ISBN 978-81-909957-0-4

॥ओ३म्॥

॥ऋग्वेदभाष्यम्॥

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समन्वितम्।

॥प्रथमं मण्डलम्॥

(ऋग्वेद १.१-१.३६ सूक्तपर्यन्तम्)

सम्पादनम्

श्रद्धानन्द-वैदिक-शोधसंस्थानम्

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्

प्रथमो भागः

प्रकाशनम्

श्रद्धानन्द-अनुसन्धान-प्रकाशन-केन्द्रः

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्.

वर्ष २०११

सम्पादक-मण्डल

मुख्यसंरक्षक	श्री सुदर्शन शर्मा, कुलाधिपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
संरक्षक	प्रो. स्वतन्त्र कुमार, कुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सहसंरक्षक	प्रो. महावीर, आचार्य एवं उपकुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रधान सम्पादक	प्रो. ज्ञानप्रकाश शास्त्री, प्रोफेसर, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सम्पादक	डॉ. सत्यदेव निगमालङ्कार, अध्यक्ष, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
व्यवसाय-प्रबन्धक	डॉ. जगदीश विद्यालङ्कार, पुस्तकालयाध्यक्ष, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रकाशक	प्रो. ए.के. चोपड़ा, कुलसचिव, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. उत्तराखण्ड)

प्रकाशनः-

श्रद्धानन्द-अनुसन्धान-प्रकाशनकेन्द्र

गुरुकुल काँगड़ी विश्वविद्यालय

हरिद्वार.

सन् २०१०

मूल्य-रु०४३०

मुद्रकः-

भारत प्रिंटर्स एण्ड पब्लिशर्स

दिल्ली.

दूरभाष-09212390469

॥ओ३म्॥

ऋग्वेदः॥

अथर्ग्वेदभाष्यारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ० ५.८२.५॥

विद्यानन्दं समवति चतुर्वेदसंस्तावनाया,

सम्पूर्येशं निगमनिलयं सम्प्रणम्याथ कुर्वे।

वेदव्यङ्के विधुयुतसरे मार्गशुक्लेऽङ्गभौमे,

ऋग्वेदस्याखिलगुणगुणिज्ञानदातुर्हि भाष्यम्॥ १॥

आभिः स्तुवन्तीत्युक्तत्वाद्विद्वांस उक्तपूर्वं वेदार्थज्ञानसाहित्यपठनपुरःसरमृग्वेदमधीत्य तत्रस्थैर्मन्त्रैरीश्वरमारभ्य भूमिपर्य्यन्ताना पदार्थानां गुणान् यथावद्विदित्वैते कार्येषूपकृतये मतिं जनयन्ति। ऋचन्ति स्तुवन्ति पदार्थानां गुणकर्मस्वभावाननया सा ऋक्, ऋक् चासौ वेदश्चर्ग्वेदः।

एतस्मिन्नग्निमीड इत्यारभ्य यथा वः सुसहासतिपर्य्यन्तेऽष्टावष्टकाः सन्ति। तत्रैकैकस्मिन्नष्टावष्टावध्यायाः सन्ति, तेषामेकैकस्य प्रत्यध्यायं वर्गाः संख्यायन्ते–

प्रथमाष्टके		**द्वितीयाष्टके**		**तृतीयाष्टके**		**चतुर्थाष्टके**		**पञ्चमाष्टके**		**षष्ठाष्टके**		**सप्तमाष्टके**		**अष्टमाष्टके**	
अ०	व०	अ०	व०	अ०	व०	अ०	व०	अ०	व०	अ०	व०	अ०	व०	अ०	व०
१	३७	१	२६	१	३४	१	३३	१	२७	१	४०	१	४१	१	३०
२	३८	२	२७	२	२६	२	२८	२	३०	२	४०	२	३३	२	२४
३	३५	३	२६	३	३१	३	३१	३	३०	३	४९	३	२६	३	२८
४	२९	४	२९	४	२५	४	३६	४	३०	४	५४	४	२८	४	३१
५	३१	५	२९	५	२६	५	३०	५	२७	५	३८	५	३३	५	२७
६	३२	६	३२	६	३०	६	२५	६	२५	६	३८	६	२८	६	२७
७	३७	७	२५	७	२७	७	३५	७	३३	७	३९	७	३०	७	३०
८	२६	८	२७	८	२६	८	३२	८	३६	८	३३	८	२९	८	४९
इ	२६५	यं	२२१	सं	२२५	ख्या	२५०	प्रत्य	२३८	ष्टकं	३३१	वेदि	२४८	त	२४६

सर्वेष्वष्टकेषु सर्वे वर्गाः संयुक्ताः २०२४ चतुर्विंशत्यधिके द्वे सहस्रे सन्ति।

तथास्मिन्नृग्वेदे दश मण्डलानि सन्ति, तत्र प्रथमे मण्डले चतुर्विंशतिरनुवाकाः, एकनवतिशतं सूक्तानि। तत्रैकैकस्मिन् सूक्ते मन्त्राश्च संख्यायन्ते–

सू०	मं०	सू०	मं०	सू०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	९	२५	२१	४९	७३	१०	९७	८	१२१	१५	१४५	५	१६९	८
२	९	२६	१०	५०	७४	९	९८	३	१२२	१५	१४६	५	१७०	५
३	१२	२७	१३	५१	७५	५	९९	१	१२३	१३	१४७	५	१७१	६
४	१०	२८	९	५२	७६	५	१००	१९	१२४	१३	१४८	५	१७२	३
५	१०	२९	७	५३	७७	५	१०१	११	१२५	७	१४९	५	१७३	१३
६	१०	३०	२२	५४	७८	५	१०२	११	१२६	७	१५०	३	१७४	१०
७	१०	३१	१८	५५	७९	१२	१०३	८	१२७	११	१५१	९	१७५	६
८	१०	३२	१५	५६	८०	१६	१०४	९	१२८	८	१५२	७	१७६	६
९	१०	३३	१५	५७	८१	९	१०५	१९	१२९	११	१५३	४	१७७	५
१०	१२	३४	१२	५८	८२	६	१०६	७	१३०	१०	१५४	६	१७८	५
११	८	३५	११	५९	८३	६	१०७	३	१३१	७	१५५	६	१७९	६
१२	१२	३६	२०	६०	८४	२०	१०८	१३	१३२	६	१५६	५	१८०	१०
१३	१२	३७	१५	६१	८५	१२	१०९	८	१३३	७	१५७	६	१८१	९
१४	१२	३८	१५	६२	८६	१०	११०	९	१३४	६	१५८	६	१८२	८
१५	१२	३९	१०	६३	८७	६	१११	५	१३५	९	१५९	५	१८३	६
१६	९	४०	८	६४	८८	६	११२	२५	१३६	७	१६०	५	१८४	६
१७	९	४१	९	६५	८९	१०	११३	२०	१३७	३	१६१	१४	१८५	११
१८	९	४२	१०	६६	९०	९	११४	११	१३८	४	१६२	२२	१८६	११
१९	९	४३	९	६७	९१	२३	११५	६	१३९	११	१६३	१३	१८७	११
२०	८	४४	१४	६८	९२	१८	११६	२५	१४०	१३	१६४	५२	१८८	११
२१	६	४५	१०	६९	९३	१२	११७	२५	१४१	१३	१६५	१५	१८९	८
२२	२१	४६	१५	७०	९४	१६	११८	११	१४२	१३	१६६	१५	१९०	८
२३	२४	४७	१०	७१	९५	११	११९	१०	१४३	८	१६७	११	१९१	१६
२४	१५	४८	१६	७२	९६	९	१२०	१२	१४४	७	१६८	१०	_	–

अस्मिन्मण्डले सर्वे मन्त्रा मिलित्वा १९७६ षट्सप्तत्यधिकान्येकोनविंशतिः शतानि सन्तीति वेद्यम्।

अथ द्वितीयमण्डले चत्वारोऽनुवाकाः, त्रयश्चत्वारिंशत् सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्या ज्ञातव्या-

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	१६	७	६	१३	१३	१९	९	२५	५	३१	७	३७	६	४३	३
२	१३	८	६	१४	१२	२०	९	२६	४	३२	८	३८	११	-	-
३	११	९	६	१५	१०	२१	६	२७	१७	३३	१५	३९	८		
४	९	१०	६	१६	९	२२	४	२८	११	३४	१५	४०	६		
५	८	११	२१	१७	९	२३	१९	२९	७	३५	१५	४१	२१		
६	८	१२	१५	१८	९	२४	१६	३०	११	३६	६	४२	३		

अस्मिन्मण्डले सर्वे मन्त्रा मिलित्वा ४२९ एकोनत्रिंशदधिकानि चत्वारि शतानि सन्ति।

अथ तृतीयमण्डले पञ्चानुवाका, द्विषष्टिश्च सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्या वेद्या-

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	२३	९	९	१७	५	२५	५	३३	१३	४१	९	४९	५	५७	६
२	१५	१०	९	१८	५	२६	९	३४	११	४२	९	५०	५	५८	९
३	११	११	९	१९	५	२७	१५	३५	११	४३	८	५१	१२	५९	९
४	११	१२	९	२०	५	२८	६	३६	११	४४	५	५२	८	६०	७
५	११	१३	७	२१	५	२९	१६	३७	११	४५	५	५३	२४	६१	७
६	११	१४	७	२२	५	३०	२२	३८	१०	४६	५	५४	२२	६२	१८
७	११	१५	७	२३	५	३१	२२	३९	९	४७	५	५५	२२	-	-
८	११	१६	६	२४	५	३२	१७	४०	९	४८	५	५६	८		

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा ६१७ सप्तदशोत्तरषट्शतानि सन्ति।

अथ चतुर्थे मण्डले पञ्चानुवाकाः, अष्टपञ्चाशच्च सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्या वेद्या-

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	२०	९	८	१७	२१	२५	८	३३	११	४१	११	४९	६	५७	८

२	२०	१०	८	१८	१३	२६	७	३४	११	४२	१०	५०	११	५८	११
३	१६	११	६	१९	११	२७	५	३५	९	४३	७	५१	११	–	–
४	१५	१२	६	२०	११	२८	५	३६	९	४४	७	५२	७		
५	१५	१३	५	२१	११	२९	५	३७	८	४५	७	५३	७		
६	११	१४	५	२२	११	३०	२४	३८	१०	४६	७	५४	६		
७	११	१५	१०	२३	११	३१	१५	३९	६	४७	४	५५	१०		
८	८	१६	२१	२४	११	३२	२४	४०	५	४८	५	५६	७		

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा ५८९ एकोननवतिः पञ्चशतानि सन्ति।

अथ पञ्चममण्डले षडनुवाकाः, सप्ताशीतिः सूक्तानि च सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्यास्तीति वेद्यम्–

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	१२	१२	६	२३	४	३४	९	४५	११	५६	९	६७	५	७८	९
२	१२	१३	६	२४	४	३५	८	४६	८	५७	८	६८	५	७९	१०
३	१२	१४	६	२५	९	३६	६	४७	७	५८	८	६९	४	८०	६
४	११	१५	५	२६	९	३७	५	४८	५	५९	८	७०	४	८१	५
५	११	१६	५	२७	६	३८	५	४९	५	६०	८	७१	३	८२	९
६	१०	१७	५	२८	६	३९	५	५०	५	६१	१९	७२	३	८३	१०
७	१०	१८	५	२९	१५	४०	९	५१	१५	६२	९	७३	१०	८४	३
८	७	१९	५	३०	१५	४१	२०	५२	१७	६३	७	७४	१०	८५	८
९	७	२०	४	३१	१३	४२	१८	५३	१६	६४	७	७५	९	८६	६
१०	७	२१	४	३२	१२	४३	१७	५४	१५	६५	६	७६	५	८७	९
११	६	२२	४	३३	१०	४४	१५	५५	१०	६६	६	७७	५	–	–

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा ७२७ सप्तविंशतिः सप्तशतानि सन्ति।

अथ षष्ठे मण्डले षडनुवाकाः, पञ्चसप्ततिश्च सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्या बोध्या–

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०

१	१३	११	६	२१	१२	३१	५	४१	५	५१	१६	६१	१४	७१	६
२	११	१२	६	२२	११	३२	५	४२	४	५२	१७	६२	११	७२	५
३	८	१३	६	२३	१०	३३	५	४३	४	५३	१०	६३	११	७३	३
४	८	१४	६	२४	१०	३४	५	४४	२४	५४	१०	६४	६	७४	४
५	७	१५	१९	२५	९	३५	५	४५	३३	५५	६	६५	६	७५	१९
६	७	१६	४८	२६	८	३६	५	४६	१४	५६	६	६६	११	–	–
७	७	१७	१५	२७	८	३७	५	४७	३१	५७	६	६७	११		
८	७	१८	१५	२८	८	३८	५	४८	२२	५८	४	६८	११		
९	७	१९	१३	२९	६	३९	५	४९	१५	५९	१०	६९	८		
१०	७	२०	१३	३०	५	४०	५	५०	१५	६०	१५	७०	६		

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा ७६५ पञ्चषष्टिः सप्तशतानि सन्ति।

अथ सप्तमे मण्डले षडनुवाकाः, चतुःशतं च सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्यास्तीति वेदितव्यम्-

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	२५	१४	३	२७	५	४०	७	५३	३	६६	१९	७९	५	९२	५
२	११	१५	१५	२८	५	४१	७	५४	३	६७	१०	८०	३	९३	८
३	१०	१६	१२	२९	५	४२	६	५५	८	६८	९	८१	६	९४	१२
४	१०	१७	७	३०	५	४३	५	५६	२५	६९	८	८२	१०	९५	६
५	९	१८	२५	३१	१२	४४	५	५७	७	७०	७	८३	१०	९६	६
६	७	१९	११	३२	२७	४५	४	५८	६	७१	६	८४	५	९७	१०
७	७	२०	१०	३३	१४	४६	४	५९	१२	७२	५	८५	५	९८	७
८	७	२१	१०	३४	२५	४७	४	६०	१२	७३	५	८६	८	९९	७
९	६	२२	९	३५	१५	४८	४	६१	७	७४	६	८७	७	१००	७
१०	५	२३	६	३६	९	४९	४	६२	६	७५	८	८८	७	१०१	६
११	५	२४	६	३७	८	५०	४	६३	६	७६	७	८९	५	१०२	३

१२	३	२५	६	३८	८	५१	३	६४	५	७७	६	९०	७	१०३	१०
१३	३	२६	५	३९	७	५२	३	६५	५	७८	५	९१	७	१०४	२५

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा ८४१ एकचत्वारिंशदष्टौ शतानि सन्ति।

अथाष्टमे मण्डले दशानुवाकाः, त्रिशतं च सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्या ज्ञेया–

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	३४	१४	१५	२७	२२	४०	१२	५३	८	६६	१५	७९	९	९२	३३
२	४२	१५	१३	२८	५	४१	१०	५४	८	६७	२१	८०	१०	९३	३४
३	२४	१६	१२	२९	१०	४२	६	५५	५	६८	१९	८१	९	९४	१२
४	२१	१७	१५	३०	४	४३	३३	५६	५	६९	१८	८२	९	९५	९
५	३९	१८	२२	३१	१८	४४	३०	५७	४	७०	१५	८३	९	९६	२१
६	४८	१९	३७	३२	३०	४५	४२	५८	३	७१	१५	८४	९	९७	१५
७	३६	२०	३६	३३	१९	४६	३३	५९	७	७२	१८	८५	९	९८	१२
८	२३	२१	१८	३४	१८	४७	१८	६०	२०	७३	१८	८६	५	९९	८
९	२१	२२	१८	३५	२४	४८	१५	६१	१८	७४	१५	८७	६	१००	१२
१०	६	२३	३०	३६	७	४९	१०	६२	१२	७५	१६	८८	६	१०१	१६
११	१०	२४	३०	३७	७	५०	१०	६३	१२	७६	१२	८९	७	१०२	२२
१२	३३	२५	२४	३८	१०	५१	१०	६४	१२	७७	११	९०	६	१०३	१४
१३	३३	२६	२५	३९	१०	५२	१०	६५	१२	७८	१०	९१	७	–	–

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा १७२६ षड्विंशति सप्तदशशतानि सन्ति।

अथ नवमे मण्डले सप्तानुवाकाः, चतुर्दशोत्तरं शतं च सूक्तानि सन्ति। तत्र प्रति सूक्तमियं मन्त्रसंख्या वेद्या–

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	१०	१५	८	२९	६	४३	६	५७	४	७१	९	८५	१२	९९	८
२	१०	१६	८	३०	६	४४	६	५८	४	७२	९	८६	४८	१००	९
३	१०	१७	८	३१	६	४५	६	५९	४	७३	९	८७	९	१०१	१६
४	१०	१८	७	३२	६	४६	६	६०	४	७४	९	८८	८	१०२	८

५	११	१९	७	३३	६	४७	५	६१	३०	७५	५	८९	७	१०३	६
६	९	२०	७	३४	६	४८	५	६२	३०	७६	५	९०	६	१०४	६
७	९	२१	७	३५	६	४९	५	६३	३०	७७	५	९१	६	१०५	६
८	९	२२	७	३६	६	५०	५	६४	३०	७८	५	९२	६	१०६	१४
९	९	२३	७	३७	६	५१	५	६५	३०	७९	५	९३	५	१०७	२६
१०	९	२४	७	३८	६	५२	५	६६	३०	८०	५	९४	५	१०८	१६
११	९	२५	६	३९	६	५३	४	६७	३२	८१	५	९५	५	१०९	२२
१२	९	२६	६	४०	६	५४	४	६८	१०	८२	५	९६	२४	११०	१२
१३	९	२७	६	४१	६	५५	४	६९	१०	८३	५	९७	५८	१११	३
१४	८	२८	६	४२	६	५६	४	७०	१०	८४	५	९८	१२	११२	४
														११३	११
														११४	४

अस्मिन् मण्डले सर्वे मन्त्रा मिलित्वा १०९७ सप्तनवत्येकसहस्रं सन्ति।

अथ दशमे मण्डले द्वादशानुवाकाः, एकनवतिशतं च सूक्तानि सन्ति। तत्र प्रतिसूक्तमियं मन्त्रसंख्या ज्ञेया-

सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०	सू०	मं०
१	७	२५	११	४९	११	७३	११	९७	२३	१२१	१०	१४५	६	१६९	४
२	७	२६	९	५०	७	७४	६	९८	१२	१२२	८	१४६	६	१७०	४
३	७	२७	२४	५१	९	७५	९	९९	१२	१२३	८	१४७	५	१७१	४
४	७	२८	१२	५२	६	७६	८	१००	१२	१२४	९	१४८	५	१७२	४
५	७	२९	८	५३	११	७७	८	१०१	१२	१२५	८	१४९	५	१७३	६
६	७	३०	१५	५४	६	७८	८	१०२	१२	१२६	८	१५०	५	१७४	५
७	७	३१	११	५५	८	७९	७	१०३	१३	१२७	८	१५१	५	१७५	४
८	९	३२	९	५६	७	८०	७	१०४	११	१२८	९	१५२	५	१७६	४
९	९	३३	९	५७	६	८१	७	१०५	११	१२९	७	१५३	५	१७७	३

१०	१४	३४	१४	५८	१२	८२	७	१०६	११	१३०	७	१५४	५	१७८	३
११	९	३५	१४	५९	१०	८३	७	१०७	११	१३१	७	१५५	५	१७९	३
१२	९	३६	१४	६०	१२	८४	७	१०८	११	१३२	७	१५६	५	१८०	३
१३	५	३७	१२	६१	२७	८५	४७	१०९	७	१३३	७	१५७	५	१८१	३
१४	१६	३८	५	६२	११	८६	२३	११०	११	१३४	७	१५८	५	१८२	३
१५	१४	३९	१४	६३	१७	८७	२५	१११	१०	१३५	७	१५९	६	१८३	३
१६	१४	४०	१४	६४	१७	८८	१९	११२	१०	१३६	७	१६०	५	१८४	३
१७	१४	४१	३	६५	१५	८९	१८	११३	१०	१३७	७	१६१	५	१८५	३
१८	१४	४२	११	६६	१५	९०	१६	११४	१०	१३८	६	१६२	६	१८६	३
१९	८	४३	११	६७	१२	९१	१५	११५	९	१३९	६	१६३	६	१८७	५
२०	१०	४४	११	६८	१२	९२	१५	११६	९	१४०	६	१६४	५	१८८	३
२१	८	४५	१२	६९	१२	९३	१५	११७	९	१४१	६	१६५	५	१८९	३
२२	१५	४६	१०	७०	११	९४	१४	११८	९	१४२	८	१६६	५	१९०	३
२३	७	४७	८	७१	११	९५	१८	११९	१३	१४३	६	१६७	४	१९१	४
२४	६	४८	११	७२	९	९६	१३	१२०	९	१४४	६	१६८	४	–	

अस्मिन्मण्डले सर्वे मन्त्रा मिलित्वा १७५४ चतु:पञ्चाशत् सप्तदशशतानि सन्ति।

अस्य ऋग्वेदस्य दशसु मण्डलेषु ८५ पञ्चाशीतिरनुवाका:, १०२८ अष्टादशसहस्रं सूक्तानि, १०५८९ दशसहस्राणि पञ्चशतानि एकोननवतिश्च मन्त्रा: सन्तीति वेद्यम्। स एतै: पूर्वोक्ताष्टाकाध्यायवर्गमण्डलानुवाकसूक्तमन्त्रैर्भूषितोऽयमृग्वेदोऽस्तीति वेदितव्यम्॥

भाषार्थ:-आगे मैं सब प्रकार से विद्या के आनन्द को देने वाली चारों वेद की भूमिका को समाप्त और जगदीश्वर को अच्छी प्रकार प्रणाम करके सम्वत् १९३४ मार्ग शुक्ल भौमवार के दिन सम्पूर्ण ज्ञान के देने वाले ऋग्वेद के भाष्य का आरम्भ करता हूं॥१॥

(ऋग्भि:०) इस ऋग्वेद से सब पदार्थों की स्तुति होती है अर्थात् ईश्वर ने जिसमें सब पदार्थों के गुणों का प्रकाश किया है, इसलिये विद्वान् लोगों को चाहिये कि ऋग्वेद को प्रथम पढ़के उन मन्त्रों से ईश्वर से लेके पृथिवी–पर्य्यन्त सब पदार्थों को यथावत् जानके संसार में उपकार के लिये प्रयत्न करें। ऋग्वेद शब्द का अर्थ यह है कि जिससे सब पदार्थों के गुणों और स्वभाव का वर्णन किया जाय वह **'ऋक्'** वेद अर्थात् जो यह सत्य सत्य ज्ञान का हेतु है, इन दो शब्दों से **'ऋग्वेद'** शब्द बनता है।

'अग्निमीळे' यहां से लेके **'यथा वः सुसहासति'** इस अन्त के मन्त्र-पर्यन्त ऋग्वेद में आठ अष्टक और एक एक अष्टक में आठ आठ अध्याय हैं। सब अध्याय मिलके चौसठ होते हैं। एक एक अध्याय की वर्गसंख्या कोष्ठों में पूर्व लिख दी है। और आठों अष्टक के सब वर्ग २०२४ दो हजार चौबीस होते हैं।

तथा इस में दश मण्डल हैं। एक एक मण्डल में जितने जितने सूक्त और मन्त्र है सो ऊपर कोष्ठों में लिख दिये हैं। प्रथम मण्डल में २४ चौबीस अनुवाक, और एकसौ इक्कानवे सूक्त, तथा १९७६ एक हजार नौ सौ छहत्तर मन्त्र। दूसरे में ४ चार अनुवाक, ४३ तितालीस सूक्त, और ४२९ चार सौ उन्तीस मन्त्र। तीसरे में ५ पांच अनुवाक, ६२ बासठ सूक्त, और ६१७ छः सौ सत्रह मन्त्र। चौथे में ५ पांच अनुवाक ५८ अठ्ठावन सूक्त, ५८९ पांच सौ नवासी मन्त्र। पांचमें ६ छः अनुवाक ८७ सतासी सूक्त, ७२७ सात सौ सत्ताईस पैंसठ मन्त्र। ६ छठे में छः अनुवाक, ७५ पचहत्तर सूक्त, ७६५ सात सौ पैंसठ मन्त्र। सातमे में ६ छः अनुवाक, १०४ एकसौ चार सूक्त, ८४१ आठ सौ इकतालीस मन्त्र। आठमे में १० दश अनुवाक, १०३ एकसौ तीन सूक्त, और १७२६ एक हजार सातसौ छब्बीस मन्त्र। नवमे में ७ सात अनुवाक ११४ एकसौ चौदह सूक्त, १०९७ और एक हजार सत्तानवे मन्त्र। और दशम मण्डल में १२ बारह अनुवाक, १९१ एकसौ इक्कानवे सूक्त, और १७५४ एक हजार सातसौ चौअन मन्त्र हैं।

तथा दशों मण्डलों में ८५ पचासी अनुवाक, १०२८ एक हजार अठ्ठाईस सूक्त, और १०५८९ दश हजार पांचसौ नवासी मन्त्र हैं। सब सज्जनों को उचित है कि इस बात को ध्यान में करलें कि जिससे किसी प्रकार का गड़बड़ न हो॥

अथादिमस्य नवर्चस्य सूक्तस्य मधुच्छन्दा ऋषिः। अग्निर्देवता। गायत्री छन्दः। षड्जः स्वरः॥

तत्राद्ये मन्त्रेऽग्निशब्देनेश्वरेणात्मभौतिकावर्थावुपदिश्येते।

यहां प्रथम मन्त्र में अग्नि शब्द करके ईश्वर ने अपना और भौतिक अर्थ का उपदेश किया है

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्।
होता॑रं रत्न॒धात॑मम्॥ १॥

अ॒ग्निम्। ई॒ळे॒। पु॒रःहि॑तम्। य॒ज्ञस्य॑। दे॒वम्। ऋ॒त्विज॑म्। होता॑रम्। र॒त्न॒ऽधात॑मम्॥ १॥

पदार्थः-(**अग्निम्**) परमेश्वरं भौतिकं वा-**इन्द्रं॑ मि॒त्रं वरु॑ण॒मग्नि॑मा॒हुर॑थो॑ दि॒व्यः स सु॑प॒र्णो ग॒रुत्मा॑न्। एक॑ं स॒द्विप्रा॑ बहु॒धा व॑दन्त्य॒ग्निं य॒मं मा॑त॒रिश्वा॑नमाहुः॥** (ऋ०१.१६४.४६) अनेनैकस्य सतः परब्रह्मण इन्द्रादीनि बहुधा नामानि सन्तीति वेदितव्यम्। **तदे॒वाग्निस्तदा॑दि॒त्यस्तद्वा॒युस्तदु॒ च॒न्द्रमा॑ः। तदे॒व शु॒क्रं तद् ब्रह्म॒ ता आप॒ः स प्र॒जाप॑तिः॥** (य०३२.१) यत्सच्चिदानन्दादिलक्षणं ब्रह्म तदेवात्राग्न्यादिनामवाच्यमिति बोध्यम्। **ब्रह्म ह्यग्निः।** (श०ब्रा०१.४.२.११) **आत्मा वा अग्निः।**

(श०ब्रा०१.२.३.२) अत्राग्निर्ब्रह्मात्मनोर्वाचकोऽस्ति। **अयं वा अग्निः प्रजाश्च प्रजापतिश्च।** (श०ब्रा०९.१.२.४२) अत्र प्रजाशब्देन भौतिकः प्रजापतिशब्देनेश्वरश्चाग्निर्ग्राह्यः। **अग्निर्वै देवानां व्रतपतिः। एतद्धः वै देवा व्रतं चरन्ति यत्सत्यम्।** (श०ब्रा०१.१.१.२.५) सत्याचारनियमपालनं व्रतं तत्पतिरीश्वरः। **त्रिभिः पवित्रैरपुपोद्ध्यर्कं हृदा मतिं ज्योतिरनु प्रजानन्। वर्षिष्ठं रत्नमकृत स्वधाभिरादिद् द्यावापृथिवी पर्यपश्यत्॥** (ऋ०३.२६.८) अत्राग्निशब्दस्यानुवृत्तेः प्रजानन्निति ज्ञानवत्त्वात् पर्य्यपश्यदिति सर्वज्ञत्वादीश्वरो ग्राह्यः।

यास्कमुनिरत्रोभयार्थकरणायाग्निशब्दपुरःसरमेतन्मन्त्रमेवं व्याचष्टे–**अग्निः कस्मादग्रणी-र्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति सन्नममानोऽक्नापनो भवतीति स्थौलष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा** भवतीति–अग्निमीळेऽग्निं याचामीळेरध्येषणाकर्मा पूजाकर्मा वा देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता। होतारं ह्वातारं जुहोतेर्होतारित्यौर्णवाभो रत्नधातमं रमणीयानां धनानां दातृतमम्। (निरु०७.१४–१५)।

अग्रणीः सर्वोत्तमः सर्वेषु यज्ञेषु पूर्वमीश्वरस्यैव प्रतिपादनात्तस्यात्र ग्रहणम्। दग्धादिति विशेषणाद्भौतिकस्यापि च।

प्रशासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्॥ १॥ एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्। इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम्॥ २॥ (मनु०१२.१२२–१२३) अत्राप्यग्न्यादीनि परमेश्वरस्य नामानि सन्तीति। **ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम्। श्रुष्टीवानं धितावानम्॥** (ऋ०३.२७.२) विपश्चितमीळे इति विशेषणादग्निशब्देनात्रेश्वरो गृह्यते, अनन्तविद्यावत्त्वाच्चेतनस्वरूपत्वाच्च।

अथ केवलं भौतिकार्थग्रहणाय प्रमाणानि–**यदश्वं तं पुरस्तादद्यश्रयंस्तस्याभयेनाष्ट्रे निवातेऽग्निरजायत तस्माद्यत्राग्निं मन्थिष्यन्त्स्यात्तदश्वमानेतवै ब्रूयात्। स पूर्वेणोपतिष्ठते वज्रमेवैतदुच्छ्रयन्ति तस्याभयेनाष्ट्रे निवातेऽग्निर्जायते।** (श०ब्रा०२.१.४.१६) **वृषो अग्निः। अश्वो ह वा एष भूत्वा देवेभ्यो यज्ञं वहति।** (श०ब्रा०१.३.३.२९–३० वृषवद्यानानां वोढृत्वाद् वृषोऽग्निः। तथाऽयमग्निराशुगमयितृत्वेनाश्वो भूत्वा कलायन्त्रैः प्रेरितः सन् देवेभ्यो विद्वद्भ्यः शिल्पविद्याविद्भ्यो मनुष्येभ्यो विमानादियानसाधनसङ्गतं यानं वहति प्रापयतीति। **तूर्णिर्हव्यवाडिति।** (श०ब्रा०१.३.४.१२) अयमग्निर्हव्यानां यानानां प्रापकत्वेन शीघ्रतया गमकत्वाद्धव्यवाट् तूर्णिश्चेति। **अग्निर्वै योनिर्यज्ञस्य।** (श०ब्रा०१.४.३.११ इत्याद्यनेकप्रमाणैरश्वनाम्ना भौतिकोऽग्निर्वात्र गृह्यते, आशुगमनहेतुत्वादश्वोऽग्निर्विज्ञेयः। **वृषो अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मन्त ईळते॥** (ऋ०३.२७.१४) यदा शिल्पिभिरयमग्निर्यन्त्रकलाभिर्यानेषु प्रदीप्यते तदा देववाहनो देवान् यानस्थान्

विदुषः शीघ्रं देशान्तरेऽश्व इव वृष इव च प्रापयति, ते हविष्मन्तो मनुष्या वेगादिगुणवन्तमश्वमग्निमीडते कार्य्यार्थमधीच्छन्तीति वेद्यम्।

(ईळे) स्तुवे याचे अधीच्छामि प्रेरयामि वा **(पुरोहितम्)** पुरस्तात्सर्वं जगद्दधाति छेदनधारणाकर्षणादिगुणांश्चापि तम्। **पुरोहितः पुर एनं दधति** होत्राय वृतः कृपायमाणोऽन्वध्यायत्। (निरु०२.१२) **(यज्ञस्य)** इज्यतेऽसौ यज्ञस्तस्य महिम्नः कर्मणो विदुषां सत्कारस्य सङ्गतस्य सत्सङ्गत्योत्पन्नस्य विद्यादिदानस्य शिल्पक्रियोत्पाद्यस्य वा। **यज्ञाः कस्मात्प्रख्यातं यजति कर्मेति नैरुक्ता याञ्चो भवतीति वा यजुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वा।** (निरु०३.१९) **(देवम्)** दातारं हर्षकरं विजेतारं द्योतकं वा **(ऋत्विजम्)** य ऋतौ ऋतौ प्रत्युत्पत्तिकालं संसारं सङ्गतं यजति करोति तथा च शिल्पसाधनानि सङ्गमयति सर्वेषु ऋतुषु यजनीयस्तम्। **ऋत्विग्दधृग्०** (अष्टा०३.२.५९) अनेन कर्त्तरि निपातनम्, तथा **कृतो बहुलमि**ति कर्मणि वा। **(होतारम्)** दातारमादातारं वा **(रत्नधातमम्)** रमणीयानि पृथिव्यादीनि सुवर्णादीनि च रत्नानि दधाति धापयतीति रत्नधा, अतिशयेन रत्नधा इति रत्नधातमस्तम्॥१॥

अन्वयः-अहं यज्ञस्यं पुरोहितमृत्विजं होतारं रत्नधातमं देवमग्निमीळे॥१॥

भावार्थः-अत्र श्लेषालङ्कारेणोभयार्थग्रहणमस्तीति बोध्यम्। इतोऽग्रे यत्र यत्र मन्त्रभूमिकायामुपदिश्यत इति क्रियापदं प्रयुज्यतेऽस्य सर्वत्र कर्त्तेश्वर एव बोध्यः। कुतः, वेदानां तेनैवोक्तत्वात् पितृवत्कृपायमाण ईश्वरः सर्वविद्याप्राप्तये सर्वजीवहितार्थं वेदोपदेशं चकार। यथा पिताऽध्यापको वा स्वपुत्रं शिष्यं च प्रति त्वमेवं वदैवं कुरु सत्यं वद पितरमाचार्य्यं च सेवस्वानृतं मा कुर्वित्युपदिशति, तथैवात्र बोध्यम्। वेदश्च सर्वजीवकल्याणार्थमाविर्भूतः। एवमर्थोऽत्रोत्तम- पुरुषप्रयोगः। वेदोपदेशस्य परोपकारार्थत्वात्।

अत्राग्निशब्देन परमार्थव्यवहारविद्यासिद्धये परमेश्वर भौतिकौ द्वावर्थौ गृह्येते। पुरा आर्य्यैर्याऽश्वविद्यानाम्ना शीघ्रगमनहेतुः शिल्पविद्या सम्पादितेति श्रूयते साग्निविद्यैवासीत्। परमेश्वरस्य स्वयंप्रकाशत्वसर्वप्रकाशकत्वाभ्यामनन्तज्ञानवत्त्वात् भौतिकस्य रूपदाहप्रकाशवेगछेदनादिगुण-वत्त्वाच्छिल्पविद्यायां मुख्यहेतुत्वाच्च प्रथमं ग्रहणं कृतमस्तीति वेदितव्यम्॥१॥

पदार्थान्वयभाषा-**(यज्ञस्य)** हम लोग विद्वानों के सत्कार सङ्गम महिमा और कर्म के **(होतारम्)** देने तथा ग्रहण करनेवाले **(पुरोहितम्)** उत्पत्ति के समय से पहिले परमाणु आदि सृष्टि के धारण करने और **(ऋत्विजम्)** वारंवार उत्पत्ति के समय में स्थूल सृष्टि के रचनेवाले तथा ऋतु-ऋतु में उपासना करने योग्य **(रत्नधातमम्)** और निश्चय करके मनोहर पृथिवी वा सुवर्ण आदि रत्नों के धारण करने वा **(देवम्)** देने तथा सब पदार्थों के प्रकाश करनेवाले परमेश्वर की **(ईळे)** स्तुति करते हैं।

तथा उपकार के लिये **(यज्ञस्य)** हम लोग (विद्यादि) दान और शिल्पक्रियाओं से उत्पन्न करने योग्य पदार्थों के **(होतारम्)** देनेहारे तथा **(पुरोहितम्)** उन पदार्थों के उत्पन्न करने के समय से पूर्व भी छेदन धारण और आकर्षण आदि गुणों के धारण करने वाले **(ऋत्विजम्)** शिल्पविद्या साधनों के हेतु **(रत्नधातमम्)** अच्छे-अच्छे सुवर्ण आदि रत्नों के धारण कराने तथा **(देवम्)** युद्धादिकों में कलायुक्त शस्त्रों से विजय करानेहारे भौतिक अग्नि की **(ईळे)** वारंवार इच्छा करते हैं।

यहां '**अग्नि**' शब्द के दो अर्थ करने में प्रमाण ये हैं कि-**(इन्द्रं मित्रं०)** इस ऋग्वेद के मन्त्र से यह जाना जाता है कि एक सद्ब्रह्म के इन्द्र आदि अनेक नाम हैं। तथा **(तदेवाग्नि०)** इस यजुर्वेद के मन्त्र से भी अग्नि आदि नामों करके सच्चिदानन्दादि लक्षणवाले ब्रह्म को जानना चाहिये। **(ब्रह्म ह्य०)** इत्यादि शतपथ ब्राह्मण के प्रमाणों से अग्नि शब्द ब्रह्म और आत्मा इन दो अर्थों का वाची है। **(अयं वा०)** इस प्रमाण में अग्नि शब्द से प्रजा शब्द करके भौतिक और प्रजापति शब्द से ईश्वर का ग्रहण होता है। **(अग्नि०)** इस प्रमाण से सत्याचरण के नियमों का जो यथावत् पालन करना है सो ही व्रत कहाता है, और इस व्रत का पति परमेश्वर है। **(त्रिभि: पवित्रै:०)** इस ऋग्वेद के प्रमाण से ज्ञानवाले तथा सर्वज्ञ प्रकाश करनेवाले विशेषण से अग्नि शब्द करके ईश्वर का ग्रहण होता है।

निरुक्तकार यास्कमुनि जी ने भी ईश्वर और भौतिक पक्षों को अग्नि शब्द की भिन्न-भिन्न व्याख्या करके सिद्ध किया है, सो संस्कृत में यथावत् देख लेना चाहिये, परन्तु सुगमता के लिये कुछ संक्षेप से यहां भी कहते हैं। यास्कमुनिजी ने स्थौलाष्ठीवि ऋषि के मत से अग्नि शब्द का अग्रणी=सब से उत्तम अर्थ किया है अर्थात् जिसका सब यज्ञों में पहिले प्रतिपादन होता है, वह सब से उत्तम ही है। इस कारण अग्नि शब्द से ईश्वर तथा दाहगुणवाला भौतिक अग्नि इन दो ही अर्थों का ग्रहण होता है।

(प्रशासितारं०; एतमे०) मनुजी के इन दो श्लोकों में भी परमेश्वर के अग्नि आदि नाम प्रसिद्ध हैं। **(ईळे०)** इस ऋग्वेद के प्रमाण से भी उस अनन्त विद्यावाले और चेतनस्वरूप आदि गुणों से युक्त परमेश्वर का ग्रहण होता है।

अब भौतिक अर्थ के ग्रहण में प्रमाण दिखलाते हैं--**(यदश्वं०)** इत्यादि शतपथ ब्राह्मण के प्रमाणों से अग्नि शब्द करके भौतिक अग्नि का ग्रहण होता है। यह अग्नि बैल के समान सब देशदेशान्तरों में पहुंचानेवाला होने के कारण वृष और अश्व भी कहाता है, क्योंकि वह कलाओं के द्वारा अश्व अर्थात् शीघ्र चलानेवाला होकर शिल्पविद्या के जानने वाले विद्वान् लोगों के विमान आदि यानों को वेग से वाहनों के समान दूर-दूर देशों में पहुंचाता है। **(तूर्णि०)** इस प्रमाण से भी भौतिक अग्नि का ग्रहण है, क्योंकि वह उक्त शीघ्रता आदि हेतुओं से हव्यवाट् और तूर्णि भी कहाता है। **(अग्निर्वै यो०)** इत्यादिक और भी अनेक प्रमाणों से अश्व नाम करके भौतिक अग्नि का ग्रहण किया गया है। **(वृषो०)** जब कि इस भौतिक अग्नि को शिल्पविद्यावाले विद्वान् लोग यन्त्रकलाओं से सवारियों में प्रदीप्त करके

युक्त करते हैं, तब **(देववाहनः)** उन सवारियों में बैठे हुए विद्वान् लोगों को देशान्तर में बैलों वा घोड़ों के समान शीघ्र पहुंचानेवाला होता है। हे मनुष्यो! तुम लोग **(हविष्मन्तम्)** वेगादि गुणवाले अश्वरूप अग्नि के गुणों को **(ईळते)** खोजो। इस प्रमाण से भी भौतिक अग्नि का ग्रहण है॥१॥

भावार्थभाषा-इस मन्त्र में श्लेषालङ्कार से दो अर्थों का ग्रहण होता है। पिता के समान कृपाकारक परमेश्वर सब जीवों के हित और सब विद्याओं की प्राप्ति के लिये कल्प-कल्प की आदि में वेद का उपदेश करता है। जैसे पिता वा अध्यापक अपने शिष्य वा पुत्र को शिक्षा करता है कि तू ऐसा कर वा ऐसा वचन कह, सत्य वचन बोल, इत्यादि शिक्षा को सुनकर बालक वा शिष्य भी कहता है कि सत्य बोलूंगा, पिता और आचार्य्य की सेवा करूंगा, झूठ न कहूंगा, इस प्रकार जैसे परस्पर शिक्षक लोग शिष्य वा लड़कों को उपदेश करते हैं, वैसे ही **'अग्निमीळे०'** इत्यादि वेदमन्त्रों में भी जानना चाहिये। क्योंकि ईश्वर ने वेद सब जीवों के उत्तम सुख के लिये प्रकट किया है। इसी **'अग्निमीळे०'** वेद के उपदेश का परोपकार फल होने से इस मन्त्र में **'ईडे'** यह उत्तम पुरुष का प्रयोग भी है।

(अग्निमीळे०) परमार्थ और व्यवहार विद्या की सिद्धि के लिये अग्नि शब्द करके परमेश्वर और भौतिक ये दोनों अर्थ लिये जाते हैं। जो पहिले समय में आर्य लोगों ने अश्वविद्या के नाम से शीघ्र गमन का हेतु शिल्पविद्या उत्पन्न की थी, वह अग्निविद्या की ही उन्नति थी। आप ही आप प्रकाशमान सब का प्रकाश और अनन्त ज्ञानवान् आदि हेतुओं से अग्निशब्द करके परमेश्वर, तथा रूप दाह प्रकाश वेग छेदन आदि गुण और शिल्पविद्या के मुख्य साधक आदि हेतुओं से प्रथम मन्त्र में भौतिक अर्थ का ग्रहण किया है॥१॥

सोऽग्निः कैः स्तोतव्योऽन्वेष्टव्यगुणो वास्तीत्युपदिश्यते।

उक्त अग्नि किन के स्तुति करने वा खोजने योग्य है, इसका उपदेश अगले मन्त्र में किया है-

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति॥२॥

अग्निः। पूर्वेभिः। ऋषिभिः। ईड्यैः। नूतनैः। उत। सः। देवान्। आ। इह। वक्षति॥२॥

पदार्थः-**(अग्निः)** परमेश्वरो भौतिको वा **(पूर्वेभिः)** अधीतविद्यैर्वर्त्तमानैः प्राक्तनैर्वा विद्वद्भिः **(ऋषिभिः)** मन्त्रार्थद्रष्टृभिरध्यापकैस्तकैः कारणस्थैः प्राणैर्वा-**ऋषिप्रशंसा चैवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति।** (निरु०७.३) इयमेव ऋषीणां प्रशंसा यतस्त एवमुच्चावचैर्महदल्पाभिप्रायैर्मन्त्रार्थैर्विदितैः प्रशंसानीया भवन्ति, तेषामृषीणां मन्त्रेषु दृष्टयोऽर्थादत्यन्तपुरुषार्थेन मन्त्रार्थानां यथावद्दर्शनानि ज्ञानानि भवन्ति तस्मात्ते पूज्याः सत्कर्त्तव्या आसन्निति। **साक्षात्कृतधर्माण ऋषयो बूभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्सम्प्रादुरुपदेशाय**

ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च बिल्मं भिल्मं भासनमिति वा। (निरु०१.२०) कीदृशा ऋषयो भवन्तीत्याह–यतः साक्षात्कृतधर्माणो धार्मिका आप्ता यैः सर्वा विद्या यथावद्विदिता, येऽवरेभ्यो ह्यसाक्षात्कृतवेदेभ्यो मनुष्येभ्य उपदेशेन वेदमन्त्रान् मन्त्रार्थांश्च सम्प्रादुः प्रकाशितवन्तस्तस्मात्ते ऋषयो जाताः। तैः कस्मै प्रयोजनाय मन्त्राध्यापनं तदर्थप्रकाशश्च कृत इत्यत्रोच्यते–उत्तरोत्तरं वेदार्थप्रचाराय। येऽवरेऽल्पबुद्धयो मनुष्या अध्ययनायोपदेशाय च ग्लायन्ते तेषां वेदार्थविज्ञानायेमं नैघण्टुकं निरुक्ताख्यं च ग्रन्थं समाम्नासिषुः सम्यगभ्यासार्थं रचितवन्तः। येन सर्वे मनुष्या वेदं वेदाङ्गानि च यथार्थतया विजानीयुरेवं कृपालव ऋषयो गण्यन्त इति। **पुरस्तान्मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्को न ऋषिर्भविष्यतीति। तेभ्य एतं तर्कमृषिं प्रायच्छन् मत्रार्थचिन्ताभ्यूहमभ्यूढम्।** (निरु०१३.१२) अत्र तर्क एव ऋषिरुक्तः। **अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः।** (न्याय०१.१.४०) या तत्त्वज्ञानार्थोहा सैव तर्कशब्देन गृह्यते। **प्राणा ऋषयः।** (श०ब्रा०७.२.१.५) अत्रर्षिशब्देन प्राणा गृह्यन्ते। **(ईड्यः)** नित्यं स्तोतव्योऽन्वेष्टव्यश्च **(नूतनैः)** वेदार्थाध्येतृभिर्ब्रह्मचारिभिस्तकैः कार्यस्थैर्विद्यमानैः प्राणैर्वा **(उत)** अप्येव **(सः)** पूर्वोक्तः **(देवान्)** दिव्यानीन्द्रियाणि विद्यादिदिव्यगुणान् दिव्यान् ऋतून् दिव्यान् भोगान्वा। **ऋतवो वै देवाः)** (श०ब्रा०७.२.२.२६) अनेनर्तुशब्देन दिव्यगुणविशिष्टा भोगा गृह्यन्ते। **(आ)** समन्तात् **(इह)** अस्मिन् वर्त्तमाने संसारे जन्मनि वा **(वक्षति)** वहतु प्रापयतु॥ २॥

यास्कमुनिरिमं मन्त्रमेवं समाचष्टे-अग्निर्यः पूर्वैर्ऋषिभिरीडितव्यो वन्दितव्योऽस्माभिश्च नवतरैः स देवानिहावहत्विति। स न मन्येतायमेवाग्निरित्यप्येते उत्तरे ज्योतिषी अग्नी उच्येते। (निरु०७.१६.२)॥२॥

अन्वयः-योऽयमग्निः पूर्वेभिरुत नूतनैर्ऋषिभिरीड्योऽस्ति, स एह देवान् वक्षति समन्तात्प्रापयतु॥ २॥

भावार्थः-ये सर्वा विद्याः पठित्वा सत्योपदेशेन सर्वोपकारका अध्यापका वर्त्तन्ते पूर्वभूताश्च ते पूर्व इति शब्देन ये चाध्येतारो विद्याग्रहणायाभ्यासं कुर्वन्ति ते नूतनैरिति पदेन गृह्यन्ते। ये मन्त्रार्थान् विदितवन्तो धर्मविद्ययोः प्रचारस्यैवानुष्ठातारः सत्योपदेशेन सर्वाननुग्रहीतारो निश्छलाः पुरुषार्थिनो मोक्षधर्मसिध्यर्थमीश्वरस्यैवोपासकाः कामार्थसिध्यर्थं भौतिकाग्नेर्गुणज्ञानेन कार्य्यसिद्धिं सम्पादयन्तो मनुष्यास्ते ऋषिशब्देन गृह्यन्ते। पूर्वेषां नूतनानां च ये युक्तिप्रमाणसिद्धास्तत्त्वज्ञानार्थास्तर्काः, ये च जगत्कारणस्थाः कार्य्यजगत्स्थाश्च प्राणाः सन्ति तैः सह योगाभ्यासेनेश्वरो भौतिकश्चाग्निर्वन्द्योऽध्यन्वेष्टव्यगुणश्चास्ति। सर्वज्ञेनेश्वरेण स्वकीयज्ञानान्मनुष्यज्ञानापेक्षयाऽतीतान् वर्त्तमानांश्चर्षीन् विदित्वाऽस्मिन् मन्त्र उपदिष्टे सति नैव कश्चिद्दोषो भवितुमर्हति, वेदस्य सर्वज्ञवाक्यत्वात्। सोऽयमेवमुपासितो व्यवहारकार्य्येषु संयोजितः सन् सर्वोत्तमान् गुणान् भोगांश्च प्रापयति। अत्र प्राचीनापेक्षया नवीनत्वं नवीनापेक्षया प्राचीनत्वं च विज्ञायत इति।

अयमेवार्थो निरुक्तकारेणोक्तः-यस्तु खलु प्राकृतजनैः पाककरणादिषु प्रसिद्धः प्रयोज्यते सोऽस्मिन् मन्त्रे नैव ग्राह्यः, किन्तु सर्वप्रकाशकः परमेश्वरः सर्वविद्याहेतु-र्विद्युदाख्योऽर्थश्चाऽग्निशब्देनात्रोच्यत इति।

एतन्मन्त्रार्थः सायणाचार्य्यादिभिरन्यथोक्तः। तद्यथा-पुरातनैर्भृग्वङ्गिरःप्रभृतिभि र्नूतनैरुतेदानींतनै-रस्माभिरपि स्तुत्यः। देवान् हविर्भुज आवक्षतीत्यन्यथेदं व्याख्यानमस्ति। तद्वद्यूरोपखण्डस्थैरत्रस्थैश्च कृतमिंगलैण्डभाषायं वेदार्थयत्नादिषु च व्याख्यानमप्यसमञ्जसम्। कुतः ईश्वरोक्तस्यानादिभूतस्य वेदस्येदृशं व्याख्यानं क्षुद्राशयं निरुक्तशतपथादिग्रन्थविरुद्धं चास्त्यत इति॥ २॥

पदार्थान्वयभाषाः-(**पूर्वेभिः**) वर्त्तमान वा पहिले समय के विद्वान् (**नूतनैः**) वेदार्थ के पढ़नेवाला ब्रह्मचारी तथा नवीन तर्क और कार्य्यों में ठहरनेवाले प्राण (**ऋषिभिः**) मन्त्रों के अर्थों को देखनेवाले विद्वान्, उन लोगों के तर्क और कारणों में रहनेवाले प्राण, इन सभों को (**अग्निः**) वह परमेश्वर (**ईड्यः**) स्तुति करने योग्य और यह भौतिक अग्नि नित्य खोजने योग्य है।

प्राचीन और नवीन ऋषियों में प्रमाण ये हैं कि--(**ऋषिप्रशंसा०**) वे ऋषि लोग गूढ़ और अल्प अभिप्राययुक्त मन्त्रों के अर्थों को यथावत् जानने से प्रशंसा के योग्य होते हैं, और उन्हीं ऋषियों की मन्त्रों में दृष्टि अर्थात् उनके अर्थों के विचार में पुरुषार्थ से यथार्थ ज्ञान और विज्ञान की प्रवृत्ति होती है, इसी से वे सत्कार करने योग्य भी हैं। तथा (**साक्षात्कृत०**) जो धर्म और अधर्म की ठीक-ठीक परीक्षा करने वाले धर्मात्मा और यथार्थवक्ता थे, तथा जिन्होंने सब विद्या यथावत् जान ली थी, वे ही ऋषि हुए और जिन्होंने मन्त्रों के अर्थ ठीक-ठीक नहीं जाने थे और नहीं जान सकते थे, उन लोगों को अपने उपदेश द्वारा वेदमन्त्रों का अर्थ सहित ज्ञान कराते हुए चले आये, इस प्रयोजन के लिये कि जिससे उत्तरोत्तर अर्थात् पीढ़ी दर पीढ़ी आगे को भी वेदार्थ का प्रचार उन्नति के साथ बना रहे, तथा जिससे कोई मनुष्य अपने और उक्त ऋषियों के लिये हुए व्याख्यान सुनने के लिये अपने निर्बुद्धिपन से ग्लानि को प्राप्त हो, इस बात के सहाय में उनको सुगमता से वेदार्थ का ज्ञान होने के लिये उन ऋषियों ने निघण्टु और निरुक्त आदि ग्रन्थों का उपदेश किया है, जिससे कि सब मनुष्यों को वेद और वेदाङ्गों का यथार्थ बोध हो जावे। (**पुरस्तान्मनुष्या०**) इस प्रमाण से ऋषि शब्द का अर्थ तर्क ही सिद्ध होता है। (**अविज्ञात०**) यह न्यायशास्त्र में गोतम मुनिजी ने तर्क का लक्षण कहा है, इससे यही सिद्ध होता है कि जो सिद्धान्त के जानने के लिये विचार किया जाता है उसी का नाम तर्क है। (**प्राणा०**) इन शतपथ के प्रमाणों से ऋषि शब्द करके प्राण और देव शब्द करके ऋतुओं का ग्रहण होता है। (**सः उत**) वही परमेश्वर (**इह**) इस संसार वा इस जन्म में (**देवान्**) अच्छी-अच्छी इन्द्रियां, विद्या आदि गुण, भौतिक अग्नि और अच्छे-अच्छे भोगने योग्य पदार्थों को (**आवक्षति**) प्राप्त करता है।

(अग्निः पूर्वे०) इस मन्त्र का अर्थ निरुक्तकार ने जैसा कुछ किया है, सो इस मन्त्र के भाष्य में लिख दिया है॥२॥

भावार्थः-जो मनुष्य सब विद्याओं को पढ़के औरों को पढ़ाते हैं तथा अपने उपदेश से सब का उपकार करनेवाले हैं वा हुए हैं वे पूर्व शब्द से, और जो कि अब पढ़नेवाले विद्या ग्रहण के लिये अभ्यास करते हैं, वे नूतन शब्द से ग्रहण किये जाते हैं। और वे सब पूर्ण विद्वान् शुभ गुण सहित होने पर ऋषि कहाते हैं, क्योंकि जो मन्त्रों के अर्थों को जाने हुए धर्म और विद्या के प्रचार, अपने सत्य उपदेश से सब पर कृपा करनेवाले निष्कपट पुरुषार्थी धर्म के सिद्ध होने के लिये ईश्वर की उपासना करनेवाले और कार्य्यों की सिद्धि के लिये भौतिक अग्नि के गुणों को जानकर अपने कर्मों के सिद्ध करनेवाले होते हैं, तथा प्राचीन और नवीन विद्वानों के तत्त्व जानने के लिये युक्ति प्रमाणों से सिद्ध तर्क और कारण वा कार्य्य जगत् में रहनेवाले जो प्राण हैं, इन सब से ईश्वर और भौतिक अग्नि का अपने-अपने गुणों के साथ खोज करना योग्य है। और जो सर्वज्ञ परमेश्वर ने पूर्व और वर्त्तमान अर्थात् त्रिकालस्थ ऋषियों को अपने सर्वज्ञपन से जान के इस मन्त्र में परमार्थ और व्यवहार ये दो विद्या दिखलाई हैं, इससे इसमें भूत वा भविष्य काल की बातों के कहने में कोई भी दोष नहीं आ सकता, क्योंकि वेद सर्वज्ञ परमेश्वर का वचन है। वह परमेश्वर उत्तम गुणों को तथा भौतिक अग्नि व्यवहार कार्यों में संयुक्त किया हुआ उत्तम-उत्तम भोग के पदार्थों का देनेवाला होता है। पुराने की अपेक्षा एक पदार्थ से दूसरा नवीन और नवीन की अपेक्षा पहिला पुराना होता है।

देखो, यही अर्थ इस मन्त्र का निरुक्तकार ने भी किया है कि-प्राकृत जन अर्थात् अज्ञानी लोगों ने जो प्रसिद्ध भौतिक अग्नि पाक बनाने आदि कार्य्यों में लिया है, वह इस मन्त्र में नहीं लेना, किन्तु सब का प्रकाश करनेहारा परमेश्वर और सब विद्याओं का हेतु जिसका नाम विद्युत् है, वही भौतिक अग्नि यहां अग्नि शब्द से लिया है।

(अग्निः पूर्वे०) इस मन्त्र का अर्थ नवीन भाष्यकारों ने कुछ का कुछ ही कर दिया है, जैसे सायणाचार्य ने लिखा है कि-**(पुरातनैः०)** प्राचीन भृगु, अङ्गिरा आदियों और नवीन अर्थात् हम लोगों को अग्नि की स्तुति करना उचित है। वह देवों को हवि अर्थात् होम में चढ़े हुए पदार्थ उनके खाने के लिये पहुंचाता है। ऐसा ही व्याख्यान यूरोप खण्डवासी और आर्यावर्त्त के नवीन लोगों ने अङ्गरेजी भाषा में किया है, तथा कल्पित ग्रन्थों में अब भी होता है। सो यह बड़े आश्चर्य की बात है जो ईश्वर के प्रकाशित अनादि वेद का ऐसा व्याख्यान जिसका क्षुद्र आशय और निरुक्त शतपथ आदि सत्य ग्रन्थों से विरुद्ध वह सत्य कैसे हो सकता है॥२॥

तेनोपासितेनोपकृतेन च किं किं प्राप्तं भवतीत्युपदिश्यते।

अब परमेश्वर की उपासना और भौतिक अग्नि के उपकार से क्या-क्या फल प्राप्त होता है, सो

अगले मन्त्र से उपदेश किया है-

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे।

यशसं वीरवत्तमम्॥ ३॥

अग्निना। रयिम्। अश्नवत्। पोषम्। एव। दिवेऽदिवे। यशसम्। वीरवत्ऽतमम्॥ ३॥

पदार्थः-**(अग्निना)** परमेश्वरेण संसेवितेन भौतिकेन संयोजितेन वा **(रयिम्)** विद्यासुवर्णाद्युत्तमधनम्। **रयिरिति धननामसु पठितम्**। (निघं०२.१०) **(अश्नवत्)** प्राप्नोति। लेट् प्रयोगः, व्यत्ययेन परस्मैपदम्। **(पोषम्)** आत्मशरीरयोः पुष्ट्या सुखप्रदम् **(एव)** निश्चयार्थे **(दिवेदिवे)** प्रतिदिनम्। **दिवेदिवे इत्यहर्नामसु पठितम्।** (निघं०१.९) **(यशसम्)** सर्वोत्तमकीर्त्तिवर्धकम्। **(वीरवत्तमम्)** वीरा विद्वांसः शूराश्च विद्यन्ते यस्मिन् तदतिशयितं वीरवत्तमम्॥ ३॥

अन्वयः-मनुष्यः अग्निनैव दिवेदिवे पोषं यशसं वीरवत्तमं रयिमश्नवत् प्राप्नोति॥ ३॥

भावार्थः-अत्र श्लेषालङ्कारेणोभयार्थस्य ग्रहणम्। ईश्वराज्ञायां वर्त्तमानेन शिल्पविद्यादिकार्य्यसिध्यर्थमग्निं साधितवता मनुष्येणाक्षयं धनं प्राप्यते, येन नित्यं कीर्त्तिर्वृद्धिर्वीरपुरुषाश्च भवन्ति॥ ३॥

पदार्थः-यह मनुष्य **(अग्निना एव)** अच्छी प्रकार ईश्वर की उपासना और भौतिक अग्नि ही को कलाओं में संयुक्त करने से **(दिवेदिवे)** प्रतिदिन **(पोषम्)** आत्मा और शरीर की पुष्टि करनेवाला **(यशसम्)** जो उत्तम कीर्त्ति का बढ़ानेवाला और **(वीरवत्तमम्)** जिसको अच्छे-अच्छे विद्वान् वा शूरवीर लोग चाहा करते हैं **(रयिम्)** विद्या और सुवर्णादि उत्तम उस धन को सुगमता से **(अश्नवत्)** प्राप्त होता है॥ ३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार से दो अर्थों का ग्रहण है। ईश्वर की आज्ञा में रहने तथा शिल्पविद्यासम्बन्धि कार्य्यों की सिद्धि के लिये भौतिक अग्नि को सिद्ध करनेवाले मनुष्यों को अक्षय अर्थात् जिसका कभी नाश नहीं होता, सो धन प्राप्त होता है, तथा मनुष्य लोग जिस धन से कीर्त्ति की वृद्धि और जिस धन को पाके वीर पुरुषों से युक्त होकर नाना सुखों से युक्त होते हैं। सब को उचित है कि इस धन को अवश्य प्राप्त करें॥ ३॥

उक्तावर्थौ कीदृशौ स्त इत्युपदिश्यते।

उक्त भौतिक अग्नि और परमेश्वर किस प्रकार के हैं, यह भेद अगले मन्त्र में जनाया है-

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।

स इद्देवेषु गच्छति॥ ४॥

अग्नेऽयम्। यज्ञम्। अध्वरम्। विश्वतऽः। परिऽभूः। असि। सः। इत्। देवेषु। गच्छति॥४॥

पदार्थः-(**अग्ने**) परमेश्वर भौतिको वा (**यम्**) (**यज्ञम्**) प्रथममन्त्रोक्तम् (**अध्वरम्**) हिंसाधर्मादिदोषरहितम्। **ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपातः।** (निरु०१.८) (**विश्वतः**) सर्वतः सर्वेषां जलपृथिवीमयानां पदार्थानां विविधाश्रयात्। **षष्ठ्या व्याश्रये** (अष्टा०५.४.४८) इत्यनेन तसिः प्रत्ययः। (**परिभूः**) यः परितः सर्वतः पदार्थेषु भवति। **परीति सर्वतोभावं प्राह।** (निरु०१.३) (**असि**) अस्ति वा (**सः**) यज्ञः (**इत्**) एव (**देवेषु**) विद्वत्सु दिव्येषु पदार्थेषु वा (**गच्छति**) प्राप्नोति॥४॥

अन्वयः-हे अग्ने! त्वं यमध्वरं यज्ञं विश्वतः परिभूरसि व्याप्य पालकोऽसि, तथाऽयमग्निरपि सम्पादयितास्ति, स इद्देवेषु गच्छति॥४॥

भावार्थः-अत्र श्लेषालङ्कारः। यतोऽयं व्यापकः परमेश्वरः स्वसत्तया पूर्वोक्तं यज्ञं सर्वतः सततं रक्षति, अत एव स यज्ञो दिव्यगुणप्राप्तिहेतुर्भवति। एवमेव परमेश्वरेण यो दिव्यगुणसहितोऽग्नी रचितोऽस्ति तस्मादेवायं दिव्यशिल्पविद्यासम्पादकोऽस्ति। यो धार्मिक उद्योगी विद्वान् मनुष्योऽस्ति, स एवैतान् गुणान् प्राप्तुमर्हति॥४॥

पदार्थः-(**अग्ने**) हे परमेश्वर! आप (**विश्वतः**) सर्वत्र व्याप्त होकर (**यम्**) जिस (**अध्वरम्**) हिंसा आदि दोषरहित (**यज्ञम्**) विद्या आदि पदार्थों के दानरूप यज्ञ को (**परिभूः**) सब प्रकार से पालन करनेवाले हैं, (**स इत्**) वही यज्ञ (**देवेषु**) विद्वानों के बीच में (**गच्छति**) फैलके जगत् को सुख प्राप्त करता है। तथा (**अग्ने**) जो यह भौतिक अग्नि (**विश्वतः**) पृथिव्यादि पदार्थों के साथ अनेक दोषों से अलग होकर (**यम्**) जिस (**अध्वरम्**) विनाश आदि दोषों से रहित शिल्पविद्यामय यज्ञ को (**परिभूः**) सब प्रकार से सिद्ध करता है, (**स इत्**) वही यज्ञ (**देवेषु**) अच्छे-अच्छे पदार्थों में (**गच्छति**) प्राप्त होकर सब को लाभकारी होता है॥४॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जिस कारण व्यापक परमेश्वर अपनी सत्ता से उक्त यज्ञ की निरन्तर रक्षा करता है, इसीसे वह अच्छे-अच्छे गुणों को देने का हेतु होता है। इसी प्रकार ईश्वर ने दिव्य गुणयुक्त अग्नि भी रचा है कि जो उत्तम शिल्पविद्या का उत्पन्न करने वाला है। उन गुणों को केवल धार्मिक उद्योगी और विद्वान् मनुष्य ही प्राप्त होने के योग्य होता है॥४॥

पुनस्तौ कीदृशौ स्त इत्युपदिश्यते।

फिर भी परमेश्वर और भौतिक अग्नि किस प्रकार के हैं, सो अगले मन्त्र में उपदेश किया है-

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरा गमत्॥५॥१॥

अग्निः। होता। कविऽक्रतुः। सत्यः। चित्रश्रवःऽतमः। देवः। देवेभिः। आ। गमत्॥५॥

पदार्थः-**(अग्निः)** परमेश्वरो भौतिको वा **(होता)** दाता ग्रहीता द्योतको वा **(कविक्रतुः)** कविः सर्वज्ञः क्रान्तदर्शनो वा। करोति यो येन वा स क्रतुः, कविश्चासौ क्रतुश्च सः। **कविः क्रान्तदर्शनो भवति कवतेर्वा।** (निरु०१२.१३) यः सर्वविद्यायुक्तं वेदशास्त्रं कवते उपदिशति स कविरीश्वरः। क्रान्तं दर्शनं यस्मात्स सर्वज्ञो भौतिको वा क्रान्तदर्शनः। **कृत्रः कतुः** (उणा०१.७६) अनेन कृञो हेतुकर्त्तरि कर्त्तरि वा कतु प्रत्ययः। **(सत्यः)** सन्तीति सन्तः, सद्भ्यो हितः तत्र साधुर्वा। **सत्यं कस्मात्सत्सु तायते सत्प्रभवं भवतीति वा।** (निरु०३.१३) **(चित्रश्रवस्तमः)** चित्रमद्भुतं श्रवः श्रवणं यस्य सोऽतिशयितः **(देवः)** स्वप्रकाशः प्रकाशकरो वा **(देवेभिः)** विद्वद्भिर्दिव्यगुणैः सह वा **(आ)** समन्तात् **(गमत्)** गच्छतु प्राप्तो भवति वा। लुङ्प्रयोगोऽडभावश्च॥५॥

अन्वयः-यः सत्यश्चित्रश्रवस्तमः कविक्रतुः होता देवोऽग्निः परमेश्वरो भौतिकश्चास्ति, स देवेभिः सहागमत्॥५॥

भावार्थः-अत्र श्लेषालङ्कारः। अग्निशब्देन परमेश्वरस्य सर्वाधारसर्वज्ञसर्वरचकविनाशरहितानन्त-शक्तिमत्त्वादिगुणैः सर्वप्रकाशकत्वात्, तथा भौतिकस्याकर्षणगुणादिभिर्मूर्त्तद्रव्याधारकत्वाच्च ग्रहणमस्तीति।

सायणाचार्य्येण गमदिति लोडन्तं व्याख्यातम्, तदेतदस्य भ्रान्तमूलमेव। कुतः? गमदित्यत्र **'छन्दसि लुङ् लङ्लिटः'** इति सामान्यकालविधायकस्य सूत्रस्य विद्यमानत्वात्॥५॥

इति प्रथमो वर्गः समाप्तः॥

पदार्थान्वयभाषा-जो **(सत्यः)** अविनाशी **(देवः)** आप से आप प्रकाशमान **(कविक्रतुः)** सर्वज्ञ है, जिसने परमाणु आदि पदार्थ और उनके उत्तम-उत्तम गुण रचके दिखलाये हैं, जो सब विद्यायुक्त वेद का उपदेश करता है, और जिससे परमाणु आदि पदार्थों करके सृष्टि के उत्तम पदार्थों का दर्शन होता है, वही कवि अर्थात् सर्वज्ञ ईश्वर है। तथा भौतिक अग्नि भी स्थूल और सूक्ष्म पदार्थों से कलायुक्त होकर देशदेशान्तर में गमन करानेवाला दिखलाया है। **(चित्रश्रवस्तमः)** जिसका अति आश्चर्यरूपी श्रवण है, वह परमेश्वर **(देवेभिः)** विद्वानों के साथ समागम करने से **(आगमत्)** प्राप्त होता है। तथा जो **(सत्यः)** श्रेष्ठ विद्वानों का हित अर्थात् उनके लिये सुखरूप **(देवः)** उत्तम गुणों का प्रकाश करनेवाला **(कविक्रतुः)** सब जगत् को जानने और रचनेहारा परमात्मा और जो भौतिक अग्नि सब पृथिवी आदि पदार्थों के साथ व्यापक और शिल्पविद्या का मुख्य हेतु **(चित्रश्रवस्तमः)** जिसको अद्भुत अर्थात् अति आश्चर्य्यरूप सुनते हैं, वह दिव्य गुणों के साथ **(आगमत्)** जाना जाता है॥५॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। सब का आधार, सर्वज्ञ, सब का रचनेवाला, विनाशरहित, अनन्त शक्तिमान् और सब का प्रकाशक आदि गुण हेतुओं के पाये जाने से अग्नि शब्द करके परमेश्वर, और आकर्षणादि गुणों से मूर्त्तिमान् पदार्थों का धारण करनेहारादि गुणों के होने से भौतिक अग्नि का भी

ग्रहण होता है। सिवाय इसके मनुष्यों को यह भी जानना उचित है कि विद्वानों के समागम और संसारी पदार्थों को उनके गुणसहित विचारने से परम दयालु परमेश्वर अनन्त सुखदाता और भौतिक अग्नि शिल्पविद्या का सिद्ध करनेवाला होता है।

सायणाचार्य्य ने **'गमत'** इस प्रयोग को लोट् लकार का माना है, सो यह उनका व्याख्यान अशुद्ध है, क्योंकि इस प्रयोग में **(छन्दसि लुङ्०)** यह सामान्यकाल बतानेवाला सुत्र वर्त्तमान है॥५॥

वह पहला वर्ग समाप्त हुआ॥

अथैकः परमार्थ उपदिश्यते।

अब अग्नि शब्द से ईश्वर का उपदेश अगले मन्त्र में किया है-

यद॒ङ्ग दा॒शुषे॒ त्वमग्ने॑ भ॒द्रं क॑रि॒ष्यसि॑।
तवेत्तत्स॒त्यमङ्गिरः॥ ६॥

यत्। अ॒ङ्ग। दा॒शुषे॑। त्वम्। अग्ने॑। भ॒द्रम्। क॒रि॒ष्यसि॑। तव॑। इत्। तत्। स॒त्यम्। अङ्गि॑रः॥ ६॥

पदार्थः-(**यत्**) यस्मात् (**अङ्ग**) सर्वमित्र (**दाशुषे**) सर्वस्वं दत्तवते (**त्वम्**) मङ्गलमयः (**अग्ने**) परमेश्वर (**भद्रम्**) कल्याणं सर्वैः शिष्टैर्विद्वद्भिः सेवनीयम्। **भद्रं भगेन व्याख्यातं भजनीयं भूतानामभिद्रवयतीति वा भाजनवद्वा।** (निरु०४.१०) (**करिष्यसि**) करोषि। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति लडर्थे लृट्। (**तव इत्**) एव (**तत्**) तस्मात् (**सत्यम्**) सत्सु पदार्थेषु सुखस्य विस्तारकं सत्प्रभवं सद्भिर्गुणैरुत्पन्नम् (**अङ्गिरः**) पृथिव्यादीनां ब्रह्माण्डस्याङ्गानां प्राणरूपेण शरीरावयवानां चान्तर्य्यामिरूपेण रसरूपोऽङ्गिरास्तत्सम्बुद्धौ। **प्राणो वा अङ्गिराः।** (श०ब्रा०६.३.७.३) **देहेऽङ्गारेष्वङ्गिरा अङ्गारा अङ्कना अञ्जनाः**। (निरु०३.१७) अत्राप्युत्तमानामङ्गानां मध्येऽन्तर्यामी प्राणाख्योऽर्थो गृह्यते॥६॥

अन्वयः-हे अङ्गिरोऽअङ्गाग्ने! त्वं यस्मात् दाशुषे भद्रं करिष्यसि करोषि, तस्मात्तवेत्तवैवेदं सत्यं व्रतमस्ति॥६॥

भावार्थः-यो न्यायकारी सर्वस्य सुहृत्सन् दयालुः कल्याणकर्त्ता सर्वस्य सुखमिच्छुः परमेश्वरोऽस्ति, तस्योपासनेन जीव ऐहिक पारमार्थिकं सुखं प्राप्नोति, नेतरस्य। कुतः, परमेश्वरस्यैवैतच्छीलवत्त्वेन समर्थत्वात्। योऽभिव्याप्याङ्गान्यङ्गीव सर्वं विश्वं धारयति, येनैवेदं जगद्रक्षितं यथावदवस्थापितं च सोऽङ्गिरा भवतीति।

अत्राङ्गिरःशब्दार्थो विलसनाख्येन भ्रान्त्यान्यथैव व्याख्यात इति बोध्यम्॥६॥

पदार्थः-हे (**अङ्गिरः**) ब्रह्माण्ड के अङ्ग पृथिवी आदि पदार्थों को प्राणरूप और शरीर के अङ्गों को अन्तर्यामीरूप से रसरूप होकर रक्षा करनेवाले होने से यहां **'अङ्गिरः'** (प्राण) शब्द से ईश्वर लिया है। (**अङ्ग**) हे सब के मित्र (**अग्ने**) परमेश्वर! (**यत्**) जिस हेतु से आप (**दाशुषे**) निर्लोभता से उत्तम-

उत्तम पदार्थों के दान करनेवाले मनुष्य के लिये **(भद्रम्)** कल्याण, जो कि शिष्ट विद्वानों के योग्य है, उसको **(करिष्यसि)** करते हैं, सो यह **(तवेत्)** आप ही का **(सत्यम्)** सत्य **(व्रतम्)** शील है॥६॥

भावार्थः-जो न्याय, दया, कल्याण और सब का मित्रभाव करनेवाला परमेश्वर है, उसी की उपासना करके जीव इस लोक और मोक्ष के सुख को प्राप्त होता है, क्योंकि इस प्रकार सुख देने का स्वभाव और सामर्थ्य केवल परमेश्वर का है, दूसरे का नहीं। जैसे शरीरधारी अपने शरीर को धारण करता है, वैसे ही परमेश्वर सब संसार को धारण करता है, और इसी से यह संसार की यथावत् रक्षा और स्थिति होती है॥६॥

तद् ब्रह्म कथमुपास्यं प्राप्तव्यमित्युपदिश्यते।

उक्त परमेश्वर कैसे उपासना करके प्राप्त होने के योग्य है, इसका विधान अगले मन्त्र में किया है॥

उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम्।
नमो॒ भर॑न्त॒ एम॑सि॥७॥

उप॑। त्वा॒। अ॒ग्ने॒। दि॒वेऽदि॑वे। दोषा॑ऽवस्तः। धि॒या। व॒यम्। नमः॑। भर॑न्तः। आ। इ॒म॒सि॒॥७॥

पदार्थः-(**उप**) सामीप्ये (**त्वा**) त्वाम् (**अग्ने**) सर्वोपास्येश्वर (**दिवेदिवे**) विज्ञानस्य प्रकाशाय प्रकाशाय (**दोषावस्तः**) अहर्निशम्। **दोषेति रात्रिनामसु पठितम्।** (निघं०१.७) रात्रेः प्रसङ्गाद्वस्त इति दिननामात्र ग्राह्यम्। (**धिया**) प्रज्ञया कर्मणा वा (**वयम्**) उपासकाः (**नमः**) नम्रीभावे (**भरन्तः**) धारयन्तः (**आ**) समन्तात् (**इमसि**) प्राप्नुमः॥७॥

अन्वयः-हे अग्ने! वयं धिया दिवेदिवे दोषावस्तस्त्वा त्वां भरन्तो नमस्कुर्वन्तश्चोपैमसि प्राप्नुमः॥७॥

भावार्थः-हे सर्वद्रष्टः सर्वव्यापिन्नुपासनार्ह! वयं सर्वकर्मानुष्ठानेषु प्रतिक्षणं त्वां यतो नैव विस्मरामः, तस्मादस्माकमधर्ममनुष्ठातुमिच्छा कदाचिन्नैव भवति। कुतः? सर्वज्ञः सर्वसाक्षी भवान्सर्वाण्यस्मत्कार्य्याणि सर्वथा पश्यतीति ज्ञानात्॥७॥

पदार्थान्वयभाषाः-(**अग्ने**) हे सब के उपासना करने योग्य परमेश्वर! हम लोग (**दिवेदिवे**) अनेक प्रकार के विज्ञान होने के लिये (**धिया**) अपनी बुद्धि और कर्मों से आपकी (**भरन्तः**) उपासना को धारण और (**दोषावस्तः**) रात्रिदिन में निरन्तर (**नमः**) नमस्कार आदि करते हुए (**उपैमसि**) आपके शरण को प्राप्त होते हैं॥७॥

भावार्थः-हे सब को देखने और सब में व्याप्त होनेवाले उपासना के योग्य परमेश्वर! हम लोग सब कामों के करने में एक क्षण भी आपको नहीं भूलते, इसी से हम लोगों को अधर्म करने में कभी

इच्छा भी नहीं होती, क्योंकि जो सर्वज्ञ सब का साक्षी परमेश्वर है, वह हमारे सब कामों को देखता है, इस निश्चय से॥७॥

पुनः स कीदृशोऽस्तीत्युपदिश्यते।

फिर भी वह परमेश्वर किस प्रकार का है, सो अगले मन्त्र में उपदेश किया है॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम्।
वर्धमानं स्वे दमे॥८॥

राजन्तम्। अध्वराणाम्। गोपाम्। ऋतस्य। दीदिविम्। वर्धमानम्। स्वे। दमे॥८॥

पदार्थः-(**राजन्तम्**) प्रकाशमानम् (**अध्वराणाम्**) पूर्वोक्तानां यज्ञानां धार्मिकाणां मनुष्याणां वा (**गोपाम्**) गाः पृथिव्यादीन् पाति रक्षति तम् (**ऋतस्य**) सत्यस्य सर्वविद्यायुक्तस्य वेदचतुष्टयस्य सनातनस्य जगत्कारणस्य वा। **ऋतमिति सत्यनामसु पठितम्।** (निघं०३.१०) **ऋत इति पदनामसु च।** (निघं०५.४) (**दीदिविम्**) सर्वप्रकाशकम्। **दिवो द्वे दीर्घश्चाभ्यासस्य।** (उणा०४.५५) अनेन क्विन्प्रत्ययः। (**वर्धमानम्**) ह्रासरहितम् (**स्वे**) स्वकीये (**दमे**) दाम्यन्त्युपशाम्यन्ति दुःखानि यस्मिंस्तस्मिन् परमानन्दे पदे। दमुधातोः **हलश्च।** (अष्टा०३.३.१२१) अनेनाधिकरणे घञ्प्रत्ययः॥८॥

अन्वयः-वयं स्वे दमे वर्धमानं राजन्तमध्वराणां गोपामृतस्य दीदिविं परमेश्वरं नित्यमुपैमसि॥८॥

भावार्थः-परमात्मा स्वस्य सत्तायामानन्दे च क्षयाज्ञानरहितोऽन्तर्यामिरूपेण सर्वान् जीवान्सत्यमुपदिशन्नाप्तान् संसारं च रक्षन् सदैव वर्तते। एतस्योपासका वयमप्यानन्दिता वृद्धियुक्ता विज्ञानवन्तो भूत्वाऽभ्युदयनिःश्रेयसं प्राप्ताः सदैव वर्त्तामह इति॥८॥

पदार्थान्वयभाषाः-(**स्वे**) अपने (**दमे**) उस परम आनन्द पद में कि जिसमें बड़े-बड़े दुःखों से छूट कर मोक्ष सुख को प्राप्त हुए पुरुष रमण करते हैं, (**वर्धमानम्**) सब से बड़ा (**राजन्तम्**) प्रकाशस्वरूप (**अध्वराणाम्**) पूर्वोक्त यज्ञादिक अच्छे-अच्छे कर्म धार्मिक मनुष्य तथा (**गोपाम्**) पृथिव्यादिकों की रक्षा (**ऋतस्य**) सत्यविद्यायुक्त चारों वेदों और कार्य जगत् के अनादि कारण के (**दीदिविम्**) प्रकाश करनेवाले परमेश्वर को हम लोग उपासना योग से प्राप्त होते हैं॥८॥

भावार्थः-जैसे विनाश और अज्ञान आदि दोष रहित परमात्मा अपने अन्तर्यामि रूप से सब जीवों को सत्य का उपदेश तथा श्रेष्ठ विद्वान् और सब जगत् की रक्षा करता हुआ अपनी सत्ता और परम आनन्द में प्रवृत्त हो रहा है, वैसे ही परमेश्वर के उपासक भी आनन्दित, वृद्धियुक्त होकर विज्ञान में विहार करते हुए परम आनन्दरूप विशेष फलों को प्राप्त होते हैं॥८॥

स कान् क इव रक्षतीत्युपदिश्यते।

वह परमेश्वर किस के समान किनकी रक्षा करता है, सो अगले मन्त्र में उपदेश किया है-

स नः पितेव सूनवेऽग्ने सूपायनो भव।

सचस्वा नः स्वस्तये॥ ९॥ २॥

सः। नः। पिताऽइव। सूनवे। अग्ने। सुऽउपायनः। भव। सचस्व। नः। स्वस्तये॥ ९॥

पदार्थः-(**सः**) जगदीश्वरः (**नः**) अस्मभ्यम् (**पितेव**) जनकवत् (**सूनवे**) स्वसन्तानाय (**अग्ने**) ज्ञानस्वरूप (**सूपायनः**) सुष्ठु उपगतमयनं ज्ञानं सुखसाधनं पदार्थप्रापणं यस्मात्सः (**भव, सचस्व**) समवेतान् कुरु। **अन्येषामपि दृश्यते।** (अष्टा०६.३.१३७) इति दीर्घः। (**नः**) अस्मान् (**स्वस्तये**) सुखाय कल्याणाय च॥ ९॥

अन्वयः-हे अग्ने! स त्वं सूनवे पितेव नोऽस्मभ्यं सूपायनो भव। एवं नोऽस्मान् स्वस्तये सचस्व॥ ९॥

भावार्थः-अत्रोपमालङ्कारः। सर्वैरेवं प्रयत्नः कर्तव्य ईश्वरः प्रार्थनीयश्च-हे भगवन्! भवानस्मान् रक्षयित्वा शुभेषु गुणकर्मसु सदैव नियोजय। यथा पिता स्वसन्तानान्सम्यक् पालयित्वा सुशिक्ष्य शुभगुणकर्म्मयुक्तान् श्रेष्ठकर्मकर्तॄंश्च सम्पादयति, तथैव भवानपि स्वकृपयाऽस्मान्निष्पादयत्विति॥ ९॥

प्रथमसूक्ते पञ्चभिर्मन्त्रैः श्लेषालङ्कारेण व्यवहारपरमार्थविद्याद्वयसाधनं प्रकाशितमेवं चतुर्भिर्मन्त्रैरीश्वरस्योपासना स्वभावश्चास्तीति। इदं सूक्तं सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिश्चान्यथैव व्याख्यातम्॥ ९॥

इति प्रथमं सूक्तं समाप्तं वर्गश्च द्वितीयः॥

पदार्थः-हे (**सः**) उक्त गुणयुक्त (**अग्ने**) ज्ञानस्वरूप परमेश्वर! (**पितेव**) जैसे पिता (**सूनवे**) अपने पुत्र के लिये उत्तम ज्ञान का देनेवाला होता है, वैसे ही आप (**नः**) हम लोगों के लिये (**सूपायनः**) शोभन ज्ञान, जो कि सब सुखों का साधक और उत्तम पदार्थों का प्राप्त करनेवाला है, उसके देनेवाले होकर (**नः**) हम लोगों को (**स्वस्तये**) सब सुख के लिये (**सचस्व**) संयुक्त कीजिये॥ ९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब मनुष्यों को उत्तम प्रयत्न और ईश्वर की प्रार्थना इस प्रकार से करनी चाहिये कि-हे भगवन्! जैसे पिता अपने पुत्रों को अच्छी प्रकार पालन करके और उत्तम-उत्तम शिक्षा देकर उनको शुभ गुण और श्रेष्ठ कर्म करने योग्य बना देता है, वैसे ही आप हम लोगों को शुभ गुण और शुभ कर्मों में युक्त सदैव कीजिये॥ ९॥

इस प्रथम सूक्त में पहिले पाँच मन्त्रों करके श्लेषालङ्कार से व्यवहार और परमार्थ की विद्याओं का प्रकाश किया, और चारो मन्त्रों से ईश्वर की उपासना और स्वभाव वर्णन किया है।

सायणाचार्य्य आदि और यूरोपदेशवासी डाक्टर विलसन आदि ने इस सूक्त की व्याख्या उलटी की है, सो मेरे इस भाष्य और उनकी व्याख्या को मिलाकर देखने से सबको विदित हो जायगा॥

यह पहला सूक्त और दूसरा वर्ग समाप्त हुआ॥

अथ नवर्चस्य द्वितीयसूक्तस्य मधुच्छन्दा ऋषिः। १-३ वायुः; ४-६ इन्द्रवायुः ७-९ मित्रावरुणौ च देवताः। १,२ पिपीलिकामध्यानिचृद्गायत्री; ३-५, ७-९ गायत्री; ६ निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्र येन सर्वे पदार्थाः शोभिताः सन्ति सोऽर्थ उपदिश्यते।

अब द्वितीय सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में उन पदार्थों का वर्णन किया है कि जिन्होंने सब पदार्थ शोभित कर रक्खे हैं–

वायवा याहि दर्शतेमे सोमा अरंकृताः।
तेषां पाहि श्रुधी हवम्॥ १॥

वायो इति। आ। याहि। दर्शत। इमे। सोमाः। अरंऽकृताः। तेषाम्। पाहि। श्रुधि। हवम्॥ १०॥

पदार्थः–**(वायो)** अनन्तबल सर्वप्राणान्तर्यामिन्नीश्वर तथा सर्वमूर्त्तद्रव्याधारो जीवनहेतुर्भौतिको वा। **प्र वावृजे सुप्रया बर्हिरेषामा विश्वपतीव बीरिट इयाते। विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान्॥** (यजु०३३.४४) अस्योपरि निरुक्तव्याख्यानरीत्येश्वरभौतिको पुष्टिकर्त्तारौ नियन्तारौ द्वावर्थौ वायुशब्देन गृह्येते। तद्यथा–

अथातो मध्यस्थाना देवतास्तासां वायुः प्रथमागामी भवति वायुर्वातेर्वेत्तेर्वा स्याद्गतिकर्मण एतेरिति स्थौलाष्ठीविरनर्थको वकारस्तस्यैषा भवति। (वायवा याहि०) वायवा याहि दर्शनीयेमे सोमा अरंकृता अलंकृतास्तेषां पिब शृणु नो ह्वानमिति। (निरु० १०.१-२)

अन्तरिक्षमध्ये ये पदार्थाः सन्ति तेषां मध्ये वायुः प्रथमागाम्यस्ति। वाति सोऽयं वायुः सर्वगत्वादीश्वरो गतिमत्त्वाद्भौतिकोऽपि गृह्यते। वेत्ति सर्वं जगत्स वायुः परमेश्वरोऽस्ति, तस्य सर्वज्ञत्वात्। मनुष्यो येन वायुना तन्नियमेन प्राणायामेन वा परमेश्वरं शिल्पविद्यामयं यज्ञं वा वेत्ति जानातीत्यर्थेन भौतिको वायुर्गृह्यते। एवमेवैति प्राप्नोति चराचरं जगदित्यर्थेन परमेश्वरस्यैव ग्रहणम्। तथा एति प्राप्नोति सर्वेषां लोकानां परिधीनित्यर्थेन भौतिकस्यापि। कुतः? अन्तर्यामिरूपेणेश्वरस्य मध्यस्थत्वात्प्राणवायुरूपेण भौतिकस्यापि। मध्यस्थत्वादेतद् द्वयार्थस्य वाचिका वायवा याहीत्यृक् प्रवृत्तास्तीति विज्ञेयम्।

वायुः सोमस्य रक्षिता वायुमस्य रक्षितारमाह साहचर्य्याद्रसहरणाद्वा। (निरु०११.५) वायुः सोमस्य सुतस्योत्पन्नस्यास्य जगतो रक्षकत्वादीश्वरोऽत्र गृह्यते। कस्मात्सर्वेण जगता सह साहचर्य्येण व्याप्तत्वात्। सोमवल्ल्यादेरोषधिगणस्य रसहरणात्तथा समुद्रादेर्जलग्रहणाच्च भौतिको वायुरप्यत्र गृह्यते।

वायुर्वा अग्निः सुषमिद्वायुर्हि स्वयमात्मानं समिन्धे स्वयमिदं सर्वं यदिदं किंच वायुमेव तदन्तरिक्षलोक आयातयति वायुर्वै प्रणीर्यज्ञानाम्। वायुर्वै तूर्णिर्हव्यावड् वायुर्हीदं सर्वं सद्यस्तरति यदिदं किंच वायुर्देवेभ्यो हव्यं वहति। (ऐ०२.३४)

वायुर्भौतिकोऽग्निदीपनस्य सुषमिदिति ग्राह्यः। वायुसंज्ञोऽहमीश्वरः स्वयमात्मानं यदिदं किंचिज्जगद्वर्त्तते तदिदं सर्वं स्वयं समिन्धे प्रकाशयामि। तथा स एवान्तरिक्षलोके भौतिकमिमं वायुमायातयति विस्तारयति स एव वायुर्भौतिको वा यज्ञानां प्रापकोऽस्तीत्यत्र वायुशब्देनेश्वरश्च। तथा वायुर्वै तूर्णिरित्यादिना भौतिको गृह्यत इति।

(आयाहि) आगच्छागच्छति वा। अत्र पक्षे व्यत्ययः। **(दर्शत)** ज्ञानदृष्ट्या द्रष्टुं योग्य योग्यो वा **(इमे)** प्रत्यक्षाः **(सोमाः)** सूयन्त उत्पद्यन्ते ये ते पदार्थाः **(अरंकृताः)** अलंकृता भूषिताः। **संज्ञाछन्दसोर्वा कपिलकादीनामिति वक्तव्यम्।** (अष्टा०८.२.१८) इति लत्वविकल्पः। **(तेषाम्)** तान्पदार्थान्। **षष्ठी शेषे।** (अष्टा०२.३.५०) इति शेषत्वविविक्षायां षष्ठी। **(पाहि)** रक्षयति वा। **(श्रुधि)** श्रायवति वा। अत्र **बहुलं छन्दसि।** (अष्टा०२.४.७३) इति विकरणाभावः। **श्रुशृणुपृकृवृभ्यश्छन्दसि।** (अष्टा०६.४.१०२) अनेन हेर्धिः। **(हवम्)**॥१॥

अन्वयः-हे दर्शत वायो जगदीश्वर! त्वमायाहि येन त्वयेमे सोमा अरंकृता अलंकृताः सन्ति तेषां तान् पदार्थान् पाहि अस्माकं हवं श्रुधि योऽयं दर्शत द्रष्टुं योग्यो येनेमे सोमा अरंकृता अलंकृताः सन्ति, स तेषां तान् सर्वानिमान् पदार्थान् पाहि पाति श्रुधि हवं स एव वायो वायुः सर्वं शब्दव्यवहारं श्रावयति। आयाहि सर्वान् पदार्थान् स्वगत्या प्राप्नोति॥१॥

भावार्थः-अत्र श्लेषालङ्कारेणेश्वरभौतिकावर्थौ गृह्येते। ब्रह्मणा स्वसामर्थ्येन सर्वे पदार्थाः सृष्ट्वा नित्यं भूष्यन्ते तथा तदुत्पादितेन वायुना च। नैव तद्धारणेन विना कस्यापि रक्षणं सम्भवति। प्रेम्णा जीवेन प्रयुक्तां स्तुतिं वाणीं चेश्वरः सर्वगतः प्रतिक्षणं शृणोति। तथा जीवो वायुनिमित्तेनैव शब्दानामुच्चारणां श्रवणं च कर्त्तुं शक्नोतीति॥१॥

पदार्थान्वयभाषा-**(दर्शत)** हे ज्ञान से देखने योग्य **(वायो)** अनन्त बलयुक्त, सब के प्राणरूप अन्तर्यामी परमेश्वर! आप हमारे हृदय में **(आयाहि)** प्रकाशित हूजिये। कैसे आप हैं कि जिन्होंने **(इमे)** इन प्रत्यक्ष **(सोमाः)** संसारी पदार्थों को **(अरंकृताः)** अलंकृत अर्थात् सुशोभित कर रक्खा है। **(तेषाम्)** आप ही उन पदार्थों के रक्षक हैं, इससे उनकी **(पाहि)** रक्षा भी कीजिये, और **(हवम्)** हमारी स्तुति को **(श्रुधि)** सुनिये। तथा **(दर्शत)** स्पर्शादि गुणों से देखने योग्य **(वायो)** सब मूर्तिमान् पदार्थों का आधार और प्राणियों के जीवन का हेतु भौतिक वायु **(आयाहि)** सब को प्राप्त होता है, फिर जिस भौतिक वायु ने **(इमे)** प्रत्यक्ष **(सोमाः)** संसार के पदार्थों को **(अरंकृताः)** शोभायमान किया है, वही **(तेषाम्)** उन पदार्थों की **(पाहि)** रक्षा का हेतु है और **(हवम्)** जिससे सब प्राणी लोग कहने और सुनने रूप व्यवहार को **(श्रुधि)** कहते सुनते हैं।

आगे ईश्वर और भौतिक वायु के पक्ष में प्रमाण दिखलाते हैं-**(प्रवावृजे०)** इस प्रमाण में वायु शब्द से परमेश्वर और भौतिक वायु पुष्टिकारी और जीवों को यथायोग्य कामों में पहुँचाने वाले गुणों से

ग्रहण किये गये हैं। **(अथातो०)** जो-जो पदार्थ अन्तरिक्ष में हैं, उनमें प्रथमागामी वायु अर्थात् उन पदार्थों में रमण करनेवाला कहाता है, तथा सब जगत् को जानने से वायु शब्द करके परमेश्वर का ग्रहण होता है। तथा मनुष्य लोग वायु से प्राणायाम करके और उनके गुणों के ज्ञान द्वारा परमेश्वर और शिल्पविद्यामय यज्ञ को जान सकता है। इस अर्थ से वायु शब्द करके ईश्वर और भौतिक का ग्रहण होता है। अथवा जो चराचर जगत् में व्याप्त हो रहा है, इस अर्थ से वायु शब्द करके परमेश्वर का तथा जो सब लोकों को परिधिरूप से घेर रहा है, इस अर्थ से भौतिक का ग्रहण होता है, क्योंकि परमेश्वर अन्तर्यामिरूप और भौतिक प्राणरूप से संसार में रहनेवाले हैं। इन्हीं दो अर्थों की कहने वाली वेद की **(वायवायाहि०)** यह ऋचा जाननी चाहिये।

इसी प्रकार से इस ऋचा का **(वायवा याहि दर्शनीये०)** इत्यादि व्याख्यान निरुक्तकार ने भी किया है, सो संस्कृत में देख लेना। वहां भी वायु शब्द से परमेश्वर और भौतिक इन दोनों का ग्रहण है। जैसे-**(वायुः सोमस्य०)** वायु अर्थात् परमेश्वर उत्पन्न हुए जगत् की रक्षा करनेवाला और उसमें व्याप्त होकर उसके अंश-अंश के साथ भर रहा है। इस अर्थ से ईश्वर का तथा सोमवल्ली आदि ओषधियों के रस हरने और समुद्रादिकों के जल को ग्रहण करने से भौतिक वायु का ग्रहण जानना चाहिये। **(वायुर्वा अ०)** इत्यादि वाक्यों में वायु को अग्नि के अर्थ में भी लिया है। परमेश्वर का उपदेश है कि मैं वायुरूप होकर इस जगत् को आप ही प्रकाश करता हूं, तथा मैं ही अन्तरिक्ष लोक में भौतिक वायु को अग्नि के तुल्य परिपूर्ण और यज्ञादिकों को वायुमण्डल में पहुँचाने वाला हूं॥१॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जैसे परमेश्वर के सामर्थ्य से रचे हुए पदार्थ नित्य ही सुशोभित होते हैं, वैसे ही जो ईश्वर का रचा हुआ भौतिक वायु है, उसकी धारणा से भी सब पदार्थों की रक्षा और शोभा तथा जैसे जीव की प्रेमभक्ति से की हुई स्तुति को सर्वगत ईश्वर प्रतिक्षण सुनता है, वैसे ही भौतिक वायु के निमित्त से भी जीव शब्दों के उच्चारण और श्रवण करने को समर्थ होता है॥१॥

कथमेतौ स्तोतव्यावित्युपदिश्यते।

उक्त परमेश्वर और भौतिक वायु किस प्रकार स्तुति करने योग्य हैं, सो अगले मन्त्र में उपदेश किया है-

वायऽउक्थेभिर्जरन्ते त्वामच्छा जरितारः।
सुतसोमा अहर्विदः॥२॥

वायो इति। उक्थेभिः। जरन्ते। त्वाम्। अच्छ। जरितारः। सुतऽसोमाः। अहऽविदः॥२॥

पदार्थः-**(वायो)** अनन्तबलेश्वर! **(उक्थेभिः)** स्तोत्रैः। अत्र **बहुलं छन्दसी**ति भिसः स्थान ऐसभावः। **(जरन्ते)** स्तुवन्ति। **जरा स्तुतिर्जरतेः स्तुतिकर्मणः।** (निरु०१०.८) **जरत इत्यर्चतिकर्मा।** (निघं०३.१४) **(त्वाम्)** भवन्तम् **(अच्छ)** साक्षात्। **निपातस्य च।** (अष्टा०६.३.१३६) इति दीर्घः।

(जरितारः) स्तोतारोऽर्चकाश्च **(सुतसोमाः)** सुता उत्पादिताः सोमा ओषध्यादिरसा विद्यार्थं यैस्ते **(अहर्विदः)** य अहर्विज्ञानप्रकाशं विन्दन्ति प्राप्नुवन्ति ते।

भौतिकवायुग्रहणे ख्ल्वयं विशेषः-**(वायो)** गमनशीलो विमानादिशिल्पविद्यानिमित्तः पवनः **(जरितारः)** स्तोतारोऽर्थाद् वायुगुणस्तावका भवन्ति यतस्तद्विद्याप्रकाशितगुणफला सती सर्वोपकाराय स्यात्॥ २॥

अन्वयः-हे वायो! अहर्विदः सुतसोमा जरितारो विद्वांस उक्थेभिस्त्वामच्छा जरन्ते॥ २॥

भावार्थः-अत्र श्लेषालङ्कारः। अनेन मन्त्रेण वेदादिस्थैः स्तुतिसाधनैः स्तोत्रैः परमार्थव्यवहारविद्यासिद्धये वायुशब्देन परमेश्वर भौतिकयोर्गुणप्रकाशेनोभे विद्ये साक्षात्कर्त्तव्ये इति। अत्रोभयार्थग्रहणे प्रथममन्त्रोक्तानि प्रमाणानि ग्राह्याणि॥ २॥

पदार्थः-**(वायो)** हे अनन्त बलवान् ईश्वर! जो-जो **(अहर्विदः)** विज्ञानरूप प्रकाश को प्राप्त होने **(सुतसोमाः)** ओषधि आदि पदार्थों के रस को उत्पन्न करने **(जरितारः)** स्तुति और सत्कार के करनेवाले विद्वान् लोग हैं, वे **(उक्थेभिः)** वेदोक्त स्तोत्रों से **(त्वाम्)** आपको **(अच्छ)** साक्षात् करने के लिये **(जरन्ते)** स्तुति करते हैं॥ २॥

भावार्थः-यहां श्लेषालङ्कार है। इस मन्त्र से जो वेदादि शास्त्रों में कहे हुए स्तुतियों के निमित्त स्तोत्र हैं, उनसे व्यवहार और परमार्थ विद्या की सिद्धि के लिये परमेश्वर और भौतिक वायु के गुणों का प्रकाश किया गया है।

इस मन्त्र में वायु शब्द से परमेश्वर और भौतिक वायु के ग्रहण करने के लिये पहिले मन्त्र में कहे हुए प्रमाण ग्रहण करने चाहियें॥ २॥

अथ तेषामुक्थानां श्रवणोच्चारणनिमित्तमुपदिश्यते।

पूर्वोक्त स्तोत्रों का जो श्रवण और उच्चारण का निमित्त है, उसका प्रकाश अगले मन्त्र में किया है।

वायो॒ तव॑ प्रपृ॒ञ्चती धेना॑ जिगाति दा॒शुषे॑।

उ॒रू॒ची सोम॑पीतये॥ ३॥

वायो॒ इति॑। तव॑। प्र॒ऽपृ॒ञ्च॒ती। धेना॑। जि॒गा॒ति॒। दा॒शुषे॑। उ॒रू॒ची। सोम॑ऽपीतये॥ ३॥

पदार्थः-**(वायो)** वेदवाणीप्रकाशकेश्वर! **(तव)** जगदीश्वरस्य **(प्रपृञ्चती)** प्रकृष्टा चासौ पृञ्चती चार्थसम्बन्धेन सकलविद्यासम्पर्ककारयित्री **(धेना)** वेदचतुष्टयी वाक्। **धेनेति वाङ्नामसु पठितम्।** (निघं०१.११) **(जिगाति)** प्राप्नोति। **जिगातीति गतिकर्मसु पठितम्।** (निघं०२.१४) तस्मात्प्राप्त्यर्थो गृह्यते। **(दाशुषे)** निष्कपटेन विद्यां दात्रे पुरुषार्थिने मनुष्याय **(उरूची)** बह्वीनां पदार्थविद्यानां ज्ञापिका।

उर्विति बहुनामसु पठितम्। (निघं०३.१) **(सोमपीतये)** सूयन्ते ये पदार्थास्तेषां पीतिः पानं यस्य तस्मै विदुषे मनुष्याय। अत्र **सह सुपे**ति समासः।

भौतिकपक्षे त्वयं विशेषः-**(वायो)** पवनस्य योगेनैव **(तव)** अस्य **(प्रपृञ्चती)** शब्दोच्चारणसाधिका **(धेना)** वाणी **(दाशुषे)** शब्दोच्चारणकर्त्रे **(उरूची)** बह्वर्थज्ञापिका। अन्यत्पूर्ववत्॥३॥

अन्वयः-हे वायो परमेश्वर! भवत्कृपया या तव प्रपृञ्चत्युरूची धेना सा सोमपीतये दाशुषे विदुषे जिगाति। तथा तवास्य वायो प्राणस्य प्रपृञ्चत्युरूची धेना सोमपीतये दाशुषे जीवाय जिगाति॥३॥

भावार्थः-अत्रापि श्लेषालङ्कारः। द्वितीयमन्त्रे यया वेदवाण्या परमेश्वरभौतिकयोर्गुणः प्रकाशितास्तस्याः फलप्राप्ती अस्मिन्मन्त्रे प्रकाशिते स्तः। अर्थात्प्रथमार्थे वेदविद्या द्वितीये वक्तॄणां जीवानां वाङ्निमित्तं च प्रकाश्यत इति॥३॥

पदार्थः-(वायो) हे वेदविद्या के प्रकाश करनेवाले परमेश्वर! **(तव)** आपकी **(प्रपृञ्चती)** सब विद्याओं के सम्बन्ध से विज्ञान का प्रकाश कराने, और **(उरूची)** अनेक विद्याओं के प्रयोजनों को प्राप्त करानेहारी **(धेना)** चार वेदों की वाणी है, सो **(सोमपीतये)** जानने योग्य संसारी पदार्थों के निरन्तर विचार करने, तथा **(दाशुषे)** निष्कपट से प्रीत के साथ विद्या देनेवाले पुरुषार्थी विद्वान् को **(जिगाति)** प्राप्त होती है।

दूसरा अर्थ-(वायो तव) इस भौतिक वायु के योग से जो **(प्रपृञ्चती)** शब्दोच्चारण श्रवण कराने और (उरूची) अनेक पदार्थों की जाननेवाली **(धेना)** वाणी है, सो **(सोमपीतये)** संसारी पदार्थों के पान करने योग्य रस को पीने वा **(दाशुषे)** शब्दोच्चारण श्रवण करनेवाले पुरुषार्थी विद्वान् को **(जिगाति)** प्राप्त होती है॥३॥

भावार्थः-यहां भी श्लेषालङ्कार है। दूसरे मन्त्र में जिस वेदवाणी से परमेश्वर और भौतिक वायु के गुण प्रकाश किये हैं, उसका फल और प्राप्ति इस मन्त्र में प्रकाशित की है अर्थात् प्रथम अर्थ से वेदविद्या और दूसरे से जीवों की वाणी का फल और उसकी प्राप्ति का निमित्त प्रकाश किया है॥३॥

अथोक्थप्रकाशितपदार्थानां वृद्धिरक्षणनिमित्तमुपदिश्यते।

अब जो स्तोत्रों से प्रकाशित पदार्थ हैं, उनकी वृद्धि और रक्षा के निमित्त का अगले मन्त्र में उपदेश किया है-

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्।
इन्दवो वामुशन्ति हि॥४॥

इन्द्रवायू इति। इमे। सुताः। उप। प्रयःऽभिः। आ। गतम्। इन्दवः। वाम्। उशन्ति। हि॥४॥

पदार्थः-**(इन्द्रवायू)** इमौ प्रत्यक्षौ सूर्य्यपवनौ। **इन्द्रेण रोचना दिवो दृह्ळानि दंहितानि च। स्थिराणि न पराणुदे॥**(ऋ०८.१४.९) ययेन्द्रेण सूर्य्यलोकेन प्रकाशमानाः किरणा धृताः, एवं च स्वाकर्षणशक्त्या पृथिव्यादीनि भूतानि दृढानि पुष्टानि स्थिराणि कृत्वा दृंहितानि धारितानि सन्ति। **न पराणुदे** अतो नैव स्वस्वकक्षां विहायेतस्ततो भ्रमणाय समर्थानि भवन्ति।

इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन् काशिरित्ते। (ऋ०३.३०.५) इमे चिदिन्द्र रोदसी रोधसी द्यावापृथिव्यौ विरोधनाद्रोधः (कूलं निरुणद्धि स्रोतः कूलं) रुजतेर्विपरीताल्लोष्टोऽविपर्य्ययेणापारे दूरपारे यत्संगृभ्णासि मघवन् काशिस्ते महान्। **अहस्तमिन्द्र संपिणक्कुणारुम्।** (ऋ०३.३०.८) अहस्तमिन्द्र कृत्वा संपिण्ढि परिक्वणनं मेघम्। (निरु०६.१)

यतोऽयं सूर्य्यलोको भूमिप्रकाशौ धारितवानस्ति, अत एव पृथिव्यादीनां निरोधं कुर्वन् पृथिव्यां मेघस्य च कूलं स्रोतश्चाकर्षणेन निरुणद्धि। यथा बाहुवेगेनाकाशे प्रतिक्षिप्तो लोष्ठो मृत्तिकाखण्डः पुनर्विपर्य्ययेणाकर्षणाद् भूमिमेवागच्छति, एवं दूरे स्थितानपि पृथिव्यादिलोकान् सूर्य्य एव धारयति। सोऽयं सूर्य्यस्य महानाकर्षः प्रकाशश्चास्ति। तथा वृष्टिनिमित्तोऽप्ययमेवास्ति। **इन्द्रो वै त्वष्टा।** (ऐ०६.१०) सूर्य्यो भूम्यादिस्थस्य रसस्य मेघस्य च छेत्तास्ति। एतानि भौतिकवायुविषयाणि **'वायवायाहि०'** इति मन्त्रप्रोक्तानि प्रमाणान्यत्रापि ग्राह्याणि।

(इमे सुताः) प्रत्यक्षभूताः पदार्थाः **(उप)** समीपम् **(प्रयोभिः)** तृप्तिकरैरन्नादिभिः पदार्थैः सह। **प्रीञ् तर्पणे कान्तौ चे**त्यस्मादौणादिकोऽसुन् प्रत्ययः। **(आगतम्)** आगच्छतः। लोट्मध्यमद्विवचनम्। **बहुलं छन्दसी**ति शपो लुक्। **अनुदात्तोपदेशे**त्यनुनासिकलोपः। **(इन्दवः)** जलानि क्रियामया यज्ञाः प्राप्तव्या भोगाश्च। **इन्दुरित्युदकनामसु पठितम्।** (निघं०१.१२) **यज्ञनामसु।** (निघं०३.१७) **पदनामसु च।** (निघं०५.४) **(वाम्)** तौ **(उशन्ति)** प्रकाशन्ते **(हि)** यतः॥४॥

अन्वयः-इमे सुता इन्दवो हि यतो वान्तौ सहचारिणाविन्द्रवायू प्रकाशन्ते तौ चोपागतमुपागच्छतस्ततः प्रयोभिरन्नादिभिः पदार्थैः सह सर्वे प्राणिनः सुखान्युशन्ति कामयन्ते॥४॥

भावार्थः-अस्मिन्मन्त्रे प्राप्यप्रापकपदार्थानां प्रकाशः कृत इति॥४॥

पदार्थः-**(इमे सुताः)** जैसे प्रत्यक्ष जलक्रियामय यज्ञ और प्राप्त होने योग्य भोग **(इन्द्रवायू)** सूर्य्य और पवन के योग से प्रकाशित होते हैं। यहां **'इन्द्र'** शब्द के लिये ऋग्वेद के मन्त्र का प्रमाण दिखलाते हैं-**(इन्द्रेण०)** सूर्य्यलोक ने अपनी प्रकाशमान किरण तथा पृथिवी आदि लोक अपने आकर्षण अर्थात् पदार्थ खैंचने के सामर्थ्य से पुष्टता के साथ स्थिर करके धारण किये हैं कि जिससे वे **'न पराणुदे'** अपने-अपने भ्रमणचक्र अर्थात् घूमने के मार्ग को छोड़कर इधर-उधर हटके नहीं जा सकते हैं।

(इमे चिदिन्द्र०) सूर्य्य लोक भूमि आदि लोकों को प्रकाश के धारण करने के हेतु से उनका रोकनेवाला है अर्थात् वह अपनी खैंचने की शक्ति से पृथिवी के किनारे और मेघ के जल के स्रोत को रोक रहा है। जैसे आकाश के बीच में फेंका हुआ मिट्टी का डेला पृथिवी की आकर्षण शक्ति से पृथिवी ही पर लौटकर आ पड़ता है, इसी प्रकार दूर भी ठहरे हुए पृथिवी आदि लोकों को सूर्य्य ही ने आकर्षण शक्ति की खैंच से धारण कर रक्खे हैं। इससे यही सूर्य्य बड़ा भारी आकर्षण प्रकाश और वर्षा का निमित्त है। (इन्द्रः०) यही सूर्य्य भूमि आदि लोकों में ठहरे हुए रस और मेघ को भेदन करनेवाला है। भौतिक वायु के विषय में **'वायवा याहि०'** इस मन्त्र की व्याख्या में जो प्रमाण कहे हैं, वे यहां भी जानना चाहिये।

अथवा जिस प्रकार सूर्य्य और पवन संसार के पदार्थों को प्राप्त होते हैं वैसे उनके साथ इन निमित्तों करके सब प्राणी अन्न आदि तृप्ति करनेवाले पदार्थों के सुखों की कामना कर रहे हैं। **(इन्दवः)** जो जलक्रियामय यज्ञ और प्राप्त होने योग्य भोग हैं, वे **(हि)** जिस कारण से पूर्वोक्त सूर्य्य और पवन के संयोग से **(उशन्ति)** प्रकाशित होते हैं, इसी कारण **(प्रयोभिः)** अन्नादि पदार्थों के योग से सब प्राणियों को सुख प्राप्त होता है॥४॥

भावार्थः-इस मन्त्र में परमेश्वर ने प्राप्त होने योग्य और प्राप्त करानेवाला इन दो पदार्थों का प्रकाश किया है॥४॥

एतन्मन्त्रोक्तौ सूर्य्यपवनावीश्वरेण धारितावेतत्कर्मनिमित्ते भवत इत्युपदिश्यते।

अब पूर्वोक्त सूर्य्य और पवन, जो कि ईश्वर ने धारण किये हैं, वे किस-किस कर्म की सिद्धि के निमित्त रचे गये हैं, इस विषय का अगले मन्त्र में उपदेश किया है-

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू।
तावा यातमुप द्रवत्॥५॥३॥

वायो इति। इन्द्रः। च। चेतथः। सुतानाम्। वाजिनीऽवसू इति। तौ। आ। यातम्। उप। द्रवत्॥५॥

पदार्थः-**(वायो)** ज्ञानस्वरूपेश्वर! **(इन्द्रः)** पूर्वोक्तः **(च)** अनुक्तसमुच्चयार्थे तेन वायुश्च **(चेतथः)** चेतयतः प्रकाशयित्वा धारयित्वा च संज्ञापयतः। अत्र व्यत्ययः योऽन्तर्गतो ण्यर्थश्च। **(सुतानाम्)** त्वयोत्पादितान् पदार्थान्। अत्र शेषे षष्ठी। **(वाजिनीवसू)** उषोवत्प्रकाशवेगयोर्वसतः। **वाजिनीत्युषसो नामसु पठितम्।** (निघं०१.८) **(तौ)** इन्द्रवायू **(आयातम्)** आगच्छतः। अत्रापि व्यत्ययः। **(उप)** सामीप्ये **(द्रवत्)** शीघ्रम्। **द्रवदिति क्षिप्रनामसु पठितम्।** (निघं०२.१५)॥५॥

अन्वयः-हे वायो ईश्वर! यतो भवद्रचितौ वाजिनीवसू च पूर्वोक्ताविन्द्रवायू सुतानां सुतान् भवदुत्पादितान् पदार्थान् चेतथः संज्ञापयतस्ततस्तान् पदार्थान् द्रवच्छीघ्रमुपायातमुपागच्छतः॥५॥

भावार्थः-यदि परमेश्वर एतौ न रचयेत्तर्हि कथमिमौ स्वकार्य्यकरणे समर्थौ भवत इति॥५॥

इति तृतीयो वर्गः॥

पदार्थः-हे **(वायो)** ज्ञानस्वरूप ईश्वर! आपके धारण किये हुए **(वाजिनीवसू)** प्रातःकाल के तुल्य प्रकाशमान **(इन्द्रश्च)** पूर्वोक्त सूर्य्यलोक और वायु **(सुतानाम्)** आपके उत्पन्न किये हुए पदार्थों का **(चेतथः)** धारण और प्रकाश करके उनको जीवों के दृष्टिगोचर करते हैं, इसी कारण वे **(द्रवत्)** शीघ्रता से **(आयातमुप)** उन पदार्थों के समीप होते रहते हैं॥५॥

भावार्थः-इस मन्त्र में परमेश्वर की सत्ता के अवलम्ब से उक्त इन्द्र और वायु अपने-अपने कार्य्य करने को समर्थ होते हैं, यह वर्णन किया है॥५॥

यह तीसरा वर्ग समाप्त हुआ॥

अथ तयोर्बहिरन्तः कार्य्यमुपदिश्यते।

पूर्वोक्त इन्द्र और वायु के शरीर के भीतर और बाहरले कार्य्यों का अगले मन्त्र में उपदेश किया है-

वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम्।
मक्ष्वित्था धिया नरा॥ ६॥

वायो इति। इन्द्रः। च। सुन्वतः। आ। यातम्। उप। निःऽकृतम्। मक्षु। इत्था। धिया। नरा॥ ६॥

पदार्थः-**(वायो)** सर्वान्तर्यामिन्नीश्वर! **(इन्द्रश्च)** अन्तरिक्षस्थः सूर्य्यप्रकाशो वायुर्वा। **इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा।** (अष्टा०५.२.९३) इति सूत्राशयादिन्द्रशब्देन जीवस्यापि ग्रहणम्। **प्राणो वै वायुः।** (श०ब्रा०८.१.७.२) अत्र वायुशब्देन प्राणस्य ग्रहणम्। **(सुन्वतः)** अभिनिष्पादयतः **(आ)** समन्तात् **(यातम्)** प्राप्नुतः। अत्र व्यत्ययः। **(उप)** सामीप्यम् **(निष्कृतम्)** कर्मणां फलं च **(मक्षु)** त्वरितगत्या। **मक्ष्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **(इत्था)** धारणपालनवृद्धिक्षयहेतुना। **था हेतौ च छन्दसि।** (अष्टा०५.२.२६) इति थाप्रत्ययः। **(धिया)** धारणावत्या बुद्ध्या कर्मणा वा। **धीरिति प्रज्ञानामसु पठितम्।** (निघं०३.९) **कर्मनामसु च।** (निघं०२.१) **(नरा)** नयनकर्त्तारौ। **सुपां सुलुगि**त्याकारादेशः॥६॥

अन्वयः-हे वायो! नरा नराविन्द्रवायू मक्ष्वित्था यथा सुन्वतस्तथा तौ धिया निष्कृतमुपायातमुपायातः॥६॥

भावार्थः-यथाऽत्र ब्रह्माण्डस्थाविन्द्रवायू सर्वप्रकाशकपोषकौ स्तः, एवं शरीरे जीवप्राणावपि, परन्तु सर्वत्रेश्वराधारापेक्षास्तीति॥६॥

पदार्थः-**(वायो)** हे सब के अन्तर्य्यामी ईश्वर! जैसे आपके धारण किये हुए **(नरा)** संसार के सब पदार्थों को प्राप्त करानेवाले **(इन्द्रश्च)** अन्तरिक्ष में स्थित सूर्य्य का प्रकाश और पवन हैं, वैसे ये-

'इन्द्रिय०' इस व्याकरण के सूत्र करके इन्द्र शब्द से जीव का, और **'प्राणो०'** इस प्रमाण से वायु शब्द करके प्राण का ग्रहण होता है–**(मक्षु)** शीघ्र गमन से **(इत्था)** धारण, पालन, वृद्धि और क्षय हेतु से सोम आदि सब ओषधियों के रस को **(सुन्वतः)** उत्पन्न करते हैं, उसी प्रकार **(नरा)** शरीर में रहनेवाले जीव और प्राणवायु उस शरीर में सब धातुओं के रस को उत्पन्न करके **(इत्था)** धारण, पालन, वृद्धि और क्षय हेतु से **(मक्षु)** सब अङ्गों को शीघ्र प्राप्त होकर **(धिया)** धारण करनेवाली बुद्धि और कर्मों से **(निष्कृतम्)** कर्मों के फलों को **(आयातमुप)** प्राप्त होते हैं॥६॥

भावार्थः-ब्रह्माण्डस्थ सूर्य्य और वायु सब संसारी पदार्थों को बाहर से तथा जीव और प्राण शरीर के भीतर के अङ्ग आदि को सब प्रकाश और पुष्ट करनेवाले हैं, परन्तु ईश्वर के आधार की अपेक्षा सब स्थानों में रहती है॥६॥

पुनरेतौ नामान्तरेणोपदिश्यते।

ईश्वर पूर्वोक्त सूर्य्य और वायु को दूसरे नाम से अगले मन्त्र में स्पष्ट करता है–

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्।
धियं घृताचीं साधन्ता॥७॥

मित्रम्। हुवे। पूतऽदक्षम्। वरुणम्। च। रिशादसम्। धियम्। घृताचीम्। साधन्ता॥७॥

पदार्थः–**(मित्रम्)** सर्वव्यवहारसुखहेतुं ब्रह्माण्डस्थं सूर्य्यं शरीरस्थं प्राणं वा। **मित्र इति पदनामसु पठितम्।** (निघं०५.४) अतः प्राप्त्यर्थः। **मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवज्जुहोत॥** (ऋ०३.५९.१) अत्र मित्रशब्देन सूर्य्यस्य ग्रहणम्। **प्राणो वै मित्रोऽपानो वरुणः।** (श०ब्रा०८.२.५.६) अत्र मित्रवरुणशब्दाभ्यां प्राणापानयोर्ग्रहणम्। **(हुवे)** तन्निमित्तां बाह्याभ्यन्तरपदार्थविद्यामादद्याम्। **बहुलं छन्दसी**ति विकरणाभावो व्यत्ययेनात्मनेपदं लिङर्थे लट् च। **(पूतदक्षम्)** पूतं पवित्रं दक्षं बलं यस्मिन् तम्। **दक्ष इति बलनामसु पठितम्।** (निघं०२.९) **(वरुणं च)** बहिःस्थं प्राणं शरीरस्थमपानं वा। **(रिशादसम्)** रिशा रोगाः शत्रवो वा हिंसिता येन तम्। **(धियम्)** कर्म धारणावतीं बुद्धिं वा **(घृताचीम्)** घृतं जलमञ्चति प्रापयतीति तां क्रियाम्। **घृतमित्युदकनामसु पठितम्।** (निघं०१.१२) **(साधन्ता)** सम्यक् साधयन्तौ। अत्र **सुपां सुलुगि**त्याकारादेशः॥७॥

अन्वयः-अहं शिल्पविद्यां चिकीर्षुर्मनुष्यो यौ घृताचीं धियं साधन्तौ वर्त्तेते तौ पूतदक्षं मित्रं रिशादसं वरुणं च हुवे॥७॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। यथा सूर्य्यवायुनिमित्तेन समुद्रादिभ्यो जलमुपरि गत्वा तद्वृष्ट्या सर्वस्य वृद्धिरक्षणे भवतः, एवं प्राणापानाभ्यां च शरीरस्य। अतः सर्वैर्मनुष्यैराभ्यां निमित्तीकृताभ्यां व्यवहारविद्यासिद्धेः सर्वोपकारः सदा निष्पादनीय इति॥७॥

पदार्थः-मैं विद्या का चाहने **(पूतदक्षम्)** पवित्रबल सब सुखों के देने वा **(मित्रम्)** ब्रह्माण्ड और शरीर में रहनेवाले सूर्य्य-'**मित्रो०**' इस ऋग्वेद के प्रमाण से मित्र शब्द करके सूर्य्य का ग्रहण है-तथा **(रिशादसम्)** रोग और शत्रुओं के नाश करने वा **(वरुणं च)** शरीर के बाहर और भीतर रहनेवाला प्राण और अपानरूप वायु को **(हुवे)** प्राप्त होऊं अर्थात् बाहर और भीतर के पदार्थ जिस-जिस विद्या के लिये रचे गये हैं, उन सबों को उस-उस के लिये उपयोग करूं॥७॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जैसे समुद्र आदि जलस्थलों से सूर्य्य के आकर्षण से वायु द्वारा जल आकाश में उड़कर वर्षा होने से सब की वृद्धि और रक्षा होती है, वैसे ही प्राण और अपान आदि ही से शरीर की रक्षा और वृद्धि होती है। इसलिये मनुष्यों को प्राण अपान आदि वायु के निमित्त से व्यवहार विद्या की सिद्धि करके सब के साथ उपकार करना उचित है॥७॥

केनैतावेतत्कर्म कर्त्तुं समर्थौ भवत इत्युपदिश्यते।

किस हेतु से ये दोनों सामर्थ्यवाले हैं, यह विद्या अगले मन्त्र में कही है-

ऋ॒तेन॑ मित्रावरुणावृतावृधावृतस्पृशा।

क्रतुं॑ बृ॒हन्त॑माशाथे॥८॥

ऋ॒तेन॑। मि॒त्रा॒व॒रु॒णौ॒। ऋ॒त॒ऽवृ॒धौ॒। ऋ॒त॒स्पृशा॒। क्रतु॑म्। बृ॒हन्त॑म्। आ॒शा॒थे॒॥८॥

पदार्थः-**(ऋतेन)** सत्यस्वरूपेण ब्रह्मणा। **ऋतमिति सत्यनामसु पठितम्।** (निघं०३.१०) अनेनेश्वरस्य ग्रहणम्। **ऋतमित्युदकनामसु च।** (निघं०१.१२) **(मित्रावरुणौ)** पूर्वोक्तौ। **देवताद्वन्द्वे च।** (अष्टा०६.३.२६) अनेनानङादेशः। **(ऋतावृधौ)** ऋतं ब्रह्म तेन वर्धयितारौ ज्ञापकौ जलाकर्षणवृष्टिनिमित्ते वा। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। **(ऋतस्पृशा)** ऋतस्य ब्रह्मणो वेदस्य स्पर्शयितारौ प्रापकौ जलस्य च **(क्रतुम्)** सर्वं सङ्गतं संसाराख्यं यज्ञम्। **(बृहन्तम्)** महान्तम् **(आशाथे)** व्याप्नुतः। **छन्दसि लुङ्लङ्लिटः।** (अष्टा०३.४.६) इति वर्त्तमाने लिट्। **वा छन्दसि सर्वे विधयो भवन्ती**ति नुडभावः॥८॥

अन्वयः-ऋतेनोत्पादितावृतावृधावृतस्पृशौ मित्रावरुणौ बृहन्तं क्रतुमाशाथे॥८॥

भावार्थः-ब्रह्मसहचर्य्ययैतौ ब्रह्मज्ञाननिमित्ते जलवृष्टिहेतू भूत्वा सर्वमग्न्यादिमूर्त्तामूर्त्तं जगद्व्याप्य वृद्धिक्षयकर्त्तारौ व्यवहारविद्यासाधकौ च भवत इति॥८॥

पदार्थः-**(ऋतेन)** सत्यस्वरूप ब्रह्म के नियम में बंधे हुए **(ऋतावृधौ)** ब्रह्मज्ञान बढ़ाने, जल के खींचने और वर्षाने **(ऋतस्पृशा)** ब्रह्म की प्राप्ति कराने में निमित्त तथा उचित समय पर जलवृष्टि के करनेवाले **(मित्रावरुणौ)** पूर्वोक्त मित्र और वरुण **(बृहन्तम्)** अनेक प्रकार के **(क्रतुम्)** जगत्रूप यज्ञ को **(आशाथे)** व्याप्त होते हैं॥८॥

भावार्थः-परमेश्वर के आश्रय से उक्त मित्र और वरुण ब्रह्मज्ञान के निमित्त जल वर्षानेवाले सब मूर्त्तिमान् वा अमूर्तिमान् जगत् को व्याप्त होकर उसकी वृद्धि विनाश और व्यवहारों की सिद्धि करने में हेतु होते हैं॥८॥

इमावस्माकं किं किं धारयत इत्युपदिश्यते।

वे हम लोगों के कौन-कौन पदार्थों के धारण कनरेवाले हैं, इस बात का प्रकाश अगले मन्त्र में किया है-

क॒वी नो॑ मि॒त्रावरु॑णा तुविजा॒ता उ॑रु॒क्षया॑। दक्षं॑ दधाते अ॒पस॑म्॥९॥४॥

क॒वी। नः॑। मि॒त्रावरु॑णा। तु॒वि॒ऽजा॒तौ। उ॒रु॒ऽक्षया॑। दक्ष॑म्। द॒धा॒ते॒। अ॒पस॑म्॥९॥

पदार्थः-**(कवी)** क्रान्तदर्शनौ सर्वव्यवहारदर्शनहेतू। **कविः क्रान्तदर्शनो भवति कवतेर्वा।** (निरु०१२.१३) एतन्निरुक्ताभिप्रायेण कविशब्देन सुखसाधकौ मित्रावरुणौ गृह्येते। **(नः)** अस्माकम् **(मित्रावरुणौ)** पूर्वोक्तौ **(तुविजातौ)** बहुभ्यः कारणेभ्यो बहुषु वोत्पन्नौ प्रसिद्धौ। **तुवीति बहुनामसु पठितम्।** (निघं०३.१) **(उरुक्षया)** बहुषु जगत्पदार्थेषु क्षयो निवासो ययोस्तौ। अत्र **सुपां सुलुगि**त्याकारः। **उर्विति बहुनामसु पठितम्।** (निघं०३.१) **'क्षि निवासगत्योः'** अस्य धातोरधिकरणार्थः क्षयशब्दः। **(दक्षम्)** बलम् **(दधाते)** धरतः **(अपसम्)** कर्म। **अप इति कर्मनामसु पठितम्।** (निरु०२.१) **व्यत्ययो बहुलमि**ति लिङ्व्यत्ययः। इदमपि सायणाचार्य्येण न बुद्धम्॥९॥

अन्वयः-इमौ तुविजातावुरुक्षयौ कवी मित्रावरुणौ नोऽस्माकं दक्षमपसं च दधाते धरतः॥९॥

भावार्थः-ब्रह्माण्डस्थाभ्यां बलकर्मनिमित्ताभ्यामेताभ्यां सर्वेषां पदार्थानां सर्वचेष्टाविद्ययोः पुष्टिधारणे भवत इति॥९॥

आदिमसूक्तोक्तेन शिल्पविद्यादिमुख्यनिमित्तेनाग्निनार्थेन सहचरितानां वाय्विन्द्रमित्रवरुणानां द्वितीय-सूक्तोक्तानामर्थानां सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिर्विलसनाख्यादिभिश्चान्यथैव व्याख्यातमिति बोध्यम्॥

इति द्वितीयं सूक्तं वर्गश्च चतुर्थः समाप्तः॥

पदार्थः-**(तुविजातौ)** जो बहुत कारणों से उत्पन्न और बहुतों में प्रसिद्ध **(उरुक्षया)** संसार के बहुत से पदार्थों में रहनेवाले **(कवी)** दर्शनादि व्यवहार के हेतु **(मित्रावरुणा)** पूर्वोक्त मित्र और वरुण हैं, वे **(नः)** हमारे **(दक्षम्)** बल तथा सुख वा दुःखयुक्त कर्मों को **(दधाते)** धारण करते हैं॥९॥

भावार्थः-जो ब्रह्माण्ड में रहनेवाले बल और कर्म के निमित्त पूर्वोक्त मित्र और वरुण हैं, उनसे क्रिया और विद्याओं की पुष्टि तथा धारणा होती है॥९॥

जो प्रथम सूक्त में अग्निशब्दार्थ का कथन किया है, उसके सहायकारी वायु, इन्द्र, मित्र और वरुण के प्रतिपादन करने से प्रथम सूक्तार्थ के साथ इस दूसरे सूक्तार्थ की सङ्गति समझ लेनी।

इस सूक्त का अर्थ सायणाचार्य्यादि और विलसन आदि यूरोपदेशवासी लोगों ने अन्यथा कथन किया है॥

यह दूसरा सूक्त और चौथा वर्ग समाप्त हुआ॥

अथास्य द्वादशर्चस्य तृतीयसूक्तस्य मधुच्छन्दा ऋषिः। १-३ अश्विनौ; ४-६ इन्द्रः; ७-९ विश्वेदेवाः; १०-२२ सरस्वती देवताः। १,३, ५-१०, १२ गायत्री; २ निचृद्गायत्री; ४,११ पिपीलिकामध्यानिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रादावश्विनावुपदिश्येते।

अब तृतीय सूक्त का प्रारम्भ करते हैं। इसके आदि के मन्त्र में अग्नि और जल अश्वि नाम से लिया है–

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती।
पुरुभुजा चनस्यतम्॥ १॥

अश्विना। यज्वरीः। इषः। द्रवत्ऽपाणी। शुभः।ऽपती। पुरुऽभुजा। चनस्यतम्॥ १॥

पदार्थः-(अश्विना) जलाग्नी। अत्र **सुपामि**त्याकारादेशः। **या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना ता हवामहे॥** (ऋ०१.२२.२) **नहि वामस्ति दूरके यत्रा रथेन गच्छथः।** (ऋ०१.२२.४) वयं **यौ सुरथौ** शोभना रथा याभ्यां तौ, **रथीतमा** भूयांसो रथा विद्यन्ते ययोस्तौ रथी, अतिशयेन रथी रथीतमौ देवौ शिल्पविद्यायां दिव्यगुणप्रकाशकौ, **दिविस्पृशा** विमानादियानैः सूर्य्यप्रकाशयुक्तेऽन्तरिक्षे मनुष्यादीन् स्पर्शयन्तौ, **उभा** उभौ **ता** तौ **हवामहे** गृह्णीमः। यत्र मनुष्या वां तयोरश्विनोः साधिपित्वाचलितयोः सम्बन्धयुक्तेन हि यतो गच्छन्ति तत्र गृहं विद्याधिकरणं दूरं नैव भवतीति यावत्।

अथातो द्युस्थाना देवतास्तासामश्विनौ प्रथमागामिनौ भवतोऽश्विनौ यद्ध्यश्नुवाते सर्वं रसेनान्यो ज्योतिषाऽन्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्यकेऽहोरात्रावित्येके सूर्य्याचन्द्रमसावित्येके .... हि मध्यमो ज्योतिर्भाग आदित्यः। (निरु०१२.१) तथाऽश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थस्तुर्फरीतु हन्तारौ। (निरु०१३.५) तयोः काल ऊर्ध्वमर्द्धरात्रात् प्रकाशीभावस्यानुविष्टम्भमनु तमो भागः। (निरु०१२.१)

(अथातो०) अत्र द्युस्थानोक्तत्वात् प्रकाशस्थाः प्रकाशयुक्ताः सूर्य्याग्निविद्युदादयो गृह्यन्ते, तत्र यावश्विनौ द्वौ द्वौ सम्प्रयुज्येते यौ च सर्वेषां पदार्थानां मध्ये गमनशीलौ भवतः। तयोर्मध्यादस्मिन् मन्त्रेऽश्विशब्देनाग्निजले गृह्येते। कुतः? यद्यस्माज्जलमश्वैः स्वकीयवेगादिगुणै रसेन सर्वं जगद्व्यश्नुते व्याप्तवदस्ति। तथाऽन्योऽग्निः स्वकीयैः प्रकाशवेगादिभिरश्वैः सर्वं जगद्व्यश्नुते तस्मादग्निजलयोरश्विसंज्ञा जायते। तथैव स्वकीयस्वकीयगुणैर्द्यावापृथिव्यादीनां द्वन्द्वानामप्यश्विसंज्ञा भवतीति विज्ञेयम्। शिल्पविद्याव्यवहारे यानादिषु युक्त्या योजितौ सर्वकलायन्त्रयानधारकौ यन्त्रकलाभिस्ताडितौ चेत्तदाहननेन गमयितारौ च तुर्फरीशब्देन यानेषु शीघ्रं वेगादिगुणप्रापयितारौ भवतः।

अश्विनाविति पदनामसु पठितम्। (निघं०५.६) अनेनापि गमनप्राप्तिनिमित्ते अश्विनौ गृह्येते। **(यज्वरीः)** शिल्पविद्यासम्पादनहेतून् **(इषः)** विद्यासिद्धये या इष्यन्ते ताः क्रियाः **(द्रवत्पाणी)**

द्रवच्छीघ्रवेगनिमित्ते पाणी पदार्थविद्याव्यवहारा ययोस्तौ **(शुभस्पती)** शुभस्य शिल्पकार्य्यप्रकाशस्य पालकौ। **'शुभ शुंभ दीप्तौ'** एतस्य रूपमिदम्। **(पुरुभुजा)** पुरूणि बहूनि भुञ्जि भोक्तव्यानि वस्तूनि याभ्यां तौ। **पुर्विति बहुनामसु पठितम्।** (निघं०३.१) भुगिति क्विप्प्रत्ययान्तः प्रयोगः। **सम्पदादिभ्यः क्विप्। रोगाख्यायां।** (अष्टा०३.३.१०८) इत्यस्य व्याख्याने। **(चनस्यतम्)** अन्नवदेतौ सेव्येताम्। **चायतेरन्ने ह्रस्वश्च।** (उणा०४.२००) अनेनासुन् प्रत्ययान्ताच्च नस्शब्दात् क्यच्प्रत्ययान्तो नामधातोर्लोटि मध्यमस्य द्विवचनेऽयं प्रयोगः॥१॥

अन्वयः-हे विद्वांसो! युष्माभिर्द्रवत्पाणी शुभस्पती पुरुभुजावश्विनौ यज्वरीरिषश्च चनस्यतम्॥१॥

भावार्थः-अत्रेश्वरः शिल्पविद्यासाधनमुपदिशति। यतो मनुष्याः कलायन्त्ररचनेन विमानादियानानि सम्यक् साधयित्वा जगति स्वोपकारपरोपकारनिष्पादनेन सर्वाणि सुखानि प्राप्नुयुः॥१॥

पदार्थः-हे विद्या के चाहनेवाले मनुष्यो! तुम लोग **(द्रवत्पाणी)** शीघ्र वेग का निमित्त पदार्थविद्या के व्यवहारसिद्धि करने में उत्तम हेतु **(शुभस्पती)** शुभ गुणों के प्रकाश को पालने और **(पुरुभुजा)** अनेक खाने-पीने के पदार्थों के देने में उत्तम हेतु **(अश्विना)** अर्थात् जल और अग्नि तथा **(यज्वरीः)** शिल्पविद्या का सम्बन्ध करानेवाली **(इषः)** अपनी चाही हुई अन्न आदि पदार्थों की देने वाली कारीगरी की क्रियाओं को **(चनस्यतम्)** अन्न के समान अति प्रीति से सेवन किया करो।

अब **'अश्विनी'** शब्द के विषय में निरुक्त आदि के प्रमाण दिखलाते हैं-हम लोग अच्छी अच्छी सवारियों को सिद्ध करने के लिये **(अश्विना)** पूर्वोक्त जल और अग्नि को कि जिनके गुणों से अनेक सवारियों की सिद्धि होती है, तथा **(देवौ)** जो कि शिल्पविद्या में अच्छे-अच्छे गुणों के प्रकाशक और सूर्य्य के प्रकाश से अन्तरिक्ष में विमान आदि सवारियों से मनुष्यों को पहुँचानेवाले होते हैं, **(ता)** उन दोनों को शिल्पविद्या की सिद्धि के लिये ग्रहण करते हैं। मनुष्य लोग जहां-जहां साधे हुए अग्नि और जल के सम्बन्धयुक्त रथों से जाते हैं, वहां सोमविद्यावाले विद्वानों का विद्याप्रकाश निकट ही है।

(अथा०) इस निरुक्त में जो कि द्युस्थान शब्द है, उससे प्रकाश में रहने वाले और प्रकाश से युक्त सूर्य्य अग्नि जल और पृथिवी आदि पदार्थ ग्रहण किये जाते हैं, उन पदार्थों में दो-दो के योग को **'अश्वि'** कहते हैं, वे सब पदार्थों में प्राप्त होनेवाले हैं, उनमें से यहां अश्वि शब्द करके अग्नि और जल का ग्रहण करना ठीक है, क्योंकि जल अपने वेगादि गुण और रस से तथा अग्नि अपने प्रकाश और वेगादि अश्वों से सब जगत् को व्याप्त होता है। इसी से अग्नि और जल का अश्वि नाम है। इसी प्रकार अपने-अपने गुणों से पृथिवी आदि भी दो-दो पदार्थ मिलकर अश्वि कहाते हैं।

जबकि पूर्वोक्त अश्वि धारण और हनन करने के लिये शिल्पविद्या के व्यवहारों अर्थात् कारीगरियों के निमित्त विमान आदि सवारियों में जोड़े जाते हैं, तब सब कलाओं के साथ उन सवारियों के धारण करनेवाले, तथा जब उक्त कलाओं से ताड़ित अर्थात् चलाये जाते हैं, तब अपने चलने से उन

सवारियों को चलाने वाले होते हैं, उन अश्वियों को **'तुर्फरी'** भी कहते हैं, क्योकि तुर्फरी शब्द के अर्थ से वे सवारियों में वेगादि गुणों के देनेवाले समझे जाते हैं। इस प्रकार वे अश्वि कलाघरों में संयुक्त किये हुए जल से परिपूर्ण देखने योग्य महासागर हैं। उनमें अच्छी प्रकार जाने-आने वाली नौका अर्थात् जहाज आदि सवारियों में जो मनुष्य स्थित होते हैं। उनके जाने-आने के लिये होते हैं॥ १॥

भावार्थः-इस मन्त्र में ईश्वर ने शिल्पविद्या को सिद्ध करने का उपदेश किया है, जिससे मनुष्य लोग कलायुक्त सवारियों को बनाकर संसार में अपना तथा अन्य लोगों के उपकार से सब सुख पावें॥ १॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे अश्वि किस प्रकार के हैं, सो उपदेश अगले मन्त्र में किया है-

अश्विना पुरुदंससा नरा शवीरया धिया।

धिष्ण्या वनतं गिरः॥ २॥

अश्विना। पुरुऽदंससा। नरा। शवीरया। धिया। धिष्ण्या। वनतम्। गिरः॥ २॥

पदार्थः-(**अश्विना**) अग्निजले (**पुरुदंससा**) पुरूणि बहुनि दंसांसि शिल्पविद्यार्थानि कर्माणि याभ्यां तौ। **दंस इति कर्मनामसु पठितम्।** (निघं०२.१) (**नरा**) शिल्पविद्याफलप्रापकौ (**धिष्ण्या**) यौ यानेषु वेगादीनां तीव्रतासंवपने कर्त्तव्ये धृष्टौ (**शवीरया**) वेगवत्या। **शव गता**वित्यस्माद्धातो रन्प्रत्यये टापि च शवीरेति सिद्धम्। (**धिया**) क्रियया प्रज्ञया वा। धीरिति कर्मप्रज्ञयोर्नामसु वाग्विन्द्रश्चेत्यत्रोक्तम्। (**वनतम्**) यौ सम्यग्वाणीसेविनौ स्तः। अत्र व्यत्ययः। (**गिरः**) वाचः॥ २॥

अन्वयः-हे मनुष्या! यूयं यौ पुरुदंससौ नरौ धिष्ण्यावश्विनौ शवीरया धिया गिरो वनतं वाणीसेविनौ स्तः, तौ सेवयत॥ २॥

भावार्थः-अत्राप्यग्निजलयोर्गुणानां प्रत्यक्षकरणाय मध्यमपुरुषप्रयोगत्वात् सर्वैः शिल्पिभिस्तौ तीव्रवेगवत्या मेधया पुरुषार्थेन च शिल्पविद्यासिद्धये सम्यक् सेवनीयौ स्तः। ये शिल्पविद्यासिद्धिं चिकीर्षन्ति तैस्तद्विद्या हस्तक्रियाभ्यां सम्यक् प्रसिद्धीकृत्योक्ताभ्यामश्विभ्यामुपयोगः कर्त्तव्य इति।

सायणाचार्य्यादिभिर्मध्यमपुरुषस्य निरुक्तोक्तं विशिष्टनियमाभिप्रायमविदित्वाऽस्य मन्त्रस्यार्थोऽन्यथा वर्णितः। तथैव यूरोपवासिभिर्विलसनाख्यादिभिश्चेति॥ २॥

पदार्थः-हे विद्वानो! तुम लोग (**पुरुदंससा**) जिनसे शिल्पविद्या के लिये अनेक कर्म सिद्ध होते हैं (**धिष्ण्या**) जो कि सवारियों में वेगादिकों की तीव्रता के उत्पन्न करने में प्रबल (**नरा**) उस विद्या के फल को देनेवाले और (**शवीरया**) वेग देनेवाली (**धिया**) क्रिया से कारीगरी में युक्त करने योग्य अग्नि और जल हैं, वे (**गिरः**) शिल्पविद्यागुणों की बतानेवाली वाणियों को (**वनतम्**) सेवन करनेवाले हैं, इसलिये इनसे अच्छी प्रकार उपकार लेते रहो॥ २॥

भावार्थः-यहां भी अग्नि और जल के गुणों को प्रत्यक्ष दिखाने के लिये मध्यम पुरुष का प्रयोग है। इससे सब कारीगरों को चाहिये कि तीव्र वेग देनेवाली कारीगरी और अपने पुरुषार्थ से शिल्पविद्या की सिद्धि के लिये उक्त अश्वियों की अच्छी प्रकार से योजना करें। जो शिल्पविद्या को सिद्ध करने की इच्छा करते हैं, उन पुरुषों को चाहिये कि विद्या और हस्तक्रिया से उक्त अश्वियों को प्रसिद्ध कर के उन से उपयोग लेवें।

सायणाचार्य्य आदि तथा विलसन आदि साहबों ने मध्यम पुरुष के विषय में निरुक्तकार के कहे हुए विशेष अभिप्राय को न जान कर इस मन्त्र के अर्थ का वर्णन अन्यथा किया है॥ २॥

पुनस्तावश्विनौ कीदृशावित्युपदिश्यते।

फिर भी वे अश्वि किस प्रकार के हैं, सो अगले मन्त्र में उपदेश किया है-

दस्रा॑ यु॒वाक॑वः सु॒ता नास॑त्या वृ॒क्तब॑र्हिषः।
आ या॑तं रुद्रवर्तनी॥ ३॥

दस्रा॑। यु॒वाक॑वः। सु॒ताः। नास॑त्या। वृ॒क्तब॑र्हिषः। आ। या॒त॒म्। रु॒द्र॒व॒र्त॒नी॒ इति॑ रुद्रऽवर्तनी॥ ३॥

पदार्थः-(**दस्रा**) दुःखानामुपक्षयकर्त्तारौ। **दसु उपक्षये** इत्यस्मादौणादिको रक्प्रत्ययः। (**युवाकवः**) सम्पादितमिश्रितामिश्रितक्रियाः। **यु मिश्रणे अमिश्रणे चे**त्यस्माद्धातोरौणादिक आकुः प्रत्ययः। (**सुताः**) अभिमुख्यतया पदार्थविद्यासारनिष्पादिनः। अत्र बाहुलकात्कर्तृकारक औणादिकः क्तप्रत्ययः। (**नासत्या**) न विद्यतेऽसत्यं कर्मगुणो वा ययोस्तौ। **नभ्राण्नपान्नवेदा०।** (अष्टा०६.३.७५) **नासत्यौ चाश्विनौ सत्यावेव नासत्यावित्यौर्णवाभः सत्यस्य प्रणेतारावित्याग्रायणः।** (निरु०६.१३) (**वृक्तबर्हिषः**) शिल्पफलनिष्पादिन ऋत्विजः। **वृक्तबर्हिष इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१८) (**आ**) समन्तात् (**यातम्**) गच्छतो गमयतः। अत्र व्यत्ययः, अन्तर्गतो ण्यर्थश्च। (**रुद्रवर्त्तनी**) रुद्रस्य प्राणस्य वर्त्तनिर्मार्गो ययोस्तौ॥ ३॥

अन्वयः-हे सुता युवाकवो वृक्तबर्हिषो विद्वांसः शिल्पविद्याविदो भवन्तो यौ रुद्रवर्त्तनी दस्रौ नासत्यौ पूर्वोक्तावश्विनावायातं समन्ताद् यानानि गमयतस्तौ यदा यूयं साधयिष्यथ तदोत्तमानि सुखानि प्राप्स्यथ॥ ३॥

भावार्थः-परमेश्वरो मनुष्यानुपदिशति- युष्माभिः सर्वसुखशिल्पविद्यासिद्ध्या दुःखविनाशायाग्नि-जलयोर्यथावदुपयोगः कर्त्तव्य इति॥ ३॥

पदार्थः-हे (**युवाकवः**) एक दूसरी से मिली वा पृथक् क्रियाओं को सिद्ध करने (**सुताः**) पदार्थविद्या के सार को सिद्ध करके प्रकट करने (**वृक्तबर्हिषः**) उसके फल को दिखानेवाले विद्वान् लोगो! (**रुद्रवर्त्तनी**) जिनका प्राणमार्ग है, वे (**दस्रा**) दुःखों के नाश करनेवाले (**नासत्या**) जिनमें एक भी

गुण मिथ्या नहीं **(आयातम्)** जो अनेक प्रकार के व्यवहारों को प्राप्त करानेवाले हैं, उन पूर्वोक्त अश्वियों को जब विद्या से उपकार में ले आओगे उस समय तुम उत्तम सुखों को प्राप्त होगे॥३॥

भावार्थः-परमेश्वर मनुष्यों को उपदेश करता है कि-हे मनुष्य लोगो! तुमको सब सुखों की सिद्धि से दुःखों के विनाश के लिये शिल्पविद्या में अग्नि और जल का यथावत् उपयोग करना चाहिये॥३॥

इदानीमेतद्विद्योपयोगिनाविन्द्रशब्देनेश्वरसूर्य्यावुपदिश्येते।

परमेश्वर ने अगले मन्त्र में इन्द्र शब्द से अपना और सूर्य्य का उपदेश किया है-

इन्द्रायाहि चित्रभानो सुता इमे त्वायवः।
अण्वीभिस्तना पूतासः॥४॥

इन्द्र। आ। याहि। चित्रभानो। सुताः। इमे। त्वायवः। अण्वीभिः। तना। पूतासः॥४॥

पदार्थः-(**इन्द्र**) परमेश्वर सूर्य्यो वा। अत्राह यास्काचार्य्यः-**इन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वेरां धारयत इति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति वा। तद्यदेनं प्राणैः समैन्धँस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते। इदं करणादित्याग्रायण इदं दर्शनादित्यौपमन्यव इन्दतेर्वैश्वर्य्यकर्मण इदञ्छत्रूणां दारयिता वा द्रावयिता वा दारयिता च यज्वनाम्।** (निरु०१०.८) **इन्द्राय साम गायत नेन्द्रादृते पवते धाम किंचनेन्द्रस्य नु वीर्य्याणि प्रवोचमिन्द्रे कामा अयंसत।** (निरु०७.२)

इराशब्देनान्नं पृथिव्यादिकमुच्यते। तद्दारणात्तद्दानात्तद्धारणात्। चन्द्रलोकस्य प्रकाशाय द्रवणात्तत्र रमणादित्यर्थेनेन्द्रशब्दात् सूर्य्यलोको गृह्यते। तथा सर्वेषां भूतानां प्रकाशनात् प्राणैर्जीवस्योपकरणादस्य सर्वस्य जगत उत्पादनाद् दर्शनहेतोश्च सर्वैश्वर्य्ययोगाद् दुष्टानां शत्रूणां विनाशकाद् दूरे गमकत्वाद् यज्वनां रक्षकत्वाच्चेत्यर्थादिन्द्रशब्देनेश्वरस्य ग्रहणम्। एवं परमेश्वराद्विना किञ्चिदपि वस्तु न पवते। तथा सूर्य्याकर्षणेन विना कश्चिदपि लोको नैव चलति तिष्ठति वा।

प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो रंरण्शे महिमा पृथिव्याः। नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः॥ (ऋ०६.१८.१२) यस्यायं महाप्रकाशस्य वृद्धस्य सर्वपदार्थानां जगदुत्पत्तौ सङ्घर्षकर्त्तुः सहनशीलस्य बहुपदार्थनिर्मातुरिन्द्रस्य परमैश्वर्य्यवतः परमेश्वरस्य सूर्य्यलोकस्य सृष्टेर्मध्ये महिमा प्रकाशते तस्यास्य न कश्चिच्छत्रुः, न किञ्चित्परिमाणसाधनमर्थादुपमानं नैकत्राधिकरणं चास्ति, इत्यनेनोभावर्थौ गृह्येते।

(आयाहि) समन्तात्प्राप्तो भव भवति वा **(चित्रभानो)** चित्रा आश्चर्यभूता भानवो दीप्तयो यस्य सः **(सुताः)** उत्पन्ना मूर्त्तिमन्तः पदार्थाः **(इमे)** विद्यमानाः **(त्वायवः)** त्वां तं वोपेताः। **छन्दसीणः।** (उणा०१.२) इत्यौणादिके उण्प्रत्यये कृते आयुरिति सिध्यति। त्वदित्यत्र **छान्दसो वर्णलोपो वे**त्यनेन तकारलोपः। **(अण्वीभिः)** कारणैः, प्रकाशावयवैः किरणैरङ्गुलिभिर्वा। **वोतो गुणवचनात्।**

(अष्टा०४.१.४४) अनेन ङीषि प्राप्ते व्यत्ययेन ङीन्। **(तना)** विस्तृतधनप्रदाः। **तनेति धननामसु पठितम्।** (निरु०२.१०) अत्र **सुपां सुलुगि**त्यनेनाकारादेशः। **(पूतासः)** शुद्धाः शोधिताश्च॥४॥

अन्वयः-हे चित्रभानो इन्द्र परमेश्वर! त्वमस्मानायाहि कृपया प्राप्नुहि, येन भवता इमे अण्वीभिस्तना पुष्कलद्रव्यदाः पूतासस्त्वायवः सुता उत्पादिता पदार्था वर्त्तन्ते तैर्गृहीतोपकारानस्मान्सम्पादय। तथा योऽयमिन्द्रः स्वगुणैः सर्वान् पदार्थानायाति प्राप्नोति तेनेमे अण्वीभिः किरणकारणावयवैस्तना विस्तृतप्राप्तिहेतवस्त्वायवस्तन्निमित्तप्राप्तायुषः पूतासः सुताः संसारस्थाः पदार्थाः प्रकाशयुक्ताः क्रियन्ते तैरिति पूर्ववत्॥४॥

भावार्थः-अत्र श्लेषालङ्कारेणेश्वरस्य सूर्य्यस्य वा यानि कर्माणि प्रकाश्यन्ते तानि परमार्थव्यवहारसिद्धये मनुष्यैः समुपयोक्तव्यानि सन्तीति॥४॥

पदार्थः-**(चित्रभानो)** हे आश्चर्य्यप्रकाशयुक्त **(इन्द्र)** परमेश्वर! आप हमको कृपा करके प्राप्त हूजिये। कैसे आप हैं कि जिन्होंने **(अण्वीभिः)** कारणों के भागों से **(तना)** सब संसार में विस्तृत **(पूतासः)** पवित्र और **(त्वायवः)** आपके उत्पन्न किये हुए व्यवहारों से युक्त **(सुताः)** उत्पन्न हुए मूर्तिमान् पदार्थ उत्पन्न किये हैं, हम लोग जिनसे उपकार लेनेवाले होते हैं, इससे हम लोग आप ही के शरणागत हैं।

दूसरा अर्थ-जो सूर्य्य अपने गुणों से सब पदार्थों को प्राप्त होता है, वह **(अण्वीभिः)** अपनी किरणों से **(तना)** संसार में विस्तृत **(त्वायवः)** उसके निमित्त से जीनेवाले **(पूतासः)** पवित्र **(सुताः)** संसार के पदार्थ हैं, वही इन उनको प्रकाशयुक्त करता है॥४॥

भावार्थः-यहां श्लेषालङ्कार समझना। जो-जो इस मन्त्र में परमेश्वर और सूर्य्य के गुण और कर्म प्रकाशित किये गये हैं, इनसे परमार्थ और व्यवहार की सिद्धि के लिये अच्छी प्रकार उपयोग लेना सब मनुष्यों को योग्य है॥४॥

अथेन्द्रशब्देनेश्वर उपदिश्यते।

ईश्वर ने अगले मन्त्र में अपना प्रकाश किया है-

इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः।
उप ब्रह्माणि वाघतः॥५॥

इन्द्र। आ। याहि। धिया। इषितः। विप्रऽजूतः। सुतऽवतः। उप। ब्रह्माणि। वाघतः॥५॥

पदार्थः-**(इन्द्र)** परमेश्वर! **(आयाहि)** प्राप्तो भव **(धिया)** प्रकृष्टज्ञानयुक्त्या बुद्ध्योत्तमकर्मणा वा **(इषितः)** प्रापयितव्यः **(विप्रजूतः)** विप्रैर्मेधाविभिर्विद्वद्भिर्ज्ञातः। **विप्र इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(सुतावतः)** प्राप्तपदार्थविद्यान् **(उप)** सामीप्ये **(ब्रह्माणि)** विज्ञातवेदार्थान् ब्राह्मणान्। **ब्रह्म**

वै ब्राह्मण:। (श०ब्रा०१३.१.५.३) **(वाघत:)** यज्ञविद्यानुष्ठानेन सुखसम्पादिन ऋत्विजः। **वाघत इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१८)॥५॥

अन्वय:-हे इन्द्र! धियेषित: विप्रजूतस्त्वं सुतावतो ब्रह्माणि वाघतो विदुष उपायाहि॥५॥

भावार्थ:-मनुष्यैर्मूलकारणस्येश्वरस्य संस्कृतया बुद्ध्या विज्ञानत: साक्षात्प्राप्ति: कार्य्या। नैवं विनाऽयं केनचिन्मनुष्येण प्राप्तुं शक्य इति॥५॥

पदार्थ:-**(इन्द्र)** हे परमेश्वर! **(धिया)** निरन्तर ज्ञानयुक्त बुद्धि वा उत्तम कर्म से **(इषित:)** प्राप्त होने और **(विप्रजूत:)** बुद्धिमान् विद्वान् लोगों के जानने योग्य आप **(ब्रह्माणि)** ब्राह्मण अर्थात् जिन्होंने वेदों का अर्थ और **(सुतावत:)** विद्या के पदार्थ जाने हों, तथा **(वाघत:)** जो यज्ञविद्या के अनुष्ठान से सुख उत्पन्न करनेवाले हों, इन सबों को कृपा से **(उपायाहि)** प्राप्त हूजिये॥५॥

भावार्थ:-सब मनुष्यों को उचित है कि जो सब कार्य्यजगत् की उत्पत्ति करने में आदिकारण परमेश्वर है, उसको शुद्ध बुद्धि विज्ञान से साक्षात् करना चाहिये॥५॥

अथेन्द्रशब्देन वायुरुपदिश्यते।

ईश्वर ने अगले मन्त्र में भौतिक वायु का उपदेश किया है-

इन्द्रायाहि तूतुजान उप ब्रह्माणि हरिव:।

सुते दधिष्व नश्चन:॥६॥५॥

इन्द्र। आ। याहि। तूतुजान:। उप। ब्रह्माणि। हरिव:। सुते। दधिष्व। न:। चन:॥६॥

पदार्थ:-**(इन्द्र)** अयं वायु:। **विश्वेभि: सोम्यं मध्वग्न इन्द्रेण वायुना।** (ऋ०१.१५.१०) अनेन प्रमाणेनेन्द्रशब्देन वायुर्गृह्यते। **(आ)** समन्तात् **(याहि)** याति समन्तात् प्रापयति **(तूतुजान:)** त्वरमाण:। **तूतुजान इति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **(उप)** सामीप्यम् **(ब्रह्माणि)** वेदस्थानि स्तोत्राणि **(हरिव:)** वेगाद्यश्ववान्। हरयो हरणनिमित्ता: प्रशस्ता: किरणा विद्यन्ते यस्य स:। अत्र प्रशंसायां मतुप्। **मतुवसो रु: सम्बुद्धौ छन्दसी**त्यनेन रुत्वविसर्जनीयौ। **छन्दसीर:** इत्यनेन वत्वम्। **हरी इन्द्रस्य।** (निघं०१.१५) **(सुते)** आभिमुख्यतयोत्पन्नौ वाग्व्यवहारौ **(दधिष्व)** दधते **(न:)** अस्मभ्यमस्माकं वा **(चन:)** अन्नभोजनादिव्यवहारम्॥६॥

अन्वय:-यो हरिवो वेगवान् तूतुजान इन्द्रो वायु: सुते ब्रह्माण्यायाहि समन्तात् प्राप्नोति स एव चनो दधिष्व दधते॥६॥

भावार्थ:-मनुष्यैरयं वायु: शरीरस्थ: प्राण: सर्वचेष्टानिमित्तोऽन्नपानादानयाचनविसर्जनधातु-विभागाभिसरणहेतुर्भूत्वा पुष्टिवृद्धिक्षयकरोऽस्तीति बोध्यम्॥६॥

इति पञ्चमो वर्ग:॥

पदार्थः-**(हरिवः)** जो वेगादिगुणयुक्त **(तूतुजानः)** शीघ्र चलनेवाला **(इन्द्र)** भौतिक वायु है, वह **(सुते)** प्रत्यक्ष उत्पन्न वाणी के व्यवहार में **(नः)** हमारे लिये **(ब्रह्माणि)** वेद के स्तोत्रों को **(आयाहि)** अच्छी प्रकार प्राप्त करता है, तथा वह **(नः)** हम लोगों के **(चनः)** अन्नादि व्यवहार को **(दधिष्व)** धारण करता है॥६॥

भावार्थः-जो शरीरस्थ प्राण है वह सब क्रिया का निमित्त होकर खाना पीना पकाना ग्रहण करना और त्यागना आदि क्रियाओं से कर्म का कराने तथा शरीर में रुधिर आदि धातुओं के विभागों को जगह-जगह में पहुँचानेवाला है, क्योंकि वही शरीर आदि की पुष्टि वृद्धि और नाश का हेतु है॥६॥

यह पाँचवां वर्ग समाप्त हुआ॥

अथेश्वरः प्राणिनां मध्ये ये विद्वांसः सन्ति तेषां कर्त्तव्यलक्षणे उपदिशति।

ईश्वर ने अगले मन्त्र में विद्वानों के लक्षण और आचरणों का प्रकाश किया है-

ओमा॑सश्चर्षणीधृतो॒ विश्वे॑ देवास॒ आ ग॑त।

दा॒श्वांसो॑ दा॒शुष॑: सु॒तम्॥७॥

ओमा॑सः। च॒र्ष॒णि॒ऽधृ॒तः। विश्वे॑। दे॒वा॒सः॒। आ। ग॒त॒। दा॒श्वांसः। दा॒शुष॑ः। सु॒तम्॥७॥

पदार्थः-**(ओमासः)** रक्षका ज्ञानिनो विद्याकामा उपदेशप्रीतयो विज्ञानतृप्तयो याथातथ्यावगमाः शुभगुणप्रवेशाः सर्वविद्याश्राविणः परमेश्वरप्राप्तौ व्यवहारे च पुरुषार्थिनः शुभविद्यागुणयाचिनः क्रियावन्तः सर्वोपकारमिच्छुका विज्ञाने प्रशस्ता आप्ताः सर्वशुभगुणालिङ्गिनो दुष्टगुणहिंसकाः शुभगुणदातारः सौभाग्यवन्तो ज्ञानवृद्धाः। **अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीत्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। अविसिविसिशुषिभ्यः कित्** इत्यनेनौणादिकेन सूत्रेणावधातोरोम् शब्दः सिध्यति। **ओमास इति पदनामसु पठितम्।** (निघं०४.३) **(चर्षणीधृतः)** सत्योपदेशेन मनुष्येभ्यः सुखस्य धर्तारः। **चर्षणय इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(विश्वेदेवासः)** देवा दीव्यन्ति विश्वे सर्वे च ते देवा विद्वांसश्च ते। **विश्वेदेवा इति पदनामसु पठितम्।** (निघं०५.६) **(आ गत)** समन्तात् गमयत। इत्यत्र गमधातोर्ज्ञानार्थः प्रयोगः **(दाश्वांसः)** सर्वस्याभयदातारः। **दाश्वान् साह्वान् मीढ्वांश्च।** (अष्टा०६.१.१२) अनेनायं दानार्थाद्दाशेः क्वसुप्रत्ययान्तो निपातितः। **(दाशुषः)** दातुः **(सुतम्)** यत्सोमादिकं ग्रहीतुं विज्ञानं प्रकाशयितुं चाभीष्टं वस्तु।

निरुक्तकार एनं मन्त्रमेवं समाचष्टे-**अवितारो वाऽवनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत, दत्तवन्तो दत्तवतः सुतमिति। तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते। यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते, यदेव विश्वलिङ्गमिति शाकपूणिरनत्यन्तगतस्त्वेष उद्देशो भवति बभ्रुरेक इति दश द्विपदा अलिङ्गाभूतांशः काश्यप आश्विनमेकलिङ्गमभितष्टीयं सूक्तमेकलिङ्गम्।**

(निरु०१२.४०) अत्र रक्षाकर्त्तारः सर्वे रक्षणीयाश्च सर्वे विद्वांसः सन्ति, ते च सर्वेभ्यो विद्याविज्ञानं दत्तवन्तो भवन्त्विति॥७॥

अन्वयः-हे ओमासश्चर्षणीधृतो दाश्वांसो विश्वेदेवासः सर्वे विद्वांसो दाशुषः सुतमागत समन्तादागच्छत॥७॥

भावार्थः-ईश्वरो विदुषः प्रत्याज्ञां ददाति-यूयमेकत्र विद्यालये चेतस्ततो वा भ्रमणं कुर्वन्तः सन्तोऽज्ञानिनो जनान् विदुषः सम्पादयत। यतः सर्वे मनुष्या विद्याधर्मसुशिक्षासत्क्रियावन्तो भूत्वा सदैव सुखिनः स्युरिति॥७॥

पदार्थः-**(ओमासः)** जो अपने गुणों से संसार के जीवों की रक्षा करने, ज्ञान से परिपूर्ण, विद्या और उपदेश में प्रीति रखने, विज्ञान से तृप्त, यथार्थ निश्चययुक्त, शुभगुणों को देने और सब विद्याओं को सुनाने, परमेश्वर के जानने के लिये पुरुषार्थी, श्रेष्ठ विद्या के गुणों की इच्छा से दुष्ट गुणों के नाश करने, अत्यन्त ज्ञानवान् **(चर्षणीधृतः)** सत्य उपदेश से मनुष्यों के सुख के धारण करने और कराने **(दाश्वांसः)** अपने शुभ गुणों से सबको निर्भय करनेहारे **(विश्वदेवासः)** सब विद्वान् लोग हैं, वे **(दाशुषः)** सज्जन मनुष्यों के सामने (**सुतम्**) सोम आदि पदार्थ और विज्ञान का प्रकाश **(आ गत)** नित्य करते रहें॥७॥

भावार्थः-ईश्वर विद्वानों को आज्ञा देता है कि-तुम लोग एक जगह पाठशाला में अथवा इधर-उधर देशदेशान्तरों में भ्रमते हुए अज्ञानी पुरुषों को विद्यारूपी ज्ञान देके विद्वान् किया करो, कि जिससे सब मनुष्य लोग विद्या धर्म और श्रेष्ठ शिक्षायुक्त होके अच्छे-अच्छे कर्मों से युक्त होकर सदा सुखी रहें॥७॥

पुनस्तानेवोपदिशति।

ईश्वर ने फिर भी उन्हीं विद्वानों का प्रकाश अगले मन्त्र में किया है-

विश्वे॑ दे॒वासो॑ अ॒प्तुरः॑ सु॒तमा ग॑न्त॒ तूर्ण॑यः।
उ॒स्रा इ॑व॒ स्वस॑राणि॥८॥

विश्वे॑। दे॒वास॑ः। अ॒प्तुर॑ः। सु॒तम्। आ। ग॒न्त॒। तूर्ण॑यः। उ॒स्राः ऽइ॑व। स्वस॑राणि॥८॥

पदार्थः-**(विश्वे)** समस्ताः **(देवासः)** विद्यावन्तः **(अप्तुरः)** मनुष्याणामपः प्राणान् तुतुरति विद्यादिबलानि प्राप्नुवन्ति प्रापयन्ति च ते। अयं शीघ्रार्थस्य तुरेः क्विबन्तः प्रयोगः। **(सुतम्)** अन्तःकरणाभिगतं विज्ञानं कर्तुम् **(आगन्त)** आगच्छत। अयं गमेर्लोटो मध्यमबहुवचने प्रयोगः। **बहुलं छन्दसि।** (अष्टा०२.४.७३) इत्यनेन शपो लुकि कृते **तप्तनप्तनथनाश्च।** (अष्टा०७.१.४५) इति तबादेशे पित्वादनुनासिकलोपाभावः। **(तूर्णयः)** सर्वत्र विद्यां प्रकाशयितुं त्वरमाणाः। **त्रित्वरा सम्भ्रमे** इत्यस्मात् **वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्।** (उणा०४.५३) अत्र नेरनुवर्त्तनात्तूर्णिरिति सिद्धम्। **(उस्रा इव)**

सूर्य्यकिरणा इव। **उस्रा इति रश्मिनामसु पठितम्।** (निरु०१.५) **(स्वसराणि)** अहानि। **स्वसराणीत्यहर्नामसु पठितम्।** (निरु०१.९)॥८॥

अन्वयः-हे अप्तुरस्तूर्णयो विश्वेदेवा यूयं स्वसराणि प्रकाशयितुं उस्राः किरणा इव सुतं कर्मोपासनाज्ञानरूपं व्यवहारं प्रकाशयितुमागन्त नित्यमागच्छत समन्तात्प्राप्नुत॥८॥

भावार्थः-अत्रोपमालङ्कारः। ईश्वरेणैतन्मन्त्रेणेयमाज्ञा दत्ता-हे सर्वे विद्वांसो नैव युष्माभिः कदाचिदपि विद्यादिशुभगुणप्रकाशकरणे विलम्बालस्ये कर्त्तव्ये। यथा दिवसे सर्वे मूर्तिमन्तः पदार्थाः प्रकाशिता भवन्ति तथैव युष्माभिरपि सर्वे विद्याविषयाः सदैव प्रकाशिता कार्य्या इति॥८॥

पदार्थः-हे **(अप्तुरः)** मनुष्यों को शरीर और विद्या आदि का बल देने, और **(तूर्णयः)** उस विद्या आदि के प्रकाश करने में शीघ्रता करनेवाले **(विश्वेदेवासः)** सब विद्वान् लोगो! जैसे **(स्वसराणि)** दिनों को प्रकाश करने के लिये **(उस्रा इव)** सूर्य्य की किरण आती-जाती हैं, वैसे ही तुम भी मनुष्यों के समीप **(सुतम्)** कर्म, उपासना और ज्ञान को प्रकाश करने के लिये **(आगन्त)** नित्य आया-जाया करो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। ईश्वर ने जो आज्ञा दी है, इसको सब विद्वान् निश्चय करके जान लेवें कि विद्या आदि शुभगुणों के प्रकाश करने में किसी को कभी थोड़ा भी विलम्ब वा आलस्य करना योग्य नहीं है। जैसे दिन की निकासी में सूर्य्य सब मूर्त्तिमान् पदार्थों का प्रकाश करता है, वैसे ही विद्वान् लोगों को भी विद्या के विषयों का प्रकाश सदा करना चाहिये॥८॥

एते कीदृशस्वभावा भूत्वा किं सेवेरन्नित्युपदिश्यते।

विद्वान् लोग कैसे स्वभाववाले होकर कैसे कर्मों को सेवें, इस विषय को ईश्वर ने अगले मन्त्र में दिखाया है-

विश्वे॑ दे॒वासो॑ अ॒स्रिध॒ एहि॑मायासो अ॒द्रुहः॑।
मेधं॑ जुषन्त॒ वह्न॑यः॥९॥

विश्वे॑। दे॒वासः॑। अ॒स्रिधः॑। एहि॑ऽमायासः। अ॒द्रुहः॑। मेध॑म्। जु॒ष॒न्त॒। वह्न॑यः॥९॥

पदार्थः-**(विश्वे)** समस्ताः **(देवासः)** वेदपारगाः **(अस्रिधः)** अक्षयविज्ञानवन्तः। क्षयार्थस्य नञ्पूर्वकस्य स्रिधेः क्विबन्तस्य रूपम्। **(एहिमायासः)** आसमन्ताच्चेष्टायां प्रज्ञा येषां ते। चेष्टार्थस्याङ्पूर्वस्य ईहधातोः **सर्वधातुभ्य इन्।** (उणा०४.११९) इतीन्प्रत्ययान्तं रूपम्। **मायेति प्रज्ञानामसु पठितम्।** (निघं०३.९) **(अद्रुहः)** द्रोहरहिताः **(मेधम्)** ज्ञानक्रियामयं शुद्धं यज्ञं सर्वैर्विद्वद्भिः शुभैर्गुणैः कर्मभिर्वा सह सङ्गमम्। **मेध इति यज्ञनामसु पठितम्।** (निघं०३.१७) **(जुषन्त)** प्रीत्या सेवध्वम्। **(वह्नयः)** सुखस्य वोढारः। अयं वहेर्निप्रत्ययान्तः प्रयोगः वह्नयो वोढारः। (निरु०८.३)॥९॥

अन्वयः-हे एहिमायासोऽस्रिधोऽदुहो वह्नयो विश्वेदेवासो भवन्तो ज्ञानक्रियाभ्यां मेधं सेधनीयं यज्ञं जुषन्त॥९॥

भावार्थः-ईश्वर आज्ञापयति-भो विद्वांसः! परक्षयद्रोहरहिता विशालविद्यया क्रियावन्तो भूत्वा सर्वेभ्यो मनुष्येभ्यो विद्यासुखयोः सदा दातारो भवन्त्विति॥९॥

पदार्थः-**(एहिमायासः)** हे क्रिया में बुद्धि रखनेवाले **(अस्रिधः)** दृढ़ ज्ञान से परिपूर्ण **(अदुहः)** द्रोहरहित **(वह्नयः)** संसार को सुख पहुँचानेवाले **(विश्वे)** सब **(देवासः)** विद्वान् लोगो! तुम **(मेधम्)** ज्ञान और क्रिया से सिद्ध करने योग्य यज्ञ को प्रीतिपूर्वक यथावत् सेवन किया करो॥९॥

भावार्थः-ईश्वर आज्ञा देता है कि-हे विद्वान् लोगो! तुम दूसरे के विनाश और द्रोह से रहित तथा अच्छी विद्या से क्रियावाले होकर सब मनुष्यों को सदा विद्या से सुख देते रहो॥९॥

तैः कीदृशी वाक् प्राप्तमेष्टव्येत्युपदिश्यते।

विद्वानों को किस प्रकार की वाणी की इच्छा करनी चाहिये, इस विषय को अगले मन्त्र में ईश्वर ने कहा है-

पा॒व॒का न॒: सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती।
य॒ज्ञं व॑ष्टु धि॒याव॑सुः॥१०॥

पा॒व॒का। न॒:। सर॑स्वती। वाजे॑भिः। वा॒जिनी॑ऽवती। य॒ज्ञम्। व॒ष्टु॒। धि॒याऽव॑सुः॥१०॥

पदार्थः-**(पावका)** पावं पवित्रकारकं व्यवहारं कायति शब्दयति या सा। **'पूञ् पवने'** इत्यस्माद्भावार्थे घञ्। तस्मिन् सति **'कै शब्दे'** इत्यस्मात् **आतोऽनुपसर्गे कः।** (अष्टा०३.२.३) **उपपदमतिङ्।** (अष्टा०२.२.१९) इति समासः। **(नः)** अस्माकम् **(सरस्वती)** सरसः प्रशंसिता ज्ञानादयो गुणा विद्यन्ते यस्यां सा सर्वविद्याप्रापिका वाक्। **सर्वधातुभ्योऽसुन्।** (उणा०४.१८९) अनेन गत्यर्थात् सृधातोरसुन्प्रत्ययः। सरन्ति प्राप्नुवन्ति सर्वा विद्या येन तत्सरः। अस्मात्प्रशंसायां मतुप्। **सरस्वतीति वाङ्नामसु पठितम्।** (निघं०१.११) **(वाजेभिः)** सर्वविद्याप्राप्ति-निमित्तैरन्नादिभिः सह। **वाज इत्यन्ननामसु पठितम्।** (निरु०२.७) **(वाजिनीवती)** सर्वविद्यासिद्धक्रियायुक्ता। वाजिनः क्रियाप्राप्तिहेतवो व्यवहारस्तद्वती। **वाजिन इति पदनामसु पठितम्।** (निघं०५.६) अनेन वाजिनीति गमनार्था प्राप्त्यर्था च क्रिया गृह्यते। **(यज्ञम्)** शिल्पिविद्यामहिमानं कर्म च। **यज्ञो वै महिमा।** (श०ब्रा०६.२.३.१८) **यज्ञो वै कर्म।** (श०ब्रा०१.१.२.१) **(वष्टु)** कामसिद्धिप्रकाशिका भवतु। **(धियावसुः)** शुद्धकर्मणा सहवासप्रापिका। **तत्पुरुषे कृति बहुलम्।** (अष्टा०६.३.१४) अनेन तृतीयातत्पुरुषे विभक्त्यलुक् सायणाचार्य्यस्तु बहुव्रीहिसमासमङ्गीकृत्य छान्दसोऽलुगिति प्रतिज्ञातवान्। अत एवैतद् भ्रान्त्या व्याख्यातवान्।

इमामृचं निरुक्तकार एवं समाचष्टे-**पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्मवसुः।** (निरु०११.२६) अत्रान्नवतीति विशेषः॥१०॥

अन्वयः-या वाजेभिर्वाजिनीवती धियावसुः पावका सरस्वती वागस्ति सास्माकं शिल्पविद्यामहिमानं कर्म च यज्ञं वष्टु तत्प्रकाशयित्री भवतु॥१०॥

भावार्थः-ईश्वरोऽभिवदति-सर्वैर्मनुष्यैः सत्याभ्यां विद्याभाषणाभ्यां युक्ता क्रियाकुशला सर्वोपकारिणी स्वकीया वाणी सदैव सम्भावनीयेति॥१०॥

पदार्थः-(**वाजेभिः**) जो सब विद्या की प्राप्ति के निमित्त अन्न आदि पदार्थ हैं, और जो उनके साथ (**वाजिनीवती**) विद्या से सिद्ध की हुई क्रियाओं से युक्त (**धियावसुः**) शुद्ध कर्म के साथ वास देने और (**पावका**) पवित्र करनेवाले व्यवहारों को चितानेवाली (**सरस्वती**) जिसमें प्रशंसा योग्य ज्ञान आदि गुण हों ऐसी उत्तम सब विद्याओं को देनेवाली वाणी है, वह हम लोगों के (**यज्ञम्**) शिल्पविद्या के महिमा और कर्मरूप यज्ञ को (**वष्टु**) प्रकाश करनेवाली हो॥१०॥

भावार्थः-सब मनुष्यों को चाहिये कि वे ईश्वर की प्रार्थना और अपने पुरुषार्थ से सत्य विद्या और सत्य वचनयुक्त कामों में कुशल और सब के उपकार करनेवाली वाणी को प्राप्त रहें, यह ईश्वर का उपदेश है॥१०॥

पुनः सा कीदृशीत्युपदिश्यते।

ईश्वर ने वह वाणी किस प्रकार की है, इस बात का उपदेश अगले मन्त्र में किया है-

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्।
यज्ञं दधे सरस्वती॥११॥

चोदयित्री। सूनृतानाम्। चेतन्ती। सुऽमतीनाम्। यज्ञम्। दधे। सरस्वती॥११॥

पदार्थः-(**चोदयित्री**) शुभगुणग्रहणप्रेरिका (**सूनृतानाम्**) सुतरामूनयत्यनृतं यत्कर्म तत् सून् तदृतं यथार्थं सत्यं येषां ते सूनृतास्तेषाम्। अत्र '**ऊन परिहाणे**' अस्मात् **क्विप् चे**ति क्विप्। (**चेतन्ती**) सम्पादयन्ती सती (**सुमतीनाम्**) शोभना मतिर्बुद्धिर्येषां ते सुमतयस्तेषां विदुषाम् (**यज्ञम्**) पूर्वोक्तम्। (**दधे**) दधाति। **छन्दसि लुङ्लङ्लिटः।** (अष्टा०३.४.६) अनेन वर्त्तमाने लिट्॥११॥

अन्वयः-या सूनृतानां सुमतीनां विदुषां चेतन्ती चोदयित्री सरस्वत्यस्ति, सैव वेदविद्या संस्कृता वाक् यज्ञं दधे दधाति॥११॥

भावार्थः-या किलाप्तानां सत्यलक्षणा पूर्णविद्यायुक्ता छलादिदोषरहिता यथार्थवाणी वर्त्तते, सा मनुष्याणां सत्यज्ञानाय भवितुमर्हति नेतरेषामिति॥११॥

पदार्थः-(**सूनृतानाम्**) जो मिथ्या वचन के नाश करने, सत्य वचन और सत्य कर्म को सदा सेवन करने (**सुमतीनाम्**) अत्यन्त उत्तम बुद्धि और विद्यावाले विद्वानों की (**चेतन्ती**) समझने तथा

(चोदयित्री) शुभगुणों को ग्रहण करानेहारी **(सरस्वती)** वाणी है, वही सब मनुष्यों के शुभ गुणों के प्रकाश करानेवाले यज्ञ आदि कर्म धारण करनेवाली होती है॥११॥

भावार्थः-जो आप्त अर्थात् पूर्ण विद्यायुक्त और छल आदि दोषरहित विद्वान् मनुष्यों की सत्य उपदेश करानेवाली यथार्थ वाणी है, वही सब मनुष्यों के सत्य ज्ञान होने के लिये योग्य होती है, अविद्वानों की नहीं॥११॥

पुनः सा कीदृशीत्युपदिश्यते

ईश्वर ने फिर भी वह वाणी कैसी है, इस बात का प्रकाश अगले मन्त्र में किया है-

म॒हो अर्ण॒: सर॑स्वती॒ प्रचे॑तयति के॒तुना॑।
धियो॒ विश्वा॒ वि रा॑जति॥ १२॥ ६॥ १॥

म॒हः। अर्ण॑:। सर॑स्वती। प्र। चे॒त॒य॒ति। के॒तुना॑। धिय॑:। विश्वा॑:। वि। रा॒ज॒ति॥ १२॥

पदार्थः-**(महः)** महत्। अत्र **सर्वधातुभ्योऽसुन्नि**त्यसुन्प्रत्ययः। **(अर्णः)** जलार्णवमिव शब्दसमुद्रम्। **उदके नुट् च।** (उणा०४.१९७) अनेन सूत्रेणार्तेरसुन्प्रत्ययः। **अर्ण इत्युदकनामसु पठितम्।** (निघं०१.१२) **(सरस्वती)** वाणी **(प्र)** प्रकृष्टार्थे **(चेतयति)** सम्यङ् ज्ञापयति **(केतुना)** शोभनकर्मणा प्रज्ञया वा। **केतुरिति प्रज्ञानामसु पठितम्।** (निघं०३.९) **(धियः)** मनुष्याणां धारणावतीर्बुद्धीः **(विश्वाः)** सर्वाः **(वि)** विशेषार्थे **(राजति)** प्रकाशयति। अत्रान्तर्भावितो ण्यर्थः।

निरुक्तकार एनं मन्त्रमेवं समाचष्टे-**महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभिविराजति वागर्थेषु विधीयते तस्मान्माध्यमिकां वाचं मन्यन्ते वाग्वाख्याता।** (निरु०११.२७)॥१२॥

अन्वयः-या सरस्वती केतुना महदर्णः खलु जलार्णवमिव शब्दसमुद्रं प्रकृष्टतया सम्यग् ज्ञापयति सा प्राणिनां विश्वा धियो विराजति विविधतयोत्तमा बुद्धीः प्रकाशयति॥१२॥

भावार्थः-अत्र वाचकोपमेयलुप्तोपमालङ्कारः। यथा वायुना चालितः सूर्य्येण प्रकाशितो जलरत्नोर्मिसहितो महान् समुद्रोऽनेकेव्यवहाररत्नप्रदो वर्त्तते तथैवास्याकाशस्थस्य वेदस्थस्य च महतः शब्दसमुद्रस्य प्रकाशहेतुर्वेदवाणी विदुषामुपदेशश्चेतरेषां मनुष्याणां यथार्थतया मेधाविज्ञानप्रदो भवतीति॥१२॥

सूक्तद्वयसम्बन्धिनोऽर्थस्योपदेशानन्तरमनेन तृतीयसूक्तेन क्रियाहेतुविषयस्याश्विशब्दार्थमुक्त्वा तत्सिद्धिकर्तॄणां विदुषां स्वरूपलक्षणमुक्त्वा विद्वद्भवनहेतुना सरस्वतीशब्देन सर्वविद्याप्राप्तिनिमित्तार्था वाक् प्रकाशितेति वेदितव्यम्। द्वितीयसूक्तोक्तानां वाय्विन्द्रादीनामर्थानां सम्बन्धे तृतीयसूक्तप्रतिपादितानामश्विविद्वत्सरस्वत्यर्थानामन्वयाद् द्वितीयसूक्तोक्तार्थेन सहास्य तृतीयसूक्तोक्तार्थस्य सङ्गतिरस्तीति बोध्यम्।

अस्य सूक्तस्यार्थः सायणाचार्य्यादिभिरन्यथैव वर्णितः। तत्र प्रथमं तस्यायं भ्रमः-**'द्विविधा हि सरस्वती विग्रहवद्देवता नदीरूपा च। तत्र पूर्वाभ्यामृग्भ्यां विग्रहवती प्रतिपादिता। अनया तु नदीरूपा प्रतिपाद्यते।'** इत्यनेन कपोलकल्पनयाऽयमर्थो लिखित इति बोध्यम्। एवमेव व्यर्था कल्पनाऽध्यापक-विलसनाख्यादीनामप्यस्ति। ये विद्यामप्राप्य व्याख्यातारो भवन्ति तेषामन्धवत्प्रवृत्तिर्भवतीत्यत्र किमाश्चर्य्यम्॥

इति प्रथमोऽनुवाकस्तृतीयं सूक्तं षष्ठश्च वर्गः समाप्तः॥

पदार्थः-जो **(सरस्वती)** वाणी **(केतुना)** शुभ कर्म अथवा श्रेष्ठ बुद्धि से **(महः)** अगाध **(अर्णः)** शब्दरूपी समुद्र को **(प्रचेतयति)** जनानेवाली है, वही मनुष्यों की **(विश्वाः)** सब बुद्धियों को विशेष करके प्रकाश करती है॥१२॥

भावार्थः-इस मन्त्र में वाचकोपमेय लुप्तोपमालङ्कार दिखलाया है। जैसे वायु से तरङ्गयुक्त और सूर्य्य से प्रकाशित समुद्र अपने रत्न और तरङ्गों से युक्त होने के कारण बहुत उत्तम व्यवहार और रत्नादि की प्राप्ति में बड़ा भारी माना जाता है, वैसे ही जो आकाश और वेद का अनेक विद्यादि गुणवाला शब्दरूपी महासागर को प्रकाश करानेवाली वेदवाणी का उपदेश है, वही साधारण मनुष्यों की यथार्थ बुद्धि का बढ़ानेवाला होता है॥१२॥

और जो दूसरे सूक्त की विद्या का प्रकाश करके क्रियाओं का हेतु अश्विशब्द का अर्थ और उसके सिद्ध करनेवाले विद्वानों का लक्षण तथा विद्वान् होने का हेतु सरस्वती शब्द से सब विद्याप्राप्ति का निमित्त वाणी के प्रकाश करने से जान लेना चाहिये कि दूसरे सूक्त के अर्थ के साथ तीसरे सूक्त के अर्थ की सङ्गति है।

इस सूक्त का अर्थ सायणाचार्य्य आदि नवीन पण्डितों ने बुरी प्रकार से वर्णन किया है। उनके व्याख्यानों में पहले सायणाचार्य्य का भ्रम दिखलाते हैं। उन्होंने सरस्वती शब्द के दो अर्थ माने हैं। एक अर्थ से देहवाली देवतारूप और दूसरे से नदीरूप सरस्वती मानी है। तथा उनने यह भी कहा है कि इस सूक्त में पहले दो मन्त्र से शरीरवाली देवरूप सरस्वती का प्रतिपादन किया है, और अब इस मन्त्र से नदीरूप सरस्वती को वर्णन करते हैं। जैसे यह अर्थ उन्होंने अपनी कपोलकल्पना से विपरीत लिखा है, इसी प्रकार अध्यापक विलसन की व्यर्थ कल्पना जाननी चाहिये। क्योंकि जो मनुष्य विद्या के बिना किसी ग्रन्थ की व्याख्या करने को प्रवृत्त होते हैं, उनकी प्रवृत्ति अन्धों के समान होती है॥

यह प्रथम अनुवाक, तीसरा सूक्त और छठा वर्ग समाप्त हुआ॥

अथास्य दशर्चस्य चतुर्थसूक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवता। १,२, ४-९ गायत्री; ३ विराड्गायत्री; १० निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्र प्रथममन्त्रेणोक्तविद्याप्रपूर्त्यर्थमिदमुपदिश्यते।

अब चौथे सूक्त का आरम्भ करते हैं। ईश्वर ने इस सूक्त के पहिले मन्त्र में उक्त-विद्या के पूर्ण करनेवाले साधन का प्रकाश किया है-

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे।
जुहूमसि द्यविद्यवि॥ १॥

सुरूपऽकृत्नुम्। ऊतये। सुदुघाम्ऽइव। गोदुहे। जुहूमसि। द्यविऽद्यवि॥ १॥

पदार्थः-**(सुरूपकृत्नुम्)** य इन्द्रः सूर्य्यः सर्वान्पदार्थान् स्वप्रकाशेन स्वरूपान् करोतीति तम्। **कृहनिभ्यां कृत्नुः।** (उणा०३.२८) अनेन क्तनुप्रत्ययः। उपपदसमासः। **इन्द्रो दिव इन्द्र ईशे पृथिव्याः।** (ऋ०१०.८९.१०) **नेन्द्रादृते पवते धाम किं चन॥** (ऋ०९.६९.६, निरु०७.२) (निरु०७.२) अहमिन्द्रः परमेश्वरः सूर्य्यं पृथिवीं च ईशे रचितवानस्मीति तेनोपदिश्यते। तस्मादिन्द्राद्विना किञ्चिदपि धाम न पवते न पवित्रं भवति। **(ऊतये)** विद्याप्राप्तये। अवधातोः प्रयोगः। **ऊतियूति०।** (अष्टा०३.३.९७) अस्मिन्सूत्रे निपातितः। **(सुदुघामिव)** यथा कश्चिन्मनुष्यो बहुदुग्धदात्र्या गोः पयो दुग्ध्वा स्वाभीष्टं प्रपूरयति तथा। **दुहः कप घश्च।** (अष्टा०३.२.७०) इति सुपूर्वाद् दुहधातोः कप्प्रत्ययो घादेशश्च। **(गोदुहे)** गोर्दोग्ध्रे दुग्धादिकमिच्छवे मनुष्याय। **सत्सूद्विष०।** (अष्टा०३.२.६१) इति सूत्रेण क्विप्प्रत्ययः। **(जुहूमसि)** स्तुमः। **बहुलं छन्दसि।** (अष्टा०२.४.७६) अनेन शपः स्थाने श्लुः। **अभ्यस्तस्य च।** (अष्टा०६.१.३३) अनेन सम्प्रसारणम्। **सम्प्रसारणाच्च।** (अष्टा०६.१.१०८) अनेन पूर्वरूपम्। **हलः।** (अष्टा०६.४.२) इति दीर्घः। **इदन्तो मसि।** (अष्टा०७.१.४६) अनेन मसेरिकारागमः। **(द्यविद्यवि)** दिने दिने। **नित्यवीप्सयोः।** (अष्टा०८.१.४) अनेन द्वित्वम्। **द्यविद्यवीत्यहर्नामसु पठितम्।** (निघं०१.९)॥१॥

अन्वयः-गोदुहे दुग्धादिकमिच्छवे मनुष्याय दोहनसुलभां गामिव वयं द्यविद्यवि प्रतिदिनं सविद्यानां स्वेषामूतये विद्याप्राप्तये सुरूपकृत्नुमिन्द्रं परमेश्वरं जुहूमसि स्तुमः॥१॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्या गोर्दुग्धं प्राप्य स्वप्रयोजनानि साधयन्ति तथैव धार्मिका विद्वांसः परमेश्वरोपासनया श्रेष्ठविद्यादिगुणान् प्राप्य स्वकार्य्याणि प्रपूरयन्तीति॥१॥

पदार्थः-जैसे दूध की इच्छा करनेवाला मनुष्य दूध दोहने के लिये सुलभ दुहानेवाली गौओं को दोहके अपनी कामनाओं को पूर्ण कर लेता है, वैसे हम लोग **(द्यविद्यवि)** सब दिन अपने निकट स्थित मनुष्यों को **(ऊतये)** विद्या की प्राप्ति के लिये **(सुरूपकृत्नुम्)** परमेश्वर जो कि अपने प्रकाश से सब पदार्थों को उत्तम रूपयुक्त करनेवाला है, उसकी **(जुहूमसि)** स्तुति करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य गाय के दूध को प्राप्त होके अपने प्रयोजन को सिद्ध करते हैं, वैसे ही विद्वान् धार्मिक पुरुष भी परमेश्वर की उपासना से श्रेष्ठ विद्या आदि गुणों को प्राप्त होकर अपने-अपने कार्य्यों को पूर्ण करते हैं॥१॥

अथेन्द्रशब्देन सूर्य्य उपदिश्यते।

अगले मन्त्र में ईश्वर ने इन्द्र शब्द से सूर्य्य के गुणों का वर्णन किया है-

उप॑ नः सव॒नागॅहि॒ सोम॑स्य सोमपाः पिब।

गो॒दा इद्रे॒वतो॒ मद॑ः॥ २॥

उप॑। नः। सव॑ना। आ। ग॒हि॒। सोम॑स्य। सो॒म॒ऽपाः॒। पि॒ब॒। गो॒ऽदाः। इत्। रे॒वत॑ः। मद॑ः॥ २॥

पदार्थः-(**उप**) सामीप्ये (**नः**) अस्माकम् (**सवना**) ऐश्वर्ययुक्तानि वस्तूनि प्रकाशयितुम्। **सु प्रसवैश्वर्य्ययोः** इत्यस्माद्धातोर्ल्युट् प्रत्ययः (अष्टा०३.३.११४) **शेश्छन्दसि बहुलम**िति शेर्लुक्। (**आगहि**) आगच्छति। शपो लुकि सति **वाच्छन्दसी**ति हेरपित्वा**दनुदात्तोपदेश०।** (अष्टा०६.४.३७) इत्यनुनासिकलोपः लडर्थे लोट् च। (**सोमस्य**) उत्पन्नस्य कार्य्यभूतस्य जगतो मध्ये (**सोमपाः**) सर्वपदार्थरक्षकः सन् (**पिब**) पिबति। अत्र व्यत्ययः लडर्थे लोट् च। (**गोदा**) चक्षुरिन्द्रियव्यवहारप्रदः। **क्विप् च**ेति क्विप् प्रत्ययः। **गौरिति पदनामसु पठितम्।** (निघं०५.५) जीवो येन रूपं जानाति तस्माच्चक्षुर्गौः। (**इत्**) एव (**रेवतः**) पदार्थप्राप्तिमतो जीवस्य। **छन्दसीर** इति वत्वम्। (**मदः**) हर्षकरः॥२॥

अन्वयः-यतोऽयं सोमपा गोदा इन्द्रः सूर्य्यः सोमस्य जगतो मध्ये स्वकिरणैः सवना सवनानि प्रकाशयितुमुपागहि उपागच्छति तस्मादेव नोऽस्माकं रेवतः पुरुषार्थिनो जीवस्य च हर्षकरो भवति॥२॥

भावार्थः-सूर्य्यस्यः प्रकाशे सर्वे जीवाः स्वस्य स्वस्य कर्मानुष्ठानाय विशेषतः प्रवर्त्तन्ते नैवं रात्रौ कश्चित्सुखतः कार्य्याणि कर्त्तुं शक्नोतीति॥२॥

पदार्थान्वयभाषा-(**सोमपाः**) जो सब पदार्थों का रक्षक और (**गोदाः**) नेत्र के व्यवहार को देनेवाला सूर्य्य अपने प्रकाश से (**सोमस्य**) उत्पन्न हुए कार्य्यरूप जगत् में (**सवना**) ऐश्वर्य्ययुक्त पदार्थों के प्रकाश करने को अपनी किरण द्वारा सन्मुख (**आगहि**) आता है, इसी से यह (**नः**) हम लोगों तथा (**रेवतः**) पुरुषार्थ से अच्छे-अच्छे पदार्थों को प्राप्त होनेवाले पुरुषों को (**मदः**) आनन्द बढ़ाता है॥२॥

भावार्थः-जिस प्रकार सब जीव सूर्य्य के प्रकाश में अपने-अपने कर्म करने को प्रवृत्त होते हैं, उस प्रकार रात्रि में सुख से नहीं हो सकते॥२॥

येनायं सूर्य्यो रचितस्तं कथं जानीमेत्युपदिश्यते।

जिसने सूर्य्य को बनाया है, उस परमेश्वर ने अपने जानने का उपाय अगले मन्त्र में जनाया है-

अथा॑ ते॒ अन्त॑मानां वि॒द्याम॑ सुमती॒नाम्।

मा नो॒ अति॑ख्य॒ आग॑हि॥ ३॥

अथ॑। ते॒। अन्त॑मानाम्। वि॒द्याम॑। सु॒म॒ती॒नाम्। मा। नः॒। अति॑ख्यः। आ। ग॒हि॒॥ ३॥

पदार्थः-(**अथ**) अनन्तरार्थे। **निपातस्य चे**ति दीर्घः। (**ते**) तव (**अन्तमानाम्**) अन्तः सामीप्यमेषामस्ति तेऽन्तिका, अतिशयेनान्तिका अन्तमास्तत्समागमेन। अत्रान्तिकशब्दात्तमपि कृते पृषोदरादित्वात्तिकलोपः। **अन्तमानामित्यन्तिकनामसु पठितम्।** (निघं०२.१६) (**विद्याम**) जानीयाम (**सुमतीनाम्**) वेदादिशास्त्रे परोपकारे धर्माचरणे च श्रेष्ठा मतिर्येषां मनुष्याणाम्। **मतय इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**मा**) निषेधार्थे (**नः**) अस्मान् (**अतिख्यः**) उपदेशोल्लङ्घनं मा कुर्याः (**आगहि**) आगच्छ॥ ३॥

अन्वयः-हे परमैश्वर्य्यवन्निन्द्र परमेश्वर! वयं ते तवान्तमानामर्थात्त्वां ज्ञात्वा त्वन्निकटे त्वदाज्ञायां च स्थितानां सुमतीनामाप्तानां विदुषां समागमेन त्वां विजानीयाम। त्वन्नोऽस्मानागच्छास्मदात्मनि प्रकाशितो भव। अथान्तर्यामितया स्थितः सन्सत्यमुपदेशं मातिख्यः कदाचिदस्योल्लङ्घनं मा कुर्य्याः॥ ३॥

भावार्थः-यदा मनुष्या धार्मिकाणां विद्वत्तमानां सकाशाच्छिक्षाविद्ये प्राप्नुवन्ति तदा नैव पृथिवीमारभ्य परमेश्वरपर्यन्तान् पदार्थान् विदित्वा सुखिनो भूत्वा पुनस्ते कदाचिदन्तर्यामीश्वरोपदेशं विहायेतस्ततो भ्रमन्तीति॥ ३॥

पदार्थः-हे परम ऐश्वर्ययुक्त परमेश्वर! (**ते**) आपके (**अन्तमानाम्**) निकट अर्थात् आपको जानकर आपके समीप तथा आपकी आज्ञा में रहनेवाले विद्वान् लोग, जिन्हों की (**सुमतीनाम्**) वेदादिशास्त्र परोपकाररूपी धर्म करने में श्रेष्ठ बुद्धि हो रही है, उनके समागम से हम लोग (**विद्याम**) आपको जान सकते हैं, और आप (**नः**) हमको (**आगहि**) प्राप्त अर्थात् हमारे आत्माओं में प्रकाशित हूजिये, और (**अथ**) इसके अनन्तर कृपा करके अन्तर्यामिरूप से हमारे आत्माओं में स्थित हुए (**मातिख्यः**) सत्य उपदेश को मत रोकिये, किन्तु उसकी प्रेरणा सदा किया कीजिये॥ ३॥

भावार्थः-जब मनुष्य लोग इन धार्मिक श्रेष्ठ विद्वानों के समागम से शिक्षा और विद्या को प्राप्त होते हैं, तभी पृथिवी से लेकर परमेश्वरपर्य्यन्त पदार्थों के ज्ञान द्वारा नाना प्रकार से सुखी होके फिर वे अन्तर्यामी ईश्वर के उपदेश को छोड़कर कभी इधर-उधर नहीं भ्रमते॥ ३॥

तत्समीपे स्थित्वा मनुष्येण किं कर्त्तव्यम्, ते च तान् प्रति किं कुर्य्युरित्युपदिश्यते।

मनुष्य लोग विद्वानों के समीप जाकर क्या करें और वे इनके साथ कैसे वर्तें, इस विषय का उपदेश ईश्वर ने अगले मन्त्र में किया है-

परे॑हि॒ विग्र॒मस्तृ॑त॒मिन्द्रं॑ पृच्छा वि॒प॒श्चित॑म्।

यस्ते सखिभ्य आ वरम्॥४॥

परा। इहि। विग्रम्। अस्तृतम्। इन्द्रम्। पृच्छ। विपः।ऽचितम्। यः। ते। सखिभ्यः। आ। वरम्॥४॥

पदार्थः-(**परा**) पृथक् (**इहि**) भव (**विग्रम्**) मेधाविनम्। **वेग्रो वक्तव्य** इति वेः परस्या नासिकायाः स्थाने ग्रः समासान्तादेशः। **उपसर्गाच्च।** (अष्टा०५.४.११९) इति सूत्रस्योपरि वार्तिकम्। **विग्र इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**अस्तृतम्**) अहिंसकम् (**इन्द्रम्**) विद्यया परमैश्वर्ययुक्तं मनुष्यम् (**पृच्छ**) सन्देहान् दृष्ट्वोत्तराणि गृहाण। **द्व्यचोऽतस्तिङः।** (अष्टा०६.३.१३५) इति दीर्घः। (**विपश्चितम्**) विद्वांसं य आप्तः सन्नुपदिशति। **विपश्चिदिति मेधाविनामसु पठितम्।** (निघं०३.१५) पुनरुक्त्याऽऽप्तत्वादिगुणवत्त्वं गृह्यते। (**ते**) तुभ्यम् (**सखिभ्यः**) मित्रस्वभावेभ्यः (**आ**) समन्तात् (**वरम्**) परमोत्तमं विज्ञानधनम्॥४॥

अन्वयः-हे विद्यां चिकीर्षो मनुष्य! यो विद्वान् तुभ्यं सखिभ्यो मित्रशीलेभ्यश्चासमन्ताद्वरं विज्ञानं ददाति, तं विग्रमस्तृतमिन्द्रं विपश्चितमुपगम्य सन्देहान् पृच्छ, यथार्थतया तदुपदिष्टान्युत्तराणि गृहीत्वाऽन्येभ्यस्त्वमपि वद। यो ह्यविद्वान् ईर्ष्यकः कपटी स्वार्थी मनुष्योऽस्ति तस्मात्सर्वदा परेहि॥४॥

भावार्थः-सर्वेषां मनुष्याणामियं योग्यतास्ति पूर्वं परोपकारिणं पण्डितं ब्रह्मनिष्ठं श्रोत्रियं पुरुषं विज्ञाय तेनैव सह प्रश्नोत्तरविधानेन सर्वाः शङ्का निवारणीयाः, किन्तु ये विद्याहीनाः सन्ति नैव केनापि तत्सङ्गकथनोत्तरविश्वासः कर्त्तव्य इति॥४॥

पदार्थः-हे विद्या की अपेक्षा करने वाले मनुष्य लोगो! जो विद्वान् तुझ और (**ते**) तेरे (**सखिभ्यः**) मित्रों के लिये (**आवरम्**) श्रेष्ठ विज्ञान को देता हो, उस (**विग्रम्**) जो श्रेष्ठ बुद्धिमान् (**अस्तृतम्**) हिंसा आदि अधर्मरहित (**इन्द्रम्**) विद्या परमैश्वर्य्ययुक्त (**विपश्चितम्**) यथार्थ सत्य कहनेवाले मनुष्य के समीप जाकर उस विद्वान् से (**पृच्छ**) अपने सन्देह पूछ, और फिर उनके कहे हुए यथार्थ उत्तरों को ग्रहण करके औरों के लिये तू भी उपदेश कर, परन्तु जो मनुष्य अविद्वान् अर्थात् मूर्ख ईर्षा करने वा कपट और स्वार्थ में संयुक्त हो उससे तू (**परेहि**) सदा दूर रह॥४॥

भावार्थः-सब मनुष्यों को यही योग्य है कि प्रथम सत्य का उपदेश करनेहारे वेद पढ़े हुए और परमेश्वर की उपासना करनेवाले विद्वानों को प्राप्त होकर अच्छी प्रकार उनके साथ प्रश्नोत्तर की रीति से अपनी सब शङ्का निवृत्त करें, किन्तु विद्याहीन मूर्ख मनुष्य का सङ्ग वा उनके दिये हुए उत्तरों में विश्वास कभी न करें॥४॥

पुनः स एवार्थ उपदिश्यते।

ईश्वर ने फिर भी इसी विषय का उपदेश मन्त्र में किया है-

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत।

दधा॑ना॒ इन्द्र॒ इद्दुव॑:॥५॥७॥

उ॒त। ब्रु॒व॒न्तु॒। न॒:। निद॑:। नि:। अ॒न्यत॑:। चि॒त्। आ॒र॒त॒। दधा॑ना:। इन्द्रे॑। इत्। दुव॑:॥५॥

पदार्थ:-(**उत**) अप्येव (**ब्रुवन्तु**) सर्वा विद्या उपदिशन्तु (**न:**) अस्मभ्यम्। (**निद:**) निन्दितार:। '**णिदि कुत्सायाम्**' अस्मात् क्विप्, **छान्दसो वर्णलोपो वे**ति नलोप:। (**नि:**) नितराम्। (**अन्यत:**) देशात् (**चित्**) अन्ये (**आरत**) गच्छन्तु। **व्यवहिताश्चे**त्युपसर्गव्यवधानम्। अत्र व्यत्यय:। (**दधाना:**) धारयितार: (**इन्द्रे**) परमैश्वर्ययुक्ते परमेश्वरे (**इत्**) इत:। इयते प्राप्यते। सोऽयमिद् देश:। अत्र कर्मणि क्विप्। तत: **सुपां सुलुगि**ति ङसेर्लुक्। (**दुव:**) परिचर्यायाम्॥५॥

अन्वय:-य इन्द्रे परमेश्वरे दुव: परिचर्य्या दधाना: सर्वासु विद्यासु धर्मे पुरुषार्थे च वर्त्तमाना: सन्ति, त उतैव नोऽस्मभ्यं सर्वा विद्या ब्रुवन्तूपदिशन्तु। ये चिदन्ये नास्तिका निदो निन्दितारोऽविद्वांसो धूर्ता: सन्ति, ते सर्व इतो देशादस्मन्निवासान्निरारत दूरे गच्छन्तु, उतान्यतो देशादपि नि:सरन्तु, अर्थादधार्मिका: पुरुषा: क्वापि मा तिष्ठेयुरिति॥५॥

भावार्थ:-सर्वैर्मनुष्यैराप्तविद्वत्सङ्गेन मूर्खसङ्गत्यागेनेत्थं पुरुषार्थ: कर्त्तव्यो यत: सर्वत्र विद्यावृद्धिरविद्याहानिश्च मान्यानां सत्कारो दुष्टानां ताडनं चेश्वरोपासना पापिनां निवृत्तिर्धार्मिकाणां वृद्धिश्च नित्यं भवेदिति॥५॥

इति सप्तमो वर्ग: समाप्त:॥

पदार्थ:-जो कि परमेश्वर की (**दुव:**) सेवा को धारण किये हुए, सब विद्या धर्म और पुरुषार्थ में वर्त्तमान हैं, वे ही (**न:**) हम लोगों के लिये सब विद्याओं का उपदेश करें, और जो कि (**चित्**) नास्तिक (**निद:**) निन्दक वा धूर्त मनुष्य हैं, वे सब हम लोगों के निवासस्थान से (**निरारत**) दूर चले जावें, किन्तु (**उत**) निश्चय करके और देशों से भी दूर हो जायें अर्थात् अधर्मी पुरुष किसी देश में न रहें॥५॥

भावार्थ:-सब मनुष्यों को उचित है कि आप्त धार्मिक विद्वानों का सङ्ग कर और मूर्खों के सङ्ग को सर्वथा छोड़ के ऐसा पुरुषार्थ करना चाहिये कि जिससे सर्वत्र विद्या की वृद्धि, अविद्या की हानि, मानने योग्य श्रेष्ठ पुरुषों का सत्कार दुष्टों को दण्ड, ईश्वर की उपासना आदि शुभ कर्मों की वृद्धि और अशुभ कर्मों का विनाश नित्य होता रहे॥५॥

यह सातवां वर्ग समाप्त हुआ॥

मनुष्यै: कीदृशं शीलं धार्य्यामित्युपदिश्यते।

अब मनुष्यों को कैसा स्वभाव धारण करना चाहिये, इस विषय का उपदेश ईश्वर ने अगले मन्त्र में किया है-

उ॒त न॑: सु॒भगाँ॑ अ॒रिर्वो॒चेयु॑र्दस्म कृ॒ष्टय॑:।

स्यामेदिन्द्रस्य शर्मणि॥ ६॥

उत। नः। सुभगान्। अरिः। वोचेयुः। दस्म। कृष्टयः। स्याम। इत्। इन्द्रस्य। शर्मणि॥ ६॥

पदार्थः-(**उत**) अपि (**नः**) अस्मान् (**सुभगान्**) शोभनो विद्यैश्वर्य्ययोगो येषां तान्। **भग इति धननामसु पठितम्।** (निघं०२.१०) (**अरिः**) शत्रुः (**वोचेयुः**) सम्प्रीत्या सर्वा विद्याः सर्वान्प्रत्युपदिश्यासुः। वचेराशिषि लिङि प्रथमस्य बहुवचने। **लिङ्याशिष्यङ्।** (अष्टा०३.१.८६) अनेन विकरणस्थान्यङ् प्रत्ययः। **वच उम्।** (अष्टा०७.४.२०)अनेनोमागमः। (**दस्म**) दुष्टस्वभावोपक्षेतः। **'दसु उपक्षये'** इत्यस्मात् **इषि युधीन्धिदसि०।** (उणा०१.४४) अनेन मक् प्रत्ययः। (**कृष्टयः**) मनुष्याः। **कृष्टय इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**स्याम**) भवेम (**इत्**) एव (**इन्द्रस्य**) परमेश्वरस्य (**शर्मणि**) नित्यसुखे। **शर्मेति पदनामसु पठितम्।** (निघं०५.५)॥६॥

अन्वयः-हे दस्मोपक्षयरहित जगदीश्वर! वयं तवेन्द्रस्य शर्म्मणि खल्वाज्ञापालनाख्यव्यवहारे नित्यं प्रवृत्ताः स्यामेमे कृष्टयः सर्वे मनुष्याः सर्वान् प्रति सर्वा विद्या वोचेयुरुपदिशासुर्य्यतः सत्योपदेशप्राप्तान्नोऽस्मानरिरुत शत्रुरपि सुभगान् जानीयाद्ददेच्च॥६॥

भावार्थः-यदा सर्वे मनुष्या विरोधं विहाय सर्वोपकारणे प्रयतन्ते तदा शत्रवोऽप्यविरोधिनो भवन्ति, यतः सर्वान्मनुष्यानीश्वरानुग्रहनित्यानन्दौ प्राप्नुतः॥६॥

पदार्थः-हे (**दस्म**) दुष्टों को दण्ड देनेवाले परमेश्वर! हम लोग। (**इन्द्रस्य**) आप के दिये हुए (**शर्मणि**) नित्य सुख वा आज्ञा पालने में (**स्याम**) प्रवृत्त हों, और ये (**कृष्टयः**) सब मनुष्य लोग प्रीति के साथ सब मनुष्यों के लिये सब विद्याओं को (**वोचेयुः**) उपदेश से प्राप्त करें, जिससे सत्य के उपदेश को प्राप्त हुए (**नः**) हम लोगों को (**अरिः**) (**उत**) शत्रु भी (**सुभगान्**) श्रेष्ठ विद्या ऐश्वर्ययुक्त जानें वा कहें॥६॥

भावार्थः-जब सब मनुष्य विरोध को छोड़कर सब के उपकार करने में प्रयत्न करते हैं, तब शत्रु भी मित्र हो जाते हैं, जिससे सब मनुष्यों को ईश्वर की कृपा वा निरन्तर उत्तम आनन्द प्राप्त होते हैं॥६॥

किमर्थः स इन्द्रः प्रार्थनीय इत्युपदिश्यते।

परमेश्वर प्रार्थना करने योग्य क्यों है, यह विषय अगले मन्त्र में प्रकाशित किया है-

एमाशुमाशवे भर यज्ञश्रियं नृमादनम्।

पतयन्मन्दयत्सखम्॥ ७॥

आ। ईम्। आशुम्। आशवे। भर। यज्ञऽश्रियम्। नृऽमादनम्। पतयत्। मन्दयत्ऽसखम्॥ ७॥

पदार्थः-(**आ**) अभितः (**ईम्**) जलं पृथिवीं च। **ईमिति जलनामसु पठितम्।** (निघं०१.१२) **पदनामसु च।** (निघं०४.२) (**आशुम्**) वेगादिगुणवन्तमग्निवाय्वादिपदार्थसमूहम्। **आश्वित्यश्वनामसु**

पठितम्। (निघं०१.१४) **कृवापा०।** (उणा०१.१) अनेनाशूङ्धातोरुण् प्रत्ययः। **(आशवे)** यानेषु सर्वानन्दस्य वेगादिगुणानां च व्याप्तये **(भर)** सम्यग्धारय प्रदेहि **(यज्ञश्रियं)** चक्रवर्त्तिराज्यादेर्महिम्नः श्रीर्लक्ष्मीः शोभा। **राष्ट्रं वा अश्वमेधः।** (श०ब्रा०१३.१.६.३) अनेन यज्ञशब्दाद्राष्ट्रं गृह्यते। **यज्ञो वै महिमा।** (श०ब्रा०६.२.३.१८) **(नृमादनम्)** माद्यन्ते हर्ष्यन्तेऽनेन तन्मादनं नृणां मादनं नृमादनम् **(पतयत्)** यत्पतिं करोतीति पतित्वसम्पादकं तत्। **तत् करोति तदाचष्टे** इति पतिशब्दाण्णिच्। **(मन्दयत्सखम्)** मन्दयन्तो विद्याज्ञापकाः सखायो यस्मिंस्तत्॥७॥

अन्वयः-हे इन्द्र परमेश्वर! तव कृपयाऽस्मदर्थमाशव आशुं यज्ञश्रियं नृमादनं पतयत्स्वामित्वसम्पादकं मन्दयत्सखं विज्ञानादिधनं भर देहि॥७॥

भावार्थः-ईश्वरः पुरुषार्थिनो मनुष्यस्योपरि कृपां दधाति नालसस्य। कुतः? यावन्मनुष्यः स्वयं पूर्णं पुरुषार्थं न करोति नैव तावदीश्वरकृपाप्राप्तान् पदार्थान् रक्षितुमपि समर्थो भवति। अतो मनुष्यैः पुरुषार्थवद्भिर्भूत्वेश्वरकृपेष्टव्येति॥७॥

पदार्थः-हे इन्द्र परमेश्वर! आप अपनी कृपा करके हम लोगों के अर्थ **(आशवे)** यानों में सब सुख वा वेगादि गुणों की शीघ्र प्राप्ति के लिये जो **(आशुम्)** वेग आदि गुणवाले अग्नि वायु आदि पदार्थ **(यज्ञश्रियम्)** चक्रवर्त्ति राज्य के महिमा की शोभा **(ईम्)** जल और पृथिवी आदि **(नृमादनम्)** जो कि मनुष्यों को अत्यन्त आनन्द देनेवाले तथा **(पतयत्)** स्वामिपन को करनेवाले वा **(मन्दयत्सखम्)** जिसमें आनन्द को प्राप्त होने वा विद्या के जनानेवाले मित्र हों, ऐसे **(भर)** विज्ञान आदि धन को हमारे लिये धारण कीजिये॥७॥

भावार्थः-ईश्वर पुरुषार्थी मनुष्य पर कृपा करता है, आलस करनेवाले पर नहीं, क्योंकि जब तक मनुष्य ठीक-ठीक पुरुषार्थ नहीं करता तब तक ईश्वर की कृपा और अपने किये हुए कर्मों से प्राप्त हुए पदार्थों की रक्षा में समर्थ कभी नहीं हो सकता। इसलिये मनुष्यों को पुरुषार्थी होकर ही ईश्वर की कृपा के भागी होना चाहिये॥७॥

पुनश्च कथंभूत इन्द्र इत्युपदिश्यते।

फिर भी परमेश्वर ने सूर्य्यलोक के स्वभाव का प्रकाश अगले मन्त्र में किया है-

अ॒स्य पी॒त्वा श॑तक्रतो घ॒नो वृ॒त्राणा॑मभवः।
प्रावो॒ वाजे॑षु वा॒जिन॑म्॥८॥

अ॒स्य। पी॒त्वा। श॒त॒क्र॒तो॒ इति॑ शतक्रतो। घ॒नः। वृ॒त्राणा॑म्। अ॒भ॒वः॒। प्र। आ॒वः॒। वाजे॑षु। वा॒जिन॑म्॥८॥

पदार्थः-**(अस्य)** समक्षासमक्षस्य सर्वस्य जगतो जलरसस्य वा **(पीत्वा)** पानं कृत्वा '**शतक्रतो**' शतान्यसंख्याताः क्रतवः कर्माणि यस्य शूरवीरस्य सूर्य्यलोकस्य वा सः। **शतमिति बहुनामसु पठितम्।** (निघं०३.१) **क्रतुरिति कर्मनामसु पठितम्।** (निघं०२.१) **(घनः)** दृढः काठिन्येन मूर्तिं प्रापितो वा। **मूर्त्तौ**

घनः। (अष्टा०३.३.७७) अनेनायं निपातितः। **(वृत्राणाम्)** वृत्रवत्सुखावरकाणां शत्रूणां मेघानां वा। **वृत्र इति मेघनामसु पठितम्।** (निघं०१.१०) **(अभवः)** भूयाः भवति वा। अत्र पक्षे व्यत्ययः। लिङ्लटोरर्थे लङ् च। **(प्रावः)** रक्ष रक्षति वा। अत्रापि पूर्ववत्। **(वाजेषु)** युद्धेषु। **वाज इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(वाजिनम्)** धार्मिकं शूरवीरं मनुष्यं प्राप्तिनिमित्तं सूर्य्यलोकं वा। **वाजिन इति पदनामसु पठितम्।** (निघं०५.६) अनेन युद्धेषु प्राप्तवेगहर्षाः शूराः सूर्य्यलोका वा गृह्यन्ते॥८॥

अन्वयः-हे शतक्रतो पुरुषव्याघ्र! यथा घनो मूर्तिमानयं सूर्य्यलोकोऽस्य जलस्य रसं पीत्वा वृत्राणां मेघावयवानां हननं कृत्वा सर्वानोषध्यादीन् पदार्थान् प्रावो रक्षति, यथा च स्वप्रकाशेन सर्वान्प्रकाशते, तथैव त्वमपि सर्वेषां रोगाणां दुष्टानां शत्रूणां च निवारको भूत्वाऽस्य रक्षकोऽभवो भूयाः। एवं वाजेषु दुष्टैः सह युद्धेषु प्रवर्त्तमानं धार्मिकं वाजिनं शूरं प्रावः प्रकृष्टतया सदैव रक्षको भव॥८॥

भावार्थः-अत्र लुप्तोमालङ्कारः। यथा यो मनुष्यो दुष्टैः सह धर्मेण युध्यति तस्यैव विजयो भवति नेतरस्य, तथा परमेश्वरोऽपि धार्मिकाणां युद्धकर्तृणां मनुष्याणामेव सहायकारी भवति नेतरेषाम्॥८॥

पदार्थः-हे पुरुषोत्तम! जैसे यह **(घनः)** मूर्त्तिमान् होके सूर्य्यलोक **(अस्य)** जलरस को **(पीत्वा)** पीकर **(वृत्राणाम्)** मेघ के अङ्गरूप जलबिन्दुओं को वर्षाके सब ओषधी आदि पदार्थों को पुष्ट करके सब की रक्षा करता है, वैसे ही हे **(शतक्रतो)** असंख्यात कर्मों के करनेवाले शूरवीरो! तुम लोग भी सब रोग और धर्म के विरोधी दुष्ट शत्रुओं के नाश करनेहारे होकर **(अस्य)** इस जगत् के रक्षा करनेवाले **(अभवः)** हूजिये। इसी प्रकार जो **(वाजेषु)** दुष्टो के साथ युद्ध में प्रवर्त्तमान धार्मिक और **(वाजिनम्)** शूरवीर पुरुष है, उसकी **(प्रावः)** अच्छी प्रकार रक्षा सदा करते रहिये॥८॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जैसे जो मनुष्य दुष्टों के साथ धर्मपूर्वक युद्ध करता है, उसी का ही विजय होता है और का नहीं। तथा परमेश्वर भी धर्मपूर्वक युद्ध करनेवाले मनुष्यों का ही सहाय करनेवाला होता है, औरों का नहीं॥८॥

पुनरिन्द्रशब्देनेश्वर उपदिश्यते।

फिर इन्द्र शब्द से अगले मन्त्र में ईश्वर का प्रकाश किया है-

तं त्वा॒ वाजे॑षु वा॒जिनं॑ वा॒जया॑मः शतक्रतो।
धना॑नामिन्द्र सा॒तये॑॥९॥

तम्। त्वा॒। वाजे॑षु। वा॒जिन॑म्। वा॒जया॑मः। श॒त॒क्र॒तो॒ इति॑ शतक्रतो। धना॑नाम्। इ॒न्द्र॒। सा॒तये॑॥९॥

पदार्थः-**(तम्)** इन्द्रं परमेश्वरम् **(त्वा)** त्वाम् **(वाजेषु)** युद्धेषु **(वाजिनम्)** विजयप्रापकम्। वाजिन इति पदनामसु पठितत्वात्प्राप्त्यर्थोऽत्र गृह्यते। **(वाजयामः)** विज्ञापयामः। **वज गता**वित्यन्तर्गतण्यर्थेन ज्ञापनार्थोऽत्र गृह्यते। **(शतक्रतो)** शतेष्वसंख्यातेषु वस्तुषु क्रतुः प्रज्ञा यस्य तत्सम्बुद्धौ। **क्रतुरिति**

प्रज्ञानामसु पठितम्। (निघं०३.९) **(धनानाम्)** पूर्णविद्याराज्यादिसाध्यपदार्थानाम् **(इन्द्र)** परमैश्वर्य्यवन्! **(सातये)** सुखार्थं सम्यक्सेवनाय॥९॥

अन्वयः-हे शतक्रतो इन्द्र जगदीश्वरं! वयं धनानां सातये वाजेषु वाजिनं तं पूर्वोक्तमिन्द्रं परमेश्वरं त्वामेव सर्वान्मनुष्यान्प्रति वाजयामो विज्ञापयामः॥९॥

भावार्थः-यो दुष्टान् युद्धेन निर्बलान् कृत्वा जितेन्द्रियो विद्वान् भूत्वा जगदीश्वराज्ञां पालयति, स एव मनुष्यो धनानि विजयं च प्राप्नोतीति॥९॥

पदार्थः-हे **(शतक्रतो)** असंख्यात वस्तुओं में विज्ञान रखनेवाले **(इन्द्र)** परम ऐश्वर्य्यवान् जगदीश्वर! हम लोग **(धनानाम्)** पूर्ण विद्या और राज्य को सिद्ध करनेवाले पदार्थों का **(सातये)** सुखभोग वा अच्छे प्रकार सेवन करने के लिये **(वाजेषु)** युद्धादि व्यवहारों में **(वाजिनम्)** विजय करानेवाले और **(तम्)** उक्त गुणयुक्त **(त्वा)** आपको ही **(वाजयामः)** नित्य प्रति जानने और जनाने का प्रयत्न करते हैं॥९॥

भावार्थः-जो मनुष्य दुष्टों को युद्ध से निर्बल करता तथा जितेन्द्रिय वा विद्वान् होकर जगदीश्वर की आज्ञा का पालन करता है, वही उत्तम धन वा युद्ध में विजय को अर्थात् सब शत्रुओं को जीतनेवाला होता है॥९॥

पुनः स कीदृशः किमर्थं स्तोतव्य इत्युपदिश्यते।

फिर भी वह परमेश्वर कैसा है और क्यों स्तुति करने योग्य है, इस विषय का प्रकाश अगले मन्त्र में किया है-

यो रायो३ऽवनिर्महान्त्सुपारः सुन्वतः सखा। तस्मा इन्द्राय गायत॥१०॥८॥

यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः। सखा। तस्मै। इन्द्राय। गायत॥१०॥

पदार्थः-**(यः)** परमेश्वरः करुणामयः **(रायः)** विद्यासुवर्णादिधनस्य। **राय इति धननामसु पठितम्।** (निघं०२.१०) **(अवनिः)** रक्षकः प्रापको दाता **(महान्)** सर्वेभ्यो महत्तमः **(सुपारः)** सर्वकामानां सुष्ठु पूर्त्तिकरः **(सुन्वतः)** अभिगतधर्मविद्यस्य मनुष्यस्य **(सखा)** सौहार्देन सुखप्रदः **(तस्मै)** तमीश्वरम् **(इन्द्राय)** परमैश्वर्य्यवन्तम्। अत्रोभयत्र **सुपां सुलुगिति** द्वितीयैकवचनस्थाने चतुर्थ्येकवचनम्। **(गायत)** नित्यमर्चत। **गायतीत्यर्चतिकर्मसु पठितम्।** (निघं०३.१४)॥१०॥

अन्वयः-हे विद्वांसो मनुष्याः! यो महान्सुपारः सुन्वतः सखा रायोऽवनिः करुणामयोऽस्ति यूयं तस्मै तमिन्द्रायेन्द्रं परमेश्वरमेव गायत नित्यमर्चत॥१०॥

भावार्थः-नैव केनापि केवलं परमेश्वरस्य स्तुतिमात्रकरणेन सन्तोष्टव्यं किन्तु तदाज्ञायां वर्त्तमानेन। स नः सर्वत्र पश्यतीत्यधर्मान्निवर्त्तमानेन तत्सहायेच्छुना मनुष्येण सदैवोद्योगे प्रवृर्त्तितव्यम्॥१०॥

एतस्य विद्यया परमेश्वरज्ञानात्मशरीरोग्यदृढत्वप्राप्या सदैव दुष्टानां विजयेन पुरुषार्थेन च चक्रवर्त्तिराज्यं धार्मिकैः प्राप्तव्यमिति संक्षेपतोऽस्य चतुर्थसूक्तोक्तार्थस्य तृतीयसूक्तोक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

अस्यापि सूक्तस्यार्य्यावर्त्तनिवासिभिः सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिरध्यापक-विलसनाख्यादिभिरन्यथैव व्याख्या कृतेति वेदितव्यम्॥

इति चतुर्थं सूक्तमष्टमश्च वर्गः समाप्तः॥

पदार्थः-हे विद्वान् मनुष्यो! जो बड़ों से बड़ा **(सुपारः)** अच्छी प्रकार सब कामनाओं की परिपूर्णता करनेहारा **(सुन्वतः)** प्राप्त हुए सोमविद्यावाले धर्मात्मा पुरुष को **(सखा)** मित्रता से सुख देने, तथा **(रायः)** विद्या सुवर्ण आदि धन का **(अवनिः)** रक्षक और इस संसार में उक्त पदार्थों में जीवों को पहुँचाने और उनका देनेवाला करुणामय परमेश्वर है, **(तस्मै)** उसकी तुम लोग **(गायत)** नित्य पूजा किया करो॥१०॥

भावार्थः-किसी मनुष्य को केवल परमेश्वर की स्तुतिमात्र ही करने से सन्तोष न करना चाहिये, किन्तु उसकी आज्ञा में रहकर और ऐसा समझ कर कि परमेश्वर मुझको सर्वत्र देखता, है, इसलिये अधर्म से निवृत्त होकर और परमेश्वर के सहाय की इच्छा करके मनुष्य को सदा उद्योग ही में वर्त्तमान रहना चाहिये॥१०॥

उस तीसरे सूक्त की कही हुई विद्या से, धर्मात्मा पुरुषों को परमेश्वर का ज्ञान सिद्ध करना तथा आत्मा और शरीर के स्थिर भाव, आरोग्य की प्राप्ति तथा दुष्टों के विजय और पुरुषार्थ से चक्रवर्त्ति राज्य को प्राप्त होना, इत्यादि अर्थ करके इस चौथे सूक्त के अर्थ की सङ्गति समझनी चाहिये।

आर्यावर्त्तवासी सायणाचार्य्य आदि विद्वान् तथा यूरोपखण्डवासी अध्यापक विलसन आदि साहबों ने इस सूक्त की भी व्याख्या ऐसी विरुद्ध की है कि यहां उसका लिखना व्यर्थ है॥

यह चौथा सूक्त और आठवां वर्ग समाप्त हुआ॥

अथ दशर्चस्यास्य पञ्चमसूक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवता। १ विराड्गायत्री; २ आर्च्युष्णिक्; ३ पिपीलिकामध्या निचृद्गायत्री; ४, १० गायत्री; ५-७, ९ निचृद्गायत्री; ८ पादनिचृद्गायत्री च छन्दः। १, ३-१० षड्जः; २ ऋषभश्च स्वरः॥

अथेन्द्रशब्देनेश्वरभौतिकावर्थावुपदिश्येते।

पाँचवें सूक्त के प्रथम मन्त्र में इन्द्र शब्द से परमेश्वर और स्पर्शगुणवाले वायु का प्रकाश किया है-

आ त्वेता॒ निषी॑द॒तेन्द्र॑म॒भि प्र गा॑यत।
सखा॑यः॒ स्तोम॑वाहसः॥ १॥

आ। तु। आ। इ॒त॒। नि। सी॒द॒त॒। इन्द्र॑म्। अ॒भि। प्र। गा॒य॒त॒। सखा॑यः। स्तोम॑ऽवाहसः॥ १॥

पदार्थः-(**आ**) समन्तात् (**तु**) पुनरर्थे (**आ**) अभ्यर्थे (**इत**) प्राप्नुत। **द्व्यचोऽतस्तिङ** इति दीर्घः। (**निषीदत**) शिल्पविद्यायां नितरां तिष्ठत (**इन्द्रम्**) परमेश्वरं विद्युदादियुक्तं वायुं वा। **इन्द्र इति पदनामसु पठितम्।** (निघं०५.४) विद्याजीवनप्रापकत्वादिन्द्रशब्देनात्र परमात्मा वायुश्च गृह्यते। **विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना।** (ऋ०१.१४.१०) इन्द्रेण वायुनेति वायोरिन्द्रसंज्ञा। (**अभिप्रगायत**) आभिमुख्येन प्रकृष्टया विद्यासिध्यर्थं तद्गुणनुपदिशत शृणुत च (**सखायः**) परस्परं सुहृदो भूत्वा (**स्तोमवाहसः**) स्तोमः स्तुतिसमूहो वाहः प्राप्तव्यः प्रापयितव्यो येषां ते॥ १॥

अन्वयः-हे स्तोमवाहसः सखायो विद्वांसः! सर्वे यूयं मिलित्वा परस्परं प्रीत्या मोक्षशिल्पविद्यासम्पादनोद्योग आनिषीदत, तदर्थमिन्द्रं परमेश्वरं वायुं चाभिप्रगायत एवं पुनः सर्वाणि सुखान्येत॥ १॥

भावार्थः-यावन्मनुष्या हठच्छलाभिमानं त्यक्त्वा सम्प्रीत्या परस्परोपकाराय मित्रवन्न प्रयतन्ते, तावन्नैवैतेषां कदाचिद्विद्यासुखोन्नतिर्भवतीति॥ १॥

पदार्थः-हे (**स्तोमवाहसः**) प्रशंसनीय गुणयुक्त वा प्रशंसा कराने और (**सखायः**) सब से मित्रभाव में वर्त्तनेवाले विद्वान् लोगो! तुम और हम लोग सब मिलके परस्पर प्रीति के साथ मुक्ति और शिल्पविद्या को सिद्ध करने में (**आनिषीदत**) स्थित हों अर्थात् उसकी निरन्तर अच्छी प्रकार से यत्नपूर्वक साधना करने के लिये (**इन्द्रम्**) परमेश्वर वा बिजली से जुड़ा हुआ वायु को-'**इन्द्रेण वायुना०**' इस ऋग्वेद के प्रमाण से शिल्पविद्या और प्राणियों के जीवन हेतु से इन्द्र शब्द से स्पर्शगुणवाले वायु का भी ग्रहण किया है- (**अभिप्रगायत**) अर्थात् उसके गुणों का उपदेश करें और सुनें कि जिससे वह अच्छी रीति से सिद्ध की हुई विद्या सब को प्रकट होजावें, (**तु**) और उसी से तुम सब लोग सब सुखों को (**एत**) प्राप्त होओ॥ १॥

भावार्थः-जब तक मनुष्य हठ, छल और अभिमान को छोड़कर सत्य प्रीति के साथ परस्पर मित्रता करके परोपकार करने के लिये तन मन और धन से यत्न नहीं करते, तब तक उनके सुखों और विद्या आदि उत्तम गुणों की उन्नति कभी नहीं हो सकती॥१॥

पुनस्तावेवोपदिश्येते।

फिर भी अगले मन्त्र में उन्हीं दोनों के गुणों का प्रकाश किया है-

पुरूतमं पुरूणामीशानं वार्य्याणाम्।
इन्द्रं सोमे सचा सुते॥२॥

पुरूऽतमम्। पुरूणाम्। ईशानम्। वार्य्याणाम्। इन्द्रम्। सोमे। सचा। सुते॥२॥

पदार्थः-(**पुरूतमम्**) पुरून् बहून् दुष्टस्वभावान् जीवान् पापकर्मफलदानेन तमयति ग्लापयति तं परमेश्वरं तत्फलभोगहेतुं वायुं वा। **पुरुरिति बहुनामसु पठितम्।** (निघं०३.१) अत्र **अन्येषामपि दृश्यत** इति दीर्घः। (**पुरूणाम्**) बहूनामाकाशादिपृथिव्यन्तानां पदार्थानाम् (**ईशानम्**) रचने समर्थं परमेश्वरं तन्मध्यस्थविद्यासाधकं वायुं वा (**वार्य्याणाम्**) वराणां वरणीयानामत्यन्तोत्तमानां मध्ये स्वीकर्तुमर्हम्। **वार्य्यं वृणोतेरथापि वरतमं तद्वार्य्यं वृणीमहे वरिष्ठं गोपयत्ययं तद्वार्य्यं वृणीमहे वर्षिष्ठं गोपायितव्यम्।** (निरु०५.१) (**इन्द्रम्**) सकलैश्वर्य्यप्रदं परमेश्वरमात्मनः सर्वभोगहेतुं वायुं वा (**सोमे**) सोतव्ये सर्वस्मिन्पदार्थे विमानादियाने वा। (**सचा**) ये समवेताः पदार्थाः सन्ति। **सचा इति पदनामसु पठितम्।** (निघं०४.२) (**सुते**) उत्पन्नेऽभिषवविद्ययाऽभिप्राप्ते॥२॥

अन्वयः-हे सखायो विद्वांसो वार्य्याणां पुरूतममीशानं पुरूणामिन्द्रमभिप्रगायत ये सुते सोमे सचाः सन्ति तान् सर्वोपकाराय यथायोग्यमभिप्रगायत॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। पूर्वस्मान्मन्त्रात् '**सखायः**; **तु**; **अभिप्रगायत**' इति पदत्रयमनुवर्त्तनीयम्। ईश्वरस्य यथायोग्यव्यवस्था जीवेभ्यस्तत्तत्कर्मफलदातृत्वात् भौतिकस्य वायोः कर्मफलहेतुत्वेन सकलचेष्टाविद्यासाधकत्वादस्मादुभयार्थस्य ग्रहणम्॥२॥

पदार्थः-हे मित्र विद्वान् लोगो! (**वार्य्याणाम्**) अत्यन्त उत्तम (**पुरूणाम्**) आकाश से लेके पृथिवीपर्य्यन्त असंख्यात पदार्थों को (**ईशानम्**) रचने में समर्थ (**पुरूतमम्**) दुष्टस्वभाववाले जीवों को ग्लानि प्राप्त करानेवाले (**इन्द्रम्**) और श्रेष्ठ जीवों को सब ऐश्वर्य्य के देनेवाले परमेश्वर के तथा (**वार्य्यणाम्**) अत्यन्त उत्तम (**पुरूणाम्**) आकाश से लेके पृथिवीपर्य्यन्त बहुत से पदार्थों की विद्याओं के साधक (**पुरूतमम्**) दुष्ट जीवों वा कर्मों के भोग के निमित्त और (**इन्द्रम्**) जीवमात्र को सुखदुःख देनेवाले पदार्थों के हेतु भौतिक वायु के गुणों को (**अभिप्रगायत**) अच्छी प्रकार उपदेश करो। और (**तु**) जो कि

(सुते) रस खींचने की क्रिया से प्राप्त वा **(सोमे)** उस विद्या से प्राप्त होने योग्य **(सचा)** पदार्थों के निमित्त कार्य्य हैं, उनको उक्त विद्याओं से सब के उपकार के लिये यथायोग्य युक्त करो॥ २॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। पीछे के मन्त्र से इस मन्त्र में **'सखायः; तु; अभिप्रगायत'** इन तीन शब्दों को अर्थ के लिये लेना चाहिये। इस मन्त्र में यथायोग्य व्यवस्था करके उनके किये हुए कर्मों का फल देने से ईश्वर तथा इन कर्मों के फल भोग कराने के कारण वा विद्या और सब क्रियाओं के साधक होने से भौतिक अर्थात् संसारी वायु का ग्रहण किया है॥ २॥

तावस्मदर्थं किं कुरुत इत्युपदिश्यते।

वे तुम हम और सब प्राणि लोगों के लिये क्या करते हैं, सो अगले मन्त्र में प्रकाश किया है-

स घा॑ नो॒ योग॒ आभु॑व॒त्स रा॒ये स पुर॑न्ध्याम्।

गम॒द्वाजे॑भि॒रा स न॑:॥ ३॥

सः। घ॒। न॒:। योगे॑। आ। भु॒व॒त्। सः। रा॒ये। सः। पुर॑न्ध्याम्। गम॑त्। वाजे॑भिः। आ। सः। न॒:॥ ३॥

पदार्थः-**(सः)** इन्द्र ईश्वरो वायुर्वा **(घ)** एवार्थे निपातः। **ऋचि तुनुघ०।** (अष्टा०६.३.१३३) अनेन दीर्घादेशः। **(नः)** अस्माकम् **(योगे)** सर्वसुखसाधनप्राप्तिसाधके **(आ भुवत्)** समन्ताद् भूयात्। भूधातोराशिषि लिङि प्रथमैकवचने **लिङ्याशिष्यङ्** (अष्टा०३.१.८६) इत्यङि सति **किदाशिषी**त्यागमानित्यत्वे प्रयोगः। **(सः)** उक्तोऽर्थः। **(राये)** परमोत्तमधनलाभाय। **राय इति धननामसु पठितम्।** (निघं०२.१०) **(सः)** पूर्वोक्तोऽर्थः। **(पुरन्ध्याम्)** बहुशास्त्रविद्यायुक्तायां बुद्ध्याम्। **पुरन्धिरिति पदनामसु पठितम्।** (निघं०४.३) **(गमत्)** आज्ञाप्यात् गमयति वा। अत्र पक्षे वर्त्तमानेऽर्थे लिङर्थे च लुङ्। **बहुलं छन्दस्यमाङ्योगेऽपि।** (अष्टा०६.४.७५) इत्यडभावः। **(वाजेभिः)** उत्तमैरन्नैर्विमानादियानैः सह वा। **बहुलं छन्दसि।** (अष्टा०७.१.१०) अनेनैसादेशाभावः। **(आ)** सर्वतः **(सः)** अतीतार्थे **(नः)** अस्मान्॥ ३॥

अन्वयः-स ह्येवेन्द्रः परमेश्वरो वायुश्च नोऽस्माकं योगे सहायकारी व्यवहारविद्योपयोगाय चाभुवत् समन्ताद् भूयात् भवति वा, तथा स एव राये स पुरन्ध्यां च प्रकाशको भूयाद्भवति वा, एवं स एव वाजेभिः सह नोऽस्मानागमदाज्ञाप्यात् समन्तात् गमयति वा॥ ३॥

भावार्थः-अत्र श्लेषालङ्कारः। ईश्वरः पुरुषार्थिनो मनुष्यस्य सहायकारी भवति नेतरस्य, तथा वायुरपि पुरुषार्थेनैव कार्य्यसिद्ध्युपयोगी भवति नैव कस्यचिद्विना पुरुषार्थे न धनवृद्धिलाभो भवति। नैवैताभ्यां विना कदाचिदुत्तमं सुखं च भवतीत्यतः सर्वैर्मनुष्यैरुद्योगिभिराशीर्मद्भिर्भवितव्यम्॥ ३॥

पदार्थः-**(सः)** पूर्वोक्त इन्द्र परमेश्वर और स्पर्शवान् वायु **(नः)** हम लोगों के **(योगे)** सब सुखों के सिद्ध करानेवाले वा पदार्थों को प्राप्त करानेवाले योग तथा **(सः)** वे ही **(राये)** उत्तम धन के लाभ के लिये और **(सः)** वे **(पुरन्ध्याम्)** अनेक शास्त्रों की विद्याओं से युक्त बुद्धि में **(आ भुवत्)** प्रकाशित हों। इसी प्रकार **(सः)** वे **(वाजेभिः)** उत्तम अन्न और विमान आदि सवारियों के सह वर्त्तमान **(नः)** हम लोगों

को **(आगमत्)** उत्तम सुख होने का ज्ञान देता तथा यह वायु भी इस विद्या की सिद्धि में हेतु होता है॥३॥

भावार्थः-इस में भी श्लेषालङ्कार है। ईश्वर पुरुषार्थी मनुष्य का सहायकारी होता है आलसी का नहीं, तथा स्पर्शवान् वायु भी पुरुषार्थ ही से कार्य्यसिद्धि का निमित्त होता है, क्योंकि किसी प्राणी को पुरुषार्थ के विना धन वा बुद्धि का और इन के विना उत्तम सुख का लाभ कभी नहीं हो सकता। इसलिये सब मनुष्यों को उद्योगी अर्थात् पुरुषार्थी आशावाले अवश्य होना चाहिये॥३॥

पुनरीश्वरसूर्यौ गातव्यावित्युपदिश्यते।

ईश्वर ने अपने आप और सूर्य्यलोक का गुणसहित चौथे मन्त्र से प्रकाश किया है-

यस्य॑ सं॒स्थे न वृ॒ण्वते॒ हरी॑ स॒मत्सु॒ शत्र॑वः।

तस्मा॒ इन्द्रा॑य गायत॥४॥

यस्य॑। सं॒ऽस्थे। न। वृ॒ण्वते॑। हरी॒ इति॑। स॒मत्ऽसु॑। शत्र॑वः। तस्मै॑। इन्द्रा॑य। गा॒य॒त॒॥४॥

पदार्थः-(**यस्य**) परमेश्वरस्य सूर्य्यलोकस्य वा **(संस्थे)** सम्यक् तिष्ठन्ति यस्मिंस्तस्मिन् जगति। **घञर्थे कविधानम्।** (अष्टा०३.३.५८) इति वार्तिकेनाधिकरणे कः प्रत्ययः। **(न)** निषेधार्थे **(वृण्वते)** सम्भजन्ते **(हरी)** हरणशीलौ बलपराक्रमौ प्रकाशाकर्षणाख्यौ च। **हरी इन्द्रस्येत्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५) **(समत्सु)** युद्धेषु। **समत्स्विति संग्रामनामसु पठितम्।** (निघं०२.१७) **(शत्रवः)** अमित्राः **(तस्मै)** एतद्गुणविशिष्टम् **(इन्द्राय)** परमेश्वरं सूर्य्यं वा। अत्रोभयत्रापि **सुपां सु०** अनेनामः स्थाने ङेः। **(गायत)** गुणस्तवनश्रवणाभ्यां विजानीत॥४॥

अन्वयः-हे मनुष्या! यूयं यस्य हरी संस्थे वर्त्तेते यस्य सहायेन शत्रवः समत्सु न वृणवते सम्यग् बलं न सेवन्ते तस्मा इन्द्राय तमिन्द्रं नित्यं गायत॥४॥

भावार्थः-अत्र श्लेषालङ्कारः। न यावन्मनुष्याः परमेश्वरेष्टा बलवन्तश्च भवन्ति, नैव तावद् दुष्टानां शत्रूणां नैर्बल्यङ्कर्तुं शक्तिर्जायत इति॥४॥

पदार्थः-हे मनुष्यो! तुम लोग **(यस्य)** जिस परमेश्वर वा सूर्य्य के **(हरी)** पदार्थों को प्राप्त करानेवाले बल और पराक्रम तथा प्रकाश और आकर्षण **(संस्थे)** इस संसार में वर्त्तमान हैं, जिनके सहाय से **(समत्सु)** युद्धों में **(शत्रवः)** वैरी लोग **(न वृण्वते)** अच्छी प्रकार बल नहीं कर सकते, **(तस्मै)** उस **(इन्द्राय)** परमेश्वर वा सूर्य्यलोक को उनके गुणों की प्रशंसा कह और सुन के यथावत् जानलो॥४॥

भावार्थः-इसमें श्लेषालङ्कार है। जब तक मनुष्य लोग परमेश्वर को अपने इष्ट देव समझनेवाले और बलवान् अर्थात् पुरुषार्थी नहीं होते, तब तक उनको दुष्ट शत्रुओं की निर्बलता करने को सामर्थ्य भी नहीं होता॥४॥

जगत्स्थाः पदार्थाः किमर्थाः कीदृशाः केन पवित्रीकृताश्च सन्तीत्युपदिश्यते।

ये संसारी पदार्थ किसलिये उत्पन्न किये गये और कैसे हैं, ये किससे पवित्र किये जाते हैं, इस विषय का प्रकाश अगले मन्त्र में किया है–

सुतपाव्ने सुता इमे शुचयो यन्ति वीतये।
सोमासो दध्याशिरः॥५॥९॥

सुतपाव्ने। सुताः। इमे। शुचयः। यन्ति। वीतये। सोमासः। दध्याशिरः॥५॥

पदार्थः–(**सुतपाव्ने**) सुतानामाभिमुख्येनोत्पादितानां पदार्थानां भाव रक्षको जीवस्तस्मै। अत्र **आतो मनिन्क्वनिब्वनिपश्च** इति वनिप्प्रत्ययः। (**सुताः**) उत्पादिताः (**इमे**) सर्वे (**शुचयः**) पवित्राः (**यन्ति**) यान्ति प्राप्नुवन्ति (**वीतये**) ज्ञानाय भोगाय वा। **वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु** अस्मात् **मन्त्रे वृषेषपचमनभूवीरा उदात्तः** अनेन क्तिन्प्रत्यय उदात्तत्वं च। (**सोमासः**) अभिसूयन्त उत्पद्यन्त उत्तमा व्यवहारा येषु ते। **सोम इति पदनामसु पठितम्।** (निघं०५.५) (**दध्याशिरः**) दधति पुष्णन्तीति दधयस्ते समन्तात् शीर्यन्ते येषु ते। दधातेः प्रयोगः **आदृगम०** (अष्टा०३.२.१७१) अनेन किन् प्रत्ययः। शॄ हिंसार्थः, ततः क्विप्॥५॥

अन्वयः-इन्द्रेण परमेश्वरेण वायुसूर्य्याभ्यां वा यतः सुतपाव्ने वीतय इमे दध्याशिरः शुचयः सोमासः सर्वे पदार्था उत्पादिताः पवित्रीकृताः सन्ति, तस्मादेतान् सर्वे जीवा यन्ति प्राप्नुवन्ति॥५॥

भावार्थः-अत्र श्लेषालङ्कारः। ईश्वरेण सर्वेषां जीवानामुपरि कृपां कृत्वा कर्मानुसारेण फलदानाय सर्वं कार्य्यं जगद्रच्यते पवित्रीयते चैवं पवित्रकारकौ सूर्य्यपवनौ च, तेन हेतुना सर्वे जडाः पदार्था जीवाश्च पवित्राः सन्ति। परन्तु ये मनुष्याः पवित्रगुणकर्मग्रहणे पुरुषार्थिनो भूत्वैतेभ्यो यथावदुपयोगं गृहीत्वा ग्राहयन्ति, त एव पवित्रा भूत्वा सुखिनो भवन्ति॥५॥

इति नवमो वर्गः॥

पदार्थः–परमेश्वर ने वा वायुसूर्य से जिस कारण (**सुतपाव्ने**) अपने उत्पन्न किये हुए पदार्थों की रक्षा करनेवाले जीव के, तथा (**वीतये**) ज्ञान वा भोग के लिये (**दध्याशिरः**) जो धारण करनेवाले उत्पन्न होते हैं, तथा (**शुचयः**) जो पवित्र (**सोमासः**) जिनसे अच्छे व्यवहार होते हैं, वे सब पदार्थ जिसने उत्पादन करके पवित्र किये हैं, इसी से सब प्राणि लोग इन को प्राप्त होते हैं॥५॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जब ईश्वर ने सब जीवों पर कृपा करके उनके कर्मों के अनुसार यथायोग्य फल देने के लिये सब कार्य्यरूप जगत् को रचा और पवित्र किया है, तथा पवित्र करने करानेवाले सूर्य्य और पवन को रचा है, उसी हेतु से सब जड़ पदार्थ वा जीव पवित्र होते हैं। परन्तु जो मनुष्य पवित्र गुणकर्मों के ग्रहण से पुरुषार्थी होकर संसारी पदार्थों से यथावत् उपयोग लेते तथा सब जीवों को उनके उपयोगी कराते हैं, वे ही मनुष्य पवित्र और सुखी होते हैं॥५॥

यह नवाँ वर्ग समाप्त हुआ॥

किं कृत्वा जीवः पूर्वोक्तोपयोगग्रहणे समर्थो भवतीत्युपदिश्यते।

ईश्वर ने, जीव जिस करके पूर्वोक्त उपयोग के ग्रहण करने को समर्थ होते हैं, इस विषय को अगले मन्त्र में कहा है-

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः।
इन्द्र ज्यैष्ठ्याय सुक्रतो॥६॥

त्वम्। सुतस्य। पीतये। सद्यः। वृद्धः। अजायथाः। इन्द्र। ज्यैष्ठ्याय। सुक्रतो इति सुक्रतो॥६॥

पदार्थः-(**त्वम्**) जीवः (**सुतस्य**) उत्पन्नस्यास्य जगत्पदार्थसमूहस्य सकाशाद्रसस्य (**पीतये**) पानाय ग्रहणाय वा (**सद्यः**) शीघ्रम् (**वृद्धः**) ज्ञानादिसर्वगुणग्रहणेन सर्वोपकारकरणे च श्रेष्ठः (**अजायथाः**) प्रादुर्भूतो भव (**इन्द्र**) विद्यादिपरमैश्वर्य्ययुक्त विद्वन्। **इन्द्र इति पदनामसु पठितम्।** (निघं०५.४) अनेन गन्ता प्रापको विद्वान् जीवो गृह्यते। (**ज्यैष्ठ्याय**) अत्युत्तमकर्मणामनुष्ठानाय (**सुक्रतो**) श्रेष्ठकर्मबुद्धियुक्त मनुष्य॥६॥

अन्वयः-हे इन्द्र सुक्रतो विद्वन् मनुष्य! त्वं सद्यः सुतस्य पीतये ज्यैष्ठ्याय वृद्धो अजायथाः॥६॥

भावार्थः-जीवायेश्वरोपदिशति-हे मनुष्य! यावत्त्वं न विद्यावृद्धो भूत्वा सम्यक् पुरुषार्थं परोपकारं च करोषि, नैव तावन्मनुष्यभावं सर्वोत्तमसुखं च प्राप्स्यसि, तस्मात्त्वं धार्मिको भूत्वा पुरुषार्थी भव॥६॥

पदार्थः-हे (**इन्द्र**) विद्यादिपरमैश्वर्ययुक्त (**सुक्रतो**) श्रेष्ठ कर्म करने और उत्तम बुद्धिवाले विद्वान् मनुष्य! (**त्वम्**) तू (**सद्यः**) शीघ्र (**सुतस्य**) संसारी पदार्थों के रस के (**पीतये**) पान वा ग्रहण और (ज्यैष्ठ्याय) अत्युत्तम कर्मों के अनुष्ठान करने के लिये (**वृद्धः**) विद्या आदि शुभ गुणों के ज्ञान के ग्रहण और सब के उपकार करने में श्रेष्ठ (**अजायथाः**) हो॥६॥

भावार्थः-ईश्वर जीव के लिये उपदेश करता है कि-हे मनुष्य! तू जबतक विद्या में वृद्ध होकर अच्छी प्रकार परोपकार न करेगा, तब तक तुझको मनुष्यपन और सर्वोत्तम सुख की प्राप्ति कभी न होगी, इससे तू परोपकार करने वाला सदा हो॥६॥

क एवमनुष्ठात्रे जीवायाशीर्ददातीत्युपदिश्यते।

उक्त काम के आचरण करने वाले जीव को आशीर्वाद कौन देता है, इस बात का प्रकाश अगले मन्त्र में किया है-

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः।
शन्ते सन्तु प्रचेतसे॥७॥

आ। त्वा। विशन्तु। आशवः। सोमासः। इन्द्र। गिर्वणः। शम्। ते। सन्तु। प्रऽचेतसे॥७॥

पदार्थः-(**आ**) समन्तात् (**त्वा**) त्वां जीवम् (**विशन्तु**) आविष्टा भवन्तु (**आशवः**) वेगादिगुणसहिताः सर्वक्रियाव्याप्ताः (**सोमासः**) सर्वे पदार्थाः (**इन्द्र**) जीव विद्वन् (**गिर्वणः**) गीर्भिर्वन्यते सम्भज्यते स गिर्वणास्तत्सम्बुद्धौ। **गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति।** (निरु०६.१४) देवशब्देनात्र प्रशस्तैर्गुणैः स्तोतुमर्हो विद्वान् गृह्यते। **गिर्वणस इति पदनामसु पठितम्।** (निघं०४.३) (**शम्**) सुखम्। **शमिति सुखनामसु पठितम्।** (निघं०३.६) (**ते**) तुभ्यम् (**सन्तु**) (**प्रचेतसे**) प्रकृष्टं चेतो विज्ञानं यस्य तस्मै॥७॥

अन्वयः-हे धार्मिक गिर्वण इन्द्र विद्वन् मनुष्य! आशवः सोमासस्त्वा त्वामाविशन्तु, एवंभूताय प्रचेतसे ते तुभ्यं मदनुग्रहेणैते शंसन्तु सुखकारका भवन्तु॥७॥

भावार्थः-ईश्वर ईदृशाय जीवायाशीर्वादं ददाति यदा यो विद्वान् परोपकारी भूत्वा मनुष्यो नित्यमुद्योगं करोति तदैव सर्वेभ्यः पदार्थेभ्यः उपकारं सङ्गृह्य सर्वान् प्राणिनः सुखयति, स सर्वं सुखं प्राप्नोति नेतर इति॥७॥

पदार्थः-हे धार्मिक (**गिर्वणः**) प्रशंसा के योग्य कर्म करने वाले (**इन्द्र**) विद्वान् जीव! (**आशवः**) वेगादि गुण सहित सब क्रियाओं से व्याप्त (**सोमासः**) सब पदार्थ (**त्वा**) तुझ को (**आविशन्तु**) प्राप्त हों, तथा इन पदार्थों को प्राप्त हुए (**प्रचेतसे**) शुद्ध ज्ञानवाले (**ते**) तेरे लिये (**शम्**) ये सब पदार्थ मेरे अनुग्रह से सुख करनेवाले (**सन्तु**) हों॥७॥

भावार्थः-ईश्वर ऐसे मनुष्यों को आशीर्वाद देता है कि जो मनुष्य विद्वान् परोपकारी होकर अच्छी प्रकार नित्य उद्योग करके इन सब पदार्थों से उपकार ग्रहण करके सब प्राणियों को सुखयुक्त करता है, वही सदा सुख को प्राप्त होता है, अन्य कोई नहीं॥७॥

एतदर्थमिन्द्रशब्दार्थ उपदिश्यते।

ईश्वर ने उक्त अर्थ ही के प्रकाश करने वाले इन्द्र शब्द का अगले मन्त्र में भी प्रकाश किया है-

त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो।
त्वां वर्धन्तु नो गिरः॥८॥

त्वाम्। स्तोमाः। अवीवृधन्। त्वाम्। उक्था। शतक्रतो इति शतक्रतो। त्वाम्। वर्धन्तु। नः। गिरः॥८॥

पदार्थः-(**त्वाम्**) इन्द्रं परमेश्वरम् (**स्तोमाः**) वेदस्तुतिसमूहाः (**अवीवृधन्**) वर्धयन्ति। अत्र लडर्थे लुङ्। (**त्वाम्**) स्तोतव्यम् (**उक्था**) परिभाषितुमर्हाणि वेदस्थानि सर्वाणि स्तोत्राणि। **पातृतुदिवचि०।** (उणा०२.७) अनेन वचधातोस्थक्प्रत्ययस्तेनोक्थस्य सिद्धिः। **शेश्छन्दसि बहुलमिति** शेर्लुक्। (**शतक्रतो**) उक्तोऽस्यार्थः (**त्वाम्**) सर्वज्येष्ठम् (**वर्धन्तु**) वर्धयन्तु। अत्रान्तर्गतो ण्यर्थः। (**नः**) अस्माकम् (**गिरः**) विद्यासत्यभाषणादियुक्ता वाण्यः। **गीरिति वाङ्नामसु पठितम्।** (निघं०१.११)॥८॥

अन्वयः-हे शतक्रतो बहुकर्मवन् बहुप्रज्ञेश्वर! यथा स्तोमास्त्वामवीवृधन् अत्यन्तं वर्धयन्ति, यथा च त्वमुक्थानि स्तुतिसाधकानि वर्धितानि कृतवान्, तथैव नो गिरस्त्वां वर्धन्तु सर्वथा प्रकाशयन्तु॥८॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। यथा ये विश्वस्मिन्पृथिवीसूर्य्यादयः सृष्टाः पदार्थाः सन्ति ते सर्वे सर्वकर्त्तारं परमेश्वरं ज्ञापयित्वा तमेव प्रकाशयन्ति, तथैतानुपकारानीश्वरगुणाँश्च सम्यग् विदित्वा विद्वांसोऽपीदृश एव कर्मणि प्रवर्त्तेरन्निति॥८॥

पदार्थः-हे **(शतक्रतो)** असंख्यात कर्मों के करने और अनन्त विज्ञान के जाननेवाले परमेश्वर! जैसे **(स्तोमाः)** वेद के स्तोत्र तथा **(उक्था)** प्रशंसनीय स्तोत्र आपको **(अवीवृधन्)** अत्यन्त प्रसिद्ध करते हैं, वैसे ही **(नः)** हमारी **(गिरः)** विद्या और सत्यभाषणयुक्त वाणी भी **(त्वाम्)** आपको **(वर्धन्तु)** प्रकाशित करे॥८॥

भावार्थः-जो विश्व में पृथिवी सूर्य्य आदि प्रत्यक्ष और अप्रत्यक्ष रचे हुए पदार्थ हैं, वे सब जगत् की उत्पत्ति करनेवाले तथा धन्यवाद देने के योग्य परमेश्वर ही को प्रसिद्ध करके जनाते हैं, जिससे न्याय और उपकार आदि ईश्वर के गुणों को अच्छी प्रकार जानके विद्वान् भी वैसे ही कर्मों में प्रवृत्त हों॥८॥

स जगदीश्वरोऽस्मदर्थं किं कुर्य्यादित्युपदिश्यते।

वह जगदीश्वर हमारे लिये क्या करे, सो अगले मन्त्र में वर्णन किया है-

अक्षि॑तोतिः सनेदि॒मं वाज॒मिन्द्रः॑ सह॒स्रिण॑म्।
यस्मि॒न् विश्वा॑नि॒ पौंस्या॑॥९॥

अक्षि॑तऽऊतिः। स॒ने॒त्। इ॒मम्। वाज॑म्। इन्द्रः॑। स॒ह॒स्रिण॑म्। यस्मि॑न्। विश्वा॑नि। पौंस्या॑॥९॥

पदार्थः-**(अक्षितोतिः)** क्षयरहिता ऊतिर्ज्ञानं यस्य सोऽक्षितोतिः **(सनेत्)** सम्यग् सेवयेत् **(इमम्)** प्रत्यक्षविषयम् **(वाजम्)** पदार्थविज्ञानम् **(इन्द्रः)** सकलैश्वर्य्ययुक्तः परमात्मा **(सहस्रिणम्)** सहस्राण्यसंख्यातानि सुखानि यस्मिन्सन्ति तम्। **तपःसहस्राभ्यां विनीनी।** (अष्टा०५.२.१०२) अनेन सहस्रशब्दादिनिः। **(यस्मिन्)** व्यवहारे **(विश्वानि)** समस्तानि **(पौंस्या)** पुंसो बलानि। **पौंस्यानीति बलनामसु पठितम्।** (निघं०२.९) शेर्लुगत्रापि॥९॥

अन्वयः-योऽक्षितोतिरिन्द्रः परमेश्वरोऽस्ति स यस्मिन् विश्वानि पौंस्यानि बलानि सन्ति तानि सनेत्संसेवयेदस्मदर्थमिमं सहस्रिणं वाजं च, यतो वयं सर्वाणि सुखानि प्राप्नुयाम॥९॥

भावार्थः-वयं यस्य सत्तयेमे पदार्था बलवन्तो भूत्वा स्वस्य स्वस्य व्यवहारे वर्त्तन्ते, तेभ्यो बलादिगुणेभ्यो विश्वसुखार्थं पुरुषार्थं कुर्य्याम, सोऽस्मिन्व्यवहारेऽस्माकं सहायं करोत्विति प्रार्थ्यते॥९॥

पदार्थः-जो **(अक्षितोतिः)** नित्य ज्ञानवाला **(इन्द्रः)** सब ऐश्वर्य्ययुक्त परमेश्वर है, वह कृपा करके हमारे लिये **(यस्मिन्)** जिस व्यवहार में **(विश्वानि)** सब **(पौंस्या)** पुरुषार्थ से युक्त बल हैं **(इमम्)** इस

(सहस्त्रिणम्) असंख्यात सुख देनेवाले **(वाजम्)** पदार्थों के विज्ञान को **(सनेत्)** सम्यक् सेवन करावे, कि जिससे हम लोग उत्तम-उत्तम सुखों को प्राप्त हों॥९॥

भावार्थः-जिसकी सत्ता से संसार के पदार्थ बलवान् होकर अपने-अपने व्यवहारों में वर्त्तमान हैं, उन सब बल आदि गुणों से उपकार लेकर विश्व के नाना प्रकार के सुख भोगने के लिये हम लोग पूर्ण पुरुषार्थ करें, तथा ईश्वर इस प्रयोजन में हमारा सहाय करे, इसलिये हम लोग ऐसी प्रार्थना करते हैं॥९॥

कस्य रक्षणेन पुरुषार्थः सिद्धो भवतीत्युपदिश्यते।

किसकी रक्षा से पुरुषार्थ सिद्ध होता है, इस विषय का प्रकाश ईश्वर ने अगले मन्त्र में किया है-

मा नो॒ मर्त्ता॑ अ॒भिद्रु॑हन् त॒नूना॑मिन्द्र गिर्वणः।

ईशा॑नो यवया व॒धम्॥ १०॥ १०॥

मा। नः॒। मर्त्ताः॑। अ॒भि। द्रु॒ह॒न्। त॒नूना॑म्। इन्द्र॒। गि॒र्व॒णः॒। ईशा॑नः। य॒व॒य॒। व॒धम्॥ १०॥

पदार्थः-**(मा)** निषेधार्थे **(नः)** अस्माकमस्मान्वा **(मर्त्ताः)** मरणधर्माणो मनुष्याः। **मर्त्ता इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(अभिद्रुहन्)** अभिद्रुह्यन्त्वभिजिघांसन्तु। अत्र व्यत्ययेन शो लोडर्थे लुङ् च। **(तनूनाम्)** शरीराणां विस्तृतानां पदार्थानां वा **(इन्द्र)** सर्वरक्षकेश्वर! **(गिर्वणः)** वेदशिक्षाभ्यां संस्कृताभिर्गीर्भिर्वन्यते सम्यक् सेव्यते यस्तत्सम्बुद्धौ **(ईशानः)** योऽसावीष्टे **(यवया)** मिश्रय। **प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चे**ति यवशब्दाद्धात्वर्थे णिच्। **अन्येषामपि दृश्यते।** (अष्टा०६.३.१३७) इति दीर्घः। **(वधम्)** हननम्॥१०॥

अन्वयः-हे गिर्वणः सर्वशक्तिमन्निन्द्र परमेश्वर! ईशानस्त्वं नोऽस्माकं तनूनां वधं मा यवय। इमे मर्त्ताः सर्वे प्राणिनोऽस्मान् मा अभिद्रुहन् मा जिघांसन्तु॥१०॥

भावार्थः-नैव कोऽपि मनुष्योऽन्यायेन कंचिदपि प्राणिनं हिंसितुमिच्छेत्, किन्तु सर्वैः सह मित्रतामाचरेत्। यथेश्वरः कंचिदपि नाभिद्रुह्यति, तथैव सर्वैर्मनुष्यैरनुष्ठातव्यमिति॥१०॥

अनेन पञ्चमेन सूक्तेन मनुष्यैः कथं पुरुषार्थः कर्त्तव्यः सर्वोपकारश्चेति चतुर्थेन सूक्तेन सह सङ्गतिरस्तीति विज्ञेयम्। इदमपि सूक्तं सायणाचार्य्यादिभिर्विलसनाख्यादिभिश्चान्यथार्थं वर्णितम्॥

इति पञ्चमं सूक्तं दशमश्च वर्गः समाप्तः॥

पदार्थः-हे **(गिर्वणः)** वेद वा उत्तम-उत्तम शिक्षाओं से सिद्ध की हुई वाणियों करके सेवा करने योग्य सर्वशक्तिमान् **(इन्द्र)** सब के रक्षक **(ईशानः)** परमेश्वर! आप **(नः)** हमारे **(तनूनाम्)** शरीरों के **(वधम्)** नाश दोषसहित **(मा)** कभी मत **(यवय)** कीजिये, तथा आपके उपदेश से **(मर्त्ताः)** ये सब मनुष्य लोग भी **(नः)** हम से **(मा)** **(अभिद्रुहन्)** वैर कभी न करें॥१०॥

भावार्थः-कोई मनुष्य अन्याय से किसी प्राणी को मारने की इच्छा न करे, किन्तु परस्पर मित्रभाव से वर्त्तें, क्योंकि जैसे परमेश्वर विना अपराध से किसी का तिरस्कार नहीं करता, वैसे ही सब मनुष्यों को भी करना चाहिये॥१०॥

इस पञ्चम सूक्त की विद्या से मनुष्यों को किस प्रकार पुरुषार्थ और सब का उपकार करना चाहिये, इस विषय के कहने से चौथे सूक्त के अर्थ के साथ इसकी सङ्गति जाननी चाहिये। इस सूक्त का भी अर्थ सायणाचार्य्य आदि और डाक्टर विलसन आदि साहबों ने उलटा किया है॥

यह पाँचवाँ सूक्त और दशवाँ वर्ग समाप्त हुआ॥

अथ दशर्च्चस्य षष्ठस्य सूक्तस्य मधुच्छन्दा ऋषिः। १-३ इन्द्र; ४,६,८,९ मरुतः; ५.७ मरुत इन्द्रश्च; १० इन्द्रश्च देवताः। १,३, ५-७, ९-१० गायत्री; २ विराड्गायत्री; ४,८ निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

मन्त्रोक्तविद्यार्थं केऽर्था उपयोक्तव्या इत्युपदिश्यते।

छठे सूक्त के प्रथम मन्त्र में यथायोग्य कार्य्यों में किस प्रकार से किन-किन पदार्थों को संयुक्त करना चाहिये, इस विषय का उपदेश किया है-

युञ्जन्ति॑ ब्र॒ध्नम॑रु॒षं चर॑न्तं॒ परि॑ त॒स्थुष॑:।
रोच॑न्ते रोच॒ना दि॒वि॥ १॥

यु॒ञ्जन्ति॑। ब्र॒ध्नम्। अ॒रु॒षम्। चर॑न्तम्। परि॑। त॒स्थुष॑:। रोच॑न्ते। रो॒च॒ना। दि॒वि॥ १॥

पदार्थः-(**युञ्जन्ति**) योजयन्ति **(ब्रध्नम्)** महान्तं परमेश्वरम्। शिल्पविद्यासिद्धय आदित्यमग्निं प्राणं वा। **ब्रध्न इति महन्नामसु पठितम्।** (निघं०३.३) **अश्वनामसु च।** (निघं०१.१४) **(अरुषम्)** सर्वेषु मर्मसु सीदन्तमहिंसकं परमेश्वरं प्राणवायुं तथा बाह्ये देशे रूपप्रकाशकं रक्तगुणविशिष्टमादित्यं वा। **अरुषमिति रूपनामसु पठितम्।** (निघं०३.७) **(चरन्तम्)** सर्व जगज्जानन्तं सर्वत्र व्याप्नुवन्तम् **(परि)** सर्वतः **(तस्थुषः)** तिष्ठन्तीति तान् सर्वान् स्थावरान् पदार्थान् मनुष्यान् वा। **तस्थुष इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(रोचन्ते)** प्रकाशन्ते रुचिहेतवश्च भवन्ति **(रोचनाः)** प्रकाशिताः प्रकाशकाश्च **(दिवि)** द्योतनात्मके ब्रह्मणि सूर्य्यादिप्रकाशे वा। अयं मन्त्रः शतपथेऽप्येवं व्याख्यातः-**युञ्जन्ति ब्रध्नमरुषं चरन्तमिति। असौ वा आदित्यो ब्रध्नोऽरुषोमुमेवाऽस्मा आदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै।** (श०ब्रा०१३.१.१५.१)॥१॥

अन्वयः-ये मनुष्या अरुषं ब्रध्नं परितस्थुषश्चरन्तं परमात्मानं स्वात्मनि बाह्यदेशे सूर्य्यं वायुं वा युञ्जन्ति ते रोचनाः सन्तो दिवि प्रकाशे रोचन्ते प्रकाशन्ते॥१॥

भावार्थः-ईश्वर उपदिशति-ये खलु विद्यासम्पादने उद्युक्ता भवन्ति तानेव सर्वाणि सुखानि प्राप्नुवन्ति। तस्माद्विद्वांसः पृथिव्यादिपदार्थेभ्य उपयोगं सङ्गृह्योपग्राह्य च सर्वान् प्राणिनः सुखयेयुरिति। यूरोपदेशवासिना भट्टमोक्षमूलराख्येनास्य मन्त्रस्यार्थो रथेऽश्वस्य योजनरूपो गृहीतः; सोऽन्यथास्तीति भूमिकायां लिखितम्॥१॥

पदार्थः-जो मनुष्य **(अरुषम्)** अङ्ग-अङ्ग में व्याप्त होनेवाले हिंसारहित सब सुख को करने **(चरन्तम्)** सब जगत् को जानने वा सब में व्याप्त **(परितस्थुषः)** सब मनुष्य वा स्थावर जङ्गम पदार्थ और चराचर जगत् में भरपूर हो रहा है, **(ब्रध्नम्)** उस महान् परमेश्वर को उपासना योग द्वारा प्राप्त होते हैं, वे **(दिवि)** प्रकाशरूप परमेश्वर और बाहर सूर्य्य वा पवन के बीच में **(रोचनाः)** ज्ञान से प्रकाशमान होके **(रोचन्ते)** आनन्द में प्रकाशित होते हैं। तथा जो मनुष्य **(अरुषम्)** दृष्टिगोचर में रूप का प्रकाश करने

तथा अग्निरूप होने से लाल गुणयुक्त **(चरन्तम्)** सर्वत्र गमन करनेवाले **(ब्रध्नम्)** महान् सूर्य्य और अग्नि को शिल्पविद्या में **(परियुञ्जन्ति)** सब प्रकार से युक्त करते हैं, वे जैसे **(दिवि)** सूर्य्यादि के गुणों के प्रकाश में पदार्थ प्रकाशित होते हैं, वैसे **(रोचनाः)** तेजस्वी होके **(रोचन्ते)** नित्य उत्तम-उत्तम आनन्द से प्रकाशित होते हैं॥१॥

भावार्थः-जो लोग विद्यासम्पादन में निरन्तर उद्योग करनेवाले होते हैं, वे ही सब सुखों को प्राप्त होते हैं। इसलिये विद्वान् को उचित है कि पृथिवी आदि पदार्थों से उपयोग लेकर सब प्राणियों को लाभ पहुंचावे कि जिससे उनको भी सम्पूर्ण सुख मिलें। जो यूरोपदेशवासी मोक्षमूलर साहब आदि ने इस मन्त्र का अर्थ घोड़े को रथ में जोड़ने का लिया है, सो ठीक नहीं। इसका खण्डन भूमिका में लिख दिया है, वहां देख लेना चाहिये॥१॥

उक्तार्थस्य कीदृशौ गुणौ क्व योक्तव्यावित्युपदिश्यते।

उक्त सूर्य्य और अग्नि आदि के कैसे गुण हैं, और वे कहां-कहां उपयुक्त करने योग्य हैं, सो अगले मन्त्र में उपदेश किया है-

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे।
शोणा धृष्णू नृवाहसा॥२॥

युञ्जन्ति। अस्य। काम्या। हरी इति। विपक्षसा। रथे। शोणा। धृष्णू इति। नृऽवाहसा॥२॥

पदार्थः-**(युञ्जन्ति)** युञ्जन्तु। अत्र लोडर्थे लट्। **(अस्य)** सूर्य्यस्याग्नेः **(काम्या)** कामयितव्यौ। अत्र सर्वत्र **सुपां सुलुगि**त्याकारादेशः। **(हरी)** हरणशीलावाकर्षणवेगगुणौ पूर्वपक्षापरपक्षौ वा। **इन्द्रस्य हरी ताभ्यामिदꣳ सर्वं हरतीति।** (षड्विंशब्रा०प्रपा०१.ख०१) **(विपक्षसा)** विविधानि यन्त्रकलाजलचक्र-भ्रमणयुक्तानि पक्षांसि पार्श्वे स्थितानि ययोस्तौ **(रथे)** रमणसाधने भूजलाकाशगमनार्थे याने। **यज्ञसंयोगाद्राजा स्तुतिं लभेत, राजसंयोगाद्युद्धोपकरणानि। तेषां रथः प्रथमागामी भवति। रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणोऽस्मिँस्तिष्ठतीति वा रपतेर्वा रसतेर्वा।** (निरु०९.११) **रथ इति पदनामसु पठितम्।** (निघं०५.३) आभ्यां प्रमाणाभ्यां रथशब्देन विशिष्टानि यानानि गृह्यन्ते। **(शोणा)** वर्णप्रकाशकौ गमनहेतू च **(धृष्णू)** दृढौ **(नृवाहसौ)** सम्यग्योजितौ नॄन् वहतस्तौ॥२॥

अन्वयः-हे विद्वांसोऽस्य काम्यौ शोणौ धृष्णू विपक्षसौ नृवाहसौ हरी रथे युञ्जन्ति युञ्जन्तु॥२॥

भावार्थः-ईश्वर उपदिशति-न यावन्मनुष्या भूजलाग्न्यादिपदार्थानां गुणज्ञानोपकारग्रहणाभ्यां भूजलाकाशगमनाय यानानि सम्पादयन्ति नैव तावत्तेषां दृढे राज्यश्रियौ सुसुखे भवतः।

शारमण्यदेशनिवासिनाऽस्य मन्त्रस्य विपरीतं व्याख्यानं कृतमस्ति। तद्यथा-**'अस्येति सर्वनाम्नो निर्देशात् स्पष्टं गम्यत इन्द्रस्य ग्रहणम्। कुतः, रक्तगुणविशिष्टावश्वावस्यैव सम्बन्धिनौ भवतोऽतः। नात्र**

खलु सूर्य्योषसोर्ग्रहणम्। कुतः, प्रथममन्त्र एकस्याश्वस्याभिधानात्।' इति मोक्षमूलरकृतोऽर्थः सम्यङ् नास्तीति। कुतः, अस्येति पदेन भौतिकपदार्थयोः सूर्य्याग्न्योर्ग्रहणं, न कस्यचिद्देहधारिणः। हरी इति सूर्य्यस्य धारणाकर्षणगुणयोर्ग्रहणम्। शोणेति पदेनाग्ने रक्तज्वालागुणयोर्ग्रहणार्हेण पूर्वमन्त्रेऽश्वाभिधान एकवचनं जात्यभिप्रायेण चास्त्यतः। इदं शब्दप्रयोगः खलु प्रत्यक्षार्थवाचित्वात् संनिहितार्थस्य सूर्य्यादेरेव ग्रहणाच्च तत्कल्पितोऽर्थोऽन्यथैवास्तीति॥ २॥

पदार्थः-जो विद्वान् **(अस्य)** सूर्य्य और अग्नि के **(काम्या)** सब के इच्छा करने योग्य **(शोणा)** अपने-अपने वर्ण के प्रकाश करनेहारे वा गमन के हेतु **(धृष्णू)** दृढ **(विपक्षसा)** विविध कला और जल के चक्र घूमनेवाले पांखरूप यन्त्रों से युक्त **(नृवाहसा)** अच्छी प्रकार सवारियों में जुड़े हुए मनुष्यादिकों को देशदेशान्तर में पहुंचानेवाले **(हरी)** आकर्षण और वेग तथा शुक्लपक्ष और कृष्णपक्षरूप दो घोड़े जिनसे सब का हरण किया जाता है, इत्यादि श्रेष्ठ गुणों को पृथिवी जल और आकाश में जाने आने के लिये अपने-अपने रथों में **(युञ्जन्ति)** जोड़ें॥ २॥

भावार्थः-ईश्वर उपदेश करता है कि-मनुष्य लोग जब तक भू जल आदि पदार्थों के गुण ज्ञान और उनके उपकार से भू जल और आकाश में जाने आने के लिये अच्छी सवारियों को नहीं बनाते, तब तक उनको उत्तम राज्य और धन आदि उत्तम सुख नहीं मिल सकते।

जरमन देश के रहनेवाले मोक्षमूलर साहब ने इस मन्त्र का विपरीत व्याख्यान किया है। सो यह है कि-**'अस्य'** सर्वनामवाची इस शब्द के निर्देश से स्पष्ट मालूम होता है कि इस मन्त्र में इन्द्र देवता का ग्रहण है, क्योंकि लाल रंग के घोड़े इन्द्र ही के हैं। और यहां सूर्य्य तथा उषा का ग्रहण नहीं, क्योंकि प्रथम मन्त्र में एक घोड़े का ही ग्रहण किया है। यह उनका अर्थ ठीक नहीं, क्योंकि **'अस्य'** इस पद से भौतिक जो सूर्य्य और अग्नि हैं, इन्हीं दोनों का ग्रहण है, किसी देहधारी का नहीं। **'हरी'** इस पद से सूर्य्य के धारण और आकर्षण गुणों का ग्रहण तथा **'शोणा'** इस शब्द से अग्नि की लाल लपटों के ग्रहण होने से और पूर्व मन्त्र में एक अश्व का ग्रहण जाति के अभिप्राय से अर्थात् एकवचन से अश्व जाति का ग्रहण होता है। और **'अस्य'** यह शब्द प्रत्यक्ष अर्थ का वाची होने से सूर्य्यादि प्रत्यक्ष पदार्थों का ग्राहक होता है, इत्यादि हेतुओं से मोक्षमूलर साहब का अर्थ सच्चा नहीं॥ २॥

येनेमे पदार्था उत्पादिताः स कीदृश इत्युपदिश्यते।

जिसने संसार के सब पदार्थ उत्पन्न किये हैं, वह कैसा है, यह बात अगले मन्त्र में प्रकाशित की है-

केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे।
समुषद्भिरजायथाः॥ ३॥

केतुम्। कृण्वन्। अकेतवे। पेशः। मर्य्याः। अपेशसे। सम्। उषत्ऽभिः। अजायथाः॥ ३॥

पदार्थः-**(केतुम्)** प्रज्ञानम्। **केतुरिति प्रज्ञानामसु पठितम्।** (निघं०३.९) **(कृण्वन्)** कुर्वन्सन्। इदं **कृवि हिंसाकरणयोश्चे**त्यस्य रूपम्। **(अकेतवे)** अज्ञानान्धकारविनाशाय **(पेशः)** हिरण्यादिधनं श्रेष्ठं रूपं वा। **पेश इति हिरण्यनामसु पठितम्।** (निघं०१.२) **रूपनामसु च।** (निघं०३.७) **(मर्य्याः)** मरणधर्मशीला मनुष्यास्तत्सम्बोधने। **मर्य्या इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(अपेशसे)** निर्धनतादारिद्र्यादिदोषविनाशाय **(सम्)** सम्यगर्थे **(उषद्भिः)** ईश्वरादिपदार्थविद्याः कामयमानैर्विद्वद्भिः सह समागमं कृत्वा **(अजायथाः)** एतद्विद्याप्राप्त्या प्रकटो भव। अत्र लोडर्थे लङ्॥३॥

अन्वयः-हे मर्य्याः! यो जगदीश्वरोऽकेतवे केतुमपेशसे पेशः कृणवन्सन् वर्त्तते तं सर्वा विद्याश्च समुषद्भिः समागमं कृत्वा यूयं यथाद्विजानीत। तथा हे जिज्ञासु मनुष्य! त्वमपि तत्समागमेनाऽजायथाः, एतद्विद्याप्राप्त्या प्रसिद्धो भव॥३॥

भावार्थः-मनुष्यै रात्रेश्चतुर्थे प्रहर आलस्यं त्यक्त्वोत्थायाज्ञानदारिद्र्यविनाशाय नित्यं प्रयत्नवन्तो भूत्वा परमेश्वरस्य ज्ञानं पदार्थेभ्य उपकारग्रहणं च कार्य्यमिति।

'यद्यपि मर्य्या इति विशेषतयाऽत्र कस्यापि नाम न दृश्यते, तदप्यत्रेन्द्रस्यैव ग्रहणमस्तीति निश्चीयते। हे इन्द्र! त्वं प्रकाशं जनयसि यत्र पूर्वं प्रकाशो नाभूत्।' इति मोक्षमूलरकृतोऽर्थोसङ्गतोऽस्ति। कुतो, मर्य्या इति मनुष्यनामसु पठितत्वात् ((निघं०२.३)। अजायथा इति लोडर्थे लङ्विधानेन मनुष्यकर्त्तृकत्वेन पुरुषव्यत्ययेन प्रथमार्थे मध्यमविधानादिति॥३॥

पदार्थः-**(मर्य्याः)** हे मनुष्य लोगो! जो परमात्मा **(अकेतवे)** अज्ञानरूपी अन्धकार के विनाश के लिये **(केतुम्)** उत्तम ज्ञान, और **(अपेशसे)** निर्धनता दारिद्र्य तथा कुरूपता विनाश के लिये **(पेशः)** सुवर्ण आदि धन और श्रेष्ठ रूप को **(कृण्वन्)** उत्पन्न करता है, उसको तथा सब विद्याओं को **(समुषद्भिः)** जो ईश्वर की आज्ञा के अनुकूल वर्त्तनेवाले हैं, उनसे मिल-मिल कर जान के **(अजायथाः)** प्रसिद्ध हूजिये। तथा हे जानने की इच्छा करनेवाले मनुष्य! तू भी उस परमेश्वर के समागम से **(अजायथाः)** इस विद्या को यथावत् प्राप्त हो॥३॥

भावार्थः-मनुष्यों को प्रति रात्रि के चौथे प्रहर में आलस्य छोड़कर फुरती से उठ कर अज्ञान और दरिद्रता के विनाश के लिये प्रयत्नवाले होकर तथा परमेश्वर के ज्ञान और संसारी पदार्थों से उपकार लेने के लिये उत्तम उपाय सदा करना चाहिये।

'यद्यपि मर्य्याः इस पद से किसी का नाम नहीं मालूम होता, तो भी यह निश्चय करके जाना जाता है कि इस मन्त्र में इन्द्र का ही ग्रहण है कि-हे इन्द्र तू वहां प्रकाश करनेवाला है कि जहां पहिले प्रकाश नहीं था।' यह मोक्षमूलरजी का अर्थ असङ्गत है, क्योंकि **'मर्य्याः'** यह शब्द मनुष्य के नामों में निघण्टु में पढ़ा है, तथा **'अजायथाः'** यह प्रयोग पुरुषव्यत्यय से प्रथम पुरुष के स्थान में मध्यम पुरुष का प्रयोग किया है॥३॥

अथ मरुतां कर्मोपदिश्यते।

अगले मन्त्र में वायु के कर्मों का उपदेश किया है-

आदह॑ स्व॒धामनु॒ पुन॑र्गर्भ॒त्वमे॑रि॒रे।
दधा॑ना॒ नाम॑ य॒ज्ञिय॑म्॥ ४॥

आत्। अह॑। स्व॒धाम्। अनु॑। पुन॑:। गर्भ॒त्वम्। आ॒ऽई॒रि॒रे। दधा॑ना:। नाम॑। य॒ज्ञिय॑म्॥ ४॥

पदार्थ:-(**आत्**) आनन्तर्य्यार्थे (**अह**) विनिग्रहार्थे। **अह इति विनिग्रहार्थीय:।** (निरु०१.५) (**स्वधाम्**) उदकम्। **स्वधेत्युदकनामसु पठितम्।** (निघं०१.१२) (**अनु**) वीप्सायाम् (**पुन:**) पश्चात् (**गर्भत्वम्**) गर्भस्याधिकरणा वाक् तस्या भावस्तत् (**एरिरे**) समन्तात् प्राप्नुवन्त:। **ईर गतौ कम्पने चे**त्यस्या**मन्त्र** इति प्रतिषेधादामोऽभावे प्रयोग:। (**दधाना:**) सर्वधारका: (**नाम**) उदकम्। **नामेत्युदकनामसु पठितम्।** (निघं०१.१२) (**यज्ञियम्**) यज्ञकर्मार्हतीति यज्ञियो देशस्तम्। **तत्कर्मार्हतीत्युपसंख्यानम्।** (अष्टा०५.१.७१) इति वार्तिकेन घ: प्रत्यय:॥४॥

अन्वय:-यथा मरुतो यज्ञियं नाम दधाना: सन्तो यदा स्वधामन्वप्सु पुनर्गर्भत्वमेरिरे, तथा आत् अनन्तरं वृष्टिं कृत्वा पुनर्जलानामहेति विनिग्रहं कुर्वन्ति॥४॥

भावार्थ:-यज्जलं सूर्य्याग्निभ्यां लघुत्वं प्राप्य कणीभूतं जायते, तद्धारणं घनाकारं कृत्वा मरुत एव वर्षयन्ति, तेन सर्वपालनं सुखं च जायते।

'तदनन्तरं मरुत: स्वस्वभावानुकूल्येन बालकाकृतयो जाता:। यै: स्वकीयं शुद्धं नाम रक्षितम्।' इति मोक्षमूलरोक्ति: प्रणाय्यास्ति। कस्मात्, न खल्वत्र बालकाकृतिशुद्धनामरक्षणयोरविद्यमानत्वेनेन्द्र-संज्ञिकानां मरुतां सकाशादन्यार्थस्य ग्रहणं सम्भवत्यत:॥४॥

पदार्थ:-जैसे 'मरुत:' वायु (**नाम**) जल और (**यज्ञियम्**) यज्ञ के योग्य देश को (**दधाना:**) सब पदार्थों को धारण किये हुए (**पुन:**) फिर-फिर (**स्वधामनु**) जलों में (**गर्भत्वम्**) उनके समूहरूपी गर्भ को (**एरिरे**) सब प्रकार से प्राप्त होते कम्पाते, वैसे (**आत्**) उसके उपरान्त वर्षा करते हैं, ऐसे ही वार-वार जलों को चढ़ाते वर्षाते हैं॥४॥

भावार्थ:-जो जल सूर्य्य वा अग्नि के संयोग से छोटा-छोटा होजाता है, उसको धारण कर और मेघ के आकार को बना के वायु ही उसे फिर-फिर वर्षाता है, उसी से सब का पालन और सब को सुख होता है।

'इसके पीछे वायु अपने स्वभाव के अनुकूल बालक के स्वरूप में बन गये और अपना नाम पवित्र रख लिया।' देखिये मोक्षमूलर साहब का किया अर्थ मन्त्रार्थ से विरुद्ध है, क्योंकि इस मन्त्र में बालक बनना और अपना पवन नाम रखना, यह बात ही नहीं है। यहां इन्द्र नामवाले वायु का ही ग्रहण है, अन्य किसी का नहीं॥४॥

तैः सह सूर्य्यः किं करोतीत्युपदिश्यते।

उन पवनों के साथ सूर्य्य क्या करता है, सो अगले मन्त्र में उपदेश किया है-

वी॒ळु चि॑दारुज॒त्नुभि॒र्गुहा॑ चिदिन्द्र॒ वह्नि॑भिः।

अवि॑न्द उ॒स्रिया॒ अनु॑॥५॥११॥

वी॒ळु। चि॒त्। आ॒रु॒ज॒त्नुऽभिः। गुहा॑। चि॒त्। इ॒न्द्र॒। वह्नि॑भिः। अवि॑न्दः। उ॒स्रियाः॑। अनु॑॥५॥

पदार्थः-(**वीळु**) दृढं बलम्। **वीळु इति बलनामसु पठितम्।** (निघं०२.९) (**चित्**) उपमार्थे। (निरु०१.४) (**आरुजत्नुभिः**) समन्ताद् भञ्जद्भिः। आङ्पूर्वाद् **रुजो भङ्ग** इत्यस्माद्धातोरौणादिकः क्त्नुः प्रत्ययः। (**गुहा**) गुहायामन्तरिक्षे। **सुपां सुलुगि**ति ङेर्लुक्। **गुहा गूहतेः।** (निरु०१३.८) (**चित्**) एवार्थे। **चिदिदं पूजायाम्।** (निरु०१.४) (**इन्द्रः**) सूर्य्यः (**वह्निभिः**) वोढृभिर्मरुद्भिः सह। **वहिशृ०** (उणा०४.५३) इति वहेरौणादिको निः प्रत्ययः। (**अविन्दः**) लभते। पूर्ववदत्र पुरुषव्यत्ययः, लडर्थे लोट् च। (**उस्रियाः**) किरणाः। अत्र **इयाडियाजीकाराणामुपसंख्यानमि**त्यनेन शसः स्थाने डियाजादेशः। **उस्रेति रश्मिनामसु पठितम्।** (निघं०१.५) (**अनु**) पश्चादर्थे॥५॥

अन्वयः-चिद्यथा मनुष्याः स्वसमीपस्थान् पदार्थानुपर्य्यधश्च नयन्ति, तथैवेन्द्रोऽयं सूर्य्यो वीळुबलेनोस्रियाः क्षेपयित्वा पदार्थान् विन्दतेऽनु पश्चात्तान् भित्त्वाऽऽरुजत्नुभिर्वह्निभिर्मरुद्भिः सह त्वामेतत्पदार्थसमूहं गुहायामन्तरिक्षे स्थापयति॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा बलवन्तो मरुतो दृढेन स्ववेगेन दृढानपि वृक्षादीन् भञ्जन्ति तथा सूर्य्यस्तानहर्निशं किरणैश्छिनत्ति मरुतश्च तानुपर्य्यधो नयन्ति, एवमेवेश्वरनियमेन सर्वे पदार्था उत्पत्तिविनाशावपि प्राप्नुवन्ति।

'हे इन्द्र! त्वया तीक्ष्णगतिभिर्वायुभिः सह गूढस्थानस्था गावः प्राप्ता' इति मोक्षमूलरव्याख्याऽसङ्गतास्ति। कुतः, उस्रेति रश्मिनामसु निघण्टौ (१.५) पठितत्वेनात्रैतस्यार्थस्यैवार्थस्य योग्यत्वात्। गुहेत्यनेन सर्वावरकत्वादन्तरिक्षस्यैव ग्रहणार्हत्वादिति॥५॥

इत्येकादशो वर्गः समाप्तः॥

पदार्थः-(**चित्**) जैसे मनुष्य लोग अपने पास के पदार्थों को उठाते धरते हैं, (**चित्**) वैसे ही सूर्य्य भी (**वीळु**) दृढ बल से (**उस्रियाः**) अपनी किरणों करके संसारी पदार्थों को (**अविन्दः**) प्राप्त होता है, (**अनु**) उसके अनन्तर सूर्य्य उनको छेदन करके (**आरुजत्नुभिः**) भङ्ग करने और (**वह्निभिः**) आकाश आदि देशों में पहुंचानेवाले पवन के साथ ऊपर-नीचे करता हुआ (**गुहा**) अन्तरिक्ष अर्थात् पोल में सदा चढ़ाता गिराता रहता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे बलवान् पवन अपने वेग से भारी-भारी दृढ वृक्षों को तोड़ फोड़ डालते और उनको ऊपर नीचे गिराते रहते हैं, वैसे ही सूर्य्य भी अपनी किरणों से उनका छेदन करता रहता है, इससे वे ऊपर नीचे गिरते रहते हैं। इसी प्रकार ईश्वर के नियम से सब पदार्थ उत्पत्ति और विनाश को भी प्राप्त होते रहते हैं।

'हे इन्द्र! तू शीघ्र चलनेवाले वायु के साथ अप्राप्त स्थान में रहनेवाली गौओं को प्राप्त हुआ।' यह भी मोक्षमूलर साहब की व्याख्या असङ्गत है, क्योंकि **'उस्रा'** यह शब्द निघण्टु में रश्मि नाम में पढ़ा है, इससे सूर्य्य की किरणों का ही ग्रहण होना योग्य है। तथा **'गुहा'** इस शब्द से सबको ढांपनेवाला होने से अन्तरिक्ष का ग्रहण है॥५॥

यह ग्यारहवाँ वर्ग समाप्त हुआ॥

पुनस्ते कीदृशा भवन्तीत्युपदिश्यते।

फिर वे पवन कैसे हैं, सो अगले मन्त्र में प्रकाश किया है-

देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः।

महामनूषत श्रुतम्॥६॥

देवयन्तः। यथा। मतिम्। अच्छ। विदत्ऽवसुम्। गिरः। महाम्। अनूषत। श्रुतम्॥६॥

पदार्थः-(**देवयन्तः**) प्रकाशयन्त आत्मनो देवमिच्छन्तो मनुष्याः (**यथा**) येन प्रकारेण (**मतिम्**) बुद्धिम् (**अच्छ**) उत्तमरीत्या। **निपातस्य चे**ति दीर्घः। (**विदद्वसुम्**) विदद्भिः सुखज्ञापकैर्वसुभिर्युक्ताम् (**गिरः**) गृणन्ति ये ते गिरो विद्वांसः (**महाम्**) महतीम् (**अनूषत**) प्रशस्तां कुर्वन्ति। **णू स्तवन** इत्यस्य लुङ्प्रयोगः। **संज्ञापूर्वको विधिरनित्य** इति गुणाभावः, लडर्थे लुङ् च। (**श्रुतम्**) सर्वशास्त्रश्रवणकथनम्॥६॥

अन्वयः-यथा देवयन्तो गिरो विद्वांसो मनुष्या विदद्वसुं महां महतीं मतिं बुद्धिं श्रुतं वेदशास्त्रार्थयुक्तं श्रवणं कथनं चानूषत प्रशस्ते कुर्वन्ति, तथैव मरुतः स्ववेगादिगुणयुक्ताः सन्तो वाक्श्रोत्रचेष्टामहच्छिल्पकार्य्यं च प्रशस्तं साधयन्ति॥६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्मरुतां सकाशाल्लोकोपकारार्थं विद्याबुद्ध्यर्थं च सदा प्रयत्नः कार्य्यो येन सर्वे व्यवहाराः सिद्धेयुरिति।

'धर्मात्मभिर्गायनैर्मरुद्भिरिन्द्राय जयजयेति श्राविताः' इति मोक्षमूलरोक्तिरन्यथास्ति। कुतः, देवयन्त इत्यात्मनो देवं विद्वांसमिच्छन्त इत्यर्थान्मनुष्याणामेव ग्रहणम्॥६॥

पदार्थः-जैसे (**देवयन्तः**) सब विज्ञानयुक्त (**गिरः**) विद्वान् मनुष्य (**विदद्वसुम्**) सुखकारक पदार्थ विद्या से युक्त (**महाम्**) अत्यन्त बड़ी (**मतिम्**) बुद्धि (**श्रुतम्**) सब शास्त्रों के श्रवण और कथन को

(अच्छ) अच्छी प्रकार **(अनूषत)** प्रकाश करते हैं, वैसे ही अच्छी प्रकार साधन करने से वायु भी शिल्प अर्थात् सब कारीगरी को **(अनूषत)** सिद्ध करते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को वायु के उत्तम गुणों का ज्ञान, सब का उपकार और विद्या की वृद्धि के लिये प्रयत्न सदा करना चाहिये, जिससे सब व्यवहार सिद्ध हों।

'गान करनेवाले धर्मात्मा जो वायु हैं उन्होंने इन्द्र को ऐसी वाणी सुनाई कि तू जीत जीत।' यह भी उनका अर्थ अच्छा नहीं, क्योंकि **'देवयन्तः'** इस शब्द का अर्थ यह है कि मनुष्य लोग अपने अन्तःकरण से विद्वानों के मिलने की इच्छा रखते हैं। इस अर्थ से मनुष्यों का ग्रहण होता है॥६॥

केन सहैते कार्य्यसाधका भवन्तीत्युपदिश्यते।

उक्त पदार्थ किस के सहाय से कार्य्य के सिद्ध करनेवाले होते हैं, सो अगले मन्त्र में प्रकाश किया है-

इन्द्रे॑ण॒ सं हि दृक्ष॑से संजग्मा॒नो अबि॑भ्युषा।
म॒न्दू स॑मा॒नव॑र्चसा॥७॥

इन्द्रे॑ण। सम्। हि। दृक्ष॑से। सं॒ऽज॒ग्मा॒नः। अबि॑भ्युषा। म॒न्दू इति॑। स॒मा॒नऽव॑र्चसा॥७॥

पदार्थः-**(इन्द्रेण)** परमेश्वरेण सूर्य्येण सह वा **(सम्)** सम्यक् **(हि)** निश्चये **(दृक्षसे)** दृश्यते। अत्र लडर्थे लेट्मध्यमैकवचनप्रयोगः। **अनित्यमागमशासन**मिति वचनप्रामाण्यात् **सृजिदृशो**रित्यम् न भवति। **(संजगमानः)** सम्यक् सङ्गतः **(अबिभ्युषा)** भयनिवारणहेतुना किरणसमूहेन वायुगणेन सह वा **(मन्दू)** आनन्दितावानन्दकारकौ। **मन्दू इति पदनामसु पठितम्।** (निघं०४.१) **(समानवर्चसा)** समानं तुल्यं वर्चो दीप्तिर्यर्योस्तौ। यास्काचार्य्येणायं मन्त्र एवं व्याख्यातः-**इन्द्रेण सं हि दृश्यसे संजग्मानो अबिभ्युषा गणेन मन्दू मदिष्णू युवास्थोऽपि वा मन्दुना तेनेति स्यात्समानवर्चसेत्येतेन व्याख्यातम्।** (निरु०४.१२॥७॥

अन्वयः-अयं वायुरबिभ्युषेन्द्रेणैव संजग्मानः सन् तथा वायुना सह सूर्य्यश्च सङ्गत्य दृश्यसे दृश्यते दृष्टिपथमागच्छति हि यतस्तौ समानवर्चसौ वर्तेते तस्मात्सर्वेषां मन्दू भवतः॥७॥

भावार्थः-ईश्वरेणाभिव्याप्य स्वसत्तया सूर्य्यवाय्वादयः सर्वे पदार्था उत्पाद्य धारिता वर्त्तन्ते। एतेषां मध्य खलु सूर्य्यवाय्वोर्धारणाकर्षणप्रकाशयोगेन सह वर्त्तमानाः सर्वे पदार्थाः शोभन्ते। मनुष्यैरेते विद्योपकारं ग्रहीतुं योजनीयाः।

'इदम्महदाश्चर्यं यद्बहुवचनस्यैकवचने प्रयोगः कृतोऽस्तीति। यच्च निरुक्तकारेण द्विवचनस्य स्थान एकवचनप्रयोगः कृतोऽस्त्यतोऽसङ्गतोऽस्ति।' इति च मोक्षमूलरकल्पना सम्यङ् न वर्त्तते। कुतः, **व्यत्ययो बहुलम्, सुप्तिङुपग्रह०** इति वचनव्यत्ययविधायकस्य शास्त्रस्य विद्यमानत्वात्। तथा

निरुक्तकारस्य व्याख्यानं समञ्जसमस्ति। कुतः, मन्दू इत्यत्र **सुपां सुलुग्० इति** पूर्वसवर्णादेशविधायकस्य शास्त्रस्य विद्यमानत्वात्॥७॥

पदार्थः-यह वायु **(अबिभ्युषा)** भय दूर करनेवाली **(इन्द्रेण)** परमेश्वर की सत्ता के साथ **(संजग्मानः)** अच्छी प्रकार प्राप्त हुआ, तथा वायु के साथ सूर्य्य **(संदृक्षसे)** अच्छी प्रकार दृष्टि में आता है, **(हि)** जिस कारण ये दोनों **(समानवर्चसा)** पदार्थों के प्रसिद्ध बलवान् हैं, इसी से वे सब जीवों को **(मन्दू)** आनन्द के देनेवाले होते हैं॥७॥

भावार्थः-ईश्वर ने जो अपनी व्याप्ति और सत्ता से सूर्य्य और वायु आदि पदार्थ उत्पन्न करके धारण किये हैं, इन सब पदार्थों के बीच में से सूर्य्य और वायु ये दोनों मुख्य हैं, क्योंकि इन्हीं के धारण आकर्षण और प्रकाश के योग से सब पदार्थ सुशोभित होते हैं। मनुष्यों को चाहिये कि उन्हें पदार्थविद्या से उपकार लेने के लिये युक्त करें।

'यह बड़ा आश्चर्य्य है कि बहुवचन के स्थान में एकवचन का प्रयोग किया गया, तथा निरुक्तकार ने द्विवचन के स्थान में एकवचन का प्रयोग माना है, सो असङ्गत है।' यह भी मोक्षमूलर साहब की कल्पना ठीक नहीं, क्योंकि **'व्यत्ययो ब०; सुप्तिङुपग्रह०'** व्याकरण के इस प्रमाण से वचनव्यत्यय होता है। तथा निरुक्तकार का व्याख्यान सत्य है, क्योंकि **'सुपा सु०'** इस सूत्र से **'मन्दू'** इस शब्द में द्विवचन को पूर्वसवर्ण दीर्घ एकादेश हो गया है॥७॥

कथं पूर्वोक्तो नित्यवर्त्तमानो व्यवहारोऽस्तीत्युपदिश्यते।

पूर्वोक्त व्यवहार किस प्रकार से नित्य वर्तमान है, इस विषय का उपदेश अगले मन्त्र में किया है-

अ॒न॒व॒द्यैर॒भिद्यु॑भिर्म॒खः सह॑स्वदर्च्चति।
ग॒णैरिन्द्र॑स्य॒ काम्यैः॥८॥

अ॒न॒व॒द्यैः। अ॒भिऽद्यु॑भिः। म॒खः। सह॑स्वत्। अ॒र्च॒ति॒। ग॒णैः। इन्द्र॑स्य। काम्यैः॥८॥

पदार्थः-(**अनवद्यैः**) निर्दोषैः **(अभिद्युभिः)** अभितः प्रकाशमानैः **(मखः)** पालनशिल्पाख्यो यज्ञः। **मख इति यज्ञनामसु पठितम्।** (निघं०३.१७) **(सहस्वत्)** सहोऽतिशयितं सहनं विद्यते यस्मिन् तद्यथा स्यात्तथा। अत्रातिशये मतुप्। **(अर्चति)** सर्वान् पदार्थान् सत्करोति **(गणैः)** किरणसमूहैर्मरुद्भिर्वा **(इन्द्रस्य)** सूर्य्यस्य **(काम्यैः)** कामयितव्यैरुत्तमैः सह मिलित्वा॥८॥

अन्वयः-अयं मख इन्द्रस्यानवद्यैरभिद्युभिः काम्यैर्गणैः सह सर्वान्पदार्थान्सहस्वदर्चति॥८॥

भावार्थः-अयं सुखरक्षणप्रदो यज्ञः शुद्धानां द्रव्याणामग्नौ कृतेन होमेन सम्पादितो हि वायुकिरणशोधनद्वारा रोगविनाशनात्सर्वान् प्राणिनः सुखयित्वा बलवतः करोति।

अत्र मोक्षमूलरेण मखशब्देन यज्ञकर्त्ता गृहीतस्तदन्यथास्ति। कुतो, मखशब्देन यज्ञस्याभिधानत्वेन कमनीयैर्वायुगणैः सूर्य्यकिरणसहितैः सह हुतद्रव्यवहनेन वायुवृष्टिजलशुद्धिद्वारेष्टसुखसम्पादनेन सर्वेषां प्राणिनां सत्कारहेतुत्वात्। यच्चोक्तं **'मखशब्देन देवानां शत्रुर्गृह्यते'** तदप्यन्यथास्ति। कुतस्तत्र मखशब्दस्योपमावाचकत्वात्॥८॥

पदार्थः-जो यह **(मखः)** सुख और पालन होने का हेतु यज्ञ है, वह **(इन्द्रस्य)** सूर्य्य की **(अनवद्यैः)** निर्दोष **(अभिद्युभिः)** सब और से प्रकाशमान और **(काम्यैः)** प्राप्ति की इच्छा करने के योग्य **(गणैः)** किरणों वा पवनों के साथ मिलकर सब पदार्थों को **(सहस्वत्)** जैसे दृढ़ होते हैं, वैसे ही **(अर्चति)** श्रेष्ठ गुण करनेवाला होता है॥८॥

भावार्थः-जो शुद्ध अत्युत्तम होम के योग्य पदार्थों के अग्नि में किये हुए होम से किया हुआ यज्ञ है, वह वायु और सूर्य्य की किरणों की शुद्धि के द्वारा रोगनाश करने के हेतु से सब जीवों को सुख देकर बलवान् करता है।

'यहां मखशब्द से यज्ञ करनेवाले का ग्रहण है, तथा देवों के शत्रु का भी ग्रहण है।' यह भी मोक्षमूलर साहब का कहना ठीक नहीं, क्योंकि जो मखशब्द यज्ञ का वाची है, वह सूर्य्य की किरणों के सहित अच्छे-अच्छे वायु के गुणों से हवन किये हुए पदार्थों को सर्वत्र पहुंचाता है, तथा वायु और वृष्टिजल की शुद्धि का हेतु होने से सब प्राणियों को सुख देनेवाला होता है। और मख शब्द के उपमावाचक होने से देवों के शत्रु का भी ग्रहण नहीं॥८॥

अथ मरुतां गमनशीलत्वमुपदिश्यते।

अगले मन्त्र में गमनस्वभाववाले पवन का प्रकाश किया है॥

अतः परिज्मन्नागहि दिवो वा रोचनादधि।
सम्मस्मिन्नृञ्जते गिरः॥९॥

अतः। परिज्मन्। आ। गहि। दिवः। वा। रोचनात्। अधि। सम्। अस्मिन्। ऋञ्जते। गिरः॥९॥

पदार्थः-**(अतः)** अस्मात्स्थानात् **(परिज्मन्)** परितः सर्वतो गच्छन् उपर्य्यधः। सर्वान् पदार्थानितस्ततः क्षेप्ता। अयमजधातोः प्रयोगः। **श्वनुक्षण०** (उणा०१.१५७) इति कनिन्प्रत्ययान्तो मुडागमेनाकारलोपेन च निपातितः। **(आगहि)** गमयत्यागमयति वा। अत्र लडर्थे लोट्, पुरुषव्यत्ययेन गमेर्मध्यमपुरुषस्यैकवचने **बहुलं छन्दसी**ति शपो लुक्, हेर्डित्त्वादनुनासिकलोपश्च। **(दिवः)** प्रकाशात् **(वा)** पक्षान्तरे **(रोचनात्)** सूर्य्यप्रकाशादुचिकरान्मेघमण्डलाद्वा **(अधि)** उपरितः **(सम्)** सम्यक् **(अस्मिन्)** बहिरन्तःस्थे मरुद्गणे **(ऋञ्जते)** प्रसाध्नुवन्ति। **ऋञ्जतिः प्रसाधनकर्मा।** (निरु०६.२१) **(गिरः)** वाचः॥९॥

अन्वयः-यत्र गिरः समृञ्जते सोऽयं परिज्मा वायुरतः पृथिवीस्थानाज्जलकणानध्यागह्युपरि गमयति, स पुनर्दिवो रोचनात् सूर्य्यप्रकाशान्मेघमण्डलाद्वा जलादिपदार्थानागह्यागमयति। अस्मिन् सर्वे पदार्थाः स्थितिं लभन्ते॥९॥

भावार्थः-अयं बलवान् वायुर्गमनागमनशीलत्वात् सर्वपदार्थगमनागमनधारणशब्दोच्चारणश्रवणानां हेतुरस्तीति। सायणाचार्य्येण परिज्मन्शब्दमुणादिप्रसिद्धमविदित्वा मनिन्प्रत्ययान्तो व्याख्यातोऽयमस्य भ्रमोऽस्तीति बोध्यम्।

'हे इतस्ततो भ्रमणशील मनुष्याकृतिदेवदेहधारिन्निन्द्र! त्वं सन्मुखात्पार्श्वतो वोपरिष्टादस्मत्समीपमागच्छ, इयं सर्वेषां गायनानामिच्छास्ति' इति मोक्षमूलरव्याख्या विपरीतास्ति। कुतः, अस्मिन्मरुद्गण इन्द्रस्य सर्वा गिर ऋञ्जते इत्यनेन शब्दोच्चारणव्यवहारप्रसाधकत्वेनात्र प्राणवायोरेव ग्रहणात्॥९॥

पदार्थः-जिस वाणी में वायु का सब व्यवहार सिद्ध होता है, वह **(परिज्मन्)** सर्वत्र गमन करता हुआ सब पदार्थों को तले ऊपर पहुँचानेवाला पवन **(अतः)** इस पृथिवी स्थान से जलकणों का ग्रहण करके **(अध्यागहि)** ऊपर पहुँचता और फिर **(दिवः)** सूर्य्य के प्रकाश से **(वा)** अथवा **(रोचनात्)** जो कि रुचि को बढ़ानेवाला मेघमण्डल है, उससे जल को गिराता हुआ तले पहुँचाता है। **(अस्मिन्)** इसी बाहर और भीतर रहनेवाले पवन में सब पदार्थ स्थिति को प्राप्त होते हैं॥९॥

भावार्थः-यह बलवान् वायु अपने गमन आमगन गुण से सब पदार्थों के गमन आगमन धारण तथा शब्दों के उच्चारण और श्रवण का हेतु है। इस मन्त्र में सायणाचार्य्य ने जो उणादिगण में सिद्ध **'परिज्मन्'** शब्द था, उसे छोड़कर मनिन्प्रत्ययान्त कल्पना किया है, सो केवल उनकी भूल है।

'हे इधर-उधर विचरनेवाले मनुष्यदेहधारी इन्द्र! तू आगे पीछे और ऊपर से हमारे समीप आ, यह सब गानेवालों की इच्छा है।' यह भी उन (मोक्षमूलर साहब) का अर्थ अत्यन्त विपरीत है, क्योंकि इस वायुसमूह में मनुष्यों की वाणी शब्दों के उच्चारणव्यवहार से प्रसिद्ध होने से प्राणरूप वायु का ग्रहण है॥९॥

इदानीं सूर्य्यकर्मोपदिश्यते।

अगले मन्त्र में सूर्य्य के कर्म का उपदेश किया है-

इतो वा सातिमीमहे दिवो वा पार्थिवादधि।

इन्द्रं महो वा रजसः॥१०॥

इतः। वा। सातिम्। ईमहे। दिवः। वा। पार्थिवात्। अधि। इन्द्रम्। महः। वा। रजसः॥१०॥

पदार्थः-**(इतः)** अस्मात् **(वा)** चार्थे **(सातिम्)** संविभागं कुर्वन्तम्। अत्र **ऊतियूतिजूतिसातिहेति०** (अष्टा०३.३.९७) अनेनायं शब्दो निपातितः। **(ईमहे)** विजानीमः। अत्र **ईङ् गतौ, बहुलं छन्दसी**ति शपो

लुकि श्यनभावः। **(दिवः)** प्रत्यक्षाग्नेः प्रकाशात् **(वा)** पक्षान्तरे लोकलोकान्तरेभ्योऽपि **(पार्थिवात्)** पृथिवीसंयोगात्। **सर्वभूमिपृथिवीभ्यामणञौ।** (अष्टा०५.१.४१) इति सूत्रेण पृथिवीशब्दादञ् प्रत्ययः। **(अधि)** अधिकार्थे **(इन्द्रम्)** सूर्य्यम् **(महः)** महान्तमति विस्तीर्णम् **(वा)** पक्षान्तरे **(रजसः)** पृथिव्यादिलोकेभ्यः। **लोका रजांस्युच्यन्ते।** (निरु०४.१९)॥१०॥

अन्वयः-वयमितः पार्थिवाद्वा दिवो वा सातिं कुर्वन्तं रजसोऽधि महान्तं वेन्द्रमीमहे विजानीमः॥१०॥

भावार्थः-सूर्य्यकिरणाः पृथिवीस्थान् जलादिपदार्थान् छित्वा लघून् सम्पादयन्ति। अतस्ते वायुना सहोपरि गच्छन्ति। किन्तु स सूर्य्यलोकः सर्वेभ्यो लोकेभ्यो महत्तमोऽस्तीति।

'वयमाकाशात् पृथिव्या उपरि वा महदाकाशात्सहायार्थमिन्द्रं प्रार्थयामहे' इति मोक्षमूलरव्याख्याऽशुद्धास्ति। कुतोऽत्र परिमाणे सर्वेभ्यो महत्तमस्य सूर्य्यलोकस्यैवाभिधानेनेन्द्रमीमहे विजानीम इत्युक्तप्रामाण्यात्॥१०॥

इन्द्रमरुद्भ्यो यथा पुरुषार्थसिद्धिः कार्य्या, ते जगति कथं वर्त्तन्ते कथं च तैरुपकारसिद्धिर्भवेदिति पञ्चमसूक्तेन सह षष्ठस्य सङ्गतिरस्तीति बोध्यम्।

अस्यापि सूक्तस्य मन्त्रार्थाः सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिर्विलसनाख्य-मोक्षमूलरादिभिश्चान्यथैव वर्णिता इति वेदितव्यम्॥

इति षष्ठं सूक्तं द्वादशश्च वर्गः समाप्तः॥

पदार्थः-हम लोग **(इतः)** इस **(पार्थिवात्)** पृथिवी के संयोग **(वा)** और **(दिवः)** इस अग्नि के प्रकाश **(वा)** लोकलोकान्तरों अर्थात् चन्द्र और नक्षत्रादि लोकों से भी **(सातिम्)** अच्छी प्रकार पदार्थों के विभाग करते हुए **(वा)** अथवा **(रजसः)** पृथिवी आदि लोकों से **(महः)** अति विस्तारयुक्त **(इन्द्रम्)** सूर्य्य को (**ईमहे**) जानते हैं॥१०॥

भावार्थः-सूर्य्य की किरण पृथिवी में स्थित हुए जलादि पदार्थों को भिन्न-भिन्न करके बहुत छोटे-छोटे कर देती हैं, इसी से वे पदार्थ पवन के साथ ऊपर को चढ़ जाते हैं, क्योंकि वह सूर्य्य सब लोकों से बड़ा है।

'हम लोग आकाश पृथिवी तथा बड़े आकाश से सहाय के लिये इन्द्र की प्रार्थना करते हैं, यह भी डाक्टर मोक्षमूलर साहब की व्याख्या अशुद्ध है, क्योंकि सूर्य्यलोक सब से बड़ा है, और उसका आना-जाना अपने स्थान को छोड़ के नहीं होता, ऐसा हम लोग जानते हैं॥१०॥

सूर्य्य और पवन से जैसे पुरुषार्थ की सिद्धि करनी चाहिये तथा वे लोक जगत् में किस प्रकार से वर्त्तते रहते हैं और कैसे उनसे उपकार सिद्धि होती है, इन प्रयोजनों से पांचवें सूक्त के अर्थ के साथ छठे सूक्तार्थ की सङ्गति जाननी चाहिये।

और सायणाचार्य्य आदि तथा यूरोपदेशवासी अङ्गरेज विलसन आदि लोगों ने भी इस सूक्त के मन्त्रों के अर्थ बुरी चाल से वर्णन किये हैं।

यह छठा सूक्त और बाहरहवाँ वर्ग समाप्त हुआ॥

अथ दशर्चस्य सप्तमस्य सूक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवता। १,३, ५-७ गायत्री। २,४ निचृद्गायत्री। ८,१० पिपीलिकामध्यानिचृद्गायत्री। ९ पादनिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

अथेन्द्रशब्देनार्थत्रयमुपदिश्यते।

अब सातवें सूक्त का आरम्भ है। इस में प्रथम मन्त्र में करके इन्द्र शब्द से तीन अर्थों का प्रकाश किया है–

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः।
इन्द्रं वाणीरनूषत॥ १॥

इन्द्रम्। इत्। गाथिनः। बृहत्। इन्द्रम्। अर्केभिः। अर्किणः। इन्द्रम्। वाणीः। अनूषत॥ १॥

पदार्थः–(**इन्द्रम्**) परमेश्वरम् (**इत्**) एव (**गाथिनः**) गानकर्त्तारः (**बृहत्**) महान्तम्। अत्र **सुपां सुलुगि**त्यमो लुक्। (**इन्द्रम्**) सूर्य्यम्। (**अर्केभिः**) अर्चनसाधकैः सत्यभाषणादिभिः शिल्पविद्यासाधकैः कर्मभिर्मन्त्रैश्च। **अर्क इति पदनामसु पठितम्।** (निघं०४.२) अनेन प्राप्तिसाधनानि गृह्यन्ते। **अर्को मन्त्रो भवति यदेनानार्चन्ति।** (निरु०५.४) अत्र **बहुलं छन्दसी**ति भिस ऐसादेशाभावः। (**अर्किणः**) विद्वांसः (**इन्द्रम्**) महाबलवन्तं वायुम् (**वाणीः**) वेदचतुष्टयीः (**अनूषत**) स्तुवन्तु। अत्र लोडर्थे लुङ्। **संज्ञापूर्वको विधिरनित्य** इति गुणादेशाभावः॥ १॥

अन्वयः-ये गाथिनोऽर्किणो विद्वांसस्ते अर्केभिर्बृहत् महान्तमिन्द्रं परमेश्वरमिन्द्रं सूर्य्यमिन्द्रं वायुं वाणीश्चेदेवानूषत यथावत्स्तुवन्तु॥ १॥

भावार्थः-ईश्वर उपदिशति–मनुष्यैर्वेदमन्त्राणां विचारेणेश्वरसूर्य्यवाय्वादिपदार्थगुणान् सम्यग्विदित्वा सर्वसुखाय प्रयत्नत उपकारो नित्यं ग्राह्य इति॥ १॥

पदार्थः–जो (**गाथिनः**) गान करनेवाले और (**अर्किणः**) विचारशील विद्वान् हैं, वे (**अर्केभिः**) सत्कार करने के पदार्थ सत्यभाषण शिल्पविद्या से सिद्ध किये हुए कर्म मन्त्र और विचार से (**वाणीः**) चारों वेद की वाणियों को प्राप्त होने के लिये (**बृहत्**) सब से बड़े (**इन्द्रम्**) परमेश्वर (**इन्द्रम्**) सूर्य्य और (**इन्द्रम्**) वायु के गुणों के ज्ञान से (**अनूषत**) यथावत् स्तुति करें॥ १॥

भावार्थः-ईश्वर उपदेश करता है कि मनुष्यों को वेदमन्त्रों के विचार से परमेश्वर सूर्य्य और वायु आदि पदार्थों के गुणों को अच्छी प्रकार जानकर सब के सुख के लिये उनसे प्रयत्न के साथ उपकार लेना चाहिये॥ १॥

उक्तेषु त्रिषु प्रथमतो वायुसूर्य्यावुपदिश्येते।

पूर्व मन्त्र में इन्द्र शब्द से कहे हुए तीन अर्थों में से वायु और सूर्य्य का प्रकाश अगले मन्त्र में किया है–

इन्द्र इद्धर्य्योः सचा सम्मिश्ल आ वचोयुजा।

इन्द्रो॑ व॒ज्री हि॑र॒ण्यय॑:॥ २॥

इन्द्र॑:। इत्। हर्य्यो॑:। सचा॑। संऽमि॑श्ल:। आ। व॒च॒:ऽयुजा॑। इन्द्र॑:। व॒ज्री। हि॒र॒ण्यय॑:॥ २॥

पदार्थ:-(**इन्द्र:**) वायु: (**इत्**) एव (**हर्य्यो:**) हरणाहरणगुणयो: (**सचा**) समवेतयो: (**संमिश्ल:**) पदार्थेषु सम्यक् मिश्रो मिलित: सन्। **संज्ञाछन्दसोर्वा कपिलकादीनामिति वक्तव्यम्।** (अष्टा०८.२.१८) अनेन वार्तिकेन रेफस्य लत्वादेश:। (**आ**) समन्तात् (**वचोयुजा**) वाणीर्योजयितो:। अत्र **सुपां सुलुगि**ति षष्ठीद्विवचनस्याकारादेश:। (**इन्द्र:**) सूर्य्य: (**वज्री**) वज्र: सम्वत्सरस्तापो वास्यास्तीति स:। **संवत्सरो हि वज्र:।** (श०ब्रा०३.३.५.१५) (**हिरण्यय:**) ज्योतिर्मय:। **ऋत्व्यवास्त्व्य०** (अष्टा०६.४.१७५) अनेन हिरण्यमयशब्दस्य मलोपो निपात्यते। **ज्योतिर्हि हिरण्यम्।** (श०ब्रा०४.३.१.२१)॥ २॥

अन्वय:-यथाऽयं संमिश्ल इन्द्रो वायु: सचा सचयोर्वचोयुजा वचांसि योजयतोर्हर्य्योर्यो गमनागमनानि युनक्ति तथा इत् एव वज्री हिरण्यय इन्द्र: सूर्य्यलोकश्च॥ २॥

भावार्थ:-अत्र लुप्तोपमालङ्कार:। यथा वायुयोगेनैव वचनश्रवणव्यवहारसर्वपदार्थगमनागमन-धारणस्पर्शा: सम्भवन्ति तथैव सूर्य्ययोगेन पदार्थप्रकाशनछेदने च। **'संमिश्ल:'** इत्यत्र सायणाचार्य्येण लत्वं छान्दसमिति वार्तिकमविदित्वा व्याख्यातम्, तदशुद्धम्॥ २॥

पदार्थ:-जिस प्रकार यह (**संमिश्ल:**) पदार्थों में मिलने तथा (**इन्द्र:**) ऐश्वर्य्य का हेतु स्पर्शगुणवाला वायु, अपने (**सचा**) सब में मिलनेवाले और (**वचोयुजा**) वाणी के व्यवहार को वर्त्तानेवाले (**हर्य्यो:**) हरने और प्राप्त करनेवाले गुणों को (**आ**) सब पदार्थों में युक्त करता है, वैसे ही (**वज्री**) संवत्सर वा तापवाला (**हिरण्यय:**) प्रकाशस्वरूप (**इन्द्र:**) सूर्य्य भी अपने हरण और आहरण गुणों को सब पदार्थों में युक्त करता है॥ २॥

भावार्थ:-इस मन्त्र में लुप्तोपमालङ्कार है। जैसे वायु के संयोग से वचन, श्रवण आदि व्यवहार तथा सब पदार्थों के गमन, आगमन, धारण और स्पर्श होते हैं, वैसे ही सूर्य्य के योग से पदार्थों के प्रकाश और छेदन भी होते हैं। **'संमिश्ल:'** इस शब्द में सायणाचार्य्य ने लकार का होना छान्दस माना है, सो उनकी भूल है, क्योंकि **'संज्ञाछन्द०'** इस वार्त्तिक से लकारादेश सिद्ध ही है॥ २॥

अथ केन किमर्थ: सूर्य्यलोको रचित इत्युपदिश्यते।

इसके अनन्तर किसने किसलिये सूर्य्यलोक बनाया है, सो अगले मन्त्र में प्रकाश किया है-

इन्द्रो॑ दी॒र्घाय॒ चक्ष॑स॒ आ सूर्य्यं॑ रोहयद्दि॒वि।

वि गोभि॒रद्रि॑मैरयत्॥ ३॥

इन्द्र॑:। दी॒र्घाय॑। चक्ष॑से। आ। सूर्य्य॑म्। रो॒ह॒य॒त्। दि॒वि। वि। गोभि॑:। अद्रि॑म्। ऐ॒र॒य॒त्॥ ३॥

पदार्थः-(**इन्द्रः**) सर्वजगत्स्रष्टेश्वरः (**दीर्घाय**) महते निरन्तराय (**चक्षसे**) दर्शनाय (**आ**) क्रियार्थे (**सूर्य्यम्**) प्रत्यक्षं सूर्य्यलोकम् (**रोहयत्**) उपरि स्थापितवान् (**दिवि**) प्रकाशनिमित्ते (**वि**) विविधार्थे (**गोभिः**) रश्मिभिः। **गाव इति रश्मिनामसु पठितम्।** (निघं०१.५) (**अद्रिम्**) मेघम्। **अद्रिरिति मेघनामसु पठितम्।** (निघं०१.१०) (**ऐरयत्**) वीरयत् वीरयत्यूर्ध्वमधो गमयति। अत्र लडर्थे लुङ्॥३॥

अन्वयः-इन्द्रः सृष्टिकर्त्ता जगदीश्वरो दीर्घाय चक्षसे यं सूर्य्यलोकं दिव्यारोहयत् सोऽयं गोभिरद्रिं व्यैरयत् वीरयति॥३॥

भावार्थः-सृष्टिमिच्छतेश्वरेण सर्वेषां लोकानां मध्ये दर्शनधारणाकर्षणप्रकाशप्रयोजनाय प्रकाशरूपः सूर्य्यलोकः स्थापितः, एवमेवायं प्रतिब्रह्माण्डं नियमो वेदितव्यः। स प्रतिक्षणं जलमूर्ध्वमाकृष्य वायुद्वारोपरि स्थापयित्वा पुनः पुनरधः प्रापयतीदमेव वृष्टेर्निमित्तमिति॥३॥

पदार्थः-(**इन्द्रः**) जो सब संसार का बनानेवाला परमेश्वर है, उसने (**दीर्घाय**) निरन्तर अच्छी प्रकार (**चक्षसे**) दर्शन के लिये (**दिवि**) सब पदार्थों के प्रकाश होने के निमित्त जिस (**सूर्य्यम्**) प्रसिद्ध सूर्य्यलोक को (**आरोहयत्**) लोकों के बीच में स्थापित किया है, वह (**गोभिः**) जो अपनी किरणों के द्वारा (**अद्रिम्**) मेघ को (**व्यैरयत्**) अनेक प्रकार से वर्षा होने के लिये ऊपर चढ़ाकर वारंवार वर्षाता है॥३॥

भावार्थः-रचने की इच्छा करनेवाले ईश्वर ने सब लोकों में दर्शन, धारण और आकर्षण आदि प्रयोजनों के लिये प्रकाशरूप सूर्य्यलोक को सब लोकों के बीच में स्थापित किया है, इसी प्रकार यह हर एक ब्रह्माण्ड का नियम है कि वह क्षण-क्षण में जल को ऊपर खींच करके पवन के द्वारा ऊपर स्थापन करके वार-वार संसार में वर्षाता है, इसी से यह वर्षा का कारण है॥३॥

इन्द्रशब्देन व्यावहारिकमर्थमुक्त्वाऽथेश्वरार्थमुपदिश्यते।

इन्द्र शब्द से व्यवहार को दिखलाकर अब प्रार्थनारूप से अगले मन्त्र में परमेश्वरार्थ का प्रकाश किया है-

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च।
उग्र उग्राभिरूतिभिः॥४॥

इन्द्र। वाजेषु। नः। अव। सहस्रऽप्रधनेषु। च। उग्रः। उग्राभिः। ऊतिभिः॥४॥

पदार्थः-(**इन्द्र**) परमैश्वर्य्यप्रदेश्वर! (**वाजेषु**) संग्रामेषु। **वाज इति संग्रामनामसु पठितम्।** (निघं०२.१७) (**नः**) अस्मान् (**अव**) रक्ष (**सहस्रप्रधनेषु**) सहस्राण्यसंख्यातानि प्रकृष्टानि धनानि प्राप्नुवन्ति येषु तेषु चक्रवर्त्तिराज्यसाधकेषु महायुद्धेषु। **सहस्रमिति बहुनामसु पठितम्।** (निघं०३.१) (**च**) आवृत्त्यर्थे (**उग्रः**) सर्वोत्कृष्टः। **ऋज्रेन्द्राग्र०** (उणा०२.२९) निपातनम्। (**उग्राभिः**) अत्यन्तोत्कृष्टाभिः (**ऊतिभिः**) रक्षाप्राप्तिविज्ञानसुखप्रवेशनैः॥४॥

अन्वयः-हे जगदीश्वर! उग्रो भवान् सहस्त्रप्रधनेषु वाजेषूग्राभिरूतिभिर्नो रक्ष सततं विजयं च प्रापय॥४॥

भावार्थः-परमेश्वरो धार्मिकेषु योद्धृषु कृपां धत्ते नेतरेषु। ये मनुष्या जितेन्द्रिया विद्वांसः पक्षपातरहिताः शरीरात्मबलोत्कृष्टा अनलसाः सन्तो धर्मेण महायुद्धानि विजित्य राज्यं नित्यं रक्षन्ति त एव महाभाग्यशालिनो भूत्वा सुखिनो भवन्ति॥४॥

पदार्थः-हे जगदीश्वर! **(इन्द्र)** परमैश्वर्य्य देने तथा **(उग्रः)** सब प्रकार से अनन्त पराक्रमवान् आप **(सहस्त्रप्रधनेषु)** असंख्यात धन को देनेवाले चक्रवर्त्ति राज्य को सिद्ध करनेवाले **(वाजेषु)** महायुद्धों में **(उग्राभिः)** अत्यन्त सुख देनेवाली **(ऊतिभिः)** उत्तम-उत्तम पदार्थों की प्राप्ति तथा पदार्थों के विज्ञान और आनन्द में प्रवेश कराने से हम लोगों की **(अव)** रक्षा कीजिये॥४॥

भावार्थः-परमेश्वर का यह स्वभाव है कि युद्ध करनेवाले धर्मात्मा पुरुषों पर अपनी कृपा करता है और आलसियों पर नहीं। इसी से जो मनुष्य जितेन्द्रिय विद्वान् पक्षपात को छोड़नेवाले शरीर और आत्मा के बल से अत्यन्त पुरुषार्थी तथा आलस्य को छोड़े हुए धर्म से बड़े-बड़े युद्धों को जीत के प्रजा को निरन्तर पालन करते हैं, वे ही महाभाग्य को प्राप्त होके सुखी रहते हैं॥४॥

पुनरीश्वरसूर्य्यवायुगुणा उपदिश्यन्ते।

फिर भी उक्त अर्थ और सूर्य्य तथा वायु के गुणों का प्रकाश अगले मन्त्र में किया है-

इन्द्रं॑ व॒यं म॑हाध॒न इन्द्र॒मर्भे॑ हवामहे।
युजं॑ वृ॒त्रेषु॑ व॒ज्रिण॑म्॥५॥१३॥

इन्द्र॑म्। व॒यम्। म॒हा॒ध॒ने। इन्द्र॑म्। अर्भे॑। ह॒वा॒म॒हे॒। युज॑म्। वृ॒त्रेषु॑। व॒ज्रिण॑म्॥५॥

पदार्थः-**(इन्द्रम्)** सर्वज्ञं सर्वशक्तिमन्तमीश्वरम् **(वयम्)** मनुष्याः **(महाधने)** महान्ति धनानि यस्मात्तस्मिन्संग्रामे। **महाधन इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(इन्द्रम्)** सूर्य्यं वायुं वा **(अर्भे)** स्वल्पे युद्धे **(हवामहे)** आह्वयामहे। स्पर्धामहे वा। ह्वेञ्धातोरिदं लेटो रूपम्। **बहुलं छन्दसि।** (अष्टा०६.१.३४) अनेन सम्प्रसारणम्। **(युजम्)** युनक्तीति युक् तम् **(वृत्रेषु)** मेघावयवेषु। **वृत्र इति मेघनामसु पठितम्।** (निघं०१.१०) **(वज्रिणम्)** किरणवन्तं जलवन्तं वा। **वज्रो वै भान्तः।** (श०ब्रा०८.२.४.१०) अनेन प्रकाशरूपाः किरणा गृह्यन्ते। **वज्रो वा आपः।** (श०ब्रा०७.४.२.४१)॥५॥

अन्वयः-वयं महाधने इन्द्रं परमेश्वरं हवामहे अर्भेऽल्पे चाप्येवं वज्रिणं वृत्रेषु युजमिन्द्रं सूर्य्यं वायुं च हवामहे स्पर्धामहे॥५॥

भावार्थः-अत्र श्लेषालङ्कारः। यद्यन्महदल्पं वा युद्धं प्रवर्त्तते तत्र तत्र सर्वतः स्थितं परमेश्वरं रक्षकं मत्वा दुष्टैः सह धर्मेणोत्साहेन च युद्ध आचरिते सति मनुष्याणां ध्रुवो विजयो जायते, तथा

सूर्य्यवायुनिमित्तेनापि खल्वेतत्सिद्धिर्जायते। यथेश्वरेणौताभ्यां निमित्तीकृताभ्यां वृष्टिद्वारा संसारस्य महत्सुखं साध्यत एवं मनुष्यैरेतन्निमित्तैरेव कार्य्यसिद्धिः सम्पादनीयेति॥५॥

इति त्रयोदशो वर्गः॥

पदार्थः-हम लोग **(महाधने)** बड़े-बड़े भारी संग्रामों में **(इन्द्रम्)** परमेश्वर का **(हवामहे)** अधिक स्मरण करते रहते हैं और **(अर्भे)** छोटे-छोटे संग्रामों में भी इसी प्रकार **(वज्रिणम्)** किरणवाले **(इन्द्रम्)** सूर्य्य वा जलवाले वायु का जो कि **(वृत्रेषु)** मेघ के अङ्गों में **(युजम्)** युक्त होनेवाले इन के प्रकाश और सब में गमनागमनादि गुणों के समान विद्या, न्याय, प्रकाश और दूतों के द्वारा सब राज्य का वर्त्तमान विदित करना आदि गुणों का धारण सब दिन करते रहें॥५॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो बड़े-बड़े भारी और छोटे-छोटे संग्रामों में ईश्वर को सर्वव्यापक और रक्षा करनेवाला मान के धर्म और उत्साह के साथ दुष्टों से युद्ध करें तो मनुष्य का अचल विजय होता है। तथा जैसे ईश्वर भी सूर्य्य और पवन के निमित्त से वर्षा आदि के द्वारा संसार का अत्यन्त सुख सिद्ध किया करता है, वैसे मनुष्य लोगों को भी पदार्थों को निमित्त करके कार्य्यसिद्धि करनी चाहिये॥५॥

यह तेरहवां वर्ग समाप्त हुआ॥

मनुष्यैः सः ईश्वरः किमर्थः प्रार्थनीयः सूर्य्यश्च किंनिमित्त इत्युपदिश्यते।

मनुष्यों को परमेश्वर की प्रार्थना किस प्रयोजन के लिये करनी चाहिये, वा सूर्य्य किसका निमित्त है, इस विषय को अगले मन्त्र में कहा है-

स नो॑ वृषन्नमुं चरुं सत्रादाव॒न्नपा॑वृधि।

अ॒स्मभ्य॒मप्र॑तिष्कुतः॥ ६॥

सः। न॒ः। वृ॒ष॒न्। अ॒मुम्। च॒रुम्। सत्रा॑ऽदावन्। अप॑। वृ॒धि॒। अ॒स्मभ्य॑म्। अप्र॑तिऽष्कुतः॥ ६॥

पदार्थः-**(सः)** ईश्वरः सूर्य्यो वा **(नः)** अस्माकम् **(वृषन्)** वर्षति सुखानि तत्सम्बुद्धौ, वर्षयति जलं वा स वा। **कनिन्युवृषि०** (उणा०१.१५४) अनेन **'वृष'** धातोः कनिन्प्रत्ययः। **(अमुम्)** मोक्षद्वारमागाम्यानन्दं चान्तरिक्षस्थम् **(चरुम्)** ज्ञानलाभं मेघं वा। **चरुरिति मेघनामसु पठितम्।** (निघं०१.१०) **(सत्रादावन्)** सत्यं ददातीति तत्सम्बुद्धौ, सत्रं वृष्ट्याख्यं यज्ञं समन्ताद्ददातीति स वा। **सत्रेति सत्यनामसु पठितम्।** (निघं०३.१०) अत्र **आतो मनिन्क्वनिब्वनिपश्च।** (अष्टा०३.२.७२) अनेन वनिप्प्रत्ययः। **(अप)** निवारणे। **निपातस्य च।** (अष्टा०६.३.१३६) इति दीर्घः। **(वृधि)** उद्घाटयोद्घाटयति वा। **'वृञ्'** धातोः प्रयोगः। **बहुलं छन्दसि** (अष्टा०२.४.७३) अनेन श्नोर्लुक्। **श्रुशृणुपृकृवृभ्यश्छन्दसि** (अष्टा०६.४.१०२) अनेन हेर्धिः। **(अस्मभ्यम्)** त्वदाज्ञायां पुरुषार्थे च वर्त्तमानेभ्यः **(अप्रतिष्कुतः)**

असञ्चलितोऽविस्मृतो वा। यास्काचार्य्योऽस्यार्थमेवमाह–**अप्रतिष्कुतोऽप्रतिस्कृतोऽप्रतिस्खलितो वेति।** (निरु०६.१६)॥६॥

अन्वयः-हे वृषन् सत्रादावन् परमेश्वर! स त्वमस्मभ्यमप्रतिष्कुतः सन्नोऽस्माकममुं चरुं मोक्षद्वारमपावृधि उद्घाटय इत्याद्यः। तथा भवद्रचितोऽयं सत्रादावा वृषाऽप्रतिष्कुतः सूर्य्योऽस्मभ्यममुं चरु मेघमपावृणोत्युद्- घाटयतीत्यपरः॥६॥

भावार्थः-यो मनुष्यो दृढतया सत्यं विद्यां चेश्वराज्ञामुपतिष्ठति तस्यात्मन्यन्तर्यामीश्वरोऽविद्यान्धकारं नाशयति। यतो नैव स पुरुषार्थाद्धर्माच्च कदाचिद्विचलति॥६॥

पदार्थः–हे **(वृषन्)** सुखों के वर्षाने और **(सत्रादावन्)** सत्यज्ञान को देनेवाले **(सः)** परमेश्वर! आप **(अस्मभ्यम्)** जो कि हम लोग आपकी आज्ञा वा अपने पुरुषार्थ में वर्त्तमान हैं, उनके लिये **(अप्रतिष्कुतः)** निश्चय करानेहारे **(नः)** हमारे **(अमुम्)** उस आनन्द करनेहारे प्रत्यक्ष मोक्ष का द्वार **(चरुम्)** ज्ञानलाभ को **(अपावृधि)** खोल दीजिये।

तथा हे परमेश्वर! जो यह आपका बनाया हुआ **(वृषन्)** जल को वर्षाने और **(सत्रादावन्)** उत्तम-उत्तम पदार्थों को प्राप्त करनेवाला **(अप्रतिष्कुतः)** अपनी कक्षा ही में स्थिर रहता हुआ सूर्य्य **(अस्मभ्यम्)** हम लोगों के लिये **(अमुम्)** आकाश में रहनेवाले इस **(चरुम्)** मेघ को **(अपावृधि)** भूमि में गिरा देता है॥६॥

भावार्थः-जो मनुष्य अपनी दृढ़ता से सत्यविद्या का अनुष्ठान और नियम से ईश्वर की आज्ञा का पालन करता है, उसके आत्मा में से अविद्यारूपी अन्धकार का नाश अन्तर्य्यामी परमेश्वर कर देता है, जिससे वह पुरुष धर्म और पुरुषार्थ को कभी नहीं छोड़ता॥६॥

पुनरिन्द्रशब्देनेश्वर उपदिश्यते।

फिर भी अगले मन्त्र में इन्द्र शब्द से परमेश्वर का प्रकाश किया है–

तुञ्जेतुंञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः।
न विन्धे अस्य सुष्टुतिम्॥७॥

तुञ्जेऽतुंञ्जे। ये। उत्ऽतरे। स्तोमाः। इन्द्रस्य। वज्रिणः। न। विन्धे। अस्य। सुऽस्तुतिम्॥७॥

पदार्थः–**(तुञ्जेतुञ्जे)** दातव्ये दातव्ये **(ये)** **(उत्तरे)** सिद्धान्तसिद्धाः **(स्तोमाः)** स्तुतिसमूहाः **(इन्द्रस्य)** सर्वदुःखविनाशकस्य **(वज्रिणः)** वज्रोऽनन्तं प्रशस्तं वीर्य्यमस्यास्तीति तस्य। अत्र भूमार्थे प्रशंसार्थे च मतुप्। **वीर्य्यं वै वज्रः।** (श०ब्रा०७.४.२.२४) **(न)** निषेधार्थे **(विन्धे)** विन्दामि। अत्र वर्णव्यत्ययेन दकारस्य धकारः। **(अस्य)** परमेश्वरस्य **(सुष्टुतिम्)** शोभनां स्तुतिम्। यास्कमुनिरिमं मन्त्रमेव व्याख्यातवान्–**तुञ्जस्तुञ्जतेर्दानकर्मणः। दाने दाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्ति स्तुतेः।** (निरु०६.१८)॥७॥

अन्वयः-नाहं ये तुञ्जेतुञ्जे उत्तरे स्तोमाः सन्ति तैर्वज्रिण इन्द्रस्य परमेश्वरस्य सुष्टुतिं विन्धे विन्दामि॥७॥

भावार्थः-ईश्वरेणास्मिन् जगति जीवानां सुखायैतेषु पदार्थेषु स्वशक्तेर्यावन्तो दृष्टान्ता यादृशं रचनं यादृशा गुणा उपकारार्थं रक्षिता वर्त्तन्ते तावतः सम्पूर्णान् वेत्तुं नाहं समर्थोऽस्मि। नैव कश्चिदीश्वरगुणानां समाप्तिं वेत्तुमर्हति। कुतः, तस्यैतषामनन्तत्वात्। परन्तु मनुष्यैरेतेभ्यः पदार्थेभ्यो यावानुपकारो ग्रहीतुं शक्योऽस्ति तावान्प्रयत्नेन ग्राह्य इति॥७॥

पदार्थः-(**न**) नहीं मैं (**ये**) जो (**वज्रिणः**) अनन्त पराक्रमवान् (**इन्द्रस्य**) सब दुःखों के विनाश करनेहारे (**अस्य**) इस परमेश्वर के (**तुञ्जेतुञ्जे**) पदार्थ-पदार्थ के देने में (**उत्तरे**) सिद्धान्त से निश्चित किये हुए (**स्तोमाः**) स्तुतियों के समूह हैं, उनसे भी (**अस्य**) परमेश्वर की (**सुष्टुतिम्**) शोभायमान स्तुति का पार मैं जीव (**न**) नहीं (**विन्धे**) पा सकता हूं॥७॥

भावार्थः-ईश्वर ने इस संसार में प्राणियों के सुख के लिये इन पदार्थों में अपनी शक्ति से जितने दृष्टान्त वा उनमें जिस प्रकार की रचना और अलग-अलग उनके गुण तथा उनसे उपकार लेने के लिये रक्खे हैं, उन सबके जानने को मैं अल्पबुद्धि पुरुष होने से समर्थ कभी नहीं हो सकता और न कोई मनुष्य ईश्वर के गुणों की समाप्ति जानने को समर्थ है, क्योंकि जगदीश्वर अनन्त गुण और अनन्त सामर्थ्यवाला है, परन्तु मनुष्य उन पदार्थों से जितना उपकार लेने को समर्थ हों, उतना सब प्रकार से लेना चाहिये॥७॥

ईश्वरो मनुष्यान् कथं प्राप्नोतीत्युपदिश्यते।

परमेश्वर मनुष्यों को कैसे प्राप्त होता है, सो अर्थ अगले मन्त्र में प्रकाशित किया है-

वृषा॑ यू॒थेव॒ वंस॑गः कृ॒ष्टीरि॑य॒र्त्योज॑सा।
ईशा॑नो॒ अप्र॑तिष्कुतः॥ ८॥

वृषा॑। यू॒थाऽइ॑व। वंस॑गः। कृ॒ष्टीः। इ॒य॒र्ति॒। ओज॑सा। ईशा॑नः। अप्र॑तिष्कुतः॥ ८॥

पदार्थः-(**वृषा**) शुभगुणवर्षणकर्त्ता (**यूथेव**) गोसमूहान् वृषभ इव। **तिथपृष्ठ०** (उणा०२.१२) (**वंसगः**) वंसं धर्मसेविनं संविभक्तपदार्थान् गच्छतीति। (**कृष्टीः**) मनुष्यानाकर्षणादिव्यवहारान्वा (**इयर्ति**) प्राप्नोति (**ओजसा**) बलेन (**ईशानः**) ऐश्वर्यवान् ऐश्वर्य्यहेतुः सृष्टेः कर्त्ता प्रकाशको वा (**अप्रतिष्कुतः**) सत्यभावनिश्चयाभ्यां याचितोऽनुग्रहीतां स्वकक्षां विहायेतस्ततो ह्यचलितो वा॥८॥

अन्वयः-वंसगो वृषा यूथानीवाप्रतिष्कुत ईशानो वृषेश्वरः सूर्य्यश्चौजसा बलेन कृष्टीर्धर्मात्मनो मनुष्यान् आकर्षणादिव्यवहारान् वेयर्ति प्राप्नोति॥८॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्या एवेश्वरं प्राप्तुं समर्थास्तेषां ज्ञानोन्नतिकरणस्वभाववत्त्वात्। धर्मात्मनो मनुष्यानेव प्राप्तुमीश्वरस्य स्वभाववत्त्वाद्यथैतं प्राप्नुवन्ति तथेश्वरेण नियोजितत्वादयं सूर्य्योऽपि स्वसंनिहितान् लोकानाकर्षितुं समर्थोऽस्तीति॥८॥

पदार्थः-जैसे **(वृषा)** वीर्य्यदाता रक्षा करनेहारा **(वंसगः)** यथायोग्य गाय के विभागों को सेवन करनेहारा बैल **(ओजसा)** अपने बल से **(यूथेव)** गाय के समूहों को प्राप्त होता है, वैसे ही **(वंसगः)** धर्म के सेवन करनेवाले पुरुष को प्राप्त होने और **(वृषा)** शुभगुणों की वर्षा करनेवाला **(ईशानः)** ऐश्वर्य्यवान् जगत् का रचनेवाला परमेश्वर अपने **(ओजसा)** बल से **(कृष्टीः)** धर्मात्मा मनुष्यों को तथा **(वंसगः)** अलग-अलग पदार्थों को पहुंचाने और **(वृषा)** जल वर्षानेवाला सूर्य्य **(ओजसा)** अपने बल से **(कृष्टीः)** आकर्षण आदि व्यवहारों को **(इयर्त्ति)** प्राप्त होता है॥८॥

भावार्थः-इस मन्त्र में उपमा और श्लेषालङ्कार है। मनुष्य ही परमेश्वर को प्राप्त हो सकते हैं, क्योंकि वे ज्ञान की वृद्धि करने के स्वभाव वाले होते हैं। और धर्मात्मा ज्ञानवाले मनुष्यों का परमेश्वर को प्राप्त होने का स्वभाव है। तथा जो ईश्वर ने रचकर कक्षा में स्थापन किया हुआ सूर्य्य है, वह अपने सामने अर्थात् समीप के लोकों को चुम्बक पत्थर और लोहे के समान खींचने को समर्थ रहता है॥८॥

ईश्वर एव सर्वथा सहायकार्य्यस्तीत्युपदिश्यते

सब प्रकार से सब का सहायकारी परमेश्वर ही है, इस विषय को अगले मन्त्र में प्रकाश किया है-

य एकश्चर्षणीनां वसूनामिरज्यति।

इन्द्रः पञ्च क्षितीनाम्॥९॥

यः। एकः। चर्षणीनाम्। वसूनाम्। इरज्यति। इन्द्रः। पञ्च। क्षितीनाम्॥९॥

पदार्थः-**(यः)** परमेश्वरः **(एकः)** अद्वितीयः **(चर्षणीनाम्)** मनुष्याणाम्। **चर्षणय इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(वसूनाम्)** अग्न्याद्यष्टानां वासहेतूनां लोकानाम् **(इरज्यति)** ऐश्वर्य्यं दातुं सेवितुं च योग्योऽस्ति। **इरज्यतीत्यैश्वर्य्यकर्मसु पठितम्।** (निघं०२.२१) **परिचरणकर्मसु च।** (निघं०३.५) **(इन्द्रः)** दुष्टानां शत्रूणां विनाशकः **(पञ्च)** निकृष्टमध्यमोत्तमोत्तमतरोत्तमतमानां पञ्चविधानाम् **(क्षितीनाम्)** पृथिवीलोकानां मध्ये। **क्षितिरिति पृथिवीनामसु पठितम्।** (निघं०१.१)॥९॥

अन्वयः-य इन्द्रश्चर्षणीनां वसूनां पञ्चानां क्षितीनामिरज्यति स एकोऽस्ति॥९॥

भावार्थः-यः सर्वाधिष्ठाता सर्वान्तर्यामी व्यापकः सर्वैश्वर्यप्रदोऽद्वितीयोऽसहायो जगदीश्वरः सर्वजगतो रचको धारक आकर्षणकर्त्तास्ति, स एव सर्वैर्मनुष्यैरिष्टत्वेन सेवनीयोऽस्ति। यः कश्चित्तं विहायान्यमीश्वरभावेनेष्टं मन्यते स भाग्यहीनः सदा दुःखमेव प्राप्नोति॥९॥

पदार्थः-**(यः)** जो **(इन्द्रः)** दुष्ट शत्रुओं का विनाश करनेवाला परमेश्वर **(चर्षणीनाम्)** मनुष्य **(वसूनाम्)** अग्नि आदि आठ निवास के स्थान, और **(पञ्च)** जो नीच, मध्यम, उत्तम, उत्तमतर और

उत्तमतम गुणवाले पांच प्रकार के **(क्षितीनाम्)** पृथिवी लोक हैं, उन्हीं के बीच **(इरज्यति)** ऐश्वर्य के देने और सब के सेवा करने योग्य परमेश्वर है, वह **(एकः)** अद्वितीय और सब का सहाय करनेवाला है॥९॥

भावार्थः-जो सब का स्वामी अन्तर्यामी व्यापक और सब ऐश्वर्य्य का देनेवाला, जिसमें कोई दूसरा ईश्वर और जिसको किसी दूसरे की सहाय की इच्छा नहीं हैं, वही सब मनुष्यों को इष्ट बुद्धि से सेवा करने योग्य है। जो मनुष्य उस परमेश्वर को छोड़ के दूसरे को इष्ट देव मानता है, वह भाग्यहीन बड़े-बड़े घोर दुःखों को सदा प्राप्त होता है॥९॥

अयमेव सर्वोपरि वर्त्तत इत्युपदिश्यते।

उक्त परमेश्वर सर्वोपरि विराजमान है, इस विषय का प्रकाश अगले मन्त्र में किया है-

इन्द्रं॑ वो वि॒श्वत॒स्परि॒ हवा॑महे॒ जने॑भ्यः।

अ॒स्माक॑मस्तु॒ केव॑लः॥ १०॥ १४॥

इन्द्र॑म्। व॒ः। वि॒श्वत॑ः। परि॑। हवा॑महे। जने॑भ्यः। अ॒स्माक॑म्। अ॒स्तु॒। केव॑लः॥ १०॥

पदार्थः-(**इन्द्रम्**) पृथिव्यां राज्यप्रदम् (**वः**) युष्माकम् (**विश्वतः**) सर्वेभ्यः (**परि**) सर्वतोभावे। **परीति सर्वतोभावं प्राह।** (निरु०१.३) (**हवामहे**) स्तुवीमः (**जनेभ्यः**) प्रादुर्भूतेभ्यः (**अस्माकम्**) मनुष्याणाम् (**अस्तु**) भवतु (**केवलः**) एकश्चेतनमात्रस्वरूप एवेष्टदेवः॥१०॥

अन्वयः-हे मनुष्या! यं वयं विश्वतो जनेभ्यः सर्वगुणैरुत्कृष्टमिन्द्रं परमेश्वरं परि हवामहे, स एव वो युष्माकमस्माकं च केवलः पूज्य इष्टोऽस्ति॥१०॥

भावार्थः-ईश्वरोऽस्मिन्मन्त्रे सर्वजनहितायोपदिशति-हे मनुष्या! युष्माभिर्नैव कदाचिन्मां विहायान्य उपास्यदेवो मन्तव्यः। कुतः, नैव मत्तोऽन्यः कश्चिदीश्वरो वर्त्तते। एवं सति यः कश्चिदीश्वरत्वेऽनेकत्वमाश्रयति स मूढ एव मन्तव्य इति॥१०॥

अत्र सप्तमे सूक्ते येनेश्वरेण रचयित्वाऽन्तरिक्षे कार्य्योपकरणार्थौ वायुसूर्य्यौ स्थापितौ स एवैकः सर्वशक्तिमान्सर्वदोषरहितः सर्वमनुष्यपूज्योऽस्तीति व्याख्यातमित्येत्सूक्तार्थेन सहास्य षष्ठसूक्तार्थस्य सङ्गतिरिति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिश्चासदर्थं व्याख्यातमिति सर्वैर्मन्तव्यम्॥

इति द्वितीयोऽनुवाकस्सप्तमं सूक्तं वर्गश्च चतुर्दशः समाप्तः॥

पदार्थः-हम लोग जिस **(विश्वतः)** सब पदार्थों वा **(जनेभ्यः)** सब प्राणियों से **(परि)** उत्तम-उत्तम गुणों करके श्रेष्ठतर **(इन्द्रम्)** पृथिवी में राज्य देनेवाले परमेश्वर का **(हवामहे)** वार-वार अपने हृदय में स्मरण करते हैं, वही परमेश्वर **(वः)** हे मित्र लोगो! तुम्हारे और हमारे पूजा करने योग्य इष्टदेव **(केवलः)** चेतनमात्र स्वरूप एक ही है॥१०॥

भावार्थः-ईश्वर इस मन्त्र में सब मनुष्यों के हित के लिये उपदेश करता है- हे मनुष्यो! तुमको अत्यन्त उचित है कि मुझे छोड़कर उपासना करने योग्य किसी दूसरे देव को कभी मत मानो, क्योंकि एक मुझ को छोड़कर कोई दूसरा ईश्वर नहीं है। जब वेद में ऐसा उपदेश है तो जो मनुष्य अनेक ईश्वर वा उसके अवतार मानता है, वह सब से बड़ा मूढ़ है॥१०॥

इस सप्तम सूक्त में जिस ईश्वर ने अपनी रचना के सिद्ध रहने के लिये अन्तरिक्ष में सूर्य्य और वायु स्थापन किये हैं, वही एक सर्वशक्तिमान् सर्वदोषरहित और सब मनुष्यों का पूज्य है। इस व्याख्या से इस सप्तम सूक्त के अर्थ के साथ छठे सूक्त के अर्थ की सङ्गति जाननी चाहिये।

इस सूक्त के मन्त्रों के अर्थ सायणाचार्य्य आदि आर्य्यावर्त्तवासियों और विलसन आदि अङ्गरेज लोगों ने भी उलटे किये हैं॥

यह दूसरा अनुवाक, सातवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथास्य दशर्चस्याष्टमसूक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवता। १,५, ८ निचृद्गायत्री। २ प्रतिष्ठागायत्री। ३,४, ६,७,९ गायत्री। १० वर्धमाना गायत्री च छन्दः। षड्जः स्वरः॥

तत्र कीदृशं धनमीश्वरानुग्रहेण स्वपुरुषार्थेन च प्रापणीयमित्युपदिश्यते।

अब अष्टमसूक्त के प्रथम मन्त्र में यह उपदेश है कि ईश्वर के अनुग्रह और अपने पुरुषार्थ से कैसा धन प्राप्त करना चाहिये–

ऐन्द्र सानसिं रयिं सजित्वानं सदासहम्।
वर्षिष्ठमूतये भर॥ १॥

आ। इन्द्र। सानसिम्। रयिम्। सऽजित्वानम्। सदाऽसहम्। वर्षिष्ठम्। ऊतये। भर॥ १॥

पदार्थः–**(आ)** समन्तात् **(इन्द्र)** परमधनप्रदेश्वर! **(सानसिम्)** सम्भजनीयम्। **सानसि वर्णसि०** (उणा०४.११०) अनेनायं **'सन'** धातोरसिप्रत्ययान्तो निपातितः। **(रयिम्)** धनम् **(सजित्वानाम्)** समानानां शत्रूणां विजयकारकम्। अत्र **अन्येभ्योऽपि दृश्यते।** (अष्टा०३.२.७५) अनेन **'जि'** धातोः क्वनिप्प्रत्ययः। **(सदासहम्)** सर्वदा दुष्टानां शत्रूणां हानिकारकदुःखानां च सहनहेतुम् **(वर्षिष्ठम्)** अतिशयेन वृद्धं वृद्धिकारकम्। अत्र वृद्धशब्दादिष्ठन् वर्षिरादेशश्च। **(ऊतये)** रक्षणाद्याय पुष्टये **(भर)** धारय॥ १॥

अन्वयः-हे इन्द्र! कृपयाऽस्मदूतये वर्षिष्ठं सानसिं सदासहं सजित्वानं रयिमाभर॥ १॥

भावार्थः-मनुष्यैः सर्वशक्तिमन्तमन्तर्यामिनमीश्वरमाश्रित्य परमपुरुषार्थेन च सर्वोपकाराय चक्रवर्त्तिराज्यानन्दकारकं विद्याबलं सर्वोत्कृष्टं सुवर्णसेनादिकं बलं च सर्वथा सम्पादनीयम्। यतः स्वस्य सर्वेषां च सुखं स्यादिति॥ १॥

पदार्थः–हे **(इन्द्र)** परमेश्वर! आप कृपा करके हमारी (**ऊतये**) रक्षा पुष्टि और सब सुखों की प्राप्ति के लिये **(वर्षिष्ठम्)** जो अच्छी प्रकार वृद्धि करनेवाला **(सानसिम्)** निरन्तर सेवने के योग्य **(सदासहम्)** दुष्ट शत्रु तथा हानि वा दुःखों के सहने का मुख्य हेतु (**सजित्वानम्**) और तुल्य शत्रुओं का जितानेवाला **(रयिम्)** धन है, उस को **(आभर)** अच्छी प्रकार दीजिये॥ १॥

भावार्थः-सब मनुष्यों को सर्वशक्तिमान् अन्तर्यामी ईश्वर का आश्रय लेकर अपने पूर्ण पुरुषार्थ के साथ चक्रवर्त्ति राज्य के आनन्द को बढ़ानेवाली विद्या की उन्नति सुवर्ण आदि धन और सेना आदि बल सब प्रकार से रखना चाहिये, जिससे अपने आप को और सब प्राणियों को सुख हो॥ १॥

कीदृशेन धनेनेत्युपदिश्यते।

कैसे धन से परमसुख होता है, सो अगले मन्त्र में प्रकाश किया है–

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै।
त्वोतासो न्यर्वता॥ २॥

नि। येन। मुष्टिऽहत्यया। नि। वृत्रा। रुणधामहै। त्वाऽऊतासः। नि। अर्वता॥ २॥

पदार्थः-(**नि**) नितरां क्रियायोगे (**येन**) पूर्वोक्तेन धनेन (**मुष्टिहत्यया**) हननं हत्या मुष्टिभिर्हत्या मुष्टिहत्या तया (**नि**) निश्चयार्थे (**वृत्रा**) मेघवत्सुखावरकान् शत्रून्। अत्र **सुपां सुलुगि**ति शसः स्थाने आजादेशः। (**रुणधामहै**) निरुन्ध्याम (**त्वोतासः**) त्वया जगदीश्वरेण रक्षिताः सन्तः (**नि**) निश्चयार्थे (**अर्वता**) अश्वादिभिः सेनाङ्गैः। **अर्वेत्यश्वनामसु पठितम्।** (निघं०१.१४)॥२॥

अन्वयः-हे जगदीश्वर! त्वं त्वोतासस्त्वया रक्षिता सन्तो वयं येन धनेन मुष्टिहत्ययाऽर्वता निवृत्रान्निश्चितान् शत्रून् निरुणधामहै, तेषां सर्वदा निरोधं करवामहै, तदस्मभ्यं देहि॥२॥

भावार्थः-ईश्वरेष्टैर्मनुष्यैः शरीरात्मबलैः सर्वसामर्थ्येन श्रेष्ठानां पालनं दुष्टानां निग्रहः सर्वदा कार्य्यः, यतो मुष्टिप्रहारमसहमानाः शत्रवो विलीयेरन्॥२॥

पदार्थः-हे जगदीश्वर! (**त्वोतासः**) आप के सकाश से रक्षा को प्राप्त हुए हम लोग (**येन**) जिस पूर्वोक्त धन से (**मुष्टिहत्यया**) बाहुयुद्ध और (**अर्वता**) अश्व आदि सेना की सामग्री से (**निवृत्रा**) निश्चित शत्रुओं को (**निरुणधामहै**) रोकें अर्थात् उनको निर्बल कर सकें, ऐसे उत्तम धन का दान हम लोगों के लिये कृपा से कीजिये॥२॥

भावार्थः-ईश्वर के सेवक मनुष्यों को उचित है कि अपने शरीर और बुद्धिबल को बहुत बढ़ावें, जिससे श्रेष्ठों का पालन और दुष्टों का अपमान सदा होता रहे, और जिससे शत्रुजन उनके मुष्टिप्रहार को न सह सकें, इधर-उधर छिपते-भागते फिरें॥२॥

मनुष्याः किं धृत्वा शत्रून् जयन्तीत्युपदिश्यते।

मनुष्य किसको धारण करने से शत्रुओं को जीत सकते हैं, सो अगले मन्त्र में प्रकाश किया है-

इन्द्र त्वोतासु आ वयं वज्रं घना ददीमहि।
जयेम सं युधि स्पृधः॥ ३॥

इन्द्र। त्वाऽऊतासः। आ। वयम्। वज्रम्। घना। ददीमहि। जयेम। सम्। युधि। स्पृधः॥ ३॥

पदार्थः-(**इन्द्र**) अनन्तबलेश्वर! (**त्वोतासः**) त्वया बलं प्रापिताः (**आ**) क्रियार्थे (**वयम्**) बलवन्तो धार्मिका शूराः (**वज्रम्**) शत्रूणां बलच्छेदकमाग्नेयादिशस्त्रास्त्रसमूहम् (**घना**) शतघ्नीभुसुण्ड्यसिचापबाणादीनि दृढानि युद्धसाधनानि। **शेश्छन्दसि बहुलम**िति लुक्। (**ददीमहि**) गृह्णीमः। अत्र लडर्थे लिङ्। (**जयेम**) (**सं**) क्रियार्थे (**युधि**) संग्रामे (**स्पृधः**) स्पर्धमानान् शत्रून्। '**स्पर्ध सङ्घर्षे**' इत्यस्य क्विबन्तस्य रूपम्। **बहुलं छन्दसि।** (अष्टा०६.१.३४) अनेन सम्प्रसारणमल्लोपश्च॥३॥

अन्वयः-हे इन्द्र! त्वोतासो वयं स्वविजायार्थं घना आददीमहि, यतो वयं युधि स्पृधो जयेम॥३॥

भावार्थः-मनुष्यैर्धर्मेश्वरावाश्रित्य शरीरपुष्टिं विद्ययात्मबलं पूर्णां युद्धसामग्रीं परस्परमविरोधमुत्साहमित्यादि सद्गुणान् गृहीत्वा सदैव दुष्टानां शत्रूणां पराजयकरणेन सुखयितव्यम्॥३॥

पदार्थः-हे **(इन्द्र)** अनन्तबलवान् ईश्वर! **(त्वोतासः)** आपके सकाश से रक्षा आदि और बल को प्राप्त हुए **(वयम्)** हम लोग धार्मिक और शूरवीर होकर अपने विजय के लिये **(वज्रम्)** शत्रुओं के बल का नाश करने का हेतु आग्नेयास्त्रादि अस्त्र और **(घना)** श्रेष्ठ शस्त्रों का समूह, जिनको कि भाषा में तोप बन्दूक तलवार और धनुष बाण आदि करके प्रसिद्ध कहते हैं, जो युद्ध की सिद्धि में हेतु हैं, उनको **(आददीमहि)** ग्रहण करते हैं। जिस प्रकार हम लोग आपके बल का आश्रय और सेना की पूर्ण सामग्री करके **(स्पृधः)** ईर्षा करनेवाले शत्रुओं को **(युधि)** संग्राम में **(जयेम)** जीतें॥३॥

भावार्थः-मनुष्यों को उचित है कि धर्म और ईश्वर के आश्रय से शरीर की पुष्टि और विद्या करके आत्मा का बल तथा युद्ध की पूर्ण सामग्री परस्पर अविरोध और उत्साह आदि श्रेष्ठ गुणों का ग्रहण करके दुष्ट शत्रुओं के पराजय करने से अपने और सब प्राणियों के लिये सुख सदा बढ़ाते रहें॥३॥

कस्य कस्य सहायेनैतत् सिध्यतीत्युपदिश्यते।

किस-किस के सहाय से उक्त सुख सिद्ध होता है, सो अगले मन्त्र में प्रकाश किया है-

व॒यं शू॒रेभि॒रस्तृ॑भि॒रिन्द्र॒ त्वया॑ यु॒जा व॒यम्।
सा॒स॒ह्याम॑ पृतन्य॒तः॥४॥

व॒यम्। शू॒रेभिः। अस्तृ॑भिः। इन्द्र॑। त्वया॑। यु॒जा। व॒यम्। सा॒स॒ह्याम॑। पृ॒त॒न्य॒तः॥४॥

पदार्थः-(**वयम्**) सभाध्यक्षाः सेनापतिवराः **(शूरेभिः)** सर्वोत्कृष्टशूरवीरैः। अत्र **बहुलं छन्दसी**ति भिस ऐसादेशो न। **(अस्तृभिः)** सर्वशस्त्रास्त्रप्रक्षेपणदक्षैः सह **(इन्द्र)** युद्धोत्साहप्रदेश्वर **(त्वया)** अन्तर्यामिणेष्टेन **(युजा)** कृपया धार्मिकेषु स्वसामर्थ्यसंयोजकेन **(वयम्)** योद्धारः **(सासह्याम)** पुनः पुनः सहेमहि। अत्र व्यत्ययेन परस्मैपदं लिङर्थे लोट् च। **(पृतन्यतः)** आत्मनः पृतनामिच्छतः शत्रून् ससेनान्। पृतनाशब्दात् क्यच्। **कव्यध्वरपृतनस्यर्चिलोपः।** (अष्टा०७.४.३९) अनेन ऋचि ऋग्वेद एवाकारलोपः॥४॥

अन्वयः-हे इन्द्र! युजा त्वया वयमस्तृभिः शूरेभिर्योद्धृभिः सह पृतन्यतः शत्रून् सासह्यामैवंप्रकारेण चक्रवर्त्तिराजानो भूत्वा नित्यं प्रजाः पालयेम॥४॥

भावार्थः-शौर्य्यं द्विविधं पुष्टिजन्यं शरीरस्थं विद्याधर्मजन्यमात्मस्थं च। एताभ्यां सह वर्त्तमानैर्मनुष्यैः परमेश्वरस्य सृष्टिरचनाक्रमान् ज्ञात्वा न्यायधैर्य्यसौजन्योद्योगादीन् सद्गुणान् समाश्रित्य सभाप्रबन्धेन राज्यपालनं दुष्टशत्रुनिरोधश्च सदा कर्त्तव्य इति॥४॥

पदार्थः-हे **(इन्द्र)** युद्ध में उत्साह के देनेवाले परमेश्वर! **(त्वया)** आपको अन्तर्यामी इष्टदेव मानकर आपकी कृपा से धर्मयुक्त व्यवहारों में अपने सामर्थ्य के **(युजा)** योग करानेवाले के योग से **(वयम्)** युद्ध के करनेवाले हम लोग **(अस्तृभिः)** सब शस्त्र-अस्त्र के चलाने में चतुर **(शूरभिः)** उत्तमों

में उत्तम शूरवीरों के साथ होकर **(पृतन्यतः)** सेना आदि बल से युक्त होकर लड़नेवाले शत्रुओं को **(सासह्याम)** वार-वार सहें अर्थात् उनको निर्बल करें, इस प्रकार शत्रुओं को जीतकर न्याय के साथ चक्रवर्त्ति राज्य का पालन करें॥४॥

भावार्थः-शूरता दो प्रकार की होती है, एक तो शरीर की पुष्टि और दूसरी विद्या तथा धर्म से संयुक्त आत्मा की पुष्टि। इन दोनों से परमेश्वर की रचना के कर्मों को जानकर न्याय, धीरजपन, उत्तम स्वभाव और उद्योग आदि से उत्तम-उत्तम गुणों से युक्त होकर सभाप्रबन्ध के साथ राज्य का पालन और दुष्ट शत्रुओं का निरोध अर्थात् उनको सदा कायर करना चाहिये॥४॥

पुनः स कीदृशोऽस्तीत्युपदिश्यते।

उक्त कार्य्यसहाय करनेहारा जगदीश्वर किस प्रकार का है, सो अगले मन्त्र में प्रकाश किया है-

म॒हाँ इन्द्रः॑ प॒रश्च॒ नु म॑हि॒त्वम॑स्तु व॒ज्रिणे॑।

द्यौर्न प्र॑थि॒ना शव॑सा॥५॥१५॥

म॒हान्। इन्द्रः॑। प॒रः॑। च॒। नु। म॒हि॒ऽत्वम्। अ॒स्तु॒। व॒ज्रिणे॑। द्यौः। न। प्र॑थि॒ना। शव॑सा॥५॥

पदार्थः-(**महान्**) सर्वथाऽनन्तगुणस्वभावसामर्थ्येन युक्तः **(इन्द्रः)** सर्वजगद्राजः **(परः)** अत्यन्तोत्कृष्टः **(च)** पुनरर्थे **(नु)** हेत्वपदेशे। (निरु०१.४) **(महित्वम्)** मह्यते पूज्यते सर्वैर्जनैरिति महिस्तस्य भावः। अत्रौणादिकः **सर्वधातुभ्य इन्नितीन्** प्रत्ययः। **(अस्तु)** भवतु **(वज्रिणे)** वज्रो न्यायाख्यो दण्डोऽस्यास्तीति तस्मै। **वज्रो वै दण्डः।** (श०ब्रा०३.१.५.३२) **(द्यौः)** विशालः सूर्य्यप्रकाशः **(न)** उपमार्थे। **उपसृष्टादुपचारस्तस्य येनोपमिमीते।** (निरु०१.४) यत्र कारकात्पूर्वं नकारस्य प्रयोगस्तत्र प्रतिषेधार्थीयः, यत्र च परस्तत्रोपमार्थीयः। **(प्रथिना)** पृथोर्भावस्तेन। पृथुशब्दादिमनिच्। **छान्दसो वर्णलापो वे**ति मकारलोपः। **(शवः)** बलम्। **शव इति बलनामसु पठितम्।** (निघं०२.९)॥५॥

अन्वयः-यो मूर्त्तिमतः संसारस्य द्यौः सूर्य्यः प्रथिना न सुविस्तृतेन स्वप्रकाशेनेव महान् पर इन्द्रः परमेश्वरोऽस्ति, तस्मै वज्रिणे इन्द्रायेश्वराय न्वस्मत्कृतस्य विजयस्य महित्वं शवश्चास्तु॥५॥

भावार्थः-अत्रोपमालङ्कारोऽस्ति। धार्मिकैर्युद्धशीलैः। शूरैर्योद्धृभिर्मनुष्यैः स्वनिष्पादितस्य दुष्टशत्रुविजयस्य धन्यवादा अनन्तशक्तिमते जगदीश्वरायैव देयाः। यतो मनुष्याणां निरभिमानतया राज्योन्नतिः सदैव वर्धेतेति॥५॥

इति पञ्चदशो वर्गः समाप्तः॥

पदार्थः-(**न**) जैसे मूर्त्तिमान् संसार को प्रकाशयुक्त करने के लिये **(द्यौः)** सूर्य्यप्रकाश **(प्रथिना)** विस्तार से प्राप्त होता है, वैसे ही जो **(महान्)** सब प्रकार से अनन्तगुण अत्युत्तम स्वभाव अतुल सामर्थ्ययुक्त और **(परः)** अत्यन्त श्रेष्ठ **(इन्द्रः)** सब जगत् की रक्षा करनेवाला परमेश्वर है, और **(वज्रिणे)**

न्याय की रीति से दण्ड देनेवाले परमेश्वर **(नु)** जो कि अपने सहायरूपी हेतु से हमको विजय देता है, उसी की यह **(महित्वम्)** महिमा **(च)** तथा बल है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। धार्मिक युद्ध करनेवाले मनुष्यों को उचित है कि जो शूरवीर युद्ध में अति धीर मनुष्यों के साथ होकर दुष्ट शत्रुओं पर अपना विजय हुआ है, उसका धन्यवाद अनन्त शक्तिमान् जगदीश्वर को देना चाहिये कि जिससे निरभिमान होकर मनुष्यों के राज्य की सदैव बढ़ती होती रहे॥५॥

यह पन्द्रहवां वर्ग समाप्त हुआ॥

मनुष्यैः कीदृशा भूत्वा युद्धं कर्त्तव्यमित्युपदिश्यते।

मनुष्यों को कैसे होकर युद्ध करना चाहिये, यह विषय अगले मन्त्र में प्रकाश किया है-

समोहे वा य आशत नरस्तोकस्य सनितौ।

विप्रासो वा धियायवः॥ ६॥

सम्ऽओहे। वा। ये। आशत। नरः। तोकस्य। सनितौ। विप्रासः। वा। धियाऽयवः॥ ६॥

पदार्थः-**(समोहे)** संग्रामे। **समोहे इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(वा)** पक्षान्तरे **(ये)** योद्धारो युद्धम् **(आशत)** व्याप्तवन्तो भवेयुः। **'अशूङ् व्याप्तौ'** इत्यस्माल्लिङर्थे लुङ्प्रयोगः। **वा छन्दसि सर्वे विधयो भवन्ती**ति च्लेरभावः। **(नरः)** मनुष्याः **(तोकस्य)** संतानस्य **(सनितौ)** भोगसंविभागलाभे। **तितुत्र०** (अष्टा०७.२.९) **आग्रहादीनामिति वक्तव्यमि**ति वार्त्तिकेनेडागमः। **(विप्रासः)** मेधाविनः। **विप्र इति मेधाविनामसु पठितम्।** (निघं०३.१५) **आज्जसेरसुक्।** (अष्टा०७.१.५०) अनेन जसोऽसुगागमः। **(वा)** व्यवहारान्तरे **(धियायवः)** ये धियं विज्ञानमिच्छन्तः, धीयते धार्य्यते श्रुतमनया सा धिया, तामात्मन इच्छन्ति ते, **'धि धारणे'** इत्यस्य कप्रत्ययान्तः प्रयोगः॥६॥

अन्वयः-ये विप्रासो नरस्ते समोहे शत्रूनाशत वा ये धियायवस्ते तोकस्य सनितावाशत॥६॥

भावार्थः-इन्द्रेश्वरः सर्वान्मनुष्यानाज्ञापयति-संसारेऽस्मिन्मनुष्यैः। कार्य्यद्वयं कर्त्तव्यम्। ये विद्वांसस्तैर्विद्याशरीरबले सम्पाद्यैताभ्यां शत्रूणां बलान्यभिव्याप्य सदैव तिरस्कर्त्तव्यानि। मनुष्यैर्यदा यदा शत्रुभिः सह युयुत्सा भवेत्तदा तदा सावधानतया शत्रूणां बलान्न्यूनान्न्यूनं द्विगुणं स्वबलं सम्पाद्यैव तेषां कृतेनापराजयेन प्रजाः सततः रक्षणीयाः। ये च विद्यादानं चिकीर्षवस्ते कन्यानां पुत्राणां च विद्याशिक्षाकरणे प्रयतेरन्। यतः। शत्रूणां पराभवेन सुराज्यविद्यावृद्धी सदैव भवेताम्॥६॥

पदार्थः-(**विप्रासः**) जो अत्यन्त बुद्धिमान् (**नरः**) मनुष्य हैं, वे (**समोहे**) संग्राम के निमित्त शत्रुओं को जीतने के लिये (**आशत**) तत्पर हैं, (**वा**) अथवा (**धियायवः**) जो कि विज्ञान देने की इच्छा करनेवाले हैं, वे (**तोकस्य**) सन्तानो के (**सनितौ**) विद्या की शिक्षा में (**आशत**) उद्योग करते रहें॥६॥

भावार्थः-ईश्वर सब मनुष्यों को आज्ञा देता है कि-इस संसार में मनुष्यों को दो प्रकार का काम करना चाहिये। इनमें से जो विद्वान् हैं वे अपने शरीर और सेना का बल बढ़ाते और दूसरे उत्तम विद्या की वृद्धि करके शत्रुओं के बल का सदैव तिरस्कार करते रहें। मनुष्यों को जब-जब शत्रुओं के साथ युद्ध करने की इच्छा हो तब-तब सावधान होके प्रथम उनकी सेना आदि पदार्थों से कम से कम अपना दोगुना बल करके उनके पराजय से प्रजा की रक्षा करनी चाहिये। तथा जो विद्याओं के पढ़ाने की इच्छा करनेवाले हैं, वे शिक्षा देने योग्य पुत्र वा कन्याओं को यथायोग्य विद्वान् करने में अच्छे प्रकार यत्न करें, जिससे शत्रुओं के पराजय और अज्ञान के विनाश से चक्रवर्त्ति राज्य और विद्या की वृद्धि सदैव बनी रहे॥६॥

अथेन्द्रशब्देन सूर्य्यलोकगुणा उपदिश्यन्ते।

अगले मन्त्र में इन्द्र शब्द से सूर्य्यलोक के गुणों का व्याख्यान किया है-

यः कुक्षिः सोमपातमः समुद्रइव पिन्वते।

उर्वीरापो न काकुदः॥७॥

यः। कुक्षिः। सोमऽपातमः। समुद्रःऽइव। पिन्वते। उर्वीः। आपः। न। काकुदः॥७॥

पदार्थः-(**यः**) सूर्य्यलोकः (**कुक्षिः**) कुष्णाति निष्कर्षति सर्वपदार्थेभ्यो रसं यः। अत्र **प्लुषिकुषिशुषिभ्यः क्सिः।** (उणा०३.१५३) अनेन '**कुष**' धातोः क्सिः प्रत्ययः। (**सोमपातमः**) यः सोमान्पदार्थान् किरणैः पाति सोऽतिशयितः (**समुद्र इव**) समुद्रवन्त्यापो यस्मिंस्तद्वत् (**पिन्वते**) सिंचति सेवते वा (**उर्वीः**) बह्वीः पृथिवीः। **उर्वीति पृथिवीनामसु पठितम्।** (निघं०१.१) (**आपः**) जलानि, वाऽऽप्नुवन्ति शब्दोच्चारणादिव्यवहारान् याभिस्ता आपः प्राणः। **आप इत्युदकनामसु पठितम्।** (निघं०१.१२) **आप इति पदनामसु पठितम्।** (निघं०५.३) आभ्यां प्रमाणाभ्यामप्शब्देनात्रोदकानि सर्वचेष्टाप्राप्तिनिमित्तत्वात् प्राणाश्च गृह्यन्ते। (**न**) उपमार्थे (**काकुदः**) वाचः शब्दसमूहः। **काकुदिति वाङ्नामसु पठितम्।** (निघं०१.११)॥७॥

अन्वयः-यः कुक्षिः सोमपातमः सूर्य्यलोकः समुद्रं जलानीवापः काकुदो न प्राणा वायवो वाचः शब्दसमूहमिवोर्वीः पृथिवीः पिन्वते॥७॥

भावार्थः-अत्रोपमालङ्कारौ स्तः। इन्द्रेणेश्वरेण यथा जलस्थितिवृष्टिहेतुः समुद्रो वाग्व्यवहारहेतुः प्राणश्च रचितस्तथैव पृथिव्याः प्रकाशाकर्षणादे रसविभागस्य च हेतुः सूर्य्यलोको निर्मितः। एताभ्यां सर्वप्राणिनामनेके व्यवहाराः सिध्यन्तीति॥७॥

पदार्थः-**(समुद्र इव)** जैसे समुद्र को जल **(आपो न काकुदः)** शब्दों के उच्चारण आदि व्यवहारों के करानेवाले प्राण वाणी का सेवन करते हैं, वैसे **(कुक्षिः)** सब पदार्थों से रस को खींचनेवाला तथा **(सोमपातमः)** सोम अर्थात् संसार के पदार्थों का रक्षक जो सूर्य्य है, वह **(उर्वीः)** सब पृथिवी को सेवन वा सेचन करता है॥७॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। ईश्वर ने जैसे जल की स्थिति और वृष्टि का हेतु समुद्र तथा वाणी के व्यवहार का हेतु प्राण बनाया है, वैसे ही सूर्य्यलोक वर्षा होने, पृथिवी के खींचने, प्रकाश और रसविभाग करने का हेतु बनाया है, इसी से सब प्राणियों के अनेक व्यवहार सिद्ध होते हैं॥७॥

पुनस्तन्निमित्तकार्य्यमुपदिश्यते।

उक्त अर्थों के निमित्त और कार्य्य का प्रकाश अगले मन्त्र में किया है-

एवा ह्यस्य सूनृता विरप्शी गोमती मही।

पक्वा शाखा न दाशुषे॥८॥

एव। हि। अस्य। सूनृता। विऽरप्शी। गोमती। मही। पक्वा। शाखा। न। दाशुषे॥८॥

पदार्थः-**(एव)** अवधारणार्थे **(हि)** हीत्यनेककर्मा। (निरु०१.५) **(अस्य)** परमेश्वरस्य सूर्य्यलोकस्य वा प्रकाशनात् **(सूनृता)** प्रियसत्यप्रकाशिका वाक्, अन्नादिपदार्थवती वा। **सूनृतेत्यन्ननामसु पठितम्।** (निघं०२.७) सुष्ठु ऋतं यथार्थं ज्ञानं यस्यां साऽन्नवती वा। **(विरप्शी)** महाविद्यायुक्ता। **विरप्शी इति महन्नामसु पठितम्।** (निघं०३.३ **(गोमती)** गावो भूयांसः स्तोतारो विद्यन्ते यस्यां सा। **गौरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) **(मही)** सर्वपूज्या वाङ्मयी वेदचतुष्टयी पृथिवी वा। **महीति वाङ्नामसु पठितम्।** (निघं०१.११) **पृथिवीनामसु च।** (निघं०१.१) **(पक्वा)** पक्वफलयुक्ता **(शाखा)** वृक्षावयवाः। **शाखाः खशयाः शक्नोतेर्वा।** (निरु०१.४) **(न)** इव **(दाशुषे)** अध्ययनार्थं तद्राज्यप्राप्त्यर्थं च ध्यानं दत्तवते मनुष्याय॥८॥

अन्वयः-हि पक्वा शाखा न इवास्य गोमती सूनृता विरप्शी मही दाशुषे सुखं पिन्वते॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा विविधपुष्पफलवन्त आम्रपनसादयो वृक्षा विविधफलप्रदाः सन्ति, तथैवेश्वरेण प्रकाशिता विविधविद्यानन्दप्रदा वेदा अनेकसुखभोगप्रदाः पृथिव्यादयश्च प्रसिद्धीकृताः सन्ति। एतेषां प्रकाशो राज्यं च विद्वद्भिरेव कर्त्तुं शक्यते॥८॥

पदार्थः-**(पक्वा शाखा न)** जैसे आम और कटहर आदि वृक्ष, पकी डाली और फलयुक्त होने से प्राणियों को सुख देनेहारे होते हैं **(अस्य हि)** वैसे ही इस परमेश्वर की **(गोमती)** जिसको बहुत से विद्वान् सेवन करनेवाले हैं, जो **(सूनृता)** प्रिय और सत्यवचन प्रकाश करनेवाली **(विरप्शी)**

महाविद्यायुक्त और **(महती)** सबको सत्कार करने योग्य चारों वेद की वाणी है, सो **(दाशुषे)** पढ़ने में मन लगानेवालों को सब विद्याओं का प्रकाश करनेवाली है।

तथा **(अस्य हि)** जैसे इस सूर्य्यलोक की **(गोमती)** उत्तम मनुष्यों के सेवन करने योग्य **(सूनृता)** प्रीति के उत्पादन करनेवाले पदार्थों का प्रकाश करनेवाली **(विरप्शी)** बड़ी से बड़ी **(मही)** बड़े-बड़े गुणयुक्त दीप्ति है, वैसे वेदवाणी **(दाशुषे)** राज्य की प्राप्ति के लिये राज्यकर्मों में चित्त देनेवालों को सुख देनेवाली होती है॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विविध प्रकार से फलफूलों से युक्त आम और कटहर आदि वृक्ष नाना प्रकार के फलों के देनेवाले होके सुख देनेहारे होते हैं, वैसे ही ईश्वर से प्रकाश की हुई वेदवाणी बहुत प्रकार की विद्याओं को देनेहारी होकर सब मनुष्यों को परम आनन्द देनेवाली है। जो विद्वान् लोग इसको पढ़ के धर्मात्मा होते हैं, वे ही वेदों का प्रकाश और पृथिवी में राज्य करने को समर्थ होते हैं॥८॥

य एवं कुर्वन्ति तेषां किं भवतीत्युपदिश्यते।

जो मनुष्य ऐसा करते हैं, उनको क्या सिद्ध होता है, सो अगले मन्त्र में प्रकाश किया है-

एवा हि ते विभूतय ऊतय इन्द्र मावते।

सद्यश्चित्सन्ति दाशुषे॥९॥

एव। हि। ते। विऽभूतयः। ऊतयः। इन्द्र। माऽवते। सद्यः। चित्। सन्ति। दाशुषे॥९॥

पदार्थः-**(एव)** निश्चयार्थे **(हि)** हेत्वर्थे **(ते)** तव **(विभूतयः)** विविधा भूतय ऐश्वर्य्याणि यासु ताः **(ऊतयः)** रक्षाविज्ञानसुखप्राप्त्यादयः **(इन्द्र)** सर्वतो रक्षयितरीश्वर! **(मावते)** मत्सदृशाय। **वतुप्प्रकारेण युष्मदस्मद्भ्यां छन्दसि सादृश्यं उपसंख्यानम्।** (अष्टा०५.२.३९) अनेनास्मच्छब्दात् सादृश्यार्थे वतुप्। **आ सर्वनाम्नः।** (अष्टा०६.३.९१) इत्याकारादेशश्च। **(सद्यः)** शीघ्रमेव। **सद्यः परुत्परार्य्यैषमः।** (अष्टा०५.३.२२) **समाने अहनि इति सद्यः** इति भाष्यवचनात्समाने अहन्येतस्मिन्नर्थे सद्य इति शब्दो निपातितः। **(चित्)** पूजार्थे। **चिदिति पूजायाम्।** (निरु०१.४) **(सन्ति)** भवन्तु। अत्र लोडर्थे लट् वा। **(दाशुषे)** सर्वोपकारधर्म आत्मानं दत्तवते॥९॥

अन्वयः-हे इन्द्र जगदीश्वर! भवत्कृपया यथा ते तव विभूतय ऊतयो मह्यं प्राप्ताः सन्ति भवन्ति, तथैवैता मावते दाशुषे चिदेव हि सद्यः प्राप्नुवन्तु॥९॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। ईश्वरस्याज्ञास्ति-ये जनाः पुरुषार्थिनो भूत्वा धार्मिकाः परोपकारिणो भवन्ति त एव पूर्णमैश्वर्य्यरक्षणं कृत्वा सर्वत्र सत्कृता जायन्ते॥९॥

पदार्थः-हे **(इन्द्र)** जगदीश्वर! आपकी कृपा से जैसे **(ते)** आपके **(विभूतयः)** जो-जो उत्तम ऐश्वर्य्य और **(ऊतयः)** रक्षा विज्ञान आदि गुण मुझको प्राप्त **(सन्ति)** हैं, वैसे **(मावते)** मेरे तुल्य **(दाशुषे चित्)** सब के उपकार और धर्म में मन को देनेवाले पुरुष को **(सद्य एव)** शीघ्र ही प्राप्त हों॥९॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। ईश्वर की आज्ञा का प्रकाश इस रीति से किया है कि-जब मनुष्य पुरुषार्थी होके सब को उपकार करनेवाले और धार्मिक होते हैं, तभी वे पूर्ण ऐश्वर्य्य और ईश्वर की यथायोग्य रक्षा आदि को प्राप्त होके सर्वत्र सत्कार के योग्य होते हैं॥९॥

इयं सर्वा प्रशंसा कस्यास्तीत्युपदिश्यते।

उक्त सब प्रशंसा किस की है, सो अगले मन्त्र में किया है-

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या।

इन्द्राय सोमपीतये॥ १०॥ १६॥

एव। हि। अस्य। काम्या। स्तोमः। उक्थम्। च। शंस्या। इन्द्राय। सोमऽपीतये॥ १०॥

पदार्थः-(**एव**) अवधारणार्थे **(हि)** हेत्वपदेशे **(अस्य)** वेदचतुष्टयस्य **(काम्या)** कमनीये। अत्र **सुपां सुलुगि**ति द्विवचनस्याकारादेशः। **(स्तोमः)** सामगानविशेषः स्तुतिसमूहः **(उक्थम्)** उच्यन्त ईश्वरगुणा येन तादृक्समूहम् **(च)** समुच्चयार्थे। अनेन यजुरथर्वणोर्ग्रहणम्। **(शंस्या)** प्रशंसनीये कर्मणी। अत्रापि **सुपां सुलुगि**त्याकारादेशः। **(इन्द्राय)** परमैश्वर्य्यवते। परमात्मने **(सोमपीतये)** सोमानां सर्वेषां पदार्थानां पीतिः पानं यस्य तस्मै। **सह सुपा।** (अष्टा०२.१.४) इति सामान्यतः समासः॥१०॥

अन्वयः-ये अस्य वेदचतुष्टयस्य काम्ये शंस्ये स्तोम उक्थं च स्तस्ते सोमपीतये इन्द्राय हि भजतः॥१०॥

भावार्थः-यथास्मिन् जगति केनचिन्निर्मितान् पदार्थान् दृष्ट्वा तद्रचयितुः प्रशंसा भवति, तथैव सर्वैः प्रत्यक्षाप्रत्यक्षैर्जगत्स्थैः सूर्य्यादिभिरुत्तमैः पदार्थैस्तद्रचनया च वेदेष्वीश्वरस्यैव धन्यवादाः सन्ति। नैतस्य समाधिका वा कस्यचित्स्तुतिर्भवितुमर्हतीति॥१०॥

एवं य ईश्वरस्योपसाकाः क्रियावन्तस्तदाश्रिता विद्ययात्मसुखं क्रियया च शरीरसुखं प्राप्य तेऽस्यैव सदा प्रशंसा कुर्य्युरित्यस्याष्टमस्य सूक्तोक्तार्थस्य सप्तमसूक्तोक्तार्थेन सह सङ्गतिरस्तीति विज्ञेयम्।

अस्यापि सूक्तस्य मन्त्रार्थाः सायणचार्य्यादिभिर्यूरोपाख्यदेशस्थैर्विलसनाख्यादिभिश्चा-यथावद्वर्णिता इति वेदितव्यम्॥

इत्यष्टमं सूक्तं षोडशश्च वर्गः समाप्तः॥

पदार्थः-**(अस्य)** जो-जो इन चार वेदों के **(काम्ये)** अत्यन्त मनोहर **(शंस्ये)** प्रशंसा करने योग्य कर्म वा **(स्तोमः)** स्तोत्र हैं, **(च)** तथा **(उक्थम्)** जिनमें परमेश्वर के गुणों का कीर्तन है, वे **(इन्द्राय)** परमेश्वर की प्रशंसा के लिये हैं। कैसा वह परमेश्वर है कि जो **(सोमपीतये)** अपनी व्याप्ति से सब पदार्थों के अंश-अंश में रम रहा है॥१०॥

भावार्थः-जैसे इस संसार में अच्छे-अच्छे पदार्थों की रचना विशेष देखकर उस रचनेवाले की प्रशंसा होती है, वैसे ही संसार के प्रसिद्ध और अप्रसिद्ध अत्युत्तम पदार्थों तथा विशेष रचना को देखकर ईश्वर को ही धन्यवाद दिये जाते हैं। इस कारण से परमेश्वर की स्तुति के समान वा उस से अधिक किसी की स्तुति नहीं हो सकती॥१०॥

इस प्रकार जो मनुष्य ईश्वर की उपासना और वेदोक्त कर्मों के करनेवाले हैं, वे ईश्वर के आश्रित होके वेदविद्या से आत्मा के सुख और उत्तम क्रियाओं से शरीर के सुख को प्राप्त होते हैं, वे परमेश्वर ही की प्रशंसाा करते रहें। इस अभिप्राय से इस आठवें सूक्त के अर्थ की पूर्वोक्त सातवें सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

इस सूक्त के मन्त्रों के भी अर्थ सायणाचार्य्य आदि और यूरोपदेशवासी अध्यापक विलसन आदि अङ्गरेज लोगों ने उलटे वर्णन किये हैं॥

यह आठवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथ नवमस्य दशर्चस्य सूक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवताः। १,३,७,१० निचृद्गायत्री; २,४,८,९ गायत्री; ५,६ पिपीलिकामध्यानिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रेन्द्रशब्देनोभावर्थावुपदिश्येते।

अब नवम सूक्त के आरम्भ के मन्त्र में इन्द्र शब्द से परमेश्वर और सूर्य्य का प्रकाश किया है-

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः।
महाँ अभिष्टिरोजसा॥ १॥

इन्द्र। आ। इहि। मत्सि। अन्धसः। विश्वेभिः। सोमपर्वऽभिः। महान्। अभिष्टिः। ओजसा॥ १॥

पदार्थः-(**इन्द्र**) सर्वव्यापकेश्वर सूर्य्यलोको वा (**आ**) क्रियार्थे (**इहि**) प्राप्नुहि प्रापयति वा। अत्र पुरुषव्यत्ययः लडर्थे लोट् च। (**मत्सि**) हर्षयितासि भवति वा। अत्र **बहुलं छन्दसी**ति श्यनो लुक्, पक्षे पुरुषव्यत्ययश्च। (**अन्धसः**) अन्नानि पृथिव्यादीनि। **अन्ध इत्यन्ननामसु पठितम्।** (निघं०२.७) (**विश्वेभिः**) सर्वैः। अत्र **बहुलं छन्दसी**ति भिस ऐसादेशाभावः। (**सोमपर्वभिः**) सोमानां पदार्थानां पर्वाण्यवयवास्तैः सह (**महान्**) सर्वोत्कृष्ट ईश्वरः सूर्य्यलोको वा परिमाणेन महत्तमः (**अभिष्टिः**) अभितः सर्वतो ज्ञाता ज्ञापयिता मूर्त्तद्रव्यप्रकाशको वा। अत्राभिपूर्वा**दिष गता**वित्यस्माद्धातो**र्मन्त्रे वृषेष०** (अष्टा०३.३.९६) अनेन क्तिन्। **एवमन्नादिषु छन्दसि पररूपं वक्तव्यम्। एङि पररूपमि**त्यस्योपरिस्थवार्त्तिकेनाभेरिकारस्य पररूपेणेदं सिध्यति। (**ओजसा**) बलेन। **ओज इति बलनामसु पठितम्।** (निघं०२.९)॥१॥

अन्वयः-यथाऽयमिन्द्रः सूर्य्यलोक ओजसा महानभिष्टिर्विश्वेभिः सोमपर्वभिः सहान्धसोऽन्नानां पृथिव्यादीनां प्रकाशेनेहि मत्सि हर्षहेतुर्भवति, तथैव हे इन्द्र त्वं महानभिष्टिर्विश्वेभिः सोमपर्वभिः सह वर्त्तमानः सन् ओजसोऽन्धस एहि प्रापयसि मत्सि हर्षयितासि॥१॥

भावार्थः-अत्र श्लेषलुप्तोमापलङ्कारौ। यथेश्वरोऽस्मिन् जगति प्रतिपरमाण्वभिव्याप्य सततं सर्वान् लोकान् नियतान् रक्षति, तथा सूर्य्योऽपि सर्वेभ्यो लोकेभ्यो महत्त्वादाभिमुख्यस्थान् पदार्थानाकृष्य प्रकाश्य व्यवस्थापयति॥१॥

पदार्थः-जिस प्रकार से (**अभिष्टिः**) प्रकाशमान (**महान्**) पृथिवी आदि से बहुत बड़ा (**इन्द्र**) यह सूर्य्यलोक है, वह (**ओजसा**) बल वा (**विश्वेभिः**) सब (**सोमपर्वभिः**) पदार्थों के अङ्गों के साथ (**अन्धसः**) पृथिवी आदि अन्नादि पदार्थों के प्रकाश से (**एहि**) प्राप्त होता और (**मत्सि**) प्राणियों को आनन्द देता है, वैसे ही हे (**इन्द्र**) सर्वव्यापक ईश्वर! आप (**महान्**) उत्तमों में उत्तम (**अभिष्टिः**) सर्वज्ञ और सब ज्ञान के देनेवाले (**ओजसा**) बल वा (**विश्वेभिः सोमपर्वभिः**) सब पदार्थों के अंशों के साथ वर्त्तमान होकर (**एहि**) प्राप्त होते और (**अन्धसः**) भूमि आदि अन्नादि उत्तम पदार्थों को देकर हमको (**मत्सि**) सुख देता है॥१॥

भावार्थः-इस मन्त्र में श्लेष और लुप्तोपमालङ्कार हैं। जैसे ईश्वर इस संसार के परमाणु-परमाणु में व्याप्त होकर सब की रक्षा निरन्तर करता है, वैसे ही सूर्य्य भी सब लोकों से बड़ा होने से अपने सन्मुख हुए पदार्थों को आकर्षण वा प्रकाश करके अच्छे प्रकार स्थापन करता है॥१॥

अथ शिल्पविद्यानुसङ्गिनी अग्निजले उपदिश्येते।

शिल्पविद्या के उत्तम साधन जल और अग्नि का वर्णन अगले मन्त्र में किया है-

एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने।
चक्रिं विश्वानि चक्रये॥२॥

आ। ईम्। एनम्। सृजत। सुते। मन्दिम्। इन्द्राय। मन्दिने। चक्रिम्। विश्वानि। चक्रये॥२॥

पदार्थः-(**आ**) क्रियार्थे (**ईम्**) जलमग्निं वा। **ईमित्युदकनामसु पठितम्।** (निघं०१.१२) **ईमिति पदनामसु च।** (निघं०४.२) अनेन शिल्पविद्यासाधकतमावेतौ गृह्येते। (**एनम्**) अर्थद्वयम् (**सृजत**) विविधतया प्रकाशयत सम्पादयत वा (**सुते**) उत्पन्नेऽस्मिन्पदार्थसमूहे जगति (**मन्दिम्**) मन्दन्ति हर्षन्त्यस्मिँस्तम् (**इन्द्राय**) ऐश्वर्य्यमिच्छवे जीवाय (**मन्दिने**) मन्दितुं मन्दयितुं शीलवते (**चक्रिम्**) शिल्पविद्याक्रियासाधनेषु यानानां शीघ्रचालनस्वभावम् (**विश्वानि**) सर्वाणि वस्तूनि निष्पादयितुम् (**चक्रये**) पुरुषार्थकरणशीलाय॥२॥

अन्वयः-हे विद्वांसः! सुत उत्पन्नेऽस्मिन्पदार्थसमूहे जगति विश्वानि कार्य्याणि कर्त्तुं मन्दिन इन्द्राय जीवाय मन्दिं चक्रये चक्रिमासृजत॥२॥

भावार्थः-विद्वद्भिरस्मिन् जगति पृथिवीमारभ्येश्वरपर्य्यन्तानां पदार्थानां विज्ञानप्रचारेण सर्वान् मनुष्यान् विद्यया क्रियावतः सम्पाद्य सर्वाणि सुखानि सदा सम्पादनीयानि॥२॥

पदार्थः-हे विद्वानो! (**सुते**) उत्पन्न हुए इस संसार में (**विश्वानि**) सब सुखों के उत्पन्न होने के अर्थ (**मन्दिने**) ऐश्वर्यप्राप्ति की इच्छा करने तथा (**मन्दिम्**) आनन्द बढ़ानेवाला (**चक्रये**) पुरुषार्थ करने के स्वभाव और (**इन्द्राय**) परम ऐश्वर्य होने वाले मनुष्य के लिये (**चक्रिम्**) शिल्पविद्या से सिद्ध किये हुए साधनों में (**एनम्**) इन (**ईम्**) जल और अग्नि को (**आसृजत**) अति प्रकाशित करो॥२॥

भावार्थः-विद्वानों को उचित है कि इस संसार में पृथिवी से लेके ईश्वरपर्य्यन्त पदार्थों के विशेषज्ञान उत्तम शिल्प विद्या से सब मनुष्यों को उत्तम-उत्तम क्रिया सिखाकर सब सुखों का प्रकाश करना चाहिये॥२॥

अथेन्द्रशब्देनेश्वर उपदिश्यते।

अगले मन्त्र में इन्द्रशब्द से परमेश्वर का प्रकाश किया है-

मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे।

सचैषु सवनेष्वा॥ ३॥

मत्स्वा। सुऽशिप्र। मन्दिऽभिः। स्तोमेभिः। विश्वऽचर्षणे। सचा। एषु। सवनेषु। आ॥ ३॥

पदार्थः-(**मत्स्व**) अस्माभिः स्तुतः सन् सदा हर्षय। **द्व्यचोऽतस्तिङ** इति दीर्घः। **बहुलं छन्दसी**ति श्यनो लुक् च। (**सुशिप्र**) शोभनं शिप्रं ज्ञानं प्रापणं वा यस्य तत्सम्बुद्धौ (**मन्दिभिः**) तज्ज्ञापकैर्हर्षकरैश्च गुणैः। (**स्तोमेभिः**) वेदस्थैः स्तुतियुक्तैस्त्वद्गुणप्रकाशकैः स्तोत्रैः। **बहुलं छन्दसी**ति भिस ऐस् न। (**विश्वचर्षणे**) विश्वस्य सर्वस्य जगतश्चर्षणिर्द्रष्टा तत्संबुद्धौ। **विश्वचर्षणिरिति पश्यतिकर्मसु पठितम्।** निघं०३.११) (**सचा**) सचन्ति ये ते सचास्तान् सचानस्मान् विदुषः। अत्र शसः स्थाने **सुपां सुलुगि**त्याकारादेशः। **सचेति पदनामसु पठितम्।** (निघं०४.२) अनेन ज्ञानप्राप्त्यर्थो गृह्यते। (**एषु**) प्रत्यक्षेषु (**सवनेषु**) ऐश्वर्य्येषु। **सु प्रसवैश्वर्य्ययो**रित्यस्य रूपम्। (**आ**) समन्तात्॥ ३॥

अन्वयः-हे विश्वचर्षणे सुशिप्रेन्द्र भगवन्! त्वं मन्दिभिः स्तोमेभिः स्तुतः सन्नेषु सवनेषु सचानस्मानामत्स्व समन्ताद्धर्षय॥ ३॥

भावार्थः-येन विश्वप्रकाशकः सूर्य्य उत्पादितस्तत्स्तुतौ ये मनुष्याः कृतनिष्ठा धार्मिकाः पुरुषार्थिनो भूत्वा सर्वथा सर्वद्रष्टारं परमेश्वरं ज्ञात्वा सर्वैश्वर्य्यस्योत्पादने तद्रक्षणे च समवेता भूत्वा सुखकारिणो भवन्तीति॥ ३॥

पदार्थः-हे (**विश्वचर्षणे**) सब संसार के देखने तथा (**सुशिप्र**) श्रेष्ठज्ञानयुक्त परमेश्वर! आप (**मन्दिभिः**) जो विज्ञान वा आनन्द के करनेवाले (**स्तोमेभिः**) वेदोक्त स्तुतिरूप गुणप्रकाश करनेहारे स्तोत्र हैं, उनसे स्तुति को प्राप्त होकर (**एषु**) इन प्रत्यक्ष (**सवनेषु**) ऐश्वर्य्य देनेवाले पदार्थों में हम लोगों को (**सचा**) युक्त करके (**मत्स्व**) अच्छे प्रकार आनन्दित कीजिये॥ ३॥

भावार्थः-जिसने संसार के प्रकाश करनेवाले सूर्य्य को उत्पन्न किया है, उसकी स्तुति करने में जो श्रेष्ठ पुरुष एकाग्रचित्त हैं, अथवा सबको देखनेवाले परमेश्वर को जानकर सब प्रकार से धार्मिक और पुरुषार्थी होकर सब ऐश्वर्य्य को उत्पन्न और उस की रक्षा करने में मिलकर रहते हैं, वे ही सब सुखों को प्राप्त होने के योग्य वा औरों को भी उत्तम-उत्तम सुखों के देनेवाले हो सकते हैं॥ ३॥

पुनस्सोऽर्थ उपदिश्यते।

फिर भी अगले मन्त्र में ईश्वर का प्रकाश किया है-

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत।

अजोषा वृषभं पतिम्॥ ४॥

असृग्रम्। इन्द्र। ते। गिरः। प्रति। त्वाम्। उत्। अहासत। अजोषाः। वृषभम्। पतिम्॥ ४॥

पदार्थः-(**असृग्रम्**) सृजामि विविधतया वर्णयामि। **बहुलं छन्दसि।** (अष्टा०७.१.८) अनेन '**सृज**' धातोरुडागमः। वर्णव्यत्ययेन जकारस्थाने गकारः, लडर्थे लङ् च। (**इन्द्र**) सर्वथा स्तोतव्य! (**ते**) तव (**गिरः**) वेदवाण्यः (**प्रति**) इन्द्रियागोचरेऽर्थे। **प्रतीत्यैतस्य प्रातिलोम्यं प्राह।** (निरु०१.३) (**त्वाम्**) वेदवक्तारं परमेश्वरम् (**उदहासत**) उत्कृष्टतया ज्ञापयन्ति। अत्र ओहाङ् गताविति्यस्माल्लडर्थे लुङ्। (**अजोषाः**) जुषसे। अत्र **छन्दस्युभयथे**त्यार्धधातुकसंज्ञाश्रयाल्लघूपधगुणः। **छान्दसो वर्णलोपो वे**ति थासस्थकारस्य लोपेनेदं सिध्यति। (**वृषभम्**) सर्वाभीष्टवर्षकम् (**पतिम्**) पालकम्॥४॥

अन्वयः-हे इन्द्र परमेश्वर! यास्ते तव गिरो वृषभं पतिं त्वामुदहासत यास्त्वमजोषाः सर्वा विद्या जुषसे ताभिरहमपि प्रतीत्थंभूतं वृषभं पतिं त्वामसृग्रं सृजामि॥४॥

भावार्थः-येनेश्वरेण स्वप्रकाशितेन वेदेन यादृशानि स्वस्वभावगुणकर्माणि प्रकाशितानि तान्यस्माभिस्तथैव वेद्यानि सन्ति। कुतः, ईश्वरस्यानन्तसत्यस्वभावगुणकर्मवत्त्वादल्पज्ञैरस्माभिर्जीवैः स्वसामर्थ्येन तानि ज्ञातुमशक्यत्वात्। यथा स्वयं स्वस्वभावगुणकर्माणि जानाति तथाऽन्यैर्यथावज्ज्ञातुमज्ञक्यानि भवन्ति। अतः सर्वैर्विद्वद्भिर्वेदवाण्यैवेश्वरादयः पदार्थाः सम्प्रीत्या पुरुषार्थेन च वेदितव्याः सन्ति, तेभ्य उपकारग्रहणं चेति। स एवेश्वर इष्टः पालकश्च मन्तव्य इति॥४॥

पदार्थः-(**इन्द्र**) हे परमेश्वर! जो (**ते**) आपकी (**गिरः**) वेदवाणी हैं, वे (**वृषभम्**) सब से उत्तम सब की इच्छा पूर्ण करनेवाले (**पतिम्**) सब के पालन करनेहारे (**त्वाम्**) वेदों के वक्ता आप को (**उदहासत**) उत्तमता के साथ जनाती हैं, और जिन वेदवाणियों को आप (**अजोषाः**) सेवन करते हो, उन्ही से मैं भी (**प्रति**) उक्त गुणयुक्त आपको (**असृग्रम्**) अनेक प्रकार से वर्णन करता हूँ॥४॥

भावार्थः-जिस ईश्वर ने प्रकाश किये हुए वेदों से जैसे अपने-अपने स्वभाव गुण और कर्म प्रकट किये हैं, वैसे ही वे सब लोगों को जानने योग्य हैं, क्योंकि ईश्वर के सत्य स्वभाव के साथ अनन्तगुण और कर्म हैं, उनको हम अल्पज्ञ लोग अपने सामर्थ्य से जानने को समर्थ नहीं हो सकते। तथा जैसे हम लोग अपने-अपने स्वभाव गुण और कर्मों को जानते हैं, वैसे औरों को उनका यथावत् जानना कठिन होता है, इसी प्रकार सब विद्वान् मनुष्यों को वेदवाणी के विना ईश्वर आदि पदार्थों को यथावत् जानना कठिन है। इसलिये प्रयत्न से वेदों को जान के उन के द्वारा सब पदार्थों से उपकार लेना तथा उसी ईश्वर को अपना इष्टदेव और पालन करनेहारा मानना चाहिये॥४॥

तस्योपासनेन किं लभ्यते, इत्युपदिश्यते।

ईश्वर की उपासना से क्या लाभ होता है, सो अगले मन्त्र में प्रकाश किया है-

सं चो॑दय चि॒त्रम॒र्वाग्राध॑ इन्द्र॒ वरे॑ण्यम्।
अस॒दित्ते॑ वि॒भु प्र॒भु॥५॥१७॥

सम्। चो॒द॒य॒। चि॒त्रम्। अ॒र्वाक्। राधः॑। इ॒न्द्र॒। वरे॑ण्यम्। अस॑त्। इत्। ते॒। वि॒ऽभु। प्र॒ऽभु॥५॥

पदार्थः-**(सम्)** सम्यगर्थे। **समित्येकीभावं प्राह।** (निरु०१.३) **(चोदय)** प्रेरय प्रापय **(चित्रम्)** चक्रवर्त्तिराज्यश्रिया विद्यामणिसुवर्णहस्त्यश्वादियोगेनाद्भुतम् **(अर्वाक्)** प्राप्त्यनन्तरमाभिमुख्येनानन्दकारकम् **(राधः)** राध्नुवन्ति सुखानि येन तद्धनम्। **राध इति धननामसु पठितम्।** (निघं०२.१०) **(इन्द्र)** दयामयसर्वसुखसाधनप्रदेश्वर! **(वरेण्यम्)** वर्त्तुमर्हमतिश्रेष्ठम्। **वृत्र एण्यः।** (उणा०३.९६) अनेन **'वृञ् वरणे'** इत्यस्मादेण्यप्रत्ययः। **(असत्)** भवेत्। अस धातोर्लेट्प्रयोगः। **(इत्)** एव **(ते)** तव **(विभु)** बहुसुखव्यापकम् **(प्रभु)** उत्तमप्रभावकारकम्॥५॥

अन्वयः-हे इन्द्र! ते तव सृष्टौ यद्यद्वरेण्यं विभु प्रभु चित्रं राधोऽसत् तत्तत्कृपयाऽर्वागस्मदाभिमुख्याय सञ्चोदय॥५॥

भावार्थः-मनुष्यैरीश्वरानुग्रहेण स्वपुरुषार्थेन च सर्वस्यात्मशरीरसुखाय विद्यैश्वर्य्ययोः प्राप्तिरक्षणोन्नतिसन्मार्गदानानि सदैव संसेव्यानि, यतो दारिद्र्यालस्यप्रभावदुःखाभावेन दिव्या भोगाः सततं वर्धेरन्निति॥५॥

सप्तदशो वर्गः समाप्तः॥

पदार्थः-हे **(इन्द्र)** करुणामय सब सुखों के देनेवाले परमेश्वर! **(ते)** आपकी सृष्टि में जो-जो **(वरेण्यम्)** अतिश्रेष्ठ **(विभु)** उत्तम-उत्तम पदार्थों से पूर्ण **(प्रभु)** बड़े-बड़े प्रभावों का हेतु **(चित्रम्)** जिससे श्रेष्ठ विद्या चक्रवर्त्ति राज्य से सिद्ध होनेवाला मणि सुवर्ण और हाथी आदि अच्छे-अच्छे अद्भुत पदार्थ होते हैं, ऐसा **(राधः)** धन **(असत्)** हो, सो-सो कृपा करके हम लोगों के लिये **(सञ्चोदय)** प्रेरणा करके प्राप्त कीजिये॥५॥

भावार्थः-मनुष्यों को ईश्वर के अनुग्रह और अपने पुरुषार्थ से आत्मा और शरीर के सुख के लिये विद्या और ऐश्वर्य्य की प्राप्ति वा उनकी रक्षा और उन्नति तथा सत्यमार्ग वा उत्तम दानादि धर्म अच्छी प्रकार से सदैव सेवन करना चाहिये, जिससे दारिद्र्य और आलस्य से उत्पन्न होनेवाले दुःखों का नाश होकर अच्छे-अच्छे भोग करने योग्य पदार्थों की वृद्धि होती रहे॥५॥

यह सत्रहवां वर्ग समाप्त हुआ॥

कथंभूतानस्मान्कुर्वित्युपदिश्यते।

अन्तर्यामी ईश्वर हम लोगों को कैसे-कैसे कामों में प्रेरणा करे, इस विषय का अगले मन्त्र में प्रकाश किया है-

अ॒स्मान्त्सु तत्र॑ चोदयेन्द्र॑ रा॒ये रभ॑स्वतः।
तुवि॑द्युम्न यश॑स्वतः॥६॥

अ॒स्मान्। सु। तत्र॑। चोद॒य॒। इन्द्र॑। रा॒ये। रभ॑स्वतः। तुवि॑ऽद्युम्न। यश॑स्वतः॥६॥

पदार्थः-(**अस्मान्**) विदुषो धार्मिकान् मनुष्यान् (**सु**) शोभनार्थे क्रियायोगे च (**तत्र**) पूर्वोक्ते पुरुषार्थे (**चोदय**) प्रेरय (**इन्द्र**) अन्तर्यामिन्नीश्वर! (**राये**) धनाय (**रभस्वतः**) कार्य्यारम्भं कुर्वत आलस्यरहितान् पुरुषार्थिनः (**तुविद्युम्न**) बहुविधं द्युम्नं विद्याद्यनन्तं धनं यस्य तत्सम्बुद्धौ। **द्युम्नमिति धननामसु पठितम्।** (निघं०२.१०) **तुवीति बहुनामसु च।** (निघं०३.१) (**यशस्वतः**) यशोविद्याधर्मसर्वोपकाराख्या प्रशंसा विद्यते येषां तान्। अत्र प्रशंसार्थे मतुप्॥६॥

अन्वयः-हे तुविद्युम्नेन्द्र परात्मँस्त्वं रभस्वतो यशस्वतोऽस्मान् तत्र पुरुषार्थे राये उत्कृष्टधनप्राप्त्यर्थे सुचोदय॥६॥

भावार्थः-अस्यां सृष्टौ परमेश्वराज्ञायां च वर्तमानैः पुरुषार्थिभिर्यशस्विभिः सर्वैर्मनुष्यैर्विद्याराज्यश्रीप्राप्त्यर्थे सदैव प्रयत्नः कर्त्तव्य नैतादृशैर्विनैताः श्रियो लब्धुं शक्याः। कुतः, ईश्वरेण पुरुषार्थिभ्य एव सर्वसुखप्राप्तेर्निर्मित्तत्वात्॥६॥

पदार्थः-हे (**तुविद्युम्न**) अत्यन्त विद्यादिधनयुक्त (**इन्द्र**) अन्तर्यामी ईश्वर! (**रभस्वतः**) जो आलस्य को छोड़ के कार्य्यों के आरम्भ करने (**यशस्वतः**) सत्कीर्तिसहित (**अस्मान्**) हम लोग पुरुषार्थी विद्या धर्म और सर्वोपकार से नित्य प्रयत्न करनेवाले मनुष्यों को (**तत्र**) श्रेष्ठ पुरुषार्थ में (**राये**) उत्तम-उत्तम धन की प्राप्ति के लिये (**सुचोदय**) अच्छी प्रकार युक्त कीजिये॥६॥

भावार्थः-सब मनुष्यों को उचित है कि इस सृष्टि में परमेश्वर की आज्ञा के अनुकूल वर्तमान तथा पुरुषार्थी और यशस्वी होकर विद्या तथा राज्यलक्ष्मी की प्राप्ति के लिये सदैव उपाय करें। इसी से उक्त गुणवाले पुरुषों ही को लक्ष्मी से सब प्रकार का सुख मिलता है, क्योंकि ईश्वर ने पुरुषार्थी सज्जनों ही के लिये सुख रचे हैं॥६॥

पुनः कीदृशं तद्धनमित्युपदिश्यते।

फिर भी उक्त धन कैसा है, इस विषय को अगले मन्त्र में प्रकाश किया है-

सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत्।
विश्वायुर्धेह्यक्षितम्॥७॥

सम्। गोऽमत्। इन्द्र। वाजऽवत्। अस्मेऽइति। पृथु। श्रवः। बृहत्। विश्वऽआयुः। धेहि। अक्षितम्॥७॥

पदार्थः-(**सम्**) सम्यगर्थे क्रियायोगे। **समित्येकीभावं प्राह।** (निरु०१.३) (**गोमत्**) गौः प्रशस्ता वाक् गावः स्तोतारश्च विद्यन्ते यस्मिंस्तत्। अत्र प्रशंसार्थे मतुप्। (**इन्द्र**) अनन्तविद्येश्वर! (**वाजवत्**) वाजो बहुविधं भोक्तव्यमन्नमस्त्यस्मिन् तत्। **वाज इत्यन्नामसु पठितम्।** (निघं०२.७) अत्र भूम्न्यर्थे मतुप्। (**अस्मे**) अस्यभ्यम्। अत्र **सुपां सुलुगिति** शेआदेशः। (**पृथु**) नानाविद्यासु विस्तीर्णम्। (**श्रवः**) शृण्वन्त्येका विद्याः सुवर्णादि च धनं यस्मिंस्तत्। **श्रव इति धननामसु पठितम्।** (निघं०२.१०) (**बृहत्**) अनेकैः

शुभगुणैर्भोगैश्च महत् **(विश्वायुः)** विश्वं शतवार्षिकमधिकं वा आयुर्यस्मात्तत् **(धेहि)** संयोजय **(अक्षितम्)** यन्न कदाचित् क्षीयते सदैव वर्धमानं तत्॥७॥

अन्वयः-हे इन्द्र जगदीश्वर! त्वमस्मे अस्मभ्यं गोमत् वाजवत् पृथु बृहत् विश्वायुरक्षितं श्रवः संधेहि॥७॥

भावार्थः-मनुष्यैर्ब्रह्मचर्य्येण विषयलोलुपतात्यागेन भोजनाच्छादनादिसुनियमैश्च विद्याचक्रवर्त्तिश्रीयोगेन समग्रस्यायुषो भोगार्थं संधेयम्। यत ऐहिकं पारमार्थिकं च दृढं विशालं सुखं सदैव वर्धेत। न ह्येतत् केवलमीश्वरस्य प्रार्थनयैव भवितुमर्हति, किन्तु विविधपुरुषार्थापेक्षं वर्त्तत एतत्॥७॥

पदार्थः-हे **(इन्द्र)** अनन्त विद्यायुक्त सब को धारण करनेहारे ईश्वर! आप **(अस्मे)** हमारे लिये **(गोमत्)** जो धन श्रेष्ठ वाणी और अच्छे-अच्छे उत्तम पुरुषों को प्राप्त कराने **(वाजवत्)** नाना प्रकार के अन्न आदि पदार्थों को प्राप्त कराने वा **(विश्वायुः)** पूर्ण सौ वर्ष वा अधिक आयु को बढ़ाने **(पृथु)** अति विस्तृत **(बृहत्)** अनेक शुभगुणों से प्रसिद्ध अत्यन्त बड़ा **(अक्षितम्)** प्रतिदिन बढ़नेवाला **(श्रवः)** जिसमें अनेक प्रकार की विद्या वा सुवर्ण आदि धन सुनने में आता है, उस धन को **(संधेहि)** अच्छे प्रकार नित्य के लिये दीजिये॥७॥

भावार्थः-मनुष्यों को चाहिये कि ब्रह्मचर्य्य का धारण, विषयों की लंपटता का त्याग, भोजन आदि व्यवहारों के श्रेष्ठ नियमों से विद्या और चक्रवर्त्ति राज्य की लक्ष्मी को सिद्ध करके सम्पूर्ण आयु भोगने के लिये पूर्वोक्त धन के जोड़ने की इच्छा अपने पुरुषार्थ द्वारा करें कि जिससे इस संसार का वा परमार्थ का दृढ़ और विशाल अर्थात् अतिश्रेष्ठ सुख सदैव बना रहे, परन्तु यह उक्त सुख केवल ईश्वर की प्रार्थना से ही नहीं मिल सकता, किन्तु उसकी प्राप्ति के लिये पूर्ण पुरुषार्थ भी करना अवश्य उचित है॥७॥

पुनः कीदृशं तदित्युपदिश्यते।

फिर भी पूर्वोक्त धन कैसा होना चाहिये, इस विषय का प्रकाश अगले मन्त्र में किया है-

अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम्।
इन्द्र ता रथिनीरिषः॥८॥

अस्मे इति। धेहि। श्रवः। बृहत्। द्युम्नम्। सहस्रऽसातमम्। इन्द्र। ताः। रथिनीः। इषः॥८॥

पदार्थः-(**अस्मे**) अस्मभ्यम्। अत्र **सुपां सुलुगिति** शेआदेशः। **(धेहि)** प्रयच्छ **(श्रवः)** पूर्वोक्तम् **(बृहत्)** उपबृंहितम् **(द्युम्नम्)** प्रकाशमयं ज्ञानम् **(सहस्रसातमम्)** सहस्रमसंख्यातं सुखं सनुते ददाति येन तदतिशयितम्। **जनसनखनक्रमगमो विट्।** (अष्टा०३.२.६७) अनेन सहस्रोपपदात्सनोतेर्विट्। **विड्वनोरनुनासिकस्यात्।** (अष्टा०६.४.४१) अनेन नकारस्याकारादेशः, ततस्तमप्। **(इन्द्र)**

महाबलयुक्तेश्वर! **(ताः)** पूर्वोक्ताः **(रथिनीः)** बहवो रमणसाधका रथा विद्यन्ते यासु ताः। अत्र भूम्न्यर्थ इनिः, **सुपां सुलुगि**ति पूर्वसवर्णादेशश्च। **(इषः)** इष्यन्ते यास्ताः सेनाः। अत्र **कृतो बहुलमि**ति वार्तिकेन कर्मणि क्विप्॥८॥

अन्वयः-हे इन्द्र! त्वमस्मे सहस्रसातमं बृहद् द्युम्नं श्रवो रथिनीरिषश्च धेहि॥८॥

भावार्थः-हे जगदीश्वर! भवत्कृपयात्यन्तपुरुषार्थेन च येन धनेन बहुसुखसाधिकाः पृतनाः प्राप्यन्ते तदस्मासु नित्यं स्थापय॥८॥

पदार्थः-हे **(इन्द्र)** अत्यन्तबलयुक्त ईश्वर! आप (**अस्मे**) हमारे लिये **(सहस्रसातमम्)** असंख्यात सुखों का मूल **(बृहत्)** नित्य वृद्धि को प्राप्त होने योग्य **(द्युम्नम्)** प्रकाशमय ज्ञान तथा **(श्रवः)** पूर्वोक्त धन और **(रथिनीरिषः)** अनेक रथ आदि साधनसहित सेनाओं को **(धेहि)** अच्छे प्रकार दीजिये॥८॥

भावार्थः-हे जगदीश्वर! आप कृपा करके जो अत्यन्त पुरुषार्थ के साथ जिस धन कर के बहुत से सुखों को सिद्ध करनेवाली सेना प्राप्त होती है, उसको हम लोगों में नित्य स्थापन कीजिये॥८॥

अथायमिन्द्रः कीदृश इन्द्र इत्युपदिश्यते।

फिर भी यह इन्द्र कैसा है, सो अगले मन्त्र में प्रकाश किया है-

वसो॒रिन्द्रं॑ वसु॑पतिं गी॒र्भिर्गृ॒णन्त॑ ऋ॒ग्मिय॑म्।
होम॒ गन्ता॑रमू॒तये॑॥९॥

वसोः॑। इन्द्र॑म्। वसु॑ऽपतिम्। गी॒ःऽभिः॑। गृ॒णन्तः॑। ऋ॒ग्मिय॑म्। होम॑। गन्ता॑रम्। ऊ॒तये॑॥९॥

पदार्थः-(**वसोः**) सुखवासहेतोर्विद्यादिधनस्य **(इन्द्रम्)** धारकम् **(वसुपतिम्)** वसूनामग्निपृथिव्यादीनां पतिं पालकं स्वामिनम्। **कतमे वसव इति। अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदꣳसर्वं वसु हितमेते हीदꣳसर्वं वासयन्ते तद्यदिदꣳसर्वं वासयन्ते तस्माद्वसव इति।** (श०ब्रा०१४.५.७.४) **(गीर्भिः)** वेदविद्यया संस्कृताभिर्वाग्भिः। **गीरिति वाङ्नामसु पठितम्।** (निघं०१.११) **(गृणन्तः)** स्तुवन्तः। **(ऋग्मियम्)** ऋचां वेदमन्त्राणां निर्मातारम्। ऋगुपपदान्मीञ्धातोः क्विप्। अमीयडादेशश्चेति। **(होम)** आह्वयामः। ह्वेञ् इत्यस्माल्लडुत्तमबहुवचने **बहुलं छन्दसी**ति शपो लुक्। **छन्दस्युभयथा** इत्युभयंसंज्ञात्वे गुणसम्प्रसारणे भवतः। **छान्दसो वर्णलोपो वे**ति सकारलोपश्च। **(गन्तारम्)** ज्ञातारं सर्वत्र व्याप्त्या प्रापकम् **(ऊतये)** रक्षणाय स्वामित्वप्राप्तये क्रियोपयोगाय वा॥९॥

अन्वयः-गीर्भिर्गृणन्तो वयं वसुपतिमृग्मियं गन्तारमिन्द्रं वसोरूतये होम॥९॥

भावार्थः-सर्वैर्मनुष्यैः सर्वजगत्स्वामिनो वेदप्रकाशकस्य सर्वत्र व्यापकस्येन्द्रस्य परमेश्वरस्यैवेश्वरत्वेन स्तुतिः कार्य्या। तथेश्वरस्य न्यायकरणत्वादिगुणानां स्पर्धा पुरुषार्थेन सर्वथोत्कृष्टान् विद्याराज्यश्रियादिपदार्थान् प्राप्य रक्षोन्नती च सदैव कार्य्ये इति॥९॥

पदार्थः-**(गीर्भिः)** वेदवाणी से **(गृणन्तः)** स्तुति करते हुए हम लोग **(वसुपतिम्)** अग्नि, पृथिवी, वायु, अन्तरिक्ष, आदित्यलोक, द्यौ अर्थात् प्रकाशमान लोक, चन्द्रलोक और नक्षत्र अर्थात् जितने तारे दीखते हैं, इन सब का नाम वसु है, क्योंकि ये ही निवास के स्थान हैं, इनका पति स्वामी और रक्षक **(ऋग्मियम्)** वेद मन्त्रों के प्रकाश करनेहारे **(गन्तारम्)** सब का अन्तर्यामी अर्थात् अपनी व्याप्ति से सब जगह प्राप्त होने तथा **(इन्द्रम्)** सब के धारण करनेवाले परमेश्वर को **(वसोः)** संसार में सुख के साथ वास कराने का हेतु जो विद्या आदि धन है, उसकी **(ऊतये)** प्राप्ति और रक्षा के लिये **(होम)** प्रार्थना करते हैं॥९॥

भावार्थः-सब मनुष्यों को उचित है कि जो ईश्वरपन का निमित्त, संसार का स्वामी, सर्वत्र व्यापक इन्द्र परमेश्वर है, उसकी प्रार्थना और ईश्वर के न्याय आदि गुणों की प्रशंसा पुरुषार्थ के साथ सब प्रकार से अतिश्रेष्ठ विद्या राज्यलक्ष्मी आदि पदार्थों को प्राप्त होकर उनकी उन्नति और रक्षा सदा करें॥९॥

पुनः कस्मै प्रयोजनायेत्युपदिश्यते।

किस प्रयोजन के लिये परमेश्वर की प्रार्थना करनी चाहिये, सो अगले मन्त्र में प्रकाश किया है-

सुतेसुते न्योकसे बृहद् बृहत एदरिः। इन्द्राय शूषमर्चति॥१०॥१८॥

सुतेऽसुते। निऽओकसे। बृहत्। बृहते। आ। इत्। अरिः। इन्द्राय। शूषम्। अर्चति॥१०॥

पदार्थः-(**सुतेसुते**) उत्पन्न उत्पन्ने **(न्योकसे)** निश्चितानि ओकांसि स्थानानि येन तस्मै। **ओक इति निवासनामोच्यते।** (निरु०३.३) **(बृहत्)** सर्वथा वृद्धम् **(बृहते)** सर्वोत्कृष्टगुणैर्महते व्यापकाय **(आ)** समन्तात् **(इत्)** अपि **(अरिः)** ऋच्छति गृह्णात्यन्यायेन सुखानि च यः। **अच इः।** (उणा०४.१३९) इत्येनन ऋधातोरौणादिक इः प्रत्ययः। **(इन्द्राय)** परमेश्वराय **(शूषम्)** बलं सुखं च। **शूषमिति बलनामसु पठितम्।** (निघं०२.९) **सुखनामसु च।** (निघं०३.६) **(अर्चति)** समर्पयति॥१०॥

अन्वयः-योऽरिरिदपि मनुष्यः सुतेसुते बृहते न्योकस इन्द्राय स्वकीयं बृहत् शूषमार्चति समर्प्पयति भाग्यशाली भवति॥१०॥

भावार्थः-यदिमं प्रतिवस्तुव्यापकं मङ्गलमयमनुपमं परमेश्वरं प्रति कश्चित्कस्यचिच्छुत्रुरपि मनुष्यः स्वाभिमानं त्यक्त्वा नम्रो भवति, तर्हि ये तदाज्ञाख्यं धर्मं तदुपासनानुष्ठं चाचरन्ति त एव महागुणैर्महान्तो भूत्वा सर्वैः पूज्या नम्राः कथं न भवेयुः? य ईश्वरोपासका धार्मिका पुरुषार्थिनः सर्वोपकारका विद्वांसो मनुष्या भवन्ति, त एव विद्यासुखं चक्रवर्त्तिराज्यानन्दं प्राप्नुवन्ति, नातो विपरीता इति॥१०॥

अत्रेन्द्रशब्दार्थवर्णनेनोत्कृष्टधनादिप्राप्त्यर्थमीश्वरप्रार्थनापुरुषार्थकरणाज्ञाप्रतिपादनं चास्त्यत एतस्य नवमसूक्तार्थस्याष्टमसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिरार्य्यावर्त्तवासिभिर्यूरोपवासिभिरध्यापकविलसनाख्यादिभिश्च मिथ्यैव व्याख्यातम्॥

इति नवमं सूक्तमष्टादशश्च वर्गः समाप्तः॥

पदार्थः-जो **(अरिः)** सब श्रेष्ठ गुण और उत्तम सुखों को प्राप्त होनेवाला विद्वान् मनुष्य **(सुतेसुते)** उत्पन्न-उत्पन्न हुए सब पदार्थों में **(बृहते)** सम्पूर्ण श्रेष्ठ गुणों में महान् सब में व्याप्त **(न्योकसे)** निश्चित जिसके निवासस्थान हैं, **(इत्)** उसी **(इन्द्राय)** परमेश्वर के लिये अपने **(बृहत्)** सब प्रकार से बढ़े हुए **(शूषम्)** बल और सुख को **(आ)** अच्छी प्रकार **(अर्चति)** समर्पण करता है, वही बलवान् होता है॥१०॥

भावार्थः-जब शत्रु भी मनुष्य सब में व्यापक मङ्गलमय उपमारहित परमेश्वर के प्रति नम्र होता है, तो जो ईश्वर की आज्ञा और उसकी उपासना में वर्त्तमान मनुष्य हैं, वे ईश्वर के लिये नम्र क्यों न हों? जो ऐसे हैं वे ही बड़े-बड़े गुणों से महात्मा होकर सब से सत्कार किये जाने के योग्य होते, और वे ही विद्या और चक्रवर्त्ति राज्य के आनन्द को प्राप्त होते हैं। जो कि उनसे विपरीत हैं, वे उस आनन्द को कभी नहीं प्राप्त हो सकते॥१०॥

इस सूक्त में इन्द्र शब्द के अर्थ के वर्णन, उत्तम-उत्तम धन आदि की प्राप्ति के अर्थ ईश्वर की प्रार्थना और अपने पुरुषार्थ करने की आज्ञा के प्रतिपादन करने से इस नवमे सूक्त के अर्थ की सङ्गति आठवें सूक्त के अर्थ के साथ मिलती है, ऐसा समझना चाहिये।

इस सूक्त का भी अर्थ सायणाचार्य्य आदि आर्य्यावर्त्तवासियों तथा विलसन आदि अङ्गरेज लोगों ने सर्वथा मूल से विरुद्ध वर्णन किया है॥

यह नवमा सूक्त और अठारहवां वर्ग पूरा हुआ॥

अथ द्वादशर्चस्य दशमस्य सूक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवता। १-३, ५-६ विराडनुष्टुप्; ४ भुरिगुष्णिक्; ७, ९-१२ अनुष्टुप्; ८ निचृदनुष्टुप् छन्दः। १-३, ५-१२ गान्धारः; ४ ऋषभः स्वरः॥

तत्र के कथं तमिन्द्रं पूजयन्तीत्युपदिश्यते।

अब दशम सूक्त का आरम्भ किया जाता है। इस सूक्त के प्रथम मन्त्र में इस बात का प्रकाश किया है कि कौन-कौन पुरुष किस-किस प्रकार से इन्द्रसंज्ञक परमेश्वर का पूजन करते हैं-

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे॥ १॥

गायन्ति। त्वा। गायत्रिणः। अर्चन्ति। अर्कम्। अर्किणः। ब्रह्माणः। त्वा। शतक्रतोइति शतक्रतो। उत्। वंशंऽइव। येमिरे॥ १॥

पदार्थः-(**गायन्ति**) सामवेदादिगानेन प्रशंसन्ति (**त्वा**) त्वां गेयं जगदीश्वरमिन्द्रम् (**गायत्रिणः**) गायत्राणि प्रशस्तानि छन्दांस्यधीतानि विद्यन्ते येषां ते धार्मिका ईश्वरोपासकाः। अत्र प्रशंसायामिनिः। (**अर्चन्ति**) नित्यं पूजयन्ति (**अर्कम्**) अर्च्यते पूज्यते सर्वैर्जनैर्यस्तम् (**अर्किणः**) अर्का मन्त्रा ज्ञानसाधना येषां ते (**ब्रह्माणः**) वेदान् विदित्वा क्रियावन्तः (**त्वा**) जगत्स्रष्टारम् (**शतक्रतो**) शतं बहूनि कर्माणि प्रज्ञानानि वा यस्य तत्सम्बुद्धौ (**तत्**) उत्कृष्टार्थे। **उदित्येतयोः प्रातिलोम्यं प्राह।** (निरु०१.३) (**वंशमिव**) यथोत्कृष्टैर्गुणैः शिक्षणैश्च स्वकीयं वंशमुद्यमवन्तं कुर्वन्ति तथा (**येमिरे**) उद्युञ्जन्ति॥ १॥

निरुक्तकार इमं मन्त्रमेवं व्याख्यातवान्-**गायन्ति त्वा गायत्रिणः प्रार्चन्ति तेऽर्कमर्किणो ब्रह्माणस्त्वा शतक्रत उद्येमिरे वंशमिव।** (निरु०५.५) **अन्यच्च। अर्को देवो भवति यदेनमर्चन्त्यर्को मन्त्रो भवति यदनेनार्चत्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो सवृत्तः कटुकिम्ना।** (निरु०५.४)॥ १॥

अन्वयः-हे शतक्रतोः ब्रह्माणः स्वकीयं वंशमुद्येमिरे इव गायत्रिणस्त्वां गायन्ति, अर्किणोऽर्कं त्वामर्चन्ति॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा सर्वैर्मनुष्यैः परमेश्वरस्यैव पूजा कार्य्या, अर्थात्तदाज्ञायां सदा वर्त्तितव्यम्, वेदविद्यामप्यधीत्य सम्यग्विदित्वोपदेशेनोत्कृष्टैर्गुणैः सह मनुष्यवंश उद्यमवान् क्रियते, तथैव स्वैरपि भवितव्यम्। नेदं फलं परमेश्वरं विहायान्यपूजकः प्राप्तुमर्हति। कुतः, ईश्वरस्याज्ञाभावेन तत्सदृशस्यान्यवस्तुनो ह्यविद्यामानत्वात्, तस्मात् तस्यैव गानमर्चनं च कर्त्तव्यमिति॥ १॥

पदार्थः-हे (**शतक्रतो**) असंख्यात कर्म और उत्तम ज्ञानयुक्त परमेश्वर! (**ब्रह्माणः**) जैसे वेदों को पढ़कर उत्तम-उत्तम क्रिया करनेवाले मनुष्य श्रेष्ठ उपदेश, गुण और अच्छी-अच्छी शिक्षाओं से (**वंशम्**) अपने वंश को (**उद्येमिरे**) प्रशस्त गुणयुक्त करके उद्यमवान् करते हैं, वैसे ही (**गायत्रिणः**) जिन्हों के गायत्र अर्थात् प्रशंसा करने योग्य छन्दराग आदि पढ़े हुए धार्मिक और ईश्वर की उपासना करनेवाले हैं, वे

पुरुष **(त्वा)** आपकी **(गायन्ति)** सामवेदादि के गानों से प्रशंसा करते हैं, तथा **(अर्किणः)** अर्क अर्थात् जो कि वेद के मन्त्र पढ़ने के नित्य अभ्यासी हैं, वे **(अर्कम्)** सब मनुष्यों को पूजने योग्य **(त्वा)** आपका **(अर्चन्ति)** नित्य पूजन करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सब मनुष्यों को परमेश्वर ही की पूजा करनी चाहिये अर्थात् उसकी आज्ञा के अनुकूल वेदविद्या को पढ़कर अच्छे-अच्छे गुणों के साथ अपने और अन्यों के वंश को भी पुरुषार्थी करते हैं, वैसे ही अपने आप को भी होना चाहिये। और जो परमेश्वर के सिवाय दूसरे का पूजन करनेवाला पुरुष है, वह कभी उत्तम फल को प्राप्त होने योग्य नहीं हो सकता, क्योंकि न तो ईश्वर की ऐसी आज्ञा ही है, और न ईश्वर के समान कोई दूसरा पदार्थ है कि जिसका उसके स्थान में पूजन किया जावे। इससे सब मनुष्यों को उचित है कि परमेश्वर ही का गान और पूजन करें॥१॥

पुनः स कथं वेदितव्य इत्युपदिश्यते।

फिर भी ईश्वर को कैसे जाने, सो अगले मन्त्र में प्रकाश किया है-

यत्सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम्।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति॥२॥

यत्। सानोः। सानुम्। आ। अरुहत्। भूरि। अस्पष्ट। कर्त्वम्। तत्। इन्द्रः। अर्थम्। चेतति। यूथेन। वृष्णिः। एजति॥२॥

पदार्थः-(**यत्**) यस्मात् **(सानोः)** पर्वतस्य शिखरात् संविभागात्कर्मणः सिद्धेर्वा। **दृसनिजनि०** (उणा०१.३) अनेन सनेर्ज्वुण्प्रत्ययः। अथवा **'षोऽन्तकर्मणि'** इत्यस्माद् बाहुलकान्नुः। **(सानुम्)** यथोक्तं त्रिविधमर्थम् **(आ)** धात्वर्थे **(अरुहत्)** रोहति। अत्र लडर्थे लङ्। विकरणव्यत्ययेन शपः स्थाने शः। **(भूरि)** बहु। **भूरिति बहुनामसु पठितम्।** (निघं०३.१) **अदिसदिभू०** (उणा०४.६६) अनेन भूधातोः क्तिन् प्रत्ययः। **(अस्पष्ट)** स्पशते। अत्र लडर्थे लङ् **बहुलं छन्दसी**ति शपो लुक्। **(कर्त्त्वम्)** कर्त्तुं योग्यं कार्य्यम्। अत्र करोतेस्त्वन् प्रत्ययः। **(तत्)** तस्मात् **(इन्द्रः)** सर्वज्ञ ईश्वरः **(अर्थम्)** अर्तुं ज्ञातुं प्राप्तुं गुणं द्रव्यं वा। **उषिकुषिगार्त्तिभ्यः स्थन्।** (उणा०२.४) अनेनार्त्तेः स्थन् प्रत्ययः। **(चेतति)** संज्ञापयति प्रकाशयति वा। अत्रान्तर्गतो ण्यर्थः। **(यूथेन)** सुखप्रापकपदार्थसमूहेनाथवा वायुगणेन सह। **तिथपृष्ठगूथयूथप्रोथाः।** (उणा०२.१२) अनेन यूथशब्दो निपातितः। **(वृष्णिः)** वर्षति सुखानि वर्षयति वा। **सृवृषिभ्यां कित्।** (उणा०४.५१) अनेन वृषधातोर्निः प्रत्ययः स च कित्। **(एजति)** कम्पते॥२॥

अन्वयः-यूथेन वायुगणेन सह वृष्णिः सूर्य्यकिरणसमूहः सानोः सानुं भूर्यारुहत् स्पशते राजति चलति चालयति वा, यो मनुष्यो यत्सानोः सानुं कर्मणः कर्मत्वं भूर्यारुहत्, अस्पष्टैजति तस्मै इन्द्रः परमात्मा तत्तस्मात् सानोः सानुमर्थं भूरि चेतति ज्ञापयति॥२॥

भावार्थः-इवशब्दानुवृत्त्याऽत्राप्युपमालङ्कारः। यथा सूर्य्यः सन्मुखस्थान् वायुना सह पुनः पुनः क्रमेणात्यन्तमाक्रम्याकर्ष्य प्रकाश्य भ्रामयति, तथैव यो मनुष्यो विद्यया कर्त्तव्यानि बहूनि कर्माणि निरन्तरं सम्पादयितुं प्रवर्त्तते, स एव साधनसमूहेन सर्वाणि कार्य्याणि साधितुं शक्नोति। अस्यामीश्वरसृष्टावेवंभूतो मनुष्यः सुखानि प्राप्नोति। ईश्वरोऽपि तमेवानुगृह्णाति॥ २॥

पदार्थः-जैसे **(यूथेन)** वायुगण अथवा सुख के साधन हेतु पदार्थों के साथ **(वृष्णिः)** वर्षा करनेवाला सूर्य्य अपने प्रकाश करके **(सानोः)** पर्वत के एक शिखर से **(सानुम्)** दूसरे शिखर को **(भूरि)** बहुधा **(आरुहत्)** प्राप्त होता **(अस्पष्ट)** स्पर्श करता हुआ **(एजति)** क्रम से अपनी कक्षा में घूमता और घुमाता है, वैसे ही जो मनुष्य क्रम से एक कर्म को सिद्ध करके दूसरे को **(कर्त्त्वम्)** करने को **(भूरि)** बहुधा **(आरुहत्)** आरम्भ तथा **(अस्पष्ट)** स्पर्श करता हुआ **(एजति)** प्राप्त होता है, उस पुरुष के लिये **(इन्द्रः)** सर्वज्ञ ईश्वर उन कर्मों के करने को **(सानोः)** अनुक्रम से **(अर्थम्)** प्रयोजन के विभाग के साथ **(भूरि)** अच्छी प्रकार **(चेतति)** प्रकाश करता है॥ २॥

भावार्थः-इस मन्त्र में भी **'इव'** शब्द की अनुवृत्ति से उपमालङ्कार समझना चाहिये। जैसे सूर्य्य अपने सम्मुख के पदार्थों को वायु के साथ वारंवार क्रम से अच्छी प्रकार आक्रमण, आकर्षण और प्रकाश करके सब पृथिवी लोकों को घुमाता है, वैसे ही जो मनुष्य विद्या से करने योग्य अनेक कर्मों को सिद्ध करने के लिये प्रवृत्त होता है, वही अनेक क्रियाओं से सब कार्य्यों के करने को समर्थ हो सकता तथा ईश्वर की सृष्टि में अनेक सुखों को प्राप्त होता, और उसी मनुष्य को ईश्वर भी अपनी कृपादृष्टि से देखता है, आलसी को नहीं॥ २॥

अथेन्द्रशब्देनेश्वरसूर्य्यावपुदिश्यते।

अगले मन्त्र में इन्द्र शब्द से ईश्वर और सूर्य्यलोक का प्रकाश किया है-

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर॥ ३॥

युक्ष्व। हि। केशिना। हरी इति। वृषणा। कक्ष्यऽप्रा। अथ। नः। इन्द्र। सोमपाः। गिराम्। उपश्रुतिम्। चर॥ ३॥

पदार्थः-**(युक्ष्व)** युङ्क्ष्व योजय। **छान्दसो वर्णलोपो वे**ति नलोपः, **द्व्यचोऽतस्तिङ** इति दीर्घश्च। **(हि)** हेत्वपदेशे **(केशिना)** प्रकाशयुक्ते आकर्षणबले। अत्र सर्वत्र **सुपां सुलुगि**ति द्विवचनस्याकारादेशः। **(हरी)** व्याप्तिहरणशीलावश्वौ **(वृषणा)** वृष्टिहेतू **(कक्ष्यप्रा)** कक्षासु भवाः कक्ष्याः सर्वपदार्थावयवास्ताम् प्रातः प्रपूरयतस्तौ **(अथ)** आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्मानस्माकं वा **(इन्द्र)** सर्वश्रोतोव्यापिन्नीश्वर प्रकाशमानः सूर्य्यलोको वा **(सोमपाः)** सोमानुत्तमान् पदार्थान् पाति रक्षति

तत्सम्बुद्धौ, पदार्थानां रक्षणहेतुः सूर्य्यो वा **(गिराम्)** प्रवर्त्तमानानां वाचम् **(उपश्रुतिम्)** उपयुक्तां श्रुतिं श्रवणम् **(चर)** प्राप्नुहि प्राप्नोति वा॥३॥

अन्वयः-हे सोमपा इन्द्र! यथा भवद्रचितस्य सूर्य्यलोकस्य केशिनौ वृषणा कक्ष्यप्रा हरी अश्वौ युक्तः, तथैव त्वं नोऽस्मान् सर्वविद्याप्रकाशाय युङ्क्ष्व। अथ हि नो गिरामुपश्रुतिं चर॥३॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। सर्वैर्मनुष्यैः सर्वविद्यापठनानन्तरं क्रियाकौशले प्रवर्त्तितव्यम्। यथाऽस्मिन् जगति सूर्य्यस्य विशालः प्रकाशो वर्त्तते, तथैवेश्वरगुणानां विद्यायाश्च प्रकाशः सर्वत्रोपयोजनीयः॥३॥

पदार्थः-हे **(सोमपाः)** उत्तम पदार्थों के रक्षक **(इन्द्र)** सब में व्याप्त होनेवाले ईश्वर! जैसे आपका रचा हुआ सूर्य्यलोक जो अपने **(केशिना)** प्रकाशयुक्त बल और आकर्षण अर्थात् पदार्थों के खीचनें का सामर्थ्य जो कि **(वृषणा)** वर्षा के हेतु और **(कक्ष्यप्रा)** अपनी-अपनी कक्षाओं में उत्पन्न हुए पदार्थों को पूरण करने अथवा **(हरी)** हरण और व्याप्ति स्वभाववाले घोड़ों के समान और आकर्षण गुण हैं, उनको अपने-अपने कार्यों में जोड़ता है, वैसे ही आप **(नः)** हम लोगों को भी सब विद्या के प्रकाश के लिये उन विद्याओं में **(युक्ष्व)** युक्त कीजिये। **(अथ)** इसके अनन्तर आपकी स्तुति में प्रवृत्त जो **(नः)** हमारी **(गिराम्)** वाणी हैं, उनका **(उपश्रुतिम्)** श्रवण **(चर)** स्वीकार वा प्राप्त कीजिये॥३॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। सब मनुष्यों को सब विद्या पढ़ने के पीछे उत्तम क्रियाओं की कुशलता में प्रवृत्त होना चाहिये। जैसे सूर्य्य का उत्तम प्रकाश संसार में वर्त्तमान है, वैसे ही ईश्वर के गुण और विद्या के प्रकाश का सब में उपयोग करना चाहिये॥३॥

मनुष्यैः परमेश्वरात् किं किं याचनीयमित्युपदिश्यते।

मनुष्यों को परमेश्वर से क्या-क्या मांगना चाहिये, सो अगले मन्त्र में प्रकाश किया है-

एहि॒ स्तोमाँ॑ अ॒भि स्व॑रा॒भि गृ॑णी॒ह्यारु॑व।
ब्रह्म॑ च नो वसो॒ सचेन्द्र॑ य॒ज्ञं च॑ वर्धय॥४॥

आ। इ॒हि॒। स्तोमा॑न्। अ॒भि। स्व॒र॒। अ॒भि। गृ॒णी॒हि॒। आरु॑व। ब्रह्म॑। च॒। नः॒। व॒सो॒ इति॑। सचा॑। इन्द्र॑। य॒ज्ञम्। च॒। व॒र्ध॒य॒॥४॥

पदार्थः-**(आ इहि)** आगच्छ **(स्तोमान्)** स्तुतिसमूहान् **(अभि)** धात्वर्थे **(स्वर)** जानीहि प्राप्नुहि। **स्वरतीति गतिकर्मसु पठितम्।** (निघं०२.१४) **(अभि)** आभिमुख्ये। **अभीत्याभिमुख्यं प्राह।** (निरु०१.३) **(गृणीहि)** उपदिश **(आ)** समन्तात् **(रुव)** शब्दविद्यां प्रकाशय **(ब्रह्म)** वेदविद्याम् **(च)** समुच्चये **(नः)** अस्मान् अस्माकं वा **(वसो)** वसन्ति सर्वाणि भूतानि यस्मिन् वा वसति सर्वेषु भूतेषु यस्तत्सम्बुद्धौ **(सचा)** ज्ञानेन सत्कर्मसु समवायेन वा **(इन्द्र)** स्तोतुमर्ह दातः **(यज्ञम्)** क्रियाकौशलम् **(च)** पुनरर्थे **(वर्धय)** उत्कृष्टं सम्पादय॥४॥

अन्वयः-हे इन्द्र जगदीश्वर! यथा कश्चित् सर्वविद्याऽभिज्ञो विद्वान् स्तोमानभिस्वरति यथावद्विज्ञानं गृणात्यारौति तथैव नोऽस्मानेहि। हे वसो! कृपयैवमेत्य नोऽस्माकं स्तोमान् वेदस्तुतिसमूहार्थान् सचाभिस्वरब्रह्म- वेदार्थानभिगृणीहि यज्ञं च वर्धय॥४॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। ये सत्येन वेदविद्यायोगेन परमेश्वरं स्तुवन्ति प्रार्थयन्त्युपासते तेभ्य ईश्वरोऽन्तर्यामितया मन्त्राणामर्थान् यथावत्प्रकाशयित्वा सततं सुखं प्रकाशयति। अतो नैव तेषु कदाचिद्विद्यापुरुषार्थौ ह्रसतः॥४॥

पदार्थः-हे **(इन्द्र)** स्तुति करने के योग्य परमेश्वर! जैसे कोई सब विद्याओं से परिपूर्ण विद्वान् **(स्तोमान्)** आपकी स्तुतियों के अर्थों को **(अभिस्वर)** यथावत् स्वीकार करता कराता वा गाता है, वैसे ही **(नः)** हम लोगों को प्राप्त कीजिये। तथा हे **(वसो)** सब प्राणियों को वसाने वा उनमें वसनेवाले! कृपा से इस प्रकार प्राप्त होके **(नः)** हम लोगों के **(स्तोमान्)** वेदस्तुति के अर्थों को **(सचा)** विज्ञान और उत्तम कर्मों का संयोग कराके **(अभिस्वर)** अच्छी प्रकार उपदेश कीजिये **(ब्रह्म च)** और वेदार्थ को **(अभिगृणीहि)** प्रकाशित कीजिये। **(यज्ञं च)** हमारे लिये होम ज्ञान और शिल्पविद्यारूप क्रियाओं को **(वर्धय)** नित्य बढ़ाइये॥४॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जो पुरुष वेदविद्या वा सत्य के संयोग से परमेश्वर की स्तुति प्रार्थना और उपासना करते हैं, उनके हृदय में ईश्वर अन्तर्यामि रूप से वेदमन्त्रो के अर्थों को यथावत् प्रकाश करके निरन्तर उनके लिये सुख का प्रकाश करता है, इससे उन पुरुषों में विद्या और पुरुषार्थ कभी नष्ट नहीं होते॥४॥

पुनः स कीदृशोऽस्तीत्युपदिश्यते।

फिर भी ईश्वर किस प्रकार का है, इस विषय का अगले मन्त्र में प्रकाश किया है-

उ॒क्थमिन्द्रा॑य॒ शंस्यं॒ वर्धनं॑ पुरुनि॒ष्षिधे॑।
श॒क्रो यथा॑ सु॒तेषु॑ णो रा॒रण॑त्स॒ख्येषु॑ च॥५॥

उ॒क्थम्। इन्द्रा॑य। शंस्य॑म्। व॒र्धनम्। पु॒रु॒नि॒ःऽषिधे॑। श॒क्रः। यथा॑। सु॒तेषु॑। नः। रा॒रण॑त्। स॒ख्येषु॑। च॒॥५॥

पदार्थः-(**उक्थम्**) वक्तुं योग्यं स्तोत्रम्। अत्र **पातृतुदि०** (उणा०२.७) अनेन **'वच'** धातोः स्थक् प्रत्ययः। **(इन्द्राय)** सर्वमित्रायैश्वर्य्यमिच्छुकाय जीवाय **(शंस्यम्)** शंसितुं योग्यम् **(वर्धनम्)** विद्यादिगुणानां वर्धकम् **(पुरुनिष्षिधे)** पुरूणि बहूनि शास्त्राणि मङ्गलानि च नितरां सेधतीति तस्मै **(शक्रः)** समर्थः शक्तिमान् **(यथा)** येन प्रकारेण **(सुतेषु)** उत्पादितेषु स्वकीयसंतानेषु **(नः)** अस्माकम् **(रारणत्)**

अतिशयेनोपदिशति। यङ्लुङन्तस्य **'रण'**धातोर्लेट्प्रयोगः। **(सख्येषु)** सखीनां कर्मसु भावेषु पुत्रस्त्रीभृत्यवर्गादिषु वा **(च)** समुच्चयार्थे॥५॥

अन्वयः-यथा कश्चिन्मनुष्यः सुतेषु सख्येषु चोपकारी वर्त्तते तथैव शक्रः सर्वशक्तिमान् जगदीश्वरः कृपायमाणः सन् पुरुनिष्षिध इन्द्राय जीवाय वर्धनं शंस्यमुक्थं च रारणत् यथावदुपदिशति॥५॥

भावार्थः-अत्रोपमालङ्कारः। अस्मिन् जगति या या शोभा प्रशंसा ये च धन्यवादास्ते सर्वे परमेश्वरमेव प्रकाशयन्ते। कुतः, यत्र यत्र निर्मितेषु पदार्थेषु प्रशंसिता रचनागुणाश्च भवन्ति ते ते निर्मातारं प्रशसन्ति। तथैवेश्वरस्यानन्ता प्रशंसा प्रार्थना च पदार्थप्राप्तये क्रियते। परन्तु यद्यदीश्वरात्प्रार्थ्यते तत्तदत्यन्तस्वपुरुषार्थेनैव प्राप्तुमर्हति॥५॥

पदार्थः-**(यथा)** जैसे कोई मनुष्य अपने **(सुतेषु)** सन्तानों और **(सख्येषु)** मित्रों के (उपकार) करने को प्रवृत्त होके सुखी होता है, वैसे ही **(शक्रः)** सर्वशक्तिमान् जगदीश्वर **(पुरुनिष्षिधे)** पुष्कल शास्त्रों को पढ़ने-पढ़ाने और धर्मयुक्त कामों में विचरने वाले **(इन्द्राय)** सब के मित्र और ऐश्वर्य की इच्छा करने वाले धार्मिक जीव के लिये **(वर्धनम्)** विद्या आदि गुणों के बढ़ानेवाले **(शंस्यम्)** प्रशंसा **(च)** और **(उक्थम्)** उपदेश करने योग्य वेदोक्त स्तोत्रों के अर्थों का **(रारणत्)** अच्छी प्रकार प्रकाश करके सुखी बना रहे॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। इस संसार में जो-जो शोभायुक्त रचना प्रशंसा और धन्यवाद हैं, वे सब परमेश्वर ही की अनन्त शक्ति का प्रकाश करते हैं, क्योंकि जैसे सिद्ध किये हुए पदार्थों में प्रशंसायुक्त रचना के अनेक गुण उन पदार्थों के रचनेवाले की ही प्रशंसा के हेतु हैं, वैसे ही परमेश्वर की प्रशंसा जनाने वा प्रार्थना के लिये हैं। इस कारण जो-जो पदार्थ हम ईश्वर से प्रार्थना के साथ चाहते हैं, सो-सो हमारे अत्यन्त पुरुषार्थ के द्वारा ही प्राप्त होने योग्य हैं, केवल प्रार्थनामात्र से नहीं॥५॥

क्व क्व स प्रार्थनीय इत्युपदिश्यते।

किस-किस पदार्थ की प्राप्ति के लिये ईश्वर की प्रार्थना करनी चाहिये, सो अगले मन्त्र में प्रकाश किया है-

तमित्सखित्व ईमहे तं राये तं सुवीर्य्ये।
स शक्र उत नः शकदिन्द्रो वसु दयमानः॥६॥१९॥

तम्। इत्। सखिऽत्वे। ईमहे। तम्। राये। तम्। सुऽवीर्ये। सः। शक्रः। उत। नः। शकत्। इन्द्रः। वसु। दयमानः॥६॥

पदार्थः-**(तम्)** परमेश्वरम् **(इत्)** एव **(सखित्वे)** सखीनां सुखायानुकूलं वर्त्तमानानां कर्मणां भावस्तस्मिन् **(ईमहे)** याचामहे। **ईमह इति याञ्चाकर्मसु पठितम्।** (निघं०३.१९) **(तम्)** परमैश्वर्य्यवन्तम्

(राये) विद्यासुवर्णादिधनाय **(तम्)** अनन्तबलपराक्रमवन्तम् **(सुवीर्य्ये)** शोभनैर्गुणैर्युक्तं वीर्य्यं पराक्रमो यस्मिंस्तस्मिन् **(सः)** पूर्वोक्तः **(शक्रः)** दातुं समर्थः **(उत)** अपि **(नः)** अस्मभ्यम् **(शकत्)** शक्नोति। अत्र लडर्थे लुङडभावश्च। **(इन्द्रः)** दुःखानां विदारयिता **(वसु)** सुखेषु वसन्ति येन तद्धनं विद्याऽऽरोग्यादिसुवर्णादि वा। **वस्विति धननामसु पठितम्।** (निघं०२.१०) **(दयमानः)** दातुं विद्यादिगुणान् प्रकाशितुं सततं रक्षितुं दुःखानि दोषान् शत्रूंश्च सर्वथा विनाशितुं धार्मिकान् स्वभक्तानादातुं समर्थः। **दय दानगतिरक्षणहिंसादानेषु** इत्यस्य रूपम्॥६॥

अन्वयः-यो नो दयमानः शक्र इन्द्रः परमात्मा वसु दातुं शक्नोति तमिदेव वयं सखित्वे तं राये तं सुवीर्य्यं ईमहे॥६॥

भावार्थः-सर्वैर्मनुष्यैः सर्वशुभगुणप्राप्तये परमेश्वरो याचनीयो नेतरः, कुतस्तस्याद्वितीयस्य सर्वमित्रस्य परमैश्वर्य्यवतोऽनन्तशक्तिमत एवैतद्दातुं सामर्थ्यवत्त्वात्॥६॥

इत्येकोनविंशो वर्गः समाप्तः॥

पदार्थः-जो **(नः)** हमारे लिये **(दयमानः)** सुखपूर्वक रमण करने योग्य विद्या, आरोग्यता और सुवर्णादि धन का देनेवाला, विद्यादि गुणों का प्रकाशक और निरन्तर रक्षक तथा दुःख दोष वा शत्रुओं के विनाश और अपने धार्मिक सज्जन भक्तों के ग्रहण करने **(शक्रः)** अनन्त सामर्थ्ययुक्त **(इन्द्रः)** दुःखों का विनाश करनेवाला जगदीश्वर है, वही **(वसु)** विद्या और चक्रवर्त्ति राज्यादि परमधन देने को **(शकत्)** समर्थ है, **(तमित्)** उसी को हम लोग **(उत)** वेदादि शास्त्र सब विद्वान् प्रत्यक्षादि प्रमाण और अपने भी निश्चय से **(सखित्वे)** मित्रों और अच्छे कर्मों के होने के निमित्त **(तम्)** उसको **(राये)** पूर्वोक्त विद्यादि धन के अर्थ और **(तम्)** उसी को **(सुवीर्य्ये)** श्रेष्ठ गुणों से युक्त उत्तम पराक्रम की प्राप्ति के लिये **(ईमहे)** याचते हैं॥६॥

भावार्थः-सब मनुष्यों को उचित है कि सब सुख और शुभगुणों की प्राप्ति के लिये परमेश्वर ही की प्रार्थना करें, क्योंकि वह अद्वितीय सर्वमित्र परमैश्वर्य्यवाला अनन्त शक्तिमान् ही का उक्त पदार्थों के देने में सामर्थ्य है॥६॥

यह उन्नीसवां वर्ग समाप्त हुआ॥

अथेन्द्रशब्देनेश्वरसूर्य्यलोकावुपदिश्येते।

अगले मन्त्र में इन्द्र शब्द से ईश्वर और सूर्य्यलोक का प्रकाश किया है-

सु॒वि॒वृत॑ꣳ सुनि॒रज॒मिन्द्र॒ त्वादा॑त॒मिद्यशः॑।
गवा॒मापः॑ व्र॒जं वृ॑धि कृणु॒ष्व राधो॑ अद्रिवः॥७॥

सुऽविवृतम्। सुनिःऽअजम्। इन्द्र। त्वाऽदातम्। इत्। यशः। गवाम्। अप। व्रजम्। वृधि। कृणुष्व। राधः। अद्रिवः॥७॥

पदार्थः-(**सुविवृतम्**) सुष्ठु विकाशितम् (**सुनिरजम्**) सुखेन नितरां क्षेप्तुं योग्यम् (**इन्द्र**) महायशः सर्वविभागकारकेश्वरः सर्वविभक्तरूपदर्शकः सूर्य्यलोको वा (**त्वादातम्**) त्वया शोधितं, तेन सूर्य्येण वा (**इत्**) एव (**यशः**) परमकीर्त्तिसाधकं जलं वा। **यश इत्युदकनामसु पठितम्।** (निघं०१.१२) (**गवाम्**) स्वस्वविषयप्रकाशकानां मनआदीन्द्रियाणां किरणानां पशूनां वा। **गौरिति पदनामसु पठितम्।** (निघं०४.१) इतीन्द्रियाणां पशूनां च ग्रहणम्। **गाव इति रश्मिनामसु पठितम्।** (निघं०१.५) (**अप**) धात्वर्थे। (**व्रजम्**) समूहं ज्ञानं वा (**वृधि**) वृणु वृणोति वा। अत्र पक्षान्तरे सूर्य्यस्य प्रत्यक्षत्वात्प्रथमार्थे मध्यमः। **श्रुशृणुपृकृवृभ्यश्छन्दसि।** (अष्टा०६.४.१०२) अनेन हेर्धिः। (**कृणुष्व**) करोति कुर्य्याद्वा। अत्र लडर्थे लोड् व्यत्येनात्मनेपदं च (**राधः**) राध्नुवन्ति सुखानि येन तद्विद्यासुवर्णादि धनम्। **राध इति धननामसु पठितम्।** (निघं०२.१०) (**अद्रिवः**) अद्रिर्मेघः प्रशंसा धनं भूयान् वा विद्यते यस्मिन् तत्सम्बुद्धावीश्वर, मेघवान् सूर्य्यो वा। **अद्रिरिति मेघनामसु पठितम्।** (निघं०१.१०) अत्र भूम्न्यर्थे मतुप्॥७॥

अन्वयः-यथाऽयमद्रिवो मेघवान् सूर्य्यलोकः सुनिरजं त्वदातं तेन शोधितं यशोजलं सुविवृतं सुष्ठु विकाशितं राधो धनं च कृणुष्व करोति गवां किरणानां व्रजं समूहं चापवृध्युद्घाटयति, तथैव हे अद्रिव इन्द्र जगदीश्वर! त्वं सुविवृतं सुनिरजं त्वादातं यशो राधो धनं च कृणुष्व कृपया कुरु, तथा हे अद्रिवो मेघादिरचकत्वात् प्रशंसनीय त्वं गवां व्रजमपवृधि ज्ञानद्वारमुद्घाटय॥७॥

भावार्थः-अत्र (श्लेष)लुप्तोपमालङ्कारौ। हे परमेश्वर! यथा भवता सूर्य्यादिजगदुत्पाद्य स्वकीर्त्तिः सर्वप्राणिभ्यः सुखं च प्रसिद्धीकृतं तथैव भवत्कृपया वयमपि मन आदीनीन्द्रियाणि शुद्धानि विद्याधर्मप्रकाशयुक्तानि सुखेन संसाध्य स्वकीर्त्तिं विद्याधनं चक्रवर्त्तिराज्यं च सततं प्रकाश्य सर्वान्मनुष्यान्सुखिनः कीर्त्तिमतश्च कारयेमेति॥७॥

पदार्थः-जैसे यह (**अद्रिवः**) उत्तम प्रकाशादि धनवाला (**इन्द्रः**) सूर्य्यलोकः (**सुनिरजम्**) सुख से प्राप्त होने योग्य (**त्वादातम्**) उसी से सिद्ध होनेवाले (**यशः**) जल को (**सुविवृतम्**) अच्छी प्रकार विस्तार को प्राप्त (**गवाम्**) किरणों के (**वज्रम्**) समूह को संसार में प्रकाश होने के लिये (**अपवृधि**) फैलाता तथा (**राधः**) धन को प्रकाशित (**कृणुष्व**) करता है, वैसे हे (**अद्रिवः**) प्रशंसा करने योग्य (**इन्द्र**) महायशस्वी सब पदार्थों के यथायोग्य बांटनेवाले परमेश्वर! आप हम लोगों के लिये (**गवाम्**) अपने विषय को प्राप्त होनेवाली मन आदि इन्द्रियों के ज्ञान और उत्तम-उत्तम सुख देनेवाले पशुओं के (**व्रजम्**) समूह को (**अपावृधि**) प्राप्त करके उनके सुख के दरवाजे को खोल तथा (**सुविवृतम्**) देश-देशान्तर में प्रसिद्ध और (**सुनिरजम्**) सुख से करने और व्यवहारों में यथायोग्य प्रतीत होने के योग्य (**यशः**) कीर्ति को

बढ़ानेवाले अत्युत्तम **(त्वादातम्)** आपके ज्ञान से शुद्ध किया हुआ **(राधः)** जिससे कि अनेक सुख सिद्ध हों, ऐसे विद्या सुवर्णादि धन को हमारे लिये **(कृणुश्व)** कृपा करके प्राप्त कीजिये॥७॥

भावार्थः-इस मन्त्र में श्लेष और लुप्तोपमालङ्कार हैं। हे परमेश्वर! जैसे आपने सूर्य्यादि जगत् को उत्पन्न करके अपना यश और संसार का सुख प्रसिद्ध किया है, वैसे ही आप की कृपा से हम लोग भी अपने मन आदि इन्द्रियों को शुद्धि के साथ विद्या और धर्म के प्रकाश से युक्त तथा सुख पूर्वक सिद्ध और अपनी कीर्ति, विद्याधन और चक्रवर्त्ति राज्य का प्रकाश करके सब मनुष्यों को निरन्तर आनन्दित और कीर्तिमान् करें॥७॥

पुनरीश्वर उपदिश्यते।

फिर अगले मन्त्र में ईश्वर का प्रकाश किया है-

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः।

जेषः स्ववतीरपः सं गा अस्मभ्यं धूनुहि॥८॥

नहि। त्वा। रोदसी। इति। उभे इति। ऋघायमाणम्। इन्वतः। जेषः। स्वः३वतीः। अपः। सम्। गाः। अस्मभ्यम्। धूनुहि॥८॥

पदार्थः-(**नहि**) निषेधार्थे **(त्वा)** सर्वत्र व्याप्तिमन्तं जगदीश्वरम् **(रोदसी)** द्यावापृथिव्यौ। **रोदसी इति द्यावापृथिव्योर्नामसु पठितम्।** (निघं०३.३०) **(उभे)** द्वे **(ऋघायमाणम्)** परिचरितुमर्हम्। ऋध्यते पूज्यते इति ऋघः। बाहुलकात् कः, तत आचारे क्यङ्। **ऋध्नोतीति परिचरणकर्मसु पठितम्।** (निघं०३.५) **(इन्वतः)** व्याप्नुतः। **इन्वतीति व्याप्तिकर्मसु पठितम्।** (निघं०२.१८) **(जेषः)** विजयं प्राप्नोषि। **'जि जये'** इत्यस्माल्लोटि मध्यमैकवचने प्रयोगः। **(स्ववतीः)** स्वः सुखं विद्यते यासु ताः **(अपः)** कर्माणि कर्त्तुम्। **अप इति कर्मनामसु पठितम्।** (निघं०२.१) **(सम्)** सम्यगर्थे क्रियायोगे **(गाः)** इन्द्रियाणि **(अस्मभ्यम्)** **(धूनुहि)** प्रेरय॥८॥

अन्वयः-हे परमेश्वर! इमे उभे रोदसी यमृघायमाणं त्वां न हीन्वतः, स त्वमस्मभ्यं स्ववतीरपो जेषो गाश्च संधूनुहि॥८॥

भावार्थः-यदा कश्चित्पृच्छेदीश्वरः कियानस्तीति, तत्रेदमुत्तरं येन सर्वमाकाशादिकं व्याप्तं नैव तमनन्तं कश्चिदप्यर्थो व्याप्तुमर्हति। अतोऽयमेव सर्वैर्मनुष्यैः सेवनीयः, उत्तमानि कर्माणि कर्त्तुं वस्तूनि च प्राप्तुं प्रार्थनीयः। यस्य गुणाः कर्माणि चेयत्ता रहितानि सन्ति तस्यान्तं ग्रहीतुं कः समर्थो भवेत्॥८॥

पदार्थः-हे परमेश्वर! ये **(उभे)** दोनों **(रोदसी)** सूर्य्य और पृथिवी जिस **(ऋघायमाणम्)** पूजा करने योग्य आपको **(नहि)** नहीं **(इन्वतः)** व्याप्त हो सकते, सो आप हम लोगों के लिये **(स्ववतीः)**

जिनसे हमको अत्यन्त सुख मिले ऐसे **(अपः)** कर्मों को **(जेषः)** विजयपूर्वक प्राप्त करने के लिये हमारे **(गाः)** इन्द्रियों को **(संधूनुहि)** अच्छी प्रकार पूर्वोक्त कार्य्यों में संयुक्त कीजिये॥८॥

भावार्थः-जब कोई पूछे कि ईश्वर कितना बड़ा है, तो उत्तर यह है कि जिसको सब आकाश आदि बड़े-बड़े पदार्थ भी घेर में नहीं ला सकते, क्योंकि वह अनन्त है। इससे सब मनुष्यों को उचित है कि उसी परमात्मा का सेवन उत्तम-उत्तम कर्म करने और श्रेष्ठ पदार्थों की प्राप्ति के लिये उसी की प्रार्थना करते रहें। जब जिसके गुण और कर्मों की गणना कोई नहीं कर सकता, तो कोई उसके अन्त पाने को समर्थ कैसे हो सकता है ?॥८॥

पुनः स एवोपदिश्यते।

फिर भी परमेश्वर का निरूपण अगले मन्त्र में किया है-

आश्रु॑त्कर्ण श्रु॒धी हव॑ं नू चि॑द्दधिष्व मे॒ गिर॑ः।
इन्द्र॒ स्तोम॑मि॒मं मम॑ कृ॒ष्वा यु॒जश्चि॒दन्त॑रम्॥९॥

आश्रु॑त्ऽकर्ण। श्रु॒धि। हव॑म्। नु। चि॒त्। द॒धि॒ष्व॒। मे॒। गिर॑ः। इन्द्र॑। स्तोम॑म्। इ॒मम्। मम॑। कृ॒ष्व। यु॒जः। चि॒त्। अन्त॑रम्॥९॥

पदार्थः-(आश्रुत्कर्ण) श्रुतौ विज्ञानमयौ श्रवणहेतू कर्णौ यस्य तत्सम्बुद्धौ। अत्र सम्पदादित्वात् करणे क्विप्। **(श्रुधि)** शृणु। अत्र **बहुलं छन्दसी**ति श्नोर्लुक्। **श्रुशृणुपृकृवृभ्य०** (अष्टा०६.४.१०२) इति हेर्ध्यादेशः। **(हवम्)** आदातव्यं सत्यं वचनम्। **(नु)** क्षिप्रार्थे। **नु इति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **ऋचि तुनुघे**ति दीर्घः। **(चित्)** पूजार्थे। **चिदिदं ब्रूयादिति पूजायाम्।** (निरु०१.४) **(दधिष्व)** धारय। **'दध धारणे'** इत्यस्माल्लोट्, **छन्दस्युभयथे**त्यार्द्धधातुकाश्रयेणेडागमः। **(मे)** मम स्तोतुः **(गिरः)** वाणीः **(इन्द्र)** सर्वान्तर्यामिन्सर्वतः श्रोतः **(स्तोमम्)** स्तूयते येनासौ स्तोमस्तं स्तुतिसमूहम् **(इमम्)** प्रत्यक्षम् **(मम)** स्तोतुः **(कृष्व)** कुरु। **'कृञ्'** इत्यस्माल्लोटि विकरणाभावः। **(युजः)** यो युनक्ति स युक् सखा तस्य सख्युः। **'युजिर् योगे'** इत्यस्मादृत्विग्दधृगिति क्विन्। **(चित्)** इव। **चिदित्युपमार्थे।** (निरु०१.४) **(अन्तरम्)** अन्तःशोधनमाभ्यन्तरं वा॥९॥

अन्वयः-हे आश्रुत्कर्ण इन्द्र जगदीश्वर! चिद्यथा प्रियः सखा युजः प्रियस्य सख्युर्गिरः प्रेम्णा शृणोति, तथैव त्वं नु मे गिरो हवं श्रुधि ममेमं स्तोममन्तरं दधिष्व युजो मामन्तःकरणं शुद्धं कृष्व कुरु॥९॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरीश्वरस्य सर्वज्ञत्वेन जीवेन प्रयुक्तस्य वाग्व्यवहारस्य यथावत् श्रोतृत्वेन सर्वाधारत्वेनान्तर्यामितया जीवान्तःकरणयोर्यथावच्छोधकत्वेन सर्वस्य मित्रत्वाच्चायमेवैकः सदैव ज्ञातव्यः प्रार्थनीयश्चेति॥९॥

पदार्थः-(**आश्रुत्कर्ण**) हे निरन्तर श्रवणशक्तिरूप कर्णवाले (**इन्द्र**) सर्वान्तर्यामि परमेश्वर! (**चित्**) जैसे प्रीति बढ़ानेवाले मित्र अपनी (**युजः**) सत्यविद्या और उत्तम-उत्तम गुणों में युक्त होनेवाले मित्र की (**गिरः**) वाणियों को प्रीति के साथ सुनता है, वैसे ही आप (**नु**) शीघ्र ही (**मे**) मेरी (**गिरः**) स्तुति तथा (**हवम्**) ग्रहण करने योग्य सत्य वचनों को (**श्रुधि**) सुनिये। तथा (**मम**) अर्थात् मेरी (**स्तोमम्**) स्तुतियों के समूह को (**अन्तरम्**) अपने ज्ञान के बीच (**दधिष्व**) धारण करके (**युजः**) अर्थात् पूर्वोक्त कामों में उक्त प्रकार से युक्त हुए हम लोगों को (**अन्तरम्**) भीतर की शुद्धि को (**कृष्व**) कीजिये॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को उचित है कि जो सर्वज्ञ जीवों के किये हुए वाणी के व्यवहारों का यथावत् श्रवण करनेहारा सर्वाधार अन्तर्यामि जीव और अन्तःकरण का यथावत् शुद्धि हेतु तथा सब का मित्र ईश्वर है, वही एक जानने वा प्रार्थना करने योग्य है॥९॥

मनुष्याः पुनस्तं कथंभूतं जानीयुरित्युपदिश्यते।

फिर भी मनुष्य लोग परमेश्वर को कैसा जानें, इस विषय का अगले मन्त्र में प्रकाश किया है-

विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम्।
वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम्॥ १०॥

विद्म। हि। त्वा। वृषन्ऽतमम्। वाजेषु। हवनऽश्रुतम्। वृषन्ऽतमस्य। हूमहे। ऊतिम्। सहस्रऽसातमाम्॥ १०॥

पदार्थः-(**विद्म**) विजानीमः। **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हि**) एवार्थे (**त्वा**) त्वाम् (**वृषन्तमम्**) सर्वानभीष्टान्कामान् वर्षतीति वृषा सोऽतिशयितस्तम्। **कनिन्युवृषि०** (उणा०१.१५४) अनेन '**वृष**' धातोः कनिन्प्रत्ययः। **अयस्मयादीनि छन्दसि।** (अष्टा०१.४.२०) अनेन भसंज्ञया नलोपाभावः। **उभयसंज्ञान्यपि छन्दांसि दृश्यन्त** इति पदसंज्ञाश्रयणाट्टिलोपाभावः। (**वाजेषु**) संग्रामेषु। **वाज इति संग्रामनामसु पठितम्।** (निघं०२.१७) (**हवनश्रुतम्**) हवनमाह्वानं शृणोतीति तम् (**वृषन्तमस्य**) अतिशयेनोत्तमानां कामानामभिवर्षयितुस्तव (**हूमहे**) स्पर्धयामहे। अत्र '**ह्वेञ्**' इत्यस्माल्लटि **बहुलं छन्दसी**ति शपो लुक्। **बहुलं छन्दसि।** (अष्टा०६.१.३४) इति सम्प्रसारणम्, **सम्प्रसारणाच्चे**ति पूर्वरूपं च। **हलः।** (अष्टा०६.४.२) इति दीर्घत्वम्। (**ऊतिम्**) रक्षां प्राप्तिमवगमं च (**सहस्रसातमाम्**) सहस्राणि बहूनि धनानि सुखानि वा सनोति यया साऽतिशयिता ताम्। अत्र सहस्रोपपदात् '**षणु दाने**' इत्यस्माद्धातोः **जनसन०** इत्यनेन विट्। **विड्वनोरनुनासिकस्यादि**ति नकारस्याकारादेशः। **कृतो बहुलमि**ति करणे च॥१०॥

अन्वयः-हे इन्द्र! वयं वाजेषु हवनश्रुतं वृषन्तमं त्वां विद्मा हि यतो वृषन्तमस्य तव सहस्रसातमामूर्तिं हूमहे॥१०॥

भावार्थः-मनुष्या सर्वकामसिद्धिप्रदं शत्रूणां युद्धेषु विजयहेतुं परमेश्वरमेव जानीयुः। येनास्मिन् जगति सर्वप्राणिसुखायासंख्याताः पदार्था उत्पाद्य रक्ष्यन्ते तं तदाज्ञां चाश्रित्य सर्वथा प्रयत्नेन स्वस्य सर्वेषां च सुखं संसाध्यम्॥१०॥

पदार्थः-हे परमेश्वर! हम लोग **(वाजेषु)** संग्रामों में **(हवनुश्रुतम्)** प्रार्थना को सुनने योग्य और **(वृषन्तमम्)** अभीष्ट कामों के अच्छी प्रकार देने और जाननेवाले **(त्वा)** आपको **(विद्म)** जानते हैं, **(हि)** जिस कारण हम लोग **(वृषन्तमस्य)** अतिशय करके श्रेष्ठ कामों को मेघ के समान वर्षानेवाले **(तव)** आपकी **(सहस्रसातमाम्)** अच्छी प्रकार अनेक सुखों की देनेवाली जो **(ऊतिम्)** रक्षाप्राप्ति और विज्ञान हैं, उनको **(हूमहे)** अधिक से अधिक मानते हैं॥१०॥

भावार्थः-मनुष्यों को सब कामों की सिद्धि देने और युद्ध में शत्रुओं के विजय के हेतु परमेश्वर ही देनेवाला है, जिसने इस संसार में सब प्राणियों के सुख के लिये असंख्यात पदार्थ उत्पन्न वा रक्षित किये हैं, तथा उस परमेश्वर वा उस की आज्ञा का आश्रय करके सर्वथा उपाय के साथ अपना वा सब मनुष्यों का सब प्रकार से सुख सिद्ध करना चाहिये॥१०॥

पुनः स कीदृशः करोतीत्युपदिश्यते।

फिर परमेश्वर कैसा और मनुष्यों के लिये क्या करता है, इस विषय को अगले मन्त्र में प्रकाश किया है-

आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब।
नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम्॥ ११॥

आ। तु। नः। इन्द्र। कौशिक। मन्दसानः। सुतम्। पिब। नव्यम्। आयुः। प्र। सु। तिर। कृधि। सहस्रसाम्। ऋषिम्॥ ११॥

पदार्थः-**(आ)** समन्तात् **(तु)** पुनरर्थे। अत्र **ऋचि तुनुघमक्षु०** इति दीर्घः। **(नः)** अस्माकम् **(इन्द्र)** सर्वानन्दस्वरूपेश्वर **(कौशिक)** सर्वासां विद्यानामुपदेशे प्रकाशे च भवस्तत्सम्बुद्धौ, अर्थानां साधूपदेष्टर्वा। **क्रोशतेः शब्दकर्मणः क्रंसतेर्वा स्यात्प्रकाशयतिकर्मणः साधु विक्रोशयिताऽर्थानामिति वा नद्यः प्रत्यूचुः।** (निरु०२.२५) अनेन कौशिकशब्द उक्तार्थो गृह्यते। **(मन्दसानः)** स्तुतः सर्वस्य ज्ञाता सन्। **ऋञ्जिवृधिमन्दि०** (उणा०२.८४) अनेन मन्देरसानच् प्रत्ययः। **(सुतम्)** प्रयत्नेनोत्पादितं प्रियशब्दं स्तवनं वा **(पिब)** श्रवणशक्त्या गृहाण **(नव्यम्)** नवीनम्। **नवसूरमर्तयविष्ठेभ्यो यत्।** (अष्टा०५.४.३६) अनेन वार्त्तिकेन नवशब्दात् स्वार्थे यत्। **नव्यमिति नवनामसु पठितम्।** (निघं०३.२८) **(आयुः)** जीवनम् **(प्र)** प्रकृष्टार्थे क्रियायोगे **(सु)** शोभार्थे क्रियायोगे। अत्र **निपातस्य चे**ति दीर्घः। **(तिर)** संतारय। तरतेर्विकरणव्यत्ययेन शः। **ऋत इद्धातो**रितीकारः। **(कृधि)** कुरु। अत्र **श्रुशृणुपृकृवृभ्यश्छन्दसी**ति

हेर्धिर्विकरणाभावः। **(सहस्रसाम्)** सहस्रं बह्वीर्विद्याः सनोति तम् **(ऋषिम्)** वेदमन्त्रार्थद्रष्टारं जितेन्द्रियतया शुभगुणानां सदैवोपदेष्टारं सकलविद्याप्रत्यक्षकारिणम्॥११॥

अन्वयः-हे कौशिकेन्द्रेश्वर! मन्दसानः संस्त्वं नः सुतमापिब तु पुनः कृपया नो नव्यमायुः प्रसूतिर तथा नोऽस्माकं मध्ये सहस्रसामृषिं कृधि सम्पादय॥११॥

भावार्थः-ये मनुष्याः प्रेम्णा विद्योपदेष्टारं जीवेभ्यः सत्यविद्याप्रकाशकं सर्वज्ञं शुद्धमीश्वरं स्तुत्वा श्रावयन्ति, ते सुखपूर्णं विद्यायुक्तमायुः प्राप्यर्षयो भूत्वा पुनः सर्वान् विद्यायुक्तान् मनुष्यान् विदुषः प्रीत्या सम्पादयन्ति॥११॥

पदार्थः-हे **(कौशिक)** सब विद्याओं के उपदेशक और उनके अर्थों के निरन्तर प्रकाश करनेवाले **(इन्द्र)** सर्वानन्दस्वरूप परमेश्वर! **(मन्दसानः)** आप उत्तम-उत्तम स्तुतियों को प्राप्त हुए और सब को यथायोग्य जानते हुए **(नः)** हम लोगों के **(सुतम्)** यत्न से उत्पन्न किये हुए सोमादि रस वा प्रिय शब्दों से की हुई स्तुतियों का **(आ)** अच्छी प्रकार **(पिब)** पान कराइये **(तु)** और कृपा करके हमारे लिये **(नव्यम्)** नवीन **(आयुः)** अर्थात् निरन्तर जीवन को **(प्रसूतिर)** दीजिये, तथा **(नः)** हम लोगों में **(सहस्रसाम्)** अनेक विद्याओं के प्रकट करनेवाले **(ऋषिम्)** वेदवक्ता पुरुष को भी **(कृधि)** कीजिये॥११॥

भावार्थः-जो मनुष्य अपने प्रेम से विद्या का उपदेश करनेवाला होकर अर्थात् जीवों के लिये सब विद्याओं का प्रकाश सर्वदा शुद्ध परमेश्वर की स्तुति के साथ आश्रय करते हैं, वे सुख और विद्यायुक्त पूर्ण आयु तथा ऋषि भाव को प्राप्त होकर सब विद्या चाहनेवाले मनुष्यों को प्रेम के साथ उत्तम-उत्तम विद्या से विद्वान् करते हैं॥११॥

इमाः सर्वाः स्तुतय ईश्वरमेव स्तुवन्तीत्युपदिश्यते।

उक्त सब स्तुति ईश्वर ही के गुणों का कीर्त्तन करती हैं, इस विषय का अगले मन्त्र में प्रकाश किया है-

परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वत॑ः।
वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः॥१२॥२०॥

परि॑। त्वा॒। गि॒र्व॒णः॒। गिरः॑। इ॒माः। भ॒व॒न्तु॒। वि॒श्वतः॑। वृ॒द्धऽआयु॑म्। अनु॑। वृद्ध॑यः। जुष्टाः॑। भ॒व॒न्तु॒। जुष्ट॑यः॥१२॥

पदार्थः-**(परि)** परितः। **परीति सर्वतोभावं प्राह।** (निरु०१.३) **(त्वा)** त्वां सर्वस्तुतिभाजनमिन्द्रमीश्वरम् **(गिर्वणः)** गीर्भिर्वेदानां विदुषां च वाणीभिर्वन्यते संसेव्यते यस्तत्सम्बुद्धौ **(गिरः)** स्तुतयः **(इमाः)** वेदस्थाः प्रत्यक्षा विद्वत्प्रयुक्ताः **(भवन्तु)** **(विश्वतः)** विश्वस्य मध्ये **(वृद्धायुम्)**

आत्मनो वृद्धमिच्छतीति तम् **(अनु)** क्रियार्थे **(वृद्धयः)** वर्ध्यन्ते यास्ताः **(जुष्टाः)** याः प्रीणन्ति सेवन्ते ताः **(भवन्तु)** **(जुष्टयः)** जुष्यन्ते यास्ताः॥१२॥

अन्वयः-हे गिर्वण इन्द्र! विश्वतो या इमा गिरः सन्ति ताः परि सर्वतस्त्वां भवन्तु तथा चेमा वृद्धयो जुष्टयो जुष्टा वृद्धायुं त्वामनुभवन्तु॥१२॥

भावार्थः-हे भगवन्! या योत्कृष्टा। प्रशंसा सा सा तवैवास्ति, या या सुखानन्दवृद्धिश्च सा सा त्वामेव संसेवते। य एवमीश्वरस्य गुणान् तत्सृष्टिगुणांश्चानुभवन्ति त एव प्रसन्ना विद्यावृद्धा भूत्वा विश्वस्मिन् पूज्या जायन्ते॥१२॥

अत्र सायणाचार्य्येण **'परिभवन्तु सर्वतः प्राप्नुवन्तु'** इत्यशुद्धमुक्तम्। कुतः, परौ भुवोऽवज्ञाने इति परिपूर्वकस्य **'भू'** धातोस्तिरस्कारार्थे निपातितत्वात्। इदं सूक्तमार्य्यावर्त्तनिवासिभिः सायणाचार्य्यादिभिस्तथा यूरोपाख्यदेशनिवासिभिर्विलसनाख्यादिभिश्चान्यथैव व्याख्यातम्।

अत्र ये क्रमेण विद्यादिशुभगुणान् गृहीत्वेश्वरं च प्रार्थयित्वा सम्यक् पुरुषार्थमाश्रित्य धन्यवादैः परमेश्वरं प्रशंसन्ति त एवाविद्यादिदुष्टगुणान्निवार्य्य शत्रून् विजित्य दीर्घायुषो विद्वांसो भूत्वा सर्वेभ्यः सुखसम्पादनेन सदानन्दयन्त इत्यस्य दशमस्य सूक्तार्थस्य नवमसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति दशमं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(गिर्वणः)** वेदों तथा विद्वानों की वाणियों से स्तुति को प्राप्त होने योग्य परमेश्वर! **(विश्वतः)** इस संसार में **(इमाः)** जो वेदोक्त वा विद्वान् पुरुषों की कही हुई **(गिरः)** स्तुति हैं, वे **(परि)** सब प्रकार से सब की स्तुतियों से सेवन करने योग्य जो आप हैं, उनको **(भवन्तु)** प्रकाश करनेहारी हों, और इसी प्रकार **(वृद्धयः)** वृद्धि को प्राप्त होने योग्य **(जुष्टाः)** प्रीति को देनेवाली स्तुतियां **(जुष्टयः)** जिनसे सेवन करते हैं, वे **(वृद्धायुम्)** जो कि निरन्तर सब कार्य्यों में अपनी उन्नति को आप ही बढ़ानेवाले आप का **(अनुभवन्तु)** अनुभव करें॥१२॥

भावार्थः-हे भगवन् परमेश्वर! जो-जो अत्युत्तम प्रशंसा है, सो-सो आपकी ही है, तथा जो-जो सुख और आनन्द की वृद्धि होती है सो-सो आप ही का सेवन करके विशेष वृद्धि को प्राप्त होती है। इस कारण जो मनुष्य ईश्वर तथा सृष्टि के गुणों का अनुभव करते हैं, वे ही प्रसन्न और विद्या की वृद्धि को प्राप्त होकर संसार में पूज्य होते हैं॥१२॥

इस मन्त्र में सायणाचार्य्य ने **'परिभवन्तु'** इस पद का अर्थ यह किया है कि- **'सब जगह से प्राप्त हों,'** यह व्याकरण आदि शास्त्रों से अशुद्ध है, क्योंकि परौ भुवोऽवज्ञाने व्याकरण के इस सूत्र से परिपूर्वक **'भू'** धातु का अर्थ तिरस्कार अर्थात् अपमान करना होता है। आर्य्यावर्त्तवासी सायणाचार्य्य आदि तथा यूरोपखण्ड देशवासी साहबों ने इस दशवें सूक्त के अर्थ का अनर्थ किया है।

जो लोग क्रम से विद्या आदि शुभगुणों को ग्रहण और ईश्वर की प्रार्थना करके अपने उत्तम पुरुषार्थ का आश्रय लेकर परमेश्वर की प्रशंसा और धन्यवाद करते हैं, वे ही अविद्या आदि दुष्टों गुणों की निवृत्ति से शत्रुओं को जीत कर तथा अधिक अवस्थावाले और विद्वान् होकर सब मनुष्यों को सुख उत्पन्न करके सदा आनन्द में रहते हैं। इस अर्थ से इस दशम सूक्त की सङ्गति नवम सूक्त के साथ जाननी चाहिये॥

यह दशम सूक्त और बीसवां वर्ग पूरा हुआ॥

अथास्याष्टर्चस्यैकादश सूक्तस्य जेता माधुच्छन्दस ऋषिः। इन्द्रो देवता। अनुष्टुप् छन्दः गान्धारः स्वरः॥

अथेन्द्रशब्देनेश्वरविजेतारावुपदिश्येते।

अब ग्यारहवें सूक्त का आरम्भ किया जाता है। तथा पहले मन्त्र में इन्द्र शब्द से ईश्वर वा विजय करनेवाले पुरुष का उपदेश किया है–

इन्द्रं॑ विश्वा॑ अवीवृधन्त्समु॒द्रव्य॑चस॒ं गिर॑ः।
र॒थीत॑मं र॒थीना॒ं वाजा॑ना॒ं सत्प॑ति॒म्पति॑म्॥ १॥

इन्द्र॑म्। विश्वा॑ः। अ॒वी॒वृ॒ध॒न्। स॒मु॒द्रऽव्य॑चसम्। गिर॑ः। र॒थिऽत॑मम्। र॒थीना॑म्। वाजा॑नाम्। सत्ऽप॑तिम्। पति॑म्॥ १॥

पदार्थः–(**इन्द्रम्**) विजयप्रदमीश्वरम, शत्रूणां विजेतारं शूरं वा (**विश्वाः**) सर्वाः (**अवीवृधन्**) अत्यन्तं वर्धयन्तु। अत्र लोडर्थे लुङ्। (**समुद्रव्यचसम्**) समुद्रेऽन्तरिक्षे व्यचा व्याप्तिर्यस्य तं सर्वव्यापिनमीश्वरम्। समुद्रे नौकादिविजयगुणसाधनव्यापिनं शूरवीरं वा (**गिरः**) स्तुतयः (**रथीतमम्**) बहवो रथा रमणाधिकरणः पृथिवीसूर्यादयो लोका विद्यन्ते यस्मिन्स रथीश्वरः सोऽतिशयितस्तम्। रथाः प्रशस्ता रणविजयहेतवो विमानादयो विद्यन्ते यस्य सोऽतिशयितः शूरस्तम्। **रथिन ईद्वक्तव्यः।** (अष्टा०८.२.१७) इति वार्त्तिकेनेकारादेशः। (**रथीनाम्**) नित्ययुक्ता रथा विद्यन्ते येषां योद्धॄणां तेषाम्। **अन्येषामपि दृश्यते।** (अष्टा०६.३.१३७) अनेन दीर्घः। (**वाजानाम्**) वजन्ति प्राप्नुवन्ति जयपराजयौ येषु युद्धेषु तेषाम् (**सत्पतिम्**) यः सतां नाशरहितानां प्रकृत्यादिकारणद्रव्याणां पतिः स्वामी तमीश्वरम्। यः सतां सद्व्यवहाराणां सत्पुरुषाणां वा पतिः पालकस्तं न्यायाधीशं राजानम् (**पतिम्**) यः पाति रक्षति चराचरं जगत्तमीश्वरम्, यः पाति रक्षति सज्जनाँस्तम्॥ १॥

अन्वयः-अस्माकमिमा विश्वा गिरो यं समुद्रव्यचसं रथीनां रथीतमं वाजनां सत्पतिं पतिमिन्द्रं परमात्मानं वीरपुरुषं वाऽवीवृधन् नित्यं वर्द्धयन्ति तं सर्वे मनुष्या वर्द्धयन्तु॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। सर्वा वेदवाण्यः परमैश्वर्य्यवन्तं सर्वगतं सर्वत्र रममाणं सत्यस्वभावं धार्मिकाणां विजयप्रदं परमेश्वरं प्रकाशयन्ति। धर्मेण बलेन दुष्टमनुष्याणां विजेतारं धार्मिकाणां पालकं वेतीश्वरो वेदवचसा सर्वान् विज्ञापयति॥ १॥

पदार्थः–हमारी ये (**विश्वाः**) सब (**गिरः**) स्तुतियां (**समुद्रव्यचसम्**) जो आकाश में अपनी व्यापकता से परिपूर्ण ईश्वर, वा जो नौका आदि पूरण सामग्री से शत्रुओं को जीतनेवाले मनुष्य (**रथीनाम्**) जो बड़े–बड़े युद्धों में विजय कराने वा करनेवाले (**रथीतमम्**) जिसमें पृथिवी आदि रथ अर्थात् सब क्रीड़ाओं के साधन, तथा जिसके युद्ध के साधन बड़े–बड़े रथ हैं, (**वाजानाम्**) अच्छी प्रकार जिनमें जय और पराजय प्राप्त होते हैं, उनके बीच (**सत्पतिम्**) जो विनाशरहित प्रकृति आदि द्रव्यों का पालन

करनेवाला ईश्वर, वा सत्पुरुषों की रक्षा करनेहारा मनुष्य **(पतिम्)** जो चराचर जगत् और प्रजा के स्वामी, वा सज्जनों की रक्षा करनेवाले और **(इन्द्रम्)** विजय के देनेवाले परमेश्वर के, वा शत्रुओं को जीतनेवाले धर्मात्मा मनुष्य के **(अवीवृधन)** गुणानुवादों को नित्य बढ़ाती रहें॥१॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। सब वेदवाणी परमैश्वयर्युक्त सब में रहने सब जगह रमण करने सत्य स्वभाव तथा धर्मात्मा सज्जनों को विजय देनेवाले परमेश्वर और धर्म वा बल से दुष्ट मनुष्यों को जीतने तथा धर्मात्मा वा सज्जन पुरुषों की रक्षा करनेवाले मनुष्य का प्रकाश करती हैं। इस प्रकार परमेश्वर वेदवाणी से सब मनुष्यों को आज्ञा देता है॥१॥

पुनस्तावेवोपदिश्येते।

फिर भी अगले मन्त्र में इन्हीं दोनों का प्रकाश किया है-

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।

त्वामभि प्र णोनुमो जेतारमपराजितम्॥२॥

सख्ये। ते। इन्द्र। वाजिनः। मा। भेम। शवसः। पते। त्वाम्। अभि। प्र। नोनुमः। जेतारम्। अपऽराजितम्॥२॥

पदार्थः-**(सख्ये)** मित्रभावे कृते **(ते)** तवेश्वरस्य न्यायशीलस्य सभाध्यक्षस्य वा **(इन्द्र)** सर्वस्वामिन्नीश्वर सभाध्यक्ष राजन् वा **(वाजिनः)** वाजः परमोत्कृष्टविद्याबलाभ्यामात्मनो देहस्य प्रशस्तो बलसमूहो येषामस्ति ते **(मा)** निषेधार्थे, क्रियायोगे **(भेम)** बिभयाम भयं करवाम। अत्र लोडर्थे लुङ्। **बहुलं छन्दसी**ति च्लेर्लुक्। **छन्दस्युभयथे**ति लुङः आर्धधातुकसंज्ञामाश्रित्य मसो डित्वाभावाद् गुणश्च। **(शवसः)** अनन्तबलस्य प्रमितबलस्य वा। **शव इति बलनामसु पठितम्।** (निघं०२.९) **(पते)** सर्वस्वामिन्नीश्वर सभाध्यक्ष राजन्वा **(त्वाम्)** जगदीश्वरं सभाध्यक्षं वा **(अभि)** आभिमुख्यार्थे **(प्र)** प्रकृष्टार्थे **(नोनुमः)** अतिशयेन स्तुमः। अयं **'णु स्तुतौ'** इत्यस्य यङ्लुकि प्रयोगः। **उपसर्गादसमासेऽपि णोपदेशस्य।** (अष्टा०८.४.१४) इति णकारादेशश्च। **(जेतारम्)** शत्रून् जापयति जयति वा तम् **(अपराजितम्)** यो न केनापि पराजेतुं शक्यते तम्॥२॥

अन्वयः-हे शवसस्पते जगदीश्वर सेनाध्यक्ष वा! अभिजेतारमपराजितं त्वां वाजिनो विजानन्तो वयं प्रणोनुमः पुनःपुनर्नमस्कुर्मः, तथा हे इन्द्र! ते तव सख्ये कृते शत्रुभ्यः कदाचिन्मा भेम भयं मा करवाम॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। ये मनुष्या परमेश्वरे तदाज्ञाचरणे तथा शूरादिमनुष्येषु नित्यं मित्रतामाचरन्ति, ते बलवन्तो भूत्वा नैव शत्रुभ्यो भयपराभवौ प्राप्नुवन्तीति॥२॥

पदार्थः-हे **(शवसः)** अनन्तबल वा सेनाबल के **(पते)** पालन करनेहारे ईश्वर वा अध्यक्ष! **(अभिजेतारम्)** प्रत्यक्ष शत्रुओं को जिताने वा जीतनेवाले **(अपराजितम्)** जिसका पराजय कोई भी न कर सके **(त्वा)** उस आप को **(वाजिनः)** उत्तम विद्या वा बल से अपने शरीर के उत्तम बल वा समुदाय को जानते हुए हम लोग **(प्रणोनुमः)** अच्छी प्रकार आप की वार-वार स्तुति करते हैं, जिससे **(इन्द्र)** हे सब प्रजा वा सेना के स्वामी! **(ते)** आप जगदीश्वर वा सभाध्यक्ष के साथ **(सख्ये)** हम लोग मित्रभाव करके शत्रुओं वा दुष्टों से कभी **(मा भेम)** भय न करें॥२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य परमेश्वर की आज्ञा के पालने वा अपने धर्मानुष्ठान से परमात्मा तथा शूरवीर आदि मनुष्यों में मित्रभाव अर्थात् प्रीति रखते हैं, वे बलवाले होकर किसी मनुष्य से पराजय वा भय को प्राप्त कभी नहीं होते॥२॥

पुनस्तावेवोपदिश्येते।

फिर भी अगले मन्त्र में इन्हीं दोनों का उपदेश किया है-

पूर्वीरिन्द्रस्य रातयो न विदस्यन्त्यूतयः।
यदि वाजस्य गोमतः स्तोतृभ्यो मंहते मघम्॥३॥

पूर्वीः। इन्द्रस्य। रातयः। न। वि। दस्यन्ति। ऊतयः। यदि। वाजस्य। गोऽमतः। स्तोऽतृभ्यः। मंहते। मघम्॥३॥

पदार्थः-**(पूर्वीः)** पूर्व्यः सनातन्यः। **सुपां सुलुगिति** पूर्वसवर्णादेशः। **(इन्द्रस्य)** परमेश्वरस्य सभासेनाध्यक्षस्य वा **(रातयः)** दानानि **(न)** निषेधार्थे **(वि)** क्रियायोगे **(दस्यन्ति)** उपक्षयन्ति **(ऊतयः)** रक्षणानि **(यदि)** आकांक्षार्थे **(वाजस्य)** वजन्ति प्राप्नुवन्ति सुखानि यस्मिन् व्यवहारे तस्य **(गोमतः)** प्रशस्ताः पृथिवी गावः पशवो वागादीनीन्द्रियाणि च विद्यन्ते यस्मिन् तस्य **(स्तोतृभ्यः)** स्तुवन्ति जगदीश्वरं सृष्टिगुणाँश्च ये तेभ्यो धार्मिकेभ्यो विद्वद्भ्यः **(मंहते)** ददाति। **मंहत इति दानकर्मसु पठितम्।** (निघं०३.२०) **(मघम्)** प्रकृष्टं विद्यासुवर्णादिधनम्॥३॥

अन्वयः-यदीन्द्रः स्तोतृभ्यो वाजस्य गोमतो मघं मंहते तर्ह्यस्यैताः पूर्व्यो रातय ऊतयो न विदस्यन्ति नैवोपक्षयन्ति॥३॥

भावार्थः-अत्रापि श्लेषालङ्कारः। यथेश्वरस्य जगति दानरक्षणानि नित्यानि न्याययुक्तानि कर्माणि सन्ति, तथैव मनुष्यैरपि प्रजायां विद्याऽभयदानानि नित्यं कार्य्याणि। यदीश्वरो न स्यात्तर्हीदं जगत्कथमुत्पद्येत, यदीश्वरः सर्वमुत्पाद्य न दद्यात्तर्हि मनुष्याः कथं जीवेयुस्तस्मात्सकलकार्य्योत्पादकः सर्वसुखदातेश्वरोऽस्ति, नेतर इति मन्तव्यम्॥३॥

पदार्थः-**(यदि)** जो परमेश्वर वा सभा और सेना का स्वामी **(स्तोतृभ्यः)** जो जगदीश्वर वा सृष्टि के गुणों की स्तुति करनेवाले धर्मात्मा विद्वान् मनुष्य हैं, उनके लिये **(वाजस्य)** जिसमें सब सुख प्राप्त

होते हैं उस व्यवहार, तथा **(गोमतः)** जिसमें उत्तम पृथिवी, गौ आदि पशु और वाणी आदि इन्द्रियां वर्त्तमान हैं, उसके सम्बन्धी **(मघम्)** विद्या और सुवर्णादि धन को **(मंहते)** देता है, तो इस **(इन्द्रस्य)** परमेश्वर तथा सभा सेना के स्वामी की **(पूर्व्यः)** सनातन प्राचीन **(रातयः)** दानशक्ति तथा **(ऊतयः)** रक्षा हैं, वे कभी **(न)** नहीं **(विदस्यन्ति)** नाश को प्राप्त होतीं, किन्तु नित्य प्रति वृद्धि ही को प्राप्त रहती हैं॥३॥

भावार्थः-इस मन्त्र में भी श्लेषालङ्कार है। जैसे ईश्वर वा राजा की इस संसार में दान और रक्षा निश्चल न्याययुक्त होती हैं, वैसे अन्य मनुष्यों को भी प्रजा के बीच में विद्या और निर्भयता का निरन्तर विस्तार करना चाहिये। जो ईश्वर न होता तो यह जगत् कैसे उत्पन्न होता। तथा जो ईश्वर सब पदार्थों को उत्पन्न करके सब मनुष्यों के लिये नहीं देता तो मनुष्य लोग कैसे जी सकते? इससे सब कार्य्यों का उत्पन्न करने और सब सुखों का देनेवाला ईश्वर ही है, अन्य कोई नहीं, यह बात सब को माननी चाहिये॥३॥

पुनरिन्द्रशब्देन सूर्य्यसेनापतिगुणा उपदिश्यन्ते।

फिर अगले मन्त्र में इन्द्र शब्द से सूर्य्य और सेनापति के गुणों का उपदेश किया है-

पुराम्भिन्दुर्युवा कविरमितौजा अजायत।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः॥४॥

पुराम्। भिन्दुः। युवा। कविः। अमितऽओजाः। अजायत। इन्द्रः। विश्वस्य। कर्मणः। धर्ता। वज्री। पुरुऽस्तुतः॥४॥

पदार्थः-(**पुराम्**) सङ्घातानां शत्रुनगराणां द्रव्याणां वा **(भिन्दुः)** भेदकः **(युवा)** मिश्रणामिश्रणकर्त्ता **(कविः)** न्यायविद्याया दर्शनविषयस्य वा क्रमकः **(अमितौजाः)** अमितं प्रमाणरहितं बलमुदकं वा यस्य यस्माद्वा सः **(अजायत)** उत्पन्नोऽस्ति **(इन्द्रः)** विद्वान्सूर्य्यो वा **(विश्वस्य)** सर्वस्य जगतः **(कर्मणः)** चेष्टितस्य **(धर्त्ता)** पराक्रमेणाकर्षणेन वा धारकः **(वज्री)** वज्राः प्राप्तिच्छेदनहेतवो बहवः शस्त्रसमूहाः किरणा वा विद्यन्ते यस्य सः। अत्र भूम्न्यर्थे इनिः **(पुरुष्टुतः)** बहुभिर्विद्वद्भिर्गुणैर्वा स्तोतुमर्हः॥४॥

अन्वयः-अयममितौजा वज्री पुरां भिन्दुर्युवा कविः पुरुष्टुत इन्द्रः सेनापतिः सूर्य्यलोको वा विश्वस्य कर्मणो धर्त्ताऽजायतोत्पन्नोऽस्ति॥४॥

भावार्थः-अत्र श्लेषालङ्कारः। यथेश्वरेण सृष्ट्वा धारितोऽयं सूर्य्यलोकः स्वकीयैर्वज्रभूतैश्छेदकैः किरणैः सर्वेषां मूर्त्तद्रव्याणां भेत्ता बहुगुणहेतुराकर्षणेन पृथिव्यादिलोकस्य धाताऽस्ति, तथैव सेनापतिना

स्वबलेन शत्रुबलं छित्त्वा सामदानादिभिर्दुष्टान् मनुष्यान् भित्त्वाऽनेकशुभगुणाकर्षको भूत्वा भूमौ स्वराज्यपालनं सततं कार्य्यमिति वेद्यम्॥४॥

पदार्थः-जो यह **(अमितौजाः)** अनन्त बल वा जलवाला **(वज्री)** जिसके सब पदार्थों को प्राप्त करानेवाले शस्त्रसमूह वा किरण हैं, और **(पुराम्)** मिले हुए शत्रुओं के नगरों वा पदार्थों का **(भिन्दुः)** अपने प्रताप वा ताप से नाश वा अलग-अलग करने **(युवा)** अपने गुणों से पदार्थों का मेल करने वा कराने तथा **(कविः)** राजनीति विद्या वा दृश्य पदार्थों का अपने किरणों से प्रकाश करनेवाला **(पुरुष्टुतः)** बहुत विद्वान् वा गुणों से स्तुति करने योग्य **(इन्द्रः)** सेनापति और सूर्य्यलोक **(विश्वस्य)** सब जगत् के **(कर्मणः)** कार्यों को **(धर्त्ता)** अपने बल और आकर्षण गुण से धारण करनेवाला **(अजायत)** उत्पन्न होता और हुआ है, वह सदा जगत् के व्यवहारों की सिद्धि का हेतु है॥४॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जैसे ईश्वर का रचा और धारण किया हुआ यह सूर्य्यलोक अपने वज्ररूपी किरणों से सब मूर्तिमान् पदार्थों को अलग-अलग करने तथा बहुत से गुणों का हेतु और अपने आकर्षणरूप गुण से पृथिवी आदि लोकों का धारण करनेवाला है, वैसे ही सेनापति को उचित है कि शत्रुओं के बल का छेदन साम, दाम और दण्ड से शत्रुओं को छिन्न-भिन्न करके बहुत उत्तम गुणों को ग्रहण करता हुआ भूमि में अपने राज्य का पालन करे॥४॥

पुनरपि तस्य गुणा उपदिश्यन्ते।

फिर भी अगले मन्त्र में सूर्य्य के गुणों का उपदेश किया है-

त्वं बलस्य गोमतोऽपावरद्रिवो बिलम्।

त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः॥५॥

त्वम्। बलस्य। गोऽमतः। अप। अवः। अद्रिवः। बिलम्। त्वाम्। देवाः। अबिभ्युषः। तुज्यमानासः। आविषुः॥५॥

पदार्थः-**(त्वम्)** अयम् **(बलस्य)** मेघस्य। **बल इति मेघनामसु पठितम्।** (निघं०१.१०) **(गोमतः)** गावः संबद्धा रश्मयो विद्यन्ते यस्य तस्य। अत्र सम्बन्धे मतुप्। **(अप)** क्रियायोगे **(अवः)** दूरीकरोत्युद्घाटयति। अत्र पुरुषव्यत्ययः, लडर्थे लङ्। **बहुलं छन्दसी**त्याडभावश्च। **(अद्रिवः)** बहवोऽद्रयो मेघा विद्यन्ते यस्मिन्सः। अत्र भूम्न्यर्थे मतुप्। **छन्दसीर** इति मतुपो मकारस्य वत्त्वम्। **मतुवसो रु सम्बुद्धौ छन्दसि।** (अष्टा०८.३.१) इति नकारस्थाने रुरादेशश्च। **अद्रिरिति मेघनामसु पठितम्।** (निघं०१.१०) **(बिलम्)** जलसमूहम्। **बिलं भरं भवति बिभर्तेः।** (निरु०२.१७) **(त्वाम्)** तमिमम् **(देवाः)** दिव्यगुणाः पृथिव्यादयः **(अबिभ्युषः)** बिभेति यस्मात् स बिभीवान्न बिभीवानबिभीवान् तस्य **(तुज्यमानासः)** कम्पमानाः स्वां स्वां वसतिमाददानाः **(आविषुः)** अभितः स्वस्वकक्षां व्याप्नुवन्ति। अत्र लडर्थे लुङ्। अयं व्याप्त्यर्थस्याऽवधातोः प्रयोगः॥५॥

अन्वयः-योऽद्रिवो मेघवानिन्द्रः सूर्य्यलोको गोमतोऽबिभ्युषो बलस्य मेघस्य बिलमपावोऽपवृणोति त्वा तमिमं तुज्यमानासो देवा दिव्यगुणा भ्रमन्तः पृथिव्यादयो लोका आविषुर्व्याप्नुवन्ति॥५॥

भावार्थः-यथा सूर्य्यः स्वकिरणैर्घनाकारं मेघं छित्वा भूमौ निपातयति, यस्य किरणेषु मेघस्तिष्ठति, यस्याभित आकर्षणेन पृथिव्यादयो लोकाः स्वस्वकक्षायां सुनियमेन भ्रमन्ति, ततोऽयनर्त्वहोरात्रादयो जायन्ते, तथैव सेनापतिना भवितव्यमिति॥५॥

पदार्थः-(**अद्रिवः**) जिसमें मेघ विद्यमान है ऐसा जो सूर्य्यलोक है, वह (**गोमतः**) जिसमें अपने किरण विद्यमान हैं उस (**अबिभ्युषः**) भयरहित (**बलस्य**) मेघ के (**बिलम्**) जलसमूह को (**अपावः**) अलग-अलग कर देता है, (**त्वाम्**) इस सूर्य्य को (**तुज्यमानासः**) अपनी-अपनी कक्षाओ में भ्रमण करते हुए (**देवाः**) पृथिवी आदिलोक (**आविषुः**) विशेष करके प्राप्त होते हैं॥५॥

भावार्थः-जैसे सूर्य्यलोक अपनी किरणों से मेघ के कठिन-कठिन बद्दलों को छिन्न-भिन्न करके भूमि पर गिराता हुआ जल की वर्षा करता है, क्योंकि यह मेघ उसकी किरणों में ही स्थित रहता, तथा इसके चारों ओर आकर्षण अर्थात् खींचने के गुणों से पृथिवी आदि लोक अपनी-अपनी कक्षा में उत्तम-उत्तम नियम से घूमते हैं, इसी से समय के विभाग जो उत्तरायण, दक्षिणायन तथा ऋतु, मास, पक्ष, दिन, घड़ी, पल आदि हो जाते हैं, वैसे ही गुणवाला सेनापति होना उचित है॥५॥

अथेन्द्रशब्देन शूरवीरगुणा उपदिश्यन्ते।

अब अगले मन्त्र में इन्द्र शब्द से शूरवीर के गुणों का उपदेश किया है-

तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन्।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः॥६॥

तव। अहम्। शूर। रातिऽभिः। प्रति। आयम्। सिन्धुम्। आऽवदन्। उप। अतिष्ठन्त। गिर्वणः। विदुः। ते। तस्य। कारवः॥६॥

पदार्थः-(**तव**) बलपराक्रमयुक्तस्य (**अहम्**) सर्वो जनः (**शूर**) धार्मिक दुष्टनिवारक विद्याबलपराक्रमवन् सभाध्यक्ष! (**रातिभिः**) अभयादिदानैः (**प्रति**) प्रतीतार्थे क्रियायोगे (**आयम्**) प्राप्नुयाम्। अत्र लिङर्थे लङ्। (**सिन्धुम्**) स्यन्दते प्रस्रवति सुखानि समुद्र इव गम्भीरस्तम् (**आवदन्**) समन्तात् ब्रुवन्सन् (**उप**) सामीप्यार्थे (**अतिष्ठन्त**) स्थिरा भवेयुः। अत् लिङर्थे लङ्। (**गिर्वणः**) गीर्भिर्वन्द्यते सेव्यते जनैस्तत्सम्बुद्धौ (**विदुः**) जानन्ति (**ते**) तव (**तस्य**) राज्यस्य युद्धस्य शिल्पस्य वा (**कारवः**) ये कार्य्याणि कुर्वन्ति ते॥६॥

अन्वयः-हे शूर! ये तव रातिभिस्त्वां सिन्धुमिवावदन् सन्नहं प्रत्यायम्। हे गिर्वणस्तव तस्य च कारवस्त्वां शूरं विदुरुपातिष्ठन्त ते सदा सुखिनो भवन्ति॥६॥

भावार्थः-अत्र लुप्तोपमालङ्कारौ स्तः। ईश्वरः सर्वानाज्ञापयति-मनुष्यैर्धार्मिकस्य शूरस्य प्रशंसितस्य सभाध्यक्षस्य वा सेनाध्यक्षस्य मनुष्याभयदानेन समुद्रस्य जन्तव इवाश्रयेण राज्यकार्य्याणि सम्यग् विदित्वा संसाधनीयानि दुःखनिवारणेन सुखाय परस्परमुपस्थितिश्च कार्य्येति॥६॥

पदार्थः-हे **(शूर)** धार्मिक घोर युद्ध से दुष्टों की निवृत्ति करने तथा विद्या बल पराक्रमवाले वीर पुरुष! जो **(तव)** आपके निर्भयता आदि दानों से मैं **(सिन्धुम्)** समुद्र के समान गम्भीर वा सुख देनेवाले आपको **(आवदन्)** निरन्तर कहता हुआ **(प्रत्यायम्)** प्रतीत करके प्राप्त होऊं। हे **(गिर्वणः)** मनुष्यों की स्तुतियों से सेवन करने योग्य! जो **(ते)** आपके **(तस्य)** युद्ध राज्य वा शिल्पविद्या के सहायक **(कारवः)** कारीगर हैं, वे भी आप को शूरवीर **(विदुः)** जानते तथा **(उपातिष्ठन्त)** समीपस्थ होकर उत्तम काम करते हैं, वे सब दिन सुखी रहते हैं॥६॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार हैं। ईश्वर सब मनुष्यों को आज्ञा देता है कि-जैसे मनुष्यों को धार्मिक शूर प्रशंसनीय सभाध्यक्ष वा सेनापति मनुष्यों के अभयदान से निर्भियता को प्राप्त होकर जैसे समुद्र के गुणों को जानते हैं, वैसे ही उक्त पुरुष के आश्रय से अच्छी प्रकार जानकर उनको प्रसिद्ध करना चाहिये तथा दुःखों के निवारण से सब सुखों के लिये परस्पर विचार भी करना चाहिये॥६॥

पुनस्तद्गुणा उपदिश्यन्ते।

फिर भी अगले मन्त्र में सूर्य्य के गुणों का उपदेश किया है-

मा॒याभि॑रिन्द्र मा॒यिनं॒ त्वं शुष्ण॒मवा॑तिरः।

वि॒दुष्टे तस्य॒ मेधि॒रास्तेषां॒ श्रवां॑स्युत्ति॒र॥७॥

मा॒याभि॑ः। इ॒न्द्र॒। मा॒यिन॑म्। त्वम्। शुष्ण॑म्। अव॑। अ॒ति॒रः॒। वि॒दुः॒। ते॒। तस्य॑। मेधि॑राः। तेषा॑म्। श्रवां॑सि। उत्। ति॒र॒॥७॥

पदार्थः-**(मायाभिः)** प्रज्ञाविशेषव्यवहारैः। **मायेति प्रज्ञानामसु पठितम्।** (निघं०३.९) **(इन्द्र)** परमैश्वर्य्यप्रापक शत्रुनिवारक सभासेनयोः परमाध्यक्ष! **(मायिनम्)** माया निन्दिता प्रज्ञा विद्यते यस्य तम्। अत्र निन्दार्थ इनिः। **(त्वम्)** प्रज्ञासेनाशरीरबलयुक्तः **(शुष्णम्)** शोषयति धार्मिकान् जनान् तं दुष्टस्वभावं प्राणिनम्। अत्र **'शुष शोषणे'** इत्यस्मात् **तृषिशुषि०** (उणा०३.१२) अनेन नः प्रत्ययः। **(अव)** विनिग्रहार्थे। **अवेति विनिग्रहार्थीयः।** (निरु०१.३) **(अतिरः)** शत्रुबलं प्लावयति। अत्र लडर्थे लुङ् विकरणव्यत्ययेन शपः स्थाने शश्च। **(विदुः)** जानन्ति **(ते)** तव **(तस्य)** राज्यादिव्यवहारस्य मध्ये **(मेधिराः)** ये मेधन्ते शास्त्राणि ज्ञात्वा दुष्टान् हिंसन्ति ते। अत्र **'मिधृमेधृ मेधाहिंसनयो'**रित्यस्माद्बाहुलकादौणादिक इरन् प्रत्ययः। **(तेषाम्)** धार्मिकाणां प्राणिनाम् **(श्रवांसि)**

अन्नादीनि वस्तूनि। **श्रव इत्यन्ननामसु पठितम्।** (निघं०२.७) **श्रव इत्यन्ननाम श्रूयत इति सतः।** (निरु०१०.३) अनेन विद्यमानादीनामन्नादिपदार्थानां ग्रहणम्। **(उत्)** उत्कृष्टार्थे **(तिर)** विस्तारय॥७॥

अन्वयः-हे इन्द्र शूरवीर! त्वं मायाभिः शुष्णं मायिनं शत्रुमवतिरस्तस्य हनने ये मेधिरास्ते तव सङ्गमेन सुखिनो भूत्वा श्रवांसि प्राप्नुवन्तु, त्वं तेषां सहायेनारीणां बलान्युत्तिरोत्कृष्टतया निवारय॥७॥

भावार्थः-ईश्वर आज्ञापयति-मेधाविभिर्मनुष्यैः सामदानदण्डभेदयुक्त्या दुष्टशत्रून्निवार्य्य विद्याचक्रवर्त्तिराज्यस्य विस्तारः सम्भावनीयः। यथाऽस्मिन् जगति कपटिनो मनुष्या न वर्द्धेरंस्तथा नित्यं प्रयत्नः कार्य्य इति॥७॥

पदार्थः-हे परमैश्वर्य्य को प्राप्त कराने तथा शत्रुओं की निवृत्ति करनेवाले शूरवीर मनुष्य! **(त्वम्)** तू उत्तम बुद्धि सेना तथा शरीर के बल से युक्त हो के **(मायाभिः)** विशेष बुद्धि के व्यवहारों से **(शुष्णम्)** जो धर्मात्मा सज्जनों का चित्त व्याकुल करने **(मायिनम्)** दुर्बुद्धि दुःख देनेवाला सब का शत्रु मनुष्य है, उसका **(अवातिर)** पराजय किया कर, **(तस्य)** उसके मारने में **(मेधिराः)** जो शस्त्रों को जानने तथा दुष्टों को मारने में अति निपुण मनुष्य हैं, वे **(ते)** तेरे संगम से सुखी और अन्नादि पदार्थों को प्राप्त हों, **(तेषाम्)** उन धर्मात्मा पुरुषों के सहाय से शत्रुओं के बलों को (**उत्तिर**) अच्छी प्रकार निवारण कर॥७॥

भावार्थः-बुद्धिमान् मनुष्यों को ईश्वर आज्ञा देता है कि-साम, दाम, दण्ड और भेद की युक्ति से दुष्ट और शत्रुजनों की निवृत्ति करके विद्या और चक्रवर्त्ति राज्य की यथावत् उन्नति करनी चाहिये। तथा जैसे इस संसार में कपटी, छली और दुष्ट पुरुष वृद्धि को प्राप्त न हों, वैसा उपाय निरन्तर करना चाहिये॥७॥

अथेश्वरगुणा उपदिश्यन्ते।

अगले मन्त्र में ईश्वर के गुणों का उपदेश किया है-

इन्द्रमीशानमोजसाभि स्तोमा अनूषत।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः॥८॥२१॥३॥

इन्द्रम्। ईशानम्। ओजसा। अभि। स्तोमाः। अनूषत। सहस्रम्। यस्य। रातयः। उत। वा। सन्ति। भूयसीः॥८॥

पदार्थः-**(इन्द्रम्)** सकलैश्वर्य्ययुक्तम् **(ईशानम्)** ईष्टे कारणात् सकलस्य जगतस्तम् **(ओजसा)** अनन्तबलेन। **ओज इति बलनामसु पठितम्।** (निघं०२.९) **(अभि)** सर्वतोभावे। **अभीत्याभिमुख्यं प्राह।** (निरु०१.३) **(स्तोमाः)** स्तुवन्ति यैस्ते स्तुतिसमूहाः **(अनूषत)** स्तुवन्ति। अत्र लडर्थे लुङ्। **(सहस्रम्)**

असंख्याता: **(यस्य)** जगदीश्वरस्य **(रातयः)** दानानि **(उत)** वितर्के **(वा)** पक्षान्तरे **(सन्ति)** भवन्ति **(भूयसीः)** अधिकाः। अत्र **वा छन्दसी**ति जसः पूर्वसवर्णत्वम्॥८॥

अन्वयः-यस्य सर्वे स्तोमाः स्तुतयः सहस्रमुत वा भूयसीरधिका रातयश्च सन्ति ता यमोजसा सह वर्त्तमानमीशानमिन्द्रं जगदीश्वरमभ्यनूषत सर्वतः स्तुवन्ति, स एव सर्वैर्मनुष्यैः स्तोतव्यः॥८॥

भावार्थः-येन दयालुनेश्वरेण प्राणिनां सुखायानेके पदार्था जगति स्वौजसोत्पाद्य दत्ता, यस्य ब्रह्मणः सर्व इमे धन्यवादा भवन्ति, तस्यैवाश्रयो मनुष्यैर्ग्राह्य इति॥८॥

अत्रैकादशसूक्तै हीन्द्रशब्देनेश्वरस्य स्तुतिर्निर्भयसम्पादनं सूर्य्यलोककृत्यं शूरवीरगुणवर्णनं दुष्टशत्रुनिवारणं प्रजारक्षणमीश्वरस्यानन्तसामर्थ्याज्जगदुत्पादनादिविधानमुक्तमतोऽस्य दशमसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशनिवासिभिर्विलसनाख्यादिभिश्चान्यथैव व्याख्यातम्॥

इति प्रथममण्डले तृतीयोऽनुवाक एकादशसूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-**(यस्य)** जिस जगदीश्वर के ये सब **(स्तोमाः)** स्तुतियों के समूह **(सहस्रम्)** हजारों **(उत वा)** अथवा **(भूयसीः)** अधिक **(रातयः)** दान **(सन्ति)** हैं, उस **(ओजसा)** अनन्त बल के साथ वर्त्तमान **(ईशानम्)** कारण से सब जगत् को रचनेवाले तथा **(इन्द्रम्)** सकल ऐश्वर्य्ययुक्त जगदीश्वर के **(अभ्यनूषत)** सब प्रकार से गुणकीर्त्तन करते हैं॥८॥

भावार्थः-जिस दयालु ईश्वर ने प्राणियों के सुख के लिये जगत् में अनेक उत्तम-उत्तम पदार्थ अपने पराक्रम से उत्पन्न करके जीवों को दिये हैं, उसी ब्रह्म के स्तुतिविधायक सब धन्यवाद होते हैं, इसलिये सब मनुष्यों को उसी का आश्रय लेना चाहिये॥८॥

इस सूक्त में इन्द्र शब्द से ईश्वर की स्तुति, निर्भयता-सम्पादन, सूर्य्यलोक के कार्य्य, शूरवीर के गुणों का वर्णन, दुष्ट शत्रुओं का निवारण, प्रजा की रक्षा तथा ईश्वर के अनन्त सामर्थ्य से कारण करके जगत् की उत्पत्ति आदि के विधान से इस ग्यारहवें सूक्त की सङ्गति दशवें सूक्त के अर्थ के साथ जाननी चाहिये।

यह भी सूक्त सायणाचार्य्य आदि आर्य्यावर्त्तवासी तथा यूरोपदेशवासी विलसन साहब आदि ने विपरीत अर्थ के साथ वर्णन किया है॥

यह प्रथम मण्डल में तीसरा अनुवाक, ग्यारहवां सूक्त, और इक्कीसवां वर्ग पूरा हुआ॥

अथ द्वादशर्च्चस्य द्वादशसूक्तस्य काण्वो मेधातिथिर्ऋषिः। अग्निर्देवता। गायत्री छन्दः। षड्जः स्वरः॥

तत्रादौ भौतिकगुणा उपदिश्यन्ते।

अब बारहवें सूक्त के प्रथम मन्त्र में भौतिक अग्नि के गुणों का उपदेश किया है-

अ॒ग्निं दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम्।
अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु॑म्॥ १॥

अ॒ग्निम्। दू॒तम्। वृ॒णी॒म॒हे॒। होता॑रम्। वि॒श्वऽवे॑दसम्। अ॒स्य। य॒ज्ञस्य॑। सु॒ऽक्रतु॑म्॥ १॥

पदार्थः-(**अग्निम्**) सर्वपदार्थच्छेदकम् (**दूतम्**) यो दावयति देशान्तरं पदार्थान् गमयत्युपतापयति वा तम्। अत्र **दुतनिभ्यां दीर्घश्च।** (उणा०३.८८) इति क्तः प्रत्ययो दीर्घश्च। (**वृणीमहे**) स्वीकुर्महे (**होतारम्**) यानेषु वेगादिगुणदातारम् (**विश्ववेदसम्**) शिल्पिनो विश्वानि सर्वाणि शिल्पादिसाधनानि विन्दन्ति यस्मात्तम् (**अस्य**) प्रत्यक्षेण साध्यस्य (**यज्ञस्य**) शिल्पविद्यामयस्य (**सुक्रतुम्**) सुष्ठु शोभनाः क्रतवः प्रज्ञाः क्रिया वा भवन्ति यस्मात्तम्॥१॥

अन्वयः-वयं क्रियाचिकीर्षवो मनुष्या अस्य यज्ञस्य सुक्रतुं विश्ववेदसं होतारं दूतमग्निं वृणीमहे॥१॥

भावार्थः-ईश्वर आज्ञापयति-मनुष्यैरयं प्रत्यक्षाप्रत्यक्षेण प्रसिद्धाप्रसिद्धगुणद्रव्याणामुपर्य्यधो गमकत्वेन दूतस्वभावः शिल्पविद्यासम्भावितकलायन्त्राणां प्रेरणहेतुर्यानेषु वेगादिक्रियानिमित्तमग्निः सम्यग् विद्यया सर्वोपकाराय संग्राह्यो यतः सर्वाण्युत्तमानि सुखानि सम्भवेयुरिति॥१॥

पदार्थः-क्रिया करने की इच्छा करनेवाले हम मनुष्य लोग (**अस्य**) प्रत्यक्ष सिद्ध करने योग्य (**यज्ञस्य**) शिल्पविद्यारूप यज्ञ के (**सुक्रतुम्**) जिससे उत्तम-उत्तम क्रिया सिद्ध होती हैं, तथा (**विश्ववेदसम्**) जिससे कारीगरों को सब शिल्प आदि साधनों का लाभ होता है, (**होतारम्**) यानों में वेग आदि को देने (**दूतम्**) पदार्थों को एक देश से दूसरे देश को प्राप्त करने (**अग्निम्**) सब पदार्थों को अपने तेज से छिन्न-भिन्न करनेवाले भौतिक अग्नि को (**वृणीमहे**) स्वीकार करते हैं॥१॥

भावार्थः-ईश्वर सब मनुष्यों को आज्ञा देता है कि-यह प्रत्यक्ष वा अप्रत्यक्ष से विद्वानों ने जिसके गुण प्रसिद्ध किये हैं, तथा पदार्थों को ऊपर नीचे पहुंचाने से दूत स्वभाव तथा शिल्पविद्या से जो कलायन्त्र बनते हैं, उनके चलाने में हेतु और विमान आदि यानों में वेग आदि क्रियाओं का देनेवाला भौतिक अग्नि अच्छी प्रकार विद्या से सब सज्जनों के उपकार के लिये निरन्तर ग्रहण करना चाहिये, जिससे सब उत्तम-उत्तम सुख हों॥१॥

अथ द्विविधोऽग्निरुपदिश्यते।

अब अगले मन्त्र में दो प्रकार के अग्नि का उपदेश किया है-

अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम्।

हव्यवाहं पुरुप्रियम्॥ २॥

अग्निऽअग्निम्। हवीमभिः। सदा। हवन्त। विश्वपतिम्। हव्यवाहम्। पुरुप्रियम्॥ २॥

पदार्थः-(**अग्निम्**) परमेश्वरम् (**अग्निम्**) विद्युद्रूपम् (**हवीमभिः**) ग्रहीतुं योग्यैरुपासनादिभिः शिल्पसाधनैर्वा। '**हु दानादानयो**'रित्यस्मात् **अन्येभ्योऽपि दृश्यन्ते।** (अष्टा०३.२.७५) इति मनिन्, **बहुलं छन्दसी**तीडागमश्च। (**सदा**) सर्वस्मिन्काले (**हवन्त**) गृह्णीत (**विश्वपतिम्**) विशः प्रजास्तासां स्वामिनं पालनहेतुं वा (**हव्यवाहम्**) होतुं दातुमत्तुमादातुं च योग्यानि ददाति वा यानादीनि वस्तूनीतस्ततो वहति प्रापयति तम् (**पुरुप्रियम्**) बहूनां विदुषां प्रीतिजनको वा पुरूणि बहूनि प्रियाणि सुखानि भवन्ति यस्मात्तम्॥ २॥

अन्वयः-यथा वयं हवीमभिः पुरुप्रियं विश्पतिं हव्यवाहमग्निमग्निं वृणीमहे, तथैवैतं यूयमपि सदा हवन्त गृह्णीत॥ २॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। पूर्वस्मान्मन्त्राद् '**वृणीमहे**' इति पदमनुवर्त्तते। ईश्वरः सर्वान्प्रत्युपदिशति-हे मनुष्या युष्माभिर्विद्युदाख्यस्य प्रसिद्धस्याग्नेश्च सकाशात् कलाकौशलादिसिद्धिं कृत्वाऽभीष्टानि सुखानि सदैव भोक्तव्यानि भोजयितव्यानि चेति॥ २॥

पदार्थः-जैसे हम लोग (**हवीमभिः**) ग्रहण करने योग्य उपासनादिकों तथा शिल्पविद्या के साधनों से (**पुरुप्रियम्**) बहुत सुख करानेवाले (**विश्पतिम्**) प्रजाओं के पालन हेतु और (**हव्यवाहम्**) देने-लेने योग्य पदार्थों को देने और इधर-उधर पहुंचानेवाले (**अग्निम्**) परमेश्वर प्रसिद्ध अग्नि और बिजुली को (**वृणीमहे**) स्वीकार करतें हैं, वैसे ही तुम लोग भी सदा (**हवन्त**) उस का ग्रहण करो॥ २॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। और पिछले मन्त्र से '**वृणीमहे**' इस पद की अनुवृत्ति आती है। ईश्वर सब मनुष्यों के लिये उपदेश करता है कि-हे मनुष्यो! तुम लोगों को विद्युत् अर्थात् बिजुलीरूप तथा प्रत्यक्ष भौतिक अग्नि से कलाकौशल आदि सिद्ध करके इष्ट सुख सदैव भोगने और भुगवाने चाहियें॥ २॥

अथेश्वरभौतिकावुपदिश्येते।

अगले मन्त्र में अग्नि शब्द से ईश्वर और भौतिक (अग्नि) के गुणों का उपदेश किया है॥

अग्ने देवाँ इहावह जज्ञानो वक्तर्बर्हिषे।

असि होता न ईड्यः॥ ३॥

अग्ने। देवान्। इह। आ। वह। जज्ञानः। वक्तऽर्बर्हिषे। असि। होता। नः। ईड्यः॥ ३॥

पदार्थः-(**अग्ने**) स्तोतुमर्हेश्वर भौतिकोऽग्निर्वा (**देवान्**) दिव्यगुणसहितान् पदार्थान् (**इह**) अस्मिन् स्थाने (**आ**) अभितः (**वह**) वहति वा (**जज्ञानः**) प्रादुर्भावयिता (**वृक्तबर्हिषे**) वृक्तं त्यक्तं हविर्बर्हिष्यन्तरिक्षे येन तस्मा ऋत्विजे। **वृक्तबर्हिष इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१७) (**असि**) भवति (**होता**) हुतस्य पदार्थस्य दाता (**नः**) अस्मभ्यमस्माकं वा (**ईड्यः**) अध्येष्टव्यः॥३॥

अन्वयः-हे अग्ने वन्दनीयेश्वर! त्वमिह जज्ञानो होतेऽड्योऽसि नोऽस्मभ्यं वृक्तबर्हिषे च देवानावह समन्तात् प्रापयेत्येकः। अयं होता जज्ञानोऽग्निर्वृक्तबर्हिषे नोऽस्मभ्यं च देवानावह समन्तात् प्रापयति, अतोऽस्माकं स ईड्यो भवति (इति द्वितायः)॥३॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्यस्मिन् प्रादुर्भूतेऽग्नौ सुगन्ध्यादिगुणयुक्तानां द्रव्याणां होमः क्रियते, स तद्द्रव्यसहित आकाशे वायुं मेघमण्डलं च, शुद्धे ह्यस्मिन् संसारे दिव्यानि सुखानि जनयति, तस्मादयमस्माभिर्नित्यमन्वेष्टव्यगुणोऽस्तीतीश्वराज्ञा मन्तव्या॥३॥

पदार्थः-हे (**अग्ने**) स्तुति करने योग्य जगदीश्वर! जो आप (**इह**) इस स्थान में (**जज्ञानः**) प्रकट कराने वा (**होता**) हवन किये हुए पदार्थों को ग्रहण करने तथा (**ईड्यः**) खोज करने योग्य (**असि**) हैं, सो (**नः**) हम लोग और (**वृक्तबर्हिषे**) अन्तरिक्ष में होम के पदार्थों को प्राप्त करनेवाले विद्वान् के लिये (**देवान्**) दिव्यगुणयुक्त पदार्थों को (**आवह**) अच्छे प्रकार प्राप्त कीजिये॥१॥३॥

जो (**होता**) हवन किये हुए पदार्थों का ग्रहण करने तथा (**जज्ञानः**) उनकी उत्पत्ति करानेवाला (**अग्ने**) भौतिक अग्नि (**वृक्तबर्हिषे**) जिसके द्वारा होम करने योग्य पदार्थ अन्तरिक्ष में पहुंचाये जाते हैं, वह उस ऋत्विज् के लिये (**इह**) इस स्थान में (**देवान्**) दिव्यगुणयुक्त पदार्थों को (**आवह**) सब प्रकार से प्राप्त करता है। इस कारण (**नः**) हम लोगों को वह (**ईड्यः**) खोज करने योग्य (**असि**) होता है॥२॥३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। हे मनुष्य लोगो! जिस प्रत्यक्ष अग्नि में सुगन्धि आदि गुणयुक्त पदार्थों का होम किया करते हैं, जो उन पदार्थों के साथ अन्तरिक्ष में ठहरनेवाले वायु और मेघ के जल को शुद्ध करके इस संसार में दिव्य सुख उत्पन्न करता है, इस कारण हम लोगों को इस अग्नि के गुणों का खोज करना चाहिये, यह ईश्वर की आज्ञा सब को अवश्य माननी योग्य है॥३॥

अथाग्निगुणा उपदिश्यन्ते।

अगले मन्त्र में भौतिक अग्नि के गुणों का उपदेश किया है-

ताँ उ॑श॒तो वि बो॑धय॒ यद॑ग्ने॒ यासि॑ दू॒त्य॑म्।
दे॒वैरा स॑त्सि ब॒र्हिषि॑॥४॥

तान्। उ॒श॒तः। वि। बो॒ध॒य॒। यत्। अ॒ग्ने॒। यासि॑। दू॒त्य॑म्। दे॒वैः। आ। स॒त्सि॒। ब॒र्हिषि॑॥४॥

पदार्थः-(**तान्**) दिव्यान् गुणान् (**उशतः**) कामितान्। अत्र **कृतो बहुलमि**ति कर्मणि लटः स्थाने शतृप्रत्ययः। (**वि**) विविधार्थे। **व्यपेत्येतस्य प्रातिलोम्यं प्राह।** (निरु०१.३) (**बोधय**) बोधयति। अत्र व्यत्ययः। (**यत्**) यस्मात् (**अग्ने**) अग्निः (**यासि**) याति। अत्र पुरुषव्यत्ययः। (**दूत्यम्**) दूतस्य कर्म। **दूतस्य भागकर्मणी।** (अष्टा०४.४.१२१) अनेन दूतशब्दाद्यत्प्रत्ययः। (**देवैः**) दिव्यैः पदार्थैः सह (**आ**) समन्तात् (**सत्सि**) दोषान् हिनस्ति। अयं '**विशरणार्थे षद्लृधातोः**' प्रयोगः पुरुषव्यत्ययश्च। (**बर्हिषि**) अन्तरिक्षे॥४॥

अन्वयः-योऽग्निर्यद्यस्माद् बर्हिषि देवैः सह दूत्यमायासि समन्ताद्याति, तानुशतो विबोधय विबोधयति, तेषां दोषान्सत्सि हन्ति, तस्मादेतैरयं विद्यासिद्धये सर्वथा सर्वदा परीक्ष्य सम्प्रयोजनीयोऽस्ति॥४॥

भावार्थः-जगदीश्वर आज्ञापयति-अयमग्निर्युष्माकं दूतोऽस्ति। कुतः? हुतान् दिव्यान् परमाणुरूपान् पदार्थानन्तरिक्षे गमयतीत्यतः, उत्तमानां भोगानां प्रापकत्वात्। तस्मात्सर्वैर्मनुष्यैः प्रसिद्धाः प्रसिद्धस्याग्नेर्गुणाः कार्य्यार्थे नित्यं प्रकाशनीया इति॥४॥

पदार्थः-यह (**अग्ने**) अग्नि (**यत्**) जिस कारण (**बर्हिषि**) अन्तरिक्ष में (**देवैः**) दिव्य पदार्थों के संयोग से (**दूत्यम्**) दूत भाव को (**आयासि**) सब प्रकार से प्राप्त होता है, (**तान्**) उन दिव्य गुणों को (**विबोधय**) विदित करानेवाला होता और उन पदार्थों के (**सत्सि**) दोषों का विनाश करता है, इससे सब मनुष्यों को विद्या सिद्धि के लिये इस अग्नि की ठीक-ठीक परीक्षा करके प्रयोग करना चाहिये॥४॥

भावार्थः-परमेश्वर आज्ञा देता है कि-हे मनुष्यो! यह अग्नि तुम्हारा दूत है, क्योंकि हवन किये हुए परमाणुरूप पदार्थों को अन्तरिक्ष में पहुंचाता और उत्तम-उत्तम भोगों की प्राप्ति का हेतु है। इससे सब मनुष्यों को अग्नि के जो प्रसिद्ध गुण हैं, उनको संसार में अपने कार्य्यों की सिद्धि के किये अवश्य प्रकाशित करना चाहिये॥४॥

पुनः स किं करोतीत्युपदिश्यते।

उक्त अग्नि फिर भी क्या करता है, सो अगले मन्त्र में प्रकाशित किया है-

घृताऽहवन दीदिवः प्रति ष्म रिषतो दह।
अग्ने त्वं रक्षस्विनः॥५॥

घृतऽआहवन। दीदिऽवः। प्रति। स्म। रिषतः। दह। अग्ने। त्वम्। रक्षस्विनः॥५॥

पदार्थः-(**घृताहवन**) घृतमाज्यादिकं जलं चासमन्ताज्जुह्वति यस्मिन् सः (**दीदिवः**) यो दीव्यति शुभैर्गुणैर्द्रव्याणि प्रकाशयति सः। अयं '**दिवु**' धातोः क्वसुप्रत्ययान्तः प्रयोगः (**प्रति**) वीप्सार्थे (**स्म**) प्रकारार्थे (**रिषतः**) हिंसाहेतुदोषान् (**दह**) दहति। अत्र व्यत्ययः। (**अग्ने**) अग्निर्भौतिकः (**त्वम्**) सः (**रक्षस्विनः**) रक्षांसि दुष्टस्वभावा निन्दिता मनुष्या विद्यन्ते येषु सङ्घातेषु तान्॥५॥

अन्वयः-घृताहवनो दीदिवानग्ने योऽग्नी रक्षस्विनो रिषतो दोषान् शत्रुंश्च प्रति पुनःपुनर्दहति स्म सोऽस्माभिः स्वकार्य्येषु नित्यं सम्प्रयोज्योऽस्ति॥५॥

भावार्थः-एवं सुगन्ध्यादिगुणयुक्तेन द्रव्येण संयुक्तोऽयमग्निः सर्वान् दुर्गन्धादिदोषान् निवार्य्य सर्वेभ्यः सुखकारी भवतीतीश्वर आह॥५॥

पदार्थः-(**घृताहवन**) जिसमें घी तथा जल क्रियासिद्ध होने के लिये छोड़ा जाता और जो अपने (**दीदिवः**) शुभ गुणों से पदार्थों को प्रकाश करने वाला है, (**त्वम्**) वह (**अग्ने**) अग्नि (**रक्षस्विनः**) जिन समूहों में राक्षस अर्थात् दुष्टस्वभाववाले और निन्दा के भरे हुए मनुष्य विद्यमान हैं, तथा जो कि (**रिषतः**) हिंसा के हेतु दोष और शत्रु हैं, उनका (**प्रति दह स्म**) अनेक प्रकार से विनाश करता है, हम लोगों को चाहिये कि उस अग्नि को कार्यों में नित्य संयुक्त करें॥५॥

भावार्थः-जो अग्नि इस प्रकार सुगन्ध्यादि गुणवाले पदार्थों से संयुक्त होकर सब दुर्गन्ध आदि दोषों को निवारण करके सब के लिये सुखदायक होता है, वह अच्छे प्रकार काम में लाना चाहिये। ईश्वर का यह वचन सब मनुष्यों को मानना उचित है॥५॥

स कथं प्रदीप्तो भवति कीदृशश्चेत्युपदिश्यते।

वह अग्नि कैसे प्रकाशित होता और किस प्रकार का है, सो अगले मन्त्र में उपदेश किया है-

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा।
हव्यवाड् जुह्वास्यः॥६॥२२॥

अग्निना। अग्निः। सम्। इध्यते। कविः। गृहऽपतिः। युवा। हव्यऽवाट्। जुहुऽआस्यः॥६॥

पदार्थः-(**अग्निना**) व्यापकेन विद्युदाख्येन (**अग्निः**) प्रसिद्धो रूपवान् दहनशीलः पृथिवीस्थः सूर्य्यलोकस्थश्च (**सम्**) सम्यगर्थम् (**इध्यते**) प्रदीप्यते (**कविः**) क्रान्तदर्शनः (**गृहपतिः**) गृहस्य स्थानस्य तत्स्थस्य वा पतिः पालनहेतुः (**युवा**) यौति मिश्रयति पदार्थैः सह पदार्थान् वियोजयति वा (**हव्यवाट्**) यो हुतं द्रव्यं देशान्तरं वहति प्रापयति सः (**जुह्वास्यः**) जुहोत्यस्यां सा जुहूर्ज्वाला साऽस्यं मुखं यस्य सः॥६॥

अन्वयः-मनुष्यैर्यो जुह्वास्यो युवा हव्यवाट् कविर्गृहपतिरग्निरग्निना समिध्यते स कार्य्यसिद्धये सदा सम्प्रयोज्यः॥६॥

भावार्थः-योऽयं सर्वपदार्थमिश्रो विद्युदाख्योऽग्निरस्ति तेनैव प्रसिद्धौ सूर्य्याग्नी प्रकाश्येते पुनरदृष्टौ सन्तौ तद्रूपावेव भवतः। मनुष्यैर्यद्यनयोर्गुणविद्याः सम्यग्गृहीत्वोपकारः क्रियेत तर्ह्यनेके व्यवहाराः सिद्ध्येयुस्तैरसंख्यातानन्दप्राप्तिः सर्वेभ्यो नित्यं भवतीत्याह जगदीश्वरः॥६॥

इति द्वाविंशो वर्ग समाप्तः॥

पदार्थः-मनुष्यों को उचित है कि जो **(जुह्वास्यः)** जिसका मुख तेज ज्वाला और **(कविः)** क्रान्तदर्शन अर्थात् जिसमें स्थिरता के साथ दृष्टि नहीं पड़ती, तथा जो **(युवा)** पदार्थों के साथ मिलने और उनको पृथक्-पृथक् करने **(हव्यवाट्)** होम किये हुए पदार्थों को देशान्तरों में पहुंचाने और **(गृहपतिः)** स्थान तथा उनमें रहने वालों का पालन करनेवाला है, उस से **(अग्निः)** यह प्रत्यक्ष रूपवान् पदार्थों को जलाने, पृथिवी और सूर्य्यलोक में ठहरनेवाला अग्नि **(अग्निना)** बिजुली से **(समिध्यते)** अच्छी प्रकार प्रकाशित होता है, वह बहुत कामों को सिद्ध करने के लिये प्रयुक्त करना चाहिये॥६॥

भावार्थः-जो यह सब पदार्थों में मिला हुआ विद्युद्रूप अग्नि कहाता है, उसी में प्रत्यक्ष यह सूर्य्यलोक और भौतिक अग्नि प्रकाशित होते हैं, और फिर जिसमें छिपे हुए विद्युद्रूप हो के रहते हैं, जो इन के गुण और विद्या को ग्रहण करके मनुष्य लोग उपकार करें, तो उन से अनेक व्यवहार सिद्ध होकर उनको अत्यन्त आनन्द की प्राप्ति होती है, यह जगदीश्वर का वचन है॥६॥

यह बाईसवां वर्ग समाप्त हुआ॥

अथाग्निशब्देनेश्वरभौतिकार्थावुपदिश्येते।

अगले मन्त्र में अग्नि शब्द से ईश्वर और भौतिक अग्नि का उपदेश किया है-

क॒विम॒ग्निमुप॑स्तुहि स॒त्यध॑र्माणमध्व॒रे।

दे॒वम॑मीव॒चात॑नम्॥७॥

क॒विम्। अ॒ग्नि॒म्। उप॑। स्तु॒हि॒। स॒त्यऽध॑र्माणम्। अ॒ध्व॒रे। दे॒वम्। अ॒मी॒व॒ऽचात॑नम्॥७॥

पदार्थः-**(कविम्)** सर्वेषां बुद्धीनां सर्वज्ञतया क्रमितारमीश्वरं सर्वेषां दृश्यानां दर्शयितारं भौतिकं वा **(अग्निम्)** ज्ञातारं दाहकं वा **(उप)** सामीप्येऽर्थे **(स्तुहि)** प्रकाशय **(सत्यधर्माणम्)** सत्या नाशरहिता धर्मा यस्य तम् **(अध्वरे)** उपासनीये कर्त्तव्ये वा यज्ञे **(देवम्)** सुखदातारम् **(अमीवचातनम्)** अमीवानज्ञानादीन् ज्वरादींश्च रोगान् चातयति हिनस्ति तम्॥७॥

अन्वयः-हे मनुष्य! त्वमध्वरे सत्यधर्माणममीवचातनं कविं देवमग्निं परमेश्वरं भौतिकं चोपस्तुहि॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैः सत्यविद्यया धर्मप्राप्तये सत्यशिल्पविद्यासिद्धये चाग्निरीश्वरो भौतिको वा तत्तद्गुणैः प्रकाशयितव्यो यतः प्राणिनां रोगनिवारणेन सुखान्युपगतानि स्युः॥७॥

पदार्थः-हे मनुष्य! तू **(अध्वरे)** उपासना करने योग्य व्यवहार में **(सत्यधर्माणम्)** जिसके धर्म नित्य और सनातन हैं, जो **(अमीवचातनम्)** अज्ञान आदि दोषों का विनाश करने तथा **(कविम्)** सब की बुद्धियों को अपने सर्वज्ञपन से प्राप्त होकर **(देवम्)** सब सुखों का देनेवाला **(अग्निम्)** सर्वज्ञ ईश्वर है, उसको **(उपस्तुहि)** मनुष्यों के समीप प्रकाशित कर॥१॥७॥

हे मनुष्य! तू **(अध्वरे)** करने योग्य यज्ञ में **(सत्यधर्माणम्)** जो कि अविनाशी गुण और **(अमीवचातनम्)** ज्वरादि रोगों का विनाश करने तथा **(कविम्)** सब स्थूल पदार्थों को दिखाने वाला और **(देवम्)** सब सुखों का दाता **(अग्निम्)** भौतिक अग्नि है, उसको **(उपस्तुहि)** सब के समीप सदा प्रकाशित करें॥२॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को सत्यविद्या से धर्म की प्राप्ति तथा शिल्पविद्या की सिद्धि के लिये ईश्वर और भौतिक अग्नि के गुण अलग-अलग प्रकाशित करने चाहियें। जिससे प्राणियों को रोग आदि के विनाश पूर्वक सब सुखों की प्राप्ति यथावत् हो॥७॥

पुनस्तावेवोपदिश्येते।

फिर भी अगले मन्त्र में ईश्वर और भौतिक अग्नि का उपदेश किया है-

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति।

तस्य स्म प्राविता भव॥८॥

यः। त्वाम्। अग्ने। हविःऽपतिः। दूतम्। देव। सपर्यति। तस्य। स्म। प्रऽअविता। भव॥८॥

पदार्थः-(**यः**) मनुष्यः (**त्वाम्**) तं वा (**अग्ने**) विज्ञानस्वरूप अग्निं वा। अत्र **सर्वत्रार्थाद्विभक्तेर्विपरिणाम** इति परिभाषया साधुत्वं विज्ञेयम्। (**हविष्पतिः**) हविषां दातुं ग्रहीतुं योग्यानां द्रव्याणां गुणानां वा पतिः पालकः कर्मानुष्ठाता (**दूतम्**) दवति प्रापयति सुखज्ञाने येन तम् (**देव**) सर्वप्रकाशकेश्वर प्रकाशदाहयुक्तमग्निं वा (**सपर्यति**) सेवते। **सपर्यतीति परिचरणकर्मसु पठितम्।** (निघं०३.५) (**तस्य**) सेवकस्य (**स्म**) स्पष्टार्थे (**प्राविता**) प्रकृष्टतया ज्ञाता सुखप्रापको वा (**भव**) भवति वा॥८॥

अन्वयः-हे देवाग्ने! यो हविष्पतिर्मनुष्यो दूतं त्वां सपर्यति तस्य त्वं प्राविता भव स्मेत्येकोऽन्वयः। यो हविष्पतिर्मनुष्यस्त्वां तं देवं दूतमग्निं सपर्यति तस्यायं प्राविता भवति स्म (इति द्वितीयः)॥८॥

भावार्थः-अत्र श्लेषालङ्कारः। दूतशब्देन ज्ञानप्रापकत्वमीश्वरे देशान्तरे द्रव्ययानप्रापणं च भौतिके मत्वाऽस्य प्रयोगः कृतोऽस्ति। ये मनुष्या आस्तिका भूत्वा हृदये सर्वसाक्षिणं परमेश्वरं ध्यायन्ति त एवेश्वरेण रक्षिताः पापानि त्यक्त्वा धर्मात्मानः सन्तः सुखं प्राप्नुवन्ति। ये युक्त्या यानयन्त्रादिष्वग्निं प्रयुञ्जते तेऽपि युद्धादिषु कार्य्येषु रक्षिता रक्षकाश्च भवन्तीति॥८॥

पदार्थः-हे (**देव**) सब के प्रकाश करनेवाले (**अग्ने**) विज्ञानस्वरूप जगदीश्वर! जो मनुष्य (**हविष्पतिः**) देने-लेने योग्य वस्तुओं का पालन करनेवाला (**यः**) जो मनुष्य (**दूतम्**) ज्ञान देनेवाले

आपका **(सपर्य्यति)** सेवन करता है, **(तस्य)** उस सेवक मनुष्य के आप **(प्रावित)** अच्छी प्रकार जनानेवाले **(भव)** हों॥१॥८॥

(यः) जो **(हविष्पतिः)** देने-लेने योग्य पदार्थों की रक्षा करनेवाला मनुष्य **(देव)** प्रकाश और दाहगुणवाले **(अग्ने)** भौतिक अग्नि का **(सपर्य्यति)** सेवन करता है, **(तस्य)** उस मनुष्य का वह अग्नि **(प्रावित)** नाना प्रकार के सुखों से रक्षा करनेवाला **(भव)** होता है॥२॥८॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। दूत शब्द का अर्थ दो पक्ष में समझना चाहिये अर्थात् एक इस प्रकार से कि सब मनुष्यों में ज्ञान का पहुंचाना ईश्वर पक्ष, तथा एकदेश से दूसरे देश में पदार्थों का पहुंचाना भौतिक पक्ष में ग्रहण किया गया है। जो आस्तिक अर्थात् परमेश्वर में विश्वास रखनेवाले मनुष्य अपने हृदय में सर्वसाक्षी का ध्यान करते हैं, वे पुरुष ईश्वर से रक्षा को प्राप्त होकर पापों से बचकर धर्मात्मा हुए अत्यन्त सुख को प्राप्त होते हैं, तथा जो युक्ति से विमान आदि रथों में भौतिक अग्नि को संयुक्त करते हैं, वे भी युद्धादिकों में रक्षा को प्राप्त होकर औरों की रक्षा करनेवाले होते हैं॥८॥

पुनस्तावेवोपदिश्येते।

फिर भी उक्त अर्थों ही का प्रकाश किया है-

यो अ॒ग्निं दे॒ववी॑तये ह॒विष्माँ॑ आ॒विवा॑सति।

तस्मै॑ पावक मृळय॥९॥

यः। अ॒ग्निम्। दे॒वऽवी॑तये। ह॒विष्मा॑न्। आ॒ऽविवा॑सति। तस्मै॑। पा॒व॒क॒। मृ॒ळ॒य॒॥९॥

पदार्थः-(**यः**) मनुष्यः (**अग्निम्**) सर्वसुखप्रापकमीश्वरं सुखहेतुं भौतिकं वा (**देववीतये**) देवानां दिव्यानां गुणानां भोगानां च वीतिर्व्याप्तिस्तस्यै (**हविष्मान्**) हवींष्युत्तमानि द्रव्याणि कर्माणि वा विद्यन्ते यस्य सः। अत्र प्रशंसार्थे मतुप्। (**आविवासति**) समन्तात्सेवते। **विवासतीति परिचरणकर्मसु पठितम्।** (निघं०३.५) (**तस्मै**) सेवकम्। अत्र कर्मणि चतुर्थी। (**पावक**) पुनाति पवित्रतां करोति तत्सम्बुद्धावीश्वर पवित्रहेतुरग्निर्वा (**मृळय**) सुखय सुखयति वा॥९॥

अन्वयः-हे पावक! यो हविष्मान् मनुष्यो देववीतये त्वामग्निमाविवासति तस्मै त्वं मृडयेत्येकः। यो हविष्मान् मनुष्यो देववीतय इममग्निमाविवासति तस्मा अयं पावकोऽग्निर्मृडयतीति द्वितीयः॥९॥

भावार्थः-अत्र श्लेषालङ्कारः। ये मनुष्याः सत्येन भावेन कर्मणा विज्ञानेन च परमेश्वरं सेवन्ते, ते दिव्यगुणान् पवित्राणि कर्माणि कृत्वा सुखानि च प्राप्नुवन्ति, येनायं दिव्यगुणप्रकाशकोऽग्नी रचितस्तस्मान्मनुष्यैर्दिव्या उपकारा ग्राह्या इतीश्वरोपदेशः॥९॥

पदार्थः-हे (**पावकः**) पवित्र करनेवाले ईश्वर! (**यः**) जो (**हविष्मान्**) उत्तम-उत्तम पदार्थ वा कर्म करनेवाला मनुष्य (**देववीतये**) उत्तम-उत्तम गुण और भोगों की परिपूर्णता के लिये (**अग्निम्**) सब

सुखों के देनेवाले आपको **(आविवासति)** अच्छी प्रकार सेवन करता है, **(तस्मै)** उस सेवन करनेवाले मनुष्य को आप **(मृळय)** सब प्रकार सुखी कीजिये॥१॥९॥

यह जो **(हविष्मान्)** उत्तम पदार्थवाला मनुष्य **(देववीतये)** उत्तम भोगों की प्राप्ति के लिये **(अग्निम्)** सुख करानेवाले भौतिक अग्नि का **(आविवासति)** अच्छी प्रकार सेवन करता है, **(तस्मै)** उसको यह अग्नि **(पावक)** पवित्र करनेवाला होकर **(मृळय)** सुखयुक्त करता है॥२॥९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य अपने सत्यभाव कर्म और विज्ञान से परमेश्वर का सेवन करते हैं, वे दिव्यगुण पवित्रकर्म और उत्तम-उत्तम सुखों को प्राप्त होते हैं तथा जिससे यह दिव्य गुणों का प्रकाश करनेवाला अग्नि रचा है, उस अग्नि से मनुष्यों को उत्तम-उत्तम उपकार लेने चाहिये, इस प्रकार ईश्वर का उपदेश है॥९॥

पुनरेतावुपदिश्येते।

फिर भी अगले मन्त्र में इन्हीं दोनों का उपदेश किया है-

स नः पावक दीदिवोऽग्ने देवाँ इहावह।

उप यज्ञं हविश्च नः॥१०॥

सः। नः। पावक। दीदिवः। अग्ने। देवान्। इह। आ। वह। उप। यज्ञम्। हविः। च। नः॥१०॥

पदार्थः-(**सः**) जगदीश्वरो भौतिको वा (**नः**) अस्मभ्यम् (**पावक**) पवित्रकर्त्तः शुद्धिहेतुर्वा (**दीदिवः**) स्वसामर्थ्येन देदीप्यमान दीप्तिमान् वा (**अग्ने**) सर्वप्रापक प्राप्तिहेतुर्वा (**देवान्**) विदुषो दिव्यगुणान् वा। (**इह**) अस्मिन् संसारेऽस्मत्संनिधौ (**आ**) समन्तात् (**वह**) प्रापय प्रापयति वा। अत्र पक्षे व्यत्ययः। (**उप**) सामीप्ये (**यज्ञम्**) पूर्वोक्तं त्रिविधम् (**हविः**) दातुमादातुमर्हं (**च**) समुच्चये (**नः**) अस्माकम्॥१०॥

अन्वयः-हे दीदिवः पावकाग्ने! स त्वमस्मभ्यमिह देवानावह, नोऽस्माकं यज्ञं हविश्चोपावहेत्येकः॥

अतोऽग्रे (१) प्रथमाङ्केनाद्यान्वयार्थो (२) द्वितीयेन द्वितीयार्थश्च सर्वत्र वेद्यः। यो दीदिवान् पावकोऽग्निः सम्यक् प्रयुक्तः सन्नोऽस्मभ्यमिह देवानावहति, स नोऽस्माकं यज्ञं हविश्च प्राप्य सुखान्युपावहतीति द्वितीयः॥१०॥

भावार्थः-अत्र श्लेषालङ्कारः। यस्य प्राणिनः कस्यचित्पदार्थस्य प्राप्तीच्छा जायते तत्सिद्धये परमेश्वरः प्रार्थ्यते पुरुषार्थश्च क्रियते। यादृशा अस्मिन् वेदे जगदीश्वरस्य गुणस्वभावा अन्येषां च प्रतिपादिता दृश्यन्ते मनुष्यैस्तदनुकूलकर्मानुष्ठानेनाग्न्यादिपदार्थगुणान् विदित्वाऽनेकविधा व्यवहारसिद्धिः कार्य्येति॥१०॥

पदार्थः-हे **(दीदिवः)** अपने सामर्थ्य से प्रकाशवान् **(पावक)** पवित्र करने तथा **(अग्ने)** सब पदार्थों को प्राप्त करानेवाले **(सः)** जगदीश्वर! आप **(नः)** हम लोगों के सुख के लिये **(इह)** इस संसार में **(देवान्)** विद्वानों को **(आवह)** प्राप्त कीजिये, तथा **(नः)** हमारे **(यज्ञम्)** उक्त तीन प्रकार के यज्ञ और **(हविः)** देनेलेने योग्य पदार्थों को **(उपावह)** हमारे समीप प्राप्त कीजिये॥१॥१०॥

(यः) जो **(दीदिवः)** प्रकाशमान तथा **(पावक)** शुद्धि का हेतु **(अग्ने)** भौतिक अग्नि अच्छी प्रकार कलायन्त्रों में युक्त किया हुआ **(नः)** हम लोगों के सुख के लिये **(इह)** हमारे समीप **(देवान्)** दिव्यगुणों को **(आवह)** प्राप्त करता है, वह **(नः)** हमारे तीन प्रकार के उक्त **(यज्ञम्)** यज्ञ को तथा **(हविः)** उक्त पदार्थों को प्राप्त होकर सुखों को **(उपावह)** हमारे समीप प्राप्त करता रहता है॥२॥१०॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जिस प्राणी को किसी पदार्थ की इच्छा उत्पन्न हो, वह अपनी कामसिद्धि के लिये परमेश्वर की प्रार्थना और पुरुषार्थ करे। जैसे इस वेद में जगदीश्वर के गुण, स्वभाव तथा औरों के उत्पन्न किये हुए दृष्टिगोचर होते हैं, वैसे मनुष्यों को उनके अनुकूल कर्म के अनुष्ठान से अग्नि आदि पदार्थों के गुणों को ग्रहण करके अनेक प्रकार व्यवहार की सिद्धि करना चाहिये॥१०॥

पुनरेतावुपदिश्येते।

फिर भी अगले मन्त्र में उन्हीं देवों का उपदेश किया है-

स नः स्तवानॱ आ भर गायत्रेण नवीयसा।

रयिं वीरवतीमिषम्॥११॥

सः। नः। स्तवानः। आ। भर। गायत्रेण। नवीयसा। रयिम्। वीरऽवतीम्। इषम्॥११॥

पदार्थः-(**सः**) पूर्वोक्तं **(नः)** अस्मभ्यम् **(स्तवानः)** स्तूयमानः गृहीतगुणो वा। अत्र **सम्यानच् स्तुवः।** (उणा०२.८६) इति बाहुलकात्समुपपदाभवेऽपि कर्मण्यौणादिक आनच् प्रत्ययः। अत्र सायणाचार्येण लटः स्थाने शानचमाश्रित्य स्तूयमानमिति व्याख्यानं कृतमत इदमशुद्धम्। **(आ)** समन्तात् **(भर)** धारय धारयति वा **(गायत्रेण)** गायत्री छन्द आदिर्यस्य प्रगाथस्य तेन। **सोऽस्यादिरिति च्छन्दसः प्रगाथेषु।** (अष्टा०४.२.५५) इति गायत्रीशब्दादण्। **(नवीयसा)** अतिशयितेन नवीनेन मन्त्रपाठगानयुक्तेन स्तवनेन **(रयिम्)** विद्याचक्रवर्त्तिराज्यजन्यं धनम् **(वीरवतीम्)** प्रशस्ता वीरा विद्यन्ते यस्याः ताम्। अत्र प्रशंसायां मतुप्। **(इषम्)** इष्यते या सत्क्रिया ताम्। अत्र **कृतो बहुलमि**ति कर्मणि क्विप्॥११॥

अन्वयः-हे भगवन्! स त्वं नवीयसा गायत्रेण स्तवानः सन् नो रयिं वीरवतीमिषं चाभरेत्येकः। स भौतिकोऽग्निर्नवीयसा गायत्रेणास्माभिः स्तवानो गृहीतगुणो रयिं वीरवतीमिषं चाभरतीति द्वितीयः॥११॥

भावार्थः-अत्र श्लेषालङ्कारः। पूर्वस्मान्मन्त्राच्चकारोऽनुकृष्यते। तथा प्रतिजनं नवीनं नवीनं वेदाध्ययनं तज्जन्योच्चारणक्रिया च प्रवर्त्तते तस्मान्नवीयसेत्युक्तम्। यैर्धर्मात्मभिर्मनुष्यैर्यथावच्छब्दार्थ-

सम्बन्धपुर:सरेण वेदस्याध्ययेन तदुक्तकर्मणा च प्रीत: सम्पादितो जगदीश्वर उत्तमानि विद्यादिधनानि शूरत्वादिगुणान् सतीमिच्छां च ददाति॥११॥

पदार्थ:-हे भगवन्! **(स:)** जगदीश्वर आप! **(नवीयसा)** अच्छी प्रकार मन्त्रों के नवीन पाठ गानयुक्त **(गायत्रेण)** छन्दवाले प्रगाथों से **(स्तवान:)** स्तुति को प्राप्त किये हुए **(न:)** हमारे लिये **(रयिम्)** विद्या और चक्रवर्त्ति राज्य से उत्पन्न होनेवाले धन तथा जिसमें **(वीरवतीम्)** अच्छे-अच्छे वीर तथा विद्वान् हों, उस **(इषम्)** सज्जनों के इच्छा करने योग्य उत्तम क्रिया का **(आभर)** अच्छी प्रकार धारण कीजिये॥१॥११॥

(स:) उक्त भौतिक अग्नि **(नवीयसा)** अच्छी प्रकार मन्त्रों के नवीन-नवीन पाठ तथा गानयुक्त स्तुति और **(गायत्रेण)** गायत्री छन्दवाले प्रगाथों से **(स्तवान:)** गुणों के साथ ग्रहण किया हुआ **(रयिम्)** उक्त प्रकार का धन **(च)** और **(वीरवतीम् इषम्)** उक्त गुणवाली उत्तम क्रिया को **(आभर)** अच्छी प्रकार धारण करता है॥२॥११॥

भावार्थ:-इस मन्त्र में श्लेषालङ्कार है। तथा पहिले मन्त्र से **'चकार'** की अनुवत्ति की है। हर एक मनुष्य को वेद आदि के नवीन-नवीन अध्ययन से वेद की उच्चारणक्रिया प्राप्त होती है, इस कारण **'नवीयसा'** इस पद का उच्चारण किया है। जिन धर्मात्मा मनुष्यों ने यथावत् शब्दार्थपूर्वक वेद के पढ़ने और वेदोक्त कर्मों के अनुष्ठान से जगदीश्वर को प्रसन्न किया है, उन मनुष्यों को वह उत्तम-उत्तम विद्या आदि धन तथा शूरता आदि गुणों को उत्पन्न करनेवाली श्रेष्ठ कामना को देता है, क्योंकि जो वेद के पढ़ने और परमेश्वर के सेवन से युक्त मनुष्य हैं, वे अनेक सुखों का प्रकाश करते हैं॥११॥

पुनरेतद्गुणा उपदिश्यन्ते।

फिर भी अगले मन्त्र में इन्हीं के गुणों का उपदेश किया है-

अग्नॅे शुक्रेण शोचिषा विश्वाभिर्देवहूतिभि:।

इमं स्तोमं जुषस्व न:॥१२॥२३॥

अग्नॅे। शुक्रेण। शोचिषा। विश्वाभि:। देवऽहूतिभि:। इमम्। स्तोमम्। जुषस्व। न:॥१२॥

पदार्थ:-**(अग्ने)** प्रकाशमयेश्वर भौतिको वा **(शुक्रेण)** अनन्तवीर्य्येण सह भास्वरेण वा **(शोचिषा)** शुद्धिकारकेण प्रकाशेन **(विश्वाभि:)** सर्वाभि: **(देवहूतिभि:)** विदुषां वेदानां वा वाग्भिराह्वानान्याहूतयस्ताभि: **(इमम्)** प्रत्यक्षम् **(स्तोमम्)** स्तुतिसमूहं प्रशंसनीयकलाकौशलं वा **(जुषस्व)** प्रीत्या सेवस्व, जुषते वा **(न:)** अस्माकम्॥१२॥

अन्वयः-हे अग्ने जगदीश्वर! त्वं कृपया शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिर्न इमं स्तोमं जुषस्वेत्याद्यः॥ अयमग्निविश्वाभिर्देवहूतिभिः सम्यक् साधितः सन् शुक्रेण शोचिषा न इमं स्तोमं जुषत इति द्वितीयः॥१२॥

भावार्थः-अत्र श्लेषालङ्कारः। दिव्यानां विद्यानां प्रकाशकत्वाद् देवशब्देन वेदा गृह्यन्ते। यदा मनुष्यैः सत्यभावेन वेदवाण्या जगदीश्वरः स्तूयते तदाऽयं प्रीतः संस्तान् विद्यादानेन प्रीणयति। अयं भौतिकोऽग्निरपि विद्यया कलाकौशलेन सम्प्रयोजित इन्धनादिस्थः सन् सर्वं क्रियाकाण्डं सेवते॥१२॥

अस्य द्वादशसूक्तार्थस्याग्न्यर्थयोजनैकादशसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपवासिभिर्विलसनादिभिश्चान्यथैव व्याख्यातम्॥

इत्याद्ये मण्डले द्वादशं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** प्रकाशमय ईश्वर! आप कृपा करके **(शुक्रेण)** अनन्तवीर्य के साथ **(शोचिषा)** शुद्धि करने वाले प्रकाश तथा **(विश्वाभिः)** विद्वान् और वेदों की वाणियों से सब प्राणियों के लिये **(नः)** हमारे **(इमम्)** इस प्रत्यक्ष **(स्तोमम्)** स्तुतिसमूह को **(जुषस्व)** प्रीति के साथ सेवन कीजिये॥१॥

यह **(अग्ने)** भौतिक अग्नि **(विश्वाभिः)** सब **(देवहूतभिः)** विद्वान् तथा वेदों की वाणियों से अच्छी प्रकार सिद्ध किया हुआ **(शुक्रेण)** अपनी कान्ति वा **(शोचिषा)** पवित्र करनेवाले प्रकाश से **(नः)** हमारे **(इमम्)** इस **(स्तोमम्)** प्रशंसा करने योग्य कला की कुशलता को **(जुषस्व)** सेवन करता है॥२॥१२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। दिव्यविद्याओं के प्रकाश होने से देव शब्द से वेदों का ग्रहण किया है। जब मनुष्य लोग सत्य प्रेम के साथ वेदवाणी से जगदीश्वर की स्तुति करते हैं, तब वह परमेश्वर उन मनुष्यों को विद्यादान से प्रसन्न करता है। वैसे ही यह भौतिक अग्नि भी विद्या से कलाकुशलता में युक्त किया हुआ इन्धन आदि पदार्थों में ठहर कर सब क्रियाकाण्ड का सेवन करता है॥१२॥

इस बारहवें सूक्त के अर्थ की अग्निशब्द के अर्थ के योग से ग्यारहवें सूक्त के अर्थ से सङ्गति जाननी चाहिये।

यह भी सूक्त सायणाचार्य्य आदि आर्य्यावर्तवासी तथा यूरोपदेशवासी विलसन आदि ने विपरीतता से वर्णन किया है॥

यह बारहवां सूक्त और तेईसवां वर्ग समाप्त हुआ॥

अथास्य द्वादशर्च्चस्य त्रयोदशसूक्तस्य मेधातिथिः कण्व ऋषिः। इध्मः समिद्धोऽग्निः; तनूनपात्; नराशंसः, इडः; बर्हिः; देवीर्द्वारः; उषासानक्ता; दैव्यौ होतारौ प्रचेतसौ; सरस्वतीडा भारत्यस्तिस्रो देव्यः; त्वष्टा; वनस्पतिः; स्वाहाकृतयश्च द्वादश देवताः। गायत्री छन्दः। षड्जः स्वरः॥

तत्र तावत्परमेश्वरभौतिकाग्न्योर्गुणा उपदिश्यन्ते।

अब तेरहवें सूक्त के अर्थ का आरम्भ करते हैं। इसके प्रथम मन्त्र में परमेश्वर और भौतिक अग्नि के गुणों का उपदेश किया है–

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते।
होतः पावक यक्षि च॥ १॥

सुऽसमिद्धः। नः। आ। वह। देवान्। अग्ने। हविष्मते। होतरिति। पावक। यक्षि। च॥ १॥

पदार्थः–(**सुसमिद्धः**) सम्यक् प्रदीपितः (**नः**) अस्मभ्यम् (**आ**) समन्तात् (**वह**) वहसि प्रापयसि वहति प्रापयति वा। अत्र पक्षान्तरे पुरुषव्यत्ययः। (**देवान्**) दिव्यपदार्थान् (**अग्ने**) विश्वेश्वर भौतिको वा (**हविष्मते**) बहूनि हवींषि विद्यन्ते यस्य तस्मै विदुषे। अत्र भूम्न्यर्थे मतुप्। (**होतः**) दातरादाता वा (**पावक**) पवित्रकारक पवित्रताहेतुर्वा (**यक्षि**) यजामि। अत्राडभावो लुङ आत्मनेपद उत्तमपुरुषस्यैकवचने प्रयोगो लडर्थे लुङ् च। (**च**) समुच्चये॥ १॥

अन्वयः-हे होतः पावकाग्ने विश्वेश्वर! यतः सुसमिद्धस्त्वं कृपया नोऽस्मभ्यं हविष्मते च देवानावहसि प्रापयस्यतोऽहं भवन्तं नित्यं यक्षि यजामीत्येकः। यतोऽयं पावको होता सुसमिद्धोऽग्निर्नोऽस्मभ्यं हविष्मते च देवानावहति समन्तात् प्रापयति तस्मादेतमहं नित्यं यक्षि यजामि सङ्गतं करोमीति द्वितीयः॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। यो मनुष्यो बहुविधां सामग्रीं सङ्गृह्य यानादीनां वोढारमग्निं प्रयुङ्क्ते तस्मै स विविधसुखसम्पादनहेतुर्भवतीति॥ १॥

पदार्थः–हे (**होतः**) पदार्थों को देने और (**पावक**) शुद्ध करनेवाले (**अग्ने**) विश्व के ईश्वर! जिस हेतु से (**सुसमिद्धः**) अच्छी प्रकार प्रकाशवान् आप कृपा करके (**नः**) हमारे (**च**) तथा (**हविष्मते**) जिसके बहुत हवि अर्थात् पदार्थ विद्यमान हैं, उस विद्वान् के लिये (**देवान्**) दिव्यपदार्थों को (**आवह**) अच्छी प्रकार प्राप्त करते हैं, इससे मैं आपका निरन्तर (**यक्षि**) सत्कार करता हूं॥ १॥ १॥

जिससे यह (**पावक**) पवित्रता का हेतु (**होता**) पदार्थों का ग्रहण करने तथा (**सुसमिद्धः**) अच्छी प्रकार प्रकाशवाला (**अग्ने**) भौतिक अग्नि (**नः**) हमारे (**च**) तथा (**हविष्मते**) उक्त पदार्थवाले विद्वान् के लिये (**देवान्**) दिव्यपदार्थों को (**आवह**) अच्छी प्रकार प्राप्त करता है, इससे मैं उक्त अग्नि को (**यक्षि**) कार्य्यसिद्धि के लिये अपने समीपवर्त्ती करता हूँ॥ २॥ १॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य बहुत प्रकार की सामग्री को ग्रहण करके विमान आदि यानों में सब पदार्थों के प्राप्त करानेवाले अग्नि की अच्छी प्रकार योजना करता है, उस मनुष्य के लिये वह अग्नि नाना प्रकार के सुखों को सिद्धि करानेवाला होता है॥१॥

पुनः शरीरादिसंरक्षकाग्नेर्गुणा उपदिश्यन्ते।

फिर भी अगले मन्त्र में शरीर आदि की रक्षा करनेवाले भौतिक अग्नि के गुण वर्णन किये हैं-

मधु॑मन्तं तनूनपाद्य॒ज्ञं दे॒वेषु॑ नः कवे।
अ॒द्या कृ॒णुहि वी॒तये॑॥२॥

मधु॑ऽमन्तम्। त॒नू॒ऽन॒पा॒त्। य॒ज्ञम्। दे॒वेषु॑। नः। क॒वे॒। अ॒द्य। कृ॒णु॒हि। वी॒तये॑॥२॥

पदार्थः-(**मधुमन्तम्**) मधवः प्रशस्ता रसा विद्यन्ते यस्य तम् (**तनूनपात्**) तनूनां शरीरौषध्यादीनामूनानि न्यूनान्युपाङ्गानि पाति रक्षति सः। इमं शब्दं यास्कमुनिरेवं समाचष्टे-**तनूनपात् आज्यमिति कात्थक्यः। नपादित्यननन्तरायाः प्रजाया नामधेयम्। निर्णततमा भवति। गौरत्र तनूरुच्यते। तता अस्यां भोगाः। तस्याः पयो जायते। पयस आज्यं जायते। अग्निरिति शाकपूणिः। आपोऽत्र तन्व उच्यन्ते। तता अन्तरिक्षे। ताभ्य ओषधिवनस्पतयो जायन्ते। ओषधिवनस्पतिभ्य एष जायते।** (निरु०८.५) (निरु०८.५) (**यज्ञम्**) यजनीयम् (**देवेषु**) विद्वत्सु दिव्येषु पदार्थेषु वा (**नः**) अस्माकम् (**कवे**) कविः क्रान्तदर्शनः (**अद्य**) अस्मिन् दिने। अत्र **निपातस्य च।** (अष्टा०६.३.१३६) इति सूत्रेण दीर्घः। (**कृणुहि**) करोति। अत्र व्यत्ययः, **कृवि हिंसाकरणयोश्चे**त्यस्माल्लडर्थे लोट्। **उतश्च प्रत्ययाच्छन्दो वा वचनम्।** (अष्टा०६.४.१०६) इति वार्त्तिकेन हेर्लुगभावः। (**वीतये**) प्राप्तये॥२॥

अन्वयः-यस्तूनपात्कविरग्निर्देवेषु सुखस्य वीतयेऽद्य नो मधुमन्तं यज्ञं कुणुहि कृणोति॥२॥

भावार्थः-यदाऽग्नौ हविर्हूयते तदैवायं वाय्वादीन् शुद्धान् कृत्वा शरीरौषध्यादीन् रक्षयित्वाऽनेकविधान् रसान् जनयति, तैः शुद्धैर्भुक्तैश्च प्राणिनां विद्याज्ञानबलवृद्धिरपि जायत इति॥२॥

पदार्थः-जो (**तनूनपात्**) शरीर तथा ओषधि आदि पदार्थों के छोटे-छोटे अंशों का भी रक्षा करने और (**कवे**) सब पदार्थों का दिखलानेवाला अग्नि है, वह (**देवेषु**) विद्वानों तथा दिव्यपदार्थों में (**वीतये**) सुख प्राप्त होने के लिये (**अद्य**) आज (**नः**) हमारे (**मधुमन्तम्**) उत्तम-उत्तम रसयुक्त (**यज्ञम्**) यज्ञ को (**कृणुहि**) निश्चित करता है॥२॥

भावार्थः-जब अग्नि में सुगन्धि आदि पदार्थों का हवन होता है, तभी वह यज्ञ वायु आदि पदार्थों को शुद्ध तथा शरीर और ओषधि आदि पदार्थों की रक्षा करके अनेक प्रकार के रसों को उत्पन्न करता है, तथा वह यज्ञ उन शुद्ध पदार्थों के भोग से प्राणियों के विद्या ज्ञान और बल की वृद्धि भी होती है॥२॥

नरैः प्रशंसनीयस्य भौतिकाग्नेर्गुणा उपदिश्यन्ते।

अब अगले मन्त्र में मनुष्यों के प्रशंसा करने योग्य भौतिक अग्नि के गुणों का उपदेश किया है-

नरा॒शंस॑मि॒ह प्रि॒यम॒स्मिन् य॒ज्ञ उप॑ ह्वये।

मधु॑जिह्वं हवि॒ष्कृत॑म्॥ ३॥

नरा॒ऽशंस॑म्। इ॒ह। प्रि॒यम्। अ॒स्मिन्। य॒ज्ञे। उप॑। ह्व॒ये॒। मधु॑ऽजिह्वम्। ह॒वि॒ःऽकृत॑म्॥ ३॥

पदार्थः-(**नराशंसम्**) नरैरभितः शस्यते प्रशस्यते तं सुखसमूहकारकम्। **नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्त्यग्निमिति शाकपूणिर्नरैः प्रशस्यो भवति।** (निरु०८.६) (**इह**) अस्मद्भोगविषये संसारे (**प्रियम्**) प्रीणति सर्वान् प्राणिनस्तम् (**अस्मिन्**) प्रत्यक्षे (**यज्ञे**) यष्टव्ये (**उप**) उपगतभोगद्योतने (**ह्वये**) उपतापये (**मधुजिह्वम्**) मधुरगुणसम्पादिका जिह्वा ज्वाला यस्य तम्। **जिह्वा जोहुवा।** (निरु०५.२६) **काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरूपी च देवी लेलायमाना इति सप्त जिह्वाः॥** इति मुण्डकोपनि० (मुण्डक १.२.४) (**हविष्कृतम्**) हविर्भिः क्रियते तम्। अत्र वर्त्तमानकाले कर्मण्यौणादिकः क्तः प्रत्ययः॥ ३॥

अन्वयः-अहमस्मिन् यज्ञे इह संसारे च हविष्कृतं मधुजिह्वं प्रियं नराशंसमग्निमुपह्वय उपगम्योपतापये॥ ३॥

भावार्थः-योऽयं भौतिकोऽग्निरस्मिन् जगति युक्त्या सेवितः प्राणिनां प्रियकारी भवति, तस्याऽग्नेः सप्त जिह्वाः सन्ति। काली=शुक्लादिवर्णप्रकाशिका, कराली=दुःसहा, मनोजवा=मनोवद्वेगवती, सुलोहिता=शोभनो लोहितो रक्तो वर्णो यस्याः सा, सुधूम्रवर्णा=शोभनो धूम्रो वर्णो यस्याः सा, स्फुल्लिङ्गिनी=बहवः स्फुल्लिङ्गाः कणा विद्यन्ते यस्यां सा। अत्र भूम्न्यर्थ इनिः। विश्वरूपी=विश्वं सर्वं रूपं यस्याः सा। इति सप्तविधा। पुनः सा किं भूता देवी देदीप्यमाना, लेलायमाना लेलायति सर्वत्र प्रकाशयति या सा। अत्र **लेला दीप्ता**वित्यस्मात् कण्ड्वादित्वाद्यक्। व्यत्ययेनात्मनेपदं च। सा जिह्वाऽर्थाज्जोहुवा पुनः पुनः सर्वान् पदार्थान् जुहोत्यादत्तेऽसाविति॥ ३॥

पदार्थः-मैं (**अस्मिन्**) इस (**यज्ञे**) अनुष्ठान करने योग्य यज्ञ तथा (**इह**) संसार में (**हविष्कृतम्**) जो कि होम करने योग्य पदार्थों से प्रदीप्त किया जाता है और (**मधुजिह्वम्**) जिसकी काली, कराली, मनोजवा, सुलोहिता, सुधूम्रवर्णा, स्फुल्लिङ्गिनी और विश्वरूपी ये अति प्रकाशमान चपल ज्वालारूपी जीभें हैं (**प्रियम्**) जो सब जीवों को प्रीति देने और (**नराशंसम्**) जिस सुख की मनुष्य प्रशंसा करते हैं, उसके प्रकाश करनेवाले अग्नि को (**उपह्वये**) समीप प्रज्वलित करता हूं॥ ३॥

भावार्थः-जो भौतिक अग्नि इस संसार में होम के निमित्त युक्ति से ग्रहण किया हुआ प्राणियों की प्रसन्नता करानेवाला है, उस अग्नि की सात जीभें हैं अर्थात् काली जो कि सुपेद आदि रंग का प्रकाश करनेवाली, कराली-सहने में कठिन, मनोजवा-मन के समान वेगवाली, सुलोहिता-जिसका उत्तम रक्तवर्ण है, सुधूम्रवर्णा-जिसका सुन्दर धुमलासा वर्ण है, स्फुल्लिंगिनी-जिससे बहुत से चिनगे उठतें हों

तथा विश्वरूपी–जिसका सब रूप हैं। ये देवी अर्थात् अतिशय करके प्रकाशमान और लेलायमाना–प्रकाश से सब जगह जानेवाली सात प्रकार की जिह्वा हैं अर्थात् सब पदार्थों को ग्रहण करनेवाली होती हैं। इस उक्त सात प्रकार की अग्नि की जीभों से सब पदार्थों में उपकार लेना मनुष्यों को चाहिये॥३॥

स एवमुपकृतः किंहेतुको भवतीत्युपदिश्यते।

उक्त अग्नि इस प्रकार उपकार में लिया हुआ किसका हेतु होता है, सो उपदेश अगले मन्त्र में किया है–

अग्ने॑ सु॒खत॑मे॒ रथे॑ दे॒वाँ ई॑डि॒त आ व॑ह।
असि॒ होता॒ मनु॑र्हितः॥४॥

अग्ने॑। सु॒खऽत॑मे। रथे॑। दे॒वान्। ई॒डि॒तः। आ। व॒ह॒। असि॑। होता॑ मनु॑ः। हि॒तः॥४॥

पदार्थः–(**अग्ने**) भौतिकोऽयमग्निः (**सुखतमे**) अतिशयितानि सुखानि यस्मिन् (**रथे**) गमनहेतौ रमणसाधने विमानादौ (**देवान्**) विदुषो भोगान्वा (**ईडितः**) मनुष्यैरध्येषितोऽधिष्ठितः (**आ**) समन्तात् (**वह**) वहति प्रापयति। अत्र सर्वत्र व्यत्ययः। (**असि**) अस्ति (**होता**) सुखदाता (**मनुः**) विद्वद्भिः क्रियासिध्यर्थं यो मन्यते (**हितः**) धृतः सन् हितकारी॥४॥

अन्वयः-मनुष्यैर्योऽग्निर्मनुर्होतेडितोऽस्ति स सुखतमे रथे हितः स्थापितः सन् देवानावहय समन्ताद्वहति देशान्तरं प्रापयति॥४॥

भावार्थः-मनुष्यैर्बहुकलासमन्वितो भूजलान्तरिक्षगमनहेतुरग्निर्जलादिना सह सम्प्रयोजितस्त्रिविधे रथे हितकारी सुखतमो भूत्वा बहुकार्य्यसिद्धिप्रापको भवतीति बोध्यम्॥४॥

पदार्थः–जो (**अग्ने**) भौतिक अग्नि (**मनुः**) विद्वान् लोग जिसको मानते हैं तथा (**होता**) सब सुखों का देने और (**ईडितः**) मनुष्यों को स्तुति करने योग्य (**असि**) है, वह (**सुखतमे**) अत्यन्त सुख देने तथा (**रथे**) गमन और विहार करानेवाले विमान आदि सवारियों में (**हितः**) स्थापित किया हुआ (**देवान्**) दिव्य भोगों को (**आवह**) अच्छे प्रकार देशान्तर में प्राप्त करता है॥४॥

भावार्थः-मनुष्यों को बहुत कलाओं से संयुक्त पृथिवी जल और अन्तरिक्ष में गमन का हेतु तथा अग्नि वा जल आदि पदार्थों से संयुक्त तीन प्रकार का रथ कल्याणकारक तथा अत्यन्त सुख देनेवाला होकर बहुत उत्तम–उत्तम कार्य्यों की सिद्धि को प्राप्त करानेवाला होता है॥४॥

पुनः स एवं सम्प्रयुक्तः किं करोतीत्युपदिश्यते।

फिर वह भौतिक अग्नि उक्त प्रकार से क्रिया में युक्त किया हुआ क्या करता है, सो अगले मन्त्र में उपदेश किया है–

स्तृ॒णी॒त ब॒र्हिरा॑नु॒षग्घृ॒तपृ॑ष्ठं मनीषिणः।

यत्रामृतस्य चक्षणम्॥५॥

स्तृणीत। बर्हिः। आनुषक्। घृतपृष्ठम्। मनीषिणः। यत्र। अमृतस्य। चक्षणम्॥५॥

पदार्थः-(**स्तृणीत**) आच्छादयत (**बर्हिः**) अन्तरिक्षम् (**आनुषक्**) अभितो यदनुषङ्गि तत् (**घृतपृष्ठम्**) घृतमुदकं पृष्ठे यस्मिँस्तत् (**मनीषिणः**) मेधाविनो विद्वांसः। **मनीषीति मेधाविनामसु पठितम्।** (निघं०३.१५) (**यत्र**) यस्मिन्नन्तरिक्षे (**अमृतस्य**) उदकसमूहस्य। **अमृतमित्युदकनामसु पठितम्।** (निघं०१.१२) (**चक्षणम्**) दर्शनम्। **'चक्षिङ् दर्शने'** इत्यस्माल्ल्युटि प्रत्यये परे **असनयोश्च।** (अष्टा०२.४.५४) इति वार्तिकेन ख्याञादेशाभावः॥५॥

अन्वयः-हे मनीषिणो यत्रामृतस्य चक्षणं वर्तते तदानुषग्घृतपृष्ठं बर्हिः स्तृणीताच्छादयत॥५॥

भावार्थः-विद्वद्भिरग्नौ यद् घृतादिकं प्रक्षिप्यते तदन्तरिक्षानुगतं भूत्वा तत्रस्थस्य जलसमूहस्य शोधकं जायते, तच्च सुगन्ध्यादिगुणैः सर्वान् पदार्थानाच्छाद्य सर्वान् प्राणिनः सुखयुक्तान् सद्यः सम्पादयतीति॥५॥

पदार्थः-हे (**मनीषिणः**) बुद्धिमान् विद्वानो! (**यत्र**) जिस अन्तरिक्ष में (**अमृतस्य**) जलसमूह का (**चक्षणम्**) दर्शन होता है, उस (**आनुषक्**) चारों ओर से घिरे और (**घृतपृष्ठम्**) जल से भरे हुए (**बर्हिः**) अन्तरिक्ष को (**स्तृणीत**) होम के धूम से आच्छादन करो, उसी अन्तरिक्ष में अन्य भी बहुत पदार्थ जल आदि को जानो॥५॥

भावार्थः-विद्वान् लोग अग्नि में जो घृत आदि पदार्थ छोड़ते हैं, वे अन्तरिक्ष को प्राप्त होकर वहां के ठहरे हुए जल को शुद्ध करते हैं, और वह शुद्ध हुआ जल सुगन्धि आदि गुणों से सब पदार्थों को आच्छादन करके सब प्राणियों को सुखयुक्त करता है॥५॥

अथ गृहयज्ञशालायानानि चानेकद्वाराणि रचनीयानीत्युपदिश्यते।

अब अगले मन्त्र में घर यज्ञशाला और विमान आदि रथ अनेक द्वारों के सहित बनाने चाहियें,
इस विषय का उपदेश किया है-

वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः।

अद्या नूनं च यष्टवे॥६॥२४॥

वि। श्रयन्ताम्। ऋतऽवृधः। द्वारः। देवीः। असश्चतः। अद्य। नूनम्। च। यष्टवे॥६॥

पदार्थः-(**वि**) विविधार्थे (**श्रयन्ताम्**) सेवन्ताम् (**ऋतावृधः**) या ऋतं सत्यं सुखं जलं वा वर्धयन्ति ताः। अत्र **अन्येषामपि०** इति दीर्घः। (**द्वारः**) द्वाराणि (**देवीः**) द्योतमानाः। अत्र **वा च्छन्दसि** इति जसः पूर्वसवर्णत्वम्। (**असश्चतः**) विभागं प्राप्ताः। अत्र **सस्ज गतौ** इत्यस्य व्यत्ययेन जकारस्य चकारः।

(अद्य) अस्मिन्नहनि। अत्र **निपातस्य च** इति दीर्घः। **(नूनम्)** निश्चये **(च)** समुच्चये **(यष्टवे)** यष्टुम्। अत्र **'यज'** धातोस्तवेन् प्रत्ययः॥६॥

अन्वयः-हे मनीषिणोऽद्य यष्टवे गृहादेरसश्चत ऋतावृधो देवीर्द्वारो नूनं विश्रयन्ताम्॥६॥

भावार्थः-मनुष्यैरनेकद्वाराणि गृहयज्ञशालायानानि रचयित्वा तत्र स्थितिं हवनं गमनागमने च कर्त्तव्ये॥६॥

इति चतुर्विंशो वर्गः समाप्तः॥

पदार्थः-हे **(मनीषिणः)** बुद्धिमान् विद्वानो! **(अद्य)** आज **(यष्टवे)** यज्ञ करने के लिये घर आदि के **(असश्चतः)** अलग-अलग **(ऋतावृधः)** सत्य सुख और जल के वृद्धि करनेवाले **(देवीः)** तथा प्रकाशित **(द्वारः)** दरवाजों का **(नूनम्)** निश्चय से **(विश्रयन्ताम्)** सेवन करो अर्थात् अच्छी रचना से उनको बनाओ॥६॥

भावार्थः-मनुष्यों को अनेक प्रकार के द्वारों के घर, यज्ञशाला और विमान आदि यानों को बनाकर उनमें स्थिति होम और देशान्तरों में जाना-आना करना चाहिये॥६॥

यह चौबीसवां वर्ग समाप्त हुआ॥

तत्रैतेनाहोरात्रे सुखं भवतीत्युपदिश्यते।

उक्त कर्म से दिनरात सुख होता है, सो अगले मन्त्र में प्रकाशित किया है-

नक्तोषसा सुपेशसास्मिन् यज्ञ उप ह्वये।
इदं नो बर्हिरासदे॥७॥

नक्तोषसा। सुऽपेशसा। अस्मिन्। यज्ञे। उप। ह्वये। इदम्। नः। बर्हिः। आऽसदे॥७॥

पदार्थः-**(नक्तोषसा)** नक्तं चोषाश्चाहश्च रात्रिश्च ते। अत्र **सुपां सुलुग्०** इति औकारस्थाने आकारादेशः। **नक्तमिति रात्रिनामसु पठितम्।** (निघं०१.७) **उषा सा नक्तोषाश्च नक्ता चोषा व्याख्याता नक्तेति रात्रिनामानक्ति भूतान्यवश्यायेनापि वा नक्ता व्यक्तवर्णा।** (निरु०८.१०) **(सुपेशसा)** शोभनं सुखदं पेशो रूपं ययोस्ते। अत्र पूर्ववदाकारादेशः। **पेश इति रूपनामसु पठितम्।** (निघं०३.७) **(अस्मिन्)** प्रत्यक्षे गृहे **(यज्ञे)** सङ्गते कर्त्तव्ये **(उप)** सामीप्ये **(ह्वये)** स्पर्द्धे **(इदम्)** प्रत्यक्षम् **(नः)** अस्माकम् **(बर्हिः)** निवासप्रापकं स्थानम्। **बर्हिरिति पदनामसु पठितम्।** (निघं०५.२) अतः प्राप्त्यर्थो गृह्यते। **(आसदे)** समन्तात् सीदन्ति प्राप्नुवन्ति सुखानि यस्यां साऽऽसत्तस्यै॥७॥

अन्वयः-अहमस्मिन् गृहे यज्ञे सुपेशसौ नक्तोषसावुपह्वय उपस्पर्द्धे, यतो नोऽस्माकमिदं बर्हिरासदे भवेत्॥७॥

भावार्थः-मनुष्यैरत्र विद्ययोपकृतेऽरात्रे सर्वप्राणिनां सुखहेतू भवत इति बोध्यम्॥७॥

पदार्थः-मैं **(अस्मिन्)** इस घर तथा **(यज्ञे)** सङ्गत करने के कामों में **(सुपेशसा)** अच्छे रूपवाले **(नक्तोषसा)** रात्रिदिन को **(उपह्वये)** उपकार में लाता हूं, जिस कारण **(नः)** हमारा **(बर्हिः)** निवासस्थान **(आसदे)** सुख की प्राप्ति के लिये हो॥७॥

भावार्थः-मनुष्यों को उचित है कि इस संसार में विद्या से सदैव उपकार लेवें, क्योंकि रात्रिदिन सब प्राणियों के सुख का हेतु होता है॥७॥

तत्र शोधकौ प्रसिद्धाप्रसिद्धावग्नी उपदिश्येते।

अब अगले मन्त्र में उन अग्नियों का उपदेश किया है कि जो शुद्ध करनेवाले विद्युत्रूप से अप्रसिद्ध और प्रत्यक्ष स्थूलरूप से प्रसिद्ध हैं-

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी।

यज्ञं नो यक्षतामिमम्॥८॥

ता। सुऽजिह्वौ। उप। ह्वये। होतारा। दैव्या। कवी। यज्ञम्। नः। यक्षताम्। इमम्॥८॥

पदार्थः-**(ता)** तौ। अत्र सर्वत्र द्वितायाया द्विवचनस्य स्थाने **सुपां सुलुग्०** इत्याच् आदेशः। **(सुजिह्वौ)** शोभनाः पूर्वोक्ताः सप्त जिह्वा ययोस्तौ **(उप)** समीपगमनार्थे **(ह्वये)** स्पर्द्धे **(होतारा)** आदातारौ **(दैव्या)** दिव्येषु पदार्थेषु भवौ। **देवाद्यञञौ।** (अष्टा०४.१.८५) इति वार्त्तिकेन प्राग्दीव्यतीयेष्वर्थेषु यञ् प्रत्ययः। **(कवी)** क्रान्तदर्शनौ **(यज्ञम्)** हवनशिल्पविद्यामयम् **(नः)** अस्माकम् **(यक्षताम्)** यजतः सङ्गमयतः। अत्र **सिब्बहुलं लेटि** इति बहुलग्रहणाल्लोटि प्रथमपुरुषस्य द्विवचने शपः पूर्वं सिप्। **(इमम्)** प्रत्यक्षम्॥८॥

अन्वयः-अहं क्रियाकाण्डाऽनुष्ठाताऽस्मिन् गृहे यौ नोऽस्माकमिमं यज्ञं यक्षतां सङ्गमयस्तौ सुजिह्वौ होतारौ कवी दैव्यावुपह्वये सामीप्ये स्पर्द्धे॥८॥

भावार्थः-यथैका विद्युद्वेगाद्यनेकदिव्यगुणयुक्ताऽस्त्येवं प्रसिद्धोऽप्यग्निर्वर्त्तते। एतौ सकलपदार्थदर्शनहेतू अग्नी सम्यङ् नियुक्तौ शिल्पाद्यनेककार्य्यसिद्धिहेतू भवतस्तस्मादेताभ्यां मनुष्यैः सर्वोपकारा ग्राह्या इति॥८॥

पदार्थः-मैं क्रियाकाण्ड का अनुष्ठान करनेवाला इस घर में जो **(नः)** हमारे **(इमम्)** प्रत्यक्ष **(यज्ञम्)** हवन वा शिल्पविद्यामय यज्ञ को **(यक्षताम्)** प्राप्त करते हैं, उन **(सुजिह्वौ)** सुन्दर पूर्वोक्त सात जीभ **(होतारा)** पदार्थों का ग्रहण करने **(कवी)** तीव्र दर्शन देने और **(दैव्या)** दिव्य पदार्थों में रहनेवाले प्रसिद्ध और अप्रसिद्ध अग्नियों को **(उपह्वये)** उपकार में लाता हूं॥८॥

भावार्थः-जैसे एक बिजुली वेग आदि अनेक गुणवाला अग्नि है, इसी प्रकार प्रसिद्ध अग्नि भी है। तथा ये दोनों सकल पदार्थों के देखने में और अच्छे प्रकार क्रियाओं में नियुक्त किये हुए शिल्प आदि अनेक कार्य्यों की सिद्धि के हेतु होते हैं। इसलिये इन्हों से मनुष्यों को सब उपकार लेने चाहियें॥८॥

तत्र त्रिधा क्रिया प्रयोज्येत्युपदिश्यते।

वहां तीन प्रकार की क्रिया का प्रयोग करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

इळा॒ सर॑स्वती म॒ही ति॒स्रो दे॒वीर्म॑यो॒भुव॑:।
ब॒र्हिः सी॑दन्तु अस्रिध॑:॥९॥

इळा॑। सर॑स्वती। म॒ही। ति॒स्रः। दे॒वीः। म॒यः॒ऽभुव॑:। ब॒र्हिः। सी॒द॒न्तु॒। अ॒स्रि॒ध॑:॥९॥

पदार्थः-**(इडा)** ईड्यते स्तूयतेऽनया सा वाणी। **इडेति वाङ्नामसु पठितम्।** (निघं०१.११) अत्र **'इड'** धातोः कर्मणि बाहुलकादौणादिकोऽन्प्रत्ययो ह्रस्वत्वं च। **वा छन्दसि सर्वे विधयो भवन्ति** इति गुणादेशाभावश्च। अत्र **सायणाचार्य्येण टापं चैव हलन्तानामि**त्यशास्त्रीयवचनस्वीकारादशुद्धमेवोक्तम्। **(सरस्वती)** सरो बहुविधं विज्ञानं विद्यते यस्याः सा। अत्र भूम्न्यर्थे मतुप्। **(मही)** महती पूज्या नीतिर्भूमिर्वा **(तिस्रः)** त्रिप्रकारकाः **(देवीः)** देदीप्यमाना दिव्यगुणहेतवः। अत्र **वा छन्दसि** इति जसः पूर्वसवर्णत्वम्। **(मयोभुवः)** या मयः सुखं भावयन्ति ताः। **मय इति सुखनामसु पठितम्।** (निघं०३.६) **(बर्हिः)** प्रतिगृहादिकम्। **बर्हिरिति पदनामसु पठितम्।** (निघं०५.२) तस्मादत्र ज्ञानार्थो गृह्यते। **(सीदन्तु)** सादयन्तु। अत्रान्तर्गतो ण्यर्थः। **(अस्रिधः)** अहिंसनीयः॥९॥

अन्वयः-हे विद्वांसो भवन्त इडा सरस्वती मह्यस्रिधो मयोभुवस्तिस्रो देवीर्बर्हिः प्रतिगृहादिकम् सीदन्तु सादयन्तु॥९॥

भावार्थः-मनुष्यैरिडापठनपाठनप्रेरिका सरस्वती ज्ञानप्रकाशिकोपदेशाख्या मही सर्वथा पूज्या कुतर्केण ह्यखण्डनीया सर्वसुखा नीतिश्चेति त्रिविधा सदा स्वीकार्य्या, यतः खल्वविद्यानाशो विद्याप्रकाशश्च भवेत्॥९॥

पदार्थः-हे विद्वानो! तुम लोग एक **(इडा)** जिससे स्तुति होती, दूसरी **(सरस्वती)** जो अनेक प्रकार विज्ञान का हेतु, और तीसरी **(मही)** बड़ो में बड़ी पूजनीय नीति है, वह **(अस्रिधः)** हिंसारहित और **(मयोभुवः)** सुखों का सम्पादन करानेवाली **(देवी)** प्रकाशवान् तथा दिव्य गुणों को सिद्ध कराने में हेतु जो **(तिस्रः)** तीन प्रकार की वाणी है, उसको **(बर्हिः)** घर-घर के प्रति **(सीदन्तु)** यथावत् प्रकाशित करो॥९॥

भावार्थः-मनुष्यों को **'इडा'** जो कि पठनपाठन की प्रेरणा देनेहारी, **'सरस्वती'** जो उपदेशरूप ज्ञान का प्रकाश करने, और **'मही'** जो सब प्रकार से प्रशंसा करने योग्य है, ये तीनों वाणी कुतर्क से

खण्डन करने योग्य नहीं हैं, तथा सब सुख के लिये तीनों प्रकार की वाणी सदैव स्वीकार करनी चाहिये, जिससे निश्चलता से अविद्या का नाश हो॥९॥

पुनस्तत्र किं किं कार्य्यमित्युपदिश्यते।

फिर वहां क्या-क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

इ॒ह त्वष्टा॑रमग्रि॒यं वि॒श्वरू॑प॒मुप॑ ह्वये।

अ॒स्माक॑मस्तु॒ केव॑लः॥ १०॥

इ॒ह। त्वष्टा॑रम्। अ॒ग्रि॒यम्। वि॒श्वऽरू॑पम्। उप॑। ह्व॒ये॒। अ॒स्माक॑म्। अ॒स्तु॒। केव॑लः॥ १०॥

पदार्थः-(**इह**) अस्यां शिल्पविद्यायामस्मिन् गृहे वा (**त्वष्टारम्**) दुःखानां छेदकं सर्वपदार्थानां विभाजितारं वा (**अग्रियम्**) सर्वेषां वस्तूनां साधनानां वा अग्रे भवम्। **घछौ च।** (अष्टा०४.४.११८) इति सूत्रेण भवार्थे घः प्रत्ययः। (**विश्वरूपम्**) विश्वस्य रूपं यस्मिन् परमात्मनि वा विश्वः सर्वो रूपगुणो यस्य तम् (**उप**) सामीप्ये (**ह्वये**) स्पर्द्धे (**अस्माकम्**) उपासकानां हवनशिल्पविद्यासाधकानां वा (**अस्तु**) भवतु भवति। अत्र पक्षे व्यत्ययः। (**केवलः**) एक एवेष्टोऽसाधरणसाधनो वा॥१०॥

अन्वयः-अहं यं विश्वरूपमग्रियं त्वष्टारमग्निं परमात्मानमिहोपह्वये सम्यक् स्पर्द्धे स एवास्माकं केवल इष्टोऽस्त्वित्येकः। अहं यं विश्वरूपमग्रियं त्वष्टारं भौतिकमग्निमिहोपह्वये सोऽस्माकं केवलोऽसाधारणसाधनोऽस्तु भवतीति द्वितीयः॥१०॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैरनन्तानन्दप्रद ईश्वर एवोपास्योऽस्ति। तथाऽयमग्निः सर्वपदार्थच्छेदको रूपगुणः सर्वद्रव्यप्रकाशकोऽनुत्तमः शिल्पविद्याया अद्वितीयसाधनोऽस्माकं यथावदुपयोक्तव्योऽस्तीति मन्तव्यम्॥१०॥

पदार्थः-मैं जिस (**विश्वरूपम्**) सर्वव्यापक (**अग्रियम्**) सब वस्तुओं के आगे होने तथा (**त्वष्टारम्**) सब दुःखों के नाश करनेवाले परमात्मा को (**इह**) इस घर में (**उपह्वये**) अच्छी प्रकार आह्वान करता हूं, वही (**अस्माकम्**) उपासना करनेवाला हम लोगों का (**केवलः**) इष्ट और स्तुति करने योग्य (**अस्तु**) हो॥१॥१०॥

और मैं (**विश्वरूपम्**) जिसमें सब गुण हैं, (**अग्रियम्**) सब साधनों के आगे होने तथा (**त्वष्टारम्**) सब पदार्थों को अपने तेज से अलग-अलग करनेवाले भौतिक अग्नि के (**इह**) इस शिल्पविद्या में (**उपह्वये**) जिसको युक्त करता हूं, वह (**अस्माकम्**) हवन तथा शिल्पविद्या के सिद्ध करनेवाले हम लोगों का (**केवलः**) अत्युत्तम साधन (**अस्तु**) होता है॥२॥१०॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को अनन्त सुख देनेवाले ईश्वर ही की उपासना करनी चाहिये तथा जो यह भौतिक अग्नि सब पदार्थों का छेदन करने, सब रूप गुण और पदार्थों का

प्रकाश करने, सब से उत्तम और हम लोगों की शिल्पविद्या का अद्वितीय साधन है, उसका उपयोग शिल्पविद्या में यथावत् करना चाहिये॥१०॥

सोऽग्निः केन प्रदीप्तः सन्नेत्कार्य्यं साधयतीत्युपदिश्यते।

वह अग्नि किससे प्रज्वलित हुआ इन कार्य्यों को सिद्ध करता है, इसका उपदेश अगले मन्त्र में किया है-

अव॑ सृजा वनस्पते॒ देव॑ दे॒वेभ्यो॑ ह॒विः।

प्र दा॒तुर॑स्तु॒ चेत॑नम्॥ ११॥

अव॑। सृ॒ज॒। व॒न॒स्प॒ते॒। देव॑। दे॒वेभ्यः॑। ह॒विः। प्र। दा॒तुः॒। अ॒स्तु॒। चेत॑नम्॥ ११॥

पदार्थः-(**अव**) विनिग्रहार्थीयः (**सृज**) सृजति। अत्र व्यत्ययः। **द्व्यचोऽस्तिङ** इति दीर्घः। (**वनस्पते**) यो वनानां वृक्षौषध्यादिसमूहानामधिकवृष्टिहेतुत्वेन पालयितास्ति सोऽपुष्पफलवान्। **अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः।** (मनु०१.४७) (**देव**) देवः फलादीनां दाता (**देवेभ्यः**) दिव्यगुणेभ्यः (**हविः**) हवनीयम्। (**प्र**) प्रकृष्टार्थे (**दातुः**) शोधयतुः। '**दैप् शोधने**' इत्यस्य रूपम्। (**अस्तु**) भवति। अत्र लडर्थे लोट्। (**चेतनम्**) चेतयति येन तत्॥११॥

अन्वयः-अयं देवो वनस्पतिर्देवेभ्यस्तद्धविरवसृजति यत्प्रदातुः सर्वपदार्थशोधयितुर्विदुषश्चेतनमस्तु भवति॥११॥

भावार्थः-मनुष्यैः पृथिवीजलमयाः सर्वे पदार्था युक्त्या सम्प्रयोजिता अग्नेः प्रदीपका भूत्वा रोगाणां विनिग्रहेण बुद्धिबलप्रदत्वाद्विज्ञानवृद्धिहेतवो भूत्वा दिव्यगुणान् प्रकाशयन्तीति॥११॥

पदार्थः-जो (**देव**) फल आदि पदार्थों को देनेवाला (**वनस्पतिः**) वनों के वृक्ष और ओषधि आदि पदार्थों को अधिक वृष्टि के हेतु से पालन करनेवाला (**देवेभ्यः**) दिव्यगुणों के लिये (**हविः**) हवन करने योग्य पदार्थों को (**अवसृज**) उत्पन्न करता है, वह (**प्रदातुः**) सब पदार्थों की शुद्धि चाहने वाले विद्वान् जन के (**चेतनम्**) विज्ञान को उत्पन्न करानेवाला (**अस्तु**) होता है॥

भावार्थः-मनुष्यों ने पृथिवी तथा सब पदार्थ जलमय युक्ति से क्रियाओं में युक्त किये हुए अग्नि से प्रदीप्त होकर रोगों की निर्मूलता से बुद्धि और बल को देने के कारण ज्ञान के बढ़ाने के हेतु होकर दिव्यगुणों का प्रकाश करते हैं॥११॥

एतं क्रियाकाण्डं मनुष्याः कथं कुर्य्युरित्युपदिश्यते।

इस क्रियाकाण्ड को मनुष्य लोग किस प्रकार से करें, सो उपदेश अगले मन्त्र में किया है-

स्वाहा॑ य॒ज्ञं कृ॑णोत॒नेन्द्रा॑य॒ यज्व॑नो गृ॒हे।

तत्र॑ दे॒वाँ उप॑ ह्वये॥ १२॥ २५॥

स्वाहा॑। य॒ज्ञम्। कृ॒णो॒त॒न॒। इन्द्रा॑य। यज्व॑नः। गृ॒हे। तत्र॑। दे॒वान्। उप॑। ह्व॒ये॒॥ १२॥

पदार्थः-(**स्वाहा**) या सत्क्रियासमूहास्ति तया (**यज्ञम्**) त्रिविधम् (**कृणोतन**) कुरुत। अत्र तकारस्थाने तनबादेशः। (**इन्द्राय**) परमैश्वर्य्यकरणाय (**यज्वनः**) यज्ञाऽनुष्ठातुः। अत्र **सुयजोर्ङ्वनिप्।** (अष्टा०३.२.१०३) अनेन '**यज**' धातोर्ङ्वनिप् प्रत्ययः। (**गृहे**) निवासस्थाने यज्ञशालायां कलाकौशलसिद्धविमानादियानसमूहे वा (**तत्र**) तेषु कर्मसु (**देवान्**) परमविदुषः (**उप**) निकाटार्थे (**ह्वये**) आह्वये॥ १२॥

अन्वयः-हे शिल्पकारिण ऋत्विजो! यथा यूयं यत्र यज्वनो गृह इन्द्राय देवानाहूय स्वाहा यज्ञं कृणोतन तथा तत्राऽहं तानुपह्वये॥ १२॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। मनुष्या विद्याक्रियावन्तो भूत्वा सम्यग्विचारेण क्रियासमूहजन्यं कर्मकाण्डं गृहे गृहे नित्यं कुर्वन् तत्र च विदुषामाह्वानं कृत्वा स्वयं वा तत्समीपं गत्वा तद्विद्याक्रियाकौशले स्वीकुर्वन्तु। नैव कदाचिद्युष्माभिरालस्येनैते उपेक्षणीये इति परमेश्वर उपदिशति॥ १२॥

अस्य त्रयोदशसूक्तार्थस्याग्न्यादिदिव्यपदार्थोपकारग्रहणार्थोक्तरीत्या द्वादशसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशवासिभिर्विलसनादिभिश्चान्यथैव व्याख्यातम्॥

इति त्रयोदशं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे शिल्पविद्या के सिद्ध यज्ञ करने और करानेवाले विद्वानो! तुम लोग जैसे जहां (**यज्वनः**) यज्ञकर्त्ता के (**गृहे**) घर यज्ञशाला कलाकुशलता से सिद्ध किये हुए विमान आदि यानों में (**इन्द्राय**) परमैश्वर्य्य की प्राप्ति के लिये परम विद्वानों को बुलाके (**स्वाहा**) उत्तम क्रियासमूह के साथ (**यज्ञम्**) जिस तीनों प्रकार के यज्ञ को (**कृणोतन**) सिद्ध करनेवाले हों, वैसे वहां मैं (**देवान्**) उन उक्त चतुर श्रेष्ठ विद्वानों को (**उपह्वये**) प्रार्थना के साथ बुलाता रहूं॥ १२॥

भावार्थः-मनुष्य लोग विद्या तथा क्रियावान् होकर यथायोग्य बने हुए स्थानों में उत्तम विचार से क्रियासमूह से सिद्ध होनेवाले कर्मकाण्ड को नित्य करते हुए और वहां विद्वानों को बुलाकर वा आप ही उनके समीप जाकर उनकी विद्या और क्रिया की चतुराई को ग्रहण करें। हे सज्जन लोगो! तुमको विद्या और क्रिया की कुशलता आलस्य से कभी नहीं छोड़नी चाहिये, क्योंकि ऐसी ही ईश्वर की आज्ञा सब मनुष्यों के लिये हैं॥ १२॥

इस तेरहवें सूक्त के अर्थ की अग्नि आदि दिव्य पदार्थों के उपकार लेने के विधान से बारहवें सूक्त के अभिप्राय के साथ सङ्गति जाननी चाहिये।

यह भी सूक्त सायणाचार्य्य आदि तथा यूरोपदेशवासी विलसन आदि साहबों ने विपरीत ही वर्णन किया है॥

यह तेरहवां सूक्त और पच्चीसवां वर्ग पूरा हुआ॥

अथास्य द्वादशर्च्चस्य चतुर्दशसूक्तस्य कण्वो मेधातिथिर्ऋषिः। विश्वेदेवा देवताः। गायत्री छन्दः। षड्जः स्वरः॥

तत्रादितो बहुभिः पदार्थैः सह संयोगीश्वरभौतिकावग्नी उपदिश्येते।

अब चौदहवें सूक्त का आरम्भ है। उसके पहिले मन्त्र में बहुत पदार्थों के साथ संयोग करनेवाले ईश्वर और भौतिक अग्नि का उपदेश किया है–

ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये।
देवेभिर्याहि यक्षि च॥ १॥

आ। एभिः। अग्ने। दुवः। गिरः। विश्वेभिः। सोमऽपीतये। देवेभिः। याहि। यक्षि। च॥ १॥

पदार्थः–**(आ)** समन्तात् **(एभिः)** प्रत्यक्षैः। अत्र **एमन्नादिषु छन्दसि पररूपं वक्तव्यम्।** (अष्टा०६.१.९४) अनेन पररूपम्। **(अग्ने)** सर्वत्र व्याप्तेश्वर भौतिको वा। अत्रान्त्यपक्षे सर्वत्र व्यत्ययः। **(दुवः)** परिचर्य्याम् **(गिरः)** वेदवाणीः **(विश्वेभिः)** सर्वैः। अत्र **बहुलं छन्दसि** इति भिस ऐस् भवति। **(सोमपीतये)** सोमानां सुखकारकाणां पीतिः पानं यस्माद्यज्ञात्तस्मै। अत्र **सह सुपा** इति समासः। **(देवेभिः)** दिव्यैर्गुणैः पदार्थैर्विद्वद्भिर्वा सह **(याहि)** प्राप्तो भव भवति वा **(यक्षि)** यजामि सङ्गमयामि वा। अत्र लडर्थे लुङ्डभावश्च। **(च)** पूर्वार्थाकर्षणे॥ १॥

अन्वयः-हे अग्ने जगदीश्वर! त्वमेभिर्विश्वेभिर्देवेभिः सह सोमपीतये दुवो गिरो वेदवाणीर्याहि प्राप्तो भवेत्येकः। यमग्निमेभिर्विश्वेभिर्देवेभिः सह समागमेन सोमपीतयेऽहं यक्षि यजामि, ईश्वरस्य दुवः परिचर्य्या गिरो वेदवाणीश्च यक्षि सङ्गमयामीति द्वितीयः॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्याणां या या व्यावहारिकपारमार्थिकसुखेच्छा भवेत्, यैर्वायुजलपृथिवीमयादिभिर्यन्त्रयानैः सहाग्निं सङ्गतं कृत्वा क्रियाः क्रियन्त ईश्वरस्याज्ञासेवनं वेदानामध्ययनाध्यापने तदुक्तानुष्ठानं च त एवाभित आनन्दं प्राप्नुवन्ति॥ १॥

पदार्थः–हे **(अग्ने)** जगदीश्वर! आप **(एभिः)** इन **(विश्वेभिः)** सब **(देवेभिः)** दिव्यगुण और विद्वानों के साथ **(सोमपीतये)** सुख करनेवाले पदार्थों के पीने के लिये **(दुवः)** सत्कारादि व्यवहार तथा **(गिरः)** वेदवाणियों को **(याहि)** प्राप्त हूजिये॥ १॥

जो यह **(अग्ने)** भौतिक अग्नि **(एभिः)** इन **(विश्वेभिः)** सब **(देवेभिः)** दिव्यगुण और पदार्थों के साथ **(सोमपीतये)** जिससे सुखकारक पदार्थों का पीना हो, उस यज्ञ के लिये **(दुवः)** सत्कारादि व्यवहार तथा **(गिरः)** वेदवाणियों को **(याहि)** प्राप्त करता है, उसको **(एभिः)** इन **(विश्वेभिः)** सब **(देवेभिः)** विद्वानों के साथ **(सोमपीतये)** उक्त सोम के पीने के लिये **(यक्षि)** स्वीकार करता हूं, तथा ईश्वर के **(दुवः)** सत्कारादि व्यवहार और वेदवाणियों को **(यक्षि)** सङ्गत अर्थात् अपने मन और कामों में अच्छी प्रकार सदैव यथाशक्ति धारण करता हूं॥ २॥ १॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जिन मनुष्यों को व्यवहार और परमार्थ के सुख की इच्छा हो, वे वायु जल और पृथिवीमयादि यन्त्र तथा विमान आदि रथों के साथ अग्नि को स्वीकार करके उत्तम क्रियाओं को सिद्ध करते और ईश्वर की आज्ञा का सेवन, वेदों का पढ़ना-पढ़ाना और वेदोक्त कर्मों का अनुष्ठान करते रहते हैं, वे ही सब प्रकार से आनन्द भोगते हैं॥१॥

अथाग्निशब्देनोभावर्थावुपदिश्येते।

अब अगले मन्त्र में अग्निशब्द से दो अर्थों का उपदेश किया है-

आ त्वा॒ कण्वा॑ अहूषत गृ॒णन्ति॑ विप्र ते॒ धिय॑:।
दे॒वेभि॑रग्न॒ आ ग॑हि॥ २॥

आ। त्वा॒। कण्वा॑:। अ॒हू॒ष॒त॒। गृ॒णन्ति॑। वि॒प्र॒। ते॒। धिय॑:। दे॒वेभि॑:। अ॒ग्ने॒। आ। ग॒हि॒॥ २॥

पदार्थः-(**आ**) आभिमुख्ये (**त्वा**) त्वां जगदीश्वरं तं भौतिकं वा (**कण्वाः**) मेधाविनो विद्वांसः। **कण्व इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**अहूषत**) आह्वयन्ति शिल्पार्थं स्पर्धयन्ति वा। अत्र लडर्थे लुङ्, **बहुलं छन्दसि** इति सम्प्रसारणञ्च। (**गृणन्ति**) अर्चन्ति शब्दयन्ति वा। **गृणातीत्यर्चतिकर्मसु पठितम्।** (निघं०३.१४) **गॄ शब्दे** इति पक्षे शब्दार्थः। (**विप्र**) विविधज्ञानेन पदार्थान् प्राति पूरयति स विद्वान् तत्संबुद्धौ। (**ते**) तव तस्य वा (**अग्ने**) विज्ञानस्वरूप प्राप्तिहेतुर्भौतिकोऽग्निर्वा। (**आ**) क्रियायोगे (**गहि**) प्राप्नुहि प्रापयति वा। अत्र पक्षे व्यत्ययः। **बहुलं छन्दसि** इति शपो लुक्। **वा छन्दसि**। (अष्टा०३.४.८८) इति हेरपित्त्वात्, **अनुदात्तोपदेश०** (अष्टा०६.४.३७) अनेनानुनासिकलोपश्च॥२॥

अन्वयः-हे अग्ने ईश्वर! यथा कण्वा मेधाविनस्त्वा त्वां गृणन्त्यहूषताह्वयन्ति तथैव वयमपि गृणीमः आह्वयामः। हे विप्र मेधाविन्! तथा ते तव धियो यं गृणन्त्याह्वयन्ति तथा सर्वे वयं मिलित्वा तमेव नित्यमुपास्महे। हे मङ्गलमय परमात्मँस्त्वं कृपया देवेभिः सहागहि समन्तात् प्राप्तो भवेत्येकः॥१॥२॥

हे विप्र विद्वन्! यथा कण्वा अन्ये विद्वांसोऽग्निं गृणन्त्यहूषताह्वयन्ति तथैव त्वमपि गृणीह्याह्वय। यथा देवेभिः सहाग्न आगह्ययं भौतिकोऽग्निः समन्ताद्विदितगुणो भूत्वा दिव्यगुणसुखप्रापको भवति, यमग्निं ते तव धियो बुद्धयो गृणन्ति स्पर्धन्ते तेन त्वं बहूनि कार्य्याणि साधयेति द्वितीयः॥२॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैरस्यां सृष्टावीश्वररचितान् पदार्थान् दृष्ट्वेदं वाच्यमिमे सर्वे धन्यवादाः स्तुतयश्चयेश्वरायैव सङ्गच्छन्त इति॥२॥

पदार्थः-हे (**अग्ने**) जगदीश्वर! जैसे (**कण्वाः**) मेधावी विद्वान् लोग (**त्वा**) आपका (**गृणन्ति**) पूजन तथा (**अहूषत**) प्रार्थना करते हैं, वैसे ही हम लोग भी आपका पूजन और प्रार्थना करें। हे (**विप्र**) मेधाविन् विद्वन्! जैसे (**ते**) तेरी (**धियः**) बुद्धि जिस ईश्वर के (**गृणन्ति**) गुणों का कथन और प्रार्थना करती हैं, वैसे हम सब लोग परस्पर मिलकर उसी की उपासना करते रहें। हे मङ्गलमय परमात्मन्! आप

कृपा करके **(देवेभिः)** उत्तम गुणों के प्रकाश और भोगों के देने के लिये हम लोगों को **(आगहि)** अच्छी प्रकार प्राप्त हूजिये॥१॥२॥

हे **(विप्र)** मेधावी विद्वान् मनुष्य! जैसे **(कण्वाः)** अन्य विद्वान् लोग **(अग्ने)** अग्नि के **(गृणन्ति)** गुणप्रकाश और **(अहूषत)** शिल्पविद्या के लिये युक्त करते हैं, वैसे तुम भी करो। जैसे **(अग्ने)** यह अग्नि **(देवेभिः)** दिव्यगुणों के साथ **(आगहि)** अच्छी प्रकार अपने गुणों को विदित करता है और जिस अग्नि के **(ते)** तेरी **(धियः)** बुद्धि **(गृणन्ति)** गुणों का कथन तथा **(अहूषत)** अधिक से अधिक मानती हैं, उससे तुम बहुत से कार्य्यों को सिद्ध करो॥२॥२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को इस संसार में ईश्वर के रचे हुए पदार्थों को देखकर यह कहना चाहिये कि ये सब धन्यवाद और स्तुति ईश्वर ही में घटती हैं॥२॥

अथ विश्वेषां देवानां मध्यात्कांश्चिदुपदिशति।

अब अगले मन्त्र में सब देवों में से कई एक देवों का उपदेश किया है-

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम्।
आदित्यान् मारुतं गणम्॥३॥

इन्द्रवायू इति। बृहस्पतिम्। मित्रा। अग्निम्। पूषणम्। भगम्। आदित्यान्। मारुतम्। गणम्॥३॥

पदार्थः-**(इन्द्रवायू)** इन्द्रश्च वायुश्च तौ विद्युत्पवनौ **(बृहस्पतिम्)** बृहतां पालनहेतुं सूर्य्यप्रकाशम्। **तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च।** (अष्टा०६.१.१५७) अनेन वार्तिकेन बृहस्पतिः सिद्धः। **पातेर्डतिः।** (उणा०४.५८) अनेन पतिशब्दश्च **(मित्रा)** मित्रं प्राणम्। अत्र **सुपां सुलुग्०** इत्यमः स्थान आकारादेशः। **(अग्निम्)** भौतिकम् **(पूषणम्)** पुष्ट्यौषध्यादिसमूहप्रापकं चन्द्रलोकम्। **पूषेति पदनामसु पठितम्।** (निघं०५.६) अनेन पुष्टिप्राप्त्यर्थश्चन्द्रो गृह्यते। **(भगम्)** भजते सुखानि येन तच्चक्रवर्त्यादिराज्यधनम्। **भग इति धननामसु पठितम्।** (निघं०२.१०) अत्र **'भज'**धातोः **पुंसि संज्ञायां घः प्रायेण।** (अष्टा०३.३.११८) अनेन घः प्रत्ययः। **भगो भजतेः।** (निरु०१.७) **(आदित्यान्)** द्वादशमासान् **(मारुतम्)** मरुतामिमम् **(गणम्)** वायुसमूहम्॥३॥

अन्वयः-हे कण्वा! भवन्तं क्रियानन्दसिद्धय इन्द्रवायू बृहस्पतिं मित्रमग्निं पूषणं भगमादित्यान्मारुतं गणमहूषत स्पर्धध्वं गृणीत॥३॥

भावार्थः-अत्र पूर्वस्मान्मन्त्रात् **'कण्वा अहूषत गृणन्ति'** इति पदत्रयमनुवर्तते। ये मनुष्या एतानिन्द्रादिपदार्थानीश्वररचितान् विदितगुणान् कृत्वा क्रियासु सम्प्रयुज्यन्ते ते सुखिनो भूत्वा सर्वान् प्राणिनो मृडयन्ति॥३॥

पदार्थः-हे **(कण्वः)** बुद्धिमान् विद्वान् लोगो! आप क्रिया तथा आनन्द की सिद्धि के लिये **(इन्द्रवायू)** बिजुली और पवन **(बृहस्पतिम्)** बड़े से बड़े पदार्थों के पालनहेतु सूर्य्यलोक **(मित्रा)** प्राण

(अग्निम्) प्रसिद्ध अग्नि **(पूषणम्)** ओषधियों के समूह के पुष्टि करनेवाले चन्द्रलोक **(भगम्)** सुखों के प्राप्त करानेवाले चक्रवर्त्ति आदि राज्य के धन **(आदित्यान्)** बारहों महीने और **(मारुतम्)** पवनों के **(गणम्)** समूह को **(अहूषत)** ग्रहण तथा **(गृणन्ति)** अच्छी प्रकार जान के संयुक्त करो॥३॥

भावार्थः-इस मन्त्र में पूर्व मन्त्र से '**कण्वाः**' '**अहूषत**' और '**गृणन्ति**' इन तीन पदों की अनुवृत्ति आती है। जो मनुष्य ईश्वर के रचे हुए उक्त इन्द्र आदि पदार्थों और उनके गुणों को जानकर क्रियाओं में संयुक्त करते हैं, वे आप सुखी होकर सब प्राणियों को सुखयुक्त सदैव करते हैं॥३॥

एवं सम्प्रयोजिता एते किंहेतुका भवन्तीत्युपदिश्यते।

उक्त पदार्थ इस प्रकार संयुक्त किये हुए किस-किस कार्य को सिद्ध करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

प्र वो॑ भ्रियन्त इन्द॑वो मत्स॒रा मा॑दयि॒ष्णव॑:।

द्र॒प्सा मध्व॑श्चमू॒ष॑दः॥४॥

प्र। व॒:। भ्रि॒य॒न्ते॒। इन्द॑व:। म॒त्स॒रा:। मा॒द॒यि॒ष्णव॑:। द्र॒प्सा:। मध्व॑:। च॒मू॒ष॑द:॥४॥

पदार्थः-**(प्र)** प्रकृष्टार्थे **(वः)** युष्मभ्यम् **(भ्रियन्ते)** भ्रियन्ते **(इन्दवः)** रसवन्तः सोमाद्यौषधिगणाः **(मत्सराः)** माद्यन्ति हर्षन्ति यैस्ते। अत्र **कृधूमदिभ्यः कित्।** (उणा०३.७१) अनेन मदेः सरन् प्रत्ययः। **(मादयिष्णवः)** हर्षनिमित्ताः। अत्र **णश्छन्दसि।** (अष्टा०३.२.१३७) अनेन ण्यन्तान्मदेरिष्णुच् प्रत्ययः। **(द्रप्साः)** दृप्यन्ति संहृष्यन्ते बलानि सैन्यानि वा यैस्ते। अत्र **दृप हर्षणमोहनयोः** इत्यस्माद्बाहुलकात्करणकारक औणादिकः सः प्रत्ययः। **(मध्वः)** मधुरगुणवन्तः **(चमूषदः)** ये चमूषु सेनासु सीदन्ति ते अत्र **कृतो बहुलम्** इति वार्त्तिकमाश्रित्य **सत्सूद्विष०** (अष्टा०३.२.६१) अनेन करणे क्विप्। **कृषिचमितनि०** (उणा०१.८१) अनेन चमूशब्दश्च सिद्धः। चमन्त्यदन्ति विनाशयन्ति शत्रुबलानि याभिस्ताश्चम्वः॥४॥

अन्वयः-हे मनुष्या! यथा मया वो युष्मभ्यं पूर्वमन्त्रोक्तैरिन्द्राभिरेव मध्वो मत्सरा मादयिष्णवो द्रप्साश्चमूषद इन्दवः प्रभ्रियन्ते प्रकृष्टतया भ्रियन्ते तथा युष्माभिरपि मदर्थमेते सम्यग्धार्य्याः॥४॥

भावार्थः-ईश्वरोऽभिवदति-मया धारितैर्मद्रचितैः पूर्वमन्त्रप्रतिपादितैर्विद्युदादिभिर्ये सर्व पदार्थाः पोष्यन्ते ये तेभ्यो वैद्यकशिल्पशास्त्ररीत्या प्रकृष्टरसोत्पादनेन शिल्पकार्य्यसिद्ध्योत्तमसेनासम्पादनाद् रोगनाशविजयप्राप्तिं कुर्वन्ति तैर्विविध आनन्दं भुञ्जते इति॥४॥

पदार्थः-हे मनुष्यो! जैसे मैंने धारण किये, पूर्व मन्त्र में इन्द्र आदि पदार्थ कह आये हैं, उन्हीं से **(मध्वः)** मधुर गुणवाले **(मत्सराः)** जिनसे उत्तम आनन्द को प्राप्त होते हैं **(मादयिष्णवः)** आनन्द के निमित्त **(द्रप्साः)** जिन से बल अर्थात् सेना के लोग अच्छी प्रकार आनन्द को प्राप्त होते और **(चमूषदः)**

जिनसे विकट शत्रुओं की सेनाओं से स्थिर होते हैं, उन **(इन्दवः)** रसवाले सोम आदि ओषधियों के समूह के समूहों को **(वः)** तुम लोगों के लिये **(भ्रियन्ते)** अच्छी प्रकार धारण कर रक्खे हैं, वैसे तुम लोग भी मेरे लिये इन पदार्थों को धारण करो॥४॥

भावार्थः-ईश्वर सब मनुष्यों के प्रति कहता है कि जो मेरे रचे हुए पहिले मन्त्र में प्रकाशित किये बिजुली आदि पदार्थों से ये सब पदार्थ धारण करके मैंने पुष्ट किये हैं, तथा जो मनुष्य इनसे वैद्यक वा शिल्पशास्त्रों की रीति से उत्तम रस के उत्पादन और शिल्प काय्र्यों की सिद्धि के साथ उत्तम सेना के सम्पादन होने से रोगों का नाश तथा विजय की प्राप्ति करते हैं, वे लोग नाना प्रकार के सुख भोगते हैं॥४॥

अथाग्निशब्देनेश्वर उपदिश्यते।

अब अगले मन्त्र में अग्निशब्द से ईश्वर का उपदेश किया है-

ईळ॑ते॒ त्वाम॑व॒स्यव॒: कण्वा॑सो वृ॒क्तब॑र्हिषः। ह॒विष्म॑न्तो अर॒ंकृ॑तः॥५॥

ईळ॑ते। त्वाम्। अ॒व॒स्यव॑:। कण्वा॑सः। वृ॒क्तऽब॑र्हिषः। ह॒विष्म॑न्तः। अर॒ंऽकृ॑तः॥५॥

पदार्थः-(**ईळते**) स्तुवन्ति **(त्वाम्)** सर्वस्य जगत उत्पादकं धारकं जगदीश्वरम् **(अवस्यवः)** आत्मनोऽवो रक्षणादिकमिच्छन्तस्तच्छीलाः। अत्र **'अव'** धातोः **सर्वधातुभ्योऽसुन्।** (उणा०४.१९६) इति भावेऽसुन्, ततः **सुप आत्मनः क्यच्** इति क्यच्, ततः **क्याच्छन्दसि।** (अष्टा०३.२.१७०) अनेन ताच्छील्य उः प्रत्ययः। **(कण्वासः)** मेधाविनो विद्वांसः **(वृक्तबर्हिषः)** ऋत्विजः **(हविष्मन्तः)** हवींषि दातुमादातुमत्तुं योग्यान्यतिशयितानि वस्तूनि विद्यन्ते येषान्ते। अत्रातिशायने मतुप्। **(अरंकृतः)** सर्वान् पदार्थानलं कर्त्तुं शीलं येषां ते। अत्र **अन्येभ्योऽपि दृश्यन्ते।** (अष्टा०३.२.१७८) अनेन ताच्छील्येऽर्थे क्विप्॥५॥

अन्वयः-हे जगदीश्वर! वयं हविष्मन्तोऽरंकृतोऽवस्यवः कण्वासो वृक्तबर्हिषो विद्वांसो यं त्वामीळते तमीडीमहि॥५॥

भावार्थः-हे सर्वसृष्ट्युत्पादक! यतो भवता सर्वप्राणिसुखार्थं सर्वे पदार्था रचयित्वा धारितास्तस्मात्त्वामेव स्तुवन्तः सर्वस्य रक्षणमिच्छन्तः शिक्षाविद्याभ्यां सर्वान्मनुष्यान् भूषयन्तो वयं नित्यं प्रयतामह इति॥५॥

पदार्थः-हे जगदीश्वर! हम लोग जिनके **(हविष्मन्तः)** देने-लेने और भोजन करने योग्य पदार्थ विद्यमान हैं, तथा **(अरंकृतः)** जो सब पदार्थों को सुशोभित करनेवाले हैं, **(अवस्यवः)** जिनका अपनी रक्षा चाहने का स्वभाव है, वे **(कण्वासः)** बुद्धिमान् और **(वृक्तबर्हिषः)** यथाकाल यज्ञ करनेवाले विद्वान् लोग जिस **(त्वाम्)** सब जगत् के उत्पन्न करनेवाले आपकी **(ईडते)** स्तुति करते हैं, उसी आपकी स्तुति करें॥५॥

भावार्थः-हे सृष्टि के उत्पन्न करनेवाले परमेश्वर! जिस आपने सब प्राणियों के सुख के लिये सब पदार्थों को रचकर धारण किये हैं, इससे हम लोग आप ही की स्तुति, सब की रक्षा की इच्छा, शिक्षा और विद्या से सब मनुष्यों को भूषित करते हुए उत्तम क्रियाओं के लिये निरन्तर अच्छी प्रकार यत्न करते हैं॥५॥

ईश्वररचिता विद्युदादयः कीदृग्गुणाः सन्तीत्युपदिश्यते।

ईश्वर के रचे हुए बिजुली आदि पदार्थ कैसे गुणवाले हैं, सो अगले मन्त्र में उपदेश किया है-

घृतपृ॑ष्ठा मनो॒युजो॒ ये त्वा॒ वह॑न्ति॒ वह्न॑यः।
आ दे॒वान्त्सोम॑पीतये॥ ६॥ २६॥

घृ॒तऽपृ॑ष्ठाः। म॒न॒ःऽयुजः॑। ये। त्वा॒। वह॑न्ति। वह्न॑यः। आ। दे॒वान्। सोमऽपीतये॥ ६॥

पदार्थः-(**घृतपृष्ठाः**) घृतमुदकं पृष्ठ आधारे येषां ते (**मनोयुजः**) मनसा विज्ञानेन युज्यन्ते ते। अत्र **सत्सूद्विष०** (अष्टा०३.२.६१) अनेन **कृतो बहुलम्** इति कर्मणि क्विप्। (**ये**) विद्युदादयश्चतुर्थमन्त्रोक्ताः (**त्वा**) तमलं कर्त्तुं योग्यं यज्ञम् (**वहन्ति**) प्रापयन्ति। अत्रान्तर्गतो ण्यर्थः। (**वह्नयः**) वहन्ति प्रापयन्ति वार्त्ताः पदार्थान् यानानि च यैस्ते। अत्र **वहिश्रिश्रुयु०**। (उणा०४.५३) अनेन करणे निः प्रत्ययः। (**आ**) समन्तात् क्रियायोगे (**देवान्**) दिव्यगुणान् भोगानृतून्वा। **ऋतवो वै देवाः।** (श०ब्रा०७.२.२.२६) (**सोमपीतये**) सोमानां पदार्थानां पीतिः पानं यस्मिंस्तस्मै यज्ञाय॥६॥

अन्वयः-हे विद्वांसो! य इमे युक्त्या सम्प्रयोजिता घृतपृष्ठा मनोयुजो वह्नयो विद्युदादयः सोमपीतये त्वा तमेतं यज्ञं देवाँश्चावहन्ति, ते सर्वैर्मनुष्यैर्यथा तद्विदित्वा कार्य्यसिद्धये सम्प्रयोज्याः॥६॥

भावार्थः-ये स्तनयित्न्वादयस्त एव जलमुपरि गमयन्त्यागगमयन्ति वा ताराख्येन यन्त्रेण सञ्चालिता विद्युन्मनोवेगवद्वार्त्ता देशान्तरं प्रापयति। एवं सर्वेषां पदार्थानां सुखानां च प्रापका एत एव सन्तीतीश्वराज्ञापनम्॥६॥

इति षड्विंशो वर्गः समाप्तः॥

पदार्थः-हे विद्वानो! जो युक्ति से संयुक्त किये हुए (**घृतपृष्ठाः**) जिनके पृष्ठ अर्थात् आधार में जल है (**मनोयुजः**) तथा जो उत्तम ज्ञान से रथों में युक्त किये जाते (**वह्नयः**) वार्त्ता पदार्थ वा यानों को दूर देश में पहुंचानेवाले अग्नि आदि पदार्थ हैं, जो (**सोमपीतये**) जिसमें सोम आदि पदार्थों का पीना होता है, उस यज्ञ के लिये (**त्वा**) उस भूषित करने योग्य यज्ञ को और (**देवान्**) दिव्यगुण दिव्यभोग और वसन्त आदि ऋतुओं को (**आवहन्ति**) अच्छी प्रकार प्राप्त करते हैं, उनको सब मनुष्य यथार्थ जानके अनेक कार्य्यों को सिद्ध करने के लिये ठीक-ठीक प्रयुक्त करना चाहिये॥६॥

भावार्थः-जो मेघ आदि पदार्थ हैं, वे ही जल को ऊपर नीचे अर्थात् अन्तरिक्ष को पहुंचाते और वहां से वर्षाते हैं, और ताराख्य यन्त्र से चलाई हुई बिजुली मन के वेग के समान वार्त्ताओं को एकदेश से दूसरे देश में प्राप्त करती है। इसी प्रकार सब सुखों को प्राप्त करानेवाले ये ही पदार्थ हैं, ऐसी ईश्वर की आज्ञा है॥६॥

यह छब्बीसवां वर्ग समाप्त हुआ॥

अथाग्निशब्देनेश्वरभौतिकावुपदिश्येते।

अब अगले मन्त्र में अग्निशब्द से ईश्वर और भौतिक अग्नि का उपदेश किया है–

तान् यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि।

मध्वः सुजिह्व पायय॥७॥

तान्। यजत्रान्। ऋतऽवृधः। अग्ने। पत्नीऽवतः। कृधि। मध्वः। सुऽजिह्व। पायय॥७॥

पदार्थः–(**तान्**) विद्युदादीन् (**यजत्रान्**) यष्टुं सङ्गमयितुमर्हान्। अत्र **अमिनक्षियजिवधि०** (उणा०३.१०३) अनेन यजधातोरत्रन् प्रत्ययः। (**ऋतावृधः**) ऋतमुदकं सत्यं यज्ञं च वर्धयन्ति तान्। अत्र **अन्येषामपि दृश्यते** इति दीर्घः। (**अग्ने**) जगदीश्वर भौतिको वा (**पत्नीवतः**) प्रशस्ताः पत्न्यो विद्यन्ते येषां तानस्मान्। अत्र प्रशंसार्थे मतुप्। (**कृधि**) करोषि करोति वा। अत्र लडर्थे लोट्, पक्षे व्यत्ययः, विकरणाभावः, **श्रुशृणुपृकृ०** (अष्टा०६.४.१०२) अनेन हेर्ध्यादेशश्च। (**मध्वः**) उत्पन्नस्य मधुरादिगुणयुक्तस्य पदार्थसमूहस्य रसभोगम् (**सुजिह्व**) सुष्ठु जोहूयन्ते धार्य्यन्ते यया जिह्वया शक्त्या तत्सहित; सुष्ठु हूयन्ते जिह्वायां ज्वालायां यस्य सोऽग्निः। (**पायय**) पाययति वा॥७॥

अन्वयः-हे अग्ने! त्वं तान् यजत्रानृतावृधो देवान् करोषि तैर्नः पत्नीवतः कृधि। हे सुजिह्व! मध्वो रसभोगं कृपया पाययस्वेत्येकः।

अयमग्निः सुजिह्वस्तानृतावृधो यजत्रान् देवान् करोति, स सम्यक् प्रयुक्तः सन्नस्मान् पत्नीवतः सुगृहस्थान् करोति मध्वो रसं पाययते तत्पाने हेतुरस्तीति द्वितीयः॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैरीश्वराराधनेन सम्यगग्निप्रयोगेण च रससारादीन् रचयित्वोपकृत्य गृहाश्रमे सर्वाणि कार्य्याणि निर्वर्त्तयितव्यानीति॥७॥

पदार्थः–हे (**अग्ने**) जगदीश्वर! आप (**यजत्रान्**) जो कला आदि पदार्थों में संयुक्त करने योग्य तथा (**ऋतावृधः**) सत्यता और यज्ञादि उत्तम कर्मों की वृद्धि करने वाले हैं, (**तान्**) उन विद्युत् आदि पदार्थों को श्रेष्ठ करते हो, उन्हीं से हम लोगों को (**पत्नीवतः**) प्रशंसायुक्त स्त्रीवाले (**कृधि**) कीजिये। हे (**सुजिह्व**) श्रेष्ठता से पदार्थों की धारणाशक्तिवाले ईश्वर! आप (**मध्वः**) मधुर पदार्थों के रस को कृपा करके (**पायय**) पिलाइये॥१॥

(सुजिह्व) जिसकी लपट में अच्छी प्रकार होम करते हैं, सो यह **(अग्ने)** भौतिक अग्नि **(ऋतावृधः)** उन जल की वृद्धि करानेवाले **(यजत्रान्)** कलाओं में संयुक्त करने योग्य **(तान्)** विद्युत् आदि पदार्थों को उत्तम **(कृधि)** करता है, और वह अच्छी प्रकार कला यन्त्रों में संयुक्त किया हुआ हम लोगों को **(पत्नीवतः)** पत्नीवान् अर्थात् श्रेष्ठ गृहस्थ **(कृधि)** कर देता, तथा **(मध्वः)** मीठे-मीठे पदार्थों के रस को **(पायय)** पिलाने का हेतु होता है॥२॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को अच्छी प्रकार ईश्वर के आराधन और अग्नि की क्रियाकुशलता से रससारादि को रचकर तथा उपकार में लाकर गृहस्थ आश्रम में सब कार्यों को सिद्ध करने चाहियें॥७॥

पुनस्ते कीदृशाः सन्तीत्युपदिश्यते।

फिर उक्त पदार्थ किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ये यजत्रा॒ य ईड्या॒स्ते ते॑ पिबन्तु जि॒ह्वया॑।
मधो॑रग्ने॒ वष॑ट्कृति॥८॥

ये। यजत्राः। ये। ईड्याः। ते। ते॒। पि॒ब॒न्तु॒। जि॒ह्वया॑। मधोः॑। अ॒ग्ने॒। वष॑ट्ऽकृति॥८॥

पदार्थः-(**ये**) विद्युदादयः **(यजत्राः)** सङ्गमयितुं योग्याः। पूर्ववदस्य सिद्धिः। **(ईड्यः)** अध्येषितुं योग्याः **(ते)** पूर्वोक्ता जगतीश्वरेणोत्पादिताः **(ते)** वर्त्तमानाः **(पिबन्तु)** पिबन्ति। अत्र लडर्थे लोट्। **(जिह्वया)** ज्वालाशक्त्या **(मधोः)** मधुरगुणांशान्। **(अग्ने)** अग्नौ। अत्र व्यत्ययः। **(वषट्कृति)** वषट् करोति येन यज्ञेन तस्मिन्। अत्र **कृतो बहुलम्** इति वार्त्तिकमाश्रित्य करणे क्विप्॥८॥

अन्वयः-ये मनुष्या यजत्रास्ते तथा य ईड्यास्ते जिह्वयाऽग्नेऽग्नौ वषट्कृति मधोर्मधुरगुणांशान् पिबन्तु यथावत् पिबन्ति॥८॥

भावार्थः-मनुष्यैरस्मिन् जगति सर्वेषु पदार्थेषु द्विविधं कर्म योजनीयमेकं गुणज्ञानं द्वितीयं तेभ्यः कार्य्यसिद्धिकरणम्। ये विद्युदादयः सर्वेभ्यो मूर्त्तद्रव्येभ्यो रसं सङ्गृह्य पुनर्विमुञ्चन्ति तेषां शुद्ध्यर्थं सुगन्ध्यादिपदार्थानां अग्नौ प्रक्षेपणं नित्यं कार्य्यं यतस्ते सुखसाधिनो भवेयुः॥८॥

पदार्थः-(**ये**) जो मनुष्य विद्युत् आदि पदार्थ **(यजत्राः)** कलादिकों में संयुक्त करते हैं **(ते)** वे, वा **(ये)** जो गुणवाले **(ईड्याः)** सब प्रकार से खोजने योग्य हैं **(ते)** वे **(जिह्वया)** ज्वालारूपी शक्ति से **(अग्ने)** अग्नि में **(वषट्कृति)** यज्ञ के विशेष-विशेष काम करने से **(मधोः)** मधुरगुणों के अंशो को **(पिबन्तु)** यथावत् पीते हैं॥८॥

भावार्थः-मनुष्यों को इस जगत् में सब संयुक्त पदार्थों से दो प्रकार का कर्म करना चाहिये अर्थात् एक तो उनके गुणों का जानना, दूसरा उनसे कार्य्य की सिद्धि करना। जो विद्युत् आदि पदार्थ सब

मूर्त्तिमान् पदार्थों से रस को ग्रहण करके फिर छोड़ देते हैं, इससे उनकी शुद्धि के लिये सुगन्धि आदि पदार्थों का होम निरन्तर करना चाहिये, जिससे वे सब प्राणियों को सुख सिद्ध करनेवाले हों॥८॥

कीदृशा मनुष्यास्तद्गुणान् ग्रहीतुं योग्या भवन्तीत्युपदिश्यते।

किस प्रकार के मनुष्य उन गुणों को ग्रहण कर सकते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

आकीं॑ सूर्य्यस्य रोच॒नाद्विश्वा॑न् दे॒वाँ उ॑ष॒र्बुधः॑।
विप्रो॒ होते॒ह व॑क्षति॥९॥

आकी॑म्। सूर्य्यस्य। रो॒च॒नात्। विश्वा॑न्। दे॒वान्। उ॒ष॒ः॒ऽबुधः॑। विप्रः॑। होता॑। इ॒ह। व॒क्ष॒ति॥९॥

पदार्थः-(**आकीम्**) समन्तात् (**सूर्य्यस्य**) चराचरस्यात्मनः परमेश्वरस्य सूर्यलोकस्य वा (**रोचनात्**) प्रकाशनात् (**विश्वान्**) सर्वान् (**देवान्**) दिव्यभोगान् (**उषर्बुधः**) उषः सम्प्राप्य बोधयन्ति तान् (**विप्रः**) मेधावी होता हवनस्य दाताऽऽदाता वा (**इह**) अस्मिन् जन्मनि लोके वा (**वक्षति**) प्राप्नोति प्रापयति वा। अत्र लडर्थे लेट्॥९॥

अन्वयः-यो होता विप्रो विद्वान् सूर्य्यस्य रोचनादिहोषर्बुधो विश्वान् देवान् वक्षति प्राप्नोति स सर्वा विद्याः प्राप्यानन्दी भवति॥९॥

भावार्थः-अत्र श्लेषालङ्कारः। यदीश्वर इमान् पदार्थान्नोत्पादयेत् तर्हि कश्चिदपि जन उपकारं ग्रहीतुं कथं शक्नुयात् यदा मनुष्या निद्रास्था भवन्ति तदा न किमपि भोक्तव्यं द्रव्यं प्राप्तुमर्हन्ति। किञ्च जागरणं प्राप्य भोगकरणे समर्था भवन्त्येतस्मादुषर्बुध इत्युक्तम्। एतेभ्यः पदार्थेभ्यो धीमान् पुरुष एव क्रियासिद्धिं कर्त्तुं शक्नोति नेतर इति॥९॥

पदार्थः-जो (**होता**) होम में छोड़ने योग्य वस्तुओं का देने-लेने वाला (**विप्रः**) बुद्धिमान् विद्वान् पुरुष है, वही (**सूर्य्यस्य**) चराचर के आत्मा परमेश्वर वा सूर्य्यलोक के (**रोचनात्**) प्रकाश से (**इह**) इस जन्म वा लोक में (**उषर्बुधः**) प्रातःकाल को प्राप्त होकर सुखों को चितानेवालों (**विश्वान्**) जो कि समस्त (**देवान्**) श्रेष्ठ भोगों को (**वक्षति**) प्राप्त होता वा कराता है, वही सब विद्याओं को प्राप्त होके आनन्दयुक्त होता है॥९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो ईश्वर इन पदार्थों को उत्पन्न नहीं करता, तो कोई पुरुष उपकार लेने को समर्थ भी नहीं हो सकता, और जब मनुष्य निद्रा में स्थित होते हैं, तब कोई मनुष्य किसी भोग करने योग्य पदार्थ को प्राप्त नहीं हो सकता किन्तु जाग्रत अवस्था को प्राप्त होकर उनके भोग करने को समर्थ होता है। इससे इस मन्त्र में '**उषर्बुधः**' इस पद का उच्चारण किया है। संसार के इन पदार्थों से बुद्धिमान् मनुष्य ही क्रिया की सिद्धि को कर सकता है, अन्य कोई नहीं॥९॥

केन सहैतत् क्रियाहेतुर्भवतीत्युपदिश्यते।

किसके साथ में यह विद्युत् अग्नि क्रियाओं की सिद्धि करानेवाला होता है, सो अगले मन्त्र में कहा है-

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना।

पिबा मित्रस्य धामभिः॥ १०॥

विश्वेभिः। सोम्यम्। मधु। अग्ने। इन्द्रेण। वायुना। पिब। मित्रस्य। धामऽभिः॥ १०॥

पदार्थः-(**विश्वेभिः**) सर्वैः। अत्र **बहुलं छन्दसि** इत्यैसभावः। (**सोम्यम्**) सोमसम्पादनार्हम्। **सोममर्हति यः।** (अष्टा०४.४.१३८) इति यः प्रत्ययः (**मधु**) मधुरादिगुणयुक्तम् (**अग्ने**) अग्निः प्रत्यक्षाप्रत्यक्षः (**इन्द्रेण**) परमैश्वर्य्यहेतुना (**वायुना**) स्पर्शवत गतिमता पवनेन सह (**पिब**) पिबति गृह्णाति। अत्र पुरुषव्यत्ययो लडर्थे लोट् **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**मित्रस्य**) सर्वगतस्य सर्वप्राणभूतस्य (**धामभिः**) स्थानैः॥१०॥

अन्वयः-अयमग्निरिन्द्रेण वायुना सह मित्रस्य विश्वेभिर्धामभिः सोम्यं मधु पिबति॥१०॥

भावार्थः-अयं विद्युदाख्योऽग्निर्ब्रह्माण्डस्थेन वायुना शरीरस्थैः प्राणैः सह वर्त्तमानः सन् सर्वेषां पदार्थानां सकाशाद् रसं गृहीत्वोद्गिरति, तस्मादयं मुख्यं शिल्पसाधनमस्तीति॥१०॥

पदार्थः-(**अग्ने**) यह अग्नि (**इन्द्रेण**) परम ऐश्वर्य करानेवाले (**वायुना**) स्पर्श वा गमन करनेहारे पवन के और (**मित्रस्य**) सब में रहने तथा सब के प्राणरूप होकर वर्त्तनेवाले वायु के साथ (**विश्वेभिः**) सब (**धामभिः**) स्थानों से (**सोम्यम्**) सोमसम्पादन के योग्य (**मधु**) मधुर आदि गुणयुक्त पदार्थ को (**पिब**) ग्रहण करता है॥१०॥

भावार्थः-यह विद्युत्रूप अग्नि ब्रह्माण्ड में रहनेवाले पवन तथा शरीर में रहनेवाले प्राणों के साथ वर्त्तमान होकर सब पदार्थों से रस को ग्रहण करके उगलता है, इससे यह मुख्य शिल्पविद्या का साधन है॥१०॥

अथाग्निशब्देनेश्वर उपदिश्यते।

अब अगले मन्त्र में अग्निशब्द से ईश्वर का उपदेश किया है-

त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि।

सेमं नो अध्वरं यज॥ ११॥

त्वम्। होता। मनुःऽहितः। अग्ने। यज्ञेषु। सीदसि। सः। इमम्। नः। अध्वरम्। यज॥ ११॥

पदार्थः-(**त्वम्**) जगदीश्वरः (**होता**) सर्वस्य दाता (**मनुर्हितः**) मनुषो मननकर्त्तारो मनुष्यादयो हिता धृता येन सः (**अग्ने**) पूजनीयतम (**यज्ञेषु**) क्रियाकाण्डादिविज्ञानान्तेषु सङ्गमनीयेषु (**सीदसि**)

अवस्थितोऽसि **(सः)** जगत्स्रष्टा धर्त्ता च **(इमम्)** अस्मदनुष्ठीयमानम्। अत्र **सोऽचि लोपे चेत्पादपूरणम्।** (अष्टा०६.१.१३४) अनेन सोर्लोपः। **(नः)** अस्माकम् **(अध्वरम्)** अहिंसनीयं सुखहेतुम् **(यज)** सङ्गमयास्य सिद्धिं सम्पादय॥११॥

अन्वयः-हे अग्ने! यस्त्वं मनुर्हितो होता यज्ञेषु सीदसि स त्वं नोऽस्माकमिममध्वरं यज सङ्गमय॥११॥

भावार्थः-येनेश्वरेण सर्वे मनुष्यव्यक्त्यादय उत्पाद्य धारिता, यस्मादयं सर्वेषु कर्मोपासनाज्ञानकाण्डेषु पूज्यतमोऽस्ति, तस्मात्स एवेदं जगदाख्यं यज्ञं सङ्गमयित्वाऽस्मान् सुखयतीति॥११॥

पदार्थः-हे **(अग्ने)** जो आप अतिशय करके पूजन करने योग्य जगदीश्वर! **(मनुर्हितः)** मनुष्य आदि पदार्थों के धारण करने और **(होता)** सब पदार्थों के देनेवाले हैं, **(त्वम्)** जो **(यज्ञेषु)** क्रियाकाण्ड को आदि लेकर ज्ञान होने पर्य्यन्त ग्रहण करने योग्य यज्ञों में **(सीदसि)** स्थित हो रहे हो, **(सः)** सो आप **(नः)** हमारे **(इमम्)** इस **(अध्वरम्)** ग्रहण करने योग्य सुख के हेतु यज्ञ को **(यज)** सङ्गत अर्थात् इसकी सिद्धि को दीजिये॥११॥

भावार्थः-जिस ईश्वर ने सब मनुष्यों आदि प्राणियों के शरीर आदि पदार्थों को उत्पन्न करके धारण किये हैं, तथा जो यह सब कर्म उपासना तथा ज्ञानकाण्ड में अतिशय से पूजने के योग्य है, वही इस जगत्रूपी यज्ञ को सिद्ध करके हम लोगों को सुखयुक्त करता है॥११॥

पुनरेकस्य भौतिकस्याग्नेर्गुणा उपदिश्यन्ते।

फिर अगले मन्त्र में भौतिक अग्नि के गुणों का उपदेश किया है-

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः।
ताभिर्देवाँ इहावह॥१२॥२७॥

युक्ष्व। हि। अरुषीः। रथे। हरितः। देव। रोहितः। ताभिः। देवान्। इह। आ। वह॥१२॥

पदार्थः-(**युक्ष्व**) योजय। अत्र **बहुलं छन्दसि** इति शपो लुकि श्नमभावः। **(हि)** यतः **(अरुषीः)** रक्तगुणा अरुष्यो गमनहेतवः। अत्र बाहुलकादुषन् प्रत्ययः। **अन्यतो ङीष्।** (अष्टा०४.१.४०) अनेन ङीष् प्रत्ययः। **वा च्छन्दसि।** (अष्टा०६.१.१०६) अनेन जसः पूर्वसवर्णम्। **(रथे)** भूसमुद्रान्तरिक्षेषु गमनार्थे याने **(हरितः)** हरन्ति यास्ता ज्वालाः **(देव)** विद्वन् **(रोहितः)** रोहयन्त्यारोहयन्ति यानानि यास्ताः। अत्र **हसृरुहियुषिभ्य इतिः।** (उणा०१.९७) अनेन **'रुह'**धातोरितिः प्रत्ययः। **(ताभिः)** एताभिः **(देवान्)** दिव्यान् क्रियासिद्धान् व्यवहारान् **(इह)** अस्मिन् संसारे **(आ)** समन्तात् **(वह)** प्रापय॥१२॥

अन्वयः-हे देव विद्वँस्त्वं रथे रोहितो हरितोऽरुषीर्युक्ष्व ताभिरिह देवानावह प्रापय॥१२॥

भावार्थः-विद्वद्भिरग्न्यादिपदार्थान् कलायन्त्रयानेषु संयोज्य तैरिहास्मिन्संसारे मनुष्याणां सुखाय दिव्याः पदार्थाः प्रकाशनीया इति॥१२॥

अथ चतुर्दशस्यास्य सूक्तस्य विश्वेषां देवानां गुणप्रकाशनेन क्रियार्थसमुच्चयात् त्रयोदशसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशनिवासिभिर्विलसनादिभिश्चान्यथैव व्याख्यातम्॥

इति चतुर्दशं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(देव)** विद्वान् मनुष्य! तू **(रथे)** पृथिवी समुद्र और अन्तरिक्ष में जाने आने के लिये विमान आदि रथ में **(रोहितः)** नीची ऊँची जगह उतारने चढ़ाने **(हरितः)** पदार्थों को हरने **(अरुषीः)** लाल रंगयुक्त तथा गमन करानेवाली ज्वाला अर्थात् लपटों को **(युक्ष्व)** युक्त कर और **(ताभिः)** इनसे **(इह)** इस संसार में **(देवान्)** दिव्यक्रियासिद्ध व्यवहारों को **(आवह)** अच्छी प्रकार प्राप्त कर॥१२॥

भावार्थः-विद्वानों को कला और विमान आदि यानों में अग्नि आदि पदार्थों को संयुक्त करके इनसे संसार में मनुष्यों के सुख के लिये दिव्य पदार्थों का प्रकाश करना चाहिये॥१२॥

सब देवों के गुणों के प्रकाश तथा क्रियाओं के समुदाय से इस चौदहवें सूक्त की सङ्गति पूर्वोक्त तेरहवें सूक्त के अर्थ के साथ जाननी चाहिये।

इस सूक्त का अर्थ सायणाचार्य्य आदि विद्वान् तथा यूरोपदेशनिवासी विलसन आदि ने विपरीत ही वर्णन किया है॥

यह चौदहवां सूक्त और सत्ताईसवां वर्ग पूरा हुआ॥

अथ द्वादशर्च्चस्य पञ्चदशसूक्तस्य कण्वो मेधातिथिर्ऋषिः। ऋतवः; इन्द्रः; मरुतः; त्वष्टा; अग्निः; इन्द्रः; मित्रावरुणौ; द्रविणोदाः; अश्विनौ; अग्निश्च देवताः। गायत्री छन्दः। षड्जः स्वरः॥

तत्र प्रत्यृतुं रसोत्पत्तिर्गमनं च भवतीत्युपदिश्यते।

अब पंद्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में ऋतु-ऋतु में रस की उत्पत्ति और गति का वर्णन किया है-

इन्द्र॒ सोम॒ पिब॑ ऋ॒तुना त्वा॑ विश॒न्त्विन्द॑वः।
म॒त्स॒रास॒स्तदो॑कसः॥ १॥

इन्द्र॑। सोम॑म्। पिब॑। ऋ॒तुना॑। आ। त्वा॒। वि॒श॒न्तु॒। इन्द॑वः। म॒त्स॒रास॑ः। तत्ऽओ॑कसः॥ १॥

पदार्थः-(**इन्द्र**) कालविभागकर्त्ता सूर्यलोकः (**सोमम्**) ओषध्यादिरसम् (**पिब**) पिबति। अत्र व्यत्ययः, लडर्थे लोट् च। (**ऋतुना**) वसन्तादिभिः सह। अत्र **जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्।** (अष्टा०१.२.५८) अनेन जात्यभिप्रायेणैकत्वम्। (**आ**) समन्तात् (**त्वा**) त्वां प्राणिनमिममप्राणिनं पदार्थं सूर्य्यस्य किरणसमूहं वा (**विशन्तु**) विशन्ति। अत्र लडर्थे लोट्। (**इन्दवः**) जलानि उन्दन्ति आर्द्रीकुर्वन्ति पदार्थास्ते। अत्र **उन्देरिच्चादेः।** (उणा०१.१२) इत्युः प्रत्ययः, आदेरिकारादेशश्च। **इन्दव इत्युदकनामसु पठितम्।** (निघं०१.१२) (**मत्सरासः**) हर्षहेतवः (**तदोकसः**) तान्यन्तरिक्षवाय्वादीन्योकांसि येषां ते॥ १॥

अन्वयः-हे मनुष्या! यमिन्द्र ऋतुना सोमं पिब पिबति इमे तदोकसो मत्सरास इन्दवो जलरसा ऋतुना सह त्वा त्वां तं वा प्रतिक्षणमाविशन्त्वाविशन्ति॥ १॥

भावार्थः-अयं सूर्य्यः संवत्सरायनर्तुपक्षाहोरात्रमुहूर्त्तकलाकाष्ठानिमेषादिकालविभागान् करोति। अत्राह मनुः- **निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कलाः। त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः॥** (मनु०५.६४) इति । तैस्सह सर्वौषधिभ्यो रसान् सर्वस्थानेभ्य उदकानि चाकर्षति तानि किरणैः सहान्तरिक्षे निवसन्ति। वायुना सह गच्छन्त्यागच्छन्ति च॥ १॥

पदार्थः-हे मनुष्य! यह (**इन्द्र**) समय का विभाग करनेवाला सूर्य्य (**ऋतुना**) वसन्त आदि ऋतुओं के साथ (**सोमम्**) ओषधि आदि पदार्थों के रस को (**पिब**) पीता है, और ये (**तदोकसः**) जिनके अन्तरिक्ष वायु आदि निवास के स्थान तथा (**मत्सरासः**) आनन्द के उत्पन्न करनेवाले हैं, वे (**इन्दवः**) जलों के रस (**ऋतुना**) वसन्त आदि ऋतुओं के साथ (**त्वा**) इस प्राणी वा अप्राणी को क्षण-क्षण (**आविशन्तु**) आवेश करते हैं॥ १॥

भावार्थः-यह सूर्य्य वर्ष, उत्तरायण दक्षिणायन, वसन्त आदि ऋतु, चैत्र आदि बारहों महीने, शुक्ल और कृष्णपक्ष, दिन-रात, मुहूर्त जो कि तीस कलाओं का संयोग कला जो ३० (तीस) काष्ठा का

संयोग, काष्ठा जो कि अठारह निमेष का संयोग तथा निमेष आदि समय के विभागों को प्रकाशित करता है। जैसे कि मनुजी ने कहा है, और उन्हीं के साथ सब ओषधियों के रस और सब स्थानों से जलों को खींचता है, वे किरणों के साथ अन्तरिक्ष में स्थित होते हैं, तथा वायु के साथ आते-जाते हैं॥१॥

अथ ऋतुभिः सह मरुतः पदार्थानाकर्षन्ति पुनन्ति चेत्युपदिश्यते।

अब ऋतुओं के साथ पवन आदि पदार्थ सब को खींचते और पवित्र करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन।
यूयं हि ष्ठा सुदानवः॥२॥

मरुतः। पिबत। ऋतुना। पोत्रात्। यज्ञम्। पुनीतन। यूयम्। हि। स्थ। सुऽदानवः॥२॥

पदार्थः-**(मरुतः)** वायवः। **मृग्रोरुतिः।** (उणा०१.९४) इति **'मृङ्'**धातोरुतिः प्रत्ययः। **मरुत इति पदनामसु पठितम्।** (निघं०५.५) अनेन गमनागमनक्रियाप्रापका वायवो गृह्यन्ते। **(पिबत)** पिबन्ति। अत्र व्यत्ययो लडर्थे लोट् च। **(ऋतुना)** ऋतुभिः सह **(पोत्रात्)** पुनाति येन गुणेन तस्मात्। अत्र **सर्वधातुभ्यः ष्ट्रन्।** (उणा०४.१६३) इति पूञ्धातोः ष्ट्रन् प्रत्ययः स्वरव्यत्ययश्च। **(यज्ञम्)** त्रिविधं पूर्वोक्तम् **(पुनीतन)** पुनन्ति पवित्रीकुर्वन्ति। अत्र व्यत्ययो लडर्थे लोट् तकारस्य तनबादेशश्च। **(यूयम्)** एते **(हि)** यतः **(स्थ)** सन्ति। अत्र पुरुषव्यत्ययो लडर्थे लोट्, **अन्येषामपि दृश्यते** इति दीर्घश्च। **(सुदानवः)** सुष्ठु दानहेतवः। **दाभाभ्यां नुः।** (उणा०३.३१) इति सूत्रेण नुः प्रत्ययः॥२॥

अन्वयः-इमे मरुत ऋतुना सर्वान् पिबत पिबन्ति त एव पोत्राद्यज्ञं पुनीतन पुनन्ति हि यतो यूयमेते सुदानवः स्थ सन्ति तस्माद्युक्त्या योजिता कार्य्यसाधका भवन्तीति॥२॥

भावार्थः-ऋतुपर्य्यायेण वायुष्वपि गुणा यथाक्रममुत्पद्यन्ते तद्विशिष्टः सर्वेषां त्रसरेण्वादीनां चेष्टानां च हेतवः सन्त्यग्नौ सुगन्ध्यादिहोमद्वारा पवित्रीभूत्वा सर्वान् सुखयुक्तान् कृत्वा त एव दानादानहेतवो भवन्ति॥२॥

पदार्थः-ये **(मरुतः)** पवन (**ऋतुना**) वसन्त आदि ऋतुओं के साथ सब रसों को **(पिबत)** पीते हैं, वे ही **(पोत्रात्)** अपने पवित्रकारक गुण से **(यज्ञम्)** उक्त तीन प्रकार के यज्ञ को **(पुनीतन)** पवित्र करते हैं, तथा (**हि**) जिस कारण **(यूयम्)** वे **(सुदानवः)** पदार्थों के अच्छी प्रकार दिलानेवाले **(स्थ)** हैं, इससे वे युक्ति के साथ क्रियाओं में युक्त हुए कार्य्यों को सिद्ध करते हैं॥२॥

भावार्थः-ऋतुओं के अनुक्रम से पवनों में भी यथायोग्य गुण उत्पन्न होते हैं, इसीसे वे त्रसरेणु आदि पदार्थों वा क्रियाओं के हेतु होते हैं तथा अग्नि के बीच में सुगन्धित पदार्थों के होमद्वारा वे पवित्र होकर प्राणीमात्र को सुखसंयुक्त करते हैं और वे ही पदार्थों के देने-लेने में हेतु होते हैं॥२॥

अथर्तुना सह विद्युत् किं करोतीत्युपदिश्यते।

अब ऋतुओं के साथ विद्युत् अग्नि क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है–

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना।
त्वं हि रत्नधा असि॥ ३॥

अभि। यज्ञम्। गृणीहि। नः। ग्नावः। नेष्टरिति। पिब। ऋतुना। त्वम्। हि। रत्नऽधाः। असि॥ ३॥

पदार्थः–(**अभि**) आभिमुख्ये (**यज्ञम्**) सङ्गम्यमानं पूर्वोक्तम् (**गृणीहि**) गृणाति स्तुतिहेतुर्भवति। अत्र व्यत्ययो लडर्थे लोट् च। (**नः**) अस्माकम् (**ग्नावः**) सर्वपदार्थप्राप्तिर्यस्य व्यवहारे। **ग्ना इति उत्तरपदनामसु पठितम्।** (निघं०३.२९) (**नेष्टः**) विद्युत् पदार्थशोधकत्वात्पोषकत्वाच्च नेनेक्ति सर्वान् पदार्थानिति। **नप्तृनेष्टृ०** (उणा०२.९१) अनेन निपातनम् (**पिब**) पिबति। अत्र व्यत्ययो लडर्थे लोट् च। (**ऋतुना**) ऋतुभिः सह (**त्वम्**) सोऽयम् (**हि**) यतः (**रत्नधाः**) रत्नानि रमणार्थानि पृथिव्यादीनि वस्तूनि दधातीति सः (**असि**) अत्र व्यत्ययः॥ ३॥

अन्वयः-हे विद्वन्! यत इयं नेष्टर्नेष्ट्रीविद्युदृतुना सह रसान् पिब पिबति रत्नधा अस्यस्ति स ग्नावो ग्नावान् न इमं यज्ञमभिगृणीहि गृणाति तस्मात्त्वमेतया कार्य्याणि साधय॥ ३॥

भावार्थः-इयं विद्युदग्नेः सूक्ष्मावस्था वर्त्तते, सा सर्वान् मूर्त्तद्रव्यसमूहावयवानभिव्याप्य धरति छिनत्ति वाऽतएव चाक्षुषोऽग्निः प्रादुर्भवत्यत्रैवान्तर्दधाति चेति॥ ३॥

पदार्थः–यह (**नेष्टः**) शुद्धि और पुष्टि आदि हेतुओं से सब पदार्थों का प्रकाश करनेवाली बिजुली (**ऋतुना**) ऋतुओं के साथ रसों को (**पिब**) पीती है तथा (**हि**) जिस कारण (**रत्नधाः**) उत्तम पदार्थों की धारण करनेवाली (**असि**) है, (**त्वम्**) सो यह (**ग्नावः**) सब पदार्थों की प्राप्ति करानेहारी (**नः**) हमारे इस (**यज्ञम्**) यज्ञ को (**अभिगृणीहि**) सब प्रकार से ग्रहण करती है, इसलिये तुम लोग इससे सब कार्य्यों को सिद्ध करो॥ ३॥

भावार्थः-यह जो बिजुली अग्नि की सूक्ष्म अवस्था है, सो सब स्थूल पदार्थों के अवयवों में व्याप्त होकर उनको धारण और छेदन करती है, इसी से यह प्रत्यक्ष अग्नि उत्पन्न होके उसी में विलाय जाता है॥ ३॥

अग्निरपि ऋतुयोजको भवतीत्युपदिश्यते।

अग्नि भी ऋतुओं का संयोजक होता है, इस विषय का उपदेश अगले मन्त्र में किया है–

अग्ने देवाँ इहावह सादया योनिषु त्रिषु।
परि भूष पिब ऋतुना॥ ४॥

अग्नेऽ। देवान्। इह। आ। वह। सादय। योनिषु। त्रिषु। परि। भूष। पिब। ऋतुना॥४॥

पदार्थः-(**अग्ने**) अग्निर्भौतिको विद्युत्प्रसिद्धो वा (**देवान्**) दिव्यगुणसहितान् पदार्थान् (**इह**) अस्मिन् संसारे (**आ**) समन्तात् (**वह**) वहति प्रापयति (**सादय**) हन्ति। अत्रोभयत्र व्यत्ययः, **अन्येषामपि दृश्यते** इति दीर्घश्च। (**योनिषु**) युवन्ति मिश्रीभवन्ति येषु कार्य्येषु कारणेषु वा तेषु। अत्र **वहिश्रिश्रुयु०** (उणा०४.५३) अनेन '**यु**'धातोर्निः प्रत्ययो निच्च। (**त्रिषु**) नामजन्मस्थानेषु त्रिविधेषु लोकेषु (**परि**) सर्वतोभावे (**भूष**) भूषत्यलङ्करोति (**पिब**) पिबति। अत्रापि व्यत्ययः। (**ऋतुना**) ऋतुभिः सह॥४॥

अन्वयः-भौतिकोऽयमग्निरिहर्तुना त्रिषु योनिषु देवान् दिव्यान् सर्वान् पदार्थानावह समन्तात् प्रापयति सादय स्थापयति परिभूष सर्वतो भूषत्यलङ्करोति सर्वेभ्यो रसं पिब पिबति॥४॥

भावार्थः-अयमग्निर्दाहगुणयुक्तो रूपप्रकाशेन सर्वान् पदार्थानुपर्य्यधोमध्यस्थान् शोभितान् करोति। हवने शिल्पविद्यायां च संयोजितः सन् दिव्यानि सुखानि प्रकाशयतीति॥४॥

पदार्थः-यह (**अग्ने**) प्रसिद्ध वा अप्रसिद्ध भौतिक अग्नि (**इह**) इस संसार में (**ऋतुना**) ऋतुओं के साथ (**त्रिषु**) तीन प्रकार के (**योनिषु**) जन्म, नाम और स्थानरूपी लोकों में (**देवान्**) श्रेष्ठगुणों से युक्त पदार्थों को (**आ वह**) अच्छी प्रकार प्राप्त करता (**सादय**) हननकर्त्ता (**परिभूष**) सब ओर से भूषित करता और सब पदार्थों के रसों को (**पिब**) पीता है॥४॥

भावार्थः-दाहगुणयुक्त यह अग्नि अपने रूप के प्रकाश से सब ऊपर नीचे वा मध्य में रहनेवाले पदार्थों को अच्छी प्रकार सुशोभित करता, होम और शिल्पविद्या में संयुक्त किया हुआ दिव्य-दिव्य सुखों का प्रकाश करता है॥४॥

ऋतुना सह वायुः किं करोतीत्युपदिश्यते।

ऋतुओं के साथ वायु क्या-क्या कार्य्य करता है, इस विषय का उपदेश अगले मन्त्र में किया है-

ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु।

तवेद्धि सख्यमस्तृतम्॥५॥

ब्राह्मणात्। इन्द्र। राधसः। पिब। सोमम्। ऋतून्। अनु। तव। इत्। हि। सख्यम्। अस्तृतम्॥५॥

पदार्थः-(**ब्राह्मणात्**) ब्राह्मणो बृहतोऽवयवात्। अत्र **अनुदात्तादेश्च।** (अष्टा०४.३.१४०) इत्यवयवार्थेऽञ् प्रत्ययः। (**इन्द्र**) ऐश्वर्य्यजीवनहेतुत्वाद्वायुः। (**राधसः**) पृथिव्यादिधनात्। अत्र **सर्वधातुभ्योऽसुन्** इत्यसुन् प्रत्ययः। (**पिब**) पिबति गृह्णाति। अत्र व्यत्ययो लडर्थे लोट्, **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**सोमम्**) पदार्थरसम् (**ऋतून्**) रसाहरणसाधकान् (**अनु**) पश्चात् (**तव**) तस्य प्राणरूपस्य (**इत्**) एव (**हि**) खलु (**सख्यम्**) मित्रस्य भाव इव (**अस्तृतम्**) हिंसारहितम्॥५॥

अन्वयः-य इन्द्रो वायुर्ब्राह्मणाद्राधसोऽन्वृतून् सोमं पिब पिबति गृह्णाति हि खलु तस्य वायोरस्तृतं सख्यमस्ति॥५॥

भावार्थः-मनुष्यैर्जगत्स्रष्ट्रेश्वरेण ये ये यस्य यस्य वाय्वा पदार्थस्य मध्ये नियमा स्थापितास्तान् विदित्वा कार्य्याणि साधनीयानि, तत्सिद्ध्या सर्वर्तुषु सर्वप्राण्यनुकूलं हितसम्पादनं कार्य्यम्। युक्त्या सेविता एते मित्रवद्भवन्त्ययुक्त्या च शत्रुवदिति वेद्यम्॥५॥

पदार्थः-जो **(इन्द्र)** ऐश्वर्य्य वा जीवन का हेतु वायु **(ब्राह्मणा)** बड़े का अवयव **(राधसः)** पृथिवी आदि लोकों के धन से **(अनुऋतून्)** अपने-अपने प्रभाव से पदार्थों के रस को हरनेवाले वसन्त आदि ऋतुओं के अनुक्रम से **(सोमम्)** सब पदार्थों के रस को **(पिब)** ग्रहण करता है, इससे **(हि)** निश्चय से **(तव)** उस वायु का पदार्थों के साथ **(अस्तृतम्)** अविनाशी **(सख्यम्)** मित्रपन है॥५॥

भावार्थः-मनुष्यों को योग्य है कि जगत् के रचनेवाले परमेश्वर ने जो-जो जिस-जिस वायु आदि पदार्थों में नियम स्थापन किये हैं उन-उनको जान कर कार्य्यों को सिद्ध करना चाहिये। और उन से सिद्ध किये हुए धन से सब ऋतुओं में सब प्राणियों के अनुकूल हित सम्पादन करना चाहिये, तथा युक्ति के साथ सेवन किये हुए पदार्थ मित्र के समान होते और इससे विपरीत शत्रु के समान होते हैं, ऐसा जानना चाहिये॥५॥

इदानीं वायुविशेषौ प्राणोदानावृतुना सह किं कुरुत इत्युपदिश्यते।

अब वायुविशेष प्राण वा उदान ऋतुओं के साथ क्या-क्या प्रकाश करते हैं, इस बात का उपदेश अगले मन्त्र में किया है-

युवं दक्षं धृतव्रत मित्रावरुण दूळभम्।
ऋतुना यज्ञमाशाथे॥६॥२८॥

युवम्। दक्षम्। धृतऽव्रता। मित्रा।ऽवरुणा। दुःदभम्। ऋतुना। यज्ञम्। आशाथे इति॥६॥

पदार्थः-**(युवम्)** ताविमौ। अत्र व्यत्ययः **प्रथमायाश्च द्विवचने भाषायाम्।** (अष्टा०७.२.८८) इति भाषायामाकारस्य विधानादत्राकारादेशो न। **(दक्षम्)** बलम् **(धृतव्रता)** धृतानि व्रतानि बलानि याभ्यां तौ **(मित्रावरुणा)** मित्रश्च वरुणश्च तौ प्राणोदाणौ। अत्रोभयत्र **सुपां सुलुग्०** इति विभक्तेकारादेशो व्यत्ययेन ह्रस्वत्वं च। **(दूडभम्)** शत्रुभिर्दुःखेन दम्भितुमर्हम्। **दुरो दाशनाशदमध्येषूत्वं वक्तव्यमुत्तरपदादेश्च ष्टुत्वम्।** (अष्टा०६.३.१०९) इति वार्तिकेन दुर इत्यस्य रेफस्योकारः सवर्णदीर्घादेशो धातोर्दकारस्य डकारश्च, खलन्तं रूपम्। सायणाचार्य्येण दूडभपदस्य **'दह'** धातो रूपमिति साधितं तन्महाभाष्यकारव्याख्यान-विरुद्धत्वादशुद्धमेव। **(ऋतुना)** ऋतुभिः सह **(यज्ञम्)** पूर्वोक्तं त्रिविधं क्रियाजन्यम् **(आशाथे)** व्याप्तवन्तौ स्तः। अत्र व्यत्ययः॥६॥

अन्वयः-युवमिमौ धृतव्रता मित्रावरुणावृतुना दूडभं दक्षं यज्ञमाशाथे व्याप्तवन्तौ स्तः॥६॥

भावार्थः-सर्वमित्रो बाह्यगतिः प्राण आभ्यन्तरगतिर्बलसाधको वरुण उदानः, एताभ्यामेव प्राणिभिः सर्वजगदाख्यो यज्ञो बलं चतुर्योगेन धृत्वा व्याप्यते, येन सर्वे व्यवहाराः सिध्यन्तीति॥६॥

इत्यष्टाविंशो वर्गः समाप्तः॥

पदार्थः-(**युवम्**) ये (**धृतव्रतौ**) बलों को धारण करनेवाले (**मित्रावरुणौ**) प्राण और अपान (**ऋतुना**) ऋतुओं के साथ (**दूडभम्**) जो कि शत्रुओं को दुःख के साथ धर्षण कराने योग्य (**दक्षम्**) बल तथा (**यज्ञम्**) उक्त तीन प्रकार के यज्ञ को (**आशाथे**) व्याप्त होते हैं॥६॥

भावार्थः-जो सबका मित्र बाहर आनेवाला प्राण तथा शरीर के भीतर रहनेवाला उदान है, इन्हीं से प्राणि ऋतुओं के साथ सब संसाररूपी यज्ञ और बल को धारण करके व्याप्त होते हैं, जिससे सब व्यवहार सिद्ध होते हैं॥६॥

यह अट्ठाईसवां वर्ग पूरा हुआ॥

पुनरीश्वरभौतिकगुणा उपदिश्यन्ते।

फिर अगले मन्त्र में ईश्वर और भौतिक अग्नि के गुणों का उपदेश किया है-

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे।

यज्ञेषु देवमीळते॥७॥

द्रविणःऽदाः। द्रविणसः। ग्रावहस्तासः। अध्वरे। यज्ञेषु। देवम्। ईळते॥७॥

पदार्थः-(**द्रविणोदाः**) द्रविणांसि विद्याबलराज्यधनानि ददातीति स परमेश्वरो भौतिको वा। **द्रविणमिति बलनामसु पठितम्।** (निघं०२.९) **द्रविणोदा इति पदनामसु पठितम्।** (निघं०५.२) द्रविणं करोति द्रविणति, अस्मात् **सर्वधातुभ्योऽसुन्** इत्युसुन्प्रत्ययः। तद्ददातीति निरुक्त्या पदनामसु पठितत्वाज्ज्ञानस्वरूपत्वादीश्वरो ज्ञानक्रियाहेतुत्वादग्न्यादयश्च गृह्यन्ते। दूयन्ते प्राप्यन्ते यानि तानि द्रविणानि। **दुदक्षिभ्यामिनन्।** (उणा०२.४९) अनेन '**दु**'धातोरिनन् प्रत्ययः। (**द्रविणसः**) यज्ञकर्त्तारः द्रविणसम्पादकाः। (**ग्रावहस्तासः**) ग्रावा स्तुतिसमूहो ग्रहणं हननं वा ग्रावाणः पाषाणादयो यज्ञशिल्पविद्यासिद्धिहेतवो हस्तेषु येषां ते। **ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा।** (निरु०९.८) (**अध्वरे**) अनुष्ठातव्ये क्रियासाध्ये यज्ञे (**यज्ञेषु**) अग्निहोत्राद्यश्वमेधान्तेषु शिल्पविद्यामयेषु वा (**देवम्**) दिव्यगुणवन्तम् (**ईळते**) स्तुवन्ति अध्येषन्ति वा।

एतद्विषयान् मन्त्रान् यास्कमुनिरेवं व्याख्यातवान्-**द्रविणोदाः कस्मात्? धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति-द्रविणोदा द्रवि० द्रविणोदा यस्त्वं द्रविणस इति द्रविणसादिन इति वा द्रविणसानिन इति वा द्रविणसस्तस्मात् पिबत्विति वा। यज्ञेषु देवमीडते। याचन्ति स्तुवन्ति वर्धयन्ति पूज्यन्तीति वा। तत्को द्रविणोदा? इन्द्र इति क्रोष्टुकिः,**

स बलधनयोर्दातृतमस्तस्य च सर्वा बलकृतिरोजसो जातमुतमन्य एनमिति चाहाऽथाप्यग्निं द्राविणोदसमाहैष पुनरेतस्माज्जायते। यो अश्मनोरन्तरग्निं जजानेत्यपि निगमो भवत्यथाप्यृतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति तेषां पुनः पात्रस्येन्द्रपानमिति भवत्यथाप्येनं सोमपानेन स्तौत्यथाप्याह। द्रविणोदाः पिबतु द्राविणोदस इत्ययमेवाग्निर्द्रविणोदा इति शाकपूणिराग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति। देवा अग्निं धारयन् द्रविणोदामित्यपि निगमो भवति यथो एतत्स बलधनयोर्दातृतम इति सर्वासु देवतास्वैश्वर्य्यं विद्यते यथो एतदोजसो जातमुतमन्य एनमिति चाहेत्ययमप्यग्निरोजसा बलेन मथ्यमानो जायते तस्मादेनमाह सहसस्पुत्रं सहसः सूनुं सहसो यहुं यथो एतदग्निं द्राविणोदसमाहेत्यृत्विजोऽत्र द्रविणोदस उच्यन्ते हविषो दातारस्ते चैनं जनयन्ति। ऋषीणां पुत्रो अधिराज एष इत्यपि निगमो भवति। यथो एतत्तेषां पुनः पात्रस्येन्द्रपानमिति भवतीति भक्तिमात्रं तद्भवति। यथा वायव्यानीति। सर्वेषां सोमपात्राणां यथो एतत्सोमपानेनैनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते। सोमं पिब मन्दसानो गणश्रिभिरित्यपि निगमो भवति। यथो एतद्द्रविणोदाः पिबतु द्रविणोदस इत्यस्यैव तद्भवति॥ निरु०८.१-२) अनेन निरुक्तेनैवमेव द्रविणोदश्शब्दस्य यथायोग्यं सर्वत्रार्थान्वयो विज्ञेयः। सायणाचार्य्येण द्रविणोदा इति पदं क्विबन्तं साधितं तदप्यत्राशुद्धमेवास्ति। कुतः, निरुक्तकारस्य द्रविणोदसामित्यादिव्याख्यानविरोधात्। स्वरस्तु **गतिकारकोपदात्०** इति सिद्ध एव॥७॥

अन्वयः-यो द्रविणोदा देवः परमेश्वरो भौतिको वास्ति यं देवं ग्रावहस्तासो द्रविणस ऋत्विजोऽध्वरे यज्ञेष्वीळते पूजयन्त्यध्येष्य योजयन्ति वा तमुपास्योपयुज्य मनुष्याः एव सदा आनन्दिता भवन्ति॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। सकलैर्मनुष्यैः सर्वेषु कर्मोपासनाज्ञानकाण्डसाध्येषु यज्ञेषु परमेश्वरः पूज्यः। होमशिल्पादिषु यज्ञेषु भौतिकोऽग्निः सुयोजनीयश्चेति॥७॥

पदार्थः-**(द्रविणोदाः)** जो विद्या बल राज्य और धनादि पदार्थों का देने और दिव्य गुणवाला परमेश्वर तथा उत्तम धन आदि पदार्थ देने और दिव्यगुणवाला भौतिक अग्नि है, जिस **(देवम्)** देव को **(ग्रावहस्तासः)** स्तुति समूह ग्रहण वा हनन और पत्थर आदि यज्ञ सिद्ध करनेहारे शिल्पविद्या के पदार्थ हाथ में हैं, जिनके ऐसे जो **(द्रविणसः)** यज्ञ करने वा द्रव्यसम्पादक विद्वान् हैं, वे **(अध्वरे)** अनुष्ठान करने योग्य क्रियासाध्य हिंसा के अयोग्य और **(यज्ञेषु)** अग्निहोत्र आदि अश्वमेधपर्य्यन्त वा शिल्पविद्यामय यज्ञों में **(ईळते)** पूजन वा उसके गुणों की खोज करके संयुक्त करते हैं, वही मनुष्य सदा आनन्दयुक्त रहते हैं॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। सब मनुष्यों को सब कर्म, उपासना तथा ज्ञानकाण्ड यज्ञों में परमेश्वर ही की पूजा तथा भौतिक अग्नि होम वा शिल्पादि कामों में अच्छी प्रकार संयुक्त करने योग्य है॥७॥

स एव सर्वेषां पदार्थानां प्रदातेत्युपदिश्यते।

उक्त अग्नि ही सब पदार्थों का देने वा उनका दिलानेवाला है, इस विषय का उपदेश अगले मन्त्र में किया है-

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे।
देवेषु ता वनामहे॥८॥

द्रविणःऽदाः। ददातु। नः। वसूनि। यानि। शृण्विरे। देवेषु। ता। वनामहे॥८॥

पदार्थः-(**द्रविणोदाः**) सुष्ठूपासितो जगदीश्वरः सम्यग्योजितो भौतिको वा (**ददातु**) ददाति वा। अत्र पक्षे लडर्थे लोट्। (**नः**) अस्मभ्यम् (**वसूनि**) विद्याचक्रवर्त्तिराज्यप्राप्याण्युत्तमानि धनानि (**यानि**) परोक्षाणि (**शृण्विरे**) श्रूयन्ते। अत्र '**श्रु**' धातोः **छन्दसि लुङ्लङ्लिट** इति लडर्थे लिट्, **छन्दस्युभयथा** इति सार्वधातुकत्वेन श्नुविकरण आर्द्धधातुकत्वाद्यगभावः, विकरणव्यवहितत्वाद् द्वित्वं च न भवति। (**देवेषु**) विद्वत्सु दिव्येषु सूर्य्यादिपदार्थेषु वा (**ता**) तानि। अत्र **शेश्छन्दसि बहुलम्** इति लोपः। (**वनामहे**) सम्भजामहे। अत्र व्यत्ययेनात्मनेपदम्॥८॥

अन्वयः-अस्माभिर्यानि देवेषु दिव्येषु कर्म्मसु राज्येषु वा शिल्पविद्यासिद्धेषु विमानादिषु सत्सु वसूनि शृण्विरे श्रूयन्ते ता तानि वयं वनामह एतानि च द्रविणोदा जगदीश्वरो नोऽस्मभ्यं ददातु भौतिकश्च ददाति॥८॥

भावार्थः-परमेश्वरणास्मिन् जगति प्राणिभ्यो ये पदार्था दत्तास्तेभ्य उपकारे संयोजितेभ्यो यावन्ति प्रत्यक्षाप्रत्यक्षाणि वस्तुजातानि वर्त्तन्ते तानि देवेषु विद्वत्सु स्थित्वैव सुखप्रदानि भवन्तीति॥८॥

पदार्थः-हम लोगों के (**यानि**) जिन (**देवेषु**) विद्वान् वा दिव्य सूर्य्य आदि अर्थात् शिल्पविद्या से सिद्ध विमान आदि पदार्थों में (**वसूनि**) जो विद्या, चक्रवर्त्ति राज्य और प्राप्त होने योग्य उत्तम धन (**शृण्विरे**) सुनने में आते तथा हम लोग (**वनामहे**) जिनका सेवन करते हैं, (**ता**) उनको (**द्रविणोदाः**) जगदीश्वर (**नः**) हम लोगों के लिये (**ददातु**) देवे तथा अच्छी प्रकार सिद्ध किया हुआ भौतिक अग्नि भी देता है॥८॥

भावार्थः-परमेश्वर ने इस संसार में जीवों के लिये जो पदार्थ उत्पन्न किये हैं, उपकार में संयुक्त किये हैं, उन पदार्थों से जितने प्रत्यक्ष वा अप्रत्यक्ष वस्तु से सुख उत्पन्न होते हैं, वे विद्वानों ही के संग से सुख देनेवाले होते हैं॥८॥

यज्ञकर्त्तॄणामृतुषु कर्त्तव्यान्युपदिश्यन्ते।

यज्ञ करनेवाले मनुष्यों को ऋतुओं में करने योग्य कार्य्यों का उपदेश अगले मन्त्र में किया है-

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत।

नेष्ट्रादृतुभिरिष्यत॥ ९॥

द्रविणःऽदाः। पिपीषति। जुहोत। प्र। च। तिष्ठत। नेष्ट्रात्। ऋतुभिः। इष्यत॥ ९॥

पदार्थः-(**द्रविणोदाः**) यज्ञानुष्ठाता मनुष्यः (**पिपीषति**) सोमादिरसान् पातुमिच्छति। अत्र '**पीङ्**' धातोः सन् व्यत्ययेन परस्मैपदं च। (**जुहोत**) दत्तादत्त वा। अत्र तत्पिबति तम्। (**प्र**) प्रकृष्टार्थे (**च**) समुच्चयार्थे (**तिष्ठत**) प्रतिष्ठां प्राप्नुत। अत्र **वा च्छन्दसि सर्वे विधयो भवन्ति** इति नियमात् **समवप्रविभ्यः स्थः।** (अष्टा०१.३.२२) इत्यात्मनेपदं न भवति। (**नेष्ट्रात्**) विज्ञानहेतोः। अत्र **णेष्टृ गतौ** इत्यस्मात् **सर्वधातुभ्यः ष्ट्रन्।** (उणा०४.१६३) इति बाहुलकात् ष्ट्रन् प्रत्ययः। (**ऋतुभिः**) वसन्तादिभिर्योगे (**इष्यत**) विजानीत॥९॥

अन्वयः-हे मनुष्या! यथा द्रविणोदा यज्ञानुष्ठाता विद्वान् मनुष्यो यज्ञेषु सोमादिरसं पिपीषति तथैव यूयमपि तान् यज्ञान् नेष्ट्रात् जुहोत। तत्कृत्वर्त्तुभिर्योगे सुखैः प्रकृष्टतया तिष्ठत प्रतिष्ठध्वं तद्विद्यामिष्यत च॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सत्कर्मणोऽनुकरणमेव कर्त्तव्यं, नासत्कर्मणः। सर्वेष्वृतुषु यथायोग्यानि कर्म्माणि कर्त्तव्यानि यस्मिन्नृतौ यो देशः स्थातुं गन्तुं योग्यस्तत्र स्थातव्यं गन्तव्यं च तत्तद्देशानुसारेण भोजनाच्छादनविहाराः कर्त्तव्याः। इत्यादिभिर्व्यवहारैः सुखानि सततं सेव्यानीति॥९॥

पदार्थः-हे मनुष्यो! जैसे (**द्रविणोदाः**) यज्ञ का अनुष्ठान करनेवाला विद्वान् मनुष्य यज्ञों में सोम आदि ओषधियों के रस को (**पिपीषति**) पीने की इच्छा करता है, वैसे ही तुम भी उन यज्ञों को (**नेष्ट्रात्**) विज्ञान से (**जुहोत**) देने-लेने का व्यवहार करो तथा उन यज्ञों को विधि के साथ सिद्ध करके (**ऋतुभिः**) ऋतु-ऋतु के संयोग से सुखों के साथ (**प्रतिष्ठत**) प्रतिष्ठा को प्राप्त हो और उनकी विद्या को सदा (**इष्यत**) जानो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को अच्छे ही काम सीखने चाहियें, दुष्ट नहीं, और सब ऋतुओं में सब सुखों के लिये यथायोग्य कर्म्म करना चाहिये, तथा जिस ऋतु में जो देश स्थिति करने वा जाने-आने योग्य हो, उसमें उसी समय स्थिति वा जाना तथा उस देश के अनुसार खाना-पीना वस्त्रधारणादि व्यवहार करके सब व्यवहार में सुखों को निरन्तर सेवन करना चाहिये॥९॥

पुनः प्रत्यृतुमीश्वरध्यानमुपदिश्यते।

फिर ऋतु-ऋतु में ईश्वर का ध्यान करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे।
अध स्मा नो ददिर्भव॥ १०॥

यत्। त्वा। तुरीयम्। ऋतुभिः। द्रविणःऽदः। यजामहे। अध। स्म। नः। ददिः। भव॥ १०॥

पदार्थः-**(यत्)** यम् **(त्वा)** त्वां जगदीश्वरम् **(तुरीयम्)** चतुर्णां स्थूलसूक्ष्मकारणपरमकारणानां संख्यापूरकम्। अत्र **चतुरश्छयतावाद्यक्षरलोपश्च।** (अष्टा०५.२.५१) इति वार्त्तिकेनास्य सिद्धिः। **(ऋतुभिः)** ऋच्छन्ति प्राप्नुवन्ति यैस्तैः। अत्र **अर्त्तेश्च तुः।** (उणा०१.७३) इति **'ऋ'**धातोस्तुः प्रत्ययः किच्च। **(द्रविणोदः)** ददतीति दाः, द्रविणस्यात्मशुद्धिकरस्य विद्यादेर्धनस्य दास्तत्सम्बुद्धौ **(यजामहे)** पूजयामहे **(अध)** निश्चयार्थे **(स्म)** सुखार्थे। **निपातस्य च** इति दीर्घः। **(नः)** अस्मभ्यम् **(ददिः)** दाता। अत्र **आदृगम०** (अष्टा०३.२.१७१) इति **'डुदाञ्'**धातोः किः प्रत्ययः। **(भव)**॥१०॥

अन्वयः-हे द्रविणोदो जगदीश्वर! वयं यद्यं तुरीयं त्वा त्वामृतुभिर्योगे यजामहे स्म स त्वं नोऽस्मभ्यमुत्तमानां विद्यादिधनानां ददिरध भव॥१०॥

भावार्थः-परमेश्वरस्त्रिविधस्य स्थूलसूक्ष्मकारणाख्यस्य जगतः सकाशात्पृथग्वस्तुत्वाच्चतुर्थो वर्त्तते। यश्च सकलैर्मनुष्यैः सर्वाभिव्यापी सर्वान्तर्यामी सर्वाधारो नित्य पूजनीयोऽस्ति, नैतं विहाय केनचिदन्यस्येश्वरबुद्ध्योपासना कार्य्या। नैवैतस्माद्भिन्नः कश्चित्कर्मानुसारेण जीवेभ्यः फलप्रदाताऽस्ति॥१०॥

पदार्थः-हे **(द्रविणोदाः)** आत्मा की शुद्धि करनेवाले विद्या आदि धनदायक ईश्वर! हम लोग **(यत्)** जिस **(तुरीयम्)** स्थूल-सूक्ष्म-कारण और परम कारण आदि पदार्थों में चौथी संख्या पूरण करनेवाले **(त्वा)** आपको **(ऋतुभिः)** पदार्थों को प्राप्त करानेवाले ऋतुओं के योग में **(यजामहे स्म)** सुखपूर्वक पूजते हैं, सो आप **(नः)** हमारे लिये धनादि पदार्थों को **(अध)** निश्चय करके **(ददिः)** देनेवाले **(भव)** हूजिये॥१०॥

भावार्थः-परमेश्वर तीन प्रकार के अर्थात् स्थूल, सूक्ष्म और कारणरूप जगत् से अलग होने के कारण चौथा है, जो कि सब मनुष्यों को सर्वव्यापी सब का अन्तर्यामी और आधार नित्य पूजन करने योग्य है, उसको छोड़कर ईश्वरबुद्धि करके किसी दूसरे पदार्थ की उपासना न करनी चाहिये, क्योंकि इससे भिन्न कोई कर्म के अनुसार जीवों को फल देनेवाला नहीं है॥१०॥

पुनः सूर्य्याचन्द्रमसोर्ऋतुयोगे गुणा उपदिश्यन्ते।

फिर ऋतुओं के साथ में सूर्य्य और चन्द्रमा के गुणों का उपदेश अगले मन्त्र में किया है।

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता।

ऋतुना यज्ञवाहसा॥११॥

अश्विना। पिबतम्। मधु। दीद्यग्नीइति दीदिऽअग्नी। शुचिऽव्रता। ऋतुना। यज्ञऽवाहसा॥११॥

पदार्थः-**(अश्विना)** सूर्य्याचन्द्रमसौ। **सुपां सुलुग्०** इत्याकारादेशः सर्वत्र। **(पिबतम्)** पिबतः। अत्र व्यत्ययो लडर्थे लोट् च। **(मधु)** मधुरं रसम् **(दीद्यग्नी)** दीदिर्दीप्तिहेतुरग्निर्ययोस्तौ **(शुचिव्रता)** शुचिः

पवित्रकरं व्रतं शीलं ययोस्तौ **(ऋतुना)** ऋतुभिः सह **(यज्ञवाहसा)** यज्ञान् हुतद्रव्यान् वहतः प्रापयतस्तौ॥११॥

अन्वयः-हे विद्वांसो! यूयं यौ शुचिव्रता यज्ञवाहसा दीद्यग्नी अश्विनौ मधु पिबतं पिबत ऋतुना ऋतुभिः सह रसान् गमयतस्तौ विजानीत॥११॥

भावार्थः-ईश्वर उपदिशति-मया यौ सूर्य्याचन्द्रमसावित्यादिसंयुक्तौ द्वौ द्वौ पदार्थौ कार्य्यसिद्ध्यर्थमीश्वरेण संयोजितौ, हे मनुष्या! युष्माभिस्तौ सम्यक् सर्वर्त्तुकं सुखं व्यवहारसिद्धिं च प्रापयत इति बोध्यम्॥११॥

पदार्थः-हे विद्वान् लोगो! तुमको जो **(शुचिव्रता)** पदार्थों की शुद्धि करने **(यज्ञवाहसा)** होम किये हुए पदार्थों को प्राप्त कराने तथा **(दीद्यग्नी)** प्रकाशहेतुरूप अग्निवाले **(अश्विना)** सूर्य्य और चन्द्रमा **(मधु)** मधुर रस को **(पिबतम्)** पीते हैं, जो **(ऋतुना)** ऋतुओं के साथ रसों को प्राप्त करते हैं, उनको यथावत् जानो॥११॥

भावार्थः-ईश्वर उपदेश करता है कि मैंने जो सूर्य्य चन्द्रमा तथा इस प्रकार मिले हुए अन्य भी दो-दो पदार्थ कार्यों की सिद्धि के लिये संयुक्त किये हैं, हे मनुष्यो! तुम अच्छी प्रकार सब ऋतुओं के सुख तथा व्यवहार की सिद्धि को प्राप्त करते हो, इनको सब लोग समझें॥११॥

पुनरपि भौतिकाग्निगुणा उपदिश्यन्ते।

फिर भी भौतिक अग्नि के गुणों का उपदेश अगले मन्त्र में किया है-

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि।

देवान् देवयते यज॥१२॥२९॥

गार्हऽपत्येन। सन्त्य। ऋतुना। यज्ञऽनीः। असि। देवान्। देवऽयते। यज॥१२॥

पदार्थः-**(गार्हपत्येन)** गृहपतिना संयुक्तेन व्यवहारेण। **गृहपतिना संयुक्ते ञ्यः।** (अष्टा०४.४.९१) अनेन ञ्यः प्रत्ययः। **(सन्त्य)** सन्तौ सनने क्रियासंविभागे भवः स सन्त्योऽग्निः। अत्र **'सन्'** धातोर्बाहुलकादौणादिकस्तिः प्रत्ययः, ततो **भवे छन्दसि** इति यत्। **(ऋतुना)** ऋतुभिः सह **(यज्ञनीः)** यज्ञं त्रिविधं नयति प्रापयतीति सः। **सत्सूद्विषदुह०** इति क्विप्। **(असि)** भवति। अत्र सर्वत्र व्यत्ययः। **(देवान्)** दिव्यव्यवहारान् **(देवयते)** कुर्वते शिल्पिने **(यज)** यजति शिल्पविद्यायां सङ्गमयति। अत्र लडर्थे लोट्॥१२॥

अन्वयः-यो सन्त्योऽग्निर्गार्हपत्येनर्त्तुना सह यज्ञनीरसि भवति, स देवयते शिल्पिने देवान् यज यजति सङ्गमयति॥१२॥

भावार्थः-यो विद्वद्भिः सर्वेषु व्यवहारकृत्येषु प्रत्यृतुं विद्ययां सम्यक् सम्प्रयोजितोऽयमग्निरस्ति स मनुष्यादिप्राणिभ्यो दिव्यानि सुखानि प्रापयति॥१२॥

चतुर्दशसूक्तार्थेनास्य पञ्चदशसूक्तार्थस्य विश्वेदेवानुयोग्यत्वादीनां यथाक्रमं प्रतिपादनेन सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिरध्यापकविलसनादिभिश्चान्यथैव व्याख्यातम्॥१२॥

इति पञ्चदशं सूक्तमेकोनत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-जो **(सन्त्य)** क्रियाओं के विभाग में अच्छी प्रकार प्रकाशित होने वाला भौतिक अग्नि **(गार्हपत्येन)** गृहस्थों के व्यवहार से **(ऋतुना)** ऋतुओं के साथ **(यज्ञनीः)** तीन प्रकार के यज्ञ को प्राप्त करानेवाला **(असि)** है, सो **(देवयते)** यज्ञ करनेवाले विद्वान् के लिये शिल्पविद्या में **(देवान्)** दिव्य व्यवहारों का **(यज)** संगम करता है॥१२॥

भावार्थः-जो विद्वानों से सब व्यवहाररूप कामों में ऋतु-ऋतु के प्रति विद्या के साथ अच्छी प्रकार प्रयोग किया हुआ अग्नि है, सो मनुष्य आदि प्राणियों के लिये दिव्य सुखों को प्राप्त कराता है॥१२॥

जो सब देवों के अनुयोगी वसन्त आदि ऋतु हैं, उनके यथायोग्य गुणप्रतिपादन से चौदहवें सूक्त के अर्थ के साथ इस पन्द्रहवें सूक्त के अर्थ की सङ्गति जाननी चाहिये।

इस सूक्त का भी अर्थ सायणाचार्य्य आदि तथा यूरोपदेशवासी विलसन आदि लोगों ने कुछ का कुछ वर्णन किया है॥

यह पन्द्रहवां सूक्त और उनत्तीसवां वर्ग पूरा हुआ॥

अथ नवर्च्चस्य षोडशसूक्तस्य काण्वो मेधातिथिर्ऋषिः। इन्द्रो देवता। गायत्री छन्दः। षड्जः स्वरः॥

तत्रेन्द्रगुणा उपदिश्यन्ते।

अब सोलहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सूर्य्य के गुणों का उपदेश किया है-

आ त्वा॑ वहन्तु हर॑यो॒ वृष॑णं॒ सोम॑पीतये।

इन्द्र॑ त्वा॒ सूर॑चक्षसः॥ १॥

आ। त्वा॒। व॒ह॒न्तु॒। हर॑यः। वृष॑णम्। सोम॑ऽपीतये। इन्द्र॑। त्वा॒। सूर॑ऽचक्षसः॥ १॥

पदार्थः-(**आ**) समन्तात् (**त्वा**) तं सूर्य्यलोकम् (**वहन्तु**) प्रापयन्तु (**हरयः**) हरन्ति ये ते किरणाः। **हृपिषिरुहि०** (उणा०४.१२४) इति '**हृ**'धातोरिन् प्रत्ययः (**वृषणम्**) यो वर्षति जलं स वृषा तम्। **कनिन्युवृषि०** (उणा०१.१५४) इति कनिन् प्रत्ययः। **वा षपूर्वस्य निगमे।** (अष्टा०६.४.९) इति विकल्पाद् दीर्घाभावः। (**सोमपीतये**) सोमानां सुतानां पदार्थानां पीतिः पानं यस्मिन् व्यवहारे तस्मै। अत्र **सह सुपा** इति समासः। (**इन्द्र**) विद्वन् (**त्वा**) तं पूर्वोक्तम् (**सूरचक्षसः**) सूरे सूर्य्ये चक्षांसि दर्शनानि येषां ते॥ १॥

अन्वयः-हे इन्द्र! यं वृषणं सोमपीतये सूरचक्षसो हरयः सर्वतो वहन्ति त्वा तं त्वमपि वह, यं सर्वे शिल्पिनो वहन्ति तं सर्वे वहन्तु, हे मनुष्या! यं वयं विजानीमस्त्वा तं यूयमपि विजानीत॥ १॥

भावार्थः-याः सूर्य्यस्य दीप्तयस्ताः सर्वरसाहारकाः सर्वस्य प्रकाशिका वृष्टिकराः सन्ति ता यथायोग्यमानुकूल्येन मनुष्यैः सेविता उत्तमानि सुखानि जनयन्तीति॥ १॥

पदार्थः-हे विद्वन्! जिस (**वृषणम्**) वर्षा करनेहारे सूर्य्यलोक को (**सोमपीतये**) जिस व्यवहार में सोम अर्थात् ओषधियों के अर्क खिंचे हुए पदार्थों का पान किया जाता है, उसके लिये (**सूरचक्षसः**) जिनका सूर्य्य में दर्शन होता है, (**हरयः**) हरण करनेहारे किरण प्राप्त करते हैं, (**त्वा**) उसको तू भी प्राप्त हो, जिसको सब कारीगर लोग प्राप्त होते हैं, उसको सब मनुष्य (**आवहन्तु**) प्राप्त हों। हे मनुष्यो! जिसको हम लोग जानते हैं (**त्वा**) उसको तुम भी जानो॥ १॥

भावार्थः-जो सूर्य्य की प्रत्यक्ष दीप्ति सब रसों के हरने सबका प्रकाश करने तथा वर्षा करानेवाली हैं, वे यथायोग्य अनुकूलता के साथ सेवन करने से मनुष्यों को उत्तम-उत्तम सुख देती हैं॥ १॥

पुनस्तद्गुणा उपदिश्यन्ते।

फिर भी अगले मन्त्र में सूर्य्यलोक के गुणों का ही उपदेश किया है-

इ॒मा धा॒ना घृ॑त॒स्नुवो॒ हरी॑ इ॒होप॑वक्षतः।

इन्द्रं॑ सु॒खत॑मे॒ रथे॑॥ २॥

इ॒माः। धा॒नाः। घृ॒त॒ऽस्नुवः॑। हरी॒ इति॑। इ॒ह। उप॑। व॒क्ष॒तः॒। इन्द्र॑म्। सु॒खऽत॑मे। रथे॑॥ २॥

पदार्थः-(**इमाः**) प्रत्यक्षाः (**धानाः**) धीयन्ते यासु ता दीप्तयः। **धापृवस्य०** (उणा०३.६) इति नः प्रत्ययः। (**घृतस्नुवः**) घृतमुदकं स्नुवन्ति प्रस्रवन्ति यास्ताः (**हरी**) हरति याभ्यां तौ। **कृष्णशुक्लपक्षौ वा पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्यां हीदं सर्वं हरति** (षड्विंश ब्रा०.१.१) (**इह**) अस्मिन्संसारे (**उप**) सामीप्ये (**वक्षतः**) वहतः। अत्र लडर्थे लेट्। (**इन्द्रम्**) सूर्य्यलोकम् (**सुखतमे**) अतिशयेन सुखहेतौ (**रथे**) रमयति येन तस्मिन्। **हनिकुषिनीरमि०** (उणा०२.२) इति क्थन् प्रत्ययः॥ २॥

अन्वयः-हरी कृष्णशुक्लपक्षाविहेमा घृतस्नुवो धाना इन्द्रं सुखतमे रथ उपवक्षत उपगतं वहतः प्रापयतः॥ १२॥

भावार्थः-यावस्मिन्संसारे रात्रिदिवसौ शुक्लकृष्णपक्षौ दक्षिणायनोत्तरायणौ हरीसंज्ञौ स्तस्ताभ्यां सूर्य्यः सर्वानन्दव्यवहारान् प्रापयति॥ २॥

पदार्थः-(**हरी**) जो पदार्थों को हरनेवाले सूर्य्य के कृष्ण वा शुक्ल पक्ष हैं, वे (**इह**) इस लोक में (**इमाः**) इन (**धानाः**) दीप्तियों को तथा (**इन्द्रम्**) सूर्य्यलोक को (**सुखतमे**) जो बहुत अच्छी प्रकार सुखहेतु (**रथे**) रमण करने योग्य विमान आदि रथों के (**उप**) समीप (**वक्षतः**) प्राप्त करते हैं॥ २॥

भावार्थः-जो इस संसार में रात्रि और दिन शुक्ल तथा कृष्णपक्ष दक्षिणायन और उत्तरायण हरण करने वाले कहलाते हैं, उनसे सूर्य्यलोक आनन्दरूप व्यवहारों को प्राप्त करता है॥ २॥

अथेन्द्रशब्देन त्रयोऽर्था उपदिश्यन्ते।

अब अगले मन्त्र में इन्द्र शब्द से तीन अर्थों का उपदेश किया है-

इन्द्रं॑ प्रा॒तर्हवा॑महू॒ इन्द्रं॑ प्रय॒त्यध्व॒रे।

इन्द्रं॒ सोम॑स्य पी॒तये॑॥ ३॥

इन्द्र॑म्। प्रा॒तः। हु॒वा॒म॒हे॒। इन्द्र॑म्। प्र॒ऽय॒ति। अ॒ध्व॒रे। इन्द्र॑म्। सोम॑स्य। पी॒तये॑॥ ३॥

पदार्थः-(**इन्द्रम्**) परमेश्वरम् (**प्रातः**) प्रतिदिनम् (**हवामहे**) आह्वयेम। **बहुलं छन्दसि** इति सम्प्रसारणम्। (**इन्द्रम्**) परमैश्वर्य्यसाधकं भौतिकमग्निम्। (**प्रयति**) प्रैति प्रकृष्टं ज्ञानं ददातीति प्रयत् तस्मिन्। **इण गतौ** इत्यस्माल्लटः स्थाने शतृप्रत्ययः। (**अध्वरे**) उपासनाक्रियासाध्ये यज्ञे (**इन्द्रम्**) बाह्याभ्यन्तरस्थं वायुम् (**सोमस्य**) सूयते सर्वेभ्यः पदार्थेभ्यो रसस्तस्य (**पीतये**) पानाय। अत्र '**पा**'धातोर्बाहुलकात्तिः प्रत्ययः॥ ३॥

अन्वयः-वयं प्रातः प्रतिदिनमिन्द्रं परमैश्वर्य्यप्रदातारमीश्वरं प्रयत्यध्वरे हवामहे। वयं प्रयत्यध्वरे प्रातः प्रतिदिनमिन्द्रं विद्युदाख्यमग्निं हवामहे। वयं प्रयत्यध्वरे सोमस्य पीतये प्रातः प्रतिदिनमिन्द्रं वायुं हवामहे॥३॥

भावार्थः-मनुष्यैः परमेश्वरः प्रतिदिनमुपासनीयस्तदाज्ञायां वर्त्तितव्यं च। प्रतियज्ञं विद्युदाख्योऽग्निर्योजनीयः प्राणविद्यया पदार्थभोगश्च कार्य्य इति॥३॥

पदार्थः-हम लोग **(प्रातः)** नित्यप्रति **(इन्द्रम्)** परम ऐश्वर्य्य देनेवाले ईश्वर का **(प्रयत्यध्वरे)** बुद्धिप्रद उपासना यज्ञ में **(हवामहे)** आह्वान करें। हम लोग **(प्रयति)** उत्तम ज्ञान देनेवाले **(अध्वरे)** क्रिया से सिद्ध होने योग्य यज्ञ में **(प्रातः)** प्रतिदिन **(इन्द्रम्)** उत्तम ऐश्वर्य्यसाधक विद्युत् अग्नि को **(हवामहे)** क्रियाओं में उपदेश कह सुनके संयुक्त करें, तथा हम लोग **(सोमस्य)** सब पदार्थों के सार रस को **(पीतये)** पीने के लिये **(प्रातः)** प्रतिदिन यज्ञ में **(इन्द्रम्)** बाहरले वा शरीर के भीतरले प्राण को **(हवामहे)** विचार में लावें और उसके सिद्ध करने का विचार करें॥३॥

भावार्थः-मनुष्यों को परमेश्वर प्रतिदिन उपासना करने योग्य है और उसकी आज्ञा के अनुकूल वर्त्तना चाहिये। बिजुली तथा जो प्राणरूप वायु है, उसकी विद्या से पदार्थों का भोग करना चाहिये॥३॥

अथेन्द्रशब्देन वायुगुणा उपदिश्यन्ते।

अब अगले मन्त्र में इन्द्र शब्द से वायु के गुणों का उपदेश किया है-

उप॑ नः सु॒तमा ग॑हि॒ हरि॑भिरिन्द्र के॒शिभि॑:।
सु॒ते हि त्वा॒ हवा॑महे॥४॥

उप॑। न॒:। सु॒तम। आ। ग॒हि॒। हरि॑ऽभि:। इ॒न्द्र॒। के॒शिभि॑:। सु॒ते। हि। त्वा॒। हवा॑महे॥४॥

पदार्थः-**(उप)** निकटार्थे **(नः)** अस्माकम् **(सुतम्)** उत्पादितम् **(आ)** समन्तात् **(गहि)** गच्छति। अत्र व्यत्ययो लडर्थे लोट्। **बहुलं छन्दसि** इति शपो लुक्। **वा छन्दसि** इति हेरपित्वादनुनासिकलोपश्च। **(हरिभिः)** हरणाहरणशीलैर्वेगवद्भिः किरणैः **(इन्द्र)** वायुः **(केशिभिः)** केशा बह्व्यो रश्मयो विद्यन्ते येषामग्निविद्युत्सूर्य्याणां तैः सह। **क्लिशेरन् लोलोपश्च।** (उणा०५.३३) अनेन **'क्लिश'** धातोरन् प्रत्ययो लकारलोपश्च। ततो भूम्न्यर्थ इनिः। **केशी केशा रश्मयस्तैस्तद्वान् भवति काशनाद्वा प्रकाशनाद्वा केशीदं ज्योतिरुच्यते।** (निरु०१२.२५) **(सुते)** उत्पादिते होमशिल्पादिव्यवहारे **(हि)** यतः **(त्वा)** तम् **(हवामहे)** आदद्मः॥४॥

अन्वयः-हि यतोऽयमिन्द्रो वायुः केशिभिर्हरिभिः सह नोऽस्माकं सुतमुपागह्युपागच्छति तस्मात्त्वा तं सुते वयं हवामहे॥४॥

भावार्थः-येऽस्माभिः शिल्पव्यवहारादिषूपकर्त्तव्याः पदार्थाः सन्ति, तेऽग्निविद्युत्सूर्य्या वायुनिमित्तेनैव प्रज्वलन्ति गच्छन्त्यागच्छन्ति च॥४॥

पदार्थः-(**हि**) जिस कारण यह (**इन्द्र**) वायु (**केशिभिः**) जिनके बहुत से केश अर्थात् किरण विद्यमान हैं, वे (**हरिभिः**) पदार्थों के हरने वा स्वीकार करने वाले अग्नि, विद्युत् और सूर्य्य के साथ (**नः**) हमारे (**सुतम्**) उत्पन्न किये हुए होम वा शिल्प आदि व्यवहार के (**उपागहि**) निकट प्राप्त होता है, इससे (**त्वा**) उसको (**सुते**) उत्पन्न किये हुए होम वा शिल्प आदि व्यवहारों में हम लोग (**हवामहे**) ग्रहण करते हैं॥४॥

भावार्थः-जो पदार्थ हम लोगों को शिल्प आदि व्यवहारों में उपकारयुक्त करने चाहियें, वे अग्नि विद्युत् और सूर्य वायु ही के निमित्त से प्रकाशित होते तथा जाते आते हैं॥४॥

पुनरिन्द्रगुणा उपदिश्यन्ते।

फिर भी अगले मन्त्र में इन्द्र के गुणों का उपदेश किया है-

सेमं नः स्तोमम॒मा ग॒ह्युपे॒दं सव॑नं सु॒तम्।
गौ॒रो न तृ॑षि॒तः पि॑ब॥५॥३०॥

सः। इ॒मम्। नः। स्तोम॑म्। आ। ग॒हि॒। उप॑। इ॒दम्। सव॑नम्। सु॒तम्। गौ॒रः। न। तृ॒षि॒तः। पि॒ब॒॥५॥

पदार्थः-(**सः**) इन्द्रः (**इमम्**) अनुष्ठीयमानम् (**नः**) अस्माकम् (**स्तोमम्**) स्तूयते गुणसमूहो यस्तं यज्ञम् (**आ**) समन्तात् (**गहि**) गच्छति । अत्र व्यत्ययो लडर्थे लोट् **बहुलं छन्दसि** इति शपो लुक् च। (**उप**) सामीप्ये (**इदम्**) प्रत्यक्षम् (**सवनम्**) सुवन्त्यैश्वर्य्यं प्राप्नुवन्ति येन तत् क्रियाकाण्डम् (**सुतम्**) ओषध्यादिरसम् (**गौरः**) गौरगुणविशिष्टो मृगः (**न**) जलाशयं प्राप्य जलं पिबतीव (**तृषितः**) यस्तृष्यति पिपासति सः (**पिब**) पिबति। अत्र व्यत्ययो लडर्थे लोट् च॥५॥

अन्वयः-य इन्द्रो नोऽस्माकमिमं स्तोमं सवनं तृषितो गौरो मृगो न इवोपागह्युपागच्छति, स इदं स्तुतमुत्पन्नमोषध्यादिरसं पिब पिबति॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽत्यन्तं तृषिता मृगादयः पशुपक्षिणो वेगेन धावनं कृत्वोदकाशयं प्राप्य जलं पिबति तथैवैष इन्द्रो वेगवद्भिः किरणैरोषध्यादिकं प्राप्यैतेषां रसं पिबति, मनुष्यैः सोऽयं विद्यावृद्धये यथावदुपयोक्तव्यः॥५॥

इति त्रिंशत्तमो वर्गः समाप्तः॥

पदार्थः-जो उक्त सूर्य्य (**नः**) हमारे (**इमम्**) अनुष्ठान किये हुए (**स्तोमम्**) प्रशंसनीय यज्ञ वा (**सवनम्**) ऐश्वर्य प्राप्त करानेवाले क्रियाकाण्ड को (**न**) जैसे (**तृषितः**) प्यासा (**गौरः**) गौरगुणाविशिष्ट हरिन (**उपागहि**) समीप प्राप्त होता है, वैसे (**सः**) वह (**इदम्**) इस (**सुतम्**) उत्पन्न किये ओषधि आदि रस को (**पिब**) पीता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अत्यन्त प्यासे मृग आदि पशु और पक्षी वेग से दौड़कर नदी तालाब आदि स्थान को प्राप्त होके जल को पीते हैं, वैसे ही यह सूर्य्यलोक अपनी वेगवती किरणों से ओषधि आदि को प्राप्त होकर उसके रस को पीता है। सो यह विद्या की वृद्धि के लिये मनुष्यों को यथावत् उपयुक्त करना चाहिये॥५॥

यह तीसवां वर्ग पूरा हुआ॥

अथ वायुः कस्मै कस्मिन् कान् पिबतीत्युपदिश्यते।

अब वायु किसलिये किसमें किन पदार्थों के रस को पीता है, इस विषय का उपदेश अगले मन्त्र में किया है-

इ॒मे सोमा॑स॒ इन्द॑वः सु॒तासो॒ अधि॑ ब॒र्हिषि॑।
ताँ इ॑न्द्र॒ सह॑से पिब॥६॥

इ॒मे। सोमा॑सः। इन्द॑वः। सु॒तासः॑। अधि॑। ब॒र्हिषि॑। तान्। इ॒न्द्र॒। सह॑से। पि॒ब॒॥६॥

पदार्थः-(**इमे**) प्रत्यक्षाः (**सोमासः**) सूयन्त उत्पद्यन्ते सुखानि येभ्यस्ते (**इन्दवः**) उन्दन्ति स्नेहयन्ति सर्वान् पदार्थान् ये ते रसाः। **उन्देरिच्चादेः।** (उणा०१.१२) इत्युः प्रत्ययः, आदेरिकारादेशश्च। (**सुतासः**) ईश्वरेणोत्पादिताः (**अधि**) उपरिभावे (**बर्हिषि**) बृंहन्ति वर्धन्ते सर्वे पदार्था यस्मिन्नन्तरिक्षे तस्मिन्। **बृंहेर्नलोपश्च।** (उणा०२.१०५) अनेन इसिः प्रत्ययो नकारलोपश्च। (**तान्**) उक्तान् (**इन्द्र**) वायुः (**सहसे**) बलाय। **सह इति बलनामसु पठितम्।** (निघं०२.९) (**पिब**) पिबति। अत्र व्यत्ययो लडर्थे लोट् च॥६॥

अन्वयः-येऽधिबर्हिषीश्वरेणेमे सोमास इन्दवः सहसे सुतास उत्पादितास्तानिन्द्रो वायुः प्रतिक्षणे पिबति॥६॥

भावार्थः-ईश्वरेणास्मिन् जगति प्राणिनां बलादिवृद्धये यावन्तो मूर्त्ताः पदार्था उत्पादितास्तान् सूर्य्येण छेदितान् वायुः स्वसमीपस्थान् कृत्वा धरति तस्य संयोगेन प्राण्यप्राणिनो बलयन्ति॥६॥

पदार्थः-जो (**अधि बर्हिषि**) जिसमें सब पदार्थ वृद्धि को प्राप्त होते हैं, उस अन्तरिक्ष में (**इमे**) ये (**सोमासः**) जिनसे सुख उत्पन्न होते हैं, (**इन्दवः**) और सब पदार्थों को गीला करनेवाले रस हैं वे (**सहसे**) बल आदि गुणों के लिये ईश्वर ने (**सुतासः**) उत्पन्न किये हैं, (**तान्**) उन्हीं को (**इन्द्र**) वायु क्षण-क्षण में (**पिब**) पिया करता है॥६॥

भावार्थः-ईश्वर ने इस संसार में प्राणियों के बल आदि वृद्धि के लिये जितने मूर्तिमान् पदार्थ उत्पन्न किये हैं, सूर्य्य से छिन्न-भिन्न किये हुए उनको पवन अपने निकट करके धारण करता है, उसके संयोग से प्राणी और अप्राणी बल पराक्रमवाले होते हैं॥६॥

स कीदृग्गुणोऽस्तीत्युपदिश्यते।

उक्त वायु कैसे गुणवाला है, इस विषय का उपदेश अगले मन्त्र में किया है-

अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शन्तमः।

अथा सोमं सुतं पिब॥७॥

अयम्। ते। स्तोमः। अग्रियः। हृदिऽस्पृक्। अस्तु। शम्ऽतमः। अथ। सोमम्। सुतम्। पिब॥७॥

पदार्थः-(**अयम्**) अस्माभिरनुष्ठितः (**ते**) तस्यास्य (**स्तोमः**) गुणप्रकाशसमूहक्रियः (**अग्रियः**) अग्रे भवोऽत्युत्तमः। **घछौ च।** (अष्टा०४.४.११७) अनेनाग्रशब्दाद् घः प्रत्ययः। (**हृदिस्पृक्**) यो हृद्यन्तःकरणे सुखं स्पर्शयति सः (**अस्तु**) भवेत्। अत्र लडर्थे लोट्। (**शन्तमः**) शं सुखमतिशयितं यस्मिन्सः। **शमिति सुखनामसु पठितम्।** (निघं०३.६) (**अथ**) आनन्तर्य्ये **निपातस्य च** इति दीर्घः। (**सोमम्**) सर्वपदार्थाभिषवम् (**सुतम्**) उत्पन्नम् (**पिब**) पिबति। अत्र व्यत्ययो लडर्थे लोट् च॥७॥

अन्वयः-मनुष्यैर्यथाऽयं वायुः पूर्वं सुतं सोमं पिबाथेत्यनन्तरं ते तस्याग्रियो हृदिस्पृक् शंतमः स्तोमो भवेत् तथाऽनुष्ठातव्यम्॥७॥

भावार्थः-मनुष्यैः शोधित उत्कृष्टगुणोऽयं पवनोऽत्यन्तसुखकारी भवतीति बोध्यम्॥७॥

पदार्थः-मनुष्यों को जैसे यह वायु प्रथम (**सुतम्**) उत्पन्न किये हुए (**सोमम्**) सब पदार्थों के रस को (**पिब**) पीता है, (**अथ**) उसके अनन्तर (**ते**) जो उस वायु का (**अग्रियः**) अत्युत्तम (**हृदिस्पृक्**) अन्तःकरण में सुख का स्पर्श करानेवाला (**स्तोमः**) उसके गुणों से प्रकाशित होकर क्रियाओं का समूह विदित (**अस्तु**) हो, वैसे काम करने चाहियें॥७॥

भावार्थः-मनुष्यों के लिये उत्तमगुण तथा शुद्ध किया हुआ यह पवन अत्यन्त सुखकारी होता है॥७॥

पुनस्तद्गुणा उपदिश्यन्ते।

फिर अगले मन्त्र में उसी के गुणों का उपदेश किया है-

विश्वमित् सवनं सुतमिन्द्रो मदाय गच्छति।

वृत्रहा सोमपीतये॥८॥

विश्वम्। इत्। सवनम्। सुतम्। इन्द्रः। मदाय। गच्छति। वृत्रऽहा। सोमऽपीतये॥८॥

पदार्थः-(**विश्वम्**) जगत् (**इत्**) एव (**सवनम्**) सर्वसुखसाधनम् (**सुतम्**) उत्पन्नम् (**इन्द्रः**) वायुः (**मदाय**) आनन्दाय (**गच्छति**) प्राप्नोति (**वृत्रहा**) यो वृत्रं मेघं हन्ति सः। **ब्रह्मभ्रूणवृत्रेषु क्विप्।** (अष्टा०३.२.८७) अनेन '**हन**'धातोः क्विप्। (**सोमपीतये**) सोमानां पीतिः पानं यस्मिन्नानन्दे तस्मै। अत्र **सह सुपा** इति समासः॥८॥

अन्वयः-अयं वृत्रहेन्द्रः सोमपीतये मदायेदेव सवनं सुतं विश्वं गच्छति प्राप्नोति॥८॥

भावार्थः-वायुः स्वर्गमनागमनैः सकलं जगत्प्राप्य वेगवान् मेघहन्ता सन् सर्वान् प्राणिनः सुखयति, नैवैतेन विना कश्चित्कंचिदपि व्यवहारं साधितुमलं भवतीति॥८॥

पदार्थः-यह **(वृत्रहा)** मेघ को हनन करनेवाला **(इन्द्रः)** वायु **(सोमपीतये)** उत्तम-उत्तम पदार्थों का पिलानेवाला तथा **(मदाय)** आनन्द के लिये **(इत्)** निश्चय करके **(सवनम्)** जिससे सब सुखों को सिद्ध करते हैं, जिससे **(सुतम्)** उत्पन्न हुए **(विश्वम्)** जगत् को **(गच्छति)** प्राप्त होते हैं॥८॥

भावार्थः-वायु आकाश में अपने गमनागमन से सब संसार को प्राप्त होकर मेघ की वृष्टि करने वा सब से वेगवाला होकर सब प्राणियों को सुख युक्त करता है। इसके विना कोई प्राणी किसी व्यवहार को सिद्धि करने को समर्थ नहीं हो सकता॥८॥

अथेन्द्रशब्देनेश्वरगुणा उपदिश्यन्ते।

अब अगले मन्त्र में इन्द्र शब्द से ईश्वर के गुणों का उपदेश किया है-

सेमं नः काममा पृण गोभिरश्वैः शतक्रतो।
स्तवाम त्वा स्वाध्यः॥९॥३१॥

सः। इमम्। नः। कामम्। आ। पृण। गोभिः। अश्वैः। शतक्रतो इति शतक्रतो। स्तवाम। त्वा। सुऽआध्यः॥९॥

पदार्थः-**(सः)** जगदीश्वरः **(इमम्)** वेदमन्त्रैः प्रेम्णा सत्यभावेनानुष्ठीयमानम् **(नः)** अस्माकम् **(कामम्)** काम्यत इष्यते सर्वैर्जनैस्तम् **(आ)** अभितः **(पृण)** पूरय **(गोभिः)** इन्द्रियपृथिवीविद्याप्रकाशपशुभिः **(अश्वैः)** आशुगमनहेतुभिरग्न्यादिभिस्तुरङ्गहस्त्यादिभिर्वा **(शतक्रतो)** शतमसंख्यातानि क्रतवः कर्माण्यनन्ता प्रज्ञा वा यस्य तत्सम्बुद्धौ सर्वकामप्रदेश्वर **(स्तवाम)** नित्यं स्तुवेम **(त्वा)** त्वाम् **(स्वाध्यः)** ये स्वाध्यायन्ति ते। अत्र स्वाङ् पूर्वाद् **ध्यै चिन्तायाम्** इत्यस्मात् **ध्यायतेः सम्प्रसारणं च।** (अष्टा०३.२.१७८) अनेन क्विप् सम्प्रसारणं च॥९॥

अन्वयः-हे शतक्रतो जगदीश्वर! यं त्वा स्वाध्यो वयं त्वां स्तवामः स्तुवेम स त्वं गोभिरश्वैर्नोऽस्माकं काममापृण समन्तात्प्रपूरय॥९॥

भावार्थः-ईश्वरस्यैतत्सामर्थ्यं वर्त्तते यत् पुरुषार्थिनो धार्मिकाणां मनुष्याणां स्वस्वकर्मानुसारेण सर्वेषां कामानां पूर्तिं करोति। यः सृष्टौ परमोत्तमपदार्थोत्पादनधारणाभ्यां सर्वान् प्राणिनः सुखयति तस्मात्स एव सर्वैर्नित्यमुपासनीयो नेतरः॥९॥

अस्य षोडशसूक्तार्थस्यर्त्तुसम्पादकानां सूर्य्यवाय्वादीनां यथायोग्यं प्रतिपादनात् पञ्चदशसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशवासिभिरध्यापकविलसनादिभिश्च विपरीतार्थे व्याख्यातमिति॥९॥

इति षोडशं सूक्तमेकत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(शतक्रतो)** असंख्यात कामों को सिद्ध करनेवाले अनन्तविज्ञानयुक्त जगदीश्वर! जिस **(त्वा)** आपकी **(स्वाध्यः)** अच्छे प्रकार ध्यान करनेवाले हम लोग **(स्तवाम)** नित्य स्तुति करें, **(सः)** सो आप **(गोभिः)** इन्द्रिय, पृथिवी, विद्या का प्रकाश और पशु तथा **(अश्वैः)** शीघ्र चलने और चलाने वाले अग्नि आदि पदार्थ वा घोड़े हाथी आदि से **(नः)** हमारी **(कामम्)** कामनाओं को **(आपृण)** सब ओर से पूरण कीजिये॥९॥

भावार्थः-ईश्वर में यह सामर्थ्य सदैव रहता है कि पुरुषार्थी धर्मात्मा मनुष्यों का उन के कर्मों के अनुसार सब कामनाओं से पूरण करना तथा जो संसार में परम उत्तम-उत्तम पदार्थों का उत्पादन तथा धारण करके सब प्राणियों को सुखयुक्त करता है, इससे सब मनुष्यों को उसी परमेश्वर की नित्य उपासना करनी चाहिये॥९॥

ऋतुओं के सम्पादक जो कि सूर्य्य और वायु आदि पदार्थ हैं, उन के यथायोग्य प्रतिपादन से इस पन्द्रहवें सूक्त के अर्थ के साथ पूर्व सोलहवें सूक्त के अर्थ की सङ्गति समझनी चाहिये।

इस सूक्त का भी अर्थ सायणाचार्य्य आदि तथा यूरोपदेशवासी अध्यापक विलसन आदि ने विपरीत वर्णन किया है॥

यह सोहलहवां सूक्त और इकत्तीसवां वर्ग पूरा हुआ॥

अथास्य नवर्च्चस्य सप्तदशसूक्तस्य काण्वो मेधातिथिर्ऋषिः। इन्द्रावरुणौ देवते। १, ३, ७,९ गायत्रीः; २ यवमध्याविराड्गायत्री; ४ पादनिचृद्गायत्री; ५ भुरिगार्च्ची गायत्री; ६ निचृद्गायत्री; ८ पिपीलिकामध्यानिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रेन्द्रावरुणगुणा उपदिश्यन्ते।

अब सत्रहवें सूक्त का आरम्भ है। इसके पहिले मन्त्र में इन्द्र और वरुण के गुणों का उपदेश किया है-

इन्द्रावरुणयोरहं सम्राजोरव आ वृणे।
ता नो मृळात ईदृशे॥ १॥

इन्द्रावरुणयोः। अहम्। सम्ऽराजोः। अवः। आ। वृणे। ता। नः। मृळातः। ईदृशे॥ १॥

पदार्थः-(**इन्द्रावरुणयोः**) इन्द्रश्च वरुणश्च तयोः सूर्य्याचन्द्रमसोः। **इन्द्र इति पदनामसु पठितम्।** (निघं०५.४) **वरुण इति च।** (निघं०५.४) अनेन व्यवहारप्रापकौ गृह्येते। **(अहम्)** होमशिल्पादिकर्मानुष्ठाता **(सम्राजोः)** यौ सम्यग्राजेते दीप्येते तयोः **(अवः)** अवनं रक्षणम्। अत्र भावेऽसुन्। **(आ)** समन्तात् **(वृणे)** स्वीकुर्वे **(ता)** तौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(नः)** अस्मान् **(मृळातः)** सुखयतः। अत्र लडर्थे लेट्। **(ईदृशे)** चक्रवर्त्तिराज्यसुखस्वरूपे व्यवहारे॥ १॥

अन्वयः-अहं ययोः सम्राजोरिन्द्रावरुणयोः सकाशादव आवृणे तावीदृशे नोऽस्मान् मृडातः॥ १॥

भावार्थः-यथा प्रकाशमानौ जगदुपकारकौ सर्वसुखव्यवहारहेतु चक्रवर्त्तिराज्यवद्रक्षकौ सूर्य्याचन्द्रमसौ वर्त्तेते तथैवाऽस्माभिरपि भवितव्यम्॥ १॥

पदार्थः-मैं जिन **(सम्राजोः)** अच्छी प्रकार प्रकाशमान **(इन्द्रावरुणयोः)** सूर्य्य और चन्द्रमा के गुणों से **(अवः)** रक्षा को **(आवृणे)** अच्छी प्रकार स्वीकार करता हूं, और **(ता)** वे **(ईदृशे)** चक्रवर्त्ति राज्य सुखस्वरूप व्यवहार में **(नः)** हम लोगों को **(मृळातः)** सुखयुक्त करते हैं॥ १॥

भावार्थः-जैसे प्रकाशमान, संसार के उपकार करने, सब सुखों के देने, व्यवहारों के हेतु और चक्रवर्त्ति राजा के समान सब की रक्षा करनेवाले सूर्य्य और चन्द्रमा हैं, वैसे ही हम लोगों को भी होना चाहिये॥ १॥

अथेन्द्रवरुणाभ्यां सह सम्प्रयुक्ता अग्निजलगुणा उपदिश्यन्ते।

अब इन्द्र और वरुण से संयुक्त किये हुए अग्नि और जल के गुणों का उपदेश अगले मन्त्र में किया है-

गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः।
धर्त्तारा चर्षणीनाम्॥ २॥

गन्तारा। हि। स्थः। अवसे। हवम्। विप्रस्य। माऽवतः। धर्तारा। चर्षणीनाम्॥ २॥

पदार्थः-(**गन्तारा**) गच्छत इति गमनशीलौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**हि**) यतः (**स्थः**) स्तः। अत्र व्यत्ययः। (**अवसे**) क्रियासिद्ध्येषणायै (**हवम्**) जुहोति ददात्याददाति यस्मिन् तं होमशिल्पव्यवहारम् (**विप्रस्य**) मेधाविनः (**मावतः**) मद्विधस्य पण्डितस्य। अत्र **वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्।** (अष्टा०५.२.३९) अनेन वार्तिकेनास्मच्छब्दात्सादृश्ये वतुप् प्रत्ययः। **आ सर्वनाम्नः।** (अष्टा०६.३.९१) इत्याकारादेशश्च। (**धर्त्तारा**) कलाकौशलयन्त्रेषु योजितौ होमरक्षणशिल्प-व्यवहारान् धरतस्तौ (**चर्षणीनाम्**) मनुष्यादिप्राणिनाम्। **कृषेरादेश्च च।** (उणा०२.१००) अनेन '**कृष**'धातोरनिः प्रत्यय आदेश्चकारादेशश्च॥ २॥

अन्वयः-यौ ये हि खल्विमे अग्निजले सम्प्रयुक्ते मावतो विप्रस्य हवं गन्तारौ स्थः स्तश्चर्षणीनां धर्त्तारा धारणशीले चात अहमेतौ स्वस्य सर्वेषां चावसे आवृणे॥ २॥

भावार्थः-पूर्वस्मान्मन्त्रात् '**आवृणे**' इति क्रियापदस्यानुवर्त्तनम्। विद्वद्भिर्यदा कलायन्त्रेषु युक्त्या संयोजिते अग्निजले प्रेर्य्येते तदा यानानां शीघ्रगमनकारके तत्र स्थितानां मनुष्यादिप्राणिनां पदार्थभाराणां च धारणहेतू सुखदायके च भवत इति॥ २॥

पदार्थः-जो (**हि**) निश्चय करके ये सम्प्रयोग किये हुए अग्नि और जल (**मावतः**) मेरे समान पण्डित तथा (**विप्रस्य**) बुद्धिमान् विद्वान् के (**हवम्**) पदार्थों का लेना-देना करानेवाले होम वा शिल्प व्यवहार को (**गन्तारा**) प्राप्त होते तथा (**चर्षणीनाम्**) पदार्थों के उठानेवाले मनुष्य आदि जीवों के (**धर्त्तारा**) धारण करनेवाले (**स्थः**) होते हैं, इससे मैं इनको अपने सब कामों की (**अवसे**) क्रिया की सिद्धि के लिये (**आवृणे**) स्वीकार करता हूं॥ २॥

भावार्थः-पूर्वमन्त्र से इस मन्त्र में '**आवृणे**' इस पद का ग्रहण किया है। विद्वानों से युक्ति के साथ कलायन्त्रों में युक्त किये हुए अग्नि-जल जब कलाओं से बल में आते हैं, तब रथों को शीघ्र चलाने उनमें बैठे हुए मनुष्य आदि प्राणी पदार्थों के धारण कराने और सबको सुख देनेवाले होते हैं॥ २॥

एवं साधितावेतौ किंहेतुकौ भवत इत्युपदिश्यते।

इस प्रकार साधे हुए ये दोनों किस किसके हेतु होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

अनुकामं तर्पयेथामिन्द्रावरुण राय आ।
ता वां नेदिष्ठमीमहे॥ ३॥

अनुऽकामम्। तर्पयेथाम्। इन्द्रावरुणा। रायः। आ। ता। वाम्। नेदिष्ठम्। ईमहे॥ ३॥

पदार्थः-(**अनुकामम्**) कामं काममनु (**तर्पयेथाम्**) तर्पयेते। अत्र व्यत्ययो लडर्थे लोट् च। (**इन्द्रावरुणा**) अग्निजले। अत्र **सुपां सुलुग्०** इत्याकारादेशो वर्णव्यत्ययेन ह्रस्वत्वं च। (**रायः**) धनानि (**आ**) समन्तात् (**ता**) तौ। अत्रापि **सुपां सुलुग्०** इत्याकारादेशः। (**वाम्**) द्वावेतौ। अत्र व्यत्ययः। (**नेदिष्ठम्**) अतिशयेनान्तिकं समीपस्थम्। अत्र **अन्तिकबाढयोर्नेदसाधौ।** (अष्टा०५.३.६३) अनेनान्तिकशब्दस्य नेदादेशः। (**ईमहे**) जानीमः प्राप्नुमः। **ईङ् गतौ** इत्यस्माद् **बहुलं छन्दसि** इति शपो लुकि श्यनभावः॥३॥

अन्वयः-याविमाविन्द्रावरुणावनुकामं रायो धनानि तर्पयेथां तर्पयेते ता तौ वां द्वावेतौ वयं नेदिष्ठमीमहे॥३॥

भावार्थः-मनुष्यैरेवं यो मित्रावरुणयोर्गुणान् विदित्वा क्रियायां संयोजितौ बहूनि सुखानि प्रापयतस्तौ युक्त्या कार्य्येषु सम्प्रयोजनीया इति॥३॥

पदार्थः-जो (**इन्द्रावरुण**) अग्नि और जल (**अनुकामम्**) हर एक कार्य्य में (**रायः**) धनों को देकर (**तर्प्पयेथाम्**) तृप्ति करते हैं, (**ता**) उन (**वाम्**) दोनों को हम लोग (**नेदिष्ठम्**) अच्छी प्रकार अपने निकट जैसे हो, वैसे (**ईमहे**) प्राप्त करते हैं॥३॥

भावार्थः-मनुष्यों को योग्य है कि जिस प्रकार अग्नि और जल के गुणों को जानकर क्रियाकुशलता में संयुक्त किये हुए ये दोनों बहुत उत्तम-उत्तम सुखों को प्राप्त करें, उस युक्ति के साथ कार्य्यों में अच्छी प्रकार इनका प्रयोग करना चाहिये॥३॥

तदेतत्करणेन किं भवतीत्युपदिश्यते।

उक्त कार्य्य के करने से क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है-

युवाकु॒ हि शचीना॑नां युवाकु॑ सुमती॒नाम्।
भूया॑म॒ वाज॒दाना॑म्॥४॥

युवाकु॑। हि। शचीना॑म्। युवाकु॑। सु॒ऽम॒ती॒नाम्। भूया॑म। वा॒ज॒ऽदाना॑म्॥४॥

पदार्थः-(**युवाकु**) मिश्रीभावम्। अत्र बाहुलकादौणादिकः काकुः प्रत्ययः। (**हि**) यतः (**शचीनाम्**) वाणीनां सत्कर्मणां वा। **शचीति वाङ्नामसु पठितम्।** निघं० १.११) **कर्मनामसु च।** (निघं०२.१) (**युवाकु**) पृथग्भावम्। अत्रोभयत्र **सुपां सुलुग्०** इति विभक्तेर्लुक। (**सुमतीनाम्**) शोभना मतिर्येषां तेषां विदुषाम्। (**भूयाम**) समर्था भवेम। **शकि लिङ् च।** (अष्टा०३.३.१७२) इति लिङ्; **बहुलं छन्दसि** इति शपो लुक् च। (**वाजदानाम्**) वाजस्य विज्ञानस्यान्नस्य दातॄणामुपदेशकानां वा॥४॥

अन्वयः-वयं हि शचीनां युवाकु वाजदानां सुमतीनां युवाकु भूयाम् समर्था भवेमात एतौ साधयेम॥४॥

भावार्थः-मनुष्यैः सदाऽऽलस्यं त्यक्त्वा सत्कर्माणि सेवित्वा विद्वत्समागमो नित्यं कर्त्तव्यः। यतोऽविद्यादारिद्र्ये मूलतो नष्टे भवेताम्॥४॥

पदार्थः-हम लोग **(हि)** जिस कारण **(शचीनाम्)** उत्तम वाणी वा श्रेष्ठ कर्मों के **(युवाकु)** मेल तथा **(वाजदाव्नाम)** विद्या वा अन्न के उपदेश करने वा देने और **(सुमतीनाम्)** श्रेष्ठ बुद्धिवाले विद्वानों के **(युवाकु)** पृथग्भाव करने को **(भूयाम)** समर्थ होवें, इस कारण से इनको साधें॥४॥

भावार्थः-मनुष्यों को सदा आलस्य छोड़कर अच्छे कामों का सेवन तथा विद्वानों का समागम नित्य करना चाहिये, जिससे अविद्या और दरिद्रपन जड़-मूल से नष्ट हों॥४॥

पुनः कथंभूताविन्द्रावरुणावित्युपदिश्यते।

फिर इन्द्र और वरुण किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम्।
क्रतुर्भवत्युक्थ्यः॥५॥३२॥

इन्द्रः। सहस्रऽदाव्नाम्। वरुणः। शंस्यानाम्। क्रतुः। भवति। उक्थ्यः॥५॥

पदार्थः-**(इन्द्रः)** अग्निर्विद्युत् सूर्य्यो वा **(सहस्रदाव्नाम्)** यः सहस्रस्यासंख्यातस्य धनस्य दातॄणां मध्ये साधकतमः। अत्र **आतो मनिन्०** (अष्टा०३.२.७४) अनेन वनिप्प्रत्ययः। **(वरुणः)** जलं वायुश्चन्द्रो वा **(शंस्यानाम्)** प्रशंसितुमर्हाणां पदार्थानां मध्ये स्तोतुमर्हः **(क्रतुः)** करोति कार्य्याणि येन सः। **कृञः कतुः।** (उणा०१.७७) अनेन **'कृञ'**धातोः कतुः प्रत्ययः। **(भवति)** वर्त्तते **(उक्थ्यः)** यानि विद्यासिद्ध्यर्थे वक्तुं वाचयितुं वार्हाणि ते साधुः॥५॥

अन्वयः-मनुष्यैर्य इन्द्रो हि सहस्रदाव्नां मध्ये क्रतुर्भवति वरुणश्च शंस्यानां मध्ये क्रतुर्भवति तस्मादयमुक्थ्योऽस्तीति बोध्यम्॥५॥

भावार्थः-अत्र पूर्वस्मान्मन्त्राद्धेरनुवृत्तिः। यतो यावन्ति पृथिव्यादीन्यन्नादिदानसाधननिमित्तानि सन्ति तेषां मध्येऽग्निविद्युत्सूर्य्या मुख्या वर्त्तन्ते, ये चैतेषां मध्ये जलवायुचन्द्रास्तत्तद्गुणैः प्रशस्या ज्ञातव्याः सन्तीति विदित्वा कर्मसु सम्प्रयोजिताः सन्तः क्रियासिद्धिहेतवो भवन्तीति॥५॥

इति द्वात्रिंशो वर्गः समाप्तः॥

पदार्थः-सब मनुष्यों को योग्य है कि जो **(इन्द्र)** अग्नि बिजुली और सूर्य्य **(हि)** जिस कारण **(सहस्रदाव्नाम्)** असंख्यात धन के देनेवालों के मध्य में **(क्रतुः)** उत्तमता से कार्य्यों को सिद्ध करनेवाले **(भवति)** होते हैं, तथा जो **(वरुणः)** जल, पवन और चन्द्रमा भी **(शंस्यानाम्)** प्रशंसनीय पदार्थों में उत्तमता से कार्य्यों के साधक हैं, इससे जानना चाहिये कि उक्त बिजुली आदि पदार्थ **(उक्थ्यः)** साधुता के साथ विद्या की सिद्धि करने में उत्तम हैं॥५॥

भावार्थः-पहिले मन्त्र से इस मन्त्र में **'हि'** इस पद की अनुवृत्ति है। जितने पृथिवी आदि वा अन्न आदि पदार्थ दान आदि के साधक हैं, उनमें अग्नि विद्युत् और सूर्य्य मुख्य हैं, इससे सबको चाहिये कि उनके गुणों का उपदेश करके उनकी स्तुति वा उनका उपदेश सुनें और करें, क्योंकि जो पृथिवी आदि पदार्थों में जल वायु और चन्द्रमा अपने-अपने गुणों के साथ प्रशंसा करने और जानने योग्य हैं, वे क्रियाकुशलता में संयुक्त किये हुए उन क्रियाओं की सिद्धि करानेवाले होते हैं॥५॥

यह बत्तीसवां वर्ग समाप्त हुआ॥

पुनस्ताभ्यां मनुष्यैः किं कर्त्तव्यमित्युपदिश्यते।

फिर उन दोनों से मनुष्यों को क्या-क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

तयो॒रिदव॑सा व॒यं स॒नेम॒ नि च॑ धीमहि।

स्यादु॒त प्रे॒चन॑म्॥ ६॥

तयोः। इत्। अव॑सा। व॒यम्। स॒नेम॑। नि। च॒। धी॒म॒हि॒। स्यात्। उ॒त। प्र॒ऽरे॒चन॑म्॥ ६॥

पदार्थः-(**तयोः**) इन्द्रावरुणयोर्गुणानाम् (**इत्**) एव (**अवसा**) विज्ञानेन तदुपकारकरणेन वा (**वयम्**) विद्वांसो मनुष्याः (**सनेम**) सुखानि भजेम (**नि**) नितरां क्रियायोगे (**च**) समुच्चये (**धीमहि**) तां धारयेमहि। अत्र **बहुलं छन्दसि** इति शपो लुक्। (**स्यात्**) भवेत् (**उत**) उत्प्रेक्षायाम् (**प्ररेचनम्**) प्रकृष्टतया रेचनं पुष्कलं व्ययार्थम्॥६॥

अन्वयः-वयं ययोर्गुणानामवसैव यानि सुखानि धनानि च सनेम तयोः सकाशात्तानि पुष्कलानि धनानि च निधीमहि तैः कोशान् प्रपूरयेम येभ्योऽस्माकं प्ररेचनमुत स्यात्॥६॥

भावार्थः-मनुष्यैरग्न्यादिपदार्थानामुपयोगेन पूर्णानि धनानि सम्पाद्य रक्षित्वा वर्द्धित्वा च तेषां यथायोग्येन व्ययेन राज्यवृद्ध्या सर्वहितमुन्नेयम्॥६॥

पदार्थः-हम लोग जिन इन्द्र और वरुण के (**अवसा**) गुणज्ञान वा उनके उपकार करने से (**इत्**) ही जिन सुख और उत्तम धनों को (**सनेम**) सेवन करें (**तयोः**) उनके निमित्त से (**च**) और उनसे पाये हुए असंख्यात धन को (**निधीमहि**) स्थापित करें अर्थात् कोश आदि उत्तम स्थानों में भरें, और जिन धनों से हमारा (**प्ररेचनम्**) अच्छी प्रकार अत्यन्त खरच (**उत**) भी (**स्यात्**) सिद्ध हो॥६॥

भावार्थः-मनुष्यों को उचित है कि अन्न आदि पदार्थों के उपयोग से पूरण धन को सम्पादन और उसकी रक्षा वा उन्नति करके यथायोग्य खर्च करने से विद्या और राज्य की वृद्धि से सबके हित की उन्नति करनी चाहिये॥६॥

कीदृशाय धनायेत्युपदिश्यते।

कैसे धन के लिये उपाय करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

इन्द्रा॑वरुण वाम॒हं हु॒वे चि॒त्राय॒ राध॑से।

अ॒स्मान्त्सु जि॒ग्युष॑स्कृतम्॥७॥

इन्द्रा॑वरुणा। वा॒म्। अ॒हम्। हु॒वे। चि॒त्राय॑। राध॑से। अ॒स्मान्। सु। जि॒ग्युष॑:। कृ॒त॒म्॥७॥

पदार्थ:-(**इन्द्रावरुणा**) पूर्वोक्तौ। अत्र **सुपां सुलुग्०** इत्याकारादेशो वर्णव्यत्ययेन ह्रस्वश्च। (**वाम्**) तौ। अत्र व्यत्यय:। (**अहम्**) (**हुवे**) आददे। अत्र व्यत्ययेनात्मनेपदं **बहुलं छन्दसि** इति शपो लुक् लडुत्तमस्यैकवचने रूपम्। (**चित्राय**) अद्भुताय राज्यसेनाभृत्यपुत्रमित्रसुवर्णरत्नहस्त्यश्वादियुक्ताय (**राधसे**) राध्नुवन्ति संसेधयन्ति सुखानि येन तस्मै धनाय। **राध इति धननामसु पठितम्।** (निघं०२.१०) (**अस्मान्**) धार्मिकान् मनुष्यान् (**सु**) सुष्ठु (**जिग्युष:**) विजययुक्तान् (**कृतम्**) कुरुत:। अत्र लडर्थे लोट्, मध्यमस्य द्विवचने **बहुलं छन्दसि** इति शपो लुक् च॥७॥

अन्वय:-यौ सम्यक् प्रयुक्तावस्मान् सुजिग्युष: कृतं कुरुतो वा ताविन्द्रावरुणौ चित्राय राधसेऽहं हुव आददे॥७॥

भावार्थ:-ये मनुष्या: सुसाधितौ मित्रावरुणौ कार्य्येषु योजयन्ति ते विविधानि धनानि विजयं च प्राप्य सुखिन: सन्त: सर्वान् प्राणिन: सुखयन्ति॥७॥

पदार्थ:-जो अच्छी प्रकार क्रिया कुशलता में प्रयोग किये हुए (**अस्मान्**) हम लोगों को (**सुजिग्युष:**) उत्तम विजययुक्त (**कृतम्**) करते हैं, (**वाम्**) उन इन्द्र और वरुण को (**चित्राय**) जो कि आश्चर्य्यरूप राज्य, सेना, नौकर, पुत्र, मित्र, सोना, रत्न, हाथी, घोड़े आदि पदार्थों से भरा हुआ (**राधसे**) जिससे उत्तम-उत्तम सुखों को सिद्ध करते हैं, उस सुख के लिये (**अहम्**) मैं मनुष्य (**हुवे**) ग्रहण करता हूं॥७॥

भावार्थ:-जो मनुष्य अच्छी प्रकार साधन किये हुए मित्र और वरुण को कामों में युक्त करते हैं, वे नाना प्रकार के धन आदि पदार्थ वा विजय आदि सुखों को प्राप्त होकर आप सुखसंयुक्त होते तथा औरों को भी सुखसंयुक्त करते हैं॥७॥

पुनस्ताभ्यां किं भवतीत्युपदिश्यते।

फिर उन से क्या-क्या सिद्ध होता है, इस विषय का उपदेश अगले मन्त्र में किया है-

इन्द्रा॑वरु॒ण॒ नू नु वाँ॒ सिषा॑सन्तीषु धी॒ष्वा।

अ॒स्मभ्यं॒ शर्म॑ यच्छतम्॥८॥

इन्द्रा॑वरुणा। नु। नु। वा॒म्। सिषा॑सन्तीषु। धी॒षु। आ। अ॒स्मभ्य॑म्। शर्म॑। य॒च्छ॒त॒म्॥८॥

पदार्थः-(**इन्द्रावरुणा**) वायुजले सम्यक् प्रयुक्ते। पूर्ववदत्राकारादेशह्रस्वत्वे। (**नु**) क्षिप्रम्। **न्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **ऋचि तुनुघ०** इति दीर्घः (**नु**) हेत्वपदेशे। (निरु०१.४) अनेन हेत्वर्थे नुः। (**वाम्**) तौ। अत्र व्यत्ययः। (**सिषासन्तीषु**) सनितुं सम्भक्तुमिच्छन्तीषु। **जनसनखनां०** (अष्टा०६.४.४२) अनेनानुनासिकस्याकारादेशः। (**धीषु**) दधति जना याभिस्तासु प्रज्ञासु। **धीरिति प्रज्ञानामसु पठितम्।** (निघं०३.९) (**आ**) समन्तात् क्रियायोगे (**अस्मभ्यम्**) पुरुषार्थिभ्यो विद्वद्भ्यः (**शर्म**) सर्वदुःखरहितं सुखम्, शृणाति हिनस्ति दुःखानि यत्तत् (**यच्छतम्**) विस्तारयतः। अत्र पुरुषव्यत्ययो लडर्थे लोट् च॥८॥

अन्वयः-यौ सिषासन्तीषु धीषु नु शीघ्रं नु यतोऽस्मभ्यं शर्म आयच्छतमातनुतस्तस्माद्वां तौ मित्रावरुणौ कार्य्यसिद्धयर्थं नित्यमहं हुवे॥८॥

भावार्थः-अत्र पूर्वस्मान्मन्त्राद् '**हुवे**' इति पदमनुवर्त्तते। ये मनुष्याः शास्त्रसंस्कारपुरुषार्थयुक्ताभिर्बुद्धिभिः सर्वेषु शिल्पाद्युत्तमेषु व्यवहारेषु मित्रावरुणौ सम्प्रयोज्यते त एवेह सुखानि विस्तारयन्तीति॥८॥

पदार्थः-जो (**सिषासन्तीषु**) उत्तम कर्म करने को चाहने और (**धीषु**) शुभ अशुभ वृत्तान्त धारण करनेवाली बुद्धियों में (**नु**) शीघ्र (**नु**) जिस कारण (**अस्मभ्यम्**) पुरुषार्थी विद्वानों के लिये (**शर्म**) दुःखविनाश करनेवाले उत्तम सुख का (**आयच्छतम्**) अच्छी प्रकार विस्तार करते हैं, इससे (**वाम्**) उन (**इन्द्रावरुणा**) इन्द्र और वरुण को कार्य्यों की सिद्धि के लिये मैं निरन्तर (**हुवे**) ग्रहण करता हूं॥८॥

भावार्थः-इस मन्त्र में पूर्व मन्त्र से '**हुवे**' इस पद का ग्रहण किया है। जो मनुष्य शास्त्र से उत्तमता को प्राप्त हुई बुद्धियों से शिल्प आदि उत्तम व्यवहारों में उक्त इन्द्र और वरुण को अच्छी रीति से युक्त करते हैं, वे ही इस संसार में सुखों को फैलाते हैं॥८॥

एतयोर्यथायोग्यगुणस्तवनं कर्त्तव्यमित्युपदिश्यते।

उक्त इन्द्र और वरुण के यथायोग्य गुणकीर्त्तन करने की योग्यता का अगले मन्त्र में प्रकाश किया है-

प्र वा॑मश्नोतु सुष्टु॒तिरिन्द्रा॑वरुणा॒ यां हु॒वे।
याम॒धाथे॑ स॒धस्तु॑तिम्॥९॥३३॥४॥

प्र। वा॒म्। अ॒श्नो॒तु॒। सु॒ऽस्तु॒तिः। इन्द्रा॑वरुणा। याम्। हु॒वे। याम्। ऋ॒धाथे॒ इति॑। स॒धऽस्तु॑तिम्॥९॥

पदार्थः-(**प्र**) प्रकृष्टार्थे क्रियायोगे (**वाम्**) यौ तौ वा। अत्र व्यत्ययः। (**अश्नोतु**) व्याप्नोतु (**सुष्टुतिः**) शोभना चासौ गुणस्तुतिश्च सा (**इन्द्रावरुणा**) पूर्वोक्तौ। अत्रापि **सुपां सुलुग्०** इत्याकारादेशो वर्णव्यत्ययेन ह्रस्वत्वं च। (**याम्**) स्तुतिम् (**हुवे**) आददे। अत्र व्यत्ययेनात्मनेपदं **बहुलं छन्दसि** इति शपो

लुक् च। **(याम्)** शिल्पक्रियाम् **(ऋधाथे)** वर्धयतः। अत्र व्यत्ययो **बहुलं छन्दसि** इति विकरणाभावश्च **(सधस्तुतिम्)** स्तुत्या सह वर्त्तते ताम्। अत्र वर्णव्यत्ययेन हकारस्य धकारः॥९॥

अन्वयः-अहं यथात्रेयं सुष्टुतिः प्राश्नोतु प्रकृष्टतया व्याप्नोतु तथा हुवे वां यौ मित्रावरुणौ यां सधस्तुतिमृधाथे वर्धयतस्तां चाहं हुवे॥९॥

भावार्थः-मनुष्यैर्यस्य पदार्थस्य यादृशा गुणाः सन्ति तादृशान् सुविचारेण विदित्वा तैरुपकारः सदैव ग्राह्य इतीश्वरोपदेशः॥९॥

पूर्वस्य षोडशसूक्तस्यार्थानुयोगिनोर्मित्रावरुणार्थयोरत्र प्रतिपादनात्सप्तदशसूक्तार्थेन सह तदर्थस्य सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशवासिभिरध्यापकविलसनाख्यादिभिश्चान्यथैव व्याख्यातम्॥

इति चतुर्थोऽनुवाकः सप्तदशं सूक्तं त्रयस्त्रिंशो वर्गश्च समाप्तः॥

पदार्थः-मैं जिस प्रकार से इस संसार में जिन इन्द्र और वरुण के गुणों की यह **(सुष्टुतिः)** अच्छी स्तुति **(प्राश्नोतु)** अच्छी प्रकार व्याप्त होवे, उसको **(हुवे)** ग्रहण करता हूं, और **(याम्)** जिस **(सधस्तुतिम्)** कीर्त्ति के साथ शिल्पविद्या को **(वाम्)** जो **(इन्द्रावरुणौ)** इन्द्र और वरुण **(ऋधाथे)** बढ़ाते हैं, उस शिल्पविद्या को **(हुवे)** ग्रहण करता हूं॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को जिस पदार्थ के जैसे गुण हैं, उनको वैसे ही जानकर और उनसे सदैव उपकार ग्रहण करना चाहिये, इस प्रकार ईश्वर का उपदेश है॥९॥

पूर्वोक्त सोलहवें सूक्त के अनुयोगी मित्र और वरुण के अर्थ का इस सूक्त में प्रतिपादन करने से इस सत्रहवें सूक्त के अर्थ सोलहवें सूक्त के अर्थ की सङ्गति करनी चाहिये।

इस सूक्त का भी अर्थ सायणाचार्य आदि तथा यूरोपदेशवासी विलसन आदि ने कुछ का कुछ ही वर्णन किया है॥

यह चौथा अनुवाक, सत्रहवां सूक्त और तेतीसवां वर्ग समाप्त हुआ॥

अथाष्टादशस्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः। १-३ ब्रह्मणस्पतिः; ४ बृहस्पतीन्द्रसोमाः; ५ बृहस्पतिदक्षिणे; ६-८ सदसस्पतिः; ९ सदसस्पतिनाराशंसौ च देवताः। १ विराड्गायत्री; २,७,९ गायत्री; ३,६,८ पिपीलिकामध्यानिचृद्गायत्री; ४ निचृद्गायत्री; ५ पादनिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रादौ यजमानेनेश्वरप्रार्थना कीदृशी कार्य्येत्युपदिश्यते।

अब अठारहवें सूक्त का आरम्भ है। उसके पहले मन्त्र में यजमान ईश्वर की प्रार्थना कैसी करें, इस विषय का उपदेश अगले मन्त्र में किया है-

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते।
कक्षीवन्तं य औशिजः॥ १॥

सोमानम्। स्वरणम्। कृणुहि। ब्रह्मणः। पते। कक्षीवन्तम्। यः। औशिजः॥ १॥

पदार्थः-**(सोमानम्)** यः सवत्यैश्वर्य्यं करोतीति तं यज्ञानुष्ठातारम् **(स्वरणम्)** यः स्वरति शब्दार्थसम्बन्धानुपदिशति तम् **(कृणुहि)** सम्पादय। **उतश्च प्रत्ययाच्छन्दो वा वचनम्।** (अष्टा०६.४.१०६) इति विकल्पाद्धेर्लोपो न भवति। **(ब्रह्मणः)** वेदस्य **(पते)** स्वामिन्नीश्वर। **षष्ठ्याः पतिपुत्रपृष्ठपरपदपयस्पोषेषु।** (अष्टा०८.३.५३) इति सूत्रेण षष्ठ्या विसर्जनीयस्य सकारादेशः। **(कक्षीवन्तम्)** याः कक्षासु कराङ्गुलिक्रियासु भवाः शिल्पविद्यास्ताः प्रशस्ता विद्यन्ते यस्य तम्। **कक्षा इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५) अत्र कक्षाशब्दाद् **भवे छन्दसि** इति यत्, ततः प्रशंसायां मतुप्। **कक्ष्यायाः संज्ञायां मतौ सम्प्रसारणं कर्त्तव्यम्।** (अष्टा०६.१.३७) अनेन वार्त्तिकेन सम्प्रसारणम्। **आसंदीवद०** (अष्टा०८.२.१२) इति निपातनान्मकारस्य वकारादेशः। **(यः)** अहम् **(औशिजः)** य उशिजि प्रकाशे जातः स उशिक् तस्य विद्यावतः पुत्र इव।

इमं मन्त्रं निरुक्तकार एवं व्याख्यातवान्-**सोमानं सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः। कक्षीवान् कक्ष्यावान्। औशिज उशिजः पुत्रः। उशिग्वष्टेः कान्तिकर्मणः। अऽपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्। तं सोमानं सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते।** (निरु०६.१०)॥१॥

अन्वयः-हे ब्रह्मणस्पते! योऽहमौशिजोऽस्मि तं मां सोमानं स्वरणं कक्षीवन्तं कृणुहि॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। इह कश्चिद्विद्याप्रकाशे प्रादुर्भूतोमनुष्योऽस्ति स एवाध्यापकः सर्वशिल्पविद्यासम्पादको भवितुमर्हति। ईश्वरोऽपीदृशमेवानुगृह्णाति।

इमं मन्त्रं सायणाचार्य्यः कल्पितपुराणेतिहासभ्रान्त्याऽन्यथैव व्याख्यातवान्॥१॥

पदार्थः-**(ब्रह्मणस्पते)** वेद के स्वामी ईश्वर! **(यः)** जो मैं **(औशिजः)** विद्या के प्रकाश में संसार को विदित होनेवाला और विद्वानों के पुत्र के समान् हूं, उस मुझको **(सोमानम्)** ऐश्वर्य्य सिद्ध करनेवाले

यज्ञ का कर्त्ता **(स्वरणम्)** शब्द अर्थ के सम्बन्ध का उपदेशक और **(कक्षीवन्तम्)** कक्षा अर्थात् हाथ वा अङ्गुलियों की क्रियाओं में होनेवाली प्रशंसनीय शिल्पविद्या का कृपा से सम्पादन करनेवाला **(कृणुहि)** कीजिये॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो कोई विद्या के प्रकाश में प्रसिद्ध मनुष्य है, वही पढ़ानेवाला और सम्पूर्ण शिल्पविद्या के प्रसिद्ध करने योग्य है। क्योंकि ईश्वर भी ऐसे ही मनुष्य को अपने अनुग्रह से चाहता है। इस मन्त्र का अर्थ सायणाचार्य्य ने कल्पित पुराण ग्रन्थ भ्रान्ति से कुछ का कुछ ही वर्णन किया है॥१॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह ईश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है-

यो रेवान् यो अमीवहा वसुवित्पुष्टिवर्धनः।

स नः सिषक्तु यस्तुरः॥२॥

यः। रेवान्। यः। अमीवहा। वसुऽवित्। पुष्टिऽवर्धनः। सः। नः। सिषक्तु। यः। तुरः॥२॥

पदार्थः-(**यः**) जगदीश्वरः (**रेवान्**) विद्याद्यनन्तधनवान्। अत्र भूम्न्यर्थे मतुप्। **रयेर्मतौ बहुलं सम्प्रसारणम्।** (अष्टा०६.१.३७) इति वार्त्तिकेन सम्प्रसारणम्। **छन्दसीरः।** (अष्टा०८.२.१५) इति मकारस्य वकारः। (**यः**) सर्वरोगरहितः (**अमीवहा**) अविद्यादिरोगाणां हन्ता (**वसुवित्**) यो वसूनि सर्वाणि वस्तूनि वेत्ति (**पुष्टिवर्धनः**) यः शरीरात्मनोः पुष्टिं वर्धयतीति (**सः**) ईश्वरः (**नः**) अस्मान् (**सिषक्तु**) अतिशयेन सचयतु। अत्र '**सच**'धातोः **बहुलं छन्दसि** इति शपः श्लुः। (**यः**) शीघ्रं सुखकारी (**तुरः**) तुरतीति। **तुर त्वरणे** इत्यस्मादृगुपधत्वात्कः॥२॥

अन्वयः-यो रेवान् यः पुष्टिवर्धनो यो वसुविदमीवहा यस्तुरो ब्रह्मणस्पतिर्जगदीश्वरोऽस्ति, स नोऽस्मान् विद्यादिधनैः सह सिषक्तु अतिशयेन संयोजयतु॥२॥

भावार्थः-ये मनुष्याः सत्यभाषणादिलक्षणामीश्वराज्ञामनुतिष्ठन्ति तेऽविद्यादिरोगरहिताः शरीरात्मपुष्टिमन्तः सन्तश्चक्रवर्त्तिराज्यादिधनानि सर्वरोगहराण्यौषधानि च प्राप्नुवन्तीति॥२॥

पदार्थः-(**यः**) जो जगदीश्वर (**रेवान्**) विद्या आदि अनन्त धनवाला, (**यः**) जो (**पुष्टिवर्धनः**) शरीर और आत्मा की पुष्टि बढ़ाने तथा (**वसुवित्**) सब पदार्थों का जानने (**अमीवहा**) अविद्या आदि रोगों का नाश करने तथा (**यः**) जो (**तुरः**) शीघ्र सुख करनेवाला वेद का स्वामी जगदीश्वर है, (**सः**) सो (**नः**) हम लोगों को विद्या आदि धनों के साथ (**सिषक्तु**) अच्छी प्रकार संयुक्त करे॥२॥

भावार्थः-जो मनुष्य सत्यभाषण आदि नियमों से संयुक्त ईश्वर की आज्ञा का अनुष्ठान करते हैं, वे अविद्या आदि रोगों से रहित और शरीर वा आत्मा की पुष्टिवाले होकर चक्रवर्त्ति राज्य आदि धन तथा सब रोगों की हरनेवाली ओषधियों को प्राप्त होते हैं॥२॥

अथेश्वरप्रार्थनोपदिश्यते।

अगले मन्त्र में ईश्वर की प्रार्थना का प्रकाश किया है-

मा नः शंसो अररुषो धूर्त्तिः प्रणङ् मर्त्यस्य।
रक्षा णो ब्रह्मणस्पते॥३॥

मा। नः। शंसः। अररुषः। धूर्त्तिः। प्रणक्। मर्त्यस्य। रक्ष। नः। ब्रह्मणस्पते॥३॥

पदार्थः-(**मा**) निषेधार्थे (**नः**) अस्माकम् (**शंसः**) शंसन्ति यत्र सः (**अररुषः**) अदातुः। **रा दाने** इत्यस्मात्क्वसुस्ततः षष्ठ्येकवचनम्। (**धूर्त्तिः**) हिंसकः (**प्रणक्**) नश्यतु। अत्र लोडर्थे लुङ्। **मन्त्रे घसह्वरणश०** (अष्टा०२.४.८०) अनेन सूत्रेण च्लेर्लुक्। (**मर्त्यस्य**) मनुष्यस्य (**रक्ष**) पालय। **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्मानस्माकं वा (**ब्रह्मणः**) वेदस्य ब्रह्माण्डस्य वा (**पते**) स्वामिन्। **षष्ठ्याः पति०** विसर्जनीयस्य सत्वम्॥३॥

अन्वयः-हे ब्रह्मणस्पते जगदीश्वर! त्वमररुषो मर्त्यस्य सकाशान्नोऽस्मान् रक्ष, यतः स नोऽस्माकं मध्ये कश्चिद्धूर्त्तिर्मनुष्यो न भवेत्, भवत्कृपयाऽस्माकं शंसो मा प्रणक् कदाचिन्मा नश्यतु॥३॥

भावार्थः-नैव केनचिन्मनुष्येण धूर्त्तस्य मनुष्यस्य कदाचित्सङ्गः कर्त्तव्यः। न चैवान्यायेन कस्यचिद्धिंसनं कर्त्तव्यम्, किन्तु सर्वैः सर्वस्य न्यायेनैव रक्षा विधेयेति॥३॥

पदार्थः-हे (**ब्रह्मणस्पते**) वेद वा ब्रह्माण्ड के स्वामी जगदीश्वर! आप (**अररुषः**) जो दान आदि धर्मरहित मनुष्य है, उस (**मर्त्यस्य**) मनुष्य के सम्बन्ध से (**नः**) हमारी (**रक्ष**) रक्षा कीजिये, जिससे कि वह (**नः**) हम लोगों के बीच में कोई मनुष्य (**धूर्त्तिः**) विनाश करनेवाला न हो और आपकी कृपा से जो (**नः**) हमारा (**शंसः**) प्रशंसनीय यज्ञ अर्थात् व्यवहार है, वह (**मा प्रणक्**) कभी नष्ट न होवे॥३॥

भावार्थः-किसी मनुष्य को धूर्त्त अर्थात् छल कपट करनेवाले मनुष्य का संग न करना तथा अन्याय से किसी की हिंसा न करनी चाहिये, किन्तु सब को सब की न्याय ही से रक्षा करनी चाहिये॥३॥

अथेन्द्रादिकृत्यान्युपदिश्यन्ते।

अगले मन्त्र में इन्द्रादिकों के कार्य्यों का उपदेश किया है-

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः।
सोमो हिनोति मर्त्यम्॥४॥

सः। घ॒। वी॒रः। न। रि॒ष्य॒ति॒। यम्। इन्द्रः॑। ब्रह्म॑णः। पतिः॑। सोमः॑। हि॒नोति॑। मर्त्य॑म्॥४॥

पदार्थः-(**सः**) इन्द्रो बृहस्पतिः सोमश्च (**घ**) एव। **ऋचि तुनुघ०** इति दीर्घः। (**वीरः**) अजति व्याप्नोति शत्रुबलानि यः (**न**) निषेधार्थे (**रिष्यति**) नश्यति (**यम्**) प्राणिनम् (**इन्द्रः**) वायुः (**ब्रह्मणः**) ब्रह्माण्डस्य (**पतिः**) पालयिता परमेश्वरः (**सोमः**) सोमलतादिसमूहरसः (**हिनोति**) वर्धयति (**मर्त्यम्**) मनुष्यम्॥४॥

अन्वयः-इन्द्रो ब्रह्मणस्पतिः सोमश्च यं मर्त्यं हिनोति स वीरो न घ रिष्यति नैव विनश्यति॥४॥

भावार्थः-ये वायुविद्युत्सूर्य्यसोमौषधगुणान् सङ्गृह्य कार्य्याणि साधयन्ति न ते खलु नष्टसुखा भवन्तीति॥४॥

पदार्थः-उक्त इन्द्र (**ब्रह्मणस्पतिः**) ब्रह्माण्ड का पालन करनेवाला जगदीश्वर और (**सोमः**) सोमलता आदि ओषधियों का रससमूह (**यम्**) जिस (**मर्त्यम्**) मनुष्य आदि प्राणी को (**हिनोति**) उन्नतियुक्त करते हैं, (**सः**) वह (**वीरः**) शत्रुओं का जीतनेवाला वीर पुरुष (**न घ रिष्यति**) निश्चय है कि वह विनाश को प्राप्त कभी नहीं होता॥४॥

भावार्थः-जो मनुष्य वायु, विद्युत्, सूर्य्य और सोम आदि ओषधियों के गुणों को ग्रहण करके अपने कार्य्यों को सिद्ध करते हैं, वे कभी दुखी नहीं होते॥४॥

कथं ते रक्षका भवन्तीत्युपदिश्यते।

कैसे वे रक्षा करनेवाले होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

त्वं तं ब्रह्मणस्पते॒ सोम॒ इन्द्र॑श्च॒ मर्त्य॑म्।
दक्षि॑णा पा॒त्वंह॑सः॥५॥३४॥

त्वम्। तम्। ब्रह्म॑णः। प॒ते॒। सोमः॑। इन्द्रः॑। च॒। मर्त्य॑म्। दक्षि॑णा। पा॒तु॒। अंह॑सः॥५॥

पदार्थः-(**त्वम्**) जगदीश्वरः (**तम्**) यज्ञानुष्ठातारम् (**ब्रह्मणः**) ब्रह्माण्डस्य (**पते**) पालकेश्वर (**सोमः**) सोमलताद्योषधिसमूहः (**इन्द्रः**) वायुः (**च**) समुच्चये (**मर्त्यम्**) विद्वांसं मनुष्यम् (**दक्षिणा**) दक्षन्ते वर्धन्ते यया सा। अत्र **दुदक्षिभ्यामिनन्।** (उणा०२.४९) इतीनन्प्रत्ययः। (**पातु**) पाति। अत्र लडर्थे लोट्। (**अंहसः**) पापात्। अत्र **अम रोगे** इत्यस्मात् **अमेर्हुक् च।** (उणा०४.२२०) अनेनासुन्प्रत्ययो हुगागमश्च॥५॥

अन्वयः-हे ब्रह्मणस्पते! त्वमंहसो यं पासि तं मर्त्यं सोम इन्द्रो दक्षिणा च पातु पाति॥१५॥

भावार्थः-ये मनुष्या अधर्माद् दूरे स्थित्वा स्वेषां सुखवृद्धिमिच्छन्ति ते परमेश्वरमुपास्य सोममिन्द्रं दक्षिणां च युक्त्या सेवयन्तु॥५॥

इति चतुस्त्रिंशो वर्गः सम्पूर्णः॥

पदार्थः-हे **(ब्रह्मणस्पते)** ब्रह्माण्ड के पालन करनेवाले जगदीश्वर! **(त्वम्)** आप **(अहंसः)** पापों से जिसको **(पातु)** रक्षा करते हैं, **(तम्)** उस धर्मात्मा यज्ञ करनेवाले **(मर्त्यम्)** विद्वान् मनुष्य की **(सोमः)** सोमलता आदि ओषधियों के रस **(इन्द्रः)** वायु और **(दक्षिणा)** जिससे वृद्धि को प्राप्त होते हैं, ये सब **(पातु)** रक्षा करते हैं॥५॥

भावार्थः-जो मनुष्य अधर्म से दूर रहकर अपने सुखों के बढ़ाने की इच्छा करते हैं, वे ही परमेश्वर के सेवक और उक्त सोम, इन्द्र और दक्षिणा इन पदार्थों को युक्ति के साथ सेवन कर सकते हैं॥५॥

यह चौंतीसवां वर्ग पूरा हुआ॥

अथेन्द्रशब्देन परमेश्वरगुणा उपदिश्यन्ते।

अगले मन्त्र में इन्द्र शब्द से परमेश्वर के गुणों का उपदेश किया है-

सदॅसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।

सनिं मेधामयासिषम्॥ ६॥

सदॅसः। पतिम्। अद्भुतम्। प्रियम्। इन्द्रस्य। काम्यम्। सनिम्। मेधाम्। अयासिषम्॥ ६॥

पदार्थः-**(सदसः)** सीदन्ति विद्वांसो धार्मिका न्यायधीशा यस्मिँस्तत्सदः सभा तस्य। अत्राधिकरणेऽसुन्। **(पतिम्)** स्वामिनम् **(अद्भुतम्)** आश्चर्य्यगुणस्वभावस्वरूपम्। **अदिभुवो डुतच्।** (उणा०५.१) अनेन **'भू'**धातोरद्युपपदे डुतच् प्रत्ययः। **(प्रियम्)** प्रीणाति सर्वान् प्राणिनस्तम् **(इन्द्रस्य)** जीवस्य **(काम्यम्)** कमनीयम् **(सनिम्)** पापपुण्यानां विभागेन फलप्रदातारम्। **खनिकष्यज्यसि०** (उणा०४.१४५) अनेन **'सन'**धातोरिः प्रत्ययः **(मेधाम्)** धारणावतीं बुद्धिम् **(अयासिषम्)** प्राप्नुयाम्॥६॥

अन्वयः-अहमिन्द्रस्य काम्यं सनिं प्रियमद्भुतं सदसस्पतिं परमेश्वरमुपास्य सभाध्यक्षं प्राप्य मेधामयासिषं बुद्धिं प्राप्नुयाम्॥६॥

भावार्थः-ये मनुष्याः सर्वशक्तिमन्तं सर्वाधिष्ठातारं सर्वानन्दप्रदं परमेश्वरसुपासते, ये च सर्वोत्कृष्टगुणस्वभावपरोपकारिणं सभापतिं प्राप्नुवन्ति त एव सर्वशास्त्रबोधक्रियायुक्तां धियं प्राप्य पुरुषार्थिनो विद्वांसश्च भूत्वा सुखिनो भवन्तीति॥६॥

पदार्थः-मैं **(इन्द्रस्य)** जो सब प्राणियों को ऐश्वर्य्य देने **(काम्यम्)** उत्तम **(सनिम्)** पाप-पुण्य कर्मों के यथायोग्य फल देने और **(प्रियम्)** प्राणियों को प्रसन्न करानेवाले **(अद्भुतम्)** आश्चर्य्यमय गुण और स्वभाव स्वरूप **(सदसस्पतिम्)** और जिसमें विद्वान् धार्मिक न्याय करनेवाले स्थित हों, उस सभा के स्वामी परमेश्वर की उपासना और सब उत्तम गुण स्वभाव परोपकारी सभापति को प्राप्त होके **(मेधाम्)** उत्तम ज्ञान को धारण करनेवाली बुद्धि को **(अयासिषम्)** प्राप्त होऊं॥६॥

भावार्थः-जो मनुष्य सर्वशक्तिमान् सबके अधिष्ठाता और सब आनन्द के देनेवाले परमेश्वर की उपासना करते और उत्कृष्ट न्यायाधीश को प्राप्त होते हैं, वे ही सब शास्त्रों के बोध से प्रसिद्ध क्रियाओं से युक्त बुद्धियों को प्राप्त और पुरुषार्थी होकर विद्वान् होते हैं॥६॥

स एव सर्वं जगद्रचयतीत्युपदिश्यते।

वही सब जगत् को रचता है, इसका उपदेश अगले मन्त्र में किया है-

यस्मा॑दृ॒ते न सिध्य॑ति य॒ज्ञो वि॑प॒श्चित॑श्च॒न।

स धी॒नां योग॑मिन्वति॥७॥

यस्मा॑त्। ऋ॒ते। न। सिध्य॑ति। य॒ज्ञः। वि॒प॒ःऽचित॑ः। च॒न। सः। धी॒नाम्। योग॑म्। इ॒न्व॒ति॥७॥

पदार्थः-(**यस्मात्**) परमेश्वरात् (**ऋते**) विना (**न**) निषेधे (**सिध्यति**) निष्पद्यते (**यज्ञः**) सङ्गतः संसारः (**विपश्चितः**) अनन्तविद्यावतः (**चन**) कदाचित् (**सः**) जगदीश्वरः (**धीनाम्**) प्रज्ञानां कर्मणां वा (**योगम्**) संयोजनम् (**इन्वति**) व्याप्नोति जानाति वा। **इन्वतीति व्याप्तिकर्मसु पठितम्।** (निघं०२.१८) **गतिकर्मसु च।** (निघं०२.१४)॥७॥

अन्वयः-हे मनुष्या! यस्माद्विपश्चितः सर्वशक्तिमतो जगदीश्वरादृते यज्ञश्चन न सिध्यति स सर्वप्राणिमनुष्याणां धीनां योगमिन्वति॥७॥

भावार्थः-व्यापकस्येश्वरस्य व्याप्यस्य सर्वस्य जगतश्च द्वयोर्नित्यसम्बन्धोऽस्ति। स एव सर्वं जगद्रचयित्वा धृत्वा सर्वेषां बुद्धीनां चेष्टाया विज्ञाता सन् सर्वेभ्यः प्राणिभ्यस्तत्तत्कर्मानुसारेण सुखदुःखात्मकं फलं प्रददाति। नैव कश्चिदनीश्वरं स्वभावसिद्धमनधिष्ठातृकं जगद्भवितुमर्हति, जडानां विज्ञानाभावेन यथायोग्यनियमेनोत्पत्तुमनर्हत्वात्॥७॥

पदार्थः-हे मनुष्यो! (**यस्मात्**) जिस (**विपश्चितः**) अनन्त विद्या वाले सर्वशक्तिमान् जगदीश्वर के (**ऋते**) विना (**यज्ञः**) जो कि दृष्टिगोचर संसार है, सो (**चन**) कभी (**न सिध्यति**) सिद्ध नहीं हो सकता, (**सः**) वह जगदीश्वर सब मनुष्यों की (**धीनाम्**) बुद्धि और कर्मों को (**योगम्**) संयोग को (**इन्वति**) व्याप्त होता वा जानता है॥७॥

भावार्थः-व्यापक ईश्वर सब में रहने वाले और व्याप्य जगत् का नित्य सम्बन्ध है। वही सब संसार को रचकर तथा धारण करके सब की बुद्धि और कर्मों को अच्छी प्रकार जानकर सब प्राणियों के लिये उनके शुभ अशुभ कर्मों के अनुसार सुख दुःखरूप फल को देता है। कभी ईश्वर को छोड़ के अपने आप स्वभावमात्र से सिद्ध होनेवाला अर्थात् जिसका कोई स्वामी न हो ऐसा संसार नहीं हो सकता, क्योंकि जड़ पदार्थों के अचेतन होने से यथायोग्य नियम के साथ उत्पन्न होने की योग्यता कभी नहीं होती॥७॥

पुनः कीदृशाः स यज्ञ इत्युच्यते।

फिर वह यज्ञ कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है-

आदृ॑ध्नोति ह॒विष्कृ॑तिं॒ प्राञ्चं॑ कृणोत्यध्व॒रम्।

होत्रा॑ दे॒वेषु॑ गच्छति॥८॥

आत्। ऋ॒ध्नोति॒। ह॒विः॒ऽकृ॑तिम्। प्राञ्च॑म्। कृ॒णोति॒। अ॒ध्व॒रम्। होत्रा॑। दे॒वेषु॑। ग॒च्छ॒ति॒॥८॥

पदार्थः-(**आत्**) समन्तात् (**ऋध्नोति**) वर्धयति (**हविष्कृतिम्**) हविषां कृतिः करणं यस्य तम्। अत्र **सह सुपा** इति समासः। (**प्राञ्चम्**) यः प्रकृष्टमञ्चति प्राप्नोति तम् (**कृणोति**) करोति (**अध्वरम्**) क्रियाजन्यं जगत् (**होत्रा**) जुह्वति येषु यानि तानि। अत्र **शेश्छन्दसि बहुलम्** इति लोपः। **हुयामाश्रु०** (उणा०४.१७२) अनेन '**हु**'धातोस्त्रन् प्रत्ययः। (**देवेषु**) दिव्यगुणेषु (**गच्छति**) प्राप्नोति॥८॥

अन्वयः-सर्वज्ञः सदसस्पतिर्देवोऽयं प्राञ्चं हविष्कृतिमध्वरं होत्राणि हवनानि कृणोत्यादृध्नोति स पुनर्देवेषु दिव्यगुणेषु गच्छति॥८॥

भावार्थः-यतः परमेश्वरः सकलं जगद्रचयति तस्मात्सर्वे पदार्थाः परस्परं योजनेन वर्धन्त एते क्रियामये शिल्पविद्यायां च सम्यक् प्रयोजिता महान्ति सुखानि जनयन्तीति॥८॥

पदार्थः-जो उक्त सर्वज्ञ सभापति देव परमेश्वर (**प्राञ्चम्**) सब में व्याप्त और जिस को प्राणी अच्छी प्रकार प्राप्त होते हैं, (**हविष्कृतिम्**) होम करने योग्य पदार्थों का जिसमें व्यवहार और (**अध्वरम्**) क्रियाजन्य अर्थात् क्रिया से उत्पन्न होने वाले जगत्रूप यज्ञ में (**होत्राणि**) होम से सिद्ध करानेवाली क्रियाओं को (**कृणोति**) उत्पन्न करता तथा (**आदृध्नोति**) अच्छी प्रकार बढ़ाता है, फिर वही यज्ञ (**देवेषु**) दिव्य गुणों में (**गच्छति**) प्राप्त होता है॥८॥

भावार्थः-जिस कारण परमेश्वर सकल संसार को रचता है, इससे सब पदार्थ परस्पर अपने-अपने संयोग में बढ़ते और ये पदार्थ क्रियामययज्ञ और शिल्पविद्या में अच्छी प्रकार संयुक्त किये हुए बड़े-बड़े सुखों को उत्पन्न करते हैं॥८॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है-

नरा॒शंसं॑ सु॒धृष्ट॒॑ममप॑श्यं स॒प्रथ॑स्तमम्।

दि॒वो न सद्म॒॑मखस॑म्॥९॥३५॥

नरा॒शंस॑म्। सु॒ऽधृष्ट॑मम्। अप॑श्यम्। स॒प्रथः॑ऽतमम्। दि॒वः। न। सद्म॑ऽमखसम्॥९॥

पदार्थः-(**नराशंसम्**) नरैरवश्यं स्तोतव्यस्तम्। **नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्त्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति।** (निरु०८.६) (**सुधृष्टमम्**) सुष्ठु सकलं

जगद्धारयति सोऽतिशयितस्तम् **(अपश्यम्)** पश्यामि। अत्र लडर्थे लङ्। **(सप्रथस्तमम्)** यः प्रथोभिर्विस्तृतैराकाशादिभिस्सहाभिव्याप्तो वर्त्तते सोऽतिशयितस्तम् **(दिवः)** सूर्य्यादिप्रकाशान् **(न)** इव **(सद्यमखसम्)** सीदन्ति यस्मिन् तत्सद्य जगत् तन्मखः प्राप्तं यस्मिन्निति॥९॥

अन्वयः-अहं सूर्य्यादिप्रकाशान् सद्यमखसमिव सप्रथस्तमं सुधृष्टमं नराशंसं सदसस्पतिं परमेश्वरमपश्यं पश्यामि तथैव यूयमपि कुरुत॥९॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्यः सर्वतो विस्तृतं सूर्य्यादिप्रकाशं पश्यति, तथैव सर्वतोऽभिव्याप्तं ज्ञानप्रकाशं परमेश्वर ज्ञात्वा विस्तृतसुखो भवतीति। अत्र सप्तममन्त्रात् '**सदसस्पति**'रिति पदमनुवर्तते॥९॥

पूर्वेण सप्तदशसूक्तार्थेन मित्रावरुणाभ्यां सहानुयोगित्वादत्र बृहस्पत्याद्यर्थानां प्रतिपादनादष्टादशसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशनिवासिभिर्विलसनादिभिश्चान्यथैव व्याख्यातम्॥

इत्यष्टादशं सूक्तं पञ्चत्रिंशो वर्गश्च समाप्तः॥९॥

पदार्थः-मैं **(न)** जैसे आकाशमय सूर्य्यादिकों के प्रकाश से **(सद्यमखसम्)** जिसमें प्राणी स्थिर होते और जिसमें जगत् प्राप्त होता है, **(सप्रथस्तमम्)** जो बड़े-बड़े आकाश आदि पदार्थों के साथ अच्छी प्रकार व्याप्त **(सुधृष्टमम्)** उत्तमता से सब संसार को धारण करने **(नराशंसम्)** सब मनुष्यों को अवश्य स्तुति करने योग्य पूर्वोक्त **(सदसस्पतिम्)** सभापति परमेश्वर को **(अपश्यम्)** ज्ञानदृष्टि से देखता हूं, वैसे तुम भी सभाओं के पति को प्राप्त होके न्याय से सब प्रजा का पालन करके नित्य दर्शन करो॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य सब जगह विस्तृत हुए सूर्य्यादि के प्रकाश को देखता है, वैसे ही सब जगह व्याप्त ज्ञान प्रकाशरूप परमेश्वर को जानकर सुख के विस्तार को प्राप्त होता है। इस मन्त्र में सातवें मन्त्र से '**सदसस्पतिम्**' इस पद की अनुवृत्ति जाननी चाहिये॥९॥

पूर्व सत्रहवें सूक्त के अर्थ के साथ मित्र और वरुण के साथ अनुयोगि बृहस्पति आदि अर्थों के प्रतिपादन से इस अठारहवें सूक्त के अर्थ की सङ्गति जाननी चाहिये।

यह भी सूक्त सायणाचार्य्य आदि और यूरोपदेशवासी विलसन आदि ने कुछ का कुछ ही वर्णन किया है॥

यह अठारहवां सूक्त और पैंतीसवां वर्ग पूरा हुआ॥

अथ नवर्च्चस्यैकोनविंशस्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः। अग्निर्मरुतश्च देवताः। १, ३-८ गायत्री; २ निचृद्गायत्री; ९ पिपीलिकामध्यानिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रादौ भौतिकाग्निगुणा उपदिश्यन्ते।

अब उन्नीसवें सूक्त का आरम्भ है। उसके पहले मन्त्र में अग्नि के गुणों का उपदेश किया है-

प्रति॒ त्यं चारु॑मध्व॒रं गो॑पी॒थाय॒ प्र हू॑यसे।

म॒रुद्भि॑रग्न॒ आ ग॑हि॥ १॥

प्रति। त्यम्। चारुम्। अध्वरम्। गोऽपीथाय। प्र। हूयसे। मरुत्ऽभिः। अग्ने। आ। गहि॥ १॥

पदार्थः-(**प्रति**) वीप्सायाम् (**त्यम्**) तम् (**चारुम्**) श्रेष्ठम् (**अध्वरम्**) यज्ञम् (**गोपीथाय**) पृथिवीन्द्रियादीनां रक्षणाय। **निशीथगोपीथावगथाः।** (उणा०२.९) अनेनायं निपातितः। (**प्र**) प्रकृष्टार्थे (**हूयसे**) अध्वरसिद्ध्यर्थं शब्द्यते। अत्र व्यत्ययः। (**मरुद्भिः**) वायुविशेषैः सह (**अग्ने**) भौतिकः (**आ**) समन्तात् (**गहि**) गच्छति। अत्र व्यत्ययो लडर्थे लोट्। **बहुलं छन्दसि** इति शपो लुक् च॥ १॥

अन्वयः-योऽग्निर्मरुद्भिः सहागहि समन्तात्प्राप्नोति स विद्वद्भिस्त्यं तं चारुमध्वरं प्रति गोपीथाय प्रहूयसे प्रकृष्टतया शब्द्यते॥ १॥

भावार्थः-यो भौतिकोऽग्निः प्रसिद्धविद्युद्रूपेण वायुभ्यः प्रदीप्यते सोऽयं विद्वद्भिः प्रशस्तबुद्ध्या प्रतिक्रियासिद्धिः सर्वस्य रक्षणाय तद्गुणज्ञानपुरःसरमुपदेष्टव्यः श्रोतव्यश्चेति॥ १॥

पदार्थः-जो (**अग्ने**) भौतिक अग्नि (**मरुद्भिः**) विशेष पवनों के साथ (**आगहि**) सब प्रकार से प्राप्त होता है, वह विद्वानों की क्रियाओं से (**त्यम्**) उक्त (**चारुम् अध्वरम् प्रति**) प्रत्येक उत्तम-उत्तम यज्ञ में उनकी सिद्धि वा (**गोपीथाय**) अनेक प्रकार की रक्षा के लिये (**प्रहूयसे**) अच्छी प्रकार क्रिया में युक्त किया जाता है॥ १॥

भावार्थः-जो यह भौतिक अग्नि प्रसिद्ध सूर्य्य और विद्युत्रूप करके पवनों के साथ प्रदीप्त होता है, वह विद्वानों की प्रशंसनीय बुद्धि से हर एक क्रिया की सिद्धि वा सबकी रक्षा के लिये गुणों के विज्ञानपूर्वक उपदेश करना वा सुनना चाहिये॥ १॥

अथाग्निशब्देनेश्वरभौतिकगुणा उपदिश्यन्ते।

अगले मन्त्र में अग्नि शब्द से ईश्वर और भौतिक अग्नि के गुणों का उपदेश किया है-

न॒हि दे॒वो न मर्त्यो॑ म॒हस्त॑व क्र॒तुं प॒रः।

म॒रुद्भि॑रग्न॒ आ ग॑हि॥ २॥

नहि। देवः। न। मर्त्यः। महः। तव। क्रतुम्। परः। मरुत्ऽभिः। अग्ने। आ। गहि॥ २॥

पदार्थः-(**नहि**) प्रतिषेधार्थे (**देवः**) विद्वान् (**न**) निषेधार्थे (**मर्त्यः**) अविद्वान् मनुष्यः (**महः**) महिमा (**तव**) परमात्मनस्तस्याग्नेर्वा (**क्रतुम्**) कर्म (**परः**) प्रकृष्टगुणः (**मरुद्भिः**) गणैः सह (**अग्ने**) विज्ञानस्वरूपेश्वर भौतिकस्य वा (**आ**) समन्तात् (**गहि**) गच्छ गच्छति वा। अत्र **बहुलं छन्दसि** इति शपो लुक्। **अनुदात्तोपदेश**० इत्यनुनासिकलोपः॥२॥

अन्वयः-हे अग्ने! त्वं कृपया मरुद्भिः सहागहि विज्ञातो भव यस्य तव परो महो महिमास्ति तं क्रतुं तव कर्म सम्पूर्णमियत्तया नहि कश्चिद्देवो न च मनुष्यो वेत्तुमर्हतीत्येकः।

यस्य भौतिकाग्नेः परो महो महिमा क्रतुं कर्म प्रज्ञां वा प्रापयति यं न देवो न मर्त्यो गुणेयत्तया परिच्छेत्तुमर्हति सोऽग्निर्मरुद्भिः सहागहि समन्तात्प्राप्नोतीति द्वितीयः॥२॥

भावार्थः-नैव परमेश्वरस्य सर्वोत्तमस्य महिम्नः कर्मणश्चानन्तत्वात् कश्चिदेतस्यान्तं गन्तुं शक्नोति, किन्तु यावत्यौ यस्य बुद्धिविद्ये तावन्तं समाधियोगयुक्तेन प्राणायामेनान्तर्य्यामिरूपेण स्थितं वेदेषु सृष्ट्यां भौतिकं च मरुतः स्वस्वरूपगुणा यावन्तः प्रकाशितास्तावन्त एव ते वेदितुमर्हन्ति नाधिकं चेति॥२॥

पदार्थः-हे (**अग्ने**) विज्ञानस्वरूप परमेश्वर! आप कृपा करके (**मरुद्भिः**) प्राणों के साथ (**आगहि**) प्राप्त हूजिये अर्थात् विदित हूजिये। आप कैसे हैं कि जिनकी (**परः**) अत्युत्तम (**महः**) महिमा है, (**तव**) आपके (**क्रतुम्**) कर्मों की पूर्णता से अन्त जानने को (**नहि**) न कोई (**देवः**) विद्वान् (**न**) और न कोई (**मर्त्यः**) अज्ञानी मनुष्य योग्य है, तथा जो (**अग्ने**) जिस भौतिक अग्नि का (**परः**) अति श्रेष्ठ (**महः**) महिमा है, वह (**क्रतुम्**) कर्म और बुद्धि को प्राप्त करता है, (**तव**) उसके सब गुणों को (**न देवः**) न कोई विद्वान् और (**न मर्त्यः**) न कोई अज्ञानी मनुष्य जान सकता है, वह अग्नि (**मरुद्भिः**) प्राणों के साथ (**आगहि**) सब प्रकार से प्राप्त होता है॥२॥

भावार्थः-परमेश्वर की सर्वोत्तमता से उत्तम महिमा वा कर्म अपार है, इससे उनका पार कोई नहीं पा सकता, किन्तु जितनी जिसकी बुद्धि वा विद्या है, उसके अनुसार समाधियोगयुक्त प्राणायाम से जो कि अन्तर्यामीरूप करके वेद और संसार में परमेश्वर ने अपनी रचना स्वरूप वा गुण वा जितने अग्नि आदि पदार्थ प्रकाशित किये हैं, उतने ही जान सकता है, अधिक नहीं॥२॥

अथाग्निशब्देनैतयोर्गुणा उपदिश्यन्ते।

अगले मन्त्र में अग्निशब्द से ईश्वर और भौतिक अग्नि के गुणों का उपदेश किया है-

ये म॒हो रज॑सो वि॒दुर्विश्वे॑ दे॒वासो॑ अ॒द्रुह॑ः।
म॒रुद्भि॑रग्न॒ आ ग॑हि॥३॥

ये। म॒हः। रज॑सः। वि॒दुः। विश्वे॑। दे॒वास॑ः। अ॒द्रुह॑ः। म॒रुत्ऽभिः॑। अ॒ग्ने॒। आ। ग॒हि॒॥३॥

पदार्थः-(**ये**) मनुष्याः (**महः**) महसः। अत्र **सुपां सुलुग्०** इति शसो लुक्। (**रजसः**) लोकान्। यास्कमुनी रजःशब्दमेवं व्याख्यातवान्-**रजो रजतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यन्तेऽसृगहनी रजसी उच्येते।** (निरु०४.१.९) (**विदुः**) जानन्ति (**विश्वे**) सर्वे (**देवासः**) विद्वांसः। अत्र **आज्जसेरसुग्०** इत्यसुगागमः। (**अदुहः**) द्रोहरहिताः (**मरुद्भिः**) वायुभिः सह (**अग्ने**) स्वयंप्रकाश सर्वलोकप्रकाशकोऽग्निर्वा (**आ**) समन्तात् (**गहि**) गच्छ गच्छति वा॥३॥

अन्वयः-येऽदुहो विश्वेदेवासो विद्वांसो मरुद्भिरग्निना च संयुगे महो रजसो विदुस्त एव सुखिनः स्युः। हे अग्ने! यस्त्वं मरुद्भिः सहागहि विदितो भवसि तेन त्वया योऽग्निर्निर्मितः मरुद्भिरेव कार्य्यार्थमागच्छति प्राप्तो भवति॥३॥

भावार्थः-ये विद्वांसोऽग्निनाकृष्य प्रकाश्य मरुद्भिश्चेष्टयित्वा धारिता लोकाः सन्ति तान् सर्वान् विदित्वा कार्य्येषुपयोक्तुं जानन्ति ते सुखिनो भवन्तीति॥३॥

पदार्थः-(**ये**) जो (**अदुहः**) किसी से द्रोह न रखनेवाले (**विश्वे**) सब (**देवासः**) विद्वान् लोग हैं, जो कि (**मरुद्भिः**) पवन और अग्नि के साथ संयोग में (**महः**) बड़े-बड़े (**रजसः**) लोकों को (**विदुः**) जानते हैं, वे ही सुखी होते हैं। हे (**अग्ने**) स्वयंप्रकाश होनेवाले परमेश्वर! आप (**मरुद्भिः**) पवनों के साथ (**आगहि**) विदित हूजिये, और जो आपका बनाया हुआ (**अग्ने**) सब लोकों का प्रकाश करनेवाला भौतिक अग्नि है, सो भी आपकी कृपा से (**मरुद्भिः**) पवनों के साथ कार्य्यसिद्धि के लिये (**आगहि**) प्राप्त होता है॥३॥

भावार्थः-जो विद्वान् लोग अग्नि से आकर्षण वा प्रकाश करके तथा पवनों से चेष्टा करके धारण किये हुए लोक हैं, उनको जानकर उनसे कार्य्यों में उपयोग लेने को जानते हैं, वे ही अत्यन्त सुखी होते हैं॥३॥

पुनः कीदृशास्ते मरुत इत्युपदिश्यते।

फिर उक्त पवन किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

य उ॒ग्रा अ॒र्कमा॑नृ॒चुरना॑धृष्टास॒ ओज॑सा।
म॒रुद्भि॑रग्न॒ आ ग॑हि॥४॥

ये। उ॒ग्राः। अ॒र्कम्। आ॒नृ॒चुः। अना॑धृष्टासः। ओज॑सा। म॒रुद्भिः॑। अ॒ग्ने॒। आ। ग॒हि॒॥४॥

पदार्थः-(**ये**) वायवः (**उग्राः**) तीव्रवेगादिगुणाः (**अर्कम्**) सूर्य्यादिलोकम् (**आनृचुः**) स्तावयन्ति तद्गुणान् प्रकाशयन्ति। **अपस्पृधेथामानृचु०** (अष्टा०६.१.३६) अनेनार्चधातोर्लिट्युसि सम्प्रसारणमकारलोपश्च निपातितः। (**अनाधृष्टाः**) धर्षितुं निवारयितुमनर्हाः (**ओजसा**) बलादिगुणसमूहेन सह वर्त्तमानाः (**मरुद्भिः**) एतैर्वायुभिः सह (**अग्ने**) विद्युत् प्रसिद्धो वा (**आ**) समन्तात् (**गहि**) प्राप्नोति॥४॥

अन्वयः-य उग्रा अनाधृष्टासो वायव ओजसाऽर्कमानृचुरेतैर्मरुद्भिः सहाग्ने अयमग्निरागह्यागच्छति समन्तात् कार्य्ये सहायकारी भवति॥४॥

भावार्थः-यावद्बलं वर्त्तते तावद्वायुविद्युद्भ्यां जायते, इमे वायवः सर्वलोकधारकाः सन्ति तद्योगेन विद्युत्सूर्य्यादयः प्रकाश्य ध्रियन्ते तस्माद्वायुगुणज्ञानोपकारग्रहणाभ्यां बहूनि कार्य्याणि सिध्यन्तीति॥४॥

पदार्थः-(**ये**) जो (**उग्राः**) तीव्र वेग आदि गुणवाले (**अनाधृष्टासः**) किसी के रोकने में न आ सकें, वे पवन (**ओजसा**) अपने बल आदि गुणों से संयुक्त हुए (**अर्कम्**) सूर्य्यादि लोकों को (**आनृचुः**) गुणों को प्रकाशित करत हैं, इन (**मरुद्भिः**) पवनों के साथ (**अग्ने**) यह विद्युत् और प्रसिद्ध अग्नि (**आगहि**) कार्य्य में सहाय करनेवाला होता है॥४॥

भावार्थः-जितना बल वर्त्तमान है उतना वायु और विद्युत् के सकाश से उत्पन्न होता है, ये वायु सब लोकों के धारण करनेवाले हैं, इनके संयोग से बिजुली वा सूर्य्य आदि लोक प्रकाशित होते तथा धारण किये जाते हैं, इससे वायु के गुणों का जानना वा उनसे उपकार ग्रहण करने से अनेक प्रकार के कार्य्य सिद्ध होते हैं॥४॥

पुनस्ते कीदृशा इत्युपदिश्यते।

फिर भी उक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः।
मरुद्भिरग्ने आ गहि॥५॥३६॥

ये। शुभ्राः। घोरऽवर्पसः। सुऽक्षत्रासः। रिशादसः। मरुत्ऽभिः। अग्ने। आ। गहि॥५॥

पदार्थः-(**ये**) वायवः (**शुभ्राः**) स्वगुणैः शोभमानाः (**घोरवर्पसः**) घोरं हननशीलं वर्पो रूपं स्वरूपं येषां ते। **वर्प इति रूपनामसु पठितम्।** (निघं०३.७) (**सुक्षत्रासः**) शोभनं क्षत्रमन्तरिक्षस्थं राज्यं येषां ते (**रिशादसः**) रिशा रोगा अदसोऽत्तारो यैस्ते (**मरुद्भिः**) प्राप्तिहेतुभिः सह। **मरुत इति पदनामसु पठितम्।** (निघं०५.५) अनेनात्र प्राप्त्यर्थो गृह्यते। (**अग्ने**) भौतिकः (**आ**) आभिमुख्ये (**गहि**) प्रापयति॥५॥

अन्वयः-ये घोरवर्पसो रिशादसः सुक्षत्रासः शुभ्रा वायवः सन्ति तैर्मरुद्भिः सहाग्नेऽग्निरागहि कार्य्याणि प्रापयति॥५॥

भावार्थः-ये यज्ञेन शोधिता वायवः सुराज्यकारिणो भूत्वा रोगान् घ्नन्ति ये चाशुद्धास्ते सुखानि नाशयन्ति, तस्मात्सर्वैर्मनुष्यैरग्निना वायोः शोधनेन सुखानि संसाधनीयानीति॥५॥

इति षट्त्रिंशो वर्गः समाप्तः॥

पदार्थः-(**ये**) जो (**घोरपर्वसः**) घोर अर्थात् जिनका पदार्थों को छिन्न-भिन्न करनेवाला रूप जो और (**रिशादसः**) रोगों को नष्ट करनेवाला (**सुक्षत्रासः**) तथा अन्तरिक्ष में निर्भय राज्य करनेहारे और (**शुभ्राः**) अपने गुणों से सुशोभित पवन हैं, उनके साथ (**अग्ने**) भौतिक अग्नि (**आगहि**) प्रकट होता अर्थात् कार्य्यसिद्धि को देता है॥५॥

भावार्थः-जो यज्ञ के धूम से शोधे हुए पवन हैं, वे अच्छे राज्य के करानेवाले होकर रोग आदि दोषों का नाश करते हैं और जो अशुद्ध अर्थात् दुर्गन्ध आदि दोषों से भरे हुए हैं, वे सुखों का नाश करते हैं। इससे मनुष्यों को चाहिये कि अग्नि में होम द्वारा वायु की शुद्धि से अनेक प्रकार के सुखों को सिद्ध करें॥५॥

यह छत्तीसवां वर्ग पूरा हुआ॥

पुनस्ते कीदृशा इत्युपदिश्यते।

फिर भी उक्त पवन कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ये नाकस्याधि रोचने दिवि देवासः आसते।

मरुद्भिरग्न आ गहि॥६॥

ये। नाकस्य। अधि। रोचने। दिवि। देवासः। आसते। मरुत्ऽभिः। अग्ने। आ। गहि॥६॥

पदार्थः-(**ये**) पृथिव्यादयो लोकाः (**नाकस्य**) सुखहेतोः सूर्य्यलोकस्य (**अधि**) उपरिभागे (**रोचने**) रुचिनिमित्ते (**दिवि**) द्योतनात्मके सूर्य्यप्रकाशे (**देवासः**) दिव्यगुणाः पृथिवीचन्द्रादयः प्रकाशिताः (**आसते**) सन्ति (**मरुद्भिः**) दिव्यगुणैर्देवैः सह (**अग्ने**) अग्निः प्रसिद्धः (**आ**) समन्तात् (**गहि**) सुखानि गमयति॥६॥

अन्वयः-ये देवासो नाकस्य रोचने दिव्यध्यासते तद्द्वारकैः प्रकाशकैर्मरुद्भि सहाग्नेऽयमग्निरागहि सुखानि प्रापयति॥६॥

भावार्थः-सर्वे लोका ईश्वरस्यैव प्रकाशेन प्रकाशिताः सन्ति, परन्तु तद्रचितस्य सूर्य्यलोकस्य दीप्त्या पृथिवीचन्द्रादयो लोका दीप्यन्ते तैर्दिव्यगुणैः सह वर्त्तमानोऽयमग्निः सर्वकार्य्येषु योजनीय इति॥६॥

पदार्थः-(**ये**) जो (**देवासः**) प्रकाशमान और अच्छे-अच्छे गुणों वाले पृथिवी वा चन्द्र आदि लोक (**नाकस्य**) सुख की सिद्धि करनेवाले सूर्य्य लोक के (**रोचने**) रुचिकारक (**दिवि**) प्रकाश में (**अध्यासते**) उन के धारण और प्रकाश करने वाले हैं, उन पवनों के साथ (**अग्ने**) यह अग्नि (**आगहि**) सुखों की प्राप्ति कराता है॥६॥

भावार्थः-सब लोक परमेश्वर के प्रकाश से प्रकाशवान् है, परन्तु उसके रचे हुए सूर्य्यलोक की दीप्ति अर्थात् प्रकाश से पृथिवी और चन्द्रलोक प्रकाशित होते हैं, उन अच्छे-अच्छे गुणवालों के साथ रहने वाले अग्नि को सब कार्य्यों में संयुक्त करना चाहिये॥६॥

पुनस्ते किंकर्महेतवः सन्तीत्युपदिश्यते।

फिर उक्त पवन किस कार्य्यों के हेतु होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम्।
मरुद्भिरग्न आ गहि॥७॥

ये। ईङ्खयन्ति। पर्वतान्। तिरः। समुद्रम्। अर्णवम्। मरुत्ऽभिः। अग्ने। आ। गहि॥७॥

पदार्थः-(**ये**) वायवः (**ईङ्खयन्ति**) छेदयन्ति निपातयन्ति (**पर्वतान्**) मेघान्। **पर्वत इति मेघनामसु पठितम्।** (निघं०१.१०) (**तिरः**) तिरस्करणे (**समुद्रम्**) सम्यगुद्द्रवन्त्यापो यस्मिन् तदन्तरिक्षम्। **समुद्र इत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३) (**अर्णवम्**) पृथिवीस्थं सागरम् (**मरुद्भिः**) उपर्य्यधोगमनशीलैर्वायुभिः (**अग्ने**) अग्निर्विद्युदाख्यः (**आ**) अभितः (**गहि**) प्राप्नोति। अत्र व्यत्ययो लडर्थे लोट् च॥७॥

अन्वयः-ये वायवः पर्वतादीनीङ्खयन्ति, अर्णवं तिरस्कुर्वन्ति समुद्रं प्रपूरयन्ति तैर्मरुद्भिः सहाग्नेऽयमग्निर्विद्युदागह्यागच्छति॥७॥

भावार्थः-वायुयोगेनैव वृष्टिर्भवति जलं रेणवश्चोपरि गत्वाऽऽगच्छन्ति, तैः सह तन्निमित्तेन वा विद्युदुत्पद्य गृह्यते॥७॥

पदार्थः-(**ये**) जो वायु (**पर्वतान्**) मेघों को (**ईङ्खयन्ति**) छिन्न-भिन्न करते और वर्षाते हैं, (**अर्णवम्**) समुद्र का (**तिरः**) तिरस्कार करते वा (**समुद्रम्**) अन्तरिक्ष को जल से पूर्ण करते हैं, उन (**मरुद्भिः**) पवनों के साथ (**अग्ने**) अग्नि अर्थात् बिजुली (**आगहि**) प्राप्त होती अर्थात् सन्मुख आती जाती है॥७॥

भावार्थः-वायु के संयोग से ही वर्षा होती है और जल के कण वा रेणु अर्थात् सब पदार्थों के अत्यन्त छोटे-छोटे कण पृथिवी से अन्तरिक्ष को जाते तथा वहां से पृथिवी को आते हैं, उनके साथ वा उनके निमित्त से बिजुली उत्पन्न होती और बद्दलों में छिप जाती है॥७॥

एत एव प्रकाशादिकं विस्तारयन्तीत्युपदिश्यते।

ये ही प्रकाश आदि गुणों का विस्तार करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा। मरुद्भिरग्न आ गहि॥८॥

आ। ये। तन्वन्ति। रश्मिऽभिः। तिरः। समुद्रम्। ओजसा। मरुत्ऽभिः। अग्ने। आ। गहि॥

पदार्थः-(**आ**) अनुगतार्थे क्रियायोगे (**ये**) वायवः (**तन्वन्ति**) विस्तारयन्ति (**रश्मिभिः**) सूर्य्यकिरणैः सह (**तिरः**) तिरस्करणे (**समुद्रम्**) अन्तरिक्षं जलमयं वा (**ओजसा**) बलेन वेगेन वा (**मरुद्भिः**) तैर्धनञ्जयाख्यैः सूक्ष्मैः सह (**अग्ने**) अग्निः (**आ**) सर्वतः (**गहि**) प्राप्नोति। अत्र व्यत्ययो लडर्थे लोट् च॥८॥

अन्वयः-ये वायव ओजसा समुद्रमन्तरिक्षमागच्छन्ति जलमयं सागरं तिरस्कुर्वन्ति ये च रश्मिभिः सह तन्वन्ति तैर्मरुद्भिः सहाग्ने अग्निरागहि प्राप्तोऽस्ति॥८॥

भावार्थः-एतेषां वायूनां प्राप्त्या सर्वे पदार्था वर्धित्वा बलहेतवो भवन्ति, तस्मान्मनुष्यैर्वाय्वग्नियोगेनानेका कार्य्यसिद्धिर्विभावनीयेति॥८॥

पदार्थः-(**ये**) जो वायु अपने (**ओजसा**) बल वा वेग से (**समुद्रम्**) अन्तरिक्ष को प्राप्त होते तथा जलमय समुद्र का (**तिरः**) तिरस्कार करते हैं, तथा जो (**रश्मिभिः**) सूर्य्य की किरणों के साथ (**आतन्वन्ति**) विस्तार को प्राप्त होते हैं, उन (**मरुद्भिः**) पवनों के साथ (**अग्ने**) भौतिक अग्नि (**आगहि**) कार्य्य की सिद्धि को देता है॥८॥

भावार्थः-इन पवनों की व्याप्ति से सब पदार्थ बढ़कर बल देनेवाले होते हैं, इससे मनुष्यों को वायु और अग्नि के योग से अनेक प्रकार कार्य्यों की सिद्धि करनी चाहिये॥८॥

पुनस्तैः किं साधनीयमित्युपदिश्यते

फिर उनसे क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु।
मरुद्भिरग्न आ गहि॥९॥३७॥१॥

अभि। त्वा। पूर्वऽपीतये। सृजामि। सोम्यम्। मधु। मरुत्ऽभिः। अग्ने। आ। गहि॥९॥

पदार्थः-(**अभि**) आभिमुख्ये (**त्वा**) तत् (**पूर्वपीतये**) पूर्वं पीतिः पानं सुखभोगो यस्मिन् तस्मा आनन्दाय (**सृजामि**) रचयामि (**सोम्यम्**) सोमं प्रसवं सुखानां समूहो रसादानमर्हति तत्। अत्र **सोममर्हति यः।** (अष्टा०४.४.१३८) अनेन यः प्रत्ययः। (**मधु**) मन्यन्ते प्राप्नुवन्ति सुखानि येन तत् मधुरसुखकारकम् (**मरुद्भिः**) अनेकविधैर्निमित्तभूतैर्वायुभिः (**अग्ने**) अग्निर्व्यावहारिकः (**आ**) अभितः (**गहि**) साधको भवति॥९॥

अन्वयः-यैर्मरुद्भिरग्नेऽग्निरागहि साधको भवति तैः पूर्वपीतये त्वा तत्सोम्यं मध्वहमभिसृजामि॥९॥

भावार्थः-विद्वांसो येषां वाय्वग्न्यादिपदार्थानां सकाशात् सर्वं शिल्पक्रियामयं यज्ञं निर्मिमते तैरेव सर्वैर्मनुष्यैः सर्वाणि कार्य्याणि साधनीयानीति॥९॥

अथाष्टादशसूक्तप्रतिपादितबृहस्पत्यादिभिः पदार्थैः सहैतेनोक्तानामग्निमरुतां विद्यासाधनशेषत्वादस्यैकोनविंशस्य सूक्तस्य सङ्गतिरस्तीति बोध्यम्।

अस्मिन्नध्यायेऽग्निमेतस्य वाय्वादीनां च परस्परं विद्योपयोगाय प्रतिपादयन्नीश्वरो वायुसहकारिणमग्निमन्ते प्रकाशयन्नध्यायसमाप्तिं द्योतयतीति।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपदेशनिवासिभिर्विलसनादिभिश्चान्यथैव व्याख्यातम्॥

इति श्रीमत्परिव्राजकाचार्य्येण दयान्दसरस्वतीस्वामिना विरचिते संस्कृतभाषार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्ते वेदभाष्ये प्रथमाष्टके प्रथमोऽध्याय एकोनविंशं सूक्तं सप्तत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-जिन **(मरुद्भिः)** पवनों से **(अग्ने)** भौतिक अग्नि **(आगहि)** कार्य्यसाधक होता है, उनमें **(पूर्वपीतये)** पहिले जिसमें पीति अर्थात् सुख का भोग है, उस उत्तम आनन्द के लिये **(सोम्यम्)** जो कि सुखों के उत्पन्न करने योग्य है, **(त्वा)** उस **(मधु)** मधुर आनन्द देनेवाले पदार्थों के रस को मैं **(अभिसृजामि)** सब प्रकार से उत्पन्न करता हूं॥९॥

भावार्थः-विद्वान् लोग जिन वायु अग्नि आदि पदार्थों के अनुयोग से सब शिल्पक्रियारूपी यज्ञ को सिद्ध करते हैं, उन्हीं पदार्थों से सब मनुष्यों को सब कार्य्य सिद्ध करने चाहियें॥९॥

अठाहरवें सूक्त में कहे हुए बृहस्पति आदि पदार्थों के साथ इस सूक्त से जिन अग्नि वा वायु का प्रतिपादन है, उनकी विद्या की एकता होने से इस उन्नीसवें सूक्त की सङ्गति जाननी चाहिये।

इस अध्याय में अग्नि और वायु आदि पदार्थों की विद्या के उपयोग के लिये प्रतिपादन और पवनों के साथ रहनेवाले अग्नि का प्रकाश करता हुआ परमेश्वर अध्याय की समाप्ति को प्रकाशित करता है।

यह भी सूक्त सायणाचार्य्य आदि तथा यूरोपदेशवासी विलसन आदि ने कुछ का कुछ का वर्णन किया है॥

यह प्रथम अष्टक में प्रथम अध्याय, उन्नीसवां सूक्त और सेंतीसवां वर्ग समाप्त हुआ॥

अथ द्वितीयोऽध्यायः

विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ऽआ सु॑व॥ ऋ०५.८२.५॥

अथाष्टर्च्चस्य विंशस्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः। ऋभवो देवताः। १, २, ६, ७ गायत्री; ३ विराड्गायत्री; ४ निचृद्गायत्री; ५, ८ पिपीलिकामध्यानिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्र पूर्वमृभुस्तुतिः प्रकाश्यते।

अब दूसरे अध्याय का प्रारम्भ है। उसके पहिले मन्त्र में ऋभु की स्तुति का प्रकाश किया है-

अ॒यं दे॒वाय॒ जन्म॑ने॒ स्तोमो॒ विप्रे॑भिरास॒या।
अका॑रि रत्न॒धात॑मः॥ १॥

अ॒यम्। दे॒वाय॑। जन्म॑ने। स्तोमः॑। विप्रे॑भिः। आ॒स॒या। अका॑रि। र॒त्न॒ऽधात॑मः॥ १॥

पदार्थः-(**अयम्**) विद्याविचारेण प्रत्यक्षमनुष्ठीयमानः (**देवाय**) दिव्यगुणभोगयुक्ताय (**जन्मने**) वर्त्तमानदेहोपयोगाय पुनः शरीरधारणेन प्रादुर्भावाय वा (**स्तोमः**) स्तुतिसमूहः (**विप्रेभिः**) मेधाविभिः। अत्र **बहुलं छन्दसि** इति भिसः स्थान ऐसभावः। (**आसया**) मुखेन। अत्र **छान्दसो वर्णलोपो वा** इत्यास्यशब्दस्य यलोपः। **सुपां सुलुग्०** इति विभक्तेर्याजादेशश्च। (**अकारि**) क्रियते। अत्र लडर्थे लुङ्। (**रत्नधातमः**) रत्नानि रमणीयानि सुखानि दधाति येन सोऽतिशयितः॥ १॥

अन्वयः-ऋभुभिर्विप्रेभिरासया देवाय जन्मने यादृशो रत्नधातमोऽयँ स्तोमोऽकारि क्रियते स तादृशजन्मभोगकारी जायते॥ १॥

भावार्थः-अत्र पुनर्जन्मविधानं विज्ञेयम्। मनुष्यैर्यादृशानि कर्माणि क्रियन्ते तादृशानि जन्मानि भोगाश्च प्राप्यन्ते॥ १॥

पदार्थः-(**विप्रेभिः**) ऋभु अर्थात् बुद्धिमान् विद्वान् लोग (**आसया**) अपने मुख से (**देवाय**) अच्छे-अच्छे गुणों के भोगों से युक्त (**जन्मने**) दूसरे जन्म के लिये (**रत्नधातमः**) रमणीय अर्थात् अतिसुन्दरता से सुखों की दिलानेवाली जैसी (**अयम्**) विद्या के विचार से प्रत्यक्ष की हुई परमेश्वर की (**स्तोमः**) स्तुति है, वह वैसे जन्म के भोग करनेवाली होती है॥ १॥

भावार्थः-इस मन्त्र में पुनर्जन्म का विधान जानना चाहिये। मनुष्य जैसे कर्म किया करते हैं, वैसे ही जन्म और भोग उनको प्राप्त होते हैं॥ १॥

पुनस्ते ऋभवः कीदृशा इत्युपदिश्यते।

फिर वे विद्वान् कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

य इन्द्रा॑य वचो॒युजा॑ ततक्षु॒र्मन॑सा॒ हरी॑।
शमी॑भि॒र्य॒ज्ञमा॑शत॥ २॥

ये। इन्द्रा॑य। व॒च॒:ऽयुजा॑। त॒त॒क्षु॒:। मन॑सा। हरी॒ इति॑। शमी॑भि:। य॒ज्ञम्। आ॒श॒त॒॥ २॥

पदार्थ:-(**ये**) ऋभवो मेधाविन: (**इन्द्राय**) ऐश्वर्य्यप्राप्तये (**वचोयुजा**) वचोभिर्युक्त:। अत्र **सुपां सुलुग्०** इत्याकारादेश:। (**ततक्षु:**) तनूकुर्वन्ति। अत्र लडर्थे लिट्। (**मनसा**) विज्ञानेन (**हरी**) गमनधारणगुणौ (**शमीभि:**) कर्मभि:। **शमी इति कर्मनामसु पठितम्।** (निघं०२.१) (**यज्ञम्**) पुरुषार्थसाध्यम् (**आशत**) प्राप्नुवन्ति। अत्र व्यत्ययो लडर्थे लङ् **बहुलं छन्दसि** इति शपो लुकि श्नोरभावश्च॥ २॥

अन्वय:-ये मेधाविनो मनसा वचोयुजा हरी ततक्षु: शमीभिरिन्द्राय यज्ञमाशत प्राप्नुवन्ति ते सुखमेधन्ते॥ २॥

भावार्थ:-ये विद्वांस: पदार्थानां संयोगविभागाभ्यां धारणकर्षणवेगादिगुणान् विदित्वा यन्त्रयष्टीभ्रामणक्रियाभि: शिल्पादियज्ञं निष्पादयन्ति त एव परमैश्वर्य्यं प्राप्नुवन्ति॥ २॥

पदार्थ:-(**ये**) जो ऋभु अर्थात् उत्तम बुद्धिवाले विद्वान् लोग (**मनसा**) अपने विज्ञान से (**वचोयुजा**) वाणियों से सिद्ध किये हुए (**हरी**) गमन और धारण गुणों को (**ततक्षु:**) अतिसूक्ष्म करते और उनको (**शमीभि:**) दण्डों से कलायन्त्रों को घुमाके (**इन्द्राय**) ऐश्वर्य्यप्राप्ति के लिये (**यज्ञम्**) पुरुषार्थ से सिद्ध करनेयोग्य यज्ञ को (**आशत**) परिपूर्ण करते हैं, वे सुखों बढ़ा सकते हैं॥ २॥

भावार्थ:-जो विद्वान् पदार्थों के संयोग वा वियोग से धारण आकर्षण वा वेगादि गुणों को जानकर क्रियाओं से शिल्पव्यवहार आदि यज्ञ को सिद्ध करते हैं, वे ही उत्तम-उत्तम ऐश्वर्य्य को प्राप्त होते हैं॥ २॥

ते केन किं साधयेयुरित्युपदिश्यते।

वे उक्त विद्वान् किससे क्या-क्या सिद्ध करें, इस विषय का उपदेश अगले मन्त्र में किया है-

तक्ष॒न्नास॑त्याभ्या॒ं परि॑ज्मानं सु॒खं रथ॑म्।
तक्ष॑न् धे॒नुं स॑ब॒र्दुघा॑म्॥ ३॥

तक्ष॑न्। नास॑त्याभ्याम्। परि॑ऽज्मानम्। सु॒ऽखम्। रथ॑म्। तक्ष॑न्। धे॒नुम्। स॒ब॒:ऽदुघा॑म्॥ ३॥

पदार्थ:-(**तक्षन्**) छेदनादिना रचयन्ति। अत्र लडर्थे लङडभावश्च। (**नासत्याभ्याम्**) नित्याभ्यामग्निजलाभ्याम् (**परिज्मानम्**) परित: सर्वतोऽजन्ति मार्गं येन तम्। अयं परिपूर्वकाद् '**अज**'धातो: **श्वन्नुक्षन्०** इत्यादिना निपातित: (**सुखम्**) शोभनं खं विस्तृतमन्तरिक्षं स्थित्यर्थं यस्मिंस्तम्

(रथम्) रमन्ते क्रीडन्ति येन तं विमानादियानसमूहम् **(तक्षन्)** सूक्ष्मं कुर्वन्ति। अत्र लडर्थे लङडभावश्च। **(धेनुम्)** उपदेशश्रवणलक्षणां वाचम्। **धेनुरिति वाङ्नामसु पठितम्।** (निघं०१.११) **(सुबर्दुघाम्)** बर्बति येन ज्ञानेन तद्वः, समानं बर्दोग्धि प्रपूरयति यया ताम्। अत्र बर्ब गतौ इत्यस्माद्धातोः **कृतो बहुलम्** इति करणे क्विप्। **राल्लोप** इति बकारलोपः। **समानस्य छन्दः०** अनेन समानस्य सकारादेशः। ततः **दुहः कप् घश्च।** (अष्टा०३.२.७०) इति दुहः कप् प्रत्ययो हस्य स्थाने घादेशश्च॥३॥

अन्वयः-ये मेधाविनो नासत्याभ्याम्परिज्मानं सुखं रथं तक्षन् रचयन्ति ते सबर्दुघां धेनुं तक्षन् विकाशयन्ति॥३॥

भावार्थः-यैर्मनुष्यैः सोपवेदान् वेदानधीत्य तज्जन्यविज्ञानेनाग्न्यादिपदार्थानां गुणान् विदित्वा कलायन्त्रयुक्तेषु यानेषु तान् याजयित्वा विमानादीनि साध्यन्ते ते नैव कदाचिद् दुःखदारिद्र्ये प्रपश्यन्तीति॥३॥

पदार्थः-जो बुद्धिमान् विद्वान् लोग **(नासत्याभ्याम्)** अग्नि और जल से **(परिज्मानम्)** जिससे सब जगह में जाना-आना बने उस **(सुखम्)** सुशोभित विस्तारवाले **(रथम्)** विमान आदि रथ को **(तक्षन्)** क्रिया से बनाते हैं, वे **(सबर्दुघाम्)** सब ज्ञान को पूर्ण करने वाली **(धेनुम्)** वाणी को **(तक्षन्)** सूक्ष्म करते हुए धीरज से प्रकाशित करते हैं॥३॥

भावार्थः-जो मनुष्य अङ्ग, उपाङ्ग और उपवेदों के साथ वेदों को पढ़कर उनसे प्राप्त हुए विज्ञान से अग्नि आदि पदार्थों के गुणों को जानकर कलायन्त्रों से सिद्ध होनेवाले विमान आदि रथों में संयुक्त करके उनको सिद्ध किया करते हैं, वे कभी दुःख और दरिद्रता आदि दोषों को नहीं देखते॥३॥

पुनस्ते कीदृशा इत्युपदिश्यते।

फिर वे विद्वान् कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

युवा॑ना पि॒तरा॒ पुनः॑ स॒त्यम॑न्त्रा ऋजू॒यव॑ः।
ऋ॒भवो॑ वि॒ष्ट्यक्रत॥४॥

युवा॑ना। पि॒तरा॑। पुन॒रिति॑। स॒त्यऽम॑न्त्राः। ऋ॒जू॒ऽयव॑ः। ऋ॒भव॑ः। वि॒ष्टी। अ॒क्र॒त॥४॥

पदार्थः-**(युवाना)** मिश्रामिश्रगुणस्वभावौ। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारादेशः। **(पितरा)** शरीरात्मपालनहेतू **(सत्यमन्त्राः)** सत्यो यथार्थो मन्त्रो विचारो येषां ते **(ऋजूयवः)** कर्मभिरात्मन ऋजुत्वमिच्छन्तस्तच्छीलाः। अत्र **क्याच्छन्दसि** इत्युः प्रत्ययः। **(ऋभवः)** मेधाविनः। **ऋभव इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(विष्टी)** व्यापनशीलावश्विनौ। अत्र **क्तिच् क्तौ च संज्ञायाम्।** (अष्टा०३.१७४) अनेन क्तिच् प्रत्ययः। **(अक्रत)** कुर्वन्ति। अत्र लडर्थे लुङ्। **मन्त्रे घसह्वरणश०** (अष्टा०२.४.८०) इति च्लेर्लुक् च॥४॥

अन्वयः-य ऋजूयवः सत्यमन्त्रा ऋभवस्ते हि विष्टी युवाना पितराऽश्विनौ क्रियासिद्ध्यर्थं पुनः पुनरक्रत सम्प्रयुक्तौ कुर्वन्ति॥४॥

भावार्थः-येऽनलसाः सन्तः सत्यप्रिया आर्जवयुक्ता मनुष्याः सन्ति त एवाग्निजलादिपदार्थेभ्य उपकारं ग्रहीतुं शक्नुवन्तीति॥४॥

पदार्थः-जो **(ऋजूयवः)** कर्मों से अपनी सरलता को चाहने और **(सत्यमन्त्राः)** सत्य अर्थात् यथार्थ विचार के करनेवाले **(ऋभवः)** बुद्धिमान् सज्जन पुरुष हैं, वे **(विष्टी)** व्याप्त होने **(युवाना)** मेल अमेल स्वभाव वाले तथा **(पितरा)** पालनहेतु पूर्वोक्त अग्नि और जल को क्रिया की सिद्धि के लिये वारम्वार **(अक्रत)** अच्छी प्रकार प्रयुक्त करते हैं॥४॥

भावार्थः-जो आलस्य को छोड़े हुए सत्य में प्रीति रखने और सरल बुद्धिवाले मनुष्य हैं, वे ही अग्नि और जल आदि पदार्थों से उपकार लेने को समर्थ हो सकते हैं॥४॥

पुनरिमे केन किं कुर्य्युरित्युपदिश्यते।

फिर ये किससे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है-

सं वो॒ मदा॑सो अग्म॒तेन्द्रे॑ण च म॒रुत्व॑ता।

आ॒दि॒त्येभि॑श्च॒ राज॑भिः॥५॥ १॥

सम्। वः। मदा॑सः। अ॒ग्म॒त॒। इन्द्रे॑ण। च॒। म॒रुत्व॑ता। आ॒दि॒त्येभि॑ः। च॒। राज॑ऽभिः॥५॥

पदार्थः-**(सम्)** सम्यगर्थे **(वः)** युष्मान् मेधाविनः **(मदासः)** विद्यानन्दाः। **आज्जसेरसुग्** इत्यसुक्। **(अग्मत)** प्राप्नुवन्ति। अत्र लडर्थे लुङ्। **मन्त्रे घसह्वरणश०** इति च्लेर्लुक्, **गमहनजनखन०** (अष्टा०६.४.३८) इत्युपधालोपः, **समो गम्यृच्छिभ्याम्** (अष्टा०१.३.२९) इत्यात्मनेपदं च। **(इन्द्रेण)** विद्युता **(च)** समुच्चये **(मरुत्वता)** मरुतः सम्बन्धिनो विद्यन्ते यस्य तेन। अत्र सम्बन्धे मतुप्। **(आदित्येभिः)** किरणैः सह। **बहुलं छन्दसि** इति भिसः स्थान ऐसभावः । **(च)** पुनरर्थे **(रजभिः)** राजयन्ते दीपयन्ते तैः॥५॥

अन्वयः-हे मेधाविनो येन मरुत्वतेन्द्रेण राजभिरादित्येभिश्च सह मदसो वो युष्मानग्मत प्राप्नुवन्ति भवन्तश्च तैः श्रीमन्तो भवन्तु॥५॥

भावार्थः-ये विद्वांसो यदा वायुविद्युद्विद्यामाश्रित्य सूर्य्यकिरणैराग्नेयास्त्रादीनि शस्त्राणि यानानि च निष्पादयन्ति तदा ते शत्रून् जित्वा राजानः सन्तः सुखिनो भवन्तीति॥५॥

इति प्रथमो वर्गः॥

पदार्थः-हे मेधावि विद्वानो! तुम लोग जिन **(मरुत्वता)** जिसके सम्बन्धी पवन हैं, उस **(इन्द्रेण)** बिजुली वा **(राजभिः)** प्रकाशमान् **(आदित्येभिः)** सूर्य्य की किरणों के साथ युक्त करते हो, इससे

(मदासः) विद्या के आनन्द **(वः)** तुम लोगों को **(अग्मत)** प्राप्त होते हैं, इससे तुम लोग उनसे ऐश्वर्य्यवाले हूजिये॥५॥

भावार्थः-जो विद्वान् लोग जब वायु और विद्युत् का आलम्ब लेकर सूर्य्य की किरणों के समान आग्नेयादि अस्त्र, असि आदि शस्त्र और विमान आदि यानों को सिद्ध करते हैं, तब वे शत्रुओं को जीत राजा होकर सुखी होते हैं॥५॥

यह पहला वर्ग समाप्त हुआ॥

कस्यैतत्करणे सामर्थ्यं भवतीत्युपदिश्यते।

उक्त कार्य्य के करने में किसका सामर्थ्य होता है, इस विषय का उपदेश अगले मन्त्र में किया है।

उ॒त त्यं च॑म॒सं नव॒ं त्वष्टु॑र्दे॒वस्य॒ निष्कृ॑तम्।

अक॑र्त्त चतु॒रः पुन॑रः॥६॥

उ॒त। त्यम्। च॒म॒सम्। नव॑म्। त्वष्टुः॑। दे॒वस्य॑। निःऽकृ॑तम्। अक॑र्त्त। च॒तुरः॑। पुन॒रिति॑॥६॥

पदार्थः-(**उत**) अपि (**त्यम्**) तम् (**चमसम्**) चमन्ति भुञ्जते सुखानि येन व्यवहारेण तम्। (**नवम्**) नवीनम् (**त्वष्टुः**) शिल्पिनः (**देवस्य**) विदुषः (**निष्कृतम्**) नितरां सम्पादितम् (**अकर्त्त**) कुर्वन्ति। अत्र लडर्थे लुङ्, **मन्त्रे घसह्वरणश०** इति च्लेर्लुक्, वचनव्यत्ययेन झस्य स्थाने तः, **छन्दस्युभयथा** इत्यार्धधातुकं मत्वा गुणादेशश्च। (**चतुरः**) चतुर्विधानि भूजलाग्निवायुभिः सिद्धानि शिल्पकर्माणि (**पुनः**) पश्चादर्थे॥६॥

अन्वयः-यदा विद्वांसस्त्वष्टुर्देवस्य त्यं तं निष्कृतं नवं चमसमिदानींतनं प्रत्यक्षं दृष्ट्वोत पुनश्चतुरोऽकर्त्त कुर्वन्ति तदानन्दिता जायन्ते॥६॥

भावार्थः-मनुष्याः कस्यचित् क्रियाकुशलस्य शिल्पिनः समीपे स्थित्वा तत्कृतिं प्रत्यक्षीकृत्य सुखेनैव शिल्पसाध्यानि कार्य्याणि कर्त्तुं शक्नुवन्तीति॥६॥

पदार्थः-जब विद्वान् लोग जो (**त्वष्टुः**) शिल्पी अर्थात् कारीगर (**देवस्य**) विद्वान् का (**निष्कृतम्**) सिद्ध किया हुआ काम सुख का देनेवाला है (**त्यम्**) उस (**नवम्**) नवीन दृष्टिगोचर कर्म को देखकर (**उत**) निश्चय से (**पुनः**) उसके अनुसार फिर (**चतुरः**) भू, जल, अग्नि और वायु से सिद्ध होनेवाले शिल्पकामों को (**अकर्त्त**) अच्छी प्रकार सिद्ध करते हैं, तब आनन्दयुक्त होते हैं॥६॥

भावार्थः-मनुष्य लोग किसी क्रियाकुशल कारीगर के निकट बैठकर उसकी चतुराई को दृष्टिगोचर करके फिर सुख के साथ कारीगरी काम करने को समर्थ हो सकते हैं॥६॥

एवं साधितैरेतैः किं फलं जायत इत्युपदिश्यते।

इस प्रकार से सिद्ध किये हुए इन पदार्थों से क्या फल सिद्ध होता है, इस विषय का उपदेश

अगले मन्त्र में किया है-

ते नो॒ रत्ना॑नि धत्तन॒ त्रिरासाप्ता॑नि सुन्व॒ते।

एक॑मेकं सुश॒स्तिभि॑:॥७॥

ते। न॒:। रत्ना॑नि। ध॒त्त॒न॒। त्रि:। आ। साप्ता॑नि। सु॒न्व॒ते। एक॑म्ऽएकम्। सु॒श॒स्तिऽभि॑:॥७॥

पदार्थ:-(**ते**) मेधाविन: (**न:**) अस्मभ्यम् (**रत्नानि**) विद्यासुवर्णादीनि (**धत्तन**) दधतु। अत्र व्यत्यय:। **तप्तनप्०** इति तनबादेशश्च। (**त्रि:**) पुन: पुन: संख्यातव्ये (**आ**) समन्तात् (**साप्तानि**) सप्तवर्गाज्जातानि ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिनां यानि विशिष्टानि कर्माणि पूर्वोक्तस्य यज्ञस्यानुष्ठानं विद्वत्सत्कारसङ्गतिकरणे दानमर्थात्सर्वोपकरणाय विद्यादानमिति सप्त। (**सुन्वते**) निष्पाद्यन्ते (**एकमेकम्**) कर्मकर्म। अत्र वीप्सायां द्वित्वम्। (**सुशस्तिभि:**) शोभना: शस्तय: यासां क्रियाणां ताभि:॥७॥

अन्वय:-ये मेधाविन: सुशस्तिभि: साप्तान्येकमेकं कर्म कृत्वा सुखानि त्रि: सुन्वते ते नोऽस्मभ्यं रत्नानि धत्तन॥७॥

भावार्थ:-सर्वैर्मनुष्यैश्चतुराश्रमाणां यानि चतुर्धा कर्माणि यानि च यज्ञानुष्ठानादीनि त्रीणि तानि मनोवाक्शरीरै: कर्त्तव्यानि एवं मिलित्वा सप्त जायन्ते। यैर्मनुष्यैरेतानि क्रियन्ते तेषां संयोगोपदेशप्राप्त्या विद्यया रत्नलाभेन सुखानि भवन्ति। परं त्वेकैकं कर्म संसेध्य समाप्य द्वितीयमिति क्रमेण शान्तिपुरुषार्थाभ्यां सेवनीयानीति॥७॥

पदार्थ:-जो विद्वान् (**सुशस्तिभि:**) अच्छी-अच्छी प्रशंसा वाली क्रियाओं से (**साप्तानि**) जो सात संख्या के वर्ग अर्थात् ब्रह्मचारी, गृहस्थ, वानप्रस्थ, सन्यासियों के कर्म, यज्ञ का करना विद्वानों का सत्कार तथा उनसे मिलाप और दान अर्थात् सबके उपकार के लिये विद्या का देना है, इनसे (**एकमेकम्**) एक-एक कर्म करके (**त्रि:**) त्रिगुणित सुखों को (**सुन्वते**) प्राप्त करते हैं (**ते**) वे बुद्धिमान् लोग (**न:**) हमारे लिये (**रत्नानि**) विद्या और सुवर्णादि धनों को (**धत्तन**) अच्छी प्रकार धारण करें॥७॥

भावार्थ:-सब मनुष्यों को उचित है कि जो ब्रह्मचारी आदि चार आश्रमों के कर्म तथा यज्ञ के अनुष्ठान आदि तीन प्रकार के हैं, उनको मन, वाणी और शरीर से यथावत् करें। इस प्रकार मिलकर सात कर्म होते हैं, जो मनुष्य इनको किया करते हैं, उनके संग उपदेश और विद्या से रत्नों को प्राप्त होकर सुखी होते हैं, वे एक-एक कर्म को सिद्ध वा समाप्त करके दूसरे का आरम्भ करें, इस क्रम से शान्ति और पुरुषार्थ से सब कर्मों का सेवन करते रहें॥७॥

त एतत्कृत्वा किं प्राप्नुवन्तीत्युपदिश्यते।

वे उक्त कर्म को करके किसको प्राप्त होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

अधा॑रयन्त॒ वह्न॒योऽभ॑जन्त सुकृ॒त्यया॑।

भा॒गं दे॒वेषु॑ य॒ज्ञिय॑म्॥८॥२॥

अधा॑रयन्त। वह्न॑यः। अभ॑जन्त। सु॒ऽकृ॒त्यया॑। भा॒गम्। दे॒वेषु॑। य॒ज्ञिय॑म्॥८॥

पदार्थः-(**अधारयन्त**) धारयन्ति। अत्र लडर्थे लङ्। (**वह्नयः**) शुभकर्मगुणानां वोढारः। अत्र **विहिश्रिश्रु०** इति निः प्रत्ययः। (**अभजन्त**) सेवन्ते। अत्र लडर्थे लङ्। (**सुकृत्यया**) श्रेष्ठेन कर्मणा (**भागम्**) सेवनीयमानन्दम् (**देवेषु**) विद्वत्सु (**यज्ञियम्**) यज्ञनिष्पन्नम्॥८॥

अन्वयः-ये वह्नयो वोढारो मेधाविनः सुकृत्यया देवेषु स्थित्वा यज्ञियमधारयन्त ते भागमभजन्त नित्यमानन्दं सेवन्ते॥८॥

भावार्थः-मनुष्यैः सुकर्मणा विद्वत्सङ्गत्या पूर्वोक्तस्य यज्ञस्यानुष्ठानाद् व्यवहारसुखमारभ्य मोक्षपर्य्यन्तं सुखं प्राप्तव्यम्॥८॥

एकोनविंशसूक्तोक्तानां सकाशादुपकारं ग्रहीतुं मेधाविन एव समर्था भवन्तीत्यस्य विंशस्य सूक्तस्यार्थस्य पूर्वेण सह सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिर्विलसनादिभिश्चान्यथार्थमेव व्याख्यातमिति॥

इति विशं सूक्तं द्वितीयो वर्गश्च समाप्तः॥८॥

पदार्थः-जो (**वह्नयः**) संसार में शुभकर्म वा उत्तम गुणों को प्राप्त करानेवाले बुद्धिमान् सज्जन पुरुष (**सुकृत्यया**) श्रेष्ठकर्म से (**देवेषु**) विद्वानों में रहकर (**यज्ञियम्**) यज्ञ से सिद्ध कर्म को (**अधारयन्त**) धारण करते हैं, वे (**भागम्**) आनन्द को निरन्तर (**अभजन्त**) सेवन करते हैं॥८॥

भावार्थः-मनुष्यों को योग्य है कि अच्छे कर्म वा विद्वानों की सङ्गति तथा पूर्वोक्त यज्ञ के अनुष्ठान से व्यवहार सुख से लेकर मोक्षपर्य्यन्त सुख की प्राप्ति करनी चाहिये॥८॥

उन्नीसवें सूक्त में कहे हुए पदार्थों से उपकार लेने को बुद्धिमान् ही समर्थ होते हैं। इस अभिप्राय से इस बीसवें सूक्त के अर्थ का मेल पिछले उन्नीसवें सूक्त के साथ जानना चाहिये।

इस सूक्त का भी अर्थ सायणाचार्य्य आदि तथा यूरोपदेशवासी विलसन आदि ने विपरीत वर्णन किया है॥

यह बीसवां सूक्त और दूसरा वर्ग पूरा हुआ॥

अथैकविंशस्य षडर्च्चस्य सूक्तस्य कण्वो मेधातिथिर्ऋषिः। इन्द्राग्नी देवते। १,३,४,६ गायत्री; २ पिपीलिकामध्यानिचृद्गायत्री; ५ निचृद्गायत्रीच्छन्दः। षड्जः स्वरः॥

तत्रेन्द्राग्निगुणा उपदिश्यन्ते।

अब इक्कीसवें सूक्त का आरम्भ है। उसके पहिले मन्त्र में इन्द्र और अग्नि के गुण प्रकाशित किये हैं-

इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि।
ता सोमं सोमपातमा॥ १॥

इह। इन्द्राग्नी इति। उप। ह्वये। तयोः। इत्। स्तोमम्। उश्मसि। ता। सोमम्। सोमऽपातमा॥ १॥

पदार्थः-**(इह)** अस्मिन् हवनशिल्पविद्यादिकर्मणि **(इन्द्राग्नी)** वायुवह्नी। **यो वै वायुः स इन्द्रो य इन्द्रः स वायुः।** (श०ब्रा०४.१.३.१९) **(उप)** सामीप्ये **(ह्वये)** स्वीकुर्वे **(तयोः)** इन्द्राग्न्योः **(इत्)** चार्थे **(स्तोमम्)** गुणप्रकाशम् **(उश्मसि)** कामयामहे। अत्र **इन्दतो मसि** इति मसेरिदन्त आदेशः **(ता)** तौ। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारादेशः। **(सोमम्)** उत्पन्नं पदार्थसमूहम् **(सोमपातमा)** सोमानां पदार्थानामतिशयेन पालकौ॥ १॥

अन्वयः-इह यौ सोमपातमाविन्द्राग्नी सोमं रक्षतस्तावहमुपह्वये तयोरिच्च स्तोमं वयमुश्मसि॥ १॥

भावार्थः-मनुष्यैरिह वाय्वग्न्योर्गुणा जिज्ञासितव्याः। न चैतयोर्गुणानामुपदेशश्रवणाभ्यां विनोपकारो ग्रहीतुं शक्योऽस्ति॥ १॥

पदार्थः-**(इह)** इस संसार होमादि शिल्प में जो **(सोमपातमा)** पदार्थों की अत्यन्त पालन के निमित्त और **(सोमम्)** संसारी पदार्थों की निरन्तर रक्षा करनेवाले **(इन्द्राग्नी)** वायु और अग्नि हैं **(ता)** उनको मैं **(उपह्वये)** अपने समीप काम की सिद्धि के लिये वश में लाता हूं, और **(तयोः)** उनके **(इत्)** और **(स्तोमम्)** गुणों के प्रकाश करने को हम लोग **(उश्मसि)** इच्छा करते हैं॥ १॥

भावार्थः-मनुष्यों को वायु और अग्नि के गुण जानने की इच्छा करनी चाहिये, क्योंकि कोई भी मनुष्य उनके गुणों के उपदेश वा श्रवण के विना उपकार लेने को समर्थ नहीं हो सकते हैं॥ १॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः।
ता गायत्रेषु गायत॥ २॥

ता। यज्ञेषु। प्र। शंसत। इन्द्राग्नी इति। शुम्भत। नरः। ता। गायत्रेषु। गायत॥ २॥

पदार्थः-**(ता)** तौ। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारादेशः। **(यज्ञेषु)** पठनपाठनेषु शिल्पमयादिषु यज्ञेषु वा **(प्र)** क्रियायोगे **(शंसत)** स्तुवीत तद्गुणान् प्रकाशयत। अत्रान्तर्गतो ण्यर्थः। **(इन्द्राग्नी)** वाय्वग्नी **(शुम्भत)** सर्वत्र यानादिकृत्येषु प्रदीप्यत। अत्र **अन्येषामपि दृश्यते** इति दीर्घः। **(नरः)** नेतारो मनुष्याः। **नयतेर्डिच्च।** (उणा०२.९६) अनेन णीञ् धातोर्ऋः प्रत्ययो डिच्च। **(ता)** तौ **(गायत्रेषु)** यानि गायत्रीछन्दस्कानीमानि वेदोक्तानि स्तोत्राणि तेषु **(गायत)** षड्जादिस्वरैर्गानं कुरुत॥२॥

अन्वयः-हे नरो यूयं याविन्द्राग्नी यज्ञेषु प्रशंसत शुम्भत च ता तौ गायत्रेषु गायत॥२॥

भावार्थः-नैव मनुष्या अभ्यासेन विना वायोरग्नेश्च गुणज्ञानं कृत्वा तयोः सकाशादुपकारं ग्रहीतुं शक्नुवन्ति॥२॥

पदार्थः-हे **(नरः)** यज्ञ करनेवाले मनुष्यो! तुम जिस पूर्वोक्त **(इन्द्राग्नी)** वायु और अग्नि के **(प्रशंसत)** गुणों को प्रकाशित तथा **(शुम्भत)** सब जगह कामों में प्रदीप्त करते हो **(ता)** उनको **(गायत्रेषु)** गायत्री छन्दवाले वेद के स्तोत्रों में **(गायत)** षड्ज आदि स्वरों से गाओ॥२॥

भावार्थः-कोई भी मनुष्य अभ्यास के विना वायु और अग्नि के गुणों के जानने वा उनसे उपकार लेने को समर्थ नहीं हो सकते॥२॥

तौ किमुपकारकौ भवत इत्युपदिश्यते।

वे किस उपकार के करनेवाले होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे।

सोमपा सोमपीतये॥३॥

ता। मित्रस्य। प्रऽशस्तये। इन्द्राग्नी इति। ता। हवामहे। सोमऽपा। सोमऽपीतये॥३॥

पदार्थः-**(ता)** तौ। अत्र त्रिषु **सुपां सुलुग्०** इत्याकारादेशः। **(मित्रस्य)** सर्वोपकारकस्य सर्वसुहृदः **(प्रशस्तये)** प्रशंसनीयसुखाय **(इन्द्राग्नी)** वाय्वग्नी **(ता)** तौ **(हवामहे)** स्वीकुर्महे। अत्र **'हेञ्'** धातो**र्बहुलं छन्दसि** इति सम्प्रसारणम्। **(सोमपा)** यौ सोमान् पदार्थसमूहान् रक्षतस्तौ **(सोमपीतये)** सोमानां पदार्थानां पीती रक्षणं यस्मिन् व्यवहारे तस्मै॥३॥

अन्वयः-यथा विद्वांसो याविन्द्राग्नी मित्रस्य प्रशस्तय आह्वयन्ति तथैव ता तौ वयमपि हवामहे यौ च सोमपौ सोमपीतय आह्वयन्ति ता तावपि वयं हवामहे॥३॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। यदा मनुष्या मित्रभावमाश्रित्य परस्परोपकाराय विद्यया वाय्वग्न्योः कार्य्येषु योजनरक्षणे कृत्वा पदार्थव्यवहारानुन्नयन्ति तदैव सुखिनो भवन्ति॥३॥

पदार्थः-जैसे विद्वान् लोग वायु और अग्नि के गुणों को जानकर उपकार लेते हैं, वैसे हम लोग भी **(ता)** उन पूर्वोक्त **(मित्रस्य)** सबके उपकार करनेहारे और सब के मित्र के **(प्रशस्तये)** प्रशंसनीय सुख

के लिये तथा **(सोमपीतये)** सोम अर्थात् जिस व्यवहार में संसारी पदार्थों की अच्छी प्रकार रक्षा होती है, उसके लिये **(ता)** उन **(सोमपा)** सब पदार्थों की रक्षा करनेवाले **(इन्द्राग्नी)** वायु और अग्नि को **(हवामहे)** स्वीकार करते हैं॥३॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जब मनुष्य मित्रपन का आश्रय लेकर एक दूसरे के उपकार के लिये विद्या से वायु और अग्नि को कार्य्यों में संयुक्त करके रक्षा के साथ पदार्थ और व्यवहारों की उन्नति करते हैं, तभी वे सुखी होते हैं॥३॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

उ॒ग्रा सन्ता॑ हवामहु उप॒ेदं सव॑नं सु॒तम्।

इ॒न्द्रा॒ग्नी एह ग॑च्छताम्॥४॥

उ॒ग्रा। सन्ता॑। हु॒वा॒म॒हे॒। उप॑। इ॒दम्। सव॑नम्। सु॒तम्। इ॒न्द्रा॒ग्नी इति॑। आ। इ॒ह। ग॒च्छ॒ता॒म्॥४॥

पदार्थः-(**उग्रा**) तीव्रौ (**सन्ता**) वर्त्तमानौ। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारः। (**हवामहे**) विद्यासिध्यर्थमुपदिशामः शृणुमश्च (**उप**) उपगमार्थे (**इदम्**) प्रत्यक्षम् (**सवनम्**) सुन्वन्ति निष्पादयन्ति पदार्थान् येन तत् (**सुतम्**) क्रियया निष्पादितं व्यवहारम् (**इन्द्राग्नी**) पूर्वोक्तौ (**आ**) समन्तात् (**इह**) शिल्पक्रियाव्यवहारे (**गच्छताम्**) गमयतः। अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च॥४॥

अन्वयः-वयं याविदं सुतं सवनमुपागच्छतामुपागमयतस्तावुग्रौग्रौ सन्तासन्ताविन्द्राग्नी इह हवामहे॥४॥

भावार्थः-मनुष्यैर्यत इमौ प्रत्यक्षीभूतौ तीव्रवेगादिगुणौ शिल्पक्रियाव्यवहारे सर्वकार्य्योपयोगिनौ स्तस्तस्मादेतौ विद्यासिद्धये कार्य्येषु सदोपयोजनीयाविति॥४॥

पदार्थः-हम लोग विद्या की सिद्धि के लिये जिन **(उग्रा)** तीव्र **(सन्ता)** वर्त्तमान **(इन्द्राग्नी)** वायु और अग्नि का **(हवामहे)** उपदेश वा श्रवण करते हैं, वे **(इदम्)** इस प्रत्यक्ष **(सवनम्)** अर्थात् जिससे पदार्थों को उत्पन्न और **(सुतम्)** उत्तम शिल्पक्रिया से सिद्ध किये हुए व्यवहार को **(उपागच्छताम्)** हमारे निकटवर्ती करते हैं॥४॥

भावार्थः-मनुष्यों को जिस कारण ये दृष्टिगोचर हुए तीव्र वेग आदि गुणवाले वायु और अग्नि शिल्पक्रियायुक्त व्यवहार में सम्पूर्ण कार्य्यों के उपयोगी होते हैं, इससे इनको विद्या की सिद्धि के लिये कार्यों में सदा संयुक्त करने चाहियें॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ता म॒हान्ता॒ सद॒स्पती॒ इन्द्रा॑ग्नी॒ रक्ष॑ उब्जतम्।

अप्र॑जाः सन्त्व॒त्रिण॑:॥५॥

ता। म॒हान्ता॑। सद॒स्पती॒ इति॑। इन्द्रा॑ग्नी॒ इति॑। रक्ष॑:। उ॒ब्ज॒त॒म्। अप्र॑जाः। स॒न्तु॒। अ॒त्रिण॑:॥५॥

पदार्थः-(**ता**) तौ (**महान्ता**) महागुणौ। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारादेशः। (**सदस्पती**) सीदन्ति गुणा येषु द्रव्येषु तानि सदांसि तेषां यौ पालयितारौ तौ (**इन्द्राग्नी**) तावेव (**रक्षः**) दुष्टव्यवहारान्। अत्र व्यत्ययेनैकवचनम्। (**उब्जतम्**) कुटिलमपहतः। अत्र व्यत्ययो लडर्थे लोट् च। (**अप्रजाः**) अविद्यमानाः प्रजा येषां ते (**सन्तु**) भवेयुः। अत्र लडर्थे लोट्। (**अत्रिणः**) शत्रवः॥५॥

अन्वयः-मनुष्यैर्यौ सम्यक् प्रयुक्तौ महान्ता महान्तौ सदस्पती इन्द्राग्नी रक्ष उब्जतं कुटिलं रक्षो दूरीकुरुतो याभ्यामत्रिणः शत्रवोऽप्रजाः सन्तु भवेयुरेतौ सर्वैर्मनुष्यैः कथं न सूपयोजनीयौ॥५॥

भावार्थः-विद्वद्भिः सर्वेषु पदार्थेषु स्वरूपेण गुणैरधिकौ वाय्वग्नी सम्यग्विदित्वा सम्प्रयोजितौ दुःखनिवारणेन रक्षणहेतू भवत इति॥५॥

पदार्थः-मनुष्यों ने जो अच्छी प्रकार क्रिया की कुशलता में संयुक्त किये हुए (**महान्ता**) बड़े-बड़े उत्तम गुणवाले (**ता**) पूर्वोक्त (**सदस्पती**) सभाओं के पालन के निमित्त (**इन्द्राग्नी**) वायु और अग्नि हैं, जो (**रक्षः**) दुष्ट व्यवहारों को (**उब्जतम्**) नाश करते और उनसे (**अत्रिणः**) शत्रु जन (**अप्रजाः**) पुत्रादिरहित (**सन्तु**) हों, उनका उपयोग सब लोग क्यों न करें॥५॥

भावार्थः-विद्वानो को योग्य है कि जो सब पदार्थों के स्वरूप वा गुणों से अधिक वायु और अग्नि हैं, उनको अच्छी प्रकार जानकर क्रियाव्यवहार में संयुक्त करें तो वे दुःखों को निवारण करके अनेक प्रकार की रक्षा करनेवाले होते हैं॥५॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर भी वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

तेन॑ स॒त्येन॑ जागृ॒तमधि॑ प्रचे॒तुने॑ प॒दे।

इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम्॥६॥३॥

तेन॑। स॒त्येन॑। जा॒गृ॒त॒म्। अधि॑। प्र॒ऽचे॒तुने॑। प॒दे। इन्द्रा॑ग्नी॒ इति॑। शर्म॑। य॒च्छ॒त॒म्॥६॥

पदार्थः-(**तेन**) गुणसमूहाधारेण (**सत्येन**) अविनाशिस्वभावेन कारणेन (**जागृतम्**) प्रसिद्धगुणौ स्तः। अत्र व्यत्ययो लडर्थे लोट् च (**अधि**) उपरिभावे (**प्रचेतुने**) प्रचेतयन्त्यानन्देन यस्मिँस्तस्मिन्। (**पदे**) प्राप्तुं योग्ये (**इन्द्राग्नी**) प्राणविद्युतौ (**शर्म**) सुखम् (**यच्छतम्**) दत्तः। अत्र व्यत्ययो लडर्थे लोट् च॥६॥

अन्वयः-याविन्द्राग्नी तेन सत्येन प्रचेतुने पदेऽधिजागृतं तौ शर्म यच्छतं दत्तः॥६॥

भावार्थ:-ये नित्या: पदार्था: सन्ति तेषां गुणा अपि नित्या भवितुमर्हन्ति, ये शरीरस्था बहिस्था: प्राणा विद्युच्च सम्यक् सेविताश्चेतनत्वहेतवो भूत्वा सुखप्रदा भवन्ति ते कथं न सम्प्रयोक्तव्यौ॥६॥

विंशसूक्तोक्ता मेधाविन: पदार्थविद्यासिद्धेरिन्द्राग्नी मुख्यौ हेतू भवत इति जानन्त्यनेन पूर्वसूक्तार्थेन सहैकविंशसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्।

इदमपि सूक्तं सायणाचार्य्यादिभिर्यूरोपाख्यदेशनिवासिभिर्विलसनादिभिश्च विरुद्धार्थं व्याख्यातम्॥

इत्येकविंशं सूक्तं तृतीयो वर्गश्च समाप्त:॥

पदार्थ:-जो **(इन्द्राग्नी)** प्राण और बिजुली हैं वे **(तेन)** उस **(सत्येन)** अविनाशी गुणों के समूह से **(प्रचेतुने)** जिसमें आनन्द से चित्त प्रफुल्लित होता है **(पदे)** उस सुखप्रापक व्यवहार में **(अधिजागृतम्)** प्रसिद्ध गुणवाले होते और **(शर्म)** उत्तम सुख को भी **(यच्छतम्)** देते हैं, उनको क्यों उपयुक्त न करना चाहिये॥६॥

भावार्थ:-जो नित्य पदार्थ हैं उनके गुण भी नित्य होते हैं, जो शरीर में वा बाहर रहने वाले प्राणवायु तथा बिजुली हैं, वे अच्छी प्रकार सेवन किये हुए चेतनता करानेवाले होकर सुख देनेवाले होते हैं॥६॥

बीसवें सूक्त में कहे हुए बुद्धिमानों की पदार्थविद्या की सिद्धि के वायु और अग्नि मुख्य हेतु होते हैं, इस अभिप्राय के जानने से पूर्वोक्त बीसवें सूक्त के अर्थ के साथ इस इक्कीसवें सूक्त के अर्थ का मेल जानना चाहिये।

यह भी सूक्त सायणाचार्य्य आदि तथा यूरोपदेशवासी विलसन आदि ने विरुद्ध अर्थ से वर्णन किया है॥

यह इक्कीसवां सूक्त और तीसरा वर्ग पूरा हुआ॥

अथास्यैकविंशत्यृचस्य द्वाविंशस्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः। १-४ अश्विनौ; ५-८ सविता; ९,१० अग्निः; ११ देव्यः; १२ इन्द्राणीवरुणान्यग्नाय्यः; १३, १४ द्यावापृथिव्यौ; १५ पृथिवी; १६ विष्णुर्देवो वा; १७-२१ विष्णुश्च देवताः। १-३, ८,१२,१७,१८ पिपीलिकामध्यानिचृद्गायत्री; ४,५,७,९-११,१३-१४,१६,२०-२१ गायत्री; ६,१९ निचृद्गायत्री; १५ विराड् गायत्री च छन्दः। षड्जः स्वरः॥

तत्रादावश्विगुणा उपदिश्यन्ते।

अब बाईसवें सूक्त का आरम्भ है। इसके पहिले मन्त्र में अश्वि के गुणों का उपदेश किया है–

प्रातर्युजा वि बोधयाश्विनावेह गच्छताम्।
अस्य सोमस्य पीतये॥ १॥

प्रातः३युजा। वि। बोधय। अश्विनौ। आ। इह। गच्छताम्। अस्य। सोमस्य। पीतये॥ १॥

पदार्थः–(**प्रातर्युजा**) प्रातः प्रथमं युङ्क्तस्तौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**वि**) विशिष्टार्थे (**बोधय**) अवगमय (**अश्विनौ**) द्यावापृथिव्यौ (**आ**) समन्तात् (**इह**) शिल्पव्यवहारे (**गच्छताम्**) प्राप्नुतः। अत्र लडर्थे लोट् (**अस्य**) प्रत्यक्षस्य (**सोमस्य**) स्तोतव्यस्य सुखस्य (**पीतये**) प्राप्तये॥ १॥

अन्वयः-हे विद्वन्! यौ प्रातर्युजावश्विनाविह गच्छतां प्राप्नुतस्तावस्य सोमस्य पीतये सर्वसुखप्राप्तयेऽस्मान् विबोधयावगमय॥ १॥

भावार्थः-शिल्पकार्य्याणि चिकीर्षुभिर्मनुष्यैर्भूम्यग्नी प्रथमं संग्राह्यौ नैताभ्यां विना यानादिसिद्धिगमने सम्भवत इतीश्वरस्योपदेशः॥ १॥

पदार्थः–हे विद्वन् मनुष्य! जो (**प्रातर्युजा**) शिल्पविद्या सिद्ध यन्त्रकलाओं में पहिले बल देनेवाले (**अश्विनौ**) अग्नि और पृथिवी (**इह**) इस शिल्प व्यवहार में (**गच्छताम्**) प्राप्त होते हैं, इससे उनको (**अस्य**) इस (**सोमस्य**) उत्पन्न करनेयोग्य सुख समूह को (**पीतये**) प्राप्ति के लिये तुम हमको (**विबोधय**) अच्छी प्रकार विदित कराइये॥ १॥

भावार्थः-शिल्प कार्य्यों की सिद्धि करने की इच्छा करनेवाले मनुष्यों को चाहिये कि उसमें भूमि और अग्नि का पहिले ग्रहण करें, क्योंकि इनके विना विमान आदि यानों की सिद्धि वा गमन सम्भव नहीं हो सकता॥ १॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है–

या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना ता हवामहे॥ २॥

या। सुऽरथा। रथिऽतमा। उभा। देवा। दिवि३ऽस्पृशा। अश्विना। ता। हवामहे॥ २॥

पदार्थः-**(या)** यौ। अत्र षट्सु प्रयोगेषु **सुपां सुलुग्०** इत्याकारादेशः। **(सुरथा)** शोभना रथा याभ्यां तौ **(रथीतमा)** प्रशस्ता रथा विद्यन्ते ययोः सकाशात् तावतिशयितौ। **रथिन ईद्वक्तव्यः।** (अष्टा०वा०८.२.१७) इतीकारादेशः। **(उभा)** द्वौ परस्परमाकांक्ष्यौ **(देवा)** देदीप्यमानौ **(दिविस्पृशा)** यौ दिव्यन्तरिक्षे यानानि स्पर्शयतस्तौ। अत्रान्तर्गतो ण्यर्थः। **(अश्विना)** व्याप्तिगुणशीलौ **(ता)** तौ **(हवामहे)** आदद्मः। अत्र **बहुलं छन्दसि** इति शपो लुकि श्लोरभावः॥२॥

अन्वयः-वयं यौ दिविस्पृशा रथीतमा सुरथा देवाऽश्विनौ स्तस्तावुभौ हवामहे स्वीकुर्मः॥२॥

भावार्थः-मनुष्यैर्यौ शिल्पानां साधकतमावग्निजले स्तस्तौ सम्प्रयोजितौ कार्य्यसिद्धिहेतू भवत इति॥२॥

पदार्थः-हम लोग **(या)** जो **(दिविस्पृशा)** आकाशमार्ग से विमान आदि यानों को एक स्थान से दूसरे स्थान में शीघ्र पहुंचाने **(रथीतमा)** निरन्तर प्रशंसनीय रथों को सिद्ध करनेवाले **(सुरथा)** जिनके योग से उत्तम-उत्तम रथ सिद्ध होते हैं **(देवा)** प्रकाशादि गुणवाले **(अश्विनौ)** व्याप्ति स्वभाववाले पूर्वोक्त अग्नि और जल हैं, **(ता)** उन **(उभा)** एक-दूसरे के साथ संयोग करने योग्यों को **(हवामहे)** ग्रहण करते हैं॥२॥

भावार्थः-जो मनुष्यों के लिये अत्यन्त सिद्धि करानेवाले अग्नि और जल हैं, वे शिल्पविद्या में संयुक्त किये हुए कार्य्यसिद्ध के हेतु होते हैं॥२॥

काभ्यामेतौ सम्प्रयोजितुं शक्यावित्युपदिश्यते।

वे क्रिया में किनसे संयुक्त हो सकते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

या वां कशा मधुमत्यश्विना सूनृतावती।

तया यज्ञं मिमिक्षतम्॥३॥

या। वाम्। कशा। मधुऽमती। अश्विना। सूनृताऽवती। तया। यज्ञम्। मिमिक्षतम्॥३॥

पदार्थः-**(या)** **(वाम्)** युवयोर्युवां वा **(कशा)** वाक्। **कशेति वाङ्नामसु पठितम्।** (निघं०१.११) **(मधुमती)** मधुरगुणा **(अश्विना)** प्रकाशितगुणयोरध्वर्य्योः। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(सूनृतावती)** सूनृता प्रशस्ता बुद्धिर्विद्यते यस्यां सा। **सूनृतेति वाङ्नामसु पठितम्।** (निघं०१.११) अत्र प्रशंसार्थे मतुप्। **(तया)** कशया **(यज्ञम्)** सुशिक्षोपदेशाख्यम् **(मिमिक्षतम्)** सेक्तुमिच्छतम्॥३॥

अन्वयः-हे उपदेष्टृपदेश्यावध्यापकशिष्यौ वां युवयोरश्विनोर्या सूनृतावती मधुमती कशाऽस्ति तया युवां यज्ञं मिमिक्षतं सेक्तुमिच्छतम्॥३॥

भावार्थः-नैवोपदेशमन्तरा कस्यचित् किञ्चिदपि विज्ञानं वर्धते। तस्मात्सर्वैर्विद्वज्जिज्ञासुभिर्मनुष्यैर्नित्यमुपदेशः श्रवणं च कार्य्यमिति॥३॥

पदार्थः-हे उपदेश करने वा सुनने तथा पढ़ने-पढ़ानेवाले मनुष्यो! **(वाम्)** तुम्हारे **(अश्विना)** गुणप्रकाश करनेवालों की **(या)** जो **(सूनृतावती)** प्रशंसनीय बुद्धि से सहित **(मधुमती)** मधुरगुणयुक्त **(कशा)** वाणी है, **(तया)** उससे तुम **(यज्ञम्)** श्रेष्ठ शिक्षारूप यज्ञ को **(मिमिक्षतम्)** प्रकाश करने की इच्छा नित्य किया करो॥३॥

भावार्थः-उपदेश के विना किसी मनुष्य को ज्ञान की वृद्धि कुछ भी नहीं हो सकती, इससे सब मनुष्यों को उत्तम विद्या का उपदेश तथा श्रवण निरन्तर करना चाहिये॥३॥

एतं कृत्वाऽश्विनोर्योगेन किं भवतीत्युपदिश्यते।

इसको करके अश्वियों के योग से क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है-

नहि वामस्ति दूरके यत्रा रथेन गच्छथः।
अश्विना सोमिनो गृहम्॥४॥

नहि। वाम्। अस्ति। दूरके। यत्र। रथेन। गच्छथः। अश्विना। सोमिनः। गृहम्॥४॥

पदार्थः-**(नहि)** प्रतिषेधार्थे **(वाम्)** युवयोः **(अस्ति)** भवति **(दूरके)** दूर एव दूरके। स्वार्थे कन्। **(यत्र)** यस्मिन्। **ऋचि तुनुघ०** (अष्टा०६.३.१३३) इति दीर्घः। **(रथेन)** विमानादियानेन **(गच्छथः)** गमनं कुरुतम्। लट् प्रयोगोऽयम्। **(अश्विना)** अश्विभ्यां युक्तेन **(सोमिनः)** सोमाः प्रशस्ताः पदार्थाः सन्ति यस्य तस्य। अत्र प्रशंसार्थ इनिः। **(गृहम्)** गृह्णाति यस्मिंस्तत्॥४॥

अन्वयः-हे रथानां रचयितृचालयितारौ युवां यत्राश्विना रथेन सोमिनो गृहं गच्छथस्तत्र दूरस्थमपि स्थानं वा युवयोर्दूरके नह्यस्ति॥४॥

भावार्थः-हे मनुष्या! यतोऽश्विवेगयुक्तं यानमतिदूरमपि स्थानं शीघ्रं गच्छति तस्मादेताभिरेतन्नित्यमनुष्ठेयम्॥४॥

पदार्थः-हे रथों के रचने वा चलानेहारे सज्जन लोगो! तुम **(यत्र)** जहाँ उक्त **(अश्विना)** अश्वियों से संयुक्त **(रथेन)** विमान आदि यान से **(सोमिनः)** जिसके प्रशंसनीय पदार्थ विद्यमान हैं, उस पदार्थविद्या वाले के **(गृहम्)** घर को **(गच्छथः)** जाते हो, वह दूरस्थान भी **(वाम्)** तुमको **(दूरके)** दूर **(नहि)** नहीं है॥४॥

भावार्थः-हे मनुष्यो! जिस कारण अग्नि और जल के वेग से युक्त किया हुआ रथ अति दूर भी स्थानों को शीघ्र पहुंचाता है, इससे तुम लोगों को भी यह शिल्पविद्या का अनुष्ठान निरन्तर करना चाहिये॥४॥

अथैश्वर्य्यहेतुरुपदिश्यते

अगले मन्त्र में परम ऐश्वर्य्य करानेवाले परमेश्वर का प्रकाश किया है-

हिर॑ण्यपाणिमू॒तये॑ सवि॒तार॒मुप॑ ह्वये।

स चेत्ता॑ दे॒वता॑ प॒दम्॥५॥४॥

हिर॑ण्यऽपाणिम्। ऊ॒तये॑। स॒वि॒तार॑म्। उप॑। ह्व॒ये॒। सः। चेत्ता॑। दे॒वता॑। प॒दम्॥५॥

पदार्थः-(**हिरण्यपाणिम्**) हिरण्यानि सुवर्णादीनि रत्नानि पाणौ व्यवहारे लभन्ते यस्मात्तम् (**ऊतये**) प्रीतये (**सवितारम्**) सर्वजगदन्तर्यामिणमीश्वरम् (**उप**) उपगमार्थे (**ह्वये**) स्वीकुर्वे (**सः**) जगदीश्वरः (**चेत्ता**) ज्ञानस्वरूपः (**देवता**) देव एवेति देवता पूज्यतमा। **देवात्तल्।** (अष्टा०५.४.२७) इति स्वार्थे तल् प्रत्ययः। (**पदम्**) पद्यते प्राप्तोऽस्ति चराचरं जगत् तम्॥५॥

अन्वयः-अहमूतये यं पदं हिरण्यपाणिं सवितारं परमात्मानमुपह्वये सा चेत्ता देवतास्ति॥५॥

भावार्थः-मनुष्यैर्यश्चिन्मयः सर्वत्र व्यापकः पूज्यतमः प्रीतिविषयः सर्वैश्वर्य्यप्रदः परमेश्वरोऽस्ति, स एव नित्यमुपास्यः। नैव तद्विषयेऽस्मादन्यः कश्चित्पदार्थ उपासितुमर्होऽस्तीति मन्तव्यम्॥५॥

इति चतुर्थो वर्गः सम्पूर्णः॥

पदार्थः-मैं (**ऊतये**) प्रीति के लिये जो (**पदम्**) सब चराचर जगत् को प्राप्त और (**हिरण्यपाणिम्**) जिससे व्यवहार में सुवर्ण आदि रत्न मिलते हैं, उस (**सवितारम्**) सब जगत् के अन्तर्यामी ईश्वर को (**उपह्वये**) अच्छी प्रकार स्वीकार करता हूं (**सः**) वह परमेश्वर (**चेत्ता**) ज्ञानस्वरूप और (**देवता**) पूज्यतम देव है॥५॥

भावार्थः-मनुष्यों को जो चेतनमय सब जगह प्राप्त होने और निरन्तर पूजन करने योग्य प्रीति का एक पुंज और ऐश्वर्य्यों का देनेवाला परमेश्वर है, वही निरन्तर उपासना के योग्य है। इस विषय में इसके विना कोई दूसरा पदार्थ उपासना के योग्य नहीं है॥५॥

यह चौथा वर्ग पूरा हुआ॥

पुनः स स्तोतव्य इत्युपदिश्यते।

फिर उस परमेश्वर की स्तुति करनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है-

अ॒पां नपा॑त॒मव॑से सवि॒तार॒मुप॑ स्तुहि।

तस्य॑ व्र॒तान्यु॒श्मसि॥६॥

अ॒पाम्। नपा॑तम्। अव॑से। स॒वि॒तार॑म्। उप॑। स्तु॒हि॒। तस्य॑। व्र॒तानि॑। उ॒श्म॒सि॒॥६॥

पदार्थः-(**अपाम्**) ये व्याप्नुवन्ति सर्वान् पदार्थानन्तरिक्षादयस्तेषां प्रणेतारम् (**नपातम्**) न विद्यते पातो विनाशो यस्येति तम्। **नभ्राण्नपान्नवेदा०** (अष्टा०६.३.७५) अनेनाऽयं निपातितः। (**अवसे**) रक्षणाद्याय (**सवितारम्**) सकलैश्वर्य्यप्रदम् (**उप**) सामीप्ये (**स्तुहि**) प्रशंसय (**तस्य**) जगदीश्वरस्य (**व्रतानि**) नियतधर्मयुक्तानि कर्माणि गुणस्वभावाँश्च (**उश्मसि**) प्राप्तुं कामयामहे॥६॥

अन्वयः-हे विद्वन्! यथाहमवसे यमपां नपातं सवितारं परमात्मानमुपस्तौमि तथा तं त्वमप्युपस्तुहि प्रशंसय यथा वयं यस्य व्रतान्युश्मसि प्रकाशितुं कामयामहे तथा तस्यैतानि यूयमपि प्राप्तुं कामयध्वम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वान् परमेश्वरं स्तुत्वा तस्याज्ञामाचरन्ति। तथैव युष्माभिरप्यनुष्ठाय तद्रचितायामस्यां सृष्टावुपकाराः संग्राह्या इति॥६॥

पदार्थः-हे धार्मिक विद्वान् मनुष्य! जैसे मैं (**अवसे**) रक्षा आदि के लिये (**अपाम्**) जो सब पदार्थों को व्याप्त होने अन्त आदि पदार्थों के वर्त्ताने तथा (**नपातम्**) अविनाशी और (**सवितारम्**) सकल ऐश्वर्य्य के देनेवाले परमेश्वर की स्तुति करता हूँ, वैसे तू भी उसकी (**उपस्तुहि**) निरन्तर प्रशंसा कर। हे मनुष्यो! जैसे हम लोग जिसके (**व्रतानि**) निरन्तर धर्मयुक्त कर्मों को (**उश्मसि**) प्राप्त होने की कामना करते हैं, वैसे (**तस्य**) उसके गुण कर्म्म और स्वभाव को प्राप्त होने की कामना तुम भी करो॥६॥

भावार्थः-जैसे विद्वान् मनुष्य परमेश्वर की स्तुति करके उसकी आज्ञा का आचरण करता है, वैसे तुम लोगों को भी उचित है कि उस परमेश्वर के रचे हुए संसार में अनेक प्रकार के उपकार ग्रहण करो॥६॥

अथ सवितृशब्देनेश्वरसूर्य्यगुणा उपदिश्यन्ते।

अगले मन्त्र में सविता शब्द से ईश्वर और सूर्य्य के गुणों का उपदेश किया है-

विभक्तारं हवामहे वसोश्चित्रस्य राधसः।
सवितारं नृचक्षसम्॥७॥

विऽभक्तारम्। हवामहे। वसोः। चित्रस्य। राधसः। सवितारम्। नृऽचक्षसम्॥७॥

पदार्थः-(**विभक्तारम्**) जीवेभ्यस्तत्तत्कर्मानुकूलफलविभाजितारम्। विविधपदार्थानां पृथक् पृथक् कर्त्तारं वा (**हवामहे**) आदद्मः। अत्र **बहुलं छन्दसि** इति शपः स्थाने श्लोरभावः। (**वसोः**) वस्तुजातस्य (**चित्रस्य**) अद्भुतस्य (**राधसः**) विद्यासुवर्णचक्रवर्त्तिराज्यादिधनस्य च (**सवितारम्**) उत्पादकमैश्वर्य्यहेतुं वा (**नृचक्षसम्**) नृषु चक्षा अन्तर्य्यामिरूपेण विज्ञानप्रकाशो वा यस्य तम्॥७॥

अन्वयः-हे मनुष्या! यथा वयं नृचक्षसं वसोश्चित्रस्य राधसो विभक्तारं सवितारं परमेश्वरं सूर्य्यं वा हवामहे आददीमहि तथैव यूयमप्यादत्त॥७॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। मनुष्यैर्यतः परमेश्वरः सर्वशक्तिमत्त्वसर्वज्ञत्वाभ्यां सर्वजगद्रचनं कृत्वा सर्वेभ्यः कर्मफलप्रदानं करोति। सूर्य्योऽग्निमयत्वछेदकत्वाभ्यां मूर्त्तद्रव्याणां विभागप्रकाशौ करोति तस्मादेतौ सर्वदा युक्त्योपचर्य्यौ॥७॥

पदार्थः-हे मनुष्य लोगो! जैसे हम लोग **(नृचक्षसम्)** मनुष्यों में अन्तर्यामिरूप से विज्ञान प्रकाश करने **(वसोः)** पदार्थों से उत्पन्न हुए **(चित्रस्य)** अद्भुत **(राधसः)** विद्या सुवर्ण वा चक्रवर्ति राज्य आदि धन के यथायोग्य **(विभक्तारम्)** जीवों के कर्म के अनुकूल विभाग से फल देने वा **(सवितारम्)** जगत् के उत्पन्न करने वाले परमेश्वर और **(नृचक्षसम्)** जो मूर्त्तिमान् द्रव्यों का प्रकाश करने **(वसोः)** **(चित्रस्य)** **(राधसः)** उक्त धनसम्बन्धी पदार्थों को **(विभक्तारम्)** अलग-अलग व्यवहारों में वर्त्ताने और **(सवितारम्)** ऐश्वर्य्य हेतु सूर्य्यलोक को **(हवामहे)** स्वीकार करें, वैसे तुम भी उनका ग्रहण करो॥७॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। मनुष्यों को उचित है कि जिससे परमेश्वर सर्वशक्तिपन वा सर्वज्ञता से सब जगत् की रचना करके सब जीवों को उसके कर्मों के अनुसार सुख दुःखरूप फल को देता और जैसे सूर्य्यलोक अपने ताप वा छेदनशक्ति से मूर्त्तिमान् द्रव्यों का विभाग और प्रकाश करता है, इससे तुम भी सबको न्यायपूर्वक दण्ड वा सुख और यथायोग्य व्यवहार में चला के विद्यादि शुभ गुणों को प्राप्त कराया करो॥७॥

कथमयुमपकारो ग्रहीतुं शक्य इत्युपदिश्यते।

कैसे मनुष्य इस उपकार को ग्रहण कर सकें, सो अगले मन्त्र में उपदेश किया-

सखा॑य॒ आ नि षी॑दत सवि॒ता स्तोम्यो॒ नु नः॑।
दाता॒ राधां॑सि शुम्भति॥८॥

सखा॑यः। आ। नि। सी॒द॒त॒। स॒वि॒ता। स्तोम्यः॑। नु। न॒ः। दाता॑। राधां॑सि। शुम्भ॒ति॒॥८॥

पदार्थः-**(सखायः)** परस्परं सुहृदः परोपकारका भूत्वा **(आ)** अभितः **(नि)** निश्चयार्थे **(सीदत)** वर्त्तध्वम् **(सविता)** सकलैश्वर्य्ययुक्तः। ऐश्वर्य्यहेतुर्वा **(स्तोम्यः)** प्रशंसनीयः **(नु)** क्षिप्रम्। **न्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **(नः)** अस्मभ्यम् **(दाता)** दानशीलो दानहेतुर्वा **(राधांसि)** नानाविधान्युत्तमानि धनानि **(शुम्भति)** शोभयति॥८॥

अन्वयः-हे मनुष्या यूयं सदा सखायः सन्त आनिषीदत यः स्तोम्यो नोऽस्मभ्यं राधांसि दाता सविता जगदीश्वरः सूर्य्यो वा शुम्भति तं नु नित्यं प्रशंसत॥८॥

भावार्थः-अत्र श्लेषालङ्कारः। नैव मनुष्याणां मित्रभावेन विना परस्परं सुखं सम्भवति। अतः सर्वैः परस्परं मिलित्वा जगदीश्वरस्याग्निमयस्य सूर्य्यादेर्वा गुणानुपदिश्य श्रुत्वा च तेभ्यः सुखाय सदोपकारो ग्राह्य इति॥८॥

पदार्थः-हे मनुष्यो! तुम लोग सदा **(सखायः)** आपस में मित्र सुख वा उपकार करने वाले होकर **(आनिषीदत)** सब प्रकार स्थित रहो और जो **(स्तोम्यः)** प्रशंसनीय **(नः)** हमारे लिये **(राधांसि)** अनेक प्रकार के उत्तम धनों को **(दाता)** देनेवाला **(सविता)** सकल ऐश्वर्य्ययुक्त जगदीश्वर **(शुम्भति)** सबको सुशोभित करता है उसकी **(नु)** शीघ्रता के साथ नित्य प्रशंसा करो। तथा हे मनुष्यो! जो **(स्तोम्यः)** प्रशंसनीय **(नः)** हमारे लिये **(राधांसि)** उक्त धनों को **(शुम्भति)** सुशोभित कराता वा उनके **(दाता)** देने का हेतु **(सविता)** ऐश्वर्य्य देने का निमित्त सूर्य्य है उसकी **(नु)** नित्य शीघ्रता के साथ प्रशंसा करो॥८॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को परस्पर मित्रभाव के विना कभी सुख नहीं हो सकता। इससे सब मनुष्यों को योग्य है कि एक-दूसरे के साथ होकर जगदीश्वर वा अग्निमय सूर्य्यादि का उपदेश कर वा सुनकर उनसे सुखों के लिये सदा उपकार ग्रहण करें॥८॥

पुनरग्निगुणा उपदिश्यन्ते।

फिर अगले मन्त्र में अग्नि के गुणों का उपदेश किया है-

अग्ने॒ पत्नी॒रि॒हा व॑ह दे॒वाना॑मुश॒तीरु॑प॑।
त्वष्टा॑र॒ सोम॑पीतये॥९॥

अग्ने॑। पत्नी॑ः। इ॒ह। आ। व॒ह॒। दे॒वाना॑म्। उ॒श॒तीः। उप॑। त्वष्टा॑रम्। सोम॑ऽपीतये॥९॥

पदार्थः-**(अग्ने)** अग्निर्भौतिकः **(पत्नीः) पत्युर्नो यज्ञसंयोगे।** (अष्टा०४.१.३३) अनेन ङीप् प्रत्ययो नकारादेशश्च। **इयं वै पृथिव्यदितिः सेयं देवानां पत्नी।** (श०ब्रा०५.२.५.४) **देवानां पत्न्य उशत्योऽवन्तु नः। प्रावन्तु नस्तुजयेऽपत्यजननाय चान्नसंसननाय च। याः पार्थिवासो या अपामपि व्रते कर्मणि ता नो देव्यः सुहवाः शर्म यच्छन्तु शरणम्। अपि च ग्नाः व्यन्तु देवपत्न्य इन्द्राणीन्द्रस्य पत्न्यग्नाय्यग्नेः पत्न्यश्विन्यश्विनोः पत्नी राड् राजते रोदसी रुद्रस्य पत्नी वरुणानी च वरुणस्य पत्नी व्यन्तु देव्यः कामयन्तां य ऋतुः कालो जायानाम्।** (निरु०१२.४५-४६) देवानां विदुषा पालनयोग्याऽग्न्यादीनां स्थित्यर्थेयं पृथिवी वर्त्तते तस्माद् दैवपत्नीत्युच्यते यस्मिन् यस्मिन् द्रव्ये या याः शक्तयः सन्ति तास्तासतेषां द्रव्याणां पत्न्य इवेत्युच्यन्ते **(इह)** अस्मिन् शिल्पयज्ञे **(आ)** समन्तात् **(वह)** वहति प्रापयति। अत्र व्यत्ययो लडर्थे लोट् च। **(देवानाम्)** पृथिव्यादीनामेकत्रिंशतः **(उशतीः)** स्वस्वाधारगुणप्रकाशयन्तीः **(उप)** सामीप्ये **(त्वष्टारम्)** छेदन कर्त्तारं सूर्य्यं शिल्पिनं वा **(सोमपीतये)** सोमानां पदार्थानां पीतिर्ग्रहणं यस्मिन् व्यवहारे तस्मै॥९॥

अन्वयः-योऽयमग्निः सोमपीतये देवानामुशतीः पत्नीस्त्वष्टारं चोपावह समीपे प्रापयति तस्य प्रयोगो यथावत्कर्त्तव्यः॥९॥

भावार्थः-विद्वद्भिर्योऽग्निर्भौतिको विद्युत्पृथिवीस्थसूर्य्यरूपेण त्रिधा वर्त्तमानः शिल्पविद्यासिद्धये पृथिव्यादीनां सामर्थ्यप्रकाशको मुख्यहेतुरस्ति स स्वीकार्य्यः। अत्र शिल्पविद्यायज्ञे पृथिव्यादीनां संयोजनार्थत्वात् तत्तत्सामर्थ्यस्य पत्नीति संज्ञा विहिता॥९॥

पदार्थः-**(अग्ने)** जो यह भौतिक अग्नि **(सोमपीतये)** जिस व्यवहार में सोम आदि पदार्थों का ग्रहण होता है उसके लिये **(देवानाम्)** इकत्तीस जो कि पृथिवी आदि लोक हैं उनकी **(उशतीः)** अपने-अपने आधार के गुणों का प्रकाश करने वाला **(पत्नीः)** स्त्रीवत् वर्त्तमान अदिति आदि पत्नी और **(त्वष्टारम्)** छेदन करनेवाले सूर्य्य वा कारीगर को **(उपावह)** अपने सामने प्राप्त करता है, उसका प्रयोग ठीक-ठीक करें॥९॥

भावार्थः-विद्वानों को उचित है कि जो बिजुली प्रसिद्ध और सूर्य्यरूप से तीन प्रकार का भौतिक अग्नि शिल्पविद्या की सिद्धि के लिये पृथिवी आदि पदार्थों के सामर्थ्य प्रकाश करने में मुख्य हेतु है, उसी का स्वीकार करें और यह इस शिल्पविद्यारूपी यज्ञ में पृथिवी आदि पदार्थों के सामर्थ्य का पत्नी नाम विधान किया है, उसको जानें॥९॥

का का सा देवपत्नीत्युपदिश्यते।

वे कौन-कौन देवपत्नी हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीम्।
वरूत्रीं धिषणां वह॥ १०॥ ५॥

आ। ग्नाः। अग्ने। इह। अवसे। होत्राम्। यविष्ठ। भारतीम्। वरूत्रीम्। धिषणाम्। वह॥ १०॥

पदार्थः-**(आ)** क्रियायोगे **(ग्नाः)** पृथिव्याः। **ग्ना इत्युत्तरपदनामसु पठितम्।** (निघं०३.२९) **(अग्ने)** पदार्थविद्यावेत्तर्विद्वन् **(इह)** शिल्पकार्य्येषु **(अवसे)** प्रवेशाय **(होत्राम्)** हुतद्रव्यगतिम् **(यविष्ठ)** यौति मिश्रयति विविनक्ति वा सोऽतिशयितस्तत्सम्बुद्धौ। **(भारतीम्)** यो ययाशुभैर्गुणैर्बिभर्त्ति पृथिव्यादिस्थान् प्राणिनः स भरतस्तस्येमां भाम्। **भरत आदित्यस्तस्य भा इळा।** (निरु०८.१३) **(वरूत्रीम्)** वरितुं स्वीकर्त्तुमर्हाम्। **अहोरात्राणि वै वरूत्रयः।** (श०ब्रा०६.४.२.६) **(धिषणाम्)** धृष्णोति कार्य्येषु यया तामग्नेर्ज्वालाप्रेरितां वाचम्। **धिषणेति वाङ्नामसु पठितम्।** (निघं०१.११) **धृषेर्धिषच् संज्ञायाम्।** (उणा०२.८०) इति क्युः प्रत्ययो धिषजादेशश्च। **(वह)** प्राप्नुहि। अत्र व्यत्ययो लडर्थे लोट् च॥१०॥

अन्वयः-हे यविष्ठाग्ने विद्वँस्त्वमिहावसे ग्ना होत्रां भारतीं वरूत्रीं धिषणामा वह समन्तात् प्राप्नुहि॥१०॥

भावार्थः-विद्वद्भिरस्मिन् संसारे मनुष्यजन्म प्राप्य वेदादिद्वारा सर्वा विद्याः प्रत्यक्षीकार्य्याः। नैव कस्यचिद् द्रव्यस्य गुणकर्मस्वभावानां प्रत्यक्षीकरणेन विना विद्या सफला भवतीति वेदितव्यम्॥१०॥

इति पञ्चमो वर्गः सम्पूर्णः॥

पदार्थः-हे **(यविष्ठ)** पदार्थों को मिलाने वा उनमें मिलने वाले **(अग्ने)** क्रियाकुशल विद्वान्! तू **(इह)** शिल्पकार्य्यों में **(अवसे)** प्रवेश करने के लिये **(ग्नाः)** पृथिवी आदि पदार्थ **(होत्राम्)** होम किये हुए पदार्थों को बहाने **(भारतीम्)** सूर्य्य की प्रभा **(वरूत्रीम्)** स्वीकार करने योग्य दिन रात्रि और **(धिषणाम्)** जिससे पदार्थों को ग्रहण करते हैं, उस वाणी को **(आवह)** प्राप्त हो॥१०॥

भावार्थः-विद्वानों को इस संसार में मनुष्य जन्म पाकर वेद द्वारा सब विद्या प्रत्यक्ष करनी चाहिये, क्योंकि कोई भी विद्या पदार्थों के गुण और स्वभाव को प्रत्यक्ष किये विना सफल नहीं हो सकती॥१०॥

यह पांचवा वर्ग पूरा हुआ॥

अथ विद्वत्स्त्रियोऽप्येतानि कार्य्याणि कुर्य्युरित्युपदिश्यते।

अब विद्वानों की स्त्रियां भी उक्त कार्य्यों को करें, इस विषय का उपदेश अगले मन्त्र में कहा है-

अभि नो देवीरवसा महः शर्म्मणा नृपत्नीः।
अच्छिन्नपत्राः सचन्ताम्॥११॥

अभि। नः। देवीः। अवसा। महः। शर्म्मणा। नृऽपत्नीः। अच्छिन्नऽपत्राः। सचन्ताम्॥११॥

पदार्थः-(**अभि**) आभिमुख्ये (**नः**) अस्मान् (**देवीः**) देवानां विदुषामिमाः स्त्रियो देव्यः। अत्रोभयत्र **सुपां सुलुग्०** इति पूर्वसवर्णः (**अवसा**) रक्षाविद्या प्रवेशादि कर्म्मणा सह (**महः**) महता। अत्र **सुपां सुलुग्०** इति विभक्तेर्लुक्। (**शर्म्मणा**) गृहसंबन्धिसुखेन। **शर्म्मेति गृहनामसु पठितम्।** (निघं०३.४) (**नृपत्नीः**) याः क्रियाकुशलानां विदुषां नृणां स्वसदृश्यः पत्न्यः (**अच्छिन्नपत्रा**) अविच्छिन्नानि पत्राणि कर्मसाधनानि यासां ताः। (**सचन्ताम्**) संयुञ्जन्तु॥११॥

अन्वयः-इमा अच्छिन्नपत्रा देवीर्नृपत्नीर्महः शर्म्मणावसा सह नोऽस्मानभिसचन्तां संयुक्ता भवन्तु॥११॥

भावार्थः-यादृशविद्यागुणस्वभावाः पुरुषास्तेषां तादृशीभिः स्त्रीभिरेव भवितव्यम्। यतस्तुल्यविद्यागुणस्वभावानां सम्बन्धे सुखं सम्भवति नेतरेषाम्। तस्मात्स्वसदृशैः सह स्त्रियः स्वसदृशीभिः स्त्रीभिः सह पुरुषाश्च स्वयंवरविधानेन विवाहं कृत्वा सर्वाणि गृहकार्य्याणि निष्पाद्य सदानन्दितव्यमिति॥११॥

पदार्थः-**(अच्छिन्नपत्राः)** जिन के अविनष्ट कर्मसाधन और **(देवीः)** **(नृपत्नीः)** जो क्रियाकुशलता में चतुर विद्वान् पुरुषों की स्त्रियां हैं, वे **(महः)** बड़े **(शर्मणा)** सुखसम्बन्धी घर **(अवसा)** रक्षा विद्या में प्रवेश आदि कर्मों के साथ **(नः)** हम लोगों को **(अभिसचन्ताम्)** अच्छी प्रकार मिलें॥११॥

भावार्थः-जैसी विद्या, गुण, कर्म और स्वभाव वाले पुरुष हों, उनकी स्त्री भी वैसे ही होनी ठीक हैं, क्योंकि जैसा तुल्य रूप विद्या गुण कर्म स्वभाव वालों को सुख का सम्भव होता है, वैसा अन्य को कभी नहीं हो सकता। इससे स्त्री अपने समान पुरुष वा पुरुष अपने समान स्त्रियों के साथ आपस में प्रसन्न होकर स्वयंवर विधान से विवाह करके सब कर्मों को सिद्ध करें॥११॥

पुनस्ताः कीदृश्यो देवपत्न्य इत्युपदिश्यते।

फिर वे कैसी देवपत्नी हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

इ॒हेन्द्रा॒णीमु॑प॒ ह्व॒ये व॒रुणा॒नीं स्व॒स्तये॑।

अ॒ग्नायी॒ं सोम॑पीतये॥ १२॥

इ॒ह। इ॒न्द्रा॒णीम्। उप॑। ह्व॒ये॒। व॒रु॒णा॒नीम्। स्व॒स्तये॑। अ॒ग्नायी॑म्। सोम॑ऽपीतये॥ १२॥

पदार्थः-**(इह)** एतस्मिन् व्यवहारे। **(इन्द्राणीम्)** इन्द्रस्य सूर्य्यस्य वायोर्वा शक्तिं सामर्थ्यमिव वर्त्तमानम् **(उप)** उपयोगे **(ह्वये)** स्वीकुर्वे **(वरुणानीम्)** यथा वरुणस्य जलस्येयं शान्तिमाधुर्य्यादिगुणयुक्ता शक्तिस्तथाभूतम् **(स्वस्तये)** अविनष्टा याभिपूजिताय सुखाय। **स्वस्तीत्यविनाशिनामास्तिरभिपूजितः।** (निरु०३.२१) **(अग्नायीम्)** यथाग्नेरियं ज्वालास्ति तादृशीम्। **वृषाकप्यग्नि०** (अष्टा०४.१.३७) अनेन ङीप्प्रत्यय ऐकारादेशश्च। **(सोमपीतये)** सोमानामैश्वर्य्याणां पीतिर्भोगो यस्मिन् तस्मै। **सह सुपा** इति समासः। **अग्नाय्यग्नेः पत्नी तस्या एषा भवति। इहेन्द्राणीमुपह्वये० सा निगदव्याख्याता।** (निरु०८.३४)॥१२॥

अन्वयः-मनुष्या यथाहमिह स्वस्तये सोमपीतय इन्द्राणीं वरुणानीमग्नायीमिव स्त्रियमुपह्वये तथा भवद्भिरपि सर्वैरनुष्ठेयम्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरीश्वररचितानां पदार्थानां सकाशादविनश्वरसुख-प्राप्तयेऽत्युत्तमाः स्त्रियः प्राप्तव्याः। नित्यमुद्योगेनान्योऽन्यं प्रीता विवाहं कुर्य्युः। नैव सदृशस्त्रीः पुरुषार्थं चान्तरा कस्यचित् किंचिदपि यथावत् सुखं सम्भवति॥१२॥

पदार्थः-हे मनुष्य लोगो! जैसे हम लोग **(इह)** इस व्यवहार में **(स्वस्तये)** अविनाशी प्रशंसनीय सुख वा **(सोमपीतये)** ऐश्वर्य्यों का जिसमें भोग होता है, उस कर्म के लिये जैसा **(इन्द्राणीम्)** सूर्य्य **(वरुणानीम्)** वायु वा जल और **(अग्नायीम्)** अग्नि की शक्ति हैं, वैसी स्त्रियों को पुरुष और पुरुषों को स्त्री लोग **(उपह्वये)** उपयोग के लिये स्वीकार करें, वैसे तुम भी ग्रहण करो॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमा और उपमालङ्कार हैं। मनुष्यों को उचित है कि ईश्वर के बनाये हुए पदार्थों के आश्रय से अविनाशी निरन्तर सुख की प्राप्ति के लिये उद्योग करके परस्पर प्रसन्नता युक्त स्त्री और पुरुष का विवाह करें, क्योंकि तुल्य स्त्री पुरुष और पुरुषार्थ के विना किसी मनुष्य को कुछ भी ठीक-ठीक सुख का सम्भव नहीं हो सकता॥१२॥

अत्र भूम्यग्नी मुख्ये साधने स्त इत्युपदिश्यते।

शिल्पविद्या में भूमि और अग्नि मुख्य साधन हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्।
पिपृतां नो भरीमभिः॥१३॥

मही। द्यौः। पृथिवी। च। नः। इमम्। यज्ञम्। मिमिक्षताम्। पिपृताम्। नः। भरीमऽभिः॥१३॥

पदार्थः-(**मही**) महागुणविशिष्टा (**द्यौः**) प्रकाशमयो विद्युत् सूर्य्यादिलोकसमूहः (**पृथिवी**) अप्रकाशगुणानां पृथिव्यादीनां समूहः (**च**) समुच्चये (**नः**) अस्मभ्यम् (**इमम्**) प्रत्यक्षम् (**यज्ञम्**) शिल्पविद्यामयम् (**मिमिक्षताम्**) सेक्तुमिच्छताम् (**पिपृताम्**) प्रपिपूर्त्तः। अत्र लडर्थे लोट्। (**नः**) अस्मान् (**भरीमभिः**) धारणपोषणकरैर्गुणैः। '**भृञ्**'धातोर्मनिन् प्रत्ययो **बहुलं छन्दसि** इतीडागमः॥१३॥

अन्वयः-हे उपदेश्योपदेष्टारौ युवां ये मही द्यौः पृथिवी च भरीमभिर्न इमं यज्ञं नोऽस्मांश्च पिपृतामङ्गैः सुखेन प्रपिपूर्त्तस्ताभ्यामिमं यज्ञं मिमिक्षतां पिपृतां च॥१३॥

भावार्थः-द्यौरिति प्रकाशवतां लोकानामुपलक्षणं पृथिवीत्यप्रकाशवतां च। मनुष्यैरेताभ्यां प्रयत्नेन सर्वानुपकारान् गृहीत्वा पूर्णानि सुखानि सम्पादनीयानि॥१३॥

पदार्थः-हे उपदेश के करने और सुनने वाले मनुष्यो! तुम दोनों जो (**मही**) बड़े-बड़े गुण वाले (**द्यौः**) प्रकाशमय बिजुली, सूर्य्य आदि और (**पृथिवी**) अप्रकाश वाले पृथिवी आदि लोकों का समूह (**भरीमभिः**) धारण और पुष्टि करने वाले गुणों से (**नः**) हमारे (**इमम्**) इस (**यज्ञम्**) शिल्पविद्यामय यज्ञ (**च**) और (**नः**) हम लोगों को (**पिपृताम्**) सुख के साथ अङ्गों से अच्छी प्रकार पूर्ण करते हैं, वे (**इमम्**) इस (**यज्ञम्**) शिल्पविद्यामय यज्ञ को (**मिमिक्षताम्**) सिद्ध करने की इच्छा करो तथा (**पिपृताम्**) उन्हीं से अच्छी प्रकार सुखों को परिपूर्ण करो॥१३॥

भावार्थः-'**द्यौः**' यह नाम प्रकाशमान लोकों का उपलक्षण अर्थात् जो जिसका नाम उच्चारण किया हो वह उसके समतुल्य सब पदार्थों के ग्रहण करने में होता है तथा '**पृथिवी**' यह विना प्रकाश वाले लोकों का है। मनुष्यों को इन से प्रयत्न के साथ सब उपकारों को ग्रहण करके उत्तम-उत्तम सुखों को सिद्ध करना चाहिये॥१३॥

एताभ्यां किं कार्य्यमित्युपदिश्यते।

उक्त दो प्रकार के लोकों से क्या-क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में

किया है-

तयो॒रिद् घृ॒तव॒त्पयो॒ विप्रा॑ रिहन्ति धी॒तिभि॑:।

ग॒न्ध॒र्वस्य॑ ध्रु॒वे प॒दे॥ १४॥

तयो॑:। इत्। घृ॒तऽव॑त्। पय॑:। विप्रा॑:। रि॒ह॒न्ति॒। धी॒तिभि॑:। ग॒न्ध॒र्वस्य॑। ध्रु॒वे। प॒दे॥ १४॥

पदार्थ:-(**तयो:**) द्यावापृथिव्यो: **(इत्)** एव **(घृतवत्)** घृतं प्रशस्तं जलं विद्यते यस्मिंस्तत्। अत्र प्रशंसार्थे मतुप्। **(पय:)** रसादिकम् **(विप्रा:)** मेधाविन: **(रिहन्ति)** आददते श्लाघन्ते वा **(धीतिभि:)** धारणाकर्षणादिभिर्गुणै: **(गन्धर्वस्य)** यो गां पृथिवीं धरति स:। **गन्धर्वो वायुस्तस्य वातो गन्धर्वस्तस्यापो अप्सरस:।** (श०ब्रा०९.३.३.१०) **(ध्रुवे)** निश्चले **(पदे)** सर्वत्र प्राप्तेऽन्तरिक्षे॥ १४॥

अन्वय:-ये विप्रा याभ्यां श्लाघन्ते तयोर्धीतिभिर्गन्धर्वस्य ध्रुवे पदे विमानादीनि यानानि रिहन्ति ते श्लाघन्ते घृतवत्पय आददते॥ १४॥

भावार्थ:-विद्वद्भि: पृथिव्यादिपदार्थैर्यानानि रचयित्वा तत्र कलासु जलाग्निप्रयोगेण भूसमुद्रान्तरिक्षेषु गन्तव्यमागन्तव्यं चेति॥ १४॥

पदार्थ:-जो **(विप्रा:)** बुद्धिमान् पुरुष जिनसे प्रशंसनीय होते हैं **(तयो:)** उन प्रकाशमय और अप्रकाशमय लोकों के **(धीतिभि:)** धारण और आकर्षण आदि गुणों से **(गन्धर्वस्य)** पृथिवी को धारण करने वाले वायु का **(ध्रुवे)** जो सब जगह भरा निश्चल (**पदे**) अन्तरिक्ष स्थान है, उसमें विमान आदि यानों को **(रिहन्ति)** गमनागमन करते हैं वे प्रशंसित होके, उक्त लोकों ही के आश्रय से **(घृतवत्)** प्रशंसनीय जल वाले **(पय:)** रस आदि पदार्थों को ग्रहण करते हैं॥ १४॥

भावार्थ:-विद्वानों को पृथिवी आदि पदार्थों से विमान आदि यान बनाकर उनकी कलाओं में जल और अग्नि के प्रयोग से भूमि, समुद्र और आकाश में जाना आना चाहिये॥ १४॥

इयं भूमि: किमर्था कीदृशी चेत्युपदिश्यते।

यह भूमि किसलिये और कैसी है, इस विषय का उपदेश अगले मन्त्र में किया है-

स्यो॒ना पृ॑थिवि भवानृक्ष॒रा नि॒वेश॑नी।

यच्छा॑ न॒: शर्म॑ स॒प्रथ॑:॥ १५॥ ६॥

स्यो॒ना। पृ॒थि॒वि॒। भ॒व॒। अ॒नृ॒क्ष॒रा। नि॒ऽवेश॑नी। यच्छ॑। न॒:। शर्म॑। स॒ऽप्रथ॑:॥ १५॥

पदार्थ:-(**स्योना**) सुखहेतु:। इदं **'सिवु'**धातो रूपम् **सिवेष्टेर्यू च।** (उ०३.९) अनेन न: प्रत्ययष्टेर्यूरादेश्च। **स्योनमिति सुखनामसु पठितम्।** (निघं०३.६) **(पृथिवि)** विस्तीर्णा सती विशालसुखदात्री भूमि:। अत्र पुरुषव्यत्यय:। **(भव)** भवति। अत्र व्यत्ययो लडर्थे लोट् च। **(अनृक्षरा)**

अविद्यमाना ऋक्षरा दुःखप्रदाः कण्टकादयो यस्यां सा **(निवेशनी)** निविशन्ति प्रविशन्ति यस्यां सा **(यच्छ)** यच्छति फलादिभिर्ददति। अत्र व्यत्ययो लडर्थे लोट्। **द्व्यचोऽतस्तिङ** इति दीर्घश्च। **(नः)** अस्मभ्यम् **(शर्म)** सुखम् **(सप्रथः)** यत् प्रथोभिर्विस्तृतैः पदार्थैः सह वर्त्तते तत्। यास्कमुनिरिमं मन्त्रमेवं व्याख्यातवान्-**सुखा नः पृथिवि भवानृक्षरा निवेशन्यृक्षरः कण्टक ऋच्छतेः। कण्टकः कन्तपो कृन्ततेर्वा कण्टतेर्वा स्याद् गतिकर्म्मण उद्गततमो भवति। यच्छ नः शर्म्म यच्छन्तु शरणं सर्वतः पृथु।** (निरु०९.३२)॥१५॥

अन्वयः-येयं पृथिवी स्योनाऽनृक्षरा निवेशनी भवति सा नोऽस्मभ्यं सप्रथः शर्म्म यच्छ प्रयच्छति॥१५॥

भावार्थः-मनुष्यैर्भूगर्भविद्यया गुणैर्विदितेयं भूमिरेव मूर्त्तिमतां निवासस्थानमनेकसुखहेतुः सती बहुरत्नप्रदा भवतीति वेद्यम्॥१५॥

इति षष्ठो वर्गः समाप्तः॥

पदार्थः-जो यह **(पृथिवी)** अति विस्तारयुक्त **(स्योना)** अत्यन्त सुख देने तथा **(अनृक्षरा)** जिसमें दुःख देने वाले कण्टक आदि न हों **(निवेशनी)** और जिसमें सुख से प्रवेश कर सकें, वैसी (**भव**) होती है, सो **(नः)** हमारे लिये **(सप्रथः)** विस्तारयुक्त सुखकारक पदार्थ वालों के साथ **(शर्म्म)** उत्तम सुख को **(यच्छ)** देती है॥१५॥

भावार्थः-मनुष्यों को योग्य है, कि यह भूमि ही सब मूर्त्तिमान् पदार्थों के रहने की जगह और अनेक प्रकार के सुखों की कराने वाली और बहुत रत्नों को प्राप्त कराने वाली होती है, ऐसा ज्ञान करें॥१५॥

यह षष्ठ वर्ग समाप्त हुआ॥

अथ पृथिव्यादीनां रचको धारकश्च कोऽस्तीत्युपदिश्यते।

अब पृथिवी आदि पदार्थों का रचने और धारण करने वाला कौन है, इस विषय का उपदेश अगले मन्त्र में किया है-

अतो॑ दे॒वा अ॑वन्तु नो॒ यतो॒ विष्णु॑र्विचक्र॒मे।

पृ॒थि॒व्याः स॒प्त धाम॑भिः॥ १६॥

अतः॑। दे॒वाः॑। अ॒व॒न्तु॒। नः॒। यतः॑। विष्णुः॑। वि॒ऽच॒क्र॒मे। पृ॒थि॒व्याः॑। स॒प्त। धाम॑ऽभिः॥ १६॥

पदार्थः-**(अतः)** अस्मात् कारणात् **(देवाः)** विद्वांसोऽग्न्यादयो वा **(अवन्तु)** अवगमयन्तु प्रापयन्ति वा पक्षे लडर्थे लोट्। **(नः)** अस्मान् **(यतः)** यस्मादनादिकारणात् **(विष्णुः)** वेवेष्टि व्याप्नोति चराचरं जगत् स परमेश्वरः। **विषेः किच्च।** (उणा०३.३८) अनेन **'विष्लृ'**धातोर्नुः प्रत्ययः किच्च। **(विचक्रमे)** विविधतया रचितवान् **(पृथिव्याः)** पृथिवीमारभ्य। **पञ्चमीविधाने ल्यब्लोपे**

कर्म्मण्युपसंख्यानम्। (अष्टा०२.३.२८) अनेन पञ्चमी। **(सप्त)** पृथिवीजलाग्निवायुविराट्परमाणु-प्रकृत्याख्यैः सप्तभिः पदार्थैः। अत्र **सुपां सुलुग्०** इति विभक्तेर्लुक्। **(धामभिः)** दधति सर्वाणि वस्तूनि येषु तैः सह॥१६॥

अन्वयः-यतोऽयं विष्णुर्जगदीश्वरः पृथिवीमारभ्य प्रकृतिपर्य्यन्तैः सप्तभिर्धामभिः सह वर्त्तमानाँल्लोकान् विचक्रमे रचितवानत एतेभ्यो देवा विद्वांसो नोऽस्मानवन्त्वेतद्विद्यामवगमयन्तु॥१६॥

भावार्थः-नैव विदुषामुपदेशेन विना कस्यचिन्मनुष्यस्य यथावत्सृष्टिविद्या सम्भवति नैवेश्वरोत्पादनेन विना कस्यचिद् द्रव्यस्य स्वतो महत्त्वपरिमाणेन मूर्त्तिमत्त्वं जायते नैवैताभ्यां विना मनुष्या उपकारान् ग्रहीतुं शक्नुवन्तीति बोध्यम्।

विलसनाख्येनास्य मन्त्रस्य **'पृथिव्यास्तस्मात्खण्डादवयवाद्विष्णोः सहायेन देवा अस्मान् रक्षन्तु'** इति मिथ्यात्वेनार्थो वर्णित इति विज्ञयेम्॥१६॥

पदार्थः-**(यतः)** जिस सदा वर्त्तमान नित्य कारण से **(विष्णुः)** चराचर संसार में व्यापक जगदीश्वर **(पृथिव्याः)** पृथिवी को लेकर **(सप्त)** सात अर्थात् पृथिवी, जल, अग्नि, वायु, विराट्, परमाणु और प्रकृति पर्य्यन्त लोकों को **(धामभिः)** जो सब पदार्थों को धारण करते हैं उनके साथ **(विचक्रमे)** रचता है **(अतः)** उसी से **(देवाः)** विद्वान् लोग **(नः)** हम लोगों को **(अवन्तु)** उक्त लोकों की विद्या को समझते वा प्राप्त कराते हुए हमारी रक्षा करते रहें॥१६॥

भावार्थः-विद्वानों के उपदेश के विना किसी मनुष्य को यथावत् सृष्टिविद्या का बोध कभी नहीं हो सकता। ईश्वर के उत्पादन करने के विना किसी पदार्थ का साकार होना नहीं बन सकता और इन दोनों कारणों के जाने विना कोई मनुष्य पदार्थों से उपकार लेने को समर्थ नहीं हो सकता।

और जो यूरोपदेश वाले विलसन साहिब ने 'पृथिवी उस खण्ड के अवयव से तथा विष्णु की सहायता से देवता हमारी रक्षा करें' यह इस मन्त्र का अर्थ अपनी झूंठी कल्पना से वर्णन किया है, सो समझना चाहिये॥१६॥

ईश्वरेणैतज्जगत् कियत्प्रकारकं रचितमित्युपदिश्यते।

ईश्वर ने इस संसार को कितने प्रकार का रचा है, इस विषय का उपदेश अगले मन्त्र में किया है-

इ॒दं विष्णु॒र्वि च॑क्रमे त्रे॒धा नि द॑धे प॒दम्।
समू॑ळ्हमस्य पांसु॒रे॥१७॥

इ॒दम्। विष्णु॑:। वि। च॒क्र॒मे॒। त्रे॒धा। नि। द॒धे॒। प॒दम्। सम्। ऊ॒ळ्ह॒म्। अ॒स्य॒। पां॒सु॒रे॥१७॥

पदार्थः-**(इदम्)** प्रत्यक्षाप्रत्यक्षं जगत् **(विष्णुः)** व्यापकेश्वरः **(वि)** विविधार्थे **(चक्रमे)** यथायोग्यं प्रकृतिपरमाण्वादिपादानंशान् विक्षिप्य सावयवं कृतवान् **(त्रेधा)** त्रिःप्रकारकम् **(नि)** नितराम् **(दधे)**

धृतवान् **(पदम्)** यत्पद्यते प्राप्यते तत् **(समूढम्)** यत्सम्यक् तर्क्यते तर्केण यद्विज्ञायते तत् **(अस्य)** जगतः **(पांसुरे)** प्रशस्ताः पांसवो रेणवो विद्यन्ते यस्मिन्नन्तरिक्षे तस्मिन्। **नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्।** (अष्टा०५.२.१०७) अनेन प्रशंसार्थे रः प्रत्ययः॥

यास्कमुनिरिमं मन्त्रमेवं व्याचष्टे-**विष्णुर्विशतेर्व्यश्नोतेर्वा यदिदं किं च तद्विक्रमते विष्णुस्त्रिधा निधते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। समारोहणं विष्णुपदे गयशिरसीत्यौर्णवाभः। समूढमस्य पांसुरेऽप्यायनेऽन्तरिक्षे पदं न दृश्यतेऽपि वोपमार्थे समूढमस्य पांसुर इव पदं न दृश्यत इति पांसवः पादैः सूयन्त इति वा पन्नाः शेरत इति वा पंसनीया भन्तीति वा।** (निरु०१२.१९) **गयशिरसीत्यत्र गय इत्यपत्यनामसु पठितम्।** (निघं०२.२) **गय इति धननामसु च।** (निघं०२.१०) **प्राणा वै गयाः।** (श०ब्रा०१४.७.१.७) प्रजायाः शिर उत्तमभागो यत्कारणं तद्विष्णुपदं गयानां विद्यादिधनानां यच्छिरः फलमानन्दः सोऽपि विष्णुपदाख्यः। गयानां प्राणानां शिरः प्रीतिजनकं सुखं तदपि विष्णुपदमित्यौर्णवाभाचार्य्यस्य मतम्। पादैः सूयन्ते वाऽनेन कारणांशैः कार्य्यमुत्पद्यत इति बोध्यम्। पदं न दृश्यतेऽनेनातीन्द्रियाः परमाण्वादयोऽन्तरिक्षे विद्यमाना अपि चक्षुषा न दृश्यन्त इति वेदितव्यम्। इदं त्रेधाभावायेति। एकं प्रत्यक्षं प्रकाशरहितं पृथिवीमयं द्वितीयं कारणाख्यमदृश्यं तृतीयं प्रकाशमयं सूर्य्यादिकं च जगदस्तीति बोध्यम्। विष्णुशब्देनात्र व्यापकेश्वरो ग्राह्य इति॥१७॥

अन्वयः-मनुष्यैर्यो विष्णुस्त्रेधेदं पदं विचक्रमेऽस्य त्रिविधस्य जगतः समूढं मध्यस्थं जगत्पांसुरेऽन्तरिक्षे विदधे विहितवानस्ति स एवोपास्यो वर्त्तते इति बोध्यम्॥१७॥

भावार्थः-परमेश्वरेणास्मिन् संसारे त्रिविधं जगद्रचितमेकं पृथिवीमयं द्वितीयमन्तरिक्षस्थं त्रसरेण्वादिमयं तृतीयं प्रकाशमयं च। एतेषां त्रयाणामेतानि त्रीण्येवाधारभूतानि यच्चान्तरिक्षस्थं तदेव पृथिव्याः सूर्य्यादेश्च वर्धकं नैवैतदीश्वरेण विना कश्चिज्जीवो विधातुं शक्नोति। सामर्थ्याभावात्।

सायणाचार्य्यादिभिर्विलसनाख्येन चास्य मन्त्रस्यार्थस्य वामनाभिप्रायेण वर्णितत्वात्स पूर्वपश्चिमपर्वतस्थो विष्णुरस्तीति मिथ्यार्थोऽस्तीति वेद्यम्॥१७॥

पदार्थः-मनुष्य लोग जो **(विष्णुः)** व्यापक ईश्वर **(त्रेधा)** तीन प्रकार का **(इदम्)** यह प्रत्यक्ष वा अप्रत्यक्ष **(पदम्)** प्राप्त होने वाला जगत् है, उसको **(विचक्रमे)** यथायोग्य प्रकृति और परमाणु आदि के पद वा अंशो को ग्रहण कर सावयव अर्थात् शरीर वाला करता और जिसने **(अस्य)** इस तीन प्रकार के जगत् का **(समूढम्)** अच्छी प्रकार तर्क से जानने योग्य और आकाश के बीच में रहने वाला परमाणुमय जगत् है, उसको **(पांसुरे)** जिसमें उत्तम-उत्तम मिट्टी आदि पदार्थों के अति सूक्ष्म कण रहते हैं, उनको आकाश में **(विदधे)** धारण किया है। जो प्रजा का शिर अर्थात् उत्तम भाग कारण रूप और जो विद्या आदि धनों का शिर अर्थात् उत्तम फल आनन्दरूप तथा जो प्राणों का शिर अर्थात् प्रीति उत्पादन करने वाला सुख है, ये सब **'विष्णुपद'** कहाते हैं, यह और्णवाभ आचार्य्य का मत है। **'पादैः सूयन्त इति वा'**

इसके कहने से कारणों से कार्य्य की उत्पत्ति की है, ऐसा जानना चाहिये। **'पदं न दृश्यते'** जो इन्द्रियों से ग्रहण नहीं होते वे परमाणु आदि पदार्थ अन्तरिक्ष में रहते भी हैं, परन्तु आंखों से नहीं दीखते। **'इदं त्रेधाभावाय'** इस तीन प्रकार के जगत् को जानना चाहिये अर्थात् एक प्रकाशरहित पृथिवीरूप, दूसरा कारणरूप जो कि देखने में नहीं आता, और तीसरा प्रकाशमय सूर्य्य आदि लोक हैं। इस मन्त्र में विष्णु शब्द से व्यापक ईश्वर का ग्रहण है॥१७॥

भावार्थः-परमेश्वर ने इस संसार में तीन प्रकार का जगत् रचा है अर्थात् एक पृथिवीरूप, दूसरा अन्तरिक्ष आकाश में रहने वाला प्रकृति परमाणुरूप और तीसरा प्रकाशमय सूर्य्य आदि लोक तीन आधाररूप हैं, इनमें से आकाश में वायु के आधार से रहने वाला जो कारणरूप है, वही पृथिवी और सूर्य्य आदि लोकों का बढ़ाने वाला है और इस जगत् को ईश्वर के विना कोई बनाने को समर्थ नहीं हो सकता, क्योंकि किसी का ऐसा सामर्थ्य ही नहीं॥१७॥

पुनर्विष्णुर्जगदीश्वरः किं कृतवानित्युपदिश्यते।

फिर वह सर्वव्यापक जगदीश्वर क्या-क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है-

त्रीणि॑ प॒दा वि च॑क्रमे॒ विष्णु॑र्गो॒पा अदा॑भ्यः।
अतो॒ धर्मा॑णि धा॒रय॑न्॥१८॥

त्रीणि॑। प॒दा। वि। च॒क्र॒मे॒। विष्णु॑:। गो॒पाः। अदा॑भ्यः। अत॑:। धर्मा॑णि। धा॒रय॑न्॥१८॥

पदार्थः-(**त्रीणि**) त्रिविधानि (**पदा**) पदानि वेद्यानि प्राप्तव्यानि वा। अत्र **शेश्छन्दसि बहुलम्** इति लोपः। (**वि**) विविधार्थे (**चक्रमे**) विहितवान् (**विष्णुः**) विश्वान्तर्यामी (**गोपाः**) रक्षकः। (**अदाभ्यः**) अविनाशित्वान्नैव केनापि हिंसितुं शक्यः (**अतः**) कारणादुत्पद्य (**धर्माणि**) स्वस्वभावजन्यान् धर्मान् (**धारयन्**) धारणां कुर्वन्॥१८॥

अन्वयः-यतोऽयमदाभ्यो गोपा विष्णुरीश्वरः सर्व जगद्धारयन् संस्त्रीणि पदानि विचक्रमेऽतः कारणादुत्पद्य सर्वे पदार्थाः स्वानि स्वानि धर्माणि धरन्ति॥१८॥

भावार्थः-मनुष्यैर्नैवेश्वरस्य धारणेन विना कस्यचिद् वस्तुनः स्थितिः सम्भवति। न चैतस्य रक्षणेन विना कस्यचिद् व्यवहारः सिध्यतीति वेदितव्यम्॥१८॥

पदार्थः-जिस कारण यह (**अदाभ्यः**) अपने अविनाशीपन से किसी की हिंसा में नहीं आ सकता (**गोपाः**) और सब संसार की रक्षा करने वाला, सब जगत् को (**धारयन्**) धारण करने वाला (**विष्णुः**) संसार का अन्तर्यामी परमेश्वर (**त्रीणि**) तीन प्रकार के (**पदानि**) जाने, जानने और प्राप्त होने योग्य पदार्थों

और व्यवहारों को **(विचक्रमे)** विधान करता है, इसी कारण से सब पदार्थ उत्पन्न होकर अपने-अपने **(धर्माणि)** धर्मों को धारण कर सकते हैं॥१८॥

भावार्थः-ईश्वर के धारण के विना किसी पदार्थ की स्थिति होने का सम्भव नहीं हो सकता। उसकी रक्षा के विना किसी के व्यवहार की सिद्धि भी नहीं हो सकती॥१८॥

पुनस्तत्कृतानि कर्म्माणि मनुष्येण नित्यं द्रष्टव्यानीत्युपदिश्यते।

फिर व्यापक परमेश्वर के किये हुए कर्म मनुष्य नित्य देखे, इस विषय का उपदेश अगले मन्त्र में किया है-

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा॥१९॥

विष्णोः। कर्म्माणि। पश्यत। यतः। व्रतानि। पस्पशे। इन्द्रस्य। युज्यः। सखा॥१९॥

पदार्थः-(**विष्णोः**) सर्वत्र व्यापकस्य शुद्धस्य स्वाभाविकानन्तसामर्थ्यस्येश्वरस्य **(कर्माणि)** जगद्रचनपालनन्यायकरणप्रलयत्वादीनि **(पश्यत)** सम्यग्विजानीत **(यतः)** कर्मबोधस्य सकाशात् **(व्रतानि)** सत्यभाषणन्यायकरणादीनि **(पस्पशे)** स्पृशति कर्त्तुं शक्नोति। अत्र लडर्थे लिट्। **(इन्द्रस्य)** जीवस्य **(युज्यः)** युञ्जन्ति व्याप्त्या सर्वान् पदार्थान् ते युजो दिक्कालाकाशादयस्तत्र भवः **(सखा)** सर्वस्य मित्रः सर्वसुखसम्पादकत्वात्॥१९॥

अन्वयः-हे मनुष्या यूयं य इन्द्रस्य युज्यः सखास्ति, यतो जीवो व्रतानि पस्पशे स्पृशति, तस्य विष्णोः कर्माणि पश्यत॥१९॥

भावार्थः-यस्मात् सर्वमित्रेण जगदीश्वरेण जीवानां पृथिव्यादीनि ससाधनानि शरीराणि रचितानि तस्मादेवं सर्वे प्राणिनः स्वानि स्वानि कर्माणि कर्त्तुं शक्नुवन्तीति॥१९॥

पदार्थः-हे मनुष्य लोगो! तुम जो **(इन्द्रस्य)** जीव का **(युज्यः)** अर्थात् जो अपनी व्याप्ति से पदार्थों में संयोग करने वाले दिशा, काल और आकाश हैं, उनमें व्यापक होके रमने वा **(सखा)** सर्व सुखों के सम्पादन करने से मित्र है **(यतः)** जिससे जीव **(व्रतानि)** सत्य बोलने और न्याय करने आदि उत्तम कर्मों को **(पस्पशे)** प्राप्त होता है उस **(विष्णोः)** सर्वत्र व्यापक शुद्ध और स्वभावसिद्ध अनन्त सामर्थ्य वाले परमेश्वर के **(कर्माणि)** जो कि जगत् की रचना पालना न्याय और प्रयत्न करना आदि कर्म हैं, उनको तुम लोग **(पश्यत)** अच्छे प्रकार विदित करो॥१९॥

भावार्थः-जिस कारण सब के मित्र जगदीश्वर ने पृथिवी आदि लोक तथा जीवों के साधन सहित शरीर रचे हैं। इसी से सब प्राणी अपने-अपने कार्यों के करने को समर्थ होते हैं॥१९॥

तद् ब्रह्म कीदृशमित्युपदिश्यते।

वह ब्रह्म कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है-

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।

दिवीव चक्षुराततम्॥ २०॥

तत्। विष्णोः। परमम्। पदम्। सदा। पश्यन्ति। सूरयः। दिवि।ऽइव। चक्षुः। आऽततम्॥ २०॥

पदार्थः-(**तत्**) उक्तं वक्ष्यमाणं वा (**विष्णोः**) व्यापकस्यानन्दस्वरूपस्य (**परमम्**) सर्वोत्कृष्टम् (**पदम्**) अन्वेष्यं ज्ञातव्यं प्राप्तव्यं वा (**सदा**) सर्वस्मिन् काले (**पश्यन्ति**) सम्प्रेक्षन्ते (**सूरयः**) धार्मिका मेधाविनः पुरुषार्थयुक्ता विद्वांसः। **सूरिरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) अत्र **सूङः क्रिः।** (उणा०४.६४) अनेन '**सूङ**' धातोः क्रिः प्रत्ययः। (**दिवीव**) यथा सूर्यादिप्रकाशे विमलेन ज्ञानेन। स्वात्मनि वा (**चक्षुः**) चष्टे येन तन्नेत्रम्। **चक्षेः शिच्च।** (उणा०२.११९) अनेन '**चक्षे**' रुसिप्रत्ययः शिच्च। (**आततम्**) समन्तात् ततं विस्तृतम्॥ २०॥

अन्वयः-सूरयो विद्वांसो दिव्याततं चक्षुरिव यद्विष्णोराततं परमं पदमस्ति तत् स्वात्मनि सदा पश्यन्ति॥ २०॥

भावार्थः-अत्रोपमालङ्कारः। यथा प्राणिनः सूर्यप्रकाशे शुद्धेन चक्षुषा मूर्त्तद्रव्याणि पश्यन्ति, तथैव विद्वांसो विमलेन ज्ञानेन विद्यासुविचारयुक्ते शुद्धे स्वात्मनि जगदीश्वरस्य सर्वानन्दयुक्तं प्राप्तुमर्हं मोक्षाख्यं पदं दृष्ट्वा प्राप्नुवन्ति। नैतत्प्राप्त्यया विना कश्चित्सर्वाणि सुखानि प्राप्तुमर्हति तस्मादेतत्प्राप्तौ सर्वैः सर्वदा प्रयत्नोऽनुविधेय इति।

विलसनाख्येन '**परमं पदम्**' इत्यस्यार्थो हि स्वर्गो भवितुमशक्य इति भ्रान्त्योक्तत्वान्मिथ्यार्थोऽस्ति। कुतः' परमस्य पदस्य स्वर्गवाचकत्वादिति॥ २०॥

पदार्थः-(**सूरयः**) धार्मिक बुद्धिमान् पुरुषार्थी विद्वान् लोग (**दिवि**) सूर्य आदि के प्रकाश में (**आततम्**) फैले हुए (**चक्षुरिव**) नेत्रों के समान जो (**विष्णोः**) व्यापक आनन्दस्वरूप परमेश्वर का विस्तृत (**परमम्**) उत्तम से उत्तम (**पदम्**) चाहने जानने और प्राप्त होने योग्य उक्त वा वक्ष्यमाण पद हैं (**तत्**) उस को (**सदा**) सब काल में विमल शुद्ध ज्ञान के द्वारा अपने आत्मा में (**पश्यन्ति**) देखते हैं॥ २०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्राणी सूर्य्य के प्रकाश में शुद्ध नेत्रों से मूर्त्तिमान् पदार्थों को देखते हैं। वैसे ही विद्वान् लोग निर्मल विज्ञान से विद्या वा श्रेष्ठ विचारयुक्त शुद्ध अपने आत्मा में जगदीश्वर को सब आनन्दों से युक्त और प्राप्त होने योग्य मोक्ष पद को देखकर प्राप्त होते हैं। इस की प्राप्ति के विना कोई मनुष्य सब सुखों को प्राप्त होने में समर्थ नहीं हो सकता। इस से इसकी प्राप्ति के निमित्त सब मनुष्यों को निरन्तर यत्न करना चाहिये।

इस मन्त्र में '**परमम्**' '**पदम्**' इन पदों के अर्थ में यूरोपियन विलसन साहब ने कहा है कि इन का अर्थ स्वर्ग नहीं हो सकता, यह उनकी भ्रान्ति है, क्योंकि परमपद का अर्थ स्वर्ग ही है॥२०॥

कीदृशा एतत्प्राप्तुमर्हन्तीत्युपदिश्यते।

कैसे मनुष्य उक्त पद को प्राप्त होने योग्य हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

तद्विप्रा॑सो विप॒न्यवो॑ जागृ॒वांस॒: समि॑न्धते।

विष्णो॒र्यत्प॑र॒मं प॒दम्॥ २१॥ ७॥ ५॥

तत्। विप्रा॑सः। वि॒प॒न्यव॑ः। जा॒गृ॒ऽवांस॑ः। सम्। इ॒न्ध॒ते॒। विष्णोः॑। यत्। प॒र॒मम्। प॒दम्॥ २१॥

पदार्थः-(**तत्**) पूर्वोक्तम् (**विप्रासः**) मेधाविनः (**विपन्यवः**) विविधं जगदीश्वरस्य गुणसमूहं पनायन्ति स्तुवन्ति ये ते। अत्र बाहुलकादौणादिको युच् प्रत्ययः। (**जागृवांसः**) जागरूकाः। अत्र जागर्तेर्लिटः स्थाने क्वसुः। **द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्।** (अष्टा०वा०६.१.८) अनेन द्विर्वचनाभावश्च। (**सम्**) सम्यगर्थे (**इन्धते**) प्रकाशयन्ते (**विष्णोः**) व्यापकस्य (**यत्**) कथितम् (**परमम्**) सर्वोत्तमगुणप्रकाशम् (**पदम्**) प्रापणीयम्॥२१॥

अन्वयः-विष्णोर्जगदीश्वरस्य यत्परमं पदमस्ति तद्विपन्यवो जागृवांसो विप्रासः समिन्धते प्राप्नुवन्ति॥२१॥

भावार्थः-ये मनुष्या अविद्याधर्माचरणाख्यां निद्रां त्यक्त्वा विद्याधर्माचरणे जागृताः सन्ति त एव सच्चिदाननन्दस्वरूपं सर्वोत्तमं सर्वैः प्राप्तुमर्हं नैरन्तर्येण सर्वव्यापिनं विष्णुं जगदीश्वरं प्राप्नुवन्ति॥२१॥

पूर्वेसूक्तोक्ताभ्यां पदार्थाभ्यां सहचारिणामश्विसवित्रग्निदेवीन्द्राणीवरुणान्यग्नायीद्यावापृथिवी-भूमिविष्णूनामर्थानामत्रप्रकाशितत्वात् पूर्वसूक्तेन सहास्य सङ्गतिरस्तीतिबोध्यम्॥

इति प्रथमाष्टके द्वितीयाध्याये सप्तमो वर्गः॥ ७॥

प्रथमे मण्डले पञ्चमेऽनुवाके द्वाविंशं सूक्तं च समाप्तम्॥ २२॥

पदार्थः-(**विष्णोः**) व्यापक जगदीश्वर का (**यत्**) जो उक्त (**परमम्**) सब उत्तम गुणों से प्रकाशित (**पदम्**) प्राप्त होने योग्य पद है (**तत्**) उसको (**विपन्यवः**) अनेक प्रकार के जगदीश्वर के गुणों की प्रशंसा करनेवाले (**जागृवांसः**) सत्कर्म में जागृत (**विप्रासः**) बुद्धिमान् सज्जन पुरुष हैं, वे ही (**समिन्धते**) अच्छे प्रकार प्रकाशित करके प्राप्त होते हैं॥२१॥

भावार्थः-जो मनुष्य अविद्या और अधर्माचरणरूप नींद को छोड़कर विद्या धर्माचरण में जाग रहे हैं, वे ही सच्चिदानन्दस्वरूप सब प्रकार से उत्तम सबको प्राप्त होने योग्य निरन्तर सर्वव्यापी विष्णु अर्थात् जगदीश्वर को प्राप्त होते हैं॥२१॥

पहिले सूक्त में जो दो पदों के अर्थ कहे थे उनके सहचारि अश्वि, सविता, अग्नि, देवी, इन्द्राणी, वरुणानी, अग्नायी, द्यावापृथिवी, भूमि, विष्णु और इनके अर्थों का प्रकाश इस सूक्त में किया है, इससे पहिले सूक्त के साथ इस सूक्त की सङ्गति जाननी चाहिये।

इसके आगे सायण और विलसन आदि विषय में जो यह सूक्त के अन्त में खण्डन द्योतक पङ्क्ति लिखते हैं, सो न लिखी जायेगी, क्योंकि जो सर्वथा अशुद्ध है, उसको बारंबार लिखना पुनरुक्त और निरर्थक है, जहाँ कहीं लिखने योग्य होगा, वहाँ तो लिखा ही जायेगा, परन्तु इतने लेख से यह अवश्य जानना कि ये टीका वेदों की व्याख्या तो नहीं हैं, किन्तु इनको व्यर्थ दूषित करनेहारी हैं॥

इति १.२ सप्तमो वर्गः॥

प्रथमे मण्डले पञ्चमेऽनुवाके द्वाविंशं सूक्तं च समाप्तम्॥

अथास्य चतुर्विंशत्यृचस्य त्रयोविंशस्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः। १ वायुः; २,३ इन्द्रवायू; ४-६ मित्रावरुणौ, ७-९ इन्द्रोमरुत्वान्; १०-१२ विश्वेदेवाः, १३-१५ पूषा; १६-२२ आपः; २३,२४ अग्निश्च देवताः। १-१८ गायत्री; १९ पुर उष्णिक्; २० अनुष्टुप्; २१ प्रतिष्ठा; २२-२४ अनुष्टुप् च छन्दांसि। १-१८ षड्जः; १९ ऋषभः; २० गान्धारः। २१ षड्जः; २२-२४ गान्धारश्च स्वरः॥

तत्रादिमेन वायुगुणा उपदिश्यन्ते।

अब तेईसवें सूक्त का आरम्भ है, इसके पहिले मन्त्र में वायु के गुण प्रकाशित किये हैं-

तीव्राः सोमास आ गह्याशीर्वन्तः सुता इमे।
वायो तान् प्रस्थितान् पिब॥ १॥

तीव्राः। सोमासः। आ। गहि। आशीःऽवन्तः। सुताः। इमे। वायो इति। तान्। प्रऽस्थितान्। पिब॥ १॥

पदार्थः-(**तीव्राः**) तीक्ष्णवेगाः (**सोमासः**) सूयन्त उत्पद्यन्ते ये ते पदार्थाः। अत्र **अर्तिस्तुसुहुसृ०** (उणा०१.१४०) अनेन षु धातोर्मन् प्रत्ययः। **आज्जसरेसुग्** इत्यसुक् च। (**आ**) सर्वतोऽर्थे (**गहि**) प्राप्नोति। अत्र व्यत्ययो लडर्थे लोट्। **बहुलं छन्दसि** इति शपो लुक् च। (**आशीर्वन्तः**) आशिषः प्रशस्ताः कामना भवन्ति येषां ते। अत्र **शासइत्वे आशासः क्वावुपसंख्यानम्।** (अष्टा०वा०६.४.३४) अनेन वार्त्तिकेनाशीरिति सिद्धम्। ततः प्रशंसार्थे मतुप्। **छन्दसीर** इति वत्वञ्च। सायणाचार्येण **'श्रीञ् पाके'** इत्यस्मादिदं पदं साधितं तदिदं भाष्यविरोधादशुद्धमस्तीति बोध्यम्। (**सुताः**) उत्पन्नाः (**इमे**) प्रत्यक्षा अप्रत्यक्षाः (**वायो**) पवनः (**तान्**) सर्वान् (**प्रस्थितान्**) इतस्ततश्चलितान् (**पिब**) पिबत्यन्तःकरोति। अत्र व्यत्ययो लडर्थे लोट् च॥ १॥

अन्वयः-य इमे तीव्रा आशीर्वन्तः सुताः सोमासः सन्ति तान् वायुरागहि समन्तात् प्राप्नोत्ययमेव तान् प्रस्थितान् पिबान्तःकरोति॥ १॥

भावार्थः-प्राणिनो यान् प्राप्तुमिच्छन्ति यान् प्राप्ता सन्त आशीर्वन्तो भवन्ति, तान् सर्वान् वायुरेव प्रापप्य स्वस्थान् करोति, येषु पदार्थेषु तीक्ष्णाः कोमलाश्च गुणाः सन्ति, तान् यथावद्विज्ञाय मनुष्या उपयोगं गृह्णीयुरिति॥ १॥

पदार्थः-जो (**इमे**) (**तीव्राः**) तीक्ष्णवेगयुक्त (**आशीर्वन्तः**) जिनकी कामना प्रशंसनीय होती है (**सुताः**) उत्पन्न हो चुके वा (**सोमासः**) प्रत्यक्ष में होते हैं (**तान्**) उन सबों को (**वायो**) पवन (**आगहि**) सर्वथा प्राप्त होता है तथा यही उन (**प्रस्थितान्**) इधर-उधर अति सूक्ष्मरूप से चलायमानों को (**पिब**) अपने भीतर कर लेता है, जो इस मन्त्र में '**आशीर्वन्तः**' इस पद को सायणाचार्य ने '**श्रीञ् पाके**' इस धातु का सिद्ध किया है, सो भाष्यकार की व्याख्या से विरुद्ध होने से अशुद्ध ही है।

भावार्थः-प्राणी जिनको प्राप्त होने की इच्छा करते और जिनके मिलने में श्रद्धालु होते हैं, उन सबों को पवन ही प्राप्त करके यथावत् स्थिर करता है, इससे जिन पदार्थों के तीक्ष्ण वा कोमल गुण हैं, उन को यथावत् जानके मनुष्य लोग उन से उपकार लेवें॥१॥

अथ परस्परानुषङ्गिणावुपदिश्येते।

अब अगले मन्त्र में परस्पर संयोग करने वाले पदार्थों का प्रकाश किया है-

उ॒भा दे॒वा दि॑वि॒स्पृशे॑न्द्रवा॒यू ह॑वामहे।
अ॒स्य सोम॑स्य पी॒तये॑॥२॥

उ॒भा। दे॒वा। दि॒वि॒स्पृशा॑। इ॒न्द्र॒वा॒यू इति॑। ह॒वा॒म॒हे॒। अ॒स्य। सोम॑स्य। पी॒तये॑॥२॥

पदार्थः-(**उभा**) द्वौ। अत्र त्रिषु प्रयोगेषु **सुपां सुलुग्०** इत्याकारादेशः। (**देवा**) दिव्यगुणौ (**दिविस्पृशा**) यौ प्रकाशयुक्त आकाशे यानानि स्पर्शयतस्तौ। अत्रान्तर्गतो ण्यर्थः (**इन्द्रवायू**) अग्निपवनौ (**हवामहे**) स्पर्द्धामहे। अत्र **बहुलं छन्दसि** इति सम्प्रसारणम्। (**अस्य**) प्रत्यक्षाप्रत्यक्षस्य (**सोमस्य**) सूयन्ते पदार्था यस्मिन् जगति तस्य (**पीतये**) भोगाय॥२॥

अन्वयः-वयमस्य सोमस्य पीतये दिविस्पृशा देवोभेन्द्रवायू हवामहे॥२॥

भावार्थः-योऽग्निर्वायुना प्रदीप्यते वायुरग्निना चेति परस्परमाकांक्षितौ सहायकारिणौ स्तो मनुष्या युक्त्या सदैव सम्प्रयोज्य साधयित्वा पुष्कलानि सुखानि प्राप्नुवन्ति तौ कुतो न जिज्ञासितव्यौ॥२॥

पदार्थः-हम लोग (**अस्य**) इस प्रत्यक्ष वा अप्रत्यक्ष (**सोमस्य**) उत्पन्न करने वाले संसार के सुख के (**पीतये**) भोगने के लिये (**दिविस्पृशा**) जो प्रकाशयुक्त आकाश में विमान आदि यानों को पहुंचाने और (**देवा**) दिव्यगुण वाले (**उभा**) दोनों (**इन्द्रवायू**) अग्नि और पवन हैं, उनको (**हवामहे**) साधने की इच्छा करते हैं॥२॥

भावार्थः-जो अग्नि पवन और जो वायु अग्नि से प्रकाशित होता है, जो ये दोनों परस्पर आकांक्षायुक्त अर्थात् सहायकारी हैं, जिनसे सूर्य्य प्रकाशित होता है, मनुष्य लोग जिनको साध और युक्ति के साथ नित्य क्रियाकुशलता में सम्प्रयोग करते हैं, जिनके सिद्ध करने से मनुष्य बहुत से सुखों को प्राप्त होते हैं, उनके जानने की इच्छा क्यों न करनी चाहिये॥२॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

इ॒न्द्र॒वा॒यू म॑नो॒जुवा॒ विप्रा॑ हवन्त ऊ॒तये॑।
स॒ह॒स्रा॒क्षा धि॒यस्पती॑॥३॥

इ॒न्द्रा॒वा॒यू इति॑। म॒न॒:ऽजु॒वा॑। विप्रा॑:। ह॒व॒न्ते॒। ऊ॒तये॑। स॒ह॒स्र॒ऽअ॒क्षा॒। धि॒य:। पती॑ इति॑॥ ३॥

पदार्थ:-(**इन्द्रवायू**) विद्युत्पवनौ (**मनोजुवा**) यौ मनोवद्वेगेन जवेते। तौ अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेश: **क्विप् च** इति क्विप् प्रत्यय:। (**विप्रा:**) विद्वांस: (**हवन्ते**) गृह्णन्ति। व्यत्ययेनात्मनेपदं **बहुलं छन्दसि** इति शप: श्लुर्न। (**ऊतये**) क्रियासिद्धीच्छायै (**सहस्राक्षा**) सहस्राण्यसंख्यातान्यक्षीणि साधनानि याभ्यां तौ (**धिय:**) शिल्पकर्मण: (**पती**) पालयितारौ। अत्र **षष्ठ्या: पति पु०** (अष्टा०८.३.५३) अनेन विसर्जनीयस्य सकारादेश:॥ ३॥

अन्वय:-विप्रा ऊतये यौ सहस्राक्षौ धियस्पती मनोजुवान्द्रिवायू हवन्ते, तौ कथं नान्यैरपि जिज्ञासितव्यौ॥ ३॥

भावार्थ:-विद्वद्भि: शिल्पविद्यासिद्धये असंख्यातव्यवहारहेतू वेगादिगुणयुक्तौ विद्युद्वायू संसाध्याविति॥ ३॥

पदार्थ:-(**विप्रा:**) विद्वान् लोग (**ऊतये**) क्रियासिद्धि की इच्छा के लिये जो (**सहस्राक्षा**) जिन से असंख्यात अक्ष अर्थात् इन्द्रियवत् साधन सिद्ध होते (**धिय:**) शिल्प कर्म के (**पती**) पालने और (**मनोजुवा**) मन के समान वेगवाले हैं उन (**इन्द्रवायू**) विद्युत् और पवन को (**हवन्ते**) ग्रहण करते हैं, उनके जानने की इच्छा अन्य लोग भी क्यों न करें॥ ३॥

भावार्थ:-विद्वानों को उचित है कि शिल्पविद्या की सिद्धि के लिये असंख्यात व्यवहारों को सिद्ध कराने वाले वेग आदि गुणयुक्त बिजुली और वायु के गुणों की क्रियासिद्धि के लिये अच्छे प्रकार सिद्धि करनी चाहिये॥ ३॥

एतद्विद्याप्रापकौ प्राणौदानौ स्त इत्युपदिश्यते।

इस विद्या के प्राप्त कराने वाले प्राण और उदान हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

मि॒त्रं व॒यं ह॑वामहे॒ वरु॑णं॒ सोम॑पीतये।
ज॒ज्ञा॒ना पू॒तद॑क्षसा॥ ४॥

मि॒त्रम्। व॒यम्। ह॒वा॒म॒हे॒। वरु॑णम्। सोम॑ऽपीतये। ज॒ज्ञा॒ना। पू॒तऽद॑क्षसा॥ ४॥

पदार्थ:-(**मित्रम्**) बाह्याभ्यन्तरस्थं जीवनहेतुं प्राणम् (**वयम्**) पुरुषार्थिनो मनुष्या: (**हवामहे**) गृह्णीम:। अत्र व्यत्ययेनात्मनेपदं **बहुलं छन्दसि** इति शप: श्लुर्न। (**वरुणम्**) ऊर्ध्वगमनबलहेतुमुदानं वायुम् (**सोमपीतये**) सोमानामनुकूलानां सुखादिरसयुक्तानां पदार्थानां पीति: पानं यस्मिन् व्यवहारे तस्मै। अत्र **सहसुपे**ति समास: (**जज्ञाना**) अवबोधहेतू (**पूतदक्षसा**) पूतं पवित्रं दक्षोबलं याभ्यां तौ। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारादेश:॥ ४॥

अन्वयः-वयं यौ सोमपीतये पूतदक्षसौ जज्ञानौ मित्रं वरुणं च हवामहे, तौ युष्माभिरपि कुतो न वेदितव्यौ॥४॥

भावार्थः-नैव मनुष्याणां प्राणोदानाभ्यां विना कदापि सुखभोगो बलं च सम्भवति, तस्मादेतयोः सेवनविद्या यथावद्वेद्यास्ति॥४॥

पदार्थः-(**वयम्**) हम पुरुषार्थी लोग जो (**सोमपीतये**) जिसमें सोम अर्थात् अपने अनुकूल सुखों को देने वाले रसयुक्त पदार्थों का पान होता है, उस व्यवहार के लिये (**पूतदक्षसा**) पवित्र बल करने वाले (**जज्ञाना**) विज्ञान के हेतु (**मित्रम्**) जीवन के निमित्त बाहर वा भीतर रहने वाले प्राण और (**वरुणम्**) जो श्वासरूप ऊपर को आता है, उस बल करने वाले उदान वायु को (**हवामहे**) ग्रहण करते हैं, उनको तुम लोगों को भी क्यों न जानना चाहिये॥४॥

भावार्थः-मनुष्यों को प्राण और उदान वायु के विना सुखों का भोग और बल का सम्भव कभी नहीं हो सकता, इस हेतु से इनके सेवन की विद्या को ठीक-ठीक जानना चाहिये॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते।

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ऋ॒तेन॒ यावृ॑ता॒वृधा॑वृ॒तस्य॒ ज्योति॑ष॒स्पती॑। ता मि॒त्रावरु॑णा हुवे॥५॥८॥

ऋ॒तेन॑। यौ। ऋ॒त॒ऽवृधौ॑। ऋ॒तस्य॑। ज्योति॑षः। पती॒ इति॑। ता। मित्रावरु॑णा। हु॒वे॒॥५॥

पदार्थः-(**ऋतेन**) सत्यरूपेण ब्रह्मणा निर्मितो सन्तौ (**यौ**) (**ऋतावृधौ**) ऋतं सत्यं कारणं जलं वा वर्द्धयतस्तौ। अत्रान्तर्गतो ण्यर्थः। **अन्येषामपि दृश्यते** इति दीर्घश्च। (**ऋतस्य**) यथार्थस्वरूपस्य (**ज्योतिषः**) प्रकाशस्य (**पती**) पालयितारौ। अत्र **षष्ठ्याः पतिपुत्रपृष्ठपार०** (अष्टा०८.३.५३) अनेन विसर्जनीयस्य सकारादेशः। (**ता**) तौ (**मित्रावरुणा**) मित्रश्च वरुणश्च द्वौ सूर्यवायू। अत्र **देवताद्वन्द्वे च।** (अष्टा०६.३.२६) अनेन पूर्वपदस्यानङादेशः। अत्रोभयत्र **सुपां सुलुग्०** इत्याकारादेशः। (**हुवे**) आददे। अत्र व्यत्ययेनात्मनेपदं **बहुलं छन्दसि** इति शपो लुक् च॥५॥

अन्वयः-अहं यावृतेन जगदीश्वरेणोत्पाद्य धारितावृतावृधावृतस्य ज्योतिषस्पती मित्रावरुणौ स्तस्तौ हुवे॥५॥

भावार्थः-नैव सूर्यवायुभ्यां विना जलज्योतिषोरुत्पत्तेः सम्भवोऽस्ति नैव चेश्वरोत्पादनेन विना सूर्य्यवाय्वोरुत्पत्तिर्भवितुं शक्या, न चैताभ्यां विना मनुष्याणां व्यवहारसिद्धिर्भवितुमर्हतीति॥५॥

इति प्रथमाष्टके द्वितीयोऽध्यायेऽष्टमो वर्गः॥८॥

पदार्थः-मैं **(यौ)** जो **(ऋतेन)** परमेश्वर ने उत्पन्न करके धारण किये हुए **(ऋतावृधौ)** जल को बढ़ाने और **(ऋतस्य)** यथार्थ स्वरूप **(ज्योतिषः)** प्रकाश के **(पती)** पालन करने वाले **(मित्रावरुणौ)** सूर्य और वायु हैं, उनको **(हुवे)** ग्रहण करता हूं॥५॥

भावार्थः-न सूर्य और वायु के विना जल और ज्योति अर्थात् प्रकाश की योग्यता, न ईश्वर के उत्पादन किये विना सूर्य्य और वायु की उत्पत्ति का सम्भव और न इनके विना मनुष्यों के व्यवहारों की सिद्धि हो सकती है॥५॥

इति प्रथमाष्टके द्वितीयाध्यायेऽष्टमो वर्गः समाप्तः॥६॥

पुनस्तौ किं कुरुत इत्युपदिश्यते।

फिर वे क्या करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

वरु॑णः प्राऽवि॒ता भु॑वन्मि॒त्रो विश्वा॑भिरू॒तिभि॑ः।
कर॑तां नः सु॒राध॑सः॥६॥

वरु॑णः। प्रऽअ॒वि॒ता। भु॒व॒त्। मि॒त्रः। विश्वा॑भिः। ऊ॒तिऽभि॑ः। कर॑ताम्। नः॒। सु॒ऽराध॑सः॥६॥

पदार्थः-(**वरुणः**) बाह्याभ्यन्तरस्थो वायुः **(प्रावि॒ता)** सुखप्रापकः **(भुवत्)** भवति। अत्र लडर्थे लेट् **बहुलं छन्दसि** इति शपो लुक्। **भूसुवोस्तिङि**। (अष्टा०७.३.८८) अनेन गुणनिषेधः। **(मित्रः)** सूर्य्यः। अत्र **अमिचिमिश०** (उणा०४.१६४) अनेन क्त्रः प्रत्ययः। **(विश्वाभिः)** सर्वाभिः **(ऊतिभिः)** रक्षणादिभिः कर्मभिः **(करताम्)** कुरुतः। अत्रापि लडर्थे लोट्। विकरणव्यत्ययश्च। **(नः)** अस्मान् **(सुराधसः)** शोभनानि विद्याचक्रवर्त्तिराज्यसंम्बन्धीनि राधांसि धनानि येषां तानेवं भूतान्॥६॥

अन्वयः-यथायं सुयुक्त्या सेवितो वरुणो विश्वाभिरूतिभिः सर्वैः पदार्थैः प्राविता भुवत् भवति मित्रश्च यौ नोस्मान् सुराधसः करताम् कुरुतस्तमादेतावस्माभिरप्येवं कथं न परिचर्य्यौ वर्त्तेते॥६॥

भावार्थः-यस्मादेतयोः सकाशेन सर्वेषां पदार्थानां क्षणादयो व्यवहारास्सम्भवन्त्यस्माद्विद्वांस एनाभ्यां बहूनि कार्याणि संसाध्योत्तमानि धनानि प्राप्नुवन्तीति॥६॥

पदार्थः-जैसे यह अच्छे प्रकार सेवन किया हुआ **(वरुणः)** बाहर वा भीतर रहनेवाला वायु **(विश्वाभिः)** सब **(ऊतिभिः)** रक्षा आदि निमित्तों से सब प्राणि या पदार्थों को करके **(प्राविता)** सुख प्राप्त करने वाला **(भुवत्)** होता है (**मित्रश्च**) और सूर्य्य भी जो **(नः)** हम लोगों को **(सुराधसः)** सुन्दर विद्या और चक्रवर्त्ति राज्यसम्बन्धी धनयुक्त **(करताम्)** करते हैं, जैसे विद्वान् लोग इन से बहुत कार्य्यों को सिद्ध करते हैं, वैसे हम लोग भी इसी प्रकार इन का सेवन क्यों न करें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिसलिये इन उक्त वायु और सूर्य के आश्रय करके सब पदार्थों के रक्षा आदि व्यवहार सिद्ध होते हैं, इसलिये विद्वान् लोग भी इनसे बहुत कार्य्यों को सिद्ध करके उत्तम-उत्तम धनों को प्राप्त होते हैं॥६॥

अथ वायुसहचारीन्द्रगुणा उपदिश्यन्ते।

अब अगले मन्त्र में वायु के सहचारी इन्द्र के गुण उपदेश किये हैं-

म॒रुत्व॑न्तं हवामह॒ इन्द्र॒मा सोम॑पीतये।

स॒जूर्ग॒णेन॑ तृम्पतु॥७॥

म॒रुत्व॑न्तम्। ह॒वा॒म॒हे॒। इन्द्र॑म्। आ। सोम॑ऽपीतये। स॒ऽजूः। ग॒णेन॑। तृ॒म्प॒तु॒॥७॥

पदार्थः-(**मरुत्वन्तम्**) मरुतः सम्बन्धिनो विद्यन्ते यस्य तम्। अत्र सम्बन्धेऽर्थे मतुप्। **तसौ मत्वर्थे।** (अष्टा०१.४.१९) इति भत्वाज्जस्त्वाभावः। (**हवामहे**) गृह्णीमः। अत्र व्यत्ययेनात्मनेपदं **बहुलं छन्दसि** इति शपः श्लुर्न। (**इन्द्रम्**) विद्युतम् (**आ**) समन्तात् (**सोमपीतये**) प्रशस्तपदार्थभोगनिमित्ताय (**सजूः**) समानं सेवनं यस्य सः। इदं जुषी इत्यस्य क्विबन्तं रूपं, **समानस्य छन्दस्य०** इति समानस्य सकारादेशश्च। (**गणेन**) वायुसमूहेन (**तृम्पतु**) प्रीणयति। अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च॥७॥

अन्वयः-हे मनुष्या यथाऽस्मिन् संसारे वयं सोमपीतये यं मरुत्वन्तमिन्द्रं हवामहे, यः सजूर्गणेनास्मानातृम्पतु समन्तात् तर्पयति तथा तं यूयमपि सेवध्वम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्नैव कदाचिदपि सहकारिणा वायुना विनाऽग्निः प्रदीपयितुं शक्यते, न चैवंभूतया विद्युता विना कस्यचित् पदार्थस्य वृद्धिः सम्भवतीति वेद्यम्॥७॥

पदार्थः-हे मनुष्य लोगो! जैसे इस संसार में हम लोग (**सोमपीतये**) पदार्थों के भोगने के लिये जिस (**मरुत्वन्तम्**) पवनों के सम्बन्ध से प्रसिद्ध होने वाली (**इन्द्रम्**) बिजुली को (**हवामहे**) ग्रहण करते हैं (**सजूः**) जो सब पदार्थों में एकसी वर्तने वाली (**गणेन**) पवनों के समूह के साथ (**नः**) हम लोगों को (**आतृम्पतु**) अच्छे प्रकार तृप्त करती है, वैसे उसको तुम लोग भी सेवन करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि जिस सहायकारी पवन के विना अग्नि कभी प्रज्वलित होने को समर्थ और उक्त प्रकार बिजुली रूप अग्नि के विना किसी पदार्थ की बढ़ती का सम्भव नहीं हो सकता, ऐसा जानें॥७॥

अथ कीदृशा मरुद्गणा इत्युपदिश्यते।

अब वे पवनों के समूह किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

इन्द्र॑ज्येष्ठा॒ मरु॑द्ग॒णा देवा॑स॒: पूष॑रातयः।

विश्वे॒ मम॑ श्रु॒ता॒ हव॑म्॥८॥

इन्द्र॑ऽज्येष्ठाः। मरुत्ऽगणाः। देवा॑सः। पूष॑ऽरातयः। विश्वे॑। मम॑। श्रु॒त॒। हव॑म्॥८॥

पदार्थः-(**इन्द्रज्येष्ठाः**) इन्द्रः सूर्य्यो ज्येष्ठः प्रशंस्यो येषां ते (**मरुद्गणाः**) मरुतां समूहाः (**देवासः**) दिव्यगुणविशिष्टाः (**पूषरातयः**) पूष्णः सूर्याद् रातिर्दानं येषां ते (**विश्वे**) सर्वे (**मम**) (**श्रुत**) श्रावयन्ति। अत्र व्यत्ययो लडर्थे लोडन्तर्गतो ण्यर्थो **बहुलं छन्दसि** इति शपो लुग् **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**हवम्**) कर्तव्यं शब्दव्यवहारम्॥८॥

अन्वयः-ये पूषरातय इन्द्रज्येष्ठा देवासो विश्वे मरुद्गणा मम हवं श्रुत श्रावयन्ति ते युष्माकमपि॥८॥

भावार्थः-नैव कश्चिदपि वायुगणेन विना कथनं श्रवणं पुष्टिं च प्राप्तुं शक्नोति। योऽयं सूर्य्यलोको महान् वर्त्तते यस्य य एव प्रदीपनहेतवः सन्ति, योऽग्निरूप एवास्ति नैतैर्विद्युतया च विना कश्चिद्वाचमपि चालयितुं शक्नोतीति॥८॥

पदार्थः-जो (**पूषरातयः**) सूर्य्य के सम्बन्ध से पदार्थों को देने (**इन्द्रज्येष्ठाः**) जिनके बीच में सूर्य्य बड़ा प्रशंसनीय हो रहा है और (**देवासः**) दिव्य गुण वाले (**विश्वे**) सब (**मरुद्गणाः**) पवनों के समूह (**मम**) मेरे (**हवम्**) कार्य्य करने योग्य शब्द व्यवहार को (**श्रुत**) सुनाते हैं, वे ही आप लोगों को भी॥८॥

भावार्थः-कोई भी मनुष्य जिन पवनों के विना कहना, सुनना और पुष्ट होनादि व्यवहारों को प्राप्त होने को समर्थ नहीं हो सकता। जिन के मध्य में सूर्य्य लोक सब से बड़ा विद्यमान, जो इसके प्रदीपन करानेवाले हैं, जो यह सूर्य्य लोक अग्निरूप ही है, जिन और जिस बिजुली के विना कोई भी प्राणी अपनी वाणी के व्यवहार करने को भी समर्थ नहीं हो सकता, इत्यादि इन सब पदार्थों की विद्या को जान के मनुष्यों को सदा सुखी होना चाहिये॥८॥

पुनस्ते कीदृशा इत्युपदिश्यते।

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

हत वृत्रं सुदानव इन्द्रेण सहसा युजा।
मा नो दुःशंस ईशत॥९॥

हत। वृत्रम्। सुऽदानवः। इन्द्रेण। सहसा। युजा। मा। नः। दुःऽशंसः। ईशत॥९॥

पदार्थः-(**हत**) घ्नन्ति। अत्र व्यत्ययो लडर्थे लोट् च। (**वृत्रम्**) मेघम् (**सुदानवः**) शोभनं दानं येभ्यो मरुद्भ्यस्ते। अत्र **दाभाभ्यां नुः।** (उणा०३.३१) अनेन नुः प्रत्ययः। (**इन्द्रेण**) सूर्य्येण विद्युता वा (**सहसा**) बलेन। **सह इति बलनामसु पठितम्।** (निघं०२.९) (**युजा**) यो युनक्ति मुहूर्त्तादिकालावयवपदार्थैः सह तेन संयुक्ताः सन्तः (**मा**) निषेधार्थे (**नः**) अस्मान् (**दुःशंसः**) दुःखेन शंसितुं योग्यास्तान् (**ईशत**) समर्थयत। अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च॥९॥

अन्वयः-हे विद्वांसो यूयं ये सुदानवो वायवः सहसा बलेन युजेन्द्रेण संयुक्ता सन्तो वृत्रं हत घ्नन्ति, तैर्नोऽस्मान् दुःशंसो मेशत दुःखकारिणः कदापि मा भवत॥९॥

भावार्थः-वयं यथावत्पुरुषार्थं कृत्वेश्वरमुपास्याचार्य्यान् प्रार्थयामो ये वायवः सूर्य्यस्य किरणैर्वा विद्युता सह मेघमण्डलस्थं जलं छित्वा निपात्य पुनः पृथिव्या सकाशादुत्थाप्योपरि नयन्ति, तद्विद्या मनुष्यैः प्रयत्नेन विज्ञातव्येति॥९॥

पदार्थः-हे विद्वान् लोगो! आप जो **(सुदानवः)** उत्तम पदार्थों को प्राप्त कराने **(सहसा)** बल और **(युजा)** अपने आनुषङ्गी **(इन्द्रेण)** सूर्य्य वा बिजुली के साथी होकर **(वृत्रम्)** मेघ को **(हत)** छिन्न-भिन्न करते हैं, उनसे **(नः)** हम लोगों के **(दुःशंसः)** दुःख कराने वाले **(मा)** **(ईशत)** कभी मत हूजिये॥९॥

भावार्थः-हम लोग ठीक पुरुषार्थ और ईश्वर की उपासना करके विद्वानों की प्रार्थना करते हैं कि जिससे हम लोगों को जो पवन, सूर्य्य की किरण वा बिजुली के साथ मेघमण्डल में रहने वाले जल को छिन्न-भिन्न और वर्षा करके और फिर पृथिवी से जल समूह को उठाकर ऊपर को प्राप्त करते हैं, उनकी विद्या मनुष्यों को प्रयत्न से अवश्य जाननी चाहिये॥९॥

पुनस्ते कीदृशा इत्युपदिश्यते।

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

विश्वा॑न् दे॒वान् ह॑वामहे म॒रुत॒: सोम॑पीतये।

उ॒ग्रा ही पृ॒श्नि॑मातरः॥ १०॥ ९॥

विश्वा॑न्। दे॒वान्। ह॒वा॒म॒हे॒। म॒रुत॑:। सोम॑ऽपीतये। उ॒ग्राः। हि। पृ॒श्नि॑ऽमातरः॥ १०॥

पदार्थः-**(विश्वान्)** सर्वान् **(देवान्)** दिव्यगुणसाहित्येनोत्तमगुणप्रकाशकान् **(हवामहे)** विद्यासिद्धये स्पर्द्धामहे। अत्र **बहुलं छन्दसि** इति सम्प्रसारणम्। **(मरुतः)** ज्ञानक्रियानिमित्तेन शिल्पव्यवहारप्रापकान्। **मरुत इति पदनामसु पठितम्।** (निघं०५.५) अनेन प्राप्त्यर्थो गृह्यते **(सोमपीतये)** पदार्थानां यथावद्भोगाय **(उग्राः)** तीव्रसंवेगादिगुणसहितः **(हि)** हेत्वर्थे **(पृश्निमातरः)** पृश्निराकाशमन्तरिक्षं मातोत्पत्तिनिमित्तं येषां ते। **पृश्निरिति साधारणनामसु पठितम्।** (निघं०१.४)॥१०॥

अन्वयः-हि यतो विद्यां चिकीर्षवो वयं य उग्राः पृश्निमातरः सन्ति, तस्मादेतान् विश्वान् देवान् मरुतो हवामहे॥१०॥

भावार्थः-यत एत आकाशादुत्पन्ना वायवो यत्र तत्र गमनागमनकर्त्तारस्तीक्ष्णस्वभावास्सन्त्यत एव विद्वांसः कार्य्यार्थं तान् स्वीकुर्वन्ति॥१०॥

इति प्रथमाष्टके द्वितीयाध्याये नवमो वर्गः॥

पदार्थः-विद्या की इच्छा करने वाले हम लोग **(हि)** जिस कारण से जो ज्ञान क्रिया के निमित्त से शिल्प व्यवहारों को प्राप्त कराने वाले **(उग्राः)** तीक्ष्णता वा श्रेष्ठ वेग के सहित और **(पृश्निमातरः)** जिनकी उत्पत्ति का निमित्त आकाश वा अन्तरिक्ष है, इससे उन **(विश्वान्)** सब **(देवान्)** दिव्यगुणों के

सहित उत्तम गुणों के प्रकाश कराने वाले वायुओं को **(हवामहे)** उत्तम विद्या की सिद्धि के लिये जानना चाहते हैं॥१०॥

भावार्थः-जिससे यह वायु आकाश ही से उत्पन्न आकाश में आने-जाने और तेज स्वभाव वाले हैं, इसी से विद्वान् लोग कार्य्य के अर्थ इनका स्वीकार करते हैं॥१०॥

इति प्रथमाष्टक द्वितीयाध्याये नवमो वर्गः॥

अथाग्रिमे मन्त्रे वायुविद्युद्गुणा उपदिश्यन्ते।

अब अगले मन्त्र में पवन और बिजुली के गुण उपदेश किये हैं-

जयतामिव तन्यतुर्मरुतामेति धृष्णुया।
यच्छुभं याथना नरः॥११॥

जयताम्ऽइव। तन्यतुः। मरुताम्। एति। धृष्णुऽया। यत्। शुभम्। याथन। नरः॥११॥

पदार्थः-(**जयतामिव**) विजयकारिणां शूराणामिव (**तन्यतुः**) विस्तृतवेगस्वभावा विद्युत्। अत्र **ऋतन्यञ्जिवन्यञ्ज्यर्पि०** (उणा०४.२) अनेन '**तन**' धातोर्यतुच् प्रत्ययः (**मरुताम्**) वायूनां सङ्गेन (**एति**) गच्छति (**धृष्णुया**) दृढत्वादिगुणयुक्ता। अत्र **सुपां सुलुग्०** इति सोः स्थाने याच् आदेशः (**यत्**) यावत् (**शुभम्**) कल्याणयुक्तं सुखं तावत्सर्वं (**याथन**) प्राप्नुत। अत्र तकारस्य स्थाने थनादेशोऽन्येषामपि दृश्यते इति दीर्घश्च। (**नरः**) ये नयन्ति धर्म्यं शिल्पसमूहं च ते नरस्तत्सम्बोधने। अत्र **नयतेर्डिच्च।** (उणा०२.१००) अनेन ऋः प्रत्ययष्टिलोश्च॥११॥

अन्वयः-हे नरा! यूयं या जयतां योद्धृणां सङ्गेन राजा शत्रुविजयमेतीव मरुतां सम्प्रयोगेण धृष्णुया तन्यतुर्वेगमेत्य मेघं तपति तत्सम्प्रयोगेण यच्छुभं तत्सर्वं याथन प्राप्नुत॥११॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यतो विद्वांसो शूरवीरसेनया शत्रुविजयं यथा च वायुघर्षणविद्यया विद्युद्यन्त्रचालनेन दूरस्थान् देशान् गत्वाऽग्नेयास्त्रादिसिद्धिं च कृत्वा सुखानि प्राप्नुवन्ति, तथैव युष्माभिरपि विज्ञानपुरुषार्थाभ्यामेतैर्व्यावहारिकपारमार्थिके सुखे नित्ये वर्द्धितव्ये॥११॥

पदार्थः-हे (**नरः**) धर्मयुक्त शिल्पविद्या के व्यवहारों को प्राप्त करने वाले मनुष्यो! आप लोग भी (**जयतामिव**) जैसे विजय करने वाले योद्धाओं के सहाय से राजा विजय को प्राप्त होता और जैसे (**मरुताम्**) पवनों के संग से (**धृष्णुया**) दृढ़ता आदि गुणयुक्त (**तन्यतुः**) अपने वेग को अति शीघ्र विस्तार करने वाली बिजुली मेघ को जीतती है, वैसे (**यत्**) जितना (**शुभम्**) कल्याणयुक्त सुख है, उस सबको प्राप्त हूजिये॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् लोग शूरवीरों को सेना से शत्रुओं के विजय वा जैसे पवनों के घिसने से बिजुली के यन्त्र को चलाकर दूरस्थ देशों को जा वा आग्नेयादि

अस्त्रों की सिद्धि को करके सुखों को प्राप्त होते हैं, वैसे ही तुमको भी विज्ञान वा पुरुषार्थ करके इनसे व्यावहारिक और पारमार्थिक सुखों को निरन्तर बढ़ाना चाहिये॥११॥

पुनः कीदृशा मरुत इत्युपदिश्यते।

फिर वे पवन किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

ह॒स्का॒राद् वि॒द्यु॒त॒स्पर्य्यतो॑ जा॒ता अव॑न्तु नः।

म॒रुतो॑ मृळयन्तु नः॥१२॥

ह॒स्का॒रात्। वि॒ऽद्यु॒तः॑। परि॑। अतः॑। जा॒ताः॑। अव॑न्तु। नः॑। म॒रुतः॑। मृ॒ळ॒य॒न्तु॒। नः॒॥१२॥

पदार्थः-(**हस्कारात्**) हसनं हस्तत्करोति येन तस्मात् (**विद्युतः**) विविधतया द्योतयन्ते यास्ताः (**परि**) सर्वतोभावे (**अतः**) हेत्वर्थे (**जाता**) प्रकटत्वं प्राप्ताः (**अवन्तु**) प्रापयन्ति। अत्र '**अव**' धातोर्गत्यर्थात् प्राप्त्यर्थो गृह्यते, लडर्थे लोडन्तर्गतो ण्यर्थश्च। (**नः**) अस्मान् (**मरुतः**) वायवः (**मृळयन्तु**) सुखयन्ति। अत्रापि लडर्थे लोट्। (**नः**) अस्मान्॥१२॥

अन्वयः-वयं यतो हस्काराज्जाता विद्युतो नोस्मान् सुखान्यवन्तु प्रापयन्त्यतस्ताः परितः सर्वतः संसाधयेम। यतो मरुतो नोस्मान् मृडयन्तु सुखयन्त्यतस्तानपि कार्येषु सम्प्रयोजयेम॥१२॥

भावार्थः-मनुष्यैर्यदा पूर्वं वायुविद्या ततो विद्युद्विद्या तदनन्तरं जलपृथिव्योषधि विद्याश्चैता विज्ञायन्ते तदा सम्यक् सुखानि प्रापयन्त इति॥१२॥

पदार्थः-हम लोग जिस कारण (**हस्कारात्**) अति प्रकाश से (**जाताः**) प्रकट हुई (**विद्युतः**) जो कि चपलता के साथ प्रकाशित होती हैं, वे बिजली (**नः**) हम लोगों के सुखों को (**अवन्तु**) प्राप्त करती हैं। जिसने उन को (**परि**) सब प्रकार से साधते और जिससे (**मरुतः**) पवन (**नः**) हम लोगों को (**मृळयन्तु**) सुखयुक्त करते हैं (**अतः**) इससे उनको भी शिल्प आदि कार्यों में (**परि**) अच्छे प्रकार से साधें॥१२॥

भावार्थः-मनुष्य लोग जब पहिले वायु फिर बिजुली के अनन्तर जल पृथिवी और ओषधी की विद्या को जानते हैं, तब अच्छे प्रकार सुखों को प्राप्त होते हैं॥१२॥

अथ सूर्यलोकगुणा उपदिश्यन्ते।

अब अगले मन्त्र में सूर्य्यलोक के गुण प्रकाशित किये हैं-

आ पू॑षञ्चि॒त्रब॑र्हिषमाघृ॒णे ध॒रुणं॑ दि॒वः॥

आजा॑ न॒ष्टं यथा॑ प॒शुम्॥१३॥

आ। पू॒ष॒न्। चि॒त्रऽब॑र्हिषम्। आघृ॑णे। ध॒रुण॑म्। दि॒वः॑। आ। अ॒ज॒। न॒ष्टम्। यथा॑। प॒शुम्॥१३॥

पदार्थः-**(आ)** समन्तात् **(पूषन्)** पोषयतीति पूषा सूर्यलोकः। अत्रान्तर्गतो णिच **श्वनुक्षन्पूषन्प्लीहन्।** (उणा०१.१५९) अनेनायं निपातितः। **(चित्रबर्हिषम्)** चित्रमाश्चर्यं बर्हिरन्तरिक्षं भवति यस्मात्तत् **(आघृणे)** समन्तात् घृणयः किरणा दीप्तयो यस्य सः **(धरुणम्)** धारणकर्त्री पृथिवी **(दिवः)** स्वप्रकाशात् **(आ)** समन्तात् **(अज)** अजति प्रकाशं प्रक्षिप्य द्योतयति। अत्र व्यत्ययो लडर्थे लोडन्तर्गतो ण्यर्थश्च। **(नष्टम्)** अदृश्यम् **(यथा)** येन प्रकारेण **(पशुम्)** गवादिकम्॥१३॥

अन्वयः-यथा कश्चित्पशुपालो नष्टं पशुं प्राप्य प्रकाशयति तथाऽयमाघृण आघृणिः पूषन्पूषा सूर्यलोको दिवश्चित्रबर्हिषं धरुणमन्तरिक्षं प्राप्याज समतात् प्रकाशयति॥१३॥

भावार्थः-अत्रोपमालङ्कारः। यथा पशुपाला अनेकैः कर्म्मभिः पशून् पोषित्वा दुग्धादिभिर्मनुष्यादीन् सुखयति तथैवायं सूर्यलोको विचित्रैर्लोकैर्युक्तामाकाशं तत्स्थान् पदार्थांश्च स्वस्य किरणैराकर्षणेन पोषित्वा सर्वान् प्राणिनः सुखयतीति॥१३॥

पदार्थः-जैसे कोई पशुओं का पालने वाला मनुष्य **(नष्टम्)** खोगये **(पशुम्)** गौ आदि पशुओं को प्राप्त होकर प्रकाशित करता है, वैसे यह **(आघृणे)** परिपूर्ण किरणों **(पूषन्)** पदार्थों को पुष्ट करने वाला सूर्यलोक **(दिवः)** अपने प्रकाश से **(चित्रबर्हिषम्)** जिससे विचित्र आश्चर्य्यरूप अन्तरिक्ष विदित होता है **(धरुणम्)** धारण करनेहारे भूगोलों को **(आज)** अच्छे प्रकार प्रकाश करता है॥१३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पशुओं को पालने वाले अनेक काम करके, गो आदि पशुओं को पुष्ट करके, उनके दुग्ध आदि पदार्थों से मनुष्यों को सुखी करते हैं, वैसे ही यह सूर्य्यलोक चित्र-विचित्र लोकों से युक्त आकाश वा आकाश में रहने वाले पदार्थों को, अपनी किरण वा आकर्षण शक्ति से पुष्ट करके प्रकाशित करता है॥१३॥

अथ पूषन् शब्देनेश्वरस्य सर्वज्ञताप्रकाशः क्रियते॥

अब अगले मन्त्र में पूषन् शब्द से ईश्वर की सर्वज्ञता का प्रकाश किया है-

पूषा राजानमाघृणिरपगूढं गुहा हितम्।
अविन्दच्चित्रबर्हिषम्॥ १४॥

पूषा। राजानम्। आघृणिः। अपऽगूढम्। गुहा। हितम्। अविन्दत्। चित्रऽबर्हिषम्॥ १४॥

पदार्थः-**(पूषा)** यो जगदीश्वरः स्वाभिव्याप्त्या सर्वान् पदार्थान् पोषयति सः **(राजानम्)** प्राणं जीवं वा **(आघृणिः)** समन्ताद् घृणयो दीप्तयो यस्य सः **(अपगूढम्)** अपगतश्चासौ गूढश्च तम् **(गुहा)** गुहायामन्तरिक्षे बुद्धौ वा। अत्र **सुपां सुलुग्०** इति डेराकारादेशः। **(हितम्)** स्थापितं वा **(अविन्दत्)** जानाति। अत्र लडर्थे लङ् **(चित्रबर्हिषम्)** चित्रमनेकविधं बर्हिरुत्तमं कर्म क्रियते येन तम्॥१४॥

अन्वयः-यतोऽयमाघृणिः पूषा परमेश्वरो गुहाहितं चित्रबर्हिषमपगूढं राजानमविन्दत्, जानाति तस्मात् सर्वशक्तिमान् वर्त्तते॥१४॥

भावार्थ:-यतो जगत्स्रष्टेश्वर: प्रकाशमानं सर्वस्य पुष्टिहेतुं हृदयस्थं प्राणं जीवं चापि जानाति तस्मात् सर्वज्ञोऽस्ति॥१४॥

पदार्थ:-जिससे यह **(आघृणि:)** पूर्ण प्रकाश वा **(पूषा)** जो अपनी व्याप्ति से सब पदार्थों को पुष्ट करता है, वह जगदीश्वर **(गुहा) (हितम्)** आकाश वा बुद्धि में यथायोग्य स्थापन किये हुए वा स्थित **(चित्रबर्हिषम्)** जो अनेक प्रकार के कार्य्य को करता **(अपगूढम्)** अत्यन्त गुप्त **(राजानम्)** प्रकाशमान प्राणवायु और जीव को **(अविन्दत्)** जानता है, इससे वह सर्वशक्तिमान् है॥१४॥

भावार्थ:-जिस कारण जगत् का रचने वाला ईश्वर सबको पुष्ट करने हारे हृदस्यस्थ प्राण और जीव को जानता है, इससे सबका जानने वाला है॥१४॥

पुनस्तस्यैव गुणा उपदिश्यन्ते।

फिर अगले मन्त्र में उस ईश्वर ही के गुणों का उपदेश किया है-

उतो स मह्यमिन्दुभि: षड्युक्ताँ अनुसेषिधत्।

गोभिर्यवं न चर्कृषत्॥१५॥१०॥

उतो इति। स:। मह्यम्। इन्दुऽभि:। षट्। युक्तान्। अनुऽसेषिधत्। गोभि:। यवम्। न। चर्कृषत्॥१५॥

पदार्थ:-**(उतो)** पक्षान्तरे **(स:)** जगदीश्वर: **(मह्यम्)** धर्मात्मने पुरुषार्थिने **(इन्दुभि:)** स्निग्धै: पदार्थै: सह **(षट्)** वसन्तादीनृतून् **(युक्तान्)** सुखसम्पादकान् **(अनुसेषिधत्)** पुन:पुनरनुकूलान् प्रापयेत्। अत्र यङ्लुगन्ताल्लेट् **सेधतेर्गतौ।** (अष्टा०८.३.११३) इत्यभ्यासस्य षत्वप्रतिषेध:। **उपसर्गादिति वक्तव्यं किं प्रयोजनम्। उपसर्गाद् या प्राप्तिस्तस्या: प्रतिषेधो यथा स्याद्, अभ्यासाद्या प्राप्तिस्तस्या: प्रतिषेधो मा भूदिति। स्तुम्भुसिवु०** (अष्टा०वा०८.३.११६) अत्र महाभाष्यकारेणोक्तम्। सायणाचार्येणेदमज्ञानान्न बुद्धमिति **(गोभि:)** गो हस्त्यश्वादिभि: सह **(यवम्)** यवादिकमन्नम् **(न)** इव **(चर्कृषत्)** पुन: पुनर्भूमिं कर्षेत्। अत्र यङ्लुगन्ताल्लेट्॥१५॥

अन्वय:-कृषीवलो भूमिं चर्कृषद्धान्यादिप्राप्त्यर्थं पुन: पुर्नभूमिं कर्षतो वायमीश्वरो मह्यमिन्दुभिस्सह वसन्तादीन् युक्तान् गोभि: सह यवमनुसेषिधत् पुन: पुनरनुगतं प्रापयेत् तस्मादहं तमेवेष्टं मन्ये॥१५॥

भावार्थ:-अत्रोपमालङ्कार:। यथा सूर्य्य: कृषीवलो वा किरणैर्हलादिभिर्वा पुन: पुनर्भूमिमाकृष्य कर्षित्वा समुप्य धान्यादीनि प्राप्य वसन्तादीन् षड्ऋतून् सुखसंयुक्तान् करोति, तथेश्वरोऽप्यनुसमयं सर्वेभ्यो जीवेभ्य: कर्मानुसारेण रसोत्पादनविभजनेनर्तून् सुखसंपादकान् करोति॥१५॥

इति प्रथमाष्टके द्वितीयाध्याये दशमो वर्ग॥१०॥

पदार्थः-जैसे खेती करने वाला मनुष्य हर एक अन्न की सिद्धि के लिये भूमि को **(चर्कृषत्)** वारंवार जोतता है **(न)** वैसे **(सः)** वह ईश्वर **(मह्यम्)** जो मैं धर्मात्मा पुरुषार्थी हूं, उसके लिये **(इन्दुभिः)** स्निग्ध मनोहर पदार्थों और वसन्त आदि **(षट्)** छः **(ऋतून्)** ऋतुओं को **(युक्तान्) (गोभिः)** गौ, हाथी और घोड़े आदि पशुओं के साथ सुखसंयुक्त और **(यवम्)** यव आदि अन्न को **(अनुसेषिधत्)** वारंवार हमारे अनुकूल प्राप्त करे, इससे मैं उसी को इष्टदेव मानता हूँ॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य्य वा खेती करने वाला किरण वा हल आदि से वारंवार भूमि को आकर्षित वा खन, बो और धान्य आदि की प्राप्ति कर सचिक्कनकर पदार्थों के सेवन के साथ वसन्त आदि छः ऋतुओं को सुखों से संयुक्त करता है, वैसे ईश्वर भी समय के अनुकूल सब जीवों को कर्मों के अनुसार रस को उत्पन्न वा ऋतुओं के विभाग से उक्त ऋतुओं को सुख देने वाली करता है॥१५॥

इति दशमो वर्गः॥

अथ जलगुणा उपदिश्यन्ते।

अब अगले मन्त्र में जल के गुण प्रकाशित किये हैं-

अ॒म्बयो॑ यन्त्यध्व॒भिर्जा॒मयो॑ अध्वरीय॒ताम्।
पृ॒ञ्च॒तीर्मधु॑ना॒ पयः॑॥ १६॥

अ॒म्बयः॑। य॒न्ति॒। अध्व॑ऽभिः। जा॒मयः॑। अ॒ध्व॒रि॒ऽय॒ताम्। पृ॒ञ्च॒तीः। मधु॑ना। पयः॑॥ १६॥

पदार्थः-**(अम्बयः)** रक्षणहेतव आपः **(यन्ति)** गच्छन्ति **(अध्वभिः)** मार्गैः **(जामयः)** बन्धव इव **(अध्वरीयताम्)** आत्मनोऽध्वरमिच्छतामस्माकम्। अत्र **न छन्दस्यपुत्रस्य।** (अष्टा०७.४.३५) **अपुत्रादीनामिति वक्तव्यम्** (अष्टा०वा०७.४.३५) इति वचनादीकारनिषेधो न भवति **वा छन्दसि सर्वे विधयो भवन्ति** इति नियमात् **कव्यध्वरपृतनस्यर्चि लोपः।** (अष्टा०७.४.३९) इत्यकारलोपोऽपि न भवति **(पृञ्चतीः)** स्पर्शयन्त्यः। अत्र **सुपां सुलुग्०** इति पूर्वसवर्णादेशोऽन्तर्गतो ण्यर्थश्च। **(मधुना)** मधुरगुणेन सह **(पयः)** सुखकारकं रसम्॥१६॥

अन्वयः-यथा बन्धूनां जामयो बन्धवोऽनुकूलाचरणैः सुखानि सम्पादयन्ति, तथैवेमा अम्बय आपो अध्वरीयतामस्माकमध्वभिर्मधुना पयः पृञ्चतीः स्पर्शयन्त्यो यन्ति॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा बन्धवः स्वबन्धून् सम्पोष्य सुखयन्ति, तथेमा आप उपर्य्यधो गच्छन्त्यः सत्यो मित्रवत् प्राणिनां सुखानि सम्पादयन्ति, नैताभिर्विना केषांचित् प्राण्यप्राणिनामुन्नतिः सम्भवति तस्मादेताः सम्यगुपयोजनीयाः॥१६॥

पदार्थः-जैसे भाइयों को **(जामयः)** भाई लोग अनुकूल आचरण सुख सम्पादन करते हैं, वैसे ये **(अम्बयः)** रक्षा करने वाले जल **(अध्वरीयताम्)** जो कि हम लोग अपने आप को यज्ञ करने की इच्छा

करते हैं, उनको **(मधुना)** मधुरगुण के साथ **(पयः)** सुखकारक रस को **(अध्वभिः)** मार्गों से **(पृञ्चतीः)** पहुंचाने वाले **(यन्ति)** प्राप्त होते हैं॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बन्धुजन अपने भाई को अच्छी प्रकार पुष्ट करके सुख करते हैं, वैसे ये जल ऊपर-नीचे जाते-आते हुए मित्र के समान प्राणियों के सुखों को सम्पादन करते हैं और इनके विना किसी प्राणी वा अप्राणी की उन्नति नहीं हो सकती। इससे ये रस को उत्पत्ति के द्वारा सब प्राणियों को माता पिता के तुल्य पालन करते हैं॥१६॥

पुनस्ताः कीदृश्य इत्युपदिश्यते।

फिर वे जल कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

अमूर्या उप सूर्ये याभिर्वा सूर्य्यः सह।

ता नो हिन्वन्त्वध्वरम्॥१७॥

अमूः। याः। उप। सूर्ये। याभिः। वा। सूर्य्यः। सह। ताः। नः। हिन्वन्तु। अध्वरम्॥१७॥

पदार्थः-(**अमूः**) परोक्षाः (**याः**) आप (**उप**) सामीप्ये (**सूर्ये**) सूर्ये तत्प्रकाशमध्ये वा (**याभिः**) अद्भिः (**वा**) पक्षान्तरे (**सूर्यः**) सवितृलोकस्तत्प्रकाशो वा (**सह**) सङ्गे (**ताः**) आपः (**नः**) अस्माकम् (**हिन्वन्तु**) प्रीणयन्ति सेधयन्ति। अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च। (**अध्वरम्**) अहिंसनीयं सुखरूपं यज्ञम्॥१७॥

अन्वयः-या अमूरापः सूर्ये तत्प्रकाशे वा वर्त्तते, याभिः सह सूर्य्यो वर्त्तते, ता नोऽस्माकमध्वरमुपहिन्वन्तूपसेधयन्ति॥१७॥

भावार्थः-यज्जलं पृथिव्यादयो मूर्त्तिमतो द्रव्यात् सूर्यकिरणैश्छन्नं संल्लघुत्वं प्राप्य सूर्याभिमुखं गच्छति, तदेवोपरिष्टाद् वृष्टिद्वाराऽऽगतं यानादिव्यवहारे यानेषु वा सुयोजितं सुखं वर्द्धयतीति॥१७॥

पदार्थः-(**याः**) जो (**अमूः**) जल दृष्टिगोचर नहीं होते (**सूर्ये**) सूर्य वा इसके प्रकाश के मध्य में वर्त्तमान हैं (**वा**) अथवा (**याभिः**) जिन जलों के (**सह**) साथ (**सूर्यः**) सूर्यलोक वर्त्तमान है (**ताः**) वे (**नः**) हमारे (**अध्वरम्**) हिंसारहित सुखरूप यज्ञ को (**उपहिन्वन्तु**) प्रत्यक्ष सिद्ध करते हैं॥१७॥

भावार्थः-जो जल पृथिवी आदि मूर्त्तिमान् पदार्थों से सूर्य्य की किरणों करके छिन्न-भिन्न अर्थात् कण-कण होता हुआ सूर्य के सामने ऊपर को जाता है, वही ऊपर से वृष्टि के द्वारा गिरा हुआ पान आदि व्यवहार वा विमान आदि यानों में अच्छे प्रकार संयुक्त किया हुआ सुख बढ़ाता है॥१७॥

पुनस्ताः कीदृश्य इत्युपदिश्यते।

फिर भी वे जल किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः।

सिन्धु॑भ्य॒: कर्त्वं॑ ह॒वि:॥ १८॥

अ॒प:। दे॒वी:। उप॑। ह्वये॒। यत्र॑। गाव॑:। पिब॑न्ति। न॒:। सिन्धु॑ऽभ्य:। कर्त्वं॑म्। ह॒वि:॥ १८॥

पदार्थ:-(**अप:**) या आप्नुवन्ति सर्वान् पदार्थान् ता: (**देवी:**) दिव्यगुणवत्त्वेन दिव्यगुणप्रापिका: (**उप**) उपगमार्थे (**ह्वये**) स्वीकुर्वे (**यत्र**) (**गाव:**) किरणा: (**पिबन्ति**) स्पृशन्ति (**न:**) अस्माकम् (**सिन्धुभ्य:**) समुद्रेभ्यो नदीभ्यो वा (**कर्त्वम्**) कर्तुम्। अत्र **कृत्यार्थे तवै०** इति त्वन्प्रत्यय:। (**हवि:**) (**हवनीयम्**)॥ १८॥

अन्वय:-यस्मिन् व्यवहारे गाव: सिन्धुभ्यो देवीरप: पिबन्ति, ता नोऽस्माकं हवि: कर्त्वमहमुपह्वये॥ १८॥

भावार्थ:-सूर्य्यस्य किरणा यावज्जलं छित्त्वा वायुनाभित आकर्षति, तावदेव तस्मान्निवृत्य भूम्योषधी: प्राप्नोति, विद्वद्भिस्तावज्जलं पानस्नानशिल्पकार्यादिषु संयोज्य नानाविधानि सुखानि सम्पादनीयानि॥ १८॥

पदार्थ:-(**यत्र**) जिस व्यवहार में (**गाव:**) सूर्य की किरणें (**सिन्धुभ्य:**) समुद्र और नदियों से (**देवी:**) दिव्यगुणों को प्राप्त करने वाले (**अप:**) जलों को (**पिबन्ति**) पीती हैं, उन जलों को (**न:**) हम लोगों के (**हवि:**) हवन करने योग्य पदार्थों के (**कर्त्वम्**) उत्पन्न करने के लिये मैं (**उपह्वये**) अच्छे प्रकार स्वीकार करता हूं॥ १८॥

भावार्थ:-सूर्य की किरणें जितना जल छिन्न-भिन्न अर्थात् कण-कण कर वायु के संयोग से खैंचती हैं, उतना ही वहाँ से निवृत्त होकर भूमि और ओषधियों को प्राप्त होता है। विद्वान् लोगों को वह जल, पान, स्नान और शिल्पकार्य आदि में संयुक्त कर नाना प्रकार के सुख सम्पादन करने चाहिये॥ १८॥

पुनस्ता कीदृश्य इत्युपदिश्यते।

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

अ॒प्स्व॑१न्त॑रमृत॑म॒प्सु भे॑ष॒जम॒पामु॒त प्रश॑स्तये।

देवा॒ भव॑त वा॒जिन॑:॥ १९॥

अ॒प्ऽसु। अ॒न्त:। अ॒मृत॑म्। अ॒प्ऽसु। भे॒ष॒जम्। अ॒पाम्। उ॒त। प्रऽश॑स्तये। देवा॑:। भव॑त। वा॒जिन॑:॥ १९॥

पदार्थ:-(**अप्सु**) जलेषु (**अन्त:**) मध्ये (**अमृतम्**) मृत्युकारकरोगनिवारकं रसम् (**अप्सु**) जलेषु (**भेषजम्**) औषधम् (**अपाम्**) जलानाम् (**उत**) अप्यर्थे (**प्रशस्तये**) उत्कर्षाय (**देवा:**) विद्वांस: (**भवत**) स्त: (**वाजिन:**) प्रशस्तो बाधो येषामस्ति ते। अत्र प्रशंसार्थ इनि:। गत्यर्थाद्विज्ञानं गृह्यते॥ १९॥

अन्वयः-हे देवा विद्वांसो यूयं प्रशस्तयेऽप्स्वन्तरमृतमुताऽप्सु भेषजम् विदित्वाऽपां प्रयोगेण वाजिनो भवत॥१४॥

भावार्थः-हे मनुष्या! यूयममृतरसाभ्य ओषधिगर्भाभ्योऽद्भ्यः शिल्पवैद्यकविद्याभ्यां गुणान् विदित्वा शिल्पकार्य्यसिद्धिं रोगनिवारणं च नित्यं कुरुतेति॥१९॥

पदार्थः-हे **(देवाः)** विद्वानो! तुम **(प्रशस्तये)** अपनी उत्तमता के लिये **(अप्सु)** जलों के **(अन्तः)** भीतर जो **(अमृतम्)** मार डालने वाले रोग का निवारण करने वाला अमृतरूप रस **(उत)** तथा **(अप्सु)** जलों में **(भेषजम्)** औषध हैं, उनको जानकर **(अपाम्)** उन जलों की क्रियाकुशलता से **(वाजिनः)** उत्तम श्रेष्ठ ज्ञान वाले **(भवत)** हो जाओ॥१९॥

भावार्थः-हे मनुष्यो तुम अमृतरूपी रस वा ओषधि वाले जलों से शिल्प और वैद्यकशास्त्र की विद्या से उनके गुणों को जानकर कार्य्य की सिद्धि वा सब रोगों की निवृत्ति नित्य करो॥१९॥

पुनस्ता कीदृश्य इत्युपदिश्यते।

फिर वे जल किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।

अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः॥२०॥११॥

अप्ऽसु। मे। सोमः। अब्रवीत्। अन्तः। विश्वानि। भेषजा। अग्निम्। च। विश्वऽशंभुवम्। आपः। च। विश्वऽभेषजीः॥२०॥

पदार्थः-**(अप्सु)** जलेषु **(मे)** मह्यम् **(सोमः)** ओषधिराजश्चन्द्रमाः सोमलताख्यरसो वा **(अब्रवीत्)** ज्ञापयति। अत्र लडर्थे लुङन्तर्गतो ण्यर्थः प्रसिद्धीकरणं धात्वर्थश्च। **(अन्तः)** मध्ये **(विश्वानि)** सर्वाणि **(भेषजा)** औषधानि। अत्र **शेश्छन्दसि बहुलम्** इति लोपः **(अग्निम्)** विद्युदाख्यम् **(च)** समुच्चये **(विश्वशंभुवम्)** यः सर्वस्मै जगते शं सुखं भावयति प्रकटयति तम्। अत्रान्तर्गतो ण्यर्थः **क्विप् च** इति क्विप्। **(आपः)** जलानि **(च)** समुच्चये **(विश्वभेषजीः)** विश्वाः सर्वा भेषज्य ओषध्यो यासु ताः। अत्र **केवलमाम०** (अष्टा०४.१.३०) अनेन भेषजशब्दान्ङीप् प्रत्ययः॥२०॥

अन्वयः-यथाऽयं सोमो मे मह्यमप्स्वन्तर्विश्वानि भेषजौषधानि विश्वशंभुवमग्निं चाब्रवीज्ज्ञापयत्येवं विश्वभेषजीरापः स्वासु सोमाद्यानि विश्वानि भेषजौषधानि विश्वशंभुवमग्निं चाब्रुवन् ज्ञापयन्ति॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सर्वे पदार्थाः स्वगुणैः स्वान् प्रकाशयन्ति तथौषधिगणपुष्टिकारकश्चन्द्रमा ओषधिगणग्राह्याणीति प्रकाशयन्त्यः सर्वौषधिहेतव आपः स्वान्तर्गतं समस्तकल्याणहेतुं स्तनयित्नुं प्रकाशयन्त्यर्थात् जलगतमौषधनिमित्तजलगतमग्निनिमित्तं चास्तीति वेद्यम्॥२०॥

इति प्रथमाष्टके द्वितीयाध्याय एकादशो वर्गः॥ २०॥

पदार्थः-जैसे यह **(सोमः)** ओषधियों का राजा चन्द्रमा वा सोमलता **(मे)** मेरे लिये **(अप्सु)** जलों के **(अन्तः)** बीच में **(विश्वानि)** सब **(भेषजा)** ओषधि **(च)** तथा **(विश्वशंभुवम्)** सब जगत् के लिये सुख करने वाले **(अग्निम्)** बिजुली को **(अब्रवीत्)** प्रसिद्ध करता है, इसी प्रकार **(विश्वभेषजीः)** जिनके निमित्त से सब ओषधियाँ होती हैं, वे (आपः) जल भी अपने में उक्त सब ओषधियों और उक्त गुण वाले अग्नि को जानते हैं॥ २०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सब पदार्थ अपने गुणों से अपने-अपने स्वभावों और उनमें ओषधियों की पुष्टि कराने वाला चन्द्रमा और जो ओषधियों में मुख्य सोमलता है, ये दोनों जल के निमित्त और ग्रहण करने योग्य सब ओषधियों का प्रकाश करते हैं, वैसे सब ओषधियों के हेतु जल अपने अन्तर्गत समस्त सुखों का हेतु मेघ का प्रकाश और जो जलों में ओषधियों का निमित्त और जो जल में अग्नि का निमित्त है, ऐसा जानना चाहिये॥ २०॥

इति प्रथमाष्टके द्वितीयाध्याय एकादशो वर्गः॥

पुनस्ताः कीदृशा इत्युपदिश्यते।

फिर वे जल कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

आपः पृणीत भेषजं वरूथं तन्वे३ मम।

ज्योक् च सूर्यं दृशे॥ २१॥

आपः। पृणीत। भेषजम्। वरूथम्। तन्वे। मम। ज्योक्। च। सूर्यम्। दृशे॥ २१॥

पदार्थः-**(आपः)** आप्नुवन्ति व्याप्नुवन्ति सर्वान् पदार्थास्ते प्राणाः **(पृणीत)** पूरयन्ति। अत्र व्यत्ययो लडर्थे लोडन्तर्गतो ण्यर्थश्च। **(भेषजम्)** रोगनाशकव्यवहारम् **(वरूथम्)** वरं श्रेष्ठम्। अत्र **जृवृभ्यामूथन्।** (उणा०२.६) अनेन **'वृञ्'** धातोरूथन्प्रत्ययः। **(तन्वे)** शरीराय **(मम)** जीवस्य **(ज्योक्)** चिरार्थे **(च)** समुच्चये **(सूर्यम्)** सवितृलोकम् **(दृशे)** द्रष्टुम्। **दृशे विख्ये च।** (अष्टा०३.४.११) अनेनायं निपातितः॥ २१॥

अन्वयः-मनुष्यैर्या आपः प्राणाः सूर्यं दृशे द्रष्टुं ज्योक् चिरं जीवनाय मम तन्वे वरूथं भेषजं वृणीत प्रपूरयन्ति ता यथावदुपयोजनीयाः॥ २१॥

भावार्थः-नैव प्राणैर्विना कश्चित्प्राणी वृक्षादयश्च शरीरं धारयितुं शक्नुवन्ति, तस्मात् क्षुत्तृषादिरोगनिवारणार्थं परममौषधं युक्त्या प्राणसेवनमेवास्तीति बोध्यम्॥ ११॥

पदार्थः-मनुष्यों को योग्य है कि सब पदार्थों को व्याप्त होने वाले प्राण **(सूर्यम्)** सूर्यलोक के **(दृशे)** दिखलाने वा **(ज्योक्)** बहुत काल जिवाने के लिये **(मम)** मेरे **(तन्वे)** शरीर के लिये **(वरूथम्)**

श्रेष्ठ **(भेषजम्)** रोगनाश करने वाले व्यवहार को **(पृणीत)** परिपूर्णता से प्रकट कर देते हैं, उनका सेवन युक्ति ही से करना चाहिये॥ २१॥

भावार्थः-प्राणों के विना कोई प्राणी वा वृक्ष आदि पदार्थ बहुत काल शरीर धारण करने को समर्थ नहीं हो सकते, इससे क्षुधा और प्यास आदि रोगों के निवारण के लिये परम अर्थात् उत्तम से उत्तम औषधों को सेवने से योगयुक्ति से प्राणों का सेवन ही परम उत्तम है, ऐसा जानना चाहिये।

पुनस्ताः कीदृश्य इत्युपदिश्यते।

फिर वे जल किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

इ॒दमा॑प॒: प्र व॑हत॒ यत्किञ्च॑ दुरि॒तं मयि॑।
यद्वा॒हम॑भिदु॒द्रोह॒ यद्वा॑ शे॒प उ॒तानृ॑तम्॥ २२॥

इ॒दम्। आ॒प॒। प्र। व॒ह॒त॒। यत्। किञ्च॑। दुरितम्। मयि॑। यत्। वा॒। अ॒हम्। अ॒भि॒ऽदु॒द्रोह॑। यत्। वा॒। शे॒पे। उ॒त। अनृ॑तम्॥ २२॥

पदार्थः-(**इदम्**) आचरितम् (**आपः**) प्राणः (**प्र**) प्रकृष्टार्थे (**वहत**) वहन्ति। अत्र व्यत्ययो लडर्थे लोट् च। (**यत्**) यादृशम् (**किञ्च**) किंचिदपि (**दुरितम्**) दुष्टस्वभावानुष्ठानजनितं पापम् (**मयि**) कर्तरि जीवे (**यत्**) ईर्ष्याप्रचुरम् (**वा**) पक्षान्तरे (**अहम्**) कर्मकर्ताजीवः (**अभिदुद्रोह**) आभिमुख्येन द्रोहं कृतवान् (**यत्**) क्रोधप्रचुरम् (**वा**) पक्षान्तरे (**शेपे**) कंचित्साधुजनमाक्रुष्टवान् (**उत**) अपि (**अनृतम्**) असत्यमाचरणमानभाषणं कृतवान्॥ २२॥

अन्वयः-अहं यत्किंच मयि दुरितमस्ति यद्वा पुण्यमस्ति यच्चाहमभिदुद्रोह या मित्रत्वमाचरितवान् यद्वा कञ्चिच्छेपे वाऽनुगृहीतवान् यदनृतं वोत सत्यं चाचरितवानस्मि तत्सर्वमिदमापो मम प्राणा मया सह प्रवहत प्राप्नुवन्ति॥ २२॥

भावार्थः-मनुष्यैर्यादृशं पापं पुण्यं चाचर्य्यते तत्तदेवेश्वरव्यवस्थया प्राप्यत इति निश्चयः॥ २२॥

पदार्थः-मैं (**यत्**) जैसा (**किम्**) कुछ (**मयि**) कर्म का अनुष्ठान करने वाले मुझमें (**दुरितम्**) दुष्ट स्वभाव के अनुष्ठान से उत्पन्न हुआ पाप (**च**) वा श्रेष्ठता से उत्पन्न हुआ पुण्य (**वा**) अथवा (**यत्**) अत्यन्त क्रोध से (**अभिदुद्रोह**) प्रत्यक्ष किसी से द्रोह करता वा मित्रता करता (**वा**) अथवा (**यत**) जो कुछ अत्यन्त ईर्ष्या से किसी सज्जन को (**शेपे**) शाप देता वा किसी को कृपादृष्टि से चाहता हुआ जो (**अनृतम्**) झूंठ (**उत**) वा सत्य काम करता हूं (**इदम्**) सो यह सब आचरण किये हुए को (**आपः**) मेरे प्राण मेरे साथ होके (**प्रवहत**) अच्छे प्रकार प्राप्त होते हैं॥ २२॥

भावार्थः-मनुष्य लोग जैसा कुछ पाप वा पुण्य करते हैं, सो सो ईश्वर अपनी न्याय व्यवस्था से उनको प्राप्त कराता ही है॥ २२॥

पुनस्ताःकीदृश्य इत्युपदिश्यते।

फिर वे जल किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

आपो॑ अ॒द्यान्व॑चारिषꣳ॒ रस॑ेन॒ सम॑गस्महि।

पय॑स्वानग्न॒ आ ग॑हि॒ तं मा॒ सं सृ॑ज॒ वर्च॑सा॥ २३॥

आपः॑। अ॒द्य। अनु॑। अ॒चा॒रि॒ष॒म्। रस॑ेन। सम्। अ॒ग॒स्म॒हि॒। पय॑स्वान्। अ॒ग्ने॒। आ। ग॒हि॒। तम्। मा॒। सम्। सृ॒ज॒। वर्च॑सा॥ २३॥

पदार्थः-(**आपः**) जलानि (**अद्य**) अस्मिन् दिने। अत्र **सद्यः परुत्परार्य्यै०** (अष्टा०५.३.२२) अनेनायं निपातितः। (**अनु**) पश्चादर्थे (**अचारिषम्**) अनुतिष्ठामि। अत्र लडर्थे लुङ्। (**रसेन**) स्वाभाविकेन रसगुणेन सह वर्त्तमानाः (**सम्**) सम्यगर्थे (**अगस्महि**) सङ्गच्छामहे। अत्र लडर्थे लुङ्, **मन्त्रे घसह्वरणश०** इति च्लेर्लुक् वर्णव्यत्ययेन मकारस्थाने सकारादेशश्च। (**पयस्वान्**) रसवच्छरीरयुक्तो भूत्वा (**अग्ने**) अग्निभौतिकः (**आ**) समन्तात् (**गहि**) प्राप्नोति। अत्र व्यत्ययो लडर्थे लोट् **बहुलं छन्दसि** इति शपो लुक् च। (**तम्**) कर्मानुष्ठातारम् (**मा**) माम् (**सम्**) एकीभावे (**सृज**) सृजाति। अत्र व्यत्ययो लडर्थे लोट् च। (**वर्चसा**) दीप्त्या॥ २३॥

अन्वयः-वयं या रसेन युक्ता आपः सन्ति ताः समगस्महि, याभिरहं पयस्वान् यत्किंचिदन्वचारिषं कर्मानुचरामि, तदेव प्राप्नोमि योऽग्निर्जन्मान्तर आगहि प्राप्नोति, स पूर्वजन्मनि तमेव कर्मानुष्ठातारं मा मामद्य वर्चसा संसृज सम्यक् सृजति ताः स च युक्त्या समुपयोजनीयः॥ २३॥

भावार्थः-सर्वान् प्राणिनः पूर्वाचरितफलं वायुजलाग्न्यादिद्वाराऽस्मिञ्जन्मनि पुनर्जन्मनि वा प्राप्नोत्येवेति॥ २३॥

पदार्थः-हम लोग जो (**रसेन**) स्वाभाविक रसगुण संयुक्त (**आपः**) जल हैं, उनको (**समगस्महि**) अच्छे प्रकार प्राप्त होते हैं, जिनसे मैं (**पयस्वान्**) रसयुक्त शरीर वाला होकर जो कुछ (**अन्वचारिषम्**) विद्वानों के अनुचरण अर्थात् अनुकूल उत्तम काम करके उसको प्राप्त होता और जो यह (**अग्ने**) भौतिक अग्नि (**मा**) तुझको इस जन्म और जन्मान्तर अर्थात एक जन्म से दूसरे जन्म में (**आगहि**) प्राप्त होता है अर्थात् वही पिछले जन्म में (**तम्**) उसी कर्मों के नियम से पालने वाले (**मा**) मुझे (**अद्य**) आज वर्त्तमान भी (**वर्चसा**) दीप्ति (**संसृज**) सम्बन्ध कराता है, उन और उसको युक्ति से सेवन करना चाहिये॥ २३॥

भावार्थः-सब प्राणियों को पिछले जन्म में किये हुए पुण्य वा पाप का फल वायु जल और अग्नि आदि पदार्थों के द्वारा इस जन्म वा अगले जन्म में प्राप्त होता ही है॥ २३॥

सोऽग्निः कीदृश इत्युपदिश्यते।

वह अग्नि किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है-

सं मा॑ग्ने॒ वर्च॑सा सृज॒ सं प्र॒जया॒ समायु॑षा।

वि॒द्युर्मे॑ अस्य दे॒वा इन्द्रो॑ विद्यात् स॒ह ऋषि॑भिः॥ २४॥ १२॥ ५॥

सम्। मा॒। अ॒ग्ने॒। वर्च॑सा। सृ॒ज॒। सम्। प्र॒जया॑। सम्। आयु॑षा। विद्युः। मे॒। अ॒स्य॒। दे॒वाः। इन्द्रः॑। वि॒द्यात्। स॒ह। ऋषि॑ऽभिः॥ २४॥

पदार्थः-(**सम्**) योगार्थे (**मा**) माम् (**अग्ने**) विद्युदाख्यः (**वर्चसा**) दीप्त्या (**सृज**) सृजति। अत्र व्यत्ययो लडर्थे लोट् च। (**सम्**) मेलनार्थे (**प्रजया**) सन्तानादिना (**सम्**) एकीभावे (**आयुषा**) जीवनेन (**विद्युः**) विदन्ति। अत्र लडर्थे लिङ्। (**मे**) मम जीवस्य (**अस्य**) मनुष्यपशुवृक्षादिस्थस्य (**देवाः**) विद्वांसः (**इन्द्रः**) परमेश्वरः (**विद्यात्**) वेत्ति। अत्र लडर्थे लिङ्। (**सह**) सङ्गार्थे (**ऋषिभिः**) विचारशीलैर्मन्त्रार्थदृष्टिभिः॥ २४॥

अन्वयः-मनुष्यैर्ऋषिभिः सह देवाः विद्वांसः परमात्मा च यदग्ने अग्निर्वर्चसा प्रजयाऽऽयुषा मा मां सृजति संयुनक्ति, यन्मे मम पापपुण्यात्मकं कर्म जन्मनः कारणं विद्युर्विदन्ति विद्यात् वेत्ति च तस्मान्मया तत्सङ्गस्तदुपासना च नित्यं कार्य्या॥ २४॥

भावार्थः-यदा जीवः पूर्वं शरीरं त्यक्त्वोत्तरं प्राप्नोति तदा तेन सह यः स्वाभाविको मानसोऽग्निर्गच्छति स एव पुनः शरीरादिकं प्रकाशयति जीवानां यत्पापं पुण्यं च जन्मकारणमस्ति तदृषिसहिता विद्वांसो जानन्ति नेतरे, परमेश्वरस्तु खलु यथार्थतया सर्वं विदित्वा स्वस्वकर्मानुसारेण जीवान् शरीरसंयुक्तान् कृत्वा फलं भोजयतीति॥ २४॥

पूर्वसूक्तेनोक्तैरश्व्यादिभिर्वाय्वादीनामनुषङ्गीणामत्रोक्तत्वाद् द्वाविंशेनातीतेन सूक्तार्थेन सहास्य त्रयोविंशस्य सूक्तोक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति प्रथमाष्टके द्वितीयध्याये द्वादशो वर्गः प्रथममण्डले त्रयोविंशं सूक्तं पञ्चमोऽनुवाकश्च समाप्तः॥

पदार्थः-मनुष्यों को योग्य है कि जो (**ऋषिभिः**) वेदार्थ जानने वालों के (**सह**) साथ (**देवाः**) विद्वान् लोग और (**इन्द्रः**) परमात्मा (**अग्ने**) भौतिक अग्नि (**वर्चसा**) दीप्ति (**प्रजया**) सन्तान आदि पदार्थ और (**आयुषा**) जीवन से (**मा**) मुझे (**संसृज**) संयुक्त करता है उस और (**मे**) मेरे (**अस्य**) इस जन्म के कारण को जानते और (**विद्यात्**) जानता है, इससे उनका संग और उसकी उपासना नित्य करें॥ २४॥

भावार्थः-जब जीव पिछले शरीर को छोड़कर अगले शरीर को प्राप्त होता है, तब उसके साथ जो स्वाभाविक मानस अग्नि जाता है, वही फिर शरीर आदि पदार्थों को प्रकाशित करता है, जो जीवों के पाप-पुण्य और जन्म का कारण है, उसको वे (ऋषि और विद्वान्) ही परमेश्वर के सिवाय जानते हैं, किन्तु परमेश्वर तो निश्चय के साथ यथायोग्य जीवों के पाप वा पुण्य को जानकर, उनके कर्म के अनुसार शरीर देकर, सुख दुःख का भोग कराता ही है॥ २४॥

पूर्व सूक्त से कहे हुए अश्वि आदि पदार्थों के अनुषङ्गी जो वायु आदि पदार्थ हैं, उनके वर्णन से पिछले बाईसवें सूक्त के अर्थ के साथ इस तेईसवें सूक्त के अर्थ की सङ्गति जाननी चाहिये॥

१ मण्डल दूसरे २ अध्याय में १२ बारहवां वर्ग ५ पांचवां अनुवाक और यह तेईसवां सूक्त समाप्त हुआ॥

अथास्य पञ्चदशर्चस्य चतुर्विंशस्य सूक्तस्य आजीगर्त्तिः शुनःशेपः कृत्रिमो वैश्वामित्रो देवरातिर्ऋषिः। १ प्रजापतिः। २ अग्निः। ३-५ सविता भगो वा। ६-१५ वरुणश्च देवताः। १,२, ६-१५ त्रिष्टुप्। ३-५ गायत्रीछन्दः। १,२, ६-१५ धैवतः। ३-५ षड्जश्च स्वरौ॥

तत्रादिमेन प्रजापतिरुपदिश्यते।

अब चौबीसवें सूक्त का प्रारम्भ है। उसके पहिले मन्त्र में प्रजापति का प्रकाश किया है-

कस्य॑ नू॒नं क॑त॒मस्या॒मृता॑नां॒ मना॑महे॒ चारु॑ दे॒वस्य॒ नाम॑।
को नो॑ म॒ह्या अदि॑तये॒ पुनर्दात्पि॒तरं॑ च दृ॒शेयं॑ मा॒तरं॑ च॥ १॥

कस्य॑। नू॒नम्। क॒त॒मस्य॑। अ॒मृता॑नाम्। मना॑महे। चारु॑। दे॒वस्य॑। नाम॑। कः। नः॒। म॒ह्यै। अदि॑तये। पुनः॑। दा॒त्। पि॒तर॑म्। च॒। दृ॒शेय॑म्। मा॒तर॑म्। च॒॥ १॥

पदार्थः-(**कस्य**) कीदृशगुणस्य (**नूनम्**) निश्चयार्थे (**कतमस्य**) बहूनां मध्ये व्यापकस्यामृतस्याऽनादेरेकस्य (**अमृतानाम्**) उत्पत्तिविनाशरहितानां प्राप्तमोक्षाणां जीवानां (**मनामहे**) विजानीयाम्। अत्र प्रश्नार्थे लेट् व्यत्ययेन श्यनः स्थाने शप् च। (**चारु**) सुन्दरम् (**देवस्य**) प्रकाशमानस्य दातुः (**नाम**) प्रसिद्धार्थे (**कः**) सुखस्वरूपो देवः (**नः**) अस्मान् (**मह्यै**) महत्याम् (**अदितये**) कारणरूपेण नाशरहितायां पृथिव्याम्। **अदितिरिति पृथिवीनामसु पठितम्।** (निघं०१.१) अत्रोभयत्र सप्तम्यर्थे चतुर्थी। (**पुनः**) पश्चात् (**दात्**) ददाति। अत्र लडर्थे लङडभावश्च। (**पितरम्**) जनकम् (**च**) समुच्चये (**दृशेयम्**) दृश्यासम् इच्छां कुर्याम्। अत्र **दृशेरग्वक्तव्यः।** (अष्टा०३.१.८६) अनेन वार्त्तिकेनाशीर्लिङि दृशेरगविकरणेन रूपम्। (**मातरम्**) गर्भस्य धात्रीम् (**च**) पुनरर्थे॥ १॥

अन्वयः-वयं कस्य कतमस्य बहूनाममृतानामनादीनां प्राप्तमोक्षाणां जीवानां जगत्कारणानां नित्यानां मध्ये व्यापकस्यामृतस्यानादेरेकस्य पदार्थस्य देवस्य चारु नाम नूनं मनामहे कश्च देवो नः प्राप्तमोक्षानप्यस्मान् मह्या अदितये पुनर्दातु ददाति येनाहं पितरं मातरं च दृशेयम्॥ १॥

भावार्थः-अत्र प्रश्नः कोऽस्तीदृशः सनातनानां पदार्थानां मध्ये सनातनस्याविनाशिनोऽर्थोऽस्ति यस्यात्युत्कृष्टं नाम्नः स्मरेम जानीयाम? कश्चास्मिन् संसारेऽस्मभ्यं केन हेतुना मोक्षसुखभोगानन्तरं जन्मान्तरं सम्पादयति? कथं च वयमानन्दप्रदां मुक्तिं प्राप्य पुनर्मातापित्रोः सकाशात् पुनर्जन्मनि शरीरं धारयेमेति॥ १॥

पदार्थः-हम लोग (**कस्य**) कैसे गुण कर्म स्वभाव युक्त (**कतमस्य**) किस बहुतों (**अमृतानाम्**) उत्पत्ति विनाशरहित अनादि मोक्षप्राप्त जीवों और जो जगत् के कारण नित्य के मध्य में व्यापक अमृतस्वरूप अनादि तथा एक पदार्थ (**देवस्य**) प्रकाशमान सर्वोत्तम सुखों को देने वाले देव का निश्चय के साथ (**चारु**) सुन्दर (**नाम**) प्रसिद्ध नाम को (**मनामहे**) जानें कि जो (**नूनम्**) निश्चय करके (**कः**) कौन सुखस्वरूप देव (**नः**) मोक्ष को प्राप्त हुए भी हम लोगों को (**मह्यै**) बड़ी कारणरूप नाशरहित

(अदितये) पृथिवी के बीच में **(पुनः)** पुनर्जन्म **(दात)** देता है। जिससे कि हम लोग **(पितरम्)** पिता **(च)** और **(मातरम्)** माता **(च)** और स्त्री पुत्र बन्धु आदि को **(दृशेयम्)** देखने की इच्छा करें॥१॥

भावार्थः-इस मन्त्र में प्रश्न का विषय है कौन ऐसा पदार्थ है जो सनातन अर्थात् अविनाशी पदार्थों में भी सनातन अविनाशी है कि जिसका अत्यन्त उत्कर्ष युक्त नाम का स्मरण करें वा जानें? और कौन देव हम लोगों के लिये किस-किस हेतु से एक जन्म से दूसरे जन्म का सम्पादन करता? और अमृत वा आनन्द के कराने वाली मुक्ति को प्राप्त होकर भी फिर हम लोगों को माता-पिता से दूसरे जन्म में शरीर को धारण करता है॥१॥

एतयोः प्रश्नयोरुत्तरे उपदिश्येते।

इन प्रश्नों के उत्तर अगले मन्त्र में प्रकाशित किये हैं-

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम।
स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च॥२॥

अग्नेः। वयम्। प्रथमस्य। अमृतानाम्। मनामहे। चारु। देवस्य। नाम। सः। नः। मह्यै। अदितये। पुनः। दात्। पितरम्। च। दृशेयम्। मातरम्। च॥२॥

पदार्थः-(**अग्नेः**) यस्य ज्ञानस्वरूपस्य **(वयम्)** विद्वांसः सनातना जीवाः **(प्रथमस्य)** अनादिस्वरूपस्यैवाद्वितीयस्य परमेश्वरस्य **(अमृतानाम्)** विनाशधर्मरहितानां जगत्कारणानां वा प्राप्तमोक्षानां जीवनां मध्ये **(मनामहे)** विजानीयाम् **(चारु)** पवित्रम् **(देवस्य)** सर्वजगत्प्रकाशकस्य सृष्टौ सकलपदार्थानां दातुः **(नाम)** आह्वानम् **(सः)** जगदीश्वरः **(नः)** अस्मभ्यम् **(मह्यै)** महागुणविशिष्टायाम् **(अदितये)** पृथिव्याम् **(पुनः०)** इत्यारभ्य निरूपितपूर्वार्थानि पदानि विज्ञेयानि॥२॥

अन्वयः-वयं यस्याग्नेर्ज्ञानस्वरूपस्यामृतानां प्रथमस्यानादेर्देवस्य चारु नाम मनामहे, स एव नोऽस्मभ्यं मह्या अदितये पुनर्जन्म दात् ददाति, यतश्चाहं पुनः पितरं मातरं च स्त्रीपुत्रबन्ध्वादीनपि दृशेयं पश्येयम्॥२॥

भावार्थः-हे मनुष्या वयं यमनादिममृतं सर्वेषामस्माकं पापपुण्यानुसारेण फलव्यवस्थापकं जगदीश्वरं देवं निश्चिनुमः। यस्य न्यायव्यवस्थया पुनर्जन्मानि प्राप्नुमो यूयप्येतमेव देवं पुनर्जन्मदातारं विजानीत, न चैतस्मादन्यः कश्चिदर्थ एतत्कर्म कर्तुं शक्नोति। अयमेव मुक्तानामपि जीवानां महाकल्पान्ते पुनः पापपुण्यतुल्यतया पितरि मातरि च मनुष्यजन्म कारयतीति च॥२॥

पदार्थः-हम लोग जिस **(अग्ने)** ज्ञानस्वरूप **(अमृतानाम्)** विनाश धर्मरहित पदार्थ वा मोक्ष प्राप्त जीवों में **(प्रथमस्य)** अनादि विस्तृत अद्वितीय स्वरूप **(देवस्य)** सब जगत् के प्रकाश करने वा संसार में सब पदार्थों के देने वाले परमेश्वर का **(चारु)** पवित्र **(नाम)** गुणों का गान करना **(मनामहे)** जानते हैं,

(सः) वही **(नः)** हमको **(महौ)** बड़े-बड़े गुण वाली **(अदितये)** पृथिवी के बीच में **(पुनः)** फिर जन्म **(दात्)** देता है, जिससे हम लोग **(पुनः)** फिर **(पितरम्)** पिता **(च)** और **(मातरम्)** माता **(च)** और स्त्री-पुत्र-बन्धु आदि को **(दृशेयम्)** देखते हैं॥२॥

भावार्थः-हे मनुष्यो! हम लोग जिस अनादि स्वरूप सदा अमर रहने वा जो हम सब लोगों के किये हुए पाप और पुण्यों के अनुसार यथायोग्य सुख-दुःख फल देने वाले जगदीश्वर देव को निश्चय करते और जिसकी न्याययुक्त व्यवस्था से पुनर्जन्म को प्राप्त होते हैं, तुम लोग भी उसी देव को जानो, किन्तु इससे और कोई उक्त कर्म करने वाला नहीं है, ऐसा निश्चय हम लोगों को है कि वही मोक्षपदवी को पहुंचे हुए जीवों का भी महाकल्प के अन्त में फिर पाप-पुण्य की तुल्यता से पिता-माता और स्त्री आदि के बीच में मनुष्यजन्म धारण करता है॥२॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह जगदीश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है-

अ॒भि त्वा॑ देव सवित॒रीशा॑नं॒ वार्य्या॑णाम्।

सदा॑व॒न्भा॒गमी॑महे॥ ३॥

अ॒भि। त्वा॒। दे॒व॒। स॒वि॒तः॒। ईशा॑नम्। वार्य्या॑णाम्। सदा॑। अ॒व॒न्। भा॒गम्। ई॒म॒हे॒॥ ३॥

पदार्थः-(**अभि**) आभिमुख्ये **(त्वा)** त्वाम् **(देव)** सर्वानन्दप्रदेश्वर **(सवितः)** पृथिव्याद्युत्पादक **(ईशानम्)** विविधस्य जगत ईक्षणशीलम् **(वार्य्याणाम्)** स्वीकर्त्तुमर्हाणां पृथिव्यादिपदार्थानां **(सदा)** सर्वदा **(अवन्)** रक्षन् **(भागम्)** भजनीयम् **(ईमहे)** याचामहे॥३॥

अन्वयः-हे सवितरवन् देव जगदीश्वर! वयं वार्य्याणामीशानं भागं त्वा त्वां सदाऽभीमहे॥३॥

भावार्थः-मनुष्यैर्यः सर्वप्रकाशकः सकलजगदुत्पादकः सर्वरक्षको जगदीश्वरो देवोऽस्ति, स एव सर्वदोपासनीयः। नैवास्माद्भिन्नं कंचिदर्थमुपास्येश्वरोपासनाफलं प्राप्तुमर्हति, तस्मान्नैतस्येश्वरस्योपासना-विषये केनापि मनुष्येण कदाचिदन्योऽर्थो व्यस्थापनीय इति॥३॥

पदार्थः-हे **(सवितः)** पृथिवी आदि पदार्थों की उत्पत्ति वा **(अवन्)** रक्षा करने और **(देव)** सब आनन्द के देने वाले जगदीश्वर हम लोग **(वार्य्याणाम्)** स्वीकार करने योग्य पृथिवी आदि पदार्थों की **(ईशानम्)** यथायोग्य व्यवस्था करने **(भागम्)** सब के सेवा करने योग्य **(त्वा)** आपको **(सदा)** सब काल में **(अभि)** **(ईमहे)** प्रत्यक्ष याचते हैं अर्थात् आप ही से सब पदार्थों को प्राप्त होते हैं॥३॥

भावार्थः-मनुष्यों को योग्य है कि जो सब का प्रकाशक सकल जगत् को उत्पन्न वा सब की रक्षा करने वाले जगदीश्वर है, वही सब समय में उपासना करने योग्य है, क्योंकि इसको छोड़ के अन्य किसी की उपासना करके ईश्वर की उपासना का फल चाहे तो कभी नहीं हो सकता, इससे इसकी उपासना के विषय में कोई भी मनुष्य किसी दूसरे पदार्थ का स्थापन कभी न करे॥३॥

पुनः स एवार्थ उपदिश्यते।

फिर भी अगले मन्त्र में परमेश्वर ने अपना ही प्रकाश किया है-

यश्चिद्धि त॑ इ॒त्था भग॑: शशमा॒नः पु॒रा नि॒दः।

अ॒द्वेषो हस्त॑योर्दधे॥ ४॥

यः। चि॒त्। हि। ते॒। इ॒त्था। भग॑:। शशमा॒नः। पु॒रा। नि॒दः। अ॒द्वेषः। हस्त॑योः। द॒धे॥ ४॥

पदार्थः-(**यः**) धनसमूहः (**चित्**) सत्कारार्थे अप्यर्थे वा (**हि**) खलु (**ते**) तव (**इत्था**) अनेन हेतुना (**भगः**) सेवितुमर्हो धनसमूहः (**शशमानः**) स्तोतुमर्हः (**पुरा**) पूर्वम् (**निदः**) निन्दकः। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति नकारलोपः। (**अद्वेषः**) अविद्यमानो द्वेषो यस्मिन् सः (**हस्तयोः**) करयोरामलकमिव कर्मफलम् (**दधे**) धारये॥ ४॥

अन्वयः-हे जीव! यथाऽद्वेषोहमीश्वर इत्था सुखहेतुना यः शशमानो भगोऽस्ति, तं सुकर्मणस्ते हस्तयोरामलकमिव दधे, यश्च निदोऽस्ति तस्य हस्तयोः सकाशादिवैतत्सुखं च विनाशये॥ ४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कार। यथाऽहमीश्वरो निन्दकाय मनुष्याय दुःखं यः कश्चित्सृष्टौ धर्मानुसारेण वर्त्तते, तस्मै सुखविज्ञाने प्रयच्छामि, तथैव सर्वैर्युष्माभिरपि कर्त्तव्यमिति॥ ४॥

पदार्थः-हे जीव जैसे (**अद्वेषः**) सब से मित्रतापूर्वक वर्तने वाला द्वेषादि दोषरहित मैं ईश्वर (**इत्था**) इस प्रकार सुख के लिये (**यः**) जो (**शशमानः**) स्तुति (**भगः**) और स्वीकार करने योग्य धन है, उसको (**ते**) तेरे धर्मात्मा के लिये (**हि**) निश्चय करके (**हस्तयोः**) हाथों में आमले का फल वैसे धर्म के साथ प्रशंसनीय धन को (**दधे**) धारण करता हूं और जो (**निदः**) सब की निन्दा करनेहारा है, उसके लिये उस धन समूह का विनाश कर देता हूं, वैसे तुम लोग भी किया करो॥ ४॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। जैसे मैं ईश्वर सब के निन्दक मनुष्य के लिये दुःख और स्तुति करने वाले के लिये सुख देता हूं, वैसे तुम भी सदा किया करो॥ ४॥

पुनः स एवार्थ उपदिश्यते।

फिर भी अगले मन्त्र में परमेश्वर ही का प्रकाश किया है-

भग॑भक्तस्य ते व॒यमुद॑शेम॒ तवाव॑सा।

मू॒र्द्धानं॑ रा॒य आ॒रभे॑॥ ५॥ १३॥

भग॑ऽभक्तस्य। ते॒। व॒यम्। उत्। अ॒शे॒म॒। तव॑। अव॑सा। मू॒र्द्धान॑म्। रा॒यः। आ॒ऽरभे॑॥ ५॥

पदार्थः-(**भगभक्तस्य**) भगाः सर्वैः सेवनीया भक्ता येन तस्य (**ते**) तव जगदीश्वरस्य (**वयम्**) ऐश्वर्य्यमिच्छुकाः (**उत्**) उत्कृष्टार्थे (**अशेम**) व्याप्नुयाम। **वा छन्दसि सर्वे विधयो भवन्ति** इति

नियमाच्छपः स्थाने श्नुर्न। **(तव)** **(अवसा)** रक्षणेन **(मूर्द्धानम्)** उत्कृष्टभागम् **(रायः)** धनसमूहस्य **(आरभे)** आरब्धव्ये व्यवहारे। अत्र **कृत्यार्थे तवैकेन्केन्यत्वनः** (अष्टा०३.४.१४) अनेन **'रभ'** धातोः केन् प्रत्ययः॥५॥

अन्वयः-हे परात्मन्! भगभक्तस्य ते तव कीर्त्तिं यतो वयमुदशेम तस्मात्तवावसा रायो मूर्द्धानं प्राप्यारभ आरब्धव्ये व्यवहारे नित्यं प्रवर्त्तामहे॥५॥

भावार्थः-येऽनुष्ठाननेनेश्वराज्ञां व्याप्नुवन्ति त एवेश्वरात् सर्वतो रक्षणं प्राप्य सर्वेषां मनुष्याणां मध्य उत्तमैश्वर्य्या भूत्वा प्रशसां प्राप्नुवन्ति, कुतः? स एवेश्वरः स्वस्वकर्मानुसारेण जीवेभ्यः फलं विभज्य ददात्यतः॥५॥

पदार्थः-हे जगदीश्वर जिससे हम लोग **(भगभक्तस्य)** जो सब के सेवने योग्य पदार्थों का यथा योग्य विभाग करने वाले **(ते)** आपकी कीर्त्ति को **(उदशेम)** अत्यन्त उन्नति के साथ व्याप्त हों कि उसमें **(तव)** आपकी **(अवसा)** रक्षणादि कृपादृष्टि से **(रायः)** अत्यन्त धन के **(मूर्द्धानम्)** उत्तम से उत्तम भाग को प्राप्त होकर **(आरभे)** आरम्भ करने योग्य व्यवहारों में नित्य प्रवृत्त हों अर्थात् उसकी प्राप्ति के लिये नित्य प्रयत्न कर सकें॥५॥

भावार्थः-जो मनुष्य अपने क्रिया कर्म से ईश्वर की आज्ञा में प्राप्त होते हैं, वही उससे रक्षा को सब प्रकार से प्राप्त और सब मनुष्यों में उत्तम ऐश्वर्य वाले होकर प्रशंसा को प्राप्त होते हैं, क्योंकि वही ईश्वर जीवों को उनके कर्मों के अनुसार न्याय व्यवस्था से विभाग कर फल देता है इससे॥५॥

पुनस्स कीदृश इत्युपदिश्यते।

पुनः वह ईश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है-

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम्॥६॥

नहि। ते। क्षत्रम्। न। सहः। न। मन्युम्। वयः। चन। अमी इति। पतयन्तः। आपुः। न। इमाः। आपः। अनिऽमिषम्। चरन्तीः। न। ये। वातस्य। प्रऽमिनन्ति। अभ्वम्॥६॥

पदार्थः-**(नहि)** निषेधे **(ते)** तव सर्वेश्वरस्य **(क्षत्रम्)** अखण्डं राज्यम् **(न)** निषेधार्थे **(सहः)** बलम् **(न)** निषेधार्थे **(मन्युम्)** दुष्टान् प्राणिनः प्रति यः क्रोधस्तम् **(वयः)** पक्षिणः **(चन)** कदाचित् **(अमी)** पक्षिसमूहा दृश्यादृश्याः सर्वे लोका वा **(पतयन्तः)** इतस्ततश्चलन्तः सन्तः **(आपुः)** प्राप्नुवन्ति अत्र वर्त्तमाने लडर्थे लिट्। **(न)** निषेधार्थे **(इमाः)** प्रत्यक्षाप्रत्यक्षाः **(आपः)** जलानि प्राणा वा **(अनिमिषम्)** निरन्तरम् **(चलन्तीः)** चरन्त्यः **(न)** निषेधे **(ये)** वेगाः **(वातस्य)** वायोः **(प्रमिनन्ति)** परिमातुं शक्नुवन्ति **(अभ्वम्)** सत्तानिषेधम्। अत्र **'भू'** धातोः क्विप् ततश्**छन्दस्युभयथा।** (अष्टा०६.४.८६ इत्यभिपरे यणादेशः॥६॥

अन्वयः-हे जगदीश्वर ते तव क्षत्रं पतयन्तः सन्तोऽमी लोका लोकान्तरानापुर्न व्याप्नुवन्ति न वयश्च न सहो न मन्युं च व्याप्नुवन्ति नेमा अनिमिषं चरन्त्य आपस्तव सामर्थ्यं प्रमिनन्ति, ये वातस्य वेगास्तेऽपि तव सत्तां न प्रमिनन्त्यर्थान्नेमे सर्वे पदार्थास्तवाभ्वम्-सत्तानिषेधं च कर्त्तुं शक्नुवन्ति॥६॥

भावार्थः-ईश्वरस्यानन्तसामर्थ्यवत्त्वान्नैतं कश्चिदपि परिमातुं हिंसितुं वा शक्नोति। इमे सर्वे लोकाश्चरन्ति नैतेषु चलत्सु जगदीश्वरश्चलति तस्य पूर्णत्वात् नैतस्माद्भिन्नेनोपासितेनार्थेन कस्यचिज्जीवस्य पूर्णमखण्डितं राज्यं भवितुमर्हति। तस्मात् सर्वै र्मनुष्यैरयं जगदीश्वरोऽप्रमेयोऽविनाशी सदोपास्यो वर्त्तते इति बोध्यम्॥६॥

पदार्थः-हे जगदीश्वर **(क्षत्रम्)** अखण्ड राज्य को **(पतयन्तः)** इधर-उधर चलायमान होते हुए **(अमी)** ये लोक-लोकान्तर **(न)** नहीं **(आपुः)** व्याप्त होते हैं और न **(वयः)** पक्षी भी **(न)** नहीं **(सहः)** बल को **(न)** नहीं **(मन्युम्)** जो कि दुष्टों पर क्रोध है, उसको भी **(न)** नहीं व्याप्त होते हैं **(न)** नहीं ये **(अनिमिषम्)** निरन्तर **(चरन्तीः)** बहने वाले **(आपः)** जल वा प्राण आपके सामर्थ्य को **(प्रमिनन्ति)** परिमाण कर सकते और **(ये)** जो **(वातस्य)** वायु के वेग हैं, वे भी आपकी सत्ता का परिमाण **(न)** नहीं कर सकते। इसी प्रकार और भी सब पदार्थ आपकी **(अभ्वम्)** सत्ता का निषेध भी नहीं कर सकते॥६॥

भावार्थः-ईश्वर के अनन्त सामर्थ्य होने से उसका परिमाण वा उसकी बराबरी कोई भी नहीं कर सकता है। ये सब लोक चलते हैं, परन्तु लोकों के चलने से उनमें व्याप्त ईश्वर नहीं चलता, क्योंकि जो सब जगह पूर्ण है, वह कभी चलेगा? इस ईश्वर की उपासना को छोड़ कर किसी जीव का पूर्ण अखण्डित राज्य वा सुख कभी नहीं हो सकता। इससे सब मनुष्यों को प्रमेय वा विनाश रहित परमेश्वर की सदा उपासना करनी योग्य है॥५॥

अथ वायुसवितृगुणा उपदिश्यन्ते।

अब अगले मन्त्र में वायु और सविता के गुण प्रकाशित करते हैं-

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः॥७॥

अबुध्ने। राजा। वरुणः। वनस्य। ऊर्ध्वम्। स्तूपम्। ददते। पूतऽदक्षः। नीचीनाः। स्थुः। उपरि। बुध्नः। एषाम्। अस्मे इति। अन्तः। निऽहिताः। केतवः। स्युरिति स्युः॥७॥

पदार्थः-**(अबुध्ने)** अन्तरिक्षासादृश्ये स्थूलपदार्थे। **बुध्नमन्तरिक्षं बद्धा अस्मिन् धृता आप इति।** (निरु०१०.४४) **(राजा)** यो राजते प्रकाशते। अत्र **कनिन्युवृषितक्षि०** (उणा०१.१५४) अनेन कनिन्प्रत्ययः। **(वरुणः)** श्रेष्ठः **(वनस्य)** वननीयस्य संसारस्य **(ऊर्ध्वम्)** उपरि **(स्तूपम्)** किरणसमूहम्। **स्तूपः स्त्यायतेः संघातः।** (निरु०१०.३३) **(ददते)** ददाति **(पूतदक्षः)** पूतं पवित्रं दक्षो बलं यस्य सः

(नीचीनाः) अर्वाचीना अधस्थाः **(स्थुः)** तिष्ठन्ति। अत्र लडर्थे लुङ्डभावश्च। **(उपरि)** ऊर्ध्वम् **(बुध्नः)** बद्धा आपो यस्मिन् स बुध्नो मेघः। **बुध्न इति मेघनामसु पठितम्।** (निघं०१.१२) **(एषाम्)** जगत्स्थानां पदार्थानाम् **(अस्मे)** अस्मासु। अत्र **सुपां सुलुग्०** इति सप्तमीस्थाने शे आदेशः **(अन्तः)** मध्ये **(निहिताः)** स्थिताः **(केतवः)** किरणाः प्रज्ञानानि वा **(स्युः)** सन्ति। अत्र लडर्थे लिङ्॥७॥

अन्वयः-हे मनुष्या! यूयं यः पूतदक्षो राजा वरुणो जलसमूहस्सविता वा बुध्ने वनस्योर्ध्वं स्तूपं ददते यस्य नीचीनाः केतव एषामुपरि स्थुस्तिष्ठन्ति पदान्तर्निहिता आप स्युस्सन्ति यदन्तःस्थो बुध्नश्च ते केतवोऽस्मेऽस्मास्वन्तर्निहिताश्च भवन्तीति विजानीत॥७॥

भावार्थः-न चैवायं सूर्य्यो रूपरहितेनान्तरिक्षं प्रकाशयितुं शक्नोति तस्माद्यान्यस्योपर्य्यधःस्थानि ज्योतींषि सन्ति, तान्येव मेघस्य निमित्तानि ये जलपरमाणवः किरणस्थाः सन्ति, यथा नैव तेऽतीन्द्रियत्वाद् दृश्यन्त एवं वाय्वग्निपृथिव्यादीनामपि सूक्ष्मा अवयवा अन्तरिक्षस्था वर्त्तमाना अपि न दृश्यन्त इति॥७॥

पदार्थः-हे मनुष्यो तुम जो **(पूतदक्षः)** पवित्र बल वाला **(राजा)** प्रकाशमान **(वरुणः)** श्रेष्ठ जलसमूह वा सूर्य्यलोक **(अबुध्ने)** अन्तरिक्ष से पृथक् असदृश्य बड़े आकाश में **(वनस्य)** जो कि व्यवहारों के सेवने योग्य संसार है, जो **(ऊर्ध्वम्)** उस पर **(स्तूपम्)** अपनी किरणों को **(ददते)** छोड़ता है, जिसकी **(नीचीनाः)** नीचे को गिरते हुए **(केतवः)** किरणें **(एषाम्)** इन संसार के पदार्थों **(उपरि)** पर **(स्थुः)** ठहरती हैं **(अन्तर्हिताः)** जो उनके बीच में जल और **(बुध्नः)** मेघादि पदार्थ **(स्युः)** हैं और जो **(केतवः)** किरणें वा प्रज्ञान **(अस्मे)** हम लोगों में **(निहिताः)** स्थिर **(स्युः)** होते हैं, उनको यथावत् जानो॥७॥

भावार्थः-जिससे यह सूर्य्य रूप के न होने से अन्तरिक्ष का प्रकाश नहीं कर सकता, इससे जो ऊपरली वा बिचली किरणें हैं, वे ही मेघ की निमित्त हैं, जो उनमें जल के परमाणु रहते तो हैं, परन्तु वे अतिसूक्ष्मता के कारण दृष्टिगोचर नहीं होते। इसी प्रकार वायु अग्नि और पृथिवी आदि के भी अतिसूक्ष्म अवयव अन्तरिक्ष में रहते तो अवश्य हैं, परन्तु वे भी दृष्टिगोचर नहीं होते॥७॥

इदानीं वरुणशब्देनात्मवाय्वोर्गुणोपदेशः क्रियते।

अब अगले मन्त्र में वरुण शब्द से आत्मा और वायु के गुणों का प्रकाश करते हैं-

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्॥८॥

उरुम्। हि। राजा। वरुणः। चकार। सूर्य्याय। पन्थाम्। अनु। एतवै। ऊम्। इति। अपदे। पादा। प्रतिऽधातवे। अकः उत। अपऽवक्ता। हृदयाऽविधः। चित्॥८॥

पदार्थः-(**उरुम्**) विस्तीर्णम् **(हि)** चार्थे **(राजा)** प्रकाशमानः परमेश्वरः प्रकाशहेतुर्वा **(वरुणः)** वरः श्रेष्ठतमो जगदीश्वरो वरत्वहेतुर्वायुर्वा **(चकार)** कृतवान् **(सूर्याय)** सूर्यस्य। अत्र **चतुर्थ्यर्थे बहुलं**

छन्दसि। (अष्टा०२.३.६२) अनेन षष्ठीस्थाने चतुर्थी। **(पन्थाम्)** मार्गम्। अत्र **छान्दसो वर्णलोपो वे**ति नकारलोपः। **(अनु)** अनुकूलार्थे **(एतवै)** एतुं गन्तुम्। अत्रेणधातोः **कृत्यार्थे तवैके०** अनेन तवै प्रत्ययः। **(उ)** वितर्के **(अपदे)** न विद्यन्ते पदानि चिह्नानि यस्मिन् तस्मिन्नन्तरिक्षे **(पादा)** पद्यन्ते गम्यन्ते याभ्यां गमनागमनाभ्यां तौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(प्रतिधातवे)** प्रतिधातुम्। अत्र **तुमर्थे सेसेन०** अनेन तवेन्प्रत्ययः। **(अकः)** कृतवान्। अत्र **मन्त्रे घसह्वरण०** इति च्लेर्लुक्। **(उत)** अपि **(अपवक्ता)** विरुद्धवक्ता वाचयिता वाऽस्ति तस्य **(हृदयाविधः)** हृदयं विध्यति तस्याधर्मस्याधार्मिकस्य शत्रोर्वा। अत्र **नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।** (अष्टा०६.६.११६) अनेन दीर्घः। **(चित्)** इव॥८॥

अन्वयः-हृदयाविधोऽपवक्ताऽपवाचयिता शत्रुरस्ति तस्य चिदिव यौ वरुणौ राजा जगद्धाता जगदीश्वरो वायुर्वा सूर्याय सूर्यस्यान्वेतव उरुं पन्थां चकारोताप्यपदे पादा प्रतिधातवे सूर्य्यमक उ इति वितर्के सर्वस्यैतद्विधत्ते स सर्वैरुपासनीय उपयोजनीयो वास्तीति निश्चेतव्यम्॥८॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। यः परमेश्वरः खलु यस्य महतः सूर्यलोकस्य भ्रमणार्थं महतीं कक्षां निर्मितवान् यो वायुनेन्धनेन प्रदीप्यते, य इमे सर्वे लोका अन्तरिक्षपरिधयः सन्ति, न च कस्याचिल्लोकस्य केनचिल्लोकान्तरेण सह सङ्गोऽस्ति, किन्तु सर्वेऽन्तरिक्षस्थाः सन्तः स्वं स्वं परिधिं प्रति परिभ्रमन्त्येते सर्वे यस्येश्वरस्य वायोर्वाकर्षणधारणाभ्यां स्वं स्वं परिधिं विहायेतस्ततश्चलितुं न शक्नुवन्ति, नैव यस्मात् कश्चिदन्य एषां धर्ताऽर्थोऽस्ति, यथा परमेश्वरोऽधार्मिकस्य वक्तुर्हृदयस्य विदारकोऽस्ति तथा प्राणोऽपि रोगाविष्टो हृदयस्य विदारकोऽस्ति, स सर्वैर्मनुष्यैः कथं नोपासनीय उपयोजनीयो भवेदिति बोध्यम्॥८॥

पदार्थः-(**चित्**) जैसे **(अपवक्ता)** मिथ्यावादी छली दुष्ट स्वभावयुक्त पराये पदार्थ **(हृदयाविधः)** अन्याय से परपीड़ा करने हारे शत्रु को दृढ़ बन्धनों से वश में रखते हैं, वैसे जो **(वरुणः)** **(राजा)** अतिश्रेष्ठ और प्रकाशमान परमेश्वर वा श्रेष्ठता और प्रकाश का हेतु वायु **(सूर्याय)** सूर्य के **(अन्वेतवै)** गमनागमन के लिये **(उरुम्)** विस्तारयुक्त **(पन्थाम्)** मार्ग को **(चकार)** सिद्ध करते **(उत)** और **(अपदे)** जिसके कुछ भी चाक्षुष चिह्न नहीं है, उस अन्तरिक्ष में **(प्रतिधातवे)** धारण करने के लिये सूर्य के **(पादा)** जिनसे जाना-आना बने, उन गमन और आगमन गुणों को **(अकः)** सिद्ध करते हैं **(उ)** और जो परमात्मा सब का धर्त्ता **(हि)** और वायु इस काम के सिद्ध कराने का हेतु है, उसकी सब मनुष्य उपासना और प्राण का उपयोग क्यों न करें॥८॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। जिस परमेश्वर ने निश्चय के साथ जिस सब से बड़े सूर्य लोक के लिये बड़ी-सी कक्षा अर्थात् उसके घूमने का मार्ग बनाया है, जो इसको वायुरूपी ईंधन से प्रदीप्त करता और जो सब लोक अन्तरिक्ष में अपनी-अपनी परिधियुक्त हैं कि किसी लोक का किसी लोकान्तर के साथ संग नहीं है, किन्तु सब अन्तरिक्ष में ठहरे हुए अपनी-अपनी परिधि पर चारों

और घूमा करते हैं और को आपस में जिस ईश्वर और वायु के आकर्षण और धारणशक्ति से अपनी-अपनी परिधि को छोड़कर इधर-उधर चलने को समर्थ नहीं हो सकते तथा जिस परमेश्वर और वायु के विना अन्य कोई भी इनका धारण करने वाला नहीं है, जैसे परमेश्वर मिथ्यावादी अधर्म करने वाले से पृथक् है, वैसे प्राण भी हृदय के विदीर्ण करने वाले रोग से अलग है, उसकी उपासना वा कार्य्यों में योजना सब मनुष्य क्यों न करें॥८॥

अथ यौ राजप्रजापुरुषौ स्तस्तौ कीदृशौ भवेतामित्युपदिश्यते।

अब जो राजा और प्रजा के मनुष्य हैं, वे किस प्रकार के हों, इस विषय का उपदेश अगले मन्त्र में किया है-

शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु।
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत्॥९॥

शतम्। ते। राजन्। भिषजः। सहस्रम्। उर्वी। गभीरा। सुऽमतिः। ते। अस्तु। बाधस्व। दूरे। निःऽऋतिम्। पराचैः। कृतम्। चित्। एनः। प्र। मुमुग्धि। अस्मत्॥९॥

पदार्थः-(**शतम्**) असंख्यातान्यौषधानि (**ते**) तव राज्ञः प्रजापुरुषस्य वा (**राजन्**) प्रकाशमान (**भिषजः**) सर्वरोगनिवारकस्य वैद्यस्य (**सहस्रम्**) असंख्याता (**उर्वी**) विस्तीर्णा भूमिः (**गभीराः**) अगाधा (**सुमतिः**) शोभना चासौ मतिर्विज्ञानं यस्य सः (**ते**) तव। अत्र **युष्मत्तत्ततक्षु०** (अष्टा०८.३.१०३) अनेन मूर्द्धन्यादेशः (**अस्तु**) भवतु (**बाधस्व**) दुष्टशत्रून् दोषान् वा निवारय (**दूरे**) विप्रकृष्टे (**निर्ऋतिम्**) भूमिम्। **निर्ऋतिरिति पृथिवीनामसु पठितम्।** (निघं०१.१) (**पराचैः**) धर्मात् पराङ्मुखैः। अत्र **बहुलं छन्दसि** इति भिस ऐस्भावः कृतः (**कृतम्**) आचरितम् (**चित्**) एव (**एनः**) पापम् (**प्र**) प्रकृष्टार्थे (**मुमुग्धि**) त्यज मोचय वा। अत्र **बहुलं छन्दसि** इति शपःश्लु। (**अस्मत्**) अस्माकं सकाशात्॥९॥

अन्वयः-हे राजन् प्रजाजन वा! यस्य भिषजस्ते तव शतमौषधानि सहस्रसंख्याता गम्भीरोर्वी भूमिरस्ति, तां त्वं सुमतिर्भूत्वा निर्ऋतिं भूमिं रक्ष, दुष्टस्वभावं प्राणिनं दुष्कर्मणः प्रमुमुग्धि, यत्पराचैः कृतमेनोऽस्ति तदस्मद्दूरे रक्षैतान् पराचो दुष्टान् स्वस्वकर्मानुसारफलदानेन बाधस्वास्मान् शत्रुचोरदस्युभयाख्यात् पापात् प्रमुमुग्धि सम्यग् विमोचय॥९॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्यौ राजप्रजाजनौ पापसर्वरोगनिवारकौ पृथिव्याधारकावुत्कृष्टबुद्धिप्रदातारौ धार्मिकेभ्यो बलप्रदानेन दुष्टानां बाधनहेतूभवतस्तावेव नित्यं सङ्गन्तव्यौ नैव कस्यचित् पापं भोगेन विना निवर्त्तते, किन्तु यद्भूतवर्त्तमानभविष्यत्काले च पापं कृतवान् करोति करिष्यति वा तन्निवारणार्थाः खलु प्रार्थनोपदेशपुरुशषार्था भवन्तीति वेदितव्यम्॥९॥

पदार्थः-(**राजन्**) हे प्रकाशमान प्रजाध्यक्ष प्रजाजन वा जिस (**भिषजः**) सर्व रोग निवारण करने वाले (**ते**) आपकी (**शतम्**) असंख्यात औषधि और (**सहस्रम्**) असंख्यात (**गभीरा**) गहरी (**उर्वी**)

विस्तारयुक्त भूमि है, उस **(निर्ऋतिम्)** भूमि की **(त्वम्)** आप **(सुमतिः)** उत्तम बुद्धिमान् होके रक्षा करो, जो दुष्ट स्वभावयुक्त प्राणी को **(प्रमुमुग्धि)** दुष्ट कर्मों को छुड़ादे और जो **(पराचैः)** धर्म से अलग होने वालों ने **(कृतम्)** किया हुआ **(एनः)** पाप है, उसको **(अस्मत्)** हम लोगों से **(दूरे)** दूर रखिये और उन दुष्टों को उनके कर्म के अनुकूल फल देकर आप **(बाधस्व)** उनकी ताड़ना और हम लोगों के दोषों को भी निवारण किया कीजिये॥९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को जानना चाहिये कि जो सभाध्यक्ष और प्रजा के उत्तम मनुष्य पाप वा सर्वरोग निवारण और पृथिवी के धारण करने, अत्यन्त बुद्धि बल देकर दुष्टों को दण्ड दिलवाने वाले होते हैं, वे ही सेवा के योग्य हैं और यह भी जानना कि किसी का किया हुआ पाप भोग के विना निवृत्त नहीं होता और इसके निवारण के लिये कुछ परमेश्वर की प्रार्थना वा अपना पुरुषार्थ करना भी योग्य ही है, किन्तु यह तो है जो कर्म जीव वर्त्तमान में करता वा करेगा, उसकी निवृत्ति के लिये तो परमेश्वर की प्रार्थना वा उपदेश भी होता है॥९॥

य उपरि लोका दृश्यन्ते ते कस्योपरि सन्ति केन धार्यन्त इत्युपदिश्यते॥

जो लोक अन्तरिक्ष में दिखाई पड़ते हैं, वे किस के ऊपर वा किसने धारण किये हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति॥१०॥१४॥

अमी इति। ये। ऋक्षाः। निऽहितासः। उच्चाः। नक्तम्। ददृश्रे। कुह। चित्। दिवा। ईयुः। अदब्धानि। वरुणस्य। व्रतानि। विऽचाकशत्। चन्द्रमाः। नक्तम्। एति॥१०॥

पदार्थः-(**अमी**) दृश्यादृश्याः (**ऋक्षाः**) सूर्याचन्द्रनक्षत्रादिलोकाः। **ऋक्षास्त्रिभिरिति नक्षत्राणाम्।** (निरु०३.२०) (**निहितासः**) ईश्वरेण स्थापिताः। अत्र **आज्जसरेसुग्** इत्यसुक्। (**उच्चाः**) ऊर्ध्वं स्थिताः (**नक्तम्**) रात्रौ (**ददृश्रे**) दृश्यन्ते। अत्र दृशेर्लिटि। **इरयो रे** (अष्टा०६.४.७६) इति सूत्रेणस्य सिद्धिः। (**कुह**) क्व। अत्र **वा ह च छन्दसि।** (अष्टा०५.३.१३) अनेन किमो हः प्रत्ययः। **कुतिहोः।** (अष्टा०७.२.१०४) इति कुरादेशश्च। (**चित्**) वितर्के (**दिवा**) दिवसे (**ईयुः**) यान्ति। अत्र लडर्थे लिट्। (**अदब्धानि**) अहिंसनीयानि (**वरुणस्य**) जगदीश्वरस्य सूर्यस्य वा (**व्रतानि**) कर्माणि नियमा वा (**विचाकशत्**) विशिष्टतया प्रकाशमानः (**चन्द्रमाः**) चन्द्रलोकः (**नक्तम्**) रात्रौ (**एति**) प्रकाशं प्राप्नोति॥१०॥

अन्वयः-वयं पृच्छामोऽमी य उच्चा केन निहितास ऋक्षा नक्तं न ददृश्रे ते दिवा कुह चिदीयुरिति। यानि वरुणस्य परमेश्वरस्य सूर्यस्य वा अदब्धानि व्रतानि यैर्नक्तं विचाकशत् संश्चन्द्रमाः-चन्द्रादिनक्षत्रसमूह एति प्रकाशं प्राप्नोति, स रचयिता स च प्रकाशयितास्तीत्युत्तरम्॥१०॥

भावार्थः-अत्र श्लेषालङ्कारः। अत्र पूर्वार्द्धेन प्रश्न उत्तरार्द्धेन समाधानं कृतमस्ति, यदा कश्चित् कंचित् प्रति पृच्छेदिमे नक्षत्रलोकाः केन रचिताः केन धारिता रात्रौ दृश्यन्ते दिवसे न दृश्यन्त एते क्व गच्छन्ति तदैतस्यौत्तरमेवं दद्यात्, येनेमे सर्वे लोका वरुणेनेश्वरेण रचिता धारिताः सन्ति। एतेषां मध्ये स्वतः प्रकाशो नास्ति, किन्तु सूर्यस्यैव प्रकाशेन प्रकाशिता भवन्ति, नैवैते क्वापि गच्छन्ति, किन्तु दिवस आव्रियमाणा न दृश्यन्ते, रात्रौ च सूर्यकिरणैः प्रकाशमाना दृश्यन्ते, तान्येतानि धन्यवादार्हाणि कर्माणि परमेश्वरस्यैव सन्तीति वेद्यम्॥१०॥

इति १४ वर्गः॥

पदार्थः-हम पूछते हैं कि जो ये **(अमी)** प्रत्यक्ष और अप्रत्यक्ष **(ऋक्षाः)** सूर्य्यचन्द्रतारकादि नक्षत्र लोक किसने **(उच्चाः)** ऊपर को ठहरे हुए **(निहितासः)** यथायोग्य अपनी-अपनी कक्षा में ठहराये हैं, क्यों ये **(नक्तम्)** रात्रि में **(ददृश्रे)** देख पड़ते हैं और **(दिवा)** दिन में **(कुहचित्)** कहाँ **(ईयुः)** जाते हैं। इन प्रश्नों के उत्तर-जो **(वरुणस्य)** परमेश्वर वा सूर्य के **(अदब्धानि)** हिंसारहित **(व्रतानि)** नियम वा कर्म हैं कि जिनसे ये ऊपर ठहरे हैं **(नक्तम्)** रात्रि में **(विचाकशत्)** अच्छे प्रकार प्रकाशमान होते हैं, ये कहीं नहीं जाते न आते हैं, किन्तु आकाश के बीच में रहते हैं **(चन्द्रमाः)** चन्द्र आदि लोक **(एति)** अपनी-अपनी दृष्टि के सामने आते और दिन में सूर्य्य के प्रकाश वा किसी लोक की आड़ से नहीं दीखते हैं, ये प्रश्नों के उत्तर हैं॥१०॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है तथा इस मन्त्र के पहिले भाग से प्रश्न और पिछले भाग से उनका उत्तर जानना चाहिये कि जब कोई किसी से पूछे कि ये नक्षत्र लोक अर्थात् तारागण किसने बनाये और किसने धारण किये हैं और रात्रि में दीखते तथा दिन में कहाँ जाते हैं, इनके उत्तर ये हैं कि ये सब ईश्वर ने बनाये और धारण किये हैं, इनमें आपही प्रकाश नहीं किन्तु सूर्य्य के ही प्रकाश से प्रकाशमान होते हैं और ये कहीं नहीं जाते, किन्तु दिन में ढपे हुए दीखते नहीं और रात्रि में सूर्य की किरणों से प्रकाशमान होकर दीखते हैं, ये सब धन्यवाद देने योग्य ईश्वर के ही कर्म हैं, ऐसा सब सज्जनों को जानना चाहिये॥२०॥

पुनः स वरुणः कीदृश इत्युपदिश्यते॥

फिर वह वरुण कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा॑स्ते॒ यज॑मानो॒ हवि॑र्भिः।
अहे॑ळमानो॒ वरु॑णे॒ह बो॒ध्यु॒रु॒शंस॒ मा न॒ आयुः॒ प्र मो॑षीः॥११॥

तत्। त्वा। यामि। ब्रह्मणा। वन्दमानः। तत्। आ। शास्ते। यजमानः। हविःऽभिः। अहेळमानः। वरुणः। इह। बोधि। उरुऽशंस। मा। नः। आयुः। प्र। मोषीः॥ ११॥

पदार्थः-(**तत्**) सुखम् (**त्वा**) त्वां वरुणं प्राप्तुं तं सूर्यं वा (**यामि**) प्राप्नोमि (**ब्रह्मणा**) वेदेन (**वन्दमानः**) स्तुवन्नभिगायन् (**तत्**) सुखम् (**आ**) अभितः (**शास्ते**) इच्छति (**यजमानः**) त्रिविधस्य यज्ञस्यानुष्ठाता (**हविर्भिः**) हवनादिभिः साधनैः (**अहेळमानः**) अनादरमकुर्वाणः (**वरुण**) जगदीश्वर वायुर्वा। (**इह**) अस्मिन् संसारे (**बोधि**) विदितो भव विदितगुणो वा भवति। अत्र लोडर्थे लडर्थे च लुङडभावश्च। (**उरुशंस**) बहुभिः शस्यते यस्तत्सम्बुद्धौ पक्षे सूर्यो वा (**मा**) निषेधार्थे (**नः**) अस्माकम् (**आयुः**) वयः (**प्र**) प्रकृष्टार्थे (**मोषीः**) नाशय विनाशयेद्वा। अत्र लोडर्थे लिङर्थे च लुङडभावोऽन्तर्गतो ण्यर्थश्च॥ ११॥

अन्वयः-हे उरुशंस वरुण! यं त्वामाश्रित्य यजमानो हविर्भिस्तदाशास्ते, तं त्वा ब्रह्मणा वन्दमानोऽहेळमानोऽहं यामि कृपया त्वं मह्यमिह बोधि विदितो भव, नोऽस्माकमायुर्मा प्रमोषीरित्येकः॥ १॥ ११॥

तत्सुखमिच्छन् यजमानो यमुरुशंसं वरुणमाशास्ते, यं ब्रह्मणा वन्दमानोऽहेडमान-स्तत्सुखमिच्छन्नहं यामि प्राप्नोमि, स उरुशंसो वरुणोऽस्माभिर्बोधि विदितो भवतु, यतोऽयं नोऽस्माकमायुर्मा प्रमोषीर्मा विनाशयेदिति द्वितीयः॥ ११॥

भावार्थः-मनुष्यैर्वेदोक्तरीत्या परमेश्वरं सूर्यं च विज्ञाय सुखं प्राप्तव्यम्। नैव केनचित् परमेश्वरोऽनादरणीयः सूर्यविद्या च सर्वदेश्वराज्ञापालनं तत्सृष्टपदार्थानां गुणान् विदित्वोपस्कृत्य चायुषोवृद्धिर्नित्यं कर्तव्येति॥ २॥ ११॥

पदार्थः-हे (**उरुशंस**) सर्वथा प्रशंसनीय (**वरुण**) जगदीश्वर जिस (**त्वा**) आपका आश्रय लेके (**यजमानः**) उक्त तीन प्रकार यज्ञ करने वाला विद्वान् (**हविर्भिः**) होम आदि साधनों से (**तत्**) अत्यन्त सुख की (**आशास्ते**) आशा करता है, उन आप को (**ब्रह्मणा**) वेद से स्मरण और अभिवादन तथा (**अहेळमानः**) आपका अनादर अर्थात् अपमान नहीं करता हुआ मैं (**यामि**) आपको प्राप्त होता हूं, आप कृपा करके मुझे (**इह**) इस संसार में (**बोधि**) बोधयुक्त कीजिये और (**नः**) हमारी (**आयुः**) उमर (**मा**) (**प्रमोषीः**) मत व्यर्थ खोइये अर्थात् अति शीघ्र मेरे आत्मा को प्रकाशित कीजिये॥ १॥ १॥

(**तत्**) सुख की इच्छा करता हुआ (**यजमानः**) तीन प्रकार के यज्ञ का अनुष्ठान करने वाला जिस (**उरुशंस**) अत्यन्त प्रशंसनीय (**वरुण**) सूर्य को (**आशास्ते**) चाहता है (**त्वा**) उस सूर्य्य को (**ब्रह्मणा**) वेदोक्त क्रियाकुशलता से (**वन्दमानः**) स्मरण करता हुआ (**अहेळमानः**) किन्तु उसके गुणों को न भूलता और (**इह**) इस संसार में (**तत्**) उक्त सुख की इच्छा करता हुआ मैं (**यामि**) प्राप्त होता हूं कि जिससे

यह **(उरुशंस)** अत्यन्त प्रशंसनीय सूर्य्य हमको **(बोधि)** विदित होकर **(नः)** हम लोगों की **(आयुः)** उमर **(मा) (प्रमोषीः)** न नष्ट करे अर्थात् अच्छे प्रकार बढ़ावे॥२॥११॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को वेदोक्त रीति से परमेश्वर और सूर्य को जानकर सुखों को प्राप्त होना चाहिये और किसी मनुष्य को परमेश्वर वा सूर्य विद्या का अनादर न करना चाहिये, सर्वदा ईश्वर की आज्ञा का पालन और उसके रचे हुए जो कि सूर्यादिक पदार्थ हैं, उनके गुणों को जानकर उनसे उपकार लेके अपनी उमर निरन्तर बढ़ानी चाहिये॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह वरुण कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

तदिन्नक्तं॒ तद्दिवा॒ मह्यमाहु॒स्तदु॒यं केतो॑ हृ॒द आ वि च॑ष्टे।
शुन॒ःशेपो॒ यमह्व॑द् गृभी॒तः सो अ॒स्मान् राजा॒ वरु॑णो मुमोक्तु॥१२॥

तत्। इत्। नक्त॑म्। तत्। दिवा॑। मह्य॑म्। आहुः। तत्। अ॒यम्। केतः॑। हृ॒दः। आ। वि। च॒ष्टे। शुन॒ःऽशेपः॑। यम्। अह्व॑त्। गृ॒भी॒तः। सः। अ॒स्मान्। राजा॑। वरु॑णः। मु॒मो॒क्तु॒॥१२॥

पदार्थः-(**तत्**) वेदबोधसहितं विज्ञानम् (**इत्**) एव (**नक्तम्**) रात्रौ (**तत्**) शास्त्रबोधयुक्तम् (**दिवा**) दिवसे (**मह्यम्**) विद्याधनमिच्छवे (**आहुः**) कथयन्ति (**तत्**) गुणदोषविवेचकः। अत्र **सुपां सुलुग्०** इति विभक्तेर्लुक्। (**अयम्**) प्रत्यक्षः (**केतः**) प्रज्ञाविशेषो बोधः। **केत इति प्रज्ञानामसु पठितम्।** (निघं०३.४) (**हृदः**) मनसा महात्मनो मध्ये (**आ**) सर्वतः (**वि**) विविधार्थे (**चष्टे**) प्रकाशयति। अत्रान्तर्गतो ण्यर्थः। (**शुनःशेपः**) शुनो विज्ञानवत इव शेपो विद्यास्पर्शो यस्य सः। **श्वा शुयायी शवतेर्वा स्याद् गतिकर्मणः।** (निरु०३.१८) **शेपः शपतेः स्पृशतिकर्मणः।** (निरु०३.२१) (**यम्**) परमेश्वरं सूर्यं वा (**अह्वत्**) आह्वयति। अत्र लडर्थे लुङ्। (**गृभीतः**) गृहीतः। **हृग्रहोर्भश्छन्दसि हस्य भत्वम्।** अनेनात्रः हस्य भः (**सः**) पूर्वोक्तो वेदविद्याभ्यासोत्पन्नो बोधः (**अस्मान्**) पुरुषार्थिनो धार्मिकान् (**राजा**) प्रकाशमानः (**वरुणः**) वरः (**मुमोक्तु**) मोचयति वा। अत्रान्त्यपक्षे लडर्थे लोट् **बहुलं छन्दसि** इति शपः श्लुरन्तर्गतो ण्यर्थश्च॥१२॥

अन्वयः-विद्वांसो यन्नक्तं दिवाऽहर्निशं ज्ञानमाहुर्यश्च मह्यं हृदः केत आविचष्टे तत्तमहं मन्ये वदामि करोमि वा। यं शुनःशेपो विद्वानह्वत् येन वरुणो राजाऽस्मान् पापाद्दुःखाच्च मुमोक्तु मोचयति वा सम्यग्विदितः उपयुक्तः सन्नीश्वरः सूर्य्योऽपि तदा दारिद्र्यं नाशयति योऽस्माभिर्गृहीत उपास्य उपकृतश्च॥१२॥

भावार्थः-अत्र श्लेषालङ्कारः। सर्वैर्मनुष्यैरेवमुपदेष्टव्यं मन्तव्यं च विद्वांसो वेदा ईश्वरश्च मह्यं यं बोधमुपदिशन्ति, य चाहं शुद्धया प्रज्ञया निश्चिनोमि तमेव मया सर्वैर्युष्माभिश्च स्वीकृत्य पापाचरणाद्दूरे स्थातव्यम्॥१२॥

पदार्थः-विद्वान् लोग **(नक्तम्)** रात **(दिवा)** दिन जिस ज्ञान का **(आहुः)** उपदेश करते हैं **(तत्)** उस और जो **(मह्यम्)** विद्या धन की इच्छा करने वाले मेरे लिये **(हृदः)** मन के साथ आत्मा के बीच में **(केतः)** उत्तम बोध **(आविचष्टे)** सब प्रकार से सत्य प्रकाशित होता है **(तदित्)** उसी वेद बोध अर्थात् विज्ञान को मैं मानता कहता और करता हूं **(यम्)** जिस को **(शुनःशेपः)** अत्यन्त ज्ञान वाले विद्या व्यवहार के लिये प्राप्त और परमेश्वर वा सूर्य्य का **(अह्वत्)** उपदेश करते हैं, जिससे **(वरुणः)** श्रेष्ठ **(राजा)** प्रकाशमान परमेश्वर हमारी उपासना को प्राप्त होकर छुड़ावे और उक्त सूर्य्य भी अच्छे प्रकार जाना और क्रिया कुशलता में युक्त किया हुआ बोध **(मह्यम्)** विद्या धन की इच्छा करने वाले मुझ को प्राप्त होता है **(सः)** हम लोगों को योग्य है कि उस ईश्वर की उपासना और सूर्य्य का उपयोग यथावत् किया करें॥१२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। सब मनुष्यों को इस प्रकार उपदेश करना तथा मानना चाहिये कि विद्वान् वेद और ईश्वर हमारे लिये जिस ज्ञान का उपदेश करते हैं तथा हम जो अपनी शुद्ध बुद्धि से निश्चय करते हैं, वही मुझ को और हे मनुष्य! तुम सब लोगों को स्वीकार करके पाप अधर्म करने से दूर रक्खा करे॥१२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह वरुण कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

शुनःशेपो ह्यह्वद् गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः।
अवैनं राजा वरुणः ससृज्याद् विद्वाँ अदब्धो वि मुमोक्तु पाशान्॥१३॥

शुनःशेपः। हि। अह्वत्। गृभीतः। त्रिषु। आदित्यम्। द्रुऽपदेषु। बद्धः। अव। एनम्। राजा। वरुणः। ससृज्यात्। विद्वान्। अदब्धः। वि। मुमोक्तु पाशान्॥१३॥

पदार्थः-**(शुनःशेपः)** उक्तार्थो विद्वान् **(हि)** निश्चयार्थे **(अह्वत्)** आह्वयति। अत्र लडर्थे लङ्। **(गृभीतः)** स्वीकृतः **हृग्रहोः०** इति हस्य भः **(त्रिषु)** कर्मोपासनाज्ञानेषु **(आदित्यम्)** विनाशरहितं परमेश्वरं प्रकाशमयं व्यवहारहेतुं प्राणं वा **(द्रुपदेषु)** द्रूणां वृक्षादीनां पदानि फलादिप्राप्तिनिमित्तानि येषु तेषु **(बद्धः)** नियमेन नियोजितः **(अव)** पृथक्करणे **(एनम्)** पूर्वप्रतिपादितं विद्वांसम् **(राजा)** प्रकाशमानः **(वरुणः)** श्रेष्ठतमः। उत्तमव्यवहारहेतुर्वा **(ससृज्यात्)** पुनः पुनर्निष्पद्येत निष्पादयेद्वा। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति नियमात्। **रुग्रिकौ च लुकि।** (अष्टा०७.४.९१) इत्यभ्यासस्य रुग्रिगागमौ न भवतः। **दीर्घोऽकितः।** (अष्टा०७.४.८३) इति दीर्घादेशश्च न भवति। **(विद्वान्)** ज्ञानवान् **(अदब्धः)** हिंसितुमनर्हः **(वि)** विशिष्टार्थे **(मुमोक्तु)** मुञ्चतु मोचयतु वा। अत्र **बहुलं छन्दसि** इति शपःश्लुरन्तर्गतो ण्यर्थो वा **(पाशान्)** अधर्माचरणजन्यबन्धान्॥१३॥

अन्वयः-हे मनुष्या यूयं शुनःशेपो विद्वान् त्रिषु यमादित्यमह्वत् सोऽस्माभिर्हि गृभीतः संस्त्रीणि कर्मोपासनाज्ञानानि प्रकाशयति, यश्च विद्वद्भिर्द्रुपदेषु बद्धो वायुलोको गृह्यते तथा सोऽस्माभिरपि ग्राह्यो यादृशगुणपदार्थादब्धो विद्वान् वरुणो राजा परमेश्वरोऽवससृज्यात् सोऽस्माभिस्तादृशगुण एवोपयोक्तव्यः। हे भगवन्! भवानस्माकं पाशान् विमुमोक्तु। एवमस्माभिस्संसारस्थः सूर्यादिपदार्थसमूहः सम्यगुपयोजितः सन् पाशान् सर्वान् दारिद्र्यबन्धान् पुनः पुनर्विमोचयति तथैतत्सर्वं कुरुत॥१३॥

भावार्थः-अत्रापि श्लेषोऽलङ्कारः लुप्तोपमा च। मनुष्यैर्यथेश्वरो यं पदार्थं यादृशगुणं निर्मितवांस्तथैव तद्गुणान् बुद्धवा कर्मोपासनाज्ञानानि तेषु नियोजितव्यानि यथा परमेश्वरो न्याय्यं कर्म करोति, तथैवास्माभिरप्यनुष्ठातव्यम्। यानि पापात्मकानि बन्धकराणि कर्माणि सन्ति, तानि दूरतस्त्यक्त्वा पुण्यात्मकानि सदा सेवनीयानि चेति॥१३॥

पदार्थः-जैसे **(शुनःशेपः)** उक्त गुणवाला विद्वान् **(त्रिषु)** कर्म उपासना और ज्ञान में **(आदित्यम्)** अविनाशी परमेश्वर का **(अह्वत्)** आह्वान करता है, वह हम लोगों ने **(गृभीतः)** स्वीकार किया हुआ उक्त तीनों कर्म उपासना और ज्ञान को प्रकाशित कराता है और जो **(द्रुपदेषु)** क्रिया कुशलता की सिद्धि के लिये विमान आदि यानों के खंभों में **(बद्धः)** नियम से युक्त किया हुआ वायु ग्रहण किया है, वैसे वह लोगों को भी ग्रहण करना चाहिये जैसे-जैसे गुणवाले पदार्थ को **(अदब्धः)** अति प्रशंसनीय **(वरुणः)** अत्यन्त श्रेष्ठ **(राजा)** और प्रकाशमान परमेश्वर **(अवससृज्यात्)** पृथक्-पृथक् बनाकर सिद्ध करे, वह हम लोगों को भी वैसे ही गुणवाले कामों में संयुक्त करे। हे भगवन्! परमेश्वर आप हमारे **(पाशान्)** बन्धनों को **(विमुमोक्तु)** बार-बार छुड़वाइये। इसी प्रकार हम लोगों की क्रियाकुशलता में संयुक्त किये हुए प्राण आदि पदार्थ **(पाशान्)** सकल दरिद्ररूपी बन्धनों को **(विमुमोक्तु)** बार-बार छुड़वा देवें वा देते हैं॥१३॥

भावार्थः-इस मन्त्र में भी लुप्तोपमा और श्लेषालङ्कार है। परमेश्वर ने जिस-जिस गुण वाले जो-जो पदार्थ बनाये हैं, उन-उन पदार्थों के गुणों को यथावत् जानकर इन-इन को कर्म उपासना और ज्ञान में नियुक्त करे, जैसे परमेश्वर न्याय अर्थात् न्याययुक्त कर्म करता है, वैसे ही हम लोगों को भी कर्म नियम के साथ नियुक्त कर जो बन्धनों के करने वाले पापात्मक कर्म हैं, उनको दूर ही से छोड़कर पुण्यरूप कर्मों का सदा सेवन करना चाहिये॥१३॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह वरुण कैसा है, इस का उपदेश अगले मन्त्र में किया है॥

अव॑ ते॒ हेळो॑ वरुण॒ नमो॑भि॒रव॑ य॒ज्ञेभि॑रीमहे ह॒विर्भिः॑।
क्षय॑न्न॒स्मभ्य॒मसुर प्रचेता॒ राज॒न्नेनां॑सि शिश्रथः कृ॒तानि॑॥१४॥

अव। ते। हेळः। वरुण। नमःऽभिः। अव। यज्ञेभिः। ईमहे। हविःऽभिः। क्षयन्। अस्मभ्यम्। असुरः। प्रचेत इति प्रऽचेतः। राजन्। एनांसि। शिश्रथः। कृतानि॥ १४॥

पदार्थः-(**अव**) क्रियार्थे (**ते**) तव (**हेळः**) हिड्यते विज्ञायते प्राप्यते यः सः (**नमोभिः**) नमस्कारैरन्नैर्जलैर्वा। **नम इत्यन्ननामसु पठितम्।** (निघं०२.७) **जलनामसु वा।** (निघं०१.१२) (**अव**) पृथगर्थे (**यज्ञेभिः**) कर्मोपासनाज्ञाननिष्पादकैः कर्मभिः। अत्र **बहुलं छन्दसि** इति भिस ऐस् न। (**ईमहे**) बुध्यामहे (**हविर्भिः**) दातुं ग्रहीतुमर्हैः। अत्र **अर्चिशुचिहुसृपि०** (उणा०२.१०४) अनेन हु धातोरिसिः प्रत्ययः। (**क्षयन्**) विनाशयन् (**अस्मभ्यम्**) विद्यानुष्ठातृभ्यः (**असुर**) असुषु रमते तत्सम्बुद्धौ स वा (**प्रचेतः**) प्रकृष्टं चेतो विज्ञानं यस्य तत्सम्बुद्धौ स वा (**राजन्**) प्रकाशमान (**एनांसि**) पापानि (**शिश्रथः**) विज्ञानदानेन शिथिलानि करोतु (**कृतानि**) अनुचरितानि॥ १४॥

अन्वयः-हे राजन् प्रचेतोऽसुर वरुणास्मभ्यं विज्ञानप्रदातो भगवन् यतस्त्वमस्मत्कृतान्येनांसि क्षयन् सन्नवशिश्रथस्तस्माद्वयं नमोभिर्यज्ञेभिस्ते तव हेळोऽवेमहे मुख्यप्राणस्य वा॥ १४॥

भावार्थः-यैर्मनुष्यैर्यथा परमेश्वररचितसृष्टौ विज्ञापितेन बोधेन कृतानि पापकर्माणि फलैः शिथिलायन्ते तथानुष्ठातव्यम्। यथा ज्ञानरहितं पुरुषं कर्मफलानि पीडयन्ति तथा नैव ज्ञानसहितं पीडयितुं समर्थानि भवन्तीति वेद्यम्॥ १४॥

पदार्थः-हे (**राजन्**) प्रकाशमान (**प्रचेतः**) अत्युत्तम विज्ञान (**असुर**) प्राणों में रमने (**वरुण**) अत्यन्त प्रशंसनीय (**अस्मभ्यम्**) हमको विज्ञान देनेहारे भगवन् जगदीश्वर जिसलिये हम लोगों के (**कृतानि**) किये हुए (**एनांसि**) पापों को (**क्षयन्**) विनाश करते हुए (**अवशिश्रथः**) विज्ञान आदि दान से उनके फलों को शिथिल अच्छे प्रकार करते हैं, इसलिये हम लोग (**नमोभिः**) नमस्कार वा (**यज्ञेभिः**) कर्म उपासना और ज्ञान और (**हविर्भिः**) होम करने योग्य अच्छे-अच्छे पदार्थों से (**ते**) आपका (**हेळः**) निरादर (**अव**) न कभी (**ईमहे**) करना जानते और मुख्य प्राण की भी विद्या को चाहते हैं॥ १४॥

भावार्थः-जिन मनुष्यों ने परमेश्वर के रचे हुए संसार में पदार्थ करके प्रकट किये हुए बोध से किये पाप कर्मों को फलों से शिथिल कर दिया वैसा अनुष्ठान करें। जैसे अज्ञानी पुरुष को पापफल दुःखी करते हैं, वैसे ज्ञानी पुरुष को दुःख नहीं दे सकते॥ १४॥

पुनः स एवार्थ उपदिश्यते।

फिर भी अगले मन्त्र में वरुण शब्द ही का प्रकाश किया है॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ १५॥ १५॥

उत्। उत्ऽउत्तमम्। वरुण। पाशम्। अस्मत्। अव। अधमम्। वि। मध्यमम्। श्रथाय। अथ। वयम्। आदित्य। व्रते। तव। अनागसः। अदितये। स्याम॥ १५॥

पदार्थः-(**उत्**) अपि (**उत्तमम्**) उत्कृष्टं दृढम् (**वरुण**) स्वीकर्त्तुमर्हेश्वर (**पाशम्**) बन्धनम् (**अस्मत्**) अस्माकं सकाशात् (**अव**) क्रियार्थे (**अधमम्**) निकृष्टम् (**वि**) विशेषार्थे (**मध्यमम्**) उत्तमाधमयोर्मध्यस्थम् (**श्रथाय**) शिथिली कुरु। अत्र **छन्दसि शायजपि।** (अष्टा०३.१.८४) अनेन शायजादेशः। (**अथ**) अनन्तरार्थे। अत्र **निपातस्य च** इति दीर्घः। (**वयम्**) मनुष्यादयः प्राणिनः (**आदित्य**) विनाशरहित (**व्रते**) सत्याचरणादावचरिते सति (**तव**) सत्योपदेष्टुस्सर्वगुरोः (**अनागसः**) अविद्यमान आगोऽपराधो येषां ते (**अदितये**) अखण्डितसुखाय (**स्याम**) भवेम॥ १५॥

अन्वयः-हे वरुण! त्वमस्मदधमं मध्यममुदुत्तमं पाशं व्यवश्रथाय दूरतो विनाशयाथेत्यनन्तरं हे आदित्य! तव व्रत आचरिते सत्यनागसः सन्तो वयमदितये स्याम भवेम॥ १५॥

भावार्थः-य ईश्वराज्ञां यथावत्पालयन्ति ते पवित्रास्सन्तः सर्वेभ्यो दुःखबन्धनेभ्यः पृथग्भूत्वा नित्यं सुखं प्राप्नुवन्ति नेतर इति॥ १५॥

त्रयोविंशसूक्तोक्तार्थानां वाय्वादीनामनुयोगिनां प्राजापत्यादीनामर्थानामत्र कथनादेतस्य चतुर्विंशस्य पूर्वसूक्तार्थेन सह सङ्गतिं रस्तीति बोध्यम्॥

इति प्रथमाष्टके द्वितीयाध्याये पञ्चदशो वर्गः॥

प्रथम मण्डले षष्ठेऽनुवाके चतुर्विंशं सूक्तं च समाप्तिमगमत्॥

पदार्थः-हे (**वरुण**) स्वीकार करने योग्य ईश्वर! आप (**अस्मत्**) हम लोगों से (**अधमम्**) निकृष्ट (**मध्यमम्**) अर्थात् निकृष्ट से कुछ विशेष (**उत्**) और (**उत्तमम्**) अति दृढ़ अत्यन्त दुःख देने वाले (**पाशम्**) बन्धन को (**व्यवश्रथाय**) अच्छे प्रकार नष्ट कीजिये (**अथ**) इसके अनन्तर हे (**आदित्य**) विनाशरहित जगदीश्वर (**तव**) उपदेश करने वाले सब के गुरु आपके (**व्रते**) सत्याचरणरूपी व्रत को करके (**अनागसः**) निरपराधी होके हम लोग (**अदितये**) अखण्ड अर्थात् विनाशरहित सुख के लिये (**स्याम**) नियत होवें॥ १५॥

भावार्थः-जो ईश्वर की आज्ञा को यथावत् नित्य पालन करते हैं, वे ही पवित्र और सब दुःख बन्धनों से अलग होकर सुखों को निरन्तर प्राप्त होते हैं॥ १५॥

तेईसवें सूक्त के कहे हुए वायु आदि अर्थों के अनुकूल प्रजापति आदि अर्थों के कहने से इस चौबीसवें सूक्त की उक्त सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

प्रथमाष्टक के प्रथमाध्याय में यह १५ पन्द्रहवां वर्ग तथा प्रथम मण्डल के षष्ठानुवाक में चौबीसवां सूक्त समाप्त हुआ॥ २४॥

अथैकविंशत्यृचस्य पञ्चविंशस्य सूक्तस्याजीगर्त्तिः शुनःशेप ऋषिः। वरुणो देवता। गायत्री छन्दः। षड्जः स्वरः॥

तत्रादौ प्रथममन्त्रे दृष्टान्तेन जगदीश्वरस्य प्रार्थना प्रकाश्यते॥

अब पच्चीसवें सूक्त का प्रारम्भ है। उसके पहिले मन्त्र में परमेश्वर ने दृष्टान्त के साथ अपनी प्रार्थना का प्रकाश किया है॥

यच्चि॒द्धि ते॒ विशो॑ यथा॒ प्र दे॑व वरुण व्र॒तम्।
मि॒नी॒मसि॒ द्यवि॑द्यवि॥ १॥

यत्। चि॒त्। हि। ते॒। विशः॑। य॒था॒। प्र। दे॒व॒। व॒रु॒ण॒। व्र॒तम्। मि॒नी॒मसि॑। द्यवि॑ऽद्यवि॥ १॥

पदार्थः-(**यत्**) स्पष्टार्थः (**चित्**) अपि (**हि**) कदाचिदर्थे (**ते**) तव (**विशः**) प्रजाः (**यथा**) येन प्रकारेण (**प्र**) क्रियायोगे (**देव**) सुखप्रद (**वरुण**) सर्वोत्कृष्ट जगदीश्वर (**व्रतम्**) सत्याचरणम् (**मिनीमसि**) हिंस्मः। अत्र **इदन्तो मसि** इति मसेरिदागमः। (**द्यविद्यवि**) प्रतिदिनम्। अत्र वीप्सायां द्विर्वचनम्। **द्यविद्यवीत्यहर्नामसु पठितम्।** (निघं०१.९)॥१॥

अन्वयः-हे देव वरुण जगदीश्वर! त्वं यथाऽज्ञानात्कस्यचिद्राज्ञो मनुष्यस्य वा विशः प्रजाः सन्तानादयो वा द्यविद्यव्यपराध्यन्ति कदाचित्कार्याणि हिंसन्ति स तन्न्यायं करुणां च करोति, तथैव वयं ते तव यद्व्रतं हि प्रमिणीमस्यस्मभ्यं तन्न्यायं करुणां चित्करोषि॥१॥

भावार्थः-अत्रोपमालङ्कारः। हे भगवन् यथा पित्रादयो विद्वांसो राजानश्च क्षुद्राणां बालबुद्धीनामुन्मत्तानां वा बालकानामुपरि करुणां न्यायशिक्षां च विदधति, तथैव भवानपि प्रतिदिनमस्माकं न्यायाधीशः करुणाकरः शिक्षको भवत्विति॥१॥

पदार्थः-हे (**देव**) सुख देने (**वरुण**) उत्तमों में उत्तम जगदीश्वर आप (**यथा**) जैसे अज्ञान से किसी राजा वा मनुष्य के (**विशः**) प्रजा वा सन्तान आदि (**द्यविद्यवि**) प्रतिदिन अपराध करते हैं, किन्हीं कामों को नष्ट कर देते हैं, वह उन पर न्याययुक्त दण्ड और करुणा करता है, वैसे ही हम लोग (**ते**) आपका (**यत्**) जो (**व्रतम्**) सत्य आचरण आदि नियम हैं (**हि**) उन को कदाचित् (**प्रमिणीमसि**) अज्ञानपन से छोड़ देते हैं, उसका यथायोग्य न्याय (**चित्**) और हमारे लिये करुणा करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे भगवन् जगदीश्वर! जैसे पिता आदि विद्वान् और राजा छोटे-छोटे अल्पबुद्धि उन्मत्त बालकों पर करुणा, न्याय और शिक्षा करते हैं, वैसे ही आप भी प्रतिदिन हमारे न्याय करुणा और शिक्षा करने वाले हों॥१॥

पुनः स एवार्थ उपदिश्यते॥

फिर भी अगले मन्त्र में उक्त अर्थ ही का प्रकाश किया है॥

मा नो॑ व॒धाय॑ ह॒त्नवे॑ जिहीळा॒नस्य॑ रीरधः।

मा ह्र॑णा॒नस्य॑ म॒न्यवे॑॥ २॥

मा। न॒:। व॒धाय॑। ह॒त्नवे॑। जि॒हीळा॒नस्य॑। री॒र॒धः। मा। ह्र॒णा॒नस्य॑। म॒न्यवे॑॥ २॥

पदार्थः-(**मा**) निषेधार्थे (**नः**) अस्मान् (**वधाय**) (**हत्नवे**) हननकरणाय। अत्र **कृहनिभ्यां क्त्नुः।** (उणा०३.२९) अनेन हनधातोः क्त्नुः प्रत्ययः। (**जिहीळानस्य**) अज्ञानादस्माकमनादरं कृतवतो जनस्य। अत्र **पृषोदरादीनि यथोपदिष्टम्।** इत्यकारस्येकारः। (**रीरधः**) संराधयः। अत्र **'रध' हिंसासंराध्यो**रस्माण्णिजन्ताल्लोडर्थे लुङ्। (**मा**) निषेधे (**ह्रणानस्य**) लज्जितस्योपरि (**मन्यवे**) क्रोधाय। अत्र **यजिमनि०** इति युच् प्रत्ययः॥ २॥

अन्वयः-हे वरुण जगदीश्वर! त्वं जिहीडानस्य हत्नवे वधाय चास्मान्कदाचिन्मा रीरधो मा संराधयैवं ह्रणानस्यास्माकं समीपे लज्जितस्योपरि मन्यवे मा रीरधः॥ २॥

भावार्थः-ईश्वर उपदिशति हे मनुष्या! यूयं बलबुद्धिभिरज्ञानादपराधे कृते हननाय मा प्रवर्त्तध्वं कश्चिदपराधं कृत्वा लज्जां कुर्यात्तस्योपरि क्रोधं मा निपातयतेति॥ २॥

पदार्थः-हे वरुण जगदीश्वर! आप जो (**जिहीळानस्य**) अज्ञान से हमारा अनादर करे उसके (**हत्नवे**) मारने के लिये (**नः**) हम लोगों को कभी (**मा रीरधः**) प्रेरित और इसी प्रकार (**ह्रणानस्य**) जो कि हमारे सामने लज्जित हो रहा है, उस पर (**मन्यवे**) क्रोध करने को हम लोगों को (**मा रीरधः**) कभी मत प्रवृत्त कीजिये॥ २॥

भावार्थः-ईश्वर उपदेश करता है कि हे मनुष्यो! जो अल्पबुद्धि अज्ञानीजन अपनी अज्ञानता से तुम्हारा अपराध करें, तुम उसको दण्ड ही देने को मत प्रवृत्त और वैसे ही जो अपराध करके लज्जित हो अर्थात् तुम से क्षमा करवावे तो उस पर क्रोध मत छोड़ो, किन्तु उसका अपराध सहो और उसको यथावत् दण्ड भी दो॥ २॥

पुनः स एवार्थ उपदिश्यते॥

फिर भी उक्त अर्थ ही का प्रकाश अगले मन्त्र में किया है॥

वि मृ॑ळी॒काय॑ ते॒ मनो॑ र॒थीरश्वं॒ न संदि॑तम्।

गी॒र्भिर्व॑रुण सीमहि॥ ३॥

वि। मृ॒ळी॒काय॑। ते॒। मन॑:। र॒थी:। अश्व॑म्। न। सम्ऽदि॑तम्। गी॒:ऽभि:। व॒रु॒ण॒। सी॒म॒हि॥ ३॥

पदार्थः-(**वि**) क्रियार्थे (**मृळीकाय**) उत्तमसुखाय अत्र **मृडः कीकच्कङ्कणौ।** (उणा०४.२५) अनेन कीकच्प्रत्ययः। (**ते**) तव (**मनः**) ज्ञानम् (**रथीः**) रथस्वामी अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति सोर्लोपो न। (**अश्वम्**) रथवोढारं वाजिनम् (**न**) इव (**संदितम्**) सम्यग्बलावखण्डितम् (**गीर्भिः**)

संस्कृताभिर्वाणीभिः **(वरुण)** जगदीश्वर **(सीमहि)** हृदये प्रेम वा कारागृहे चोरादिकं बन्धयामः। अत्र **बहुलं छन्दसि** इति श्नोर्लुक वर्णव्यत्ययेन दीर्घश्च॥३॥

अन्वयः-हे वरुण! वयं रथीः संदितमश्वं न=इव मृळीकाय ते तव गीर्भिर्मनो विषीमहि॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे भगवन्! यथा रथपतेर्भृत्योऽश्वं सर्वतो बध्नाति, तथैव वयं तव वेदस्थं विज्ञानं हृदये निश्चलीकुर्मः॥३॥

पदार्थः-हे **(वरुण)** जगदीश्वर! हम लोग **(रथीः)** रथवाले के **(संदितम्)** रथ में जोड़े हुए **(अश्वम्)** घोड़े के **(न)** समान **(मृळीकाय)** उत्तम सुख के लिये **(ते)** आपके सम्बन्ध में **(गीर्भिः)** पवित्र वाणियों द्वारा **(मनः)** ज्ञान **(विषीमहि)** बांधते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे भगवन् जगदीश्वर! जैसे रथ के स्वामी का भृत्य घोड़े को चारों ओर से बांधता है, वैसे ही हम लोग आपका जो वेदोक्त ज्ञान है, उसको अपनी बुद्धि के अनुसार मन में दृढ़ करते हैं॥३॥

पुनः स एवार्थो दृष्टान्तेन साध्यते॥

फिर भी उसी अर्थ को दृष्टान्त से अगले मन्त्र में सिद्ध किया है॥

परा॒ हि मे॒ विम॑न्यव॒ः पत॑न्ति॒ वस्य॑इष्टये।

वयो॒ न व॑स॒तीरुप॑॥४॥

परा॑। हि। मे॒। विऽम॑न्यवः। प॒त॑न्ति॒। वस्य॑ःऽइष्टये। वयः॑। न। व॒स॒तीः। उप॑॥४॥

पदार्थः-**(परा)** उपरिभावे। **प्र परेत्येतस्य प्रातिलोम्यं प्राह।** (निरु०१.३) **(हि)** खलु **(मे)** मम **(विमन्यवः)** विविधो मन्युर्येषां ते **(पतन्ति)** पतन्तु गच्छन्तु। अत्र लोडर्थे लट्। **(वस्यइष्टये)** वसीयत इष्टये सङ्गतये। अत्र वसुशब्दान्मतुप् ततोऽतिशय ईयसुनि। **विन्मतोर्लुक्।** (अष्टा०५.३.६५) इति मतोर्लुक्। **टेः।** (अष्टा०६.४.१५५) इति टेर्लोपस्ततश्**छान्दसो वर्णलोपो वा** इतीकारस्य लोपश्च। **(वयः)** पक्षिणः **(न)** इव **(वसतीः)** वसन्ति यासु ता विहाय **(उप)** सामीप्ये॥४॥

अन्वयः-हे जगदीश्वर! त्वत्कृपया वयो वसतीर्विहाय दूरस्थानान्युपपतन्ति न इव। मे मम वासात् वस्यइष्टये विमन्यवः परा पतन्ति हि खलु दूरे गच्छन्तु॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा ताडिताः पक्षिणो दूरं गत्वा वसन्ति, तथैव क्रोधयुक्ताः प्राणिनो मत्तो दूरे वसन्त्वहमपि तेभ्यो दूरे वसेयम्। यस्मादस्माकं स्वभावविपर्यासो धनहानिश्च कदाचिन्न स्यातामिति॥४॥

पदार्थः-हे जगदीश्वर जैसे **(वयः)** पक्षी **(वसतीः)** अपने रहने के स्थानों को छोड़-छोड़ दूर देश को **(उपपतन्ति)** उड़ जाते हैं **(न)** वैसे **(मे)** मेरे निवास स्थान से **(वस्यइष्टये)** अत्यन्त धन होने के लिये **(विमन्यवः)** अनेक प्रकार के क्रोध करने वाले दुष्ट जन **(परापतन्ति) (हि)** दूर ही चले जावें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे उड़ाये हुए पक्षी दूर जाके बसते हैं, वैसे ही क्रोधी मुझ से दूर बसें और मैं भी उनसे दूर बसूं, जिससे हमारा उलटा स्वभाव और धर्म की हानि कभी न होवे॥४॥

पुनः स वरुणः कीदृशोऽस्तीत्युपदिश्यते॥

फिर वह वरुण कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

कदा क्षत्रश्रियं नरमा वरुणं करामहे।

मृळीकायोरुचक्षसम्॥५॥१६॥

कदा। क्षत्रऽश्रियम्। नरम्। आ। वरुणम्। करामहे। मृळीकाय। उरुऽचक्षसम्॥५॥

पदार्थः-**(कदा)** कस्मिन्काले **(क्षत्रश्रियम्)** चक्रवर्त्तिराजलक्ष्मीम् **(नरम्)** नयनकर्त्तारम् **(आ)** समन्तात् **(वरुणम्)** परमेश्वरम् **(करामहे)** कुर्य्याम **(मृळीकाय)** सुखाय **(उरुचक्षसम्)** बहुविधं वेदद्वारा चक्ष आख्यानं यस्य तम्॥५॥

अन्वयः-वयं कदा मृळीकायोरुचक्षसं नरं वरुणं परमेश्वरं संसेव्य क्षत्रश्रियं करामहे॥५॥

भावार्थः-मनुष्यैः परमेश्वराज्ञां यथावत् पालयित्वा सर्वसुखं चक्रवर्त्तिराज्यं न्यायेन सदा सेवनीयमिति॥५॥

इति षोडशो वर्गः॥

पदार्थः-हम लोग **(कदा)** कब **(मृळीकाय)** अत्यन्त सुख के लिये **(उरुचक्षसम्)** जिसको वेद अनेक प्रकार से वर्णन करते हैं और **(नरम्)** सबको सन्मार्ग पर चलाने वाले उस **(वरुणम्)** परमेश्वर को सेवन करके **(क्षत्रश्रियम्)** चक्रवर्त्ति राज्य की लक्ष्मी को **(करामहे)** अच्छे प्रकार सिद्ध करें॥५॥

भावार्थः-मनुष्यों को परमेश्वर की आज्ञा का यथावत् पालन करके सब सुख और चक्रवर्त्ति राज्य न्याय के साथ सदा सेवन करने चाहियें॥५॥

यह सोलहवां वर्ग पूरा हुआ॥

अथ वायुसूर्य्यावुपदिश्यते॥

अब अगले मन्त्र में सूर्य्य और वायु का प्रकाश किया है॥

तदित्समानमाशाते वेनन्ता न प्र युच्छतः।

धृतव्रताय दाशुषे॥६॥

तत्। इत्। समानम्। आशाते इति। वेनन्ता। न। प्र। युच्छतः। धृतऽव्रताय। दाशुषे॥६॥

पदार्थः-(**तत्**) हुतं हविः। विमानादिरचनविधानं वा (**इत्**) एव (**समानम्**) तुल्यम् (**आशाते**) व्याप्नुतः (**वेनन्ता**) वादित्रवादकौ। अत्र '**वेनृ**' धातोर्वादित्राद्यर्थो गृह्यते। **सुपां सुलुग्०** इत्याकारादेशश्च। (**न**) इव। निरुक्तकारनियमेन परः प्रयुज्यमानो नकार उपमार्थे भवतीति हेतोः सायणाचार्य्यस्य निषेधार्थव्याख्यानमशुद्धमेव। (**प्र**) प्रकृष्टार्थे (**युच्छतः**) हर्षं कुरुतः (**धृतव्रताय**) धृतं धारितं व्रतं सत्यभाषणादिकं क्रियामयं वा येन तस्मै (**दाशुषे**) दानकर्त्रे॥६॥

अन्वयः-एतौ वेनन्ता प्रयुच्छतो न=इव मित्रावरुणौ धृतव्रताय दाशुषे तदिद्यानं समानमाशाते व्याप्नुतः॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा हर्षवन्तौ वादित्रवादनकुशलौ वादित्राणि गृहीत्वा चालयित्वा शब्दयतस्तथैव साधितं धृतविद्येन मनुष्येण हुतं हविर्विमानादियानं च कलायन्त्रेयषु यथावत् प्रयोजितौ वायुसूर्य्यौ धृत्वा चालयित्वा शब्दयतः॥६॥

पदार्थः-ये (**प्रयुच्छतः**) आनन्द करते हुए (**वेनन्ता**) बाजा बजाने वालों के (**न**) समान सूर्य और वायु (**धृतव्रताय**) जिसने सत्यभाषण आदि नियम वा क्रियामय यज्ञ धारण किया है, उस (**दाशुषे**) उत्तम दान आदि धर्म करने वाले पुरुष के लिये (**तत्**) जो उसका होम में चढ़ाया हुआ पदार्थ वा विमान आदि रथों की रचना (**इत्**) उसी को (**समानम्**) बराबर (**आशाते**) व्याप्त होते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अति हर्ष करने वाले बाजे बजाने में अति कुशल दो पुरुष बाजों को लेकर चलाकर बजाते हैं, वैसे ही सिद्ध किये विद्या के धारण करने वाले मनुष्य से होम हुए पदार्थों को सूर्य और वायु चालन करके धारण करते हैं॥६॥

एतद्यथावत्को वेदेत्युपदिश्यते॥

उक्त विद्या को यथावत् कौन जानता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वेदा यो वीनां पदमन्तरिक्षेण पतताम्।
वेद नावः समुद्रियः॥७॥

वेद। यः। वीनाम्। पदम्। अन्तरिक्षेण। पतताम्। वेद। नावः। समुद्रियः॥७॥

पदार्थः-(**वेद**) जानाति। **द्व्यचोऽतस्तिङ** इति दीर्घः। (**यः**) विद्वान् मनुष्यः (**वीनाम्**) विमानानां सर्वलोकानां पक्षिणां वा (**पदम्**) पदनीयं गन्तव्यमार्गम् (**अन्तरिक्षेण**) आकाशमार्गेण। अत्र **अपवर्गे तृतीया।** (अष्टा०२.३.६) इति तृतीया विभक्तिः। (**पताताम्**) गच्छताम् (**वेद**) जानाति (**नावः**) नौकायाः (**समुद्रियः**) समुद्रेऽन्तरिक्षे जलमये वा भवः। अत्र **समुद्राभ्राद् घः।** (अष्टा०४.४.११८) अनेन समुद्रशब्दाद् घः प्रत्ययः॥७॥

अन्वयः-यः समुद्रियो मनुष्योऽन्तरिक्षेण पततां वीनां पदं वेद समुद्रे गच्छन्त्या नावश्च पदं वेद स शिल्प विद्यासिद्धिं कर्त्तुं शक्नोति नेतरः॥७॥

भावार्थः-या ईश्वरेण वेदेष्वन्तरिक्षभूसमुद्रेषु गमनाय यानानां विद्या उपदिष्टाः सन्ति ताः साधितुं यः पूर्णविद्याशिक्षाहस्तक्रियाकौशलेषु विचक्षण इच्छति स एवैतत्कार्यकरणे समर्थो भवतीति॥७॥

पदार्थः-(**यः**) जो (**समुद्रियः**) समुद्र अर्थात् अन्तरिक्ष वा जलमय प्रसिद्ध समुद्र में अपने पुरुषार्थ से युक्त विद्वान् मनुष्य (**अन्तरिक्षेण**) आकाश मार्ग से (**पतताम्**) जाने-आने वाले (**वीनाम्**) विमान सब लोक वा पक्षियों के और समुद्र में जाने वाली (**नावः**) नौकाओं के (**पदम्**) रचन, चालन, ज्ञान और मार्ग को (**वेद**) जानता है, वह शिल्पविद्या की सिद्धि के करने को समर्थ हो सकता है, अन्य नहीं॥७॥

भावार्थः-जो ईश्वर ने वेदों में अन्तरिक्ष भू और समुद्र में जाने आने वाले यानों की विद्या का उपदेश किया है, उन को सिद्ध करने को जो पूर्ण विद्या शिक्षा और हस्त क्रियाओं के कलाकौशल में कुशल मनुष्य होता है, वही बनाने में समर्थ हो सकता है॥७॥

पुनः स किं जानातीत्युपदिश्यते॥

फिर वह क्या जानता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वेदा मासो धृतव्रतो द्वादश प्रजावतः।
वेदा य उपजायते॥८॥

वेद। मासः। धृतऽव्रतः। द्वादश। प्रजाऽवतः। वेद। यः। उपजायते॥८॥

पदार्थः-(**वेद**) जानाति (**मासः**) चैत्रादीन् (**धृतव्रतः**) धृतं व्रतं सत्यं विद्याबलं येन सः (**द्वादश**) मासान् (**प्रजावतः**) बह्व्यः प्रजा उत्पन्ना विद्यन्ते येषु मासेषु तान्। अत्र **भूमार्थे मतुप्**। (**वेद**) जानाति। अत्रापि **द्व्यचोऽतस्तिङ** इति दीर्घः। (**यः**) विद्वान् मनुष्यः (**उपजायते**) यत्किंचिदुत्पद्यते तत्सर्वं त्रयोदशो मासो वा॥८॥

अन्वयः-यो धृतव्रतो मनुष्यः प्रजावतो द्वादश मासान् वेद तथा योऽत्र त्रयोदश मास उपजायते तमपि वेद स सर्वकालावयवान् विदित्वोपकारी भवति॥८॥

भावार्थः-यथा सर्वज्ञत्वात् परमेश्वरः सर्वाधिष्ठानं कालचक्रं विजानाति, तथा लोकानां कालस्य च महिमानं विदित्वा नैव कदाचिदस्यैककणः क्षणोऽपि व्यर्थो नेय इति॥८॥

पदार्थः-(**यः**) जो (**धृतव्रतः**) सत्य नियम, विद्या और बल को धारण करने वाला विद्वान् मनुष्य (**प्रजावतः**) जिनमें नाना प्रकार के संसारी पदार्थ उत्पन्न होते हैं (**द्वादश**) बारह (**मासः**) महीनों और जो कि (**उपजायते**) उनमें अधिक मास अर्थात् तेरहवां महीना उत्पन्न होता है, उस को (**वेद**) जानता है, वह काल के सब अवयवों को जानकर उपकार करने वाला होता है॥८॥

भावार्थः-जैसे परमेश्वर सर्वज्ञ होने से सब लोक वा काल की व्यवस्था को जानता है, वैसे मनुष्यों को सब लोक तथा काल के महिमा की व्यवस्था को जानकर इस को एक क्षण भी व्यर्थ नहीं खोना चाहिये॥८॥

पुनः स किं किं जानातीत्युपदिश्यते

फिर वह क्या-क्या जानता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वेदु वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः।
वेदा ये अध्यासते॥९॥

वेद। वातस्य। वर्तनिम्। उरोः। ऋष्वस्य। बृहतः। वेद। ये। अधि।ऽआसते॥९॥

पदार्थः-(**वेद**) जानाति (**वातस्य**) वायोः (**वर्त्तनिम्**) वर्त्तन्ते यस्मिंस्तं मार्गम् (**उरोः**) बहुगुणयुक्तस्य (**ऋष्वस्य**) सर्वत्रागमनशीलस्य। अत्र '**ऋषी गतौ**' अस्माद् बाहुलकादौणादिको वन् प्रत्ययः (**बृहतः**) महतो महाबलविशिष्टस्य (**वेद**) जानाति (**ये**) पदार्थाः (**अध्यासते**) तिष्ठन्ति ते॥९॥

अन्वयः-यो मनुष्य ऋष्वस्योरोर्बृहतो वातस्य वर्त्तनिं वेद जानीयात्, येऽत्र पदार्था अध्यासते तेषां च वर्त्तनिं वेद, स खलु भूखगोलगुणविज्जायते॥९॥

भावार्थः-यो मनुष्योऽग्न्यादीनां पदार्थानां मध्ये परिमाणतो गुणतश्च महान् सर्वाधारो वायुर्वर्त्तते तस्य कारणमुत्पत्तिं गमनागमनयोगमार्गं ये तत्र स्थूलसूक्ष्माः पदार्थाः वर्त्तन्ते, तानपि यथार्थतया विदित्वैतेभ्य उपकारं गृहीत्वा ग्राहयित्वा कृतकृत्यो भवेत्, स इह गण्यो विद्वान् भवतीति वेद्यम्॥९॥

पदार्थः-जो मनुष्य (**ऋष्वस्य**) सब जगह जाने-आने (**उरोः**) अत्यन्त गुणवान् (**बृहतः**) बड़े अत्यन्त बलयुक्त (**वातस्य**) वायु के (**वर्त्तनिम्**) मार्ग को (**वेद**) जानता है (**ये**) और जो पदार्थ इस में (**अध्यासते**) इस वायु के आधार से स्थित हैं, उनके भी (**वर्त्तनिम्**) मार्ग को (**वेद**) जाने, वह भूगोल वा खगोल के गुणों का जानने वाला होता है॥९॥

भावार्थः-जो मनुष्य अग्नि आदि पदार्थों में परिमाण वा गुणों से बड़ा सब मूर्त्ति वाले पदार्थों का धारण करने वाला वायु है, उसका कारण अर्थात् उत्पत्ति और जाने-आने के मार्ग और जो उसमें स्थूल वा सूक्ष्म पदार्थ ठहरे हैं, उनको भी यथार्थता से जान इनसे अनेक कार्य सिद्ध कर करा के सब प्रयोजनों को सिद्ध कर लेता है, वह विद्वानों में गणनीय विद्वान् होता है॥९॥

य एतं जानाति स किं प्राप्नोतीत्युपदिश्यते

जो मनुष्य इस वायु को ठीक-ठीक जानता है, वह किसको प्राप्त होता है, इस विषय का उपदेश अगले मन्त्र में किया है।

नि षसाद धृतव्रतो वरुणः पस्त्या३स्वा।

साम्राज्याय सुक्रतुः॥ १०॥ १७॥

नि। ससाद। धृतऽव्रतः। वरुणः। पस्त्यासु। आ। साम्ऽराज्याय। सुक्रतुः॥ १०॥

पदार्थः-(**नि**) नित्यार्थे (**ससाद**) तिष्ठति। अत्र लडर्थे लिट्। **सदेः परस्य लिटि**। (अष्टा०८.३.१०७) अनेन परसकारस्य मूर्द्धन्यादेशनिषेधः। (**धृतव्रतः**) सत्याचारशीलः (**वरुणः**) उत्तमो विद्वान् (**पस्त्यासु**) पस्त्येभ्यो गृहेभ्यो हितास्तासु प्रजासु। **पस्त्यमिति गृहनामसु पठितम्।** (निघं०३.४) (**आ**) समन्तात् (**साम्राज्याय**) यद्राष्ट्रं सर्वत्र भूगोले सम्यक् राजते प्रकाशते तस्य भावाय (**सुक्रतुः**) शोभनाः क्रतवः कर्माणि प्रजा वः यस्य सः॥ १०॥

अन्वयः-यथा यो धृतव्रतः सुक्रतुर्वरुणो विद्वान् मनुष्यः पस्त्यासु प्रजासु साम्राज्यायानिषसाद तथाऽस्माभिरपि भवितव्यम्॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा परमेश्वरः सर्वासां प्रजानां सम्राड् वर्त्तते तथा य ईश्वराज्ञायां वर्त्तमानो विद्वान् धार्मिकः शरीरबुद्धिबलसंयुक्तो मनुष्यो भवति स एव साम्राज्यं कर्तुमर्हतीति॥ १०॥

पदार्थः-जैसे जो (**धृतव्रतः**) सत्य नियम पालने (**सुक्रतुः**) अच्छे-अच्छे कर्म वा उत्तम बुद्धियुक्त (**वरुणः**) अति श्रेष्ठ सभा सेना का स्वामी (**पस्त्यासु**) अत्युत्तम घर आदि पदार्थों से युक्त प्रजाओं में (**साम्राज्याय**) चक्रवर्त्ती राज्य को करने की योग्यता से युक्त मनुष्य (**आनिषसाद**) अच्छे प्रकार स्थित होता है, वैसे ही हम लोगों को भी होना चाहिये॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे परमेश्वर सब प्राणियों का उत्तम राजा है, वैसे जो ईश्वर की आज्ञा में वर्त्तमान धार्मिक शरीर और बुद्धि बलयुक्त मनुष्य हैं, वे ही उत्तम राज्य करने योग्य होते हैं॥ १०॥

पुनः स एवार्थ उपदिश्यते॥

फिर अगले मन्त्र में उक्त अर्थ का ही प्रकाश किया है॥

अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति।
कृतानि या च कर्त्वा॥ ११॥

अतः। विश्वानि। अद्भुता। चिकित्वान्। अभि। पश्यति। कृतानि। या। च। कर्त्वा॥ ११॥

पदार्थः-(**अतः**) पूर्वोक्तात्कारणात् (**विश्वानि**) सर्वाणि (**अद्भुता**) आश्चर्यरूपाणि। अत्र सर्वत्र **शेश्छन्दसि** इति लोपः। (**चिकित्वान्**) केतयति जानातीति चिकित्वान्। अत्र '**कित ज्ञाने**' अस्माद् वेदोक्ताद् धातोः क्वसुः प्रत्ययः। **चिकित्वान् चेतनावान्।** (निरु०२.११) (**अभि**) सर्वतः (**पश्यति**) प्रेक्षते

(कृतानि) अनुष्ठितानि **(या)** यानि **(च)** समुच्चये **(कर्त्वा)** कर्त्तव्यानि। अत्र **कृत्यार्थे तवैकेन्केन्यत्वन** इति त्वन् प्रत्ययः॥११॥

अन्वयः-यतो यश्चिकित्वान् वरुणो धार्मिकोऽखिलविद्यो न्यायकारी मनुष्यो वा यानि विश्वानि सर्वाणि कृतानि यानि च कर्त्त्वा कर्त्तव्यान्यद्भुतानि कर्माण्यभिपश्यत्यतः स न्यायाधीशो भवितुं योग्यो जायते॥११॥

भावार्थः-यथेश्वरः सर्वत्राभिव्याप्तः सर्वशक्तिमान् सन् सृष्टिरचनादीन्याश्चर्य्यरूपाणि कृत्वा वस्तूनि विधाय जीवनां त्रिकालस्थानि कर्म्माणि च विदित्वैतेभ्यस्तत्तत्कर्माश्रितं फलं दातुमर्हति। एवं यो विद्वान् मनुष्यो भूतपूर्वाणां विदुषां कर्माणि विदित्त्वाऽनुष्ठातव्यानि कर्माण्येव कर्त्तमुद्युङ्क्ते स एव सर्वाभिद्रष्टा सन् सर्वोपकारकाण्यनुत्तमानि कर्माणि कृत्वा सर्वेषां न्यायं कर्त्तुं शक्नोतीति॥११॥

पदार्थः-जिस कारण जो **(चिकित्वान्)** सबको चेताने वाला धार्मिक सकल विद्याओं को जानने न्याय करने वाला मनुष्य **(या)** जो **(विश्वानि)** सब **(कृतानि)** अपने किये हुए **(च)** और **(कर्त्त्वा)** जो आगे करने योग्य कर्मों और **(अद्भुतानि)** आश्चर्य्यरूप वस्तुओं को **(अभिपश्यति)** सब प्रकार से देखता है **(अतः)** इसी कारण वह न्यायाधीश होने को समर्थ होता है॥११॥

भावार्थः-जिस प्रकार ईश्वर सब जगह व्याप्त और सर्वशक्तिमान् होने से सृष्टि रचनादि रूपी कर्म और जीवों के तीनों कालों के कर्मों को जानकर इनको उन-उन कर्मों के अनुसार फल देने को योग्य है। इसी प्रकार जो विद्वान् मनुष्य पहिले हो गये उनके कर्मों और आगे अनुष्ठान करने योग्य कर्मों के करने में युक्त होता है, वही सबको देखता हुआ सब सब के उपकार करने वाले उत्तम से उत्तम कर्मों को कर सब का न्याय करने को योग्य होता है॥११॥

पुनरपि स एवार्थ उपदिश्यते॥

फिर भी अगले मन्त्र में उसी अर्थ का प्रकाश किया है॥

स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत्।

प्र ण॒ आयूं॑षि तारिषत्॥१२॥

सः। नः। वि॒श्वाहा॑। सु॒ऽक्रतुः॑। आ॒दि॒त्यः। सु॒ऽपथा॑। क॒र॒त्। प्र। नः। आयूं॑षि। ता॒रि॒ष॒त्॥१२॥

पदार्थः-(**सः**) वक्ष्यमाणः (**नः**) अस्मान् (**विश्वाहा**) विश्वानि चाहानि च तेषु। अत्र **सुपां सुलुग्०** इति सप्तम्या बहुवचनस्याकारादेशः। (**सुक्रतुः**) शोभनानि प्रज्ञानानि कर्माणि वा यस्य सः (**आदित्यः**) विनाशरहितः परमेश्वरो जीवः कारणरूपेण प्राणो वा (**सुपथा**) शोभनश्चासौ पन्थाश्च सुपथस्तेन (**करत्**) कुर्यात्। लेट् प्रयोगोऽयम्। (**प्र**) प्रकृष्टार्थे क्रियायोगे (**नः**) अस्माकम् (**आयूंषि**) जीवनानि (**तारिषत्**) सन्तारयेत्। अत्रान्तर्गतो ण्यर्थः॥१२॥

अन्वयः-यथादित्यः परमेश्वरः प्राणः सूर्यो वा विश्वाहा सर्वेषु दिनेषु नोऽस्मान् सुपथा करत् नोऽस्माकमायूंषि प्रतारिषत् तथा सुक्रतुरादित्यो न्यायकारी मनुष्यो विश्वाहेषु नः सुपथा करत् नोऽस्माकमायूंषि प्रतारिषत् सन्तारयेत्॥१२॥

भावार्थः-अत्र श्लेषवाचकलुप्तोपमालङ्कारौ। ये मनुष्या ब्रह्मचर्य्येण जितेन्द्रियत्वादिनाऽऽयुर्वर्द्धयित्वा धर्ममार्गे विचरन्ति, तान् जगदीश्वरोऽनुगृह्यानन्दयुक्तान् करोति। यथाऽयं प्राणः सूर्य्यो वा स्वबलतेजोभ्यामुच्चावचानि स्थलानि प्रकाश्य प्राणिनः सुखयित्वा सर्वानहोरात्रादीन् कालविभागान् विभजतस्तथैव स्वात्मशरीरसेनाबलेन धर्म्याणि कनिष्ठमध्यमोत्तमानि कर्माणि प्रचार्य्याधर्म्याणि निवर्त्योत्तमनीचजनसमूहौ सदा विभजेत॥१२॥

पदार्थः-जैसे **(आदित्यः)** अविनाशी परमेश्वर, प्राण वा सूर्य्य **(विश्वाहा)** सब दिन **(नः)** हम लोगों को **(सुपथा)** अच्छे मार्ग में चलाने और **(नः)** हमारी **(आयूंषि)** उमर **(प्रतारिषत्)** सुख के साथ परिपूर्ण **(करत्)** करते हैं, वैसे ही **(सुक्रतुः)** श्रेष्ठ कर्म और उत्तम-उत्तम जिससे ज्ञान हो वह **(आदित्यः)** विद्या धर्म प्रकाशित न्यायकारी मनुष्य **(विश्वाहा)** सब दिनो में **(नः)** हम लोगों को **(सुपथा)** अच्छे मार्ग में **(करत्)** करे। और **(नः)** हम लोगों की **(आयूंषि)** उमरों को **(प्रतारिषत्)** सुख से परिपूर्ण करे॥१२॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। जो मनुष्य ब्रह्मचर्य्य और जितेन्द्रियता आदि से आयु बढ़ाकर धर्ममार्ग में विचरते हैं, उन्हीं को जगदीश्वर अनुगृहीत कर आनन्दयुक्त करता है। जैसे प्राण और सूर्य्य अपने बल और तेज से ऊंचे नीचे स्थानों को प्रकाशित कर प्राणियों को सुख के मार्ग से युक्त करके उचित समय पर दिन-रात आदि सब कालविभागों को अच्छे प्रकार सिद्ध करते हैं, वैसे ही अपने आत्मा, शरीर और सेना के बल से न्यायाधीश मनुष्य धर्मयुक्त छोटे मध्यम और बड़े कर्मों के प्रचार से अधर्म युक्त को छुड़ा उत्तम और नीच मनुष्यों का विभाग सदा किया करे॥१२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम्।
परि स्पशो नि षेदिरे॥१३॥

बिभ्रत्। द्रापिम्। हिरण्ययम्। वरुणः। वस्त। निःऽनिजम्। परि। स्पशः। नि। सेदिरे॥१३॥

पदार्थः-(**बिभ्रत्**) धारयन् (**द्रापिम्**) कवचं निद्रां वा। अत्र **'द्रै स्वप्ने'** अस्माद् **इञ्वपादिभ्य** इतीञ् (**हिरण्ययम्**) ज्योतिर्मयम्। **ऋत्व्यवास्त्व्य०** (अष्टा०६.४.१७५) अनेनायं निपातितः **'ज्योतिर्वै हिरण्यम्'** इति पूर्ववत्प्रमाणं विज्ञेयम्। (**वरुणः**) विविधपाशैः शत्रूणां बन्धकः (**वस्त**) वस्ते आच्छादयति। अत्र वर्त्तमाने लङ्डभावश्च। (**निर्णिजम्**) शुद्धम् (**परि**) सर्वतोभावे (**स्पशः**) स्पर्शवन्तः पदार्थाः (**नि**) नितराम् (**सेदिरे**) सीदन्ति। अत्र लडर्थे लिट्॥१३॥

अन्वयः-यथाऽस्मिन् वरुणे सूर्य्ये वा स्पर्शवन्तः सर्वे पदार्था निषेदिरे एतौ निर्णिजं हिरण्ययं ज्योतिर्मयं द्रापिं बिभ्रत एतान् सर्वान् पदार्थान् सर्वतोऽभिव्याप्याच्छादयतस्तथा विद्यान्यायप्रकाशे सर्वान् स्पर्शवन्तः पदार्थान् निषाद्य निर्णिजं हिरण्ययं ज्योतिर्मयं द्रापिं बिभ्रत् सन् वरुण विद्वान् परिवस्त वस्ते सर्वान् शत्रून् स्वतेजसाऽऽच्छादयेत्॥१३॥

भावार्थः-अत्र श्लेषालङ्कारः। सर्वे मनुष्या यथा वायुर्बलकारित्वात् सर्वमग्न्यादिकं मूर्त्तामूर्तं वस्तु धृत्वाऽऽकाशे गमनागमने कुर्वन् गमयति। यथा सूर्य्यलोको प्रकाशस्वरूपत्वाद् रात्र्यन्धकारं निवार्य्य स्वतेजसा प्रकाशते, तथैव सुशिक्षाबलेन सर्वान् मनुष्यान् धृत्वा धर्मे गमनागमने कृत्वा कार्येरन्॥१३॥

पदार्थः-जैसे इस वायु वा सूर्य्य के तेज में **(स्पशः)** स्पर्शवान् अर्थात् स्थूल-सूक्ष्म सब पदार्थ **(निषेदिरे)** स्थिर होते हैं और वे दोनों **(वरुणः)** वायु और सूर्य्य **(निर्णिजम्)** शुद्ध **(हिरण्ययम्)** अग्न्यादिरूप पदार्थों को **(बिभ्रत)** धारण करते हुए **(द्रापिम्)** बल तेज और निद्रा को **(परिवस्त)** सब प्रकार से प्राप्त कर जीवों के ज्ञान को ढांप देते हैं, वैसे **(निर्णिजम्)** शुद्ध **(हिरण्ययम्)** ज्योतिर्मय प्रकाशयुक्त को **(बिभ्रत्)** धारण करता हुआ **(द्रायिम्)** निद्रादि के हेतु रात्रि को **(परिवस्त)** निवारण कर अपने तेज से सबको ढांप लेता है॥१३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जैसे वायु बल का करने हारा होने से सब अग्नि आदि स्थूल और सूक्ष्म पदार्थों को धरके आकाश में गमन और आगमन करता हुआ चलता और जैसे सूर्य्यलोक भी स्वयं प्रकाशरूप होने से रात्रि को निवारण कर अपने प्रकाश से सबको प्रकाशता है, वैसे विद्वान् लोग भी विद्या और उत्तम शिक्षा के बल से सब मनुष्यों को धारण कर धर्म में चल सब अन्य मनुष्यों को चलाया करें॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह वरुण किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्।
न देवमभिमातयः॥१४॥

नः। यम्। दिप्सन्ति। दिप्सवः। नः। द्रुह्वाणः। जनानाम्। नः। देवम्। अभिऽमातयः॥१४॥

पदार्थः-**(न)** निषेधे **(यम्)** वरुणं परमेश्वरं विद्वांसं वा **(दिप्सन्ति)** विरोद्धुमिच्छन्ति। **(दिप्सवः)** मिथ्याभिमानव्यवहारमिच्छवः शत्रवः। अत्रोभयत्र वर्णव्यत्ययेन धकारस्य दकारः। **(न)** प्रतिषेधे **(द्रुह्वाणः)** द्रोहकर्त्तारः **(न)** निवारणे **(देवम्)** दिव्यगुणं **(अभिमातयः)** अभिमानिनः। **'मा माने** इत्यस्य रूपम्॥१४॥

अन्वयः-हे मनुष्या! यूयं जनानां दिप्सवो यं न दिप्सन्ति दुह्वाणो यं न द्रह्यन्त्यभिमातयो यं नाभिमन्यन्ते तं परमेश्वरं देवमुपास्यं कार्य्यहेतुं विद्वांसं वा सर्वे जानीत॥१४॥

भावार्थः-अत्र श्लेषालङ्कारः। ये हिंसका परद्रोहयुक्ता अभिमानसहिता जना वर्त्तन्ते, ते विद्याहीनत्वात् परमेश्वरस्य विदुषां वा गुणान् ज्ञात्वा नैवोपकर्तुमर्हन्ति, तस्मात् सर्वैरेतेषां गुणकर्मस्वभावैः सह सदा भवितव्यम्॥१४॥

पदार्थः-हे मनुष्यो! तुम सब लोग **(जनानाम्)** विद्वान् धार्मिक वा मनुष्य आदि प्राणियों से **(दिप्सवः)** झूठे अभिमान और झूठे व्यवहार को चाहने वाले शत्रुजन **(यम्)** जिस **(देवम्)** दिव्य गुणवाले परमेश्वर वा विद्वान् को **(न)** **(दिप्सन्ति)** विरोध से न चाहें **(दुह्वाणः)** द्रोह करने वाले जिस को द्रोह से **(न)** चाहें। तथा जिसके साथ **(अभिमातयः)** अभिमानी पुरुष **(न)** अभिमान से न वर्त्तें, उन उपासना करने योग्य परमेश्वर वा विद्वानों को जानो॥१४॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो हिंसक परद्रोही अभिमानयुक्त जन हैं, वे अज्ञानपन से परमेश्वर वा विद्वानों के गुणों को जान कर उनसे उपकार लेने को समर्थ नहीं हो सकते। इसलिये सब मनुष्यों को योग्य है कि उनके गुण, कर्म और स्वभाव का सदैव ग्रहण करें॥१४॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह वरुण किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उत यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा॥१५॥१८॥

उत। यः। मानुषेषु। आ। यशः। चक्रे। असामि। आ। अस्माकम्। उदरेषु। आ॥१५॥

पदार्थः-**(उत)** अपि **(यः)** जगदीश्वरो वायुर्वा **(मानुषेषु)** नृव्यक्तिषु **(आ)** अभितः **(यशः)** कीर्त्तिमन्नं वा। **यश इत्यन्ननामसु पठितम्।** (निघं०२.७) **(चक्रे)** कृतवान् **(असामि)** समस्तम् **(आ)** समन्तात् **(अस्माकम्)** मनुष्यादिप्राणिनम् **(उदरेषु)** अन्तर्देशेषु **(आ)** अभितोऽर्थे॥१५॥

अन्वयः-योऽस्माकमुदरेषूतापि बहिरसामि यश आचक्रे यो मानुषेषु जीवेषूतापि जडेषु पदार्थेष्वाकीर्त्तिं प्रकाशितवानस्ति, स वरुणो जगदीश्वरो विद्वान् वा सकलैर्मानवैः कुतो नोपासनीयो जायेत॥१५॥

भावार्थः-येन सृष्टिकर्त्तान्तर्यामिणा जगदीश्वरेण परोपकाराय जीवानां तत्तकर्मफलभोगाय समस्तं जगत्प्रतिकल्पं विरच्यते, यस्य सृष्टौ बाह्याभ्यन्तरस्थो वायुः सर्वचेष्टा हेतुरस्ति, विद्वांसो विद्याप्रकाशका अविद्याहन्तारश्च प्रायतन्ते, तदिदं धन्यवादार्हं कर्म परमेश्वरस्यैवाखिलैर्मनुष्यैर्विज्ञेयम्॥१५॥

पदार्थः-**(यः)** जो हमारे **(उदरेषु)** अर्थात् भीतर **(उत)** और बाहर भी **(असामि)** पूर्ण **(यशः)** प्रशंसा के योग्य कर्म को **(आचक्रे)** सब प्रकार से करता है, जो **(मानुषेषु)** जीवों और जड़ पदार्थों में

सर्वथा कीर्त्ति को किया करता है, सो वरुण अर्थात् परमात्मा वा विद्वान् सब मनुष्यों को उपासनीय और सेवनीय क्यों न होवे॥१५॥

भावार्थः-जिस सृष्टि करने वाले अन्तर्यामी जगदीश्वर ने परोपकार वा जीवों को उनके कर्म के अनुसार भोग कराने के लिये सम्पूर्ण जगत् कल्प-कल्प में रचा है, जिसकी सृष्टि में पदार्थों के बाहर-भीतर चलने वाला वायु सब कर्मों का हेतु है और विद्वान् लोग विद्या का प्रकाश और अविद्या का हनन करने वाले प्रयत्न कर रहे हैं, इसलिये इस परमेश्वर के धन्यवाद के योग्य कर्म सब मनुष्यों को जानना चाहिये॥१५॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

परा॑ मे यन्ति धी॒तयो॒ गावो॒ न गव्यू॑ती॒रनु॑।
इ॒च्छन्ती॑रुरु॒चक्ष॑सम्॥ १६॥

परा॑। मे॒। य॒न्ति॒। धी॒तयः॑। गावः॑। न। गव्यू॑तीः। अनु॑। इ॒च्छन्ती॑ः। उ॒रु॒ऽचक्ष॑सम्॥ १६॥

पदार्थः-(**परा**) प्रकृष्टार्थे (**मे**) मम (**यन्ति**) प्राप्नुवन्ति (**धीतयः**) दधात्यर्थान् याभिः कर्मवृत्तिभिस्ताः (**गावः**) पशुजातयः (**न**) इव (**गव्यूतीः**) गवां यूतयः स्थानानि। **गोर्यूतौ छन्दस्युपसंख्यानम्।** (अष्टा०वा०६.१.७९) (**अनु**) अनुगमार्थे (**इच्छन्तीः**) इच्छन्त्यः। अत्र **सुपां सुलुग्०** इति पूर्वसवर्णः। (**उरुचक्षसम्**) उरुषु बहुषु चक्षो विज्ञानं प्रकाशनं वा यस्य तं कर्मकर्त्तारं जीवं माम्॥१६॥

अन्वयः-यथा गव्यूतीरन्विच्छन्त्यो गावो न इव मे ममेमा धीयत उरुचक्षसं मां परायन्ति तथा सर्वान् कर्त्तॄन् प्रति स्वानि स्वानि कर्माणि प्राप्नुवन्त्येवेति विज्ञेयम्॥१६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरेवं निश्चतेव्यं यथा गावः स्व-स्ववेगानुसारेण धावन्त्योऽभीष्टं स्थानं गत्वा परिश्रान्ता भवन्ति, तथैव मनुष्याः स्व-स्वबुद्धिबलानुसारेण परमेश्वरस्य सूर्यादेर्वा गुणानन्विष्य यथाबुद्धि विदित्वा परिश्रान्ता भवन्ति, नैव कस्यापि जनस्य बुद्धिशरीरवेगोऽपरिमितो भवितुमर्हति। यथा पक्षिणः स्व-स्वबलानुसारेणाकाशं गच्छन्तो नैतस्यान्तं कश्चिदपि प्राप्नोति, तथैव कश्चिदपि मनुष्यो विद्या विषयस्यान्तं गन्तुं नार्हति॥१६॥

पदार्थः-जैसे (**गव्यूतीः**) अपने स्थानों को (**इच्छन्तीः**) जाने की इच्छा करती हुई (**गावः**) गो आदि पशु जाति के (**न**) समान (**मे**) मेरी (**धीतयः**) कर्म की वृत्तियां (**उरुचक्षसम्**) बहुत विज्ञान वाले मुझ को (**परायन्ति**) अच्छे प्रकार प्राप्त होती हैं, वैसे सब कर्त्ताओं को अपने-अपने किये हुए कर्म प्राप्त होते ही हैं, ऐसा जानना योग्य है॥१६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को ऐसा निश्चय करना चाहिये कि जैसे गौ आदि पशु अपने-अपने वेग के अनुसार दौड़ते हुए चाहे हुए स्थान को पहुंच कर थक जाते हैं, वैसे ही मनुष्य अपनी-अपनी बुद्धि बल के अनुसार परमेश्वर वायु और सूर्य्य आदि पदार्थों के गुणों को जानकर थक जाते हैं। किसी मनुष्य की बुद्धि वा शरीर का वेग ऐसा नहीं हो सकता कि जिस का अन्त न हो सके, जैसे पक्षी अपने-अपने बल के अनुसार आकाश को जाते हुए आकाश का पार कोई भी नहीं पाता, इसी प्रकार कोई मनुष्य विद्या विषय के अन्त को प्राप्त होने को समर्थ नहीं हो सकता है॥१६॥

मनुष्यैर्यथायोग्या विद्या कथं प्राप्तव्या इत्युपदिश्यते।

मनुष्यों को यथायोग्य विद्या किस प्रकार प्राप्त होनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

सं नु वोचावहै पुनर्यतो मे मध्वाभृतम्।
होतेव क्षदसे प्रियम्॥ १७॥

सम्। नु। वोचावहै। पुनः। यतः। मे। मधु। आऽभृतम्। होताऽइव। क्षदसे। प्रियम्॥ १७॥

पदार्थः-(**सम्**) सम्यगर्थे (**नु**) अनुपृष्टे (निरु०१.४) (**वोचावहै**) परस्परमुपदिशेव। लेट्प्रयोगोऽयम्। (**पुनः**) पश्चाद्भावे (**यतः**) हेत्वर्थे (**मे**) मम (**मधु**) मधुरगुणविशिष्टं विज्ञानम् (**आभृतम्**) विद्वद्भिर्यत्समन्ताद् धियते धार्यते तत् (**होतेव**) यज्ञसम्पादकवत् (**क्षदसे**) अविद्यारोगान्धकारविनाशकाय बलाय (**प्रियम्**) यत् प्रीणाति तत्॥१७॥

अन्वयः-यत आवामुपदेशोपदेष्टारौ होतेवानुक्षदस आभृतं यजमानप्रियं मधुमधुरगुणविशिष्टं विज्ञानं संवोचावहै, यतो मे मम तव च विद्यावृद्धिर्भवेत्॥१७॥

भावार्थः-अत्रोपमालङ्कारः। यथा होतृयजमानौ प्रीत्या परस्परं मिलित्वा हवनादिकं कर्म प्रपूर्त्तस्तथैवाध्यापकाध्येतारौ समागम्य सर्वा विद्याः प्रकाशयेतामेवं समस्तैर्मनुष्यैरस्माकं विद्यावृद्धिर्भूत्वा वयं सुखानि प्राप्नुयामेति नित्यं प्रयतितव्यम्॥१७॥

पदार्थः-(**यतः**) जिससे हम आचार्य और शिष्य दोनों (**होतेव**) जैसे यज्ञ कराने वाला विद्वान् (**नु**) परस्पर (**क्षदसे**) अविद्या और रोगजन्य दुःखान्धकार विनाश के लिये (**आभृतम्**) विद्वानों के उपदेश से जो धारण किया जाता है, उस यजमान के (**प्रियम्**) प्रियसम्पादन करने के समान (**मधु**) मधुर गुण विशिष्ट विज्ञान का (**वोचावहै**) उपदेश नित्य करें कि उससे (**मे**) हमारी और तुम्हारी (**पुनः**) बार-बार विद्यावृद्धि होवे॥१७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे यज्ञ कराने और करने वाले प्रीति के साथ मिलकर यज्ञ को सिद्ध कर पूरण करते हैं, वैसे ही गुरु शिष्य मिलकर सब विद्याओं का प्रकाश करें। सब मनुष्यों

को इस बात की चाहना निरन्तर रखनी चाहिये कि जिससे हमारी विद्या की वृद्धि प्रतिदिन होती रहे॥१७॥

पुनस्ते किं किं कुर्युरित्युपदिश्यते।

फिर भी वे क्या-क्या करें, इस विषय का प्रकाश अगले मन्त्र में किया है।

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि।
एता जुषत मे गिरः॥१८॥

दर्शम्। नु। विश्वऽदर्शतम्। दर्शम्। रथम्। अधि। क्षमि। एताः। जुषत। मे। गिरः॥१८॥

पदार्थः-(**दर्शम्**) पुनः पुनर्द्रष्टुम् (**नु**) अनुपृष्टे (**विश्वदर्शतम्**) सर्वैर्विद्वद्भिर्द्रष्टव्यं जगदीश्वरम् (**दर्शम्**) पुनः पुनः सम्प्रेक्षितुम् (**रथम्**) रमणीयं विमानादियानम् (**अधि**) उपरिभावे (**क्षमि**) क्षाम्यन्ति सहन्ते जना यस्मिन् व्यवहारे तस्मिन् स्थित्वा। अत्र **कृतो बहुलम्** इत्यधिकरणे क्विप्। **वा छन्दसि सर्वे विधयो भवन्ति** इति **अनुनासिकस्य क्विझलोः क्ङिति।** (अष्टा०६.४.१५) इति दीर्घो न भवति (**एताः**) वेदविद्यासुशिक्षासंस्कृताः (**जुषत**) सेवध्वम् (**मे**) मम (**गिरः**) वाणीः॥१८॥

अन्वयः-हे मनुष्या! यूयमधि क्षमि स्थित्वा विश्वदर्शतं वरुणं परेशं दर्शं रथं नु दर्शं मे ममैता गिरो वाणीर्जुषत नित्यं सेवध्वम्॥१८॥

भावार्थः-यस्मात् क्षमादिगुणसहितैर्मनुष्यैः प्रश्नोत्तरव्यवहारेणानुष्ठानेन विनेश्वरं शिल्पविद्यासिद्धानि यानानि च वेदितुं न शक्यानि, तत्र ये गुणास्तेऽपि चास्मादेतेषां विज्ञानाय सर्वदा प्रयतितव्यम्॥१८॥

पदार्थः-हे मनुष्यो! तुम (**अधिक्षमि**) जिन व्यवहारों में उत्तम और निकृष्ट बातों का सहना होता है, उनमें ठहर कर (**विश्वदर्शतम्**) जो कि विद्वानों की ज्ञानदृष्टि से देखने के योग्य परमेश्वर है उसको (**दर्शम्**) बारंबार देखने (**रथम्**) विमान आदि यानों को (**नु**) भी (**दर्शम्**) पुनः-पुनः देख के सिद्ध करने के लिये (**मे**) मेरी (**गिरः**) वाणियों को (**जुषत**) सदा सेवन करो॥१८॥

भावार्थः-जिससे क्षमा आदि गुणों से युक्त मनुष्यों को यह जानना योग्य है कि प्रश्न और उत्तर के व्यवहार के किये विना परमेश्वर को जानने और शिल्पविद्या सिद्ध विमानादि रथों को कभी बनाने को शक्य नहीं और जो उनमें गुण हैं, वे भी इससे इनके विज्ञान होने के लिये सदैव प्रयत्न करना चाहिये॥१८॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

इमं मे वरुण श्रुधी हवमद्या च मृळय।

त्वाम॑व॒स्युरा च॑के॥ १९॥

इ॒मम्। मे॒। व॒रु॒ण॒। श्रु॒धि॒। हव॑म्। अ॒द्य। च॒। मृ॒ळ॒य॒। त्वाम्। अ॒व॒स्युः। आ। च॒के॒॥ १९॥

पदार्थः-(**इमम्**) प्रत्यक्षमनुष्ठितम् (**मे**) मम (**वरुण**) सर्वोत्कृष्टजगदीश्वर विद्वन् वा (**श्रुधी**) शृणु। अत्र **बहुलं छन्दसि** श्नोर्लुक् **श्रुशृणुपृकृवृभ्यश्छन्दसि** (अष्टा०६.४.१०२) इति हेर्द्धिर्यादेशो **अन्येषामपि** इति दीर्घश्च। (**हवम्**) आदातुमर्हं स्तुतिसमूहम् (**अद्य**) अस्मिन् दिने (**च**) समुच्चये (**मृळय**) सुखय (**त्वाम्**) विद्वांसम् (**अवस्युः**) आत्मनो रक्षणं विज्ञानं चेच्छुः (**आ**) समन्तात् (**चके**) प्रशंसामि॥ १९॥

अन्वयः-हे वरुण विद्वन्! अद्यावस्युरहं त्वामाचके प्रशंसामि त्वं मे मम हवं श्रुधि शृणु, मां च मृळय॥ १९॥

भावार्थः-यथेश्वरः खलूपासकैः सत्यप्रेम्णा यां प्रयुक्तां स्तुतिं सर्वज्ञतया यथावच्छ्रुत्त्वा तदनुकूलतया स्तावकेभ्यः सुखं प्रयच्छति, तथैव विद्वद्भिरपि भवितव्यम्॥ १९॥

पदार्थः-हे (**वरुण**) सब से उत्तम विपश्चित्! (**अद्य**) आज (**अवस्युः**) अपनी रक्षा वा विज्ञान को चाहता हुआ मैं (**त्वाम्**) आपकी (**आ चके**) अच्छी प्रकार प्रशंसा करता हूं, आप (**मे**) मेरी की हुई (**हवम्**) ग्रहण करने योग्य स्तुति को (**श्रुधि**) श्रवण कीजिये तथा मुझको (**मृळय**) विद्यादान से सुख दीजिये॥ १९॥

भावार्थः-जैसे परमात्मा जो उपासकों द्वारा निश्चय करके सत्य भाव और प्रेम के साथ की हुई स्तुतियों को अपने सर्वज्ञपन से यथावत् सुन कर उनके अनुकूल स्तुति करने वालों को सुख देता है, वैसे विद्वान् लोग भी धार्मिक मनुष्यों की योग्य प्रशंसा को सुन सुखयुक्त किया करें॥ १९॥

पुनः स ईश्वरः कीदृश इत्युपदिश्यते।

फिर वह परमात्मा कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं विश्व॑स्य मेधिर दि॒वश्च॒ ग्मश्च॑ राजसि।

स यामं॑नि॒ प्रति॑ श्रुधि॥ २०॥

त्वम्। विश्व॑स्य। मे॒धि॒र॒। दि॒वः। च॒। ग्मः। च॒। रा॒ज॒सि॒। सः। यामं॑नि। प्रति॑। श्रु॒धि॒॥ २०॥

पदार्थः-(**त्वम्**) यो वरुणो जगदीश्वरः (**विश्वस्य**) सर्वस्य जगतो मध्ये (**मेधिर**) मेधाविन् (**दिवः**) प्रकाशसहितस्य सूर्य्यादेः (**च**) अन्येषां लोकलोकान्तराणां समुच्चये (**ग्मः**) पृथिव्यादेः। **ग्मेति पृथिवीनामसु पठितम्।** (निघं०१.१) (**च**) अनुकर्षणे (**राजसि**) प्रकाशसे (**सः**) (**यामनि**) यान्ति गच्छन्ति यस्मिन् कालावयवे प्रहरे तस्मिन् (**प्रति**) प्रतीतार्थे (**श्रुधि**) शृणु। अत्र **बहुलं छन्दसि** इति श्नोर्लुक्। **श्रुशृणुपृकृवृभ्य- श्छन्दसि** (अष्टा०६.४.१०२) इति हेर्धिश्च॥ २०॥

अन्वयः-हे मेधिर वरुण! त्वं यथा यो जगदीश्वरो दिवश्च ग्मश्च विश्वस्य यामनि राजति, सोऽस्माकं स्तुतिं प्रतिशृणोति तथैतन्मध्ये राजसि राजेः स्तुतिं प्रतिश्रुधि शृणु॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरेण सर्वस्य जगतो द्विधाभेदः कृतोऽस्ति। एकः प्रकाशसहितः सूर्य्यादिर्द्वितीयः प्रकाशरहितः पृथिव्यादिश्च यस्तयोरुत्पत्तिर्विनाशनिमित्तः कालोऽस्ति, तत्राभिव्याप्तः सर्वेषां प्राणिनां संकल्पोत्पन्ना अपि वार्त्ताः शृणोति, तस्मान्नैव केनापि कदाचिदधर्मानुष्ठानकल्पना कर्त्तव्याऽस्ति, तथैव सकलैर्मानवैर्विज्ञायानुचरितव्यमिति॥२०॥

पदार्थः-हे **(मेधिर)** अत्यन्त विज्ञानयुक्त वरुण विद्वन्! **(त्वम्)** आप जैसे जो ईश्वर **(दिवः)** प्रकाशवान् सूर्य्य आदि **(च)** वा अन्य सब लोक **(ग्मः)** प्रकाशरहित पृथिवी आदि **(विश्वस्य)** सब लोकों के **(यामनि)** जिस-जिस काल में जीवों का आना-जाना होता है, उस-उसमें प्रकाश हो रहे हैं **(सः)** सो हमारी स्तुतियों को सुनकर आनन्द देते हैं, वैसे होकर इस राज्य के मध्य में **(राजसि)** प्रकाशित हूजिये और हमारी स्तुतियों को **(प्रतिश्रुधि)** सुनिये॥२०॥

भावार्थः-इस मन्त्र में वाचक लुप्तोपमालङ्कार है। जैसे परब्रह्म ने इस सब संसार के दो भेद किये हैं-एक प्रकाश वाला सूर्य्य आदि और दूसरा प्रकाश रहित पृथिवी आदि लोक। जो इनकी उत्पत्ति वा विनाश का निमित्त कारण काल है, उसमें सदा एक-सा रहने वाला परमेश्वर सब प्राणियों के संकल्प से उत्पन्न हुई बातों का भी श्रवण करता है, इससे कभी अधर्म के अनुष्ठान की कल्पना भी मनुष्यों को नहीं करनी चाहिये, वैसे इस सृष्टिक्रम को जानकर मनुष्यों को ठीक-ठीक वर्त्तना चाहिये॥२०॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह परमेश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उदु॑त्तमं मुमुग्धि नो॒ वि पाशं॑ मध्य॒मं चृ॑त।
अवा॑धमानि॑ जी॒वसे॑॥ २१॥ १९॥

उत्। उ॒त्ऽत॒मम्। मु॒मु॒ग्धि॒। नः॒। वि। पाश॑म्। म॒ध्य॒मम्। चृ॒त॒। अव॑। अ॒ध॒मानि॑। जी॒वसे॑॥ २१॥

पदार्थः-(**उत्**) उत्कृष्टार्थे क्रियायोगे वा **(उत्तमम्)** उत्कृष्टम् **(मुमुग्धि)** मोचय। अत्र **बहुलं छन्दसि** इति श्लुः। **(नः)** अस्माकम् **(वि)** विविधार्थे **(पाशम्)** बन्धनम् **(मध्यमम्)** उत्कृष्टानुकृष्टयोरन्तर्भवम् **(चृत)** नाशय। अत्रान्तर्गतो ण्यर्थः। **(अव)** क्रियायोगे **(अधमानि)** निकृष्टानि बन्धनानि **(जीवसे)** चिरं जीवितुम्। अत्र **तुमर्थे से०** इत्यसेन्प्रत्ययः॥२१॥

अन्वयः-हे वरुणाविद्यान्धकारविदारकेश्वर! त्वं करुणया नोऽस्माकं जीवस उत्तमं मध्यमं पाशमुन्मुमुग्ध्यधमानि बन्धनानि च व्यवचृत॥२१॥

भावार्थः-यथा धार्मिकाः परोपकारिणो विद्वांसो भूत्वेश्वरं प्रार्थयन्ते तेषां जगदीश्वरः सर्वाणि दुःखबन्धनादीनि निवार्य्यैतान् सुखयति, तथास्माभिः कथं नानुचरणीयानि॥ २१॥

चतुर्विंशसूक्तोक्तानां प्राजापत्यादीनामर्थानां मध्यस्थस्य वरुणार्थस्योक्तत्त्वाच्चातीत-सूक्तार्थेनास्य पञ्चविंशसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति प्रथमस्य द्वितीय एकोनविंशो वर्गः।१।६॥

पञ्चविंशं सूक्तं च समाप्तम्॥ २५॥

पदार्थः-हे अविद्यान्धकार के नाश करने वाले जगदीश्वर! आप **(नः)** हम लोगों के **(जीवसे)** बहुत जीने के लिये हमारे **(उत्तमम्)** श्रेष्ठ **(मध्यमम्)** मध्यम दुःखरूपी **(पाशम्)** बन्धनों को **(उन्मुमुग्धि)** अच्छे प्रकार छुड़ाइये तथा **(अधमानि)** जो कि हमारे दोषरूपी निकृष्ट बन्धन हैं, उनका भी **(व्यवचृत)** विनाश कीजिये॥ २१॥

भावार्थः-जैसे धार्मिक परोपकारी विद्वान् होकर ईश्वर की प्रार्थना करते हैं जगदीश्वर उनके सब दुःख बन्धनों को छुड़ाकर सुख युक्त करता है, वैसे कर्म हम लोगों को क्या न करना चाहिये॥ २१॥

चौबीसवें सूक्त में कहे हुए प्रजापति आदि अर्थों के बीच जो वरुण शब्द है, उसके अर्थ को इस पच्चीसवें सूक्त में कहने से सूक्त के अर्थ की सङ्गति पहिले सूक्त के अर्थ के साथ जाननी चाहिये॥

यह पहिले अष्टक और दूसरे अध्याय में उन्नीसवां वर्ग और पहिले मण्डल में छठे अनुवाक में पच्चीसवां सूक्त समाप्त हुआ॥ २५॥

अथास्य दशर्चस्य षड्विंशस्य सूक्तस्याजीगर्त्तिः शुनःशेप ऋषिः। अग्निर्देवता। १,८,९ आर्ची उष्णिक् छन्दः। ऋषभः स्वरः। २,६। निचृद्गायत्री। ३ प्रतिष्ठागायत्री। ४,१० गायत्री। ५,७ विराड्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रादिमे मन्त्रे होतृयजमानगुणा उपदिश्यन्ते॥

अब छब्बीसवें सूक्त का प्रारम्भ है। उसके पहिले मन्त्र में यज्ञ कराने और करने वालों के गुण प्रकाशित किये हैं॥

वसि॑ष्वा॒ हि मि॑येध्य॒ वस्त्रा॑ण्यू॒र्जां पते। सेमं नो॑ अध्व॒रं य॑ज॥ १॥

वसि॑ष्व। हि। मि॒ये॒ध्य॒। वस्त्रा॑णि। ऊ॒र्जा॒म्। प॒ते॒। सः। इ॒मम्। नः। अध्व॒रम्। य॒ज॒॥ १॥

पदार्थः-(**वसिष्व**) धर। अत्र **छन्दस्युभयथा** (अष्टा०३.४.११७) इत्यार्द्धधातुकत्वमाश्रित्य लोट्यपि वलादिलक्षण इट्। (**हि**) खलु (**मियेध्य**) मिनोति प्रक्षिपत्यन्तरिक्षं प्रत्यग्निद्वारा पदार्थांस्तत्सम्बुद्धौ। अत्र '**डुमिञ्**' धातोरौणादिको बाहुलकात् केध्यच् प्रत्ययः। (**वस्त्राणि**) कार्पासौर्णकौशेयकादीनि (**ऊर्जाम्**) बलपराक्रमान्नानाम् (**पते**) पालयितः (**सः**) होता यजमानो वा (**इमम्**) प्रत्यक्षमनुष्ठीयमानम् (**नः**) अस्माकम् (**अध्वरम्**) त्रिविधं यज्ञम् (**यज**) सङ्गच्छस्व॥ १॥

अन्वयः-हे ऊर्जां पते! मियेध्य होतर्यजमान वा त्वमेतानि वस्त्राणि वसिष्व हि नोऽस्माकमध्वरं यज सङ्गमय॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। यजमानो बहून् हस्तक्रियाप्रत्यक्षान् विदुषोवरित्वैतान् सत्कृत्यानेकानि कार्य्याणि संसेध्य सुखं प्राप्नुयात् प्रापयेच्च। नहि कश्चित् खलूत्तमपुरुषसंप्रयोगेण विना किञ्चिदपि व्यवहारपरमार्थकृत्यं साद्धुं शक्नोति॥ १॥

पदार्थः-हे (**ऊर्जाम्**) बल पराक्रम और अन्न आदि पदार्थों का (**पते**) पालन करने और कराने वाले तथा (**मियेध्य**) अग्नि द्वारा पदार्थों को फैलाने वाले विद्वान्! तू (**वस्त्राणि**) वस्त्रों को (**वसिष्व**) धारण कर (**सः**) (**हि**) ही (**नः**) हम लोगों के (**इमम्**) इस प्रत्यक्ष (**अध्वरम्**) तीन प्रकार के यज्ञ को (**यज**) सिद्ध कर॥ १॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। यज्ञ करने वाला विद्वान् हस्तक्रियाओं से बहुत पदार्थों को सिद्ध करने वाले विद्वानों को स्वीकार और उनका सत्कार कर अनेक कार्य्यों को सिद्ध कर सुख को प्राप्त करे वा करावे। कोई भी मनुष्य उत्तम विद्वान् पुरुषों के प्रसङ्ग किये विना कुछ भी व्यवहार वा परमार्थरूपी कार्य्य को सिद्ध करने को समर्थ नहीं हो सकता है॥ १॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि नो॒ होता॒ वरे॑ण्यः॒ सदा॑ यविष्ठ॒ मन्म॑भिः।

अग्ने॑ दि॒वित्म॑ता॒ वच॑:॥ २॥

नि। न॒:। होता॑। वरे॑ण्य:। सदा॑। य॒वि॒ष्ठ॒। मन्म॑ऽभि:। अग्ने॑। दि॒वित्म॑ता। वच॑:॥ २॥

पदार्थ:-(**नि**) नितराम् (**न:**) अस्माकम् (**होता**) सुखदाता (**वरेण्य:**) वरितुमर्ह:। **वृत्र एण्य:।** (उणा०३.२६) अनेनैण्यप्रत्यय:। (**सदा**) सर्वस्मिन् काले (**यविष्ठ**) अतिशयेन बलवान् यजमान (**मन्मभि:**) मन्यन्ते जानन्ति जना यै: पुरुषार्थैस्तै:। अत्र **कृतो बहुलम्** इति वार्त्तिकेन। **अन्यभ्योऽपि दृश्यन्ते।** (अष्टा०३.२.७५) अनेन करणे मनिन् प्रत्यय:। (**अग्ने**) विज्ञानादिप्रसिद्धस्वरूप। (**दिवित्मता**) दिवं प्रकाशमिन्धते यै: प्रशस्तै: स्वगुणैस्तद्वता। अत्र दिव्शब्दोपपदादिन्धधातो: **कृतो बहुलम्** इति करणकारके (**अन्यभ्योऽपि दृश्यन्ते।** अनेन सूत्रेण) क्विप्। तत: प्रशंसायां मतुप्। (**वच:**) उच्यते यत् तत्॥ २॥

अन्वय:-हे यविष्ठाग्ने यजमान! यो मन्मभि: सह वर्त्तमानो वरेण्यो होता नोऽस्माकं दिवित्मता वच: सङ्गमयति स त्वया सदा सङ्गन्तव्य:॥ २॥

भावार्थ:-अत्र पूर्वस्मान्मन्त्रात् (यज) इत्यस्याऽनुवृति:। मनुष्यै: सज्जनजनसाहित्येन सकलकामनासिद्धि: कार्य्या। नैतेन विना कश्चित्सुखी भवितुमर्हतीति॥ २॥

पदार्थ:-हे (**यविष्ठ**) अत्यन्त बल वाले (**अग्ने**) यजमान जो (**मन्मभि:**) जिनसे पदार्थ जाने जाते हैं, उन पुरुषार्थों के साथ वर्त्तमान (**वरेण्य:**) स्वीकार करने योग्य (**होता**) सुख देने वाला (**न:**) हम लोगों के (**दिवित्मता**) जिनसे अत्यन्त प्रकाश होता है, उससे प्रसिद्ध (**वच:**) वाणी को (**यज**) सिद्ध करता है, उसी का (**सदा**) सब काल में संग करना चाहिये॥ २॥

भावार्थ:-इस मन्त्र में पूर्व मन्त्र से (यज) इस पद की अनुवृत्ति आती है। मनुष्यों को योग्य है कि सज्जन मनुष्यों के सङ्ग से सकल कामनाओं की सिद्धि करें। इसके विना कोई भी मनुष्य सुखी रहने को समर्थ नहीं हो सकता॥ २॥

पुन: स कीदृश इत्युपदिश्यते।

फिर वह किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ हि ष्मा॑ सू॒नवे॑ पि॒तापिर्यज॑त्या॒पये॑।

सखा॒ सख्ये॒ वरे॑ण्य:॥ ३॥

आ। हि। स्म॒। सू॒नवे॑। पि॒ता। आ॒पि:। यज॑ति। आ॒पये॑। सखा॑। सख्ये॑। वरे॑ण्य:॥ ३॥

पदार्थः-**(आ)** अभितः **(हि)** निश्चये **(स्म)** स्पष्टार्थे। अत्र **निपातस्य च** इति दीर्घः।[1] **(सूनवे)** अपत्याय **(पिता)** पालकः **(आपिः)** सुखप्रापकः। अत्र **'आप्लृ व्याप्तौ'** अस्मात्। **इत्रजादिभ्यः।** (अष्टा०वा०३.३.१०८) इति वार्त्तिकेन **'इत्र्'** प्रत्ययः। **(यजति)** सङ्गच्छते **(आपये)** सद्गुणव्यापिने **(सखा)** सुहृत् **(सख्ये)** सुहृदे **(वरेण्यः)** सर्वत उत्कृष्टतमः॥३॥

अन्वयः-हे मनुष्या! यथा पिता सूनवे सखा सख्य आपिरापय आयजति, तथैवान्योऽयं सम्प्रीत्या कार्याणि संसाध्य हि ष्म सर्वोपकाराय यूयं सङ्गच्छध्वम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सन्तानसुखसम्पादकः कृपायमाणः पिता मित्राणां सुखप्रदः सखा विद्यार्थिने विद्याप्रदो विद्वाननुकूलो वर्त्तते, तथैव सर्वे मनुष्याः सर्वोपकाराय सततं प्रयतेरन्नितीश्वरोपदेशः॥३॥

पदार्थः-हे मनुष्यो! जैसे **(पिता)** पालन करने वाला **(सूनवे)** पुत्र के **(सखा)** मित्र **(सख्ये)** मित्र के और **(आपिः)** सुख देने वाला विद्वान् **(आपये)** उत्तम गुण व्याप्त होने विद्यार्थी के लिये **(आयजति)** अच्छे प्रकार यत्न करता है, वैसे परस्पर प्रीति के साथ कार्यों को सिद्धकर **(हि)** निश्चय करके **(स्म)** वर्त्तमान में उपकार के लिये तुम सङ्गत हो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अपने लड़कों को सुख सम्पादक उन पर कृपा करने वाला पिता, स्वमित्रों को सुख देने वाला मित्र और विद्यार्थियों को विद्या देने वाला विद्वान् अनुकूल वर्त्तता है, वैसे ही सब मनुष्य सबके उपकार के लिये अच्छे प्रकार निरन्तर यत्न करें, ऐसा ईश्वर का उपदेश है॥३॥

पुनस्ते कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर वे कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नो॑ ब॒र्ही रि॒शाद॑सो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा।
सीद॑न्तु मनु॒षो यथा॥४॥

आ। नः। ब॒र्हिः। रिशाद॑सः। वरु॑णः। मि॒त्रः। अ॒र्य॒मा। सीद॑न्तु। मनु॒षः। य॒था॒॥४॥

पदार्थः-**(आ)** समन्तात् **(नः)** अस्माकं **(बर्हिः)** सर्वसुखप्रापकमासनम्। **बर्हिरिति पदनामसु पठितम्।** (निघं०५.२) **(रिशादसः)** रिशानां हिंसकानां रोगाणां वा अदस उपक्षयितारः **(वरुणः)**

---

१. (आ) इत्यारभ्य, दीर्घः इति पर्यन्तं मुद्रितपुस्तके पाठो नास्ति, हस्तलिखितप्रेसपुस्तके तु वर्तते। सं०

सकलविद्यासु वरः **(मित्रः)** सर्वसुहृत् **(अर्यमा)** न्यायाधीशः **(सीदन्तु)** समासताम् **(मनुषः)** जानन्ति ये सभ्या मर्त्यास्ते। अत्र मनधातार्बाहुलकादौणादिक उसिः प्रत्ययः। **(यथा)** येन प्रकारेण॥४॥

अन्वयः-हे मनुष्या! यथा रिशादसो दुष्टहिंसकाः सभ्या वरुणो मित्रोऽर्यमा मनुषो नो बर्हिः सीदन्ति तथा भवन्तोऽपि सीदन्तु॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा सभ्यतया सभाचतुराः सभायां वर्त्तेरंस्तथा सर्वैर्मनुष्यैः सदा वर्त्तितव्यमिति॥४॥

पदार्थः-हे मनुष्यो **(यथा)** जैसे **(रिशादसः)** दुष्टों के मारनेवाले **(वरुणः)** सब विद्याओं में श्रेष्ठ **(मित्रः)** सबका सुहृद् **(अर्यमा)** न्यायकारी **(मनुषः)** सभ्य मनुष्य **(नः)** हम लोगों के **(बर्हिः)** सब सुख के देने वाले आसन में बैठते हैं, वैसे आप भी बैठिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सभ्यतापूर्वक सभाचतुर मनुष्य सभा में वर्त्तें, वैसे ही सब मनुष्यों को सब दिन वर्त्तना चाहिये॥४॥

पुनः स कथं वर्त्तेत इत्युपदिश्यते॥

फिर वह कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

पूर्व्य॑ होतर॒स्य नो॒ मन्द॑स्व स॒ख्यस्य॑ च।

इ॒मा उ॒ षु श्रु॑धी॒ गिर॑:॥५॥२०॥

पूर्व्य॑। होत॒:। अ॒स्य। न॒:। मन्द॑स्व। स॒ख्यस्य॑। च॒। इ॒माः। ऊ॒म् इति॑। सु। श्रु॒धि॒। गिर॑:॥५॥

पदार्थः-**(पूर्व्य)** पूर्वैर्विद्वद्भिः कृतो मित्रः। अत्र **पूर्वैः कृतमिनियौ च।** (अष्टा०४.४.१३३) अनेन पूर्वशब्दाद्यः प्रत्ययः **(होतः)** यज्ञसम्पादक **(अस्य)** वक्ष्यमाणस्य **(नः)** अस्माकम् **(मन्दस्व)** मोदस्व **(सख्यस्य)** सखीनां कर्मणः **(च)** पुत्रादीनां समुच्चये **(इमाः)** प्रत्यक्षमनुष्ठीयमानाः **(उ)** वितर्के **(सु)** शोभनार्थे **(श्रुधि)** शृणु श्रावय वा। अत्रैकपक्षेऽन्तर्गतो ण्यर्थो **बहुलं छन्दसि** इति श्नोर्लुक् **श्रुशृणुपृकृवृभ्यः** इति हेर्ध्यादेशश्च। **(गिरः)** वेदविद्यासंस्कृता वाचः॥५॥

अन्वयः-हे पूर्व्य होतर्यजमान वा त्वं नोऽस्माकमस्य सख्यस्य मन्दस्व कामयस्व, उ इति वितर्के नोऽस्माकमिमा वेदविद्या संस्कृता गिरः सुश्रुधि सुष्ठु शृणु श्रावय वा॥५॥

भावार्थः-मनुष्यैः सर्वेषु मनुष्येषु मैत्रीं कृत्वा सुशिक्षाविद्ये श्रुत्वा विद्वद्भिर्भवितव्यम्॥५॥

इति विंशो वर्गः॥२०॥

पदार्थः-हे **(पूर्व्य)** पूर्व विद्वानों ने किये हुए मित्र **(होतः)** यज्ञ करने वा कराने वाले विद्वान् तू **(नः)** हमारे **(अस्य)** इस **(सख्यस्य)** मित्रकर्म की **(मन्दस्व)** इच्छा कर **(उ)** निश्चय है कि हम लोगों

को **(इमाः)** ये जो प्रत्यक्ष **(गिरः)** वेदविद्या से संस्कार की हुई वाणी हैं, उनको **(सुश्रुधि)** अच्छे प्रकार सुन और सुनाया कर॥५॥

भावार्थः-मनुष्यों को उचित है कि सब मनुष्यों में मित्रता रखकर उत्तम शिक्षा और विद्या को पढ़ सुन और विचार के विद्वान् होवें॥५॥

यह बीसवां वर्ग पूरा हुआ॥२०॥

पुनर्होत्रादिभिरस्माभिः किं कर्त्तव्यमित्युपदिश्यते॥

फिर यज्ञ करने-कराने वाले आदि हम लोगों को क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

यच्चिद्धि शश्वता तना देवंदेवं यजामहे।
त्वे इद् धूयते हविः॥६॥

यत्। चित्। हि। शश्वता। तना। देवम्ऽदेवम्। यजामहे। त्वे इति। इत्। हूयते। हविः॥६॥

पदार्थः-(**यत्**) वक्ष्यमाणम् **(चित्)** अपि **(हि)** खलु **(शश्वता)** अनादिना कारणेन **(तना)** विस्तृतेन **(देवंदेवम्)** विद्वांसं विद्वांसं पृथिव्यादिदिव्यगुणं पदार्थं पदार्थं वा। अत्र वचनव्यत्ययो वीप्सा च। **(यजामहे)** सङ्गच्छामहे **(त्वे)** तस्मिन् **(इत्)** एव **(हूयते)** प्रक्षिप्यते **(हविः)** होतव्यं द्रव्यम्॥६॥

अन्वयः-हे नरो! यथा वयं शश्वता तना कारणेनेदेव सहितमुत्पन्नं यं देवंदेवं चिदपि यजामहे सङ्गच्छामहे त्वे हि खलु हविर्हूयते तथा यूयमपि जुहोत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्वत्सङ्गं कृत्वा अस्मिन् जगति यावन्तो दृश्यादृश्याः पदार्थाः सन्ति, ते सर्व अनादिना विस्तृतेन कारणेनोत्पद्यन्त इति बोध्यम्॥६॥

पदार्थः-हे मनुष्य लोगो! जैसे हम लोग **(यत्)** जिससे ये **(शश्वता)** अनादि **(तना)** विस्तारयुक्त कारण से **(इत्)** ही उत्पन्न हैं, इससे उन **(देवंदेवम्)** विद्वान् विद्वान् और सब पृथिवी आदि दिव्यगुण वाले पदार्थ पदार्थ को **(चित्)** भी **(यजामहे)** सङ्गत अर्थात् सिद्ध करते हैं **(त्वे)** उसमें **(हि)** ही **(हविः)** हवन करने योग्य वस्तु **(हूयते)** छोड़ते हैं, वैसे तुम भी किया करो॥६॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। इस संसार में जितने प्रत्यक्ष वा अप्रत्यक्ष पदार्थ हैं, वे सब अनादि अति विस्तार वाले कारण से उत्पन्न हैं, ऐसा जानना चाहिये॥६॥

पुनरस्माभिः परस्परं कथं वर्त्तितव्यमित्युपदिश्यते॥

फिर हम लोगों को परस्पर किस प्रकार वर्त्तना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः।

प्रियाः स्वग्नयो वयम्॥७॥

प्रियः। नः। अस्तु। विश्पतिः। होता। मन्द्रः। वरेण्यः। प्रियाः। सुऽअग्नयः। वयम्॥७॥

पदार्थः-(**प्रियः**) प्रीतिविषयः (**नः**) अस्माकम् (**अस्तु**) भवतु (**विश्पतिः**) विशां प्रजानां पालकः सभापती राजा। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति नियमात् **व्रश्चभ्रस्जसृजमृजयज०** (अष्टा०८.२.३६) इति षत्वं न भवति (**होता**) यज्ञसम्पादकः (**मन्द्रः**) स्तोतुमर्हो धार्मिकः। अत्र **स्फायितञ्चिवञ्चि०** (उणा०२.१३) इति रक्प्रत्ययः। (**वरेण्यः**) स्वीकर्तुं योग्यः (**प्रियाः**) राज्ञः प्रीतिविषयाः। (**स्वग्नयः**) शोभनः सुखकारकोऽग्निः सम्पादितो यैस्ते (**वयम्**) प्रजास्था मनुष्याः॥७॥

अन्वयः-हे मानवा! यथा स्वग्नयो वयं राजप्रियाः स्मो यथा होता मन्द्रो वरेण्यो विश्पतिर्नः प्रियोऽस्ति तथाऽन्योऽपि प्रियोऽस्तु॥७॥

भावार्थः-यथा वयं सर्वैः सह सौहार्देन वर्त्तामहेऽस्माभिः सह सर्वे वर्त्तेरंस्तथा यूयमपि वर्त्तध्वम्॥७॥

पदार्थः-हे मनुष्यो! जैसे (**स्वग्नयः**) जिन्होंने अग्नि को सुखकारक किया है, वे हम लोग (**प्रियाः**) राजा को प्रिय हैं, जैसे (**होता**) यज्ञ का करने-कराने (**मन्द्रः**) स्तुति के योग्य धर्मात्मा (**वरेण्यः**) स्वीकार करने योग्य विद्वान् (**विश्पतिः**) प्रजा का स्वामी सभाध्यक्ष (**नः**) हम को प्रिय है, वैसे अन्य भी मनुष्य हों॥७॥

भावार्थः-जैसे हम लोग सब के साथ मित्रभाव से वर्त्तते और ये सब लोग हम लोगों के साथ मित्रभाव और प्रीति से सब लोग वर्त्तते हैं, वैसे आप लोग भी होवें॥७॥

पुनस्ते कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर वे कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

स्वग्नयो हि वार्यं देवासो दधिरे च नः।

स्वग्नयो मनामहे॥८॥

सुऽअग्नयः। हि। वार्यम्। देवासः। दधिरे। च। नः। सुऽअग्नयः। मनामहे॥८॥

पदार्थः-(**स्वग्नयः**) शोभनोऽग्निर्येषां ते मनुष्याः पृथिव्यादयो वा (**हि**) खलु (**वार्यम्**) वरितुमर्हं पदार्थसमूहम् (**देवासः**) दिव्यगुणयुक्ता विद्वांसः। अत्र **आज्जसेरसुक्** (अष्टा०७.१.५०) इत्यसुगागमः। (**दधिरे**) हितवन्तः (**च**) समुच्चये (**नः**) अस्मभ्यम् (**स्वग्नयः**) ये शोभनानुष्ठानतेजोयुक्ताः (**मनामहे**) विजानीयाम। अत्र विकरणव्यत्ययेन शप्॥८॥

अन्वयः-यथा स्वग्नयो देवासः पृथिव्यादयो वा नोऽस्मभ्यं वार्यं दधिरे हितवन्तस्तथा वयमपि स्वग्नयो भूत्वैतेभ्यो विद्यासमूहं मनामहे विजानीयाम॥८॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। मनुष्यैरस्मिन् जगति यावन्तः पदार्था ईश्वरेणोत्पादितास्तेषां विज्ञानाय विद्यां सम्पाद्य कार्यसिद्धिः कार्येति॥८॥

पदार्थः-जैसे **(स्वग्नयः)** उत्तम अग्नियुक्त **(देवासः)** दिव्यगुण वाले विद्वान् **(च)** वा पृथिवी आदि पदार्थ **(नः)** हम लोगों के लिये **(वार्यम्)** स्वीकार करने योग्य पदार्थों को **(दधिरे)** धारण करते हैं, वैसे हम लोग **(स्वग्नयः)** अग्नि के उत्तम अनुष्ठान युक्त होकर इन्हों से विद्या समूह को **(मनामहे)** जानते हैं, वैसे तुम भी जानो॥८॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि ईश्वर ने इस संसार में जितने पदार्थ उत्पन्न किये हैं, उनके जानने के लिये विद्याओं का सम्पादन करके कार्यों की सिद्धि करें॥८॥

पुनः स किमर्थं याचनीयो मनुष्यैश्च परस्परं कथं वर्त्तितव्यमित्युपदिश्यते॥

फिर किसलिये उस ईश्वर की प्रार्थना करना और मनुष्यों को परस्पर कैसे वर्त्तना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अथा॑ न उ॒भये॑षा॒ममृ॑त॒ मर्त्या॑नाम्।

मि॒थः स॑न्तु॒ प्रश॑स्तयः॥९॥

अथ॑। नः॑। उ॒भये॑षाम्। अमृ॑त। मर्त्या॑नाम्। मि॒थः॑। स॒न्तु॒। प्रश॑स्तयः॥९॥

पदार्थः-**(अथ)** अनन्तरे **(नः)** अस्माकम् **(उभयेषाम्)** पण्डितापण्डितानाम् **(अमृत)** अविनाशिस्वरूपेश्वर **(मर्त्यानाम्)** मनुष्याणाम् **(मिथः)** अन्योन्यार्थे **(सन्तु)** भवन्तु **(प्रशस्तयः)** उत्तमगुणकर्मग्रहणप्रशंसाः॥९॥

अन्वयः-हे अमृत जगदीश्वर! भवत्कृपया यथोत्तमगुणकर्मग्रहणोनाथ नोऽस्माकमुभयेषां मर्त्यानां मिथः प्रशस्तयः सन्तु, तथा सर्वेषां भवन्त्विति प्रार्थयामः॥९॥

भावार्थः-यावन्मनुष्या रागद्वेषौ विहाय परस्परोपकाराय विद्याशिक्षापुरुषार्थैः प्रशस्तानि कर्माणि न कुर्वन्ति नैव तावत्तेषु सुखानि सम्पत्तुं शक्नुवन्ति। अथेत्यनन्तरं सर्वैर्मनुष्यैः परमेश्वराज्ञायां वर्त्तित्वा सर्वहितं नित्यं साधनीयमिति॥९॥

पदार्थः-हे **(अमृत)** अविनाशिस्वरूप जगदीश्वर! आप की कृपा से जैसे उत्तम गुण कर्मों के ग्रहण से **(अथ)** अनन्तर **(नः)** हम लोग जो कि विद्वान् वा मूर्ख हैं **(उभयेषाम्)** उन दोनों प्रकार के **(मर्त्यानाम्)** मनुष्यों की **(मिथः)** परस्पर संसार में **(प्रशस्तयः)** प्रशंसा **(सन्तु)** हों, वैसे सब मनुष्यों की हों, ऐसी प्रार्थना करते हैं॥९॥

भावार्थः-जब तक मनुष्य लोग राग वा द्वेष को छोड़कर परस्पर उपकार के लिये विद्या शिक्षा और पुरुषार्थ से उत्तम-उत्तम कर्म नहीं करते, तब तक वे सुखों के सम्पादन करने को समर्थ नहीं हो सकते। इसलिये सबको योग्य है कि परमेश्वर की आज्ञा में वर्त्तमान होकर सब का कल्याण करें॥९॥

पुनस्ते कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर वे कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः।

चनो धाः सहसो यहो॥ १०॥ २१॥

विश्वेभिः। अग्ने। अग्निऽभिः। इमम्। यज्ञम्। इदम्। वचः। चनः। धाः। सहसः। यहो इति॥ १०॥

पदार्थः-(**विश्वेभिः**) सर्वैः। अत्र **बहुलं छन्दसि** इति भिस ऐसादेशाभावः। (**अग्ने**) विद्यासुशिक्षायुक्तविद्वन् (**अग्निभिः**) विद्युत्सूर्यप्रसिद्धैः कार्यरूपैस्त्रिभिः (**इमम्**) प्रत्यक्षाप्रत्यक्षम् (**यज्ञम्**) सङ्गन्तव्यम् (**इदम्**) अस्माभिः प्रयुक्तम् (**वचः**) विद्यायुक्तं स्तुतिसम्पादकं वचनम् (**चनः**) भक्ष्यभोज्यलेह्यचूष्याख्यमन्नम्। अत्र **चायतेरन्ने ह्रस्वश्च।** (उणा०४.२०७) अनेनासुन् प्रत्ययो नुडागमश्च। (**धाः**) हितवान्। अत्राडभावश्च। (**सहसः**) सहते सहो वायुस्तस्य बलस्वरूपस्य (**यहो**) क्रिया-कौशलयुक्तस्यापत्यं तत्सम्बुद्धौ। **यहुरित्यपत्यनामसु पठितम्।** (निघं०२.२)॥१०॥

अन्वयः-हे अग्ने! यहो त्वं यथा दयालुर्विद्वान् सर्वसुखार्थं सहसो बलाद् विष्वेभिरग्निभिरिमं यज्ञमिदं वचश्चनश्च धा हितवांस्तथा त्वमपि सततं धेहि॥१०॥

भावार्थः-अत्रवाचकलुप्तोपमालङ्कारः। मनुष्यैरेवं स्वसन्तानानि नित्यं योज्यानि यः कारणरूपोऽग्निर्नित्योऽस्ति तस्मादीश्वररचनया विद्युदादिरूपाणि कार्य्याणि जायन्ते पुनस्तेभ्यो जाठरादिरूपाण्यनेकानि च तान् सर्वानग्नीन् कारणरूप एव धरति, यावन्त्यग्निकार्य्याणि सन्ति तावन्ति वायुनिमित्तेनैव जायन्ते, सर्वं जगत् तत्रस्थानि वस्तूनि च धरन्ति नैवाग्निवायुभ्यां विना कदाचित्कस्यापि वस्तुनो धारणं सम्भवतीति॥१०॥

पूर्वसूक्तोक्तेन वरुणार्थेनात्रोक्तस्याग्नेरनुषङ्गित्वात् पूर्वसूक्तार्थेनास्य षड्विंशसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति प्रथमाष्टके द्वितीयध्याय एकविंशो वर्गः॥ २१॥

प्रथममण्डले षष्ठेऽनुवाके षड्विंशं सूक्तं च समाप्तम्॥ २६॥

पदार्थः-हे (**यहो**) शिल्पकर्म में चतुर के अपत्य कार्य्यरूप अग्नि के उत्पन्न करने वाले (**अग्ने**) विद्वान् जैसे आप सब सुखों के लिये (**सहसः**) अपने बल स्वरूप से (**विश्वेभिः**) सब (**अग्निभिः**) विद्युत् सूर्य्य और प्रसिद्ध कार्य्यरूप अग्नियों से (**इमम्**) इस प्रत्यक्ष वा अप्रत्यक्ष (**यज्ञम्**) संसार के व्यवहाररूप

यज्ञ और **(इदम्)** हम लोगों ने कहा हुआ **(वचः)** विद्यायुक्त प्रशंसा का वाक्य **(चनः)** और खाने स्वाद लेने चाटने और चूसने योग्य पदार्थों को **(धाः)** धारण कर चुका हो, वैसे तू भी सदा धारण कर॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि अपने सन्तानों को निम्नलिखित ज्ञान कार्य्य में युक्त करें। जो कारणरूप नित्य अग्नि है, उससे ईश्वर की रचना में बिजुली आदि कार्य्यरूप पदार्थ सिद्ध होते हैं, फिर उनसे जो सब जीवों के अन्न को पचाने वाले अग्नि के समान अनेक पदार्थ उत्पन्न होते हैं, उन सब अग्नियों को कारण रूप ही अग्नि धारण करता है, जितने अग्नि के कार्य हैं, वे वायु के निमित्त ही प्रसिद्ध होते हैं, उन सबको पदार्थ धारण करते हैं, अग्नि और वायु के विना कभी किसी पदार्थ का धारण नहीं हो सकता है इत्यादि॥१०॥

पहिले सूक्त में वरुण के अर्थ के अनुषङ्गी अर्थात् सहायक अग्नि शब्द के इस सूक्त में प्रतिपादन करने से पिछले सूक्त के अर्थ के साथ इस छब्बीसवें सूक्त के अर्थ की सङ्गति जाननी चाहिये॥

यह पहिले अष्टक में दूसरे अध्याय में इक्कीसवां वर्ग तथा पहिले मण्डल में छठे अनुवाक में छब्बीसवां सूक्त समाप्त हुआ॥२६॥

अथ त्रयोदशर्चस्य सप्तविंशस्य सूक्तस्याजीगर्त्तिः शुनःशेप ऋषिः। १-१२ अग्निः। १३ विश्वेदेवा देवताः। १-१२ गायत्री। १३ त्रिष्टुप् छन्दः। १-१२ षड्जः। १३ धैवतः स्वरश्च॥

तत्रादिमेनाग्निरुपदिश्यते॥

अब सत्ताईसवें सूक्त का प्रारम्भ है, उसके पहिले मन्त्र में अग्नि का प्रकाश किया है॥

अश्वं॒ न त्वा॒ वार॑वन्तं व॒न्दध्या॑ अ॒ग्निं नमो॑भिः।

स॒म्राज॑न्तमध्व॒राणा॑म्॥ १॥

अश्व॑म्। न। त्वा॒। वार॑ऽवन्तम्। व॒न्दध्यै॑। अ॒ग्निम्। नमः॑ऽभिः। स॒म्ऽराज॑न्तम्। अ॒ध्व॒राणा॑म्॥ १॥

पदार्थः-(**अश्वम्**) वेगवन्तं वाजिनम् (**न**) (**त्वा**) त्वां तं वा (**वारवन्तम्**) वालवन्तम् (**वन्दध्यै**) वन्दितुम्। अत्र **तुमर्थे सेसे०** इति कध्यै प्रत्ययः। (**अग्निम्**) विद्वांसं वा भौतिकम् (**नमोभिः**) नमस्कारैरन्नादिभिः सह (**सम्राजन्तम्**) सम्यक् प्रकाशमानम् (**अध्वराणाम्**) राज्यपालनाग्निहोत्रादिशिल्पान्तानां यज्ञानां मध्ये (**अश्वम्**) मार्गे व्यापिनम् (**न**) इव (**त्वा**) त्वाम् (**वारवन्तम्**)। एतद्यास्कमुनिरेवं व्याचष्टे। **अश्वमिव त्वा वालवन्तं वाला दंशवारणार्था भवन्ति दंशो दशतेः।** (निरु०१.२०)॥१॥

अन्वयः-वयं नमोभिर्वारवन्तमश्वं न इवाध्वराणां सम्राजन्तं त्वामग्निं वन्दध्यै वन्दितुं प्रवृत्ताः सेवामहे॥१॥

भावार्थः-अत्रोपमालङ्कारः। यथा विपश्चित्स्वविद्यादिगुणैः स्वराज्ये राजते तथैव परमेश्वरः सर्वज्ञत्वादिभिर्गुणैः सर्वत्र प्रकाशते चेति॥१॥

पदार्थः-हम लोग (**नमोभिः**) नमस्कार, स्तुति और अन्न आदि पदार्थों के साथ (**वारवन्तम्**) उत्तम केशवाले (**अश्वम्**) वेगवान् घोड़े के (**न**) समान। (**अध्वराणाम्**) राज्य के पालन अग्निहोत्र से लेकर शिल्प पर्य्यन्त यज्ञों में (**सम्राजन्तम्**) प्रकाशयुक्त (**त्वा**) आप विद्वान् को (**वन्दध्यै**) स्तुति करने को प्रवृत्त हुए भये सेवा करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् स्वविद्या के प्रकाश आदि गुणों से अपने राज्य में अविद्या अन्धकार को निवारण कर प्रकाशित होते हैं, वैसे परमेश्वर सर्वज्ञपन आदि से प्रकाशमान है॥१॥

अथाऽपत्यगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में सन्तान के गुण प्रकाशित किये हैं॥

स घा॑ नः सू॒नुः शव॑सा पृ॒थुप्र॑गामा सु॒शेव॑ः।

मी॒ढ्वाँ अ॒स्माक॑ं बभूयात्॥ २॥

सः। घ। नः। सूनुः। शवसा। पृथुऽप्रगामा। सुऽशेवः। मीढ्वान्। अस्माकम्। बभूयात्॥ २॥

पदार्थः-(**सः**) वक्ष्यमाणः (**घ**) एव। अत्र **ऋचि तुनुघमक्षु०** (अष्टा०६.३.१३३) अनेन दीर्घः। (**नः**) अस्माकम् (**सूनुः**) कार्यकारी सन्तानः। **सूनुरित्यपत्यनामसु पठितम्।** (निघं०२.२) (**शवसा**) बलादिगुणेन सह (**पृथुप्रगामा**) पृथुभिः विस्तृतैर्यानैः प्रकृष्टो गामो गमनं यस्य सः। अत्र **सुपां सुलुग्०** इति विभक्तेराकारादेशः। (**सुशेवः**) शोभनं शेवं सुखं यस्मात् सः। **शेवमिति सुखनामसु पठितम्।** (निघं०३.६) अत्र। **इण्शीभ्यां वन्।** (उणा०१.१५०) अनेन शीङ्धातोर्वन् प्रत्ययः। (**मीढ्वान्**) वृष्टिद्वारा सेचकः। अत्र **दाश्वान् साह्वान्०** (अष्टा०६.१.१२) इति निपाताद् द्वित्वं न। (**अस्माकम्**) पुरुषार्थिनां सुक्रियया (**बभूयात्**) भवेत्। अत्र **वा च्छन्दसि सर्वे विधयो भवन्तीति** नियमात् लिटः स्थाने लिङ् तद्वत्कार्यं च। अत्र सायणाचार्य्येण लिटः स्थाने लिडित्युच्चार्य्य **तिङां तिङो भवन्ती**त्यशुद्धं व्याख्यातम्॥ २॥

अन्वयः-यः सूनुः सुपुत्रः शवसा पृथुप्रगामा मीढ्वानस्ति, स नोऽस्माकं पुरुषार्थिना घ एव कार्य्यकारी बभूयात् भवेत्॥ २॥

भावार्थः-यथा विद्यासुशिक्षया धार्मिका विद्वांसः पुत्रा अनेकान्यनुकूलानि कर्माणि संसेव्य पित्रादीनां सुखानि नित्यं सम्पादयन्ति, तथैव बहुगुणयुक्तोऽयमग्निर्विद्यानुकूलरीत्या सम्प्रयोजितः सन्नस्माकं सर्वाणि सुखानि साधयति॥ २॥

पदार्थः-जो (**सूनुः**) धर्मात्मा पुत्र (**शवसा**) अपने पुरुषार्थ बल आदि गुण से (**पृथुप्रगामा**) अत्यन्त विस्तारयुक्त विमानादि रथों से उत्तम गमन करने तथा (**मीढ्वान्**) योग्य सुख का सींचने वाला है, वह (**नः**) हम लोगों की (**घ**) ही उत्तम क्रिया से धर्म और शिल्प कार्यों को करने वाला (**बभूयात्**) हो। इस मन्त्र में सायणाचार्य्य ने लिट् के स्थान में लिङ् लकार कहकर तिङ् को तिङ् होना यह अशुद्धता से व्याख्यान किया है, क्योंकि (**तिङां तिङो भवन्तीति वक्तव्यम्**) इस वार्तिक से तिङों का व्यत्यय होता है, कुछ लकारों का व्यत्यय नहीं होता है॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्या सुशिक्षा से धार्म्मिक सुशील पुत्र अनेक अपने कहे के अनुकूल कामों को करके पिता माता आदि के सुखों को नित्य सिद्ध करता है, वैसे ही बहुत गुण वाला यह भौतिक अग्नि विद्या के अनुकूल रीति से सम्प्रयुक्त किया हुआ हम लोगों के सब सुखों को सिद्ध करता है॥ २॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स नो॑ दू॒राच्चा॒साच्च॒ नि मर्त्या॑दघा॒योः। पा॒हि स॒दमि॒द् वि॒श्वायु॑ः॥ ३॥

सः। नः। दूरात्। च। आसात्। च। नि। मर्त्यात्। अघऽयोः। पाहि। सदम्। इत्। विश्वऽआयुः॥३॥

पदार्थः-(**सः**) जगदीश्वरो विद्वान् वा (**नः**) अस्मानस्माकं वा (**दूरात्**) विप्रकृष्टात् (**च**) समुच्चये (**आसात्**) समीपात् (**च**) पुनरर्थे (**नि**) नितराम् (**मर्त्यात्**) मनुष्यात् (**अघायोः**) आत्मनोऽघमिच्छतः शत्रोः (**पाहि**) रक्ष (**सदम्**) सीदन्ति सुखानि यस्मिंस्तं शिल्पव्यवहारं देहादिकं वा (**इत्**) एव (**विश्वायुः**) विश्वं सम्पूर्णामायुर्यस्मात् सः॥३॥

अन्वयः-स विश्वायुरघायोः शत्रोर्मर्त्त्याद् दूरादासाच्च नोऽस्मानस्माकं सदं च निपाहि सततं रक्षति॥३॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैरुपासित ईश्वरः संसेवितो विद्वान् वा युद्धे शत्रूणां सकाशाद् रक्षको रक्षाहेतुर्भूत्वा शरीरादिकं विमानादिकं च संरक्ष्यास्मभ्यं सर्वमायुः सम्पादयति॥३॥

पदार्थः-(**विश्वायुः**) जिससे कि समस्त आयु सुख से प्राप्त होती है (**सः**) वह जगदीश्वर वा भौतिक अग्नि (**अघायोः**) जो पाप करना चाहते हैं, उन (**मर्त्यात्**) शत्रुजनों से (**दूरात्**) दूर वा (**आसात्**) समीप से (**नः**) हम लोगों की वा हम लोगों के (**सदः**) सब सुख रहने वाले शिल्पव्यवहार वा देहादिकों की (**नि**) (**पाहि**) निरन्तर रक्षा करता है॥३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों से उपासना किया हुआ ईश्वर वा सम्यक् सेवित विद्वान् युद्ध में शत्रुओं से रक्षा करने वाला वा रक्षा का हेतु होकर शरीर आदि वा विमानादि की रक्षा करके हम लोगों के लिये सब आयु देता है॥३॥

अथाग्निशब्देनेश्वर उपदिश्यते॥

अब अगले मन्त्र में अग्नि शब्द से ईश्वर का प्रकाश किया है॥

इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम्।
अग्ने देवेषु प्र वोचः॥४॥

इमम्। ऊम् इति। सु। त्वम्। अस्माकम्। सनिम्। गायत्रम्। नव्यांसम्। अग्ने। देवेषु। प्र। वोचः॥४॥

पदार्थः-(**इमम्**) वक्ष्यमाणम् (**ऊ**) वितर्के अत्र **निपातस्य च** इति दीर्घः। (**सु**) शोभने (**त्वम्**) सर्वमङ्गलप्रदातेश्वरः (**अस्माकम्**) मनुष्याणाम् (**सनिम्**) सनन्ति सम्भजन्ति सुखानि यस्मिन् व्यवहारे तम्। अत्र '**सन**' धातोः। **खनिकृष्यज्यसिवसिवनिसनि०** (उणा०४.१४५) अनेनाऽधिकरण '**इः**' प्रत्ययः। (**गायत्रम्**) गायत्रीप्रगाथा येषु चतुर्षु वेदेषु तं वेदचतुष्टयम् (**नव्यांसम्**) अतिशयेन नवो नवीनो बोधो यस्मात्तम्। अत्र **छान्दसो वर्णलोपो वा** इत्यनेनेकारलोपश्च। (**अग्ने**) अनन्तविद्यामय जगदीश्वर (**देवेषु**) सुष्ट्यादौ पुण्यात्मसु जातेष्वग्निवाय्वादित्याङ्गिरस्सु मनुष्येषु (**प्र**) प्रकृष्टार्थे क्रियायोगे (**वोचः**) प्रोक्तवान्। अत्र '**वच**' धातोर्वर्त्तमाने लुङडभावश्च॥४॥

अन्वयः-हे अग्ने! त्वं यथा देवेषु नव्यांसं गायत्रं सुसनिं प्रवोचस्तथेममु इति वितर्केऽस्माकमात्मसु प्रवग्धि॥४॥

भावार्थः-हे जगदीश्वर! भवान् यथा ब्रह्मादीनां महर्षीणां धार्मिकाणां विदुषामात्मसु सत्यं बोधं प्रकाश्य परमं सुखं दत्तवान्, तथैवास्माकमात्मसु तादृशमेव प्रकाशय यतो वयं विद्वांसो भूत्वा श्रेष्ठानि धर्म्मकार्य्याणि सदैव कुर्य्यामेति॥४॥

पदार्थः-हे **(अग्ने)** अनन्त विद्यामय जगदीश्वर **(त्वम्)** सब विद्याओं का उपदेश करने और सब मङ्गलों के देने वाले आप जैसे सृष्टि की आदि में **(देवेषु)** पुण्यात्मा अग्नि वायु आदित्य अङ्गिरा नामक मनुष्यों के आत्माओं में **(नव्यांसम्)** नवीन-नवीन बोध कराने वाला **(गायत्रम्)** गायत्री आदि छन्दों से युक्त **(सुसनिम्)** जिन में सब प्राणी सुखों का सेवन करते हैं, उन चारों वेदों का **(प्रवोचः)** उपदेश किया और अगले कल्प-कल्पादि में फिर भी करोगे, वैसे उसको **(उ)** विविध प्रकार से **(अस्माकम्)** हमारे आत्माओं में **(सु)** अच्छे प्रकार कीजिये॥४॥

भावार्थः-हे जगदीश्वर! आप ने जैसे ब्रह्मा आदि महर्षि धार्मिक विद्वानों के आत्माओं में वेद द्वारा सत्य बोध का प्रकाश कर उनको उत्तम सुख दिया वैसे ही हम लोगों के आत्माओं में बोध प्रकाशित कीजिये, जिससे हम लोग विद्वान् होकर उत्तम-उत्तम धर्मकार्यों का सदा सेवन करते रहें॥

पुनर्मनुष्यान् प्रति विदुषा कथं वर्त्तितव्यमित्युपदिश्यते॥

फिर मनुष्यों के प्रति विद्वानों को कैसे वर्त्तना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नो भज परमेष्वा वाजेषु मध्यमेषु।
शिक्षा वस्वो अन्तमस्य॥५॥२२॥

आ। नः। भज। परमेषु। आ। वाजेषु। मध्यमेषु। शिक्ष। वस्वः। अन्तमस्य॥५॥

पदार्थः-**(आ)** समन्तात् **(नः)** अस्मान् **(भज)** सेवस्व **(परमेषु)** उत्कृष्टेषु **(आ)** अभ्यर्थे **(वाजेषु)** सुखप्राप्तिमयेषु युद्धेषूत्तमेष्वन्नादिषु वा **(मध्यमेषु)** मध्यमसुखविशिष्टेषु **(शिक्ष)** सर्वा विद्या उपदिशेः। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(वस्वः)** सुखपूर्वकं वसन्ति यैस्तानि वसूनि द्रव्याणि **(अन्तमस्य)** सर्वेषां दुःखानामन्तं मिमीते येन युद्धेन तस्य मध्ये॥५॥

अन्वयः-हे विद्वंस्त्वं परमेषु मध्यमेषु वाजेषु वान्तमस्य मध्ये नोऽस्मान् सर्वा विद्या आशिक्षैवं नोऽस्मान् वस्वो वसून्याभज समन्तात्सेवस्व॥५॥

भावार्थः-एवं यैर्धार्मिकैः पुरुषार्थिभिर्मनुष्यैः सेवितः सन् विद्वान् सर्वा विद्याः प्राप्य तान् सुखिनः कुर्य्यात्। अस्मिन् जगत्युत्तममध्यमनिकृष्टभेदेन त्रिविधा भोगालोका मनुष्याश्च सन्त्येतेषु यथाबुद्धि जनान् विद्यां दद्यात्॥५॥

पदार्थः-हे विद्वान् मनुष्य **(परमेषु)** उत्तम **(मध्यमेषु)** मध्यम आनन्द के देने वाले वा **(वाजेषु)** सुख प्राप्तिमय युद्धों वा उत्तम अन्नादि में **(अन्तमस्य)** जिस प्रत्यक्ष सुख मिलने वाले संग्राम के बीच में **(नः)** हम लोगों को **(आशिक्ष)** सब विद्याओं की शिक्षा कीजिये इसी प्रकार हम लोगों के **(वस्वः)** धन आदि उत्तम-उत्तम पदार्थों का **(आभज)** अच्छे प्रकार स्वीकार कीजिये॥५॥

भावार्थः-इस प्रकार जिन धार्मिक पुरुषार्थी पुरुषों से सेवन किया हुआ विद्वान् सब विद्याओं को प्राप्त कराके उनको सुख युक्त करे तथा इस जगत् में उत्तम, मध्यम और निकृष्ट भेद से तीन प्रकार के भोगलोक और मनुष्य हैं, इन को यथा बुद्धि विद्या देता रहे॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ।
सद्यो दाशुषे क्षरसि॥६॥

विऽभक्ता। असि। चित्रभानो इति चित्रऽभानो। सिन्धोः। ऊर्म्मौ। उपाके। आ। सद्यः। दाशुषे। क्षरसि॥६॥

पदार्थः-(**विभक्ता**) विविधानां पदार्थानां सम्भागकर्त्ता **(असि)** वर्त्तसे **(चित्रभानो)** यथा चित्रा अद्भुता भानवो विज्ञानादिदीप्तयो यस्य विदुषस्तत्सम्बुद्धौ तथा **(सिन्धोः)** समुद्रस्य **(ऊर्मौ)** तरङ्ग इव **(उपाके)** समीपे **(आ)** सर्वतः **(सद्यः)** शीघ्रम् **(दाशुषे)** विद्याग्रहणाऽनुष्ठानकृतवते मनुष्याय **(क्षरसि)** वर्षसि॥६॥

अन्वयः-यथा हे चित्रभानो विविधविद्यायुक्त विद्वँस्त्वं सिन्धोरूर्मौ जलकणविभाग इव सर्वेषां पदार्थानां विद्यानां विभक्तासि, दाशुष उपाके सत्योपदेशेन बोधान् सद्य आक्षरसि समन्ताद्वर्षसि तथा त्वं भाग्यशाली विद्वानस्माभिः सत्कर्त्तव्योऽसि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा समुद्रस्य जलकणाः पृथक् भूत्वा आकाशं प्राप्यैकीभूत्वा अभिवर्षन्ति यथा विद्वान् विद्याभिः सर्वान् पदार्थान् विभज्यैतान् पुनः पुनर्मनुष्यात्मसु प्रकाशयेत् तथाऽस्माभिः कथं नानुष्ठातव्यम्॥६॥

पदार्थः-जैसे हे **(चित्रभानो)** विविधविद्यायुक्त विद्वान्! मनुष्य आप **(सिन्धोः)** समुद्र की **(ऊर्मौ)** तरंगों में जल के बिन्दु कणों के समान सब पदार्थ विद्या के **(विभक्ता)** अलग-अलग करने वाले **(असि)** हैं और **(दाशुषे)** विद्या का ग्रहण वा अनुष्ठान करने वाले मनुष्य के लिये **(उपाके)** समीप सत्य

बोध उपदेश को **(सद्यः)** शीघ्र **(आक्षरसि)** अच्छे प्रकार वर्षाते हो, वैसे भाग्यशाली विद्वान् आप हम सब लोगों के सत्कार के योग्य हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे समुद्र के जलकण अलग हुए आकाश को प्राप्त होकर वहाँ इकट्ठे होके वर्षते हैं, वैसे ही विद्वान् अपनी विद्या से सब पदार्थों का विभाग करके उनका बार-बार मनुष्यों के आत्माओं में प्रवेश किया करते हैं॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः।
स यन्ता शश्वतीरिषः॥७॥

यम्। अग्ने। पृऽत्सु। मर्त्यम्। अवाः। वाजेषु। यम्। जुनाः। सः। यन्ता। शश्वतीः। इषः॥७॥

पदार्थः-(**यम्**) धार्मिकं शूरवीरम् **(अग्ने)** स्वबलतेजसा प्रकाशमान् **(पृत्सु)** पृतनासु। **पदादिषु मांस्पृत्स्नूनामुपसंख्यानम्।** (अष्टा०वा०६.१.६३) इति वार्त्तिकेन पृतनाशब्दस्य पृदादेशः। **(मर्त्यम्)** मनुष्यम् **(अवाः)** रक्षेः। अयं लेट्प्रयोगः। **(वाजेषु)** संग्रामेषु **(यम्)** योद्धारम् **(जुनाः)** प्रेरयेः। अयं **'जुन गतौ'** इत्यस्य लेट्प्रयोगः। **(सः)** मनुष्यः **(यन्ता)** शत्रूणां निग्रहीता **(शश्वतीः)** अनादिस्वरूपाः **(इषः)** इष्यन्ते यास्ताः प्रजाः। अत्र **कृतो बहुलम्** इति कर्मणि क्विप्॥७॥

अन्वयः-हे जगदीश्वर! त्वं यं मर्त्यं पृत्स्ववा रक्षेर्यं च वाजेषु जुनाः प्रेरयेर्य इमाः शश्वतीः प्रजाः सततमवरक्षेरस्मात् कारणात् स भवानस्माकं सदा यन्ता भवत्विति वयं प्रतिजानीमः॥७॥

भावार्थः-यथा यो जगदीश्वर एवानादिकालाद् वर्तमानायाः प्रजाया रक्षारचनाव्यवस्थाकारकोऽस्ति, तथा यो मनुष्य एतं सर्वव्यापिनं सर्वतोऽभिरक्षकं परमेश्वरमुपास्यैवं विदधाति तस्य नैव कदाचित्पीडापराजयौ भवत इति॥७॥

पदार्थः-हे **(अग्ने)** सेनाध्यक्ष! आप **(यम्)** जिस युद्ध करने वाले **(मर्त्यम्)** मनुष्य को **(पृत्सु)** सेनाओं के बीच **(अवाः)** रक्षा करें **(यम्)** जिस धार्मिक शूरवीर को **(वाजेषु)** संग्रामों में **(जुनाः)** प्रेरें जो इस **(शश्वतीः)** अनादि काल से वर्त्तमान **(इषः)** प्रजा की निरन्तर रक्षा करें, इस कारण से **(सः)** सो आप हमारा **(यन्ता)** नियमों में चलाने वाला नायक हूजिये, इस प्रकार हम प्रतिज्ञा करते हैं॥७॥

भावार्थः-जैसे जगदीश्वर जो अनादि काल से वर्त्तमान प्रजा की रक्षा, रचना और व्यवस्था करने वाला है, वैसे जो मनुष्य इस सर्वव्यापी सब प्रकार की रक्षा करने वाले परमेश्वर की उपासना कर यथोक्त काम करता है, उसको न कभी पीड़ा वा पराजय होता है॥७॥

पुनः सः कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

नकि॑रस्य सहन्त्य पर्ये॒ता कय॑स्य चित्।

वाजो॑ अस्ति श्रवाय्य॑:॥८॥

नकि॑:। अ॒स्य॒। स॒हन्त्य॒। प॒रि॒ऽए॒ता। कय॑स्य। चि॒त्। वाज॑:। अ॒स्ति॒। श्र॒वाय्य॑:॥८॥

पदार्थः-(**नकिः**) धर्ममर्यादा या नाक्रमिता। **नकिरिति सर्वसमानीयेषु पठितम्।** (निघं०३.१२) अनेन क्रमणनिषेधार्थो गृह्यते **(अस्य)** सेनाध्यक्षस्य **(सहन्त्य)** सहनशील विद्वन् **(पर्येता)** सर्वतोऽनुग्रहीता **(कयस्य)** चिकेति जानाति योद्धुं शत्रून् पराजेतुं यः स कयस्तस्य। अत्र सायणाचार्येण यकारोपजनश्छान्दस इति भ्रमादेवोक्तम्। **(चित्)** एव **(वाजः)** संग्रामः **(अस्ति)** भवति **(श्रवाय्यः)** श्रोतुमर्हः। अत्र **श्रुदक्षिस्पृहि०** (उणा०३.९४) अनेनाय्य प्रत्ययः॥८॥

अन्वयः-हे सहन्त्य सहनशील विद्वन्नकिः पर्येता त्वं यस्यास्य कयस्य धर्मात्मनो वीरस्य श्रवाय्यो वाजोऽस्ति, तस्मै सर्वमभीष्टं पदार्थं दद्या इति नियोज्यते भवानस्माभिः॥८॥

भावार्थः-यथा नैव कश्चिद् विद्वानप्यनन्तशुभगुणस्याप्रमेयस्याक्रमितव्यस्य परमेश्वरस्य क्रमणं परिमाणं कर्त्तुमर्हति यस्य सर्वं विज्ञानं निर्भ्रान्तमस्ति, तथैव येनैवं प्रवृत्त्यते स एव सर्वैर्मनुष्यै राजकार्य्याधिपतिः स्थापनीयः॥८॥

पदार्थः-हे **(सहन्त्य)** सहनशील विद्वान्! **(नकिः)** जो धर्म की मर्यादा उल्लङ्घन न करने और **(पर्येता)** सब पर पूर्ण कृपा करने वाले आप **(यस्य)** जिस **(कयस्य)** युद्ध करने और शत्रुओं को जीतने वाले शूरवीर पुरुष का **(श्रवाय्यः)** श्रवण करने योग्य **(वाजः)** युद्ध करना **(अस्ति)** होता है, उसको सब उत्तम पदार्थ सदा दिया कीजिये, इस प्रकार आप का नियोग हम लोग करते हैं॥८॥

भावार्थः-जैसे कोई भी जीव जिस अनन्त शुभ गुणयुक्त परिमाण सहित सब से उत्तम परमेश्वर के गुणों की न्यूनता वा उसका परिमाण करने को योग्य नहीं हो सकता, जिसका सब ज्ञान निर्भ्रम है, वैसे जो मनुष्य वर्त्तता है, वही सब राजकार्यो का स्वामी नियत करना चाहिये॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स वाज॑ं वि॒श्वच॑र्षणि॒रर्व॑द्भिरस्तु॒ तर॑ुता।

विप्रे॑भिरस्तु॒ सनि॑ता॥९॥

सः। वाज॑म्। वि॒श्वऽच॑र्षणिः। अर्व॑त्ऽभिः। अ॒स्तु॒। तर॑ुता। विप्रे॑भिः। अ॒स्तु॒। सनि॑ता॥९॥

पदार्थः-(**सः**) सेनाध्यक्षः **(वाजम्)** संग्रामम् **(विश्वचर्षणिः)** विश्वे सर्वे चर्षणयो मनुष्या रक्ष्या यस्य सः। अत्र **कृषेरादेश्च चः।** (उणा०२.१००) अनेनानि प्रत्यय आदेश्चकारादेशश्च। **(अर्वद्भिः)**

सेनास्थैरश्वादिभिः सेनाङ्गैः। **अर्वा इत्यश्वनामसु पठितम्।** (निघं०१.१४) **(अस्तु)** भवतु **(तरुता)** तर्त्ता तारयिता पारंगमयिता। **ग्रसितस्कभितस्तभि०** (अष्टा०७.२.३४) अनेनायं निपातितः। **(विप्रेभिः)** मेधाविभिः सह। अत्र **बहुलं छन्दसि** इति भिस ऐस् न। **(अस्तु)** भवतु **(सनिता)** ज्ञानस्य सुखस्य विभक्ता॥९॥

अन्वयः-यो विश्वचर्षणिस्तरुता सेनाध्यक्षोऽस्माकं सेनायां विप्रेभिर्नरैरर्वद्भिरश्वादिभिः सहितः सन्नो वाजं विजयप्रदः शत्रूणां पराजयकृदस्तु भवेत्, स एवास्माकं मध्ये सेनापतिरस्तु॥९॥

भावार्थः-मनुष्यैर्यः सर्वदुःखेभ्यः पारं गमयिता युद्धे विजयप्रापको युद्धकुशलो धार्मिको विद्वान् भवेत्, स एव नः सेनास्वामी भवतु॥९॥

पदार्थः-जो **(विश्वचर्षणिः)** जिसके सब मनुष्य रक्षा के योग्य **(तरुता)** शत्रुनिमित्तक दुःखों के पार पहुंचने-पहुंचाने वाला **(सनिता)** ज्ञान और सुख का विभाग करके देनेहारा सेनापति हमारी सेना में **(विप्रेभिः)** बुद्धिचातुर्ययुक्त पुरुष **(अर्वद्भिः)** घोड़े आदि से सहित हो हमको **(वाजम्)** युद्ध में विजय की प्राप्ति और शत्रुओं का पराजय करने हारा सेनापति है, वही हमारे बीच में सेना स्वामी **(अस्तु)** हो॥९॥

भावार्थः-जो मनुष्यों को सब दुःखरूपी सागर से पार करने और युद्ध में विजय देने वाला विद्वान् है, वही अच्छे विद्वानों के समागम से सेना का अधिपति होने योग्य है॥९॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

जरा॑बोधु॒ तद्वि॑विड्ढि वि॒शेवि॑शे यु॒ज्ञिया॑य।
स्तोमं॑ रु॒द्राय॒ दृशी॑कम्॥ १०॥ २३॥

जरा॑ऽबोध। तत्। वि॒वि॒ड्ढि। वि॒शेऽवि॑शे। यु॒ज्ञिया॑य। स्तोम॑म्। रु॒द्राय॑। दृशी॑कम्॥ १०॥

पदार्थः-**(जराबोध)** जरया गुणस्तुत्या बोधो यस्य सैन्यनायकस्य तत्सम्बुद्धौ **(तत्)** तस्मात् **(विविड्ढि)** व्याप्नुहि। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति नियमात्। **निजां त्रयाणां गुणः०** (अष्टा०७.४.७५) अनेनाभ्यासस्य गुणनिषेधः[२]। **(विशेविशे)** प्रजायै प्रजायै **(यज्ञियाय)** यज्ञकर्मार्हतीति यज्ञियो योद्धा तस्मै। अत्र **तत्कर्मार्हतीत्युपसंख्यानम्।** (अष्टा०वा०५.१.७१) अनेन वार्त्तिकेन यज्ञशब्दाद् घः प्रत्ययः **(स्तोमम्)** स्तुतिसमूहम् **(रुद्राय)** रोदकाय **(दृशीकम्)** द्रष्टुमर्हम्। अत्र बाहुलकादौणादिक ईकन् प्रत्ययः। किच्च। यास्कमुनिरिमं मन्त्रमेवं

---

२. 'न' इत्यर्थः। सं०

समाचष्टे। **जरा स्तुतिर्जरते: स्तुतिकर्मणस्तां बोधय तया बोधयितरिति वा। तद्विविड्ढि तत्कुरु। मनुष्यस्य मनुष्यस्य वा यज्ञियाय**[३] **स्तोमं रुद्राय दर्शनीयम्।** (निरु०१०.८)॥१०॥

अन्वय:-हे जराबोध सेनाधिपते! त्वं यस्माद् विशेविशे यज्ञियाय रुद्राय दृशीकं स्तोमं विविड्ढि तत्तस्मान्मानार्होऽसि॥१०॥

भावार्थ:-अत्र पूर्णोपमालङ्कार:। नैव धनुर्वेदविदो गुणश्रवणेन विनाऽस्य बोध: सम्भवति, य: प्रजासुखाय तीक्ष्णस्वभावान् शत्रुबलहृद्भृत्यान् सुशिक्ष्य रक्षति, स एव प्रजापालो भवितुमर्हति॥१०॥

पदार्थ:-हे **(जराबोध)** गुण कीर्त्तन से प्रकाशित होने वाले सेनापति आप जिससे **(विशेविशे)** प्राणी-प्राणी के सुख के लिये **(यज्ञियाय)** यज्ञकर्म के योग्य **(रुद्राय)** दुष्टों को रुलाने वाले के लिये सब पदार्थों को प्रकाशित करने वाले **(दृशीकम्)** देखने योग्य **(स्तोमम्)** स्तुतिसमूह गुणकीर्त्तन को **(विविड्ढि)** व्याप्त करते हो, **(तत्)** इससे माननीय हो॥१०॥

भावार्थ:-इस मन्त्र में पूर्णोपमालङ्कार है। युद्धविद्या के जानने वाले के गुणों को श्रवण करे विना इस का ज्ञान नहीं होता और जो प्रजा के सुख के लिये अतितीक्ष्ण स्वभाव वाले शत्रुओं के बल के नाश करनेहारे भृत्यों को अच्छी शिक्षा दे कर रखता है, वही प्रजापालन में योग्य होता है॥१०॥

पुनर्भौतिकगुणा उपदिश्यन्ते॥

फिर अगले मन्त्र में भौतिक अग्नि के गुण प्रकाशित किये हैं॥

स नो॑ म॒हाँ अ॑निमा॒नो धू॒मके॑तु: पुरुश्च॒न्द्र:।
धि॒ये वाजा॑य हिन्वतु॥११॥

स:। न॒:। म॒हान्। अ॒नि॒ऽमा॒न:। धू॒मऽके॑तु:। पु॒रु॒ऽच॒न्द्र:। धि॒ये। वाजा॑य। हि॒न्व॒तु॥११॥

पदार्थ:-(**स:**) भौतिकोऽग्नि: (**न:**) अस्मान् (**महान्**) महागुणविशिष्ट (**अनिमान:**) अविद्यमानं निमानं परिमाणं यस्य स: (**धूमकेतु:**) धूम: केतुर्ध्वजावद्यस्य स: (**पुरुश्चन्द्र:**) पुरूणां बहूनां चन्द्र आह्लादक:। अत्र **ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे०** (अष्टा०६.१.१५१) अनेन सुडागम:। (**धिये**) कर्मणे (**वाजाय**) वेगाय (**हिन्वतु**) प्रीणयतु। अत्र लडर्थे लोडन्तर्गतो ण्यर्थ:॥११॥

अन्वय:-मनुष्यैर्यतोऽयं धूमकेतु: पुरुश्चन्द्रोऽनिमानो महानग्निरस्ति, स धिये वाजाय नोऽस्मान् हिन्वतु प्रीणयेत्, तस्मादेतस्य साधनं कार्यम्॥११॥

---

३. वै० यन्त्रालये मुद्रित निरुक्तस्य तृतीयावृत्तौ '**बोधय**' इत्यस्य स्थाने '**बोध**' '**यज्ञियाय**' इत्यस्यस्थाने च '**यजनाय**' इति पाठो वर्तते। सं०।

भावार्थः-यः सर्वथोत्कृष्टः केनापि परीच्छेत्तुमनर्हः सर्वाधारः सर्वानन्दप्रदः विज्ञानधनो जगदीश्वरोऽस्ति, येन महागुणयुक्तोऽयमग्निर्निर्मितः स एव शुभे कर्मणि शुद्धे विज्ञाने अस्मान् प्रेरयत्विति॥११॥

पदार्थः-मनुष्यों को योग्य है कि जो **(धूमकेतुः)** जिसका धूम ध्वजा के समान **(पुरुश्चन्द्रः)** बहुतों को आनन्द देने **(अनिमानः)** जिसका निमान अर्थात् परिमाण नहीं है **(महान्)** अत्यन्त गुणयुक्त भौतिक अग्नि है **(सः)** वह **(धिये)** उत्तम कर्म वा **(वाजाय)** विज्ञानरूप वेग के लिये **(नः)** हम लोगों को **(हिन्वतु)** तृप्त करता है॥११॥

भावार्थः-जो सब प्रकार श्रेष्ठ किसी के छिन्न-भिन्न करने में नहीं आता, सब का आधार, सब आनन्द का देने वा विज्ञानसमूह परमेश्वर है और जिसने महागुण युक्त भौतिक अग्नि रची है, वही उत्तम कर्म वा शुद्ध विज्ञान में हम लोगों को सदा प्रेरणा करे॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः।
उक्थैरग्निर्बृहद्भानुः॥१२॥

सः। रेवान्ऽइव। विश्पतिः। दैव्यः। केतुः। शृणोतु। नः। उक्थैः। अग्निः। बृहत्ऽभानुः॥१२॥

पदार्थः-**(सः)** श्रीमान् **(रेवान्इव)** महाधनाढ्य इव। अत्र रैशब्दान्मतुप्। **रयेर्मतौ बहुलम्।** (अष्टा०वा०६.१.३७) इति वार्त्तिकेन सम्प्रसारणं **छन्दसीरः** (अष्टा०८.२.१५) इति वत्वम्। **(विश्पतिः)** विशां प्रजानां पतिः पालनहेतुः। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति **व्रश्चभ्रस्जसृज०** (अष्टा०८.२.३६) अनेन षकारादेशो न। **(दैव्यः)** देवेषु कुशलः। अत्र **देवाद्यञञौ।** (अष्टा०वा०४.१.८५) अनेन प्राग्दीव्यतीयकुशलेऽर्थे देवशब्दाद्यञ् प्रत्ययः। **(केतुः)** रोगदूरकरणे हेतुः **(शृणोतु)** श्रावयतु वा। अत्र पक्षेऽन्तर्गतो ण्यर्थः। **(नः)** अस्मभ्यम् **(उक्थैः)** वेदस्तोत्रैः सुखप्रापकः **(बृहद्भानुः)** बृहन्तो भानवः प्रकाशा यस्य सः॥१२॥

अन्वयः-हे विद्वँस्त्वं यो दैव्यः केतुर्विश्पतिर्बृहद्भानू रेवान् इवाग्निरस्ति तमुक्थैः शृणोतु नोऽस्मभ्यं श्रावयतु॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा पूर्णधनो विद्वान् मनुष्यो धनभोगैः सर्वान् मनुष्यान् सुखयति, सर्वेषां वार्त्ताः प्रीत्या शृणोति, तथैव जगदीश्वरोऽपि प्रीत्या सम्पादितां स्तुतिं श्रुत्वा तान् सदैव सुखयतीति॥१२॥

पदार्थः-हे विद्वान् मनुष्य! तुम जो **(दैव्यः)** देवों में कुशल **(केतुः)** रोग को दूर करने में हेतु **(विश्पतिः)** प्रजा को पालने वाला **(बृहद्भानुः)** बहुत प्रकाशयुक्त **(रेवान् इव)** अत्यन्त धन वाले के समान **(अग्निः)** सबको सुख प्राप्त करने वाला अग्नि है **(उक्थैः)** वेदोक्त स्तोत्रों के साथ सुना जाता है, उसको **(शृणोतु)** सुन और **(नः)** हम लोगों के लिये सुनाइये॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पूर्ण धन वाला विद्वान् मनुष्य धन भोगने योग्य पदार्थों से सब मनुष्यों को सुख संयुक्त करता और सब की वार्त्ताओं को सुनता है, वैसे ही जगदीश्वर सबकी की हुई स्तुति को सुनकर उनको सुखसंयुक्त करता है॥१२॥

अथ सर्वेषां सत्कारः कर्त्तव्य इत्युपदिश्यते॥

अब अगले मन्त्र में सब का सत्कार करना अवश्य है, इस बात का प्रकाश किया है॥

नमो॑ म॒हद्भ्यो॒ नमो॑ अर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्य॑:।
यजा॑म दे॒वान् यदि॑ श॒क्नवा॑म॒ मा ज्याय॑स॒: शंस॒मा वृ॑क्षि देवा:॥ १३॥ २४॥

नमः॑। म॒हत्ऽभ्यः॑। नमः॑। अ॒र्भ॒केभ्यः॑। नमः॑। युव॑ऽभ्यः। नमः॑। आ॒शि॒नेभ्यः॑। यजा॑म। दे॒वान्। यदि॑। श॒क्नवा॑म। मा। ज्याय॑सः। शंस॑म्। आ। वृ॒क्षि॒। दे॒वाः॒॥ १३॥

पदार्थः-**(नमः)** सत्करणमन्त्रं वा। **नम इत्यन्ननामसु पठितम्।** (निघं०२.७) **(महद्भ्यः)** पूर्णविद्यायुक्तेभ्यो विद्वद्भ्यः **(नमः)** प्रीणनाय **(अर्भकेभ्यः)** अल्पगुणेभ्यो विद्यार्थिभ्यः **(नमः)** सत्काराय **(युवभ्यः)** युवावस्थया बलिष्ठेभ्यो विद्वद्भ्यः **(नमः)** सेवायै **(आशिनेभ्यः)** सकलविद्याव्यापकेभ्यः स्थविरेभ्यः **(यजाम)** दद्याम **(देवान्)** विदुषः **(यदि)** सामर्थ्याऽनुकूलविचारे **(शक्नवाम)** समर्था भवेम **(मा)** निषेधार्थे **(ज्यायसः)** विद्याशुभगुणैर्ज्येष्ठान् **(शंसम्)** शंसन्ति येन तं स्तुतिसमूहम् **(आ)** समन्तात् **(वृक्षि)** वर्जयेयम्। अत्र **'वृजी वर्जन'** इत्यस्माल्लिडर्थे लुङ् **छन्दस्युभयथा** इति सार्वधातुकाश्रयणादिण् न। वृजीत्यस्य सिद्धे सति सायणाचार्य्येण **ओव्रश्चू** इत्यस्य व्यत्ययं मत्त्वा प्रमादादेवोक्तमिति **(देवाः)** देवयन्ति प्रकाशयन्ति विद्यास्तत्सम्बोधने॥१३॥

अन्वयः-हे देवा विद्वांसो वयं महद्भ्योऽन्नं यजाम दद्यामैवमर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यश्च नमो ददन्तो वयं यदि शक्नवाम ज्यायसो देवानायजाम समन्ताद् विद्यादानं कुर्यामैवं प्रतिजनोऽहमेतेषां शंसम्मावृक्षि कदाचिन्मा वर्जयेयम्॥१३॥

भावार्थः-अत्र मनुष्यैर्निरभिमानत्वं प्राप्यान्नादिभिः सर्वे सत्कर्त्तव्या इतीश्वर उपदिशति यावत्स्वसामर्थ्यं तावद्विदुषां सङ्गसत्कारौ नित्यं कर्त्तव्यौ नैव कदाचित्तेषां निन्दा कर्त्तव्येति॥१३॥

पूर्वेणाग्न्यर्थप्रतिपादनस्य बोद्धारो विद्वांस एव भवन्तीत्यस्मिन् सूक्ते प्रतिपादनात् षडविंशसूक्तार्थेन सहास्य सप्तविंशसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्।

इति प्रथमस्य द्वितीये चतुर्विंशो वर्गः।

प्रथममण्डले षष्ठेऽनुवाके सप्तविंशं सूक्तं च समाप्तम्॥

पदार्थः-हे **(देवाः)** सब विद्याओं को प्रकाशित करने वाले विद्वानो! हम लोग **(महद्भ्यः)** पूर्ण विद्यायुक्त विद्वानों के लिये **(नमः)** सत्कार अन्न **(यजाम)** करें और दें **(अर्भकेभ्यः)** थोड़े गुणवाले विद्यार्थियों के **(नमः)** तृप्ति **(युवभ्यः)** युवावस्था से जो बल वाले विद्वान् हैं उनके लिये **(नमः)** सत्कार **(आशिनेभ्यः)** समस्त विद्याओं में व्याप्त जो बुड्ढे विद्वान् हैं, उनके लिये **(नमः)** सेवापूर्वक देते हुए **(यदि)** जो सामर्थ्य के अनुकूल विचार में **(शक्नवाम)** समर्थ हों तो **(ज्यायसः)** विद्या आदि उत्तम गुणों से अति प्रशंसनीय **(देवान्)** विद्वानों को **(आयजाम)** अच्छे प्रकार विद्या ग्रहण करें, इसी प्रकार हम सब जने **(शंसम्)** इनकी स्तुति प्रशंसा को **(मा वृक्षि)** कभी न काटें॥१३॥

भावार्थः-इस मन्त्र में ईश्वर का यह उपदेश है कि मनुष्यों को चाहिये अभिमान छोड़कर अन्नादि से सब उत्तम जनों का सत्कार करें अर्थात् जितना धन पदार्थ आदि उत्तम बातों से अपना सामर्थ्य हो उतना उनका संग करके विद्या प्राप्त करें, किन्तु उनकी कभी निन्दा न करें॥१३॥

पिछले सूक्त में अग्नि का वर्णन है उसको अच्छे प्रकार जानने वाले विद्वान् ही होते हैं, उनका यहाँ वर्णन करने से छब्बीसवें सूक्तार्थ के साथ इस सत्ताईसवें सूक्त की सङ्गति जाननी चाहिये।

यह पहले अष्टक में दूसरे अध्याय में चौबीसवां वर्ग और पहिले मण्डल में छठे अनुवाक में सत्ताईसवां सूक्त समाप्त हुआ॥२७॥

अथ नवर्चस्याष्टाविंशस्य सूक्तस्याजीगर्त्तिः शुनःशेप ऋषिः। इन्द्रयज्ञसोमा देवताः। १-६ अनुष्टुप् ७-९ गायत्री च छन्दसी। १-६ गान्धारः ७-९ षड्जश्च स्वरौ॥

कर्मानुष्ठात्रा जीवेन यद्यत्कर्त्तव्यं तदुपदिश्यते॥

अब अट्ठाईसवें सूक्त का प्रारम्भ है, उसके पहिले मन्त्र में कर्म के अनुष्ठान करने वाले जीव को जो-जो करना चाहिये, इस विषय का उपदेश किया है॥

यत्र ग्रावा॑ पृथु॒बु॑ध्न ऊ॒र्ध्वो भव॑ति॒ सोत॑वे।
उ॒लूख॑लसुताना॒मवेद्वि॑न्द्र॒ जल्गु॑लः॥ १॥

यत्र॑। ग्रावा॑। पृथु॒ऽबु॑ध्नः। ऊ॒र्ध्वः। भव॑ति। सोत॑वे। उ॒लूख॑लऽसुतानाम्। अव॑। इत्। ऊ॒म् इति॑। इ॒न्द्र॒। जल्गु॑लः॥ १॥

पदार्थः-(**यत्र**) यस्मिन् यज्ञव्यवहारे (**ग्रावा**) पाषाणः (**पृथुबुध्नः**) पृथुमहद् बुध्नं मूलं यस्य सः (**ऊर्ध्वः**) पृथिव्याः सकाशात् किंचिदुन्नतः (**भवति**) (**सोतवे**) यवाद्योषधीनां सारं निष्पादयितु। अत्र तुमर्थे **सेसेनसे०** इति सुञ् धातोस्तवेन् प्रत्ययः। (**उलूखलसुतानाम्**) उलूखलेन सुता निष्पादिताः पदार्थास्तेषाम् (**अव**) रक्ष (**इत्**) एव (**उ**) वितर्के (**इन्द्र**) ऐश्वर्यप्राप्तये तत्तत्कर्मानुष्ठातर्मनुष्य (**जल्गुलः**) अतिशयेन गृणीहि। अत्र '**गृ शब्दे**' इत्यस्माद्यङ्लुगन्ताल्लेट्। **बहुलं छन्दसि** इत्युपधाया उत्वं च॥ १॥

अन्वयः-हे इन्द्र यज्ञकर्मानुष्ठातर्मनुष्य त्वं यत्र पृथुबुध्न ऊर्ध्वो ग्रावा धान्यानि सोतवे अभिषोतुं भवति, तत्रोलूखलसुतानां पदार्थानां ग्रहणं कृत्वा तान् सदाऽव उ इति वितर्के तमुलूखलं युक्त्या धान्यसिद्धये जल्गुलः पुनः पुनः शब्दय॥ १॥

भावार्थः-ईश्वर उपदिशति हे मनुष्या! यूयं यवाद्योषधीनामसारत्यागाय सारग्रहणाय स्थूलं पाषाणं यथायोग्यं मध्यगर्तं कृत्वा निवेशयत स च भूमितलात् किञ्चिदूर्ध्वं स्थापनीयो येन धान्यसारनिस्सरण यथावत् स्यात्, तत्र यवादिकं स्थापयित्वा मुसलेन हत्वा शब्दयतेति॥ १॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्ययुक्त कर्म के करने वाले मनुष्य! तुम (**यत्र**) जिन यज्ञ आदि व्यवहारों में (**पृथुबुध्नः**) बड़ी जड़ का (**ऊर्ध्वः**) जो कि भूमि से कुछ ऊंचे रहने वाले (**ग्रावा**) पत्थर और मुसल को (**सोतवे**) अन्न आदि कूटने के लिये (**भवति**) युक्त करते हो, उनमें (**उलूखलसुतानाम्**) उखली मुशल के कूटे हुए पदार्थों को ग्रहण करके उनकी सदा उत्तमता के साथ रक्षा करो (**उ**) और अच्छे विचारों से युक्ति के साथ पदार्थ सिद्ध होने के लिये (**जल्गुलः**) इस को नित्य ही चलाया करो॥ १॥

भावार्थः-ईश्वर उपदेश करता है कि हे मनुष्यो! तुम यव आदि ओषधियों के असार निकालने और सार लेने के लिये भारी से पत्थर में जैसा चाहिये, वैसा गड्ढा करके उसको भूमि में गाड़ो और वह भूमि से कुछ ऊंचा रहे, जिससे कि अनाज के सार वा असार का निकालना अच्छे प्रकार बने, उसमें यव आदि अन्न स्थापन करके मुसल से उसको कूटो॥ १॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

यत्र द्वाविव जघनाधिषवण्या कृता।

उलूखलसुतानामवेद्विन्द्र जल्गुलः॥ २॥

यत्र। द्वौऽइव। जघना। अधिऽसवन्या। कृता। उलूखलऽसुतानाम्। अव। इत्। ऊम् इति। इन्द्र। जल्गुलः॥ २॥

पदार्थः-(**यत्र**) यस्मिन् व्यवहारे (**द्वाविव**) उभे यथा (**जघना**) उरुणी। **जघनं जङ्घन्यते:।** (निरु०९.२०) अत्र हन्ते: **शरीरावयवे द्वे च।** (उणा०५.३२) अनेनाच् प्रत्ययो द्वित्वं **सुपां सुलुग्०** इति त्रिषु विभक्तेराकारादेशश्च। (**अधिषवण्या**) अधिगतं सुन्वन्ति याभ्यां ते अधिषवणी तयोर्भवे। अत्र **भवे छन्दसि** (अष्टा०४.४.११०) इति यत् (**कृता**) कृते (**उलूखलसुतानाम्**) उलूखलेन शोधितानाम् (**अव**) प्राप्नुहि (**इत्**) एव (**उ**) वितर्के (**इन्द्र**) अन्त:करणबहिष्करणशरीरादिसाधनैऽश्वर्य्यवन् मनुष्य (**जल्गुलः**) अतिशयेन शब्दय। सिद्धिः पूर्ववत्॥ २॥

अन्वयः-हे इन्द्र! विद्वंस्त्वं यत्र द्वे जङ्घे इव अधिषवण्ये फलके कृते भवतस्ते सम्यक् कृत्वोलूखलसुतानां पदार्थानां सकाशात् सारमव प्राप्नुहि उ वितर्के इत् तदेव जल्गुलः पुनः पुनः शब्दय॥ २॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा द्वाभ्यामुरुभ्यां गमनादिका क्रिया निष्पाद्यते, तथैव पाषाणस्याध एका स्थूला शिला स्थापनार्था द्वितीया हस्तेनोपरि पेषणार्था कार्ये ताभ्यामोषधीनां पेषणं कृत्वा यथावद्भक्षणादि संसाध्य भक्षणीयमिदमपि मुसलोलूखलवद् द्वितीयं साधनं रचनीयमिति॥ २॥

पदार्थः-हे (**इन्द्र**) भीतर बाहर के शरीर साधनों से ऐश्वर्य वाले विद्वान् मनुष्य! तुम (**द्वाविव**) (**जघना**) दो जंघाओं के समान (**यत्र**) जिस व्यवहार में (**अधिषवण्या**) अच्छे प्रकार वा असार अलग-अलग करने के पात्र अर्थात् शिलबट्टे होते हैं, उनको (**कृता**) अच्छे प्रकार सिद्ध करके (**उलूखलसुतानाम्**) शिलबट्टे से शुद्ध किये हुए पदार्थों के सकाश से सार को (**अव**) प्राप्त हो (**उ**) और उत्तम विचार से (**इत्**) उसी को (**जल्गुलः**) बार-बार पदार्थों पर चला॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को योग्य है कि जैसे दोनों जांघों के सहाय से मार्ग का चलना-चलाना सिद्ध होता है, वैसे ही एक तो पत्थर की शिला नीचे रक्खें और दूसरा ऊपर से पीसने के लिये बट्टा जिसको हाथ में लेकर पदार्थ पीसे जायें, इनसे औषधि आदि पदार्थों को पीसकर यथावत् भक्ष्य आदि पदार्थों को सिद्ध करके खावें। यह भी दूसरा साधन उखली मुसल के समान बनाना चाहिये॥ २॥

अथेयं विद्या कथं ग्राह्येत्युपदिश्यते॥

अब अगले मन्त्र में यह विद्या कैसे ग्रहण करनी चाहिये, इस विषय का उपदेश किया है॥

यत्र॒ नार्य॑पच्य॒वमु॑पच्य॒वं च॒ शिक्ष॑ते।

उ॒लूख॑लसुतानामवेद॒मिन्द्र॒ जल्गु॑लः॥ ३॥

यत्र॑। नारी॑। अ॒प॒ऽच्य॒वम्। उ॒प॒ऽच्य॒वम्। च॒। शिक्ष॑ते। उ॒लूख॑लसुतानाम्। अव॑। इत्। ऊ॒म् इति॑। इ॒न्द्र॒। ज॒ल्गु॒लः॥ ३॥

पदार्थः-(**यत्र**) यस्मिन् कर्मणि (**नारी**) नरस्य पत्नी गृहमध्ये (**अपच्यवम्**) त्यागम् (**उपच्यवम्**) प्रापणम्। **च्युङ् गता**वित्यस्य प्रयोगौ (**च**) तत् क्रियाकरणशिक्षादेः समुच्चये (**शिक्षते**) ग्राहयति (**उलूखलसुतानाम्**) उलूखलेनोत्पादितानाम् (**अव**) जानीहि (**इत्**) एवं (**उ**) जिज्ञासने (**इन्द्र**) इन्द्रियाधिष्ठातर्जीव (**जल्गुलः**) शृणूपदिश च। सिद्धिः पूर्ववत्॥ ३॥

अन्वयः-हे इन्द्र! त्वं यत्र नारीकर्मकारीभ्य उलूखलसुतानामपच्यवमुपच्यवं च शिक्षते तद्विद्यामुपादत्ते, तत्र तदेतत्सर्वमु इदेव जल्गुलः शृण्वेता उपदिश च॥ ३॥

भावार्थः-उलूखलादिविद्याया भोजनादिसाधिकाया गृहसम्बन्धिकार्यकारित्वादेषा स्त्रीभिर्नित्यं ग्राह्याऽन्याभ्यो ग्राहयितव्या च। यत्र पाकक्रिया साध्यते तत्रैतानि स्थापनीयानि नैतैर्विना कुट्टनपेषणादिक्रियाः सिध्यन्तीति॥ ३॥

पदार्थः-हे (**इन्द्र**) इन्द्रियों के स्वामी जीव! तू (**यत्र**) जिस कर्म में घर के बीच (**नारी**) स्त्रियां काम करने वाली अपनी संगि स्त्रियों के लिये (**उलूखलसुतानाम्**) उक्त उलूखलों से सिद्ध की हुई विद्या को (**अपच्यवम्**) (**उपच्यवम्**) (**च**) अर्थात् जैसे डालना निकालनादि क्रिया करनी होती है, वैसे उस विद्या को (**शिक्षते**) शिक्षा से ग्रहण करती और कराती हैं, उसको (**उ**) अनेक तर्कों के साथ (**जल्गुलः**) सुनो और इस विद्या का उपदेश करो॥ ३॥

भावार्थः-यह उलूखलविद्या जो कि भोजनादि के पदार्थ सिद्ध करने वाली है, गृहसम्बन्धि कार्य करने वाली होने से यह विद्या स्त्रियों को नित्य ग्रहण करनी और अन्य स्त्रियों को सिखाना भी चाहिये। जहाँ पाक सिद्ध किये जाते हों वहाँ ये सब उलूखल आदि साधन स्थापन करने चाहिये, क्योंकि इनके विना कूटना-पीसना आदि क्रिया सिद्ध नहीं हो सकती॥ ३॥

एतत्सम्बन्ध्यन्यदपि साधनमुपदिश्यते॥

इसके सम्बन्धी और भी साधन का अगले मन्त्र में उपदेश किया है॥

यत्र॒ मन्था॑ वि॒बु॒ध्नते॑ र॒श्मीन्॒ य॒मि॑त॒वा इ॑व।

उ॒लूख॑लसुतानामवेद॒मिन्द्र॒ जल्गु॑लः॥ ४॥

यत्र॑। मन्था॑म्। वि॒ऽब॒ध्नते॑। र॒श्मी॑न्। य॒मि॒त॒वैऽइ॑व। उ॒लूख॑लऽसुतानाम्। अव॑। इत्। ऊ॒म् इति॑। इ॒न्द्र॒। ज॒ल्गु॒ल॒:॥४॥

पदार्थ:-(यत्र) यस्मिन् क्रियासाध्ये व्यवहारे **(मन्थाम्)** घृतादिनिस्सारणं मन्थानम्। अत्र **छान्दसो वर्णलोपो वा** इति नकारलोप:। **(विबध्नते)** विशिष्टतया बध्नन्ति। अत्र व्यत्ययेनात्मनेपदम्। **(रश्मीन्)** रज्जू: **(यमितवाइव)** निग्रहीतुमर्ह इव। अत्र यम धातोस्तवै प्रत्यय:। **वा छन्दसि सर्वे विधयो भवन्ति** इति इडागम:। **(उलूखलसुतानाम्)** उलूखलेन सम्पादितानां प्राप्तिम्। उलूखलशब्दार्थं यास्कमुनिरेवं समाचष्टे। **उलूखलमुरुकरं वोर्ध्वखं वोर्क्करं वा। उरु मे कुर्वित्यब्रवीत् तदुलूखलमभवत्। उरुकरं वै तदुलूखलमित्याचक्षते** (निरु०९.२०)। **(अव)** इच्छ **(इत्)** निश्चये **(उ)** वितर्के **(इन्द्र)** रसाभिसिंचन् जीव **(जल्गुल:)** शब्दय। सिद्धि: पूर्ववत्॥४॥

अन्वय:-हे इन्द्र! सुखाभिलाषिन् विद्वंस्त्वं रश्मीन् यमितवै सूर्यो वा सारथिरिव यत्र मन्थां विबध्नते, तत्रोलूखलसुतानां प्राप्तिमवेच्छ। एतामिदुविद्यां युक्त्या जल्गुल: शब्दयोपदिश॥४॥

भावार्थ:-अत्रोपमालङ्कार:। ईश्वर उपदिशति हे विद्वांसो! यथा सूर्यो रश्मिभिर्भूमिमाकर्षणेन बध्नाति यथा सारथी रज्जुभिरश्वान् नियच्छति, तथैव मन्थनबन्धनचालनविद्यया दुग्धादिभ्य ओषधिभ्यश्च नवनीतादिसारान् युक्त्या निष्पादयतेति॥४॥

पदार्थ:-हे **(इन्द्र)** सुख की इच्छा करने वाले विद्वान् मनुष्य! तू **(रश्मीन्) (इव)** जैसे **(यमितवै)** सूर्य्य अपनी किरणों को वा सारथी जैसे घोड़े आदि पशुओं की रस्सियों को **(यत्र)** जिस क्रिया से सिद्ध होने वाले व्यवहार में **(मन्थाम्)** घृत आदि पदार्थों के निकालने के लिये मन्थनियों को **(विबध्नते)** अच्छे प्रकार बांधते हैं, वहाँ **(उलूखलसुतानाम्)** उलूखल से सिद्ध हुए पदार्थों को **(अव)** वैसे ही सिद्ध करने की इच्छा कर **(उ)** और **(इत्)** उसी विद्या को **(जल्गुल:)** युक्ति के साथ उपदेश कर॥४॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। ईश्वर उपदेश करता है कि हे विद्वानो! जैसे सूर्य्य अपनी किरणों के साथ भूमि को आकर्षण शक्ति से बांधता और जैसे सारथी रश्मियों से घोड़ों को नियम में रखता है, वैसे ही मथने बांधने और चलाने की विद्या से दूध आदि वा औषधि आदि पदार्थों से मक्खन आदि पदार्थों को युक्ति के साथ सिद्ध करो॥४॥

तेनोलूखलेन किं कर्त्तव्यमित्युपदिश्यते॥

उक्त उलूखल से क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

यच्चि॒द्धि त्वं गृ॒हेगृ॑ह॒ उलू॑खलक युज्यसे॑।
इ॒ह द्यु॒मत्त॑मं वद॒ जय॑तामिव दुन्दु॒भि:॥५॥२५॥

यत्। चित्। हि। त्वम्। गृहेगृहे। उलूखलक। युज्यसे। इह। द्युमत्ऽतमम्। वद। जयताम्। इव। दुन्दुभिः॥५॥

पदार्थः-(**यत्**) यस्मात् (**चित्**) चार्थे (**हि**) प्रसिद्धौ (**गृहेगृहे**) प्रतिगृहम् वीप्सायां द्वित्वं (**उलूखलक**) उलूखलं कायति शब्दयति यस्तत्सम्बुद्धौ विद्वन् (**युज्यसे**) समादधासि (**इह**) अस्मिन्संसारे गृहे स्थाने वा (**द्युमत्तमम्**) प्रशस्तः प्रकाशो विद्यते यस्मिन् स शब्दो द्युमान् अतिशयेन द्युमान् द्युमत्तमस्तम्। अत्र प्रशंसार्थे मतुप्। (**वद**) वादय वा। अत्र पक्षेऽन्तर्गतो ण्यर्थः। (**जयतामिव**) विजयकरणशीलानां वीराणामिव (**दुन्दुभिः**) वादित्रविशेषैः॥५॥

अन्वयः-हे उलूखलक! विद्वँस्त्वं यद्धि गृहेगृहे युज्यसे तद्विद्यां समादधासि, स त्वमिह जयतां दुन्दुभिरिव द्युमत्तममुलूखलं वादयैतद्विद्यां (चित्) वदोपदिश॥५॥

भावार्थः-अत्रोपमालङ्कारः। सर्वेषु गृहेषूलूखलक्रिया योजनीया यथा भवति शत्रूणां विजेतारः सेनास्थाः शूरा दुन्दुभिः वादयित्वा युध्यन्ते, यथैव रससम्पादकेन मनुष्येणोलूखले यवाद्योषधीर्योजयित्वा मुसलेन हत्वा तुषादिकं निवार्य्य सारांशः संग्राह्य इति॥५॥

पदार्थः-हे (**उलूखलक**) उलूखल से व्यवहार लेने वाले विद्वान्! तू (**यत्**) जिस कारण (**हि**) प्रसिद्ध (**गृहेगृहे**) घर-घर में (**युज्यसे**) उक्त विद्या का व्यवहार वर्त्तता है (**इह**) इस संसार गृह वा स्थान में (**जयताम्**) शत्रुओं को जीतने वालों के (**दुन्दुभिः**) नगाड़ों के (**इव**) समान (**द्युमत्तमम्**) जिसमें अच्छे शब्द निकले, वैसे उलूखल के व्यवहार की (**वद**) विद्या का उपदेश करें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब घरों में उलूखल और मुसल को स्थापन करना चाहिये, जैसे शत्रुओं के जीतने वाले शूरवीर मनुष्य अपने नगाड़ों को बजा कर युद्ध करते हैं, वैसे ही रस चाहने वाले मनुष्यों को उलूखल में यव आदि ओषधियों को डालकर मुसल से कूटकर भूसा आदि दूर करके सार-सार लेना चाहिये॥५॥

पुनस्तत्किमर्थं ग्राह्यमित्युपदिश्यते।

फिर वह किसलिये ग्रहण करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

उत स्म ते वनस्पते वातो वि वात्यग्रमित्।
अथो इन्द्राय पातवे सुनु सोममुलूखल॥६॥

उत। स्म। ते। वनस्पते। वातः। वि। वाति। अग्रम्। इत्। अथो इति। इन्द्राय। पातवे। सुनु। सोमम्। उलूखल॥६॥

पदार्थः-(**उत**) अपि (**स्म**) अतीतार्थे क्रियायोगे (**ते**) तस्य (**वनस्पते**) वृक्षादेः (**वातः**) वायुः (**वि**) विविधार्थे क्रियायोगे (**वाति**) गच्छति (**अग्रम्**) उपरिभागम् (**इत्**) एव (**अथो**) अनन्तरे (**इन्द्राय**)

जीवाय **(पातवे)** पातुं पानं कर्त्तुम्। अत्र **तुमर्थे सेसेनसे०** इति तवेन्प्रत्ययः। **(सुनु)** सेधय **(सोमम्)** सर्वौषधं सारम् **(उलूखल)** उलूखलेन बहुकार्यकरेण साधनेन। अत्र **सुपां सुलुग्०** इति तृतीयैकवचनस्य लुक्॥६॥

अन्वयः-हे विद्वन्! यथा वात इत्तस्यास्य वनस्पतेरग्रमुत विवाति स्माथो इत्यनन्तरमिन्द्राय जीवाय सोमं पातवे पातुं सुनोति निष्पादयति तथोलूखलेन यवाद्यमोषधिसमुदायं सुनु॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा पवनेन सर्वे वनस्पत्योषध्यादयो वर्ध्यन्ते, तदैव प्राणिनस्तेषां पुष्टानामुलूखले स्थापनं कृत्वा सारं गृहीत्वा भुञ्जते, रसमपि पिबन्ति, नैतेन विना कस्यचित्पदार्थस्य वृद्धिपुष्टी सम्भवतः॥६॥

पदार्थः-हे विद्वन्! जैसे **(वातः)** वायु **(इत्)** ही **(वनस्पते)** वृक्ष आदि पदार्थों के **(अग्रम्)** ऊपरले भाग को **(उत)** भी **(वि वाति)** अच्छे प्रकार पहुंचाता **(स्म)** पहुंचा वा पहुंचेगा **(अथो)** इसके अनन्तर **(इन्द्राय)** प्राणियों के लिये **(सोमम्)** सब ओषधियों के सार को **(पातवे)** पान करने को सिद्ध करता है, वैसे **(उलूखल)** उखरी में यव आदि ओषधियों के समुदाय के सार को **(सुनु)** सिद्ध कर॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब पवन सब वनस्पति ओषधियों को अपने वेग से स्पर्श कर बढ़ाता है, तभी प्राणी उनको उलूखल में स्थापन करके उनका सार ले सकते और रस भी पीते हैं। इस वायु के विना किसी पदार्थ की वृद्धि वा पुष्टि होने का सम्भव नहीं हो सकता है॥६॥

पुनर्मुसलोलूखले कीदृशस्त इत्युपदिश्यते॥

फिर मुसल और उलूखल कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ॒य॒जी वा॑ज॒सात॑मा॒ ता ह्यु१॑च्चा वि॑जर्भृ॒तः।
हरी॑ इ॒वान्धां॑सि॒ बप्स॑ता॥७॥

आ॒य॒जीइत्या॑ऽय॒जी। वा॒ज॒ऽसात॑मा। ता। हि। उ॒च्चा। वि॒ऽज॒र्भृ॒तः। हरी॑ इ॒वेति॒ हरी॑ऽइव। अन्धां॑सि। बप्स॑ता॥७॥

पदार्थः-(आयजी) समन्ताद् यज्यन्ते सङ्गम्यन्ते पदार्था याभ्यां तौ स्त्रीपुरुषौ। अत्र बाहुलकादौणादिकः करणाकारके इः प्रत्ययः। **(वाजसातमा)** वाजान् युद्धसमूहान् सनन्ति सम्भज्य विजयन्ते याभ्यां तावतिशायितौ। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेशः। **(ता)** तौ **(हि)** खलु **(उच्चा)** उत्कृष्टानि कार्याणि। अत्र **शेश्छन्दसि** इति शेर्लोपः। **(विजर्भृतः)** विविधं धरतः **(हरीइव)** यथाऽश्वौ तथा **(अन्धांसि)** अन्नानि। **अन्ध इत्यन्ननामसु पठितम्।** (निघं०२.७) **(बप्सता)** बप्सन्तौ। अत्र **भसभर्त्सनदीप्त्यो**रित्यस्माल्लटः शत्रादेशः। **घसिभसोर्हलि च।** (अष्टा०६.४.१००) अनेनोपधालोपः सुगममन्यत्। भस धातोर्भर्त्सन इत्यर्थो नवीनो भक्षण इति प्राचीनोऽर्थः॥७॥

अन्वयः-यावायजी वाजसातमौ स्तस्तौ स्त्रीपुरुषावन्धांसि बप्सन्तौ भक्षयस्तौ हरीइव मुसलोलूखलादिभ्य उच्चा उत्कृष्टानि कार्याणि विजर्भृतः॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा भक्षणकर्त्तारावश्वौ यानादीनि वहतस्तथैव मुसलोलूखले बहूनि विभागकरणादीनि कार्याणि प्रापयत इति॥७॥

पदार्थः-(**आयजी**) जो अच्छे प्रकार पदार्थों को प्राप्त होने वाले (**वाजसातमा**) संग्रामों को जीतते हैं (**ता**) वे स्त्री पुरुष (**अन्धांसि**) अन्नों को (**बप्सता**) खाते हुए (**हरी**) घोड़ों के (**इव**) समान उलूखल आदि से (**उच्चा**) जो अति उत्तम काम हैं, उनको (**विजर्भृतः**) अनेक प्रकार से सिद्धकर धारण करते रहें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे खाने वाले घोड़े रथ आदि को वहते हैं, वैसे ही मुसल और ऊखरी से पदार्थों को अलग-अलग करने आदि अनेक कार्यों को सिद्ध करते हैं॥७॥

पुनस्ते कथंभूते कार्ये इत्युपदिश्यते॥

फिर वे कैसे करने चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

ता नो॑ अ॒द्य व॑नस्पती ऋ॒ष्वावृ॒ष्वेभि॑: सो॒तृभि॑:।

इन्द्रा॑य॒ मधु॑मत्सुतम्॥८॥

ता। नः। अद्य। वनस्पती इति। ऋष्वौ। ऋष्वेभिः। सोतृऽभिः। इन्द्राय। मधुऽमत्। सुतम्॥८॥

पदार्थः-(**ता**) तौ मुसलोलूखलाख्यौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**नः**) अस्माकम् (**अद्य**) अस्मिन् दिने (**वनस्पती**) काष्ठमयौ (**ऋष्वौ**) महान्तौ। **ऋष्व इति महन्नामसु पठितम्।** (निघं०३.३) (**ऋष्वेभिः**) महद्भिर्विद्वद्भिः। **बहुलं छन्दसि** इति भिस ऐस् न। (**सोतृभिः**) अभिषवकरणकुशलैः (**इन्द्राय**) ऐश्वर्यप्रापकाय व्यवहाराय (**मधुमत्**) मधवो मधुरादयः प्रशस्ता गुणा विद्यते यस्मिन् तत्। अत्र प्रशंसार्थे मतुप्। (**सुतम्**) सम्पादितुं वस्तु॥८॥

अन्वयः-यौ सोतृभिर्ऋष्वौ वनस्पती सम्पादितौ स्तो यौ नोऽस्माकमिन्द्रायाद्य मधुमद्वस्तु सुतं सम्पादनहेतुभवतस्तौ सर्वैः सम्पादनीयौ॥८॥

भावार्थः-यथा पाषाणस्य मुसलोलूखलानि भवन्ति, तथैव काष्ठायः पित्तलरजतसुवर्णादीनामपि क्रियन्ते, तैः श्रेष्ठैरोषधाभिषवादीन् साधयेयुरिति॥८॥

पदार्थः-जो (**सोतृभिः**) रस खींचने में चतुर (**ऋष्वेभिः**) बड़े विद्वानों ने (**ऋष्वौ**) अतिस्थूल (**वनस्पती**) काठ के उखली-मुसल सिद्ध किये हों, जो (**नः**) हमारे (**इन्द्राय**) ऐश्वर्य प्राप्त कराने वाले व्यवहार के लिये (**अद्य**) आज (**मधुमत्**) मधुर आदि प्रशंसनीय गुण वाले पदार्थों को (**सुतम्**) सिद्ध करने के हेतु होते हों (**ता**) वे सब मनुष्यों को साधने योग्य हैं॥८॥

भावार्थः-जैसे पत्थर के मूसल और उखली होते हैं, वैसे ही काष्ठ, लोहा, पीतल, चाँदी, सोना तथा औरों के भी किये जाते हैं, उन उत्तम उलूखल मुसलों से मनुष्य औषध आदि पदार्थों के अभिषव अर्थात् रस आदि खींचने के व्यवहार करें॥८॥

पुनस्ताभ्यां किं किं साधनीयमित्युपदिश्यते॥

फिर उन से क्या-क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

उच्छि॒ष्टं च॒म्वो॑र्भर॒ सोमं॑ प॒वित्र॒ आ सृ॑ज।
नि धे॑हि॒ गोरधि॑ त्व॒चि॥ ९॥ २६॥

उत्। शि॒ष्टम्। च॒म्वो॑। भ॒र॒। सोम॑म्। प॒वित्रे॑। आ। सृ॒ज॒। नि। धे॒हि॒। गोः। अधि॑। त्व॒चि॥ ९॥

पदार्थः-(**उत्**) उत्कृष्टार्थे क्रियायोगे (**शिष्टम्**) शिष्यते यस्तम् (**चम्वोः**) पदातिहस्त्यश्वादिरूढयोः सेनयोरिव (**भर**) धर (**सोमम्**) सर्वरोगनाशकबलपुष्टिबुद्धिवर्द्धकमुत्तमौषध्यभिषवम् (**पवित्रे**) शुद्धे सेविते (**आ**) समन्तात् (**सृज**) निष्पादय (**नि**) नितराम् (**धेहि**) संस्थापय (**गोः**) पृथिव्याः। **गौरिति पृथिवीनामसु पठितम्।** (निघं०१.१) (**अधि**) उपरि (**त्वचि**) पृष्ठे॥९॥

अन्वयः-हे विद्वँस्त्वं चम्वोरिव शिष्टं सोममुद्धर तेनोभे सेने पवित्रे आसृज गोः पृथिव्या अधि त्वचि ते निधेहि नितरां संस्थापय॥९॥

भावार्थः-राजपुरुषादिभिर्द्विविधे सेने सम्पादनीये एका यानारूढा द्वितीया पदातिरूपा तदर्थमुत्तमा रसाः शस्त्रादिसामग्र्यश्च सम्पादनीयाः सुशिक्षयौषधादिदानेन च शुद्धबले सर्वरोगरहिते सङ्गृह्य पृथिव्या उपरि चक्रवर्त्तिराज्यं नित्यं सेवनीयमिति॥९॥

सप्तविंशेन सूक्तेनाग्निर्विद्वाँसश्चोक्तास्तैर्मुसलोलूखलादीनि साधनानि गृहीत्वौषध्यादिभ्यो जगत्स्थपदार्थेभ्यो बहुविधा उत्तमाः पदार्थाः सम्पादनीया इत्यस्मिन्सूक्ते प्रतिपादनात् सप्तविंशसूक्तोक्तार्थेन सहास्याष्टाविंशसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥९॥

इति प्रथमाष्टके द्वितीयाध्याये षड्विंशो वर्गः॥

प्रथमण्डले षष्ठेऽनुवाकेऽष्टाविंशं सूक्तं च समाप्तम्॥ २८॥

पदार्थः-हे विद्वान् तुम (**चम्वोः**) पैदल और सवारों की सेनाओं के समान (**शिष्टम्**) शिक्षा करने योग्य (**सोमम्**) सर्व रोगविनाशक बलपुष्टि और बुद्धि को बढ़ाने वाले उत्तम ओषधि के रस को (**उद्धर**) उत्कृष्टता से धारण कर उस से दो सेनाओं को (**पवित्रे**) उत्तम (**आसृज**) कीजिये (**गोः**) पृथिवी के (**अधि**) ऊपर अर्थात् (**त्वचि**) उस की पीठ पर सेनाओं को (**निधेहि**) स्थापन करो॥९॥

भावार्थः-राजपुरुषों को चाहिये कि दो प्रकार की सेना रक्खें अर्थात् एक तो सवारों की दूसरी पैदलों की, उनके लिये उत्तम रस और शस्त्र आदि सामग्री इकट्ठी करें अच्छी शिक्षा और औषधि देकर शुद्ध बलयुक्त और नीरोग कर पृथिवी पर एक चक्रराज्य नित्य करें॥९॥

सत्ताईसवें सूक्त से अग्नि और विद्वान् जिस-जिस गुण को कहे हैं, वे मूसल और ऊखली आदि साधनों को ग्रहण कर औषध्यादि पदार्थों से संसार के पदार्थों से अनेक प्रकार के उत्तम-उत्तम पदार्थ उत्पन्न करें, इस अर्थ का इस सूक्त में सम्पादन करने से सत्ताईसवें सूक्त के कहे हुए अर्थ के साथ अट्ठाईसवें सूक्त की सङ्गति है, यह जानना चाहिये॥९॥

इति प्रथमाष्टके द्वितीयाध्याये षड्विंशो वर्गः ॥२६॥ प्रथमण्डले षष्ठेऽनुवाकेऽष्टाविंशं सूक्तं च समाप्तम्॥२८॥

[प्रथम अष्टक के द्वितीय अध्याय में छब्बीसवाँ वर्ग समाप्त हुआ तथा प्रथम मण्डल में छठे अनुवाक में अट्ठाईसवाँ सूक्त समाप्त हुआ।]

अथ सप्तर्चस्यैकोनत्रिंशस्य सूक्तस्याजीगर्त्तिः शुनःशेप ऋषिः। इन्द्रो देवता। पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रशब्देन न्यायाधीशगुणा उपदिश्यन्ते॥

अब उनतीसवें सूक्त का प्रारम्भ है, उस के पहिले मन्त्र में इन्द्र शब्द से न्यायाधीश के गुणों का प्रकाश किया है॥

यच्चि॒द्धि स॑त्य सोमपा अनाश॒स्ताइ॑व॒ स्मसि॑।
आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ॥ १॥

यत्। चि॒त्। हि। स॒त्य॒। सो॒म॒ऽपाः। अ॒ना॒श॒स्ताऽइ॑व। स्मसि॑। आ। तु। नः॒। इ॒न्द्र॒। शं॒स॒य॒। गोषु॑। अश्वे॑षु। शु॒भ्रिषु॑। स॒हस्रे॑षु। तु॒वि॒ऽम॒घ॒॥ १॥

पदार्थः-(**यत्**) येषु (**चित्**) अपि (**हि**) खलु (**सत्य**) अविनाशिस्वरूप सत्सु साधो (**सोमपाः**) सोमानुत्पन्नान् सर्वान् पदार्थान् पाति रक्षति तत्सम्बुद्धौ (**अनाशस्ताइव**) अप्रशस्तगुणसामर्थ्या इव (**स्मसि**) भवामः। **इदन्तो मसि** इति इदागमः। (**आ**) समन्तात् (**तु**) पुनरर्थे। **ऋचि तुनु०** इति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) प्रशस्तैश्वर्यप्राप्त (**शंसय**) प्रशस्तान् कुरु (**गोषु**) पश्विन्द्रियपृथिवीषु (**अश्वेषु**) वेगाग्निहयेषु (**शुभ्रिषु**) शोभनसुखप्रदेषु (**सहस्रेषु**) असंख्यातेषु (**तुविमघ**) तुवि बहुविधं मघं पूज्यतमं धनं विद्यते यस्य तत्सम्बुद्धौ **अन्येषामपि दृश्यत** इति पूर्वपदस्य दीर्घः॥ १॥

अन्वयः-हे सोमपास्तुविमघ सत्येन्द्रन्यायाधीशत्वमनाशस्ताइव वयं यच्चित् स्मसि तू (नः) तानस्माँश्चतुःसहस्रेषु शुभ्रिषु गोष्वश्वेषु हि खल्वाशंसय॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽऽलस्येनाश्रेष्ठामनुष्या भवन्ति, तद्वद्वयमपि यदि कदाचिदलसा भवेम तानस्मान् प्रशस्तपुरुषार्थगुणान् सम्पादयतु, यतो वयं पृथिव्यादिराज्यं बहूनुत्तमान् हस्त्यश्वगवादिपशून् प्राप्य पालित्वा वर्द्धिवा तेभ्य उपकारेण प्रशस्ता भवेमेति॥ १॥

पदार्थः-हे (**सोमपाः**) उत्तम पदार्थों की रक्षा करने वाले (**तुविमघ**) अनेक प्रकार के प्रशंसनीय धनयुक्त (**सत्य**) अविनाशिस्वरूप (**इन्द्र**) उत्तम ऐश्वर्य प्रापक न्यायाधीश! आप (**यच्चित्**) जो कभी हम लोग (**अनाशस्ताइव**) अप्रशंसनीय गुण सामर्थ्य वालों के समान (**स्मसि**) हों (**तु**) तो (**नः**) हम लोगों को (**सहस्रेषु**) असंख्यात (**शुभ्रिषु**) अच्छे सुख देने वाले (**गोषु**) पृथिवी इन्द्रियाँ वा गो बैल (**अश्वेषु**) घोड़े आदि पशुओं में (**हि**) ही (**आशंसय**) प्रशंसा वाले कीजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे आलस्य के मारे अश्रेष्ठ अर्थात् कीर्त्तिरहित मनुष्य होते हैं, वैसे हम लोग भी जो कभी हों तो यह न्यायाधीश हम लोगों को प्रशंसनीय पुरुषार्थ और गुणयुक्त कीजिये, जिससे हम लोग पृथिवी आदि राज्य और बहुत उत्तम-उत्तम हाथी, घोड़े, गौ, बैल

आदि पशुओं को प्राप्त होकर उनका पालन वा उनकी वृद्धि करके उनके उपकार से प्रशंसा वाले हों॥१॥

पुनः स ऐश्वर्ययुक्तः कीदृश इत्युपदिश्यते॥

फिर वह विभूतियुक्त सभाध्यक्ष कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

शिप्रिन् वाजानां पते शचीवस्तव दंसना।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥२॥

शिप्रिन्। वाजानाम्। पते। शचीऽवः। तव। दंसना। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ॥२॥

पदार्थः-(**शिप्रिन्**) शिप्रे प्राप्तुमर्हे प्रशस्ते व्यावहारिकपारमार्थिके सुखे विद्येते यस्य सभापते स्तत्सम्बुद्धौ। अत्र प्रशंसार्थ इनिः। **शिप्रे इति पदनामसु पठितम्॥** (निघं०४.१) (**वाजानाम्**) संग्रामाणां मध्ये (**पते**) पालक (**शचीवः**) शची बहुविधं कर्म बह्वी प्रजा वा विद्यते यस्य तत्सम्बुद्धौ। **शचीति प्रजानामसु पठितम्।** (निघं०३.९) **कर्मनामसु च** (निघं०२.१) अत्र **छन्दसीरः।** (अष्टा०८.२.१५) इति मतुपो मस्य वः। **मतुवसोरु०** (अष्टा०८.३.१) इति रुत्वं च। (**तव**) न्यायाधीशस्य (**दंसना**) दंसयति भाषयत्यनया क्रियया सा। **ण्यासश्रन्थो युच्।** (अष्टा०३.३.१०) अनेन दंसिभाषार्थ इत्यस्माद्युच् प्रत्ययः। (**आ**) अभ्यर्थे क्रियायोगे (**तु**) पुनरर्थे। पूर्ववद्दीर्घः (**नः**) अस्माँस्त्वदाज्ञायां वर्त्तमानान् विदुषः (**इन्द्र**) सर्वराज्यैश्वर्यधारक (**शंसय**) प्रकृष्टगुणवतः कुरु (**गोषु**) सत्यभाषणशास्त्रशिक्षासहितेषु वागादीन्द्रियेषु। **गौरिति वाङ्नामसु पठितम्।** (निघं०१.११) (**अश्वेषु**) वेगादिगुणवत्सु अग्न्यादिषु (**शुभ्रिषु**) शोभनेषु विमानादियानेषु तत् साधकतमेषु वा (**सहस्रेषु**) बहुषु (**तुविमघ**) बहुविधं मघं पूज्यं विद्याधनं यस्य तत्सम्बुद्धौ। **मघमिति धननामसु पठितम्।** (निघं०२.१०) **मघमिति धननामधेयम्। मंहतेर्दानकर्मणः।** (निरु०१.७) **अन्येषामपि दृश्यत** इति दीर्घः॥२॥

अन्वयः-हे शिप्रिन् शचीवो वाजानां पते तुवीमघेद्र न्यायाधीश! या तव दंसनास्ति तया सहस्रेषु शुभ्रिषु गोष्वश्वेषु नोऽस्मानाशंसय प्रकृष्टगुणवतः सम्पादय॥२॥

भावार्थः-मनुष्यैरित्थं जगदीश्वरं प्रार्थनीयः। हे भगवन्! त्वया कृपया यथा न्यायाधीशत्वमुत्तमं राज्यादिकं च सम्पाद्यते तथास्मान् पृथिवीराज्यवतः सत्यभाषणयुक्तान् ब्रह्मशिल्पविद्यादिसिद्धिकारकान् बुद्धिमतो नित्यं सम्पादयेति॥२॥

पदार्थः-हे (**शिप्रिन्**) प्राप्त होने योग्य प्रशंसनीय ऐहिक पारमार्थिक वा सुखों को देने हारे (**शचीवः**) बहुविध प्रजा वा कर्मयुक्त (**वाजानाम्**) बड़े-बड़े युद्धों के (**पते**) पालन करने और (**तुविमघ**) अनेक प्रकार के प्रशंसनीय विद्याधन युक्त (**इन्द्र**) परमैश्वर्य सहित सभाध्यक्ष जो (**तव**) आपकी (**दंसना**) वेद विद्यायुक्त वाणी सहित क्रिया है, उससे आप (**सहस्रेषु**) हजारह (**शुभ्रिषु**) शोभन

विमान आदि रथ वा उनके उत्तम साधन **(गोषु)** सत्यभाषण और शास्त्र की शिक्षा सहित वाक् आदि इन्द्रियाँ **(अश्वेषु)** तथा वेग आदि गुण वाले अग्नि आदि पदार्थों से युक्त घोड़े आदि व्यवहारों में **(नः)** हम लोगों को **(आशंसय)** अच्छे गुणयुक्त कीजिये॥२॥

भावार्थः-मनुष्यों को इस प्रकार जगदीश्वर की प्रार्थना करनी चाहिये कि हे भगवन्! कृपा करके जैसे न्यायाधीश अत्युत्तम राज्य आदि को प्राप्त कराता है, वैसे हम लोगों को पृथिवी के राज्य सत्य बोलने और शिल्पविद्या आदि व्यवहारों की सिद्धि करने में बुद्धिमान् नित्य कीजिये॥२॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या-क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि ष्वापया मिथूदृशा सस्तामबुध्यमाने।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्त्रेषु तुवीमघ॥३॥

नि। स्वापय। मिथूऽदृशा। सस्ताम्। अबुध्यमाने इति। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्त्रेषु। तुविऽमघ॥३॥

पदार्थः-(**नि**) नितरां क्रियायोगे **(स्वापय)** निवारय। अत्र अन्तर्गतो णिज् **अन्येषामपि** इति दीर्घश्च **(मिथूदृशा)** मिथूविषयाशक्तिप्रमादौ हिंसनं च दर्शयतस्तौ। अत्र **मिथृमेथृ मेधाहिंसनयो**रित्यस्मादौणादिकः कुः प्रत्ययस्तदुपपदाद् दृशेः कर्त्तरि क्विप् **सुपां सुलुग्०** इत्याकारादेशोऽ**न्येषामपि दृश्यत** इति दीर्घश्च। **(सस्ताम्)** शयाताम् **(अबुध्यमाने)** बोधनिवारके शरीरमनसी आलस्ये कर्मणि **(आ)** आदरार्थे **(तु)** पश्चादर्थे। पूर्ववद्दीर्घः। **(नः)** अस्मान् **(इन्द्र)** अविद्यानिद्रादोषनिवारकविद्वन् **(शंसय)** प्रकृष्टज्ञानवतः कुरु **(गोषु)** पृथिव्यादिषु **(अश्वेषु)** व्याप्तिशीलेशष्वग्न्यादिषु **(शुभ्रिषु)** शुभ्राः प्रशस्ता गुणा विद्यन्ते येषु तेषु **(सहस्त्रेषु)** अनेकेषु **(तुविमघ)** तुविबहुविधं धनमस्ति यस्य तत्सम्बुद्धौ। **अन्येषामपि दृश्यत** इति पूर्वपदस्य दीर्घः॥३॥

अन्वयः-हे तुविमघेन्द्रविद्वन्! ये मिथूदृशाबुध्यमाने शरीरमनसी आलस्ये वर्त्तमाने सस्तां शयातां पुरुषार्थनाशं प्रापयतस्ते त्वं निष्वापय निवारय पुनः सहस्त्रेषु शुभ्रिषु गोष्वश्वेषु नोऽस्मानाशंसय॥३॥

भावार्थः-मनुष्यैः शरीरात्मनोरालस्ये दूरतस्त्यक्त्वा सत्कर्मसु नित्यं प्रयत्नोऽनुसंधेय इति॥३॥

पदार्थः-हे **(तुविमघ)** अनेक प्रकार के धनयुक्त **(इन्द्र)** अविद्यारूपी निद्रा और दोषों को दूर करने वाले विद्वान्! जो-जो **(मिथूदृशा)** विषयाशक्ति अर्थात् खोटे काम वा प्रमाद अच्छे कामों के विनाश को दिखाने वाले वा **(अबुध्यमाने)** बोधनिवारक शरीर और मन **(सस्ताम्)** शयन और पुरुषार्थ का नाश करते हैं, उनको आप **(निष्वापय)** अच्छे प्रकार निवारण कर दीजिये **(तु)** फिर **(सहस्त्रेषु)** हजारहों

(शुभ्रिषु) प्रशंसनीय गुण वाले **(गोषु)** पृथिवी आदि पदार्थ वा **(अश्वेषु)** वस्तु-वस्तु में रहने वाले अग्नि आदि पदार्थों में **(नः)** हम लोगों को **(आशंसय)** अच्छे गुण वाले कीजिये॥३॥

भावार्थः-मनुष्यों को शरीर और आत्मा से आलस्य को दूर छोड़ के उत्तम कर्मों में नित्य प्रयत्न करना चाहिये॥३॥

मनुष्यैः कीदृशान् वीरान् सङ्गृह्य शत्रवो निवारणीया इत्युपदिश्यते॥

मनुष्यों को कैसे वीरों को ग्रहण करके शत्रु-निवारण करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

स॒सन्तु॒ त्या अरा॑तयो॒ बोध॑न्तु शूर रा॒तय॑ः।
आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ॥४॥

स॒सन्तु॑। त्याः। अरा॑तयः। बोध॑न्तु। शूर॑। रा॒तय॑ः। आ। तु। न॒ः। इ॒न्द्र॒। शं॒स॒य॒। गोषु॑। अश्वे॑षु। शु॒भ्रिषु॑। स॒हस्रे॑षु। तु॒वि॒ऽम॒घ॒॥४॥

पदार्थः-(**ससन्तु**) निद्रां प्राप्नुवन्तु (**त्याः**) वक्ष्यमाणाः (**अरातयः**) अविद्यमानारातिर्दानं येषां शत्रूणां ते (**बोधन्तु**) जानन्तु (**शूर**) शृणाति हिनस्ति शत्रुबलान्याक्रमति। अत्र '**शॄ हिंसायाम्**' इत्यस्माद् बाहुलकाड्डूरन्प्रत्ययः। (**रातयः**) दातारः (**आ**) समन्तात् (**तु**) पुनरर्थे। **ऋचि तुनु०** इति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) उत्कृष्टैश्वर्य्यसभाध्यक्ष सेनापते (**शंसय**) शत्रूणां विजयेन प्रशंसायुक्तान् कुरु (**गोषु**) सूर्य्यादिषु (**अश्वेषु**) (**शुभ्रिषु**) (**सहस्रेषु**) उक्तार्थेषु (**तुविमघ**) अस्यार्थसाधुत्वे पूर्ववत्॥४॥

अन्वयः-हे तुवीमघ शूर सेनापते! तवारातयः ससन्तु ये रातयश्च ते सर्वे बोधन्तु तु पुनः हे इन्द्र वीरपुरुष! त्वं सहस्रेषु शुभ्रिषु गोष्वश्वेषु नोऽस्मानाशंसय॥४॥

भावार्थः-अस्माभिः स्वसेनासु शूरा मनुष्या रक्षित्वा हर्षणीया येषां भयाद् दुष्टाः शत्रवः शयीरन् कदाचिन्मा जाग्रतु, येन वयं निष्कण्टकं चक्रवर्त्तिराज्यं नित्यं सेवेमहीति॥४॥

पदार्थः-हे (**तुविमघ**) विद्या सुवर्ण सेना आदि धनयुक्त (**शूर**) शत्रुओं के बल को नष्ट करने वाले सेनापति! आप के (**अरातयः**) जो दान आदि धर्म से रहित शत्रुजन हैं, वे (**ससन्तु**) सो जावें और जो (**रातयः**) दान आदि धर्म के कर्त्ता हैं (**त्याः**) वे (**बोधन्तु**) जाग्रत होकर शत्रु और मित्रों को जानें (**तु**) फिर हे (**इन्द्र**) अत्युत्तम ऐश्वर्ययुक्त सभाध्यक्ष सेनापते वीरपुरुष! तू (**सहस्रेषु**) हजारह (**शुभ्रिषु**) अच्छे-अच्छे गुण वाले (**गोषु**) गौ वा (**अश्वेषु**) घोड़े हाथी सुवर्ण आदि धनों में (**नः**) हम लोगों को (**आशंसय**) शत्रुओं के विजय से प्रशंसा वाले करो॥४॥

भावार्थः-हम लोगों को अपनी सेना में शूर ही मनुष्य रखकर आनन्दित करने चाहिये, जिससे भय के मारे दुष्ट और शत्रुजन जैसे निद्रा में शान्त होते हैं, वैसे सर्वदा हों, जिससे हम लोग निष्कंटक अर्थात् बेखटके चक्रवर्त्ति राज्य का सेवन नित्य करें॥४॥

पुनः स वीरः कीदृश इत्युपदिश्यते॥

फिर वह वीर कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

समिन्द्र गर्दभं मृण नुवन्तं पापयामुया।

आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥५॥

सम्। इन्द्र। गर्दभम्। मृण। नुवन्तम्। पापया। अमुया। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ॥५॥

पदार्थः-(सम्) सम्यगर्थे **(इन्द्र)** सेनाध्यक्ष **(गर्दभम्)** गर्दभस्य स्वभावयुक्तमिव **(मृण)** हिंस। अत्रान्तर्गतो ण्यर्थः। **(नुवन्तम्)** स्तुवन्तम् **(पापया)** अधर्मरूपया **(अमुया)** प्रत्यक्षतया वाचा। **(आ)** समन्तात् **(तु)** पुनरर्थे। पूर्ववद्दीर्घः। **(नः)** अस्मान् धर्मकारिणः **(इन्द्र)** न्यायाधीश **(शंसय)** सत्याननपराधान् संपादय **(गोषु)** स्वकीयेषु पृथिव्यादिपदार्थेषु **(अश्वेषु)** हस्त्यश्वादिषु पशुषु **(शुभ्रिषु)** शुद्धभावेन धर्मव्यवहारेण गृहीतेषु **(सहस्रेषु)** बहुषु **(तुविमघ)** तुवि बहुविधं विद्याधर्मधनं यस्य तत्सम्बुद्धौ। अत्र **अन्येषामपि दृश्यत** इति दीर्घः॥५॥

अन्वयः-हे इन्द्र! त्वं गर्दभं तत् स्वभावमिवामुया पापया मिथ्याभाषणान्वितया भाषयाऽस्मान्नुवन्तं कपटेन स्तुवन्तं शत्रुं सम्मृण। हे तुविमघेन्द्र सभाध्यक्षन्यायाधीश! त्वं स्वकीयेषु सहस्रेषु शुभ्रिषु गोष्वश्वेषु नोस्मानाशंसय प्राप्तन्यायान् कुरु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यः सभाध्यक्षो न्यायासने स्थित्वा यथा गर्दभतुल्यस्वभावं मूर्खं व्यभिचारिणं पुरुषं कुत्सितं शब्दमुच्चरन्तं तथाऽन्यायमिथ्याभाषणरूपेण साक्ष्येण तिरस्कुर्वन्तं यथायोग्यं दण्डयेत्। ये च सत्यवादिनो धार्मिकास्तेषां सत्कारं च कुर्यात्। यैरन्यायेन परपदार्था गृह्यन्ते तान् दण्डयित्वा ये यस्य पदार्थास्तान् तेभ्यो दापयेत्। एषां सनातनं न्यायाधीशानां धर्मं सदैव समाश्रयेत् तं वयं सततं सत्कुर्याम॥५॥

पदार्थः-हे **(इन्द्र)** सभाध्यक्ष! तू **(गर्दभम्)** गदहे के समान **(अमुया)** हमारे पीछे **(पापया)** पापरूप मिथ्याभाषण से युक्त गवाही और भाषण आदि कपट से हम लोगों की **(नुवन्तम्)** स्तुति करते हुए शत्रु को **(सम्मृण)** अच्छे प्रकार दण्ड दे **(तु)** फिर **(तुविमघ)** हे बहुत से विद्या वा धर्मरूपी धनवाले **(इन्द्र)** न्यायाधीश तू **(सहस्रेषु)** हजारह **(शुभ्रिषु)** शुद्धभाव वा धर्मयुक्त व्यवहारों से ग्रहण किये हुए **(गोषु)** पृथिवी आदि पदार्थ वा **(अश्वेषु)** हाथी घोड़ा आदि पशुओं के निमित्त **(नः)** हम लोगों को **(आशंसय)** सच्चे व्यवहार वर्तने वाले अपराधरहित कीजिए॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सभा स्वामी न्याय से अपने सिंहासन पर बैठकर जैसे गदहा रूखे और खोटे शब्द को उच्चारण से औरों की निन्दा करते हुए जन को दण्ड दे और

जो सत्यवादी धार्मिक जन का सत्कार करे जो अन्याय के साथ औरों के पदार्थ को लेते हैं, उनको दण्ड दे के जिसका जो पदार्थ हो, वह उसको दिला देवे, इस प्रकार सनातन न्याय करने वालों के धर्म में जो प्रवृत्त पुरुष का सत्कार हम लोग निरन्तर करें॥५॥

इदानीमशुद्धवायोर्निवारणमुपदिश्यते॥

अब अगले मन्त्र में अशुद्ध वायु के निवारण का विधान किया है॥॥

पताति कुण्डृणाच्या दूरं वातो वनादधि।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥६॥

पताति। कुण्डृणाच्या। दूरम्। वातः। वनात्। अधि। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ॥६॥

पदार्थः-(**पताति**) गच्छेत् (**कुण्डृणाच्या**) यया कुटिलां गतिमञ्चति प्राप्नोति तया (**दूरम्**) विप्रकृष्टदेशम् (**वातः**) वायुः (**वनात्**) वन्यते सेव्यते तद्वनं जगत् तस्मात्किरणेभ्यो वा। **वनमिति रश्मिनामसु पठितम्।** (निघं०१.५) (**अधि**) उपरिभावे (**आ**) समन्तात् (**तु**) पुनरर्थे। पूर्ववद्दीर्घः। (**नः**) अस्मान् (**इन्द्र**) परमविद्वन् (**शंसय**) (**गोषु**) पृथिवीन्द्रियकिरणचतुष्पात्सु (**अश्वेषु**) वेगादिगणेषु (**शुभ्रिषु**) शुद्धेषु व्यवहारेषु (**सहस्रेषु**) बहुषु (**तुविमघ**) तुवि बहुविधं धनं साध्यते येन तत्सम्बुद्धौ। अत्र पूर्ववद्दीर्घः॥६॥

अन्वयः-हे तुविमघेन्द्र! त्वं यथा वातः कुण्डृणाच्यागत्यावनाज्जगतः किरणेभ्यो वाधिपताति उपर्यधो गच्छेत् तथानुतिष्ठ सहस्रेषु गोष्वश्वेषु शुभ्रिषु नोऽस्मानाशंसय॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरेवं वेदितव्यं योऽयं वायुः स एव सर्वतोऽभिगच्छन्नग्न्यादिभ्योऽधिकः कुटिलगतिर्बह्वैश्वर्यप्राप्तिः पशुवृक्षादीनां चेष्टावृद्धिभञ्जनकारकः सर्वस्य व्यवहारस्य च हेतुस्तीति बोध्यम्॥६॥

पदार्थः-हे (**तुविमघ**) अनेकविध धनों को सिद्ध करने हारे (**इन्द्र**) सर्वोत्कृष्ट विद्वान्! आप जैसे (**वातः**) पवन (**कुण्डृणाच्या**) कुटिलगति से (**वनात्**) जगत् और सूर्य की किरणों से (**अधि**) ऊपर वा इनके नीचे से प्राप्त होकर आनन्द करता है, वैसे (**तु**) बारम्बार (**सहस्रेषु**) हजारह (**अश्वेषु**) वेग आदि गुण वाले घोड़े आदि (**गोषु**) पृथिवी, इन्द्रिय, किरण और चौपाए (**शुभ्रिषु**) शुद्ध व्यवहारों में सब प्राणियों और अप्राणियों को सुशोभित करता है, वैसे (**नः**) हम को (**आशंसय**) प्रशंसित कीजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को ऐसा जानना चाहिये कि जो यह पवन है वही सब जगह जाता हुआ अग्नि आदि पदार्थों से अधिक कुटिलता से गमन करने हारा और बहुत से ऐश्वर्य की प्राप्ति तथा पशु वृक्षादि पदार्थों के व्यवहार उनके बढ़ने-घटने और समस्त वाणी के व्यवहार का हेतु है॥६॥

पुनः स किं कुर्य्यादित्युपदिश्यते॥

फिर वह क्या करे इस विषय का उपदेश अगले मन्त्र में किया है॥

सर्वं॑ परिक्रो॒शं ज॑हि ज॒म्भया॑ कृकदा॒श्वं॑म्।

आ तू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ॥७॥ २७॥

सर्वं॑म्। प॒रि॒ऽक्रो॒शम्। ज॒हि॒। ज॒म्भय॑। कृ॒क॒दा॒श्व॑म्। आ। तु। नः॒। इ॒न्द्र॒। शं॒स॒य॒। गोषु॑। अश्वे॑षु। शु॒भ्रिषु॑। स॒हस्रे॑षु। तु॒वि॒ऽम॒घ॒॥७॥

पदार्थः-(**सर्वम्**) समस्तम् (**परिक्रोशम्**) परितः सर्वतः क्रोशन्ति रुदन्ति यस्मिन् दुःखसमूहे तम् (**जहि**) हिंधि (**जम्भय**) विनाशय अदर्शनं प्रापय। **अन्येषामपि दृश्यत** इति दीर्घः। (**कृकदाश्वम्**) कृकं हिसनं दाशति ददाति तं शत्रुम्। अत्र **दाशृ धातो**र्बाहुकादौणादिक उण् प्रत्ययस्ततोऽ**मिपूर्व** इत्यत्र **वा छन्दसि** इत्यनुवृत्तौ पूर्वसवर्णविकल्पेन यणादेशः। (**आ**) समन्तात् (**तु**) पुनरर्थे। पूर्ववद्दीर्घः। (**नः**) अस्माकमस्मान् वा (**इन्द्र**) सर्वशत्रुनिवारकसेनाध्यक्ष (**शंसय**) सुखिनः सम्पादय (**गोषु**) पृथिव्या राज्यव्यवहारेषु (**अश्वेषु**) हस्त्यश्वसेनाङ्गेषु (**शुभ्रिषु**) शुद्धेषु धर्म्येषु व्यवहारेषु (**सहस्रेषु**) बहुषु (**तुविमघ**) अधिकं मघं वलाख्यं धनं यस्य तत्सम्बुद्धौ। अत्रापि पूर्ववद्दीर्घः॥७॥

अन्वयः-हे तुवीमघेन्द्रसेनाध्यक्षस्त्वं यो नोऽस्माकं सहस्रेषु शुभ्रिषु गोष्वश्वेषु सर्वं परिक्रोशं जहि कृकदाश्वं च जम्भयानेन तु पुनर्नोऽस्मानाशंसय॥७॥

भावार्थः-मनुष्यैरित्थं जगदीश्वरं प्रार्थनीयः। हे परमात्मन्! भवान् येऽस्मासु दृष्टव्यवहाराश्शत्रवः सन्ति तान् सर्वान् निवार्य्यास्मभ्यं सकलैश्वर्य्यं देहीति॥७॥

पूर्वेण पदार्थविद्यासाधनान्युक्तानि तदुपादानं जगत्पदार्थाः सन्ति ते जगदीश्वरेणोत्पादिता इत्युक्त्वात्र तेषां सकाशादुपकारग्रहणसमर्थाः स सभाध्यक्षः सभ्याजना भवन्तीत्युक्तत्वादष्टाविंश-सूक्तोक्तार्थेन सहास्यैकोनत्रिंशसूक्तार्थस्य सङ्गतिरस्तीतिबोध्यम्॥

इति प्रथमाष्टके द्वितीयाध्याये सप्तविंशो वर्गः॥

प्रथममण्डले षष्ठेऽनुवाक एकोनत्रिंशत्तमं सूक्तं च समाप्तम्॥ २९॥

पदार्थः-हे (**तुविमघ**) अनन्त बलरूप धनयुक्त (**इन्द्र**) सब शत्रुओं के विनाश करने वाले जगदीश्वर आप जो (**नः**) हमारे (**सहस्रेषु**) अनेक (**शुभ्रिषु**) शुद्ध कर्मयुक्त व्यवहार वा (**गोषु**) पृथिवी के राज्य आदि व्यवहार तथा (**अश्वेषु**) घोड़े आदि सेना के अङ्गों में विनाश का कराने वाला व्यवहार हो उस (**परिक्रोशम्**) सब प्रकार से रुलाने वाले व्यवहार को (**जहि**) विनष्ट कीजिये तथा जो (**नः**) हमारा शत्रु हो (**कृकदाश्वम्**) उस दुःख देने वाले को भी (**जम्भय**) विनाश को प्राप्त कीजिये। इस रीति से (**तु**) फिर (**नः**) हम लोगों को (**आशंसय**) शत्रुओं से पृथक् कर सुखयुक्त कीजिये॥७॥

भावार्थः-मनुष्यों को इस प्रकार जगदीश्वर की प्रार्थना करनी चाहिये कि हे परमात्मन्! आप हम लोगों में जो दुष्ट व्यवहार अर्थात् खोटे चलन तथा जो हमारे शत्रु हैं, उनको दूर कर हम लोगों के लिये सकल ऐश्वर्य दीजिये॥७॥

पिछले सूक्त में पदार्थ विद्या और उसके साधन कहे हैं, उनके उपादान अत्यन्त प्रसिद्ध कराने हारे संसार के पदार्थ हैं जो कि परमेश्वर ने उत्पन्न किये हैं, इस सूक्त में उन पदार्थों से उपकार ले सकने वाली सभाध्यक्ष सहित सभा होती है, उसके वर्णन करने से पूर्वोक्त अट्ठाईसवें सूक्त के अर्थ के साथ इस उनतीसवें सूक्त के अर्थ की सङ्गति जाननी चाहिये।

यह प्रथम अष्टक में दूसरे अध्याय में सत्ताईसवां वर्ग वा प्रथम मण्डल में छठे अनुवाक में उनतीसवां सूक्त समाप्त हुआ॥ २९॥

अथ द्वाविंशत्यृचस्य त्रिंशत्तमस्य सूक्तस्याजीगर्त्ति शुनःशेप ऋषिः। १-१६ इन्द्रः। १७-१९ अश्विनौ। २०-२२ उषादेवताः। १-१०, १२-१५, १७-२२ गायत्री। ११ पादनिचृद्गायत्री त्रिष्टुप् च छन्दांसि। १-२२ षड्जः। १६ धैवतश्च स्वरः॥

तत्रादिमे इन्द्रशब्देन शूरवीरगुणा उपदिश्यन्ते।

इसके पहले मन्त्र में इन्द्र शब्द से शूरवीरों के गुणों का प्रकाश किया है॥

आ व॒ इ॒न्द्रं॒ क्रिवि॑ं॒ यथा वाज॒यन्त॑ः श॒तक्र॑तुम्।

मंहि॑ष्ठं सिञ्च॒ इन्दु॑भिः॥ १॥

आ। व॒ः। इन्द्र॑म्। क्रिवि॑म्। य॒था॒। वाज॒ऽयन्त॑ः। श॒तऽक्र॑तुम्। मंहि॑ष्ठम्। सि॒ञ्च॒। इन्दु॑ऽभिः॥ १॥

पदार्थः-(**आ**) सर्वतः (**वः**) युष्माकम् (**इन्द्रम्**) परमैश्वर्यहेतुप्रापकम् (**क्रिविम्**) कूपम्। **क्रिविरिति कूपनामसु पठितम्।** (निघं०३.२३) (**यथा**) येन प्रकारेण (**वाजयन्तः**) जलं चालयन्तो वायवः (**शतक्रतुम्**) शतमसंख्याताः क्रतवः कर्म्माणि यस्मात्तम् (**मंहिष्ठम्**) अतिशयेन महान्तम् (**सिञ्च**) (**इन्दुभिः**) जलैः॥ १॥

अन्वयः-हे सभाध्यक्ष! मनुष्या यथा कृषीवलाः क्रिविं कूपं सम्प्राप्य तज्जलेन क्षेत्राणि सिंचन्ति यथा वाजयन्तो वायव इन्दुभिः शतक्रतुं मंहिष्ठमिन्द्रं च तथा त्वमपि प्रजाः सुखैः सिंच संयोजय॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्याः पूर्वं कूपं खनित्वा तज्जलेन स्नानपानक्षेत्रवाटिकादि सिंचनादि व्यवहारं कृत्वा सुखिनो भवन्ति, तथैव विद्वांसो यथावत् कलायन्त्रेष्वऽग्निं योजयित्वा तत्सम्बन्धेन जलं स्थापयित्वा चालनेन बहूनि कार्य्याणि कृत्वा सुखिनो भवन्ति॥ १॥

पदार्थः-हे सभाध्यक्ष मनुष्य! (**यथा**) जैसे खेती करने वाले किसान (**क्रिविम्**) कुएँ को खोद कर उसके जल से खेतों को (**सिञ्च**) सींचते हैं और जैसे (**वाजयन्तः**) वेगयुक्त वायु (**इन्दुभिः**) जलों से (**शतक्रतुम्**) जिससे अनेक कर्म होते हैं (**मंहिष्ठम्**) बड़े (**इन्द्रम्**) सूर्य को सींचते, वैसे तू भी प्रजाओं को सुखों से अभिषिक्त कर॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य पहिले कुएँ को खोद कर उसके जल से स्नान-पान और खेत बगीचे आदि स्थानों के सींचने से सुखी होते हैं, वैसे ही विद्वान् लोग यथायोग्य कलायन्त्रों में अग्नि को जोड़ के उसकी सहायता से कलों में जल को स्थापन करके उनको चलाने से बहुत कार्य्यों को सिद्ध करके सुखी होते हैं॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

श॒तं वा॒ यः शुची॑नां स॒हस्रं॑ वा॒ समा॑शिराम्।

एदु॑ नि॒म्नं न री॑यते॥ २॥

श॒तम्। वा॒। यः। शुची॑नाम्। स॒हस्र॑म्। वा॒। सम्ऽआ॑शिराम्। आ। इत्। ऊ॒म् इति॑। नि॒म्नम्। न। री॒य॒ते॥ २॥

पदार्थः-(**शतम्**) असंख्यातम् (**वा**) पक्षान्तरे (**यः**) बहुशुभगुणयुक्तो जनः (**शुचीनाम्**) शुद्धानां पवित्रकारकाणां मध्ये। **शुचिश्शोचतेर्ज्वलतिकर्म्मणः।** (निरु०६.१) (**सहस्रम्**) बह्वर्थे (**वा**) पक्षान्तरे (**समाशिराम्**) सम्यगभितः श्रीयन्ते सेव्यन्ते सद्गुणैर्ये तेषाम्। अत्र **श्रयतेः स्वाङ्गे शिरः किच्च।** (उणा०४.२००) अनेनासुन् प्रत्ययः शिर आदेशश्चासुनि। (**आ**) आधारार्थे (**इत्**) एव (**उ**) वितर्के (**निम्नम्**) अधःस्थानम् (**न**) इव (**रीयते**) विजानाति। **रीयतीति गतिकर्मसु पठितम्।** (निघं०२.१४)॥२॥

अन्वयः-पवित्रश्चोपचितो विद्वान् योऽग्निर्भौतिकोऽस्ति सोऽयं निम्नमधः स्थानं गच्छतीव शुचीनां शतं शतगुणो वा समाशिरां सहस्रं वैद्वाधारभूतो दाहको वा रीयते विजानाति॥२॥

भावार्थः-अत्रोपमालङ्कारः। अयमग्निः सूर्यविद्युत्प्रसिद्धरूपेण शतशः शुद्धीः करोति पच्यमानानां पदार्थानां मध्ये वेगैस्सहस्रशः पदार्थान् पचति, यथा जलमधःस्थानमभिद्रवति तथैवायमग्निरूर्ध्वमभिगच्छत्यनयोर्विपर्यासकरणेनाग्निमधः स्थापयित्वा तदुपरि जलस्य स्थापनेन द्वयोर्योगाद् वाष्पैर्वेगादयो गुणा जायन्त इति॥२॥

पदार्थः-जो शुद्धगुण, कर्म, स्वभावयुक्त विद्वान् है, उसी से यह जो भौतिक अग्नि है वह (**निम्नम्**) (**न**) जैसे नीचे स्थान को जाते हैं, वैसे (**शुचीनाम्**) शुद्ध कलायन्त्र वा प्रकाश वाले पदार्थों का (**शतम्**) (**वा**) सौ गुना अथवा (**समाशिराम्**) जो सब प्रकार से पकाए जावें, उन पदार्थों का (**सहस्रम्**) (**वा**) हजार गुना (**आ**) (**इत्**) (**उ**) आधार और दाह गुणवाला (**रीयते**) जानता है॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। यह अग्नि सूर्य और बिजली जो इसके प्रसिद्ध रूप हैं, सैकड़ों पदार्थों की शुद्धि करता है और पकने योग्य पदार्थों में हजारों पदार्थों को अपने वेग से पकाता है, जैसे जल नीची जगह को जाता है, वैसे ही यह अग्नि ऊपर को जाता है। इन अग्नि और जल को लौट-पौट करने अर्थात् अग्नि को नीचे और जल को ऊपर स्थापन करने से वा दोनों के संयोग से वेग आदि गुण उत्पन्न होते हैं॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सं यन्मदा॑य शु॒ष्मिणे॒ एना॒ ह्यस्यो॒दरे॑।
स॒मु॒द्रो न व्यचो॑ दधे॥ ३॥

सम्। यत्। मदा॑य। शु॒ष्मिणे॑। एना॑। हि। अ॒स्य॒। उ॒दरे॑। स॒मु॒द्रः। न। व्यचः॑। द॒धे॥ ३॥

पदार्थः-(**सम्**) सम्यगर्थे (**यत्**) याः (**मदाय**) हर्षाय (**शुष्मिणे**) शुष्मं प्रशस्तं बलं विद्यते यस्मिन् व्यवहारे तस्मै। **शुष्ममिति बलनामसु पठितम्।** (निघं०२.९) अत्र प्रशंसार्थ इनिः। (**एना**) एनेन शतेन सहस्रेण वा। अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**हि**) खलु (**अस्य**) इन्द्राख्यस्याग्नेः (**उदरे**) मध्ये (**समुद्रः**) जलाधिकरणः (**न**) इव (**व्यचः**) विविधं जलादिवस्त्वञ्चन्ति ताः। अत्र **व्युपपदादऽचेः किन्** ततो जस्। (**दधे**) धरेयम्॥३॥

अन्वयः-अहं कि खलु मदाय शुष्मिणे समुद्रो व्यचो नो वाऽस्येन्द्राख्यस्याग्नेरुदर एना एनेन शतेन सहस्रेण च गुणैः सह वर्त्तमाना यत् याः क्रियाः सन्ति ताः सन्दधे॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा समुद्रस्योदरेऽनेके गुणा रत्नानि सन्त्यगाधं जलं वास्ति तथैवाग्नेर्मध्येऽनेके गुणा अनेकाः क्रिया वसन्ति। तस्मान्मनुष्यैरग्निजलयोः सकाशात् प्रयत्नेन बहुविध उपकारो ग्रहीतुं शक्य इति॥३॥

पदार्थः-मैं (**हि**) अपने निश्चय से (**मदाय**) आनन्द और (**शुष्मिणे**) प्रशंसनीय बल और ऊर्जा जिस व्यवहार में हो, उसके लिये (**समुद्रः**) (**न**) जैसे समुद्र (**व्यचः**) अनेक व्यवहार (**न**) सैकड़ह हजार गुणों सहित (**यत्**) जो क्रिया हैं, उन क्रियाओं को (**सन्दधे**) अच्छे प्रकार धारण करूं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे समुद्र के मध्य में अनेक गुण, रत्न और जीव-जन्तु और अगाध जल है, वैसे ही अग्नि और जल के सकाश से प्रयत्न के साथ बहुत प्रकार का उपकार लेना चाहिये॥३॥

पुनः स एवोपदिश्यते।

फिर भी उसी विषय का अगले मन्त्र में प्रकाश किया है॥

अयमु॑ ते॒ सम॑तसि क॒पोत॑ इव गर्भ॒धिम्।

वच॒स्तच्चि॑न्न ओहसे॥४॥

अयम्। ऊम् इति॑। ते॒। सम्। अ॒त॒सि॒। क॒पोत॑ऽइव। ग॒र्भ॒धिम्। वचः॑। तत्। चि॒त्। नः॒। ओ॒ह॒से॒॥४॥

पदार्थः-(**अयम्**) इन्द्राख्योऽग्निः (**उ**) वितर्के (**ते**) तव (**सम्**) सम्यगर्थे (**अतसि**) निरन्तरं गच्छति प्रापयति। अत्र व्यत्ययः (**कपोत इव**) पारावत इव (**गर्भधिम्**) गर्भो धीयतेऽस्यां ताम् (**वचः**) वर्त्तनम् (**तत्**) तस्मै पूर्वोक्ताय बलादिगुणवर्द्धकायानन्दाय (**चित्**) पुनरर्थे (**नः**) अस्माकम् (**ओहसे**) आप्नोति॥४॥

अन्वयः-अयमिन्द्राख्योऽग्निरु गर्भधिं कपोत इव नो वचः समोहसे चिन्नस्तत् अतसि॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा कपोतो वेगेन कपोतीमनुगच्छति, तथैव शिल्पविद्यया साधितोऽग्निरनुकूलां गतिं गच्छति, मनुष्या एनां विद्यामुपदेशश्रवणाभ्यां प्राप्तुं शक्नुवन्तीति॥४॥

पदार्थः-(**अयम्**) यह इन्द्र अग्नि जो कि परमेश्वर का रचा है (**उ**) हम जानते हैं कि जैसे (**गर्भधिम्**) कबूतरी को (**कपोत इव**) कबूतर प्राप्त हो, वैसे (**नः**) हमारी (**वचः**) वाणी को (**समोहसे**) अच्छे प्रकार प्राप्त होता है और (**चित्**) वही सिद्ध किया हुआ (**नः**) हम लोगों को (**तत्**) पूर्व कहे हुये बल आदि गुण बढ़ाने वाले आनन्द के लिये (**अतसि**) निरन्तर प्राप्त करता है॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कबूतर अपने वेग से कबूतरी को प्राप्त होता है, वैसे ही शिल्पविद्या से सिद्ध किया हुआ अग्नि अनुकूल अर्थात् जैसे चाहिये वैसे गति को प्राप्त होता है। मनुष्य इस विद्या को उपदेश वा श्रवण से पा सकते हैं॥४॥

अथेन्द्रशब्देन सभासेनाध्यक्ष उपदिश्यते॥

अब अगले मन्त्र में इन्द्र शब्द से सभा वा सेना के स्वामी का उपदेश किया है॥

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते।

विभूतिरस्तु सूनृता॥५॥२८॥

स्तोत्रम्। राधानाम्। पते। गिर्वाहः। वीर। यस्य। ते। विऽभूतिः। अस्तु। सूनृता॥५॥

पदार्थः-(**स्तोत्रम्**) स्तुवन्ति येन तत् (**राधानाम्**) राध्नुवन्ति सुखानि येषु पृथिव्यादि धनेषु तेषाम्। **राध इति धननामसु पठितम्।** (निघं०२.१०) अत्र **हलश्च।** (अष्टा०३.३.१२१) इति घञ्। अत्र सायणाचार्येण राध्नुवन्ति एभिरिति राधनानि धनानीत्यशुद्धमुक्तं घञन्तस्य नियतपुल्लिङ्गत्वात् (**पते**) पालयितः (**गिर्वाहः**) गीर्भिर्वेदस्थवाग्भिरुह्यते प्राप्यते यस्तत्सम्बुद्धौ। अत्र कारकोपपदाद्वहधातोः **सर्वधातुभ्योऽसुन्।** (उणा०४.१९६) अनेनासुन् प्रत्ययः। **वा छन्दसि सर्वे विधयो भवन्ति** इति पूर्वपदस्य दीर्घादेशो न। (**वीर**) अजति वेद्यं जानाति प्रक्षिपति विनाशयति सर्वाणि दुःखानि वा यस्तत्सम्बुद्धौ। अत्र **स्फायितञ्चिवञ्चि०** (उणा०२.१२) अनेनाजेरक् प्रत्ययः। (**यस्य**) स्पष्टार्थः (**ते**) तव (**विभूतिः**) विविधमैश्वर्यम् (**अस्तु**) भवतु (**सूनृता**) सुष्ठु ऋतं यस्यां सा। **पृषोदरादी०** इति दीर्घत्वं नुडागमश्च॥५॥

अन्वयः-हे गिर्वाहो वीर राधानां पते सभासेनाध्यक्ष विद्वन्! यस्य ते तव सूनृता विभूतिरस्ति तस्य तव सकाशादस्माभिर्गृहीतं स्तोत्रं नोऽस्माकं प्रदाय शुष्मिणेऽस्तु॥५॥

भावार्थः-अत्र पूर्वस्मान्मन्त्रात् (**मदाय**) (**शुष्मिणे**) (**नः**) इति पदत्रयमनुवर्त्तते। मनुष्यैर्यः सर्वस्य स्वामी वेदोक्तगुणाधिष्ठानो विज्ञानरतः सत्यैश्वर्य्यः यथायोग्यन्यायकारी सभाध्यक्षः सेनापतिर्वा विद्वानस्ति स एवास्माभिर्न्यायाधीशो मन्तव्य इति॥५॥

पदार्थः-हे (**गिर्वाहः**) जानने योग्य पदार्थों के जानने और सुख-दुःखों के नाश करने वाले तथा (**राधानाम्**) जिन पृथिवी आदि पदार्थों में सुख सिद्ध होते हैं, उनके (**पते**) पालन करने वाले सभा वा सेना के स्वामी विद्वान् (**यस्य**) जिन (**ते**) आपका (**सूनृता**) श्रेष्ठता से सब गुण का प्रकाश करने वाला

(विभूतिः) अनेक प्रकार का ऐश्वर्य्य है, सो आप के सकाश से हम लोगों के लिये **(स्तोत्रम्)** स्तुति **(नः)** हमारे पूर्वोक्त **(मदाय)** आनन्द और **(शुष्मिणे)** बल के लिये **(अस्तु)** हो॥५॥

भावार्थः-इस मन्त्र में पिछले तीसरे मन्त्र से **(मदाय) (शुष्मिणे) (नः)** इन तीन पदों अनुवृत्ति है। हम लोगों को सब का स्वामी जो कि वेदों से परिपूर्ण विज्ञानरत ऐश्वर्य्ययुक्त और यथायोग्य न्याय करने वाला सभाध्यक्ष वा सेनापति विद्वान् है, उसी को न्यायाधीश मानना चाहिये॥५॥

पुनरयं कीदृश इत्युपदिश्यते॥

फिर यह सभाध्यक्ष वा सेनापति कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो।

समन्येषु ब्रवावहै॥ ६॥

ऊर्ध्वः। तिष्ठ। नः। ऊतये। अस्मिन्। वाजे। शतक्रतो इति शतक्रतो। सम्। अन्येषु। ब्रवावहै॥ ६॥

पदार्थः-(**ऊर्ध्वः**) सर्वोपरि विराजमानः **(तिष्ठ)** स्थिरो भव। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्माकम् **(ऊतये)** रक्षणाद्याय **(अस्मिन्)** वर्त्तमाने **(वाजे)** युद्धे **(शतक्रतो)** शतानि बहुविधानि कर्माणि वा बहुविधाप्रज्ञा यस्य तत्सम्बुद्धौ। सभासेनाध्यक्ष **(सम्)** सम्यगर्थे **(अन्येषु)** युद्धेतरेषु साधनीयेषु कार्येषु **(ब्रवावहै)** परस्परमुपदेशश्रवणे नित्यं कुर्य्यावहै॥६॥

अन्वयः-हे शतक्रतो! नोऽस्माकमूतये ऊर्ध्वस्तिष्ठैवं सति वाजेऽन्येषु साधनीयेषु कर्मसु त्वं प्रतिजनोऽहं च द्वौ द्वौ सम्ब्रवावहै॥६॥

भावार्थः-सत्याचारैर्ध्यानावस्थितैर्मनुष्यैरात्मस्थानान्तर्यामि जगदीश्वरस्याज्ञया सेनाधिष्ठात्रा सभाध्यक्षेण च सत्यासत्ययोः कर्तव्याकर्तव्ययोश्च सम्यङ्निश्चयः कार्यो नैतेन विना कदाचित् कस्यचिद्विजयसत्यबोधौ भवतः। ये सर्वव्यापिनं जगदीश्वरं न्यायाधीशं मत्वा धार्मिकं शूरवीरं च सेनापतिं कृत्वा शत्रुभिः सह युध्यन्ति तेषां ध्रुवो विजयो नेतरेषामिति॥६॥

पदार्थः-हे **(शतक्रतो)** अनेक प्रकार के कर्म वा अनेक प्रकार की बुद्धियुक्त सभा वा सेना के स्वामी! जो आप के सहाय के योग्य हैं, उन सब कार्यों में हम **(सम्ब्रवावहै)** परस्पर कह सुन सम्मति से चलें और तू **(नः)** हम लोगों की **(ऊतये)** रक्षा करने के लिये **(ऊर्ध्वः)** सभों से ऊँचे **(तिष्ठ)** बैठ। इस प्रकार आप और हम सभों में प्रतिजन अर्थात् दो-दो होकर **(वाजे)** युद्ध तथा **(अन्येषु)** अन्य कर्त्तव्य जो कि उपदेश वा श्रवण है, उस को नित्य करें॥६॥

भावार्थः-सत्य प्रचार के विचारशील पुरुषों को योग्य है कि जो अपने आत्मा में अन्तर्यामी जगदीश्वर है, उसकी आज्ञा से सभापति वा सेनापति के साथ सत्य और मिथ्या वा करने और न करने योग्य कामों का निश्चय करना चाहिये। इसके विना कभी किसी को विजय या सत्य बोध नहीं हो

सकता। जो सर्वव्यापी जगदीश्वर न्यायाधीश को मानकर वा धार्मिक शूरवीर को सेनापति करके शत्रुओं के साथ युद्ध करते हैं, उन्हीं का निश्चय से विजय होता है, औरों का नहीं॥६॥

पुनरीश्वरसेनाध्यक्षौ कीदृशौ स्त इत्युपदिश्यते॥

फिर ईश्वर वा सेनाध्यक्ष कैसे हैं, इस का उपदेश अगले मन्त्र में किया है॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे।
सखाय इन्द्रमूतये॥७॥

योगेऽयोगे। तवःऽतरम्। वाजेऽवाजे। हवामहे। सखायः। इन्द्रम्। ऊतये॥७॥

पदार्थः-(**योगेयोगे**) अनुपात्तस्योपात्तलक्षणो योगस्तस्मिन् प्रतियोगे (**तवस्तरम्**) तूयते विज्ञायत इति तवाः सोऽतिशयितस्तम्। सायणाचार्येणात्र विन्प्रत्ययस्य छान्दसो लोप इति यदुक्तं तदशुद्धं प्रमाणाभावात् (**वाजेवाजे**) युद्धं युद्धं प्रति (**हवामहे**) आह्वयामहि। अत्र लेटोऽस्मद्बहुवचने **लेटोऽडाटौ।** (अष्टा०३.४.९४) अनेनाडागमे कृते। **बहुलं छन्दसि।** (अष्टा०६.१.३४) इति सम्प्रसारणम्। (**सखायः**) सुहृदो भूत्वा (**इन्द्रम्**) सर्वविजयप्रदं जगदीश्वरं वा दुष्टशत्रुनिवारकमात्मशरीरबलवन्तं धार्म्मिकं वीरं सेनापतिम् (**ऊतये**) रक्षणाद्याय विजयसुखप्राप्तये वा॥७॥

अन्वयः-वयं सखायो भूत्वा स्वोतये योगेयोगे वाजेवाजे तवस्तरमिन्द्रं परमात्मानं सभाध्यक्षं वा हवामहे॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्मित्रतां सम्पाद्य प्राप्तानां पदार्थानां रक्षणं सर्वत्र विजयश्च कार्यः। परमेश्वरः सेनापतिश्च नित्यमाश्रयणीयः नैवैतावन्मात्रेणैवैतत्सिद्धिर्भवितुमर्हति। किं तर्हि? विद्यापुरुषार्थाभ्यामेतस्य सिद्धिर्जायत इति॥७॥

पदार्थः-हम लोग (**सखायः**) परस्पर मित्र होकर अपनी (**ऊतये**) उन्नति वा रक्षा के लिये (**योगेयोगे**) अति कठिनता से प्राप्त होने वाले पदार्थ-पदार्थ में वा (**वाजेवाजे**) युद्ध-युद्ध में (**तवस्तरम्**) जो अच्छे प्रकार वेदों से जाना जाता है, उस (**इन्द्रम्**) सब से विजय देने वाले जगदीश्वर वा दुष्ट शत्रुओं को दूर करने और आत्मा वा शरीर के बल वाले धार्म्मिक सभाध्यक्ष को (**हवामहे**) बुलावें अर्थात् बार-बार उसकी विज्ञप्ति करते रहें॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को परस्पर मित्रता सिद्ध कर अलभ्य पदार्थों की रक्षा और सब जगह विजय करना चाहिये तथा परमेश्वर और सेनापति का नित्य आश्रय करना चाहिये और यह भी स्मरण रखना चाहिये कि उक्त आश्रय से ही उत्तम कार्यसिद्धि होने के योग्य हो, सो ही नहीं, किन्तु विद्या और पुरुषार्थ भी उनके लिये करने चाहिये॥७॥

स केन सहागच्छदित्युपदिश्यते॥

वह किसके साथ प्राप्त हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ घा॑ गम॒द्यदि॒ श्रव॑त्सह॒स्रिणी॑भिरू॒तिभि॑:।
वाजे॑भि॒रुप॑ नो॒ हव॑म्॥८॥

आ। घ॒। ग॒म॒त्। यदि॑। श्रव॑त्। स॒ह॒स्रिणी॑भिः। ऊ॒तिऽभि॑:। वाजे॑भिः। उप॑। न॒:। हव॑म्॥८॥

पदार्थ:-(**आ**) समन्तात् (**घ**) एव। **ऋचि तुनुघ०** इति दीर्घः। (**गमत्**) प्राप्नुयात्। अत्र लिङर्थे लुङ्डभावश्च। (**यदि**) चेत् (**श्रवत्**) शृणुयात्। अत्र श्रुधातोर्लेट् **बहुलं छन्दसि** इति श्नोर्लुक्। (**सहस्रिणीभि:**) सहस्राणि प्रशस्तानि पदार्थप्रापणानि विद्यन्ते यासु ताभिः। अत्र प्रशंसार्थ इनिः। (**ऊतिभि:**) रक्षणादिभिः सह (**वाजेभि:**) अन्नज्ञानयुद्धादिभिः सह। अत्र **बहुलं छन्दसि** इति भिस ऐस् न (**उप**) सामीप्ये (**न:**) अस्माकम् (**हवम्**) प्रार्थनादिकं कर्म॥८॥

अन्वय:-यदि स इन्द्रः सभासेनाध्यक्षो नोऽस्माकमाहवमाह्वानं श्रवत् शृणुयात्तर्हि सद्य स एव सहस्रिणीभिरूतिभिर्वाजेभिः सह नोऽस्माकं हवमाह्वानमुपागमदुपागच्छेत्॥८॥

भावार्थ:-यत्र मनुष्यैः सत्यभावेन यस्य सभासेनाध्यक्षस्य सेवनं क्रियते, तत्र संरक्षणाय ससेनाङ्गै रत्नादिभिस्सह तानुपतिष्ठते नैतस्य सहायेन विना कस्यचित्सत्यौ सुखविजयौ सम्भवत इति॥८॥

पदार्थ:-(**यदि**) जो वह सभा वा सेना का स्वामी (**न:**) हम लोगों की (**आ**) (**हवम्**) प्रार्थना को (**श्रवत्**) श्रवण करे (**घ**) वही (**सहस्रिणीभि:**) हजारों प्रशंसनीय पदार्थ प्राप्त होते हैं, जिनमें उन (**ऊतिभि:**) रक्षा आदि व्यवहार वा (**वाजेभि:**) अन्न ज्ञान और युद्ध निमित्तक विजय के साथ प्रार्थना को (**उपागमत्**) अच्छे प्रकार प्राप्त हो॥८॥

भावार्थ:-जहाँ मनुष्य सभा वा सेना के स्वामी का सेवन करते हैं, वहाँ वह सभाध्यक्ष अपनी सेना के अङ्ग वा अन्नादि पदार्थों के साथ उनके समीप स्थिर होता है। इस की सहायता के विना किसी को सत्य-सत्य सुख वा विजय नहीं होते हैं॥८॥

अथेश्वरसभाध्यक्षयो प्रार्थना सर्वमनुष्यैः कार्येत्युपदिश्यते॥

अब ईश्वर और सभाध्यक्ष की प्रार्थना सब मनुष्यों को करनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अनु॑ प्र॒त्नस्यौक॑सो हु॒वे तु॑वि॒प्रति॑ं नर॑म्।
यं ते॒ पूर्व॑ पि॒ता हु॒वे॥९॥

अनु॑। प्र॒त्नस्य॑। ओक॑सः। हु॒वे। तु॒वि॒ऽप्र॒तिम्। नर॑म्। यम्। ते॒। पूर्व॑म्। पि॒ता। हु॒वे॥९॥

पदार्थः-(**अनु**) पश्चादर्थे (**प्रत्नस्य**) सनातनस्य कारणस्य। **प्रत्नमिति पुराणनामसु पठितम्।** (निघं०३.२७) अत्र त्नप् **प्रगस्य छन्दसि गलोपश्च।** (अष्टा०वा०४.३.२३) अनेन प्रशब्दात्तनप् प्रत्ययः। (**ओकसः**) सर्वनिवासार्थस्याकाशस्य (**हुवे**) स्तौमि (**तुविप्रतिम्**) तुवीनां बहूनां पदार्थानां प्रतिमातरम्। अत्रैकदेशेन प्रतिशब्देन प्रतिमातृशब्दार्थो गृह्यते। (**नरम्**) सर्वस्य जगतो नेतारम् (**यम्**) जगदीश्वरं सभासेनाध्यक्षं वा (**ते**) तव (**पूर्वम्**) प्रथमम् (**पिता**) जनक आचार्यो वा (**हुवे**) गृह्णात्याह्वयति। अत्र **बहुलं छन्दसि** इति शपो लुगात्मनेपदं च॥९॥

अन्वयः-हे मनुष्य! ते पिता यं प्रत्नस्यौकसः सनातनस्य कारणस्य सकाशात् तुविप्रतिं बहुकार्यप्रतिमातारं नरं परमेश्वरं सभासेनाध्यक्षं वा पूर्वं हुवे तमेवाहमनुकूलं हुवे स्तौमि॥९॥

भावार्थः-ईश्वरो मनुष्यानुपदिशति। हे मनुष्या! युष्माभिरेवमन्यान् प्रत्युपदेष्टव्यं योऽनादिकारणस्य सकाशादनेकविधानि कार्याण्युत्पादयति। किञ्च यस्योपासनं पूर्वे कृतवन्तः कुर्वन्ति करिष्यन्ति च तस्यैवोपासनं नित्यं कर्त्तव्यमिति। अत्र कञ्चित्प्रति कश्चित् पृच्छेत्त्वं कस्योपासनं करोषीति तस्मा उत्तरं दद्यात् यस्योपासनं तव पिता करोति यस्य च सर्वे विद्वांसः। यं वेदा निराकारं सर्वव्यापिनं सर्वशक्तिमन्तमजमनादिस्वरूपं जगदीश्वरं प्रतिपादयन्ति तमेवाहं नित्यमुपासे॥९॥

पदार्थः-हे मनुष्य! (**ते**) तेरा (**पिता**) जनक वा आचार्य्य (**यम्**) जिस (**प्रत्नस्य**) सनातन कारण वा (**ओकसः**) सबके ठहरने योग्य आकाश के सकाश से (**तुविप्रतिम्**) बहुत पदार्थों को प्रसिद्ध करने और (**नरम्**) सबको यथायोग्य कार्य्यों में लगाने वाले परमेश्वर वा सभाध्यक्ष का (**पूर्वम्**) पहिले (**हुवे**) आह्वान करता रहा उन का मैं भी (**अनुहुवे**) तदनुकूल आह्वान वा स्तवन करता हूं॥९॥

भावार्थः-ईश्वर मनुष्यों को उपदेश करता है कि हे मनुष्यो! तुम को औरों के लिये ऐसा उपदेश करना चाहिये कि जो अनादि कारण से अनेक प्रकार के कार्य्यों को उत्पन्न करता है तथा जिस की उपासना पहिले विद्वानों ने की वा अब के करते और अगले करेंगे, उसी की उपासना नित्य करनी चाहिये। इस मन्त्र में ऐसा विषय है कि कोई किसी से पूछे कि तुम किस की उपासना करते हो? उसके लिये ऐसा उत्तर देवे कि जिसकी तुम्हारे पिता वा सब विद्वान् जन करते तथा वेद जिस निराकर, सर्वव्यापी, सर्वशक्तिमान्, अज और अनादि स्वरूप जगदीश्वर का प्रतिपादन करते हैं, उसी की उपासना मैं निरन्तर करता हूं॥९॥

अथोक्तस्येश्वरस्य प्रार्थनाविषय उपदिश्यते॥

अब ईश्वर की प्रार्थना के विषय का उपदेश अगले मन्त्र में किया है॥

तं त्वा॑ व॒यं वि॑श्ववा॒रा शा॑स्महे पुरुहूत।
सखे॑ वसो जरि॒तृभ्य॑॥ १०॥ २९॥

तम्। त्वा॒। व॒यम्। वि॒श्व॒ऽवा॒र॒। आ। शा॒स्म॒हे॒। पु॒रु॒ऽहू॒त॒। सखे॑। व॒सो॒ इति॑। ज॒रि॒तृऽभ्य॑॥ १०॥

पदार्थः-(**तम्**) पूर्वोक्तं परमेश्वरम् (**त्वा**) त्वाम् (**यम्**) उपासनामभीप्सवः (**विश्ववार**) विश्वं वृणीते सम्भाजयति तत्सम्बुद्धौ (**आ**) समन्तात् (**शास्महे**) इच्छामः (**पुरुहूत**) पुरुभिर्बहुभिराहूयते स्तूयते यस्तत् सम्बुद्धौ (**सखे**) मित्र (**वसो**) वसन्ति सर्वाणि भूतानि यस्मिन् यो वा सर्वेषु भूतेषु वसति तत्सम्बुद्धौ (**जरितृभ्यः**) स्तावकेभ्यो धार्मिकेभ्यो विद्वद्भ्यो मनुष्येभ्यः॥१०॥

अन्वयः-हे विश्ववार पुरुहूत वसो सखे जगदीश्वर! पूर्वप्रतिपादितं त्वां वयं जरितृभ्य आशास्महे भवद्विज्ञानप्रकाशमिच्छाम इति यावत्॥१०॥

भावार्थः-मनुष्यैर्विदुषां सङ्गमेनैवास्य सर्वरचकस्य सर्वपूज्यस्य सर्वमित्रस्य सर्वाधारस्य पूर्वमन्त्रप्रतिपादितस्य परमेश्वरस्य विज्ञानमुपासनं नित्यमन्वेष्टव्यम्, कुतो नैव विदुषामुपदेशेन विना कस्यापि यथार्थतया विज्ञानं भवितुमर्हति॥१०॥

पदार्थः-हे (**विश्ववार**) संसार को अनेक प्रकार सिद्ध करने (**पुरुहूत**) सब से स्तुति को प्राप्त होने (**वसो**) सब में रहने वा सबको अपने में बसाने वाले (**सखे**) सबके मित्र जगदीश्वर! (**तम्**) पूर्वोक्त (**त्वा**) आपकी (**वयम्**) हम लोग (**जरितृभ्यः**) स्तुति करने वाले धार्मिक विद्वानों से (**आ**) सब प्रकार से (**शास्महे**) आशा करते हैं अर्थात् आपके विशेष ज्ञान प्रकाश की इच्छा करते हैं॥१०॥

भावार्थः-मनुष्यों को विद्वानों के समागम ही से सब जगत् के रचने, सबके पूजने योग्य, सबके मित्र, सबके आधार, पिछले मन्त्र से प्रतिपादित किये हुए परमेश्वर के विज्ञान वा उपासना की नित्य इच्छा करनी चाहिये, क्योंकि विद्वानों के उपदेश के विना किसी को यथायोग्य विशेष ज्ञान नहीं हो सकता है॥१०॥

पुनः सभासेनाध्यक्षप्राप्तीच्छाकरणमुपदिश्यते॥

फिर सभा सेनाध्यक्ष के प्राप्त होने की इच्छा करने का उपदेश अगले मन्त्र में किया है॥

अ॒स्माक॑ꣳ शि॒प्रिणी॑नां॒ सोम॑पाः॒ सोम॒पाव्ना॑म्।

सखे॑ वज्रि॒न्त्सखी॑नाम्॥११॥

अ॒स्माक॑म्। शि॒प्रिणी॑नाम्। सोम॑ऽपाः। सो॒म॒ऽपाव्ना॑म्। सखे॑। व॒ज्रि॒न्। सखी॑नाम्॥११॥

पदार्थः-(**अस्माकम्**) विदुषां सकाशाद् गृहीतोपदेशानाम् (**शिप्रिणीनाम्**) शिप्रे ऐहिकपारमार्थिकव्यवहारज्ञाने विद्येते यासां ता विदुष्यः स्त्रियस्तासाम्। **शिप्रे इति पदनामसु पठितम्।** (निघं०४.३)। अनेनात्र ज्ञानार्थो गृह्यते। (**सोमपाः**) सोमान् उत्पादितान् कार्याख्यान् पदार्थान् पाति रक्षति तत्संबुद्धौ (**सोमपाव्नाम्**) सोमानां पावनो रक्षकास्तेषाम् (**सखे**) सर्वसुखप्रद (**वज्रिन्**) वज्रोऽविद्यानिवारकः प्रशस्तो बोधो विद्यते यस्य तत्संबुद्धौ। अत्र व्रजेर्गत्यर्थाज्ज्ञानार्थे प्रशंसायां मतुप्। (**सखीनाम्**) सर्वमित्राणां पुरुषाणां सखीनां स्त्रीणां वा॥११॥

अन्वयः-हे सोमपा वज्रिन्! सोमपान्नां सखीनामस्माकं सखीनां शिप्रिणीनां स्त्रीणां च सर्वप्रधानं त्वा त्वां वयमाशास्महे प्राप्तुमिच्छामः॥११॥

भावार्थः-अत्र श्लेषालङ्कारः। पूर्वस्मान्मन्त्रात् **(त्वा) (वयम्) (आ) (शास्महे)** इति पदचतुष्टयाऽनुवृत्तिः। सर्वैः पुरुषैः सर्वाभिः स्त्रीभिश्च परस्परं मित्रतामासाद्य परमेश्वरोपासनाऽऽर्यराजविद्या धर्मसभा सर्वव्यवहारसिद्धिश्च प्रयत्नेन सदैव सम्पादनीया॥११॥

पदार्थः-हे **(सोमपाः)** उत्पन्न किये हुए पदार्थ की रक्षा करने वाले **(वज्रिन्)** सब अविद्यारूपी अन्धकार के विनाशक उत्तम ज्ञानयुक्त **(सखे)** समस्त सुख देने और **(सोमपान्नाम्)** सांसारिक पदार्थों की रक्षा करने वाले **(सखीनाम्)** सबके मित्र हम लोगों के तथा **(सखीनाम्)** सबका हित चाहनेहारी वा **(शिप्रिणीनाम्)** इस लोक और परलोक के व्यवहार ज्ञानवाली हमारी स्त्रियों को सब प्रकार से प्रधान **(त्वा)** आप को **(वयम्)** करने वाले हम लोग **(आशास्महे)** प्राप्त होने की इच्छा करते हैं॥११॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है और पूर्व मन्त्र से **(त्वा) (वयम्) (आ) (शास्महे)** इन चार पदों की अनुवृत्ति है। सब पुरुष वा सब स्त्रियों को परस्पर मित्रभाव का वर्त्ताव कर व्यवहार की सिद्धि के लिये परमेश्वर की प्रार्थना वा आर्य्य राजविद्या और धर्म सभा प्रयत्न के साथ सदा सम्पादन करनी चाहिये॥११॥

अथ सभाध्यक्षाय किं किमुपदेशनीयमित्युपदिश्यते॥

अब उस सभाध्यक्ष को क्या-क्या उपदेश करने के योग्य है, यह अगले मन्त्र में कहा है॥

तथा॒ तद॑स्तु सोमपाः सखे॑ वज्रि॒न् तथा॑ कृणु।
यथा॑ त उ॒श्मसी॒ष्टये॑॥१२॥

तथा॑। तत्। अ॒स्तु॒। सो॒म॒पाः॒। सखे॑। व॒ज्रि॒न्। तथा॑। कृ॒णु॒। यथा॑। ते॒। उ॒श्मसि॑। इ॒ष्टये॑॥१२॥

पदार्थः-**(तथा)** तेन प्रकारेण **(तत्)** मित्राचरणम् **(अस्तु)** भवतु **(सोमपाः)** यः सोमैर्जगत्युत्पन्नैः पदार्थैः सर्वान् पाति रक्षति तत्संबुद्धौ **(सखे)** सर्वेषां सुखदातः **(वज्रिन्)** वज्रः सर्वदुःखनाशनो बहुविधो दृढो बोधो यस्यास्तीति तत्संबुद्धौ। अत्र भूम्न्यर्थे मतुप्। **(तथा)** प्रकारार्थे **(कृणु)** कुरु **(यथा)** येन प्रकारेण **(ते)** तव **(उश्मसि)** कामयामहे। अत्र **इदन्तो मसि** इति मसिरादेशः। **(इष्टये)** इष्टसुखसिद्धये॥१२॥

अन्वयः-हे सोमपा वज्रिन्सखे सभाध्यक्ष! यथा वयमिष्टये ते तवाऽनुकूलं यन्मित्राचरणं कर्त्तुमुश्मसि कामयामहे कुर्म्मश्च तथा तदस्तु तथा तत् त्वमपि कृणु कुरु॥१२॥

भावार्थः-यथा सर्वेषां हितैषी सकलविद्यान्वितः सभासेनाध्यक्षः प्रजाः सततं रक्षेत्, तथैव प्रजासेनास्थैरपि मनुष्यैस्तदवनं सदा सम्भावनीयमिति॥१२॥

पदार्थः-हे **(सोमपाः)** सांसारिक पदार्थों से जीवों की रक्षा करने वाले **(वज्रिन्)** सभाध्यक्ष! जैसे हम लोग **(इष्टये)** अपने सुख के लिये **(ते)** आप शस्त्रास्त्रवित् **(सखे)** मित्र की मित्रता के अनुकूल जिस

मित्राचरण के करने को **(उश्मसि)** चाहते और करते हैं **(तथा)** उसी प्रकार से आपकी **(तत्)** मित्रता हमारे में **(अस्तु)** हो आप (**तथा**) वैसे **(कृणु)** कीजिये॥१२॥

भावार्थः-जैसे सब का हित चाहनेवाला और सकल विद्यायुक्त सभा सेनाध्यक्ष निरन्तर प्रजा की रक्षा करे, वैसे ही प्रजा सेना के मनुष्यों को भी उसकी रक्षा की सम्भावना करनी चाहिये॥१२॥

तस्मिन्किं किं स्थापयित्वा सर्वैः सुखयितव्यमित्युपदिश्यते॥

उसमें क्या-क्या स्थापन करके सब मनुष्यों को सुखयुक्त होना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः।

क्षुमन्तो याभिर्मदेम॥१३॥

रेवतीः। नः। सधऽमादे। इन्द्रे। सन्तु। तुविऽवाजाः। क्षुऽमन्तः। याभिः। मदेम॥१३॥

पदार्थः-(**रेवतीः**) रयिः शोभा धनं प्रशस्तं विद्यते यासु ताः **(प्रजाः)**। अत्र प्रशंसार्थे मतुप्। **रयेर्मतौ बहुलम्।** (अष्टा०वा०६.१.३७) अनेन सम्प्रसारणम्। **छन्दसीर** इति मस्य वत्वम्। **सुपां सुलुग्०** इति पूर्वसवर्णादेशश्च। **(नः)** अस्माकम् **(सधमादे)** मादेनान्देन सह वर्त्तमाने। अत्र **सध मादस्थयोश्छन्दसि।** (अष्टा०६.३.९६) इति सहस्य सधादेशः। **(इन्द्रे)** परमैश्वर्ये **(सन्तु)** भवन्तु **(तुविवाजाः)** तुवि बहुविधो वाजो विद्याबोधो यासां ताः **(क्षुमन्तः)** बहुविधं क्ष्वन्नं विद्यते येषां ते। अत्र भूम्न्यर्थे मतुप्। **क्ष्वित्यन्ननामसुपठितम्।** (निघं०२.७) **(याभिः)** प्रजाभिः **(मदेम)** आनन्दं प्राप्नुयाम॥१३॥

अन्वयः-यथा क्षुमन्तो वयं याभिः प्रजाभिः सधमादे मदेम तुविवाजा रेवतीः रेवत्यः प्रजा इन्द्रे परमैश्वर्ये नियुक्ताः सन्तु॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः ससभासेनाध्यक्षेषु सभासत्सु सर्वाणि राज्यविद्याधर्मप्रचारकराणि कार्य्याणि संस्थाप्य प्रशस्तं सुखं भोज्यं भोजयतिव्यं च वेदाज्ञया समानविद्यारूपस्वभावानां युवावस्थानां स्त्रीपुरुषाणां परस्परानुमत्या स्वयंवरो विवाहो भवितुं योग्यस्ते खलु गृहकृत्ये परस्परसत्कारे नित्यं प्रयतेरन् सर्व एते परमेश्वरस्योपासने तदाज्ञायां सत्पुरुषसभाज्ञायां च सदा वर्त्तेरन् नैतद्विन्ने व्यवहारे कदाचित् केनचित्पुरुषेण कयाचित् स्त्रिया च क्षणमपि स्थातुं योग्यमस्तीति॥१३॥

पदार्थः-(**क्षुमन्तः**) जिनके अनेक प्रकार के अन्न विद्यमान हैं, वे हम लोग **(याभिः)** जिन प्रजाओं के साथ **(सधमादे)** आनन्दयुक्त एक स्थान में जैसे आनन्दित होवें, वैसे **(तुविवाजाः)** बहुत प्रकार के विद्याबोधवाली **(रेवतीः)** जिनके प्रशंसनीय धन है, वे प्रजा **(इन्द्रे)** परमैश्वर्य के निमित्त **(सन्तु)** हों॥१३॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। मनुष्यों को सभाध्यक्ष सेनाध्यक्ष सहित सभाओं में सब राज्य विद्या और धर्म के प्रचार करने वाले कार्य स्थापन करके सब सुख भोगना वा भोगाना चाहिये और वेद की आज्ञा से एक से रूप स्वभाव और एकसी विद्या तथा युवा अवस्था वाले स्त्री और पुरुषों की परस्पर इच्छा से स्वयंवर विधान से विवाह होने योग्य हैं और वे अपने घर के कामों में तथा एक-दूसरे के सत्कार में नित्य यत्न करें और वे ईश्वर की उपासना वा उस की आज्ञा तथा सत्पुरुषों की आज्ञा में सदा चित्त देवें, किन्तु उक्त व्यवहार से विरुद्ध व्यवहार में कभी किसी पुरुष वा स्त्री को क्षणभर भी रहना न चाहिये॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः।

ऋणोरक्षं न चक्र्योः॥१४॥

आ। घ। त्वाऽवान्। त्मना। आप्तः। स्तोतृऽभ्यः। धृष्णो इति। इयानः। ऋणोः। अक्षम्। न। चक्र्योः॥१४॥

पदार्थः-(**आ**) अभ्यर्थे (**घ**) एव (**त्वावान्**) त्वादृशः। अत्र **वतुप् प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्।** (अष्टा०वा०५.२.३९) इति सादृश्यार्थे वतुप्। (**त्मना**) आत्मना। **मन्त्रेष्वाङ्योदरात्मनः।** (अष्टा०६.४.१४१) इत्याकारलोपः। (**आप्तः**) सर्वविद्यादिसद्गुणव्याप्तः सत्योपदेष्टा (**स्तोतृभ्यः**) स्तावकेभ्यो जनेभ्यः। **गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि।** (अष्टा०२.३.१२) इति चतुर्थी (**इयानः**) सर्वाभीष्टाभिज्ञाता। अत्रेङ्गताावित्यस्मात्। **छन्दसि लिट्।** (अष्टा०३.२.१०५) इति लिट्। **लिटः कानज्वा।** (अष्टा०३.२.१०६) इति कानच्। (**ऋणोः**) प्राप्नोति। अत्र लडर्थे लङ्। **बहुलं छन्दसि** इत्यडभावश्च। (**अक्षम्**) धूः (**न**) इव (**चक्र्योः**) रथाङ्गयोः। अत्र कृञ् धातोः **आदृगमहनजनः०** (अष्टा०३.२.१७१) इति किप्रत्ययः॥१४॥

अन्वयः-हे धृष्णो अति प्रगल्भ सभाध्यक्ष! त्मनाप्त इयानस्त्वावान् त्वं घ त्वमेवासि यस्त्वं चक्र्योरक्षं न इव स्तोतृभ्यः स्तावकेभ्य आऋणोः स्तावकान् आप्नोसीति यावत्॥१४॥

भावार्थः-अत्रोपमालङ्कारः प्रतीपालङ्कारश्च। यथा चक्र्यार्धूः रथधारिका सती परिभ्रमणेनापि स्वस्मिन्नैव स्थापनी रथस्य देशान्तरप्रापिका भवति। तथैव सकलगुणकर्मस्वभावाभिव्याप्त-स्त्वमेतत्सर्वन्नियच्छसीति॥१४॥

पदार्थः-हे (**धृष्णो**) अति धृष्ट (**त्मना**) अपनी कुशलता से (**आप्तः**) सर्व विद्यायुक्त सत्य के उपदेश करने और (**इयानः**) राज्य को जानने वाले राजन्! (**त्वावान्**) आप से (**घ**) आप ही हो जो आप

(चक्र्योः) रथ के पहियों की **(अक्षम्)** धुरी के **(न)** समान **(स्तोतृभ्यः)** स्तुति करने वालों को **(आऋणोः)** प्राप्त होते हो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार और प्रतीपालङ्कार हैं। जैसे पहियों की धुरी रथ को धारण करने वाली घूमती भी अपने ही में ठहरी सी रहती है और रथ को देशान्तर में प्राप्त करने वाली होती है, वैसे ही आप राज्य को व्याप्त होकर यथायोग्य नियम में रखते हो॥१४॥

पुनस्तत्सेवनात् किं फलमित्युपदिश्यते॥

फिर उसके सेवन से क्या फल होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ यद्दुवः शतक्रतवा कामं जरितॄणाम्।

ऋणोरक्षं न शचीभिः॥ १५॥ ३०॥

आ। यत्। दुवः। शतक्रतो इति शतऽक्रतो। आ। कामम्। जरितॄणाम्। ऋणोः। अक्षम्। न। शचीभिः॥ १५॥

पदार्थः-(**आ**) समन्तात् (**यत्**) वक्ष्यमाणम् (**दुवः**) परिचरणम् (**शतक्रतो**) शतविधप्रज्ञाकर्मयुक्त सभेश राजन् (**आ**) अभितः पूर्त्यर्थे (**कामम्**) काम्यते यस्तम्। (**जरितॄणाम्**) गुणकर्मस्तावकानाम् (**ऋणोः**) प्रापयसि। अस्यापि सिद्धिः पूर्ववत् (**अक्षम्**) अश्यन्ते व्याप्यन्ते प्रशस्ता व्यवहारा येन तम् (**न**) इव (**शचीभिः**) कर्मभिः॥१५॥

अन्वयः-हे शतक्रतो सभापते! त्वं जरितृभिः यत्तव दुवः परिचरणं तत् प्राप्य शचीभिः शकटार्हकर्मभिरक्षं न इव तेषां जरितॄणां कामं आऋणोः तदनुकूलं प्रापयसि॥१५॥

भावार्थः- अत्रोपमालङ्कारः। यथा सभास्वामी राजा विद्वत्सेवनं विद्यार्थिनामभीष्टं पूरयति तथा परमेश्वरस्य सेवनं धार्मिकाणां जनानां सर्वमभीष्टं प्रापयति तस्मात्सर्वैर्मनुष्यैस्तत् सेवनीयमिति॥१५॥

पदार्थः-हे (**शतक्रतो**) अनेकविध विद्या बुद्धि वा कर्मयुक्त राजसभा स्वामिन्! आप स्तुति करने वाले धार्मिक जनों से (**तत्**) जो आप का (**दुवः**) सेवन है, उस को प्राप्त होकर (**शचीभिः**) रथ के योग्य कर्मों से (**अक्षम्**) उसकी धुरी के (**न**) समान उन (**जरितॄणाम्**) स्तुति करने वाले धार्मिक जनों की (**कामम्**) कामनाओं को (**आ**) (**ऋणोः**) अच्छी प्रकार पूरी करते हो॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वानों का सेवन विद्यार्थियों का अभीष्ट अर्थात् उनकी इच्छा के अनुकूल कामों को पूरा करता है, वैसे परमेश्वर का सेवन धार्मिक सज्जन मनुष्यों का अभीष्ट पूरा करता है। इसलिये उनको चाहिये कि परमेश्वर की सेवा नित्य करें॥१५॥

पुनः स सभाध्यक्षः कीदृशः किं करोतीत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा और क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

शश्व॒दिन्द्रः॑ पोप्रु॑थद्भिर्जिगाय॒ नाना॑दद्भिः॒ शाश्व॑सद्भि॒र्धना॑नि।
स नो॑ हिरण्यर॒थं दं॒सना॑वा॒न्त्स नः॑ सनि॒ता स॒नये॒ स नो॑ऽदात्॥ १६॥

श॒श्व॑त्। इन्द्रः॑। पोप्रु॑थत्ऽभिः। जि॒गा॒य॒। नाना॑दत्ऽभिः। शाश्व॑सत्ऽभिः। धना॑नि। सः। नः॒। हि॒र॒ण्य॒ऽर॒थम्। दं॒सना॑ऽवान्। सः। नः॒। स॒नि॒ता। स॒नये॑। सः। नः॒। अ॒दा॒त्॥ १६॥

पदार्थः-(**शश्वत्**) अनादिस्वरूपाज्जगत्कारणात् (**इन्द्रः**) सृष्टिकर्त्तेश्वरः राज्यशास्ता (**पोप्रुथद्भिः**) अतिशयेन स्थूलैरचरैः कार्यैः। अत्र **प्रोथृ पर्याप्ता**वित्यस्माद् यङ्लुगन्ताच्छतृप्रत्यय उपधाया उत्वं च वर्णव्यत्ययेन (**जिगाय**) जयति प्रकर्षतां प्रापयति। अत्र लडर्थे लिट्। (**नानदद्भिः**) अतिशयेनाव्यक्तशब्दं कुर्वद्भिर्जीवैर्विद्युदादिभिर्वा (**शाश्वसद्भिः**) अतिशयेन प्राणवद्भिश्चरैः (**धनानि**) पृथिवीसुवर्णविद्यादीनि (**सः**) उक्तार्थः (**नः**) अस्मभ्यम् (**हिरण्यरथम्**) हिरण्यानां ज्योतिर्मयानां सूर्यादीनां लोकानां सुवर्णादीनां वा रथो देशान्तरप्रापणो यानसमूहः। अत्र रथ इति **रमु क्रीडायामि**त्यस्य रूपं रमधातो रूपं वा। (**दंसनावान्**) दंसः कर्म आचष्टेऽनया सा दंसना। सा बह्वी विद्यते यस्य सः। **दंस इति कर्मनामसु पठितम्।** (निघं०२.१) अस्मात् **तत्करोति तदाचष्टे** इति णिच् ततो **ण्यासश्रन्थो युच्** इति युच् ततो भूम्न्यर्थे मतुप्। (**सः**) सर्वेषां जीवानां पापपुण्यफलानां विभागदाता (**नः**) अस्माकम् (**सनिता**) विद्याकर्मोपदेशेन सम्भाजिता (**सनये**) सुखानां सम्भोगाय (**सः**) उक्तार्थः (**नः**) अस्मभ्यम् (**अदात्**) दत्तवान्। ददाति दास्यति वा। अत्र **छन्दसि लुङ्लङ्लिटः** इति सामान्यकाले लुङ्॥ १६॥

अन्वयः-इन्द्रो जगदीश्वरः शश्वत् शश्वतोऽनादेः कारणात् नानदद्भिः शाश्वसद्भिः पोप्रुथद्भिः कार्यैर्द्रव्यैर्जिगाय जयति स दंसनावानीश्वरो नोऽस्मभ्यं हिरण्यरथमदाद् ददाति दास्यति स नोऽस्माकं सनये सुखानां सनिता सर्वाणि सुखान्यदादिव सभासेनापतिर्वर्त्तेत॥ १६॥

भावार्थः-यथा जगदीश्वरः सनातनाज्जगत्कारणाच्चराचराणि कार्याण्युत्पाद्यैतेः सर्वेभ्यो जीवेभ्यस्सर्वाणि सुखानि ददाति तथा सभासेनापतिर्न्यायाधीशाः सर्वाणि सभासेनान्यायाङ्गानि निष्पाद्य सर्वाः प्रजा निरन्तरमानन्दयेयुः यथा नैतस्माद्भिन्नः कश्चिज्जगत्स्रष्टा कर्मफलप्रदाता राज्यप्रशास्ता च भवितुमर्हति तथैव सर्वमेतदनुतिष्ठेरन्॥ १६॥

पदार्थः-(**इन्द्रः**) जगत् का रचने वाला ईश्वर (**शश्वत्**) अनादि सनातन कारण से (**नानदद्भिः**) तड़फ और गर्जना आदि शब्दों को करती हुई बिजली और नदी अचेतन और जीव तथा (**शाश्वसद्भिः**) अति प्रशंसनीय प्राण वाले चर वा (**पोप्रुथद्भिः**) स्थूल जो कि अचर हैं, उन कार्य्यरूपी पदार्थों से (**धनानि**) पृथिवी सुवर्ण और विद्या आदि धनों को (**जिगाय**) प्रकर्षता अर्थात् उन्नति को प्राप्त करता है (**सः**) वह (**दंसनावान्**) कर्मों का फल देने हारा के और साधनों से संयुक्त ईश्वर (**नः**) हमारे लिये (**हिरण्यरथम्**) ज्योति वाले सूर्य आदि लोक वा सुवर्ण आदि पदार्थों के प्राप्त कराने वाले पदार्थों को और विमान आदि रथों को (**अदात्**) प्रत्यक्ष करता है (**सः**) (**नः**) हम को सुखों के (**सनये**) भोग के लिये

(सनिता) विद्या, कर्म और उपदेश से विभाग करने वाला होकर सब सुखों को **(अदात्)** देता है, वैसा सभा, सेनापति और न्यायाधीश भी वर्तें॥१६॥

भावार्थः-जैसे जगदीश्वर सनातन कारण से चर और अचर कार्यों को उत्पन्न करके इन्हीं से सब जीवों को सुख देता है, वैसे सभा, सेनापति, न्यायाधीश लोग सब सभा, सेना और न्याय के अङ्गों को सिद्ध कर सब प्रजा को निरन्तर आनन्दयुक्त करते हैं, जैसे इससे और कोई संसार का रचने वा कर्म फल का देने और ठीक न्याय से राज्य का पालन करने वाला नहीं हो सकता, वैसे वे भी सब कार्य्य करें॥१६॥

पुनस्तौ कीदृशौ स्त इत्युपदिश्यते॥

फिर वे कैसे हों, इसका अगले मन्त्र में प्रकाश किया है॥

आश्विना वश्वावत्येषा यातं शवीरया।
गोमद् दस्रा हिरण्यवत्॥१७॥

आ। अश्विनौ। अश्वऽवत्या। इषा। यातम्। शवीरया। गोऽमत्। दस्रा। हिरण्यऽवत्॥१७॥

पदार्थः-(**आ**) समन्तात् (**अश्विनौ**) यथा द्यावापृथिव्यादिकद्वन्द्वं तथा विद्याक्रियाकुशलौ (**अश्वावत्या**) वेगादिगुणसहितया। अत्र **मन्त्रे सोमाश्वेन्द्रियविश्व०** (अष्टा०६.३.१३१) अनेन पूर्वपदस्य दीर्घः। (**इषाः**) इष्यते यया। अत्र **कृतो बहुलम्** इति करणे क्विप्। (**यातम्**) प्रापयतम् (**शवीरया**) देशान्तरप्रापिकया गत्या **शु गता**वित्यस्माद्धातोर्बाहुलकादौणादिक ईरन् प्रत्ययः। (**गोमत्**) गावः सुखप्रापिका बह्व्यो विद्यन्ते यस्मिंस्तत्। **गौरिति पदनामसु पठितम्।** (निघं०५.५) अनेन प्राप्त्यर्थो गृह्यते। अत्र भूम्न्यर्थे मतुप्। (**दस्रा**) दारिद्र्योपक्षयहेतू। अत्र **सुपां सुलुग्०** इति आकारादेशः (**हिरण्यवत्**) हिरण्यं सुवर्णादिकं बहुविधं साधने यस्य तत्। अत्र भूम्न्यर्थे मतुप्॥१७॥

अन्वयः-हे विद्याक्रियाकुशलौ विद्वांसौ शिल्पिनौ दस्रावश्विनौ सभासेनास्वामिनौ द्यावापृथिव्याविवेषाभीष्टयाऽश्ववत्या शवीरया गत्या हिरण्यवद् गोमद् यानमायातं समन्ताद्देशान्तरं प्रापयतम्॥१७॥

भावार्थः-पूर्वोक्ताभ्यामश्विभ्यां चालितं यानं शीघ्रगत्या भूमौ जलेऽन्तरिक्षे च गच्छति तस्मादेतत्सद्यः साध्यम्॥१७॥

पदार्थः-हे (**दस्रा**) दारिद्र्य विनाश कराने वाले (**अश्विनौ**) बिजली और पृथिवी के समान विद्या और क्रियाकुशल शिल्पी लोगो! तुम (**इषा**) चाही हुई (**अश्वावत्या**) वेग आदि गुणयुक्त (**शवीरया**) देशान्तर को प्राप्त कराने वाली गति के साथ (**हिरण्यवत्**) जिसके सुवर्ण आदि साधन हैं और (**गोमत्**)

जिसमें सिद्ध किये हुए धन से सुख प्राप्त कराने वाली बहुत सी क्रिया हैं, उस रथ को **(आयातम्)** अच्छे प्रकार देशान्तर को पहुंचाइये॥१७॥

भावार्थः-पूर्वोक्त अश्वि अर्थात् सूर्य्य और पृथिवी के गुणों से चलाया हुआ रथ शीघ्र गमन से भूमि, जल और अन्तरिक्ष में पदार्थों को प्राप्त करता है, इसलिये इसको शीघ्र साधना चाहिये॥१७॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे किस प्रकार के हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

समानयोजनो हि वां रथो दस्रावमर्त्यः।
समुद्रे अश्विनेयते॥१८॥

समानऽयोजनः। हि। वाम्। रथः। दस्रौ। अमर्त्यः। समुद्रे। अश्विना। ईयते॥१८॥

पदार्थः-(**समानयोजनः**) समानं तुल्यं योजनं संयोगकरणं यस्मिन् सः **(हि)** खलु **(वाम्)** युवयोः **(रथः)** नौकादियानम् **(दस्रौ)** गमनकर्त्तारौ **(अमर्त्यः)** अविद्यमाना आकर्षका मनुष्यादयः प्राणिनो यस्मिन् सः **(समुद्रे)** जलेन सम्पूर्णे समुद्रेऽन्तरिक्षे वा **(अश्विना)** अश्विनौ क्रियाकौशलव्यापिनौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(ईयते)** गच्छति॥१८॥

अन्वयः-हे दस्रौ मार्गगमनपीडोपक्षेतारावश्विना अश्विनौ विद्वांसौ! यो वां युवयोर्हि खलु समानयोजनोऽमर्त्यो रथः समुद्र ईयते यस्य वेगेनाश्वावत्या शवीरया गत्या समुद्रस्य पारावारौ गन्तुं युवां शक्नुतस्तं निष्पादयतम्॥१८॥

भावार्थः-अत्र पूर्वस्मान्मन्त्रात् **(अश्वावत्या) (शवीरया)** इति द्वयोः पदयोरनुवृत्तिः। मनुष्यैर्यानि महान्त्यग्निवाष्पजलकलायन्त्रैः सम्यक् चालितानि नौकायानानि तानि निर्विघ्नतया समुद्रान्तं शीघ्रं गमयन्ति। नैवेदृशैर्विना नियतेन कालेनाभीष्टं स्थानान्तरं गन्तुं शक्यत इति॥१८॥

पदार्थः-हे **(दस्रौ)** मार्ग चलने की पीड़ा को हरने वाले **(अश्विना)** उक्त अश्वि के समान शिल्पकारी विद्वानो! **(वाम्)** तुम्हारा जो सिद्ध किया हुआ **(समानयोजनः)** जिसमें तुल्य गुण से अश्व लगाये हों **(अमर्त्यः)** जिसके खींचने में मनुष्य आदि प्राणि न लगे हों, वह **(रथः)** नाव आदि रथसमूह **(समुद्रे)** जल से पूर्ण सागर वा अन्तरिक्ष में **(ईयते) (अश्वावत्या)** वेग आदि गुणयुक्त **(शवीरया)** देशान्तर को प्राप्त कराने वाली गति के साथ समुद्र के पार और वार को प्राप्त कराने वाला होता है, उसको सिद्ध कीजिये॥१८॥

भावार्थः-इस मन्त्र में पूर्व मन्त्र से **(अश्वावत्या) (शवीरया)** इन दो पदों की अनुवृत्ति है। मनुष्यों की जो अग्नि, वायु और जलयुक्त कलायन्त्रों से सिद्ध की हुई नाव हैं, वे निस्सन्देह समुद्र के अन्त को जल्दी पहुंचाती हैं, ऐसी-ऐसी नावों के विना अभीष्ट समय में चाहे हुए एक स्थान से दूसरे स्थान को जाना नहीं हो सकता है॥१८॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

न्य१ंघ्न्यस्य॑ मू॒र्धनि॑ च॒क्रं रथ॑स्य येमथुः।

परि॒ द्याम॒न्यदी॑यते॥ १९॥

नि। अ॒घ्न्यस्य॑। मू॒र्धनि॑। च॒क्रम्। रथ॑स्य। ये॒म॒थुः। परि॑। द्याम्। अ॒न्यत्। ई॒य॒ते॥ १९॥

पदार्थः-(**नि**) क्रियायोगे (**अघ्न्यस्य**) हन्तुं विनाशयितुमनर्हस्य यानस्य (**मूर्धनि**) उत्तमाङ्गेऽग्रभागे (**चक्रम्**) एकं यन्त्रकलासमूहम् (**रथस्य**) विमानादियानस्य (**येमथुः**) देशान्तरे यच्छथः। अत्र लडर्थे लिट्। (**परि**) सर्वतः (**द्याम्**) दिवमुपर्य्याकाशम् (**अन्यत्**) द्वितीयं चक्रम (**ईयते**) गमयति॥ १९॥

अन्वयः-हे अश्विनौ! विद्याव्याप्तौ युवां यद्येकमघ्न्यस्य रथस्य मूर्द्धन्यपरं द्वितीयं च चक्रमधो रचयेतां तर्ह्येते समुद्रमाकाशं वा नियेमथुर्नियच्छथ एताभ्यां द्वाभ्यां युक्तं यानं यथेष्टे मार्गे ईयते प्रापयति॥ १९॥

भावार्थः-शिल्पिभिः शीघ्रगमनार्थं यद्यद्यानं चिकीर्ष्यते तस्य तस्याग्रभाग एकं कलायन्त्रचक्रं सर्वकलाभ्रमणार्थं द्वितीयमपरभागे च रचनीयं तद्रचने जलाग्न्यादि प्रयोज्यैतेन यानेन ससम्भाराः शिल्पिनो भूमिसमुद्रान्तरिक्षमार्गेण सुखेन गन्तुं शक्नुवन्तीति निश्चयः॥ १९॥

पदार्थः-हे अश्विनौ विद्यायुक्त शिल्पि लोगो! तुम दोनों (**अघ्न्यस्य**) जो कि विनाश करने योग्य नहीं है, उस (**रथस्य**) विमान आदि यान के (**मूर्धनि**) उत्तम अङ्ग अग्रभाग में जो एक और (**अन्यत्**) दूसरा नीचे की ओर कलायन्त्र बनाओं तो वे दो चक्र समुद्र वा (**द्याम्**) आकाश पर भी (**नियेमथुः**) देश-देशान्तर में जाने के वास्ते बहुत अच्छे हों, इन दोनों चक्रों से जुड़ा हुआ रथ जहाँ चाहो वहाँ (**ईयते**) पहुंचाने वाला होता है॥ १९॥

भावार्थः-शिल्पि विद्वानों को योग्य है कि जो शीघ्र जाने आने के लिये रथ बनाना चाहें तो उसके आगे एक-एक कलायन्त्रयुक्त चक्र तथा सब कलाओं के घूमने के लिये दूसरा चक्र नीचे भाग में रच के उसमें यन्त्र के साथ जल और अग्नि आदि पदार्थों का प्रयोग करें। इस प्रकार रचे हुए यान भारसहित शिल्पि विद्वान् लोगों को भूमि, समुद्र और अन्तरिक्ष मार्ग से सुखपूर्वक देशान्तर को प्राप्त करता है॥ १९॥

अथैतद्विद्योपयोग्योषसः काल उपदिश्यते॥

अब इस विद्या के उपयोग करने वाले प्रातःकाल का उपदेश अगले मन्त्र में किया है॥

कस्त॑ उषः कधप्रिये भु॒जे मर्तो॑ अमर्त्ये।

कं न॑क्षसे विभावरि॥ २०॥

कः। ते। उषः। कधऽप्रिये। भुजे। मर्तः। अमर्त्ये। कम्। नक्षसे। विभाऽवरि॥ २०॥

पदार्थः-(**कः**) वक्ष्यमाणः (**ते**) तव विदुषः (**उषः**) उषाः (**कधप्रिये**) कथनं कथा प्रिया यस्यां सा। अत्र वर्णव्यत्ययेन थकारस्य स्थाने धकारः। (**भुजे**) भुज्यते यः स भुक् तस्मै। अत्र **कृतो बहुलम्** इति कर्मणि क्विप्। (**मर्तः**) मनुष्यः (**अमर्त्यः**) कारणप्रवाहरूपेण नाशरहिता (**कम्**) मनुष्यम् (**नक्षसे**) प्राप्नोसि (**विभावरि**) विविधं जगत् भाति दीपयति सा विभावरि। अत्र **वनो र च।** (अष्टा०४.१.७) अनेन ङीप् रेफादेशश्च॥ २०॥

अन्वयः-हे विद्वन्! येयममर्त्ये कधप्रिये विभावर्युषरुषा भुजे सुखभोगाय प्रत्यहं प्राप्नोति, तां प्राप्य त्वं कं मनुष्यं न नक्षसे प्राप्नोसि, को मर्तो भुजे ते तव सनीडं न प्राप्नोति॥ २०॥

भावार्थः-अत्र काक्वर्थः। को मनुष्यः कालस्य सूक्ष्मां व्यर्थगमनानर्हां गतिं वेद, नहि सर्वो मनुष्यः पुरुषार्थारम्भस्य सुखाख्यामुषसं यथावज्जानाति, तस्मात्सर्वे मनुष्याः प्रातरुत्थाय यावन्नसुषुपुस्तावदेकं क्षणमपि कालस्य व्यर्थं न नयेयुः, एवं जानन्तो जनाः सर्वकालं सुखं भोक्तुं शक्नुवन्ति नेतरेऽलसाः॥ २०॥

पदार्थः-हे विद्याप्रियजन! जो यह (**अमर्त्ये**) कारण प्रवाह रूप से नाशरहित (**कधप्रिये**) कथनप्रिय (**विभावरि**) और विविध जगत् को प्रकाश करने वाली (**उषा**) प्रातःकाल की वेला (**भुजे**) सुख भोग कराने के लिये प्राप्त होती है, उसको प्राप्त होकर तू (**कम्**) किस मनुष्य को (**नक्षसे**) प्राप्त नहीं होता और (**कः**) कौन (**मर्त्तः**) मनुष्य (**भुजे**) सुख भोगने के लिये (**ते**) तेरे आश्रय को नहीं प्राप्त होता॥ २०॥

भावार्थः-इस मन्त्र में काक्वर्थ है। कौन मनुष्य इस काल की सूक्ष्म गति जो व्यर्थ खोने के अयोग्य है, उसको जाने जो पुरुषार्थ के आरम्भ का आदि समय प्रातःकाल है, उसके निश्चय से प्रातःकाल उठ कर जब तक सोने का समय न हो, एक भी क्षण व्यर्थ न खोवे। इस प्रकार समय के सार्थपन को जानते हुए मनुष्य सब काल सुख भोग सकते हैं, किन्तु आलस्य करने वाले नहीं॥ २०॥

पुनः सा कीदृशी ज्ञातव्येत्युपदिश्यते॥

फिर उस वेला को कैसी जाननी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

वयं हि ते अमन्महान्तादा पराकात्।

अश्वे न चित्रे अरुषि॥ २१॥

वयम्। हि। ते। अमन्महि। आ। अन्तात्। आ। पराकात्। अश्वे। न। चित्रे। अरुषि॥ २१॥

पदार्थः-(**वयम्**) कालमहिम्नो वेदितारः (**हि**) निश्चये (**ते**) तव (**अमन्महि**) विजानीयाम। अत्र **बहुलं छन्दसि** इति श्यनोर्लुक्।[४] (**आ**) मर्यादायाम् (**पराकात्**) दूरदेशात् (**अश्वे**) प्रतिक्षणं शिक्षिते तुरंगे (**न**) इव (**चित्रे**) आश्चर्य्यव्यवहारे (**अरुषि**) रक्तगुणप्रकाशयुक्ता॥ २१॥

अन्वयः-हे विद्वन्! यथा वयं या चित्रेऽरुष्यद्भुतता रक्तगुणाढ्यास्ति तामन्तादाभिमुख्यात् समीपस्थाद् देशादापराकाद् दूरदेशाच्चाश्वेनामन्महि तथा त्वमपि विजानीहि॥ २१॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या भूतभविष्यद्वर्त्तमानकालान् यथावदुपयोजितुं जानन्ति, तेषां पुरुषार्थेन दूरस्थ समीपस्थानि सर्वाणि कार्याणि सिध्यन्ति। अतो नैव केनापि मनुष्येण क्षणमात्रोऽपि व्यर्थः कालः कदाचिन्नेय इति॥ २१॥

पदार्थः-हे कालविद्यावित् जन! जैसे (**वयम्**) समय के प्रभाव को जानने वाले हम लोग जो (**चित्रे**) आश्चर्यरूप (**अरुषि**) कुछ एक लाल गुणयुक्त उषा है, उस को (**आ अन्तात्**) प्रत्यक्ष समीप वा (**आपराकात्**) एक नियम किये हुए दूर देश से (**अश्वे**) नित्य शिक्षा के योग्य घोड़े पर बैठ के जाने आने वाले के (**न**) समान (**अमन्महि**) जानें, वैसे इस को तू भी जान॥ २१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य भूत, भविष्यत् और वर्त्तमान काल का यथायोग्य उपयोग लेने को जानते हैं, उनके पुरुषार्थ से समीप वा दूर के सब कार्य सिद्ध होते हैं। इससे किसी मनुष्य को कभी क्षण भर भी व्यर्थ काल खोना न चाहिये॥ २१॥

पुनः सः कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं त्येभि॒रा ग॑हि॒ वाजे॑भिर्दुहितर्दिवः।

अ॒स्मे र॒यिं नि धा॑रय॥ २२॥ ३१॥ ६॥

त्वम्। त्येभिः। आ। ग॒हि॒। वाजे॑भिः। दु॒हि॒तः॒। दि॒वः॒। अ॒स्मे इति॑। र॒यिम्। नि। धा॒र॒य॒॥ २२॥

पदार्थः-(**त्वम्**) कालकृत्यवित् (**त्येभिः**) शोभनैः कालावयवैः सह। अत्र **बहुलं छन्दसि** इति भिस ऐस् न। (**आ**) समन्तात् (**गहि**) प्राप्नुहि। अत्र **बहुलं छन्दसि** इति शपो लुक्। (**वाजेभिः**) अन्नादिभिः पदार्थैः। अत्रापि पूर्ववद् भिस ऐस न। (**दुहितः**) दुहिता पुत्रीव। **दुहिता दुर्हिता दूरे हिता दोग्धेर्वा।** (निरु०३.४) (**दिवः**) **दिवो द्योतनकर्मणामादित्यरश्मीनाम्।** (निरु०१३.२५) अनेन सूर्यप्रकाशस्य दिव

---

४. (आ) प्रत्यक्षम् (अन्तात्) समीपे इति स्खलितः पाठः। सं०

इति नामास्ति। **(अस्मे)** अस्मभ्यम् **(रयिम्)** विद्यासुवर्णादिधनम् **(नि)** नितरां क्रियायोगे **(धारय)** सम्पादय॥ २२॥

अन्वयः-हे कालमाहात्म्यवित् विद्वंस्त्वं या दिवो दुहितर्दुहितोषाः संसाधिता सती त्येभिः कालावयवैरस्मे अस्मान् वाजेभिरन्नादिभिश्च सहानन्दाय समन्तात् प्राप्नोति तथाऽस्मभ्यं रयिर्निधारय धारय नित्यं सम्पादयैवमागहि सर्वथा तद्विद्यां ज्ञापय यतो वयमपि कालं व्यर्थं न नयेम॥ २२॥

भावार्थः-ये मनुष्याः कालं व्यर्थं न नयन्ति तेषां सर्वः कालः सर्वकार्यसिद्धिप्रदो भवति नेतरेषामिति॥ २२॥

अत्र पूर्वसूक्तोक्तविद्यानुषङ्गिणामिन्द्राश्व्युषसामर्थानां प्रतिपादनात् पूर्वसूक्तार्थेनैतत् सूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति प्रथमाष्टके द्वितीयाध्याय एकत्रिंशो वर्गः प्रथममण्डले षष्ठोऽनुवाकस्त्रिंशं सूक्तं च समाप्तम्॥ ३०॥

पदार्थः-हे काल के माहात्म्य को जानने वाले विद्वान् **(त्वम्)** तू जो **(दिवः)** सूर्य किरणों से उत्पन्न हुई उनकी **(दुहितः)** लड़की के समान प्रातःकाल की वेला **(त्येभिः)** उसके उत्तम अवयव अर्थात् दिन महीना आदि विभागों से वह हम लोगों को **(वाजेभिः)** अन्न आदि पदार्थों के साथ प्राप्त होती और धनादि पदार्थों की प्राप्ति का निमित्त होती है, उससे **(अस्मे)** हम लोगों के लिये **(रयिम्)** विद्या, सुवर्णादि धनों को **(निधारय)** निरन्तर ग्रहण कराओ और **(आगहि)** इस प्रकार इस विद्या की प्राप्ति कराने के लिये प्राप्त हुआ कीजिये कि जिससे हम लोग भी समय को निरर्थक न खोवें॥ २२॥

भावार्थः-जो मनुष्य कुछ भी व्यर्थ काल नहीं खोते उन का सब काल सब कामों की सिद्धि का करने वाला होता है॥ २२॥

इस मन्त्र में पिछले सूक्त के अनुषङ्गी **(इन्द्र)** **(अश्वि)** और **(उषा)** समय के वर्णन से पिछले सूक्त के अनुषङ्गी अर्थो के साथ इस सूक्त के अर्थ की संगति जाननी चाहिये।

यह पहिले अष्टक में दूसरे अध्याय में इकतीसवां वर्ग तथा पहिले मण्डल में छठा अनुवाक और तीसवां सूक्त समाप्त हुआ॥ ३०॥

अथाष्टादशर्चस्यैकत्रिंशत्तमस्य सूक्तस्याङ्गिरसो हिरण्यस्तूप ऋषिः। अग्निर्देवता १-७९-१५। १७ जगतीछन्दो निषादः स्वरः ८,१६,१८ त्रिष्टुप् च छन्दः। धैवतः स्वरः॥

तत्रादिमेनेश्वर उपदिश्यते॥

अब इकतीसवें सूक्त का प्रारम्भ है, उस के पहिले मन्त्र में ईश्वर का प्रकाश किया है॥

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः॥ १॥

त्वम्। अग्ने। प्रथमः। अङ्गिराः। ऋषिः। देवः। देवानाम्। अभवः। शिवः। सखा। तव। व्रते। कवयः। विद्मनाऽअपसः। अजायन्त। मरुतः। भ्राजत्ऽऋष्टयः॥ १॥

पदार्थः-(**त्वम्**) जगदीश्वरः (**अग्ने**) स्वप्रकाशविज्ञानस्वरूपेश्वर (**प्रथमः**) अनादिस्वरूपो जगतः कल्पादौ सदा वर्त्तमानः (**अङ्गिराः**) पृथिव्यादीनां ब्रह्माण्डस्य शिरआदीनां शरीरस्य रसोऽन्तर्यामिरूपेणावस्थितः। **आङ्गिरसो अङ्गानाꣳ हि रसः।** (श०ब्रा०१४.३.१.२१) (**ऋषिः**) सर्वविद्याविद्वेदोपदेष्टा (**देवः**) आनन्दोत्पादकः (**देवानाम्**) विदुषाम् (**अभवः**) भवसि। अत्र लडर्थे लङ्। (**शिवः**) मङ्गलमयो जीवानां मङ्गलकारी च (**सखा**) सर्वदुःखविनाशनेन सहायकारी (**तव**) जगदीश्वरस्य (**व्रते**) धर्माचारपालनाज्ञानियमे (**कवयः**) विद्वांसः (**विद्मनापसः**) वेदनं विद्म तद्विद्यते येषु तानि विज्ञाननिमित्तानि समन्तादपांसि कर्माणि येषां ते (**अजायन्त**) जायन्ते। अत्र लडर्थे लङ्। (**मरुतः**) धर्मप्राप्ता मनुष्याः। **मरुत इति पदनामसु पठितम्।** (निघं०५.५) (**भ्राजदृष्टयः**) भ्राजत् प्रकाशमाना विद्या ऋष्टिर्ज्ञानं येषान्ते॥ १॥

अन्वयः-हे अग्ने! यतस्त्वं प्रथमोऽङ्गिरा ऋषिर्देवानां देवः शिवः सखाऽभवो भवसि ये विद्मनापसो मनुष्यास्तव व्रते वर्त्तन्ते तस्मात्त एव भ्राजदृष्टयः कवयोऽजायन्त जायन्ते॥ १॥

भावार्थः-य ईश्वराज्ञाधर्मविद्वत्सङ्गान् विहाय किमपि न कुर्वन्ति, तेषां जगदीश्वरेण सह मित्रता भवति, पुनस्तन्मित्रतया तेषामात्मसु सत्यविद्याप्रकाशो जायते, पुनस्ते विद्वांसो भूत्वोत्तमानि कर्माण्यनुष्ठाय सर्वेषां प्राणिनां सुखप्रापकत्वेन प्रसिद्धा भवन्तीति॥ १॥

पदार्थः-हे (**अग्ने**) आप ही प्रकाशित और विज्ञान स्वरूप युक्त जगदीश्वर जिसका कारण (**त्वम्**) आप (**प्रथमः**) अनादि स्वरूप अर्थात् जगत् कल्प की आदि में सदा वर्त्तमान (**अङ्गिराः**) ब्रह्माण्ड के पृथिवी आदि शरीर के हस्त पाद आदि अङ्गों के रस रूप अर्थात् अन्तर्यामी (**ऋषिः**) सर्व विद्या से परिपूर्ण वेद के उपदेश करने और (**देवानाम्**) विद्वानों के (**देवः**) आनन्द उत्पन्न करने (**शिवः**) मङ्गलमय तथा प्राणियों को मङ्गल देने तथा (**सखा**) उनके दुःख दूर करने से सहायकारी (**अभवः**) होते हो और

जो (**विद्मनापसः**) ज्ञान के हेतु काम युक्त (**मरुतः**) धर्म को प्राप्त मनुष्य (**तव**) आप की (**व्रते**)[५] आज्ञा नियम में रहते हैं, इससे वही (**भ्राजदृष्टयः**) प्रकाशित अर्थात् ज्ञान वाले (**कवयः**) कवि विद्वान् (**अजायन्त**) होते हैं॥१॥

भावार्थः-जो ईश्वर की आज्ञा पालन धर्म और विद्वानों के संग के सिवाय और कुछ काम नहीं करते हैं, उनकी परमेश्वर के साथ मित्रता होती है, फिर उस मित्रता से उनके आत्मा में सत् विद्या का प्रकाश होता है और वे विद्वान् होकर उत्तम काम का अनुष्ठान करके सब प्राणियों के सुख करने के लिये प्रसिद्ध होते हैं॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परि भूषसि व्रतम्।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे॥२॥

त्वम्। अग्ने। प्रथमः। अङ्गिरःऽतमः। कविः। देवानाम्। परि। भूषसि। व्रतम्। विऽभुः। विश्वस्मै। भुवनाय। मेधिरः। द्विऽमाता। शयुः कतिधा। चित्। आयवे॥२॥

पदार्थः-(**त्वम्**) सर्वस्यालङ्करिष्णुः (**अग्ने**) सर्वदुःखप्रणाशक सर्वशत्रुप्रदाहक वा (**प्रथमः**) अनादिस्वरूपः पूर्वं मान्यो वा (**अङ्गिरस्तमः**) अतिशयेनाङ्गिरा अङ्गिरस्तमः। जीवात् प्राणादन्य-मनुष्यादत्यन्तोत्कृष्टः (**कविः**) सर्वज्ञः (**देवानाम्**) विदुषां सूर्यपृथिव्यादीनां लोकानां वा (**परि**) सर्वतः (**भूषसि**) अलङ्करोषि (**व्रतम्**) तत्तद्धर्म्यनियमम् (**विभुः**) सर्वव्यापकः सर्वसभासेनाङ्गैः शत्रुबलेषु व्यापनशीलो वा (**विश्वस्मै**) सर्वस्मै (**भुवनाय**) भवन्ति भूतानि यस्मिँस्तद्भुवनं तस्मै (**मेधिरः**) सङ्गमकः (**द्विमाता**) द्वयोः प्रकाशाप्रकाशवतोर्लोकसमूहयोर्माता निर्माता (**शयुः**) यः प्रलये सर्वाणि भूतानि शाययति सः (**कतिधा**) कतिभिः प्रकारैः (**चित्**) एव (**आयवे**) मनुष्याय। **आयव इति मनुष्यनामसु पठितम्।** (निघं०२.३)॥२॥

अन्वयः-हे अग्ने! यतस्त्वं प्रथमं शयुर्मेधिरो द्विमाताऽङ्गिरस्तमो विभुः कविरसि, तस्माच्चिदेवायवे मनुष्याय विश्वस्मै भुवनाय च देवानां व्रतं परिभूषसि॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। परमेश्वरो वेदद्वारा तदध्यापनेन विद्वांश्च मनुष्याणां विद्याधर्माख्यं व्रतं लोकानां नियमाख्यं च सुशोभयति, येन सूर्य्यादिः प्रकाशवान् वायुपृथिव्यादिरप्रकाशवांश्च लोकसमूहः सृष्टः स सर्वव्याप्यस्ति यैरीश्वरस्यैतत्कृतसृष्टेर्विद्या प्रकाश्यते ते विद्वांसो भवितुमर्हन्ति, नैव

---

५. धर्माचरणरूपी। सं०

विभुना विद्वद्भिर्वा विना कश्चिद् यथार्थां विद्यां कारणात् कार्यरूपान् सर्वान् लोकान् स्रष्टुं धारयितुं विज्ञापयितुं च शक्नोतीति॥ २॥

पदार्थः-हे **(अग्ने)** सब दुःखों के नाश करने और सब दुष्ट शत्रुओं के दाह करने वाले जगदीश्वर वा सभासेनाध्यक्ष! जिस कारण **(त्वम्)** आप **(प्रथमः)** अनादिस्वरूप वा पहिले मानने योग्य **(शयुः)** प्रलय में सब प्राणियों को सुलाने **(मेधिरः)** सृष्टि समय में सबको चिताने **(द्विमाता)** प्रकाशवान् वा अप्रकाशवान् लोकों के निर्माण अर्थात् सिद्ध करने वा तद्विद्या जनाने वाले **(अङ्गिरस्तमः)** जीव, प्राण और मनुष्यों में अत्यन्त उत्तम **(विभुः)** सर्वव्यापक वा सभा सेना के अङ्गों से शत्रु बलों में व्याप्त स्वभाव **(कविः)** और सबको जानने वाले हैं **(चित्)** उसी कारण से **(आयवे)** मनुष्य वा **(विश्वस्मै)** सब **(भुवनाय)** संसार के लिये **(देवानाम्)** विद्वान् वा सूर्य और पृथिवी आदि लोकों के **(व्रतम्)** धर्मयुक्त नियमों को **(कतिधा)** कई प्रकार से **(परिभूषसि)** सुशोभित करते हो॥ २॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। परमेश्वर वेद द्वारा वा उसके पढ़ाने से विद्वान् मनुष्य के विद्या धर्मरूपी व्रत वा लोकों के नियमरूपी व्रत को सुशोभित करता है, जिस ईश्वर ने सूर्य आदि प्रकाशवान् वा वायु पृथिवी आदि अप्रकाशवान् लोकसमूह रचा है वह सर्वव्यापी है और ईश्वर की रची हुई सृष्टि से विद्या को प्रकाशित करता है, वह विद्वान् होता है, उस ईश्वर वा विद्वान् के विना कोई पदार्थ विद्या वा कारण से कार्यरूप सब लोकों के रचने धारणे और जानने को समर्थ नहीं हो सकता॥ २॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वह दोनों कैसे हैं, यह उपदेश अगले मन्त्र में किया है॥

त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते।
अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो॥ ३॥

त्वम्। अग्ने। प्रथमः। मातरिश्वने। आविः। भव। सुक्रतुऽया। विवस्वते। अरेजेताम्। रोदसी इति। होतृऽवूर्ये। असघ्नोः। भारम्। अयजः। महः। वसो इति॥ ३॥

पदार्थः-**(त्वम्)** ईश्वरः सभाध्यक्षो वा **(अग्ने)** विज्ञापक **(प्रथमः)** कारणरूपेणाऽनादिर्वा कार्य्येष्वादिमः **(मातरिश्वने)** यो मातर्याकाशे श्वसिति सोऽयं मातरिश्वा वायुस्तत्प्रकाशाय **(आविः)** प्रसिद्धार्थे **(भव)** भावय **(सुक्रतुया)** शोभनः क्रतुः प्रज्ञाकर्म वा यस्मात् तेन। अत्र **सुपां सुलुग्०** इति याडादेशः। **(विवस्वते)** सूर्यलोकाय **(अरेजेताम्)** चलतः। **भ्यसते रेजत इति भयवेपनयोः।** (निरु०३.२१) **(रोदसी)** द्यावापृथिव्यौ। **रोदसी इति द्यावापृथिवीनामसु पठितम्।** (निघं०३.३०) **(होतृवूर्ये)** होतॄणां स्वीकर्त्तव्ये। अत्र **वृ वरणे** इत्यस्माद्बाहुलकादौणादिकः क्यथ् प्रत्ययः। **उदोष्ठ्यपूर्वस्य।**

(अष्टा०७.१.१०२) इत्यृकारस्योकारः। **हलि च** इति दीर्घश्च। **(असघ्नोः)** हिंस्याः **(भारम्)** **(अयजः)** सङ्गमयसि **(महः)** महान्तम् **(वसो)** वासयति सर्वान् यस्तत्सम्बुद्धौ॥३॥

अन्वयः-हे अग्ने जगदीश्वर विद्वन् वा! प्रथमस्त्वं येन सुक्रतुया मातरिश्वना होतृवूर्ये रोदसी द्यावापृथिव्यावरेजेतां तस्मै मातरिश्वने विवस्वते चाविर्भवैतौ प्रकटीभावय। हे वसो! याभ्यां महो भारमयजो यजसि तौ नो बोधय॥३॥

भावार्थः-कारणरूपोऽग्निः स्वकारणाद् वायुनिमित्तेन सूर्याकृतिर्भूत्वा तमो हत्त्वा पृथिवीप्रकाशौ धरति, स यज्ञशिल्पहेतुर्भूत्वा कलायन्त्रेषु प्रयोजितः सन् महाभारयुक्तान्यपि यानानि सद्यो गमयतीति॥३॥

पदार्थः-हे **(अग्ने)** परमात्मन् वा विद्वन्! **(प्रथमः)** अनादि स्वरूप वा समस्त कार्यों में अग्रगन्ता **(त्वम्)** आप जिस **(सुक्रतुया)** श्रेष्ठ बुद्धि और कर्मों को सिद्ध कराने वाले पवन से **(होतृवूर्ये)** होताओं को ग्रहण करने योग्य **(रोदसी)** विद्युत् और पृथिवी **(अरेजेताम्)** अपनी कक्षा में घूमा करते हैं, उस **(मातरिश्वने)** अपनी आकाश रूपी माता में सोने वाले पवन वा **(विवस्वते)** सूर्यलोक के लिये उनको **(आविः भव)** प्रकट कराइये। हे **(वसो)** सबको निवास करानेहारे! आप शत्रुओं का **(असघ्नोः)** विनाश कीजिये, जिनसे **(महः)** बड़े-बड़े **(भारम्)** भारयुक्त यान को **(अयजः)** देश-देशान्तर में पहुंचाते हो, उनका बोध हमको कराइये॥३॥

भावार्थः-कारणरूप अग्नि अपने कारण और वायु के निमित्त से सूर्य रूप से प्रसिद्ध तथा अन्धकार विनाश करके पृथिवी वा प्रकाश का धारण करता है, वह यज्ञ वा शिल्पविद्या के निमित्त से कला यन्त्रों में संयुक्त किया हुआ बड़े-बड़े भारयुक्त विमान आदि यानों को शीघ्र ही देश-देशान्तर में पहुंचाता है॥३॥

पुनः स ईश्वरः कीदृश इत्युपदिश्यते॥

फिर वह ईश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमग्ने मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः।
श्वात्रेण यत्पित्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः॥४॥

त्वम्। अग्ने। मनवे। द्याम्। अवाशयः। पुरूरवसे। सुऽकृते। सुकृत्ऽतरः। श्वात्रेण। यत्। पित्रोः। मुच्यसे। परि। आ। त्वा। पूर्वम्। अनयन्। आ। अपरम्। पुनरिति॥४॥

पदार्थः-**(त्वम्)** सर्वप्रकाशकः **(अग्ने)** परमेश्वर **(मनवे)** मन्यते जानाति विद्याप्रकाशेन सर्वव्यवहारं तस्मै ज्ञानवते मनुष्याय **(द्याम्)** सूर्य्यलोकम् **(अवाशयः)** प्रकाशितवान् **(पुरूरवसे)** पुरवो बहवो रवा शब्दा यस्य विदुषस्तस्मै। **पुरूरवा बहुधा रोरूयते।** (निरु०१०.४६) **पुरूरवा इति पदनामसु पठितम्।** (निघं०५.४) अनेन ज्ञानवान् मनुष्यो गृह्यते। अत्र पुरूपदाद् रु शब्द इत्यस्मात् **पुरूरवाः।** (उणा०४.२३७) इत्यसुन् प्रत्ययान्तो निपातितः। **(सुकृते)** यः शोभनानि कर्माणि करोति तस्मै **(सुकृत्तरः)**

योऽतिशयेन शोभनानि करोतीति सः **(श्वात्रेण)** धनेन विज्ञानेन वा। **श्वात्रामिति धननामसु पठितम्**। (निघं०२.१०) **पदनामसु च।** (निघं०४.२) **(यत्)** यं यस्य वा **(पित्रोः)** मातुः पितुश्च सकाशात् **(मुच्यसे)** मुक्तो भवसि **(परि)** सर्वतः **(आ)** अभितः **(त्वा)** त्वां जीवम् **(पूर्वम्)** पूर्वकल्पे पूर्वजन्मनि वा वर्त्तमानं[६] देहम् **(पुनः)** पश्चादर्थे॥४॥

अन्वयः-हे अग्ने जगदीश्वर! सुकृत्तरस्त्वं पुरूरवसे सुकृते मनवे द्यामवाशयः श्वात्रेण सह वर्त्तमानं त्वां विद्वांसः पूर्वं पुनरपरं चानयन् प्राप्नुवन्ति। हे जीव! ये त्वां श्वात्रेण सह वर्त्तमानं पूर्वमपरं च देहं विज्ञापयन्ति यद्यतः समन्ताद् दुःखान्मुक्तो भवसि, यस्य च नियमेन त्वं पित्रोः सकाशान्महाकल्पान्ते पुनरागच्छसि, तस्य सेवनं ज्ञानं च कुरु॥४॥

भावार्थः-येन जगदीश्वरेण सूर्य्यादिकं जगद्रचितं येन विदुषा सुशिक्षा ग्राह्यते तस्य प्राप्तिः सुकृतैः कर्मभिर्भवति चक्रवर्त्तिराज्यादिधनस्य चेति॥४॥

पदार्थः-हे **(अग्ने)** जगदीश्वर! **(सुकृत्तरः)** अत्यन्त सुकृत कर्म करने वाले **(त्वम्)** सर्व प्रकाशक आप **(पुरूरवसे)** जिसके बहुत से उत्तम-उत्तम विद्यायुक्त वचन हैं और **(सुकृते)** अच्छे-अच्छे कामों को करने वाला है, उस **(मनवे)** ज्ञानवान् विद्वान् के लिये **(द्याम्)** उत्तम सूर्यलोक को **(अवाशयः)** प्रकाशित किये हुए हैं। विद्वान् लोग **(श्वात्रेण)** धन और विज्ञान के साथ वर्त्तमान **(पूर्वम्)** पूर्वकल्प वा पूर्वजन्म में प्राप्त होने योग्य और **(अपरम्)** इसके आगे जन्म-मरण आदि से अलग प्रतीत होने वाले आपको **(पुनः)** बार-बार **(अनयन्)** प्राप्त होते हैं। हे जीव! तू जिस परमेश्वर को वेद और विद्वान् लोग उपदेश से प्रतीत कराते हैं, जो (**त्वा**) तुझे **(श्वात्रेण)** धन और विज्ञान के साथ वर्त्तमान **(पूर्वम्)** पिछले **(अपरम्)** अगले देह को प्राप्त कराता है और जिसके उत्तम ज्ञान से मुक्त दशा में **(पित्रोः)** माता और पिता से तू **(पर्यामुच्यसे)** सब प्रकार के दुःख से छूट जाता तथा जिसके नियम से मुक्ति से महाकल्प के अन्त में फिर संसार में आता है, उसका विज्ञान वा सेवन तू **(आ)** अच्छे प्रकार कर॥४॥

भावार्थः-जिस जगदीश्वर ने सूर्य आदि जगत् रचा वा जिस विद्वान् से सुशिक्षा का ग्रहण किया जाता है उस परमेश्वर वा विद्वान् की प्राप्ति अच्छे कर्मों से होती है तथा चक्रवर्त्ति राज्य आदि धन का सुख भी वैसे ही होता है॥४॥

पुनः स उपदिश्यते॥

फिर अगले मन्त्र में उसी का प्रकाश किया है॥

---

६. **(अनयन्)** प्राप्नुवन्ति। **(आ)** सम्यग् रूपेण **(अपरम्)** आगमिनं देहम्॥ इति स्खलितः पाठः॥ सं०

त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः।

य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विशं आविवाससि॥५॥ ३२॥

त्वम्। अग्ने। वृषभः। पुष्टिऽवर्धनः। उद्यतऽस्रुचे। भवसि। श्रवाय्यः। यः। आऽहुतिम्। परि। वेद। वषट्ऽकृतिम्। एकऽआयुः। अग्रे। विशः। आऽविवाससि॥५॥

पदार्थः-(**त्वम्**) (**अग्ने**) प्रज्ञेश्वर (**वृषभः**) यो वर्षति सुखानि सः (**पुष्टिवर्धनः**) पुष्टिं वर्धयतीति (**उद्यतस्रुचे**) उद्यता उत्कृष्टतया गृहीता स्रुग् येन तस्मै यज्ञानुष्ठात्रे (**भवसि**) (**श्रवाय्यः**) श्रोतुं श्रावयितुं योग्यः। (**यः**) (**आहुतिम्**) समन्ताद्धूयन्ते गृह्यन्ते शुभानि यया ताम् (**परि**) सर्वतः (**वेद**) जानासि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वषट्कृतिम्**) वषट् क्रिया क्रियते यया रीत्या ताम् (**एकायुः**) एकं सत्यगुणस्वभावमायुर्यस्य सः (**अग्रे**) वेदविद्याभिज्ञापक (**विशः**) प्रजाः (**आविवासति**)[७] समन्तात् परिचरति। **विवासतीति परिचरणकर्मसु पठितम्।** (निघं०३.५)॥५॥

अन्वयः-हे अग्ने जगदीश्वर! यस्त्वमग्ने उद्यतस्रुचे श्रवाय्यो वृषभ एकायुः पुष्टिवर्धनो भवसि यस्त्वं वषट्कृतिमाहुतिं परिवेद विज्ञापयसि, विशः सर्वाः प्रजा पुष्टिवृद्ध्या तं त्वां सुखानि च पर्याविवासति॥५॥

भावार्थः-मनुष्यैरादौ जगत्कारणं ब्रह्म ज्ञानं यज्ञविद्यायां च याः क्रिया यादृशानि होतुं योग्यानि द्रव्याणि सन्ति तानि सम्यग्विदित्वैतेषां प्रयोगविज्ञानेन शुद्धानां वायुवृष्टिजलशोधनहेतूनां द्रव्याणामग्नौ होमे कृते सेविते चास्मिन् जगति महान्ति सुखानि वर्धन्ते, तैः सर्वाः प्रजा आनन्दिता भवन्तीति॥५॥

पदार्थः-हे (**अग्ने**) यज्ञ क्रिया फलवित् जगद्गुरो परेश! जो (**त्वम्**) आप (**अग्रे**) प्रथम (**उद्यतस्रुचे**) स्रुक् अर्थात् होम कराने के पात्र को अच्छे प्रकार ग्रहण करने वाले मनुष्य के लिये (**श्रवाय्यः**) सुनने-सुनाने योग्य (**वृषभः**) और सुख वर्षाने वाले (**एकायुः**) एक सत्य गुण, कर्म, स्वभाव रूप समान युक्त तथा (**पुष्टिवर्द्धनः**) पुष्टि वृद्धि करने वाले (**भवसि**) होते हैं और (**यः**) जो आप (**वषट्कृतिम्**) जिसमें कि उत्तम-उत्तम क्रिया की जायें (**आहुतिम्**) तथा जिससे धर्मयुक्त आचरण किये जायें उसका विज्ञान कराते हैं (**विशः**) प्रजा लोग पुष्टि वृद्धि के साथ उन आप और सुखों को (**पर्याविवासति**) अच्छे प्रकार से सेवन करते हैं॥५॥

भावार्थः-मनुष्यों को उचित है कि पहिले जगत् का कारण ब्रह्मज्ञान और यज्ञ की विद्या में जो क्रिया जिस-जिस प्रकार के होम करने योग्य पदार्थ हैं, उनको अच्छे प्रकार जानकर उनकी यथायोग्य

---

७. मूलमन्त्रे 'आविवाससि' इति पाठः। सं०

क्रिया जानने से शुद्ध वायु और वर्षा जल की शुद्धि के निमित्त जो पदार्थ हैं, उनका होम अग्नि में करने से इस जगत् में बड़े-बड़े उत्तम-उत्तम सुख बढ़ते हैं और उनसे सब प्रजा आनन्द युक्त होती है॥५॥

अथेश्वरोपासकः प्रजारक्षकाः किं कुर्यादित्युपदिश्यते।

अब ईश्वर का उपासक वा प्रजा पालनेहारा पुरुष क्या-क्या कृत्य करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमग्ने वृजिनवर्तनिं नरं सक्मन् पिपर्षि विदथे विचर्षणे।
यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः॥६॥

त्वम्। अग्ने। वृजिनऽवर्तनिम्। नरम्। सक्मन्। पिपर्षि। विदथे। विऽचर्षणे। यः। शूरऽसाता। परिऽतक्म्ये। धने। दभ्रेभिः। चित्। सम्ऽऋता। हंसि। भूयसः॥६॥

पदार्थः-(**त्वम्**) प्रजापालनेऽधिकृतः (**अग्ने**) सर्वतोऽभिरक्षक (**वृजिनवर्त्तनिम्**) वृजिनस्य बलस्य वर्त्तनिर्मार्गो यस्य तम्। अत्र **सह सुपेति** समासः। **वृजिनमिति बलनामसु पठितम्।** (निघं०२.९) (**नरम्**) मनुष्यम् (**सक्मन्**) यः सचति तत्सम्बुद्धौ (**पिपर्षि**) पालयसि (**विदथे**) धर्म्ये युद्धे यज्ञे। **विदथ इति संग्रामनामसु पठितम्।** (निघं०३.१७) (**विचर्षणे**) विविधपदार्थानां यथार्थद्रष्टा तत्सम्बुद्धौ (**यः**) (**शूरसाता**) शूराणां सातिः सम्भजनं यस्मिन् तस्मिन् संग्रामे। **शूरसाताविति संग्रामनामसु पठितम्।** (निघं०२.१७) अत्र **सुपां सुलुग्०** इति ङेः स्थाने डादेशः। (**परितक्म्ये**) परितः सर्वतो हर्षनिमित्ते (**धने**) सुवर्णविद्या चक्रवर्त्तिराज्यादियुक्तद्रव्ये (**दभ्रेभिः**) अल्पैर्युद्धसाधनैः सह। **दभ्रमिति ह्रस्वनामसु पठितम्।** (निघं०३.२) **दभ्रमर्भकमित्यल्पस्य दभ्रं दभ्नातेः। सुदभ्भं भवति। अर्भकमवहृतं भवति।** (निरु०३.२०) अत्र **बहुलं छन्दसि** इति भिस ऐस् न। (**चित्**) अपि (**समृता**) सम्यक् ऋतं सत्यं येषु तानि। अत्र शे स्थाने डादेशः। (**हंसि**) (**भूयसः**) बहून्॥६॥

अन्वयः-हे सक्मन् विचर्षणेऽग्नेसेनापते! यो न्यायविद्यया प्रकाशमानस्त्वं विदथे शूरसातौ युद्धे दभ्रेभिरल्पैरपि साधनैर्वृजिनवर्त्तनिं नरं भूयसः शत्रूंश्च हंसिसमृता समृतानि कर्माणि पिपर्षि स त्वं नः सेनाध्यक्षो भव॥६॥

भावार्थः-परमेश्वरस्यायं स्वभावोऽस्ति ये ह्यधर्मं त्युक्तुं धर्मं च सेवितुमिच्छति, तान् कृपया धर्मस्थान् करोति, ये च धर्म्यं युद्धं धर्मसाध्यं धनं चिकीर्षन्ति तान् रक्षित्वा तत्तत्कर्मानुसारेण तेभ्यो धनमपि प्रयच्छति। ये च दुष्टाचारिणस्तान् तत्तत्कर्मानुकूलफलदानेन ताडयति य ईश्वराज्ञयां वर्त्तमाना धर्मात्मानोऽल्पैरपि युद्धसाधनैर्युद्धं कर्त्तुं प्रवर्त्तन्ते तेभ्यो विजयं ददाति नेतरेषामिति॥६॥

पदार्थः-हे (**सक्मन्**) सब पदार्थों का सम्बन्ध कराने (**विचर्षणे**) अनेक प्रकार के पदार्थों को अच्छे प्रकार देखने वाले (**अग्ने**) राजनीतिविद्या से शोभायमान सेनापति! (**यः**) जो तू (**विदथे**) धर्मयुक्त

यज्ञरूपी **(शूरसातौ)** संग्राम में **(दभ्रेभिः)** थोड़े ही साधनों से **(वृजिनवर्त्तनिम्)** अधर्म मार्ग में चलने वाले **(नरम्)** मनुष्य और **(भूयसः)** बहुत शत्रुओं का **(हंसि)** हननकर्त्ता है और **(समृता)** अच्छे प्रकार सत्य कर्मों को **(पिपर्षि)** पालनकर्त्ता है। जो चोर पराये पदार्थों के हरने की इच्छा से **(परितक्म्ये)** सब ओर से देखने योग्य **(धने)** सुवर्ण विद्या और चक्रवर्त्ति राज्य आदि धन की रक्षा करने के निमित्त आप हमारे सेनापति हूजिये॥६॥

भावार्थः-परमेश्वर का यह स्वभाव है कि जो पुरुष अधर्म छोड़ धर्म करने की इच्छा करते हैं, उनको अपनी कृपा से शीघ्र ही धर्म में स्थिर करता है जो धर्म से युद्ध वा धन को सिद्ध कराना चाहते हैं, उनकी रक्षा कर उनके कर्मों के अनुसार उनके लिये धन देता और जो खोटे आचरण करते हैं, उनको उनके कर्मों के अनुसार दण्ड देता है, जो ईश्वर की आज्ञा में वर्त्तमान धर्मात्मा थोड़े भी युद्ध के पदार्थों से युद्ध करने को प्रवृत्त होते हैं, ईश्वर उन्हीं को विजय देता है, औरों को नहीं॥६॥

पुनरीश्वरो जीवेभ्यः किं करोतीत्युपदिश्यते॥

फिर वह ईश्वर जीवों के लिये क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे।
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये॥७॥

त्वम्। तम्। अग्ने। अमृतऽत्वे। उत्ऽतमे। मर्तम्। दधासि। श्रवसे। दिवेऽदिवे। यः। ततृषाणः। उभयाय। जन्मने। मयः। कृणोषि। प्रयः। आ। च। सूरये॥७॥

पदार्थः-(**त्वम्**) जगदीश्वरः (**तम्**) पूर्वोक्तं धर्मात्मानम् (**अग्ने**) मोक्षादिसुखप्रदेश्वर (**अमृतत्वे**) अमृतस्य मोक्षस्य भावे (**उत्तमे**) सर्वथोत्कृष्टे (**मर्त्तम्**) मनुष्यम्। **मर्त्ता इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**दधासि**) धरसि (**श्रवसे**) श्रोतुमर्हाय भवते (**दिवेदिवे**) प्रतिदिनम् (**यः**) मनुष्यः (**ततृषाणः**) पुनः पुनर्जन्मनि तृष्यति। अत्र **छन्दसि लिट्** इति लडर्थे लिट्, **लिटः कानज्वा** इति कानच् वर्णव्यत्ययेन दीर्घत्वं च। (**उभयाय**) पूर्वपराय (**जन्मने**) शरीरधारणेन प्रसिद्धाय (**मयः**) सुखम्। **मय इति सुखनामसु पठितम्।** (निघं०३.६) (**कृणोषि**) करोषि (**प्रयः**) प्रीयते काम्यते यत् तत्सुखम् (**आ**) समन्तात् (**च**) समुच्चये (**सूरये**) मेधाविने। **सूरिरिति मेधाविनामसु पठितम्।** (निघं०३.१५)॥७॥

अन्वयः-हे अग्ने जगदीश्वर! त्वं यः सूरिर्मेधावी दिवेदिवे श्रवसे सन्मोक्षमिच्छति तं मर्त्तं मनुष्यमुत्तमेऽमृतत्वे मोक्षपदे दधासि, यश्च सूरिर्मेधावी मोक्षसुखमनुभूय पुनरुभयाय जन्मने तातृषाणः सँस्तस्मात् पदान्निवर्त्तते तस्मै सूरये मयः प्रयश्चाकृणोषि॥७॥

भावार्थः-ये ज्ञानिनो धर्मात्मानो मनुष्या मोक्षपदं प्राप्नुवन्ति तदानीं तेषामाधार ईश्वर एवास्ति। यज्जन्मातीतं तत्प्रथमं यच्चागामि तद्द्वितीयं यद्वर्त्तते तत्तृतीयं यच्च विद्याचार्य्याभ्यां जायते तच्चतुर्थम्।

एतच्चतुष्टयं मिलित्वैकं जन्म यत्र मुक्तिं प्राप्य मुक्ता पुनर्जायते तद्द्वितीयजन्मैतदुभयस्य धारणाय सर्वे जीवा: प्रवर्त्तन्त इतीयं व्यवस्थेश्वराधीनास्तीति वेद्यम्॥७॥

पदार्थः-हे **(अग्ने)** जगदीश्वर! आप **(यः)** जो **(सूरिः)** बुद्धिमान् मनुष्य **(दिवेदिवे)** प्रतिदिन **(श्रवसे)** सुनने के योग्य अपने लिये मोक्ष को चाहता है उस **(मर्त्तम्)** मनुष्य को **(उत्तमे)** अत्युत्तम **(अमृतत्वे)** मोक्षपद में स्थापन करते हो और जो बुद्धिमान् अत्यन्त सुख भोग कर फिर **(उभयाय)** पूर्व और पर **(जन्मने)** जन्म के लिये चाहना करता हुआ उस मोक्षपद से निवृत्त होता है, उस **(सूरये)** बुद्धिमान् सज्जन के लिये **(मयः)** सुख और **(प्रयः)** प्रसन्नता को **(आ कृणोषि)** सिद्ध करते हो॥७॥

भावार्थः-जो ज्ञानी धर्मात्मा मनुष्य मोक्षपद को प्राप्त होते हैं, उनका उस समय ईश्वर ही आधार है जो जन्म हो गया वह पहिला और जो मृत्यु वा मोक्ष होके होगा वह दूसरा, जो है वह तीसरा और जो विद्या वा आचार्य से होता है वह चौथा जन्म है। ये चार जन्म मिल के जो मोक्ष के पश्चात् होता है वह दूसरा जन्म है इन दोनों जन्मों के धारण करने के लिये सब जीव प्रवृत्त हो रहे हैं। मोक्षपद से छूट कर संसार की प्राप्ति होती है, यह भी व्यवस्था ईश्वर के आधीन है॥७॥

पुनस्तदुपासकः प्रजायै कीदृश इत्युपदिश्यते॥

फिर परमात्मा का उपासक प्रजा के वास्ते कैसा हो इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं नो॑ अग्ने स॒नये॒ धना॑नां य॒शस॑ं का॒रुं कृ॑णुहि॒ स्तवा॑नः।
ऋ॒ध्याम॒ कर्मा॒पसा॒ नवे॑न दे॒वैर्द्यावा॑पृथि॒वी॒ प्राव॑तं नः॥८॥

त्वम्। नः। अग्ने। सनये। धनानाम्। यशसम्। कारुम्। कृणुहि। स्तवानः। ऋध्याम। कर्म। अपसा। नवेन। देवैः। द्यावापृथिवी इति। प्र। अवतम्। नः॥८॥

पदार्थः-**(त्वम्)** जगदीश्वरोपासकः **(नः)** अस्माकम् **(अग्ने)** कीर्त्युत्साहप्रापक **(सनये)** संविभागाय **(धनानाम्)** विद्यासुवर्णचक्रवर्त्तिराज्यप्रसिद्धानाम् **(यशसम्)** यशांसि कीर्त्तियुक्तानि कर्माणि विद्यन्ते यस्य तम् **(कारुम्)** य उत्साहेनोत्तमानि कर्माणि करोति तम् **(कृणुहि)** कुरु। अत्र **उतश्च प्रत्ययाच्छन्दो वा वचनम्।** (अष्टा०६.४.१०६) अनेन वार्तिकेन हेर्लुक् न। **(स्तवान)** यः स्तौति सः **(ऋध्याम)** वर्द्धेम **(कर्म)** क्रियमाणमीप्सितम् **(अपसा)** पुरुषार्थयुक्तेन कर्मणा सह। **अप इति कर्मनामसु पठितम्।** (निघं०२.१) **(नवेन)** नूतनेन। **नवेति नवनामसु पठितम्।** (निघं०३.२८) **(देवैः)** विद्वद्भिः सह **(द्यावापृथिवी)** भूमिसूर्यप्रकाशौ **(प्र)** प्रकृष्टार्थे **(प्रावतम्)** अवतो रक्षतम् **(नः)** अस्मान्॥८॥

अन्वयः-हे अग्ने! त्वं स्तवानः सन् नोऽस्माकं धनानां सनये संविभागाय यशसं कारुं कृणुहि सम्पादय, यतो वयं पुरुषार्थिनो भूत्वा नवेनापसा सह कर्म कृत्वा ऋध्याम नित्यं वर्द्धेम विद्याप्राप्तये देवैः सह युवां नोऽस्मान् द्यावापृथिवी च प्रावतं नित्यं रक्षतम्॥८॥

भावार्थः-मनुष्यैरेतदर्थं परमात्मा प्रार्थनीयः। हे जगदीश्वर! भवान् कृपयाऽस्माकं मध्ये सर्वासामुत्तमधनप्रापिकानां शिल्पादिविद्यानां वेदितॄनुत्तमान् विदुषो निर्वर्तय, यतो वयं तैः सह नवीनं पुरुषार्थं कृत्वा पृथिवीराज्यं सर्वेभ्यः पदार्थेभ्य उपकारांश्च गृह्णीयामेति॥८॥

पदार्थः-हे **(अग्ने)** कीर्त्ति और उत्साह के प्राप्त कराने वाले जगदीश्वर वा परमेश्वरोपासक **(स्तवानः)** आप स्तुति को प्राप्त होते हुए **(नः)** हम लोगों के **(धनानाम्)** विद्या सुवर्ण चक्रवर्त्ति राज्य प्रसिद्ध धनों के **(सनये)** यथायोग्य कार्य्यों में व्यय करने के लिये **(यशसम्)** कीर्त्तियुक्त **(कारुम्)** उत्साह से उत्तम कर्म करने वाले उद्योगी मनुष्य को नियुक्त **(कृणुहि)** कीजिये, जिससे हम लोग नवीन **(अपसा)** पुरुषार्थ से **(नित्य)** नित्य बुद्धियुक्त होते रहें और आप दोनों विद्या की प्राप्ति के लिये **(देवैः)** विद्वानों के साथ करते हुए **(नः)** हम लोगों की और **(द्यावापृथिवी)** सूर्य प्रकाश और भूमि को **(प्रावतम्)** रक्षा कीजिये॥८॥

भावार्थः-मनुष्यों को परमेश्वर की इस प्रकार प्रार्थना करनी चाहिये कि हे परमेश्वर! आप कृपा करके हम लोगों में उत्तम धन देने वाली सब शिल्पविद्या के जानने वाले उत्तम विद्वानों को सिद्ध कीजिये, जिससे हम लोग उनके साथ नवीन-नवीन पुरुषार्थ करके पृथिवी के राज्य और सब पदार्थों से यथायोग्य उपकार ग्रहण करें॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं नो॑ अग्ने पि॒त्रोरु॒पस्थ॒ आ दे॒वो दे॒वेष्व॑नवद्य॒ जागृ॑विः
त॒नू॒कृद्बो॑धि॒ प्रम॑तिश्च का॒रवे॒ त्वं क॑ल्याण॒ वसु॒ विश्व॒मोपि॑षे॥९॥

त्वम्। नः। अ॒ग्ने॒। पि॒त्रोः। उ॒पऽस्थे॑। आ। दे॒वः। दे॒वेषु॑। अ॒न॒व॒द्य॒। जागृ॑विः। त॒नू॒ऽकृत्। बो॒धि॒। प्रऽम॑तिः। च॒। का॒रवे॑। त्वम्। क॒ल्या॒ण॒। वसु॑। विश्व॑म्। आ। ऊ॒पि॒षे॒॥९॥

पदार्थः-**(त्वम्)** सर्वमङ्गलकारकः सभाध्यक्षः **(नः)** अस्मान् **(अग्ने)** विज्ञानस्वरूप **(पित्रोः)** जनकयोः **(उपस्थे)** उपतिष्ठन्ति यस्मिन् तस्मिन्। अत्र **घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्।** (अष्टा०वा०३.३.५८) अनेनाधिकरणे कः। **(आ)** अभितः **(देवः)** सर्वस्य न्यायविनयस्य द्योतकः **(देवेषु)** विद्वत्सु अग्न्यादिषु त्रयस्त्रिंशद्दिव्यगुणेषु वा **(अनवद्य)** न विद्यते वद्यं निन्द्यं कर्म्म यस्मिन् तत्सम्बुद्धौ **अवद्यपण्यवर्य्या०** (अष्टा०३.१.१०१) अनेन गर्ह्येऽवद्यशब्दो निपातितः। **(जागृविः)** यो नित्यं धर्म्ये पुरुषार्थे जागर्ति सः **(तनूकृत्)** यस्तनूषु पृथिव्यादिविस्तृतेषु लोकेषु विद्यां करोति सः **(बोधि)** बोधय। अत्र

लोडर्थे लङ्डभावोऽन्तर्गतो ण्यर्थश्च। **(प्रमतिः)** प्रकृष्टा मतिर्ज्ञानं यस्य सः **(च)** समुच्चये **(कारवे)** शिल्पकार्यसम्पादनाय **(त्वम्)** सर्वविद्यावित् **(कल्याण)** कल्याणकारक **(वसु)** विद्याचक्रवर्त्यादिराज्य-साध्यधनम् **(विश्वम्)** सर्वम् **(आ)** समन्तात् **(ऊपिषे)** वपसि। अत्र लडर्थे लिट्॥९॥

अन्वयः-अनवद्याग्ने सभास्वामिन्! जागृविर्देवस्तनूकृत्त्वं देवेषु पित्रोरुपस्थे नोऽस्मानोपिषे वपसि सर्वतः प्रादुर्भावयसि। हे कल्याणप्रमतिस्त्वं कारवे मह्यं विश्वमाबोधि समन्ताद्बोधय॥९॥

भावार्थः-पुनरित्थं जगदीश्वरः प्रार्थनीयः। हे भगवन्! यदा यदास्माकं जन्म दद्यास्तदा तदा विद्वत्तमानां सम्पर्के जन्म दद्यास्तत्रास्मान् सर्वविद्यायुक्तान् कुरु, यतो वयं सर्वाणि धनानि प्राप्य सदा सुखिनो भवेमेति॥९॥

पदार्थः-हे **(अनवद्य)** उत्तम कर्मयुक्त **(अग्ने)** सब पदार्थों के जानने वाले सभापते! **(जागृविः)** धर्मयुक्त पुरुषार्थ में जागने **(देवः)** सब प्रकाश करने **(तनूकृत्)** और बड़े-बड़े पृथिवी आदि बड़े लोकों में ठहरने हारे आप **(देवेषु)** विद्वान् वा अग्नि आदि तेजस्वी दिव्य गुणयुक्त लोकों में **(पित्रोः)** माता-पिता के **(उपस्थे)** समीपस्थ व्यवहार में **(नः)** हम लोगों को **(ऊपिषे)** वार-वार नियुक्त कीजिये। **(कल्याण)** हे अत्यन्त सुख देने वाले राजन्! **(प्रमतिः)** उत्तम ज्ञान देते हुए आप **(कारवे)** कारीगरी के चाहने वाले मुझ को **(वसु)** विद्या, चक्रवर्त्ति राज्य आदि पदार्थों से सिद्ध होने वाले (**विश्वम्**) समस्त धन का **(आबोधि)** अच्छे प्रकार बोध कराइये॥९॥

भावार्थः-फिर भी ईश्वर की इस प्रकार प्रार्थना करनी चाहिये कि हे भगवन्! जब-जब आप जन्म दें, तब-तब श्रेष्ठ विद्वानों के सम्बन्ध में जन्म दें और वहाँ हम लोगों को सर्व विद्यायुक्त कीजिये, जिससे हम लोग सब धनों को प्राप्त होकर सदा सुखी हों॥९॥

पुन सः कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम्।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य॥१०॥३३॥

त्वम्। अग्ने। प्रऽमतिः। त्वम्। पिता। असि। नः। त्वम्। वयःऽकृत्। तव। जामयः। वयम्। सम्। त्वा। रायः। शतिनः। सम्। सहस्रिणः। सुवीरम्। यन्ति। व्रतऽपाम्। अदाभ्य॥१०॥

पदार्थः-(**त्वम्**) सर्वस्य सुखस्य प्रादुर्भाविता **(अग्ने)** यथायोग्यरचनस्य वेदितः **(प्रमतिः)** प्रकृष्टा मतिर्मानं यस्य सः **(त्वम्)** दयालुः **(पिता)** पालकः **(असि)** **(नः)** अस्माकम् **(त्वम्)** आयुऽप्रद **(वयस्कृत्)** यो वयो वृद्धावस्थापर्यन्तं विद्यासुखयुक्तमायुः करोति सः **(तव)** सुखजनकस्य **(जामयः)** ज्ञानवन्त्यपत्यानि। **जमतीति गतिकर्मसु पठितम्।** (निघं०२.१४) अत्र जमुधातोः। **इण्जादिभ्यः।**

(अष्टा०३.३.१०८) अनेनेण् प्रत्ययः। **जमतेर्वा स्याद् गतिकर्म्मणः।** (निरु०३.६) **(वयम्)** मनुष्याः **(सम्)** एकीभावे **(त्वा)** त्वाम् सर्वपालकम् **(रायः)** धनानि। **राय इति धननामसु पठितम्।** (निघं०२.१०) **(शतिनः)** शतमसंख्याताः प्रशंसिता विद्याकर्माणि वा विद्यन्ते येषां ते। **(सहस्रिणः)** अत्र उभयत्र प्रशंसार्थ इनिः। **(सुवीरम्)** शोभना वीरा यस्मिन् येन वा तत् **(यन्ति)** प्राप्नुवन्ति **(व्रतपाम्)** यो व्रतं सत्य पाति तम् **(अदाभ्य)** दभितुं हिंसितुं योग्यानि दाभ्यानि तान्यविद्यमानानि यस्य तत्सम्बुद्धौ। अत्र **दभेश्चेति वक्तव्यम्।** (अष्टा०३.१.१२४) अनेन वार्त्तिकेन दभ इति सौत्राद्धातोर्ण्यत्॥१०॥

अन्वयः-हे अदाभ्याग्ने सभाध्यक्ष प्रमतिस्त्वं नोऽस्माकं पिता पालकोऽसि त्वं नोऽस्माकं वयःकृदसि तव कृपया वयं जामयो यथा भवेम तथा कुरु यथा च शतिनः सहस्रिणो विद्वांसो मनुष्या व्रतपां सुवीरं त्वामासाद्य रायो धनानि संयन्ति, तथा त्वामाश्रित्य वयमपि तानि धनानि समिमः॥१०॥

भावार्थः-यथा पिता सन्तानैर्माननीयः पूजनीयश्चास्ति, तथा प्रजाजनैस्सभापती राजास्ति॥१०॥

पदार्थः-हे **(अदाभ्य)** उत्तम कर्मयुक्त **(अग्ने)** यथायोग्य रचना कर्म जानने वाले सभाध्यक्ष! **(प्रमतिः)** अत्यन्त मान को प्राप्त हुए **(त्वम्)** समस्त सुख से प्रकट करने वाले आप **(नः)** हम लोगों के **(पिता)** पालने वाले तथा **(त्वम्)** आयुर्दा के बढ़वाने हारे तथा आप हम लोगों को **(वयःकृत्)** बुढ़ापे तक विद्या सुख में आयुर्दा व्यतीत कराने हारे हैं **(तव)** सुख उत्पन्न करने वाले आपकी कृपा से हम लोग **(जामयः)** ज्ञानवान् सन्तान युक्त हों, दयायुक्त **(त्वम्)** आप वैसा प्रबन्ध कीजिये और जैसे **(शतिनः)** सैकड़ों वा **(सहस्रिणः)** हजारों प्रशंसित पदार्थविद्या वा कर्म युक्त विद्वान् लोग **(व्रतपाम्)** सत्य पालने वाले **(सुवीरम्)** अच्छे-अच्छे वीर युक्त आपको प्राप्त होकर **(रायः)** धन को **(सम्)** **(यन्ति)** अच्छी प्रकार प्राप्त होते हैं, वैसे आपका आश्रय किये हुए हम लोग भी उन धनों को प्राप्त होवें॥१०॥

भावार्थः-जैसे पिता सन्तानों को मान और सत्कार करने के योग्य है, वैसे प्रजाजनों को सभापति राजा है॥१०॥

पुनः स कीदृश किं कुर्यादित्युपदिश्यते॥

फिर वह कैसा है और क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिम्।
इळामकृण्वन् मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते॥११॥

त्वाम्। अग्ने। प्रथमम्। आयुम्। आयवे। देवाः। अकृण्वन्। नहुषस्य। विश्वपतिम्। इळाम्। अकृण्वन्। मनुषस्य। शासनीम्। पितुः। यत्। पुत्रः। ममकस्य। जायते॥११॥

पदार्थः-(**त्वाम्**) प्रजापतिम् **(अग्ने)** विज्ञानान्वित **(प्रथमम्)** सर्वेष्वग्रगन्तारम् **(आयुम्)** य एति न्यायेन प्रजां तं **(आयवे)** यथा विज्ञानाय **(देवाः)** विद्वांसः **(अकृण्वन्)** कुर्युः। अत्र लिङर्थे लङ्। **(नहुषस्य)** मनुषस्य। **नहुष इति मनुष्यनामसु पठितम्।** (निघं०२.३) नहुषस्येत्यत्र सायणाचार्य्येण

नहुषनामकराजविशेषो गृहीस्तस्तदसत्। कस्यचिन्नहुषस्येदानींतनत्वाद् वेदानां सनातनत्वात् तस्य गाथात्र न सम्भवति निघण्टौ नहुषस्येति मनुष्यनाम्नः प्रसिद्धेश्च। **(विश्वपतिम्)** विशां प्रजानां पतिं पालकं सर्वोत्तमं राजानम् **(इळाम्)** वेदचतुष्टयीं वाचम्। **इळेति वाङ्नामसु पठितम्।** (निघं०१.१९) **(अकृण्वन्)** कुर्युः **(मनुषस्य)** मनुष्यस्य। अत्र मन् धातोर्बाहुलकादुषन् प्रत्ययः। **(शासनीम्)** शास्ति सर्वान् विद्याधर्माचरण-शीलान् यया सत्यनीत्या ताम्। अत्रापि सायणाचार्य्येण मनोः पुत्री गृहीता तदप्यशुद्धमेव। **(पितुः)** जनकस्य सकाशात् **(यत्)** यथा **सुपां सुलुग्०** इति तृतीयैकवचनस्य लुक्। **(पुत्रः)** यः पितृपावनशीलः **(ममकस्य)** मादृशस्य। अत्र बाहलुकान् मन्धातोर्दमकन् प्रत्ययः। **(जायते)** उत्पद्यते॥११॥

अन्वयः-हे अग्ने विज्ञानान्वितसभाध्यक्ष! देवा नहुषस्यायव इमामिळामकृण्वन् विशदीमकुर्वन् मनुष्यस्य शासनीं सत्यशिक्षां चाकृण्वन्। प्रजा च यत्-यथा ममकस्य पितुः पुत्रो जायते तथा भवति॥११॥[८]

भावार्थः-नैवेश्वरप्रणीतेन व्यवस्थापकेन वेदशास्त्रेण राजनीत्या च विना प्रजापालक प्रजां पालयितुं शक्नोति, प्रजाजनश्च राज्ञोऽज्ञसन्तानवद्भवत्यतः सभापती राजाज्ञपुत्रमिव प्रजां शिष्यात्॥११॥

पदार्थः-हे **(अग्ने)** विज्ञानयुक्त सभाध्यक्ष! **(देवाः)** विद्वानों ने **(नहुषस्य)** मनुष्य की **(आयवे)** विज्ञान वृद्धि के लिये इस **(इळाम्)** वेद वाणी को **(अकृण्वन्)** प्रकाशित किया तथा **(मनुष्यस्य)** मनुष्यमात्र की **(शासनीम्)** सत्य शिक्षा को **(अकृण्वन्)** प्रकाशित किया और **(यत्)** जैसे **(ममकस्य)** हम लोग **(पितुः)** पिता होते हैं, उनका **(पुत्रः)** पुत्र अपने शील से पितृवर्ग को पवित्र करने वाला **(जायते)** उत्पन्न होता है, वैसे राजवर्गों के प्रजाजन होते हैं॥११॥[९]

---

८. अन्वयेः- त्वाम्, प्रथमम्, आयुम्, विश्पतिम् इत्येते चत्वारश्शब्दास्तेषामर्थाश्च स्खलिता सन्ति। ह० लि० प्रेस पुस्तके तु **'त्वां'** विहाय नैतेषां स्खलनमभूत् परमन्वये पाठ भेदो वर्तते, तच्चेत्थम्। सं० 'हे अग्ने! यथा देवा विद्वांसो नहुषस्य शासनीमिलामकृण्वन् ममकस्य मनुष्यस्य प्रथमायुं विश्पतिं न्यायाधीशं सभापतिं राजानमकृण्वन् तथा पितुः पुत्रो जायते तथा धार्मिकेण राज्ञा प्रजा पालनीयाः।' अस्मिन् पाठे **'आयवे'** शब्दस्य पाठो न वर्त्तते। सं०

९. हिन्दी पदार्थ में भी **(त्वाम्) (प्रथमम्) (आयुम्) (विश्पतिम्)** यह चार शब्द तथा उनका अर्थ छूट गया है। ह० लि० प्रेस कापी के हिन्दी पदार्थ में उपर्युक्त चारों शब्द तथा उसके अर्थ तो नहीं छूटे, परन्तु मुद्रित हि० पदार्थ से पाठ भेद अवश्य है- जो कि निम्न प्रकार है॥ सं०- हे **(अग्ने)** अमृतस्वरूप सभापते! तू जैसे **(देवाः)** विद्वान् लोग **(शासनीम्)** सत्यासत्य के निर्णय का निमित्त **(इळाम्)** चार वेदों की वाणी को **(अकृण्वन्)** करें। **(नहुषस्य)** मनुष्य के **(आयवे)** विशेष ज्ञान के लिये **(शासनीम्)** जिससे सब विद्या और धर्माचार युक्तनीति से उसको ग्रहण करके **(प्रथमम्)** अनादि स्वरूप जिस न्याय से प्रजा योग्य **(आयुम्)** प्राप्त होने **(विश्पतिम्)** प्रजा-पुत्र आदिकों के रक्षा करने वाले सभापति राजा को चारों वेदों की वाणी व सत्य व्यवस्था को

भावार्थः-ईश्वरोक्त व्यवस्था करने वाले वेद शास्त्र और राजनीति के विना प्रजा पालनेहारा सभापति राजा प्रजा नहीं पाल सकता है और प्रजा राजा के अज्ञ सन्तान के तुल्य होती है, इससे सभापति राजा पुत्र के समान प्रजा को शिक्षा देवे॥११॥

पुनः स एवोपदिश्यते॥

अगले मन्त्र में भी सभापति का उपदेश किया है॥

त्वं नो॑ अग्ने॒ तव॑ देव पा॒युभि॑र्मघोनो॑ रक्ष त॒न्व॑श्च वन्द्य।
त्रा॒ता तो॒कस्य॒ तन॑ये॒ गवा॑म॒स्य नि॑मेषं॒ रक्ष॑माण॒स्तव॑ व्र॒ते॥ १२॥

त्वम्। नः। अग्ने। तव। देव। पायुऽभिः। मघोनः। रक्ष। तन्वः। च। वन्द्य। त्राता। तोकस्य। तनये। गवाम्। अस्य। अनिऽमेषम्। रक्षमाणः। तव। व्रते॥ १२॥

पदार्थः-(**त्वम्**) सभेशः (**नः**) अस्माकमस्मान् वा (**अग्ने**) सर्वाभिरक्षक (**तव**) सर्वाधिपतेः (**देव**) सर्वसुखदातः (**पायुभिः**) रक्षादिव्यवहारैः (**मघोनः**) मघं प्रशस्तं धनं विद्यते येषां तान्। अत्र प्रशंसार्थे मतुप्। **मघमिति धननामधेयम्।** (निघं०२.१०) (**रक्ष**) पालय (**तन्वः**) शरीराणि। अत्र **सुपां सुलुग्०** इति शसः स्थाने जस्। (**वन्द्य**) स्तोतुमर्ह (**त्राता**) रक्षक (**तोकस्य**) अपत्यस्य। **तोकमित्यपत्यनामसु पठितम्।** (निघं०२.२) (**तनये**) विद्याशरीरबलवर्धनाय प्रवर्त्तमाने पुत्रे। **तनयमित्यपत्यनामसु पठितम्।** (निघं०२.२) (**गवाम्**) मनआदीन्द्रियाणां चतुष्पदां वा (**अस्य**) प्रत्यक्षाप्रत्यक्षस्य संसारस्य (**अनिमेषम्**) प्रतिक्षणम् (**रक्षमाणः**) रक्षन् सन्। अत्र व्यत्ययेन शानच् (**तव**) प्रजेश्वरस्य (**व्रते**) सत्यपालनादिनियमे॥१२॥

अन्वयः-हे देव वन्द्याग्ने सभेश्वर! तव व्रते वर्त्तमानान् मघोनो नोस्मान् अस्माकं वा तन्वस्तनूँश्च पायुभिस्त्वमनिमेषं रक्ष तथा रक्षमाणस्त्वं तव व्रते वर्त्तमानस्य तोकस्य गवामस्य संसारस्य चानिमेषं च तनये त्राता भव॥१२॥

भावार्थः-सभापती राजा परमेश्वरस्य जगद्धारणपालनादिगुणैरिवोत्तमगुणै राज्यनियमप्रवृत्ताञ्जनान् सततं रक्षेत्॥१२॥

पदार्थः-हे (**देव**) सब सुख देने और (**वन्द्य**) स्तुति करने योग्य (**अग्ने**) तथा यथोचित सबकी रक्षा करने वाले सभेश्वर! (**तव**) सर्वाधिपति आपके (**व्रते**) सत्य पालन आदि नियम में प्रवृत्त और (**मघोनः**) प्रशंसनीय धनयुक्त (**नः**) हम लोगों को और हमारे (**तन्वः**) शरीरों को (**पायुभिः**) उत्तम

(**अकृण्वन्**) प्रकाशित करते हैं, वैसे ही (**ममकस्य**) ज्ञानवान् (**नहुषस्य**) मनुष्य की जो वेदवाणी है उसको आप प्रकाशित कीजिये॥

रक्षादि व्यवहारों से **(अनिमेषम्)** प्रतिक्षण **(रक्ष)** पालिये **(रक्षमाणः)** रक्षा करते हुए आप जो कि आपके उक्त नियम में वर्त्तमान **(तोकस्य)** छोटे-छोटे बालक वा **(गवाम्)** प्राणियों की मन आदि इन्द्रियाँ और गाय बैल आदि पशु हैं उनके तथा **(अस्य)** सब चराचर जगत् के प्रतिक्षण **(त्राता)** रक्षक अर्थात् अत्यन्त आनन्द देने वाले हूजिये॥१२॥

भावार्थः-सभापति राजा ईश्वर के जो संसार की धारणा और पालना आदि गुण हैं उनके तुल्य उत्तम गुणों से अपने राज्य के नियम में प्रवृत्तजनों को निरन्तर रक्षा करे॥१२॥

पुनरग्निगुणः सभापतिरुपदिश्यते॥

अब अगले मन्त्र में भौतिक अग्नि गुणयुक्त सभा स्वामी का उपदेश किया है॥

त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय चतुरक्ष इध्यसे।
यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तम्॥१३॥

त्वम्। अग्ने। यज्यवे। पायुः। अन्तरः। अनिषङ्गाय। चतुरः।अक्षः। इध्यसे। यः। रातऽहव्यः। अवृकाय। धायसे। कीरेः। चित्। मन्त्रम्। मनसा। वनोषि। तम्॥१३॥

पदार्थः-(**त्वम्**) सभाधिष्ठाता **(अग्ने)** योऽग्निरिव देदीप्यमानः **(यज्यवे)** होमादिशिल्पविद्यासाधकाय विदुषे। अत्र **यजिमनिशुन्धिदसि०** (उणा०३.२०) अनेन यजधातोर्युच् प्रत्ययः। **(पायुः)** पालनहेतुः। **'पा रक्षणे'** इत्यस्माद् उण्। **(अन्तरः)** मध्यस्थः **(अनिषङ्गाय)** अविद्यमानो नितरां सङ्गः पक्षपातो यस्य तस्मै **(चतुरक्षः)** यः खलु चतस्रः सेना अश्नुते व्याप्नोति स चतुरक्षः। **अक्षा अश्नुवत एनान् इति वा अभ्यश्नुत एभिरिति वा।** (निरु०९.७) **(इध्यसे)** प्रदीप्यसे **(यः)** विद्वान् शुभलक्षणः **(रातहव्यः)** रातानि दत्तानि हव्यानि येन सः **(अवृकाय)** अचोराय। **वृक इति चोरनामसु पठितम्।** (निघं०३.२४) अत्र **सृवृभूशुषि०** (उणा०३.४०) अनेन वृञ्धातोः कक् प्रत्ययः। **(धायसे)** यो दधाति सर्वाणि कर्माणि स धायास्तस्मै **(कीरेः)** किरति विविधतया वाचा प्रेरयतीति कीरिः स्तोता तस्मात्। **कीरिरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) अत्र **'कॄ विक्षेप'** इत्यस्मात् **कॄगॄशॄपॄकुटि०** (उणा०४.१४८) अनेन इप्रत्ययः, स च कित् पूर्वस्य च दीर्घो बाहुलकात्। **(चित्)** इव **(मन्त्रम्)** उच्चार्य्यमाणं वेदावयवं विचारं वा **(मनसा)** अन्तःकरणेन **(वनोषि)** याचसे सम्भजसि वा **(तम्)** अग्निम्॥१३॥

अन्वयः-हे सभापते! मनसा चिदिव रातहव्योऽन्तरश्चतुरक्षस्त्वमनिषङ्गायावृकाय धायसे यज्यवे यज्ञकर्त्रे इध्यसे दीप्यसे। किञ्च यं वनोषि सम्भजसि तस्य कीरेः सकाशाद् विनयमधिगम्य प्रजाः पालयेः॥१३॥

भावार्थः-अत्रोपमालङ्कारः। यथाध्यापकाद्विद्यार्थिनो मनसा विद्या सेवन्ते, तथैव त्वमाप्तोपदेशानुसारेण राजधर्मं सेवस्व॥१३॥

पदार्थः-हे **(त्वम्)** सभापति! तू **(मनसा)** विज्ञान से **(मन्त्रम्)** विचार वा वेदमन्त्र को सेवने वाले के **(चित्)** सदृश **(रातहव्यः)** रातहव्य अर्थात् होम में लेने-देने के योग्य पदार्थों का दाता **(पायुः)** पालना का हेतु **(अन्तरः)** मध्य में रहने वाला और **(चतुरक्षः)** सेना के अङ्ग अर्थात् हाथी घोड़े और रथ के आश्रय से युद्ध करने वाले और पैदल योद्धाओं में अच्छी प्रकार चित्त देता हुआ **(अनिषङ्गाय)** जिस पक्षपातरहित न्याययुक्त **(अवृकाय)** चोरी आदि दोष के सर्वथा त्याग और **(धायसे)** उत्तम गुणों के धारण तथा **(यज्यवे)** यज्ञ वा शिल्प विद्या सिद्ध करने वाले मनुष्य के लिये **(इध्यसे)** तेजस्वी होकर अपना प्रताप दिखाता है, या कि जिसको **(वनोषि)** सेवन करता है, उस **(कीरेः)** प्रशंसनीय वचन कहने वाले विद्वान् से विनय को प्राप्त होके प्रजा का पालन किया कर॥१३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्यार्थी लोग अध्यापक अर्थात् पढ़ाने वालों से उत्तम विचार के साथ उत्तम-उत्तम विद्यार्थियों का सेवन करते हैं, वैसे तू भी धार्मिक विद्वानों के उपदेश के अनुकूल होके राजधर्म का सेवन करता रह॥१३॥

पुनः स एवोपदिश्यते॥

अगले मन्त्र में भी उसी अर्थ का प्रकाश किया है॥

त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत्।
आध्रस्य चित् प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः॥१४॥

त्वम्। अग्ने। उरुऽशंसाय। वाघते। स्पार्हम्। यत्। रेक्णः। परमम्। वनोषि। तत्। आध्रस्य। चित्। प्रऽमतिः। उच्यसे। पिता। प्र। पाकम्। शास्सि। प्र। दिशः। विदुःऽतरः॥१४॥

पदार्थः-**(त्वम्)** प्रजाप्रशासिता **(अग्ने)** विज्ञानस्वरूप **(उरुशंसाय)** उरुर्बहुविधः शंसः स्तुतिर्यस्य तस्मै **(वाघते)** वाक् हन्यते ज्ञायते येन तस्मै विदुष ऋत्विजे मनुष्याय। **वाघत इत्यृत्विङ्नामसु पठितम्।** (निघं०३.१८) **(स्पार्हम्)** स्पृहा वाञ्छा तस्या इदं स्पार्हम् **(यत्)** यस्मात् **(रेक्णः)** धनम्। **रेक्ण इति धननामसु पठितम्।** (निघं०२.१०) **रिचेर्धने घिच्च।** (उणा०४.१९९) अनेन रिच्धातोर्धनेऽर्थेऽसुन् प्रत्ययः स च घिन्नुडागमश्च। **(परमम्)** अत्युत्तमम् **(वनोषि)** याचसे **(तत्)** धनम् **(आध्रस्य)** समन्ताद् धियमाणस्य राज्यस्य। अत्र आङ्पूर्वाद्धाञ् धातोर्बाहुलकादौणादिको रक् प्रत्यय आकारलोपश्च। **(चित्)** इव **(प्रमतिः)** प्रकृष्टा मतिर्ज्ञानं यस्य सः **(उच्यसे)** परिभाष्यसे **(पिता)** पालकः **(प्र)** प्रकृष्टार्थे **(पाकम्)** पचन्ति परिपक्वं ज्ञानं कुर्वन्ति यस्मिन् धर्म्ये व्यवहारे तम् **(शास्सि)** उपदिशसि **(प्र)** प्रशंसायाम् **(दिशः)** ये दिशन्त्युपसृजन्ति सदाचारं तानाप्तान् **(विदुष्टरः)** यो विविधानि दुरिष्टानि तारयति प्लावयति सः॥१४॥

अन्वयः-हे अग्ने विज्ञानयुक्त न्यायधीश! यद् यतः प्रमतिर्विदुष्टरस्त्वमुरुशंसाय वाघते स्पार्हं परमं रेक्णो धनं पाकं दिश उपदेशकाँश्च वनोषि धर्मेणाध्रस्य सर्वान् पिता चिदिव प्रशास्सि तस्मात् सर्वैर्मान्यार्होऽसि॥१४॥

भावार्थः-अत्रोपमालङ्कारः। यथा पिता स्वसन्तानस्य पालन-धनदान-[१०]धारण-शिक्षां करोति, तथैव राजा सर्वस्याः प्रजाया पालकत्वाज्जीवेभ्यः सर्वेषां धनानां सम्यग्विभागेन तेषां कर्मानुसारात् सुखदुःखानि प्रदद्यात्॥१४॥

पदार्थः-हे **(अग्ने)** विज्ञानप्रिय न्यायकारिन्! **(यत्)** जिस कारण **(प्रमतिः)** उत्तमज्ञानयुक्त **(विदुष्टरः)** नाना प्रकार के दुःखों से तारने वाले आप **(उरुशंसाय)** बहुत प्रकार की स्तुति करने वाले **(वाघते)** ऋत्विक् मनुष्य के लिये **(स्पार्हम्)** चाहने योग्य **(परमम्)** अत्युत्तम **(रेक्णः)** धन **(पाकम्)** पवित्रधर्म और **(दिशः)** उत्तम विद्वानों को **(वनोषि)** अच्छे प्रकार चाहते हैं और राज्य को धर्म से **(आध्रस्य)** धारण किये हुए **(पिता)** पिता के **(चित्)** तुल्य सबको **(प्र शास्सि)** शिक्षा करते हैं, **(तत्)** इसी से आप सब के माननीय है॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पिता अपने सन्तानों की पालना वा उनको धन देता वा शिक्षा आदि करता है, वैसे राजा सब प्रजा के[११] धारण करने और सब जीवों को धन के यथायोग्य देने से उनके कर्मों के अनुसार सुख दुःख देता है॥१४॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः।
स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोमपा दिवः॥१५॥३४॥

त्वम्। अग्ने। प्रयतऽदक्षिणम्। नरम्। वर्मऽइव। स्यूतम्। परि। पासि। विश्वतः। स्वादुऽक्षद्मा। यः। वसतौ। स्योनऽकृत्। जीवऽयाजम्। यजते। सः। उपऽमा। दिवः॥१५॥

---

१०. **'शुभ गुण'** इत्यधिकः पाठो ह० लि० प्रेस पुस्तके। सं० **'जीवेभ्य'** इत्यस्मादग्रे 'सर्वाणि धनानि प्रदद्यात्' इति ह० लि० प्रेस पुस्तके पाठः। सं० **'पालना'** के आगे ह० लि० प्रेस कापी में निम्न पाठ है-धन देने और शुभ गुण धारण करने आदि की शिक्षा देता है।

११. के, के आगे निम्न पाठ ह० लि० प्रेस कापी में है-पिता होने से सब जीवों के लिये अच्छी प्रकार विभाग द्वारा सब धन तथा। सं०

पदार्थः-(**त्वम्**) सर्वाभिरक्षकः (**अग्ने**) सत्यन्यायप्रकाशमान (**प्रयतदक्षिणम्**) प्रयताः प्रकृष्टतया यता विद्याधर्मोपदेशाख्या दक्षिणा येन तम् (**नरम्**) विनयाभियुक्तं मनुष्यम् (**वर्म्मेव**) यथा कवचं देहरक्षकम् (**स्यूतम्**) विविधसाधनैः कारुभिर्निष्पादितम् (**परि**) अभ्यर्थे (**पासि**) रक्षसि (**विश्वतः**) सर्वतः (**स्वादुक्षद्मा**) स्वादूनि क्षद्मानि जलान्यन्नानि यस्य सः। **क्षद्मेत्युदकनामसु पठितम्।** (निघं०१.१२) **अन्ननामसु च।** (निघं०२.७) इदं पदं सायणाचार्येणान्यथैव व्याख्यातं तदसङ्गतम्। (**यः**) मनुष्य (**वसतौ**) निवासस्थाने (**स्योनकृत्**) यः स्योनं सुखं करोति सः (**जीवयाजम्**) जीवान् याजयति धर्मं च सङ्गमयति तम् (**यजते**) यो यज्ञं करोति (**सः**) धर्मात्मा परोपकारी विद्वान्। अत्र **सोऽचि लोपे चेत्पादपूरणम्।** (अष्टा०६.१.१३४) अनेन सोर्लोपः। (**उपमा**) उपमीयतेऽनयेति दृष्टान्तः (**दिवः**) सूर्यप्रकाशस्य॥१५॥

अन्वयः-हे अग्ने राजधर्मराजमान! त्वं वर्म्मे वयः स्वादुक्षद्मा स्योनकृन्मनुष्यो वसतौ विविधैर्यज्ञैर्यजते तं प्रयतदक्षिणं जीवयाजं स्यूतं नरं विश्वतः परिपासि, स भवान् दिव उपमा भवति॥१५॥

भावार्थः-अत्रोपमालङ्कारः। ये सर्वेषां सुखकर्त्तारः पुरुषार्थिनो मनुष्याः प्रयत्नेन यज्ञान् कुर्वन्ति, ते यथा सूर्यः सर्वान् प्रकाश्य सुखयति तथा भवन्ति यथा युद्धे प्रवर्त्तमानान् वीरान् शस्त्रघातेभ्यः कवचं रक्षति, तथैव राजादयो राजसभा जना धार्मिकान्नरान् सर्वेभ्यो दुःखेभ्यो रक्षेयुरिति॥१५॥

इति प्रथम द्वितीये चतुस्त्रिंशो वर्गः॥३४॥

पदार्थः-हे (**अग्ने**) सबको अच्छे प्रकार जानने वाले सभापति आप (**वर्म्मेव**) कवच के समान (**यः**) जो (**स्वादुक्षद्मा**) शुद्ध अन्न जल का भोक्ता (**स्योनकृत्**) सबको सुखकारी मनुष्य (**वसतौ**) निवासदेश में नाना साधनयुक्त यज्ञों से (**यजते**) यज्ञ करता है, उस (**प्रयतदक्षिणम्**) अच्छे प्रकार विद्या धर्म के उपदेश करने (**जीवयाजम्**) और जीवों को यज्ञ कराने वाले (**स्यूतम्**) अनेक साधनों से कारीगरी में चतुर (**नरम्**) नम्र मनुष्य को (**विश्वतः**) सब प्रकार से (**परिपासि**) पालते हो (**सः**) ऐसे धर्मात्मा परोपकारी विद्वान् आप (**दिवः**) सूर्य के प्रकाश की (**उपमा**) उपमा पाते हो॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सब के सुख करने वाले पुरुषार्थी मनुष्य यत्न के साथ यज्ञों को करते हैं, वे जैसे सूर्य सबको प्रकाशित करके सुख देता है, वैसे सबको सुख देने वाले होते हैं। जैसे युद्ध में प्रवृत्त हुए वीरों को शस्त्रों के घाओं से बख्तर बचाता है, वैसे ही सभापति राजा और राजजन सब धार्मिक सज्जनों को सब दुःखों से रक्षा करते रहें॥१५॥

यह पहिले अष्टक में दूसरे अध्याय में चौतीसवां वर्ग समाप्त हुआ॥३४॥

पुनः स एवार्थः प्रकाश्यते॥

अगले मन्त्र में भी उसी अर्थ का प्रकाश किया है॥

त्वमा॑ग्ने शर॒णिं मी॑मृषो॒ न त्वमध्वा॑नं॒ यमगा॑म दू॒रात्।
आपिः पि॒ता प्रम॑तिः सो॒म्यानां॒ भृमि॑रस्यृषि॒कृन्मर्त्या॑नाम्॥१६॥

इमाम्। अग्ने। शरणिम्। मीमृषः। नः। इमम्। अध्वानम्। यम्। अगाम। दूरात्। आपिः। पिता। प्रऽमतिः। सोम्यानाम्। भृमिः। असि। ऋषिऽकृत्। मर्त्यानाम्॥ १६॥

पदार्थः-(**इमाम्**) वक्ष्यमाणाम् (**अग्ने**) सर्वंसहानुत्तमविद्वन्! (**शरणिम्**) अविद्यादिदोषहिंसिकां विद्याम्। अत्र शृधातोर्बाहुलकादौणादिकोऽनिः प्रत्ययः। (**मीमृषः**) अस्यन्तं निवारयसि। अत्र लडर्थे लुङ्डभावश्च। (**नः**) अस्माकम् (**इमम्**) वक्ष्यमाणम् (**अध्वानम्**) धर्ममार्गम् (**यम्**) मार्गम् (**अगाम**) जानीयाम प्राप्नुयाम वा। अत्र इण्धातोर्लिङर्थे लुङ्। (**दूरात्**) विकृष्टात् (**आपिः**) यः प्रीत्या प्राप्नोति सः (**पिता**) पालकः (**प्रमतिः**) प्रकृष्टा मतिर्यस्य (**सोम्यानाम्**) ये सोमे साधवः सोमानर्हन्ति तेषां पदार्थानाम् (**भृमिः**) यो नित्यं भ्रमति। **भ्रमेः सम्प्रसारणं च।** (उणा०४.१२६) अनेन भ्रमुधातोरिन् प्रत्ययः सम्प्रसारणं च स च कित्। (**असि**) (**ऋषिकृत्**) ऋषीन् ज्ञानवतो मन्त्रार्थद्रष्टॄन् कृपया ध्यानोपदेशाभ्यां करोति। अत्र **कृतो बहुलम्** इति करणे क्विप्। (**मर्त्यानाम्**) मनुष्याणाम्॥ १६॥

अन्वयः-हे अग्ने विद्वंस्त्वं सोम्यानां मर्त्यानामापिः पिता प्रमतिर्भृमिर्ऋषिकृदसि न इमां शरणिम् मीमृषो वयं दूरादध्वानमतीत्यागाम नित्यमभिगच्छेम तं त्वं वयं च सेवेमहि॥ १६॥[१२]

भावार्थः-यदा मनुष्याः सत्यभावेन सन्मार्गं प्राप्तुमिच्छन्ति तदा जगदीश्वरस्तेषां सत्पुरुषसङ्गाय प्रीतिजिज्ञासे जनयति, ततस्ते श्रद्धालवः सन्तोऽतिदूरेऽपि वसत आप्तान् योगिनो विदुष उपसगम्याभीष्टं बोधं प्राप्य धार्मिका जायन्ते॥ १६॥

पदार्थः-हे (**अग्ने**) सबको सहने वाले सर्वोत्तम विद्वान्! जो आप (**सोम्यानाम्**) शान्त्यादि गुणयुक्त (**मर्त्यानाम्**) मनुष्यों को (**आपिः**) प्रीति से प्राप्त (**पिता**) और सर्व पालक (**प्रमतिः**) उत्तम विद्यायुक्त (**भृमिः**) नित्य भ्रमण करने और (**ऋषिकृत्**) वेदार्थ को बोध कराने वाले हैं तथा (**नः**) हमारी (**इमाम्**) इस (**शरणिम्**) विद्यानाशक अविद्या को (**मीमृषः**) अत्यन्त दूर करने हारे हैं, वे आप और हम (**यम्**) जिसको हम लोग (**दूरात्**) दूर से उल्लङ्घन करके (**इमम्**) वक्ष्यमाण (**अध्वानम्**) धर्ममार्ग के (**अगाम**) सन्मुख आवें, उसकी सेवा करें॥ १६॥[१३]

भावार्थः-जब मनुष्य सत्यभाव से अच्छे मार्ग को प्राप्त होना चाहते हैं, तब जगदीश्वर उनको उत्तम ज्ञान का प्रकाश करने वाले विद्वानों का संग होने के लिये प्रीति और जिज्ञासा अर्थात् उनके उपदेश

---

१२. अन्वये '**इमम्**' शब्दः स्खलितः। सं०

१३. हिन्दी पदार्थ में '**इमम्**' शब्द तथा उसका अर्थ छूट गया है। सं०

के जानने की इच्छा उत्पन्न करता है। इससे वे श्रद्धालु हुए अत्यन्त दूर भी बसने वाले सत्यवादी योगी विद्वानों के समीप जाय, उनका संग कर अभीष्ट बोध को प्राप्त होकर धर्मात्मा होते हैं॥ १६॥

पुनः स एवोपदिश्यते॥

फिर उसी का उपदेश अगले मन्त्र में किया है॥

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम्॥ १७॥

मनुष्वत्। अग्ने। अङ्गिरस्वत्। अङ्गिरः। ययातिऽवत्। सदने। पूर्वऽवत्। शुचे। अच्छ। याहि। आ। वह। दैव्यम्। जनम्। आ। सादय। बर्हिषि। यक्षि। च। प्रियम्॥ १७॥

पदार्थः-(**मनुष्वत्**) यथा मनुष्या गच्छन्ति तद्वत् (**अग्ने**) सर्वाभिगन्तः सभेश (**अङ्गिरस्वत्**) यथा शरीरे प्राणा गच्छन्त्यागच्छन्ति तद्वत् (**अङ्गिरः**) पृथिव्यादीनामङ्गानां प्राणवद्धारक (**ययातिवत्**) यथा प्रयत्नवन्तः पुरुषाः कर्माणि प्राप्नुवन्ति प्रापयन्ति च तद्वत्। अत्र **यती प्रयत्न** इत्यस्मादौणादिक इन् प्रत्ययः स च बाहुलकाण्णित् सन्वच्च। इदं सायणाचार्य्येण भूतपूर्वस्य कस्यचिद् ययाते राज्ञः कथासम्बन्धे व्याख्यातं तदनजर्यम् (**सदने**) सीदन्ति जना यस्मिंस्तस्मिन् (**पूर्ववत्**) यथा पूर्वे विद्वांसो विद्यादानार्थं गच्छन्त्यागच्छन्ति तद्वत् (**शुचे**) पवित्रकारक (**अच्छ**) श्रेष्ठार्थे (**याहि**) प्राप्नुहि (**आ**) समन्तात् (**वह**) प्रापय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**दैव्यम्**) देवेषु विद्वत्सु कुशलस्तम् (**जनम्**) मनुष्यम् (**आ**) आभिमुख्ये (**सादय**) अवस्थापय (**बर्हिषि**) उत्तमे मोक्षपदेऽन्तरिक्षे वा (**यक्षि**) याजय वा। अत्र सामान्यकाले[१४] लुङडभावश्च। (**च**) (**प्रियम्**) सर्वाञ्जनान् प्रीणन्तम्॥ १७॥

अन्वयः-हे शुचेऽङ्गिरोऽग्ने सभापते! त्वं विनयायाभ्यां मनुष्वदङ्गिरस्वद्ययातिवत्पूर्ववत् प्रियं दैव्यं जनमच्छायाहि तं च विद्याधर्मं प्रति वह प्रापय बर्हिष्यासादय सदने यक्षि याजय च॥ १७॥

भावार्थः-यैर्मनुष्यैर्विद्यया धर्मानुष्ठानेन प्रेम्णा सेवितः सभापतिः स तानुत्तमेषु धर्म्येषु व्यवहारेषु प्रेरयति॥ १७॥

पदार्थः-हे (**शुचे**) पवित्र (**अङ्गिरः**) प्राण के समान धारण करने वाले (**अग्ने**) विद्याओं से सर्वत्र व्याप्त सभाध्यक्ष! आप (**मनुष्वत्**) मनुष्यों के जाने-आने के समान वा (**अङ्गिरस्वत्**) शरीरव्याप्त प्राणवायु के सदृश राज्यकर्म व्याप्त पुरुष के तुल्य वा (**ययातिवत्**) जैसे पुरुष यत्न के साथ कामों को सिद्ध करते कराते हैं वा (**पूर्ववत्**) जैसे उत्तम प्रतिष्ठा वाले विद्वान् विद्या देने वाले हैं, वैसे (**प्रियम्**) सबको प्रसन्न करनेहारे (**दैव्यम्**) विद्वानों में अति चतुर (**जनम्**) मनुष्य को (**अच्छ**) अच्छे प्रकार

---

१४. '**यक्षि**' इति लोटो रूपं लुङि तु '**यक्षीः**' इति भाव्यमर्थोऽपि महर्षिणा लोट एव कृतः। सं०

(आयाहि) प्राप्त हूजिये, उस मनुष्य को विद्या और धर्म की ओर **(वह)** प्राप्त कीजिये तथा **(बर्हिषि) (सदने)** उत्तम मोक्ष के साधन में **(आसादय)** स्थित और **(यक्षि)** वहाँ उसको प्रतिष्ठित कीजिये॥१७॥

भावार्थ:-जिन मनुष्यों ने विद्या धर्मानुष्ठान और प्रेम से सभापति की सेवा की है, वह उनको उत्तम-उत्तम धर्म के कामों में लगाता है॥१७॥

पुनः स कीदृशो भवेदित्याह॥

फिर वह कैसा हो, इसका प्रकाश अगले मन्त्र में किया है॥

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या॥१८॥३५॥

एतेन। अग्ने। ब्रह्मणा। वावृधस्व। शक्ती। वा। यत्। ते। चकृम। विदा। वा। उत। प्र। नेषि। अभि। वस्यः। अस्मान्। सम्। नः। सृज। सुऽमत्या। वाजऽवत्या॥१८॥

पदार्थ:-**(एतेन)** वक्ष्यमाणेन **(अग्ने)** पाठशालाध्यापक **(ब्रह्मणा)** वेदेन **(वावृधस्व)** भृशमेधस्वैधय वा। अत्र वृधुधातोर्लोटिमध्यमैकवचने विकरणव्यत्ययेन श्लुरोरत्त्वम्, **अन्येषामपि दृश्यत** इति दीर्घः। **(शक्ती)** आत्मसामर्थ्येन। अत्र **सुपां सुलुग्०** इति तृतीयैकवचनस्य पूर्वसवर्णादेशः। **(वा)** शरीरबलेन **(यत्)** आज्ञापालनाख्यं कर्म **(ते)** तव **(चकृम)** कुर्महे। अत्र लडर्थे लिट्। **अन्येषामपि दृश्यत** इति दीर्घः। **(विदा)** विदन्ति येन ज्ञानेन। अत्र **कृतो बहुलम्** इति करणे क्विप्। **(वा)** योगक्रियया **(उत)** अपि **(प्र)** प्रकृष्टार्थे **(नेषि)** नयसि। अत्र **बहुलं छन्दसि** इति शपो लुक्। **(अभि)** आभिमुख्ये **(वस्यः)** अतिशयेन धनम्। अत्र वसुशब्दादीयसुन् प्रत्ययः। **छान्दसो वर्णलोपो वा** इत्यकारलोपः। **(अस्मान्)** विद्याधर्माचरणयुक्तान् विदुषो धार्मिकान् मनुष्यान् **(सम्)** एकीभावे **(नः)** अस्मभ्यम् **(सृज)** निष्पादय **(सुमत्या)** शोभना चासौ मतिर्विचारो यस्यां तया **(वाजवत्या)** वाजः प्रशस्तमन्नं युद्धं विज्ञानं वा विद्यते यस्यां तया॥१८॥

अन्वयः-हे अग्ने विद्वद्वर्य! त्वं ब्रह्मणा वाजवत्या सुमत्या शक्ती शक्त्या नो वस्योऽभिसृज त्वमुत विदा वावृधस्व ते तव यत् प्रियाचरण तद्वयं चकृम, त्वं चास्मान् प्रणेषि सद्बोधं प्रापयसि॥१८॥

भावार्थ:-ये मनुष्या वेदरीत्या धर्म्यं व्यवहारं कुर्वन्ति, ते ज्ञानवन्तः सुमतयो धार्मिका भूत्वा यं धार्मिकमुत्तमं विपश्चितं सेवन्ते स तान् श्रेष्ठ सामर्थ्यसद्विद्यायुक्तान् सम्पादयतीति॥१८॥

अत्र सूक्त इन्द्रानुयोगिनः खलु प्राधान्येनेश्वरस्य गोण्यावृत्या भौतिकस्यार्थस्य प्रकाशनात् पूर्वसूक्तार्थेन सहैतस्य सङ्गतिरस्तीति बोध्यम्।

इति प्रथमस्य द्वितीये पञ्चत्रिंशो (३५) वर्गः॥
प्रथम मण्डले सप्तमेऽनुवाक एकत्रिंशं सूक्तं च समाप्तम्॥३१॥

पदार्थः-हे **(अग्ने)** सर्वोत्कृष्ट विद्वन्! आप (**ब्रह्मणा**) वेदविद्या **(वाजवत्या)** उत्तम अन्न युद्ध और विज्ञान वा **(सुमत्या)** श्रेष्ठ विचारयुक्त[१५] से **(नः)** हमारे लिये **(वस्यः)** अत्यन्त धन **(अभिसृज)** सब प्रकार से प्रगट कीजिये **(उत)** और आप **(विदा)** अपने उत्तम ज्ञान से **(वावृधस्व)** नित्य-नित्य उन्नति को प्राप्त हूजिये **(ते)** आपका **(यत्)** जो प्रेम है वह हम लोग **(चकृम)** करें और आप **(अस्मान्)** हम लोगों को **(प्रणेषि)** श्रेष्ठ बोध को प्राप्त कीजिये॥१८॥

भावार्थः-जो मनुष्य वेद की रीति से धर्मयुक्त व्यवहार को करते हैं, वे ज्ञानवान् और श्रेष्ठमति वाले होकर उत्तम विद्वान् की सेवा करते हैं, वह उनको श्रेष्ठ सामर्थ्य और उत्तम विद्या से संयुक्त करता है॥१८॥

इस सूक्त में सभा, सेनापति आदि के अनुयोगी अर्थों के प्रकाश से पिछले सूक्त के साथ इस सूक्त की सङ्गति जाननी चाहिये।

यह पहिले अष्टक में दूसरे अध्याय में पैंतीसवां ३५ वर्ग वा पहिले मण्डल में सातवें अनुवाक में इकतीसवां सूक्त समाप्त हुआ॥ ३१॥

---

१५. इसके आगे 'और (शक्ती) शक्ति से' ऐसा पाठ और होना चाहिये, जो भूल से छूट गया है। सं०

अथ पञ्चदशर्चस्य द्वात्रिंशस्य सूक्तस्याङ्गिरसो हिरण्यस्तूप ऋषिः। इन्द्रो। देवता। त्रिष्टुप् छन्दः। धैवतः स्वरः।

तत्रादाविन्द्रशब्देन सूर्यलोकदृष्टान्तेन राजगुणा उपदिश्यन्ते॥

अब बत्तीसवें सूक्त का प्रारम्भ है, उसके पहिले मन्त्र में इन्द्र शब्द से सूर्यलोक की उपमा करके राजा के गुणों का प्रकाश किया है॥

इन्द्र॑स्य॒ नु वी॒र्याणि॒ प्र वो॑चं॒ यानि॑ च॒कार॑ प्रथ॒मानि॑ व॒ज्री।
अह॒न्नहि॒मन्व॒पस्त॑तर्द॒ प्र व॒क्षणा॑ अभिन॒त् पर्व॑तानाम्॥ १॥

इन्द्र॑स्य। नु। वी॒र्या॑णि। प्र। वो॒च॒म्। यानि॑। च॒कार॑। प्र॒थ॒मानि॑। व॒ज्री। अह॑न्। अहि॑म्। अनु॑। अ॒पः। त॒तर्द॒। प्र। व॒क्षणा॑ः। अ॒भि॒न॒त्। पर्व॑तानाम्॥ १॥

पदार्थः-(**इन्द्रस्य**) सर्वपदार्थविदारकस्य सूर्यलोकस्येव सभापते राज्ञः (**नु**) क्षिप्रम् (**वीर्य्याणि**) आकर्षणप्रकाशयुक्तादिवत् कर्माणि (**प्र**) प्रकृष्टार्थे (**वोचम्**) उपदिशेयम्। अत्र लिडर्थे लुङडभावश्च। (**यानि**) (**चकार**) कृतवान् करोति करिष्यति वा। अत्र सामान्यकाले लिट्। (**प्रथमानि**) प्रख्यातानि (**वज्री**) सर्वपदार्थविच्छेदक किरणवानिव शत्रूच्छेदी (**अहन्**) हन्ति। अत्र लडर्थे लङ्। (**अहिम्**) मेघम्। **अहिरिति मेघनामसु पठितम्।** (निघं १.१०) (**अनु**) पश्चादर्थे (**अपः**) जलानि (**ततर्द**) तर्दति हिनस्ति। अत्र लडर्थे लिट्। (**प्रवक्षणाः**) वहन्ति जलानि यास्ता नद्यः (**अभिनत्**) विदारयति। अत्र लडर्थे लङन्तर्गतो ण्यर्थश्च। (**पर्वतानाम्**) मेघानां गिरीणां वा। **पर्वत इति मेघनामसु पठितम्।** (निघं०१.१०)॥१॥

अन्वयः-हे विद्वांसो मनुष्या! यूयं यथा यस्येन्द्रस्य सूर्य्यस्य यानि प्रथमानि वीर्य्याणि पराक्रमान् प्रवक्ततान्यहं नु प्रवोचम्। यथा स वज्रयहिमहन् तदवयवा अपोऽध ऊर्ध्वं चकार तं ततर्द पर्वतानां सकाशात्प्रवक्षणा अभिनत् तथाऽहं शत्रून् हन्याम् तानऽध ऊर्ध्वमनुतर्देयम् दुर्गादीनां सकाशाद्युद्धायागताः सेना भिन्द्याम्॥१॥

भावार्थः-अत्रोपमालङ्कारः। ईश्वरेणोत्पादितोऽयमग्निमयः सूर्य्यलोको यथा स्वकीयानि स्वाभाविकगुण-युक्तान्यन्नादीनि प्रकाशाकर्षणदाहछेदनवर्षोत्पत्तिनिमित्तानि कर्माण्यहर्निशं करोति, तथैव प्रजापालनतत्परै राजपुरुषैरपि भवितव्यम्॥१॥

पदार्थः-हे विद्वान् मनुष्यो! तुम लोग जैसे (**इन्द्रस्य**) सूर्य्य के (**यानि**) जिन (**प्रथमानि**) प्रसिद्ध (**वीर्य्याणि**) पराक्रमों को कहो, उनकों मैं भी (**नु**) (**प्रवोचम्**) शीघ्र कहूं, जैसे वह (**वज्री**) सब पदार्थों के छेदन करने वाले किरणों से युक्त सूर्य्य (**अहिम्**) मेघ को (**अहन्**) हनन करके वर्षाता उस मेघ के अवयव रूप (**अपः**) जलों को नीचे-ऊपर (**चकार**) करता, उसको (**ततर्द**) पृथिवी पर गिराता और (**पर्वतानाम्**) उन मेघों उन मेघों के सकाश से (**प्रवक्षणाः**) नदियों को छिन्न-भिन्न करके बहाता है। वैसे

मैं शत्रुओं को मारूं उनको इधर-उधर फेंकूं और उनको तथा किला आदि स्थानों से युद्ध करने के लिये आई सेनाओं को छिन्न-भिन्न करूं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। ईश्वर का उत्पन्न किया हुआ यह अग्निमय सूर्यलोक जैसे अपने स्वाभाविक गुणों से युक्त अन्नादि, प्रकाश, आकर्षण, दाह, छेदन और वर्षा की उत्पत्ति के निमित्त कामों को दिन-रात करता है, वैसे जो प्रजा के पालन में तत्पर राजपुरुष हैं, उनको भी नित्य करना चाहिये॥१॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह सूर्य्य तथा सभापति क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष।
वाश्राइव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः॥२॥

अहन्। अहिम्। पर्वते। शिश्रियाणम्। त्वष्टा। अस्मै। वज्रम्। स्वर्यम्। ततक्ष। वाश्राऽइव। धेनवः। स्यन्दमानाः। अञ्जः। समुद्रम्। अव। जग्मुः। आपः॥२॥

पदार्थः-(**अहन्**) हतवान् हन्ति हनिष्यति वा (**अहिम्**) मेघमिव शत्रुम् (**पर्वते**) मेघमण्डले इव गिरौ। **पर्वत इति मेघनामसु पठितम्।** (निघं०१.१०) (**शिश्रियाणम्**) विविधाश्रयम् (**त्वष्टा**) स्वकिरणैः छेदनसूक्ष्मकर्त्ता स्वतेजोभिः शत्रुविदारको वा (**अस्मै**) मेघाय दुष्टाय वा (**वज्रम्**) छेदनस्वभावं किरणसमूहं शस्त्रवृन्दं वा (**स्वर्यम्**) स्वरे गर्जने वाचि वा साधुस्तम्। **स्वर इति वाङ्नामसु पठितम्।** (निघं०१.११)। इदं पदं सायणाचार्येण मिथ्यैव व्याख्यातम्। (**ततक्ष**) छिनत्ति (**वाश्राइव**) वत्सप्राप्तिमुत्कण्ठिताः शब्दायमाना इव (**धेनवः**) गावः (**स्यन्दमानाः**) प्रस्रवन्त्यः (**अञ्जः**) व्यक्तागमनशीला वा। **अञ्जू व्यक्तिकरण** इत्यस्य प्रयोगः। (**समुद्रम्**) जलेन पूर्णं सागरमन्तरिक्षं वा (**अव**) नीचार्थे (**जग्मुः**) गच्छन्ति (**आपः**) जलानि शत्रुप्राणा वा॥२॥

अन्वयः-यथाऽयं त्वष्टा सूर्य्यलोकः पर्वते शिश्रियाणं स्वर्य्यमहिमहन् हन्ति। अस्मै मेघाय वज्रं ततक्ष तक्षति। एतेन कर्मणा वाश्रा धेनव इव स्यन्दमाना अञ्ज आपः समुद्रमवजग्मुरवगच्छन्ति। तथैव सभाध्यक्षो राजा दुर्गमाश्रितं शत्रुं हन्यादस्मै शत्रवे वज्रं तक्षेत् तेन वाश्रा धेनव इव स्यन्दमाना अञ्ज आपः समुद्रमवगमयेत्॥२॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्यः स्वकिरणैरन्तरिक्षस्थं मेघं भूमौ निपात्य जगज्जीवयति, तथा सेनेशो दुर्गपर्वताद्याश्रितमपि शत्रुं पृथिव्या सम्पात्य प्रजाः सततं सुखयति॥२॥

पदार्थः-जैसे यह (**त्वष्टा**) सूर्य्यलोक (**पर्वते**) मेघमण्डल में (**शिश्रियाणम्**) रहने वाले (**स्वर्य्यम्**) गर्जनशील (**अहिम्**) मेघ को (**अहन्**) मारता है (**अस्मै**) इस मेघ के लिये (**वज्रम्**) काटने के स्वभाव वाले किरणों को (**ततक्ष**) छोड़ता है। इस कर्म से (**वाश्रा धेनव इव**) बछड़ों को प्रीतिपूर्वक

चाहती हुई गौओं के समान **(स्यन्दमानाः)** चलते हुए **(अञ्जः)** प्रकट **(आपः)** जल **(समुद्रम्)** जल से पूर्ण समुद्र को **(अवजग्मुः)** नदियों के द्वारा जाते हैं। वैसे ही सभाध्यक्ष राजा को चाहिये कि किला में रहने वाले दुष्ट शत्रु को मारे, इस शत्रु के लिये उत्तम शस्त्र छोड़े। इस प्रकार उसके बछड़ों को चाहने वाली गौओं के समान चलते हुए प्रसिद्ध प्राणों को अन्तरिक्ष में प्राप्त करे, उन कण्टक शत्रुओं को मार के प्रजा को सुख देवे॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य्य अपनी किरणों से अन्तरिक्ष में रहने वाले मेघ को भूमि पर गिराकर जगत् को जिलाता है, वैसे ही सेनापति किला पर्वत आदि में रहने वाले भी शत्रु को पृथिवी में गिरा के प्रजा को निरन्तर सुखी करता है॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम्॥३॥

वृषऽयमाणः। अवृणीत। सोमम्। त्रिऽकद्रुकेषु। अपिबत्। सुतस्य। आ। सायकम्। मघऽवा। अदत्त। वज्रम्। अहन्। एनम्। प्रथमऽजाम्। अहीनाम्॥३॥

पदार्थः-**(वृषायमाणः)** वृष इवाचरन् **(अवृणीत)** स्वीकरोति। अत्र लडर्थे लङ् **(सोमम्)** सूयत उत्पद्यते यस्तं रसम्। **(त्रिकद्रुकेषु)** त्रय उत्पत्तिस्थितिप्रलयाख्याः कद्रवो विविधकला येषां तेषु कार्यपदार्थेषु। अत्र कदिधातोरौणादिकः कुन्प्रत्ययः। पुनः समासान्तः कप् च। **(अपिबत्)** स्वप्रकाशेन पिबति। अत्र लडर्थे लङ् **(सुतस्य)** उत्पन्नस्य जगतो मध्ये **(आ)** क्रियायोगे **(सायकम्)** शस्त्रविशेषम् **(मघवा)** मघं बहुविधं पूज्यं धनं यस्य सः। अत्र भूम्न्यर्थे मतुप्। **(अदत्त)** ददाति वा। अत्र वर्त्तमाने लङ्। **(वज्रम्)** किरणसमूहमिवास्त्रम् (**अहन्**) हन्ति। अत्र वर्त्तमाने लङ्। **(एनम्)** मेघम् **(प्रथमजाम्)** प्रथमं जायते तम्। अत्र **जनसन०** (अष्टा०३.२.६७) अनेन जनधातोर्विट् प्रत्ययः। **(अहीनाम्)** मेघानाम्॥३॥

अन्वयः-यथा वृषायमाण इन्द्रः सूर्य्यलोको मेघ इव सुतस्य त्रिकद्रुकेषु सोमं रसमवृणीत स्वीकरोति अपिबत् पिबति मघवा सायकं वज्रमादत्तेवाहिनां प्रथमजामेनं मेघमहन् हन्ति। एतादृशगुणकर्मस्वभावपुरुषः सैनापत्यमर्हति॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा वृषभो वीर्य्यवृद्धिं कृत्वा बलिष्ठो भूत्वा सुखी जायते, तथैवायं सेनापतिः रसं पीत्वा बलीभूत्वा सुखी जायेत। यथा सूर्यः स्वकिरणैर्जलमाकृष्यान्तरिक्षे स्थापयित्वा वर्षयति तथा शत्रुबलान्याकृष्य स्वबलमुन्नीय प्रजासुखान्यभिवर्षयेत्॥३॥

पदार्थः-जो **(वृषायमाणः)** वीर्य्यवृद्धि का आचरण करता हुआ सूर्य्यलोक मेघ के समान **(सुतस्य)** इस उत्पन्न हुए जगत् के **(त्रिकद्रुकेषु)** जिनकी उत्पत्ति, स्थिरता और विनाश ये तीन कला व्यवहार में वर्त्ताने वाले हैं, उन पदार्थों में **(सोमम्)** उत्पन्न हुए रस को **(अवृणीत)** स्वीकार करता **(अपिबत्)** उसको अपने ताप में भर लेता और **(मघवा)** यह बहुत सा धन दिलाने वाला सूर्य **(सायकम्)** शस्त्ररूप **(वज्रम्)** किरण समूह को **(आदत्त)** लेते हुए के समान **(अहीनाम्)** मेघों में **(प्रथमजाम्)** प्रथम प्रकट हुए **(एनम्)** इस मेघ को **(अहन्)** मारता है, वैसे गुण-कर्म-स्वभावयुक्त पुरुष सेनापति का अधिकार पाने योग्य होता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे बैल वीर्य को बढ़ा बलवान् हो सुखी होता है, वैसे सेनापति दूध आदि पीकर बलवान् होके सुखी होवे और जैसे सूर्य्य रस को पी अच्छे प्रकार बरसाता है, वैसे शत्रुओं के बल को खींच अपना बल बढ़ाके प्रजा में सुखों की वृष्टि करे॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से॥४॥

यत्। इन्द्र। अहन्। प्रथमऽजाम्। अहीनाम्। आत्। मायिनाम्। अमिनाः। प्र। उत। मायाः। आत्। सूर्यम्। जनयन्। द्याम्। उषसम्। तादीत्ना। शत्रुम्। न। किल। विवित्से॥४॥

पदार्थः-(**यत्**) यम्। **सुपाम्०** इत्यमो लुक्। (**इन्द्र**) पदार्थविदारयितः सूर्यलोकसदृश **(अहन्)** जहि **(प्रथमजाम्)** सृष्टिकालयुगपदुत्पन्नं मेघम् **(अहीनाम्)** सर्पस्येव मेघावयवानाम् **(आत्)** अनन्तरम् **(मायिनाम्)** येषां मायानिर्माणं घनाकारं सूर्यप्रकाशाच्छादकं वा बहुविधं कर्म विद्यते तेषाम्। अत्र भूम्न्यर्थ इनिः। **(अमिनाः)** निवारयेद्वा। **मीनातेर्निगमे।** (अष्टा०७.३.८१) इति ह्रस्वादेशश्च। **(प्र)** प्रकृष्टार्थे **(उत)** अपि **(मायाः)** अन्धकाराद्या इव **(आत्)** अद्भुते **(सूर्य्यम्)** किरणसमूहम् **(जनयन्)** प्रकटयन् सन् **(द्याम्)** प्रकाशमयं दिनम् **(उषसम्)** प्रातःसमयम्। अत्र वर्णव्यत्ययेन दीर्घत्वम्। **(तादीत्ना)** तदानीम्। अत्र **पृषोदरादीनि यथोपदिष्टम्।** (अष्टा०६.३.१०९) अनेन वर्णविपर्यासेनाकारस्थान ईकार ईकारस्थान आकारस्तुडागमः पूर्वस्य दीर्घश्च। **(शत्रुम्)** वैरिणम् **(न)** इव **(किल)** निश्चयार्थे। अत्र **निपातस्य च** इति दीर्घः। **(विवित्से)** अत्र व्यत्ययेनात्मनेपदम्॥४॥

अन्वयः-हे सेनाराजँस्त्वमिन्द्रः सूर्य्योऽहीनां प्रथमजां मेघमहन् तेषां मायिनामहीनां मायादीन् प्रामिणाः तादीत्ना यद्यं सूर्यकिरणसमूहमुषसं द्यां च प्रजनयन् दिनं करोति नेव शत्रून्विवित्से तेषां माया हन्यास्तदानीं न्यायर्कं प्रकटयन् सत्यविद्याचाराख्यं सवितारं जनय॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा कश्चिच्छत्रोर्बलछले निवार्य तं जित्वा स्वराज्ये सुखन्यायप्रकाशौ विस्तारयति, तथैव सूर्योऽपि मेघस्य घनाकारं प्रकाशावरणं निवार्य स्वकिरणान् विस्तार्य मेघं छित्त्वा तमो हत्वा स्वदीप्तिं प्रसिद्धीकरोति॥४॥

पदार्थः-हे सेनापते! जैसे **(इन्द्र)** सब पदार्थों को विदीर्ण अर्थात् छिन्न-भिन्न करने वाला सूर्य्यलोक **(अहीनाम्)** छोटे-छोटे मेघों के मध्य में **(प्रथमजाम्)** संसार के उत्पन्न होने समय में उत्पन्न हुए मेघ को **(अहन्)** हनन करता है। जिनकी **(मायिनाम्)** सूर्य्य के प्रकाश का आवरण करने वाली बड़ी-बड़ी घटा उठती हैं, उन मेघों की **(मायाः)** उक्त अन्धकाररूप घटाओं को **(प्रामिणाः)** अच्छे प्रकार हरता है **(तादीत्ना)** तब **(यत्)** जिस **(सूर्य्यम्)** किरणसमूह **(उषसम्)** प्रातःकाल और **(द्याम्)** अपने प्रकाश को **(प्रजनयन्)** प्रगट करता हुआ दिन उत्पन्न करता है **(न)** वैसे ही तू शत्रुओं को **(विवित्से)** प्राप्त होता हुआ उनकी छल-कपट आदि मायाओं को हनन कर और उस समय सूर्य्यरूप न्याय को प्रसिद्ध करके सत्य विद्या के व्यवहाररूप सूर्य्य का प्रकाश किया कर॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कोई राजपुरुष अपने वैरियों के बल और छल का निवारण कर और उनको जीत के अपने राज्य में सुख तथा न्याय का प्रकाश करता है, वैसे ही सूर्य भी मेघ की घटाओं की घनता और अपने प्रकाश के ढाँपने वाले मेघ को निवारण कर अपनी किरणों को फैला मेघ को छिन्न-भिन्न और अन्धकार को दूर कर अपनी दीप्ति को प्रसिद्ध करता है॥४॥

पुनः स तं कीदृशं करोतीत्युपदिश्यते॥

फिर वह सूर्य्य उस मेघ को कैसा करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक् पृथिव्याः॥५॥३६॥

अहन्। वृत्रम्। वृत्रऽतरम्। विऽअंसम्। इन्द्रः। वज्रेण। महता। वधेन। स्कन्धांसिऽइव। कुलिशेन। विवृक्णा। अहिः। शयते। उपऽपृक्। पृथिव्याः॥५॥

पदार्थः-**(अहन्)** हतवान् **(वृत्रम्)** मेघम्। **वृत्रो मेघ इति नैरुक्ताः।** (निरु०२.१६) **वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्त्ततेर्वा वधतेर्वा। यदवृणोत् तद्वृत्रस्य वृत्रत्वमिति विज्ञायते, यदवर्त्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते, यदवर्द्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते।** (निरु०२.१७) **वृत्रो ह वा इदꣳसर्वं वृत्वा शिष्ये। यदिदमन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं वृत्वा शिष्ये तस्माद् वृत्रो नाम॥४॥ तमिन्द्रो जघान सहतः पूतिः सर्वत एवापोऽभि सुस्राव सर्वत इव ह्ययꣳ समुद्रस्तस्मादुहैका आपो बीभत्सां चक्रिरे ता उपय्युपर्य्यतिपुप्लुविरे॥** (श०ब्रा०१.१.३.४-५) एतैर्गुणैर्युक्तत्वान् मेघस्य वृत्र इति संज्ञा। **(वृत्रतरम्)** अतिशयेनावरकम् **(व्यंसम्)** विगता अंसाः

स्कन्धवदवयवा यस्य तम् **(इन्द्रः)** विद्युत् सूर्यलोकाख्य इव सेनाधिपतिः **(वज्रेण)** छेदकेनोष्मकिरणसमूहेन **(महता)** विस्तृतेन **(वधेन)** हन्यते येन तेन **(स्कन्धांसीव)** शरीरावयवाबाहुमूलादीनीव। अत्र **स्कन्देश्च स्वाङ्गेः।** (उणा०४.२०७) अनेनासुन् प्रत्ययो धकारादेशश्च। **(कुलिशेन)** अतिशितधारेण खड्गेन। अत्र **अन्येषामपि दृश्यत** इति दीर्घः। **(विवृक्णा)** विविधतया छिन्नानि। अत्र **ओव्रश्चू छेदन** इत्यस्मात्कर्मणि निष्ठा। **ओदितश्च**। (अष्टा०८.२) इति नत्वम्। **निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः।** (अष्टा०वा०६.१.१६, ८.२.३) इति वार्तिकेन झलि षत्वे कर्त्तव्ये झल्परत्वाभावात् षत्वं न भवति। **चो कु**रिति कुत्वं **शेश्छन्दसि** इति शेर्लोपः। **(अहिः)** मेघः **(शयते)** शेते। अत्र **बहुलं छन्दसि** इति शपो लुङ् न। **(उपपृक्)** उपसामीप्यं पृङ्क्ते स्पृशति यः सः **(पृथिव्याः)** भूमेः॥५॥

अन्वयः-हे सेनापतेऽतिरथस्त्वं यथेन्द्रो महता वज्रेण कुलिशेन विवृक्णा विच्छिन्नानि स्कन्धांसीव व्यंसं यथा स्यात्तथा वृत्रतरं वृत्रमहन् वधेन हतोऽहिर्मेघः पृथिव्या उपपृक् सन् शयते शेत इव सर्वारीन् हन्याः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमोपमालङ्कारौ। यथा कश्चिन्महता शितेन शस्त्रेण शत्रोः शरीरावयवान् छित्वा भूमौ निपातयति, स हतः पृथिव्यां शेते तथैवायं सूर्य्यो विद्युच्च मेघावयवान् छित्वा भूमौ निपातयति, स भूमौ निहतः शयान इव भासते॥५॥

पदार्थः-हे महावीर सेनापते! आप जैसे **(इन्द्रः)** सूर्य वा बिजुली **(महता)** अति विस्तारयुक्त **(कुलिशेन)** अत्यन्त धारवाली तलवाररूप **(वज्रेण)** पदार्थों के छिन्न-भिन्न करने वाले अति तापयुक्त किरणसमूह से (**विवृक्णा**) कटे हुए **(स्कन्धांसीव)** कंधों के समान **(व्यंसम्)** छिन्न-भिन्न अङ्ग जैसे हों वैसे **(वृत्रतरम्)** अत्यन्त सघन **(वृत्रम्)** मेघ को **(अहन्)** मारता है अर्थात् छिन्न-भिन्न कर पृथिवी पर बरसाता है और वह **(वधेन)** सूर्य्य के गुणों से मृतकवत् होकर **(अहिः)** मेघ **(पृथिव्याः)** पृथिवी के **(उपपृक्)** ऊपर **(शयते)** सोता है, वैसे ही वैरियों का हनन कीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमा और उपमालङ्कार हैं। जैसे कोई अतितीक्ष्ण तलवार आदि शस्त्रों से शत्रुओं के शरीर को छेदन कर भूमि में गिरा देता है और वह मरा हुआ शत्रु पृथिवी पर निरन्तर सो जाता है, वैसे ही सूर्य्य और बिजुली मेघ के अङ्गों को छेदन कर भूमि में गिरा देती और वह भूमि में गिरा हुआ होने के समान दीख पड़ता है॥५॥

पुनस्तौ कथं युध्येते इत्युपदिश्यते॥

फिर वे कैसे युद्ध करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम्।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः॥६॥

अयोद्धाऽइव। दुःऽमदः। आ। हि। जुह्वे। महाऽवीरम्। तुविऽबाधम्। ऋजीषम्। न। अतारीत्। अस्य। सम्ऽऋतिम्। वधानाम्। सम्। रुजानाः। पिपिषे। इन्द्रऽशत्रुः॥६॥

पदार्थः-(**अयोद्धेव**) न योद्धा अयोद्धा तद्वत् (**दुर्मदः**) दुष्टो मदो यस्य सः (**आ**) समन्तात् (**हि**) खलु (**जुह्वे**) आहूतवानस्मि। **वा छन्दसि सर्वे विधयो भवन्ति** इत्युवङादेशो न। (**महावीरम्**) महांश्चासौ वीरश्च तमिव महाकर्षणप्रकाशादिगुणयुक्तं सूर्यलोकम् (**तुविबाधम्**) यो बहून् शत्रून् बाधते तम् (**ऋजीषम्**) उपार्जकम्। अत्र **अर्जेर्ऋज च।** (उणा०४.२९) इत्यर्जधातोरीषन् प्रत्यय ऋजादेशश्च। (**न**) निषेधार्थे (**अतारीत्**) तरत्युल्लङ्घयति वा। अत्र वर्त्तमाने लुङ्। (**अस्य**) सूर्यलोकस्य (**समृतिम्**) सङ्गतिम् (**वधानाम्**) हननानाम् (**सम्**) सम्यगर्थे (**रुजानाः**) नद्यः। **रुजाना इति नदीनामसु पठितम्।** (निघं०१.१३) (**पिपिषे**) पिष्टः। अत्र व्यत्ययेनात्मनेपदं च। (**इन्द्रशत्रुः**) इन्द्रः शत्रुर्यस्य वृत्रस्य सः॥६॥

अन्वयः-यथा दुर्मदोऽयोद्धेवायं मेघ ऋजीषन्तु विबाधं महावीरमिन्द्रं सूर्यलोकमाजुह्वे यदा सर्वतो रुतवानिव हतोऽयमिन्द्रशत्रुः संपिपिषे स मेघोऽस्य इन्द्रस्य वधानां समृतिं नातारीत् समन्तान्नोल्लङ्घितवान् हि खल्वस्य वृत्रस्य शरीरादुत्पन्ना रुजानाः नद्यः पर्वतपृथिव्यादिकूलान् छिन्दन्त्यश्चलन्ति तथा सेनासु विराजमानोऽध्यक्षः शत्रुषु चेष्टेत॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा मेघो जगत्प्रकाशाय प्रवर्त्तमानस्य सूर्य्यस्य प्रकाशमकस्मादुत्थायावृत्य च तेन सह युद्ध्यत इव प्रवर्त्ततेऽपितु सूर्य्यस्य सामर्थ्यं नालं भवति। यदायं सूर्येण हतो भूमौ निपतति तदा तच्छरीरावयवेन जलेन नद्यः पूर्णा भूत्वा समुद्रं गच्छन्ति तथा राजा शत्रून् हत्वाऽस्तं नयेत्॥६॥

पदार्थः-(**दुर्मदः**) दुष्ट अभिमानी (**अयोद्धेव**) युद्ध की इच्छा न करने वाले पुरुष के समान मेघ (**ऋजीषम्**) पदार्थों के रस को इकट्ठे करने और (**तुविबाधम्**) बहुत शत्रुओं को मारनेहारे के तुल्य (**महावीरम्**) अत्यन्त बलयुक्त शूरवीर के समान सूर्य्यलोक को (**आजुह्वे**) ईर्ष्या से पुकारते हुए के सदृश वर्त्तता है, जब उसको रोते हुए के सदृश सूर्य ने मारा तब वह मारा हुआ (**इन्द्रशत्रुः**) सूर्य्य का शत्रु मेघ (**पिपिषे**) सूर्य से पिस जाता है और वह (**अस्य**) इस सूर्य की (**वधानाम्**) ताड़नाओं के (**समृतिम्**) समूह को (**नातारीत्**) सह नहीं सकता और (**हि**) निश्चय है कि इस मेघ के शरीर से उत्पन्न हुई (**रुजानाः**) नदियाँ पर्वत और पृथिवी के बड़े-बड़े टीलों को छिन्न-भिन्न करती हुई बहती हैं, वैसे ही सेनाओं में प्रकाशमान सेनाध्यक्ष शत्रुओं में चेष्टा किया करे॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मेघ संसार के प्रकाश के लिये वर्त्तमान सूर्य के प्रकाश को अकस्मात् पृथिवी से उठा और रोककर उस के साथ युद्ध करते हुए के समान वर्त्तता है तो भी वह मेघ सूर्य के सामर्थ्य का पार नहीं पाता, जब यह सूर्य मेघ को मारकर भूमि में गिरा देता है, तब

उसके शरीर के अवयवों से निकले हुए जलों से नदी पूर्ण होकर समुद्र में जा मिलती है। वैसे राजा को उचित है कि शत्रुओं को मार के निर्मूल करता रहे॥६॥

पुनः स कीदृशो भूत्वा भूमौ पततीत्युपदिश्यते॥

फिर वह मेघ कैसा होकर पृथिवी पर गिरता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद् व्यस्तः॥७॥

अपात्। अहस्तः। अपृतन्यत्। इन्द्रम्। आ। अस्य। वज्रम्। अधि। सानौ। जघान। वृष्णः। वध्रिः। प्रतिऽमानम्। बुभूषन्। पुरुऽत्रा। वृत्रः। अशयत्। विऽअस्तः॥७॥

पदार्थः-(**अपात्**) अविद्यमानौ पादौ यस्य सः (**अहस्तः**) अविद्यमानौ हस्तौ यस्य सः (**अपृतन्यत्**) आत्मनः पृतनां युद्धमिच्छतीति। अत्र **कव्यध्वरपृतनस्य।** (अष्टा०७.४.३९) इत्याकारलोपः। (**इन्द्रम्**) सूर्यलोकम् (**आ**) समन्तात् (**अस्य**) वृत्रस्य (**वज्रम्**) स्वकिरणाख्यम् (**अधि**) उपरि (**सानौ**) अवयवे (**जघान**) हतवान् (**वृष्णः**) वीर्यसेक्तुः पुरुषस्य (**वध्रिः**) वध्यते स वध्रिः। निर्वीर्यो नपुंसकमिव। अत्र बन्धधातोर्बाहुलकादौणादिकः क्रिन् प्रत्ययः। (**प्रतिमानम्**) सादृश्यं परिमाणं वा (**बुभूषन्**) भवितुमिच्छन् (**पुरुत्रा**) बहुषु देशेषु पतितः सन्। अत्र **देवमनुष्यपुरुष०** (अष्टा०५.४.५६) इति त्रा प्रत्ययः। (**वृत्रः**) मेघः (**अशयत्**) शयितवान्। व्यत्ययेन परस्मैपदम्। **बहुलं छन्दसि** इति शपो लुङ् न। (**व्यस्तः**) विविधतया प्रक्षिप्तः॥७॥

अन्वयः-हे सर्वसेनास्वामिँस्त्वं यथा वृत्रो वृष्णः प्रतिमानं बुभूषन् वध्रिरिवयमिन्द्रं प्रत्यपृतन्यदात्मनः पृतनामिच्छँस्तस्यास्य वृत्रस्य सानावधि शिखराकारघनानामुपरीन्द्रस्सूर्य्यलोको वज्रमाजघानेतेन हतः सन् वृत्रोऽपादहस्तो व्यस्तः पुरुत्राशयद् बहुषु भूमिदेशेषु शयान इव भवति तथैवैवं भूतान् शत्रून् भित्त्वा छित्त्वा सततं विजयस्व॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कश्चिन्निर्बलो बलवता सह युद्धं कर्त्तुं प्रवर्त्तेत, तथैव वृत्रो मेघः सूर्येण सहयुद्धकारीव प्रवर्त्तते। यथान्ते सूर्येण छिन्नो भिन्नः सन् पराजितः पृथिव्यां पतति, तथैव यो धार्मिकेण राज्ञा सह योद्धुं प्रवर्त्तेत तस्यापीदृश्येव गतिः स्यात्॥७॥

पदार्थः-हे सब सेनाओं के स्वामी! आप (**वृत्रः**) जैसे मेघ (**वृष्णः**) वीर्य सींचने वाले पुरुष की (**प्रतिमानम्**) समानता को (**बुभूषन्**) चाहते हुए (**वध्रिः**) निर्बल नपुंसक के समान जिस (**इन्द्रम्**) सूर्यलोक के प्रति (**अपृतन्यत्**) युद्ध के लिये इच्छा करने वाले के समान (**अस्य**) इस मेघ के (**सानौ**) (**अधि**) पर्वत के शिखरों के समान बादलों पर सूर्य्यलोक (**वज्रम्**) अपने किरण रूपी वज्र को (**आ जघान**) छोड़ता है, उससे मरा हुआ मेघ (**अपादहस्तः**) पैर-हाथ कटे हुए मनुष्य के तुल्य (**व्यस्तः**)

अनेक प्रकार फैला पड़ा हुआ **(पुरुत्रा)** अनेक स्थानों में **(अशयत्)** सोता सा मालूम देता है, वैसे इस प्रकार के शत्रुओं को छिन्न-भिन्न कर सदा जीता कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे कोई निर्बल पुरुष बड़े बलवान् के साथ युद्ध चाहे, वैसे ही वृत्र मेघ सूर्य के साथ प्रवृत्त होता है और जैसे अन्त में वह मेघ सूर्य से छिन्न-भिन्न होकर पराजित हुए के समान पृथिवी पर गिर पड़ता है, वैसे जो धर्मात्मा बलवान् पुरुष क संग लड़ाई को प्रवृत्त होता है, उसकी भी ऐसी ही दशा होती है॥७॥

पुनस्तौ परस्परं किं कुरुत इत्युपदिश्यते॥

फिर वे दोनों परस्पर क्या करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः।
याश्चिदवृत्रो महिना पर्यतिष्ठत् तासामहिः पत्सुतःशीर्बभूव॥८॥

नदम्। न। भिन्नम्। अमुया। शयानम्। मनः। रुहाणाः। अति। यन्ति। आपः। याः। चित्। वृत्रः। महिना। परिऽअतिष्ठत्। तासाम्। अहिः। पत्सुतःऽशीः। बभूव॥८॥

पदार्थः-(**नदम्**) महाप्रवाहयुक्तम् (**न**) इव (**भिन्नम्**) विदीर्णतटम् (**अमुया**) पृथिव्या सह (**शयानम्**) कृतशयनम् (**मनः**) अन्तःकरणमिव (**रुहाणाः**) प्रादुर्भवन्त्यश्चलन्त्यो नद्यः (**अति**) अतिशयार्थे (**यन्ति**) गच्छन्ति (**आपः**) जलानि। **आप इत्युदकनामसु पठितम्।** (निघं०१.१२) (**याः**) मेघमण्डलस्थाः (**चित्**) एव (**वृत्रः**) मेघः (**महिना**) महिम्ना। अत्र **छान्दसो वर्णलोपो वा** इति मकारलोपः। (**पर्यतिष्ठत्**) सर्वत आवृत्य स्थितः (**तासाम्**) अपां समूहः (**अहिः**) मेघः (**पत्सुतःशीः**) यः पादेष्वधः शेते सः। अत्र सप्तम्यन्तात् पादशब्दात् **इतराभ्योऽपि दृश्यन्ते।** (अष्टा०५.३.१४) इति तसिल्। **वा छन्दसि सर्वे विधयो भवन्ति** इति विभक्त्यलुक् शीङ्धातोः क्विप् च। (**बभूव**) भवति। अत्र लडर्थे लिट्॥८॥

अन्वयः-भो महाराज! त्वं यथायं वृत्रो मेघो महिना स्वमहिम्ना पर्यतिष्ठन्निरोधको भूत्वा सर्वतः स्थितोऽहिर्हतः सन् तासामपां मध्ये स्थितः पत्सुतःशीर्बभूव भवति, तस्य शरीरं मनो रुहाणा याश्चिदेवान्तरिक्षस्था आपो भिन्नशयानं यन्ति गच्छन्ति नदं नेवामुया भूम्या सह वर्त्तन्ते, तथैव सर्वान् शत्रून् बद्ध्वा वशं नय॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यावज्जलं सूर्येण छेदितं वायुना सह मेघमण्डलं गच्छति तावत्सर्वं मेघ एव जायते, यदा जलाशयोऽतीव वर्द्धते तदा सघनपृतनः सन् स्वविस्तारेण सूर्यज्योतिर्निरुणद्धि तं यदा सूर्यः स्वकिरणैश्छिनत्ति तदायमितस्ततो जलानि महानदं तडागं समुद्रं वा

प्राप्य शेरते, सोऽपि पृथिव्यां यत्र तत्र शयानः सन् मनुष्यादीनां पादाध इव भवत्येवमधार्मिकोऽप्येधित्वा सद्यो नश्यति॥८॥

पदार्थः-भो राजाधिराज! आप जैसे यह **(वृत्रः)** मेघ **(महिना)** अपनी महिमा से **(पर्यतिष्ठत्)** सब ओर से एकता को प्राप्त और **(अहिः)** सूर्य के ताप से मारा हुआ **(तासाम्)** उन जलों के बीच में स्थित **(पत्सुतःशीः)** पादों के तले सोनेवाला सा **(बभूव)** होता है, उस मेघ का शरीर **(मनः)** मननशील अन्तःकरण के सदृश **(रुहाणाः)** उत्पन्न होकर चलने वाली नदी जो अन्तरिक्ष में रहने वाले **(चित्)** ही **(याः)** जो अन्तरिक्ष में वा भूमि में रहने वाले **(आपः)** जल **(भिन्नम्)** विदीर्ण तट वाले **(शयानम्)** सोते हुए के **(न)** तुल्य **(नदम्)** महाप्रवाहयुक्त नद को **(यन्ति)** जाते और वे जल **(न)** **(अमुया)** इस पृथिवी के साथ प्राप्त होते हैं, वैसे सब शत्रुओं को बाँध के वश में कीजिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमा और उपमालङ्कार हैं। जितना जल सूर्य से छिन्न-भिन्न होकर पवन के साथ मेघमण्डल को जाता है, वह सब जल मेघरूप ही हो जाता है। जब मेघ के जल का समूह अत्यन्त बढ़ता है, तब मेघ घनी-घनी घटाओं से घुमड़ि-घुमड़ि के सूर्य के प्रकाश को ढांप लेता है, उसको सूर्य अपनी किरणों से जब छिन्न-भिन्न करता है, तब इधर-उधर आए हुए जल बड़े-बड़े नद ताल और समुद्र आदि स्थानों को प्राप्त होकर सोते हैं, वह मेघ भी पृथिवी को प्राप्त होकर जहाँ तहां सोता है अर्थात् मनुष्य आदि प्राणियों के पैरों में सोता सा मालूम होता है, वैसे अधार्मिक मनुष्य भी प्रथम बढ़ के शीघ्र नष्ट हो जाता है॥८॥

पुनः स कीदृशो भवतीत्युपदिश्यते॥

फिर वह कैसा होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

नीचावया अभवद् वृत्रपुत्रेन्द्रा अस्या अव वधर्जभार।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः॥९॥

नीचाऽवयाः। अभवत्। वृत्रऽपुत्रा। इन्द्रः। अस्याः। अव। वधः। जभार। उत्ऽतरा। सूः। अधरः। पुत्रः। आसीत्। दानुः। शये। सहवत्सा। न। धेनुः॥९॥

पदार्थः-**(नीचावयाः)** नीचानि वयांसि यस्य मेघस्य सः **(अभवत्)** भवति। अत्र वर्त्तमाने लङ्। **(वृत्रपुत्रा)** वृत्रः पुत्र इव यस्याः सा **(इन्द्रः)** सूर्य्यः **(अस्याः)** वृत्रमातुः **(अव)** क्रियायोगे **(वधः)** वधम्। अत्र हन्तेर्बाहुलकादौणादिकेऽसुनिवधादेशः। **(जभार)** हरति। अत्र वर्त्तमाने लिट्। **हृग्रहोर्हस्य भश्छन्दसि वक्तव्यम्** इति भादेशः। **(उत्तरा)** उपरिस्थाऽन्तरिक्षाख्या **(सूः)** सूयत उत्पादयति या सा माता। अत्र षूङ् धातोः क्विप्। **(अधरः)** अधस्थः **(पुत्रः)** **(आसीत्)** अस्ति। अत्र वर्त्तमाने लङ्। **(दानुः)** ददाति या सा। अत्र **दाभाभ्यां नुः।** (उणा०३.३१) इति नुः प्रत्ययः। **(शये)** शेते। अत्र **लोपस्त आत्मनेपदेषु।**

(अष्टा०७.१.४१) इति लोपः। **(सहवत्सा)** या वत्सेन सह वर्त्तमाना **(न)** इव **(धेनुः)** यथा दुग्धदात्री गौः॥९॥

अन्वयः-हे सभाध्यक्ष! त्वं यथा वृत्रपुत्रा सूर्भूमिरुत्तरान्तरिक्षं वाऽभवदस्याः पुत्रस्य वधो वधमिन्द्रोऽवजभारानेनास्याः पुत्रो नीचावया अधर आसीत्। दानुः सहवत्सा धेनुः स्वपुत्रेण सह माता नेव च शये शेते तथा स्वशत्रून् पृथिव्या सह शयानान् कुरु॥९॥

भावार्थः-अत्रोपमालङ्कारः। वृत्रस्य द्वे मातरौ वर्त्तेते एका पृथिवी द्वितीयाऽन्तरिक्षं चैतयोर्द्वयोः सकाशादेव वृत्रस्योत्पत्तेः। यथा काचिद्गौः स्ववत्सेन सह वर्त्तते तथैव यदा जलसमूहो मेघ उपरि गच्छति तदाऽन्तरिक्षाख्या माता स्वपुत्रेण सह शयाना इव दृश्यते। यदा च स वृष्टिद्वारा भूमिमागच्छति तदा भूमिस्तेन स्वपुत्रेण सह शयानेव दृश्यते। अस्य मेघस्य पितृस्थानी सूर्य्योऽस्ति तस्योत्पादकत्वात्। अस्य हि भूम्यन्तरिक्षे द्वे स्त्रियाविव वर्त्तेते, यदा स जलमाकृष्य वायुद्वारान्तरिक्षे प्रक्षिपति, तदा स पुत्रो मेघो वृद्धिं प्राप्य प्रमत्त इवोन्नतो भवति, सूर्यस्तमाहत्य भूमौ निपातयत्येवमयं वृत्रः कदाचिदुपरिस्थः कदाचिदधःस्थो भवति, तथैव राज्यपुरुषैः प्रजाकण्टकान् शत्रूनितस्ततः प्रक्षिप्य प्रजाः पालनीयाः॥९॥

पदार्थः-हे सभापते! **(वृत्रपुत्रा)** जिसका मेघ लड़के के समान है, वह मेघ की माता **(नीचावयाः)** निकृष्ट उमर को प्राप्त हुई। **(सूः)** पृथिवी और **(उत्तरा)** ऊपरली अन्तरिक्ष नामवाली **(अभवत्)** है **(अस्याः)** इसके पुत्र मेघ के **(वधः)** वध अर्थात् ताड़न को **(इन्द्रः)** सूर्य **(अव जभार)** करता है, इससे इसका **(नीचावयाः)** निकृष्ट उमर को प्राप्त हुआ **(पुत्रः)** पुत्र मेघ **(अधरः)** नीचे **(आसीत्)** गिर पड़ता है और जो **(दानुः)** सब पदार्थों की देने वाली भूमि जैसे **(सहवत्सा)** बछड़े के साथ **(धेनुः)** गाय हो **(न)** वैसे अपने पुत्र के साथ **(शये)** सोती सी दीखती है, वैसे आप अपने शत्रुओं को भूमि के साथ सोते के सदृश किया कीजिये॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मेघ की दो माता हैं- एक पृथिवी दूसरी अन्तरिक्ष अर्थात् इन्हीं दोनों से मेघ उत्पन्न होता है। जैसे कोई गाय अपने बछड़े के साथ रहती है, वैसे ही जब जल का समूह मेघ अन्तरिक्ष में जाकर ठहरता है, तब उसकी माता अन्तरिक्ष अपने पुत्र मेघ के साथ और जब वह वर्षा से भूमि को आता है, तब भूमि उस अपने पुत्र मेघ के साथ सोती सी दीखती है। इस मेघ का उत्पन्न करने वाला सूर्य है, इसलिये वह पिता के स्थान में समझा जाता है। उस सूर्य की भूमि वा अन्तरिक्ष दो स्त्री के समान हैं, वह पदार्थों से जल को वायु के द्वारा खींचकर जब अन्तरिक्ष में चढ़ाता है, जब वह पुत्र मेघ प्रमत्त के सदृश बढ़कर उठता और सूर्य के प्रकाश को ढक लता है, तब सूर्य उसको मार कर भूमि में गिरा देता अर्थात् भूमि में वीर्य छोड़ने के समान जल पहुंचाता है। इसी प्रकार यह मेघ कभी ऊपर कभी नीचे होता है, वैसे ही राजपुरुषों को उचित है कि कण्टकरूप शत्रुओं को इधर-उधर निर्बीज करके प्रजा का पालन करें॥९॥

पुनस्तस्य शरीरं कीदृशं क्व तिष्ठतीत्युपदिश्यते॥

फिर उस मेघ का शरीर कैसा और कहाँ स्थित होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयुदिन्द्रशत्रुः॥ १०॥ ३७॥

अतिष्ठन्तीनाम्। अनिऽवेशनानाम्। काष्ठानाम्। मध्ये। निऽहितम्। शरीरम्। वृत्रस्य। निण्यम्। वि। चरन्ति। आपः। दीर्घम्। तमः। आ। अशयत्। इन्द्रऽशत्रुः॥ १०॥

पदार्थः-(**अतिष्ठन्तीनाम्**) चलन्तीनामपाम् (**अनिवेशनानाम्**) अविद्यमानं निवेशनमेकत्रस्थानं यासां तासाम् (**काष्ठानाम्**) काश्यन्ते प्रकाश्यन्ते यासु ता दिशः। **काष्ठा इति दिङ्नामसु पठितम्।** (निघं०१.६) अत्र **हनिकुषिनी०** (उणा०२.२) इति क्थन् प्रत्ययः। (**मध्ये**) अन्तः (**निहितम्**) स्थापितम् (**शरीरम्**) शीर्यते हिंस्यते यत्तत् (**वृत्रस्य**) मेघस्य (**निण्यम्**) निश्चितान्तर्हितम्। **निण्यमिति निर्णीतान्तर्हितनामसु पठितम्।** (निघं०३.२५) (**वि**) (**चरन्ति**) विविधतया गच्छन्त्यागच्छन्ति (**अपः**) जलानि (**दीर्घम्**) महान्तम् (**तमः**) अन्धकारम् (**आ**) समन्तात् (**अशयत्**) शेते। **बहुलं छन्दसि** इति शपो लुङ् न। (**इन्द्रशत्रुः**) इन्द्रः शत्रुर्यस्य स मेघः। यास्कमुनिरेवमिमं मन्त्रं व्याचष्टे। **अतिष्ठन्तीनामनिविशमानानामित्य-स्थावरणां काष्ठानां मध्ये निहितं शरीरं मेघः। शरीरं शृणातेः। शम्नातेर्वा। वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्त्याप इति। दीर्घं द्राघतेः। तमस्तनोतेः। आशयदाशेतेः। इन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा। तस्मादिन्द्रशत्रुः। तत्को वृत्रः? मेघ इति नैरुक्ताः।** (निरु०२.१६)॥१०॥

अन्वयः-भोः सभेश! त्वया यथा यस्य मेघस्य निवेशनानामतिष्ठन्तीनामपां निण्यं शरीरं काष्ठानां दिशां मध्ये निहितमस्ति, यस्य च शरीराख्या आपो दीर्घं तमो विचरन्ति, स इन्द्रशत्रुर्मेघस्तासामपां मध्ये समुदायावयविरूपेणाशयत् समन्ताच्छेते तथा प्रजायाः द्रोग्धारः ससहायाश्शत्रवो बद्ध्वा काष्ठानां मध्ये शाययितव्याः॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सभापतेर्योग्यमस्ति यथाऽयं मेघोऽन्तरिक्षस्थास्वप्सु सूक्ष्मत्वान्न दृश्यते पुनर्यदा घनाकारो वृष्टिद्वारा जलसमुदायरूपो भवति, तदा दृष्टिपथमागच्छति। परन्तु या इमा आप एकं क्षणमपि स्थितिं न लभन्ते, किन्तु सर्वदैवोपर्यधो गच्छन्त्यागच्छन्ति च, याश्च वृत्रस्य शरीरं वर्त्तन्ते ता अन्तरिक्षे स्थिता अतिसूक्ष्मा नैव दृश्यन्ते। तथा महाबलान् शत्रून् सूक्ष्मबलान् कृत्वा वशं नयेत्॥१०॥

पदार्थः-हे सभा स्वामिन्! तुम को चाहिये कि जिस (**वृत्रस्य**) मेघ के (**अनिवेशनानाम्**) जिनको स्थिरता नहीं होती (**अतिष्ठन्तीनाम्**) जो सदा बहने वाले हैं, उन जलों के बीच (**निण्यम्**) निश्चय करके

स्थिर **(शरीरम्)** जिसका छेदन होता है, ऐसा शरीर है वह **(काष्ठानाम्)** सब दिशाओं के बीच **(निहितम्)** स्थित होता है। तथा जिसके शरीररूप **(अपः)** जल **(दीर्घम्)** बड़े **(तमः)** अन्धकार रूप घटाओं में **(विचरन्ति)** इधर-उधर जाते आते हैं, वह **(इन्द्रशत्रुः)** मेघ उन जलों में इक्ट्ठा वा अलग-अलग छोटा-छोटा बद्दल रूप होके **(अशयत्)** सोता है, वैसे ही प्रजा के द्रोही शत्रुओं को उनके सहायियों के सहित बाँध के सब दिशाओं में सुलाना चाहिये॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सभापति को योग्य है कि जैसे यह मेघ अन्तरिक्ष में ठहराने वाले जलों में सूक्ष्मपन से नहीं दीखता, फिर जब घन के आकार वर्षा के द्वारा जल का समुदाय रूप होता है, तब वह देखने में आता है और जैसे ये जल एक क्षणभर भी स्थिति को नहीं पाते हैं, किन्तु सब काल में ऊपर जाना वा नीचे आना इस प्रकार घूमते ही रहते हैं और जो मेघ के शरीर रूप हैं वे अन्तरिक्ष में रहते हुए अति सूक्ष्म होने से नहीं दीख पड़ते, वैसे बड़े-बड़े बल वाले शत्रुओं को भी अल्प बल वाले करके वशीभूत किया करे॥ १०॥

पुनः सूर्यस्तं प्रति किं करोतीत्युपदिश्यते॥

फिर सूर्य उस मेघ के प्रति क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः।
अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद्ववार॥ ११॥

दासपत्नीः। अहिगोपाः। अतिष्ठन्। निऽरुद्धाः। आपः। पणिनाऽइव। गावः। अपाम्। बिलम्। अपिऽहितम्। यत्। आसीत्। वृत्रम्। जघन्वान्। अप। तत्। ववार॥ ११॥

पदार्थः-(**दासपत्नीः**) दास आश्रयदाता पतिर्यासां ताः। अत्र **सुपां सुलुग्०** इति पूर्वसवर्णादेशः। (**अहिगोपाः**) अहिना मेघेन गोपा गुप्ता आच्छादिताः (**अतिष्ठन्**) तिष्ठन्ति। अत्र वर्त्तमाने लङ्। (**निरुद्धाः**) संरोधं प्रापिताः (**आपः**) जलानि (**पणिनेव**) गोपालेन वणिग्जनेनेव (**गावः**) पशवः (**अपाम्**) जलानाम् (**बिलम्**) गर्त्तम् (**अपिहितम्**) आच्छादितम् (**यत्**) पूर्वोक्तम् (**आसीत्**) अस्ति। अत्र वर्त्तमाने लङ्। (**वृत्रम्**) सूर्यप्रकाशावरकं मेघम् (**जघन्वान्**) हन्ति। अत्र वर्त्तमाने लिट्। (**अप**) दूरीकरणे (**तत्**) द्वारम् (**ववार**) वृणोत्युद्घाटयति। अत्र वर्त्तमाने लिट्। यास्कमुनिरिमं मन्त्रमेवं व्याचष्टे-**दासपत्नीर्दासाधिपत्न्यः। दासो दस्यतेः, उपदासयति कर्माणि। अहिगोपा अतिष्ठन्। अहिना गुप्ताः। अहिरयनात्। एत्यन्तरिक्षे। अयमपीतरोऽहिरेतस्मादेव। निर्ह्रसितोपसर्गः। आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग्भवति। पणिः पणनात्। वणिक् पण्यं नेनक्ति। अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बिभर्तेः। वृत्रं जघ्निवान्। अपववार।** (निरु०२.१७)॥ ११॥

अन्वयः-हे सभापते! यथा पणिनेव गावो दासपत्न्योऽहिगोपा येन वृत्रेण निरुद्धा आपोऽतिष्ठन् तिष्ठन्ति तासामपां यद्बिलमपिहितमासीदस्ति तं सविता जघन्वान् हन्ति हत्वा तज्जलगमनद्वारमपववारापवृणोत्युद्घाटयति तथैव दुष्टाचाराञ्छत्रून्निरुध्य न्यायद्वारं प्रकाशितं रक्ष॥ ११॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा गोपालः स्वकीया गाः स्वाभीष्टे स्थाने निरुणद्धि पुनर्द्वारं चोद्घाट्य मोचयति, यथा वृत्रेण मेघेन स्वकीयमण्डलेऽपां द्वारमावृत्य ता वशं नीयन्ते, यथा सूर्यस्तं मेघं ताडयति तज्जलद्वारमपावृत्यापो विमोचयति तथैव राजपुरुषै शत्रून्निरुध्य सततं प्रजाः पालनीयाः॥ २१॥

पदार्थः-हे सभापते! (**पाणिनेव**) गाय आदि पशुओं के पालने और (**गावः**) गौओं को यथायोग्य स्थानों में रोकने वाले के समान (**दासपत्नीः**) अति बल देने वाला मेघ जिनका पति के समान और (**अहिगोपाः**) रक्षा करने वाले हैं वे (**निरुद्धाः**) रोके हुए (**आपः**) जल (**अतिष्ठन्**) स्थित होते हैं, उन (**अपाम्**) जलों का (**यत्**) जो (**बिलम्**) गर्त अर्थात् एक गाढ़े के समान स्थान (**अपिहितम्**) ढांप सा रक्खा (**आसीत्**) है, उस (**वृत्रम्**) मेघ को सूर्य (**जघन्वान्**) मारता है, मारकर (**तत्**) उस जल की (**अपववार**) रुकावट तोड़ देता है, वैसे आप शत्रुओं को दुष्टाचार से रोक के न्याय अर्थात् धर्ममार्ग को प्रकाशित रखिये॥ ११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे गोपाल अपनी गौओं को अपने अनुकूल स्थान में रोक रखता और फिर उस स्थान का दरवाजा खोल के निकाल देता है और जैसे मेघ अपने मण्डल में जलों का द्वार रोक के उन जलों को वश में रखता है, वैसे सूर्य उस मेघ को ताड़ना देता और उस जल की रुकावट को तोड़ के अच्छे प्रकार उसे बरसाता है, वैसे ही राजपुरुषों को चाहिये कि शत्रुओं को रोककर प्रजा का यथायोग्य पालन किया करें॥ ११॥

पुनस्तौ परस्परं किं कुरुत इत्युपदिश्यते॥

फिर वे दोनों परस्पर क्या करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अश्व्यो॒ वारो॑ अभव॒स्तदि॑न्द्र सृ॒के यत्त्वा॑ प्र॒त्यह॑न्दे॒व एक॑ः।
अज॑यो॒ गा अज॑यः शू॒र सोम॒मवा॑सृज॒ः सर्त॑वे स॒प्त सिन्धू॑न्॥ १२॥

अश्व्यः॑। वार॑ः। अ॒भव॒ः। तत्। इ॒न्द्र॒। सृ॒के। यत्। त्वा॒। प्र॒ति॒ऽअह॑न्। दे॒वः। एक॑ः। अज॑यः। गाः। अज॑यः। शू॒र॒। सोम॑म्। अव॑। अ॒सृ॒ज॒ः। सर्त॑वे। स॒प्त। सिन्धू॑न्॥ १२॥

पदार्थः-(**अश्व्यः**) योऽश्वेषु वेगादिगुणेषु साधुः (**वारः**) वरीतुमर्हः (**अभवः**) भवति। अत्र सर्वत्र वर्त्तमाने लङ् व्यत्ययश्च। (**तत्**) तस्मात् (**इन्द्र**) शत्रुविदारक (**सृके**) वज्र इव किरणसमूहे। **सृक इति वज्रनामसु पठितम्।** (निघं०२.२०) (**यत्**) यः। अत्र **सुपाम्** इति सोर्लुक्। (**त्वा**) त्वां सभेशं राजानम् (**प्रत्यहन्**) प्रति हन्ति (**देवः**) दानादिगुणयुक्तः (**एकः**) असहायः (**अजयः**) जयति (**गाः**) पृथिवीः

(अजयः) जयति **(शूर)** वीरवन्निर्भय **(सोमम्)** पदार्थरससमूहम् **(अव)** अधोऽर्थे **(असृजः)** सृजति **(सर्त्तवे)** सर्त्तुं गन्तुम्। अत्र **तुमऽर्थे से०** इति तुमर्थे तवेन् प्रत्ययः। **(सप्त) (सिन्धून्)** भूमौ महाजलाशयसमुद्रनदीकूपतडागस्थांश्चतुरोऽन्तरिक्षे निकटमध्यदूरदेशस्थाँ स्त्रींश्चेति सप्त जलाशयान्॥१२॥

अन्वयः-हे शूरसेनेशन्द्र! त्वं यथा यद् योऽश्व्यो वार एको देवो मेघः सूर्येण सह योद्धाऽभवो भवति सृके स्वघनदलं प्रत्यहन् किरणान् प्रति हन्ति सूर्यस्तं मेघं जित्वा गा अजयो जयति सोममजयो जयति एवं कुर्वन् सूर्यो जलानि सर्त्तवे सर्त्तुमुपर्यधो गन्तुं सप्त सिन्धूनवासृजः सृजति, तथैव शत्रुषु चेष्टसे तत्तस्मात्त्वा त्वां युद्धेषु वयमधिकुर्मः॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथायं मेघः सूर्यस्य प्रकाशं निवारयति तदा सूर्यः स्वकिरणैस्तं छित्त्वा भूमौ जलं निपातयत्यत एवायमस्य जलसमूहस्य गमनागमनाय समुद्राणां निष्पादनहेतुर्भवति तथा प्रजापालको राजाऽरीन्निरुध्य शस्त्रैश्छित्त्वाऽधो नीत्वा प्रजाया धर्म्ये मार्गे गमनहेतुः स्यात्॥१२॥

पदार्थः-हे **(शूर)** वीर के तुल्य भयरहित **(इन्द्र)** शत्रुओं को विदीर्ण करनेहारे सेना के स्वामी! आप जैसे **(यत्)** जो **(अश्व्यः)** वेग और तड़फ आदि गुणों में निपुण **(वारः)** स्वीकार करने योग्य **(एकः)** असहाय और **(देवः)** उत्तम-उत्तम गुण देने वाला मेघ सूर्य के साथ युद्ध करनेहारा **(अभवः)** होता है **(सृके)** किरणरूपी वज्र में अपने बद्दलों के जाल को **(प्रत्यहन्)** छोड़ता है अर्थात् किरणों को उस घन जाल से रोकता है, सूर्य उस मेघ को जीत कर **(गाः)** उससे अपनी किरणों को **(अजयः)** अलग करता अर्थात् एक देश से दूसरे देश में पहुंचाता और **(सोमम्)** पदार्थों के रस को **(अजयः)** जीतता है। इस प्रकार करता हुआ वह सूर्यलोक जलों को **(सर्त्तवे)** ऊपर नीचे जाने आने के लिये सब लोकों में स्थिर होने वाले **(सप्त) (सिन्धून)** बड़े-बड़े जलाशय, नदी, कुंआ और साधारण तालाब ये चार जल के स्थान पृथिवी पर और समीप, बीच और दूरदेश में रहने वाले तीन जलाशय इन सात जलाशयों को **(अवासृजः)** उत्पन्न करता है, वैसे शत्रुओं में चेष्टा करते हो **(तत्)** इसी कारण **(त्वा)** आपको युद्धों में हम लोग अधिष्ठाता करते हैं॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे यह मेघ सूर्य के प्रकाश को ढांप देता, तब वह सूर्य अपनी किरणों से उसको छिन्न-भिन्न कर भूमि में जल को वर्षाता है। इसी से यह सूर्य उस जल समुदाय को पहुंचाने न पहुंचाने के लिये समुद्रों को रचने का हेतु होता है, वैसे प्रजा का रक्षक राजा शत्रुओं को बाँध शस्त्रों से काट और नीच गति को प्राप्त करके प्रजा को धर्मयुक्त मार्ग में चलाने का निमित्त होवे॥१२॥

एतयोरस्मिन् युद्धे कस्य विजयो भवतीत्युपदिश्यते॥

इन दोनों के इस युद्ध में किस का विजय होता है, इस विषय का उपदेश अगले मन्त्र में किया

है।

नास्मै॑ वि॒द्युन्न त॑न्य॒तुः सिषे॑ध॒ न यां मिह॒मकि॑रद् ध्रा॒दुनि॑ं च।
इन्द्र॑श्च॒ यद्यु॑यु॒धाते॒ अहि॑श्चो॒तापरी॑भ्यो॑ म॒घव॒ा वि जि॑ग्ये॥ १३॥

न। अ॒स्मै॒। वि॒ऽद्युत्। न। त॒न्य॒तुः। सि॒षे॒ध॒। न। याम्। मिह॑म्। अकि॑रत्। ह्रा॒दुनि॑म्। च॒। इन्द्रः॑। च॒। इन्द्र॑ः। च॒। यत्। यु॒यु॒धाते॒ इति॑। अहि॑ः। च॒। उ॒त। अ॒प॒रीभ्य॑ः। म॒घऽवा॑। वि। जि॒ग्ये॒॥ १३॥

पदार्थः-(**न**) निषेधार्थे (**अस्मै**) इन्द्राय सूर्यलोकाय (**विद्युत्**) प्रयुक्ता स्तनयित्नुः (**न**) निषेधे (**तन्यतुः**) गर्जनसहिता (**सिषेध**) निवारयति। अत्र सर्वत्र लडर्थे लङ्लिटौ। (**न**) निवारणे (**द्याम्**) वक्ष्यमाणम् (**मिहम्**) मेहति सिंचति यया वृष्ट्या ताम् (**अकिरत्**) किरति विक्षिपति (**ह्रादुनिम्**) ह्रादतेऽव्यक्ताञ्शब्दान् करोति यया वृष्ट्याताम्। अत्र ह्रादधातोर्बाहुलकादौणादिक उनिः प्रत्ययः। (**च**) समुच्चये (**इन्द्रः**) सूर्यः (**च**) पुनरर्थे (**यत्**) यः। अत्रापि **सुपां सु०** इति सोर्लुक्। (**युयुधाते**) युध्येते (**अहिः**) मेघः (**च**) अन्योन्यार्थे (**उत्**) अपि (**अपरीभ्यः**) अपूर्णाभ्यः सेनाक्रियाभ्यः। अत्र पृधातोः। **अच इः।** (उणा०४.१४४) अनेन इः प्रत्ययः। **कृदिकारदक्तिनः।** (अष्टा०वा०४.१.४५) अनेन ङीष् प्रत्ययः। इदं पदं सायणाचार्येणाप्रमाणादपराभ्य इत्यशुद्धं व्याख्यातम्। (**मघवा**) मघं पूज्यं बहुविधं प्रकाशो धनं विद्यते यस्मिन् सः। अत्र भूम्न्यर्थे मतुप्। (**वि**) विशेषार्थे (**जिग्ये**) जयति॥ १३॥

अन्वयः-हे सेनापते! त्वं यथा येनाहिनास्मा इन्द्राय प्रत्युक्ता विद्युदेनं न सिषेध निवारयितुं न शक्नोति। तन्यतुर्गर्जनाप्यस्मै प्रयुक्ता न सिषेध निषेद्धुं समर्था न भवति, योऽहिर्या ह्रादुनिं मिहं वृष्टिं चाकिरत् प्रक्षिपति साऽप्यस्मै न सिषेध। अयमिन्द्रः परीभ्यः पूर्णाभ्यः सेनाभ्यो युक्त उताप्यपरीभ्यः सेनाभ्यो युक्तोऽहिर्मेघश्च परस्परं युयुधाते। यद्यस्मादधिकबलयुक्तत्वान्मघवा तं मेघं विजिग्ये विजयते तथैव पूर्णं बलं सम्पाद्य शत्रून् विजयस्व॥ १३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषैर्यथा वृत्रस्य यावन्ति विद्युदादीनि युद्धसाधनानि सन्ति, तावन्ति सूर्यापेक्षया क्षुद्राणि वर्त्तन्ते, सूर्यस्य खलु युद्धसाधनानि तदपेक्षया महान्ति सन्ति। अत एव सर्वदा सूर्यस्य विजयो वृत्रस्य पराजयश्च भवति, तथैव धर्म्मेण शत्रुविजयः कार्य्यः॥ १३॥

पदार्थः-हे सेनापते! आप जैसे मेघ ने (**अस्मै**) इस सूर्यलोक के लिये छोड़ी हुई (**विद्युत्**) बिजुली (**न**) (**सिषेध**) इसकी कुछ रुकावट नहीं कर सकती (**तन्यतुः**) उस मेघ की गर्जना भी उस सूर्य को (**न**) (**सिषेध**) नहीं रोक सकता और वह (**अहिः**) मेघ (**याम्**) जिस (**ह्रादुनिम्**) गर्जना आदि गुणवाली (**मिहम्**) बरसा को (**च**) भी (**अकिरत्**) छोड़ता है, वह भी सूर्य की (**न**) (**सिषेध**) हानि नहीं कर सकती है, यह (**इन्द्रः**) सूर्यलोक अपनी किरणरूपी पूर्णसेना से युक्त (**उत**) और अपनी (**अपरीभ्यः**) अधूरी सेना से युक्त (**अहिः**) मेघ (**च**) भी ये दोनों (**युयुधाते**) परस्पर युद्ध किया करते हैं (**यत्**) अधिक

बलयुक्त होने के कारण **(मघवा)** अत्यन्त प्रकाशवान् सूर्यलोक उस मेघ को **(च)** भी **(विजिग्ये)** अच्छे प्रकार जीत लेता है, वैसे ही धर्मयुक्त पूर्णबल करके शत्रुओं का विजय कीजिये॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुषों को योग्य है कि जैसे वृत्र अर्थात् मेघ के जितने बिजली आदि युद्ध के साधन हैं, वे सब सूर्य्य के आगे क्षुद्र अर्थात सब प्रकार निर्बल और थोड़े हैं और सूर्य के युद्धसाधन उसकी अपेक्षा से बड़े-बड़े हैं। इसी से सब समय में सूर्य ही का विजय और मेघ का पराजय होता रहता है, वैसे ही धर्म से शत्रुओं को जीतें॥१३॥

पुनस्तयोः परस्परं किं भवतीत्युपदिश्यते॥

फिर उन दोनों में परस्पर क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अहे॑र्या॒तार॑ं कम॑पश्य इन्द्र हृ॒दि यत्ते॑ ज॒घ्नुषो॒ भीर॑गच्छत्।
नव॑ च॒ यन्न॑व॒तिं च स्रव॑न्तीः श्ये॒नो न भी॒तो अत॑रो॒ रजां॑सि॥१४॥

अहे॑ः। या॒तार॑म्। कम्। अ॒प॒श्य॒ः। इ॒न्द्र॒। हृ॒दि। यत्। ते॒। ज॒घ्नुष॑ः। भीः। अग॑च्छत्। नव॑। च॒। यत्। न॒व॒तिम्। च॒ स्रव॑न्तीः। श्ये॒नः। न। भी॒तः। अत॑रः। रजां॑सि॥१४॥

पदार्थः-(**अहेः**) मेघस्य **(यातारम्)** देशान्तरे प्रापयितारम् **(कम्)** सूर्यादन्यम् **(अपश्यः)** पश्येत्। अत्र लिडर्थे लङ्। **(इन्द्र)** शत्रुदलविदारकः योद्धः **(हृदि)** हृदये **(यत्)** धनम् **(ते)** तव **(जघ्नुषः)** हन्तुः सकाशात् **(भीः)** भयम् **(अगच्छत्)** गच्छति प्राप्नोति। अत्र सर्वत्र वर्त्तमाने लङ्। **(नव)** संख्यार्थे **(च)** पुनरर्थे **(स्रवन्तीः)** गमनं कुर्वन्तीर्नदीर्नाडीर्वा। **स्रवन्त्य इति नदीनामसु पठितम्।** (निघं०१.१३) स्रु धातोर्गत्यर्थत्वाद् रुधिरप्राणगमनमार्गा जीवनहेतवो नाड्योऽपि गृह्यन्ते। **(श्येनः)** पक्षी **(न)** इव **(भीतः)** भयं प्राप्तः **(अतरः)** तरति **(रजांसि)** सर्वाँल्लोकान्। **लोका रजांस्युच्यन्ते।** (निरु०४.१९)॥१४॥

अन्वयः-हे इन्द्र योद्धार्यस्य शत्रून् जघ्नुषस्ते तव प्रभावोऽहेर्मेघस्य विद्युद्गर्जनादिविशेषात् प्राणिनो यद्याभीरगच्छत् प्राप्नोति विद्वान् मनुष्यस्तस्य मेघस्य यातारं देशान्तरे प्रापयितारं सूर्य्यादन्यं कमप्यर्थं न पश्येयुः। स सूर्येण हतो मेघो भीतो नेव श्येनादिव कपोतः भूमौ पतित्वा नवनवतिर्नदीर्नाडीर्वा स्रवन्तीः पूर्णाः करोति यद्यस्मात्सूर्यः स्वकीयैः प्रकाशाकर्षणछेदनादिगुणैर्महान् वर्त्तते तत्तस्माद्रजांस्यतरः सर्वाँल्लोकान् सन्तरतीवास्ति स त्वं हृदि यं शत्रुमपश्यः पश्येस्तं हन्याः॥१४॥

भावार्थः-अत्रोपमालङ्कारः। राजभृत्या वीरा यथा केनचित् प्रहृतो भययुक्तः श्येनः पक्षी इतस्ततो गच्छति तथैव सूर्येण हत आकर्षितश्च यो मेघ इतस्ततः पतन् गच्छति, स स्वशरीराख्येन जलेन लोकलोकान्तरस्य मध्येऽनेका नद्यो नाड्यश्च पिपर्त्ति। अत्र नवनवतिमिति पदमसंख्यातार्थेऽस्त्युपलक्षणत्वान्नह्येतस्य मेघस्य सूर्याद्भिन्नं किमपि निमित्तमस्ति। यथाऽन्धकारे प्राणिनां

भयं जायते, तथा मेघस्य सकाशाद् विद्युद्गर्जनादिभिश्च भयं जायते तन्निवारकोऽपि सूर्य एव तथा सर्वलोकानां प्रकाशाकर्षणादिभिर्व्यवहारहेतुरस्ति तथैव शत्रून् विजयेरन्॥१४॥

पदार्थः-हे **(इन्द्र)** इन्द्र योद्धा जिस युद्ध व्यवहार में शत्रुओं का **(जघ्नुषः)** हनने वाले **(ते)** आपका प्रभाव **(अहेः)** मेघ के गर्जन आदि शब्दो से प्राणियों को **(यत्)** जो **(भीः)** भय **(अगच्छत्)** प्राप्त होता है, विद्वान् लोग उस मेघ के **(यातारम्)** देश-देशान्तर में पहुंचाने वाले सूर्य को छोड़ और **(कम्)** किसको देखें। सूर्य से ताड़ना को प्राप्त हुआ मेघ **(भीतः)** डरे हुए **(श्येनः)** **(न)** वाज के समान **(च)** भूमि में गिर के **(नवनवतिम्)** अनेक **(स्रवन्तीः)** जल बहाने वाली नदी वा नाड़ियों को पूरित करता है **(यत्)** जिस कारण सूर्य अपने प्रकाश, आकर्षण और छेदन आदि गुणों से बड़ा है, इसी से **(रजांसि)** सब लोकों को **(अतरः)** तरता अर्थात् प्रकाशित करता है। इसके समान आप हैं, वे आप **(हृदि)** अपने मन में जिसको शत्रु **(अपश्यः)** देखो उसी को मारा करो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजसेना के वीर-पुरुषों को योग्य है कि जैसे किसी से पीड़ा को पाकर डरा हुआ श्येन पक्षी इधर-उधर गिरता-पड़ता उड़ता है वा सूर्य से अनेक प्रकार की ताड़ना और खैंच कढ़ेर को प्राप्त होकर मेघ इधर-उधर देशदेशान्तर में अनेक नदी वा नाड़ियों को पूर्ण करता है। इस मेघ की उत्पत्ति का सूर्य से भिन्न कोई निमित्त नहीं है और जैसे अन्धकार में प्राणियों को भय होता है, वैसे ही मेघ के बिजली और गर्जना आदि गुणों से भय होता है, उस भय का दूर करने वाला भी सूर्य ही है तथा सब लोकों के व्यवहारों को अपने प्रकाश और आकर्षण आदि गुणों में चलाने वाला है, वैसे ही दुष्ट शत्रुओं को जीता करें। इस मन्त्र में (नवनवतिम्) यह संख्या का उपलक्षण होने से पद असंख्यात अर्थ में है॥१४॥

पुनः सूर्यः कीदृश इत्युपदिश्यते॥

फिर उक्त सूर्य कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

इन्द्रो॑ या॒तोऽव॑सितस्य॒ राजा॒ शम॑स्य च शृ॒ङ्गिणो॒ वज्र॑बाहुः।
सेदु॒ राजा॑ क्षयति चर्षणी॒नाम॒रान्न ने॒मिः परि॒ ता ब॑भूव॥१५॥३८॥२॥

इन्द्रः॑। या॒तः॑। अव॑ऽसितस्य। राजा॑। शम॑स्य। च॒। शृ॒ङ्गिणः॑। वज्र॑ऽबाहुः। सः। इत्। ऊ॒म् इति॑। राजा॑। क्ष॒यति॒। च॒र्ष॒णी॒नाम्। अ॒रान्। न। ने॒मिः॑। परि॑। ता। ब॒भूव॒॥१५॥

पदार्थः-**(इन्द्रः)** सूर्यलोक इव सभासेनापती राज्यं प्राप्तः **(यातः)** गमनादिव्यवहारप्रापकः **(अवसितस्य)** निश्चितस्य चराचरस्य जगतः **(राजा)** यो राजते दीप्यते प्रकाशते सः **(शमस्य)** शाम्यन्ति येन तस्य शान्तियुक्तस्य मनुष्यस्य **(च)** समुच्चये **(शृङ्गिणः)** शृङ्गयुक्तस्य गवादेः पशुसमूहस्य **(वज्रबाहुः)** वज्रः शस्त्रसमूहो बाहौ यस्य सः **(सः)** **(इत्)** एव **(उ)** अप्यर्थे **(राजा)** न्यायप्रकाशकः सभाध्यक्षः **(क्षयति)** निवासयति गमयति वा **(चर्षणीनाम्)** मनुष्याणाम् **(अरान्)** चक्रावयवान् **(इव)**

(नेमिः) रथाङ्गम् **(परि)** सर्वतोऽर्थे **(ता)** तानि यानि जगतो दुष्टानि कर्माणि पूर्वोक्ताँल्लोकान् वा। अत्र **शेश्छन्दसि बहुलम्** इति शेर्लोपः। **(बभूव)** भवेः। अत्र लिङर्थे लिट्॥१५॥

अन्वयः-सूर्य्य इव वज्रबाहुरिन्द्रो यातः सभापतिरवसितस्य शमस्य शृङ्गिणश्चर्षणीनां च मध्येऽरान्नेमिर्नेव ता तानि रजांसि परिक्षयति स चेदु उतापि सर्वेषां राजा बभूव भवतु॥१५॥

भावार्थः-अत्रोपमालङ्कारः। अत्र पूर्वमन्त्रात् रजांसीति पदमनुवर्त्तते। राजा यथा रथचक्रमरान् धृत्वा चालयति यथायं सूर्य्यश्चराचरस्य शान्ताशान्तस्य जगतो मध्ये प्रकाशमानः सन् सर्वाँल्लोकान् धरन् स्वस्वकक्षासु चालयति न चैतस्माद्विना कस्यचित्संनिहितस्य मूर्त्तिमतो लोकस्य धारणकर्षणप्रकाशमेघवर्षणादीनि कर्माणि सम्भवितुमर्हन्ति तथा धर्मेण राज्यं पालयेत्॥१५॥

अत्रेन्द्रवृत्रयुद्धालङ्कारवर्णनेनास्य पूर्वसूक्तोक्ताग्निशब्दार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति प्रथमस्य द्वितीयेऽष्टात्रिंशो वर्गः ३८॥

प्रथममण्डले सप्तमेऽनुवाके द्वात्रिंशं च सूक्तमध्यायश्च द्वितीयः समाप्तः॥२॥

श्रीमत्परिव्राजकाचार्यश्रीविरजानन्दसरस्वतीस्वामिना शिष्येण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतभाषार्यभाषाभ्यां विभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये द्वितीयोऽध्यायः पूर्तिमगमत्॥२॥

पदार्थः-सूर्य्य के समान **(वज्रबाहुः)** शस्त्रास्त्रयुक्तबाहु **(इन्द्रः)** दुष्टों का निवारणकर्ता **(यातः)** गमन आदि व्यवहार को वर्त्ताने वाला सभापति **(अवसितस्य)** निश्चित चराचर जगत् **(शमस्य)** शान्ति करने वाले मनुष्य आदि प्राणियों **(शृङ्गिणः)** सींगों वाले गाय आदि पशुओं और **(चर्षणीनाम्)** मनुष्यों के बीच पहियों को धारने वाले **(नेमिः)** धुरी के **(न)** समान **(राजा)** प्रकाशमान होकर **(ता)** उत्तम तथा नीच कर्मों के कर्त्ताओं को सुख-दुःखों को तथा **(रजांसि)** उक्त लोकों को **(परिक्षयति)** पहुंचाता और निवास करता है **(उ)** **(इत्)** वैसे ही **(सः)** वह सभी के **(राजा)** न्याय का प्रकाश करने वाला **(बभूव)** होवे॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार और पूर्व मन्त्र से (रजांसि) इस पद की अनुवृत्ति आती है। राजा को चाहिये कि जैसे रथ का पहिया धुरियों को चलाता और जैसे यह सूर्य चराचर शान्त और अशान्त संसार में प्रकाशमान होकर सब लोकों को धारण किये हुए उन सभों को अपनी-अपनी कक्षा में चलाता है, जैसे सूर्य के विना अति निकट मूर्तिमान् लोक की धारणा, आकर्षण, प्रकाश और मेघ की वर्षा आदि काम किसी से नहीं हो सकते हैं, वैसे धर्म से प्रजा का पालन किया करें॥१५॥

इस सूक्त में सूर्य और मेघ के युद्ध वर्णन करने से इस सूक्त की पिछले सूक्त में प्रकाशित किये अग्नि शब्द के अर्थ के साथ सङ्गति जाननी चाहिये।

यह पहिले अष्टक के दूसरे अध्याय में अड़तीसवां वर्ग, पहिले मण्डल के सातवें अनुवाक में बत्तीसवां सूक्त और दूसरा अध्याय भी समाप्त हुआ॥३२॥

इति श्रीमत्परिव्राजकाचार्यश्रीविरजानन्दसरस्वतीस्वामिनां शिष्येण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतभाषार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्ते वेदभाष्ये द्वितीयोऽध्यायः पूर्तिमगमत्॥२॥

अथ तृतीयोऽध्यायः प्रारभ्यते॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ पञ्चदशर्चस्य त्रयस्त्रिंशस्य सूक्तस्याङ्गिरसो हिरण्यस्तूप ऋषिः। इन्द्रो देवता १,२,४,८,१२,१३। निचृत्त्रिष्टुप् ३,६,१०; त्रिष्टुप् ५,७,११; विराट् त्रिष्टुप् १४-१५; भुरिक् पङ्क्तिश्छन्दः। पङ्क्तेः पञ्चमः। त्रिष्टुभो धैवतः स्वरश्च॥

तत्रादाविन्द्रशब्देनेश्वरसभापती उपदिश्येते॥

अब तेतीसवें सूक्त का प्रारम्भ है, उसके पहिले मन्त्र में इन्द्र शब्द से ईश्वर और सभापति का प्रकाश किया है॥

एताया॒मोप॑ गव्यन्त इन्द्र॑म॒स्माकं॒ सु प्रम॑तिं वावृधाति।
अ॒ना॒मृ॒णः। कु॒वि॑दादु॒स्य रा॒यो गवां॒ केतं॑ पर॑मा॒वर्ज॑ते नः॥ १॥

आ। इ॒त॒। अया॑म। उप॑। गव्यन्तः। इन्द्र॑म्। अ॒स्माक॑म्। सु। प्रऽम॑तिम्। व॒वृ॒धा॒ति॒। अ॒ना॒मृ॒णः। कु॒वित्। आत्। अ॒स्य॒। रा॒यः। गवा॑म्। केत॑म्। पर॑म्। आ॒ऽव॑र्जते। नः॥ १॥

पदार्थः-(**आ**) समन्तात् (**इत**) प्राप्नुत (**अयाम**) प्राप्नुयाम। अयं लोडुत्तमबहुवचने प्रयोगः। (**उप**) सामीप्ये (**गव्यन्तः**) आत्मनो गा इन्द्रियाणीच्छन्तः। अत्र गो शब्दात् **सुप आत्मनः क्यच्।** (अष्टा०३.१.८) इति क्यच्। **गौरिति पदनामसु पठितम्।** (निघं०४.१) (**इन्द्रम्**) परमेश्वरम् (**अस्माकम्**) मनुष्यादीनाम् (**सु**) पूजायाम् (**प्रमतिम्**) प्रकृष्टा मतिर्विज्ञानं यस्य तम् (**वावृधाति**) वर्द्धयेत्। अत्र वृधुधातोर्लेट् **बहुलं छन्दसि** शपः श्लुः व्यत्ययेन परस्मैपदम्। **तुजादीनां दीर्घ०** (अष्टा०६.१.७) इत्यभ्यासदीर्घत्वमन्तर्गतो ण्यर्थश्च। (**अनामृणः**) अविद्यमाना समन्तान् मृणा हिंसका यस्य सः (**कुवित्**) बहुविधानि। **कुविदिति बहुनामसु पठितम्।** (निघं०३.१) (**आत्**) अनन्तरार्थे (**अस्य**) जगतः (**रायः**) प्रशस्तानि धनानि (**गवाम्**) मनआदीनामिन्द्रियाणां पृथिव्यादीनां पशूनां वा (**केतम्**) प्रज्ञानम्। **केत इति प्रज्ञानामसु पठितम्।** (निघं०३.९) (**परम्**) प्रकृष्टम् (**आवर्जते**) समन्ताद्वर्जयति त्याजयति। अत्राङ्पूर्वाद् वृजीधातोर्लट् **बहुलं छन्दसि** इति शपो लुङ् न। अन्तर्गतो ण्यर्थश्च। (**नः**) अस्मभ्यम्॥ १॥

अन्वयः-हे मनुष्या! यथा गव्यन्तो वयं योऽस्माकमस्य जगतश्च कुविद्रायो वावृधाति, यश्च आदनन्तरं नोऽस्मभ्यमनामृणो गवां परं केतं वावृधात्यज्ञानं चावर्जते सुप्रमतिमिन्द्रं परेशं न्यायाधीशं वा शरणमुपायाम तथैव यूयमप्येत॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैरविद्यानाशविद्यावृद्धियां यः परमं धनं वर्द्धयति तस्यैवेश्वरस्याज्ञापालनोपासनाभ्यां शरीरात्मबलं नित्यं वर्द्धनीयम्। नह्येतस्य सहायेन विना कश्चिद्धर्मार्थकाममोक्षाख्यं फलं प्राप्तुं शक्नोतीति॥ १॥

पदार्थः-हे मनुष्यो! **(गव्यन्तः)** अपने आत्मा गौ आदि पशु और शुद्ध इन्द्रियों की इच्छा करने वाले हम लोग जो **(अस्माकम्)** हम लोगों और **(अस्य)** इस जगत् के **(कुवित्)** अनेक प्रकार के **(रायः)** उत्तम धनों को **(वावृधाति)** बढ़ाता और जो **(आत्)** इसके अनन्तर **(नः)** हम लोगों के लिये **(अनामृणः)** हिंसा, वैर, पक्षपातरहित होकर **(गवाम्)** मन आदि इन्द्रिय, पृथिवी आदि लोक तथा गौ आदि पशुओं के **(परम्)** उत्तम **(केतम्)** ज्ञान को बढ़ाता और अज्ञान का **(आवर्जते)** नाश करता है, उस **(सुप्रमतिम्)** उत्तम ज्ञानयुक्त **(इन्द्रम्)** परमेश्वर और न्यायकर्ता को **(उपायाम)** प्राप्त होते हैं, वैसे तुम लोग भी **(आ इत)** प्राप्त होओ॥१॥

भावार्थः-यहाँ श्लेषालङ्कार है। मनुष्यों को योग्य है कि जो पुरुष संसार में अविद्या का नाश तथा विद्या के दान से उत्तम-उत्तम धनो को बढ़ाता है, परमेश्वर की आज्ञा का पालन और उपासना करके उसी के शरीर तथा आत्मा का बल नित्य बढ़ावे और इसकी सहायता के विना कोई भी मनुष्य धर्म, अर्थ, काम और मोक्ष रूपी फल प्राप्त होने को समर्थ नहीं हो सकता॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन्॥२॥

उप। इत्। अहम्। धनऽदाम्। अप्रतिऽइतम्। जुष्टाम्। न। श्येनः। वसतिम्। पतामि। इन्द्रम्। नमस्यन्। उपमेभिः। अर्कैः। यः। स्तोतृभ्यः। हव्यः। अस्ति। यामन्॥२॥

पदार्थः-(**उप**) सामीप्ये **(इत्)** एव **(अहम्)** मनुष्यः **(धनदाम्)** यो धनं ददाति तम् **(अप्रतीतम्)** यश्चक्षुरादीन्द्रियैर्न प्रतीयते तमगोचरम्। **(जुष्टाम्)** पूर्वकालसेविताम् **(न)** इव **(श्येनः)** वेगवान् पक्षी **(वसतिम्)** निवासस्थानम् **(पतामि)** प्राप्नोमि **(इन्द्रम्)** अखण्डैश्वर्यप्रदं जगदीशश्वरम् **(नमस्यन्)** नमस्कुर्वन्। अत्र **नमोवरिवश्चित्रङ् क्यच्।** (अष्टा०३.१.१९) इति क्यच्। **(उपमेभिः)** उपमीयन्ते यैस्तै। अत्र माङ् धातोः **घञर्थे क विधानम्** (अष्टा०वा०३.३.५८) इति वार्त्तिकेन करणे कः प्रत्ययः। **बहुलं छन्दसि** इति भिस ऐस् न। **(अर्कैः)** अनेकैः सूर्यलोकैः **(यः)** पूर्वोक्तः सूर्यलोकोत्पादकः **(स्तोतृभ्यः)** य ईश्वरं स्तुवन्ति तेभ्यः **(हव्यः)** होतुमादातुमर्हः **(अस्ति)** वर्त्तते **(यामन्)** याति गच्छति प्राप्नोति स यामा तस्मिन्नस्मिन् संसारे। अत्र **सुपां सुलुग्०** इति विभक्तेर्लुक्॥२॥

अन्वयः-यो हव्यः स्तोतृभ्यो धनप्रदोऽस्ति तमप्रतीतं धनदामिन्द्रं नमस्यन्नहं जुष्टां वसतिं श्येनो नेव यामन् गमनशीलेऽस्मिन् संसार उपमेभिरर्कैरिदेवोपपताम्यभ्युपगच्छामि॥२॥

भावार्थः-अत्रोपमालङ्कारः। यथा श्येनाख्यः पक्षी प्राक्सेवितं सुखप्रदं निवासस्थानं स्थानान्तराद्वेगेन गत्वा प्राप्नोति, तथैव परमेश्वरं नमस्यन्तो मनुष्या अस्मिन् संसारे तद्रचितैः सूर्यादिलोकदृष्टान्तैरीश्वरं निश्चित्य तमेवोपासताम्। यावन्तोऽस्मिञ्जगति रचिताः पदार्था वर्त्तन्ते, तावन्तः सर्वे निर्मातारमीश्वरं निश्चापयन्ति। नहि निर्मात्रा विना किञ्चिन्निर्मितं सम्भवति। तथाऽस्मिन् मनुष्यै रचनीये व्यवहारे रचकेन विना किञ्चिदपि स्वतो न जायते तथैवेश्वरसृष्टौ वेदितव्यम्। अहो एवं सति य ईश्वरमनादृत्य नास्तिका भवन्ति तेषामिदं महदज्ञानं कुतः समागतमिति। अत्राध्यापकविलसनेन श्येनस्य प्रसिद्धस्य पक्षिणो नामा विदित्वा गोदृष्टान्तो गृहीतोऽस्य मन्त्रस्यान्यथार्थो वर्णितस्तस्मादिदमस्य व्याख्यानमनादरणीयमस्तीति॥ २॥

पदार्थः-(**यः**) जो (**हव्यः**) ग्रहण करने योग्य ईश्वर (**स्तोतृभ्यः**) अपनी स्तुति करने वालों के लिये धन देने वाला (**अस्ति**) है, उस (**अप्रतीतम्**) चक्षु आदि इन्द्रियों से अगोचर (**धनदाम्**) धन देने वाले (**इन्द्रम्**) परमेश्वर को (**नमस्यन्**) नमस्कार करता हुआ (**अहम्**) मैं (**न**) जैसे (**जुष्टाम्**) पूर्व काल में सेवन किये हुए (**वसतिम्**) घोंसले को (**श्येनः**) बाज पक्षी प्राप्त होता है, वैसे (**यामन्**) गमनशील अर्थात् चलायमान इस संसार में (**उपमेभिः**) उपमा देने के योग्य (**अर्कैः**) अनेक सूर्यों से (**इत्**) ही (**उपपतामि**) प्राप्त होता हूं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे श्येन अर्थात् वेगवान् पक्षी अपने पहिले सेवन किये हुए सुख देने वाले स्थान को स्थानान्तर से चलकर प्राप्त होता है, वैसे ही परमेश्वर को नमस्कार करते हुए मनुष्य उसी के बनाये इस संसार से सूर्य्य आदि लोकों के दृष्टान्तों में ईश्वर का निश्चय करके उसी की प्राप्ति करें, क्योंकि जितने इस संसार में रचे हुए पदार्थ हैं, वे सब रचने वाले का निश्चय कराते हैं और रचने वाले के विना किसी जड़ पदार्थ की रचना कभी नहीं हो सकती। जैसे इस व्यवहार में रचने वाले के विना कुछ भी पदार्थ नहीं बन सकता, वैसे ही ईश्वर की सृष्टि में भी जानना चाहिये। बड़ा आश्चर्य है कि ऐसे निश्चय हो जाने पर भी जो ईश्वर का अनादर करके नास्तिक हो जाते हैं, उनको यह बड़ा अज्ञान क्योंकर प्राप्त होता है॥ २॥

अथेन्द्रशब्देन शूरवीरगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में इन्द्र शब्द से शूरवीर के गुण प्रकाशित किये हैं॥

नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध॥ ३॥

नि। सर्वऽसेनः। इषुऽधीन्। असक्त। सम्। अर्यः। गाः। अजति। यस्य। वष्टि। चोष्कूयमाणः। इन्द्र। भूरि। वामम्। मा। पणिः। भूः। अस्मत्। अधि। प्रऽवृद्ध॥ ३॥

पदार्थः-(**नि**) नितराम् (**सर्वसेनः**) सर्वाः सेना यस्य सः (**इषुधीन्**) इषवो बाणा धीयन्ते येषु तान् (**असक्त**) सज्ज। अत्र सज्ज धातोः **बहुलं छन्दसि** इति शपो लुक्। लोडर्थे लङ् व्यत्ययेनात्मनेपदं च। (**सम्**) संयोगे (**अर्यः**) वणिग्जनः। **अर्य्यः स्वामिवैश्ययोः।** (अष्टा०३.१.१०३) इत्ययं शब्दो निपातितः। (**गाः**) पशून् (**अजति**) प्राप्य रक्षति (**यस्य**) पुरुषस्य (**वष्टि**) प्रकाशते (**चोष्कूयमाणः**) सर्वानाप्रावयन्। **स्कुञ् आप्रवण** इत्यस्य यङन्तं रूपम् (**इन्द्र**) शत्रूणां दारयितः (**भूरि**) बहु। **भूरीति बहुनामसु पठितम्।** (निघं०३.१) (**वामम्**) वमत्युद्गिरति येन तम्। **टुवमु उद्गिरणे**ऽस्माद्धातोः **हलश्च** इति घञ्। उपधावृद्धिनिषेधे प्राप्ते[१६]। **अनाचमिकमिवमीनामिति वक्तव्यम्।** (अष्टा०वा०७.३.३४) इति वार्त्तिकेन वृद्धिः सिद्धा। (**मा**) निषेधे (**पणिः**) सत्यव्यवहारः (**भूः**) भव। अत्र लोडर्थे लुङ् **न माङ्योग** (अष्टा०६.४.७४) इत्यडभावः। (**अस्मत्**) स्पष्टार्थम् (**अधि**) उपरिभावे (**प्रवृद्ध**) महोत्तमगुणविशिष्ट॥३॥

अन्वयः-हे अधिप्रवृद्धेन्द्र! सर्वसेनः पणिश्चोष्कूयमाणस्त्वं भूरीषुधीन् धृत्वाऽर्यो गाः भूरि समजतीव न्यसक्त सज्जास्मद् वामं मा भूर्यस्माद्यस्य भवतः प्रतापो वष्टि विजयी च भवेः॥३॥

भावार्थः-अत्रवाचकलुप्तोपमालङ्कारः। यथावणिग्जनेन गाः पालयित्वा चारयित्वा दुग्धादिना व्यवहारसिद्धिर्निष्पाद्यते यथेश्वरेणोत्पादितस्य महतः सूर्यलोकस्य किरणा बाणवच्छेदकत्वेन सर्वान् पदार्थान् प्रवेश्य वायुनोपर्यधो गमयित्वा सर्वान् सरसान् पदार्थान् कृत्वा सुखानि निष्पादयन्ति तथा राजा प्रजाः पालयेत्॥३॥

पदार्थः-हे (**अधिप्रवृद्ध**) महोत्तमगुणयुक्त! (**इन्द्र**) शत्रुओं को विदीर्ण करने वाले (**सर्वसेनः**) जिसके सब सेना (**पणिः**) सत्य व्यवहारी (**चोष्कूयमाणः**) सब शत्रुओं को भगाने वाले आप (**भूरि**) बहुत (**इषुधीन्**) जिसमें प्राण रक्खे जाते हैं, उसको घर के जैसे (**अर्य्यः**) वैश्य (**गाः**) पशुओं को (**समजति**) चलाता और खवाता है, वैसे (**न्यसक्त**) शत्रुओं को दृढ़बन्धनों से बाँध और (**अस्मत्**) हम से (**वामम्**) अरुचिकर कर्म के कर्त्ता (**मा भूः**) मत हो, जिससे (**यस्य**) आपका प्रताप (**वष्टि**) प्रकाशित हो और आप विजयी हों॥३॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। राजा को चाहिये कि जैसे वैश्य गौओं का पालन तथा चराकर दुग्धादिकों से व्यवहार सिद्ध करता है और जैसे ईश्वर से उत्पन्न हुए सब लोकों में बड़े सूर्यलोक की किरणें बाण के समान छेदन करने वाली सब पदार्थों को प्रवेश करके वायु से ऊपर नीचे चलाकर रस सहित सब पदार्थों को करके सब सुख सिद्ध करते हैं, इसके समान राजा प्रजा का पालन करे॥३॥

---

१६. नोदोत्तोपदेशस्य मान्तस्यानाचमेः। इत्यनेन। सं०

इन्द्रशब्देन पुनः स एवार्थ उपदिश्यते॥

अगले मन्त्र में इन्द्र शब्द से उसी के गुणों का उपदेश किया है॥

वधीर्हि दस्युं धनिनं घनेन एकश्चरन्नुपशाकेभिरिन्द्र।
धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः॥४॥

वधीः। हि। दस्युम्। धनिनम्। घनेन। एकः। चरन्। उपऽशाकेभिः। इन्द्र। धनोः। अधि। विषुणक्। ते। वि। आयन्। अयज्वानः। सनकाः। प्रऽइतिम्। ईयुः॥४॥

पदार्थः-(**वधीः**) हिन्धि। अत्र लोडर्थे लुङडभावश्च। (**हि**) निश्चयार्थे (**दस्युम्**) बलान्यायाभ्यां परस्वापहर्त्तारम् (**धनिनम्**) धार्मिकं धनाढ्यम्। (**घनेन**) वज्राख्येन शस्त्रेण। **मूर्तौ घनः।** (अष्टा०३.३.७७) इति घनशब्दो निपातितस्तेन काठिन्यादिगुणयुक्तो हि शस्त्रविशेषो गृह्यते। अत्र **ईषाअक्षादिषु च छन्दसि प्रकृतिभावमात्रं वक्तव्यम्।** (अष्टा०६.१.१२७) इति वार्त्तिकेन प्रकृतिभावः। अत्र सायणाचार्य्येण द्रष्टव्यमिति भाष्यकारपाठमबुध्वा वक्तव्यमित्यशुद्धः पाठो लिखितः। मूलवार्त्तिकस्यापि पाठो न बुद्धः। (**एकः**) यथैकोऽपि परमेश्वरः सूर्यलोको वा (**चरन्**) जानन् प्राप्तः सन् (**उपशाकेभिः**) उपशक्यन्ते यैः कर्मभिस्तैः। **बहुलं छन्दसि** इति भिस ऐस् न। (**इन्द्र**) ऐश्वर्ययुक्त शूरवीर (**धनोः**) धनुषो ज्यायाः (**अधि**) उपरिभावे (**विषुणक्**) वेविषत्यधर्मेण ये ते विषवस्तान् नाशयति सः। अत्र अन्तर्गतो ण्यर्थः। (**ते**) तव (**वि**) विशेषार्थे (**आयन्**) यन्ति प्राप्नुवन्ति। अत्र लडर्थे लङ्। (**अयज्वानः**) अयाक्षुस्ते यज्वानो न यज्वानोऽयज्वानः (**सनकाः**) सनन्ति सेवन्ते परपदार्थान् ये ते। अत्र **क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि।** (उणा०२.३२) इत्यनेन क्वुन् प्रत्ययः। (**प्रेतिम्**) प्रयन्ति म्रियन्ते येन तं मृत्युम् (**ईयुः**) प्राप्नुयुः। अत्र लडर्थे लिट्॥४॥

अन्वयः-हे इन्द्र शूरवीर! यथेश्वरः सूर्य्यलोकश्चोपशाकेभिरेकश्चरन् दुष्टान् हिनस्ति, तथैकाकी त्वं धनेन दस्युं वधीर्हिन्धि विनाशय विषुणक् त्वं धनोरधि बाणान् सक्त्वा दस्यून्निवार्य धनिनं वर्द्धय। यथेश्वरस्य निन्दकाः सूर्यलोकस्य शत्रवो धनेन सामर्थ्येन किरणसमूहेन वा नाशं व्यायन् वियन्ति तथा हिते तवायज्वानः सनकाः प्रेतिमीयुर्यथा प्राप्नुयुस्तथैव यतस्व॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरो जातशत्रुः सूर्यलोकोऽपि निवृतवृत्रो भवति, तथैव मनुष्यैर्दस्यून् हत्वा धनिनो ह्यवित्वाऽजातशत्रुभिर्भवितव्यमिति॥४॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्ययुक्त शूरवीर! एकाकी आप जैसे ईश्वर वा सूर्यलोक (**उपशाकेभिः**) सामर्थ्यरूपी कर्मों से (**एकः**) एक ही (**चरन्**) जानता हुआ दुष्टों को मारता है, वैसे (**घनेन**) वज्ररूपी शस्त्र से (**दस्युम्**) बल और अन्याय से दूसरे के धन को हरने वाले दुष्ट को (**वधीः**) नाश कीजिये और (**विषुणक्**) अधर्म से धर्मात्माओं को दुःख देने वालों के नाश करने वाले आप (**धनोः**) धनुष् के (**अधि**) ऊपर बाणों को निकाल कर दुष्टों को निवारण करके (**धनिनम्**) धार्मिक धनाढ्य की वृद्धि कीजिये। जैसे

ईश्वर की निन्दा करने वाले तथा सूर्यलोक के शत्रु मेघावयव **(घनेन)** सामर्थ्य वा किरणसमूह से नाश को **(व्यायन्)** प्राप्त होते हैं, वैसे ही निश्चय करके **(ते)** तुम्हारे **(अयज्वानः)** यज्ञ को न करने तथा **(सनकाः)** अधर्म से औरों के पदार्थों का सेवन करने वाले मनुष्य **(प्रेतिम्)** मरण को **(ईयुः)** प्राप्त हों, वैसा यत्न कीजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर शत्रुओं से रहित तथा सूर्यलोक भी मेघ से निवृत्त हो जाता है, वैसे ही मनुष्यों को चोर, डाकू वा शत्रुओं को मार और धनवाले धर्मात्माओं की रक्षा करके शत्रुओं से रहित होना अवश्य चाहिये॥४॥

अथेन्द्रशब्देन शूरवीरकृत्यमुपदिश्यते॥

अब अगले मन्त्र में इन्द्रशब्द से शूरवीर के काम का उपदेश किया है॥

परा॑ चिच्छी॒र्षा व॑वृजु॒स्त इ॒न्द्रायं॑ज्वानो॒ यज्व॑भि॒: स्पर्ध॑माना:।
प्र यद्दि॒वो ह॑रिव: स्थातरुग्र॒ निर॑व्र॒ताँ अ॑धमो॒ रोद॑स्यो:॥५॥ १॥

परा॑। चि॒त्। शी॒र्षा। व॒वृ॒जु॒:। ते। इ॒न्द्र॒। अय॑ज्वान:। यज्व॑ऽभिः। स्पर्ध॑माना:। प्र। यत्। दि॒व:। ह॒रि॒ऽव॒:। स्था॒त॒:। उ॒ग्र॒। नि:। अ॒व्र॒तान्। अ॒ध॒म॒:। रोद॑स्यो:॥५॥

पदार्थः-(**परा**) दूरीकरणे (**चित्**) उपमायाम् (**शीर्षा**) शिरांसि। अत्र **अचि शीर्षः।** (अष्टा०६.१.६२) इति शीर्षादेशः। **शेश्छन्दसि ब०** इति शेर्लोपः। (**ववृक्षुः**) त्यक्तवन्तः (**ते**) वक्ष्यमाणाः (**इन्द्र**) शत्रुविदारयितः शूरवीर (**अयज्वानः**) यज्ञानुष्ठानं त्यक्तवन्तः (**यज्वभिः**) कृतयज्ञानुष्ठानैः सह (**स्पर्द्धमानाः**) ईर्ष्यकाः (**प्र**) प्रकृष्टार्थे (**यत्**) यस्मात् (**दिवः**) प्रकाशस्य (**हरिवः**) हरयोऽश्वहस्त्यादयः प्रशस्ताः सेनासाधका विद्यन्ते यस्य स हरिवाँस्तत्सम्बुद्धौ (**स्थातः**) यो युद्धे तिष्ठतीति तत्सम्बुद्धौ (**उग्र**) दुष्टान् प्रति तीक्ष्णव्रत। (**निः**) नितराम् (**अव्रतान्**) व्रतेन सत्याचरणेन हीनान् मिथ्यावादिनो दुष्टान्। (**अधमः**) शब्दैः शिक्षय (**रोदस्योः**) द्यावापृथिव्योः। **रोदस्योरिति द्यावापृथिव्योर्नामसु पठितम्।** (निघं०३.३०)॥५॥

अन्वयः-हे हरिवो युद्धं प्रति प्रस्थातरुग्रेन्द्र यथा प्रस्थातोग्रेन्द्र! सूर्यलोको रोदस्योः प्रकाशाकर्षणे कुर्वन् वृत्रावयवाँश्छित्वा पराधमति तथैव त्वं यद्येऽयज्वानो यज्वभिः स्पर्द्धमानाः सन्ति, ते यथा शीर्षा शिरांसि ववृजुस्त्यक्तवन्तो भवेयुस्तानव्रताँस्त्वं निरधमो नितरां शिक्षय दण्डय॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्यो दिनं पृथिव्यादिकं प्रकाशं च धृत्वा वृत्रान्धकारं निवार्य वृष्ट्या सर्वान् प्राणिनः सुखयति, तथैव मनुष्यैः सद्गुणान् धृत्वाऽसद्गुणाँस्त्यक्त्वाऽधार्मिकान् दण्डयित्वा विद्यासुशिक्षाधर्मोपदेशवर्षणेन सर्वान् प्राणिनः सुखयित्वा सत्यराज्यं प्रचारणीयमिति॥५॥

पदार्थः-हे **(हरिवः)** प्रशंसित सेना आदि के साधन घोड़े हाथियों से युक्त **(प्रस्थातः)** युद्ध में स्थित होने और **(उग्र)** दुष्टों के प्रति तीक्ष्णव्रत धारण करने वाले **(इन्द्र)** सेनापति! **(चित्)** जैसे हरण आकर्षण गुण युक्त किरणवान् युद्ध में स्थित होने और दुष्टों को अत्यन्त ताप देने वाला सूर्यलोक **(रोदस्योः)** अन्तरिक्ष और पृथिवी का प्रकाश और आकर्षण करता हुआ मेघ के अवयवों को छिन्न-भिन्न कर उसका निवारण करता है, वैसे आप **(यत्)** जो **(अयज्वानः)** यज्ञ के न करने वाले **(यज्वभिः)** यज्ञ करने वालों से **(स्पर्द्धमानाः)** ईर्षा करते हैं, वे जैसे **(शीर्षाः)** अपने शिरों को **(ते)** तुम्हारे सकाश से **(ववृजुः)** छोड़ने वाले हों, वैसे उन **(अव्रतान्)** सत्याचरण आदि व्रतों से रहित मनुष्यों को **(निरधमः)** अच्छे प्रकार दण्ड देकर शिक्षा कीजिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य दिन और पृथिवी और प्रकाश को धारण तथा मेघ रूप अन्धकार को निवारण करके वृष्टि द्वारा सब प्राणियों को सुख युक्त करता है, वैसे ही मनुष्यों को उत्तम-उत्तम गुणों का धारण खोटे गुणों को छोड़ धार्मिकों की रक्षा और अधर्म्मी दुष्ट मनुष्यों को दण्ड देकर विद्या, उत्तम शिक्षा और धर्मोपदेश की वर्षा से सब प्राणियों को सुख देके सत्य के राज्य का प्रचार करना चाहिये॥५॥

पुनस्तस्य किं कृत्यमित्युपदिश्यते॥

फिर उसका क्या कार्य है, यह उपदेश अगले मन्त्र में किया है॥

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः।
वृषायुधो न वध्र्यो निरष्टाः प्रवद्भिरिन्द्रात्चितयन्त आयन्॥६॥

अयुयुत्सन्। अनवद्यस्य। सेनाम्। अयातयन्त। क्षितयः। नवऽग्वाः। वृषऽयुधः। न। वध्र्यः। निःऽअष्टाः। प्रवत्ऽभिः। इन्द्रात्। चितयन्तः। आयन्॥६॥

पदार्थः-**(अयुयुत्सन्)** युद्धेच्छां कुर्य्युः। अत्र लिडर्थे लङ्। व्यत्ययेन परस्मैपदं च **(अनवद्यस्य)** सद्गुणैः प्रशंसनीयस्य सेनाध्यक्षस्य **(सेनाम्)** चतुरङ्गिणीं सम्पाद्य **(अपातयन्त)** सुशिक्षया प्रयत्नवतीं संस्कुर्वन्तु **(क्षितयः)** क्षियन्ति क्षयं प्राप्नुवन्ति निवसन्ति ये ते मनुष्याः। **क्षितय इति मनुष्यनामसु पठितम्।** (निघं०२.३) **क्षि निवासगत्योरर्थयोर्वर्त्तमानाद् धातोः क्तिच् क्तौ च संज्ञायाम्।** (अष्टा०३.३.१७४) अनेन क्तिच्। **(नवग्वाः)** नवीनशिक्षाविद्याप्राप्तः प्रापयितारश्च। **नवगतयो नवनीतगतयो वा।** (निरु०११.१९) **(वृषायुधः)** ये वृषेण वीर्यवता शूरवीरेण सह युध्यन्ते ते। वृषोपपदे **क्विप् च** इति क्विप्। **अन्येषामपि दृश्यते** इति दीर्घः। **(न)** इव **(वध्र्यः)** ये वध्यन्ते निर्वीर्या नपुंसका वीर्य्यहीनास्ते **(निरष्टाः)** ये नितरां अश्यन्ते व्याप्यन्ते शत्रुभिर्बलेन ते **(प्रवद्भिः)** ये नीचमार्गैः प्रवन्ते प्लवन्ते तैः **(इन्द्रात्)** शूरवीरात् **(चितयन्तः)** धनुर्विद्यया प्रहारादिकं संजानन्तः **(आयन्)** ईयुः। अत्र लिडर्थे लङ्॥६॥

अन्वयः-हे नवग्वा वृषायुधश्चितयन्तः क्षितयो मानुषा! भवन्तो यस्यानवद्यस्य सेनामयातयन्त दुष्टैः शत्रुभिः सहाययुत्सन् यस्मादिन्द्रात् सेनाध्यक्षात् वध्रयो नेव शत्रवश्चितयन्तो निरष्टाः सन्तः प्रवद्भिर्मार्गैरायन् पलायेरँस्तं सेनाध्यक्षं स्वीकुर्वन्तु॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये मानवाः शरीरात्मबलयुक्तं शूरवीरं धार्मिकं मनुष्यं सेनाध्यक्षं कृत्वा सर्वथोत्कृष्टां सेनां सम्पाद्य यदा दुष्टैः सह युद्धः कुर्वन्ति, तदा यथा सिंहस्य समीपादजा वीरस्य समीपाद्भीरवः सूर्यस्य प्रतापाद् वृत्रावयवा नश्यन्ति, तथा तेषां शत्रवो नष्टसुखादर्शितपृष्ठा इतस्ततः पलायन्ते। तस्मात्सर्वैमनुष्यरीदृशं सामर्थ्यं सम्पाद्य राज्यं भोक्तव्यमिति॥६॥

पदार्थः-हे **(नवग्वाः)** नवीन-नवीन शिक्षा वा विद्या के प्राप्त करने और कराने **(वृषायुधः)** अतिप्रबल शत्रुओं के साथ युद्ध करने **(चितयन्तः)** युद्ध विद्या से युक्त **(क्षितयः)** मनुष्य लोगो! आप **(अनवद्यस्य)** जिस उत्तम गुणों से प्रशंसनीय सेनाध्यक्ष की **(सेनाम्)** सेना को **(अयातयन्त)** उत्तम शिक्षा से यत्नवाली करके शत्रुओं के साथ **(अययुत्सन्)** युद्ध की इच्छा करो, जिस **(इन्द्रात्)** शूरवीर सेनाध्यक्ष से **(वध्रयः)** निर्बल नपुंसकों के **(न)** समान शत्रुलोग **(निरष्टाः)** दूर-दूर भागते हुए **(प्रवद्भिः)** पलायन योग्य मार्गों से **(आयन्)** निकल जावें, उस पुरुष को सेनापति कीजिये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य शरीर और आत्मबल वाले शूरवीर धार्मिक मनुष्य को सेनाध्यक्ष और सर्वथा उत्तम सेना को सम्पादन करके जब दुष्टों के साथ युद्ध करते हैं, तभी जैसे सिंह के समीप बकरी और वीर मनुष्य के समीप से भीरु मनुष्य और सूर्य के ताप से मेघ के अवयव नष्ट होते हैं, वैसे ही उक्त वीरों के समीप से शत्रु लोग सुख से रहित और पीठ दिखाकर इधर-उधर भाग जाते हैं। इससे सब मनुष्यों को इस प्रकार का सामर्थ्य सम्पादन करके राज्य का भोग सदा करना चाहिये॥६॥

पुनरिन्द्रशब्देन शूरवीरकर्त्तव्यमुपदिश्यते॥

फिर अगले मन्त्र में इन्द्र शब्द से शूरवीर के काम का उपदेश किया है॥

त्वमे॒तान् रु॑द॒तो जक्ष॑त॒श्चायो॑धयो॒ रज॑स इन्द्र पा॒रे।
अव॑दहो दि॒व आ दस्यु॑मु॒च्चा प्र सु॑न्व॒तः स्तु॑व॒तः शंस॑मावः॥७॥

त्वम्। ए॒तान। रु॒द॒तः। जक्ष॑तः। च॒। अयो॑धयः। रज॑सः। इ॒न्द्र॒। पा॒रे॒। अव॑। अ॒द॒हः॒। दि॒वः। आ। दस्यु॑म्। उ॒च्चा। प्र। सु॒न्व॒तः। स्तु॒व॒तः। शंस॑म्। आ॒व॒रिति॑ आवः॥१७॥

पदार्थः-**(त्वम्)** युद्धविद्याविचक्षणः **(एतान्)** परपीडाप्रदान् दुष्टान् शत्रून् **(रुदतः)** रोदनं कुर्वतः **(जक्षतः)** भक्षणसहने कुर्वतः **(च)** समुच्चये **(अयोधयः)** सम्यक् योधय। अत्र लोडर्थे लङ्। **(रजसः)** पृथिवीलोकस्य। **लोका रजांस्युच्यन्ते।** (निरु०४.१९) **(इन्द्र)** राज्यैश्वर्ययुक्त **(पारे)** परभागे **(अव)**

अर्वागर्थे (**अदहः**) दह (**दिवः**) सुशिक्षयेश्वरधर्मशिल्पयुद्धविद्यापरोपकारादिप्रकाशात् (**आ**) समन्तात् (**दस्युम्**) बलादन्यायेन परपदार्थहर्त्तारम् (**उच्चा**) उच्चानि सुखानि कर्माणि वा (**प्र**) प्रकृष्टार्थे (**सुन्वतः**) निष्पादयतः (**स्तुवतः**) गुणस्तुतिं कुर्वतः (**शंसम्**) शंसति येन शास्त्रबोधेन तम् (**आवः**) रक्ष प्राप्नुहि वा॥७॥

अन्वयः-हे इन्द्र सेनैश्वर्ययुक्त सेनाध्यक्ष! त्वमेतान् दुष्टकर्मकारिणो रुदतो रोदनं कुर्वतो शत्रून् वा दस्युं च स्वकीयभृत्यान् जक्षतो बहुविधभोजनादिप्रापितान् कारितहर्षांश्चायोधयः। एतान् धर्मशत्रून् रजसः पारे कृत्वाऽवादहः। एवं दिव उच्चोत्कृष्टानि कर्माणि प्रसुन्वत आस्तुवतस्तेषां शंसं च प्रावः॥७॥

भावार्थः-मनुष्यैर्युद्धार्थं विविधं कर्म कर्त्तव्यम्। प्रथमं स्वसेनास्थानां पुष्टिहर्षकरणं दुष्टानां बलोत्साहभङ्गनसम्पादनं नित्यं कार्यम्। यथा सूर्यः स्वकिरणैः सर्वान् प्रकाश्य वृत्रान्धकारनिवारणाय प्रवर्त्तते, तथा सर्वदोत्तमकर्मगुणप्रकाशनाय दुष्टकर्मदोषनिवारणाय च नित्यं प्रयत्नः कर्त्तव्य इति॥७॥

पदार्थः-हे (**इन्द्र**) सेना के ऐश्वर्य से युक्त सेनाध्यक्ष! (**त्वम्**) आप (**एतान्**) इन दूसरों को पीड़ा देने दुष्टकर्म करने वाले (**रुदतः**) रोते हुए जीवों (**च**) और (**दस्युम्**) डाकुओं को दण्ड दीजिये तथा अपने भृत्यों को (**जक्षतः**) अनेक प्रकार के भोजन आदि देते हुए आनन्द करने वाले मनुष्यों को उनके साथ (**अयोधयः**) अच्छे प्रकार युद्ध कराइये और इन धर्म के शत्रुओं को (**रजसः**) पृथिवी लोक के (**पारे**) परभाग में करके (**अवादहः**) भस्म कीजिये। इसी प्रकार (**दिवः**) उत्तम शिक्षा से ईश्वर, धर्म, शिल्प, युद्धविद्या और परोपकार आदि के प्रकाशन से (**उच्चा**) उत्तम-उत्तम कर्म वा सुखों को (**प्रसुन्वतः**) सिद्ध करने तथा (**आस्तुवतः**) गुणस्तुति करने वालों की (**प्रावः**) रक्षा कीजिये और उनकी (**शंसम्**) प्रशंसा को प्राप्त हूजिये॥७॥

भावार्थः-मनुष्यों को युद्ध के लिये अनेक प्रकार के कर्म करने अर्थात् पहिले अपनी सेना के मनुष्यों की पुष्टि, आनन्द तथा दुष्टों का दुर्बलपन वा उत्साह भङ्ग नित्य करना चाहिये। जैसे सूर्य अपनी किरणों से सबको प्रकाशित करके मेघ के अन्धकार निवारण के लिये प्रवृत्त होता है, वैसे सब काल में उत्तम कर्म वा गुणों के प्रकाश और दुष्ट कर्म के दोषों की निवृत्ति के लिये नित्य यत्न करना चाहिये॥७॥

पुनरिन्द्रकृत्यमुपदिश्यते॥

फिर अगले मन्त्र में इन्द्र के कृत्य का उपदेश किया है॥

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात् सूर्येण॥८॥

चक्राणासः। परिऽनहम्। पृथिव्याः। हिरण्येन। मणिना। शुम्भमानाः। न। हिन्वानासः। तितिरुः। ते। इन्द्रम्। परि। स्पशः। अदधात्। सूर्येण॥८॥

पदार्थः-(**चक्राणासः**) भृशं युद्धं कुर्वाणाः (**परीणहम्**) परितस्सर्वतः प्रबन्धनं सुखाच्छादकत्वेन व्यापनं वा। **णह बन्धन** इत्यस्मात् **क्विप् च** इति क्विप् **नहिवृति०** (अष्टा०६.३.११६) अनेनादेदीर्घः। (**पृथिव्याः**) भूमे राज्यस्य (**हिरण्येन**) न्यायप्रकाशेन सुवर्णादिधातुमयेन वा (**मणिना**) आभूषणेन (**शुम्भमानाः**) शोभायुक्ताः। (**न**) निषेधार्थे (**हिन्वानासः**) सुखं सम्पादयन्तः (**तितिरुः**) प्लवन्त उल्लङ्घयन्ति। अत्र लडर्थे लिट्। (**ते**) शत्रवो दुष्टा मनुष्याः (**इन्द्रम्**) सबलं सेनाध्यक्षम् (**परि**) सर्वतो भावे (**स्पशः**) ये स्पशन्ति ते। अत्र क्विप् प्र०। (**अदधात्**) दधाति। अत्र लडर्थे लङ्। (**सूर्येण**) सवितृमण्डलेनेव॥८॥

अन्वयः-यथा यान् सूर्य्यः पर्य्यदधात् परिदधाति ते वृत्रावयवा घनाः सूर्यस्य प्रकाशं स्पशो बाधमानाः पृथिव्याः परीणहं चक्राणासो हिरण्येन मणिनेव सूर्य्येण शुम्भमाना हिन्वानास इन्द्रं न तितिरुर्न प्लवन्ते नोल्लङ्घयन्ति तथा स्वसेनाध्यक्षादीञ्जनाँञ्छत्रवो बाधितुं समर्था यथा न स्युस्तथा सर्वैरनुष्ठैयम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा परमात्मना सूर्येण सह प्रकाशाकर्षणादीनि कर्माणि निबद्धानि तथैव विद्याधर्मन्यायशूरवीरसेनादिसामग्रीप्राप्तेन पुरुषेण सह पृथिवीराज्यं नियोजितमिति॥८॥

पदार्थः-जैसे जिनको सूर्य्य (**पर्य्यदधात्**) सब ओर से धारण करता है (**ते**) वे मेघ के अवयव बादल सूर्य के प्रकाश को (**स्पशः**) बाँधने वाले (**पृथिव्याः**) पृथिवी को (**परीणहम्**) चौतर्फी घेरे हुए के समान (**चक्राणासः**) युद्ध करते हुए (**हिरण्येन**) प्रकाशरूप (**मणिना**) मणि से जैसे (**सूर्य्येण**) सूर्य्य के तेज से (**शुम्भमानाः**) शोभायमान (**हिन्वानासः**) सुखों को सम्पादन करते हुए (**इन्द्रम्**) सूर्यलोक को (**न**) नहीं (**तितिरुः**) उल्लङ्घन कर सकते हैं, वैसे ही सेनाध्यक्ष अपने धार्मिक शूरवीर आदि को शत्रुजन जैसे जीतने को समर्थ न हों, वैसा प्रयत्न सब लोग किया करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे परमेश्वर ने सूर्य के साथ प्रकाश आकर्षणादि कर्मों का निबन्धन किया है, वैसे ही विद्या, धर्म, न्याय, शूरवीरों की सेनादि सामग्री को प्राप्त हुए पुरुष के साथ इस पृथिवी के राज्य को नियुक्त किया है॥८॥

पुनरिन्द्रस्य कृत्यमुपदिश्यते॥

फिर अगले मन्त्र में इन्द्र के कृत्य का उपदेश किया है॥

परि॒ यदि॑न्द्र॒ रोद॑सी उ॒भे अबु॑भोजीर्महि॒ना वि॒श्वत॑: सीम्।
अम॑न्यमानाँ अ॒भि मन्य॑मानै॒र्निर्ब्र॒ह्मभि॑रधम॒ो दस्यु॑मिन्द्र॥९॥

परि॑। यत्। इ॒न्द्र॒। रोद॑सी॒ इति॑। उ॒भे इति॑। अबु॑भोजीः। म॒हि॒ना। वि॒श्वत॑:। सी॒म्। अम॑न्यमानान्। अ॒भि। मन्य॑मानैः। निः। ब्र॒ह्मऽभि॑:। अ॒ध॒म॒:। दस्यु॑म्। इ॒न्द्र॒॥९॥

पदार्थः-(**परि**) सर्वतो भावे (**यत्**) यस्मात् (**इन्द्र**) ऐश्वर्ययोजक राजन् (**रोदसी**) भूमिप्रकाशौ (**उभे**) द्वे (**अबुभोजीः**) आकर्षणेन न्यायेन वा पालयसि पालयति वा। अत्र **भुज पालनाभ्यवहारयो**र्लडर्थे लङि सिपि **बहुलं छन्दसि** इति शपः स्थान आदिष्टस्य श्नमः स्थाने श्लुः **श्लौ** इति द्वित्वम् **बहुलं छन्दसि** इति इडागमश्च। (**महिना**) महिम्ना। अत्र **छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वर** इति मलोपः। (**विश्वतः**) सर्वतः (**सीम्**) सुखप्राप्तिः। **सीमिति पदनामसु पठितम्।** (निघं०४.२) अनेन प्राप्त्यर्थो गृह्यते। **सीमिति परिग्रहार्थीयः।** (निरु०१.७) (**अमन्यमानान्**) अज्ञानहठाग्रहयुक्तान् सूर्य्यप्रकाशनिरोधकान् मेघावयवान् वा (**अभि**) आभिमुख्ये (**मन्यमानैः**) विद्यार्जवयुक्तैर्दुराग्रहरहितैर्मनुष्यैर्ज्ञानसम्पादकैः किरणैर्वा (**निः**) सातत्ये (**ब्रह्मभिः**) वेदैर्ब्रह्मविद्भिर्ब्राह्मणैर्वा। **ब्रह्म हि ब्राह्मणः।** (शत०ब्रा०५.१.१.११) (**अधमः**) शिक्षय अग्निना संयोजयति वा। लोडर्थे लडर्थे वा लङ्। (**दस्युम्**) दुष्टकर्मणा सह वर्त्तमानां परद्रोहिणं परस्वहर्त्तारं चोरं शत्रुं वा (**इन्द्र**) राज्यैश्वर्ययुक्त सेनाध्यक्ष शूरवीर मनुष्य॥९॥

अन्वयः-हे इन्द्र! त्वं यथेन्द्रः सूर्यलोको महिना महिम्नोभे रोदसी सीं विश्वतः पर्युबुभोजीः। मन्यमानैर्ब्रह्मभिर्बृहत्तमैः किरणैर्दस्युं वृत्रं मेघममन्यमानान्मेघावयवान् घनान् यद्यस्मादभिनिरधमः। अभितो नितरां स्वतापाग्नियुक्तान् कृत्वा निवारयति तथा विश्वतो महिम्ना सीमुभे रोदसी पर्यबुभोजीः सर्वतो भुग्धि। एवं च हे इन्द्र! मन्यमानैर्ब्रह्मभिरमन्यमानान् मनुष्यान् दस्युं दुष्टपुरुषं चाभिनिरधम आभिमुख्यतया शिक्षय॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यलोकः सर्वान् पृथिव्यादिमूर्तिमतो लोकान् प्रकाश्याकर्षणेन धृत्वा पालको भूत्वा वृत्ररात्र्यन्धकारान्निवारयति, तथैव हे मनुष्याः! भवन्तः सुशिक्षितैर्विद्वद्भिर्मूर्खाणां मूढतां निवार्य दुष्टशत्रून् शिक्षित्वा महद्राज्यसुखं नित्यं भुञ्जीरन्निति॥९॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्य्य का योग करने वाले राजन्! आपको योग्य है कि जैसे सूर्यलोक (**महिना**) अपनी महिमा से (**उभे**) दोनों (**रोदसी**) प्रकाश और भूमि को (**सीम्**) जीवों के सुख की प्राप्ति के लिये (**विश्वतः**) सब प्रकार आकर्षण से पालन करता और (**मन्यमानैः**) ज्ञानसम्पादक (**ब्रह्मभिः**) बड़े आकर्षणादि बलयुक्त किरणों से (**दस्युम्**) मेघ और (**अमन्यमानान्**) सूर्य्य प्रकाश के रोकने वाले मेघ के अवयवों को (**निरधमः**) चारों ओर से अपने तापरूप अग्नि करके निवारण करता है, वैसे सब प्रकार अपनी महिमा से प्राणियों के सुख के लिये (**उभे**) दोनों (**रोदसी**) प्रकाश और पृथिवी का (**पर्य्यबुभोजीः**) भोग कीजिये। इसी प्रकार हे (**इन्द्र**) राज्य के ऐश्वर्य्य से युक्त सेनाध्यक्ष शूरवीर पुरुष! आप (**मन्यमानैः**) विद्या की नम्रता से युक्त हठ दुराग्रह रहित (**ब्रह्मभिः**) वेद के जानने वाले विद्वानों से (**अमन्यमानान्**) अज्ञानी दुराग्रही मनुष्यों को (**अभिनिरधमः**) साक्षात्कार शिक्षा कराया कीजिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्यलोक सब पृथिव्यादि मूर्त्तिमान् लोकों का प्रकाश, आकर्षण से धारण और पालन करने वाला होकर मेघ और रात्रि के अन्धकार को निवारण

करता है, वैसे ही हे मनुष्यो! आप लोग उत्तम शिक्षित विद्वानों से मूर्खों की मूढ़ता छुड़ा और दुष्ट शत्रुओं को शिक्षा देकर बड़े राज्य के सुख का भोग नित्य कीजिये॥९॥

पुनरिन्द्रकर्माण्युपदिश्यन्ते॥

फिर अगले मन्त्र में इन्द्र के कर्मों का उपदेश किया है॥

न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन्।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत्॥१०॥२॥

न। ये। दिवः। पृथिव्याः। अन्तम्। आपुः। न। मायाभिः। धनऽदाम्। परिऽअभूवन्। युजम्। वज्रम्। वृषभः। चक्रे। इन्द्रः। निः। ज्योतिषा। तमसः। गाः। अधुक्षत्॥१०॥

पदार्थः-(**न**) निषेधार्थे (**ये**) मेघावयवघनवद्दस्स्वादयः[१७] शत्रवः (**दिवः**) सूर्यप्रकाशस्येव न्यायबलपराक्रमदीप्तेः (**पृथिव्याः**) पृथिवीलोकस्यान्तरिक्षस्येव पृथिवीराज्यस्य। **पृथिवीत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३) **पदनामसु च।** (निघं०५.३) अनेन सुखप्राप्तिहेतुसार्वभौमराज्यं गृह्यते। (**अन्तम्**) सीमानम् (**आपुः**) प्राप्नुवन्ति। अत्र लडर्थे लिट्। (**न**) निषेधार्थे (**मायाभिः**) गर्जनान्धकारविद्युदादिवत्कपटधूर्त्तताधर्मादिभिः (**धनदाम्**) वृष्टिवद्राजनीतिम् (**पर्य्यभूवन्**) परितस्सर्वतस्तिरकुर्वन्ति (**युजम्**) यो युज्यते तम्। अत्र क्विप् प्र० (**वज्रम्**) छेदकत्वादिगुणयुक्तं किरणविद्युदाख्यादिशस्त्रादिकम्। **वज्र इति वज्रनामसु पठितम्।** (निघं०२.२०) (**वृषभः**) जलवद्वर्षयति शस्त्रसमूहम् (**चक्रे**) करोति। अत्र लडर्थे लिट्। (**इन्द्रः**) सूर्यलोकसदृक् शूरवीरसभाध्यक्षो राजा (**निः**) नितराम् (**ज्योतिषा**) प्रकाशवद्विद्यान्यायादिसद्गुणप्रकाशेन (**तमसः**) अन्धकारवदविद्याछलाधर्मव्यवहारस्य (**गाः**) पृथिवी इव मन आदीन्द्रियाणि (**अधुक्षत्**) प्रपिपूर्द्धि। अत्र लोडर्थे लुङ्॥१०॥

अन्वयः-हे सभेश! त्वं यथाऽस्य वृत्रस्य ये घनादयोऽवयवा दिवः सूर्य्यप्रकाशस्य पृथिव्या अन्तरिक्षस्य चान्तं नापुर्मायाभिर्धनदां न पर्यभूवन् तानुपरि वृषभ इन्द्रो युजं वज्रं प्रक्षिप्य ज्योतिषा तमस आवरणं निश्चक्रे गा अधुक्षत् तथा शत्रुषु वर्त्तस्व॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सूर्यस्य स्वभावप्रकाशसदृशानि कर्माणि कृत्वा सर्वशत्रवान्यायाऽन्धकारं विनाश्य धर्मेण राज्यं सेवनीयम्। न हि मायाविनां कदाचित् स्थिरं राज्यं जायते तस्मात् स्वयममायाविभिर्विद्वद्भिः शत्रुप्रयुक्तां मायां निवार्य्य राज्यकरणायोद्यतैर्भवितव्यमिति॥१०॥

---

१७. अन्वये, आर्य भाषायाः पदार्थे च 'दस्स्वादयः शत्रवः' अस्यार्थः स्खलितः। सं०

पदार्थः-हे सभा के स्वामी! आप जैसे इस मेघ के **(ये)** जो बादलादि अवयव **(दिवः)** सूर्य के प्रकाश और **(पृथिव्याः)** अन्तरिक्ष की **(अन्तम्)** मर्यादा को **(नापुः)** नहीं प्राप्त होते **(मायाभिः)** अपनी गर्जना अन्धकार और बिजली आदि माया से **(धनदाम्)** पृथिवी का **(न)** **(पर्यभूवन्)** अच्छे प्रकार आच्छादन नहीं कर सकते हैं, उन पर **(वृषभः)** वृष्टिकर्त्ता (**इन्द्रः**) छेदन करनेहारा सूर्य **(युजम्)** प्रहार करने योग्य **(वज्रम्)** किरण समूह को फेंक के **(ज्योतिषा)** अपने तेज प्रकाश से **(तमसः)** अन्धेरे को **(निश्चक्रे)** निकाल देता और **(गाः)** पृथिवी लोकों को वर्षा से **(अधुक्षत्)** पूर्ण कर देता है, वैसे जो शत्रुजन न्याय के प्रकाश और भूमि के राज्य के अन्त को न पावें, धन देने वाली राजनीति का नाश न कर सकें, उन वैरियों पर अपनी प्रभुता विद्यादान से अविद्या की निवृत्ति और प्रजा को सुखों से पूर्ण किया कीजिये॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि सूर्य के तेजरूप स्वभाव और प्रकाश के सदृश कर्म कर और सब शत्रुओं के अन्यायरूप अन्धकार का नाश करके धर्म से राज्य का सेवन करें, क्योंकि छली कपटी लोगों का राज्य स्थिर कभी नहीं होता। इससे सबको छलादि दोष रहित विद्वान् होके शत्रुओं की माया में न फँस के राज्य का पालन करने के लिये अवश्य उद्योग करना चाहिये॥१॥

पुनस्तस्येन्द्रस्य कृत्यमुपदिश्यते॥

फिर अगले मन्त्र में इन्द्र के कर्मों का उपदेश किया है॥

अनु॑ स्व॒धाम॑क्षर॒न्नापो॑ अ॒स्यार्वर्धत॒ मध्य॒ आ ना॒व्या॑नाम्।
स॒ध्री॒चीने॑न॒ मन॑सा॒ तमिन्द्र॒ ओजि॑ष्ठेन॒ हन्म॑नाहन्न॒भि द्यून्॥ ११॥

अनु॑। स्व॒धाम्। अ॒क्ष॒र॒न्। आपः॑। अ॒स्य॒। अर्व॑र्धत। मध्ये॑। आ। ना॒व्या॑नाम्। स॒ध्री॒चीने॑न। मन॑सा। तम्। इन्द्रः॑। ओजि॑ष्ठेन। हन्म॑ना। अ॒हन्। अ॒भि। द्यून्॥ ११॥

पदार्थः-(**अनु**) वीप्सायाम् **(स्वधाम्)** अन्नमन्नं प्रति **(अक्षरन्)** संचलन्ति। अत्र सर्वत्र लडर्थे लङ्। **(आपः)** जलानि **(अस्य)** सूर्यस्य **(अवर्धत)** वर्धते **(मध्ये)** **(आ)** समन्तात् **(नाव्यानाम्)** नावा तार्य्याणां नदी तडागसमुद्राणाम्। **नौवयोधर्म०** (अष्टा०४.४.९१) इत्यादिना यत्। **(सध्रीचीनेन)** सहाञ्चति गच्छति तत्सध्र्यङ्, सध्र्यङ् एव सध्रीचीनं तेन। **सहस्य सध्रिः।** (अष्टा०६.३.९५) अनेन सध्र्यादेशः। **विभाषाऽञ्चेरदिक्स्त्रियाम्।** (अष्टा०५.४.८)[१८] **चौ।** (अष्टा०६.३.१३८) इति दीर्घत्वम्। **(मनसा)** मनोवद्वेगेन **(तम्)** वृत्रम् **(इन्द्रः)** विद्युत् **(ओजिष्ठेन)** ओजो बलं तदितिशयितं तेन। **ओज इति बलनामसु**

---

१८. इत्यनेन स्वार्थे खः प्रत्ययः।

पठितम्। (निघं०२.९) **(हन्मना)** हन्ति येन तेन। अत्र **कृतो बहुलमि**ति। **अन्येभ्योऽपि दृश्यन्त** इति करणे मनिन् प्रत्ययः। **न संयोगाद्वमन्तात्।** (अष्टा०६.४.१३७) इत्यल्लोपो न। **(अहन्)** हन्ति **(अभि)** आभिमुख्ये **(द्यून्)** दीप्तान् दिवसान्॥११॥

अन्वयः-हे सेनाधिपते! यथाऽस्य वृत्रस्य शरीरं नाव्यानां मध्ये आवर्धत यथास्य आपः सूर्य्येण छिन्ना अनुस्वधामक्षरन्। यथा चायं वृत्रः सध्रीचीनेनौजिष्ठेन हन्मना मनसाऽस्य सूर्य्यस्याभिद्यूनहन् हन्ति। यथेन्द्रो विद्युत् सध्रीचीनेनौजिष्ठेन बलेन तं हन्ति। अभिद्यून् प्रकाशान् च दर्शयति तथा नाव्यानां मध्ये नौकादिसाधनसहितं बलमावर्ध्यास्य युद्धस्य मध्ये प्राणादीनीन्द्रियाण्यनुस्वधां चालय सैन्येन तमिमं शत्रुं हिन्धि न्यायादीन् प्रकाशय च॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युता वृत्रं हत्वा निपातिता वृष्टिर्यवादिकमन्नं नदीतडागसमुद्रजलं च वर्धयति, तथैव मनुष्यैः सर्वेषां शुभगुणानां सर्वतो वर्षणेन प्रजाः सुखयित्वा शत्रून् हत्वा विद्यासद्गुणान् प्रकाश्य सदा धर्मः सेवनीय इति॥११॥

पदार्थः-हे सेना के अध्यक्ष! आप जैसे **(अस्य)** इस मेघ का शरीर **(नाव्यानाम्)** नदी, तड़ाग और समुद्रों में **(आवर्द्धत)** जैसे इस मेघ में स्थित हुए **(आपः)** जल सूर्य से छिन्न-भिन्न होकर **(अनुस्वधाम्)** अन्न- अन्न के प्रति **(अक्षरन्)** प्राप्त होते और जैसे यह मेघ **(सध्रीचीनेन)** साथ चलने वाले **(ओजिष्ठेन)** अत्यन्त बलयुक्त **(हन्मना)** हनन करने के साधन **(मनसा)** मन के सदृश वेग से इस सूर्य के **(अभिद्यून्)** प्रकाशयुक्त दिनों को **(अहन्)** अन्धकार से ढांप लेता और जैसे सूर्य के अपने साथ चलने वाले किरणसमूह के बल वा वेग से **(तम्)** उस मेघ को **(अहन्)** मारता और अपने **(अभिद्यून्)** प्रकाशयुक्त दिनों का प्रकाश करता है, वैसे नदी तड़ाग और समुद्र के बीच नौका आदि साधन के सहित अपनी सेना को बढ़ा तथा इस युद्ध में प्राण आदि सब इन्द्रियों को अन्नादि पदार्थों से पुष्ट करके अपनी सेना से **(तम्)** उस शत्रु को **(अहन्)** मारा कीजिये॥११॥

भावार्थः-इस मन्त्र में वाचक लुप्तोपमालङ्कार है। जैसे बिजुली ने मेघ मार कर पृथिवी पर गेरी हुई वृष्टि यव आदि अन्न-अन्न को बढ़ाती और नदी तड़ाग समुद्र के जल को बढ़ाती है, वैसे ही मनुष्यों को चाहिये कि सब प्रकार शुभ गुणों की वर्षा से प्रजा सुख शत्रुओं का मारण और विद्या वृद्धि से उत्तम गुणों का प्रकाश करके धर्म का सेवन सदैव करें॥११॥

पुनरिन्द्रस्य कृत्यमुपदिश्यते॥

फिर अगले मन्त्र में इन्द्र के कृत्य का उपदेश किया है॥

न्या॑विध्यदिली॒बिश॑स्य दृ॒ळ्हा वि शृ॒ङ्गि॑णमभि॒नच्छुष्ण॒मिन्द्रः॑।
याव॒त्तरो॑ मघव॒न्याव॒दोजो॒ वज्रे॑ण॒ शत्रु॑मवधीः पृत॒न्युम्॥१२॥

नि। अ॒वि॒ध्य॒त्। इ॒ली॒बिश॑स्य। दृ॒ळ्हा। वि। शृ॒ङ्गि॑णम्। अ॒भि॒न॒त्। शुष्ण॑म्। इन्द्रः॑। याव॑त्। तरः॑। म॒घ॒ऽव॒न्। याव॑त्। ओजः॑। वज्रे॑ण। श॒त्रु॒म्। अ॒व॒धीः॑। पृ॒त॒न्यु॒म्॥ १२॥

पदार्थः-(**नि**) निश्चितार्थे (**अविध्यत्**) विध्यति अत्र लडर्थे लङ्। (**इलीबिशस्य**) इलायाः पृथिव्या बिले गर्ते शेते तस्य वृत्रस्य। **इलेति पृथिवीनामसु पठितम्।** (निघं०१.१) इदमभीष्टं पदं पृषोदरादिना सिध्यति। **इलाबिशस्य इलाबिलशयस्य** (निरु०६.१९) (**दृळ्हा**) दृढानि दृंहितानि वर्द्धितानि किरणशस्त्राणि (**वि**) विशेषार्थे (**शृङ्गिणम्**) शृङ्गवदुन्नतविद्युद्गर्जनाकारणघनीभूतं मेघं (**अभिनत्**) भिनत्ति। अत्र लडर्थे लङ्। (**शुष्णम्**) शोषणकर्त्तारम् (**इन्द्रः**) विद्युत् (**यावत्**) वक्ष्यमाणम् (**तरः**) तरति येन बलेन तत्। (**इन्द्रः**) विद्युत् (**यावत्**) वक्ष्यमाणम् (**तरः**) तरति येन बलेन तत्। **तर इति बलनामसु पठितम्।** (निघं०२.९) (**मघवन्**) महाधनप्रद महाधनयुक्त वा (**यावत्**) वक्ष्यमाणम् (**ओजः**) पराक्रमः (**वज्रेण**) छेदकेन वेगयुक्तेन तापेन (**शत्रुम्**) वृत्रमिव शत्रुम् (**अवधीः**) हिन्धि। अत्र लोडर्थे लुङ्। (**पृतन्युम्**) पृतनां सेनामिच्छतीव पृतन्यतीति पृतन्युस्तम्। **कव्यध्वरपृतनस्यर्चि लोपः।** (अष्टा०७.४.३९)[१९]॥१२॥

अन्वयः-हे मघवन्! वीरस्त्वं यथेन्द्रः स्तनयित्नुरिलीबिशस्य वृत्रस्य सम्बन्धीनि दृढा दृढानि घनादीनि व्यभिनत् भिनत्ति स्वस्य यावत्तरो यावदोजोऽस्ति, तेन सह युजा वज्रेण शृङ्गिणं शुष्णं न्यविध्यन् निहन्ति पृतन्युं वृत्रमिव शत्रुमवधीर्हन्ति तथा शत्रुषु चेष्टस्व॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युद् मेघावयवान् भित्त्वा जलं वर्षयित्वा सर्वान् सुखयति, तथैव मनुष्यैः सुशिक्षितया सेनया दुष्टगुणान् दुष्टान्मनुष्याँश्चोपदेश्य प्रचण्डदण्डास्त्रवृष्टिभ्यां शत्रून्निवार्य प्रजायां सततं सुखानि वर्षणीयानीति॥१२॥

पदार्थः-हे (**मघवन्**) अत्यन्त धनदाता महाधनयुक्त वीर! आप जैसे (**इन्द्रः**) बिजुली आदि बलयुक्त सूर्य्यलोक (**इलीबिशस्य**) पृथिवी के गड्ढों में सोने वाले मेघ के सम्बन्धी (**दृळ्हा**) दृढरूप बादलादिकों को (**अभिनत्**) छिन्न-भिन्न करते और अपना (**यावत्**) जितना (**तरः**) बल और (**यावत्**) जितना (**ओजः**) पराक्रम है, उस से युक्त हुए (**वज्रेण**) किरण समूह से (**शृङ्गिणम्**) सींगों के समान ऊंचे (**शुष्णम्**) ऊपर चढ़ते हुए पदार्थों को सुखाने वाले मेघ को (**न्यविध्यत्**) नष्ट और (**पृतन्युम्**) सेना की इच्छा करते हुए (**शत्रुम्**) शत्रु के समान मेघ का (**अवधीः**) हनन करता है, वैसे शत्रुओं में चेष्टा किया करें॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुली मेघ के अवयवों को छिन्न-भिन्न और जल को वर्षा कर सबको सुखयुक्त करती है, वैसे ही सब मनुष्यों को उचित है कि उत्तम-उत्तम

---

१९. इत्यनेन पृतनाऽऽकारस्य लोपः। सं०

शिक्षायुक्त सेना से दुष्टगुण वाले दुष्ट मनुष्यों को उपदेश दे और शस्त्र-अस्त्र वृष्टि से शत्रुओं को निवारण कर प्रजा में सुखों की वृष्टि निरन्तर किया करें॥१२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन वृषभेणा पुरोऽभेत्।
सं वज्रेणासृजद् वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः॥१३॥

अभि। सिध्मः। अजिगात्। अस्य। शत्रून्। वि। तिग्मेन। वृषभेण। पुरः। अभेत्। सम्। वज्रेण। असृजत्। वृत्रम्। इन्द्रः। प्र। स्वाम्। मतिम्। अतिरत्। शाशदानः॥१३॥

पदार्थः-(**अभि**) आभिमुख्ये (**सिध्मः**) सेवते प्राप्नोति विजयं येन गुणेन सः। अत्र **षिधु गत्यामि**त्यस्मादौणादिको मक् प्रत्ययः। (**अजिगात्**) प्राप्नोति। अत्र सर्वत्र लडर्थे लङ्। **जिगातीति गतिकर्मसु पठितम्।** (निघं०२.१४) (**अस्य**) स्तनयित्नोः (**शत्रून्**) मेघावयवान् (**वि**) विशेषार्थे (**तिग्मेन**) तीक्ष्णेन तेजसा (**वृषभेण**) वृष्टिकरणोत्तमेन। **अन्येषामपि** इति दीर्घः। (**पुरः**) पुराणि (**अभेत्**) भिनत्ति (**सम्**) सम्यगर्थे (**वज्रेण**) गतिमता तेजसा (**असृजत्**) सृजति (**वृत्रम्**) मेघम् (**इन्द्रः**) सूर्य्यः (**प्र**) प्रकृष्टार्थे (**स्वाम्**) स्वकीयाम् (**मतिम्**) ज्ञापनम् (**अतिरत्**) सन्तरति प्लावयति अत्र विकरणव्यत्ययेन शः। (**शाशदानः**) अतिशयेन शीयते शातयति छिनत्ति यः सः॥१३॥

अन्वयः-यथास्य स्तनयित्नोः सिध्मो वेगस्तिग्मेन वृषभेण शत्रून् व्यजिगाद् विजिगाति। अस्य पुरो व्यभेत् पुराणि विभिनत्ति, यथाऽयं शाशदान इन्द्रो वृत्रं वज्रेण समसृजत् संसृजति संयुक्तं करोति, तथा मतिं ज्ञापिकां स्वां रीतिं प्रातिरत् प्रकृष्टतया सन्तरति, तथैवानेन सेनाध्यक्षेण भवितव्यम्॥३३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युन्मेघावयवाँस्तीक्ष्णवेगेन घनाकारं मेघं च छित्वा भूमौ निपात्य ज्ञापयति, तथैव सभासेनाध्यक्षो बुद्धिशरीरबलसेनावेगेन शत्रूँश्छित्वा शस्त्रप्रहारैर्निपात्य स्वसंमतावानयेदिति॥१३॥

पदार्थः-जैसे (**अस्य**) इस सूर्य का (**सिध्मः**) विजय प्राप्त कराने वाला वेग (**तिग्मेन**) तीक्ष्ण (**वृषभेण**) वृष्टि करने वाले तेज से (**शत्रून्**) मेघ के अवयवों को (**व्यजिगात्**) प्राप्त होता और इस मेघ के (**पुरः**) नगरों के सदृश समुदायों को (**व्यभेत्**) भेदन करता है जैसे (**शाशदानः**) अत्यन्त छेदन करने

वाली **(इन्द्रः)** बिजुली **(वृत्रम्)** मेघ को **(प्रातिरत्)** अच्छे प्रकार नीचा करती हैं वैसे ही इस सेनाध्यक्ष को होना चाहिये॥१३॥[२०]

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुली मेघ के अवयव बादलों को तीक्ष्णवेग से छिन्न-भिन्न और भूमि में घेर कर उसको वश में करती है, वैसे ही सभासेनाध्यक्ष को चाहिये कि बुद्धि, शरीरबल वा सेना के वेग से शत्रुओं को छिन्न-भिन्न और शस्त्रों के अच्छे प्रकार प्रहार से पृथिवी पर गिरा कर अपनी सम्मति में लावें॥१३॥

पुनरिन्द्रकृत्यमुपदिश्यते॥

फिर अगले मन्त्र में इन्द्र के कृत्य का उपदेश किया है॥

आव॒: कुत्स॑मिन्द्र॒ यस्मि॑ञ्चा॒कन्प्रावो॒ युध्य॑न्तं वृष॒भं दश॑द्युम्।
शफ॑च्युतो रे॒णुर्न॑क्षत॒ द्यामुच्छ्वैत्रे॒यो नृषा॒ह्याय तस्थौ॥ १४॥

आव॑:। कुत्स॑म्। इ॒न्द्र॒। यस्मि॑न्। चा॒कन्। प्र। आव॒:। युध्य॑न्तम्। वृ॒ष॒भम्। दश॑ऽद्युम्। शफ॑ऽच्युतः। रे॒णुः। न॒क्ष॒त॒। द्याम्। उत्। श्वैत्रे॒यः। नृ॒ऽसह्या॑य। त॒स्थौ॥ १४॥

पदार्थः-(**आवः**) रक्षेत्। अत्र लिङर्थे लुङ्। (**कुत्सम्**) वज्रम्। **कुत्स इति वज्रनामसु पठितम्।** (निघं०२.२०)। सायणाचार्येणात्र भ्रान्त्या कुत्सगोत्रोत्पन्नऋषिर्गृहीतोऽसम्भवादिदं व्याख्यानमशुद्धम्। (**इन्द्र**) सुशील सभाध्यक्ष (**यस्मिन्**) युद्धे (**चाकन्**) चङ्क्रन्यते काम्यत इति चाकन्। '**कनी दीप्तिकान्तिगतिषु**' इत्यस्य यङ्लुगन्तस्य क्विबन्तं रूपम्। **वाच्छन्दसि सर्वे विधयो भवन्ति** इति नुगभावः। **दीर्घोऽकित** (अष्टा०७.४.८३) इत्यभ्यासस्य दीर्घत्वं च। सायणाचार्येणेदं भ्रमतो मित्संज्ञकस्य ण्यन्तस्य च कनीधातो रूपमशुद्धं व्याख्यातम् (**प्र**) प्रकृष्टार्थे (**आवः**) प्राणिनः सुखे प्रवेशयेत्। अत्र लिङर्थे लुङ्। (**युध्यन्तम्**) युद्धे प्रवर्तमानम् (**वृषभम्**) प्रबलं (**दशद्युम्**) दशसु दिक्षु द्योतते तम् (**शफच्युतः**) शफेषु गवादिखुरचिह्नेषु च्युतः पतित आसिक्तो यः सः (**रेणुः**) धूलिः (**नक्षत**) प्राप्नोति। अत्र अडभावो व्यत्ययेनात्मनेपदम्। '**णक्ष गतौ**' इति प्राप्त्यर्थस्य रूपम् (**द्याम्**) प्रकाशसमूहं द्युलोकम् (**उत्**) उत्कृष्टार्थे (**श्वैत्रेयः**) श्वित्राया आवरणकर्त्र्या भूमेरपत्यं श्वैत्रेयः (**नृसाह्याय**) नृणां सहायाय। अत्र **अन्येषामपि** इति दीर्घः। (**तस्थौ**) तिष्ठेत्। अत्र लिङर्थे लिट्॥१४॥

अन्वयः-हे इन्द्र! भवता यथा सूर्यलोको यस्मिन् युद्धे युध्यन्तं वृषभं दशद्युं वृत्रं प्रति कुत्सं वज्रं प्रहृत्य जगत्प्रावः श्वैत्रेयो मेघः शफच्युतो रेणुश्च द्यां नक्षत प्राप्नोति नृषाह्याय चाकन्नुत्तस्थौ सुखान्यावः प्रापयति, तथा ससभेन राज्ञा प्रयतितव्यम्॥१४॥

---

२०. (**वज्रेण**) तेज से (**समसृजत्**) मिलाता है, तथा (**स्वाम्**) अपनी (**मतिम्**) ज्ञान से। (इतना पाठ छूट गया है। सं०

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यः स्वकिरणैर्वृत्रं भूमौ निपात्य सर्वान्प्राणिनः सुखयति, तथा हे सेनाध्यक्ष! त्वमपि सेनाशिक्षाशस्त्रबलेन शत्रूनस्तव्यस्तान्नधो निपात्य सततं प्रजा रक्षेति॥१४॥

पदार्थः-हे इन्द्र सभापते! जैसे सूर्यलोक **(यस्मिन्)** जिस युद्ध में **(युध्यन्तम्)** युद्ध करते हुए **(वृषभम्)** वृष्टि के कराने वाले **(दशद्युम्)** दश दिशाओं में प्रकाशमान मेघ के प्रति **(कुत्सम्)** वज्र मारके जगत् की **(प्रावः)** रक्षा करता है और **(श्वैत्रेयः)** भूमि का पुत्र मेघ **(शफच्युतः)** गौ आदि पशुओं के खुरों के चिह्नों में गिरी हुई **(रेणुः)** धूलि **(द्याम्)** प्रकाशयुक्त लोक को **(नक्षत)** प्राप्त होती है, उसको **(नृषाह्याय)** मनुष्यों के लिये **(चाकन्)** वह कान्ति वाला मेघ **(उत्तस्थौ)** उठता और सुखों को देता है, वैसे सभा सहित आपको प्रजा के पालन में यत्न करना चाहिये॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्यलोक अपनी किरणों से पृथिवी में मेघ को गिरा कर सब प्राणियों को सुखयुक्त करता है, वैसे ही हे सभाध्यक्ष! तू भी सेना, शिक्षा और शस्त्र बल से शत्रुओं को अस्त-व्यस्त कर नीचे गिरा के प्रजा की रक्षा निरन्तर किया कर॥१४॥

पुनरिन्द्रस्य किं कृत्यमित्युपदिश्यते॥

फिर इन्द्र का क्या कृत्य है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आव॒: शमं॑ वृष॒भं तुग्र्या॑सु क्षेत्रजे॒षे म॑घव॒ञ्छ्वञ्यं॒ गाम्।
ज्योक् चि॒दत्र॑ तस्थि॒वांसो॑ अक्रञ्छत्रू॒य॒तामध॑रा॒ वेद॑नाकः॥१५॥३॥

आव॑:। शम॑म्। वृ॒ष॒भम्। तुग्र्या॑सु। क्षे॒त्र॒जे॒ऽषे। म॒घ॒ऽव॒न्। श्वञ्य॑म्। गाम्। ज्योक्। चि॒त्। अत्र॑। त॒स्थि॒ऽवांस॑:। अ॒क्र॒न्। श॒त्रु॒ऽय॒ताम्। अध॑रा। वेद॑ना। अ॒क॒ इत्य॑कः॥१५॥

पदार्थः-(**आवः**) प्रापय **(शमम्)** शाम्यन्ति येन तम् **(वृषभम्)** वर्षणशीलं मेघम् **(तुग्र्यासु)** अप्सु हिंसनक्रियासु **(क्षेत्रजेषे)** क्षेत्रमन्नादिसहितं भूमिराज्यं जेषते प्रापयति तस्मै। अत्र अन्तर्गतो ण्यर्थः क्विबुपपदसमासश्च। **(मघवन्)** महाधन सभाध्यक्ष **(श्वित्र्यम्)** श्वित्रायां भूमेरावरणे साधु **(गाम्)** ज्योतिः पृथिवीं वा **(ज्योक्)** निरन्तरे **(चित्)** उपमार्थे **(अत्र)** अप्सु भूमौ वा **(तस्थिवांसः)** तिष्ठन्तः **(अक्रन्)** कुर्वन्ति। **मन्त्रे घसह्वरणश०** (अष्टा०२.४.८०) इत्यादिना च लेर्लुक्। **(शत्रूयताम्)** शत्रुरिवाचरताम् **(अधरा)** नीचानि **(वेदना)** वेदनानि। अत्रोभयत्र **शेश्छन्दसि बहुलम्** (अष्टा०६.१.७०) इति शेर्ल्लोपः। **(अकः)** करोति। अत्र लडर्थे लुङ्॥१५॥

अन्वयः-हे मघवन्! सभेश त्वं यथा सूर्यः क्षेत्रजेषे श्वित्र्यं वृषभं तुग्र्यास्वप्सु गां किरणसमूहमावः प्रवेशयति शत्रूयतां तेषां मेघावयवानामधरा नीचानि वेदना वेदनानि पापफलानि दुःखानि

तस्थिवांसः किरणाश्छेदनं ज्योगक्रन्। अत्र भूमौ निपातनमकः क्षेत्रजेषे आसु क्रियासु श्वित्र्यं वृषभं शममावः शान्तिं प्रापयति गां पृथिवीमावः दुःखान्यकश्चिदिव शत्रून्निवार्य प्रजाः सदा सुखय॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्योऽन्तरिक्षान्मेघजलं भूमौ निपात्य प्राणिभ्यः शमं सुखं ददाति, तथैव सेनाध्यक्षादयो मनुष्या दुष्टान् शत्रुन् बध्वा धार्मिकान् पालयित्वा सततं सुखानि भुञ्जीरन्निति॥१५॥

पूर्वसूक्तार्थेन सहात्र सूर्यमेघयुद्धार्थवर्णनेनोपमानोपमेयालङ्कारेण मनुष्येभ्यो युद्धविद्योपदेशार्थस्यैतत्सूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति तृतीयो वर्गस्त्रयस्त्रिंशं सूक्तं च समाप्तम्॥३३॥

पदार्थः-हे **(मघवन्)** बड़े धन के हेतु सभा के स्वामी! आप जैसे सूर्यलोक **(क्षेत्रजेषे)** अन्नादि सहित पृथिवी राज्य को प्राप्त कराने के लिये **(श्वित्र्यम्)** भूमि के ढांप लेने में कुशल **(वृषभम्)** वर्षण स्वभाव वाले मेघ के **(तुग्र्यासु)** जलों में **(गाम्)** किरण समूह को **(आवः)** प्रवेश करता हुआ **(शत्रूयताम्)** शत्रु के समान आचरण करने वाले उन मेघावयवों के **(अधरा)** नीचे के **(वेदना)** दुष्टों को वेदनारूप पापफलों को **(तस्थिवांसः)** स्थापित हुए किरणें छेदन **(ज्योक्)** निरन्तर **(अक्रन्)** करते हैं **(अत्र)** और फिर इस भूमि में वह मेघ **(अकः)** गमन करता है उसके **(चित्)** समान शत्रुओं का निवारण और प्रजा को सुख दिया कीजिये॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य अन्तरिक्ष से मेघ के जल को भूमि पर गिरा के सब प्राणियों के लिये सुख देता है, वैसे सेनाध्यक्षादि लोग दुष्ट मनुष्य शत्रुओं को बांधकर धार्मिक मनुष्यों की रक्षा करके सुखों का भोग करें और करावें॥१५॥

इस सूक्त में सूर्य मेघ के युद्धार्थ के वर्णन तथा उपमान उपमेय अलङ्कार वा मनुष्यों के युद्धविद्या के उपदेश करने से पिछले सूक्तार्थ के साथ इस सूक्तार्थ की सङ्गति जाननी चाहिये॥

यह तीसरा वर्ग और तेतीसवां सूक्त समाप्त हुआ॥३३॥

अथास्य द्वादशर्चस्य चतुस्त्रिंशस्य सूक्तस्य हिरण्यस्तूप आङ्गिरस ऋषिः। अश्विनौ देवते। १, ६ विराड् जगती। २,३,७,८, निचृज्जगती। ५,१०,११ जगती छन्दः। निषादः स्वरः। ४ भुरिक् त्रिष्टुप्। १२ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ९ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

तत्रादिमेन मन्त्रेणाश्विदृष्टान्तेन शिल्पिगुणा उपदिश्यन्ते॥

अब चौतीसवें सूक्त का आरम्भ है। उसके पहिले मन्त्र में अश्वि के दृष्टान्त से कारीगरों के गुणों का उपदेश किया है॥

त्रिश्चि॑न्नो अ॒द्या भ॑वतं नवेदसा वि॒भुर्वां॒ याम॑ उ॒त रा॒तिर॑श्विना।
यु॒वोर्हि यन्त्रं॑ हि॒म्येव॒ वास॑सोऽभ्याय॒ंसेन्या॑ भवतं मनी॒षिभि॑:॥ १॥

त्रिः। चि॒त्। नः। अ॒द्य। भ॒व॒त॒म्। न॒वे॒द॒सा॒। वि॒ऽभुः। वा॒म्। यामः॑। उ॒त। रा॒तिः। अ॒श्वि॒ना॒। युवोः। हि। य॒न्त्रम्। हि॒म्याऽइ॑व। वास॑सः। अ॒भि॒ऽआ॒य॒ंसेन्या॑। भ॒व॒त॒म्। म॒नी॒षिऽभि॑:॥ १॥

पदार्थः-(**त्रिः**) त्रिवारम् (**चित्**) एव (**नः**) अस्माकम् (**अद्य**) अस्मिन्नहनि। **निपातस्य च** इति दीर्घः। (**भवतम्**) (**नवेदसा**) न विद्यते वेदितव्यं ज्ञातव्यमवशिष्टं ययोस्तौ विद्वांसौ। **नवेदा इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**विभुः**) सर्वमार्गव्यापनशीलः (**वाम्**) युवयोः (**यामः**) याति गच्छति येन स यामो रथः (**उत**) अप्यर्थे (**रातिः**) वेगादीनां दानम् (**अश्विना**) स्वप्रकाशेन व्यापिनौ सूर्य्याचन्द्रमसाविव सर्वविद्याव्यापिनौ (**युवोः**) युवयोः। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति **ओसि च** (अष्टा०७.३.१०४) इत्येकारादेशो न भवति (**हि**) यतः (**यन्त्रम्**) यन्त्र्यते यन्त्रयन्ति संकोचयन्ति विलिखन्ति चालयन्ति वा येन तत् (**हिम्याइव**) हेमन्ततौ भवा महाशीतयुक्ता रात्रय इव। **भवेश्छन्दसि** (अष्टा०४.४.११०) इति यत्। **हिम्येति रात्रिनामसु पठितम्।** (निघं०१.७) **हन्तेर्हि च।** (उणा०३.११६) इति हन् धातोर्मक् ह्यादेशश्च। (**वाससः**) वसन्ति यस्मिन् तद्वासो दिनं तस्य मध्ये। दिवस उपलक्षणेन रात्रिरपि ग्राह्या (**अभ्यायंसेन्या**) आभिमुख्यतया समन्तात् यम्येते गृह्येते यौ तौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। अभ्याङ्पूर्वाद् यमधातोर्बाहुलकादौणादिकः सेन्यः प्रत्ययः। (**भवतम्**) (**मनीषिभिः**) मेधाविभिर्विद्वद्भिः शिल्पिभिः। **मनीषिति मेधाविनामसु पठितम्।** (निघं०३.१५)॥१॥

अन्वयः-हे परस्परमुपकारिणावभ्यायंसेन्या नवेदसावश्विनौ! युवां मनीषिभिः सह दिनैः सह सखायौ शिल्पिनौ हिम्या इव नोऽस्माकमद्यास्मिन् वर्त्तमानेऽह्नि शिल्पकार्यसाधकौ भवतं हि यतो वयं युवोः सकाशाद् यन्त्रं संसाध्य यानसमूहं चालयेम, येन नोऽस्माकं वाससो रातिः प्राप्येत उतापि वां युवयोः सकाशाद् विभुर्यामो रथश्च प्राप्तः सन्नस्मान् देशान्तरं सुखेन त्रिस्त्रिवारं गमयेदतो युष्मत्सङ्गं कुर्याम॥१॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा रात्रिदिवसयोः क्रमेण सङ्गतिर्वर्त्तते तथैव यन्त्रकलानां क्रमेण सङ्गतिः कार्या, यथा विद्वांसः पृथिवीविकाराणां यानकलाकीलयन्त्रादिकं रचयित्वा तेषां भ्रामणेन

तत्र जलाग्न्यादिसम्प्रयोगेण भूसमुद्राकाशगमनार्थानि यानानि साध्नुवन्ति, तथैव मयापि साधनीयानि नैवैतद्विद्यया विना दारिद्र्यक्षयः श्रीवृद्धिश्च कस्यापि सम्भवति तस्मादेतद्विद्यायां सर्वैर्मनुष्यैरत्यन्तः प्रयत्नः कर्तव्यः। यथा मनुष्या हेमन्ततौ शरीरे वस्त्राणि सम्बध्नन्ति, तथैव सर्वतः कीलयन्त्रकलादिभिः यानानि सम्बन्धनीयानीति॥१॥

पदार्थः-हे परस्पर उपकारक और मित्र **(अभ्यायंसेन्या)** साक्षात् कार्य्यसिद्धि के लिये मिले हुए **(नवेदसा)** सब विद्याओं के जानने वाले **(अश्विना)** अपने प्रकाश से व्याप्त सूर्य्य चन्द्रमा के समान सब विद्याओं में व्यापी कारीगर लोगो! आप **(मनीषिभिः)** सब विद्वानों के साथ दिनों[२१] के साथ **(हिम्याइव)** शीतकाल की रात्रियों के समान **(नः)** हम लोगों के **(अद्य)** इस वर्त्तमान दिवस में शिल्पकार्य्य के साधक **(भवतम्)** हूजिये **(हि)** जिस कारण **(युवोः)** आपके सकाश से **(यन्त्रम्)** कलायन्त्र को सिद्ध कर यानसमूह को चलाया करें जिससे **(नः)** हम लोगों को **(वाससः)** रात्रि, दिन, के बीच **(रातिः)** वेगादि गुणों से दूर देश को प्राप्त होवे **(उत)** और **(वाम्)** आपके सकाश से **(विभुः)** सब मार्ग में चलने वाला **(यामः)** रथ प्राप्त हुआ हम लोगों को देशान्तर को सुख से **(त्रिः)** तीन वार पहुंचावे, इसलिये आप का सङ्ग हम लोग करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये जैसे रात्रि वा दिन की क्रम से सङ्गति होती है, वैसे सङ्गति करें जैसे विद्वान् लोग पृथिवी विकारों के यान, कला, कील और यन्त्रादिकों को रचकर उनके घुमाने और उसमें अग्नयादि के संयोग से भूमि समुद्र वा आकाश में जाने-आने के लिये यानों को सिद्ध करते हैं। वैसे ही मुझ को भी विमानादि यान सिद्ध करने चाहिये। क्योंकि इस विद्या के विना किसी के दारिद्र्य का नाश वा लक्ष्मी की वृद्धि कभी नहीं हो सकती। इससे इस विद्या में सब मनुष्यों को अत्यन्त प्रयत्न करना चाहिये। जैसे मनुष्य लोग हेमन्त ऋतु में वस्त्रों को अच्छे प्रकार धारण करते हैं, वैसे ही सब प्रकार कील कला यन्त्रादिकों से यानों को संयुक्त रखना चाहिये॥१॥

पुनस्ताभ्यां तत्र किं किं साधनीयमित्युपदिश्यते॥

फिर उनसे क्या-क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रयः॑ प॒वयो॑ मधु॒वाह॑ने॒ रथे॒ सोम॑स्य वे॒नामनु॒ विश्व॒ इद्वि॑दुः।
त्रयः॑ स्क॒म्भासः॑ स्कभि॒तास॑ आ॒रभे॒ त्रिर्नक्तं॑ या॒थस्त्रिर्वश्विना॒ दिवा॑॥२॥

त्रयः॑ प॒वयः॑। म॒धु॒ऽवाह॑ने। रथे॑। सोम॑स्य। वे॒नाम्। अनु॑। विश्वे॑। इत्। वि॒दुः॒। त्रयः॑। स्क॒म्भासः॑। स्क॒भि॒तासः॑। आ॒ऽरभे॑। त्रिः। नक्त॑म्। या॒थः॒। त्रिः। उ॒ँ इति॑। अ॒श्वि॒ना॒। दिवा॑॥२॥

---

२१. यह अर्थ संस्कृत पदार्थ में नहीं है। सं०

पदार्थः-(**त्रयः**) त्रित्वसंख्याविशिष्टाः (**पवयः**) वज्रतुल्यानि चालनार्थानि कलाचक्राणि। **पविरिति वज्रनामसु पठितम्।** (निघं०२.२०) (**मधुवाहने**) मधुरगुणयुक्तानां द्रव्याणां वेगानां वा वाहनं प्रापणं यस्मात् तस्मिन् (**रथे**) रमन्ते येन यानेन तस्मिन् (**सोमस्य**) ऐश्वर्यस्य चन्द्रलोकस्य वा। अत्र **षु प्रसवैश्वर्ययो**रित्यस्य प्रयोगः। (**वेनाम्**) कमनीयां यात्रां। **धापृवस्यज्यतिभ्यो नः।** (उणा०३.६) इत्यजधातोर्नः प्रत्ययः।[२२] (**अनु**) आनुकूल्ये (**विश्वे**) सर्वे (**इत्**) एव (**विदुः**) जानन्ति (**त्रयः**) त्रित्वसंख्याकाः (**स्कम्भासः**) धारणार्थाः स्तम्भविशेषाः (**स्कभितासः**) स्थापिता धारिताः। अत्रोभयत्र **आज्जसेरसुग्** (अष्टा०७.१.५०) इत्यसुगागमः। (**आरभे**) आरब्धव्ये गमनागमने (**त्रिः**) त्रिवारम् (**नक्तम्**) रात्रौ। **नक्तमिति रात्रिनामसु पठितम्।** (निघं०१.७) (**याथः**) प्राप्नुतम् (**त्रिः**) त्रिवारम् (**ऊँ**) वितर्के (**अश्विना**) अश्विनाविव सकलशिल्पविद्याव्यापिनौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**दिवा**) दिवसे॥२॥

अन्वयः-हे अश्विनाविवसमग्रशिल्पविद्याव्यापिनौ पुरुषौ! युवां यस्मिन् मधुवाहने रथे त्रयः पवयस्त्रयः स्कम्भासः स्कभितासो भवन्ति तस्मिन् स्थित्वा त्रिर्नक्तं रात्रौ त्रिर्दिवा दिवसे चाभीष्टं स्थानं याथो गच्छथस्तत्रापि युवाभ्यां विना कार्य्यसिद्धिर्न जायते। मनुष्या यस्य मध्ये स्थित्वा सोमस्य चन्द्रस्य वा वेनां कमनीयां कान्तिं सद्यः प्राप्नुवन्ति। यं चारभे विश्वेदेवा इदेव विदुर्जानन्ति तमु रथं संसाध्य यथावदभीष्टं क्षिप्रं प्राप्नुतम्॥२॥

भावार्थः-भूमिसमुद्रान्तरिक्षगमनं चिकीर्षुभिर्मनुष्यैस्त्रिचक्राग्न्यागारस्तम्भयुक्तानि विमानादीनि यानानि रचयित्वा तत्र स्थित्वैकस्मिन् दिन एकस्यां रात्रौ भूगोलसमुद्रान्तरिक्षमार्गेण त्रिवारं गन्तुं शक्येरन्। तत्रेदृशास्त्रयस्स्कम्भा रचनीया, यत्र सर्वे कलावयवाः काष्ठलोष्ठादिस्तम्भावयवा वा स्थितिं प्राप्नुयुः। तत्राग्निजले सम्प्रयोज्य चालनीयानि। नैतैर्विना कश्चित्सद्यो भूमौ समुद्रेऽन्तरिक्षे वा गन्तुमागन्तुं च शक्नोति, तस्मादेतेषां सिद्धये विशिष्टाः प्रयत्नाः कार्या इति॥२॥

पदार्थः-हे अश्वि अर्थात् वायु और बिजुली के समान सम्पूर्ण शिल्प विद्याओं को यथावत् जानने वाले विद्वान् लोगो! आप जिस (**मधुवाहने**) मधुर गुणयुक्त द्रव्यों की प्राप्ति होने के हेतु (**रथे**) विमान में (**त्रयः**) तीन (**पवयः**) वज्र के समान कला घूमने के चक्र और (**त्रयः**) तीन (**स्कम्भासः**) बन्धन के लिये खंभ (**स्कभितासः**) स्थापित और धारण किये जाते हैं, उसमें स्थित अग्नि और जल के समान कार्य्यसिद्धि करके (**त्रिः**) तीन वार (**नक्तम्**) रात्रि और (**त्रिः**) तीन वार (**दिवा**) दिन में इच्छा किये हुए स्थान को (**उपयाथः**) पहुंचो, वहाँ भी आपके विना कार्य्यसिद्धि कदापि नहीं होती। मनुष्य लोग जिसमें

---

२२. अजेर्व्यघञपोः। अष्टा०२.४.५६ इत्यनेन चाज्धातोः स्थाने व्यादेशः। सं०

बैठ के **(सोमस्य)** ऐश्वर्य की **(वेनाम्)** प्राप्ति को करती हुई कामना वा चन्द्रलोक की कान्ति को प्राप्त होते और जिसको **(आरभे)** आरम्भ करने योग्य गमनागमन व्यवहार में **(विश्वे)** सब विद्वान् **(इत्)** ही **(विदुः)** जानते हैं, उस **(ऊँ)** अद्भुत रथ को ठीक-ठीक सिद्ध कर अभीष्ट स्थानों में शीघ्र जाया आया करो॥ २॥

भावार्थः-भूमि समुद्र और अन्तरिक्ष में जाने की इच्छा करने वाले मनुष्यों को योग्य है कि तीन-तीन चक्र युक्त अग्नि के घर और स्तम्भयुक्त यान को रच कर उसमें बैठ कर एक दिन-रात में भूगोल, समुद्र, अन्तरिक्ष मार्ग से तीन-तीन वार जाने को समर्थ हो सकें, उस यान में इस प्रकार के खंभ रचने चाहिये कि जिसमें कलावयव अर्थात् काष्ठ, लोष्ठ आदि खंभों के अवयव स्थित हों, फिर वहाँ अग्नि जल का सम्प्रयोग कर चलावें। क्योंकि इनके विना कोई मनुष्य शीघ्र भूमि, समुद्र, अन्तरिक्ष में जाने-आने को समर्थ नहीं हो सकता। इस से इनकी सिद्धि के लिये सब मनुष्यों को बड़े-बड़े यत्न अवश्य करने चाहियें॥ २॥

पुनस्ताभ्यां कृतैर्यानैः किं किं साधनीयमित्युपदिश्यते॥

फिर उनसे सिद्ध किये हुए यानों से क्या-क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

समाने अहन् त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम्।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम्॥ ३॥

समाने। अहन्। त्रिः। अवद्यऽगोहना। त्रिः। अद्य। यज्ञम्। मधुना। मिमिक्षतम्। त्रिः। वाजऽवतीः। इषः। अश्विना। युवम्। दोषाः। अस्मभ्यम्। उषसः। च। पिन्वतम्॥ ३॥

पदार्थः-**(समाने)** एकस्मिन् **(अहन्)** अहनि दिने **(त्रिः)** त्रिवारम् **(अवद्यगोहना)** अवद्यानि गर्ह्याणि निन्दितानि दुःखानि गूहत आच्छादयतो दूरीकुरुतस्तौ। **अवद्यपण्य०** (अष्टा०३.१.१०१) इत्ययं निन्दार्थे निपातः। ण्यन्ताद् **गुहू संवरण** इत्यस्माद्धातोः **ण्यासश्रन्थो युच्।** (अष्टा०३.३.१०७) इति युच्। **ऊदुपधाया गोहः।** (अष्टा०६.४.८९) इत्यूदादेशे प्राप्ते। **वा च्छन्दसि सर्वे विधयो भवन्ति** इत्यस्य निषेधः। **सुपां सुलुग्०** इत्याकारादेशश्च। **(त्रिः)** त्रिवारम् **(अद्य)** अस्मिन्नहनि **(यज्ञम्)** ग्राह्यशिल्पादिसिद्धिकरम् **(मधुना)** जलेन। **मध्वित्युदकनामसु पठितम्।** (निघं०१.१२) **(मिमिक्षतम्)** मेढुमिच्छतम् **(त्रिः)** त्रिवारम् **(वाजवतीः)** प्रशस्ता वाजा वेगादयो गुणा विद्यन्ते यासु नौकादिषु ताः। अत्र प्रशंसार्थे मतुप्। **(इषः)** या इष्यन्ते ता इष्टसुखसाधिकाः **(अश्विना)** वह्निजलवद्यानसिद्धिं सम्पाद्य प्रेरकचालकावध्वर्यू। **अश्विनावध्वर्यू।** (श०ब्रा०१.१.२.१७) **(युवम्)** युवाम्। **प्रथमायाश्च द्विवचने भाषायाम्।** (अष्टा०७.२.८८) इत्याकारादेशनिषेधः। **(दोषाः)** रात्रिषु। अत्र **सुपां सुलुग्०** इति सुब्व्यत्ययः। **दोषेति रात्रिनामसु पठितम्।**

(निघं०१.७) **(अस्मभ्यम्)** शिल्पक्रियाकारिभ्य: **(उषस:)** प्रापितप्रकाशेषु दिवसेषु। अत्रापि सुब्व्यत्यय:। **उष इति पदनामसु पठितम्।** (निघं०५.५) **(च)** समुच्चये **(पिन्वतम्)** प्रीत्या सेवेथाम्॥३॥

अन्वय:-हे अश्विनावद्यगोहनाध्वर्यू! युवं युवां समानेऽहनि मधुना यज्ञं त्रिर्मिमिक्षतमद्यास्मभ्यं दोषा उषस: त्रिर्यानानि पिन्वतं वाजवतीरिषश्च त्रि: पिन्वतम्॥३॥

भावार्थ:-शिल्पविद्याविद्विद्वांसो यन्त्रैर्यानं चालयिताश्च प्रतिदिनं शिल्पविद्यया यानानि निष्पाद्य त्रिधा शरीरात्ममन: सुखाय धनाद्यनेकोत्तमान् पदार्थानर्जयित्वा सर्वान् प्राणिन: सुखयन्तु। येनाहोरात्रे सर्वे पुरुषार्थेनेमां विद्यामुन्नीयालस्यं त्यक्त्वोत्साहेन तद्रक्षणे नित्यं प्रयतेरन्निति॥३॥

पदार्थ:-हे **(अश्विना)** अग्नि जल के समान यानों को सिद्ध करके प्रेरणा करने और चलाने तथा **(अवद्यगोहना)** निन्दित दुष्ट कर्मों को दूर करने वाले विद्वान् मनुष्यो! **(युवम्)** तुम दोनों **(समाने)** एक **(अहन्)** दिन में **(मधुना)** जल से **(यज्ञम्)** ग्रहण करने योग्य शिल्पादि विद्या सिद्धि करने वाले यज्ञ को **(त्रि:)** तीन वार **(मिमिक्षितम्)** सींचने की इच्छा करो और **(अद्य)** आज **(अस्मभ्यम्)** शिल्पक्रियाओं को सिद्ध करने कराने वाले हम लोगों के लिये **(दोषा:)** रात्रियों और **(उषस:)** प्रकाश को प्राप्त हुए दिनों में **(त्रि:)** तीन वार यानों का **(पिन्वतम्)** सेवन करो और **(वाजवती:)** उत्तम-उत्तम सुखदायक **(इष:)** इच्छा सिद्धि करने वाले नौकादि यानों को **(त्रि:)** तीन वार **(पिन्वतम्)** प्रीति से सेवन करो॥३॥

भावार्थ:-शिल्पविद्या को जानने और कलायन्त्रों से यान को चलाने वाले प्रतिदिन शिल्पविद्या से यानों को सिद्ध कर तीन प्रकार अर्थात् शारीरिक, आत्मिक और मानसिक सुख के लिये धन आदि अनेक उत्तम-उत्तम पदार्थों को इकट्ठा कर सब प्राणियों को सुखयुक्त करें, जिससे दिन-रात में सब लोग अपने पुरुषार्थ से इस विद्या की उन्नति कर और आलस्य को छोड़ के उत्साह से उसकी रक्षा में निरन्तर प्रयत्न करें॥३॥

पुनस्ताभ्यां किं कार्यं कर्त्तव्यमित्युपदिश्यते॥

फिर उनसे क्या कार्य करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिर्व॒र्तिर्या॑त॒ं त्रिरनु॑ व्र॒ते॒ जने॒ त्रि: सु॑प्रा॒व्ये॑ त्रे॒धेव॑ शिक्षतम्।
त्रिर्न॒न्द्यं॑ वहतमश्विना यु॒वं त्रि: पृक्षो॑ अ॒स्मे अ॒क्षरे॑व पिन्वतम्॥४॥

त्रि:। व॒र्ति:। या॒त॒म्। त्रि:। अनु॑ऽव्रते। जने॑। त्रि:। सु॒ऽप्र॒ऽअ॒व्ये॑। त्रे॒धाऽइ॑व। शि॒क्ष॒त॒म्। त्रि:। न॒न्द्य॑म्। व॒ह॒त॒म्। अ॒श्वि॒ना॒। यु॒वम्। त्रि:। पृक्ष॑:। अ॒स्मे इति॑। अ॒क्षरा॑ऽइव। पि॒न्व॒त॒म्॥४॥

पदार्थ:-(**त्रि:**) त्रिवारम् (**वर्त्ति:**) वर्त्तन्ते व्यवहरन्ति यस्मिन् मार्गे। **हृपिषिरुहिवृति०** (उणा०४.१२४)। इत्यधिकरण इप्रत्यय:। अत्र **सुपां सुलुग्०** इति द्वितीयैकवचनस्य स्थाने सोरादेश:। **(यातम्)** प्रापयतम् (**त्रि:**) त्रिवारम् (**अनुव्रते**) अनुकूलं सत्याचरणं व्रतं यस्य तस्मिन् (**जने**) यो जनयति

बुद्धिं तस्मिन्। अत्र पचाद्यच्। **(त्रिः)** त्रिवारम् **(सुप्राव्ये)** सुष्ठु प्रकृष्टमवितुं प्रवेशितुं योग्यस्तस्मिन् अत्र **वाच्छन्दसि सर्वे०** इति वृद्धिनिरोधः। **(त्रेधेव)** यथा त्रिभिः पाठनज्ञापनहस्तक्रियादिभिः प्रकारैस्तथा। **इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च**। (अष्टा०वा०२.१.४) अत्र सायणाचार्य्येण त्रेधैव त्रिभिरेवप्रकारैरित्येवशब्दोऽशुद्धो व्याख्यातः, पदपाठ इव शब्दस्य प्रत्यक्षत्वात्। **(शिक्षतम्)** सुशिक्षया विद्यां ग्राहयतम् **(त्रिः)** त्रिवारम् **(नान्द्यम्)** नन्दयितुं समर्धयितुं योग्यं शिल्पज्ञानम् **(वहतम्)** प्रापयतम् **(अश्विना)** विद्यादाताग्रहीतारावध्वर्यू **(युवम्)** युवाम् **(त्रिः)** त्रिवारम् **(पृक्षः)** पृङ्क्ते येन तत्। अत्र पृचीधातोः **सर्वधातुभ्योऽसुन्।** बाहुलकात्सुडागमश्च। **(अस्मे)** अस्मान् **(अक्षरेव)** यथाऽक्षराणि जलानि तथा। अत्र **शेश्छन्दसि** इति शेर्लोपः। **अक्षरमित्युदकनामसु पठितम्।** (निघं०१.१२) **(पिन्वतम्)** प्रापयतम्॥४॥

अन्वयः-हे अश्विना! युवं युवामस्मे अस्माकं वर्तिर्मार्गं त्रिर्यातं तथा सुप्राव्येऽनुव्रते जने त्रिर्यातं प्रापयतम्, शिष्याय त्रेधा हस्तक्रियारक्षणचालनज्ञानाढ्यां शिक्षन्नध्यापक इवास्मान् त्रिः शिक्षतमस्मान्नान्द्यं त्रिर्वहतं त्रिवारं प्रापयतम् यथा नदीतडागसमुद्रादयो जलाशया मेघस्य सकाशादक्षराणि जलानि व्याप्नुवन्ति तथाऽस्मान् पृक्षोविद्या सम्पर्कं त्रिः पिन्वतम्॥४॥

भावार्थः-अत्रोपमालङ्कारौ। शिल्पविद्याविदां योग्यतास्ति विद्या चिकीर्षूननुकूलान् बुद्धिमतो जनान् हस्तक्रियाविद्यां पाठयित्वा पुनः पुनः सुशिक्ष्य कार्यसाधनसमर्थान् सम्पादयेयुः। ते चैतां सम्पाद्य यथावच्चातुर्यपुरुषार्थाभ्यां बहून् सुखोपकारान् गृह्णीयुः॥४॥

पदार्थः-हे **(अश्विना)** विद्या देने वा ग्रहण करने वाले विद्वान् मनुष्यो! **(युवम्)** तुम दोनों **(अस्मे)** हम लोगों के **(वर्त्तिः)** मार्ग को **(त्रिः)** तीन वार **(यातम्)** प्राप्त हुआ करो। तथा **(सुप्राव्ये)** अच्छे प्रकार प्रवेश करने योग्य **(अनुव्रते)** जिसके अनुकूल सत्याचरण व्रत है उस **(जने)** बुद्धि के उत्पादन करने वाले मनुष्य के निमित्त **(त्रिः)** तीन वार **(यातम्)** प्राप्त हूजिये और शिष्य के लिये **(त्रेधेव)** तीन प्रकार अर्थात् हस्तक्रिया, रक्षा और यान चालन के ज्ञान को शिक्षा करते हुए अध्यापक के समान **(अस्मे)** हम लोगों को **(त्रिः)** तीन वार **(शिक्षतम्)** शिक्षा और **(नान्द्यम्)** समृद्धि होने योग्य शिल्प ज्ञान को **(त्रिः)** तीन बार **(वहतम्)** प्राप्त करो और **(अक्षरेव)** जैसे नदी, तालाब और समुद्र आदि जलाशय मेघ के सकाश से जल को प्राप्त होते हैं, वैसे हम लोगों को **(पृक्षः)** विद्यासम्पर्क को **(त्रिः)** तीन वार **(पिन्वतम्)** प्राप्त करो॥४॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। शिल्प विद्या के जानने वाले मनुष्यों को योग्य है कि विद्या की इच्छा करने वाले अनुकूल बुद्धिमान् मनुष्यों को पदार्थ विद्या पढ़ा और उत्तम-उत्तम शिक्षा वार-वार देकर कार्यों को सिद्ध करने में समर्थ करें और उनको भी चाहिये कि इस विद्या को सम्पादन करके यथावत् चतुराई और पुरुषार्थ से सुखों के उपकारों को ग्रहण करें॥४॥

पुनस्तौ किं साधकावित्युपदिश्यते॥

फिर वे किस कार्य के साधक हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिर्नो॑ र॒यिं व॑हतमश्विना यु॒वं त्रिर्दे॒वता॑ता॒ त्रिरु॒ताव॑तं॒ धिय॑:।
त्रि: सौभ॑ग॒त्वं त्रिरु॒त श्रवां॑सि नस्त्रि॒ष्ठं वां॒ सूरे॑ दु॒हि॒ता रु॑ह॒द्रथ॑म्॥५॥

त्रि:। न॒:। र॒यिम्। व॒ह॒त॒म्। अ॒श्वि॒ना॒। यु॒वम्। त्रि:। दे॒वऽता॑ता। त्रि:। उ॒त। अव॑तम्। धिय॑:। त्रि:। सौभ॑ग॒ऽत्वम्। त्रि:। उ॒त। श्रवां॑सि। न॒:। त्रि॒ऽस्थम्। वा॒म्। सूरे॑। दु॒हि॒ता। आ। रु॒ह॒त्। रथ॑म्॥५॥

पदार्थ:-(**त्रि:**) त्रिवारं विद्याराज्यश्रीप्राप्तिरक्षणक्रियामयम् (**न:**) अस्मान् (**रयिम्**) परमोत्तमं धनम् (**वहतम्**) प्रापयतम् (**अश्विना**) द्यावापृथिव्यादिसंज्ञकाविव। अत्र **सुपां सुलुग्०** इत्याकारादेश:। (**युवम्**) युवाम् (**त्रि:**) त्रिवारं प्रेरकसाधकक्रियाजन्यम्। (**देवताता**) शिल्पक्रियायज्ञसम्पत्तिहेतू यद्वा देवान् विदुषो दिव्यगुणान् वा तनुतस्तौ। अत्र **दुतनिभ्यां दीर्घश्च।** (उणा०३.८८) इति क्त: प्रत्यय:। **देवतातेति यज्ञनामसु पठितम्।** (निघं०३.१७) (**त्रि:**) त्रिवारं शरीरप्राणमनोभी रक्षणम् (**उत्**) अपि (**अवतम्**) प्रविशतम् (**धिय:**) धारणावतीर्बुद्धी: (**त्रि:**) त्रिवारं भृत्यसेनास्वात्मभार्यादिशिक्षाकरणम् (**सौभगत्वम्**) शोभना भगा ऐश्वर्याणि यस्मात् पुरुषार्थात् तस्येदं[२३] सौभगं तस्य भाव:[२४] सौभगत्वम् (**त्रि:**) त्रिवारं श्रवणमननिदिध्यासनकरणम् (**उत**) अपि (**श्रवांसि**) श्रूयन्ते यानि तानि वेदादिशास्त्रश्रवणानि धनानि वा। **श्रव इति धननामसु पठितम्।** (निघं०२.१०) (**न:**) अस्माकम् (**त्रिस्थम्**) त्रिषु शरीरात्ममनस्सुखेषु तिष्ठतीति त्रिस्थम् (**वाम्**) तयो: (**सूरे**) सूर्यस्य। अत्र **सुपां सुलुग्०** इति शे आदेश:। (**दुहिता**) कन्येव। **दुहिता दुर्हिता दूरे हिता दोग्धेर्वा।** (निरु०३.४) (**आ**) समन्तात् (**रुहत्**) रोहेत्। अत्र **कृमृदृरुहिभ्यश्छन्दसि।** (अष्टा०३.१.५९) इति च्लेरङ्। **बहुलं छन्दस्यमाङ्योगेऽपि** (अष्टा०६.४.७५) इत्यडभावो लडर्थे लुङ्। च (**रथम्**) रमन्ते येन तं विमानादियानसमूहम्॥५॥

अन्वय:-हे देवतातावश्विनौ! युवं युवां नोऽस्मभ्यं रयिं त्रिर्वहतं नोऽस्माकं धियो बुद्धीरुतापि बलं त्रिरवतं नोऽस्मभ्यं त्रिस्थं सौभगत्वं त्रिर्वहतं प्राप्नुतमुतापि श्रवांसि त्रिर्वहतं प्राप्नुतं वां ययोरश्विनो: सूरे दुहिता पुत्रो वसुविद्यया नोऽस्माकं रथं त्रिरारुहत् त्रिवारमारोहेत् तौ वयं शिल्पकार्येषु सम्प्रयुञ्महे॥५॥

---

२३. तस्येदम्। अष्टा०४.३.१२०। इत्यण् प्र०।

२४. तस्य भावस्त्वतलौ। अष्टा०५.१.११९। इति '**त्व**' रोहति, सं०।

भावार्थः-मनुष्यैरश्विनोः सकाशाच्छिल्पकार्याणि निर्वर्त्य बुद्धिं वर्धयित्वा सौभाग्यमुत्तमान्नादीनि च प्रापणीयानि तत्सिद्धयानेषु स्थित्वा देशदेशान्तरान् गत्वा व्यवहारेण धनं प्राप्य सदानन्दयितव्यमिति॥५॥

पदार्थः-हे **(देवताता)** शिल्प क्रिया और यज्ञ सम्पत्ति के मुख्य कारण वा विद्वान् तथा शुभगुणों के बढ़ाने और **(अश्विना)** आकाश-पृथिवी के तुल्य प्राणियों को सुख देने वाले विद्वान् लोगो! **(युवम्)** आप **(नः)** हम लोगों के लिये **(रयिम्)** उत्तम धन **(त्रिः)** तीन वार अर्थात् विद्या, राज्य, श्री की प्राप्ति और रक्षण क्रियारूप ऐश्वर्य को **(वहतम्)** प्राप्त करो **(नः)** हम लोगों की **(धियः)** बुद्धियों **(उत)** और बल को **(त्रिः)** तीन बार **(अवतम्)** प्रवेश कराइये **(नः)** हम लोगों के लिये **(त्रिष्ठम्)** तीन अर्थात् शरीर, आत्मा और मन के सुख में रहने और **(सौभगत्वम्)** उत्तम ऐश्वर्य्य के उत्पन्न करने वाले पुरुषार्थ को **(त्रिः)** तीन अर्थात् भृत्य, सन्तान और स्वात्म, भार्यादि को प्राप्त कीजिये **(उत)** और **(श्रवांसि)** वेदादि शास्त्र वा धनों को **(त्रिः)** शरीर, प्राण और मन की रक्षा सहित प्राप्त करते और **(वाम्)** जिन अश्वियों के सकाश से **(सूरेः)** सूर्य की **(दुहिता)** पुत्री के समान कान्ति **(नः)** हम लोगों के **(रथम्)** विमानादि यानसमूह को **(त्रिः)** तीन अर्थात् प्रेरक, साधक और चालन क्रिया से **(आरुहत्)** ले जाती है, उन दोनों को हम लोग शिल्प कार्यों में अच्छे युक्त करें॥५॥

भावार्थः-मनुष्यों को उचित है कि अग्नि भूमि के अवलम्ब से शिल्प कार्यों को सिद्ध और बुद्धि बढ़ाकर सौभाग्य और उत्तम अन्नादि पदार्थों को प्राप्त हो तथा इस सब समाग्री से सिद्ध हुए यानों में बैठ के देश-देशान्तरों को जा आ और व्यवहार द्वारा धन को बढ़ा कर सब काल में आनन्द में रहें॥५॥

पुनस्ताभ्यां किं कार्यमित्युपदिश्यते॥

फिर उनसे क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिर्नो॑ अश्विना दि॒व्यानि॑ भेष॒जा त्रिः पार्थि॑वानि॒ त्रिरु॑ दत्तम॒द्भ्यः।
ओ॒मान॑ꣳ शं॒योर्मम॑काय सू॒नवे॑ त्रि॒धातु॒ शर्म॑ वहतं शुभस्पती॥६॥४॥

त्रिः। नः। अ॒श्वि॒ना॒। दि॒व्यानि॑। भे॒ष॒जा। त्रिः। पार्थि॑वानि त्रिः। ऊँ इति॑। द॒त्त॒म्। अ॒त्ऽभ्यः। ओ॒मान॑म्। शं॒ऽयोः। मम॑काय। सू॒नवे॑। त्रि॒ऽधातु॑। शर्म॑। व॒ह॒त॒म्। शु॒भ॒ः। प॒ती॒ इति॑॥६॥

पदार्थः-(**त्रिः**) त्रिवारम् (**नः**) अस्मभ्यम् (**अश्विना**) अश्विनौ विद्याज्योतिर्विस्तारमयौ (**दिव्यानि**) विद्यादिशुभगुणप्रकाशकानि (**भेषजा**) सोमादीन्यौषधानि रसमयानि (**त्रिः**) त्रिवारम् (**पार्थिवानि**) पृथिव्या विकारयुक्तानि (**त्रिः**) त्रिवारम् (**ऊँ**) वितर्के (**दत्तम्**) (**अद्भ्यः**) सातत्यागन्तृभ्यो वायुविद्युदादिभ्यः (**ओमानम्**) रक्षन्तम्, विद्याप्रवेशकं क्रियागमकं व्यवहारम्। अत्रावधातोः। **अन्येभ्योऽपि दृश्यन्त** इति

मनिन्। **(शंयोः)** शं सुखं कल्याणं विद्यते यस्मिँस्तस्य **(ममकाय)** ममायं ममकस्तस्मै। अत्र **संज्ञापूर्वको विधिरनित्यः।** (अष्टा०६.४.१४६) इति[२५] वृद्ध्यभावः **(सूनवे)** औरसाय विद्या पुत्राय वा **(त्रिधातु)** त्रयोऽयस्ताम्रपित्तलानि धातवो यस्मिन् भूसमुद्रान्तरिक्षगमनार्थे याने तत् **(शर्म)** गृहस्वरूपं सुखकारकं वा। **शर्मेति गृहनामसु पठितम्।** (निघं०३.४) **(वहतम्)** प्रापयतम् **(शुभः)** यत् कल्याणकारकं मनुष्याणां कर्म तस्य। अत्र सम्पादादित्वात् क्विप्। **(पती)** पालयितारौ। **षष्ठ्याः पतिपुत्र०** (अष्टा०८.३.५३) इति संहितायां विसर्जनीयस्य सकारादेशः॥६॥

अन्वयः-हे शुभस्पती अश्विनौ! युवां नोऽस्मभ्यमद्भ्यो दिव्यानि भेषजौषधानि त्रिर्दत्तं ऊँ इति वितर्के पार्थिवानि भेषजौषधानि त्रिर्दत्तं ममकाय सूनवे शंयोः सुखस्य दानमोमानं च त्रिर्दत्तं त्रिधातु शर्म ममकाय सूनवे त्रिर्वहतं प्रापयतम्॥६॥

भावार्थः-मनुष्यैर्जलपृथिव्योर्मध्ये यानि रोगनाशकान्यौषधानि सन्ति तानि त्रिविधतापनिवारणाय भोक्तव्यान्यनेकधातुकाष्ठमयं गृहाकारं यानं रचयित्वा तत्रोत्तमानि यवादीन्यौषधानि संस्थाप्याग्निगृहेऽग्निं पार्थिवैरिन्धनैः प्रज्वाल्यापः स्थापयित्वा वाष्पबलेन यानानि चालयित्वा व्यवहारार्थं देशदेशान्तरं गत्वा तत आगत्य सद्यः स्वदेशः प्राप्तव्य एवं कृते महान्ति सुखानि प्राप्तानि भवन्तीति॥६॥

इति चतुर्थो वर्गः॥४॥

पदार्थः-हे **(शुभस्पती)** कल्याणकारक मनुष्यों के कर्मों की पालना करने और **(अश्विना)** विद्या की ज्योति को बढ़ाने वाले शिल्पि लोगो! आप दोनों **(नः)** हम लोगों के लिये **(अद्भ्यः)** जलों से **(दिव्यानि)** विद्यादि उत्तम गुण प्रकाश करने वाले **(भेषजा)** रसमय सोमादि औषधियों को **(त्रिः)** तीन ताप निवारणार्थ **(दत्तम्)** दीजिये **(उ)** और **(पार्थिवानि)** पृथिवी के विकारयुक्त औषधी **(त्रिः)** तीन प्रकार से दीजिये और **(ममकाय)** मेरे **(सूनवे)** औरस अथवा विद्यापुत्र के लिये **(शंयोः)** सुख तथा **(ओमानम्)** विद्या में प्रवेश और क्रिया के बोध कराने वाले रक्षणीय व्यवहार को **(त्रिः)** तीन वार कीजिये और **(त्रिधातु)** लोहा ताँबा पीतल इन तीन धातुओं के सहित भूजल और अन्तरिक्ष में जाने वाले **(शर्म)** गृहस्वरूप यान को मेरे पुत्र के लिये **(त्रिः)** तीन वार **(वहतम्)** पहुंचाइये॥६॥

भावार्थः-मनुष्यों को चाहिये कि जो जल और पृथिवी में उत्पन्न हुई रोग नष्ट करने वाली औषधी हैं, उनका एक दिन में तीन वार भोजन किया करें और अनेक धातुओं से युक्त काष्ठमय घर के समान यान को बना उसमें उत्तम-उत्तम जव आदि औषधी स्थापन, अग्नि के घर में अग्नि को काष्ठों से

---

२५. अनया परिभाषया। सं०

प्रज्ज्वलित जल के घर में जलों को स्थापन, भाफ के बल से यानों को चला व्यवहार के लिये देश-देशान्तरों को जा और वहाँ से आकर जल्दी अपने देश को प्राप्त हों, इस प्रकार करने से बड़े बड़े सुख प्राप्त होते हैं॥६॥

यह चौथा वर्ग समाप्त हुआ॥४॥

पुनस्तौ कीदृशौ स्त इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिर्नो॑ अश्विना यजता दि॒वेदि॑वे॒ परि॑ त्रि॒धातु॑ पृथि॒वीम॑शायतम्।
ति॒स्रो नास॑त्या रथ्या परा॒वत॑ आ॒त्मेव॒ वात॒: स्वस॑राणि गच्छतम्॥७॥

त्रि:। न॒:। अ॒श्वि॒ना॒। य॒ज॒ता॒। दि॒वेऽदि॑वे। परि॑। त्रि॒ऽधातु॑। पृ॒थि॒वीम्। अ॒शा॒य॒त॒म्। ति॒स्र:। नास॑त्या। र॒थ्या॒। प॒रा॒ऽवत॑:। आ॒त्माऽइ॑व। वात॑:। स्वस॑राणि। ग॒च्छ॒त॒म्॥७॥

पदार्थ:-(**त्रि:**) त्रिवारम् (**न:**) अस्माकम् (**अश्विना**) जलाग्नी इव शिल्पिनौ (**यजता**) यष्टारौ सङ्गन्तारौ। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेश:। (**दिवेदिवे**) प्रतिदिनम् (**परि**) सर्वतो भावे (**त्रिधातु**) सुवर्णरजतादिधातुसम्पादितम् (**पृथिवीम्**) भूमिमन्तरिक्षं वा। **पृथिवीत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३) (**आशयतम्**) शयाताम्। अत्र लोडर्थे लङ। अशयातामिति प्राप्ते ह्रस्वदीर्घयोर्व्यत्ययास:। (**तिस्र:**) ऊर्ध्वाध: समगती: (**नासत्या**) न विद्यतेऽसत्यं ययोस्तौ (**रथ्या**) यौ रथविमानादिकं यानं वहतस्तौ (**परावत:**) दूरस्थानानि। **परावत: प्रेरितवत: परागता:।** (निरु०११.४८) **परावत इति दूरनामसु पठितम्।** (निघं०३.२६) (**आत्मेव**) आत्मन: शीघ्रगमनवत् (**वात:**) कलाभिर्भ्रामितो वायु: (**स्वसराणि**) स्वस्वकार्य्यप्रापकाणि दिनानि। **स्वसराणीति पदनामसु पठितम्।** (निघं०४.२) अनेन प्राप्त्यर्थो गृह्यते (**गच्छतम्**)॥७॥

अन्वय:-हे नासत्यौ यजतौ रथ्यावश्विनाविव शिल्पिनौ युवां! पृथिवी प्राप्य त्रि: पर्य्यशयातमात्मेव वात: प्राणश्च स्वसराणि दिवे दिवे गच्छति तद्वद्गच्छतं नोऽस्माकं त्रिधातु यानं परावतो मार्गौंस्तिस्रो गतीर्गमयतम्॥७॥

भावार्थ:-अत्रोपमालङ्कार:। ऐहिकसुखमभीप्सवो जना यथा जीवोऽन्तरिक्षादिमार्गै: सद्य: शरीरान्तरं गच्छति यथा च वायु: सद्यो गच्छति तथैव पृथिव्यादिविकारै: कलायन्त्रयुक्तानि यानानि रचयित्वा तत्र जलाग्न्यादीन् सम्प्रयोज्याभीष्टान् दूरदेशान् सद्य: प्राप्नुयु:। नैतेन कर्मणा विना सांसारिकं सुखं भवितुमर्हति॥७॥

पदार्थ:-हे (**नासत्या**) असत्य व्यवहाररहित (**यजता**) मेल करने तथा (**रथ्या**) विमानादि यानों को प्राप्त कराने वाले (**अश्विना**) जल और अग्नि के समान कारीगर लोगो! तुम दोनों (**पृथिवी**) भूमि वा अन्तरिक्षे को प्राप्त होकर (**त्रि:**) तीन वार (**पर्य्यशायतम्**) शयन करो (**आत्मेव**) जैसे जीवात्मा के समान

(वातः) प्राण **(स्वसराणि)** अपने कार्य्यों में प्रवृत्त करने वाले दिनों को नित्य नित्य प्राप्त होते हैं, वैसे **(गच्छतम्)** देशान्तरों को प्राप्त हुआ करो और जो **(नः)** हम लोगों के **(त्रिधातु)** सोना चान्दी आदि धातुओं से बनाये हुए यान **(परावतः)** दूर स्थानों को **(तिस्रः)** ऊंची नीची और सम चाल चलते हुए मनुष्यादि प्राणियों को पहुंचाते हैं, उनको कार्यसिद्धि के अर्थ हम लोगों के लिये बनाओ॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। संसारसुख की इच्छा करने वाले पुरुष जैसे जीव अन्तरिक्ष आदि मार्गों से दूसरे शरीरों को शीघ्र प्राप्त होता और जैसे वायु शीघ्र चलता है, वैसे ही पृथिव्यादि विकारों से कलायन्त्र युक्त यानों को रच और उनमें अग्नि, जल आदि का अच्छे प्रकार प्रयोग करके चाहे हुए दूर देशों को शीघ्र पहुंचा करें, इस काम के विना संसारसुख होने को योग्य नहीं है॥७॥

पुनस्तौ कीदृशौ ताभ्यां किं किं साध्यमित्युपदिश्यते॥

फिर वे कैसे हैं और उनसे क्या-क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रयं आहावास्त्रेधा हविष्कृतम्।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम्॥८॥

त्रिः। अश्विना। सिन्धुऽभिः। सप्तमातृऽभिः। त्रयः। आऽहावाः। त्रेधा। हविः। कृतम्। तिस्रः। पृथिवीः। उपरि। प्रवा। दिवः। नाकम्। रक्षेथे इति। द्युऽभिः। अक्तुऽभिः। हितम्॥८॥

पदार्थः-(**त्रिः**) त्रिवारम् **(अश्विना)** अश्विनौ सूर्य्याचन्द्रमसाविव। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेशः। **(सिन्धुभिः)** नदीभिः **(सप्तमातृभिः)** सप्तार्थात् पृथिव्यग्निसूर्यवायुविद्युदुदकावकाशा मातरो जनका यासां ताभिः **(त्रयः)** उपर्यधोमध्याख्याः **(आहावाः)** निपानसदृशा मार्गा जलाधरा वा। **निपानमाहावः।** (अष्टा०३.३.७४) इति निपातनम्। **(त्रेधा)** त्रिभिः प्रकारैः **(हविः)** होतुमर्हं द्रव्यम्। **(कृतम्)** शोधितम् **(तिस्रः)** स्थूलत्रसरेणुपरमाण्वाख्याः **(पृथिवीः)** विस्तृताः **(उपरि)** ऊर्ध्वार्थे **(प्रवा)** गमयितारौ **(दिवः)** प्रकाशयुक्तान् किरणान् **(नाकम्)** अविद्यमानदुःखम् **(रक्षेथे)** रक्षतम्। अत्र लोडर्थे लङ् व्यत्ययेनात्मनेपदं च **(द्युभिः)** दिनैः **(अक्तुभिः)** रात्रिभिः। **द्युरित्यहर्नामसु पठितम्।** (निघं०१.७ **(हितम्)** धृतम्॥८॥

अन्वयः-हे प्रवौ गमयितारावश्विनौ वायुसूर्य्याविव शिल्पिनौ! युवां सप्तमातृभिः सिन्धुभिर्द्युभिरक्तुभिश्च यस्य त्रय आहावाः सन्ति तत् त्रेधा हविष्कृतं शोधितं नाकं हितं द्रव्यमुपरि प्रक्षिप्य तत् तिस्रः पृथिवीर्दिवः प्रकाशयुक्तान् किरणान् प्रापय्य तदितस्ततश्चालयित्वाऽधो वर्षयित्वैतेन सर्वं जगती रक्षेथे त्रिवारं रक्षतम्॥८॥

भावार्थः-मनुष्यैर्वायुसूर्य्ययोश्छेदनाकर्षणवृष्ट्युद्भावकैर्गुणैर्नद्यश्चलन्ति हुतं द्रव्यं दुर्गन्धादिदोषान्निवार्य हितं सर्वदुःखरहितं सुख साधयति यतोऽहर्निशं सुखं वर्द्धते येन विना कश्चित्प्राणी जीवितुं न शक्नोति तस्मादेतच्छोधनार्थं यज्ञाख्यं कर्म नित्यं कर्तव्यमिति॥८॥

पदार्थः-हे **(प्रवा)** गमन कराने वाले **(अश्विना)** सूर्य और वायु के समान कारीगर लोगो! आप **(सप्तमातृभिः)** जिन को सप्त अर्थात् पृथिवी, अग्नि, सूर्य, वायु, बिजुली, जल और आकाश सात माता के तुल्य उत्पन्न करने वाले हैं उन **(सिन्धुभिः)** नदियों और **(द्युभिः)** दिन **(अक्तुभिः)** रात्रि के साथ जिसके **(त्रयः)** ऊपर, नीचे और मध्य में चलने वाले **(आहावः)** जलाधार मार्ग हैं, उस **(त्रेधा)** तीन प्रकार से **(हविष्कृतम्)** ग्रहण करने योग्य शोधे हुए **(नाकम्)** सब दुःखों से रहित **(हितम्)** स्थित द्रव्य को **(उपरि)** ऊपर चढ़ा के **(तिस्रः)** स्थूल त्रसरेणु और परमाणु नाम वाली तीन प्रकार की **(पृथिवीः)** विस्तारयुक्त पृथिवी और **(दिवः)** प्रकाशस्वरूप किरणों को प्राप्त कराके उसको इधर-उधर चला और नीचे वर्षा के इससे सब जगत् की **(त्रिः)** तीन वार **(रक्षेथे)** रक्षा कीजिये॥८॥

भावार्थः-मनुष्यों को योग्य है कि जो सूर्य वायु के छेदन आकर्षण और वृष्टि कराने वाले गुणों से नदियां चलती तथा हवन किया हुआ द्रव्य दुर्गन्धादि दोषों को निवारण कर सब दुःखों से रहित सुखों को सिद्ध करता है, जिससे दिन-रात सुख बढ़ता है, इसके विना कोई प्राणी जीवने को समर्थ नहीं हो सकता, इस से इसकी शुद्धि के लिये यज्ञरूप कर्म नित्य करें॥८॥

पुनस्ताभ्यां किं कर्त्तव्यमित्युपदिश्यते॥

फिर उन से क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

क्व१ त्री चक्रा त्रिवृतो रथस्य क्व१ त्रयो वन्धुरो ये सनीळाः।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः॥९॥

क्व। त्री। चक्रा। त्रिऽवृतः। रथस्य। क्व। त्रयः। वन्धुरः। ये। सऽनीळाः। कदा। योगः। वाजिनः। रासभस्य। येन। यज्ञम्। नासत्या। उपऽयाथः॥९॥

पदार्थः-(**क्व**) कस्मिन् (**त्री**) त्रीणि (**चक्रा**) यानस्य शीघ्रं गमनाय निर्मितानि कलाचक्राणि। अत्रोभयत्र **शेश्छन्द०** इति शेर्लोपः। (**त्रिवृतः**) त्रिभी रचनचालनसामग्रीभिः पूर्णस्य (**रथस्य**) त्रिषु भूमिजलान्तरिक्षमार्गेषु रमन्ते येन तस्य (**क्व**) (**त्रयः**) जलाग्निमनुष्यपदार्थस्थित्यर्थावकाशाः (**बन्धुरः**) बन्धनविशेषाः। **सुपां सुलुग्०** इति जसः स्थाने सुः। (**ये**) प्रत्यक्षाः (**सनीडाः**) समाना नीडा बन्धना धारा गृहविशेषा अग्न्यागारविशेषा वा येषु ते (**कदा**) कस्मिन् काले (**योगः**) युज्यते यस्मिन् सः (**वाजिनः**) प्रशस्तो वाजो वेगोऽस्यास्तीति तस्य। अत्र प्रशंसार्थ इनिः। (**रासभस्य**) रासयन्ति शब्दयन्ति येन वेगेन तस्य **रासभावश्विनोरित्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५) (**येन**) रथेन (**यज्ञम्**) गमनयोग्यं मार्गं (**नासत्या**) सत्यगुणस्वभावौ (**उपयाथः**) शीघ्रमभीष्टस्थाने सामीप्यं प्रापयथः॥९॥

अन्वयः-हे नासत्यावश्विनौ शिल्पिनौ युवां! येन विमानादियानेन यज्ञं सङ्गन्तव्यं मार्गं कदोपयाथो दूरदेशस्थं स्थानं सामीप्यवत्प्रापयथः तस्य च रासभस्य वाजिनस्त्रिवृतो रथस्य मध्ये क्व त्रीणि चक्राणि कर्त्तव्यानि क्व चास्मिन् विमानादियाने ये सनीडास्त्रयो बन्धुरास्तेषां योगः कर्त्तव्य इति त्रयः प्रश्नाः॥९॥

भावार्थः-अत्रोक्तानां त्रयाणां प्रश्नानामेतान्युत्तराणि वेद्यानि विभूतिकामैर्नरै रथस्यादिमध्यान्तेषु सर्वकलाबन्धनाधाराय त्रयो बन्धनविशेषाः कर्त्तव्याः। एकं मनुष्याणां स्थित्यर्थं द्वितीयमग्निस्थित्यर्थं तृतीयं जलस्थित्यर्थं च कृत्वा यदा यदा गमनेच्छा भवेत्तदा तदा यथायोग्यकाष्ठानि संस्थाप्याग्निं योजयित्वा कलायन्त्रोद्भावितेन वायुना सन्दीप्य वाष्पवेगेन चालितेन यानेन सद्यो दूरमपि स्थानं समीपवत्प्राप्तुं शक्नुयुः। नहीदृशेन यानेन विना कश्चिन्निर्विघ्नतया स्थानान्तरं सद्यो गन्तुं शक्नोतीति॥९॥

पदार्थः-हे नासत्या सत्य गुण और स्वभाव वाले कारीगर लोगो! तुम दोनों **(यज्ञम्)** दिव्यगुण युक्त विमान आदि यान से जाने-आने योग्य मार्ग को **(कदा)** कब **(उपयाथः)** शीघ्र जैसे निकट पहुंच जावें, वैसे पहुंचते हो और **(येन)** जिससे पहुंचते हो उस **(रासभस्य)** शब्द करने वाले **(वाजिनः)** प्रशंसनीय वेग से युक्त **(त्रिवृतः)** रचन, चालन आदि सामग्री से पूर्ण **(रथस्य)** और भूमि, जल, अन्तरिक्ष मार्ग में रमण कराने वाले विमान में **(क्व)** कहाँ **(त्री)** तीन **(चक्रा)** चक्र रचने चाहिये और इस विमानादि यान में **(ये)** जो **(सनीडाः)** बराबर बन्धनों के स्थान वा अग्नि रहने का घर **(बन्धुरः)** नियमपूर्वक चलाने के हेतु काष्ठ होते हैं, उनका **(योगः)** योग **(क्व)** कहाँ रहना चाहिये ये तीन प्रश्न हैं॥९॥

भावार्थः-इस मन्त्र में कहे हुए तीन प्रश्नों के ये उत्तर जानने चाहिये। विभूति की इच्छा रखने वाले पुरुषों को उचित है कि रथ के आदि, मध्य और अन्त में सब कलाओं के बन्धनों के आधार के लिये तीन बन्धन विशेष सम्पादन करें तथा तीन कला घूमने-घुमाने के लिये सम्पादन करें। एक मनुष्यों के बैठने, दूसरी अग्नि की स्थिति और तीसरी जल की स्थिति के लिये करके जब-जब चलने की इच्छा हो, तब-तब यथायोग्य जलकाष्ठों को स्थापन, अग्नि को युक्त और कला के वायु से प्रदीप्त करके भाफ के वेग से चलाये हुए यान से शीघ्र दूर स्थान को भी निकट के समान जाने को समर्थ होवें। क्योंकि इस प्रकार किये विना निर्विघ्नता से स्थानान्तर को कोई मनुष्य शीघ्र नहीं जा सकता॥९॥

पुनस्ताभ्यां किं साधनीयमित्युपदिश्यते॥

फिर उन से क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मंन्त्र में किया है॥

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः।
युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति॥१०॥

आ। नासत्या। गच्छतम्। हूयते। हविः। मध्वः। पिबतम्। मधुऽपेभिः। आसऽभिः। युवोः। हि। पूर्वम्। सविता। उषसः। रथम्। ऋताय। चित्रम्। घृतऽवन्तम्। इष्यति॥ १०॥

पदार्थः-(**आ**) समन्तात् (**नासत्या**) अश्विनाविव। अत्र **सुपां सुलुग्०** इत्याकारादेशः (**गच्छतम्**) (**हूयते**) क्षिप्यते दीप्यते (**हविः**) होतुं प्रक्षेप्तुं दातुमर्हं काष्ठादिकमिन्धनम् (**मध्वः**) मधुरगुणयुक्तानि जलानि। **मध्वित्युदकनामसु पठितम्।** (निघं०१.१२) अत्र लिङ्गव्यत्ययेन पुंस्त्वम्। **वाच्छन्दसि सर्वे०** इति पूर्वसवर्णप्रतिषेधाद्यणादेशः। (**पिबतम्**) (**मधुपेभिः**) मधूनि जलानि पिबन्ति यैस्तैः (**आसभिः**) स्वकीयैरास्यवच्छेदकगुणैः। अत्रास्यस्य स्थाने **पदन्नोमास्०** (अष्टा०६.१.६३) इत्यासन्नादेशः। (**युवोः**) युवयोः (**हि**) निश्चयार्थे (**पूर्वम्**) प्राक् (**सविता**) सूर्यलोकः (**उषसः**) सूर्योदयात्प्राक् वर्त्तमानकालवेलायाः (**रथम्**) रमणहेतुम् (**ऋताय**) सत्यगमनाय। **ऋतमिति सत्यनामसु पठितम्।** (निघं०३.१०) (**चित्रम्**) आश्चर्य्यवेगादियुक्तम् (**घृतवन्तम्**) घृतानि बहून्युदकानि विद्यन्ते यस्मिँस्तम्। **घृतमित्युदकनामसु पठितम्।** (निघं०१.१२) (**इष्यति**) गच्छति॥ १०॥

अन्वयः-हे अश्विनौ! नासत्याभ्यामश्विभ्यामिव युवाभ्यां यद्धविर्हूयते तेन हविषा शोधितानि मध्वो मधूनि जलानि मधुपेभिरासभिः पिबतम्। अस्मदानन्दाय घृतवन्तं चित्रं रथमागच्छतं समन्ताच्छीघ्रं प्राप्नुतं युवोर्युवयोर्यो रथ उषसः पूर्वं सवितेव प्रकाशमान इष्यति स ह्यृतायास्माभिर्गृहीतव्यो भवति॥ १०॥

भावार्थः-यदा यानेष्वग्निजले प्रदीप्य चालयन्ति तदेमानि यानानि स्थानान्तरं सद्यः प्राप्नुवन्ति। तत्र जलवाष्पनिस्सारणायैकमीदृशं स्थानं निर्मातव्यं यद्द्वारा वाष्पनिर्मोचनेन वेगो वर्द्धेत। एतद्विद्याऽभिज्ञ एव सम्यक् सुखं प्राप्नोति॥ १०॥

पदार्थः-हे शिल्पिलोगो! तुम दोनों (**नासत्या**) जल और अग्नि के सदृश जिस (**हविः**) सामग्री का (**हूयते**) हवन करते हो उस हवि से शुद्ध हुए (**मध्वः**) मीठे जल (**मधुपेभिः**) मीठे-मीठे जल पीने वाले (**आसभिः**) अपने मुखों से (**पिबतम्**) पियो और हम लोगों को आनन्द देने के लिये (**घृतवन्तम्**) बहुत जल की कलाओं से युक्त (**चित्रम्**) वेगादि आश्चर्य्य गुणसहित (**रथम्**) विमानादि यानों से देशान्तरों को (**गच्छतम्**) शीघ्र जाओ आओ (**युवोः**) तुम्हारा जो रथ (**उषसः**) प्रातःकाल से (**पूर्वम्**) पहिले (**सविता**) सूर्यलोक के समान प्रकाशमान (**इष्यति**) शीघ्र चलता है (**हि**) वही (**ऋताय**) सत्य सुख के लिये समर्थ होता है॥ १०॥

भावार्थः-जब यानों में जल और अग्नि को प्रदीप्त करके चलाते हैं, तब ये यान और स्थानों को शीघ्र प्राप्त कराते हैं, उनमें जल और भाप के निकलने का एक ऐसा स्थान रच लेवें कि जिसमें होकर भाफ के निकलने से वेग की वृद्धि होवे। इस विद्या का जानने वाला ही अच्छे प्रकार सुखों को प्राप्त होता है॥ १०॥

पुनस्ताभ्यां किं किं साधनीयमित्युपदिश्यते॥

फिर उनसे क्या-क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा॥ ११॥

आ। नासत्या। त्रिऽभिः। एकादशैः। इह। देवेभिः। यातम्। मधुऽपेयम्। अश्विना। प्र। आयुः। तारिष्टम्। निः। रपांसि। मृक्षतम्। सेधतम्। द्वेषः। भवतम्। सचाऽभुवा॥ ११॥

पदार्थः-(**आ**) समन्तात् (**नासत्या**) सत्यगुणस्वभावौ। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेशः। (**त्रिभिः**) एभिरहोरात्रैः समुद्रस्य पारम् (**एकादशैः**) एभिरहोरात्रैर्भूगोलान्तम् (**इह**) यानेषु सम्प्रयोजितौ (**देवेभिः**) विद्वद्भिः (**यातम्**) प्राप्नुतम् (**मधुपेयम्**) मधुभिर्गुणैर्युक्तं पेयं द्रव्यम् (**अश्विना**) द्यावापृथिव्यादिकौ द्वौ द्वौ (**प्र**) प्रकृष्टार्थे (**आयुः**) जीवनम् (**तारिष्टम्**) अन्तरिक्षं प्लावयतम् (**निः**) नितराम् (**रपांसि**) पापानि दुःखप्रदानि। **रपोरिप्रमिति पापनामनी भवतः।** (निरु०४.२१) (**मृक्षतम्**) दूरीकुरुतम् (**सेधतम्**) मङ्गलं सुखं प्राप्नुतम् (**द्वेषः**) द्विषतः शत्रून्। **अन्येभ्योऽपि दृश्यन्त** इति कर्तरि विच्। (**भवतम्**) (**सचाभुवा**) यौ सचा समवायं भावयतस्तौ। अत्रान्तर्गतो ण्यर्थः॥ ११॥

अन्वयः-हे शिल्पिनौ! युवां नासत्याश्विना सचाभुवाविव देवेभिर्विद्वद्भिस्सहेहोत्तमेषु यानेषु स्थित्वा त्रिभिरहोरात्रैर्महासमुद्रस्य पारमेकादशैरहोरात्रैर्भूगोलान्तं यातं द्वेषो रपांसि च निर्मृक्षतं मधुपेयमायुः प्रतारिष्टं सुसुखं सेधतं विजयिनौ भवतम्॥ ११॥

भावार्थः-यदा मनुष्या ईदृशेषु (यानेषु) स्थित्वा चालयन्ति तदा त्रिभिरहोरात्रैः सुखेन समुद्रपारमेकादशैरहोरात्रैर्भूगोलस्याभितो गन्तुं शक्नुवन्ति। एवं कुर्वन्तो विद्वांसः सुखयुक्तं पूर्णमायुः प्राप्य दुःखानि दूरीकृत्य शत्रून् विजित्य चक्रवर्त्तिराज्यभागिनो भवन्तीति॥ ११॥

पदार्थः-हे शिल्पि लोगो! तुम दोनों (**नासत्या**) सत्यगुण स्वभावयुक्त (**सचाभुवा**) मेल कराने वाले जल और अग्नि के समान (**देवेभिः**) विद्वानों के साथ (**इह**) इन उत्तम यानों में बैठ के (**त्रिभिः**) तीन दिन और तीन रात्रियों में महासमुद्र के पार और (**एकादशभिः**) ग्यारह दिन और ग्यारह रात्रियों में भूगोल पृथिवी के अन्त को (**यातम्**) पहुंचो (**द्वेषः**) शत्रु और (**रपांसि**) पापों को (**निर्मृक्षतम्**) अच्छे प्रकार दूर करो (**मधुपेयम्**) मधुर गुणयुक्त पीने योग्य द्रव्य और (**आयुः**) उमर को (**प्रतारिष्टम्**) प्रयत्न से बढ़ाओ, उत्तम सुखों को (**सेधतम्**) सिद्ध करो और शत्रुओं को जीतने वाले (**भवतम्**) होओ॥ ११॥

भावार्थः-जब मनुष्य ऐसे यानों में बैठ और उनको चलाते हैं, तब तीन दिन और रात्रियों में सुख से समुद्र के पार तथा ग्यारह दिन और ग्यारह रात्रियों में ब्रह्माण्ड के चारों और जाने को समर्थ हो सकते हैं। इसी प्रकार करते हुए विद्वान् लोग सुखयुक्त पूर्ण आयु को प्राप्त हो दुःखों को दूर और शत्रुओं को जीत कर चक्रवर्त्तिराज्य भोगने वाले होते हैं॥ ११॥

पुनरेताभ्यां किं साधनीयमित्युपदिश्यते॥

फिर इन से क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नो॑ अश्विना त्रि॒वृता॒ रथे॑ना॒र्वाञ्चं॑ व॑हतं सु॒वी॑रम्
शृ॒ण्वन्ता॑ वा॒मव॑से जोहवीमि वृ॒धे च॑ नो भवतं वाज॑सातौ॥ १२॥ ५॥

आ। नः। अ॒श्विना॒ त्रि॒ऽवृता॑। रथे॑न। अ॒र्वाञ्च॑म्। र॒यिम्। व॒ह॒त॒म्। सु॒ऽवी॑रम्। शृ॒ण्वन्ता॑। वा॒म्। अव॑से। जो॒ह॒वी॒मि॒। वृ॒धे। च॒। नः॒। भ॒व॒त॒म्। वाज॑ऽसातौ॥ १२॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्माकम् (**अश्विना**) जलपवनौ। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेशः। (**त्रिवृता**) यस्त्रिषु स्थलजलान्तरिक्षेषु पूर्णगत्या गमनाय वर्त्तते यते तेन (**रथेन**) विमानादियानस्वरूपेण रमणसाधनेन (**अर्वाञ्चम्**) अर्वागुपरिष्टादधस्थं स्थानमभीष्टं वाऽञ्चति येन तम् (**रयिम्**) चक्रवर्त्तिराज्यसिद्धं धनम् (**वहतम्**) प्राप्नुतः। अत्र लडर्थे लोट्। (**सुवीरम्**) शोभना वीरा यस्य तम् (**शृण्वन्ता**) शृण्वन्तौ (**वाम्**) युवयोः (**अवसे**) रक्षणाय सुखावगमाय विद्यायां प्रवेशाय वा (**जोहवीमि**) पुनः पुनराददामि (**वृधे**) वर्द्धनाय। अत्र **कृतो बहुलम्** इति भावे क्विप्। (**च**) समुच्चये (**नः**) अस्मान् (**भवतम्**) भवतः। अत्र लडर्थे लोट्। (**वाजसातौ**) सङ्ग्रामे॥ १२॥

अन्वयः-हे शिल्पविद्याविचक्षणौ शृण्वन्ता श्रावयितारावश्विनौ! युवां द्यावापृथिव्यादिकौ द्वाविव त्रिवृता रथेन नोऽस्मानर्वाञ्चं सुवीरं रयिमावहतं प्राप्नुतम् नोऽस्माकं वाजसातौ वृधे वर्द्धनाय च विजयिनौ भवतं यथाऽहं वामवसे जोहवीमि पुनः पुनराददामि तथा मां गृह्णीतम्॥ १२॥

भावार्थः-नैतदश्विसम्प्रयोजितरथेन विना कश्चित् स्थलजलान्तरिक्षमार्गान् सुखेन सद्यो गन्तुं शक्नोत्यतो राज्यश्रियमुत्तमां सेनां वीरपुरुषाँश्च सम्प्राप्येदृशेन यानेन युद्धे विजयं प्राप्तुं शक्नुवन्ति तस्मादेतस्मिन् मनुष्याः सदा युक्ता भवन्त्विति॥ १२॥

पूर्वेण सूक्तेनैतद्विद्यासाधकेन्द्रोऽर्थः प्रतिपादितोऽनेन सूक्तेन ह्येतस्या विद्याया मुख्यौ साधकावश्विनौ द्यावापृथिव्यादिकौ च प्रतिपादितौ स्त इत्येतदर्थस्य पूर्वार्थेन सह सङ्गतिरस्तीति विज्ञेयम्।

इति पञ्चमो वर्गश्चतुस्त्रिंशं सूक्तं च समाप्तम्॥ ३४॥

पदार्थः-हे कारीगरी में चतुरजनो! (**शृण्वन्ता**) श्रवण कराने वाले (**अश्विना**) दृढ़ विद्या बलयुक्त आप दोनों जल और पवन के समान (**त्रिवृता**) तीन अर्थात् स्थल, जल और अन्तरिक्ष में पूर्णगति से जाने के लिये वर्त्तमान (**रथेन**) विमान आदि यान से (**नः**) हम लोगों को (**अर्वाञ्चम्**) ऊपर से नीचे अभीष्ट स्थान को प्राप्त होने वाले (**सुवीरम्**) उत्तम वीर युक्त (**रयिम्**) चक्रवर्त्ति राज्य से सिद्ध हुए धन को (**आवहतम्**) अच्छे प्रकार प्राप्त होके पहुंचाइये (**च**) और (**नः**) हम लोगों के (**वाजसातौ**) सङ्ग्राम में (**वृधे**) वृद्धि के अर्थ विजय को प्राप्त कराने वाले (**भवतम्**) हूजिये, जैसे मैं (**अवसे**) रक्षादि के लिये (**वाम्**) तुम्हारा (**जोहवीमि**) वारंवार ग्रहण करता हूं, वैसे आप मुझ को ग्रहण कीजिये॥ १२॥

भावार्थः-जल अग्नि से प्रयुक्त किये हुए रथ के विना कोई मनुष्य स्थल जल और अन्तरिक्ष मार्गों में शीघ्र जाने को समर्थ नहीं हो सकता। इस से राज्यश्री, उत्तम सेना और वीर पुरुषों को प्राप्त होके ऐसे विमानादि यानों से युद्ध में विजय को पा सकते हैं। इस कारण इस विद्या में मनुष्य सदा युक्त हों॥१२॥

पूर्व सूक्त से इस विद्या के सिद्ध करने वाले इन्द्र शब्द के अर्थ का प्रतिपादन किया तथा इस सूक्त से इस विद्या के साधक अश्वि अर्थात् द्यावापृथिवी आदि अर्थ प्रतिपादन किये हैं। इससे इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह पांचवां वर्ग और चौतीसवां सूक्त समाप्त हुआ॥३४॥

अथैकादशर्चस्य पञ्चत्रिंशस्य सूक्तस्याङ्गिरसो हिरण्यस्तूप ऋषिः। आदिमस्य मन्त्रस्याग्निर्मित्रावरुणौ रात्रिः सविता च, २-११ सविता च देवताः। १ विराड् जगती। ९ निचृज्जगती छन्दः। निषादः स्वरः। २, ५, १०, ११ विराट् त्रिष्टुप्। ३, ४, ६ त्रिष्टुप् छन्दः। धैवतः स्वरः ७,८ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

तत्र अग्न्यादिगुणान् विज्ञाय कृत्यं सिद्धं कुर्य्यादित्युपदिश्यन्ते॥

अब पैतीसवें सूक्त का आरम्भ है। उस के पहिले मन्त्र से अग्नि आदि के गुणों को जाने के सब प्रयोजनों को सिद्ध करे, इस विषय का वर्णन किया है॥

ह्वया॑म्यु॒ग्निं प्र॑थ॒मं स्व॒स्तये॒ ह्वया॑मि मि॒त्रावरु॑णावि॒हाव॑से।
ह्वया॑मि॒ रात्री॑ं जग॑तो नि॒वेश॑नी॑ं ह्वया॑मि दे॒वं स॑वि॒तार॑मू॒तये॑॥ १॥

ह्वया॑मि। अ॒ग्निम्। प्र॒थ॒मम्। स्व॒स्तये॑। ह्वया॑मि। मि॒त्रावरु॑णौ। इ॒ह। अव॑से। ह्वया॑मि। रात्री॑म्। जग॑तः। नि॒ऽवेश॑नीम्। ह्वया॑मि। दे॒वम्। स॒वि॒तार॑म्। ऊ॒तये॑॥ १॥

पदार्थः-(**ह्वयामि**) स्पर्धामि (**अग्निम्**) रूपगुणम् (**प्रथमम्**) जीवनस्यादिमनिमित्तम् (**स्वस्तये**) सुशोभनमिष्टं सुखमस्ति यस्मात्तस्मै सुखाय (**ह्वयामि**) स्वीकरोमि (**मित्रावरुणौ**) मित्रः प्राणो वरुण उदानस्तौ (**इह**) अस्मिन् शरीरधारणादिव्यवहारे (**अवसे**) रक्षणाद्याय (**ह्वयामि**) प्राप्नोमि (**रात्रीम्**) सूर्याभावादन्धकाररूपाम् (**ह्वयामि**) गृह्णामि (**देवम्**) द्योतनात्मकं (**सवितारम्**) सूर्यलोकम् (**ऊतये**) क्रियासिद्धीच्छायै॥ १॥

अन्वयः-अहमिह स्वस्तये प्रथममग्निं ह्वयाम्यवसे मित्रावरुणौ ह्वयामि जगतो निवेशनीं रात्रीं ह्वयाम्यूतये सवितारं देवं ह्वयामि॥ १॥

भावार्थः-मनुष्यैरहर्निशं सुखायाग्निवायुसूर्याणां सकाशादुपयोगं गृहीत्वा सर्वाणि सुखानि प्राप्याणि नैतदादिना विना कदाचित् कस्यचित् सुखं सम्भवतीति॥ १॥

पदार्थः-मैं (**इह**) इस शरीर धारणादि व्यवहार में (**स्वस्तये**) उत्तम सुख होने के लिये (**प्रथमम्**) शरीर धारण के आदि साधन (**अग्निम्**) रूप गुणयुक्त अग्नि के (**ह्वयामि**) ग्रहण की इच्छा करता हूँ (**अवसे**) रक्षणादि के लिये (**मित्रावरुणौ**) तथा प्राण वा उदान वायु को (**ह्वयामि**) स्वीकार करता हूं (**जगतः**) संसार को (**निवेशनीम्**) निद्रा में निवेश कराने वाली (**रात्रीम्**) सूर्य के अभाव से अन्धकाररूप रात्रि को (**ह्वयामि**) प्राप्त होता हूं (**ऊतये**) क्रियासिद्धि की इच्छा के लिये (**देवम्**) द्योतनात्मक (**सवितारम्**) सूर्य लोक को (**ह्वयामि**) ग्रहण करता हूं॥ १॥

भावार्थः-मनुष्यों को चाहिये कि दिन-रात सुख के लिये अग्नि वायु और सूर्य के सकाश से उपकार को ग्रहण करके सब सुखों को प्राप्त होवें, क्योंकि इस विद्या के विना कभी किसी पुरुष को पूर्ण सुख का सम्भव नहीं हो सकता॥ १॥

अथ सूर्यलोकगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में सूर्यलोक के गुणों का उपदेश किया है॥

आ कृ॒ष्णेन॒ रज॑सा॒ वर्त॑मानो नि॒वे॒श॒य॑न्न॒मृत॑ं॒ मर्त्यं॑ च।
हि॒र॒ण्यये॑न सवि॒ता रथे॒ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न्॥ २॥

आ। कृ॒ष्णेन॑। रज॑सा। वर्त॑मानः। नि॒ऽवे॒श॒य॑न्। अ॒मृत॑म्। मर्त्य॑म्। च॒। हि॒र॒ण्यये॑न। स॒वि॒ता रथे॑न। आ। दे॒वः। या॒ति॒। भुव॑नानि। पश्य॑न्॥ २॥

पदार्थः-**(आ)** समन्तात् **(कृष्णेन)** कर्षति येन स कृष्णस्तेन। यद्वा कृष्णवर्णेन लोकेन। **कृष्णं कृष्येतर्निकृष्टो वर्णः।** (निरु०२.२०) **यत्कृष्णं तदन्नस्य**। (छान्दो०६.५) एताभ्यां प्रमाणाभ्यां पृथिवीलोका अत्र गृह्यन्ते। **कृषेर्वर्णे।** (उणा०३.४) इति नक् प्रत्ययः। अत्राङ्पूर्वकत्वादाकर्षणार्थो गृह्यते **(रजसा)** लोकसमूहेन सह। **लोका रजांस्युच्यन्ते।** (निरु०४.१९) **(वर्त्तमानः)** वर्त्ततेऽसौ वर्त्तमानः **(निवेशयन्)** नितरां स्वस्वसामर्थ्ये स्थापयन् **(अमृतम्)** अन्तर्यामितया वेदद्वारा च मोक्षसाधकं सत्यं ज्ञानं वृष्टिद्वाराऽमृतात्मकं रसं वा **(मर्त्यम्)** कर्मप्रलयप्राप्तिव्यवस्थया कालव्यवस्थया वा मरणधर्मयुक्तं प्राणिनम् **(च)** समुच्चये **(हिरण्ययेन)** ज्योतिर्मयेनानन्तेन यशसा तेजोमयेन वा। **ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि।** (अष्टा०वा०६.४.१७५) इत्ययं निपातितः। **ज्योतिर्हि हिरण्यम्।** (श०ब्रा०४.३.१.२१) **(सविता)** सर्वेषां प्रसविता प्रकाशवृष्टिरसानां च प्रसविता **(रथेन)** रंहति जानाति गच्छति गमयति वा येन तेन। **रथो रंहतेर्गतिकर्मणः।** (निरु०९.११) **(आ)** समन्तात् **(देवः)** दीव्यति प्रकाशयतीति **(याति)** प्राप्नोति प्रापयति वा। अत्र पक्षेऽन्तर्गतो ण्यर्थः। **(भुवनानि)** भवन्ति भूतानि येषु तानि। **भूसू०** (उणा०२.७८) इत्यधिकरणे क्युन् प्रत्ययः। **(पश्यन्)** प्रेक्षमाणो दर्शयन् वा। अत्रापि पक्षेऽन्तर्गतो ण्यर्थः॥ २॥

अन्वयः-अयं सविता देवः परमेश्वर आकृष्णेन रजसा सहाभिव्याप्य वर्त्तमानः सर्वस्मिन् जगत्यमृतं मर्त्यं च निवेशयन् सन् हिरण्ययेन यशोमयेन ज्ञानरथेन युक्तो भुवनानि पश्यन्नायाति समन्तात् सर्वान् पदार्थान् प्राप्नोतीति पूर्वोऽन्वयः। अयं सविता देवः सूर्यलोकः कृष्णेन रजसा सह वर्त्तमानोऽस्मिन् जगत्यमृतं मर्त्यं च निवेशयन् हिरण्ययेन रथेन भुवनानि पश्यन् दर्शयन् सन्नायाति समन्ताद् वृष्ट्यादिरूपविभागं च प्रापयतीत्यपरोऽन्वयः॥ २॥

भावार्थः-अत्र श्लेषालङ्कारः। यथा पृथिव्यादयो लोकाः सर्वान् मनुष्यादीन् धरन्ति सूर्यलोक आकर्षणेन पृथिव्यादीन् धरति। ईश्वरः स्वसत्तया सूर्यादीन् लोकान् धरति। एवं क्रमेण सर्वलोकधारणं प्रवर्त्तते, नैतेन विनान्तरिक्षे कस्यचिद् गुरुत्वयुक्तस्य लोकस्य स्वपरिधौ स्थितेः सम्भवोऽस्ति। नैव लोकानां भ्रमणेन विना क्षणमुहूर्त्तप्रहराहोरात्रपक्षमासर्तुसंवत्सरादयः कालावयवा उत्पत्तुं शक्नुवन्तीति॥ २॥

पदार्थः-यह **(सविता)** सब जगत् के उत्पन्न करने वाला **(देवः)** सबसे अधिक प्रकाशयुक्त परमेश्वर **(आकृष्णेन)** अपनी आकर्षण शक्ति से **(रजसा)** सब सूर्य्यादि लोकों के साथ व्यापक **(वर्त्तमानः)** हुआ **(अमृतम्)** अन्तर्यामिरूप वा वेद द्वारा मोक्षसाधक सत्य ज्ञान **(च)** और **(मर्त्यम्)** कर्मों और प्रलय की व्यवस्था से मरणयुक्त जीव को **(निवेशयन्)** अच्छे प्रकार स्थापना करता हुआ **(हिरण्ययेन)** यशोमय **(रथेन)** ज्ञानस्वरूप रथ से युक्त **(भुवनानि)** लोकों को **(पश्यन्)** देखता हुआ **(आयाति)** अच्छे प्रकार सब पदार्थों को प्राप्त होता है॥ १॥ २॥

यह **(सविता)** प्रकाश वृष्टि और रसों का उत्पन्न करने वाला **(कृष्णेन)** प्रकाशरहित **(रजसा)** पृथिवी आदि लोकों के साथ **(आ वर्त्तमानः)** अपनी आकर्षण शक्ति से वर्त्तमान इस जगत् में **(अमृतम्)** वृष्टि द्वारा अमृत स्वरूप रस **(च)** तथा **(मर्त्यम्)** काल व्यवस्था से मरण को **(निवेशयन्)** अपने-अपने सामर्थ्य में स्थापन करता हुआ **(हिरण्ययेन)** प्रकाशस्वरूप **(रथेन)** गमन शक्ति से **(भुवनानि)** लोकों को **(पश्यन्)** दिखाता हुआ **(आयाति)** अच्छे प्रकार वर्षा आदि रूपों की अलग अलग प्राप्ति कराता है॥ २॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जैसे सब पृथिवी आदि लोक मनुष्यादि प्राणियों वा सूर्यलोक अपने आकर्षण से पृथिवी आदि लोकों वा ईश्वर अपनी सत्ता से सूर्यादि सब लोकों का धारण करता है, ऐसे क्रम से सब लोकों का धारण होता है, इसके विना अन्तरिक्ष में किसी अत्यन्त भारयुक्त लोक का अपनी परिधि में स्थिति होने का सम्भव नहीं होता और लोकों के घूमने विना क्षण, मुहूर्त, प्रहर, दिन, रात, पक्ष, मास, ऋतु और संवत्सर आदि कालों के अवयव नहीं उत्पन्न हो सकते हैं॥ २॥

अथ वायुसूर्य्यदृष्टान्तेन शूरवीरगुणा उपदिश्यन्ते॥

अब वायु और सूर्य्य के दृष्टान्त के साथ अगले मन्त्र में शूरवीर के गुणों का उपदेश किया है॥

याति॑ दे॒वः प्र॒वता॒ यात्यु॒द्वता॒ याति॑ शु॒भ्राभ्यां॑ यज॒तो हरि॑भ्याम्।
आ दे॒वो या॑ति सवि॒ता प॑रा॒वतोऽप॒ विश्वा॑ दुरि॒ता बाध॑मानः॥ ३॥

याति॑। दे॒वः। प्र॒ऽवता॑। याति॑। उ॒त्ऽवता॑। याति॑। शु॒भ्राभ्या॑म्। य॒ज॒तः। हरि॑ऽभ्याम्। आ। दे॒वः। या॒ति॒। स॒वि॒ता। प॒रा॒ऽवतः॑। अप॑। विश्वा॑। दुः॒ऽइ॒ता। बाध॑मानः॥ ३॥

पदार्थः-(**याति**) गच्छति **(देवः)** द्योतको वायुः **(प्रवता)** अधोमार्गेण। अत्र प्रपूर्वकात् संभजनार्थाद् वनधातोः क्विप् **(याति)** प्राप्नोति **(उद्वता)** ऊर्ध्वमार्गेण **(याति)** गच्छति **(शुभ्राभ्याम्)** शुद्धाभ्याम् **(यजतः)** सङ्गन्तुं योग्यः **(हरिभ्याम्)** कृष्णशुक्लपक्षाभ्याम् **(आ)** अभ्यर्थे **(देवः)** प्रकाशकः **(याति)** प्राप्नोति **(सविता)** सूर्यलोकः **(परावतः)** दूरमार्गान्। **परावत इति दूरनामसु पठितम्।** (निघं०३.२६) **(अप)** दूरार्थे **(विश्वा)** विश्वानि सर्वाणि **(दुरिता)** दुष्टानि दुःखानि। अत्रोभयत्र **शेश्छन्दसि** इति लोपः। **(बाधमानः)** दुरीकुर्वन्॥ ३॥

अन्वयः-हे राजपुरुषा! भवन्तो यथा विश्वानि दुरितान्यपबाधमानो यजतो देवो वायुः प्रवता मार्गेण यात्युद्वता मार्गेण यात्यायाति च यथा च विश्वा दुरिता सर्वाणि दुःखप्रदान्यन्धकारादीनि बाधमानो यजतः सविता देवः सूर्यलोकः शुभ्राभ्यां हरिभ्यां हरणसाधनाभ्यामहोरात्राभ्यां कृष्णशुक्लपक्षाभ्यां परावतो दूरस्थान् पदार्थान् स्वकिरणैः प्राप्य पृथिव्यादीन् लोकान् याति प्राप्नोति तथा युद्धाय शूरवीरा गमनागमनाभ्यां प्रजाः सततं सुखयन्तु॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा ईश्वरोत्पादितायां सृष्टौ वायुरधऊर्ध्वसमगत्या गच्छन्नधस्थानुपर्युपरिस्थानानयति यथायमहोरात्रादिभ्यां हरणशीलाभ्यां स्वकिरणयुक्ताभ्यां युक्तः सविता देवोऽन्धकाराद्यपवारणेन दुःखानि विनाश्य सुखानि प्रकटय्य कदाचित् सुखानि निवार्य्य दुःखानि प्रकटयति तथा सभापत्यादिभिरपि सेनादिभिः सहगत्वागत्य च शत्रून् जित्वा प्रजापालनमनुष्ठेयम्॥३॥

पदार्थः-जैसे **(विश्वा)** सब **(दुरिता)** दुष्ट दुःखों को **(अप)** **(बाधमानः)** दूर करता हुआ **(यजतः)** संगत करने योग्य **(देवः)** श्रवण आदि ज्ञान का प्रकाशक वायु **(प्रवता)** नीचे मार्ग से **(याति)** जाता आता और **(उद्वता)** ऊर्ध्व मार्ग से **(याति)** जाता आता है और जैसे सब दुःख देने वाले अन्धकारादिकों को दूर करता हुआ **(यजतः)** सङ्गत होने योग्य **(सविता)** प्रकाशक सूर्यलोक **(शुभ्राभ्याम्)** शुद्ध **(हरिभ्याम्)** कृष्ण वा शुक्लपक्षों से **(परावतः)** दूरस्थ पदार्थों को अपनी किरणों से प्राप्त होकर पृथिव्यादि लोकों को **(आयाति)** सब प्रकार प्राप्त होता है, वैसे शूरवीरादि लोग सेना आदि सामग्री सहित ऊंचे-नीचे मार्ग में जा आ के शत्रुओं को जीत कर प्रजा की रक्षा निरन्तर किया करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर की उत्पन्न की हुई सृष्टि में वायु नीचे ऊपर वा समगति से चलता हुआ नीचे के पदार्थों को ऊपर और ऊपर के पदार्थों को नीचे करता है और जैसे दिन-रात वा आकर्षण धारण गुण वाले अपने किरण समूह से युक्त सूर्यलोक अन्धकारादिकों के दूर करने से दुःखों का विनाश कर सुख और सुखों का विनाश कर दुःखों को प्रगट करता है, वैसे ही सभापति आदि को भी अनुष्ठान करना चाहिये॥३॥

पुनस्तयोर्दृष्टान्तेन राजकृत्यमुपदिश्यते॥

फिर भी अगले मन्त्र में दोनों के दृष्टान्त से राजकार्य्य का उपदेश किया है॥

अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम्।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः॥४॥

अभिऽवृतम्। कृशनैः। विश्वऽरूपम्। हिरण्यऽशम्यम्। यजतः। बृहन्तम्। आ। अस्थात्। रथम्। सविता। चित्रऽभानुः। कृष्णा। रजांसि। तविषीम्। दधानः॥४॥

पदार्थः-**(अभीवृतम्)** अभितः सर्वतः साधनैः पूर्णो वर्त्तते सोऽभीवृत्तम्। **नहिवृति०** (अष्टा०६.३.११६) इति पूर्वस्य दीर्घत्वम्। **(कृशनैः)** तनूकरणैः सूक्ष्मत्वनिष्पादकैः किरणैर्विविधैरूपैर्वा। **कृशनमिति रूपनामसु पठितम्।** (निघं०३.७) **(विश्वरूपम्)** विश्वानि बहूनि रूपाणि यस्मिन् प्रकाशे तम् **(हिरण्यशम्यम्)** हिरण्यसुवर्णान्यन्यानि वा ज्योतींषि शम्यानि शमितुं योग्यानि यस्मिंस्तम् **(यजतः)** सङ्गतिप्रकाशयोर्दाता **(बृहन्तम्)** महान्तम् **(आ)** समन्तात् **(अस्थात्)** तिष्ठति। अत्र लडर्थे लुङ्। **(रथम्)** यस्मिन् रमते तम्। **रममाणोऽस्मिंस्तिष्ठतीति वा।** (निरु०९.११) **(सविता)** ऐश्वर्यवान् राजा सूर्यलोको वायुर्वा। **सवितेति पदनामसु पठितम्।** (निघं०५.४) अनेन प्राप्तिहेतोर्वायोरपि ग्रहणम्। **(चित्रभानुः)** चित्राभानवो दीप्तयो यस्य यस्माद्वा सः **(कृष्णा)** कृष्णान्याकर्षणाकृष्णवर्णयुक्तानि पृथिव्यादीनि **(रजांसि)** लोकान् **(तविषीम्)** बलम्। **तविषीति बलनामसु पठितम्।** (निघं०२.९) **(दधानः)** धरन्॥४॥

अन्वयः-हे सभेश राजँस्त्वं यथा यजतश्चित्रभानुः सविता सूर्यो वायुर्वा कृशनैः किरणै रूपैर्वा बृहन्तं हिरण्यशम्यमभीवृतं विश्वरूपं रथं कृष्णानि रजांसि पृथिव्यादिलोकांस्तविषीं बलं च दधानः सन्नास्थात् समन्तात् तिष्ठति तथा भूत्वा वर्त्तस्व॥४॥

भावार्थः-अत्र श्लेषवाचकलुप्तोपमालङ्कारौ। यथा सूर्यादिजननिमित्तः सूर्यादिलोकधारको बलवान् सर्वान् लोकानाकर्षणाख्यं बलं च धरन् वायुर्वर्त्तते यथा च सूर्यलोकः स्वसन्निहितान् लोकान् धरन् सर्वं रूपं प्रकटयन् बलाकर्षणाभ्यां सर्वं धरति नैताभ्यां विना कस्यचित् परमाणोरपि धारणं संभवति। तथैव राजा शुभगुणाढ्यो भूत्वा राज्यं धरेत्॥४॥

पदार्थः-हे सभा के स्वामी राजन्! आप जैसे **(यजतः)** सङ्गति करने वा प्रकाश का देने वाला **(चित्रभानुः)** चित्र-विचित्र दीप्तियुक्त **(सविता)** सूर्यलोक वा वायु **(कृशनैः)** तीक्ष्ण करने वाले किरण वा विविधरूपों से **(बृहन्तम्)** बड़े **(हिरण्यशम्यम्)** जिसमें सुवर्ण वा ज्योति शान्त करने योग्य हो **(अभीवृतम्)** चारों ओर से वर्त्तमान **(विश्वरूपम्)** जिसके प्रकाश वा चाल में बहुत रूप हैं, उस **(रथम्)** रमणीय रथ **(कृष्णा)** आकर्षण वा कृष्णवर्ण युक्त **(रजांसि)** पृथिव्यादि लोकों और **(तविषीम्)** बल को **(दधानः)** धारण करता हुआ **(आस्थात्)** अच्छे प्रकार स्थित होता है, वैसे अपना बर्त्ताव कीजिये॥४॥

भावार्थः-इस मन्त्र में श्लेष और वाचकलुप्तोपमालङ्कार हैं। जैसे सूर्य आदि की उत्पत्ति का निमित्त सूर्य आदि लोक का धारण करने वाला बलवान् सब लोकों और आकर्षणरूपी बल को धारण करता हुआ वायु विचरता है और जैसे सूर्य्यलोक अपने समीप स्थलों को धारण और सब रूप विषय को प्रकट करता हुआ बल वा आकर्षण शक्ति से सबको धारण करता है और इन दोनों के विना किसी स्थूल वा सूक्ष्म वस्तु के धारण का संभव नहीं होता, वैसे ही राजा को होना चाहिये कि उत्तम गुणों से युक्त होकर राज्य का धारण किया करें॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि जनाँऽछ्यावाः शितिपादो अख्यन् रथं हिरण्यप्रउगं वहन्तः।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः॥५॥६॥

वि। जनान्। श्यावाः। शितिऽपादः। अख्यन्। रथम्। हिरण्यऽप्रउगम्। वहन्तः। शश्वत्। विशः। सवितुः। दैव्यस्य। उपऽस्थे। विश्वा। भुवनानि। तस्थुः॥५॥

पदार्थः-(**वि**) विशेषार्थे (**जनान्**) विदुषः (**श्यावाः**) श्यायन्ते प्राप्नुवन्ति ते। श्यावाः। **सवितुरित्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५) (**शितिपादः**) शितयः शुक्लाः पादा अंशा येषां किरणानान्ते (**अख्यन्**) ख्याता भवन्ति। अत्र लडर्थे लुङ्। (**रथम्**) विमानादियानम् (**हिरण्यप्रउगम्**) हिरण्यस्य ज्योतिषोऽग्नेः प्रउगं सुखवत्स्थानं यस्मिँस्तं प्रयोगार्हम्। **पृषोदरादिना** अभीष्टरूपसिद्धिः (**वहन्तः**) प्राप्नुवन्तः (**शश्वत्**) अनादयः (**विशः**) प्रजा (**सवितुः**) सूर्यलोकस्य (**दैव्यस्य**) देवेषु दिव्येषु पदार्थेषु भवो दैव्यस्तस्य (**उपस्थे**) उपतिष्ठन्ते यस्मिँस्तस्मिन्। अत्र **घञर्थे कविधानम्** इत्यधिकरणे कः प्रत्ययः। (**विश्वा**) विश्वानि सर्वाणि। अत्र **शेश्छन्दसि** इति शेर्लोपः। (**भुवनानि**) पृथिवीगोलादीनि (**तस्थुः**) तिष्ठन्ति। अत्र लडर्थे लिट्॥५॥

अन्वयः-हे सज्जन! यथाऽस्य दैव्यस्य सवितुः सूर्यलोकस्योपस्थे विश्वा भुवनानि सर्वे भूगोलास्तस्थुस्तस्य शितिपादः श्यावाः किरणा जनान् हिरण्यप्रउगं रथं शश्वद्विशश्च वहन्त व्यख्यन् विविधतया ख्यान्ति तथा तव निकटे विद्वांसस्तिष्ठन्तु त्वं च विद्याधर्मौ प्रकटय॥५॥

भावार्थः-हे मनुष्या! यूयं यथा सूर्यलोकस्य प्रकाशाकर्षणादयो गुणाः सन्ति, ते सर्वं जगद्धारणपुरस्सरं यथायोग्यं प्रकटयन्ति, ये सूर्यस्य सन्निधौ लोकाः सन्ति, ते सूर्य्यप्रकाशेन प्रकाशन्ते, या अनादिरूपाः प्रजास्ता अपि वायुर्धरति। अनेन सर्वे लोकाः स्वस्वपरिधौ समवतिष्ठन्ते तथा गुणान् धरत स्वस्वव्यवस्थायां स्थित्वा न्यायान् स्थापयत च॥५॥

पदार्थः-हे सज्जन पुरुष! आप जैसे जिस (**दैव्यस्य**) विद्वान् वा दिव्य पदार्थों में उत्पन्न होने वाले (**सवितुः**) सूर्यलोक की (**उपस्थे**) गोद अर्थात् आकर्षण शक्ति में (**विश्वा**) सब (**भुवनानि**) पृथिवी आदि लोक (**तस्थुः**) स्थित होते हैं, उसके (**शितिपादः**) अपने श्वेत अवयवों से युक्त (**श्यावाः**) प्राप्ति होने वाले किरण (**जनान्**) विद्वानों (**हिरण्यप्रउगम्**) जिसमें ज्योतिरूप अग्नि के मुख के समान स्थान हैं, उस (**रथम्**) विमान आदि यान और (**शश्वत्**) अनादि रूप (**विशः**) प्रजाओं को (**वहन्तः**) धारण और बढ़ाते हुए (**अख्यन्**) अनेक प्रकार प्रगट होते हैं, वैसे तेरे समीप विद्वान् लोग रहें और तू भी विद्या तथा धर्म का प्रचार कर॥५॥

भावार्थः-हे मनुष्यो! तुम जैसे सूर्यलोक के प्रकाश वा आकर्षण आदि गुण सब जगत् को धारणपूर्वक यथायोग्य प्रकट करते हैं और जो सूर्य के समीप लोक हैं, वे सूर्य के प्रकाश से प्रकाशित होते हैं, जो अनादि रूप प्रजा है, उसका भी वायु धारण करता है। इस प्रकार होने से सब लोक अपनी-अपनी परिधि में स्थित होते हैं, वैसे तुम सद्गुणों को धारण और अपने-अपने अधिकारों में स्थित होकर अन्य सबको न्याय मार्ग में स्थापन किया करो॥५॥

पुनरपि वायुसूर्य्ययोर्गुणा उपदिश्यन्ते॥

फिर भी वायु और सूर्य्य के गुणों का उपदेश अगले मन्त्र में किया है॥

तिस्रो द्याव॑: सवि॒तुर्द्वा उ॒पस्था॒ँ एका॑ य॒मस्य॒ भुव॑ने विरा॒षाट्।
आ॒णिं न रथ्य॑म॒मृताधि॑ तस्थु॒रि॒ह ब्र॑वीतु॒ य उ॒ तच्चिके॑तत्॥६॥

ति॒स्रः। द्याव॑:। स॒वि॒तुः। द्वौ। उ॒पऽस्था॑। एका॑। य॒मस्य॑। भुव॑ने। वि॒रा॒षाट्। आ॒णिम्। न। रथ्य॑म्। अ॒मृता॑। अधि॑। त॒स्थुः। इ॒ह। ब्र॒वी॒तु॒। यः। ऊँ॒ इति॑। तत्। चिके॑तत्॥६॥

पदार्थः-(**तिस्रः**) त्रित्वसंख्याकाः (**द्यावः**) सूर्याग्निविद्युद्रूपाः (**सवितुः**) सूर्यलोकस्य (**द्वौ**) स्वप्रकाशभूगोलौ (**उपस्था**) उपतिष्ठन्ति यस्मिँस्तत्र। अत्र **आडयाजयाराणां चोपसङ्ख्यानम्**। (अष्टा०वा०७.१.३९) इति वार्त्तिकेन ङेः स्थाने आडादेशः। **आङोऽनुनासिकश्छन्दसि।** (अष्टा०६.१.१२६) इति प्रकृतिभावादसंधिः। (**एका**) विद्युदाख्यदीप्तिः (**यमस्य**) वायोः (**भुवने**) अन्तरिक्षस्थाने (**विराषाट्**) वीरान् ज्ञानवतः प्राप्तिशीलान् जीवान् सहते सः। अत्र वर्णव्यत्ययेन दीर्घेकारस्य स्थाने ह्रस्वेकारोऽकारस्थान आकारश्च **स्फायितञ्चि०** (उणा०२.१३) इत्यजधातोरक् प्रत्ययः।[२६] **छन्दसि सहः।** (अष्टा०३.२.६३) इति ण्विः। **सहेः साढः सः।** (अष्टा०८.३.५६) इति षत्वम् (**आणिम्**) संग्रामम्। **आणाविति संग्रामनामसु पठितम्।** (निघं०२.१७) (**न**) इव (**रथ्यम्**) रथान् वहति तम् (**अमृता**) अमृतानि (**अधि**) उपरिभावे (**तस्थुः**) तिष्ठन्ति। अत्र लडर्थे लिट्। (**इह**) अस्मिन् संसारेऽस्यां विद्यायां वा (**ब्रवीतु**) उपदिशतु (**यः**) मनुष्यः (**ऊँ**) वितर्के (**तत्**) ज्ञानम् (**चिकेतत्**) विजानीयात्। अयं **कितज्ञाने** धातोर्लेट् प्रथमैकवचनप्रयोगः। **बहुलं छन्दसि** इति शपः श्लुः॥६॥

अन्वयः-हे विद्वँस्त्वं रथ्यमाणिं भृत्यानेवाऽस्य सवितुः सूर्यलोकस्य प्रकाशे यास्तिस्रो द्यावोऽधितस्थुस्तत्र द्वौ सवितृमण्डलस्योपस्था वर्त्तेते। एका विराषाट् विद्युदाख्या दीप्तिर्यमस्य नियन्तुर्वायोर्भुवनेऽन्तरिक्षे हि तिष्ठति। यान्यमृता कारणरूपेण नाशरहितानि चन्द्रतारकादीनि भुवनानि सन्ति

---

२६. अजेर्व्यधञपोः। अष्टा०२.४.५६। इत्यजधातोः स्थाने व्यादेशः।

तान्यन्तरिक्षेऽधितस्थुरधितिष्ठन्ति य उ एतानि चिकेतत् जानीयात् स तज्ज्ञानं ब्रवीतु तथा भूत्वेमां विद्यामुपादिश॥६॥

भावार्थः-अत्रोपमालङ्कारः। ईश्वरेण या अग्न्याख्यात् कारणात् तिस्रो दीप्तयः सूर्याग्निविद्युदाख्या रचिताः सन्ति, तद्द्वारा सर्वाणि कार्याणि सिध्यन्ति। यदा ये जीवाः। शरीराणि त्यक्त्वा यस्य यमस्य स्थानं गच्छन्ति स कोऽस्तीति पृच्छ्यते। अत्रोत्तरमन्तरिक्षस्थं वायुं यमाख्यं गच्छन्तीति ब्रूयात्। यथा युद्धे रथस्य भृत्यादीन्यङ्गान्युपतिष्ठन्ति। तथैव मृता जीविताश्च जीवा वायुमाश्रित्य तिष्ठन्ति। पृथिवीचन्द्रतारकादयो लोकाः सूर्यप्रकाशमुपाश्रित्य वर्त्तन्ते। यो विद्वान् स एव प्रश्नोत्तराणि वदेन्नेतरो मूढः। नैव मनुष्यैरविद्वत्कथने विश्वसितव्यं न किलाप्तशब्दऽश्रद्धातव्यं चेति॥६॥

पदार्थः-हे विद्वान्! तू **(रथ्यम्)** रथ आदि के चलाने योग्य **(आणिम्)** संग्राम को जीतने वाले राजभृत्यों के **(न)** समान इस **(सवितुः)** सूर्यलोक के प्रकाश में जो **(तिस्रः)** तीन अर्थात् **(द्यावः)** सूर्य, अग्नि और विद्युत् रूप के साधनों से युक्त **(अधितस्थुः)** स्थित होते हैं उनमें से **(द्वौ)** दो प्रकाश वा भूगोल सूर्य मण्डल के **(उपस्था)** समीप में रहते हैं और **(एका)** एक **(विराषाट्)** शूरवीर ज्ञानवान् प्राप्ति स्वभाव वाले जीवों को सहने वाली बिजुली रूप दीप्ति **(यमस्य)** नियम करने वाले वायु के **(भुवने)** अन्तरिक्ष में ही रहती है और जो **(अमृता)** कारणरूप से नाशरहित चन्द्र, तारे आदि लोक हैं, वे इस सूर्य लोक के प्रकाश में प्रकाशित होकर **(अधितस्थुः)** स्थित होते हैं **(यः)** जो मनुष्य **(ऊँ)** वाद-विवाद से इनको **(चिकेतत्)** जाने और इस ज्ञान को **(ब्रवीतु)** अच्छे प्रकार उपदेश करे, उसी के समान हो के हम को सद्गुणों का उपदेश किया कर॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस ईश्वर ने अग्निरूप कारण से सूर्य अग्नि और बिजुली रूप तीन प्रकार की दीप्ति रची है, जिनके द्वारा सब कार्य सिद्ध होते हैं। जब कोई ऐसा पूछे कि जीव अपने शरीरों को छोड़ के जिस यम के स्थान को प्राप्त होते हैं, वह कौन है, तब उत्तर देने वाला अन्तरिक्ष में रहने वाले वायु को प्राप्त होते हैं, ऐसा कहे। जैसे युद्ध में रथ, भृत्य आदि सेना के अङ्गों में स्थित होते हैं, वैसे मरे और जीते हुए जीव वायु के अवलम्ब से स्थित होते हैं। पृथिवी चन्द्रमा और नक्षत्रादि लोक सूर्य्य प्रकाश के आश्रय से स्थित होते हैं, जो विद्वान् हो, वही प्रश्नों के उत्तर कह सकता है, मूर्ख नहीं। इसलिये मनुष्यों को मूर्ख अर्थात् अनाप्तों के कहने में विश्वास और विद्वानों के कथन में अश्रद्धा कभी न करनी चाहिये॥६॥

पुनरस्य सूर्यलोकस्य गुणा उपदिश्यन्ते॥

फिर इस सूर्यलोक के गुणों का उपदेश अगले मन्त्र में किया है॥

वि सु॑प॒र्णो अ॒न्तरि॑क्षाण्यख्यद् गभी॒रवे॑पा॒ असु॑रः सुनी॒थः।

क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान॥७॥

वि। सुऽपर्णः। अन्तरिक्षाणि। अख्यत्। गभीरऽवेपाः। असुरः। सुऽनीथः। क्व। इदानीम्। सूर्यः। कः। चिकेत। कतमाम्। द्याम्। रश्मिः। अस्य। आ। ततान॥७॥

पदार्थः-(**वि**) विशेषार्थे (**सुपर्णः**) शोभनपतनशीला रश्मयो यस्य। **सुपर्णा इति रश्मिनामसु पठितम्।** (निघं०१.५) (**अन्तरिक्षाणि**) अन्तरिक्षस्थानि सर्वाणि भुवनानि (**अख्यत्**) ख्यापयति प्रकाशयति (**गभीरवेपाः**) गभीरोऽविद्वद्भिर्लक्षितुमशक्यो वेपः कम्पनं यस्य सः। **टुवेपृ कम्पन** अस्मात् **सर्वधातुभ्योऽसुन्** इत्यसुन् प्रत्ययः (**असुरः**) सर्वेभ्यः प्राणदः सूर्य्योदये मृता इवोत्तिष्ठन्तीत्यतः। असुषु प्राणेषु रमते वा। (**सुनीथः**) सुष्ठु नीथाः पदार्था प्राप्तयो यस्मात् सः। **हनिकुषि०** (उणा०२.२) अनेन **णीञ् प्रापणे** धातोः क्थन् प्रत्ययः। (**क्व**) कुत्र (**इदानीम्**) अस्मिन् समये वर्त्तमानायां रात्रौ (**सूर्यः**) (**कः**) विद्वान् (**चिकेत**) केतति जानाति। अत्र **कितज्ञाने** धातोर्लडर्थे लिट्। (**कतमाम्**) बहूनां पृथिवीनां मध्ये काम् (**द्याम्**) द्योतनात्मिकाम् (**रश्मिः**) ज्योतिः (**अस्य**) सूर्यस्य (**आ**) समन्तात् (**ततान**) तनोति विस्तृणोति। अत्रापि लडर्थे लिट्॥७॥

अन्वयः-हे विद्वन्! यथाऽसुरो गभीरवेपाः सुनीथः सुपर्णोऽस्य रश्मिरन्तरिक्षाणि व्यख्यद् विख्यापयति प्रकाशयति तेन रश्मिगणेन युक्तः सूर्य्य इदानीं क्व वर्त्तते। एतत्कश्चिकेत को जानाति। कतमां द्यामस्य सूर्य्यस्य रश्मिराततानैतदपि कश्चिकेत। कश्चिदेव जानाति न तु सर्वे तदेतत्तत्त्वमवेहि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदायं भूगोलो भ्रमणेन सूर्यप्रकाशमाच्छाद्यान्धकारं जनयति तदाऽविद्वांसो जनाः पृच्छन्तीदानीं सूर्य्यः क्व गत इति तं प्रश्नमुत्तरेणैवं समादध्यात्। पृथिव्या अपरे पृष्ठेऽस्तीति यस्य चलनमतीव सूक्ष्ममस्त्यतः प्राकृतैर्जनैर्न विज्ञायत एवं विद्वदभिप्रायोऽपि॥७॥

पदार्थः-हे विद्वज्जन! जैसे यह सूर्य्यलोक जो (**असुरः**) सब के लिये प्राणदाता अर्थात् रात्रि में सोये हुओं को उदय के समय चेतनता देने (**गभीरवेपाः**) जिसका कम्पन गभीर अर्थात् सूक्ष्म होने से साधारण पुरुषों के मन में नहीं बैठता (**सुनीथः**) उत्तम प्रकार से पदार्थों की प्राप्ति कराने और (**सुपर्णः**) उत्तम पतन स्वभाव किरणयुक्त सूर्य्य (**अन्तरिक्षाणि**) अन्तरिक्ष में ठहरे हुए सब लोकों को (**व्यख्यत्**) प्रकाशित करता है (**इदानीम्**) इस वर्त्तमान समय रात्रि में (**क्व**) कहाँ है। इस बात को (**कः**) कौन (**चिकेत**) जानता तथा (**कतमाम्**) बहुतों में किस (**द्याम्**) प्रकाश को (**अस्य**) इस सूर्य्य के (**रश्मिः**) किरण (**आततान**) व्याप्त हो रहे हैं, इस बात को भी कौन जानता है अर्थात् कोई-कोई जो विद्वान् हैं वे ही जानते हैं, सब साधारण पुरुष नहीं, इसलिये सूर्य्यलोक का स्वरूप और गति आदि को तू जान॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब यह भूगोल अपने भ्रमण से सूर्य्य के प्रकाश का आच्छादन कर अन्धकार करता है, तब साधारण मनुष्य पूंछते हैं कि अब वह सूर्य्य कहाँ

गया, उस प्रश्न का उत्तर से समाधान करे कि पृथिवी के दूसरे पृष्ठ में है, जिस का चलना अति सूक्ष्म है, जैसे वह मूर्ख मनुष्यों से जाना नहीं जाता, वैसे ही महाशय मनुष्यों का आशय भी अविद्वान् लोग नहीं जान सकते॥७॥

पुनरतेस्य कृत्यमुपदिश्यन्ते॥

फिर इसके कृत्य का उपदेश अगले मन्त्र में किया है॥

अ॒ष्टौ व्य॑ख्यत्ककु॒भः॑ पृथि॒व्यास्त्री धन्व॒ योज॑ना स॒प्त सिन्धू॑न्।
हि॒र॒ण्या॒क्षः स॑वि॒ता दे॒व आगा॒द् दध॒द्रत्ना॑ दा॒शुषे॒ वार्या॑णि॥८॥

अ॒ष्टौ। वि। अ॒ख्य॒त्। क॒कुभ॑ः। पृ॒थि॒व्याः। त्री। धन्व॑। योज॑ना। स॒प्त। सिन्धू॑न्। हि॒र॒ण्य॒ऽअ॒क्षः। स॒वि॒ता। दे॒वः। आ। अ॒गा॒त्। दध॑त्। रत्ना॑। दा॒शुषे॑। वार्या॑णि॥८॥

पदार्थः-(**अष्टौ**) चतस्रो दिश उपदिशश्च। (**वि**) विशेषार्थे क्रियायोगे (**अख्यत्**) ख्यापयति (**ककुभः**) दिशः। **ककुभ इति दिङ्नामसु पठितम्।** (निघं०१.६) (**पृथिव्याः**) भूमेः सम्बन्धिनीः (**त्री**) त्रीणि भूम्यन्तरिक्षप्रकाशस्थानि भुवनानि (**धन्व**) प्राप्तव्यानि। अत्र गत्यर्थाद्धविधातौरौणादिकः कनिन्, **सुपां सुलुग्०** इति विभक्तेर्लुक्। (**योजना**) युज्यन्ते सर्वाणि वस्तूनि येषु भुवनेषु तानि योजनानि। अत्र **शेश्छन्दसि** इति शेर्ल्लोपः। (**सप्त**) सप्त सङ्ख्याकान् (**सिन्धून्**) भूम्यन्तरिक्षोपर्युपरिस्थितान् (**हिरण्याक्षः**) हिरण्यानि ज्योतींष्यक्षीणि व्याप्तिशीलानि यस्य सः (**सविता**) वृष्ट्युत्पादकः (**देवः**) द्योतनात्मकः (**आ**) समन्तात् (**अगात्**) एति प्राप्नोति। अत्र लडर्थे लुङ्। **इणो गा लुङि।** (अष्टा०२.४.४५) इति गा आदेशः। (**दधत्**) दधातीति दधत्सन् (**रत्ना**) सुवर्णादीनि रमणीयानि (**दाशुषे**) सर्वोपकारकाय विद्यादिदानशीलाय यजमानाय (**वार्य्याणि**) वरितु ग्रहीतुं योग्यानि॥८॥

अन्वयः-हे सभेश! त्वं यथा यो हिरण्याक्षः सविता देवः सूर्यलोकः पृथिव्याः सम्बन्धिनीरष्टौ ककुभस्त्री त्रीण्युपर्यधोमध्यस्थानि धन्वानि योजनानि तदुपलक्षितान् मार्गान् सप्तसिधूँश्च व्यख्यद् विख्यापयति, स दाशुषे वार्याणि रत्ना रत्नानि दधत्सन्नागात् समन्तादेति तथा भूतः सन् वर्त्तस्व॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽयं सूर्यलोकः सर्वाणि मूर्त्तद्रव्याणि प्रकाश्य छित्वा वायुद्वाराऽन्तरिक्षे नीत्वा तस्मादधो निपात्य सर्वाणि रमणीयानि सुखानि जीवार्थं नयति। पृथिव्या मध्ये स्थितानामेकोनपञ्चाशत् क्रोशपर्यन्तेऽन्तरिक्षे स्थूलसूक्ष्मलघुगुरुत्वरूपेण स्थितानां चापां सप्तसिन्धिवति संज्ञैताः सर्वा आकर्षणेन धरति च तथा सर्वैर्विद्वद्भिर्विद्याधर्म्माभ्यां सकलान् मनुष्यान् धृत्वाऽऽनन्दयितव्याः॥८॥

पदार्थः-हे सभेश! जैसे जो (**हिरण्याक्षः**) जिसके सुवर्ण के समान ज्योति है वह (**सविता**) वृष्टि उत्पन्न करने वाला (**देवः**) द्योतनात्मक सूर्यलोक (**पृथिव्याः**) पृथिवी से सम्बन्ध रखने वाली (**अष्टौ**)

आठ **(ककुभः)** दिशा अर्थात् चार दिशा और चार उपदिशाओं **(त्री)** तीन भूमि, अन्तरिक्ष और प्रकाश के अर्थात् ऊपर, नीचे और मध्य में ठहरने वाले **(धन्व)** प्राप्त होने योग्य **(योजना)** सब वस्तु के आधार तीन लोकों और **(सप्त)** सात **(सिन्धून्)** भूमि, अन्तरिक्ष वा ऊपर स्थित हुए जलसमुदायों को **(व्यख्यत्)** प्रकाशित करता है, वह **(दाशुषे)** सर्वोपकारक विद्यादि उत्तम पदार्थ देने वाले यजमान के लिये **(वार्याणि)** स्वीकार करने योग्य **(रत्ना)** पृथिवी आदि वा सुवर्ण आदि रमणीय रत्नों को **(दधत्)** धारण करता हुआ **(आगात्)** अच्छे प्रकार प्राप्त होता है, वैसे तुम भी वर्त्तो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यह सूर्यलोक सब मूर्त्तिमान् पदार्थों का प्रकाश, छेदन, वायु द्वारा अन्तरिक्ष में प्राप्त और वहाँ से नीचे गिराकर सब रमणीय सुखों को जीवों के लिये उत्पन्न करता और पृथिवी में स्थित और उनचास क्रोश पर्यन्त अन्तरिक्ष में स्थूल, सूक्ष्म, लघु और गुरु से स्थित हुए जलों को अर्थात् जिन का सप्तसिन्धु नाम है, आकर्षणशक्ति से धारण करता है, वैसे सब विद्वान् लोग विद्या और धर्म से सब प्रजा को धारण करके सबको आनन्द में रक्खें॥८॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥९॥

हिरण्यऽपाणिः। सविता। विऽचर्षणिः। उभे इति। द्यावापृथिवी इति। अन्तः। ईयते। अप। अमीवाम्। बाधते। वेति। सूर्यम्। अभि। कृष्णेन। रजसा। द्याम्। ऋणोति॥९॥

पदार्थः-(**हिरण्यपाणिः**) हिरण्यानि ज्योतींषि पाण्यो हस्तवद्ग्रहणसाधनानि यस्य सः **(सविता)** रसानां प्रसविता **(विचर्षणिः)** विलेखनस्वभावेन विच्छेदकः। **कृषेरादेश्च चः।** (उणा०२.१००) इति कृषविलेखने धातोरनिः प्रत्ययः। **(उभे)** द्वे **(द्यावापृथिवी)** प्रकाशपृथिव्यौ **(अन्तः)** अन्तरिक्षस्य मध्ये **(ईयते)** प्रापयति **(अप)** दूरीकरणे **(अमीवाम्)** रोगपीडाम् **(बाधते)** निवारयति **(वेति)** प्रजनयति। अत्रान्तर्गतो ण्यर्थः। **(सूर्यम्)** सरणशीलं स्वकीयरश्मिगणम् **(अभि)** सर्वतो भावे **(कृष्णेन)** पृथिव्यादिना **(रजसा)** लोकसमूहेन **(द्याम्)** प्रकाशम् **(ऋणोति)** प्रापयति। अत्रान्तर्गतो ण्यर्थः॥९॥

अन्वयः-भोः सभाध्यक्ष! यथा हिरण्यपाणिर्विचर्षणिः सविता सूर्यलोक उभे द्यावापृथिवी अन्तरीयते अमीवामपबाधते सूर्यमभिवेति कृष्णेन रजसा सह द्यामृणोति तथाभूतस्त्वं भव॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे सभापते! यथायं सूर्यो बहुभिर्लोकैः सहाकर्षणसम्बन्धेन वर्त्तमानः सर्वं वस्तुजातं प्रकाशयन् प्रकाशपृथिव्योरान्तर्यं करोति तथैव त्वया भवितव्यमिति॥९॥

पदार्थः-हे सभाध्यक्ष! जैसे **(हिरण्यपाणिः)** जिसके हिरण्यरूप ज्योति हाथों के समान ग्रहण करने वाले हैं **(विचर्षणिः)** पदार्थों को छिन्न-भिन्न और **(सविता)** रसों को उत्पन्न करने वाला सूर्यलोक **(उभे)** दोनों **(द्यावापृथिवी)** प्रकाशभूमि को **(अन्तः)** अन्तरिक्ष के मध्य में **(ईयते)** प्राप्त **(अमीवाम्)** रोग पीड़ा का **(अपबाधते)** निवारण **(सूर्य्यम्)** सबको प्राप्त होने वाले अपने किरणसमूह को **(अभिवेति)** साक्षात् प्रगट और **(कृष्णेन)** पृथिवी आदि प्रकाशरहित **(रजसा)** लोकसमूह के साथ अपने **(द्याम्)** प्रकाश को **(ऋणोति)** प्राप्त करता है, वैसे तुझ को भी होना चाहिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे सभापते! जैसे यह सूर्य्यलोक बहुत लोकों के साथ आकर्षण सम्बन्ध से वर्त्तमान सब वस्तुमात्र को प्रकाशित करता हुआ प्रकाश तथा पृथिवी लोक का मेल करता है, वैसे स्वभावयुक्त आप हूजिये॥९॥

अथ वायुगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में वायु के गुणों का उपदेश किया है॥

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ्।
अपसेधन् रक्षसो यातुधानानस्थाद् देवः प्रतिदोषं गृणानः॥१०॥

हिरण्यऽहस्तः। असुरः। सुऽनीथः। सुऽमृळीकः। स्वऽवान्। यातु। अर्वाङ्। अपऽसेधन्। रक्षसः। यातुऽधानान्। अस्थात्। देवः। प्रतिऽदोषम्। गृणानः॥१०॥

पदार्थः-(**हिरण्यहस्तः**) हिरण्यानि सर्वतो गमनानि हस्ता इव यस्य सः। अत्र गत्यर्थाद्धर्य्य धातौरौणादिकः कन्यन् प्रत्ययः। **(असुरः)** असून् प्राणान् राति ददात्यविद्यमानरूपगुणो वा सोऽसुरो वायुः। **आतोऽनुपसर्गे कः।** (अष्टा०३.२.३) इत्यसूपपदाद्राधातोः कः। **(सुनीथः)** शोभनं नीथो नयनं प्रापणं यस्य सः। **(सुमृडीकः)** यः शोभने मृडयति सुखयति सः। **मृडः कीकच् कङ्कणौ।** (उणा०४.२५) इति कीकच्। **(स्ववान्)** स्वे प्रशस्ताः स्पर्शादयो गुणा विद्यन्ते यस्मिन् सः। अत्र प्रशंसार्थे मतुप्। **(यातु)** प्राप्नोति प्राप्नोतु वा **(अर्वाङ्)** अर्वतः स्वकीयानध ऊर्ध्वतिर्यग्गमनाख्यवेगानञ्चति प्राप्नोतीति। अत्र **ऋत्विग्दधृक्०** (अष्टा०३.२.५९) इति क्विन्। **क्विन् प्रत्यस्य कुः** (अष्टा०८.२.६२) इति कवर्गादेशः। **(अपसेधन्)** निवारयन् सन् **(रक्षसः)** चोरादीन् दुष्टकर्मकर्तॄन्। **रक्षो रक्षयितव्यमस्मात्।** (निरु०४.१८) **(यातुधानान्)** यातवो यातनाः पीडा धीयन्ते येषु तान् दस्यून् **(अस्थात्)** स्थितवानस्ति **(देवः)** सर्वव्यवहारसाधकः **(प्रतिदोषम्)** रात्रिं रात्रिं प्रति। अत्र रात्रेरुपलक्षणत्वाद् दिवसस्यापि ग्रहणमस्ति प्रतिसमयमित्यर्थः। **दोषेति रात्रिनामसु पठितम्।** (निघं०१.७) **(गृणानः)** स्वगुणैः स्तोतुमर्हः॥१०॥

अन्वयः-हे सभेश! भवान् यथाऽयं हिरण्यहस्तोऽसुरः सुनीथः सुमृडीकः स्ववानर्वाङ् वायुर्याति सर्वतश्चलति। एवं प्रति दोषं गृणानो देवो वायु दुःखानि निवार्य सुखानि प्रापयित्वाऽस्थात् तथा यातुधानान् रक्षसोऽपसेधन् सर्वान् दुष्टान्निवारयन् श्रेष्ठान् यातु प्राप्नोतु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे सभापते! यथायं वायुः स्वकीयाकर्षणबलादिगुणैः सर्वान् पदार्थान् व्यवस्थापयति यथा च दिवसे चौराः प्रबला भवितुं नार्हन्ति, तथैव भवतापि भवितव्यम्। येन जगदीश्वरेण बहुगुणसुखप्रापका वायुवादयः पदार्था रचितास्तस्मै सर्वैर्धन्यवादा देयाः॥१०॥

पदार्थः-हे सभापते! आप जैसे यह **(हिरण्यहस्तः)** जिसका चलना हाथ के समान है **(असुरः)** प्राणों की रक्षा करने वाला रूपगुणरहित **(सुनीथः)** सुन्दर रीति से सबको प्राप्त होने **(सुमृडीकः)** उत्तम व्यवहारों से सुखयुक्त करने और **(स्ववान्)** उत्तम-उत्तम स्पर्श आदि गुण वाला **(अर्वाङ्)** अपने नीचे-ऊपर टेढ़े जाने वाले वेगों को प्राप्त होता हुआ वायु चारों ओर से चलता है तथा **(प्रतिदोषम्)** रात्रि-रात्रि के प्रति **(गृणानः)** गुण कथन से स्तुति करने योग्य **(देवः)** सुखदायक वायु दुःखों को निवृत्त और सुखों को प्राप्त करके **(अस्थात्)** स्थित होता है, वैसे **(रक्षसः)** दुष्ट कर्म करने वाले **(यातुधानान्)** जिनसे पीड़ा आदि दुःख होते हैं, उन डाकुओं को **(अपसेधन्)** निवारण करते हुए श्रेष्ठों को प्राप्त हूजिये॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे सभापति! जैसे यह वायु अपने आकर्षण और बल आदि गुणों से सब पदार्थों को व्यवस्था में रखता है और जैसे दिन में चोर प्रबल नहीं हो सकते हैं, वैसे आप भी हूजिये और तुमको जिस जगदीश्वर ने बहुत गुणयुक्त सुख प्राप्त करने वाले वायु आदि पदार्थ रचे हैं, उसी को सब धन्यवाद देने योग्य हैं॥१०॥

अथेन्द्रशब्देनेश्वर उपदिश्यते॥

अब अगले मन्त्र में इन्द्र शब्द से ईश्वर का उपदेश किया है॥

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव॥११॥७॥७॥

ये। ते। पन्थाः। सवितरिति। पूर्व्यासः। अरेणवः। सुऽकृताः। अन्तरिक्षे। तेभिः। नः। अद्य। पथिऽभिः। सुऽगेभिः। रक्ष। च। नः। अधि। च। ब्रूहि। देव॥११॥

पदार्थः-(**ये**) वक्ष्यमाणाः (**ते**) तव (**पन्थाः**) धर्ममार्गाः। अत्र **सुपां सुलुग्०** इति जसः स्थाने सुः। (**सवितः**) सकलजगदुत्पादकेश्वर (**पूर्व्यासः**) पूर्वैः कृता साधिताः सेविताश्च। अत्र **पूर्वैः कृतमिनियौ च।** (अष्टा०४.४.१३३) इति पूर्वशब्दाद्यः प्रत्ययः। **आज्जसेरसुग्** (अष्टा०७.१.५०) इत्यसुगागमश्च। (**अरेणवः**) अविद्यमाना रेणवो धूल्यंशा इव विघ्ना येषु ते। **अजिवृरी०** (उणा०३.३७) इति रीधातोर्णुः प्रत्ययः। (**सुकृताः**) सुष्ठु निर्मिताः (**अन्तरिक्षे**) स्व्याप्तिरूपे ब्रह्माण्डे (**तेभिः**) तैः (**नः**) अस्मान् (**अद्य**) अस्मिन्नहनि (**पथिभिः**) उक्तमार्गैः (**सुगेभिः**) सुखेन गच्छन्ति येषु तैः। **सुदुरोरधिकरणे०**

(अष्टा०३.२.४८) इति वार्त्तिकेन सूपपदाद् गमधातोर्डः प्रत्ययः **(रक्ष)** पालय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(च)** समुच्चये **(नः)** अस्मभ्यम् **(अधि)** ईश्वरार्थ उपरिभावे **(च)** अपि **(ब्रूहि)** उपदिश **(देव)** सर्वसुखप्रदातरीश्वर॥११॥

अन्वयः-हे सवितर्देव जगदीश्वर! त्वं कृपया ये ते तवारेणवः पूर्व्यासः सुकृताः पन्थानोऽन्तरिक्षे स्वव्याप्तिरूपे वर्त्तन्ते, तेभिः सुगेभिः पथिभिर्नोऽस्मानद्य रक्ष च नोऽस्मभ्यं सर्वा विद्या अधिब्रूहि च॥११॥

भावार्थः-हे ईश्वर! त्वया ये सूर्यादिलोकानां भ्रमणार्था मार्गा प्राणिसुखाय च धर्ममार्गा अन्तरिक्षे स्वमहिम्नि च रचितास्तेष्विमे यथानियमं भ्रमन्ति विचरन्ति च तान् सर्वेषां पदार्थानां मार्गान् गुणांश्चास्मभ्यं ब्रूहि। येन वयं कदाचिदितस्ततो न भ्रमेमेति॥११॥

अस्मिन् सूक्ते सूर्यलोकेश्वरवायुगुणानां प्रतिपादनाच्चतुस्त्रिंशसूक्तोक्तार्थेन सङ्गतिरस्तीति वेदितव्यम्।

इति सप्तमो ७ वर्गः, अनुवाकः पञ्चत्रिंशं ३५ सूक्तं च समाप्तम्॥

पदार्थः-हे **(सवितः)** सकल जगत् के रचने और **(देव)** सब सुख देने वाले जगदीश्वर! **(ये)** जो **(ते)** आपके **(अरेणवः)** जिनमें कुछ भी धूलि के अंशों के समान विघ्नरूप मल नहीं हैं तथा **(पूर्व्यासः)** जो हमारी अपेक्षा से प्राचीनों ने सिद्ध और सेवन किये हैं **(सुकृताः)** अच्छे प्रकार सिद्ध किये हुए **(पन्थाः)** मार्ग **(अन्तरिक्षे)** अपने व्यापकता रूप ब्रह्माण्ड में वर्त्तमान हैं **(तेभिः)** उन **(सुगेभिः)** सुखपूर्वक सेवने योग्य **(पथिभिः)** मार्गों से **(नः)** हम लोगों की **(अद्य)** आज **(रक्ष)** रक्षा कीजिये **(च)** और **(नः)** हम लोगों के लिये सब विद्याओं का **(अधिब्रूहि)** उपदेश **(च)** भी कीजिये॥११॥

भावार्थः-हे ईश्वर! आपने जो सूर्य आदि लोकों के घूमने और प्राणियों के सुख के लिये आकाश वा अपने महिमारूप संसार में शुद्ध मार्ग रचे हैं, जिनमें सूर्यादि लोक यथानियम से घूमते और सब प्राणी विचरते हैं, उन सब पदार्थों के मार्गों तथा गुणों का उपदेश कीजिये कि जिससे हम लोग इधर-उधर चलायमान न होवें॥११॥

इस सूक्त में सूर्यलोक वायु और ईश्वर के गुणों का प्रतिपादन करने से चौंतीसवें सूक्त के साथ इस सूक्त की सङ्गति जाननी चाहिये॥

यह सातवां वर्ग ७ सातवां अनुवाक ७ और पैंतीसवां सूक्त समाप्त हुआ॥३५॥

अथ विंशत्यृचस्य षट्त्रिंशस्य सूक्तस्य घौरः काण्वऋषिः। अग्निर्देवता। १, १२ भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः। २ निचृत्सतःपङ्क्तिः। ४ निचृत्पङ्क्तिः। १०,१४ निचृद्विष्टारपङ्क्तिः। १८ विष्टारपङ्क्तिः। २० सतः पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३,११ निचृत्पथ्याबृहती। ५,१६ निचृद्बृहती। ६ भुरिग् बृहती। ७ बृहती। ८ स्वराड् बृहती। ९ निचृदुपरिष्टाद् बृहती। १२ उपरिष्टाद् बृहती। १५ विराट् पथ्या बृहती। १७ विराडुपरिष्टाद् बृहती। १९ पथ्याबृहती च छन्दः। मध्यमः स्वरः॥

तत्रादावग्निशब्देनेश्वरगुणा उपदिश्यन्ते॥

अब छत्तीसवें सूक्त का आरम्भ है उसके पहिले मन्त्र में अग्नि शब्द से ईश्वर के गुणों का उपदेश किया है॥

प्र वो॑ य॒ह्वं पु॑रू॒णां वि॒शां दे॑वय॒तीना॑म्।
अ॒ग्निं सू॒क्तेभि॒र्वचो॑भिरीमहे॒ यं सी॒मिद॒न्य ईळ॑ते॥ १॥

प्र। वः। यह्वम्। पुरूणाम्। विशाम्। देवऽयतीनाम्। अग्निम्। सुऽउक्तेभिः। वचःऽभिः। ईमहे। यम्। सीम्। इत्। अन्ये। ईळते॥ १॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**वः**) युष्माकम् (**यह्वम्**) गुणैर्महान्तम्। **यह्व इति महन्नामसु पठितम्।** (निघं०३.३) (**पुरूणाम्**) बह्वीनाम् (**विशाम्**) प्रजानां मध्ये (**देवयतीनाम्**) आत्मनो देवान् दिव्यान् भोगान् गुणाँश्चेच्छन्तीनाम् (**अग्निम्**) परमेश्वरम् (**सूक्तेभिः**) सुष्ठूक्ता विद्या येषु तैः (**वचोभिः**) वेदार्थज्ञानयुक्तैर्वचनैः (**ईमहे**) याचामहे। अत्र **बहुलं छन्दसि** इति श्यनो लुक्। **ईमह इति याञ्चाकर्मसु पठितम्।** (निघं०३.१९) (**यम्**) उक्तम् (**सीम्**) सर्वतः। **प्र सीमादित्यो असृजत्।** (ऋ०२.२८.४) **प्रासृजदिति वा। प्रासृजत् सर्वत इति वा।** (निरु०१.७) इति सीमव्ययं सर्वार्थे गृह्यते। (**इत्**) एव (**अन्ये**) परोपकारका बुद्धिमन्तो धार्मिका विद्वांसः (**ईळते**) स्तुवन्ति॥१॥

अन्वयः-वयं यथान्ये विद्वांसः सूक्तेभिर्वचोभिर्देवयतीनां पुरूणां वो युष्माकं विशां प्रजानां सुखाय यं यह्वमग्निं सीमीडते तथा तमिदेव प्रेमहे प्रकृष्टतया याचामहे प्रकाशयामश्च॥१॥

भावार्थः-अत्र वाचकलुप्तोमालङ्कारः। हे मनुष्या! यूयं यथा विद्वांसः प्रजासुखसम्पत्तये सर्वव्यापिनं परमेश्वरं निश्चित्योपदिश्य च तद्गुणान् प्रयत्नेन विज्ञापयन्ति स्तावयन्ति, तथैव वयमपि प्रकाशयामः। यथेश्वरोऽग्न्यादिपदार्थरचनपालनाभ्यां जीवेषु सर्वाणि सुखानि दधाति तथा वयमपि सर्वप्राणिसुखानि सदा निर्वर्त्तयेमेति बुध्यध्वम्॥१॥

पदार्थः-हम लोग जैसे (**अन्ये**) अन्य परोपकारी धर्मात्मा विद्वान् लोग (**सूक्तेभिः**) जिनमें अच्छे प्रकार विद्या कही है, उन (**वचोभिः**) वेद के अर्थज्ञानयुक्त वचनों से (**देवयतीनाम्**) अपने लिये दिव्यभोग वा दिव्यगुणों की इच्छा करने वाले (**पुरूणाम्**) बहुत (**वः**) तुम (**विशाम्**) प्रजा लोगों के सुख

के लिये **(यम्)** जिस **(यह्वम्)** अनन्तगुण युक्त **(अग्निम्)** परमेश्वर की **(सीम्+ईडते)** सब प्रकार स्तुति करते हैं, वैसे उस **(इत्)** ही की **(प्रेमहे)** अच्छे प्रकार याचना और गुणों का प्रकाश करें॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे तुम लोग पूर्ण विद्यायुक्त विद्वान् लोग प्रजा के सुख की सम्पत्ति के लिये सर्वव्यापी परमेश्वर का निश्चय तथा उपदेश करके प्रयत्न से जानते हैं, वैसे ही हम लोग भी उसके गुण प्रकाशित करें। जैसे ईश्वर अग्नि आदि पदार्थों के रचन और पालन से जीवों में सब सुखों को धारण करता है, वैसे हम लोग भी प्राणियों के लिये सदा सुख वा विद्या को सिद्ध करते रहें, ऐसा जानो॥१॥

पुनः स एवार्थ उपदिश्यते॥

फिर भी अगले मन्त्र में उक्त विषय का उपदेश किया है॥

जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते।

स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य॥२॥

जनासः। अग्निम्। दधिरे। सहःऽवृधम्। हविष्मन्तः। विधेम। ते। सः। त्वम्। नः। अद्य। सुऽमनाः। इह। अविता। भव। वाजेषु। सन्त्य॥२॥

पदार्थः-(**जनासः**) विद्यासु प्रादुर्भूता मनुष्याः (**अग्निम्**) सर्वाभिरक्षकमीश्वरम् (**दधिरे**) धरन्ति। अत्र लडर्थे लिट्। (**सहोवृधम्**) सहोबलं वर्धयतीति सहोवृत्तम् (**हविष्मन्तः**) प्रशस्तानि हवींषि दातुमादातुमर्हाणि वस्तूनि विद्यन्ते येषां ते। अत्र प्रशंसार्थे मतुप्। (**विधेम**) सेवेमहि (**ते**) तव। अत्र सायणाचार्य्येण ते त्वामित्युक्तं तन्न सम्भवति द्वितीयैकवचने त्वाऽऽदेशविधानात् (**सः**) ईश्वरः (**त्वम्**) सर्वदा प्रसन्नः (**नः**) अस्माकम् (**अद्य**) अस्मिन्नहनि (**सुमनाः**) शोभनं मनो ज्ञानं यस्य सः (**इह**) अस्मिन् संसारे (**अविता**) रक्षको ज्ञापकः सर्वासु विद्यासु प्रवेशकः (**भवा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वाजेषु**) युद्धेषु (**सन्त्य**) सन्तौ दाने साधुस्तत्सम्बुद्धौ। अत्र **षणुदान** इत्यस्माद् बाहुलकादौणादिकस्तिः प्रत्ययस्ततः साध्वर्थे यच्च॥२॥

अन्वयः-हे सन्त्येश्वर! यथा हविष्मन्तो जनासो यस्य ते तवाश्रयं दधिरे तथा तं सहोवृधमग्निं त्वां वयं विधेम स सुमनास्त्वमद्य नोऽस्माकमिह वाजेषु चाविता भव॥२॥

भावार्थः-मनुष्यैरेकस्याद्वितीयपरमेश्वरस्योपासनेनैव सन्तोषितव्यं नहि विद्वांसः कदाचिद् ब्रह्मस्थानेऽन्यद् वस्तूपास्यत्वेन स्वीकुर्वन्ति। अत एव तेषां युद्धेष्विह कदाचित् पराजयो न दृश्यते। एवं नहि कदाचिदनीश्वरोपासकास्तान् विजेतुं शक्नुवन्ति येषामीश्वरो रक्षकोऽस्ति कुतस्तेषां पराभवः॥२॥

पदार्थः-हे (**सन्त्य**) सब वस्तु देनेहारे ईश्वर! जैसे (**हविष्मन्तः**) उत्तम देने-लेने योग्य वस्तु वाले (**जनासः**) विद्या में प्रसिद्ध हुए विद्वान् लोग जिस (**ते**) आप के आश्रय का (**दधिरे**) धारण करते हैं, वैसे

उन **(सहोवृधम्)** बल को बढ़ाने वाले **(अग्निम्)** सब के रक्षक आप को हम लोग **(विधेम)** सेवन करें **(सः)** सो **(सुमनाः)** उत्तम ज्ञान वाले **(त्वम्)** आप **(अद्य)** आज **(नः)** हम लोगों के **(इह)** संसार और **(वाजेषु)** युद्धों में **(अविता)** रक्षक और सब विद्याओं में प्रवेश कराने वाले **(भव)** हूजिये॥२॥

भावार्थः-मनुष्यों को एक अद्वितीय परमेश्वर की उपासना ही से सन्तुष्ट रहना चाहिये, क्योंकि विद्वान् लोग परमेश्वर के स्थान में अन्य वस्तु को उपासना भाव से स्वीकार कभी नहीं करते। इसी कारण उनका युद्ध वा इस संसार में कभी पराजय दीख नहीं पड़ता, क्योंकि वे धार्मिक ही होते हैं और इसी से ईश्वर की उपासना नहीं करने वाले उनके जीतने को समर्थ नहीं होते, क्योंकि ईश्वर जिनकी रक्षा करने वाला है, उनका कैसे पराजय हो सकता है॥२॥

अथ भौतिकाग्निदृष्टान्तेन राजदूतगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में भौतिक अग्नि के दृष्टान्त से राजदूत के गुणों का उपदेश किया है॥

प्र त्वा॑ दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम्।
म॒हस्ते॑ स॒तो वि च॑रन्त्य॒र्चयो॑ दि॒वि स्पृ॑शन्ति भा॒नवः॑॥३॥

प्र। त्वा॒। दू॒तम्। वृ॒णी॒म॒हे॒। होता॑रम्। वि॒श्वऽवे॑दसम्। म॒हः। ते॒। स॒तः। वि। च॒र॒न्ति॒। अ॒र्चयः॑। दि॒वि। स्पृ॒श॒न्ति॒। भा॒नवः॑॥३॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**त्वा**) त्वाम् (**दूतम्**) यो दुनोत्युपतापयति सर्वान् पदार्थानितस्ततो भ्रमणेन दुष्टान् वा तम् (**वृणीमहे**) स्वीकुर्महे (**होतारम्**) ग्रहीतारम् (**विश्ववेदसम्**) विश्वानि सर्वाणि शिल्पसाधनानि विन्दन्ति यस्मात्तं सर्वप्रजासमाचारज्ञं वा (**महः**) महसो महागुणविशिष्टस्य। **सर्वधातुभ्योऽसुन्** (उणा०४.१९०) इत्यसुन्। **सुपां सुलुग्०** इति ङसो लुक्। (**ते**) तव (**सतः**) कारणरूपेणाविनाशिनो विद्यमानस्य (**वि**) विशेषार्थे (**चरन्ति**) गच्छन्ति (**अर्चयः**) दीप्तिरूपा ज्वाला न्यायप्रकाशका नीतयो वा (**दिवि**) द्योतनात्मके सूर्यप्रकाशे प्रजाव्यवहारे वा (**स्पृशन्ति**) सम्बध्नन्ति (**भानवः**) किरणाः प्रभावा वा। **भानव इति रश्मिनामसु पठितम्।** (निघं०१.५)॥३॥

अन्वयः-हे विद्वन् राजदूत! यथा वयं विश्ववेदसं होतारं दूतमग्निं प्रवृणीमहे तथाभूतं त्वा त्वामपि प्रवृणीमहे यथा च महो महसः सतोऽग्नेर्भानवः सर्वान् पदार्थान् स्पृशन्ति सम्बध्नन्त्यर्चयो दिवि विचरन्ति च तथा ते तवापि सन्तु॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे स्वकर्मप्रवीण राजदूत! यथा सर्वैर्मनुष्यैर्महाप्रकाशादिगुणयुक्तमग्निं पदार्थप्राप्त्यप्राप्त्योः कारकत्वाद् दूतं कृत्वा शिल्पकार्याणि वियदि हुतद्रव्यप्रापणं च साधयित्वा सुखानि स्वीक्रियन्ते यथाऽस्य विद्युद्रूपास्याग्नेर्दीप्तयः सर्वत्र वर्त्तन्ते प्रसिद्धस्य लघुत्वाद् वायोश्छेदकत्वेनावकाशकारित्वाज्जवाला उपरि गच्छन्ति तथा त्वमपीदं कृत्वैवं भव॥३॥

पदार्थः-हे विद्वन् राजदूत! जैसे हम लोग **(विश्ववेदसम्)** सब शिल्पविद्या का हेतु **(होतारम्)** ग्रहण करने और **(दूतम्)** सब पदार्थों को तपाने वाले अग्नि को **(वृणीमहे)** स्वीकार करते हैं, वैसे **(त्वा)** तुझ को भी ग्रहण करते हैं तथा जैसे **(महः)** महागुणविशिष्ट **(सतः)** सत्कारणरूप से नित्य अग्नि के **(भानवः)** किरण सब पदार्थों से **(स्पृशन्ति)** सम्बन्ध करते और **(अर्चयः)** प्रकाशरूप ज्वाला **(दिवि)** द्योतनात्मक सूर्य्य के प्रकाश में **(विचरन्ति)** विशेष करके प्राप्त होती हैं, वैसे तेरे भी सब काम होने चाहिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे अपने काम में प्रवीण राजदूत! जैसे सब मनुष्य महाप्रकाशादिगुणयुक्त अग्नि को पदार्थों की प्राप्ति वा अप्राप्ति के कारण दूत के समान जान और शिल्पकार्यों को सिद्ध करके सुखों को स्वीकार करते और जैसे इस बिजुली रूप अग्नि की दीप्ति सब जगह वर्त्तती है और प्रसिद्ध अग्नि की दीप्ति छोटी होने तथा वायु के छेदक होने से अवकाश करने वाला होकर ज्वाला ऊपर जाती है, वैसे तू भी अपने कामों में प्रवृत हो॥३॥

पुनः स दूतः कीदृश इत्युपदिश्यते॥

फिर वह दूत कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः॥४॥

देवासः। त्वा। वरुणः। मित्रः। अर्यमा। सम्। दूतम्। प्रत्नम्। इन्धते। विश्वम्। सः। अग्ने। जयति। त्वया। धनम्। यः। ते। ददाश। मर्त्यः॥४॥

पदार्थः-(**देवासः**) सभ्या विद्वांसः **(त्वा)** त्वाम् **(वरुणः)** उत्कृष्टः **(मित्रः)** मित्रवत्प्राणप्रदः **(अर्य्यमा)** न्यायकारी **(सम्)** सम्यगर्थे **(दूतम्)** यो दुनोति सामादिभिः शत्रूँस्तम्। **दुतनिभ्यां दीर्घश्च।** (उणा०३.८८)। **(प्रत्नम्)** कारणरूपेणानादिम्। **नश्च पुराणे प्रादूक्तव्याः।**[२७] (अष्टा०५.४.३०) इति पुराणार्थे प्रशब्दात् तनप् प्रत्ययः। **(इन्धते)** शुभगुणैः प्रकाशन्ते **(विश्वम्)** सर्वम् **(सः)** **(अग्ने)** धर्मविद्या श्रेष्ठगुणैः प्रकाशमानसभापते **(जयति)** उत्कर्षयति **(त्वया)** **(धनम्)** विद्यासुवर्णादिकम् **(यः)** **(ते)** तव **(ददाश)** दाशति। अत्र लडर्थे लिट्। **(मर्त्यः)** मनुष्यः॥४॥

---

२७. नैत्सदृशं कश्चित्। सूत्रं वार्तिक वा विद्यते। अतः 'प्रगस्य छन्दसि गलोपश्च' अष्टा० ४.३.२३ अनेन वार्त्तिकेन **'प्रत्न'** शब्दः सिद्ध्यति। सं०

अन्वयः-हे अग्ने सभेश! यस्ते दूतो मर्त्त्यो धनं ददाश यस्त्वया सह शत्रून्ज्जयति मित्रो वरुणोऽर्यमा देवासो यं दूतं समिन्धते यस्त्वा त्वां प्रजाश्च प्रीणाति स प्रत्नं विश्वं राज्यं रक्षितुमर्हति॥४॥

भावार्थः-नहि केचिदपि सर्वशास्त्रविशारदै राजधर्मवित्तमैः परावरज्ञैर्धार्मिकैः प्रगल्भैः शूरैर्दूतैः सराजभिः सभासद्भिश्च विना राज्यं लब्धुं रक्षितुमुन्नेतुमुपकर्त्तुं शक्नुवन्ति तस्मादेवमेव सर्वैः सदा विधेयमिति॥४॥

पदार्थः-हे **(अग्ने)** धर्म विद्या श्रेष्ठ गुणों से प्रकाशमान सभापते! **(यः)** जो **(ते)** तेरा **(दूतः)** दूत **(मर्त्यः)** मनुष्य तेरे लिये **(धनम्)** विद्या, राज्य, सुवर्णादि श्री को **(ददाश)** देता है तथा जो **(त्वया)** तेरे साथ शत्रुओं को **(जयति)** जीतता है **(मित्रः)** सबका सुहृद् **(वरुणः)** सब से उत्तम **(अर्यमा)** न्यायकारी **(देवासः)** ये सब सभ्य विद्वान् मनुष्य जिसको **(समिन्धते)** अच्छे प्रकार प्रशंसित जान कर स्वीकार के लिये शुभगुणों से प्रकाशित करें जो **(त्वा)** तुझ और सब प्रजाको प्रसन्न रक्खे **(सः)** वह दूत **(प्रत्नम्)** जो कि कारणरूप से अनादि है **(विश्वम्)** सब राज्य को सुरक्षित रखने को योग्य होता है॥४॥

भावार्थः-कोई भी मनुष्य सब शास्त्रों में प्रवीण, राजधर्म को ठीक-ठीक जानने, पर-अपर इतिहासों के वेत्ता, धर्मात्मा, निर्भयता से सब विषयों के वक्ता, शूरवीर, दूतों और उत्तम राजा सहित सभासदों के विना राज्य को पाने, पालने, बढ़ाने और परोपकार में लगाने को समर्थ नहीं हो सकते, इससे पूर्वोक्त प्रकार ही से राज्य की प्राप्ति आदि का विधान सब लोग सदा किया करें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत॥५॥८॥

मन्द्रः। होता। गृहऽपतिः। अग्ने। दूतः। विशाम्। असि। त्वे इति। विश्वा। सम्ऽगतानि। व्रता। ध्रुवा। यानि। देवाः। अकृण्वत॥५॥

पदार्थः-(**मन्द्रः**) पदार्थप्रापकत्वेन हर्षहेतुः **(होता)** सुखानां दाता **(गृहपतिः)** गृहकार्याणां पालयिता **(अग्ने)** शरीरबलेन देदीप्यमान **(दूतः)** यो दुनोत्युपतप्य भिनत्ति दुष्टान् शत्रून् सः **(विशाम्)** प्रजानाम् **(असि)** **(त्वे)** त्वयि राज्यपालके सति **(विश्वा)** विश्वानि सर्वाणि **(संगतानि)** धर्म्यव्यवहारसंयुक्तानि **(व्रता)** व्रतानि सत्याचरणानि कर्माणि। **व्रतमिति कर्मनामसु पठितम्।** (निघं०२.१) **(ध्रुवा)** निश्चलानि। अत्र त्रिषु **शेश्छन्दसि बहुलम्** इति शेर्लोपः। **(यानि)** **(देवाः)** विद्वांसः **(अकृण्वत)** कृण्वन्ति कुर्वन्ति। अत्र लडर्थे लङ् व्यत्येयनात्मनेपदञ्च॥५॥

अन्वयः-हे अग्ने! यतस्त्वं मन्द्रो होता गृहपतिर्दूतो विशांपतिरसि, तस्मात् सर्वा प्रजा यानि विश्वा ध्रुवा संगतानि व्रता धर्म्याणि कर्माणि देवा अकृण्वत तानि त्वे सततं सेवन्ते॥५॥

भावार्थः-सुराजदूतसभासद एव राज्यं रक्षितुमर्हन्ति न विपरीताः॥५॥

इत्यष्टमो वर्गः॥

पदार्थः-हे **(अग्ने)** शरीर और आत्मा के बल से सुशोभित जिससे आप **(मन्द्रः)** पदार्थों की प्राप्ति करने से सुख का हेतु **(होता)** सुखों के देने **(गृहपतिः)** गृहकार्यों का पालन **(दूतः)** दुष्ट शत्रुओं को तप्त और छेदन करने वाले **(विशाम्)** प्रजाओं के **(पतिः)** रक्षक **(असि)** हैं, इससे सब प्रजा **(यानि)** जिन **(विश्वा)** सब **(ध्रुवा)** निश्चल **(संगतानि)** सम्यक् युक्त समयानुकूल प्राप्त हुए **(व्रता)** धर्मयुक्त कर्मों को **(देवाः)** धार्मिक विद्वान् लोग **(अकृण्वत)** करते हैं, उनका सेवन **(त्वे)** आप के रक्षक होने से सदा कर सकती हैं॥५॥

भावार्थः-जो प्रशस्त राजा, दूत और सभासद् होते हैं, वे ही राज्य का पालन कर सकते हैं, इन से विपरीत मनुष्य नहीं कर सकते॥५॥

आठवाँ वर्ग समाप्त हुआ॥

अथाग्निदृष्टान्तेन राजपुरुषगुणा उपदिश्यन्ते॥

अब अग्नि के दृष्टान्त से राजपुरुषों के गुणों का उपदेश अगले मन्त्र में किया है॥

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या॥६॥

त्वे इति। इत्। अग्ने। सुऽभगे। यविष्ठ्य। विश्वम्। आ। हूयते। हविः। सः। त्वम्। नः। अद्य। सुऽमनाः। उत। अपरम्। यक्षि। देवान्। सुऽवीर्या॥६॥

पदार्थः-(**त्वे**) त्वयि **(इत्)** एव **(अग्ने)** सुखप्रदातः सभेश **(सुभगे)** शोभनमैश्वर्यं यस्मिँस्तस्मिन् **(यविष्ठ्य)** यो वेगेन पदार्थान् यौति संयुनक्ति संहतान् भिनत्ति वा स युवातिशयेन युवा यविष्ठो यविष्ठ एव यविष्ठ्यस्तत्सम्बुद्धौ **(विश्वम्)** सर्वम् **(आ)** समन्तात् **(हूयते)** दीयते **(हविः)** सुसंस्कृतं वस्तु **(सः)** त्वम् **(नः)** अस्मान् **(अद्य)** अस्मिन्नहनि **(सुमनाः)** शोभनं मनो विज्ञानं यस्य सः **(उत)** अपि **(अपरम्)** श्वो दिनं प्रति **(यक्षि)** संगमय। अत्र लोडर्थे लङडभावश्च। **(देवान्)** विदुषः **(सुवीर्या)** शोभनानि वीर्याणि येषां तान्। अत्र **सुपां सुलुग्०** इत्याकारादेशः॥६॥

अन्वयः-हे यविष्ठ्याग्ने! यथा होत्राग्नौ विश्वं हविराहूयते यस्मिन् सुभगे त्वे त्वयि सर्वो न्यायोऽस्माभिरधिक्रियते स सुमनास्त्वमद्योताप्यपरं दिनं प्रति नोऽस्मान् सुवीर्या श्रेष्ठपराक्रमयुक्तानि देवान्यक्षि संगमय॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसो वह्नौ शुद्धं हव्यं द्रव्यं प्रक्षिप्य जगते सुखं जनयन्ति तथैव राजपुरुषा दुष्टान् कारागृहे प्रक्षिप्य धार्मिकेभ्य आनन्दं प्रादुर्भावयन्तु॥६॥

पदार्थः-हे **(यविष्ठ्य)** पदार्थों के मेल करने में बलवान् **(अग्ने)** सुख देनेवाले राजन्! जैसे होता द्वारा **(अग्नौ)** अग्नि में **(विश्वम्)** सब **(हविः)** उत्तमता से संस्कार किया हुआ पदार्थ **(आहूयते)** डाला जाता है, वैसे जिस **(सुभगे)** उत्तम ऐश्वर्ययुक्त **(त्वे)** आप में न्याय करने का काम स्थापित करते हैं सो **(सुमनाः)** अच्छे मन वाले **(त्वम्)** आप **(अद्य)** आज **(उत)** और **(अपरम्)** दूसरे दिन में भी **(नः)** हम लोगों को **(सुवीर्य्या)** उत्तम वीर्य वाले **(देवान्)** विद्वान् **(इत्)** ही **(यक्षि)** कीजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् लोग वह्नि में पवित्र होम करके योग्य घृतादि पदार्थों को होम के संसार के लिये सुख उत्पन्न करते हैं, वैसे ही (राजपुरुष) दुष्टों को बन्दीघर में डाल के सज्जनों को आनन्द सदा दिया करें॥६॥

पुनः स एवार्थ उपदिश्यते॥

फिर उसी अर्थ का उपदेश अगले मन्त्र में किया है॥

तं घेमित्था नमस्विन उप स्वराजमासते।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः॥७॥

तम्। घ। ईम्। इत्था। नमस्विनः। उप। स्वऽराजम्। आसते। होत्राभिः। अग्निम्। मनुषः। सम्। इन्धते। तितिर्वांसः। अति। स्रिधः॥७॥

पदार्थः-(**तम्**) प्रधानसभाध्यक्षं राजानम् (**घ**) एव (**ईम्**) प्रदातारम्। **ईमिति पदनामसु पठितम्।** (निघं०४.२) अनेन प्राप्त्यर्थो गृह्यते **(इत्था)** अनेन प्रकारेण **(नमस्विनः)** नमः प्रशस्तो वज्रः शस्त्रसमूहो विद्यते येषां ते। अत्र प्रशंसार्थे विनिः। **(उप)** सामीप्ये **(स्वराजम्)** स्वेषां राजा स्वराजस्तम् **(आसते)** उपविशन्ति **(होत्राभिः)** हवनसत्यक्रियाभिः **(अग्निम्)** ज्ञानस्वरूपम् **(मनुषः)** मनुष्याः। अत्र मनधातोर्बाहुलकादौणादिक उसिः प्रत्ययः। **(सम्)** सम्यगर्थे **(इन्धते)** प्रकाशयन्ते **(तितिर्वांसः)** सम्यक् तरन्तः। अत्र तृधातोर्लिटः[२८] स्थाने वर्त्तमाने क्वसुः। **(अति)** अतिशयार्थे **(स्रिधः)** हिंसकान् क्षयकर्त्तॄञ्च्छत्रून्॥७॥

अन्वयः-ये नमस्विनो मनुषो होत्राभिस्तं स्वराजमग्निं सभाध्यक्षं घोपासते समिन्धते च तेऽतिस्रिधस्तितिर्वांसो भवेयुः॥७॥

भावार्थः-न खलु सभाध्यक्षोपासकैः सभासद्भिर्भृत्यैर्विना कश्चिदपि स्वराजसिद्धिं प्राप्य शत्रून् विजेतुं शक्नोति॥७॥

---

२८. लोटः। सं

पदार्थः-जो **(नमस्विनः)** उत्तम सत्कार करने वाले **(मनुषः)** मनुष्य **(होत्राभिः)** हवनयुक्त सत्य क्रियाओं से **(स्वराजम्)** अपने राजा **(अग्निम्)** ज्ञानवान् सभाध्यक्ष को **(घ)** ही **(उपासते)** उपासना और **(तम्)** उसीका **(समिन्धते)** प्रकाश करते हैं, वे मनुष्य **(स्रिधः)** हिंसानाश करने वाले शत्रुओं को **(अति तितिर्वांसः)** अच्छे प्रकार जीतकर पार हो सकते हैं॥७॥

भावार्थः-कोई भी मनुष्य सभाध्यक्ष की उपासना करने वाले भृत्य और सभासदों के विना अपने राज्य की सिद्धि को प्राप्त होकर शत्रुओं से विजय को प्राप्त नहीं हो सकता॥७॥

पुनः स एवार्थ उपदिश्यते॥

फिर भी पूर्वोक्त विषय का उपदेश अगले मन्त्र में किया है॥

घ्नन्तो॑ वृ॒त्रम॑तर॒न् रोद॑सी अ॒प उ॒रु क्षया॑य चक्रिरे।
भुव॒त्कण्वे॒ वृषा॑ द्यु॒म्न्याहु॑तः क्रन्द॒दश्वो॒ गवि॑ष्टि॒षु॥८॥

घ्नन्तः। वृत्रम्। अतरन्। रोदसी इति। अपः। उरु। क्षयाय। चक्रिरे। भुवत्। कण्वे। वृषा। द्युम्नी। आऽहुतः। क्रन्दत्। अश्वः। गोऽइष्टिषु॥८॥

पदार्थः-(**घ्नन्तः**) शत्रुहननं कुर्वन्तो विद्युत्सूर्यकिरणा इव सेनापत्यादयः **(वृत्रम्)** मेघमिव शत्रुम् **(अतरन्)** प्लावयन्ति। अत्र लडर्थे लङ्। **(रोदसी)** द्यावापृथिव्यौ **(अपः)** कर्माणि। **अप इति कर्मनामसु पठितम्।** (निघं०२.१) **(उरु)** बहु **(क्षयाय)** निवासाय **(चक्रिरे)** कुर्वन्ति। अत्र लडर्थे लिट्। **(भुवत्)** भवेत् लेट् प्रयोगो **बहुलं छन्दसि** इति शपो लुकि **भूसुवोस्तिङि।** (अष्टा०७.३.८८) इति गुणप्रतिषेधः। **(कण्वे)** शिल्पविद्याविदि मेधाविनि विद्वज्जने **(वृषा)** सुखवृष्टिकर्त्ता **(द्युम्नि)** द्युम्नानि बहुविधानि धनानि भवन्ति यस्मिन्। अत्र भूम्न्यर्थ इनिः। **(आहुतः)** सभाध्यक्षत्वेन स्वीकृतः **(क्रन्दत्)** हेषणाख्यं शब्दं कुर्वन् **(अश्वः)** तुरङ्ग इव **(गविष्टिषु)** गवां पृथिव्यादीनामिष्टिप्राप्तीच्छा येषु संग्रामेषु तेषु॥८॥

अन्वयः-राजपुरुषा विद्युत्सूर्यकिरणा वृत्रमिव शत्रुदलं घ्नन्तो रोदसी अतरन्नपः कुर्युः तथा गविष्टिषु क्रन्ददश्व इवाहुतो वृषासन्नुरुक्षयाय कण्वे द्युम्नी दधद्भवत्॥८॥

भावार्थः-यथा विद्युद्भौतिकसूर्याग्नयो मेघं छित्त्वा वर्षयित्वा सर्वान् लोकान् जलेन पूयन्ति तत् कर्म प्राणिनां चिरसुखाय भवत्येवं सभाध्यक्षादिभी राजपुरुषैः कण्टकरूपाञ्छत्रून् हत्वा प्रजाः सततं तर्पणीयाः॥८॥

पदार्थः-राजपुरुष जैसे बिजुली सूर्य और उसके किरण **(वृत्रम्)** मेघ का छेदन करते और वर्षाते हुए आकाश और पृथिवी को जल से पूर्ण तथा इन कर्मों को प्राणियों के संसार में अधिक निवास के लिये करते हैं, वैसे ही शत्रुओं को **(घ्नन्तः)** मारते हुए **(रोदसी)** प्रकाश और अन्धेरे में **(अपः)** कर्म को करें और सब जीवों को **(अतरन्)** दुःखों के पार करें तथा **(गविष्टिषु)** गाय आदि पशुओं के संघातों में

(क्रन्दत्) शब्द करते हुए **(अश्वः)** घोड़े के समान **(आहुतः)** राज्याधिकार में नियत किया **(वृषा)** सुख की वृष्टि करने वाला **(उरुक्षयाय)** बहुत निवास के लिये **(कण्वे)** बुद्धिमान् में **(द्युम्नी)** बहुत ऐश्वर्य को धरता हुआ सुखी **(भुवत्)** होवे॥८॥

भावार्थः-जैसे बिजुली, भौतिक और सूर्य यही तीन प्रकार के अग्नि मेघ को छिन्न-भिन्न कर सब लोकों को जल से पूर्ण करते हैं, उनका युद्ध कर्म सब प्राणियों के अधिक निवास के लिये होता है, वैसे ही सभाध्यक्षादि राजपुरुषों को चाहिये कि कण्टकरूप शत्रुओं को मार के प्रजा को निरन्तर तृप्त करें॥८॥

अथ सभापतेर्गुणा उपदिश्यन्ते॥

अब अगले मन्त्र में सभापति के गुणों का उपदेश किया है॥

सं सीदस्व महाँ असि शोचस्व देववीतमः।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्॥९॥

सम्। सीदस्व। महान्। असि। शोचस्व। देववऽवीतमः। वि। धूमम्। अग्ने। अरुषम्। मियेध्य। सृज। प्रऽशस्त। दर्शतम्॥९॥

पदार्थः-(**सम्**) सम्यगर्थे **(सीदस्व)** दोषान् हिन्धि। व्यत्येनात्रत्मनेपदम् **(महान्)** महागुणविशिष्टः **(असि)** वर्त्तसे **(देववीतमः)** देवान् पृथिव्यादीन् वेत्ति व्याप्नोति **(शोचस्व)** प्रकाशस्व। **शुचिदीप्ताव**ित्यस्माल्लोट् **(देववीतमः)** यो देवान् विदुषो व्याप्नोति सोऽतिशयतः **(वि)** **(धूमम्)** धूमसदृशमलरहितम् **(अग्ने)** तेजस्विन् सभापते **(अरुषम्)** सुन्दररूपयुक्तम्। **अरुषमिति रूपनामसु पठितम्।** (निघं०३.७) **(मियेध्य)** मेधार्ह। अयं प्रयोगः पृषोदरादिना अभीष्टः सिद्ध्यति। **(सृज)** **(प्रशस्त)** प्रशंसनीय **(दर्शतम्)** द्रष्टुमर्हम्॥९॥

अन्वयः-हे तेजस्विन् मियेध्याग्ने सभापते! यस्त्वं महानसि स सभापते देववीतमः सन्न्याये संसीदस्व शोचस्व। हे प्रशस्त राजँस्त्वमत्र विधूमं दर्शतमरुषं सृजोत्पादय॥९॥

भावार्थः-मेधाविनो राजपुरुषा अग्निवत् तेजस्विनो महागुणाढ्या भूत्वा दिव्यगुणानां पृथिव्यादिभूतानां तत्त्वं विज्ञाय प्रकाशमानाः सन्तो निर्मलं दर्शनीयं रूपमुत्पादयेयुः॥९॥

पदार्थः-हे **(तेजस्विन्)** विद्याविनययुक्त **(मियेध्य)** प्राज्ञ **(अग्ने)** विद्वन् सभापते! जो आप **(महान्)** बड़े-बड़े गुणों से युक्त **(असि)** हैं सो **(देववीतमः)** विद्वानों को व्याप्त होने हारे आप न्यायधर्म में स्थित होकर **(संसीदस्व)** सब दोषों का नाश कीजिये और **(शोचस्व)** प्रकाशित हूजिये हे **(प्रशस्त)** प्रशंसा करने योग्य राजन्! आप **(विधूमम्)** धूमसदृश मल से रहित **(दर्शतम्)** देखने योग्य **(अरुषम्)** रूप को **(सृज)** उत्पन्न कीजिये॥९॥

भावार्थः-प्रशंसित बुद्धिमान् राजपुरुषों को चाहिये कि अग्नि के समान तेजस्वि और बड़े-बड़े गुणों से युक्त हों और श्रेष्ठ गुणवाले पृथिवी आदि भूतों के तत्त्व को जान के प्रकाशमान होते हुए निर्मल देखने योग्य स्वरूपयुक्त पदार्थों को उत्पन्न करें॥९॥

मनुष्याः कीदृशं सभेशं कुर्य्युरित्याह॥

मनुष्य किस प्रकार के पुरुष को सभाध्यक्ष करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

यं त्वा॑ दे॒वासो॒ मन॑वे दधु॒रिह यजि॑ष्ठं हव्यवाहन।

यं कण्वो॒ मेध्या॑तिथिर्धन॒स्पृतं॑ यं वृषा॒ यमु॑प॒स्तुतः॥१०॥९॥

यम्। त्वा॒। दे॒वासः॑। मन॑वे। दधुः। इ॒ह। यजि॑ष्ठम्। ह॒व्य॒ऽवा॒ह॒न॒। यम्। कण्वः॑। मेध्य॑ऽअतिथिः। ध॒न॒ऽस्पृत॑म्। यम्। वृषा॑। यम्। उ॒प॒ऽस्तुतः॥१०॥

पदार्थः-(**यम्**) मननशीलम् (**त्वा**) त्वाम् (**देवासः**) विद्वांसः (**मनवे**) मननयोग्याय राजशासनाय (**दधुः**) दध्यासुः। अत्र लिङर्थे लिट्। (**इह**) अस्मिन् संसारे (**यजिष्ठम्**) अतिशयेन यष्टारम् (**हव्यवाहन**) हव्यान्यादातुमर्हाणि वसूनि वहति प्राप्नोति तत्सम्बुद्धौ सभ्यजन (**यम्**) शिक्षितम् (**कण्वः**) मेधावीजनः (**मेध्यातिथिः**) मेध्यैरतिथिभिर्युक्तोऽध्यापकः (**धनस्पृतम्**) धनैर्विद्यासुवर्णादिभिः स्पृतः प्रीतः सेवितस्तम् (**यम्**) सुखस्य वर्षकम् (**वृषा**) विद्यावर्षकः (**यम्**) स्तोतुमर्हम् (**उपस्तुतः**) उपगतः स्तौति स उपस्तुतो विद्वान्। अत्र स्तुधातोर्बाहुलकादौणादिकः क्तः प्रत्ययः॥१०॥

अन्वयः-हे हव्यवाहन! यं यजिष्ठं त्वा त्वां देवासो मनव इह दधुर्दधति। यं धनस्पृतं त्वा त्वां मेध्यातिथिः कण्वो दधे। यं त्वा त्वां वृषादधे। यं त्वा त्वामुपस्तुतो दधे तं त्वां वयं सभापतित्वेनाङ्गीकुर्महे॥१०॥

भावार्थः-अस्मिञ्जगति सर्वैर्मनुष्यैर्विद्वांसोऽन्ये च श्रेष्ठपुरुषा मिलित्वा यं विचारशीलमादेयवस्तु-प्रापकं शुभगुणाढ्यं विद्यासुवर्णादिधनयुक्तं सभ्यजनं राज्यशासनाय नियुञ्ज्युस्स एव पितृवत्पालको राजा भवेत्॥१०॥

पदार्थः-हे (**हव्यवाहन**) ग्रहण करने योग्य वस्तुओं की प्राप्ति कराने वाले सभ्यजन! (**यम्**) जिस विचारशील (**यजिष्ठम्**) अत्यन्त यज्ञ करने वाले (**त्वा**) आप को (**देवासः**) विद्वान् लोग (**मनवे**) विचारने योग्य राज्य की शिक्षा के लिये (**इह**) पृथिवी में (**दधुः**) धारण करते (**यम्**) जिस शिक्षा पाये हुए (**धनस्पृतम्**) विद्या सुवर्ण आदि धन से युक्त आप को (**मेध्यातिथिः**) पवित्र अतिथियों से युक्त अध्यापक (**कण्वः**) विद्वान् पुरुष स्वीकार करता (**यम्**) जिस सुख की वृष्टि करने वाला (**त्वा**) आप को (**वृषा**) सुखों का फैलाने वाला धारण करता और (**यम्**) जिस स्तुति के योग्य आप को (**उपस्तुतः**)

समीपस्थ सज्जनों की स्तुति करने वाला राजपुरुष धारण करता है, उन आप को हम लोग सभापति के अधिकार में नियत करते हैं॥१०॥

भावार्थः-इस सृष्टि में सब मनुष्यों को चाहिये कि विद्वान् और अन्य सब श्रेष्ठ चतुर पुरुष मिल के जिस विचारशील ग्रहण के योग्य वस्तुओं के प्राप्त कराने वाले शुभ गुणों से भूषित विद्या सुवर्णादि धनयुक्त सभा के योग्य पुरुष को राज्य शिक्षा के लिये नियुक्त करें, उसी पिता के तुल्य पालन करने वाला जन राजा होवे॥१०॥

पुनरेतैरग्न्यादिपदार्थाः कथमुपकर्त्तव्याः॥

फिर सभाध्यक्षादि लोग अग्नि आदि पदार्थों से कैसे उपकार लेवें, इस विषय का उपदेश अगले मन्त्र में किया है॥

यमग्निं मेध्यातिथिः कण्व ईधे ऋतादधि।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि॥११॥

यम्। अग्निम्। मेध्यऽअतिथिः। कण्वः। ईधे। ऋतात्। अधि। तस्य। प्र। इषः। दीदियुः। तम्। इमाः। ऋचः। तम्। अग्निम्। वर्धयामसि॥११॥

पदार्थः-(**यम्**) (**अग्निम्**) दाहगुणविशिष्टं सर्वपदार्थछेदकं च (**मेध्यातिथिः**) पवित्रैः पूजकैः शिष्यवर्गैर्युक्तो विद्वान् (**कण्वः**) विद्याक्रियाकुशलः (**ईधे**) दीपयति। अत्र लडर्थे लिट्। **इजादेश्च गुरुमतोऽनृच्छः।** (अष्टा०३.१.३६) इति '**अमन्त्रे**' इति प्रतिषेधाद् '**आम्**' निषेधः।[२९] **इन्धिभवतिभ्यां लिट् च।** (अष्टा०१.२.६) इति लिटः कित्त्वाद् **अनिदिताम्०** (अष्टा०६.४.२४) इति नलोपो गुणाभावश्च। (**ऋतात्**) मेघमण्डलादुपरिष्टादुदकात् (**अधि**) उपरिभावे (**तस्य**) अग्नेः (**प्र**) प्रकृष्टार्थे (**इषः**) प्रापिका दीप्तयो रश्मयः (**दीदियुः**) दीयन्ते। **दीदयतीति ज्वलतिकर्मसु पठितम्।** (निघं०१.१६) दीङ् क्षय इत्यस्माद् व्यत्ययेन परस्मैपदमभ्यासस्य ह्रस्वत्वे **वाच्छन्दसि सर्वे विधयो भवन्ति** इत्यनभ्यासस्य ह्रस्वः। सायणाचार्येणेदं पदमन्यथा व्याख्यातम्। (**तम्**) यज्ञस्य मुख्यं साधनम् (**इमाः**) प्रत्यक्षाः (**ऋचः**) वेदमन्त्राः विद्युदाख्यम् (**अग्निम्**) सर्वत्र व्यापकम् (**वर्धयामसि**) वर्धयामः॥११॥

अन्वयः-मेध्यातिथिः कण्व ऋतादधि यमग्निमीधे तस्येषो प्रदीदियुरिमा ऋचस्तं वर्णयन्ति तमेवाग्निं राजपुरुषा वयं शिल्पक्रियासिद्धये वर्धयामसि॥११॥

---

२९. '**अमन्त्रे**' इति पूर्वसूत्रादनुवृत्तौ सत्याम् '**आम्**' निषेधः, इत्यर्थः। सं०

भावार्थः-सभाध्यक्षादिराजपुरुषैर्होत्रादयो विद्वांसो वायुवृष्टिशुद्ध्यर्थं हवनाय यमग्निं दीपयन्ति, यस्य रश्मय ऊर्ध्वं प्रकाशन्ते, यस्य गुणान् वेदमन्त्रा वदन्ति, स राजव्यवहारसाधकशिल्पक्रियासिद्धय एव वर्द्धनीयः॥११॥

पदार्थः-(**मेध्यातिथिः**) पवित्र सेवक शिष्यवर्गों से युक्त (**कण्वः**) विद्यासिद्ध कर्मकाण्ड में कुशल विद्वान् (**ऋतादधि**) मेघमण्डल के ऊपर से सामर्थ्य होने के लिये (**यम्**) जिस (**अग्निम्**) दाहयुक्त सब पदार्थों के काटने वाले अग्नि को (**ईधे**) प्रदीप्त करता है (**तस्य**) उस अग्नि के (**इषः**) घृतादि पदार्थों को मेघमण्डल में प्राप्त करने वाले किरण (**प्र**) अत्यन्त (**दीदियुः**) प्रज्वलित होते हैं और (**इमाः**) ये (**ऋचः**) वेद के मन्त्र (**तम्**) जिस अग्नि के गुणों का प्रकाश करते हैं (**तम्**) उसी (**अग्निम्**) अग्नि को सभाध्यक्षादि राजपुरुष हम लोग शिल्प क्रियासिद्धि के लिये (**वर्धयामसि**) बढ़ाते हैं॥११॥

भावार्थः-सभाध्यक्षादि राजपुरुषों को चाहिये कि होता आदि विद्वान् लोग वायु वृष्टि के शोधक हवन के लिये जिस अग्नि को प्रकाशित करते हैं, जिसके किरण ऊपर को प्रकाशित होते और जिसके गुणों को वेदमन्त्र कहते हैं, उसी अग्नि को राज्य साधक क्रियासिद्धि के लिये बढ़ावें॥११॥

पुनश्च तेषामेव राजपुरुषाणां गुणा उपदिश्यन्ते॥

फिर भी अगले मन्त्र में उन्हीं राजपुरुषों के गुणों का उपदेश किया है॥

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम्।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि॥१२॥

रायः। पूर्धि। स्वधाऽवः। अस्ति। हि। ते। अग्ने। देवेषु। आप्यम्। त्वम्। वाजस्य। श्रुत्यस्य। राजसि। सः। नः। मृळ। महान्। असि॥१२॥

पदार्थः-(**रायः**) विद्यासुवर्णचक्रवर्त्तिराज्यादिधनानि (**पूर्धि**) पिपूर्धि। अत्र **बहुलं छन्दसि** (अष्टा०२.४.७३) इति शपो लुक्। **श्रुशृणुपृ०** (अष्टा०६.४.१०२) इति हेर्धिः। (**स्वधावः**) स्वधा भोक्तव्या अन्नादिपदार्थाः सन्ति यस्य तत्सम्बुद्धौ (**अस्ति**) (**हि**) यतः (**ते**) तव (**अग्ने**) अग्निवत्तेजस्विन् (**देवेषु**) विद्वत्सु (**आप्यम्**) आप्तुं प्राप्तुं योग्यं सखित्वम्। अत्र **आप्लृ व्याप्तौ**इत्यस्मादौणादिको यत्। सायणाचार्य्येण प्रमाददुपधत्वाभावेऽपि **पोरदुपधात्** इति कर्मणि यत्। **यतो नाव** (अष्टा०६.१.२१०) इत्याद्युदात्तत्वम् यच्च छान्दसमाद्युदात्तत्वमित्यशुद्धमुक्तम्। औणादिकस्य यत्प्रत्ययस्य विद्यमानत्वात् (**त्वम्**) पुत्रवत्प्रजापालकः (**वाजस्य**) युद्धस्य (**श्रुत्यस्य**) श्रोतुं योग्यस्य। **श्रु श्रवण** इत्यस्मादौणादिकः कर्माणि क्यप् प्रत्ययः। (**राजसि**) प्रकाशितो भवसि (**सः**) (**नः**) अस्मान् (**मृड**) सुखय (**महान्**) बृहद् गुणाढ्यः (**असि**) वर्त्तसे॥१२॥

अन्वयः-हे स्वधावोऽग्ने! हि यतस्ते देवेष्वाप्यमस्ति रायस्पूर्धि। यस्त्वं महानसि श्रुत्यस्य वाजस्य च मध्ये राजसि, स त्वं नोऽस्मान् मृड सुखयुक्तान् कुरु॥१२॥

भावार्थः-वेदवित्सु विद्यावृद्धिषु मैत्रीं भावयद्भिः सभाध्यक्षादिराजपुरुषैरन्नधनादिपदार्थागारान् सततं प्रपूर्य प्रसिद्धैर्दस्युभिस्सह युद्धाय समर्था भूत्वा प्रजायै महान्ति सुखानि दातव्यानि॥१२॥

पदार्थः-हे **(स्वधावः)** भोगने योग्य अन्नादि पदार्थों से युक्त **(अग्ने)** अग्नि के समान तेजस्वी सभाध्यक्ष! **(हि)** जिस कारण **(ते)** आपकी **(देवेषु)** विद्वानों के बीच में **(आप्यम्)** ग्रहण करने योग्य मित्रता **(अस्ति)** है, इसलिये आप **(रायः)** विद्या, सुवर्ण और चक्रवर्त्ति राज्यादि धनों को **(पूर्धि)** पूर्ण कीजिये जो आप **(महान्)** बड़े-बड़े गुणों से युक्त **(असि)** हैं और **(श्रुत्यस्य)** सुनने के योग्य **(वाजस्य)** युद्ध के बीच में प्रकाशित होते हैं **(सः)** सो **(त्वम्)** पुत्र के तुल्य प्रजा की रक्षा करनेहारे आप **(नः)** हम लोगों को **(मृड)** सुखयुक्त कीजिये॥१२॥

भावार्थः-वेदों को जानने वाले उत्तम विद्वानों में मित्रता रखते हुए सभाध्यक्षादि राजपुरुषों को उचित है कि अन्न, धन आदि पदार्थों के कोशों को निरन्तर भर और प्रसिद्ध डाकुओं के साथ निरन्तर युद्ध करने को समर्थ होके प्रजा के लिये बड़े-बड़े सुख देने वाले होवें॥१२॥

पुनः स कथंभूत इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

ऊर्ध्व ऊ षु णं ऊतये तिष्ठा देवो न सविता।

ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे॥ १३॥

ऊर्ध्वः। ऊँ इति। सु। नः। ऊतये। तिष्ठ। देवः। न। सविता। ऊर्ध्वः। वाजस्य। सनिता। यत्। अञ्जिऽभिः। वाघत्ऽभिः। विऽह्वयामहे॥ १३॥

पदार्थः-(**ऊर्ध्वः**) उच्चासने **(ऊँ)** च **(सु)** शोभने। अत्र सोरुपसर्गस्यग्रहणं न किन्तु सुञो निपातस्य तेन **इकः सुञि।** (अष्टा०६.३.१३४) इति संहितायामुकारस्य दीर्घः। **सुञः।** (अष्टा०८.३.१०७) इति मूर्द्धन्यादेशश्च। **(नः)** अस्माकम्। **नश्च धातुस्थोरुषभ्यः।** (अष्टा०८.४.२६) इति णत्वम्। **(ऊतये)** रक्षणाद्याय **(तिष्ठ)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घश्च। **(देवः)** द्योतकः **(न)** इव **(सविता)** सूर्यलोकः **(ऊर्ध्वः)** उन्नतस्सन् **(वाजस्य)** संग्रामस्य **(सनिता)** सम्भक्ता सेवकः **(यत्)** यस्मात् **(अञ्जिभिः)** अञ्जसाधनानि प्रकटयद्भिः। **सर्वधातुभ्य इन्।** (उणा०४.१२३) इति कर्त्तरीन् प्रत्ययः। **(वाघद्भिः)** विद्वद्भिर्मेधाविभिः। **वाघत इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(विह्वयामहे)** विविधैः शब्दैः स्तुमः॥१३॥

अन्वयः-हे सभापते! त्वं सविता देवो नेव नोऽस्माकमूतय ऊर्ध्वः सुतिष्ठ। ऊ चोर्ध्वः सन् वाजस्य सनिता भव, अतो वयमञ्जिभिर्वाघद्भिस्सह त्वां विह्वयामहे॥१३॥

भावार्थः-सूर्य्यवदुत्कष्टतेजसा सभापतिना संग्रामसेवने न दुष्टशत्रून्निवार्य्य सर्वेषां प्राणिनामूतये यज्ञसाधकैर्विद्वद्भिः सहात्युच्चासने स्थातव्यम्॥१३॥

पदार्थः-हे सभापते! आप **(देवः)** सबको प्रकाशित करनेहारे **(सविता)** सूर्य्यलोक के **(न)** समान **(नः)** हम लोगों की रक्षा आदि के लिये **(ऊर्ध्वः)** ऊंचे आसन पर **(सुतिष्ठ)** सुशोभित हूजिये **(ऊँ)** और **(ऊर्ध्वः)** उन्नति को प्राप्त हुए **(वाजस्य)** युद्ध के **(सविता)** सेवने वाले हूजिये, इसलिये हम लोग **(अञ्जिभिः)** यज्ञ के साधनों को प्रसिद्ध करने तथा **(वाघद्भिः)** सब ऋतुओं में यज्ञ करने वाले विद्वानों के साथ **(विह्वयामहे)** विविध प्रकार के शब्दों से आप की स्तुति करते हैं॥१३॥

भावार्थः-सूर्य्य के समान अति तेजस्वी सभापति को चाहिये कि संग्राम सेवन से दुष्ट शत्रुओं को हटा के सब प्राणियों की रक्षा के लिये प्रसिद्ध विद्वानों के साथ सभा में बीच में ऊंचे आसन पर बैठे॥१३॥

पुनः स कीदृश इत्याह॥

फिर वह सभापति कैसा होवे, यह अगले मन्त्र में कहा है॥

ऊ॒र्ध्वो न॑: पा॒ह्यंह॑सो॒ नि के॒तुना॒ विश्वं॒ सम॒त्रिण॑ दह।
कृ॒धी न॑ ऊ॒र्ध्वाञ्चर॑थाय जी॒वसे॑ वि॒दा दे॒वेषु॑ नो॒ दुव॑:॥१४॥

ऊ॒र्ध्वः। न॒:। पा॒हि॒। अंह॑स:। नि। के॒तुना॑। विश्व॑म्। सम्। अ॒त्रिण॑म्। द॒ह॒। कृ॒धि। न॒:। ऊ॒र्ध्वान्। चर॑थाय। जी॒वसे॑। वि॒दा:। दे॒वेषु॑। न॒:। दुव॑:॥१४॥

पदार्थः-(**ऊर्ध्वः**) सर्वोत्कृष्टः (**नः**) अस्मान् (**पाहि**) रक्ष (**अंहसः**) परपदार्थहरणरूपपापात्। **अमेर्हुक् च।** (उणा०४.२१३)। इत्यसुन् प्रत्ययो हुगागमश्च। (**नि**) नितराम् (**केतुना**) प्रकृष्टज्ञानदानेन **केतुरिति प्रज्ञानामसु पठितम्।** (निघं०३.९) (**विश्वम्**) सर्वम् (**सम्**) सम्यगर्थे (**अत्रिणम्**) अत्ति भक्षयत्यन्यायेन परपदार्थान् यः स शत्रुस्तम् (**दह**) भस्मी (**कृधि**) कुरु। अत्रा**न्येषामपी**ति संहितायां दीर्घः। (**नः**) अस्मान् (**ऊर्ध्वान्**) उत्कृष्टगुणसुखसहितान् (**चरथाय**) चरणाय (**जीवसे**) जीवितुम्। जीव धातोस्तुमर्थेऽसे प्रत्ययः (**विदाः**) लम्भय। अत्र लोडर्थे लेट्। (**देवेषु**) विद्वत्स्ववृतुषु वा। **ऋतवो वै देवाः।** (शत०७.२.४.२६; तै०सं०५.४.११.४) (**नः**) अस्माकमस्मभ्यं वा (**दुवः**) परिचर्याम्॥१४॥

अन्वयः-हे सभापते! त्वं केतुना प्रज्ञादानेन नोंऽहसो निपाहि विश्वमत्रिणं शत्रुं सन्दह ऊर्ध्वस्त्वं चरथाय न ऊर्ध्वान् कृधि देवेषु जीवसे नो दुवो विदाः॥१४॥

भावार्थः-उत्कृष्टगुणस्वभावेन सभाध्यक्षेण राज्ञा राज्यनियमदण्डभयेन सर्वमनुष्यान् पापात् पृथक्कृत्य सर्वान् शत्रून् दग्ध्वा विदुषः परिषेव्य ज्ञानसुखजीवनवर्द्धनाय सर्वे प्राणिन उत्कृष्टगुणाः सदा सम्पादनीयाः॥१४॥

पदार्थः-हे सभापते! आप **(केतुना)** बुद्धि के दान से **(नः)** हम लोगों को **(अंहसः)** दूसरे का पदार्थ हरणरूप पाप से **(निपाहि)** निरन्तर रक्षा कीजिये **(विश्वम्)** सब **(अत्रिणम्)** अन्याय से दूसरे के पदार्थों को खाने वाले शत्रुमात्र को **(संदह)** अच्छे प्रकार जलाइये और **(ऊर्ध्वः)** सब से उत्कृष्ट आप **(चरथाय)** ज्ञान और सुख की प्राप्ति के लिये **(नः)** हम लोगों को **(ऊर्ध्वान्)** बड़े-बड़े गुण कर्म और स्वभाव वाले **(कृधि)** कीजिये तथा **(नः)** हमको **(देवेषु)** धार्मिक विद्वानों में **(जीवसे)** सम्पूर्ण अवस्था होने के लिये **(दुवः)** सेवा को **(विदाः)** प्राप्त कीजिये॥१४॥

भावार्थः-अच्छे गुण, कर्म और स्वभाव वाले सभाध्यक्ष राजा को चाहिये कि राज्य की रक्षा नीति और दण्ड के भय से सब मनुष्यों को पाप से हटा सब शत्रुओं को मार और विद्वानों की सब प्रकार सेवा करके प्रजा में ज्ञान, सुख और अवस्था बढ़ाने के लिये सब प्राणियों को शुभगुणयुक्त सदा किया करें॥१४॥

पुनः तं प्रति प्रजासेनाजनाः किङ्किम्प्रार्थयेयुरित्युपदिश्यते॥

फिर उस सभाध्यक्ष राजा से प्रजा और सेना के जन क्या-क्या प्रार्थना करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

पा॒हि नो॑ अग्ने र॒क्षस॑: पा॒हि धू॒र्तेररा॑व्णः।
पा॒हि रीष॑त उ॒त वा॒ जिघां॑सतो॒ बृह॑द्भानो॒ यवि॑ष्ठ्य॥ १५॥ १०॥

पा॒हि। न॒:। अ॒ग्ने॒। र॒क्षस॑:। पा॒हि। धू॒र्ते:। अरा॑व्ण:। पा॒हि। रिष॑त:। उ॒त। वा॒। जिघां॑सत:। बृह॑द्भानो॒ इति॒ बृह॑त्ऽभानो। यवि॑ष्ठ्य॥ १५॥

पदार्थः-**(पाहि)** रक्ष **(नः)** अस्मान् **(अग्ने)** सर्वाग्रणीः सर्वाभिरक्षक **(रक्षसः)** महादुष्टान्मनुष्यात् **(पाहि)** **(धूर्त्तेः)** विश्वासघातिनः। अत्र धुर्वी धातोर्बाहुलकादाणौदिकस्तिः प्रत्ययः। **(अराव्णः)** राति ददाति स रावा न अराव रावा तस्मात्कृपणाददानशीलात्। **(पाहि)** रक्ष **(रिषतः)** हिंसकाद् व्याघ्रादेः प्राणिनः। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। **(उत)** अपि **(वा)** पक्षान्तरे **(जिघांसतः)** हन्तुमिच्छतः शत्रोः **(बृहद्भानो)** बृहन्ति भानवो विद्याद्यैश्वर्य्यतेजांसि यस्य तत्सम्बुद्धौ **(यविष्ठ्य)** अतितरुणावस्थायुक्त॥१५॥

अन्वयः-हे बृहद्भानो यविष्ठ्याग्ने सभाध्यक्ष महाराज! त्वं धूर्तेरराव्यणो रक्षसो नः पाहि। रिषतः पापाचाराज्जनात् पाहि। उत वा जिघांसतः पाहि॥१५॥

भावार्थः-मनुष्यैः सर्वतोभिरक्षणाय सर्वाभिरक्षको धर्म्मोन्नतिं चिकीर्षुर्दयालुः सभाध्यक्षः सदा प्रार्थनीयः। स्वैरपि दुष्टस्वभावेभ्यो मनुष्यादिप्राणिभ्यः सर्वपापेभ्यश्च शरीरवचोमनोभिर्दूरे स्थातव्यं नैवं विना कश्चित्सदा सुखी भवितुमर्हति॥१५॥

पदार्थः-हे **(बृहद्भानो)** बड़े-बड़े विद्यादि ऐश्वर्य्य के तेजवाले **(यविष्ठ्य)** अत्यन्त तरुणावस्थायुक्त **(अग्ने)** सब से मुख्य सब की रक्षा करने वाले मुख्य सभाध्यक्ष महाराज! आप **(धूर्तेः)**

कपटी, अधर्मी **(अराव्णः)** दानधर्मरहित कृपण **(रक्षसः)** महाहिंसक दुष्ट मनुष्य से **(नः)** हमको **(पाहि)** बचाइये **(रिषतः)** सबको दुःख देने वाले सिंह आदि दुष्ट जीव दुष्टाचारी मनुष्य से हम को पृथक् रखिये **(उत)** और **(वा)** भी **(जिघांसतः)** मारने की इच्छा करते हुए शत्रु से हमारी रक्षा कीजिये॥१५॥

भावार्थः-सब मनुष्यों को चाहिये कि सब प्रकार रक्षा के लिये सर्वरक्षक धर्मोन्नति की इच्छा करने वाले सभाध्यक्ष की सर्वदा प्रार्थना करें और अपने आप भी दुष्ट स्वभाव वाले मनुष्य आदि प्राणियों और सब पापों से मन वाणी और शरीर से दूर रहें, क्योंकि इस प्रकार रहने के विना कोई मनुष्य सर्वदा सुखी नहीं रह सकता॥१५॥

पुनस्तदेवाह॥

फिर भी अगले मन्त्र में उसी सभाध्यक्ष का उपदेश किया है॥

घ॒नेव॒ विष्व॒ग्वि ज॒ह्यरा॑व्ण॒स्तपु॑र्जम्भ॒ यो अ॑स्म॒ध्रुक्।
यो मर्त्यः॒ शिशी॑ते॒ अत्य॒क्तुभि॒र्मा न॒ः स रि॒पुरी॑शत॥ १६॥

घ॒नाऽइ॑व। विष्व॑क्। वि। ज॒हि॒। अरा॑व्णः। तपु॑ः॑ऽजम्भ। यः। अ॒स्म॒ऽध्रुक्। यः। मर्त्यः॑। शिशी॑ते। अति॑। अ॒क्तुऽभि॑ः। मा। न॒ः। सः। रि॒पुः। ई॒श॒त॥ १६॥

पदार्थः-(**घनेव**) घनाभिर्यष्टिभिर्यथा घटं भिनत्ति तथा **(विष्वक्)** सर्वतः **(वि)** विगतार्थे **(जहि)** नाशय **(अराव्णः)** उक्तशत्रून् **(तपुर्जम्भ) तप सन्ताप** इत्यस्मादौणादिक उसिन् प्रत्ययः, सन्ताप्यन्ते शत्रवो यैस्तानि तपूंषि। **जभि नाशन** इत्यस्मात् करणे घञ्, जभ्यन्त एभिरिति जम्भान्यायुधानि तपूंष्येव जम्भानि यस्य भवतस्तत्सम्बुद्धौ **(यः)** मनुष्यः **(अस्मध्रुक्)** अस्मान् द्रुह्यति यः सः **(यः) (मर्त्यः)** मनुष्यः **(शिशीते)** कृशं करोति। **शो तनूकरण** इत्यस्माल्लटि विकरणव्यत्ययेन श्यनः स्थाने श्लुरात्मनेपदं **बहुलं छन्दसि** इत्यभ्यासस्येत्वम्। **ई हल्यघोः।** (अष्टा०६.४.११३) इत्यनभ्यासस्येकारादेशश्च। **(अति)** अतिशये **(अक्तुभिः)** अञ्जन्ति मृत्युं नयन्ति यैस्तैः शस्त्रैः। **अञ्जू** धातोर्बाहुलकादौणादिकस्तुः प्रत्ययः **(मा)** निषेधार्थे **(नः)** अस्मान् **(सः) (रिपुः)** शत्रुः **(ईशतम्)** ईष्टां समर्थो भवतु। अत्र लोडर्थे लङ्, **बहुलं छन्दसि** इति शपो लुक्॥१६॥

अन्वयः-हे तपुर्ज्जम्भ सेनापते! विष्वक् त्वमराव्णोऽरीन् घनेन विजहि यो मर्त्योऽक्तुभिरस्मध्रुगतिशिशीते स रिपुर्नोऽस्मान् मेशत॥१६॥

भावार्थः-अत्रोपमालङ्कारः। सेनापत्यादयो यथा घनेनायः पाषाणादीस्त्रोटयन्ति, तथैव शत्रूणामङ्गानि त्रोटयित्वाऽहर्निशं धार्मिकप्रजापालनतत्पराः स्युर्यतोऽरय एते दुःखयितुन्नो शक्नुयुरिति॥१६॥

पदार्थः-हे **(तपुर्ज्जम्भ)** शत्रुओं को सताने और नाश करने के शस्त्र बांधने वाले सेनापते! **(विष्वक्)** सर्वथा सेनादि बलों से युक्त होके आप **(अराव्णः)** सुखदानरहित शत्रुओं को **(घनेव)** घन के समान **(विजहि)** विशेष करके जीत और **(यः)** जो **(मर्त्यः)** मनुष्य **(अक्तुभिः)** रात्रियों से **(अस्मध्रुक्)** हमारा द्रोही **(अतिशिशीते)** अति हिंसा करता हो **(सः)** सो **(रिपुः)** वैरी **(नः)** हम लोगों को पीड़ा देने में **(मा)** मत **(ईशत)** समर्थ होवे॥१६॥

भावार्थः-इस मन्त्र में उपमा अलङ्कार है। सेनाध्यक्षादि लोग जैसे लोहा के घन से लोहे पाषाणादिकों को तोड़ते हैं, वैसे ही अधर्म्मी दुष्ट शत्रुओं के अङ्गों को छिन्न-भिन्न कर दिन-रात धर्म्मात्मा प्रजाजनों के पालन में तत्पर हों, जिससे शत्रुजन इन प्रजाओं को दुःख देने को समर्थ न हो सकें॥१६॥

पुनस्तेषां गुणा अग्नि दृष्टान्तेनोपदिश्यते॥

फिर भी इन सभाध्यक्षादि राजपुरुषों के गुण अग्नि के दृष्टान्त से अगले मन्त्र में कहे हैं॥

अ॒ग्निर्व॑न्वे॒ सु॒वीर्य॑म॒ग्निः कण्वा॑य॒ सौभ॑गम्।

अ॒ग्निः प्रावं॑न्मि॒त्रोत मेध्या॑तिथिम॒ग्निः सा॒ता उ॑प॒स्तुत॑म्॥ १७॥

अ॒ग्निः। व॒न्वे॒। सु॒ऽवीर्य॑म्। अ॒ग्निः। कण्वा॑यः। सौभ॑गम्। अ॒ग्निः। प्र। आ॒व॒त्। मि॒त्रा। उ॒त। मेध्य॑ऽअतिथिम्। अ॒ग्निः। सा॒तौ। उ॒प॒ऽस्तुत॑म्॥ १७॥

पदार्थः-**(अग्निः)** विद्युदिव सभाध्यक्षो राजा **(वन्वे)** याचते। **वनु याचन** इत्यस्माल्लडर्थे लिट्, **वन सम्भक्ता**वित्यस्माद् वा **छन्दसो वर्णलोपो वा** इत्यनेनोपधालोपः। **(सुवीर्यम्)** शोभनं शरीरात्मपराक्रमलक्षणं बलम् **(अग्निः)** उत्तमैश्वर्यप्रदः **(कण्वाय)** धर्मात्मने मेधाविने शिल्पिने **(सौभगम्)** शोभना भगा ऐश्वर्ययोगा यस्य तस्य भावस्तम् **(अग्निः)** सर्वमित्रः **(प्र)** प्रकृष्टार्थे **(आवत्)** रक्षति प्रीणाति **(मित्रा)** मित्राणि। अत्र शेर्लोपः। **(उत)** अपि **(मेध्यातिथिम्)** मेध्याः सङ्गमनीयाः पवित्रा अतिथयो यस्य तम् **(अग्निः)** सर्वाभिरक्षकः **(सातौ)** सम्भजन्ते धनानि यस्मिन् युद्धे शिल्पकर्मणि वा तस्मिन् **(उपस्तुतम्)** य उपगतैर्गुणैः स्तूयते तम्॥१७॥

अन्वयः-यो विद्वान् राजाग्निरिव सातौ संग्रामे उपस्तुतं सुवीर्यमग्निरिव कण्वाय सौभगं वन्वेऽग्निरिव मित्राः सुहृदः प्रावदग्निरिवोताग्निरिव मेध्यातिथिं च सेवेत, स एव राजा भवितुमर्हेत॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथायं भौतिकोऽग्निर्विद्वद्भिः सुसेवितः सन् तेभ्यो बलपराक्रमान् सौभाग्यं च प्रदाय शिल्पविद्याप्रवीणं तन्मित्राणि च सर्वदा रक्षति। तथैव प्रजासेनास्थैर्भद्रपुरुषैर्याचितोऽयं सभाध्यक्षो राजा तेभ्यो बलपराक्रमोत्साहानैश्वर्य्यशक्तिं च दत्त्वा युद्धं विद्याप्रवीणान् तन्मित्राणि च सर्वथा पालयेत्॥१७॥

पदार्थः-जो विद्वान् **(अग्नि)** भौतिक अग्नि के समान **(सातौ)** युद्ध में **(उपस्तुतम्)** उपगत स्तुति के योग्य **(सुवीर्य्यम्)** अच्छे प्रकार शरीर और आत्मा के बल पराक्रम **(अग्निः)** विद्युत् के सदृश

(कण्वाय) उसी बुद्धिमान् के लिये **(सौभगम्)** अच्छे ऐश्वर्य्य को **(वन्वे)** किसी ने याचित किया हुआ देता है **(अग्निः)** पावक के तुल्य **(मित्रा)** मित्रों को **(आवत्)** पालन करता **(उत)** और **(अग्निः)** जाठराग्निवत् **(उपस्तुतम्)** शुभ गुणों से स्तुति करने योग्य **(मेध्यातिथिम्)** कारीगर विद्वान् को सेवे, वही पुरुष राजा होने को योग्य होता है॥१७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यह भौतिक अग्नि विद्वानों का ग्रहण किया हुआ, उनके लिये बल पराक्रम और सौभाग्य को देकर, शिल्पविद्या में प्रवीण और उसके मित्रों की सदा रक्षा करता है, वैसे ही प्रजा और सेना के भद्रपुरुषों से प्रार्थना किया हुआ यह सभाध्यक्ष राजा उनके लिये बल, पराक्रम, उत्साह और ऐश्वर्य का सामर्थ्य देकर युद्धविद्या में प्रवीण और उनके मित्रों को सब प्रकार पाले॥१७॥

सर्वे मनुष्याः सभाध्यक्षेण सह दुष्टान् कथं हन्युरित्युपदिश्यते॥

सब मनुष्य सभाध्यक्ष से मिल के दुष्टों को कैसे मारें, इस विषय का उपदेश अगले मन्त्र में किया है॥

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः॥१८॥

अग्निना। तुर्वशम्। यदुम्। पराऽवतः। उग्रऽदेवम्। हवामहे। अग्निः। नयत्। नवऽवास्त्वम्। बृहत्ऽरथम्। तुर्वीतिम्। दस्यवे। सहः॥१८॥

पदार्थः-**(अग्निना)** अग्निवत्तेजस्विना सभाध्यक्षेण **(तुर्वशम्)** तुरा शीघ्रतया परपदार्थान् वष्टि काङ्क्षति सः। **तुर्वशा इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(यदुम्)** इतरधनाय यततेऽसौ यदुर्मनुष्यस्तम्। अत्र **यती प्रयत्न** इत्यस्माद्बाहुलकादौणादिक उः प्रत्ययस्तकारस्य दकारः **(परावतः)** दूरदेशात् **(उग्रादेवम्)** उग्रान् तीव्रस्वभावान् विजिगीषुम्। अत्र**ान्येषामपि दृश्यत** इति पूर्वपदस्य दीर्घः **(हवामहे)** योद्धुमाह्वयेम **(अग्निः)** अग्रणीस्सभाध्यक्षः **(नयत्)** नयतु बन्धनागारे प्रापयतु। अयं लेट्प्रयोगः। **(नववास्त्वम्)** नवानि नवीनान्यरण्ये निर्मितानि वस्तूनि गृहाणि येन तम्। **अमिपूर्वः** (अष्टा०६.१.१०७) इत्यत्र **वाच्छन्दसि** (अष्टा०६.१.१०६) इत्यनुवर्त्तनात् पूर्वसवर्णाभावे यणादेशः। **(बृहद्रथम्)** बृहन्तो रथा रमणसाधका यस्य तम् **(तुर्वीतिम्)** तुर्वति हिनस्ति यस्तम्। अत्र हिंसार्थात् तुर्वीधातोर्बाहुलकादौणादिकः कर्त्तृकारक इतिः प्रत्ययः **(दस्यवे)** स्वबलोत्कर्षेण परपदार्थहर्त्तुर्दस्योः। अत्र षष्ठ्यर्थे चतुर्थी। **(सहः)** पराभावुकः॥१८॥

अन्वयः-वयं येनाग्निना संग्राह्योग्रादेवं तुर्वशं यदुं परावतो हवामहे। स च दस्यवे सहोऽग्निर्नववास्त्वं बृहद्रथं तुर्वीतिमिहानयत् बन्धागारे प्रापयतु॥१८॥

भावार्थः-सर्वैर्धार्मिकपुरुषैस्तेजस्विना सभाध्यक्षेण राज्ञा सह समागम्य वेगेन परपदार्थहर्त्तॄन् कुटिलस्वभावान् स्वविजयमिच्छन् दस्यूनाहूय पर्वतारण्यादिषु निर्मितानि तद्गृहाणि निपात्य तान् बध्वा कारागृहे नियोक्तव्याः सायणाचार्य्येणायं मन्त्रोऽर्वाचीनपुराणाख्यमिथ्याग्रन्थरीतिमाश्रित्य भ्रान्त्याऽनर्थो व्याख्यातः॥१८॥

पदार्थः-हम लोग जिस **(अग्निना)** अग्नि के समान तेजस्वी सभाध्यक्ष राजा के साथ मिल के **(उग्रादेवम्)** तेज स्वभाव वालों को जीतने की इच्छा करने तथा **(तुर्वशम्)** शीघ्र ही दूसरे के पदार्थों को ग्रहण करने वाले **(यदुम्)** दूसरे का धन मारने के लिये यत्न करते हुए डाकू पुरुष को **(परावतः)** दूसरे देश से **(हवामहे)** युद्ध के लिये बुलावें, वह **(दस्यवे)** अपने विशेष बल से दूसरे का पदार्थ हरने वाले डाकू का **(सहः)** तिरस्कार करने योग्य बल को **(अग्निः)** सब मुख्य राजा **(नववास्त्वम्)** एकान्त में नवीन घर बनाने **(बृहद्रथम्)** बड़े-बड़े रमण के साधन रथों वाले **(तुर्वीतिम्)** हिंसक दुष्टपुरुषों को यहाँ **(नयत्)** कैद में रक्खे॥१८॥

भावार्थः-सब धार्मिक पुरुषों को चाहिये कि तेजस्वी सभाध्यक्ष राजा के साथ मिल के वेग से अन्य के पदार्थों को हरने खोटे स्वभावयुक्त और अपने विजय की इच्छा करने वाले डाकुओं को बुला उनके पर्वतादि एकान्त स्थानों में बने हुए घरों को खसाकर और बाँध के उनको कैद में रक्खें॥१८॥

सायणाचार्य ने यह मन्त्र नवीन पुराण मिथ्या ग्रन्थों की रीति के अवलम्ब से भ्रम के साथ कुछ का कुछ विरुद्ध वर्णन किया है॥

पुनरेषां सहायकारी जगदीश्वरः कीदृश इत्युपदिश्यते॥

फिर उन राजपुरुषों का सहायक जगदीश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि त्वाम॑ग्ने॒ मनु॑र्दधे॒ ज्योति॒र्जना॑य॒ शश्व॑ते।
दी॒देथ॒ कण्व॑ ऋ॒तजा॑त उक्षि॒तो यं नम॒स्यन्ति॑ कृ॒ष्टय॑ः॥ १९॥

नि। त्वाम्। अ॒ग्ने॒। मनुः॑। द॒धे॒। ज्योतिः॑। जना॑य। शश्व॑ते। दी॒देथ॑। कण्वे॑। ऋ॒तऽजा॑तः। उ॒क्षि॒तः। यम्। नम॒स्यन्ति॑। कृ॒ष्टय॑ः॥ १९॥

पदार्थः-(**नि**) नितराम् **(त्वाम्)** सर्वसुखप्रदम्। अत्र स्वरव्यत्ययादुदात्तत्वम्। सायणाचार्येणेदं भ्रमान्न बुद्धम्। **(अग्ने)** तेजस्विन् **(मनुः)** विज्ञानन्यायेन सर्वस्याः प्रजायाः पालकः **(दधे)** स्वात्मनि धरे **(ज्योतिः)** स्वयं प्रकाशकत्वेन ज्ञानप्रकाशकम् **(जनाय)** जीवस्य रक्षणाय **(शश्वते)** स्वरूपेणानादिने

(दीदेथ) प्रकाशयेथ। शबभावः। **(कण्वे)** मेधाविनि जने **(ऋतजातः)** ऋतेन सत्याचरणेन जातः प्रसिद्धः **(उक्षितः)** आनन्दैः सिक्तः **(यम्)** परमात्मानम् **(नमस्यन्ति)** पूजयन्ति। **नमसः पूजायाम्।**[३०] (अष्टा०३.१.१९) **(कृष्टयः)** मनुष्याः। **कृष्टय इति मनुष्यनामसु पठितम्।** (निघं०२.३)॥१९॥

अन्वयः-हे अग्ने जगदीश्वर! यं परमात्मानं त्वां शश्वते जनाय कृष्टयो नमस्यन्ति। हे विद्वांसो! यूयं दीदेथ तज्ज्योतिस्स्वरूपं ब्रह्म ऋतजात उक्षितो मनुरहं कण्वे निदधे, तमेव सर्वे मनुष्या उपासीरन्॥१९॥

भावार्थः-पूज्यस्य परमात्मनः कृपया प्रजारक्षणाय राज्याधिकारे नियोजितैः मनुष्यैः सर्वैः सत्यव्यवहारप्रसिद्ध्या धार्मिका आनन्दितव्या दुष्टाश्च ताड्या बुद्धिमत्सु मनुष्येषु विद्या निधातव्याः॥१९॥

पदार्थः-हे **(अग्ने)** परमात्मन्! **(यम्)** जिस परमात्मा **(त्वाम्)** आप को **(शश्वते)** अनादि स्वरूप **(जनाय)** जीवों की रक्षा के लिये **(कृष्टयः)** सब विद्वान् मनुष्य **(नमस्यन्ति)** पूजा और हे विद्वान् लोगो! जिसको आप **(दिदेथ)** प्रकाशित करते हैं, उस **(ज्योतिः)** ज्ञान के प्रकाश करने वाले परब्रह्म को **(ऋतजातः)** सत्याचरण से प्रसिद्ध **(उक्षितः)** आनन्दित **(मनुः)** विज्ञानयुक्त मैं **(कण्वे)** बुद्धिमान् मनुष्य में **(निदधे)** स्थापित करता हूं, उसकी सब मनुष्य लोग उपासना करें॥१९॥

भावार्थः-सब के पूजने योग्य परमात्मा के कृपाकटाक्ष से प्रजा की रक्षा के लिये राज्य के अधिकारी सब मनुष्यों को योग्य है कि सत्यव्यवहार की प्रसिद्धि से धर्मात्माओं को आनन्द और दुष्टों को ताड़ना देवें॥१९॥

अथ तं सभेशं प्रति किं किमुपदिशेदित्याह॥

अब उस सभापति के प्रति क्या-क्या उपदेश करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वेषासो॑ अग्नेरमवन्तो अर्चयो॑ भीमासो॒ न प्रती॑तये।
रक्षस्विनः॑ सदमिद्या॑तुमावतो॒ विश्वं॑ समत्रिणं॑ दह॥ २०॥ ११॥

त्वेषासः॑। अग्नेः। अमऽवन्तः। अर्चयः॑। भीमासः॑। न। प्रति॑ऽइतये। रक्षस्विनः॑। सदम्। इत्। यातुऽमावतः। विश्वम्। सम्। अत्रिणम्। दह॥ २०॥

पदार्थः-(**त्वेषासः**) त्विषन्ति दीप्यन्ते यास्ताः **(अग्नेः)** सूर्यविद्युत्प्रसिद्धरूपस्य **(अमवन्तः)** निन्दितरोगकारकाः **(अर्चयः)** दीप्तयः। **अर्चिरिति ज्वलतो नामधेयेषु पठितम्।** (निघं०१.१७) **(भीमासः)** बिभ्यति याभ्यस्ता भयङ्कराः **(न)** इव **(प्रतीयते)** सुखप्राप्तये ज्ञानाय वा **(रक्षस्विनः)** रक्षांसि

---

३०. नमो वरिवश्चित्रङः क्यच्। अष्टा०३.१.१९ इत्यनेन सूत्रेण नमसः पूजायमिति नियमात्पूजार्थे क्यच् प्रत्ययः। सं०

निन्दिताः पुरुषा सन्ति येषु व्यवहारेषु ते। अत्र निन्दितार्थे विनिः। **(सदम्)** सीदन्त्यवतिष्ठन्ति यस्मिँस्तत् **(इत्)** एव **(यातुमावतः)** यान्ति प्राप्नुवन्ति ये यातवः, मत्सदृशा इति मावन्तः। यातवश्च ते मावन्तश्च तान्। अत्र सायणाचार्येण यातुरिति पूर्वपदं मावानित्युत्तरपदं चाविदित्वा यातुमावत्पदान् मतुप्कृतस्तदिदं पदपाठाद् विरुद्धत्वादशुद्धम्। **(विश्वम्)** सर्वं जगत् **(सम्)** सम्यगर्थे **(अत्रिणम्)** परपदार्थापहर्त्तारं शत्रुम् **(दह)** भस्मी कुरु॥२०॥

अन्वयः-हे तेजस्विन् सभापते! त्वमग्नेस्त्वेषसो भीमासोऽर्चयोर्न येऽमवन्तो रक्षस्विनः सन्ति तानत्रिणं चेदेवं संदह प्रतीतये विश्वं सदं यातुमावतश्च संरक्ष॥२०॥

भावार्थः-सभाध्यक्षादिभी राजपुरुषैः प्रजाजनैश्च यथाऽग्न्यादयः वनादीनि दहन्ति तथा दुष्टाचाराः प्राणिनो विनाशनीया एवं प्रयतमानैः सततं प्रजारक्षणं कार्यमिति॥२०॥

अत्र सर्वाभिरक्षकेश्वरस्य दूतदृष्टान्तेन भौतिकाग्नेश्च गुणवर्णनं दूतगुणोपदेशोऽग्निदृष्टान्तेन राजपुरुषगुणवर्णनं सभापतिकृत्यं सभापतित्वाधिकारिप्रकारोऽग्न्यादिपदार्थोपयोगकरणं मनुष्याणां सभेशस्य प्रार्थना सर्वमनुष्याणां सभाध्यक्षेण सह दुष्टहननं राजपुरुषसहायकेश्वरवर्णनं चोक्तमत एतत्सूक्तोक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्।

षट्त्रिंशं सूक्तमेकादशो वर्गश्च समाप्तः॥३६॥

पदार्थः-हे तेजस्वी सभास्वामिन्! आप **(अग्नेः)** सूर्य, विद्युत् और प्रसिद्ध रूप अग्नि की **(त्वेषासः)** प्रकाशस्वरूप **(भीमासः)** भयकारक **(अर्चयः)** ज्वाला के **(न)** समान जो **(अमवन्तः)** निन्दित रोग करने वाले **(रक्षस्विनः)** राक्षस अर्थात् निन्दित पुरुष हैं, उन और **(अत्रिणम्)** बल से दूसरे के पदार्थों को हरने वाले शत्रु को **(इत्)** ही **(संदह)** अच्छे प्रकार भस्म कीजिये और **(प्रतीतये)** विज्ञान वा उत्तम सुख की प्रतीति होने के लिये **(विश्वम्)** सब **(सदम्)** संसार तथा **(यातुमावतः)** मेरे समान होने वालों की रक्षा कीजिये॥२०॥

भावार्थः-इस मन्त्र में सायणाचार्य ने यातु पूर्वपद और मावान् उत्तर पद नहीं जान **(यातुमा)** इस पूर्वपद से मतुप् प्रत्यय माना है, सो पद पाठ से विरुद्ध होने के कारण अशुद्ध है। सभाध्यक्ष आदि राजपुरुषों और प्रजा के मनुष्यों को चाहिये कि जिस प्रकार अग्नि आदि पदार्थ वन आदि को भस्म कर देते हैं, वैसे दुःख देने वाले शत्रु जनों के विनाश के लिये इस प्रकार प्रयत्न करें॥२०॥

इस सूक्त में सब की रक्षा करने वाले परमेश्वर तथा दूत के दृष्टान्त से भौतिक अग्नि के गुणों का वर्णन, दूत के गुणों का उपदेश, अग्नि के दृष्टान्त से राजपुरुषों के गुणों का वर्णन, सभापति का कृत्य, सभापति होने के अधिकारी का कथन, अग्नि आदि पदार्थों से उपयोग लेने की रीति, मनुष्यों की सभापति से प्रार्थना, सब मनुष्यों को सभाध्यक्ष के साथ मिलके दुष्टों का मारना और राजपुरुषों के सहायक जगदीश्वर के उपदेश से इस सूक्त के अर्थ की पूर्वसूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह छत्तीसवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥३६॥

ISBN 978-81-909957-0-4

॥ओ३म्॥

॥ऋग्वेदभाष्यम्॥

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समन्वितम्।

॥प्रथमं मण्डलम्॥

(ऋग्वेद १.३७-१.९० सूक्तपर्यन्तम्)

सम्पादनम्

श्रद्धानन्द-वैदिक-शोधसंस्थानम्

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्

द्वितीयो भागः

प्रकाशनम्

श्रद्धानन्द-अनुसन्धान-प्रकाशन-केन्द्रः

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्.

वर्ष २०११

सम्पादक-मण्डल

मुख्यसंरक्षक	श्री सुदर्शन शर्मा, कुलाधिपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
संरक्षक	प्रो. स्वतन्त्र कुमार, कुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सहसंरक्षक	प्रो. महावीर, आचार्य एवं उपकुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रधान सम्पादक	प्रो. ज्ञानप्रकाश शास्त्री, प्रोफेसर, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सम्पादक	डॉ. सत्यदेव निगमालङ्कार, अध्यक्ष, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
व्यवसाय-प्रबन्धक	डॉ. जगदीश विद्यालङ्कार, पुस्तकालयाध्यक्ष, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रकाशक	प्रो. ए.के. चोपड़ा, कुलसचिव, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. उत्तराखण्ड)

प्रकाशनः-

श्रद्धानन्द-अनुसन्धान-प्रकाशनकेन्द्र

गुरुकुल काँगड़ी विश्वविद्यालय

हरिद्वार.

सन् २०१०

मूल्य-रु०४३०

मुद्रकः-

भारत प्रिंटर्स एण्ड पब्लिशर्स

दिल्ली.

दूरभाष-09212390469

अथास्य पञ्चदशर्चस्य सप्तत्रिंशस्य सूक्तस्य घौरः कण्व ऋषिः। मरुतो देवताः।
१,२,४,६,८,१२ गायत्री। ३,९,११,१४ निचृद्गायत्री। ५ विराड्गायत्री १०,१५
पिपीलिकामध्या निचृद्गायत्री। १३ पादनिचृद्गायत्री च छन्दः। षड्जः स्वरः॥
अत्र मोक्षमूलरादिकृतव्याख्यानं सर्वमसङ्गतं तत्र प्रत्येकमन्त्रेणानर्जयमस्तीति वेद्यम्।
तत्रादिमे मन्त्रे विद्वद्भिर्वायुगुणैः किं किं कर्त्तव्यमित्युपदिश्यते॥

अब सैंतीसवे सूक्त का आरम्भ है और इस सूक्त भर में मोक्षमूलर आदि साहिबों का किया हुआ व्याख्यान असङ्गत है, उसमें एक-एक मन्त्र में उनकी अंसगति जाननी चाहिये।
इस सूक्त के प्रथम मन्त्र में विद्वानों को वायु के गुणों से क्या-क्या उपकार लेना चाहिये, इस विषय का उपदेश किया है॥

क्रीळं वः शर्धो मारुतमनर्वाणं रथे शुभम्।
कण्वा अभि प्र गायत॥ १॥

क्रीळम्। वः। शर्धः। मारुतम्। अनर्वाणम्। रथे। शुभम्। कण्वाः। अभि। प्र। गायत॥ १॥

पदार्थः-(**क्रीडम्**) क्रीडन्ति यस्मिँस्तत्। अत्र **कीड़ विहार** इत्यस्माद् **घञर्थे कविधानम्** इति कः प्रत्ययः। (**वः**) युष्माकम् (**शर्धः**) बलम्। **शर्ध इति बलनामसु पठितम्।** (निघं०२.९) (**मारुतम्**) मरुतां समूहः। अत्र **मृग्रोरुतिः।** (उणा०१.९५) इति मृङ्धातोरुतिः प्रत्ययः। **अनुदात्तादेरञ्।** (अष्टा०४.२.४४) इत्यञ् प्रत्ययः। इदं पदं सायणाचार्येण मरुतां सम्बन्धि **तस्येदम्** इत्यण् व्यत्ययेनाद्युदात्तत्वमित्यशुद्धं व्याख्यातम् (**अनर्वाणम्**) अविद्यमाना अर्वाणोऽश्वा यस्मिँस्तम्। **अर्वेत्यश्वनामसु पठितम्।** (निघं०१.१४) (**रथे**) रयते गच्छन्ति येन तस्मिन् विमानादियाने (**शुभम्**) शोभनम् (**कण्वाः**) मेधाविनः (**अभि**) आभिमुख्ये (**प्र**) प्रकृष्टार्थे (**गायत**) शब्दायत शृणुतोपदिशत च॥ १॥

अन्वयः-हे कण्वा मेधाविनो विद्वांसो! यूयं यद्वोऽनर्वाणं रथे क्रीडं क्रियायां शुभमारुतं शर्धोऽस्ति, तदभिप्रगायत॥ १॥

भावार्थः-विद्वद्भिर्ये वायवः प्राणिनां चेष्टाबलवेगयानमङ्गलादिव्यवहारान् साधयन्ति, तस्मात् तद्गुणान् परीक्ष्यैतेभ्यो यथायोग्यमुपकारा ग्राह्याः॥ १॥

मोक्षमूलराख्येनार्वशब्देन ह्यश्वग्रहणनिषेधः कृतः सोऽशुद्ध एव भ्रममूलत्वात्। तथा पुनरर्वशब्देन सर्वत्रैवाश्वग्रहणं क्रियत इत्युक्तम्। एतदपि प्रमाणाभावादशुद्धमेव। अत्र विमानादेरनश्वस्य रथस्य विवक्षितत्वात्। अत्र कलाभिश्चालितेन वायुनाग्नेः प्रदीपनाज्जलस्य वाष्पवेगेन यानस्य गमनं कार्य्यते नहि पशवोऽश्वा गृह्यन्त इति॥ १॥

पदार्थः-हे (**कण्वाः**) मेधावी विद्वान् मनुष्यो! तुम जो (**वः**) आप लोगों के (**अनर्वाणम्**) घोड़ों के योग से रहित (**रथे**) विमानादि यानों में (**क्रीडम्**) क्रीड़ा का हेतु क्रिया में (**शुभम्**) शोभनीय

(मारुतम्) पवनों का समूह रूप **(शर्धः)** बल है, उसको **(अभि प्रगायत)** अच्छे प्रकार सुनो वा उपदेश करो॥१॥

भावार्थः-सायणाचार्य्य ने **(मारुतम्)** इस पद को पवनों का सम्बन्धि **(तस्येदम्)** इस सूत्र से अण् प्रत्यय और व्यत्यय से आद्युदात्त स्वर अशुद्ध व्याख्यान किया है। बुद्धिमान् पुरुषों को चाहिये कि जो पवन प्राणियों के चेष्टा, बल, वेग, यान और मङ्गल आदि व्यवहारों को सिद्ध करते, इससे इनके गुणों की परीक्षा करके इन पवनों से यथायोग्य उपकार ग्रहण करें॥१॥

मोक्षमूलर साहिब ने **'अर्व'** शब्द से अश्व के ग्रहण का निषेध किया है, सो भ्रममूलक होने से अशुद्ध ही है और फिर अर्व शब्द से सब जगह अश्व का ग्रहण किया है, यह भी प्रमाण के न होने से अशुद्ध ही है। इस मन्त्र में अश्वरहित विमान आदि रथ की विवक्षा होने से यानों में कलाओं से चलाये हुए पवन तथा अग्नि के प्रकाश और जल की भाफ के वेग से यानों के गमन का सम्भव है, इससे यहाँ कुछ पशुरूप अश्व नहीं लिये हैं॥१॥

पुनस्तैः कथं भवितव्यमित्युपदिश्यते॥

फिर वे विद्वान् कैसे होने चाहियें, इस विषय का उपदेश अगले मन्त्र में किया है॥

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः।
अजायन्त स्वभानवः॥२॥

ये। पृषतीभिः। ऋष्टिऽभिः। साकम्। वाशीभिः। अञ्जिऽभिः। अजायन्त। स्वऽभानवः॥२॥

पदार्थः-(**ये**) मरुत इव विज्ञानशीला विद्वांसो जनाः **(पृषतीभिः)** पर्षन्ति सिञ्चन्ति धर्मवृक्षं याभिरद्भिः **(ऋष्टिभिः)** याभिः कलायन्त्रयष्टीभिर्ऋषन्ति जानन्ति प्राप्नुवन्ति व्यवहाराँस्ताभिः **(साकम्)** सह **(वाशीभिः)** वाणीभिः। **वाशीति वाङ्नामसु पठितम्।** (निघं०१.११) **(अञ्जिभिः)** अञ्जन्ति व्यक्तीकुर्वन्ति पदार्थगुणान् याभिः क्रियाभिः **(अजायन्त)** धर्म्मक्रियाप्रचाराय प्रादुर्भवन्ति। अत्र लडर्थे लङ्। **(स्वभानवः)** वायुवत्स्वभानवो ज्ञानदीप्तयो येषान्ते॥२॥

अन्वयः-ये पृषतीभिर्ऋष्टिभिरञ्जिभिर्वाशीभिः साकं क्रियाकौशले प्रयतन्ते ते स्वभानवोऽजायन्त॥२॥

भावार्थः-हे विद्वांसो मनुष्या! युष्माभिरीश्वररचितायां सृष्टौ कार्यस्वभावप्रकाशस्य वायोः सकाशाज्जलसेचनं चेष्टाकरणमग्न्यादिप्रसिद्धिर्वायुव्यवहाराश्चार्थात् कथनश्रवणस्पर्शा भवन्ति, तैः क्रियाविद्याधर्मादिशुभगुणाः प्रचारणीयाः॥२॥

मोक्षमूलरोक्तिः। ये ते वायवो विचित्रैर्हरिणैरयोमयोभिः शक्तिभिरसिभिः प्रदीप्तैराभूषणैश्च सह जाता इत्यसम्भवोऽस्ति। कुतः? वायवो हि पृषत्यादीनां स्पर्शादिगुणानां च योगेन सर्वचेष्टाहेतुत्वेन च वागग्निप्रादुर्भावे हेतवः सन्तः स्वप्रकाशवन्तः सन्त्यतः। यच्चोक्तं सायणाचार्येण वाशीशब्दस्य व्याख्यानं

समीचीनं कृतमित्यप्यलीकम्। कुत: ? मन्त्रपदवाक्यार्थविरोधात्। यश्च प्रकरणपदवाक्यभावार्थानुकूलोऽस्ति सोऽयमस्य मन्त्रस्यार्थो द्रष्टव्य:॥२॥

पदार्थ:-(**ये**) जो (**पृषतीभि:**) पदार्थों को सींचने (**ऋष्टिभि:**) व्यवहारों को प्राप्त और (**अञ्जिभि:**) पदार्थों को प्रगट कराने वाली (**वाशीभि:**) वाणियों के (**साकम्**) साथ क्रियाओं के करने की चतुराई में प्रयत्न करते हैं, वे (**स्वभानव:**) अपने ऐश्वर्य के प्रकाश से प्रकाशित (**अजायन्त**) होते हैं॥२॥

भावार्थ:-हे विद्वान् मनुष्यो! तुम लोगों को उचित है कि ईश्वर की रची हुई इस कार्य्य सृष्टि में जैसे अपने-अपने स्वभाव के प्रकाश करने वाले वायु के सकाश से जल की वृष्टि, चेष्टा का करना, अग्नि आदि की प्रसिद्धि और वाणी के व्यवहार अर्थात् कहना सुनना स्पर्श करना आदि सिद्ध होते हैं, वैसे ही विद्या और धर्मादि शुभगुणों का प्रचार करो॥२॥

मोक्षमूलर साहिब कहते हैं कि जो वे पवन, चित्र-विचित्र हरिण, लोह की शक्ति तथा तलवारों और प्रकाशित आभूषणों के साथ उत्पन्न हुए हैं, इति। यह व्याख्या असम्भव है, क्योंकि पवन निश्चय करके वृष्टि कराने वाली क्रिया तथा स्पर्शादि गुणों के योग और सब चेष्टा के हेतु होने से वाणी और अग्नि के प्रगट करने के हेतु हुए अपने आप प्रकाश वाले हैं और जो उन्होंने कहा है कि सायणाचार्य ने '**वाशी**' शब्द का व्याख्यान यथार्थ किया है, सो भी असङ्गत है, क्योंकि वह भी मन्त्र पद और वाक्यार्थ से विरुद्ध है और जो मेरे भाष्य में प्रकरण, पद, वाक्य और भावार्थ के अनुकूल अर्थ है, उसको विद्वान् लोग स्वयं विचार लेंगे कि ठीक है वा नहीं॥२॥

पुनरेते तै: किं कुर्य्युरित्युपदिश्यते॥

फिर वे विद्वान् लोग इन पवनों से क्या-क्या उपकार लेवें, इस विषय का उपदेश अगले मन्त्र में किया है॥

इ॒हेव॑ शृण्व एषा॒ कशा॒ हस्ते॑षु॒ यद्व॒दान्।
नि याम॑ञ्चि॒त्रमृ॑ञ्जते॥३॥

इ॒हऽइ॑व। शृ॒ण्वे॒। एषा॒म्। कशा॑:। हस्ते॑षु। यत्। वदा॑न्। नि। याम॑न्। चि॒त्रम्। ऋ॒ञ्ज॒ते॥३॥

पदार्थ:-(**इहेव**) यथाऽस्मिन् स्थाने स्थित्वा तथा (**शृण्वे**) शृणोमि। अत्र व्यत्ययेनात्मनेपदम्। (**एषाम्**) वायूनाम् (**कशा:**) चेष्टासाधनरज्जुवन्नियमप्रापिका: क्रिया: (**हस्तेषु**) हस्ताद्यङ्गेषु। बहुवचनादङ्गानीति ग्राह्यम्। (**यत्**) व्यावाहारिकं वच: (**वदान्**) वदेयु: (**नि**) नितराम् (**यामन्**) यान्ति प्राप्नुवन्ति सुखहेतुपदार्थान् यस्मिँस्तस्मिन् मार्गे। अत्र **सुपां सुलुग्०** इति डेर्लुक्। (**चित्रम्**) अद्भुतं कर्म (**ऋञ्जते**) प्रसाध्नोति। **ऋञ्जति: प्रसाधनकर्मा।** (निरु०६.२१)॥३॥

अन्वयः-अहं यदेषां वायूनां कशा हस्तेषु सन्ति प्राणिनो वदान् वदेयुस्तदिहेव शृण्वे सर्वः प्राण्यप्राणी यद्यामन् यामनि चित्रं कर्म न्यृञ्जते तदहमपि कर्त्तुं शक्नोमि॥३॥

भावार्थः-अत्रोपमालङ्कारः। पदार्थविद्यामभीप्सुभिर्विद्वद्भिर्यानि कर्माणि जडचेतनाः पदार्थाः कुर्वन्ति, तद्धेतवो वायवः सन्ति। यदि वायुर्न स्यात्तर्हि कश्चित् किञ्चदपि कर्म कर्त्तुं न शक्नुयात्। दूरस्थेनोच्चारिताञ्छब्दान् समीपस्थानिव वुचेष्टामन्तरेण कश्चिदपि श्रोतुं वक्तुं च न प्रभवेत्। वीरा युद्धादिकार्येषु यावन्तौ बलपराक्रमौ कुर्वन्ति, तावत्तौ सर्वौ वायुयोगादेव भवतः। नह्येतेन विना नेत्रस्पन्दनमपि कर्त्तुं शक्यमतोऽस्य सर्वदेव शुभगुणाः सर्वैः सदान्वेष्टव्याः॥३॥

मोक्षमूलरोक्तिः। अहं सारथिना कशाशब्दाञ्च्छृणोमि। अतिनिकटे हस्तेषु तान् प्रहरन्ति ते स्वमार्गेष्वतिशोभां प्राप्नुवन्ति। यामन्निति मार्गस्य नाम येन मार्गेण देवा गच्छन्ति यस्मान् मार्गाद् बलिदानानि प्राप्नुवन्ति। यथास्माकं प्रकरणे मेघावयवानामपि ग्रहणं भवतीत्यशुद्धास्ति। कुतः? अत्र कशाशब्देन वायुहेतुकानां क्रियाणां ग्रहणाद् यामन्निति शब्देन सर्वव्यवहारसुखप्रापिकस्य कर्मणो ग्रहणाच्च॥३॥

पदार्थः-मैं (**यत्**) जिस कारण (**एषाम्**) इन पवनों की (**कशाः**) रज्जु के समान चेष्टा के साधन नियमों को प्राप्त कराने वाली क्रिया (**हस्तेषु**) हस्त आदि अङ्गो में हैं, इससे सब चेष्टा और जिससे प्राणी व्यवहार सम्बन्धी वचन को (**वदान्**) बोलते हैं, उसको (**इहेव**) जैसे इस स्थान में स्थित होकर वैसे करता और (**शृण्वे**) श्रवण करता हूं और जिससे सब प्राणी और अप्राणी (**यामन्**) सुख हेतु व्यवहारों के प्राप्त कराने वाले मार्ग में (**चित्रम्**) आश्चर्य्यरूप कर्म को (**न्यृञ्जते**) निरन्तर सिद्ध करते हैं, उसके करने को समर्थ उसी से मैं भी होता हूं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वायु, पदार्थ-विद्या की इच्छा करने वाले विद्वानों को चाहिये कि मनुष्य आदि प्राणी जितने कर्म करते हैं, उन सभी के हेतु पवन हैं। जो वायु न हों तो कोई मनुष्य कुछ भी कर्म करने को समर्थ न हो सके और दूरस्थित मनुष्य ने उच्चारण किये हुए शब्द निकट के उच्चारण के समान, वायु की चेष्टा के विना, कोई भी कह वा सुन न सके और मनुष्य मार्ग में चलने आदि जितने बल वा पराक्रमयुक्त कर्म करते हैं, वे सब वायु ही के योग से होते हैं। इससे यह सिद्ध है कि वायु के विना कोई नेत्र के चलाने को भी समर्थ नहीं हो सकता, इसलिये इसके शुभगुणों का खोज सर्वदा किया करें॥३॥

मोक्षमूलर साहिब कहते हैं कि मैं सारथियों के कशा अर्थात् चाबुक के शब्दों को सुनता हूं तथा अति समीप हाथों में उन पवनों को प्रहार करते हैं, वे अपने मार्ग में अत्यन्त शोभा को प्राप्त होते हैं और '**यामन्**' यह मार्ग का नाम है, जिस मार्ग से देव जाते हैं वा जिस मार्ग से बलिदानों को प्राप्त होते हैं, जैसे हम लोगों के प्रकरण में मेघ के अवयवों का भी ग्रहण होता है। यह सब अशुद्ध है, क्योंकि इस

मन्त्र में '**कशा**' शब्द से सब क्रिया और '**यामन्**' शब्द से मार्ग में सब व्यवहार प्राप्त करने वाले कर्मों का ग्रहण है॥३॥

पुनरेते वायोः कस्मै प्रयोजनाय किं कुर्युरित्युपदिश्यते॥

फिर वे विद्वान् लोग वायु से किस-किस प्रयोजन के लिये क्या-क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे।
देवत्तं ब्रह्म गायत॥४॥

प्र। वः। शर्धाय। घृष्वये। त्वेषऽद्युम्नाय। शुष्मिणे। देवत्तम्। ब्रह्म। गायत॥४॥

पदार्थः-(**प्र**) प्रीतार्थे (**वः**) युष्माकम् (**शर्धाय**) बलाय (**घृष्वये**) घर्षन्ति परस्परं संचूर्णयन्ति येन तस्मै (**त्वेषद्युम्नाय**) प्रकाशमानाय यशसे। **द्युम्नं द्योततेर्यशो वान्नं वा।** (निरु०५.५) (**शुष्मिणे**) शुष्यति बलयति येन व्यवहारेण स बहुर्विद्यते यस्मिँस्तस्मै। अत्र भूम्न्यर्थ इनिः। (**देवत्तम्**) यद्देवेनेश्वरेण दत्तं विद्वद्भिर्वाध्यापकेन तत् (**ब्रह्म**) वेदम् (**गायत**) षड्जादि स्वरैरालपत॥४॥

अन्वयः-हे विद्वांसो मनुष्या! य इमे वायवः वो युष्माकं शर्धाय घृष्वये शुष्मिणे त्वेषद्युम्नाय सन्ति, तन्नियोगेन देवत्तं ब्रह्म यूयं गायत॥४॥

भावार्थः-विद्वद्भिर्मनुष्यैरीश्वरोक्तान् वेदानधीत्य वायुगुणान् विदित्वा यशस्वीनि बलकारकाणि कर्माणि नित्यमनुष्ठाय सर्वेभ्यः प्राणिभ्यः सुखानि देयानीति॥४॥

मोक्षमूलरोक्तिः। येषां गृहेषु वायवो देवता आगच्छन्ति हे कण्वा! यूयं तेषामग्रे ता देवता स्तुत। ताः कीदृश्यः सन्ति। उन्मत्ता विजयवत्यो बलवत्यश्च। अत्र। ऋ०४.१७.२ इदमत्रप्रमाणमस्तीत्यशुद्धास्ति। यच्चात्र मन्त्रप्रमाणं दत्तं तत्रापि तदभीष्टोऽर्थो नास्तीत्यतः॥४॥

पदार्थः-हे विद्वान् मनुष्यो! जो ये पवन (**वः**) तुम लोगों के (**शर्धाय**) बल प्राप्त करनेवाले (**घृष्वये**) जिसके लिये परस्पर लड़ते-भिड़ते हैं, उस (**शुष्मिणे**) अत्यन्त प्रशंसित बलयुक्त व्यवहार वाले (**त्वेषद्युम्नाय**) प्रकाशमान यश के लिये हैं, तुम लोग उनके नियोग से (**देवत्तम्**) ईश्वर ने दिये वा विद्वानों ने पढ़ाये हुए (**ब्रह्म**) वेद को (**प्रगायत**) अच्छे प्रकार षड्जादि स्वरों से स्तुतिपूर्वक गाया करो॥४॥

भावार्थः-विद्वान् मनुष्यों को चाहिये कि ईश्वर के कहे हुए वेदों को पढ़, वायु के गुणों को जान और यश वा बल के कर्मों का अनुष्ठान करके सब प्राणियों के लिये सुख देवें॥४॥

मोक्षमूलर साहिब का अर्थः- जिन के घरों में वायु देवता आते हैं, हे बुद्धिमान् मनुष्यो! तुम उनके आगे उन देवताओं की स्तुति करो तथा देवता कैसे हैं कि उन्मत्त विजय करने वा वेग वाले। इसमें चौथे मण्डल सत्रहवें सूक्त दूसरे मन्त्र का प्रमाण है। सो यह अशुद्ध है, क्योंकि सब जगह पवनों की

स्थिति के जाने-आने वाली क्रिया होने वा उनके सामीप्य के विना वायु के गुणों की स्तुति के सम्भव होने से और वायु से भिन्न वायु का कोई देवता नहीं हैं, इससे तथा जो मन्त्र का प्रमाण दिया है, वहाँ भी उनका अभीष्ट अर्थ इनके अर्थ के साथ नहीं है॥४॥

पुनरेतेषां योगेन किं किं भवतीत्युपदिश्यते॥

फिर इनके योग से क्या-क्या होता है, यह अगले मन्त्र में उपदेश किया है॥

प्र शं॑सा॒ गोष्वघ्यं॑ क्री॒ळं यच्छर्धो॒ मारु॑तम्।

जम्भे॒ रस॑स्य वावृधे॥५॥१२॥

प्र। शं॑स॒। गोषु॑। अघ्य॑म्। क्री॒ळम्। यत्। शर्धः॑। मारु॑तम्। जम्भे॑। रस॑स्य। व॒वृ॒धे॒॥५॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**शंसा**) अनुशाधि (**गोषु**) पृथिव्यादिष्विन्द्रियेषु पशुषु वा (**अघ्यम्**) हन्तुमयोग्यमघ्न्याभ्यो गोभ्यो हितं वा। **अघ्यादयश्च।** (उणा०४.११२)। अनेनाऽयं सिद्धः। **अघ्येति गोनामसु पठितम्।** (निघं०२.११) (**क्रीडम्**) क्रीडति येन तत् (**यत्**) (**शर्धः**) बलम् (**मारुतम्**) मरुतो विकारो मारुतस्तम् (**जम्भे**) जम्भ्यन्ते गात्राणि विनाम्यन्ते चेष्ट्यन्ते येन मुखेन तस्मिन् (**रसस्य**) भुक्तान्नत उत्पन्नस्य शरीरवर्द्धकस्य भोगेन (**वावृधे**) वर्धते। अत्र **तुजादीनां दीर्घोऽभ्यासस्य** (अष्टा०६.१.७) इति दीर्घः॥५॥

अन्वयः-हे विद्वंस्त्वं यद् गोषु क्रीडमघ्न्यं मारुतं जम्भे रसस्य सकाशादुत्पद्यमानं शर्धो बलं वावृधे तन्मह्यं प्रशंस नित्यमनुशाधि॥५॥

भावार्थः-मनुष्यैर्यद्वायुसम्बन्धि शरीरादिषु क्रीडाबलवर्धनमस्ति तन्नित्यं वर्धनीयम्। यावद्रसादिज्ञानं तत्सर्वं वायुसन्नियोगेनैव जायते, अतः सर्वैः परस्परमेवमनुशासनं कार्य्यं यतः सर्वेषां वायुगुणविद्या विदिता स्यात्॥५॥

मोक्षमूलरोक्तिः। स प्रसिद्धो वृषभो गवां मध्य अर्थात् पवनदलानां मध्ये उपाधिवर्द्धितो जातः सन् यथा तेन मेघावयवाः खादिताः। कुतः? अनेन मरुतामादरः कृतस्तस्मादित्यशुद्धास्ति। कथम्। अत्र यद्गवां मध्ये मारुतं बलमस्ति। तस्य प्रशंसाः कार्य्याः। यच्च प्राणिभिर्मुखेन खाद्यते तदपि मारुतं बलमस्तीति। अत्र जम्भशब्दार्थे विलसन मोक्षमूलराख्यविवादो निष्फलोऽस्ति॥५॥

पदार्थः-हे विद्वान्मनुष्यो! तुम (**यत्**) जो (**गोषु**) पृथिवी आदि भूत वा वाणी आदि इन्द्रिय तथा गौ आदि पशुओं में (**क्रीडम्**) क्रीड़ा का निमित्त (**अघ्यम्**) नहीं हनन करने योग्य वा इन्द्रियों के लिये हितकारी (**मारुतम्**) पवनों का विकाररूप (**रसस्य**) भोजन किये हुए अन्नादि पदार्थों से उत्पन्न (**जम्भे**) जिससे गात्रों का संचलन हो, मुख में प्राप्त हो के शरीर में स्थित (**शर्धः**) बल (**वावृधे**) वृद्धि को प्राप्त होता है, उसको मेरे लिये नित्य (**प्रशंसा**) शिक्षा करो॥५॥

भावार्थः-मनुष्यों को योग्य है कि जो वायुसम्बन्धी शरीर आदि में क्रीड़ा और बल का बढ़ना है, उसको नित्य उन्नति देवें और जितना रस आदि प्रतीत होता है, वह सब वायु के संयोग से होता है। इससे परस्पर इस प्रकार सब शिक्षा करनी चाहिये कि जिससे सब लोगों को वायु के गुणों की विद्या विदित हो जावे॥५॥

मोक्षमूलर साहिब का कथन कि यह प्रसिद्ध वायु पवनों के दलों में उपाधि से बढ़ा हुआ जैसे उस पवन ने मेघावयवों को स्वादयुक्त किया है, क्योंकि इसने पवनों का आदर किया इससे। सो यह अशुद्ध है, कैसे कि जो इस मन्त्र में इन्द्रियों के मध्य में पवनों का बल कहा है, उसकी प्रशंसा करनी और जो प्राणि लोग मुख से स्वाद लेते हैं, वह भी पवनों का बल है और इस **'जम्भ'** शब्द के अर्थ में विलसन और मोक्षमूलर साहिब का वाद-विवाद निष्फल है॥५॥

पुनरेतेभ्यः प्रजाराजजनाभ्यां किं किं कार्य्यं ज्ञातव्यं चेत्युपदिश्यते॥

फिर इन पवनों से मनुष्यों को क्या-क्या करना वा जानना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

को वो॒ वर्षि॑ष्ठ आ न॑रो दि॒वश्च॒ ग्मश्च॑ धू॒तयः।

यत्सी॒मन्तं॒ न धू॑नु॒थ॥६॥

कः। व॒ः। वर्षि॑ष्ठः। आ। न॒रः। दि॒वः। च॒। ग्मः। च॒। धू॒तय॒ः। यत्। सी॒म्। अन्त॑म्। न। धू॒नु॒थ॥६॥

पदार्थः-(**कः**) प्रश्ने (**वः**) युष्माकं मध्ये (**वर्षिष्ठः**) अतिशयेन वृद्धः (**आ**) समन्तात् (**नरः**) नयन्ति ये ते नरस्तत्सम्बुद्धौ (**दिवः**) द्योतकान् सूर्यादिलोकान् (**च**) समुच्चये (**ग्मः**) प्रकाशरहितपृथिव्यादि- लोकान्। **ग्मेति पृथिवीनामसु पठितम्।** (निघं०१.१) अत्र गमधातोर्बाहुलकादौणादिक आप्रत्यय उपधालोपश्च। (**च**) तत्सम्बन्धितश्च (**धूतयः**) धून्वन्ति ये ते (**यत्**) ये (**सीम्**) सर्वतः (**अन्तम्**) वस्त्रप्रान्तम् (**न**) इव (**धूनुथ**) शत्रून् कम्पयत॥६॥

अन्वयः-हे धूतयो नरो विद्वांसो मनुष्या! यद्ये यूयं दिवः सूर्यादिप्रकाशकाँल्लोकाँस्तत्सम्बन्धिनोऽन्याँश्च ग्मः ग्मपृथिवीस्तत्सम्बन्धिन इतराँश्च सीं सर्वतस्तृणवृक्षाद्यवयवान् कम्पयन्तो वायवो नेव शत्रुगणानामन्तं यदाधूनुथ समन्तात् कम्पयत तदा वो युष्माकं मध्ये को वर्षिष्ठो विद्वान्न जायते॥६॥

भावार्थः-अत्रोपमालङ्कारः। विद्वद्भी राजपुरुषैर्यथाकश्चिद्बलवान् मनुष्यो निर्बलं केशान् गृहीत्वा कम्पयति, यथा च वायवः सर्वान् लोकान् धृत्वा कम्पयित्वा चालयित्वा स्वं स्वं परिधिं प्रापयन्ति, तथैव सर्वं शत्रुगणं प्रकम्प्य तत्स्थानात् प्रचाल्य प्रजा रक्षणीया॥६॥

मोक्षमूलरोक्तिः। हे मनुष्या! युष्माकं मध्ये महान् कोऽस्ति? यूयं कम्पयितार आकाशपृथिव्योः। यदा यूयं धारितवस्त्रप्रान्तकम्पनवत् तान् कम्पयत। अन्तशब्दार्थं सायणाचार्योक्तं न स्वीकुर्वे किन्तु विलसनाख्यादिभिरुक्तमित्यशुद्धमिति। कुतः? अत्रोपमालङ्कारेण यथा राजपुरुषाः शत्रूनितरे मनुष्यास्तृणकाष्ठादिकं च गृहीत्वा कम्पयन्ति तथा वायवोऽग्निपृथिव्यादिकं गृहीत्वा कम्पयन्तीत्यर्थस्य विदुषां सकाशान्निश्चयः कार्य इत्युक्तत्वात्। यथा सायणाचार्येण कृतोऽर्थो व्यर्थोऽस्ति, तथैव मोक्षमूलरोक्तोऽस्तीति विजानीमः॥६॥

पदार्थः-हे विद्वान् मनुष्यो! **(धूतयः)** शत्रुओं को कम्पाने वाले **(नरः)** नीतियुक्त **(यत्)** ये तुम लोग **(दिवः)** प्रकाश वाले सूर्य आदि **(च)** वा उनके सम्बन्धी और तथा **(ग्मः)** पृथिवी **(च)** और उनके सम्बन्धी प्रकाश रहित लोकों को **(सीम्)** सब ओर से अर्थात् तृण, वृक्ष आदि अवयवों के सहित ग्रहण करके कम्पाते हुए वायुओं के **(न)** समान शत्रुओं का **(अन्तम्)** नाश कर दुष्टों को जब **(आधूनुथ)** अच्छे प्रकार कम्पाओ, तब **(वः)** तुम लोगों के बीच में **(कः)** कौन **(वर्षिष्ठः)** यथावत् श्रेष्ठ विद्वान् प्रसिद्ध न हो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। विद्वान् राजपुरुषों को चाहिये कि जैसे कोई बलवान् मनुष्य निर्बल मनुष्य के केशों का ग्रहण करके कंपाता और जैसे वायु सब लोकों का ग्रहण तथा चलायमान करके अपनी-अपनी परिधि में प्राप्त करते हैं, वैसे ही सब शत्रुओं को कम्पा और उनके स्थानों से चलायमान करके प्रजा की रक्षा करें॥६॥

मोक्षमूलर साहिब का अर्थ कि हे मनुष्यो! तुम्हारे बीच में बड़ा कौन है तथा तुम आकाश वा पृथिवी लोक को कम्पाने वाले हो, जब तुम धारण किये हुए वस्त्र का प्रान्त भाग कंपने समान उनको कंपित करते हो। सायणाचार्य के कहे हुए अन्त शब्द के अर्थ को मैं स्वीकार नहीं करता, किन्तु विलसन आदि के कहे हुए को स्वीकार करता हूं। यह अशुद्ध और विपरीत है, क्योंकि इस मन्त्र में उपमालङ्कार है। जैसे राजपुरुष शत्रुओं और अन्य मनुष्य, तृण, काष्ठ आदि को ग्रहण करके कंपाते हैं, वैसे वायु भी हैं, इस अर्थ का विद्वानों के सकाश से निश्चय करना चाहिये, इस प्रकार कहे हुए व्याख्यान से। जैसे सायणाचार्य का किया हुआ अर्थ व्यर्थ है, वैसा ही मोक्षमूलर साहिब का किया हुआ अर्थ अनर्थ है, ऐसा हम सब सज्जन लोग जानते हैं॥६॥

पुना राजप्रजाजनैः कथं भवितव्यमित्युपदिश्यते॥

फिर वे राजा और प्रजाजन कैसे होने चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि वो यामाय मानुषो दुध्र उग्राय मन्यवे।
जिहीत पर्वतो गिरिः॥७॥

नि। वः। यामाय। मानुषः। दुध्रे। उग्राय। मन्यवे। जिहीत। पर्वतः। गिरिः॥७॥

पदार्थः-(**नि**) निश्चयार्थे (**वः**) युष्माकम् (**यामाय**) यथार्थव्यवहारप्रापणाय। **अर्त्तिस्तुसु०** (उणा०१.१४०)। इति याधातोर्मप्रत्ययः। (**मानुषः**) सभापतिर्मनुजः (**दध्रे**) धरति। अत्र लडर्थे लिट्। (**उग्राय**) तीव्रदण्डाय (**मन्यवे**) क्रोधरूपाय (**जिहीत**) स्वस्थानाच्चलति। अत्र लडर्थे लिङ्। (**पर्वतः**) मेघः (**गिरिः**) यो गिरति जलादिकं गृणाति महतः शब्दान् वा सः॥७॥

अन्वयः-हे प्रजासेनास्था मनुष्या! भवन्तो यस्य सेनापतेर्भयाद्वायोः सकाशाद् गिरिः पर्वत इव शत्रुगणो जिहीत पलायते, स मानुषो वो युष्माकं यामाय मन्यव उग्राय च राज्यं दध्र इति विजानन्तु॥७॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। हे प्रजासेनास्था मनुष्याः! युष्माकं सर्वे व्यवहारा राज्यव्यवस्थयैव वायुवद् व्यवस्थाप्यन्ते। स्वनियमविचलितेभ्यश्च युष्मभ्यं वायुरिव सभाध्यक्षो भृशं दण्डं दद्यात्, यस्य भयाच्छत्रवश्च वायोर्मेघा इव प्रचलिता भवेयुस्तं पितृवन्मन्यध्वम्॥७॥

मोक्षमूलरोक्तिः। हे वायवो! युष्माकमागमनेन मनुष्यस्य पुत्रः स्वयमेव नम्रो भवति, युष्माकं क्रोधात् पलायत इति व्यर्थोऽस्ति। कुतोऽत्र गिरिपर्वतशब्दाभ्यां मेघो गृहीतोऽस्ति, मानुषशब्दोऽर्थो निदध्रे इति क्रियायाः कर्त्तास्त्यतो नात्र बालकशिरो नमनस्य ग्रहणं यथा सायणाचार्यस्य व्यर्थोऽर्थः तथैव मोक्षमूलरस्यापीति वेद्यम्। यदि वेदकर्त्तेश्वर एव नैव मनुष्याः सन्तीत्येतावत्यपि मोक्षमूलरेण न स्वीकृतं तर्हि वेदार्थज्ञानस्य तु का कथा॥७॥

पदार्थः-हे प्रजासेना के मनुष्यो! जिस सभापति राजा के भय से वायु के बल से (**गिरिः**) जल को रोकने गर्जना करने वाले (**पर्वतः**) मेघ शत्रु लोग (**जिहीत**) भागते हैं वह (**मानुषः**) सभाध्यक्ष राजा (**वः**) तुम लोगों के (**यामाय**) यथार्थ व्यवहार चलाने और (**मन्यवे**) क्रोधरूप (**उग्राय**) तीव्र दण्ड देने के लिये राज्यव्यवस्था को (**दध्रे**) धारण कर सकता है, ऐसा तुम लोग जानो॥७॥

भावार्थः-इस मन्त्र में वाचक लुप्तोपमालङ्कार है। हे प्रजासेनास्थ मनुष्यो! तुम लोगों के सब व्यवहार वायु के समान राजव्यवस्था ही से ठीक-ठीक चल सकते हैं और जब तुम लोग अपने नियमोपनियमों पर नहीं चलते हो, तब तुम को सभाध्यक्ष राजा वायु के समान शीघ्र दण्ड देता है और जिसके भय से वायु से मेघों के समान शत्रुजन पलायमान होते हैं, उसको तुम लोग पिता के समान जानो॥७॥

मोक्षमूलर कहते हैं कि हे पवनो! आप के आने से मनुष्य का पुत्र अपने आप ही नम्र होता है तथा तुम्हारे क्रोध से डर भागता है। यह उनका कथन व्यर्थ है, क्योंकि इस मन्त्र में गिरि और पर्वत शब्द से मेघ का ग्रहण किया है। तथा मानुष शब्द का अर्थ धारण क्रिया का कर्त्ता है और न इस मन्त्र में बालक के शिर के नमन होने का ग्रहण है। जैसा कि सायणाचार्य्य का अर्थ व्यर्थ है, वैसा ही मोक्षमूलर का भी जानना चाहिये। वेद का करने वाला ईश्वर ही है, मनुष्य नहीं। इतनी भी परीक्षा मोक्षमूलर साहिब ने नहीं की, पुनः वेदार्थज्ञान की तो क्या ही कथा है॥७॥

पुनस्तेषां योगेन किं भवतीत्युपदिश्यते।

फिर उन पवनों के योग से क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

येषा॒मज्मे॑षु पृथि॒वी जु॑जु॒र्वाँ इ॑व वि॒श्पति॑:।

भि॒या यामे॑षु रेज॑ते॥८॥

येषा॑म्। अज्मे॑षु। पृथि॒वी। जुजुर्वान्ऽइ॑व। वि॒श्पति॑:। भि॒या। यामे॑षु। रेज॑ते॥८॥

पदार्थ:-(**येषाम्**) महताम् (**अज्मेषु**) प्रापकक्षेपकादिगुणेषु सत्सु (**पृथिवी**) भू: (**जुजुर्वान् इव**) यथा वृद्धावस्थां प्राप्तो मनुष्य:। **जॄष वयोहानावित्यस्मात् क्वसु:। बहुलं छन्दसि** (अष्टा०७.१.१०३) इत्युत्वम्। **वा छन्दसि सर्वे विधयो भवन्ती**ति **हलि च** (अष्टा०८.२.७७) इति दीर्घो न। (**विश्पति:**) विशां प्रजानां पालको राजा (**भिया**) भयेन (**यामेषु**) स्वस्वगमनरूपमार्गेषु (**रेजते**) कम्पते चलति॥८॥

अन्वय:-हे विद्वांसो! येषां मरुतामज्मेषु सत्सु भिया जुजुर्वानिव वृद्धो विश्पति: पृथिव्यादिलोकसमूहो यामेषु रेजते कम्पते चलति, तान् कार्य्येषु सम्प्रयुङ्ध्वम्॥८॥

भावार्थ:-अत्रोपमालङ्कार:। यथा जीर्णावस्थां प्राप्त: कश्चिद्राजा रोगै: शत्रूणां भयेन वा कम्पते तथा वायुभि: सर्वतो धारित: पृथिवीलोक: स्वपरिधौ प्रतिक्षणं भ्रमति एवं सर्वे लोकाश्च। नहि सूत्रवद्वेष्टनेन वायुना कस्यचिल्लोकस्य स्थितिर्भ्रमणं च सम्भवतीति॥८॥

मोक्षमूलरोक्ति: येषां मरुतां धावने पृथिवी निर्बलराजवद्भयेन मार्गेषु कम्पते, संस्कृतरीत्यायं महान् दोषो यत् स्त्रीलिङ्गोपमेयेन सह पुल्लिङ्गोपमा न दीयत इत्यलीकास्ति कुतो वायोर्योगेनैव पृथिव्या धारणभ्रमणे सम्भूय तद्भीषणेनैव पृथिव्यादीनां लोकानां स्वरूपस्थितिर्भवति, नायं लिङ्गव्यत्ययेनोपमालङ्कारे दोषो भवितुमर्हति। मनोवद्वायुर्गच्छति। वायुरिव मनो गच्छति। श्येनवन्मेना गच्छति। स्त्रीवत् पुरुष: पुरुषवत् स्त्री। हस्तिवन्महिषी हस्तिनीवद्वा चन्द्रवन्मुखम्। सूर्यप्रकाश इव राजनीतिरित्यादिनास्य शोभनत्वात्॥८॥

पदार्थ:-हे विद्वानो लोगो! (**येषाम्**) जिन पवनों के (**अज्मेषु**) पहुंचाने फेंकने आदि गुणों में (**भिया**) भय से (**जुजुर्वानिव**) जैसे वृद्धावस्था को प्राप्त हुआ (**विश्पति:**) प्रजा की पालना करने वाला राजा शत्रुओं से कम्पता है, वैसे (**पृथिवी**) पृथिवी आदि लोक (**यामेषु**) अपने-अपने चलने रूप परिधि मार्गों में (**रेजते**) चलायमान होते हैं॥८॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे कोई राजा जीर्ण अवस्था को प्राप्त हुआ रोग वा शत्रुओं के भय से कम्पता है, वैसे पवनों से सब प्रकार धारण किये हुए पृथिवी आदि लोक घूमते हैं। और सूत्र के समान बंधे हुए वायु के विना किसी लोक की स्थिति वा भ्रमण का सम्भव कभी नहीं हो सकता॥८॥

मोक्षमूलर साहिब का कथन कि जिन पवनों के दौड़ने में पृथिवी निर्बल राजा के समान भय से मार्गों में कम्पित होती है। संस्कृत की रीति से यह बड़ा दोष है कि जो स्त्रीलिङ्ग उपमेय के साथ पुल्लिङ्गवाची उपमान दिया है। सो यह मोक्षमूलर का कथन मिथ्या है, क्योंकि वायु के योग ही से पृथिवी के धारण वा भ्रमण का सम्भव होकर वायु के भीषण ही से पृथिवी आदि लोकों के स्वरूप की स्थिति होती है तथा यह लिङ्गव्यत्यय से उपमालङ्कार में दोष नहीं हो सकता, जैसे मनुष्य के तुल्य वायु और वायु के समान मन चलता है, श्येनपक्षी के समान सेना, स्त्री के समान पुरुष वा पुरुष के समान स्त्री, हाथी के समान भैंसी अथवा हथिनी के समान, चन्द्रमा के समान मुख, सूर्य प्रकाश के समान राजनीति, इस प्रकार उपमालङ्कार में लिङ्गभेद से कोई भी दोष नहीं आ सकता॥८॥

पुनस्ते वायवः कीदृशगुणाः सन्तीत्युपदिश्यते॥

फिर वे वायु कैसे गुण वाले हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

स्थि॒रं हि जान॑मेषा॒ं वयो॑ मा॒तुर्नि॑रे॒तवे।

यत्सी॒मनु॑ द्वि॒ता शव॑ः॥९॥

स्थि॒रम्। हि। जान॑म्। ए॒षा॒म्। वय॑ः। मा॒तुः। निः॒ऽए॑तवे। यत्। सी॒म्। अनु॑। द्वि॒ता। शव॑ः॥९॥

पदार्थः-(**स्थिरम्**) गमनरहितम् (**हि**) खलु (**जानम्**) जायते यस्मात्तदाकाशम्। अत्र जनधातोर्घञ् स्वरव्यत्ययेनाद्युदात्तत्वम्। सायणाचार्येणेदं जनिवध्योरित्यादीनामबोधादुपेक्षितम्। (**एषाम्**) वायूनाम्। (**वयः**) पक्षिणः (**मातुः**) अन्तरिक्षस्य मध्ये (**निरेतवे**) निरन्तरमेतुं गन्तुम् (**यत्**) (**सीम्**) सर्वतः (**अनु**) अनुक्रमेण (**द्विता**) द्वयोः शब्दस्पर्शयोर्गुणयोर्भावः (**शवः**) बलम्। **शव इति बलनामसु पठितम्।** (निघं०२.९)॥९॥

अन्वयः-हे मनुष्या! एषां यत् स्थिरं जानं शवो बलं द्विता वर्त्तते, यदाश्रित्य वयः पक्षिणो मातुरन्तरिक्षस्य मध्ये सीं निरेतवे शक्नुवन्ति, तान् भवन्तोऽनुविजानन्तु॥९॥

भावार्थः-य इमे कार्यवायव आकाशादुत्पद्येतस्ततो गच्छन्त्यागच्छन्ति यत्र यत्रावकाशस्तत्र तत्र येषां सर्वतो गमनं सम्भवति। सर्वे प्राणिनो याननुजीवनं प्राप्य बलवन्तो भवन्ति, तान् युक्त्या यूयं सेवध्वम्॥९॥

मोक्षमूलरोक्तिः। सत्यमेव वायूनामुत्पत्तिस्तेषां सामर्थ्यं मातुः सकाशादागच्छत्येतेषां सामर्थ्यं द्विगुणं चास्तीति निष्प्रयोजनास्येयं व्याख्याऽस्ति। कुतः सर्वेषां द्रव्याणामुत्पत्तिः स्वस्वकारणानुकूलत्वेन बलवती जायते, तेषां कार्याणां मध्ये कारणगुणा आगच्छन्त्येव वयःशब्देन किल पक्षिणो ग्रहणमस्तीत्यतः॥९॥

पदार्थः-हे मनुष्यो! **(एषाम्)** इन **(वायूनाम्)** पवनों का **(यत्)** जो **(स्थिरम्)** निश्चल **(जानम्)** जन्मस्थान आकाश **(शवः)** बल और जिसमें **(द्विता)** शब्द और स्पर्श गुण का योग है, जिसके आश्रय से **(वयः)** पक्षी **(मातुः)** अन्तरिक्ष के बीच में **(सीम्)** सब प्रकार **(निरेतवे)** निरन्तर जाने-आने को समर्थ होते हैं, उन वायुओं को आप लोग **(अनु)** पश्चात् विशेषता से जानिये॥९॥

भावार्थः-ये कार्यरूप पवन आकाश में उत्पन्न होकर इधर-उधर जाते-आते हैं, जहाँ अवकाश है, वहाँ जिनके सब प्रकार गमन का सम्भव होता और जिनकी अनुकूलता से सब प्राणी जीवन को प्राप्त होकर बल वाले होते हैं, उनको युक्ति के साथ तुम लोग सेवन किया करो॥९॥

मोक्षमूलर की उक्ति है कि सत्य ही है कि पवनों की उत्पत्ति बल वाली तथा उनका सामर्थ्य आकाश से आता है, उनका सामर्थ्य द्विगुण वा पुष्कल है। सो यह निष्प्रयोजन है, क्योंकि सब द्रव्यों की उत्पत्ति अपने-अपने कारण के अनुकूल बलवाली होती है उनके कार्यों में कारण के गुण आते ही हैं और वयः शब्द से पक्षियों का ग्रहण है॥९॥

पुनस्ते कीदृशं कर्म कुर्युरित्युपदिश्यते॥

फिर वे कैसे काम करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

उदु॒ त्ये सू॒नवो॒ गिरः॒ काष्ठा॒ अज्मे॑ष्वत्नत।
वा॒श्रा अ॑भि॒ज्ञु यात॑वे॥ १०॥ १३॥

उत्। ऊँ॒ इति॑। त्ये। सू॒नवः॑। गिरः॑। काष्ठाः॑। अज्मे॑षु। अ॒त्न॒त॒। वा॒श्राः। अ॒भि॒ऽज्ञु। यात॑वे॥ १०॥

पदार्थः-(**उत्**) उत्कृष्टार्थे (**उ**) वितर्के (**त्ये**) परोक्षाः (**सूनवः**) ये प्राणिगर्भान् विमोचयन्ति। (**गिरः**) वाचः (**काष्ठाः**) दिशः। **काष्ठा इति दिङ्नामसु पठितम्।** (निघं०१.६) (**अज्मेषु**) गमनाऽधिकरणेषु मार्गेषु (**अत्नत**) तन्वते। अत्र लडर्थे लुङ्। **बहुलं छन्दसि** इति विकरणाभावः। **तनिपत्योश्छन्दसि।** (अष्टा०६.४.९९) अनेनोपधालोपः। (**वाश्राः**) यथा शब्दायमाना गावो वत्सानभितो गच्छन्ति तथा (**अभिज्ञु**) अभिगते जानुनी यासां ताः। अत्र **अव्ययं विभक्ति०** (अष्टा०२.१.६) इति यौगपद्यार्थे समासः। **वा छन्दसि सर्वे विधयो भवन्ति** इति समासान्तो ञुरादेशश्च (**यातवे**) यातुम्। अत्र तुमर्थे तवेन् प्रत्ययः॥१०॥

अन्वयः-हे राजप्रजाजना! भवन्तस्त्ये तेऽन्तरिक्षस्थास्सूनवो वायव अभिज्ञु वाश्रा इव गिरः काष्ठा अज्मेषु उ यातवे यातुं तन्वन्तीव सुखमुद् अत्नत तन्वन्तु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजप्रजाजनैर्यथेमे वायव एव वाचो जलानि च चालयित्वा विस्तार्य शब्दानाश्रावयन्तो गमनागमनजन्मवृद्धिक्षयहेतवः सन्ति, तथैतैः शुभकर्माण्यनुष्ठेयानि॥१०॥

मोक्षमूलरोक्तिः। ये गायनाः पुत्राः स्वगतौ गोष्ठानानि विस्तीर्णानि लम्बीभूतानि कुर्वन्ति, गावो जानुबलेनागच्छन्निति व्यर्थास्ति कुतः? अत्र सूनुशब्देन प्रियां वाचमुच्चायन्तो बालका गृह्यन्ते। यथा गावो वत्सलेहनार्थं पृथिव्या जानुनी स्थापयित्वा सुखयन्ति, तथा वायवोऽपीति विवक्षितत्वात्॥१०॥

त्रयोदशो वर्ग समाप्तः॥१३॥

पदार्थः-हे राजप्रजा के मनुष्यो! आप लोग **(त्ये)** वे अन्तरिक्ष में रहने वा **(सूनवः)** प्राणियों के गर्भ छुड़ाने वाले पवन **(अभिज्ञु)** जिनकी सन्मुख जंघा हों **(वाश्राः)** उन शब्द करती वा बछड़ों को सब प्रकार प्राप्त होती हुई गौओं के समान **(गिरः)** वाणी वा **(काष्ठाः)** दिशाओं से **(अज्मेषु)** जाने के मार्गों में और **(यातवे)** प्राप्त होने को विस्तार करते हुओं के समान सुख का **(उत् अत्नत)** अच्छे प्रकार विस्तार कीजिये॥१०॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। राजा और प्रजा के मनुष्यों को चाहिये कि जैसे ये वायु ही वाणी और जलों को चलाकर विस्तृत करके अच्छे प्रकार शब्दों को श्रवण कराते हुए जाना-आना, जन्म, वृद्धि और नाश के हेतु हैं, वैसे ही शुभाशुभ कर्मों का अनुष्ठान सुख-दुःख का निमित्त है॥१०॥

मोक्षमूलर की उक्ति है कि जो गान करने वाले पुत्र अपनी गति में गौओं के स्थानों को विस्तारयुक्त लम्बे करते हैं तथा गौ जांघ के बल से आती हैं। सो वह व्यर्थ है, क्योंकि इस मन्त्र में **'सूनु'** शब्द से प्रिय वाणी को उच्चारण करते हुए बालक ग्रहण किये हैं, जैसे गौ बछड़ों को चाटने के लिये पृथिवी में जंघाओं को स्थापन करके सुखयुक्त होती है, इस प्रकार विवक्षा के होने से॥१०॥

यह तेरहवां वर्ग समाप्त हुआ॥१३॥

पुनरेते किं कुर्युरित्युपदिश्यते॥

फिर ये राजपुरुष क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्यं चिद् घा दीर्घं पृथुं मिहो नपातमम्भ्रम्।
प्र च्यावयन्ति यामभिः॥११॥

त्यम्। चित्। घ। दीर्घम्। पृथुम्। मिहः। नपातम्। अमृम्भ्रम्। प्र। च्यावयन्ति। यामऽभिः॥११॥

पदार्थः-(**त्यम्**) मेघम् (**चित्**) अपि (**घ**) एव। अत्र **ऋचि तुनुघ०** इति दीर्घः। (**दीर्घम्**) स्थूलम्। (**पृथुम्**) विस्तीर्णम् (**मिहः**) सेचनकर्त्तारः। अत्र इगुपधलक्षणः[1] इत्यनेन कः प्रत्ययः। **सुपां सुलुक्०** इति जसः स्थाने सुः। (**नपातम्**) यो न पातयति जलं तम्। अत्र **नपात्** (अष्टा०६.३.७५) इति निपातनम्।

---

१ इगुपधज्ञाप्रीकिरः कः (अष्टा०३.१.१३५)

(अमृध्रम्) न मर्धते नोनत्ति तम्। अत्र नञ्पूर्वान्मृधधातोर्बाहुलकादौणादिको रक् प्रत्ययः। **(प्र)** प्रकृष्टार्थे **(च्यावयन्ति)** पातयन्ति **(यामभिः)** यान्त्यायान्ति यैस्तैः स्वकीयगमनागमनैः॥११॥

अन्वयः-हे राजपुरुषा! यूयं यथा मिहो वृष्ट्या सेचनकर्त्तारो मरुतो यामभिर्घैव नपातममृध्रं पृथुं दीर्घं त्यं चिदपि प्र च्यावयन्ति तथा शत्रून् प्रच्याव्य प्रजा आनन्दयत॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषैर्यथा मरुत एव मेघनिमित्तं पुष्कलं जलमुपरि गमयित्वा परस्परं घर्षणेन विद्युतमुत्पाद्य तत्समूहमपतनशीलमतुन्दनीयं दीर्घावयवं मेघं भूमौ निपातयन्ति, तथैव धर्मविरोधिनः सर्वव्यवहाराः प्रच्यावनीयाः॥११॥

मोक्षमूलरोक्तिः। ते वायवोऽस्य दीर्घकालं वर्षतोऽप्रतिबद्धस्य मेघस्य निमित्तं सन्ति पातनाय मार्गस्योपरि। इति किञ्चिच्छुद्धास्ति। कुतः? मिह इति मरुतां विशेषणमस्त्यनेन मेघविशेषणं कृतमस्त्यतः॥११॥

पदार्थः-हे राजपुरुषो! तुम लोग जैसे **(मिहः)** वर्षा जल से सींचने वाले पवन **(यामभिः)** अपने जाने के मार्गों से **(घ)** ही **(त्यम्)** उस **(नपातम्)** जल को न गिराने और **(अमृध्रम्)**) गीला न करने वाले **(पृथुम्)** बड़े **(चित्)** भी **(दीर्घम्)** स्थूल मेघ को **(प्रच्यावयन्ति)** भूमि पर गिरा देते हैं, वैसे शत्रुओं को गिरा के प्रजा को आनन्दित करो॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुषों को चाहिये कि जैसे पवन ही मेघ के निमित्त बहुत जल को ऊपर पहुंचा कर परस्पर घिसने से बिजुली को उत्पन्न कर उस न गिरने योग्य तथा न गीला करने और बड़े आकार वाले मेघ को भूमि में गिराते हैं, वैसे ही धर्मविरोधी सब व्यवहारों को छोड़ें और छुड़ावें॥११॥

मोक्षमूलर की उक्ति है कि वे पवन इस बहुत काल वर्षा कराते हुए अप्रतिबद्ध मेघ के निमित्त और मार्ग के ऊपर गिराने के लिये हैं, यह कुछेक शुद्ध है। क्योंकि (मिहः) यह पद पवनों का विशेषण है और इन्होंने मेघ का विशेषण किया है॥११॥

पुनस्ते वायुवत् कर्माणि कुर्युरित्युपदिश्यते॥

फिर वे राजप्रजाजन वायु के समान कर्म करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन।
गिरीँरचुच्यवीतन॥१२॥

मरुतः। यत्। ह। वः। बलम्। जनान्। अचुच्यवीतन। गिरीन्। अचुच्यवीतन॥१२॥

पदार्थः-(**मरुतः**) वायव इव सेनाध्यक्षादयः **(यत्)** यस्मात् **(ह)** प्रसिद्धम् **(वः)** युष्माकम् **(बलम्)** सेनादिकम् **(जनान्)** प्रजास्थान् मनुष्यान्। अत्र **दीर्घादटि समानपादे।** (अष्टा०८.३.९) इति नकारस्य रुत्वम्। **अत्रानुनासिकः पूर्वस्य तु वा।** (अष्टा०८.३.२) इति पूर्वस्याऽनुनासिकः। **भोभगोअघो०**

(अष्टा०८.३.१७) इति य लोपः।[२] **(अचुच्यवीतन)** प्रेरयन्ति। अत्र लडर्थे लङ्। **बहुलं छन्दसि** इति शपः श्लुः। **बहुलं छन्दसि** इति ईडागमः। **तप्तनप्तनथनाश्च** (अष्टा०७.१.४५) इति तनबादेशः। पुरुषव्यत्ययः। सायणाचार्येणेदं भ्रान्त्या लुङन्तं व्याख्याय **बहुलं छन्दसि** इति शपः श्लुरिति सूत्रं योजितम्। तत्र च्लेरपवादत्वाच्छबेव नास्ति, कुतः श्लुः, कस्य लुक्, तस्मादशुद्धमेव। **(गिरीन्)** मेघान्। **गिरिरिति मेघनामसु पठितम्।** (निघं०१.१०) अत्र रुत्वाऽनुनासिकाविति पूर्ववत् **(अचुच्यवीतन)** आकाशे भूमौ च प्रापयन्ति। अस्य सिद्धिः पूर्ववत् अत्रान्तर्गतो ण्यर्थः॥१२॥

अन्वयः-हे मरुत इव वर्त्तमानाः सेनापत्यादयो! यूयं यद्वो युष्माकं ह बलमस्ति तेन वायवो गिरीनचुच्यवीतनेव जनानचुच्यवीतन स्वस्वव्यवहारेषु प्रेरयत॥१२॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। सभाध्यक्षादिराजपुरुषैर्यथा वायवो मेघानितस्ततः प्रेरयन्ति, तथैव सर्वे प्रजाजनाः स्वस्वकर्मसु न्यायव्यवस्थया सदैव निरालस्ये प्रेरणीयाः॥१२॥

मोक्षमूलरोक्तिः। हे मरुत! ईदृग्बलेन सह यादृशी शक्तिर्युष्माकमस्ति यूयं पुरुषाणां पातननिमित्तं स्थ पर्वतानां चेत्यशुद्धास्ति। कुतः? गिरिशब्देनात्र मेघस्य ग्रहणं न शैलानां जनशब्देन सामान्यगतिमतो ग्रहणं न तु पतनमात्रस्यातः॥१२॥

पदार्थः-हे **(मरुतः)** पवनों के समान सेनाध्यक्षादि राजपुरुषो! तुम लोग **(यत्)** जिस कारण **(वः)** तुम्हारा **(ह)** प्रसिद्ध **(बलम्)** सेना आदि दृढ़ बल है, इसलिये जैसे वायु **(गिरीन्)** मेघों को **(अचुच्यवीतन)** इधर-उधर आकाश पृथिवी में घुमाया करते हैं, वैसे **(जनान्)** प्रजा के मनुष्यों को **(अचुच्यवीतन)** अपने-अपने उत्तम व्यवहारों में प्रेरित करो॥१२॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। सभाध्यक्षादि राजपुरुषों को चाहिये कि जैसे वायु मेघों को इधर-उधर घुमा के वर्षाते हैं, वैसे ही प्रजा के सब मनुष्यों को न्याय की व्यवस्था से अपने-अपने कर्मों में आलस्य छोड़के सदा नियुक्त करते रहें॥१२॥

मोक्षमूलर की उक्ति है। हे पवनो! ऐसे बल के साथ जैसी आप की शक्ति है और तुम पुरुष वा पर्वतों को पतन कराने के निमित्त हो सो यह अशुद्ध है, क्योंकि गिरि शब्द से इस मन्त्र में मेघ का ग्रहण है और जन शब्द से सामान्य गति वाले का ग्रहण है, पतनमात्र का नहीं है॥१२॥

पुनस्ते वायुभ्यः किं किमुपकुर्युरित्युपदिश्यते॥

फिर वे वायुओं से क्या-क्या उपकार लेवें, इस विषय का उपदेश अगले मन्त्र में किया है॥

यद्ध॒ यान्ति॑ म॒रुत॒: सं ह॑ ब्रु॒वते॑ऽध्व॒न्ना।

---

२. इति यकारादेशः। लोपः शाकल्यस्य। अष्टा०८.३.१९ इत्यनेन च यकारलोपः। सं०॥

शृणोति॒ कश्चि॑देषाम्॥ १३॥

यत्। ह॒। यान्ति॑। म॒रुत॑:। सम्। ह॒। ब्रु॒व॒ते॒। अध्व॑न्। आ। शृ॒णोति॑। क:। चि॒त्। ए॒षा॒म्॥ १३॥

पदार्थ:-(**यत्**) ये (**ह**) स्फुटम् (**यान्ति**) गच्छन्ति (**मरुत:**) वायव: (**सम्**) सङ्गमे (**ह**) प्रसिद्धम् (**ब्रुवते**) परस्परमुपदिशन्ति (**अध्वन्**) अध्वनि विद्यामार्गे। अत्र **सुपां सुलुक्०** इति ङेर्लुक् (**आ**) समन्तात् (**शृणोति**) शब्दविद्यां गृह्णाति (**क:**) विद्वान् (**चित्**) अपि (**एषाम्**) मरुताम्॥ १३॥

अन्वय:-यथा यद्येत इमे मरुत इतस्ततो ह यान्त्यायान्ति तथाऽध्वन् विद्यामार्गे शिल्पिनो विद्वांसो ह समाब्रुवते, एषां मरुतां विद्यां कश्चिदेव शृणोति विजानाति च न तु सर्वे॥ १३॥

भावार्थ:-अस्य वायोर्विद्यां कश्चिद्विद्याक्रियाकुशल एव ज्ञातुं शक्नोति नेतरो जडधी:॥ १३॥

मोक्षमूलरोक्ति:। यदा खलु मरुत: सह गच्छन्ति स्वमार्गाणामुपरि परस्परं वदन्ति। कश्चिन्मनुष्य: शृणोति किमित्यशुद्धास्ति। कुत: ? मरुतां जडत्वेन परस्परं वार्त्ताकरणाऽसम्भावत्। वक्तॄणां चेतनानां जीवानां वचनश्रवणहेतुत्वाच्च॥ १३॥

पदार्थ:-जैसे (**यत्**) ये (**मरुत:**) पवन (**यान्ति**) जाते-आते हैं, वैसे (**अध्वन्**) विद्यामार्ग में कारीगर विद्वान् लोग (**ह**) स्पष्ट (**समाब्रुवते**) मिलके अच्छे प्रकार परस्पर उपदेश करते हैं और (**एषाम्**) इन वायुओं की विद्या को (**कश्चित्**) कोई विद्वान् पुरुष (**शृणोति**) सुनता और जानता है, सब साधारण पुरुष नहीं॥ १३॥

भावार्थ:-इस वायु विद्या को कोई विद्वान् ही ठीक-ठीक जान सकता है, जड़बुद्धि नहीं जान सकता॥ १३॥

मोक्षमूलर की उक्ति है कि जब निश्चय करके पवन परस्पर साथ-साथ जाते वा अपने मार्गों के ऊपर बोलते हैं, तब कोई मनुष्य क्या श्रवण करता है अर्थात् नहीं, यह अशुद्ध है, क्योंकि पवनों का जड़त्व होने से वार्त्ता करना असम्भव है और कहने वाले चेतन जीवों के बोलने-सुनने में हेतु तो होते हैं॥ १३॥

पुनर्मनुष्यैर्वायुभ्य: किं किं कार्य्यमित्युपदिश्यते॥

फिर मनुष्यों को वायुओं से क्या-क्या कार्य्य लेना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र या॑त॒ शीभ॑मा॒शुभि॒: सन्ति॒ कण्वे॑षु वो॒ दुव॑:।
तत्रो॒ षु मा॑दयाध्वै॥ १४॥

प्र। या॒त॒। शीभ॑म्। आ॒शुऽभि॑:। सन्ति॑। कण्वे॑षु। व॒:। दुव॑:। तत्रो॒ इति॑। सु। मा॒द॒या॒ध्वै॒॥ १४॥

पदार्थः-**(प्र)** प्रकृष्टार्थे **(यात)** अभीष्टं स्थानं प्राप्नुत **(शीभम्)** शीघ्रम्। **शीभमिति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **(आशुभिः)** शीघ्रं गमनागमनकारकैर्विमानादियानैः **(सन्ति) (कण्वेषु)** मेधाविषु **(वः)** युष्माकम् **(दुवः)** परिचरणानि **(तत्रो)** तेषु खलु **(सु)** शोभनार्थे। **सुत्रः।** (अष्टा०८.३.१०७) इति मूर्द्धन्यादेशः। **(मादयाध्वै)** मादयध्वम्। लेट् प्रयोगोऽयम्॥१४॥

अन्वयः-हे राजप्रजाजना! यूयमाशुभिः शीभं वायुवत् प्र यात। येषु कण्वेषु वो दुवः सन्ति तत्रो सु मादयाध्वै॥१४॥

भावार्थः-राजप्रजास्थैर्विद्वद्भिर्जनैरभीष्टस्थानेषु वायुवच्छीघ्रगमनाय यानान्युत्पाद्य स्वकार्याणि सततं साधनीयानि। धर्मात्मनां सेवनेऽधर्मात्मनां च ताडने सदैवानन्दितव्यञ्च॥१४॥

मोक्षमूलरोक्तिः यूयं तीव्रगतीनामश्वानामुपरि स्थित्वा शीघ्रमागच्छत, तत्र युष्माकं पूजारयः कण्वानां मध्ये सन्ति, यूयं तेषां मध्ये आनन्दं कुरुतेत्यशुद्धास्ति। कुतः? महान्तो वेगादयो गुणा एवाश्वास्ते वायौ समवायसम्बन्धेन वर्त्तन्ते। तेषामुपरि वायूनां स्थितेरसम्भवात्। कण्वशब्देन विदुषां ग्रहणं तत्र निवासेनान्दस्योद्भवाच्चेति॥१४॥

पदार्थः-हे राजपुरुषो! तुम लोग **(आशुभिः)** शीघ्र ही गमनागमन कराने वाले यानों से **(शीभम्)** शीघ्र वायु के समान **(प्र यात)** अच्छे प्रकार अभीष्ट स्थान को प्राप्त हुआ करो, जिन **(कण्वेषु)** बुद्धिमान् विद्वानों में **(वः)** तुम लोगों की **(दुवः)** सत् क्रिया हैं **(तत्र उ)** उन विद्वानों में तुम लोग **(सु मादयाध्वै)** सुन्दर रीति से प्रसन्न रहो॥१४॥

भावार्थः-राजा और प्रजा के विद्वानों को चाहिये कि वायु के समान अभीष्ट स्थानों को शीघ्र जाने-आने के लिये विमानादि यान बना के अपने कार्यों को निरन्तर सिद्ध करें और धर्मात्माओं की सेवा तथा दुष्टों को ताड़ने में सदैव आनन्दित रहें॥१४॥

मोक्षमूलर की उक्ति है कि तुम तीव्र गति वाले घोड़ों के ऊपर स्थित होकर जल्दी आओ, वहाँ आपके पुजारी कण्वों के मध्य में हैं, तुम उनमें आनन्दित होओ, सो यह अशुद्ध है, क्योंकि बड़े-बड़े वेग आदि गुण ही अश्व हैं, वे गुण वायु के हैं, वे गुण उनमें समवाय सम्बन्ध से रहते हैं, उनके ऊपर इन पवनों की स्थिति होने का ही सम्भव नहीं और कण्व शब्द से विद्वानों का ग्रहण है, उनमें निवास करने से विद्या की प्राप्ति और आनन्द का प्रकाश होता है॥१४॥

पुनस्ते वायवः किं प्रयोजनाः सन्तीत्युपदिश्यते॥

फिर वे वायु किस-किस प्रयोजन के लिये हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्ति॒ हि ष्मा॒ मदा॑य व॒: स्मसि॑ ष्मा व॒यमे॑षाम्।
विश्वा॑ चि॒दायु॑र्जी॒वसे॑॥ १५॥ १४॥

अस्ति॑। हि। स्म। मदा॑य। व॒:। स्मसि॑। स्म॒। व॒यम्। ए॒वा॒म्। विश्व॑म्। चि॒त्। आयु॑:। जी॒वसे॑॥ १५॥

पदार्थ:-(**अस्ति**) वर्त्तते (**हि**) यत: (**स्म**) खलु। अत्र **निपातस्य च** इति दीर्घ:। **अविहितलक्षणो मूर्द्धन्य: सुषामादिषु द्रष्टव्य:।** (अष्टा०८.३.९८) इति वार्त्तिकेन मूर्द्धन्यादेश:। इदं पदं सायणाचार्येण व्याकरणविषयमबुद्ध्वा त्यक्तम्। (**मदाय**) आनन्दाय (**व:**) युष्माकम् (**स्मसि**) भवेम। अत्र लिङर्थे लट्। **इदन्तो मसि** (अष्टा०७.१.४६) इतीकारागम: (**स्म**) नैरन्तर्ये। अत्रापि पूर्ववन्मूर्द्धन्यादेश:। (**वयम्**) उपदेश्या जना: (**एषाम्**) ज्ञातविद्यानां मरुतां सकाशात् (**विश्वम्**) सर्वम् (**चित्**) अपि (**आयु:**) प्राणधारणम् (**जीवसे**) जीवितुम्। अत्र **तुमर्थे०** (अष्टा०३.४.९) इत्यसेन् प्रत्यय:॥ १५॥

अन्वय:-हे विद्वांसो मनुष्या! एषां हि स्म वो युष्माकं मदाय जीवसे विश्वामायुरस्ति, तथाभूता वयं चित्स्मसि स्म॥ १५॥

भावार्थ:-यथा योगाभ्यासेन प्राणविद्याविदो वायुविकारज्ञा: पथ्यकारिणो जनाश्चानन्देन सर्वमायुर्भुञ्जते तथैवेतरैर्जनैस्तत्सकाशात् तद्विद्यां ज्ञात्वा सर्वमायुर्भोक्तव्यम्॥ १५॥

मोक्षमूलरोक्ति: निश्चयेन तत्र युष्माकं प्रसन्नता पुष्कलास्ति वयं सदा युष्माकं भृत्या: स्म:। यद्यपि वयं सर्वमायुर्जीवेमेत्यशुद्धास्ति कुत: ? अत्र प्रमाणरूपेण वायुना जीवनं भवतीति वयमेतद्विद्यां विजानीमेत्युक्तत्वादिति॥ १५॥

एवमेव यथात्र मोक्षमूलरेण कपोलकल्पनया मन्त्रार्था विरुद्धा वर्णितास्तथैवाग्रेऽप्येतदुक्तिरन्यथास्तीति वेदितव्यम्। यदा पक्षपातविरहा विद्वांसो मद्रचितस्य मन्त्रार्थभाष्यस्य मोक्षमूलरोक्तादेश्च सम्यक् परीक्ष्य विवेचनं करिष्यन्ति, तदैतेषां कृतावशुद्धिर्विदिता भविष्यतीत्यलमिति विस्तरेण। अत्राग्निप्रकाशकस्य सर्वचेष्टाबलायुर्निमित्तस्य वायोस्तद्विद्याविदां राजप्रजाश्वविदुषां च गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्।

इति चतुर्दशो वर्ग: सप्तत्रिंशं सूक्तञ्च समाप्तम्॥ ३७॥

पदार्थ:- हे विद्वान् मनुष्यो! (**एषाम्**) जानी है विद्या जिनकी उन पवनों के सकाश से (**हि**) जिस कारण (**स्म**) निश्चय करके (**व:**) तुम लोगों के (**मदाय**) आनन्दपूर्वक (**जीवसे**) जीने के लिये (**विश्वम्**) सब (**आयु:**) अवस्था है। इसी प्रकार (**वयम्**) आप से उपदेश को प्राप्त हुए हम लोग (**चित्**) भी (**स्मसि,स्म**) निरन्तर होवें॥ १५॥

भावार्थ:-जैसे योगाभ्यास करके प्राणविद्या और वायु के विकारों को ठीक-ठीक जानने वाले पथ्यकारी विद्वान् लोग आनन्दपूर्वक सब आयु भोगते हैं वैसे अन्य मनुष्यों को भी करनी चाहिये कि उन विद्वानों के सकाश से उस वायु विद्या को जान के सम्पूर्ण आयु भोगें॥ १५॥

मोक्षमूलर की उक्ति है कि निश्चय करके वहां तुम्हारी प्रसन्नता पुष्कल है। हम लोग सब दिन तुम्हारे भृत्य हैं, जो भी हम सम्पूर्ण आयु भर जीते हैं-यह अशुद्ध है। क्योंकि यहाँ प्राणरूप वायु से जीवन होता है, हम लोग इस विद्या को जानते हैं, इस प्रकार इस मन्त्र का अर्थ है॥ १५॥

इसी प्रकार कि जैसे यहाँ मोक्षमूलर साहेब ने अपनी कपोल कल्पना से मन्त्रों के अर्थ विरुद्ध वर्णन किये हैं, वैसे आगे भी इनकी शक्ति अन्यथा ही है, ऐसा सबको जानना चाहिये। जब पक्षपात को छोड़ कर मेरे रचे हुए मन्त्रार्थ भाष्य वा मोक्षमूलरादिकों के कहे हुए की परीक्षा करके विवेचन करेंगे, तब इनके किये हुए ग्रन्थों की अशुद्धि जान पड़ेंगी, बहुत को थोड़े ही लिखने से जान लेवें। आगे अब बहुत लिखने से क्या है।

इस सूक्त में अग्नि के प्रकाश करने वाले सब चेष्टा, बल और आयु के निमित्त वायु और उस वायु विद्या को जानने वाले राजप्रजा के विद्वानों के गुणवर्णन से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये।

यह चौदहवां वर्ग और सैंतीसवां सूक्त समाप्त हुआ॥ ३७॥

अथास्य पञ्चदशर्चस्याष्टत्रिंशस्य सूक्तस्य घौरः कण्व ऋषिः। मरुतो देवताः॥ १,८,११,१३,१५ गायत्री २,६,७,९,१० निचृद्गायत्री। ३ पादनिचृद्गायत्री। ५,१२ पिपीलिकामध्या निचृद्गायत्री। १४ यवमध्या विराड्गायत्री छन्दः। षड्जः स्वरः॥

तत्रादिमे मन्त्रे वायुरिव मनुष्यैर्भवितव्यमित्युपदिश्यते॥

अब अड़तीसवें सूक्त का आरम्भ है। उसके पहिले मन्त्र में वायु के समान मनुष्यों को होना चाहिये, इस विषय का वर्णन अगले मन्त्र में किया है॥

कद्ध॑ नू॒नं क॑धप्रियः पि॒ता पु॒त्रं न हस्त॑योः।
दु॒धि॒ष्वे व॒क्तब॑र्हिषः॥ १॥

कत्। ह। नू॒नम्। क॒ध॒ऽप्रि॒यः। पि॒ता। पु॒त्रम्। न। हस्त॑योः। दु॒धि॒ष्वे। व॒क्त॒ऽब॒र्हि॒षः॥ १॥

पदार्थः-(**कत्**) कदा। अत्र **छान्दसो वर्णलोपो वा** इत्याकारलोपः. (**ह**) प्रसिद्धम् (**नूनम्**) निश्चयार्थे (**कधप्रियः**) ये कधाभिः कथाभिः प्रीणयन्ति ते। अत्र वर्णव्यत्ययेन थकारस्य धकारः। **ड्यापोः संज्ञाछन्दसोर्बहुलम्।** (अष्टा०६.३.६३) अनेन ह्रस्वः। (**पिता**) जनकः (**पुत्रम्**) औरसम् (**न**) इव (**हस्तयोः**) बाह्वोः (**दधिध्वे**) धरिष्यथ। अत्र लोडर्थे लिट्। (**वृक्तबर्हिषः**) ऋत्विजो विद्वांसः॥ १॥

अन्वयः-हे कधप्रिया वृक्तबर्हिषो विद्वांसः! पिता हस्तयोः पुत्रं न मरुतो लोकानिव कद्ध नूनं यज्ञकर्म दधिध्वे॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा पिता हस्ताभ्यां स्वपुत्रं गृहीत्वा शिक्षित्वा पालयित्वा सत्कार्येषु नियोज्य सुखी भवति, तथैव ये मनुष्या मरुतो लोकानिव विद्यया यज्ञं गृहीत्वा युक्त्या संसेवन्ते त एव सुखिनो भवन्तीति॥ १॥

पदार्थः-हे (**कधप्रियाः**) सत्य कथाओं से प्रीति कराने वाले (**वृक्तबर्हिषः**) ऋत्विज् विद्वान् लोगो! (**न**) जैसे (**पिता**) उत्पन्न करने वाला जनक (**पुत्रम्**) पुत्र को (**हस्तयोः**) हाथों से धारण करता है और जैसे पवन लोकों को धारण कर रहे हैं, वैसे (**कद्ध**) कब प्रसिद्ध से (**नूनम्**) निश्चय करके यज्ञकर्म को (**दधिध्वे**) धारण करोगे॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे पिता हाथों से अपने पुत्र को ग्रहण कर शिक्षापूर्वक पालना तथा अच्छे कार्यों में नियुक्त करके सुखी होता और जैसे पवन सब लोकों को धारण करते हैं, वैसे जो मनुष्य विद्या से यज्ञ का ग्रहण कर युक्ति से अच्छे प्रकार सेवन करते हैं, वे ही सुखी होते हैं॥ १॥

पुनस्ते कथं प्रश्नोत्तरं कुर्युरित्युपदिश्यते॥

फिर मनुष्यों को परस्पर किस प्रकार प्रश्नोत्तर करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

क्व॑ नू॒नं कद्वो॒ अर्थं॒ गन्ता॑ दि॒वो न पृ॑थि॒व्याः।

क्व॑ वो॒ गावो॒ न र॑ण्यन्ति॥ २॥

क्व॑। नू॒नम्। कत्। व॒ः। अर्थ॑म्। गन्ता॑। दि॒वः। न। पृ॒थि॒व्याः। क्व॑। व॒ः। गाव॑ः। न। र॒ण्य॒न्ति॥ २॥

पदार्थः-(**क्व**) कुत्र (**नूनम्**) निश्चयार्थे (**कत्**) कदा (**वः**) युष्माकम् (**अर्थम्**) द्रव्यं (**गन्त**) गच्छति गच्छन्ति वा। अत्र पक्षे लडर्थे लोट्। **बहुलं छन्दसी**ति शपो लुक्। **तप्तनप्तन०** इति तबादेशो ङित्त्वाभावादनुनासिकलोपाभावः। **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**दिवः**) द्योतनकर्मणः सूर्यस्य (**न**) इव (**पृथिव्याः**) भूमेरुपरि (**क्व**) कस्मिन् (**वः**) युष्माकम् (**गावः**) पशव इन्द्रियाणि वा (**न**) उपमार्थे (**रण्यन्ति**) रणन्ति शब्दयन्ति। अत्र व्यत्ययेन शपः स्थाने श्यन्॥ २॥

अन्वयः-मनुष्या यूयं पृथिव्या कन्नूनं दिवो गावोऽर्थं गन्त, क्व वो युष्माकमर्थं गन्त तथा वो युष्माकं गावो रण्यन्ति नेव मरुतः क्व रणन्ति॥ २॥

भावार्थः-अत्रोपमालङ्कारौ। यथा सूर्यस्य किरणाः पृथिव्यां स्थितान् पदार्थान् प्रकाशयन्ति तथा यूयमपि विदुषां समीपं प्राप्य क्व वायूनां नियोगः कर्त्तव्य इति तान् पृष्ट्वाऽर्थान् प्रकाशयत। यथा गावः स्ववत्सान् प्रति शब्दयित्वा धावन्ति तथा यूयमपि विदुषां संङ्गं कर्तुं शीघ्रं गच्छत गत्वा शब्दयित्वाऽस्माकमिन्द्रियाणि वायुवत् क्व स्थित्वाऽर्थान् प्रति गच्छन्तीति पृष्ट्वा युष्माभिर्निश्चेतव्यम्॥ २॥

पदार्थः-हे मनुष्यो! तुम (**न**) जैसे (**कत्**) कब (**नूनम्**) निश्चय से (**पृथिव्याः**) भूमि के वाष्प और (**दिवः**) प्रकाश कर्म वाले सूर्य की (**गावः**) किरणें (**अर्थम्**) पदार्थों को (**गन्त**) प्राप्त होती हैं, वैसे (**क्व**) कहाँ (**वः**) तुम्हारे अर्थ को (**गन्त**) प्राप्त होते हो, जैसे (**गावः**) गौ आदि पशु अपने बछड़ों के प्रति (**रण्यन्ति**) शब्द करते हैं, वैसे तुम्हारी गाय आदि शब्द करते हुओं के समान वायु कहाँ शब्द करते हैं॥ २॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। हे मनुष्यो! जैसे सूर्य की किरणें पृथिवी में स्थित हुए पदार्थों को प्रकाश करती हैं, वैसे तुम भी विद्वानों के समीप जाकर कहाँ पवनों का नियोग करना चाहिये, ऐसा पूछ कर अर्थों को प्रकाश करो और जैसे गौ अपने बछड़ों के प्रति शब्द करके दौड़ती हैं, वैसे तुम भी विद्वानों के संग करने को प्राप्त हो तथा हम लोगों की इन्द्रियां वायु के समान कहाँ स्थित होकर अर्थों को प्राप्त होती हैं, ऐसा पूछकर निश्चय करो॥ २॥

पुनस्तदेवाह॥

फिर भी उक्त विषय का उपदेश अगले मन्त्र में किया है॥

क्व॑ वः सु॒म्ना नव्यां॑सि॒ मरु॑तः॒ क्व॑ सु॒वि॒ता।

क्वो३ विश्वानि सौभगा॥ ३॥

क्व। वः। सुम्ना। नव्यांसि। मरुतः। क्व। सुविता। क्वो ३ इति। विश्वानि। सौभगा॥ ३॥

पदार्थः-(**क्व**) कुत्र (**वः**) युष्माकं विदुषाम् (**सुम्ना**) सुखानि। अत्र सर्वत्र **शेश्छन्दसि बहुलम्** (अष्टा०६.१.७०) इति शेर्लोपः। (**नव्यांसि**) नवीयांसि नवतमानि। अत्र **छान्दसो वर्णलोपो वा** इति ईकारलोपः। (**मरुतः**) वायुवच्छीघ्रं गमनकारिणो जनाः (**क्व**) कस्मिन् (**सुविता**) प्रेरणानि (**क्वो**) कुत्र। अत्र वर्णव्यत्ययेन अकारस्थान ओकारः। (**विश्वा**) सर्वाणि (**सौभगा**) सुभगानां कर्म्माणि। अत्र उदात्तृत्वादञ्[३]॥ ३॥

अन्वयः-हे मरुतो मनुष्या! यूयं विदुषां सदेशं प्राप्य वो युष्माकं क्व विश्वानि नव्यांसि सुम्ना क्व सुविता सौभगाः सन्तीति पृच्छत॥ ३॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। हे शुभे कर्म्मणि वायुवत् क्षिप्रं गन्तारो मनुष्या! युष्माभिर्विदुषः प्रति पृष्ट्वा यथा नवीनानि क्रियासिद्धिनिमित्तानि कर्म्माणि नित्यं प्राप्येरंस्तथा प्रयतितव्यम्॥ ३॥

पदार्थः-हे (**मरुतः**) वायु के समान शीघ्र गमन करने वाले मनुष्यो! तुम लोग विद्वानों के समीप प्राप्त होकर (**वः**) आप लोगों के (**विश्वानि**) सब (**नव्यांसि**) नवीन (**सुम्ना**) सुख (**क्व**) कहाँ? सब (**सुविता**) प्रेरणा कराने वाले गुण (**क्व**) कहाँ? और सब नवीन (**सौभगा**) सौभाग्य प्राप्ति कराने वाले कर्म (**क्वो**) कहाँ हैं? ऐसा पूछो॥ ३॥

भावार्थः-हे शुभ कर्मों में वायु के समान शीघ्र चलने वाले मनुष्यो! तुम लोगों को चाहिये कि विद्वानों के प्रति पूछ कर जिस प्रकार नवीन क्रिया की सिद्धि के निमित्त कर्म प्राप्त होवें, वैसा अच्छे प्रकार निरन्तर यत्न किया करो॥ ३॥

पुनस्ते कीदृशाः स्युरित्युपदिश्यते॥

फिर वे राजपुरुष कैसे होने चाहियें, इस विषय का उपदेश अगले मन्त्र में किया है।

यद्यूयं पृश्निमातरो मर्तासः स्यातन।
स्तोता वो अमृतः स्यात्॥ ४॥

यत्। यूयम्। पृश्निऽमातरः। मर्तासः। स्यातन। स्तोता। वः। अमृतः। स्यात्॥ ४॥

पदार्थः-(**यत्**) यदि (**यूयम्**) (**पृश्निमातरः**) पृश्निराकाशो माता येषा वायूनां त इव (**मर्त्तासः**) मरणधर्माणो राजाप्रजाजनाः। अत्र**ाज्जसेरसुग्** इत्यसुगागमः। (**स्यातन**) भवेत। तस्य तनबादेशः। (**स्तोता**) स्तुतिकर्त्ता सभाध्यक्षो राजा (**वः**) युष्माकम् (**अमृतः**) शत्रुभिरप्रतिहतः (**स्यात्**) भवेत्॥ ४॥

---

३. अष्टा०५.१.१२९

अन्वयः-हे पृश्निमातर इव वर्त्तमाना मर्त्तासो! यूयं यद्यदि पुरुषार्थिनः स्यातन तर्हि वः स्तोताऽमृतः स्यात्॥४॥

भावार्थः-राजप्रजापुरुषैरालस्यं त्यक्त्वा वायव इव स्वकर्मसु नियुक्तैर्भवितव्यम्। यत एतेषां रक्षकः सभाध्यक्षो राजा शत्रुभिर्हन्तुमशक्यो भवेत्॥४॥

पदार्थः-हे **(पृश्निमातरः)** जिन वायुओं का माता आकाश है, उनके सदृश **(मर्त्तासः)** मरणधर्म युक्त राजा और प्रजा के पुरुषो! आप पुरुषार्थयुक्त **(यत्)** जो अपने-अपने कामों में **(स्यातन)** हों तो **(वः)** तुम्हारी रक्षा करने वाला सभाध्यक्ष राजा **(अमृतः)** अमृत सुखयुक्त **(स्यात्)** होवे॥४॥

भावार्थः-राजा और प्रजा के पुरुषों को उचित है कि आलस्य छोड़ वायु के समान अपने-अपने कामों में नियुक्त होवें, जिससे सब का रक्षक सभाध्यक्ष राजा शत्रुओं से मारा नहीं जा सकता॥४॥

तत्सम्बन्धेन जीवस्य किं भवतीत्युपदिश्यते॥

उन वायुओं के सम्बन्ध से जीव को क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

मा वो॑ मृ॒गो न यव॑से जरि॒ता भू॒दजो॑ष्यः। प॒था य॒मस्य॑ गा॒दुप॑॥५॥१५॥

मा। वः। मृ॒गः। न। यव॑से। ज॒रि॒ता। भू॒त। अजो॑ष्यः। प॒था। य॒मस्य॑। गा॒त्। उप॑॥५॥

पदार्थः-(**मा**) निषेधार्थे **(वः)** एतेषां मरुताम् **(मृगः)** हरिणः **(न)** इव **(यवसे)** भक्षणीये घासे **(जरिता)** स्तोता जनः **(भूत्)** भवेत्। अत्र **बहुलं छन्दस्यमाङ्योगेऽपि** (अष्टा०६.४.७५) इत्यडभावः। **(अजोष्यः)** असेवनीयः **(पथा)** श्वासप्रश्वासरूपेण मार्गेण **(यमस्य)** निग्रहीतुर्वायोः **(गात्)** गच्छेत्। अत्र लिङर्थे लुङडभावश्च। **(उप)** सामीप्ये॥५॥

अन्वयः-हे राजप्रजाजना! यूयं यवसे मृगो नेव वो जरिताऽजोष्यो मा भूत्, यमस्य पथा च मोपगादेवं विधत्त॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा हरिणा निरन्तरं घासं भक्षयित्वा सुखिनो भवन्ति, तथा प्राणविद्याविन्मनुष्यो युक्त्याऽऽहारविहारं कृत्वा यमस्य मार्गं मृत्युं नोपगच्छेत्, पूर्णमायुर्भुक्त्वा शरीरं सुखेन त्यजेत्॥५॥

पदार्थः-हे राजा और प्रजा के जनो! आप लोग **(नः)** जैसे **(मृगः)** हिरन **(यवसे)** खाने योग्य घास खाने के निमित्त प्रवृत्त होता है, वैसे **(वः)** तुम्हारा **(जरिता)** विद्याओं का दाता **(अजोष्यः)** असेवनीय अर्थात् पृथक् **(मा भूत्)** न होवे तथा **(यमस्य)** निग्रह करने वाले वायु के **(पथा)** मार्ग से **(मोप गात्)** कभी अल्पायु होकर मृत्यु को प्राप्त न होवे, वैसा काम किया करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे हिरन युक्ति से निरन्तर घास खाकर सुखी होते हैं, वैसे प्राणवायु की विद्या को जानने वाला मनुष्य युक्ति के साथ आहार-विहार कर वायु के मार्ग को अर्थात् मृत्यु को प्राप्त नहीं होता और सम्पूर्ण अवस्था को भोग के सुख से शरीर को छोड़ता है अर्थात् सदा विद्या पढ़े-पढ़ावें, कभी विद्यार्थी और आचार्य वियुक्त न हों और प्रमाद करके अल्पायु में न मर जायें॥५॥

पुनस्तद्विषयमाह॥

फिर भी पूर्वोक्त विषय का उपदेश अगले मन्त्र में किया है॥

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्।
पदीष्ट तृष्णया सह॥६॥

मो इति। सु। नः। पराऽपरा। निःऽऋतिः। दुःऽहना। वधीत्। पदीष्ट। तृष्णया। सह॥६॥

पदार्थः-(**मो**) निषेधार्थे (**सु**) सर्वथा (**नः**) अस्मान् (**परापरा**) या परोत्कृष्टा चासावपराऽनुत्कृष्टा च सा (**निर्ऋतिः**) वायूनां रोगकारिका दुःखप्रदा गतिः। **निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापतिरितरा सा पृथिव्या संदिह्यते तयोर्विभागः।** (निरु०२.७) (**दुर्हणा**) दुःखेन हन्तुं योग्या (**वधीत**) नाशयतु। अत्र लोडर्थे लुङन्तर्गतो ण्यर्थश्च। (**पदीष्ट**) पत्सीष्ट प्राप्नुयात्। अत्र **छन्दस्युभयथा** इति सार्वधातुकाश्रयणात्सलोपः। (**तृष्णया**) तृष्यते यया पिपासया लोभगत्या वा तया (**सह**) सहिता॥६॥

अन्वयः-हे अध्यापका! यूयं यथा पराऽपरा दुर्हणा निर्ऋतिर्मरुतां प्रतिकूला गतिस्तृष्णया सह नोऽस्मान्मोपदीष्ट मोपवधीच्च किं त्वेतेषां या सुष्ठु सुखप्रदा गतिः सास्मान्नित्यं प्राप्ता भवेदेवं प्रयतध्वम्॥५॥

भावार्थः-मरुतां द्विविधा गतिरेका सुखकारिणी द्वितीया दुःखकारिणी च, तत्र या सुनियमैः सेविता रोगान् हन्त्री सती शरीरादिसुखहेतुर्भवति साऽऽद्या। या च कुनियमैः प्रमादेनोत्पादिता कृच्छ्रदुःखरोगप्रदा साऽपरा। एतयोर्मध्यान्मनुष्यैः परमेश्वराऽनुग्रहेण विद्वत्सङ्गेन स्वपुरुषार्थेश्च प्रथमामुत्पाद्य द्वितीयां निहत्य सुखमन्नेयम्। यः पिपासादिधर्मः स वायुनिमित्तेनैव यश्च लोभवेगः सोऽज्ञानेनैव जायत इति वेद्यम्॥६॥

पदार्थः-हे अध्यापक लोगो! आप जैसे (**परापरा**) उत्तम, मध्यम और निकृष्ट (**दुर्हणा**) दुःख से हटने योग्य (**निर्ऋतिः**) पवनों की रोग करने वा दुःख देने वाली गति (**तृष्णया**) प्यास वा लोभ गति के (**सह**) साथ (**नः**) हम लोगों को (**मोपदिष्ट**) कभी न प्राप्त हो और (**मावधीत्**) बीच में न मारें, किन्तु जो इन पवनों की सुख देने वाली गति है, वह हम लोगों को नित्य प्राप्त होवे, वैसा प्रयत्न किया कीजिये॥६॥

भावार्थः-पवनों की दो प्रकार की गति होती है, एक सुखकारक और दूसरी दुःख करने वाली, उनमें से जो उत्तम नियमों से सेवन की हुई रोगों का हनन करती हुई शरीर आदि के सुख का हेतु है, वह

प्रथम और जो खोटे नियम और प्रमाद से उत्पन्न हुई क्लेश, दुःख और रोगों की देने वाली वह दूसरी। इन्हीं के मध्य में से मनुष्यों को अति उचित है कि परमेश्वर के अनुग्रह और अपने पुरुषार्थों से पहिली गति को उत्पन्न करके दूसरी गति का नाश करके सुख की उन्नति करनी चाहये और जो पिपासा आदि धर्म हैं, वह वायु के निमित्त से तथा जो लोभ का वेग है, वह अज्ञान से ही उत्पन्न होता है॥६॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः।
मिहं कृण्वन्त्यवातां॥७॥

सत्यम्। त्वेषाः। अमऽवन्तः। धन्वन्। चित्। आ। रुद्रियासः। मिहम्। कृण्वन्ति। अवाताम्॥७॥

पदार्थः-(**सत्यम्**) अविनाशि गमनागमनाख्यं कर्म (**त्वेषाः**) बाह्याभ्यन्तरघर्षणेनोत्पन्नविद्युदग्निना प्रदीप्ताः। (**अमवन्तः**) अमानां रोगानां गमनागमनबलानां वा सम्बन्धो विद्यते एषान्ते। अत्र सम्बन्धार्थे मतुप्। **अम रोगे। अमगत्यादिषु चे**त्यस्माद् **हलश्च** (अष्टा०३.३.१२१) इति करणाधिकरणयोर्घञ्। अमन्ति रोगं प्राप्नुवन्ति यद्वाऽमन्ति गच्छन्त्यागच्छन्ति बलयन्ति यैस्तेऽमाः (**धन्वन्**) धन्वन्यन्तरिक्षे मरुस्थले वा। **धन्वेत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३) **पदनामसु च।** (निघं०४.२) (**चित्**) उपमार्थे (**आ**) अभितः (**रुद्रियासः**) रुद्राणां जीवानामिमे जीवननिमित्ता रुद्रिया वायवः। **तस्येदम्** (अष्टा०४.३.१२०) इति शैषिको घः। **आज्जसेरसुग्** इत्यसुगागमः (**मिहम्**) मेहति सिचति यया तां वृष्टिम् (**कृण्वन्ति**) कुर्वन्ति (**अवाताम्**) अविद्यमाना वातो यस्यास्ताम्॥७॥

अन्वयः-हे मनुष्या! यूयं धन्वन्नन्तरिक्षे त्वेषा अमवन्तो रुद्रियासो मरुतो वर्त्तन्तेऽवातां मिहं वृष्टिमाकृण्वन्ति तेषां मरुतां सत्यकर्मास्ति चिदिवानुतिष्ठत॥७॥

भावार्थः-मनुष्यैर्यथा येऽन्तरिक्षस्थाः सत्यगुणस्वभावा वायवो वृष्टिहेतवः सन्ति, त एव युक्त्या परिचरिता अनुकूला सन्तः सुखयन्ति। अयुक्त्या सेविताः प्रतिकूलाः सन्तश्च दुःखयन्ति तथा युक्त्या धर्माऽनुकूलानि कर्माणि सेव्यानि॥७॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे (**धन्वन्**) अन्तरिक्ष में (**त्वेषाः**) बाहर-भीतर घिसने से उत्पन्न हुई बिजुली से प्रदीप्त (**अमवन्तः**) जिनका रोगों और गमनागमन रूप वालों के साथ सम्बन्ध है (**रुद्रियासः**) प्राणियों के जीने के निमित्त वायु (**अवाताम्**) हिंसा रहति (**मिहम्**) सींचने वाली वृष्टि को (**आकृण्वन्ति**) अच्छे प्रकार सम्पादन करते हैं और इनका (**सत्यम्**) सत्य कर्म है (**चित्**) वैसे ही सत्य कर्म का अनुष्ठान किया करो॥७॥

भावार्थः-मनुष्यों को चाहिये कि जैसे अन्तरिक्ष में रहने तथा सत्यगुण और स्वभाव वाले पवन वृष्टि के हेतु हैं, वे ही युक्ति से सेवन किये हुए अनुकूल होकर सुख देते और युक्तिरहित सेवन किये प्रतिकूल होकर दुःखदायक होते हैं, वैसे युक्ति से धर्मानुकूल कर्मों का सेवन करें॥७॥

एते किंवत्किं कुर्युरित्युपदिश्यते॥

ये मनुष्य किस के समान क्या करें, इस विषय को अगले मन्त्र में किया है॥

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति।
यदेषां वृष्टिरसर्जि॥८॥

वाश्राऽइव। विऽद्युत्। मिमाति। वत्सम्। न। माता। सिसक्ति। यत्। एषाम्। वृष्टिः। असर्जि॥८॥

पदार्थः- (**वाश्रेव**) यथा कामयमाना धेनुः (**विद्युत्**) स्तनयित्नुः (**मिमाति**) मिमीते जनयति। अत्र व्यत्ययेन परस्मैपदम्। (**वत्सम्**) स्वापत्यम् (**न**) इव (**माता**) मान्यप्रदा जननी (**सिषक्ति**) समेति सेवते वा। **सिषक्तु सचत इति सेवमानस्य।** (निरु०३.२१) (**यत्**) या (**एषाम्**) मरुतां सम्बन्धेन (**वृष्टिः**) अन्तरिक्षाज्जलस्याधःपतनम् (**असर्जि**) सृज्यते। अत्र लडर्थे लुङ्॥८॥

अन्वयः-हे मनुष्या! यूयं यद्येषां विद्युद्वत्सं वाश्रेव मिहं मिमाति कामयमाना माता पयसा पुत्रं सिषक्ति नेव यया वृष्टिरसर्जि सृज्यते तथैव परस्परं शुभगुणवर्षणेन सुखकारका भवत॥८॥

भावार्थः-अत्रोपमालङ्कारौ। यथा स्वस्ववत्सान् सेवितुं कामयमाना धेनवो मातरः स्वपुत्रान् प्रत्युच्चैः शब्दानुच्चार्य धावन्ति तथैव विद्युन्महाशब्दं कुर्वन्ती मेघावयवान् सेवितुं धावति॥८॥

पदार्थः-हे मनुष्यो! आप लोग (**यत्**) जो (**एषाम्**) इन वायुओं के योग से उत्पन्न हुई (**विद्युत्**) बिजुली (**वाश्रेव**) जैसे गौ अपने (**वत्सम्**) बछड़े को इच्छा करती हुई सेवन करती है, वैसे (**मिहम्**) वृष्टि को (**मिमाति**) उत्पन्न करती और इच्छा करती हुई (**माता**) मान्य देनेवाली माता पुत्र का दूध से (**सिषक्ति न**) जैसे सींचती है, वैसे पदार्थों को सेवन करती है, जो (**वृष्टिः**) वर्षा को (**असर्जि**) करती है, वैसे शुभ गुण, कर्मों से एक-दूसरों के सुख करनेहारे हूजिये॥८॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। हे विद्वान् मनुष्यो! तुम लोगों को उचित है कि जैसे अपने-अपने बछड़ों को सेवन करने के लिये इच्छा करती हुई गौ और अपने छोटे बालक को सेवनेहारी माता ऊँचे स्वर से शब्द करके उनकी ओर दौड़ती है, वैसे ही बिजुली बड़े-बड़े शब्दों को करती हुई मेघ के अवयवों के सेवन के लिये दौड़ती है॥८॥

पुनस्ते वायवः किं कुर्वन्तीत्युपदिश्यते॥

फिर से वायु क्या करते हैं इस विषय का उपदेश अगले मन्त्र मं किया है॥

दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन।

यत्पृथिवीं व्युन्दन्ति॥ ९॥

दिवा। चित्। तमः। कृण्वन्ति। पर्जन्येन। उदऽवाहेन। यत्। पृथिवीम्। विऽउन्दन्ति॥ ९॥

पदार्थः-(**दिवा**) दिवसे (**चित्**) इव (**तमः**) अन्धकाराख्यां रात्रिम् (**कृण्वन्ति**) कुर्वन्ति (**पर्जन्येन**) मेघेन (**उदवाहेन**) य उदकानि वहति तेन। अत्र **कर्मण्यण्।** (अष्टा०३.२.१) इत्यण् प्रत्ययः। **वाच्छन्दसि सर्वे विधयो भवन्ति** इत्युदकस्योद आदेशः। (**यत्**) ये (**पृथिवीम्**) विस्तीर्णां भूमिम् (**व्युन्दन्ति**) विविधतया क्लेदयन्त्यार्द्रयन्ति॥ ९॥

अन्वयः-हे मनुष्या! यद्ये वायव उद्वाहेन पर्जन्येन दिवा तमः चित् कृण्वन्ति, पृथिवीं व्युन्दन्ति तान्युक्त्योपकुरुत॥ ९॥

भावार्थः-अत्रोपमालङ्कारः। वायव एव जलावयवान् कठिनीकृत्य घनाकारं मेघं दिवसेऽप्यन्धकारं जनित्वा पुनर्विद्युतमुत्पाद्य तया तान् छित्वा पृथिवीं प्रति निपात्य जलैः स्निग्धां कृत्वानेकानोषध्यादिसमूहान् जनयन्तीति विद्वांसोऽन्यानुपदिशन्तु॥ ९॥

पदार्थः-हे विद्वान् लोगो! आप (**यत्**) जो पवन (**उदवाहेन**) जलों को धारण वा प्राप्त कराने वाले (**पर्जन्येन**) मेघ से (**दिवा**) दिन में (**तमः**) अन्धकाररूप रात्रि के (**चित्**) समान अन्धकार (**कृण्वन्ति**) करते हैं (**पृथिवीम्**) भूमि को (**व्युदन्ति**) मेघ के जल से आर्द्र करते हैं, उनका युक्ति से सेवन करो॥ ९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। पवन ही जलों के अवयवों को कठिन सघनाकार मेघ को उत्पन्न उस बिजुली से उन मेघों के अवयवों को छिन्न-भिन्न और पृथिवी में गेर कर जलों से स्निग्ध करके अनेक ओषधी आदि समूहों को उत्पन्न करते हैं, उनका उपदेश विद्वान् लोग अन्य मनुष्यों को सदा किया करें॥ ९॥

पुनरेतेषां योगेन किं भवतीत्युपदिश्यते॥

फिर इन पवनों के योग से क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अधा स्वनान्मरुतां विश्वमा सद्म पार्थिवम्। अरेजन्त प्र मानुषाः॥ १०॥ १६॥

अधा। स्वनात्। मरुताम्। विश्वम्। आ। सद्म। पार्थिवम्। अरेजन्त। प्र। मानुषाः॥ १०॥

पदार्थः-(**अध**) आनन्तर्ये। वर्णव्यत्ययेन थस्य धः। (**स्वनात्**) उत्पन्नाच्छब्दात् (**मरुताम्**) वायूनां विद्युतश्च सकाशात् (**विश्वम्**) सर्वम् (**आ**) समन्तात् (**सद्म**) सीदन्ति यस्मिन् गृहे तत्। **सद्मेति गृहनामसु पठितम्।** (निघं०३.४) (**पार्थिवम्**) पृथिव्यां विदितं वस्तु (**अरेजन्त**) कम्पन्ते। **रेजृ कम्पन** अस्माद्धातोर्लडर्थे लङ्। (**प्र**) प्रगतार्थे (**मानुषाः**) मानवाः॥ १०॥

अन्वयः-हे मानुषा! यूयं येषां मरुतां स्वनादध विश्वं पार्थिवं सद्म कम्पते प्राणिनः प्रारेजन्त प्रकम्पन्ते चलन्तीति तान् विजानीत॥१०॥

भावार्थः-हे ज्योतिर्विदो विपश्चितो भवन्तो! मरुतां योगेनैव सर्वं मूर्तिमद्द्रव्यं चेष्टते प्राणिनो भयंकराद् विद्युच्छब्दाद् भीत्वा कम्पते पृथिव्यादिकं प्रतिक्षणं भ्रमतीति निश्चिन्वन्तु॥१०॥

पदार्थः-हे **(मानुषाः)** मननशील मनुष्यो! तुम जिन **(मरुताम्)** पवनों के **(स्थानात्)** उत्पन्न शब्द के होने से **(अध)** अनन्तर **(विश्वम्)** सब **(पार्थिवम्)** पृथिवी में विदित वस्तुमात्र का **(सद्म)** स्थान कम्पता और प्राणिमात्र **(प्रारेजन्त)** अच्छे प्रकार कंपित होते हैं, इस प्रकार जानो॥१०॥

भावार्थः-हे ज्योतिष्य शास्त्र के विद्वान् लोगो! आप पवनों के योग ही के सब मूर्तिमान् द्रव्य चेष्टा को प्राप्त होते, प्राणी लोग बिजुली के भयंकर शब्द में भय को प्राप्त होकर कंपित होते और भूगोल आदि प्रतिक्षण भ्रमण किया करते हैं, ऐसा निश्चित समझो॥१०॥

पुनस्ते मानवो वायुभिः किं कुर्वन्तीत्युपदिश्यते॥

फिर वे मनुष्य पवनों से क्या करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु।

यातेमखिद्रयामभिः॥११॥

मरुतः। वीळुपाणिऽभिः। चित्राः। रोधस्वतीः। अनु। यात। ईम्। अखिद्रयामऽभिः॥११॥

पदार्थः-(**मरुतः**) योगाभ्यासिनो व्यवहारसाधका वा जनाः **(वीळुपाणिभिः)** वीळूनि दृढानि बलानि पाण्योर्ग्रहणसाधनव्यवहारयोर्येषां तैः। **वीड्विति बलनामसु पठितम्।** (निघं०२.९) **(चित्राः)** अद्भुतगुणाः **(रोधस्वतीः)** रोधो बहुविधमावरणं विद्यते यासां नदीनां नाडीनां वा ताः। **रोधस्वत्य इति नदीनामसु पठितम्।** (निघं०१.१३) **(अनु)** अनुकूले **(यात)** प्राप्नुत **(ईम्)** एव **(अखिद्रयामभिः)** अच्छिन्नानि निरन्तराणि निगमनानि येषां तैः। **स्फायितञ्चि०** (उणा०२.१४) इति रक्। **सर्वधातुभ्यो मनिन्** इति करणे मनिंश्च॥११॥

अन्वयः-हे मरुतो! यूयमखिद्रयामभिर्वीळुपाणिभिः पवनैः सह रोधस्वतीश्चित्रा ईमनुयात॥११॥

भावार्थः-वायुषु गमनबलव्यवहारहेतूनि कर्माणि स्वाभाविकानि सन्ति। एते खलु नदीनां गमयितारो नाडीनां मध्ये गच्छन्तो रुधिररसादिकं शरीराऽवयवेषु प्रापयन्ति, तस्माद्योगिभिर्योगाभ्यासेनेतरैर्जनैश्च बलादिसाधनाय वायुभ्यो महोपकारा ग्राह्याः॥११॥

पदार्थः-हे **(मरुतः)** योगाभ्यासी योगव्यवहार सिद्धि चाहनेवाले पुरुषो! तुम लोग **(अखिद्रयामभिः)** निरन्तर गमनशील **(वीळुपाणिभिः)** दृढ़ बलरूप ग्रहण के साधक व्यवहार वाले पवनों के साथ **(रोधस्वतीः)** बहुत प्रकार के बाँध वा आवरण और **(चित्राः)** आश्चर्य्य गुण वाली नदी वा नाडियों के **(ईम्)** **(अनु)** अनुकूल **(यात)** प्राप्त हों॥११॥

भावार्थः-पवनों में गमन बल और व्यवहार होने के हेतु स्वाभाविक धर्म हैं और ये निश्चय करके नदियों को चलाने वाले नाड़ियों के मध्य में गमन करते हुए रुधिर रसादि को शरीर के अवयवों में प्राप्त करते हैं, इस कारण योगी लोग योगाभ्यास और अन्य मनुष्य बल आदि के साधनरूप वायुओं से बड़े-बड़े उपकार ग्रहण करें॥११॥

पुनस्तदेवाह॥

फिर भी उक्त विषय का उपदेश अगले मन्त्र में किया है॥

स्थि॒रा व॑: सन्तु ने॒मयो॒ रथा॒ अश्वा॑स एषाम्।
सुसं॑स्कृता अ॒भीश॑वः॥ १२॥

स्थि॒राः। व॒ः। स॒न्तु॒। ने॒मयः॑। रथा॑ः। अश्वा॑सः। ए॒षा॒म्। सुऽसं॑स्कृताः। अ॒भीश॑वः॥ १२॥

पदार्थः-(**स्थिराः**) दृढा (**वः**) युष्माकम् (**सन्तु**) भवन्तु (**नेमयः**) कलाचक्राणि (**रथाः**) विमानादीनि यानानि (**अश्वासः**) अग्न्यादयस्तुरङ्गा वा। अत्र **आज्जसरेसुग्** इत्यसुगागमः। (**एषाम्**) मरुतां सकाशात् (**अभीशवः**) अभितोऽश्नुवते व्याप्नुवन्ति मार्गान् यैस्ते रश्मयो हया वा। अत्रा**भिपूर्वादशूङ् व्याप्ता**वित्यस्माद्धातोः। **कृवापा०** (उणा०१.१) इत्युण् वर्णव्यत्ययेनाकारस्थान ईकारश्च॥१२॥

अन्वयः-हे विद्वांसो मनुष्या! वो युष्माकमेषां मरुतां सकाशात्सुसंस्कृता नेमयो रथा अभिशवोऽश्वासश्च स्थिराः सन्तु॥१२॥

भावार्थः-ईश्वर उपदिशति। हे मनुष्या! युष्माभिर्विविधकलाचक्राणि यानानि रचयित्वा तेष्वग्निजलादीनां शीघ्रं गमयतॄणां सम्प्रयोगेण वायूनां योगात्सुखेन सर्वतो गमनागमनानि शत्रुविजयादयः सर्वे व्यवहाराः संसाधनीया इति॥१२॥

पदार्थः-हे विद्वान् लोगो! (**वः**) तुम्हारे (**एषाम्**) इन पवनों के सकाश से (**सुसंस्कृताः**) उत्तम शिल्प विद्या से संस्कार किए हुये (**नेमयः**) कला चक्रयुक्त (**रथाः**) विमान आदि रथ (**अभीशवः**) मार्गों को व्याप्त करने वाले (**अश्वासः**) अग्नि आदि वा घोड़ों के सदृश (**स्थिराः**) दृढ़ बलयुक्त (**सन्तु**) होवें॥१२॥

भावार्थः-ईश्वर उपदेश करता है। हे मनुष्यो! तुम को चाहिये कि अनेक प्रकार के कलाचक्र युक्त विमान आदि यानों को रच कर उनमें जल्दी चलने वाले अग्नि जल के सम्प्रयोग वा पवनों के योग से सुख पूर्वक जाने-आने और शत्रुओं को जीतने आदि सब व्यवहारों को सिद्ध करो॥१२॥

तदेतदुपदेशको विद्वान् कीदृशो भवेदित्युपदिश्यते॥

फिर इस विमानादि विद्या का उपदेशक विद्वान् कैसा होवे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अच्छा॑ वदा॒ तना॑ गि॒रा ज॒रायै॒ ब्रह्म॑ण॒स्पति॑म्।

अ॒ग्निं मि॒त्रं न द॑र्श॒तम्॥ १३॥

अच्छ॑। व॒द॒। तना॑। गि॒रा। ज॒रायै॑। ब्रह्म॑णः। पति॑म्। अ॒ग्निम्। मि॒त्रम्। न। द॒र्श॒तम्॥ १३॥

पदार्थः-(**अच्छ**) सम्यग्रीत्या। अत्र दीर्घः। (**वद**) उपदिश। अत्र **व्यचोऽतस्तिङ** इति दीर्घः। (**तना**) गुणप्रकाशं विस्तारयन्त्या (**गिरा**) स्वकीयया वेदयुक्त्या वाण्या (**जरायै**) स्तुत्यै। **जरास्तुतिर्जरतेः स्तुतिकर्मणः।** (निरु०१०.८) (**ब्रह्मणः**) वेदस्याऽध्यापनोपदेशेन (**पतिम्**) पालकम् (**अग्निम्**) ब्रह्मवर्चस्विनम् (**मित्रम्**) सुहृदम् (**न**) इव (**दर्शतम्**) द्रष्टव्यम्॥ १३॥

अन्वयः-हे सर्वविद्याविद्विद्वँस्त्वं ब्रह्मणस्पतिं दर्शतमग्निंमित्रं न जरायै, तना गिरा विमानादियानविद्यामच्छा वद॥ १३॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो मनुष्या! यथा प्रियः सखा प्रीतं तेजस्विनं वेदोपदेशकं सुहृदं सेवागुणस्तुतिभ्यां प्रीणाति तथा सर्वविद्याविस्तारिकया वेदवाण्या विमानादियानरचनविद्यां तद्गुणज्ञानाय सम्यगुपदिशत॥ १३॥

पदार्थः-हे सब विद्या के जानने वाले विद्वान्! तू (**न**) जैसे (**ब्रह्मणः**) वेद के पढ़ाने और उपदेश से (**पतिम्**) पालने हारे (**दर्शतम्**) देखने योग्य (**अग्निम्**) तेजस्वी (**मित्रम्**) जैसे मित्र को मित्र उपदेश करता है, वैसे (**जरायै**) गुणज्ञान के लिये (**तना**) गुणों के प्रकाश को बढ़ानेहारी (**गिरा**) अपनी वेदयुक्त वाणी से विमानादि यानविद्या का (**अच्छा वद**) अच्छे प्रकार उपदेश कर॥ १३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान् मनुष्यो! तुम लोगों को चाहिये कि जैसे प्रिय मित्र अपने प्रिय तेजस्वी वेदोपदेशक मित्र को सेवा और गुणों की स्तुति से तृप्त करता है, वैसे सब विद्याओं का विस्तार करने वाली वेद वाणी से विमानादि यानों के रचने की विद्या का उस के गुण ज्ञान के लिये निरन्तर उपदेश करो॥ १३॥

पुनस्तत्पाठितो विद्यार्थी कीदृशो भवेदित्युपदिश्यते॥

फिर उस विद्वान् का पढ़ाया शिष्य कैसा होना चाहिये, इसका उपदेश अगले मन्त्र में किया है॥

मि॒मी॒हि श्लोक॑मा॒स्ये॑ प॒र्जन्य॑ इव ततनः।

गाय॑ गाय॒त्रमु॒क्थ्य॑म्॥ १४॥

मि॒मी॒हि। श्लोक॑म्। आ॒स्ये॑। प॒र्जन्यः॑ऽइव। त॒त॒नः। गाय॑। गा॒य॒त्रम्। उ॒क्थ्य॑म्॥ १४॥

पदार्थः-(**मिमीहि**) निर्मिमीहि। **माङ् माने शब्दे चे**त्यस्य रूपम् व्यत्ययेन परस्मैपदम्। (**श्लोकम्**) वेदशिक्षायुक्तां वाणीम्। **श्लोक इति वाङ्नामसु पठितम्।** (निघं०१.११) (**आस्ये**) मुखे (**पर्जन्य इव**) यथा मेघो गर्जनं कुर्वन् वृष्टिं तनोति (**ततनः**) विस्तारय। लेटि मध्यमैकवचने **तनु विस्तार** इत्यस्य रूपम्।

विकरणव्यत्ययेन ओः श्लुः। **(गाय)** पठ पाठय वा **(गायत्रम्)** गायत्रीछन्दस्कम् **(उक्थ्यम्)** गातुं वक्तुं योग्यम्॥१४॥

अन्वयः-हे विद्वन् मनुष्य! त्वमास्ये श्लोकं मिमीहि तं च पर्जन्य इव ततनः। उक्थ्यं गायत्रं च गाय॥१४॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वद्भ्योधीतविद्या मनुष्या! युष्माभिः सर्वथा प्रयत्नेन स्वकीयां वाणीं वेदविद्यासुशिक्षितां कृत्वा वाचस्पत्यं सम्पाद्य परमेश्वरस्य वाय्वादीनां च गुणाः स्तोतव्याः श्रोतव्या उपदेशनीयाश्च॥१४॥

पदार्थः-हे विद्वान् मनुष्य! तू **(आस्ये)** अपने मुख में **(श्लोकम्)** वेद की शिक्षा से युक्त वाणी को **(मिमीहि)** निर्माण कर और उस वाणी को **(पर्जन्य इव)** जैसे मेघ वृष्टि करता है, वैसे **(ततनः)** फैला और **(उक्थ्यम्)** करने योग्य **(गायत्रम्)** गायत्री छन्द वाले स्तोत्ररूप वैदिक सूक्तों को **(गाय)** पढ़ तथा पढ़ा॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानों से विद्या पढ़े हुए मनुष्यो! तुम लोगों को उचित है कि सब प्रकार प्रयत्न के साथ वेदविद्या से शिक्षा की हुई वेदवाणी से वाणी के वेत्ता के समान वक्ता होकर वायु आदि पदार्थों के गुणों की स्तुति तथा उपदेश किया करो॥१४॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह विद्वान् क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम्।
अस्मे वृद्धा असन्निह॥१५॥१७॥

वन्दस्व। मारुतम्। गणम्। त्वेषम्। पनस्युम्। अर्किणम्। अस्मे इति। वृद्धाः। असन्। इह॥१५॥

पदार्थः-**(वन्दस्व)** कामय **(मारुतम्)** मरुतमिमम् **(गणम्)** समूहम् **(त्वेषम्)** अग्न्यादिप्रकाशवद् द्रव्ययुक्तम् **(पनस्युम्)** पनायति व्यवहरति येन। तदात्मन इच्छुम् **क्याच्छन्दसि** (अष्टा०३.२.१७०) इत्युः प्रत्ययः। **(अर्किणम्)** प्रशस्तोऽर्कोऽर्चनं विद्यते यस्मिंस्तम्। अत्र प्रशंसार्थ इनिः। **(अस्मे)** अस्माकम्। अत्र **सुपां सुलुग्** इत्यामः स्थाने शे। **(वृद्धाः)** दीर्घविद्यायुक्ताः **(असन्)** भवेयुः। लेट्प्रयोगः। **(इह)** अस्मिन् सर्वव्यवहारे॥१५॥

अन्वयः-हे विद्वंस्त्वं यथेहास्मे वृद्धा असन् तथाऽर्किणं त्वेषं पनस्युं मारुतं गणं वन्दस्व॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा वायवः कार्याणि साधकत्वेन सुखप्रदा भवेयुस्तथा विद्यापुरुषार्थाभ्यां प्रयतितव्यम्॥१५॥

अथास्मिन् वायुदृष्टान्तेन विद्वद्गुणवर्णितेनातीतेन सूक्तेन सहास्य सङ्गतिरस्तीति बोध्यम्॥

इति सप्तदशो वर्गोऽष्टात्रिंशं सूक्तं च समाप्तम्॥ ३८॥

पदार्थः-हे विद्वान् मनुष्य! तू जैसे **(इह)** इस सब व्यवहार में **(अस्मे)** हम लोगों के मध्य में **(वृद्धाः)** बड़ी विद्या और आयु से युक्त वृद्ध पुरुष सत्याचरण करने वाले **(असन्)** होवें, वैसे **(अर्किणम्)** प्रशंसनीय **(त्वेषम्)** अग्नि आदि प्रकाशवान् द्रव्यों से युक्त **(पनस्युम्)** अपने आत्मा के व्यवहार की इच्छा के हेतु **(मारुतम्)** वायु के इस **(गणम्)** समूह की **(वन्दस्व)** कामना कर॥ १५॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे पवन कार्यों को सिद्ध करने के साधन होने से सुख देने वाले होते हैं, वैसे विद्या और अपने पुरुषार्थ से सुख किया करें॥ १५॥

इस सूक्त में वायु के दृष्टान्त से विद्वानों के गुण वर्णन करने से पूर्व सूक्त के साथ इस सूक्त की सङ्गति जाननी चाहिये।

यह सत्रहवां वर्ग और अड़तीसवां सूक्त समाप्त हुआ॥ ३८॥

अथ दशर्चस्यैकोनचत्वारिंशस्य सूक्तस्य घोरपुत्रः कण्व ऋषिः मरुतो देवताः। १,५,९ पथ्याबृहती। ७ उपरिष्टाद्विराड् बृहती छन्दः। मध्यमः स्वरः। २,८,१० विराड् सतः पङ्क्तिः। ४,६ निचृत्सतःपङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३ अनुष्टुप् छन्दः। गान्धारः स्वरः। अत्र सायणाचार्य्यादिभिर्विलसनमोक्षमूलराख्यादिभिश्चैतत्सूक्तस्था मन्त्राः सतो बृहती छन्दस्का आयुजो बृहती छन्दस्काश्च छन्दःशास्त्राभिप्रायमविदित्वाऽन्यथा व्याख्याता इति मन्तव्यम्॥

पुनस्ते विद्वांसः कथं कथं संवदन्त इत्युपदिश्यते॥

अब उनतालीसवें सूक्त का आरम्भ है। फिर वे विद्वान् लोग परस्पर किस-किस प्रकार संवाद करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र यदित्था परावतः शोचिर्न मानमस्यथ।

कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः॥ १॥

प्र। यत्। इत्था। पराऽवतः। शोचिः। न। मानम्। अस्यथ। कस्य। क्रत्वा। मरुतः। कस्य। वर्पसा। कम्। याथ। कम्। ह। धूतयः॥ १॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**यत्**) ये (**इत्था**) अस्माद्धेतोः (**परावतः**) दूरात् (**शोचिः**) सूर्यज्योतिः पृथिव्याम् (**न**) इव (**मानम्**) यत्परिमाणम् (**अस्यथ**) प्रक्षिपत (**कस्य**) सुखस्वरूपस्य परमात्मनः (**क्रत्वा**) क्रतुना कर्मणा ज्ञानेन वा। अत्र **जसादिषु छन्दसि वा वचनम्**। (अष्टा०वा०७.३.१०९) इति नादेशाभावः। (**मरुतः**) विद्वांसः (**कस्य**) सुखदातुर्भाग्यशालिनः (**वर्पसा**) रूपेण। **वर्प इति रूपनामसु पठितम्।** (निघं०३.७) (**कम्**) सुखप्रदं देशम् (**याथ**) प्राप्नुत (**कम्**) सुखहेतुं पदार्थम् (**ह**) खलु (**धूतयः**) ये धून्वन्ति ते। **क्तिच् क्तौ च संज्ञायाम्।** (अष्टा०३.३.१७४) इति क्तिच्॥ १॥

अन्वयः-हे मरुतो! यूयं यद्ये धूतयो वायव इव शोचिर्न परावतः कस्य मानमस्यथ। इत्था ह कस्य क्रत्वा वर्पसा च कं याथचेति समाधानानि ब्रूत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारौ। सुखमभीप्सुभिर्विद्वद्भिर्जनैर्यथा सूर्यस्य रश्मयो दूरदेशाद्भूमिं प्राप्य पदार्थान् प्रकाशयन्ति, तथैव सर्वसुखदातुः परमात्मनो भाग्यशालिनः परमविदुषश्च सकाशाद् वायोर्गुणकर्मस्वभावान् याथातथ्यतो विज्ञाय तेष्वेव रमणीयं वायवः कारणमानं कारणस्वरूपेण यान्तीति विजानीयात्॥ १॥

पदार्थः-हे (**मरुतः**) विद्वान् लोगो! आप (**यत्**) जो (**धूतयः**) सबको कम्पाने वाले वायु (**शोचिर्न**) जैसे सूर्य की ज्योति और वायु पृथिवी पर दूर से गिरते हैं, इस प्रकार (**परावतः**) दूर से (**कस्य**) किस के (**मानम्**) परिमाण को (**अस्यथ**) छोड़ देते (**इत्था**) इसी हेतु से (**कस्य**) सुखस्वरूप परमात्मा के (**क्रत्वा**) कर्म वा ज्ञान और (**वर्पसा**) रूप के साथ (**कम्**) सुखदायक देश को (**याथ**) प्राप्त होते हो, इन प्रश्नों के उत्तर दीजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सुख की इच्छा करने वाले विद्वान् पुरुषों को चाहिये कि जैसे सूर्य की किरणें दूर देश से भूमि को प्राप्त होकर पदार्थों को प्रकाश करती हैं, वैसे ही अभिमान को दूर से त्याग के सब सुख देने वाले परमात्मा और भाग्यशाली परमविद्वान् के गुण, कर्म, स्वभाव और मार्ग को ठीक-ठीक जान के उन्हीं में रमण करें, ये वायु कारण से आते कारणस्वरूप से स्थित और कारण में लीन भी हो जाते हैं॥१॥

अथ तेभ्य उपदिश्याऽशीर्दत्वा युष्माभिः किं किं साधनीयमित्युपदिश्यते॥

अब ईश्वर इनको उपदेश और आशीर्वाद देकर सब से कहता है कि तुमको क्या-क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः॥२॥

स्थिरा। वः। सन्तु। आयुधा। पराऽनुदे। वीळु। उत। प्रतिऽस्कभे। युष्माकम्। अस्तु। तविषी। पनीयसी। मा। मर्त्यस्य। मायिनः॥२॥

पदार्थः-(**स्थिरा**) स्थिराणि चिरं स्थातुमर्हाणि। अत्र सर्वत्र **शेश्छन्दसि** इति लोपः। (**वः**) युष्माकम् (**सन्तु**) भवन्तु (**आयुधा**) आयुधान्याग्नेयानि धनुर्बाणभुसुण्डीशतघ्न्यादीन्यस्त्रशस्त्राणि (**पराणुदे**) परान्नुदन्ति शत्रून् यस्मिन् युद्धे तस्मै। अत्र **कृतो बहुलम्** इत्यधिकरणे क्विप्। (**वीळू**) वीडूनि दृढानि बलकारीणि। अत्र ईषा अक्षादित्वात्[४] प्रकृतिभावः। (**उत**) अप्येव (**प्रतिष्कभे**) प्रतिष्कम्भते प्रतिबध्नाति शत्रून् येन कर्मणा तस्मै। अत्र सौत्रात् स्कम्भु धातोः पूर्ववत् क्विप्। (**युष्माकम्**) धार्मिकाणां वीराणाम् (**अस्तु**) भवतु (**तविषी**) प्रशस्तबलविद्यायुक्ता सेना। **तवेर्णिद्वा।** (उणा०१.४९) अनेन टिषच् प्रत्ययो णिद्वा। **तविषीति बलनामसु पठितम्।** (निघं०२.९) (**पनीयसी**) अतिशयेन स्तोतुमर्हा व्यवहारसाधिका (**मा**) निषेधार्थे (**मर्त्यस्य**) मनुष्यस्य (**मायिनः**) कपटधर्माचरणयुक्तस्य। माया कुत्सिता प्रज्ञा विद्यते यस्य तस्य। अत्र निन्दार्थ इनिः। **मायेति प्रज्ञानामु पठितम्।** (निघं०३.९)॥२॥

अन्वयः-हे धार्मिकमनुष्या व आयुधा! शत्रूणां पराणुद उत प्रतिष्कभे स्थिरा वीळू सन्तु। युष्माकं तविषी सेना पनीयस्यस्तु मायिनो मर्त्यस्य मा सन्तु॥२॥

भावार्थः-धार्मिका मनुष्या एवेश्वरानुग्रहविजयौ प्राप्नुवन्ति, ईश्वरोऽपि धर्मात्मभ्य एवाशीर्ददाति, नेतरेभ्यः। एतैः प्रशस्तानि शस्त्रास्त्राणि रचयित्वा तत्प्रक्षेपाभ्यासं कृत्वा प्रशस्तां सेनां शिक्षित्वा दुष्टानां शत्रूणां वधनिरोधपराजयान् कृत्वा न्यायेन नित्यं प्रजा रक्ष्या नेदं मायावी प्राप्तुं कर्त्तुं शक्नोति॥२॥

---

४. ईषा अक्षादिषु छन्दसि प्रकृतिभावमात्रं वक्तव्यम्। अष्टा०वा०६.१.१२७

पदार्थः-हे धार्मिक मनुष्यो! **(वः)** तुम्हारे **(आयुधा)** आग्नेय आदि अस्त्र और तलवार, धनुष, बाण, भुसुण्डी (बन्दूक), शतघ्नी (तोप) आदि शस्त्र-अस्त्र **(पराणुदे)** शत्रुओं को व्यथा करने वाले युद्ध **(उत)** और **(प्रतिष्कभे)** रोकने, बांधने और मारने रूप कर्मों के लिये **(स्थिरा)** स्थिर दृढ़ चिरस्थायी **(वीळू)** दृढ़ बड़े-बड़े उत्तम बलयुक्त **(तविषी)** प्रशस्त सेना **(पनीयसी)** अतिशय करके स्तुति करने योग्य वा व्यवहार को सिद्ध करनेवाली **(अस्तु)** हो और पूर्वोक्त पदार्थ **(मायिनः)** कपट आदि अधर्माचरणयुक्त **(मर्त्यस्य)** दुष्ट मनुष्यों के **(मा)** कभी मत हों॥२॥

भावार्थः-धार्मिक मनुष्य ही परमात्मा के कृपा पात्र होकर सदा विजय को प्राप्त होते हैं, दुष्ट नहीं। परमात्मा भी धार्मिक मनुष्यों ही को आशीर्वाद देता है, पापियों को नहीं। पुण्यात्मा मनुष्यों को उचित है कि उत्तम-उत्तम शस्त्र-अस्त्र रचकर उनके फेंकने का अभ्यास करके सेना को उत्तम शिक्षा देकर शत्रुओं का निरोध वा पराजय करके न्याय से मनुष्यों की निरन्तर रक्षा करनी चाहिये[५]॥२॥

अथ विद्वन्मनुष्यकृत्यमुपदिश्यते॥

अब अगले मन्त्र में विद्वान् मनुष्यों के कार्य का उपदेश किया है॥

परा॑ ह॒ यत्स्थि॒रं ह॒थ नरो॑ व॒र्तय॑था गु॒रु।
वि या॑थन व॒निन॑: पृथि॒व्या व्याशा॒: पर्व॑तानाम्॥३॥

परा॑। ह॒। यत्। स्थि॒रम्। ह॒थ। नरः॑। व॒र्तय॑थ। गु॒रु। वि। या॒थ॒न। व॒निन॑ः। पृ॒थि॒व्याः वि। आशा॑ः। पर्व॑तानाम्॥३॥

पदार्थः-(**परा**) प्रकृष्टार्थे **(ह)** किल **(यत्)** ये **(स्थिरम्)** दृढं बलम् **(हथ)** भग्नाङ्गाञ्छत्रून् कुरुथ **(नरः)** नेतारो मनुष्याः **(वर्तयथ)** निष्पादयथ। अत्र **अन्येषामपि०** इति दीर्घः **(गुरु)** गुरुत्वयुक्तं न्यायाचरणं पृथिव्यादिकं द्रव्यं वा **(वि)** विविधार्थे **(याथन)** प्राप्नुथ। अत्र **तप्तनप्तन०** इति थस्य स्थाने थनादेशः। **(वनिनः)** वनं रश्मिसम्बन्धो विद्यते येषान्ते वायवः। अत्र सम्बन्धार्थ इनिः। **(पृथिव्याः)** भूगोलस्यान्तरिक्षस्य वा **(वि)** विशिष्टार्थे **(आशाः)** दिशः। **आशा इति दिङ्नामसु पठितम्।** (निघं०१.६) **(पर्वतानाम्)** गिरीणां मेघानां वा॥३॥

अन्वयः-हे नरो नायका! यूयं यथा वनिनो वायवो यत्पर्वतानां पृथिव्याश्च व्याशाः सन्तः स्थिरं गुरु हत्वा नयन्ति तथा तत्स्थिरं गुरु बलं सम्पाद्य शत्रून् पराहथ ह किलैतान् विवर्त्तयथ विजयाय वायुवच्छत्रुसेनाः शत्रुपुराणि वा वियाथ॥३॥

---

५. सं.भा. के अनुसार इसके आगे 'इन शस्त्रादि पदार्थों को छली मनुष्य नहीं प्राप्त कर सकता' इतना वाक्य और होना चाहिये। सं०।

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वेगयुक्ता वायवो वृक्षादीन् भञ्जते पृथिव्यादिकं धरन्ति तथा धार्मिका न्यायाधीशा अधर्म्माचरणानि भङ्क्त्वा धर्म्येण न्यायेन प्रजा धरेयुः। सेनापतयश्च महत्सैन्यं धृत्वा शत्रून् हत्वा पृथिव्यां चक्रवर्त्तिराज्यं संसेव्य सर्वासु दिक्षु सत्कीर्त्तिं प्रचारयन्तु यथा सर्वेषां प्राणाः प्रियाः सन्ति, तथैते विनयशीलाभ्यां प्रजासु स्युः॥३॥

पदार्थः-हे **(नरः)** नीतियुक्त मनुष्यो! तुम जैसे **(वनिनः)** सम्यक् विभाग और सेवन करने वाले किरण सम्बन्धी वायु अपने बल से **(यत्)** जिन **(पर्वतानाम्)** पहाड़ और मेघों **(पृथिव्याः)** और भूमि को **(व्याशाः)** चारों दिशाओं में व्यासवत् व्याप्त होकर उस **(स्थिरम्)** दृढ़ और **(गुरु)** बड़े-बड़े पदार्थों का धरते और वेग से वृक्षादि को उखाड़ के तोड़ देते हैं, वैसे विजय के लिये शत्रुओं की सेनाओं को **(पराहथ)** अच्छे प्रकार नष्ट करो और **(ह)** निश्चय से इन शत्रुओं को **(विवर्त्तयथ)** तोड़-फोड़, उलट-पलट कर अपनी कीर्त्ति से **(आशाः)** दिशाओं को **(वियाथन)** अनेक प्रकार व्याप्त करो॥३॥

भावार्थः-इस मन्त्र में वाचक लुप्तोपमालङ्कार है। जैसे वेगयुक्त वायु वृक्षादि को उखाड़ तोड़-झंझोड़ देते और पृथिव्यादि को धरते हैं, वैसे धार्मिक न्यायाधीश अधर्माचारों को रोक के धर्मयुक्त न्याय से प्रजा को धारण करें और सेनापति दृढ़ बल युक्त हो, उत्तम सेना का धारण, शत्रुओं को मार, पृथिवी पर चक्रवर्त्ति राज्य का सेवन कर, सब दिशाओं में अपनी उत्तम कीर्त्ति का प्रचार करें और जैसे प्राण सब में अधिक प्रिय होते हैं, वैसे राजपुरुष प्रजा को प्रिय हों॥३॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वे विद्वान् किस प्रकार के हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे॥४॥

नहि। वः। शत्रुः। विविदे। अधि। द्यवि। न। भूम्याम्। रिशादसः। युष्माकम्। अस्तु। तविषी। तना। युजा। रुद्रासः। नु। चित्। आऽधृषे॥४॥

पदार्थः-(**नहि**) निषेधार्थे (**वः**) युष्मान् (**शत्रुः**) विरोधी (**विविदे**) विन्देत्। अत्र लिङर्थे लिट्। (**अधि**) उपरिभावे (**द्यवि**) प्रकाशे (**न**) निषेधार्थे (**भूम्याम्**) पृथिव्याम् (**रिशादसः**) रिशान् शत्रून् रोगान् वा समन्ताद् दस्यन्त्युपक्षयन्ति ये तत्सम्बुद्धौ (**युष्माकम्**) मनुष्याणाम् (**अस्तु**) भवतु (**तविषी**) प्रशस्तबलयुक्ता सेना (**तना**) विस्तृता (**युजा**) युनक्ति यया तया। अत्र **कृतो बहुलम्** इति करणे क्विप्। (**रुद्रासः**) ये रोदयन्त्यन्यायकारिणो जनांस्तत्सम्बुद्धौ (**नु**) क्षिप्रम् (**चित्**) यदि (**आधृषे**) समन्ताद् धृष्णुवन्ति यस्मिन् व्यवहारे तस्मै। अत्र पूर्ववत् क्विप्॥४॥

अन्वयः-हे रिशादसो रुद्रासो वीरा! चित् यदि युष्माकमाधृषे तना युजा तविष्यस्तु स्यात्तर्ह्यधि द्यवि न्यायप्रकाशे वो युष्मान् शत्रुर्नु नहि विविदे कदाचिन्न प्राप्नुयान्न भूम्यां भूमिराज्ये कश्चिच्छत्रुरुत्पद्यते॥४॥

भावार्थः-यथा पवना अजातशत्रवः सन्ति तथा मनुष्या विद्याधर्मबलपराक्रमवन्तो न्यायाधीशा भूत्वा सर्वान् प्रशास्य दुष्टाञ्च्छत्रून निवार्याऽदृष्टशत्रवः स्युः॥४॥

पदार्थः-हे **(रिशादसः)** शत्रुओं के नाशकारक **(रुद्रासः)** अन्यायकारी मनुष्यों को रुलाने वाले वीर पुरुष! **(चित्)** जो **(युष्माकम्)** तुम्हारे **(आधृषे)** प्रगल्भ होने वाले व्यवहार के लिये **(तना)** विस्तृत **(युजा)** बलादि सामग्री युक्त **(तविषी)** सेना **(अस्तु)** हो तो **(अधिद्यवि)** न्याय प्रकाश करने में **(वः)** तुम लोगों को **(शत्रुः)** विरोधी शत्रु **(नु)** शीघ्र **(नहि)** नहीं **(विविदे)** प्राप्त हो और **(भूम्याम्)** भूमि के राज्य में भी तुम्हारा कोई मनुष्य विरोधी उत्पन्न न हो॥४॥

भावार्थः-जैसे पवन आकाश में शत्रु रहित विचरते हैं, वैसे मनुष्य विद्या, धर्म, बल, पराक्रम वाले न्यायधीश हो, सबको शिक्षा दे और दुष्ट शत्रुओं को दण्ड देके, शत्रुओं से रहित होकर धर्म्म में वर्त्तें॥४॥

पुनस्ते कीदृशानि कर्माणि कुर्य्युरित्युपदिश्यते॥

फिर वे कैसे कर्म्म करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन्।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा॥५॥१८॥

प्र। वेपयन्ति। पर्वतान्। वि। विञ्चन्ति वनस्पतीन्। प्रो इति। आरत। मरुतः। दुर्मदाःऽइव। देवासः। सर्वया। विशा॥५॥

पदार्थः-**(प्र)** प्रकृष्टार्थे **(वेपयन्ति)** चालयन्ति **(पर्वतान्)** मेघान् **(वि)** विवेकार्थे **(विञ्चन्ति)** विभञ्जन्ति **(वनस्पतीन्)** वटाश्वत्थादीन् **(प्रो)** प्रवेशार्थे **(आरत)** प्राप्नुत। अत्र लोडर्थे लुङ्। **(मरुतः)** वायुवद्बलवन्तः **(दुर्मदा इव)** यथा दुष्टमदा जनाः **(देवासः)** न्यायाधीशाः सेनापतयः सभासदो विद्वांसः। अत्राज्जसेरसुग् इत्यसुक्। **(सर्वया)** अखिलया **(विशा)** प्रजया सह॥५॥

अन्वयः-हे मरुतो देवासो! यूयं यथा वायवो वनस्पतीन् प्रवेपयन्ति पर्वतान् विञ्चन्ति तथा दुर्मदा इव वर्त्तमानानरीन् युद्धेन प्रो आरत सर्वया प्रजया सह सुखेन वर्त्तध्वम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा राजधर्मनिष्ठा विद्वांसो दण्डेनोन्मत्तान् दस्यून् वशं नीत्वा धार्मिकीः प्रजाः पालयन्ति तथा यूयमप्येताः पालयत। यथा वायवा भूगोलस्याऽभितो विचरन्ति तथा भवन्तोऽपि विचरन्तु॥५॥

अष्टादशो वर्गः समाप्तः॥ १८॥

पदार्थः-हे **(मरुतः)** वायुवत् बलिष्ठ और प्रिय **(देवासः)** न्यायाधीश सेनापति सभाध्यक्ष विद्वान् लोगो! तुम जैसे वायु **(वनस्पतीन्)** बड़ और पिप्पल आदि वनस्पतियों को **(प्रवेपयन्ति)** कम्पाते और जैसे **(पर्वतान्)** मेघों को **(वि विञ्चन्ति)** पृथक्-पृथक कर देते हैं, वैसे **(दुर्मदा इव)** मदोन्मत्तों के समान वर्त्तते हुए शत्रुओं को युद्ध से **(प्रो आरत)** अच्छे प्रकार प्राप्त हूजिये और **(सर्वया)** सब **(विशा)** प्रजा के साथ सुख से वर्त्तिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे राजधर्म में वर्त्तने वाले विद्वान् लोग दण्ड से घमण्डी डाकुओं को वश में करके धर्मात्मा प्रजाओं का पालन करते हैं, वैसे तुम भी अपनी प्रजा का पालन करो और जैसे पवन भूगोल के चारों और विचरते हैं, वैसे आप लोग भी सर्वत्र जाओ-आओ॥५॥

यह अठारहवां वर्ग समाप्त हुआ॥ १८॥

पुनर्मनुष्यैः केन सहैतान्सम्प्रयोज्य कार्याणि साधनीयानीत्युपदिश्यते॥

फिर मनुष्यों को किस के साथ इनको युक्त करके कार्यों को सिद्ध करने चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

उपो॒ रथे॑षु पृष॒तीरयुग्ध्वं॒ प्रष्टि॑र्वहति॒ रोहि॑तः।
आ वो॒ याम॑ाय पृथि॒वी चि॑दश्रो॒दबी॑भयन्त॒ मानु॑षाः॥ ६॥

उपो॒ इति॑। रथे॑षु। पृष॒तीः। अ॒युग्ध्व॒म्। प्रष्टि॑ः। व॒ह॒ति॒। रोहि॑तः। आ। व॒ः। याम॑ाय। पृ॒थि॒वी। चि॒त्। अ॒श्रो॒त्। अबी॑भय॒न्त। मानु॑षाः॥ ६॥

पदार्थः-(**उपो**) सामीप्ये **(रथेषु)** स्थलजलान्तरिक्षाणां मध्ये रमणसाधनेषु यानेषु **(पृषतीः)** पर्षन्ति सिंचन्ति याभिस्ताः शीघ्रगतीः मरुतां धारणवेगादयोऽश्वाः। **पृषत्यो मरुतामित्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५) **(अयुग्ध्वम्)** सम्प्रयुङ्ध्वम्। अत्र लोडर्थे लुङ्। **बहुलं छन्दसि** इति विकरणाभावश्च। **(प्रष्टिः)** पृच्छन्ति ज्ञीप्सन्त्यनेन सः **(वहति)** प्रापयति **(रोहितः)** रक्तगुणविशिष्टस्याग्नेर्वेगादिगुणसमूहः। **रोहितोऽग्नेरित्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५)।[६] **(चित्)** एव **(अश्रोत्)** शृणोति। अत्र **बहुलं छन्दसि** इति विकरणाभावः। **(अबीभयन्त)** भीषयन्ते। अत्र लडर्थे लुङ् **(मानुषाः)** विद्वांसो जनाः॥६॥

अन्वयः-हे मानुषा! यूयं वो युष्माकं यामाय प्रष्टी रोहितोऽग्निः पृथिवी भूमावन्तरिक्षे गमनाय यान् वहति यस्य शब्दानश्रोदबीभयन्त तेषु रथेषु तं पृषतीश्चायुग्ध्वम्॥६॥

---

६. इस मन्त्र में 'आ, वः, यामाय, पृथिवी' ये चार पद छूटे हुए हैं।

भावार्थः-यदि मनुष्या यानेषु जलाग्निवायुप्रयोगान् कृत्वा तत्र स्थित्वा गमनागमने कुर्युस्तर्हि सुखेनैव सर्वत्र गन्तुमागन्तुं च शक्नुयुः॥६॥

पदार्थः-हे **(मानुषाः)** विद्वान् लोगो! तुम **(वः)** अपने **(यामाय)** स्थानान्तर में जाने के लिये **(पृष्टिः)** प्रश्नोत्तरादि विद्या व्यवहार से विदित **(रोहितः)** रक्तगुणयुक्त अग्नि **(पृथिवी)** स्थल जल अन्तरिक्ष में जिनको **(उपो वहति)** अच्छे प्रकार चलाता है जिनके शब्दों को **(अश्रोत्)** सुनते और **(अबीभयन्त)** भय को प्राप्त होते हैं, उन **(रथेषु)** रथों में **(पृषतीः)** वायुओं को **(अयुग्ध्वम्)** युक्त करो॥६॥

भावार्थः-जो मनुष्य यानों में जल, अग्नि और वायु को युक्त कर, उनमें बैठ, गमनागमन करें तो सुख ही से सर्वत्र जाने-आने को समर्थ हों॥६॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ वो॑ मक्षू तना॑य कं रुद्रा अवो॑ वृणीमहे।
गन्ता॑ नू॒नं नोऽव॑सा॒ यथा॑ पु॒रेत्था कण्वा॑य बि॒भ्युषे॑॥७॥

आ। वः। मक्षु। तनाय। कम्। रुद्राः। अवः। वृणीमहे। गन्त। नूनम्। नः। अवसा। यथा। पुरा। इत्था। कण्वाय। बिभ्युषे॥७॥

पदार्थः-**(आ)** समन्तात् **(वः)** युष्माकम् **(मक्षु)** शीघ्रम्। **ऋचि तुनुघमक्षु०** इति दीर्घः। **(तनाय)** यः सर्वस्मै सद्विद्या धर्मोपदेशेन सुखानि तनोति तस्मै। अत्र बाहुलकादौणादिकोऽन् प्रत्ययः। इदं सायणाचार्य्येण पचाद्यजित्यशुद्धं व्याख्यातम्। कुतोऽच् स्वराभावेन **ञ्नित्यादिर्नित्यम्** इत्याद्युदात्तस्याभिहितत्वात् **(कम्)** सुखम्। **कमिति सुखनामसु पठितम्।** (निघं०३.६) **(रुद्राः)** दुष्टरोदनकारकाश्चतुश्चत्वारिंशद् वर्षकृतब्रह्मचर्यविद्याः **(अवः)** अवन्ति येन तद्रक्षणादिकम् **(वृणीमहे)** स्वीकुर्महे **(गन्त)** प्राप्नुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **बहुलं छन्दसि** इति शपो लुक्। **तप्तनप्तन०** इति तबादेशः। **(नूनम्)** निश्चितार्थे **(नः)** **(अस्मभ्यम्)** **(अवसा)** रक्षणादिना **(यथा)** येन प्रकारेण **(पुरा)** पूर्वं पुराकल्पे वा **(इत्था)** अनेन प्रकारेण **(कण्वाय)** मेधाविने **(बिभ्युषे)** भयं प्राप्ताय॥७॥

अन्वयः-हे रुद्रा! यथा वयं वोऽवसा मक्षु नूनं कं वृणीमह इत्था यूयं नोऽवो गन्त यथा चेश्वरो बिभ्युषे तनाय कण्वाय रक्षां विधत्ते तथा यूयं च मिलित्वाऽखिलप्रजायाः पालनं सततं विदध्याम॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा मेधाविनो वाय्वादिद्रव्यगुणसम्प्रयोगेण भयं निवार्य सद्यः सुखिनो भवन्ति, तथाऽस्माभिरप्यनुष्ठेयमिति॥७॥

पदार्थः-हे **(रुद्राः)** दुष्टों के रोदन कराने वाले ४४ वर्ष पर्यन्त अखण्डित ब्रह्मचर्य सेवन से सकल विद्याओं को प्राप्त विद्वान् लोगो! **(यथा)** जैसे हम लोग **(वः)** आप लोगों के लिये **(अवसा)** रक्षादि से **(मक्षु)** शीघ्र **(नूनम्)** निश्चित **(कम्)** सुख को **(वृणीमहे)** सिद्ध करते हैं **(इत्था)** ऐसे तुम भी **(नः)** हमारे वास्ते **(अवः)** सुख वर्द्धक रक्षादि कर्म **(गन्त)** किया करो और जैसे ईश्वर **(बिभ्युषे)** दुष्ट प्राणी वा दुःखों से भयभीत **(तनाय)** सबको सद्विद्या और धर्म के उपदेश से सुखकारक **(कण्वाय)** आप्त विद्वान् के अर्थ रक्षा करता है, वैसे तुम और हम मिलके सब प्रजा की रक्षा सदा किया करें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मेधावी विद्वान् लोग वायु आदि के द्रव्य और गुणों के योग से भय को निवारण करके तुरन्त सुखी होते हैं, वैसे हम लोगों को भी होना चाहिये॥७॥

पुनः युष्माभिस्तेभ्यः किं साधनीयमित्युपदिश्यते

फिर तुम को उन से क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः॥८॥

युष्माऽइषितः। मरुतः। मर्त्यऽइषितः। आ। यः। नः। अभ्वः। ईषते। वि। तम्। युयोत। शवसा। वि। ओजसा। वि। युष्माकाभिः। ऊतिऽभिः॥८॥

पदार्थः-(**युष्मेषितः**) यो युष्माभिर्जेतुमिषितः सः। अत्र **छान्दसो वर्णलोपो वा** इति दकारलोपः। इमं सुगमपक्षं विहाय सायणाचार्येण प्रत्ययलक्षणादिकोलाहलः कृतः **(मरुतः)** ऋत्विजः। **मरुत इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१८) **(मर्त्येषितः)** मर्त्यैः सेनास्थैरितरैश्चेषितो विजयः **(आ)** समन्तात् यः शत्रुः **(नः)** अस्मान् **(अभ्वः)** यो विरोधी मित्रो न भवति सः **(ईषते)** हिनस्ति **(वि)** विगतार्थे **(तम्)** शत्रुम् **(युयोत)** पृथक् कुरुत। अत्र **बहुलं छन्दसि** इति शपः श्लुः। **तप्तनप्तन०** इति तबादेशः। **(शवसा)** बलयुक्त-सैन्येन **(वि)** विविधार्थे **(ओजसा)** पराक्रमेण **(वि)** विशिष्टार्थे **(युष्माकाभिः)** युष्माभिरनुकम्पिताभिः सेनाभिः **(ऊतिभिः)** रक्षाप्रीतितृप्त्यवगमप्रवेशयुक्ताभिः॥८॥

अन्वयः-हे मरुतो! यूयं योऽभ्वो युष्मेषितो मर्त्येषितः शत्रुर्नोऽस्मानीषते तं शवसा व्योजसा युष्माकाभिरूतिभिर्वियुयोत॥८॥

भावार्थः-मनुष्यैर्ये स्वार्थिनः परोपकारविरहाः परपीडारता अरयः सन्ति तान् विद्याशिक्षाभ्यां दुष्कर्मभ्यो निवर्त्याऽथवा परमे सेनाबले सम्पाद्य युद्धेन विजित्य निवार्य सर्वहितं सुखं विस्तारणीयम्॥८॥

पदार्थः-हे **(मरुतः)** विद्वानो! तुम **(यः)** जो **(अभ्वः)** विरोधी मित्र भाव रहित **(युष्मेषितः)** तुम लोगों को जीतने और **(मर्त्येषितः)** मनुष्यों से विजय की इच्छा करने वाला शत्रु **(नः)** हम लोगों को **(ईषते)** मारता है, उसको **(शवसा)** बलयुक्त सेना वा **(व्योजसा)** अनेक प्रकार के पराक्रम और

(युष्माकाभिः) तुम्हारी कृपापात्र **(ऊतिभिः)** रक्षा, प्रीति, तृप्ति, ज्ञान आदिकों से युक्त सेनाओं से **(वियुयोत)** विशेषता से दूर कर दीजिये॥८॥

भावार्थः-मनुष्यों को उचित है कि जो स्वार्थी, परोपकार से रहित, दूसरे को पीड़ा देने में अत्यन्त प्रसन्न शत्रु हैं, उनको विद्या वा शिक्षा के द्वारा खोटे कर्मों से निवृत्त कर वा उत्तम सेना बल को सम्पादन कर, युद्ध से जीत, उनका निवारण करके सब के हित का विस्तार करना चाहिये॥८॥

पुनस्तच्छोधिताः प्रेरिताः किं किं साध्नुवन्तीत्युपदिश्यते॥

फिर उन से शोधे वा प्रेरे हुए वे क्या-क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

असामि॒ हि प्र॑यज्यव॒: कण्व॑ दु॒द प्र॑चेतसः।
असा॑मिभिर्मरुत॒ आ न॑ ऊ॒तिभि॒र्गन्ता॑ वृ॒ष्टिं न वि॒द्युत॑:॥९॥

असा॑मि। हि। प्र॒ऽय॒ज्य॒व॒:। कण्व॑म्। दु॒द। प्र॒ऽचे॒त॒स॒:। असा॑मिऽभिः। म॒रु॒त॒:। आ। न॒:। ऊ॒तिऽभि॑:। गन्त॑। वृ॒ष्टिम्। न। वि॒ऽद्युत॑:॥९॥

पदार्थः-(**असामि**) सम्पूर्णम्। सामीति खण्डवाची। न साम्यसामि **(हि)** खलु **(प्रयज्यवः)** प्रकृष्टो यज्यु परोपकाराख्यो यज्ञो येषां राजपुरुषाणां तत्सम्बुद्धौ **(कण्वम्)** मेधाविनं विद्यार्थिनम् **(दद)** दत्त। अत्र लोडर्थे लिट्। **(प्रचेतसः)** प्रकृष्टं चेतो ज्ञानं येषां ते **(असामिभिः)** क्षयरहिताभिः रीतिभिः। अत्र **षै क्षय** इत्यस्माद् बाहुलकादौणादिको मि प्रत्ययः। **(मरुतः)** पूर्णबला ऋत्विजः **(आ)** समन्तात् **(नः)** अस्मभ्यम् **(ऊतिभिः)** रक्षादिभिः **(गन्त)** गच्छत। अत्र दीर्घः। **(वृष्टिम्)** वर्षाः **(न)** इव **(विद्युतः)** स्तनयित्नवः॥९॥

अन्वयः-हे प्रयज्यवः प्रचेतसो मरुतो! यूयं सामभिरुतिभिर्न विद्युतो वृष्टिं नोऽसामि सुखं सर्वस्मै दद हि किल शत्रुविजयाय कण्वमागन्त॥९॥

भावार्थः-अत्रोपमालङ्कारः। यथा मरुतः सूर्यविद्युतश्च वृष्टिं कृत्वा सर्वेषां प्राणिनां सुखाय विविधानि फलपत्रपुष्पदीन्युत्पादयन्ति। तथैव विद्वांसः सर्वेभ्यो मनुष्येभ्यो वेदविद्यां दत्त्वा सुखानि सम्पादयत्विति॥९॥

पदार्थः-हे **(प्रयज्वयः)** अच्छे प्रकार परोपकार करने **(प्रचेतसः)** उत्तम ज्ञानयुक्त **(मरुतः)** विद्वान् लोगो! तुम **(असामिभिः)** नाशरहित **(ऊतिभिः)** रक्षा सेना आदि से **(न)** जैसे **(विद्युतः)** सूर्य, बिजुली आदि **(वृष्टिम्)** वर्षा कर सुखी करते हैं, वैसे **(नः)** हम लोगों को **(असामि)** अखण्डित सुख **(दद)** दीजिये **(हि)** निश्चय से दुष्ट शत्रुओं को जीतने के वास्ते **(कण्वम्)** और आप्त विद्वान् के समीप नित्य **(आगन्त)** अच्छे प्रकार जाया कीजिए॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पवन, सूर्य, बिजुली आदि वर्षा करके सब प्राणियों के सुख के लिये अनेक प्रकार के फल, पत्र, पुष्प, अन्न आदि को उत्पन्न करते हैं, वैसे विद्वान् लोग भी सब प्राणिमात्र को वेदविद्या देकर उत्तम-उत्तम सुखों को निरन्तर सम्पादन करें॥९॥

पुनस्ते किं कुर्युरित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः।

ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम्॥ १०॥ १९॥

असामि। ओजः। बिभृथ। सुऽदानवः। असामि। धूतयः। शवः। ऋषिऽद्विषे। मरुतः। परिमन्यवे। इषुम्। न। सृजत। द्विषम्॥ १०॥

पदार्थः-(**असामि**) अखिलम् (**ओजः**) विद्यापराक्रमम् (**बिभृथ**) धरत तेन पुष्यत वा। अत्र **अन्येषामपि०** इति दीर्घः। (**सुदानवः**) शोभनं दानुर्दानं येषां तत्सम्बुद्धौ (**असामि**) पूर्णम् (**धूतयः**) ये धून्वन्ति ते (**शवः**) बलम् (**ऋषिद्विषे**) वेदवेदविदीश्वरविरोधिने दुष्टाय मनुष्याय (**मरुतः**) ऋत्विजः (**परिमन्यवः**) परितः सर्वतो मन्युः क्रोधो येषां वीराणां ते (**इषुम्**) बाणादिशस्त्रसमूहम् (**न**) इव (**सृजत**) प्रक्षिपत (**द्विषम्**) शत्रुम्॥ १०॥

अन्वयः-हे धूतयः सुदानवो मरुत ऋत्विजो! यूयं परिमन्यवो द्विषं शत्रुं प्रतीषुं शस्त्रसमूहं प्रक्षिपन्ति नर्षिद्विषेऽसाम्योजोऽसामि शवो बिभृथ ब्रह्मद्विषं शत्रुं प्रति शस्त्राणि सृजत प्रक्षिपत॥ १०॥

भावार्थः-अत्रोपमालङ्कारः। यथा धार्मिका जातक्रोधाः शूरवीराः शस्त्रप्रहारैः शत्रून् विजित्य निष्कण्टकराज्यं प्राप्य प्रजाः सुखयन्ति। तथैव सर्वे मनुष्या वेदविद्याविद्वदीश्वरद्वेष्टॄन् प्रत्यखिलाभ्यां बलपराक्रमाभ्यां शस्त्राऽस्त्राणि प्रक्षिप्यैतान् विजित्य वेदविद्येश्वरप्रकाशयुक्तं राज्यं निष्पादयन्तु॥ १०॥

अत्र वायुविद्वद्गुणवर्णनात् पूर्वसूक्तार्थेन सहास्य सङ्गतिरस्तीति बोध्यम्।

इत्येकोनचत्वारिंशं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**धूतयः**) दुष्टों को कम्पाने (**सुदानवः**) उत्तम दान स्वभाव वाले (**मरुतः**) विद्वान् लोगो! तुम (**न**) जैसे (**परिमन्यवः**) सब प्रकार क्रोधयुक्त शूरवीर मनुष्य (**द्विषम्**) शत्रु के प्रति (**इषुम्**) बाण आदि शस्त्र समूहों को छोड़ते हैं, वैसे (**ऋषिद्विषे**) वेद, वेदों को जानने वाले और ईश्वर के विरोधी दुष्ट मनुष्यों के लिये (**असामि**) अखिल (**ओजः**) विद्या पराक्रम (**असामि**) सम्पूर्ण (**शवः**) बल को (**बिभृथ**) धारण करो और उस शत्रु के प्रति शस्त्र वा अस्त्रों को (**सृजत**) छोड़ो॥ १०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे धार्मिक शूरवीर मनुष्य क्रोध को उत्पन्न कर शस्त्रों के प्रहारों से शत्रुओं को जीत निष्कण्टक राज्य को प्राप्त होकर प्रजा को सुखी करते हैं, वैसे ही सब मनुष्य वेद, विद्वान् वा ईश्वर के विरोधियों के प्रति सम्पूर्ण बल पराक्रमों से शस्त्र को छोड़, उनको जीत कर, ईश्वर वेद विद्या और विद्वान् युक्त राज्य का सम्पादन करें॥ १०॥

इस सूक्त में वायु और विद्वानों के गुण वर्णन करने से पूर्व सूक्तार्थ के साथ इस सूक्त के अर्थ की सङ्गति जाननी चाहिये।

यह उनतालीसवां सूक्त और उन्नीसवां वर्ग समाप्त हुआ॥ ३९॥ १९॥

अथाष्टर्चस्य चत्वारिंशस्य घोरपुत्रः कण्व ऋषिः। ब्रह्मणस्पतिर्देवता। २,८ निचृदुपरिष्टाद् बृहती छन्दः। ५ पथ्या बृहती छन्दः। मध्यमः स्वरः। ३,७ आर्ची त्रिष्टुप् छन्दः। धैवतः स्वरः। ४,६ शतः पङ्क्तिर्निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्मनुष्यैर्वेदविदङ्कथमुपदिशेदित्युपदिश्यते॥

फिर मनुष्यों को उचित है कि वेदविद जनों को कैसे उपदेश करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा॥ १॥

उत्। तिष्ठ। ब्रह्मणः। पते। देवयन्तः। त्वा। ईमहे। उप। प्र। यन्तु। मरुतः। सुऽदानवः। इन्द्र। प्राशूः। भव। सचा॥ १॥

पदार्थः-(**उत्**) उत्कृष्टार्थे (**तिष्ठ**) (**ब्रह्मणः**) वेदस्य (**पते**) स्वामिन् (**देवयन्तः**) सत्यविद्याः कामयमानाः (**त्वा**) त्वाम् (**ईमहे**) जानीमः (**उप**) सामीप्ये (**प्र**) प्रतीतार्थे (**यन्तु**) प्राप्नुवन्तु (**मरुतः**) आर्त्विजीना विद्वांसः (**सुदानवः**) शोभनं दानुर्दानं येषां ते (**इन्द्र**) विद्यादिपरमैश्वर्यप्रद (**प्राशूः**) यः प्राश्नुते प्रकृष्टतया व्याप्नोति सः (**भव**) **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सचा**) समवेतेन विज्ञानेन॥ १॥

अन्वयः-हे ब्रह्मणस्पत इन्द्र! यथा सचा सह देवयन्तः सुदानवो मरुतो वयं त्वेमहे यथा च सर्वे जना उपप्रयन्तु तथा त्वं प्राशूः सर्वसुखप्रापको भव सर्वस्य हितायोत्तिष्ठ॥ १॥

भावार्थः-मनुष्या यत्नतो विद्वत्सङ्गसेवाविद्यायोगधर्मसर्वोपकाराद्युपायैः सर्वविद्याधीशस्य परमेश्वरस्य विज्ञानेन प्राप्तानि सर्वाणि सुखानि प्राप्तव्यानि प्रापयितव्यानि च॥ १॥

पदार्थः-हे (**ब्रह्मणस्पते**) वेद की रक्षा करने वाले (**इन्द्र**) अखिल विद्यादिपरमैश्वर्ययुक्त विद्वन्! जैसे (**सचा**) विज्ञान से (**देवयन्तः**) सत्य विद्याओं की कामना करने (**सुदानवः**) उत्तम दान स्वभाव वाले (**मरुतः**) विद्याओं के सिद्धान्तों के प्रचार के अभिलाषी हम लोग (**त्वा**) आप को (**ईमहे**) प्राप्त होते और जैसे सब धार्मिक जन (**उपप्रयन्तु**) समीप आवें, वैसे आप (**प्राशूः**) सब सुखों के प्राप्त कराने वाले (**भव**) हूजिये और सब के हितार्थ प्रयत्न कीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्य अति पुरुषार्थ से विद्वानों का संग, उनकी सेवा विद्या, योग, धर्म और सब का उपकार करना आदि उपायों से समग्र विद्याओं के अध्येता, परमात्मा के विज्ञान और प्राप्ति से सब मनुष्यों को प्राप्त हों और इसी से अन्य सबको सुखी करें॥ १॥

पुनरेतैः परस्परं कथं वर्त्तितव्यमित्याह॥

फिर ये लोग आपस में कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते।

सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके॥ २॥

त्वाम् इत्। हि। सहसः। पुत्र। मर्त्यः। उपऽब्रूते। धने। हिते। सुऽवीर्यम्। मरुतः। आ। सुऽअश्व्यम्। दधीत। यः। वः। आऽचके॥ २॥

पदार्थः-(**त्वाम्**) (**इत्**) एव (**हि**) खलु (**सहसः**) शरीरात्मबलयुक्तस्य विदुषः (**पुत्र**) (**मर्त्यः**) मनुष्यः (**उपब्रूते**) सर्वा विद्यामुपदिशेत् (**धने**) विद्यादिगुणसमूहे (**हिते**) सुखसम्पादके (**सुवीर्यम्**) शोभनं वीर्यं पराक्रमो यस्मिंस्तत् (**मरुतः**) धीमन्तो जनाः (**आ**) समन्तात् (**स्वश्व्यम्**) शोभनेष्वश्वेषु विद्याव्याप्तविषयेषु साधुम् (**दधीत**) धरत (**यः**) विद्वान् (**वः**) युष्मान् (**आचके**) सर्वतस्सुखैस्तर्प्पयेत्॥ २॥

अन्वयः-हे सहसस्पुत्र! यो मर्त्यो विद्वांस्त्वामुपब्रूते हे मरुतो! यूयं यो वो हिते धन आचके तस्मादेव स्वश्व्यं वीर्यं यूयं दधत॥ २॥

भावार्थः-मनुष्या अध्ययनाऽध्यापनादिव्यवहारेणैव परस्परमुपकृत्य सुखिनः सन्तु॥ २॥

पदार्थः-हे (**सहसस्पुत्र**) ब्रह्मचर्य और विद्यादि गुणों से शरीर आत्मा के पूर्ण बलयुक्त के पुत्र! (**यः**) जो (**मर्त्यः**) विद्वान् मनुष्य (**त्वाम्**) तुझ को सब विद्या (**उपब्रूते**) पढ़ाता हो और (**मरुतः**) बुद्धिमान् लोगो! आप जो (**वः**) आप लोगों को (**हिते**) कल्याणकारक (**धने**) सत्यविद्यादि धन में (**आचके**) तृप्त करे (**इत्**) उसी के लिये (**स्वश्व्यम्**) उत्तम विद्या विषयों में उत्पन्न (**सुवीर्यम्**) अत्युत्तम पराक्रम को तुम लोग धारण करो॥ २॥

भावार्थः-मनुष्य लोग पढ़ने-पढ़ाने आदि धर्मयुक्त कर्मों ही से एक-दूसरे का उपकार करके सुखी हों॥ २॥

पुनस्तैः मिथः कथं वर्तितव्यमित्याह॥

फिर ये लोग अन्योऽन्य कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः॥ ३॥

प्र। एतु। ब्रह्मणः। पतिः। प्र। देवी। एतु। सूनृता। अच्छ। वीरम्। नर्यम्। पङ्क्तिऽराधसम्। देवाः। यज्ञम्। नयन्तु। नः॥ ३॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**एतु**) प्राप्नोतु (**ब्रह्मणः**) चतुर्वेदविदः (**पतिः**) पालयिता (**प्र**) प्रतीतार्थे (**देवी**) सर्वशास्त्रबोधेन देदीप्यमाना (**एतु**) प्राप्नोतु (**सूनृता**) प्रियसत्याचरणलक्षणवाणीयुक्ता (**अच्छ**) शुद्धार्थे। अत्र **निपातस्य च** (अष्टा०६.३.१३६) इति दीर्घः। (**वीरम्**) पूर्णशरीरात्मबलप्रदम्। (**नर्यम्**) नरेषु साधुं हितकारिणम् (**पङ्क्तिराधसम्**) यः पङ्क्तीर्धर्मात्मवीरमनुष्यसमूहान् राध्नोति यद्वा पङ्क्त्यर्थं

राधोऽन्नं यस्य तम् **(देवाः)** विद्वांसः **(यज्ञम्)** पठनपाठनश्रवणोपदेशाख्यम् **(नयन्तु)** प्रापयन्तु **(नः)** अस्मान्॥३॥

अन्वयः-हे विद्वन्! ब्रह्मणः पतिर्भवान् यं पङ्क्तिराधसं नर्यमच्छा वीरं सुखप्रापकं यज्ञं प्रैतु। हे विदुषि! सूनृता देवी सती भवत्यप्येतं प्रैतु तं नो देवाः प्रणयन्तु॥३॥

भावार्थः-सर्वैर्मनुष्यैरिदं कर्त्तव्यमाकांक्षितव्यं च यतो विद्यावृद्धिः स्यादिति॥३॥

पदार्थः-हे विद्वान्! **(ब्रह्मणः)** वेदों का **(पतिः)** प्रचार करने वाले! आप जिस **(पङ्क्तिराधसम्)** धर्मात्मा और वीर पुरुषों को सिद्धकारक **(अच्छावीरम्)** शुद्ध पूर्ण शरीर आत्मबलयुक्त वीरों की प्राप्ति के हेतु **(यज्ञम्)** पठन-पाठन, श्रवण आदि क्रियारूप यज्ञ को **(प्रैतु)** प्राप्त होते और हे विद्यायुक्त स्त्री! **(सूनृता)** उस वेदवाणी की शिक्षा सहित **(देवी)** सब विद्या सुशीलता से प्रकाशमान होकर आप भी जिस यज्ञ को प्राप्त हो, उस यज्ञ को **(देवाः)** विद्वान् लोग **(नः)** हम लोगों को **(प्रणयन्तु)** प्राप्त करावें॥३॥

भावार्थः-सब मनुष्यों को ऐसी इच्छा करनी चाहिये कि जिससे विद्या की वृद्धि होती जाये॥३॥

विद्वद्भिरितरैर्मनुष्यैश्च परस्परं किं कर्त्तव्यमित्युपदिश्यते॥

विद्वान् और अन्य मनुष्यों को एक दूसरे के साथ क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

यो वाघते ददाति सूनरं वसु स धत्ते अक्षितिं श्रवः।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम्॥४॥

यः। वाघते। ददाति। सूनरम्। वसु। सः। धत्ते। अक्षितिं। श्रवः। तस्मै। इळाम्। सुऽवीराम्। आ। यजामहे। सुऽप्रतूर्तिम्। अनेहसम्॥४॥

पदार्थः-**(यः)** मनुष्यः **(वाघते)** ऋत्विजे **(ददाति)** प्रयच्छति **(सूनरम्)** शोभना नरा यस्मात्तत् **(वसु)** धनम्। **वस्विति धननामसु पठितम्।** (निघं०२.१०) **(सः)** मनुष्यः **(धत्ते)** धरति **(अक्षिति)** अविद्यमानाक्षितिः क्षयो यस्य तत् **(श्रवः)** शृण्वन्ति सर्वा विद्या येनान्नेन तत् **(तस्मै)** मनुष्याय **(इडाम्)** पृथिवीं वाणीं वा **(सुवीराम्)** शोभना वीरा यस्यां ताम् **(आ)** समन्तात् **(यजामहे)** प्राप्नुयाम् **(सुप्रतूर्त्तिम्)** सुष्ठु प्रकृष्टा तूर्त्तिस्त्वरिता प्राप्तिर्यया ताम् **(अनेहसम्)** हिंसितुमनर्हां रक्षितुं योग्याम्॥४॥

अन्वयः-यो मनुष्यो वाघते सूनरं वसु ददाति यामनेहसं सुप्रतूर्त्तिं सुवीरामिडां वयमायजामहे तेन तया च सोऽक्षिति श्रवो धत्ते॥४॥

भावार्थः-यो मनुष्यः शरीरवाङ्मनोभिर्विदुषः सेवते स एवाक्षयां विद्यां प्राप्य पृथिवीराज्यं भुक्त्वा मुक्तिमाप्नोति। ये वाग्विद्यां प्राप्नुवन्ति ते विद्वांसोऽन्यान् विदुषः कर्त्तुं शक्नुवन्ति नेतरे॥४॥

पदार्थः-(**यः**) जो मनुष्य (**वाघते**) विद्वान् के लिये (**सूनरम्**) जिससे उत्तम मनुष्य हों उस (**वसु**) धन को (**ददाति**) देता है और जिस (**अनेहसम्**) हिंसा के अयोग्य (**सुप्रतूर्त्तिम्**) उत्तमता से शीघ्र प्राप्ति कराने (**सुवीराम्**) जिससे उत्तम शूरवीर प्राप्त हों (**इडाम्**) पृथिवी वा वाणी को हम लोग (**आयजामहे**) अच्छे प्रकार प्राप्त होते हैं, उससे (**सः**) वह पुरुष (**अक्षिति**) जो कभी क्षीणता को न प्राप्त हो उस (**श्रवः**) धन और विद्या के श्रवण को (**धत्ते**) धारण करता है॥४॥

भावार्थः-जो मनुष्य शरीर, वाणी, मन और धन से विद्वानों का सेवन करता है, वही अक्षय विद्या को प्राप्त हो और पृथिवी के राज्य को भोग कर मुक्ति को प्राप्त होता है। जो पुरुष वाणी, विद्या को प्राप्त होते हैं, वे विद्वान् दूसरे को भी पण्डित कर सकते हैं, आलसी अविद्वान् पुरुष नहीं॥४॥

अथेश्वरः कीदृश इत्युपदिश्यते।

अब ईश्वर कैसा है, उसका उपदेश अगले मन्त्र में किया है॥

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे॥५॥२०॥

प्र। नूनम्। ब्रह्मणः। पतिः। मन्त्रम्। वदति। उक्थ्यम्। यस्मिन्। इन्द्रः। वरुणः। मित्रः। अर्यमा। देवाः। ओकांसि। चक्रिरे॥५॥

पदार्थः-(**प्र**) (**नूनम्**) निश्चये (**ब्रह्मणः**) बृहतो जगतो वेदस्य वा (**पतिः**) न्यायाधीशः स्वामी (**मन्त्रम्**) वेदस्थमन्त्रसमूहम् (**वदति**) उपदिशति (**उक्थ्यम्**) वक्तुं श्रोतुं योग्येषु ऋग्वेदादिषु भवम् (**यस्मिन्**) जगदीश्वरे (**इन्द्रः**) विद्युत् (**वरुणः**) चन्द्रसमुद्रतारकादिसमूहः (**मित्रः**) प्राणः (**अर्य्यमा**) वायुः (**देवाः**) पृथिव्यादयो लोका विद्वांसो वा (**ओकांसि**) गृहाणि (**चक्रिरे**) कृतवन्तः सन्ति॥५॥

अन्वयः-यो ब्रह्मणस्पतिरीश्वरो नूनमुक्थ्यं मन्त्रं प्रवदति यस्मिन्निन्द्रो वरुणो मित्रो अर्य्यमा देवाश्चौकांसि चक्रिरे तमेव वयं यजामहे॥५॥

भावार्थः-हे मनुष्या! येनेश्वरेण वेदा उपदिष्टा यः सर्वजगदभिव्याप्य स्थितोऽस्ति, यस्मिन् सर्वे पृथिव्यादयो लोकास्तिष्ठन्ति, मुक्तिसमये विद्वांसश्च निवसन्ति, स एव सर्वैर्मनुष्यैरुपास्योऽस्ति, न चास्माद्भिन्नोऽन्यः॥५॥

पदार्थः-जो (**ब्रह्मणस्पतिः**) बड़े भारी जगत् और वेदों का पति स्वामी न्यायाधीश ईश्वर (**नूनम्**) निश्चय करके (**उक्थ्यम्**) कहने-सुनने योग्य वेदवचनों में होने वाले (**मन्त्रम्**) वेदमन्त्र समूह का (**प्रवदति**) उपदेश करता है वा (**यस्मिन्**) जिस जगदीश्वर में (**इन्द्रः**) बिजुली (**वरुणः**) समुद्र, चन्द्र, तारे आदि लोकान्तर (**मित्रः**) प्राण (**अर्यमा**) वायु और (**देवाः**) पृथिवी आदि लोक और विद्वान् लोग (**ओकांसि**) स्थानों को (**चक्रिरे**) किये हुए हैं, उसी परमेश्वर का हम लोग सत्कार करें॥५॥

भावार्थः-मनुष्यों को उचित है कि जिस ईश्वर ने वेदों का उपदेश किया है, जो सब जगत् में व्याप्त होकर स्थित है, जिसमें सब पृथिवी आदि लोक रहते और मुक्ति समय में विद्वान् लोग निवास करते हैं, उसी परमेश्वर की उपासना करनी चाहिये, इससे भिन्न किसी की नहीं॥५॥

अथ सर्वमनुष्याऽर्था वेदाः सन्तीत्युपदिश्यते॥

अब अगले मन्त्र में सब मनुष्यों के लिये वेदों के पढ़ने का अधिकार है, इस विषय का उपदेश अगले मन्त्र में किया है॥

तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम्।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत्॥६॥

तम्। इत्। वोचेम। विदथेषु। शम्ऽभुवम्। मन्त्रम्। देवाः। अनेहसम्। इमाम्। च। वाचम्। प्रतिऽहर्यथ। नरः। विश्वा। इत्। वामा। वः। अश्नवत्॥६॥

पदार्थः-(**तम्**) वेदम् (**इत्**) एव (**वोचेम**) उपदिशेम। **अन्येषामपि** इति दीर्घः। (**विदथेषु**) विज्ञानेषु पठनपाठनव्यवहारेषु कर्तव्येषु सत्सु। **विदथानि वेदनानि विदथानि प्र चोदयादित्यपि निगमो भवति।** (निरु०६.७) (**शंभुवम्**) शं कल्याणं यस्मात्तम्। अत्र शम्युपपदे **भुवः संज्ञान्तरयोः** (अष्टा०३.२.१७९) इति क्विप् **कृतो बहुलम्** इति हेतौ (**मन्त्रम्**) मन्यन्ते गुप्ताः पदार्थाः परिभाषन्ते येन तम्। **मन्त्रा मननात्।** (निरु०७.१२) (**देवाः**) विद्वांसः (**अनेहसम्**) अहिंसनीयं सर्वदा रक्ष्यं निर्दोषम्। अत्र **नञि हन एह च।** (उणा०४.२३१) इति नञ्पूर्वकस्य हन् धातोः प्रयोगः। (**इमाम्**) वेदचतुष्टयीम् (**च**) सत्यविद्यान्वयसमुच्चये (**वाचम्**) वाणीम् (**प्रतिहर्यथ**) पुनः पुनर्विजानीथ। अत्र **अन्येषामपि** इति दीर्घः। (**नरः**) विद्यानेतारः (**विश्वा**) सर्वा (**इत्**) यदि (**वामा**) प्रशस्ता वाक्। **वाम इति प्रशस्यनामसु पठितम्।** (निघं०३.८) (**वः**) युष्मान् युष्मभ्यं वा (**अश्नवत्**) प्राप्नुयात्। अयं लेट् प्रयोगो व्यत्ययेन परस्मैपदं च॥६॥

अन्वयः-हे देवा विद्वांसो! वो युष्मभ्यं वयं विदथेषु यमनेहसं मन्त्रं वोचेम तमिद्यूयं विजानीत। हे नरो! यूयमिद्यदीमां वाचं प्रति हर्यथ तर्हि विश्वा सर्वा वामा प्रशस्तेऽयं वाक् वो युष्मानश्नवत् व्याप्नुयात्॥६॥

भावार्थः-विद्वद्भिर्विद्याप्रचाराय सर्वेभ्यो मनुष्येभ्यो नित्यं सार्थाः साङ्गाः सरहस्याः सस्वरहस्तक्रिया वेदा उपदेष्टव्याः। यदि कश्चित्सुखमिच्छेत्सङ्गेन वेदविद्यां प्राप्नुयात्। नैतया विना कस्यचित्सत्यं सुखं भवति। तस्मादध्यापकैरध्येतृभिश्च प्रयत्नेन सकला वेदा ग्राहयितव्या ग्रहीतव्याश्चेति॥६॥

पदार्थः-हे **(देवाः)** विद्वानो! **(वः)** तुम लोगों के लिये हम लोग **(विदथेषु)** जानने योग्य पढ़ने-पढ़ाने आदि व्यवहारों में जिस **(अनेहसम्)** अहिंसनीय सर्वदा रक्षणीय दोषरहित **(शंभुवम्)** कल्याणकारक **(मन्त्रम्)** पदार्थों को मनन कराने वाले मन्त्र अर्थात् श्रुति समूह को **(वोचेम)** उपदेश करें। **(तम्)** उस वेद को **(इत्)** ही तुम लोग ग्रहण करो **(इत्)** जो **(इमाम्)** इस **(वाचम्)** वेदवाणी को **(प्रतिहर्य्यथ)** बार-बार जानो तो **(विश्वा)** सब **(वामा)** प्रशंसनीय वाणी **(वः)** तुम लोगों को **(अश्नवत्)** प्राप्त होवे॥६॥

भावार्थः-विद्वानों को योग्य है कि विद्या के प्रचार के लिये मनुष्यों को निरन्तर अर्थ, अङ्ग, उपाङ्ग, रहस्य, स्वर और हस्तक्रिया सहित वेदों को उपदेश करें और ये लोग अर्थात् मनुष्यमात्र इन विद्वानों से सब वेद विद्या को साक्षात् करें। जो कोई पुरुष सुख चाहे तो वह विद्वानों के संग से विद्या को प्राप्त करे तथा इस विद्या के विना किसी को सत्य सुख नहीं होता, इससे पढ़ने-पढ़ाने वालों को प्रयत्न से सकल विद्याओं को ग्रहण करना वा कराना चाहिये॥६॥

कश्चिदेव विद्वांसं प्राप्य विद्याग्रहणं कर्तुं शक्नोतीत्युपदिश्यते॥

कोई ही मनुष्य विद्वान् मनुष्य को प्राप्त होकर विद्या को ग्रहण कर सकता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम्।
प्रप्र दाश्वान् पस्त्याभिरस्थितान्तर्वावत् क्षयं दधे॥७॥

कः। देवऽयन्तम्। अश्नवत्। जनम्। कः। वृक्तऽबर्हिषम्। प्रऽप्र। दाश्वान्। पस्त्याभिः। अस्थित। अन्तःऽवावत्। क्षयम्। दधे॥७॥

पदार्थः-(**कः**) कश्चिदेव **(देवयन्तम्)** देवानां कामयितारम् **(अश्नवत्)** प्राप्नुयात्। लेट् प्रयोगोऽयम्। **(जनम्)** सकलविद्याऽऽविर्भूतम् **(कः)** कश्चिदेव **(वृक्तबर्हिषम्)** सर्वविद्यासु कुशलमृत्विजम् **(प्रप्र)** प्रत्यर्थे। अत्र **प्रसमुपोदः पादपूरणे।** (अष्टा०८.१.६) इति द्वित्वम्। **(दाश्वान्)** दानशीलः **(पस्त्याभिः)** पस्त्यानि गृहाणि विद्यन्ते यासु भूमिषु ताभिः। **पस्त्यमिति गृहनामसु पठितम्।** (निघं०३.४) ततः **अर्शआदिभ्योऽच्** (अष्टा०५.२.१२७)[७]। **(अस्थित)** प्रतिष्ठते **(अन्तर्वावत्)** अन्तर्मध्ये वाति गच्छति सोऽतर्वा वायुः स विद्यते यस्मिन् गृहे तत् **(क्षयम्)** क्षियन्ति निवसन्ति यस्मिँस्तत्। अत्र **क्षि निवासगत्यो**रित्यस्मात् **एरच्।** (अष्टा०३.३.५६) इत्यच्। **भयादीनामिति वक्तव्यम्।** (अष्टा०३.३.५६) इति नपुंसकत्वम्। **(दधे)** धरेत्। **(अत्र)** लिङर्थे लिट्॥७॥

---

७. इत्यनेन मत्वर्थीयोऽच्। सं०

अन्वयः-को मनुष्या देवयन्तं कश्च वृक्तबर्हिषं जनमश्नवत् प्राप्नुयात् को दाश्वान् प्रास्थित प्रतिष्ठिते को विद्वान् पस्त्याभिरन्तर्वावत् क्षयं गृहं दधे धरेत्॥७॥

भावार्थः-नैव सर्वे मनुष्या विद्याप्रचारकामं विद्वांसं प्राप्नुवन्ति नहि समस्ता दाश्वांसो भूत्वा सर्वर्तु सुखं गृहं धर्तुं शक्नुवन्ति, किन्तु कश्चिदेव भाग्यशाल्येतत्प्राप्तुमर्हतीति॥७॥

पदार्थः-(**कः**) कौन मनुष्य (**देवयन्तम्**) विद्वानों की कामना करते और (**कः**) कौन (**वृक्तबर्हिषम्**) सब विद्याओं में कुशल सब ऋतुओं में यज्ञ करने वाले (**जनम्**) सकल विद्याओं में प्रकट हुए मनुष्य को (**अश्नवत्**) प्राप्त तथा कौन (**दाश्वान्**) दानशील पुरुष (**प्रास्थित**) प्रतिष्ठा को प्राप्त होवे और कौन (**पस्त्याभिः**) उत्तमगृह वाली भूमि में (**अन्तर्वावत्**) सब के अन्तर्गत चलने वाले वायु से युक्त (**क्षयम्**) निवास करने योग्य घर को (**दधे**) धारण करे॥७॥

भावार्थः-सब मनुष्य विद्या प्रचार की कामना वाले उत्तम विद्वान् को नहीं प्राप्त होते और न सब दानशील होकर सब ऋतुओ में सुखरूप घर को धारण कर सकते हैं, किन्तु कोई ही भाग्यशाली विद्वान् मनुष्य इन सबको प्राप्त हो सकता है॥७॥

एतल्लक्षणस्य विदुषः कीदृशं राज्यं भवतीत्युपदिश्यते॥

ऐसे विद्वान् का कैसा राज्य होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उप॑ क्ष॒त्रं पृ॑ञ्ची॒त हन्ति॒ राज॑भिर्भ॒ये चि॑त्सुक्षि॒तिं द॑धे।
नास्य॑ व॒र्ता न त॑रु॒ता म॑हाध॒ने नार्भे॑ अस्ति व॒ज्रिण॑:॥८॥२१॥

उप॑। क्ष॒त्रम्। पृ॒ञ्ची॒त। हन्ति॑। राज॑ऽभिः। भ॒ये। चि॒त्। सु॒ऽक्षि॒तिम्। द॒धे॒। न। अ॒स्य॒। व॒र्ता। न। त॒रु॒ता। म॒हाऽध॒ने। न। अर्भे॑। अ॒स्ति॒। व॒ज्रिण॑:॥८॥

पदार्थः-(**उप**) सामीप्ये (**क्षत्रम्**) राज्यम् (**पृञ्चीत**) सम्बध्नीत (**हन्ति**) नाशयति (**राजभिः**) राजपूतैः सह (**भये**) बिभेति यस्मात्तस्मिन् (**चित्**) अपि (**सुक्षितिम्**) शोभना क्षितिर्भूमिर्यस्मिन् व्यवहारे तम्। अत्र **लोपस्त आत्मनेपदेषु** इति त लोपः। (**न**) निषेधार्थे (**अस्य**) पूर्वोक्तलक्षणाऽन्वितस्य सर्वसभाध्यक्षस्य (**वर्त्ता**) विपरिवर्तयिता। अत्र वृणोतेस्तृच् **छन्दस्युभयथा** इति सार्वधातुकत्वादिडभावः। (**न**) निषेधार्थे (**तरुता**) संप्लवनकर्त्ता। अत्र **ग्रसित०** (अष्टा०७.२.२४) इति निपातनम्। (**महाधने**) पुष्कलधनप्रापके संग्रामे (**अर्भे**) अल्पे युद्धे (**अस्ति**) भवति (**वज्रिणः**) बलिनः। **वज्रो वै वीर्यम्।** (शत० ७.४.२.२४)॥८॥

अन्वयः-यः क्षत्रं पृञ्चीत सुक्षितिं दधेऽस्य वज्रिणो राजभिः सङ्गे भये स्वकीयान् जनाञ्च्छत्रुर्न हन्ति महाधने युद्धे वर्त्ता विपरिवर्त्तयिता नास्त्यर्भे युद्धे चिदपि तरुता बलस्योल्लङ्घयिता नास्ति॥८॥

भावार्थः-ये राजपुरुषा महाधनेऽल्पे वा युद्धे शत्रून् विजित्य बध्वा वा निवारयितुं धर्मेण राज्यं पालयितुं शक्नुवन्ति, त इहानन्दं भुक्त्वा प्रेत्यापि महानन्दं भुञ्जते॥८॥

अथैकोनचत्वारिंशत्सूक्तोक्तेन विद्वत्कृत्यार्थेन सह ब्रह्मणस्पत्यादीनामर्थानां सम्बन्धात् पूर्वेण सूक्तार्थेन सहैतदर्थस्य सङ्गतिरस्तीति बोध्यम्।

इति चत्वारिंशं सूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-जो मनुष्य **(क्षत्रम्)** राज्य को **(पृञ्चीत)** सम्बन्ध तथा **(सुक्षितिम्)** उत्तमोत्तम भूमि की प्राप्ति कराने वाले व्यवहार को **(दधे)** धारण करता है **(अस्य)** इस सर्व सभाध्यक्ष **(वज्रिणः)** बली के **(राजभिः)** रजपूतों के साथ **(भये)** युद्ध भीति में अपने मनुष्यों को कोई भी शत्रु **(न)** नहीं **(हन्ति)** मार सकता **(न)** **(महाधने)** नहीं महाधन की प्राप्ति के हेतु बड़े युद्ध में **(वर्त्ता)** विपरीत वर्त्तनेवाला और **(न)** इस वीर्य वाले के समीप **(अर्भे)** छोटे युद्ध में **(चित्)** भी **(तरुता)** बल को उल्लङ्घन करने वाला कोई **(अस्ति)** होता है॥८॥

भावार्थः-जो राजपूत लोग महाधन की प्राप्ति के निमित्त बड़े बुद्ध वा थोड़े युद्ध में शत्रुओं को जीत वा बाँध के निवारण करने और धर्म से प्रजा का पालन करने को समर्थ होते हैं, वे इस संसार में आनन्द को भोग कर परलोक में भी बड़े भारी आनन्द को भोगते हैं॥८॥

अब उनतालीसवें सूक्त में कहे हुए विद्वानों के कार्यरूप अर्थ के साथ ब्रह्मणस्पति आदि शब्दों के अर्थों के सम्बन्ध से पूर्वसूक्त की सङ्गति जाननी चाहिये॥

यह चालीसवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥४०॥२१॥

अथ नवर्चस्यैकचत्वारिंशस्य सूक्तस्य घोरः कण्व ऋषिः। १-३, ७-९ वरुणमित्रार्यम्णः। ४-६ आदित्याश्च देवताः। १,४,५,८ गायत्री। २,३,६, विराड्गायत्री। ७,९ निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

अनेकैः सुरक्षितोऽपि कदाचिच्छत्रुणा पीड्यत इत्युपदिश्यते॥

अनेक वीरों से रक्षित भी राजा कभी शत्रु से पीड़ित होता ही है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा।
नू चित्स दभ्यते जनः॥ १॥

यम्। रक्षन्ति। प्रऽचेतसः। वरुणः। मित्रः। अर्यमा। नु। चित्। सः। दभ्यते। जनः॥ १॥

पदार्थः-(**यम्**) सभासेनेशं मनुष्यं (**रक्षन्ति**) पालयन्ति (**प्रचेतसः**) प्रकृष्टं चेतो विज्ञानं येषान्ते (**वरुणः**) उत्तमगुणयोगेन श्रेष्ठत्वात् सर्वाध्यक्षत्वार्हः (**मित्रः**) सर्वसुहृत् (**अर्यमा**) पक्षपातं विहाय न्यायं कर्त्तुं समर्थः (**नु**) सद्यः। अत्र **ऋचि तुनु०** इति दीर्घः। (**चित्**) एव (**सः**) रक्षितः (**दभ्यते**) हिंस्यते (**जनः**) प्रजासेनास्थो मनुष्यः॥१॥

अन्वयः-प्रचेतसो वरुणो मित्रोऽर्यमा चैते यं रक्षन्ति स चिदपि कदाचिन्नु दभ्यते॥१॥

भावार्थः-मनुष्यैः सर्वोत्कृष्टः सेनासभाध्यक्षः सर्वमित्रो दूतोऽध्यापक उपदेष्टा धार्मिको न्यायाधीशश्च कर्तव्यः। तेषां सकाशाद्रक्षणदीनि प्राप्य सर्वान् शत्रून् शीघ्रं हत्वा चक्रवर्त्तिराज्यं प्रशास्य सर्वहितं सम्पादनीयम्। नात्र केनचिन्मृत्युना भेतव्यं कुत सर्वेषां जातानां पदार्थानां ध्रुवो मृत्युरित्यतः॥१॥

पदार्थः-(**प्रचेतसः**) उत्तम ज्ञानवान् (**वरुणः**) उत्तम गुण वा श्रेष्ठपन होने से सभाध्यक्ष होने योग्य (**मित्रः**) सब का मित्र (**अर्यमा**) पक्षपात छोड़ के न्याय करने को समर्थ ये सब (**यम्**) जिस मनुष्य वा राज्य तथा देश की (**रक्षन्ति**) रक्षा करते हों (**सः**) (**चित्**) वह भी (**जनः**) मनुष्य आदि (**नु**) जल्दी सब शत्रुओं से कदाचित् (**दभ्यते**) मारा जाता है॥१॥

भावार्थः-मनुष्यों को उचित है कि सब से उत्कृष्ट, सेना सभाध्यक्ष, सब का मित्र, दूत, पढ़ाने वा उपदेश करने वाले धार्मिक मनुष्य को न्यायाधीश करें; तथा उन विद्वानों के सकाश से रक्षा आदि को प्राप्त हो, सब शत्रुओं को शीघ्र मार और चक्रवर्त्ति राज्य का पालन करके सबके हित को सम्पादन करें, किसी को भी मृत्यु से भय करना योग्य नहीं है, क्योंकि जिनका जन्म हुआ है, उनका मृत्यु अवश्य होता है। इसलिये मृत्यु से डरना मूर्खों का काम है॥१॥

स संरक्षितस्सन् किं प्राप्नोतीत्युपदिश्यते॥

वह रक्षा किया हुआ किसको प्राप्त होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः।

अरिष्टः सर्व एधते॥ २॥

यम्। बाहुताऽइव। पिप्रति। पान्ति। मर्त्यम्। रिषः। अरिष्टः। सर्वः। एधते॥ २॥

पदार्थः-(**यम्**) जनम् (**बाहुतेव**) यथा बाधते दुःखानि याभ्यां भुजाभ्यां बलवीर्याभ्यां वा तयोर्भावस्तथा (**पिप्रति**) पिपुरति (**पान्ति**) रक्षन्ति (**मर्त्यम्**) मनुष्यम् (**रिषः**) हिंसकाच्छत्रोः (**अरिष्टः**) सर्वविघ्नरहितः (**सर्वः**) समस्तो जनः (**एधते**) सुखैश्वर्ययुक्तैर्गुणैर्वर्धते॥ २॥

अन्वयः-एते वरुणादयो यं मर्त्यं बाहुतेव पिप्रति रिषः शत्रोः सकाशात् पान्ति स सर्वो जनोऽरिष्टो निर्विघ्नः सन् देवविद्यादिसद्गुणैर्नित्यमेधते॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यथा सभासेनाध्यक्षा राजपुरुषा बाहुबलप्रयत्नाभ्यां शत्रुदस्युचोरान् दारिद्र्यञ्च निवार्य जनान् सम्यग्रक्षित्वा पूर्णानि सुखानि सम्पाद्य सर्वं विघ्नान्निवार्य्य सर्वान् मनुष्यान् पुरुषार्थे संयोज्य ब्रह्मचर्यसेवनेन विषयलोलुपतात्यागेन विद्यासुशिक्षाभ्यां शरीरात्मोन्नतिं कुर्वन्ति तथैव प्रजास्थैरप्यनुष्ठेयम्॥ २॥

पदार्थः-जो वरुण आदि धार्मिक विद्वान् लोग (**बाहुतेव**) जैसे शूरवीर बाहुबलों से चोर आदि को निवारण कर दुःखों को दूर करते हैं, वैसे (**यम्**) जिस (**मर्त्यम्**) मनुष्य को (**पिप्रति**) सुखों से पूर्ण करते और (**रिषः**) हिंसा करने वाले शत्रु से (**पान्ति**) बचाते हैं (**सः**) वे (**सर्वः**) समस्त मनुष्यमात्र (**अरिष्टः**) सब विघ्नों से रहित होकर वेद विद्या आदि उत्तम गुणों से नित्य (**एधते**) वृद्धि को प्राप्त होते हैं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सभा और सेनाध्यक्ष के सहित राजपुरुष बाहुबल वा उपाय के द्वारा शत्रु, डाकू, चोर आदि और दरिद्रपन को निवारण कर, मनुष्यों की अच्छे प्रकार रक्षा, पूर्ण सुखों को सम्पादन, सब विघ्नों को दूर कर, पुरुषार्थ में संयुक्त कर, ब्रह्मचर्य सेवन वा विषयों की लिप्सा छोड़ने से शरीर की वृद्धि और विद्या वा उत्तम शिक्षा से आत्मा की उन्नति करते हैं; वैसे ही प्रजाजन भी किया करें॥ २॥

पुनस्ते राजजनाश्च परस्परं किं कुर्युरित्युपदिश्यते॥

फिर वे राजप्रजा पुरुष क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम्।
नयन्ति दुरिता तिरः॥ ३॥

वि। दुःऽगाः। वि। द्विषः। पुरः। घ्नन्ति। राजानः। एषाम्। नयन्ति। दुःऽइता। तिरः॥ ३॥

पदार्थः-(**वि**) विविधार्थे (**दुर्गा**) येषु दुःखेन गच्छन्ति तानि। अत्र **सुदुरोरधिकरणे०** (अष्टा०वा०३.२.४८) इति दुरुपपदाद्गमेर्डः प्रत्ययः। **शेश्छन्दसि** इति शेर्लोपः। (**वि**) विशेषार्थे (**द्विषः**) ये द्विषन्त्यप्रीणयन्ति ताञ्छत्रून् (**पुरः**) पुराणि (**घ्नन्ति**) नाशयन्ति (**राजानः**) ये राजन्ते सत्कर्मगुणैः प्रकाशन्ते

ते **(एषाम्)** शत्रूणाम् **(नयन्ति)** गमयन्ति **(दुरिता)** दुरिता दुःसहानि दुःखानि। अत्रापि शेर्लोपः। **(तिरः)** अदर्शने॥३॥

अन्वयः-ये राजान एषां शत्रूणां दुर्गा घ्नन्ति द्विषः शत्रूँस्तिरो नयन्ति ते साम्राज्यं प्राप्तुं शक्नुवन्ति॥३॥

भावार्थः-येऽन्यायकारिणो धार्मिकान् पीडयित्वा दुर्गस्था भवन्ति पुनरागत्य दुःखयन्ति तेषां विनाशाय श्रेष्ठानां पालनाय धार्मिका विद्वांसो राजपुरुषास्तेषां दुर्गाणि विनाश्य तान् छित्वा भित्वा हिंसित्वा मरणं वा वशत्वं प्रापय्य धर्मेण राज्यं पालयेयुः॥३॥

पदार्थः-जो **(राजानः)** उत्तम कर्म वा गुणों से प्रकाशमान राजा लोग **(एषाम्)** इन शत्रुओं के **(दुर्गा)** दुःख से जाने योग्य प्रकोटों और **(पुरः)** नगरों को **(घ्नन्ति)** छिन्न-भिन्न करते और **(द्विषः)** शत्रुओं को तथा **(दुरिता)** दुःखों को **(वि)(तिरो नयन्ति)** नष्ट कर देते हैं, वे चक्रवर्त्ति राज्य को प्राप्त होने को समर्थ होते हैं॥३॥

भावार्थः-जो अन्याय करने वाले मनुष्य धार्मिक मनुष्यों को पीड़ा देकर दुर्ग में रहते और फिर आकर दुःखी करते हों उनको नष्ट और श्रेष्ठों के पालन करने के लिये विद्वान् धार्मिक राजा लोगों को चाहिये कि उनके प्रकोट और नगरों का विनाश और शत्रुओं को छिन्न-भिन्न मार और वशीभूत करके धर्म से राज्य का पालन करें॥३॥

पुनस्ते किं साधयेयुरित्युपदिश्यते।

फिर वे क्या सिद्ध करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

सु॒गः पन्था॑ अनृक्ष॒र आदि॑त्यास ऋ॒तं य॒ते।
नात्रा॑वखा॒दो अ॑स्ति वः॥४॥

सु॒ऽगः। पन्थाः। अ॒नृ॒क्ष॒रः। आदि॑त्यासः। ऋ॒तम्। य॒ते। न। अत्र॑। अ॒व॒ऽख॒दः। अ॒स्ति॒। व॒रिति॑ वः॥४॥

पदार्थः-**(सुगः)** सुखेन गच्छन्ति यस्मिन् सः **(पन्थाः)** जलस्थलान्तरिक्षगमनार्थः शिक्षाविद्याधर्मन्यायप्राप्त्यर्थश्च मार्गः **(अनृक्षरः)** कण्टकगर्त्तादिदोषरहितः सेतुमार्जनादिभिः सह वर्तमानः सरलः। चोरदस्युकुशिक्षाऽविद्याऽधर्माऽऽचरणरहितः **(आदित्यासः)** सुसेवितेनाष्टचत्वारिंशद्वर्षब्रह्मचर्येण शरीरात्मबलसाहित्येनाऽऽदित्यवत्प्रकाशिता अविनाशिधर्मविज्ञाना विद्वांसः। **आदित्या इति पदनामसु पठितम्।** (निघं०५.६) अनेन ज्ञानवत्त्वं सुखप्रापकत्वं च गृह्यते। **(ऋतम्)** ब्रह्म सत्य यज्ञं वा **(यते)** प्रयतमानाय **(न)** निषेधार्थे **(अत्र)** विद्वत्प्रचारिते रक्षिते व्यवहारे **(अवखादः)** विखादो भयम् **(अस्ति)** भवति **(वः)** युष्माकम्॥४॥

अन्वयः-यत्रादित्यासो रक्षका भवन्ति, यत्र चैतैरनृक्षरः सुगः पन्थाः सम्पादितस्तदर्थमृतं यते च वोऽत्रावखादो नास्ति॥४॥

भावार्थः-मनुष्यैर्भूमिसमुद्रान्तरिक्षेषु रथनौकाविमानानां गमनाय सरला दृढाः कंटकचोरदस्युभयादिदोष-रहिताः पन्थानो निष्पाद्या यत्र खलु कस्याऽपि किंचिद् दुःखभये न स्याताम्। एतत्सर्वं संसाध्याखण्डचक्रवर्त्तिराज्यं भोग्यं भोजयितव्यमिति॥४॥

पदार्थः-जहाँ **(आदित्यासः)** अच्छे प्रकार सेवन से अड़तालीस वर्ष युक्त ब्रह्मचर्य से शरीर आत्मा के बल सहित होने से सूर्य के समान प्रकाशित हुए अविनाशी धर्म्म को जानने वाले विद्वान् लोग रक्षा करने वाले हों वा जहाँ इन्हीं से जिस **(अनृक्षरः)** कण्टक, गड्ढा, चोर, डाकू, अविद्या, अधर्माचरण से रहित सरल **(सुगः)** सुख से जानने योग्य **(पन्थाः)** जल, स्थल, अन्तरिक्ष में जाने के लिये वा विद्या, धर्म, न्यायप्राप्ति के मार्ग का सम्पादन किया हो उस और **(ऋतम्)** ब्रह्म, सत्य वा यज्ञ को **(यते)** प्राप्त होने के लिये तुम लोगों को **(अत्र)** इस मार्ग में **(अवखादः)** भय **(नास्ति)** कभी नहीं होता॥४॥

भावार्थः-मनुष्यों को भूमि, समुद्र, अन्तरिक्ष में रथ नौका विमानों के लिये सरल, दृढ़, कण्टक, चोर, डाकू, भय, आदि दोष रहित मार्गों का सम्पादन करना चाहिये, जहाँ किसी को कुछ भी दुःख वा भय न होवे। इन सबको सिद्ध करके अखण्ड चक्रवर्त्ती राज्य को भोग करना वा कराना चाहिये॥४॥

पुनरेते कं संरक्ष्य किं प्राप्नुयुरित्युपदिश्यते॥

फिर ये किस की रक्षा कर किस को प्राप्त होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

यं यज्ञं नयथा नर आदित्या ऋजुना पथा। प्र वः स धीतये नशत्॥५॥२२॥

यम्। यज्ञम्। नयथ। नरः। आदित्याः। ऋजुना। पथा। प्र। वः। सः। धीतये। नशत्॥५॥

पदार्थः-(**यम्**) वक्ष्यमाणम् **(यज्ञम्)** शत्रुनाशकं श्रेष्ठपालनाख्यं राजव्यवहारम् **(नयथ)** प्राप्नुथ। अत्र **अन्येषामपि०** इति दीर्घः। **(नरः)** नयन्ति सत्यं व्यवहारं प्राप्नुवन्त्यसत्यं च दूरीकुर्वन्ति तत्सम्बुद्धौ **(आदित्याः)** पूर्वोक्ता वरुणादयो विद्वांसः **(ऋजुना)** सरलेन शुद्धेन **(पथा)** न्यायमार्गेण **(प्र)** प्रकृष्टार्थे **(वः)** युष्माकम् **(सः)** यज्ञः **(धीतये)** धीयन्ते प्राप्यन्ते सुखान्यनया क्रियया सा **(नशत्)** नाशं प्राप्नुयात्। अत्र व्यत्ययेन शप् लेट् प्रयोगश्च॥५॥

अन्वयः-हे आदित्या! नरो यूयं धीतये यं यज्ञमृजुना पथा नयथ, स वः प्रणशत् यूयमपि नयथ। एवं कृते सति स यज्ञो वो युष्माकं धीतये न प्रणशत् नाशं न प्राप्नुयात्॥५॥

भावार्थः-अत्र पूर्वस्मान्मन्त्रान्नेत्यनुवर्तते। यत्र विद्वांसः सभासेनाध्यक्षाः सभास्थाः सभ्याः भृत्याश्च भूत्वा विनयं कुर्वन्ति तत्र न किञ्चिदपि सुखं नश्यतीति॥५॥

पदार्थः-हे **(आदित्याः)** सकलविद्याओं से सूर्य्यवत् प्रकाशमान **(नरः)** न्याययुक्त राजसभासदो! आप लोग **(धीतये)** सुखों को प्राप्त कराने वाली क्रिया के लिये **(यम्)** जिस **(यज्ञम्)** राजधर्मयुक्त व्यवहार को **(ऋजुना)** शुद्ध सरल **(पथा)** मार्ग से **(नयथ)** प्राप्त होते हो **(सः)** सो **(वः)** तुम लोगों को **(प्र नशत्)** नष्ट करनेहारा नहीं होता॥५॥

भावार्थः-इस मन्त्र में पूर्व मन्त्र से (न) इस पद की अनुवृत्ति है। जहाँ विद्वान् लोग सभा सेनाध्यक्ष सभा में रहने वाले भृत्य होकर विनयपूर्वक न्याय करते हैं, वहां सुख का नाश कभी नहीं होता॥५॥

पुनः स संरक्षितः सन् मनुष्यः किं प्राप्नोतीत्युपदिश्यते॥

फिर वह रक्षा को प्राप्त होकर किस को प्राप्त होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना।
अच्छा गच्छत्यस्तृतः॥ ६॥

सः। रत्नम्। मर्त्यः। वसु। विश्वम्। तोकम्। उत। त्मना। अच्छ। गच्छति। अस्तृतः॥ ६॥

पदार्थः-**(सः)** वक्ष्यमाणः **(रत्नम्)** रमन्ते जनानां मनांसि यस्मिंस्तत् **(मर्त्यः)** मनुष्यः **(वसु)** उत्तमं द्रव्यम् **(विश्वम्)** सर्वम् **(तोकम्)** उत्तमगुणवदपत्यम्। **तोकमित्यपत्यनामसु पठितम्।** (निघं०२.२) **(उत)** अपि **(त्मना)** आत्मना मनसा प्राणेन वा। अत्र **मन्त्रेष्वाङ्यादेरात्मनः।** (अष्टा०६.४.१४१) अनेनास्याकारलोपः। **(अच्छ)** सम्यक् प्रकारेण। अत्र **निपातस्य च** इति दीर्घः। **(गच्छति)** प्राप्नोति **(अस्तृतः)** अहिंसितस्सन्॥६॥

अन्वयः-योऽस्तृतोऽहिंसितो मर्त्यो मनुष्योऽस्ति, स त्मनाऽऽत्मना विश्वं रत्नं वसूतापि तोकमच्छ गच्छति॥६॥

भावार्थः-विद्वद्भिर्मनुष्यैः सम्यग्रक्षिता मनुष्यादयः प्राणिनः सर्वानुत्तमान् पदार्थान् सन्तानांश्च प्राप्नुवन्ति नैतेन विना कस्यचिद् वृद्धिर्भवतीति॥६॥

पदार्थः-जो **(अस्तृतः)** हिंसारहित **(मर्त्यः)** मनुष्य है **(सः)** वह **(त्मना)** आत्मा मन वा प्राण से **(विश्वम्)** सब **(रत्नम्)** मनुष्यों के मनों के रमण कराने वाले **(वसु)** उत्तम से उत्तम द्रव्य **(उत)** और **(तोकम्)** सब उत्तम गुणों से युक्त पुत्रों को **(अच्छ गच्छति)** अच्छे प्रकार प्राप्त होता है॥६॥

भावार्थः-विद्वान् मनुष्यों से अच्छे प्रकार रक्षा किये हुए मनुष्य आदि प्राणी सब उत्तम से उत्तम पदार्थ और सन्तानों को प्राप्त होते हैं, रक्षा के विना किसी पुरुष वा प्राणी की बढ़ती नहीं होती॥६॥

सर्वैः किं कृत्वैतत् सुखं प्रापयितव्यमित्युपदिश्यते॥

सबको क्या करके इस सुख को प्राप्त कराना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

कथा राधाम सखायः स्तोमं मित्रस्यार्य्यम्णः।

महि प्सरो वरुणस्य॥७॥

कथा। राधाम। सखायः। स्तोमम्। मित्रस्य। अर्य्यम्णः। महि। प्सरः। वरुणस्य॥७॥

पदार्थः-(**कथा**) केन हेतुना (**राधाम**) साध्नुयाम। अत्र विकरणव्यत्ययः। (**सखायः**) मित्राः सन्तः (**स्तोमम्**) गुणस्तुतिसमूहम् (**मित्रस्य**) सर्वसुहृदः (**अर्य्यम्णः**) न्यायाधीशस्य (**महि**) महासुखप्रदम् (**प्सरः**) यं प्सान्ति भुञ्जते स भोगः (**वरुणस्य**) सर्वोत्कृष्टस्य॥७॥

अन्वयः-वयं सखायः सन्तो मित्रस्यार्य्यम्णो वरुणस्य च महि स्तोमं कथा राधामास्माकं कथं प्सरः सुखभोगः स्यात्॥७॥

भावार्थः-यदा केचित्कञ्चित्पृच्छेयुर्वयं केन प्रकारेण मैत्रीन्यायोत्तमविद्याः प्राप्नुयामेति, स तान् प्रत्येवं ब्रूयात् परस्परं विद्यादानपरोपकाराभ्यामेवैतत्सर्वं प्राप्तुं शक्यं नैतेन विना कश्चित्किंचिदपि सुखं साद्धुं शक्नोतीति॥७॥

पदार्थः-हम लोग (**सखायः**) सबके मित्र होकर (**मित्रस्य**) सबके सखा (**अर्य्यम्णः**) न्यायाधीश (**वरुणस्य**) और सबसे उत्तम अध्यक्ष के (**महि**) बड़े (**स्तोमम्**) गुण-स्तुति के समूह को (**कथा**) किस प्रकार से (**राधाम**) सिद्ध करें और किस प्रकार हमको (**प्सरः**) सुखों का भोग सिद्ध होवे॥७॥

भावार्थः-जब कोई मनुष्य किसी को पूछे कि हम लोग किस प्रकार से मित्रपन, न्याय और उत्तम विद्याओं को प्राप्त होवें, वह उनको ऐसा कहे कि परस्पर मित्रता, विद्यादान और परोपकार ही से यह सब प्राप्त हो सकता है, इसके विना कोई भी मनुष्य किसी सुख को सिद्ध करने को समर्थ नहीं हो सकता॥७॥

सभाध्यक्षादयः प्रजास्थैः सह किं किं प्रतिजानीरन्नित्युपदिश्यते॥

सभाध्यक्ष आदि लोग प्रजाजनों के साथ क्या-क्या प्रतिज्ञा करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम्।

सुम्नैरिद्व आ विवासे॥८॥

मा। वः। घ्नन्तम्। मा। शपन्तम्। प्रति। वोचे। देवऽयन्तम्। सुम्नैः। इत्। वः। आ। विवासे॥८॥

पदार्थः-(**मा**) निषेधार्थे (**वः**) युष्मान् (**घ्नन्तम्**) हिंसन्तम् (**मा**) (**शपन्तम्**) आक्रोशन्तम् (**प्रति**) प्रतीतार्थे (**वोचे**) वदेयम्। अत्र स्थानिवत्त्वात् आत्मनेपदमडभावश्च। (**देवयन्तम्**) देवान् दिव्यगुणान्

कामयमानम् **(सुम्नैः)** सुखैः। **सुम्नमिति सुखनामसु पठितम्।** (निघं०३.६) **(इत्)** एव **(वः)** युष्मान् **(आ)** समन्तात् **(विवासे)** परिचरामि॥८॥

अन्वयः-अहं वो युष्मान्मन्मित्रान् घ्नन्तं मा प्रतिवोचे वो युष्माञ्छपन्तं मा प्रतिवोचे प्रियं न वदेयम्। किन्तु युष्मान्सुम्नैः सह देवयन्तमिदेवाविवासे॥८॥

भावार्थः-मनुष्यैः स्वमित्रशत्रौ तन्मित्रेऽपि प्रीतिः कदाचिन्नैव कार्य्या, मित्ररक्षा सदैव विधेया। विदुषां मित्राणां प्रियधनभोजनवस्त्रयानादिभिर्नित्यं परिचर्य्या कार्य्या नो अमित्रः सुखमेधते, तस्माद्विद्वांसो धार्मिकान् मित्रान् सम्पादयेयुः॥८॥

पदार्थः-मैं **(वः)** मित्ररूप तुम को **(घ्नतम्)** मारते हुए जन से **(मा प्रतिवोचे)** सम्भाषण भी न करूं **(वः)** तुम को **(शपन्तम्)** कोसते हुए मनुष्य से प्रिय **(मा०)** न बोलूं किन्तु **(सुम्नैः)** सुखों से सहित तुम को सुख देनेहारे **(इत्)** ही **(देवयन्तम्)** दिव्यगुणों की कामना करनेहारे की **(आविवासे)** अच्छे प्रकार सेवा किया करूं॥८॥

भावार्थः-मनुष्य को योग्य है कि न अपने शत्रु और न मित्र के शत्रु में प्रीति करे, मित्र की रक्षा और विद्वानों को प्रियवाक्य, भोजन-वस्त्र-पान आदि से सेवा करनी चाहिये, क्योंकि मित्ररहित पुरुष सुख की वृद्धि नहीं कर सकता; इस से विद्वान् लोग बहुत से धर्मात्माओं को मित्र करें॥८॥

उक्तवक्ष्यमाणेभ्यश्चतुर्भ्यो दुष्टेभ्यो भयं कृत्वा कदाचिन्न विश्वसेदित्युपदिश्यते॥

जो कहे और जिनको आगे कहते हैं, उन चार दुष्टों से नित्य भय करके उनका विश्वास कभी न करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

चतुरश्चिद् ददमानाद् बिभीयादा निधातोः।
न दुरुक्ताय स्पृहयेत्॥ ९॥ २३॥

चतुरः। चित्। ददमानात्। बिभीयात्। आ। निऽधातोः। न। दुःऽउक्ताय। स्पृहयेत्॥ ९॥

पदार्थः-**(चतुरः)** घ्नन्तं शपन्तं द्वावुक्तौ द्वौ वक्ष्यमाणौ **(चित्)** अपि **(ददमानात्)** दुःखार्थे विषादिकं प्रयच्छतः **(बिभीयात्)** भयं कुर्य्यात् **(आ)** आभिमुख्ये **(निधातोः)** अन्यायेन परपदार्थानां स्वीकर्तुः **(न)** निषेधार्थे **(दुरुक्ताय)** दुष्टमुक्तं येन तस्मै **(स्पृहयेत्)** ईप्सेदाप्तुमिच्छेत्॥९॥

अन्वयः-मनुष्यो घ्नतः शपतो ददमानान्निधातोरेताञ्चतुरः प्रति न विश्वसेच्चिद् बिभीयात् तथा दुरुक्ताय न स्पृहयेदेतान् पञ्च मित्रान् कर्त्तुं नेच्छेत्॥९॥

भावार्थः-मनुष्यैर्दुष्टकर्म्मकारिणां दुष्टवचसां सङ्गविश्वासौ कदाचिन्नैव कार्या मित्रद्रोहापमानविश्वासघाताश्च कदाचिन्नैव कर्त्तव्या इति॥९॥

अस्मिन् सूक्ते प्रजारक्षणं शत्रुविजयमार्गशोधनं यानरचनचालने द्रव्योन्नतिकरणं श्रेष्ठैः सह मित्रत्वभावनं दुष्टेष्वविश्वासकरणमधर्म्माचरणान्नित्यं भयमित्युक्तमतः पूर्वसूक्तार्थेन सहैतदर्थस्य सङ्गतिरस्तीति बोध्यम्।

इति प्रथमस्य तृतीये त्रयोविंशो वर्गः। २३) प्रथममण्डल एकचत्वारिंशं सूक्तं च समाप्तम्॥ ४१॥

पदार्थः-मनुष्य **(चतुरः)** मारने, शाप देने और **(ददमानात्)** विषादि देने और **(निधातोः)** अन्याय से दूसरे के पदार्थों को हरने वाले इन चार प्रकार के मनुष्यों का विश्वास न करे **(चित्)** और इन से **(बिभीयात्)** नित्य डरे और **(दुरुक्ताय)** दुष्ट वचन कहने वाले मनुष्य के लिये **(न स्पृहयेत्)** इन पांचो को मित्र करने की इच्छा कभी न करें॥९॥

भावार्थः-मनुष्य को दुष्ट कर्म्म करने वा दुष्ट वचन बोलने वाले मनुष्यों का संग, विश्वास और मित्र से द्रोह, दूसरे का अपमान और विश्वासघात आदि कर्म्म कभी न करें॥९॥

इस सूक्त में प्रजा की रक्षा शत्रुओं को जीतना, मार्ग का शोधना, यान की रचना और उनका चलाना, द्रव्यों की उन्नति करना, श्रेष्ठों के साथ मित्रता, दुष्टों में विश्वास न करना और अधर्माचरण से नित्य डरना। इस प्रकार कथन से पूर्व सूक्तार्थ के साथ इस सूक्त के अर्थ की सङ्गति जाननी चाहिये।

यह पहिले अष्टक के तीसरे अध्याय में तेईसवां वर्ग और पहिले मण्डल में इकतालीसवां सूक्त समाप्त हुआ॥ ४१॥

अथ दशर्चस्य द्विचत्वारिंशस्य सूक्तस्य घौरः कण्व ऋषिः। पूषा देवता। १,९ निचृद्गायत्री। २,३,५-८,१० गायत्री। ४ विराड् गायत्री च छन्दः। षड्जः स्वरः॥

प्रवसन्मार्गे किं किमेष्टव्यमित्युपदिश्यते॥

अब बयालीसवें सूक्त का आरम्भ है। उस के पहिले मन्त्र में प्रवास करते हुए मनुष्य मार्ग में किस-किस पदार्थ की इच्छा करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्।
सक्ष्वा देव प्र णस्पुरः॥ १॥

सम्। पूषन्। अध्वनः। तिर। वि। अंहः। विऽमुचः। नपात्। सक्ष्व। देव। प्र। नः। पुरः॥ १॥

पदार्थः-(**सम्**) सम्यगर्थे (**पूषन्**) पोषकविद्यया पुष्टिकारक विद्वन्। **पूषेति पदनामसु पठितम्।** (निघं०५.६) (**अध्वनः**) मार्गात् (**तिर**) पारं गच्छ (**वि**) विशेषार्थे (**अंहः**) दुःखरोगवेगम्। अत्र **अमेर्हुक् च।** (उणा०४.२२०) चादसुन्। अनेन वेगो गृह्यते (**विमुचः**) विमुञ्च (**नपात्**) न विद्यते पातो यस्य तत्सम्बुद्धौ (**सक्ष्व**) सक्तो भव। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**देव**) दिव्यगुणसम्पन्न (**प्र**) प्रकृष्टार्थे (**नः**) अस्मान्। अत्र **उपसर्गाद् बहुलम्।** (अष्टा०८.४.२८) अनेन णत्वम्। (**पुरः**) पूर्वम्॥ १॥

अन्वयः-हे पूषन्नपाद्देव विद्वंस्त्वं दुःखस्याध्वनः पारं वितिर विशिष्टतया प्रापयांहो रोगदुःखवेगं विमुचो दूरीकुरु पुरः पूर्वं नोऽस्मान् प्रसक्ष्व सद्गुणेषु प्रसक्तान् कुरु॥ १॥

भावार्थः-मनुष्यैर्यथा परमेश्वरस्योपासनेन तदाज्ञापालनेन च सर्वदुःखपारं गत्वा सर्वाणि सुखानि प्राप्तव्यान्येवं धार्मिकसर्वमित्रपरोपकर्तुर्विदुषः सान्निध्योपदेशाभ्यामविद्याजालमार्गस्य पारं गत्वा विद्याऽर्कः सम्प्राप्तव्यः॥ १॥

पदार्थः-हे (**पूषन्**) सब जगत् का पोषण करने वाले (**नपात्**) नाशरहित (**देव**) दिव्य गुण सम्पन्न विद्वन्! दुःख के (**अध्वनः**) मार्ग से (**वितिर**) पार होकर हम को भी पार कीजिये (**अंहः**) रोगरूपी दुःखों के वेग को (**विमुचः**) दूर कीजिये (**पुरः**) पहिले (**नः**) हम लोगों को (**प्रसक्ष्व**) उत्तम-उत्तम गुणों में प्रसक्त कीजिये॥ १॥

भावार्थः-मनुष्य, जैसे परमेश्वर की उपासना वा उस की आज्ञा के पालन से सब दुःखों के पार प्राप्त होकर सब सुखों को प्राप्त करें, इसी प्रकार धर्म्मात्मा सबके मित्र, परोपकार करने वाले विद्वानों के समीप वा उनके उपदेश से अविद्या जालरूपी मार्ग से पार होकर विद्यारूपी सूर्य्य को प्राप्त करें॥ १॥

ये धर्म्मराजमार्गेषु विघ्नकर्त्तारस्ते निवारणीया इत्युपदिश्यते॥

जो धर्म्म और राज्य के मार्गों में विघ्न करते हैं, उनका निवारण करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

यो नः पूषन्नघो वृको दुःशेव आदिदेशति।

अप॑ स्म॒ तं प॒थो ज॑हि॥ २॥

यः। न॒ः। पू॒ष॒न्। अ॒घः। वृ॒कः। दु॒ःऽशे॑वः। आ॒ऽदिदे॑शति। अप॑। स्म॒। तम्। प॒थः। ज॒हि॒॥ २॥

पदार्थः-(**यः**) वक्ष्यमाणः (**नः**) अस्मान् (**पूषन्**) विद्वन् (**अघः**) अघं पापं विद्यते यस्मिन् सः (**वृकः**) स्तेनः। **वृक इति स्तेननामसु पठितम्।** (निघं०३.२४) (**दुःशेवः**) दुःखे शाययितुमर्हः (**आदिदेशति**) अतिसृजेदस्मानतिदेश्य पीडयेत् (**अप**) निवारणे (**स्म**) एव (**तम्**) दुष्टस्वभावम् (**पथः**) धर्मराजप्रजामार्गाद् दूरे (**जहि**) हिन्धि गमय वा॥ २॥

अन्वयः-हे पूषन् विद्वँस्त्वं योऽघो दुःशेवो वृकः स्तेनोनस्मानादिदेशति तं पथोऽपजहि विनाशय वा दूरे निक्षिप॥ २॥

भावार्थः-मनुष्यैः शिक्षाविद्यासेनाबलेन परस्वादायिनः शठाश्चोराः सर्वथा हन्तव्या दूरतः प्रक्षेप्याः सततं बन्धनीयाश्चैवं विधाय राजधर्म्मप्रजामार्गा निःशंका निर्भयाः सम्पादनीयाः। यथा परमेश्वरो दुष्टाँस्तत्कर्म्मानुसारेण शिक्षते तथैवाऽस्माभिरप्येते शिक्षादण्डवेदद्वारा सर्वे साधवः सम्पादनीया इति॥ २॥

पदार्थः-हे (**पूषन्**) सब जगत् को विद्या से पुष्ट करने वाले विद्वान्! आप (**यः**) जो (**अघः**) पाप करने (**दुःशेव**) दुःख में शयन कराने योग्य (**वृकः**) स्तेन अर्थात् दुःख देने वाला चोर (**नः**) हम लोगों को (**आदिदेशति**) उद्देश करके पीड़ा देता हो (**तम्**) उस दुष्ट स्वभाव वाले को (**पथः**) राजधर्म और प्रजामार्ग से (**अपजहि**) नष्ट वा दूर कीजिये॥ २॥

भावार्थः-मनुष्यों को उचित है कि शिक्षा, विद्या तथा सेना के बल से दूसरे के धन को लेने वाले शठ और चोरों को मारना, सर्वथा दूर करना, निरन्तर बाँध के राजनीति के मार्गों को भय से रहित सम्पादन करें, जैसे जगदीश्वर दुष्टों को उनके कर्मों के अनुसार दण्ड के द्वारा शिक्षा करता है, वैसे हम लोग भी दुष्टों को दण्ड द्वारा शिक्षा देकर श्रेष्ठ स्वभावयुक्त करें॥ २॥

पुनरेतस्मान्मार्गात्के के निवारणीया इत्युपदिश्यते॥

फिर इस मार्ग से किन-किन का निवारण करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अप॒ त्यं प॑रिप॒न्थिनं॑ मुषी॒वाणं॑ हुर॒श्चित॑म्।
दू॒रमधि॑ स्रु॒तेर॑ज॥ ३॥

अप॑। त्यम्। प॒रि॒ऽप॒न्थिन॑म्। मु॒षी॒वाण॑म्। हु॒रः॒ऽचित॑म्। दू॒रम्। अधि॑। स्रु॒तेः। अ॒ज॒॥ ३॥

पदार्थः-(**अप**) दूरीकरणे (**त्यम्**) पूर्वोक्तम् (**परिपन्थिनम्**) प्रतिकूलं पन्थानं परित्यज्य स्तेयाय गुप्तं स्थितम्। अत्र **छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि।** (अष्टा०५.२.८९) अनेन पर्य्यवस्थाता विरोधी गृह्यते। (**मुषीवाणम्**) स्तेयकर्मणा भित्तिं भित्वा दृष्टिमावृत्य परपदार्थापहर्त्तारम्। **मुषीवानिति**

स्तेननामसु पठितम्। (निघं०३.२४) **(हुरश्चितम्)** उत्कोचकं हस्तात् परपदार्थापहर्त्तारम्। **हुरश्चिदिति स्तेननामसु पठितम्।** (निघं०३.२४) **(दूरम्)** विप्रकृष्टदेशम् **(अधि)** उपरिभावे **(स्रुतेः)** स्रवन्ति गच्छन्ति यस्मिन् स स्रुतिमार्गस्तस्मात्। अत्र **क्तिच्क्तौ च संज्ञायाम्।** (अष्टा०३.३.१७४) अनेन स्रुधातोः संज्ञायां क्तिच्। **(अज)** प्रक्षिप॥३॥

अन्वयः-हे पूषँस्त्वं त्यं परिपन्थिनं मुषीवाणं हुरश्चितमनेकविधं स्तेनं स्रुतेर्दूरमध्यपाज॥३॥

भावार्थः-चोरा अनेकविधाः केचिद्दस्यवः, केचित्कपटेनापहर्त्तारः, केचिन्मोहयित्वा परपदार्थादायिनः, केचिदुत्कोचकाः, केचिद्रात्रौ सुरंगं कृत्वा परपदार्थान् हरन्ति, केचिन्नानापण्यवासिनो हट्टेषु छलेन परपदार्थान् हरन्ति, केचिच्छुल्कग्राहिणः, केचिद् भृत्या भूत्वा स्वामिनः पदार्थान् हरन्ति, केचिच्छलकपटाभ्यां परराज्यानि स्वीकुर्वन्ति, केचिद्धर्मोपदेशेन जनान् भ्रामयित्वा गुरुवो भूत्वा शिष्यपदार्थान् हरन्ति केचित् प्राड्विवाकाः सन्तो जनान् विवादयित्वा पदार्थान् हरन्ति, केचिन्न्यायासने स्थित्वा शुल्कादिकं स्वीकृत्य मित्रभावेन वाऽन्यायं कुर्वन्त्येतदादयस्सर्वे चोरा विज्ञेयाः। एतान् सर्वोपायैर्निवर्त्य मनुष्यैर्धर्मेण राज्यं शासनीयमिति॥३॥

पदार्थः-हे विद्वन् राजन्! आप **(त्यम्)** उस **(परिपन्थिनम्)** प्रतिकूल चलने वाले डाकू **(मुषीवाणम्)** चोरकर्म से भित्ति को फोड़ कर दृष्टि का आच्छादन कर दूसरे के पदार्थों को हरने **(हुरश्चितम्)** उत्कोचक अर्थात् हाथ से दूसरे के पदार्थ को ग्रहण करने वाले अनेक प्रकार से चोरों को **(स्रुतेः)** राजधर्म और प्रजामार्ग से **(दूरम्)** **(अध्यपाज)** उन पर दण्ड और शिक्षा कर दूर कीजिये॥३॥

भावार्थः-चोर अनेक प्रकार के होते हैं, कोई डाकू, कोई कपट से हरने, कोई मोहित करके दूसरे के पदार्थों को ग्रहण करने, कोई रात में सुरंग लगाकर ग्रहण करने, कोई उत्कोचक अर्थात् हाथ से छीन लेने, कोई नाना प्रकार के व्यवहारी दुकानों में बैठ छल से पदार्थों को हरने, कोई शुल्क अर्थात् रिश्वत लेने, कोई भृत्य होकर स्वामी के पदार्थों को हरने, कोई छल कपट से औरों के राज्य को स्वीकार करने, कोई धर्मोपदेश से मनुष्यों को भ्रमाकर गुरु बन शिष्यों के पदार्थों को हरने, कोई प्राड्विवाक अर्थात् वकील होकर मनुष्यों को विवाद में फंसाकर पदार्थों को हर लेने और कोई न्यायासन पर बैठ प्रजा से धन लेके अन्याय करने वाले इत्यादि हैं, इन सबको चोर जानो। इनको सब उपायों से निकाल कर मनुष्यों को धर्म से राज्य का पालन करना चाहिये॥३॥

पुनरेतेषां चोराणां का गतिः कार्य्येत्युपदिश्यते॥

फिर इन पूर्वोक्त चोरों की क्या गति करनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं तस्य॑ द्वया॒विनो॒ऽघशं॑सस्य॒ कस्य॑ चित्।

पदाभि तिष्ठ तपुषिम्॥४॥

त्वम्। तस्य। द्वयाविनः। अघऽशंसस्य। कस्य। चित्। पदा। अभि। तिष्ठ। तपुषिम्॥४॥

पदार्थः-(**त्वम्**) पूर्वोक्तः पूषा (**तस्य**) पूर्वोक्तस्य वक्ष्यमाणस्य च (**द्वयाविनः**) प्रत्यक्षाप्रत्यक्षयोः परपदार्थापहर्तुः (**अघशंसस्य**) स्तेनस्य। **अघशंस इति स्तेननामसु पठितम्।** (निघं०३.२४) (**कस्य**) किंत्वमितिवदतः (**चित्**) अपि (**पदा**) पादाक्रमणेन (**अभितिष्ठ**) स्थिरो भव (**तपुषिम्**) श्रेष्ठानां सन्तापकारिकां सेनाम्॥४॥

अन्वयः-हे पूषन्सेनासभाध्यक्ष! त्वं तस्य द्वयाविनः कस्यचिदघशंसस्य तपुषिं पदाभितिष्ठ पादाक्रान्तां कुरु॥४॥

भावार्थः-नैव न्यायकारिभिर्मनुष्यैः कस्यापराधिनश्चोरस्य दण्डदानेन विना त्यागः कर्त्तव्यः। नोचेत्प्रजा पीडिता स्यात् तस्मात् प्रजारक्षणार्थं दुष्टकर्मकारिणः पित्राचार्य्यमातृपुत्रमित्रादयोऽपि सदैव यथाऽपराधं ताडनीयाः॥४॥

पदार्थः-हे सेनासभाध्यक्ष! (**त्वम्**) आप (**तस्य**) उस (**द्वयाविनः**) प्रत्यक्ष अप्रत्यक्ष औरों के पदार्थों को हरने वाले (**कस्यचित्**) किसी (**अघशंसस्य**) (**तपुषिम्**) चोरों की सेना को (**पदाभितिष्ठ**) बल से वशीभूत कीजिये॥४॥

भावार्थः-न्याय करने वाले मनुष्यों को उचित है कि किसी अपराधी चोर को दण्ड देने विना छोड़ना कभी न चाहिये, नहीं तो, प्रजा पीड़ायुक्त होकर नष्ट-भ्रष्ट होने से राज्य का नाश हो जाये। इस कारण प्रजा की रक्षा के लिये दुष्ट कर्म करने वाले अपराध किये हुए माता-पिता, पुत्र, आचार्य्य और मित्र आदि को भी अपराध के योग्य ताड़ना अवश्य देनी चाहिये॥४॥

पुनः स न्यायाधीशः कीदृशो भवेदित्युपदिश्यते॥

फिर वह न्यायाधीश कैसा होवे, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे।

येन पितॄनचोदयः॥५॥२४॥

आ। तत्। ते। दस्र। मन्तुऽमः। पूषन्। अवः। वृणीमहे। येन। पितॄन्। अचोदयः॥५॥

पदार्थः-(**आ**) समन्तात् (**तत्**) पूर्वोक्तं वक्ष्यमाणं च (**ते**) (**दस्र**) दुष्टानामुपक्षेप्तः (**मन्तुमः**) मन्तुः प्रशस्तं ज्ञानं विद्यते यस्य तत्सम्बुद्धौ (**पूषन्**) सर्वथा पुष्टिकारक (**अवः**) रक्षणादिकम् (**वृणीमहे**) स्वीकुर्वीमहि (**येन**) (**पितॄन्**) वयोज्ञानवृद्धान् (**अचोदयः**) धर्मे प्रेरयेः। अत्र लिङर्थे लङ्॥५॥

अन्वयः-हे दस्र मन्तुमः पूषन् विद्वँस्त्वं येन पितॄनचोदयस्तत् ते तवाऽवो रक्षणादिकं वयं वृणीमहे॥५॥

भावार्थः-मनुष्या यथा प्रेमप्रीत्या सेवनेन जनकादीनध्यापकादीन् ज्ञानवयोवृद्धांश्च प्रीणयेयुस्तथैव सर्वासां प्रजानां सुखाय दुष्टान् दण्डयत्वा श्रेष्ठान् सुखयेयुः॥५॥

पदार्थः-हे **(दस्र)** दुष्टों को नाश करने **(मन्तुमः)** उत्तम ज्ञानयुक्त **(पूषन्)** सर्वथा पुष्टि करने वाले विद्वान्! आप **(येन)** जिस रक्षादि से **(पितॄन्)** अवस्था वा ज्ञान से वृद्धों को **(अचोदयः)** प्रेरणा करो **(तत्)** उस **(ते)** आप के **(अवः)** रक्षादि को हम लोग **(आवृणीमहे)** सर्वथा स्वीकार करें॥५॥

भावार्थः-जैसे प्रेम प्रीति के साथ सेचन करने से उत्पन्न करने वा पढ़ाने वाले ज्ञान वा अवस्था से वृद्धों को तृप्त करें, वैसे ही सब प्रजाओं के सुख के लिये दुष्ट मनुष्यों को दण्ड दे के धार्मिकों को सदा सुखी रक्खें॥५॥

पुनः स प्रजासु किं कुर्य्यादित्युपदिश्यते॥

फिर वह न्यायाधीश प्रजा में क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अधा॑ नो विश्वसौभग॒ हिर॑ण्यवाशीमत्तम।

धना॑नि सु॒षणा॑ कृधि॥ ६॥

अध॑। न॒:। वि॒श्व॒ऽसौ॒भ॒ग॒। हिर॑ण्यवाशीमत्ऽतम। धना॑नि। सु॒ऽसना॑। कृ॒धि॒॥ ६॥

पदार्थः-**(अध)** अथेत्यनन्तरम्। अत्र वर्णव्यत्ययेन थस्य धः **निपातस्य च** इति दीर्घश्च। **(नः)** अस्मभ्यम् **(विश्वसौभग)** विश्वेषां सर्वेषां सुभगानां श्रेष्ठानामैश्वर्य्याणां भावो यस्य तत्सम्बुद्धौ **(हिरण्यवाशीमत्तम)** हिरण्येन सत्यप्रकाशेन परमयशसा सह प्रशस्ता वाक् विद्यते यस्य सोऽतिशयितस्तत्सम्बुद्धौ। **वाशीति वाङ्नामसु पठितम्।** (निघं०१.११) **(धनानि)** विद्याधर्मचक्रवर्त्तिराज्यश्रीसिद्धानि **(सुषणा)** यानि सुखेन सन्यन्ते तानि सुषणानि। अत्र अविहितलक्षणो मूर्द्धन्यः, **सुषमादिषु द्रष्टव्यः।** (अष्टा०८.३.९८) इति मूर्द्धन्यादेशस्तत्सन्नियोगेन णत्वं **शेश्छन्दसि** बहुलम् इति लोपश्च। **(कृधि)** कुरु॥६॥

अन्वयः-हे विश्वसौभग हिरण्यवाशीमत्तम पृथिव्यादिराज्ययुक्त सभाध्यक्ष विद्वँस्त्वं नोऽस्मभ्यं सुषणा धनानि कृधि॥६॥

भावार्थः-ईश्वरस्यानन्तसौभगत्वाद्धार्म्मिकस्य सभासेनान्यायाधीशस्य चक्रवर्त्तिसुखैश्वर्ययुक्तत्वादेतौ समाश्रित्य मनुष्यैरसंख्यातानि विद्यासुवर्णादिधनानि प्राप्य बहुसुखभोगः कर्त्तव्यः कारयतिव्यश्चेति॥६॥

पदार्थः-हे **(विश्वसौभग)** सम्पूर्ण ऐश्वर्य्यों को प्राप्त होने **(हिरण्यवाशीमत्तम)** अतिशय करके सत्य के प्रकाशक उत्तम कीर्त्ति और सुशिक्षित वाणीयुक्त सभाध्यक्ष! आप **(नः)** हम लोगों के लिये

(सुषणा) सुख से सेवन करने योग्य **(धनानि)** विद्या, धर्म और चक्रवर्त्ति राज्य की लक्ष्मी से सिद्ध किये हुए धनों को प्राप्त कराके **(अध)** पश्चात् हम लोगों को सुखी **(कृधि)** कीजिये॥६॥

भावार्थः-ईश्वर के अनन्त सौभाग्य वा सभा, सेना, न्यायाधीश, धार्मिक मनुष्य के चक्रवर्त्ति राज्य आदि सौभाग्य होने से इन दोनों के आश्रय से मनुष्यों को असंख्यात विद्या, सुवर्ण आदि धनों की प्राप्ति से अत्यन्त सुखों के भोग को प्राप्त होना वा कराना चाहिये॥६॥

पुनः स कीदृशानस्मान् सम्पादयेदित्युपदिश्यते॥

फिर वह हम लोगों को किस प्रकार के करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अति॑ नः स॒श्चतो॑ नय सु॒गा नः॑ सु॒पथा॑ कृणु।
पूष॑न्नि॒ह क्रतुं॑ विदः॥७॥

अति॑। न॒ः। स॒श्चत॑ः। न॒य॒। सु॒ऽगा। न॒ः। सु॒ऽपथा॑। कृ॒णु॒। पूष॑न्। इ॒ह। क्रतु॑म्। वि॒द॒ुः॥७॥

पदार्थः-(**अति**) अत्यन्तार्थे (**नः**) अस्मान् (**सश्चतः**) विज्ञानवतो विद्याधर्मप्राप्तान् (**नय**) प्रापय (**सुगा**) सुखं गच्छन्ति प्राप्नुवन्ति यस्मिन् तेन (**नः**) अस्मान् (**सुपथा**) विद्याधर्मयुक्तेनाप्तमार्गेण (**कृणु**) कुरु (**पूषन्**) सर्वपोषकेश्वर प्रजापोषक सभाध्यक्ष वा (**इह**) अस्मिन् समये संसारे वा (**क्रतुम्**) श्रेष्ठं कर्म प्रज्ञां वा। **क्रतुरिति कर्म्मनामसु पठितम्।** (निघं०२.१) **प्रज्ञानामसु पठितम्।** (निघं०३.९) (**विदः**) प्राप्नुहि। अत्र **वा छन्दसि सर्वे विधयो भवन्ति** इति गुणविकल्पो लेट्प्रयोगोऽन्तर्गतो ण्यर्थश्च। सायणाचार्य्येणेदमडागमेन साधितम्। गुणप्राप्तिर्न बुद्धाऽतोऽस्यानभिज्ञता दृश्यते॥७॥

अन्वयः-हे पूषन् परमात्मन् सभाध्यक्ष! वा त्वमिह सश्चतो नोऽस्मान् सुगा सुपथाऽतिनय नोऽस्मान् क्रतुं विदः॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। सर्वैर्मनुष्यैरेवं जगदीश्वरः प्रार्थनीयः। हे जगदीश्वर! भवान् कृपयाऽधर्म-मार्गादस्मान्निवर्त्य धर्ममार्गेण नित्यं गमयत्विति। विद्वानपि प्रष्टव्यः सेवनीयश्च भवान्नोऽस्माञ्छुद्धेन सरलेन वेदविद्यामार्गेण गमयत्विति॥७॥

पदार्थः-हे (**पूषन्**) सबको पुष्ट करने वाले जगदीश्वर वा प्रजा का पोषण करनेहारे सभाध्यक्ष विद्वान्! आप (**इह**) इस संसार वा जन्म में (**सश्चतः**) विज्ञानयुक्त विद्या धर्म को प्राप्त हुए (**नः**) हम लोगों को (**सुगा**) सुख पूर्वक जाने के योग्य (**सुपथा**) उत्तम विद्या, धर्मयुक्त विद्वानों के मार्ग से (**अतिनय**) अत्यन्त प्रयत्न से चलाइये और हम लोगों को उत्तम विद्यादि धर्म मार्ग से (**क्रतुम्**) उत्तम कर्म वा उत्तम प्रज्ञा से (**विदः**) जानने वाले कीजिये॥७॥

भावार्थः-इस मन्त्र में श्लेषांलकार है। सब मनुष्यों को ईश्वर की प्रार्थना इस प्रकार करनी चाहिये कि हे जगदीश्वर! आप कृपा करके अधर्म मार्ग से हम लोगों को अलग कर धर्म मार्ग में नित्य चलाइये

तथा विद्वान् से पूछना वा उसका सेवन करना चाहिये कि हे विद्वान्! आप हम लोगों को शुद्ध, सरल वेदविद्या से सिद्ध किये हुए मार्ग में सदा चलाया कीजिये॥७॥

पुनस्तेन किं प्रापणीयमित्युपदिश्यते॥

फिर उसे किस को प्राप्त होना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अभि सूयवसं नय न नवज्वारो अध्वने।

पूषन्निह क्रतुं विदः॥८॥

अभि। सुऽयवसम्। नय। न। नवऽज्वारः। अध्वने। पूषन्। इह। क्रतुम्। विदः॥८॥

पदार्थः-(**अभि**) आभिमुख्ये (**सुयवसम्**) शोभनो यवाद्योषधिसमूहो यस्मिन् देशे तम्। अत्र **अन्येषामपि दृश्यते** इति दीर्घः। (**नय**) प्रापय (**न**) निषेधार्थे (**नवज्वारः**) यो नवो नूतनश्चासौ ज्वारः सन्तापश्च सः (**अध्वने**) मार्गाय (**पूषन्**) सभाध्यक्ष (**इह**) उक्तार्थम् (**विदः**) प्राप्नुहि॥८॥

अन्वयः-हे पूषंस्त्वमिहाऽध्वने सुयवसं देशमभिनय तेन मार्गेण क्रतुं विदो येन त्वयि नवज्वारो न भवेत्॥८॥

भावार्थः-हे परमेश्वर! भवान् स्वकृपया श्रेष्ठदेशं गुणाँश्चास्मभ्यं देहि। सर्वाणि दुःखानि निवार्य्य सुखानि प्रापय। हे विद्वन् सभाध्यक्ष! त्वमस्मान् विनयेन पालयित्वा विद्यां शिक्षयित्वाऽस्मिन् राज्ये सुखयेति॥८॥

पदार्थः-हे (**पूषन्**) सभाध्यक्ष! इस संसार वा जन्मान्तर में (**अध्वने**) श्रेष्ठ मार्ग के लिये हम लोगों को (**सुयवसम्**) उत्तम यव आदि ओषधी होने वाले देश को (**अभिनय**) सब प्रकार प्राप्त कीजिये और (**क्रतुम्**) उत्तम कर्म वा प्रज्ञा को (**विदः**) प्राप्त हूजिये जिससे इस मार्ग में चल के हम लोगों में (**नवज्वारः**) नवीन-नवीन सन्ताप (**न**) न हों॥८॥

भावार्थः-हे सभाध्यक्ष! आप अपनी कृपा से श्रेष्ठ देश वा उत्तम गुण हम लोगों को दीजिये और सब दुःखों को निवारण कर सुखों को प्राप्त कीजिये। हे सभासेनाध्यक्ष! विद्वान् लोगों को विनयपूर्वक पालन से विद्या पढ़ाकर इस राज्य में सुखयुक्त कीजिये॥८॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम्।

पूषन्निह क्रतुं विदः॥९॥

शग्धि। पूर्धि। प्र। यंसि। च। शिशीहि। प्रासि। उदरम्। पूषन्। इह। क्रतुम्। विदः॥९॥

पदार्थः-(**शग्धि**) सुखदानाय समर्थोऽसि। अत्र **बहुलं छन्दसि** इति श्नोर्लुक्। (**पूर्धि**) प्रीणीहि सर्वाणि सुखानि सम्प्राप्नुहि (**प्र**) प्रकृष्टार्थे (**यंसि**) यच्छ। दुष्टेभ्यः कर्मभ्य उपरतोऽसि। अत्र लोडर्थे लट्। (**च**) समुच्चये (**शिशीहि**) सुखेन शयनं कुरु। अत्र व्यत्ययेन परस्मैपदम् (**प्रासि**) सर्वाणि सेनाङ्गानि प्रजाङ्गानि च प्रपूर्धि (**उदरम्**) जठरं श्रेष्ठैर्भोजनादिभिस्तृप्यतु (**पूषन्**) सेनाध्यक्ष (**इह**) प्रजासुखे (**क्रतुम्**) युद्धप्रज्ञां कर्म वा (**विदः**) प्राप्नुहि॥९॥

अन्वयः-हे पूषन् सभासेनाद्यध्यक्ष! त्वं सेनाप्रजाङ्गानि शग्धि पूर्द्धि प्रयंसि शिशीहि नोऽस्माकमुदरं चोत्तमान्नैरिह प्रासि प्रपूर्धि क्रतुं विदः॥९॥

भावार्थः-नहि सभासेनाध्यक्षाभ्यां विनेह कश्चित्सामर्थ्यप्रदः सुखैरलङ्कर्त्ता पुरुषार्थप्रदश्चोरदस्युभय- निवारकः सर्वोत्तमभोगप्रदो न्यायविद्याप्रकाशकश्च विद्यते तस्मात् तस्यैवाऽश्रयः सर्वैः कर्त्तव्यः॥९॥

पदार्थः-हे (**पूषन्**) सभासेनाधिपते! आप हम लोगों के (**शग्धि**) सुख देने के लिये समर्थ (**पूर्धि**) सब सुखों की पूर्ति कर (**प्रयंसि**) दुष्ट कर्मों से पृथक् रह (**शिशीहि**) सुख पूर्वक सो वा दुष्टों का छेदन कर (**प्रासि**) सब सेना वा प्रजा के अङ्गों को पूरण कीजिये और हम लोगों के (**उदरम्**) उदर को उत्तम अन्नों से (**इह**) इस प्रजा के सुख से तथा (**क्रतुम्**) युद्ध विद्या को (**विदः**) प्राप्त हूजिये॥९॥

भावार्थः-इस मन्त्र में श्लेषाऽलङ्कार है। सभा सेनाध्यक्ष के विना इस संसार में कोई सामर्थ्य को देने वा सुखों से अलंकृत करने, पुरुषार्थ को देने, चोर-डाकुओं से भय निवारण करने, सबको उत्तम भोग देने और न्यायविद्या का प्रकाश करने वाला अन्य नहीं हो सकता, इससे दोनों का आश्रय सब मनुष्य करें॥९॥

तमाश्रित्य कथं भवितव्यं किं च कर्त्तव्यमित्युपदिश्यते॥

उसका आश्रय लेकर कैसे होना वा क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

न पूषणं मेथामसि सूक्तैरभि गृणीमसि।
वसूनि दस्ममीमहे॥ १०॥ २५॥

न। पूषणम्। मेथामसि। सुऽउक्तैः। अभि। गृणीमसि। वसूनि। दस्मम्। ईमहे॥ १०॥

पदार्थः-(**न**) निषेधार्थे (**पूषणम्**) पूर्वोक्तं सभासेनाध्यक्षम् (**मेथामसि**) हिंस्मः (**सूक्तैः**) वेदोक्तैः स्तोत्रैः (**अभि**) सर्वतः (**गृणीमसि**) स्तुमः। अत्रोभयत्र मसिरादेशः। (**वसूनि**) उत्तमानि धनानि (**दस्मम्**) शत्रुम् (**ईमहे**) याचामहे॥१०॥

अन्वयः-हे मनुष्या! यथा वयं सूक्तैः पूषणं सभासेनाध्यक्षमभिगृणीमसि दस्मं मेथामसि वसूनीमहे परस्परं कदाचिन्न द्विष्मस्तथैव यूयमप्याचरत॥१०॥

भावार्थः-अत्र श्लेषालंकारः। न केनचिन्मूर्खत्वेन सभासेनाध्यक्षाश्रयं त्यक्त्वा शत्रुर्याचनीयः, किन्तु वेदै राजनीतिं विज्ञाय सुसहायेन शत्रून् हत्वा विज्ञानसुवर्णादीनि धनानि प्राप्य सुपात्रेभ्यो दानं दत्वा विद्या विस्तारणीया॥१०॥

अत्र पूषन्शब्दवर्णनं शक्तिवर्द्धनं दुष्टशत्रुनिवारणं सर्वैश्वर्यप्रापणं सुमार्गगमनं बुद्धिकर्मवर्द्धनं चोक्तमस्त्यतोऽस्यैकचत्वारिंशसूक्तार्थेन सहैतदर्थस्य सङ्गतिरस्तीति वेदतिव्यम्॥

इति पञ्चविंशतितमो वर्गो द्विचत्वारिंशं सूक्तं च समाप्तम्॥४२॥

पदार्थः-हे मनुष्य लोगो! जैसे हम लोग (**सूक्तैः**) वेदोक्त स्तोत्रों से (**पूषणम्**) सभा और सेनाध्यक्ष को (**अभिगृणीमसि**) गुणज्ञानपूर्वक स्तुति करते हैं (**दस्मम्**) शत्रु को (**मेथामसि**) मारते हैं। (**वसूनि**) उत्तम वस्तुओं को (**ईमहे**) याचना करते हैं और आपस में द्वेष कभी (**न**) नहीं करते, वैसे तुम भी किया करो॥१०॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। किसी मनुष्य को नास्तिक वा मूर्खपन से सभाध्यक्ष की आज्ञा को छोड़ शत्रु की याचना न करनी चाहिये, किन्तु वेदों से राजनीति को जान के इन दोनों के सहाय से शत्रुओं को मार विज्ञान वा सुवर्ण आदि धनों को प्राप्त होकर उत्तम मार्ग में सुपात्रों के लिये दान देकर विद्या का विस्तार करना चाहिये॥१०॥

इस सूक्त में पूषन् शब्द का वर्णन शक्ति का बढ़ाना, दुष्ट शत्रुओं का निवारण, सम्पूर्ण ऐश्वर्य्य की प्राप्ति, सुमार्ग में चलना, बुद्धि वा कर्म का बढ़ाना कहा है। इससे इस सूक्त के अर्थ की सङ्गति पूर्व सूक्तार्थ के साथ जाननी चाहिये।

यह पच्चीसवां वर्ग २५ और बयालीसवां सूक्त समाप्त हुआ॥४२॥

अथ नवर्च्चस्य त्रयश्चत्वारिंशस्य सूक्तस्य घौरः कण्व ऋषिः। १,२,४,५,६ रुद्रः। ३ मित्रावरुणौ। ७,८,९ सोमश्च देवताः। १,४,७,८ गायत्री। ५ विराड्गायत्री। ६ पादनिचृद्गायत्री च छन्दः। षड्जः। स्वरः। ९ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

अब तेंतालीसवें सूक्त का आरम्भ है, उस के पहिले मन्त्र में रुद्र शब्द के अर्थ का उपदेश किया है॥

कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे।

वोचेम शंतमं हृदे॥ १॥

कत्। रुद्राय। प्रचेतसे। मीढुःऽतमाय। तव्यसे। वोचेम। शम्ऽतमम्। हृदे॥ १॥

पदार्थः-(**कत्**) कदा (**रुद्राय**) परमेश्वराय जीवाय वा (**प्रचेतसे**) प्रकृष्टं चेतो ज्ञानं यस्य यस्माद्वा तस्मै (**मीढुष्टमाय**) प्रसेक्तुतमाय (**तव्यसे**) अतिशयेन वृद्धाय। अत्र तवीयानिति सम्प्राप्ते **छान्दसो वर्णलोपो वा** इतीकारलोपः। (**वोचेम**) उपदिशेम (**शन्तमम्**) अतिशयितं सुखम् (**हृदे**) हृदयाय॥ १॥

अन्वयः-वयं कत्कदा प्रचेतसे मीढुष्टमाय तव्यसे हृदे रुद्राय शंतमं वोचेम॥ १॥

भावार्थः-रुद्रशब्देन त्रयोऽर्था गृह्यन्ते। परमेश्वरो जीवो वायुश्चेति तत्र परमेश्वरः सर्वज्ञतया येन यादृशं पापकर्म कृतं तत्फलदानेन रोदयिताऽस्ति जीवः खलु यदा मरणसमये शरीरं जहाति पापफलं च भुङ्क्ते तदा स्वयं रोदिति वायुश्च शूलादिपीडाकर्म्मणा कर्मनिमित्तः सन् रोदयिताऽस्त्यत एते रुद्रा विज्ञेयाः॥ १॥

पदार्थः-हम लोग (**कत्**) कब (**प्रचेतसे**) उत्तम ज्ञानयुक्त (**मीढुष्टमाय**) अतिशय करके सेवन करने वा (**तव्यसे**) अत्यन्त वृद्ध (**हृदे**) हृदय में रहने वाले (**रुद्राय**) परमेश्वर जीव वा प्राणवायु के लिये (**शंतमम्**) अत्यन्त सुख रूप वेद का (**वोचेम**) अच्छे प्रकार उपदेश करें॥ १॥

भावार्थः-रुद्र शब्द से तीन अर्थों का ग्रहण है, परमेश्वर जीव और वायु, उनमें से परमेश्वर अपने सर्वज्ञपन से जिसने जैसा पाप कर्म किया उस कर्म के अनुसार फल देने से उसको रोदन कराने वाला है। जीव निश्चय करके मरने समय अन्य सम्बन्धियों को इच्छा कराता हुआ शरीर को छोड़ता है, तब अपने आप रोता है और वायु शूल आदि पीड़ा कर्म से रोदन कर्म का निमित्त है; इन तीनों के योग से मनुष्यों को अत्यन्त सुखों को प्राप्त होना चाहिये॥ १॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे।

यथा तोकाय रुद्रियम्॥ २॥

यथा॑। नः। अदि॑तिः। कर॒त्। पश्वे॑। नृऽभ्यः॑। यथा॑। गवे॑। यथा॑। तो॒काय॑। रु॒द्रिय॑म्॥ २॥

पदार्थः-(**यथा**) येन प्रकारेण (**नः**) अस्मभ्यम् (**अदितिः**) माता। अत्र **अदितिर्द्यौः** इत्यादिना माता गृह्यते। (**करत्**) कुर्य्यात् अत्राऽयं भ्वादिः। (**पश्वे**) पशुसमूहाय पशुपालः। अत्र **जसादिषु छन्दसि वा वचनम्।** (अष्टा०७.६.१०९) इति वार्तिकेनायं सिद्धः। (**नृभ्यः**) यथा मनुष्येभ्यो नृपतिः (**यथा**) (**गवे**) इन्द्रियाय जीवः पृथिव्यै कृषीवलः (**यथा**) (**तोकाय**) सद्यो जातायापत्याय बालकाय (**रुद्रियम्**) रुद्रस्येदं कर्म। अत्र पृषोदराद्याकृतिगणान्तर्गतत्वात् इदमर्थे घः॥ २॥

अन्वयः-यथा तोकायादितिर्माता यथा पश्वे पशुपालो यथा नृभ्यो नरेशो यथा गवे गोपालश्च सुखं करत् कुर्यात् तथा नोऽस्मभ्यं रुद्रियं कर्म स्यात्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यथा मातापितृभ्यां सन्तानाय पशुभ्यो गोपालेन राजसभया च विना प्रजाभ्यः सुखं न जायते तथैव विद्यापुरुषार्थाभ्यां विना सुखं न भवति॥ २॥

पदार्थः-(**यथा**) जैसे (**तोकाय**) उत्पन्न हुए बालक के लिये (**अदितिः**) माता (**यथा**) जैसे (**पश्वे**) पशु समूह के लिये पशुओं का पालक (**यथा**) जैसे (**नृभ्यः**) मनुष्यों के लिये राजा (**यथा**) जैसे (**गवे**) इन्द्रियों के लिये जीव वा पृथिवी के लिये खेती करने वाला (**करत्**) सुखों को करता है, वैसे (**नः**) हम लोगों के लिये (**रुद्रियम्**) परमेश्वर वा पवनों का कर्म प्राप्त हो॥ २॥

भावार्थः-इस मन्त्र में उपमाऽलङ्कार है। जैसे माता-पिता पुत्र के लिये, गोपाल पशुओं के लिये और राजसभा प्रजा के लिये सुखकारी होते हैं, वैसे ही सुखों के करने-कराने वाले परमेश्वर और पवन भी हैं॥ २॥

अथ सर्वैः सह विद्वांसः कथं वर्तेरन्नित्युपदिश्यते॥

अब सबके साथ विद्वान् लोग कैसे वर्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

यथा॑ नो मि॒त्रो वरु॑णो॒ यथा॑ रु॒द्रश्चिके॑तति।
यथा॒ विश्वे॑ स॒जोष॑सः॥ ३॥

यथा॑। न॒ः। मि॒त्रः। वरु॑णः। यथा॑। रु॒द्रः। चिके॑तति। यथा॑। विश्वे॑। स॒जोष॑सः॥ ३॥

पदार्थः-(**यथा**) येन प्रकारेण (**नः**) अस्मान् (**मित्रः**) सखा प्राणो वा (**वरुणः**) उत्तम उपदेष्टोदानो वा (**यथा**) (**रुद्रः**) परमेश्वरः (**चिकेतति**) ज्ञापयति (**यथा**) (**विश्वे**) सर्वे (**सजोषसः**) समानो जोषः प्रीतिः सेवनं वा येषान्ते॥ ३॥

अन्वयः-यथा मित्रो यथा वरुणो यथा रुद्रो नोऽस्माँश्चिकेतति यथा विश्वे सजोषसः सर्वे विद्वांसः सर्वा विद्याश्चिकेतन्ति तथाऽऽप्ता जनाः सत्यं विज्ञापयन्तु॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यथा सर्वैर्विद्वद्भिर्मैत्रीमुत्तमशीलं च धृत्वा सर्वेभ्यो मनुष्येभ्यो यथार्था विद्या उपदेष्टव्याः। यथा परमेश्वरेण वेदद्वारा सर्वा विद्याः प्रकाशितास्तथैवाध्यापकैः सर्वे मनुष्या विद्यायुक्ताः सम्पादनीया इति॥३॥

पदार्थः-(**यथा**) जैसे (**मित्रः**) सखा वा प्राण (**वरुणः**) उत्तम उपदेष्टा वा उदान (**यथा**) जैसे (**रुद्रः**) परमेश्वर (**नः**) हम लोगों को (**चिकेतति**) ज्ञानयुक्त करते हैं (**यथा**) जैसे (**विश्वे**) सब (**सजोषसः**) स्वतुल्य प्रीति सेवन करने वाले विद्वान् लोग सब विद्याओं के जानने वाले होते हैं, वैसे यथार्थ वक्ता पुरुष सबको जनाया करें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् लोग सब मनुष्यों को मित्रपन और उत्तम शील धारण कराकर उनके लिये यथार्थ विद्याओं की प्राप्ति और जैसे परमेश्वर ने वेदद्वारा सब विद्याओं का प्रकाश किया है, वैसे विद्वान् अध्यापकों को भी सब मनुष्यों को विद्यायुक्त करना चाहिये॥३॥

पुनः स रुद्रः कीदृश इत्युपदिश्यते॥

फिर वह रुद्र कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

गा॒थप॑तिं मे॒धप॑तिं रु॒द्रं जला॑षभेषजम्।

तच्छं॒योः सु॒म्नमी॑महे॥४॥

गा॒थऽप॑तिम्। मे॒धऽप॑तिम्। रु॒द्रम्। जला॑षऽभेषजम्। तत्। श॒म्ऽयोः। सु॒म्नम्। ई॒म॒हे॒॥४॥

पदार्थः-(**गाथपतिम्**) यो गाथानां स्तावकानां विदुषां पतिः पालकस्तम् (**मेधपतिम्**) यो मेधानां पवित्राणां पुरुषाणां वा पालयिता तम्। **मेध इति यज्ञनामसु पठितम्।** (निघं०३.१७) (**रुद्रम्**) पूर्वोक्तम् (**जलाषभेषजम्**) जलाषाय सुखाय भेषजं यस्मात्तम् (**तत्**) ज्ञानम् (**शंयोः**) शं लौकिकं पारमार्थिकं सुखं विद्यते यस्मिँस्तस्य (**सुम्नम्**) मोक्षसुखम् (**ईमहे**) याचामहे॥४॥

अन्वयः-हे मनुष्या! यथा वयं गाथपतिं मेधपतिं जलाषभेषजं रुद्रमाश्रित्य यच्छंयोरपि सुम्नं मोक्षसुखमीमहे याचामहे तथैव यूयमपीच्छत॥४॥

भावार्थः-नहि कश्चत्स्तुतीनां मेधानां दुःखनाशकानामोषधीनां प्रापकेण विदुषा प्राणायामेन च विना विज्ञानं लौकिकं सुखं मोक्षसुखं च प्राप्तुमर्हति॥४॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**गाथपतिम्**) स्तुति करने वालों के पालक (**मेधपतिम्**) यज्ञ वा पवित्र पुरुषों की पालना करने वाले (**जलाषभेषजम्**) जिससे सुख के लिये औषधी हो, उस (**रुद्रम्**) परमेश्वर के आश्रय होकर (**तत्**) उस विज्ञान वा (**शंयोः**) व्यावहारिक पारमार्थिक सुख से भी (**सुम्नम्**) मोक्ष के सुख की (**ईमहे**) याचना करते हैं, वैसे तुम भी करो॥४॥

भावार्थः-कोई भी मनुष्य स्तुति, यज्ञ वा दुःखों के नाश करने वाली ओषधियों की प्राप्ति कराने वाले परमेश्वर, विद्वान् और प्राणायाम के विना, विज्ञान और लौकिक सुख वा मोक्ष सुख प्राप्त होने के योग्य नहीं हो सकता॥४॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यः शुक्रइ॑व॒ सूर्यो॑ हिर॑ण्यमिव॒ रोच॑ते।
श्रेष्ठो॑ दे॒वानां॒ वसु॑ः॥५॥२६॥

यः। शुक्रःऽइ॑व। सूर्यः॑। हिर॑ण्यम्ऽइव। रोच॑ते। श्रेष्ठः॑। दे॒वाना॑म्। वसु॑ः॥५॥

पदार्थः-(**यः**) पूर्वोक्तो रुद्रः (**शुक्रइव**) यथा तेजस्वी (**सूर्य्यः**) सविता (**हिरण्यमिव**) यथा सुवर्णं प्रीतिकरम् (**रोचते**) रुचिकारी वर्त्तते (**श्रेष्ठः**) अत्युत्तमः (**देवानाम्**) सर्वेषां विदुषां पृथिव्यादीनां च मध्ये (**वसुः**) वसन्ति सर्वाणि भूतानि यस्मिन् सः॥५॥

अन्वयः-हे मनुष्या! यूयं यो रुद्रः सभेशः सूर्य्यः शुक्रइव हिरण्यमिव रोचते देवानां श्रेष्ठो वसुरस्ति तं सेनानायकं कुरुत॥५॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा परमेश्वरः सर्वेषां ज्योतिषां ज्योतिरानन्दिनामानन्दी श्रेष्ठानामुत्तमानामुत्तमो देवानां देवोऽधिकरणानामधिकरणमस्ति। एवं सभाध्यक्षः प्रकाशवत्सु प्रकाशवान् न्यायकारिषु न्यायकारी खल्वानन्दप्रदेष्वानन्दप्रदः श्रेष्ठस्वभावेषु श्रेष्ठस्वभावो विद्वत्सु विद्वान् वासहेतुनां वासहेतुर्भवेदिति वेद्यम्॥५॥

पदार्थः-(**यः**) जो पूर्व कहा हुआ रुद्र सेनापति (**सूर्य्यः शुक्र इव**) तेजस्वी शुद्ध भास्कर सूर्य के समान (**हिरण्यमिव**) सुवर्ण के तुल्य प्रीतिकारक (**देवानाम्**) सब विद्वान् वा पृथिवी आदि के मध्य में (**श्रेष्ठः**) अत्युत्तम (**वसुः**) सम्पूर्ण प्राणीमात्र का वसाने वाला (**रोचते**) प्रीतिकारक हो उसको सेना का प्रधान करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को उचित है कि जैसा परमेश्वर सब ज्योतिषों का ज्योति, आनन्दकारियों का आनन्दकारी, श्रेष्ठों का श्रेष्ठ, विद्वानों का विद्वान्, आधारों का आधार है, वैसे ही जो न्यायकारियों में न्यायकारी, आनन्द देने वालों में आनन्द देने वाला, श्रेष्ठ स्वभाव वालों में श्रेष्ठ स्वभाव वाला, विद्वानों में विद्वान् और वास हेतुओं का वासहेतु वीर पुरुष हो, उसको सभाध्यक्ष मानना चाहिये॥५॥

स तस्मै किं करोतीत्युपदिश्यते॥

वह उसके लिये क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

शं नः॑ कर॒त्यर्व॑ते सु॒गं मे॒षाय॑ मे॒ष्ये॑।

नृभ्यो॒ नारि॑भ्यो॒ गवे॑॥ ६॥

शम्। नः॑। क॒र॒ति॒। अर्व॑ते। सु॒ऽगम्। मे॒षाय॑। मे॒ष्ये॑। नृऽभ्यः॑। नारि॑ऽभ्यः। गवे॑॥ ६॥

पदार्थः-(**शम्**) सुखम् (**नः**) अस्माकम् (**करति**) कुर्यात्। लेट् प्रयोगोऽयम्। (**अर्वते**) अश्वजातये। **अर्वेत्यश्वनामसु पठितम्।** (निघं०१.१४) (**सुगम्**) सुखं गम्यं यस्मिन्। अत्र बहुलम् इति करणे डः। (**मेषाय**) मेषजातये (**मेष्ये**) तत्स्त्रियै। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ति** इत्याडागमो न भवति (**नृभ्यः**) मनुष्येभ्यः (**नारिभ्यः**) तत्स्त्रीभ्यः (**गवे**) गोजातये॥ ६॥

अन्वयः-यो रुद्रो नोऽस्माकमर्वते मेधाय मेध्ये नृभ्यो नारिभ्यो गवे सुगं शं सततं करति, स एव सभाधीशः स्थापनीयः॥ ६॥

भावार्थः-मनुष्यैः स्वस्य स्वकीयपरकीयानां मनुष्याणां पश्वादीनां च सुखाय परमेश्वरस्य प्रार्थना विदुषां सहायः प्राणानां यथावदुपयोगः पुरुषार्थश्च कर्त्तव्य इति॥ ६॥

पदार्थः-जो रुद्रस्वामी (**नः**) हम लोगों की (**अर्वते**) अश्वजाति (**मेषाय**) मेषजाति (**मेष्ये**) भेड़, बकरी (**नृभ्यः**) मनुष्य जाति (**नारिभ्यः**) स्त्री जाति और (**गवे**) गो जाति के लिये (**सुगम्**) सुगम (**शम्**) सुख को (**करति**) निरन्तर करे, वही न्यायाधीश करना चाहिये॥ ६॥

भावार्थः-मनुष्यों को अपने वा पराए पशु, मनुष्यों के लिये परमेश्वर की प्रार्थना, विद्वानों की सहायता, प्राणवायुओं से यथावत् उपयोग और अपना पुरुषार्थ करना चाहिये॥ ६॥

पुनस्तद्गुणा उपदिश्यन्ते॥

अब अगले मन्त्र में रुद्र के गुणों का उपदेश किया है॥

अ॒स्मे सो॑म॒ श्रिय॒मधि॒ नि धे॑हि श॒तस्य॑ नृ॒णाम्।

महि॒ श्रव॑स्तुविनृ॒म्णम्॥ ७॥

अ॒स्मेऽइति॑। सो॒म॒। श्रिय॑म्। अधि॑। नि। धे॒हि॒। श॒तस्य॑। नृ॒णाम्। महि॑। श्रवः॑। तु॒वि॒ऽनृ॒म्णम्॥ ७॥

पदार्थः-(**अस्मे**) अस्मभ्यस्माकं वा अत्र **सुपां सुलुग्०** इति शे आदेशः। (**सोम**) सर्वसुखप्रापक सभाध्यक्ष (**श्रियम्**) लक्ष्मीं विद्यां भोगान् धनं वा (**अधि**) उपरिभावे (**नि**) निश्चयार्थे (**धेहि**) स्थापय (**शतस्य**) बहूनाम् (**नृणाम्**) वीरपुरुषाणाम् (**महि**) पूज्यम्महद्वा (**श्रवः**) विद्याश्रवणमन्नं वा (**तुविनृम्णम्**) बहुविधं धनम्॥ ७॥

अन्वयः-हे सोम सभाध्यक्ष! त्वमस्मे अस्मभ्यमस्माकं वा शतस्य नृणां तुविनृम्णं महि श्रवः श्रियं चाधि निधेहि॥ ७॥

भावार्थः-अत्र श्लेषाऽलङ्कारः। नहि कश्चित्परमेश्वरस्य कृपया सभाध्यक्षसहायेन स्वपुरुषार्थेन च विना पूर्णां विद्यां पशूँश्चक्रवर्त्तिराज्यं लक्ष्मीं च प्राप्तुं शक्नोतीति॥७॥

पदार्थः-हे **(सोम)** जगदीश्वर सभाध्यक्ष वा आप! **(अस्मे)** हम लोगों के लिये वा हम लोगों के **(शतस्य)** बहुत **(नृणाम्)** वीरपुरुषों के **(तुविनृम्णम्)** अनेक प्रकार के धन **(महि)** पूज्य वा बहुत **(श्रवः)** विद्या का श्रवण और **(श्रियम्)** राज्यलक्ष्मी को **(अधि नि धेहि)** स्थापन कीजिये॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। कोई प्राणी परमेश्वर की कृपा, सभाध्यक्ष की सहायता वा अपने पुरुषार्थ के विना पूर्ण विद्या, पशु, चक्रवर्त्ती राज्य और लक्ष्मी को प्राप्त नहीं हो सकता॥७॥

पुनः स किन्निवारयेदित्युपदिश्यते॥

फिर वह किसका निवारण करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

मा नः सोमपरिबाधो मारातयो जुहुरन्त।

आ न इन्दो वाजे भज॥८॥

मा। नः। सोमऽपरिबाधः। मा। अरातयः। जुहुरन्त। आ। नः। इन्दोऽइति। वाजे। भज॥८॥

पदार्थः-(**मा**) निषेधार्थे (**नः**) अस्मान् (**सोमपरिबाधः**) ये सोमानुत्तमान् पदार्थान् परितः सर्वतो बाधन्ते ते (**मा**) निषेधार्थे (**अरातयः**) शत्रवः (**जुहुरन्त**) प्रसह्यकारिणो भवन्तु। अत्र **ह्वृ प्रसह्यकरणे** व्यत्ययेन आत्मनेपदं लङ्यडभावो **बहुलं छन्दसि** इत्युत्वं **वा छन्दसि सर्वे विधयो भवन्ति** इति **अदभ्यस्तात्** इति प्राप्तेऽद्भावो न भवति (**आ**) अभितः (**नः**) अस्मान् (**इन्दो**) आर्द्रीकारक सभाध्यक्ष (**वाजे**) युद्धे (**भज**) सेवस्व॥८॥

अन्वयः-हे इन्दो सभाध्यक्ष! नोऽस्मान् सोमपरिबाधो विरोधिनो मा जुहुरन्त येन नोऽस्माकमरातयः सन्ति ताँस्त्वं कदाचिन्माऽऽभज॥८॥

भावार्थः-मनुष्यैः परमोत्तमबलसाहित्येन युद्धेन च सर्वान् दुष्टाञ्च्छत्रून् विजित्य सत्यन्याययुक्तं राज्यं कार्य्यमिति॥८॥

पदार्थः-हे **(इन्दो)** सुशिक्षा से आर्द्र करने वाले सभाध्यक्ष **(नः)** हम लोगों को **(सोमपरिबाधः)** जो उत्तम पदार्थों को सब प्रकार दूर करने वाले विरोधी पुरुष हैं वे हम पर **(मा जुहुरन्त)** प्रबल न होवें और **(अरातयः)** जो दान आदि धर्मरहित शत्रु हठ करने वाले हैं वे **(नः)** हम लोगों को इन शत्रुओं को **(वाजे)** युद्ध में पराजय करने को **(आभज)** अच्छे प्रकार युक्त कीजिये॥८॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को अत्यन्त उत्तम बल के साहित्य से परमेश्वर वा सभासेनाध्यक्ष के आश्रय वा अपने पुरुषार्थयुक्त युद्ध में सब शत्रुओं को जीत कर न्याययुक्त होके राज्य का पालन करना चाहिये॥८॥

पुनरेतस्य का कीदृशीत्युपदिश्यते॥

फिर उसकी कौन कैसी है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यास्ते॑ प्र॒जा अ॒मृत॑स्य॒ पर॑स्मि॒न् धाम॑न्नृ॒तस्य॑।
मू॒र्धा नाभा॑ सोम वेन आ॒भूष॑न्ती॒: सोम वेद:॥ ९॥ २७॥ ८॥

या:। ते॒। प्र॒ऽजा:। अ॒मृत॑स्य। पर॑स्मिन्। धाम॑न्। ऋ॒तस्य॑। मू॒र्धा। नाभा॑। सो॒म॒। वे॒न॒:। आ॒ऽभूष॑न्ती:। सो॒म॒। वे॒द॒:॥ ९॥

पदार्थ:-(**या:**) वक्ष्यमाणा: (**ते**) तव जगदीश्वरस्येव सभाध्यक्षस्य (**प्रजा:**) प्रादुर्भूता: पालनीया: (**अमृतस्य**) नाशरहितस्य कारणस्य सकाशाद्योत्पन्ना: (**परस्मिन्**) उत्तमे (**धामन्**) धामन्यानन्दमये स्थाने (**ऋतस्य**) सत्यस्वरूपस्य सत्यप्रियस्य वा (**मूर्द्धा**) उत्तम: (**नाभा**) सन्नहनस्य सुखस्थिरस्य बन्धनरूपे। अत्र **सुपां सुलुक्** इत्याकारादेश:। (**सोम**) सर्वसुखैश्वर्यप्रद (**वेन:**) कामयस्व (**आभूषन्ती:**) समन्ताद् भूषणयुक्ता: (**सोम**) विज्ञानप्रद (**वेद:**) प्राप्नुहि॥ ९॥

अन्वय:-हे सोम! वेनो मूर्द्धा त्वमृतस्याऽमृतस्य नाशरहितस्य नाभा परस्मिन् धामन् वर्त्तमानस्येश्वरस्य ते या: प्रजा: सन्ति ता आभूषन्तीर्वेद: सर्वाभिर्विद्याभि: प्राप्नुहि॥ ९॥

भावार्थ:-यत्र मनुष्या अद्वितीयस्येश्वरस्योपासकस्य सभाद्यध्यक्षस्य चाश्रयं कुर्वन्ति तत्रैते दु:खस्य लेशमपि न प्राप्नुवन्ति। यथा परमेश्वर: श्रेष्ठाचारिणो मनुष्यान् कामयते सभाध्यक्षश्च तथैव प्रजास्थैरपि पुरुषै: परमेश्वरसभाध्यक्षौ नित्यं कामनीयौ नैतत्कामनया विना विस्तृतं सुखं कदाचित्सम्भवतीति॥ ९॥

अस्मिन् सूक्ते रुद्रशब्दार्थवर्णनं सर्वसुखप्रतिपादनं मित्रताऽऽचरणं परमेश्वरसभाध्यक्षाश्रयेण सर्वसुखप्रापणमेकस्येश्वरस्योपासनं परमसुखप्रापणं सभाद्यध्यक्षाश्रयकरणं चोक्तमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति त्रयश्चत्वारिंशं सूक्तं सप्तविंशो वर्गश्च समाप्त:॥

पदार्थ:-हे (**सोम**) विज्ञान के देने वाले (**वेन:**) कमनीयस्वरूप (**मूर्द्धा**) सर्वोत्तम! तू (**ऋतस्य**) सत्यस्वरूप वा सत्यप्रिय (**अमृतस्य**) नाशरहित (**नाभा**) स्थिर सुख के बन्धनरूप (**धामन्**) न्याय वा आनन्दमय स्थान में वर्त्तमान ईश्वर के समान न्यायकारी (**ते**) तेरी (**या:**) जो (**प्रजा:**) हैं उन को (**आभूषन्ती:**) सब प्रकार भूषणयुक्त होने की (**वेन:**) इच्छा कर और उनको (**वेद:**) सब विद्याओं से प्राप्त हो॥ ९॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जहाँ मनुष्य ईश्वर ही की उपासना करनेहारे अत्युत्तम सभाध्यक्ष का आश्रय करते हैं, वहां वे दु:ख के लेश को भी नहीं प्राप्त होते। जैसे परमेश्वर और

सभाध्यक्ष श्रेष्ठ आचरण करने वाले मनुष्यों की इच्छा करते हैं, वैसे ही प्रजा में रहने वाले मनुष्य परमेश्वर वा सभाध्यक्ष की नित्य इच्छा करें, क्योंकि इसके विना बहुत सुख कभी प्राप्त नहीं हो सकते॥९॥

इस सूक्त में रुद्र शब्द के अर्थ का वर्णन, सब सुखों का प्रतिपादन, मित्रपन का आचरण, परमेश्वर वा सभाध्यक्ष के आश्रय से सुखों की प्राप्ति, एक ईश्वर ही की उपासना, परमसुख की प्राप्ति और सभाध्यक्ष का आश्रय करना कहा है। इससे इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह तेंतालीसवां सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥ ४३॥ २७॥

अथ चतुर्दशर्च्चस्य चतुश्चत्वारिंशस्य सूक्तस्य प्रस्कण्व ऋषिः। अग्निर्देवता। १,५ उपरिष्टाद्विराड् बृहती। ३ निचृदुपरिष्टाद् बृहती। ७,११ निचृत्पथ्याबृहती। १२ भुरिग्बृहती। १३ पथ्याबृहती च छन्दः। मध्यमः स्वरः २,४,६,८,१४ विराट्सतः पङ्क्तिः। १० विराड् विस्तारपङ्क्तिश्छन्दः। पञ्चमः स्वरः। ९ आर्च्ची त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अत्र सायणाचार्य्यादिभिर्विलसनमोक्षमूलरादिभिश्च युजः सतोबृहत्योऽयुजोबृहत्य इत्युक्तं तदलीकतरम्। इत्थमेषां छन्दोविषयज्ञानं सर्वत्रैवास्तीति वेद्यम्॥

इस सूक्त में सायणाचार्य्यादि वा विलसन मोक्षमूलरादिकों ने यजोबृहती, अयुजो बृहती छन्द कहे हैं, सो मिथ्या हैं। इसी प्रकार छन्दों का ज्ञान इन को सब जगह जानो॥

अथाऽग्निशब्दसम्बन्धेन देवकामना कार्य्येत्युपदिश्यते॥

अब चवालीसवें सूक्त का आरम्भ है, उसके पहिले मन्त्र में अग्नि शब्द के सम्बन्ध से विद्वानों की कामना करनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अग्ने॒ विव॑स्वदु॒षस॑श्चि॒त्रं राधो॑ अमर्त्य।
आ दा॒शुषे॑ जातवेदो वहा॒ त्वम॒द्या दे॒वाँ उ॑ष॒र्बुधः॥ १॥

अग्ने॑। विव॑स्वत्। उ॒षसः॑। चि॒त्रम्। राधः॑। अ॒म॒र्त्य॒। आ। दा॒शुषे॑। जा॒त॒ऽवे॒दः॒। व॒ह॒। त्वम्। अ॒द्य। दे॒वान्। उ॒ष॒ऽबुधः॑॥ १॥

पदार्थः-(**अग्ने**) विद्वन् (**विवस्वत्**) यथा स्वप्रकाशस्वरूपः सूर्य्यः (**उषसः**) प्रातःकालात् (**चित्रम्**) अद्भुतं विवस्वत्प्रकाशकम् (**राधः**) धनम् (**अमर्त्य**) स्वस्वरूपेण मरणधर्मरहितसाधारणमनुष्यस्वभाव- विलक्षण (**आ**) अभितः (**दाशुषे**) दात्रे पुरुषार्थिने मनुष्याय (**जातवेदः**) यो जातान् सर्वान्वेत्ति जातान् विन्दति वा तत्सम्बुद्धौ। अत्राह यास्कमुनिः। **जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञो वा यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणम्।** (निरु०७.१९) (**वह**) प्राप्नुहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**देवान्**) उत्तमान् विदुषो दिव्यगुणान् वा (**उषर्बुधः**) य उषसि स्वयं बुध्यन्ते सुप्तान् बोधयन्ति तान्॥ १॥

अन्वयः-हे अमर्त्य जातवेदोऽग्ने विद्वन्! यतस्त्वमद्य दाशुषे उषसश्चित्रं विवस्वद्राधो ददासि स उषर्बुधो देवाँश्चावह॥ १॥

भावार्थः-मनुष्यैरीश्वराज्ञापालनाय स्वपुरुषार्थेन परमेश्वरमनलसानुत्तमान् विदुषश्चाश्रित्य चक्रवर्त्तिराज्य-विद्याश्रीः प्राप्तव्या सर्वविद्याविदो विद्वांसः परमोत्तमगुणाढ्यं यच्छ्रेष्ठं कर्म स्वीकर्त्तुमिष्टं तन्नित्यं कुर्य्युः। यद्दुष्टं कर्म्म तत्कदाचिन्नैव कुर्य्युरिति॥ १॥

पदार्थः-हे **(विवस्वत्)** स्वप्रकाशस्वरूप वा विद्याप्रकाशयुक्त **(अमर्त्य)** मरणधर्म से रहित वा साधारण मनुष्यस्वभाव से विलक्षण **(जातवेदः)** उत्पन्न हुए पदार्थों को जानने वा प्राप्त होने वाले **(अग्ने)** जगदीश्वर वा विद्वान्! जिस से आप **(अद्य)** आज **(दाशुषे)** पुरुषार्थी मनुष्य के लिये **(उषसः)** प्रातःकाल से **(चित्रम्)** अद्भुत **(विवस्वत्)** सूर्य्य के समान प्रकाश करने वाले **(राधः)** धन को देते हो, वह आप **(उषर्बुधः)** प्रातःकाल में जागने वाले विद्वानों को **(आवह)** अच्छे प्रकार प्राप्त कीजिये॥१॥

भावार्थः-मनुष्यों को परमेश्वर की आज्ञा पालन के लिये अपने पुरुषार्थ से परमेश्वर वा आलस्य रहित उत्तम विद्वानों को आश्रय लेकर चक्रवर्त्ति राज्य, विद्या और राजलक्ष्मी का स्वीकार करना चाहिये सब विद्याओं के जानने वाले विद्वान् लोग जो उत्तम गुण और श्रेष्ठ अपने करने योग्य कर्म हैं, उसीको नित्य करें और जो दुष्ट कर्म हैं, उस को कभी न करें॥१॥

पुनर्विद्वत्सङ्गगुणा उपदिश्यन्ते॥

फिर विद्वानों के संग के गुणों का उपदेश अगले मन्त्र में किया है॥

जुष्टो॒ हि दू॒तो असि॑ हव्य॒वाह॒नोऽग्ने॑ र॒थीर॑ध्व॒राणा॑म्।
स॒जूर॒श्विभ्या॑मु॒षसा॑ सुवी॒र्य॑म॒स्मे धे॑हि॒ श्रवो॑ बृ॒हत्॥२॥

जुष्टः॑। हि। दू॒तः। असि॑। ह॒व्य॒ऽवाह॑नः। अग्ने॑। र॒थीः। अ॒ध्व॒राणा॑म्। स॒ऽजूः। अ॒श्वि॒ऽभ्या॑म्। उ॒षसा॑। सु॒ऽवी॒र्य॑म्। अ॒स्मेऽइति॑। धे॒हि॒। श्रवः॑। बृ॒हत्॥२॥

पदार्थः-(**जुष्टः**) प्रीतः सेवितः **(हि)** खलु **(दूतः)** शत्रूणामुपतापयिताऽतिप्रतापगुणयुक्तो वा **(असि)** **(हव्यवाहनः)** यो हव्यानि ग्राह्यदातव्यानि हुतानि द्रव्याणि यानानि वा वहति प्राप्नोति सः **(अग्ने)** राजविद्याविचक्षण **(रथीः)** प्रशस्ता रथा यस्य सन्ति सः। अत्र **छन्दसीवनिपौ च वक्तव्यौ।** (अष्टा०वा०५.२.१०९) अनेन रथशब्दान्मत्वर्थ ईप्रत्ययः। **(अध्वराणाम्)** अहिंसनीयानां यज्ञानां मध्ये **(सजूः)** यः समाना जुषते। अत्र जुष धातो क्विप् समानस्य सादेशश्च **(अश्विभ्याम्)** वायुजलाभ्याम् **(उषसा)** प्रातःकालेन युक्त्या क्रियया **(सुवीर्य्यम्)** सुष्ठु वीर्य्याणि यस्य सः **(अस्मे)** अस्मासु। अत्र **सुपां सुलुग्०** इति सप्तम्याः स्थाने शे आदेशः। **(धेहि)** धर **(श्रवः)** सर्वविद्याश्रवणनिमित्तमन्नम् **(बृहत्)** महत्तमम्॥२॥

अन्वयः-हे अग्ने विद्वान्! यतस्त्वं जुष्टो दूतः सन्नध्वराणां रथीर्हव्यवाहनः सजूरसि तस्मादस्मे अश्विभ्यामुषसा सिद्धं बृहत्सुवीर्य्यं श्रवो धेहि॥२॥

भावार्थः-नहि कश्चिद्विदुषां सङ्गेन विना सर्वविद्यां प्राप्य शत्रुविजयमुत्तमं पराक्रमं चक्रवर्त्यादिश्रियं च प्राप्तुं शक्नोति। नहि खल्वग्नेर्जलादियोगेन विनोत्तमव्यवहारसिद्धिं च प्राप्तुमर्हतीति॥२॥

पदार्थः-हे **(अग्ने)** पावक के समान राजविद्या के जानने वाले विद्वान्! **(हि)** जिस कारण आप **(जुष्टः)** प्रसन्न प्रकृति और **(दूतः)** शत्रुओं को ताप कराने वाले होकर **(अध्वराणाम्)** अहिंसनीय यज्ञों को सिद्ध करते **(रथीः)** प्रशंसनीय रथयुक्त **(हव्यवाहनः)** देने-लेने योग्य वस्तुओं को प्राप्त होने **(सजूः)** अपने तुल्यों के सेवन करने वाले **(असि)** हो इस से **(अस्मे)** हम लोगों में **(अश्विभ्याम्)** वायु, जल **(उषसः)** प्रातःकाल में सिद्ध हुई क्रिया से सिद्ध किये हुए **(बृहत्)** बड़े **(सुवीर्य्यम्)** उत्तम पराक्रम कारक **(श्रवः)** सब विद्या के श्रवण का निमित्त अन्न को **(धेहि)** धारण कीजिये॥२॥

भावार्थः-कोई मनुष्य विद्वानों के संग के विना विद्या को प्राप्त, शत्रु को जीत के उत्तम पराक्रम चक्रवर्त्ति राज्यलक्ष्मी के प्राप्त होने को समर्थ नहीं हो सकता और अग्नि, जल आदि के योग के विना उत्तम व्यवहार की सिद्धि भी नहीं कर सकता॥२॥

पुनस्तं कथंभूतं स्वीकुर्य्युरित्युपदिश्यते॥

फिर कैसे मनुष्य को स्वीकार करे, इस विषय का उपदेश अगले मन्त्र में किया है।

अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम्।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम्॥ ३॥

अद्य। दूतम्। वृणीमहे। वसुम्। अग्निम्। पुरुऽप्रियम्। धूमऽकेतुम्। भाःऽऋजीकम्। विऽउष्टिषु। यज्ञानाम्। अध्वरऽश्रियम्॥ ३॥

पदार्थः-(**अद्य**) अस्मिन् दिने। **निपातस्य च** इति दीर्घः। **(दूतम्)** यो दुनोति पदार्थान् देशान्तरं प्रापयति तम् **(वृणीमहे)** स्वीकुर्वीमहि **(वसुम्)** सकलविद्यानिवासम् **(अग्निम्)** पावकमिव विद्वांसम् **(पुरुप्रियम्)** यः पुरूणां बहूनां प्रियस्तम् **(धूमकेतुम्)** धूमकेतुर्ध्वजो यस्य तम् **(भाऋजीकम्)** भाति प्रकाशयति सा भा भा कान्तिर्वा तां योऽर्जयते तम् **(व्युष्टिषु)** विविधा उष्टयः कामनाश्च तासु **(यज्ञानाम्)** अग्निहोत्राद्यश्वमेधान्तानां योगज्ञानशिल्पोपासनाज्ञानानां वा मध्ये **(अध्वरश्रियम्)** याऽध्वराणामहिंसनीयानां यज्ञानां श्रीः शोभा ताम्॥३॥

अन्वयः-वयमद्य मनुष्यजन्मविद्याप्राप्तिसमयं प्राप्याऽस्मिन् दिने व्युष्टिषु भाऋजीकं यज्ञानां मध्येऽध्वरश्रियं धूमकेतुं वसुं पुरुप्रियं दूतमग्निमिव वर्त्तमानं विद्वांसं दूतं वृणीमहे॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्याराज्यसुखप्राप्त्यर्थमनूचानं विद्वांसं दूतं कृत्वा बहुगुणयोगेन बहुकार्य्यप्रापिकां विद्युतं स्वीकृत्य सर्वाणि कार्य्याणि संसाधनीयानि॥३॥

पदार्थः-हम लोग **(अद्य)** आज मनुष्यजन्म वा विद्या के प्राप्ति समय को प्राप्त होकर **(व्युष्टिषु)** अनेक प्रकार की कामनाओं में **(भाऋजीकम्)** कामनाओं के प्रकाश **(यज्ञानाम्)** अग्निहोत्र आदि अश्वमेध पर्यन्त वा योग, उपासना, ज्ञान, शिल्पविद्यारूप यज्ञों के मध्य **(अध्वरश्रियम्)** अहिंसनीय यज्ञों की भी शोभारूप **(धूमकेतुम्)** जिसका धूम ही ध्वजा है **(वसुम्)** सब विद्याओं का घर वा बहुत धन की प्राप्ति

का हेतु **(पुरुप्रियम्)** बहुतों को प्रिय **(दूतम्)** पदार्थों को दूर पहुंचाने वाले **(अग्निम्)** भौतिक अग्नि के सदृश विद्वान् दूत को **(वृणीमहे)** अङ्गीकार करें॥३॥

भावार्थः-मनुष्यों को उचित है कि विद्या वा राज्य की प्राप्ति के लिये सब विद्याओं के कथन करने वा सब बातों का उत्तर देने वाले विद्वान् को दूत करें और बहुत गुणों के योग से बहुत कार्य्यों को प्राप्त कराने वाली बिजुली को स्वीकार करके सब कार्य्यों को सिद्ध करें॥३॥

पुनस्तं कीदृशं गृह्णीयुरित्युपदिश्यते॥

फिर किस प्रकार के विद्वान् को ग्रहण करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे।
देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु॥४॥

श्रेष्ठम्। यविष्ठम्। अतिथिम्। सुऽआहुतम्। जुष्टम्। जनाय। दाशुषे। देवान्। अच्छ। यातवे। जातऽवेदसम्। अग्निम्। ईळे। विऽउष्टिषु॥४॥

पदार्थः-(**श्रेष्ठम्**) अत्युत्तमम् (**यविष्ठम्**) बलवत्तरम् (**अतिथिम्**) नित्यं भ्रमणशीलं सेवितुमर्हम् (**स्वाहुतम्**) यः सुष्ठु आहूयते तम् (**जुष्टम्**) विद्वद्भिः प्रीतं सेवितं वा (**जनाय**) धार्मिकाय विदुषे मनुष्याय (**दाशुषे**) दात्रे (**देवान्**) विदुषो दिव्यगुणान् वा (**अच्छ**) उत्तमेन प्रकारेण। अत्र **निपातस्य च** इति दीर्घः। (**यातवे**) यातुं प्राप्तुम्। अत्र **तुमर्थे से०** इति तवेन् प्रत्ययः। (**जातवेदसम्**) जातेषु पदार्थेषु विद्यमानमिव व्याप्तविद्यम् (**अग्निम्**) वह्निवद्वर्त्तमानं विद्वांसम् (**ईडे**) सत्कुर्याम् (**व्युष्टिषु**) विशिष्टासु कामनास्वध्येषितासु सतीषु॥४॥

अन्वयः-अहं व्युष्टिषु यातवे दाशुषे जनाय श्रेष्ठं यविष्ठं जुष्टं स्वाहुतं जातवेदसमतिथिमग्निमिव प्रकाशमानं विद्वांसं दूतमन्यान् देवान् वाऽच्छेडे॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः श्रेष्ठानां धर्मबलानां सर्वैर्विद्वद्भिः सत्कृतानां प्रसन्नस्वभावानां सर्वोपकारकाणां विदुषामतिथिनामेव सत्कारः कर्त्तव्यः, यतः सर्वहितं स्यात्॥४॥

पदार्थः-मैं (**व्युष्टिषु**) विशिष्ट पढ़ने के योग्य कामनाओं में (**यातवे**) प्राप्ति के लिये (**दाशुषे**) दाता (**जनाय**) धार्मिक विद्वान् मनुष्य के अर्थ (**श्रेष्ठम्**) अति उत्तम (**यविष्ठम्**) परम बलवान् (**जुष्टम्**) विद्वान् से प्रसन्न वा सेवित (**स्वाहुतम्**) अच्छे प्रकार बुला के सत्कार के योग्य (**जातवेदसम्**) सब पदार्थों में व्याप्त (**अतिथिम्**) सेवा करने योग्य (**अग्निम्**) अग्नि के तुल्य वर्त्तमान सज्जन अतिथि और (**देवान्**) दिव्य गुण वाले विद्वानों को (**अच्छ**) अच्छे प्रकार सत्कार करूं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को अति योग्य है कि उत्तम धर्म बल वाले प्रसन्न स्वभाव सहित सबके उपकारक विद्वान् और अतिथियों का सत्कार करें, जिस से सब जनों का हित हो॥४॥

पुनस्तं कीदृशं स्वीकुर्य्युरित्युपदिश्यते॥

फिर कैसे को ग्रहण करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन॥५॥२८॥

स्तविष्यामि। त्वाम्। अहम्। विश्वस्य। अमृत। भोजन। अग्ने। त्रातारम्। अमृतम्। मियेध्य। यजिष्ठम्। हव्यवाहन॥५॥

पदार्थः-(**स्तविष्यामि**) स्तोष्यामि (**त्वाम्**) जगदीश्वरम् (**अहम्**) (**विश्वस्य**) समस्तस्य संसारस्य (**अमृत**) अविनाशिन् (**भोजन**) पालक (**अग्ने**) स्वप्रकाशेश्वर (**त्रातारम्**) अभिरक्षितारम् (**अमृतम्**) नाशरहितं सदा मुक्तम् (**मियेध्य**) दुःखानां प्रक्षेप्तः (**यजिष्ठम्**) सुखानामतिशयितं दातारम् (**हव्यवाहन**) यो हव्यानि होतुं दातुमर्हाणि द्रव्याणि सुखसाधकानि वहति प्रापयति तत्सम्बुद्धौ॥५॥

अन्वयः-हे अमृत भोजन मियेध्य हव्यवाहनाऽग्ने! जगदीश्वरोऽहं विश्वस्य त्रातारं यजिष्ठममृतं त्वां स्तविष्यामि स्तोष्यामि नान्यं कदाचित्॥५॥

भावार्थः-नहि विद्वद्भिरस्य सर्वस्य रक्षकं मोक्षदातारं विद्याकामानन्दप्रदं सेवनीयं परमेश्वरं हित्वा कस्यापीश्वरत्वेनाऽऽश्रयः स्तुतिर्वा कदापि कर्त्तव्या॥५॥

पदार्थः-(**अमृत**) अविनाशिस्वरूप (**भोजन**) पालनकर्त्ता (**मियेध्य**) प्रमाण करने (**हव्यवाहन**) लेने-देने योग्य पदार्थों को प्राप्त कराने वाले (**अग्ने**) परमेश्वर (**अहम्**) मैं (**विश्वस्य**) सब जगत् के (**त्रातारम्**) रक्षा (**यजिष्ठम्**) अत्यन्त यजन करने वाले (**अमृतम्**) नित्य स्वरूप (**त्वा**) तुझ ही की (**स्तविष्यामि**) स्तुति करूंगा॥५॥

भावार्थः-विद्वानों को योग्य है कि इस सब जगत् के रक्षक, मोक्ष देने, विद्या, काम, आनन्द के देने वा उपासना करने योग्य परमेश्वर को छोड़ अन्य किसी का भी ईश्वरभाव से आश्रय न करें॥५॥

पुनः स कीदृशः कस्मै किं करोतीत्युपदिश्यते॥

फिर वह कैसा है, किस के लिये क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः।
प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम्॥६॥

सुऽशंसः। बोधि। गृणते। यविष्ठ्य। मधुऽजिह्वः। सुऽआहुतः। प्रस्कण्वस्य। प्रऽतिरन्। आयुः। जीवसे। नमस्य। दैव्यम्। जनम्॥६॥

पदार्थः-(**सुशंसः**) शोभना शंसाः स्तुतयो यस्य विदुषः सः (**बोधि**) बुध्येत्। अत्र लिङर्थे लुङ्डभावश्च। (**गृणते**) स्तुतिं कुर्वते (**यविष्ठ्य**) अतिशयने युवा यविष्ठो यविष्ठ एव यविष्ठ्यस्तत्सम्बुद्धौ (**मधुजिह्वः**) मधुरगुणयुक्ता जिह्वा यस्य। अत्र **फलिपाटिनमि०** (उणा०१.१८) अनेन मनधातो रुः प्रत्ययो नस्य धकारादेशश्च। (**स्वाहुतः**) यः सुखेनाहूयते (**प्रस्कण्वस्य**) प्रकृष्टश्चासौ कण्वो मेधावी च तस्य (**प्रतिरन्**) दुःखात्तरन्। अत्र **बहुलं छन्दसि** इति शपो लुक्। (**आयुः**) जीवनम् (**जीवसे**) जीवितुम् (**नमस्य**) पूजितुं योग्य। अत्र नमस् धातोर्ण्यत्। **अन्येषामपि०** इति दीर्घश्च (**दैव्यम्**) देवेषु विद्वत्सु भवम् (**जनम्**) मनुष्यम्॥६॥

अन्वयः-हे यविष्ठ्य नमस्य विद्वन्! मधुजिह्वः सुशंसः स्वाहुतः प्रस्कण्वस्य जीवस आयुः प्रतिरन्त्सँस्त्वं गृणते शास्त्राणि बोध्यनेन दैव्यं जनं रक्षसि तस्मात् सत्कर्त्तव्योऽसि॥६॥

भावार्थः-सर्वैर्मनुष्यैः सर्वोत्कृष्टत्वान्नमस्करणीयो विद्वाँश्च सत्कर्त्तव्यः। एवमेतं समाश्रित्य सर्वे आयुर्विद्ये प्राप्तव्ये इति॥६॥

पदार्थः-हे (**यविष्ठ्य**) अत्यन्त बलवान् (**नमस्य**) पूजने योग्य विद्वान्! (**मधुजिह्वः**) मधुर ज्ञानरूप जिह्वायुक्त (**सुशंसः**) उत्तम स्तुति से प्रशंसित (**स्वाहुतः**) सुख से आह्वान बोलने योग्य (**प्रस्कण्वस्य**) उत्तम मेधावी विद्वान् के (**जीवसे**) जीवन के लिये (**आयुः**) जीवन को (**प्रतिरन्**) दुःखों से पार करते जो आप (**गृणते**) सत्य की स्तुति करते हुए मनुष्य के लिये शास्त्रों का (**बोधि**) बोध कीजिये और जिस से (**दैव्यम्**) विद्वानों में उत्पन्न हुए (**जनम्**) मनुष्य की रक्षा करते हो, इस से सत्कार के योग्य हो॥६॥

भावार्थः-सब मनुष्यों को उचित है कि जो सब से उत्कृष्ट विद्वान् है, उसी का सत्कार करें। ऐसे ही इस का अच्छे प्रकार आश्रय लेकर सब उमर और विद्या को प्राप्त करें॥६॥

पुनः स कीदृशोऽस्तीत्युपदिश्यते॥

फिर वह किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

होतारं विश्ववेदसं सं हि त्वा विश इन्धते।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत्॥७॥

होतारम्। विश्वऽवेदसम्। सम्। हि। त्वा। विशः। इन्धते। सः। आ। वह। पुरुऽहूत। प्रऽचेतसः। अग्ने। देवान्। इह। द्रवत्॥७॥

पदार्थः-(**होतारम्**) हवनस्य कर्त्तारम् (**विश्ववेदसम्**) विश्वानि सर्वाणि सुखानि विन्दति यस्मात्तम् (**सम्**) सम्यगर्थे (**हि**) खलु (**त्वा**) त्वाम् (**विशः**) प्रजाः (**इन्धते**) प्रदीप्यन्ते (**सः**) (**आ**) अभितः (**वह**) प्राप्नुहि (**पुरुहूत**) यः पुरुभिर्बहुभिर्विद्वद्भिर्हूयते स्तूयते तत्सम्बुद्धौ (**प्रचेतसः**) प्रकृष्टं चेतो विज्ञानं यासां ताः (**अग्ने**) विशिष्टज्ञानयुक्त (**देवान्**) वीरान् विदुषो दिव्यगुणान् वा (**इह**) अस्मिन् युद्धादिव्यवहारे (**द्रवत्**) द्रवतु॥७॥

अन्वयः-हे पुरुहूताग्ने विद्वन्! प्रचेतसो विशो यं होतारं विश्ववेदसं त्वां हि खलु समिन्धते ता प्रति भवान् द्रवत्॥७॥

भावार्थः-नहि विद्वत्सहायेन विना प्रजासुखं दिव्यगुणप्राप्तिः शत्रुविजयश्च जायते तस्मादेतत्सर्वैः प्रयत्नेन संसाधनीयमिति॥७॥

पदार्थः-हे (**पुरुहूत**) बहुत विद्वानों के बुलाये हुए (**अग्ने**) विशिष्ट ज्ञानयुक्त विद्वन्! (**प्रचेतसः**) उत्तम ज्ञानयुक्त (**विशः**) प्रजा जिस (**होतारम्**) हवन के कर्त्ता (**विश्ववेदसम्**) सब सुख प्राप्त (**त्वा**) आपको (**हि**) निश्चय करके (**समिन्धते**) अच्छे प्रकार प्रकाश करती हैं (**सः**) सो आप (**इह**) इस युद्ध आदि कर्मों में उत्तम ज्ञान वाले (**देवान्**) शूरवीर विद्वानों को (**आवह**) अच्छे प्रकार प्राप्त हूजिये॥७॥

भावार्थः-विद्वानों के सहाय के विना प्रजा के सुख को वा दिव्य गुणों की प्राप्ति और शत्रुओं से विजय नहीं हो सकता। इससे यह सब मनुष्यों को प्रयत्न के साथ सिद्ध करना चाहिये॥७॥

पुनस्तं कीदृशं जानीयुः केन सह च किं प्राप्नोतीत्युपदिश्यते।

फिर वह कैसा और किस के सहाय से किस को प्राप्त होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर॥८॥

सवितारम्। उषसम्। अश्विना। भगम्। अग्निम्। विऽउष्टिषु। क्षपः। कण्वासः। त्वा। सुतऽसोमासः। इन्धते। हव्यऽवाहम्। सुऽअध्वर॥८॥

पदार्थः-(**सवितारम्**) सूर्य्यप्रकाशम् (**उषसम्**) प्रातःकालम् (**अश्विना**) वायुजले (**भगम्**) ऐश्वर्य्यम् (**अग्निम्**) विद्युतम् (**व्युष्टिषु**) कामनासु (**क्षपः**) रात्रीः (**कण्वासः**) मेधाविनः (**त्वा**) त्वाम् (**सुतसोमासः**) सुताः सम्पादिता उत्तमाः पदार्था यैस्ते (**इन्धते**) दीप्यन्ते (**हव्यवाहम्**) यो हव्यानि वहति प्राप्नोति तम् (**स्वध्वर**) शोभना अध्वरा यस्य तत्सम्बुद्धौ॥८॥

अन्वयः-हे स्वध्वर विद्वन्! ये सुतसोमाः कण्वासो व्युष्टिषु सवितारमुषसमश्विनौ भगमग्निं क्षपो हव्यवाहं त्वां च समिन्धते तांस्त्वमपि दीप्यस्व॥८॥

भावार्थः-मनुष्यैः सर्वासु क्रियास्वहोरात्रे सवित्रादीन् पदार्थान् सम्प्रयोज्य वायुवृष्टिशुद्धिकराणि शिल्पादीनि सर्वाणि कार्य्याणि सम्पादनीयानि केनापि विद्वत्सङ्गेन विनैतेषां गुणज्ञानाभावात् क्रियासिद्धिं कर्त्तुं नैव शक्यत इति॥८॥

पदार्थः-हे **(स्वध्वर)** उत्तम यज्ञ वाले विद्वान्! जो **(सुतसोमाः)** उत्तम पदार्थों को सिद्ध करते **(कण्वासः)** मेधावी विद्वान् लोग **(व्युष्टिषु)** कामनाओं में **(सवितारम्)** सूर्य्यप्रकाश **(उषसम्)** प्रातःकाल **(अश्विना)** वायुजल **(क्षपः)** रात्रि और **(हव्यवाहम्)** होम करने योग्य द्रव्यों को प्राप्त कराने वाले **(त्वा)** आपको **(समिन्धते)** अच्छे प्रकार प्रकाशित करते हैं, वह आप भी उन को प्रकाशित कीजिये॥८॥

भावार्थः-मनुष्यों को उचित है कि सब क्रियाओं में दिन-रात प्रयत्न से सूर्य्य आदि पदार्थों को संयुक्त कर वायु, वृष्टि शुद्धि करने वाले शिल्परूप यज्ञ को प्रकाश करके कार्य्यों को सिद्ध और विद्वानों के संग से इनके गुण जानें॥८॥

पुनरयं विद्वान् कीदृश इत्युपदिश्यते।

फिर यह विद्वान् कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

पतिर्ह्यध्वराणामग्ने दूतो विशामसि।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः॥९॥

पतिः। हि। अध्वराणाम्। अग्ने। दूतः। विशाम्। असि। उषःऽबुधः। आ। वह। सोमऽपीतये। देवान्। अद्य। स्वः।ऽदृशः॥९॥

पदार्थः-(**पतिः**) पालयिता **(हि)** खलु **(अध्वराणाम्)** यज्ञानाम् **(अग्ने)** नीतिज्ञ विद्वन् **(दूतः)** यो दुनोति शत्रून् भेत्तुं जानाति सः **(विशाम्)** प्रजानाम् **(असि)** **(उषर्बुधः)** य उषसि बुध्यन्ते तान् **(आ)** आभिमुख्ये **(वह)** प्राप्नुहि **(सोमपीतये)** सोमानाममृतरसानां पानं यस्मिन् व्यवहारे तस्मै। अत्र **सह सुपा** (अष्टा०२.१.४) इति समासः। **(देवान्)** विदुषो दिव्यगुणान् वा **(अद्य)** अस्मिन् दिने **(स्वर्दृशः)** ये सुखेन विद्यानन्दं पश्यन्ति तान्॥९॥

अन्वयः-हे अग्ने विद्वन्! यस्त्वमध्वराणां विशां पतिरसि तस्मात्त्वमद्य हि सोमपीतय उषर्बुधः स्वर्दृशो देवानावह॥९॥

भावार्थः-सभासेनाद्यध्यक्षादयो विद्वांसो विद्यापाठनप्रजापालनादियज्ञानां रक्षायै प्रजासु दिव्यगुणान्नित्यं प्रकाशयेयुः॥९॥

पदार्थः-हे **(अग्ने)** विद्वन्! जो तू **(हि)** निश्चय करके **(अध्वराणाम्)** यज्ञ और **(विशाम्)** प्रजाओं के **(पतिः)** पालक **(असि)** हो इससे आप **(अद्य)** आज **(सोमपीतये)** अमृतरूपी रसों के पीने

रूप व्यवहार के लिये **(उषर्बुधः)** प्रातःकाल में जागने वाले **(स्वर्दृशः)** विद्यारूपी सूर्य्य के प्रकाश से यथावत् देखने वाले **(देवान्)** विद्वान् वा दिव्यगुणों को **(आवह)** प्राप्त हूजिये॥९॥

भावार्थः-सभासेनाध्यक्षादि विद्वान् लोग विद्या पढ़ के प्रजापालनादि यज्ञों की रक्षा के लिये प्रजा में दिव्य गुणों का प्रकाश नित्य किया करें॥९॥

पुनः स कीदृशः किं कुर्य्यादित्युपदिश्यते॥

फिर वह कैसा हो क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अग्ने॒ पूर्वा॒ अनू॒षसो॑ विभावसो दी॒देथ॑ वि॒श्वद॑र्शतः।
असि॒ ग्रामे॑ष्ववि॒ता पु॒रोहि॒तोऽसि॑ य॒ज्ञेषु॒ मानु॑षः॥ १०॥ २९॥

अग्ने॑। पूर्वाः॑। अनु॑। उ॒षसः॑। वि॒भा॒व॒सो॒ इति॑ विभाऽवसो। दी॒देथ॑। वि॒श्वऽद॑र्शतः। असि॑। ग्रामे॑षु। अ॒वि॒ता। पु॒रः॒ऽहि॑तः। असि॑। य॒ज्ञेषु॑। मानु॑षः॥ १०॥

पदार्थः-(**अग्ने**) विद्याप्रकाशक विद्वन् (**पूर्वाः**) अतीताः (**अनु**) पश्चात् (**उषसः**) या वर्त्तमाना आगामिन्यश्च (**विभावसो**) विशिष्टां भां दीप्तिं वासयति तत्सम्बुद्धौ (**दीदेथ**) विजानीहि (**विश्वदर्शतः**) विश्वैः सर्वैः सम्प्रेक्षितुं योग्यः (**असि**) (**ग्रामेषु**) मनुष्यादिनिवासेषु (**अविता**) रक्षणादिकर्त्ता (**पुरोहितः**) सर्वसाधनसुखसम्पादयिता (**असि**) (**यज्ञेषु**) अश्वमेधादिशिल्पान्तेषु (**मानुषः**) मनुष्याकृतिः॥१०॥

अन्वयः-हे विभावसोऽग्ने विद्वन्! विश्वदर्शतो यस्त्वं पूर्वा अनु पश्चादागामिनीर्वर्त्तमाना वोषसो दीदेथ ग्रामेष्ववितासि यज्ञेषु मानुषः पुरोहितोऽसि तस्मादस्माभिः पूज्यो भवसि॥१०॥

भावार्थः-विद्वान् सर्वेषु दिनेष्वेकं क्षणमपि व्यर्थन्न नयेत् सर्वोत्तमकार्य्याऽनुष्ठानयुक्तानि सर्वाणि दिनानि जानीयादेवमेतानि ज्ञात्वा प्रजारक्षको यज्ञानुष्ठाता सततं भवेत्॥१०॥

पदार्थः-हे (**विभावसो**) विशेष दीप्ति को वसाने वाले (**अग्ने**) विद्या को प्राप्त करनेहारे विद्वान्! (**विश्वदर्शतः**) सभों को देखने योग्य आप (**पूर्वाः**) पहिले व्यतीत (**अनु**) फिर (**उषसः**) आने वाली और वर्त्तमान प्रभात और रात दिनों को (**दीदेथ**) जानकर एक क्षण भी व्यर्थ न खोवे आप ही (**ग्रामेषु**) मनुष्यों के निवास योग्य ग्रामों में (**अविता**) रक्षा करने वाले (**असि**) हो और (**यज्ञेषु**) अश्वमेध आदि शिल्प पर्य्यन्त क्रियाओं में (**मानुषः**) मनुष्य व्यक्ति (**पुरोहितः**) सब साधनों के द्वारा सब सुखों को सिद्ध करने वाले (**असि**) हो॥१०॥

भावार्थः-विद्वान् सब दिन एक क्षण भी व्यर्थ न खोवे, सर्वथा बहुत उत्तम-उत्तम कार्य्यों के अनुष्ठान ही के लिये सब दिनों को जान कर प्रजा की रक्षा वा यज्ञ का अनुष्ठान करने वाला निरन्तर हो॥१०॥

पुनः स कीदृशो भवेदित्युपदिश्यते॥

फिर वह किस प्रकार का हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि त्वा॑ य॒ज्ञस्य॒ साध॑नमग्ने॒ होता॑रमृ॒त्विज॑म्।
म॒नु॒ष्वद्दे॑व धीमहि॒ प्रचे॑तसं जी॒रं दू॒तमम॑र्त्यम्॥ ११॥

नि। त्वा॒। य॒ज्ञस्य॑। साध॑नम्। अग्ने॑। होता॑रम्। ऋ॒त्विज॑म्। म॒नु॒ष्वत्। दे॒व॒। धी॒म॒हि॒। प्रऽचे॑तसम्। जी॒रम्। दू॒तम्। अम॑र्त्यम्॥ ११॥

पदार्थः-(**नि**) नितराम् (**त्वा**) त्वाम् (**यज्ञस्य**) त्रिविधस्य (**साधनम्**) साध्नोति येन तत् (**अग्ने**) विद्वन् (**होतारम्**) हवनकर्त्तारम् (**ऋत्विजम्**) यज्ञसम्पादकम् (**मनुष्वत्**) मननशीलेन मनुष्येण तुल्यम् (**देव**) दिव्यविद्यासम्पन्नम् (**धीमहि**) धरेमहि (**प्रचेतसम्**) प्रकृष्टं चेतो विज्ञानं यस्य यस्माद्वा तम् (**जीरम्**) विद्यावन्तम्। अत्र **जोरी च।** (उणा०२.२३) अनेनायं सिद्धः। (**दूरम्**) प्रशस्तबुद्धिमन्तम् (**अमर्त्यम्**) साधारणमनुष्यस्वभावरहितं स्वस्वरूपेणं नित्यम्॥ ११॥

अन्वयः-हे देवाग्ने विद्वन्! सुतसोमासः कण्वासो वयं यज्ञस्य साधनं होतारमृत्विजं प्रचेतसं जीरममर्त्यं दूतं त्वा मनुष्वद्धीमहि॥ ११॥८

भावार्थः-अष्टमान्मन्त्रात् (**सुतसोमासः**) (**कण्वासः**) इति पदद्वयमनुवर्त्तते नहि विदुषा द्रव्यसामग्र्या च विना यज्ञसिद्धिं कर्त्तुं शक्यते॥ ११॥

पदार्थः-हे (**देव**) दिव्यविद्यासम्पन्न (**अग्ने**) भौतिक अग्नि के सदृश उत्तम पदार्थों को सम्पादन करने वाले मेधावी विद्वान्! हम लोग (**यज्ञस्य**) तीन प्रकार के यज्ञ के (**साधनम्**) मुख्य साधक (**होतारम्**) हवन करने वा ग्रहण करने वाले (**ऋत्विजम्**) यज्ञ साधक (**प्रचेतसम्**) उत्तम विज्ञानयुक्त (**जीरम्**) वेगवान् (**अमर्त्यम्**) साधारण मनुष्यस्वभाव से रहित वा स्वरूप से नित्य (**दूतम्**) प्रशंसनीय बुद्धियुक्त वा पदार्थों को देशान्तर में प्राप्त करने वाले (**त्वा**) आपको (**मनुष्यवत्**) मननशील मनुष्य के समान (**नि धीमहि**) निरन्तर धारण करें॥ ११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। और आठवें मन्त्र से (**सुतसोमासः**) (**कण्वासः**) इन दो पदों की अनुवृत्ति है। विद्वान् अग्नि आदि साधन और द्रव्य आदि सामग्री के विना यज्ञ की सिद्धि नहीं कर सकता॥ ११॥

पुनः स कीदृश इत्युपदिश्यते।

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यद्दे॒वानां॑ मित्रमहः पु॒रोहि॑तोऽन्त॒रो यासि॑ दू॒त्य॑म्।

---

८ मूलमन्त्रानुसारेण (देव) हे दिव्यविद्यासम्पन्न। सं०।

सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः॥ १२॥

यत्। देवानाम्। मित्रऽमहः। पुरःऽहितः। अन्तरः। यासि। दूत्यम्। सिन्धोःऽइव। प्रऽस्वनितासः। ऊर्मयः। अग्नेः। भ्राजन्ते। अर्चयः॥ १२॥

पदार्थः-(**यत्**) यः (**देवानाम्**) विदुषाम् (**मित्रमहः**) यो मित्राणां महः पूज्यः (**पुरोहितः**) पुर एनं दधति पुरोऽयं दधाति सः (**अन्तरः**) मध्यस्थः सन् (**यासि**) गच्छसि (**दूत्यम्**) दूतस्य भागं कर्म वा (**सिन्धोरिव**) यथा समुद्रस्य (**प्रस्वनितासः**) प्रकृष्टतया शब्दायमानाः (**ऊर्मयः**) वीचयः (**अग्नेः**) विद्युतो भौतिकस्य वा (**भ्राजन्ते**) प्रकाशन्ते (**अर्चयः**) दीप्तयः॥ १२॥

अन्वयः-हे मित्रमहो विद्वन्! यस्त्वं सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेरर्चयो भ्राजन्ते पुरोहितोऽन्तरस्सन्देवानां दूत्यं यासि, सोऽस्माभिः सत्कर्त्तव्यः कथं न स्याः॥ १२॥

भावार्थः-हे मनुष्या! यूयं तथा परमेश्वरः सर्वेषां मनुष्याणां मित्रः पूज्यः पुरोहितोऽन्तर्य्यामी सन् दूतवदन्तरात्मनि सत्यमसत्यं कर्म जानाति। एवं यस्येश्वरस्यानन्ता दीप्तयश्चरन्ति स एव जगदीश्वरः सर्वस्य धाता रचकः पालको न्यायकारी महाराजः सर्वैरुपास्योऽस्ति तथोत्तमो दूतः सत्करणीयो भवति॥ १२॥

पदार्थः- हे (**मित्रमहः**) मित्रों में बड़े पूजनीय विद्वान्! आप मध्यस्थ होकर (**दूत्यम्**) दूत कर्म को (**यासि**) प्राप्त करते हो जिस (**अग्नेः**) आत्मा की (**सिन्धोरिव**) समुद्र के सदृश (**प्रस्वनितासः**) शब्द करती हुई (**ऊर्मयः**) लहरियाँ (**अग्नेः**) अग्नि के (**अर्चयः**) दीप्तियां (**भ्राजन्ते**) प्रकाशित होती हैं। (**पुरोहितः**) पुरोहित तथा (**अन्तरः**) मध्यस्थ होते हुए (**देवानाम्**) विद्वानों के (**दूत्यम्**) दूत के स्वभाव को (**यासि**) प्राप्त होते हो सो आप हम लोगों को सत्कार के योग्य क्यों न हों॥ १२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम जैसे परमेश्वर सबका मित्र, पूजनीय, पुरोहित, अन्तर्यामी होकर दूत के समान सत्य-असत्य कर्मों का प्रकाश करता है; जैसे ईश्वर की अनन्त दीप्ति विचरती है, जो ईश्वर सबका धाता, रचने वा पालन करने वा न्यायकारी महाराज सबको उपासने योग्य है, वैसे उत्तम दूत भी राजपुरुषों को माननीय होता है॥ १२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम्॥ १३॥

श्रुधि। श्रुत्ऽकर्ण। वह्निऽभिः। देवैः। अग्ने। सयावऽभिः। आ। सीदन्तु। बर्हिषि। मित्रः। अर्यमा। प्रातःऽयावानः। अध्वरम्॥ १३॥

पदार्थः-(**श्रुधि**) शृणु (**श्रुत्कर्ण**) यः शृणोति कर्णाभ्यां तत्सम्बुद्धौ (**वह्निभिः**) वहनसमर्थैः (**देवैः**) विद्वद्भिः (**अग्ने**) विद्याप्रकाशयुक्त (**सयावभिः**) ये समानं यान्ति ते सयावानस्तैः (**आ**) आभिमुख्ये (**सीदन्तु**) (**बर्हिषि**) उत्तमे व्यवहारे स्थाने वा (**मित्रः**) सर्वहितकारी (**अर्यमा**) न्यायाधीशः (**प्रातर्यावाणः**) ये प्रातः प्रतिदिनं पुरुषार्थं यान्ति ते (**अध्वरम्**) अहिंसनीयं पूर्वोक्तयज्ञम्॥१३॥

अन्वयः-हे श्रुत्कर्णाऽग्ने! विद्वँस्त्वं सम्प्रीत्या सयावभिर्वह्निभिर्देवैः सहास्माकं वार्त्ताः श्रुधि शृणु मित्रोऽर्य्यमा प्रातर्यावाणस्सर्वेऽध्वरमनुष्ठाय बर्हिष्यासीदन्तु॥१३॥

भावार्थः-मनुष्याः श्रुतसर्वविद्यां धार्मिकान् मनुष्यान् राजकार्य्येषु नियुञ्जीरन् विद्वांसस्तु खलु सुशिक्षितैर्भृत्यैः सर्वाणि कार्याणि साधयेयुः सर्वदाऽऽलस्यं विहाय सततं पुरुषार्थे प्रयतेरन् नह्येवं विना खलु व्यवहारापरमार्थौ सिध्येते, इति॥१३॥

पदार्थः-हे (**श्रुत्कर्ण**) श्रवण करने वाले (**अग्ने**) विद्याप्रकाशक विद्वन्! आप प्रीति के साथ (**सयावभिः**) तुल्य जानने वाले (**वह्निभिः**) सत्याचार के भार धरनेहारे मनुष्य आदि (**देवैः**) विद्वान् और दिव्यगुणों के साथ (**अस्माकम्**) हम लोगों की वार्त्ताओं को (**श्रुधि**) सुनो, तुम और हम लोग (**मित्रः**) सबके हितकारी (**अर्य्यमा**) न्यायाधीश (**प्रातर्य्यावाणः**) प्रतिदिन पुरुषार्थ से युक्त (**सर्वे**) सब (**अध्वरम्**) अहिंसनीय पहिले कहे हुए यज्ञ को प्राप्त होकर (**बर्हिषि**) उत्तम व्यवहार में (**आसीदन्तु**) ज्ञान को प्राप्त हों वा स्थित हों॥१३॥

भावार्थः-मनुष्यों को उचित है कि सब विद्याओं को श्रवण किये हुए धार्मिक मनुष्यों को राज्यव्यवहार में विशेष करके युक्त करें, विद्वान् लोग शिक्षा से युक्त भृत्यों से सब कार्य्यों को सिद्ध और सर्वदा आलस्य को छोड़ निरन्तर पुरुषार्थ में यत्न करें। निदान इसके विना निश्चय हैं कि व्यवहार वा परमार्थ कभी सिद्ध नहीं होते॥१३॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वे कैसे होवें इस विषय का उपदेश अगले मन्त्र में किया है॥

शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः।
पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः॥१४॥३०॥

शृण्वन्तु। स्तोमम्। मरुतः। सुऽदानवः। अग्निऽजिह्वाः। ऋतऽवृधः। पिबतु। सोमम्। वरुणः। धृतऽव्रतः। अश्विऽभ्याम्। उषसा। सऽजूः॥१४॥

पदार्थः-(**शृण्वन्तु**) (**स्तोमम्**) स्तुतिविषयं न्यायप्रज्ञापनम् (**मरुतः**) विद्वांस ऋत्विजः सुखप्राप्त्यर्हाः सर्वे प्रजास्थाः मनुष्याः। **मरुत इत्यृत्विङ्नामसु पठितम्।** (निघं०३.१८) **पदनामसु पठितम्।** (निघं०५.५) (**सुदानवः**) शोभनानि दानवो दानानि येषान्ते (**अग्निजिह्वाः**)

अग्निवद्विद्याशब्दप्रकाशिका जिह्वा येषान्ते **(ऋतावृधः)** ऋतेन सत्येन वर्द्धन्ते ते। अत्र **अन्येषामपि** इति दीर्घः। **(पिबतु)** **(सोमम्)** पदार्थसमूहजं रसम् **(वरुणः)** श्रेष्ठ **(धृतव्रतः)** धृतं सत्यं व्रतं येन सः **(अश्विभ्याम्)** व्याप्तिशीलाभ्यां सभासेनाधर्माध्यक्षाभ्यामध्वर्युभ्यां **(उषसा)** प्रकाशेन **(सजूः)** यः समानं जुषते सः॥१४॥

अन्वयः-हे मनुष्याः! अग्निजिह्वा ऋतावृधः सुदानवो मरुतो भवन्तोऽस्माकं स्तोमं शृण्वन्तु। एवं प्रतिजनः सजूर्वरुणो धृतव्रतः सन्नुषसाश्विभ्यां सह सोमं पिबत॥१४॥

भावार्थः-या धर्मराजसभानां सकाशादाज्ञाः प्रकाश्यन्ते ताः सर्वैर्मनुष्यैः श्रुत्वा यथावदनुष्ठातव्याः। ये च तत्रस्थाः सभासदो भवेयुस्तेऽपि पक्षपातं विहाय प्रतिदिनं सर्वहिताय सर्वे मिलित्वा यथाऽविद्याऽधर्माऽन्यायनाशो भवेत् तथैव प्रयतेरन्निति॥१४॥

अस्मिन् सूक्ते धर्मप्राप्तिकरणं दूतत्वसम्पादनं सर्वविद्याश्रवणं परश्रीसम्प्रापणं श्रेष्ठपुरुषसम्पादनमुत्तमपुरुष- स्तवनसत्कारौ सर्वाभिः प्रजाभिरुत्तमपुरुषपदार्थप्रकाशनं विद्वद्भिः पदार्थविद्यानां सम्पादनं सभाध्यक्षदूतकृत्यं यज्ञानुष्ठानं मित्रतादिसंग्रहणमुक्तमव्यवहारे स्थितिः परस्परं विद्याधर्मराजसभाज्ञाः श्रुत्वाऽनुष्ठानमुक्तमतोऽस्य सूक्तार्थस्य त्रयश्चत्वारिंशत्तमसूक्तोक्तर्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति त्रिंशो वर्गः चतुश्चत्वारिंशं सूक्तं च समाप्तम्॥३०॥४४॥

पदार्थः-हे मनुष्यो! **(अग्निजिह्वाः)** जिनकी अग्नि के समान शब्दविद्या से प्रकाशित हुई जिह्वा है **(ऋतावृधः)** सत्य के बढ़ाने वाले **(सुदानवः)** उत्तम दानशील **(मरुतः)** विद्वानो! तुम लोग हम लोगों के **(स्तोमम्)** स्तुति वा न्यायप्रकाश को **(शृण्वन्तु)** श्रवण करो, इसी प्रकार प्रतिदिन **(सजूः)** तुल्य सेवने **(वरुणः)** श्रेष्ठ **(धृतव्रतः)** सत्यव्रत का धारण करनेहारे सब मनुष्यजन **(उषसा)** प्रभात **(अश्विभ्याम्)** व्याप्तिशील सभा, सेना, शाला, धर्माध्यक्ष, अध्वर्युओं के साथ **(सोमम्)** पदार्थविद्या से उत्पन्न हुए आनन्दरूपी रस को **(पिबतु)** पीओ॥१४॥

भावार्थः-जो विद्या धर्म वा राजसभाओं से आज्ञा प्रकाशित हो सब मनुष्य उनका श्रवण तथा अनुष्ठान करें, जो सभासद् हों वे भी पक्षपात को छोड़कर प्रतिदिन सबके हित के लिये सब मिल कर जैसे अविद्या, अधर्म, अन्याय का नाश होवे, वैसा यत्न करें॥१४॥

इस सूक्त में धर्म की प्राप्ति, दूत का करना, सब विद्याओं का श्रवण, उत्तम श्री की प्राप्ति, श्रेष्ठ सङ्ग, स्तुति और सत्कार, पदार्थ विद्याओं, सभाध्यक्ष, दूत और यज्ञ का अनुष्ठान, मित्रादिकों का ग्रहण, परस्पर मिल कर सब कार्य्यों की सिद्धि, उत्तम व्यवहारों में स्थिति, परस्पर विद्या, धर्म, राजसभाओं को सुनकर अनुष्ठान करना कहा है, इससे इस सूक्तार्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह तीसवां वर्ग और चवालीसवां सूक्त समाप्त हुआ॥३०॥४४॥

अथ दशर्च्चस्य पञ्चचत्वारिंशस्य सूक्तस्य प्रस्कण्वः काण्व ऋषिः। अग्निर्देवाश्च देवताः। १ भुरिगुष्णिक्। ५ उष्णिक् छन्दः। ऋषभः स्वरः। २,३,७,८ अनुष्टुप्। ४ निचृदनुष्टुप्। ६,९,१० विराडनुष्टुप् च छन्दः। गान्धारः स्वरः॥

तत्रादौ विद्युद्विद्वद्गुणा उपदिश्यन्ते॥

अब पैंतालीसवें सूक्त का आरम्भ है। उसके पहिले मन्त्र में बिजुली के दृष्टान्त से विद्वान् के गुणों का उपदेश किया है॥

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम्॥ १॥

त्वम्। अग्ने। वसून्। इह। रुद्रान्। आदित्यान्। उत। यज। सुऽअध्वरम्। जनम्। मनुजातम्। घृतऽप्रुषम्॥ १॥

पदार्थः-(**त्वम्**) (**अग्ने**) विद्युद्वद्वर्त्तमान विद्वन् (**वसून्**) कृतचतुर्विंशतिवर्षब्रह्मचर्य्यान् पण्डितान् (**इह**) अत्र। **दीर्घादटि समानपादे।** (अष्टा०८.३.९) अनेन रुः पूर्वस्यानुनासिकश्च। (**रुद्रान्**) आचरितचतुश्चत्वारिंशद्वर्षब्रह्मचर्य्यान् महाबलान् विदुषः (**आदित्यान्**) समाचरिताऽष्टचत्वारिंशत् संवत्सर- ब्रह्मचर्य्याऽखण्डितव्रतान् महाविदुषः। अत्रापि पूर्वसूत्रेणैव रुत्वाऽनुनासिकत्वे। **भोभगोअघो अपूर्वस्य योऽशि।** (अष्टा०८.३.१७) इति यत्वम्। **लोपः शाकल्यस्य।** (अष्टा०८.३.१९) इति यकारलोपः। (**उत**) अपि (**यज**) सङ्गच्छस्व। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**स्वध्वरम्**) शोभना पालनीया अध्वरा यस्य तम् (**जनम्**) पुरुषार्थिनम् (**मनुजातम्**) यो मनोर्मननशीलान्मनुष्यादुत्पननस्तम् (**घृतप्रुषम्**) यो यज्ञसिद्धेन घृतेन प्रुष्णाति स्निह्यति तम्॥ १॥

अन्वयः-हे अग्ने! त्वमिह वसून् रुद्रानादित्यानुतापि घृतप्रुषम्मनुजातं स्वध्वरं जनं सततं यज॥ १॥

भावार्थः-स्वस्वपुत्रान् न्यूनान्न्यूनं पञ्चविंशतिवर्षमितेनाऽधिकादधिकेनाऽष्टचत्वारिंशद्वर्षमितेनैवं न्यूनान्न्यूनेन षोडशवर्षेणाधिकादधिकेन चतुर्विंशतिवर्षमितेन च ब्रह्मचर्य्येण स्वस्वकन्याश्च पूर्णविद्याः सुशिक्षिताश्च सम्पाद्य स्वयंवराख्यविधानेनैतैर्विवाहः कर्त्तव्यो यतः सर्वे सदा सुखिनः स्युः॥ १॥

पदार्थः-हे (**अग्ने**) बिजुली के समान वर्त्तमान विद्वान्! आप (**इह**) इस संसार में (**वसून्**) जो चौबीस वर्ष ब्रह्मचर्य से विद्या को प्राप्त हुए पण्डित (**रुद्रान्**) जिन्होंने चवालीस वर्ष ब्रह्मचर्य किया हो उन महाबली विद्वान् और (**आदित्यान्**) जिन्होंने अड़तालीस वर्ष पर्य्यन्त ब्रह्मचर्य किया हो, उन महाविद्वान् लोगों को (**उत**) और भी (**घृतप्रुषम्**) यज्ञ से सिद्ध हुए घृत से सेचन करने वाले (**मनुजातम्**) मननशील मनुष्य से उत्पन्न हुए (**स्वध्वरम्**) उत्तम यज्ञ को सिद्ध करनेहारे (**जनम्**) पुरुषार्थी मनुष्य को (**यज**) समागम कराया करें॥ १॥

भावार्थः-मनुष्यों को चाहिये कि अपने पुत्रों को कम से कम चौबीस और अधिक से अधिक अड़तालीस वर्ष तक और कन्याओं को कम से कम सोलह और अधिक से अधिक चौबीस वर्ष पर्यन्त ब्रह्मचर्य करावें। जिससे सम्पूर्ण विद्या और सुशिक्षा को पाकर वे परस्पर परीक्षा और अति प्रीति से विवाह करें, जिससे सब सुखी रहें॥१॥

पुनः स किं कुर्य्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

श्रुष्टीवानो॒ हि दा॒शुषे॑ दे॒वा अ॑ग्ने॒ विच॑ेतसः।
तान् रो॑हिदश्व गिर्वण॒स्त्रय॑स्त्रिंशत॒मा व॑ह॥२॥

श्रुष्टी॑ऽवान॑ः। हि। दा॒शुषे॑। दे॒वाः। अ॒ग्ने॒। विऽच॑ेतसः। तान्। रो॒हि॒त्ऽअ॒श्व॒। गि॒र्व॒णः॒। त्रय॑ः॒ऽत्रिंशत्। आ। व॒ह॒॥२॥

पदार्थः-(**श्रुष्टीवानः**) ये श्रुष्टी शीघ्रं वनन्ति सम्भजन्ति ते। **श्रुष्टी इति पदनामसु पठितम्।** (निघं०४.३) (**हि**) खलु (**दाशुषे**) दानशीलाय पुरुषार्थिने जनाय (**देवाः**) दिव्यगुणा विद्वांसः (**अग्ने**) विद्वन् (**विचेतसः**) विविधं चेतः शास्त्रोक्तबोधयुक्ता प्रज्ञा येषां ते (**तान्**) देवान् (**रोहिदश्व**) रोहितोऽश्वा वेगादयो गुणा यस्य तत्सम्बुद्धौ (**गिर्वणः**) यो गीर्भिर्वन्यते सम्भज्यते तत्सम्बुद्धौ (**त्रयस्त्रिंशतम्**) एतत्संख्याकान् पृथिव्यादीन् (**आ**) आभिमुख्ये (**वह**) प्राप्नुहि॥२॥

अन्वयः-हे रोहिदश्व गिर्वणोऽग्ने! त्वमिह ये विचेतसः श्रुष्टीवानो देवा दाशुषे सुखं प्रयच्छन्ति, तान् त्रयस्त्रिंशतं देवानावह॥२॥

भावार्थः-यदा विद्वांसो विद्यार्थिने त्रयस्त्रिंशतो देवानां विद्याः साक्षात्कारयन्ति तदैते विद्युत्प्रमुखैः पदार्थैरनेकानुत्तमान् व्यवहारान् साधितुं शक्नुवन्ति॥२॥

पदार्थः-हे (**रोहिदश्व**) वेग आदि गुणयुक्त (**गिर्वणः**) वाणियों से सेवित (**अग्ने**) विद्वन्! (**त्वम्**) आप इस संसार में जो (**विचेतसः**) नाना प्रकार के शास्त्रोक्त ज्ञानयुक्त (**श्रुष्टीवानः**) यथार्थ विद्या के सेवन करने वाले (**देवाः**) दिव्य गुणवान् विद्वान् (**दाशुषे**) दानशील पुरुषार्थी मनुष्य के लिये सुख देते हैं (**तान्**) उन (**त्रयस्त्रिंशतम्**) भूमि आदि तेंतीस दिव्य गुण वालों को (**हि**) निश्चय करके (**आवह**) प्राप्त हूजिये॥२॥

भावार्थः-जब विद्वान् लोग विद्यार्थियों को तेंतीस देव अर्थात् पृथिवी आदि तेंतीस पदार्थों की विद्या को अच्छे प्रकार साक्षात्कार कराते हैं, तब वे बिजुली आदि अनेक पदार्थों से उत्तम-उत्तम व्यवहारों की सिद्धि कर सकते हैं॥२॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत्।

अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम्॥ ३॥

प्रियमेधऽवत्। अत्रिऽवत्। जातऽवेदः। विरूपऽवत्। अङ्गिरस्वत्। महिऽव्रत। प्रस्कण्वस्य। श्रुधि। हवम्॥ ३॥

पदार्थः-(**प्रियमेधवत्**) प्रिया तृप्ता कमनीया प्रदीप्ता मेधा बुद्धिर्यस्य तेन तुल्यः (**अत्रिवत्**) न विद्यन्ते त्रय आध्यात्मिकाधिभौतिकाधिदैविकास्तापा यस्य तद्वत् (**जातवेदः**) यो जातेषु पदार्थेषु विद्यते सः (**विरूपवत्**) विविधानि रूपाणि यस्य तद्वत् (**जातवेदः**) यो जातेषु विद्यते सः (**विरूपवत्**) विविधानि रूपाणि यस्य तद्वत् (**अङ्गिरस्वत्**) योऽङ्गानां रसः प्राणस्तद्वत् (**महिव्रत**) महि महद्व्रतं शीलं यस्य सः (**प्रस्कण्वस्य**) प्रकृष्टश्चासौ कण्वो मेधावी (**श्रुधी**) शृणु। अत्र व्यत्ययो, **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हवम्**) ग्राह्यं देयमध्ययनाध्यापनाख्यं व्यवहारम्। यास्कमुनिरेवमिमं मन्त्रं व्याख्यातवान्। **प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेवं प्रस्कण्वस्य शृणु ह्वानम्। प्रस्कण्वः कण्वस्य पुत्रः कण्वस्य प्रभवो यथा प्राग्रमिति। विरूपो नानारूपो महिव्रतो महाव्रत इति।** (निरु०३.१७)॥३॥

अन्वयः-हे जातवेदो महिव्रत! विद्वँस्त्वं प्रियमेधवदत्रिवद्विरूपवदङ्गिरस्वत् प्रकण्वस्य हवं श्रुधि॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्य! यथा सर्वस्य प्रियकारिणो जनाः कायिकवाचिकमानसदोषरहिता नानाविद्याप्रत्यक्षाः स्वप्राणवत्सर्वान् जानन्तो विद्वांसो मनुष्याणां प्रियाणि कार्य्याणि साध्नुयुस्तथा यूयमप्याचरत॥३॥

पदार्थः-हे (**जातवेदः**) उत्पन्न हुए पदार्थों को जाननेहारे (**महिव्रत**) बड़े व्रत युक्त विद्वान्! आप (**प्रियमेधवत्**) विद्याप्रिय बुद्धि वाले के तुल्य (**अत्रिवत्**) तीन अर्थात् शरीर, अन्य प्राणी और मन आदि इन्द्रियों के दुःखों से रहित के समान (**विरूपवत्**) अनेक प्रकार के रूपवाले के तुल्य (**अङ्गिरस्वत्**) अङ्गों के रसरूप प्राणों के सदृश (**प्रस्कण्वस्य**) उत्तम मेधावी मनुष्य के (**हवम्**) देने-लेने, पढ़ने-पढाने योग्य व्यवहार को (**श्रुधि**) श्रवण किया करें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सबके प्रिय करने वाले विद्वान् लोग शरीर, वाणी और मन के दोषों से रहित, नानाविद्याओं को प्रत्यक्ष करने और अपने प्राण के समान सबको जानते हुए विद्वान् लोग मनुष्यों के प्रिय कार्य्यों को सिद्ध करते हैं और जैसे पढ़ाये हुए बुद्धिमान् विद्यार्थी भी बहुत उत्तम-उत्तम कार्य्यों को सिद्ध कर सकें, वैसे तुम भी किया करो॥३॥

पुनर्विद्वांसस्तं कस्मै प्रयुञ्जीरन्नित्युपदिश्यते॥

फिर विद्वान् लोग उसको किसके लिये प्रेरणा करें, इस विषय का उपदेश अगले मन्त्र में किया

है॥

महिकेरव ऊतये प्रियमेधा अहूषत।

राजन्तमध्वराणामग्निं शुक्रेण शोचिषा॥४॥

महिऽकेरवः। ऊतये। प्रियऽमेधाः। अहूषत। राजन्तम्। अध्वराणाम्। अग्निम्। शुक्रेण। शोचिषा॥४॥

पदार्थः-(**महिकेरवः**) महयो महान्तः कारवः शिल्पविद्यासाधका येषां ते। अत्र कृञ धातोरुण् प्रत्ययो वर्णव्यत्ययेन अकारस्य एकारश्च। (**ऊतये**) रक्षणाद्याय (**प्रियमेधाः**) सत्यविद्याशिक्षाप्रापिका प्रिया मेधा येषां ते (**अहूषत**) उपदिशत। अत्र लोडर्थे लुङ्। (**राजन्तम्**) प्रकाशमानम् (**अध्वराणाम्**) अहिंसनीयव्यवहाराख्यकर्मणाम् (**अग्निम्**) पावकवद्विद्वांसम् (**शुक्रेण**) शीघ्रकरेण (**शोचिषा**) पवित्रेण विज्ञानेन॥४॥

अन्वयः-हे महाविद्वांसो महिकेरवः प्रियमेधाः! यूयमध्वराणामूतये शुक्रेण शोचिषा सह राजन्तमग्निमहूषत॥४॥

भावार्थः-नहि कश्चिद्धार्मिकविद्वत्सङ्गेन विना परमोत्तमव्यवहाराणां सिद्धिं कर्त्तुं शक्नोति, तस्मात् सर्वैरेतेषां सङ्गेन सकला विद्याः साक्षात्कर्त्तव्याः॥४॥

पदार्थः-हे महाविद्वानो! (**महिकेरवः**) जिनके बड़े-बड़े शिल्प विद्या के सिद्ध करने वाले कारीगर हों, ऐसे (**प्रियमेधाः**) सत्यविद्या वा शिक्षाओं की प्राप्त कराने वाली मेधा बुद्धियुक्त आप लोग (**अध्वराणाम्**) पालनीय व्यवहाररूपी कर्मों की (**ऊतये**) रक्षा आदि के लिये (**शुक्रेण**) शुद्ध शीघ्रकारक (**शोचिषा**) तेज से (**राजन्तम्**) प्रकाशमान (**अग्निम्**) प्रसिद्ध वा बिजुली रूप आग के सदृश सभापति को (**अहूषत्**) उपदेश वा उससे श्रवण किया करो॥४॥

भावार्थः-कोई मनुष्य धार्मिक बुद्धिमानों के सङ्ग के विना उत्तम-उत्तम व्यवहारों की सिद्धि करने को समर्थ नहीं हो सकता। इससे सब मनुष्यों को योग्य है कि इनके सङ्ग से इन विद्याओं को साक्षात्कार अवश्य करें॥४॥

पुनः स केन ज्ञातुं शक्नुयादित्युपदिश्यते॥

फिर वह किससे जानने को समर्थ होवे, इस विषय का उपदेश अगले मन्त्र में किया है॥

घृताहवन सन्त्येमा उ षु श्रुधी गिरः।

याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा॥५॥३१॥

घृतऽआहवन। सन्त्य। इमाः। ऊँ इति। सु। श्रुधि। गिरः। याभिः। कण्वस्य। सूनवः। हवन्ते। अवसे। त्वा॥५॥

पदार्थः-(**घृताहवन**) घृतग्राहिन् (**सन्त्य**) सनन्ति सम्भजन्ति सुखानि याभिः क्रियाभिस्तासु साधो (**इमाः**) वक्ष्यमाणाः प्रत्यक्षाः (**उ**) वितर्के (**सु**) शोभार्थे। अत्र **सूत्र** (अष्टा०८.३.१०७) इति मूर्धन्यादेशः। (**श्रुधि**) शृणु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**गिरः**) वाणीः (**याभिः**) वेदवाग्भिः (**कण्वस्य**) मेधाविनः (**सूनवः**) पुत्रा विद्यार्थिनः (**हवन्ते**) गृह्णन्ति (**अवसे**) रक्षणाद्याय (**त्वा**) त्वाम्॥५॥

अन्वयः-हे सन्त्य घृताहवन विद्वन्! यथा कण्वस्य सूनवोऽवसे याभिर्वेदवाणीभिर्यं त्वा हवन्ते स त्वमुताभिस्तेषामिमा गिरः सुश्रुधि सुष्ठु शृणु॥५॥

भावार्थः-ये मनुष्या इह संसारे विदुष्या मातुर्विदुषः पितुरनूचनास्याचार्य्यस्य च सकाशाच्छिक्षाविद्ये गृहीत्वा परमार्थव्यवहारौ साधित्वा विज्ञानशिल्पयोः सिद्धिं कर्त्तुं प्रवर्त्तन्ते, ते सर्वाणि सुखानि प्राप्नुवन्ति नेतरे॥५॥

पदार्थः-हे (**सन्त्य**) सुखों की क्रियाओं में कुशल (**घृताहवन**) घी को अच्छे प्रकार ग्रहण करने वाले विद्वान् मनुष्य! जैसे (**कण्वस्य**) मेधावी विद्वान् के (**सूनवः**) पुत्र विद्यार्थी (**अवसे**) रक्षा आदि के लिये (**याभिः**) जिन वेदवाणियों से जिस (**त्वा**) तुझ को (**हवन्ते**) ग्रहण करते हैं सो आप (**उ**) भी उनसे उनकी (**इमा**) इन प्रत्यक्ष कारक (**गिरः**) वाणियों को (**सुश्रुधि**) अच्छे प्रकार सुन और ग्रहण कर॥५॥

भावार्थः-जो मनुष्य इस संसार में विदुषी माता, विद्वान् पिता और सब उत्तर देने वाले आचार्य्य आदि से शिक्षा वा विद्या को ग्रहण कर परमार्थ और व्यवहार को सिद्ध कर विज्ञान और शिल्प को करने में प्रवृत्त होते हैं, वे सब सुखों को प्राप्त होते हैं, आलसी कभी नहीं होते॥५॥

पुनस्तं कीदृशं गृह्णीयुरित्युपदिश्यते॥

फिर उसको किस प्रकार ग्रहण करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः।

शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे॥६॥

त्वाम्। चित्रश्रवःऽतम। हवन्ते। विक्षु। जन्तवः। शोचिःऽकेशम्। पुरुऽप्रिय। अग्ने। हव्याय। वोळ्हवे॥६॥

पदार्थः-(**त्वाम्**) (**चित्रश्रवस्तम**) चित्राण्यद्भुतानि श्रवांस्यतिशयितान्यन्नादीनि यस्य तत्सम्बुद्धौ (**हवन्ते**) स्पर्द्धन्ते (**विक्षु**) प्रजासु (**जन्तवः**) मनुष्याः। **जन्तव इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**शोचिष्केशम्**) शोचिषः शुद्धाचाराः केशाः प्रकाशका यस्य तम् (**पुरुप्रिय**) यः पुरून् बहून् प्रीणाति तत्सम्बुद्धौ (**अग्ने**) विद्वन् (**हव्याय**) होतुमर्हाय यज्ञाय (**वोढवे**) विद्याप्रापणाय॥६॥

अन्वयः-हे चित्रश्रवसस्तम पुरुप्रियाग्ने विद्युदिव विद्वन्! ये जन्तवो विक्षु वोढवे हव्याय यं शोचिष्केशं त्वां हवन्ते, स त्वं तान् विद्यासुशिक्षाप्रदानेन विदुषः सुशीलान् सद्यः सम्पादय॥६॥

भावार्थः-मनुष्यैरनेकगुणाग्निवद्वर्त्तमानं विद्वांसं प्राप्य विद्याः सततं ग्राह्याः॥६॥

पदार्थः-हे **(चित्रश्रवस्तम)** अत्यन्त अद्भुत अन्न वा श्रवणों से व्युत्पन्न **(पुरुप्रिय)** बहुतों को तृप्त करने वाले **(अग्ने)** बिजुली के तुल्य विद्याओं में व्यापक विद्वान्! जो **(जन्तवः)** प्राणी लोग **(विक्षु)** प्रजाओं में **(वोढवे)** विद्या प्राप्ति कराने हारे **(हव्याय)** ग्रहण करने योग्य पठन-पाठनरूप यज्ञ के लिये जिस **(शोचिष्केशम्)** जिसके पवित्र आचरण हैं, उस **(त्वाम्)** आपको **(हवन्ते)** ग्रहण करते हैं, वह आप उन को विद्या और शिक्षा देकर विद्वान् और शीलयुक्त शीघ्र कीजिये॥६॥

भावार्थः-मनुष्यों को उचित है कि अनेक गुणयुक्त अग्नि के समान विद्वान् को प्राप्त होके विद्याओं का ग्रहण करें॥६॥

पुनस्तं कथंभूतं विदित्वा धरेयुरित्युपदिश्यते॥

फिर उसको किस प्रकार जानकर धारण करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि त्वा॒ होता॑रमृ॒त्विजं॑ दधि॒रे व॑सु॒वित्त॑मम्।
श्रुत्क॑र्णं स॒प्रथ॑स्तमं॒ विप्रा॑ अग्ने॒ दिवि॑ष्टिषु॥७॥

नि। त्वा॒। होता॑रम्। ऋ॒त्विज॑म्। दु॒धि॒रे। व॒सु॒वित्ऽत॑मम्। श्रुत्ऽक॑र्णम्। स॒प्रथ॑ःऽतमम्। विप्रा॑ः। अ॒ग्ने॒। दिवि॑ष्टिषु॥७॥

पदार्थः-(**नि**) निश्चयार्थे **(त्वा)** त्वाम् **(होतारम्)** ग्रहीतारम् **(ऋत्विजम्)** ऋतून् यजति सङ्गच्छते यस्तम् **(दधिरे)** दधीरन्। अत्र लिङर्थे लिट्। **(वसुवित्तमम्)** यो वसूनि विदन्ति स वसुवित् सोऽतिशयितस्तम् **(श्रुत्कर्णम्)** यः सकला विद्याः शृणोति तम् **(सप्रथस्तमम्)** यः प्रथेन विद्याविस्तरेण सह वर्त्तते सोऽतिशयितस्तम् **(विप्राः)** मेधाविनः **(अग्ने)** बहुश्रुत सज्जन **(दिविष्टिषु)** दिवो दिव्या इष्टयो येषु पठनपाठनाख्येषु यज्ञेषु तेषु॥७॥

अन्वयः-हे अग्ने! मेधाविनो विप्रा विद्वांसो दिविष्टिष्वग्निमिव होतारमृत्विजं श्रुत्कर्णं सप्रथस्तमं वसुवित्तमं त्वा निदधिरे तांस्त्वमपि निधेहि॥७॥

भावार्थः-ये मनुष्या विद्याप्रचाराद्युत्तमकार्य्यसिद्धये प्रयतन्ते चक्रवर्त्तिराज्यश्रीर्विद्याधनं साद्धुं च शक्नुवन्ति, ते शोकं नोपलभन्ते॥७॥

पदार्थः-हे **(अग्ने)** बहुश्रुत सत्पुरुष! जो **(विप्राः)** मेधावी विद्वान् लोग **(दिविष्टिषु)** पवित्र पठन-पाठनरूप क्रियाओं में अग्नि के तुल्य जिस **(होतारम्)** ग्रहण कारक **(ऋत्विजम्)** ऋतुओं को सङ्गत करने **(श्रुत्कर्णम्)** सब विद्याओं को सुनने **(सप्रथस्तमम्)** अत्यन्त विस्तार के साथ वर्त्तने **(वसुवित्तमम्)** पदार्थों को ठीक-ठीक जानने वाले **(त्वा)** तुझ को **(निदधिरे)** धारण करते हैं, उनको तू भी धारण कर॥७॥

भावार्थः-जो मनुष्य उत्तम कार्य सिद्धि के लिये प्रयत्न करते और चक्रवर्ती राज्य, श्री और विद्याधन की सिद्धि करने को समर्थ हो सकते हैं, वे शोक को प्राप्त नहीं होते ॥७॥

पुनस्त कीदृशं जानीयुरित्युपदिश्यते॥

फिर उस को कैसा जाने, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ त्वा॒ विप्रा॑ अचुच्यवुः सु॒तसो॑मा अ॒भि प्रय॑ः।

बृ॒हद्भा बिभ्र॑तो ह॒विरग्ने॒ मर्ता॑य दा॒शुषे॑॥८॥

आ। त्वा॒। विप्रा॑ः। अ॒चु॒च्य॒वुः। सु॒तऽसो॑माः। अ॒भि। प्रय॑ः। बृ॒हत्। भाः। बिभ्र॑तः। ह॒विः। अग्ने॑। मर्ता॑य। दा॒शुषे॑॥८॥

पदार्थः-(**आ**) समन्तात् (**त्वा**) त्वाम् (**विप्राः**) विद्वांसः (**अचुच्यवुः**) च्यवन्तां प्राप्नुवन्तु (**सुतसोमाः**) सुता ओषध्यादिपदार्थसारा यैस्ते। (**अभि**) अभितः (**प्रयः**) प्रीणयन्ति तृप्यन्ति येन तदन्नम् (**बृहत्**) महत्सुखकारकम् (**भाः**) या भान्ति प्रकाशयन्ति ताः (**बिभ्रतः**) धरन्तः (**हविः**) ग्रहीतुन्दातुमत्तुं योग्यं पदार्थम् (**अग्ने**) विद्युदिव विद्वन् (**मर्त्ताय**) मनुष्याय (**दाशुषे**) दानशीलाय॥८॥

अन्वयः-हे अग्ने! यस्त्वं यथा क्रियाकुशला दाशुषे मर्त्ताय प्रयो बृहद्धविर्भा बिभ्रतः सन्तः सुतसोमा विप्रास्त्वामभ्यचुच्यवुस्तथैताँस्त्वमपि प्राप्नुहि॥८॥

भावार्थः-विद्वांसो येन मनुष्याणमुत्तमं सुखं स्यात्तं विद्याविशेषपरीक्षाभ्यां प्रत्यक्षीकृत्य यथाऽनुक्रमं सर्वान् ग्राहयेयुर्यतो ह्येतेषां सर्वाणि कार्याणि सिध्येयुः॥८॥

पदार्थः-हे (**अग्ने**) बिजुली के समान वर्त्तमान विद्वान्! जो तू जैसे क्रियाओं में कुशल (**दाशुषे**) दानशील मनुष्य के लिये (**प्रयः**) अन्न (**बृहत्**) बड़े सुख करने वाले (**हविः**) देने-लेने योग्य पदार्थ और (**भाः**) जो प्रकाशकारक क्रियाओं को (**बिभ्रतः**) धारण करते हुए (**सुतसोमाः**) ऐश्वर्ययुक्त (**विप्राः**) विद्वान् लोग (**त्वा**) तुझको (**अभ्यचुच्यवुः**) सब प्रकार प्राप्त हों, वैसे तू भी इन को प्राप्त हो॥८॥

भावार्थः-विद्वान् मनुष्यों को चाहिये जिस प्रकार उत्तम सुख हों, उस को विद्याविशेष परीक्षा से प्रत्यक्ष कर अनुक्रम से सबको ग्रहण करावें, जिससे इन लोगों के भी सब काम निश्चय करके सिद्ध होवें॥८॥

एतदनुष्ठाता मनुष्यः कस्मै किं कुर्यादित्युपदिश्यते॥

इस के अनुष्ठान करने वाला मनुष्य किसके लिये क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रा॒तर्या॑व्णः॑ सहस्कृत सोम॒पेया॑य सन्त्य।

इहाद्य दैव्यं जनं बर्हिरा सादया वसो॥ ९॥

प्रातःऽयाव्णः। सहःऽकृत। सोमऽपेयाय। सन्त्य। इह। अद्य। दैव्यम्। जनम्। बर्हिः। आ। सादय। वसो इति॥ ९॥

पदार्थः-(**प्रातर्याव्णः**) ये प्रातः प्रतिदिनं यान्ति पुरुषार्थं गच्छन्ति तान् (**सहस्कृत**) सहो बलं कृतं येन तत्सम्बुद्धौ (**सोमपेयाय**) यः सोमो रसश्च पेयः पातुं योग्यश्च तस्मै (**सन्त्य**) सनन्ति सम्भजन्ति ये ते सन्तस्तेषु साधो (**इह**) अस्मिन् विद्याव्यवहारे (**अद्य**) अस्मिन् दिने (**दैव्यम्**) देवेषु विद्वत्सु कुशलम् (**जनम्**) पुरुषार्थयुक्तं धार्मिकं विपश्चितम् (**बर्हिः**) उत्तमासनम् (**आ**) समन्तात् (**सादय**) आसय। अत्र **अन्येषामपि०** इति दीर्घः। (**वसो**) यः श्रेष्ठेषु गुणेषु वसति तत्सम्बुद्धौ॥ ९॥

अन्वयः-हे सहस्कृत सन्त्य वसो विद्वँस्त्वमिहाद्य सोमपेयाय प्रातर्याव्णो दैव्यं जनं बर्हिश्चासादय॥ ९॥

भावार्थः-ये मनुष्या उत्तमगुणेभ्यो मनुष्येभ्य एवोत्तमानि वस्तूनि ददति, तादृशानां सङ्गः सर्वैः कार्य्यः। न हि कश्चिदपि विद्यापुरुषार्थयुक्तानां सङ्गोपदेशाभ्यां विना दिव्यानि सुखानि प्राप्तुमर्हति॥ ९॥

पदार्थः-हे (**सहस्कृत**) सबको सिद्ध करने (**सन्त्य**) जो सम्भजनीय क्रियाओं में कुशल विद्वानों में सज्जन (**वसो**) श्रेष्ठ गुणों में वसने वाले विद्वान्! तू (**इह**) इस विद्या व्यवहार में (**अद्य**) आज (**सोमपेयाय**) सोमरस के पीने के लिये (**प्रातर्याव्णः**) प्रातःकाल पुरुषार्थ को प्राप्त होने वाले विद्वानों और (**दैव्यम्**) विद्वानों में कुशल (**जनम्**) पुरुषार्थयुक्त धार्मिक मनुष्य और (**बर्हिः**) उत्तम आसन को (**आसादय**) प्राप्त कर॥ ९॥

भावार्थः-जो मनुष्य उत्तम गुणयुक्त मनुष्यों ही को उत्तम वस्तु देते हैं, ऐसे मनुष्यों ही का संग सब लोग करें, कोई भी मनुष्य विद्या वा पुरुषार्थ युक्त मनुष्यों के संग वा उपदेश के विना पवित्र गुण, वस्तुओं और सुखों को प्राप्त नहीं हो सकता॥ ९॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय का उपदेश अगले मन्त्र में किया है॥

अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः।
अयं सोमः सुदानवस्तं पात तिरोअह्न्यम्॥ १०॥ ३२॥

अर्वाञ्चम्। दैव्यम्। जनम्। अग्ने। यक्ष्व। सहूतिऽभिः। अयम्। सोमः। सुऽदानवः। तम्। पात। तिरः। अह्न्यम्॥ १०॥

पदार्थः-(**अर्वाञ्चम्**) योऽर्वतो वेगादिगुणानश्नानञ्चति प्राप्नोति तम् (**दैव्यम्**) दिव्यगुणेषु भवम् (**जनम्**) पुरुषार्थेषु प्रादुर्भूतम् (**अग्ने**) विद्वन् (**यक्ष्व**) सङ्गच्छस्व (**सहूतिभिः**) समाना हूतयः, आह्वानानि

च सहूतयस्ताभिः **(अयम्)** प्रत्यक्षः **(सोमः)** विद्यैश्वर्ययुक्तः **(सुदानवः)** शोभनानि दानानि येषां विदुषां तत्सम्बुद्धौ **(तम्)** **(पात)** रक्षत **(तिरोअह्न्यम्)** अहनि भवमहन्यम्। तिरस्कृतमाच्छादितमहन्यम् येन तम्। अत्र **प्रकृत्यान्तः पादमव्यपरे** (अष्टा०६.१.११४) इति प्रकृतिभावः॥१०॥

अन्वयः-हे सुदानवो विद्वांसो! यूयं सहूतिभिस्तमर्वाञ्चं दैव्यं तिरो अह्न्यं जनं पात, यथायं सोमः सत्कार्य्यस्ति तथा त्वमप्येतान् यक्ष्व सत्कुरु॥१०॥

भावार्थः-मनुष्यैः सर्वदा सज्जनानाहूय सत्कृत्य सर्वेषां पदार्थानां विज्ञानं शोधनं तेभ्य उपकारग्रहणं च कार्य्यमुत्तरोत्तरमेतद्विज्ञायैतद्विद्याप्रचारश्च कार्य्यः॥१०॥

अस्मिन् सूक्ते वसुरुद्रादित्यानां प्रमाणादिचोक्तमत एतत्सूक्तार्थस्य पूर्वसूक्तोतार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति ४५ पञ्चचत्वारिंशं सूक्तं द्वात्रिंशत् ३२ वर्गश्च समाप्तः॥

पदार्थः-**(हे सुदानवः)** उत्तम दानशील विद्वान् लोगो! आप **(सहूतिभिः)** तुल्य आह्वान युक्त क्रियाओं से **(अर्वाञ्चम्)** वेगादि गुण वाले घोड़ों को प्राप्त करने वा कराने **(दैव्यम्)** दिव्य गुणों में प्रवृत्त **(तिरोअह्न्यम्)** चोर आदि का तिरस्कार करनेहारे दिन में प्रसिद्ध **(जनम्)** पुरुषार्थ में प्रकट हुए मनुष्य की **(पात)** रक्षा कीजिये और जैसे **(अयम्)** यह **(सोमः)** पदार्थों के समूह सबके सत्कारार्थ हैं तथा **(तम्)** उसको तू भी **(यक्ष्व)** सत्कार में संयुक्त कर॥१०॥

भावार्थः-मनुष्यों को उचित है कि सर्वदा सज्जनों को बुला सत्कार कर सब पदार्थों का विज्ञान शोधन और उनसे उपकार ले और उत्तरोत्तर इस को जान कर इस विद्या का प्रचार किया करें॥१०॥

इस सूक्त में वसु, रुद्र और आदित्यों की गति तथा प्रमाण आदि कहा है, इससे इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥४५॥

यह ४५ पैंतालीसवां सूक्त और ३२ बत्तीसवां वर्ग समाप्त हुआ॥

अथ पञ्चदशर्चस्य षट्चत्वारिंशस्य सूक्तस्य प्रस्कण्व ऋषिः। अश्विनौ देवते। १, १० विराड्गायत्री। ३,११,६,१२,१४, गायत्री। ५,७,९,१३,१५,२,४,८, निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

तत्रोषरश्विवद्वर्त्तमानानां विदुषीणां गुणा उपदिश्यन्ते॥

अब छयालीसवें सूक्त का आरम्भ है। इसके पहिले मन्त्र में उषा और सूर्य-चन्द्र के दृष्टान्त से विद्वान् स्त्रियों के गुणों का प्रकाश किया है॥

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः।
स्तुषे वामश्विना बृहत्॥ १॥

एषो इति। उषाः। अपूर्व्या। वि। उच्छति। प्रिया। दिवः। स्तुषे। वाम्। अश्विना। बृहत्॥ १॥

पदार्थः-(**एषो**) इयम् (**उषाः**) दाहनिमित्तशीला (**अपूर्व्या**) न पूर्वैः कृता। अत्र **पूर्वैः कृतमिनियौ च।** (अष्टा०४.४.१३४) अनेनायं सिद्धः। (**वि**) विविधार्थे (**उच्छति**) विवसति (**प्रिया**) या प्रीणाति सर्वान् सा (**दिवः**) सूर्य्यप्रकाशात् (**स्तुषे**) तद्गुणान् प्रकाशयसि (**वाम्**) द्वे (**अश्विना**) अश्विनौ सूर्य्याचन्द्रमसाविवा- ध्यापिकोपदेशिके (**बृहत्**) महद्दिनम्॥ १॥

अन्वयः-हे विदुषि! या त्वं यथैषो अपूर्व्या दिव अद्भुता सती प्रियोषा बृहदुच्छति तथा मां व्युच्छसि यथाऽश्विनौ स्तुषे तथाऽहमपि त्वां विवासयामि स्तौमि च॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। याः स्त्रियः सूर्यचन्द्रोषर्वत्सर्वान् प्राणिनः सुखयन्ति ता एवानन्दाप्ता भवन्ति नेतराः॥ १॥

पदार्थः-हे विदुषि! जो तू जैसे (**एषो**) यह (**अपूर्व्या**) किसी की की हुई न (**दिवः**) सूर्य्यप्रकाश से उत्पन्न हुई (**प्रिया**) सबको प्रीति को बढ़ाने वाली (**उषाः**) दाहशील उषा अर्थात् प्रातःकाल की वेला (**बृहत्**) बड़े दिन को (**उच्छति**) प्रकाशित करती है, वैसे मुझ को (**व्युच्छति**) आनन्दित करती हो और जैसे वह (**वाम्**) (**अश्विना**) सूर्य और चन्द्रमा के तुल्य पढ़ाने और उपदेश करनेहारी स्त्रियों के (**स्तुषे**) गुणों का प्रकाश करती हो, वैसे मैं भी तुझ को सुखों में वसाऊं और तेरी प्रशंसा भी करूं॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्री लोग सूर्य चन्द्र और उषा के सदृश सब प्राणियों को सुख देती हैं, वे आनन्द को प्राप्त होती हैं, इनसे विपरीत कभी नहीं हो सकती॥ १॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे अश्वि कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

या दस्रा सिन्धुमातरा मनोतरा रयीणाम्।
धिया देवा वसुविदा॥ २॥

या। दस्रा। सिन्धुऽमातरा। मनोतरा। रयीणाम्। धिया। देवा। वसुऽविदा॥ २॥

पदार्थः-(**या**) यौ (**दस्रा**) दुःखोपक्षेतारौ (**सिन्धुमातरा**) सिन्धूनां समुद्राणां नदीनां वा मातरौ यद्वा सिन्धवो मातरो ययोः (**मनोतरा**) अतिशयितं मनो ययोस्तौ (**रयीणाम्**) धनानाम् (**धिया**) कर्मणा (**देवा**) दिव्यगुणप्रापकौ (**वसुविदा**) बहुधनप्रदौ। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेशः॥ २॥

अन्वयः-हे मनुष्या! यूयं या दस्रा सिन्धुमातरा मनोतरा धिया रयीणां देवा वसुविदावग्निजलवद्वर्त्तमाना- वध्यापकोपदेशकौ स्तस्तौ सेवध्वम्॥ २॥

भावार्थः-यथा शिल्पिभिर्यथावत्सम्प्रयोजिते अग्निजले यानानां मनोवेगवत्सद्यो गमयितृणी बहुधनप्रापके वर्त्तेते, तथाऽध्यापकोपदेशकौ भवेतामिति॥ २॥

पदार्थः-हे मनुष्य लोगो! तुम लोग (**या**) जो (**दस्रा**) दुःखों को नष्ट (**सिन्धुमातरा**) समुद्र नदियों के प्रमाण कारक (**मनोतरा**) मन के समान पार करने हारे (**धिया**) कर्म से (**रयीणाम्**) धनों के (**देवा**) देने हारे (**वसुविदा**) बहुत धन को प्राप्त कराने वाले अग्नि और जल के तुल्य वर्त्तमान अध्यापक और उपदेशक हैं, उनकी सेवा करो॥ २॥

भावार्थः-जैसे कारीगर लोगों ने ठीक-ठीक युक्त किये हुए अग्नि और जल के यानों को मन के वेग के समान तुरन्त पहुँचाने वा बहुत धन को प्राप्त करने वाले हैं, उसी प्रकार अध्यापक और उपदेशकों को होना चाहिये॥ २॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि।
यद्वां रथो विभिष्पतात्॥ ३॥

वच्यन्ते। वाम्। ककुहासः। जूर्णायाम्। अधि विष्टपि। यत्। वाम्। रथः। विऽभिः। पतात्॥ ३॥

पदार्थः-(**वच्यन्ते**) उच्येरन्। **सम्प्रसारणाच्च** (अष्टा०६.१.१०८) इत्यत्र **वा छन्दसि** (अष्टा०६.१.१०६) इत्यनुवृत्तेः पूर्वरूपाभावाद्यणादेशः। (**वाम्**) युवां शिल्पविद्याध्यापकाध्येतारौ (**ककुहासः**) महान्तो विद्वांसः। **ककुह इति महन्नामसु पठितम्।** (निघं०३.३) (**जूर्णायाम्**) गन्तुमशक्यायां वृद्धावस्थायाम् (**अधि**) उपरिभावे (**विष्टपि**) अन्तरिक्षे (**यत्**) यः (**वाम्**) युवयोः (**रथः**) विमानादियान-समूहः (**विभिः**) यथा वयन्ति गच्छन्ति ये ते वयः पक्षिणस्तैः (**पतात्**) गच्छेत्॥ ३॥

अन्वयः-हे शिल्पिनौ! यदि जूर्णायां वर्त्तमानाः ककुहासो वां विद्या वच्यन्ते, तर्हि वां युवयोरथो विभिः सह विष्टप्यधिपतात्॥ ३॥

भावार्थः-यदि मनुष्याः परमविदुषां सकाशाच्छिल्पविद्यां गृह्णीयुस्तर्हि विमानादियानानि रचयित्वा पक्षिवदाकाशे गन्तुं शक्नुयुः॥३॥

पदार्थः-हे कारीगरो! जो **(जूर्णायाम्)** वृद्धावस्था में वर्त्तमान **(ककुहासः)** बड़े विद्वान् **(वाम्)** तुम शिल्पविद्या पढ़ने-पढ़ाने वालों को विद्याओं का **(वच्यन्ते)** उपदेश करें तो **(वाम्)** आप लोगों का बनाया हुआ **(रथः)** विमानादि सवारी **(विभिः)** पक्षियों के तुल्य **(विष्टपि)** अन्तरिक्ष में **(अधि)** ऊपर **(पतात्)** चलें॥३॥

भावार्थः-जो मनुष्य लोग बड़े ज्ञानी के समीप से कारीगरी और शिक्षा को ग्रहण करें तो विमानादि सवारियों को रच के पक्षी के तुल्य आकाश में जाने-आने को समर्थ होवें॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

ह॒विषा॑ जा॒रो अ॒पां पिप॑र्ति॒ पपु॑रि॒र्नरा॑।
पि॒ता कु॒ट॑स्य च॒र्ष॒णिः॥४॥

ह॒विषा॑। जा॒रः। अ॒पाम्। पिप॑र्ति। पपु॑रिः। नरा॑। पि॒ता। कु॒ट॑स्य। च॒र्ष॒णिः॥४॥

पदार्थः-**(हविषा)** दानाऽऽदानेन **(जारः)** विभागकर्त्तादित्यः **(अपाम्)** जलानाम् **(पिपर्त्ति)** प्रपिपूर्त्ति **(पपुरिः)** प्रपूरको विद्वान् **(नरा)** नेतारावध्यापकोपदेशकौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(पिता)** पालयिता **(कुटस्य)** कुटिलस्य मार्गस्य सकाशात् **(चर्षणिः)** दर्शको मनुष्यः। **चर्षणिरिति पदनामसु पठितम्।** (निघं०४.२) इमं मन्त्रं यास्कमुनिरेवं समाचष्टे। **हविषापां जरयिता पिपर्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा। पिता कृतस्य कर्मणश्चायितादित्यः।** (निरु०५.२४)॥४॥

अन्वयः-हे नरा! युवां यथा जारः पपुरिश्च कुटस्य पिता चर्षणिरादित्यो हविषाधिविष्टप्यपां योगेन पिपर्त्ति तथा प्रजाः पालयताम्॥४॥

भावार्थः-मनुष्यो यथा सूर्य्यो वर्षादिद्वारा प्राण्यप्राणिनः पुष्णाति तथा सर्वान् पुष्येत्॥४॥

पदार्थः-हे **(नरा)** नीति के सिखाने पढ़ाने और उपदेश करनेहारे लोगो! तुम जैसे **(जारः)** विभागकर्त्ता **(पपुरिः)** अच्छे प्रकार पूर्ति **(पिता)** पालन करने **(कुटस्य)** कुटिल मार्ग को **(चर्षणिः)** दिखलाने हारा सूर्य **(हविषा)** आहुति से बढ़कर **(अपाम्)** जलों के योग से **(पिपर्त्ति)** पूरण कर प्रजाओं का पालन करता है, वैसे प्रजा का पालन करो॥४॥

भावार्थः-मनुष्यों को योग्य है कि जैसे सविता वर्षा के द्वारा जिलाने के योग्य प्राणी और अप्राणियों को पुष्ट करता है, वैसे ही सबको पुष्ट करें॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ॒दा॒रो वां॑ मती॒नां नास॑त्या मतवचसा।

पा॒तं सोम॑स्य धृष्णु॒या॥५॥३३॥

आ॒ऽदा॒रः। वा॒म्। म॒ती॒नाम्। नास॑त्या। म॒त॒ऽव॒च॒सा॒। पा॒तम्। सोम॑स्य। धृ॒ष्णु॒ऽया॥५॥

पदार्थः-(**आदारः**) समन्ताच्छत्रूणां दारणकर्त्ता गुणः (**वाम्**) युवयोः (**मतीनाम्**) मनुष्याणाम् (**नासत्या**) सत्यगुणस्वभावौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**मतवचसा**) मतानि वचांसि वेदवचनानि याभ्यां तौ (**पातम्**) प्राप्नुतम् (**सोमस्य**) ऐश्वर्य्यम्। अत्र **कर्मणि** (अष्टा०२.३.६५) षष्ठी (**धृष्णुया**) धर्षणेन प्रगल्भत्वेन॥५॥

अन्वयः-हे नासत्या मतवचसाऽश्विना सभासेनेशौ! युवां यो वामादारोऽस्ति तेन धृष्णुया सोमस्य मतीनां पातम्॥५॥

भावार्थः-राजपुरुषा दृढेन बलेन शत्रून् जित्वा स्वेषां प्रजानां चैश्वर्य्यं सततं वर्द्धयेयुः॥५॥

पदार्थः-हे (**नासत्या**) पवित्र गुण, स्वभावयुक्त (**मतवचसा**) ज्ञान से बोलने वाले सभा सेना के पति! तुम जो (**वाम्**) तुम्हारे (**आदारः**) सब प्रकार से शत्रुओं को विदारण कर्त्ता गुण हैं, उस और (**धृष्णुया**) प्रगल्भता से (**सोमस्य**) ऐश्वर्य्य और (**मतीनाम्**) मनुष्यों की (**पातम्**) रक्षा करो॥५॥

भावार्थः-राजपुरुषों को चाहिये कि दृढ़ बलयुक्त सेना से शत्रुओं को जीत अपनी प्रजा के ऐश्वर्य्य की निरन्तर वृद्धि किया करें॥५॥

पुनः सूर्य्यचन्द्रवदश्विनौ किं कुरुत इत्युपदिश्यते॥

फिर सूर्य्य-चन्द्रमा के समान सभा सेनापति क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

या नः॑ पीप॑रदश्विना॒ ज्योति॑ष्मती॒ तम॑स्तिरः।

ताम॒स्मे रा॑साथा॒मिष॑म्॥६॥

याः। नः॒। पीप॑रत्। अ॒श्वि॒ना॒। ज्योति॑ष्मती। तमः॑। ति॒रः॒। ताम्। अ॒स्मे इति॑। रा॒सा॒था॒म्। इष॑म्॥६॥

पदार्थः-(**या**) यौ वक्ष्यमाणौ (**नः**) अस्मभ्यम् (**पीपरत्**) सुखैः पूरयेत्। अत्र लिङर्थे लुङडभावश्च। (**अश्विना**) सूर्य्याचन्द्रमसाविव सभासेनेशौ (**ज्योतिष्मती**) प्रशस्तानि ज्योतींषि विद्यन्ते यस्यां सा। अत्र **सुपां सुलुग्०** इत्यमो लुक्। (**तमः**) रात्रिम्। **तम इति रात्रिनामसु पठितम्।** (निघं०१.७) (**तिरः**) अन्तर्धाने (**ताम्**) (**अस्मे**) अस्माकम्। अत्र **सुपाम्** इति शे आदेशः। (**रासाथाम्**) दद्यातम् (**इषम्**) उत्तमगुणसम्पादक- मन्नाद्यौषधसमूहम्॥६॥

अन्वयः-हे अश्विना सभासेनेशौ! युवां यथा सूर्याचन्द्रमसोर्ज्योतिष्मती तमस्तिरस्कृत्योषसं रात्रिं च कृत्वा नः सर्वान् पीपरत् तथास्मे अविद्यां निवार्य तामिषं रासाथाम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्याचन्द्रमसावन्धकारं निवार्य्य प्राणिनः सुखयन्ति, तथैव सभासेनेशावन्यायं निवर्त्त्य प्रजाः सुखयेताम्॥६॥

पदार्थः-हे **(अश्विना)** सभासेनाध्यक्षो! जैसे सूर्य्य और चन्द्रमा की **(ज्योतिष्मती)** उत्तम प्रकाशयुक्त कान्ति **(तमः)** रात्रि का निवारण करके प्रभात और शुक्लपक्ष से सब का पोषण करते हैं, वैसे **(अस्मे)** हमारी अविद्या को छुड़ा विद्या का प्रकाश कर **(नः)** हम सबको **(ताम्)** उस **(इषम्)** अन्न आदि को **(रसाथाम्)** दिया करो॥६॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। जिस प्रकार सूर्य्य और चन्द्रमा अन्धकार को दूर कर प्राणियों को सुखी करते हैं, वैसे ही सभा और सेना के अध्यक्षों को चाहिये कि अन्याय दूर कर प्रजा को सुखी करें॥६॥

पुनस्तौ किं कुर्य्यातामित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नो॑ नावा म॑तीनां या॒तं पा॒राय॒ गन्त॑वे।

युञ्जाथा॑मश्विना॒ रथ॑म्॥७॥

आ। नः। नावा। मतीनाम्। यातम्। पाराय। गन्तवे। युञ्जाथाम्। अश्विना। रथम्॥७॥

पदार्थः-(**आ**) समन्तात् **(नः)** अस्मान् **(नावा)** नौकादिना **(मतीनाम्)** मनुष्याणाम् **(यातम्)** प्राप्नुतम् **(पाराय)** परतटम् **(गन्तवे)** गन्तुम्। अत्र **गत्यर्थकर्मणि०** (अष्टा०२.३.१२) इति द्वितीयार्थे चतुर्थी। **(युञ्जाथाम्)** **(अश्विना)** व्यवहारव्यापिनौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(रथम्)** रमणीयं विमानादिकं यानसमूहम्॥७॥

अन्वयः-हे अश्विना! युवां मतीनां नावा पाराय गन्तवे नोऽस्मानायातं रथं च युञ्जाथाम्॥७॥

भावार्थः-मनुष्यै रथेन स्थले नौकया समुद्रे विमानेनाऽकाशे गमनाऽगमने कार्य्ये॥७॥

पदार्थः-हे **(अश्विना)** व्यवहार करने वाले कारीगरो! आप **(मतीनाम्)** मनुष्यों की **(नावा)** नौका से **(पाराय)** पार **(गन्तवे)** जाने के लिये **(नः)** हमारे लिये **(रथम्)** विमान आदि यानसमूहों को **(युञ्जाथाम्)** युक्त कर चलाइये॥७॥

भावार्थः-मनुष्यों को चाहिये कि रथ से स्थल अर्थात् सूखे में नाव से जल में विमान से आकाश में जाया-आया करें॥७॥

पुनस्तत् कीदृशं कर्त्तव्यमित्युपदिश्यते॥

फिर वह यान किस प्रकार का होना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अरित्रं॑ वां दिवस्पृथु तीर्थे॑ सिन्धू॑नां॒ रथः॑।

धिया॑ युयुज्र॒ इन्द॑वः॥८॥

अरित्र॑म्। वा॒म्। दि॒वः। पृ॒थु। ती॒र्थे। सिन्धू॑नाम्। रथः॑। धि॒या। यु॒यु॒ज्रे॒। इन्द॑वः॥८॥

पदार्थः-(**अरित्रम्**) यानस्तम्भनार्थं जलगाधग्रहणार्थं वा लोहमयं साधनम् (**वाम्**) युवयोः (**दिवः**) द्योतमानात्मकविद्युदग्न्यादिपदार्थैर्युक्तम् (**पृथु**) विस्तीर्णम् (**तीर्थे**) तरति येन तस्मिन्नर्थे (**सिन्धूनाम्**) समुद्रादीनाम् (**रथः**) यानसमूहः (**धिया**) क्रियया (**युयुज्रे**) योज्यन्ताम्। अत्र लोडर्थे लिट्। **इरयो रे।** (अष्टा०६.४.७६) इति रे आदेशः। (**इन्दवः**) जलानि। **इन्दुरित्युदकनामसु पठितम्।** (निघं०१.१२)॥८॥

अन्वयः-हे शिल्पिनौ! यो वां पृथु रथोऽस्ति तत्र सिन्धूनां (तीर्थे) यानेऽरित्रं दिवोऽग्न्यादीनीन्दवो जलानि च युवाभ्यां धिया युयुज्रे योज्यन्ताम्॥८॥

भावार्थः-न किल कश्चिदग्निजलादिचालनयुक्तेन यानेन विना भूसमुद्रान्तरिक्षेषु सुखेन गन्तुं शक्नोति॥८॥

पदार्थः-हे कारीगरो! जो (**वाम्**) आप लोगों का (**पृथु**) विस्तृत (**रथः**) यानसमूह अर्थात् अनेकविध सवारी हैं, उनको (**सिन्धूनाम्**) समुद्रों के (**तीर्थे**) तराने वाले में (**अरित्रम्**) यान रोकने और बहुत जल के थाह ग्रहणार्थ लोहे का साधन (**दिवः**) प्रकाशमान बिजुली अग्न्यादि और (**इन्दवः**) जलादि को आप (**धिया**) क्रिया से) (**युयुज्रे**) युक्त कीजिये॥८॥

भावार्थः-कोई भी मनुष्य अग्नि आदि से चलने वाले यान अर्थात् सवारी के विना पृथिवी, समुद्र और अन्तरिक्ष में सुख से आने-जाने को समर्थ नहीं हो सकता॥८॥

पुनस्तौ किं कुर्य्यातामित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

दि॒वस्क॑ण्वास॒ इन्द॑वो॒ वसु॒ सिन्धू॑नां॒ प॒दे।

स्वं व॒व्रिं कु॑ह॒ धित्सथः॥९॥

दि॒वः। क॒ण्वा॒स॒ः। इन्द॑वः। वसु॑। सिन्धू॑नाम्। प॒दे। स्वम्। व॒व्रिम्। कु॑ह॑। धि॒त्स॒थ॒ः॥९॥

पदार्थः-(**दिवः**) प्रकाशमानानग्न्यादीन् (**कण्वासः**) शिल्पविद्याविदो मेधाविनः (**इन्दवः**) जलानि (**वसु**) धनम् (**सिन्धूनाम्**) समुद्राणाम् (**पदे**) गन्तव्ये मार्गे (**स्वम्**) स्वकीयम् (**वव्रिम्**) रूपयुक्तं पदार्थसमूहम्। **वव्रिरिति रूपनामसु पठितम्।** (निघं०३.७) (**कुह**) क्व (**धित्सथः**) धर्तुमिच्छथः॥९॥

अन्वयः-हे कण्वासो विद्वांसो! यूयमिमौ शिल्पिनौ पृच्छत युवां सिन्धूनां पदे ये दिव इन्दवः सन्ति तान् स्वं वव्रिं वसु च कुह धित्सथ इति॥९॥

भावार्थः-यदि मनुष्या विद्वच्छिक्षानुकूल्येनाऽग्निजलादिसम्प्रयुक्तेषु यानेषु स्थित्वा राजकर्मव्यापारयोः सिद्धये समुद्रान्तं गच्छेयुस्तदा पुष्कलं सुरूपं धनम्प्राप्नुयुः॥९॥

पदार्थः-हे (**कण्वासः**) मेधावी विद्वान् लोगो! तुम इन कारीगरों को पूछो कि तुम लोग (**सिन्धूनाम्**) समुद्रों के (**पदे**) मार्ग में जो (**दिवः**) प्रकाशमान अग्नि और (**इन्दवः**) जल आदि हैं उन्हें और (**स्वम्**) अपना (**वव्रिम्**) सुन्दर रूपयुक्त (**वसु**) धन (**कुह**) कहाँ (**धित्सथः**) धरने की इच्छा करते हो॥९॥

भावार्थः-जो मनुष्य लोग विद्वानों की शिक्षा के अनुकूल अग्नि जल के प्रयोग से युक्त यानों पर स्थित होके राजा-प्रजा के व्यवहार की सिद्धि के लिये समुद्र के अन्त में जावें आवें तो बहुत उत्तमोत्तम धन को प्राप्त होवें॥९॥

तदुत्तरमाह।

इस विषय का उत्तर अगले मन्त्र में कहा है॥

अभूदु भा उ अंशवे हिरण्यं प्रति सूर्यः।

व्यख्यज्जिह्वयासितः॥१०॥३४॥

अभूत्। ऊम् इति। भाः। ऊम् इति। अंशवे। हिरण्यम्। प्रति। सूर्यः। वि। अख्यत्। जिह्वया। असितः॥१०॥

पदार्थः-(**अभूत्**) भवति। अत्र लडर्थे लुङ्। (**उ**) वितर्के (**भाः**) या भाति प्रकाशयति (**उ**) (**अंशवे**) पदार्थानां किरणानां वेगाय (**हिरण्यम्**) सुवर्णादिकं (**प्रति**) प्रतीतार्थे (**सूर्य्यः**) सविता (**वि**) विविधार्थे (**अख्यत्**) प्रसिद्धतया प्रकाशेत (**जिह्वया**) रसनेन्द्रियेणेव किरणज्वालासमूहेन (**असितः**) अबद्धः॥१०॥

अन्वयः-हे शिल्पिनौ! युवां यथाऽसितो भाः सूर्य्योऽशवे जिह्वयेवाख्यत् सन्मुखोऽभूत् तथा तत्सन्निधौ तद्यानं स्थापयित्वा तत्रोचितस्थाने हिरण्यं ज्योतिः सुवर्णादिकं रक्षेत॥१०॥

भावार्थः-हे यानयायिनो मनुष्या! यूयं ध्रुवयन्त्रसूर्य्यादिनिमित्तेन दिशो विज्ञाय यानानि चालयत स्थापयत च यतो भ्रान्त्याऽन्यत्र गमनं न स्यात्॥१०॥

पदार्थः-हे कारीगरो! तुम लोग जैसे (**असितः**) अबद्ध अर्थात् जिसका किसी के साथ बन्धन नहीं है (**भाः**) प्रकाशयुक्त (**सूर्य्यः**) सूर्य्य के (**अंशवे**) किरणों के विभागार्थ (**जिह्वया**) जीभ के समान (**व्यख्यत्**) प्रसिद्धता से प्रकाशमान सन्मुख (**अभूत्**) होता है, वैसे उसी पर यान का स्थापन कर उसमें उचित स्थान में (**हिरण्यम्**) सुवर्णादि उत्तम पदार्थों को धरो॥१०॥

भावार्थः-हे सवारी पर चलने वाले मनुष्यो! तुम दिशाओं के जानने वाले चुम्बक, ध्रुव, यन्त्र और सूर्यादि कारण से दिशाओं को जान; यानों को चलाओ और ठहराया भी करो, जिससे भ्रान्ति में पड़कर अन्यत्र गमन न हो अर्थात् जहाँ जाना चाहते हो, ठीक वहीं पहुँचो, भटकना न हो॥१०॥

पुनस्तदेवोपदिशति॥

फिर उसी उत्तर का उपदेश अगले मन्त्र में किया है॥

अभूदु पारमेतवे पन्था ऋतस्य साधुया।
अदर्शि वि स्रुतिर्दिवः॥११॥

अभूत्। ऊम् इति। पारम्। एतवे। पन्थाः। ऋतस्य। साधुऽया। अदर्शि। वि। स्रुतिः। दिवः॥११॥

पदार्थः-(**अभूत्**) भवेत्। अत्र लडर्थे लुङ्। (**उ**) निश्चयार्थे (**पारम्**) परभागम् (**एतवे**) एतुम्। अत्र **तुमर्थे से०** इति तवे प्रत्ययः। (**पन्था**) मार्गः (**ऋतस्य**) जलस्य (**साधुया**) साधुना। अत्र **सुपां सुलुग्०** इति याडादेशः। (**अदर्शि**) दृश्यताम्। अत्रापि लडर्थे लुङ्। (**वि**) विविधार्थे (**स्रुतिः**) स्रवणं गमनं यस्मिन्मार्गे सः (**दिवः**) प्रकाशमानादग्नेः॥११॥

अन्वयः-यदि मनुष्यैः समुद्रादेः पारमेतवे यत्र दिव ऋतस्य विस्रुतिः पन्था अभूत् तत्र स्थित्वा साधुया यानेन सुखतो देशान्तरमदर्शि तर्हि श्रीमन्तः कथं न स्युः॥११॥

भावार्थः-मनुष्यैः सर्वत्र गमनागमनार्थाय सरलान् शुद्धान् मार्गान् रचयित्वा तत्र विमानादिभिर्यानै- र्यथावद्गमनं कृत्वा विविधानि सुखानि प्राप्तव्यानि॥११॥

पदार्थः-मनुष्यों को योग्य है कि समुद्रादि के (**पारम्**) पार (**एतवे**) जाने के लिये जहाँ (**दिवः**) प्रकाशमान सूर्य्य और (**ऋतस्य**) जल का (**विस्रुतिः**) अनेक प्रकार गमनार्थ (**पन्थाः**) मार्ग (**अभूत्**) हो वहां स्थिर हो (**साधुया**) उत्तम सवारी से सुखपूर्वक देश-देशान्तरों को (**अदर्शि**) देखें तो श्रीमन्त क्यों न होवें॥११॥

भावार्थः-मनुष्यों को उचित है कि सर्वत्र आने-जाने के लिये सीधे और शुद्ध मार्गों को रच और विमानादि यानों से इच्छापूर्वक गमन करके नाना प्रकार के सुखों को प्राप्त करें॥११॥

पुनरेताभ्यां किं प्राप्तव्यमित्युपदिश्यते॥

फिर सभा और सेनापति अश्वियों से क्या पाना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

तत्तदिदुश्विनोरवो जरिता प्रति भूषति।
मदे सोमस्य पिप्रतोः॥१२॥

तत्ऽतत्। इत्। अश्विनोः। अवः। जरिता। प्रति। भूषति। मदे। सोमस्य। पिप्रतोः॥ १२॥

पदार्थः-(**तत्तत्**) तत्तदुक्तं वक्ष्यमाणं वा सुखम् (**इत्**) एव (**अश्विनोः**) उक्तयोः सभासेनेशयोः सकाशात् (**अवः**) रक्षणादिकम् (**जरिता**) स्तोता विद्वान् (**प्रति**) (**भूषति**) अलङ्करोति (**मदे**) माद्यन्ति हृष्यन्त्यानन्दन्ति यस्मिन् व्यवहारे तस्मिन् (**सोमस्य**) उत्पन्नस्य जगतो मध्ये (**पिप्रतोः**) यौ पिपूर्त्तस्तयोः॥ १२॥

अन्वयः-यो जरिता मनुष्यः पिप्रतोरश्विनोः सकाशात् सोमस्य मदेऽवः प्रति भूषति स तत्सुखमाप्नोति॥ १२॥

भावार्थः-नहि कैश्चिदपि विद्वच्छिक्षायुक्त्या क्रियया विना सर्वाणि सुखानि प्राप्तुं शक्यन्ते तस्मादेतान्नित्यमध्येष्टव्यम्॥ १२॥

पदार्थः-जो (**जरिता**) स्तुति करने वाला विद्वान् मनुष्य (**पिप्रतोः**) पूरण करने वाले (**अश्विनोः**) सभा और सेनापति से (**सोमस्य**) उत्पन्न हुए जगत् के बीच (**मदे**) आनन्दयुक्त व्यवहार में (**अवः**) रक्षादि को (**प्रतिभूषति**) अलंकृत करता है (**तत्तत्**) उस-उस सुख को (**इत्**) ही प्राप्त होता है॥ १२॥

भावार्थः-कोई भी विद्वानों से शिक्षा वा क्रिया को ग्रहण किये विना सब सुखों को प्राप्त नहीं हो सकता। इससे उसका खोज नित्य करना चाहिये॥ १२॥

पुनस्तौ कीदृशवित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

वावसाना विवस्वति सोमस्य पीत्या गिरा।

मनुष्वच्छंभू आ गतम्॥ १३॥

ववसाना। विवस्वति। सोमस्य। पीत्या। गिरा। मनुष्वत्। शंभू इति शम्ऽभू। आ। गतम्॥ १३॥

पदार्थः-(**वावसाना**) सुखेष्वतिशयेन वस्तारौ अत्र **सुपां सुलुग्०** इत्याकारादेशः। (**विवस्वति**) सूर्य्ये (**सोमस्य**) उत्पन्नस्य जगतो मध्ये (**पीत्या**) रक्षिकया क्रियया। अत्र **पा रक्षण** इत्यस्मात् क्तिन्। (**गिरा**) वाण्या (**मनुष्वत्**) यथा मनुष्या रक्षन्ति तद्वत् (**शम्भू**) सुखं भावुकौ (**आ**) समन्तात् (**गतम्**) प्राप्नुतम्॥ १३॥

अन्वयः-हे वावसाना शम्भू अध्यापकोपदेशकौ! युवां विवस्वति सोमस्य पीत्या गिराऽस्मान्मनुष्वदागतम्॥ १३॥

भावार्थः-हे मनुष्या! यूयं यथा परोपकारिणो जनाः प्राणिनां निवासविद्याप्रकाशदानेन सुखानि भावयन्ति, तथैव सर्वेभ्यो बहूनि सुखानि सम्पादयतेति॥ १३॥

पदार्थः-हे **(वावसाना)** अत्यन्त सुख में वसाने **(शम्भू)** सुखों के उत्पन्न करने वाले पढ़ाने और सत्य के उपदेश करने हारे! आप **(विवस्वति)** सूर्य्य के प्रकाश में **(सोमस्य)** उत्पन्न हुए जगत् के मध्य में **(पीत्या)** रक्षा रूपी क्रिया वा **(गिरा)** वाणी से हम को **(मनुष्वत्)** रक्षा करने हारे मनुष्यों के तुल्य **(आ) (गतम्)** सब प्रकार प्राप्त हूजिये॥१३॥

भावार्थः-हे मनुष्यो! तुम जिस प्रकार परोपकारी मनुष्य प्राणियों के निवास और विद्या प्रकाश के दान से सुखों को प्राप्त कराते हैं, वैसे तुम भी उन को प्राप्त कराओ॥१३॥

तयोः सकाशात् किं प्राप्नुयुरित्युपदिश्यते॥

इन दोनों से क्या प्राप्त करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

युवोरुषा अनु श्रियं परिज्मनोरुपाचरत्।
ऋता वनथो अक्तुभिः॥१४॥

युवोः। उषाः। अनु। श्रियम्। परिऽज्मनोः। उपऽआचरत्। ऋता। वनथः। अक्तुऽभिः॥१४॥

पदार्थः-(**युवोः**) सभासेनेशयोः **(उषाः)** सूर्य्याचन्द्रमसोः प्रातःप्रकाशः **(अनु)** पश्चादर्थे **(श्रियम्)** विद्याराजलक्ष्मीम् **(परिज्मनोः)** यः परितः सर्वतोऽजतः प्रक्षिपतो गच्छतस्तयोः **(उपाचरत्)** उपचारिणीव वर्त्तते **(ऋता)** ऋतौ यथार्थसुगुणस्वरूपौ। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(वनथः)** सम्भजेथाम् **(अक्तुभिः)** रात्रिभिः। **अक्तुरिति रात्रिनामसु पठितम्।** (निघं०१.७)॥१४॥

अन्वयः-हे ऋता सभासेनाधिपती! यथोषा अक्तुभिरुपाचरत् तथा ययोः परिज्मनोर्युवोर्न्यायो रक्षणं चोपाचरत् तौ युवां श्रियमनुवनथः॥१४॥

भावार्थः-राजप्रजाजना अन्योन्येषु प्रीतिं कृत्वा महदैश्वर्य्यं प्राप्य सदा सर्वोपकारे प्रयतन्ताम्॥१४॥

पदार्थः-हे **(ऋता)** उचित गुण सुन्दरस्वरूप सभासेनापति! जैसे **(उषाः)** प्रभात समय **(अक्तुभिः)** रात्रियों के साथ **(उपाचरत्)** प्राप्त होता है, वैसे जिन **(परिज्मनोः)** सर्वत्र गमनकर्त्ता पदार्थों को प्रकाश से फेंकने हारे सूर्य और चन्द्रमा के सदृश वर्त्तमान **(युवोः)** आपका न्याय और रक्षा हम को प्राप्त होवे आप **(श्रियम्)** उत्तम लक्ष्मी को **(अनुवनथः)** अनुकूलता से सेवन कीजिये॥१४॥

भावार्थः-राजा और प्रजाजनों को चाहिये कि परस्पर प्रीति से बड़े ऐश्वर्य्य को प्राप्त होकर सदा सबके उपकार में यत्न किया करें॥१४॥

पुनस्तावस्मभ्यं किं किं कुर्यातामित्युपदिश्यते॥

फिर वे हम लोगों के लिये क्या-क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

उभा पिबतमश्विनोभा नः शर्म यच्छतम्।

अविद्रियाभिरूतिभिः॥ १५॥ ३५॥ ३॥

उभा। पिबतम्। अश्विना। उभा। नः। शर्म। यच्छतम्। अविद्रियाभिः। ऊतिभिः॥ १५॥

पदार्थः-(**उभा**) द्वौ। अत्र सर्वत्र **सुपां सुलुग्०** इत्याकारादेशः (**पिबतम्**) रक्षतम् (**अश्विना**) सकलविद्यासुखव्यापिनौ सभासेनेशौ (**उभा**) उभौ (**नः**) अस्मभ्यम् (**शर्म**) सुखं निवासं वा (**यच्छतम्**) (**अविद्रियाभिः**) या विदीर्यन्ते ता विद्रास्ता अर्हन्ति ता विद्रियाः। अविद्यमाना विद्रिया यासु क्रियासु ताभिः। अत्र '**घजर्थे कविधानम्**' ततो घस्तद्धितः। (**ऊतिभिः**) रक्षणादिभिः॥ १५॥

अन्वयः-हे सभासेनेशावश्विना! युवामुभावमृतात्मकमोषधीरसं पिबतमुभाऽविद्रियाभिरूतिभिर्नः शर्म यच्छतम्॥ १५॥

भावार्थः-यदि सभासेनेशादयो राजजनाः प्रीतिविनयाभ्यां प्रजाः पालयेयुस्तर्हि प्रजाजना अपि तानित्थमेव रक्षयेयुः॥ १५॥

अस्मिन् सूक्ते उषोऽश्विशब्दार्थदृष्टार्थवर्णनादेतदर्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति पञ्चत्रिंशो वर्गः ३५ षट्चत्वारिंश ४६ सूक्तं ३ तृतीयोऽध्यायश्च समाप्तः॥

इति श्रीमत्परिव्राजकाचार्य्येण श्रीयुतमहाविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण दयानन्दसरस्वती- स्वामिना विरचिते संस्कृतार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये तृतीयोऽध्यायः पूर्तिं प्रापितः॥ ३॥

पदार्थः-हे सभा और सेना के ईश! (**अश्विना**) सम्पूर्ण विद्या और सुख में व्याप्त होने वाले! तुम दोनों अमृतरूप औषधियों के रस को (**पिबतम्**) पीओ और (**उभा**) दोनों (**अविद्रियाभिः**) अखण्डित क्रियायुक्त (**ऊतिभिः**) रक्षाओं से (**नः**) हम को (**शर्म**) सुख (**यच्छतम्**) देओ॥ १५॥

भावार्थः-जो सभा और सेनापति आदि राजपुरुष प्रीति और विनय से प्रजा की पालना करें तो प्रजा भी उनकी रक्षा अच्छे प्रकार करें॥ १५॥

इस सूक्त में उषा और अश्वियों का प्रत्यक्षार्थ वर्णन किया है। इससे इस सूक्तार्थ के साथ पूर्वसूक्तार्थ की सङ्गति जाननी चाहिये॥

यह पैंतीसवां वर्ग ३५ छयालीसवां ४६ सूक्त और ३ तीसरा अध्याय समाप्त हुआ॥ ४६॥

इति श्रीमत्परिव्राजकाचार्य्य महाविद्वान् श्रीयुत् स्वामी विरजानन्द सरस्वती जी के शिष्य दयानन्द सरस्वती स्वामी ने संस्कृत और आर्य्यभाषा से सुशोभित अच्छे प्रमाण सहित ऋग्वेदभाष्य के तीसरे अध्याय को पूर्ण किया॥ ३॥

ओ३म्

अथ चतुर्थाऽध्यायाऽऽरम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अतोऽग्रे यानि सामान्येन शब्दसाधुत्वविषयाणि सूत्राणि लिखितानि तान्युत्तरत्र यथाविषयं वेदितव्यानि यच्चापूर्वं भविष्यति तत्तु लेखिष्यते॥

अथ दशर्चस्य सप्तचत्वारिंशस्य सूक्तस्य प्रस्कण्व ऋषिः। अश्विनौ देवते। १,५ निचृत्पथ्या बृहती। ३,७ पथ्या बृहती। ९ विराट् पथ्या बृहती च छन्दः। मध्यमः स्वरः। २,६,८ निचृत्सतःपङ्क्तिः। ४,१० सतः पङक्तिश्छन्दः। पञ्चमः स्वरः॥

अब इस के आगे चौथे अध्याय के भाष्य का आरम्भ है॥

तत्राऽश्विभ्यां किं साधनीयमित्युपदिश्यते॥

उस के पहले मन्त्र में अश्वि से क्या सिद्ध करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

अ॒यं वां॑ मधु॑मत्तमः सु॒तः सोम॑ ऋतावृधा।
तमश्विना पिबतं ति॒रोअ॑ह्न्यं ध॒त्तं रत्ना॑नि दा॒शुषे॑॥ १॥

अ॒यम्। वा॒म्। मधु॑मत्ऽतमः। सु॒तः। सोम॑ः। ऋ॒तऽवृ॒धा॒। तम्। अ॒श्वि॒ना॒। पि॒ब॒त॒म्। ति॒रः॒ऽअ॑ह्न्यम्। ध॒त्तम्। रत्ना॑नि। दा॒शुषे॑॥ १॥

पदार्थः-(**अयम्**) वक्ष्यमाण एताभ्यां साधितः (**वाम्**) युवाभ्यां (**मधुमत्तमः**) प्रशस्ता मधुरादयो गुणा विद्यन्ते यस्मिन् सोऽतिशयितः (**सुतः**) निष्पादितः (**सोमः**) वैद्यकशिल्पक्रियया संसाधित ओषधीरसः (**ऋतावृधा**) यावृतेन जलेन यथार्थतया शिल्पक्रियया वा वर्धेते तौ (**तम्**) रसम् (**अश्विना**) सूर्य्यपवनाविव (**पिबतम्**) (**तिरोअह्न्यम्**) तिरश्च तदहश्च तिरोहस्तस्मिन् भवम् (**धत्तम्**) (**रत्नानि**) रमणीयानि सुवर्णादीनि यानानि वा (**दाशुषे**) विद्यादिदानकर्त्रे विदुषे॥ १॥

अन्वयः-हे ऋतावृधाऽश्विना सूर्य्यपवनवद्वर्त्तमानौ सभासेनेशौ वां योऽयं मधुमत्तमः सोमोऽस्माभिः सुतस्तं तिरोअह्न्यं रसं युवां पिबतं दाशुषे रत्नानि धत्तम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सभाध्यक्षादयः सदौषधीसारान् संसेव्य बलवन्तो भूत्वा प्रजाश्रियो वर्धयेयुः॥ १॥

पदार्थः-हे (**ऋतावृधा**) जल वा यथार्थ शिल्पक्रिया करके बढ़ाने वाले! (**अश्विना**) सूर्य्य-वायु के तुल्य सभा और सेना के ईश! (**वाम्**) जो (**अयम्**) यह (**मधुमत्तमः**) अत्यन्त मधुरादि गुणयुक्त

(सोमः) यान व्यापार वा वैद्यक शिल्प क्रिया से हम ने **(सुतः)** सिद्ध किया है **(तम्)** उस **(तिरोअह्नयम्)** तिरस्कृत दिन में उत्पन्न हुए रस को तुम लोग **(पिबतम्)** पीओ और विद्यादान करने वाले विद्वान् के लिये **(रत्नानि)** सुवर्णादि वा सवारी आदि को **(धत्तम्)** धारण करो॥१॥

भावार्थः-सभा के मालिक आदि लोग सदा औषधियों के रसों की सेवा से अच्छे प्रकार बलवान् होकर प्रजा की शोभाओं को बढ़ावें॥१॥

ताभ्यां साधितेन यानेन किं कर्त्तव्यमित्युपदिश्यते॥

उनसे सिद्ध किये हुए यान से क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिव॒न्धुरे॑ण॒ त्रिवृ॑ता॒ सुपेश॑सा॒ रथे॒ना या॑तमश्विना।
कण्वा॑सो वां॒ ब्रह्म॑ कृ॒ण्वन्त्यध्व॒रे तेषां॒ सु शृ॑णुतं॒ हव॑म्॥२॥

त्रि॒व॒न्धु॒रेण॑। त्रि॒ऽवृता॑। सु॒ऽपेश॑सा। रथे॑न। आ। या॒त॒म्। अ॒श्वि॒ना॒। कण्वा॑सः। वा॒म्। ब्रह्म॑। कृ॒ण्व॒न्ति॒। अ॒ध्व॒रे। तेषा॑म्। सु। शृ॒णु॒त॒म्। हव॑म्॥२॥

पदार्थः-(**त्रिबन्धुरेण**) त्रीणि बन्धुराणि बन्धनानि यस्मिंस्तेन **(त्रिवृता)** त्रिभिः शिल्पक्रियाप्रकारैः प्रपूरितस्तेन **(सुपेशसा)** शोभनं पेशो रूपं हिरण्यं वा यस्मिन् तेन। **पेश इति रूपनामसु पठितम्।** (निघं०३.७) **हिरण्यनामसु पठितम्।** (निघं०१.२) च। **(रथेन)** विमानादिना **(आ)** अभितः **(यातम्)** गच्छतम् **(अश्विना)** अग्निजले इव वर्त्तमानौ **(कण्वासः)** मेधाविनः **(वाम्)** एतयोः सकाशात् **(ब्रह्म)** अन्नम्। **ब्रह्मेत्यन्ननामसु पठितम्।** (निघं०२.७) **(कृण्वन्ति)** कुर्वन्ति **(अध्वरे)** सङ्गते शिल्पक्रियासिद्धे याने **(तेषाम्)** मेधाविनाम् **(सु)** शोभनार्थे **(शृणुतम्)** **(हवम्)** ग्राह्यं विद्याशब्दसमूहम्॥२॥

अन्वयः-हे अश्विना वर्त्तमानौ सभासेनेशौ! युवां यथा कण्वासोऽध्वरे येन त्रिबधुरेण त्रिवृता सुपेशसा रथेन देशदेशाऽन्तरं शीघ्रं गत्वाऽऽगत्य ब्रह्म कृण्वन्ति तथा तेनायातम्। तेषां हवं सुशृणुतमन्नादिसमृद्धिं च वर्द्धयतम्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विदुषां सकाशात् पदार्थविज्ञानपुरःसरां यज्ञशिल्पहस्तक्रियां साक्षात्कृत्वा व्यवहारकृत्यानि निष्पादनीयानि॥२॥

पदार्थः-हे **(अश्विना)** पावक और जल के तुल्य सभा और सेना के ईश तुम लोग! जैसे **(कण्वासः)** बुद्धिमान् लोग **(अध्वरे)** अग्निहोत्रादि वा शिल्पक्रियया से सिद्ध यज्ञ में जिस **(त्रिबन्धुरेण)** तीन बन्धनयुक्त **(त्रिवृता)** तीन शिल्पक्रिया के प्रकारों से पूरित **(सुपेशसा)** उत्तम रूप वा सोने से जटित **(रथेन)** विमान आदि यान से देश-देशान्तरों में शीघ्र जा आ के **(ब्रह्म)** अन्नादि पदार्थों को **(कृण्वन्ति)** करते हैं, वैसे उससे देश-देशान्तर और दीप-द्वीपान्तरों को **(आयातम्)** जाओ आओ **(तेषाम्)** उन

बुद्धिमानों का **(हवम्)** ग्रहण करने योग्य विद्याओं के उपदेश को **(शृणुतम्)** सुनो और अन्नादि समृद्धि को बढ़ाया करो॥२॥

भावार्थः-यहां वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि विद्वानों के सङ्ग से पदार्थ विज्ञानपूर्वक यज्ञ और शिल्पविद्या की हस्तक्रिया को साक्षात् करके व्यवहाररूपी कार्यों को सिद्ध करें॥२॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अश्विना मधुमत्तमं पातं सोममृतावृधा।

अथाद्य दस्रा वसु बिभ्रता रथे दाश्वांसमुप गच्छतम्॥३॥

अश्विना। मधुमत्ऽतमम्। पातम्। सोमम्। ऋतऽवृधा। अथ। अद्य। दस्रा। वसु। बिभ्रता। रथे। दाश्वांसम्। उप। गच्छतम्॥३॥

पदार्थः-(**अश्विना**) सूर्य्यवायुसदृक्कर्मकारिणौ सभासेनेशौ **(मधुमत्तमम्)** अतिशयेन प्रशस्तैर्मधुरादिगुणैरुपेतम् **(पान्तम्)** रक्षतम् **(सोमम्)** वीररसादिकम् **(ऋतावृधा)** यावृतेन यथार्थगुणेन प्राप्तिसाधकेन वर्धयेते तौ **(अथ)** आनन्तर्य्ये **(अद्य)** अस्मिन् वर्त्तमाने दिने **(दस्रा)** दुःखोपक्षेतारौ **(वसु)** सर्वोत्तमं धनम् **(बिभ्रता)** धरन्तौ **(रथे)** विमानादियाने **(दाश्वांसम्)** दातारम् **(उप)** सामीप्ये **(गच्छतम्)** प्राप्नुतम्॥३॥

अन्वयः-हे अश्विना सूर्य्यवायुवद्वर्त्तमानौ दस्रा वसु बिभ्रतर्तावृधा सभासेनाध्यक्षौ युवामद्य मधुमत्तमं सोमं पातमथोक्ते रथे स्थित्वा दाश्वांसमुपगच्छतम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायुना सोमसूर्य्ययोः पुष्टिस्तमो नाशश्च भवति, तथैव सभासेनेशाभ्यां प्रजानां दुःखोपक्षयो धनवृद्धिश्च जायते॥३॥

पदार्थः-हे **(अश्विना)** सूर्य्य-वायु के समान कर्म और **(दस्रा)** दुःखों के दूर करने वाले! **(वसु)** सब से उत्तम धन को **(बिभ्रता)** धारण करते तथा **(ऋतावृधा)** यथार्थ गुण संयुक्त प्राप्ति साधन से बढ़े हुए सभा और सेना के पति आप **(अद्य)** आज वर्त्तमान दिन में **(मधुमत्तमम्)** अत्यन्त मधुरादिगुणों से युक्त **(सोमम्)** वीर रस की **(पातम्)** रक्षा करो **(अथ)** तत्पश्चात् पूर्वोक्त **(रथे)** विमानादि यान में स्थित होकर **(दाश्वांसम्)** देने वाले मनुष्य के **(उपगच्छतम्)** समीप प्राप्त हुआ कीजिये॥३॥

भावार्थः-यहां वाचकलुप्तोपमालङ्कार है। जैसे वायु से सूर्य्य चन्द्रमा की पुष्टि और अन्धकार का नाश होता है, वैसे ही सभा और सेना के पतियों से प्रजास्थ प्राणियों की सन्तुष्टि दुःखों का नाश और धन की वृद्धि होती है॥३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्रिष॒धस्थे ब॒र्हिषि॑ विश्ववेदसा॒ मध्वा॑ य॒ज्ञं मि॑मिक्षतम्।
कण्वा॑सो वां सु॒तसो॑मा अभि॒द्यवो॒ युवां॑ ह॑वन्ते अश्विना॥४॥

त्रि॒ऽस॒धस्थे। ब॒र्हिषि॑। वि॒श्व॒वे॒द॒सा॒। मध्वा॑। य॒ज्ञम्। मि॒मि॒क्ष॒त॒म्। कण्वा॑सः। वा॒म्। सु॒तऽसो॑माः। अ॒भि॒ऽद्यवः। युवाम्। ह॒व॒न्ते॒। अ॒श्वि॒ना॒॥४॥

पदार्थः-(**त्रिषधस्थे**) त्रीणि भूजलपवनाख्यानि स्थित्यर्थानि स्थानानि यस्मिंस्तस्मिन् (**बर्हिषि**) अन्तरिक्षे (**विश्ववेदसा**) विश्वान्यखिलान्यन्नानि धनानि वा ययोस्तौ (**मध्वा**) मधुरेण रसेन। **जसादिषु छन्दसि वा वचनाद्** (अष्टा०वा०७.३.१०९) नादेशो न। (**यज्ञम्**) शिल्पाख्यम् (**मिमिक्षतम्**) मेढुं सेक्तुमिच्छतम् (**कण्वासः**) मेधाविनः (**वाम्**) युवाम् (**सुतसोमाः**) सुता निष्पादिताः सोमाः पदार्थसारा यैस्ते (**अभिद्यवः**) अभितः सर्वतो द्यवो दीप्ता विद्या विद्युदादयः पदार्थाः साधिता यैस्ते। अत्र द्युतधातोर्बाहुलकादौणादिको डुः प्रत्ययः। (**युवाम्**) यौ (**हवन्ते**) गृह्णन्ति (**अश्विना**) क्षत्रधर्मव्यापिनौ॥४॥

अन्वयः-हे विश्ववेदसाऽश्विनेव वर्त्तमानौ सभासेनेशौ! युवां यथाऽभिद्यवः सुतसोमाः कण्वासो विद्वांसस्त्रिषधस्थे बर्हिषि मध्वा मधुरेण रसेन वां यज्ञं च हवन्ते तथा मिमिक्षतम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मनुष्या विद्वद्भ्यो विद्यां गृहीत्वा यानानि रचयित्वा तत्र जलादिकं संयोज्य सद्यो गमनाय शक्नुवन्ति तथा नेतरेणोपायेन॥४॥

पदार्थः-हे (**विश्ववेदसा**) अखिल धनों के प्राप्त करने वाले (**अश्विना**) क्षत्रियों के धर्म में स्थित के सदृश सभा सेनाओं के रक्षक! आप जैसे (**अभिद्यवः**) सब प्रकार से विद्याओं के प्रकाशक और विद्युदादि पदार्थों के साधक (**सुतसोमाः**) उत्पन्न पदार्थों के ग्राहक (**कण्वासः**) मेधावी विद्वान् लोग (**त्रिषधस्थे**) जिस में तीनों भूमि, जल, पवन स्थिति के लिये हों उस (**बर्हिषि**) अन्तरिक्ष में (**मध्वा**) मधुर रस से (**वाम्**) आप और (**यज्ञम्**) शिल्प कर्म को (**हवन्ते**) ग्रहण करते हैं, वैसे (**मिमिक्षतम्**) सिद्ध करने की इच्छा करो॥४॥

भावार्थः-जैसे मनुष्य लोग विद्वानों से विद्या सीख, यान रच और उसमें जल आदि युक्त करके शीघ्र जाने आने के वास्ते समर्थ होते हैं, वैसे अन्य उपाय से नहीं, इसलिये उसमें परिश्रम अवश्य करें॥४॥

पुनस्तौ किं कुरुतमित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

याभि॒: कण्व॑मभिष्टि॑भि॒: प्राव॑तं यु॒वम॑श्विना।

ताभि: ष्व१स्माँ अवतं शुभस्पती पातं सोममृतावृधा॥५॥ १॥

याभि:। कण्वम्। अभिष्टिऽभि:। प्र। आवतम्। युवम्। अश्विना। ताभि:। सु। अस्मान्। अवतम्। शुभ:। पती इति। पातम्। सोमम्। ऋतऽवृधा॥५॥

पदार्थ:-(**याभि:**) वक्ष्यमाणाभि: (**कण्वम्**) मेधाविनम् (**अभिष्टिभि:**) या आभिमुख्येनेष्यन्ते ताभिरभीष्टाभिरिच्छाभि:। अत्र **एमन्नादिषु छन्दसि पररूपं वक्तव्यम्** (अष्टा०वा०६.१.९४) इति पूर्वस्येकारस्य पररूपम्। (**प्र**) प्रकृष्टार्थे (**आवतम्**) पालयतम् (**युवम्**) युवाम् (**अश्विना**) सूर्य्यचन्द्रमसाविव सभासेनाध्यक्षौ (**ताभि:**) उक्ताभि: (**सु**) शोभनार्थे (**अस्मान्**) धार्मिकान् पुरुषार्थिनो मनुष्यान् (**अवतम्**) (**शुभ:**) कल्याणकरस्य कर्मण: शुभगुणसमूहस्य वा (**पती**) पालयितारौ (**पातम्**) रक्षतम् (**सोमम्**) ऐश्वर्य्यम् (**ऋतावृधा**) यावृतेन सत्यानुष्ठानेन वर्धेते तौ॥५॥

अन्वय:-हे ऋतावृधा शुभस्पती अश्विना सूर्य्याचन्द्रमसौ गुणयुक्तौ युवं याभिरभिष्टिभि: सोमं कण्वं च पातं ताभिरस्मान् सुप्रावतं याभिरस्मान् पातं ताभि: सर्वानवतम्॥५॥

भावार्थ:-सभासेनेशौ यथा स्वस्यैश्वर्य्यस्य रक्षां विधत्तां तथैव प्रजा: सेनाश्च सततं रक्षेताम्॥५॥

पदार्थ:-हे (**ऋतावृधा**) सत्य अनुष्ठान से बढ़ने वाले (**शुभस्पती**) कल्याणकारक कर्म्म वा श्रेष्ठ गुण समूह के पालक! (**अश्विना**) सूर्य और चन्द्रमा के गुणयुक्त सभा सेनाध्यक्ष! (**युवम्**) आप दोनों (**याभि:**) जिन (**अभिष्टिभि:**) इच्छाओं से (**सोमम्**) अपने ऐश्वर्य और (**कण्वम्**) मेधावी विद्वान् की (**पातम्**) रक्षा करें, उनसे (**अस्मान्**) हम लोगों को (**सु**) अच्छे प्रकार (**आवतम्**) रक्षा कीजिये और जिनसे हमारी रक्षा करें उनसे प्राणियों की (**आवतम्**) रक्षा कीजिये॥५॥

भावार्थ:-सभा और सेना के पति राजपुरुष जैसे अपने ऐश्वर्य की रक्षा करें, वैसे ही प्रजा और सेनाओं की रक्षा सदा किया करें॥५॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

सुदासे दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना।
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहम्॥६॥

सुऽदासे। दस्रा। वसु। बिभ्रता। रथे। पृक्ष:। वहतम्। अश्विना। रयिम्। समुद्रात्। उत। वा। दिव:। परि। अस्मे इति। धत्तम्। पुरुऽस्पृहम्॥६॥

पदार्थ:-(**सुदासे**) सुष्ठु शोभना दासा यस्य तस्मिन् (**दस्रा**) शत्रूणामुपक्षेतारौ (**वसु**) विद्यादिधनसमूहम् (**बिभ्रता**) धरन्तौ (**रथे**) विमानादियाने (**पृक्ष:**) सुखसम्पर्कनिमित्तं विज्ञानम्। अत्र पृचीधातो: बाहुलकाद् औणादिकोऽसुन् प्रत्ययस्तस्य सुडागमश्च। (**वहतम्**) प्रापयतम् (**अश्विना**)

वायुविद्युदादिरिवि व्याप्तैश्वर्य्यौ **(रयिम्)** राज्यश्रियम् **(समुद्रात्)** सागरादन्तरिक्षाद्वा **(उत)** अपि **(वा)** पक्षान्तरे **(दिवः)** द्योतनात्मकात् सूर्यात् **(परि)** सर्वतः **(अस्मे)** अस्मभ्यम् **(धत्तम्)** **(पुरुस्पृहम्)** यत्सत्पुरुषैर्बहुभिः स्पृह्यत ईप्स्यते तत्॥६॥

अन्वयः-हे दस्रा वसु बिभ्रताऽश्विनेव! युवां सुदासे रथे समुद्रादुत दिवः पारेऽस्मे पृक्षो वहतं पुरुस्पृहं रयिं च परिधत्तम्॥६॥

भावार्थः-सभेशादिभिः राजपुरुषैः सेनाप्रजार्थं विविधं धनं समुद्रादिपाराऽवारगमनाय विमानादियानानि च सम्पाद्य सुखोन्नतिः कार्य्येति॥६॥

पदार्थः-हे **(दस्रा)** शत्रुओं के नाश करने वाले **(वसु)** विद्यादि धन समूह को **(बिभ्रता)** धारण करते हुए **(अश्विना)** वायु और बिजुली के समान पूर्ण ऐश्वर्ययुक्त आप! जैसे **(सुदासे)** उत्तम सेवक युक्त **(रथे)** विमानादि यान में **(समुद्रात्)** सागर वा सूर्य से **(उत)** और **(दिवः)** प्रकाशयुक्त आकाश (सूर्य) से पार **(पृक्षः)** सुख प्राप्ति का निमित्त **(पुरुस्पृहम्)** जो बहुत का इच्छित हो उस **(रयिम्)** राज्यलक्ष्मी को धारण करें, वैसे **(अस्मे)** हमारे लिये **(परिधत्तम्)** धारण कीजिये॥६॥

भावार्थः-राजपुरुषों को योग्य है कि सेना और प्रजा के अर्थ नाना प्रकार का धन समुद्रादि के पार जाने के लिये विमान आदि यान रच कर सब प्रकार सुख की उन्नति करें॥६॥

पुनरेतौ किं कुरुतामित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे।
अतो रथेन सुवृता न आ गतं साकं सूर्यस्य रश्मिभिः॥७॥

यत्। नासत्या। पराऽवति। यत्। वा। स्थः। अधि। तुर्वशे। अतः। रथेन। सुऽवृता। नः। आ। गतम्। साकम्। सूर्यस्य। रश्मिऽभिः॥७॥

पदार्थः-(**यत्**) यं रथम् **(नासत्या)** सत्यगुणकर्मस्वभावौ सभासेनेशौ **(परावति)** दूरं दूरं देशं प्रतिगमने कर्त्तव्ये **(यत्)** यत्र **(वा)** पक्षान्तरे **(स्थः)** **(अधि)** उपरिभावे **(तुर्वशे)** वेदशिल्पादिविद्यावति मनुष्ये। **तुर्वश इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(अतः)** कारणात् **(रथेन)** विमानादियानेन **(सुवृता)** शोभना वृतोऽङ्गपूर्त्तिर्य्यस्य तेन **(नः)** अस्मान् **(आ)** अभितः **(गतम्)** गच्छतम् **(साकम्)** सह **(सूर्यस्य)** सवितृमण्डलस्य **(रश्मिभिः)** किरणैः॥७॥

अन्वयः-हे नासत्यावश्विना! युवां यत्सुवृता रथेन यद्यतः परावति देशे तुर्वशेऽधिष्ठस्तेनातः सूर्य्यस्य रश्मिभिः साकं नोऽस्मानागतम्॥७॥

भावार्थः-राजसभेशादयो येन यानेनान्तरिक्षमार्गेण देशान्तरं गन्तुं शक्नुयुस्तद्यानं प्रयत्नेन रचयेयुः॥७॥

पदार्थः-हे **(नासत्या)** सत्य गुण, कर्म, स्वभाव वाले सभा, सेना के ईश! आप **(यत्)** जिस **(सुवृता)** उत्तम अङ्गों से परिपूर्ण **(रथेन)** विमान आदि यान से **(यत्)** जिस कारण **(परावति)** दूर देश में गमन करने तथा **(तुर्वशे)** वेद और शिल्पविद्या के जानने वाले विद्वान् जन के **(अधिष्ठः)** ऊपर स्थित होते हैं **(अतः)** इससे **(सूर्य्यस्य)** सूर्य के **(रश्मिभिः)** किरणों के **(साकम्)** साथ **(नः)** हम लोगों को **(आगतम्)** सब प्रकार प्राप्त हूजिये॥७॥

भावार्थः-राजसभा के पति जिस सवारी से अन्तरिक्ष मार्ग करके देश-देशान्तर जाने को समर्थ होवें, उसको प्रयत्न से बनावें॥७॥

पुनस्तौ किं हेतुकावित्युपदिश्यते॥

फिर वे किस हेतु वाले हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अर्वाञ्चा वां सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप।
इषं पृञ्चन्ता सुकृते सुदानव आ बर्हिः सीदतं नरा॥८॥

अर्वाञ्चा। वाम्। सप्तयः। अध्वरऽश्रियः। वहन्तु। सवना इत्। उप। इषम्। पृञ्चन्ता। सुऽकृते। सुऽदानवे। आ। बर्हिः। सीदतम्। नरा॥८॥

पदार्थः-(**अर्वाञ्चा**) अर्वतो वेगानञ्चतः प्राप्नुतस्तौ **(वाम्)** युवयोः **(सप्तयः)** वाष्पादयोऽश्वा येषान्ते। **सप्तिरित्यश्वनामसु पठितम्।** (निघं०१.१४) **(अध्वरश्रियः)** या अध्वरस्याहिंसनीयस्य चक्रवर्त्तिराज्यस्य लक्ष्मीस्ताः **(वहन्तु)** प्राप्नुवन्तु **(सवना)** सुन्वति यैस्तानि **(इत्)** एव **(उप)** सामीप्ये **(इषम्)** श्रेष्ठामिच्छामुत्तममन्नादिकं वा **(पृञ्चन्ता)** सम्पर्चकौ **(सुकृते)** यः शोभनानि कर्म्माणि करोति तस्मै **(सुदानवे)** शोभना दानवो दानानि यस्य तस्मै **(आ)** अभितः **(बर्हिः)** अन्तरिक्षमुत्तमं वस्तुजातम् **(सीदतम्)** गच्छतम् **(नरा)** नायकौ सभासेनापती॥८॥

अन्वयः-हे अर्वाञ्चा पृञ्चन्ता नरा सभासेनेशौ! युवां ये वां सप्तयः सुकृते सुदानवे जनाय चैषां बर्हिः सवनाध्वरश्रियश्चोपावहन्तु तानुपासीदतम्॥८॥

भावार्थः-राजप्रजाजनाः परस्परमुत्तमान् पदार्थान् समर्प्य सुखिनः स्युः॥८॥

पदार्थः-हे **(अर्वाञ्चा)** घोड़े के समान वेगों को प्राप्त **(पृञ्चन्ता)** सुखों के कराने वाले **(नरा)** सभा सेनापति! आप जो **(वाम्)** तुम्हारे **(सप्तयः)** भाफ आदि अश्वयुक्त **(सुकृते)** सुन्दर कर्म करने **(सुदानवे)** उत्तम दाता मनुष्य के वास्ते **(इषम्)** धर्म की इच्छा वा उत्तम अन्न आदि **(बर्हिः)** आकाश वा श्रेष्ठ पदार्थ **(सवना)** यज्ञ की सिद्धि की क्रिया **(अध्वरश्रियः)** और पालनीय चक्रवर्त्ति राज्य की लक्ष्मियों को **(आवहन्तु)** प्राप्त करावें, उन पुरुषों का **(उपसीदतम्)** सङ्ग सदा किया करो॥८॥

भावार्थः-राजा और प्रजाजनों को चाहिये कि आपस में उत्तम पदार्थों को दे लेकर सुखी हों॥८॥

पुनस्तौ किं कुर्य्यातामित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

तेना नासत्या गतं रथेन सूर्यत्वचा।

येन शश्वदूहथुर्दाशुषे वसु मध्वः सोमस्य पीतये॥ ९॥

तेना नासत्या। आ। गतम्। रथेन। सूर्यऽत्वचा। येना। शश्वत्। ऊहथुः। दाशुषे। वसु। मध्वः। सोमस्य। पीतये॥ ९॥

पदार्थः-(**तेन**) पूर्वोक्तेन वक्ष्यमाणेन च (**नासत्या**) सत्याचरणस्वरूपौ (**आ**) समन्तात् (**गतम्**) गच्छतम् (**रथेन**) विमानादिना (**सूर्य्यत्वचा**) सूर्य्य इव त्वग् यस्य तेन (**येन**) उक्तेन (**शश्वत्**) निरन्तरम् (**ऊहथुः**) प्रापयतम् (**दाशुषे**) दानशीलाय मनुष्याय (**वसु**) कार्य्यकारणद्रव्यं वा (**मध्वः**) मधुरगुणयुक्तस्य (**सोमस्य**) पदार्थसमूहस्य (**पीतये**) पानाय भोगाय वा॥ ९॥

अन्वयः-हे नासत्या! युवां येन सूर्य्यत्वचा रथेनागतं तेन दाशुषे मध्वः सोमस्य पीतये शश्वद्वसूहथुः प्रापयतम्॥ ९॥

भावार्थः-राजपुरुषा यथा स्वहिताय प्रयतन्ते तथैव प्रजासुखायापि प्रयतेरन्॥ ९॥

पदार्थः-हे (**नासत्या**) सत्याचरण करनेहारे सभासेना के स्वामी! आप (**येन**) जिस (**सूर्य्यत्वचा**) सूर्य्य की किरणों के समान भास्वर (**रथेन**) गमन कराने वाले विमानादि यान से (**आगतम्**) अच्छे प्रकार आगमन करें (**तेन**) उस से (**दाशुषे**) दानशील मनुष्य के लिये (**मध्वः**) मधुरगुणयुक्त (**सोमस्य**) पदार्थ समूह के (**पीतये**) पान वा भोग के अर्थ (**वसु**) कार्य्यरूपी द्रव्य को (**ऊहथुः**) प्राप्त कराइये॥ ९॥

भावार्थः-राजपुरुष जैसे अपने हित के लिये प्रयत्न करते हैं, उसी प्रकार प्रजा के सुख के लिये भी प्रयत्न करें॥ ९॥

पुनरेतौ प्रति प्रजाजनाः किं कुर्य्युरित्युपदिश्यते॥

फिर उन के प्रति प्रजाजन क्या करें, इस विषय का उपदेश अगले मन्त्र में कहा है॥

उक्थेभिर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे।

शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना॥ १०॥ २॥

उक्थेभिः। अर्वाक्। अवसे। पुरूवसू इति पुरुऽवसू। अर्कैः। च। नि। ह्वयामहे। शश्वत्। कण्वानाम्। सदसि। प्रिये। हि। कम्। सोमम्। पपथुः। अश्विना॥ १०॥

पदार्थः-(**उक्थेभिः**) वेदस्तोत्रैरधीतवेदाप्तोपदिष्टवचनैर्वा (**अर्वाक्**) पश्चात् (**अवसे**) रक्षणाद्याय (**पुरूवसू**) पुरूणां बहूनां विदुषां मध्ये कृतवासौ (**अर्कैः**) मन्त्रैर्विचारैर्वा। **अर्को मन्त्रो भवति यदेनेनार्चन्ति।** (निरु०५.४) (**च**) समुच्चये (**नि**) नितराम् (**ह्वयामहे**) स्पर्धामहे (**शश्वत्**) अनादिरूपम्

(कण्वानाम्) मेधाविनां विदुषाम् **(सदसि)** सभायाम् **(प्रिये)** प्रीतिकामनासिद्धिकर्य्यां **(हि)** खलु **(कम्)** सुखसम्पादकम् **(सोमम्)** सोमवल्यादिरसम् **(पपथुः)** पिबतम् **(अश्विना)** वायुसूर्य्याविव वर्त्तमानौ धर्मन्यायप्रकाशकौ॥१०॥

अन्वयः-हे पुरूवसू अवसे अश्विना! वयमुक्थेभिरर्कैर्यत्र कण्वानां प्रिये सदसि यौ युवां निह्वयामहे तत्रार्वाक् तौ शश्वत्कं प्राप्नुतं हि सोमं च पपथुः॥१०॥

भावार्थः-राजप्रजाजना विदुषां सभायां गत्वोपदेशान्नित्यं शृण्वन्तु यतः सर्वेषां कर्त्तव्याऽकर्त्तव्यबोधः स्यात्॥१०॥

अत्र राजप्रजाधर्मवर्णनादेतदर्थस्य पूर्वसूक्तोक्तार्थेन साकं सङ्गतिरस्तीति बोध्यम्॥

इति द्वितीयो २ वर्गः सप्तचत्वारिंशं ४७ सूक्तं च समाप्तम्॥

पदार्थः-हे **(पुरूवसू)** बहुत विद्वानों में बसने वाले **(अश्विना)** वायु और सूर्य के समान वर्त्तमान धर्म्म और न्याय के प्रकाशक! **(अवसे)** रक्षादि के अर्थ हम लोग **(उक्थेभिः)** वेदोक्त स्तोत्र वा वेदविद्या के जानने वाले विद्वानों के इष्ट वचनों के **(अर्कैः)** विचार से जहाँ **(कण्वानाम्)** विद्वानों की **(प्रिये)** पियारी **(सदसि)** सभा में आप लोगों को **(निह्वयामहे)** अतिशय श्रद्धा कर बुलाते हैं, वहां तुम लोग **(अर्वाक्)** पीछे **(शश्वत्)** सनातन **(कम्)** सुख को प्राप्त होओ **(च)** और **(हि)** निश्चय से **(सोमम्)** सोमवल्ली आदि औषधियों के रसों को **(पपथुः)** पिओ॥१०॥

भावार्थः-राजप्रजा जनों को चाहिये कि विद्वानों की सभा में जाकर नित्य उपदेश सुनें, जिससे सब करने और न करने योग्य विषयों का बोध हो॥१०॥

यहां राजा और प्रजा के धर्म्म का वर्णन होने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह दूसरा २ वर्ग सैंतालीसवां ४७ सूक्त समाप्त हुआ॥

अथाऽस्य षोडशर्चस्याऽष्टचत्वारिंशस्य सूक्तस्य प्रस्कण्व ऋषिः। उषा देवता। १,३,७,९ विराट् पथ्याबृहती। ५,११,१३ निचृत्पथ्याबृहती च छन्दः। मध्यमः स्वरः। ४,६,१४, विराट् सतः पङ्क्तिः। २,१०,१६ निचृत्सतः पङ्क्तिः। ८ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथोषर्वत्कन्यकानां गुणाः सन्तीत्युपदिश्यते॥

अब अड़तालीसवें सूक्त का आरम्भ है। उस के पहिले मन्त्र में उषा के समान पुत्रियों के गुण होने चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

सह वामेन न उषो व्युच्छा दुहितर्दिवः।
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती॥ १॥

सह। वामेन। नः। उषः। वि। उच्छ। दुहितः। दिवः। सह। द्युम्नेन। बृहता। विभाऽवरि। राया। देवि। दास्वती॥ १॥

पदार्थः-(**सह**) सङ्गे (**वामेन**) प्रशस्येन (**नः**) अस्मान् (**उषः**) उषर्वद्वर्त्तमाने (**वि**) विविधार्थे (**उच्छ**) विवस (**दुहितः**) पुत्रीव (**दिवः**) प्रकाशमानस्य सूर्यस्य (**सह**) सार्द्धम् (**द्युम्नेन**) प्रकाशेनेव विद्यासुशिक्षारूपेण (**बृहता**) महागुणविशिष्टेन (**विभावरि**) विविधा दीप्तयो यस्यास्तत्सम्बुद्धौ (**राया**) विद्याचक्रवर्त्तिराज्यश्रिया (**देवि**) विद्यासुशिक्षाभ्यां द्योतमाने (**दास्वती**) प्रशस्तानि दानानि विद्यन्तेऽस्याः सा॥ १॥

अन्वयः-हे दिवो! दुहितरुषर्वद्वर्त्तमाने विभावरि देवि कन्ये दास्वती त्वं बृहता वामेन द्युम्नेन राया सह नो व्युच्छ॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यतो यदुत्पद्यते तत्तस्याऽपत्यवद्भवति यथा कश्चित्स्वामिभृत्यः स्वामिनं प्रबोध्य सचेतनं कृत्वा व्यवहारेषु प्रयोजयति यथोषाश्च पुरुषार्थयुक्तान् प्राणिनः कृत्वा महता पदार्थसमूहेन सुखेन वा सार्द्धं योजयित्वाऽऽनन्दितान् कृत्वा सायंकालस्थैषा व्यवहारेभ्यो निवर्त्यारामस्थान् करोति तथा मातापितृभ्यां विद्यासुशिक्षादिव्यवहारेषु स्वकन्याः प्रेरयितव्याः॥ १॥

पदार्थः-हे (**दिवः**) सूर्यप्रकाश की (**दुहितः**) पुत्री के समान (**उषः**) उषा के तुल्य वर्त्तमान (**विभावरि**) विविध दीप्तियुक्त (**देवि**) विद्या सुशिक्षाओं से प्रकाशमान कन्या (**दास्वती**) प्रशस्त दानयुक्त! तू (**बृहता**) बड़े (**वामेन**) प्रशंसित प्रकाश (**द्युम्नेन**) न्यायप्रकाश करके सहित (**राया**) विद्या चक्रवर्त्ति राज्य लक्ष्मी के (**सह**) सहित (**नः**) हम लोगों को (**व्युच्छ**) विविध प्रकार प्रेरणा करें॥ १॥

भावार्थः-यहाँ वाचकलुप्तोपमालंकार है। जैसे कोई स्वामी भृत्य को वा भृत्य स्वामी को सचेत कर व्यवहारों में प्रेरणा करता है और जैसे उषा अर्थात् प्रातःकाल की वेला प्राणियों को पुरुषार्थ युक्त कर बड़े-बड़े पदार्थसमूह युक्त सुख से आनन्दित कर सायंकाल में सब व्यवहारों से निवृत्त कर

आरामस्थ करती है, वैसे ही माता-पिता विद्या और अच्छी शिक्षा आदि व्यवहारों में अपनी कन्याओं को प्रेरणा करें॥१॥

पुनः सा कीदृशी किं करोतीत्युपदिश्यते॥

फिर वह कैसी और क्या करती है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अश्वा॑वती॒र्गोम॑तीर्विश्वसु॒विदो॒ भूरि॑ च्यवन्त॒ वस्त॑वे।
उदी॑रय॒ प्रति॑ मा सू॒नृता॑ उष॒श्चोद॒ राधो॑ म॒घोना॑म्॥२॥

अश्व॑ऽवतीः। गोऽम॑तीः। वि॒श्व॒ऽसु॒विद॑ः। भूरि॑। च्य॒व॒न्त॒। वस्त॑वे। उत्। ई॒र॒य॒। प्रति॑। मा॒। सू॒नृता॑ः। उ॒ष॒ः। चोद॑। राध॑ः। म॒घोना॑म्॥२॥

पदार्थः-(**अश्वावती**) प्रशस्ता अश्वा विद्यन्ते यासान्ताः (**गोमतीः**) बह्व्यो गावो विद्यन्ते यासां ताः (**विश्वसुविदः**) विश्वानि सर्वाणि सुष्ठुतया विदन्ति याभ्यस्ताः (**भूरि**) बहु (**च्यवन्त**) च्यवन्ते (**वस्तवे**) निवस्तुम् (**उत्**) उत्कृष्टार्थे (**ईरय**) गमय (**प्रति**) अभिमुखे (**मा**) माम् (**सूनृताः**) सुष्ठु सत्यप्रियवाचः (**उषः**) दाहगुणयुक्तोषर्वत् (**चोद**) प्रेरय (**राधः**) अनुत्तमं धनम् (**मघोनाम्**) धनवतां सकाशात्॥२॥

अन्वयः-हे उषरिव स्त्रि! त्वमश्वतीर्गोमतीर्विश्वसुविदः सूनृता वाचो वस्तवे भूर्युदीरय ये व्यवहारेभ्यश्च्यवन्त तेषां मघोनां सकाशाद्राधश्चोद प्रेरय ताभिर्मा प्रत्यानन्दय॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुशुम्भमानोषाः सर्वान् प्राणिनः सुखयति तथा स्त्रियः पत्यादीन् सततं सुखयेयुः॥२॥

पदार्थः-हे (**उषः**) उषा के सदृश स्त्री! तू जैसे यह शुभगुणयुक्ता उषा है, वैसे (**अश्वावतीः**) प्रशंसनीय व्याप्ति युक्त (**गोमतीः**) बहुत गौ आदि पशुसहित (**विश्वसुविदः**) सब वस्तुओं को अच्छे प्रकार जानने वाली (**सूनृताः**) अच्छे प्रकार प्रियादियुक्त वाणियों को (**वस्तवे**) सुख में निवास करने के लिये (**भूरि**) बहुत (**उदीरय**) प्रेरणा कर और जो व्यवहारों से (**च्यवन्त**) निवृत्त होते हैं, उन को (**मघोनाम्**) धनवानों के सकाश से (**राधः**) उत्तम से उत्तम धन को (**चोद**) प्रेरणा कर उनसे (**मा**) मुझे (**प्रति**) आनन्दित कर॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अच्छी शोभित उषा सब प्राणियों को सुख देती है, वैसे स्त्रियां अपने पतियों को निरन्तर सुख दिया करें॥२॥

पुनः सा कीदृशी भवेदित्युपदिश्यते॥

फिर वह कैसी हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

उ॒वास॒ोषा उ॒च्छाच्च॒ नु दे॒वी जी॒रा रथा॑नाम्।

ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः॥ ३॥

उवास। उषाः। उच्छात्। च। नु। देवी। जीरा। रथानाम्। ये। अस्याः। आऽचरणेषु। दध्रिरे। समुद्रे। न। श्रवस्यवः॥ ३॥

पदार्थः-(**उवास**) वसति (**उषाः**) प्रभावती (**उच्छात्**) विवसनात् (**च**) समुच्चये (**नु**) शीघ्रम् (**देवी**) सुखदात्री (**जीरा**) वेगयुक्ता (**रथानाम्**) रमणसाधनानां यानानाम् (**ये**) विद्वांसः (**अस्याः**) सत्स्त्रियाः (**आचरणेषु**) समन्ताच्चरन्ति जानन्ति व्यवहरन्ति येषु तेषु (**दध्रिरे**) धरन्ति (**समुद्रे**) जलमयेऽन्तरिक्षे वा (**न**) इव (**श्रवस्यवः**) आत्मनः श्रवणमिच्छवः॥ ३॥

अन्वयः-या स्त्री उषा इव वर्त्तमाना जीरा देवी रथानां मध्य उवास येऽस्याआचरणेषु समुद्रे न श्रवस्यवो दध्रिरे ते रथानामुच्छान्वध्वानं तरन्ति॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। येन स्वसदृशी विदुषी सर्वथाऽनुकूला प्राप्यते स सुखमवाप्नोति नेतरः॥ ३॥

पदार्थः-जो स्त्री उषा के समान (**जीरा**) वेगयुक्त (**देवी**) सुख देने वाली (**रथानाम्**) आनन्ददायक यानों के (**उवास**) वसती है (**ये**) जो (**अस्याः**) इस सती स्त्री के (**आचरणेषु**) धर्म्मयुक्त आचरणों में (**समुद्रे**) (**न**) जैसे सागर में (**श्रवस्यवः**) अपने आप विद्या के सुनने वाले विद्वान् लोग उत्तम नौका से जाते आते हैं, वैसे (**दध्रिरे**) प्रीति को धरते हैं, वे पुरुष अत्यन्त आनन्द को प्राप्त होते हैं॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिसको अपने समान विदुषी पण्डिता और सर्वथा अनुकूल स्त्री मिलती है, वह सुख को प्राप्त होता है और नहीं॥ ३॥

य उषसि योगमभ्यस्यन्ति ते किं प्राप्नुवन्तीत्याह॥

जो प्रभात समय में योगाऽभ्यास करते हैं, वे किसको प्राप्त होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः।
अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणाम्॥ ४॥

उषः। ये। ते। प्र। यामेषु। युञ्जते मनः। दानाय। सूरयः। अत्र। अह। तत्। एषाम्। कण्वः। कण्वऽतमः। नाम। गृणाति। नृणाम्॥ ४॥

पदार्थः-(**उषः**) उषसः (**ये**) (**ते**) तव (**प्र**) प्रकृष्टार्थे (**यामेषु**) प्रहरेषु (**युञ्जते**) अभ्यस्यन्ति (**मनः**) विज्ञानं (**दानाय**) विद्यादिदानाय (**सूरयः**) स्तोतारो विद्वांसः। **सूरिरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) (**अत्र**) अस्यां विद्यायाम् (**अह**) विनिग्रहार्थे। **अह इति विनिग्रहार्थीयः।** (निरु०१.५)

(तत्) (कण्वः) मेधावी **(एषाम्) (कण्वतमः)** अतिशयेन मेधावी **(नाम)** सञ्ज्ञादिकम् **(गृणाति)** प्रशंसति **(नृणाम्)** विद्याधर्मेषु नायकानां मनुष्याणां मध्ये॥४॥

अन्वयः-हे विद्वन्! ये सूरयस्ते तव सकाशादुपदेशं प्राप्यात्रोषर्यामेषु दानाय मनोऽह प्रयुञ्जते ते सिद्धा भवन्ति। यः कण्वः एषां नृणां नाम गृणाति स कण्वतमो जायते॥४॥

भावार्थः-ये जना एकान्ते पवित्रे निरुपद्रवे देशे स्वासीना यमादिसंयमान्तानां नवानामुपासनाङ्गानामभ्यासं कुर्वन्ति, ते निर्मलात्मानः सन्तः प्राज्ञा आप्ताः सिद्धा जायन्ते। ये चैतेषां सङ्गसेवे विदधति तेऽपि शुद्धान्तःकरणा भूत्वाऽत्मयोगजिज्ञासवो भवन्ति॥४॥

पदार्थः-हे विद्वन्! जो **(सूरयः)** स्तुति करने वाले विद्वान् लोग **(ते)** आप से उपदेश पाके **(अत्र)** इस **(उषः)** प्रभात के **(यामेषु)** प्रहरों में **(दानाय)** विद्यादि दान के लिये **(मनः)** विज्ञानयुक्त चित्त को **(प्रयुञ्जते)** प्रयुक्त करते हैं, वे जीवन्मुक्त होते हैं और जो **(कण्वः)** मेधावी **(एषाम्)** इन **(नृणाम्)** प्रधान विद्वानों के **(नाम)** नामों को **(गृणाति)** प्रशंसित करता है वह **(कण्वतमः)** अतिशय मेधावी होता है॥४॥

भावार्थः-जो मनुष्य एकान्त पवित्र निरुपद्रव देश में स्थिर होकर यमादि संयमान्त उपासना के नव अङ्गों का अभ्यास करते हैं, वे निर्मल आत्मा होकर ज्ञानी श्रेष्ठ सिद्ध होते हैं और जो इनका संग और सेवा करते हैं, वे भी शुद्ध अन्तःकरण होके आत्मयोग के जानने के अधिकारी होते हैं॥४॥

पुनः सा किं करोतीत्युपदिश्यते॥

फिर वह क्या करती है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ घा॒ योषे॑व सू॒नर्यु॒षा या॑ति प्रभु॒ञ्जती॑।
ज॒रय॑न्ती॒ वृज॑नं प॒द्वदी॑यत॒ उत्पा॑तयति प॒क्षिण॑ः॥५॥३॥

आ। घ॒। योषा॑ऽइव। सू॒नरी॑। उ॒षाः। या॒ति॒। प्र॒भु॒ञ्जती॑। ज॒रय॑न्ती। वृज॑नम्। प॒त्ऽवत्। ई॒य॒ते॒। उत्। पा॒त॒य॒ति॒। प॒क्षिण॑ः॥५॥

पदार्थः-**(आ)** समन्तात् **(घ)** एव **(योषेव)** यथा स्त्री तथा **(सूनरी)** या सुष्ठु नयति **(उषाः)** प्रबोधदात्री **(याति)** प्राप्नोति **(प्रभुञ्जती)** प्रकृष्टं पालनं कुर्वती **(जरयन्ती)** या जीर्णामवस्थां भावयन्ती **(वृजनम्)** मार्गम् **(पद्वत्)** पद्भ्यां तुल्यम् **(ईयते)** प्राप्नोति **(उत्)** ऊर्ध्वे **(पातयति)** जागारयति **(पक्षिणः)** विहङ्गमान्॥५॥

अन्वयः-या योषेव प्रभुञ्जती सूनरी जरयन्ती उषा पद्वदीयते वृजनं याति पक्षिण उत्पातयति तस्यां सर्वैर्योगो घाभ्यसनीयः॥५॥

भावार्थः-यथोषा निर्मला सर्वथा सुखप्रदा योगाभ्यासनिमित्ता भवति तथैव स्त्रीभिर्भवितव्यम्॥५॥

पदार्थः-जो **(योषेव)** सत्स्त्री के समान **(प्रभुञ्जती)** अच्छे प्रकार भोगती **(सूनरी)** अच्छे प्रकार ले जाती **(जरयन्ती)** जीर्णावस्था को करती **(उषाः)** प्रातः समय **(पद्वत्)** पगों के तुल्य **(वृजनम्)** मार्ग को **(ईयते)** प्राप्त होती हुई **(याति)** जाती और **(पक्षिणः)** पक्षियों को **(उत्पातयति)** उड़ाती है, उस काल में सबको योगाभ्यास **(घ)** ही करना चाहिये॥५॥

भावार्थः-जैसे प्रातःकाल की वेला निर्मल तथा सब प्रकार से सुख की देने वाली योगाभ्यास का कारण है, उसी प्रकार स्त्रियों को होना चाहिये॥५॥

पुनः सा किं कुर्यादित्युपदिश्यते॥

फिर वह कैसी हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती।
वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति॥६॥

वि। या। सृजति। समनम्। वि। अर्थिनः। पदम्। न। वेति। ओदती। वयः। नकिः। ते। पप्तिऽवांसः। आसते। विऽउष्टौ। वाजिनीऽवति॥६॥

पदार्थः-(**वि**) विविधार्थे **(या)** उषर्वत्स्त्री **(सृजति)** **(समनम्)** समीचीनं संग्रामम्। **समनमिति संग्रामनामसु पठितम्।** (निघं०२.१७) **(वि)** विशेषार्थे **(अर्थिनः)** प्रशस्ता अर्था यस्य सन्ति **(पदम्)** प्रापणीयम् **(न)** इव **(वेति)** व्याप्नोति **(ओदती)** उन्दनं कुर्वन्ती **(वयः)** पक्षिणः **(नकिः)** या न शब्दयति सा **(ते)** तव **(पप्तिवांसः)** पतनशीला **(आसते)** **(व्युष्टौ)** विशेषेणोष्यन्ते दह्यन्ते यया कान्त्या तस्याम् **(वाजिनीवती)** बहवो वाजिन्यः क्रिया विद्यन्ते यस्यां सा॥६॥

अन्वयः-हे योगिनि स्त्रि! भवति यथा यौदती नकिर्वाजिनीवत्युषा अर्थिनः पदं न समानं विवेति विसृजति यस्या व्युष्टौ पप्तिवांसो वय आसते सा वेला ते योगाभ्यासार्थाऽस्तीति मन्यस्व॥६॥

भावार्थः-अत्रोपमाऽलङ्कारः। यथा स्त्रियो व्यवहारेण स्वकीयान् पदार्थान् प्राप्नुवन्ति तथोषाः स्वप्रकाशेन स्वव्यवहाराऽधिकारं प्राप्नोति यथा सा दिनमुत्पाद्य सर्वान् प्राणिन उत्थाप्य स्वस्वव्यवहारेषु वर्त्तयित्वा रात्रिं निवर्तयति दिनस्य प्रादुर्भावाद्दाहं जनयति तथैव स्त्रीभिर्भवितव्यम्॥६॥

पदार्थः-हे योगाभ्यास करने हारी स्त्री! आप जैसे **(या)** जो **(ओदती)** आर्द्रता को करती हुई **(नकिः)** शब्द को न करती **(वाजिनीवती)** बहुत क्रियाओं का निमित्त **(उषाः)** प्रातःसमय **(अर्थिनः)** प्रशस्त अर्थ वाले का **(पदं न)** प्राप्ति के योग्य के समान **(समनम्)** सुन्दर संग्राम को जैसे **(विवेति)** व्याप्त होती है, जिसकी **(व्युष्टौ)** दहन करने वाली कान्ति में **(पप्तिवांसः)** पतनशील **(वयः)** पक्षी **(आसते)** स्थिर होते हैं, वह वेला **(ते)** तेरे योगाभ्यास के लिये है, इसको तू जान॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे स्त्रियां व्यवहार से अपने पदार्थों को प्राप्त होती हैं, वैसे उषा अपने प्रकाश से अधिकार को प्राप्त होती है। जैसे वह दिन को उत्पन्न और सब प्राणियों को उठाकर अपने-अपने व्यवहार में प्रवर्त्तमान कर रात्रि को निवृत्त करती और दिन के होने से दाह को भी उत्पन्न करती है, वैसे ही सब स्त्री जनों को भी होना चाहिये॥६॥

पुनस्तद्वत् स्त्रियः स्युरित्युपदिश्यते॥

फिर उषा के समान स्त्रीजन हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

एषायुक्त परावतः सूर्यस्योदयनादधि।
शतं रथेभिः सुभगोषा इयं वि यात्यभि मानुषान्॥७॥

एषा। अयुक्त। परऽवतः। सूर्यस्य। उत्ऽअयनात्। अधि। शतम्। रथेभिः। सुऽभगा। उषाः। इयम्। वि। याति। अभि। मानुषान्॥७॥

पदार्थः-(**एषा**) वक्ष्यमाणा (**अयुक्त**) युङ्क्ते। अत्र लडर्थे लङ् **बहुलं छन्दसि** इति श्नमो लुक्। (**परावतः**) दूरदेशात् (**सूर्य्यस्य**) सवितृमण्डलस्य (**उदयनात्**) उदयात् (**अधि**) उपरान्तसमये (**शतम्**) असंख्यातान् (**रथेभिः**) रमणीयैः किरणैः (**सुभगा**) शोभना भगा ऐश्वर्याणि यस्याः सा (**उषाः**) सुशोभा कान्तिः (**इयम्**) प्रत्यक्षा (**वि**) विविधार्थे (**याति**) प्राप्नोति (**अभि**) आभिमुख्ये (**मानुषान्**) मनुष्यादीन्॥७॥

अन्वयः-हे स्त्रियो! यूयं यथैषोषाः परावतः सूर्यस्योदयनादध्यभ्ययुक्त यथेयं सुभगा रथेभिः शतं मानुषान् वियाति तथैव युक्ता भवत॥७॥

भावार्थः-यथा पतिव्रताः स्त्रियो नियमेन स्वपतीन् सेवन्ते यथोषसः पदार्थानां च दूरदेशात् संयोगो जायते, तथैव दूरस्थैः कन्यावरैर्विवाहः कर्त्तव्यो यतो दूरदेशेऽपि प्रीतिर्वर्द्धेत। यथा समीपस्थानां विवाहः क्लेशकारी भवति, तथैव दूरस्थानां च सुखदायी जायते॥७॥

पदार्थः-हे स्त्री जनो! जैसे (**एषा**) यह (**उषाः**) प्रातःकाल (**सूर्यस्य**) सूर्यमण्डल के (**परावतः**) दूरदेश से (**उदयनात्**) उदय से (**अधि**) उपरान्त (**अध्यभ्ययुक्त**) ऊपर सन्मुख से सब में युक्त होती है, जिस प्रकार (**इयम्**) यह (**सुभगा**) उत्तम ऐश्वर्य्ययुक्त (**रथेभिः**) रमणीय यानों से (**शतम्**) असंख्यात (**मानुषान्**) मनुष्यादिकों को (**वियाति**) विविध प्रकार प्राप्त होती है, वैसे तुम भी युक्त होओ॥७॥

भावार्थः-जैसे पतिव्रता स्त्रियां नियम से अपने पतियों की सेवा करती हैं, जैसे उषा से सब पदार्थों का दूर देश से संयोग होता है, वैसे दूरस्थ कन्या-पुत्रों का युवावस्था में स्वयंवर विवाह करना चाहिये, जिससे दूरदेश में रहनेवाले मनुष्यों से प्रीति बढ़े। जैसे निकटस्थों का विवाह दुःखदायक होता है, वैसे ही दूरस्थों का विवाह आनन्दप्रद होता है॥७॥

पुनस्सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी।
अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रिधः॥८॥

विश्वम्। अस्याः। नानाम। चक्षसे। जगत्। ज्योतिः। कृणोति। सूनरी। अप। द्वेषः। मघोनी। दुहिता। दिवः। उषाः। उच्छत्। अप। स्रिधः॥८॥

पदार्थः-(**विश्वम्**) सर्वम् (**अस्याः**) उषसः (**नानाम**) नमति। अत्र तुजादित्वाद् अभ्यासदीर्घत्वम्। (**चक्षसे**) द्रष्टुम् (**जगत्**) संसारम् (**ज्योतिः**) प्रकाशम् (**कृणोति**) करोति (**सूनरी**) सुष्ठ नेत्री (**अप**) दूरीकरणे (**द्वेषः**) द्विषन्ति ये शत्रवस्ते। अत्र **अन्येभ्योऽपि दृश्यन्ते** इति विच्। (**मघोनी**) प्रशस्तानि मघानि पूज्यानि धनानि यस्याः सन्ति सा (**दुहिता**) पुत्रीव (**दिवः**) प्रकाशमानस्य सवितुः (**उषाः**) प्रभातः (**उच्छत्**) विवासयति (**अप**) अपराधे (**स्रिधः**) हिंसकान्॥८॥

अन्वयः-हे स्त्रियो! यूयं यथा मघोनी सूनरी दिवो दुहितेवोषा विश्वं जगन्नानाम तस्याश्चक्षसे ज्योतिः कृणोति स्रिधोऽपद्वेषोऽपोच्छद् दूरतो विवासयति तथापत्यादिषु वर्त्तध्वम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सत्स्त्री विघ्नान्निवार्य्य क्रियमाणानि कार्य्याणि साध्नोति, तथैवोषा दस्युचोरशत्रवादीन्निवार्य्य कार्यसाधिका भवतीति॥८॥

पदार्थः-हे स्त्री जनो! तुम जैसे (**मघोनी**) प्रशंसनीय धन का निमित्त (**सूनरी**) अच्छे प्रकार प्राप्त कराने वाली (**दिवः**) प्रकाशमान सूर्य की (**दुहिता**) पुत्री के सदृश (**उषाः**) प्रकाशने वाली प्रभात की वेला को (**विश्वम्**) सब जगत् (**नानाम**) आदर करता है, और उसको (**चक्षसे**) देखने के लिये (**ज्योतिः**) प्रकाश को (**कृणोति**) करती है और (**स्रिधः**) हिंसक (**द्वेषः**) बुरा द्वेष करने वाले शत्रुओं को (**अपोच्छत्**) दूर वास कराती है, वैसे पति आदि में वर्त्तो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सती स्त्री विघ्नों को दूर कर कर्त्तव्य कर्मों को सिद्ध कराती है, वैसे ही उषा डाकू, चोर, शत्रु आदि को दूर कर कार्य्य की सिद्धि कराने वाली होती है॥८॥

पुनः सा कीदृशी सती किं कुर्य्यादित्युपदिश्यते॥

फिर वह कैसी होके क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः।
आवहन्ती भूर्यस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु॥९॥

उषः। आ। भाहि। भानुना। चन्द्रेण। दुहितः। दिवः। आऽवहन्ती। भूरि। अस्मभ्यम्। सौभगम्। विऽउच्छन्ती। दिविष्टिषु॥ ९॥

पदार्थः-(**उषः**) उषा इव कमनीये (**आ**) समन्तात् (**भाहि**) (**भानुना**) सूर्येण (**चन्द्रेण**) इन्दुना (**दुहितः**) पुत्रीव (**दिवः**) प्रकाशस्य (**आवहन्ती**) सर्वतः सुखं प्रापयन्ती (**भूरि**) बहु (**अस्मभ्यम्**) पुरुषार्थिभ्यः (**सौभगम्**) शोभनानां भगानामैश्वर्य्याणामिदम् (**व्युच्छन्ती**) निवासं कुर्वन्ती (**दिविष्टिषु**) प्रकाशितासु कान्तिषु॥ ९॥

अन्वयः-हे दिवो दुहितरिव वर्त्तमाने स्त्रि! यथोषा भानुना चन्द्रेणऽस्मभ्यं भूरि सौभगमावहन्ती दिविष्टिषु व्युच्छन्ती सती जगद् भाति तथा त्वं विद्याशमाभ्यामाभाहि॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुकन्या मातृपतिकुले उज्ज्वलयति, तथोषा उभे स्थूलसूक्ष्मे वस्तुनी प्रकाशयति॥ ९॥

पदार्थः-हे (**दिवः**) सूर्य्य के प्रकाश की (**दुहितः**) पुत्री के तुल्य कन्ये! जैसे (**उषाः**) प्रकाशमान उषा (**भानुना**) सूर्य्य और (**चन्द्रेण**) चन्द्रमा से (**अस्मभ्यम्**) हम पुरुषार्थी लोगों के लिये (**भूरि**) बहुत (**सौभगम्**) ऐश्वर्य्य के समूहों को (**आवहन्ती**) सब ओर से प्राप्त कराती (**दिविष्टिषु**) प्रकाशित कान्तियों में (**व्युच्छन्ती**) निवास कराती हुई संसार को प्रकाशित करती है, वैसे ही तू विद्या और शमादि से (**आ भाहि**) सुशोभित हो॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विदुषी धार्मिक कन्या दोनों माता और पति के कुलों को उज्ज्वल करती है, वैसे उषा दोनों स्थूल-सूक्ष्म अर्थात् बड़ी-छोटी वस्तुओं को प्रकाशित करती है॥ ९॥

पुनः सा कीदृशेन किं कुर्य्यादित्युपदिश्यते॥

फिर वह कैसी होकर किससे क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि।
सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवम्॥ १०॥ ४॥

विश्वस्य। हि। प्राणनम्। जीवनम्। त्वे इति। वि। यत्। उच्छसि। सूनरि। सा। नः। रथेन। बृहता। विभाऽवरि। श्रुधि। चित्रऽमघे। हवम्॥ १०॥

पदार्थः-(**विश्वस्य**) सर्वस्य (**हि**) खलु (**प्राणनम्**) प्राणधारणम् (**जीवनम्**) जीविकाप्रापणम् (**त्वे**) त्वयि। अत्र **सुपां सुलुग्०** इति शेआदेशः। (**वि**) विविधार्थे (**यत्**) या (**उच्छसि**) (**सूनरि**) सुष्ठुतया व्यवहारनेत्री (**सा**) (**नः**) अस्मभ्यम् (**रथेन**) रमणीयेन स्वरूपेण विमानादिना वा (**बृहता**) महता (**विभावरि**) या विविधतया भाति प्रकाशयति तत्सम्बुद्धौ (**श्रुधि**) शृणु (**चित्रामघे**) चित्राण्यद्भुतानि मघानि

धनानि यस्यास्तत्सम्बुद्धौ। अत्र **अन्येषामपि०** इति पूर्वपदस्य दीर्घः। **(हवम्)** श्रोतव्यं श्रावयितव्यं वा शब्दसमूहम्॥१०॥

अन्वयः-हे सूनरि विभावरि चित्रामघे स्त्रि! यथोषा बृहता महता रथेन रमणीयेन स्वरूपेण वर्त्तते यस्यां विश्वस्य प्राणिजातस्य हि प्राणनं जीवनं सम्भवति तथा त्वे त्वय्यप्यस्तु यद्या त्वं न उच्छसि साऽस्माकं हवं श्रुधि॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषसा सर्वस्य प्राणिजातस्य सुखानि जायन्ते, तथा सत्या स्त्रिया प्रसीदन्तं पुरुषं सर्व आनन्दाः प्राप्नुवन्ति॥१०॥

पदार्थः-हे **(सूनरि)** अच्छे प्रकार व्यवहारों को प्राप्त **(विभावरि)** विविध प्रकाशयुक्त **(चित्रामघे)** चित्र विचित्र धन से सुशोभित स्त्री जैसे उषा **(बृहता)** बड़े **(रथेन)** रमणीय स्वरूप वा विमानादि यान से विद्यमान जिसमें **(विश्वस्य)** सब प्राणियों के **(प्राणनम्)** प्राण और **(जीवनम्)** जीविका की प्राप्ति का सम्भव होता है, वैसे ही **(त्वे)** तेरे में होता है **(यत्)** जो तू **(नः)** हम लोगों को **(व्युच्छसि)** विविध प्रकार वास करती है, वह तू हमारे **(हवम्)** सुनने-सुनाने योग्य वाक्यों को **(श्रुधि)** सुन॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे उषा से सब प्राणिजात को सुख होता है, वैसे ही पतिव्रता स्त्री से प्रसन्न पुरुष को सब आनन्द होते हैं॥१०॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वे कैसी है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उषो॒ वाज॒ꣳ हि वꣳस्व॒ यश्चि॒त्रो मानु॑षे॒ जने॑।
तेना व॑ह सु॒कृतो॑ अध्व॒राँ उप॒ ये त्वा॑ गृ॒णन्ति॒ वह्न॑यः॥११॥

उषः॑। वाज॑म्। हि। वꣳस्व॑। यः। चि॒त्रः। मानु॑षे। जने॑। तेन॑। आ। व॒ह॒। सु॒ऽकृ॑तः। अ॒ध्व॒रान्। उप॑। ये। त्वा॒। गृ॒ण॒न्ति॒। वह्न॑यः॥११॥

पदार्थः-(**उषः**) प्रभातवद्बहुगुणयुक्ते **(वाजम्)** ज्ञानमन्नं वा **(हि)** किल **(वंस्व)** सम्भज **(यः)** विद्वान् **(चित्रः)** अद्भुतशुभगुणकर्मस्वभावः **(मानुषे)** मनुष्ये **(जने)** विद्याधर्मादिभिर्गुणैः प्रसिद्धे **(तेन)** उक्तेन **(आ)** समन्तात् **(वह)** प्राप्नुहि **(सुकृतः)** शोभनानि कृतानि कर्माणि येन सः **(अध्वरान्)** अहिंसनीयान् गृहाश्रमव्यवहारान् **(उप)** उपगमे **(ये)** वक्ष्यमाणाः **(त्वा)** त्वाम् **(गृणन्ति)** स्तुवन्ति **(वह्नयः)** वोढारो विद्वांसो जितेन्द्रियाः सुशीला मनुष्याः॥११॥

अन्वयः-हे उषर्वद्वर्त्तमाने स्त्रि! त्वं यश्चित्रः सुकृतस्तव पतिर्वर्त्तते तस्मिन् मानुषे जने वाजं हि वंस्व ये वह्नयो येनाध्वरानुपगृणन्ति त्वा चोपदिशन्ति तेन तानावह समन्तात् प्राप्नुहि॥११॥

भावार्थः-हे मनुष्या! यथा सूर्य उषसं प्राप्य दिनं कृत्वा सर्वान् प्राणिनः सुखयति, तथा स्वाः स्त्रियो भूषयेयुस्तान् दारा अप्यलंकुर्युरेवं परस्परं सुप्रीत्युपकाराभ्यां सदा सुखिनः स्युः॥११॥

पदार्थः-हे **(उषः)** प्रभात वेला के तुल्य वर्त्तमान स्त्री! तू **(यः)** जो **(चित्रः)** अद्भुत गुण, कर्म, स्वभावयुक्त **(सुकृतः)** उत्तम कर्म करने वाला तेरा पति है **(मानुषे)** मनुष्य **(जने)** विद्याधर्मादि गुणों से प्रसिद्ध में **(वाजम्)** ज्ञान वा अन्न को **(हि)** निश्चय करके **(वंस्व)** सम्यक् प्रकार से सेवन कर **(ये)** जो **(वह्नयः)** प्राप्ति करने वाले विद्वान् मनुष्य जिस कारण से **(अध्वरान्)** अध्वरयज्ञ वा अहिंसनीय विद्वानों की **(उपगृणन्ति)** अच्छे प्रकार स्तुति करते और तुझ को उपदेश करते हैं **(तेन)** उस से उन को **(आवाह)** सुखों को प्राप्त कराती रह॥११॥

भावार्थः-जो मनुष्य जैसे सूर्य उषा को प्राप्त होके दिन को प्रकट कर सबको सुख देता है, वैसे अपनी स्त्रियों को भूषित करते हैं, उनको स्त्रीजन भी भूषित करती हैं। इस प्रकार परस्पर प्रीति उपकार से सदा सुखी रहें॥११॥

पुनः सा किं कुर्य्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वम्।
सास्मासु धा गोमदश्वावदुक्थ्यमुषो वाजं सुवीर्यम्॥१२॥

विश्वान्। देवान्। आ। वह। सोमऽपीतये। अन्तरिक्षात्। उषः। त्वम्। सा। अस्मासु। धाः। गोमऽत्। अश्वऽवत्। उक्थ्यम्। उषः। वाजम्। सुऽवीर्यम्॥१२॥

पदार्थः-(**विश्वान्**) अखिलान् **(देवान्)** दिव्यगुणयुक्तान् पदार्थान् **(आ)** समन्तात् **(वह)** प्राप्नुहि **(सोमपीतये)** सोमानां पीतिः पानं यस्मिन् व्यवहारे तस्मै **(अन्तरिक्षात्)** उपरिष्टात् **(उषः)** उषर्वदनुत्तमगुणे **(त्वम्)** **(सा)** **(अस्मासु)** मनुष्येषु **(धाः)** धेहि। अत्र लडर्थे लुङडभावश्च। **(गोमत्)** प्रशस्ता गाव इन्द्रियाणि किरणाः पृथिव्यादयो वा विद्यन्ते यस्मिँस्तत् **(अश्वावत्)** बहवः प्रशस्ता वेगप्रदा अश्वा अग्न्यादयः सन्ति यस्मिँस्तत्। अत्र **मन्त्रे सोमाश्वेन्द्रिय०** (अष्टा०६.३.१३१) इति दीर्घः। **(उक्थ्यम्)** उच्यते प्रशस्यते यत्तस्मै हितम् **(उषः)** उषर्वद्धितसम्पादिके **(वाजम्)** विज्ञानमन्नं वा **(सुवीर्य्यम्)** शोभनानि वीर्य्याणि पराक्रमा यस्मात्तम्॥१२॥

अन्वयः-हे उषर्वद्वर्त्तमाने स्त्रि! अहं सोमपीतयेऽन्तरिक्षाद्यान् विश्वान्देवान् यां त्वाञ्च प्राप्नोमि सा त्वमेतानावह। हे उषर्वत्सर्वेष्टप्रापिके! त्वमस्मासूक्थ्यं गोमदश्ववत्सुवीर्यं वाजं धा धेहि॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेयमुषाः स्वप्रादुर्भावेन शुद्धजलवायुप्रकाशादीन् प्रापय्य दोषान्नाशयित्वा सर्वमुत्तमपदार्थसमूहं प्रकटयन्ति तथोत्तमा स्त्री गृहकृत्येषु भवेत्॥१२॥

पदार्थः-हे **(उषः)** प्रभात के तुल्य स्त्रि! मैं **(सोमपीतये)** सोम आदि पदार्थों को पीने के लिये **(अन्तरिक्षात्)** ऊपर से **(विश्वान्)** अखिल **(देवान्)** दिव्य गुणयुक्त पदार्थों और जिस तुझ को प्राप्त होता

हूं, उन्हीं को तू भी **(आवह)** अच्छे प्रकार प्राप्त हो। हे **(उषः)** उषा के समान हित करने और **(सा)** तू **(सब)** इष्ट पदार्थों को प्राप्त कराने वाली! **(अस्मासु)** हम लोगों में इन्द्रिय किरण और पृथिवी आदि से **(अश्वावत्)** और अत्युत्तम तुरंगों से युक्त **(सुवीर्य्यम्)** उत्तम वीर्य्य पराक्रम कारक **(वाजम्)** विज्ञान वा अन्न को **(धाः)** धारण कर॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यह उषा अपने प्रादुर्भाव में शुद्ध वायु जल आदि दिव्य गुणों को प्राप्त करा के दोषों का नाश कर, सब उत्तम पदार्थ समूह को प्रकट करती है, वैसे उत्तम स्त्री गृह कार्य्य में हो॥१२॥

पुनः सा कीदृशी भूत्वा किं दद्यादित्युपदिश्यते॥

फिर वह कैसी होकर क्या देवे, इस विषय का उपदेश अगले मन्त्र में किया है॥

यस्या॒ रुश॑न्तो अ॒र्चय॒: प्रति॑ भ॒द्रा अद॑ृक्षत।
सा नो॑ र॒यिं वि॒श्ववा॑रं सु॒पेश॑समु॒षा द॑दातु॒ सुग॒म्य॑म्॥ १३॥

यस्याः॑। रुश॑न्तः। अ॒र्चयः॑ प्रति॑। भ॒द्राः॑। अद॑ृक्षत। सा। नः॒। र॒यिम्। वि॒श्व॒ऽवा॑रम्। सु॒ऽपेश॑सम्। उ॒षाः॑। द॒दा॒तु॒। सुग॒म्य॑म्॥ १३॥

पदार्थः-(**यस्याः**) प्रकाशिकायाः (**रुशन्तः**) चोरदस्व्यन्धकारादीन् हिंसन्तः (**अर्चयः**) प्रकाशाः (**प्रति**) प्रत्यक्षार्थे (**भद्राः**) कल्याणकारकाः (**अदृक्षत**) दृश्यन्ते (**सा**) (**नः**) अस्मभ्यम् (**रयिम्**) चक्रवर्त्तिराज्यश्रियम् (**विश्ववारम्**) येन विश्वं सर्वं वृणोति तत् (**सुपेशसम्**) शोभनं पेशो रूपं यस्मात्तत् (**उषाः**) उषर्वत्सुरूपप्रदा (**ददातु**) (**सुगम्यम्**) सुखेषु भवमानन्दम्। **सुग्म्यमिति सुखनामसु पठितम्।** (निघं०३.६)॥१३॥

अन्वयः-हे स्त्रि! यस्या रुशन्तो भद्रा अर्चयः प्रत्यदृक्षत सोषा नो विश्ववारं सुपेशसं रयिं सुग्म्यं सुखं च यथा ददाति तथा सती ह्येतत्सर्वं भवती ददातु॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा दिननिमित्तयोषसा विना सुखेन कार्य्याणि न सिद्ध्यन्ति स्वरूपप्राप्तिश्च तथा सत्स्त्रिया विनैतदखिलं न जायते॥१३॥

पदार्थः-हे स्त्रि! **(यस्याः)** जिस के सकाश से ये **(रुशन्तः)** चोर, डाकू, अन्धकार आदि का नाश और **(भद्राः)** कल्याण करने वाली **(अर्चयः)** दीप्ति **(प्रत्यदृक्षत)** प्रत्यक्ष होती है **(सा)** जैसे वह **(उषाः)** सुरूप को देने वाली प्रभात की वेला **(नः)** हम लोगों के लिये **(विश्ववारम्)** सब आच्छादन करने योग्य **(सुपेशसम्)** शोभनरूपयुक्त **(रयिम्)** चक्रवर्त्ति राज्यलक्ष्मी **(सुगम्यम्)** सुख को **(ददाति)** देती है, वैसी होकर तू भी हम को सुखदायक हो॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे दिन की निमित्त उषा के विना सुख वा राज्य के कार्य्य सिद्ध नहीं होते और सुरूप की प्राप्ति भी नहीं होती, वैसे ही समीचीन स्त्री के विना यह सब नहीं होता॥१३॥

पुनः सा कस्मै प्रयोजनाय प्रभवतीत्युपदिश्यते॥

फिर वह किस प्रयोजन के लिये समर्थ होती है, इस विषय का उपदेश अगले मन्त्र में किया है॥

ये चि॒द्धि त्वामृष॑य॒: पूर्व॑ ऊ॒तये॑ जुहू॒रेऽव॑से महि।
सा न॒: स्तोमाँ॑ अ॒भि गृ॑णीहि राध॒सोष॑: शु॒क्रेण॑ शो॒चिषा॑॥१४॥

ये। चि॒त्। हि। त्वाम्। ऋष॑यः। पूर्वे॑। ऊ॒तये॑। जु॒हू॒रे। अव॑से। म॒हि॒। सा। न॒ः। स्तोमा॑न्। अ॒भि। गृ॒णी॒हि॒। राध॑सा। उष॑ः। शु॒क्रेण॑। शो॒चिषा॑॥१४॥

पदार्थः-(**ये**) वक्ष्यमाणाः (**चित्**) अपि (**हि**) खलु (**त्वाम्**) (**ऋषयः**) वेदार्थविदो विद्वांसः (**पूर्वे**) येऽधीतवन्तः (**ऊतये**) अतिशयेन गुणप्राप्तये (**जुहुरे**) शब्दयन्ति (**अवसे**) रक्षणादिप्रयोजनाय (**महि**) महागुणविशिष्टान् (**सा**) (**नः**) अस्माकम् (**स्तोमान्**) स्तुतिसमूहान् (**अभि**) आभिमुख्ये (**गृणीहि**) स्तुहि (**राधसा**) परमेण धनेन (**उषः**) उषर्वत्स्तोतुं योग्ये (**शुक्रेण**) शुद्धेन कर्महेतुना (**शोचिषा**) प्रकाशेन॥१४॥

अन्वयः-हे उषर्वद्वर्त्तमाने महि विदुषि स्त्रि! ये पूर्व ऋषयः ऊतयेऽवसे त्वां जुहुरे शब्दयेयुः, सा त्वं शुक्रेण शोचिषा राधसा तान् नोऽस्मभ्यं चित्स्तोमान् ह्यभिगृणीहि॥१४॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्येऽधीतवेदास्ते पूर्वे येऽधीयते तेऽर्वाचीना ऋषयो वेद्याः यथा विद्वांसो यान् पदार्थान् विदित्वोपकुर्वन्ति तथैवान्यैरपि कर्त्तव्यम्। नैव केनापि मूर्खाणामनुकरणं कार्य्यम्। यथा विद्वांसः स्वविद्यया पदार्थगुणान् प्रकाश्य विद्योपकारौ जनयेयुः। यथेयमुषा सर्वान् पदार्थान् संद्योत्य सुखानि जनयति, तथाऽखिलविद्याः स्त्रियो विश्वमलंकुर्वन्तु॥१४॥

पदार्थः-हे उषा के तुल्य वर्त्तमान (**महि**) महागुणविशिष्ट पण्डिता स्त्री! (**ये**) जो (**पूर्वे**) अध्ययन किये हुए वेदार्थ के जानने वाले विद्वान् लोग (**ऊतये**) अत्यन्त गुण प्राप्ति वा (**अवसे**) रक्षण आदि प्रयोजन के लिये (**त्वाम्**) तुझे (**जुहुरे**) प्रशंसित करें (**सा**) सो तू (**शुक्रेण**) शुद्ध कामों के हेतु (**शोचिषा**) धर्मप्रकाश से युक्त (**राधसा**) बहुत धन से (**नः**) हमारे (**चित्**) ही (**स्तोमान्**) स्तुति समूहों का (**हि**) निश्चय से (**अभि**) सन्मुख (**गृणीहि**) स्वीकार कर॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को योग्य है कि जिन्होंने वेदों का अध्ययन किया, वे पूर्ण ऋषि और जो वेदों को पढ़ते हों, उनको नवीन ऋषि जानें, और जैसे विद्वान् लोग जिन पदार्थों को जान कर उपकार लेते हों, वैसे अन्य पुरुषों को भी करना चाहिये। किसी मनुष्य को मूर्खों की चाल-चलन पर न चलना चाहिये और जैसे विद्वान् लोग अपनी विद्या के पदार्थों के गुणों को प्रकाश कर

उपकार करते हैं, जैसे यह उषा अपने प्रकाश से सब पदार्थों को प्रकाशित करती है, वैसे ही विद्वान् स्त्रियां विश्व को सुभूषित कर देती हैं॥१५॥

पुनः सा किं करोतीत्युपदिश्यते॥

फिर वह क्या करती है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उषो॒ यद॒द्य भा॒नुना॒ वि द्वारा॑वृणवो॑ दि॒वः।
प्र नो॑ यच्छतादवृ॒कं पृ॒थु च्छ॒र्दिः प्र दे॑वि॒ गोम॑तीरिषः॥१५॥

उषः॑। यत्। अ॒द्य। भा॒नुना॑। वि। द्वारौ॑। ऋ॒णवः॑। दि॒वः॒। प्र। नः॒। य॒च्छ॒ता॒त्। अ॒वृ॒कम्। पृ॒थु। छ॒र्दिः॑। प्र। दे॒वि॒। गोऽम॑तीः। इषः॑॥१५॥

पदार्थः-(**उषः**) उषर्वत्प्रकाशिके (**यत्**) या (**अद्य**) अस्मिन् दिने (**भानुना**) सदर्थप्रकाशकत्वेन (**वि**) विशेषार्थे (**द्वारौ**) गृहादीन्द्रिययोः प्रवेशनिर्गमनिमित्तौ (**ऋणवः**) ऋणुहि (**दिवः**) द्योतमानान् गुणान् (**प्र**) प्रकृष्टार्थे (**नः**) अस्मभ्यम् (**यच्छतात्**) देहि (**अवृकम्**) हिंसकप्राणिरहितम् (**पृथु**) सर्वर्त्तुस्थानाऽवकाशयोगेन विशालम् (**छर्दिः**) शुद्धाच्छादनादिना संदीप्यमानं गृहम्। **छर्दिरिति गृहनामसु पठितम्।** (निघं०३.४) (**प्र**) प्रत्यक्षार्थे (**देवि**) दिव्यगुणे (**गोमतीः**) प्रशस्ताः स्वराज्ययुक्ता गावः किरणा विद्यन्ते यासु ताः (**इषः**) इच्छाः॥१५॥

अन्वयः-हे देवि स्त्रि! त्वं यथोषा अद्य भानुना द्वारौ प्रार्णवो यथा च नो यदवृकं पृथु छर्दिर्दिवो गोमतीरिषश्च तथा विप्रयच्छतात्॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषाः स्वप्रकाशेन पूर्वस्मिन्नस्मिन्नागामिनि दिवसे सर्वान् मार्गान् द्वाराणि च प्रकाशयति तथा मनुष्यैः सर्वर्त्तुसुखप्रदानि गृहाणि रचयित्वा तत्र सर्वान् भोगान् पदार्थान् संस्थाप्यैतत्सर्वं कृत्वा प्रतिदिनं सुखयितव्यम्॥१५॥

पदार्थः-हे (**देवि**) दिव्य गुणयुक्त स्त्री! तू जैसे (**उषाः**) प्रभात समय (**अद्य**) इस दिन में (**भानुना**) अपने प्रकाश से (**द्वारौ**) गृहादि वा इन्द्रियों के प्रवेश और निकलने के निमित्त छिद्र (**प्रार्णवः**) अच्छे प्रकार प्राप्त होती और जैसे (**नः**) हम लोगों के लिये (**यत्**) (**अवृकम्**) हिंसक प्राणियों से भिन्न (**पृथु**) सब ऋतुओं के स्थान और अवकाश के योग्य होने से विशाल (**छर्दिः**) शुद्ध आच्छादन से प्रकाशमान घर है और जैसे (**दिवः**) प्रकाशादि गुण (**गोमतीः**) बहुत किरणों से युक्त (**इषः**) इच्छाओं को देती है, वैसे (**विप्रयच्छतात्**) सम्पूर्ण दिया कर॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे उषा अपने प्रकाश से अतीत वर्त्तमान और आने वाले दिनों में सब मार्ग और द्वारों को प्रकाश करती है, वैसे ही मनुष्यों को चाहिये कि सब ऋतुओं में सुख देने वाले घरों को रच उन में सब भोग्य पदार्थों को स्थापन और वह सब स्त्री के आधीन कर प्रतिदिन सुखी रहें॥१५॥

पुनस्सा केन किं दद्यादित्युपदिश्यते॥

फिर वह किससे क्या दे, इस विषय का उपदेश अगले मन्त्र में किया है॥

सं नो॑ रा॒या बृ॑ह॒ता वि॒श्वपे॑शसा मिमि॒क्ष्वा समिळा॑भि॒रा।

सं द्यु॒म्ने॑न वि॒श्वतु॑रो॒षो महि॒ सं वाजै॑र्वाजिनीवति॥ १६॥ ५॥

सम्। न॒:। रा॒या। बृ॒हता। वि॒श्वपे॑शसा। मि॒मि॒क्ष्व। सम्। इळा॑भि:। आ। सम्। द्यु॒म्ने॑न। वि॒श्व॒ऽतुरा॑। उ॒ष॒:। म॒हि॒। सम्। वाजै॑:। वा॒जि॒नी॒ऽव॒ति॥ १६॥

पदार्थ:-(**सम्**) सम्यगर्थे (**न:**) अस्मभ्यम् (**राया**) प्रशस्तधनेन (**बृहता**) महता (**विश्वपेशसा**) विश्वानि सर्वाणि पेशांसि रूपाणि यस्मात्तेन (**मिमिक्ष्व**) मेढुमिच्छ। अत्र **अन्येषामपि**० इति दीर्घ:। (**सम्**) एकीभावे (**इडाभि:**) भूमिवाणीनीतिभि:। **इडेति पृथिवीनामसु पठितम्।** (निघं०१.१) **वाङ्नामसु पठितम्।** (निघं०१.११) **पदनामसु पठितम्।** (निघं०५.५) अनेन प्राप्तुं योग्या नीतिर्गृह्यते। (**आ**) समन्तात् (**सम्**) श्रैष्ठ्येऽर्थे (**द्युम्नेन**) विद्याधर्मादिगुणप्रकाशवता (**विश्वतुरा**) यद्विश्वं सर्वं तुरति त्वरयति तेन (**उष:**) उषर्वत्सर्वरूपप्रकाशिके (**महि**) पूजनीये (**सम्**) सम्यक् (**वाजै:**) युद्धैरन्नैर्विज्ञानैर्वा (**वाजिनीवति**) प्रशस्ता वाजिनी क्रिया विद्यते यस्यास्तत्सम्बुद्धौ॥ १६॥

अन्वय:-हे उषर्वद्वर्त्तमाने वाजिनीवति महि विदुषि स्त्रि! यथोषा विश्वपेशसा बृहता संविश्वतुरा संद्युम्नेन राया समिडाभि: संवाजैर्न: सुखयति, तथैतेस्त्वमस्मान् सुखय॥ १६॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। विदुषां शिक्षयोषर्गुणज्ञानेन सुहितैर्मनुष्यैर्भूत्वाऽनेन पुरुषार्थसिद्धे: सर्वाणि सुखनिमित्तानि वस्तूनि जायन्ते तथा मातृशिक्षयैवाऽपत्यान्युत्तमानि भवन्ति नान्यथा॥ १६॥

अत्रोषर्दृष्टान्तेन कन्यास्त्रीणां लक्षणप्रतिपादनादेतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्।

इत्यष्टाचत्वारिंशं सूक्तं पञ्चमो वर्गश्च समाप्त:॥ ४८॥

पदार्थ:-हे (**उष:**) प्रात: समय के सम तुल्य वर्त्तमान (**वाजिनीवति**) प्रशंसनीय क्रियायुक्त (**महि**) पूजनीय विद्वान् स्त्री! तू जैसे (**उषा:**) सब रूप को प्रकाश करने वाली प्रात:समय की वेला (**विश्वपेशसा**) सब सुन्दर रूपयुक्त (**बृहता**) बड़े (**विश्वतुरा**) सबको प्रवृत्त करने (**संद्युम्नेन**) विद्या

धर्मादि गुण प्रकाशयुक्त **(राया)** प्रशंसनीय धन **(समिडाभिः)** भूमि, वाणी, नीति और **(संवाजैः)** अच्छे प्रकार युद्ध, अन्न, विज्ञान से **(नः)** हम लोगों को सुख देती है, वैसे ही इन से तू हमें सुख दे॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वानों की विद्या शिक्षा से उषा के गुण का ज्ञान हो के उस से पुरुषार्थ सिद्धि, फिर उससे सब सुखों की निमित्त विद्या प्राप्त होती है, वैसे ही माता की शिक्षा से पुत्र उत्तम होते हैं और प्रकार से नहीं॥१६॥

इस सूक्त में उषा के दृष्टान्त करके कन्या और स्त्रियों के लक्षणों का प्रतिपादन करने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह अड़तालीसवां सूक्त ४८ और पांचवां वर्ग ५ समाप्त हुआ॥

अथास्य चतुर्ऋचस्यैकोनपञ्चाशस्य सूक्तस्य प्रस्कण्व ऋषिः। उषा देवता। निचृदनुष्टुप् छन्दः। गान्धारः स्वरः।

तत्रादिमे मन्त्रे उषर्दृष्टान्तेन स्त्रीकृत्युमपदिश्यते॥

अब ४९ सूक्त का आरम्भ है, इस के प्रथम मन्त्र में उषा के दृष्टान्त से स्त्रियों के कर्म का उपदेश अगले मन्त्र में किया है॥

उषो॑ भ॒द्रेभि॒रा ग॑हि दि॒वश्चि॑द्रो॒च॒नादधि॑।
वह॑न्त्वरु॒णप्स॑व॒ उप॑ त्वा सो॒मिनो॑ गृ॒हम्॥ १॥

उष॑ः। भ॒द्रेभि॑ः। आ। ग॒हि॒। दि॒वः। चि॒त्। रो॒च॒नात्। अधि॑। वह॑न्तु। अ॒रु॒णऽप्स॑वः। उप॑। त्वा॒। सो॒मिन॑ः। गृ॒हम्॥ १॥

पदार्थः-(**उषः**) उषर्वत्कल्याणनिमित्ते (**भद्रेभिः**) कल्याणकारकैर्गुणैः (**आ**) समन्तात् (**गहि**) प्राप्नुहि (**दिवः**) प्रकाशान् (**चित्**) अपि (**रोचनात्**) देदीप्यमानात् (**अधि**) उपरि (**वहन्तु**) प्राप्नुवन्तु (**अरुणप्सवः**) अरुणा रक्तगुणविशिष्टाश्च प्सवो भक्षणानि येषान्ते वृद्धा जाताः (**उप**) समीपे (**त्वा**) त्वाम् (**सोमिनः**) प्रशस्ताः सोमाः पदार्थास्सन्ति यस्य तस्य (**गृहम्**) निवासस्थानम्॥ १॥

अन्वयः-हे उषः शुभगुणैः प्रकाशमाने! यथोषा रोचनादधि भद्रेभिरागच्छति, तथा त्वमागहि यथेयं दिव उषा वहति तथा त्वारुणप्सव सोमिनो गृहमुपवहन्तु सामीप्यं प्रापयन्तु॥ १॥

भावार्थः-यस्योषसो भूमिसंयुक्तसूर्य्यप्रकाशादुत्पत्तिरस्ति सा यथा दिनरूपेण परिणता पदार्थान् प्रकाशयन्ती सर्वानाह्लादयति, तथा ब्रह्मचर्यविद्यासंयोगा स्त्री वरा स्यात्॥ १॥

पदार्थः-हे शुभगुणों से प्रकाशमान! जैसे (**उषाः**) कल्याणनिमित्त (**रोचनात्**) अच्छे प्रकार प्रकाशमान से (**अधि**) ऊपर (**भद्रेभिः**) कल्याणकारक गुणों से अच्छे प्रकार आती है, वैसे ही तू (**आ गहि**) प्राप्त हो और जैसे यह (**दिवः**) प्रकाश के समीप प्राप्त होती है, वैसे ही (**त्वा**) तुझ को (**अरुणप्सवः**) रक्त गुणविशिष्ट छेदन करके भोक्ता (**सोमिनः**) उत्तम पदार्थ वाले विद्वान् के (**गृहम्**) निवासस्थान को (**उपवहन्तु**) समीप प्राप्त करें॥ १॥

भावार्थः-जिस उषा की भूमि संयुक्त सूर्य के प्रकाश से उत्पत्ति है वह दिन रूप परिणाम को प्राप्त होकर पदार्थों को प्रकाशित करती हुई सबको आह्लादित करती है वैसे ही ब्रह्मचर्य विद्या योग से युक्त स्त्री श्रेष्ठ हो॥ १॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सु॒पेश॑सं सु॒खं रथं॒ यम॒ध्यस्था॑ उष॒स्त्वम्।

तेना॑ सु॒श्रव॑सं॒ जनं॒ प्राव॒द्य दु॑॑हितर्दिवः॥ २॥

सु॒ऽपेश॑सम्। सु॒ऽखम्। रथ॑म्। यम्। अ॒धि॒ऽअस्था॑ः। उ॒षः॒। त्वम्। तेन॑। सु॒ऽश्रव॑सम्। जन॑म्। प्र। अ॒व॒। अ॒द्य। दु॒हि॒तः॒। दि॒वः॒॥ २॥

पदार्थः-(**सुपेशसम्**) सुन्दरस्वरूपम् (**सुखम्**) आनन्दकारकम् (**रथम्**) रमणसाधनं यानम् (**यम्**) वक्ष्यमाणम् (**अध्यस्थाः**) अध्युपरि तिष्ठन्तीत्यध्यस्थाः (**उषः**) उषर्वद्वर्त्तमाने (**त्वम्**) (**तेन**) रथेन (**सुश्रवसम्**) शोभनानि श्रवांसि श्रवणान्यस्मिन् प्रसादे यस्य तम् (**जनम्**) विद्वांसम् (**प्र**) प्रकृष्टार्थे (**अव**) रक्ष (**अद्य**) अस्मिन् दिने (**दुहितः**) पुत्रीव (**दिवः**) प्रकाशस्य॥ २॥

अन्वयः-हे दिवो दुहितरुषर्वद्वर्त्तमाने स्त्रि! त्वं यं सुपेशसं सुखं रथमध्यस्था, येन जना आनन्दमेधन्ते तेन रथेनाद्य सुश्रवसं जनं प्राव॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा प्रकाशेन सुरूपप्रसिद्धिर्जायते तथा सौभाग्यकारिकया विदुष्या स्त्रिया गृहकृत्यसिद्धिरपत्योत्पत्तिश्च जायत इति विज्ञायोपकर्त्तव्यम्॥ २॥

पदार्थः-हे (**दिवः**) प्रकाशमान सूर्य्य की (**दुहितः**) पुत्री ही के तुल्य (**उषः**) वर्त्तमान स्त्रि! तू (**यम्**) जिस (**सुपेशसम्**) सुन्दर रूप (**सुखम्**) आनन्दकारक (**रथम्**) क्रीड़ा के साधन यान के (**अध्यस्थाः**) ऊपर बैठने वाले प्राणी आनन्द को बढ़ाते हैं (**तेन**) उस रथ से (**सुश्रवम्**) उत्तम श्रवण युक्त (**जनम्**) विद्वान् मनुष्य की (**प्राव**) अच्छे प्रकार रक्षा आदि कर॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य लोग जैसे सूर्य्य के प्रकाश से सुरूप की प्रसिद्धि होती है, वैसे ही विदुषी स्त्री से घर का काम और पुत्रों की उत्पत्ति होती है, ऐसा जान कर उनसे उपकार लेवें॥ २॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वय॑श्चित्ते पत॒त्रिणो॑ द्विपच्चतु॑ष्पदर्जुनि।

उष॒ः प्रार॑न्नृ॒तूँर॑नु॑ दि॒वो अन्ते॑भ्य॒स्परि॑॥ ३॥

वय॑ः। चि॒त्। ते॒। प॒त॒त्रिण॑ः। द्वि॒ऽप॒त्। चतु॑ः॒ऽप॒त्। अ॒र्जु॒नि॒। उष॑ः। प्र। आ॒र॒न्। ऋ॒तून्। अनु॑। दि॒वः। अन्ते॑भ्यः। परि॑॥ ३॥

पदार्थः-(**वयः**) पक्षिणः (**चित्**) इव (**ते**) तव (**पतत्रिणः**) पतनशीलाः। अत्र **पतेरत्रिन्।** (उणा०४.७०) अनेनायं सिद्धः। (**द्विपत्**) द्वौ पादौ यस्य मनुष्यादेः सः (**चतुष्पत्**) चत्वारः पादा यस्य पश्वादेः सः। अत्रोभयत्र **वाच्छन्दसि** इति पदादेशः। (**अर्जुनि**) अर्जयन्ति प्रतियतन्ते ययोषसा सा। अत्र **अर्ज प्रतियत्ने** धातोः रक् प्रत्ययो णिलुक् च। **अर्जेर्णिलुक् च।** (उणा०३.५८) अनेनायं सिद्धः।

अर्जुनीत्युषर्नामसु पठितम्। (निघं०१.८) **(उषः)** उषर्वत्पुरुषार्थनिमित्ते **(प्र)** **(आरन्)** प्रापयति **(ऋतून्)** वसन्तादीन् **(अनु)** पश्चात् **(दिवः)** प्रकाशस्य **(अन्तेभ्यः)** समीपेभ्योऽहोरात्रेभ्य **(परि)** सर्वतः॥३॥

अन्वयः-हे स्त्रि! यथार्जुनि दिवोऽन्तेभ्य ऋतून् सम्पादयन्ती द्विपच्चतुष्पच्च बोधयन्ती सत्युषाः सर्वान् प्राप्नोति, यथाऽस्याः पतत्रिणो वयः प्रारँश्चित्ते गुणा भवन्तु॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथोषा मुहूर्त्तप्रहरदिनमासर्त्वयनसंवत्सरान् विभजन्ती सर्वेषां प्राणिनां व्यवहारचेतने च विभजति तथा स्त्री सर्वाणि गृहकृत्यानि विभजेत्॥३॥

पदार्थः-हे स्त्रि! जैसे **(अर्जुनि)** अच्छे प्रकार प्रयत्न का निमित्त **(उषः)** उषा **(दिवः)** सूर्य्यप्रकाश के **(अन्तेभ्यः)** समीप से **(ऋतून्)** ऋतुओं को सिद्ध और **(द्विपत्)** मनुष्यादि तथा **(चतुष्पत्)** पशु आदि का बोध कराती हुई सबको प्राप्त होके जैसे इससे **(पतत्रिणः)** नीचे-ऊंचे उड़ने वाले **(वयः)** पक्षी **(प्रारन्)** इधर-उधर जाते **(चित्)** वैसे ही **(ते)** तेरे गुण हों॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे उषा मूहूर्त्त, प्रहर, दिन, मास, ऋतु, अयन अर्थात् दक्षिणायन और वर्षों का विभाग करती हुई सब प्राणियों के व्यवहार और चेतनता को करती है, वैसे ही स्त्री सब गृहकृत्यों को पृथक्-पृथक् करें॥

पुनः सा कीदृशी किं कुर्यादित्युपदिश्यते॥

फिर वह कैसी और क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

व्युच्छन्ती॒ हि र॒श्मिभि॒र्विश्व॑मा॒भासि॑ रोच॒नम्।
तां त्वामु॑षर्वसू॒यवो॑ गी॒र्भिः कण्वा॑ अहूषत॥४॥६॥

वि॒ऽउ॒च्छन्ती॑। हि। र॒श्मिऽभि॑:। विश्व॑म्। आ॒ऽभासि॑। रो॒च॒नम्। ताम्। त्वाम्। उ॒ष॒:। व॒सु॒ऽयव॑:। गी॒:ऽभि:। कण्वा॑:। अ॒हू॒ष॒त॒॥४॥

पदार्थः-(**व्युच्छन्ति**) विविधतया वासयन्ति **(हि)** खलु **(रश्मिभिः)** किरणैः **(विश्वम्)** सर्वं जगत् **(आभासि)** समन्तात् प्रकाशयति। अत्र व्यत्ययः **(रोचनम्)** देदीप्यमानं रुचिकरम् **(ताम्)** **(त्वाम्)** एताम् **(उषः)** उषाः **(वसूयवः)** ये वसून् पृथिव्यादीन् युवन्ति मिश्रयन्त्यमिश्रयन्ति ते विद्वांसः **(गीर्भिः)** वेदशिक्षासहिताभिः **(कण्वाः)** मेधाविनः **(अहूषत)** स्पर्द्धन्ताम्॥४॥

अन्वयः-हे वसूयवः कण्वा! यूयं यथोषरुषा व्युच्छन्ती हि खलु रश्मिभी रोचनं विश्वमाभास्याभाति तथाभूतां त्वां स्त्रियं गीर्भिरहूषत॥४॥

भावार्थः-विद्वद्भिरुषर्गुणवद्वर्त्तमाना स्त्री श्रेष्ठाऽस्तीति बोद्धव्यं सर्वेभ्य उपदेष्टव्यं च॥४॥

अत्रोषर्गुणवत्स्त्रीगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥४॥

इत्येकोनपञ्चाशं सूक्तं षष्ठो वर्गश्च समाप्तः॥४९॥

पदार्थः-हे **(वसूयवः)** जो पृथिवी आदि वसुओं को संयुक्त और वियुक्त करने वाले **(कण्वाः)** बुद्धिमान् लोग! जैसे **(उषः)** उषा **(व्युच्छन्ती)** विविध प्रकार से वसाने वाली **(हि)** निश्चय करके **(रश्मिभिः)** किरणों से **(रोचनम्)** रुचिकारक **(विश्वम्)** सब संसार को **(आभासि)** अच्छे प्रकार प्रकाशित करती है, वैसी **(ताम्)** उस **(त्वाम्)** तुझ स्त्री को **(गीर्भिः)** वेदशिक्षायुक्त अपनी वाणियों से **(अहूषत)** प्रंशसित करें॥४॥

भावार्थः-विद्वानों को चाहिये कि उषा के गुणों के तुल्य स्त्री उत्तम होती है, इस बात को जानें और सबको उपदेश करें॥४॥

इस में उषा के गुणवर्णन करने से इस सूक्त के अर्थ की पूर्वसूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनचासवां सूक्त ४९ और छठा वर्ग समाप्त हुआ॥

अथास्य त्रयोदशर्चस्य पञ्चाशस्य सूक्तस्य प्रस्कण्व ऋषिः। सूर्यो देवता। १,६ निचृद्गायत्री। २,४,८,९ पिपीलिका मध्या निचृद्गायत्री। ३ गायत्री ५ यवमध्या विराड्गायत्री। ७ विराड्गायत्री च छन्दः। षड्जः स्वरः। १०,११ निचृदनुष्टुप्। १२,१३ अनुष्टुप् च छन्दः। गान्धारः स्वरः॥

तत्रादिमे मन्त्रे कीदृग्लक्षणः सूर्योऽस्तीत्युपदिश्यते॥

अब पचासवें सूक्त का आरम्भ है, उस के पहिले मन्त्र में कैसे लक्षण वाला सूर्य है, इस विषय का उपदेश किया है॥

उदु॒ त्यं जा॒तवे॑दसं दे॒वं व॑हन्ति के॒तव॑:।
दृ॒शे विश्वा॑य॒ सूर्य॑म्॥ १॥

उत्। ऊ॒म् इति॑। त्यम्। जा॒तऽवे॑दसम्। दे॒वम्। व॒ह॒न्ति॒। के॒तव॑:। दृ॒शे। विश्वा॑य। सूर्य॑म्॥ १॥

पदार्थः-(**उत्**) ऊर्ध्वार्थे (**उ**) वितर्के (**त्यम्**) अमुम् (**जातवेदसम्**) यो जातान् पदार्थान् विन्दति तम् (**देवम्**) देदीप्यमानम् (**वहन्ति**) प्राप्नुवन्ति (**केतवः**) किरणाः (**दृशे**) द्रष्टुं दर्शयितुं वा। इदं केन् प्रत्ययान्तं निपातनम्। (**विश्वाय**) सर्वेषां दर्शनव्यवहाराय (**सूर्य्यम्**) सवितृलोकम्। यास्कमुनिरिमं मन्त्रमेवं व्याख्यातवान्। **उद्वहन्ति तं जातवेदसं देवमश्वाः केतवो रश्मयो वा सर्वेषां भूतानां संदर्शनाय सूर्य्यम्।** (निरु०१२.१५)॥१॥

अन्वयः-हे मनुष्या! यूयं यथा केतवो रश्मयो विश्वाय दृश उदुत्यं जातवेदसं देवं सूर्य्यमुद्वहन्ति तथा गृहाश्रमसुखदर्शनाय सुशोभनाः स्त्रिय उद्वहत॥१॥

भावार्थः-धार्मिका जना यथाश्वा रथं किरणाश्च सूर्यं वहन्त्येवं विद्याधर्मप्रकाशयुक्ताः स्वसदृशाः स्त्रियः सर्वान् पुरुषानुद्वाहयेयुः॥१॥

पदार्थः-हे मनुष्यो! तुम जैसे (**केतवः**) किरणें (**विश्वाय**) सबके (**दृशे**) दीखने (**उ**) और दिखलाने के योग्य व्यवहार के लिये (**त्यम्**) उस (**जातवेदसम्**) उत्पन्न किये हुए पदार्थों को प्राप्त करने वाले (**देवम्**) प्रकाशमान (**सूर्य्यम्**) रविमण्डल के (**उद्वहन्ति**) ऊपर बहती हैं, वैसे ही गृहाश्रम का सुख देने के लिये सुशोभित स्त्रियों को विवाह विधि से प्राप्त होओ॥१॥

भावार्थः-धार्मिक माता-पिता आदि विद्वान् लोग जैसे घोड़े रथ को और किरणें सूर्य्य को प्राप्त करती हैं, ऐसे ही विद्या और धर्म के प्रकाशयुक्त अपने तुल्य स्त्रियों से सब पुरुषों का विवाह करावें॥१॥

पुनः के कस्मै किं कुर्युरित्युपदिश्यते॥

फिर कौन किसके लिये क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

अप॒ त्ये ता॒यवो॑ यथा॒ नक्ष॑त्रा यन्त्य॒क्तुभि॑:।

सूरा॑य वि॒श्वच॑क्षसे॥ २॥

अप॑। त्ये। ता॒यव॑:। य॒था॒। नक्ष॑त्रा। य॒न्ति॒। अ॒क्तुऽभि॑:। सूरा॑य। वि॒श्वऽच॑क्षसे॥ २॥

पदार्थ:-(**अप**) पृथग्भावे (**त्ये**) अमी (**तायव:**) सूर्य्यपालका वायव: (**यथा**) येन प्रकारेण (**नक्षत्रा**) नक्षत्राणि क्षयरहिता लोका: (**यन्ति**) (**अक्तुभि:**) रात्रिभि: (**सूराय**) सूर्य्यलोकाय (**विश्वचक्षसे**) विश्वस्य चक्षुर्दर्शनं यस्मात्तस्मै॥ २॥

अन्वय:-हे स्त्री पुरुषा! यूयं यथाऽक्तुभि: सह वर्त्तमानानि नक्षत्रा नक्षत्राणि लोकास्त्ये तायवो वायवश्च विश्वचक्षसे सूरायापयन्ति तथा विवाहिताभि: स्त्रीभि: सह संयोगवियोगान् कुरुत॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। यथा रात्रौ नक्षत्राणि चन्द्रेण प्राणश्च शरीरेण सह वर्त्तन्ते, तथा विवाहित-स्त्रीपुरुषौ वर्त्तेयाताम्॥ २॥

पदार्थ:-हे स्त्रीपुरुषो! तुम (**यथा**) जैसे (**अक्तुभि:**) रात्रियों के साथ (**नक्षत्रा**) नक्षत्र आदि क्षयरहित लोक और (**तायव:**) वायु (**विश्वचक्षसे**) विश्व के दिखाने वाले (**सूराय**) सूर्य्यलोक के अर्थ (**अपयन्ति**) संयुक्त वियुक्त होते हैं, वैसे ही विवाहित स्त्रियों के साथ संयुक्त वियुक्त हुआ करो॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे रात्रि में नक्षत्र लोक चन्द्रमा के साथ और प्राण शरीर के साथ वर्त्तते हैं, वैसे विवाह करके स्त्री-पुरुष आपस में वर्त्ता करें॥ २॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

अदृ॑श्रमस्य के॒तवो॒ वि र॒श्मयो॒ जना॒ँ अनु॑।

भ्राज॑न्तो अ॒ग्नयो॑ यथा॥ ३॥

अदृ॑श्रम्। अ॒स्य॒। के॒तव॑:। वि। र॒श्मय॑:। जना॑न्। अनु॑। भ्राज॑न्त:। अ॒ग्नय॑:। य॒था॒॥ ३॥

पदार्थ:-(**अदृश्रम्**) प्रेक्षेयम्। अत्र लिङर्थे लङ् शपो लुक् रुडागमश्च। (**अस्य**) सूर्य्यस्य (**केतव:**) ज्ञापका: (**वि**) विशेषार्थे (**रश्मय:**) किरणा: (**जनान्**) मनुष्यादीन् प्राणिन: (**अनु**) पश्चात् (**भ्राजन्त:**) प्रकाशमाना: (**अग्नय:**) प्रज्वलिता वह्नय: (**यथा**) येन प्रकारेण॥ ३॥

अन्वय:-यथाऽस्य सूर्य्यस्य भ्राजन्तोऽग्नय: केतवो रश्मयो जनाननुभ्राजन्त: सन्ति, तथाहं स्वस्त्रियं स्वपुरुषञ्चैव गम्यत्वेन व्यदृश्रं नान्यथेति यावत्॥ ३॥

भावार्थ:-अत्रोपमालङ्कार:। यथा प्रदीप्ता अग्नय: सूर्य्यादयो बहि: सर्वेषु प्रकाशन्ते, तथैवान्तरात्मनीश्वरस्य प्रकाशो वर्त्तते। एतद्विज्ञानाय सर्वेषां मनुष्याणां प्रयत्न: कर्त्तुं योग्योऽस्ति तदाज्ञया परस्त्रीपुरुषै: सह व्यभिचारं सर्वथा विहाय विवाहिता: स्व-स्वस्त्रीपुरुषा ऋतुगामिन एव स्यु:॥ ३॥

पदार्थः-(**यथा**) जैसे (**अस्य**) इस सविता के (**भ्राजन्तः**) प्रकाशमान (**अग्नयः**) प्रज्ज्वलित (**केतवः**) जनाने वाली (**रश्मयः**) किरणें (**जनान्**) मनुष्यादि प्राणियों को (**अनु**) अनुकूलता से प्रकाश करती हैं, वैसे मैं अपनी विवाहित स्त्री और अपने पति ही को समागम के योग्य देखूं अन्य को नहीं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्रज्ज्वलित हुए अग्नि और सूर्य्यादिक बाहर सब में प्रकाशमान हैं, वैसे ही अन्तरात्मा में ईश्वर का प्रकाश वर्त्तमान है। इसके जानने के लिये सब मनुष्यों को प्रयत्न करना योग्य है। उस परमात्मा की आज्ञा से परस्त्री के साथ पुरुष और परपुरुष के संग स्त्री व्यभिचार को सब प्रकार छोड़ के पाणिगृहीत अपनी-अपनी स्त्री और अपने-अपने पुरुष के साथ ऋतुगामी ही होवें॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य्य।

विश्वमाभासि रोचनम्॥४॥

तरणिः। विश्वऽदर्शतः। ज्योतिःऽकृत्। असि। सूर्य। विश्वम्। आ। भासि। रोचनम्॥४॥

पदार्थः-(**तरणिः**) क्षिप्रतया संप्लविता (**विश्वदर्शतः**) यो विश्वस्य दर्शयिता (**ज्योतिष्कृत्**) यो ज्योतिः प्रकाशात्मकं सूर्यादिलोकं करोति सः (**असि**) (**सूर्य**) सर्वप्रकाशक सर्वात्मन् (**विश्वम्**) सर्वं जगत् (**आ**) समन्तात् (**भासि**) प्रकाशयसि (**रोचनम्**) अभिप्रेतं रुचिकरम्॥४॥

अन्वयः-हे सूर्य्येश्वर! यतो विश्वदर्शतस्तरणिर्ज्योतिष्कृत् त्वं रोचनं विश्वमाभासि तस्मात् स्वयं प्रकाशोऽसि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यविद्युतौ बाह्याभ्यन्तरस्थान् मूर्त्तान् पदार्थान् प्रकाशेतान्तस्तथेश्वरः सर्वमखिलं जगत् प्रकाशयति॥४॥

पदार्थः-हे (**सूर्य्य**) चराचर के आत्मा ईश्वर! जिससे (**विश्वदर्शतः**) विश्व के दिखाने और (**तरणिः**) शीघ्र सब का आक्रमण करने (**ज्योतिष्कृत्**) स्वप्रकाश स्वरूप आप! (**रोचनम्**) रुचिकारक (**विश्वम्**) सब जगत् को प्रकाशित करते हैं, इसीसे आप स्वप्रकाशस्वरूप हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य और बिजुली बाहर-भीतर रहने वाले सब स्थूल पदार्थों को प्रकाशित करते हैं, वैसे ही ईश्वर भी सब वस्तुमात्र को प्रकाशित करता है॥४॥

पुनः स जगदीश्वरः कीदृश इत्युपदिश्यते॥

फिर वह जगदीश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र॒त्यङ् दे॒वानां॑ विश॑: प्र॒त्यङ्डु॑दे॒षि॒ मानु॑षान्।

प्र॒त्यङ् विश्वं॒ स्व॑र्दृ॒शे॥५॥७॥

प्र॒त्यङ्। दे॒वाना॑म्। विश॑:। प्र॒त्यङ्। उत्। ए॒षि॒। मानु॑षान्। प्र॒त्यङ्। विश्व॑म्। स्व॑:। दृ॒शे॥५॥

पदार्थ:-(**प्रत्यङ्**) य: प्रत्यञ्चति स: (**देवानाम्**) दिव्यानां पदार्थानां विदुषां वा (**विश:**) प्रजा: (**प्रत्यङ्**) प्रत्यञ्चतीति (**उत्**) ऊर्ध्वे (**एषि**) (**मानुषान्**) मनुष्यान् (**प्रत्यङ्**) यत्प्रत्यञ्चति तत् (**विश्वम्**) सर्वम् (**स्व:**) सुखम् (**दृशे**) द्रष्टुम्॥५॥

अन्वय:-हे जगदीश्वर! यस्त्वं देवानां विशो मानुषान् प्रत्यङ्डुदेष्युत्कृष्टतया प्राप्तोऽसि सर्वेषामात्मसु प्रत्यङ्डसि तस्माद्विश्वं स्वर्दृशे प्रत्यङ्डुपासनीयोऽसि॥५॥

भावार्थ:-यत ईश्वर: सर्वव्यापक: सकलान्तर्यामी समस्तकर्मसाक्षी वर्त्तते, तस्मादयमेव सर्वै: सज्जनैरुपासनीयोऽस्ति॥५॥

पदार्थ:-हे जगदीश्वर! जो आप (**देवानाम्**) दिव्य पदार्थों वा विद्वानों के (**विश:**) प्रजा (**मानुषान्**) मनुष्यों को (**प्रत्यङ्डुदेषि**) अच्छे प्रकार प्राप्त हो और सबके आत्माओं में (**प्रत्यङ्**) प्राप्त होते हो, इससे (**विश्वं स्वर्दृशे**) सब सुखों के देखने के अर्थ सबों के (**प्रत्यङ्**) प्रत्यगात्मरूप से उपासनीय हो॥५॥

भावार्थ:-जिससे ईश्वर सब कहीं व्यापक सबके आत्मा का जानने वाला और सब कर्मों का साक्षी है, इसलिये यही सब सज्जन लोगों को नित्य उपासना करने के योग्य है॥५॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह ईश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

येना॑ पाव॒क॒ चक्ष॑सा भु॒र॒ण्यन्तं॒ जना॒ँ अनु॑।

त्वं व॑रुण॒ पश्य॑सि॥६॥

येन॑। पा॒व॒क॒। चक्ष॑सा। भु॒र॒ण्यन्त॑म्। जना॑न्। अनु॑। त्वम्। व॒रु॒ण॒। पश्य॑सि॥६॥

पदार्थ:-(**येन**) वक्ष्यमाणेन (**पावक**) पवित्रकारकेश्वर (**चक्षसा**) प्रकाशेन (**भुरण्यन्तम्**) धरन्तम् (**जनान्**) मनुष्यादीन् (**अनु**) पश्चादर्थे (**त्वम्**) उक्तार्थ: (**वरुण**) सर्वोत्कृष्ट (**पश्यसि**) सम्प्रेक्षसे॥६॥

अन्वय:-हे पावक वरुण जगदीश्वर! त्वं येन चक्षसा विज्ञानप्रकाशेन भुरण्यन्तं लोकं जनाँश्चानुपश्यसि तेन युक्तानस्मान् कृपया सम्पादय॥६॥

भावार्थ:-नहि परमेश्वरोपासनेन विना कस्यचिद्विज्ञानं पवित्रता च सम्भवति, तस्मात् सर्वैर्मनुष्यैरेक एवेश्वर उपासनीय:॥६॥

पदार्थः-हे **(पावक)** पवित्रकारक **(वरुण)** सब से उत्तम जगदीश्वर! आप **(येन)** जिस **(चक्षसा)** विज्ञान प्रकाश से **(भुरण्यन्तम्)** धारण वा पोषण करते हुए लोकों वा **(जनान्)** मनुष्यादि को **(अनु पश्यसि)** अच्छे प्रकार देखते हो, उस ज्ञानप्रकाश से हम लोगों को संयुक्त कृपापूर्वक कीजिये॥६॥

भावार्थः-परमेश्वर की उपासना के विना किसी मनुष्य को विज्ञान वा पवित्रता होने का सम्भव नहीं हो सकता, इससे सब मनुष्यों को एक परमेश्वर ही की उपासना करनी चाहिये॥६॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः।

पश्यञ्जन्मानि सूर्य॥७॥

वि। द्याम्। एषि। रजः। पृथु। अहा। मिमानः। अक्तुऽभिः। पश्यन्। जन्मानि। सूर्य॥७॥

पदार्थः-(**वि**) विशेषार्थे **(द्याम्)** प्रकाशम् **(एषि)** **(रजः)** लोकसमूहम् **(पृथु)** विस्तीर्णम् **(अहा)** अहानि दिनानि **(मिमानः)** प्रक्षिपन् विभजन् **(अक्तुभिः)** रात्रिभिः **(पश्यन्)** समीक्षमाणः **(जन्मानि)** पूर्वापरवर्त्तमानानि **(सूर्य्य)** चराऽचरात्मन्॥७॥

अन्वयः-हे सूर्य्य जगदीश्वर! त्वं यथा सविताऽक्तुभिः पृथुरजोऽहा मिमानः सन् पृथु रजः प्राप्य व्यवस्थापयति तथा सर्वतः पश्यन् सर्वेषां जन्मानि व्येषि॥७॥

भावार्थः-येन सूर्यादि जगद्रच्यते सर्वेषां जीवानां पापपुण्यानि कर्म्माणि दृष्ट्वा यथायोग्यं तत्फलानि प्रदीयन्ते, स एव सर्वेषां सत्यो न्यायाधीशो राजास्तीति सर्वैर्मनुष्यैर्मन्तव्यम्॥७॥

पदार्थः-हे **(सूर्य्य)** चराचराऽत्मन् परमेश्वर! आप, जैसे सूर्य्य लोक **(अक्तुभिः)** प्रसिद्ध रात्रियों से **(पृथु)** विस्तारयुक्त **(रजः)** लोकसमूह और **(अहा)** दिनों को **(मिमानः)** निर्माण करता हुआ **(पृथु)** बड़े-बड़े **(रजः)** लोकों को प्राप्त होके नियम व्यवस्था करता है, वैसे हम लोगों के **(जन्मानि)** पहिले, पिछले और वर्त्तमान जन्मों को **(पश्यन्)** देखते हुए **(व्येषि)** अनेक प्रकार से जानने और प्राप्त होने वाले हो॥७॥

भावार्थः-जिसने सूर्य्य आदि लोक बनाये और सब जीवों के पाप-पुण्य को देख के ठीक-ठीक सुख-दुःख रूप फलों को देता है, सब का सत्य-सत्य न्यायकारी राजा है, ऐसा सब मनुष्य जानें॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सप्त त्वा हरितो रथे वहन्ति देव सूर्य।

शो॒चिष्के॑शं विचक्षण॥ ८॥

स॒प्त। त्वा॒। ह॒रित॑:। रथे॑। वह॑न्ति। दे॒व॒। सू॒र्य॒। शो॒चि:ऽके॑शम्। वि॒ऽच॒क्ष॒ण॒॥ ८॥

पदार्थ:-(**सप्त**) सप्तविधा: किरणा: (**त्वा**) त्वाम् (**हरित:**) यै: किरणै रसान् हरति त आदित्य-रश्मय:। **हरित इत्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५) (**रथे**) रमणीये लोके (**वहन्ति**) (**देव**) दात: (**सूर्य्य**) ज्ञानस्वरूप ज्ञानप्रापक वा (**शोचिष्केशम्**) शोचींषि केशा दीप्तयो रश्मयो यस्य तं सूर्य्यलोकम् (**विचक्षण**) विविधान् दर्शक॥ ८॥

अन्वय:-हे विचक्षण देव सूर्य जगदीश्वर! यथा सप्त हरित: शोचिष्केशं रथे वहन्ति तथा त्वा सप्त छन्दांसि प्रापयन्ति॥ ८॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यथा किरणैर्विना सूर्य्यस्य दर्शनं न भवति, तथैव वेदाभ्यासमन्तरा परमात्मनो दर्शनं नैव जायत इति बोध्यम्॥ ८॥

पदार्थ:-हे (**विचक्षण**) सबको देखने (**देव**) सुख देने हारे (**सूर्य्य**) ज्ञानस्वरूप जगदीश्वर! जैसे (**सप्त**) हरितादि सात (**हरित:**) जिनसे रसों को हरता है, वे किरणें (**शोचिष्केशम्**) पवित्र दीप्ति वाले सूर्य्यलोक को (**रथे**) रमणीय सुन्दरस्वरूप रथ में (**वहन्ति**) प्राप्त करते हैं, वैसे (**त्वा**) आपको गायत्री आदि वेदस्थ सात छन्द प्राप्त कराते हैं॥ ८॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे रश्मियों के विना सूर्य्य का दर्शन नहीं हो सकता, वैसे ही वेदों को ठीक-ठीक जाने विना परमेश्वर का दर्शन नहीं हो सकता, ऐसा निश्चय जानो॥ ८॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अयु॑क्त स॒प्त शु॒न्ध्यु॒व॒: सूरो॒ रथ॑स्य न॒प्त्य॑:।
ताभि॑र्याति॒ स्वयु॑क्तिभि:॥ ९॥

अयु॑क्त। स॒प्त। शु॒न्ध्यु॒व॑:। सूर॑:। रथ॑स्य। न॒प्त्य॑:। ताभि॑:। या॒ति॒। स्वयु॑क्तिऽभि:॥ ९॥

पदार्थ:-(**अयुक्त**) योजयति (**सप्त**) पूर्वोक्ता: (**शुन्ध्युव:**) पवित्रहेतवो रश्मयोऽश्वा:। अत्र **तन्वादीनां छन्दसि बहुलमुपसंख्यानम्।** (अष्टा०वा०६.४.७७) अनेन वार्त्तिकेनोवङादेश:। (**सूर:**) य: सरति प्राप्नोति स सूर्य: (**रथस्य**) रमणाधिकरणस्य जगतो मध्ये (**नप्त्य:**) पातेन नाशेन रहिता:। अत्र **सुपां सुलुग्०** इति जस: स्थाने सु:। नञ् उपपदात् पतधातो: **इक् कृष्यादिभ्य:।** (अष्टा०वा०३.३.१०८) इतीक्। **तनिपत्योश्छन्दसि।** (अष्टा०६.४.९९) अनेनोपधालोप:। इकारस्याकारादेशश्च। (**ताभि:**) व्याप्तिभि: (**याति**) प्राप्नोति (**स्वयुक्तिभि:**) स्वा युक्तयो योजनानि यासु ताभि:॥ ९॥

अन्वयः-हे ईश्वर! यथा सूरो याः सप्त नप्त्यः शुन्ध्युव सन्ति ता रथस्य मध्येऽयुक्त तैः सह याति प्राप्नोति तथा त्वं स्वयुक्तिभिः सर्वं विश्वं जगत्संयोजयसीति वयं विजानीमः॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यः सूर्यवत् स्वयं प्रकाश आकाशमिव व्याप्त उपासकानां शुद्धिकरः परमेश्वरोऽस्ति, स खलु सर्वैर्मनुष्यैरुपासनीयो वर्त्तते॥९॥

पदार्थः-हे ईश्वर! जैसे (**सूरः**) सब का प्रकाशक जो (**सप्त**) पूर्वोक्त सात (**नप्त्यः**) नाश से रहित (**शुन्ध्युवः**) शुद्धि करने वाली किरणें हैं उन को (**रथस्य**) रमणीयस्वरूप में (**अयुक्त**) युक्त करता और उनसे सहित प्राप्त होता है, वैसे आप (**ताभिः**) उन (**स्वयुक्तिभिः**) अपनी युक्तियों से सब संसार को संयुक्त रखते हो, ऐसा हम को दृढ़ निश्चय है॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान आप ही आप से प्रकाशस्वरूप, आकाश के तुल्य सर्वत्र व्यापक, उपासकों को पवित्रकर्त्ता परमात्मा है, वही सब मनुष्यों का उपास्यदेव है॥९॥

पुनस्तं विद्वांसः कीदृशं जानीयुरित्युपदिश्यते॥

फिर उसको विद्वान् लोग किस प्रकार जानें, इस विषय का उपदेश अगले मन्त्र में किया है॥

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्।

देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ १०॥

उत्। वयम्। तमसः। परि। ज्योति। पश्यन्तः। उत्ऽतरम्। देवम्। देवऽत्रा। सूर्यम्। अगन्म। ज्योतिः। उत्ऽतमम्॥ १०॥

पदार्थः-(**उत्**) ऊर्ध्वेऽर्थे (**वयम्**) विद्वांसः (**तमसः**) आवरकादज्ञानादन्धकारात् (**परि**) परितः (**ज्योतिः**) ईश्वररचितं प्रकाशस्वरूपं सूर्य्यलोकं (**पश्यन्तः**) प्रेक्षमाणाः (**उत्तरम्**) सर्वोत्कृष्टं प्रलयादूर्ध्वं वर्त्तमानं संप्लवकर्त्तारम् (**देवम्**) दातारम् (**देवत्रा**) देवेषु विद्वत्सु मनुष्येषु पृथिव्यादिषु वा वर्त्तमानम् (**सूर्य्यम्**) सर्वात्मानम् (**अगन्म**) प्राप्नुयाम (**ज्योतिः**) प्रकाशम् (**उत्तमम्**) उत्कृष्टगुणकर्मस्वभावम्॥१०॥

अन्वयः-हे मनुष्या! यथा ज्योतिः पश्यन्तो वयं तमसः पृथग्भूते ज्योतिरुत्तमं देवत्रा देवमुत्तमं ज्योतिः सूर्य्यं परमात्मानं पर्य्युदगन्मोत्कृष्टतया प्राप्नुयाम तथा यूयमप्येतं प्राप्नुत॥१०॥

भावार्थः-मनुष्यैर्नहि परमेश्वरेण सदृशः कश्चिदुत्तमः प्रकाशकः पदार्थोऽस्ति, न खल्वेतत्प्राप्तिमन्तरेण मुक्तिसुखं प्राप्तुं कोऽपि मनुष्योऽर्हतीति वेद्यम्॥१०॥

पदार्थः-हे मनुष्यो! जैसे (**ज्योतिः**) ईश्वर ने उत्पन्न किये प्रकाशमान सूर्य्य को (**पश्यन्तः**) देखते हुए (**वयम्**) हम लोग (**तमसः**) अज्ञानान्धकार से अलग होके (**ज्योतिः**) प्रकाशस्वरूप (**उत्तरम्**) सब से उत्तम प्रलय से ऊर्ध्व वर्त्तमान वा प्रलय करने हारा (**देवत्रा**) देव, मनुष्य, पृथिव्यादिकों में व्यापक

(देवम्) सुख देने **(उत्तमम्)** उत्कृष्ट गुण, कर्म, स्वभाव युक्त **(सूर्यम्)** सर्वात्मा ईश्वर को **(पर्युदगन्म)** सब प्रकार प्राप्त होवें, वैसे तुम भी उस को प्राप्त होओ॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि परमेश्वर के सदृश कोई भी उत्तम पदार्थ नहीं और न इस की प्राप्ति के विना मुक्ति सुख को प्राप्त होने योग्य कोई भी मनुष्य हो सकता है, ऐसा निश्चित जानें॥१०॥

पुनः स कीदृशोऽस्तीत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उ॒द्यन्न॒द्य मि॑त्रमह आ॒रोह॒न्नुत्त॑रां॒ दिव॑म्।

ह्रद्रो॒गं मम॑ सू॒र्य हरि॒माणं॑ च नाशय॥११॥

उ॒त्ऽयन्। अ॒द्य। मि॒त्र॒ऽम॒हः॒। आ॒ऽरोह॑न्। उत्ऽत॑राम्। दिव॑म्। ह्रत्ऽरो॒गम्। मम॑। सू॒र्य॒। हरि॒माण॑म्। च॒। ना॒श॒य॒॥११॥

पदार्थः-(**उद्यन्**) उदयं प्राप्नुवन् सन् (**अद्य**) अस्मिन् वर्त्तमाने दिने (**मित्रमहः**) यः सर्वमित्रैः पूज्यते तत्सम्बुद्धौ (**आरोहन्**) समारुढः सन् जगत्यारोहणं कुर्वन् वा (**उत्तराम्**) कारणरूपाम् (**दिवम्**) दीप्तिम् (**ह्रद्रोगम्**) यो हृदयस्याज्ञानादिज्वरादिरोगस्तम् (**मम**) मनुष्यादेः (**सूर्य**) सर्वौषधीरोगनिवारणविद्यावित् (**हरिमाणम्**) सुखहरणशीलं (**च**) समुच्चये (**नाशय**)॥११॥

अन्वयः-हे मित्रमह! सूर्य विद्वंस्त्वं यथाऽद्योद्यन्नुत्तरां दिवमारोहन् सविताऽन्धकारं निवार्य्य दिनं जनयति, तथा मम ह्रद्रोगं हरिमाणं च नाशय॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्योदयेऽन्धकारचोरादयो निवर्त्तन्ते, तथा सद्वैद्ये प्राप्ते कुपथ्यरोगा निवर्त्तन्ते॥११॥

पदार्थः-हे (**मित्रमहः**) मित्रों से सत्कार के योग्य (**सूर्य्य**) सब ओषधी और रोगनिवारण विद्याओं के जानने वाले विद्वान्! आप जैसे (**अद्य**) आज (**उद्यन्**) उदय को प्राप्त हुआ वा (**उत्तराम्**) कारणरूपी (**दिवम्**) दीप्ति को (**आरोहन्**) अच्छे प्रकार करता हुआ अन्धकार का निवारण कर दिन को प्रकट करता है, वैसे मेरे (**ह्रद्रोगम्**) हृदय के रोगों और (**हरिमाणम्**) हरणशील चोर आदि को (**नाशय**) नष्ट कीजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य के उदय में अन्धेरा और चोरादि निवृत्त हो जाते हैं, वैसे उत्तम वैद्य की प्राप्ति से कुपथ्य और रोगों का निवारण हो जाता है॥११॥

पुनस्ते किं कुर्य्युरित्याह॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

शुकेषु मे हरिमाणं रोपणाकासु दध्मसि।

अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि॥ १२॥

शुकेषु। मे। हरिमाणम्। रोपणाकासु। दध्मसि। अथो इति। हारिद्रवेषु। मे। हरिमाणम्। नि। दध्मसि॥ १२॥

पदार्थः-(**शुकेषु**) शुकवत्कृतेषु कर्मसु (**मे**) मम (**हरिमाणम्**) हरणशीलं रोगम् (**रोपणाकासु**) रोपणं समन्तात् कामयन्ति तासु क्रियासु लिप्तास्वोषधीषु (**दध्मसि**) धरेम (**अथो**) आनन्तर्ये (**हारिद्रवेषु**) ये हरन्ति द्रवन्ति द्रावयन्ति च तेषोमेतेषु (**मे**) मम (**हरिमाणम्**) चित्ताकर्षकं व्याधिम् (**नि**) नितराम् (**दध्मसि**) स्थापयेम॥ १२॥

अन्वयः-यथा सद्वैद्या ब्रूयुस्तथा वयं शुकेषु रोपणाकासु मे हरिमाणं दध्मस्यथो हारिद्रवेषु मे मम हरिमाणं निदध्मसि॥ १२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या लेपनादिक्रियाभिः सर्वान् रोगान्निवार्य बलं प्राप्नुवन्तु॥ १२॥

पदार्थः-जैसे श्रेष्ठ वैद्य लोग कहें वैसे हम लोग (**शुकेषु**) शुओं के समान किये हुए कर्मों और (**रोपणाकासु**) लेप आदि क्रियाओं से (**मे**) मेरे (**हरिमाणम्**) चित्त को खैंचने वाले रोगनाशक औषधियों को (**दध्मसि**) धारण करें (**अथो**) इस के पश्चात् (**हारिद्रवेषु**) जो सुख हरने, मल बहाने वाले रोग हैं, उनमें (**मे**) अपने (**हरिमाणम्**) हरणशील चित्त को (**निदध्मसि**) निरन्तर स्थिर करें॥ १२॥

भावार्थः-मनुष्य लोग लेपनादि क्रियाओं से रोगों का निवारण करके बल को प्राप्त होवें॥ १२॥

पुनर्मनुष्यैः कथं प्रजाः पालनीया इत्युपदिश्यते॥

फिर मनुष्य किस प्रकार प्रजाओं का पालन करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

उदगादयमादित्यो विश्वेन सहसा सह।

द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम्॥ १३॥ ८॥ ९॥

उत्। अगात्। अयम्। आदित्यः। विश्वेन। सहसा। सह। द्विषन्तम्। मह्यम्। रन्धयन्। मो इति। अहम्। द्विषते। रधम्॥ १३॥

पदार्थः-(**उत्**) ऊर्ध्वे (**अगात्**) व्याप्नोति (**अयम्**) सभेशो विद्वान् (**आदित्यः**) नाशरहितः (**विश्वेन**) अखिलेन (**सहसा**) बलेन (**सह**) साकम् (**द्विषन्तम्**) शत्रुम् (**मह्यम्**) धार्मिकमनुष्याय (**रन्धयन्**) हिंसन् (**मो**) निषेधार्थे (**अहम्**) मनुष्यः (**द्विषते**) शत्रवे (**रधम्**) हिंसेयम्॥ १३॥

अन्वयः-हे विद्वन्! यथाऽयमादित्य उदगात् तथा त्वं विश्वेन सहसा सहऽस्मिन् राज्य उदिहि यथा त्वं मह्यं द्विषन्तं रन्धयन् प्रवर्त्तसे, तथाऽहं प्रवर्तेय। यथायं शत्रुर्मा हिनस्ति, तथाहमप्यस्मै द्विषते रधं यो मां न हिंसेत्तमहं मोरधं न हिंसेयम्॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरनन्तबलजगदीश्वरस्य बलनिमित्तस्य प्राणवद्विद्युतो दृष्टान्तेन वर्तित्वा सज्जनैः सार्द्धं मित्रभावमाश्रित्य सर्वाः प्रजाः पालनीयाः॥१३॥

अत्र परमेश्वराग्निकार्यकारणयोर्दृष्टान्तेन राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्यष्टमो वर्गः ८ नवमोऽनुवाकः ९ पञ्चाशं सूक्तं च समाप्तम्॥५०॥

पदार्थः-हे विद्वन्! यथा **(अयम्)** यह **(आदित्यः)** नाशरहित सूर्य्य **(उदगात्)** उदय को प्राप्त होता है, वैसे तू **(विश्वेन)** अखिल **(सहसा)** बल के साथ उदित हो जैसे तू **(मह्यम्)** धार्मिक मनुष्य के **(द्विषन्तम्)** द्वेष करते हुए शत्रु को **(रन्धयन्)** मारता हुआ वर्त्तता है, वैसे **(अहम्)** मैं **(द्विषते)** शत्रु के लिये वर्त्तूं। जैसे यह शत्रु मुझ को मारता है, वैसे इसको मैं भी, मारूं जो मुझे न मारे उसे मैं भी **(मो रधम्)** न मारूं॥१३॥

भावार्थः-मनुष्यों को उचित है कि अनन्त बल युक्त परमेश्वर के बल के निमित्त प्राण वा बिजुली के दृष्टान्त से वर्त्त के, सत्पुरुषों के साथ मित्रता कर, सब प्रजाओं का पालन यथावत् किया करें॥१३॥

इस सूक्त में परमेश्वर वा अग्नि के कार्य-कारण के दृष्टान्त से राजा के गुणवर्णन करने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह आठवां ८ वर्ग नवम ९ अनुवाक और पचासवां ५० सूक्त समाप्त हुआ॥५०॥

अथास्य पञ्चदशर्चस्यैकपञ्चाशस्य सूक्तस्याङ्गिरसः सव्य ऋषिः। इन्द्रो देवता। १,९,१० जगती। २,५,८ विराड् जगती। ११-१३ निचृज्जगती च छन्दः। निषादः स्वरः। ३,४ भुरिक् त्रिष्टुप्। ६,७ त्रिष्टुप्। १४,१५ विराट् त्रिष्टुप् च छन्दः। धैवतः स्वरः॥

अथेन्द्रशब्दार्थवद्विद्वद्गुणा उपदिश्यन्ते॥

अब इक्कावनवें सूक्त का आरम्भ है, उस के पहिले मन्त्र में इन्द्र शब्दार्थ के समान विद्वानों के गुणों का उपदेश किया है॥

अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम्।
यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत॥ १॥

अभि। त्यम्। मेषम्। पुरुऽहूतम्। ऋग्मियम्। इन्द्रम्। गीःऽभिः। मदत। वस्वः। अर्णवम्। यस्य। द्यावः। न। विऽचरन्ति। मानुषा। भुजे। मंहिष्ठम्। अभि। विप्रम्। अर्चत॥ १॥

पदार्थः-(**अभि**) आभिमुख्ये (**त्यम्**) तम् (**मेषम्**) वृष्टिद्वारा सेक्तारम् (**पुरुहूतम्**) पुरुभिर्बहुभिर्विद्वद्भिः स्तुतम् (**ऋग्मियम्**) य ऋग्भिर्मीयते तम् (**इन्द्रम्**) सूर्यमिव शत्रूणां विदारयितारम् (**गीर्भिः**) वाग्भिः (**मदत**) हर्षत (**वस्वः**) वसोर्धनस्य (**अर्णवम्**) समुद्रवद्वर्त्तमानम् (**यस्य**) इन्द्रस्य (**द्यावः**) प्रकाशः (**न**) इव (**विचरन्ति**) (**मानुषा**) मनुष्याणां हितकारकाणि (**भुजे**) भोगाय (**मंहिष्ठम्**) अतिशयेन महान्तम् (**अभि**) सर्वतः (**विप्रम्**) मेधाविनम् (**अर्चत**) सत्कुरुत॥ १॥

अन्वयः-हे मनुष्या! यूयमर्णवमिव त्यं मेषं पुरुहूतमृग्मियं मंहिष्ठमिन्द्रं परमैश्वर्यवन्तं राजानं गीर्भिरभिमदत सर्वतो हर्षयत सूर्यस्य द्यावः किरणान्नेव यस्य भुजे मानुषा विचरन्ति, तस्य वस्वो दातारं विप्रमभ्यर्चत॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्बहुगुणयोगाद्यः सूर्यवद्विद्वान् राजा वर्त्ततां स एव सत्कर्त्तव्यः। नह्येतेन विना कस्यचित् सुखभोगो जायत इति॥ १॥

पदार्थः-हे मनुष्यो! तुम (**अर्णवम्**) समुद्र के तुल्य (**त्यम्**) उस (**मेषम्**) वृष्टिद्वारा सेचन करने हारे (**पुरुहूतम्**) बहुत विद्वानों से स्तुत (**ऋग्मियम्**) ऋचाओं से मान करने योग्य (**मंहिष्ठम्**) गुणों से बड़े (**इन्द्रम्**) समग्र ऐश्वर्य से युक्त शत्रुओं को विदारण करने वाले राजा को (**गीर्भिः**) सत्य प्रशंसित वाणियों से (**अभिमदत**) हर्षित करो और सूर्य्य के (**द्यावः**) किरणों के (**न**) समान (**यस्य**) जिस को (**भुजे**) भोग के लिये (**मानुषा**) मनुष्यों के हित करने वाले गुण (**विचरन्ति**) विचरते हैं, उस (**वस्वः**) धन के देने वाले (**विप्रम्**) विद्वान् का (**अभ्यर्चत**) सदा सत्कार करो॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को योग्य है कि जो बहुत गुणों के योग से सूर्य्य के सदृश विद्यायुक्त राजा हो, उसी का सत्कार सदा किया करें॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अभीमवन्वन्त्स्वभिष्टिमूतयोऽन्तरिक्षप्रां तविषीभिरावृतम्।
इन्द्रं दक्षासऽ ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत्॥ २॥

अभि। ईम्। अवन्वन्। सुऽअभिष्टिम्। ऊतयः। अन्तरिक्षऽप्राम्। तविषीभिः। आऽवृतम्। इन्द्रम्। दक्षासः। ऋभवः। मदऽच्युतम्। शतऽक्रतुम्। जवनी। सूनृता। आ। अरुहत्॥ २॥

पदार्थः-(**अभि**) आभिमुख्ये **(ईम्)** जलमन्नं पृथिवीं वा। **ईमित्युदकनामसु पठितम्।** (निघं०१.१२) **पदनामसु पठितम्।** (निघं०४.२) **(अवन्वन्)** अवन्ति रक्षणादिकं कुर्वन्ति। अत्राऽव धातोः विकरणव्यत्ययेन श्नुः। **(स्वभिष्टिम्)** शोभना अभिष्टा इष्टयो यस्मात्तम्। अत्र व्यत्ययेन ह्रस्वः। **(ऊतयः)** रक्षादयः **(अन्तरिक्षप्राम्)** स्वतेजसान्तरिक्षं प्राप्य प्राति पिपर्ति ताम् **(तविषीभिः)** बलाकर्षणादिगुणाढ्याभिः सेनाभिः **(आवृतम्)** संयुक्तम् **(इन्द्रम्)** सुखानां बिभर्तारं सेनेशम् **(दक्षासः)** विज्ञानबलवृद्धाः शीघ्रकारिणः **(ऋभवः)** मेधाविनः **(मदच्युतम्)** मदा हर्षणादयश्च्युता यस्मात्तम् **(शतक्रतुम्)** अनेककर्मप्रज्ञायुक्तम् **(जवनी)** वेगशीला **(सूनृता)** अन्नादिसमूहकारी राजनीतिः। **सूनृता इत्यन्ननामसु पठितम्।** (निघं०२.७) **(आ)** समन्तात् **(अरुहत्)** रोहेत्॥ २॥

अन्वयः-हे सेनेश! यस्य तवोतयः प्रजा रक्षन्ति दक्षास ऋभवो यं स्वभिष्टिमन्तरिक्षप्राम्मदच्युतं शतक्रतुं तविषीभिरावृतमिन्द्रं त्वामभ्यवन्वन्नभ्यवन्ति जवनी सूनृताऽरुहत्तं वयमपि सततं रक्षेम॥ २॥

भावार्थः-धार्मिका मेधाविनो यस्याश्रयं कुर्य्युस्तस्यैवाश्रयं सर्वे मनुष्या गृह्णीयुः॥ २॥

पदार्थः-हे सेनापते! जिस आपकी **(ऊतयः)** रक्षा प्रजा का पालन करती हैं **(दक्षासः)** विज्ञानवृद्ध शीघ्र कार्य को सिद्ध करने वाले **(ऋभवः)** मेधावी विद्वान् लोग जिस **(स्वभिष्टिम्)** उत्तम इष्टि युक्त **(अन्तरिक्षप्राम्)** अपने तेज से अन्तरिक्ष अर्थात् अवकाश में सबको सुख से पूर्ण करने **(मदच्युतम्)** हर्षादि को देने वाले **(शतक्रतुम्)** अनेक कर्मों के कर्ता **(तविषीभिः)** बल आकर्षण आदि गुणों से युक्त सेना से **(आवृतम्)** संयुक्त **(इन्द्रम्)** बिजुली के सदृश वर्त्तमान आपको **(अभ्यवन्वन्)** कार्यों को करने के लिये सब प्रकार से वृद्धियुक्त करते हैं जिस को **(जवनी)** वेगयुक्त **(सूनृता)** अन्नादि पदार्थों को सिद्ध करने हारी राजनीति **(आरुहत्)** बढ़ के प्राप्त होवे, उस आपकी रक्षा हम किया करें॥ २॥

भावार्थः-धर्मात्मा बुद्धिमान् लोग जिस का आश्रय करें, उसी का शरण ग्रहण सब मनुष्य करें॥ २॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित्।

स॒सेन॑ चिद्वि॒मदा॑यावहो॒ वस्वा॒जावद्रिं॑ वावसा॒नस्य॑ नर्तय॑न्॥ ३॥

त्वम्। गो॒त्रम्। अङ्गि॑रःऽभ्यः। अ॒वृ॒णोः॒। अप॑। उ॒त। अत्र॑ये। श॒तऽदु॑रेषु। गा॒तु॒ऽवित्। स॒सेन॑। चि॒त्। वि॒ऽम॒दाय॑। अ॒व॒ह॒ः। वसु॑। आ॒जौ। अद्रि॑म्। व॒व॒सा॒नस्य॑। नर्तय॑न्॥ ३॥

पदार्थः-(**त्वम्**) (**गोत्रम्**) मेघम्। **गोत्रमिति मेघनामसु पठितम्।** (निघं०१.१०) (**अङ्गिरोभ्यः**) प्राणरूपेभ्यो वायुभ्यः। **प्राणो वा अङ्गिरा।** (शत०६.३.७.३) (**अवृणोः**) वृणु (**अप**) दूरीकरणे (**उत**) अपि (**अत्रये**) अविद्यमानानि त्रीणि दुःखान्याध्यत्मिकाऽऽधिभौतिकाऽऽधिदैविकानि यस्मिन् सुखे तस्मै (**शतदुरेषु**) शतावरणेषु मेघावयवेषु धनेषु (**गातुवित्**) यो भूगर्भविद्यया गातुं पृथिवीं वेत्ति सः। **गातुरिति पृथिवीनामसु पठितम्।** (निघं०१.१) (**चित्**) इव (**विमदाय**) विविधा मदा हर्षा यस्मिन् व्यवहारे तस्मै (**अवहः**) प्राप्नुहि (**वसु**) धनादिकम् (**आजौ**) संग्रामे (**अद्रिम्**) मेघम् (**वावसानस्य**) आच्छादकस्य। अत्र यङ्लुगन्ताद् **वस आच्छादने** धातोः कर्त्तरि ताच्छीलिकश्चानश् **बहुलं छन्दसि** इति शपः श्लुः। (**नर्त्तयन्**) नृत्यं कारयन्। अत्र **न पादभ्याङ्यम०** (अष्टा०१.३.८८) इति निषेधे प्राप्ते व्यत्ययेन परस्मैपदम्॥ ३॥

अन्वयः-हे ससेन राजँस्त्वं यथा सूर्योऽङ्गिरोभ्योऽद्रिं गोत्रं मेघं चिदिवात्रय आजौ शत्रुबलमपावृणोः वावसानस्यारिपक्षस्य सेनां नर्त्तयन्निव विमदाय वस्वाऽवहरुहतापि गातुवित्त्वं शतदुरेष्विवावृतां स्वसेनामपावृणोसि स भवान् सत्कर्त्तव्योऽसि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सेनापत्यादयो यावत्सूर्य्यवत्पराक्रमं न गृह्णीयुस्तावच्छत्रुविजयमाप्तुं न शक्नुयुः॥ ३॥

पदार्थः-हे (**ससेन**) सेना से सहित सेनाध्यक्ष! आप जैसे सूर्य (**अङ्गिरोभ्यः**) प्राणस्वरूप पवनों से (**अद्रिम्**) पर्वत और मेघों के तुल्य वर्त्तमान (**अत्रये**) जिसमें तीन अर्थात् आध्यात्मिक, आधिभौतिक और आधिदैविक दुःख नहीं है उस (**आजौ**) सङ्ग्राम में शत्रुओं के बल को (**अपावृणोः**) दूर कर देते हो (**वावसानस्य**) ढांकने वाले शत्रुपक्ष की सेना को (**नर्त्तयन्**) नचाते के समान कम्पाते हुए (**विमदाय**) विविध आनन्द के वास्ते (**वसु**) धन को (**आवहः**) अच्छे प्रकार प्राप्त कर (**उत**) और (**गातुवित्**) भूगर्भ विद्या के जानने वाले आप (**शतदुरेषु**) असंख्य मेघ के अवयवों में ढके हुए पदार्थों के समान ढकी हुई अपनी सेना को बचाते हो सो आप सत्कार के योग्य हो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सेनापति आदि जब तक वायु के सकाश से उत्पन्न हुए सूर्य के समान पराक्रमी नहीं होते, तब तक शत्रुओं को नहीं जीत सकते॥ ३॥

पुनः स कीदृशः किं कुर्यादित्युपदिश्यते॥

फिर वह किसके समान क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वम॒पाम॑पि॒धाना॑वृणो॒रपाधा॑रय॒ः पर्व॑ते॒ दानु॑म॒द्वसु॑।

वृत्रं यदिन्द्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे॥४॥

त्वम्। अपाम् अपिऽधाना। अवृणोः। अप। अधारयः। पर्वते। दानुऽमत्। वसु। वृत्रम्। यत्। इन्द्र। शवसा। अवधीः। अहिम्। आत्। इत्। सूर्यम्। दिवि। आ। अरोहयः। दृशे॥४॥

पदार्थः-(**त्वम्**) सभेश (**अपाम्**) जलानाम् (**अपिधाना**) अपिधानान्यावरणानि (**अवृणोः**) वृणुयाः (**अप**) दूरीकरणे (**अधारयः**) धारयन्। अत्र नञुपपदाद् **धारिपारि** इति शः प्रत्ययः। (**पर्वते**) मेघे (**दानुमत्**) मेघम् (**यत्**) यस्मात् (**इन्द्र**) परमैश्वर्य्यवन् (**शवसा**) बलेन (**अवधीः**) हिन्धि (**अहिम्**) सर्वत्र व्याप्तुमर्हं मेघम् (**आत्**) अनन्तरम् (**इत्**) एव (**सूर्यम्**) (**दिवि**) प्रकाशे (**आ**) समन्तात् (**अरोहयः**) रोहयसि (**दृशे**) द्रष्टुं दर्शयितुं वा॥४॥

अन्वयः-हे इन्द्र! यत्त्वमपिधाना सूर्य इव शत्रुबन्धनान्यपावृणोर्दूरीकरोषि यथायं रविः पर्वते मेघे जलं दानुमद् वस्वधारयन् सन् वृत्रं विद्युदिव शत्रूनिदवधीः किरणाः सूर्यमिव दृशे न्यायमारोहयस्तस्मात् त्वं राज्यं कर्त्तुमर्हसि॥४॥

भावार्थः-मनुष्याणां योग्यतास्ति येनेश्वरेण यः सर्वान् लोकानाकृष्यान्तरिक्षे स्थाप्य वर्षयित्वा सर्वान् प्रकाश्य च सुखानि ददातीदृशं सूर्य्यं निर्माय स्थापित इति वेदितव्यम्॥३॥

पदार्थः-हे (**इन्द्र**) जगदीश्वर! (**यम्**) जिस कारण (**त्वम्**) आप जैसे सूर्य (**अपाम्**) जलों के (**अपिधाना**) आच्छादनों को दूर करता है, वैसे शत्रुओं के बल को (**अपावृणोः**) दूर करते हो जैसे (**पर्वते**) मेघ में (**दानुमत्**) उत्तम शिखर युक्त (**वसु**) द्रव्य वा जल को (**अधारयः**) धारण करता और (**शवसा**) बल से (**अहिम्**) व्याप्त होने योग्य (**वृत्रम्**) मेघ को (**अवधीः**) मारता है वैसे शत्रुओं को छिन्न-भिन्न करते हो और जैसे किरणसमूह (**सूर्यम्**) सूर्य को (**अरोहयः**) अच्छे प्रकार स्थापित करते हैं, वैसे न्याय के प्रकाश से युक्त हैं, इससे राज्य करने के योग्य हैं॥४॥

भावार्थः-मनुष्यों को योग्य है कि जिस ईश्वर ने मेघ के द्वार का छेदन कर, आकर्षण कर, अन्तरिक्ष में स्थापन, वर्षा और सबको प्रकाशित करके सुखों को देता है, उस सूर्य को ईश्वर ने रच कर स्थापन किया है, ऐसा जानें॥४॥

पुनः सभाध्यक्षगुणा उपदिश्यन्ते॥

फिर सभाध्यक्षादि के गुणों का उपदेश अगले मन्त्र में किया है॥

त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुप्तावजुह्वत।

त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ॥५॥९॥

त्वम्। मायाभिः। अप। मायिनः। अधमः। स्वधाभिः। ये। अधि। शुप्तौ। अजुह्वत। त्वम्। पिप्रोः। नृऽमनः। प्र। अरुजः। पुरः। प्र। ऋजिश्वानम्। दस्युऽहत्येषु। आविथ॥५॥

पदार्थः-(**त्वम्**) सेनाध्यक्षः (**मायाभिः**) प्रज्ञानोपायैः। **मायेति प्रज्ञानामसु पठितम्।** (निघं०३.९) (**अप**) दूरीकरणे (**मायिनः**) निन्दिता माया प्रज्ञा विद्यते येषां तान्मायिनः (**अधमः**) धम कम्पय (**स्वधाभिः**) अन्नादिभिरुदकादिभिर्वा। **स्वधेत्यन्ननामसु पठितम्।** (निघं०२.७) **उदकनामसु पठितम्।** (निघं०१.१२) (**ये**) चोरदस्व्वादयः परस्वापहर्त्तारः (**अधि**) उपरिभावे (**शुप्तौ**) शयने कृते सति। अत्र वर्णव्यत्ययेन शः। (**अजुह्वत**) स्पर्द्धन्ते (**त्वम्**) उक्तार्थः (**पिप्रोः**) न्यायपूर्त्तेः कर्त्रोः (**नृमनः**) नृषु मनो ज्ञानं यस्य तत्सम्बुद्धौ (**प्र**) प्रकृष्टार्थे (**अरुजः**) रुज (**पुरः**) अग्रतः (**प्र**) प्रकृष्टार्थे (**ऋजिश्वानम्**) य ऋजीन् ज्ञानादिसरलान् गुणानश्नुते तं धार्मिकं मनुष्यम्। अत्र **इक् कृष्यादिभ्यः।** (अष्टा०वा०३.३.१०८) इत्यृजधातोरिक्। अशूङ् धातोर्ङ्वनिप्। अकारलोपश्च। (**दस्युहत्येषु**) दस्यूनां हत्या हननानि येषु सङ्ग्रामादिव्यवहारेषु (**आविथ**) रक्ष॥५॥

अन्वयः-हे नृमणस्त्वं पुरः स्वधाभिः पिप्रोराज्ञामृजिश्वानं चाविथ ये मायिनो मायाभिः शुप्तावधि परपदार्थान्नजुह्वत तान् दस्यूनपाधमो दूरीकुरु दस्युहत्येषु प्रारुजः प्रभन्नान् कुरु॥५॥

भावार्थः-यः सभाद्यध्यक्षः स्वसत्यन्यायेन श्रेष्ठदुष्टकर्मकारिभ्यो यथावत्फलानि दत्वा रक्षति, स एवाऽत्र मान्यभाग्भवेत्॥५॥

पदार्थः-हे (**नृमणः**) मनुष्यों में मन रखने वाले सभाध्यक्ष! (**त्वम्**) आप (**पुरः**) प्रथम (**स्वधाभिः**) अन्नादि पदार्थों से (**पिप्रोः**) न्याय को पूर्ण करने हारे न्यायाधीशों की आज्ञा और (**ऋजिश्वानम्**) ज्ञान आदि सरल गुणों से युक्त की (**प्राविथ**) रक्षा कर और जो (**मायिनः**) निन्दित बुद्धि वाले (**मायाभिः**) कपट छलादि से वा (**शुप्तौ**) सोने के उपरान्त पराये पदार्थों को (**अजुह्वत**) हरण करते हैं, उन डाकू आदि दुष्टों को (**अपाधमः**) दूर कीजिये और उन को (**दस्युहत्येषु**) डाकुओं के हननरूप संग्रामों में (**प्रारुजः**) छिन्न-भिन्न कर दीजिये॥५॥

भावार्थः-जो सभाध्यक्ष अपने सत्यरूपी न्याय से उत्तम वा दुष्टकर्मों के करने वाले मनुष्यों के लिये फलों को देकर दोनों की यथायोग्य रक्षा करता है, वही इस जगत् में सत्कार के योग्य होता है॥५॥

पुनरपि सभाध्यक्ष गुणा उपदिश्यन्ते॥

फिर भी अगले मन्त्र में सभाध्यक्ष के गुणों का उपदेश किया है॥

त्वं कुत्सं शुष्णहत्येष्वाविथारन्धयोऽतिथिग्वाय शम्बरम्।
महान्तं चिदर्बुदं नि क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे॥६॥

त्वम्। कुत्सम्। शुष्णऽहत्येषु। आविथ। अरन्धयः। अतिथिऽग्वाय। शम्बरम्। महान्तम्। चित्। अर्बुदम्। नि। क्रमीः। पदा। सनात्। एव। दस्युऽहत्याय। जज्ञिषे॥६॥

पदार्थः-(**त्वम्**) सभाध्यक्षः (**कुत्सम्**) वज्रादिशस्त्रसमूहम् (**शुष्णहत्येषु**) शुष्णानां बलानां हत्या हननं येषु संग्रामेषु। **शुष्णमिति बलनामसु पठितम्।** (निघं०२.९) (**आविथ**) रक्ष (**अरन्धयः**) हिन्धि (**अतिथिग्वाय**) अतिथीनां गमनाय। अत्रातिथ्युपपदाद् गम् धातोः बाहुलकाद् औणादिको ड्वः प्रत्ययः। (**शम्बरम्**) बलम्। **शम्बरमिति बलनामसु पठितम्।** (निघं०२.९) (**महान्तम्**) महागुणविशिष्टम् (**चित्**) इव (**अर्बुदम्**) असङ्ख्यातगुणविशिष्टम् (**नि**) नितराम् (**क्रमीः**) क्रमस्व (**पदा**) पादेन (**सनात्**) सम्भजनात् (**एव**) निश्चयार्थे (**दस्युहत्याय**) दस्यूनां हननं यस्मिन् व्यवहारे तस्मै (**जज्ञिषे**) जातोऽसि जातोऽस्ति वा॥६॥

अन्वयः-हे विद्वन् वीर! यतस्त्वं पदा पदाक्रान्तं शत्रुसमूहं चिदिव शुष्णहत्येषु युद्धेषु महान्तं कुत्सं धृत्वा प्रजा आविथ शत्रूनरन्धयोऽतिथिग्वाय शुद्धमार्गायार्बुदं शम्बरं बलं निक्रमीः सनात्पदा दस्युहत्यायैव जज्ञिषे तस्मादस्माभिः सत्कर्त्तव्योऽसि॥६॥

भावार्थः-सभाद्यध्यक्षादिभिर्यथा सूर्यस्तथा शत्रून् हत्वा श्रेष्ठान् पालयित्वा शुद्धान् मार्गान् कृत्वाऽसंख्यातं बलं धृत्वा शत्रूणां हननाय प्रभावो वर्द्धनीयः॥६॥

पदार्थः-हे विद्वन् शूरवीर मनुष्य! जिससे (**त्वम्**) तू (**पदा**) पाद से आक्रान्त हुए शत्रुसमूह को मारने वाले के (**चित्**) समान (**शुष्णहत्येषु**) शत्रुओं के बलों के हनने योग्य व्यवहारों में (**महान्तम्**) महागुण विशिष्ट (**कुत्सम्**) शस्त्रवर व्रज को धारण करके प्रजा की (**आविथ**) रक्षा करते और दुष्टों को (**अरन्धयः**) मारते हो (**अतिथिग्वाय**) अतिथियों के जाने-आने को शुद्ध मार्ग के लिये (**अर्बुदम्**) असंख्यात गुणविशिष्ट (**शम्बरम्**) बल को (**नि क्रमीः**) क्रम से बढ़ाते हो (**सनात्**) अच्छे प्रकार सेवन करने से (**पदा**) पदाक्रान्त शत्रुसेना को नाश करते हो (**दस्युहत्याय**) शत्रुओं के मारने रूप व्यवहार के लिये (**एव**) ही (**जज्ञिषे**) उत्पन्न हुए हो, इससे हम लोग आप का सत्कार करते हैं॥६॥

भावार्थः-सभाध्यक्षादिकों को योग्य है कि जैसे शत्रुओं को मार, श्रेष्ठों की रक्षा, मार्गों को शुद्ध और असंख्यात बल को धारण कर शत्रुओं के मारने के लिये अत्यन्त प्रभाव बढ़ावें॥६॥

पुनः सभाद्यध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सभा आदि का अध्यक्ष कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वे विश्वा तविषी सध्र्यङ्धिता तव राधः सोमपीथाय हर्षते।
तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या॥७॥

त्वे इति। विश्वा। तविषी। सध्र्यक्। हिता। तव। राधः। सोमऽपीथाय। हर्षते। तव। वज्रः। चिकिते। बाह्वोः। हितः। वृश्च। शत्रोः। अव। विश्वानि। वृष्ण्या॥७॥

पदार्थः-(**त्वे**) त्वयि (**विश्वा**) अखिला (**तविषी**) बलयुक्ता सेना (**सध्र्यक्**) सह सेवमानम् (**हिता**) हितकारिणी (**तव**) (**राधः**) धनम् (**सोमपीथाय**) सुखकारकपदार्थभोगाय (**हर्षते**) हर्षति। अत्र

व्यत्ययेन आत्मनेपदम्। **(तव)** **(वज्रः)** शस्त्रसमूहः **(चिकिते)** चिकित्सति **(बाह्वोः)** भुजयोः **(हितः)** धृतः **(वृश्च)** छिन्धि **(शत्रोः)** **(अव)** रक्ष **(विश्वानि)** सर्वाणि **(वृष्ण्या)** वृषभ्यो वीरेभ्यो हितानि बलानि॥७॥

अन्वयः-हे विद्वँस्त्वे त्वयि या विश्वा तविषी हिता सध्र्यग्राधः सोमपीथाय हर्षत यस्तव बाह्वोर्हितो वज्रो येन भवान् चिकिते सुखानि ज्ञापयति तेनाऽस्माकं विश्वानि वृष्ण्या अव शत्रोर्बलं वृश्च॥७॥

भावार्थः-यदि च श्रेष्ठेषु बलं जायते तर्हि सर्वेषां सुखं वर्द्धेत, यदि दुष्टेषु बलमुत्पद्येत तर्हि सर्वेषां दुःखं वर्द्धेत, तस्माच्छ्रेष्ठानां सुखबलवृद्धिर्दुष्टानां बलहानिर्नित्यं कार्येति॥७॥

पदार्थः-हे विद्वन् मनुष्य! **(त्वे)** आप में जो **(विश्वा)** सब **(तविषी)** बल **(हिता)** स्थापित किया हुआ **(सध्र्यक्)** साथ सेवन करने वाला **(राधः)** धन **(सोमपीथाय)** सुख करने वाले पदार्थों के भोग के लिये **(हर्षते)** हर्षयुक्त करता है, जो **(तव)** आपके **(बाह्वोः)** भुजाओं में **(हितः)** धारण किया **(वज्रः)** शस्त्रसमूह है, जिससे आप **(चिकिते)** सुखों को जानते हो, उससे हम लोगों के **(विश्वानि)** सब **(वृष्ण्या)** वीरों के लिये हित करने वाले बल की **(अव)** रक्षा और **(शत्रोः)** शत्रु के बल का नाश कीजिये॥७॥

भावार्थः-जो श्रेष्ठों में बल उत्पन्न हो तो उससे सब मनुष्यों को सुख होवे, जो दुष्टों में बल होवे तो उससे सब मनुष्यों को दुःख होवे, इससे श्रेष्ठों के सुख की वृद्धि और दुष्टों के बल की हानि निरन्तर करनी चाहिये॥७॥

पुनः स किं कुर्य्यादित्युपदिश्यते॥

फिर वह सभाध्यक्ष क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्।
शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन॥८॥

वि। जानीहि। आर्यान्। ये। च। दस्यवः। बर्हिष्मते। रन्धय। शासत्। अव्रतान्। शाकी। भव। यजमानस्य। चोदिता। विश्वा। इत्। ता। ते। सधऽमादेषु। चाकन॥८॥

पदार्थः-(**वि**) विशेषार्थे **(जानीहि)** विद्धि **(आर्य्यान्)** धार्मिकानाप्तान् विदुषः सर्वोपकारकान् मनुष्यान् **(ये)** वक्ष्यमाणाः **(च)** समुच्चये **(दस्यवः)** परपीडका मूर्खा धर्मरहिता दुष्टा मनुष्याः **(बर्हिष्मते)** बर्हिषः प्रशस्ता ज्ञानादयो गुणा विद्यन्ते यस्मिन् व्यवहारे तन्निष्पत्तये **(रन्धय)** हिंसय **(शासत्)** शासनं कुर्वन्। **(अव्रतान्)** सत्यभाषणादिरहितान् **(शाकी)** प्रशस्तः शाकः शक्तिर्विद्यते यस्य सः **(भव)** निर्वर्त्तस्व **(यजमानस्य)** यज्ञनिष्पादकस्य **(चोदिता)** प्रेरकः **(विश्वा)** सर्वाणि **(इत्)** एव **(ता)** तानि **(ते)** तव **(सधमादेषु)** सुखेन सह वर्त्तमानेषु स्थानेषु **(चाकन)** कामये। अत्र कनधातोर्वर्त्तमाने लिट् **तुजादीनां दीर्घोऽभ्यासस्य** (अष्टा०६.१.७) इत्यभ्यासदीर्घत्वं च॥८॥

अन्वयः-हे मनुष्य! त्वं बर्हिष्मत आर्य्यान् विजानीहि ये दस्यवः सन्ति ताँश्च विदित्वा रन्धयाऽव्रतान् शासत् यजमानस्य चोदिता सन् शाकी भव यतस्ते तवोपदेशेन सङ्गेन वा सधमादेषु ता तानि विश्वा विश्वान्येतानि सर्वाणि कर्माणीदेवाहं चाकन॥८॥

भावार्थः-मनुष्यैर्दस्युस्वभावं विहायाऽऽर्य्यस्वभावयोगेन नित्यं भवितव्यम्। त आर्य्या भवितुमर्हन्ति ये सद्विद्यादिप्रचारेण सर्वेषामुत्तमभोगसिद्धयेऽधर्मदुष्टनिवारणाय च सततं प्रयतन्ते न खलु कश्चिदार्यसङ्गाध्ययनोपदेशै- र्विना यथावद्विद्वान् धर्मात्माऽऽर्य्यस्वभावो भवितुं शक्नोति, तस्मात् किल सर्वैरुत्तमानि गुणकर्माणि सेवित्वा दस्युकर्म्माणि हित्वा सुखयित्वम्॥८॥

पदार्थः-हे मनुष्य! तू **(बर्हिष्मते)** उत्तम सुखादि गुणों के उत्पन्न करने वाले व्यवहार की सिद्धि के लिये **(आर्य्यान्)** सर्वोपकारक धार्मिक विद्वान् मनुष्यों को **(विजानीहि)** जान और **(ये)** जो **(दस्यवः)** परपीड़ा करने वाले अधर्मी दुष्ट मनुष्य हैं, उनको जान कर **(बर्हिष्मते)** धर्म की सिद्धि के लिये **(रन्धय)** मार और उन **(अव्रतान्)** सत्यभाषणादि धर्मरहित मनुष्यों को **(शासत्)** शिक्षा करते हुए **(यजमानस्य)** यज्ञ के कर्ता का **(चोदिता)** प्रेरणाकर्त्ता और **(शाकी)** उत्तम शक्तियुक्त सामर्थ्य को **(भव)** सिद्ध कर, जिससे **(ते)** तेरे उपदेश वा सङ्ग से **(सधमादेषु)** सुखों के साथ वर्त्तमान स्थानों में **(ता)** उन **(विश्वा)** सब कर्मों को सिद्ध करने की **(इत्)** ही मैं **(चाकन)** इच्छा करता हूं॥८॥

भावार्थः-मनुष्यों को दस्यु अर्थात् दुष्ट स्वभाव को छोड़ कर आर्य्य अर्थात् श्रेष्ठ स्वभावों के आश्रय से वर्त्तना चाहिये। वे ही आर्य हैं कि जो उत्तम विद्यादि के प्रचार से सबके उत्तम भोग की सिद्धि और अधर्मी दुष्टों के निवारण के लिये निरन्तर यत्न करते हैं। निश्चय करके कोई भी मनुष्य आर्य्यों के संग, उनसे अध्ययन वा उपदेशों के विना यथावत् विद्वान्, धर्मात्मा, आर्यस्वभाव युक्त होने को समर्थ नहीं हो सकता। इससे निश्चय करके आर्य के गुण और कर्मों को सेवन कर निरन्तर सुखी रहना चाहिये॥८॥

पुनः स किं कुर्वन् किं कुर्य्यादित्युपदिश्यते॥

फिर वह क्या करके किस को करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अनु॑व्रताय र॒न्धय॒न्नप॑व्रता॒नाभू॒भि॒रिन्द्रः॑ श्न॒थय॒न्ना॑भुवः।
वृ॒द्धस्य॑ चि॒द्वर्ध॑तो॒ द्यामि॑नक्षत॒: स्तवा॑नो व॒म्रो वि ज॑घान सं॒दिहः॑॥९॥

अनु॑ऽव्रताय। र॒न्धय॑न्। अप॑ऽव्रतान्। आ॒ऽभूभिः॑। इन्द्रः॑। श्न॒थय॑न्। अना॑भुवः। वृ॒द्धस्य॑। चि॒त्। वर्ध॑तः। द्याम्। इ॒न॑क्षतः। स्तवा॑नः। व॒म्रः। वि। ज॒घा॒न॒। स॒म्ऽदिहः॑॥९॥

पदार्थः-**(अनुव्रताय)** अनुगतानि धर्म्याणि व्रतानि यस्य तस्मै **(रन्धयन्)** सेनया सामादिभिर्वा हिंसयन् **(अपव्रतान्)** अपगतानि दुष्टानि मिथ्याभाषणादीनि व्रतानि कर्माणि येषान्तान् दस्यून् **(आभूभिः)** समन्ताद्भवन्ति वीरा यासु प्रशासनक्रियासु ताभिः **(इन्द्रः)** परमैश्वर्यवान् सभाशालासेनान्यायाधीशः

(श्नथयन्) हिंसयन् **(अनाभुवः)** ये समन्ताद्धर्माचरणे भवन्ति त आभुवो नाभुवोऽनाभुवस्तान् **(वृद्धस्य)** ज्ञानादिगुणैः श्रेष्ठस्य **(चित्)** इव **(वर्द्धतः)** यो गुणैर्दोषैर्वा वर्द्धते तस्य **(द्याम्)** किरणप्रकाशवद्विद्याप्रकाशम् **(इनक्षतः)** व्याप्नुवतः। अयं निपातेकारोपपदस्य नक्षधातोः प्रयोगः। **(स्तवानः)** यः स्तौति सः **(वम्रः)** उद्गिरकस्त्यक्ता **(वि)** विशेषे **(जघान)** हन्ति **(संदिहः)** संदिहत्यसौ सन्दिहः॥९॥

अन्वयः-मनुष्यैर्य इन्द्रः परमविद्याद्यैश्वर्यवान् मनुष्य आभूभिः सह वर्त्तमानोऽनुव्रतायार्यायाव्रतान् दुष्टान् दस्यून् रन्धयन्ननाभुवः श्नथयन् शिथिली कुर्वन्निनक्षतो वर्धतो वृद्धस्य स्तवानो वम्रोऽधर्मस्योद्गिरकः सन्दिहो द्यां चिदिव प्रकाशं कुर्वन् सूर्य्य इव विद्याप्रचारं विस्तारयन् दुष्टान् विजघान विशेषेण हन्ति स एव कुलभूषकोऽस्ति तं सर्वाधिपतित्वेऽधिकृत्य राजधर्मः पालनीयः॥९॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्धार्मिकैर्भूत्वा सर्वान् मनुष्यानविद्यातो निवर्त्य विद्यावतः कृत्वा धर्माऽधर्मौ संदिह्य निश्चित्य च धर्मग्रहणमधर्मत्यागश्च कार्य्यः कारयितव्यश्च। सदैवार्य्याणां सङ्गं कृत्वा दस्यूनां च त्यक्त्वा सर्वोत्तमायां व्यवस्थायां वर्त्तितव्यमिति॥९॥

पदार्थः-मनुष्यों को उचित है कि जो **(इन्द्रः)** परम विद्या आदि ऐश्वर्य्य, सभा, शाला, सेना और न्याय का अध्यक्ष **(आभूभिः)** उत्तम वीरों को शिक्षा करने वाली क्रियाओं के साथ वर्त्तमान **(अनुव्रताय)** अनुकूल धर्म युक्त व्रतों के धारण करने वाले आर्य मनुष्य के लिये **(अपव्रतान्)** मिथ्या भाषणादि दुष्ट कर्मयुक्त डाकू मनुष्यों को **(रन्धयन्)** अति ताड़ना करता हुआ **(अनाभुवः)** जो धर्मात्माओं से विरुद्ध मनुष्य हैं, उन पापियों को **(श्नथयन्)** शिथिल करता **(इनक्षतः)** व्याप्तियुक्त **(वर्धतः)** गुण दोषों से बढ़ने वाले **(वृद्धस्य)** ज्ञानादि गुणों से युक्त श्रेष्ठ की **(स्तवानः)** स्तुति का कर्त्ता **(वम्रः)** अधर्म का नाश **(संदिहः)** धर्माऽधर्म को संदेह से निश्चय करने वाला **(द्याम्)** सूर्य प्रकाश के **(चित्)** समान विद्या के प्रकाश को विस्तारयुक्त करता हुआ दुष्टों को **(विजघान)** विशेष करके मारता है, उसी कुल को सुभूषित करने वाले आर्य मनुष्य को सर्वाधिपतिपन में स्वीकार कर राजधर्म का यथावत् पालन करें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब धार्मिक मनुष्यों को उचित है कि सब मनुष्यों को अविद्या से निवारण और विद्या पढ़ा विद्वान् करके धर्माऽधर्म के विचार पूर्वक निश्चय से धर्म का ग्रहण और अधर्म का त्याग करें। सदैव आर्यों का सङ्ग डाकुओं के सङ्ग का त्याग कर सबसे उत्तम व्यवस्था में वर्त्तें॥९॥

पुनः सभाध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

तक्षद्यत्त॑ उ॒शना॒ सह॑सा॒ सहो॒ वि रोद॑सी मु॒ज्मना॑ बाधते॒ शवः॑।
आ त्वा॒ वात॑स्य नृ॒मणो॑ मनो॒युज॒ आ पूर्य॑माणमवहन्न॒भि श्रवः॑॥ १०॥ १०॥

तक्षत्। यत्। ते। उशना। सहसा। सहः। वि। रोदसी इति। मज्मना। बाधते। शवः। आ। त्वा। वातस्य। नृऽमनः। मनःऽयुजः। आ। पूर्यमाणम्। अवहन्। अभि। श्रवः॥ १०॥

पदार्थः-(**तक्षत्**) तनूकरोति (**यत्**) (**ते**) तव (**उशना**) कामयमानः (**सहसा**) सामर्थ्येनाकर्षणेन वा (**सहः**) बलं सहनम् (**वि**) विशेषार्थे (**रोदसी**) द्यावापृथिव्यौ (**मज्मना**) शुद्धेन बलेन। **मज्मेति बलनामसु पठितम्।** (निघं०२.९) (**बाधते**) विलोडयति (**शवः**) बलम् (**आ**) समन्तात् (**त्वा**) त्वाम् (**वातस्य**) बलिष्ठस्य वायोरिव (**नृमणः**) नृषु नयनकारिषु मनो यस्य तत्सम्बुद्धौ (**मनोयुजः**) ये मनसा युज्यन्ते ते भृत्याः (**आ**) समन्तात् (**पूर्य्यमाणम्**) न्यूनतारहितम् (**अवहन्**) प्राप्नुयुः (**अभि**) आभिमुख्ये (**श्रवः**) श्रवणमन्नं वा॥ १०॥

अन्वयः-हे नृमणो विद्वन्नुशना! भवान् सहसा शत्रूणां सहो हत्वा सूर्यो रोदसी भूमिप्रकाशाविव मज्मना स्वकीयेन शुद्धेन बलेन शवः शत्रूणां बलं विबाधत आतक्षच्च। मनोयुजो भृत्यास्त्वा त्वामाश्रित्य ते तव वातस्यापूर्यमाणं श्रवोऽभ्यवहन् समन्तात् प्राप्नुयुः॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि विदुषा सेनाध्यक्षेण विना पृथिवीराज्यव्यवस्था शत्रूणां बलहानिर्विद्यासद्गुणप्रकाशा उत्तमान्नादिप्राप्तिश्च जायते॥ १०॥

पदार्थः-हे (**नृमणाः**) मनुष्यों में मन देने वाले (**उशना**) कामयमान विद्वान् आप! (**सहसा**) अपने सामर्थ्य से शत्रुओं के (**सहः**) बल का हनन कर के जैसे सूर्य (**रोदसी**) भूमि और प्रकाश को करता है वैसे (**मज्मना**) शुद्ध बल से (**शवः**) शत्रुओं के बल को (**विबाधते**) विलोड़न वा (**आतक्षत्**) छेदन करते हो और (**ते**) आप के (**मनोयुजः**) मन से युक्त होने वाले भृत्य (**त्वा**) आप का आश्रय ले के (**ते**) आप के (**वातस्य**) बलयुक्त वायु के सम्बन्धी (**आपूर्यमाणम्**) न्यूनतारहित (**श्रवः**) श्रवण और अन्नादि को (**अभ्यावहन्**) प्राप्त होवें॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् सभाध्यक्ष के विना पृथिवी के राज्य की व्यवस्था शत्रुओं के बल की हानि विद्यादि सद्गुणों का प्रकाश और उत्तम अन्नादि की प्राप्ति नहीं होती॥ १०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वड्कू वड्कुतराधि तिष्ठति।
उग्रो ययिं निरपः स्रोतसासृजद् वि शुष्णस्य दृंहिता ऐरयत् पुरः॥ ११॥

मन्दिष्ट। यत्। उशने। काव्ये। सचा। इन्द्रः। वड्कू इति। वड्कुऽतरा। अधि। तिष्ठति। उग्रः। ययिम्। निः। अपः। स्रोतसा। असृजत्। वि। शुष्णस्य। दृंहिताः। ऐरयत्। पुरः॥ ११॥

पदार्थः-(**मन्दिष्ट**) अतिशयेन मन्दिता तत्सम्बुद्धौ (**यत्**) यस्मिन् (**उशने**) कामयमाने (**काव्ये**) कवीनां कर्मणि (**सचा**) विज्ञानप्रापकेन गुणसमूहेन (**इन्द्रः**) सभाध्यक्षः (**वङ्कू**) कुटिलगती शत्रूदासीनौ (**वङ्कुतरा**) अतिशयेन कुटिलौ (**अधि**) ईश्वरोपरिभावयोः (**तिष्ठति**) प्रवर्त्तते (**उग्रः**) दुष्टानां हन्ता (**ययिम्**) याति सोऽयं ययिर्मेघस्तम् (**निः**) नितराम् (**अपः**) जलानीव प्राणान् (**स्रोतसा**) प्रसवितेन (**असृजत्**) सृजति (**वि**) विशिष्टार्थे (**शुष्णस्य**) बलस्य (**दृंहिता**) वर्धिकाः क्रियाः (**ऐरयत्**) गमयति (**पुरः**) पूर्वम्॥११॥

अन्वयः-हे मन्दिष्ट! य उग्र इन्द्रः सभाध्यक्षो भवान् सूर्य्यः स्रोतसाऽपि इव यद्वङ्कू कुटिलौ वङ्कुतरौ शत्रूदासीनावधितिष्ठति यथा सविता सचा ययिं मेघं निरसृजत् तथा शुष्णस्य बलस्य दृंहिताः क्रियाः पुरो व्यैरयद् विविधतया प्रेरते तथा त्वं भव॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यः कविः सर्वशास्त्रवेत्ता कुटिलताविनाशको दुष्टानामुपर्युग्रः श्रेष्ठानामुपरि कोमलः सर्वथा बलवर्द्धकः पुरुषोऽस्ति, स एव सभाधिकारादिषु योजनीयः॥११॥

पदार्थः-हे (**मन्दिष्ट**) अतिशय करके स्तुति करने वाले जो (**उग्रः**) दुष्टों को मारने वाले (**इन्द्रः**) सभाध्यक्ष! आप जैसे सूर्य (**स्रोतसा**) स्रोताओं से (**आपः**) जलों को बहाता है, वैसे (**उशने**) अतीव सुन्दर (**यत्**) जिस (**काव्ये**) कवियों के कर्म में जो (**वङ्कू**) कुटिल (**वङ्कुतरा**) अतिशय करके कुटिल चाल वाले शत्रु और उदासी मनुष्यों के (**अधितिष्ठति**) राज्य में अधिष्ठाता होते हो जैसे सविता (**सचा**) अपने गुणों से (**ययिम्**) मेघ को (**निरसृजत्**) नित्य सर्जन करता है, वैसे (**शुष्णस्य**) बल की (**दृंहिता**) वृद्धि कराने हारी क्रियाओं को (**पुरः**) पहिले (**व्यैरयत्**) प्राप्त करते हो, सो आपको सत्कार करने योग्य हो॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि जो कवि सब शास्त्र का वक्ता, कुटिलता का विनाश करने, दुष्टों में कठोर, श्रेष्ठों में कोमल, सर्वथा बल को बढ़ाने वाला पुरुष है, उसी को सभा आदि के अधिकारों में स्वीकार करें॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ स्मा॒ रथं॑ वृष॒पाणे॑षु तिष्ठसि शार्या॒तस्य॒ प्रभृ॑ता॒ येषु॒ मन्द॑से।
इन्द्र॒ यथा॑ सु॒तसो॑मेषु चा॒कनो॑ऽनु॒र्वाणं॒ श्लोक॒मा रो॑हसे दि॒वि॥१२॥

आ। स्म॒। रथ॑म्। वृ॒ष॒ऽपाने॑षु। ति॒ष्ठ॒सि॒। शा॒र्या॒तस्य॑। प्रऽभृ॑ताः। येषु॑। मन्द॑से। इन्द्र॑। यथा॑। सु॒तऽसो॑मेषु। चा॒कनः॑। अ॒नु॒र्वाण॑म्। श्लोक॑म्। आ। रो॒ह॒से॒। दि॒वि॥१२॥

पदार्थः-(**आ**) अभितः (**स्म**) एव (**रथम्**) विमानादिकम् (**वृषपाणेषु**) ये वृषन्ति पोषयन्ति ते वृषाः सोमादयः पदार्थास्तेषां पानेषु (**तिष्ठसि**) (**शार्य्यातस्य**) यो वीरसमूहं शरितुं हिंसितुं योग्यान् समन्तान्निरन्तरमतति व्याप्नोति तस्य मध्ये। अत्र शृधातोर्ण्यत् अतधातोरच् प्रत्ययः। (**प्रभृताः**) प्रकृष्टतया धृताः (**येषु**) उत्तमगुणेषु पदार्थेषु। (**मन्दसे**) हर्षसि (**इन्द्र**) उत्कृष्टैश्वर्य्ययुक्त (**यथा**) येन प्रकारेण (**सुतसोमेषु**) सुता निष्पादिताः सोमा उत्तमा रसा येभ्यस्तेषु (**चाकनः**) कामयसे (**अनर्वाणम्**) अग्न्याद्यश्वसहितं पश्वाद्यश्वरहितम्। **अर्वेत्यश्वनामसु पठितम्।** (निघं०१.१४) (**श्लोकम्**) सर्वावयवैः संहितां वाचम् (**आ**) समन्तात् (**रोहसे**) (**दिवि**) द्योतनात्मके सूर्यप्रकाशयुक्तेऽन्तरिक्ष इव न्यायप्रकाशे॥१२॥

अन्वयः-हे इन्द्र विद्वन् सभाध्यक्ष! यस्मात्त्वं यथा विद्वांसः पदार्थविद्यां सम्यगेत्य सुखानि प्राप्नुवन्ति ये शार्य्यातस्य येषु सुतसोमेषु वृषपाणेषु व्यवहारेषु प्रभृतास्तथैतान् प्राप्य मन्दसेऽनर्वाणं रथं श्लोकमातिष्ठसि चाकन दिव्यारोहसे तस्मात्त्वं योग्योऽसि॥१२॥

भावार्थः-अत्रोपमालङ्कारः। नहि विमानादियानैर्विद्वत्सङ्गेन च विना कस्यचित्सुखं सम्भवति तस्माद्विद्वत्सभां पदार्थज्ञानोपयोगौ च कृत्वा सर्वैरानन्दितव्यम्॥१२॥

पदार्थः-हे (**इन्द्र**) उत्तम ऐश्वर्य वाले सभाध्यक्ष! जिससे तू (**यथा**) जैसे विद्वान् लोग पदार्थ विद्या को सिद्ध करके सुखों को प्राप्त होते और जो (**शार्यातस्य**) वीर पुरुष के (**येषु**) जिन (**सुतसोमेषु**) उत्तम रसों से युक्त (**वृषपाणेषु**) पुष्टि करने वाले सोमलतादि पदार्थों अर्थात् वैद्यक शास्त्र की रीति से अति श्रेष्ठ बनाये हुए उत्तम व्यवहारों में (**प्रभृताः**) धारण किये हों, वैसे उनको प्राप्त होके (**मन्दसे**) आनन्दित होने और (**अनर्वाणम्**) अग्नि आदि अश्वसहित, पशु आदि अश्वरहित (**श्लोकम्**) सब अवयवों से सहित रथ के मध्य (**स्म**) ही (**आतिष्ठसि**) स्थित और उस की (**चाकनः**) इच्छा करते हैं और (**दिवि**) प्रकाश रूप सूर्य्यलोक में (**आरोहसे**) आरोहण करते हो (**स्म**) इसलिये आप योग्य हो॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। विमानादि यान वा विद्वानों के सङ्ग के विना किसी मनुष्य को सुख नहीं हो सकता। इससे विद्वानों के सभा वा पदार्थों के ज्ञान के उपयोग से सब मनुष्यों को आनन्द में रहना चाहिये॥१२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अदॱदाॱ अभीॱ महॱते वॱचॱस्यवॱ कॱक्षीवॱते वृचॱयामिॱन्द्र सुन्वॱते।
मेनाॱभवो वृषणॱश्वस्यॱ सुक्रतॱो विश्वेत्ता तॱे सवॱनेषु प्रॱवाच्याॱ॥ १३॥

अदॱदाः। अभीॱम्। महॱते। वॱचॱस्यवॱ। कॱक्षीवॱते। वृचॱयाम्। इन्द्र। सुन्वॱते। मेनाॱ। अभॱवः। वृषणॱश्वस्यॱ। सुक्रतॱो इतॱि सुऽक्रतो। विश्वाॱ। इत्। ता। तॱे। सवॱनेषु। प्रऽवाच्याॱ॥ १३॥

पदार्थः-**(अददाः)** देहि **(अर्भाम्)** अल्पामपि शिल्पक्रियां वाचं वा **(महते)** महागुणविशिष्टाय **(वचस्यवे)** आत्मनो वचः शास्त्रोपदेशमिच्छवे **(कक्षीवते)** कक्षाः प्रशस्ताङ्गुलय इव विद्या प्रान्ता विद्यन्ते यस्य तस्मै। **कक्षा इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५) **(वृचयाम्)** छेदनभेदनप्रकारम् **(इन्द्र)** शिल्पक्रियाविद्विद्वन्। **(सुन्वते)** शिल्पविद्यानिष्पादकाय **(मेना)** वाणी। **मेनेति वाङ्नामसु पठितम्।** (निघं०१.११) **(अभवः)** भव **(वृषणश्वस्य)** वृषणो वृष्टिहेतवो यानगमयितारो वाऽश्वा यस्य तस्य। **वृषण्वस्वश्वयोः।** (अष्टा०वा०१.४.१८) अनेन भसंज्ञाकरणान्नलोपो न, णत्वं च भवति **(सुक्रतो)** शोभनाः क्रतवः प्रज्ञाः कर्माणि वा यस्य तत्सम्बुद्धौ **(विश्वा)** सर्वाणि **(इत्)** एव **(ता)** तानि **(ते)** तव **(सवनेषु)** सुन्वन्ति यैः कर्मभिस्तेषु **(प्रवाच्या)** प्रकृष्टतया वक्तं योग्या॥१३॥

अन्वयः-हे सुक्रतो इन्द्र! शिल्पविद्यादिद्वँस्त्वं वचस्यवे महते सुन्वते कक्षीवते जनाय मां वृचयामर्भां स्वल्पामपि क्रियामददाः या सवनेषु प्रवाच्या मेना वाक् क्रिया वा वृषणश्वस्य शिल्पक्रियामिच्छोस्ते यानि विश्वा कार्य्याणि सन्ति, ता इदेव संसाधितुं समर्थोऽभवो भव॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वद्भिरग्न्यादिपदार्थविद्यादानं कृत्वा सर्वेभ्यो हितं निष्पादनीयमिति॥१३॥

पदार्थः-हे **(सुक्रतो)** शोभनकर्म युक्त **(इन्द्र)** शिल्प विद्या को जानने वाले विद्वान्। तू **(वचस्यवे)** अपने को शास्त्रोपदेश की इच्छा करने वा **(महते)** महागुण विशिष्ट **(सुन्वते)** शिल्पविद्या को सिद्ध करने **(कक्षीवते)** विद्याप्रान्त अङ्गुली वाले मनुष्य के लिये जिस **(वृचयाम्)** छेदन-भेदनरूप **(अर्भाम्)** थोड़ी भी शिल्पक्रिया को **(अददाः)** देते हो **(सवनेषु)** प्रेरणा करने वाले कर्मों में **(प्रवाच्या)** अच्छे प्रकार कथन करने योग्य **(मेना)** वाणी **(वृषणश्वस्य)** शिल्पक्रिया की इच्छा करने वाले **(ते)** आपके **(विश्वा)** सब कार्य्य हैं **(ता)** **(इत्)** उन ही के सिद्ध करने को समर्थ **(अभवः)** हूजिये॥१३॥

भावार्थः-विद्वान् मनुष्यों को अग्नि आदि पदार्थों से विद्यादान करके सब मनुष्यों के लिये हित के काम करने चाहिये॥१३॥

पुनः स कीदृशग्गुणो भवेदित्युपदिश्यते॥

फिर वह कैसे गुणवाला हो, यह विषय अगले मन्त्र में कहा है॥

इन्द्रो॑ अश्रायि सु॒ध्यो॑ निरे॒के प॒त्रेषु॒ स्तोमो॒ दुर्यो॒ न यूप॑ः।
अ॒श्व॒युर्ग॒व्यू र॑थ॒युर्व॑सू॒युरिन्द्र॒ इद्रा॒यः क्षय॑ति प्रय॒न्ता॥१४॥

इन्द्र॑ः। अ॒श्रा॒यि॒। सु॒ऽध्यः॑। नि॒रे॒के। प॒त्रेषु॑। स्तोम॑ः। दुर्यः॑। न। यूप॑ः। अ॒श्व॒ऽयुः। ग॒व्युः। र॒थ॒ऽयुः। व॒सु॒ऽयुः। इन्द्र॑ः। इत्। रा॒यः। क्षय॑ति। प्र॒ऽय॒न्ता॥१४॥

पदार्थः-(**इन्द्रः**) सर्वाधीशः (**अश्रायि**) श्रियेत सेव्येत (**सुध्यः**) शोभना धीर्येषान्ते। अत्र **छन्दस्युभयथा**। (अष्टा०६.४.८६) अनेन पाक्षिको यणादेशः। (**निरेके**) निर्गता रेकाः शंका यस्मात्तस्मिन् (**पत्रेषु**) शिल्पव्यवहारेषु। अत्र पन धातोः बाहुलकाद् औणादिको रक् प्रत्ययो वर्णव्यत्ययेन जकारादेशश्च। (**स्तोमः**) स्तुतिसमूहः (**दुर्यः**) गृहसम्बन्धी द्वारस्थः। **दुर्या इति गृहनामसु पठितम्।** (निघं०३.४) (**न**) इव (**यूपः**) स्तम्भः (**अश्वयुः**) आत्मनोऽश्वानिच्छुः (**गव्युः**) आत्मनो गाः धेनुपृथिवीन्द्रियकिरणान्निच्छुः (**इन्द्रः**) विद्याद्यैश्वर्य्यवान् (**इत्**) एव (**रायः**) धनानि (**क्षयति**) प्राप्नुयात्। लेट्प्रयोगोऽयम् (**प्रयन्ता**) प्रकर्षेण यमनकर्त्ता सन्॥१४॥

अन्वयः-योऽश्वयुर्गव्यूरथयुर्वसूयुरिदेवेन्द्रो राय क्षयति स मनुष्यैर्ये सुध्यः सन्ति तैर्दुर्यो यूपो नेवायमिन्द्रो निरेके पत्रेषु स्तोमः स्तोतुमर्होऽश्रायि॥१४॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्यस्याश्रयेण बहूनि कार्याणि सिध्यन्ति, तथा विदुषामग्निजलादीनां सकाशाद् रथसिद्ध्या धनप्राप्तिर्जायत इति॥१४॥

पदार्थः-जो (**अश्वयुः**) अपने अश्वों (**गव्युः**) अपने गौ पृथिवी इन्द्रिय किरणों (**रथयुः**) अपने रथ और (**वसूयुः**) अपने द्रव्यों की इच्छा और (**प्रयन्ता**) अच्छे प्रकार नियम करने वाले के (**इत्**) समान (**इन्द्रः**) विद्यादि ऐश्वर्ययुक्त विद्वान् (**रायः**) धनों को (**क्षयति**) निवासयुक्त करता है वह (**सुध्यः**) जो उत्तम बुद्धि वाले विद्वान् मनुष्य हैं, उनसे (**दुर्यः**) गृहसम्बन्धी (**यूपः**) खंभा के (**न**) समान (**इन्द्रः**) विद्यादि ऐश्वर्यवान् विद्वान् (**निरेके**) शंकारहित (**पत्रेषु**) शिल्पादि व्यवहारों में (**स्तोमः**) स्तुति करने योग्य (**अश्रायि**) सेवनयुक्त होता है॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य से बहुत उत्तम-उत्तम कार्य सिद्ध होते हैं, वैसे विद्वान् वा अग्नि जलादि के सकाश से रथ की सिद्धि के द्वारा धन की प्राप्ति होती है॥१४॥

अथ सभाध्यक्षगुणा उपदिश्यते॥

अब अगले मन्त्र में सभाध्यक्ष के गुणों का उपदेश किया है॥

इ॒दं नमो॑ वृष॒भाय॑ स्व॒राज॑े स॒त्यशु॑ष्माय त॒वसे॑ऽवाचि।
अ॒स्मिन्नि॑न्द्र वृ॒जने॒ सर्व॑वीरा॒: स्मत्सू॒रिभि॒स्तव॒ शर्म॑न्त्स्याम॥ १५॥ ११॥

इदम्। नमः। वृषभाय। स्वऽराजे। सत्यऽशुष्माय। तवसे। अवाचि। अस्मिन्। इन्द्र। वृजने। सर्वऽवीराः। स्मत्। सूरिऽभिः। तव। शर्मन्। स्याम॥ १५॥

पदार्थः-(**इदम्**) प्रत्यक्षम् (**नमः**) सत्करणम् (**वृषभाय**) सुखवृष्टेः कर्त्रे (**स्वराजे**) स्वयं राजते तस्मै सर्वाधिपतये परमेश्वराय (**सत्यशुष्माय**) सत्यमविनश्वरं शुष्मं बलं यस्य तस्मै (**तवसे**) बलाय। **तव इति बलनामसु पठितम्।** (निघं०२.९) (**अवाचि**) उच्यते (**अस्मिन्**) जगति यक्ष्यमाणे वा (**इन्द्र**) परमपूज्य (**वृजने**) वर्जन्ति दुःखानि येन बलेन तस्मिन्। **वृजनमिति बलनामसु पठितम्।** (निघं०२.९)

(सर्ववीराः) सर्वे च वीराश्च ते सर्ववीराः **(स्मत्)** श्रेष्ठार्थे **(सूरिभिः)** मेधाविभिः सह **(तव)** **(शर्मन्)** शर्मणि गृहे। **शर्मेति गृहनामसु पठितम्।** (निघं०३.४) **(स्याम)** भवेम॥१५॥

अन्वयः-हे इन्द्र सभेश! यथा सूरिभिर्वृषभाय सत्यशुष्माय तवसे स्वराजे जगदीश्वरायेदं नमोऽवाच्युच्यते तथास्मदादिभिरप्युच्यत एवं विधाय वयं तवास्मिन् वृजने शर्मन् स्मत् सुष्ठुतया सर्ववीराः स्याम भवेम॥१५॥

भावार्थः-सर्वैर्मनुष्यैर्विद्वद्भिः सह वर्त्तमानैर्भूत्वा परमेश्वरस्योपासनां पूर्णप्रीत्या विद्वत्सङ्गं च कृत्वाऽस्मिन् संसारे परमानन्दः प्राप्तव्यः प्रापयतिव्यश्चेति॥१५॥

अस्मिन् सूक्ते सूर्याग्निविद्युदादिपदार्थवर्णनं बलादिप्रापणमनेकालङ्कारोक्त्या विविधार्थवर्णनं सभाध्यक्षपरमेश्वरगुणप्रतिपादनं चोक्तमत एतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्।

इत्येकादशो ११ वर्ग ५१ एकपञ्चाशं सूक्तं च समाप्तम्। वर्गः ११ सूक्तम्॥५१॥

पदार्थः-हे **(इन्द्र)** परम पूजनीय सभापते! जैसे **(सूरिभिः)** विद्वान् लोग **(वृषभाय)** सुख की वृष्टि करने **(सत्यशुष्माय)** विनाशरहित बलयुक्त **(तवसे)** अति बल से प्रवृद्ध **(स्वराजे)** अपने आप प्रकाशमान परमेश्वर को **(इदम्)** इस (**नमः**) सत्कार को **(अवाचि)** कहते हैं, वैसे हम भी करें, ऐसे करके हम लोग **(तव)** आपके **(अस्मिन्)** इस जगत् वा इस **(वृजने)** दुःखों को दूर करने वाले बल से युक्त **(शर्मन्)** गृह में **(स्मत्)** अच्छे प्रकार सुखी **(स्याम)** होवें॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को विद्वान् के साथ वर्त्तमान रह कर परमेश्वर ही की उपासना, पूर्णप्रीति से विद्वानों का सङ्ग कर परम आनन्द को प्राप्त करना और कराना चाहिये॥१५॥

इस सूक्त में सूर्य अग्नि और बिजुली आदि पदार्थों का वर्णन, बलादि की प्राप्ति, अनेक अलङ्कारों के कथन से विविध अर्थों का वर्णन और सभाध्यक्ष तथा परमेश्वर के गुणों का प्रतिपादन किया है। इससे इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये।

यह ग्यारहवां वर्ग ११ और इक्यावनवां ५१ सूक्त समाप्त हुआ॥१५॥

अथाऽस्य पञ्चदशर्चस्य द्विपञ्चाशस्य सूक्तस्याङ्गिरसः सव्य ऋषिः। इन्द्रो देवता॥ १,८ भुरिक् त्रिष्टुप्। ७ त्रिष्टुप्। ९,१० स्वराट् त्रिष्टुप्। १२,१३,१५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २-४ निचृज्जगती। ५,१४ जगती। ६,११ विराट् जगती च छन्दः। निषादः स्वरः॥

पुनः स इन्द्रः कीदृगित्युपदिश्यते॥

अब बावनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में इन्द्र कैसा हो, इस विषय का उपदेश किया है॥

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः॥ १॥

त्यम्। सु। मेषम्। महय। स्वः।ऽविदम्। शतम्। यस्य। सुभ्वः। साकम्। ईरते। अत्यम्। न। वाजम्। हवनऽस्यदम्। रथम्। आ। इन्द्रम्। ववृत्याम्। अवसे। सुवृक्तिभिः॥ १॥

पदार्थः-(**त्यम्**) तं सभाध्यक्षम् (**सु**) शोभने (**मेषम्**) सुखजलाभ्यां सर्वान् सेक्तारम् (**महय**) पूजयोपकुरु वा। अत्र **अन्येषामपि दृश्यत** इति दीर्घः। (**स्वर्विदम्**) स्वरन्तरिक्षं विन्दति येन तम् (**शतम्**) असंख्याताः (**यस्य**) इन्द्रस्य (**सुभ्वः**) ये जनाः सुष्ठु सुखं भावयन्ति ते। अत्र **छन्दस्युभयथा** (अष्टा०६.४.८७) इति यणादेशः। (**साकम्**) सह (**ईरते**) गच्छन्ति प्राप्नुवन्ति (**अत्यम्**) अश्वम्। **अत्य इत्यश्वनामसु पठितम्।** (निघं०१.१४) (**न**) इव (**वाजम्**) वेगयुक्तम् (**हवनस्यदम्**) येन हवनं पन्थानं स्यन्दते तम् (**रथम्**) विमनादिकम् (**आ**) समन्तात् (**इन्द्रम्**) परमैश्वर्यवन्तम् (**ववृत्याम्**) वर्त्तयेयम्, लिङ् प्रयोगोऽयम्। **बहुलं छन्दसी**त्यादिभिः द्वित्वादिकम् (**अवसे**) रक्षणाद्याय (**सुवृक्तिभिः**) सुष्ठु शोभना वृक्तयो दुःखवर्जनानि यासु क्रियासु ताभिः॥ १॥

अन्वयः-हे विद्वन्! यस्येन्द्रस्य सेनाध्यक्षस्य शतं सुभ्वो जनाः सुवृक्तिभिः साकमत्यमश्वं नेवावसे हवनस्यदं वाजमिन्द्रं स्वर्विदं रथमीरते, येनाहं ववृत्यां वर्त्तयेयं त्यन्तं मेषं त्वं सुमहय॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या यथाऽश्वं नियोज्य रथादिकं चालयन्ति, तथैतैर्वह्न्यादिभिर्यानानि वाहयित्वा कार्याणि साधयेयुः॥ १॥

पदार्थः-(**यस्य**) जिस परमैश्वर्ययुक्त सभाध्यक्ष के (**शतम्**) असंख्यात (**सुभ्वः**) सुखों को उत्पन्न करने वाले कारीगर लोग (**सुवृक्तिभिः**) दुःखों को दूर करने वाली उत्तम क्रियाओं के (**साकम्**) साथ (**अत्यम्**) अश्व के (**न**) समान अग्नि जलादि से (**अवसे**) रक्षादि के लिये (**हवनस्यदम्**) सुखपूर्वक आकाश मार्ग में प्राप्त करने वाले (**वाजम्**) वेगयुक्त (**इन्द्रम्**) परमोत्कृष्ट ऐश्वर्य के दाता (**स्वर्विदम्**) जिससे आकाश मार्ग से जा आ सकें, उस (**रथम्**) विमान आदि यान को (**ईरते**) प्राप्त होते हैं और जिससे मैं (**ववृत्याम्**) वर्त्तता हूं (**त्यम्**) उस (**मेषम्**) सुख को वर्षाने वाले को हे विद्वान् मनुष्य! तू उनका (**सुमहय**) अच्छे प्रकार सत्कार कर॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को जैसे अश्व को युक्त कर रथ आदि को चलाते हैं, वैसे अग्नि आदि से यानों को चला के कार्यों को सिद्ध कर सुखों को प्राप्त होना चाहिये॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

स पर्वतो॒ न ध्रुरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे।

इन्द्रो॒ यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि॒ जर्हृषाणो॒ अन्धसा॥२॥

सः। पर्वतः। न। ध्रुरुणेषु। अच्युतः। सहस्रम्ऽऊतिः। तविषीषु। ववृधे। इन्द्रः। यत्। वृत्रम्। अवधीत्। नदीऽवृतम्। उब्जन्। अर्णांसि। जर्हृषाणः। अन्धसा॥२॥

पदार्थः-(**सः**) पूर्वोक्तः (**पर्वतः**) मेघः (**न**) इव (**ध्रुरुणेषु**) धारकेषु वाय्वादिषु (**अच्युतः**) अक्षयः (**सहस्रमूतिः**) सहस्रमूतयो रक्षणीदीनि यस्मात्सः। अत्र **वाच्छन्दसि सर्व विधयो भवन्ति** इति विभक्त्यलोपः। (**तविषीषु**) बलयुक्तेषु सैन्येषु (**वावृधे**) अतिशयेन वर्द्धते (**इन्द्रः**) सूर्यः (**यत्**) यः (**वृत्रम्**) मेघम् (**अवधीत्**) हन्ति (**नदीवृतम्**) नदीभिर्वृतो युक्तो नदीर्वर्त्तयति वा तम् (**उब्जन्**) आर्जवं कुर्वन्। अधो निपातयन् वा (**अर्णांसि**) जलानि। **अर्ण इत्युदकनामसु पठितम्।** (निघं०१.१२) (**जर्हृषाणः**) पुनः पुनर्हर्षं प्रापयन् (**अन्धसा**) अन्नादिना॥२॥

अन्वयः-हे राजप्रजाजन! यथा धरुणेष्वच्युतोऽर्णांस्युब्जन्निन्द्रो नदीवृतं वृत्रमवधीत्, स च पर्वतो नेव वावृधे पुनः पुनर्वर्धते, यद्यस्त्वं शत्रून् हिंधि सहस्रमूतिस्तविषीषु जर्हृषाणः सन्नन्धसा वर्द्धस्व॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो मनुष्यः सूर्यवत्सेनादिधारणं कृत्वा मेघवदन्नादिसामग्र्या सह वर्त्तमानो बलानि वर्धयति, स गिरिवत्स्थिरसुखः सन् शत्रून् हत्वा राज्यं वर्द्धयितुं शक्नोति॥२॥

पदार्थः-हे राजप्रजाजन! जैसे (**ध्रुरुणेषु**) धारकों में (**अच्युतः**) सत्य सामर्थ्य युक्त (**अर्णांसि**) जलों को (**उब्जन्**) बल पकड़ता हुआ (**इन्द्रः**) सविता (**नदीवृतम्**) नदियों से युक्त वा नदियों को वर्त्ताने वाले (**वृत्रम्**) मेघ को (**अवधीत्**) मारता है (**सः**) वह (**पर्वतः**) पर्वत के (**न**) समान (**ववृधे**) बढ़ता है, वैसे (**यत्**) जो तू शत्रुओं को मार (**सहस्रमूतिः**) असंख्यात रक्षा करनेहारे (**तविषीषु**) बलों में (**जर्हृषाणः**) बार-बार हर्ष को प्राप्त करता हुआ (**अन्धसा**) अन्नादि के साथ वर्त्तमान बार-बार बढ़ाता रह॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सेना आदि को धारण कर और मेघ के तुल्य अन्नादि सामग्री के साथ वर्त्तमान हो के बलों को बढ़ाता है, वह पर्वत के समान स्थिर सुखी हो शत्रुओं को मार कर राज्य के बढ़ाने में समर्थ होता है॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स हि द्वरो द्वरिषु वव्र ऊर्धनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः।
इन्द्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः॥ ३॥

सः। हि। द्वरः। द्वरिषु। वव्रः। ऊर्धनि। चन्द्रऽबुध्नः। मदऽवृद्धः। मनीषिऽभिः। इन्द्रम्। तम्। अह्वे। सुऽअपस्यया। धिया। मंहिष्ठऽरातिम्। सः। हि। पप्रिः। अन्धसः॥ ३॥

पदार्थः-(**सः**) पूर्वोक्तः (**हि**) किल (**द्वरः**) यो द्वरत्यावृणोति (**द्वरिषु**) आवरकेषु व्यवहारेषु (**वव्रः**) कूप इव। **वव्र इति कूपनामसु पठितम्।** (निघं०३.२३) (**ऊर्धनि**) उषसि। अत्र **वाच्छन्दसि सर्वे०** इति **ऊधसो नङ्** (अष्टा०५.४.१३१) इति समासन्तो नङादेशः। **ऊध इत्युषर्नामसु पठितम्।** (निघं०१.८) (**चन्द्रबुध्नः**) चन्द्रं सुवर्णं चन्द्रमा वा बुध्नेऽन्तरिक्षे यस्य यस्माद्वा सः। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२) (**मदवृद्धः**) मदो हर्षो वृद्धो यस्य यस्माद्वा सः (**मनीषिभिः**) मेधाविभिः। **मनीषीति मेधाविनामसु पठितम्।** (निघं०३.१५) (**इन्द्रम्**) विद्वांसम् (**तम्**) पूर्वोक्तम् (**अह्वे**) आह्वयामि (**स्वपस्यया**) **अप इति कर्मनामसु पठितम्।** (निघं०२.१) (**धिया**) प्रज्ञया (**मंहिष्ठरातिम्**) अतिशयेन मंहित्री रातिर्दानं यस्य यस्माद्वा तम् (**सः**) पूर्वोक्तः (**हि**) खलु (**पप्रिः**) पूरकः (**अन्धसः**) अन्नादेः॥ ३॥

अन्वयः-य ऊधनि द्वरिषु द्वरश्चन्द्रबुध्नो मदवृद्धोऽन्धसः पप्रिर्वव्र इव मेघोऽस्ति, तद्वन्मनीषिभिः सह वर्त्तमानः सभाध्यक्षो हि किल वर्त्तेत, तं मंहिष्ठरातिमिन्द्रं स्वपस्यया धियाऽहमह्व आह्वयामि॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यो मेघवत्प्रजाः पालयति सूर्यवत्सुखं वर्षति, स परमैश्वर्यवान् सभाध्यक्षः संस्थापनीयः॥ ३॥

पदार्थः-जो (**ऊधनि**) प्रातःकाल में (**द्वरिषु**) अन्धकारावृत व्यवहारों में (**द्वरः**) अन्धकार से आवृतद्वार (**चन्द्रबुध्नः**) बुध्न अर्थात् अन्तरिक्ष में सुवर्ण वा चन्द्रमा के वर्ण से युक्त (**मदवृद्धः**) हर्ष से बढ़ा हुआ (**अन्धसः**) अन्नादि को (**पप्रिः**) पूर्ण करने वाला (**वव्रः**) कूप के समान मेघ है, उसके तुल्य (**मनीषिभिः**) मेधावियों के साथ (**हि**) निश्चय करके वर्त्तमान सभाध्यक्ष है (**तम्**) उस (**मंहिष्ठरातिम्**) अत्यन्त पूजनीय दानयुक्त (**इन्द्रम्**) विद्वान् को (**स्वपस्यया**) उत्तम कर्मयुक्त व्यवहार में होने वाली (**धिया**) बुद्धि से मैं (**अह्वे**) आह्वान करता हूं॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जो मेघ के तुल्य प्रजापालन करता है, उस परमैश्वर्य युक्त पुरुष को सभाध्यक्ष का अधिकार देवें॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्वः स्वा अभिष्टयः।

तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः॥४॥

आ। यम्। पृणन्ति। दिवि। सद्मऽबर्हिषः। समुद्रम्। न। सुऽभ्वः। स्वाः। अभिष्टयः। तम्। वृत्रऽहत्ये। अनु। तस्थुः। ऊतयः। शुष्माः। इन्द्रम्। अवाताः। अह्रुतऽप्सवः॥४॥

पदार्थः-(**आ**) समन्तात् (**यम्**) सभाध्यक्षम् (**पृणन्ति**) सुखयेयुः (**दिवि**) न्यायप्रकाशे (**सद्मबर्हिषः**) सद्मस्थानं बर्हिरुत्तमं यासां ताः (**समुद्रम्**) सागरम् (**न**) इव (**सुभ्वः**) याः सुष्ठु भवन्ति ताः (**स्वाः**) स्वकीयाः (**अभिष्टयः**) इष्टेच्छाः (**तम्**) पूर्वोक्तम् (**वृत्रहत्ये**) वृत्राणां मेघाऽवयवानां हत्या हननमिव यस्मिँस्तस्मिन् संग्रामे (**अनु**) आनुपूर्व्ये (**तस्थुः**) वर्त्तन्ते (**ऊतयः**) रक्षणाद्याः (**शुष्माः**) बलवत्यः शोषण-कारिण्यो वा (**इन्द्रम्**) परमैश्वर्य्यहेतुं सूर्य्यम् (**अवाताः**) अविद्यमानो वायुः कम्पनं यासां तां (**अह्रुतप्सवः**) अह्रुतं कुटिलं सूर्य्यरूपं यासां ताः। अत्र **ह्रु ह्वरेश्छन्दसि।** (अष्टा०७.२.३१) अनेन ह्रुरादेशः। **प्स्वीति रूपनामसु पठितम्।** (निघं०३.७)॥४॥

अन्वयः-सद्मबर्हिषो मनुष्या अवाता नद्यः सुभ्वो समुद्रं न यमिन्द्रं वृत्रहत्ये स्वा अभिष्टयः शुष्मा अह्रुतप्सव ऊतयः प्रजा आपृणन्ति तमनुतस्थुरनुतिष्ठेयुः स एव साम्राज्यं कर्त्तुमर्हति॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा सरितः समुद्रं जलमयमन्तरिक्षं वा प्राप्य स्थिरा भवन्ति, तथैव ससभं विद्वांसं प्राप्य सर्वाः प्रजा स्थिरसुखा जायन्ते॥४॥

पदार्थः-(**सद्मबर्हिषः**) उत्तम स्थान आसनयुक्त (**सुभ्वः**) उत्तम होने वाले मनुष्य (**अवाताः**) वायु के चलाने से रहित नदियां (**समुद्रं न**) जैसे सागर वा आकाश को प्राप्त होकर स्थित होती हैं, वैसे जिस (**इन्द्रम्**) सभासदों सहित सभापति को (**वृत्रहत्ये**) जिनमें मेघावयवों के हनन तुल्य हनन होता, उस संग्राम में (**स्वाः**) अपने (**अभिष्टयः**) शुभेच्छा युक्त (**शुष्माः**) बल सहित (**अह्रुतप्सवः**) कुटिलतारहित सूर्यरूप (**ऊतयः**) सुरिक्षत प्रजा (**आ पृणन्ति**) सुखी करें (**तम्**) उस परमैश्वर्यकारक वीरपुरुष के (**अनुतस्थुः**) अनुकूल स्थिर होवें, वही चक्रवर्त्ती राज्य करने को योग्य होता है॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे नदी समुद्र वा अन्तरिक्ष को प्राप्त होकर स्थिर होती है, वैसे ही सभासदों के सहित विद्वान् को प्राप्त होकर सब प्रजा स्थिर सुखवाली होती हैं॥४॥

पुनः स कीदृशो भवेदित्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः।

इन्द्रो॒ यद्व॒ज्री धृ॒षमा॑णो॒ अन्ध॑सा भि॒नद् ब॒लस्य॑ परि॒धीँरि॑व त्र॒तः॥५॥१२॥

अ॒भि। स्वऽवृ॑ष्टिम्। मदे॑। अ॒स्य॒। युध्य॑तः। र॒घ्वीःऽइ॑व। प्र॒व॒णे। स॒स्रु॒ः। ऊ॒तय॑ः। इन्द्रः॑। यत्। व॒ज्री। धृ॒षमा॑णः। अन्ध॑सा। भि॒नत्। ब॒लस्य॑। प॒रि॒धीन्ऽइ॑व। त्र॒तः॥५॥

पदार्थः-(**अभि**) आभिमुख्ये (**स्ववृष्टिम्**) स्वस्य शस्त्राणां वा वृष्टिर्यस्य तम् (**मदे**) हर्षे (**अस्य**) शत्रोर्वृत्रस्य वा (**युध्यतः**) युद्धं कुर्वतः (**रघ्वीरिव**) यथा गमनशीला नद्यः (**प्रवणे**) निम्नस्थाने (**सस्रुः**) गच्छन्ति (**ऊतयः**) रक्षणाद्याः (**इन्द्रः**) सभाद्यध्यक्षो विद्युद्वा (**यत्**) यः (**वज्री**) प्रशस्तो वज्रः शत्रुच्छेदकः शस्त्रसमूहो विद्यते यस्य सः (**धृषमाणः**) शत्रूणां धर्षणाऽऽकर्षणे प्रगल्भः (**अन्धसा**) अन्नादिनोदकादिना वा (**भिनत्**) भिनत्ति (**बलस्य**) बलवतः शत्रोर्मेघस्य वा। **बल इति मेघनामसु पठितम्।** (निघं०१.१०) (**परिधींरिव**) सर्वत उपरिस्था गोलरेखेव (**त्रितः**) उपरिरेखातो मध्यरेखातस्तिर्यगरेखातश्च॥५॥

अन्वयः-यद्यः सूर्य इव शस्त्राणां स्ववृष्टिं कुर्वन् धृषमाणो वज्रीन्द्रः सभाद्यध्यक्षो मदेऽस्य युध्यतः शत्रोस्त्रितः परिधींरिव बलमभिभिनदभितो भिनत्ति तस्यान्धसा रघ्वीः प्रवण इवोतयः सस्रुः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽऽपो निम्नस्थानं प्रतिगच्छन्ति, तथा सभाध्यक्षो नम्रो भूत्वा विनयं प्राप्नुयात्॥५॥

पदार्थः-(**यत्**) जो सूर्य्य के समान (**स्ववृष्टिम्**) अपने शस्त्रों की वृष्टि करता हुआ (**धृषमाणः**) शत्रुओं को प्रगल्भता दिखाने हारा (**वज्री**) शत्रुओं को छेदन करने वाले शस्त्रसमूह से युक्त (**इन्द्रः**) सभाध्यक्ष (**मदे**) हर्ष में (**अस्य**) इस (**युध्यतः**) युद्ध करते हुए (**बलस्य**) शत्रु के (**त्रितः**) ऊपर, मध्य और टेढ़ी तीन रेखाओं से (**परिधींरिव**) सब प्रकार ऊपर की गोल रेखा के समान बल को (**अभि भिनत्**) सब प्रकार से भेदन करता है, उसके (**अन्धसा**) अन्नादि वा जल से (**रघ्वीरिव**) जैसे जल से पूर्ण नदियां (**प्रवणे**) नीचे स्थान में जाती हैं, वैसे (**ऊतयः**) रक्षा आदि (**सस्रुः**) गमन करती हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जल नीचे स्थान को जाते हैं, वैसे सभाध्यक्ष नम्र होकर विनय को प्राप्त होवे॥५॥

पुनः स किंवत्किं करोतीत्युपदिश्यते॥

फिर वह सभाध्यक्ष किसके तुल्य क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

परी॑ घृ॒णा च॑रति तित्वि॒षे शवो॒ऽपो वृ॒त्वी रज॑सो बु॒ध्नमा॑शय॒त्।
वृ॒त्रस्य॒ यत्प्र॑व॒णे दु॒र्गृभि॑श्वनो निज॒घन्थ॒ हन्वो॑रिन्द्र तन्य॒तुम्॥६॥

परि॑। ई॒म्। घृ॒णा। च॒र॒ति। ति॒त्वि॒षे। शव॑ः। अ॒पः। वृ॒त्वी। रज॑सः। बु॒ध्नम्। आ। अ॒शा॒य॒त्। वृ॒त्रस्य॑। यत्। प्र॒व॒णे। दु॒ःऽगृभि॑श्वनः। नि॒ऽज॒घन्थ॑। हन्वोः॑। इ॒न्द्र॒। त॒न्य॒तुम्॥६॥

पदार्थः-(**परि**) सर्वतः (**ईम्**) उदकम्। **ईमित्युदकनामसु पठितम्।** (निघं०१.१२) (**घृणा**) दीप्तिः क्षरणं वा (**चरति**) सेवते (**तित्विषे**) प्रकाशाय (**शवः**) बलम् (**अपः**) जलानि (**वृत्वी**) आवृत्य (**रजसः**) अन्तरिक्षस्य मध्ये (**बुध्नम्**) शरीरम्। **इदमपीतरबुध्नमेतस्मादेव बद्धा अस्मिन् धृताः प्राणा इति।** (निरु०१०.४४) (**आ**) समन्तात् (**अशयत्**) शेते (**वृत्रस्य**) मेघस्य (**यम्**) यस्य (**प्रवणे**) गमने (**दुर्गृभिश्वनः**) दुःखेन गृभिर्गृहिर्ग्रहणं श्वाभिव्याप्तिर्यस्य तस्य। अत्र गृहधातोः **इक् कृष्यादिभ्य** (अष्टा०३.३.१०८) इक् हस्य भत्वं च। **अशूङ् व्याप्तौ**त्यस्मात् कनिन् प्रत्ययो वुगागमोऽकारलोपश्च। (**निजघन्थ**) नितरां हन्ति (**हन्वोः**) मुखावयवयोरिव (**इन्द्र**) सवितवद्वर्त्तमान (**तन्यतुम्**) विद्युतम्॥६॥

अन्वयः-हे इन्द्र! यथा तित्विषे यस्येन्द्रस्य सूर्यस्य शवो बलं घृणा दीप्तिरीमुदकं परिचरति यो यस्य दुर्गृभिश्वनो वृत्रस्य मेघस्य बुध्नं शरीरं रजसोऽन्तरिक्षस्य मध्येऽपो वृत्वी जलमावृत्याशयच्छेते तस्य हन्वोरग्रपार्श्वभागयोरुपरि तन्यतुं विद्युतं प्रहृत्य प्रवणे निजघन्थ तथा वर्त्तमानः सन्न्याये प्रवर्त्तस्व॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याणामियं योग्यतास्ति यत्सूर्यमेघवद्वर्त्तित्वा विद्यान्यायवर्षा प्रकाशीकार्येति॥६॥

पदार्थः-हे (**इन्द्र**) सूर्य के समान वर्त्तमान सभाध्यक्ष जैसे (**तित्विषे**) प्रकाश के लिये (**यत्**) जिस सूर्य का (**शवः**) बल वा (**घृणा**) दीप्ति (**ईम्**) जल को (**परिचरति**) सेवन करती है जो (**दुर्गृभिश्वनः**) दुःख से जिसका ग्रहण हो (**वृत्रस्य**) मेघ का (**बुध्नम्**) शरीर (**रजसः**) अन्तरिक्ष के मध्य में (**आपः**) जल को (**वृत्वी**) आवरण करके (**अशयत्**) सोता है उसके (**हन्वोः**) आगे-पीछे के मुख के अवयवों में (**तन्यतुम्**) बिजली को छोड़कर उसे (**प्रवणे**) नीचे (**निजघन्थ**) मार कर गिरा देता है, वैसे वर्त्तमान होकर न्याय में प्रवृत्त हूजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि सूर्य वा मेघ के समान वर्त्त के विद्या और न्याय की वर्षा का प्रकाश करें॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना।
त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसम्॥७॥

ह्रदम्। न। हि। त्वा। निऽऋषन्ति। ऊर्मयः। ब्रह्माणि। इन्द्र। तव। यानि। वर्धना। त्वष्टा। चित्। ते। युज्यम्। ववृधे। शवः। ततक्ष। वज्रम्। अभिभूतिऽओजसम्॥७॥

पदार्थः-(**ह्रदम्**) जलाशयम् (**न**) इव (**हि**) खलु (**त्वा**) त्वाम् (**न्यृषति**) नितराम् प्राप्नुवन्ति (**ऊर्मयः**) तरङ्गादयः (**ब्रह्माणि**) बृहत्तमान्यन्नानि (**इन्द्र**) विद्युद्वद्वर्त्तमान (**तव**) (**यानि**) वक्ष्यमाणानि

(वर्धना) सुखानां वर्धनानि **(त्वष्टा)** मेघाऽवयवानां मूर्त्तद्रव्याणां च छेत्ता **(चित्)** अपि **(ते)** तव **(युज्यम्)** योक्तुमर्हम् **(वावृधे)** वर्धते **(शवः)** बलम् **(ततक्ष)** तक्षति **(वज्रम्)** प्रकाशसमूहम् **(अभिभूत्योजसम्)** अभिगतानि तप ऐश्वर्याण्योजः पराक्रमश्च यस्मात्तम्॥७॥

अन्वयः-हे इन्द्र! ते वर्द्धना ब्रह्माण्ययूर्मयो ह्रदं न न्यृषन्ति यथा हि त्वष्टा ज्योतींषि शवोऽभिभूत्योजसं युज्यं वज्रं प्रहृत्य सर्वान् पदार्थान् ततक्ष तक्षति तथा त्वं भव॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा जलं निम्नं स्थानं गत्वा स्थिरं स्वच्छं भवति तथा सद्गुणविनयवन्तं पुरुषं प्राप्य स्थिराः शुद्धिकारका भवन्तीति॥७॥

पदार्थः-हे **(इन्द्र)** बिजुली के समान वर्त्तमान **(ते)** आपके **(वर्द्धना)** बढ़ानेहारे **(ब्रह्माणि)** बड़े-बड़े अत्र **(ऊर्मयः)** तरंग आदि **(ह्रदम्)** **(न)** जैसे नदी जलस्थान को प्राप्त होती हैं, वैसे **(हि)** निश्चय करके ज्योतियों को **(न्यृषन्ति)** प्राप्त होते हैं, वह **(त्वष्टा)** मेघाऽवयव वा मूर्तिमान् द्रव्यों का छेदन करने वाले **(शवः)** बल **(अभिभूत्योजसम्)** ऐश्वर्ययुक्त पराक्रम तथा **(युज्यम्)** युक्त करने योग्य **(वज्रम्)** प्रकाश समूह का प्रहार करके सब पदार्थों को **(ततक्ष)** छेदन करता है, वैसे आप भी हूजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जल नीचे स्थानों को जाकर स्थिर वा स्वच्छ होता है, वैसे ही राजपुरुष उत्तम-उत्तम गुणयुक्त तथा विनय वाले पुरुष को प्राप्त होकर स्थिर और शुद्धि करने वाले होते हैं॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, यह विषय उपदेश अगले मन्त्र में कहा है॥

जघन्वाँ उ हरिभिः संभृतक्रतविन्द्रं वृत्रं मनुषे गातुयन्नपः।
अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे॥८॥

जघन्वान्। ऊम् इति। हरिऽभिः। संभृतऽक्रतो इति सम्भृतऽक्रतो। इन्द्र। वृत्रम्। मनुषे। गातुऽयन्। अपः। अयच्छथाः। बाह्वोः। वज्रम्। आयसम्। अधारयः। दिवि। आ। सूर्यम्। दृशे॥८॥

पदार्थः-(**जघन्वान्**) हननं कुर्वन् **(उ)** वितर्के **(हरिभिः)** हरणशीलैरश्वैः किरणैर्वा **(संभृतक्रतो)** सम्भृता धारिताः क्रतवः क्रिया प्रज्ञा वा येन तत्सम्बुद्धौ **(इन्द्र)** मेघावयवानां छेदकवच्छत्रुच्छेदक **(वृत्रम्)** मेघम् **(मनुषे)** मानवाय **(गातुयन्)** यो गातुं पृथिवीमेति सः **(अपः)** जलानि **(अयच्छथाः)** **(बाह्वोः)** बलाकर्षणयोरिव भुजयोः **(वज्रम्)** किरणसमूहवच्छस्त्रसमूहम् **(आयसम्)** अयोनिर्मितम् **(अधारयः)** धारय **(दिवि)** द्योतनात्मके व्यवहारे **(आ)** समन्तात् **(सूर्यम्)** सवितृमण्डलमिव न्यायविद्याप्रकाशम् **(दृशे)** दर्शयितुम्॥८॥

अन्वयः-हे सम्भृतक्रतो इन्द्र सभेश! त्वं यथा सविता हरिभिर्वृत्रं जघन्वानपो मनुषे गातुयन् प्रजा धरति तथा प्रजापालनाय बाह्वोरायसं वज्रमाधारयः समन्ताद् धारय सार्वजनिकसुखाय दिवि सूर्यं दृश इव न्यायविद्यार्कं प्रकाशय॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यलोको बलाकर्षणाभ्यां सर्वान् लोकान् धृत्वा जलमाकृष्य वर्षित्वा दिव्यं सुखं जनयति, तथैव सभा सर्वान् शुभगुणान् धृत्वा श्रियमाकृष्य सुपात्रेभ्यो दत्वा प्रजाभ्य आनन्दं प्रकटयेत्॥८॥

पदार्थः-हे **(संभृतक्रतो)** क्रियाप्रज्ञाओं को धारण किये हुए **(इन्द्र)** मेघावयवों का छेदन करने वाले सूर्य्य के समान शत्रुओं को ताड़ने वाले सभापति! आप जैसे सूर्य अपने किरणों से **(वृत्रम्)** मेघ को **(जघन्वान्)** गिराता हुआ **(आपः)** जलों को **(मनुषे)** मनुष्यों को **(गातुयन्)** पृथिवी पर प्राप्त करता हुआ प्रजा को धारण करता है, वैसे ही प्रजा की रक्षा के लिये (**बाह्वोः**) बल तथा आकर्षणों के समान भुजाओं के मध्य **(आयसम्)** लोहे के **(वज्रम्)** किरणसमूह के तुल्य शस्त्रों को **(आधारयः)** अच्छे प्रकार धारण कीजिये, वीरों को कराइये और सब मनुष्यों को सुख होने के लिये **(दिवि)** शुद्ध व्यवहार में **(सूर्य्यम्)** सूर्यमण्डल के समान न्याय और विद्या के प्रकाश को **(दृशे)** दिखाने के लिये **(अयच्छथाः)** सब प्रकार से प्रदान कीजिये॥८॥

भावार्थः-जैसे सूर्यलोक बल और आकर्षण गुणों से सब लोकों के धारण से जल को आकर्षण कर वर्षा से दिव्य सुखों को उत्पन्न करता है, वैसे ही सभा सब गुणों को धर, धनकार्य्य से सुपात्रों को सुमार्ग की प्रवृत्ति के लिये दान देकर प्रजा के लिये आनन्द को प्रकट करे॥८॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः।
यन्मानुषप्रधना इन्द्रमूतय: स्वर्नृषाचो मरुतोऽमदन्ननु॥९॥

बृहत्। स्वऽचन्द्रम्। अमऽवत्। यत्। उक्थ्यम्। अकृण्वत। भियसा। रोहणम्। दिवः। यत्। मानुषऽप्रधनाः। इन्द्रम्। ऊतयः। स्वः। नृऽसाचः। मरुतः। अमदन्। अनु॥९॥

पदार्थः-(**बृहत्**) महत् **(स्वश्चन्द्रम्)** स्वेन प्रकाशेनाह्लादकारकेण युक्तं सुवर्णम्। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२) अत्र **हस्वाच्चन्द्रोत्तरपदे मन्त्रे।** (अष्टा०६.१.१५१) अनेन सुडागमः। **(अमवत्)** अमः प्रशस्तो बोधः सम्भागो यस्मिँस्तत् **(यत्)** गुणप्रकाशकम् **(उक्थ्यम्)** प्रशंसनीयम् **(अकृण्वत)** कुर्वन्ति **(भियसा)** भयेन **(रोहणम्)** आरोहन्ति येन तत् **(दिवः)** प्रकाशमानस्य **(यत्)** यम् **(मानुषप्रधनाः)** मनुष्याणां प्रकृष्टानि धनानि याभ्यस्ताः **(इन्द्रम्)** विद्युतम् **(ऊतयः)** रक्षणाद्याः **(स्वः)**

सुखम् (**नृषाचः**) ये नॄन् सचन्ति समवयन्ति ते (**मरुतः**) प्राणादयः (**अमदन्**) हर्षन्ति (**अनु**) आनुकूल्ये॥९॥

अन्वयः-ये मानुषप्रधना नृषाचो मरुत इन्द्रं प्राप्य यद्बृहत्स्वश्चन्द्रममवदुक्थ्यं स्वः सुखं चाकृण्वत कुर्वन्ति यद्ये भियसा दुःखभयेन दिवः प्रकाशमानस्य मोक्षसुखस्यारोहणमूतयो भूत्वाऽन्वमदन्ननुमोदन्ते ते सुखिनः स्युः॥९॥

भावार्थः-विद्याधनं राज्यं पराक्रमो बलं पुरुषसहायश्च यं धार्मिकं विद्वांसं प्राप्नुवन्ति, तमुत्तमं सुखं जनयन्ति॥९॥

पदार्थः-जो (**मानुषप्रधनाः**) मनुष्यों को उत्तम धन प्राप्त करने तथा (**नृषाचः**) मनुष्यों को कर्म में संयुक्त करने वाले (**मरुतः**) प्राण आदि हैं वे (**इन्द्रम्**) बिजुली को प्राप्त होकर (**यत्**) जिस (**बृहत्**) बड़े (**स्वश्चन्द्रम्**) अपने आह्लादकारक प्रकाश से युक्त (**अमवत्**) उत्तम ज्ञान (**उक्थ्यम्**) प्रशंसनीय (**स्वः**) सुख को (**अकृण्वत**) सम्पादन करते हैं और (**यत्**) जो (**भियसा**) दुःख के भय से (**दिवः**) प्रकाशमान मोक्ष सुख का (**रोहणम्**) आरोहण (**ऊतयः**) रक्षा आदि होती हैं, उनको करके (**अन्वमदन्**) उसके अनुकूल आनन्द करते हैं, वे मनुष्य मुख्य सुख को प्राप्त होते हैं॥९॥

भावार्थः-विद्याधन, राज्य, पराक्रम, बल वा पुरुषों की सहायता ये सब जिस धार्मिक विद्वान् मनुष्य को प्राप्त होते हैं, उसको उत्तम सुख उत्पन्न करते हैं॥९॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, यह विषय अगले मन्त्र में कहा है॥

द्यौश्चि॑दस्यामव॒ाँ अहे॑: स्व॒नादयो॑यवीद्भि॒यसा॒ वज्र॑ इन्द्र ते।

वृ॒त्रस्य॒ यद्ब॑द्ब॒धा॒नस्य॑ रोदसी॒ मदे॑ सु॒तस्य॒ शव॒साभि॑न॒च्छिर॑:॥१०॥१३॥

द्यौः। चि॒त्। अ॒स्य॒। अम॑वान्। अहे॑:। स्व॒नात्। अयो॑यवीत्। भि॒यसा॑। वज्रः॑। इ॒न्द्र॒। ते॒। वृ॒त्रस्य॑। यत्। ब॒द्ब॒धा॒नस्य॑। रो॒द॒सी॒ इति॑। मदे॑। सु॒तस्य॑। शव॑सा। अभि॑नत्। शिरः॑॥१०॥

पदार्थः-(**द्यौः**) प्रकाशः (**चित्**) इव (**अस्य**) वक्ष्यमाणस्य (**अमवान्**) बलवान् (**अहेः**) मेघस्य (**स्वनात्**) शब्दात् (**अयोयवीत्**) पुनः पुनर्मिश्रयत्यमिश्रयति वा (**भियसा**) भयेन (**वज्रः**) शस्त्रास्त्रसमूहः (**इन्द्र**) परमैश्वर्यहेतो (**ते**) तव (**वृत्रस्य**) मेघस्य (**यत्**) यस्य (**बद्बधानस्य**) बन्धकस्य। अत्र बन्धधातोश्चानश्। **बहुलं छन्दसि** इति शपः श्लुः हलादिशेषाऽभावश्च। (**रोदसी**) द्यावापृथिवी (**मदे**) हर्षकारके व्यवहारे (**सुतस्य**) उत्पन्नस्य (**शवसा**) बलेन (**अभिनत्**) भिनत्ति (**शिरः**) उत्तमाङ्गम्॥१०॥

अन्वयः-हे सेनेश! यद्यस्य ते तवास्य सूर्यस्य द्यौरहेर्बद्बधानस्य सुतस्य वृत्रस्यावयवानयोयवीच्चिदिवामवान् वज्रो यस्य शवसा स्वनादयः पलायन्ते रोदसी इव मदे वर्त्तमानस्य शत्रोः शिरोऽभिनत् स भवानस्माकं पालको भवतु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यकिरणा विद्युच्चमेघं प्रति प्रवर्त्तन्ते, तथैव सेनापत्यादिभिर्भवितव्यम्॥१०॥

पदार्थः-हे **(इन्द्र)** परम ऐश्वर्य के हेतु सेनापति! जो **(अस्य)** इस **(ते)** आप का और इस सूर्य्य का **(द्यौः)** प्रकाश **(अहेः)** **(बद्बधानस्य)** रोकने वाले मेघ के **(सुतस्य)** उत्पन्न हुए **(वृत्रस्य)** आवरण कारक जल के अवयवों को **(अयोयवीत्)** मिलाता वा पृथक् करता है **(चित्)** वैसे **(अमवान्)** बलकारी **(वज्रः)** वज्र के **(स्वनात्)** शब्दों से **(भियसा)** और भय से **(शवसा)** बल के साथ शत्रु लोग भागते हैं **(रोदसी)** आकाश और पृथिवी के समान **(मदे)** आनन्दकारी व्यवहार में वर्त्तमान शत्रु का **(शिरः)** शिर अभिनत् काटते हैं, सो आप हम लोगों का पालन कीजिये॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य के किरण और बिजुली मेघ के साथ प्रवृत्त होती है, वैसे ही सेनापति आदि के साथ सेना को होना चाहिये॥१०॥

पुनः सभाध्यक्षः किं कुर्यादित्युपदिश्यते॥

फिर वह सभाध्यक्ष क्या करे, यह विषय अगले मन्त्र में कहा है॥

यदिन्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः।
अत्राह ते मघवन् विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत्॥११॥

यत्। इत्। नु। इन्द्र। पृथिवी। दशऽभुजिः। अहानि। विश्वा। ततनन्त। कृष्टयः। अत्र। अह। ते। मघऽवन्। विऽश्रुतम्। सहः। द्याम्। अनु। शवसा। बर्हणा। भुवत्॥११॥

पदार्थः-(**यत्**) वक्ष्यमाणम् (**इत्**) एव (**नु**) शीघ्रम् (**इन्द्र**) सभासेनाध्यक्ष (**पृथिवी**) भूमिः (**दशभुजिः**) या दशभिरिन्द्रियैर्भुज्यते सा (**अहानि**) दिनानि (**विश्वा**) सर्वाणि (**ततनन्त**) विस्तीर्णानि भवन्ति (**कृष्टयः**) कृषन्ति विलिखन्ति स्वानि कर्माणि ये ते मनुष्याः। **कृष्टय इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**अत्र**) अस्मिन् व्यवहारे (**अह**) विनिग्रहार्थे (**ते**) तव (**मघवन्**) उत्कृष्टधनविद्यैश्वर्ययुक्त (**विश्रुतम्**) यद्विविधं श्रूयते तद्यशः (**सहः**) बलम् (**द्याम्**) राजपालनविनयप्रकाशम् (**अनु**) आनुकूल्ये (**शवसा**) बलेन (**बर्हणा**) सर्वसुखप्रापिकया क्रियया। **बर्हणा इति पदनामसु पठितम्।** (निघं०४.३) अनेन प्राप्त्यर्थो गृह्यते। (**भुवत्**) भवेत्। अत्र लेटि **बहुलं छन्दसि** (अष्टा०२.४.७३) इति शपो लुक्। **भूसुवोस्तिङि** (अष्टा०७.३.८८) इति गुणनिषेधादुवङादेशः॥११॥

अन्वयः-हे मघवन्निन्द्र! त्वया यद्या दशभुजिः पृथिवी भुज्यते यस्य ते तव बर्हणा शवसाह द्यामनु विश्रुतं यशस्सहो भुवत् तेन सहितस्त्वं प्रयतस्व, यतोऽत्र राज्ये कृष्टयो विश्वान्यहानीदेव सुखानि नु ततनन्त विस्तारयेयुः॥११॥

भावार्थः-राजपुरुषैः स्वराज्ये सुखानां वृद्धिर्विविधगुणप्राप्तिश्च यथा स्यात् तथैवानुष्ठेयमिति॥११॥

पदार्थः-हे **(मघवन्)** उत्कृष्ट धन और विद्या के ऐश्वर्य से युक्त **(इन्द्र)** सभा सेनाध्यक्ष! आप **(यत्)** जो **(दशभुजिः)** दश इन्द्रियों से **(पृथिवी)** भूमि को भोगते हो **(ते)** आप के **(बर्हणा)** सब सुख प्राप्त कराने वा **(शवसा)** **(अह)** बल से ही **(द्याम्)** राज्यपालन **(अनुविश्रुतम्)** अनुकूल कीर्ति कराने वाला यश **(सहः)** बल **(भुवत्)** होवे उससे युक्त होके आप प्रयत्न कीजिये, जिससे **(अत्र)** इस राज्य में **(कृष्टयः)** मनुष्य लोग **(विश्वा)** सब **(अहानि)** दिनों को **(इत्)** ही सुख से **(नु)** जल्दी **(ततनन्त)** विस्तार करें॥११॥

भावार्थः-राजपुरुषों को चाहिये कि जैसे अपने राज्य में सुखों की वृद्धि और अनेक प्रकार से गुणों की प्राप्ति हो वैसा अनुष्ठान करें॥११॥

पुनरस्य जगतो राजेश्वरः कीदृश इत्युपदिश्यते॥

फिर इस समग्र जगत् का राजा परमात्मा कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः।
चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवम्॥१२॥

त्वम्। अस्य। पारे। रजसः। विऽओमनः। स्वभूतिऽओजाः। अवसे। धृषत्ऽमनः। चकृषे। भूमिम्। प्रतिऽमानम्। ओजसः। अपः। स्वरिति स्वः। परिऽभूः। एषि। आ। दिवम्॥१२॥

पदार्थः-**(त्वम्)** परमेश्वरः **(अस्य)** संसारस्य क्लेशेभ्यः **(पारे)** अपरभागे **(रजसः)** पृथिव्यादिलोकानाम् **(व्योमनः)** आकाशस्य। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ति** इत्यल्लोपो न भवति। **(स्वभूत्योजाः)** स्वकीया भूतिरैश्वर्यमोजः पराक्रमो वा यस्य सः **(अवसे)** रक्षणाद्याय **(धृषन्मनः)** धृषद्धृष्यते मनः सर्वस्यान्तःकरणं येन तत्सम्बुद्धौ **(चकृषे)** कृतवानसि **(भूमिम्)** सर्वाधारां क्षितिम् **(प्रतिमानम्)** प्रतिमीयते परिणीयते प्रतिक्रियते येन तत् **(ओजसः)** पराक्रमस्य **(अपः)** प्राणान् **(स्वः)** सुखमन्तरिक्षं वा **(परिभूः)** यः परितः सर्वतो भवति सः **(एषि)** प्राप्नोषि **(आ)** समन्तात् **(दिवम्)** विज्ञानप्रकाशम्॥१२॥

अन्वयः-हे धृषन्मनो जगदीश्वर! यः परिभूः स्वभूत्योजास्त्वमवसेऽस्य संसारस्य रजसो व्योमनः पारेऽप्येषि त्वं सर्वेषामोजसः पराक्रमस्य स्वभूमिं चाप्रतिमानमाचकृषे समन्तात् कृतवानासि तं (सर्वे) वयमुपास्महे॥१२॥

भावार्थः-परमेश्वरः सर्वेभ्यः परः प्रकृष्टः सर्वेभ्यो दुःखेभ्यः पारे वर्त्तमानः सन् स्वसामर्थ्यात् सर्वान् लोकान् रचयित्वा तानभिव्याप्तः सन्सर्वान् व्यवस्थापयन् जीवानां पापपुण्यव्यवस्थाकरणेन न्यायाधीशः सन् वर्त्तते तथा सभेशो राज्यं कुर्वन् सर्वेभ्यः सुखं जनयेत्॥१२॥

पदार्थः-हे **(धृषन्मनः)** अनन्त प्रगल्भ विज्ञानयुक्त जगदीश्वर! जो **(परिभूः)** सब प्रकार होने **(स्वभूत्योजाः)** अपने ऐश्वर्य वा पराक्रम युक्त से **(त्वम्)** आप **(अवसे)** रक्षा आदि के लिये **(अस्य)** इस संसार के **(रजसः)** पृथिवी आदि लोकों तथा **(व्योमनः)** आकाश के **(पारे)** अपरभाग में भी **(एषि)** प्राप्त हैं और आप **(ओजसः)** पराक्रम आदि के **(प्रतिमानम्)** अवधि **(स्वः)** सुख **(दिवम्)** शुद्ध विज्ञान के प्रकाश **(भूमिम्)** भूमि और **(अपः)** जलों को **(आचकृषे)** अच्छे प्रकार किया है, उन आपकी हम सब लोग उपासना करते हैं॥१२॥

भावार्थः-जैसे परमेश्वर सब से उत्तम, सबसे परे वर्त्तमान होकर सामर्थ्य से लोकों को रच के, उनमें सब प्रकार से व्याप्त हो धारण कर सब का व्यवस्था में युक्त करता हुआ जीवों के पाप-पुण्य की व्यवस्था करने से न्यायाधीश होकर वर्त्तता है, वैसे ही न्यायाधीश भी सब भूमि के राज्य को सम्पादन करता हुआ, सबके लिये सुखों को उत्पन्न करे॥१२॥

पुनः स कीदृश इत्यपुदिश्यते॥

फिर वह परब्रह्म कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान्॥१३॥

त्वम्। भुवः। प्रतिऽमानम्। पृथिव्याः। ऋष्वऽवीरस्य। बृहतः। पतिः। भूः। विश्वम्। आ। अप्राः। अन्तरिक्षम्। महिऽत्वा। सत्यम्। अद्धा। नकिः। अन्यः। त्वाऽवान्॥१३॥

पदार्थः-**(त्वम्)** जगदीश्वरः **(भुवः)** भवतीति भूस्तस्याः **(प्रतिमानम्)** परिमाणम् **(पृथिव्याः)** विस्तृतस्याकाशस्य **(ऋष्ववीरस्य)** ऋष्वा महान्तो गुणा वीरा वा यस्य तस्य **(बृहतः)** महाबलस्य **(पतिः)** पालकः **(भूः)** भवसि **(विश्वम्)** सर्वं जगत् **(आ)** समन्तात् **(अप्राः)** प्रपूर्द्धि **(अन्तरिक्षम्)** अनेकेषां लोकानाम् मध्येऽवकाशरूपं वर्त्तमानमाकाशम् **(महित्वा)** महत्या व्याप्त्याभिव्याप्य **(सत्यम्)** अव्यभिचारि सुपरीक्षितं वेदचतुष्टयजन्यम् **(अद्धा)** साक्षात् **(नकिः)** नैव **(अन्यः)** कश्चिदपि द्वितीयः **(त्वावान्)** त्वत्सदृशः॥१३॥

अन्वयः-हे जगदीश्वर! यस्त्वं पृथिव्या भुवः प्रतिमानं बृहतं ऋष्ववीरस्य जगतो महावीरस्य मनुष्यस्य पतिर्भूरसि त्वं विश्वं सर्वं जगदन्तरिक्षं सत्यं च महित्वाऽद्धाप्राः तस्मात् कश्चिदन्यस्त्वावान् नकिर्विद्यते॥१३॥

भावार्थः-यथा परमेश्वरः सर्वस्य जगतो रचयिता परिमाणकर्ता व्याप्तः सत्यप्रकाशकोऽस्त्यत ईश्वरसदृशः कश्चिदपि पदार्थो न भूतो न भविष्यतीति मत्वा तमेव वयमुपास्महे॥१३॥

पदार्थः-हे जगदीश्वर! जो **(त्वम्)** आप **(पृथिव्याः)** विस्तृत आकाश और **(भुवः)** भूमि के **(प्रतिमानम्)** परिमाणकर्त्ता तथा **(बृहतः)** महाबलयुक्त **(ऋष्ववीरस्य)** बड़े गुणयुक्त जगत् का वा महावीर मनुष्य के **(पतिः)** पालन करने वाले **(भूः)** हैं तथा आप **(विश्वम्)** सब जगत् **(अन्तरिक्षम्)** अनेक लोकों के मध्य में अवकाश स्वरूप आकाश और **(सत्यम्)** कारणरूप से अविनाशी अच्छे प्रकार परीक्षा किये हुए चारों वेदों को **(महित्वा)** बड़ी व्याप्ति से व्याप्त होकर **(अद्धाप्राः)** साक्षात्कार पूरण करते हो, इससे **(त्वावान्)** आप के सदृश **(अन्यः)** दूसरा **(नकिः)** विद्यमान कोई भी नहीं है॥१३॥

भावार्थः-जैसे परमेश्वर ही सब जगत् की रचना, परिमाण, व्यापक और सत्य का प्रकाश करने वाला है, इससे ईश्वर के सदृश कोई भी पदार्थ न हुआ और न होगा, ऐसा समझ के हम लोग उसी की उपासना करें॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक्॥१४॥

न। यस्य। द्यावापृथिवी इति। अनु। व्यचः। न। सिन्धवः। रजसः। अन्तम्। आनशुः। न। उत। स्वऽवृष्टिम्। मदे। अस्य। युध्यतः। एकः। अन्यत्। चकृषे। विश्वम्। आनुषक॥१४॥

पदार्थः-**(न)** निषेधार्थे **(यस्य)** जगदीश्वरस्य परमविदुषः सूर्यस्य **(वा)** **(द्यावापृथिवी)** प्रकाशाप्रकाशयुक्तौ लोकसमूहौ **(अनु)** अनुयोगे **(व्यचः)** व्याप्तेः **(न)** प्रतिषेधे **(सिन्धवः)** समुद्राः **(रजसः)** रागविषयस्यैश्वर्यस्य लोकस्य वा **(अन्तम्)** सीमानम् **(आनशुः)** प्राप्नुवन्ति। अत्र व्यत्ययेन परस्मैपदम् **(न)** निवारणे **(उत)** अपि **(स्ववृष्टिम्)** स्वकीयानां धनानामिव प्रेरितानां पदार्थानां शस्त्राणां जलानां वा वर्षणं प्रति **(मदे)** आनन्दे **(अस्य)** मेघस्य **(युध्यतः)** युद्धमाचरतः **(एकः)** असहायः **(अन्यत्)** द्वितीयं भिन्नम् **(चकृषे)** करोषि **(विश्वम्)** जगत् **(आनुषक्)** व्याप्त्यानुषक्तमुत्कृष्टगुणैरनुरक्तमाकर्षणेनानुयुक्तं वा॥१४॥

अन्वयः-यस्य रजसः परमेश्वरस्याऽनुव्यचोऽनुगताया अनन्ताया व्याप्तेर्द्यावापृथिवी चन्द्रादयश्चान्तं नानशुः न व्याप्नुवन्ति नोतापि सिन्धवो व्याप्नुवन्ति। हे परमात्मँस्त्वं यथा स्ववृष्टिं प्रति मदे युध्यतो मेघस्य सूर्यस्याग्रे विजयो न भवति तथैकोऽसहायोऽद्वितीयः सन्नन्यद्विश्वमानुषक् चकृषे कृतवानसि तस्माद्भवानुपास्योऽस्ति॥१४॥

भावार्थः-यथा परमेश्वरस्य कस्यापि गुणस्य कोऽपि मनुष्यो लोकश्च पारं ग्रहीतुं न शक्नोति। यथा जगदीश्वरः पापकर्मकारिभ्यो दुःखफलदानेन पीडयन् दुष्टान् ताडयन् सूर्यो मेघावयवान् विदारयँश्च युद्धकारीव वर्त्तते, तथैव सज्जनैर्भवितव्यम्॥१४॥

पदार्थः-(**यस्य**) जिस (**रजसः**) ऐश्वर्ययुक्त जगदीश्वर की (**अनुव्यचः**) अनन्तव्याप्ति के अनुकूल वर्त्तमान (**द्यावापृथिवी**) प्रकाश अप्रकाश युक्त लोक और चन्द्रमादि भी (**अन्तम्**) अन्त अर्थात् सीमा को (**न**) नहीं (**आनशुः**) प्राप्त होते हैं। हे परमात्मन्! जैसे (**स्ववृष्टिम्**) अपने पदार्थों की रक्षा के प्रति (**मदे**) आनन्द में (**युध्यतः**) युद्ध करते हुए मेघ का सूर्य के सामने विजय नहीं होता वैसे (**एकः**) सहायरहित अद्वितीय जगदीश्वर ने (**अन्यत्**) अपने से भिन्न द्वितीय (**विश्वम्**) जगत् को (**आनुषक्**) अपनी व्याप्ति से युक्त किया है, इससे आप उपासना के योग्य हैं॥१४॥

भावार्थः-जैसे परमेश्वर के किसी गुण की कोई मनुष्य वा कोई लोक सीमा को ग्रहण नहीं कर सकता और जैसे वह पापयुक्त कर्म करने वाले मनुष्यों के लिये दुःखरूप फल देने से पीड़ा देता दुष्टों की ताड़ना और सूर्य मेघाऽवयवों को विदारण करता और युद्ध करने वाले मनुष्य के समान वर्त्तता है, वैसे ही सब सज्जन मनुष्यों को वर्त्तना चाहिये॥१४॥

पुनस्तदुपासकाः कीदृशा भवेयुरित्युपदिश्यते॥

फिर ईश्वरोपासक कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

आर्चन्नत्रं मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा।
वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ॥१५॥१४॥

आर्चन्। अत्र। मरुतः। सस्मिन्। आजौ। विश्वे। देवासः। अमदन्। अनु। त्वा। वृत्रस्य। यत्। भृष्टिऽमता। वधेन। नि। त्वम्। इन्द्र। प्रति। आनम्। जघन्थ॥१५॥

पदार्थः-(**आर्चन्**) अर्चन्तु (**अत्र**) अस्मिन् जगति (**मरुतः**) ऋत्विजः। **मरुत इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१८) (**सस्मिन्**) सर्वस्मिन्। अत्र **छान्दसो वर्णलोपो वा** इति रेफवकारयोर्लोपः (**आजौ**) संग्रामे (**विश्वे**) सर्वे (**देवासः**) विद्वांसः (**अमदन्**) हृष्यन्तु (**अनु**) पुनरर्थे (**त्वा**) त्वां सभाध्यक्षम् (**वृत्रस्य**) मेघस्येव शत्रोः (**यत्**) यः (**भृष्टिमता**) भृज्जन्ति यया सा भृष्टिः कान्तिरिव नीतिः सा प्रशस्ता विद्यते यस्मिन् तेन (**वधेन**) हननेन (**नि**) नित्यम् (**त्वम्**) (**इन्द्र**) परमैश्वर्यवन् (**प्रति**) प्रत्यक्षे (**आनम्**) अनन्ति येन तज्जीवनम् (**जघन्थ**) हन॥१५॥

अन्वयः-हे इन्द्र सभासेनेश यद्यस्त्वं भृष्टिमता वधेन वृत्रस्येव शत्रोरानं जीवनं जघन्थाऽहन् त्वा सस्मिन्नाजौ विश्वे देवासो मरुतो न्यार्चन् सततं सत्कुर्वन्तु, यतस्ते प्रजास्थाः प्राणिनः प्रत्यन्वमदन् प्रत्यक्षममाद्यन्॥१५॥

भावार्थः-य एकं परमेश्वरमुपास्य विद्यां गृहीत्वा शत्रून् जित्वा विजयं प्राप्य प्रजां नित्यमनुमोदयन्ति, ते विद्वांसः सुखिनो भवन्तीति॥१५॥

अत्र विद्वद्विद्युदाद्यग्नीश्वराणां गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदतिव्यम्॥

इति ५२ द्विपञ्चाशं सूक्तं १४ चतुर्दशो वर्गश्च समाप्तः॥१४॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त सभा सेना के स्वामी **(यत्)** जो **(त्वम्)** आप **(भृष्टिमता)** प्रशंसनीय नीति वाले न्यायव्यवहार से युक्त **(वधेन)** हनन से **(वृत्रस्य)** अधर्मी मनुष्य के समान **(आनम्)** प्राण को **(जघन्थ)** नष्ट करते हो उन **(त्वा)** आपको **(सस्मिन्)** सब **(आजौ)** संग्राम वा **(अत्र)** इस आप में श्रद्धा करने वाले **(विश्वे देवासः)** सब विद्वान् और **(मरुतः)** ऋत्विज् लोग **(न्यार्चन्)** नित्य सत्कार करते हैं, इससे वे प्रजा के प्राणी **(प्रत्यन्वमदन्)** सबको आनन्दित कर के आप आनन्दित होते हैं॥१५॥

भावार्थः-जो एक परमेश्वर की उपासना विद्या को ग्रहण और शत्रुओं को ताड़कर प्रजा को निरन्तर आनन्दित करते हैं, वही धार्मिक विद्वान् सुखी रहते हैं॥१२॥

इस सूक्त में विद्वान्, बिजुली आदि अग्नि और ईश्वर के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह बावनवां ५२ सूक्त और चौदहवां १४ वर्ग समाप्त हुआ॥

अथैकादशर्चस्य त्रिपञ्चाशस्य सूक्तस्याङ्गिरसः सव्य ऋषिः। इन्द्रो देवता १,३ निचृज्जगती। २ भुरिग्जगती। ४ जगती। ५,७ विराड्जगती च छन्दः। निषादः स्वरः। ६,८,९, त्रिष्टुप्। १० भुरिक् त्रिष्टुप् च छन्दः। धैवतः स्वरः। ११ सतः पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

सायणाचार्य्यादीनां मोक्षमूलरादीनां वा यदि छन्दःषड्जादिस्वरज्ञानमपि न स्यात्तर्हि भाष्यकरणयोग्यता तु कथं भवेत्॥

जब सायणाचार्य्यादि वा मोक्षमूलरादिकों को छन्द और षड्जादि स्वरों का भी ज्ञान नहीं तो भाष्य करने की योग्यता तो कैसे होगी॥

मनुष्यैर्धर्मं विचार्य्य किं कर्त्तव्यमित्युपदिश्यते॥

अब त्रेपनवें सूक्त का आरम्भ है, उस के पहिले मन्त्र में मनुष्यों को धर्म विचार कर क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

न्यू३षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते॥ १॥

नि। उम् इति। सु। वाचम्। प्र। महे। भरामहे। गिरः। इन्द्राय। सदने। विवस्वतः। नु। चित्। हि। रत्नम्। ससताम्ऽइव। अविदत्। न। दुःऽस्तुतिः। द्रविणः ऽदेषु। शस्यते॥ १॥

पदार्थः-(**नि**) नितराम् (**उ**) वितर्के (**सु**) शोभने (**वाचम्**) वाणीम् (**प्र**) प्रकृष्टार्थे (**महे**) महति महासुखप्रापके (**भरामहे**) धरामहे (**गिरः**) स्तुतयः (**इन्द्राय**) परमैश्वर्यप्रापणाय (**सदने**) सीदन्ति यस्मिँस्थाने तस्मिन् (**विवस्वतः**) यथा प्रकाशमानस्य सूर्यस्य प्रकाशे (**नु**) शीघ्रम् (**चित्**) अपि (**हि**) खलु (**रत्नम्**) रमणीयं सुवर्णादिकम् (**ससतामिव**) यथा स्वपतां पुरुषाणां तथा (**अविदत्**) विन्दति प्राप्नोति (**न**) निषेधे (**दुःस्तुतिः**) दुष्टा चासौ स्तुतिः पापकीर्तिश्च सा (**द्रविणोदेषु**) ये द्रविणांसि सुवर्णादीनि द्रव्यप्रदानि विद्यादीनि च ददति तेषु (**शस्यते**) प्रशस्ता भवति॥ १॥

अन्वयः-हे मनुष्या! यथा वयं महे सदन इन्द्राय वाचं सुभरामहे स्वप्ने ससतामिव विवस्वतः सूर्यस्य प्रकाशे रत्नमिव गिरो निभरामहे, किन्तु द्रविणोदेष्वस्मासु दुष्टुतिर्न प्रशस्ता न भवति तथा यूयं भवत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा निद्रावस्था मनुष्या आरामं प्राप्नुवन्ति, तथा सर्वदा विद्यासुशिक्षाभ्यां संस्कृतां वाचं स्वीकृत्य प्रशस्तं कर्म सेवित्वा निद्रां दूरीकृत्य स्तुतिप्रकाशाय प्रयतितव्यम्॥ १॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**महे**) महासुख प्रापक (**सदने**) स्थान में (**इन्द्राय**) परमैश्वर्य के प्राप्त करने के लिये (**सु**) शुभलक्षणयुक्त (**वाचम्**) वाणी को (**निभरामहे**) निश्चित धारण करते हैं, स्वप्न में (**ससतामिव**) सोते हुए पुरुषों के समान (**विवस्वतः**) सूर्यप्रकाश में (**रत्नम्**) रमणीय सुवर्णादि

के समान **(गिरः)** स्तुतियों को धारण करते हैं, किन्तु **(द्रविणोदेषु)** सुवर्णादि वा विद्यादिकों के देने वाले हम लोगों में **(दुष्टुतिः)** दुष्ट स्तुति और पाप की कीर्ति अर्थात् निन्दा **(न प्रशस्यते)** श्रेष्ठ नहीं होती, वैसे तुम भी होवो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को जैसे निद्रा में स्थित हुए मनुष्य आराम को प्राप्त होते हैं, वैसे सर्वदा विद्या उत्तम शिक्षाओं से संस्कार की हुई वाणी को स्वीकार प्रशंसनीय कर्म को सेवन और निंदा को दूरकर स्तुति का प्रकाश होने के लिये अच्छे प्रकार प्रयत्न करना चाहिये॥१॥

अथ विद्वद्गुणा उपदिश्यन्ते॥

अब अगले मन्त्र में विद्वानों के गुणों का उपदेश किया है॥

दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि॥२॥

दुरः। अश्वस्यः। दुरः। इन्द्र। गोः। असि। दुरः। यवस्य। वसुनः। इनः। पतिः। शिक्षाऽनरः। प्रऽदिवः। अकामऽकर्शनः। सखा। सखिऽभ्यः। तम्। इदम्। गृणीमसि॥२॥

पदार्थः-(**दुरः**) सुखैः संवारकाणि द्वाराणि **(अश्वस्य)** व्याप्तिकारकाग्न्यादेस्तुरङ्गस्य वा **(दुरः)** **(इन्द्र)** विद्वन् **(गोः)** सुसंस्कृताया वाचः **(असि)** **(दुरः)** **(यवस्य)** उत्तमस्य यवादेरन्नस्य **(वसुनः)** सर्वोत्तमस्य द्रव्यस्य **(इनः)** ईश्वरः। **इन इतीश्वरनामसु पठितम्।** (निघं०२.२२) **(पतिः)** पालयिता **(शिक्षानरः)** यः शिक्षां नृणाति प्राप्नोति स शिक्षाया नरः शिक्षानरः। अत्र वा० **सर्वधातुभ्योऽजयं वक्तव्यः** इति नृधातोरच्प्रत्ययः। **(प्रदिवः)** प्रकृष्टस्य न्यायप्रकाशस्य **(अकामकर्शनः)** योऽकामानलसान् कृशति तनूकरोति सः **(सखा)** सुहृत् **(सखिभ्यः)** सुहृद्भ्यः **(तम्)** उक्तार्थम् **(इदम्)** अर्चनं सत्करणं यथा स्यात्तथा **(गृणीमसि)** अर्चामः स्तुमः॥२॥

अन्वयः-हे इन्द्र विद्वन्! योऽकामकर्शनः शिक्षानरः सखिभ्यः सखा पतिरिन इव त्वमश्वस्य दुरो गोर्दुरोऽभिप्राप्य यवस्य प्रदिवो दुरोऽधिष्ठितः सन् वसुनो दाताऽसि तं त्वामिदं वयं गृणीमसि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। न हि परमेश्वरतुल्येन धार्मिकेण विदुषा विना कस्मैचित् सर्वपदार्थानां सुखानां च प्रदाता कश्चिदस्ति, परन्तु ये खलु सर्वमित्राः शिक्षाप्राप्ता मनुष्याः सन्ति त एवैतत् सर्वसुखं लभन्ते नेतरे॥२॥

पदार्थः-हे **(इन्द्र)** विद्वान्! जो **(अकामकर्शनः)** आलस्ययुक्त मनुष्यों को कृश **(शिक्षानरः)** शिक्षाओं को प्राप्त करने वा **(सखिभ्यः)** मित्रों के **(सखा)** मित्र **(पतिः)** पालन करने वा **(इनः)** ईश्वर के तुल्य सामर्थ्ययुक्त आप **(अश्वस्य)** व्याप्तिकारक अग्नि आदि वा तुरङ्ग आदि के **(दुरः)** द्वारों को प्राप्त होके सुख देने वाली **(गोः)** वाणी वा दूध देने वाली गौ के **(दुरः)** सुख देने वाले द्वारों को जान

(यवस्य) उत्तम यव आदि अन्न **(प्रदिवः)** उत्तम विज्ञान प्रकाश और **(वसुनः)** उत्तम धन देने वाले **(असि)** हैं **(तम्)** उस आपकी **(इदम्)** पूजा वा सत्कार पूर्वक **(गृणीमसि)** स्तुति करते हैं॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। परमेश्वर के तुल्य धार्मिक विद्वान् के विना किसी के लिये सब पदार्थ वा सब सुखों के देने वाला कोई नहीं है, परन्तु जो निश्चय करके सबके मित्र शिक्षाओं को प्राप्त किये हुए आलस्य को छोड़कर, ईश्वर की उपासना विद्या वा विद्वानों के संग को प्रीति से सेवन करने वाले मनुष्य हैं वे ही इन सब सुखों को प्राप्त होते हैं आलसी मनुष्य नहीं॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में उपदेश में किया है॥

शचीव इन्द्र पुरुकृद् द्युमत्तम तवेदिदमभितश्चेकिते वसु।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः॥३॥

शचीऽवः। इन्द्र। पुरुऽकृत्। द्युमत्ऽतम। तव। इत्। इदम्। अभितः। चेकिते। वसु। अतः। सम्ऽगृभ्य। अभिऽभूते। आ। भर। मा। त्वाऽयतः। जरितुः। कामम्। ऊनयीः॥३॥

पदार्थः-(**शचीवः**) प्रशस्ताः प्रज्ञा बह्वी वाक् प्रशस्तं कर्म च विद्यते यस्य तत्संबुद्धौ **(इन्द्र)** परमैश्वर्यप्रापक विद्वन् वा **(पुरुकृत्)** यः पुरूणि बहूनि सुखानि करोति सः **(द्युमत्तम)** द्यौर्बहुः सर्वज्ञः प्रकाशो विद्याप्रकाशो वा विद्यते यस्मिन् सोऽतिशयितस्तत्संबुद्धौ **(तव)** **(इत्)** एव **(इदम्)** वक्ष्यमाणम् **(अभितः)** सर्वतः **(चेकिते)** जानाति **(वसु)** परं प्रकृष्टं द्रव्यम् **(अतः)** पुरुषार्थात् **(संगृभ्य)** सम्यग्गृहीत्वा **(अभिभूतम्)** अभिभूतिः शत्रूणामभिभवनं पराभवो यस्मात्तत्सम्बुद्धौ **(आ)** आभिमुख्ये **(भर)** धर **(मा)** निषेधे **(त्वायतः)** त्वामात्मानं तवात्मानं वेच्छतः **(जरितुः)** स्तोतुः **(कामम्)** इष्टसिद्धिम् **(ऊनयीः)** ऊनयेः। लुङ् प्रयोगोऽयम्॥३॥

अन्वयः-हे शचीवो द्युमत्तम पुरुकृदिन्द्र सभेश! यो मनुष्यस्तव कृपया सहायेन वाऽभित इदं वसु चेकिते जानाति। हे अभिभूते शत्रूणां पराभवकर्त्तर्यतस्त्वं त्वायतो जरितुर्धार्मिकस्य स्वजनस्य काममाभर समन्तात्प्रपूर्द्धि। अतस्त्वां संगृभ्याहं वर्त्ते त्वं मां सर्वैः कामैराभर त्वायतो जरितुर्मम कामं मोनयीः परिहीणं क्षीणं न्यूनं कदाचिन्मा सम्पादयेः॥१३॥

भावार्थः-मनुष्यैर्न किल परमेश्वरेणाप्तेन पुरुषसङ्गेन वा विना सर्वेषां कामानां पूर्त्तिः कर्त्तुं शक्या तस्मादेतमेवोपास्य संगम्य वा कामपूर्त्तिः सम्पादनीयेति॥३॥

पदार्थः-हे **(शचीवः)** प्रशंसनीय प्रज्ञा, वाणी और कर्मयुक्त **(द्युमत्तम)** अतिशय करके सर्वज्ञता विद्याप्रकाशयुक्त **(पुरुकृत्)** बहुत सुखों के दाता **(इन्द्र)** परमैश्वर्ययुक्त जगदीश्वर वा ऐश्वर्य प्रापक सभापति विद्वान्! आपकी कृपा वा आप के सहाय से मनुष्य **(अभितः)** सब ओर से **(इदम्)** इस **(वसु)**

उत्तम धन को **(चेकिते)** जानता है, हे **(अभिभूते)** शत्रुओं के पराजय करने वाले! जिस कारण आप **(त्वायतः)** आप वा उस के आत्मा की इच्छा करते हुए **(जरितुः)** स्तुति करने वाले धार्मिक भक्तजन की **(कामम्)** इष्टसिद्धि को **(आभर)** पूर्ण करें **(अतः)** इस पुरुषार्थ से आपको **(संगृभ्य)** ग्रहण करके मैं वर्त्तता हूं और आप मुझे सब कामों से पूर्ण कीजिये, आपकी इच्छा करते हुए स्तुति करने वाले मेरी इष्टसिद्धि को **(मोनयीः)** कभी क्षीण मत कीजिये॥३॥

भावार्थः-मनुष्यों को निश्चय करके परमेश्वर वा विद्वान् मनुष्य के संग के विना कोई भी मनुष्य इष्टसिद्धि को पूरण करने वाला होने को योग्य नहीं है। इससे इसी की उपासना वा विद्वान् मनुष्य का सत्संग करके इष्टसिद्धि को सम्पादन करना चाहिये॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुध्यानो अमतिं गोभिरश्विना।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि॥४॥

एभिः। द्युऽभिः। सुऽमनाः। एभिः। इन्दुऽभिः। निऽरुध्यानः। अमतिम्। गोभिः। अश्विना। इन्द्रेण। दस्युम्। दरयन्तः। इन्दुऽभिः। युतऽद्वेषसः। सम्। इषा। रभेमहि॥४॥

पदार्थः-(**एभिः**) प्रत्यक्षैः (**द्युभिः**) प्रकाशयुक्तैर्गुणैर्द्रव्यैर्वा (**सुमनाः**) शोभनं मनो विज्ञानं यस्य सभाध्यक्षस्य सः (**एभिः**) वक्ष्यमाणैः (**इन्दुभिः**) आह्लादकारिभिर्गुणैः पदार्थैर्वा (**निरुध्यानः**) निरोधं कुर्वन् (**अमतिम्**) अविद्यमाना मतिर्विज्ञानं सुखं वा यस्यामविद्यायां दरिद्रायां वा तां सुरूपं वा (**गोभिः**) प्रशस्ताभिर्वाग्धेनुपृथिवीभिः (**अश्विना**) अग्निजलसूर्यचन्द्रादिभिः (**इन्द्रेण**) विद्युता तद्रचितेन विदारकेण शस्त्रेण वा (**दस्युम्**) बलात्कारेण परस्वापहर्त्तारम् (**दरयन्तः**) विदारयन्तः (**इन्दुभिः**) अभिषुतैर्बलकारिभिः पेयैः सोमरसाभियुक्तैर्जलैः (**युतद्वेषसः**) युता अमिश्रिताः पृथग्भूता द्वेषा येभ्यस्ते (**सम्**) सम्यगर्थे (**इषा**) इच्छया अन्नादिना वा (**रभेमहि**) आरम्भं कुर्वीमहि॥४॥

अन्वयः-वयं योऽमतिं निरुन्धानः सुमना विद्वानस्ति तं प्राप्य तत्सहायेनैर्भिर्द्युभिरेभिरिन्दुभिर्गोभिरश्विनेन्दुभिरिषेन्द्रेण सह दस्युं दरयन्तो युतद्वेषसः शत्रुभिः सह युद्धं सुखेन समारभेमहि॥४॥

भावार्थः-यः सभाद्यध्यक्षो वा सर्वं दारिद्र्यं विनाश्य शत्रुविजयं कृत्वा सर्वा विद्याः शिक्षित्वाऽस्मान् सुखयति स सर्वैर्मनुष्यैः समाश्रयितव्यश्चेति नहि खल्वेतत्सहायेन विना कश्चिदपि व्यावहारिकं चानन्दं प्राप्तुं शक्नोति, तस्मादेतत्सहायेन सर्वेषां धर्म्याणां कार्याणामारम्भः सुखसेवनं च नित्यं कार्य्यमिति॥४॥

पदार्थः-हम लोग जो **(अमतिम्)** विज्ञान वा सुख से अविद्या दरिद्रता तथा सुन्दर रूप को **(निरुन्धानः)** निरोध वा ग्रहण करता हुआ **(सुमनाः)** उत्तम विज्ञानयुक्त सभाध्यक्ष है, उसकी प्राप्ति कर

उसके सहाय वा **(एभिः)** इन **(द्युभिः)** प्रकाशयुक्त द्रव्य **(एभिः)** इन **(इन्दुभिः)** आह्लादकारक गुण वा पदार्थ इन **(गोभिः)** प्रशंसनीय गौ पृथिवी **(अश्विना)** अग्नि, जल, सूर्य्य, चन्द्र आदि **(इषा)** इच्छा वा अन्नादि **(इन्दुभिः)** सोमरसादि पेयों **(इन्द्रेण)** बिजुली और उसके रचे हुए विदारण करने वाले शस्त्र से **(दस्युम्)** बल से दूसरे के धन को लेने वाले दुष्ट को **(दरयन्तः)** विदारण करते हुए **(युतद्वेषसः)** द्वेष से अलग होने वाले शत्रुओं के साथ युद्ध को सुख से **(समारभेमहि)** आरम्भ करें॥४॥

भावार्थः-जो सभाध्यक्ष सब विद्याओं की शिक्षा कर हम लोगों को सुखी करता है, उसका सब मनुष्यों को सेवन करना चाहिये। इस के सहाय के विना कोई भी मनुष्य व्यावहारिक और परमार्थ विषयक आनन्द को प्राप्त होने को समर्थ नहीं हो सकता, इससे इसके सहाय से सब धर्म युक्त कार्यों का आरम्भ वा सुख का सेवन करना चाहिये॥४॥

पुनरेतत्सहायेन मनुष्यैः किं कर्त्तव्यमित्युपदिश्यते॥

फिर इसके सहाय से मनुष्यों को क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि॥५॥१५॥

सम्। इन्द्र। राया। सम्। इषा। रभेमहि। सम्। वाजेभिः। पुरुऽचन्द्रैः। अभिद्युऽभिः। सम्। देव्या। प्रऽमत्या। वीरऽशुष्मया। गोऽअग्रया। अश्वऽवत्या। रभेमहि॥५॥

पदार्थः-(**सम्**) प्राप्तौ **(इन्द्र)** परमैश्वर्यप्रदेश्वर सभाध्यक्ष वा **(राया)** राज्यपरमश्रिया **(सम्)** सम्यक् **(इषा)** धर्मेच्छयान्नादिना वा **(रभेमहि)** आरम्भं कुर्याम **(सम्)** श्रैष्ठ्येऽर्थे **(वाजेभिः)** विज्ञानादिगुणैः संग्रामैर्वा **(पुरुश्चन्द्रैः)** पुरवो बहवश्चन्द्रा आह्लादकारकाः सुवर्णरजतादयो धातवो वा येभ्यस्तैः **(अभिद्युभिः)** अभितो दिवः विद्याव्यवहारप्रकाशा येषु तैः **(सम्)** श्लेषे **(देव्या)** दिव्यगुणसहितया विद्यायुक्त्या सेनया **(प्रमत्या)** प्रकृष्टा मतिर्मननं यस्यां तया **(वीरशुष्मया)** वीराणां योद्धृणां शुष्माणि बलानि यस्यां तया **(गोअग्रया)** गाव इन्द्रियाणि धेनवः पृथिव्यो वाऽग्राः श्रेष्ठा यस्यां तया। अत्र **सर्वत्र विभाषा गोः।** (अष्टा०६.१.१२२) अनेन प्रकृतिभावः। **(अश्वत्या)** प्रशस्ता वेगबलयुक्ता अश्वा विद्यन्ते यस्यां तया **(रभेमहि)** शत्रुभिः सह युध्येमहि॥५॥

अन्वयः-हे इन्द्र सभाध्यक्ष! यथा वयं त्वत्सहायेन सम्राया समिषा पुरुश्चन्द्रैरभिद्युभिः संवाजेभिः प्रमत्या देव्या गोऽअग्रयाऽश्वावत्या वीरशुष्मया सेनया सह वर्त्तमानाः शत्रुभिः संरभेमहि सम्यक् संग्रामं कुर्याम तथैतत्कृत्वा लौकिकपारमार्थिकान् व्यवहारान् रभेमहि तं त्वं संसाधय॥५॥

भावार्थः-नहि कश्चिदपि विद्वत्सहायमन्तरा सम्यक् पुरुषार्थसिद्धिमाप्नोति नैव किल बलारोग्यपूर्णसामग्री- सुशिक्षितया धार्मिकशूरवीरयुक्त्या चतुरङ्गिण्या सेनया विना कश्चिच्छत्रुपराजयं कृत्वा विजयं प्राप्तुं शक्नोति, तस्मादेतत्सर्वदोन्नेयमिति॥५॥

पदार्थः-हे **(इन्द्र)** सभाध्यक्ष! जैसे हम लोग आप के सहाय से **(सम्राया)** उत्तम राज्यलक्ष्मी **(समिषा)** धर्म की इच्छा वा अन्नादि **(अभिद्युभिः)** विद्या व्यवहार और प्रकाशयुक्त **(पुरुश्चन्द्रैः)** बहुत आह्लादकारक सुवर्ण और उत्तम चांदी आदि धातु **(सं वाजेभिः)** विज्ञानादि गुण वा संग्राम तथा **(प्रमत्या)** उत्तम मतियुक्त **(देव्या)** दिव्यगुण सहित विद्या से युक्त सेना से **(गोअग्रया)** श्रेष्ठ इन्द्रिय गौ और पृथिवी से युक्त **(वीरशुष्मया)** शूरवीर योद्धाओं के बल से युक्त **(अश्ववत्या)** प्रशंसनीय वेग, बलयुक्त घोड़े वाली सेना के साथ वर्त्तमान होके शत्रुओं के साथ **(संरभेमहि)** अच्छे प्रकार संग्राम को करें, इस सब कार्य्य को करके लौकिक और पारमार्थिक सुखों को **(रभेमहि)** सिद्ध करें॥५॥

भावार्थः-कोई भी मनुष्य विद्वान् की सहायता के विना अच्छे प्रकार पुरुषार्थ की सिद्धि को प्राप्त नहीं हो सकता और निश्चय करके बल, आरोग्य, पूर्ण सामग्री और उत्तम शिक्षा से युक्त धार्मिक, शूरवीर युक्त चतुरंगिणी अर्थात् चौतर्फी अङ्ग से युक्त सेना के विना शत्रुओं का पराजय वा विजय के प्राप्त होने को समर्थ नहीं हो सकता, इससे मनुष्यों को इन कार्यों की उन्नति करनी चाहिये॥५॥

पुनस्तै किं कर्त्तव्यमित्युपदिश्यते॥

फिर उन मनुष्यों को क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

ते त्वा॒ मदा॑ अमद॒न्तानि॒ वृष्ण्या॒ ते सोमा॑सो वृत्र॒हत्ये॑षु सत्पते।
यत्का॒रवे॒ दश॑ वृ॒त्राण्यप्र॑ति ब॒र्हिष्म॑ते॒ नि स॒हस्रा॑णि ब॒र्हय॑॥६॥

ते। त्वा॒। मदा॑ः। अ॒म॒द॒न्। तानि॑। वृष्ण्या॑। ते। सोमा॑सः। वृ॒त्र॒ऽहत्ये॑षु। स॒त्ऽप॒ते॒। यत्। का॒रवे॑। दश॑। वृ॒त्राणि॑। अप्र॑ति। ब॒र्हिष्म॑ते। नि। स॒हस्रा॑णि। ब॒र्हय॑॥६॥

पदार्थः-(**ते**) प्रजास्था धार्मिका विद्वांसः (**त्वा**) त्वां पाठशालाध्यक्षम् (**मदाः**) आनन्दिता आनन्दयितारः (**अमदन्**) हृष्यन्तु (**तानि**) पूर्वोक्तानि कर्माणि (**वृष्ण्या**) सुखसेचनसमर्थानि (**ते**) पूर्वोक्ताः (**सोमासः**) अभिषुताः सुसम्पादिताः पदार्था यैस्ते (**वृत्रहत्येषु**) वृत्राः शत्रवो हत्या हननीया येषु तेषु संग्रामेषु (**सत्पते**) सत्पुरुषाणां पति पालयिता तत्सम्बुद्धौ (**यत्**) यः (**कारवे**) कर्मकर्त्रे (**दश**) दशत्वसंख्याविशिष्टानि (**वृत्राणि**) शत्रूणामावरकाणि कर्माणि (**अप्रति**) अप्रतीतानि यथा स्यात् तथा (**बर्हिष्मते**) विज्ञानवते (**नि**) नित्यम् (**सहस्राणि**) बहून्यसंख्यातानि सैन्यानि (**बर्हयः**) वर्द्धय॥६॥

अन्वयः-हे सत्पते यस्त्वं बर्हिष्मते कारवे दश सहस्राणि वृत्राण्यप्रति निबर्हयस्तं त्वामाश्रित्य ते सोमासो मदाः शूरवीराः वृत्रहत्येषु तानि वृष्ण्या सेचनसमर्थान्युत्तमानि कर्माण्याचरन्तोऽमदन्॥६॥

भावार्थः-सर्वैर्मनुष्यैः सदा सत्पुरुषसङ्गेनाऽनेकानि साधनानि प्राप्यानन्दयितव्यमिति॥६॥

पदार्थः-हे **(सत्पते)** सत्पुरुषों के पालन करने वाले सभाध्यक्ष! **(यत्)** जो आप **(बर्हिष्मते)** विज्ञान युक्त **(कारवे)** कर्म करने वाले मनुष्य के लिये **(वृत्राणि)** शत्रुओं को रोकने हारे कर्म **(दश)** दश **(सहस्राणि)** हजार अर्थात् असंख्यात सेनाओं के **(अप्रति)** अप्रतीति जैसे हो वैसे प्रतिकूल कर्मों को **(निर्बहयः)** निरन्तर बढ़ाइये, उस आप के आश्रित होकर **(ते)** वे **(सोमासः)** उत्तम-उत्तम पदार्थों को उत्पन्न करने **(मदाः)** आनन्दित करने वाले शूरवीर धार्मिक विद्वान् लोग **(त्वा)** आपको **(वृत्रहत्येषु)** शत्रुओं के मारने योग्य संग्रामों में **(तानि)** उन **(वृष्ण्या)** सुख वर्षाने वाले उत्तम-उत्तम कर्मों को आचरण करते हुए **(अमदन्)** प्रसन्न होते हैं॥६॥

भावार्थः-सब मनुष्यों को चाहिये कि सत्पुरुषों के संग से अनेक साधनों को प्राप्त कर आनन्द भोगें॥६॥

पुनः स सेनाध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सेनाध्यक्ष कैसा होवे, इस विषय का उपदेश अगले मन्त्र में किया है॥

युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम्॥७॥

युधा। युधम्। उप। घ। इत्। एषि। धृष्णुऽया। पुरा। पुरम्। सम्। इदम्। हंसि। ओजसा। नम्या। यत्। इन्द्र। सख्या। पराऽवति। निऽबर्हयः। नमुचिम्। नाम। मायिनम्॥७॥

पदार्थः-(**युधा**) यो योधयति तेन **(युधम्)** युध्यमानम् **(उप)** सामीप्ये **(घ)** एव **(इत्)** अपि **(एषि)** प्राप्नोषि **(धृष्णुया)** धार्ष्ट्यादिगुणयुक्तेन धृष्टेन **(पुरो)** पूर्वम् **(पुरम्)** शत्रुनगरम् **(सम्)** एकीभावे **(इदम्)** यद्यद्गोचरं तत्तत् **(हंसि)** नाशयसि **(ओजसा)** बलेन **(नम्या)** यथा रात्रिरन्धकारेण सर्वान् पदार्थानावृणोति तथा। **नम्या इति रात्रिनामसु पठितम्।** (निघं०१.७) **(यत्)** यस्मात् **(इन्द्र)** सभासेनाध्यक्ष **(सख्या)** मित्रसमूहेन **(परावति)** दूरदेशे **(निबर्हयः)** निःसारय **(नमुचिम्)** न विद्यते मुचिर्मोक्षणं यस्य तम्। अत्र **इक् कृष्यादिभ्य** (अष्टा०वा०३.३.१०८) इति मुचधातोर्भाव इक्। **नभ्राण्नपान्नवेदाना०** (अष्टा०६.३.७५) इति निपातनान्नञः प्रकृतिभावः। **(नाम)** प्रसिद्धम् **(मायिनम्)** कुत्सिता माया विद्यते यस्य तं छलकपटयुक्तं दुष्टकर्मकारिणं मनुष्यम्॥७॥

अन्वयः-हे इन्द्र सभाद्यध्यक्ष! यद्यस्मात्त्वं धृष्णुया सख्या युधौजसा च सह पुरेदं पुरं हंसि युधमिद् घ शत्रुमप्येवैषि नम्या रात्रिरिवान्यायेनान्धकारिणं नाम प्रसिद्धं नमुचिं मायिनं परावति दूरदेशे निबर्हयस्तस्मात्त्वां मूर्धाभिषिक्तं कृत्वा वयं सभाद्यध्यक्षत्वेन स्वीकृत्य राजानमभिषिञ्चामः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्बहून् मित्रान् सम्पाद्य दुष्टान् शत्रून्निवार्य दुष्टदलानि शत्रूणां पुराणि च विदार्य सर्वानन्यायकारिणो मनुष्यादीन् सततं कारागारे बध्वा धर्म्यं चक्रवर्त्तिराज्यं प्रशास्य परमैश्वर्यं सम्पादनीयम्॥७॥

पदार्थः-हे **(इन्द्र)** सभा सेनाध्यक्ष! **(यत्)** जिस कारण तुम **(धृष्णुया)** दृढ़ता आदि गुणयुक्त **(सख्या)** मित्रसमूह **(युधा)** युद्ध करने वाले **(ओजसा)** बल के साथ **(पुरा)** पहिले **(इदम्)** इस **(पुरम्)** शत्रुओं के नगर को **(हंसि)** नष्ट करते तथा **(युधम्)** युद्ध करते हुए शत्रु को **(इत्)** भी **(घ)** निश्चय करके **(एषि)** प्राप्त करते और **(नम्या)** जैसे रात्रि अन्धकार से सब पदार्थों का आवरण करती है, वैसे अन्याय से अन्धकार करने वाले **(नाम)** प्रसिद्ध **(नमुचिम्)** छुट्टी से रहित **(मायिनम्)** छल-कपटयुक्त दुष्ट कर्म करने वाले मनुष्य वा पश्वादि को **(परावति)** दूर देश में **(निबर्हयः)** निःसारण करते हो, इससे आपको मूर्द्धाभिषिक्त करके हम लोग सभाध्यक्ष के अधिकार में स्वीकार करके राजपदवी से मान्य करते हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि बहुत उत्तम-उत्तम मित्रों को प्राप्त, दुष्ट शत्रुओं का निवारण, दुष्ट दल वा शत्रुओं के पुरों को विदारण, सब अन्यायकारी मनुष्यों को निरन्तर कैदघर में बांध, ताड़ना दे और धर्मयुक्त चक्रवर्त्ति राज्य को पालन करके उत्तम ऐश्वर्य को सिद्ध करें॥७॥

पुनः स किं कुर्य्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी।
त्वं शता वङ्गृदस्याभिनत् पुरोऽनानुदः परिषूता ऋजिश्वना॥८॥

त्वम्। करञ्जम्। उत। पर्णयम्। वधीः। तेजिष्ठया। अतिथिऽग्वस्य। वर्तनी। त्वम्। शता। वङ्गृदस्य। अभिनत्। पुरः। अननुऽदः। परिऽसूताः। ऋजिऽश्वना॥८॥

पदार्थः-**(त्वम्)** सभाध्यक्षः **(करञ्जम्)** यः किरति विक्षिपति धार्मिकाँस्तम्। अत्र **कृविक्षेप** इत्यस्माद्धातोः बाहुलकाद् औणादिकोऽञ्जन् प्रत्ययः। **(उत)** अपि **(पर्णयम्)** पर्णानि परप्राप्तानि वस्तूनि याति प्राप्नोति तं चोरम् **(वधीः)** हंसि **(तेजिष्ठया)** या अतिशयेन तीव्रा तेजिष्ठा सेनानीतिर्वा तया **(अतिथिग्वस्य)** अतिथीन् गच्छति गमयति वा येन तस्य। अत्रातिथ्युपपदाद्गमधातोः बाहुलकादौणादिको ड्वः प्रत्ययः। **(वर्त्तनी)** वर्त्तते यया क्रियया सा **(त्वम्)** **(शता)** बहूनि **(वङ्गृदस्य)** यो वङ्गून् वक्रान् विषादीन् पदार्थान् व्यवहारान् ददात्युपदिशति वा तस्य दुष्टस्य **(अभिनत्)** विदारयसि **(पुरः)** पुराणि **(अननुदः)** योऽनुगतं न ददाति तस्य **(परिसूताः)** परितः सर्वतः सूता उत्पन्ना उत्पादिता वा पदार्थाः **(ऋजिश्वना)** ऋजय ऋजुगुणयुक्ता सुशिक्षिताः श्वानो येन तेन सह॥८॥

अन्वयः-हे सभाध्यक्ष! यतस्त्वं यस्मिन् युद्धव्यवहारे तेजिष्ठया सेनया करञ्जमुतापि पर्णयं वधीर्हंसि याऽतिथिग्वस्य वर्त्तनी गमनागमनसत्करणक्रियाऽस्ति तां रक्षित्वाऽननुदो वङ्गृदस्य दुष्टस्य शतानि पुरः पुराण्यभिनद्भिनत्सि ये परिसूताः पदार्थास्तानृजिश्वनां व्यवहारेण रक्षसि तस्मात्त्वमेव सभाध्यक्षत्वे योग्योऽसीति वयं निश्चिनुमः॥८॥

भावार्थः-राजपुरुषैर्दुष्टान् शत्रून् छित्वा पूर्णविद्यावतां परोपकारिणां धार्मिकाणामतिथीनां सत्क्रियार्थं सर्वान् प्राणिनः पदार्थांश्च रक्षित्वा धर्म्यं राज्यं सेवनीयम्। यथा श्वानः स्वामिनं रक्षन्ति तथान्ये रक्षितुं न शक्नुवन्ति तस्मादेते सुशिक्ष्य परिरक्षणीयाः॥८॥

पदार्थः-हे सभाध्यक्ष! जिस कारण **(त्वम्)** आप इस युद्ध व्यवहार में **(तेजिष्ठया)** अत्यन्त तीक्ष्ण सेना वा नीतियुक्त बल से **(करञ्जम्)** धार्मिकों को दुःख देने **(पर्णयम्)** दूसरे के वस्तु को लेने वाले चोर को **(उत)** भी **(वधीः)** मारते और जो **(अतिथिग्वस्य)** अतिथियों के जाने आने के वास्ते **(वर्तनी)** सत्कार करने वाली क्रिया है, उसकी रक्षा कर **(अननुदः)** अनुकूल न वर्त्तने **(वङ्गृदस्य)** जहर आदि पदार्थों को देने वा दुष्ट व्यवहारों का उपदेश करने वाले दुष्ट मनुष्य के **(शता)** असंख्यात **(पुरः)** नगरों को **(अभिनत्)** भेदन करते और जो **(परिसूताः)** सब प्रकार से उत्पन्न किये हुए पदार्थ हैं, उनकी **(ऋजिश्वना)** कोमल गुणयुक्त कुत्तों की शिक्षा करने वाले के समान व्यवहार के साथ रक्षा करते हो, इससे आप ही सभा आदि के अध्यक्ष होने योग्य हो, ऐसा हम लोग निश्चय करते हैं॥८॥

भावार्थः-राजमनुष्यों को दुष्ट शत्रुओं के छेदन से पूर्ण विद्यायुक्त परोपकारी धार्मिक अतिथियों के सत्कार के लिये सब प्राणी वा सब पदार्थों की रक्षा करके धर्मयुक्त राज्य का सेवन करना चाहिये, जैसे कि कुत्ते अपनी स्वामी की रक्षा करते हैं, वैसी अन्य जन्तु रक्षा नहीं कर सकते, इससे इन कुत्तों को सिखा कर और इनकी रक्षा करनी चाहिये॥८॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमे॒ताञ्जन॒राज्ञो॒ द्विर्दशा॑ब॒न्धुना॑ सु॒श्रव॑सोपज॒ग्मुष॑:।
ष॒ष्टिं स॒हस्रा॑ नव॒तिं नव॑ श्रु॒तो नि च॒क्रेण॒ रथ्या॑ दु॒ष्पदा॑वृणक्॥९॥

त्वम्। ए॒तान्। ज॒न॒ऽराज्ञः॑। द्विः। दश॑। अ॒ब॒न्धुना॑। सु॒ऽश्रव॑सा। उ॒प॒ऽज॒ग्मुषः॑। ष॒ष्टिम्। स॒हस्रा॑। न॒व॒तिम्। नव॑। श्रु॒तः। नि। च॒क्रेण॑। रथ्या॑। दुः॒ऽपदा॑। अ॒वृ॒ण॒क्॥९॥

पदार्थः-**(त्वम्)** सभाद्यध्यक्षः **(एतान्)** मनुष्यादीन् **(जनराज्ञः)** जना धार्मिका राजानो येषां तान् **(द्विः)** द्विवारम् **(दश)** दश संख्यायाम् **(अबन्धुना)** अविद्यमाना बन्धवो मित्रा यस्य तेनार्थेन सह **(सुश्रवसा)** शोभनानि श्रवांसि श्रवणन्यन्नानि वा यस्य तेन मित्रेण सह **(उपजग्मुषः)** य उप सामीप्ये

गतवन्तस्तान् **(षष्टिम्)** एतत्संख्याकान् **(सहस्रा)** सहस्राणि **(नवतिम्)** एतत्संख्याकान् **(नव)** एतत्संख्यापरिमिताञ्छूरान् भृत्यान् **(श्रुतः)** यः श्रूयते सः **(नि)** नित्यम् **(चक्रेण)** शस्त्रसमूहेन चक्राङ्गयुक्तेन यानसमूहेन वा **(रथ्या)** यो रथं वहति तेन रथ्येन **(दुष्पदा)** दुःखेन पत्तुं प्राप्तुं योग्येन **(अवृणक्)** वृणक्षि॥९॥

अन्वयः-हे सभाद्यध्यक्ष! यथा श्रुतस्त्वमेतानबन्धुना सुश्रवसा सह वर्त्तमानानुपजग्मुष उपगतां षष्टिं नवतिं नव दश च सहस्राणि जनराज्ञो दुष्पदा रथ्या दुष्प्रापकेन रथ्येन चक्रेण द्विर्न्यवृणक् नित्यं वृणक्षि दुःखैः पृथक् करोषि दुष्टांश्च दूरीकरोषि तथा त्वमपि दुराचारत्पृथक् वस॥९॥

भावार्थः-चक्रवर्त्तिना राज्ञा सर्वान् माण्डलिकान् महामाण्डलिकान् राज्ञो भृत्यान् गृहस्थान् विरक्तान् वाऽनुरज्य शरणागतान् पालयित्वा धर्म्यं सार्वभौमराज्यमनुशासनीयम्। यतो दशेत्यादयः संख्यावाचिनः शब्दा उपलक्षणार्थाः सन्त्यतो राजपुरुषैः सर्वेषां यथायोग्यं रक्षणं दण्डनं च विधेयमिति॥९॥

पदार्थः-हे सभा और सेना के अध्यक्ष! जैसे **(श्रुतः)** श्रवण करने वाले **(त्वम्)** तुम **(एतान्)** इन **(अबन्धुना)** अबन्धु अर्थात् मित्ररहित अनाथ वा (**सुश्रवसा**) उत्तम श्रवण अन्नयुक्त मित्र के साथ वर्त्तमान **(उपजग्मुषः)** समीप होने वाले **(षष्टिम्)** साठ **(नवतिम्)** नव्वे **(नव)** नौ **(दश)** **(सहस्राणि)** दस हजार **(जनराज्ञः)** धार्मिक राजायुक्त मनुष्यादिकों को **(दुष्पदा)** दुःख से प्राप्त होने योग्य **(रथ्या)** रथ को प्राप्त करने वाले **(चक्रेण)** शस्त्र विशेष वा चक्रादि अङ्ग युक्त यानसमूह से **(द्विः)** दो बेर **(न्यवृणक्)** नित्य दुःखों से अलग करते वा दुष्टों को दूर करते हो, वैसे तू भी पापाचरण से सदा दूर रह॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। चक्रवर्त्ति राजा को माण्डलिक वा महामाण्डलिक राजा भृत्य गृहस्थ वा विरक्तों को प्रसन्न और शरणागत आये हुए मनुष्य की रक्षा करके धर्मयुक्त सार्वभौम राज्य का यथावत् पालन करना चाहिये और दश से आदि ले के सब संख्यावाची शब्द उपलक्षण के लिये हैं, इससे राजपुरुषों को योग्य है कि सब की यथावत् रक्षा वा दुष्टों को दण्ड देवे॥९॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमा॑विथ सु॒श्रव॑सं॒ तवो॒तिभि॒स्तव॒ त्राम॑भिरिन्द्र॒ तूर्व॑याणम्।
त्वम॑स्मै॒ कुत्स॑मतिथि॒ग्वमा॒युं म॒हे राज्ञे॒ यूने॒ अरन्धनायः॥ १०॥

त्वम्। आ॒वि॒थ॒। सु॒ऽश्रव॑सम्। तव॑। ऊ॒तिऽभिः॑। तव॑। त्राम॑ऽभिः। इ॒न्द्र॒। तूर्व॑याणम्। त्वम्। अ॒स्मै॒। कुत्स॑म्। अ॒ति॒थि॒ऽग्वम्। आ॒युम्। म॒हे। राज्ञे॑। यूने॑। अर॑न्धनायः॥ १०॥

पदार्थः-(**त्वम्**) सभाद्यध्यक्षः (**आविथ**) रक्षसि (**सुश्रवसम्**) सुष्ठु श्रवांसि श्रवणान्यन्नादीनि यस्य तम् (**तव**) रक्षणे वर्त्तमानस्य (**ऊतिभिः**) रक्षणादिभिः (**तव**) सेनादिभिः सह वर्त्तमानस्य (**त्रामभिः**) त्रायन्ते ते धार्मिका विद्वांसः शूरास्तैः (**इन्द्र**) परमैश्वर्यप्रद (**तूर्वयाणम्**) तूर्वाः शत्रुबलहिंसका योद्धारो यानेषु यस्य तम् (**त्वम्**) सभाशालासेनाप्रजारक्षकः (**अस्मै**) युध्यमानाय वीराय (**कुत्सम्**) वज्रम्। **कुत्स इति वज्रनामसु पठितम्।** (निघं०२.२०) (**अतिथिग्वम्**) योऽतिथीन् गच्छति गमयति वा तम् (**आयुम्**) य एति प्राप्नोति तम् (**महे**) महोत्तमगुणविशिष्टाय (**राज्ञे**) न्यायविनयविद्यागुणैर्देदीप्यमानाय (**यूने**) युवावस्थायां वर्त्तमानाय (**अरन्धनायः**) अरमलं धनं यस्य स इवाचरसीत्यरन्धनायः। अत्र लडर्थे लिङ्॥१०॥

अन्वयः-हे इन्द्र सभाद्यध्यक्ष! त्वमस्मै महे यूने राज्ञे तवोतिभिस्तव त्रामभी रक्षितं यमतिथिग्वं तूर्वयाणमायुं सुश्रवसमरन्धनायो यं त्वं कुत्समाविथ तं किमपि दुःखं न भवति॥१०॥

भावार्थः-राजपुरुषैः शत्रून् निवार्य सर्वान् रक्षित्वा सर्वदा सुखिनः सम्पादनीयाः एते किल राजोन्नतिश्रियः सदा भवेयुः। विद्याशालाध्यक्षः सर्वान् सुशिक्षया विदुषः शस्त्रास्त्रकुशलान् सम्पाद्यैतैः प्रजां सततं रक्षेत्॥१०॥

पदार्थः-हे (**इन्द्र**) सभासेनाध्यक्ष! (**त्वम्**) आप (**अस्मै**) इस (**महे**) महा उत्तम-उत्तम गुणयुक्त (**यूने**) युवावस्था में वर्त्तमान (**राज्ञे**) न्याय, विनय और विद्यादि गुणों से देदीप्यमान राजा के लिये (**तव**) आप के (**ऊतिभिः**) रक्षण आदि कर्मों से सेनादि सहित और (**तव**) वर्त्तमान आपके (**त्रामभिः**) रक्षा करने वाले धार्मिक विद्वानों से रक्षा किये हुए जिस (**अतिथिग्वम्**) अतिथियों को प्राप्त करने कराने (**तूर्वयाणाम्**) शत्रुबलों की हिंसा करने वाले यानसहित (**आयुम्**) जीवनयुक्त (**सुश्रवसम्**) उत्तम श्रवण वा अन्नादि युक्त मनुष्यों को (**अरन्धनायः**) पूर्ण धन वाले मनुष्य के समान आचरण करते और (**त्वम्**) आप जिस (**कुत्सम्**) वज्र के समान वीर पुरुष की (**आविथ**) रक्षा करते हो, उसको कुछ भी दुःख नहीं होता॥१०॥

भावार्थः-राजपुरुषों को योग्य है कि शत्रुओं को निवारण कर सब की रक्षा करके सर्वथा उनको सुखयुक्त करें तथा ये निश्चय करके राजोन्नतिरूपी लक्ष्मी से सदा युक्त रहें और विद्याशाला के अध्यक्ष उत्तम शिक्षा से सब शस्त्रास्त्र विद्या में कुशल निपुण विद्वानों को सम्पन्न करके इन से प्रजा की निरन्तर रक्षा करें॥१०॥

पुनरेते परस्परं कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर ये लोग परस्पर कैसे वर्त्तें, इस विषय का उपदेश अगले मन्त्र में किया है॥

य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम।

त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः॥ ११॥ १६॥

ये। उत्ऽऋचि। इन्द्र। देवऽगोपाः। सखायः। ते। शिवऽतमाः। असाम। त्वाम्। स्तोषाम। त्वया। सुऽवीराः। द्राघीयः। आयुः। प्रऽतरम्। दधानाः॥ ११॥

पदार्थः-(**ये**) वक्ष्यमाणलक्षणा वयम् (**उदृचि**) उत्कृष्टा ऋचो यस्मिन्नध्ययने तस्मिन् (**इन्द्र**) सभाद्यध्यक्षं (**देवगोपाः**) देवा विद्वांसो गोपा रक्षका येषान्ते। यद्वा ये देवानां दिव्यानां गुणानां कर्मणां वा गोपा रक्षकास्ते (**सखायः**) परस्परं सुहृदः सन्तः (**ते**) तव (**शिवतमाः**) अतिशयेन शिवाः कल्याणकारकं कर्म कुर्वन्तः कारयन्तश्च (**असाम**) भवेम (**त्वाम्**) शुभलक्षणम् (**स्तोषाम**) गुणान् कीर्त्तयेम (**त्वया**) रक्षिताः शिक्षिता वा (**सुवीराः**) शोभनाश्च ते वीराश्च यद्वा सुष्ठु वीरा येषु ते (**द्राघीयः**) अतिशयेन विस्तीर्णं शताद् वर्षेभ्योऽप्यधिकम् (**आयुः**) जीवनम् (**प्रतरम्**) प्रकृष्टया तरति प्लावयति दूरीकरोति दुःखं येन तत् (**दधानाः**) धरन्तः सन्तः॥ ११॥

अन्वयः-हे इन्द्र! ते तव देवगोपाः शिवतमाः सखायो वयमसाम भवेम त्वया रक्षिताः सुवीराः प्रतरं द्राघीय आयुर्दधानाः सन्तो वयमुदृचि त्वां स्तोषाम॥ ११॥

भावार्थः-सर्वैर्मनुष्यैः परस्परं निश्चितां मैत्रीं कृत्वा सर्वान् स्त्रीपुरुषादिजनान् सुविद्यायुक्तान् सम्पाद्य जितेन्द्रियत्वादिगुणान् गृहीत्वा ग्राहयित्वा च पूर्णमायुर्भोक्तव्यम्॥ ११॥

अस्मिन् सूक्ते विद्वत्सभाध्यक्षप्रजापुरुषैः परस्परमित्रभावेन वर्त्तित्वा सर्वदा सुखं प्राप्तव्यमित्युक्तमत एतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति षोडशो १६ वर्गस्त्रिपञ्चाशं ५३ सूक्तं च समाप्तम्॥ ५३॥

पदार्थः-हे (**इन्द्र**) सभासेनाध्यक्ष! (**ते**) आप के (**देवगोपाः**) रक्षक विद्वान् वा दिव्य गुण कर्मों की रक्षा करने (**शिवतमाः**) अतिशय करके कल्याण लक्षणयुक्त (**सखायः**) परस्पर मित्र हम लोग (**असाम**) होवें (**त्वया**) आपके साथ रक्षा वा शिक्षा किये (**सुवीराः**) उत्तम वीरयुक्त (**अतरम्**) दुःख दूर करते (**द्राघीयः**) अत्यन्त विस्तारयुक्त सौ वर्ष से अधिक (**आयुः**) उमर को (**दधानाः**) धारण करके (**उदृचि**) उत्तम ऋचा युक्त अध्ययन व्यवहार में (**त्वाम्**) शुभ लक्षण युक्त आप के (**स्तोषाम**) गुणों का कीर्त्तन करें॥ ११॥

भावार्थः-सब मनुष्यों को परस्पर निश्चित मैत्री, सब स्त्री पुरुषों को उत्तम विद्या युक्त जितेन्द्रियपन आदि गुणों को ग्रहण कर और कराके पूर्ण आयु का भोग करना चाहिये॥ ११॥

इस सूक्त में विद्वान् सभाध्यक्ष तथा प्रजा के पुरुषों को परस्पर प्रीति से वर्त्तमान रहकर सुख को प्राप्त करना कहा है। इससे सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह सोलहवां वर्ग १६ और तिरेपनवां ५३वां सूक्त समाप्त हुआ॥ ५३॥

अथास्यैकादशर्चस्य चतु:पञ्चाशस्य सूक्तस्याङ्गिरस: सव्य ऋषि:। इन्द्रो देवता। १,४,१० विराड्जगति। २,३,५ निचृज्जगती। ७ जगती च छन्द:। निषाद: स्वर:। ६ विराट्त्रिष्टुप्। ८,९,११ निचृत्त्रिष्टुप् च छन्द:। धैवत: स्वर:॥

तत्रादावीश्वरगुणा उपदिश्यन्ते॥

अब चौअनवें सूक्त का आरम्भ है। उस के पहिले मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

मा नो॑ अ॒स्मिन् म॑घवन् पृ॒त्स्वंह॑सि न॒हि ते॒ अन्त॒: शव॑स: परी॒णशे॑।
अक्र॑न्दयो न॒द्यो३॑ रोरु॑वद्व॒ना कृ॒था न क्षो॒णीर्भि॒यसा॒ समा॑रत॥ १॥

मा। न॒:। अ॒स्मिन्। म॒घ॒ऽव॒न्। पृ॒त्ऽसु। अंह॑सि। न॒हि। ते॒। अन्त॑:। शव॑स:। प॒रि॒ऽनशे॑। अक्र॑न्दय:। न॒द्य॑:। रोरु॑वत्। वना॑। कृ॒था। न। क्षो॒णी:। भि॒यसा॑। सम्। आ॒र॒त॥ १॥

पदार्थ:-(**मा**) निषेधार्थे (**न:**) अस्मान् (**अस्मिन्**) जगति (**मघवन्**) प्रशस्तधनयुक्त (**पृत्सु**) सेनासु (**अंहसि**) पापे (**नहि**) निषेधार्थे (**ते**) तव (**अन्त:**) पारम् (**शवस:**) बलस्य (**परीणशे**) परित: सर्वतो नश्यन्त्यदृश्या भवन्ति यस्मिंस्तस्मिन्। अत्र घञर्थे क: प्रत्ययोऽ**न्येषामपि** इति दीर्घश्च। (**अक्रन्दय:**) आह्वय (**नद्य:**) सरित इव (**रोरुवत्**) पुन: पुना रोदय (**वना**) सम्भक्तानि वस्तूनि (**कथा**) कथम् (**न**) निषेधे (**क्षोणी:**) बह्वी: पृथिवी:। **क्षोणी इति पृथिवीनामसु पठितम्।** (निघं०१.१) (**भियसा**) भयेन (**सम्**) सम्यक् (**आरत**) प्राप्नुत॥ १॥

अन्वय:-हे मघवन् जगदीश्वर! यस्त्वं पृत्स्वस्मिन् परीणशेंऽहस्यस्मान् माक्रन्दयो यस्य ते तव शवसोऽन्तो नह्यस्ति स त्वमस्मान्नद्य: सरित इव मा भ्रामय भियसा मारोरुवन्मा रोदय यस्त्वं क्षोणीर्बह्वी: पृथिवीर्निर्मातुं धर्त्तुं शक्नोषि तन्त्वा मनुष्या: कथा न समारत कथं न प्राप्नुयु:॥ १॥

भावार्थ:-अत्र मनुष्यै: परमेश्वरस्यानन्तत्वात् सत्यभावेनोपासित: सन्नयं दु:खजनकादधर्ममार्गान्निवर्त्य सुखयति। एतस्यानन्तरूपगुणवत्त्वात् कश्चिदप्यस्यान्तं ग्रहीतुं न शक्नोति, तस्मादेतस्योपासनं त्यक्त्वा को भाग्यहीनोऽन्यमुपासीत॥ १॥

पदार्थ:-हे (**मघवन्**) उत्तम धनयुक्त जगदीश्वर! जो आप (**पृत्सु**) सेनाओं (**अस्मिन्**) इस जगत् और (**परीणशे**) सब प्रकार से नष्ट करने वाले (**अंहसि**) पाप में हम लोगों को (**माक्रन्दय:**) मत फँसाइये जिस (**ते**) आप के (**शवस:**) बल के (**अन्त:**) अन्त को कोई भी (**नहि**) नहीं पा सकता वह आप (**नद्य:**) नदियों के समान हम को मत भ्रमाइये (**भियसा**) भय से (**मा रोरुवत्**) बार-बार मत रुलाइये जो आप (**क्षोणी:**) बहुत गुणयुक्त पृथिवी के निर्माण वा धारण करने को समर्थ हैं, इसलिये मनुष्य आपको (**कथा**) क्यों (**न**) नहीं (**समारत**) प्राप्त होवे॥ १॥

भावार्थ:-मनुष्यों को चाहिये कि जो परमेश्वर अनन्त होने से सत्य प्रेम के साथ उसकी उपासना किया हुआ दु:ख उत्पन्न करने वाले अधर्म मार्ग से निवृत्त कर मनुष्यों को सुखी करता है, उसके अनन्त

स्वरूप गुण होने से कोई भी अन्त को ग्रहण नहीं कर सकता। इस से उस ईश्वर की उपासना को छोड़ के कौन अभागी पुरुष दूसरे की उपासना करे॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

अर्चा शक्रायं शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते॥२॥

अर्च। शक्रायं। शाकिनें। शचीऽवते। शृण्वन्तम्। इन्द्रम्। महयन्। अभि। स्तुहि। यः। धृष्णुना। शवसा। रोदसी इति। उभे इति। वृषा। वृषऽत्वा। वृषभः। निऽऋञ्जते॥२॥

पदार्थः-(**अर्च**) सत्कुरु (**शक्राय**) समर्थाय (**शाकिने**) प्रशस्ताः शाकाः शक्तियुक्ता गुणा विद्यन्ते यस्मिंस्तस्मै (**शचीवते**) प्रशस्ता प्रज्ञा विद्यते यस्य तस्मै। **शचीति प्रज्ञानामसु पठितम्।** (निघं०३.९) (**शृण्वन्तम्**) श्रवणं कुर्वन्तम् (**इन्द्रम्**) प्रशस्तैश्वर्ययुक्तं सभाद्यध्यक्षम् (**महयन्**) सत्कुर्वन् (**अभि**) आभिमुख्ये (**स्तुहि**) प्रशंस (**यः**) (**धृष्णुना**) दृढत्वादिगुणयुक्तेन (**शवसा**) बलेन (**रोदसी**) द्यावापृथिव्यौ (**उभे**) द्वे (**वृषा**) जलानां वर्षकः (**वृषत्वा**) सुखवर्षकाणां भावस्तानि। अत्र **शेश्छन्दसि बहुलम्** इति शेर्लोपः। (**वृषभः**) यो वृषान् वृष्टिनिमित्तानि भाति सः (**नि**) नितरां (**ऋञ्जते**) प्रसाध्नोति। **ऋञ्जतिः प्रसाधनकर्मा।** (निरु०६.१)॥२॥

अन्वयः-हे मनुष्य! यथा सूर्य्यो वृषा वृषभो वृषत्वा धृष्णुना शवसोभे रोदसी निऋञ्जते तथा यो राज्यं साध्नोति तस्मै शाकिने शचीवते शक्राय त्वमर्च तं सर्वन्यायं शृण्वन्तमिन्द्रं महयन् सन्नभिस्तुहि॥२॥

भावार्थः-यो गुणोत्कृष्टत्वेन सार्वभौमः सभाद्यध्यक्षो धर्मेण सर्वान् प्रशास्य धर्मे संस्थापयति स एव सर्वैर्मनुष्यैराश्रयितव्यः॥२॥

पदार्थः-हे मनुष्यो! तुम जैसे (**वृषा**) जल वर्षाने और (**वृषभः**) वर्षा के निमित्त बादलों को प्रसिद्ध करानेहारा सूर्य्य (**वृषत्वा**) सुखों की वर्षा के तत्त्व और (**धृष्णुना**) दृढ़ता आदि गुणयुक्त (**शवसा**) आकर्षण बल से (**उभे**) दोनों (**रोदसी**) द्यावापृथिवी को (**न्यृञ्जते**) निरन्तर प्रसिद्ध करता है, वैसे (**यः**) जो तू राज्य का यथायोग्य प्रबन्ध करता है उस (**शाकिने**) प्रशंसनीय शक्ति आदि गुणयुक्त (**शचीवते**) प्रशंसित बुद्धिमान् (**शक्राय**) समर्थ के लिये (**अर्च**) सत्कार कर उस सबके न्याय को (**शृण्वन्तम्**) श्रवण करने वाले (**इन्द्रम्**) प्रशंसनीय ऐश्वर्ययुक्त सभाध्यक्ष का (**महयन्**) सत्कार करता हुआ (**अभिष्टुहि**) गुणों की प्रशंसा किया कर॥२॥

भावार्थः-जो गुणों की अधिकता होने से सार्वभौम सभाध्यक्ष धर्म से सबको शिक्षा देकर धर्म के नियमों में स्थापन करता है, उसी का सब मनुष्यों को सेवन वा आश्रय करना चाहिये॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः॥३॥

अर्च। दिवे। बृहते। शूष्यम्। वचः। स्वऽक्षत्रम्। यस्य। धृषतः। धृषत्। मनः। बृहत्ऽश्रवाः। असुरः। बर्हणा। कृतः। पुरः। हरिऽभ्यास्। वृषभः। रथः। हि। सः॥३॥

पदार्थः-(**अर्च**) पूजय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**दिवे**) सर्वथा शुभगुणस्य प्रकाशकाय (**बृहते**) विद्यादिगुणैर्वृद्धाय (**शूष्यम**) शूषे बले साधु यत्तत्। **शूषमिति बलनामसु पठितम्।** (निघं०२.९) (**वचः**) विद्याशिक्षासत्यप्रापकं वचनम् (**स्वक्षत्रम्**) स्वस्य राज्यम् (**यस्य**) सभाध्यक्षस्य (**धृषतः**) अधार्मिकान् दुष्टान् धर्षयतस्तत्कर्मफलं प्रापयतः (**धृषत्**) यो धृष्णोति दृढं कर्म करोति सः (**मनः**) सर्वक्रियासाधकं विज्ञानम् (**बृहच्छ्रवाः**) बृहच्छ्रवणं यस्य सः (**असुरः**) मेघो वा यः प्रज्ञां राति ददाति सः। **असुर इति मेघनामसु पठितम्।** (निघं०१.१०) **असुरिति प्रज्ञानामसु पठितम्।** (निघं०३.९) (**बर्हणा**) वृद्धियुक्तेन (**कृतः**) निष्पन्नः (**पुरः**) पूर्वः (**हरिभ्याम्**) सुशिक्षिताभ्यां तुरङ्गाभ्यां (**वृषभः**) यः पूर्वोक्तान् वृषान् भाति सः (**रथः**) रमणीयः (**हि**) खलु (**सः**)॥३॥

अन्वयः-हे विद्वन्मनुष्य! त्वं यस्य धृषतो मनो हि यो धृषद् बृहच्छ्रवा असुरः पुरो हरिभ्यां युक्तो दिव इव वृषभो रथो बर्हणा कृतस्तस्मै बृहते स्वक्षत्रं वर्धय शूष्यं वचोऽर्च च॥१३॥

भावार्थः-मनुष्यैरीश्वरेष्टं सभाद्यध्यक्षप्रशासितमेकमनुष्यराजप्रशासनविरहं राज्यं सम्पादनीयम्। यतः कदाचिद् दुःखान्यायालस्याज्ञानशत्रुपरस्परविरोधपीडितं न स्यात्॥३॥

पदार्थः-हे विद्वान् मनुष्य! तू (**यस्य**) जिस (**धृषतः**) अधार्मिक दुष्टों को कर्मों के अनुसार फल प्राप्त कराने वाले सभाध्यक्ष का (**धृषत्**) दृढ़ कर्म करने वाला (**मनः**) क्रियासाधक विज्ञान (**हि**) निश्चय करके है जो (**बृहच्छ्रवाः**) महाश्रवण युक्त (**असुरः**) जैसे प्रज्ञा देने वाले (**पुरः**) पूर्व (**हरिभ्याम्**) हरण-आहरण करने वा अग्नि, जल वा घोड़े से युक्त मेघ (**दिवे**) सूर्य के अर्थ वर्त्तता है, वैसे (**वृषभः**) पूर्वोक्त वर्षाने वालों के प्रकाश करने वाले (**रथः**) यानसमूह को (**बर्हणा**) वृद्धि से (**कृतः**) निर्मित किया है, उस (**बृहते**) विद्यादि गुणों से वृद्ध (**दिवे**) शुभ गुणों के प्रकाश करने वाले के लिये (**स्वक्षत्रम्**) अपने राज्य बढ़ा और (**शूष्यम्**) बल तथा निपुणतायुक्त (**वचः**) विद्या शिक्षा प्राप्त करने वाले वचन का (**अर्च**) पूजन अर्थात् उनके सहाय युक्त शिक्षा कर॥३॥

भावार्थः-मनुष्यों को अपना राज्य ईश्वर इष्ट वाले सभाध्यक्ष के शिक्षा किये हुए को सम्पादन कर, एक मनुष्य राज के प्रशासन से अलग राज्य को सम्पादन करना चाहिये, जिससे कभी दुःख, अन्याय, आलस्य, अज्ञान और शत्रुओं के परस्पर विरोध से प्रजा पीड़ित न होवे॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा होवे, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शम्बरं भिनत्।
यन्मायिनो वन्दिनो मन्दिना धृषच्छितां गभस्तिमशनिं पृतन्यसि॥४॥

त्वम्। दिवः। बृहतः। सानु। कोपयः। अव। त्मना। धृषता। शम्बरम्। भिनत्। यत्। मायिनः। वन्दिनः। मन्दिना। धृषत्। शिताम्। गभस्तिम्। अशनिम्। पृतन्यसि॥४॥

पदार्थः-(**त्वम्**) सभाध्यक्षः (**दिवः**) प्रकाशमयान्न्यायात् (**बृहतः**) महतः सत्यशुभगुणयुक्तात् (**सानु**) सनन्ति सम्भजन्ति येन कर्मणा तत्। अत्र **दृसनिजनि०** (उणा०१.३) इति ञुण् प्रत्ययः। (**कोपयः**) कोपयसि (**अव**) निरोधे (**त्मना**) आत्मना (**धृषता**) दृढकर्मकारिणा (**शम्बरम्**) शं सुखं वृणोति येन तं मेघमिव शत्रुम् (**भिनत्**) विदृणाति (**यत्**) यः (**मायिनः**) कपटादिदोषयुक्ताँश्छत्रून् (**वन्दिनः**) निन्दिता वन्दा मनुष्यादिसमूहा विद्यन्ते येषां तान् (**मन्दिना**) हर्षकारेण बलिना (**धृषत्**) शत्रुधर्षणं कुर्वन् (**शिताम्**) तीक्ष्णधाराम् (**गभस्तिम्**) रश्मिम् (**अशनिम्**) छेदनभेदनेन वज्रस्वरूपाम् (**पृतन्यसि**) आत्मनः पृतनां सेनामिच्छसि॥४॥

अन्वयः-हे सभाध्यक्ष! यः शत्रून् धृषत्त्वं यथा सूर्य्यो बृहतो दिवः सानु शितामशनिं गभस्तिं वज्राख्यं किरणं प्रहृत्य शम्बरं मेघं भिनत्तथा शस्त्रास्त्राणि प्रक्षिप्य त्मना दुष्ट जनानवकोपयो वन्दिनो मायिनो विदृणासि तन्निवारणाय पृतन्यसि स त्वं राज्यमर्हसि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा जगदीश्वरः पापकर्मकारिभ्यः स्वस्वपापानुसारेण दुःखफलानि दत्वा यथायोग्यं पीडयत्येवं सभाध्यक्षः शस्त्रास्त्रशिक्षया धार्मिकशूरवीरसेनां सम्पाद्य दुष्टकर्मकारिणो निवार्य्य धार्मिकीं प्रजां सततं पालयेत्॥४॥

पदार्थः-हे सभाध्यक्ष! जो (**धृषत्**) शत्रुओं का धर्षण करता (**त्वम्**) आप जैसे सूर्य्य (**बृहतः**) महासत्य शुभगुणयुक्त (**दिवः**) प्रकाश से (**सानु**) सेवने योग्य मेघ के शिखरों पर (**शिताम्**) अति तीक्ष्ण (**अशनिम्**) छेदन-भेदन करने से वज्रस्वरूप बिजुली और (**गभस्तिम्**) वज्ररूप किरणों का प्रहार कर (**शम्बरम्**) मेघ को (**भिनत्**) काट के भूमि में गिरा देता है, वैसे शस्त्र और अस्त्रों को चला के अपने (**त्मना**) आत्मा से दुष्ट मनुष्यों को (**अवकोपयः**) कोप कराते (**वन्दिनः**) निन्दित मनुष्यादि समूहों वाले (**मायिनः**) कपटादि दोषयुक्त शत्रुओं को विदीर्ण करते और उनके निवारण के लिये (**पृतन्यसि**) अपने न्यायादि गुणों की प्रकाश करने वाली विद्या वा वीर पुरुषों से युक्त सेना की इच्छा करते हो सो आप राज्य के योग्य होते हो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जगदीश्वर पापकर्म करने वाले मनुष्यों के लिये अपने-अपने पाप के अनुसार दुःख के फलों को देकर यथायोग्य पीड़ा देता है, इसी प्रकार

सभाध्यक्ष को चाहिये कि शस्त्रों और अस्त्रों की शिक्षा से धार्मिक शूरवीर पुरुषों की सेना को सिद्ध और दुष्ट कर्म करने वाले मनुष्यों का निवारण करके धर्मयुक्त प्रजा का निरन्तर पालन करे॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि॥५॥१७॥

नि। यत्। वृणक्षि। श्वसनस्य। मूर्धनि। शुष्णस्य। चित्। व्रन्दिनः। रोरुवत्। वना। प्राचीनेन। मनसा। बर्हणाऽवता। यत्। अद्य। चित्। कृणवः। कः। त्वा। परि॥५॥

पदार्थः-(**नि**) नितराम् (**यत्**) यः (**वृणक्षि**) त्यजसि (**श्वसनस्य**) श्वसन्ति येन प्राणेन तस्य (**मूर्द्धनि**) उत्तमाङ्गे (**शुष्णस्य**) बलस्य (**चित्**) इव (**व्रन्दिनः**) निन्दिता व्रन्दाः सन्ति येषां तान् दुष्टान् (**रोरुवत्**) पुनः पुनारोदनं कारयन् सन् (**वना**) रश्मियुक्तेन। **वनमिति रश्मिनामसु पठितम्।** (निघं०१.५) (**प्राचीनेन**) सनातनेन (**मनसा**) विज्ञानेन (**बर्हणावता**) बहुविधं बर्हणं वर्धनं विद्यते यस्य तेन। अत्र भूम्न्यर्थे मतुप्। (**यत्**) यस्मात् (**अद्य**) अस्मिन् दिने। **निपातस्य च** (अष्टा०६.३.१३६) इति दीर्घः। (**चित्**) अपि (**कृणवः**) हिंसितुं शक्नोति (**कः**) कश्चिदेव (**त्वा**) त्वाम् (**परि**) निषेधे॥५॥

अन्वयः-हे विद्वन्! यद्यस्त्वं सूर्य्यो वना मेघमिव प्राचीनेन बर्हणावता मनसा श्वसनस्य शुष्णस्य मूर्धनि वर्त्तमाने व्रन्दिनो रोरुवत्सन् यद्यस्मादद्य निवृणक्षि तत्तस्माच्चिदपि त्वा त्वां कः परि कृणवो हिंसितुं शक्नोति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा परमेश्वरः स्वकीयेनानादिना विज्ञानेन सर्वं न्यायेन प्रशास्ति सूर्य्यश्च मेघं हिनस्ति तथैव सभाध्यक्षो धर्मेण सर्वं प्रशिष्याच्छत्रूँश्च हिंस्यात्॥५॥

पदार्थः-हे सभाध्यक्ष विद्वान्! (**यत्**) जो आप जैसे सविता (**वना**) रश्मियुक्त मेघ का निवारण करता है, वैसे (**प्राचीनेन**) सनातन (**बर्हणावता**) अनेक प्रकार वृद्धियुक्त (**मनसा**) विज्ञान से (**श्वसनस्य**) प्राणवद् बलवान् (**शुष्णस्य**) शोषण कर्त्ता के (**मूर्द्धनि**) उत्तम अङ्ग में प्रहार के (**चित्**) समान (**व्रन्दिनः**) निन्दित कर्म करने वाले दुष्ट मनुष्यों को (**रोरुवत्**) रोदन कराते हुए (**यत्**) जिस कारण (**अद्य**) आज (**निवृणक्षि**) निरन्तर उन दुष्टों को अलग करते हो इससे (**चित्**) भी (**त्वा**) आप के (**कृणवः**) मारने को (**कः**) कोई भी समर्थ (**परि**) नहीं हो सकता॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे परमेश्वर अपने अनादि विज्ञान युक्त न्याय से सबको शिक्षा देता और सूर्य मेघ को काट-काट कर गिराता है, वैसे ही सभापति आदि धर्म से सब की शिक्षा देवें और शत्रुओं को नष्ट-भ्रष्ट करें॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वमा॑विथ॒ नर्य॑ तु॒र्वशं॒ यदु॑ं त्वं तु॒र्वीति॑ं व॒य्य॑ं शतक्रतो।
त्वं रथ॒मेत॑शं कृत्व्ये॒ धने॒ त्वं पुरो॑ नव॒तिं द॑म्भयो॒ नव॑॥ ६॥

त्वम्। आ॒वि॒थ॒। नर्य॑म्। तु॒र्वश॑म्। यदु॑म्। त्वम्। तु॒र्वीति॑म्। व॒य्य॑म्। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो। त्वम्। रथ॑म्। एत॑शम्। कृ॒त्व्ये॑। धने॑। त्वम्। पुरः॑। न॒व॒तिम्। दु॒म्भ॒यः॑। नव॑॥ ६॥

पदार्थः-(**त्वम्**) सभाध्यक्षः (**आविथ**) रक्षणादिकं करोषि (**नर्यम्**) नृषु साधुम् (**तुर्वशम्**) उत्तमं मनुष्यम् (**यदुम्**) प्रयतमानम्। अत्र यती प्रयत्ने धातोः बाहुलकाद् औणादिक उः प्रत्ययो जश्त्वं च। (**त्वम्**) (**तुर्वीतिम्**) दुष्टान् प्राणिनो दोषांश्च हिंसन्तम्। अत्र संज्ञायां क्तिन्। **बहुलं छन्दसि** इतीडागमः। (**वय्यम्**) यो वयते जानाति तम्। अत्र वय धातोः बाहुलकाद् औणादिको यत्प्रत्ययः। (**शतक्रतो**) बहुप्रज्ञ (**त्वम्**) शिल्पविद्योत्पादकः (**रथम्**) रमणस्यधिकरणम् (**एतशम्**) वेगादिगुणयुक्ताश्ववन्तम् (**कृत्व्ये**) कर्त्तव्ये (**धने**) विद्याचक्रवर्त्तिराज्यसिद्धे द्रव्ये (**त्वम्**) दुष्टानां भेत्ता (**पुरः**) पुराणि (**नवतिम्**) एतत्संख्याकानि (**दम्भयः**) हिंधि (**नव**) नवसंख्यासहितानि॥ ६॥

अन्वयः-हे शतक्रतो विद्वन्! यतस्त्वं नर्यं तुर्वशं यदुमाविथ त्वं तुर्वीतिं वय्यमाविथ त्वं कृत्व्ये धन एतशं रथं चाविथ त्वं नव नवतिं शत्रूणां पुरो दम्भयस्तस्माद् भवानेवास्माभिरत्र राज्यकार्य्ये समाश्रयितव्यः॥ ६॥

भावार्थः-मनुष्यैर्यो राज्यं रक्षितुं न क्षमः स राजा नैव कार्य्यः॥ ६॥

पदार्थः-हे (**शतक्रतो**) बहुत बुद्धियुक्त विद्वन् सभाध्यक्ष! जिस कारण (**त्वम्**) आप (**नर्य्यम्**) मनुष्यों में कुशल (**तुर्वशम्**) उत्तम (**यदुम्**) यत्न करने वाले मनुष्य की रक्षा (**त्वम्**) आप (**तुर्वीतिम्**) दोष वा दुष्ट प्राणियों को नष्ट करने वाले (**वय्यम्**) ज्ञानवान् मनुष्य की रक्षा और (**त्वम्**) आप (**कृत्व्ये**) सिद्ध करने योग्य (**धने**) विद्या, चक्रवर्त्ति राज्य से सिद्ध हुए द्रव्य के विषय (**एतशम्**) वेगादि गुण वाले अश्वादि से युक्त (**रथम्**) सुन्दर रथ की (**आविथ**) रक्षा करते और (**त्वम्**) आप दुष्टों के (**नव**) नौ संख्या युक्त (**नवतिम्**) नव्वे अर्थात् निन्नाणवे (**पुरः**) नगरों को (**दम्भयः**) नष्ट करते हो, इस कारण इस राज्य में आप ही का आश्रय हम लोगों को करना चाहिये॥ ६॥

भावार्थः-मनुष्यों को योग्य है कि जो राज्य की रक्षा करने में समर्थ न होवे उस को राजा कभी न बनावें॥ ६॥

पुनस्तेन सभाध्यक्षेण किं कर्त्तव्यमित्युपदिश्यते॥

फिर उस सभाध्यक्ष को क्या करना चाहिये इस विषय का उपदेश अगले मन्त्र में किया है॥

स घा॒ राजा॒ सत्प॑तिः शूशुव॒ज्जनो॑ रा॒तह॑व्यः॒ प्रति॒ यः शास॒मिन्व॑ति।

उ॒क्था वा॒ यो अ॑भिगृ॒णाति॒ राध॑सा॒ दानु॑रस्मा॒ उप॑रा पिन्वते दि॒वः॥७॥

सः। घ॒। राजा॑। सत्ऽप॑तिः। शूशु॒व॒त्। जन॑ः। रा॒तऽह॑व्यः। प्रति॑। यः। शास॑म्। इ॒न्व॒ति॒। उ॒क्था। वा॒। यः। अ॒भि॒ऽगृ॒णाति॑। राध॑सा। दानु॑ः। अ॒स्मै॒। उप॑रा। पि॒न्व॒ते॒। दि॒वः॥७॥

पदार्थः-(**सः**) (**घ**) एव। अत्र **ऋचि तुनुघ०** इति दीर्घः। (**राजा**) न्यायविज्ञानादिभिः प्रकाशमानः (**सत्पतिः**) सतां पालयिता (**शूशुवत्**) यो ज्ञापयति वर्द्धयति वा। अयं ण्यन्तस्य श्विधातोर्लुङि प्रयोगोऽडभावश्च (**जनः**) उत्तमगुणकर्मभिर्वर्त्तमानः (**रातहव्यः**) रातानि दत्तानि हव्यानि येन सः (**प्रति**) वीप्सायाम् (**यः**) ईदृग्लक्षणः (**शासम्**) शास्ति येन तं न्यायम् (**इन्वति**) व्याप्नोति। **इन्वतीति व्याप्तिकर्मसु पठितम्।** (निघं०२.१८) (**उक्था**) वक्तुं योग्यानि वेदस्तोत्राणि वचनानि वा (**वा**) पक्षान्तरे (**यः**) सत्यवक्ता (**अभिगृणाति**) अभिगतान्युपदिशति (**राधसा**) न्यायप्राप्तेन धनेन (**दानुः**) दानशीलः (**अस्मै**) सभाध्यक्षाय (**उपरा**) मेघ इव। **उपर इति मेघनामसु पठितम्।** (निघं०१.१०) **उपर उपलो मेघो भवति। उपरमन्तेऽस्मिन्नभ्राणि। उपरता आप इति वा।** (निरु०२.२१) (**पिन्वते**) सेवते सिञ्चति वा। अत्र व्यत्ययेन आत्मनेपदम्। (**दिवः**) प्रकाशमानाद्धर्म्याचरणात्॥७॥

अन्वयः-यो रातहव्यः सत्पतिः सभाध्यक्षो जनो राजा प्रतिशासं प्रजा इन्वति न्यायं व्याप्नोति वा। यः शूशुवद् राज्यं कर्त्तुं जानाति राधसा दानुः सन्नुक्थाऽभिगृणाति सर्वेभ्यो मनुष्येभ्य उपदिशत्यस्मै दिव उपरा सूर्य्यादुत्पद्य मेघो भूमिं सिञ्चतीव सर्वसुखानि पिन्वते सेवते स घ राज्यं कर्तुं शक्नोति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि कश्चित्सद्विद्याविनयन्यायवीरपुरुषसेनाग्रहणनुष्ठानेन विना राज्यं शासितुं शत्रून् जेतुं सर्वाणि सुखानि च प्राप्तुं शक्नोति तस्मादेतत्सभाध्यक्षेणावश्यमनुष्ठेयम्॥७॥

पदार्थः-(**यः**) जो (**रातहव्यः**) हव्य पदार्थों को देने (**सत्पतिः**) सत्पुरुषों का पालन करने (**जनः**) उत्तम गुण और कर्मों से सहित वर्त्तमान (**राजा**) न्यायविनयादि गुणों से प्रकाशमान सभाध्यक्ष (**प्रतिशासम्**) शास्त्र-शास्त्र के प्रति प्रजा को (**इन्वति**) न्याय में व्याप्त करता (**वा**) अथवा (**शूशुवत्**) राज्य करने को जानता है और जो (**राधसा**) न्याय करके प्राप्त हुए धन से (**दानुः**) दानशील हुआ (**उक्था**) कहने योग्य वेदस्तोत्र वा वचनों को (**अभिगृणाति**) सब मनुष्यों के लिये उपदेश करता है (**अस्मै**) इस सभाध्यक्ष के लिये (**दिवः**) (**उपरा**) जैसे सूर्य के प्रकाश से मेघ उत्पन्न होकर भूमि को (**पिन्वते**) सींचता है, वैसे सब सुखों को (**पिन्वते**) सेवन करे (**सः**) वही राज्य कर सकता है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। कोई भी मनुष्य उत्तम विद्या, विनय, न्याय और वीरपुरुषों की सेना के ग्रहण वा अनुष्ठान के विना राज्य के लिये शिक्षा करने, शत्रुओं को जीतने और सब

सुखों को प्राप्त होने को समर्थ नहीं हो सकता, इसलिये सभाध्यक्ष को अवश्य इन बातों का अनुष्ठान करना चाहिये॥७॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च॥८॥

असमम्। क्षत्रम्। असमा। मनीषा। प्र। सोमऽपाः। अपसा। सन्तु। नेमे। ये। ते। इन्द्र। ददुषः। वर्धयन्ति। महि। क्षत्रम्। स्थविरम्। वृष्ण्यम्। च॥८॥

पदार्थः-(**असमम्**) अविद्यमानः समः समता यस्मिंस्तत्कर्म सादृश्यरहितम् (**क्षत्रम्**) राज्यम् (**असमा**) अविद्यमाना समा यस्यां साऽनुपमा (**मनीषा**) मनो विज्ञानमीषते यया प्रज्ञया सा (**प्र**) प्रकृष्टार्थे (**सोमपाः**) ये वीराः सोमानोषधिरसान् पिबन्ति ते (**अपसा**) कर्मणा (**सन्तु**) भवन्तु (**नेमे**) सर्वे (**ये**) उक्ता वक्ष्यमाणश्च (**ते**) तव (**इन्द्र**) ऐश्वर्ययुक्त (**ददुषः**) दत्तवतः (**वर्धयन्ति**) उन्नयन्ति (**महि**) महागुणविशिष्टम् (**क्षत्रम्**) राज्यम् (**स्थविरम्**) प्रवृद्धम् (**वृष्ण्यम्**) शत्रुसामर्थ्यप्रतिबन्धकेभ्यो वृषेभ्यो हितम् (**च**) समुच्चये॥८॥

अन्वयः-हे इन्द्र सभेश! यदि ददुषस्ते तवासमं क्षत्रमसमा मनीषाऽस्तु तर्हि ये नेमे सोमपा धार्मिका वीरपुरुषा अपसा स्थविरं वृष्ण्यं मयि क्षत्रं प्रवर्धयन्ति, ते तव सभासदो भृत्याश्च सन्तु॥८॥

भावार्थः-नैव कदाचिद्राजपुरुषैः प्रजाविरोधः प्रजास्थै राजपुरुषविरोधश्च कार्य्यः, किन्तु परस्परं प्रीत्युपकारबुद्ध्या सर्वं राज्यं सुखैर्वर्धनीयम्। नह्येवं विना राज्यपालनव्यवस्था निश्चला जायते॥८॥

पदार्थः-हे (**इन्द्र**) सभाध्यक्ष! जो (**ददुषः**) दान करते हुए (**ते**) आप का (**असमम्**) समता रहित कर्म वा सादृश्य रहित (**क्षत्रम्**) राज्य तथा (**असमा**) समता वा उपमा रहित (**मनीषा**) बुद्धि होवे तो (**ये**) जो (**नेमे**) सब (**सोमपाः**) सोम आदि ओषधीरसों के पीने वाले धार्मिक विद्वान् पुरुष (**अपसा**) कर्म से (**स्थविरम्**) वृद्ध (**वृष्ण्यम्**) शत्रुओं के बलनाशक सुख वर्षाने वाले के लिये कल्याणकारक (**महि**) महागुणयुक्त (**क्षत्रम्**) राज्य को (**प्रवर्धयन्ति**) बढ़ाते हैं, वे सब आपकी सभा में बैठने योग्य सभासद् (**च**) और भृत्य (**सन्तु**) होवें॥८॥

भावार्थः-राजपुरुषों को प्रजा से और प्रजा में रहने वाले पुरुषों को राजपुरुषों से विरोध कभी न करना चाहिये, किन्तु परस्पर प्रीति वा उपकार बुद्धि के साथ सब राज्य सुखों से बढ़ाना चाहिये, क्योंकि इस प्रकार किये विना राज्यपालन की व्यवस्था निश्चल नहीं हो सकती॥८॥

पुनः स किं कुर्य्यादित्युपदिश्यते॥

फिर वह क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः।
व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व॥९॥

तुभ्य। इत्। एते। बहुलाः। अद्रिऽदुग्धाः। चमूऽसदः। चमसाः। इन्द्रऽपानाः। वि। अश्नुहि। तर्पय। कामम्। एषाम्। अथ। मनः। वसुऽदेयाय। कृष्व॥९॥

पदार्थः-(**तुभ्य**) तुभ्यम्। अत्र **छान्दसो वर्णलोपो वा** इति मलोपः। (**इत्**) एव (**एते**) वीराः (**बहुलाः**) बहूनि सुखानि युद्धकर्माणि लान्ति प्रयच्छन्ति ते (**अद्रिदुग्धाः**) अद्रेर्मेघात् पर्वतेभ्यो वा प्रपूरिताः (**चमूषदः**) ये चमूषु सेनासु सीदन्त्यवस्थिता भवन्ति (**चमसाः**) ये चाम्यन्त्यदन्ति भोगान् येभ्यो मेघेभ्यस्ते। **चमस इति मेघनामसु पठितम्।** (निघं०१.१०) (**इन्द्रपानाः**) य इन्द्रं परमैश्वर्य्यहेतुं सवितारं पान्ति ते। अत्र नन्दादित्वात् ल्युः प्रत्ययः। (**वि**) विविधार्थे (**अश्नुहि**) व्याप्नुहि। अत्र व्यत्ययेन परस्मैपदम्। (**तर्पय**) प्रीणय (**कामम्**) यः काम्यते तम् (**एषाम्**) भृत्यानाम् (**अथ**) आनन्तर्य्ये (**मनः**) मननात्मकम् (**वसुदेयाय**) दातव्यधनाय (**कृष्व**) विलिख॥९॥

अन्वयः-हे इन्द्र सभेश! यथैते बहुला इन्द्रपानाश्चमसाः सर्वान् कामान् पिप्रति तथाऽद्रिदुग्धाश्चमूषदो वीरास्तुभ्यं प्रीणयन्तु त्वमेतेभ्यो वसुदेयाय मनः कृष्व त्वमेताँस्तर्पयैषां कामं प्रपूर्द्धि अर्थात् सर्वान् कामान् व्यश्नुहि॥९॥

भावार्थः-सभाद्यध्यक्षः सुशिक्षितपालितोत्पादितान् शूरवीरान् रक्षित्वा प्रजा सततं पालयित्वैतेभ्यः सर्वाणि सुखानि दद्यादेते च सभाद्यध्यक्षान् नित्यं सन्तोषयेयुर्यतः सर्वे कामाः पूर्णाः स्युः॥९॥

पदार्थः-हे (**इन्द्र**) सभाध्यक्ष! जैसे (**एते**) ये (**बहुलाः**) बहुत सुख वा कर्मों को देने वाले (**इन्द्रपानाः**) परमैश्वर्य के हेतु सूर्य्य को प्राप्त होने हारे (**चमसा**) मेघ सब कामों कों पूर्ण करते हैं, वैसे (**अद्रिदुग्धाः**) मेघ वा पर्वतों से प्राप्तविद्या (**चमूषदः**) सेनाओं में स्थित शूरवीर पुरुष (**तुभ्यम्**) आपको तृप्त करें तथा आप इन को (**वसुदेयाय**) सुन्दर धन देने के लिये (**मनः**) मन (**कृष्व**) कीजिये और आप इन को (**तर्पय**) तृप्त वा (**एषाम्**) इन की (**कामान्**) कामना पूर्ण कीजिये (**अथ**) इस के अनन्तर (**इत्**) ही सब कामनाओं को (**व्यश्नुहि**) प्राप्त हूजिये॥९॥

भावार्थः-सभा आदि के अध्यक्ष उत्तम शिक्षा वा पालन से उत्पादन किये हुए शूरवीरों और प्रजा की निरन्तर पालना करके इनके लिये सब सुखों को देवें और वे प्रजा के पुरुष भी सभाध्यक्षादिकों को निरन्तर सन्तुष्ट रक्खें, जिससे सब कामना पूर्ण होवें॥९॥

अथ स सूर्य इव किं कुर्य्यादित्युपदिश्यते॥

अब वह सूर्य्य के समान क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अपामतिष्ठद् ध्रुरुणाह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः।

अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते॥ १०॥

अपाम्। अतिष्ठत्। धरुणऽह्वरम्। तमः। अन्तः। वृत्रस्य। जठरेषु। पर्वतः। अभि। ईम्। इन्द्रः। नद्यः। वव्रिणा। हिताः। विश्वाः। अनुऽस्थाः। प्रवणेषु। जिघ्नते॥ १०॥

पदार्थः-(**अपाम्**) जलानाम् (**अतिष्ठत्**) तिष्ठति (**धरुणह्वरम्**) धरुणानि धारकाणि ह्वराणि कुटिलानि यस्मिंस्तत् (**तमः**) अन्धकारम् (**अन्तः**) मध्ये (**वृत्रस्य**) मेघस्य (**जठरेषु**) जायन्ते वृष्टयो येभ्यस्तेषु। अत्र **जनेररष्ठ च।** (उणा०५.३८) इत्यरः प्रत्ययष्ठकारादेशश्च। (**पर्वतः**) पर्वताकारो घनसमूहवान् मेघः (**अभि**) आभिमुख्ये (**ईम्**) जलम् (**इन्द्रः**) परमैश्वर्यदाता (**नद्यः**) सरितः (**वव्रिणा**) रूपेण (**हिताः**) हिन्वन्ति गच्छन्ति यास्ताः (**विश्वाः**) सर्वाः (**अनुष्ठाः**) या अनुतिष्ठन्ति (**प्रवणेषु**) निम्नमार्गेषु (**जिघ्नते**) गच्छन्ति अत्र **बहुलं छन्दसि** इति शपः श्लुः व्यत्ययेन आत्मनेपदं च॥ १०॥

अन्वयः-हे सभेशेन्द्रस्त्वं यथा सूर्य्यो वृत्रस्यापामन्तर्जठरेषु स्थितं धरुणह्वरं तमोऽतिष्ठत् तन्निवार्य्य वव्रिणा सह वर्त्तमानो यः पर्वतो मेघ ईमभिपातयति येन प्रवणेष्वनुष्ठा विश्वा हिता नद्यो जिघ्नते तथा भव॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो यज्जलमाकृष्यान्तरिक्षं नयति तद्वायुर्धरति यदैतन्मिलित्वा पर्वताकारं भूत्वा सूर्य्यप्रकाशमावृणोति तद्विद्युच्छित्वा भूमौ निपातयति तदुद्भूता नानारूपा अधोगामिन्यो नद्यः प्रचलन्त्यः सत्यः पृथिवीपर्वतवृक्षादीन् छित्वा भित्वा च पुनस्तज्जलं सागरमन्तरिक्षं च प्राप्यैवं पुनः पुनर्वर्षति तथा राजाद्यध्यक्षा भवेयुरिति॥ १०॥

पदार्थः-हे सभेश! (**इन्द्रः**) परमैश्वर्य देनेहारे आप जैसे सूर्य्य (**वृत्रस्य**) मेघ सम्बन्धी (**अपाम्**) जलों के (**अन्तः**) मध्यस्थ (**जठरेषु**) जहाँ से वर्षा होती है, उनमें (**धरुणह्वरम्**) धारण करने वाला कुटिल कर्मों का हेतु (**तमः**) अन्धकार (**अतिष्ठत्**) स्थित है, उसका निवारण कर (**वव्रिणा**) रूप से सह वर्त्तमान जो (**पर्वतः**) पक्षीवत् आकाश में उड़नेहारा मेघ (**ईम्**) जल को (**अभि**) सन्मुख गिराता है, जिससे (**प्रवणेषु**) नीचे स्थानों में (**अनुष्ठाः**) अनुकूलता से बहने हारी (**विश्वा**) सब (**हिताः**) प्रतिक्षण चलने वाली (**नद्यः**) नदियां (**जिघ्नते**) समुद्र पर्यन्त चली जाती हैं, वैसे आप हूजिये॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य जिस जल को आकर्षण कर अन्तरिक्ष में पहुंचाता और उसको वायु धारण करता है, जब वह जल मिल तथा पर्वताकार होकर सूर्य के प्रकाश का आवरण करता है, उसको बिजुली छेदन करके भूमि में गिरा देती है, उससे उत्पन्न हुई नानारूपयुक्त नीचे चलने वाली चलती हुई नदियां पृथिवी, पर्वत और वृक्षादिकों को छिन्न-भिन्न कर फिर वह जल समुद्र वा अन्तरिक्ष को प्राप्त होकर वार-वार इसी प्रकार वर्षता है, वैसे सभाध्यक्षादिकों को होना चाहिये॥ १०॥

पुनः सभाद्यध्यक्षकृत्यमुपदिश्यते॥

फिर सभा आदि के अध्यक्षों के कृत्य का उपदेश अगले मन्त्र में किया है॥

स शेवृ॑धमधि॑ धा द्यु॒म्नम॒स्मे महि॑ क्ष॒त्रं ज॑ना॒षाळि॑न्द्र॒ तव्य॑म्।
रक्षा॑ च नो म॒घोन॑: पा॒हि सू॒रीन् रा॒ये च॑ न: स्वप॒त्या इ॒षे धा॑:॥ ११॥ १८॥

स:। शेऽवृ॑धम्। अधि॑। धा॒:। द्यु॒म्नम्। अ॒स्मे इति॑। महि॑। क्ष॒त्रम्। ज॒ना॒षाट्। इ॒न्द्र॒। तव्य॑म्। रक्ष॑। च॒। न॒:। म॒घोन॑:। पा॒हि। सू॒रीन्। रा॒ये। च॒। न॒:। सु॒ऽअ॒प॒त्यै। इ॒षे। धा॒:॥ ११॥

पदार्थ:-(**स:**) सभाध्यक्ष: (**शेवृधम्**) सुखम्। **शेवृधमिति सुखनामसु पठितम्।** (निघं०३.६) (**अधि**) उपरिभावे (**धा:**) धेहि (**द्युम्नम्**) विद्याप्रकाशयुक्तं धनम् (**अस्मे**) अस्मभ्यम् (**महि**) महासुखप्रदं पूज्यतमम् (**क्षत्रम्**) राज्यम् (**जनाषाट्**) यो जनान् सहते स:। अत्र **छन्दसि सह:।** (अष्टा०३.२.६३) इति सहधातोर्ण्वि: प्रत्यय:। (**इन्द्र**) परमैश्वर्य्यसम्पादक सभाध्यक्ष (**तव्यम्**) तवे बले भवम् (**रक्ष**) पालय (**च**) समुच्चये (**न:**) अस्मान् (**मघोन:**) मघं प्रशस्तं धनं विद्यते येषां तान् (**पाहि**) पालय (**सूरीन्**) मेधाविनो विदुष: (**राये**) धनाय (**च**) समुच्चये (**न:**) अस्माकम् (**स्वपत्यै**) शोभनान्यपत्यानि यस्यां तस्यै (**इषे**) अन्नरूपायै राज्यलक्ष्म्यै (**धा:**) धेहि॥ ११॥

अन्वय:-हे इन्द्र सभाद्यध्यक्ष! यो जनाषाट् सँस्त्वमस्मे शेवृधं तव्यं महि क्षत्रमधिधा मघोनो नोऽस्मान् रक्ष सूरींश्च पाहि राये स्वपत्या इषे च द्युम्नं धा: सोऽस्माभि: कथन्न सत्कर्त्तव्य:॥ ११॥

भावार्थ:-सभाद्यध्यक्षेण सर्वा: प्रजा: पालयित्वा सर्वान् सुशिक्षितान् विदुष: सम्पाद्य चक्रवर्त्तिराज्यं धनं चोन्नेयम्॥ ११॥

अस्मिन् सूक्ते सूर्य्यविद्युत्सभाध्यक्षशूरवीरराज्यप्रशासनप्रजापालनानि विहितान्यत एतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥ ११॥

इति चतु:पञ्चाशं ५४ सूक्तमष्टादशो १८ वर्गश्च समाप्त:॥

पदार्थ:-हे (**इन्द्र**) परमैश्वर्य्यसम्पादक सभाध्यक्ष! जो (**जनाषाट्**) जनों को सहन करने हारे आप (**अस्मे**) हम लोगों के लिये (**शेवृधम्**) सुख (**तव्यम्**) बलयुक्त (**महि**) महासुखदायक पूजनीय (**क्षत्रम्**) राज्य को (**अधि**) (**धा:**) अच्छे प्रकार सर्वोपरि धारण कर (**मघोन:**) प्रशंसनीय धन वा (**न:**) हम लोगों की (**रक्ष**) रक्षा (**च**) और (**सूरीन्**) बुद्धिमान् विद्वानों की (**पाहि**) रक्षा कीजिये (**च**) और (**न:**) हम लोगों के (**राये**) धन (**च**) और (**स्वपत्यै**) उत्तम अपत्ययुक्त (**इषे**) इष्टरूप राजलक्ष्मी के लिये (**द्युम्नम्**) कीर्त्तिकारक धन को (**धा:**) धारण करते हो (**स:**) वह आप हम लोगों से सत्कार योग्य क्यों न होवें॥ ११॥

भावार्थ:-सभाध्यक्ष को योग्य है कि सब प्रजा की अच्छे प्रकार रक्षा और शिक्षा से युक्त विद्वान् करके चक्रवर्त्ती राज्य वा धन की उन्नति करे॥ ११॥

इस सूक्त में सूर्य्य, बिजुली, सभाध्यक्ष, शूरवीर और राज्य की पालना आदि का विधान किया है, इससे इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह अठाहरवां १८ वर्ग और चौअनवां ५४ सूक्त समाप्त हुआ॥ ५४॥

अथास्याऽचष्टर्चस्य पञ्चपञ्चाशस्य सूक्तस्याङ्गिरसः सव्य ऋषिः। इन्द्रो देवता। १,४ जगती। २,५,६,७ निचृज्जगती। ३,८, विराड्जगती च छन्दः। निषादः स्वरः॥

तत्रादौ सभाध्यक्षगुणा उपदिश्यन्ते॥

अब पचपनवें सूक्त के पहिले मन्त्र में सभाध्यक्ष के गुणों का उपदेश किया है॥

दि॒वश्चि॑दस्य वरि॒मा वि प॑प्रथ॒ इन्द्रं॒ न म॒ह्ना पृ॑थि॒वी च॒न प्रति॑।
भी॒मस्तुवि॑ष्माञ्चर्ष॒णिभ्य॑ आत॒पः शिशी॑ते॒ वज्रं॒ तेज॑से॒ न वंस॑गः॥ १॥

दि॒वः। चि॒त्। अ॒स्य॒। व॒रि॒मा। वि। प॒प्र॒थे॒। इन्द्र॑म्। न। म॒ह्ना। पृ॒थि॒वी। च॒न। प्रति॑ भी॒मः। तुवि॑ष्मान्। च॒र्ष॒णिऽभ्य॑ः। आ॒ऽत॒पः। शिशी॑ते। वज्र॑म्। तेज॑से। न। वंस॑गः॥ १॥

पदार्थः-(**दिवः**) दिव्यगुणात् (**चित्**) एव (**अस्य**) सभाद्यध्यक्षस्य (**वरिमा**) वरस्य भावः (**वि**) विविधार्थे (**पप्रथे**) प्रथते (**इन्द्रम्**) परमैश्वर्यस्य प्रापकम् (**न**) इव (**महा**) महत्त्वेन। अत्र महधातोः बाहुलकाद् औणादिकः कनिन् प्रत्ययः। (**पृथिवी**) भूमिः (**चन**) अपि (**प्रति**) योगे (**भीमः**) दुष्टान् प्रति भयंकरः श्रेष्ठान् प्रति सुखकरः (**तुविष्मान्**) वृद्धिमान्। अत्र तुधातोः बाहुलकादौणादिक इसिः प्रत्ययः स च कित्। (**चर्षणिभ्यः**) दुष्टेभ्यः श्रेष्ठेभ्यो वा मनुष्येभ्यः (**आतपः**) समन्तात् प्रतापयुक्तः (**शिशीते**) उदके **शिशीतमित्युदकनामसु पठितम्।** (निघं०१.१२) (**वज्रम्**) किरणान् (**तेजसे**) प्रकाशाय (**न**) इव (**वंसगः**) यो वंसं सम्भजनीयं गच्छति गमयति वा स वृषभः॥१॥

अन्वयः-हे मनुष्या! यथाऽस्य सवितुर्दिवो वरिमा महा विपप्रथे पृथिवी चन महा तुल्या न भवति नातपो वंसगो न गोसमूहान् वंसगो न पृथिवीं प्रति तेजसे वज्रं शिशीते प्रक्षिपति तथा यो दुष्टेभ्यो भीमो धार्मिकेभ्यः प्रियो भूत्वा प्रजाः पालयेत् स चित्सर्वैः सत्कर्त्तव्यो नेतरः खलु॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सवितृमण्डलं सर्वेभ्यो लोकेभ्य उत्कृष्टगुणं महद्वर्त्तते यथा वृषभो गोसमूहेषूत्तमो महाबलिष्ठो वर्त्तते तथैवोत्कृष्टगुणो महान् मनुष्यः सभाद्यधिपतिः कार्य्यः। स च सदैव स्वयं धर्मात्मा सन् दुष्टेभ्यो भयप्रदो धार्मिकेभ्यः सुखकारी च भवेत्॥१॥

पदार्थः-हे मनुष्यो! जैसे (**अस्य**) इस सविता के (**दिवः**) प्रकाश से (**वरिमा**) उत्तमता का भाव (**महा**) बड़ाई से (**विपप्रथे**) विशेष करके प्रसिद्ध करता है (**पृथिवी**) जिसके बराबर भूमि (**चन**) भी तुल्य (**न**) नहीं और न (**आतपः**) सब प्रकार प्रताप युक्त (**वंसगः**) बलवान् विभाग कर्त्ता के समान (**पृथिवी**) भूमि के (**प्रति**) मध्य में (**तेजसे**) प्रकाशार्थ (**वज्रम्**) किरणों को (**शिशीते**) अति शीतल उदक में प्रक्षेप करता है, वैसे जो दुष्टों के लिये भयंकर धर्मात्माओं के वास्ते सुखदाता हो के प्रजाओं का पालन करे, वह सब से सत्कार के योग्य है, अन्य नहीं॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य मण्डल सब लोकों से उत्कृष्ट गुणयुक्त और बड़ा है और जैसे बैल गोसमूहों में उत्तम और महाबलवान् होता है, वैसे ही उत्कृष्ट

गुणयुक्त सब से बड़े मनुष्य को सब मनुष्यों को सभा आदि का पति करना चाहिये और वे सभाध्यक्षादि दुष्टों को भय देने और धार्मिकों के लिये आप भी धर्मात्मा हो के सुख देने वाले सदा होवें॥१॥

पुनः स कीदृग्गुण इत्युपदिश्यते॥

फिर वह कैसे गुण वाला हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

सो अ॑र्ण॒वो न न॒द्यः॑ समु॒द्रिय॒: प्रति॑ गृभ्णाति॒ विश्रि॑ता॒ वरी॑मभिः।
इन्द्र॑: सोम॑स्य पी॒तये॑ वृषायते स॒नात्स यु॒ध्म ओज॑सा पनस्यते॥२॥

सः। अ॒र्ण॒वः। न। न॒द्यः॑। स॒मु॒द्रिय॑:। प्रति॑। गृ॒भ्णा॒ति॒। विऽश्रि॑ताः। वरी॑मऽभिः। इन्द्रः॑। सोम॑स्य। पी॒तये॑। वृ॒ष॒ऽय॒ते॒। स॒नात्। सः। यु॒ध्मः। ओज॑सा। प॒न॒स्य॒ते॒॥२॥

पदार्थः-(**सः**) उक्तार्थः (**अर्णवः**) समुद्रः (**न**) इव (**नद्यः**) सरितः (**समुद्रियः**) समुद्रे भवो नौसमूहः (**प्रति**) क्रियायोगे (**गृभ्णाति**) गृह्णाति (**विश्रिताः**) विविध प्रकारैः सेवमानाः (**वरीमभिः**) वृण्वन्ति ये तैः शिल्पिभिः (**इन्द्रः**) सभाद्यध्यक्षः (**सोमस्य**) वैद्यविद्यासम्पादितस्य (**पीतये**) पानाय (**वृषायते**) वृष इवाचरति (**सनात्**) सर्वदा (**सः**) (**युध्मः**) यो युध्यते सः (**ओजसा**) बलेन (**पनस्यते**) यः पनायति व्यवहरति स पना, पना इवाचरति॥२॥

अन्वयः-य इन्द्रः सूर्य इव सोमस्य पीतये वृषायते सयुध्मो विश्रिता नद्योऽर्णवो न समुद्रियः सनादोजसा वरीमभिः पनस्यते राज्यं प्रति गृभ्णाति स राज्याय सत्काराय च सर्वैर्मनुष्यैः स्वीकार्य्यः॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा सागरो विविधानि रत्नानि नानानदींश्च स्वमहिम्ना स्वस्मिन् संरक्षति तथैव सभाद्यध्यक्षो विविधान् पदार्थान्नानाविधाः सेनाः स्वीकृत्य दुष्टान् पराजित्य श्रेष्ठान् संरक्ष्य स्वमहिमानं विस्तारयेत्॥२॥

पदार्थः-जो (**इन्द्रः**) सभाध्यक्ष सूर्य के समान (**सोमस्य**) वैद्यक विद्या से सम्पादित वा स्वभाव से उत्पन्न हुए रस के (**पीतये**) पीने के लिये (**वृषायते**) बैल के समान आचरण करता है (**सः**) वह (**युध्मः**) युद्ध करने वाला पुरुष (**न**) जैसे (**विश्रिताः**) नाना प्रकार के देशों को सेवन करने हारी (**नद्यः**) नदियाँ (**अर्णवः**) समुद्र को प्राप्त होके स्थिर होती और जैसे (**समुद्रियः**) सागरों में चलने योग्य नौकादि यान समूह पार पहुंचाता है, जैसे (**सनात्**) निरन्तर (**ओजसा**) बल से (**वरीमभिः**) धर्म वा शिल्पी क्रिया से (**पनस्यते**) व्यवहार करने वाले के समान आचरण और पृथिवी आदि के राज्य को (**प्रतिगृभ्णाति**) ग्रहण कर सकता है, वह राज्य करने और सत्कार के योग्य है, उस को सब मनुष्य स्वीकार करें॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे समुद्र नाना प्रकार के रत्न और नाना प्रकार की नदियों को अपनी महिमा से अपने में रक्षा करता है, वैसे ही सभाध्यक्ष आदि भी अनेक

प्रकार के पदार्थ और अनेक प्रकार की सेनाओं को स्वीकार कर दुष्टों को जीत और श्रेष्ठों की रक्षा करके अपनी महिमा फैलावें॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि।
प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः॥ ३॥

त्वम्। तम्। इन्द्र। पर्वतम्। न। भोजसे। महः। नृम्णस्य। धर्मणाम्। इरज्यसि। प्र। वीर्येण। देवता। अति। चेकिते। विश्वस्मै। उग्रः। कर्मणे। पुरः।हितः॥ ३॥

पदार्थः-(**त्वम्**) (**तम्**) वक्ष्यमाणम् (**इन्द्र**) सभाध्यक्ष (**पर्वतम्**) मेघम् (**न**) इव (**भोजसे**) पालनाय भोगाय वा (**महः**) महागुणविशिष्टस्य (**नृम्णस्य**) धनस्य। **नृम्णमिति धननामसु पठितम्।** (निघं०२.१०) (**धर्मणाम्**) धर्माणां योगेन (**इरज्यसि**) ऐश्वर्यं प्राप्नोसि। **इरज्यतीत्यैश्वर्य्यकर्मसु पठितम्।** (निघं०२.२१) (**प्र**) प्रकृष्टार्थे (**वीर्येण**) पराक्रमेण (**देवता**) द्योतमान एव (**अति**) अतिशये (**चेकिते**) जानाति। **वा छन्दसिस०** इत्यभ्यासस्य गुणः (**विश्वस्मै**) सर्वस्मै (**उग्रः**) तीव्रकारी (**कर्मणे**) कर्त्तव्याय (**पुरोहितः**) पुरोहितवदुपकारी॥ ३॥

अन्वयः-हे इन्द्र! यो देवतोग्रः पुरोहितस्त्वं विद्युद्वत्पर्वतं न वीर्य्येण भोजसे तं शत्रुं हत्वा महो नृम्णस्य धर्मणां योगेनातीरज्यसि यो भवान् विश्वस्मै कर्मणे प्रचेकिते सोऽस्मासु राजा भवतु॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः प्रवृत्तिमाश्रित्य धनं सम्पाद्य भोगान् प्राप्नुवन्ति ते ससभाध्यक्षा विद्याबुद्धिविनयधर्मवीरसेनाः प्राप्य दुष्टेषूग्रा धार्मिकेषु क्षमान्विताः सर्वेषां हितकारका भवन्ति॥ ३॥

पदार्थः-हे (**इन्द्र**) सभाध्यक्ष! जो (**देवता**) विद्वान् (**उग्रः**) तीव्रकारी (**पुरोहितः**) पुरोहित के समान उपकार करने वाले (**त्वम्**) आप जैसे बिजुली (**पर्वतम्**) मेघ के आश्रय करने वाले बादलों के (**न**) समान (**वीर्येण**) पराक्रम से (**भोजसे**) पालन वा भोग के लिये (**तम्**) उस शत्रु को हनन कर (**महः**) बड़े (**नृम्णस्य**) धन और (**धर्मणाम्**) धर्मों के योग से (**अतीरज्यसि**) अतिशय ऐश्वर्य करते हो जो आप (**विश्वस्मै**) सब (**कर्मणे**) कर्मों के लिये (**प्रचेकिते**) जानते हो, वह आप हम लोगों में राजा हूजिये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य प्रवृत्ति का आश्रय और धन को सम्पादन करके भोगों को प्राप्त करते हैं, वे सभाध्यक्ष के सहित विद्या, बुद्धि, विनय और धर्मयुक्त वीरपुरुषों की सेना को प्राप्त होकर दुष्ट जनों के विषय में तेजधारी और धर्मात्माओं में क्षमायुक्त हों, वे ही सबके हितकारक होते हैं॥ ३॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह कैसा कर्म करे, यह उपदेश अगले मन्त्र में किया है॥

स इद्वने॑ नम॒स्युभि॑र्वचस्यते॒ चारु॒ जने॑षु प्रब्रु॒वा॒ण इ॑न्द्रि॒यम्।
वृषा॒ छन्दु॑र्भवति हर्य॒तो वृषा॒ क्षेमे॑ण॒ धेना॑ म॒घवा॒ यदिन्व॑ति॥४॥

सः। इत्। वने॑। न॒म॒स्युऽभिः॑। व॒च॒स्य॒ते॒। चारु॑। जने॑षु। प्र॒ऽब्रु॒वा॒णः। इ॒न्द्रि॒यम्। वृषा॑। छन्दुः॑। भ॒व॒ति॒। ह॒र्य॒तः। वृषा॑। क्षेमे॑ण। धेना॑म्। म॒घऽवा॑। यत्। इन्व॑ति॥४॥

पदार्थः-(**सः**) अध्यापक उपदेशको वा (**इत्**) एव (**वने**) एकान्ते (**नमस्युभिः**) नम्रैर्विद्यार्थिभिः श्रोतृभिः (**वचस्यते**) परिभाष्यते सर्वतः स्तूयते (**चारु**) सुन्दरम् (**जनेषु**) प्रसिद्धेषु मनुष्येषु (**प्रब्रुवाणः**) यः प्रकर्षेण वाचयत्युपदेशयति वा सः (**इन्द्रियम्**) विज्ञानयुक्तं मनः (**वृषा**) समर्थः (**छन्दुः**) स्वच्छन्दः (**भवति**) वर्त्तते (**हर्यतः**) सर्वेषां सुबोधं कामयमानः (**वृषा**) सत्योपदेशवर्षकः (**क्षेमेण**) रक्षणेन (**धेनाम्**) विद्याशिक्षायुक्तां वाचम्। **धेनेति वाङ्नामसु पठितम्।** (निघं०१.११) (**मघवा**) प्रशस्तविद्याधनवान् (**यत्**) यः (**इन्वति**) व्याप्नोति॥४॥

अन्वयः-यद्योऽध्यापक उपदेशको वा वने जनेषु चार्वन्द्रियं ब्रुवाणो हर्यतः प्रभवति वृषा मघवा छन्दुर्वृषा क्षेमेण सहितां धेनामिन्वति स इन्नमस्युभिर्वचस्यते॥४॥

भावार्थः-परमविद्वान् सर्वान् मनुष्यान् सर्वा विद्याः प्रापय्य विद्यावतो बहुश्रुतान् स्वच्छन्दान् सुरक्षितान् कुर्याद्यतो निःसंशयाः सन्तः सदा सुखिनः स्युः॥४॥

पदार्थः-(**यत्**) जो अध्यापक वा उपदेशकर्त्ता (**वने**) एकान्त में एकाग्र चित्त से (**जनेषु**) प्रसिद्ध मनुष्यों में (**चारु**) सुन्दर (**इन्द्रियम्**) मन को (**ब्रुवाणः**) अच्छे प्रकार कहता (**हर्य्यतः**) और सबको उत्तम बोध की कामना करता हुआ (**प्रभवति**) समर्थ होता है (**वृषा**) दृढ़ (**मघवा**) प्रशंसित विद्या और धनवाला (**छन्दुः**) स्वच्छन्द (**वृषा**) सुख वर्षाने वाला (**क्षेमेण**) रक्षण के सहित (**धेनाम्**) विद्या शिक्षायुक्त वाणी को (**इन्वति**) व्याप्त करता है (**स इत्**) वही (**नमस्युभिः**) नम्र विद्वानों से (**वचस्यते**) प्रशंसा को प्राप्त होता है॥४॥

भावार्थः-उत्तम विद्वान् सभाध्यक्ष सब मनुष्यों के लिये सब विद्याओं को प्राप्त करके सबको विद्यायुक्त, बहुश्रुत, रक्षा वा स्वच्छन्दता युक्त करें कि जिससे सब निस्सन्देह होकर सदा सुखी रहें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, यह विषय अगले मन्त्र में कहा है॥

स इन्म॒हानि॑ सम्॒थानि॑ म॒ज्मना॑ कृ॒णोति॑ यु॒ध्म ओज॑सा॒ जने॑भ्यः।
अधा॑ च॒न श्र॒द्द॑धति॒ त्विषी॑मत॒ इन्द्रा॑य॒ वज्रं॑ नि॒घनि॑घ्नते व॒धम्॥५॥ १९॥

सः। इत्। महानि। समिथ्ऽथानि। मज्मना। कृणोति। युध्मः। ओजसा। जनेभ्यः। अध। चन। श्रत्। दधति। त्विषीऽमते। इन्द्राय। वज्रम्। निऽघनिघ्नते। वधम्॥५॥

पदार्थः-(**सः**) (**इत्**) एव (**महानि**) महान्ति पूज्यानि (**समिथानि**) सम्यक् यन्ति यानि विज्ञानानि तानि (**मज्मना**) बलेन। **मज्मेति बलनामसु पठितम्।** (निघं०२.९) (**कृणोति**) करोति (**युध्मः**) अविद्याकुटुम्बस्य प्रहर्त्ता (**ओजसा**) पराक्रमेण (**जनेभ्यः**) मनुष्येभ्यः (**अध**) अथ। **निपातस्य च** इति दीर्घः। (**चन**) अपि (**श्रत्**) सत्यम्। **श्रदिति सत्यनामसु पठितम्।** (निघं०३.१०) (**दधति**) धरन्ति (**त्विषीमते**) प्रशस्तप्रकाशान्तःकरणवते (**इन्द्राय**) परमैश्वर्य्ययोजकाय (**वज्रम्**) शस्त्रमिवाज्ञानच्छेदकमुपदेशम् (**निघनिघ्नते**) यो हन्ति स निघ्नः स इवाचरति। अत्र निघ्नशब्दाद् आचारे क्विप् ततो लट् शपः श्लुः व्यत्ययेन आत्मनेपदं च। (**वधम्**) हननम्॥५॥

अन्वयः-यदि स युध्मो मज्मनौजसा जनेभ्य उपदेशेन महानि समिथानि कृणोति करोति वज्रमिव वधं निघनिघ्नतेऽधाथ तर्ह्यस्मा इत् त्विषीमत इन्द्राय चन जनाः श्रद्दधति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो मेघमुत्पाद्य छित्वा वर्षित्वा स्वप्रकाशेन सर्वानानन्दयति तथाऽध्यापकोपदेशकावन्धपरम्परां निवार्य विद्यान्यायादीन् प्रकाश्य सर्वाः प्रजाः सुखिनीः कुर्याताम्॥५॥

पदार्थः-जो (**सः**) वह (**युध्मः**) युद्ध करने वाला उपदेशक (**मज्मना**) बल वा (**ओजसा**) पराक्रम से युक्त हो के (**जनेभ्यः**) मनुष्यादिकों के सुख के लिये उपदेश से (**महानि**) बड़े पूजनीय (**समिथानि**) संग्रामों को जीतने वाले के तुल्य अविद्या विजय को (**कृणोति**) करता है (**वज्रम्**) वज्रप्रहार के समान शत्रुओं के (**वधम्**) मारने को (**निघनिघ्नते**) मारने वाले के समान आचरण करता है तो (**अध**) इसके अनन्तर (**इत्**) ही (**अस्मै**) इस (**त्विषीमते**) प्रशंसनीय प्रकाशयुक्त (**इन्द्राय**) परमैश्वर्य्य की प्राप्ति कराने वाले के लिये सब मनुष्य लोग (**चन**) भी (**श्रद्दधति**) प्रीति से सत्य का धारण करते हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य मेघ को उत्पन्न, काट और वर्षा करके अपने प्रकाश से सब मनुष्यों को आनन्द युक्त करता है, वैसे ही अध्यापक और उपदेशक लोग विद्या को प्राप्त करा और अविद्या को जीत के अन्धपरम्परा को निवारण कर विद्यान्यायादि का प्रकाश करके सब प्रजा को सुखी करें॥५॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, यह विषय अगले मन्त्र में कहा है॥

स हि श्वस्युः सदनानि कृत्रिमा क्षमया वृधान ओजसा विनाशयन्।
ज्योतींषि कृण्वन्नवृकाणि यज्युवेऽव सुक्रतुः सर्तवा अपः सृजत्॥६॥

सः। हि। श्रवस्युः। सदनानि। कृत्रिमा। क्षमया। वृधानः। ओजसा। विऽनाशयन्। ज्योतींषि। कृण्वन्। अवृकाणि। यज्यवे। अव। सुऽक्रतुः। सर्तवै। अपः। सृजत्॥६॥

पदार्थः-(**सः**) उक्तः **(हि)** किल **(श्रवस्युः)** आत्मनः श्रवोऽन्नमिच्छुः **(सदनानि)** स्थानान्युदकानि वा। **सदनमित्युदकनामसु पठितम्।** (निघं०१.१२) **(कृत्रिमा)** कृत्रिमाणि **(क्षमया)** पृथिव्या सह। **क्षमेति पृथिवीनामसु पठितम्।** (निघं०१.१) **(वृधानः)** वर्धमानः **(ओजसा)** विद्याबलेन **(विनाशयन्)** अविद्याऽदर्शनं प्रापयन् **(ज्योतींषि)** विद्यादिसद्गुणप्रकाशकानि तेजांसि **(कृण्वन्)** कुर्वन् **(अवृकाणि)** अविद्यमानचोराणि **(यज्यवे)** यज्ञाऽनुष्ठानाय **(अव)** विनिग्रहे **(सुक्रतुः)** शोभना प्रज्ञा कर्म वा यस्य सः **(सर्त्तवै)** सर्त्तुं ज्ञातुं गन्तुं वा **(अपः)** जलानि **(सृजत)** सृजति॥६॥

अन्वयः-यः सुक्रतुरोजसा क्षमया सह वृधानः श्रवस्युर्यज्यवे सर्तवै कृत्रिमाण्यवृकाणि सदनानि कृण्वन्नपो ज्योतींषि प्रकाशयन् सूर्य इव विनाशयन्निव सृजत् स हि सर्वैर्मनुष्यैर्माता पिता सुहृद्रक्षकश्च मन्तव्यः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य सूर्यवद्विद्याधर्मराजनीतिप्रकाशकः सन् सर्वान् सुबोधान् करोति स सर्वैरखिलमनुष्यादिप्राणिनां कल्याणकार्य्यस्तीति वेद्यम्॥६॥

पदार्थः-जो **(सुक्रतुः)** श्रेष्ठ बुद्धि वा कर्मयुक्त **(ओजसा)** पराक्रम से **(क्षमया)** पृथिवी के साथ **(वृधानः)** बढ़ता हुआ और **(श्रवस्युः)** अपने आत्मा के वास्ते अन्न की इच्छा से सब शास्त्रों का श्रवण कराता हुआ **(यज्यवे)** राज्य के अनुष्ठान के वास्ते **(सर्त्तवै)** जाने-आने को **(कृत्रिमाणि)** किये हुए **(अवृकाणि)** चोरादि रहित **(सदनानि)** मार्ग और सुन्दर घरों को सुशोभित **(कृण्वन्)** करता हुआ **(अपः)** जलों को वर्षाने हारा **(ज्योतींषि)** चन्द्रादि नक्षत्रों को प्रकाशित करते हुए सूर्य्य के तुल्य **(विनाशयन्)** अविद्या का नाश करता हुआ राज्य **(अवसृजत्)** बनावे, वही सब मनुष्यों को माता, पिता, मित्र और रक्षक मानने योग्य है॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्य जो सूर्य्य के सदृश विद्या, धर्म और राजनीति का प्रचारकर्त्ता हो के सब मनुष्यों को उत्तम बोधयुक्त करता है, वह मनुष्यादि प्राणियों का कल्याणकारी है, ऐसा निश्चित जानें॥६॥

पुनः स कथंभूतः स्यादित्युपदिश्यते॥

फिर वह कैसा हो, यह विषय अगले मन्त्र में कहा है॥

दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि।
यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः॥७॥

दा॒नाय॑। मन॑:। सो॒म॒ऽपा॒व॒न्। अ॒स्तु॒। ते॒। अ॒र्वाञ्चा॑। हरी॒ इति॑। व॒न्द॒न॒ऽश्रु॒त्। आ। कृ॒धि॒। यमि॑ष्ठास:। सार॑थय:। ये। इ॒न्द्र॒। ते॒। न। त्वा॒। केता॑:। आ। द॒भ्नु॒व॒न्ति॒। भूर्ण॑य:॥७॥

पदार्थ:-(**दानाय**) सुपात्रेभ्यो विद्यादिदानाय (**मन:**) अन्त:करणम् (**सोमपावन्**) य: सोमान् श्रेष्ठान् रसान् पिबति तत्सम्बुद्धौ (**अस्तु**) भवतु (**ते**) तव (**अर्वाञ्चा**) यावर्वागऽञ्चतस्तौ (**हरी**) हरणशीलौ (**वन्दनश्रुत्**) येन वायुना वन्दनं स्तवनं भाषणं शृणोति श्रावयति वा तत्सम्बुद्धौ (**आ**) समन्तात् (**कृधि**) कुरु (**यमिष्ठास:**) अतिशयेन नियन्तार: (**सारथय:**) यानगमयितार: (**ये**) सुशिक्षिता: (**इन्द्र**) सभाद्यध्यक्ष (**ते**) तव (**न**) निषेधे (**त्वा**) त्वाम् (**केता:**) प्रज्ञा: प्रज्ञापनव्यवहारान् (**आ**) अभित: (**दभ्नुवन्ति**) हिंसन्ति (**भूर्णय:**) ये बिभ्रति ते। अत्र **घृणिपृश्नि०** (उणा०४.५४) अनेनायं निपातित:॥७॥

अन्वय:-हे वन्दनश्रुत्सोमपावन्निन्द्र! ते तव मनो दानायास्तु समन्ताद्भवतु यथा वायोरर्वाञ्चौ हरी यथा भूर्णयो यमिष्ठास: सारथयस्तथा सर्वान् धर्मे नियच्छ सर्वेषु केता आकृधि एवंकृते ये तव शत्रव: सन्ति, ते तव वशे भवन्तु त्वा न दभ्नुवन्ति॥७॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा सुसारथयोऽश्वान् संशिक्ष्य नियच्छन्ति यथा तिर्यग्गामी वायुश्च तथाऽऽध्यापकोपदेशका विद्यासूपदेशाभ्यां सर्वान् सत्याचरणे निश्चितान् कुर्वन्तु न ह्येताभ्यां विना मनुष्यान् धार्मिकान् कर्त्तुं शक्नुवन्ति॥७॥

पदार्थ:-हे (**वन्दनश्रुत्**) स्तुति वा भाषण के सुनने-सुनाने और (**सोमपावन्**) श्रेष्ठ रसों के पीने वाले (**इन्द्र**) परमैश्वर्ययुक्त सभाध्यक्ष! (**ते**) आपका (**मन:**) मन (**दानाय**) पुत्रों को विद्यादि दान के लिये (**अस्तु**) अच्छे प्रकार होवे, जैसे वायु वा सूर्य्य के (**अर्वाञ्चा**) वेगादि गुणों को प्राप्त कराने वाली (**हरी**) धारणाऽकर्षण गुण और जैसे (**भूर्णय:**) पोषक (**यमिष्ठास:**) अतिशय करके यमन करता (**सारथय:**) रथों को चलाने वाले सारथि घोड़े आदि को सुशिक्षा कर नियम में रखते हैं, वैसे तू सब मनुष्यादि को धर्म में चला और सब में (**केता:**) शास्त्रीय प्रज्ञाओं को (**आकृधि**) अच्छे प्रकार प्राप्त कीजिये, इस प्रकार करने से (**ये**) जो तेरे शत्रु हैं वे (**ते**) तेरे वश में हो जायें, जिससे (**त्वा**) तुझ को (**न दभ्नुवन्ति**) दु:खित न कर सकें॥७॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे उत्तम सारथि लोग घोड़े को अच्छे प्रकार शिक्षा करके नियम में चलाते हैं और जैसे तिरछा चलने वाला वायु नियन्ता है, वैसे धार्मिक पढ़ाने और उपदेश करनेहारे विद्वान् लोग सत्य विद्या और सत्य उपदेशों से सबको सत्याचार में निश्चित करें, इन दोनों के विना मनुष्यों को धर्मात्मा करने के वास्ते कोई भी समर्थ नहीं हो सकता॥७॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अप्र॑क्षितं॒ वसु॑ बिभर्षि॒ हस्त॑योरषा॒ळ्हं स॒हस्त॑न्वि॑ श्रु॒तो द॑धे।

आवृ॑तासोऽव॒तासो॒ न क॒र्तृभि॑स्त॒नूषु॑ ते॒ क्रत॑व इन्द्र॒ भूर॑यः॥८॥२०॥

अप्र॑ऽक्षितम्। वसु॑। बि॒भ॒र्षि॒। हस्त॑योः। अषा॑ळ्हम्। सहः॑। त॒न्वि॑। श्रुतः॑। द॒धे॒। आऽवृ॑तासः। अ॒व॒तासः॑। न। क॒र्तृऽभिः॑। त॒नूषु॑। ते॒। क्रत॑वः। इ॒न्द्र॒। भूर॑यः॥८॥

पदार्थः-(**अप्रक्षितम्**) यत्र प्रक्षीयते तत् (**वसु**) वसन्ति सुखेन यत्र तद्विज्ञानम् (**बिभर्षि**) धरसि (**हस्तयोः**) करयोः (**अषाढम्**) पापिभिः सोढुमशक्यम् (**सहः**) बलम् (**तन्वि**) शरीरे। अत्र **वाच्छन्दसि सर्वे०** इत्याडामोरभावः। (**श्रुतः**) यः श्रूयते सः (**दधे**) (**आवृतासः**) समन्तात् सुखैराच्छादिताः (**अवतासः**) सर्वतो रक्षिताः (**न**) इव (**कर्त्तृभिः**) पुरुषार्थिभिः (**तनूषु**) शरीरेषु (**ते**) तव (**क्रतवः**) प्रज्ञाः (**इन्द्र**) विद्यैश्वर्य (**भूरयः**) बहव्यः। **भूरिरिति बहुनामसु पठितम्।** (निघं०३.१)॥८॥

अन्वयः-हे इन्द्र! श्रुतस्त्वं यदप्रक्षितं वस्वषाढं सहश्च तन्वि हस्तयोरामलकमिव बिभर्षि य आवृतासोऽवतासो न ते भूरयः क्रतवः कर्त्तृभिस्तनूषु ध्रियन्ते तान्यहं दधे॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा सभ्यैर्विद्वद्भिश्चाक्षयं विज्ञानं बलं धनं श्रवणं बहूनि सुकर्माणि च धार्यन्ते तथैवैतत्सर्वं प्रजास्थैर्मनुष्यैरपि सन्धार्य्यम्॥८॥

अस्मिन् सूक्ते सूर्यप्रजासभाद्यध्यक्षकृत्यं वर्णितमत एवैतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति विंशतितमो २० वर्गः पञ्चपञ्चाशं ५५ सूक्तञ्च समाप्तम्॥

पदार्थः-हे (**इन्द्र**) सभाध्यक्ष (**श्रुतः**) प्रशंसायुक्त तू जिस (**अप्रक्षितम्**) क्षयरहित (**वसु**) धन और (**अषाढम्**) शत्रुओं से असह्य (**सहः**) बल को (**तन्वि**) शरीर में (**हस्तयोः**) हाथ में आंवले के फल के समान (**बिभर्षि**) धारण करता है जो (**आवृतासः**) सुखों से युक्त (**अवतासः**) अच्छे प्रकार रक्षित मनुष्यों के (**न**) समान (**ते**) आपकी (**भूरयः**) बहुत शास्त्र विद्यायुक्त (**क्रतवः**) बुद्धि और कर्मों को (**कर्त्तृभिः**) पुरुषार्थी मनुष्य (**तनूषु**) शरीरों में धारण करते हैं, उनको मैं (**दधे**) धारण करता हूं॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सभाध्यक्ष वा सभासद् विद्वान् लोग क्षयरहित विज्ञान, बल, धन, श्रवण और बहुत उत्तम कर्मों को धारण करते हैं, वैसे ही इन सब कामों को सब प्रजा के मनुष्यों को धारण करना चाहिये॥८॥

इस सूक्त में सूर्य्य, प्रजा और सभाध्यक्ष के कृत्य का वर्णन किया है, इसी से इस सूक्तार्थ-की पूर्व सूक्तार्थ के साथ सङ्गति जानना चाहिये॥

यह बीसवां वर्ग २० और पचपनवां ५५ सूक्त समाप्त हुआ॥५५॥

अथास्य षडर्चस्य षट्पञ्चाशस्य सूक्तस्याङ्गिरसः सव्य ऋषिः। इन्द्रो देवता। १,३,४ निचृज्जगती। २ जगती च छन्दः। निषादः स्वरः। ५ त्रिष्टुप्। भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

तत्रादावध्यापकोपदेशकगुणा उपदिश्यन्ते॥

अब छप्पनवें सूक्त का आरम्भ है, उस के पहिले मन्त्र में अध्यापक और उपदेशक के गुणों का उपदेश किया है॥

एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम्॥ १॥

एषः। प्र। पूर्वीः। अव। तस्य। चम्रिषः। अत्यः। न। योषाम्। उत्। अयंस्त। भुर्वणिः। दक्षम्। महे। पायययते। हिरण्ययम्। रथम्। आऽवृत्य। हरियोगम्। ऋभ्वसम्॥ १॥

पदार्थः-(**एषः**) अध्यापक उपदेशको वा (**प्र**) प्रकृष्टार्थे (**पूर्वीः**) प्राचीनाः सनातनीः प्रजाः (**अव**) विरुद्धार्थे (**तस्य**) परमैश्वर्य्यस्य प्राप्तये (**चम्रिषः**) चाम्यन्त्यदन्ति भोगाँस्तान्। अत्र बाहुलकादौणादिक इसिः प्रत्ययो रुडागमश्च। (**अत्यः**) अश्वः। **अत्य इत्यश्वनामसु पठितम्।** (निघं०१.१४) (**न**) इव (**योषाम्**) भार्य्याम् (**उत्**) (**अयँस्त**) उद्यच्छति (**भुर्वणिः**) बिभर्त्ति यः सः। अत्र भृञ् धातोर्बाहुलकादौणादिकः क्वणिः प्रत्ययः। (**दक्षम्**) बलं चातुर्य्यं वा (**महे**) पूज्ये व्यवहारे (**पाययते**) रक्षां कार्यते (**हिरण्ययम्**) तेजः सुवर्णं वा प्रचुरं यस्मिँस्तम् (**रथम्**) यानसमूहम् (**आवृत्य**) सामग्र्याच्छाद्य (**हरियोगम्**) हरीणामश्वादीनां योगो यस्मिँस्तम् (**ऋभ्वसम्**) ऋभून् मनुष्यादीन् पदार्थान् वाऽस्यन्ति येन तम्॥१॥

अन्वयः-य एष भुर्वणिस्तस्य चम्रिषः पूर्वीः प्रजा उत्पादयितुमत्यो न योषामुदयँस्त स तस्यै प्रजायै महे सत्योपदेशैः श्रोत्राण्यावृत्य हिरण्ययमृभ्वसं हरियोगं रथं दक्षं च प्रापय्य पाययते स सर्वैर्माननीयो भवति॥१॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। उपदेशकः स्वसदृशी विदुषीं स्त्रियं परिणीय यथा स्वयं पुरुषानुपदिशेद् बालकानध्यापयेत् तथातत्स्त्री स्त्रिय उपदिशेत् कन्याश्च पाठयेदेवं कृते कुतश्चिदप्यविद्याभये न पीडयेताम्॥१॥

पदार्थः-जो (**एषः**) यह (**भुर्वणिः**) धारण वा पोषण करने वाला सभा का अध्यक्ष वा सूर्य (**न**) जैसे (**अत्यः**) घोड़ा घोड़ियों से संयोग करता है, वैसे (**योषाम्**) विद्वान् स्त्री से युक्त हो के (**तस्य**) उस परमैश्वर्य की प्राप्ति के लिये (**चम्रिषः**) भोगों को करने वाली (**पूर्वीः**) सनातन प्रजा को (**प्रावोदयंस्त**) अच्छे प्रकार अधर्म वा निकृष्टता से निवृत्त कर वह उस प्रजा के वास्ते (**महे**) पूजनीय मार्ग में कान आदि इन्द्रियों को (**आवृत्य**) युक्त कर (**हिरण्यम्**) बहुत तेज वा सुवर्ण (**ऋभ्वसम्**) मनुष्यादिकों के प्रक्षेपण

करने वाला **(हरियोगम्)** अग्नियुक्त वा अश्वादि युक्त हुए **(दक्षम्)** बल चतुर शिल्पी मनुष्य युक्त **(रथम्)** यान समूह को **(आवृत्य)** सामग्री से आच्छादन करके सुखीरूपों रसों को **(पाययते)** पान करता है, वह सब से मान्य को प्राप्त होता है॥१॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। उपदेशक अपने तुल्य विदुषी स्त्री के साथ विवाह करके जैसे आप पुरुषों को उपदेश और बालकों को पढ़ावे, वैसे उसकी स्त्री स्त्रियों को उपदेश और कन्याओं को पढ़ावें, ऐसे करने से किसी ओर से अविद्या और भय से दुःख नहीं हो सकता॥१॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय अगले मन्त्र में कहा है॥

तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोहु तेजसा॥२॥

तम्। गूर्तयः। नेमन्ऽइषः। परीणसः। समुद्रम्। न। सम्ऽचरणे। सनिष्यवः। पतिम्। दक्षस्य। विदथस्य। नु। सहः। गिरिम्। न। वेनाः। अधि। रोहु। तेजसा॥२॥

पदार्थः-(**तम्**) पूर्वोक्तम् (**गूर्त्तयः**) उद्यमयुक्ताः कन्याः (**नेमन्निषः**) नीयन्त इष्यन्ते च यास्ताः (**परीणसः**) बह्वयः। **परीणस इति बहुनामसु पठितम्।** (निघं०३.१) (**समुद्रम्**) सागरम् (**न**) इव (**संचरणे**) सङ्गमने (**सनिष्यवः**) संविभागमिच्छवः (**पतिम्**) स्वामिनम् (**दक्षस्य**) चतुरस्य (**विदथस्य**) विज्ञानयुक्तस्य (**नु**) शीघ्रम् (**सहः**) बलम् (**गिरिम्**) मेघम् (**न**) इव (**वेनाः**) मेधाविनः। **वेन इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**अधि**) उपरिभावे (**रोह**) (**तेजसा**) प्रतापेन॥२॥

अन्वयः-हे कन्ये! त्वं संचरणे सनिष्यवः समुद्रं नद्यो न गिरिं न परीणसो नेमन्निषो गूर्त्तयो धीमत्यो ब्रह्मचारिण्यो वेना मेधाविनो ब्रह्मचारिणः समावर्त्तनात् पश्चात् परस्परं प्रीत्या विवाहं कुर्वन्तु, दक्षस्य विदथस्य विदुषः सकाशात् प्राप्तविद्यां पतिमधिरोह तं तेजसा प्राप्य सहो नु प्राप्नुहि॥२॥

भावार्थः-अत्रोपमालङ्कारौ। सर्वैर्बालकैः कन्याभिश्च यथाविधिसेवितेन ब्रह्मचर्य्येणाऽखिला विद्या अधीत्य पूर्णयुवावस्थायां तुल्यगुणकर्मस्वभावान् परीक्ष्यान्योन्यमतिप्रेमोद्भवानन्तरं विवाहं कृत्वा पुनर्यदि पूर्णविद्यास्तर्हि बालिका अध्यापयेयुः। क्षत्रियवैश्यशूद्रवर्णयोग्याश्चेत्तर्हि स्व-स्व वर्णोचितानि कर्माणि कुर्य्युः॥२॥

पदार्थः-हे कन्ये! तू **(संचरणे)** अच्छे प्रकार समागम में **(न)** जैसे **(सनिष्यवः)** सम्यक् विविध सेवन करनेहारी नदियां **(समुद्रम्)** सागर को प्राप्त होती और **(न)** जैसे बादल **(गिरिम्)** मेघ को प्राप्त होते हैं, वैसे जो **(परीणसः)** बहुत **(नेमन्निषः)** प्राप्त होने योग्य इष्ट सुखदायक **(गूर्त्तयः)** उद्यमयुक्त बुद्धिमती ब्रह्मचारिणी और **(वेनाः)** बुद्धिमान् ब्रह्मचारी लोग समावर्त्तन के पश्चात् परस्पर प्रीति के साथ

विवाह करें **(दक्षस्य)** हे कन्ये! तू सब विद्याओं में अतिचतुर **(विदथस्य)** पूर्णविद्या युक्त विद्वान् से विद्या को प्राप्त हुए **(पतिम्)** स्वामी को **(अधिरोह)** प्राप्त हो **(तेजसा)** अतीव तेज से **(तम्)** उसको प्राप्त हो के **(सहः)** बल को **(नु)** शीघ्र प्राप्त हो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब लड़के और लड़कियों को योग्य है कि यथोक्त ब्रह्मचर्य्य के सेवन से सम्पूर्ण विद्याओं को पढ़ के पूर्ण युवावस्था में अपने तुल्य, गुण कर्म और स्वभाव वाले परस्पर परीक्षा करके अतीव प्रेम के साथ विवाह कर पुनः जो पूर्ण विद्या वाले हों तो लड़का लड़कियों को पढ़ाया करें, जो क्षत्रिय हों तो राजपालन और न्याय किया करें, जो वैश्य हों तो अपने वर्ण के कर्म और जो शूद्र हों तो अपने कर्म किया करें॥ २॥

पुनस्तौ कीदृशा इत्युपदिश्यते॥

फिर वे दोनों कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः।
येन शुष्णं मायिनंमायसो मदे दुध्र आभूषु रामयन्नि दामनि॥ ३॥

सः। तुर्वणिः। महान्। अरेणु। पौंस्ये। गिरेः। भृष्टिः। न। भ्राजते। तुजा। शवः। येन। शुष्णम्। मायिनम्। आयसः। मदे। दुध्रः। आभूषु। रमयत्। नि। दामनि॥ ३॥

पदार्थः-(**सः**) उक्तार्थः (**तुर्वणिः**) शीघ्रानन्ददाता। **तुर्वणिस्तूर्णवनिः।** (निरु०६.१४) महान् गुणैर्महत्त्वयुक्तः (**अरेणु**) अहिंसनीयम् (**पौंस्ये**) पुंसो भवे यौवने (**गिरेः**) मेघस्य (**भृष्टिः**) भृज्जन्ति परिपचन्ति यस्यां वृष्टौ सा (**न**) इव (**भ्राजते**) प्रकाशते (**तुजा**) तोजति हिनस्ति दुःखानि येन तेन (**शवः**) बलम् (**येन**) बलेन (**शुष्णम्**) बलवन्तम् (**मायिनम्**) प्रशंसितप्रज्ञादियुक्तम् (**आयसः**) विज्ञानात् (**मदे**) हर्षयुक्ते (**दुध्रः**) बलेन पूर्णः। अत्र वर्णव्यत्ययेन हस्य धः। (**आभूषु**) समन्ताद्भूषिता जना येन तत् (**रामयत्**) रामं रमणं कारयितृ (**नि**) नितराम् (**दामनि**) यः सुखानि ददाति तस्मिन् गृहाश्रमे॥ ३॥

अन्वयः-हे वरमिच्छुके कन्ये! यथा त्वं यस्तुर्वणिर्दुध्र आयसो महान् पौंस्ये तुजाऽऽभूष्वरेणु मदे रामयच्छवः प्राप्य गिरेर्भृष्टिरुन्नतो नेव भ्राजते तं शुष्णं मायिनं जनं दामनि निबध्नासि तथा स वरोऽपि तेन त्वां निबध्नीयात्॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। स विवाह उत्तमो यत्र समानरूपशीलौ कन्यावरौ स्यातां परन्तु कन्यायाः सकाशाद् वरस्य बलायुषी द्विगुणे सार्द्धैकगुणे वा भवेताम्॥ ३॥

पदार्थः-हे उत्तम वर की इच्छा करनेहारी कन्या! जैसे तू जो **(तुर्वणिः)** शीघ्र सुखकारी **(दुध्रः)** बल से पूर्ण **(आयसः)** विज्ञान से युक्त **(महान्)** सर्वोत्कृष्ट **(पौंस्ये)** पुरुषार्थ युक्त व्यवहार में प्रवीण **(तुजा)** दुःखों का नाशक **(आभूषु)** सब प्रकार सबको सुभूषित कारक **(अरेणु)** क्षयरहित कर्म को **(मदे)** हर्षित होने में **(रमयत्)** क्रीड़ा का हेतु **(शवः)** उत्तम बल को प्राप्त हो के **(न)** जैसे **(गिरेः)** मेघ के

(भृष्टिः) उत्तम शिखर **(भ्राजते)** प्रकाशित होते हैं, वैसे **(तम्)** उस **(शुष्णम्)** बलयुक्त **(मायिनम्)** अत्युत्तम बुद्धिमान् वर को **(येन)** जिस बल से **(दामनि)** सुखदायक गृहाश्रम में स्वीकार करती हो, वैसे **(सः)** वह वर भी तुझे उसी बल से प्रेमबद्ध करे॥३॥

भावार्थः-इस मन्त्र में उपमा वाचकलुप्तोपमालङ्कार हैं। अति उत्तम विवाह वह है, जिसमें तुल्य रूप स्वभाव युक्त कन्या और वर का सम्बन्ध होवे, परन्तु कन्या से वर का बल और आयु दूना वा ड्योढ़ा होना चाहिये॥३॥

पुनस्तौ कीदृशौ स्यातामित्याह॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में कहा है॥

देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः॥४॥

देवी। यदि। तविषी। त्वाऽवृधा। ऊतये। इन्द्रम्। सिषक्ति। उषसम्। न। सूर्यः। यः। धृष्णुना। शवसा। बाधते। तमः। इयर्ति। रेणुम्। बृहत्। अर्हरिऽस्वनिः॥४॥

पदार्थः-(**देवी**) दिव्यगुणैर्वर्त्तमाना स्त्री (**यदि**) चेत् (**तविषी**) बलादिगुणयुक्ता (**त्वावृधा**) या त्वां वर्धयते सा (**ऊतये**) रक्षणाद्याय (**इन्द्रम्**) परमसुखप्रदं पतिम् (**सिषक्ति**) समवैति (**उषसम्**) प्रत्युषःकालम् (**न**) इव (**सूर्य्यः**) सविता (**यः**) (**धृष्णुना**) धृष्टेन दृढेन (**शवसा**) बलेन (**बाधते**) निवर्त्तयति (**तमः**) रात्रिम् (**इयर्त्ति**) प्राप्नोति (**रेणुम्**) विद्यादिशुभप्राप्तम् (**बृहत्**) महत् (**अर्हरिष्वणिः**) योऽर्हान् हिंसकाँश्च सम्भजति सः॥४॥

अन्वयः-हे स्त्रियोऽर्हरिष्वणिर्धृष्णुना शवसोषसं प्राप्य सूर्यो बृहत्तमो न दुःखं बाधते। हे पुरुष! यदि त्वावृधा तविषी देवी रेणुं त्वामिर्यत्यूतये इन्द्रं त्वा सिषक्ति स सा च युवां परस्परस्यानन्दाय सततं वर्त्तेयाथाम्॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यदा स्त्रीप्रियः पुरुषः पुरुषप्रिया भार्या च भवेत्तदैव मङ्गलं वर्द्धेत॥४॥

पदार्थः-हे स्त्रि! (**यः**) जो (**अर्हरिष्वणिः**) अहिंसक, धार्मिक और पापी लोगों का विवेककर्त्ता पुरुष (**धृष्णुना**) दृढ़ (**शवसा**) बल से (**न**) जैसे (**सूर्य्यः**) रवि (**उषसम्**) प्रातःसमय को प्राप्त हो के (**बृहत्**) बड़े (**तमः**) अन्धकार को दूर कर देता है, वैसे तेरे दुःख को दूर कर देता है। हे पुरुष! (**यदि**) जो (**त्वावृधा**) तुझे सुख से बढ़ाने हारी (**तविषी**) पूर्ण बलयुक्त (**देवी**) विदुषी अतीव प्रिया स्त्री (**रेणुम्**) रमणीय स्वरूप तुझ को (**इयर्त्ति**) प्राप्त होती है और (**ऊतये**) रक्षादि के वास्ते (**इन्द्रम्**) परम सुखप्रद तुझे

(सिषक्ति) उत्तम सुख से युक्त करती है, सो तू और वह स्त्री तुम दोनों एक-दूसरे के आनन्द के लिये सदा वर्त्ता करो॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जब स्त्री से प्रसन्न पुरुष और पुरुष से प्रसन्न स्त्री होवे, तभी गृहाश्रम में निरन्तर आनन्द होवे॥४॥

पुनः स कीदृशो भवेदित्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन् वृत्रं निरपामौब्जो अर्णवम्॥५॥

वि। यत्। तिरः। धरुणम्। अच्युतम्। रजः। अतिस्थिपः। दिवः। आतासु। बर्हणा। स्वः।ऽमीळ्हे। यत्। मदे। इन्द्र। हर्ष्या। अहन्। वृत्रम्। निः। अपाम्। औब्जः। अर्णवम्॥५॥

पदार्थः-(**वि**) विशेषार्थे (**यत्**) यम् (**तिरः**) तिरस्करणे (**धरुणम्**) आधारकम् (**अच्युतम्**) कारणरूपेण प्रवाहरूपेण वाऽविनाशि (**रजः**) पृथिव्यादिलोकजातम् (**अतिष्ठिपः**) संस्थापयेः (**दिवः**) प्रकाशादाकर्षणाद्वा (**आतासु**) सर्वासु दिक्षु। **आता इति दिङ्नामसु पठितम्।** (निघं०१.६) (**बर्हणा**) बृह्यते येन तत् (**स्वर्मीढे**) स्वः किरणान् जलानि वा मेहयति यस्मादन्तरिक्षात् तस्मिन् (**यत्**) तम् (**मदे**) माद्यन्ति यस्मिंस्तस्मिन् (**इन्द्र**) सूर्य इव परमैश्वर्य्यकारक (**हर्ष्या**) हर्षं जनितुं योग्यानि कर्माणि कुर्वन् (**अहन्**) हन्ति (**वृत्रम्**) मेघम् (**निः**) नितराम् (**अपाम्**) जलानां सकाशात् (**औब्जः**) य उब्जत्यार्जवी करोति तेन निर्वृत्तः सः (**अर्णवम्**) समुद्रम्॥५॥

अन्वयः-हे इन्द्र! यथौब्जो सूर्य्यलोको दिव आतासु तिरो बर्हणाऽच्युतं धरुणं रजो व्यतिष्ठिपो व्यवस्थापयति मदे स्वर्मीढेऽन्तरिक्षे हर्ष्या हर्षकराणि कर्माणि कुर्वन् यद्यं वृत्रमहन्नपामर्वणं निर्वर्त्तयति यथा स्वराज्यन्यायौ धृत्वा शत्रून् हत्वा पत्न्या आनन्दं जनय॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यलोकः स्वप्रकाशाकर्षणादिगुणैः सर्वाँल्लोकान् स्वस्वकक्षासु भ्रामयन् सर्वासु दिक्षु स्वतेजसा रसं हृत्वा वर्षां जनयन् प्रजापालनहेतुर्वर्त्तते तथा स्त्रीपुरुषाभ्यां वर्त्तितव्यम्॥५॥

पदार्थः-हे परमैश्वर्य्ययुक्त (**इन्द्र**) सभेश! जैसे (**औब्जः**) कोमल करने वाले से सिद्ध हुआ (**यत्**) जो सूर्य (**दिवः**) प्रकाश वा आकर्षण से (**आतासु**) दिशाओं में (**तिरः**) तिरछा किया हुआ (**बर्हणा**) वृद्धि युक्त (**अच्युतम्**) कारणरूप वा प्रवाहरूप से अविनाशि (**धरुणम्**) आधारकर्त्ता (**रजः**) पृथिवी आदि सब लोकों को (**व्यतिष्ठिपः**) विशेष करके स्थापन करता और (**मदे**) आनन्दयुक्त (**स्वर्मीढे**) अन्तरिक्ष में वर्त्तमान (**हर्ष्या**) हर्ष उत्पन्न कराने योग्य कर्मों को करता हुआ (**यत्**) जिस (**वृत्रम्**) मेघ को (**अहन्**) नष्ट कर (**आतासु**) दिशाओं में (**अपाम्**) जलों के सकाश से (**अर्णवम्**) समुद्र

को सिद्ध करता है, वैसे अपने राज्य और न्याय को धारण कर शत्रुओं को मार अपनी स्त्री को आनन्द दिया कर॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्यलोक अपने प्रकाश और आकर्षणादि गुणों से सब लोकों को अपनी-अपनी कक्षा में भ्रमण कराता, सब दिशाओं में अपना तेज वा रस को विस्तार और वर्षा को उत्पन्न करता हुआ प्रजा के पालन का हेतु होता है, वैसे स्त्री-पुरुषों को भी वर्त्तना चाहिये॥५॥

पुनः स सभाध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं दि॒वो ध॒रुणं॑ धिष॒ ओज॑सा पृथि॒व्या इ॑न्द्र॒ सद॑नेषु मा॒हि॑नः।
त्वं सु॒तस्य॒ मदे॑ अरिणा अ॒पो वि वृ॒त्रस्य॑ स॒मया॑ पा॒ष्या॑रुजः॥६॥२१॥

त्वम्। दि॒वः। ध॒रुण॑म्। धि॒षे॒। ओज॑सा। पृ॒थि॒व्याः। इ॒न्द्र॒। सद॑नेषु। मा॒हि॑नः। त्वम्। सु॒तस्य॑। मदे॑। अ॒रि॒णाः॒। अ॒पः। वि। वृ॒त्रस्य॑। स॒मया॑। पा॒ष्या॑। अ॒रु॒जः॒॥६॥

पदार्थः-(**त्वम्**) सभाध्यक्षः (**दिवः**) दिव्यगुणसमूहान् (**धरुणम्**) सर्वमूर्त्तद्रव्याणामाधारम् (**धिषे**) दधासि। अत्र **वाच्छन्दसि सर्वे०** इति द्विर्वचनाभावः। (**ओजसा**) बलेन (**पृथिव्याः**) भूमे राज्यम् (**इन्द्र**) परमैश्वर्यसम्पादक (**सदनेषु**) गृहादिषु (**माहिनः**) पूज्या महत्त्वगुणविशिष्टाः (**त्वम्**) शत्रुविनाशकः (**सुतस्य**) सम्पादितस्य (**मदे**) आह्लादकारके व्यवहारे (**अरिणाः**) प्राप्नोसि (**अपः**) जलानि (**वि**) विशेषेण (**वृत्रस्य**) मेघस्य (**समया**) यथासमयम् (**पाष्या**) पेषणयोग्यानि कर्माणि। अत्र पिष्लृधातोर्ण्यत् वर्णव्यत्ययेन पूर्वस्याऽऽकारः **सुपां सुलुग्** इत्याकारादेशश्च। (**अरुजः**) आमर्दय॥६॥

अन्वयः-हे इन्द्र! माहिनस्त्वमोजसा यथा सूर्यो दिवः पृथिव्या धरुणं सदनेषु धरति तथा प्रजा धिषे यथेन्द्रो विद्युद् वृत्रस्य हननं कृत्वाऽपो वर्षति तथा त्वं सुतस्य मदे समया पाष्या शत्रून् व्यरुजः सुखमरिणाः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसः सूर्यवन्न्यायं प्रकाश्य शत्रून्निवार्य्य प्रजाः पालयन्ति तथैवाऽस्माभिरप्यनुष्ठेयम्॥६॥

अत्र सूर्य्यविद्युद्गुणवर्णनादेतदुक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकविंशो २१ वर्गः षट्पञ्चाशं ५६ सूक्तं च समाप्तम्॥५६॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्यसम्पादक सभाध्यक्ष! (**माहिनः**) पूजनीय महत्त्व गुणवाले (**त्वम्**) आप (**ओजसा**) बल से जैसे सविता (**दिवः**) दिव्यगुणयुक्त प्रकाश से (**पृथिव्याः**) पृथिवी और पदार्थों का (**धरुणम्**) आधार है, वैसे (**सदनेषु**) गृहादिकों में (**धिषे**) धारण करते हो वा जैसे बिजुली (**वृत्रस्य**)

मेघ को मार कर **(अपः)** जलों को वर्षाती है, वैसे **(त्वम्)** आप **(सुतस्य)** उत्पन्न हुए वस्तुओं के **(मदे)** आनन्दकारक व्यवहार में **(समया)** समय में **(अपः)** जलों की वर्षा से सुख देते हो, वैसे **(पाष्या)** अच्छे प्रकार चूर्ण करने रूप सिद्ध किये हुए रस के **(मदे)** आनन्दरूपी व्यवहार में **(पाष्या)** चूर्ण कारक क्रिया से शत्रुओं को **(व्यरुजः)** मरणप्रायः करके **(अरिणाः)** सुख को प्राप्त कीजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् सूर्य्य के समान राज्य को सुप्रकाशित कर शत्रुओं का निवारण करके प्रजा का पालन करते हैं, वैसा ही हम सब लोगों को भी अनुष्ठान करना चाहिये॥६॥

इस सूक्त में सूर्य्य वा विद्वान् के गुण वर्णन से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्कीसवां २१ वर्ग और छप्पनवां ५६ सूक्त समाप्त हुआ॥६॥

अथ षड्चस्य सप्तपञ्चाशस्य सूक्तस्याङ्गिरसः सव्य ऋषिः। इन्द्रो देवता। १,२,४ जगती। ३ विराट्। ६ निचृज्जगती छन्दः। निषादः स्वरः। ५ भुरिक् त्रिष्टुप् छन्दः। मध्यमः स्वरः॥

पुनः सभाध्यक्षो कीदृशो भवेदित्युपदिश्यते॥

फिर सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम्॥ १॥

प्र। मंहिष्ठाय। बृहते। बृहत्ऽरये। सत्यऽशुष्माय। तवसे। मतिम्। भरे। अपाम्ऽइव। प्रवणे। यस्य। दुःऽधरम्। राधः। विश्वऽआयु। शवसे। अपऽवृतम्॥ १॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**मंहिष्ठाय**) योऽतिशयेन मंहिता दाता तस्मै। **मंह इति दानकर्मसु पठितम्।** (निघं०३.२०) (**बृहते**) गुणैर्महते (**बृहद्रये**) बृहन्तो रायो धनानि यस्य तस्मै। अत्र वर्णव्यत्ययेन ऐकारस्य स्थान एकारः। (**सत्यशुष्माय**) सत्यं शुष्मं बलं यस्य तस्मै (**तवसे**) बलवते (**मतिम्**) विज्ञानम् (**भरे**) धरे (**अपामिव**) जलानामिव (**प्रवणे**) निम्ने (**यस्य**) सभाध्यक्षस्य (**दुर्धरम्**) शत्रुभिर्दुःखेन धर्तुं योग्यम् (**राधः**) विद्याराज्यसिद्धं धनम् (**विश्वायु**) विश्वं सर्वमायुर्यस्मात्तत् (**शवसे**) सैन्यबलाय (**अपावृतम्**) दानाय भोगाय वा प्रसिद्धम्॥ १॥

अन्वयः-यथाऽहं यस्य सभाद्यध्यक्षस्य शवसे प्रवणेऽपामिवापावृतं विश्वायु दुर्धरं राधोऽस्ति, तस्मै सत्यशुष्माय तवसे बृहद्रये बृहते मंहिष्ठाय मतिं प्रभरे तथा यूयमपि संधारयत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा जलमूर्ध्वादेशादागत्य निम्नदेशस्थं जलाशयं प्राप्य स्थिरं स्वच्छं भवति तथा नम्राय धार्मिकाय बलवते पुरुषार्थिने मनुष्यायाक्षयं धनं निश्चलं जायते। यो राज्यश्रियं प्राप्य सर्वहिताय विद्यावृद्धये शरीरात्मबलोन्नतये प्रददाति, तमेव शूरं प्रदातारं सभाशालासेनापतित्वे वयमभिषिञ्चेम॥ १॥

पदार्थः-जैसे मैं यस्य जिस सभा आदि के अध्यक्ष के (**शवसे**) बल के लिये (**प्रवणे**) नीचे स्थान में (**अपामिव**) जलों के समान (**अपावृतम्**) दान वा भोग के लिये प्रसिद्ध (**विश्वायु**) पूर्ण आयुयुक्त (**दुर्धरम्**) दुष्ट जनों को दुःख से धारण करने योग्य (**राधः**) विद्या वा राज्य से सिद्ध हुआ धन है, उस (**सत्यशुष्माय**) सत्य बलों का निमित्त (**तवसे**) बलवान् (**बृहद्रये**) बड़े उत्तम-उत्तम धन युक्त (**बृहते**) गुणों से बड़े (**मंहिष्ठाय**) अत्यन्त दान करने वाले सभाध्यक्ष के लिये (**मतिम्**) विज्ञान को (**प्रभरे**) उत्तम रीति से धारण करता हूं, वैसे तुम भी धारण कराओ॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे जल ऊंचे देश से आकर नीचे देश अर्थात् जलाशय को प्राप्त होके स्वच्छ, स्थिर होता है, वैसे नम्र, बलवान् पुरुषार्थी, धार्मिक, विद्वान् मनुष्य को प्राप्त हुआ विद्यारूप धन निश्चल होता है। जो राज्यलक्ष्मी को प्राप्त हो के सबके हित, न्याय वा विद्या की वृद्धि

तथा शरीर, आत्मा के बल की उन्नति के लिये देता है, उसी शूरवीर, विद्यादि देने वाले सभाशाला सेनापति मनुष्य का हम लोग अभिषेक करें॥१॥

पुनः विद्युद्वत्सभाध्यक्षगुणा उपदिश्यन्ते॥

फिर बिजुली के दृष्टान्त से सभा आदि के अध्यक्ष के गुणों का उपदेश अगले मन्त्र में किया है॥

अध॑ ते॒ विश्व॒मनु॑ हासदि॒ष्टय॒ आपो॒ नि॒म्नेव॒ सव॑ना ह॒विष्म॑तः।
यत्पर्व॑ते॒ न स॒मशी॑त हर्य॒त इन्द्र॑स्य॒ वज्रः॑ श्नथि॒ता हिर॒ण्यय॑ः॥२॥

अध॑। ते॒। विश्व॑म्। अनु॑। ह॒। अ॒स॒त्। इ॒ष्टये॑। आपः॑। नि॒म्नाऽइ॑व। सव॑ना। ह॒विष्म॑तः। यत्। पर्व॑ते। न। स॒म्ऽअशी॑त। ह॒र्य॒तः। इन्द्र॑स्य। वज्रः॑। श्नथि॑ता। हिर॒ण्यय॑ः॥२॥

पदार्थः-(**अध**) आनन्तर्ये (**ते**) तव (**विश्वम्**) सर्वं जगत् (**अनु**) अनुयोगे (**ह**) निश्चये (**असत्**) भवेत् (**इष्टये**) अभीष्टसिद्धये (**आपः**) जलानि (**निम्नेव**) यथा निम्नानि स्थानानि गच्छन्ति तथा (**सवना**) ऐश्वर्याणि (**हविष्मतः**) प्रशस्तानि हवींषि विद्यन्ते यस्य (**यत्**) यस्य (**पर्वते**) गिरौ मेघे वा (**न**) इव (**समशीत**) सम्यग् व्याप्नुयात्। अत्र **बहुलं छन्दसि** इति श्नोर्लुक्। (**हर्यतः**) गमयिता कमनीयो वा (**इन्द्रस्य**) विद्युतः (**वज्रः**) ऊष्मसमूहः (**श्नथिता**) हिंसिता (**हिरण्यः**) ज्योतिर्मयः॥२॥

अन्वयः-यद्यस्य हविष्मतो जनस्येन्द्रस्य हिरण्ययो ज्योतिर्मयो वज्रः पर्वते श्नथिता नेव हर्यतो व्यवहारः समशीताध ते समाश्रयेन विश्वं सर्वं जगत्सवनाऽऽपो निम्नेवेष्टये ह खल्वन्वसत् सोऽस्माभिः समाश्रयितव्यः॥२॥

भावार्थः-अत्र श्लेषवाचकलुप्तोपमालङ्कारौ। यथा शैलं मेघं वा समाश्रित्य सिंहादयो जलानि वा रक्षितानि स्थिराणि जायन्ते, तथैव सभाद्यध्यक्षाश्रयेण प्रजाः स्थिरानन्दा भवन्ति॥२॥

पदार्थः-(**यत्**) जिस (**हविष्मतः**) उत्तम दानग्रहणकर्त्ता (**इन्द्रस्य**) ऐश्वर्य वाले सभाध्यक्ष का (**हिरण्ययः**) ज्योतिःस्वरूप (**वज्रः**) शस्त्ररूप किरणें (**पर्वते**) मेघ में (**न**) जैसे (**श्नथिता**) हिंसा करने वाला होता है, वैसे (**हर्यतः**) उत्तम व्यवहार (**समशीत**) प्रसिद्ध हो (**अध**) इसके अनन्तर (**ते**) आप के समाश्रय से (**विश्वम्**) सब जगत् (**सवना**) ऐश्वर्य को (**आपः**) जल (**निम्नेव**) जैसे नीचे स्थान को जाते हैं, वैसे (**इष्टये**) अभीष्ट सिद्धि के लिये (**ह**) निश्चय करके (**अन्वसत्**) हो उसी सभाध्यक्ष वा बिजुली का हम सब मनुष्यों को समाश्रय वा उपयोग करना चाहिये॥२॥

भावार्थः-इस मन्त्र में श्लेष और वाचकलुप्तोपमालङ्कार हैं। जैसे पर्वत वा मेघ का समाश्रय कर सिंह आदि वा जल रक्षा को प्राप्त होकर स्थित होते हैं, जैसे नीचे स्थानों में रहने वाला जलसमूह सुख देने वाला होता है, वैसे ही सभाध्यक्ष के आश्रय से प्रजा की रक्षा तथा बिजुली की विद्या से शिल्प विद्या की सिद्धि को प्राप्त होकर सब प्राणी सुखी होवें॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे॥ ३॥

अस्मै। भीमाय। नमसा। सम्। अध्वरे। उषः। न। शुभ्रे। आ। भर। पनीयसे। यस्य। धाम। श्रवसे। नाम। इन्द्रियम्। ज्योतिः। अकारि। हरितः। न। अयसे॥ ३॥

पदार्थः-(**अस्मै**) सभाध्यक्षाय (**भीमाय**) दुष्टानां भयंकराय (**नमसा**) सत्कारेण (**सम्**) सम्यगर्थे (**अध्वरे**) अहिंसानीये धर्मे यज्ञे (**उषः**) उषाः। अत्र **सुपाम्** इति विभक्तेर्लुक्। (**न**) इव (**शुभ्रे**) शोभमाने सुखे (**आ**) समन्तात् (**भर**) धर (**पनीयसे**) यथायोग्यं व्यवहारं कुर्वते स्तोतुमर्हाय (**यस्य**) उक्तार्थस्य (**धाम**) दधाति प्राप्नोति विद्यादिसुखं यस्मिंस्तत् (**श्रवसे**) श्रवणायान्नाय वा (**नाम**) प्रख्यातिः (**इन्द्रियम्**) प्रशस्तं बुद्ध्यादिकं चक्षुरादिकं वा (**ज्योतिः**) न्यायविनयप्रचारकम् (**अकारि**) क्रियते (**हरितः**) दिशः (**न**) इव (**अयसे**) विज्ञानाय। **हरित इति दिङ्नामसु पठितम्।** (निघं०१.६)॥३॥

अन्वयः-हे मनुष्य! त्वं यस्य धाम श्रवसेऽस्ति येनायसे हरितो न येन नामेन्द्रियं ज्योतिकारि क्रियतेऽस्मै भीमाय पनीयसे शुभ्र अध्वर उषो न प्रातःकाल इव नमसा समाभर॥३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा प्रातःकालः सर्वान्धकारं निवार्य सर्वान् प्रकाश्याह्लादयति तथैव अन्यायविनाशको गुणाधिक्येन प्रशंसितः सत्कृत्य संग्रामादिव्यवहारे संस्थाप्यः। यथा दिशो व्यवहारं प्रज्ञापयन्ति तथैव विद्यासुशिक्षासेनाविनयन्यायानुष्ठानादिना सर्वान् भूषयित्वा धनान्नादिभिः संयोज्य सततं सुखयेत्। स एव सभाद्यधिकारे प्रधानः कर्त्तव्यः॥३॥

पदार्थः-हे विद्वान् मनुष्य! तू (**यस्य**) जिस सभाध्यक्ष का (**धाम**) विद्यादि सुखों का धारण करने वाला (**श्रवसे**) श्रवण वा अन्न के लिये है, जिसने (**अयसे**) विज्ञान के वास्ते (**हरितः**) दिशाओं के (**न**) समान (**नाम**) प्रसिद्ध (**इन्द्रियम्**) प्रशंसनीय बुद्धिमान् आदि वा चक्षु आदि (**अकारि**) किया है (**अस्मै**) इस (**भीमाय**) दुष्ट वा पापियों को भय देने (**पनीयसे**) यथायोग्य व्यवहार, स्तुति करने योग्य सभाध्यक्ष के लिये (**शुभ्रे**) शोभायमान शुद्धिकारक (**अध्वरे**) अहिंसनीय धर्मयुक्त यज्ञ (**उषः**) प्रातःकाल के (**न**) समान (**नमसा**) नमस्ते वाक्य के साथ (**समाभर**) अच्छे प्रकार धारण वा पोषण कर॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को समुचित है कि जैसे प्रातःकाल सब अन्धकार को निवारण और सबको प्रकाश से आनन्दित करता है, वैसे ही शत्रुओं को भय करने वाले मनुष्य को गुणों की अधिकता से स्तुति, सत्कार वा संग्रामादि व्यवहारों में स्थापन करें। जैसे दिशा व्यवहार की जाननेहारी होती है, वैसे ही जो विद्या उत्तम शिक्षा, सेना, विनय, न्यायादि से सबको सुभूषित धन अन्न आदि से संयुक्त कर सुखी करे, उसी को सभा आदि अधिकारों में सब मनुष्यों को अधिकार देवें॥३॥

अथेश्वरगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में ईश्वर और सभा आदि के अध्यक्ष के गुणों का उपदेश किया है॥

इ॒मे त॑ इन्द्र ते व॒यं पु॑रुष्टुत॒ ये त्वा॒रभ्य॒ चरा॑मसि प्रभूवसो।
न॒हि त्वदु॒न्यो गि॒र्वणो॒ गिर॒: सघ॑त् क्षो॒णीरि॑व॒ प्रति॑ नो हर्य॒ तद्वच॑:॥४॥

इ॒मे। ते॒। इ॒न्द्र॒। ते। व॒यम्। पु॒रु॒ऽस्तु॒त॒। ये। त्वा॒। आ॒ऽरभ्य॑। चरा॑मसि। प्र॒भु॒व॒सो॒ इति॑ प्रभुऽवसो। न॒हि। त्वत्। अ॒न्यः। गि॒र्व॒णः॒। गिरः॑। सघ॑त्। क्षो॒णीः॒ऽइ॑व। प्रति॑। नः॒। ह॒र्य॒। तत्। वचः॑॥४॥

पदार्थः-(**इमे**) सर्वे प्रत्यक्षा मनुष्याः (**ते**) तव (**इन्द्र**) जगदीश्वर (**ते**) सर्वे परोक्षाः (**वयम्**) सर्वे मिलित्वा (**पुरुष्टुत्**) पुरुभिर्बहुभिः स्तुतस्तत्सम्बुद्धौ (**ये**) पूर्वोक्ताः (**त्वा**) त्वाम् (**आरभ्य**) त्वत्सामर्थ्यमाश्रित्य (**चरामसि**) विचरामः (**प्रभूवसो**) प्रभूः सर्वसमर्थश्च वसुः सुखेषु वासप्रदश्चासौ तत्सम्बुद्धौ (**नहि**) निषेधे (**त्वत्**) तव सकाशात् (**अन्यः**) भिन्नस्त्वत्सदृक् (**गिर्वणः**) योगीभिर्वेदविद्यासंस्कृताभिर्वाग्भिर्वन्यते सम्भज्यते तत्सम्बुद्धौ। अत्र गिरुपदाद्वनधातोरौणादिकोऽसुन् प्रत्ययः। (**गिरः**) वाचः (**सघत्**) हिंसन्। अत्र **बहुलं छन्दसि** इति श्नोर्लुक्। (**क्षोणीरिव**) यथा पृथिवीः। **क्षोणीरिति पृथिवीनामसु पठितम्।** (निघं०१.१) (**प्रति**) प्राप्त्यर्थे (**न**) अस्मभ्यम् (**हर्य**) कमनीय सर्वसुखप्रापक (**तत्**) वक्ष्यमाणम् (**वचः**) उपदेशकारकं वेदवचनम्॥४॥

अन्वयः-हे प्रभूवसो! गिर्वणः पुरुष्टुत हर्येन्द्र जगदीश्वर ते तव कृपासहायेनेमे वयं सघत् क्षोणीरिव त्वारभ्य पृथिवीराज्यं चरामसि त्वं नोऽस्मभ्यं गिरः श्रुधि त्वदन्यः कश्चिदपि नो रक्षक इति नहि विजानीमो यच्च भवदुक्तं वेदवचस्तद्वयमाश्रयेम॥४॥

भावार्थः-ये मनुष्या परब्रह्मणो भिन्नं वस्तूपास्यत्वेन नाङ्गीकुर्वन्ति तदुक्तवेदाभिहितं मतं विहायान्यन्नैव मन्यन्ते त एवात्र पूज्या जायन्ते॥४॥

पदार्थः-हे (**प्रभूवसो**) समर्थ वा सुखों में वास देने (**गिर्वणः**) वेदविद्या से संस्कार की हुई वाणियों से सेवनीय (**पुरुष्टुत**) बहुतों से स्तुति करने वाले (**हर्य**) कमनीय वा सर्वसुखप्रापक (**इन्द्र**) जगदीश्वर! (**ते**) आपकी कृपा के सहाय से हम लोग (**सघत्**) (**क्षोणीरिव**) जैसे शूरवीर शत्रुओं को मारते हुए पृथिवी राज्य को प्राप्त होते हैं, वैसे (**नः**) हम लोगों के लिये (**गिरः**) वेद विद्या से अधिष्ठित वाणियों को प्राप्त कराने की इच्छा करने वाले (**त्वत्**) आप से (**अन्यः**) भिन्न (**नहि**) कोई भी नहीं है (**तत्**) उन (**वचः**) वचनों को सुन कर वा प्राप्त करा जो (**इमे**) ये सन्मुख मनुष्य वा (**ये**) जो (**ते**) दूर रहने वाले मनुष्य और (**वयम्**) हम लोग परस्पर मिलकर (**ते**) आप के शरण होकर (**त्वारभ्य**) आप के सामर्थ्य का आश्रय करके निर्भय हुए (**प्रतिचरामसि**) परस्पर सदा सुखयुक्त विचरते हैं॥४॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। जैसे शूरवीर शत्रुओं के बलों को निवारण और राज्य को प्राप्त कर सुखों को भोगते हैं, वैसे ही हे जगदीश्वर! हम लोग अद्वितीय आप का आश्रय करके सब प्रकार विजय वाले होकर विद्या की वृद्धि को कराते हुए सुखी होते हैं॥४॥

पुनः सः कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

भूरि॑ त इन्द्र वी॒र्यं१ तव॑ स्मस्य॒स्य स्तो॒तुर्म॑घव॒न्काम॒मा पृ॑ण।
अनु॑ ते॒ द्यौर्बृ॒हती वी॒र्यं॑ मम इ॒यं च॑ ते पृथि॒वी ने॑म॒ ओज॑से॥५॥

भूरि॑। ते॒। इ॒न्द्र॒। वी॒र्य॑म्। तव॑। स्म॒सि॒। अ॒स्य॒। स्तो॒तुः॒। म॒घ॒ऽव॒न्। काम॑म्। आ। पृ॒ण॒। अनु॑। ते॒। द्यौः॒। बृ॒ह॒ती। वी॒र्य॑म्। म॒मे॒। इ॒यम्। च॒। ते॒। पृ॒थि॒वी। ने॒मे॒। ओज॑से॥५॥

पदार्थः-(**भूरि**) बहु (**ते**) तव (**इन्द्र**) परमात्मन् (**वीर्य्यम्**) बलं पराक्रमो वा (**तव**) (**स्मसि**) स्मः (**अस्य**) वक्ष्यमाणस्य (**स्तोतुः**) गुणप्रकाशकस्य (**मघवन्**) परमपूज्य (**कामम्**) इच्छाम् (**आ**) समन्तात् (**पृण**) प्रपूर्द्धि (**अनु**) पश्चात् (**ते**) तव (**द्यौः**) सूर्यादिः (**बृहती**) महती (**वीर्य्यम्**) पराक्रमम् (**ममे**) मिमीते (**इयम्**) वक्ष्यमाणा (**च**) समुच्चये (**ते**) तव (**पृथिवी**) भूमिः (**नेमे**) प्रह्वीभूता भवति (**ओजसे**) बलयुक्ताय॥५॥

अन्वयः-हे मघवन्निन्द्र! यस्य ते तव यद्भूरि वीर्य्यमस्ति यद्वयं स्मसि यस्य तवेयं बृहती द्यौः पृथिवी चौजसे नेमे भोगाय प्रह्वीभूता नम्रेव भवति, स त्वमस्य स्तोतुः काममापृण॥५॥

भावार्थः-मनुष्यैरीश्वरस्यानन्तं वीर्य्यमाश्रित्य कामसिद्धिं पृथिवीराज्यं सम्पाद्य सततं सुखयितव्यम्॥५॥

पदार्थः-हे (**मघवन्**) उत्तम धनयुक्त (**इन्द्र**) सेनादि बल वाले सभाध्यक्ष! जिस (**ते**) आप का जो (**भूरि**) बहुत (**वीर्यम्**) पराक्रम है, जिस के हम लोग (**स्मसि**) आश्रित और जिस (**तव**) आपकी (**इयम्**) यह (**बृहती**) बड़ी (**द्यौः**) विद्या, विनययुक्त न्यायप्रकाश और राज्य के वास्ते (**पृथिवी**) भूमि (**ओजसे**) बलयुक्त के लिये और भोगने के लिये (**नेमे**) नम्र के समान है, वह आप (**अस्य**) इस (**स्तोतुः**) स्तुति कर्त्ता के (**कामम्**) कामना को (**आपृण**) परिपूर्ण करें॥५॥

भावार्थः-मनुष्यों को योग्य है कि ईश्वर का आश्रय करके सब कामनाओं की सिद्धि वा पृथिवी के राज्य की प्राप्ति करके निरन्तर सुखी रहें॥५॥

पुनस्तदुपासकः कीदृशो भवेदित्युपदिश्यते॥

फिर ईश्वर का उपासक कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं तमि॑न्द्र॒ पर्व॑तं म॒हामु॒रुं वज्रे॑ण॒ वज्रि॒न्पर्व॒शश्च॑कर्तिथ।

अवा॑सृजो॒ निवृ॑ता॒: सर्त॒वा अ॒प: स॒त्रा विश्वं॑ दधिषे॒ केव॑लं॒ सह॑:॥६॥२२॥१०॥

त्वम्। तम्। इ॒न्द्र॒। पर्व॑तम्। म॒हाम्। उ॒रुम्। वज्रे॑ण। व॒ज्रि॒न्। प॒र्व॒ऽश॒:। च॒क॒र्त्थ॒। अव॑। अ॒सृ॒ज॒:। निऽवृ॑ता:। सर्त॒वै। अ॒प:। स॒त्रा। विश्व॑म्। दु॒धि॒षे॒। केव॑लम्। सह॑:॥६॥

पदार्थ:-(**त्वम्**) सेनेश: (**तम्**) वक्ष्यमाणम् (**इन्द्र**) सूर्य इव शत्रुबलविदारक (**पर्वतम्**) मेघाश्रितं जलमिव पर्वताश्रितं शत्रुम् (**महाम्**) पूज्यतमम् (**उरुम्**) बहुबलादिगुणविशिष्टम् (**वज्रेण**) किरणैरिव तीक्ष्णेन शस्त्रसमूहेन (**वज्रिन्**) शस्त्रास्त्रधारिन् (**पर्वश:**) अङ्गमङ्गम् (**चकर्त्थ**) कृन्तसि (**अव**) विनिग्रहे (**असृज:**) सृज (**निवृता:**) निवारिता: (**सर्तवै**) सर्त्तुं गन्तुम् (**अप:**) जलानीव (**सत्रा**) सत्यकारणरूपेणाविनाशि। **सत्रेति सत्यनामसु पठितम्।** (निघं०३.१०) (**विश्वम्**) जगत् (**दधिषे**) धरसि (**केवलम्**) असहायम् (**सह:**) बलम्॥६॥

अन्वय:-हे वज्रिन्निन्द्र! यस्त्वं महामुरुं वीराणां पूज्यतमां सेनामवासृजो वज्रेण यथा सूर्य: पर्वतं छित्वा निवृता अपस्तथा शत्रुसमूहं पर्वशश्चकर्त्तिथाङ्गमङ्गं कृन्तसि निवारयसि सत्रा विश्वं केवलं सहश्च सर्तवै दधिषे तन्त्वां सभाद्यधिपतिं वयं गृह्णीम:॥६॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। मनुष्यैर्य: शत्रूणां छेत्ता प्रजापालनतत्परो बलविद्यायुक्तोऽस्ति, स एव सभाद्यध्यक्ष: कार्य्य:॥६॥

अस्मिन् सूक्तेऽग्निसभाध्यक्षादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशो २२ वर्ग: सप्तपञ्चाशं ५७ सूक्तं च समाप्तम्॥

पदार्थ:-हे (**वज्रिन्**) प्रशस्त शस्त्रविद्यावित् (**इन्द्र**) दुष्टों के विदारण करनेहारे सभाध्यक्ष! जो (**त्वम्**) आप (**महाम्**) श्रेष्ठ (**उरुम्**) बड़ी वीर पुरुषों की सत्कार के योग्य उत्तम सेना को (**अवासृज:**) बनाइये और (**वज्रेण**) वज्र से जैसे सूर्य्य (**पर्वतम्**) मेघ को छिन्न-भिन्न कर (**निवृता:**) निवृत्त हुए (**अप:**) जलों को धारण करता और पुन: पृथिवी पर गिराता है, वैसे शत्रुदल को (**पर्वश:**) अङ्ग अङ्ग से (**चकर्त्थ**) छिन्न-भिन्न कर शत्रुओं का निवारण करते हो (**सत्रा**) कारणरूप से सत्यस्वरूप (**विश्वम्**) जगत् को अर्थात् राज्य को धारण करके (**केवलम्**) असहाय (**सह:**) बल को (**सर्त्तवै**) सबको सुख से जाने-आने के न्यायमार्ग में चलने को (**दधिषे**) धरते हो (**तम्**) उस आपको सभा आदि के पति हम लोग स्वीकार करते हैं॥६॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि जो शत्रुओं के छेदन, प्रजा के पालन में तत्पर, बल और विद्या से युक्त है, उसी को सभा आदि का रक्षक अधिष्ठाता स्वामी बनावें॥६॥

इस सूक्त में अग्नि और सभाध्यक्ष आदि के गुणों के वर्णन से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह बाईसवां २२ वर्ग और सत्तावनवां ५७ सूक्त समाप्त हुआ॥

अथ नवर्चस्याष्टपञ्चाशस्य सूक्तस्य गौतमो नोधा ऋषिः। अग्निर्देवता। १,५, जगती। २ विराड्जगती। ४ निचृज्जगती च छन्दः। निषादः स्वरः। ३ त्रिष्टुप्। ६,७,९ निचृत्त्रिष्टुप्। ८ विराड्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाऽग्निदृष्टान्तेन जीवगुणा उपदिश्यन्ते॥

अब अट्ठावनवें सूक्त का आरम्भ है। उस के पहिले मन्त्र में अग्नि के दृष्टान्त से जीव के गुणों का उपदेश किया है॥

नू चित्सहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति॥ १॥

नु। चित्। सहःऽजाः। अमृतः। नि। तुन्दते। होता। यत्। दूतः। अभवत्। विवस्वतः। वि। साधिष्ठेभिः। पथिऽभिः। रजः। ममे। आ। देवऽताता। हविषा। विवासति॥ १॥

पदार्थः-(**नु**) शीघ्रम् (**चित्**) इव (**सहोजाः**) यः सहसा बलेन प्रसिद्धः (**अमृतः**) नाशरहितः (**नि**) नितराम् (**तुन्दते**) व्यथते। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ति** इति नुमागमः। (**होता**) अत्ता खल्वादाता (**यत्**) यः (**दूतः**) उपतप्ता देशान्तरं प्रापयिता (**अभवत्**) भवति (**विवस्वतः**) परमेश्वरस्य (**वि**) विशेषार्थे (**साधिष्ठेभिः**) अधिष्ठोऽधिष्ठानं समानमधिष्ठानं येषां तैः (**पथिभिः**) मार्गैः (**रजः**) पृथिव्यादिलोकसमूहम् (**ममे**) मिमीते (**आ**) सर्वतः (**देवताता**) देवा एव देवतास्तासां भावः (**हविषा**) आदत्तेन देहेन (**विवासति**) परिचरति॥ १॥

अन्वयः-हे मनुष्या! यद्यश्चिद्विद्युदिवाऽमृतः सहोजा होता दूतोऽभवद् देवताता साधिष्ठेभिः पथिभी रजो नु निर्मातुर्विवस्वतो मध्ये वर्त्तमानः सन् हविषा सह विवासति स्वकीये कर्मणि व्याममे स जीवात्मा वेदितव्यः॥ १॥

भावार्थः-हे मनुष्या! यूयमनादौ सच्चिदानन्दस्वरूपे सर्वशक्तिमति स्वप्रकाशे सर्वाऽऽधारेऽखिल- विश्वोत्पादके देशकालवस्तुपरिच्छेदशून्ये सर्वाभिव्यापके परमेश्वरे नित्येन व्याप्यव्यापकसम्बन्धेन योऽनादि- र्नित्यश्चेतनोऽल्पोऽल्पज्ञोऽस्ति स एव जीवो वर्त्तत इति बोध्यम्॥ १॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**चित्**) विद्युत् के समान स्वप्रकाश (**अमृतः**) स्वस्वरूप से नाशरहित (**सहोजाः**) बल को उत्पादन करने हारा (**होता**) कर्मफल का भोक्ता सब मन और शरीर आदि का धर्त्ता (**दूतः**) सबको चलाने हारा (**अभवत्**) होता है (**देवताता**) दिव्यपदार्थों के मध्य में दिव्यस्वरूप (**साधिष्ठेभिः**) अधिष्ठानों से सह वर्त्तमान (**पथिभिः**) मार्गो से (**रजः**) पृथिवी आदि लोकों को (**नु**) शीघ्र बनाने हारे (**विवस्वतः**) स्वप्रकाश स्वरूप परमेश्वर के मध्य में वर्त्तमान होकर (**हविषा**) ग्रहण किये हुए शरीर से सहित (**नि तुन्दते**) निरन्तर जन्म-मरण आदि में पीड़ित होता और अपने कर्मों के फलों का

(विवासति) सेवन और अपने कर्म में **(व्याममे)** सब प्रकार से वर्त्तता है, सो जीवात्मा है, ऐसा तुम लोग जानो॥१॥

भावार्थः-हे मनुष्यो लोगो! तुम अनादि अर्थात् उत्पत्तिरहित, सत्यस्वरूप, ज्ञानमय, आनन्दस्वरूप, सर्वशक्तिमान्, स्वप्रकाश, सबको धारण और सबके उत्पादक, देश-काल और वस्तुओं के परिच्छेद से रहित और सर्वत्र व्यापक परमेश्वर में नित्य व्याप्य-व्यापक सम्बन्ध से जो अनादि, नित्य, चेतन, अल्प, एक देशस्थ और अल्पज्ञ है, वही जीव है, ऐसा निश्चित जानो॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत्॥२॥

आ। स्वम्। अद्म। युवमानः। अजरः। तृषु। अविष्यन्। अतसेषु। तिष्ठति। अत्यः। न। पृष्ठम्। प्रुषितस्य। रोचते। दिवः। न। सानु। स्तनयन्। अचिक्रदत्॥२॥

पदार्थः-(**आ**) समन्तात् (**स्वम्**) स्वकीयम् (**अद्म**) अत्तुमर्हं कर्मफलम् (**युवमानः**) संयोजको भेदकश्च। अत्र विकरणव्यत्ययेन श आत्मनेपदं च। (**अजरः**) स्वस्वरूपेण जीर्णावस्थारहितः (**तृषु**) शीघ्रम्। **तृष्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) (**अविष्यन्**) रक्षणादिकं करिष्यन् (**अतसेषु**) विस्तृतेष्वाकाशपवनादिषु पदार्थेषु (**तिष्ठति**) वर्त्तते (**अत्यः**) अश्वः (**न**) इव (**पृष्ठम्**) पृष्ठभागम् (**प्रुषितस्य**) स्निग्धस्य मध्ये (**रोचते**) प्रकाशते (**दिवः**) सूर्य्यप्रकाशात् (**न**) इव (**सानु**) मेघस्य शिखरः (**स्तनयन्**) शब्दयन् (**अचिक्रदत्**) विकलयति॥२॥

अन्वयः-हे मनुष्याः! यूयं यो युवमानोऽजरो देहादिकमविष्यन्नतसेषु तिष्ठति प्रुषितस्य पूर्णस्य मध्ये स्थितः सन् पृष्ठमत्यो न देहादि वहति सानु दिवो न रोचते विद्युत् स्तनयन्निवाचिक्रदत् स्वमद्म तृष्वाभुङ्क्ते स देही जीव इति मन्तव्यम्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यः पूर्णेनेश्वरेण धृत आकाशादिषु प्रयतते सर्वान् बुध्यादीन् प्रकाशते ईश्वरनियोगेन स्वकृतस्य शुभाशुभाचरितस्य कर्मणः सुखदुःखात्मकं फलं भुङ्क्ते, सोऽत्र शरीरे स्वतन्त्रकर्त्ता भोक्ता जीवोऽस्तीति मनुष्यैर्वेदितव्यम्॥२॥

पदार्थः-हे मनुष्यो! तुम जो **(युवमानः)** संयोग और विभाग कर्त्ता **(अजरः)** जरादि रोगरहित देह आदि की **(अविष्यन्)** रक्षा करने वाला होता हुआ **(अतसेषु)** आकाशादि पदार्थों में **(तिष्ठति)** स्थित होता **(प्रुषितस्य)** पूर्ण परमात्मा में कार्य्य का सेवन करता हुआ **(न)** जैसे **(अत्यः)** घोड़ा **(पृष्ठम्)** अपनी पीठ पर भार को बहाता है, वैसे देहादि को बहाता है **(न)** जैसे **(दिवः)** प्रकाश से **(सानु)** पर्वत के शिखर वा मेघ की घटा प्रकाशित होती है, वैसे **(रोचते)** प्रकाशमान होता है, जैसे **(स्तनयन्)** बिजुली

शब्द करती है, वैसे **(अचिक्रदत्)** सर्वथा शब्द करता है, जो **(स्वम्)** अपने किये **(अद्य)** भोक्तव्य कर्म को **(तृषु)** शीघ्र **(आ)** सब प्रकार से भोगता है, वह देह का धारण करने वाला जीव है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पूर्ण ईश्वर ने धारण किया, आकाशादि तत्त्वों में प्रयत्नकर्त्ता, सब बुद्धि आदि का प्रकाशक, ईश्वर के न्याय-नियम से अपने किये शुभाशुभ कर्म के सुखदुःखरूप फल को भोगता है, सो इस शरीर में स्वतन्त्रकर्ता भोक्ता जीव है, ऐसा सब मनुष्य जानें॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः।
रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग्वार्या देव ऋण्वति॥३॥

क्राणा। रुद्रेभिः। वसुऽभिः। पुरःऽहितः। होता। निऽसत्तः। रयिषाट्। अमर्त्यः। रथः। न। विक्षु। ऋञ्जसानः। आयुषु। वि। आनुषक्। वार्या। देवः। ऋण्वति॥३॥

पदार्थः-(**क्राणा**) कर्त्ता। अत् कृञ् धातोर्बाहुलकादौणादिक आनच् प्रत्ययः। **सुपां सुलुग्०** इत्याकारादेशश्च। (**रुद्रेभिः**) प्राणैः (**वसुभिः**) पृथिव्यादिभिः सहः (**पुरोहितः**) पूर्वं ग्रहीता (**होता**) अत्ता (**निसत्तः**) स्थितः (**रयिषाट्**) यो रयिं द्रव्यं सहते (**अमर्त्यः**) नाशरहितः (**रथः**) रमणीयस्वरूपः (**न**) इव (**विक्षु**) प्रजासु (**ऋञ्जसानः**) य ऋञ्जति प्रसाध्नोति सः। अत्र **ऋञ्जिवृधिमदि०** (उणा०२.८७) अनेन सानच् प्रत्ययः। (**आयुषु**) बाल्यावस्थासु (**वि**) विशिष्टार्थे (**आनुषक्**) अनुकूलतया (**वार्या**) वर्त्तुं योग्यानि वस्तूनि (**देवः**) देदीप्यमानः (**ऋण्वति**) कर्माणि साध्नोति॥३॥

अन्वयः-हे मनुष्या! यो रुद्रेभिर्वसुभिः सह निषत्तो होता पुरोहितो रयिषाडमर्त्यः क्राणा ऋञ्जसानो विक्षु रथो नेवायुष्वानुषग्वार्य्या व्यृण्वति साध्नोति, स एव देवो जीवात्माऽस्तीति यूयं विजानीत॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये पृथिव्यां प्राणैश्चेष्टन्ते, मनोऽनुकूलेन रथेनेव शरीरेण सह रमन्ते, श्रेष्ठानि वस्तूनि सुखं चेच्छन्ति, त एव जीवा इति वेद्यम्॥३॥

पदार्थः-हे मनुष्यो! तुम जो (**रुद्रेभिः**) प्राणों और (**वसुभिः**) वास देनेहारे पृथिवी आदि पदार्थों के साथ (**निसत्तः**) स्थित चलता फिरता (**होता**) देहादि का धारण करने हारा (**पुरोहितः**) प्रथम ग्रहण करने योग्य (**रयिषाट्**) धन का सहन कर्त्ता (**अमर्त्यः**) मरण धर्मरहित (**क्राणा**) कर्मों का कर्त्ता (**ऋञ्जसानः**) जो किये हुए कर्म को प्राप्त होता (**विक्षु**) प्रजाओं में (**रथो न**) रथ के समान शरीरसहित होके (**आयुषु**) बाल्यादि जीवनावस्थाओं में (**आनुषक्**) अनुकूलता से वर्त्तमान (**वार्या**) उत्तम पदार्थ और

सुखों को **(व्यृण्वति)** विविध प्रकार सिद्ध करता है, वही **(देवः)** शुद्ध प्रकाशस्वरूप जीवात्मा है, ऐसा जानो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पृथिवी में प्राणों के साथ चेष्टा, मन के अनुकूल, रथ के समान शरीर के साथ क्रीड़ा, श्रेष्ठ वस्तु और सुख की इच्छा करते हैं, वे ही जीव हैं, ऐसा सब लोग जानें॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर॥४॥

वि। वातऽजूतः। अतसेषु। तिष्ठते। वृथा। जुहूभिः। सृण्या। तुविऽस्वनिः। तृषु। यत्। अग्ने। वनिनः। वृषऽयसे। कृष्णम्। ते। एम। रुशत्ऽऊर्मे। अजर॥४॥

पदार्थः-(**वि**) विशेषार्थे **(वातजूतः)** वातेन वायुना जूतः प्राप्तवेगः **(अतसेषु)** व्याप्तव्येषु तृणकाष्ठभूमिजलादिषु **(तिष्ठते)** वर्त्तते **(वृथा)** व्यर्थे **(जुहूभिः)** जुह्वति याभिः क्रियाभिः **(सृण्या)** धारणेन हननेन वा। **द्विविधा सृणिर्भवति भर्ता च हन्ता च।** (निरु०१३.५) **(तुविष्वणिः)** यस्तुविषो बहून् पदार्थान् वनति सम्भजति सः **(तृषु)** शीघ्रम् **(यत्)** यः **(अग्ने)** विद्युद्वद्वर्त्तमान **(वनिनः)** प्रशस्ता रश्मयो वनानि वा येषां तेषु वा तान् **(वृषायसे)** वृष इवाचरसि **(कृष्णम्)** कर्षति विलिखति येन ज्योतिः समूहेन तम् **(ते)** तव **(एम)** विज्ञाय प्राप्नुयाम **(रुशदूर्मे)** रुशन्त्य ऊर्मयो ज्वाला यस्य तत्सम्बुद्धौ **(अजर)** स्वयं जरादिदोषरहित॥४॥

अन्वयः-हे रुशदूर्मेऽजराग्ने जीव! यो भवानतसेषु वितिष्ठते यद्यो वातजूतो जुहूभिः सृण्या च सह वनिनः प्राप्य त्वं वृथाऽभिमानं परित्यज्य स्वात्मानं जानीहि॥४॥

भावार्थः-सर्वान् मनुष्यान् प्रतीश्वरोऽभिवदति मया यदुपदिष्टं तदेव युष्मदात्मस्वरूपमस्तीति वेदितव्यम्॥४॥

पदार्थः-हे **(रुशदूर्मे)** अपने स्वभाव की लहरी युक्त **(अजर)** वृद्धावस्था से रहित **(अग्ने)** बिजुली के तुल्य वर्त्तमान जीव! जो तू **(अतसेषु)** आकाशादि व्यापक पदार्थों में **(वितिष्ठते)** ठहरता **(यत्)** जो **(वातजूतः)** वायु का प्रेरक और वायु के समान वेग वाला **(तुविष्वणिः)** बहुत पदार्थों का सेवक **(जुहूभिः)** ग्रहण करने के साधनरूप क्रियाओं और **(सृण्या)** धारण तथा हननरूप कर्म्म से सह वर्त्तमान **(वनिनः)** विद्युत् युक्त प्राणों को प्राप्त होके तू **(तृषु)** शीघ्र **(वृषायसे)** बलवान् होता है, जिस **(ते)** तेरे **(कृष्णम्)** कर्षणरूप गुण को हम लोग **(एम)** प्राप्त होते हैं, सो तू **(वृथा)** अभिमान को छोड़ के अपने स्वरूप को जान॥४॥

भावार्थः-सब मनुष्यों को ईश्वर उपदेश करता है कि जैसा मैंने जीव के स्वभाव का उपदेश किया है, वही तुम्हारा स्वरूप है, यह निश्चित जानो॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः।
अभिव्रजन् नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः॥५॥२३॥

तपुर्ःऽजम्भः। वने। आ। वातऽचोदितः। यूथे। न। साह्वान्। अव। वाति। वंसगः। अभिऽव्रजन्। अक्षितम्। पाजसा। रजः। स्थातुः। चरथम्। भयते। पतत्रिणः॥५॥

पदार्थः-(**तपुर्जम्भः**) तपूंषि तापा जम्भो वक्रमिव यस्य सः (**वने**) रश्मौ (**आ**) समन्तात् (**वातचोदितः**) वायुना प्रेरितः (**यूथे**) सैन्ये (**न**) इव (**साह्वान्**) सहनशीलो वीरः (**अव**) विनिग्रहे (**वाति**) गच्छति (**वंसगः**) यो वंसान् सम्भक्तान् पदार्थान् गच्छति प्राप्नोति सः (**अभिव्रजन्**) अभितः सर्वतो गच्छन् (**अक्षितम्**) क्षयरहितम् (**पाजसा**) बलेन। **पाज इति बलनामसु पठितम्।** (निघं०२.९) (**रजः**) सकारणं लोकसमूहम् (**स्थातुः**) कृतस्थितेः (**चरथम्**) चर्यते गम्यते भक्ष्यते यस्तम् (**भयते**) भयं जनयति। अत्र व्यत्ययेन **बहुलं छन्दसि** इति शपो लुक् आत्मनेपदञ्च (**पतत्रिणः**) पक्षिणः॥५॥

अन्वयः-हे मनुष्या! यो वंसगो वाचचोदितस्तपुर्जम्भोऽग्निरिव जीवो यूथे साह्वानाववाति विस्तृतो भूत्वा हिनस्ति योऽभिव्रजन् चरथमक्षितं रजः पाजसा धरति स्थातुस्तिष्ठतो वृक्षादेर्मध्ये पतत्रिण इव भयते तद्युष्माकमात्मस्वरूपमस्तीति विजानीत॥५॥

भावार्थः-मनुष्यैर्योऽन्तःकरणप्राणेन्द्रियशरीरप्रेरकः सर्वेषामेतेषां धर्त्ता नियन्ताऽधिष्ठातेच्छाद्वेषप्रयत्नसुख- दुःखज्ञानादिगुणोऽस्ति सोऽत्र देहे जीवोऽस्तीति वेद्यम्॥५॥

पदार्थः-हे मनुष्य लोगो! जो (**वंसगः**) भिन्न-भिन्न पदार्थों को प्राप्त होता (**वातचोदितः**) प्राणों से प्रेरित (**तपुर्जम्भः**) जिस का मुख के समान प्रताप, वह जीव अग्नि के सदृश जैसे (**यूथम्**) सेना में (**साह्वान्**) सहनशील जीव (**अववाति**) सब शरीर की चेष्टा कराता है, जो विस्तृत होके दुःखों का हनन करता जो (**अभिव्रजन्**) जाता-आता हुआ (**चरथम्**) चरनेहारे (**अक्षितम्**) क्षयरहित (**रजः**) कारण के सहित लोकसमूह को (**पाजसा**) बल से धरता जो (**स्थातुः**) स्थिर वृक्ष में बैठे हुए (**पतत्रिणः**) पक्षी के समान (**भयते**) भय करता है, सो तुम्हारा आत्मस्वरूप है, इस प्रकार तुम लोग जानो॥५॥

भावार्थः-मनुष्यों को योग्य है कि जो अन्तःकरण अर्थात् मन, बुद्धि, चित्त और अहङ्कार, प्राण अर्थात् प्राणादि दशवायु इन्द्रिय अर्थात् श्रोत्रादि दश इन्द्रियों का प्रेरक, इन का धारक और नियन्ता,

स्वामी, इच्छा, द्वेष, प्रयत्न, सुख, दु:ख और ज्ञान आदि गुण वाला है, वह इस देह में जीव है, ऐसा निश्चित जानो॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने॥६॥

दधुः। त्वा। भृगवः। मानुषेषु। आ। रयिम्। न। चारुम्। सुऽहवम्। जनेभ्यः। होतारम्। अग्ने। अतिथिम्। वरेण्यम्। मित्रम्। न। शेवम्। दिव्याय। जन्मने॥६॥

पदार्थः-(**दधुः**) धरन्तु (**त्वा**) त्वाम् (**भृगवः**) परिपक्वविज्ञाना मेधाविनो विद्वांसः (**मानुषेषु**) मानवेषु (**आ**) समन्तात् (**रयिम्**) धनम् (**न**) इव (**चारुम्**) सुन्दरम् (**सुहवम्**) सुखेन होतुं योग्यम् (**जनेभ्यः**) मनुष्यादिभ्यः (**होतारम्**) दातारम् (**अग्ने**) पावकवद्वर्त्तमान (**अतिथिम्**) न विद्यते नियता तिथिर्यस्य तम् (**वरेण्यम्**) वरीतुमर्हं श्रेष्ठम् (**मित्रम्**) सखायम् (**न**) इव (**शेवम्**) सुखस्वरूपम्। **शेवमिति सुखनामसु पठितम्।** (निघं०३.६) (**दिव्याय**) दिव्यभोगान्विताय (**जन्मने**) प्रादुर्भावाय॥६॥

अन्वयः-हे अग्ने स्वप्रकाशस्वरूप! त्वं यं त्वा भृगवो मानुषेषु जनेभ्यश्चारुं सुहवं रयिं न धनमिव होतारमतिथिं वरेण्यं शेवं लब्ध्वा दिव्याय जन्मने मित्रं न सखायमिव त्वाऽऽदधुस्तमेव जीवं विजानीहि॥६॥

भावार्थः-यथा मनुष्या विद्याश्रियौ मित्रांश्च प्राप्य सुखमेधन्ते, तथैव जीवस्वरूपस्य वेदितारोऽत्यन्तानि सुखानि प्राप्नुवन्ति॥६॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश स्वप्रकाश स्वरूप जीव! तू जिस (**त्वा**) तुझको (**भृगवः**) परिपक्व ज्ञान वाले विद्वान् (**मानुषेषु**) मनुष्यों में (**जनेभ्यः**) विद्वानों से विद्या को प्राप्त होके (**चारुम्**) सुन्दरस्वरूप (**सुहवम्**) सुखों के देनेहारे (**रयिम्**) धन के (**न**) समान (**होतारम्**) दानशील (**अतिथिम्**) अनियत स्थिति अर्थात् अतिथि के सदृश देह-देहान्तर और स्थान-स्थानान्तर में जानेहारा (**वरेण्यम्**) ग्रहण करने योग्य (**शेवम्**) सुखरूप जीव को प्राप्त होके (**दिव्याय**) शुद्ध (**जन्मने**) जन्म के लिये (**मित्रन्न**) मित्र के सदृश तुझ को (**आदधुः**) सब प्रकार धारण करते हैं, उसी को जीव जान॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य विद्या वा लक्ष्मी तथा मित्रों को प्राप्त होकर सुखों को प्राप्त होते हैं, वैसे ही जीव के स्वरूप को जानने वाले विद्वान् लोग अत्यन्त सुखों को प्राप्त होते हैं॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम्॥७॥

होतारम्। सप्त। जुह्वः। यजिष्ठम्। यम्। वाघतः। वृणते। अध्वरेषु। अग्निम्। विश्वेषाम्। अरतिम्। वसूनाम्। सपर्यामि। प्रयसा। यामि। रत्नम्॥७॥

पदार्थः-(**होतारम्**) सुखदातारम् (**सप्त**) एतत्संख्याकाः (**जुह्वः**) याभिर्जुह्वत्युपदिशन्ति परस्परं ताः (**यजिष्ठम्**) अतिशयेन यष्टारम् (**यम्**) शिल्पकार्योपयोगिनम् (**वाघतः**) मेधाविनः। **वाघत इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**वृणते**) सम्भजन्ते (**अध्वरेषु**) अनुष्ठातव्येषु कर्ममयेषु यज्ञेषु (**अग्निम्**) पावकम् (**विश्वेषाम्**) सर्वेषाम् (**अरतिम्**) प्रापकम् (**वसूनाम्**) पृथिव्यादीनाम् (**सपर्यामि**) परिचरामि (**प्रयसा**) प्रयत्नेन (**यामि**) प्राप्नोमि (**रत्नम्**) रमणीयस्वरूपम्॥७॥

अन्वयः-हे मनुष्या! यस्य सप्त जुह्वस्तं होतारं यजिष्ठं विश्वेषां वसूनामरतिं यं वाघतः प्रयसाऽग्निमिवाध्वरेषु वृणते सम्भजन्ते, तं रत्नमहं यामि सपर्यामि च॥७॥

भावार्थः-ये मनुष्याः स्वात्मानं विदित्वा परंब्रह्म विजानन्ति त एव मोक्षमधिगच्छन्ति॥७॥

पदार्थः-हे मनुष्यो! जिस के (**सप्त**) सात (**जुह्वः**) सुख की इच्छा के साधन हैं, उस (**होतारम्**) सुखों के दाता (**यजिष्ठम्**) अतिशय सङ्गति में निपुण (**विश्वेषाम्**) सब (**वसूनाम्**) पृथिव्यादि लोकों को (**अरतिम्**) प्राप्त होनेहारा (**यम्**) जिस को (**वाघतः**) बुद्धिमान् लोग (**प्रयसा**) प्रीति से (**अध्वरेषु**) अहिंसनीय गुणों में (**अग्निम्**) अग्नि के सदृश (**वृणते**) स्वीकार करते हैं, उस (**रत्नम्**) रमणीयानन्द स्वरूप वाले जीव को मैं (**यामि**) प्राप्त होता और (**सपर्यामि**) सेवा करता हूं॥७॥

भावार्थः-जो मनुष्य अपने आत्मा को जान के परब्रह्म को जानते हैं, वे ही मोक्ष पाते हैं॥७॥

अथात्मविदो योगिनः कीदृशः स्युरित्युपदिश्यते॥

अब आत्मज्ञ योगीजन कैसे हों, यह विषय अगले मन्त्र में कहा है॥

अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ।
अग्ने गृणन्तमंहस उरुष्योर्जो नपात् पूर्भिरायसीभिः॥८॥

अच्छिद्रा। सूनो इति। सहसः। नः। अद्य। स्तोतृऽभ्यः। मित्रऽमहः। शर्म। यच्छ। अग्ने। गृणन्तम्। अंहसः। उरुष्य। ऊर्जः। नपात्। पूःऽभिः। आयसीभिः॥८॥

पदार्थः-(**अच्छिद्रा**) अच्छिद्राणि छिद्ररहितानि (**सूनो**) यः सूयते सुनोति वा तत्सम्बुद्धौ (**सहसः**) विद्याविनयबलयुक्तस्य (**नः**) अस्मभ्यम् (**अद्य**) अस्मिन् दिने (**स्तोतृभ्यः**) विद्यया पदार्थगुणस्तावकेभ्यः (**मित्रमहः**) मित्राणां महः सत्कारस्य कारयितः (**शर्म**) शर्माणि सुखानि (**यच्छ**) प्रदेहि (**अग्ने**) अग्निमिव

प्रकाशक विद्वन् **(गृणन्तम्)** स्तुवन्तम् **(अंहसः)** दुःखात् **(उरुष्य)** पृथग्रक्ष। अयं कण्वादिगणे नामधातुर्गणनीयः। **(ऊर्जः)** पराक्रमात् **(नपात्)** न कदाचिदधः पतति **(पूर्भिः)** पूर्णाभिः पालनसमर्थाभिः क्रियायुक्ताभिरन्नमयादिभिः **(आयसीभिः)** अयसः सुवर्णनिर्मितान्याभूषणानीवेश्वरेण रचिताभिः॥८॥

अन्वयः-हे सहसः सूनो मित्रमहोऽग्ने विद्वँस्त्वमद्यात्मस्वरूपोपदेशेन नोंऽहसः पाह्यच्छिद्रा शर्म यच्छ स्तोतृभ्यो नो विद्याः प्रापय। हे विद्वँस्त्वमात्मानं गृणन्तं स्तुवन्तमायसीभिः पूर्भिरूर्ज उरुष्य दुःखात् पृथग्रक्ष॥८॥

भावार्थः-हे आत्मपरमात्मविदो योगिनो यूयमात्मपरमात्मन उपदेशेन सर्वान् नॄन् दुःखाद् दूरे कृत्वा सततं सुखिनः कुरुत॥८॥

पदार्थः-हे **(सहसः)** पूर्ण ब्रह्मचर्य्य से शरीर और विद्या से आत्मा के बलयुक्त जन का **(सूनो)** पुत्र **(मित्रमहः)** सबके मित्र और पूजनीय **(अग्नेः)** अग्निवत् प्रकाशमान विद्वन्! **(नपात्)** नीच कक्षा में न गिरने वाला तू **(अद्य)** आज अपने आत्मस्वरूप के उपदेश से **(नः)** हम को **(अंहसः)** पापाचरण से **(पाहि)** अलग रक्षा कर **(अच्छिद्रा)** छेद-भेद रहित **(शर्म)** सुखों को **(यच्छ)** प्राप्त कर **(स्तोतृभ्यः)** विद्वानों से विद्याओं की प्राप्ति हम को करा। हे विद्वन्! तू आत्मा की **(गृणन्तम्)** स्तुति के कर्त्ता को **(आयसीभिः)** सुवर्ण आदि आभूषणों की ईश्वर की रचनारूप **(पूर्भिः)** रक्षा करने में समर्थ अन्न आदि क्रियाओं के साथ **(ऊर्जः)** पराक्रम के बल से **(उरुष्य)** दुःख से पृथक् रख॥८॥

भावार्थः-हे आत्मा और परमात्मा को जानने वाले योगी लोगो! तुम आत्मा और परमात्मा के उपदेश से सब मनुष्यों को दुःख से दूर करके निरन्तर सुखी किया करो॥८॥

पुनः स सभेशः कीदृश इत्युपदिश्यते॥

फिर वह सभापति कैसा है, यह विषय अगले मन्त्र में कहा है॥

भवा॒ वरू॑थं गृण॒ते वि॑भावो॒ भवा॑ मघवन्म॒घव॑द्भ्यः॒ शर्म॑।
उ॒रु॒ष्याग्ने॒ अंह॑सो गृ॒णन्तं॑ प्रा॒तर्म॒क्षू धि॒याव॑सुर्जगम्यात्॥९॥२४॥

भव॑। वरू॑थम्। गृ॒ण॒ते। वि॒भा॒ऽवः॒। भव॑। म॒घ॒ऽव॒न्। म॒घव॑त्ऽभ्यः। शर्म॑। उ॒रु॒ष्य। अ॒ग्ने॒। अंह॑सः। गृ॒णन्त॑म्। प्रा॒तः। म॒क्षु। धि॒याऽव॑सुः। ज॒ग॒म्या॒त्॥९॥

पदार्थः-(**भव**) **(वरूथम्)** गृहम्। **वरूथमिति गृहनामसु पठितम्।** (निघं०३.४) **(गृणते)** गुणान् कीर्तयते **(विभावः)** विभावय **(भव)** अत्रोभयत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मघवन्)** परमधनवन् **(मघवद्भ्यः)** विद्यादिधनयुक्तेभ्यः **(शर्म)** सुखम् **(उरुष्य)** पाहि **(अग्ने)** विज्ञानादियुक्त **(अंहसः)** पापात् **(गृणन्तम्)** स्तुवन्तम् **(प्रातः)** दिनारम्भे **(मक्षु)** शीघ्रम्। अत्र **ऋचि तुनु०** (अष्टा०६.३.१३३) इति दीर्घः। **(धियावसुः)** धिया कर्मणा प्रज्ञया वा वासयितुं योग्यः **(जगम्यात्)** भृशं प्राप्नुयात्॥९॥

अन्वयः-हे मघवन्नग्ने विद्वँस्त्वं गृणते मघवद्भ्यश्च वरूथं विभावो विभावय शर्म च गृणन्तमंहसो मक्षूरुष्य पाहि त्वमप्यंहसः पृथग्भव यो धियावसुरेवं प्रातः प्रतिदिनं प्रजारक्षणं विधत्ते, स सुखानि जगम्याद् भृशं प्राप्नुयात्॥९॥

भावार्थः-मनुष्यैर्यो विद्वान् धर्मविनयाभ्यां सर्वाः प्रजाः प्रशास्य पालयेत्, स एव सभाद्यध्यक्षः स्वीकार्य्यः॥९॥

अस्मिन् सूक्तेऽग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्बोध्या॥

इत्यष्टपञ्चाशं ५८ सूक्तं चतुर्विंशो २४ वर्गश्च समाप्तः॥

पदार्थः-हे **(मघवन्)** उत्तम धन वाले **(अग्ने)** विज्ञान आदि गुणयुक्त सभाध्यक्ष विद्वन्! तू **(गृणते)** गुणों के कीर्त्तन करने वाले और **(मघवद्भ्यः)** विद्यादि धनयुक्त विद्वानों के लिये **(वरूथम्)** घर को और **(शर्म)** सुख को **(विभावः)** प्राप्त कीजिये तथा आप भी घर और सुख को **(भव)** प्राप्त हो **(गृणन्तम्)** स्तुति करते हुए मनुष्य को **(अंहसः)** पाप से **(मक्षु)** शीघ्र **(उरुष्य)** रक्षा कीजिये; आप भी पाप से अलग **(भव)** हूजिये, ऐसा जो **(धियावसुः)** प्रज्ञा वा कर्म से वास कराने योग्य **(प्रातः)** प्रतिदिन प्रजा की रक्षा करता है, वह सुखों को **(जगम्यात्)** अतिशय करके प्राप्त होवे॥९॥

भावार्थः-मनुष्यों को योग्य है कि जो विद्वान् धर्म वा विनय से सब प्रजा को शिक्षा देकर पालना करता है, उसी को सभा आदि का अध्यक्ष करें॥९॥

इस सूक्त में अग्नि वा विद्वानों के गुण वर्णन करने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठावनवां ५८सूक्त और चौबीसवां २४ वर्ग समाप्त हुआ॥

अथास्य सप्तर्चस्यैकोनषष्टितमस्य सूक्तस्य गौतमो नोधा ऋषिः। अग्निर्वैश्वानरो देवता। १ निचृत् त्रिष्टुप्। २,४, विराट्त्रिष्टुप्। ५-७ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्नीश्वरगुणा उपदिश्यन्ते॥

अब उनसठवें सूक्त का आरम्भ है, उस के प्रथम मन्त्र में अग्नि और ईश्वर के गुणों का उपदेश किया है॥

व॒या इदग्ने अ॒ग्नय॑स्ते अ॒न्ये त्वे विश्वे॑ अ॒मृता॒ मादयन्ते।
वैश्वा॑नर॒ नाभि॑रसि क्षिती॒नां स्थूणे॑व॒ जना॑ँ उप॒मिद्य॑यन्थ॥ १॥

व॒याः। इत्। अ॒ग्ने॒। अ॒ग्नयः॑। ते॒। अ॒न्ये। त्वे इति॑। विश्वे॑। अ॒मृताः॑। मा॒द॒य॒न्ते॒। वैश्वा॑नर। नाभिः॑। अ॒सि॒। क्षि॒ती॒नाम्। स्थूणा॑ऽइव। जना॑न्। उ॒प॒ऽऽमित्। य॒य॒न्थ॒॥ १॥

पदार्थः-(**वयाः**) शाखाः। **वयाः शाखा वेतेर्वातायना भवन्ति।** (निरु०१.४) (**इत्**) इव (**अग्ने**) सर्वाधारेश्वर (**अग्नयः**) सूर्यादय इव ज्ञानप्रकाशकाः (**ते**) तव (**अन्ये**) त्वत्तो भिन्नाः (**त्वे**) त्वयि (**विश्वे**) सर्वे (**अमृताः**) अविनाशिनो जीवाः (**मादयन्ते**) हर्षयन्ति (**वैश्वानर**) यो विश्वान् सर्वान् पदार्थान् नयति तत्सम्बुद्धौ (**नाभिः**) मध्यवर्त्तिः (**असि**) (**क्षितीनाम्**) मनुष्याणाम् (**स्थूणेव**) यथा धारकस्तम्भः (**जनान्**) मनुष्यादीन् (**उपमित्**) य उप समीपे मिनोति प्रक्षिपति सः (**ययन्थ**) यच्छति॥ १॥

अन्वयः-हे वैश्वानराऽग्ने जगदीश्वर! यस्य ते तव ये त्वत्तोऽभिन्ना विश्वेऽमृता अग्नय इव जीवास्त्वे त्वयि वया इन्मादयन्ते यस्त्वं क्षितीनान्नाभिरसि जनानुपमित् सन् स्थूणेव ययन्थ यच्छ सोऽस्माभिरुपासनीयः॥ १॥

भावार्थः-यथा वृक्षः शाखाः स्थूणाश्च गृहं धृत्वाऽऽनन्दयन्ति, तथैव परमेश्वरः सर्वान् धृत्वाऽऽनन्दयति॥ १॥

पदार्थः-हे (**वैश्वानर**) सम्पूर्ण विश्व को नियम में रखने हारे (**अग्ने**) जगदीश्वर! जिस (**ते**) आप के सकाश से जो (**अन्ये**) भिन्न (**विश्वे**) सब (**अमृताः**) अविनाशी (**अग्नयः**) सूर्य आदि ज्ञानप्रकाशक पदार्थों के तुल्य जीव (**त्वे**) आप में (**वयाः**) शाखा के (**इत्**) समान बढ़ के (**मादयन्ते**) आनन्दित होते हैं, जो आप (**क्षितीनाम्**) मनुष्यादिकों के (**नाभिः**) मध्यवर्त्ति (**असि**) हो (**जनान्**) मनुष्यादिकों को (**उपमित्**) धर्मविद्या में स्थापित करते हुए (**स्थूणेव**) धारण करने वाले खंभे के समान (**ययन्थ**) सबको नियम में रखते हो, वही आप हमारे उपास्य देवता हो॥ १॥

भावार्थः-जैसे वृक्ष अपनी शाखा और खंभे गृहों को धारण करके आनन्दित करते हैं, वैसे ही परमेश्वर सबको धारण करके आनन्द देता है॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय॥ २॥

मूर्धा। दिवः। नाभिः। अग्निः। पृथिव्याः। अथ। अभवत्। अरतिः। रोदस्योः। तम्। त्वा। देवासः। अजनयन्त। देवम्। वैश्वानर। ज्योतिः। इत्। आर्याय॥ २॥

पदार्थः-(**मूर्द्धा**) उत्कृष्टः (**दिवः**) सूर्य्यादिप्रकाशात् (**नाभिः**) मध्यवर्त्तिः (**अग्निः**) नियन्त्री विद्युदिव (**पृथिव्याः**) विस्तृताया भूमेः (**अथ**) अनन्तरे (**अभवत्**) भवति (**अरतिः**) स्वव्याप्त्या धर्त्ता (**रोदस्योः**) प्रकाशाऽप्रकाशयोर्भूमिसूर्ययोः (**तम्**) उक्तार्थम् (**त्वा**) त्वाम् (**देवासः**) विद्वांसः (**अजनयन्त**) प्रकटयन्ति (**देवम्**) द्योतकम् (**वैश्वानर**) सर्वप्रकाशक (**ज्योतिः**) ज्ञानप्रकाशम् (**इत्**) एव (**आर्याय**) उत्तमगुणस्वभावाय॥ २॥

अन्वयः-ये वैश्वानर यो भवानग्निरिव दिवः पृथिव्या मूर्द्धा नाभिश्चाभवदथ रोदस्योररतिरभवदार्यायेज्ज्योतिरिदेव यं देवं देवासोऽजनयन्त तन्त्वा वयमुपासीमहि॥ २॥

भावार्थः-यो जगदीश्वर आर्य्याणां विज्ञानाय सर्वविद्याप्रकाशकान् वेदान् प्रकाशितवान् यः सर्वतः उत्कृष्टः सर्वाधारो जगदीश्वरोस्ति, तं विदित्वा स एव मनुष्यैः सर्वदोपासनीयः॥ २॥

पदार्थः-हे (**वैश्वानर**) सब संसार के नायक! जो आप (**अग्निः**) बिजुली के समान (**दिवः**) प्रकाश वा (**पृथिव्याः**) भूमि के मध्य समान (**मूर्द्धा**) उत्कृष्ट और (**नाभिः**) मध्यवर्त्तिव्यापक (**अभवत्**) होते हो (**अथ**) इन सब लोकों की रचना के अनन्तर जो (**रोदस्योः**) प्रकाश और अप्रकाश रूप सूर्यादि और भूमि आदि लोकों के (**अरतिः**) आप व्यापक होके अध्यक्ष (**अभवत्**) होते हो जो (**आर्याय**) उत्तम गुण, कर्म, स्वभाव वाले मनुष्य के लिये (**ज्योतिः**) ज्ञानप्रकाश वा मूर्त्त द्रव्यों के प्रकाश को (**इत्**) ही करते हैं, जिस (**देवम्**) प्रकाशमान (**त्वा**) आपको (**देवासः**) विद्वान् लोग (**अजनयन्त**) प्रकाशित करते हैं वा जिस बिजुलीरूप अग्नि को विद्वान् लोग (**अजनयन्त**) प्रकट करते हैं (**तम्**) उस आप ही की उपासना हम लोग करें॥ २॥

भावार्थः-जिस जगदीश्वर ने आर्य अर्थात् उत्तम मनुष्यों के विज्ञान के लिये सब विद्याओं के प्रकाश करने वाले वेदों को प्रकाशित किया है तथा जो सब से उत्तम सब का आधार जगदीश्वर है, उस को जानकर मनुष्यों को उसी की उपासना करनी चाहिये॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि।

या पर्व॑तेष्वोष॑धीष्व॒प्सु या मानु॑षेष्वसि॒ तस्य॒ राजा॑॥ ३॥

आ। सूर्ये॑। न। र॒श्मय॑:। ध्रु॒वास॑:। वै॒श्वा॒न॒रे। द॒धि॒रे॒। अ॒ग्ना। वसू॑नि। या। पर्व॑तेषु। ओष॑धीषु। अ॒प्ऽसु। या। मानु॑षेषु। असि॑। तस्य॑। राजा॑॥ ३॥

पदार्थः-(**आ**) समन्तात् (**सूर्ये**) सवितृमण्डले (**न**) इव (**रश्मयः**) किरणा (**ध्रुवासः**) निश्चलाः (**वैश्वानरे**) जगदीश्वरे (**दधिरे**) धरन्ति (**अग्ना**) विद्युदिव वर्त्तमाने। अत्र **सुपां सुलुग्०** इति डादेशः। (**वसूनि**) सर्वाणि द्रव्याणि (**या**) यानि (**पर्वतेषु**) शैलेषु (**ओषधीषु**) यवादिषु (**अप्सु**) जलेषु (**या**) यानि (**मानुषेषु**) मानवेषु (**असि**) (**तस्य**) द्रव्यसमूहस्य जगतः (**राजा**) प्रकाशकः॥ ३॥

अन्वयः-हे जगदीश्वर! यस्यास्य जगतस्त्वं राजाऽसि तस्य मध्ये या पर्वतेषु यौषधीषु याऽप्सु यानि मानुषेषु वसूनि वर्त्तन्ते, तानि सर्वाणि सूर्ये रश्मयो नेव वैश्वानरेऽग्ना त्वयि सति ध्रुवासः प्रजाः सर्वे देवास आदधिरे धरन्ति॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। अत्र पूर्वस्मान्मन्त्राद्देवास इति पदमनुवर्त्तते। मनुष्यैर्यथा प्रकाशमाने सूर्ये विद्यमाने सति कार्याणि निर्वर्त्तन्ते तथैवोपासिते जगदीश्वरे सर्वाणि कार्याणि सिध्यन्ति। एव कुर्वन्नृणां नैव कदाचित् सुखधननाशो दुःखदारिद्र्ये चोपजायेते॥ ३॥

पदार्थः-हे जगदीश्वर! जिस इस द्रव्यसमूह जगत् के आप (**राजा**) प्रकाशक (**असि**) हैं (**तस्य**) उस के मध्य में (**या**) जो (**पर्वतेषु**) पर्वतों में (**या**) जो (**ओषधीषु**) ओषधियों में जो (**अप्सु**) जलों में और (**मानुषेषु**) जो मनुष्यों में वसूनि द्रव्य हैं, उन सबको (**सूर्ये**) सवितृलोक में (**रश्मयः**) किरणों के (**न**) समान (**अग्ना**) (**वैश्वानरे**) आप में (**ध्रुवासः**) निश्चल प्रजाओं को विद्वान् लोग (**आ दधिरे**) धारण कराते हैं॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। तथा पूर्व मन्त्र से (**देवासः**) इस पद की अनुवृत्ति आती है। मनुष्यों को योग्य है कि जैसे प्राणी लोग प्रकाशमान सूर्य के विद्यमान होने में सब कार्यों को सिद्ध करते हैं, वैसे मनुष्यों को उपासना किये हुए जगदीश्वर में सब कार्यों को सिद्ध करना चाहिये। इसी प्रकार करते हुए मनुष्यों को कभी सुख और धन का नाश होकर दुःख वा दरिद्रता उत्पन्न नहीं होते॥ ३॥

अथ नरोत्तमगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में पुरुषोत्तम के गुणों का उपदेश किया है॥

बृ॒हती॑इव॒ सून॑वे॒ रोद॑सी॒ गिरो॒ होता॑ मनु॒ष्यो॒३॑ न दक्ष॑:।
स्व॑र्वते स॒त्यशु॑ष्माय॒ पूर्वी॑र्वैश्वान॒राय॒ नृत॑माय य॒ह्वी:॥ ४॥

बृ॒हती इ॒वेति॑ बृ॒हती॑इ॒व। सून॑वे। रोद॑सी॒ इति॑। गिर॑:। होता॑। म॒नु॒ष्य॑:। न। दक्ष॑:। स्व॑:ऽवते। स॒त्यऽशु॑ष्माय। पूर्वी॑:। वै॒श्वा॒न॒राय॑। नृऽत॑माय। य॒ह्वी:॥ ४॥

पदार्थः-(**बृहतीइव**) यथा महागुणयुक्ता पूज्या माता (**सूनवे**) पुत्राय (**रोदसी**) द्यावापृथिव्यौ (**गिरः**) वाणीः (**होता**) दाता ग्रहीता (**मनुष्यः**) मानवः (**न**) इव (**दक्षः**) चतुरः (**स्वर्वते**) प्रशस्तं स्वः सुखं वर्त्तते यस्मिँस्तस्मै (**सत्यशुष्माय**) सत्यं शुष्मं यस्य तस्मै (**पूर्वीः**) पुरातनीः (**वैश्वानराय**) परब्रह्मोपासकाय (**नृतमाय**) अतिशयेन ना तस्मै (**यह्वीः**) महतीः। **यह्व इति महन्नामसु पठितम्।** (निघं०३.३) अस्माद् **बह्वादिभ्य**श्चान्तर्गत्वात् ङीष् (अष्टा०४.१.४५)॥४॥

अन्वयः-यथा सूनवे बृहती इव रोदसी दक्षो मनुष्यः पिता न विद्वान् पुरुष इव होतेश्वरे सभाध्यक्षे वा प्रीतो भवति यथा विद्वांसोऽस्मै स्वर्वते सत्यशुष्माय नृतमाय वैश्वानराय पूर्वीर्यह्वीर्गिरो वेदवाणीर्दधिरे तथैव तस्मिन् सर्वैर्मनुष्यैर्वर्त्तिव्यम्॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा भूमिसूर्यप्रकाशौ धृत्वा सुखयतो यथा पिताऽध्यापको वा पुत्रशिष्ययोर्हिताय प्रवर्त्तते, यथेश्वरः प्रजासुखाय प्रवर्तते, तथैव सभाध्यक्षः प्रयतेतेति सर्वा वेदवाण्यः प्रतिपादयन्ति॥४॥

पदार्थः-जैसे (**सूनवे**) पुत्र के लिये (**बृहतीइव**) महागुणयुक्त माता वर्त्तती है, जैसे (**रोदसी**) प्रकाश भूमि और (**दक्षः**) चतुर (**मनुष्यः**) पढ़ानेहारे विद्वान् मनुष्य पिता के (**न**) समान (**होता**) देने-लेने वाला विद्वान् ईश्वर वा सभापति विद्वान् में प्रसन्न होता है, जैसे विद्वान् लोग इस (**स्वर्वते**) प्रशंसनीय सुख वर्त्तमान (**सत्यशुष्माय**) सत्यबलयुक्त (**नृतमाय**) पुरुषों में उत्तम (**वैश्वानराय**) परमेश्वर के लिये (**पूर्वीः**) सनातन (**यह्वीः**) महागुण लक्षणयुक्त (**गिरः**) वेदवाणियों को (**दधिरे**) धारण करते हैं, वैसे ही परमेश्वर के उपासक सभाध्यक्ष में सब मनुष्यों को वर्त्तना चाहिये॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे भूमि वा सूर्यप्रकाश सबको धारण करके सुखी करते हैं, जैसे पिता वा अध्यापक पुत्र के हित के लिये प्रवृत्त होता है, जैसे परमेश्वर प्रजासुख के वास्ते वर्तता है, वैसे सभापति प्रजा के अर्थ वर्ते, इस प्रकार सब देववाणियां प्रतिपादन करती हैं॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वम्।
राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ॥५॥

दिवः। चित्। ते। बृहतः। जातऽवेदः। वैश्वानर। प्र। रिरिचे। महिऽत्वम्। राजा। कृष्टीनाम्। असि। मानुषीणाम्। युधा। देवेभ्यः। वरिवः। चकर्थ॥५॥

पदार्थः-(**दिवः**) विज्ञानप्रकाशात् (**चित्**) अपि (**ते**) तव (**बृहतः**) महतः (**जातवेदः**) जाता वेदा यस्माज्जगदीश्वराज्जातान् वेदान् वेत्ति जातान् सर्वान् पदार्थान् विदन्ति जातेषु पदार्थेषु विद्यते वा तत्सम्बुद्धौ (**वैश्वानर**) सर्वनेतः (**प्र**) प्रकृष्टार्थे (**रिरिचे**) रिणक्ति। (**महित्वम्**) महागुणस्वभावम् (**राजा**) प्रकाशमानोऽधीशः (**कृष्टीनाम्**) मनुष्याणाम् (**असि**) (**मानुषीणाम्**) मनुष्यसम्बन्धिनीनां प्रजानाम् (**युधा**) युध्यन्ते यस्मिन् संग्रामे तेन। अत्र **कृतो बहुलम्** इत्यधिकरणे क्विप्। (**देवेभ्यः**) विद्वद्भ्यः (**वरिवः**) परिचरणम् (**चकर्थ**) करोषि॥५॥

अन्वयः-हे जातवेदो वैश्वानर जगदीश्वर! यस्य ते तव महित्वं बृहतो दिवश्चित् सूर्यादेर्महतः प्रकाशादपि प्ररिरिचे प्रकृष्टतयाऽधिकमस्ति यस्त्वं कृष्टीनां मानुषीणां प्रजानां राजासि यस्त्वं देवेभ्यो युधा वरिवश्चकर्थ स भवानस्माकं न्यायाधीशोऽस्त्विति॥५॥

भावार्थः-अत्र श्लेषालङ्कारः। सभासद्भिर्मनुष्यैः परमेश्वरोऽनन्तसामर्थ्यवत्त्वात् सर्वाधीशत्वेनोपासनीयः। सभाद्यध्यक्षो महाशुभगुणान्वितत्वात् सर्वाधिपतित्वेन समाश्रित्य युद्धेन दुष्टान् विजित्य धार्मिकान् प्रसाद्य प्रजापालनं विधाय विदुषां सेवासङ्गौ सदैव कर्त्तव्यौ॥५॥

पदार्थः-हे (**जातवेदः**) जिससे वेद उत्पन्न हुए वेदों को जानने वा उन को प्राप्त कराने तथा उत्पन्न हुए पदार्थों में विद्यमान (**वैश्वानर**) सबको प्राप्त होने वाले (**प्रजापते**) जगदीश्वर! जिस (**ते**) आप का (**महित्वम्**) महागुणयुक्त प्रभाव (**बृहतः**) बड़े (**दिवः**) सूर्य्यादि प्रकाश से (**चित्**) भी (**प्ररिरिचे**) अधिक है जो आप (**कृष्टीनाम्**) मनुष्यादि (**मानुषीणाम्**) मनुष्य सम्बन्धी प्रजाओं के (**राजा**) प्रकाशमानाधीश (**असि**) हो और जो आप (**देवेभ्यः**) विद्वानों के लिये (**युधा**) संग्राम से (**वरिवः**) सेवा को (**चकर्थ**) प्राप्त कराते हो, सो आप ही हम लोगों के न्यायाधीश हूजिये॥५॥

भावार्थः-इस मन्त्र में श्लेष अलङ्कार है। सभा में रहने वाले मनुष्यों को अनन्त सामर्थ्यवान् होने से, परमेश्वर की सबके अधिष्ठाता होने से उपासना वा महाशुभगुण युक्त होने से, सभा आदि के अध्यक्ष के अधीश का सेवन और युद्ध से दुष्टों को जीत के प्रजा का पालन करके विद्वानों की सेवा तथा सत्सङ्ग को सदा करना चाहिये॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र नू म॑हि॒त्वं वृ॑ष॒भस्य॑ वोचं॒ यं पू॒रवो॑ वृत्र॒हणं॒ सच॑न्ते।
वै॒श्वा॒न॒रो दस्यु॑म॒ग्निर्ज॑घ॒न्वाँ अधू॑नोत्काष्ठा॒ अव॒ शम्ब॑रं भेत्॥ ६॥

प्र। नु। म॒हि॒ऽत्वम्। वृ॒ष॒भस्य॑। वो॒च॒म्। यम्। पू॒रव॑ः। वृ॒त्र॒ऽहन॑म्। सच॑न्ते। वै॒श्वा॒न॒रः। दस्यु॑म्। अ॒ग्निः। ज॒घ॒न्वान्। अधू॑नोत्। काष्ठाः॑। अव॑। शम्ब॑रम्। भे॒त्॥ ६॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**नु**) शीघ्रम् (**महित्वम्**) महत्त्वम् (**वृषभस्य**) सर्वोत्कृष्टस्य (**वोचम्**) कथयेयम् (**यम्**) वक्ष्यमाणम् (**पूरवः**) मनुष्याः। **पूरव इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**वृत्रहणम्**) यो वृत्रं मेघं शत्रुं वा हन्ति तम् (**सचन्ते**) समवयन्ति (**वैश्वानरः**) सर्वनियन्ता (**दस्युम्**) दुष्टस्वभावयुक्तम् (**अग्निः**) स्वयंप्रकाशः (**जघन्वान्**) हतवान् (**अधूनोत्**) कम्पयति (**काष्ठाः**) दिशस्तत्रस्थाः प्रजाः (**अव**) विनिग्रहे (**शम्बरम्**) मेघम्। **शम्बरमिति मेघनामसु पठितम्।** (निघं०१.१०) (**भेत्**) भिन्द्यात्॥६॥

अन्वयः-यं परमेश्वरं पूरवः सचन्तेऽग्निर्वृत्रहणं सवितारमिव सर्वान् पदार्थान् दर्शयति यथा वैश्वानरो दस्युं शम्बरं जघन्वानधूनोदवभेत् यस्य मध्ये काष्ठाः सन्ति, तस्य वृषभस्य महित्वमहं नु प्रवोचं तथा सर्वे विद्वांसः कुर्युः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्यायं सर्वः संसारो महिमास्ति स एवानन्तशक्तिमान् परमेश्वरः सर्वैरुपास्यो मन्तव्यः॥६॥

पदार्थः-(**तम्**) जिस परमेश्वर को (**पूरवः**) विद्वान् लोग अपने आत्मा के साथ (**सचन्ते**) युक्त करते हैं, जैसे (**अग्निः**) सर्वत्र व्यापक विद्युत् (**वृत्रहणम्**) मेघ के नाशकर्त्ता सूर्य को दिखलाती है, जैसे (**वैश्वानरः**) सम्पूर्ण प्रजा को नियम में रखने वाला सूर्य्य (**दस्युम्**) डाकू के तुल्य (**शम्बरम्**) मेघ को (**जघन्वान्**) हनन (**अधूनोत्**) कँपाता (**अवभेत्**) विदीर्ण करता है, जिस के बीच में (**काष्ठाः**) दिशा भी व्याप्य है, उस (**वृषभस्य**) सब से उत्तम सूर्य के (**महित्वम्**) महिमा को मैं (**नु**) शीघ्र (**प्रवोचम्**) प्रकाशित करूं, वैसे सब विद्वान् लोग किया करें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस की महिमा को सब संसार प्रकाशित करता है, वही अनन्त शक्तिमान् परमेश्वर सबको उपासना के योग्य है॥६॥

पुनरीश्वरगुणा उपदिश्यन्ते॥

फिर अगले मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान्॥७॥ २५॥

वैश्वानरः। महिम्ना। विश्वऽकृष्टिः। भरत्ऽवाजेषु। यजतः। विभाऽवा। शातऽवनेये। शतिनीभिः। अग्निः। पुरुऽनीथे। जरते। सूनृताऽवान्॥७॥

पदार्थः-(**वैश्वानरः**) सर्वनेता (**महिम्ना**) स्वप्रभावेण (**विश्वकृष्टिः**) विश्वाः सर्वाः कृष्टीर्मनुष्यादिकाः प्रजाः (**भरद्वाजेषु**) ये भरन्ति ते भरतः। वज्यन्ते ज्ञायन्ते यैस्ते वाजा भरतश्च ते वाजाश्च तेषु पृथिव्यादिषु। **भरणाद्भारद्वाजः।** (निरु०३.१७) (**यजतः**) यष्टुं सङ्गन्तुमर्हः (**विभावा**) यो

विशेषेण भाति प्रकाशयति सः **(शातवनेये)** शतान्यसंख्यातानि वनयः सम्भक्तयो येषान्ते शतवनयस्तैर्निर्वृत्ते जगति **(शतिनीभिः)** शतसंख्याताः प्रशस्ता गतयो यासु क्रियासु ताभिः सह वर्त्तमानः **(अग्निः)** सूर्य्य इव स्वप्रकाशः **(पुरुणीथे)** यत्पुरुभिर्बहुभिः प्राणिभिः पदार्थैर्वा नीयते तस्मिन् **(जरते)** सत्करोति। **जरत इत्यर्चतिकर्मसु पठितम्।** (निघं०३.१४) **(सूनृतावान्)** सूनृता अन्नादीनि प्रशस्तानि विद्यन्ते यस्मिन् सः॥७॥

अन्वयः-यो विश्वकृष्टीरुत्पादितवान् यजतो विभावा सूनृतावान् वैश्वानरोऽग्निः सर्वद्योतकः परमात्मा स्वमहिम्ना भरद्वाजेषु शतिनीभिः सह वर्त्तमानः सन् पुरुनीथे शातवनेये वर्तते तं यो जरतेऽर्चति स सत्कारं प्राप्नोति॥७॥

भावार्थः-यो संख्यातेषु पदार्थेष्वसंख्यातक्रियाहेतुर्विद्युदिवेश्वरो वर्तते, स एव सर्वं जगद्धरति यो मनुष्यस्तद्विद्यां जानाति स सततं महीयते॥७॥

अत्र वैश्वानरशब्दार्थवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति पञ्चविंशो २५ वर्गः एकोनषष्टितमं ५९ सूक्तं च समाप्तम्॥

पदार्थः-जो **(विश्वकृष्टीः)** सबको उत्पन्न कर्त्ता **(यजतः)** पूजन के योग्य **(विभावा)** विशेष करके प्रकाशमान **(सूनृतावान्)** प्रशंसनीय अन्नादि का आधार **(वैश्वानरः)** सबको प्राप्त कराने वाला **(अग्निः)** सूर्य्य के समान जगदीश्वर अपने जगत्रूप **(महिम्ना)** महिमा के साथ **(भरद्वाजेषु)** धारण करने वा जानने योग्य पृथिवी आदि पदार्थों में **(शतिनीभिः)** असंख्यात गतियुक्त क्रियाओं से सहित **(पुरुणीथे)** बहुत प्राणियों में प्राप्त **(शातवनेये)** असंख्यात विभागयुक्त क्रियाओं से सिद्ध हुए संसार में वर्त्तता है, उसका जो मनुष्य **(जरते)** अर्चन पूजन करता है, वह निरन्तर सत्कार को प्राप्त होता है॥७॥

भावार्थः-जो असख्यात पदार्थों में असंख्यात क्रियाओं का हेतु बिजुलीरूप अग्नि के समान ईश्वर है, वही सब जगत् को धारण करता है, उसका पूजन जो मनुष्य करता है, वह सदा महिमा को प्राप्त होता है॥

इस सूक्त में वैश्वानर शब्दार्थ वर्णन से इसके अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह पच्चीसवां २५ वर्ग और उनसठवां ५९ सूक्त समाप्त हुआ॥४९॥

अथास्य पञ्चर्चस्य षष्टितमस्य सूक्तस्य गौतमो नोधा ऋषिः। अग्निर्देवता। १ विराट् त्रिष्टुप्।
३,५ त्रिष्टुप् च छन्दः। धैवतः स्वरः। २,४ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः स परेशः कीदृश इत्युपदिश्यते॥

फिर वह ईश्वर कैसा है यह विषय अगले मन्त्र में कहा है॥

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम्।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा॥ १॥

वह्निम्। यशसम्। विदथस्य। केतुम्। सुप्रऽअव्यम्। दूतम्। सद्यःऽअर्थम्। द्विऽजन्मानम्। रयिम्ऽइव। प्रऽशस्तम्। रातिम्। भरत्। भृगवे। मातरिश्वा॥ १॥

पदार्थः-(**वह्निम्**) पदार्थानां वोढारम् (**यशसम्**) कीर्त्तिकरम् (**विदथस्य**) विज्ञातव्यजगतोऽस्य मध्ये (**केतुम्**) ध्वजवद्वर्त्तमानम् (**सुप्राव्यम्**) सुष्ठु प्रावितं चालितुमर्हम् (**दूतम्**) देशान्तरप्रापकम् (**सद्योअर्थम्**) शीघ्रगामिपृथिव्यादि द्रव्यम् (**द्विजन्मानम्**) द्वाभ्यां वायुकारणाभ्यां जन्म यस्य तम् (**रयिमिव**) यथोत्तमां श्रियम् (**प्रशस्तम्**) श्रेष्ठतमम् (**रातिम्**) दातारम् (**भरत्**) धरति (**भृगवे**) भर्ज्जनाय परिपाचनाय (**मातरिश्वा**) आकाशे शयिता वायुः॥ १॥

अन्वयः-हे मनुष्या! यथा मातरिश्वा भृगवे विदथस्य केतुं यशसं सुप्राव्यं दूतं रातिं प्रशस्तं द्विजन्मानं वह्निं रयिमिव सद्योअर्थं भरद्धरति तथा यूयमप्याचरत॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा वायुः पावकादिवस्तु धृत्वा सर्वाञ्चराऽचराँल्लोकान् धरति तथा राजपुरुषैर्विद्या धर्मधारणपुरःसरं प्रजा न्याये धर्त्तव्याः॥ १॥

पदार्थः-हे मनुष्यो! (**मातरिश्वा**) अन्तरिक्ष में शयन करता वायु (**भृगवे**) भूजने वा पकाने के लिये (**विदथस्य**) युद्ध के (**केतुम्**) ध्वजा के समान (**यशसम्**) कीर्त्तिकारक (**सुप्राव्यम्**) उत्तमता से चलाने के योग्य (**दूतम्**) देशान्तर को प्राप्त करने (**रातिम्**) दान का निमित्त (**प्रशस्तम्**) अत्यन्त श्रेष्ठ (**द्विजन्मानम्**) वायु वा कारण से जन्मसहित (**वह्निम्**) सबको वहनेहारे अग्नि को (**रयिमिव**) उत्तम लक्ष्मी के समान (**सद्योअर्थम्**) शीघ्रगामी पृथिव्यादि द्रव्य को (**भरत्**) धरता है, वैसे तुम भी काम किया करो॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे वायु बिजुली आदि वस्तु का धारण करके सब चराऽचर लोकों का धारण करता है, वैसे राजपुरुष विद्याधर्म धारणपूर्वक प्रजाओं को न्याय में रक्खें॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः।

दि॒वश्चि॒त्पूर्वो॑ न्य॑सादि॒ होता॒ऽऽपृच्छ्यो॑ वि॒श्पति॑र्वि॒क्षु वे॒धाः॥ २॥

अ॒स्य। शासु॑ः। उ॒भया॑सः। स॒च॒न्ते॒। ह॒विष्म॑न्तः। उ॒शिज॑ः। ये। च॒। मर्ता॑ः। दि॒वः। चि॒त्। पूर्वः॑। नि। अ॒सा॒दि॒। होता॑। आ॒ऽपृच्छ्यः॑। वि॒श्पति॑ः। वि॒क्षु। वे॒धाः॥ २॥

पदार्थः-(**अस्य**) वक्ष्यमाणस्य (**शासुः**) न्यायेन प्रजायाः प्रशासितुः (**उभयासः**) राजप्रजाजनाः (**सचन्ते**) समवयन्ति (**हविष्मन्तः**) प्रशस्तसामग्रीमन्तः (**उशिजः**) कामयितारः (**ये**) धर्मविद्ये चिकीर्षवः (**च**) समुच्चये (**मर्त्ताः**) मनुष्याः (**दिवः**) प्रकाशादुत्पन्नः (**चित्**) अपि (**पूर्वः**) अर्वाग्वर्त्तमानः (**नि**) नितराम् (**असादि**) साद्यते (**होता**) ग्रहीता (**आपृच्छ्यः**) समन्तान्निश्चयार्थं प्रष्टुं योग्यः (**विश्पतिः**) प्रजायाः पालयिता (**विक्षु**) प्रजासु (**वेधाः**) विविधशास्त्रजन्यमेधायुक्तः। **विधाञो वेध च।** (उणा०४.२२५) अनेनासुन् प्रत्ययो वेधादेशश्च॥२॥

अन्वयः-ये हविष्मन्त उशिज उभयासा मर्त्ता यस्यास्य शासुर्विक्षु सचन्ते यो होताऽऽपृच्छ्यो वेधा विश्पतिर्दिवः पूर्वश्चिदिव धार्मिकै राज्याय न्यसादि नियोज्यते सर्वैः स च समाश्रयितव्यः॥२॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्विद्वद्भिर्धार्मिकैर्न्यायाधीशैः प्रशंस्यन्ते, येषां च विनयात् सर्वाः प्रजाः सन्तुष्यन्ते, ते सर्वैः पितृवत्सेवितव्याः॥२॥

पदार्थः-(**ये**) जो (**हविष्मन्तः**) उत्तम सामग्रीयुक्त (**उशिजः**) शुभ गुण कर्मों की कामना करनेहारे (**उभयासः**) राजा और प्रजा के (**मर्त्ताः**) मनुष्य जिस (**अस्य**) इस (**शासुः**) सत्यन्याय के शासन करने वाले (**विक्षु**) प्रजाओं में (**सचन्ते**) संयुक्त होते हैं जो (**होता**) शुभ कर्मों का ग्रहण करनेहारा (**आपृच्छ्यः**) सब प्रकार के प्रश्नों के पूछने योग्य (**वेधाः**) विविध विद्या का धारण करने वाला (**विश्पतिः**) प्रजाओं का स्वामी (**दिवः**) प्रकाश के (**पूर्वः**) पूर्व स्थित सूर्य के (**चित्**) समान धार्मिक जनों ने जो राज्यपालन के लिये नियुक्त किया हो (**च**) वही सब मनुष्यों को आश्रय करने के योग्य है॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को योग्य है कि जो विद्वान् धर्मात्मा और न्यायधीशों से प्रशंसा को प्राप्त हों, जिनके शील से सब प्रजा सन्तुष्ट हो, उनकी सेवा पिता के समान सब लोग करें॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

तं नव्य॑सी हृ॒द आ जाय॑मानम॒स्मत्सु॑की॒र्तिर्मधु॑जिह्वमश्याः।

यमृ॒त्विजो॑ वृ॒जने॒ मानु॑षासः॒ प्रय॑स्वन्त आ॒यवो॒ जीज॑नन्त॥ ३॥

तम्। नव्यसी। हृदः। आ। जायमानम्। अस्मत्। सुऽकीर्तिः। मधुऽजिह्वम्। अश्याः। यम्। ऋत्विजः। वृजने। मानुषासः। प्रयस्वन्तः। आयवः। जीजनन्त॥ ३॥

पदार्थः-(**तम्**) विनयादिशुभगुणाढ्यम् (**नव्यसी**) नवतरा प्रजा (**हृदः**) सुहृदः (**आ**) समन्तात् (**जायमानम्**) उत्पद्यमानम् (**अस्मत्**) अस्माकं सकाशात् प्राप्तया शिक्षया (**सुकीर्त्तिः**) अतिप्रशंसनीयः (**मधुजिह्वम्**) मधुरजिह्वम् (**अश्याः**) भोगं कुर्याः (**यम्**) उक्तम् (**ऋत्विजः**) य ऋतुषु यजन्ते ते विद्वांसः (**वृजने**) त्यक्ताधर्मे मार्गे। अत्र **कृपृवृजिमन्दि०** (उणा०२.७९) अनेन वृजधातोः क्युः प्रत्ययः। (**मानुषासः**) मननशीला मानवाः (**प्रयस्वन्तः**) प्रशस्तानि प्रयांसि प्रज्ञानानि विद्यन्ते येषान्ते (**आयवः**) प्राप्तसत्यासत्यविवेचनाः (**जीजनन्त**) जनयन्ति। अत्र लडर्थे लुङडभावश्च॥ ३॥

अन्वयः-हे मनुष्य! यथा ऋत्विजः प्रयस्वन्त आयवो हृदो मानुषासो जिज्ञासून् वृजने जीजनन्त जनयन्ति, यं जायमानं मधुजिह्वं नव्यसी प्रजा प्रीत्या सेवते, तमस्मत्सुकीर्त्तिस्त्वमाश्याः॥ ३॥

भावार्थः-मनुष्यैर्येऽधर्मं त्याजयित्वा धर्मं ग्राहयन्ति ते सर्वथा सत्कर्त्तव्याः सन्ति॥ ३॥

पदार्थः-हे मनुष्य! जैसे (**ऋत्विजः**) ऋतुओं के योग्य कर्मकर्त्ता (**प्रयस्वन्तः**) उत्तम विज्ञानयुक्त (**आयवः**) सत्याऽसत्य का विवेक करनेहारे (**हृदः**) सबके मित्र (**मानुषासः**) विद्वान् मनुष्य जानने की इच्छा करने वालों को (**वृजने**) अधर्मरहित धर्ममार्ग में (**जीजनन्त**) विद्याओं से प्रकट कर देते हैं, जिस (**जायमानम्**) प्रसिद्ध हुए (**मधुजिह्वम्**) स्वादिष्ट भोग को (**नव्यसी**) अति नूतन प्रजा सेवन करती है (**तम्**) उसको (**अस्मत्**) हम से प्राप्त हुई शिक्षा से युक्त (**सुकीर्त्तिः**) अति प्रशंसा के योग्य तू (**आश्याः**) अच्छे प्रकार भोग कर॥ ३॥

भावार्थः-मनुष्यों को उचित है कि जो अधर्म को छुड़ा के धर्म का ग्रहण कराते हैं, उन का सब प्रकार से सन्मान किया करें॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

उशिक् पावको वसुर्मानुषेषु वरेण्यो होताऽधायि विक्षु।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम्॥ ४॥

उशिक्। पावकः। वसुः। मानुषेषु। वरेण्यः। होता। अधायि। विक्षु। दमूनाः। गृहऽपतिः। दमे। आ। अग्निः। भुवत्। रयिऽपतिः। रयीणाम्॥ ४॥

पदार्थः-(**उशिक्**) सत्यं कामयमानः (**पावकः**) पवित्रः (**वसुः**) वासयिता (**मानुषेषु**) युक्त्याहारविहारकर्त्तृषु (**वरेण्यः**) वरितुं स्वीकर्त्तुमर्हः (**होता**) सुखानां दाता (**अधायि**) धीयते (**विक्षु**) प्रजासु (**दमूनाः**) दाम्यति येन सः। अत्र **दमेरुनसि०** (उणा०४.२४०) इत्युनस् प्रत्ययो **अन्येषामपि** इति

दीर्घः। **(गृहपतिः)** गृहस्य पालयिता **(दमे)** गृहे **(आ)** समन्तात् **(अग्निः)** भौतिकोऽग्निरिव **(भुवत्)** भवेत्। अयं लेट् प्रयोगः। **(रयिपतिः)** धनानां पालयिता **(रयीणाम्)** राज्यादिधनानाम्॥४॥

अन्वयः-मनुष्यैर्य उशिक् पावको वसुर्वरेण्यो दमूना गृहपती रयिपतिरग्निरिव मानुषेषु विक्षु दमे च रयीणां होता दाता भुवद्भवेत्, स प्रजापालनक्षम अधायि॥४॥

भावार्थः-मनुष्यैर्नैव कदाचिदविद्वानधार्मिको राज्यरक्षायामधिकर्त्तव्यः॥४॥

पदार्थः-मनुष्यों को उचित है कि जो **(उशिक्)** सत्य की कामनायुक्त **(पावकः)** अग्नि के तुल्य पवित्र करने **(वसुः)** वास कराने **(वरेण्यः)** स्वीकार करने योग्य **(दमूनाः)** दम अर्थात् शान्तियुक्त **(गृहपतिः)** गृह का पालन करने तथा **(रयिपतिः)** धनों को पालने **(अग्निः)** अग्नि के समान **(मानुषेषु)** युक्तिपूर्वक आहार-विहार करने वाले मनुष्य **(विक्षु)** प्रजा और **(दमे)** गृह में **(रयीणाम्)** राज्य आदि धन और होता सुखों का देने वाला **(भुवत्)** होवे, वही प्रजा में राजा **(अधायि)** धारण करने योग्य है॥४॥

भावार्थः-मनुष्यों को उचित है कि अधर्मी मूर्खजन को राज्य की रक्षा का अधिकार कदापि न देवें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

तं त्वा॑ व॒यं पति॑मग्ने रयी॒णां प्र शं॑सामो म॒तिभि॒र्गोत॑मासः।

आ॒शुं न वा॑जंभ॒रं मर्ज॑यन्तः प्रा॒तर्म॒क्षू धि॒यावसुर्जगम्यात्॥५॥ २६॥

तम्। त्वा॒। व॒यम्। पति॑म्। अ॒ग्ने॒। र॒यी॒णाम्। प्र। शं॒सा॒मः॒। म॒तिऽभिः॑। गोत॑मासः। आ॒शुम्। न। वा॒ज॒म्ऽभ॒रम्। मर्ज॑यन्तः। प्रा॒तः। म॒क्षु। धि॒याऽव॑सुः। ज॒ग॒म्या॒त्॥५॥

पदार्थः-**(तम्)** विद्वांसम् **(त्वा)** त्वाम् **(वयम्)** **(पतिम्)** पालयितारम् **(अग्ने)** विद्युद्वर्त्तमान **(रयीणाम्)** चक्रवर्त्तिराज्यश्रियादिधनानाम् **(प्र)** प्रकृष्टार्थे **(शंसामः)** स्तुमः **(मतिभिः)** मेधाविभिः सह। **मतय इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(गोतमासः)** येऽतिशयेन गावो वेदाद्यर्थानां स्तोतारस्ते। **गौरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) **(आशुम्)** शीघ्रगमनहेतुमश्वम् **(न)** इव **(वाजम्भरम्)** यो वाजं वेगं बिभर्त्ति तम् **(मर्जयन्तः)** शोधयन्तः **(प्रातः)** प्रातःकाले **(मक्षु)** शीघ्रम् **(धियावसुः)** धियां बुद्धीनां वासयिता **(जगम्यात्)** पुनः पुनर्भृशं ज्ञानानि गमयेत्॥५॥

अन्वयः-हेऽग्ने पावकवत्प्रकाशमान धियावसुर्मतिभिः सह वाजम्भरं प्रातराशुमश्वं न मक्षु रयीणां पतिं जगम्यात् तथा त्वा तं मर्जयन्तो गोतमासो वयं प्रशंसामः॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा मनुष्या यानेऽश्वान् योजयित्वा तूर्णं गच्छन्ति, तथैव विद्वद्भिः सह सङ्गत्य विद्यापारावारं प्राप्नुवन्ति॥५॥

अत्र शरीरयानादिषु सम्प्रयोज्यस्याऽग्नेर्दृष्टान्तेन विद्वद्गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति षड्विंशो २६ वर्गः षष्टितमं ६० सूक्तञ्च समाप्तम्॥

पदार्थः-हे **(अग्ने)** पावकवत्पवित्र स्वरूप विद्वन्! जैसे **(धियावसुः)** बुद्धियों में वसाने वाला **(मतिभिः)** बुद्धिमानों के साथ **(वाजंभरम्)** वेग को धारण करने वाले को **(प्रातः)** प्रतिदिन **(आशुं न)** जैसे शीघ्र चलने वाले घोड़े को जोड़ के स्थानान्तर को तुरन्त जाते-आते हैं, वैसे **(मक्षु)** शीघ्र **(रयीणाम्)** चक्रवर्त्ति राज्यलक्ष्मी आदि धनों के **(पतिम्)** पालन करने वाले को **(जगम्यात्)** अच्छे प्रकार प्राप्त होवे, वैसे **(तम्)** उस **(त्वा)** तुझ को **(मर्जयन्तः)** शुद्ध कराते हुए **(गोतमासः)** अतिशय करके स्तुति करने वाले **(वयम्)** हम लोग **(प्रशंसामः)** स्तुति से प्रशंसित करते हैं॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे मनुष्य लोग उत्तम यान अर्थात् सवारियों में घोड़ों को जोड़ कर शीघ्र देशान्तर को जाते हैं, वैसे ही विद्वानों के सङ्ग से विद्या के पाराऽवार को प्राप्त होते हैं॥५॥

इस सूक्त में शरीर और यान आदि में संयुक्त करने योग्य अग्नि के दृष्टान्त से विद्वानों के गुणवर्णन से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह छब्बीसवां २६ वर्ग और साठवां ६० समाप्त हुआ॥

अथास्य षोडशर्चस्यैकषष्टितमस्य सूक्तस्य गोतमो नोधा ऋषिः। इन्द्रो देवता। १,१४,१६ विराट् त्रिष्टुप्। २,७,९, निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३,४,६,८,१०,१२, पङ्क्तिः। ५,१५ विराट् पङ्क्तिः। ११ भुरिक् पङ्क्तिः। १३ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ सभाद्यध्यक्षः कीदृश इत्युपदिश्यते॥

अब इकसठवें ६१ सूक्त का आरम्भ है। उसके पहिले मन्त्र में सभा आदि का अध्यक्ष कैसा हो, इस विषय का उपदेश किया है॥

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा॥ १॥

अस्मै। इत्। ऊम् इति। प्र। तवसे। तुराय। प्रयः। न। हर्मि। स्तोमम्। माहिनाय। ऋचीषमाय। अध्रिऽगवे ओहम्। इन्द्राय। ब्रह्माणि। रातऽतमा॥ १॥

पदार्थः-(**अस्मै**) सभाद्यध्यक्षाय (**इत्**) एव (**उ**) वितर्के (**प्र**) प्रकृष्टे (**तवसे**) बलवते (**तुराय**) कार्य्यसिद्धये तूर्णं प्रवर्त्तमानाय शत्रूणां हिंसकाय वा (**प्रयः**) तृप्तिकारकमन्नम् (**न**) इव (**हर्मि**) हरामि। अत्र शपो लुक्। (**स्तोमम्**) स्तुतिम् (**माहिनाय**) उत्कृष्टयोगान्महते (**ऋचीषमाय**) ऋच्यन्ते स्तूयन्ते ये त ऋचीषास्तानतिमान्यान् करोति तस्मै। अत्र ऋचधातोर्बाहुलकादौणादिकः कर्मणीषन् प्रत्ययः। **ऋचीषमः स्तूयते वज्री ऋचा समः।** (निरु०६.२३) (**अध्रिगवे**) शत्रुभिरध्रयोऽसहमाना वीरास्तान् गच्छति प्राप्नोति तस्मै (**ओहम्**) ओहति प्राप्नोति येन तम्। (**इन्द्राय**) परमैश्वर्यकारकाय (**ब्रह्माणि**) सुसंस्कृतानि बृहत्सुखकारकाण्यन्नानि धनानि वा। **ब्रह्मेत्यन्ननामसु पठितम्।** (निघं०२.७) **धननामसु च पठितम्।** (निघं०२.१०) (**राततमा**) अतिशयेन दातव्यानि॥ १॥

अन्वयः-यथाहमु प्रयो न प्रीतिकारकमन्नमिव तवसे तुराय ऋचीषमायाध्रिगवे माहिनायास्मा इन्द्राय सभाद्यध्यक्षायेदेवौहं स्तोमं राततमा ब्रह्माण्यन्नानि धनानि वा प्रहर्मि प्रकृष्टतया ददामि तथा यूयमपि कुरुत॥ १॥

भावार्थः-मनुष्यैः स्तोतुमर्हान् राज्याधिकारिणः कृत्वा तेभ्यो यथायोग्यानि करप्रयुक्तानि धनानि दत्त्वोत्तमैरन्नादिभिः सदा सत्कर्त्तव्याः राजपुरुषैः प्रजास्था मनुष्याश्च॥ १॥

पदार्थः-हे विद्वान् लोगो! जैसे मैं (**उ**) वितर्कपूर्वक (**प्रयः**) तृप्ति करने वाले कर्म्म के (**न**) समान (**तवसे**) बलवान् (**तुराय**) कार्यसिद्धि के लिये शीघ्र करता (**ऋचीषमाय**) स्तुति करने को प्राप्त होने तथा (**अध्रिगवे**) शत्रुओं से असह्य वीरों के प्राप्त होनेहारे (**माहिनाय**) उत्तम-उत्तम गुणों से बड़े (**अस्मै**) इस (**इन्द्राय**) सभाध्यक्ष के लिये (**इत्**) ही (**ओहम्**) प्राप्त करने वाले (**स्तोमम्**) स्तुति को (**राततमा**) अतिशय करने के योग्य (**ब्रह्माणि**) संस्कार किये हुए अन्न वा धनों को (**प्र**) (**हर्मि**) देता हूं, वैसे तुम भी किया करो॥ १॥

भावार्थः-मनुष्यों को चाहिये कि स्तुति के योग्य पुरुषों को राज्य का अधिकार देकर, उनके लिये यथायोग्य हाथों से प्रयुक्त किये हुए धनों को देकर, उत्तम-उत्तम अन्नादिकों से सदा सत्कार करें और राजपुरुषों को भी चाहिये कि प्रजा के पुरुषों का सत्कार करें॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मा इदु प्रयइव प्र यंसि भराम्याङ्गूषं बाधे सुवृक्ति।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त॥ २॥

अस्मै। इत्। ऊम् इति। प्रयः। इव। प्र। यंसि। भरामि। आङ्गूषम्। बाधे। सुवृक्ति। इन्द्राय। हृदा। मनसा। मनीषा। प्रत्नाय। पत्ये। धियः। मर्जयन्त॥ २॥

पदार्थः-(**अस्मै**) सभाद्यध्यक्षाय (**इत्**) एव (**उ**) वितर्के (**प्रयइव**) यथाप्रीतमन्नम् (**प्र**) प्रकृष्टार्थे (**यंसि**) यच्छसि। अत्र शपो लुक्। (**भरामि**) धरामि पुष्णामि (**आङ्गूषम्**) युद्धे प्राप्तं शत्रुम् (**बाधे**) ताडयामि (**सुवृक्ति**) सुष्ठु व्रजन्ति येन यानेन तत् (**इन्द्राय**) शत्रुदुःखविदारकाय (**हृदा**) आत्मना (**मनसा**) मननात्मकेन (**मनीषा**) बुद्ध्या (**प्रत्नाय**) प्राचीनाय (**पत्ये**) स्वामिने (**धियः**) कर्माणि प्रज्ञा वा (**मर्जयन्त**) शोधयन्ति॥ २॥

अन्वयः-हे विद्वंस्त्वमस्मै प्रत्नाय सुहृदे पत्य इन्द्राय प्रय इव यथा प्रीतमन्नं धनं वा दत्वाऽभिप्रीतमन्नं धनं वा प्रयंसि यस्मा इन्द्रायाहं सर्वाभिः सामग्रीभिर्हृदा मनीषा मनसा सुवृक्ति भराम्याङ्गूषं बाधे यस्मै सर्वे वीराः प्रजास्थाश्च मनुष्या धियो मर्जयन्त शोधयन्ति, तस्मा इन्द्रायेद्वहमप्येता मार्जये॥ २॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्नैव परीक्षितपूर्वं पूर्णविद्यं धार्मिकं सर्वोपकारकं प्राचीनं सभाद्यधिपतिं विहायैतद्विरुद्धः स्वीकर्तव्यः सर्वैस्तस्य प्रियमाचरणीयम्॥ २॥

पदार्थः-हे विद्वन् मनुष्य! तुम (**अस्मै**) इस (**प्रत्नाय**) प्राचीन सबके मित्र (**पत्ये**) स्वामी (**इन्द्राय**) शत्रुओं को विदारण करने वाले के लिये (**प्रयइव**) जैसे प्रीतिकारक अन्न वा धन वैसे (**प्रयंसि**) सुख देते हो, जिस परमैश्वर्ययुक्त धार्मिक के लिये मैं सब सामग्री अर्थात् (**हृदा**) हृदय (**मनीषा**) बुद्धि (**मनसा**) विज्ञान पूर्वक मन से (**सुवृक्ति**) उत्तमता से गमन कराने वाले यान को (**भरामि**) धारण करता वा पुष्ट करता हूं, जैसे (**आङ्गूषम्**) युद्ध में प्राप्त हुए शत्रु को (**बाधे**) ताड़ना देना जिस वीर के वास्ते सब प्रजा के मनुष्य (**धियः**) बुद्धि वा कर्म को (**मर्जयन्त**) शुद्ध करते हैं, उस पुरुष के लिये (**इत्**) ही (**उ**) तर्क के साथ मैं भी बुद्धि शुद्ध करूं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को उचित है कि पहिले परीक्षा किये पूर्ण विद्यायुक्त धार्मिक सबके उपकार करने वाले प्राचीन पुरुष को सभा का अधिपति करें तथा इससे विरुद्ध मनुष्य को स्वीकार नहीं करें और सब मनुष्य उसके प्रिय आचरण करें॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै॥ ३॥

अस्मै। इत्। ऊम् इति। त्यम्। उपऽमम्। स्वःऽसाम्। भरामि। आङ्गूषम्। आस्येन। मंहिष्ठम्। अच्छोक्तिऽभिः। मतीनाम्। सुवृक्तिऽभिः। सूरिम्। ववृधध्यै॥ ३॥

पदार्थः-(**अस्मै**) सभाध्यक्षाय (**इत्**) अपि (**उ**) वितर्के (**त्यम्**) तम् (**उपमम्**) दृष्टान्तस्वरूपम् (**स्वर्षाम्**) सुखप्रापकम् (**भरामि**) धरामि (**आङ्गूषम्**) स्तुतिप्राप्तम् (**आस्येन**) मुखेन (**मंहिष्ठम्**) अतिशयेन मंहिता वृद्धस्तम् (**अच्छोक्तिभिः**) अच्छ श्रेष्ठा उक्तयो वचनानि यासु स्तुतिषु ताभिः (**मतीनाम्**) मननशीलानां मनुष्याणाम् (**सुवृक्तिभिः**) सुष्ठु व्रजन्ति गच्छन्ति याभिस्ताभिः (**सूरिम्**) शास्त्रविदम् (**वावृधध्यै**) पुनः पुनर्वर्धितुम्॥ ३॥

अन्वयः-हे मनुष्या! यथाऽहमस्मा आस्येन मतीनां वावृधध्यै सुवृक्तिभिरच्छोक्तिभिः स्तुतिभिरिदुत्यमुपमं स्वर्षामाङ्गूषं मंहिष्ठं सूरिं भरामि तथैव यूयमपि भरत॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वद्भिर्मनुष्याणां सुखाय सर्वथोत्कृष्टोऽनुपमो यत्नः क्रियते, तथैतेषां सत्काराय मनुष्यैरपि प्रयतितव्यम्॥ ३॥

पदार्थः-हे मनुष्यो! जैसे मैं (**अस्मै**) इस सभाध्यक्ष के लिये (**मतीनाम्**) मनुष्यों के (**वावृधध्यै**) अत्यन्त बढ़ाने को (**आस्येन**) सुख से (**सुवृक्तिभिः**) जिन में अच्छे प्रकार अधर्म और अविद्या को छोड़ सकें (**अच्छोक्तिभिः**) श्रेष्ठ वचन स्तुतियों से (**इत्**) भी (**उ**) (**त्यम्**) उसी (**उपमम्**) उपमा करने योग्य (**स्वर्षाम्**) सुखों को प्राप्त कराने (**आङ्गूषम्**) स्तुति को प्राप्त किये हुए (**मंहिष्ठम्**) अतिशय करके विद्या से वृद्ध (**सूरिम्**) शास्त्रों को जानने वाले विद्वान् को (**भरामि**) धारण करता हूं, वैसे तुम लोग भी किया करो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वानों से मनुष्यों के लिये सब से उत्तम उपमा रहित यत्न किया जाता है, वैसे इन के सत्कार के वास्ते सब मनुष्य भी प्रयत्न किया करें॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय।
गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय॥४॥

अस्मै। इत्। उम् इति। स्तोमम्। सम्। हिनोमि। रथम्। न। तष्टाऽइव। तत्ऽसिनाय। गिरः। च। गिर्वाहसे। सुऽवृक्ति। इन्द्राय। विश्वम्ऽइन्वम्। मेधिराय॥४॥

पदार्थः-(**अस्मै**) सभ्याय (**इत्**) अपि (**उ**) वितर्के (**स्तोमम्**) स्तुतिम् (**सम्**) सम्यगर्थे (**हिनोमि**) वर्धयामि (**रथम्**) यानसमूहम् (**न**) इव (**तष्टेव**) यथा तनूकर्त्ता शिल्पी (**तत्सिनाय**) तस्य यानसमूहस्य बन्धनाय (**गिरः**) वाचः (**च**) समुच्चये (**गिर्वाहसे**) यो गिरो विद्यावाचो वहति तस्मै (**सुवृक्ति**) सुष्ठु वृजते त्यजन्ति दोषान् यस्मात्तत् (**इन्द्राय**) विद्यावृष्टिकारकाय (**विश्वमिन्वम्**) यो विश्वं सर्वं विज्ञानमिन्वति व्याप्नोति तत्। अत्र विभक्त्यलुक्। (**मेधिराय**) धीमते॥४॥

अन्वयः-हे मनुष्या! यथाऽहं मेधिराय गिर्वाहसेऽस्मा इन्द्रायेदुं रथं न यानसमूहमिव तत्सिनाय तष्टेव विश्वमिन्वं सुवृक्ति स्तोमं गिरश्च संहिनोमि, तथा यूयमपि प्रयतध्वम्॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा रथकारो दृढं रथं चालनाय बन्धनैः सह यन्त्रकलाः सम्यग्रचयित्वा स्वप्रयोजनानि साध्नोति सुखेन गमनागमने कृत्वा मोदते, तथैव मनुष्यो विद्वांसमाश्रित्य तत्सन्नियोगेन विद्या गृहीत्वा सुखेन धर्मार्थकाममोक्षान् साधयित्वा सततमानन्देत्॥४॥

पदार्थः-हे मनुष्यो! जैसे मैं (**मेधिराय**) अच्छे प्रकार जानने (**गिर्वाहसे**) विद्यायुक्त वाणियों को प्राप्त कराने वाले (**अस्मै**) इस (**इन्द्राय**) विद्या की वृष्टि करने वाले विद्वान् (**इत्**) ही के लिये (**उ**) तर्कपूर्वक (**रथम्**) यानसमूह के (**न**) समान (**तत्सिनाय**) यानसमूह के बन्धन के लिये (**तष्टेव**) तीक्ष्ण करने वाले कारीगर के तुल्य (**विश्वमिन्वम्**) सब विज्ञान को प्राप्त कराने (**सुवृक्ति**) जिससे सब दोषों को छोड़ते हैं, उस (**स्तोमम्**) शास्त्रों के अभ्यासयुक्त स्तुति (**च**) और (**गिरः**) वेद वाणियों को (**संहिनोमि**) सम्यक् बढ़ाता हूं, वैसे तुम भी प्रयत्न किया करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे रथ का बनाने वाला दृढ़ रथ के बनाने के वास्ते उत्तम बन्धनों के सहित यन्त्रकलाओं को अच्छे प्रकार रच कर अपने प्रयोजनों को सिद्ध करता और सुखपूर्वक जाना-आना करके आनन्दित होता है, वैसे ही मनुष्य विद्वान् का आश्रय लेकर उस के सम्बन्ध से धर्म्म, अर्थ, काम और मोक्ष को सिद्ध करके सदा आनन्द में रहें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३समञ्जे।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम्॥५॥२७॥

अ॒स्मै। इत्। ऊ॒म् इति॑। सप्ति॑म्ऽइव। श्र॒व॒स्या। इन्द्रा॑य। अ॒र्कम्। जु॒ह्वा॑। सम्। अ॒ञ्जे॒। वी॒रम्। दा॒नऽओ॑कसम्। व॒न्दध्यै॑। पु॒राम्। गू॒र्तऽश्र॑वसम्। दु॒र्माण॑म्॥५॥

पदार्थः-(**अस्मै**) सभ्याय विदुषे (**इत्**) एव (**उ**) वितर्के (**सप्तिमिव**) यथा वेगवानश्वः (**श्रवस्या**) आत्मनः श्रवणेच्छया (**इन्द्राय**) परमैश्वर्यप्रापकाय (**अर्कम्**) अर्च्यन्ते येन तम् (**जुह्वा**) जुहोति गृह्णाति ददाति वा यया तया (**सम्**) सम्यगर्थे (**अञ्जे**) कामये। अत्र विकरणलुक् व्यत्ययेन आत्मनेपदं च। (**वीरम्**) विद्याशौर्यगुणयुक्तम् (**दानौकसम्**) दानमोकश्च यस्य तम् (**वन्दध्यै**) अभिवन्दितुं स्तोतुम् (**पुराम्**) शत्रुनगराणाम् (**गूर्त्तश्रवसम्**) गर्त्तुं निगलितं श्रवः शास्त्रश्रवणं येन तम् (**दर्माणम्**) विदारयितारम्॥५॥

अन्वयः-हे मनुष्या! यथाऽहं श्रवस्या जुह्वा स्मा इन्द्रायेदु वन्दध्यै सप्तिमिव गूर्त्तश्रवसं पुरां दर्माणं दानौकसमर्कं वीरमित् समञ्जे सम्यक्कामये तथा तं यूयमपि कामयध्वम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्या रथेऽश्वान् योजयित्वा तदुपरि स्थित्वा गमनाऽऽगमनाभ्यां कार्याणि साध्नुवन्ति तथा वर्त्तमानैर्विद्वद्भिर्वीरैः सह सङ्गत्य सर्वाणि कार्याणि मनुष्यैः साधनीयानि॥५॥

पदार्थः-हे मनुष्यो! जैसे मैं (**श्रवस्या**) अपने करने की इच्छा (**जुह्वा**) विद्याओं के लेने-देने वाली क्रियाओं से (**अस्मै**) इस (**इन्द्राय**) परमैश्वर्य प्राप्त करने वाले (**इत्**) सभाध्यक्ष का ही (**उ**) विशेष तर्क के साथ (**वन्दध्यै**) स्तुति कराने के लिये (**सप्तिमिव**) वेग वाले घोड़े के समान (**गूर्त्तश्रवसम्**) जिसने सब शास्त्रों के श्रवणों को ग्रहण किया है (**पुराम्**) शत्रुओं के नगरों के (**दर्माणम्**) विदारण करने वा (**दानौकसम्**) दान वा स्थानयुक्त (**अर्कम्**) सत्कार के हेतु (**वीरम्**) विद्या शौर्यादि गुणयुक्त वीर (**इत्**) ही को (**समञ्जे**) अच्छे प्रकार कामना करता हूं, वैसी तुम भी कामना किया करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य लोग रथ में घोड़े को जोड़ उस के ऊपर स्थित होकर जाने-आने से कार्यों को सिद्ध करते हैं, वैसे वर्त्तमान विद्वान् वीर पुरुषों के सङ्ग से सब कार्यों को मनुष्य लोग सिद्ध करें॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अ॒स्मा इदु त्वष्टा॑ तक्षद्व॒ज्रं स्वप॑स्तमं स्व॒र्य१॒॑ रणा॑य।
वृ॒त्रस्य॑ चिद्विदद्येन॒ मर्म॑ तु॒जन्नीशा॑नस्तुज॒ता कि॑ये॒धाः॥६॥

अ॒स्मै। इत्। ऊ॒म् इति॑। त्वष्टा॑। त॒क्ष॒त्। व॒ज्रम्। स्वपः॑ऽतमम्। स्व॒र्य॑म्। रणा॑य। वृ॒त्रस्य॑। चि॒त्। वि॒दत्। येन॑। मर्म॑। तु॒जन्। ईशा॑नः। तु॒ज॒ता। कि॒ये॒धाः॥६॥

पदार्थः-(**अस्मै**) उक्ताय (**इत्**) एव (**उ**) वितर्के (**त्वष्टा**) प्रकाशयिता (**तक्षत्**) तनूकरोति (**वज्रम्**) किरणसमूहं प्रहृत्य (**स्वपस्तमम्**) अतिशयेन शोभनान्यपांसि कर्माणि यस्मात्तम् (**स्वर्यम्**) स्वः सुखे साधुस्तम् (**रणाय**) युद्धाय। **रण इति संग्रामनामसु पठितम्।** (निघं०२.१७) (**वृत्रस्य**) मेघस्य (**चित्**) इव

(विदत्) प्राप्नुवन् **(येन)** वज्रेण **(मर्म)** जीवननिमित्तम् **(तुजन्)** हिंसन्। अत्र शपो लुक्। **(ईशानः)** समर्थः **(तुजता)** छेदकेन वज्रेण **(कियेधाः)** यः कियतो धरति सः। अत्र **पृषोदरा०** इति तस्थान इकारः॥६॥

अन्वयः-मनुष्यैर्यस्त्वष्टेशानः कियेधाः स्वयं शत्रून् तुजन् वृत्रस्य मेघस्योपरि वज्रं स्वकिरणान् क्षिपन् विदत् स्वर्यं स्वपस्तमं तक्षत्सूर्यश्चिदिवास्मै रणाय मर्म तुजता येन वज्रेण शत्रून् विजयते स इदु सभाद्यध्यक्षत्वे योग्य इति वेद्यम्॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा सविता स्वप्रतापेन मेघं छित्वा भूमौ निपात्य जलं विस्तार्य सुखयति तथा सभाद्यध्यक्षो विद्याविनयादिना शस्त्रास्त्राशिक्षया युद्धेषु कुशलां सेनां सम्पाद्य शत्रून् जित्वा सर्वान् प्राणिन आनन्दयेत्॥६॥

पदार्थः-मनुष्यों को उचित है कि जो **(त्वष्टा)** प्रकाश करने **(ईशानः)** समर्थ **(कियेधाः)** कितनों को धारण करने वाला शत्रुओं को **(तुजन्)** मारता हुआ **(वृत्रस्य)** मेघ के ऊपर अपने किरणों को छोड़ता **(विदत्)** प्राप्त होते हुए सूर्य के समान **(स्वर्यम्)** सुख के हेतु **(स्वपस्तमम्)** अतिशय करके उत्तम कर्मों के उत्पन्न करने वाले **(वज्रम्)** किरणसमूह को **(तक्षत्)** छेदन करते हुए सूर्य के **(चित्)** समान **(अस्मै)** इस **(रणाय)** स-ाम के वास्ते जिस **(मर्म)** जीवन निमित्त स्थान को **(तुजता)** काटते हुए **(येन)** जिस वज्र से शत्रुओं को जीतता है, **(इदु)** उसी को सभा आदि का अध्यक्ष करना चाहिये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य अपने प्रताप से मेघ को छिन्न-भिन्न कर भूमि में जल को गिरा के सबको सुखी करता है, वैसे ही सभा आदि का अध्यक्ष विद्या, विनय वा शस्त्र-अस्त्रों के सीखने-सिखाने से युद्धों में कुशल सेना को सिद्ध कर, शत्रुओं को जीत कर, सब प्राणियों को आनन्दित किया करे॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना।
मुषायद्विष्णुः पचतं सहीयान् विध्यद्वराहं तिरो अद्रिमस्ता॥७॥

अस्य। इत्। ऊम् इति। मातुः। सवनेषु। सद्यः। महः। पितुम्। पपिऽवान्। चारु। अन्ना। मुषायत्। विष्णुः। पचतम्। सहीयान्। विध्यत्। वराहम्। तिरः। अद्रिम्। अस्ता॥७॥

पदार्थः-(**अस्य**) सभाध्यक्षस्य **(इत्)** अपि **(उ)** वितर्के **(मातुः)** परिमाणकर्त्तुः **(सवनेषु)** ऐश्वर्येषु **(सद्यः)** समानेऽहनि **(महः)** महत् **(पितुम्)** सुसंस्कृतमन्नम् **(पपिवान्)** रसान् पीतवान् **(चारु)** सुन्दरम् **(अन्ना)** अन्नानि **(मुषायत्)** आत्मनः स्तेयमिच्छत्। अत्र **घञर्थे कविधानम्** (अष्टा०वा०३.३.५८) इति कः प्रत्ययः, ततः **सुप आत्मनः क्यच्।** (अष्टा०३.१.८) इति क्यच्, **न छन्दस्यपुत्रस्य।** (अष्टा०७.४.३५)

इतीत्वनिषेधः। **(विष्णुः)** सर्वविद्याङ्गव्यापनशीलः **(पचतम्)** परिपक्वम् **(वराहम्)** मेघम् **(सहीयान्)** अतिशयेन सोढा **(विध्यत्)** विध्यति मेघम् **(तिरः)** अधोगमने **(अद्रिम्)** पर्वताकारम् **(अस्ता)** प्रक्षेप्ता॥७॥

अन्वयः-योऽस्य मातुः सभाद्यध्यक्षस्य सवनेषु महः पचतं चारु पितुं च पपिवान् सहीयान् वीरोऽन्नास्ता मुषायदिव विष्णुः सूर्योऽद्रिं वराहं तिरो विध्यदिव शत्रून् सद्यो हन्यात् स इदु सेनाध्यक्षो योग्यो भवति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्योऽन्नजलरसान् चोरयन् गोपायन् स्वकिरणैर्मेघं संहत्य प्रकटयन् छित्वा निपात्य विजयते, तथैव सेनाद्यध्यक्षस्य सेनाद्यैश्वर्येषु स्थिताः शूरवीराः पुरुषाः शूत्रन् विजयेरन्॥७॥

पदार्थः-जो **(अस्य)** इस **(मातुः)** शत्रु और अपने बल का परिमाण करने वाले सभाध्यक्ष के **(सवनेषु)** ऐश्वर्यों में **(महः)** बड़े **(पचतम्)** परिपक्व **(चारु)** सुन्दर **(पितुम्)** संस्कार किये हुए अन्न को **(पपिवान्)** खाने-पीने तथा **(सहीयान्)** अतिशय करके सहन करने वाला वीर मनुष्य **(अन्ना)** अन्नों को **(अस्ता)** प्रक्षेपण करने **(मुषायत्)** अपने को चोर की इच्छा करते हुए के तुल्य **(विष्णुः)** सब विद्याओं के अङ्गों में व्यापक **(अद्रिम्)** पर्वताकार **(वराहम्)** मेघ को **(तिरः)** नीचे **(विध्यत्)** गिराते हुए सूर्य के समान शत्रुओं को **(सद्यः)** शीघ्र नष्ट करे **(इदु)** वही मनुष्य सेनाध्यक्ष होने के योग्य होता है॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य अन्न-जल के रसों को चोर के समान हरता वा रक्षा करता हुआ, अपने किरणों से मेघ को हनन कर प्रकट करता हुआ, छिन्न-भिन्न कर अपने विजय को प्राप्त होता है, वैसे ही सेना आदि के अध्यक्ष के सेना आदि ऐश्वर्यों में स्थित हुए शूरवीर पुरुष शत्रुओं का पराजय करें॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्यं ऊवुः।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परिष्टः॥८॥

अस्मै। इत्। ऊम् इति। ग्नाः। चित्। देवऽपत्नीः। इन्द्राय। अर्कम्। अहिऽहत्ये। ऊवुरित्यूवुः। परि। द्यावापृथिवी इति। जभ्रे। उर्वी इति। न। अस्य। ते इति। महिमानम्। परि। स्त इति स्तः॥८॥

पदार्थः-**(अस्मै)** सभाध्यक्षाय **(इदु)** पादपूरणे **(ग्नाः)** वाणीः। **ग्नेति वाङ्नामसु पठितम्।** (निघं०१.११) **(चित्)** अपि **(देवपत्नीः)** देवैर्विद्वद्भिः पालनीयाः **(इन्द्राय)** परमैश्वर्यप्रापकाय **(अर्कम्)** दिव्यगुणसम्पन्नमर्चनीयं वीरम् **(अहिहत्ये)** अहीनां मेघानां हत्या यस्मिंस्तस्मिन् **(ऊवुः)** तन्तुवद् विस्तारयेयुः **(परि)** सर्वतः **(द्यावापृथिवी)** भूमिप्रकाशौ **(जभ्रे)** धरति **(उर्वी)** बहुरूपे द्यावापृथिव्यौ।

ऊर्वीति पृथिवीनामसु पठितम्। (निघं०१.१) **(न)** निषेधे **(अस्य)** सूर्यस्य **(ते) (महिमानम्)** स्तुत्यस्य पूज्यस्य व्यवहारस्य भावम् **(परि)** अभितः **(स्तः)** भवतः॥८॥

अन्वयः-हे सभेश! यथाऽयं द्यावापृथिवी जभ्रेऽस्य वशे उर्वी वर्त्तते यस्यास्याहिहत्ये द्यावापृथिवी चित् भूमिप्रकाशावपि महिमानं न परि स्तः परिछेत्तुं समर्थेन भवतस्तथा यस्मा अस्मा इन्द्रायेदु देवपत्नीर्ग्ना अर्कं पर्य्यूवुः परितः सर्वतो विस्तारयन्ति स राज्यं कर्तुं योग्यः स्यात्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यस्य प्रतापमहत्त्वस्याग्रे पृथिव्यादीनां स्वल्पत्वं विद्यते, तथैव पूर्णविद्यावतः पुरुषस्य महिम्नोऽग्रे मूर्खस्य गणना तुच्छाऽस्तीति॥८॥

पदार्थः-हे सभापति! जैसे यह सूर्य्य **(द्यावापृथिवी)** प्रकाश और भूमि को **(जभ्रे)** धारण करता वा जिसके वश में **(उर्वी)** बहुधा रूपप्रकाशयुक्त पृथिवी है **(अस्य)** जिस इस सभाध्यक्ष के **(अहिहत्ये)** मेघों के हनन व्यवहार में **(चित्)** प्रकाश भूमि की **(महिमानम्)** महिमा के **(न) (परि स्तः)** सब प्रकार छेदन को समर्थ नहीं हो सकते, वैसे उस **(अस्मै)** इस **(इन्द्राय)** ऐश्वर्य प्राप्त करने वाले सभाध्यक्ष के लिये **(इदु)** ही **(देवपत्नीः)** विद्वानों से पालनीय पतिव्रता स्त्रियों के सदृश **(ग्नाः)** वेदवाणी **(अर्कम्)** दिव्यगुण सम्पन्न अर्चनीय वीर पुरुष को **(पर्यूवुः)** सब प्रकार तन्तुओं के समान विस्तृत करती हैं, वही राज्य करने के योग्य होता है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य के प्रताप और महत्त्व के आगे पृथिवी आदि लोकों की गणना स्वल्प है, वैसे ही पूर्ण विद्या वाले पुरुष के महिमा के आगे मूर्ख की गणना तुच्छ है॥८॥

अथ सूर्यसभाद्यध्यक्षौ कथं भूतावित्युपदिश्यते॥

अब सूर्य सभाध्यक्ष कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात्।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय॥९॥

अस्य। इत्। एव। प्र। रिरिचे। महिऽत्वम्। दिवः। पृथिव्याः। परि। अन्तरिक्षात्। स्वऽराट्। इन्द्रः। दमे। आ। विश्वऽगूर्तः। सुऽअरिः। अमत्रः। ववक्षे। रणाय॥९॥

पदार्थः-**(अस्य)** सभाद्यध्यक्षस्य सूर्यस्य वा **(इत्)** अपि **(एव)** निश्चयार्थे **(प्र)** प्रकृष्टार्थे **(रिरिचे)** रिणक्ति अधिकं वर्त्तते **(महित्वम्)** पूज्यत्वं महागुणविशिष्टत्वं परिमाणेनाधिकत्वं च **(दिवः)** प्रकाशात् **(पृथिव्याः)** भूमेः **(परि)** सर्वतः **(अन्तरिक्षात्)** सूक्ष्मादाकाशात् **(स्वराट्)** यः स्वयं राजते सः **(इन्द्रः)** परमैश्वर्यहेतुमान् हेतुर्वा **(दमे)** दाम्यन्त्युपशाम्यन्ति जना यस्मिन् गृहे संसारे वा तस्मिन् **(आ)**

आभिमुख्ये (**विश्वगूर्त्तः**) विश्वं सर्वं भोज्यं वस्तु निगलितं येन सः (**स्वरिः**) यः शोभनश्चासावरिश्च (**अमत्रः**) ज्ञानवान् ज्ञानहेतुर्वा (**ववक्षे**) वक्षति रोषं सङ्घातं करोति (**रणाय**) सङ्ग्रामाय॥९॥

अन्वयः-यो विश्वगूर्त्तः स्वरिरमत्रः स्वराडिन्द्रो दमे रणायाववक्षे यस्येदपि दिवः पृथिव्या अन्तरिक्षात् परि महित्वं प्ररिरिचेऽस्ति रिक्तं वर्त्तते तस्यास्यैव सभादिष्वधिकारः कार्य्येषूपयोगश्च कर्त्तव्यः॥९॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्यथा सूर्यः पृथिव्यादिभ्यो गुणैः परिमाणेनाऽधिकोऽस्ति तथैवोत्तमगुणं सभाद्यधिपतिं राजानमधिकृत्य सर्वकार्य्यसिद्धिः कार्य्या॥९॥

पदार्थः-जो (**विश्वगूर्त्तः**) सब भोज्य वस्तुओं को भक्षण करने (**स्वरिः**) उत्तम शत्रुओं (**अमत्रः**) ज्ञानवान् वा ज्ञान का हेतु (**स्वराट्**) अपने आप प्रकाश सहित (**इन्द्रः**) परमैश्वर्य युक्त सूर्य वा सभाध्यक्ष (**दमे**) उत्तम घर वा संसार में (**रणाय**) संग्राम के लिये (**आववक्षे**) रोष वा अच्छे प्रकार घात करता है वा जिस की (**दिवः**) प्रकाश (**पृथिव्याः**) भूमि और (**अन्तरिक्षात्**) अन्तरिक्ष से (**इत्**) भी (**परि**) सब प्रकार (**महित्वम्**) पूज्य वा महागुणविशिष्ट महिमा (**प्र रिरिचे**) विशेष हैं उस (**अस्य**) इस सूर्य वा सभाध्यक्ष का (**एव**) ही कार्यों में उपयोग वा सभा आदि में अधिकार देना चाहिये॥९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को जैसे सूर्य, पृथिव्यादिकों से गुण वा परिमाण के द्वारा अधिक है, वैसे ही उत्तम गुण युक्त सभा आदि के अधिपति राजा को अधिकार देकर सब कार्यों की सिद्धि करनी चाहिये॥९॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है।

अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः।
गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः॥१०॥२८॥

अस्य। इत्। एव। शवसा। शुषन्तम्। वि। वृश्चत्। वज्रेण। वृत्रम्। इन्द्रः। गाः। न। व्राणाः। अवनीः। अमुञ्चत्। अभि। श्रवः। दावने। सऽचेताः॥१०॥

पदार्थः-(**अस्य**) सभाद्यध्यक्षस्य (**इत्**) अपि (**एव**) अवधारणे (**शवसा**) बलेन (**शुषन्तम्**) द्वेषेण प्रतापेन क्षीणम् (**वि**) विविधार्थे (**वृश्चत्**) छिनत्ति (**वज्रेण**) शस्त्रसमूहेन तेजोवेगेन वा (**वृत्रम्**) मेघमिव न्यायावरकं शत्रुं (**इन्द्रः**) सेनाधिपतिस्तनयित्नुर्वा (**गाः**) पशून् (**न**) इव (**व्राणाः**) आवृताः (**अवनीः**) पृथिवीं प्रति (**अमुञ्चत्**) मुञ्चति (**अभि**) आभिमुख्ये (**श्रवः**) श्रवणमन्नं वा (**दावने**) दात्रे (**सचेताः**) समानं चेतो विज्ञानं संज्ञापनं वा यस्य सः॥१०॥

अन्वयः-यः सचेता इन्द्रोऽस्यैव शवसा वज्रेण शुषन्तं वृत्रं विवृश्चद्विछिनत्ति स गा न गोपालो बन्धनान्मोचयित्वा वनं गमयतीवावनीः व्राणा दावने श्रव इदपि व्राणा अपो वाभ्यमुञ्चदाभिमुख्येन मुञ्चति स राज्यं कर्तुमर्हति॥१०॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। यथा विद्युत्सहायेन सूर्यः सूर्यस्य सहायेन विद्युच्च प्रवृध्य विश्वं प्रकाश्य मेघं विच्छिद्य भूमौ निपातयति यथा गोपालो बन्धनादु गा विमुच्य सुखयति तथैव सभासदः सेनासदश्च न्यायं संरक्ष्य शत्रूंश्च छिन्नं भिन्नं कृत्वा धार्मिकान् दुःखबन्धनाद्विमोच्य सुखेयत्॥१०॥

पदार्थः-जो **(सचेताः)** तुल्य ज्ञानवान् **(इन्द्रः)** सेनाधिपति **(अस्य)** इस सभाध्यक्ष **(एव)** ही के **(शवसा)** बल तथा **(वज्रेण)** तेज से **(शुषन्तम्)** द्वेष से क्षीण हुए **(वृत्रम्)** प्रकाश के आवरण करने वाले मेघ के समान आवरण करने वाले शत्रु को **(विवृश्चत्)** छेदन करता है वह **(गाः)** पशुओं को पशुओं के पालने वाले बन्धन से छुड़ाकर वन को प्राप्त करते हुए के **(न)** समान **(अवनीः)** पृथिवी को **(व्राणाः)** आवरण किये हुए जल के तुल्य **(दावने)** देने वाले के लिये **(श्रवः)** अन्न को **(इत्)** भी **(अभ्यमुञ्चत्)** सब प्रकार से छोड़ता है, वह राज्य करने को समर्थ होता है॥१०॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। जैसे बिजुली के सहाय से सूर्य्य वा सूर्य्य के सहाय से बिजुली बढ़ के विश्व को प्रकाशित और मेघ को छिन्न-भिन्न कर भूमि में गिरा देती है, जैसे गौओं का पालने वाला गौओं को बन्धन से छोड़कर सुखी करता है, वैसे ही सभा सेना के अध्यक्ष मनुष्य न्याय की रक्षा और शत्रुओं को छिन्न-भिन्न और धार्मिकों को दुःखरूपी बन्धनों से छुड़ाकर सुखी करें॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत्।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः॥११॥

अस्य। इत्। ऊम् इति। त्वेषसा। रन्त। सिन्धवः। परि। यत्। वज्रेण। सीम्। अयच्छत्। ईशानऽकृत्। दाशुषे। दशस्यन्। तुर्वीतये। गाधम्। तुर्वणिः। करिति कः॥११॥

पदार्थः-**(अस्य)** सभाद्यध्यक्षस्य सूर्य्यस्य वा **(इत्)** अपि **(उ)** वितर्के **(त्वेषसा)** विद्यान्यायबलप्रकाशेन कान्त्या वा **(रन्त)** रमन्ते। अत्र लङि **बहुलं छन्दसि** इति शपो लुक्। **(सिन्धवः)** समुद्रनदीवत् कठिनावगाहाः शत्रवः **(परि)** सर्वतः **(यत्)** येन **(वज्रेण)** शस्त्रसमूहेन छेदनाकर्षणादिगुणैः **(सीम्)** सेनाम् **(अयच्छत्)** यच्छेत् **(ईशानकृत्)** ईशानानैश्वर्यवतः करोतीति **(दाशुषे)** दानकरणशीलाय **(दशस्यन्)** दशति येन तद्दशस्तदिवाचरतीति। अत्र दंश धातोरसुन् प्रत्ययः स च चित्। तत **उपमानादाचारे**

(अष्टा०३.१.१०) इति क्यच्। **(तुर्वीतये)** तुराणां शीघ्रकारिणां व्याप्तिस्तस्यै **(गाधम्)** विलोडनम् **(तुर्वणिः)** यस्तुरः शीघ्रकरान् वनति सम्भजति सः **(कः)** करोति। अयमडभावेन लुङ्प्रयोगः॥११॥

अन्वयः-अस्य सभाद्यध्यक्षस्य त्वेषसा सह वर्त्तमानाः शूराः स्तनयित्नव इव रन्तो रमन्ते यद्यः सिन्धव इव सीं वज्रेण शत्रुसेनाः पर्यच्छत्सर्वतो निगृह्णाति य ईशानकृत् तुर्वीतये दाशुषे दशस्यन् तुर्वणिः शत्रुबलं गाधं कः करोति स सेनाध्यक्षत्वमर्हति॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो मनुष्यो यस्य सभाद्यध्यक्षस्य सहायेन शत्रून् विजित्य पृथिवीराज्यं संसेव्य सुखी प्रतापी भवति, स सर्वेषां शत्रूणां विलोडनं कर्त्तुमर्हति॥११॥

पदार्थः-**(अस्य)** इस सभाध्यक्ष के **(त्वेषसा)** विद्या, न्याय, बल के प्रकाश के साथ जो वर्त्तमान शूरवीर बिजुली के समान **(रन्त)** रमण करते हैं **(सिन्धवः)** समुद्र के समान **(वज्रेण)** शस्त्र से **(सीम्)** सब प्रकार शत्रु की सेनाओं को **(पर्यच्छत्)** निग्रह करता है, वह **(दाशुषे)** दानशील मनुष्य के **(ईशानकृत्)** ऐश्वर्ययुक्त करने वाला **(तुर्वीतये)** शीघ्र करने वालों के लिये **(दशस्यन्)** दशन के समान आचरण करता हुआ **(तुर्वणिः)** शीघ्र करने वालों को सेवन करने वाला मनुष्य **(गाधम्)** शत्रुओं का विलोडन **(कः)** करता है॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सभाध्यक्ष वा सूर्य के सहाय से शत्रु वा मेघादिकों को जीत कर पृथिवी राज्य का सेवन कर सुखी और प्रतापी होता है, वह सब शत्रुओं के बिलोड़ने को योग्य है॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै॥१२॥

अस्मै। इत्। ऊम् इति। प्र। भर। तूतुजानः। वृत्राय। वज्रम्। ईशानः। कियेधाः। गोः। न। पर्व। वि। रद। तिरश्चा। इष्यन्। अर्णांसि। अपाम्। चरध्यै॥१२॥

पदार्थः-**(अस्मै)** वक्ष्यमाणाय **(इत्)** अपि **(उ)** उक्तार्थे **(प्र)** प्रकृष्टतया **(भर)** धर **(तूतुजानः)** त्वरमाणः **(वृत्राय)** मेघायेव शत्रवे **(वज्रम्)** शस्त्रसमूहम् **(ईशानः)** ऐश्वर्यवानैश्वर्यहेतुर्वा **(कियेधाः)** कियतो गुणान् धरतीति **(गोः)** वाचः **(न)** इव **(पर्व)** अङ्गमङ्गम् **(वि)** विशेषार्थे **(रद)** संसेध **(तिरश्चा)** तिर्यग्गत्या **(इष्यन्)** जानन् **(अर्णांसि)** जलानि **(अपाम्)** जलानाम् **(चरध्यै)** चरितुं भक्षितुं गन्तुम्॥१२॥

अन्वयः-हे सभाद्यध्यक्ष! कियेधा ईशानस्तूतुजानस्त्वं सूर्योऽपामर्णांसि चरध्यै निपातयन् वृत्रायेवास्मै शत्रवे वृत्राय वज्रं प्रभर तिरश्चा वज्रेण गोर्न वाचो विभागमिव तस्य पर्वाङ्गमङ्गं छेत्तुमिष्यन्निदु विरद विविधतया हिन्धि॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे सेनेश! त्वं यथा प्राणवायुना ताल्वादिषु ताडनं कृत्वा भिन्नान्यक्षराणि पदानि विभज्यन्ते, तथैव शत्रोर्बलं छिन्नं भिन्नं कृत्वाङ्गानि विभक्तानि कृत्वैवं विजयस्व॥१२॥

पदार्थः-हे सभाध्यक्ष **(कियेधाः)** कितने गुणों को धारण करने वाला **(ईशानः)** ऐश्वर्ययुक्त **(तूतुजानः)** शीघ्र करनेहारे आप जैसे सूर्य्य **(अपाम्)** जलों के सम्बन्ध से **(अर्णांसि)** जलों के प्रवाहों को **(चरध्यै)** बहाने के अर्थ **(वृत्राय)** मेघ के वास्ते वर्त्तता है, वैसे **(अस्मै)** इस शत्रु के वास्ते शस्त्र को **(प्र)** अच्छे प्रकार **(भर)** धारण कर **(तिरश्चा)** टेढ़ी गति वाले वज्र से **(गोर्न)** वाणियों के विभाग के समान **(पर्व)** उस के अङ्ग-अङ्ग को काटने को **(इष्यन्)** इच्छा करता हुआ **(इदु)** ऐसे ही **(विरद)** अनेक प्रकार हनन कीजिये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे सेनापते! आप जैसे प्राणवायु से तालु आदि स्थानों में जीभ का ताड़न कर भिन्न-भिन्न अक्षर वा पदों के विभाग प्रसिद्ध होते हैं, वैसे ही सभाध्यक्ष शत्रु के बल को छिन्न-भिन्न और अङ्गों को विभाग युक्त करके इसी प्रकार शत्रुओं को जीता करे॥१२॥

पुनः स सभाध्यक्षः किं कुर्य्यादित्युपदिश्यते॥

फिर वह सभाध्यक्ष क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः।
युधे यदिष्णान आयुधान्यृधायमाणो निरिणाति शत्रून्॥१३॥

अस्य। इत्। ऊम् इति। प्र। ब्रूहि। पूर्व्याणि। तुरस्य। कर्माणि। नव्यः। उक्थैः। युधे। यत्। इष्णानः। आयुधानि। ऋघायमाणः। निऽरिणाति। शत्रून्॥१३॥

पदार्थः-(**अस्य**) सभाद्यध्यक्षस्य **(इत्)** अपि **(उ)** आकाङ्क्षायाम् **(प्र)** प्रत्यक्षे **(ब्रूहि)** कथय **(पूर्व्याणि)** पूर्वैः कृतानि **(तुरस्य)** त्वरमाणस्य **(कर्माणि)** कर्त्तुं योग्यानि कर्त्तुरीप्सिततमानि **(नव्यः)** नवान्येव नव्यानि नूतनानि **(उक्थैः)** वक्तुं योग्यैः वचनैः **(युधे)** युध्यन्ति अस्मिन् संग्रामे तस्मै **(यत्)** यः **(इष्णानः)** अभीक्ष्णं निष्पादयन् शोधयन् **(आयुधानि)** शतघ्नीभुशुण्ड्यस्यादीनि शस्त्राणि, आग्नेयादीन्यस्त्राणि वा **(ऋघायमाणः)** ऋघो हिंसित इवाचरति। अत्र रघधातो बाहुलकाद् औणादिकोऽन् प्रत्ययः। सम्प्रसारणं च तत आचारे क्यङ्। **(निरिणाति)** नित्यं हिनस्ति **(शत्रून्)** वैरिणो दुष्टान्॥१३॥

अन्वयः-हे विद्वन्! यद्यः सभाद्यध्यक्षो यथर्घायमाण आयुधानीष्णानो नव्यो युधे शत्रून् निरिणाति तस्य तुरस्येदुक्थैः पूर्व्याणि नव्यानि च कर्माणि करोति तथा त्वं प्रब्रूहि॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सभाद्यध्यक्षादीनां विद्याविनयशत्रुपराजयकरणादीनि कर्माणि प्रशंस्योत्साह्यैते सदा सत्कर्त्तव्याः। एतै राजपुरुषैः शस्त्रास्त्रशिक्षाशिल्पकुशलान् सेनास्थान् वीरान् सङ्गृह्य शत्रून् पराजित्य प्रजाः सततं संरक्ष्या॥१३॥

पदार्थः-हे विद्वन् मनुष्य! **(यत्)** जो सभा आदि का पति जैसे **(ऋघायमाणः)** मरे हुए के समान आचरण करने वाले **(आयुधानि)** तोप, बन्दूक, तलवार आदि शस्त्र-अस्त्रों को **(इष्णानः)** नित्य-नित्य सम्हालते और शोधते हुए **(नव्यः)** नवीन शस्त्रास्त्र विद्या को पढ़े हुए आप **(युधे)** संग्राम में **(शत्रून्)** दुष्ट शत्रुओं को **(निरिणाति)** मारते हो उस **(तुरस्य)** शीघ्रतायुक्त **(अस्य)** सभापति आदि के **(इत्)** ही **(उक्थैः)** कहने योग्य वचनों से **(पूर्व्याणि)** प्राचीन सत्पुरुषों ने किये **(कर्माणि)** करने योग्य और करने वाले को अत्यन्त इष्ट कर्मों को करता है, वैसे **(प्र ब्रूहि)** अच्छे प्रकार कहो॥१३॥

भावार्थः-मनुष्यों को चाहिये कि सभाध्यक्ष आदि के विद्या, विनय, न्याय और शत्रुओं को जीतना आदि कर्मों की प्रशंसा करके और उत्साह देकर इन को सदा सत्कार करें तथा इन सभाध्यक्ष आदि राजपुरुषों से शस्त्रास्त्र चलाने की शिक्षा और शिल्पविद्या की चतुराई को प्राप्त हुए सेना में रहने वाले वीर पुरुषों के साथ शत्रुओं को जीत कर प्रजा की निरन्तर रक्षा करें॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः॥१४॥

अस्य। इत्। ऊम् इति। भिया। गिरयः। च। दृळ्हाः। द्यावा। च। भूम। जनुषः। तुजेते इति। उपो इति। वेनस्य। जोगुवानः। ओणिम्। सद्यः। भुवत्। वीर्याय। नोधाः॥१४॥

पदार्थः-**(अस्य)** सभाद्यध्यक्षस्य **(इत्)** (उ) पादपूरणार्थौ **(भिया)** भयेन **(गिरयः)** मेघाः। **गिरिरिति मेघनामसु पठितम्।** (निघं०१.१०) **(च)** शत्रूणां समुच्चये **(दृढाः)** स्थिराः कृता **(द्यावा)** द्यौः प्रकाशः। अत्र **सुपां सुलुग्०** इत्याकारादेशः। **(च)** समुच्चये **(भूम)** भवेम **(जनुषः)** जनाः **(तुजेते)** हिंस्तः **(उपो)** समीपे **(वेनस्य)** मेधाविनः। **वेन इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(जोगुवानः)** पुनः पुनरव्यक्तशब्दं कुर्वन् **(ओणिम्)** दुःखान्धकारस्यापनयनम् **(सद्यः)** शीघ्रम् **(भुवत्)** भवति **(वीर्याय)** पराक्रमसम्पादनाय **(नोधाः)** नायकान् प्राप्तिकरान् धरन्तीति। अत्र णीञ् धातोर्बाहुलकादौणादिको डो प्रत्ययस्तदुपपदाड्डुधाञ्धातोश्च क्विप्॥१४॥

अन्वयः-यो जोगुवानो नोधाः सभाध्यक्षः सद्यो वीर्याय भुवद् यथा सूर्याद् दृढा गिरयो मेघा इवाऽस्य वेनस्येदु भिया च शत्रवः कम्पन्ते यथा द्यावा च तुजेते इव जनुषो भयं प्राप्नुवन्ति नोपो भूम स ओणिमाप्नोति॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। न किल विद्यादिसद्गुणैरीश्वरेण जगदुत्पादितेन विना सभाद्यध्यक्षादयः प्रजाः पालयितुं यथा सूर्यः सर्वाल्लोकान् प्रकाशयितुं धर्तुं च शक्नोति तस्माद्विद्याद्युत्तमगुणग्रहण-परेशस्तवनं च कार्यम्॥१४॥

पदार्थः-जो (**जोगुवानः**) अव्यक्त शब्द करने (**नोधाः**) सेना का नायक सभा आदि का अध्यक्ष (**सद्यः**) शीघ्र (**वीर्य्याय**) पराक्रम के सिद्ध करने के लिये (**भुवत्**) हो जैसे सूर्य से (**दृढाः**) पुष्ट (**गिरयः**) मेघ के समान (**अस्य**) इस (**वेनस्य**) मेधावी के (**इत्**) (उ) ही (**भिया**) भय से (**च**) शत्रुजन कम्पायमान होते हैं, जैसे (**द्यावा**) प्रकाश (**च**) और भूमि (**तुजेते**) कांपते हैं, वैसे (**जनुषः**) मनुष्य लोग भय को प्राप्त होते हैं, वैसे हम लोग उस सभाध्यक्ष के (**उपो**) निकट भय को प्राप्त न (**भूम**) हों और वह सभाध्यक्ष भी (**ओणिम्**) दुःख को दूरकर सुख को प्राप्त होता है॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यह सबको निश्चय समझना चाहिये कि विद्या आदि उत्तम गुण तथा ईश्वर से जगत् के उत्पन्न होने विना सभाध्यक्ष आदि प्रजा का पालन करने और जैसे सूर्य सब लोकों को प्रकाशित तथा धारण करने को समर्थ नहीं हो सकता। इसलिये विद्या आदि श्रेष्ठगुणों और परमेश्वर ही की प्रशंसा और स्तुति करना उचित है॥१४॥

पुनः सभाध्यक्षविद्युतौ कीदृशावित्युपदिश्यते॥

फिर उक्त सभाध्यक्ष और विद्युत् कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मा इदु त्यदनु दाय्येषामेको यद्वन्वे भूरेरीशानः।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः॥१५॥

अस्मै। इत्। ऊम् इति। त्यत्। अनु। दायि। एषाम्। एकः। यत्। वन्वे। भूरेः। ईशानः। प्र। एतशम्। सूर्ये। पस्पृधानम्। सौवश्व्ये। सुस्विम्। आवत्। इन्द्रः॥१५॥

पदार्थः-(**अस्मै**) उक्ताय (**इत्**) अपि (**उ**) वितर्के (**त्यत्**) तम् (**अनु**) पश्चात् (**दायि**) दीयते (**एषाम्**) मनुष्याणां लोकानां वा (**एकः**) अनुत्तमोऽसहायः (**यत्**) यम् (**वन्वे**) याचते (**भूरेः**) बहुविधस्यैश्वर्यस्य (**ईशानः**) अधिपतिः (**प्र**) प्रकृष्टे (**एतशम्**) अश्वम्। **एतश इत्यश्वनामसु पठितम्।** (निघं०१.१४) (**सूर्ये**) सवितृप्रकाशे (**पस्पृधानम्**) पुनः पुनः स्पर्द्धमानम् (**सौवश्व्ये**) शोभना अश्वास्तुरङ्गा विद्यन्ते यासु सेनासु ते स्वश्वास्तेषां भावे (**सुष्विम्**) शोभनैश्वर्यप्रदम् (**आवत्**) रक्षेत् (**इन्द्रः**) सभाद्यध्यक्षः॥१५॥

अन्वयः-यथा विद्वद्भिरेषां सुखं दायि तथा य एको भूरेरीशान इन्द्रः सूर्ये इव यद्यं सौवश्व्ये पस्पृधानं सुष्विमेतशमनुवन्वे याचतेत्यत्तमस्मा इदु सभाद्यध्यध्यक्षाय प्रावत् स सभामर्हति॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यो बहुसुखदाताऽश्वविद्याविदनुपमपुरुषार्थी विद्वान् मनुष्योऽस्ति स एव रक्षणे नियोजनीयः, विद्युद्विद्या च संग्राह्या॥१५॥

पदार्थः-जैसे विद्वानों ने **(एषाम्)** इन मनुष्यादि प्राणियों को सुख **(दायि)** दिया हो वैसे जो **(एकः)** उत्तम से उत्तम सहाय रहित **(भूरेः)** अनेक प्रकार के ऐश्वर्य्य का **(ईशानः)** स्वामी **(इन्द्रः)** सभा आदि का पति **(सूर्ये)** सूर्य्यमण्डल में है वैसे **(सौवश्व्ये)** उत्तम-उत्तम घोड़े से युक्त सेना में **(यत्)** जिस **(पस्पृधानम्)** परस्पर स्पर्द्धा करते हुए **(सुष्विम्)** उत्तम ऐश्वर्य्य के देने वाले **(एतशम्)** घोड़े की **(अनुवन्ने)** यथायोग्य याचना करता है **(त्यत्)** उसको **(अस्मै)** इस **(इदु)** सभाध्यक्ष ही के लिये **(प्रावत्)** अच्छे प्रकार रक्षा करता है, वह सभा के योग्य होता है॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को उचित है कि जो बहुत सुख देने तथा घोड़ों की विद्या को जानने वाला और उपमारहित पुरुषार्थी विद्वान् मनुष्य है, उसी को प्रजा की रक्षा करने में नियुक्त करें और बिजुली की विद्या का ग्रहण भी अवश्य करें॥१५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन्।
एषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात्॥ १६॥ २९॥ ४॥

एव। ते। हारिऽयोजन। सुऽवृक्ति। इन्द्र। ब्रह्माणि। गोतमासः। अक्रन्। आ। एषु। विश्वऽपेशसम्। धियम्। धाः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ १६॥

पदार्थः-**(एव)** अवधारणार्थे **(ते)** तुभ्यम् **(हारियोजन)** यो हरीन् तुरङ्गानग्न्यादीन् वा युनक्ति स एव तत्सम्बुद्धौ **(सुवृक्ति)** सुष्ठु वृक्तयो वर्जिता दोषा येभ्यस्तानि **(इन्द्र)** परमैश्वर्य्यप्रापक **(ब्रह्माणि)** बृहत्सुखकारकाण्यन्नानि **(गोतमासः)** गच्छन्ति स्तुवन्ति सर्वाविद्यास्तेऽतिशयिताः। **गौरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) **(अक्रन्)** कुर्य्युः **(आ)** समन्तात् **(एषु)** स्तोतृषु **(विश्वपेशसम्)** विश्वानि सर्वाणि पेशांसि रूपाणि यस्यां ताम् **(धियम्)** धारणावतीं प्रज्ञाम् **(धाः)** धर **(प्रातः)** प्रतिदिनम् **(मक्षु)** शीघ्रम् **(धियावसुः)** यः प्रज्ञाकर्मभ्यां सह वसति सः **(जगम्यात्)** भृशं प्राप्नुयात्॥१६॥

अन्वयः-हे हारियोजनेन्द्र सभाद्यध्यक्ष! धियावसुर्भवान् यद्येषु विद्याऽध्येतृषु जनेषु विश्वपेशसं धियं प्रातर्मक्ष्वाधास्तर्हि सर्वा विद्या जगम्यात् प्राप्नुयात्। ये गोतमासः संस्तोतारस्ते तुभ्यमेव सुवृक्ति सुष्ठु वर्जितदोषाण्यभिसंस्कृतानि ब्रह्माणि बृहत्सुखकारकाण्यन्नान्यक्रँस्तान् सुसेवताम्॥१६॥

भावार्थः-परोपकारिभिर्विद्वद्भिर्नित्यं प्रयत्नेन सुशिक्षाविद्यादानाभ्यां सर्वे मनुष्याः सुशिक्षिता विद्वांसः सम्पादनीयाः। एते चाध्यापकान् विदुषो मनोवाक्कर्मभिः सत्कृत्य सुसंस्कृतैरन्नादिभिर्नित्यं

सेवन्ताम्। नहि कश्चिदपि विद्यादानग्रहणाभ्यामुत्तमो धर्मोऽस्ति तस्मात् सर्वैः परस्परं प्रीत्या विद्योन्नतिः सदा कार्य्या॥१६॥

अस्मिन् सूक्ते सभाद्यध्यक्षाऽग्निविद्याप्रचारकरणाद्युक्तमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीत्यवगन्तव्यम्॥

इति चतुर्थोऽध्याय ४ एकषष्टितमं ६१ सूक्तमेकोनत्रिंशो २९ वर्गश्च समाप्तः॥

पदार्थः-हे **(हारियोजन)** यानों में घोड़े वा अग्नि आदि पदार्थ युक्त होने वालों को पढ़ने वा जानने वाले **(इन्द्र)** परम ऐश्वर्य के प्राप्त कराने वाले **(धियावसुः)** बुद्धि और कर्म के निवास करने वाले आप जो **(एषु)** इन स्तुति तथा विद्या पढ़ने वाले मनुष्यों में **(विश्वपेशसम्)** सब विद्यारूप गुणयुक्त **(धियम्)** धारणा वाली बुद्धि को **(प्रातः)** प्रतिदिन **(मक्षु)** शीघ्र **(आधाः)** अच्छे प्रकार धारण करते हो तो जिन को ये सब विद्या **(जगम्यात्)** वार-वार प्राप्त होवें **(गोतमासः)** अत्यन्त सब विद्याओं की स्तुति करने वाले **(ते)** आप के लिये **(एव)** ही **(सुवृक्ति)** अच्छे प्रकार दोषों को अलग करने वाले शुद्धि किये हुए **(ब्रह्माणि)** बड़े-बड़े सुख करने वाले अन्नों को देने के लिये **(अक्रन्)** सम्पादन करते हैं, उनकी अच्छे प्रकार सेवा कीजिये॥१६॥

भावार्थः-परोपकारी विद्वानों को उचित है कि नित्य प्रयत्नपूर्वक अच्छी शिक्षा और विद्या के दान से सब मनुष्यों को अच्छी शिक्षा से युक्त विद्वान् करें। तथा इतर मनुष्यों को भी चाहिये कि पढ़ाने वाले विद्वानों को अपने निष्कपट मन, वाणी और कर्मों से प्रसन्न करके ठीक-ठीक पकाए हुए अन्न आदि पदार्थों से नित्य सेवा करें। क्योंकि पढ़ने और पढ़ाने से पृथक् दूसरा कोई उत्तम धर्म नहीं है, इसलिये सब मनुष्यों को परस्पर प्रीतिपूर्वक विद्या की वृद्धि करनी चाहिये॥१६॥

इस सूक्त में सभाध्यक्ष आदि का वर्णन और अग्निविद्या का प्रचार करना आदि कहा है, इससे इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह उनतीसवाँ २९ वर्ग चौथा अध्याय ४ इकसठवाँ ६१ सूक्त समाप्त हुआ।

इति श्रीयुत्परिव्राजकाचार्य्येण श्रीयुतमहाविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्ते ऋग्वेदभाष्ये चतुर्थोऽध्यायः समाप्तिमगात्॥

॥ओ३म्॥

अथ ऋग्वेदभाष्ये प्रथमोऽष्टकः॥

अथ पञ्चमाध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ त्रयोदशर्चस्य द्विषष्टितमस्य सूक्तस्य गौतमो नोधा ऋषिः। इन्द्रो देवता। १,४,६ विराडार्षी त्रिष्टुप्। २,५,९ निचृदार्षी त्रिष्टुप्। १०-१३ आर्षी त्रिष्टुप्छन्दः १-२, ४-६, ९-१३ धैवतः स्वरः। भुरिगार्षी पङ्क्तिश्छन्दः। ३,७,८ पञ्चमः स्वरः॥

अथेश्वरसभाध्यक्षगुणा उपदिश्यन्ते॥

अब पांचवे अध्याय का आरम्भ किया जाता है, इसके प्रथम सूक्त के प्रथम मन्त्र में ईश्वर और सभाध्यक्ष के गुणों का वर्णन किया है॥

प्र म॑न्महे शवसा॒नाय॑ शू॒षमा॑ङ्गू॒षं गिर्व॑णसे अङ्गि॒र॒स्वत्।
सु॒वृ॒क्तिभि॑: स्तुव॒त ऋ॑ग्मि॒यायार्चा॑मा॒र्कं नरे॒ विश्रु॑ताय॥ १॥

प्र। म॒न्म॒हे॒। श॒व॒सा॒नाय॑। शू॒षम्। आ॒ङ्गू॒षम्। गिर्व॑णसे। अ॒ङ्गि॒र॒स्वत्। सु॒वृ॒क्तिऽभि॑:। स्तु॒व॒ते॒। ऋ॒ग्मि॒याय॑। अर्चा॑म। अ॒र्कम्। नरे॑। विऽश्रु॑ताय॥ १॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**मन्मन्हे**) मन्यामहे याचामहे वा। अत्र **बहुलं छन्दसि** इति श्यनो लुक्। **मन्मह इति याञ्चाकर्मसु पठितम्।** (निघं०३.१९) (**शवसानाय**) ज्ञानबलयुक्ता। **छन्दस्यसानच् शुजृभ्याम्।** (उणा०२.८६) अनेनायं सिद्धः। (**शूषम्**) बलम् (**आङ्गूषम्**) विज्ञानं स्तुतिसमूहं वा। अत्र बाहुलकादगिधातोरौणादिक ऊषन् प्रत्ययः। अङ्गूषाणां विदुषामिदं विज्ञानमयं स्तुतिसमूहो वेति। **तस्येदम्** इत्यण। **आङ्गूष इति पदनामसु च।** (निघं०४.२) (**गिर्वणसे**) गीर्भिः स्तोतुमर्हाय (**अङ्गिरस्वत्**) प्राणानां बलमिव (**सुवृक्तिभिः**) सुष्ठु वृक्तयो दोषवर्जनानि याभ्यस्ताभिः (**स्तुवते**) सत्यस्य स्तावकाय (**ऋग्मियाय**) ऋग्भिर्यो मीयते स्तूयते तस्मै। अत्र ऋगुपपदान्मा धातोर्बाहुलकादौणादिको डियच् प्रत्ययः। (**अर्चाम**) पूजयेम (**अर्कम्**) अर्चनीयम् (**नरे**) नयनकर्त्रे (**विश्रुताय**) यो विविधैर्गुणैः श्रूयते तस्मै॥ १॥

अन्वयः-हे विद्वांसो! यथा वयं सुवृक्तिभिः शवसानाय गिर्वणस ऋग्मियाय नरे विश्रुताय स्तुवते सभाद्यध्यक्षायाऽङ्गिरस्वच्छूषमर्कमाङ्गूषमर्चाम प्रमन्महे च तथा यूयमप्याचरत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा परमेश्वरं स्तुत्वा प्रार्थयित्वोपास्य सुखं लभते तथा सभाद्यध्यक्षमाश्रित्य व्यावहारिकपारमार्थिके सुखे संप्रापणीये इति ॥ १॥

पदार्थः-हे विद्वान् लोगो! जैसे हम **(सुवृक्तिभिः)** दोषों को दूर करनेहारी क्रियाओं से **(शवसानाय)** ज्ञान बलयुक्त **(गिर्वणसे)** वाणियों से स्तुति के योग्य **(ऋग्मियाय)** ऋचाओं से प्रसिद्ध **(नरे)** न्याय करने **(विश्रुताय)** अनेक गुणों के सह वर्त्तमान होने के कारण श्रवण करने योग्य **(स्तुवते)** सत्य की प्रशंसावाले सभाध्यक्ष के लिये **(अङ्गिरस्वत्)** प्राणों के बल के समान **(शूषम्)** बल और **(अर्कम्)** पूजा करने योग्य **(आङ्गूषम्)** विज्ञान और स्तुति समूह को **(अर्चाम्)** पूजा करें और **(प्र मन्महे)** मानें और उससे प्रार्थना करें, वैसे तुम भी किया करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे परमेश्वर की स्तुति, प्रार्थना और उपासना से सुख को प्राप्त होते हैं, वैसे सभाध्यक्ष के आश्रय से व्यवहार और परमार्थ के सुखों को सिद्ध करें॥१॥

पुनर्मनुष्यैरेतद्विषये किं कर्त्तव्यमित्युपदिश्यते॥

फिर मनुष्यों को इस विषय में क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र वो॑ म॒हे मह्यर्नमो॑ भरध्वमाङ्गू॒ष्यं॑ शवसा॒नाय॒ साम॑।
येना॑ न॒: पूर्वे॑ पि॒तर॑: पद॒ज्ञा अर्च॑न्तो॒ अङ्गि॑रसो॒ गा अवि॑न्दन्॥२॥

प्र। व॒:। म॒हे। मह्यि॑। नम॑:। भ॒र॒ध्व॒म्। आ॒ङ्गू॒ष्य॑म्। श॒व॒सा॒नाय॑। साम॑। येन॑। न॒:। पूर्वे॑। पि॒तर॑:। प॒द॒ऽज्ञा:। अर्च॑न्त:। अङ्गि॑रस:। गा:। अवि॑न्दन्॥२॥

पदार्थः-**(प्र)** प्रकृष्टार्थे **(वः)** युष्माकम् **(महे)** महते **(महि)** महत् **(नमः)** नमस्करणमन्नं वा **(भरध्वम्)** धरध्वम् **(आङ्गूष्यम्)** अङ्गूषाणां विज्ञानानां भावस्तम् **(शवसानाय)** ज्ञानवते **(साम)** स्यन्ति खण्डयन्ति दुःखानि येन तत्। अत्र **सर्वधातुभ्यो मनिन्** (उणा०४.१४६) इति करणकारके मनिन्। **(येन)** पूर्वोक्तेन। अत्रा**न्येषामपी**ति दीर्घः। **(नः)** अस्माकम् **(पूर्वे)** पूर्वं विद्या अधीतवन्तोऽनूचाना विद्वांसः **(पितरः)** ये पान्ति पितृवत् रक्षन्ति विद्यासुशिक्षादिदानैस्ते **(पदज्ञाः)** ये पदानि प्राप्तव्यानि धर्मार्थकाममोक्षाख्यानि साधितुं साधयितुं वा जानन्ति ते **(अर्चन्तः)** सत्कुर्वन्तः **(अङ्गिरसः)** प्राणादिविद्याविदः **(गाः)** विद्याप्रकाशयुक्ता वाचः **(अविन्दन्)** प्राप्नुयुः। अत्र **लिडर्थे लङ्**॥२॥

अन्वयः-हे मनुष्याः! ये वो युष्माकं नोऽस्माकं चाङ्गिरसः पदज्ञा महे महते शवसानाय सभाद्यध्यक्षाय महि महत्सामाङ् गूष्यं नमश्चार्चन्तः सन्तः पूर्वे पितरो येन गा अविन्दन् प्राप्नुयुस्तान् यूयं प्रभरध्वम्॥२॥

भावार्थः-हे मनुष्याः! यथा विद्वांसो वेदसृष्टिक्रमप्रत्यक्षादिप्रमाणैः प्रतिपादितेन धर्म्येण मार्गेण गच्छन्तः सन्तः परमात्मानमभ्यर्च्य सर्वहितं धरन्ति, तथैव यूयमपि समवतिष्ठध्वम्॥२॥

पदार्थः–हे मनुष्यो! जो **(वः)** तुम वा **(नः)** हम लोगों को **(अङ्गिरसः)** प्राणादि विद्या और **(पदज्ञाः)** धर्म, अर्थ, काम और मोक्ष को जाननेवाले **(महे)** बड़े **(शवसानाय)** ज्ञान बलयुक्त सभाध्यक्ष के लिये **(महि)** बहुत **(साम)** दुःखनाश करनेवाले **(आङ्गूष्यम्)** विज्ञानयुक्त **(नमः)** नमस्कार वा अन्न का **(अर्चन्तः)** सत्कार करते हुए **(पूर्वे)** पहिले सब विद्याओं को पढ़ते हुए **(पितरः)** विद्यादि सद्गुणों से रक्षा करनेवाले विद्वान् लोग **(येन)** जिस विज्ञान वा कर्म से **(गाः)** विद्या प्रकाशयुक्त वाणियों को **(अविन्दन्)** प्राप्त हों, उनका तुम लोग **(प्रभरध्वम्)** भरण-पोषण सदा किया करो॥ २॥

भावार्थः–हे मनुष्यो! जैसे विद्वान् लोग जिन वेद, सृष्टिक्रम और प्रत्यक्षादि प्रमाणों से कहे हुए धर्मयुक्त मार्ग से चलते हुए सब प्रकार परमेश्वर का पूजन करके सबके हित को धारण करते हैं, वैसे ही तुम लोग भी करो॥ २॥

पुनर्मनुष्यैरेतत्किमर्थमनुष्ठेयमित्युपदिश्यते॥

फिर मनुष्यों को पूर्वोक्त कृत्य किसलिये करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम्।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः॥ ३॥

इन्द्रस्य। अङ्गिरसाम्। च। इष्टौ। विदत्। सरमा। तनयाय। धासिम्। बृहस्पतिः। भिनत्। अद्रिम्। विदत्। गाः। सम्। उस्रियाभिः। वावशन्त। नरः॥ ३॥

पदार्थः–**(इन्द्रस्य)** परमैश्वर्यवतः सभाद्यध्यक्षस्य **(अङ्गिरसाम्)** विद्याधर्मराज्यप्राप्तिमतां विदुषाम्। **अङ्गिरस इति पदनामसु पठितम्।** (निघं०५.५) **(च)** समुच्चये **(इष्टौ)** इष्टसाधिकायां नीतौ **(विदत्)** प्राप्नुयात्। अत्र **लिडर्थे लङडभावश्च। (सरमा)** यथा सरान् विद्याधर्मबोधान् मिमीते तथा। **आतोऽनुपसर्गे कः।** (अष्टा०३.२.३) इति कः प्रत्ययः **(तनयाय)** सन्तानाय **(धासिम्)** अन्नादिकम्। **धासिमित्यन्ननामसु पठितम्।** (निघं०२.७) **(बृहस्पतिः)** बृहतां पतिः पालयिता सभाद्यध्यक्षः **(भिनत्)** भिनत्ति। अत्र लडर्थे लङडभावश्च। **(अद्रिम्)** मेघम् **(विदत्)** प्राप्नोति। अस्याऽपि सिद्धिः पूर्ववत्। **(गाः)** पृथिवीः **(सम्)** सम्यगर्थे **(उस्रियाभिः)** किरणैः **(वावशन्त)** पुनः पुनः प्रकाशयन्त **(नरः)** ये नृणन्ति नयन्ति ते मनुष्यास्तत्सम्बुद्धौ॥ ३॥

अन्वयः–हे नरो मनुष्याः! यथा सरमा माता तनयाय धासिं विदत् प्राप्नोति यथा बृहस्पतिः सभाद्यध्यक्षो यथा सूर्य उस्रियाभिः किरणैरद्रिं भिनद्विदृणति यथा गा विदत् प्राप्नोति तथैव यूयमपीन्द्रस्याङ्गिरसां चेष्टौ विद्यादिसद्गुणान् संवावशन्त पुनः पुनः सम्यक् प्रकाशयन्तः, यतः सर्वस्मिन् जगत्यविद्यादिदुष्टगुणा नश्येयुः॥ ३॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्मातृवत्प्रजायां वर्त्तित्वा सूर्यवद् विद्यादिसद्गुणान् प्रकाश्येश्वरोक्तायां विद्वदनुष्ठितायां नीतौ स्थित्वा सर्वोपकारं कर्म कृत्वा सदा सुखयितव्यम्॥ ३॥

पदार्थः-हे **(नरः)** सुखों को प्राप्त करानेवाले मनुष्यो! जैसे **(सरमा)** विद्या धर्मादिबोधों को उत्पन्न करनेवाली माता **(तनयाय)** पुत्र के लिये **(धासिम्)** अन्न आदि अच्छे पदार्थों को **(विदत्)** प्राप्त करती है। जैसे **(बृहस्पतिः)** बड़े-बड़े पदार्थों को रक्षा करनेवाला सभाध्यक्ष जैसे सूर्य **(उस्रियाभिः)** किरणों से **(अद्रिम्)** मेघ को **(भिनत्)** विदारण और जैसे **(गाः)** सुशिक्षित वाणियों को **(विदत्)** प्राप्त करता है, वैसे तुम भी **(इन्द्रस्य)** परमैश्वर्यवाले परमेश्वर, सभाध्यक्ष वा सूर्य **(च)** और **(अङ्गिरसाम्)** विद्या, धर्म और राज्यवाले विद्वानों की **(इष्टौ)** इष्ट की सिद्ध करनेवाली नीति में विद्यादि उत्तम गुणों का **(संवावशन्त)** अच्छे प्रकार वार-वार प्रकाश करो, जिससे सब संसार में अविद्यादि दुष्ट गुण नष्ट हों॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को उचित है कि माता के समान प्रजा में वर्त्त, सूर्य के समान विद्यादि उत्तम गुणों का प्रकाश कर, ईश्वर की कही वा विद्वानों से अनुष्ठान की हुई नीति में स्थित हो और सबके उपकार को करते हुए विद्यादि सद्गुणों के आनन्द में सदा मग्न रहें॥३॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्युपदिश्यते॥

फिर मनुष्यो को कैसे वर्त्तना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः।
सरण्युभिः फलिगमिन्द्र शक्र बलं रवेण दरयो दशग्वैः॥४॥

सः। सुऽस्तुभा। सः। स्तुभा। सप्त। विप्रैः। स्वरेण। अद्रिम्। स्वर्यः। नवऽग्वैः। सरण्युऽभिः। फलिऽगम्। इन्द्र। शक्र। बलम्। रवेण। दरयः। दशऽग्वैः॥४॥

पदार्थः-(**सः**) इन्द्रः **(सुष्टुभा)** सुष्ठु द्रव्यगुणक्रियास्थिरकारकेण **(सः)** उक्तार्थः **(स्तुभा)** स्तोभते स्थिरीकरोति येन तेन **(सप्त)** सप्तसंख्याकानामुदात्तादीनां षड्जादीनां स्वराणां वा मध्यस्थेन केनचित् **(विप्रैः)** मेधाविभिः। विविधान् पदार्थान् प्रान्ति तैः किरणैर्वा **(स्वरेण)** महाशब्देन **(अद्रिम्)** मेघम् **(स्वर्य्यः)** स्वरेषु साधुः **(नवग्वैः)** नवनीतगतिभिः। **नवग्वा नवनीतगतयः।** (निरु०११.११) अत्र नवोपपदाद् गमधातोर्बाहुलकादौणादिको ड्वप्रत्ययः। **(सरण्युभिः)** सर्वेषु शास्त्रेषु विज्ञानगतिभिः। अत्र **सृयुवचि०।** (उणा०३.८१) इति सूत्रेणान्युच् प्रत्ययः। **(फलिगम्)** फलीनां गमयितारं मेघम्। **फलिग इति मेघनामसु पठितम्।** (निघं०१.१०) **(इन्द्र)** परमैश्वर्ययुक्त **(शक्र)** शक्तिमान् **(बलम्)** बलयुक्तं मेघम् **(रवेण)** विद्युतः शब्देन **(दरयः)** विदारय। अत्र **लिडर्थे लडडभावश्च। (दशग्वैः)** ये रश्मयो दश दिशो गच्छन्ति तैः॥४॥

अन्वयः-हे स इन्द्र शक्र सभाद्यध्यक्ष! यस्त्वं नवग्वैर्दशग्वैः सरण्युभिर्विप्रैः सुष्टुभा स्तुभा रवेण सप्त यथा सविता सप्तानां मध्ये वर्त्तमानेन स्वरेणाद्रिं बलं फलिगं हन्ति तथाऽरीन् दरयो विदारयः स त्वं स्वर्यः स्तुत्योऽसि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा स्तनयित्नुः स्वैरुत्तमैर्गुणैर्वर्त्तमानः सन् जीवनहेतुं मेघोत्पत्त्यादिकं कार्य्यं साधयति, तथैव सभाद्यध्यक्षः परमोत्तमैर्विद्याबलयुक्तैः पुरुषैः सह वर्त्तमानेन विद्यान्यायप्रकाशेन सर्वमन्यायं प्रणाश्य दुष्टांश्च निवार्य्य चक्रवर्त्तिराज्यं प्रशिष्यात्॥४॥

पदार्थः-हे **(सः)** वह **(इन्द्र)** परमैश्वर्ययुक्त **(शक्र)** शक्ति को प्राप्त करनेवाले सभाध्यक्ष! जो आप **(नवग्वैः)** नवों से प्राप्त हुई गति वा **(दशग्वैः)** दश दिशाओं में जाने **(सरण्युभिः)** सब शास्त्रों में विज्ञान करनेवाली गतियों से युक्त **(विप्रैः)** बुद्धिमान् विद्वानों के साथ जैसे सूर्य्य **(सुष्टुभा)** उत्तम द्रव्य, गुण और क्रियाओं के स्थिर करने वा **(स्तुभा)** धारण करनेवाले **(रवेण)** शस्त्रों के शब्द से जैसे सूर्य **(सप्त)** सात संख्यावाले स्वरों के मध्य में वर्त्तमान **(स्वरेण)** उदात्तादि वा षड्जादि स्वर से **(अद्रिम्)** बलयुक्त **(फलिगम्)** मेघ का हनन करता है, वैसे शत्रुओं को **(दरयः)** विदारण करते हो **(सः)** आप हम लोगों से **(स्वर्यः)** स्तुति करने योग्य हो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुली उत्तम-उत्तम गुणों से वर्त्तमान हुई जीवन के हेतु मेघ के उत्पन्न करने आदि कार्यों को सिद्ध करती है, वैसे ही सभाध्यक्ष आदि अत्यन्त उत्तम-उत्तम विद्या बल से युक्त पुरुषों के साथ वर्त्त के विद्यारूपी न्याय के प्रकाश से अन्याय वा दुष्टों का निवारण कर चक्रवर्त्ति राज्य का पालन करें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, यह विषय अगले मन्त्र में कहा है॥

गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः॥५॥१॥

गृणानः। अङ्गिरऽभिः। दस्म। वि। वः। उषसा। सूर्येण। गोभिः। अन्धः। वि। भूम्याः। अप्रथयः। इन्द्र। सानु। दिवः। रजः। उपरम्। अस्तभायः॥५॥

पदार्थः-**(गृणानः)** शब्दं कुर्वाणः। अत्र व्यत्ययेनात्मनेपदम्। **(अङ्गिरोभिः)** प्राणैर्बलैः **(दस्म)** उपक्षेतः **(वि)** विशेषार्थे **(वः)** वृणोषि **(उषसा)** दिनप्रमुखेन **(सूर्येण)** सूर्यप्रकाशेन **(गोभिः)** किरणैः **(अन्धः)** अन्नम् **(वि)** विविधार्थे **(भूम्याः)** भूमिषु साधवः **(अप्रथयः)** प्रथय **(इन्द्र)** विदारक **(सानु)** शिखरम् **(दिवः)** प्रकाशस्य **(रजः)** लोकम् **(उपरम्)** मेघम् **(अस्तभायः)** स्तभान। अत्र लडर्थे लङ्॥५॥

अन्वयः-हे इन्द्र! (दस्म) सभाद्यध्यक्ष! गृणानस्त्वमङ्गिरोभिरुषसा सूर्येण गोभिरन्धो विवो वृणोति तथा विद्युद् व्यप्रथयो यथा भूम्या दिवः प्रकाशस्य सानु रजः सर्वं लोकमुपरं मेघं स्तभ्नाति तथा धर्मराज्यसेना विवः शत्रून् व्यस्तभनन् भवानस्माभिः स्तुत्योऽस्ति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। पुरुषैरुषोवत् सूर्यवत्किरणवत् प्राणवच्च सद्गुणान् प्रकाश्य दुष्टनिवारणं कार्यम्। यथा सूर्यः स्वप्रकाशं विस्तार्य मेघमुत्पाद्य वर्षयति, तथैव प्रजासु सद्विद्यामुत्पाद्य सुखवृष्टिः कार्येति॥५॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के **(दस्म)** नाश करनेवाले सभाध्यक्ष! **(गृणानः)** उपदेश करते हुए आप जैसे बिजुली **(अङ्गिरोभिः)** प्राण **(उषसा)** प्रातःकाल के **(सूर्येण)** सूर्य के प्रकाश तथा **(गोभिः)** किरणों से **(अन्धः)** अन्न को प्रकट करती है, वैसे धर्मराज्य और सेना को **(विवः)** प्रकट करो वैसे बिजुली को **(व्यप्रथयः)** विविधप्रकार से विस्तृत कीजिये। जैसे सूर्य **(भूम्याः)** पृथिवी में श्रेष्ठ **(दिवः)** प्रकाश के **(सानु)** ऊपरले भाग **(रजः)** सब लोकों और **(उपरम्)** मेघ को **(अस्तभायः)** संयुक्त करता है, वैसे धर्मयुक्त राज्य की सेना को विस्तारयुक्त कीजिये और शत्रुओं को बन्धन करते हुए आप हम सब लोगों से स्तुति करने के योग्य हो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को प्रातःकाल सूर्य के किरण और प्राणों के समान उक्त गुणों का प्रकाश करके दुष्टों का निवारण करना चाहिये। जैसे सूर्य प्रकाश को फैला और मेघ को उत्पन्न कर वर्षाता है, वैसे ही सभाध्यक्ष आदि मनुष्यों को प्रजा में उत्तम विद्या उत्पन्न करके सुखों की वर्षा करनी चाहिये॥५॥

पुनरस्य कीदृशं कर्म स्यादित्युपदिश्यते॥

फिर भी इस सभाध्यक्ष के कैसे कर्म हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

तदु॒ प्रय॑क्षतममस्य॒ कर्म॑ दु॒स्मस्य॒ चारु॑तममस्ति॒ दंस॑ः।
उ॒प॒ह्वरे॒ यदुप॑रा॒ अपि॑न्व॒न्मध्व॑र्णसो॒ न॒द्य॑श्चतस्रः॥६॥

तत्। ऊ॒म् इति॑। प्रय॑क्षऽतमम्। अ॒स्य॒। कर्म॑। दु॒स्मस्य॑। चारु॑ऽतमम्। अ॒स्ति॒। दंस॑ः। उ॒प॒ऽह्वरे॑। यत्। उप॑राः। अपि॑न्वत्। मधु॑ऽअर्णसः। न॒द्य॑ः। चत॑स्रः॥६॥

पदार्थः-(**तत्**) वक्ष्यमाणम् **(उ)** वितर्के **(प्रयक्षतमम्)** अत्यन्तपूजनीयम् **(अस्य)** सभाध्यक्षस्य **(कर्म)** क्रियमाणम् **(दस्मस्य)** दुःखोपक्षेतुः **(चारुतमम्)** अतीव सुन्दरम् **(अस्ति)** वर्त्तते **(दंसः)** दंसयन्ति पश्यन्ति विद्याः सुखानि च येन कर्मणा तत् **(उपह्वरे)** उपह्वरन्ति कुटिलयन्ति येन तस्मिन् व्यवहारे। अत्र **कृतो बहुलमिति** करणे अच्। **(यत्)** उक्तम् **(उपराः)** दिशः। **उपरा इति दिङ्नामसु पठितम्।** (निघं०१.६) **(अपिन्वत्)** सेवते **(मध्वर्णसः)** मधूनि मधुराण्यर्णांस्युदकानि यासु ताः **(नद्यः)** सरितः **(चतस्रः)** चतुःसंख्याकाः॥६॥

अन्वयः-हे मनुष्याः ! युष्माभिरस्य दस्मस्येन्द्रस्य सभाद्यध्यक्षस्य स्तनयित्नोर्वोपह्वरे यत्प्रयक्षतमं चारुतमं दंसः कर्मास्ति, तदु विदित्वाऽऽचरणीयं य ईदृशेन कर्मणा मध्वर्णसो नद्यश्चतस्र उपरा दिशोऽपिन्वत् सेवते सिञ्चति स विद्यया सम्यक् सेवताम्॥६॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैः श्रेष्ठतमानि कर्माणि संसेव्य यज्ञमनुष्ठाय राज्यं पालयित्वा सर्वासु दिक्षु कीर्तिवृष्टिः संप्रसारणीयेति॥६॥

पदार्थः-हे मनुष्यो! तुम लोगों को उचित है कि **(अस्य)** इस **(दस्मस्य)** दुःख नष्ट करनेवाले सभाध्यक्ष वा बिजुली के **(उपह्वरे)** कुटिलतायुक्त व्यवहार में **(यत्)** जो **(प्रयक्षतमम्)** अत्यन्त पूजने योग्य **(चारुतमम्)** अतिसुन्दर **(दंसः)** विद्या वा सुखों के जानने का हेतु **(कर्म)** कर्म **(अस्ति)** है **(तदु)** उसको जानकर आचरण करना वा जिनके इस प्रकार के कर्म से **(मध्वर्णसः)** मधुर जलवाली **(नद्यः)** नदी और **(चतस्रः)** चार **(उपराः)** दिशा **(अपिन्वत्)** सेवन या सेचन करती हैं। उन दोनों को विद्या से अच्छी प्रकार सेवन करना चाहिये॥६॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को चाहिये कि अति उत्तम-उत्तम कर्मों का सेवन, यज्ञ का अनुष्ठान और राज्य का पालन करके सब दिशाओं में कीर्त्ति की वर्षा करें॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

द्विता वि वव्रे सनजा सनीळे अयास्य स्तवमानेभिरर्कैः।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः॥७॥

द्विता। वि। वव्रे। सनऽजा। सनीळे इति सऽनीळे। अयास्यः। स्तवमानेभिः। अर्कैः। भगः। न। मेने इति। परमे। विऽओमन्। अधारयत्। रोदसी इति। सुऽदंसाः॥७॥

पदार्थः-(**द्विता**) द्वयोः प्रजासभाद्यध्यक्षयोर्भावो द्विता **(वि)** विशेषे **(वव्रे)** व्रियते **(सनजा)** या सनेति सनातनाज्जायते सा **(सनीडे)** समीपे **(अयास्यः)** प्रयत्नासाध्यः स्वाभाविकः **(स्तवमानेभिः)** स्तुवन्ति यैस्तैः **(अर्कैः)** स्तोत्रैः **(भगः)** ऐश्वर्य्यम् **(न)** इव **(मेने)** प्रक्षेप्ये। अत्र बाहुलकाङ्डुमिञ् धातोर्नः प्रत्ययः आत्वनिषेधश्च। **(परमे)** प्रकृष्टे **(व्योमन्)** अन्तरिक्षे। अत्र **सुपां सुलुक्** इति सप्तम्या लुक्। **(अधारयत्)** धारयेत् **(रोदसी)** द्यावापृथिव्यौ **(सुदंसा)** शोभनानि दसांसि कर्माणि यस्मिन् सः॥७॥

अन्वयः-यथा विद्वद्भिर्या सनीडे स्तवमानेभिरर्कैः सनजा द्विता विवव्रे विशेषेण व्रियते तथा मनुष्योऽयास्यः सुदंसा अहं परमे व्योमन् रोदसी भगो न सवितेव अधारयत् धारयेत् विद्वान् मेने तथाऽहं धरेयं मन्ये च॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा सभाद्यध्यक्षेणैश्वर्य्यं ध्रियते यथा च सूर्य्यः प्रकाशपृथिव्यौ धरति तथैव न्यायविद्ये धर्त्तव्ये॥७॥

पदार्थः-जैसे विद्वानों से जो **(सनीडे)** समीप **(स्तवमानेभिः)** स्तुतियुक्त **(अर्कैः)** स्तोत्रों से **(सनजा)** सनातन कारण से उत्पन्न हुई **(द्विता)** दो अर्थात् प्रजा और सभाध्यक्ष को **(विवव्रे)** विशेष करके स्वीकार किया जाता है, वैसे मनुष्य **(अयास्यः)** अनायास से सिद्ध करनेवाला **(सुदंसा)** उत्तम कर्मयुक्त मैं जैसे **(परमे)** **(व्योमन्)** उत्तम अन्तरिक्ष में **(रोदसी)** प्रकाश और भूमि को **(भगो न)** सूर्य्य के समान विद्वान् **(मेने)** मानता और **(अधारयत्)** धारण करता है, वैसे इसको धारण करता और मानता हूँ॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे सभा आदि का अध्यक्ष ऐश्वर्य को और जैसे सूर्यप्रकाश तथा पृथिवी को धारण करता है, वैसे ही न्याय और विद्या को धारण करें॥७॥

अथ रात्रिदिवसदृष्टान्तेन स्त्रीपुरुषौ कथं वर्त्तेयातामित्युपदिश्यते॥

अब रात्रि और दिन के दृष्टान्त से स्त्री और पुरुष किस-किस प्रकार वर्त्तमान करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या॥८॥

सनात्। दिवम्। परि। भूमा। विरूपे इति विऽरूपे। पुनःऽभुवा युवती इति। स्वेभिः। एवैः। कृष्णेऽभिः। अक्ता। उषाः। रुशत्ऽभिः। वपुःऽभिः। आ। चरतः। अन्याऽअन्या॥८॥

पदार्थः-(**सनात्**) सनातनात्कारणात् **(दिवम्)** सूर्यप्रकाशं प्राप्य **(परि)** सर्वतः **(भूमा)** भूमिम्। अत्र **सुपां सुलुक्** इति डादेशः। **(विरूपे)** विविध रूपं ययोरह्नो रात्रेश्च ते **(पुनर्भवा)** ये पुनः पुनः पर्य्यायेण भवतस्ते। अत्र **सुपां सुलुक्** इत्याकारादेशः। **(युवती)** युवावस्थास्थे स्त्रियाविव **(स्वेभिः)** दक्षिणादिभिरवयवैः **(एवैः)** प्रापकैः **इण्शीभ्यां वन्।** (उणा०१.१५४) अनेनात्रेण्धातोर्वन् प्रत्ययः। **(कृष्णेभिः)** परस्पराकर्षणैर्विलेखनैः **(अक्ता)** अनक्त्यञ्जनवत्पदार्थानाच्छादयति सा रात्रिः **(उषाः)** दिनं च। **(रुशद्भिः)** प्रापकै रूपादिगुणैः **(वपुर्भिः)** स्वाकृत्यादिभिः शरीरैः **(आ)** समन्तात् **(चरतः)** गच्छत आगच्छतश्च **(अन्यान्या)** भिन्ना भिन्ना पृथक् पृथक् संयुक्ते च। अत्र वीप्सायां द्विर्वचनम्॥८॥

अन्वयः-हे स्त्रीपुरुषौ! युवां यथा सनाद्दिवं भूमा प्राप्य पुनर्भुवा युवती इव विरूपे अक्तोषाः स्वेभीरुशद्भिर्वपुभिः कृष्णेभिरेवैः सहान्यान्या पर्य्याचरतस्तथा स्वयंवरविधानेन विवाहं कृत्वा परस्परौ प्रीतिमन्तौ भूत्वा सततमानन्देतम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा सर्वदा चक्रवत्परिवर्त्तमाने रात्रिदिने परस्परं संयुक्ते वर्त्तेते तथा विवाहितौ स्त्रीपुरुषौ संप्रीत्या सर्वदा वर्त्तेयाताम्॥८॥

पदार्थः-हे स्त्री-पुरुषो! तुम जैसे **(सनात्)** सनातन कारण से **(दिवम्)** सूर्य्य प्रकाश और **(भूमा)** भूमि को प्राप्त होकर **(पुनर्भुवा)** वार-वार पर्य्याय से उत्पन्न होके **(युवती)** युवावस्था को प्राप्त हुए स्त्री-पुरुष के समान **(विरूपे)** विविध रूप से युक्त **(अक्ता)** रात्रि **(उषाः)** दिन **(स्वेभिः)** क्षण आदि अवयव **(रुशद्भिः)** प्राप्ति के हेतु रूपादि गुणों के साथ **(वपुर्भिः)** अपनी आकृति आदि शरीर वा **(कृष्णेभिः)** परस्पर आकर्षणादि को **(एवैः)** प्राप्त करनेवाले गुणों के साथ **(अन्यान्या)** भिन्न-भिन्न परस्पर मिले हुए **(पर्य्याचरतः)** जाते-आते हैं, वैसे स्वयंवर अर्थात् परस्पर की प्रसन्नता से विवाह करके एक-दूसरे के साथ प्रीति युक्त होके सदा आनन्द में वर्त्तें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि जैसे चक्र के समान सर्वदा वर्त्तमान रात्रि-दिन परस्पर संयुक्त वर्त्तते हैं, वैसे विवाहित स्त्री-पुरुष अत्यन्त प्रेम के साथ वर्त्ता करें॥८॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में कहा है॥

सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः।
आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु॥९॥

सनेमि। सख्यम्। सुऽअपस्यमानः। सूनुः। दाधार। शवसा। सुऽदंसाः। आमासु। चित्। दधिषे। पक्वम्। अन्तरिति। पयः। कृष्णासु। रुशत्। रोहिणीषु॥९॥

पदार्थः-**(सनेमि)** पुराणम्। **सनेमिरिति पुराणनामसु पठितम्।** (निघं०३.२७) **(सख्यम्)** मित्रत्वम् **(स्वपस्यमानः)** शोभनानि चापांसि कर्माणि च स्वपांसि तान्याचरतीव सः **(सूनुः)** पुत्रो मातापितराविव **(दाधार)** धरति **(शवसा)** बलेन **(सुदंसाः)** शोभनानि दंसानि कर्माणि यस्य सः। **(आमासु)** अपक्वास्वोषधीषु **(चित्)** अपि **(दधिषे)** धरसि **(पक्वम्)** पच्यमानम् **(अन्तः)** मध्ये **(पयः)** रसम् **(कृष्णासु)** परिपक्वासु विलिखितासु **(रुशत्)** सुन्दरं रूपं धरन् **(रोहिणीषु)** रोहणशीलासु॥९॥

अन्वयः-यः स्वपस्यमानः सुदंसा रुशत्त्वं सूनुमिवाहोरात्रं सनेमि सख्यं दाधार स रोहिणीषु कृष्णासु चिदप्यामास्वन्तः पक्वं पयो धरति, तथैव शवसा दधिषे स सुखमाप्नुयात्॥९॥

भावार्थः-विद्वद्भिर्यथाऽहोरात्रः पक्वापक्वरसोत्पादक उत्पन्नद्रव्यवृद्धिक्षयकरः सर्वेषां मित्रवद्वर्त्तते तथा सर्वैर्मनुष्यैः सह वर्त्तितव्यम्॥९॥

पदार्थः-जो **(स्वपस्यमानः)** उत्तम कर्मों को करते हुए के समान **(सुदंसाः)** उत्तम कर्म्मयुक्त **(रुशत्)** शुभ गुणों की प्राप्ति करता हुआ तू जैसे **(सूनुः)** सत्पुत्र अपने माता-पिता का पोषण करते हुए के समान रात्रि-दिन **(सनेमि)** प्राचीन **(सख्यम्)** मित्रपन के कालावयवों को **(दाधार)** धारण करता और **(रोहिणीषु)** उत्पन्नशील **(कृष्णासु)** सब प्रकार से पकी हुई **(चित्)** और **(आमासु)** कच्ची औषधियों के

(अन्तः) मध्य में **(पक्वम्)** पक्व **(पयः)** रस को धारण करता है, वैसे **(शवसा)** बल के साथ गृहाश्रम को **(दधिषे)** धारण कर॥९॥

भावार्थः-विद्वानों को जैसे ये दिन-रात कच्चे-पक्के रसों से उत्पन्न करने और उत्पन्न हुए पदार्थों की वृद्धि वा नाश करनेवाले सबों के मित्र के समान वर्त्तमान है, वैसे सब मनुष्यों के साथ वर्त्तना योग्य है॥९॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम्॥१०॥२॥

सनात्। सऽनीळाः। अवनीः। अवाताः। व्रता। रक्षन्ते। अमृताः। सहःऽभिः। पुरु। सहस्रा। जनयः। न। पत्नीः। दुवस्यन्ति। स्वसारः। अह्रयाणम्॥१०॥

पदार्थः-**(सनात्)** सनातनात्कारणात् **(सनीडाः)** समीपे वर्त्तमानाः **(अवनीः)** पृथिवीः **(अवाताः)** वायुकम्पादिरहिताः **(व्रता)** व्रतानि सत्याचरणानि। अत्र **शेश्छन्दसि०** इति शेर्लोपः। **(रक्षन्ते)** पालयन्ति। व्यत्ययेनात्मनेपदम्। **(अमृताः)** स्वरूपेण नित्याः **(सहोभिः)** बलैः **(पुरु)** बहूनि **(सहस्रा)** सहस्राणि **(जनयः)** ये जनयन्ति ते पतयः **(नः)** इव **(पत्नीः)** भार्य्याः **(दुवस्यन्ति)** परिचरन्ति **(स्वसारः)** भगिन्यः **(अह्रयाणम्)** विगतलज्जं प्रकाशितम्। अत्र नञ्पूर्वाद्ध्रीधातोर्बाहुलकादौणादिक आनच् प्रत्ययः॥१०॥

अन्वयः-अवाता अवनीरिव पुरु सहस्रा जनयः पत्नीर्न ये सनीडा अमृताः सहोभिः सनाद् व्रता स्वसारोऽह्रयाणं बन्धुं दुवस्यन्तीव विद्याधर्मौ सेवन्ते ते मुक्तिमाप्नुवन्ति॥१०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा पतयः स्वस्त्री-भगिनी-भ्रातॄन् विद्यार्थिन आचार्य्यांश्च सेवित्वा सुखानि विद्याश्च प्राप्नुवन्ति तथा धर्मारूढा धार्मिका विद्वांसः स्त्रीपुरुषा गृहे वसन्तोऽपि मुक्तिमाप्नुवन्ति॥१०॥

पदार्थः-जैसे **(अवाताः)** हिंसारहित **(अवनीः)** भूमि सबकी रक्षा **(पुरुसहस्रा)** बहुत हजारह **(जनयः)** उत्पन्न करनेहारे पति **(पत्नीः)** **(न)** जैसे अपनी स्त्रियों की रक्षा करते हैं, वैसे **(सनीडाः)** समीप में वर्त्तमान **(अमृताः)** नाशरहित विद्वान् लोग **(सहोभिः)** विद्या योग धर्मवालों से **(सनात्)** सनातन **(व्रता)** सत्य धर्म के आचरणों की **(रक्षन्ते)** रक्षा करते हैं, और जैसे **(स्वसारः)** बहिनें **(अह्रयाणम्)** लज्जा को अप्राप्त अपने भाई की **(दुवस्यन्ति)** सेवा करती हैं, वैसे विद्या और धर्म ही को सेवते हैं, वे मुक्ति को प्राप्त होते हैं॥१०॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे पति लोग अपनी स्त्रियों, बहिनों और भाइयों तथा विद्यार्थी लोग आचार्य्यों की सेवा से सुख और विद्याओं को प्राप्त होते हैं, वैसे धर्मात्मा विद्वान् स्त्री–पुरुष लोग घर में बसते हुए मुक्ति को प्राप्त होते हैं॥१०॥

पुनस्ते कीदृशा एतद्वेदितारो विद्वांश्चेत्युपदिश्यते॥

फिर भी दिन और रात्रि कैसे तथा इनके जाननेवाले विद्वान् लोग कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः॥
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः॥११॥

सनाऽयुवः। नमसा। नव्यः। अर्कैः। वसुऽयवः। मतयः। दस्म। दद्रुः। पतिम्। न। पत्नीः। उशतीः। उशन्तम्। स्पृशन्ति। त्वा। शवसाऽवन्। मनीषाः॥११॥

पदार्थः–(**सनायुवः**) सनातनस्य कर्मणः कर्त्तार इवाचरन्तः (**नमसा**) नमस्कारेण युक्ताः (**नव्यः**) नवीना युवतयः। अत्र **सुपां सुलुक्** इति जसः स्थाने सुः। (**अर्कैः**) मन्त्रैर्विचारैः सह (**वसूयवः**) आत्मनो वसूनि विद्याधनानीच्छन्तः (**मतयः**) मन्यन्ते जानन्ति ये ते विद्वांसः (**दस्म**) अन्धकारोपक्षेतः (**दद्रुः**) द्रान्ति (**पतिम्**) पालयितारम् (**न**) इव (**पत्नीः**) भार्य्या युवतयः (**उशन्तीः**) कामयमानाः (**उशन्तम्**) कामयमानम् (**स्पृशन्ति**) आलिङ्गयन्ति (**त्वा**) (**शवसावन्**) बलयुक्त (**मनीषाः**) ये मनांसि विज्ञानानीषन्ते ते। अत्र **शकन्ध्वादित्वात्** पररूपम्॥११॥

अन्वयः–हे शवसावन् दस्म सभापते! त्वं यथा सनायुवो नमसाऽर्कैः सह वर्त्तमाना वसूयवो मनीषा मतय उशन्तं पतिं नोशन्तीर्नव्यः पत्नीः स्पृशन्ति यथा च दद्रुः कुटिलां गतिं गच्छन्ति तथा त्वा प्रजाः सेवन्ताम्॥११॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा स्त्रीपुरुषयोः सह वर्त्तमानेनापत्यान्युत्पद्यन्ते तथैव रात्रिंदिवयोः सह वर्त्तमानेन सर्वे व्यवहारा जायन्ते। यथा च सूर्य्यप्रकाशभूमिच्छायाभ्यां विनैतयोरुत्पत्तिर्भवितुं न शक्या तथा दम्पतीभ्यां विना मैथुनसृष्ट्युत्पत्तिरसंभवा॥११॥

पदार्थः–हे (**शवसावन्**) बलयुक्त (**दस्म**) अविद्यान्धकार विनाशक सभापते! तू जैसे (**सनायुवः**) सनातन कर्म के करनेवालों के समान आचरण करते (**नमसा**) अन्न वा नमस्कार तथा (**अर्कैः**) मन्त्र अर्थात् विचारों के साथ वर्त्तमान (**वसूयवः**) अपने लिये विद्या, धनों और (**मनीषाः**) विज्ञानों के इच्छा करने (**मतयः**) सबको जाननेवाले विद्वान् लोग (**न**) जैसे (**नव्यः**) नवीन (**उशतीः**) काम की चेष्टा से युक्त (**पत्नीः**) स्त्री (**उशन्तम्**) काम की इच्छा करनेवाले (**पतिम्**) पति का (**स्पृशन्ति**) आलिङ्गन करती हैं और जैसे (**दद्रुः**) कुटिल गति को प्राप्त होनेवालों को जानते हैं, वैसे (**त्वा**) तुझको प्रजा सेवें॥११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को समझना चाहिये कि जैसे स्त्री-पुरुषों के साथ वर्त्तमान होने से सन्तानों की उत्पत्ति होती है, वैसे ही रात-दिनों के एक-साथ वर्तमान होने से सब व्यवहार सिद्ध होते हैं। और जैसे सूर्य का प्रकाश और पृथिवी की छाया के विना रात और दिन का सम्भव नहीं होता, वैसे ही स्त्री-पुरुष के विना मैथुनी सृष्टि नहीं हो सकती॥११॥

अथ सूर्यसभाद्यध्यक्षयोर्गुणा उपदिश्यन्ते॥

अब अगले मन्त्र में सूर्य्य और सभापति आदि के गुणों का उपदेश किया है॥

सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः॥१२॥

सनात्। एव। तव। रायः। गभस्तौ। न। क्षीयन्ते। न। उप। दस्यन्ति। दस्म। द्युऽमान्। असि। क्रतुऽमान्। इन्द्र। धीरः। शिक्ष। शचीऽवः। तव। नः। शचीभिः॥१२॥

पदार्थः-(**सनात्**) सनातनात् (**एव**) निश्चये (**तव**) सभाध्यक्षस्य (**रायः**) धनानि (**गभस्तौ**) नीति प्रकाशे। **गभस्तय इति रश्मिनामसु पठितम्।** (निघं०१.५) (**न**) निषेधे (**क्षीयन्ते**) क्षीणानि भवन्ति (**न**) निषेधे (**उप**) सामीप्ये (**दस्यन्ति**) नश्यन्ति (**दस्म**) शत्रोरुपक्षेतः (**द्युमान्**) विद्यादिसद्गुणप्रकाशयुक्तः (**असि**) (**क्रतुमान्**) प्रज्ञावान् (**इन्द्र**) परमधनवन् परमधनहेतुर्वा (**धीरः**) ध्यानवान् (**शिक्ष**) उपदिश (**शचीवः**) शची प्रशस्ता वाक् प्रज्ञा कर्म वा विद्यतेऽस्मिन् तत्सम्बुद्धौ। **शचीति प्रज्ञानामसु पठितम्।** (निघं०३.९) **कर्मनामसु पठितम्।** (निघं०२.१) **वाङ्नामसु पठितम्।** (निघं०१.११) (**तव**) भवत्प्रबन्धे (**नः**) अस्मान् (**शचीभिः**) कर्मभिः॥१२॥

अन्वयः-हे दस्म शचीव इन्द्र! यस्त्वं द्युमान् क्रतुमान् धीरोऽसि तस्य तव गभस्तौ सनाद्रायो नैव क्षीयन्ते, तव नोपदस्यन्ति स त्वं शचीभिर्नोऽस्मान् शिक्ष॥१२॥

भावार्थः-यः सनातनाद्वेदविज्ञानात् शिक्षां प्राप्य सभाद्यध्यक्षो भूत्वा प्रजाः पालयेत्, स मनुष्यो धार्मिको वेद्यः॥१२॥

पदार्थः-हे (**दस्म**) शत्रुओं के नाश करनेवाले (**शचीवः**) उत्तम बुद्धि वा वाणी से युक्त (**इन्द्र**) उत्तम धनवाले सभाध्यक्ष! जो आप (**द्युमान्**) विद्यादि श्रेष्ठ गुणों के प्रकाश से युक्त (**क्रतुमान्**) बुद्धि से विचार कर कर्म करनेवाले! (**धीरः**) ध्यानी (**असि**) हैं, उस (**तव**) आपके (**गभस्तौ**) राजनीति के प्रकाश में (**सनात्**) सनातन से (**रायः**) धन (**नैव**) नहीं (**क्षीयन्ते**) क्षीण तथा (**तव**) आपके प्रबन्ध में (**न**) नहीं (**उपदस्यन्ति**) नष्ट होते हैं, सो आप अपनी (**शचीभिः**) बुद्धि, वाणी और कर्म से (**नः**) हम लोगों को (**शिक्ष**) उपदेश दीजिये॥१२॥

भावार्थः–मनुष्यो को चाहिये कि जो सनातन वेद के ज्ञान से शिक्षा को और सभापति आदि के अधिकार को प्राप्त होके प्रजा का पालन करे, उसी मनुष्य को धर्मात्मा जानें॥१२॥

पुनः सभाध्यक्षगुणा उपदिश्यन्ते॥

फिर सभाध्यक्ष के गुणों का उपदेश किया है॥

सनायते गोतम इन्द्र नव्यमतक्षद् ब्रह्म हरियोजनाय।

सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात्॥ १३॥ ३॥

सनाऽयते। गोतमः। इन्द्र। नव्यम्। अतक्षत्। ब्रह्म। हरिऽयोजनाय। सुऽनीथाय। नः। शवसान। नोधाः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ १३॥

पदार्थः–**(सनायते)** सना सनातन इवाचरति **(गोतमः)** गच्छतीति गोः स्तोता सोऽतिशयितः सः **(इन्द्र)** परमैश्वर्यवन् **(नव्यम्)** नवीनम् **(अतक्षत्)** तनूकरोति **(ब्रह्म)** बृहद्धनमन्नं वा। **ब्रह्मेति धननामसु पठितम्।** (निघं०२.१०) **अन्ननामसु पठितम्।** (निघं०२.७) **(हरियोजनाय)** हरीणां मनुष्याणां योजनाय समाधानाय। **हरय इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(सुनीथाय)** सुखानां सुष्ठु प्रापणाय **(नः)** अस्मान् **(शवसान)** बलयुक्त **(नोधाः)** स्तोता। **नवो धुट् च।** (उणा०४.२२३) अनेनौणादिकसूत्रेणास्य सिद्धिः। **(प्रातः)** प्रतिदिनम् **(मक्षु)** शीघ्रम् **(धियावसुः)** यः प्रज्ञया कर्मणा वा वसति सः **(जगम्यात्)** पुनः पुनः प्राप्नुयात्॥१३॥

अन्वयः–हे शवसानेन्द्र गोतमो धियावसुर्नोधा भवान् हरियोजनाय नव्यं ब्रह्मातक्षत्तनूकरोति नोऽस्मभ्यं सुनीथाय प्रातर्मक्षु सनायते नोऽस्मान् सद्यो जगम्यात्॥१३॥

भावार्थः–सभाद्यध्यक्षो मनुष्येभ्यो हिताय प्रतिदिनं नवीनं नवीनं धनमन्नं च प्रापयेत्। यथा प्राणो वायुः सुखानि प्रापयति तथैव सर्वान् सुखयेत्॥१३॥

अस्मिन् सूक्त ईश्वरसभाध्यक्षाहोरात्रविद्वत्सूर्य्यवायुगुणानां वर्णनादेतदर्थस्यैकषष्टितम–सूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विषष्टितमं ६२ सूक्तं तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः–हे **(शवसान)** बलयुक्त **(इन्द्र)** उत्तम धनवाले सभाध्यक्ष **(धियावसुः)** बुद्धि और कर्म के साथ बसनेवाले **(गोतमः)** अत्यन्त स्तुति के योग्य तथा **(नोधाः)** स्तुति करनेवाले आप **(हरियोजनाय)** मनुष्यों से समाधान के लिये **(नव्यम्)** नवीन **(ब्रह्म)** बड़े धन को **(अतक्षत्)** क्षीण करते हो **(नः)** हम लोगों को **(सुनीथाय)** सुखों की प्राप्ति के लिये **(प्रातः)** प्रतिदिन **(मक्षु)** शीघ्र **(सनायते)** सनातन के समान आचरण करते हो तथा **(नः)** हम लोगों के सुखों के लिये शीघ्र **(जगम्यात्)** प्राप्त हो॥१३॥

भावार्थः-सभापति आदि को चाहिये कि मनुष्यों के हित के लिये प्रतिदिन नवीन-नवीन धन और अन्न को उत्पन्न करें। जैसे प्राणवायु से मनुष्यों को सुख होते हैं, वैसे ही सभाध्यक्ष सबको सुखी करें॥१३॥

इस सूक्त में ईश्वर, सभाध्यक्ष, दिन, रात, विद्वान्, सूर्य और वायु के गुणों का वर्णन होने से पूर्व सूक्तार्थ के साथ इस सूक्तार्थ की सङ्गति जाननी चाहिये॥

यह बासठवां ६२ सूक्त और तीसरा ३ वर्ग पूरा हुआ॥६२॥३॥

अथ नवर्चस्य त्रिषष्टितमस्य सूक्तस्य गोतमो नोधा ऋषिः। इन्द्रो देवता। १,७-९ भुरिगार्षी पङ्क्तिश्छन्दः। ३ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,४ विराट् त्रिष्टुप्छन्दः। धैवतः स्वरः। ५ भुरिगार्षी जगती छन्दः। निषादः स्वरः। ६ स्वराडार्षी बृहती छन्दः। मध्यमः स्वरः॥

यद्येतेषां रावणोवटसायणमहीधरमोक्षमूलरादीनां छन्दोविज्ञानमपि नास्ति तर्हि वेदार्थं व्याख्यानानर्थस्य तु का कथा॥

अथेश्वरगुणा उपदिश्यन्ते॥

अब त्रेसठवें सूक्त का आरम्भ है, उसके पहिले मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळहासः किरणा नैजन्॥ १॥

त्वम्। महान्। इन्द्र। यः। ह। शुष्मैः। द्यावा। जज्ञानः। पृथिवी इति। अमे। धाः। यत्। ह। ते। विश्वा। गिरयः। चित्। अभ्वा। भिया। दृळहासः। किरणाः। न। ऐजन्॥ १॥

पदार्थः-(**त्वम्**) (**महान्**) गुणैरधिकः (**इन्द्र**) परमैश्वर्यप्रद (**यः**) उक्तार्थः (**ह**) किल (**शुष्मैः**) बलादिभिः (**द्यावा**) प्रकाशम् (**जज्ञानः**) प्रसिद्धः (**पृथिवी**) भूमिः (**अमे**) गृहे (**धाः**) दधासि (**यत्**) ये (**ह**) प्रसिद्धम् (**ते**) तव (**विश्वा**) सर्वे (**गिरयः**) शैला मेघा वा (**चित्**) अपि (**अभ्वा**) नोत्पद्यते कदाचित् तेन कारणेन सह वर्त्तमानाः (**भिया**) भयेन (**दृढासः**) दृंहिताः (**किरणाः**) कान्तयः (**न**) निषेधे (**ऐजन्**) एजन्ति॥ १॥

अन्वयः-हे इन्द्र! यस्त्वं महान् जज्ञानः शुष्मैरमे ह द्यावापृथिवी धा दधासि ते तवाभ्वा सामर्थ्येन भिया भयेन ह प्रसिद्धं यद्ये विश्वा गिरयो दृढासः सन्तः किरणाश्चिदपि नैजन्न कम्पन्ते॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यः परमेश्वरः स्वकीयसामर्थ्यबलादिभिः सर्वं जगद्रचयित्वा स्वसामर्थ्येन दृढं धरति स एव सर्वदोपास्यः। ये सूर्यलोकेन स्वकीयाकर्षगुणेन पृथिव्यादयो लोका ध्रियन्ते सोऽपि परमेश्वरेण रचितो धारित इति बोध्यम्॥ १॥

पदार्थः-हे (**इन्द्र**) उत्तम सम्पदा के देनेवाले परमात्मन्! जो (**त्वम्**) आप (**महान्**) गुणों से अनन्त (**जज्ञानः**) प्रसिद्ध (**शुष्मैः**) बलादि के (**अमे**) प्रकाश में (**ह**) निश्चय करके (**द्यावापृथिवी**) प्रकाश और पृथिवी को (**धाः**) धारण करते हो (**ते**) आपके (**अभ्वा**) उत्पन्न रहित सामर्थ्य के (**भिया**) भय से (**ह**) ही (**यत्**) जो (**विश्वा**) सब (**गिरयः**) पर्वत वा मेघ (**दृढासः**) दृढ़ हुए (**चित्**) और (**किरणाः**) कान्ति (**नैजत्**) कभी कम्प को प्राप्त नहीं होते॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को ऐसा समझना चाहिये कि जो परमेश्वर अपने सामर्थ्य और बल आदि से सब जगत् को रच के दृढ़ता से धारण करता है, उसी की सब

काल में उपासना करें तथा जिस सूर्य्यलोक ने अपने आकर्षण आदि गुणों से पृथिवी आदि लोकों को धारण किया है, उसको भी परमेश्वर का बनाया और धारण किया जानें॥ १॥

पुनः सभाद्यध्यक्षगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में सभापति आदि के गुणों का उपदेश किया है॥

आ यद्धरी॑ इन्द्र॒ विव्र॑ता॒ वेरा ते॒ वज्रं॑ जरि॒ता बा॒ह्वोर्धा॑त्।
येना॑विहर्यतक्रतो अ॒मित्रा॒न् पुर॑ इ॒ष्णासि॑ पुरुहूत पू॒र्वीः॥ २॥

आ। यत्। हरी॒ इति॑। इ॒न्द्र॒। विऽव्र॑ता। वेः॒। आ। ते॒। वज्र॑म्। ज॒रि॒ता। बा॒ह्वोः॒। धा॒त्। येन॑। अ॒वि॒ह॒र्य॒त॒क्र॒तो॒ इत्य॑विहर्य्यतऽक्रतो। अ॒मित्रा॑न्। पुरः॑। इ॒ष्णासि॑। पु॒रु॒हू॒त॒। पू॒र्वीः॥ २॥

पदार्थः-(**आ**) समन्तात् (**यत्**) यस्मात् (**हरी**) सद्व्यवहारहरणशीलसेनान्यायप्रकाशौ (**इन्द्र**) परमैश्वर्यकारक सभाध्यक्ष (**विव्रता**) विविधानि व्रतानि शीलानि याभ्यां तौ (**वेः**) विद्धि। अत्रोभयत्राडभावः। (**आ**) आभिमुख्ये (**ते**) तव (**वज्रम्**) आज्ञापनं शस्त्रसमूहं वा (**जरिता**) सर्वविद्यास्तोता (**बाह्वोः**) बलवीर्ययोः (**धात्**) दधाति (**येन**) वज्रेण (**अविहर्यतक्रतो**) न विद्यन्ते विरुद्धा हर्य्यताः प्रज्ञाकर्माणि यस्य तत्सम्बुद्धौ (**अमित्रान्**) शत्रून् (**पुरः**) नगरीः (**इष्णासि**) अभीक्ष्णं प्राप्नोषि गच्छसि वा (**पुरुहूत**) बहुभिर्विद्वद्भिः पूजित (**पूर्वीः**) पूर्वेषां सम्बन्धिनीः॥ २॥

अन्वयः-हे अविहर्यतक्रतो पुरुहूतेन्द्र सभाद्यध्यक्ष! त्वं यद्यस्माद्विव्रतो हरी आवेः समन्ताद् विद्धि। येनामित्रान् हंसि येन शत्रूणां पूर्वीः पुर इष्णासि तत्पराजयाय स्वविजयाभीक्ष्णं गच्छसि तस्माज्जरिता ते तव बाह्वोराश्रयेण वज्रमाधाद्दधाति॥ २॥

भावार्थः-सभाद्यध्यक्षेणैवं शीलं गुणान् कर्माणि च स्वीकार्याणि यतः सर्वे मनुष्यास्तदेतद् दृष्ट्वा शिष्टा भूत्वा निष्कण्टकं राज्यसुखं सर्वदा भुञ्जीरन्निति॥ २॥

पदार्थः-हे (**अविहर्य्यक्रतो**) दुष्ट बुद्धि और पाप कर्मों से रहित (**पुरुहूत**) बहुत विद्वानों से सत्कार को प्राप्त करानेवाले सभाद्यध्यक्ष! आप (**यत्**) जिस कारण (**विव्रता**) नाना प्रकार के नियमों के उत्पन्न करनेवाले (**हरी**) सेना और न्यायप्रकाश को (**आवेः**) अच्छे प्रकार जानते हो (**येन**) जिस वज्र से (**अमित्रान्**) शत्रुओं को मारते तथा जिससे उनके (**पूर्वीः**) बहुत (**पुरः**) नगरों को (**इष्णासि**) जीतने के लिये इच्छा करते और शत्रुओं के पराजय और अपने विजय के लिये प्रतिक्षण जाते हो, इससे (**जरिता**) सब विद्याओं की स्तुति करनेवाला मनुष्य (**ते**) आपके (**बाह्वोः**) भुजाओं के बल के आश्रय से (**वज्रम्**) वज्र को (**आधात्**) धारण करता है॥ २॥

भावार्थः–सभापति आदि को उचित है कि इस प्रकार के उत्तम स्वभाव, गुण और कर्मों को स्वीकार करें कि जिससे सब मनुष्य इस कर्म को देख तथा शिष्ट होकर निष्कण्टक राज्य के सुख को सदा भोगें॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं स॒त्य इ॑न्द्र धृ॒ष्णुरे॒तान् त्वमृ॑भु॒क्षा नर्य॒स्त्वं षाट्।
त्वं शुष्णं॑ वृ॒जने॑ पृ॒क्ष आ॒णौ यू॒ने कुत्सा॑य द्यु॒मते॒ सचा॑हन्॥३॥

त्वम्। स॒त्यः। इ॒न्द्र॒। धृ॒ष्णुः। ए॒तान्। त्वम्। ऋ॒भु॒क्षाः। नर्यः॑। त्वम्। षाट्। त्वम्। शुष्ण॑म्। वृ॒जने॑। पृ॒क्षे। आ॒णौ। यू॒ने। कुत्सा॑य। द्यु॒ऽमते॑। सचा॑। अ॒ह॒न्॥३॥

पदार्थः–(**त्वम्**) निरूपितपूर्वः (**सत्यः**) सत्सु साधुर्जीवस्वरूपेणानादिस्वरूपो वा (**इन्द्र**) परमैश्वर्य्यप्रापक (**धृष्णुः**) दृढः (**एतान्**) मित्रान् शत्रून् वा (**त्वम्**) (**ऋभुक्षाः**) महान्। **ऋभुक्षा इति महन्नामसु पठितम्।** (निघं०३.३) (**नर्य्यः**) नृषु साधुर्नृभ्यो हितो वा (**त्वम्**) (**षाट्**) सहनशीलः। **वा छन्दसि विधयो भवन्ती**ति केवलादपि ण्विः। (**त्वम्**) (**शुष्णम्**) बलम् (**वृजने**) वृजते शत्रून् येन तस्मिन् (**पृक्षे**) पृचन्ति संयुञ्जन्ति यस्मिन् (**आणौ**) संग्रामे (**यूने**) शरीरात्मनोः पूर्णं बलं प्राप्ताय (**कुत्साय**) कुत्सः प्रशस्तो वज्रः शस्त्रसमूहो वा यस्य तस्मै धृतवज्राय (**द्युमते**) द्यौः प्रशस्तो विद्याप्रकाशो विद्यते यस्मिँस्तस्मै (**सचा**) शिष्टसमवायेन सह (**अहन्**) शत्रून् हंसि॥३॥

अन्वयः–हे इन्द्र! यतस्त्वं सत्योऽसि यतस्त्वं धृष्णुरसि यतस्त्वमृभुक्षा असि यतस्त्वं नर्य्योऽसि यतस्त्वं षाडसि तस्माद् वृजने पृक्ष आणौ सचा सत्समवायेन कुत्साय द्युमते यूने शूष्णं शरीरात्मबलं ददासि शत्रूनहन् हंस्येतान् धार्मिकान् पालयसि तस्मात् पूज्योऽसि॥३॥

भावार्थः–नहि सभासभाद्यध्यक्षाभ्यां विना शत्रुपराजयो राज्यपालनं च यथावज्जायते तस्माच्छिष्टगुणयुक्ताभ्यामेताभ्यामेते कार्य्ये सर्वैर्मनुष्यैः कारयितव्ये इति ॥३॥

पदार्थः–हे (**इन्द्र**) उत्तम सम्पदा के देनेवाले सभाध्यक्ष! (**त्वम्**) आप जिस कारण (**सत्यः**) जीव स्वरूप से अनादि हो, जिस कारण (**त्वम्**) आप (**धृष्णुः**) दृढ़ हो तथा जिस कारण (**त्वम्**) आप (**ऋभुक्षाः**) गुणों से बड़े (**नर्य्यः**) मनुष्यों के बीच चतुर और (**षाट्**) सहनशील हो, इससे (**वृजने**) जिसमें शत्रुओं को प्राप्त होते हैं (**पृक्षे**) संयुक्त इकट्ठे होते हैं, जिसमें उस (**आणौ**) संग्राम में (**सचा**) शिष्टों के सम्बन्ध से (**कुत्साय**) शस्त्रों को धारण किये (**द्युमते**) उत्तम प्रकाशयुक्त (**यूने**) शरीर और आत्मा के बल को प्राप्त हुए मनुष्य के लिये (**शुष्णम्**) पूर्ण बल को देते हो। जिस कारण आप शत्रुओं को (**अहन्**) मारते तथा (**एतान्**) इन धर्मात्मा श्रेष्ठ पुरुषों का पालन करते हो, इससे पूजने योग्य हो॥३॥

भावार्थः-सभा और सभापति के विना शत्रुओं का पराजय और राज्य का पालन किसी से नहीं हो सकता। इसलिये श्रेष्ठ गुणवालों की सभा और सभापति से इन सब कार्य्यों को सिद्ध कराना मनुष्यों का मुख्य काम है॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह पूर्वोक्त सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं ह॒ त्यदि॑न्द्र चोदी॒: सखा॑ वृ॒त्रं यद्व॑ज्रिन्वृषकर्मन्नु॒भ्ना:।
यद्ध॑ शूर वृषमण: परा॒चैर्वि दस्यूँ॒र्योना॒वकृ॑तो वृथा॒षाट्॥४॥

त्वम्। ह॒। त्यत्। इ॒न्द्र॒। चो॒दी॒:। सखा॑। वृ॒त्रम्। यत्। व॒ज्रि॒न्। वृ॒ष॒ऽक॒र्म॒न्। उ॒भ्ना:। यत्। ह॒। शू॒र॒। वृ॒ष॒ऽम॒न॒:। प॒रा॒चै:। वि। दस्यू॑न्। योनौ॑। अकृ॑त:। वृ॒था॒षाट्॥४॥

पदार्थः-(**त्वम्**) सभाद्यध्यक्षः (**ह**) खलु (**त्यत्**) तम् (**इन्द्र**) सद्गुणधारक (**चोदीः**) शुभे कर्मणि प्रेरयसि (**सखा**) सुहृत् (**वृत्रम्**) मेघमिव सुखावरकं शत्रुम् (**यत्**) यस्मात् (**वज्रिन्**) प्रशस्तशस्त्रसमूहयुक्त (**वृषकर्मन्**) वृषस्य श्रेष्ठस्येव कर्माणि यस्य सः (**उभ्नाः**) प्रपूर्द्धि। अत्र व्यत्ययेन श्ना। (**यत्**) यः (**ह**) खलु (**शूर**) निर्भय (**वृषमणः**) वृषेषु शूरवीरेषु मनो विज्ञानं यस्य तत्सम्बुद्धौ (**पराचैः**) दूरार्थे। अत्र बाहुलकात्परोपदादपि चिधातोर्डसिः प्रत्ययः। (**वि**) विविधार्थे (**दस्यून्**) परस्वापहारकान् (**योनौ**) गृहे। **योनिरिति गृहनामसु पठितम्।** (निघं०३.४) (**अकृतः**) कृन्तसि (**वृथाषाट्**) यो वृथाऽनायासेन सहते सः॥४॥

अन्वयः-हे वज्रिन्निन्द्र! यस्मात्त्वं ह त्यत्तं वृत्रं पराचैश्चोदीर्दूरे प्रक्षिपसि। तस्माच्छिष्टानां पालने समर्थोऽसि। हे वृषकर्मन्निन्द्र! यद्यतस्त्वं सखासि तस्मात्सखीन् पालयसि। हे शूर! यस्त्वं ह खलु दस्यून् पराचैरकृतः पृथक् पृथक् विच्छिनत्सि तस्मात् प्रजारक्षितुं योग्योऽसि। हे वृषमण इन्द्र! यतस्त्वं सुखान्युभ्नाः प्रपूर्द्धि तस्मात् सत्कर्त्तव्योऽसि। इन्द्र! यतस्त्वं वृथाषाडसि तस्माद्योनौ गृहे सर्वान् सुखैरुभ्नाः॥४॥

भावार्थः-मनुष्यैर्यथा सूर्य्यः स्वप्रकाशेन सर्वानानन्द्य मेघमुत्पाद्य वर्षयति, अन्धकारं निवार्य प्रकाशते तथैव सभाद्यध्यक्षो विद्यादिशुभगुणैः सर्वान् सुखयित्वा शरीरात्मबलमुत्पाद्य धर्मशिक्षाभयानि वर्षित्वाऽधर्मान्धकारशत्रून् निवार्य्य राज्ये प्रकाशेत॥४॥

पदार्थः-हे (**वज्रिन्**) उत्तम शस्त्रों के धारण करने तथा (**इन्द्र**) उत्तम गुणों के जाननेवाले सभाध्यक्ष! जिस कारण (**त्वम्**) आप (**ह**) निश्चय करके (**त्यत्**) उस (**वृत्रम्**) शत्रु को (**पराचैः**) दूर (**चोदीः**) कर देते हो, इसी कारण श्रेष्ठ पुरुषों के धारण और पालन करने को समर्थ हो। हे (**वृषकर्मन्**) श्रेष्ठ मनुष्यों के समान उत्तम कर्मों के करनेवाले सभाध्यक्ष! (**यत्**) जिस कारण आप (**सखा**) सबके मित्र

हो, इसीसे मित्रों की रक्षा करते हो। हे (**शूर**) निर्भय सेनाध्यक्ष! (**यत्**) जो आप (**ह**) निश्चय करके (**दस्यून्**) दूसरे के पदार्थों को छीन लेनेवाले दुष्टों को (**अकृतः**) दूर से (**वि**) विशेष कर के छेदन करते हो, इससे प्रजा की रक्षा करने के योग्य हो। हे (**वृषमणः**) शूरवीरों में विचारशील सभाध्यक्ष! आप जिस कारण सुखों को (**उभ्नाः**) पूर्ण करते हो, इससे सत्कार करने के योग्य हो। तथा हे सभाध्यक्ष! जिस कारण आप (**वृथाषाट्**) सहज स्वभाव से सहन करनेवाले हो, इससे (**योनौ**) घर में रहनेवाले सब मनुष्यों के सुखों को पूर्ण करते हो॥४॥

भावार्थः–मनुष्यों को चाहिये कि जैसे सूर्य्य अपने प्रकाश से सबको आनन्दित कर तथा मेघ को उत्पन्न करके वर्षाता है और अन्धकार को निवारण करके अपने प्रकाश को फैलाता है, वैसे ही सभाध्यक्ष विद्यादि उत्तम गुणों से सबको सुखी, शरीर वा आत्मा के बल को सिद्ध, धर्म, शिक्षा, अभय आदि की वर्षा, अधर्मरूपी अन्धकार और शत्रुओं का निवारण करके राज्य में प्रकाशित होवे॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह उक्त सभाध्यक्ष कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं ह॒ त्यदि॒न्द्रारि॑षण्यन् दृ॒ळ्हस्य॑ चिन्मर्ता॑ना॒मजु॑ष्टौ।
व्य१॑स्मदा काष्ठा॒ अर्व॑ते॒ वर्घ॒नेव॑ वज्रि॒ञ्छ्नथि॒ह्यमित्रा॑न्॥५॥४॥

त्वम्। ह॒। त्यत्। इ॒न्द्र॒। अरि॑षण्यन्। दृ॒ळ्हस्य॑। चि॒त्। मर्ता॑नाम्। अजु॑ष्टौ। वि। अ॒स्मत्। आ। काष्ठाः॑। अर्व॑ते। व॒रिति॑ वः॑। घ॒नाऽइ॑व। व॒ज्रि॒न्। श्न॒थि॒हि॒। अ॒मित्रा॑न्॥५॥

पदार्थः–(**त्वम्**) उक्तार्थः (**ह**) प्रसिद्धम् (**त्यत्**) तस्य (**इन्द्र**) सभाद्यध्यक्ष! (**अरिषण्यन्**) आत्मनो रिषं हिंसनमनिच्छन्। अत्र **दुरस्युर्द्रविणस्यु०।** (अष्टा०७.४.३६) अनेनेत्वनिषेधः। (**दृढस्य**) स्थिरस्य (**चित्**) अपि (**मर्त्तानाम्**) मनुष्याणाम् (**अजुष्टौ**) अप्रतीतावसेवने (**वि**) (**अस्मत्**) अस्माकं सकाशात् (**आ**) अभितः (**काष्ठाः**) दिशः प्रति (**अर्वते**) अश्वादियुक्ताय सैन्याय (**वः**) वृणोषि (**घनेव**) यथा घनेन तथा (**वज्रिन्**) प्रशस्तो वज्रः शस्त्रसमूहो विद्यते यस्य तत्सम्बुद्धौ (**श्नथिहि**) हिन्धि (**अमित्रान्**) धर्मविरोधिनो मनुष्यान्॥५॥

अन्वयः–हे अरिषण्यन् वज्रिन्निन्द्र! त्वं ह प्रसिद्धमस्मदर्वते व्यावः। त्यत्तस्य दृढस्य राज्यस्य मर्त्तानां चिदप्यजुष्टौ घनेवामित्रान् काष्ठाः श्नथिहि॥५॥

भावार्थः–अत्रोपमालङ्कारः। सभाद्यध्यक्षाभ्यां राज्यसेनयोः प्रीतिमुत्पाद्य शत्रुषु द्वेषश्चेति यथा सूर्यो मेघान् छिनत्ति तथैव दुष्टाः सदा छेत्तव्याः॥५॥

पदार्थः–हे (**अरिषण्यन्**) अपने शरीर से हिंसा अधर्म्म की इच्छा नहीं करने वाले (**वज्रिन्**) उत्तम आयुधों से युक्त (**इन्द्र**) सभापते! (**त्वम्**) आप (**ह**) प्रसिद्ध (**अस्मत्**) हम लोगों से (**अर्वते**) घोड़े आदि धनों से युक्त सेना के लिये (**व्यावः**) अनेक प्रकार स्वीकार करते हो (**त्यत्**) उस (**दृढस्य**) स्थिर राज्य

(चित्) और **(मर्त्तानाम्)** प्रजा के मनुष्यों को शत्रुओं की **(अजुष्टौ)** अप्रीति होने में **(घनेव)** जैसे सूर्य मेघों को काटता **(अमित्रान्)** धर्म्मविरोधी शत्रुओं को **(काष्ठाः)** दिशाओं के प्रति **(श्नथिहि)** मारो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सभा सभापति आदि को उचित है कि राज्य तथा सेना में प्रीति उत्पन्न और शत्रुओं में द्वेष करके जैसे सूर्य मेघों का नित्य छेदन करता है, वैसे दुष्ट शत्रुओं का सदैव छेदन किया करें॥५॥

पुनर्मनुष्यैरीश्वरसभाध्यक्षयोः सहायः क्व क्व प्रेप्सितव्य इत्युपदिश्यते॥

फिर मनुष्यों को ईश्वर और सभापति आदि के सहाय की इच्छा कहाँ-कहाँ करनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत्॥६॥

त्वाम्। ह। त्यत्। इन्द्र। अर्णऽसातौ। स्वः।ऽमीळ्हे। नरः। आजा। हवन्ते। तव। स्वधाऽवः। इयम्। आ। सऽमर्ये। ऊतिः। वाजेषु। अतसाय्या। भूत्॥६॥

पदार्थः-(**त्वाम्**) जगदीश्वरं सभाध्यक्षं वा (**ह**) खलु (**त्यत्**) तस्मिन् (**इन्द्र**) परमैश्वर्यप्रापक (**अर्णसातौ**) अर्णानां विजयप्रापकाणां योद्धॄणां सातिर्यस्मिंस्तस्मिन् (**स्वर्मीढे**) स्वः सुखस्य मीढः सेचनं यस्मिन् तस्मिन्। (**नरः**) नयनकर्त्तारो मनुष्याः (**आजा**) संग्रामे (**हवन्ते**) स्पर्द्धन्ते प्रेप्सन्ते (**तव**) (**स्वधावः**) प्रशस्तं स्वधान्नं विद्यते तस्य तत्सम्बुद्धौ (**इयम्**) वक्ष्यमाणा (**आ**) अभितः (**समर्य्ये**) संग्रामे (**ऊतिः**) रक्षणादिका (**वाजेषु**) विज्ञानान्नसेनादिषु (**अतसाय्या**) अतन्ति निरन्तरं सुखानि गच्छन्ति यया सा। अत्रातधातोर्बाहुलकादौणादिक आय्यप्रत्ययोऽसुगागमश्च। सायणाचार्य्येणेदं पदमतधातोराय्यप्रत्ययं वर्जयित्वा साय्य प्रत्ययान्तरं कल्पित्वाऽडागमेन व्याख्यातं तदशुद्धम् (**भूत्**) भवतु॥६॥

अन्वयः-हे स्वधाव इन्द्र जगदीश्वर सभाद्यध्यक्ष! नरस्त्यन्नर्णसातौ स्वर्मीढ आजौ त्वां ह खल्वाहवन्ते। यतस्तव येयं समर्य्ये वाजेष्वतसाय्योऽतिर्वर्त्तते साऽस्मान् प्राप्ता भूत्॥६॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैः सर्वेषु धर्म्यकार्येषु कर्तव्येष्वीश्वरस्य सभाध्यक्षस्य च सहायं नित्यं सङ्गृह्य कार्य्यसिद्धिः कर्त्तव्या॥६॥

पदार्थः-हे (**स्वधावः**) उत्तम अन्न और (**इन्द्र**) श्रेष्ठ ऐश्वर्य के प्राप्त करानेवाले जगदीश्वर वा सभाध्यक्ष (**नरः**) राजनीति के जाननेवाले मनुष्य (**त्यत्**) उस (**अर्णसातौ**) विजय की प्राप्ति करानेवाले शूरवीर योद्धा, मनुष्यों का सेवन हो, जिस (**स्वर्मीढे**) सुख के सींचने से युक्त (**आजौ**) संग्राम में (**त्वाम्**) आपको (**ह**) निश्चय करके (**आहवन्ते**) पुकारते हैं। जिस कारण (**तव**) आपकी जो (**इयम्**) यह (**समर्य्ये**)

संग्राम वा **(वाजेषु)** विज्ञान, अन्न और सेनादिकों में **(अतसाय्या)** निरन्तर सुखों की प्राप्ति करानेवाले **(ऊतिः)** रक्षण आदि क्रिया है, वह हम लोगों को प्राप्त **(भूत्)** होवे॥६॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को चाहिये कि सब धर्मसम्बन्धी कार्य्यों में ईश्वर वा सभाध्यक्ष का सहाय लेके सम्पूर्ण कार्यों को सिद्ध करें॥६॥

अथ सभाद्यध्यक्षगुणा उपदिश्यन्ते॥

फिर अगले मन्त्र में सभापति आदि के गुणों का उपदेश किया है॥

त्वं ह॒ त्यदि॑न्द्र स॒प्त युध्य॒न् पुरो॑ वज्रिन् पुरु॒कुत्सा॑य दर्दः।
ब॒र्हिर्न यत्सु॒दासे॒ वृथा॒ वर्गं॑हो रा॑ज॒न्वरि॑वः पू॒र्वे क॑रिति कः॥७॥

त्वम्। ह॒। त्यत्। इ॒न्द्र॒। स॒प्त। युध्य॑न्। पुरः॑। व॒ज्रि॒न्। पु॒रु॒ऽकुत्सा॑य। दर्दरिति॑ दर्दः। ब॒र्हिः॑। न। यत्। सु॒ऽदासे॑। वृथा॑। वर्क्। अं॒होः॑। रा॒ज॒न्। वरि॑वः। पू॒र्वे। क॒रिति॑ कः॥७॥

पदार्थः-(**त्वम्**) (**ह**) किल (**त्यत्**) तस्मै (**इन्द्र**) विजयप्रद सभाद्यध्यक्ष (**सप्त**) सभासभासद्सभापतिसेनासेनापतिभृत्यप्रजाः (**युध्यन्**) युद्धं कुर्वन्ति। अत्र व्यत्ययेन परस्मैपदम् अडभावश्च। (**पुरः**) शत्रुनगराणि (**वज्रिन्**) प्रशस्तो वज्रः शस्त्र समूहो यस्यास्तीति तत्संबुद्धौ (**पुरुकुत्साय**) बहुभिरवक्षिप्ताय (**दर्दः**) पुनर्विदारय। अयं यङ्लुङन्तः प्रयोगोऽडभावश्च। (**बर्हिः**) शुद्धमन्तरिक्षम्। (**न**) इव (**यत्**) (**सुदासे**) शोभना दासा दानकर्त्तारो यस्मिन् देशे तस्मिन् (**वृथा**) व्यर्थे (**वर्क्**) वर्जयसि। अत्र **मन्त्रे घसहर०** इति च्लेर्लुक्। (**अंहोः**) प्राप्तस्य प्राप्तव्यस्य वा राज्यस्य (**राजन्**) प्रकाशक (**वरिवः**) परिचरणम् (**पूरवे**) प्रपूर्णाय सुखाय (**कः**) करोषि। अत्र **मन्त्रे घस०** इति च्लेर्लुक्॥७॥

अन्वयः-हे वज्रिन्निन्द्र राजन् सभाधिपते! ये तव सभादयः सप्त सन्ति तैः सह वर्त्तमानाः शत्रुभिः सह युध्यन् यतस्त्वं ह खलु तेषां पुरो दर्दो विदारयसि यतस्त्वमंहो राज्यस्य पुरुकुत्साय पूरवे यद्वरिवः सुदासे बर्हिर्न को यद्वृथा मनुष्या वर्त्तन्ते त्यत्तान् वर्क् वर्जयसि तस्मात्त्वं सर्वैरस्माभिस्सत्कर्त्तव्योऽसि॥७॥

भावार्थः-यथा सूर्यो जगद्धिताय मेघं छित्त्वा निपातयति तथैव सर्वाधीशः सभापतिः सर्वेभ्यः प्राणिभ्यो हितं सम्पादयेत्॥७॥

पदार्थः-हे (**वज्रिन्**) उत्तम शस्त्रों से युक्त (**राजन्**) प्रकाश करने तथा (**इन्द्र**) विजय के देनेवाले सभा के अधिपति! जो आपके (**सप्त**) सभा, सभासद्, सेना, सेनापति, भृत्य, प्रजा ये सात हैं, उन्हीं के साथ प्रेम से वर्त्तमान होके शत्रुओं के साथ (**युध्यन्**) युद्ध करते हुए जिस कारण तुम उन शत्रुओं के (**पुरः**) नगरों को (**दर्दः**) विदारण करते हो। जो आप (**अंहोः**) प्राप्त होने योग्य राज्य के (**पुरुकुत्साय**) बहुत मनुष्यों को ग्रहण करने योग्य (**पूरवे**) पूर्ण सुख के लिये (**यत्**) जो (**वरिवः**) सेवन करने योग्य पदार्थों को (**सुदासे**) उत्तम दान करनेवाले मनुष्यों से युक्त देश में (**बर्हिः**) अन्तरिक्ष के (**न**) समान

(कः) करते हो **(यत्)** जो **(वृथा)** व्यर्थ काम करनेवाले मनुष्य हों **(त्यत्)** उनको **(वर्क्)** वर्जित करते हो, इस कारण हम सब लोगों को सत्कार करने योग्य हो॥७॥

भावार्थः-जैसे सूर्य्य सब जगत् के हित के लिये मेघ को वर्षाता है, वैसे ही सबका स्वामी सभापति सभों का हित सिद्ध करे॥७॥

पुनः सभाद्यध्यक्षविद्युतोर्गुणा उपदिश्यन्ते॥

अब सभाध्यक्षादि और विद्युत् अग्नि के गुणों का उपदेश किया है॥

त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन्।
ययाशूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै॥८॥

त्वम्। त्याम्। नः। इन्द्र। देव। चित्राम्। इषम्। आपः। न। पीपयः। परिऽज्मन्। ययाः। शूर। प्रति। अस्मभ्यम्। यंसि। त्मनम्। ऊर्जम्। न। विश्वध। क्षरध्यै॥८॥

पदार्थः-(**त्वम्**) सभाद्यध्यक्षः सूर्यो वा (**त्याम्**) ताम् (**नः**) अस्माकम् (**इन्द्र**) सुखप्रद सुखहेतुर्वा (**देव**) विद्याशिक्षाप्रकाशक चक्षुर्हिता वा (**चित्राम्**) अद्भुतसुखप्रकाशिकाम् (**इषम्**) इच्छामन्नादिप्राप्तिं वा (**आपः**) जलानि (**न**) इव (**पीपयः**) पाययसि। ण्यन्तोऽयं प्रयोगः। (**परिज्मन्**) परितः सर्वतो जहि हिनस्ति दुष्टांस्तत्सम्बुद्धौ विद्युद्वा (**यया**) उक्तया (**शूर**) निर्भय निर्भयहेतुर्वा (**प्रति**) वीप्सायाम् (**अस्मभ्यम्**) (**यंसि**) दुष्टाचारान्निरुणत्सि। अत्र शपो लुक्। (**त्मनन्**) आत्मानम्। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ती**त्याकारलोपः। उपधादीर्घत्वनिषेधश्च। सायणाचार्य्येणेदं पदमुपधादीर्घत्वनिषेधकरं वचनमविज्ञायाशुद्धं व्याख्यातम् (**ऊर्जम्**) पराक्रममन्नं वा (**न**) इव (**विश्वध**) विश्वं दधातीति तत्सम्बुद्धौ (**क्षरध्यै**) क्षरितुं संचलितुम्॥८॥

अन्वयः-हे विद्युदिव परिज्मन् विश्वध शूर देवेन्द्र सभाद्यध्यक्ष! यथा त्वं यया नोऽस्माकं त्मनमात्मानं क्षरध्या ऊर्जं न संचलितुमन्नं पराक्रममिव यंसि त्यां तां चित्रामिषमस्मभ्यमापो न जलानीव प्रतिपीपयः पाययसि तथा वयमपि त्वां संतोषयेम॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽन्नं क्षुधं यथा च जलं पिपासां निवार्य्य सर्वान् प्राणिनः सुखयतस्तथैव सभाद्यध्यक्षः सर्वान्सुखयेत्॥८॥

पदार्थः-हे बिजुली के समान (**परिज्मन्**) सब ओर से दुष्टों के नष्ट करने (**विश्वध**) विश्व के धारण करने (**शूर**) निर्भय (**देव**) विद्या और शिक्षा के प्रकाश करने और (**इन्द्र**) सुखों के देनेवाले सभाध्यक्ष! जैसे (**त्वम्**) आप (**यया**) जिससे (**नः**) हम लोगों के (**त्मनम्**) आत्मा को (**क्षरध्यै**) चलायमान होने को (**ऊर्जम्**) अन्न वा पराक्रम के (**न**) समान (**यंसि**) दुष्ट काम से रोक देते हो (**त्यम्**) उस (**चित्राम्**) अद्भुत

सुखों को करनेवाली **(इषम्)** इच्छा वा अन्न को **(अस्मभ्यम्)** हम लोगों के लिये **(आपो न)** जलों के समान **(प्रतिपीपयः)** वार-वार पिलाते हो, वैसे हम भी आपको अच्छे प्रकार प्रसन्न करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अन्न क्षुधा को और जल तृषा को निवारण करके सब प्राणियों को सुखी करते हैं, वैसे सभापति आदि सबको सुखी करें॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर भी उक्त सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम्।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात्॥९॥५॥

अकारि। ते। इन्द्र। गोतमेभिः। ब्रह्माणि। आऽउक्ता। नमसा। हरिऽभ्याम्। सुऽपेशसम्। वाजम्। आ। भर। नः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥९॥

पदार्थः-(**अकारि**) क्रियते **(ते)** तव **(इन्द्र)** सभाद्यध्यक्ष **(गोतमेभिः)** ये गच्छन्ति जानन्ति प्राप्नुवन्ति विद्यादिशुभान् गुणांस्तैर्विद्वद्भिः किरणैर्वा। **गौरिति पदनामसु पठितम्।** (निघं०४.१) **(ब्रह्माणि)** बृहत्तमान्यन्नानि धनानि वा **(ओक्ता)** समन्तादुक्तानि प्रशंसितानि **(नमसा)** अन्नेन। **नम इति अन्ननामसु पठितम्।** (निघं०२.७) **वज्रनामसु पठितम्।** (निघं०२.२) **(हरिभ्याम्)** हरणशीलाभ्याम् बलपराक्रमाभ्याम् **(सुपेशसम्)** शोभनानि पेशांसि रूपाणि यस्मात्तम् **(वाजम्)** विज्ञानकरम् **(आ)** समन्तात् **(भर)** धर **(नः)** अस्मभ्यम् **(प्रातः)** प्रतिदिनम् **(मक्षु)** शीघ्रम् **(धियावसुः)** कर्मप्रज्ञाभ्यां सुखेषु वासयिता **(जगम्यात्)** पुनः पुनः प्राप्नुयात्॥९॥

अन्वयः-हे इन्द्र! सभाद्यध्यक्ष! ते तव यैर्गोतमेभिः सुशिक्षितैः पुरुषैर्नमसा हरिभ्यां यान्योक्ता ब्रह्माण्यकारि तैः सह नोऽस्मभ्यं यथा धियावसुः सुपेशसं वाजं प्रातर्जगम्यादेतद्भरेच्च तथा त्वमेनत् सर्वं मक्ष्वाभर॥९॥

भावार्थः-यथा विद्युत्सूर्य्यादिरूपेण सर्वं जगत्पोषति तथैव सभाद्यध्यक्षादयः प्रशस्तैर्धनादिभिर्युक्तां प्रजां कुर्य्युः॥९॥

अस्मिन् सूक्त ईश्वरसभाद्यध्यक्षाग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति त्रिषष्टितमं ६३ सूक्तं पञ्चमो ५ वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** सभा आदि के पति! **(ते)** आपके जिन **(गोतमेभिः)** विद्या से उत्तम शिक्षा को प्राप्त हुए शिक्षित पुरुषों से **(नमसा)** अन्न और धन **(हरिभ्याम्)** बल और पराक्रम से जिन **(ओक्ता)** अच्छे प्रकार प्रशंसा किये हुए **(ब्रह्माणि)** बड़े-बड़े अन्न और धनों को **(अकारि)** करते हैं, उनके साथ **(नः)** हम लोगों के लिये उनको जैसे **(धियावसुः)** कर्म और बुद्धि से सुखों में बसानेवाला विद्वान्

(सुपेशसम्) उत्तमरूप युक्त **(वाजम्)** विज्ञान समूह को **(प्रातः)** प्रतिदिन **(जगम्यात्)** पुनः-पुनः प्राप्त होवे और इसका धारण करे, वैसे आप पूर्वोक्त सबको **(मक्षु)** शीघ्र **(आ भर)** सब ओर से धारण कीजिये॥९॥

भावार्थः-जैसे बिजुली सूर्य्य आदि रूप से सब जगत् को आनन्दों से पुष्ट करती है, वैसे सभाध्यक्ष आदि भी उत्तम धन और श्रेष्ठ गुणों से प्रजा को पुष्ट करें॥९॥

इस सूक्त में ईश्वर, सभाद्यध्यक्ष और अग्नि के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह त्रेसठवां ६३ सूक्त और पाचवां ५ वर्ग समाप्त हुआ॥

अथ पञ्चदशर्चस्य चतु:षष्टितमस्य सूक्तस्य गौतमो नोधा ऋषि:। इन्द्रो देवता। १,४,६,९,१४ विराड्जगती। २,३,५,७,१०,११,१३ निचृज्जगती। ८,१२ जगती छन्द:। निषाद: स्वर:। १५ निचृत्त्रिष्टुप्छन्द:। धैवत: स्वर:॥

अथ वायुस्वरूपगुणदृष्टान्तेन विद्वद्गुणा उपदिश्यन्ते॥

अब चौसठवें सूक्त का आरम्भ किया जाता है, उसके पहिले मन्त्र में वायु के गुणों के दृष्टान्त से विद्वान् के गुणों का उपदेश किया है॥

वृष्णे शर्धाय सुमखाय वेधसे नोध: सुवृक्तिं प्र भरा मरुद्भ्य:॥
अपो न धीरो मनसा सुहस्त्यो गिर: समञ्जे विदथेष्वाभुव:॥ १॥

वृष्णे। शर्धाय। सुऽमखाय। वेधसे। नोध:। सुऽवृक्तिम्। प्र। भर। मरुत्ऽभ्य:। अप:। न। धीर:। मनसा। सुऽहस्त्य:। गिर:। सम्। अञ्जे। विदथेषु। आऽभुव:॥ १॥

पदार्थ:-(**वृष्णे**) वृष्टिकर्त्रे (**शर्द्धाय**) बलाय (**सुमखाय**) शोभनाय चेष्टासाध्याय यज्ञाय (**वेधसे**) धारणाय। अत्र **विधाञो वेध च।** (उणा०४.१३२) अनेनास्य सिद्धि:। (**नोध:**) स्तावक: (**सुवृक्तिम्**) वर्जयन्त्यनया सा शोभना चासौ वृक्तिश्च ताम् (**प्र**) प्रकृष्टार्थे (**भर**) धर (**मरुद्भ्य:**) वायुभ्य: (**अप:**) प्राणान् कर्माणि वा (**न**) इव (**धीर:**) संयमी विद्वान् मनुष्य: (**मनसा**) विज्ञानेन (**सुहस्त्य:**) शोभनहस्तक्रिया: सुहस्तास्तासु साधु: (**गिर:**) वाच: (**सम्**) सम्यक् (**अञ्जे**) स्वेच्छया गृह्णामि (**विदथेषु**) युद्धादिचेष्टामययज्ञेषु (**आभुव:**) समन्ताद्भवन्ति ये या वा तान् ता वा॥ १॥

अन्वय:-हे नोधो मनुष्य! आभुव अपो नेव धीर: सुहस्त्योऽहं वृष्णे शर्द्धाय वेधसे सुमखाय मनसा मरुद्भ्यो विदथेषु गिर: सुवृक्तिं च समञ्जे तथैव त्वं प्रभर॥ १॥

भावार्थ:-अत्रोपमालङ्कार:। मनुष्यैर्यावच्चेष्टा भावना बलं विज्ञानं पुरुषार्थो धारणं विसर्जनं वचनं श्रवणं वृद्धि: क्षय: क्षुत्पिपासादिकं च भवति तावत् सर्वं वायुनिमित्तेनैव जायत इति वेद्यम्। यादृशीमेतां विद्यामहं जानामि तादृशीमेव त्वमपि गृहाणेति सर्वदोपदेष्टव्यम्॥ १॥

पदार्थ:-हे (**नोध:**) स्तुति करनेवाले मनुष्य! (**आभुव:**) अच्छे प्रकार उत्पन्न होनेवाले (**अप:**) कर्म वा प्राणों के समान (**धीर:**) संयम से रहनेवाला विद्वान् (**सुहस्त्य:**) उत्तम हस्तक्रियाओं में कुशल मैं (**मनसा**) विज्ञान और (**मरुद्भ्य:**) पवनों के सकाश से (**विदथेषु**) युद्धादि चेष्टामय यज्ञों में (**गिर:**) वाणी (**सुवृक्तिम्**) उत्तमता से दुष्टों को रोकनेवाली क्रिया को (**समञ्जे**) अपनी इच्छा से ग्रहण करता हूँ, वैसे ही तू (**प्रभर**) धारण कर॥ १॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जितनी चेष्टा, भावना, बल, विज्ञान, पुरुषार्थ धारण करना, छोड़ना, कहना, सुनना, बढ़ना, नष्ट होना, भूख, प्यास आदि हैं, वे सब

वायु के निमित्त से ही होते हैं। जिस प्रकार कि इस विद्या को मैं जानता हूँ, वैसे ही तू भी ग्रहण कर, ऐसा उपदेश सबको करो॥१॥

पुनस्ते वायवः कीदृशा इत्युपदिश्यते॥

फिर भी उक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

ते ज॑ज्ञिरे दि॒व ऋ॒ष्वास॑ उ॒क्षणो॑ रु॒द्रस्य॒ मर्या॒ असु॑रा अरे॒पस॑:॥
पा॒व॒कास॒: शुच॑य॒: सूर्या॑ इव॒ सत्वा॑नो॒ न द्रप्सिनो॑ घो॒रव॑र्पसः॥२॥

ते। ज॒ज्ञि॒रे। दि॒वः। ऋ॒ष्वास॑:। उ॒क्षणः॑। रु॒द्रस्य॑। मर्याः॑। असु॑राः। अ॒रे॒पस॑:। पा॒व॒कास॑:। शुच॑यः। सूर्याः॑ऽइव। सत्वा॑नः। न। द्रप्सिन॑:। घो॒रऽव॑र्पसः॥२॥

पदार्थः-(**ते**) वायव इव (**जज्ञिरे**) प्रादुर्भवन्ति (**दिवः**) प्रकाशात् (**ऋष्वासः**) ज्ञानहेतवः (**उक्षणः**) सेचनकर्त्तारः। अत्र **वा षपूर्वस्य निगमे।** (अष्टा०६.४.९) अनेन दीर्घनिषेधः। (**रुद्रस्य**) समष्टिप्राणस्य (**मर्याः**) मरणधर्मकाः (**असुराः**) प्रकाशरहिताः (**अरेपसः**) अव्यक्तशब्दा निष्पापाः (**पावकासः**) पवित्रकारकाः (**शुचयः**) पवित्रा (**सूर्य्याइव**) सूर्य्यस्य किरणा इव (**सत्वानः**) बलपराक्रमप्राणिभूतगणाः (**न**) (**इव**) (**द्रप्सिनः**) बहुद्रप्सो विविधो मोहोऽस्ति येषु ते (**घोरवर्पसः**) घोरं वर्पो रूपं येषान्ते॥२॥

अन्वयः-हे मनुष्या! युष्माभिर्ये रुद्रस्य जीवस्य प्राणसमुदायस्य वा सम्बन्धिनो वायवो दिवो जज्ञिरे जायन्ते। ये सूर्य्याइव ऋष्वास उक्षणः पावकासः शुचयो वर्त्तन्ते। ये सत्वानो नेव मर्या असुरा अरेपसो द्रप्सिनो घोरवर्पसः सन्ति तेषां सङ्गेन विद्यादिशुभगुणा गृह्यन्ताम्॥२॥

भावार्थः-अत्रोपमालङ्कारौ। यथेश्वरसृष्टौ सिंहहस्तिमनुष्यादयो बलवन्तः सन्ति तथा वायवो वर्त्तन्ते। यथा सूर्यकिरणाः पवित्रकारकाः सन्ति तथैव वायवोऽपि। नह्येतयोर्विना रोगाऽऽरोग्यमरणजन्मादयो व्यवहाराः सम्भवितुं शक्यास्तस्मान्मनुष्यैरेतेषां गुणान् विज्ञाय सर्वेषु कार्येषु यथावत्संप्रयोगः कार्याः॥२॥

पदार्थः-हे मनुष्यो! तुम लोगों को उचित है कि जो (**रुद्रस्य**) जीव वा प्राण के सम्बन्धी पवन (**दिवः**) प्रकाश से (**जज्ञिरे**) उत्पन्न होते हैं जो (**सूर्याइव**) सूर्य के किरणों के समान (**ऋष्वासः**) ज्ञान के हेतु (**उक्षणः**) सेचन और (**पावकासः**) पवित्र करनेवाले (**शुचयः**) शुद्ध जो (**सत्वानः**) बल पराक्रमवाले प्राणियों के (**न**) समान (**मर्याः**) मरणधर्मयुक्त (**असुराः**) प्रकाशरहित (**अरेपसः**) पापों से पृथक् (**द्रप्सिनः**) नाना प्रकार के मोहों से युक्त (**घोरवर्पसः**) भयङ्कर वायु के हैं (**ते**) उन्हीं के संग से विद्यादि उत्तम गुणों का ग्रहण करो॥२॥

भावार्थः–इस मन्त्र में दो उपमालङ्कार हैं। जैसे ईश्वर की सृष्टि में सिंह, हाथी और मनुष्य आदि प्राणी बलवान् होते हैं, वैसे वायु भी है। जैसे सूर्य की किरणें पवित्र करने वाली हैं, वैसे वायु भी। इन दोनों के बिना, रोग, रोग का नाश, मरण और जन्म आदि व्यवहार नहीं हो सकते। इससे मनुष्यों को चाहिये कि इनके गुणों को जानके सब कार्यों में यथावत् संप्रयोग करें॥ २॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर भी पूर्वोक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

युवा॑नो रु॒द्रा अ॒जरा॑ अभो॒ग्घनो॑ ववृ॒क्षुर॒ध्रि॑गावः॒ पर्व॑ताइव।
दृ॒ळ्हा चि॒द्विश्वा॒ भुव॑नानि॒ पार्थि॑वा॒ प्र च्या॑वयन्ति दि॒व्यानि॑ म॒ज्मना॑॥ ३॥

युवा॑नः। रु॒द्राः। अ॒जरा॑ः। अ॒भो॒क्ऽहन॑ः। व॒वृ॒क्षुः। अ॒ध्रि॑ऽगावः। पर्व॑ताःऽइव। दृ॒ळ्हा। चि॒त्। विश्वा॑। भुव॑नानि। पार्थि॑वा। प्र। च्या॒व॒य॒न्ति॒। दि॒व्यानि॑। म॒ज्मना॑॥ ३॥

पदार्थः–(**युवानः**) मिश्रणामिश्रणकर्त्तृत्वेन बलिष्ठाः (**रुद्राः**) मरणज्वरादिपीडाहेतुत्वाद्रोदयितारः (**अजराः**) जन्मजरामृत्युधर्मादिरहित्वात्कारणरूपेण नित्याः (**अभोग्घनः**) ये भोज्यन्ते ते भोजो हन्यन्ते ते हनः। भोजश्च ते हनो भोग्घनः न भोग्घनोऽभोग्घनस्ते (**ववक्षुः**) ये वक्षयन्ति रोषयन्ति ते (**अध्रिगावः**) अधृता गावो रश्मयो यैस्ते (**पर्वताइव**) यथा पर्वता मेघाः शैला वा धर्त्तारः सन्ति तथैव मूर्त्तद्रव्यधर्त्तारः (**दृढा**) दृढानि (**चित्**) अपि (**विश्वा**) सर्वाणि (**भुवनानि**) सर्वेषां पदार्थानामधिकरणानि (**पार्थिवा**) पृथिवीत्याख्यस्य कारणस्य विकारभूतानि भूगोलाख्यानि कार्य्याणि (**प्र**) प्रकृष्टार्थे (**च्यावयन्ति**) प्रचालयन्ति (**दिव्यानि**) दिवि प्रकाशे भवानि सूर्य्यविद्युदादीनि (**मज्मना**) शुद्धिधारणक्षेपणाख्येन बलेन। अत्र मस्जधातोरौणादिको मनिन् प्रत्ययो बाहुलकात्सकारलोपश्च। **मज्मेति बलनामसु पठितम्।** (निघं०२.९)॥३॥

अन्वयः–हे मनुष्याः! यूयं य इमे पर्वताइव युवानोऽभोग्घनोऽध्रिगावोऽजरा रुद्रा जीवान् ववक्षु रोषयन्ति। मज्मना पार्थिवा दिव्यानि चिदपि विश्वा भुवनानि दृढा प्रच्यावयन्ति तान् विद्यया यथावद्विदित्वा कार्य्येषु संप्रयोजयत॥ ३॥

भावार्थः–अत्रोपमालङ्कारः। मनुष्यैर्यथा मेघा जलाधिकरणाः शैलाश्चौषध्याद्यधिकरणाः सन्ति तथैवैते संयोगवियोगकर्त्तारः सर्वाधाराः सुखदुःखहेतवो नित्या रूपरहिताः स्पर्शवन्तो वायवः सन्तीति वेदितव्यम्। नह्येतैर्विना भूगोलजलाग्निपुञ्जाश्चैतेषां कणाश्च गन्तुमागन्तुं स्थातुं च शक्नुवन्ति॥ ३॥

पदार्थः–हे मनुष्यो! तुम लोग जो ये (**पर्वताइव**) पर्वत वा मेघ के समान धारण करनेवाले (**युवानः**) पदार्थों के मिलाने तथा पृथक् करने में बड़े बलवान् (**अभोग्घनः**) भोजन करने तथा मरने से पृथक् (**अध्रिगावः**) किरणों को नहीं धारण करनेवाले अर्थात् प्रकाशरहित (**अजराः**) जन्म लेके वृद्ध होना, फिर मरना इत्यादि कामों से रहित तथा कारणरूप से नित्य (**रुद्राः**) ज्वर आदि की पीडा से

रुलानेवाले वायु जीवों को **(ववक्षुः)** रुष्ट करते हैं **(मज्मना)** बल से **(पार्थिवा)** भूगोल आदि **(दिव्यानि)** प्रकाश में रहनेवाले सूर्य आदि लोक **(चित्)** और **(विश्वा)** सब **(भुवनानि)** लोक **(दृढा)** दृढ़ स्थिरों को भी **(प्रच्यावयन्ति)** चलायमान करते हैं, उनको विद्या से यथावत् जानकर कार्य्यों के बीच लगाओ॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को जैसे मेघ जलों के आधार और पर्वत ओषधि आदि के आधार हैं, वैसे ही ये संयोग-वियोग करनेवाले, सबके आधार, सुख-दुःख होने के हेतु, नित्यरूप, गुण से अलग, स्पर्श गुणवाले पवन हैं, ऐसा समझना योग्य है। और इन्हींके विना जल, अग्नि और भूगोल तथा इनके परमाणु भी जान-आने **[**तथा ठहरने**]** को समर्थ नहीं हो सकते॥३॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षःसु रुक्माँ अधि येतिरे शुभे।
अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः॥४॥

चित्रैः। अञ्जिऽभिः। वपुषे। वि। अञ्जते। वक्षःऽसु। रुक्मान्। अधि। येतिरे। शुभे। अंसेषु। एषाम्। नि। मिमृक्षुः। ऋष्टयः। साकम्। जज्ञिरे। स्वधया। दिवः। नरः॥४॥

पदार्थः-(**चित्रैः**) अद्भुतक्रियास्वभावैः (**अञ्जिभिः**) व्यक्तीकरणादिधर्मैः (**वपुषे**) शरीरधारण-पोषणाग्निरूपप्रकाशाय। **वपुरिति रूपनामसु पठितम्।** (निघं०३.७) (**वि**) विशेषार्थे (**अञ्जते**) गच्छन्ति। अत्र व्यत्ययेनात्मनेपदम्। (**वक्षःसु**) हृदयेषु (**रुक्मान्**) विद्युज्जाठराग्निप्रकाशान् (**अधि**) उपरिभावे (**येतिरे**) प्रयतन्ते (**शुभे**) शोभनाय (**अंसेषु**) बलपराक्रमाधिकरणेषु भुजमूलेषु (**एषाम्**) वायुनां योगे (**नि**) नितराम् (**मिमृक्षुः**) सहन्ते। अत्र **बहुलं छन्दसी**त्यभ्यासस्येत्वम्। (**ऋष्टयः**) गमनागमनशीलाः (**साकम्**) सह (**जज्ञिरे**) जायन्ते जनयन्ति वा (**स्वधया**) पृथिव्यादिनान्नेना वा (**दिवः**) सूर्य्यादिप्रकाशान् (**नरः**) नेतारः॥४॥

अन्वयः-हे मनुष्याः! यूयं य एते ऋष्टयो नरो वायवश्चित्रैरञ्जिभिः शुभे वपुषे व्यञ्जते वक्षःसु रुक्मानधियेतिरे स्वधया साकं जज्ञिरे जायन्ते दिवो जनयन्ति चैषामंसेषु निमिमृक्षुः सर्वे पदार्थाः सहन्ते तान् विदित्वा सम्प्रयोजयत॥४॥

भावार्थः-विद्वद्भिरीदृग्दिव्यगुणान् वायून् विदित्वा शुद्धानि सुखानि भोक्तव्यानि॥४॥

पदार्थः-हे मनुष्यो! तुम लोग जो ये (**ऋष्टयः**) इधर-उधर चलने तथा (**नरः**) पदार्थों को प्राप्त करनेवाले पवन (**चित्रैः**) आश्चर्य्य रूप क्रिया, गुण और स्वभाव तथा (**अञ्जिभिः**) प्रकट करना आदि धर्मों से (**शुभे**) सुन्दर (**वपुषे**) शरीर के धारण वा पोषण के लिये (**व्यञ्जते**) विशेष करके प्राप्त होते हैं, जो (**वक्षःसु**) हृदयों में (**रुक्मान्**) बिजुली तथा जाठराग्नि के प्रकाशों को (**अधियेतिरे**) यत्नपूर्वक सिद्ध

करते **(स्वधया)** पृथिवी, आकाश तथा अन्न के **(साकम्)** साथ **(जायन्ते)** उत्पन्न होते और **(दिवः)** सूर्य आदि के प्रकाशों को उत्पन्न करते हैं, **(एषाम्)** इन पवनों के योग से **(अंसेषु)** बल, पराक्रम के मूल कन्धों में **(निमिमृक्षुः)** सब पदार्थ समूह को प्राप्त हो सकते हैं, उनको यथावत् जानकर अपने कार्य्यों में सम्प्रयुक्त करो॥४॥

भावार्थः-विद्वानों को उचित है कि ऐसे-ऐसे विलक्षण गुणवाले वायुओं को जानकर शुद्ध-शुद्ध सुखों को भोगें॥४॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर उक्त वायु कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत।

दुहन्त्यूधर्दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः॥५॥६॥

ईशानऽकृतः। धुनयः। रिशादसः। वातान्। विऽद्युतः। तविषीभिः। अक्रत। दुहन्ति। ऊधः। दिव्यानि। धूतयः। भूमिम्। पिन्वन्ति। पयसा। परिऽज्रयः॥५॥

पदार्थः-(**ईशानकृतः**) य ईशानानैश्वर्य्ययुक्तान् कुर्वन्ति ते **(धुनयः)** रजो वृक्षादीन् कम्पयितारः **(रिशादसः)** ये रिशान् हिंसकान् रोगानदन्ति ते **(वातान्)** पवनान् **(विद्युत्)** स्तनयित्नून् **(तविषीभिः)** बलैः **(अक्रत)** कुर्वन्ति **(दुहन्ति)** पिप्रति **(ऊधः)** उषसम्। **ऊधरित्युषर्नामसु पठितम्।** (निघं०१.८) **(दिव्यानि)** शुद्धानि जलादीनि वस्तूनि कर्माणि वा **(धूतयः)** ये धून्वन्ति **(भूमिम्)** पृथिवीम् **(पिन्वन्ति)** सेवन्ते सिञ्चन्ति वा **(पयसा)** जलेन रसेन वा **(परिज्रयः)** ये परितः सर्वतो जीर्णयन्ति ते॥५॥

अन्वयः-हे मनुष्या! यूयं य एत ईशानकृतो धुनयो रिशादसो धूतयः परिज्रयस्तविषीभिर्विद्युतोऽक्रत ये पयसोऽधर्दुहन्ति भूमिं पिन्वन्ति सेवन्ते तान् वातान् विजानीत॥५॥

भावार्थः-हे मनुष्या! युष्मभ्यमीश्वरो वायुगुणानुपदिशति। उक्तानुक्तगुणा वायवो विद्युदुत्पादनेन वृष्ट्या भूम्यौषधादिसेचनेन सर्वान् प्राणिनः सुखयन्तीति विजानीत॥५॥

पदार्थः-हे मनुष्यो! तुम लोग जो ये **(ईशानकृतः)** जीवों के ऐश्वर्य्ययुक्त करने **(धुनयः)** धूलि के वर्षाने, वृक्ष आदि के कम्पाने **(रिशादसः)** जीवों को दुःख देनेवाले रोगों के नाश करने **(धूतयः)** सब पदार्थों को कम्पाने और **(परिज्रयः)** सब ओर से पदार्थों को जीर्ण करनेवाले वायु **(तविषीभिः)** अपने बलों से **(विद्युतः)** बिजुली आदि को **(अक्रत)** उत्पन्न करते हैं तथा जो **(पयसा)** जल वा रस से **(ऊधः)** उषा को **(दुहन्ति)** पूर्ण करते हैं जो **(भूमिम्)** पृथिवी **(दिव्यानि)** शुद्ध जल आदि वस्तु तथा उत्तम कार्य्यों का **(पिन्वन्ति)** सेवन या सेचन करते हैं **(वातान्)** उन पवनों को जानो॥५॥

भावार्थः-हे मनुष्यो! तुम लोगों के लिये परमेश्वर वायु के गुणों का उपदेश करता है कि कहे वा न कहे गुणवाले वायु बिजुली को उत्पन्न करके वर्षा द्वारा भूमि पर ओषधि आदि के सेचन से सब प्राणियों को सुख देनेवाले होते हैं, ऐसा तुम सब लोग जानो॥५॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर उक्त वायु किस प्रकार के गुणवाले हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः।
अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम्॥६॥

पिन्वन्ति। अपः। मरुतः। सुऽदानवः। पयः। घृतऽवत्। विदथेषु। आऽभुवः। अत्यम्। न। मिहे। वि। नयन्ति। वाजिनम्। उत्सम्। दुहन्ति। स्तनयन्तम्। अक्षितम्॥६॥

पदार्थः-(**पिन्वन्ति**) सेवन्ते सिञ्चन्ति वा (**अपः**) प्राणान् जलान्यन्तरिक्षावयवान् (**मरुतः**) शरीरत्यागहेतवः (**सुदानवः**) सुष्ठु दानवो दानानि येभ्यस्ते (**पयः**) जलं रसं वा (**घृतवत्**) घृतेन तुल्यम् (**विदथेषु**) यज्ञेषु (**आभुवः**) समन्ताद्भवन्ति ये ते (**अत्यम्**) अश्वम् (**न**) इव (**महे**) वीर्यसेचनाय वेगाय वा (**वि**) विविधार्थे (**नयन्ति**) प्राप्नुवन्ति (**वाजिनम्**) प्रशस्तो वाजो वेगो यस्यास्ति तम् (**उत्सम्**) कूपम् (**दुहन्ति**) पिपुरति (**स्तनयन्तम्**) शब्दयन्तम् (**अक्षितम्**) क्षयरहितम्॥६॥

अन्वयः-हे मनुष्याः! यूयं यथाऽऽभुवः सुदानवो मरुतो विदथेषु घृतवत्पयः पिन्वन्ति मिह अत्यं नेवापो विनयन्ति। उत्समिवाक्षितं स्तनयन्तं वाजिनं दुहन्ति तथाऽऽचरत॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा यज्ञेषु घृतादिकं हविः क्षेत्रपश्वादितृप्तये कूपो वडवासेचनायाश्वश्चास्ति तथैव विद्यया संप्रयुक्ता वायवः सर्वाणि कार्याणि साध्नुवन्तीति॥६॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे (**आभुवः**) अच्छे प्रकार उत्पन्न होने तथा (**सुदानवः**) उत्तम दान देने के हेतु (**मरुतः**) पवन (**विदथेषु**) यज्ञों में (**घृतवत्**) घृत के तुल्य (**पयः**) जल वा रस को (**पिन्वन्ति**) सेवन वा सेचन करते हैं (**मिहे**) वीर्य वृष्टि के लिये (**अत्यम्**) घोड़े के (**न**) समान (**अपः**) प्राण, जल वा अन्तरिक्ष के अवयवों को (**विनयन्ति**) नाना प्रकार से प्राप्त करते हैं (**उत्सम्**) और कूप के समान (**अक्षितम्**) नाशरहित (**स्तनयन्तम्**) शब्द करते हुए (**वाजिनम्**) उत्तम वेगवाले पुरुष को (**दुहन्ति**) पूर्ण करते हैं, वैसे हो और उनको कार्यों में लगाओ॥६॥

भावार्थः-इस मन्त्र में उपमा तथा वाचकलुप्तोपमालङ्कार हैं। जैसे यज्ञ में घृत आदि पदार्थ, क्षेत्र पशु आदि की तृप्ति के लिये कूप तथा घोड़ी की तृप्ति के लिये घोड़ा है, वैसे विद्या से संप्रयोग किये हुए पवन सब कार्यों को सिद्ध करते हैं॥६॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे पूर्वोक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

म॒हि॒षासो॑ मा॒यिन॑श्चि॒त्रभा॑नवो गि॒रयो॒ न स्वत॑वसो रघु॒स्पद॑:।
मृ॒गाइ॑व ह॒स्तिन॑: खादथा॒ वना॒ यदारु॑णीषु त॒वि॒षी॒र॒युं॑ध्वम्॥७॥

म॒हि॒षास॑:। मा॒यिन॑:। चि॒त्रऽभा॑नव:। गि॒रय॑:। न। स्वऽत॑वस:। र॒घु॒ऽस्पद॑:। मृ॒गाःऽइ॑व। ह॒स्तिन॑:। खा॒द॒थ॒। वना॑। यत्। आरु॑णीषु। त॒वि॒षी॒:। अ॒यु॒ं॑ध्वम्॥७॥

पदार्थ:-(**महिषास:**) पूजितगुणा महान्त:। **महिष इति महन्नामसु पठितम्।** (निघं०३.३) (**मायिन:**) प्रशस्ता माया प्रज्ञा विद्यते येभ्यस्ते (**चित्रभानव:**) चित्रा अद्भुता भानवो दीप्तयो येभ्यस्ते (**गिरय:**) ये जलं गिलन्ति शब्दं वा गृणन्ति ते मेघा: (**न**) इव (**स्वतवस:**) स्वं स्वकीयं तवो बलं येषु ते (**रघुस्पद:**) रघव आस्वादा: स्पदश्च प्रश्रवणानि प्रकृष्टगमनानि येषां ते (**मृगाइव**) हरिणवद् वेगवन्त: (**हस्तिन:**) किरणा: (**खादथ**) खादन्ति (**वना**) वनानि जलानि वा (**यत्**) यथा (**आरुणीषु**) गच्छन्ति प्राप्नुवन्ति सुखानि यैस्तान्यरुणानि यानानि तेषामिमा: क्रियास्तासु (**तविषी:**) बलानि (**अयुग्ध्वम्**) योजयत॥७॥

अन्वय:-हे मनुष्या! यूयं यद्यथा महिषासश्चित्रभानवो मायिन: स्वतवसो रघुस्पदो गिरवो नेव जलानि हस्तिनो मृगाइव च वना खादथ तथैतैसस्तविषीरारुणीष्वयुग्ध्वम्॥७॥

भावार्थ:-अत्रोपमालङ्कारौ। मनुष्यैर्नहि वायुभिर्विना गमनभोजनयानचालनादीनि कर्माणि कर्त्तुं शक्यन्ते तस्मादेते वायवो विमाननौकादियानेषु संप्रयोज्याऽग्निजलयोगेन यानानि सद्यश्चालनीयानि॥७॥

पदार्थ:-हे मनुष्यो! तुम लोग (**यत्**) जैसे (**महिषास:**) बड़े-बड़े सेवन करने योग्य गुणों से युक्त (**चित्रभानव:**) चित्र-विचित्र दीप्तिवाले (**मायिन:**) उत्तम बुद्धि होने के हेतु (**स्वतवस:**) अपने बल से बलवान् (**रघुस्पद:**) अच्छे स्वाद के कारण वा उत्तम चलन क्रिया से युक्त (**गिरयो न**) मेघों के समान जलों को तथा (**हस्तिन:**) हाथी और (**मृगाइव**) बलवाले हरिणों के समान वेगयुक्त वायु (**वना**) जल वा वनों को (**खादथ**) भक्षण करते हैं, वैसे इन (**तविषी:**) बलों को (**आरुणीषु**) प्राप्त होते हैं, सुख जिन्हों में, उन सेना और यानों की क्रियाओं में (**अयुग्ध्वम्**) ठीक-ठीक विचारपूर्वक संयुक्त करो॥७॥

भावार्थ:-इस मन्त्र में दो उपमालङ्कार हैं। मनुष्यों को चाहिये कि पवनों के विना हमारे चलना, खाना, यान का चलाना आदि काम भी सिद्ध नहीं हो सकते, इससे इन वायुओं को सेना, विमान और नौका आदि यानो में संयुक्त करके अग्नि जलों के संयोग से यानों को शीघ्र चलाया करें॥७॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे पूर्वोक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

सिं॒हाइ॑व नानदति॒ प्रचे॑तस: पि॒शाइ॑व सु॒पिशो॑ वि॒श्ववे॑दस:।

क्षपो॒ जिन्व॑न्त॒: पृष॑तीभिर्ऋ॒ष्टिभि॒: समित्स॒बाध॒: शव॒साहि॑मन्यव:॥८॥

सिं॒हाऽइ॑व। नान॑द॒ति॒। प्रऽचे॑तस:। पि॒शा:ऽइ॑व। सु॒ऽपिश॑:। वि॒श्वऽवे॑दस:। क्षप॑:। जिन्व॑न्त:। पृष॑तीभि:। ऋ॒ष्टिऽभि॑:। सम्। इत्। स॒ऽबाध॑:। शव॑सा। अहि॑ऽमन्यव:॥८॥

पदार्थ:-(**सिंहाइव**) व्याघ्रतुल्यबला: (**नानदति**) पुन: पुन: शब्दयन्ति (**प्रचेतस:**) प्रकृष्टं चेत: संज्ञानं येभ्यस्ते (**पिशाइव**) यथा बलयुक्तावयववन्तो गजा: (**सुपिश:**) सुष्ठु पिशन्त्यवयुवन्ति ये ते (**विश्ववेदस:**) ये विश्वानि सर्वाणि कर्माणि वेदयन्ति प्रापयन्ति ते (**क्षप:**) रात्री:। **क्षपेति रात्रिनामसु पठितम्।** (निघम्)१.७) (**जिन्वत:**) तर्पयन्त: (**पृषतीभि:**) स्वगमनागमनवेगादिगुणै: (**ऋष्टिभि:**) व्यवहारप्रापकै: (**सम्**) सम्यगर्थे (**इत्**) एव (**सबाध:**) ये पदार्थान् सहैव बाधन्ते ते (**शवसा**) बलेन (**अहिमन्यव:**) येऽहिं मेघं मानयन्ति ते ज्ञापयन्ति ते॥८॥

अन्वय:-हे मनुष्या! यूयं य एते प्रचेतस: सुपिश: सबाधोऽहिमन्यव इदेव ऋष्टिभि: पृषतीभि: क्षप: संजिन्वन्तो विश्ववेदसो वायव: शवसा सिंहा इव पिशा इव बलाऽवयववन्तो गजा इव नानदति तान् कार्य्येषु संप्रयोजयत॥८॥

भावार्थ:-अत्रोपमालङ्कारौ। हे मनुष्या:! यूयं यावद्बलपराक्रमजीवनश्रवणमननादिकर्मास्ति तावत्सर्वं वायूनां सकाशादेव जायत इति विजानीत॥८॥

पदार्थ:-हे मनुष्यो! तुम लोग जो ये (**प्रचेतस:**) उत्तम विज्ञान होने के हेतु (**सुपिश:**) सुन्दर अवयवों के करनेवाले (**सबाध:**) पदार्थों को अपने नियम में रखनेवाले (**अहिमन्यव:**) मेघ की वर्षा का ज्ञान करानेवाले वायु (**इत्**) ही (**ऋष्टिभि:**) व्यवहारों के प्राप्त कराने और (**पृषतीभि:**) अपने गमनागमन वेगादिगुणों से (**क्षप:**) रात्रि को (**संजिन्वन्त:**) तृप्त करते हुए (**विश्ववेदस:**) सब कर्मों के प्राप्त करानेवाले पवन (**शवसा**) अपने बलों से (**सिंहाइव**) सिहों के समान तथा (**पिशाइव**) बड़े बलवाले हाथियों के समान (**नानदति**) अत्यन्त शब्द करते हैं, उनको कार्यों की सिद्धि के लिये यथावत् संयुक्त करो॥८॥

भावार्थ:-इस मन्त्र में दो उपमालङ्कार हैं। हे मनुष्यो! तुम ऐसा जानो कि जितना बल, पराक्रम, जीवन, सुनना, विचारना आदि क्रिया है, वे सब वायु के सकाश से ही होती हैं॥८॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर पूर्वोक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

रोद॑सी॒ आ व॑दता गणश्रियो॒ नृषा॑च: शूरा॒: शव॒साहि॑मन्यव:।
आ ब॒न्धुरे॑ष्व॒मति॒र्न दर्श॒ता वि॒द्युन्न त॑स्थौ मरुतो॒ रथे॑षु व:॥९॥

रोदसी इति। आ। वदत। गणऽश्रियः। नृऽसाचः। शूराः। शवसा। अहिऽमन्यवः। आ। बन्धुरेषु। अमतिः। न। दर्शता। विऽद्युत्। न। तस्थौ। मरुतः। रथेषु। वः॥९॥

पदार्थः-(**रोदसी**) द्यावापृथिव्यौ (**आ**) समन्तात् (**वदत**) उपदिशत (**गणश्रियः**) गणानां समूहानां श्रियः शोभा येषु ते (**नृषाचः**) ये कर्म्मसु नॄन् जीवान् साचयन्ति संयोजयन्ति ते (**शूराः**) शूरवीराः (**शवसा**) बलेन (**अहिमन्यवः**) येऽहिं व्याप्तिं मानयन्ति ज्ञापयन्ति ते (**आ**) अभितः (**बन्धुरेषु**) यानयन्त्राणां बन्धनेषु (**अमतिः**) रूपम्। **अमतिरिति रूपनामसु पठितम्।** (निघं०३.७) (**न**) इव (**दर्शता**) द्रष्टव्यानि (**विद्युत्**) स्तनयित्नुः (**न**) इव (**तस्थौ**) तिष्ठति (**मरुतः**) शिल्पविद्याविद ऋत्विजः (**रथेषु**) यानेषु (**वः**) युष्माकम्॥९॥

अन्वयः-हे गणश्रियो नृषाचोऽहिमन्यवः शूरा मरुतो! येऽमतिर्न रूपमिव दर्शता विद्युत्तस्थौ न वर्त्तत इव वर्त्तमाना वायवो बन्धुरेषु रोदसी आधरयन्ति ये वो युष्माकं रथेषु संयुक्ताः कार्य्याणि साध्नुवन्ति तानस्मभ्यमावदत समन्तादुपदिशत॥९॥

भावार्थः-अत्रोपमालङ्कारौ। मनुष्यैः सर्वमूर्त्तद्रव्याधाराः शौर्य्यशिल्पविद्याकार्यहेतवो वायव एव सन्तीति बोद्धव्यम्॥९॥

पदार्थः-हे (**गणश्रियः**) इकट्ठे होके शोभा को प्राप्त होने (**नृषाचः**) मनुष्यों को कर्मों में संयुक्त करने और (**अहिमन्यवः**) अपनी व्याप्ति को जाननेवाले (**शूराः**) शूरवीर के तुल्य (**मरुतः**) शिल्पविद्या के जाननेवाले ऋत्विज विद्वान् लोग जो (**अमतिर्न**) जैसे रूप तथा (**दर्शता**) देखने योग्य (**विद्युत्**) बिजुली (**तस्थौ**) वर्त्तमान होती वैसे वर्त्तमान वायु (**बन्धुरेषु**) यानयन्त्रों के बन्धनों में जो (**शवसा**) बल से (**रोदसी**) प्रकाश और भूमि को धारण करते हैं तथा जो (**वः**) तुम लोगों के (**रथेषु**) रथों में जोड़े हुए कार्य्यों को सिद्ध करते हैं, उनका हम लोगों के लिये (**आवदत**) उपदेश कीजिये॥९॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। मनुष्यों को जानना योग्य है कि सब मूर्तिमान् द्रव्यों के आधार, शूरवीरता के तुल्य तथा शिल्पविद्या और अन्य कार्य्यों के हेतु मुख्य करके पवन ही हैं, अन्य नहीं॥९॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर उक्त पवन किस प्रकार के गुणवाले हैं, यह विषय अगले मन्त्र में कहा है॥

विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः।
अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः॥१०॥७॥

विश्वऽवेदसः। रयिऽभिः। सम्ऽओकसः। सम्ऽमिश्लासः। तविषीभिः। विऽरप्शिनः। अस्तारः। इषुम्। दधिरे। गभस्त्योः। अनन्तऽशुष्माः। वृषऽखादयः। नरः॥१०॥

पदार्थः-(**विश्ववेदसः**) विश्वानि सर्वाणि वस्तूनि विदन्ति येभ्यस्ते (**रयिभिः**) चक्रवर्त्तिराज्य-श्रियादिभिः (**समोकसः**) सम्यगोको निवासार्थं स्थानं येभ्यस्ते (**संमिश्लासः**) अग्न्यादितत्त्वैः सम्यङ् मिश्राः। अत्र **कपिलकादीनां सञ्ज्ञाछन्दसोर्वा रो लमापद्यत इति वक्तव्यम्।** (अष्टा०वा०८.२.१८) इति लत्वम्। (**तविषीभिः**) बलपराक्रमयुक्ताभिः सेनाभिः (**विरप्शिनः**) महान्तः। **विरप्शीति महन्नामसु पठितम्।** (निघं०३.३) (**अस्तारः**) प्रक्षेप्तारः। अत्रास् धातोस्तृन् **वाच्छन्दसि सर्वे विधयो भवन्ती**तीडागमविकल्पः। (**इषुम्**) बाणम्। प्राप्तिसाधनमिच्छाविशेषं वा (**दधिरे**) धरन्ति (**गभस्त्योः**) रश्मियुक्तयोः सूर्य्यप्रसिद्धाग्न्योरिव भुजयोः (**अनन्तशुष्माः**) अनन्तं शुष्मं बलं येषान्ते (**वृषखादयः**) ये वृषान् रसवर्षकान् पदार्थान् खादयन्ति ते (**नरः**) नयनकर्त्तारो मनुष्या वायवो वा॥१०॥

अन्वयः-हे नरो मनुष्या! यूयं ये समोकसः संमिश्लास इषुमस्तारो वृषखादयोऽनन्तशुष्मा विरप्सिनो विश्ववेदसो रयिभिस्तविषीभिश्च प्रजा गभस्त्योः सूर्य्याग्न्योरिव बलं दधिरे धरन्ति तेषां सङ्गेन विद्याशिक्षायानचालनक्रियाश्च स्वीकुरुत॥१०॥

भावार्थः-मनुष्यैर्नहि विद्वद्भिर्वाय्वादिपदार्थविद्यया च विना परमार्थव्यवहारसुखानि सेद्धुं शक्यन्ते॥१०॥

पदार्थः-हे (**नरः**) विद्या को प्राप्त होनेवाले मनुष्यो! तुम लोग जो (**समोकसः**) जिनसे अच्छे प्रकार निवास होता है (**संमिश्लासः**) अग्नि आदि चार तत्त्वों के साथ अत्यन्त मिले हुए (**इषुम्**) बाण वा इच्छा विशेष छोड़ते हुए (**वृषखादयः**) रसों को वर्षानेवाले पदार्थों के खानेवाले (**अनन्तशुष्माः**) अनन्त बलवान् (**विरप्सिनः**) बड़े (**विश्ववेदसः**) सब पदार्थों की प्राप्ति के हेतु होके सब पदार्थों को इधर-उधर चलानेवाले वायु (**रयिभिः**) चक्रवर्त्तिराज्य की शोभा आदि तथा (**तविषीभिः**) बल पराक्रम सेना आदि प्रजा और (**गभस्त्योः**) किरणयुक्त सूर्य्य वा प्रसिद्ध अग्नि के समान भुजाओं में बल को (**दधिरे**) धारण करते हैं, उनके गुणों को ठीक-ठीक जान कर उनसे विद्या, शिक्षा और यान के चलाने की क्रियाओं को ग्रहण करो॥१०॥

भावार्थः-मनुष्य लोग विद्वान् तथा वायु आदि पदार्थ विद्या के विना परलोक और इस लोक के सुखों की सिद्धि कभी नहीं कर सकते॥१०॥

पुनरेते वायवः कीदृशा इत्युपदिश्यते॥

फिर भी वे पूर्वोक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आप्थ्यो३ न पर्वतान्।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः॥११॥

हिर॒ण्ययेभिः। प॒विऽभिः। प॒य॒ऽउ॒वृ॒धः। उत्। जि॒घ्न॒न्ते॒। आ॒ऽप॒थ्यः। न। पर्व॑तान्। म॒खाः। अ॒यासः। स्व॒ऽसृ॑तः। ध्रु॒व॒ऽच्यु॒तः। दु॒ध्र॒ऽकृ॑तः। म॒रुतः। भ्राज॑त्ऽऋष्टयः॥ ११॥

पदार्थः-(**हिरण्ययेभिः**) तेजोमयैः (**पविभिः**) वज्रतुल्यैः पवित्रैर्गमनागमनादिसाधनचक्रैः (**पयोवृधः**) ये पय उदकं रात्रिं वा वर्धयन्ति ते (**उत्**) उत्कृष्टे (**जिघ्नन्ते**) हिंसन्ति। अत्र **वा छन्दसि सर्वे विधयो भवन्ती**त्यदादेशविकल्पः। (**आपथ्यः**) पथि भवः पथ्यः सर्वतः पथ्य आपथ्यः (**न**) इव (**पर्वतान्**) शैलान् मेघान् वा (**मखाः**) यष्टुमर्हा यज्ञाः (**अयासः**) प्राप्तिशीलाः (**स्वसृतः**) ये स्वान् गुणान् सरन्ति प्राप्नुवन्ति ते (**ध्रुवच्युतः**) ये ध्रुवानपि पदार्थान् च्यावयन्ति निपातयन्ति ते (**दुध्रकृतः**) ये दुध्राणि धारकाणि बलादीनि कुर्वन्ति ते (**मरुतः**) वायवः (**भ्राजदृष्टयः**) भ्राजत्यः प्रदीप्ता ऋष्टयो व्यवहारप्रापिकाः कान्त्यो येभ्यस्ते॥ ११॥

अन्वयः-हे विद्वांसो मनुष्या! यूयमापथ्यो न हिरण्ययेभिः पविभिः सह समन्ताद्रथेन पथि गच्छन्निव ये भ्राजदृष्टयो दुध्रकृतो ध्रुवच्युतः स्वसृतः पयोवृधो मरुतो पर्वतान् मेघान् शैलान् वोज्जिघ्नन्ते तेषां गुणान् विज्ञायैतान् कार्य्येषु नित्यं संप्रयोजयत॥ ११॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्येभ्यो वृष्ट्यादिकं जायते ते वायवो युक्त्या सेवनीयाः॥ ११॥

पदार्थः-हे विद्वान् मनुष्यो! तुम लोग (**आपथ्यो न**) अच्छे प्रकार (**हिरण्ययेभिः**) सुवर्ण आदि के योग से प्रकाशरूप (**पविभिः**) पवित्र चक्रों के रथ से मार्ग में चलने के समान (**भ्राजदृष्टयः**) जिनसे व्यवहार प्राप्त करानेवाली कान्ति प्रसिद्ध हों (**दुध्रकृतः**) धारण करने वाले बलादि के उत्पन्न करने (**ध्रुवच्युतः**) निश्चल आकाश से चलायमान (**स्वसृतः**) अपने गुणों को प्राप्त होके चलनेहारे (**पयोवृधः**) जल वा रात्रि के बढ़ानेवाले (**मखाः**) यज्ञ के योग्य (**अयासः**) प्राप्त होने के स्वभाव से युक्त (**मरुतः**) पवन (**पर्वतान्**) मेघ वा पर्वतों को (**उज्जिघ्नन्ते**) नष्ट करते हैं, उन पवनों के गुणों को जान कर अपने कार्यों में संयुक्त करो॥ ११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जिन वायुओं से वृष्टि आदि की उत्पत्ति होती है, उनका युक्ति के साथ सेवन किया करें॥ ११॥

पुनस्तत्समुदायः कीदृशोऽस्तीत्युपदिश्यते॥

फिर वायुओं के समुदाय कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

घृषुं॑ पाव॒कं व॒निनं॒ विच॑र्षणिं रु॒द्रस्य॑ सू॒नुं ह॒वसा॑ गृणीमसि।
र॒ज॒स्तुरं॑ त॒वसं॒ मारु॑तं ग॒णमृ॑जी॒षिणं॒ वृष॑णं सश्चत श्रि॒ये॥ १२॥

घृषु॑म्। पा॒व॒कम्। व॒निन॑म्। विऽच॑र्षणिम्। रु॒द्रस्य॑। सू॒नुम्। ह॒वसा॑। गृ॒णी॒म॒सि॒। र॒ज॒ःऽतु॑रम्। त॒वस॑म्। मारु॑तम्। ग॒णम्। ऋ॒जी॒षिण॑म्। वृष॑णम्। स॒श्च॒त॒। श्रि॒ये॥ १२॥

पदार्थः-(**घृषुम्**) घर्षणशीलम् (**पावकम्**) पवित्रकारकम् (**वनिनम्**) संभक्तारम् (**विचर्षणिम्**) विलेखकम् (**रुद्रस्य**) परमेश्वरस्य जीवस्य वायुकरणस्य वा (**सूनुम्**) पुत्रवद्वर्त्तमानं प्राणिगर्भविमोचकं वा (**हवसा**) ग्रहणत्यागभक्षणादिकर्मणा सह वर्त्तमानम् (**गृणीमसि**) स्तुवीमः (**रजस्तुरम्**) यो रजांसि लोकान् तुरति तूर्णगमनागमनहेतुम् (**तवसम्**) महाबलयुक्तम् (**मारुतम्**) मरुतां वायूनामिमम् (**गणम्**) समूहम् (**ऋजीषिणम्**) प्रशस्तमुपार्जनं विद्यते यस्मिंस्तम् (**वृषणम्**) वृष्टिकारकम् (**सश्चत**) विजानीत प्राप्नुत वा (**श्रिये**) विद्याशिक्षाराज्यधनप्राप्तये॥१२॥

अन्वयः-हे मनुष्याः! यथा वयं हवसा श्रिये रुद्रस्य सूनुं विचर्षणिं वनिनं घृषुं पावकं तवसं रजस्तुरमृजीषिणं वृषणं मारुतं गणं गृणीमसि स्तुवीमस्तं यूयमपि सश्चत विजानीत॥१२॥

भावार्थः-मनुष्यैर्नहि वायुसमुदायेन विना काचिद्व्यवहारक्रिया भवितुं शक्येति निश्चित्यावश्यं वायुविद्यां स्वीकृत्य स्वकीयानि कार्य्याणि साधनीयानि॥१२॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**हवसा**) दान और ग्रहण से (**श्रिये**) विद्या, शिक्षा और चक्रवर्त्तिराज्य की प्राप्ति के लिये जिस (**रुद्रस्य**) मुख्य वायु के (**सूनुम्**) पुत्र के समान वर्त्तमान (**विचर्षणिम्**) भेद करने तथा (**वनिनम्**) संग्राम करनेवाले (**घृषुम्**) घिसने के स्वभाव से युक्त (**पावकम्**) पवित्र करनेवाले (**तवसम्**) महाबलवान् (**रजस्तुरम्**) लोकों को शीघ्र चलाने (**ऋजीषिणम्**) उत्तम शुद्धि होने के कारण और (**वृषणम्**) वृष्टि करनेवाले (**मारुतम्**) पवनों के (**गणम्**) समूह का (**गृणीमसि**) उपदेश करते हैं, उसको तुम भी (**सश्चत**) जानो॥१२॥

भावार्थः-मनुष्यों को चाहिये कि वायुसमुदाय के विना हमारे कोई काम सिद्ध नहीं हो सकते, ऐसी वायुविद्या का निश्चयतया स्वीकार करके अपने कार्यों की सिद्धि अवश्य करें॥१२॥

पुतस्तेः वायवः कीदृशा इत्युपदिश्यते॥

फिर वे उक्त वायु कैसे गुणवाले हैं, यह विषय अगले मन्त्र में कहा है॥

प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति॥१३॥

प्र। नु। सः। मर्तः। शवसा। जनान्। अति। तस्थौ। वः। ऊती। मरुतः। यम्। आवत। अर्वत्ऽभिः। वाजम्। भरते। धना। नृऽभिः। आऽपृच्छ्यम्। क्रतुम्। आ। क्षेति। पुष्यति॥१३॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**नु**) शीघ्रम् (**सः**) (**मर्त्तः**) मनुष्यः (**शवसा**) विद्याक्रियायुक्तेन बलेन (**जनान्**) मनुष्यादीन् (**अति**) अतिशयेन (**तस्थौ**) तिष्ठति (**वः**) युष्माकम् (**ऊती**) ऊत्या रक्षादिना। अत्र **सुपां सुलुगिति** तृतीयायाः पूर्वसवर्णादेशः। (**मरुतः**) युक्त्या सेविता वायवः। (**यम्**) मनुष्यम् (**आवत**) विजानीत (**अर्वद्भिः**) वेगादिगुणैरश्वैः (**वाजम्**) वेगादिगुणसमूहम् (**भरते**) धरति (**धना**) (**नृभिः**) मनुष्यैः

(आपृच्छ्यम्) समन्तात्प्रष्टव्यम् **(क्रतुम्)** प्रज्ञां कर्म वा **(आ)** समन्तात् **(क्षेति)** क्षियति निवासयति। अत्र **बहुलं छन्दसी**ति शस्य लुक्। **(पुष्यति)** पुष्टं करोति॥१३॥

अन्वयः-हे मरुतो! यूयं यमावत स मर्त्त ऊती शवसाऽर्वद्भिरश्वैर्नृभिः सह वाजं वेगमन्नं वो जनान् धनान्यापृच्छ्य क्रतुं च नु प्रभरत आक्षेति शरीरात्मभ्यां चाति पुष्यति तस्थौ॥१३॥

भावार्थः-ये मनुष्याः प्राणविद्यां विदित्वोपयुञ्जते ते बलवन्तः प्रतिष्ठिता भूत्वा दुःखानि शत्रूनुल्लंध्योत्तमैर्हस्त्यश्वमनुष्यधनप्रज्ञायुक्ताः सन्तः सदा पुष्यन्ति॥१३॥

पदार्थः-हे **(मरुतः)** युक्ति से सेवन किये हुए वायु के समान तुम **(यम्)** जिस मनुष्य की **(आवत)** रक्षा आदि करते हो **(सः)** वह **(मर्त्तः)** मनुष्य **(ऊती)** रक्षा आदि के सहित **(शवसा)** विद्या क्रियायुक्त बल **(अर्वद्भिः)** घोड़ों और **(नृभिः)** मनुष्यों के साथ **(वाजम्)** वेग अन्न **(वः)** तुम **(जनान्)** मनुष्यादि प्राणियों और **(धना आ पृच्छ्यम्)** धनों को पूछने योग्य अच्छे **(क्रतुम्)** बुद्धि वा कर्म्म को **(नु)** शीघ्र **(प्रभरते)** अच्छे प्रकार धारण करता **(आक्षेति)** अच्छे प्रकार निवासयुक्त करता, शरीर और आत्मा अन्तःकरण से **(पुष्यति)** बल को पुष्ट करता हुआ **(तस्थौ)** स्थित होता है॥१३॥

भावार्थः-जो मनुष्य प्राणवायु की विद्या को जानकर उपयोग करते हैं, वे बलवान् प्रतिष्ठा को प्राप्त हो और दुःख तथा शत्रुओं को जीत कर उत्तम हाथी, घोड़े, मनुष्य, धन और बुद्धि से युक्त होके सदा सबको पुष्ट करते हैं॥१३॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे पूर्वोक्त वायु कैसे गुणवाले हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः॥१४॥

चर्कृत्यम्। मरुतः। पृतऽसु। दुस्तरम्। द्युऽमन्तम्। शुष्मम्। मघवत्ऽसु। धत्तन। धनऽस्पृतम्। उक्थ्यम्। विश्वऽचर्षणिम्। तोकम्। पुष्येम। तनयम्। शतम्। हिमाः॥१४॥

पदार्थः-**(चर्कृत्यम्)** पुनः पुनः कर्त्तव्येषु साधुम्। अत्र यङ् लुङन्तात्करोतेः क्तस्ततः साध्वर्थे यत्। **(मरुतः)** वायुवद्वर्त्तमानाः **(पृत्सु)** पृतनासु सेनासु **(दुष्टरम्)** दुःखेन तरितुं योग्यम् **(द्युमन्तम्)** बहुप्रकाशवन्तम् **(शुष्मम्)** शोषकम् **(मघवत्सु)** प्रशस्तधनयुक्तेषु राजषु **(धत्तन)** धत्त **(धनस्पृतम्)** धनेन प्रीतं सेवितं वा **(उक्थ्यम्)** वक्तुं श्रोतुं योग्यम् **(विश्वचर्षणिम्)** सर्वदर्शकम् **(तोकम्)** अपत्यम् **(पुष्येम)** पुष्टा भवेम **(तनयम्)** विद्वांसं पौत्रम् **(शतम्)** शतसंख्याकान् **(हिमाः)** हेमन्तानृतून्॥१४॥

अन्वयः-हे मरुतः मनुष्या! यथा वयं पृत्सु चर्कृत्यं दुष्टरं द्युमन्तं शुष्मं बलं मघवत्सु धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं तनयं प्राप्य शतं हिमाः पुष्येम तथाऽनुष्ठाय यूयं सुखं धत्तन॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वद्भिर्मरुतां विद्याग्रहणाय युक्त्योपयोगः क्रियते तथान्येऽप्याचरन्तु॥१४॥

पदार्थः-हे **(मरुतः)** पवनवद्वर्त्तमान मनुष्यो! जैसे हम **(पृत्सु)** सेनाओं में **(चर्कृत्यम्)** वार-वार करने योग्य कार्यों में कुशल **(दुष्टरम्)** दुःख से पार होने योग्य **(द्युमन्तम्)** अति प्रकाशयुक्त **(शुष्मम्)** सुखानेवाले बल को **(मघवत्सु)** प्रशंसनीय धनयुक्त राजकार्य्यों में **(धनस्पृतम्)** धन से प्रसन्न वा सेवा को प्राप्त हुए **(उक्थ्यम्)** कहने-सुनने योग्य **(विश्वचर्षणिम्)** सबको देखने योग्य **(तोकम्)** पुत्र तथा **(तनयम्)** विद्वान् पौत्र को प्राप्त होके **(शतं हिमाः)** हेमन्त ऋतु युक्त सौ वर्ष पर्य्यन्त **(पुष्येम)** बल, पराक्रम आदि से पुष्ट होवें, वैसे कर्म करके तुम भी सुख को **(धत्तन)** धारण कीजिये॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् लोग-पवनों के योग से हमारे बिजुली, यन्त्र, बैल, सौ वर्ष पर्य्यन्त जीना और शरीर आदि में पुष्टि का होना ये सब काम होते हैं, इसलिए इन वायुओं की विद्या को युक्ति के साथ जान कर-उपयोग में लिया करते हैं, वैसे अन्य लोग भी आचरण करें॥१४॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे उक्त वायु कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

नू ष्ठिरं मꣳरुतो वीरवꣳन्तमृतीषाहꣳ रयिमस्मासुꣳ धत्त।

सहस्त्रिणꣳ शतिनꣳ शूशुवांसꣳ प्रातर्मक्षू धियावꣳसुर्जगम्यात्॥ १५॥ ८॥ ११॥

नु। स्थिरम्। मरुतः। वीरऽवन्तम्। ऋतिऽसाहम्। रयिम्। अस्मासु। धत्त। सहस्त्रिणम्। शतिनम्। शूशुऽवांसम्। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ १५॥

पदार्थः-(**नु**) क्षिप्रार्थे **(स्थिरम्)** निश्चलम् **(मरुतः)** वायव इव वर्त्तमानाः **(वीरवन्तम्)** प्रशस्ता वीरा विद्यन्ते यस्मिँस्तम् **(ऋतिषाहम्)** य ऋतिं सत्यं सहते तम्। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। **(रयिम्)** विद्याराज्यसुवर्णादिधनसमूहम् **(अस्मासु)** **(धत्त)** धरत **(सहस्त्रिणम्)** सहस्रमसंख्यातं प्रशस्तं सुखं विद्यते यस्मिंस्तम्। अत्र **तपः सहस्राभ्यां विनीनी।** (अष्टा०५.२.१२) इति सूत्रेण मत्वर्थीय इनिः प्रत्ययः। **(शतिनम्)** **(शूशुवांसम्)** सर्वसुखज्ञापकं प्रापकं वा **(प्रातः)** प्रतिदिनम् **(मक्षु)** शीघ्रम् **(धियावसुः)** प्रज्ञाकर्मयुक्तः **(जगम्यात्)** भृशं प्राप्नुयात्॥१५॥

अन्वयः-हे मरुतो! यथा विद्वांसोऽस्मासु स्थिरं वीरवन्तमृतिसाहं सहस्त्रिणं शतिनं शूशुवांसं प्राप्यानन्दति तथैव यूयमप्येतत्प्राप्यानन्दतेति॥१५॥

भावार्थः–अत्रोपमालङ्कारः। हे मनुष्याः! यथाऽतिप्रशस्यो मेधावी विद्यापुरुषार्थैः संयुक्तो विद्वान् वातादि पदार्थेभ्यो दृढानि बहूनि सुखानि संसाध्यानन्दं प्राप्नोति तथा यूयमप्येतां विद्यां प्राप्यानन्दं भुञ्जत॥१५॥

अत्र वायुगुणोपदेशादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकादशो ११ अनुवाकश्चतुःषष्टितमं ६४ सूक्तमष्टमो ८ वर्गश्च समाप्तः॥

पदार्थः–हे **(मरुतः)** पवन के तुल्य वर्त्तमान! जैसे विद्वान् लोग **(अस्मासु)** हम लोगों में **(स्थिरम्)** निश्चल **(वीरवन्तम्)** प्रशंसा करने योग्य वीर पुरुषों से युक्त **(ऋतिषाहम्)** सत्य के सहन करनेवाले **(रयिम्)** विद्याराज्य और सुवर्ण आदि धन को धारण करें और **(धियावसुः)** बुद्धि और कर्मों से युक्त विद्वान् **(जगम्यात्)** शीघ्र प्राप्त हो, वैसे उनको तुम **(प्रातः)** प्रतिदिन **(मक्षु)** शीघ्र **(धत्त)** धारण करो॥१५॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम लोग जैसे अति प्रशंसा करने योग्य, बुद्धिवाला, विद्या, पुरुषार्थों से युक्त विद्वान् जन वायु आदि पदार्थों के सकाश से दृढ़ निश्चल बहुत सुखों को सिद्ध करके आनन्द को प्राप्त होता है, वैसे तुम भी इस विद्या को प्राप्त होकर आनन्द भोगो॥१५॥

इस सूक्त में वायु के गुणों का उपदेश करने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह ग्यारहवां ११ अनुवाक चौसठवां ६४ सूक्त और आठवां ८ वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य पञ्चषष्टितमस्य सूक्तस्य पराशर ऋषिः। अग्निर्देवता। १,२,३,५ निचृत्पङ्क्तिः। ४ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथान्तर्व्याप्तोऽग्निरुपदिश्यते॥

अब पैंसठवें सूक्त का आरम्भ है। इसके पहिले मन्त्र में सर्वत्र व्यापक अग्नि शब्द का वाच्य जो पदार्थ है, उसका उपदेश किया है॥

प॒श्चा न ता॒युं गुहा॒ चत॑न्तं॒ नमो॑ युजा॒नं नमो॒ वह॑न्तम्।
स॒जोषा॒ धीरा॑: प॒दैरनु॑ ग्म॒न्नुप॑ त्वा सीद॒न् विश्वे॒ यज॑त्राः॥ १॥

प॒श्चा। न। ता॒युम्। गुहा॑। चत॑न्तम्। नम॑:। यु॒जा॒नम्। नम॑:। वह॑न्तम्। स॒ऽजोषा॑:। धीरा॑:। प॒दैः। अनु॑। ग्म॒न्। उप॑। त्वा॒। सी॒द॒न्। विश्वे॑। यज॑त्राः॥ १॥

पदार्थः–(**पश्चा**) अपहृतस्य पशोः स्वरूपाङ्गपादचिह्नान्वेषणेन (**न**) इव (**तायुम्**) चोरम्। **तायुरिति स्तेननामसु पठितम्।** (निघं०३.२४) (**गुहा**) गुहायां सर्वपदार्थानां मध्ये। अत्र **सुपां सुलुगिति** सप्तम्याडादेशः। (**चतन्तम्**) गच्छतं व्याप्तम्। **चततीति गतिकर्मसु पठितम्।** (निघं०२.१४) (**नमः**) अन्नम्। **नम इत्यन्ननामसु पठितम्।** (निघं०२.२०) (**युजानम्**) समादधानम्। अत्र बाहुलकादौणादिक आनच् प्रत्ययः किच्च। (**नमः**) सत्कारमन्नं वा (**वहन्तम्**) प्राप्नुवन्तम् (**सजोषाः**) सर्वत्र समानप्रीतिसेवनाः (**धीराः**) मेधाविनो विद्वांसः (**पदैः**) प्रत्यक्षेण प्राप्तैर्गुणनियमैः (**अनु**) पश्चात् (**ग्मन्**) प्राप्नुवन्ति। अत्र गमधातोर्लुङि **मन्त्रे घस०** इति च्लेर्लुक्। **गमहनेत्युपधालोपोऽङभावो लडर्थे लुङ् च।** (**उप**) सामीप्ये (**त्वा**) त्वां सभेश्वरम् (**सीदन्**) अवतिष्ठन्ते। अत्राप्यडभावो लडर्थे लुङ् च। (**विश्वे**) सर्वे (**यजत्राः**) पूजका उपदेशका सङ्गति-कर्त्तारो दातारश्च॥ १॥

अन्वयः–हे सर्वविद्याभिव्याप्त सभेश्वर! यजत्राः सजोषा धीरा विद्वांसः पदैः पश्चा तायुं नेव यं गुहा बुद्धौ चतन्तं नमो युजानं नमो वहन्तं त्वा त्वामनुग्मन्। उपसीदन् त्वां प्राप्य त्वय्यवतिष्ठन्ते वयमप्येवं प्राप्यावतिष्ठामहे॥ १॥

भावार्थः–हे मनुष्याः! यथा स्तेनस्य पदाङ्गस्वरूपप्रेक्षणेन चोरं प्राप्य पश्वादिः पदार्थान् गृह्णन्ति, तथैवात्मान्तरुपदेष्टारं सर्वाधारं ज्ञानगम्यं परमेश्वरं प्राप्य सर्वानन्दं स्वीकुरुत॥ १॥

पदार्थः–हे सर्वविद्यायुक्त सभेश! (**विश्वे**) सब (**यजत्राः**) संगतिप्रिय (**सजोषाः**) सब तुल्य प्रीति को सेवन करनेवाले (**धीराः**) बुद्धिमान् लोग (**पदैः**) प्रत्यक्ष प्राप्त जो गुणों के नियम उन्हीं से (**न**) जैसे (**पश्चा**) पशु को ले जानेवाले (**तायुम्**) चोर को प्राप्त कर आनन्द होता है, वैसे जिस (**गुहा**) गुफा में (**चतन्तम्**) व्याप्त (**नमः**) वज्र के समान आज्ञा का (**युजानम्**) समाधान करने (**नमः**) सत्कार को (**वहन्तम्**) प्राप्त करते हुए (**त्वा**) आपको (**अनुग्मन्**) अनुकूलतापूर्वक प्राप्त तथा (**उपसीदन्**) समीप स्थित होते हैं, उस आपको हम लोग भी इस प्रकार प्राप्त होके आपके समीप स्थिर होते हैं॥ १॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम लोग जैसे वस्तु को चुराए हुए चोर के पाद आदि अङ्ग वा स्वरूप देखने से उसको पकड़कर चोरे हुए पशु आदि पदार्थों का ग्रहण करते हो, वैसे अन्तःकरण में उपदेश करनेवाले, सबके आधार विज्ञान से जानने योग्य परमेश्वर तथा बिजुलीरूप अग्नि को जान और प्राप्त होके सब आनन्द को स्वीकार करो॥१॥

पुनस्तं कीदृशं विजानीम इत्युपदिश्यते॥

फिर उसको किस प्रकार हम लोग जानें, यह विषय अगले मन्त्र में कहा है॥

ऋ॒तस्य॑ दे॒वा अनु॑ व्र॒ता गु॒र्भुव॒त् परि॑ष्टिर्द्यौर्न भूम॑।
वर्ध॑न्ती॒माप॑: प॒न्वा सु॒शि॑श्विमृ॒तस्य॒ योना॒ गर्भे॑ सुजा॑तम्॥२॥

ऋ॒तस्य॑। दे॒वाः। अनु॑। व्र॒ता। गु॒रिति॑ गुः। भुव॑त्। परि॑ष्टिः। द्यौः। न। भूम॑। वर्ध॑न्ति। ई॒म्। आप॑ः। प॒न्वा। सु॒ऽशि॑श्विम्। ऋ॒तस्य॑। योना॑। गर्भे॑। सुऽजा॑तम्॥२॥

पदार्थः–(**ऋतस्य**) सत्यस्वरूपस्य (**देवाः**) विद्वांसः (**अनु**) पश्चात् (**व्रता**) सत्यभाषणादीनि व्रतानि (**गुः**) गच्छन्ति। अत्राडभावो लडर्थे लुङ् च। (**भुवत्**) भवति (**परिष्टिः**) परितः पर्वतः इष्टिरन्वेषणं यस्याः सा। अत्र **एमन्नादिषु पररूपं वक्तव्यम्।** (अष्टा०वा०६.१.१४) इति वार्त्तिकेन पररूप एकादेशः। (**द्यौः**) सूर्यद्युतिः (**न**) इव (**भूम**) भवेम (**वर्धन्ति**) वर्धन्ते। अत्र व्यत्येन परस्मैपदम्। (**ईम्**) पृथिवीम् (**आपः**) जलानि (**पन्वा**) स्तुत्येन कर्मणा (**सुशिश्विम्**) सुष्ठु वर्धकम्। छन्दसि सामान्येन विधानादत्र किः प्रत्ययः। (**ऋतस्य**) सत्यस्य कारणस्य (**योना**) योनौ निमित्ते सति (**गर्भे**) सर्वपदार्थान्तःस्थाने (**सुजातम्**) सुष्ठु प्रसिद्धम्॥२॥

अन्वयः–हे मनुष्या! देवा विद्वांसः परिष्टिः द्यौर्भुवन्नेवर्त्तस्य व्रताऽनुगुरनुगम्याचरन्ति। यथैत ऋतस्य योना स्थितं सुजातं सुशिश्विं सभेशं पन्वा वर्धयन्ति विद्युतमीं पृथिवीं चापश्च तथैव वयं भूम भवेम यूयमपि भवत॥२॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या यथा सूर्य्यप्रकाशेन सर्वे पदार्थाः सदृश्या भवन्ति, तथैव विदुषां सङ्गेन वेदविद्यायां जातायां धर्माचरणे कृते परमेश्वरो विद्युदादयश्च स्वगुणकर्मस्वभावः सम्यग्दृष्टा भवन्तीति यूयं विजानीत॥२॥

पदार्थः–हे मनुष्यो! (**न**) जैसे विद्वान् लोग (**परिष्टिः**) सब प्रकार खोजने योग्य (**द्यौः**) सूर्य्य के प्रकाश के तुल्य (**भुवत्**) होकर व पदार्थों को दृष्टिगोचर करते हैं, वैसे (**ऋतस्य**) सत्य धर्म स्वरूप आज्ञा विज्ञान से (**व्रता**) सत्यभाषण आदि नियमों को (**अनुगुः**) प्राप्त होकर आचरण करते हैं, तथा जैसे ये (**ऋतस्य**) कारणरूपी सत्य की (**योना**) योनि अर्थात् निमित्त में स्थित (**सुजातम्**) अच्छी प्रकार प्रसिद्ध (**सुशिश्विम्**) अच्छे पढ़ानेवाले सभापति की (**पन्वा**) स्तुति करने योग्य कर्म्म से (**ईम्**) पृथिवी को

(आपः) जल वा प्राण को **(वर्धन्ति)** बढ़ा कर ज्ञानयुक्त कर देते हैं, वैसे हम लोग **(भूम)** होवें और तुम भी होओ॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य के प्रकाश से सब पदार्थ दृष्टि में आते हैं, वैसे ही विद्वानों के संग से वेदविद्या के उत्पन्न होने और धर्म्माचरण की प्रवृत्ति में परमेश्वर और बिजुली आदि पदार्थ अपने-अपने गुण, कर्म, स्वभावों से अच्छे प्रकार देखे जाते हैं, ऐसा तुम लोग जान कर अपने विचार से निश्चित करो॥२॥

पुनः स कीदृशोऽस्तीत्युपदिश्यते॥

फिर वह परमात्मा कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो शंभु।
अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते॥३॥

पुष्टिः। न। रण्वा। क्षितिः। न। पृथ्वी। गिरिः। न। भुज्म। क्षोदः। न। शम्ऽभु। अत्यः। न। अज्मन्। सर्गऽप्रतक्तः। सिन्धुः। न। क्षोदः। कः। ईम्। वराते॥३॥

पदार्थः-(**पुष्टिः**) शरीरेन्द्रियात्मसौख्यवर्द्धिका (**न**) इव (**रण्वा**) या रण्वति सुखं प्रापयति सा (**क्षितिः**) क्षियन्ति निवसन्ति राज्यरत्नानि प्राप्नुवन्ति यस्यां सा (**न**) इव (**पृथ्वी**) भूमिः (**गिरिः**) मेघः (**न**) इव (**भुज्म**) सुखानां भोजयिता (**क्षोदः**) जलम् (**न**) इव (**शंभु**) सुखसम्पादकम् (**अत्यः**) साधुरश्वः (**न**) इव (**अज्मन्**) मार्गे (**सर्गप्रतक्तः**) यः सर्गमुदकं प्रतनक्ति संकोचयति सः। **सर्ग इत्युदकनामसु पठितम्।** (निघं०१.१२) (**सिन्धुः**) समुद्रः (**न**) इव (**क्षोदः**) जलसमूहः (**कः**) कश्चिदपि (**ईम्**) ज्ञातव्यं प्राप्तव्यं परमेश्वरं विद्युदूपमग्निं वा (**वराते**)॥३॥

अन्वयः-यस्तमेतं परमात्मानं रण्वा पुष्टिर्नेव क्षितिः पृथ्वी नेव गिरिर्भुज्मनेव क्षोदः शंभुनेवाऽज्मन्नत्यो नेव सर्गप्रतक्तः क्षोदो नेव को वराते वृणुते स पूर्णविद्यो भवति॥३॥

भावार्थः-अत्रोपमालङ्कारः। कश्चिदेव मनुष्यः परमेश्वरस्य प्राप्तिं विद्युतो विज्ञानोपकरणे कर्त्तुं शक्नोति। यथा सर्वोत्तमा पुष्टिः पृथ्वीराज्यं मेघवृष्टिरुत्तममुदकं श्रेष्ठोऽश्वः समुद्रश्च बहूनि सुखानि ददाति। तथैव परमेश्वरो विद्युच्च सर्वानन्दान् प्रापयतः परन्त्वेतं ज्ञाता महाविद्वान् मनुष्यो दुर्लभो भवति॥६॥

पदार्थः-जो मनुष्य उस परमेश्वर को **(रण्वा)** सुख से प्राप्त करानेवाला **(पुष्टिः)** शरीर आत्मा और इन्द्रियों की पुष्टि के **(न)** समान **(क्षोदः)** जल **(शम्भु)** सुख सम्पन्न करनेवाले के **(न)** समान तथा **(अज्मन्)** मार्ग में **(अत्यः)** घोड़े के समान **(सर्गप्रतक्तः)** जल को संकोच करनेवाले **(सिन्धुः)** समुद्र **(क्षोदः)** जल के **(न)** समान **(ईम्)** जानने तथा प्राप्त करने योग्य परमेश्वर वा बिजुलीरूप अग्नि को **(कः)** कौन विद्वान् मनुष्य **(वराते)** स्वीकार करता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। कोई विद्वान् मनुष्य परमेश्वर को प्राप्त होके और बिजुलीरूप अग्नि जान के उससे उपकार लेने को समर्थ होता है, जैसे उत्तम पुष्टि, पृथिवी का राज्य, मेघ की वृष्टि, उत्तम जल, उत्तम घोड़े और समुद्र बहुत सुखों को प्राप्त कराते हैं, वैसे ही परमेश्वर और बिजुली भी सब आनन्दों को प्राप्त कराते हैं, परन्तु इन दोनों का जाननेवाला विद्वान् मनुष्य दुर्लभ है॥३॥

पुनर्भौतिकोऽग्निः कीदृश इत्युपदिश्यते॥

अब भौतिक अग्नि कैसा है, इस विषय को अगले मन्त्र में कहा है॥

जा॒मिः सिन्धू॑नां॒ भ्रातेव॒ स्वस्रा॒मिभ्या॒न्न राजा॒ वना॑न्यत्ति॥

यद्वात॑जूतो॒ वना॒ व्यस्था॑दग्निर्ह॑ दा॒ति॒ रोमा॑ पृथि॒व्याः॥४॥

जा॒मिः। सिन्धू॑नाम्। भ्रातेऽइव। स्वस्रा॑म्। इभ्या॑न्। न। राजा॑। वना॑नि। अ॒त्ति॒। यत्। वात॑ऽजूतः। वना॑। वि। अस्था॑त्। अ॒ग्निः। ह॒। दा॒ति॒। रोम॑। पृ॒थि॒व्याः॥४॥

पदार्थः-(**जामिः**) सुखप्रापको बन्धुः (**सिन्धूनाम्**) नदीनां समुद्राणां वा (**भ्रातेव**) सनाभिरिव (**स्वस्राम्**) स्वसॄणां भगिनीनाम्। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ती**ति नुडभावः। (**इभ्यान्**) य इभान् हस्तिनो नियन्तुमर्हन्ति तान् (**न**) इव (**राजा**) नृपः (**वनानि**) अरण्यानि (**अत्ति**) भक्षयति (**यत्**) यः (**वातजूतः**) वायुना वेगं प्राप्तः (**वना**) वनानि जङ्गलानि (**वि**) विविधार्थे (**अस्थात्**) तिष्ठति (**अग्निः**) प्रसिद्धः पावकः (**ह**) किल (**दाति**) छिनत्ति (**रोमा**) रोमाण्योषध्यादीनि (**पृथिव्याः**) भूमेः॥४॥

अन्वयः-यद्यो वातजूतोऽग्निर्वनानि दाति छिनत्ति पृथिव्या ह किल रोमाणि दाति छिनत्ति स सिन्धूनां जामिः। स्वस्रां भगिनीनां भ्रातेवेभ्यान् राजानेव व्यस्थात् वनानि व्यत्ति॥४॥

भावार्थः-अत्र द्वावुपमालङ्कारौ। यदा मनुष्यैर्यानचालनादिकार्य्येषु वायुसंप्रयुक्तोऽग्निश्चाल्यते, तदा स बहूनि कार्य्याणि साधयतीति बोद्धव्यम्॥४॥

पदार्थः-(**यत्**) जो (**वातजूतः**) वायु से वेग को प्राप्त हुआ (**अग्निः**) अग्नि (**वना**) वनों का (**दाति**) छेदन करता तथा (**पृथिव्याः**) पृथिवी के (**ह**) निश्चय करके (**रोमा**) रोमों के समान छेदन करता है, वह (**सिन्धूनाम्**) समुद्र और नदियों के (**जामिः**) सुख प्राप्त करानेवाला बन्धु (**स्वस्राम्**) बहिनों के (**भ्रातेव**) भाई के समान तथा (**इभ्यान्**) हाथियों की रक्षा करनेवाले पीलवानों को (**राजेव**) राजा के समान (**व्यस्थात्**) स्थित होता और (**वनानि**) वनों को (**व्यत्ति**) अनेक प्रकार भक्षण करता है॥४॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। जब मनुष्य लोग यानचालन आदि कार्यों में वायु से संयुक्त किये हुए अग्नि को चलाते हैं, तब वह बहुत कार्यों को सिद्ध करता है, ऐसा सब मनुष्यों को जानना चाहिये॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभेश कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

श्वसि॑त्यप्सु हं॒सो न सीद॒न् क्रत्वा॒ चेति॑ष्ठो वि॒शामु॑ष॒र्भुत्।
सोमो॒ न वे॒धा ऋ॒तप्र॑जातः॒ पशु॑र्न शिश्वा॑ वि॒भुर्दू॒रेभा॑:॥५॥९॥

श्वसि॑ति। अ॒प्सु। हं॒सः। न। सीद॑न्। क्रत्वा॑। चेति॑ष्ठः। वि॒शाम्। उ॒ष॒:ऽभुत्। सोम॑:। न। वे॒धाः। ऋ॒तऽप्र॑जातः। पशुः। शिश्वा॑। वि॒ऽभुः। दू॒रेऽभा॑:॥५॥

पदार्थः-(**श्वसिति**) योऽग्निना प्राणाऽपानचेष्टां करोति (**अप्सु**) जलेषु (**हंसः**) पक्षिविशेषः (**सीदन्**) गच्छन्नागच्छन्निमज्जन्नुन्मज्जन् वा (**क्रत्वा**) क्रतुना प्रज्ञया स्वकीयेन कर्मणा वा (**चेतिष्ठः**) अतिशयेन चेतयिता (**विशाम्**) प्रजानाम् (**उषर्भुत्**) उषसि सर्वान्बोधयति सः। अत्रोषरुपपदाद् बुधधातोः क्विप्। **बशोभषि**ति भत्वं च। (**सोमः**) ओषधिसमूहः (**न**) इव (**वेधाः**) पोषकः (**ऋतप्रजातः**) कारणादुत्पद्य ऋते वायावुदके प्रसिद्धः (**पशुः**) गवादिः (**न**) इव (**शिश्वा**) शिशुना वत्सादिना (**विभुः**) व्यापकः (**दूरेभाः**) दूरदेशे भा दीप्तयो यस्य सः॥५॥

अन्वयः-हे मनुष्या! यूयं योऽप्सु हंसो नेव सीदन् विशामुषर्भुत् सन् क्रत्वा चेतिष्ठः सोमो नेवर्त्तप्रजातः शिशुना पशुर्नेव विभुः सन् दूरेभा विद्युदाद्यग्निरिव वेधाः श्वसिति तं कार्य्येषु विद्यया संप्रोजयत॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा विद्युताग्निना विना कस्यचित्प्राणिनो व्यवहारसिद्धिर्भवितुं न शक्यास्ति। तस्मादयं विद्यया सम्परीक्ष्य कार्य्येषु संयोजितः बहूनि सुखानि साध्नोतीति॥५॥

अत्रेश्वरविद्युदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोद्धव्यम्॥

इति पञ्चषष्टितमं ६५ सूक्तं नवमो ९ वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! तुम लोग जो (**अप्सु**) जलों में (**हंसः**) पक्षी के (**न**) समान (**सीदन्**) जाता-आता डूबता-उछलता हुआ (**विशाम्**) प्रजाओं को (**उषर्भुत्**) प्रातःकाल में बोध कराने वा (**क्रत्वा**) अपनी बुद्धि वा कर्म्म से (**चेतिष्ठः**) अत्यन्त ज्ञान करानेवाले (**सोमः**) ओषधिसमूह के (**न**) समान (**ऋतप्रजातः**) कारण से उत्पन्न होकर वायु जल में प्रसिद्ध (**वेधाः**) पुष्ट करनेवाले (**शिशुना**) बछड़ा आदि से (**पशुः**) गौ आदि के (**न**) समान (**विभुः**) व्यापक हुआ (**दूरेभाः**) दूरदेश में दीप्तियुक्त बिजुली आदि अग्नि के समान (**श्वसिति**) प्राण, अपान आदि को करता है, उसको शिल्पादि कार्यों में संप्रयुक्त करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे बिजुली के विना किसी मनुष्य के व्यवहार की सिद्धि नहीं हो सकती। इस अग्निविद्या से परीक्षा करके कार्यों में संयुक्त किया हुआ अग्नि बहुत सुखों को सिद्ध करता है॥५॥

इस सूक्त में ईश्वर, अग्निरूप बिजुली के वर्णन से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह पैसठवां ६५ सूक्त और नवां ९वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य षट्षष्टितमस्य सूक्तस्य शाक्त्यः पराशर ऋषिः। अग्निर्देवता। १ पङ्क्तिः। २ भुरिक्पङ्क्तिः। ३ निचृत्पङ्क्तिः। ४,५ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः सोऽग्निः कीदृश इत्युपदिश्यते॥

अब छासठवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में पूर्वोक्त अग्नि के गुणों का उपदेश किया है॥

रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः।
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा॥ १॥

रयिः। न। चित्रा। सूरः। न। सम्ऽदृक्। आयुः। न। प्राणः। नित्यः। न। सूनुः। तक्वा। न। भूर्णिः। वना। सिसक्ति। पयः। न। धेनुः। शुचिः। विऽभावा॥ १॥

पदार्थः-(**रयिः**) द्रव्यसमूहः (**न**) इव (**चित्रा**) विविधाश्चर्यगुणः। अत्र **सुपां सुलुगि**त्याकारादेशः। (**सूरः**) सूर्यः (**न**) इव (**सन्दृक्**) सम्यग्दर्शयिता (**आयुः**) जीवनम् (**न**) इव (**प्राणः**) सर्वशरीरगामी वायुः (**नित्यः**) कारणरूपेणाविनाशिस्वरूपः (**न**) इव (**सूनुः**) कारणरूपेण वायोः पुत्रवद्वर्त्तमानः (**तक्वा**) स्तेनः। **तक्वेति स्तेननामसु पठितम्।** (निघं०३.२४) (**भूर्णिः**) धर्त्ता (**वना**) अरण्यानि किरणान् वा (**सिसक्ति**) समवैति (**पयः**) दुग्धम् (**न**) इव (**धेनुः**) दुग्धदात्री गौः (**शुचिः**) पवित्रः (**विभावा**) यो विविधान् पदार्थान् भाति प्रकाशयति सः॥ १॥

अन्वयः-हे मनुष्या! भवन्तो रयिर्नेव चित्रः सूरो नेव संदृगायुर्नेव प्राणो नित्यो नेव सूनुः पयो नेव धेनुस्तक्वा नेव भूर्णिर्विभावा शुचिरग्निर्वना सिसक्ति तं यथावद् विज्ञाय कार्येषूपयोजयन्तु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्येनेश्वरेण प्रजाहिताय विविधगुणोऽनेककार्योपयोगी सत्यस्वभावोऽग्नि-र्निर्मितः स एव सर्वदोपासनीयः॥ १॥

पदार्थः-हे मनुष्यो! आप सब लोग (**रयिर्न**) द्रव्यसमूह के समान (**चित्रा**) आश्चर्य गुणवाले (**सूरः**) सूर्य्य के (**न**) समान (**संदृक्**) अच्छे प्रकार दिखानेवाला (**आयुः**) जीवन के (**न**) समान (**प्राणः**) सब शरीर में रहनेवाला (**नित्यः**) कारणरूप से अविनाशिस्वरूप वायु के (**न**) समान (**सूनुः**) कार्य्यरूप से वायु के पुत्र के तुल्य वर्त्तमान (**पयः**) दूध के (**न**) समान (**धेनुः**) दूध देनेवाली गौ (**तक्वा**) चोर के (**न**) समान (**भूर्णिः**) धारण करने (**विभावा**) अनेक पदार्थों का प्रकाश करनेवाला (**शुचिः**) पवित्र अग्नि (**वना**) वन वा किरणों को (**सिसक्ति**) संयुक्त होता वा संयोग करता है, उसको यथावत् जान के कार्यों में उपयुक्त करो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को उचित है कि जिस ईश्वर ने प्रजा के हित के लिए बहुत गुणवाले अनेक कार्य्यों के उपयोगी सत्य स्वभाववाले इस अग्नि को रचा है, उसी की सदा उपासना करें॥ १॥

पुनः स मनुष्यः कीदृशो भवेदित्युपदिश्यते॥

फिर वह मनुष्य कैसा हो, यह विषय अगले मन्त्र में कहा है॥

दा॒धार॒ क्षेम॒मोको॒ न र॒ण्वो यवो॒ न प॒क्वो जेता॒ जना॑नाम्।
ऋषि॒र्न स्तुभ्वा॑ वि॒क्षु प्र॑शस्तो वा॒जी न प्री॒तो वयो॑ दधाति॥ २॥

दा॒धार॑। क्षेम॑म्। ओक॑:। न। र॒ण्व:। यव॑:। न। प॒क्व:। जेता॑। जना॑नाम्। ऋषि॑:। न। स्तुभ्वा॑। वि॒क्षु। प्र॒ऽश॒स्त:। वा॒जी। न। प्री॒त:। वय॑:। दु॒धा॒ति॥ २॥

पदार्थः-(**दाधार**) धरेत्। अत्र **तुजादित्वाद्** दीर्घोऽभ्यासः। (**क्षेमम्**) कल्याणकरं रक्षणम् (**ओकः**) गृहम् (**न**) इव (**रण्वः**) रमणीयः (**यवः**) सुखकारी धान्यविशेषः (**न**) इव (**पक्वः**) उपभोक्तुमर्हः (**जेता**) उत्कर्षत्वप्रापकः (**जनानाम्**) मनुष्यादीनाम् (**ऋषिः**) मन्त्रार्थद्रष्टा विद्वान् विद्याप्रकाशकः (**न**) इव (**स्तुभ्वा**) अर्चकः। **स्तोभतीत्यर्चतिकर्मसु पठितम्।** (निघं०३.१४) (**विक्षु**) उत्पन्नासु प्रजासु (**प्रशस्तः**) श्रेष्ठः (**वाजी**) वेगवानश्वः (**न**) इव (**प्रीतः**) कमनीयः (**वयः**) जीवनम् (**दधाति**) धरेत्॥ २॥

अन्वयः-यो मनुष्य ओको नेव रण्वः पक्वो यवो नेव पक्वऋषिर्नेव स्तुभ्वा वाजी नेव प्रीतो विक्षु प्रशस्तो जनानां जेता वयो दधाति स क्षेमं दाधार॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या जीवनहेतून् ब्रह्मचर्यादीन् सम्यग् विज्ञाय कार्य्यसिद्धये संप्रयुञ्जते युक्ताहारविहारायोपयुक्तान् पदार्थान् धरन्ति, ते दीर्घायुषो भूत्वा सदा सुखिनो भवन्ति॥ २॥

पदार्थः-जो मनुष्य (**ओकः**) घर के (**न**) समान (**रण्वः**) रमणीयस्वरूप (**पक्वः**) पके (**यवः**) सुख करनेवाले यव के (**न**) समान (**ऋषिः**) मन्त्रों के अर्थ को जाननेवाले विद्वान् के (**न**) समान (**स्तुभ्वा**) सत्कार के योग्य (**वाजी**) वेगवान् घोड़े के समान (**प्रीतः**) कमनीय (**विक्षु**) प्रजाओं में (**प्रशस्त**) श्रेष्ठ (**जनानाम्**) मनुष्य आदि प्राणियों को (**जेता**) सुख प्राप्त करानेवाला (**वयः**) जीवन (**दधाति**) धारण करता है, वह (**क्षेमम्**) रक्षा को (**दाधार**) धारण करता है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य जीवन के निमित्त ब्रह्मचर्य्यादि कर्मों को काम की सिद्धि के लिये अच्छे प्रकार जानके युक्तिपूर्वक आहार और विहार के अर्थ यथायोग्य पदार्थों को धारण करते हैं, वे बहुत काल पर्यन्त जी के सदा सुखी होते हैं॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

दु॒रोक॑शोचि॒: क्रतु॒र्न नित्यो॑ जा॒येव॒ योना॒वर॑ं विश्व॑स्मै।
चि॒त्रो यदभ्रा॑ट्छ्वे॒तो न वि॒क्षु रथो॒ न रु॒क्मी त्वे॒ष: स॒मत्सु॑॥ ३॥

दुरोकऽशोचिः। क्रतुः। न। नित्यः। जायाऽइव। योनौ। अरम्। विश्वस्मै। चित्रः। यत्। अभ्राट्। श्वेतः। न। विक्षु। रथः। न। रुक्मी। त्वेषः। समत्ऽसु॥ ३॥

पदार्थः-(**दुरोकशोचिः**) दूरस्थेष्वोकेषु स्थानेषु शोचयो दीप्तयो यस्य सः (**क्रतुः**) प्रज्ञा कर्म वा (**न**) इव (**नित्यः**) अविनश्वरस्वभावः (**जायेव**) यथा भार्या तथा (**योनौ**) कारणे (**अरम्**) अलम् (**विश्वस्मै**) सर्वस्मै जगते (**चित्रः**) अद्भुतस्वभावः (**यत्**) यः (**अभ्राट्**) न केनापि प्रकाशितो भवति स्वप्रकाशत्वात् (**श्वेतः**) भास्वरस्वरूपत्वाच्छुद्धः (**न**) इव (**रुक्मी**) प्रशस्तानि रुक्माणि रोचकानि कर्माणि गुणा वा सन्ति यस्य सः (**त्वेषः**) प्रदीप्तस्वभावः (**समत्सु**) संग्रामेषु। **समत्स्विति संग्रामनामसु पठितम्।** (निघं०२.१७)॥ ३॥

अन्वयः-यद्यो मनुष्यो क्रतुर्नेव नित्यो जायेव योनावरं कर्त्ता श्वेतो नेव विक्षु रथो नेव रुक्मी दुरोकशोचि-र्विश्वस्मै सर्वसुखकर्त्ता समत्सु चित्रोऽभ्राट् त्वेषोऽस्ति स सम्राड् भवितुमर्हति॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यो ज्ञानकर्मवत्सदा वर्त्तमानोऽनुकूलस्त्रीवत्सर्वसुखनिमित्तः सूर्य्यवत् प्रकाशकोऽद्भुतो रथवन्मोक्षमार्गस्य नेता वीरवद्युद्धेषु विजेता वर्त्तते, स राज्यश्रियमवाप्नोति॥ ३॥

पदार्थः-(**यत्**) जो मनुष्य (**क्रतुः**) बुद्धि वा कर्म के (**न**) समान (**नित्यः**) अविनाशिस्वभाव (**जायेव**) भार्या के समान (**योनौ**) कारणरूप में (**अरम्**) अलंकर्त्ता (**श्वेतः**) शुद्ध शुक्लवर्ण के (**न**) समान (**विक्षु**) प्रजाओं में शुद्ध करने (**रथः**) सुवर्णादि से निर्मित विमानादि यान के (**न**) समान (**रुक्मी**) रुचि करनेवाले कर्म वा गुणयुक्त (**दुरोकशोचिः**) दूरस्थानों में दीप्तियुक्त (**विश्वस्मै**) सब जगत् के लिये सुख करने (**समत्सु**) संग्रामों में (**चित्रः**) अद्भुत स्वभावयुक्त (**अभ्राट्**) आप ही प्रकाशमान होने से शुद्ध (**त्वेषः**) प्रदीप्त स्वभाववाला है, वही चक्रवर्त्ति राजा होने के योग्य होता है॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जो ज्ञान और कर्मकाण्ड के समान सदा वर्त्तमान, अनुकूल स्त्री के समान सुखों का निमित्त, सूर्य के समान शुभगुणों को प्रकाश करने, आश्चर्य गुणवाले रथ के समान मोक्ष में प्राप्त करने, वीर के समान युद्धों में विजय करनेवाला हो, वह राज्यलक्ष्मी को प्राप्त होता है॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका।
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्॥ ४॥

सेनाऽइव। सृष्टा। अमम्। दधाति। अस्तुः। न। दिद्युत्। त्वेषऽप्रतीका। यमः। ह। जातः। यमः। जनिऽत्वम्। जारः। कनीनाम्। पतिः। जनीनाम्॥ ४॥

पदार्थः-(**सेनेव**) यथा (सुशिक्षिता) वीरपुरुषाणां विजयकर्त्री सेनास्ति तथाभूतः (**सृष्टा**) युद्धाय प्रेरिता (**अमम्**) अपरिपक्ववविज्ञानं जनम् (**दधाति**) धरति (**अस्तुः**) शत्रूणां विजेतुः प्रक्षेप्तुः (**न**) इव (**दिद्युत्**) विच्छेदिका (**यमः**) नियन्ता (**ह**) किल (**जातः**) प्रकटत्वं गतः (**यमः**) सर्वोपरतः (**जनित्वम्**) जन्मादिकारणम् (**जारः**) हन्ता सूर्य्यः (**कनीनाम्**) कन्येव वर्त्तमानानां रात्रीणां सूर्य्यादीनां वा (**पतिः**) पालयिता (**जनीनाम्**) जनानां प्रजानाम्॥४॥

अन्वयः-हे मनुष्या! यूयं योऽयं सेनेशो जातो यमो जनित्वं कनीनां जार इव जनीनां पतिश्चाऽस्ति, स सृष्टा सेनेवास्तुस्त्वेषप्रतीका दिद्युन्नेवादधाति तं भजत॥३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्विद्यया सम्यक् प्रयत्नेन यथा सुशिक्षिता सेना शत्रून् विजित्य विजयं करोति। यथा च धनुर्वेदविदः शत्रूणामुपरि शस्त्रास्त्राणि प्रक्षिप्यैतान् विच्छिद्य प्रलयं गमयन्ति, तथैवोत्तमः सेनाऽधिपतिः सर्वदुःखानि नाशयतीति बोद्धव्यम्॥४॥

पदार्थः-हे मनुष्यो! तुम लोग जो सेनापति (**यमः**) नियम करनेवाला (**जातः**) प्रकट (**यमः**) सर्वथा नियमकर्त्ता (**जनित्वम्**) जन्मादि कारणयुक्त (**कनीनाम्**) कन्यावत् वर्त्तमान रात्रियों के (**जारः**) आयु का हननकर्त्ता सूर्य के समान (**जननीनाम्**) उत्पन्न हुई प्रजाओं का (**पतिः**) पालनकर्त्ता (**सृष्टा**) प्रेरित (**सेनेव**) अच्छी शिक्षा को प्राप्त हुई वीर पुरुषों की विजय करनेवाली सेना के समान (**अस्तुः**) शत्रुओं के ऊपर अस्त्र-शस्त्र चलानेवाले (**त्वेषप्रतीका**) दीप्तियों के प्रतीति करनेवाले (**दिद्युन्न**) बिजुली के समान (**अमम्**) अपरिपक्व विज्ञानयुक्त जन को (**दधाति**) धारण करता है, उसका सेवन करो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि विद्या से अच्छे प्रयत्न द्वारा जैसे की हुई उत्तम शिक्षा से सिद्ध की हुई सेना शत्रुओं को जीत कर विजय करती है, जैसे धनुर्वेद के जाननेवाले विद्वान् लोग शत्रुओं के ऊपर शस्त्र-अस्त्रों को छोड़ उनका छेदन करके भगा देते हैं, वैसे उत्तम सेनापति सब दुःखों का नाश करता है, ऐसा तुम जानो॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर पूर्वोक्त कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

तं व॑श्चरा॒था व॒यं व॑स॒त्याऽस्तं॒ न गावो॒ नक्ष॑न्त द्रु॒द्धम्।
सिन्धु॑र्न क्षोद॒: प्र नी॒चीरै॑नो॒न्नव॑न्त॒ गाव॒: स्व॑र्दृ॒शीके॑॥५॥१०॥

तम्। व॒रः। च॒रा॒था॑। व॒यम्। व॒स॒त्या। अस्त॑म्। न। गाव॑ः। नक्ष॑न्ते। द्रु॒द्धम्। सिन्धु॑ः। न। क्षोद॑ः। प्र। नी॒ची॑ः। ऐ॒नो॒त्। नव॑न्त। गाव॑ः। स्व॑ः। दृ॒शीके॑॥५॥

पदार्थः-(**तम्**) पूर्वोक्तम् (**वः**) युष्मभ्यम् (**चराथा**) चराथया। अत्र चरधातो बाहुलकादौणादिकोऽथप्रत्ययः प्रत्ययादेर्दीर्घः **सुपां सुलुगि**त्याकारादेशश्च। (**वयम्**) अनुष्ठातारः (**वसत्या**)

वसन्ति यस्यां तया **(अस्तम्)** गृहम् **(न)** इव **(गावः)** पालिता धेनवः **(नक्षन्ते)** प्राप्नुवन्ति **(इद्धम्)** दीप्तम् **(सिन्धुः)** समुद्रः **(न)** इव **(क्षोदः)** जलम् **(प्र)** प्रकृष्टार्थे **(नीचः)** निम्नदेशे **(ऐनोत्)** प्राप्नोति। अत्रेण् धातोर्व्यत्ययेन श्नुः। **(नवन्त)** गच्छन्ति। **नवत इति गतिकर्मसु पठितम्।** (निघं०२.१४) **(गावः)** किरणाः **(स्वः)** आदित्ये **(दृशीके)** दर्शके। अत्र दृशधातोर्बाहुलकादौणादिक ईकन् प्रत्ययः किच्च॥५॥

अन्वयः-यः सभेशश्चराथा वसत्या गावोऽस्तं न गृहमिव नक्षन्ते गाव स्वर्दृशीक इद्धं नवन्तेव सिन्धुर्नीचीः क्षोदो न वः प्रैनोत् प्राप्नोति तं वयं सेवेमहि॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। य एवं जगदीश्वरं संसेव्य विद्युतं वा साध्नुवन्ति तान् यथा गावो गृहं किरणाः सूर्य्यं च गच्छन्ति तथैव सुखानि प्राप्नुवन्ति। यथा मनुष्यः समुद्रं प्राप्य नानाकार्य्याण्यलंकरोति तथैव सज्जनैरन्तर्यामिणमुपास्य विद्युद्विद्यां वा साध्य सर्वे कामा अलंकर्त्तव्याः॥५॥

अत्रेश्वरस्याग्नेश्च गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति षट्षष्टितमं ६६ सूक्तं दशमो १० वर्गश्च समाप्तः॥

पदार्थः-जो **(चराथा)** चररूप **(वसत्या)** वास करने योग्य पृथिवी के सह वर्त्तमान **(गावः)** गौ **(न)** जैसे **(अस्तम्)** घर को **(नक्षन्ते)** प्राप्त होती जैसे **(गावः)** किरण **(स्वर्दृशीके)** देखने के हेतु व्यवहार में **(इद्धम्)** सूर्य्य को **(नवन्ते)** प्राप्त होते हैं **(न)** जैसे **(सिन्धुः)** समुद्र **(नीचीः)** नीचे के **(क्षोदः)** जल को प्राप्त होता है, वैसे **(वः)** तुम लोगों को **(प्रैनोत्)** प्राप्त होता है, उसी की सेवा हम लोग करें॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सभापति आदि इस प्रकार परमेश्वर का सेवन और विद्युत् अग्नि को सिद्ध करते हैं, उनको जैसे गौ, घर और किरण सूर्य को प्राप्त होते हैं और जैसे मनुष्य समुद्र को प्राप्त होके नाना प्रकार के कामों को सुशोभित (सिद्ध) करता है, वैसे ही सज्जन पुरुषों को उचित है कि अन्तर्य्यामी परमेश्वर की उपासना तथा विद्युत् विद्या को यथावत् सिद्ध करके अपनी सब कामनाओं को पूर्ण करें॥५॥

इस सूक्त में ईश्वर और अग्नि और गुणों का वर्णन होने इस सूक्त की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह छासठवां ६६ सूक्त तथा दशवां १० वर्ग समाप्त हुआ॥

अथ पर्ज्जन्यस्य सप्तषष्टितमस्य सूक्तस्य शाक्त्यः पराशर ऋषिः। अग्निर्देवता। १,२,४ निचृत् पङ्क्तिः। ३ पङ्क्तिः। ५ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः स विद्वान् कीदृशो भवेदित्युपदिश्यते॥

अब सड़सठवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वान् कैसा हो, इस विषय को कहा है॥

वने॑षु जा॒युर्मर्ते॑षु मि॒त्रो वृ॑णी॒ते श्रु॒ष्टिं राजे॑वाजु॒र्यम्।
क्षेमो॒ न सा॒धुः क्रतु॒र्न भ॒द्रो भुव॑त्स्वा॒धीर्होता॑ हव्य॒वाट्॥ १॥

वने॑षु। जा॒युः। मर्ते॑षु। मि॒त्रः। वृ॒णी॒ते। श्रु॒ष्टिम्। राजा॑ऽइव। अ॒जु॒र्यम्। क्षेमः॑। न। सा॒धुः। क्रतुः॑। न। भ॒द्रः। भुव॑त्। सु॒ऽआ॒धीः। होता॑। ह॒व्य॒ऽवाट्॥ १॥

पदार्थः-(**वनेषु**) संभजनीयेषु पदार्थेषु (**जायुः**) प्रजेता (**मर्तेषु**) मनुष्येषु (**मित्रः**) सखेव (**वृणीते**) स्वीकुरुते (**श्रुष्टिम्**) क्षिप्रकारिणम्। **श्रुष्टि इति क्षिप्रनाम। आशु अष्टीति।** (निरु०६.१२) (**राजेव**) यथा सभाद्यध्यक्षः (**अजुर्य्यम्**) युद्धविद्यासङ्गतम् (**क्षेमः**) कल्याणकारी (**न**) इव (**साधुः**) सत्यमानी सत्यकारी सत्यवादी (**क्रतुः**) प्रशस्तकर्मप्रज्ञः (**न**) इव (**भद्रः**) कल्याणकरः (**भुवत्**) भवेत्। अत्र लडर्थे लेट्। (**स्वाधीः**) सुष्ठु समन्ताद्धीयते येन सः (**होता**) दाताऽनुग्रहीता (**हव्यवाट्**) यो ग्राह्यदातव्यान् पदार्थान् वहति प्रापयति सः॥१॥

अन्वयः-हे मनुष्या! यूयं यो विद्वान् वनेषु जायुरिवाजुर्य्यं श्रुष्टिं राजेव क्षेमः साधुर्नेव भद्रः क्रतुर्नेव स्वाधीर्होता हव्यवाड्भुवद्भवेद्धार्मिकान् मनुष्यान् वृणीते तं सदा सेवध्वम्॥१॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्विद्वत्सङ्गं कृत्वाऽऽनन्दः सदैव कर्त्तव्यः॥१॥

पदार्थः-हे मनुष्यो! तुम लोग जो विद्वान् (**वनेषु**) सम्यक् सेवने योग्य पदार्थ (**जायुः**) जीतने के हेतु सूर्य्य के समान (**अजुर्य्यम्**) युद्धविद्या से सङ्गत सेना के तुल्य योग्य (**श्रुष्टिम्**) शीघ्रता करनेवाले को (**राजेव**) राजा के समान (**क्षेमः**) रक्षक (**साधुः**) सत्पुरुष के समान (**भद्रः**) कल्याणकारी (**क्रतुर्न**) उत्तम बुद्धि और कर्मकर्त्ता के तुल्य (**स्वाधीः**) अच्छे प्रकार धारण करने (**होता**) देने तथा अनुग्रह करने और (**हव्यवाट्**) लेने-देने योग्य पदार्थों का प्राप्त करानेवाला (**भुवत्**) हो तथा धर्मात्मा मनुष्यों को (**वृणीते**) स्वीकार करे, उसका सदा सेवन करो॥१॥

भावार्थः-इस मन्त्रा में उपमा और (वाचकलुप्तोपमालङ्कार) हैं। मनुष्यों को उचित कि विद्वानों का संग करके सदैव आनन्द भोग करें॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

ह॒स्ते॒ दधा॑नो नृ॒म्णा विश्वा॒न्यमे॑ दे॒वान् धा॒द्गुहा॑ नि॒षीद॑न्।

विदन्तीमत्र नरो धियंधा हृदा यत्तष्टान् मन्त्राँ अशंसन्॥ २॥

हस्ते। दधानः। नृम्णा। विश्वानि। अमे। देवान्। धात्। गुहा। निऽसीदन्। विदन्ति। ईम्। अत्र। नरः। धियम्ऽधाः। हृदा। यत्। तष्टान्। मन्त्रान्। अशंसन्॥ २॥

पदार्थः-(**हस्ते**) करे (**दधानः**) धरन्नुदारो धातेव (**नृम्णा**) धनानि (**विश्वानि**) सर्वाणि (**अमे**) ज्ञानादिनिमित्तेषु गृहेषु (**देवान्**) विदुषो दिव्यगुणान् वा (**धात्**) दधाति (**गुहा**) गुहायां सर्वविद्यासंयुक्तायां बुद्धौ। **गुहागूहतेः।** (निरु०१३.९) निषीदन् स्थितोऽवस्थापयन् (**विदन्ति**) जानन्ति (**ईम्**) प्राप्तव्यान् बोधान्। **ईमति पदनामसु पठितम्।** (निघं०४.२) (अत्र) अस्मिन् (**नरः**) ये नयन्ति ते मनुष्याः (**धियन्धाः**) ये प्रज्ञां कर्म्म वा दधाति ते (**हृदा**) हृदयस्तेन विज्ञानेन (**यत्**) (**तष्टान्**) तक्षन्ति तीक्ष्णीकुर्वन्ति यैर्विद्यास्तान् (**मन्त्रान्**) वेदावयवान् विचारान् वा (**अशंसन्**) स्तुवन्ति॥ २॥

अन्वयः-यद्येन नरो यथा धियन्धा विद्वांसस्तष्टान् मन्त्रान् विदन्त्यशंसन् स्तुवन्ति च। यथोदारो दाता हस्ते विश्वानि नृम्णानि दधानोऽन्येभ्यः सुपात्रेभ्यो ददाति यथा गुहा निषीदन्नीश्वरो विद्वान् अत्र अमे देवान् धाद्दधाति तथा वर्त्तन्ते तेऽतुलमानन्दं लभन्ते॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! युष्माभिर्योऽन्तर्य्याम्यात्मनि सत्यानृते उपदिशति बाह्योऽध्यापको विद्वांश्च वर्त्तते तं विहाय नैव कस्याप्युपासना संसर्गश्च कर्त्तव्य इति ॥२॥

पदार्थः-(**यत्**) जो (**नरः**) प्राप्ति करनेवाला मनुष्य जैसे (**धियन्धाः**) प्रज्ञा, कर्म को धारण करनेवाले विद्वान् लोग (**तष्टान्**) विद्याओं को तीक्ष्ण करनेवाले (**मन्त्रान्**) वेदों के अवयव वा विचाररूपी मन्त्रों को (**विदन्ति**) जानते (**अशंसन्**) स्तुति करते हैं। जैसे देनेवाला उदार मनुष्य (**हस्ते**) हाथ में (**विश्वानि**) सब (**नृम्णा**) धनों को (**दधानः**) धारण किया हुआ अन्य सुपात्र मनुष्यों को देता है। जैसे (**गुहा**) सब विद्याओं से युक्त बुद्धि में (**निषीदन्**) स्थित हुआ ईश्वर वा योगी विद्वान् (**अत्र**) इस (**अमे**) विज्ञान आदि में (**देवान्**) विद्वान् व दिव्य गुणों को (**धात्**) धारण करता है, वैसे होते हैं, वे अत्यन्त आनन्द को प्राप्त होते हैं॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम लोगों को चाहिये कि जो अन्तर्यामी आत्मा में सत्य-झूंठ का उपदेश करता और बाह्य अध्ययन करानेवाला विद्वान् वर्त्तमान है, उसको छोड़ कर किसी की उपासना वा संगत कभी मत करो॥ २॥

पुनरीश्वरविद्वद्गुणा उपदिश्यन्ते॥

अब अगले मन्त्र में ईश्वर और विद्वान् के गुणों का उपदेश किया है॥

अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः॥ ३॥

अ॒जः। न। क्षाम्। दा॒धार॑। पृ॒थि॒वीम्। त॒स्तम्भ॑। द्याम्। मन्त्रे॑भिः। स॒त्यैः। प्रि॒या। प॒दानि॑। प॒शुः। नि। पा॒हि॒। वि॒श्वऽआ॑युः। अ॒ग्ने॒। गु॒हा। गुह॑म्। गाः॥ ३॥

पदार्थः-(**अजः**) यः परमात्मा कदाचिन्न जायते सः (**न**) इव (**क्षाम्**) भूमिम्। **क्षेति पृथिवीनामसु पठितम्।** (निघं०१.१) (**दाधार**) स्वसत्तयाकर्षणेन धरति (**पृथिवीम्**) अन्तरिक्षस्थानन्यांल्लोकान् (**तस्तम्भ**) स्तभ्नाति (**द्याम्**) प्रकाशमयं विद्यमानम्। सूर्य्यादिलोकसमूहं वा (**मन्त्रेभिः**) ज्ञानयुक्तैर्विचारैः (**सत्यैः**) सत्यलक्षणोज्ज्वलैर्नित्यैः (**प्रिया**) प्रियाणि (**पदानि**) प्राप्तव्यानि (**पशुः**) पशोर्बन्धनात् (**नि**) नितराम् (**पाहि**) रक्ष (**विश्वायुः**) सर्वमायुर्जीवनं यस्मात्सः (**अग्ने**) विद्वन् (**गुहा**) गुहायां बुद्धौ (**गुहम्**) गूढं विज्ञानगम्यं कारणज्ञानम् (**गाः**)॥ ३॥

अन्वयः-हे अग्ने विद्वंस्त्वं यथा परमात्मा सत्यैर्मन्त्रेभिः क्षां दाधार पृथिवीं द्यां तस्तम्भ स्तभ्नाति प्रियाणि पदानि ददाति गुहा स्थितः सन् गुहं गाः पश्वो बन्धनादस्मान् रक्षति तथा विश्वायुः सन् धर्मेण प्रजा निपाह्यजो नेव भव॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा परमेश्वरः स्वकीयैर्विज्ञानबलादिगुणैः सर्वं जगद्धरति यथा प्रियः सखा स्वकीयं मित्रं दुःखबन्धात् पृथक्कृत्य प्रियाणि सुखानि प्रापयति यथाऽन्तर्यामिरूपेण परमेश्वरो जीवादिकं धृत्वा प्रकाशयति, तथैव सभाध्यक्षः सत्यन्यायेन राज्यं सूर्यः स्वैराकर्षणादिगुणैर्जगच्च धरति॥ ३॥

पदार्थः-हे (**अग्ने**) पूर्ण विद्यायुक्त विद्वान्! तू जैसे परमात्मा (**सत्यैः**) सत्य लक्षणों से प्रकाशित ज्ञानयुक्त (**मन्त्रेभिः**) विचारों से (**क्षाम्**) भूमि को (**दाधार**) अपने बल से धारण करता (**पृथिवीम्**) अन्तरिक्ष में स्थित जो अन्य लोक (**द्याम्**) तथा प्रकाशमय सूर्य्यादि लोकों को (**तस्तम्भ**) प्रतिबन्धयुक्त करता और (**प्रिया**) प्रीतिकारक (**पदानि**) प्राप्त करने योग्य ज्ञानों को प्राप्त कराता है (**गुहा**) बुद्धि में स्थित हुए (**गुहम्**) गूढ़ विज्ञान भीतर के स्थान को (**गाः**) प्राप्त हो वा होते हैं (**पशुः**) बन्धन से हम लोगों की रक्षा करता वैसे धर्म से प्रजा की (**नि पाहि**) निरन्तर रक्षा कर और (**अजो न**) न्यायकारी ईश्वर के समान हूजिये॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे परमेश्वर वा जीव कभी उत्पन्न वा नष्ट नहीं होता, वैसे कारण भी विनाश में नहीं आता। जैसे परमेश्वर अपने विज्ञान, बल आदि गुणों से पृथिवी आदि जगत् को रचकर धारण करता है, वैसे सत्य विचारों से सभाध्यक्ष राज्य का धारण करे। जैसे प्रिय मित्र अपने मित्र को दुःख के बन्धों से पृथक् करके उत्तम-उत्तम सुखों को प्राप्त कराता है, वैसे ईश्वर और सूर्य्य भी सब सुखों को प्राप्त कराते हैं। जैसे अन्तर्य्यामि रूप से ईश्वर जीवादि को धारण करके प्रकाश करता है, वैसे सभाध्यक्ष सत्यन्याय से राज्य और सूर्य्य अपने आकर्षणादि गुणों से जगत् को धारण करता है॥ ३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर भी ईश्वर और विद्वान् के गुणों का उपदेश करते हैं॥

य ईं॑ चि॒केत॒ गुहा॒ भव॑न्तमा॒ यः स॒सादं॒ धारा॑मृ॒तस्य॑।
वि ये चृ॒तन्त्यृ॒ता सप॑न्त॒ आदिद्वसू॑नि॒ प्र व॑वाचास्मै॥ ४॥

यः। ईम्। चि॒केत॑। गुहा॑। भव॑न्तम्। आ। यः। स॒साद॑। धारा॑म्। ऋ॒तस्य॑। वि। ये। चृ॒तन्ति॑। ऋ॒ता। सप॑न्तः। आत्। इत्। वसू॑नि। प्र। व॒वा॒च॒। अ॒स्मै॒॥ ४॥

पदार्थः-(**यः**) मनुष्यः (**ईम्**) विज्ञानमुदकं वा (**चिकेत**) जानाति (**गुहा**) बुद्धौ विज्ञाने (**भवन्तम्**) सन्तं जगदीश्वरं सभाद्यध्यक्षं वा (**आ**) समन्तात् (**यः**) (**ससाद**) अवसादयति (**धाराम्**) वाचं प्रवाहं वा। **धारेति वाङ्नामसु पठितम्।** (निघं०१.११) (**ऋतस्य**) सत्यविद्यामयस्य वेदचतुष्टयस्य जलस्य वा (**वि**) विशेषे (**ये**) मनुष्याः (**चृतन्ति**) ग्रथ्नन्ति (**ऋता**) ऋतानि सत्यानि (**सपन्तः**) समवयन्तः (**आ**) अनन्तरे (**इत्**) एव (**वसूनि**) विद्यासुवर्णादिधनानि (**प्र**) प्रकृष्टे (**ववाच**) उक्तवान्। **सम्प्रसारणाच्चे**त्यत्र **वाच्छन्दसी**त्युनवर्त्तनाद् यणादेशः। (**अस्मै**) मनुष्याय॥४॥

अन्वयः-यो मनुष्यो गुहाभवन्तमी ज्ञानस्वरूपमीश्वरं विद्वांसं ज्ञापकमुदकं वा चिकेत जानाति। य ऋतस्य धारामाससाद ये ऋता सपन्तो वसूनि विचृतन्ति। यस्मै परमेश्वरः प्रववाचादनन्तरमस्मायिदेव सर्वाणि सुखानि प्राप्नुवन्ति॥४॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि कस्यचित्परमेश्वरोपासनविज्ञानाभ्यां सत्यविद्याचरणाभ्यां च विना सुखानि यथावन्निर्विघ्नतया भवितुं शक्यन्ते॥४॥

पदार्थः-(**यः**) जो मनुष्य (**गुहा**) बुद्धि तथा विज्ञान में (**ईम्**) विज्ञानस्वरूप (**भवन्तम्**) जगदीश्वर वा सभाध्यक्ष को (**चिकेत**) जानता है (**यः**) जो (**ऋतस्य**) सत्य विद्यारूप चारों वेद वा जल के (**धाराम्**) वाणी वा प्रवाह को (**आ ससाद**) प्राप्त कराता है (**ये**) जो मनुष्य (**ऋता**) सत्यों को (**सपन्तः**) संयुक्त करते हुए (**वसूनि**) विद्या, सुवर्ण आदि धनों को (**विचृतन्ति**) ग्रन्थियुक्त करते हैं, जिसलिये परमेश्वर ने (**प्र ववाच**) कहा है (**आत्**) इसके पीछे (**इत्**) उसी के लिये सब सुख प्राप्त होते हैं॥४॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। किसी मनुष्य को परमेश्वर की उपासना वा विज्ञान, सत्यविद्या और उत्तम आचरणों के विना सुख प्राप्त नहीं हो सकते॥४॥

अथेश्वरविद्युद्गुणा उपदिश्यन्ते॥

अब अगले मन्त्र में ईश्वर और विद्युत् अग्नि के गुणों का वर्णन किया है॥

वि यो वी॒रुत्सु॒ रोध॑न्महि॒त्वोत प्र॒जा उ॒त प्र॒सूष्व॒न्तः।
चित्ति॑र॒पां दमे॑ वि॒श्वायुः॒ सद्मे॑व॒ धीरा॑ः स॒माय॑ चक्रुः॥ ५॥ ११॥

वि। यः। वीरुत्ऽसु। रोधत्। महित्ऽवा। उत। प्रऽजाः। उत। प्रऽसूषु। अन्तरिति। चित्तिः। अपाम्। दमे। विश्वऽआयुः। सद्मऽइव। धीराः। सम्ऽमाय। चक्रुः॥५॥

पदार्थः-(**वि**) विशेषार्थे (**यः**) जगदीश्वरो विद्युद्वा (**वीरुत्सु**) सत्तारचनाविशेषेण निरुद्धेषु कार्य्यकारणद्रव्येषु। **वीरुध इति पदनामसु पठितम्।** (निघं०४.३) (**रोधत्**) निरुणद्धि स्वीकरोति (**महित्वा**) सत्कृत्य (**उत**) अपि (**प्रजाः**) समुत्पन्नाः (**उत**) अपि (**प्रसूषु**) येभ्यो ये वा प्रसूयन्ते तेषु (**अन्तः**) मध्ये (**चित्तिः**) सम्यङ् ज्ञाता ज्ञापको वा (**अपाम्**) प्राणानां जलानां वा (**इमे**) उपशमे गृहीते गृहे वा (**विश्वायुः**) विश्वमायुर्यस्य सः (**सद्मेव**) गृहमिव संग्राममिव वा। **सद्मेति संग्रामनामसु पठितम्।** (निघं०२.१७) (**धीराः**) ज्ञानवन्तो विद्वांसः (**संमाय**) सम्यङ् मानं कृत्वा (**चक्रुः**) कुर्वन्ति॥५॥

अन्वयः-हे मनुष्या! धीराः यूयं संमाय सद्मेव यं लाभं चक्रुः। तथा यो महित्वा वीरुत्सु प्रज्ञा दाधार विरोधत् प्रसूष्वन्तर्वर्त्तते। य उतापि विश्वायुश्चितिर्दमेऽपां मध्ये प्रजा दधाति तं सुसेवध्वम्॥५॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। मनुष्यैर्योऽन्तर्य्यामिरूपेण रूपवेगादिगुणवत्त्वेन वा प्रजासु व्याप्य संनियच्छति तमेव जगदीश्वरमुपास्य कार्य्येषु विद्युतं संप्रयोज्य यथा विद्वांसो गृहे स्थित्वा संग्रामे शत्रून् विजित्य सुखयन्ति तथैव सुखयितव्यम्॥५॥

अत्रेश्वरसभाध्यक्षविद्युद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति सप्तषष्टितमं ६७ सूक्तमेकादशो ११ वर्गश्च समाप्तः॥

पदार्थः-हे (**धीराः**) ज्ञानवाले विद्वान् मनुष्यो! (**संमाय**) अच्छे प्रकार मान कर (**सद्मेव**) जैसे घर वा संग्राम के लिये जिस लाभ को (**चक्रुः**) करते हो, वैसे (**यः**) जो जगदीश्वर वा बिजुली (**महित्वा**) सत्कार करके (**वीरुत्सु**) रचना विशेष से निरोध प्राप्त हुए कारण-कार्य द्रव्यों में (**प्रजाः**) प्रजा (**विरोधत्**) विशेष कर के आवरण करता है, जो (**उत**) (**प्रसूषु**) उत्पन्न होनेवालों में भी (**अन्तः**) मध्य में वर्त्तमान है, जो (**उत**) (**विश्वायुः**) पूर्ण आयुयुक्त भी (**चित्तिः**) अच्छे प्रकार जाननेवाला (**दमे**) शान्तियुक्त घर तथा (**अपाम्**) प्राण वा जलों के मध्य में प्रजा को धारण करता है, उसकी सेवा अच्छे प्रकार करो॥५॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। मनुष्यों को चाहिये कि जो अन्तर्यामीरूप तथा रूप वेगादि गुणों से प्रजा में नियत (संयमन) करता है, उसी जगदीश्वर की उपासना और विद्युत् अग्नि को अपने कार्यों में संयुक्त करके जैसे विद्वान् लोग घर में स्थित हुए संग्राम में शत्रुओं को जीत कर सुखी करते हैं, वैसे सुखी करे॥५॥

इस सूक्त में ईश्वर, सभाध्यक्ष और विद्युत्, अग्नि के गुणों का वर्णन होने से पूर्व सूक्तार्थ के साथ इस सूक्तार्थ की सङ्गति जाननी चाहिये॥

यह सड़सठवां ६७ सूक्त और ग्यारहवां ११ वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्याष्टषष्टितमस्य सूक्तस्य शाक्त्यः पराशर ऋषिः। अग्निर्देवता। १,४ निचृत् पङ्क्तिः। २,३,५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे ईश्वर और विद्युत् अग्नि कैसे गुणवाले हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

श्रीणन्नुप॑ स्था॒द्दिवं॑ भुर॒ण्युः स्था॒तुश्च॒रथ॑म॒क्तून् व्यू॑र्णोत्।
परि॒ यदे॑षा॒मेको॒ विश्वे॑षां भुव॑द्दे॒वो दे॒वाना॑ं महि॒त्वा॥ १॥

श्री॒णन्। उप॑। स्था॒त्। दिव॑म्। भु॒र॒ण्युः। स्था॒तुः। च॒रथ॑म्। अ॒क्तून्। वि। ऊ॒र्णो॒त्। परि॑। यत्। ए॒षा॒म्। एक॑ः। विश्वे॑षाम्। भुव॑त्। दे॒वः। दे॒वाना॑म्। म॒हि॒ऽत्वा॥ १॥

पदार्थः-(**श्रीणन्**) परिपक्वं कुर्वन् (**उप**) सामीप्ये (**स्थात्**) तिष्ठेत् (**दिवम्**) प्रकाशस्वरूपम् (**भुरण्युः**) धर्त्ता पोषको वा। अत्र भुरणधातोः कण्ड्वादित्वाद् यक् तत उः। (**स्थातुः**) स्थावरसमूहम्। अत्र स्थाधातोस्तुः **सुपां सुलुगि**त्यमः स्थाने सुश्च। (**चरथम्**) जङ्गमसमूहम् (**अक्तून्**) व्यक्तान् प्राप्तव्यान् सर्वान् पदार्थान् (**वि**) विशेषार्थे (**ऊर्णोत्**) ऊर्णोत्याच्छादयति स्वीकरोति (**परि**) सर्वतः (**यत्**) यः (**एषाम्**) वर्त्तमानानां मनुष्याणां मध्ये (**एकः**) कश्चित् (**विश्वेषाम्**) सर्वेषाम् (**भुवत्**) (**देवः**) दिव्यगुणसम्पन्नो विद्वान् (**देवानाम्**) विदुषां मध्ये (**महित्वा**) पूजितो भूत्वा॥ १॥

अन्वयः-यद्यो भुरण्युः श्रीणन्मनुष्यो दिवं द्योतनात्मकं परमेश्वरं विद्युतं वा पर्युपस्थात् स्थातुः स्थावरं चरथमक्तूंश्च पर्यूर्णोत् स एषां विश्वेषां देवानामेको महित्वा भुवद्विभवेत्॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि कश्चित्परमेश्वरमनुपास्य विद्युद्विद्यामनाश्रित्य सर्वाणि पारमार्थिकव्यावहारिकसुखानि प्राप्तुमर्हति॥ १॥

पदार्थः-(**यत्**) जो (**भुरण्युः**) धारण वा पोषण करनेवाला (**श्रीणन्**) परिक्व करता हुआ मनुष्य (**दिवम्**) प्रकाश करनेवाले परमेश्वर वा विद्युत् अग्नि के (**उप स्थात्**) उप स्थित होवे और (**स्थातुः**) स्थावर (**चरथम्**) जङ्गम तथा (**अक्तून्**) प्रकट प्राप्त करने योग्य पदार्थों को (**पर्यूर्णोत्**) आच्छादन वा स्वीकार करता है वह (**एषाम्**) इन वर्त्तमान (**विश्वेषाम्**) सब (**देवानाम्**) विद्वानों के बीच (**एकः**) सहायरहित (**देवः**) दिव्यगुणयुक्त (**महित्वा**) पूजा को प्राप्त होकर (**विभुवत्**) विभव अर्थात् ऐश्वर्य को प्राप्त होवे॥ १॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। कोई परमेश्वर की उपासना वा विद्युत् अग्नि के आश्रय को छोड़कर सब परमार्थ और व्यवहार के सुखों को प्राप्त होने को योग्य नहीं हो सकता॥ १॥

पुनर्जगदीश्वरः कीदृश इत्युपदिश्यते॥

फिर जगदीश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आदित्ते विश्वे क्रतुं जुषन्त शुष्कादयद्वेव जीवो जनिष्ठाः।
भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः॥ २॥

आत्। इत्। ते। विश्वे। क्रतुम्। जुषन्त। शुष्कात्। यत्। देव। जीवः। जनिष्ठाः। भजन्त। विश्वे। देवऽत्वम्। नाम। ऋतम्। सपन्तः। अमृतम्। एवैः॥ २॥

पदार्थः-(**आत्**) अनन्तरम् (**इत्**) एव (**ते**) तव तस्य वा (**विश्वे**) अखिलाः (**क्रतुम्**) प्रज्ञापनं कर्म वा (**जुषन्त**) प्रीणन्ति सेवन्ते वा (**शुष्कात्**) धर्मानुष्ठानतपसो नीरसात् काष्ठादेः (**यत्**) ये (**देव**) जगदीश्वर (**जीवः**) इच्छादिगुणविशिष्टश्चेतनः (**जनिष्ठाः**) अतिशयेन प्रकटाः (**भजन्त**) सेवन्ते (**विश्वे**) सम्पूर्णाः (**देवत्वम्**) देवस्य भावः (**नाम**) प्रसिद्धम् (**ऋतम्**) सत्यम् (**सपन्तः**) समवयन्तः (**अमृतम्**) मरणजन्मदुःखादिदोषरहितम् (**एवैः**) ज्ञापकैः प्रापकैर्गुणैः॥ २॥

अन्वयः-हे देव जगदीश्वर! त्वामाश्रित्य यद्ये विश्वे सर्वे जनिष्ठाः सपन्तो विद्वांस एवैः शुष्कान् ते देवत्वं क्रतुं नाम जुषन्त ते ऋतममृतं भजन्त सेवन्ते तथा जीवआदिरेतत्सर्वं प्रयत्नेन प्राप्नुयात्॥ २॥

भावार्थः-नहि मनुष्याः परमेश्वरोपासनाऽज्ञानुष्ठानेन विना व्यवहारपरमार्थसुखं प्राप्तुमर्हन्तीति॥ २॥

पदार्थः-हे (**देव**) जगदीश्वर! आपका आश्रय करके (**यत्**) जो (**विश्वे**) सब (**जनिष्ठाः**) अतिज्ञान युक्त (**सपन्तः**) एक सम्मत विद्वान् लोग (**एवैः**) प्राप्तिकारक गुणों और (**शुष्कात्**) धर्मानुष्ठान के तप से (वा नीरस काष्ठादि से) (**ते**) आपके (**देवत्वम्**) दिव्य गुण प्राप्त करनेवाले (**क्रतुम्**) बुद्धि और कर्म (**नाम**) प्रसिद्ध अर्थयुक्त संज्ञा को सिद्ध (**जुषन्त**) प्रीति से सेवा करें वे (**ऋतम्**) सत्य रूप को (**भजन्त**) सेवन करते हैं, वैसे (**अमृतम्**) मोक्ष को (**जीवः**) इच्छादि गुणवाला चेतनस्वरूप मनुष्य (**आत्**) इसके अनन्तर (**इत्**) ही इस सबको प्राप्त हो॥ २॥

भावार्थः-मनुष्य परमेश्वर की उपासना वा आज्ञानुष्ठान के विना व्यवहार और परमार्थ के सुखों को प्राप्त नहीं हो सकते॥ २॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे ईश्वर और विद्वान् कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान् रयिं दयस्व॥ ३॥

ऋतस्य। प्रेषाः। ऋतस्य। धीतिः। विश्वऽआयुः। विश्वे। अपांसि। चक्रुः। यः। तुभ्यम्। दाशात्। यः। वा। ते। शिक्षात्। तस्मै। चिकित्वान्। रयिम्। दयस्व॥ ३॥

पदार्थः-(**ऋतस्य**) सत्यस्य विज्ञानस्य परमात्मनः कारणस्य वा (**प्रेषाः**) प्रेष्यन्ते ये प्रकृष्टमिष्यन्ते बोधसमूहास्ते (**ऋतस्य**) स्वरूपप्रवाहरूपेण सत्यस्य (**धीतिः**) धारणम् (**विश्वायुः**) विश्वं सर्वमायुर्यस्माद्यस्य वा (**विश्वे**) सर्वे (**अपांसि**) न्याय्यानि कर्माणि (**चक्रुः**) कुर्वन्ति (**यः**) (**तुभ्यम्**) ईश्वरोपासकाय धर्मपुरुषार्थयुक्ताय (**दाशात्**) पूर्णां विद्यां दद्यात् (**यः**) (**वा**) पक्षान्तरे (**ते**) तुभ्यम् (**शिक्षात्**) साध्वीं शिक्षां कुर्यात् (**तस्मै**) महात्मने (**चिकित्वान्**) ज्ञानवान् (**रयिम्**) सुवर्णादिधनम् (**दयस्व**) देहि॥३॥

अन्वयः-येनेश्वरेण विद्युता विश्वे प्रेषाः प्राप्यन्ते ऋतस्य धीतिर्विश्वायुश्च भवति तमाश्रित्य ये ऋतस्य मध्ये वर्त्तमाना विद्वांसोऽपांसि चक्रुः। य एतद्विद्यां तुभ्यं दाशाद्वा तव सकाशाद् गृह्णीयात्। यश्चिकित्वांस्ते तुभ्यं शिक्षां दाशाद् वा तव सकाशाद् गृह्णीयात्तस्मै स्वं रयिं दयस्व देहि॥३॥

भावार्थः-अत्र श्लेषालङ्कारः मनुष्यैर्नहीश्वररचनया विना जडात्कारणात्किं चित्कार्यमुत्पत्तुं विनष्टुं च शक्यते। नह्याधारेण विनाऽऽधेयं स्थातुमर्हति। नहि कश्चित् कर्म्मणा विना स्थातुं शक्नोति ये विद्वांसः सन्तो विद्यादिशुभगुणान् ददति वा य एतेभ्यो गृह्णन्ति, तेषामेव सदा सत्कारः कर्त्तव्यो नान्येषामिति बोद्धव्यम्॥३॥

पदार्थः-जिस ईश्वर वा विद्युत् अग्नि से (**विश्वे**) सब (**प्रेषाः**) अच्छी प्रकार जिनकी इच्छा की जाती है, वे बोधसमूह को प्राप्त होते हैं (**ऋतस्य**) सत्य विज्ञान तथा कारण का (**धीतिः**) धारण और (**विश्वायुः**) सब आयु प्राप्त होती है, उसका आश्रय करके जो (**ऋतस्य**) स्वरूप प्रवाह से सत्य के बीच वर्त्तमान विद्वान् लोग (**अपांसि**) न्याययुक्त कामों को (**चक्रुः**) करते हैं (**यः**) वा मनुष्य इस विद्या को (**तुभ्यम्**) ईश्वरोपासना, धर्म, पुरुषार्थयुक्त मनुष्य के लिये (**दाशात्**) देवे वा उससे ग्रहण करे (**यः**) जो (**चिकित्वान्**) ज्ञानवान् मनुष्य (**ते**) तेरे लिये (**शिक्षात्**) शिक्षा करे वा तुझ से शिक्षा लेवे (**तस्मै**) उसके लिये आप (**रयिम्**) सुवर्णादि धन को (**दयस्व**) दीजिये॥३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को ऐसा जानना चाहिये ईश्वर की रचना के विना जड़ कारण से कुछ भी कार्य उत्पन्न वा नष्ट होने तथा आधार के विना आधेय भी स्थित होने को समर्थ नहीं हो सकता और कोई मनुष्य कर्म से विना क्षण भर भी स्थित नहीं हो सकता। जो विद्वान् लोग विद्या आदि उत्तम गुणों को अन्य सज्जनों के लिये देते तथा उनसे ग्रहण करते हैं, उन्हीं दोनों का सत्कार करें, औरों का नहीं॥३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर अध्यापक और शिष्य कैसे हों, यह विषय अगले मन्त्र में कहा है॥

होता॒ निष॑त्तो॒ मनो॒रप॑त्ये॒ स चि॒न्वा॑सां॒ पती॑ रयी॒णाम्।
इ॒च्छन्त॒ रेतो॑ मि॒थस्त॒नूषु॒ सं जा॑नत॒ स्वैर्दक्षै॒रमू॑राः॥४॥

होता। निऽसत्तः। मनोः। अपत्ये। सः। चित्। नु। आसाम्। पतिः। रयीणाम्। इच्छन्त। रेतः। मिथः। तनूषु। सम्। जानत। स्वैः। दक्षैः। अमूराः॥४॥

पदार्थः-(**होता**) दाता (**निषत्तः**) सर्वत्र शुभकर्मसु स्थितस्य (**मनोः**) विज्ञानवतो मनुष्यस्य (**अपत्ये**) सन्ताने (**सः**) विद्वान् (**चित्**) अपि (**नु**) सद्यः (**आसाम्**) प्रजानाम् (**पतिः**) पालयिता (**रयीणाम्**) राज्यश्रियादिधनानाम् (**इच्छन्त**) इच्छन्तु। अत्र व्यत्ययेनात्मनेपदम्। (**रेतः**) विद्याशिक्षाजं शरीरात्मवीर्य्यम् (**मिथः**) परस्परं प्रीत्या (**तनूषु**) विद्यमानेषु शरीरेषु (**सम्**) सम्यगर्थे (**जानत**) (**स्वैः**) आत्मीयैः (**दक्षैः**) विद्यासुशिक्षाचातुर्य्यगुणैः (**अमूराः**) **अमूढाः।** (निरु०६.८) मूढत्वादिगुणरहिता ज्ञानवन्तः। **अमूर इति पदनामसु पठितम्।** (निघं०४.३)॥४॥

अन्वयः-यो निषत्तो मनोरपत्ये रयीणां होताऽस्ति स आसां प्रज्ञानां पतिर्भवेत्। हे अमूराः! स्वैर्दक्षैर्गुणैः सह तनूषु वर्त्तमानाः सन्तो मिथो रेतो विस्तारयन्तो भवन्त एतं समिच्छन्त चिदपि सर्वा विद्या यूयं नु जानत॥४॥

भावार्थः-मनुष्यैरन्योन्यं सखायो भूत्वाखिलविद्याः शीघ्रं ज्ञात्वा सततमानन्दितव्यम्॥४॥

पदार्थः-जो (**निषत्तः**) सर्वत्र स्थित (**मनोः**) मनुष्य के (**अपत्ये**) सन्तान में (**रयीणाम्**) राज्यश्री आदि धनों का (**होता**) देनेवाला है (**सः**) वह ईश्वर विद्युत् अग्नि (**आसाम्**) इन प्रजाओं का (**पतिः**) पालन करनेवाला है। हे (**अमूराः**) मूढ़पन आदि गुणों से रहित ज्ञानवाले! (**स्वैः**) अपने (**दक्षैः**) शिक्षा सहित चतुराई आदि गुणों के साथ (**तनूषु**) शरीरों में वर्त्तमान होते हुए (**मिथः**) परस्पर (**रेतः**) विद्या शिक्षारूपी वीर्य का विस्तार करते हुए तुम लोग इस की (**समिच्छन्त**) अच्छे प्रकार शिक्षा करो (**चित्**) और तुम सब विद्याओं को (**नु**) शीघ्र (**जानत**) अच्छे प्रकार जानो॥४॥

भावार्थः-मनुष्यों को उचित है कि परस्पर मित्र हो और समग्र विद्याओं को शीघ्र जानकर निरन्तर आनन्द भोगें॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे पढ़ने और पढ़ाने हारे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः।
वि राय और्णोर्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः॥५॥१२॥

पितुः। न। पुत्राः। क्रतुम्। जुषन्त। श्रोषन्। ये। अस्य। शासम्। तुरासः। वि। रायः। और्णोत्। दुरः। पुरुऽक्षुः। पिपेश। नाकम्। स्तृऽभिः। दमूनाः॥५॥

पदार्थः-(**पितुः**) जनकस्य (**न**) इव (**पुत्राः**) औरसाः। **पुत्रः पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा।** (निरु०१.११) (**क्रतुम्**) कर्म प्रज्ञां वा (**जुषन्त**) सेवन्ताम् (**श्रोषन्**) शृण्वन्तु (**ये**)

मनुष्याः **(अस्य)** जगदीश्वरस्याप्तस्य वा **(शासम्)** शासनम् **(तुरासः)** शीघ्रकारिणः **(वि)** विशेषार्थे **(रायः)** धनानि **(और्णोत्)** स्वीकरोति **(दुरः)** हिंसकान् **(पुरुक्षुः)** पुरूणि क्षूण्यन्नानि यस्य सः **(पिपेश)** पिंशत्यवयवान् प्राप्नोति **(नाकम्)** बहुसुखम् **(स्तृभिः)** प्राप्तव्यैर्गुणैः **(दमूनाः)** उपशमयुक्तः। **दमूना दममना वा दानमना वा दान्तमना वा।** (निरु०४.४)॥५॥

अन्वयः–ये तुरासो मनुष्याः पितुः पुत्रानेवास्य शासं श्रोषन् शृण्वन्ति ते सुखिनो भवन्तु। यो दमूनाः पुरुक्षुः स्तृभी रायो व्यौर्णोन्नाकं च दुरः पिपेश स सर्वैर्मनुष्यैः सेवनीयः॥५॥

भावार्थः–अत्र श्लेषोपमालङ्कारौ। मनुष्यैर्नहीश्वराप्ताज्ञापालनेन विना कस्यचित् किंचिदपि सुखं प्राप्तुं शक्नोति नहि जितेन्द्रियत्वादिभिर्विना कश्चित्सुखं प्राप्तुमर्हति। तस्मादेतत्सर्वं सर्वदा सेवनीयम्॥५॥

अत्रेश्वरग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्यष्टषष्टितमं ६८ सूक्तं द्वादशो १२ वर्गश्च समाप्तः॥

पदार्थः–**(ये)** जो **(तुरासः)** अच्छे कर्मों को शीघ्र करनेवाले मनुष्य **(पितुः)** पिता के **(पुत्राः)** पुत्रों के **(न)** समान **(अस्य)** जगदीश्वर वा सत्पुरुष की **(शासम्)** शिक्षा को **(श्रोषन्)** सुनते हैं, वे सुखी होते हैं। जो **(दमूनाः)** शान्तिवाला **(पुरुक्षुः)** बहुत अन्नादि पदार्थों से युक्त **(स्तृभिः)** प्राप्त करने योग्य गुणों से **(रायः)** धनों के **(व्यौर्णोत्)** स्वीकारकर्त्ता तथा **(नाकम्)** सुख को स्वीकार कर और **(दुरः)** हिंसा करनेवाले शत्रुओं के **(पिपेश)** अवयवों को पृथक्-पृथक् करता है, उसी की सेवा सब मनुष्य करें॥५॥

भावार्थः–इस मन्त्र में श्लेष और उपमालङ्कार हैं। मनुष्यों को चाहिये कि ईश्वर की आज्ञा पालने विना किसी मनुष्य का कुछ भी सुख सम्भव नहीं होता तथा जितेन्द्रियता आदि गुणों के विना किसी मनुष्य को सुख प्राप्त नहीं हो सकता। इससे ईश्वर की आज्ञा और जितेन्द्रियता आदि का सेवन अवश्य करें॥५॥

इस सूक्त में ईश्वर और अग्नि के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह अड़सठवां ६८ सूक्त और बारहवां १२ वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य नवषष्टितमस्य सूक्तस्य शक्तिपुत्रः पराशर ऋषिः। अग्निर्देवता। १ पङ्क्तिः। २,३ निचृत्पङ्क्तिः। ४ भुरिक्पङ्क्ति। ५ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्गुणा उपदिश्यन्ते॥

अब उनहत्तरवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में विद्वानों के गुणों का उपदेश किया है॥

शु॒क्रः शु॑शु॒क्वाँ उ॒षो न जा॒रः प॒प्रा स॑मी॒ची दि॒वो न ज्योति॑षः।
परि॒ प्रजा॑त॒ः क्रत्वा॑ बभूथ॒ भुवो॑ दे॒वाना॑ पि॒ता पु॒त्रः सन्॥ १॥

शु॒क्रः। शु॒शु॒क्वान्। उ॒षः। न। जा॒रः। प॒प्रा। स॒मी॒ची इति॑ स॒म्ऽई॒ची। दि॒वः। न। ज्योति॑षः। परि॑। प्रऽजा॑तः। क्रत्वा॑। ब॒भू॒थ॒। भुव॑ः। दे॒वाना॑म्। पि॒ता। पु॒त्रः। सन्॥ १॥

पदार्थः-(**शुक्रः**) वीर्यवान् शुद्धः (**शुशुक्वान्**) शोचकः (**उषः**) उषाः। अत्र **सुपां सुलुगि**ति ङमो लुक्। (**न**) इव (**जारः**) वयोहन्ता सूर्यः (**पप्रा**) स्वविद्या पूर्णः। अत्र **आदृगमहनजन०** इति किः। **सुपां सुलुगि**ति सोर्डादेशश्च। (**समीची**) सम्यगञ्चति प्राप्नोति सा भूमिः (**दिवः**) प्रकाशात् (**न**) इव (**ज्योतिः**) (**परि**) सर्वतः (**प्रजातः**) प्रसिद्ध उत्पन्नः (**क्रत्वा**) प्रज्ञया कर्मणा वा (**बभूथ**) अत्र **बभूथाततंथजगृम्भ०।** (अष्टा०७.२.६४) इति निपातनादिडभावः। (**भुवः**) पृथिव्याः (**देवानाम्**) विदुषाम् (**पिता**) अध्यापकः (**पुत्रः**) अध्येता (**सन्**) अस्ति॥ १॥

अन्वयः-यो मनुष्य उषो जारो नेव शुक्रः शुशुक्वान् पप्रा भुवो दिवः समीची ज्योतिर्न परि प्रज्ञातः क्रत्वा सह वर्त्तमानो देवानां पुत्रः सन् पिता बभूथ भवति, स एव सर्वैस्सेव्यः॥ १॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। नहि कश्चिदपि विद्यार्थित्वेन विना विद्वान् जन्यते हि कस्यचिद् विद्युदादिविद्यासंप्रयोगाभ्यां विना महान् सुखलाभो जायत इति ॥ १॥

पदार्थः-जो मनुष्य (**उषः**) प्रातःकाल की वेला के (**जारः**) आयु के हन्ता सूर्य के (**न**) समान (**शुक्रः**) वीर्यवान् शुद्ध (**शुशुक्वान्**) शुद्ध कराने (**पप्रा**) अपनी विद्या से पूर्ण (**युवः**) भूमि के मध्य (**दिवः**) प्रकाश से (**समीची**) पृथिवी को प्राप्त हुए (**ज्योतिः**) दीप्ति के (**न**) समान (**परि**) सब प्रकार (**प्रजातः**) प्रसिद्ध उत्पन्न (**क्रत्वा**) उत्तम बुद्धि वा कर्म्म के साथ वर्त्तमान (**देवानाम्**) विद्वानों के (**पुत्रः**) पुत्र के तुल्य पढ़नेवाला सब विद्याओं को पढ़ के (**पिता**) पढ़ानेवाला (**बभूथ**) होता है, उसका सेवन सब मनुष्य करें॥ १॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। विद्यार्थी न होके कोई भी मनुष्य विद्वान् नहीं हो सकता और किसी मनुष्य को बिजुली आदि विद्या तथा उसके संप्रयोग के विना बड़ा भारी सुख भी नहीं हो सकता॥ १॥

पुनर्विद्वान् कीदृशो भवेदित्युपदिश्यते॥

फिर यह विद्वान् कैसा हो, यह विषय अगले मन्त्र में कहा है॥

वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनाम्।
जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे॥ २॥

वेधाः। अदृप्तः। अग्निः। विऽजानन्। ऊधः। न। गोनाम्। स्वाद्म। पितूनाम्। जने। न। शेवः। आऽहूर्यः। सन्। मध्ये। निऽसत्तः। रण्वः। दुरोणे॥ २॥

पदार्थः–(**वेधा**) ज्ञानवान्। **वेधा इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**अदृप्तः**) मोहरहितः (**अग्निः**) अग्निरिव ज्ञानप्रकाशकः (**विजानन्**) सर्वविद्या अनुभवन् (**ऊधः**) दुग्धाधिकरणम् (**न**) इव (**गोनाम्**) धेनूनाम्। अत्र **गोः पादान्ते** इति **वाच्छन्दसि सर्वे विधयो भवन्ती**त्यपादान्तेऽपि नुट्। (**स्वाद्म**) स्वादिष्ठानाम्। अत्र **सुपां सुलुगि**त्यामो लोपः। (**पितूनाम्**) अन्नानाम्। **पितुरित्यन्ननामसु पठितम्।** (निघं०२.७) (**जने**) गुणैरुत्कृष्टे सेवनीये (**न**) इव (**शेवः**) सुखकारी (**आहूर्यः**) आह्वातव्यः। अत्र ह्वेञ् धातोर्बाहुलकाद्यक् रुडागमश्च। (**सन्**) (**मध्ये**) सभायाः (**निषत्तः**) निषण्णः (**रण्वः**) रमयिता (**दुरोणे**) गृहे। **दुरोण इति गृहनामसु पठितम्।** (निघं०३.४)॥ २॥

अन्वयः–सर्वैर्मनुष्यैर्यो गोनामूधर्न जने शेवो न वेधा अदृप्तः स्वाद्म पितूनां दुरोणे रण्व आहूर्यः सभाया मध्ये निषत्तो विजानन् सन्नग्निरिव वर्त्तते स सदैव सेवनीयः॥ २॥

भावार्थः–अत्रोपमालङ्कारः। हे मनुष्याः! यथा गवां दुग्धस्थानं यथा च विद्वज्जनः सर्वस्य हितकारी भवति, तथैव शुभैर्गुणैर्व्याप्ताः सभादिषु स्थिताः सभाध्यक्षादयो यूयं सर्वान् सुखयत॥ २॥

पदार्थः–सब मनुष्यों को चाहिये कि जो (**गोनाम्**) गौओं के (**ऊधः**) दूध के स्थान के (**न**) समान (**जने**) गुणों से उत्तम सेवने योग्य मनुष्य में (**शेवः**) सुख करनेवाले के (**न**) समान (**वेधाः**) पूर्ण ज्ञानयुक्त (**अदृप्तः**) मोहरहित (**स्वाद्म**) स्वादिष्ठ (**पितूनाम्**) अन्नों का भोक्ता (**दुरोणे**) घर में (**रण्वः**) रमण करनेवाला (**आहूर्य्यः**) आह्वान करने योग्य सभा के मध्य में (**निषत्तः**) स्थित (**विजानन्**) सब विद्या का अनुभव करता हुआ (**अग्निः**) अग्नि के तुल्य ज्ञानप्रकाश से युक्त सभाध्यक्ष है, इसका सदा सेवन करो॥ २॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम लोगों को चाहिये कि जैसे गौओं का ऐन दूध आदि से सबको सुख देता है, वैसे विद्वान् मनुष्य सब का उपकारी होता है, वैसे ही सब में अभिव्याप्त जीव के मध्य में अन्तर्य्यामी रूप से व्याप्त ईश्वर पक्षपात को छोड़ के न्याय करता है, वैसे सभा आदि में स्थित सभापति तुम सबको सुख करानेवाले होओ॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर विद्वान् कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत्।

विशो॒ यद॑ह्व॒ नृभि॒: सनी॑ळा अ॒ग्निर्दे॑व॒त्वा वि॒श्वान्यश्या:॥ ३॥

पु॒त्र:। न। जा॒त:। र॒ण्व:। दु॒रो॒णे। वा॒जी। न। प्री॒त:। विश॑:। वि। ता॒री॒त्। विश॑:। यत्। अह्व॑। नृ॒ऽभि॑:। सऽनी॑ळा:। अ॒ग्नि:। दे॒व॒ऽत्वा। विश्वा॑नि। अ॒श्या॒:॥ ३॥

पदार्थ:-(**पुत्र:**) पित्रादीनां पालयिता (**न**) इव (**जात:**) उत्पन्न: (**रण्व:**) रमणीय:। अत्र रम धातोर्बाहुलकादौणादिको व: प्रत्यय:। (**दुरोणे**) गृहे (**वाजी**) अश्व: (**न**) इव (**प्रीत:**) प्रसन्न: (**विश:**) प्रजा: (**वि**) विशेषार्थे (**तारीत्**) दु:खात्सन्तारयेत् (**विश:**) प्रजा: (**यत्**) य: (**अह्व**) अह्वन्ति व्याप्नुवन्ति यस्मिन् व्यवहारे तस्मिन् (**नृभि:**) नेतृभिर्मनुष्यै: (**सनीडा:**) समानस्थाना: (**अग्नि:**) पावक इव पवित्र: सभाध्यक्ष: (**देवत्वा**) देवानां विदुषां दिव्यगुणानां वा भावरूपाणि (**विश्वानि**) सर्वाणि (**अश्या:**) प्राप्नुया:। अत्र व्यत्ययेन परस्मैपदम्॥ ३॥

अन्वय:-हे मनुष्य! यद्योऽग्निरिव दुरोणे जात: पुत्रो न रण्वो वाजी न प्रीतो विशो वितारीत्। योऽह्व नृभि: सनीडा विशो विश्वानि देवत्वा प्रापयति ते त्वमप्यश्या:॥ ३॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। नहि मनुष्याणां विज्ञानविद्वत्सङ्गाश्रयेण विना सर्वाणि सुखानि प्राप्तुं शक्यानि भवन्तीति वेदितव्यम्॥ ३॥

पदार्थ:-हे मनुष्य! (**यत्**) जो (**अग्नि:**) अग्नि के तुल्य सभाध्यक्ष (**दुरोणे**) गृह में (**जात:**) उत्पन्न हुआ (**पुत्र:**) पुत्र के (**न**) समान (**रण्व:**) रमणीय (**वाजी**) अश्व के (**न**) समान (**प्रीत:**) आनन्ददायक (**विश:**) प्रजा को (**वितारीत्**) दु:खों से छुड़ाता है (**अह्व**) व्याप्त होनेवाले व्यवहार में (**सनीडा:**) समानस्थान (**विश:**) प्रजाओं को (**विश्वानि**) सब (**देवत्वा**) विद्वानों के गुण, कर्मों को प्राप्त करता है, उसको तू (**अश्या:**) प्राप्त हो॥ ३॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को विज्ञान और विद्वानों के सङ्ग के विना सब सुख प्राप्त नहीं हो सकते, ऐसा जानना चाहिये॥ ३॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा है, यह विषय अगले मन्त्र में कहा है॥

नकि॑ष्ट एता व्र॒ता मि॑नन्ति॒ नृभ्यो॒ य दे॒भ्य: श्रुष्टिं च॒कर्थ॑।
तत्तु॒ ते॒ दंसो॒ यद॑हन्त्समा॒नैर्नृभि॒र्यद्यु॒क्तो वि॒वे॒ रपां॑सि॥ ४॥

नकि॑:। ते॒। ए॒ता। व्र॒ता:। मि॒न॒न्ति॒। नृऽभ्य॑:। यत्। ए॒भ्य:। श्रुष्टि॑म्। च॒कर्थ॑। तत्। तु। ते॒। दंस॑:। यत्। अह॑न्। स॒मा॒नै:। नृऽभि॑:। यत्। यु॒क्त:। वि॒वे॒:। रपां॑सि॥ ४॥

पदार्थ:-(**नकि:**) नहि (**ते**) तव (**एता:**) एतानि (**व्रता**) व्रतानि शीलानि (**मिनन्ति**) हिंसन्ति (**नृभ्य:**) मनुष्यादिभ्य: (**यत्**) यम् (**एभ्य:**) वर्त्तमानेभ्य: (**श्रुष्टिम्**) शीघ्रम् (**चकर्थ**) करोति (**तत्**)

वक्ष्यमाणम् **(तु)** पश्चादर्थे **(ते)** तव **(दंसः)** कर्म **(यत्)** यैः **(युक्तः)** सहितः **(विवेः)** प्राप्नोषि। अत्र **बहुलं छन्दसी**ति श्लुः। **(रपांसि)** व्यक्तोपदेशप्रकाशकानि शोभनानि वचनानि॥४॥

अन्वयः-हे विद्वन्! यानि ते तवैतानि व्रतानि सन्ति तानि केऽपि न मिनन्ति। तानि कानीत्याह। यत्त्वमेभ्यो नृभ्यो यं श्रुष्टिं चकर्थ रपांसि विवेः। यत्ते तवेदं समानैर्नृभिः सह दंसोऽस्ति, तत्तु कश्चिदपि नकिरहन् हन्ति॥४॥

भावार्थः-सर्वैर्मनुष्यैर्यथा परमेश्वर आप्तो विद्वान् वा पक्षपातं विहाय मनुष्यादिषु सत्यैरुपकारैः कर्मभिः सह वर्त्तते, तथैव सदा वर्त्तितव्यम्॥४॥

पदार्थः-हे विद्वन्! जो आपके **(एताः)** ये **(व्रता)** व्रत हैं वे कोई भी **(नकिः)** नहीं **(मिनन्ति)** हिंसा कर सकते हैं **(यत्)** जो आप **(एभ्यः)** इन **(नृभ्यः)** मनुष्यों के लिये **(यत्)** जिस **(श्रुष्टिम्)** शीघ्र सत्यविद्यासमूह को **(चकर्थ)** करते हो वा **(रंपांसि)** सत्कर्म और व्यक्त उपदेशयुक्त वचनों को **(विवेः)** प्राप्त करते हो तथा **(यत्)** जो **(ते)** आप का **(इदम्)** यह **(समानैः)** विद्यादि गुणों में तुल्य **(नृभिः)** मनुष्यों के साथ **(दंसः)** कर्म है **(तत्)** उसको **(तु)** कोई मनुष्य **(नकिः)** नहीं **(अहन्)** हनन कर सकता, जो **(युक्तः)** युक्त होकर आप करते हो, उसको हम लोग भी सत्य ही जानते हैं॥४॥

भावार्थः-सब मनुष्यों को चाहिये कि जैसे परमेश्वर वा पूर्णविद्यायुक्त विद्वान् पक्षपात छोड़कर मनुष्यादि प्राणियों में सत्य उपकार करनेवाले कर्मों के साथ वर्त्तमान है वैसे सदा वर्त्ते॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा है, यह विषय अगले मन्त्र में कहा है॥

उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै।
त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्वर्दृशीके॥५॥१३॥

उषः। न। जारः। विभाऽवा। उस्रः। संज्ञातऽरूपः। चिकेतत्। अस्मै। त्मना। वहन्तः। दुरः। वि। ऋण्वन्। नवन्त। विश्वे। स्वः। दृशीके॥५॥

पदार्थः-(**उषः**) प्रत्यूषकालस्य **(न)** इव **(जारः)** दुःखहन्ता सविता **(विभावा)** यः सर्वं विभातीति सः **(उस्रः)** रश्मिरिव **(संज्ञातरूपः)** सम्यग्ज्ञातं रूपं येन सः **(चिकेतत्)** जानीयात् **(अस्मै)** विदुषे **(त्मना)** आत्मना जीवेन **(वहन्तः)** उपदेशेन प्राप्नुवन्तः **(दुरः)** दुष्टान् **(वि)** विशेषे **(ऋण्वन्)** हिंसन् **(नवन्त)** प्रशंसत **(विश्वे)** सर्वे धार्मिका मनुष्याः **(स्वः)** सुखप्रापकम् **(दृशीके)** द्रष्टव्ये ज्ञानव्यवहारे॥५॥

अन्वयः-य उषो न जार उस्र इव संज्ञातरूपो विभावास्ति तं मनुष्यश्चिकेतज्जानीयादस्मै सर्वं समर्पयतु। हे मनुष्या! यथैवं कुर्वन्तो विश्वे विद्वांसस्त्मना स्वर्वन्तो दृशीके व्यवहारे दुरो व्यृण्वन् हिंसन्ति सन्नुवन्ति तथैव यूयं सदैतत्कुरुत तं सदा नवन्त॥५॥

भावार्थः-अत्र श्लेषोपमालुप्तोपमालङ्काराः। मनुष्यैर्यः सूर्यवत् सर्वविद्याप्रकाशकोऽग्निवत्सर्वदुःखदाहकः परमेश्वरो विद्वान् वास्ति तमात्मनाऽश्रित्य दुष्टव्यवहारांस्त्यक्त्वा सत्येषु व्यवहारेषु सुखं सदा प्राप्तव्यम्॥५॥

अत्र विद्वद्विद्युदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति नवषष्टितमं ६९ सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः-जो **(उषः)** प्रातःकाल के **(न)** समान **(जारः)** दुःख का नाश करनेवाला **(उस्रः)** किरणों के समान **(संज्ञातरूपः)** अच्छी प्रकार रूप जानने **(विभावा)** सब प्रकाश करने वाला है, उसको मनुष्य **(चिकेतत्)** जाने **(अस्मै)** उस ईश्वर वा विद्वान् के लिये सब कुछ उत्तम पदार्थ समर्पण करे। हे मनुष्यो! जैसे इस प्रकार करते हुए **(विश्वे)** सब विद्वान् लोग **(त्मना)** आत्मा से **(स्वः)** सुख प्राप्त करनेवाले विद्यासमूह को **(वहन्तः)** प्राप्त होते हुए **(दृशीके)** देखने योग्य व्यवहार में **(दुरः)** शत्रुओं को **(व्यृण्वन्)** मारते तथा सज्जनों की प्रशंसा करते हैं, वैसे तुम भी शत्रुओं को मारो तथा **(नवन्त)** सज्जनों की स्तुति करो॥५॥

भावार्थः-इस मन्त्र में श्लेष, उपमा और लुप्तोपमालङ्कार हैं। मनुष्यो को चाहिये कि जो सूर्य्य के समान विद्या का प्रकाशक, अग्नि के समान सब दुःखों को भस्म करनेवाला परमेश्वर वा विद्वान् है, उसको अपने आत्मा से आश्रय कर दुष्ट व्यवहारों को त्याग और सत्य व्यवहारों में स्थित होकर सदा सुख को प्राप्त हों॥५॥

इस सूक्त में विद्वान् बिजुली और ईश्वर के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्वसूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह उनहत्तरवां ६९ सूक्त तथा तेरहवां १३ वर्ग समाप्त हुआ॥

अथ षड्चस्य सप्ततितमस्य सूक्तस्य पराशर ऋषिः। अग्निर्देवता। १,४ विराट्पङ्क्तिः। २ पङ्क्तिः। ३,५ निचृत् पङ्क्तिः। ६ याजुषी पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यगुणा उपदिश्यन्ते॥

अब ७० सत्तरवें सूक्त का आरम्भ किया जाता है, इसके पहिले मन्त्र में मनुष्यों के गुणों का उपदेश किया है॥

वनेम पूर्वीर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म॥ १॥

वनेम। पूर्वीः। अर्यः। मनीषा। अग्निः। सुऽशोकः। विश्वानि। अश्याः। आ। दैव्यानि। व्रता। चिकित्वान्। आ। मानुषस्य। जनस्य। जन्म॥ १॥

पदार्थः-(**वनेम**) संविभागेनानुष्ठेम (**पूर्वीः**) पूर्वभूताः प्रजाः (**अर्य्यः**) स्वामीश्वरो जीवो वा। **अर्य्य इतीश्वरनामसु पठितम्।** (निघं०२.२२) (**मनीषा**) मनीषया विज्ञानेन (**अग्निः**) ज्ञानादिगुणवान् (**सुशोकः**) शोभनाः शोका दीप्तयो यस्य सः (**विश्वानि**) सर्वाणि भूतानि कर्माणि वा (**अश्याः**) व्याप्नुहि (**आ**) समन्तात् (**दैव्यानि**) दिव्यैर्गुणैः कर्मभिर्वा निर्वृत्तानि (**व्रता**) विद्याधर्मानुष्ठानशीलानि (**चिकित्वान्**) ज्ञानवान् (**आ**) आभिमुख्ये (**मानुषस्य**) मनुष्यजातौ भवस्य (**जनस्य**) श्रेष्ठस्य देवस्य मनुष्यस्य (**जन्म**) शरीरधारणेन प्रादुर्भवम्॥ १॥

अन्वयः-वयं यः सुशोकश्चिकित्वानग्निरर्य्य ईश्वरो जीवो वा मनीषया पूर्वीः प्रजा विश्वानि दैव्यानि व्रता मानुषस्य जन्म चाश्याः समन्ताद् व्याप्नोति तमा वनेम॥ १॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्येन जगदीश्वरेण मनुष्येण वा कारणकार्यजीवाख्याः शुद्धाः गुणाः कर्म्माणि व्याप्तानि स चोपास्यः सत्कर्त्तव्यो वास्ति नह्येतेन विना मनुष्यजन्मसाफल्यं जायते॥ १॥

पदार्थः-हम लोग जो (**सुशोकः**) उत्तम दीप्तियुक्त (**चिकित्वान्**) ज्ञानवान् (**अग्निः**) ज्ञान आदि गुणवाला (**अर्य्यः**) ईश्वर वा मनुष्य (**मनीषा**) बुद्धि तथा विज्ञान से (**पूर्वीः**) पूर्व हुई प्रजा और (**विश्वानि**) सब (**दैव्यानि**) दिव्य गुण वा कर्मों से सिद्ध हुए (**व्रता**) विद्याधर्मानुष्ठान और (**मानुषस्य**) मनुष्य जाति में हुए (**जनस्य**) श्रेष्ठ विद्वान् मनुष्य के (**जन्म**) शरीरधारण से उत्पत्ति को (**अश्याः**) अच्छी प्रकार प्राप्त कराता है, उसका (**आ वनेम**) अच्छे प्रकार विभाग से सेवन करें॥ १॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को जिस जगदीश्वर वा मनुष्य के कार्य्य, कारण और जीव प्रजा शुद्ध गुण और कर्मों को व्याप्त किया करे, उसी की उपासना वा सत्कार करना चाहिये, क्योंकि इसके विना मनुष्यजन्म ही व्यर्थ जाता है॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

गर्भो॑ यो अ॒पां गर्भो॒ वना॑नां॒ गर्भ॑श्च स्था॒तां गर्भ॑श्चरथा॑नाम्।
अद्रौ॑ चिदस्मा अ॒न्तर्दु॑रो॒णे वि॒शां न विश्वो॑ अ॒मृत॑: स्वा॒धी:॥ २॥

गर्भ॑:। य:। अ॒पाम्। गर्भ॑:। वना॑नाम्। गर्भ॑:। च॒। स्था॒ताम्। गर्भ॑:। च॒रथा॑नाम्। अद्रौ॑। चि॒त्। अ॒स्मै॒। अ॒न्त:। दु॒रो॒णे। वि॒शाम्। न। विश्व॑:। अ॒मृत॑:। सु॒ऽआ॒धी:॥ २॥

पदार्थ:-(**गर्भ:**) स्तोतव्योऽन्त:स्थो वा (**य:**) परमात्मा जीवात्मा वा (**अपाम्**) प्राणानां जलानां (**गर्भ:**) गर्भ इव वर्त्तमान: (**वनानाम्**) संभजनीयानां पदार्थानां रश्मीनां वा (**गर्भ:**) गूढ इव स्थित: (**च**) समुच्चये (**स्थाताम्**) स्थावराणाम्। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ती**ति तुक्। (**गर्भ:**) गर्भ इवावृत: (**चरथाम्**) जङ्गमानाम्। अत्र **वाच्छन्दसी**ति नुडागमाभाव:। (**अद्रौ**) शैलादो घने पदार्थे (**चित्**) अपि (**अस्मै**) जगदुपकाराय कर्मभोगाय वा (**अन्त:**) मध्ये (**दुरोणे**) गृहे (**विशाम्**) प्रजानाम् (**न**) इव (**विश्व:**) अखिलश्चेतनस्वरूप: (**अमृत:**) अनुत्पन्नत्वान्नाशरहित: (**स्वाधी:**) य: सुष्ठु समन्ताद् ध्यायति सर्वान् पदार्थान् स:॥ २॥

अन्वय:-यो जगदीश्वरो जीवो वा यथाऽपामन्तर्गर्भो वनानामन्तर्गर्भ: स्थातामन्तर्गर्भश्चरथामन्तर्गर्भोऽद्रौ चिदन्तर्गर्भो दुरोणेऽन्तर्गर्भो विश्वोऽमृत: स्वाधीर्विशा प्रजानामन्तराकाशोऽग्निर्वायुर्नेव सर्वेषु च बाह्यदेशेष्वपि विश्वानि दैव्यानि व्रतान्यश्या व्याप्तोऽस्त्यस्मै सर्वे पदार्था: सन्ति तं वयं वनेम॥ २॥

भावार्थ:-अत्र श्लेषालङ्कार:। (**अश्या:**) (**वनेम**) (**विश्वानि**) (**दैव्यानि**) (**व्रता**) इति पञ्चपदानां पूर्वस्मान्मन्त्रादनुवृतिश्च। मनुष्यैर्नहि चिन्मयेन परमेश्वरेण विना किंचिदपि वस्त्वव्याप्तमस्ति। नहि चिन्मयो जीव: स्वकर्मफलभोगविरह एकक्षणमपि वर्त्तते तस्मात्तं सर्वाभिव्याप्तमन्तर्यामिणं विज्ञाय सर्वदा पापकर्माणि त्यक्त्वा धर्म्यकार्य्येषु प्रवर्त्तितव्यम्। यथा पृथिव्यादिककार्य्यरूपा: प्रजा अनेकेषां तत्त्वानां संयोगेनोत्पन्ना वियोगेन विनष्टाश्च भवन्ति तथैष ईश जीवकारणाख्या अनादित्वात् संयोगविभागेभ्य: पृथक्त्वादनादयो सन्तीति वेदितव्यम्॥ २॥

पदार्थ:-हम लोग जो जगदीश्वर वा जीव (**अपाम्**) प्राण वा जलों के (**अन्त:**) बीच (**गर्भ:**) स्तुति योग्य वा भीतर रहनेवाला (**वनानाम्**) सम्यक् सेवा करने योग्य पदार्थ वा किरणों में (**गर्भ:**) गर्भ के समान आच्छादित (**अद्रौ**) पर्वत आदि बड़े-बड़े पदार्थों में (**चित्**) भी गर्भ के समान (**दुरोणे**) घर में गर्भ के समान (**विश्व:**) सब चेतन तत्त्वस्वरूप (**अमृत:**) नाशरहित (**स्वाधी:**) अच्छे प्रकार पदार्थों का चिन्तन करनेवाला (**विशाम्**) प्रजाओं के बीच आकाश वायु के (**न**) समान बाह्य देशों में भी सब दिव्य गुण कर्मयुक्त व्रतों को (**अश्या:**) प्राप्त होवे (**अस्मै**) उसके लिये सब पदार्थ हैं, उसका (**आ वनेम**) सेवन करें॥ २॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। पूर्व मन्त्र से **(अश्याः) (वनेम) (विश्वानि) (दैव्यानि) (व्रता)** इन पांच पदों की अनुवृत्ति आती है। मनुष्यों को ज्ञानस्वरूप परमेश्वर के विना कोई भी वस्तु अव्याप्त नहीं है और चेतनस्वरूप जीव अपने कर्म के फल भोग से एक क्षण भी अलग नहीं रहता। इससे उस सबमें अभिव्याप्त अन्तर्य्यामी ईश्वर को जानकर सर्वदा पापों को छोड़ कर धर्मयुक्त कार्यों में प्रवृत्त होना चाहिये। जैसे पृथिवी आदि कार्यरूप प्रजा अनेक तत्त्वों के संयोग से उत्पन्न और वियोग से नष्ट होती है, वैसे यह ईश्वर जीव कारणरूप आदि वा संयोग-वियोग से अलग होने से अनादि है, ऐसा जानना चाहिये॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह मनुष्य कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः।
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्ताँश्च विद्वान्॥ ३॥

सः। हि। क्षपाऽवान्। अग्निः। रयीणाम्। दाशत्। यः। अस्मै। अरम्। सुऽउक्तैः। एता। चिकित्वः। भूम। नि। पाहि। देवानाम्। जन्म। मर्तान्। च। विद्वान्॥ ३॥

पदार्थः-**(सः)** परमेश्वरो जीवो वा **(हि)** खलु **(क्षपावान्)** क्षपाः प्रशस्ता रात्रयो विद्यन्ते यस्मिन् यस्य वा सः **(अग्निः)** यथा सर्वसुखदात्री विद्युत् **(रयीणाम्)** विद्यारत्नराज्यादिपदार्थानाम् **(दशत्)** दाश्यात् **(यः)** उक्तार्थः **(अस्मै)** प्रापणाय **(अरम्)** अलम् **(सूक्तैः)** शोभनान्युक्तानि वचनानि येषूपदेशनेषु तेषु **(एता)** एतानि **(चिकित्वः)** ज्ञानवन् **(भूम)** भूमानि बहूनि **(नि)** नितराम् **(पाहि)** रक्ष **(देवानाम्)** दिव्यानां गुणानां विदुषां वा **(जन्म)** प्रादुर्भावम् **(मर्त्तान्)** मनुष्यान् **(च)** समुच्चये **(विद्वान्)** यो वेत्ति सः॥ ३॥

अन्वयः-हे चिकित्वो विद्वान्! यस्त्वं क्षपावानग्निरिवास्मै रयीणामरं प्रापणायैतान् परं सूक्तैर्भूम देवानां जन्म मर्त्ताँश्चादन्यश्च दाशत् स त्वं हि खल्वेतानि निपाहि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यः परमेश्वरो विद्वान् वा वेदान्तर्यामित्वद्वारोपदेशैर्वा सर्वा विद्या सर्वमनुष्येभ्यः प्रयच्छति, स एवोपास्यः सङ्गमनीयश्चेति॥ ३॥

पदार्थः-हे **(चिकित्वः)** ज्ञानवान् जगदीश्वर वा **(विद्वान्)** जाननेवाले! **(यः)** जो **(क्षपावान्)** जिसमें उत्तम बहुत रात्रि हैं **(अग्निः)** सब सुखों की देनेवाली बिजुली के समान **(अस्मै)** इन **(रयीणाम्)** विद्यारत्न राज्य आदि पदार्थों की **(अरम्)** पूर्णप्राप्ति के लिये **(एता)** इन **(अरम्)** पूर्ण **(सूक्तैः)** उत्तम वचनों से **(भूम)** बहुत **(देवानाम्)** दिव्यगुण वा विद्वानों के **(जन्म)** जन्म **(मर्त्तान्)** मनुष्य **(च)** मनुष्य से भिन्नों को **(दाशत्)** देते हो **(सः)** सो आप **(हि)** निश्चय करके इनकी **(नि पाहि)** निरन्तर रक्षा कीजिये॥ ३॥

भावार्थः-इस मन्त्र में श्लेष और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को जो परमेश्वर वा विद्वान् वेद वा अन्तर्यामि द्वारा तथा उपदेशों से सब मनुष्यों के लिये सब विद्याओं को देता है, उसकी उपासना तथा सत्सङ्ग करना चाहिये॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह मनुष्य कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतम्।
अराधि होता स्वर्निषत्तः कृण्वन् विश्वान्यपांसि सत्या॥४॥

वर्धान्। यम्। पूर्वीः। क्षपः। विऽरूपाः। स्थातुः। च। रथम्। ऋतऽप्रवीतम्। अराधि। होता। स्वः। निऽसत्तः। कृण्वन्। विश्वानि। अपांसि। सत्या॥४॥

पदार्थः-(**वर्धन्**) वर्धयेयुः। अत्र व्यत्ययेन परस्मैपदम्। लेट् प्रयोगोऽयम्। (**यम्**) परमेश्वरं जीवं वा (**पूर्वीः**) सनातन्यः (**क्षपः**) क्षान्ता रात्रीः (**विश्वरूपाः**) विविधानि रूपाणि यासान्ताः (**स्थातुः**) तिष्ठतो जगतः (**च**) समुच्चये (**रथम्**) रमणीयस्वरूपं संसारम् (**ऋतप्रवीतम्**) ऋतात्सत्यात्कारणात्प्रकृष्टतया जनितमुदकेन चालितं वा (**अराधि**) संसाध्यते (**होता**) ग्रहीता दाता वा (**स्वः**) सुखस्वरूपः सुखकारको वा (**निषत्तः**) नितरामवस्थितः (**कृण्वन्**) कुर्वन् (**विश्वानि**) अखिलानि (**अपांसि**) कर्माणि (**सत्या**) सत्याधर्मोज्ज्वलितानि॥४॥

अन्वयः-मनुष्यैर्योऽराधि यं परमेश्वरं जीवं वा पूर्वीः क्षपो विरूपाः प्रजावर्धान् यः स्थातुर्ऋतप्रवीतं रथः निर्मितवान् यः स्वर्निषतो होता विश्वानि सत्यान्यपांसि कृण्वन् वर्त्तते स सदा ज्ञातव्यः सङ्गमनीयश्च॥४॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्यस्य परमेश्वरस्य ज्ञापिका इमाः सर्वाः प्रजा वर्त्तन्ते, येन जीवेन ज्ञातव्याश्च, नैव यस्योत्पादनेन विना कस्याप्युत्पत्तिः सम्भवति, यस्य पुरुषार्थेन विना किञ्चित् सुखं प्राप्तुं न शक्नोति। यः सत्यमानी सत्यकारी सत्यवादी स सर्वैः सेवनीयः॥४॥

पदार्थः-मनुष्यों को चाहिये कि जो (**अराधि**) सिद्ध हुआ वा (**यम्**) जिस परमेश्वर तथा जीव को (**पूर्वीः**) सनातन (**क्षपः**) शान्तियुक्त रात्रि (**विरूपाः**) नाना प्रकार के रूपों से युक्त प्रजा (**वर्धान्**) बढ़ाती हैं, जिसने (**स्थातुः**) स्थित जगत् के (**ऋतप्रवीतम्**) सत्य कारण से उत्पन्न वा जल से चलाये हुए (**रथम्**) रमण करने योग्य संसार वा यान को बनाया, जो (**स्वः**) सुखस्वरूप वा सुख करनेहारा (**निषत्तः**) निरन्तर स्थित (**होता**) ग्रहण करने वा देनेवाला (**विश्वानि**) सब (**सत्या**) सत्य धर्म से शुद्ध हुए (**अपांसि**) कर्मों को (**कृण्वन्**) करता हुआ वर्त्तता है, उसको जाने वा सत्सङ्ग करे॥४॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को उचित है कि जिस परमेश्वर का ज्ञान करानेवाली यह सब प्रजा है वा जिसको जानना चाहिये, जिसके उत्पन्न करने के विना किसी की उत्पत्ति का सम्भव नहीं होता, जिसके पुरुषार्थ के विना कुछ भी सुख प्राप्त नहीं हो सकता और जो सत्यमानी, सत्यकारी, सत्यवादी हो, उसी का सदा सेवन करें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर ईश्वर के गुणों का उपदेश अगले मन्त्र में किया है॥

गोषु॒ प्रश॑स्तिं॒ वने॑षु धिषे॒ भर॑न्त॒ विश्वे॑ बलिं॒ स्व॑र्णरः।
वि त्वा॒ नर॑: पुरु॒त्रा स॑पर्यन् पि॒तुर्न जिव्रे॒र्वि वेदो॑ भरन्त॥५॥

गोषु॑। प्रऽश॑स्तिम्। वने॑षु। धि॒षे॒। भर॑न्त। विश्वे॑। ब॒लिम्। स्व॑रिति॑ सुऽअ॑:। नः॒। वि। त्वा॒। नर॑:। पु॒रु॒ऽत्रा। स॒प॒र्य॒न्। पि॒तुः। न। जिव्रे॑:। वि। वेद॑:। भ॒र॒न्त॒॥५॥

पदार्थः-(**गोषु**) पृथिव्यादिषु (**प्रशस्तिम्**) प्रशस्तव्यवहारम् (**वनेषु**) सम्यग्विभाजकेषु किरणेषु (**धिषे**) दधासि (**भरन्त**) यो भरति सर्वं विश्वं सर्वान् गुणांस्तत्संबुद्धौ (**विश्वे**) सर्वे (**बलिम्**) संवरणम् (**स्वः**) आदित्यम् (**नः**) अस्मान् (**वि**) विशेषे (**त्वा**) त्वाम् (**नरः**) नयनकर्त्तारो मनुष्याः (**पुरुत्रा**) पुरूणि देयानि (**सपर्यन्**) परिचरन्ति (**पितुः**) (**न**) इव (**जिव्रेः**) जीर्णात् वृद्धावस्थां प्राप्तात् जनकात् (**वि**) विशेषे (**वेदः**) विन्दति सुखानि येन धनेन तत् (**भरन्त**) धरन्तु॥५॥

अन्वयः-हे भरन्त! पुरुत्रा गोषु बलिं स्वः वनेषु प्रशस्तिं नो विधिषेऽतो विश्वे नरः पुत्राः जिव्रेः पितुर्वेदो भरन्त न त्वा सपर्यन्॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्याः! सर्वे यूयं येन जगदीश्वरेण सनातनात्कारणात्सर्वाणि कार्याणि वस्तून्युत्पाद्य स्पर्शादयो गुणाः प्रकाशिताः। यस्य सृष्टावुत्पन्नानां जनकस्य पुत्रा इव सर्वे जीवा दायभागिनः सन्ति। येन सर्वेभ्यः सर्वाणि सुखानि दीयन्ते तस्यात्ममनोवाक्छरीरधनैर्नित्यं परिचर्य्यां यूयं कुरुत॥५॥

पदार्थः-हे (**भरन्त**) सब विश्व वा सब गुणों को धारण करनेवाले जगदीश्वर! जिस कारण (**पुरुत्रा**) बहुत दान करने योग्य आप (**गोषु**) पृथिवी आदि पदार्थों में (**बलिम्**) संवरण (**स्वः**) आदित्य (**वनेषु**) किरणों में (**प्रशस्तिम्**) उत्तम व्यवहार और (**नः**) हम लोगों को (**वि धिषे**) विशेष धारण करते हो (**विश्वे**) सब (**नरः**) इससे विद्वान् लोग जैसे (**पुत्राः**) पुत्र (**जिव्रेः**) वृद्धावस्था की प्राप्त हुए (**पितुः**) पिता के सकाश से (**वेदः**) विद्याधन को (**भरन्त**) धारण करें (**न**) वैसे (**त्वा**) आपका (**सपर्यन्**) सेवन करते हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम सब लोग जिस जगदीश्वर ने सनातन कारण से सब कार्य अर्थात् स्थूलरूप वस्तुओं को उत्पन्न करके स्पर्श आदि गुणों को प्रकाशित किया है,

जिसकी सृष्टि में उत्पन्न हुए सब पदार्थों के पिता-पुत्र के समान सब जीव दायभागी हैं, जो सब प्राणियों के लिये सब सुखों को देता है, उसी की आत्मा, मन, वाणी, शरीर और धनों से सेवा करो॥५॥

पुनः स सभाध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु॥६॥१४॥

साधुः। न। गृध्नुः। अस्ताऽइव। शूरः। याताऽइव। भीमः। त्वेषः। समत्ऽसु॥६॥

पदार्थः-(**साधुः**) यः परोपकारी परकार्याणि साध्नोति सः (**न**) इव (**गृध्नुः**) परोत्कर्षाभिकाङ्क्षकः (**अस्ताइव**) तथा शस्त्राणां प्रक्षेप्ता (**शूरः**) शूरवीरः (**यातेव**) यथा दण्डप्रापकः (**भीमः**) बिभेति यस्मात्स भयङ्करः (**त्वेषः**) त्वेषति प्रदीप्तो भवति सः (**समत्सु**) संग्रामेषु॥६॥

अन्वयः-हे मनुष्या! यूयं यो गृध्नुः साधुर्नास्ताइव शूरो भीमो यातेव समत्सु त्वेषः परमेश्वरः सभाध्यक्षोऽस्ति तं नित्यं सेवध्वम्॥६॥

भावार्थः-अत्र श्लेषोपमालङ्काराः। हे मनुष्याः! परमेश्वरं धार्मिकं विद्वांसं सभाद्यध्यक्षं च विहाय कश्चिदन्यः स्वेषां राजा शत्रुविजेता दण्डप्रदाता सुखाभिवर्धको नैवाऽस्तीति निश्चित्य सर्वाणि परोपकृतानि सुखान्यभिवर्धयत॥६॥

अत्रेश्वरमनुष्यसभाद्यध्यक्षाणां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति सप्ततितमं ७० सूक्तं चतुर्दशो १४ वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! तुम जो (**गृध्नुः**) दूसरे के उत्कर्ष की इच्छा करनेवाले (**साधुः**) परोपकारी मनुष्य के (**न**) समान (**अस्ताइव**) शत्रुओं के ऊपर शस्त्र पहुंचानेवाले (**शूरः**) शूरवीर के समान (**भीमः**) भयङ्कर (**यातेव**) तथा दण्ड प्राप्त करनेवाले के समान (**समत्सु**) संग्रामों में (**त्वेषः**) प्रकाशमान परमेश्वर वा सभाध्यक्ष है, उसका नित्य सेवन करो॥६॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। हे मनुष्यो! तुम लोग परमेश्वर वा धर्मात्मा विद्वान् को छोड़ कर शत्रुओं को जीतने और दण्ड देने तथा सुखों का बढ़ानेवाला अन्य कोई अपना राजा नहीं है, ऐसा निश्चय करके सब लोग परोपकारी होके सुखों को बढ़ाओ॥६॥

इस सूक्त में ईश्वर, मनुष्य और सभा आदि अध्यक्ष के गुणों का वर्णन होने से इस सूक्त की पूर्वसूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्तरवाँ ७० सूक्त और चौदहवां १४ वर्ग पूरा हुआ॥

अथ दशर्चस्यैकसप्ततितमस्य सूक्तस्य पराशर ऋषिः। अग्निर्देवता। १,६,७ त्रिष्टुप्। २,५ निचृत् त्रिष्टुप्। ३,४,८,१० विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ९ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः स कीदृश इत्युपदिश्यते॥

अब इकहत्तरवें सूक्त का आरम्भ किया जाता है, इसके प्रथम मन्त्र में सभाध्यक्ष आदि के गुणों का उपदेश किया है॥

उप॒ प्र जि॑न्वन्नुश॒तीरु॒शन्तं॒ पतिं॒ न नित्यं॑ जन॒यः॑ स॒नीळाः॑।
स्वसा॑रः॒ श्याव॑ीमरु॒षीमजु॒ष्रञ्चि॒त्रमु॒च्छन्ती॑मु॒षस॒ं न गाव॑ः॥ १॥

उप॑। प्र। जि॒न्व॒न्। उ॒श॒तीः। उ॒शन्त॑म्। पति॑म्। न। नित्य॑म्। जन॑यः। सऽनी॑ळाः। स्वसा॑रः। श्याव॑ीम्। अरु॑षीम्। अ॒जु॒ष्रन्। चि॒त्रम्। उ॒च्छन्ती॑म्। उ॒षस॑म्। न। गाव॑ः॥ १॥

पदार्थः–(**उप**) सामीप्ये (**प्र**) प्रकृष्टार्थे (**जिन्वन्**) तर्पयन्तु। (**उशतीः**) कामयमानाः (**उशन्तम्**) कामयमानम् (**पतिम्**) पालकं पाणिग्रहीतारम् (**न**) इव (**नित्यम्**) अव्यभिचारिस्वरूपेणाविनाशिनम् (**जनयः**) या जायन्ते ता प्रजाः (**सनीळाः**) एकेश्वराधिकरणसमानस्थानाः (**स्वसारः**) युवतयो भगिन्यः (**श्यावीम्**) अल्पकृष्णवर्णाम् (**अरुषीम्**) आरक्तवर्णाम् (**अजुष्रन्**) सेवन्ते। अत्र **बहुलं छन्दसी**ति रुडागमः। (**चित्रम्**) अद्भुतगुणस्वरूपभावम् (**उच्छन्तीम्**) निवासयन्तीम् (**उषसम्**) रात्र्यन्तसमयम् (**न**) इव (**गावः**) किरणा धेनवो वा॥ १॥

अन्वयः–हे मनुष्या! यूयं यं नित्यं चित्रं परमेश्वरं सभाध्यक्षं वा सनीळा जनयः प्रजा उशन्तीः स्वसार उशन्तं पतिं नेव गावः श्यावीमरुषीमुच्छन्तीमुषसं नेवोपाजुष्रन् तं सततं सेवित्वा प्रजिन्वन्॥ १॥

भावार्थः–अत्र श्लेषोपमालङ्कारौ। सर्वैर्मनुष्यैर्यथा धार्मिका विदुषी पतिव्रता स्त्री पतिं धार्मिको विद्वान् स्त्रीव्रतो मनुष्यो धार्मिकां विवाहितां स्त्रियं सेवते। यथा चोषः कालं प्राप्य किरणाः पशवः पृथिव्यादिकान् पदार्थान् सेवन्ते तथैव परमेश्वरः सभाध्यक्षश्च नित्यं सेवनीयः॥ १॥

पदार्थः–हे मनुष्यो! तुम विद्वान् लोग जिस (**नित्यम्**) व्यभिचाररहित स्वरूप से नित्य अविनाशी (**चित्रम्**) आश्चर्य गुण, कर्म और स्वभावयुक्त परमेश्वर वा सभाध्यक्ष के (**सनीळाः**) एक ईश्वर के बीच रहने से समान स्थान वाले (**जनयः**) प्रजा वा (**उशन्तीः**) शोभायमान (**स्वसारः**) युवती भगिनी (**उशन्तम्**) शोभायमान अपने-अपने (**पतिम्**) पालन करनेवाले पति के (**न**) समान तथा (**गावः**) किरण वा धेनु (**श्यावीम्**) धुमैले वर्ण से युक्त वा (**अरुषीम्**) अत्यन्त लाल वर्ण वाली (**उच्छन्तीम्**) विशेष वास कराती हुई (**उषसम्**) प्रातःकाल की वेला के (**न**) समान (**उपाजुष्रन्**) सेवन करके (**प्रजिन्वन्**) अत्यन्त तृप्त रहो॥ १॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। सब मनुष्यों को चाहिये कि जैसे धर्मात्मा विद्वान् स्त्री विवाहित पति का और धर्मात्मा विद्वान् मनुष्य विवाहित स्त्री का सेवन करता है, जैसे प्रातःकाल होते ही किरण वा गौ आदि पशु पृथिवी आदि पदार्थों का सेवन करते हैं, वैसे ही परमेश्वर वा सभाध्यक्ष का निरन्तर सेवन करें॥१॥

पुनः कैः के कथं सेवनीया इत्युपदिश्यते॥

फिर किनकी कौन कैसे सेवा करें, इस विषय को अगले मन्त्र में कहा है॥

वीळु चिद् दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः॥२॥

वीळु। चित्। दृळ्हा। पितरः। नः। उक्थैः। अद्रिम्। रुजन्। अङ्गिरसः। रवेण। चक्रुः। दिवः। बृहतः। गातुम्। अस्मे इति। अहरिति। स्वः। विविदुः। केतुम्। उस्राः॥२॥

पदार्थः-(**वीळु**) बलम् (**चित्**) अपि (**दृढा**) दृढम्। अत्राकारादेशः। (**पितरः**) ज्ञानिनः (**नः**) अस्मान् (**उक्थैः**) परिभाषितोपदेशैः (**अद्रिम्**) मेघमिव (**रुजन्**) भञ्जन्ति (**अङ्गिरसः**) वायवः (**रवेण**) स्तुतिसमूहेन (**चक्रुः**) कुर्वन्ति (**दिवः**) द्योतकान् (**बृहतः**) महतः (**गातुम्**) पृथिवीम् (**अस्मे**) अस्माकम् (**अहः**) व्यापनशीलं दिनम् (**स्वः**) सुखम् (**विविदुः**) वेदयन्ति (**केतुम्**) प्रज्ञानम् (**उस्राः**) किरणाः॥२॥

अन्वयः-अस्माभिर्ये पितर उक्थैर्नोस्मान् दृढं केतुं वीळु स्वश्चिदुस्रा गातुमिवाहर्बृहतो दिव इव विविदुः। अङ्गिरसो रवेणाद्रिं रुजन्निवास्मे दुःखनाशं चक्रुस्ते सेवनीयाः॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैराप्तान् विदुषः संसेव्य विद्यां प्राप्य प्रज्ञामुत्पाद्य धर्मार्थकाममोक्षफलानि सेवनीयानि॥२॥

पदार्थः-हम लोगों को चाहिये कि जो (**पितरः**) ज्ञानी मनुष्य (**उक्थैः**) कहे हुए उपदेशों से (**नः**) हम लोगों के (**दृढा**) दृढ़ (**केतुम्**) प्रज्ञा (**वीळु**) बल (**स्वः**) (**चित्**) और सुख को (**उस्राः**) किरण वा (**गातुम्**) पृथिवी के समान (**अहः**) तथा दिन और (**बृहतः**) बड़े (**दिवः**) द्योतमान पदार्थों के समान (**विविदुः**) जानते हैं वा (**अङ्गिरसः**) वायु (**रवेण**) स्तुतिसमूह से (**अद्रिम्**) मेघ को (**रुजन्**) पृथिवी पर गिराते हुए के समान (**अस्मे**) हम लोगों के दुःखों को (**चक्रुः**) नष्ट करते हैं, उनको सेवें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि पूर्ण विद्यायुक्त विद्वानों का सेवन तथा विद्या बुद्धि को उत्पन्न करके धर्म-अर्थ-काम-मोक्ष फलों का सेवन करें॥२॥

यथा पुरुषा ब्रह्मचर्यं सेवित्वा विद्वांसो भवन्ति तथा स्त्रियोऽपि भवेयुरित्युपदिश्यते॥

जैसे ब्रह्मचर्याश्रम का सेवन करके पुरुष विद्वान् होते हैं, वैसे स्त्रियों को भी होना योग्य है, यह विषय कहा है॥

दधन्नृतं धनयन्नस्य धीतिमादिदुर्यो दिधिष्वो३ विभृत्राः।
अतृष्यन्तीरपसो यन्त्यच्छा देवाञ्जन्म प्रयसा वर्धयन्तीः॥ ३॥

दधन्। ऋतम्। धनयन्। अस्य। धीतिम्। आत्। इत्। अर्यः। दिधिष्वः। विऽभृत्राः। अतृष्यन्तीः। अपसः। यन्ति। अच्छ। देवान्। जन्म। प्रयसा। वर्धयन्तीः॥ ३॥

पदार्थः-(**दधन्**) दधीरन् (**ऋतम्**) सत्यं विज्ञानम् (**धनयन्**) विद्यादिधनं कुर्युः (**अस्य**) ब्रह्मचर्य्यस्य धर्मस्य विद्यादिधनस्य वा (**धीतिम्**) धारणम् (**आत्**) अनन्तरम् (**इत्**) इव (**अर्य्यः**) वैश्यः (**दिधिष्वः**) धारयन्त्यः (**विभृत्राः**) विशिष्टानि भृत्राणि धारणानि यासां ताः (**अतृष्यन्तीः**) तृष्णादिदोषरहिताः (**अपसः**) कर्माणि। अत्र लिङ्गव्यत्ययः। (**यन्ति**) प्राप्नुवन्ति वा (**अच्छ**) सम्यग्रीत्या (**देवान्**) विदुषो दिव्यान् गुणान् वा (**जन्म**) विद्याजननम् (**प्रयसा**) येन प्रीणन्ति तृप्यन्ति कामयन्ते वा शिष्टान् विदुषः शुभान् गुणांस्तेन सह वर्त्तमानाः (**वर्धयन्तीः**) उन्नयन्त्यः॥ ३॥

अन्वयः-या विभृत्रा दिधिष्वोऽतृष्यन्त्यो वर्धयन्त्यः कुमार्यो देवान् प्राप्यार्य्य इदिव ऋतं धनयन्नादस्य धीतिं दधन् प्रयसाऽपसो देवाञ्जन्माच्छादयन्ति। ता विदुष्यो भूत्वा वेदादिषु सर्वाणि सुखानि प्राप्नुवन्ति॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यथा वैश्या धर्मं धृत्वा धनमर्जयन्ति तथैव कन्या विवाहात् प्राक् सुब्रह्मचर्य्येणाप्ता विदुष्योऽध्यापिकाः प्राप्य पूर्णां सुशिक्षां विद्यां चादायाथ विवाहं कृत्वा प्रजासुखं स्वार्जयेयुः। नहि विद्याध्ययनस्य समयो विवाहादर्वागस्ति न खलु कस्यचित्पुरुषस्य स्त्रिया वा विद्याग्रहणेऽनधिकारोऽस्ति॥ ३॥

पदार्थः-जो (**विभृत्राः**) विशेष धारण करनेवाली (**दिधिष्वः**) भूषण आदि से युक्त (**अतृष्यन्तीः**) तृष्णा आदि दोषों से पृथक् (**वर्धयन्तीः**) उन्नति करनेवाली कुमारी कन्या (**देवान्**) दिव्य गुणों को प्राप्त होकर (**अर्य्यः**) वैश्य के (**इत्**) समान (**ऋतम्**) सत्य विज्ञान को (**धनयन्**) विद्याधनयुक्त कर (**आत्**) इसके अनन्तर (**अस्य**) ब्रह्मचर्य की (**धीतिम्**) धारणा को (**दधन्**) धारण कर (**प्रयसा**) अन्न के समान वर्त्तमान (**अपसः**) कर्म्म (**देवान्**) विद्वान् (**जन्म**) और विद्या की प्राप्ति को (**अच्छ**) अच्छे प्रकार (**यन्ति**) प्राप्त होती हैं, वेदादि शास्त्रों में विद्वान् होकर सब सुखों को प्राप्त होती हैं॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे वैश्य लोग धर्म्म के अनुकूल धन का संचय करते हैं, वैसे ही कन्या विवाह से पहले ब्रह्मचर्यपूर्वक पूर्ण विद्वान् पढ़ानेवाली स्त्रियों को प्राप्त हो पूर्णशिक्षा और विद्या का ग्रहण तथा विवाह करके प्रजासुख को सम्पादन करे। विवाह के पीछे विद्याध्ययन का समय नहीं समझना चाहिये। किसी पुरुष वा स्त्री को विद्या के पढ़ने का अधिकार नहीं है, ऐसा किसी को नहीं समझना चाहिये, किन्तु सर्वथा सबको पढ़ने का अधिकार है॥ ३॥

पुनस्ताः कथंभूता भवेयुरित्युपदिश्यते॥

फिर उन स्त्रियों को कैसा होना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत्।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं१ भृगवाणो विवाय॥४॥

मथीत्। यत्। ईम्। विऽभृतः। मातरिश्वा। गृहेऽगृहे। श्येतः। जेन्यः। भूत्। आत्। ईम्। राज्ञे। न। सहीयसे। सचा। सन्। आ। दूत्यम्। भृगवाणः। विवाय॥४॥

पदार्थः-(**मथीत्**) मथति (**यत्**) (**ईम्**) प्राप्तमग्निम् (**विभृतः**) विविधद्रव्यविद्याधारकाः (**मातरिश्वा**) यो मातर्यन्तरिक्षे श्वसिति स वायुः (**गृहेगृहे**) प्रतिगृहम् (**श्येतः**) प्राप्तः (**जेन्यः**) विजयहेतुः। अत्र बाहुलकादौणादिक एन्यप्रत्ययो डिच्च। (**भूत्**) भवति (**आत्**) अनन्तरम् (**ईम्**) विजयप्रापिका सेना (**राज्ञे**) नृपतये (**न**) इव (**सहीयसे**) यशसा सोढे (**सचा**) सङ्गत्या (**सन्**) वर्त्तमानः (**आ**) समन्तात् (**दूत्यम्**) दूतस्य भावः कर्म वा (**भृगवाणः**) भृज्जति पदार्थविद्ययानेकान् पदार्थानिति भृगवाणस्तद्वत् (**विवाय**) संवृणोति॥४॥

अन्वयः-भृगवाण इव गृहीतविद्याः कुमार्य्यो यथायं विभृतः श्येतो जेन्यो मातरिश्वा यद्दूत्यं तदाविवाय गृहेगृह ईम्प्राप्तमग्निं मथीदात् सहीयसे राज्ञे नेम् सचा सन् भूत् तथैव विद्यायोगेन सुखकारिण्यो भवन्तु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। न खलु विद्या ग्रहणेन विना स्त्रीणां किंचिदपि सुखं भवति यथाऽगृहीतविद्याः पुरुषाः सुलक्षणा विदुषीः स्त्रियः पीडयन्ति, तथैव विद्याशिक्षारहिताः स्त्रियः स्वान् पतीन् पीडयन्ति तस्माद्विद्याग्रहणानन्तरमेव परस्परं प्रीत्या स्वयंवरविधानेन विवाहं कृत्वा सततं सुखयितव्यम्॥४॥

पदार्थः-(**भृगवाणः**) अनेकविध पदार्थविद्या से पदार्थों को व्यवहार में लानेहारों के तुल्य विद्याग्रहण की हुई कन्याओ! जैसे यह (**विभृतः**) अनेक प्रकार की पदार्थ विद्या का धारण करनेवाला (**श्येतः**) प्राप्त होने का (**जेन्यः**) और विजय का हेतु तथा (**मातरिश्वा**) अन्तरिक्ष में सोने आदि विहारों का करनेवाला वायु (**यत्**) जो (**दूत्यम्**) दूत का कर्म है उसको (**आ विवाय**) अच्छे प्रकार स्वीकार करता और (**गृहे-गृहे**) घर-घर अर्थात् कलायन्त्रों के कोठे-कोठे में (**ईम्**) प्राप्त हुए अग्नि को (**मथीत्**) मथता है (**आत्**) अथवा (**सहीयसे**) यश सहनेवाले (**राज्ञे**) राजा के लिये (**न**) जैसे (**ईम्**) विजय सुख प्राप्त करानेवाली सेना (**सचा**) सङ्गति के साथ (**सन्**) वर्त्तमान (**भूत्**) होती है, वैसे विद्या के योग से सुख करानेवाली होओ॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। विद्या-ग्रहण के विना स्त्रियों को कुछ भी सुख नहीं होता। जैसे अविद्याओं का ग्रहण किये हुए मूढ़ पुरुष उत्तम लक्षण युक्त विद्वान्

स्त्रियों को पीड़ा देते हैं, वैसे विद्या शिक्षा से रहित स्त्री अपने विद्वान् पतियों को दुःख देती हैं। इससे विद्या-ग्रहण के अनन्तर ही परस्पर प्रीति के साथ स्वयंवर विधान से विवाह कर निरन्तर सुखयुक्त होना चाहिये॥४॥

पुनः सूर्यवदध्यापकगुणा उपदिश्यन्ते॥

फिर सूर्य के समान अध्यापक के गुणों का उपदेश किया है॥

म॒हे यत्पि॒त्रे ई॑मं॒ रस॑म॒ दि॒वे कर॑व॒ त्सर॒त्पृश॒न्यं॑श्चिकि॒त्वान्।
सृ॒जद॒स्ता॑ धृष॒ता दि॒द्युम॑स्मै॒ स्वाया॑ दे॒वो दु॑हि॒तरि॒ त्विषि॑ धात्॥५॥१५॥

म॒हे। यत्। पि॒त्रे। ई॒म्। रस॑म्। दि॒वे॒। क॒रः। अव॑। त्स॒र॒त्। पृ॒श॒न्यः॑। चि॒कि॒त्वान्। सृ॒जत्। अस्ता॑। धृ॒ष॒ता। दि॒द्युम्। अ॒स्मै॒। स्वाया॑म्। दे॒वः। दु॒हि॒तरि॑। त्विषि॑म्। धा॒त्॥५॥

पदार्थः-(**महे**) विद्यया परिमाणेन महत् (**यत्**) यः (**पित्रे**) विद्याप्रकाशयोर्दानेन पालयित्रे (**ईम्**) प्राप्तव्यम् (**रसम्**) विद्यौषधिफलम् (**दिवे**) प्रकाशाय (**करः**) सुखदः (**अव**) विनिग्रहे (**त्सरत्**) विरुद्धं गच्छति (**पृशन्यः**) पर्शिता (**चिकित्वान्**) ज्ञानवान् ज्ञानहेतुर्वा (**सृजत्**) सृजति (**अस्ता**) प्रक्षेप्ता (**धृषता**) प्रागल्भ्येन (**दिद्युम्**) द्योतमानां विद्यां दीप्तिं वा (**अस्मै**) प्रयोजनाय (**स्वायाम्**) स्वकीयाम् (**देवः**) विद्याप्रकाशदाता (**दुहितरि**) कन्येव वर्त्तमानायामुषसि (**त्विषिम्**) विद्याप्रकाशं तेजो वा (**धात्**) दधाति॥५॥

अन्वयः-हे मनुष्याः! यूयं तथा यद्यः करः पृशन्य अस्ता चिकित्वान् देवः सूर्यो महे पित्रे दिव ईम्रसमवसृजदीमन्धकारं च त्सरत्स्वायां दुहितरि त्विषिं धादथ दिद्युं धृषता सुखं दीयते तथा सर्वस्मै सुखं कुरुत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वैर्मातापित्रादिभिर्मनुष्यैः स्वस्य स्वस्य सन्तानेषु विद्या स्थापनीया। यथा प्रकाशमयः सन् सूर्यः सर्वं प्रकाश्यानन्दयति तथैव विद्यायुक्ताः पुत्राः कन्याश्च सर्वाणि सुखानि ददति॥५॥

पदार्थः-हे मनुष्यो! तुम लोगों को जैसे (**यत्**) जो (**करः**) सुखदाता (**पृशन्यः**) स्पर्श करने (**अस्ता**) फेंकने (**चिकित्वान्**) जानने (**देवः**) विद्या प्रकाश के देनेवाला सूर्य्य (**महे**) बड़े (**पित्रे**) प्रकाश के देने से पालन करनेवाले (**दिवे**) प्रकाश के लिये (**ईम्**) प्राप्त करने योग्य (**रसम्**) ओषधि के फल को (**अवसृजत्**) रचता (**ईम्**) (**त्सरत्**) अन्धकार को दूर करता (**स्वायाम्**) अपनी (**दुहितरि**) कन्या के समान उषा में (**त्विषिम्**) प्रकाश वा तेज को (**धात्**) धारण करता, उसके अनन्तर (**दिद्युम्**) दीप्ति की (**धृषता**) दृढ़ता से सुख देता है, वैसे किया करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब माता-पिता आदि मनुष्यों को अपने-अपने सन्तानों में विद्यास्थापन करना चाहिये। जैसे प्रकाशमान सूर्य सबको प्रकाश करके आनन्दित करता है, वैसे ही विद्यायुक्त पुत्र वा पुत्री सब सुखों को देते हैं॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर भी अध्यापक के गुणों का उपदेश अगले मन्त्र में किया है॥

स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून्।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि॥६॥

स्वे। आ। यः। तुभ्यम्। दमे। आ। विऽभाति। नमः। वा। दाशात्॥ उशतः। अनु। द्यून्। वर्धो इति। अग्ने। वयः। अस्य। द्विऽबर्हाः। यासत्। राया। सऽरथम्। यम्। जुनासि॥६॥

पदार्थः-(**स्वे**) स्वकीये (**आ**) समन्तात् (**यः**) अध्येता (**तुभ्यम्**) (**दमे**) गृहे। **दम इति गृहनामसु पठितम्।** (निघं०६.४) (**आ**) अभितः (**विभाति**) प्रकाशते (**नमः**) अन्नम् (**वा**) विकल्पे (**दाशात्**) ददाति (**उशतः**) कामयमानान् (**अनु**) वीप्सायाम् (**द्यून्**) दिवसान् (**वर्धो**) यो वर्धयति तत्संबुद्धौ (**अग्ने**) विज्ञानप्रद (**वयः**) जीवनम् (**अस्य**) अपत्यस्य जगतो वा (**द्विबर्हाः**) यो द्वाभ्यां विद्याशिक्षाभ्यां प्रतापप्रकाशाभ्यां वा वर्धयति सः (**यासत्**) प्रापयन्ति (**राया**) विद्यादिधनेन (**सरथम्**) रथै रमणीयैः कर्मभिर्गुणैर्यानैर्वा सह वर्त्तमानस्तम् (**यम्**) मनुष्यं रथं वा (**जुनासि**) व्यवहारे प्रेरयसि॥६॥

अन्वयः-हे अग्ने! वर्धो द्विबर्हास्त्वं यथा सविता स्वे दमे तुभ्यं नम आदाशादाविभाति यथा वास्य जगतो वयो यासत् तथा यः स्वे दमे तुभ्यं नम आदाशादाविभात्यस्यापत्यस्य वयो यासत् राया सरथं यं जुनासि तान् सर्वाननुद्यूनुशतः सम्पादय॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! युष्माभिर्ये युष्माकं पितरो जनका आचार्याश्च युष्मभ्यं सुशिक्षया सूर्य्यवद्विद्याप्रकाशेनान्नादिदानेन वा सुखयन्ति ते नित्यं सेवनीयाः॥६॥

पदार्थः-हे (**अग्ने**) विज्ञानप्रद! (**वर्धो**) (**द्विबर्हाः**) विद्या और शिक्षा से वार-वार बढ़ानेहारे आप जैसे सविता (**स्वे**) अपने (**दमे**) घर में (**तुभ्यम्**) तुमको (**नमः**) अन्न (**आदाशात्**) अच्छे प्रकार देता (**आविभाति**) और अत्यन्त प्रकाश को करता (**वा**) अथवा (**अस्य**) इस जगत् की (**वयः**) अवस्था को (**यासत्**) पहुंचाता है, वैसे (**यः**) जो शिष्य अपने घर में तुम्हारे लिये अन्न देता अर्थात् यथायोग्य सत्कार करता और आपसे गुणों को प्राप्त होता हुआ प्रकाशित होता अथवा इस अपने पुत्र आदि की अवस्था पहुंचाता अर्थात् औषधि आदि पदार्थों से नीरोगता को प्राप्त करता है और (**राया**) विद्यादि धन (**सरथम्**) मनोहर (**यान,**) कर्म वा गुणों सहित से (**यम्**) जिस मनुष्य को (**जुनासि**) व्यवहार में चलाते हो, उन सबको (**अनुद्यून्**) प्रतिदिन (**उशतः**) अति उत्तम कीजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम लोगों को चाहिये कि जो तुम्हारे पिता अर्थात् उत्पन्न करनेवाले वा पढ़ानेवाले आचार्य्य तुम्हारे लिये उत्तम शिक्षा से सूर्य के समान विद्याप्रकाश वा अन्नादि दे कर सुखी रखते हैं, उनका निरन्तर सेवन करो॥६॥

पुनस्स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अ॒ग्निं विश्वा॑ अ॒भि पृक्षः॑ सचन्ते समु॒द्रं न स्र॒वतः॑ स॒प्त य॒ह्वीः।
न जा॒मिभि॒र्वि चि॑किते॒ वयो॑ नो वि॒दा दे॒वेषु॒ प्रम॑तिं चिकि॒त्वान्॥७॥

अ॒ग्निम्। विश्वाः॑। अ॒भि। पृक्षः॑। स॒च॒न्ते॒। स॒मु॒द्रम्। न। स्र॒वतः॑। स॒प्त। य॒ह्वीः। न। जा॒मिऽभिः॑। वि। चि॒कि॒ते॒। वयः॑। नः॒। वि॒दाः॒। दे॒वेषु॑। प्रऽम॑तिम्। चि॒कि॒त्वान्॥७॥

पदार्थः-(**अग्निम्**) विद्युतम् (**विश्वाः**) अखिलाः (**अभि**) अभितः (**पृक्षः**) याः पृचते विद्यासम्पर्कं कुर्वन्ति ताः पुत्र्यः (**सचन्ते**) समवयन्ति (**समुद्रम्**) अर्णवम् (**न**) इव (**स्रवतः**) प्राणान् (**सप्त**) प्राणापानव्यानोदानसमानसूत्रात्मकारणस्थान् (**यह्वीः**) महत्यो रुधिरविद्युदादिगतयः (**न**) निषेधे (**जामिभिः**) स्त्रीभिः (**वि**) विशेषे (**चिकिते**) ज्ञापयति (**वयः**) विज्ञानम् (**नः**) अस्मान् (**विदाः**) विज्ञापय (**देवेषु**) विद्वत्सु दिव्यगुणेषु वा (**प्रमतिम्**) प्रकृष्टं ज्ञानम् (**चिकित्वान्**) ज्ञानवान् ज्ञापको वा॥७॥

अन्वयः-यश्चिकित्वान् नोऽस्मान् देवेषु प्रमतिं विदा वयो विचिकिते तमग्निमिव विश्वा पृक्षः पुत्र्यः कान्तयो वा समुद्रं स्रवतः सप्त प्राणान् यह्वीर्नेवाभिसचन्ते यतो वयं मूर्खाभिर्दुःखदाभिर्जामिभिर्वा सह न संवसेम॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा समुद्रं नद्यः प्राणान् विद्युदादयश्च संयुञ्जन्ति तथैव मनुष्याः सर्वे पुत्रा कन्याश्च ब्रह्मचर्य्येण विद्याव्रते समाप्य युवाऽवस्थां प्राप्य विवाहादिना सन्तानानुत्पाद्य तेभ्यस्तथैव विद्यासुशिक्षा ग्राहयेयुरनेन समः कश्चिदधिक उपकारो न विद्यत इति ॥७॥

पदार्थः-जो (**चिकित्वान्**) ज्ञानवान् ज्ञान का हेतु (**नः**) हम लोगों को (**देवेषु**) विद्वान् वा दिव्यगुणों में (**प्रमतिम्**) उत्तम ज्ञान को (**विदाः**) प्राप्त करता (**वयः**) जीवन का (**विचिकिते**) विशेष ज्ञान कराता है, उस (**अग्निम्**) अग्नि के समान विद्वान् (**विश्वाः**) सब (**पृक्षः**) विद्यासम्पर्क करनेवाले पुत्र वा दीप्ति (**समुद्रम्**) समुद्र वा (**स्रवतः**) नदी के समान शरीर को गमन कराते हुए (**सप्त**) सात अर्थात् प्राण, अपान, व्यान, उदान, समान इन पांच के और सूत्ररूप आत्मा के समान (सूत्रात्मकारणस्थ) तथा (**यह्वीः**) रुधिर वा बिजुली आदि की गतियों के (**न**) समान (**अभिसचन्ते**) सम्बन्ध करती हैं, जिससे हम लोग मूर्ख वा दुःख देनेवाली (**जामिभिः**) स्त्रियों के साथ (**न**) नहीं बसें॥७॥

भावार्थः-इस मन्त्र में उपमा तथा वाचकलुप्तोपमालङ्कार हैं। जैसे समुद्र को नदी वा प्राणों को बिजुली आदि गति संयुक्त करती हैं, वैसे ही मनुष्य सब पुत्र वा कन्या ब्रह्मचर्य्य से विद्या वा व्रतों को

समाप्त करके युवावस्था वाले होकर विवाह से सन्तानों को उत्पन्न कर उनको इसी प्रकार विद्या शिक्षा सदा ग्रहण करावें। पुत्रों के लिये विद्या का उत्तम शिक्षा करने के समान कोई बड़ा उपकार नहीं है॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह अध्यापक कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ यदिषे नृपतिं तेज आनट्छुचि रेतो निषिक्तं द्यौरभीके।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च॥८॥

आ। यत्। इषे। नृऽपतिम्। तेजः। आनट्। शुचि। रेतः। निऽसिक्तम्। द्यौः। अभीके। अग्निः। शर्धम्। अनवद्यम्। युवानम्। सुऽआध्यम्। जनयत्। सूदयत्। च॥८॥

पदार्थः-(**आ**) समन्तात् (**यत्**) यः (**इषे**) इच्छापूर्त्तये (**नृपतिम्**) राजानम् (**तेजः**) प्रागल्भ्यम् (**आनट्**) व्याप्नोति। अत्र व्यत्ययेन परस्मैपदं श्नं च। (**शुचि**) पवित्रम् (**रेतः**) वीर्य्यमुदकं वा। **रेत इत्युदकनामसु पठितम्।** (निघं०१.१२) (**निषिक्तम्**) संस्थापितम् (**द्यौः**) प्रकाशः (**अभीके**) संग्रामे। **अभीक इति संग्रामनामसु पठितम्।** (निघं०२.१७) (**अग्निः**) विद्युत् (**शर्धम्**) बलिनम् (**अनवद्यम्**) अनिन्दितम् (**युवानम्**) (**स्वाध्यम्**) सुष्ठु समन्ताद् विद्याऽधीयते यस्मिन् यस्यां तं वा (**जनयत्**) (**सूदयत्**) सूदयेत् (**च**) समुच्चये॥८॥

अन्वयः-हे युवते! त्वं यथा द्यौरग्निरभीके इषे यन् निषिक्तं शुचि रेतस्तेजश्चानट् समन्तात् प्रापयति तेन युक्ता त्वं तथा शर्धमनवद्यं स्वाध्यं युवानं नृपतिं विद्वांसं स्वयंवरविवाहेन प्राप्यापत्यान्याजनयद् दुःखं सूदयच्च॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। न सर्वैर्मनुष्यैः कदाचित्सुविद्या शरीरबलाभ्यां विना व्यावहारिकपारमार्थिकसुखे प्राप्येते। न खलु सन्तानेभ्यो विद्यादानेन विना मातापित्रादयोऽनृणा भवितुं शक्नुवन्तीति वेद्यम्॥८॥

पदार्थः-हे युवते! जैसे (**द्यौः**) प्रकाशस्वरूप (**अग्निः**) विद्युत् (**अभीके**) संग्राम में (**इषे**) इच्छा की पूर्णता के लिये (**यत्**) जो (**निषिक्तम्**) स्थापन किये हुए (**शुचि**) पवित्र (**रेतः**) वीर्य और (**तेजः**) प्रगल्भता को (**आनट्**) प्राप्त करती है, उससे युक्त तू वैसे (**शर्धम्**) बली (**अनवद्यम्**) निन्दारहित (**युवानम्**) युवावस्था वाले (**स्वाध्यम्**) उत्तम विद्यायुक्त विद्वान् (**नृपतिम्**) मनुष्यों में राजमान पति को स्वेच्छा से प्रसन्नतापूर्वक प्राप्त हो के (**आजनयत्**) सन्तानों को उत्पन्न (**च**) और अविद्या दुःख को (**सूदयत्**) दूर कर॥८॥

भावार्थः-सब मनुष्यों जो जानना चाहिये कि कभी उत्तम विद्या वा प्रदीप्त अग्नि के समान विद्वान् के सङ्ग के विना व्यवहार और परमार्थ के सुख प्राप्त नहीं होते और अपने सन्तानों को विद्या देने के विना माता-पिता आदि कृतकृत्य नहीं हो सकते॥८॥

विद्यया किं प्राप्नोतीत्युपदिश्यते॥

विद्या से क्या प्राप्त होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

मनो॒ न योऽध्व॑नः स॒द्य एत्येक॑: स॒त्रा सूरो॒ वस्व॑ ईशे।
राजा॑ना मि॒त्रावरु॑णा सुपा॒णी गोषु॑ प्रि॒यम॒मृत॑ं रक्ष॑माणा॥९॥

मन॑:। न। यः। अध्व॑नः। स॒द्यः। एति॑। एक॑:। स॒त्रा। सूर॑:। वस्व॑:। ई॒शे॒। राजा॑ना। मि॒त्रावरु॑णा। सु॒पा॒णी इति॑ सु॒ऽपा॒णी। गोषु॑। प्रि॒यम्। अ॒मृत॑म्। रक्ष॑माणा॥९॥

पदार्थः-(**मनः**) सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः (**न**) इव (**यः**) विद्वान् (**अध्वनः**) मार्गान् (**सद्यः**) शीघ्रम् (**एति**) गच्छति (**एकः**) असहायः (**सत्रा**) सत्यान् गुणकर्मस्वभावान् (**सूरः**) प्राणिगर्भविमोचिका प्राणस्थविद्युदिव (**वस्वः**) वसूनि (**ईशे**) ऐश्वर्ययुक्तो भवति (**राजाना**) प्रकाशमानौ सभाविद्याध्यक्षौ (**मित्रावरुणा**) यः सर्वमित्रः सर्वेश्वरश्च तौ (**सुपाणी**) शोभनाः पाणयो व्यवहारा ययोस्तौ (**गोषु**) पृथिवीराज्येषु (**प्रियम्**) प्रीतिकरम् (**अमृतम्**) सर्वसुखप्रापकत्वेन दुःखविनाशकम् (**रक्षमाणा**) यौ रक्षतस्तौ। अत्र व्यत्ययेनात्मनेपदम्॥९॥

अन्वयः-हे स्त्रीपुरुषो! युवां यथा विद्वान् मनो न सूर इव विमानादियानैरध्वनः पारं सद्य एति य एकः सत्रा वस्व ईशे तथा गोषु प्रियममृतं रक्षमाणा सुपाणी मित्रावरुणौ राजा नेव भूत्वा धर्मार्थकाममोक्षान् साध्नुयाताम्॥९॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा मनुष्या न विद्याविद्वत्सङ्गाभ्यां विना विमानादीन् रचयित्वा तत्र स्थित्वा देशान्तरेषु सद्यो गमनागमने सत्यविज्ञानमुत्तमद्रव्यप्राप्तिर्धार्मिको राजा च राज्यं भावयितुं शक्नुवन्ति तथा स्त्रीपुरुषेषु विद्या बलोन्नत्या विना सुखवृद्धिर्न भवति॥९॥

पदार्थः-हे स्त्रीपुरुषो! तुम विद्वान्मनुष्य जैसे (**मनः**) सङ्कल्पविकल्परूप अन्तःकरण की वृत्ति के (**न**) समान वा (**सूरः**) प्राणियों के गर्भों को बाहर करनेहारी प्राणस्थ बिजुली के तुल्य विमान आदि यानों से (**अध्वनः**) मार्गों को (**सद्यः**) शीघ्र (**एति**) जाता और (**यः**) जो (**एकः**) सहायरहित एकाकी (**सत्रा**) सत्य गुण, कर्म और स्वभाववाला (**वस्वः**) द्रव्यों को शीघ्र (**ईशे**) प्राप्त करता है, वैसे (**गोषु**) पृथिवीराज्य में (**प्रियम्**) प्रीतिकारक (**अमृतम्**) सब सुखों-दुःखों के नाश करनेवाले अमृत की (**रक्षमाणा**) रक्षा करनेवाले (**सुपाणी**) उत्तम व्यवहारों से युक्त (**मित्रावरुणौ**) सबके मित्र सब से उत्तम (**राजाना**) सभा वा विद्या के अध्यक्षों के सदृश हो के धर्म, अर्थ, काम और मोक्ष को सिद्ध किया करो॥९॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे मनुष्य विद्या और विद्वानों के संग के विना विमानादि यानों को रच और उनमें स्थित होकर देश-देशान्तर में शीघ्र जाना-आना, सत्य विज्ञान, उत्तम द्रव्यों की प्राप्ति और धर्मात्मा राजा राज्य के सम्पादन करने को समर्थ नहीं हो सकते, वैसे स्त्री और पुरुषों में निरन्तर विद्या और शरीरबल की उन्नति के विना सुख की बढ़ती कभी नहीं हो सकती॥९॥

पुनः स विद्वान् कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

मा नो॑ अग्ने स॒ख्या पित्र्या॑णि॒ प्र म॑र्षिष्ठा अ॒भि वि॒दुष्क॒विः सन्।
नभो॒ न रू॒पं ज॑रि॒मा मि॑नाति पु॒रा तस्या॑ अभिश॑स्ते॒रधी॑हि॥ १०॥ १६॥

मा। नः। अग्ने। सख्या। पित्र्याणि। प्र। मर्षिष्ठाः। अभि। विदुः। कविः। सन्। नभः। रूपम्। जरिमा। मिनाति। पुरा। तस्याः। अभिऽशस्तेः। अधि। इहि॥ १०॥

पदार्थः-(**मा**) निषेधे (**नः**) अस्माकम् (**अग्ने**) सर्वविद्याऽभिव्याप्त विद्वान् (**सख्या**) मित्रभावकर्माणि (**पित्र्याणि**) पितृभ्य आगतानि (**प्र**) प्रकृष्टार्थे (**मर्षिष्ठाः**) विनाशयेः (**अभि**) अभितः (**विदुः**) वेत्ता (**कविः**) पूर्णविद्यः (**सन्**) वर्त्तमानः (**नभः**) अन्तरिक्षम् (**न**) इव (**रूपम्**) रूपवद्वस्तु (**जरिमा**) एतस्याः स्तुतेर्भावयुक्तः (**मिनाति**) हन्ति (**पुरा**) पुरातनानि (**तस्याः**) उक्तायाः (**अभिशस्तेः**) हिंसायाः (**अधि**) उपरिभावे (**इहि**) स्मर॥१०॥

अन्वयः-हे अग्ने! पावकवज्जरिमा कविर्विदुः संस्त्वं नमो रूपं न तथा नोऽस्माकं पुरा पित्र्याणि सख्या माभिप्रमर्षिष्ठास्तस्या अभिशस्तेर्नाशस्याधीहि एवं भूतः सन् यः सुखं मिनाति तं दूरीकरु॥१०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा रूपवन्तः पदार्थाः सूक्ष्म अवस्थां प्राप्यान्तरिक्षेऽदृश्या भवन्ति। तथाऽस्माकं सखित्वानि नष्टानि न भवेयुर्यतः सर्वे वयं सर्वथा विरोधं विहाय परस्परं सुहृदो भूत्वा सर्वदा सुखिनः स्याम॥१०॥

अत्रेश्वरसभाध्यक्षस्त्रीपुरुषविद्युद्विद्वद्गुणवर्णनं कृतमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकसप्ततितमं ७१ सूक्तं षोडशो १६ वर्गश्च पूर्णः॥

पदार्थः-हे (**अग्ने**) सब विद्याओं को प्राप्त हुए विद्वान्! (**जरिमा**) स्तुति के योग्य (**कविः**) पूर्णविद्या को (**विदुः**) जाननेवाले (**सन्**) होकर आप (**नभोरूपं न**) जैसे आकाश सब रूपवाले पदार्थों को अपने में नाश के समय गुप्त कर लेता है, वैसे (**नः**) हम लोगों के (**पुरा**) प्राचीन (**पित्र्याणि**) पिता आदि से आए हुए (**सख्या**) मित्रता आदि कर्मों को (**माभि प्र मर्षिष्ठाः**) नष्ट मत कीजिए और (**तस्याः**) उस

(अभिशस्तेः) नाश को **(अधीहि)** अच्छी प्रकार स्मरण रखिये, इसी प्रकार होकर जो सुख को **(मिनाति)** नष्ट करता है, उसको दूर कीजिये॥१०॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे रूपवाले पदार्थ सूक्ष्म अवस्था को प्राप्त होकर अन्तरिक्ष में नहीं दीखते, वैसे हम लोगों के मित्रपन आदि व्यवहार नष्ट न होवें, किन्तु हम सब लोग विरोध सर्वथा छोड़कर परस्पर मित्र होके सब काल में सुखी रहें॥१०॥

इस सूक्त में ईश्वर, सभाध्यक्ष, स्त्री, पुरुष, बिजुली और विद्वानों के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह इकहत्तरवां ७१ सूक्त और सोलहवां १६ वर्ग समाप्त हुआ॥

अथ दशर्चस्य द्विसप्ततितमस्य सूक्तस्य पराशर ऋषिः। अग्निर्देवता। १,२,५,६,९ विराट् त्रिष्टुप्। ४,१० त्रिष्टुप्। ७ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३,८ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्याणां वेदाध्यापनाध्ययनेन किं किं फलं भवतीत्युपदिश्यते॥

अब बहत्तरवें सूक्त का आरम्भ किया है। इसके प्रथम मन्त्र में मनुष्यों को वेदों के पढ़ने-पढ़ाने से क्या-क्या फल होता है, इस विषय को कहा है॥

नि काव्या॑ वे॒धस॒: शश्व॑तस्कृ॒र्हस्ते॒ दधा॑नो॒ नर्या॑ पु॒रूणि॑।
अ॒ग्निर्भु॑वद्रयि॒पती॑ रयी॒णां स॒त्रा च॑क्रा॒णो अ॒मृता॑नि॒ विश्वा॑॥ १॥

नि। काव्या॑। वे॒धस॑:। शश्व॑तः। कृ॒:। हस्ते। दधा॑नः। नर्या॑। पु॒रूणि॑। अ॒ग्निः। भु॒व॒त्। र॒यि॒ऽपतिः। र॒यी॒णाम्। स॒त्रा। च॒क्रा॒णः। अ॒मृता॑नि। विश्वा॑॥ १॥

पदार्थः-(**नि**) नितराम् (**काव्या**) वेदस्तोत्राणि वा (**वेधसः**) सकलविद्याधातुर्विधातुः (**शश्वतः**) अनादिस्वरूपस्य परमेश्वरस्य सम्बन्धात् प्रकाशितानि (**कः**) करोति (**हस्ते**) करे प्रत्यक्षवस्तुवत् (**दधानः**) धरन् (**नर्य्या**) नृभ्यो हितानि (**पुरूणि**) बहूनि (**अग्निः**) विद्वान्। **अग्निरिति पदनामसु पठितम्।** (निघं०५.४) (**भुवत्**) भवति (**रयिपतिः**) श्रीशः (**रयीणाम्**) विद्याचक्रवर्त्तिप्रभृतिधनानाम् (**सत्रा**) नित्यानि सत्यार्थप्रतिपादकानि (**चक्राणः**) (**अमृतानि**) मोक्षपर्यन्तार्थप्रापकानि (**विश्वा**) सर्वाणि चतुर्वेदस्थानि॥ १॥

अन्वयः-योग्निरिव विद्वान्मनुष्यो यानि वेधसः शश्वतः परमात्मनः सकाशात् प्रकाशितानि पुरूणि सत्राऽमृतानि विश्वा नर्य्या काव्यानि सन्ति तानि दधानः विद्याप्रकाशं चक्राणः सन् धर्माचरणं नि को निश्चयेन करोति स रयीणां रयिपतिर्भुवद्भवति॥ १॥

भावार्थः-हे मनुष्या! अनन्तसत्यविद्येनाऽनादिना सर्वज्ञेन परमेश्वरेण युष्मद्धिताय स्वविद्यामया अनादयो वेदाः प्रकाशितास्तानधीत्याध्याप्य च धार्मिका विद्वांसो भूत्वा धर्मार्थकाममोक्षान्निर्वर्त्तयत॥ १॥

पदार्थः-जो (**अग्निः**) अग्नि के तुल्य विद्वान् मनुष्य (**वेधसः**) सब विद्याओं के धारण और विधान करनेवाले (**शश्वतः**) अनादि स्वरूप परमेश्वर के सम्बन्ध से प्रकाशित हुए (**पुरूणि**) बहुत (**सत्रा**) सत्य अर्थ के प्रकाश करने तथा (**अमृतानि**) मोक्षपर्यन्त अर्थों को प्राप्त करनेवाले (**विश्वा**) सब (**नर्य्या**) मनुष्यों को सुख होने के हेतु (**काव्या**) सर्वज्ञ निर्मित वेदों के स्तोत्र हैं, उन को (**हस्ते**) हाथ में प्रत्यक्ष पदार्थ के तुल्य (**दधानः**) धारण कर तथा विद्याप्रकाश को (**चक्राणः**) करता हुआ धर्माचरण को (**नि कः**) निश्चय करके सिद्ध करता है वह (**रयीणाम्**) विद्या, चक्रवर्त्ति राज्य आदि धनों का (**रयिपतिः**) पालन करनेवाला श्रीपति (**भुवत्**) होता है॥ १॥

भावार्थः-हे मनुष्यो! अनन्त सत्यविद्यायुक्त अनादि सर्वज्ञ परमेश्वर ने तुम लोगों के हित के लिए जिन अपनी विद्यामय अनादि रूप वेदों को प्रकाशित किये हैं, उनको पढ़-पढ़ा और धर्मात्मा विद्वान् होकर धर्म, अर्थ, काम, मोक्ष, आदि फलों को सिद्ध करो॥ १॥

य एतान् स्वीकुर्वन्ति ते सदानन्दा भवन्ति, ये च नाधीयते वृथाश्रमा भवन्तीत्युपदिश्यते॥

जो लोग इन उक्त वेदों को पढ़ते हैं, वे ही सदा आनन्द में रहते हैं और जो नहीं पढ़ते उनका परिश्रम व्यर्थ जाता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः॥ २॥

अस्मे इति। वत्सम्। परि। सन्तम्। न। विन्दन्। इच्छन्तः। विश्वे। अमृताः। अमूराः। श्रमऽयुवः। पदऽव्यः। धियम्ऽधाः। तस्थुः। पदे। परमे। चारु। अग्नेः॥ २॥

पदार्थः-(**अस्मे**) अस्मान् (**वत्सम्**) सुखेषु निवासयन्तं व्यक्तवाचं प्रसिद्धं वेदचतुष्टयम्। अत्र **वृतॄ०।** (उणा०३.६१) इति सूत्रेणास्य सिद्धिः। (**परि**) सर्वतः (**सन्तम्**) वर्त्तमानम् (**न**) निषेधे (**विन्दन्**) लभन्ते (**इच्छन्तः**) श्रद्धालवो भूत्वा (**विश्वे**) सर्वे जीवाः (**अमृताः**) अनुत्पन्नत्वादनादित्वान्मरणधर्मरहिताः प्राप्तमोक्षाश्च (**अमूराः**) मूढभावरहिताः (**श्रमयुवः**) श्रमेण युक्ताः। अत्र **क्विब्वचिप्रच्छि०।** (उणा०२.५४) इति क्विब्दीर्घौ भवतः। (**पदव्यः**) सुखं प्राप्ताः (**धियन्धाः**) बुद्धिं कर्म वा दधति (**तस्थुः**) तिष्ठन्ति। (**पदे**) प्राप्तव्ये (**परमे**) सर्वोत्कृष्टे (**चारु**) श्रैष्ठ्यं यथा स्यात्तथा (**अग्नेः**) परमेश्वरस्य॥ २॥

अन्वयः-ये विश्वे अमृता अमूराः श्रमयुवः पदव्यो धियंधा मोक्षमिच्छन्तो मनुष्या अस्मे वत्सं सन्तं वेदचतुष्टयं परि विन्दँस्तेऽग्नेश्चारु परमे पदे तस्थुर्ये च न विदुस्ते तद्ब्रह्म पदं नाप्नुवन्ति॥ २॥

भावार्थः-सर्वे जीवा अनादयः सन्त्येतेषां मध्ये ये मनुष्या देहधारिणः सन्ति, तान् प्रतीश्वर उपदिशति। हे मनुष्याः! सर्वे यूयं वेदानधीत्याध्याप्याज्ञानविरहा ज्ञानवन्तः पुरुषार्थिनो भूत्वा सुखिनो भवत, न हि वेदार्थज्ञानेन विना कश्चिदपि मनुष्यः सर्वविद्याः प्राप्तुं शक्नोति, तस्माद् वेदविद्यावृद्धिं सम्यक् कुरुत॥ २॥

पदार्थः-जो (**विश्वे**) सब (**अमृताः**) उत्पत्तिमृत्युरहित अनादि (**अमूराः**) मूढ़तादि दोषरहित (**श्रमयुवः**) श्रम से युक्त (**पदव्यः**) सुखों को प्राप्त (**धियन्धाः**) बुद्धि वा कर्म को धारण करनेवाले (**इच्छन्तः**) श्रद्धालु होकर मनुष्य (**अस्मे**) हम लोगों को (**वत्सम्**) पुत्रवत् सुखों में निवास करती हुई प्रसिद्ध चारों वेद से युक्त वाणी के (**सन्तम्**) वर्त्तमान को (**परिविन्दन्**) प्राप्त करते हैं, वे (**अग्नेः**) (**चारु**) श्रेष्ठ जैसे हो वैसे परमात्मा के (**परमे**) सबसे उत्तम (**पदे**) प्राप्त होने योग्य सुखरूपी मोक्ष पद में (**तस्थुः**) स्थित होते हैं और जो नहीं जानते, वे उस ब्रह्म पद को प्राप्त नहीं होते॥ २॥

भावार्थः-सब जीव अनादि हैं, जो इनके बीच मनुष्य देहधारी हैं, उनके प्रति ईश्वर उपदेश करता है कि हे मनुष्यो! तुम सब लोग वेदों को पढ़-पढ़ा कर अज्ञान से ज्ञानवाले पुरुषार्थी होके सुख भोगो, क्योंकि वेदार्थज्ञान के विना कोई भी मनुष्य सब विद्याओं को प्राप्त नहीं हो सकता, इससे तुम लोगों को वेदविद्या की वृद्धि निरन्तर करनी उचित है॥२॥

पुनस्तं किमर्थमधीयीरन्नित्युपदिश्यते॥

फिर वे उन वेदों को किसलिये पढ़ें, इस विषय का उपदेश अगले मन्त्र में किया है॥

तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान्।
नामानि चिद्दधिरे यज्ञियान्यसूदयन्त तन्वः सुजाताः॥३॥

तिस्रः। यत्। अग्ने। शरदः। त्वाम्। इत्। शुचिम्। घृतेन। शुचयः। सपर्यान्। नामानि। चित्। दधिरे। यज्ञियानि। असूदयन्त। तन्वः। सुऽजाताः॥३॥

पदार्थः-(**तिस्रः**) त्रित्वसंख्याविशिष्टान् (**यत्**) ये (**अग्ने**) विद्वन् (**शरदः**) शरदृत्वन्तान् संवत्सरान् (**त्वाम्**) तम् (**इत्**) एव (**शुचिम्**) पवित्रम् (**घृतेन**) आज्येनोदकेन वा (**शुचयः**) पवित्राः सन्तः (**सपर्यान्**) परिचरेयुः सेवेरन् (**नामानि**) अर्थज्ञानक्रियासहिताः संज्ञाः (**चित्**) अपि (**दधिरे**) दधति (**यज्ञियानि**) कर्मोपासनाज्ञानसम्पादनार्हाणि कर्माणि (**असूदयन्त**) संचालयेयुः (**तन्वः**) तनूः (**सुजाताः**) विद्याक्रियासुकौशले सुष्ठु प्रसिद्धाः॥३॥

अन्वयः-हे अग्ने! यद्ये शुचयः सुजाता मनुष्याः शुचिं त्वां तिस्रः शरदः सपर्यान् त इद्यज्ञियानि नामानि दधिरे चिदपि घृतेन तन्वस्तनूरसूदयन्त॥३॥

भावार्थः-नहि कस्यचिदपि वेदाननधीत्य विद्याः प्राप्नोति, नहि विद्याभिर्विना मनुष्यजन्मसाफल्यं पवित्रता च जायते, तस्मात्सर्वैर्मनुष्यैरेतत्कर्म प्रयत्नेन सदैवानुष्ठेयम्॥३॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**यत्**) जो (**शुचयः**) पवित्र (**सुजाताः**) विद्याक्रियाओं में उत्तम कुशलता से प्रसिद्ध मनुष्य (**शुचिम्**) पवित्र (**त्वाम्**) तुझको (**तिस्रः**) तीन (**शरदः**) शरद् ऋतुवाले संवत्सरों को (**सपर्यान्**) सेवन करें वे (**इत्**) ही (**यज्ञियानि**) कर्म्म, उपासना और ज्ञान को सिद्ध करने योग्य व्यवहार (**नामानि**) अर्थज्ञान सहित संज्ञाओं को (**दधिरे**) धारण करें (**चित्**) और (**घृतेन**) घृत वा जलों के साथ (**तन्वः**) शरीरों को भी (**असूदयन्त**) चलावें॥३॥

भावार्थः-कोई भी मनुष्य वेदविद्या के विना पढ़े विद्वान् नहीं हो सकता और विद्याओं के विना निश्चय करके मनुष्य जन्म की सफलता तथा पवित्रता नहीं होती, इसलिये सब मनुष्यों को उचित है कि धर्म्म का सेवन नित्य करें॥३॥

वेदानामध्येतारः कीदृशा भवेयुरित्युपदिश्यते॥

वेदों के पढ़नेवाले किस प्रकार के हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः॥
विदन्मर्तो नेमधिता चिकित्वान्ग्निं पदे परमे तस्थिवांसम्॥४॥

आ। रोदसी इति। बृहती इति। वेविदानाः। प्र। रुद्रियाः। जभ्रिरे। यज्ञियासः। विदत्। मर्तः। नेमऽधिता। चिकित्वान्। अग्निम्। पदे। परमे। तस्थिऽवांसम्॥४॥

पदार्थः-(**आ**) अभितः (**रोदसी**) भूमिराज्यं विद्याप्रकाशं वा (**बृहती**) महत्यौ (**वेविदानाः**) अतिशयेन विज्ञानवन्तः (**प्र**) प्रकृष्टार्थे (**रुद्रिया**) शत्रून् दुष्टान् रोदयतां सम्बन्धिनो रुद्राः (**जभ्रिरे**) भरन्ति पुष्णन्ति (**यज्ञियासः**) यज्ञसम्पादने योग्याः (**विदत्**) जानाति (**मर्त्तः**) मनुष्यः (**नेमधिता**) नेमाः प्राप्ताः पदार्था धिता हिता येन सः। अत्र **सुधितवसुधितनेमधितधिष्वधिषीय च।** (अष्टा०७.४.४५) इति छन्दसि निपातनात् क्तप्रत्यये हित्वं प्रतिषिध्यते। **सुपां सुलुगिति** सोः स्थान आकारादेशः। (**चिकित्वान्**) ज्ञानवान् (**अग्निम्**) परमेश्वरम् (**पदे**) प्राप्तव्ये गुणसमूहे (**परमे**) सर्वोत्कृष्टे (**तस्थिवांसम्**) स्थितम्॥४॥

अन्वयः-ये रुद्रिया वेविदाना यज्ञियासो विद्वांसो बृहती रोदसी आजभ्रिरे सर्वाविद्याविदंस्तेषां सकाशाद् विज्ञानं प्राप्य यश्चिकित्वान् नेमधिता मर्त्तः परमे पदे तस्थिवांसमग्निं प्रविदत् स सुखी जायते॥४॥

भावार्थः-मनुष्यैर्वेदविदां सकाशात् सुनियमेन वेदविद्यां प्राप्य विद्वांसो भूत्वा परमेश्वरं तत्सृष्टं च विज्ञायाऽन्येभ्यो विद्या सततं दातव्याः॥४॥

पदार्थः-जो (**रुद्रिया**) दुष्ट शत्रुओं को रुलानेवाले के सम्बन्धी (**वेविदानाः**) अत्यन्त ज्ञानयुक्त (**यज्ञियासः**) यज्ञ की सिद्धि करने वाले विद्वान् लोग (**बृहती**) बड़े (**रोदसी**) भूमि राज्य वा विद्या प्रकाश को (**आजभ्रिरे**) धारण-पोषण करते और समग्र विद्याओं को जानते हैं, उनसे विज्ञान को प्राप्त होकर जो (**चिकित्वान्**) ज्ञानवान् (**नेमधिता**) प्राप्त पदार्थ को धारण करनेवाला (**मर्त्तः**) मनुष्य (**परमे**) सबसे उत्तम (**पदे**) प्राप्त करने योग्य मोक्ष पद में (**तस्थिवांसम्**) स्थित हुए (**अग्निम्**) परमेश्वर को (**प्रविदत्**) जानता है, वही सुख भोगता है॥४॥

भावार्थः-मनुष्यों को चाहिये कि वेद के जाननेवाले विद्वानों से उत्तम नियम द्वारा वेदविद्या को प्राप्त हो विद्वान् होके परमेश्वर तथा उसके रचे हुए जगत् को जान अन्य मनुष्यों के लिये निरन्तर विद्या देवें॥४॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वह विद्वान् कैसे हों, यह विषय अगले मन्त्र में कहा है॥

संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन्।

रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः॥५॥१७॥

सम्ऽजानानाः। उप। सीदन्। अभिऽज्ञु। पत्नीऽवन्तः। नमस्यम्। नमस्यन्निति नमस्यन्। रिरिक्वांसः। तन्वः। कृण्वत। स्वाः। सखा। सख्युः। निऽमिषि। रक्षमाणाः॥५॥

पदार्थः-(**संजानानाः**) सम्यग्जानन्तः। अत्र व्यत्ययेनात्मनेपदम्। (**उप**) सामीप्ये (**सीदन्**) तिष्ठन्ति (**अभिज्ञु**) अभितो जानुनी यस्य तम् (**पत्नीवन्तः**) प्रशस्ता विद्यायुक्ता यज्ञसम्बन्धिन्यः स्त्रियो विद्यन्ते येषान्ते (**नमस्यम्**) परमेश्वरमध्यापकं विद्वांसं वा नमस्कारार्हम् (**नमस्यन्**) सत्कुर्वन्ति (**रिरिक्वांसः**) अधर्माद्विनिर्गताः। अत्र न्यङ्क्वादित्वात्कुत्वम्। (**तन्वः**) बलारोग्ययुक्तास्ते (**कृण्वते**) कुर्वन्ति (**स्वाः**) स्वकीयाः (**सखा**) सुहृत् (**सख्युः**) सुहृदः (**निमिषि**) विद्याधिक्याय स्पर्धिते सन्तते व्यवहारे (**रक्षमाणाः**) रक्षां कुर्वन्तः॥५॥

अन्वयः-ये संजानानाः पत्नीवन्तो धर्मविद्ये रक्षमाणा अधर्माद्रिरिक्वांसो विद्वांसोऽभिज्ञूपसीदन्नमस्यं नमस्यन्निमिषि सख्युः सखेव स्वास्तन्वः कृण्वत ते भाग्यशालिनो भवन्ति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहीश्वरविदुषोः सत्कारेण विना कस्यचिद् विद्यासुखानि प्रजायन्ते, तस्मात् सत्कर्त्तुं योग्यानामेव सत्कारः सदैव कर्तव्यः॥५॥

पदार्थः-जो (**संजानानाः**) अच्छी प्रकार जानते हुए (**पत्नीवन्तः**) प्रशंसा योग्य विद्यायुक्त यज्ञ की जाननेवाली स्त्रियों के सहित (**रक्षमाणाः**) धर्म और विद्या की रक्षा करते हुए विद्वान् लोग (**रिरिक्वांसः**) विशेष करके पापों से पृथक् (**अभिज्ञु**) जङ्घाओं से (**उपसीदन्**) सन्मुख समीप बैठना जानते हैं तथा (**नमस्यम्**) नमस्कार करने योग्य परमेश्वर और पढ़ानेवाले विद्वान् का (**नमस्यन्**) सत्कार करते और (**निमिषि**) अधिक विद्या के होने के लिये स्पर्द्धायुक्त निरन्तर व्यवहार में क्षण-क्षण में (**सख्युः**) मित्र के (**सखा**) मित्र के समान (**स्वाः**) अपने (**तन्वः**) शरीरों को (**कृण्वत**) बलयुक्त और रोगरहित करते हैं, वे मनुष्य भाग्यशाली होते हैं॥५॥

भावार्थः-इस मन्त्र में श्लेष और वाचकलुप्तोपमालङ्कार हैं।[९] ईश्वर और विद्वान् के सत्कार करने के विना किसी मनुष्य को विद्या के पूर्ण सुख नहीं हो सकते, इसलिए मनुष्यों को चाहिये कि सत्कार करने ही योग्य मनुष्यों का सत्कार और अयोग्यों का असत्कार करें॥५॥

एते विद्यया किं विदित्वा वर्त्तत इत्युपदिश्यते॥

इन विद्वानों को विद्या से किसको जान के वर्त्तना योग्य है, इस विषय का उपदेश अगले मन्त्र में किया है॥

---

९. संस्कृतभावार्थ में श्लेष अलङ्कार नहीं दिया है। सं०

त्रि स॒प्त यद्गुह्या॑नि॒ त्वे इत् प॒दावि॑दन् निहि॒ता य॒ज्ञिया॑सः।
तेभी॑ रक्षन्ते अ॒मृतं॑ स॒जोषा॑: प॒शूँश्च॑ स्था॒तॄँश्चर॑थं च पाहि॥ ६॥

त्रिः। स॒प्त। यत्। गुह्या॑नि। त्वे इति॑। इत्। पदा॒। अ॒वि॒द॒न्। निऽहि॑ता। य॒ज्ञिया॑सः। तेभिः॑। र॒क्ष॒न्ते॒। अ॒मृत॑म्। स॒ऽजोषा॑:। प॒शून्। च। स्था॒तॄन्। चर॑थम्। च॒। पा॒हि॥ ६॥

पदार्थः-(**त्रि**) त्रिवारं श्रवणमननिदिध्यासनैः (**सप्त**) साङ्गोपाङ्गाँश्चतुरो वेदान् त्रीन् क्रियाकौशल-विज्ञानपुरुषार्थान् (**यत्**) यानि (**गुह्यानि**) गुप्तानि सम्यक् स्वीकर्त्तव्यानि (**त्वे**) केचित् (**इत्**) अपि (**पदा**) प्राप्तुमर्हाणि (**अविदन्**) लभन्ते (**निहिता**) निधिरूपाणि (**यज्ञियासः**) यज्ञसम्पादने योग्याः (**तेभिः**) तैः (**रक्षन्ते**) पालयन्ति (**अमृतम्**) धर्मार्थकाममोक्षाख्यममृतसुखम् (**सजोषाः**) समानप्रीतिसेविनः (**पशून्**) पशुवद्वर्त्तमानान् मूर्खत्वयुक्तान् गवादीन् वा (**च**) समुच्चये (**स्थातॄन्**) भूम्यादिस्थावरान् (**चरथम्**) मनुष्यादिजङ्गमम् (**च**) समुच्चये (**पाहि**) रक्ष॥ ६॥

अन्वयः-हे मनुष्याः! यथा त्वे यज्ञियासो यद्यानि निहिता गुह्यानि सप्त पदानि त्रिरंविन्दँस्तथा त्वमप्येतानि लभस्व। हे जिज्ञासो! यथैते सजोषास्तेभिरमृतं पशून् चाद् भृत्यादीन् स्थातॄन् चाद्राज्यरत्नादीꣳश्चरथं जङ्गमं चात् पुत्रकलत्रादीन् रक्षन्ते, तथैतानि त्वामित् पाहि॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विदुषामनुकरणं कार्य्यं न किलाऽविदुषाम्। यथा सत्पुरुषाः सत्कार्येषु प्रवर्त्तन्ते दुष्टानि कर्माणि त्यजन्ति तथैव सर्वमनुष्ठेयमिति॥ ६॥

पदार्थः-हे विद्वान् मनुष्यो! जैसे (**त्वे**) कोई (**यज्ञियासः**) यज्ञ के सिद्ध करनेवाले विद्वान् (**यत्**) जिन (**निहिता**) स्थापित विद्यादि धनरूप (**गुह्यानि**) गुप्त वा सब प्रकार स्वीकार करने (**पदा**) प्राप्त होने योग्य (**सप्त**) सात अर्थात् चार वेदों और तीन क्रियाकौशल, विज्ञान और पुरुषार्थों को (**त्रिः**) श्रवण, मनन और विचार करने से (**अविदन्**) प्राप्त करते हैं, वैसे तुम भी इनको प्राप्त होओ। हे जानने की इच्छा करनेहारे सज्जन! जैसे (**सजोषाः**) समान प्रीति के सेवन करनेवाले (**तेभिः**) उन्हींसे (**अमृतम्**) धर्म, अर्थ काम और मोक्षरूपी सुख (**पशून्**) पशुओं के तुल्य मूर्खत्वयुक्त मनुष्य वा पशु आदि (**च**) और भृत्य आदि (**स्थातॄन्**) भूमि आदि स्थावर (**च**) और राज्य रत्नादि सम्पदा (**चरथम्**) मनुष्य आदि जङ्गम (**च**) और स्त्री पुत्र आदि की (**रक्षन्ते**) रक्षा करते हैं, वैसे उनकी तू (**इत्**) भी (**पाहि**) रक्षा कर॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिए कि विद्वानों का अनुकरण करें, मूर्खों का नहीं। जैसे सज्जन पुरुष उत्तम कार्यों में प्रवृत्त होते और दुष्ट कर्मों का त्याग कर देते हैं, वैसा ही सब मनुष्य करें॥ ६॥

पुनरीश्वरगुणा उपदिश्यन्ते॥

फिर भी अगले मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

वि॒द्वाँ अ॑ग्ने व॒युना॑नि क्षिती॒नां व्या॑नु॒षक्छु॒रुधो॑ जी॒वसे॑ धाः।

अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट्॥७॥

विद्वान्। अग्ने। वयुनानि। क्षितीनाम्। वि। आनुषक्। शुरुधः। जीवसे। धाः। अन्तःऽविद्वान्। अध्वनः। देवऽयानान्। अतन्द्रः। दूतः। अभवः। हविःऽवाट्॥७॥

पदार्थः-(**विद्वान्**) यः सर्वं वेत्ति (**अग्ने**) सर्वसुखप्रापक! (**वयुनानि**) विज्ञानानि (**क्षितीनाम्**) मनुष्याणाम् (**वि**) विविधार्थे (**आनुषक्**) आनुकूल्ये (**शुरुधः**) प्राप्तव्यानि सुखानि (**जीवसे**) जीवितुम् (**धाः**) दधासि (**अन्तर्विद्वान्**) योऽन्तर्वेत्ति सः (**अध्वनः**) मार्गान् (**देवयानान्**) यान्ति यैस्तान् देवानाम् विदुषां गमनाधिकरणान् (**अतन्द्रः**) अनलसः (**दूतः**) विज्ञापकः (**अभवः**) भवति (**हविर्वाट्**) विज्ञानादिप्रापकः॥७॥

अन्वयः-हे अग्ने! यतोऽन्तर्विद्वान् बहिर्विद्वानतन्द्रो हविर्वाट् त्वं क्षितीनां वयुनानि जीवसे शुरुध आनुषक् विधा देवयानानध्वनो दूतोऽभवस्तस्मात्पूज्यतमोऽसि॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। यः प्रार्थितो सेवित ईश्वरो विद्वान् वा धर्म्यमार्गं विज्ञानं प्रदर्श्य सुखानि ददाति स कथं न सेवनीयः॥७॥

पदार्थः-हे (**अग्ने**) सब सुख प्राप्त करनेवाले जगदीश्वर! जिस कारण (**अन्तर्विद्वान्**) अन्तःकरण के सब व्यवहारों को तथा (**विद्वान्**) बाहर के कार्य्यों को जाननेवाले (**अतन्द्रः**) आलस्यरहित (**हविर्वाट्**) विज्ञान आदि प्राप्त करानेवाले आप (**क्षितीनाम्**) मनुष्यों के (**वयुनानि**) विज्ञानों को (**जीवसे**) जीवन के लिये (**शुरुधः**) प्राप्त करने योग्य सुखों को (**आनुषक्**) अनुकूलता पूर्वक (**विधाः**) विविध प्रकार से धारण करते हो, वेदद्वारा (**देवयानान्**) विद्वानों के जाने-आनेवाले (**अध्वनः**) मार्गों के (**दूतः**) विज्ञान करानेवाले (**अभवः**) होते हो, इससे आपका सत्कार हम लोग अवश्य करें॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो प्रार्थना वा सेवन किया हुआ ईश्वर धर्ममार्ग वा विज्ञान को दिखाकर सुखों को देता है, उनका सेवन अवश्य करना चाहिये॥७॥

पुनस्ते ब्रह्मविदो विद्वांसः कीदृशा भवन्तीत्युपदिश्यते॥

फिर वे ब्रह्म के जाननेवाले विद्वान् कैसे होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन्।
विदद्गव्यं सरमा दृळहमूर्वं येना नु कं मानुषी भोजते विट्॥८॥

सुऽआध्यः। दिवः। आ। सप्त। यह्वीः। रायः। दुरः। वि। ऋतऽज्ञाः। अजानन्। विदत्। गव्यम्। सरमा। दृळहम्। ऊर्वम्। येन। नु। कम्। मानुषी। भोजते। विट्॥८॥

पदार्थः-(**स्वाध्यः**) ये सुष्ठु सम्यक् सर्वेषां कल्याणं ध्यायन्ति ते (**दिवः**) पूर्वोक्तविद्याः (**आ**) अभितः (**सप्त**) एतत्संख्याकान् (**यह्वीः**) महतीः (**रायः**) अनुत्तमानि धनानि (**दुरः**) दूर्वन्ति सर्वाणि

दुःखानि यैस्तान् विद्याप्रवेशस्थान् द्वारान् **(वि)** विशेषार्थे **(ऋतज्ञाः)** सत्यविदः **(अजानन्)** जानन्ति **(विदत्)** लभते **(गव्यम्)** गोभ्यः पशुभ्य इन्द्रियेभ्यो वा हितम् **(सरमा)** या सरान् बोधान् मिमीते सा **(दृढम्)** **(उर्वम्)** दोषहिंसनम् **(येन)** पुरुषार्थेन **(नु)** शीघ्रम् **(कम्)** सुखम् **(मानुषी)** मानुषाणामियम् **(भोजते)** भुङ्क्ते। अत्र विकरणव्यत्ययेन शप्। **(विट्)** प्रजाः॥८॥

अन्वयः-हे मनुष्या! यूयं यथा स्वाध्य ऋतज्ञाविद्वांसो येन यह्वीः सप्त दिवो रायो दुरी व्यजानन् येन सरमा मानुषी विट् दृढमूर्व गव्यं सुखं नु विदत्कं भोजते तथैव तत्कर्म सदा सेवध्वम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याणामियं योग्यतास्ति यादृशीं विद्यां स्वयं प्राप्नुयात् तादृशीं सर्वेभ्यो नैष्कापट्येन सदा दद्युः यतो मनुष्याः सर्वाणि सुखानि लभेरन्॥८॥

पदार्थः-हे मनुष्यो! जैसे-जैसे **(स्वाध्यः)** सबके कल्याण को यथावत् विचारने **(ऋतज्ञाः)** सत्य के जाननेवाले **(येन)** जिस पुरुषार्थ से **(यह्वीः)** बड़ी (बड़ी) **(सप्त)** सात संख्यावाली **(दिवः)** सूर्य के तुल्य (पूर्वोक्त मन्त्र ६ में वर्णित) विद्या **(रायः)** अति उत्तम धनों के **(दुरः)** प्रवेश के स्थानों को **(व्यजानन्)** जानते तथा **(सरमा)** बोध के समान करनेवाली **(मानुषी)** मनुष्यों की **(विट्)** प्रजा **(दृढम्)** दृढ़ निश्चल **(ऊर्वम्)** दोषों का नाश **(गव्यम्)** पशु और इन्द्रियों के हितकारक सुख को **(नु)** शीघ्र **(विदत्)** प्राप्त होती है, वैसे इस कर्म का सदा सेवन करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को यह योग्य है कि जैसे विद्या को पढ़े, वैसी ही कपट-छल छोड़ कर सब मनुष्यों को पढ़ावें और उपदेश करें, जिससे मनुष्य लोग सब सुखों को प्राप्त हो॥८॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम्।
मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः॥९॥

आ। ये। विश्वा। सुऽअपत्यानि। तस्थुः। कृण्वानासः। अमृतऽत्वाय। गातुम्। मह्ना। महत्ऽभिः। पृथिवी। वि। तस्थे। माता। पुत्रैः। अदितिः। धायसे। वेरिति। वेः॥९॥

पदार्थः-**(आ)** समन्तात् **(ये)** विद्वांसः **(विश्वा)** सर्वाणि **(स्वपत्यानि)** शोभनशिक्षायुक्तान् पुत्रादीन् **(तस्थुः)** तिष्ठन्ति **(कृण्वानासः)** कुर्वन्तः **(अमृतत्वाय)** मोक्षादिसुखानां भावाय **(गातुम्)** बोधसमूहम् **गातुरिति पदनामसु पठितम्।** (निघं०४.१) **(मह्ना)** महागुणसमूहेन **(महद्भिः)** महासुखकारकैर्गुणैः **(पृथिवीः)** भूमिः **(वि)** विशेषार्थे **(तस्थे)** तिष्ठामि **(मा)** उत्पादिका **(पुत्रैः)** सह **(अदितिः)** द्यौः **(धायसे)** धारणाय। अत्र बाहुलकादौणादिकोऽसुन्प्रत्ययो युट् च। **(वेः)** पक्षिण इव॥९॥

अन्वयः-यथा येऽमृतत्वाय गातुं कृण्वानासो विद्वांसो महद्भिर्गुणः सह विश्वानि स्वपत्यानि मह्ना धायसे पृथिवीव पुत्रैर्मात्रेवादितिर्मूर्त्तान् पदार्थान् वेरिवातस्थुस्तथैवैतदहं वितस्थे॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्वद्वत्स्वसंतानान् सुशिक्षाविद्या युक्तान् कृत्वा धर्मार्थकाममोक्षान् प्राप्यताम्॥९॥

पदार्थः-जैसे **(ये)** जो **(अमृतत्वाय)** मोक्षादि सुख होने के लिये **(गातुम्)** भूमि के समान बोध के कोश को **(कृण्वानासः)** सिद्ध करते हुए विद्वान् लोग **(महद्भिः)** अतिसुख करनेवाले गुणों के साथ **(विश्वा)** सब **(स्वपत्यानि)** उत्तम शिक्षायुक्त पुत्रादिकों को **(मह्ना)** बड़े-बड़े गुणों से **(धायसे)** धारण के लिये **(पृथिवी)** भूमि के तुल्य **(पुत्रैः)** पुत्रों के साथ **(माता)** माता के समान **(अदितिः)** प्रकाशस्वरूप सूर्य स्थूल पदार्थों में **(वेः)** व्याप्ति करनेवाले पक्षी के समान **(आतस्थुः)** स्थित होते हैं, वैसे मैं इस कर्म का **(वितस्थे)** विशेष करके ग्रहण करता हूं॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को विद्वानों के समान अपने सन्तानों को विद्या शिक्षा से युक्त करके धर्म, अर्थ, काम और मोक्ष रूपी सुखों को प्राप्त करना चाहिये॥९॥

पुनस्ते किं धरन्तीत्युपदिश्यते॥

फिर वे विद्वान् किसको धारण करते हैं, यह विषय अगले मन्त्र में कहा है॥

अधि॒ श्रिय॑ं नि दधु॒श्चारु॑मस्मिन् दि॒वो यद॒क्षी अ॒मृता॒ अकृ॑ण्वन्।
अध॑ क्षरन्ति॒ सिन्ध॑वो॒ न सृ॒ष्टाः प्र नीची॑रग्ने॒ अरु॑षीरजानन्॥१०॥१८॥

अधि॑। श्रिय॑म्। नि। दधुः। चारु॑म्। अ॒स्मि॒न्। दि॒वः। यत्। अ॒क्षी इति॑। अ॒मृता॑ः। अकृ॑ण्वन्। अध॑। क्ष॒र॒न्ति॒। सिन्ध॑वः। न। सृ॒ष्टाः। प्र। नीची॑ः। अ॒ग्ने॒। अरु॑षीः। अ॒जा॒न॒न्॥१०॥

पदार्थः-**(अधि)** अधिकार्थे **(श्रियम्)** विद्याराज्यैश्वर्यशोभाम् **(नि)** नितराम् **(दधु)** धरन्ति **(चारुम्)** श्रेष्ठं व्यवहारम् **(अस्मिन्)** लोके **(दिवः)** विज्ञानात्सूर्य्यप्रकाशाद्वा **(यत्)** ये **(अक्षी)** अश्नुवते व्याप्नुवन्ति याभ्यां बाह्याभ्यन्तरविद्यायुक्ताभ्यान्ते **(अमृताः)** मरणधर्मरहिताः प्राप्तमोक्षा वा **(अकृण्वन्)** कुर्वन्ति **(अध)** अनन्तरम्। अथेत्यस्यार्थे शब्दारम्भेऽधेत्यव्ययम्। **(क्षरन्ति)** संवर्षन्ति **(सिन्धवः)** नद्यः **(न)** इव **(सृष्टाः)** निर्मिताः **(प्र)** क्रियायोगे **(नीचीः)** नितरां सेव्याः **(अग्ने)** विद्वान् **(अरुषीः)** उषस इव सर्वसुखप्रापिका विद्याः क्रिया वा **(अजानन्)** जानीयुः॥१०॥

अन्वयः-हे अग्ने! यथा यद्येऽमृता विद्वांसोऽस्मिन् श्रियमधि निदधुश्चारुं दिवोऽक्षी अकृण्वन् सृष्टाः सिन्धवो नाध सुखानि क्षरन्ति नीचीररुषीः प्राजानन् तथात्वमप्येतान्निधेहि कुरु देहि प्रजानीहि॥१०॥

भावार्थः-अत्रोपमा (वाचक)लुप्तोपमालङ्कारौ। हे मनुष्या! यथायोग्यं विदुषामाचरणं स्वीकुरुत, नैवाविदुषाम्। यथा नद्यः सुखानि सृजन्ति तथा सर्वेभ्यः सर्वाणि सुखानि सृजत॥१०॥

अत्रेश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति द्विसप्ततितमं ७२ सूक्तमष्टादशो १८ वर्गश्च समाप्तः॥

पदार्थः–जैसे (**यत्**) जो (**अमृताः**) मरण–जन्म रहित मोक्ष को प्राप्त हुए विद्वान् लोग (**अस्मिन्**) इस लोक में (**श्रियम्**) विद्या तथा राज्य के ऐश्वर्य की शोभा को (**अधि निदधुः**) अधिक धारण (**चारुम्**) श्रेष्ठ व्यवहार (**दिव्यः**) प्रकाश और विज्ञान से (**अक्षी**) बाहर भीतर से देखने की विद्याओं को (**अकृण्वन्**) सिद्ध करते (**सृष्टाः**) उत्पन्न की हुई (**सिन्धवः**) नदियों के (**न**) समान (**अध**) अनन्तर सुखों को (**क्षरन्ति**) देते हैं (**नीचीः**) निरन्तर सेवन करने तथा (**अरुषीः**) प्रभात के समान सब सुख प्राप्त करनेवाली विद्या और क्रिया को (**प्र अजानन्**) अच्छा जानते हैं, वैसे हे (**अग्ने**) विद्वान् मनुष्य! तू भी यथाशक्ति सब कामों को सिद्ध कर॥१०॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! तुम लोग यथायोग्य विद्वानों के आचरण को स्वीकार करो और अविद्वानों का नहीं। तथा जैसे नदी सुखों के होने की हेतु होती है, वैसे सबके लिये सुखों को उत्पन्न करो॥१०॥

इस सूक्त में ईश्वर और विद्वानों के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह बहत्तरवां ७२ सूक्त और अठारहवां १८ वर्ग समाप्त हुआ॥

अथ दशर्चस्य त्रिसप्ततितमस्य सूक्तस्य पराशर ऋषिः। अग्निर्देवता। १,२,४,५,७,१०
निचृत्त्रिष्टुप्। ३,६ त्रिष्टुप्। ८ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्गुणा उपदिश्यन्ते॥

अब तिहत्तरवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में विद्वान् के गुणों का उपदेश किया है॥

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत्॥ १॥

रयिः। नः। यः। पितृऽवित्तः। वयःऽधाः। सुऽप्रनीतिः। चिकितुषः। न। शासुः। स्योनऽशीः। अतिथिः। न। प्रीणानः। होताऽइव। सद्म। विधतः। वि। तारीत्॥ १॥

पदार्थः-(**रयिः**) निधिसमूहः (**न**) इव (**यः**) विद्वान् (**पितृवित्तः**) पितृभ्योऽध्यापकेभ्यो वित्तः प्रतीतो विज्ञातः (**वयोधाः**) यो वयो जीवनं दधातीति (**सुप्रणीतिः**) शोभना प्रशस्ता नीतिर्यस्य सः (**चिकितुषः**) प्रशस्तविद्यस्य (**न**) इव (**शासुः**) शासनकर्त्तोपदेष्टा (**स्योनशीः**) यः स्योनेषु सुखेषु विद्याधर्मपुरुषार्थेषु शेत आस्ते सः (**अतिथिः**) महाविद्वान् भ्रमणशील उपदेष्टा परोपकारी मनुष्यः (**न**) इव (**प्रीणानः**) प्रसन्नः सत्यासत्यविज्ञापकः (**होतेव**) दाता यथा ग्रहीता (**सद्म**) गृहवद् वर्त्तमानं शरीरं वा (**विधतः**) यो विधानं करोति तस्य (**वि**) विशेषे (**तारीत्**) सुखानि ददाति॥ १॥

अन्वयः-हे मनुष्या! यूयं यः पितृवित्तो रयिर्न वयोधाः सुप्रणीतिश्चिकितुषः शासुर्न स्योनशीः प्रीणानोऽतिथिर्न विधतो होतेव सद्म वितारीत् तं नित्यं भजतोपकुरुत वा॥ १॥

भावार्थः-अत्रोपमालङ्कारः। न खलु विद्याधर्मानुष्ठानविद्वत्सङ्गसुविचारैर्विना कस्यचिन्मनुष्यस्य विद्यासुशिक्षासाक्षात्कारो विद्युदादिपदार्थविज्ञानं च जायते, न किल नित्यं भ्रमणशीलानां विदुषामतिथीनामुपदेशेन विना कश्चिन्निर्भ्रमो भवितुं शक्नोति, तस्मादेतत् सदान्वाचरणीयम्॥ १॥

पदार्थः-हे मनुष्यो! तुम (**यः**) जो विद्वान् (**पितृवित्तः**) पिता, पितामहादि अध्यापकों से प्रतीत विद्यायुक्त हुए (**रयिः**) धनसमूह के (**न**) समान (**वयोधाः**) जीवन को धारण करने (**सुप्रणीतिः**) उत्तम नीतियुक्त तथा (**चिकितुषः**) उत्तम विद्यावाले (**शासुः**) उपदेशक मनुष्य के (**न**) समान (**स्योनशीः**) विद्या, धर्म्म और पुरुषार्थयुक्त सुख में सोने (**प्रीणानः**) प्रसन्न तथा (**अतिथिः**) महाविद्वान् भ्रमण और उपदेश करनेवाले परोपकारी मनुष्य के (**न**) समान (**विधतः**) वा सब व्यवहारों को विधान करता है, उसके (**होतेव**) देने-लेनेवाले (**सद्म**) घर के तुल्य वर्त्तमान शरीर का (**वि तारीत्**) सेवन और उससे उपकार लेके सबको सुख देता है, उसका नित्य सेवन और उससे परोपकार कराया करो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। विद्याधर्मानुष्ठान, विद्वानों का संग तथा उत्तमविचार के विना किसी मनुष्य को विद्या और सुशिक्षा का साक्षात्कार, पदार्थों का ज्ञान नहीं होता और निरन्तर भ्रमण

करने वाले अतिथि विद्वानों के उपदेश के विना कोई मनुष्य सन्देहरहित नहीं हो सकता, इससे सब मनुष्यों को अच्छा आचरण करना चाहिये॥९॥

पुनर्विद्वान् कीदृशः स्यादित्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत्॥२॥

देवः। न। यः। सविता। सत्यऽमन्मा। क्रत्वा। निऽपाति। वृजनानि। विश्वा। पुरुऽप्रशस्तः। अमतिः। न। सत्यः। आत्माऽइव। शेवः। दिधिषाय्यः। भूत्॥२॥

पदार्थः-(**देवः**) दिव्यगुणः (**न**) इव (**यः**) पूर्णविद्यः (**सविता**) सूर्य्यः (**सत्यमन्मा**) यः सत्यं मन्यते विजानाति विज्ञापयति सः (**क्रत्वा**) कर्मणा (**निपाति**) नित्यं रक्षति (**वृजनानि**) बलानि। **वृजनमिति बलनामसु पठितम्।** (निघं०२.९) (**विश्वा**) सर्वाणि (**पुरुप्रशस्तः**) बहुषु श्रेष्ठतमः (**अमतिः**) सुन्दरस्वरूपः (**दिधिषाय्यः**) धारकः पोषकः। **दधातेर्द्वित्वमित्वं षुक् च।** (उणा०३.९५) अनेनायं सिद्धः। (**भूत्**) वर्त्तते॥२॥[१०]

अन्वयः-हे मनुष्या! यूयं यः सविता देवो न सत्यमन्मा क्रत्वा विश्वा वृजनानि पाति पुरुप्रशस्तोऽमतिर्न सत्यो दिधिषाय्य आत्मेव शेवो भूत्तं सेवित्वा विद्योन्नतिं कुरुत॥२॥

भावार्थः-अत्रोपमालङ्कारः। नैव मनुष्यैः विद्वत्सङ्गेन विना सत्यविद्याबले सुखसौन्दर्य्याणि प्राप्तुं शक्यन्ते तस्मादेते नित्यं सेवनीयाः॥२॥

पदार्थः-हे मनुष्यो! तुम (**यः**) जो (**सविता**) सूर्य (**देवः**) दिव्य गुण के (**न**) समान (**सत्यमन्मा**) सत्य को जानने वा जनानेवाला विद्वान् (**क्रत्वा**) बुद्धि वा कर्म से (**विश्वा**) सब (**वृजनानि**) बलों की (**निपाति**) रक्षा करता है (**पुरुप्रशस्तः**) बहुतों में अति श्रेष्ठ (**अमतिः**) उत्तम स्वरूप के (**न**) समान (**सत्यः**) अविनाशिस्वरूप (**दिधिषाय्यः**) धारण वा पोषण करनेवाले (**आत्मेव**) आत्मा के समान (**शेवः**) सुखस्वरूप अध्यापक वा उपदेष्टा (**भूत्**) है, उसका सेवन करके विद्या की उन्नति करो॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य विद्वानों के सत्संग से सत्यविद्या, बल, सुख और सौन्दर्य आदि के प्राप्त होने को समर्थ हो सकते हैं, इससे इन दोनों का सेवन निरन्तर करें॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर भी विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

---

१०. संस्कृतपदार्थे 'न, सत्यः, आत्मेव, शेवः' इति चतुर्णानां पदानां पदार्थो नैव कृतः। सं०।

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी॥ ३॥

देवः। नः। यः। पृथिवीम्। विश्वऽधायाः। उपऽक्षेति। हितऽमित्रः। नः। राजा। पुरऽसदः। शर्मऽसदः। नः। वीराः। अनवद्या। पतिजुष्टाऽइव। नारी॥ ३॥

पदार्थः-(**देवः**) दिव्यसुखदाता (**न**) इव (**यः**) सर्वोपकारको विद्वान् (**पृथिवीम्**) भूमिम् (**विश्वधायाः**) यो विश्वं दधाति। अत्र विश्वोपपदाद्बाहुलकादसुन् युडागमश्च। (**उपक्षेति**) विजानाति निवासयति वा (**हितमित्रः**) हिता धृता मित्राः सुहृदो येन सः (**नः**) इव (**राजा**) सभाध्यक्षः (**पुरःसदः**) ये पूर्वं सीदन्ति शत्रून् हिंसन्ति वा (**शर्म्मसदः**) ये शर्मणि सुखे सीदन्ति ते (**न**) इव (**वीराः**) शत्रूणां प्रक्षेप्तारः (**अनवद्या**) विद्यासौन्दर्यादिशुभगुणयुक्ता (**पतिजुष्टेव**) पतिर्जुष्टः प्रीतः सेवितो यया तद्वत् (**नारी**) नरस्येयं विवाहिता भार्य्या॥ ३॥

अन्वयः-हे मनुष्या! यूयं यो देवः पृथिवीं न विश्वधाया हितमित्रो राजा नोपेक्षति पुरःसदः शर्म्मसदो वीरा न दुःखानि शत्रून् विनाशयति। अनवद्या पतिजुष्टेव सुखे निवासयति तं सदा समाहिता भूत्वा यथावत् परिचरत॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। न खलु मनुष्याः परमेश्वरेण विद्वद्भिः सह प्रेम्णा सह वर्त्तमानेन विना सर्वं बलं सुखं च प्राप्तुमर्हन्ति तस्मादेताभ्यां साकं प्रीतिं सदा कुर्वन्तु॥ ३॥

पदार्थः-हे मनुष्यो! तुम लोग (**यः**) जो (**देवः**) अच्छे सुखों का देनेवाला परमेश्वर वा विद्वान् (**पृथिवीम्**) भूमि के समान (**विश्वधायाः**) विश्व को धारण करनेवाले (**हितमित्रः**) मित्रों को धारण किये हुए (**राजा**) सभा आदि के अध्यक्ष के (**न**) समान (**उपक्षेति**) जानता वा निवास कराता है तथा (**पुरःसदः**) प्रथम शत्रुओं को मारने वा युद्ध के जानने (**शर्मसदः**) सुख में स्थिर होने और (**वीराः**) युद्ध में शत्रुओं के फेंकनेवाले के (**न**) समान तथा (**अनवद्या**) विद्यासौन्दर्यादि शुद्धगुणयुक्त (**नारी**) नर की स्त्री (**पतिजुष्टेव**) जो कि पति की सेवा करनेवाली के समान सुखों में निवास कराता है, उसको सदा सेवन करो॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य लोग परमेश्वर वा विद्वानों के साथ प्रेम प्रीति से वर्त्तने के विना सब बल वा सुखों को प्राप्त नहीं हो सकते, इससे इन्हींके साथ सदा प्रीति करें॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु।
अधि द्युम्नं नि दधुर्भूर्यस्मिन् भवा विश्वायुर्धरुणो रयीणाम्॥ ४॥

तम्। त्वा। नरः। दमे। आ। नित्यम्। इद्धम्। अग्ने। सचन्त। क्षितिषु। ध्रुवासु। अधि। द्युम्नम्। नि। दधुः। भूरि। अस्मिन्। भव। विश्वऽआयुः। धरुणः। रयीणाम्॥ ४॥

पदार्थः-(**तम्**) एवंभूतम् (**त्वा**) त्वां धार्मिक विद्वांसम् (**नरः**) ये विद्यां नयन्ति ते सर्वे मनुष्याः (**दमे**) दुःखोपशान्ते गृहे (**आ**) समन्तात् (**नित्यम्**) निरन्तरम् (**इद्धम्**) प्रदीप्तम् (**अग्ने**) विज्ञापक (**सचन्त**) सेवन्ताम् (**क्षितिषु**) पृथिवीषु। **क्षितिरिति पृथिवीनाम।** (निघं०१.१) (**ध्रुवासु**) दृढासु (**अधि**) उपरिभावे (**द्युम्नम्**) विद्याप्रकाशं यशोधनं वा (**नि**) नितराम् (**दधुः**) धरन्तु (**भूरि**) बहु (**अस्मिन्**) मनुष्यजन्मनि जगति वा (**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**विश्वायुः**) अखिलं जीवनं यस्य सः (**धरुणः**) धर्त्ता (**रयीणाम्**) विद्यासार्वभौमराज्यनिष्पन्नधनानाम्॥ ४॥

अन्वयः-हे अग्ने! विद्वँस्त्व रयीणां धरुणो विश्वायुस्त्वमस्मिन् सहायकारी भव भूरि द्युम्नं धेहि तं नित्यमिद्धं त्वा ध्रुवासु क्षितिषु ये नरोऽधिनिदधुर्दमे आसचन्त ताँस्त्वं सततं सेवस्व॥ ४॥

भावार्थः-हे मनुष्या! यूयं येन जगदीश्वरेणेह संसारेऽनेके पदार्था रचिता विदुषा वा ज्ञायन्ते तद्विज्ञानोपासनासङ्गेन सत्यं सुख जायत इति विजानीत॥ ४॥

पदार्थः-हे (**अग्ने**) विज्ञान करानेवाले विद्वान्! (**रयीणाम्**) विद्या और सब पृथिवी के राज्य से सिद्ध किये हुए धनों के (**धरुणः**) धारण करनेवाले (**विश्वायुः**) सम्पूर्ण जीवन युक्त आप (**अस्मिन्**) इस मनुष्य वा जगत् में सहायकारी (**भव**) हूजिये, जो (**भूरि**) बहुत (**द्युम्नम्**) विद्याप्रकाशरूपी धन और कीर्ति को धारण करते हो (**तम्**) उन (**नित्यम्**) निरन्तर (**इद्धम्**) प्रदीप्त (**त्वा**) आपको (**ध्रुवासु**) दृढ़ (**क्षितिषु**) भूमियों में जो (**नरः**) नयन करनेवाले सब मनुष्य (**अधि निदधुः**) धारण करें और (**दमे**) शान्तियुक्त घर में (**आ सचन्त**) सेवन करें, उनका सेवन नित्य किया करो॥ ४॥

भावार्थः-हे मनुष्यो! तुम लोग जिस जगदीश्वर ने अनेक पदार्थों को रच कर धारण किये हैं और जिस विद्वान् ने जाने हैं, उसकी उपासना वा सत्संग के विना किसी मनुष्य को सुख नहीं होता, ऐसा जानो॥ ४॥

तत्कृपासङ्गाभ्यां सह मनुष्यैः किं किं प्राप्यत इत्युपदिश्यते॥

परमेश्वर और विद्वानों के सङ्ग से मनुष्यों को क्या-क्या प्राप्त होता है, यह विषय अगले मन्त्र में कहा है॥

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः।
सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः॥ ५॥ १९॥

वि। पृक्षः। अग्ने। मघऽवानः। अश्युः। वि। सूरयः। ददतः। विश्वम्। आयुः। सनेम। वाजम्। सम्ऽइथेषु। अर्यः। भागम्। देवेषु। श्रवसे। दधानाः॥ ५॥

पदार्थः-(**वि**) विशेषे (**पृक्षः**) अत्युत्तमान्यन्नानि (**अग्ने**) सुखरूपविद्वन् (**मघवानः**) सत्कृतधनाः (**अश्युः**) भुञ्जते (**वि**) विशेषार्थे (**सूरयः**) मेधाविनः (**ददतः**) दानशीलाः (**विश्वम्**) अखिलम् (**आयुः**) जीवनं प्राप्तव्यं वस्तु वा (**सनेम**) संभजेम (**वाजम्**) विज्ञानम् (**समिथेषु**) संग्रामेषु। **समिथे इति संग्राम नामसु पठितम्।** (निघं०२.१७) (**अर्य्यः**) स्वामी वणिग्जनो वा। (**भागम्**) भागसमूहम् (**देवेषु**) विद्वत्सु दिव्यगुणेषु वा (**श्रवसे**) श्रूयते येन यशसा तस्मै (**दधानाः**) धरन्तः॥५॥

अन्वयः-हे अग्ने! यथाऽर्यो भागं मघवानो ददतः सूरयः समिथेषु देवेषु वाजं दधानाः श्रवसे पृक्षो विश्वामायुश्च व्यश्युस्तथा वयमपि विसनेम॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरीश्वरविद्वत्सहायपुरुषार्थाभ्यां सर्वाणि सुखानि प्राप्यन्ते नान्यथेति॥५॥

पदार्थः-हे (**अग्ने**) सुखस्वरूप विद्वान्! आपके उपदेश से जैसे (**अर्य्यः**) स्वामी वा वैश्य (**भागम्**) सेवनीय पदार्थों के समान (**मघवानः**) सत्कारयुक्त धनवाले (**ददतः**) दानशील (**सूरयः**) मेधावी लोग (**समिथेषु**) संग्रामों तथा (**देवेषु**) विद्वान् वा दिव्यगुणों में (**वाजम्**) विज्ञान को (**दधानाः**) धारण करते हुए (**श्रवसे**) श्रवण करने योग्य कीर्ति के लिये (**पृक्षः**) अत्युत्तम अन्न और (**विश्वम्**) सब (**आयुः**) जीवन को (**व्यश्युः**) विशेष करके भोगें वा (**वि सनेम**) विशेष करके सेवन करें, वैसे हम भी किया करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य ईश्वर और विद्वानों के सहाय और अपने पुरुषार्थ से सब सुखों को प्राप्त हो सकते हैं, अन्यथा नहीं॥५॥

अथ विद्वद्गुणा उपदिश्यन्ते॥

अब विद्वान् के गुणों का उपदेश अगले मन्त्र में किया है॥

ऋ॒तस्य॒ हि धे॒नवो॑ वावशा॒नाः स्मदू॑ध्नीः पी॒पय॑न्त॒ द्युभ॑क्ताः।
प॒रा॒वत॑: सुम॒तिं भिक्ष॑माणा॒ वि सिन्ध॑व: स॒मया॑ सस्रु॒रद्रि॑म्॥ ६॥

ऋ॒तस्य॑। हि। धे॒नव॑:। वा॒व॒शा॒नाः। स्मत्ऽऊ॑ध्नीः। पी॒पय॑न्त। द्युऽभ॑क्ताः। प॒रा॒ऽव॑तः। सु॒ऽम॒तिम्। भिक्ष॑माणाः। वि। सिन्ध॑वः। स॒मया॑। स॒स्रु॒:। अद्रि॑म्॥ ६॥

पदार्थः-(**ऋतस्य**) मेघोत्पन्नजलस्येव सत्यस्य (**हि**) खलु (**धेनवः**) गावः (**वावशानाः**) अत्यन्तं कामयमानाः (**स्मदूध्नीः**) बहुदुग्धप्रापिकाः। अत्र स्मदुपपदादूधसोऽनङ्। (**पीपयन्त**) पाययन्ति (**द्युभक्ताः**) सूर्यादिप्रकाशेन संभागं प्राप्ताः (**परावतः**) दूरदेशात् (**सुमतिम्**) शोभनं विज्ञानम् (**भिक्षमाणाः**) याचमानाः (**वि**) विशेषे (**सिन्धवः**) नद्यः (**समया**) सामीप्ये (**सस्रुः**) स्रवन्ति (**अद्रिम्**) मेघम्॥६॥

अन्वयः-हे मनुष्या! यथा वावशानाः स्मदूध्नीर्धेनवः पीपयन्त यथा द्युभक्ताः किरणाः परावतोऽद्रिं मेघं समया वर्षयन्ति सिन्धवो नद्यश्च सस्रुस्तथा यूयं सुमतिं भिक्षमाणाः विजानीतान्येभ्यः ऋतस्य हि वर्षयत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा यज्ञेन संशोधितं जलं शक्तिकारकं भूत्वा विज्ञानजनकं भवति, तथैव हि धार्मिका विद्वांसो भवेयुः॥६॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे (**वावशानाः**) अत्यन्त शोभायमान (**स्मदूध्नीः**) बहुत दूध देनेवाली (**धेनवः**) गायें (**पीपयन्त**) दूध आदि से बढ़ाती हैं, जैसे (**द्युभक्ताः**) प्रकाश से भिन्न-भिन्न किरणें (**परावतः**) दूरदेश से (**अद्रिम्**) मेघ को (**समया**) समय पर वर्षाते हैं, (**सिन्धवः**) नदियां (**सस्रुः**) बहती हैं, वैसे तुम (**सुमतिम्**) उत्तम विज्ञान को (**भिक्षमाणाः**) जिज्ञासा से (**वि**) विशेष जानकर अन्य मनुष्य के लिये विद्या और सुशिक्षापूर्वक (**ऋतस्य हि**) मेघ से उत्पन्न हुए जल के समान सत्य ही की वर्षा करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यज्ञ से सम्यक् प्रकार शोधा हुआ जल शक्ति को बढ़ानेवाला होकर विज्ञान को बढ़ाता है, वैसे ही धर्मात्मा विद्वान् हों॥६॥

ते मनुष्याः कीदृशा भवेयुरित्याह॥

वे मनुष्य कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः॥७॥

त्वे इति। अग्ने। सुऽमतिम्। भिक्षमाणाः। दिवि। श्रवः। दधिरे। यज्ञियासः नक्ता। च। चक्रुः। उषसा। विरूपे इति विऽरूपे। कृष्णम्। च। वर्णम्। अरुणम्। च। सम्। धुरिति धुः॥७॥

पदार्थः-(**त्वे**) त्वयि (**अग्ने**) अध्यापक (**सुमतिम्**) शोभनां बुद्धिम् (**भिक्षमाणाः**) लम्भमानाः (**दिवि**) प्रकाशस्वरूपे (**श्रवः**) श्रवणमन्नं वा (**दधिरे**) धरन्ति (**यज्ञियासः**) यज्ञक्रियाकुशलाः (**नक्ता**) रात्र्या (**च**) समुच्चये (**चक्रुः**) कुर्वन्ति (**उषसा**) दिनेन सह (**विरूपे**) विरुद्धरूपे (**कृष्णम्**) निकृष्टम् (**च**) समुच्चये (**वर्णम्**) चक्षुर्विषयम् (**अरुणम्**) रक्तम् (**च**) समुच्चये (**सम्**) सम्यगर्थे (**धुः**) धरन्ति॥७॥

अन्वयः-हे अग्ने! ये दिवि त्वे स्थिता भिक्षमाणाः यज्ञियासः सुमतिं दधिरे श्रवः संधुः नक्तोषसा च सह कृष्णमरुणं च वर्णं चादन्यान् वर्णान् दधिरे विरूपे चक्रुस्ते सुखिनः स्युः॥७॥

भावार्थः-नहि परमेश्वरसृष्टेर्विज्ञानेन विना कश्चिदलं विद्वान् भवितुं शक्नोति। यथा रात्रिंदिवौ विरुद्धरूपे वर्त्तेते तथा साधर्म्यवैधर्म्यादिविचारेण सर्वान् पदार्थान् विद्युः॥७॥

पदार्थः-हे (**अग्ने**) पढ़ानेहारे विद्वान्! जो (**दिवि**) प्रकाशस्वरूप (**त्वे**) आपके समीप स्थित हुए (**भिक्षमाणाः**) विद्याओं ही की भिक्षा करनेवाले (**यज्ञियासः**) अध्ययनरूप कर्मचतुर विद्वान् लोग

(सुमतिम्) उत्तमबुद्धि को **(दधिरे)** धारण करते तथा **(श्रवः)** श्रवण वा अन्न को **(संधुः)** धारण करते हैं **(नक्ता)** रात्री **(च)** और **(उषसा)** दिन के साथ **(कृष्णम्)** श्याम **(अरुणम्)** लाल **(वर्णम्)** वर्ण को **(च)** तथा इनसे भिन्न वर्णों से युक्त पदार्थों को धारण करते हैं **(च)** और **(विरूपे)** विरुद्ध रूपों का विज्ञान **(चक्रुः)** करते हैं, वे सुखी होते हैं॥७॥

भावार्थः-परमेश्वर की सृष्टि के विज्ञान के विना कोई मनुष्य पूर्ण विद्वान् होने को समर्थ नहीं होता। जैसे रात्री-दिवस भिन्न-भिन्न रूपवाले हैं, वैसे ही अनुकूल और विरुद्ध धर्मादि के विज्ञान से सब पदार्थों को जान के उपयोग में लेवें॥७॥

अथैतत्सृष्टिकर्त्तेश्वरः कीदृशोऽस्तीत्युपदिश्यते॥

फिर सृष्टिकर्त्ता ईश्वर कैसा है, यह विषय अगले मन्त्र में कहा है॥

यान् रा॒ये मर्ता॒न्त्सुषू॑दो अग्ने॒ ते स्या॑म म॒घवा॑नो व॒यं च॑।
छा॒येव॒ विश्वं॒ भुव॑नं सिसक्ष्यापप्रि॒वान् रोद॑सी अ॒न्तरि॑क्षम्॥८॥

यान्। रा॒ये। मर्ता॑न्। सुसू॑दः। अ॒ग्ने॒। ते। स्या॒म॒। म॒घऽवा॑नः। व॒यम्। च॒। छा॒याऽइ॑व। विश्व॑म्। भुव॑नम्। सि॒स॒क्षि॒। आ॒प॒प्रि॒ऽवान्। रोद॑सी इति॑। अ॒न्तरि॑क्षम्॥८॥

पदार्थः-(**यान्**) उत्तमविद्यास्वभावान् **(राये)** धनाय **(मर्त्तान्)** मनुष्यान् **(सुसूदः)** क्षयशरीरादियुक्तान् **(अग्ने)** जगदीश्वर **(ते)** तव **(स्याम)** भवेम **(मघवानः)** प्रशस्तधनयुक्ताः **(वयम्)** पुरुषार्थिनः **(च)** समुच्चये **(छायेव)** यथा शरीरैः सह छाया वर्त्तते तथा **(विश्वम्)** अखिलम् **(भुवनम्)** जगत् **(सिसक्षि)** समवैति **(आपप्रिवान्)** सर्वतो व्याप्तवान् **(रोदसी)** द्यावापृथिव्यौ **(अन्तरिक्षम्)** आकाशम्॥८॥

अन्वयः-हे अग्ने जगदीश्वर! यस्त्वं यान् सुसूदो मर्त्तानस्मान् राये सिसक्षि, ते वयं मघवानः स्याम। यो भवान् छायेव विश्वं भुवनं रोदसी अन्तरिक्षं चापप्रिवान् व्याप्तवानसि तं सर्वे वयमुपास्महे॥८॥

भावार्थः-अत्रोपमालङ्कारः। विद्वद्भिरीश्वरोपासनापुरुषार्थाभ्यां स्वयं विद्यादिधनवन्तो भूत्वा सर्वे मनुष्या विद्यादिधनवन्तः कार्याः॥८॥

पदार्थः-हे **(अग्ने)** जगदीश्वर! जो आप **(यान्)** जिन **(सुसूदः)** क्षयवृद्धि धर्म्मयुक्त **(मर्त्तान्)** मनुष्यों को **(राये)** विद्यादि धन के लिये **(सिसक्षि)** संयुक्त करते हो **(ते)** वे **(वयम्)** हम लोग **(मघवानः)** प्रशंसा योग्य धनवाले **(स्याम)** होवें **(च)** और जो आप **(छायेव)** शरीरों की छाया के समान **(विश्वम्)** सब **(भुवनम्)** जगत् और **(रोदसी)** आकाश, पृथिवी और **(अन्तरिक्षम्)** अन्तरिक्ष को **(आपप्रिवान्)** पूर्ण करनेवाले हो, उन आपकी सब लोग उपासना करें॥८॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि ईश्वर की उपासना और अपने पुरुषार्थ से आप विद्यादि धनवाले होकर सब मनुष्यों को भी करें॥८॥

पुनस्ते कीदृशा भवेयुरित्युपदिश्यते॥

फिर वे मनुष्य कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

अर्वद्भिरग्ने अर्वतो नृभिर्नॄन् वीरैर्वीरान् वनुयामा त्वोताः।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः॥९॥

अर्वत्ऽभिः। अग्ने। अर्वतः। नृऽभिः। नॄन्। वीरैः। वीरान्। वनुयाम। त्वाऽऊताः। ईशानासः। पितृऽवित्तस्य। रायः। वि। सूरयः। शतऽहिमाः। नः। अश्युः॥९॥

पदार्थः–(**अर्वद्भिः**) प्रशस्तैरश्वैः (**अग्ने**) सर्वसुखप्रापक (**अर्वतः**) अश्वान् (**नृभिः**) विद्यादिप्रशस्तगुणयुक्तैर्मनुष्यैः (**नॄन्**) विद्यासुशिक्षाधर्मयुक्तान् मनुष्यान् (**वीरैः**) शौर्य्यादियुक्तैः (**वीरान्**) शौर्यादिगुणयुक्तान् (**वनुयाम**) इच्छेम याचेम (**त्वोताः**) त्वया कृतरक्षाः (**ईशानासः**) समर्थाः स्वामिनः (**पितृवित्तस्य**) जनकभुक्तस्य (**रायः**) धनस्य (**वि**) विशेषे (**सूरयः**) विद्वांसः (**शतहिमाः**) शतं हिमानि यासु समासु ताः (**नः**) अस्मान् (**अश्युः**) प्राप्नुयुः॥९॥

अन्वयः–हे जगदीश्वर! त्वोता वयमर्वद्भिरर्वतो नृभिर्नॄन् वीरैर्वीरान् वनुयाम। त्वत्कृपया पितृवित्तस्य राय ईशानासो भवेम सूरयो नोऽस्मान् शतहिमा व्यश्युः॥९॥

भावार्थः–नहि मनुष्यैरीश्वरगुणकर्मस्वभावानुकूलाचरणेन विनोत्तमा विद्याः पदार्थाश्च प्राप्तुं शक्यास्तस्मादेतन्नित्यं प्रेम्णानुष्ठातव्यम्॥९॥

पदार्थः–हे (**अग्ने**) सब सुखों के प्राप्त करानेवाले परमेश्वर! आपसे (**त्वोताः**) रक्षित हम लोग (**अर्वद्भिः**) प्रशंसा योग्य घोड़ों से (**अर्वतः**) घोड़ों को (**नृभिः**) विद्यादि श्रेष्ठ गुणयुक्त मनुष्यों से (**नॄन्**) शिक्षा धर्म्मवाले मनुष्यों और (**वीरैः**) शौर्यादियुक्त शूरवीरों से (**वीरान्**) शूरता आदि गुणवाले शूरवीरों की प्राप्ति (**वनुयाम**) होने को चाहें और याचना करें। आपकी कृपा से (**पितृवित्तस्य**) पिता के भोगे हुए (**रायः**) धन के (**ईशानासः**) समर्थ स्वामी हम हों और (**सूरयः**) मेधावी विद्वान् (**नः**) हम लोगों को (**शतहिमाः**) सौ हेमन्त ऋतु पर्यन्त (**व्यश्युः**) प्राप्त होते रहें॥९॥

भावार्थः–मनुष्य लोग ईश्वर के गुण, कर्म्म, स्वभाव के अनुकूल वर्त्तने और अपने पुरुषार्थ के विना उत्तम विद्या और पदार्थों के प्राप्त होने को समर्थ नहीं हो सकते, इससे इसका सदा अनुष्ठान करना उचित है॥९॥

पुनस्तं तत्सहायेन किं प्राप्यत इत्युपदिश्यते॥

फिर उसको उसके सहाय से क्या प्राप्त होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च।

शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः॥ १०॥ २०॥ १२॥

एता। ते। अग्ने। उचथानि। वेधः। जुष्टानि। सन्तु। मनसे। हृदे। च। शकेम। रायः। सुऽधुरः। यमम्। ते। अधि। श्रवः। देवऽभक्तम्। दधानाः॥ १०॥

पदार्थः-(**एता**) एतानि (**ते**) तव (**अग्ने**) विज्ञानप्रद (**उचथानि**) वेदवचनानि (**वेधः**) प्रज्ञाप्रद (**जुष्टानि**) प्रीतानि सेवितानि (**सन्तु**) भवन्तु (**मनसे**) (**हृदे**) आत्मने (**च**) समुच्चये (**शकेम**) शक्नुयाम। अत्र व्यत्ययेन शप्। (**रायः**) धनानि (**सुधुरः**) शोभना धुरो धारणानि येषान्ते (**यमम्**) यच्छति येन तम् (**ते**) तव (**अधि**) उपरिभावे (**श्रवः**) सर्वविद्याश्रवणम् (**देवभक्तम्**) विद्वद्भिः सेवितम् (**दधानाः**) धरन्तः॥ १०॥

अन्वयः-हे वधोऽग्ने जगदीश्वर! ते तव कृपयैतोचथान्यस्माकं मनसे हृदे च जुष्टानि सन्तु ते तव सम्बन्धेन यमं देवभक्तं श्रवो दधानाः सुधुरो वयं राया धनानि प्राप्तुमधि शकेम॥ १०॥

भावार्थः-मनुष्यैः सर्वाणि सुखानि प्राप्य सर्वेभ्यः प्रापयितव्यानि॥ १०॥

अत्रेश्वराग्निविद्वत्सूर्य्यगुण-वर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति त्रिसप्ततितमं ७३ सूक्तं [द्वादशोऽनुवाको] विंशो २० वर्गश्च समाप्तः॥ २०॥

पदार्थः-हे (**वेधः**) सबके अन्तःकरण में रहने से सबको बुद्धिप्रद धर्त्ता (**अग्ने**) विज्ञान के देनेवाले जगदीश्वर (**ते**) आपकी कृपा से (**एता**) (**उचथानि**) वेदवचन हम लोगों के (**मनसे**) मन (**च**) और (**हृदे**) आत्मा के लिये (**जुष्टानि**) सेवन किये हुए प्रीतिकारक (**सन्तु**) होवें, वे (**ते**) आपके सम्बन्ध से (**यमम्**) नियम करने (**देवभक्तम्**) विद्वानों ने सेवन किये हुए (**श्रवः**) श्रवण को (**दधानाः**) धारण करते हुए (**सुधुरः**) उत्तम पदार्थों के धारण करनेवाले हम लोग (**रायः**) धनों के प्राप्त होने को (**अधि शकेम**) समर्थ हों॥ १०॥

भावार्थः-मनुष्यों को चाहिये कि आप सब सुखों को प्राप्त होकर और सभी के लिये प्राप्त करावें॥ १०॥

इस सूक्त में ईश्वर, अग्नि, विद्वान् और सूर्य के गुणों का वर्णन होने से इस सूक्तार्थ की पूर्वसूक्तार्थ के साथ सङ्गति समझनी उचित है॥

यह तिहत्तरवां ७३ सूक्त बीसवां २० वर्ग [और बारहवां अनुवाक] पूरा हुआ॥

अथ नवर्चस्य चतुःसप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता। १,२,८,९ निचृद्गायत्री। ३,६ गायत्री। ४,७ विराड्गायत्री च छन्दः। षड्जः स्वरः॥

अथेश्वरगुणा उपदिश्यन्ते॥

अब चौहत्तरवें सूक्त का आरम्भ किया जाता है, इसके प्रथम मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

उप॒प्र॒यन्तो॑ अध्व॒रं मन्त्रं॑ वोचेमा॒ग्नये॑। आ॒रे अ॒स्मे च॑ शृण्व॒ते॥ १॥

उप॒ऽप्र॒यन्त॑ः। अ॒ध्व॒रम्। मन्त्र॑म्। वो॒चे॒म॒। अ॒ग्नये॑। आ॒रे। अ॒स्मे इति॑। च॒। शृ॒ण्व॒ते॥ १॥

पदार्थः-(**उपप्रयन्तः**) समीपं प्राप्तवन्तः (**अध्वरम्**) अहिंसकम् (**मन्त्रम्**) विचारम् (**वोचेम**) उच्याम। अत्राशीर्लिङ्यङ् **वचउमि**त्यमागमश्च। (**अग्नये**) परमेश्वराय (**आरे**) दूरे। **आर इति दूरनामसु पठितम्।** (निघं०३.२६) (**अस्मे**) अस्माकम् (**च**) चात्समीपे (**शृण्वते**) श्रवणं कुर्वते॥१॥

अन्वयः-हे मनुष्या! यथोपप्रयन्तो वयमस्मे आरे च शृण्वतेऽग्नयेऽध्वरं मन्त्रं सततं वोचेम तथा ययूमपि वदत॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्बहिरन्तर्व्याप्तमस्माकं दूरे समीपे सर्वव्यवहारं विजानन्तं परमात्मानं विज्ञायाऽधर्माद्भीत्वा सत्यं धर्मं सेवित्वाऽऽनन्दितव्यम्॥१॥

पदार्थः-हे मनुष्यो! जैसे (**उपप्रयन्तः**) समीप प्राप्त होनेवाले हम लोग इस (**अस्मे**) हम लोगों के (**आरे**) दूर (**च**) और समीप में (**शृण्वते**) श्रवण करते हुए (**अग्नये**) परमेश्वर के लिये (**अध्वरम्**) हिंसारहित (**मन्त्रम्**)विचार को निरन्तर (**वोचेम**) उपदेश करें, वैसे तुम भी किया करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि बाहर-भीतर व्याप्त होके हम लोगों के दूर-समीप व्यवहार के कर्मों को जानते हुए परमात्मा को जानकर, अधर्म से अलग होकर, सत्य धर्म का सेवन करके आनन्दयुक्त रहें॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह परमेश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यः स्नीहि॑तीषु पू॒र्व्यः संज॑ग्मा॒नासु॑ कृ॒ष्टिषु॑। अर॑क्षद्दा॒शुषे॒ गय॑म्॥ २॥

यः। स्नीहि॑तीषु। पू॒र्व्यः। स॒म्ऽज॒ग्मा॒नासु॑। कृ॒ष्टिषु॑। अर॑क्षत्। दा॒शुषे॑। गय॑म्॥ २॥

पदार्थः-(**यः**) जगदीश्वरः (**स्नीहितीषु**) स्नेहकारिणीषु। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। (**पूर्व्यः**) पूर्वैः साक्षात्कृतः (**संजग्मानासु**) सङ्गच्छन्तीषु (**कृष्टिषु**) मनुष्यादिप्रजासु (**अरक्षत्**) रक्षति (**दाशुषे**) विद्यादिशुभगुणानां दात्रे (**गयम्**) धनम्। **गयमिति धननामसु पठितम्।** (निघं०२.१०)॥२॥

अन्वयः-हे मनुष्या! यः पूर्व्यो जगदीश्वरः संजग्मानासु स्नीहितीषु कृष्टिषु दाशुषे गयमरक्षत् तस्मा अग्नयेऽध्वरं यथा वयं मन्त्रं वोचेम तथा यूयमपि वदत॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। पुरस्तात् **(अग्नये)** **(अध्वरम्)** **(मन्त्रम्)** **(वोचेम)** इति पदचतुष्टयमत्रानुवर्त्तते, नहि कस्यापि प्रजास्थस्य जीवस्य परमेश्वरेण विना यथावद्रक्षणं सुखं च जायते तस्मादयं सर्वैस्सदा सेवनीयः॥२॥

पदार्थः-हे मनुष्यो! जो **(पूर्व्यः)** पूर्वज विद्वान् लोगों ने साक्षात्कार किये हुए जगदीश्वर **(संजग्मानासु)** एक-दूसरे के सङ्ग चलती हुई **(स्नीहितीषु)** स्नेह करनेवाली **(कृष्टिषु)** मनुष्य आदि प्रजा में **(दाशुषे)** विद्यादि शुभ गुण देने वाले के लिये **(गयम्)** धन की **(अरक्षत्)** रक्षा करता है, उस **(अग्नये)** ईश्वर के लिये **(अध्वरम्)** हिंसारहित **(मन्त्रम्)** विचार को हम लोग **(वोचेम)** कहें, वैसे तुम भी कहा करो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पूर्व मन्त्र से **(अग्नये)** **(अध्वरम्)** **(मन्त्रम्)** **(वोचेम)** इन चार पदों की अनुवृत्ति आती है। प्रजा में रहनेवाले किसी जीव का परमेश्वर के विना रक्षण और सुख नहीं हो सकता, इससे सब मनुष्यों को उचित है कि इसका सेवन सर्वदा करें॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि। धनंजयो रणेरणे॥३॥

उत। ब्रुवन्तु। जन्तवः। उत्। अग्निः। वृत्रऽहा। अजनि। धनम्ऽजयः। रणेऽरणे॥३॥

पदार्थः-(**उत**) अपि (**ब्रुवन्तु**) उपदिशन्तु (**जन्तवः**) जीवाः (**उत्**) उत्कृष्टे (**अग्निः**) विजयप्रदो भगवान् (**वृत्रहा**) मेघहन्ता सूर्य इवाविद्यान्धकारनाशकः (**अजनि**) जनयति (**धनञ्जयः**) यो धनेन जापयति सः (**रणेरणे**) युद्धे युद्धे॥३॥

अन्वयः-यो रणेरणे धनञ्जयो वृत्रहेव दाशुषे गयमुदजनि। उतापि यं विद्वांस उपदिशन्ति, तं जन्तवोऽन्योन्यमुपब्रुवन्तु॥३॥

भावार्थः-हे मनुष्या! यूयं यस्योपाश्रयेण शत्रूणां पराजयेन विजयः स्वविजयेन च राज्यधनानि जायन्ते, तं नित्यं सेवध्वम्॥३॥

पदार्थः-जो **(रणेरणे)** युद्ध-युद्ध में **(धनञ्जयः)** धन से जितानेवाला **(वृत्रहा)** मेघ को नष्ट करनेहारे सूर्य्य के समान **(अग्निः)** परमेश्वर **(दाशुषे)** विद्या, शुभ गुणों के दान करनेवाले मनुष्य के लिये **(गयम्)** धन को **(उदजनि)** उत्पन्न करता है **(उत्)** और भी जिसका विद्वान् लोग उपदेश करते हैं **(जन्तवः)** सब मनुष्य **(अध्वरम्)** हिंसारहित **(मन्त्रम्)** उसी के विचार को **(उपब्रुवन्तु)** परस्पर उपदेश करें॥३॥

भावार्थः-हे मनुष्यो! तुम जिसके आश्रय से शत्रुओं के पराजय द्वारा अपने विजय से राज्यधनों की प्राप्ति होती है, उस परमेश्वर का नित्य सेवन किया करो॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में कहा है॥

यस्य॑ दू॒तो असि॒ क्षये॒ वेषि॑ ह॒व्यानि॑ वी॒तये॑। द॒स्मत्कृ॒णोष्यध्व॒रम्॥४॥

यस्य॑। दू॒तः। असि॑। क्षये॒। वेषि॑। ह॒व्यानि॑। वी॒तये॑। द॒स्मत्। कृ॒णोषि॑। अ॒ध्व॒रम्॥४॥

पदार्थः-(**यस्य**) मनुष्यस्य (**दूतः**) दुःखोपनाशकः (**असि**) (**क्षये**) गृहे (**वेषि**) प्राप्नोषि (**हव्यानि**) होतुमर्हाण्युत्तमगुणकर्मयुक्तानि द्रव्याणि (**वीतये**) विज्ञानाय (**दस्मत्**) दुःखोपक्षेत्तारम्। अत्र बाहुलकादौणादिको मदिक् प्रत्ययः। (**कृणोषि**) करोषि (**अध्वरम्**) अग्निहोत्रादिकमिव विद्याविज्ञानवर्द्धकं यज्ञम्॥४॥

अन्वयः-हे विद्वँस्त्वं यस्य वीतयेऽग्निरिव दूतोऽसि क्षये हव्यानि वेषि दस्मदध्वरं च कृणोति, तं सर्वे सत्कुर्वन्तु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येन मनुष्येण परमेश्वरवद्विद्वांसावध्यापकोपदेष्टारौ विज्ञापकौ चेष्येते, तस्य न कदाचिद् दुखं संभवति॥४॥

पदार्थः-हे विद्वान्! आप (**यस्य**) जिस मनुष्य के (**वीतये**) विज्ञान के लिये अग्नि के तुल्य (**दूतः**) दुःखनाश करनेवाले (**असि**) हैं (**क्षये**) घर में (**हव्यानि**) हवन करने योग्य उत्तम द्रव्यगुणकर्मों को (**वेषि**) प्राप्त वा उत्पन्न करते हो (**दस्मत्**) दुःख नाश करनेवाले (**अध्वरम्**) अग्निहोत्रादि यज्ञ के समान विद्याविज्ञान को बढ़ानेवाले यज्ञ को (**कृणोषि**) सिद्ध करते हो, उसका सब मनुष्य सेवन करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस मनुष्य ने परमेश्वर के समान विद्वान् पढ़ाने और उपदेश करनेवाले की चाहना की है, उसको कभी दुःख नहीं होता॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में कहा है॥

तमित्सु॒ह॒व्यमङ्गि॑रः सु॒दे॒वं सह॑सो॒ यहो।
जना॑ आहुः सु॒ब॒र्हिष॑म्॥५॥२१॥

तम्। इत्। सु॒ऽह॒व्यम्। अङ्गि॑रः। सु॒ऽदे॒वम्। स॒ह॒सः। य॒हो॒ इति। जना॑ः। आ॒हुः। सु॒ऽब॒र्हिष॑म्॥५॥

पदार्थः-(**तम्**) उक्तम् (**इत्**) एव (**सुहव्यम्**) शोभनानि हव्यनानि यस्य सः (**अङ्गिरः**) अङ्गानां रसरूपः (**सुदेवम्**) शोभनश्चासौ देवो दिव्यगुणो दाता च तम् (**सहसः**) प्रशस्तबलयुक्तस्य (**यहो**) पुत्र (**जनाः**) विद्वांसः (**आहुः**) कथयन्ति (**सुबर्हिषम्**) शोभनानि बर्हीष्यन्तरिक्षोदकविज्ञानानि तस्य तम्॥५॥

अन्वयः-हे अङ्गिरः सहसो यहो विद्वन्! यं त्वामग्निमिव सुदेवं सुबर्हिषं सुहव्यं जना आहुस्तमिद्वयं सेवेमहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्वत्सु प्रख्यातस्य विदुष सकाशात् पदार्थविद्यां विदित्वा सम्प्रयुज्याऽन्येभ्यो वेदयितव्या च॥५॥

पदार्थः-हे **(अङ्गिरः)** अङ्गों के रस रूप **(सहसः)** बल के **(यहो)** पुत्ररूप विद्वान् मनुष्य! जिस तुझको बिजुली के तुल्य **(सुदेवम्)** दिव्यगुणों के देने **(सुबर्हिषम्)** विज्ञानयुक्त **(सुहव्यम्)** उत्तम ग्रहण करनेवाले आपको **(जनाः)** विद्वान् लोग **(आहुः)** कहते हैं **(तम्)** उसको **(इत्)** ही हम लोग सेवन करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि विद्वानों के संग से पदार्थविद्या को जान और सम्यक् परीक्षा करके अन्य मनुष्यों को जनावें॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ च वहासि ताँ इह देवाँ उप प्रशस्तये। हव्या सुश्चन्द्र वीतये॥६॥

आ। च। वहासि। तान्। इह। देवान्। उप। प्रऽशस्तये। हव्या। सुऽचन्द्र। वीतये॥६॥

पदार्थः-**(आ)** समन्तात् **(च)** समुच्चये **(वहासि)** प्राप्नुयाः **(तान्)** वक्ष्यमाणान् **(इह)** अस्मिन् संसारे **(देवान्)** विदुषो दिव्यगुणान् वा **(उप)** सामीप्ये **(प्रशस्तये)** प्रशंसनाय **(हव्या)** ग्रहीतुं योग्यान्। अत्राकारादेशः। **(सुश्चन्द्र)** शोभनं चन्द्रमाह्लादनं हिरण्यं वा यस्मात् तत्सम्बुद्धौ। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२) **ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे।** (अष्टा०६.१.१५१) इति सुडागमः। **(वीतये)** सर्वसुखव्याप्तये॥६॥

अन्वयः-हे सुश्चन्द्राप्तविद्वँस्त्वमिह प्रशस्तये वीतये च यान् हव्या देवानुपावहासि सर्वतः प्राप्नुयास्तान् वयं प्राप्नुयाम॥६॥

भावार्थः-यावन्मनुष्याः परमेश्वरस्याप्तविदुषोऽग्न्यादेश्च सङ्गाय विज्ञानाय प्रशंसितं पुरुषार्थं न कुर्वन्ति, तावत् किल पूर्णा विद्या प्राप्तुं न शक्नुवन्ति॥६॥

पदार्थः-हे **(सुश्चन्द्र)** अच्छे आनन्द देनेवाले विद्वान्! आप **(इह)** इस संसार में **(प्रशस्तये)** प्रशंसा **(च)** और **(वीतये)** सुखों की प्राप्ति के लिये जिन **(हव्या)** ग्रहण के योग्य **(देवान्)** दिव्य गुणों वा विद्वानों को **(उपावहासि)** समीप में सब प्रकार प्राप्त हों **(तान्)** उन आप को हम लोग प्राप्त होवें॥५॥

भावार्थः-जब तक मनुष्य परमेश्वर के जानने के लिये धर्मात्मा विद्वान् पुरुषों से शिक्षा और अग्नि आदि पदार्थों से उपकार लेने में ठीक-ठीक पुरुषार्थ नहीं करते, तब तक पूर्ण विद्या को प्राप्त कभी नहीं हो सकते॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन। यदग्ने यासि दूत्यम्॥७॥

न। योः। उपब्दिः। अश्व्यः। शृण्वे। रथस्य। कत्। चन। यत्। अग्ने। यासि। दूत्यम्॥७॥

पदार्थः-**(न)** निषेधे **(योः)** गच्छतो गमयितुः। अत्र **या प्रापण** इत्यत्माद्धातोर्बाहुलकादौणादिकः कुः प्रत्ययः। **(उपब्दिः)** महाशब्दकर्त्ता। **उपब्दिरिति वाङ्नामसु पठितम्।** (निघं०१.११) **(अश्व्यः)** अश्वेष्वाशु गच्छत्सु साधुरत्यन्तवेगकारी **(शृण्वे)** **(रथस्य)** विमानादियानसमूहस्य **(कत्)** कदा **(चन)** अपि **(यत्)** यस्य **(अग्ने)** अग्निवद्विद्यया प्रकाशमान **(यासि)** **(दूत्यम्)** दूत्यम् कर्म॥७॥

अन्वयः-हे अग्ने! यथोपब्दिरश्व्यस्त्यं यद्यस्य यो रथस्य मध्ये स्थितः सन् दूत्यं यासि, तस्य समीपेऽन्यान् शब्दानहं कच्चन न शृण्वे तथाहं यामि त्वमपि मा शृणु॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नैव मनुष्यैः शिल्पविद्यया संसाधितेषु यानयन्त्रादिषु सम्प्रयुक्तस्यातीव गमयितोऽग्नेः समीपेऽन्ये शब्दाः श्रोतुं शक्यन्ते॥७॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य विद्या से प्रकाशित विद्वान्! आप जैसे **(उपब्दि)** अत्यन्त शब्द करने **(अश्व्यः)** शीघ्र चलनेवाले यानों में अत्यन्त वेगकारक **(यत्)** जिस अग्नियुक्त और **(योः)** चलने-चलाने वाले **(रथस्य)** विमानादि यानसमूह के बीच स्थिर होके **(दूत्यम्)** दूत के तुल्य अपने कर्म को **(यासि)** प्राप्त होते हो, मैं उस अग्नि के समीप और शब्दों को **(कच्चन)** कभी **(न)** नहीं **(शृण्वे)** सुनता किन्तु प्राप्त होता हूँ, तू भी नहीं सुन सकता, परन्तु प्राप्त हो सकता है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य लोग शिल्पविद्या से सिद्ध किये हुए यान और यन्त्रादिकों में युक्त अत्यन्त गमन करानेवाले अग्नि के समीपस्थ शब्द के निकट अन्य शब्दों को नहीं सुन सकते॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वोतो वाज्यह्योऽभि पूर्वस्मादपरः। प्र दाश्वाँ अग्ने अस्थात्॥८॥

त्वाऽऊतः। वाजी। अह्यः। अभि। पूर्वस्मात्। अपरः। प्र। दाश्वान्। अग्ने। अस्थात्॥८॥

पदार्थः-(**त्वोतः**) युष्माभिरुतः सङ्गमितः (**वाजी**) प्रशस्तो वेगोऽस्यास्तीति (**अह्नयः**) ये सद्योऽह्नुन्ति व्याप्नुवन्ति यानानि मार्गांस्ते (**अभि**) आभिमुख्ये (**पूर्वस्मात्**) पूर्वाधिकरणस्थात् (**अपरः**) अन्यो देशोऽन्यः शिल्पी वा (**प्र**) (**दाश्वान्**) दाता (**अग्ने**) विद्वन् (**अस्थात्**) तिष्ठति॥८॥

अन्वयः-हे अग्ने यथाऽह्नयोऽपरस्त्वोतो वाजी दाश्वान्वा पूर्वस्मादभिसंप्रयुक्तः सन् प्रतिष्ठते प्रस्थितो भवति तथाऽन्ये पदार्थाः सन्तीति विजानीहि॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्नहि शिल्पविद्यासिद्धयन्त्रप्रयोगेण विनाग्नियानानां गमयिता भवतीति वेद्यम्॥८॥

पदार्थः-हे (**अग्ने**) विद्यायुक्त! जैसे (**अह्नयः**) शीघ्रयान मार्गों को प्राप्त करानेवाले अग्नि आदि (**अपरः**) और भिन्न देश वा भिन्न कारीगर (**त्वोतः**) आपसे संगम को प्राप्त हुआ (**वाजी**) प्रशंसा के योग्य वेगवाला (**दाश्वान्**) दाता (**पूर्वस्मात्**) पहले स्थान से (**अभि**) सन्मुख (**प्रास्थात्**) देशान्तर को चलानेवाला होता है, वैसे अन्य मन आदि पदार्थ भी हैं, ऐसा तू जान॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को यह जानना चाहिये कि शिल्पविद्यासिद्ध यन्त्रों के विना अग्नि यानों का चलानेवाला नहीं होता॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि। देवेभ्यो देव दाशुषे॥९॥२२॥

उत। द्युऽमत्। सुऽवीर्यम्। बृहत्। अग्ने। विवाससि। देवेभ्यः। देव। दाशुषे॥९॥

पदार्थः-(**उत**) अपि (**द्युमत्**) प्रशस्तप्रकाशवत् (**सुवीर्य्यम्**) सुष्ठु पराक्रमम् (**बृहत्**) महान्तम् (**अग्ने**) विद्युदादिस्वरूपवद्वर्त्तमान (**विवाससि**) परिचरसि (**देवेभ्यः**) विद्वद्भ्यः (**देवः**) दिव्यगुणकर्म्म-स्वभावयुक्त (**दाशुषे**) दानशीलाय कार्य्याधिपतये॥९॥

अन्वयः-हे देवाऽग्ने विद्वन्! यथा त्वं दाशुष उत देवेभ्यो द्युमद् बृहत्सु वीर्य्यं विवाससि, तथा तं वयं सदा सेवेमहि॥९॥

भावार्थः-कार्य्यस्वामिनां विद्वद्भिर्भृत्यैश्च विद्यापुरुषार्थाभ्यां विदुषां सकाशान्महान्त उपकाराः संग्राह्याः॥९॥

अत्रेश्वरविद्वद्विद्युदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति चतुःसप्ततितमं ७४ सूक्तं द्वाविंशो २२ वर्गश्च समाप्तः॥

पदार्थः-हे (**देव**) दिव्य गुण, कर्म्म और स्वभाववाला (**अग्ने**) अग्निवत् प्रज्ञा से प्रकाशित विद्वान्! तू (**दाशुषे**) देने के स्वभाववाले कार्य्यों के अध्यक्ष (**उत**) अथवा (**देवेभ्यः**) विद्वानों के लिये

(द्युमत्) अच्छे प्रकाशवाले **(बृहत्)** बड़े **(सुवीर्य्यम्)** अच्छे पराक्रम को **(विवासति)** सेवन करता है, वैसे हम भी उसका सेवन करें॥९॥

भावार्थः-जो कार्यों के स्वामी होवें, उन विद्वानों के सकाश से विद्या और पुरुषार्थ करके विद्वान् तथा भृत्यों को बड़े-बड़े उपकारों का ग्रहण करना चाहिये॥९॥

इस सूक्त में ईश्वर विद्वान् और विद्युत् अग्नि के गुणों का वर्णन होने से पूर्वसूक्तार्थ के साथ इस सूक्त की सङ्गति है॥

यह चौहत्तरवां ७४ सूक्त और बाईसवां २२ वर्ग पूरा हुआ॥

अथ पञ्चर्चस्य पञ्चसप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता। १ गायत्री। २,४,५ निचृद्गायत्री। ३ विराड् गायत्री छन्दः। षड्जः स्वरः॥

पुनर्विद्वान् कीदृशो भवेदित्युपदिश्यते॥

अब ७५ पचहत्तरवें सूक्त का आरम्भ किया जाता है। उसके प्रथम मन्त्र में विद्वान् लोग कैसे हों, इस विषय का उपदेश किया है॥

जुषस्व॑ स॒प्रथ॑स्तमं॒ वचो॑ दे॒वप्स॑रस्तमम्। ह॒व्या जुह्वा॑न आ॒सनि॑॥ १॥

जुषस्व॑। स॒प्रथ॑ः ऽतमम्। वचः॑। दे॒वप्स॑रः ऽतमम्। ह॒व्या। जुह्वा॑नः। आ॒सनि॑॥ १॥

पदार्थः-(**जुषस्व**) (**सप्रथस्तमम्**) अतिशयेन विस्तारयुक्तव्यवहारम् (**वचः**) वचनम् (**देवप्सरस्तमम्**) देवैर्विद्वद्भिरतिशयेन ग्राह्यम् तम् (**हव्या**) अत्तुमर्हाणि (**जुह्वानः**) भुञ्जानः (**आसनि**) व्याप्त्याख्ये मुखे। अत्र **पद्दन्नोमास०।** (अष्टा०६.१.६३) इति सूत्रेणासन्नादेशः॥ १॥

अन्वयः-हे विद्वन्नासनि हव्या जुह्वानस्त्वं य विदुषां व्यवहारस्तं सप्रथस्तमं देवप्सरस्तमं वचश्च जुषस्व॥ १॥

भावार्थः-ये मनुष्या युक्ताहारैर्ब्रह्मचारिणः स्युस्ते शरीरात्मसुखमाप्नुवन्तीति॥ १॥

पदार्थः-हे विद्वान्! (**आसनि**) अपने सुख में (**हव्या**) भोजन करने योग्य पदार्थों को (**जुह्वानः**) खानेवाले आप जो विद्वानों का (**सप्रथस्तमम्**) अतिविस्तारयुक्त (**देवप्सरस्तमम्**) विद्वानों को अत्यन्त ग्रहण करने योग्य व्यवहार वा (**वचः**) वचन है (**तम्**) उसको (**जुषस्व**) सेवन करो॥ १॥

भावार्थः-जो मनुष्य युक्तिपूर्वक भोजन, पान और चेष्टाओं से युक्त ब्रह्मचारी हों, वे शरीर और आत्मा के सुख को प्राप्त होते हैं॥ १॥

पुनस्तं प्रत्यन्ये किं वदेयुरित्याह॥

फिर उससे विद्वान् क्या कहें, इस विषय का उपदेश अगले मन्त्र में किया है॥

अथा॑ ते अङ्गिरस्तमाग्ने॑ वेधस्तम प्रि॒यम्। वो॒चेम॒ ब्रह्म॑ सान॒सि॥ २॥

अथ॑। ते॒। अ॒ङ्गि॒रः ऽत॒म॒। अग्ने॑। वे॒ध॒ः ऽत॒म॒। प्रि॒यम्। वो॒चेम॑। ब्रह्म॑। सा॒न॒सि॥ २॥

पदार्थः-(**अथ**) अनन्तरम् (**ते**) तुभ्यम् (**अङ्गिरस्तम**) अङ्गति गच्छति जानाति सोऽतिशयितस्तत्संबुद्धौ तस्मै वा (**अग्ने**) विज्ञानस्वरूप (**वेधस्तम**) अतिशयेन सर्वाविद्याधर (**प्रियम्**) प्रीणाति यत् तत् (**वोचेम**) उपदिशेम (**ब्रह्म**) वेदचतुष्टयम् (**सानसि**) सनातनम्॥ २॥

अन्वयः-हे अङ्गिरस्तम वेधस्तमाग्ने विद्वन्! यथा वयं वेदानधीत्याथ ते तुभ्यं सानसि प्रियं ब्रह्म वोचेम तथैव त्वं विधेहि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नह्युपदेशेन विना कस्यचिन्मनुष्यस्य परमेश्वरविषयं विद्युदादिविषयं वा ज्ञानं संभवति तस्मात् सर्वैर्मनुष्यैरुपदेशश्रवणे सदा कर्त्तव्ये॥ २॥

पदार्थः-हे **(अङ्गिरस्तम)** सब विद्याओं के जानने और **(वेधस्तम)** अत्यन्त धारण करनेवाले **(अग्ने)** विद्वान्! जैसे हम लोग वेदों को पढ़ के **(अथ)** इसके पीछे **(ते)** तुझे **(सानसि)** सदा से वर्त्तमान **(प्रियम्)** प्रीतिकारक **(ब्रह्म)** चारों वेदों का **(वोचेम)** उपदेश करें, वैसे ही तू कर॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वेदादि सत्यशास्त्रों के उपदेश के विना किसी मनुष्य को परमेश्वर और विद्युत् अग्नि आदि पदार्थों के विषय का ज्ञान नहीं होता॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, यह विषय कहा है॥

कस्ते॑ जा॒मिर्जना॑ना॒मग्ने॑ को दा॒श्वध्व॑रः। को ह॒ कस्मि॑न्नसि श्रि॒तः॥ ३॥

कः। ते॒। जा॒मिः। जना॑नाम्। अग्ने॑। कः। दा॒शुऽअ॑ध्वरः। कः। ह॒। कस्मि॑न्। अ॒सि॒। श्रि॒तः॥ ३॥

पदार्थः-**(कः)** **(ते)** तव **(जामिः)** ज्ञाता। अत्र ज्ञा धातोर्बाहुलकादौणादिको मिः प्रत्ययो जादेशश्च। **(जनानाम्)** मनुष्याणां मध्ये **(अग्ने)** सकलविद्यावित् **(कः)** **(दाश्वध्वरः)** दाशुर्दाताऽध्वरोऽहिंसको यस्मिन् सः **(कः)** **(ह)** किल **(कस्मिन्)** **(असि)** **(श्रितः)** आश्रितः॥ ३॥

अन्वयः-हे अग्ने विद्वन्! जनानां मध्ये ते तव को ह जामिरस्ति को दाश्वध्वरस्त्वं कः कस्मिन् श्रितोऽसीत्यस्य सर्वस्य वदोत्तरम्॥ ३॥

भावार्थः-मनुष्याणां मध्ये कश्चिदेव परमेश्वरस्याग्न्यादेश्च विज्ञाता विज्ञापको भवितुं शक्नोति। कुत एतयोरत्यन्ताश्चर्य्यगुणकर्मस्वभाववत्त्वात्॥ ३॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(जनानाम्)** मनुष्यों के बीच **(ते)** आपका **(कः)** कौन मनुष्य **(ह)** निश्चय करके **(जामिः)** जाननेवाला है **(कः)** कौन **(दाश्वध्वरः)** दान देने और रक्षा करनेवाला है, तू **(कः)** कौन है और **(कस्मिन्)** किसमें **(श्रितः)** आश्रित **(असि)** है, इस सब बात का उत्तर दे॥ ३॥

भावार्थः-बहुत मनुष्यों में कोई ऐसा होता है कि जो परमेश्वर और अग्न्यादि पदार्थों को ठीक-ठीक जाने और जनावें, क्योंकि ये दोनों अत्यन्त आश्चर्य्य गुण, कर्म और स्वभाववाले हैं॥ ३॥

पुनः स कीदृश इत्याह॥

फिर वह विद्वान् कैसा हो, यह विषय अगले मन्त्र में कहा है॥

त्वं जा॒मिर्जना॑ना॒मग्ने॑ मि॒त्रो अ॑सि प्रि॒यः। सखा॒ सखि॑भ्य॒ ईड्यः॥ ४॥

त्वम्। जा॒मिः। जना॑नाम्। अग्ने॑। मि॒त्रः। अ॒सि॒। प्रि॒यः। सखा॑। सखि॑ऽभ्यः। ईड्यः॥ ४॥

पदार्थः-**(त्वम्)** सर्वोपकारी **(जामिः)** उदकमिव शान्तिप्रदः। **जामिरित्युदकनामसु पठितम्।** (निघं०१.१२) **(जनानाम्)** मनुष्याणाम् **(अग्ने)** अत्यन्तविद्यायोगेनानूचान **(मित्रः)** सर्वसुहृत् **(असि)** वर्त्तते **(प्रियः)** कामयमानः प्रियकारी **(सखा)** सुखप्रदः **(सखिभ्यः)** मित्रेभ्यः **(ईड्यः)** स्तोतुमर्हः॥ ४॥

अन्वयः-हे अग्ने विद्वन्! यतस्त्वं जनानां जामिर्मित्रः प्रिय ईड्यः सन् सखिभ्यः सखाऽसि तस्मात् सर्वैस्सत्कर्त्तव्योऽसि॥४॥

भावार्थः-मनुष्यैर्यः सर्वदा मित्रो भूत्वा सर्वेभ्यो विद्यादिशुभगुणान् सुखानि च ददाति, स कथं न सेवनीयः॥४॥

पदार्थः-हे **(अग्ने)** पण्डित! जिस कारण **(जनानाम्)** मनुष्यों को **(जामिः)** जल के तुल्य सुख देनेवाले **(मित्रः)** सबके मित्र **(प्रियः)** कामना को पूर्ण करनेवाले योग्य विद्वान् **(त्वम्)** आप **(सखिभ्यः)** सबके मित्र मनुष्यों को **(ईड्यः)** स्तुति करने योग्य **(सखा)** मित्र हो, इसीसे सबको सेवने योग्य विद्वान् **(असि)** हो॥४॥

भावार्थः-मनुष्यों को उस परमेश्वर और उस विद्वान् मनुष्य की सेवा क्यों नहीं करना चाहिये कि जो संसार में विद्यादि शुभ गुण और सबको सुख देता है॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

यजा॑ नो मि॒त्रावरु॑णा॒ यजा॑ दे॒वाँ ऋ॒तं बृ॒हत्। अग्ने॒ यक्षि॒ स्वं दम॑म्॥५॥२३॥

यज॑। न॒ः। मि॒त्रावरु॑णा। यज॑। दे॒वान्। ऋ॒तम्। बृ॒हत्। अग्ने॑। यक्षि॑। स्वम्। दम॑म्॥५॥

पदार्थः-**(यज)** सङ्गमय। अत्र **द्व्यचोऽतस्तिङ्** इति दीर्घः। **(नः)** अस्मभ्यम् **(मित्रावरुणा)** बलपराक्रमकारकौ प्राणोदानौ **(यज)** सङ्गच्छस्व **(देवान्)** दिव्यगुणान् भोगान् **(ऋतम्)** सत्यं विज्ञानम् **(बृहत्)** महाविद्यादिगुणयुक्तम् **(अग्ने)** विज्ञानयुक्त **(यक्षि)** यजसि। अत्र लडर्थे लुङ्। **(स्वम्)** स्वकीयम् **(दमम्)** दान्तस्वभावं गृहम्॥५॥

अन्वयः-हे अग्ने यतस्त्वं स्वं दमं यक्षि तस्मान्नो मित्रावरुणा यज बृहदृतं देवाँश्च यज॥५॥

भावार्थः-यथा परमेश्वरस्य परोपकारन्यायादिशुभगुणदानस्वभावोऽस्ति तथैव विद्वद्भिरपि तादृक् स्वभावः कर्त्तव्यः॥५॥

अत्रेश्वराग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति पञ्चसप्ततितमं ७५ सूक्तं त्रयोविंशो २३ वर्गश्च समाप्तः॥५॥

पदार्थः-हे **(अग्ने)** पूर्ण विद्यायुक्त विद्वान् मनुष्य! जिस कारण **(स्वम्)** आप अपने **(दमम्)** उत्तम स्वभावरूपी घर को **(यक्षि)** प्राप्त होते हैं, इसी से **(नः)** हमारे लिये **(मित्रावरुणा)** बल और पराक्रम के करनेवाले प्राण और उदान को **(यज)** अरोग कीजिये **(बृहत्)** बड़े-बड़े विद्यादिगुणयुक्त **(ऋतम्)** सत्य विज्ञान को **(यज)** प्रकाशित कीजिये॥५॥

भावार्थः–जैसे परमेश्वर का परोपकार के लिये न्याय आदि शुभ गुण देने का स्वभाव है, वैसे ही विद्वानों को भी अपना स्वभाव रखना चाहिये॥५॥

इस सूक्त में ईश्वर अग्नि और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह पचहत्तरवां ७५ सूक्त और तेईसवां २३ वर्ग पूरा हुआ॥

अथ पञ्चर्च्चस्य षट्सप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता। १,३,४ निचृत्त्रिष्टुप्। २,५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनः स कीदृश इत्युपदिश्यते॥

अब छहत्तरवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में विद्वान् के गुणों का उपदेश किया है॥

का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा।
को वां यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम॥ १॥

का। ते। उपेऽइतिः। मनसः। वराय। भुवत्। अग्ने। शम्ऽतमा। का। मनीषा। कः। वा। यज्ञैः। परि। दक्षम्। ते। आप। केन। वा। ते। मनसा। दाशेम॥ १॥

पदार्थः-(**का**) नीतिः (**ते**) तवानूचानस्य विदुषः (**उपेतिः**) उपेयन्ते सुखानि यया सा (**मनसः**) चित्तस्य (**वराय**) श्रैष्ठ्याय (**भुवत्**) भवति (**अग्ने**) शान्तिप्रद (**शन्तमा**) अतिशयेन सुखप्रापिका (**का**) (**मनीषा**) प्रज्ञा (**कः**) मनुष्यः (**वा**) पक्षान्तरे (**यज्ञैः**) अध्ययनाध्यापनादिभिर्यज्ञैः (**परि**) सर्वतः (**दक्षम्**) बलम् (**ते**) तव (**आप**) प्राप्नोति (**केन**) कीदृशेन (**वा**) पक्षान्तरे (**ते**) तुभ्यम् (**मनसा**) विज्ञानेन (**दाशेम**) दद्याम॥ १॥

अन्वयः-हे अग्ने! ते तव का उपेतिर्मनसो वराय भुवत्। का शन्तमा मनीषा को वा ते दक्षं यज्ञैः पर्याप वयं केन मनसा किं वा ते दाशेमेति ब्रूहि॥ १॥

भावार्थः-मनुष्यैः परमेश्वरस्य विदुषो वेदृशी प्रार्थना कार्य्या हे भगवँस्त्वं कृपयाऽस्माकं शुद्धये यद्वरं कर्म वरा बुद्धिः श्रेष्ठं बलमस्ति तानि देहि येन वयं त्वां विज्ञाय प्राप्य वा सुखिनो भवेम॥ १॥

पदार्थः-हे (**अग्ने**) शान्ति के देनेवाले विद्वान् मनुष्य! (**ते**) तुझ अति श्रेष्ठ विद्वान् की (**का**) कौन (**उपेतिः**) सुखों को प्राप्त करनेवाली नीति (**मनसः**) चित्त की (**वराय**) श्रेष्ठता के लिये (**भुवत्**) होती है (**का**) कौन (**शन्तमा**) सुख को प्राप्त करनेवाली (**मनीषा**) बुद्धि होती है (**कः**) कौन मनुष्य (**वा**) निश्चय करके (**ते**) आपके (**दक्षम्**) बल को (**यज्ञैः**) पढ़ने-पढ़ाने आदि यज्ञों को करके (**परि**) सब ओर से (**आप**) प्राप्त होता है (**वा**) अथवा हम लोग (**केन**) किस प्रकार के (**मनसा**) मन से (**ते**) आपके लिये क्या (**दाशेम**) देवें॥ १॥

भावार्थः-मनुष्यों को परमेश्वर और विद्वान् से ऐसी प्रार्थना करनी चाहिये कि हे परमात्मन् वा विद्वान् पुरुष! आप कृपा करके हमारी शुद्धि के लिये श्रेष्ठ कर्म, श्रेष्ठ बुद्धि और श्रेष्ठ बल को दीजिये, जिससे हम लोग आपको जान और प्राप्त होके सुखी हों॥ १॥

पुनः स किमर्थं प्रार्थनीय इत्युपदिश्यते॥

फिर उस विद्वान् की प्रार्थना किसलिये करनी चाहिये, इस विषय का उपदेश अगले मन्त्र में किया

है॥

एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान्॥ २॥

आ। इहि। अग्ने। इह। होता। नि। सीद। अदब्धः। सु। पुरःएता। भव। नः। अवताम्। त्वा। रोदसी इति। विश्वमिन्वे इति विश्वम्ऽइन्वे। यज। महे। सौमनसाय। देवान्॥ २॥

पदार्थः-(**आ**) समान्तात् (**इहि**) प्राप्नुहि (**अग्ने**) विश्वोपकारक (**इह**) अस्मिन् संसारे (**होता**) दाता सन् (**नि**) नित्यम् (**सीद**) आस्व (**अदब्धः**) अस्माभिरहिंसितोऽतिरस्कृतः (**सु**) सुष्ठु (**पुरएता**) पूर्वं प्राप्तः (**भव**) (**नः**) अस्मान् (**अवताम्**) रक्षेताम् (**त्वा**) त्वाम् (**रोदसी**) विद्याप्रकाशभूमिराज्ये द्यावापृथिव्यौ वा (**विश्वमिन्वे**) विश्वतर्पके (**यज**) सङ्गच्छस्व (**महे**) महते (**सौमनसाय**) मनसो निर्वैरत्वाय (**देवान्**) विदुषो दिव्यगुणान् वा॥ २॥

अन्वयः-हे अग्नेऽदब्धस्त्वमिह नो होतेहि सुनिषीद पुरएता भव यं त्वां विश्वमिन्वे रोदसी अवतां स त्वं महे सौमनसाय देवान् यज॥ २॥

भावार्थः-एवं सत्यभावेन प्रार्थितः परमेश्वरः सेवितो धार्मिको विद्वान् वा सर्वमेतन्मनुष्येभ्यो ददाति॥ २॥

पदार्थः-हे (**अग्ने**) सबके उपकार करनेवाले विद्वान्! (**अदब्धः**) अहिंसक हम लोगों को सेवा करने योग्य आप (**इह**) इस संसार में (**होता**) देनेवाले (**नः**) हम लोगों को (**आ, इहि**) प्राप्त हूजिये (**सु**) अच्छे प्रकार (**नि**) नित्य (**सीद**) ज्ञान दीजिये (**पुरएता**) पहिले प्राप्त करनेवाले (**भव**) हूजिये जिस (**त्वा**) आपको (**विश्वमिन्वे**) सब संसार को तृप्त करनेवाले (**रोदसी**) विद्याप्रकाश और भूगोल का राज्य अथवा आकाश और पृथिवी (**अवताम्**) प्राप्त हों, सो आप (**महे**) बड़े (**सौमनसाय**) मन का वैरभाव छुड़ाने के लिये (**देवान्**) विद्वान् दिव्य गुणों को स्वात्मा में (**यज**) संगत कीजिये॥ २॥

भावार्थः-इस प्रकार सत्यभाव से प्रार्थना किया हुआ परमेश्वर और सेवा किया हुआ धर्मात्मा विद्वान् सब सुख मनुष्यों को देता है॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र सु विश्वान् रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा।
अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने॥ ३॥

प्र। सु। विश्वान्। रक्षसः। धक्षि। अग्ने। भव। यज्ञानाम्। अभिशस्तिऽपावा। अथ। आ। वह। सोमऽपतिम्। हरिऽभ्याम्। आतिथ्यम्। अस्मै। चकृम। सुऽदाव्ने॥ ३॥

पदार्थः-(**प्र**) प्रकृष्टे (**सु**) सुष्ठु (**विश्वान्**) सर्वान् (**रक्षसः**) दुष्टान् मनुष्यान् दोषान् वा। अत्र लिङ्गव्यत्ययः। (**धक्षि**) दहसि। अत्र **बहुलं छन्दसी**ति शपो लुक्। (**अग्ने**) दुष्टप्रशासक सभाध्यक्ष (**भव**) (**यज्ञानाम्**) विज्ञानक्रियाशिल्पसाधकानाम् (**अभिशस्तिपावा**) योऽभिशस्तेर्हिंसायाः पावा रक्षकः सः (**अथ**) आनन्तर्ये (**आ**) अभितः (**वह**) प्राप्नुहि (**सोमपतिम्**) ऐश्वर्याणां स्वामिनम् (**हरिभ्याम्**) धारणाकर्षणाभ्याम् (**आतिथ्यम्**) अतिथेः कर्म (**अस्मै**) (**चकृम**) कुर्याम (**सुदान्वे**) विद्याविनयसुशिक्षाराज्यधनानां सुष्ठु दात्रे॥३॥

अन्वयः-हे अग्ने! यतस्त्वं विश्वान् रक्षसः प्रधक्षि तस्मादेव यज्ञानामभिशस्तिपावा भव। यथा सूर्यो हरिभ्यां सोमपतिं वहति तथैश्वर्यमावहाऽथातोऽस्मै सुदान्वे तुभ्यमातिथ्यं चकृम॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरेण जगति प्राणिभ्यः सर्वे पदार्थो दत्तास्तथा मनुष्यैर्यो विद्यासुशिक्षे दद्यात्तस्यैव सत्कारः कर्त्तव्यो नेतरस्य॥३॥

पदार्थः-हे (**अग्ने**) दुष्टों को शिक्षा करनेवाले सभाध्यक्ष! जिस प्रकार आप (**विश्वान्**) सब (**रक्षसः**) दुष्ट मनुष्यों वा दोषों का (**प्र**) अच्छे प्रकार (**धक्षि**) नाश करते हैं, इसी कारण (**यज्ञानाम्**) जो जानने योग्य कारीगरी है उनके साधकों की (**अभिशस्तिपावा**) हिंसा से रक्षा करने वाले (**सु**) अच्छे प्रकार (**भव**) हूजिये, जैसे सूर्य्य (**हरिभ्याम्**) धारण और आकर्षण से सब सुखों को प्राप्त करता है, वैसे (**सोमपतिम्**) ऐश्वर्यों के स्वामी को (**आवह**) प्राप्त हूजिये, (**अथ**) इसके पीछे (**अस्मै**) इस (**सुदान्वे**) विद्या विज्ञान अच्छी शिक्षा राज्यादि धनों के देनेवाले आपके लिये हम लोग (**आतिथ्यम्**) सत्कार (**चकृम**) करते हैं॥३॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर ने जगत् में प्राणियों के वास्ते सब पदार्थ दिये हैं, वैसे जो मनुष्य उत्तम विद्या और शिक्षा देवे उसीका सत्कार करें, अन्य का नहीं॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनितर्वसूनाम्॥४॥

प्रजाऽवता। वचसा। वह्निः। आसा। आ। च। हुवे। नि। च। सत्सि। इह। देवैः। वेषि। होत्रम्। उत। पोत्रम्। यजत्र। बोधि। प्रऽयन्तः। जनितः। वसूनाम्॥४॥

पदार्थः-(**प्रजावता**) प्रशस्ता प्रजा विद्यते यस्मिँस्तेन (**वचसा**) वचनेन (**वह्निः**) सुखानां प्रापकः (**आसा**) अस्यन्ते वर्णा येन तेन मुखेन (**च**) समुच्चये (**हुवे**) स्तुवे। अत्र **बहुलं छन्दसी**ति संप्रसारणम्। (**नि**) नितराम् (**च**) पुनरर्थे (**सत्सि**) सभायाम् (**इह**) अस्मिन् संसारे (**देवैः**) दिव्यगुणैर्विद्वद्भिर्वा (**वेषि**)

व्याप्नोषि **(होत्रम्)** हवनीयं वस्तु **(उत)** अपि **(पोत्रम्)** पवित्रकारम् **(यजत्र)** दातः **(बोधि)** जानीहि **(प्रयन्तः)** प्रकृष्टनियमकर्त्तः **(जनितः)** उत्पादकः **(वसूनाम्)** वासाधिकरणानाम्॥४॥

अन्वयः-हे यजत्र! यो वह्निस्त्वमिह देवैः सह सत्सि प्रजावता वचसा बोधि यतो होत्रमुत पोत्रं निवेषि। हे यजत्र! प्रयन्तर्यथा त्वं वसूनां वेत्ताऽसि तथाऽहमासा त्वां हुवे॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः परमेश्वरस्य धार्मिकाणां विदुषां च सहायेन पवित्रतां सम्पाद्य सर्वाणि श्रेष्ठानि प्राप्तव्यानि॥४॥

पदार्थः-हे **(यजत्र)** दाता! **(वह्निः)** सुखों को प्राप्त करनेवाले तू **(इह)** इस संसार में **(देवैः)** विद्वानों के साथ **(सत्सि)** सभा में **(प्रजावता)** प्रजा की सम्मति के अनुकूल **(वचसा)** वचनों से **(बोधि)** बोध कराता है, जिससे **(होत्रम्)** हवन करने योग्य **(च)** और **(पोत्रम्)** पवित्र करनेवाले वस्तुओं को **(उत)** भी **(नि)** निरन्तर **(वेषि)** प्राप्त होता है, **(जनितः)** सुखोत्पन्न करनेवाले **(प्रयन्तः)** प्रयत्न से तू जैसे **(वसूनाम्)** पृथिव्यादि पदार्थों को जाननेवाला है, वैसे मैं **(आसा)** मुख से तेरी **(च)** अन्य विद्वानों की भी **(आहुवे)** स्तुति करता हूँ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य परमेश्वर और धार्मिक विद्वानों के सहाय और संग से शुद्धि को प्राप्त होकर सब श्रेष्ठ वस्तुओं को प्राप्त हों॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर पूर्वोक्त कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

यथा॑ विप्र॑स्य मनु॑षो ह॒विर्भि॑र्दे॒वाँ अय॑जः क॒विभि॑: क॒विः सन्।
एवा हो॑तः सत्यतर॒ त्वम॒द्याग्ने॑ म॒न्द्रया॑ जु॒ह्वा॑ यजस्व॥५॥२४॥

यथा॑॥ विप्र॑स्य। मनु॑षः। ह॒विःऽभि॑। दे॒वान्। अय॑जः। क॒विऽभि॑:। क॒विः। सन्। एव। हो॒त॒रिति॑। स॒त्य॒ऽत॒र॒। त्वम्। अ॒द्य। अग्ने॑। म॒न्द्रया॑। जु॒ह्वा॑। य॒ज॒स्व॒॥५॥

पदार्थः-**(यथा)** येन प्रकारेण **(विप्रस्य)** मेधाविनः **(मनुषः)** मननशीलस्य मानवस्य **(हविर्भिः)** आदेयैर्गुणकर्मस्वभावैः सह **(देवान्)** विदुषो दिव्यगुणान् वा **(अयजः)** **(कविभिः)** पूर्णविद्यैः क्रान्तदर्शनैः **(कविः)** क्रान्तदर्शनो विद्वान् **(सन्)** वर्त्तमानः **(एव)** निश्चये **(होतः)** सर्वसुखप्रदातः **(सत्यतर)** अतिशयेन सत्यस्वरूप **(त्वम्)** परमात्मा विद्वान् वा **(अद्य)** अस्मिन् दिने **(अग्ने)** ज्ञानप्रदविद्वन् **(मन्द्रया)** आह्लादकामनाविज्ञानप्रदया स्तुत्या **(जुह्वा)** आदानक्रियाकौशलया बुद्ध्या **(यजस्व)** सुखानि देहि॥५॥

अन्वयः-हे सत्यतर होतरग्ने! यथा कश्चिद्धार्मिको विद्वान् विद्यार्थी वा विप्रस्य मनुषोऽनुकूलो भूत्वा सुखकारी वर्त्तते, तथैव त्वमद्य कविभिः सह सन् यया हविर्भिर्देवानयजस्तया मन्द्रया जुह्वाऽस्मान् यजस्व॥५॥

भावार्थः-यथा कश्चिन्मनुष्यो विद्वद्भ्यो विद्यां प्राप्य सर्वोपकारी भूत्वा सर्वान् प्राणिनः सुखयित्वा मनुष्यान् विदुषः कृत्वानन्दति तथैवाप्तौ मनुष्यो वर्त्तते इति वेद्यम्॥५॥

अत्रेश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति षट्सप्ततितमं ७६ सूक्तं चतुर्विंशो २४ वर्गश्च समाप्तः॥

पदार्थः-हे **(सत्यतर)** अतिशय सत्याचारनिष्ठ **(होतः)** सत्यग्रहण करनेहारे दाता **(अग्ने)** विद्वान्! **(यथा)** जैसे कोई धार्मिक विद्वान् अथवा विद्यार्थी **(विप्रस्य)** बुद्धिमान् अध्यापक विद्वान् **(मनुषः)** मनुष्य के अनुकूल होके सबका सुखदायक होता है, वैसे **(एव)** ही **(त्वम्)** तू **(अद्य)** इसी समय **(कविभिः)** पूर्णविद्यायुक्त बहुदर्शी विद्वानों के साथ **(कविः)** विद्वान् बहुदर्शी **(सन्)** होके जिन **(हविर्भिः)** ग्रहण करने योग्य गुण, कर्म, स्वभावों के साथ **(देवान्)** विद्वान् और दिव्यगुणों को **(अयजः)** प्राप्त होता है, उस **(मन्द्रया)** आनन्द करनेहारी **(जुह्वा)** दान क्रिया से हमको **(यजस्व)** प्राप्त हो॥५॥

भावार्थः-जैसे कोई मनुष्य विद्वानों से सब विद्याओं को प्राप्त करके सबका उपकारक हो, सब प्राणियों को सुख दे, सब मनुष्यों को विद्वान् करके आनन्दित होता है, वैसे ही आप्त अर्थात् पूर्ण विद्वान् धार्मिक होता है॥५॥

इस सूक्त में ईश्वर और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह छहत्तरवां ७६ सूक्त और चौबीसवां २४ वर्ग पूरा हुआ॥

अथ पञ्चर्च्चस्य सप्तसप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता। १ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २ निचृत्त्रिष्टुप्। ३-५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनः स कीदृश इत्युपदिश्यते॥

अब सतहत्तरवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में विद्वान् कैसा हो, यह विषय कहा है॥

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान्॥ १॥

कथा। दाशेम। अग्नये। का। अस्मै। देवऽजुष्टा। उच्यते। भामिने। गीः। यः। मर्त्येषु। अमृतः। ऋतऽवा। होता। यजिष्ठः। इत्। कृणोति। देवान्॥ १॥

पदार्थः-(**कथा**) केन प्रकारेण (**दाशेम**) दद्याम (**अग्नये**) विज्ञापकाय (**का**) वक्ष्यमाणा (**अस्मै**) उपदेशकाय (**देवजुष्टा**) विद्वद्भिः प्रीता सेविता वा (**उच्यते**) कथ्यते (**भामिने**) प्रशस्तो भामः क्रोधो विद्यते यस्य तस्मै (**गीः**) वाक् (**यः**) जीवः (**मर्त्येषु**) नश्यमानेषु पदार्थेषु (**अमृतः**) मृत्युरहितः (**ऋतावा**) ऋताः प्रशस्ताः सत्या गुणा विद्यन्ते यस्मिन् सः (**होता**) ग्रहीता दाता (**यजिष्ठः**) अतिशयेन यष्टा सङ्गमिता (**इत्**) एव (**कृणोति**) करोति (**देवान्**) दिव्यगुणान् पदार्थान् विदुषो वा॥ १॥

अन्वयः-हे मनुष्या! यथा वयं विद्वद्भिर्यो मर्त्येष्वमृत ऋतावा होता यजिष्ठो देवान् कृणोत्यस्मै भामिनेऽग्नये का कथा देवजुष्टा गीरुच्यते तस्मा इदेव दाशेम तथा यूयमपि कुरुत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वानीश्वरस्य स्तुतिं विद्वत्सेवनं च कृत्वा दिव्यान् गुणान् प्राप्य सुखानि प्राप्नोति, तथैवाऽस्माभिरपि कर्त्तव्यम्॥ १॥

पदार्थः-हे मनुष्यो! जैसे हम लोग विद्वानों के साथ होते हैं, वैसे (**यः**) जो (**मर्त्येषु**) मरणधर्म्मयुक्त शरीरादि में (**अमृतः**) मृत्युरहित (**ऋतावा**) सत्य गुण, कर्म, स्वभावयुक्त (**होता**) दाता और ग्रहण करनेहारा (**यजिष्ठः**) अत्यन्त सत्संगी (**देवान्**) दिव्यगुण वा दिव्यपदार्थों वा विद्वानों को (**कृणोति**) करता है (**अस्मै**) इस उपदेशक (**भामिने**) दुष्टों पर क्रोधकारक (**अग्नये**) सत्यासत्य जनानेहारे के लिये (**का**) कौन (**कथा**) किस हेतु से (**देवजुष्टा**) विद्वानों ने सेवी हुई (**गीः**) वाणी (**उच्यते**) कही है, उस (**इत्**) ही को (**दाशेम**) विद्या देवें, वैसे तुम भी किया करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् ईश्वर की स्तुति और विद्वानों को सेवन करके दिव्य गुणों को प्राप्त होकर सुखों को प्राप्त होता है, वैसे ही हम लोगों को सेवन करना चाहिये॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में कहा है॥

या अ॑ध्व॒रेषु॒ शंत॑म ऋ॒तावा॒ होता॒ तमू॒ नमो॑भि॒रा कृ॑णुध्वम्।
अ॒ग्निर्यद्वे॒र्मर्ता॑य दे॒वान्त्स चा॒ बोधा॑ति॒ मन॑सा यजाति॥ २॥

यः। अ॒ध्व॒रेषु॑। शम्ऽतमः। ऋ॒तऽवा॑। होता॑। तम्। ऊ॒म्ऽइति॑। नमः॑ऽभिः। आ। कृ॒णु॒ध्व॒म्। अ॒ग्निः। यत्। वेः। मर्ता॑य। दे॒वान्। सः। च॒। बोधा॑ति। मन॑सा। य॒जा॒ति॒॥ २॥

पदार्थः-(**यः**) विद्वान् (**अध्वरेषु**) अहिंसनीयेषु (**शन्तमः**) अतिशयेनानन्दप्रदः (**ऋतावा**) सत्यगुणकर्मस्वभाववान् (**होता**) सर्वस्य जगतो विज्ञानस्य वा दाता (**तम्**) (**उ**) वितर्के (**नमोभिः**) नमस्कारैरन्नैर्वा (**आ**) समन्तात् (**कृणुध्वम्**) कुरुध्वम् (**अग्निः**) विज्ञानस्वरूपः (**यत्**) यः (**वेः**) आवहति (**मर्त्ताय**) मनुष्याय (**देवान्**) दिव्यगुणान् विज्ञानादीन् (**सः**) (**च**) समुच्चये (**बोधाति**) जानीयात् (**मनसा**) विज्ञानेन (**यजाति**) सङ्गच्छेत॥ २॥

अन्वयः-हे मनुष्या! यूयं योऽग्निरध्वरेषु शन्तम ऋतावा होताऽस्ति यद्यो मर्त्ताय देवान् वेस्स मनसा सर्वान् बोधाति यजाति च तमु नमोभिराकृणुध्वम् प्रसन्नं कुरुध्वम्॥ २॥

भावार्थः-नह्याप्तेन मनुष्येण विना मनुष्याणां विद्याऽऽध्यापको विद्यते, नहि तं विहायान्यः कश्चित् सत्कर्त्तुं महोऽस्तीति वेद्यम्॥ २॥[११]

पदार्थः-हे मनुष्यो! तुम लोग (**यः**) जो (**अग्निः**) विज्ञानस्वरूप परमेश्वर वा विद्वान् (**अध्वरेषु**) सदैव ग्रहण करने योग्य यज्ञों में (**शन्तमः**) अत्यन्त आनन्द को देनेहारा तथा (**ऋतावा**) शुभ गुण, कर्म,और स्वभाव से सत्य है (**होता**) सब जगत् और विज्ञान का देनेवाला है तथा (**यत्**) जो (**मर्त्ताय**) मनुष्य के लिये (**देवान्**) विज्ञान और श्रेष्ठ गुणों को (**बोधाति**) अच्छे प्रकार जाने (**च**) और (**यजाति**) संगत करें, इसलिये (**तम् उ**) उसी परमेश्वर वा विद्वान् को (**नमोभिः**) नमस्कार वा अन्नों से प्रसन्न (**आ कृणुध्वम्**) करो॥ २॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। परमेश्वर और धर्मात्मा मनुष्य के विना मनुष्य को विद्या का देनेवाला कोई दूसरा नहीं है तथा उन दोनों को छोड़ के उपासना तथा सत्कार भी किसी का न करना चाहिये॥ २॥

पुनः स विद्वान् कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः।

---

११. हिन्दी भावार्थ में श्लेषालंकार दिखाया है, जबकि संस्कृत-भावार्थ में ऐसा नहीं किया है। सं०

तं मेधे॑षु प्रथ॒मं दे॑व॒यन्ती॒र्विश॒ उप॑ ब्रुवते दु॒स्ममारी॑:॥ ३॥

सः। हि। क्रतु॑:। सः। मर्य॑:। सः। सा॒धुः। मि॒त्रः। न। भूत्। अद्भु॑तस्य। र॒थीः। तम्। मेधे॑षु। प्र॒थ॒मम्। दे॒व॒ऽयन्ती॑:। विश॑:। उप॑। ब्रु॒व॒ते॒। दु॒स्मम्। आरी॑:॥ ३॥

पदार्थः-(**सः**) अग्निर्ज्ञानवान् विद्वान् (**हि**) खलु (**क्रतुः**) प्रज्ञाकर्मयुक्तः प्रज्ञाकर्मज्ञापको वा (**सः**) (**मर्यः**) मनुष्यः (**सः**) (**साधुः**) परोपकारी सन्मार्गस्थितो विद्वान् (**मित्रः**) सुहृत् (**न**) इव (**भूत्**) भवेत्। अत्राडभावः। (**अद्भुतस्य**) आश्चर्यकर्मयुक्तस्य सैन्यस्य (**रथीः**) प्रशस्तरथः। अत्र **वा छन्दसि सर्वे विधयो भवन्ती**ति सोरलुक्। (**तम्**) (**मेधेषु**) अध्ययनाध्यापनसंग्रामादियज्ञेषु (**प्रथमम्**) सर्वोत्कृष्टम् (**देवयन्तीः**) कामयमानाः। अत्र **वा छन्दसी**ति पूर्वसवर्णादेशः। (**विशः**) प्रजाः (**उप**) (**ब्रुवते**) (**दस्मम्**) दुःखनामुपक्षेत्तारम् (**आरीः**) ज्ञानवत्यः। अत्र ऋ धातोः **सर्वधातुभ्य इन्नि**तीन्। **कृदिकारादक्तिन** इति ङीष् पूर्वसवर्णादेशश्च॥ ३॥

अन्वयः-देवयन्तीः कामयमाना आरीर्ज्ञानवत्यो विशः प्रजाः मेधेषु तं दस्मं सभाध्यक्षत्वेन प्रथममुपब्रुवते। यो मित्रो न सर्वस्य हृदिव भूद् भवेत्, स हि खलु सर्वथा ऋतः स मर्यो मनुष्यस्वभावः स साधुरद्भुतस्य सैन्यस्य रथो रथवान् भवेत्॥ ३॥

भावार्थः-मनुष्यैर्यः सर्वोत्कृष्टगुणकर्मस्वभावः सज्जनः सर्वोपकारी मनुष्योऽस्ति, स एव सभाध्यक्षत्वेन राजा मन्तव्यः। नैव कस्यचिदेकस्याज्ञायां राज्यव्यवहारोऽधिकर्त्तव्यः। किन्तु शिष्टसभाधीनान्येव सर्वाणि कार्याणि रक्षणीयानि॥ ३॥

पदार्थः-(**देवयन्तीः**) कामनायुक्त (**आरीः**) ज्ञानवाली (**विशः**) प्रजा (**मेधेषु**) पढ़ने-पढ़ाने और संग्राम आदि यज्ञों में (**तम्**) उस (**दस्मम्**) दुःखनाश करनेवाले को सभाध्यक्ष मान कर (**प्रथमम्**) सबसे उत्तम (**उपब्रुवते**) कहती है कि जो (**मित्रः**) सबका मित्र (**न**) जैसा (**भूत्**) हो (**स हि**) वही सब प्रकार (**क्रतुः**) बुद्धि और सुकर्म से युक्त (**सः**) वही (**मर्य्यः**) मनुष्यपन का रखनेवाला और (**सः**) वही (**साधुः**) सबका उपकार करने तथा श्रेष्ठ मार्ग में चलनेवाला विद्वान् (**अद्भुतस्य**) आश्चर्यकर्मों से युक्त सेना का (**रथीः**) उत्तम रथवाला रथी होवे॥ ३॥

भावार्थः-मनुष्यों को चाहिये कि जो सबसे अधिक गुण, कर्म और स्वभाव तथा सबका उपकार करने वाला सज्जन मनुष्य है, उसीको सभाध्यक्ष का अधिकार देके राजा माने अर्थात् किसी एक मनुष्य को स्वतन्त्र राज्य का अधिकार न देवें, किन्तु शिष्ट पुरुषों की जो सभा है, उसके आधीन राज्य के सब काम रक्खें॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह उक्त विद्वान् कैसा हो, यह विषय अगले मन्त्र में कहा है॥

स नो॑ नृ॒णां नृत॑मो रि॒शादा॑ अ॒ग्निर्गिरो॒ऽवसा वेतु धी॒तिम्।

तना॑ च॒ ये म॒घवा॑न॒: शवि॑ष्ठा॒ वाज॑प्रसूता इ॒षय॑न्त॒ मन्म॑॥४॥

स:। न॒:। नृ॒णाम्। नृऽत॑म:। र॒िशाद॑:। अ॒ग्नि:। गिर॑:। अव॑सा। वे॒तु॒। धी॒तिम्। तना॑। च॒। ये। म॒घऽवा॑न:। शवि॑ष्ठा:। वाज॑ऽप्रसूता:। इ॒षय॑न्त। मन्म॑॥४॥

पदार्थ:-(**स:**) (**न:**) अस्माकम् (**नृणाम्**) मनुष्याणां मध्ये (**नृतम:**) अतिशयेनोत्तमो नर: (**रिशाद:**) यो रिशान् हिंसकान् शत्रूनत्ति नाशयति स:। अत्रादधातोरसुन्। (**अग्नि:**) उत्कृष्टगुणविज्ञान: (**गिर:**) वाणी (**अवसा**) रक्षणादिना (**वेतु**) कामयताम् (**धीतिम्**) धारणाम् (**तना**) विस्तृतानि धनानि। **तनेति धननामसु पठितम्।** (निघं०२.१०) (**च**) विद्यादिशुभगुणानां समुच्चये (**ये**) (**मघवान:**) प्रशस्तधना: (**श्रविष्ठा:**) अतिशये बलवन्त: (**वाजप्रसूता:**) विज्ञानादिगुणै: प्रकाशिता: (**इषयन्त**) एषयन्ति प्राप्नुवन्ति। अत्र लङि **वा च्छन्दसि सर्वे विधयो भवन्ती**ति गुणाभावोऽडभावश्च। (**मन्म**) विज्ञानम्। अत्रा**न्येभ्योऽपि दृश्यन्त** इति मनधातोर्मनिन्॥४॥

अन्वय:-यो नोऽस्माकं नृणां मध्ये नृतमोऽग्निरिवावसा गिरो धीतिं च कामयते स नो नृणां मध्ये सभाध्यक्षत्वं वेतु प्राप्नोतु। ये नोऽस्माकं नृणां मध्ये रिशादा वाजप्रसूता: श्रविष्ठा मघवानस्तना मन्म चात् सद्गुणानिषयन्त ते नोऽस्माकं सभासद: सन्तु॥४॥

भावार्थ:-मनुष्यै: सपरमोत्तमसभाध्यक्षमनुष्यां सभां निर्माय राज्यव्यवहारपालने चक्रवर्त्तिराज्यं प्रशासनीयं नैवं विना कदाचित् स्थिरं राज्यं कस्यचिद्भवितुमर्हति। तस्मादेतत्सदानुष्ठायैको राजा नैव मन्तव्य:॥४॥

पदार्थ:-जो (**न:**) हमारे (**नृणाम्**) मनुष्यों के बीच (**नृतम:**) अत्यन्त उत्तम मनुष्य (**अग्नि:**) पावक के तुल्य अधिक ज्ञान प्रकाशवाला (**अवसा**) रक्षण आदि से (**गिर:**) वाणी और (**धीतिम्**) धारणा को चाहता है (**स:**) वह मनुष्य हमारे बीच में सभाध्यक्ष के अधिकार को (**वेतु**) प्राप्त हो, जो (**नृणाम्**) मनुष्यों में (**रिशाद:**) शत्रुओं को नष्ट करनेहारे (**वाजप्रसूता:**) विज्ञान आदि गुणों से शोभायमान (**शविष्ठा:**) अत्यन्त बलवान् (**मघवान:**) प्रशंसित धनवाले (**तना**) विस्तृत धनों की और (**मन्म**) विज्ञान (**च**) विद्या आदि अच्छे-अच्छे गुणों की (**इषयन्त**) इच्छा करते हैं, इसीसे हमारी सभा में वे लोग सभासद् हों॥४॥

भावार्थ:-मनुष्यों को चाहिये कि अत्युत्तम सभाध्यक्ष मनुष्यों के सहित सभा बना के राज्यव्यवहार की रक्षा से चक्रवर्त्तिराज्य की शिक्षा करे, इसके विना कभी स्थिर राज्य नहीं हो सकता, इसलिये पूर्वोक्त कर्म का अनुष्ठान करके एक को राजा नहीं मानना चाहिये॥४॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः।

स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान्॥५॥२५॥

एव। अग्निः। गोतमेभिः। ऋतऽवा। विप्रेभिः। अस्तोष्ट। जातऽवेदाः। सः। एषु। द्युम्नम्। पीपयत्। सः। वाजम्। सः। पुष्टिम्। याति। जोषम्। आ। चिकित्वान्॥५॥

पदार्थः-(**एव**) अवधारणार्थे (**अग्निः**) उक्तार्थे (**गोतमेभिः**) अतिशयेन स्तावकैः (**ऋतावा**) ऋतानि सत्यानि कर्माणि गुणा स्वभावो वा विद्यते यस्य सः (**विप्रेभिः**) मेधाविभिः (**अस्तोष्ट**) स्तौति (**जातवेदाः**) यो जातानि विन्दति वेत्ति वा सः (**सः**) (**एषु**) धार्मिकेषु विद्वत्सु (**द्युम्नम्**) विद्याप्रकाशम् (**पीपयत्**) प्रापयति (**सः**) (**वाजम्**) उत्तमान्नादिपदार्थसमूहम् (**सः**) (**पुष्टिम्**) धातुसाम्योपचयम् (**याति**) प्राप्नोति (**जोषम्**) प्रीतिं प्रसन्नताम् (**आ**) समन्तात् (**चिकित्वान्**) ज्ञानवान्॥५॥

अन्वयः-हे विद्वन्! गोतमेभिर्विप्रेभिर्यो जातवेदा ऋतावा अग्निः स्तूयते यस्त्वमस्तोष्ट स एव चिकित्वान् द्युम्नं याति स वाजं पीपयत् स जोषं पुष्टिमायाति॥५॥

भावार्थः-मनुष्यैर्धार्मिकैर्विद्वद्भिरार्य्यैः सह संवासं कृत्वैतेषां सभायां स्थित्वा विद्यासुशिक्षाः प्राप्य सुखानि सेवनीयानि॥५॥

अत्रेश्वरविद्वदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तसप्ततितमं ७७ सूक्तं पञ्चविंशो २५ वर्गश्च समाप्तः॥

पदार्थः-(**गोतमेभिः**) अत्यन्त स्तुति करनेवाले (**विप्रेभिः**) बुद्धिमान् लोगों से जो (**जातवेदाः**) ज्ञान और प्राप्त होनेवाला (**ऋतावा**) सत्य हैं गुण, कर्म्म और स्वभाव जिसके (**अग्निः**) वह ईश्वर स्तुति किया जाता और (**अस्तोष्ट**) जिसको विद्वान् स्तुति करता है (**एव**) वही (**एषु**) इन धार्मिक विद्वानों में (**चिकित्वान्**) ज्ञानवाला (**द्युम्नम्**) विद्या के प्रकाश को प्राप्त होता है (**सः**) वह (**वाजम्**) उत्तम अन्नादि पदार्थों को (**पीपयत्**) प्राप्त कराता और (**सः**) वही (**जोषम्**) प्रसन्नता और (**पुष्टिम्**) धातुओं की समता को (**आ याति**) प्राप्त होता है॥५॥

भावार्थः-मनुष्यों को चाहिये कि श्रेष्ठ धर्मात्मा विद्वानों के साथ उनकी सभा में रहकर उनसे विद्या और शिक्षा को प्राप्त होके सुखों का सेवन करे॥५॥

इस सूक्त में ईश्वर, विद्वान् और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह सतहत्तरवां ७७ सूक्त और पच्चीसवां २५ वर्ग समाप्त हुआ॥

अथ पञ्चर्च्चस्याष्टसप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता। गायत्री छन्दः। षड्जः स्वरः॥

पुनः स कीदृश इत्युपदिश्यते॥

अब अठहत्तरवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में उन्हीं विद्वानों के गुणों का उपदेश किया है॥

अभि॒ त्वा॒ गोत॑मा गि॒रा जात॑वेदो॒ विच॑र्षणे। द्यु॒म्नैर॒भि प्र णो॑नुमः॥ १॥

अ॒भि। त्वा॒। गोत॑माः। गि॒रा। जात॑ऽवेदः। विऽच॑र्षणे। द्यु॒म्नैः। अ॒भि। प्र। नो॒नु॒मः॥ १॥

पदार्थः-(**अभि**) आभिमुख्ये (**त्वा**) त्वाम् (**गोतमाः**) अतिशयेन स्तोतारः (**गिरा**) वाण्या (**जातवेदाः**) पदार्थप्रज्ञापक (**विचर्षणे**) सर्वादिद्रष्टः (**द्युम्नैः**) धनैर्विज्ञानादिभिर्गुणैः सह (**अभि**) सर्वतः (**प्र**) प्रकृष्टे (**नोनुमः**) अतिशयेन स्तुमः॥ १॥

अन्वयः-हे जातवेदो विचर्षणे परमात्मन्! यं त्वां यथा गोतमा द्युम्नैर्गिरा स्तुवन्ति यथा च वयमभि प्रणोनुमस्तथा सर्वे मनुष्याः कुर्य्युः॥ १॥

भावार्थः-सर्वैर्मनुष्यैः परमेश्वरमुपास्याप्तविद्वांसमुपसङ्गम्य विद्या संभावनीया॥ १॥

पदार्थः-हे (**जातवेदः**) पदार्थों को जाननेवाले (**विचर्षणे**) सबसे प्रथम देखने योग्य परमेश्वर! जिस आपकी जैसे (**गोतमाः**) अत्यन्त स्तुति करनेवाले (**द्युम्नैः**) धन और विमानादिक गुणों तथा (**गिरा**) उत्तम वाणियों के साथ (**अभि**) चारों ओर से स्तुति करते हैं और जैसे हम लोग (**अभि प्रणोनुमः**) अत्यन्त नम्र होके (**त्वा**) आपकी प्रशंसा करते हैं, वैसे सब मनुष्य करें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को चाहिये कि परमेश्वर की उपासना और विद्वानों का सङ्ग करके विद्या का विचार करें॥ १॥

पुनः सः विद्वान् कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में कहा है॥

तमु॑ त्वा॒ गोत॑मो गि॒रा रा॒यस्का॑मो दुवस्यति। द्यु॒म्नैर॒भि प्र णो॑नुमः॥ २॥

तम्। ऊ॒म्ऽइति॑। त्वा॒। गोत॑मः। गि॒रा। रा॒यःऽका॑मः। दु॒व॒स्य॒ति॒। द्यु॒म्नैः। अ॒भि। प्र। नो॒नु॒मः॥ २॥

पदार्थः-(**तम्**) उक्तार्थम् (**उ**) वितर्के (**त्वा**) त्वाम् (**गोतमः**) विद्यायुक्तो जनः (**गिरा**) वाचा (**रायस्कामः**) धनमीप्सुः (**दुवस्यति**) सेवते (**द्युम्नैः**) श्रेष्ठैर्यशोभिः (**अभि**) सर्वतः (**प्र**) प्रकृष्टे (**नोनुमः**) प्रशंसामः॥ २॥

अन्वयः-हे धनेश! यथा रायस्कामो गोतमो विद्वान् गिरा त्वा दुवस्यति तथा तमु द्युम्नैः सह वर्त्तमानः वयमभिप्रणोनुमः॥ २॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। नहि मनुष्याणां परमेश्वरोपासनेन विद्वत्सहवासेन च विना धनकामपूर्तिर्भवितुं शक्या॥२॥

पदार्थः–हे धनपते **(रायस्कामः)** धन की इच्छा करनेवाला **(गोतमः)** विद्वान् मनुष्य! **(गिरा)** वाणी से **(त्वा)** तेरी **(दुवस्यति)** सेवा करता है वैसे **(तम् उ)** उसी आपकी **(द्युम्नैः)** श्रेष्ठ कीर्ति से सह वर्त्तमान हम लोग **(अभि)** सब ओर से **(प्र णोनुमः)** अति प्रशंसा करते हैं॥२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को ऐसा विचार अपने मन में सदैव रखना चाहिये कि परमेश्वर की उपासना और विद्वान् मनुष्य के संग के विना हम लोगों की धन की कामना पूरी कभी नहीं हो सकती॥२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

तमु॑ त्वा वाज॒सात॑ममङ्गिर॒स्वद्ध॑वामहे। द्यु॒म्नैर॒भि प्र णो॑नुमः॥३॥

तम्। ऊ॒म्ऽइति॑। त्वा॒। वा॒ज॒ऽसात॑मम्। अ॒ङ्गि॒र॒स्वत्। ह॒वा॒म॒हे॒। द्यु॒म्नैः। अ॒भि। प्र। नो॒नु॒मः॥३॥

पदार्थः–**(तम्)** यशस्विनम् **(उ)** वितर्के **(त्वा)** त्वाम् **(वाजसातमम्)** यो वाजान् प्रशस्तान् बोधान् संभजते सोऽतिशयितस्तम् **(अङ्गिरस्वत्)** प्रशस्तप्राणवत् **(हवामहे)** स्वीकुर्मः **(द्युम्नैः)** पुण्ययशोभिः सह **(अभि)** सर्वतः **(प्र)** प्रकृष्टे **(नोनुमः)** स्तुमः॥३॥

अन्वयः–हे विद्वन्! विद्वांसो वयं यं द्युम्नैर्वाजसातमं त्वामु हवामहे स्तुमो यमङ्गिरस्वदभिप्रणोनुमस्तं त्वं स्तुहि प्रणम॥३॥

भावार्थः–हे मनुष्या! एवं सत्कारेण विदुषः सन्तोष्य धर्मार्थकाममोक्षसिद्धिं कुरुत॥३॥

पदार्थः–हे विद्वन्! **(द्युम्नैः)** पुण्यरूपी कीर्तियों के साथ जिस **(वाजसातमम्)** अतिप्रशंसित बोधों से युक्त विद्वान् की और **(त्वा)** आपकी हम लोग **(हवामहे)** स्तुति करें **(उ)** अच्छे प्रकार **(अङ्गिरस्वत्)** प्रशंसित प्राण के समान **(अभि)** सब ओर से **(प्र णोनुमः)** सत्कार करते हैं सो तुम **(तम्)** उसीकी स्तुति और प्रणाम किया करो॥३॥

भावार्थः–हे मनुष्यो! तुम लोग विद्वान् को उक्त प्रकार के सत्कार से सन्तुष्ट करके धर्म, अर्थ, काम और मोक्ष को सिद्ध करो॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

तमु॑ त्वा वृत्र॒हन्त॑मं॒ यो दस्यूँ॒रव॑धूनु॒षे। द्यु॒म्नैर॒भि प्र णो॑नुमः॥४॥

तम्। उ॒म् इति॑। त्वा॒। वृ॒त्र॒हन्ऽत॑मम्। यः। दस्यू॑न्। अव॒ऽधू॒नु॒षे। द्यु॒म्नैः। अ॒भि। प्र। नो॒नु॒मः॥४॥

पदार्थः-(**तम्**) उक्तम् (**उ**) वितर्के (**त्वा**) त्वाम् (**वृत्रहन्तमम्**) अतिशयेन वृत्रस्य हन्तारम् (**यः**) विद्वान् (**दस्यून्**) महादुष्टान् (**अवधूनुषे**) अतिकम्पयति (**द्युम्नैः**) यशसा प्रकाशमानैः शस्त्रास्त्रैः (**अभि**) आभिमुख्ये (**प्र**) प्रकृष्टे (**नोनुमः**) भृशं स्तुमः॥४॥

अन्वयः-हे विद्वन्! यस्त्वं दस्यूँरवधूनुषे तं वृत्रहन्तमं त्वामु द्युम्नैः सह वर्त्तमाना वयमभिप्रणोनुमः॥४॥

भावार्थः-हे मनुष्या! यूयं योऽजातशत्रुः सभाध्यक्षः दुष्टाचारान् शत्रून् पराजयते तं सदा सेवध्वम्॥४॥

पदार्थः-हे विद्वन् (**यः**) जो (**त्वम्**) तू (**दस्यून्**) महादुष्ट डाकुओं को (**अवधूनुषे**) कँपा के नष्ट करता है (**तम्**) उसी (**वृत्रहन्तमम्**) मेघ वर्षानेवाले सूर्य के समान (**त्वा**) तेरी (**द्युम्नैः**) कीर्तिकारी शस्त्रों से हम लोग (**अभि**) सम्मुख होके (**प्रणोनुमः**) सब प्रकार स्तुति करें॥४॥

भावार्थः-हे मनुष्यो! तुम लोग जिसका कोई शत्रु न हो ऐसा विद्वान् सभाध्यक्ष जो कि दुष्ट शत्रुओं को परास्त कर सके, उसकी सदैव सेवा करो॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अवोचाम रहूगणा अग्नये मधुमद्वचः। द्युम्नैरभि प्र णोनुमः॥५॥२६॥

अवोचाम। रहूगणाः। अग्नये। मधुऽमत्। वचः। द्युम्नैः। अभि। प्र। नोनुमः॥५॥

पदार्थः-(**अवोचाम**) उच्याम (**रहूगणाः**) रहवोऽधर्मत्यागिनो गणाः सेविता यैस्ते (**अग्नये**) विदुषे सभाध्यक्षाय (**मधुमत्**) मधुरसवत् (**वचः**) वचनम् (**द्युम्नैः**) उत्तमैर्यशोभिः (**अभि**) (**प्र**) (**नोनुमः**) भृशन्नमस्कुर्म्मः॥५॥

अन्वयः-हे विद्वांसो! रहूगणा भवन्तो यथा द्युम्नैरग्नये मधुमद्वचो ब्रुवते तथा वयमवोचाम। यथा वयं तमभिप्रणोनुमस्तथा यूयमपि नमत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्धर्म्यकीर्त्तिमतामेव प्रशंसा कार्य्या नेतरेषाम्॥५॥

अत्रेश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्ताऽर्थेन सह सङ्गतिर्वेद्या॥

इति अष्टासप्ततितमं ७८ सूक्तं षड्विंशो २६ वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् लोगो! (**रहूगुणाः**) धर्मयुक्त पापियों के समूह के त्याग करनेवाले तुम जैसे (**द्युम्नैः**) उत्तम कीर्त्ति के साथ वर्त्तमान (**अग्नये**) विद्वान् के लिये (**मधुमत्**) मिष्ट (**वचः**) वचन बोलते

हो, वैसे हम भी **(अवोचाम)** बोला करें। जैसे हम लोग उसको **(अभि प्र णोनुमः)** नमस्कारादि से प्रसन्न करते हैं, वैसे तुम भी किया करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को अत्यावश्यक है कि धर्मयुक्त कीर्त्तिवाले मनुष्यों ही की प्रशंसा करें, अन्य की नहीं॥५॥

इस सूक्त में ईश्वर और विद्वानों के गुणकथन से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह अठत्तरवाँ ७८ सूक्त और छब्बीसवां २६ वर्ग पूरा हुआ॥

अथ द्वादशर्चस्य नवसप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता। १ विराट् त्रिष्टुप्। २,३ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ आर्ष्युष्णिक्। ५,६ निचृदार्ष्युष्णिक् छन्दः। ऋषभः स्वरः। ७,८,१०,११ निचृद्गायत्री। ९,१२ गायत्री छन्दः। षड्जः स्वरः॥

अथ कथंभूतो विद्युदग्निरित्युपदिश्यते॥

अब ७९ वें सूक्त का आरम्भ किया जाता है। उसके प्रथम मन्त्र में विद्युत् अग्नि कैसा है, इस विषय का उपदेश किया है॥

हिर॑ण्यकेशो॒ रज॑सो॒ विसा॒रेऽहि॒र्धुनि॒र्वात॑इव॒ ध्रजी॑मान्।
शुचि॑भ्राजा उ॒षसो॒ नवे॑दा॒ यश॑स्वतीरप॒स्युवो॒ न स॒त्याः॥ १॥

हिर॑ण्यऽकेशः। रज॑सः। वि॒ऽसा॒रे। अहिः॑। धुनिः॑। वात॑ःऽइव। ध्रजी॑मान्। शुचि॑ऽभ्राजाः। उ॒षस॑ः। नवे॑दाः। यश॑स्वतीः। अ॒प॒स्युव॑ः। न। स॒त्याः॥ १॥

पदार्थः-(**हिरण्यकेशः**) हिरण्यवत्तेजोवत्केशा न्यायप्रकाशा यस्य सः (**रजसः**) ऐश्वर्य्यस्य (**विसारे**) विशेषेण स्थिरत्वे (**अहिः**) मेघ इव (**धुनिः**) दुष्टानां कम्पकः (**वातइव**) वायुवत् (**ध्रजीमान्**) शीघ्रगतिः (**शुचिभ्राजाः**) शुचयः पवित्रा भ्राजाः प्रकाशा यासां ताः (**उषसः**) प्रभाताः इव (**नवेदाः**) या अविद्यां न विन्दति ताः (**यशस्वतीः**) पुण्यकीर्त्तिमत्यः (**अपस्युवः**) आत्मनोऽपांसि कर्माणीच्छन्तः (**न**) इव (**सत्याः**) सत्सु गुणकर्मस्वभावेषु भवाः॥ १॥

अन्वयः-हे कुमारिका ब्रह्मचारिण्यो! रजसो विसारे हिरण्यकेशो धुनिरहिरिव ध्रजीमान् वात इव उषस इव शुचिभ्राजा न वेदा यशस्वतीरपस्युवो नेव यूयं सत्या भवत॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। याः कन्या यावच्चतुर्विंशतिवर्षमायुस्तावद् ब्रह्मचर्येण जितेन्द्रियतया साङ्गोपाङ्गा वेदविद्या अधीयते ताः मनुष्यजातिभूषिका भवन्ति॥ १॥

पदार्थः-हे कुमारि ब्रह्मचर्य्ययुक्त कन्या लोगो! (**रजसः**) ऐश्वर्य्य के (**विसारे**) स्थिरता में (**हिरण्यकेशः**) हिरण्य सुवर्णवत् वा प्रकाशवत् न्याय के प्रचार करनेवाले (**धुनिः**) शत्रुओं को कंपानेवाले (**अहिः**) मेघ के समान (**ध्रजीमान्**) शीघ्र चलने वाले (**वातइव**) वायु के तुल्य (**उषसः**) प्रातःकाल के समान (**शुचिभ्राजाः**) पवित्र विद्याविज्ञान से युक्त (**नवेदाः**) अविद्या का निषेध करने वाली विद्यायुक्त (**यशस्वतीः**) उत्तम कीर्त्तियुक्त (**अपस्युवः**) प्रशस्त कर्म्म करनेवाली के (**न**) समान तुम (**सत्याः**) सत्य गुण, कर्म्म, स्वभाववाली हों॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो कन्या लोग चौबीस वर्ष पर्यन्त ब्रह्मचर्य्य सेवन और जितेन्द्रिय होकर छः अङ्ग अर्थात् शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष। उपाङ्ग अर्थात् मीमांसा, वैशेषिक, न्याय, योग, सांख्य और वेदान्त तथा आयुर्वेद अर्थात् वैद्यक विद्या आदि को पढ़ती हैं, वे सब संसारस्थ मनुष्य जाति की शोभा करनेवाली होती हैं॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह विद्वान् कैसा हो, यह विषय अगले मन्त्र में कहा है॥

आ ते॑ सु॒प॒र्णा अ॑मिनन्तँ॒ एवै॑: कृ॒ष्णो नो॑नाव वृष॒भो यदी॒दम्।
शि॒वाभि॒र्न स्मय॑मानाभि॒रागा॒त् पत॑न्ति मिह॑: स्त॒नय॑न्त्य॒भ्रा॥ २॥

आ। ते॒। सु॒ऽप॒र्णाः। अ॒मि॒न॒न्त॒। एवैः॑। कृ॒ष्णः। नो॒ना॒व॒। वृ॒ष॒भः। यदि॑। इ॒दम्। शि॒वाभिः॑। न। स्मय॑मानाभिः। आ। अ॒गा॒त्। पत॑न्ति। मिह॑ः। स्त॒नय॑न्ति। अ॒भ्रा॥ २॥

पदार्थः-(**आ**) समन्तात् (**ते**) तव (**सुपर्णाः**) किरणाः। **सुपर्ण इति रश्मिनामसु पठितम्।** (निघं०१.५) (**अमिनन्त**) प्रक्षिपन्ति (**एवैः**) प्रापकैर्गुणैः (**कृष्णः**) आकर्षणकर्त्ता (**नोनाव**) अत्यन्तप्रशंसितः (**वृषभः**) वृष्टिहेतुः सूर्य्यः (**यदि**) चेत् (**इदम्**) जलम्। **इदमित्युदकनामसु पठितम्।** (निघं०१.२) (**शिवाभिः**) कल्याणकारिकाभिः कन्याभिः (**न**) इव (**स्मयमानाभिः**) किञ्चिद्धासकारिकाभिः (**आ**) अभितः (**अगात्**) प्राप्नोति (**पतन्ति**) उपरिष्टादधः (**मिहः**) वृष्टयः (**स्तनयन्ति**) शब्दयन्ति (**अभ्रा**) अभ्राणि॥ २॥

अन्वयः-हे विद्वन्! यो सुपर्णाः आमिनन्तैवैः कृष्णो वृषभ इदमिव नोनाव यथा स्मयमानाभिः शिवाभिर्नेव यद्यगाद् यथाऽभ्रास्ते नयन्ति मिह आपतन्ति तथा विद्या वर्षेत् तर्हि तस्य ते तव किमप्राप्तं स्यात्॥ २॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। येषां ब्रह्मचारिणां ब्रह्मचारिण्यः स्त्रियः स्युस्ते सुखं कथन्न लभेरन्॥ २॥

पदार्थः-हे विद्वन्! आप जैसे (**सुपर्णाः**) किरणें (**आमिनन्त**) सब ओर से वर्षा की प्रेरणा करती हैं (**एवैः**) प्राप्त करनेवाले गुणों से सहित (**कृष्णः**) आकर्षण करता (**वृषभः**) वर्षानेवाला सूर्य (**इदम्**) जल को वर्षाता है, वैसे विद्या की (**नोनाव**) प्रशंसित वृष्टि करें तथा (**स्मयमानाभिः**) सदा प्रसन्नवदन (**शिवाभिः**) शुभ गुण, कर्म्मयुक्त कन्याओं के साथ तत्तुल्य ब्रह्मचारियों के विवाह के (**न**) समान सुख को (**यदि**) जो (**अगात्**) प्राप्त हो और जैसे (**अभ्रा**) मेघ (**स्तनयन्ति**) गर्जते तथा (**मिहः**) वर्षा के जल (**आ पतन्ति**) वर्षते हैं, वैसे विद्या को वर्षावे तो (**ते**) तुझको क्या अप्राप्त हो, अर्थात् सब सुख प्राप्त हों॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार और उपमालङ्कार हैं। जिन विद्वान् ब्रह्मचारियों की विदुषी ब्रह्मचारिणी स्त्री हों, वे पूर्ण सुख को क्यों न प्राप्त हों॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

यदी॑मृ॒तस्य॒ पय॑सा॒ पिया॑नो॒ नय॑न्नृ॒तस्य॑ प॒थिभी॒ रजि॑ष्ठैः।

अर्य॒मा मि॒त्रो वरु॑ण॒: परि॑ज्मा॒ त्वच॑ं पृञ्च॒न्त्युप॑रस्य॒ योनौ॑॥ ३॥

यत्। ई॒म्। ऋ॒तस्य॑। पय॑सा। पिया॑न:। नय॑न्। ऋ॒तस्य॑। प॒थिऽभि॑:। रजि॑ष्ठै:। अ॒र्य॒मा। मि॒त्र:। वरु॑ण:। परि॑ऽज्मा। त्वच॑म्। पृ॒ञ्च॒न्ति॒। उप॑रस्य। योनौ॑॥ ३॥

पदार्थ:-(**यत्**) यदा (**ईम्**) प्राप्तव्यं सुखम् (**ऋतस्य**) उदकस्य (**पयसा**) रसेन (**पियान:**) पिबन् (**नयन्**) प्राप्नुवन् (**ऋतस्य**) सत्यस्य (**पथिभि:**) मार्गै: (**रजिष्ठै:**) अतिशयेन रजस्वलै: (**अर्यमा**) नियन्ता सूर्य्य: (**मित्र:**) प्राण: (**वरुण:**) उदान: (**परिज्मा**) य: परित: सर्वतो गच्छति स जीव: (**त्वचम्**) त्वगिन्द्रियम् (**पृञ्चन्ति**) सम्बध्नन्ति (**उपरस्य**) मेघस्य (**योनौ**) निमित्ते मेघमण्डले ॥ ३॥

अन्वय:-यदृतस्य पयसा पियानो रजिष्ठै: पथिभिरुपरस्य योनावीं नयन्नर्यमा मित्रो वरुण: परिज्मा चर्त्तस्य त्वचं पृञ्चन्ति तदा सर्वेषां जीवनं संभवति॥ ३॥

भावार्थ:-यदा कार्यकारणस्थै: प्राणजलादिभि: सह जीवा: सम्बन्धमाप्नुवन्ति तदा शरीराणि धर्त्तुं शक्नुवन्ति॥ ३॥

पदार्थ:-(**यत्**) जब (**ऋतस्य**) उदक के (**पयसा**) रस को (**पियान:**) पीनेवाला (**रजिष्ठै:**) अत्यन्त धूलीयुक्त (**पथिभि:**) मार्गों से (**उपरस्य**) मेघ के (**योनौ**) कारणरूप मण्डल में (**ईम्**) जल को (**नयन्**) प्राप्त करता हुआ (**अर्यमा**) नियन्ता (**सूर्य:**) (**मित्र:**) प्राण (**वरुण:**) उदान और (**परिज्मा**) सब ओर से जाने-आने वाला जीव (**ऋतस्य**) सत्य के (**त्वचम्**) त्वचा रूप उपरिभाग को (**पृञ्चन्ति**) सम्बन्ध करते हैं, तब सब का जीवन सम्भव होता है॥ ३॥

भावार्थ:-जब कार्य्य और कारण में रहनेवाले प्राण और जलादि पदार्थों के साथ जीव सम्बन्ध को प्राप्त होते हैं, तब शरीरों के धारण करने को समर्थ होते हैं॥ ३॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अग्ने॒ वाज॑स्य॒ गोम॑त॒ ईशा॑न: सहसो यहो।
अ॒स्मे धे॑हि जातवेदो॒ महि॒ श्रव॑:॥ ४॥

अग्ने॑। वाज॑स्य। गोऽम॑त:। ईशा॑न:। स॒हस॒:। य॒हो॒ इति॑। अ॒स्मे इति॑। धे॒हि॒। जा॒त॒ऽवे॒द॒:। महि॑। श्रव॑:॥ ४॥

पदार्थ:-(**अग्ने**) विद्युदिव विद्वान् (**वाजस्य**) अन्नस्य (**गोतम:**) बहुधेनुधनयुक्तस्य (**ईशान:**) स्वामी (**सहस:**) बलयुक्तस्य (**यहो**) पुत्र (**अस्मे**) अस्मासु (**धेहि**) (**जातवेद:**) जातविज्ञान (**महि**) महत: (**श्रव:**) सर्ववेदादिशास्त्रश्रवणम्॥ ४॥

अन्वय:-हे जातवेदोऽग्ने! सहसो यहो गोतमो वाजस्येशानस्त्वमस्मे महि श्रवो धेहि॥ ४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विदुषां मातापितॄणां सन्ताना भूत्वा मातापित्राचार्य्यैः प्राप्तशिक्षा बह्वन्नैश्वर्य्यविद्याः स्युस्तेऽन्येष्वप्येतत्सर्वं वर्द्धयेयुः॥४॥

पदार्थः-हे **(जातवेदः)** प्राप्तविज्ञान **(अग्ने)** विद्युत् के समान विद्या प्रकाशयुक्त विद्वन्! **(सहसः)** बलयुक्त पुरुष के **(यहो)** पुत्र **(गोतमः)** धन से युक्त **(वाजस्य)** अन्न के **(ईशानः)** स्वामी आप **(अस्मे)** हम लोगों में **(महि)** बड़े **(श्रवः)** विद्याश्रवण को **(धेहि)** धारण कीजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वान् माता और पिताओं के सन्तान होके माता, पिता और आचार्य्य से विद्या की शिक्षा को प्राप्त होकर बहुत अन्नादि ऐश्वर्य और विद्याओं को प्राप्त हों, वे अन्य मनुष्यों में भी यह सब बढ़ावें॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

स इ॑धा॒नो वसु॑ष्क॒विर॒ग्निरी॒ळेन्यो॑ गि॒रा।

रे॒वदु॒स्मभ्यं॑ पुर्वणीक दीदिहि॥५॥

सः। इ॒धा॒नः। वसुः॑। क॒विः। अ॒ग्निः। ई॒ळेन्यः॑। गि॒रा। रे॒वत्। अ॒स्मभ्य॑म्। पु॒रु॒ऽअ॒नी॒क॒। दी॒दि॒हि॒॥५॥

पदार्थः-(**सः**) **(इधानः)** इन्धनैः पावकवद्विद्यया प्रदीप्तः **(वसुः)** वासयिता **(कविः)** सर्वविद्यावित् **(अग्निः)** पावक इव वर्त्तमानः **(इळेन्यः)** स्तोतुं योग्यः **(गिरा)** वाण्या **(रेवत्)** प्रशस्तधनयुक्तम् **(अस्मभ्यम्)** **(पुर्वणीक)** पुरवोऽनीकाः सेना यस्य तत्सम्बुद्धौ **(दीदिहि)** भृशं प्रकाशय। **दीदयति ज्वलति कर्मनामसु पठितम्।** (निघं०१.१६)॥५॥

अन्वयः-हे पुर्वणीक! यस्वमिन्धनैरग्निरिवेन्धानो गिरेलेन्यो वसुः कविरसि स त्वमस्मभ्यं रेवच्छ्रवो दीदिहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। पूर्वस्मान्मन्त्राच्छ्रव इति पदमनुवर्त्तते। यथा विद्युद्द्यौमसूर्यरूपेणाऽग्निः सर्वं मूर्त्तं द्रव्यं द्योतयति तथाऽनूचानो विद्वान् सर्वा विद्याः प्रकाशयति॥५॥

पदार्थः-हे **(पुर्वणीक)** बहुत सेनाओं से युक्त! जो तू जैसा इन्धनों से **(अग्निः)** अग्नि प्रकाशमान होता है, वैसे **(इन्धानः)** प्रकाशमान **(गिरा)** वाणी से **(ईळेन्यः)** स्तुति करने योग्य **(वसुः)** सुख को बसानेवाला और **(कविः)** सर्वशास्त्रवित् होता है **(सः)** सो **(अस्मभ्यम्)** हमारे लिये **(रेवत्)** बहुत धन करनेवाला सब विद्या के श्रवण को **(दीदिहि)** प्रकाशित करे॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पूर्व मन्त्र से **(श्रवः)** इस पद की अनुवृत्ति आती है। जैसे बिजुली प्रसिद्ध पावक सूर्य अग्नि सब मूर्तिमान् द्रव्य को प्रकाश करता है, वैसे सर्वविद्यावित् सत्पुरुष सब विद्या का प्रकाश करता है॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः।
स तिग्मजम्भ रक्षसो दह प्रति॥६॥२७॥

क्षपः। राजन्। उत। त्मना। अग्ने। वस्तोः। उत। उषसः। सः। तिग्मऽजम्भ। रक्षसः। दह। प्रति॥६॥

पदार्थः-(**क्षपः**) रात्रीः (**राजन्**) न्यायविनयाभ्यां प्रकाशमान (**उत**) अपि (**त्मना**) आत्मना (**अग्ने**) विद्वन् (**वस्तोः**) दिनस्य (**उत**) अपि (**उषसः**) प्रत्यूषकालस्य (**तिग्मजम्भ**) तिग्मं तीव्रं जम्भं वक्त्रं यस्य तत्सम्बुद्धौ (**रक्षसः**) दुष्टान् (**दह**) (**प्रति**)॥६॥

अन्वयः-हे तिग्मजम्भाऽग्ने राजँस्त्वं त्मना यथा सूर्यः क्षपो निवर्त्योत स वस्तोरुषसो भावं करोति तथा धार्मिकेषु सज्जनेषु विद्याविनयौ प्रकाश्योत रक्षसः प्रतिदह॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सविता सन्निहितं जगत् प्रकाश्य वृष्टिं कृत्वा सर्वं रक्षति तमो निवारयति राजानो धार्मिकान् संरक्ष्य दुष्टान् दण्डयित्वा राज्यं रक्षन्तु॥६॥

पदार्थः-हे (**तिग्मजम्भ**) तीव्र मुख से बोलनेहारे (**अग्ने**) विद्वन्! (**राजन्**) न्याय विनय से प्रकाशमान तू (**त्मना**) अपने आत्मा से जैसे सूर्य (**क्षपः**) रात्रियों को निवर्त्त करके (**सः**) वह (**वस्तोः**) दिन (**उत**) और (**उषसः**) प्रभातों को विद्यमान करता है, वैसे धार्मिक सज्जनों में विद्या और विनय का प्रकाश कर (**उत**) और (**रक्षसः**) दुष्टाचारियों को (**प्रतिदह**) प्रत्यक्ष दग्ध कर॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सविता निकट प्राप्त जगत् को प्रकाशित कर वृष्टि करके सब जगत् की रक्षा और अन्धकार का निवारण करता है, वैसे सज्जन राजा लोग धार्मिकों की रक्षा कर दुष्टों के दण्ड से राज्य की रक्षा करें॥६॥

पुनः स सभाध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि। विश्वासु धीषु वन्द्य॥७॥

अव। नः। अग्ने। ऊतिऽभिः। गायत्रस्य। प्रऽभर्मणि। विश्वासु। धीषु। वन्द्य॥७॥

पदार्थः-(**अव**) रक्ष (**नः**) अस्मान् (**अग्ने**) विज्ञानस्वरूप (**ऊतिभिः**) रक्षणादिभिः (**गायत्रस्य**) गायत्रीप्रगाथस्य छन्दस आनन्दकरस्य व्यवहारस्य वा (**प्रभर्मणि**) प्रकर्षेण बिभ्रति राज्यादीन् यस्मिंस्तस्मिन् (**विश्वासु**) सर्वासु (**धीषु**) प्रज्ञासु (**वन्द्य**) अभिवदितुं प्रशंसितुं योग्य॥७॥

अन्वयः-हे वन्द्याग्ने सभाध्यक्ष! त्वमूतिभिर्गायत्रस्य प्रभर्मणि विश्वासु धीषु नोऽस्मानव॥७॥

भावार्थः-मनुष्यैर्येन प्रज्ञा प्रज्ञाप्यते स सत्कर्त्तव्यः॥७॥

पदार्थः–हे **(वन्द्य)** अभिवादन और प्रशंसा करने योग्य **(अग्ने)** विज्ञानस्वरूप सभाध्यक्ष! आप **(ऊतीभिः)** रक्षण आदि से **(गायत्रस्य)** गायत्री के प्रगाथ वा आनन्दकारक व्यवहार का **(प्रभर्मणि)** अच्छी प्रकार राज्यादि का धारण हो जिसमें उस तथा **(विश्वासु)** सब **(प्रज्ञासु)** बुद्धियों में **(नः)** हम लोगों की **(अव)** रक्षा कीजिये॥७॥

भावार्थः–सब मनुष्यों को चाहिये कि जो सभाध्यक्ष विद्वान् हमारी बुद्धि को शुद्ध करता है, उसका सत्कार करें॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नो॑ अग्ने र॒यिं भ॑र सत्रा॒साह॑ं वरे॑ण्यम्। विश्वा॑सु पृ॒त्सु दु॒ष्टर॑म्॥८॥

आ। नः॒। अ॒ग्ने॒। र॒यिम्। भ॒र॒। स॒त्रा॒ऽसाह॑म्। वरे॑ण्यम्। विश्वा॑सु। पृ॒त्ऽसु। दु॒स्तर॑म्॥८॥

पदार्थः–**(आ)** समन्तात् **(नः)** अस्मभ्यम् **(अग्ने)** प्रदातः प्रदानहेतुर्वा **(रयिम्)** प्रशस्तद्रव्यसमूहम् **(भर)** **(सत्रासाहम्)** सत्यानि सह्यन्ते येन तम् **(वरेण्यम्)** प्रशस्तगुणकर्मस्वभावकारकम् **(विश्वासु)** सर्वासु **(पृत्सु)** सेनासु **(दुष्टरम्)** शत्रुभिर्दुःखेन तरितुं योग्यम्॥८॥

अन्वयः–हे अग्ने सभाध्यक्ष! त्वं नोऽस्मभ्यं विश्वासु पृत्सु सत्रासाहं वरेण्यं दुष्टरं रयिमाभर॥८॥

भावार्थः–मनुष्यैः सभाध्यक्षाश्रयेणाग्न्यादिपदार्थसंप्रयोगेण च विनाऽखिलं सुखं प्राप्तुं न शक्यत इति वेद्यम्॥८॥

पदार्थः–हे **(अग्ने)** दान देने वा दिलानेवाले सभाध्यक्ष! आप **(नः)** हम लोगों के लिये **(विश्वासु)** सब **(पृत्सु)** सेनाओं में **(सत्रासाहम्)** सत्य का सहन करते हैं जिससे उस **(वरेण्यम्)** अच्छे गुण और स्वभाव होने का हेतु **(दुष्टरम्)** शत्रुओं के दुःख से तरने योग्य **(रयिम्)** अच्छे द्रव्यसमूह को **(आभर)** अच्छी प्रकार धारण कीजिये॥८॥

भावार्थः–मनुष्यों को सभाध्यक्ष आदि के आश्रय और अग्न्यादि पदार्थों के विज्ञान के विना सम्पूर्ण सुख प्राप्त कभी नहीं हो सकता॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ नो॑ अग्ने सुचे॒तुना॑ र॒यिं वि॒श्वायु॑पोषसम्। मा॒र्डी॒कं धे॑हि जी॒वसे॑॥९॥

आ। नः॒। अ॒ग्ने॒। सु॒ऽचे॒तुना॑। र॒यिम्। वि॒श्वायु॑ऽपोषसम्। मा॒र्डी॒कम्। धे॒हि॒। जी॒वसे॑॥९॥

पदार्थः-**(आ)** समन्तात् **(नः)** अस्मभ्यम् **(अग्ने)** विज्ञानसुखद **(सुचेतुना)** सुष्ठु विज्ञानेन सह वर्त्तमानम् **(रयिम्)** धनसमूहम् **(विश्वायुपोषसम्)** अखिलायुपुष्टिकारकम् **(मार्डीकम्)** मृडीकानां सुखानामिमं साधकम् **(धेहि)** **(जीवसे)** जीवितुम्॥९॥

अन्वयः-हे अग्ने! त्वं नोऽस्मभ्यञ्जीवसे सुचेतुना विश्वायुपोषसं मार्डीकं रयिमाधेहि॥९॥

भावार्थः-मनुष्यैः संसेवितो विद्वान् सुशिक्षां कृत्वा पूर्णायुप्रापके विद्याधने ददाति॥९॥

पदार्थः-हे **(अग्ने)** विज्ञान और सुख के देनेवाले विद्वान्! आप **(नः)** हमारे **(जीवसे)** जीवन के लिये **(सुचेतुना)** अच्छे विज्ञान से युक्त **(विश्वायुपोषसम्)** सम्पूर्ण अवस्था में पुष्टि करने **(मार्डीकम्)** सुखों के सिद्ध करने वाले **(रयिम्)** धन को **(आधेहि)** सब प्रकार धारण कीजिये॥९॥

भावार्थः-मनुष्यों को अच्छी प्रकार सेवा किया हुआ विद्वान् विज्ञान और धन को देके पूर्ण आयु भोगने के लिये विद्या धन को देता है॥९॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर भी अगले मन्त्र में विद्वान् कैसा हो, इस विषय का उपदेश किया है॥

प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये। भरस्व सुम्नयुर्गिरः॥ १०॥

प्र। पूताः। तिग्मऽशोचिषे। वाचः। गोतम। अग्नये। भरस्व। सुम्नऽयुः। गिरः॥१०॥

पदार्थः-**(प्र)** प्रकृष्टार्थे **(पूताः)** पवित्रकारिकाः **(तिग्मशोचिषे)** तीव्रबुद्धिप्रकाशाय **(वाचः)** विद्यावाणीः **(गोतम)** अतिशयेन स्तोतः **(अग्नये)** विज्ञानवते **(भरस्व)** धर **(सुम्नयुः)** य आत्मनः सुम्नं सुखमिच्छति तच्छीलः **(गिरः)** विद्याशिक्षोपदेशयुक्ताः॥१०॥

अन्वयः-हे गोतम! सुम्नयुस्त्वं विद्वांसः तिग्मशोचिषेऽग्नये याः पूतागिरो धरन्ति ता वाचः प्रभरस्व॥१०॥

भावार्थः-यस्मान्नहि कश्चिदन्यः परमेश्वरेण परमविदुषा वा विना सत्यविद्याः प्रकाशितुं शक्नोति, तस्मादेतौ सदा संसेवनीयौ स्तः॥१०॥

पदार्थः-हे **(गोतम)** अत्यन्त स्तुति और **(सुम्नयुः)** सुख की इच्छा करनेवाले विद्वान्! तू **(तिग्मशोचिषे)** तीक्ष्ण बुद्धि प्रकाशवाले **(अग्नये)** विज्ञानरूप और विज्ञानवाले विद्वान् के लिये **(पूताः)** पवित्र करनेवाली **(गिरः)** विद्या की शिक्षा और उपदेश से युक्त वाणियों को धारण करते हैं, उन **(वाचः)** वाणियों को **(प्र भरस्व)** सब प्रकार धारण कर॥१०॥

भावार्थः-जिस कारण परमेश्वर और परम विद्वान् के विना कोई दूसरा सत्यविद्या के प्रकाश करने को समर्थ नहीं होता, इसलिए ईश्वर और विद्वान् की सदा सेवा करनी चाहिये॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

यो नो॑ अग्नेऽभि॒दास॒त्यन्ति॑ दू॒रे प॑दी॒ष्ट स:। अ॒स्माक॒मिद् वृ॒धे भ॑व॥ ११॥

य:। न॒:। अ॒ग्ने॒। अ॒भि॒ऽदास॑ति। अन्ति॑। दू॒रे। प॒दी॒ष्ट। स:। अ॒स्माक॑म्। इत्। वृ॒धे। भ॒व॒॥ ११॥

पदार्थ:-(**य:**) विद्वान् (**न:**) अस्मभ्यम् (**अग्ने**) विज्ञापक (**अभिदासति**) अभीष्टं ददाति (**अन्ति**) समीपे। अत्र **सुपां सुलुगि**ति विभक्तेर्लुक्। छान्दसो वर्णलोपो वेति कलोपश्च। (**दूरे**) विप्रकृष्टे (**पदीष्ट**) पद्यते। अत्र **लिङ: सलोपो०।** इति सकारलोप:। अत्र**ान्येषामपी**ति दीर्घ:। (**स:**) (**अस्माकम्**) (**इत्**) एव (**वृधे**) वृद्धये (**भव**)॥ ११॥

अन्वय:-हे अग्ने! य: भवानन्ति दूरे नोऽस्मभ्यमभिदासति पदीष्ट सं त्वमस्माकं वृध इद्भव॥ ११॥

भावार्थ:-मनुष्यैर्योऽन्तर्बहिर्व्याप्तेश्वरो ज्ञानं विज्ञापयति यो विद्वान् दूरे समीपे वा स्थित्वा सत्योपदेशेन विद्या: प्रददाति स कथं न सम्यक् सेवनीय:॥ ११॥

पदार्थ:-हे (**अग्ने**) विज्ञान देनेवाले (**य:**) जो विद्वान्! आप (**अन्ति**) समीप और (**दूरे**) दूर (**न:**) हमारे लिये (**अभिदासति**) अभीष्ट वस्तुओं को देते और (**पदीष्ट**) प्राप्त होते हो (**स:**) सो आप (**अस्माकम्**) हमारी (**इत्**) ही (**वृधे**) वृद्धि करनेवाले (**भव**) हूजिये॥ ११॥

भावार्थ:-मनुष्यों को उस ईश्वर की सेवा अवश्य करनी क्यों नहीं चाहिये, क्योंकि जो बाहर-भीतर सर्वत्र व्यापक होके ज्ञान देता है तथा जो विद्वान् दूर वा समीप स्थित होके सत्य उपदेश से विद्या देता है॥ ११॥

पुन: स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

स॒ह॒स्र॒ऽअ॒क्षो विच॑र्षणि॒रग्नी रक्षा॑ꣳसि सेधति।
होता॑ गृणीत उ॒क्थ्य॑:॥ १२॥ २८॥

स॒ह॒स्र॒ऽअ॒क्ष:। विऽच॑र्षणि:। अ॒ग्नि:। रक्षा॑ꣳसि। से॒ध॒ति॒। होता॑। गृ॒णी॒ते॒। उ॒क्थ्य॑:॥ १२॥

पदार्थ:-(**सहस्राक्ष:**) सहस्राण्यक्षीणि यस्मिन् स: (**विचर्षणि:**) साक्षाद् द्रष्टा (**अग्नि:**) यथा परमेश्वरस्तथा विद्वान् (**रक्षांसि**) दुष्टानि कर्माणि दुष्टस्वभावान् प्राणिन: (**सेधति**) दूरीकरोति (**होता**) दाता (**गृणीते**) उपदिशति (**उक्थ्य:**) स्तोतुमर्ह:॥ १२॥

अन्वय:-हे विद्वन्! यथोक्थ्य: सहस्राक्षो विचर्षणिर्होताग्नी रक्षांसि सेधति निषेधति वेदान् गृणीते तथा त्वं भव॥ १२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यूयं परमेश्वरो विद्वान् वा यानि कर्माणि कर्त्तुमुपदिशति तानि कर्त्तव्यानि यानि निषेधति तानि त्यक्तव्यानि इति विजानीत॥ १२॥

अत्राऽग्निविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकोनाशीतितमं ७९ सूक्तमष्टाविंशो २८ वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! जैसे **(उक्थ्यः)** स्तुति करने योग्य **(सहस्राक्षः)** असंख्य नेत्रों की सामर्थ्य से युक्त **(विचर्षणिः)** साक्षात् देखनेवाला **(होता)** अच्छे-अच्छे विद्या आदि पदार्थों को देनेवाला **(अग्निः)** परमेश्वर **(रक्षांसि)** दुष्ट कर्म वा दुष्ट कर्मवाले प्राणियों को **(सेधति)** दूर और वेदों का **(गृणीते)** उपदेश करता है, वैसे तू हो॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। परमेश्वर वा विद्वान् जिन कर्मों के करने की आज्ञा देवे उनको करो और जिनका निषेध करें उनको छोड़ दो॥१२॥

इस सूक्त में अग्नि ईश्वर और विद्वान् के गुणों का वर्णन होने से इसके अर्थ की पूर्व सूक्तार्थ के साथ संगति समझनी चाहिये॥

यह उन्नासीवां ७९ सूक्त और अट्ठाईसवां २८ वर्ग पूरा हुआ॥

अथ षोडशर्चस्याशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। इन्द्रो देवता १,११ निचृदास्तारपङ्क्तिः। ५,६,९,१०,१३,१४ विराट्पङक्तिछन्दः। पञ्चमः स्वरः। २,३,४,७,१२,१५ भुरिग् बृहती। ८,१६ बृहतीछन्दः। मध्यमः स्वरः॥

अथ सभाद्यध्यक्षः कीदृश इत्युपदिश्यते॥

अब ८० वें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में सभापति आदि का वर्णन किया है॥

इत्था॒ हि सोम॒ इन्मदे॑ ब्र॒ह्मा च॒कार॒ वर्ध॑नम्।
शवि॑ष्ठ वज्रिन्नोज॑सा पृथि॒व्या निः श॑शा॒ अहि॒मर्च॒न्ननु॑ स्व॒राज्य॑म्॥ १॥

इ॒त्था। हि। सोमे॑। इत्। मदे॑। ब्र॒ह्मा। च॒कार॑। वर्ध॑नम्। शवि॑ष्ठ। व॒ज्रि॒न्। ओज॑सा। पृ॒थि॒व्याः। निः। श॒शाः॒। अहि॑म्। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ १॥

पदार्थः-(**इत्था**) अनेन हेतुना (**हि**) खलु (**सोमे**) ऐश्वर्यप्रापके (**इत्**) अपि (**मदे**) आनन्दकारके (**ब्रह्मा**) चतुर्वेदवित् (**चकार**) कुर्यात् (**वर्धनम्**) येन वर्धन्ति तत् (**शविष्ठ**) अतिशयेन बलवान् (**वज्रिन्**) शस्त्रास्त्रविद्यासम्पन्न (**ओजसा**) पराक्रमेण (**पृथिव्याः**) विस्तृताया भूमेः (**निः**) नितराम् (**शशाः**) उत्प्लवस्व (**अहिम्**) सूर्यो मेघमिव (**अर्चन्**) पूजयन् (**अनु**) पश्चात् (**स्वराज्यम्**) स्वस्य राज्यम्॥१॥

अन्वयः-हे शविष्ठ वज्रिन्! यथा सूर्योऽहिं यथा ब्रह्मोजसा पृथिव्या मदे सोमे स्वराज्यमन्वर्चन्नित्था वर्धनं चकार तथा हि त्वं सर्वानन्यायाचारान्निः शशाः॥१॥

भावार्थः-मनुष्याश्चक्रवर्त्तिराज्यकरणस्य सामग्रीं विधाय पालनं कृत्वा विद्यासुखोन्नतिं कुर्युः॥१॥

पदार्थः-हे (**शविष्ठ**) बलयुक्त (**वज्रिन्**) शस्त्रास्त्रविद्या से सम्पन्न सभापति! जैसे सूर्य (**अहिम्**) मेघ को जैसे (**ब्रह्मा**) चारों वेद के जाननेवाला (**ओजसा**) अपने पराक्रम से (**पृथिव्याः**) विस्तृत भूमि के मध्य (**मदे**) आनन्द और (**सोमे**) ऐश्वर्य की प्राप्ति करानेवाले में (**स्वराज्यम्**) अपने राज्य की (**अन्वर्चन्**) अनुकूलता से सत्कार करता हुआ (**इत्था**) इस हेतु से (**वर्धनम्**) बढ़ती को (**चकार**) करे, वैसे ही तू सब अन्यायाचरणों को (**इत्**) (**हि**) ही (**निश्शशाः**) दूर कर दे॥१॥

भावार्थः-मनुष्यों को चाहिये कि चक्रवर्त्तिराज्य की सामग्री इकट्ठी कर और उसकी रक्षा करके विद्या और सुख की निरन्तर वृद्धि करें॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष आदि कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स त्वा॑मद॒द् वृषा॒ मद॒ः सोम॑ः श्ये॒नाभृ॑तः सु॒तः।
येना॑ वृ॒त्रं नि॒रु॒द्भ्यो ज॒घन्थ॑ वज्रि॒न्नोज॒सार्चन्ननु॑ स्व॒राज्य॑म्॥ २॥

सः। त्वा। अमदत्। वृषा। मदः। सोमः। श्येनऽआभृतः। सुतः। येन। वृत्रम्। निः। अत्ऽभ्यः। जघन्थ। वज्रिन्। ओजसा। अर्चन्। अनु। स्वऽराज्यम्॥ २॥

पदार्थः-(**सः**) (**त्वा**) त्वाम् (**अमदत्**) हर्षयेत् (**वृषा**) न्यायवर्षकः (**मदः**) आह्लादकारकः (**सोमः**) ऐश्वर्यप्रदः पदार्थसमूहः (**श्येनाभृतः**) यः श्येन इव विज्ञानादिगुणैः समन्ताद् भ्रियते सः (**सुतः**) संतापितः (**येन**) (**वृत्रम्**) जलं स्वीकुर्वन्तं प्रजासुखं स्वीकुर्वन्तं वा (**निः**) नितराम् (**अद्भ्यः**) जलेभ्यः प्रजाभ्यो वा (**जघन्थ**) हन्ति (**वज्रिन्**) शस्त्रास्त्रविद्याभिज्ञ (**ओजसा**) पराक्रमेण (**अर्चन्**) सत्कुर्वन् (**अनु**) आनुकूल्ये (**स्वराज्यम्**) स्वकीयं राज्यम्॥ २॥

अन्वयःहे वज्रिन्! येन वृष्णा मदेन श्येनाभृतेन सुतेन सोमेन त्वमोजसा स्वराज्यमन्वर्चन् यथा सूर्य्योऽद्भ्यः पृथक्कृत्य वृत्रं जलं स्वीकुर्वन्तं मेघं निर्जघान तथा प्रजाभ्यः पृथक्कृत्य प्रजासुखं स्वीकुर्वन्तं शत्रुं निर्जघन्थ, स वृषा मदः श्येनाभृतः सुतः सोमस्त्वामदत्॥ २॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। पुरुषैर्यैः पदार्थैः कर्मभिश्च प्रजा प्रसन्ना स्यात्तैः समुन्नेया शत्रून्निवार्य्य धर्मराज्यं नित्यं प्रशंसनीयम्॥ २॥

पदार्थः-हे (**वज्रिन्**) शस्त्र और अस्त्रों की विद्या को धारण करनेवाले और सभाध्यक्ष! (**येन**) जिस न्याय वर्षाने और मद करनेवाले जो कि बाज पक्षी के समान धारण किया जावे उस उत्पादन किये हुए पदार्थों के समूह से तू (**ओजसा**) पराक्रम से (**स्वराज्यम्**) अपने राज्य को (**अन्वर्चन्**) शिक्षानुकूल किये हुए जैसे सूर्य (**अद्भ्यः**) जलों से अलग कर (**वृत्रम्**) जल को स्वीकार अर्थात् पत्थर सा कठिन करते हुए मेघ को निरन्तर छिन्न-भिन्न करता है, वैसे प्रजा से अलग कर प्रजा सुख को स्वीकार करते हुए शत्रु को (**निर्जघन्थ**) छिन्न-भिन्न करते हो (**सः**) वह (**वृषा**) (**मदः**) (**श्येनाभृतः**) (**सुतः**) उक्त गुण वाला (**सोमः**) पदार्थों का समूह (**त्वा**) तुझको (**अमदत्**) आनन्दित करावे॥ २॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जिन पदार्थों और कामों से प्रजा प्रसन्न हो, उनसे प्रजा की उन्नति करें और शत्रुओं की निवृत्ति करके धर्मयुक्त राज्य की नित्य प्रशंसा करें॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम्॥ ३॥

प्र। इहि। अभि। इहि। धृष्णुहि। न। ते। वज्रः। नि। यंसते। इन्द्र। नृम्णम्। हि। ते। शवः। हनः। वृत्रम्। जयाः। अपः। अर्चन्। अनु। स्वऽराज्यम्॥ ३॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**इहि**) प्राप्नुहि (**अभि**) आभिमुख्ये (**इहि**) जानीहि (**धृष्णुहि**) (**न**) निषेधे (**ते**) तव (**वज्रः**) किरणसमूहः (**निः**) क्रियायोगे (**यंसते**) यच्छन्ति (**इन्द्र**) सभाद्यध्यक्ष (**नृम्णम्**) धनम्। **नृम्णमिति धननामसु पठितम्।** (निघं०२.१०) (**हि**) किल (**ते**) तव (**शवः**) बलम् (**हनः**) हन्याः (**वृत्रम्**) मेघम् (**जयाः**) (**अपः**) जलानि (**अर्चन्**) सत्कुर्वन् (**अनु**) आनुकूल्ये (**स्वराज्यम्**) स्वस्य राज्यम्॥३॥

अन्वयः-हे इन्द्र! यथा सूर्यस्य वज्रो वृत्रं हनोऽपो निर्यंसते तथा ये ते शत्रवस्तान् हत्वा स्वराज्यमन्वर्चन् हि नृम्णं प्रेहि, शवोऽभीहि शरीरात्मबलेन धृष्णुहि जया एवं कुर्वतस्ते पराजयो न भविष्यति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजजना सूर्यवत् प्रकाशितकीर्त्तयः सन्ति, ते राज्यैश्वर्यभोगिनो भवन्ति॥३॥

पदार्थः-हे (**इन्द्रः**) परमसुखकारक! जैसे सूर्य का (**वज्रः**) किरणसमूह (**वृत्रम्**) मेघ को (**हनः**) मारता और (**अपः**) जलों को (**निर्यंसते**) नियम में रखता है, वैसे जो (**ते**) आपके शत्रु हैं, उन शत्रुओं का हनन करके (**स्वराज्यम्**) अपने राज्य का (**अन्वर्चन्**) सत्कार करता हुआ (**हि**) निश्चय करके (**नृम्णम्**) धन को (**प्रेहि**) प्राप्त हो (**शवः**) बल को (**अभीहि**) चारों ओर से बढ़ा शरीर और आत्मा के बल से (**धृष्णुहि**) ढीठ हो तथा (**जयाः**) जीत को प्राप्त हो, इस प्रकार करते हुए (**ते**) आपका पराजय (**न**) न होगा॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजपुरुष सूर्यप्रकाश के तुल्य प्रसिद्ध कीर्त्तिवाले हैं, वे राज्य के ऐश्वर्य के भोगनेहारे होते हैं॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः।
सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यम्॥४॥

निः। इन्द्र। भूम्याः। अधि। वृत्रम्। जघन्थ। निः। दिवः। सृज। मरुत्वतीः। अव। जीवऽधन्याः। इमाः। अपः। अर्चन्। अनु। स्वऽराज्यम्॥४॥

पदार्थः-(**निः**) नितराम् (**इन्द्र**) परमैश्वर्यप्रद (**भूम्याः**) पृथिव्याः। **भूमिरिति पृथिवीनामसु पठितम्।** (निघं०१.१) (**अधि**) उपरि (**वृत्रम्**) मेघम् (**जघन्थ**) हन्ति (**निः**) नित्यम् (**दिवः**) किरणान् (**सृज**) (**मरुत्वतीः**) मनुष्यादिप्रजासम्बन्धिनीः (**अव**) (**जीवधन्याः**) या जीवेषु धन्या धनाय हिताः (**इमाः**) प्रत्यक्षाः (**अपः**) जलानि (**अर्चन्**) सत्कुर्वन् (**अनु**) आनुकूल्ये (**स्वराज्यम्**)॥४॥

अन्वयः-हे इन्द्र! त्वं यथा सूर्य्यो वृत्रं हत्वा भूम्याऽधीमा जीवधन्या मरुत्त्वतीरपो निर्जघन्थ दिवोऽवसृजति तथा दुष्टाचारान् हत्वा धर्माचारं प्रचार्य स्वराज्यमन्वर्चन् राज्यं शाधि विविधं वस्तु सृज॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राज्यं कर्त्तुमिच्छेत् स विद्याधर्मविनयान् प्रचार्य्य स्वयं धार्मिको भूत्वा प्रजासु पितृवद्वर्तेत॥४॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य के देनेहारे! तू जैसे सूर्य्य **(वृत्रम्)** मेघ का ताड़न कर **(भूम्याः)** पृथिवी के **(अधि)** ऊपर **(इमाः)** ये **(जीवधन्याः)** जीवों में धनादि की सिद्धि में हितकारक **(मरुत्वतीः)** मनुष्यादि प्रजा के व्यवहारों को सिद्ध करनेवाले **(अपः)** जलों को **(निर्जघन्थ)** नित्य पृथिवी को पहुंचाता है और **(दिवः)** प्रकाशों को प्रकट करता है, वैसे अधर्मियों को दण्ड दे धर्माचार का प्रकाश कर **(स्वराज्यम्)** अपने राज्य का **(अन्वर्चन्)** यथायोग्य सत्कार करता हुआ प्रजाशासन किया कर और नाना प्रकार के सुखों को **(निरवसृज)** निरन्तर सिद्ध कर॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राज्य करने की इच्छा करे, वह विद्या, धर्म और विशेष नीति का प्रचार करके आप धर्म्मात्मा होकर, सब प्रजाओं में पिता के समान वर्त्ते॥४॥

पुनस्तस्य कर्त्तव्यानि कर्माण्युपदिश्यन्ते॥

फिर उस सभाध्यक्ष के कर्त्तव्य कर्मों का उपदेश अगले मन्त्र में किया है॥

इन्द्रो॑ वृ॒त्रस्य॒ दोध॑तः सानु॑ वज्रे॑ण हीळि॒तः।
अ॒भि॒क्रम्याव॑ जिघ्नते॒ऽपः सर्मा॑य चो॒दय॒न्नर्च॒न्ननु॑ स्व॒राज्य॑म्॥५॥२९॥

इन्द्रः॑। वृ॒त्रस्य॑। दोध॑तः। सानु॑म्। वज्रे॑ण। हीळि॒तः। अ॒भि॒ऽक्रम्य॑। अव॑। जि॒घ्न॒ते॒। अ॒पः। सर्मा॑य। चो॒दय॑न्। अर्च॑न्। अनु॑। स्व॒राज्य॑म्॥५॥

पदार्थः-**(इन्द्रः)** उक्तपूर्वः **(वृत्रस्य)** मेघस्य **(दोधतः)** क्रुद्धतः। **दोधतीति क्रुध्यतिकर्मा।** (निघं०२.१२) **(सानुम्)** अङ्गानां संविभागम् **(वज्रेण)** तीव्रेण तेजसा **(हीळितः)** अनादृतः। अत्र वर्णव्यत्ययेनेकारः। **(अभिक्रम्य)** सर्वत उल्लङ्घ्य **(अव)** **(जिघ्नते)** हन्त्रे **(अपः)** जलानि **(सर्माय)** गच्छते **(चोदयन्)** प्रेरयन् **(अर्चन्)** **(अनु)** **(स्वराज्यम्)**॥५॥

अन्वयः-हे विद्वन्! यथेन्द्रः सूर्यो वज्रेण वृत्रस्याऽपोऽभिक्रम्य सानुं छिनत्ति तथा त्वं स्वराज्यमन्वर्चन् जिघ्नते सर्माय स्वबलं चोदयन् दोधतः शत्रोर्बलमभिक्रम्य सेनां छित्त्वा हीळितः सन् क्रोधमवसृज॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवदविद्यां निवार्य विद्यां प्रकाश्य दुष्टान् संताड्य धार्मिकान् सत्कुर्वन्ति ते विद्वत्सु सत्कृता जायन्ते॥५॥

पदार्थः-हे विद्वान्! जैसे **(इन्द्रः)** सूर्य्य **(वज्रेण)** किरणों से **(वृत्रस्य)** मेघ के **(अपः)** जलों को **(अभिक्रम्य)** आक्रमण करके **(सानुम्)** मेघ के शिखरों को छेदन करता है, वैसे **(स्वराज्यम्)** अपने राज्य का **(अन्वर्चन्)** सत्कार करता हुआ राजा **(जिघ्नते)** हनन करनेवाले **(सर्माय)** प्राप्त हुए शत्रु के पराजय के लिये अपनी सेनाओं को **(चोदयन्)** प्रेरणा करता हुआ **(दोधतः)** क्रुद्ध शत्रु के बल के आक्रमण से सेना को छिन्न-भिन्न करके **(हीळितः)** प्रजाओं से अनादर को प्राप्त होता हुआ शत्रु पर क्रोध को **(अव)** कर॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान अविद्यान्धकार को छुड़ा, विद्या का प्रकाश कर, दुष्टों को दण्ड और धर्मात्माओं का सत्कार करते हैं, वे विद्वानों में सत्कार को प्राप्त होते हैं॥५॥

पुनस्तस्य कर्त्तव्यानि कर्माण्युपदिश्यन्ते॥

फिर उसके करने योग्य कर्मों का उपदेश अगले मन्त्र में किया है॥

अधि॒ सानौ॒ नि जि॑घ्नते॒ वज्रे॑ण श॒तप॑र्वणा।
म॒न्दा॒न इन्द्रो॒ अन्ध॑सः सखि॒भ्यो गा॒तुमि॑च्छ॒त्यर्च॒न्ननु॑ स्व॒राज्य॑म्॥६॥

अधि॑। सानौ॑। नि। जि॒घ्न॒ते॒। वज्रे॑ण। श॒तऽप॑र्वणा। म॒न्दा॒नः। इन्द्रः॑। अन्ध॑सः। सखि॑ऽभ्यः। गा॒तुम्। इ॒च्छ॒ति॒। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥६॥

पदार्थः-**(अधि)** उपरिभावे **(सानौ)** अवयवे **(नि)** नितराम् **(जिघ्नते)** हन्त्रे **(वज्रेण)** **(शतपर्वणा)** शतान्यसंख्यातानि पर्वाण्यलं कर्माणि वा यस्मात्तेन **(मन्दानः)** कामयमानो हर्षयन् वा **(इन्द्रः)** दाता **(अन्धसः)** अन्नस्य **(सखिभ्यः)** मित्रेभ्यः **(गातुम्)** सुशिक्षितां वाणीम् **(इच्छति)** काङ्क्षति **(अर्चन्)** **(अनु)** **(स्वराज्यम्)**॥६॥

अन्वयः-हे राजन्! यथेन्द्रो विद्युच्छतपर्वणा वज्रेण वृत्रस्य सानावधि प्रहरन्तीव प्रकाशं निजिघ्नते मेघाय प्रतिकूलो वर्त्तते तथैव गातुमिच्छति स भवान् सखिभ्यो मन्दानः स्वराज्यमन्वर्चन्नन्धसो दाता भव॥६॥

भावार्थः-अत्र श्लेषलुप्तोपमालङ्कारौ। यथा सर्वजगदुपकारी सूर्य्योऽस्ति, तथैव सभाद्यध्यक्षादयः सततं स्युः॥६॥

पदार्थः-हे राजन्! जैसे **(इन्द्रः)** विद्युत् अग्नि **(शतपर्वणा)** असंख्यात अच्छे-अच्छे कर्मों से युक्त **(वज्रेण)** अपने किरणों से मेघ के **(सानावधि)** अवयवों पर प्रहार करता हुआ **(निजिघ्नते)** प्रकाश को रोकनेवाले मेघ के लिये सदैव प्रतिकूल रहता है, वैसे ही जो आप **(गातुम्)** उत्तम रीति से शिक्षायुक्त वाणी की **(इच्छति)** इच्छा करते हैं सो **(सखिभ्यः)** मित्रों के लिये **(मन्दानः)** आनन्द बढ़ाते हुए और **(स्वराज्यम्)** अपने राज्य का **(अन्वर्चन्)** सत्कार करते हुए **(अन्धसः)** अन्न के दाता हों॥६॥

भावार्थः-इस मन्त्र में श्लेष **[**और**]** लुप्तोपमालङ्कार हैं। जैसे सब जगत् का उपकार करनेवाला सूर्य्य है, वैसे ही सभाध्यक्ष आदि को भी होना चाहिये॥६॥

पुनरेतस्य कृत्यमुपदिश्यते॥

फिर इसके कृत्य का उपदेश अगले मन्त्र में किया है॥

इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन् वीर्यम्।

यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यम्॥७॥

इन्द्र। तुभ्यम्। इत्। अद्रिऽवः। अनुत्तम्। वज्रिन्। वीर्यम्। यत्। ह। त्यम्। मायिनम्। मृगम्। तम्। ऊम् इति। त्वम्। मायया। अवधीः। अर्चन्। अनु। स्वऽराज्यम्॥७॥

पदार्थः-(**इन्द्र**) सुखस्य दातः (**तुभ्यम्**) (**इत्**) अपि (**अद्रिवः**) मेघवत्पर्वतयुक्तराज्यालङ्कृत (**अनुत्तम्**) अप्रेरितं स्वाभाविकम् (**वज्रिन्**) प्रशस्ता वज्राः शस्त्रास्त्राणि यस्य तत्सम्बुद्धौ (**वीर्यम्**) पराक्रमः (**यत्**) यतः (**ह**) किल (**त्यम्**) एतम् (**मायिनम्**) छलादिदोषयुक्तम् (**मृगम्**) परस्वापहर्त्तारम्। **मृगो मार्ष्टेर्गतिकर्मणः।** (निरु०१.२०) (**तम्**) (**उ**) वितर्के (**त्वम्**) (**मायया**) प्रज्ञया (**अवधीः**) हंसि (**अर्चन्**) (**अनु**) (**स्वराज्यम्**)॥७॥

अन्वयः-हे अद्रिवो वज्रिन्निन्द्र! त्वं यत्यं मायिनं मृगं माययाहाऽवधीर्दिवः सूर्यस्येवाऽनुत्तं वीर्य्ये गृहीत्वा स्वराज्यमन्वर्चंस्तमु दण्डयसि तस्मै तुभ्यमिदेव वयं करान् ददाम॥७॥

भावार्थः-ये प्रजापालनाय सूर्यवत्स्वबलन्यायविद्याः प्रकाश्य कपटिनो जनान् निबध्नन्ति, ते राज्यं वर्द्धयितुं करान् प्राप्तुं च शक्नुवन्ति॥७॥

पदार्थः-हे (**अद्रिवः**) मेघ शिखरवत् पर्वतादि युक्त स्वराज्य से सुभूषित (**वज्रिन्**) अत्युत्तम शस्त्रास्त्रों से युक्त (**इन्द्र**) सभेश! (**यत्**) जिससे (**त्वम्**) उस (**मायिनम्**) कपटी (**मृगम्**) मृग के तुल्य पदार्थ भोगनेवाले को (**मायया**) बुद्धि से (**ह**) निश्चय करके (**अवधीः**) हनन करता है (**दिवः**) सूर्य्य के समान (**अनुत्तम्**) स्वाधीन पुरुषार्थ से ग्रहण किये हुए (**वीर्यम्**) पराक्रम को ग्रहण करके (**स्वराज्यम्**) अपने राज्य का (**अन्वर्चन्**) सत्कार करता हुआ (**तमु**) उसी दुष्ट को दण्ड देता है, उस (**तुभ्यमित्**) तेरे ही लिये उत्तम-उत्तम धन हम लोग देवें॥७॥

भावार्थः-जो प्रजा रक्षा के लिये सूर्य के समान शरीर और आत्मा तथा न्यायविद्याओं का प्रकाश करके कपटियों को दण्ड देते हैं, वे राज्य के बढ़ाने और करों को प्राप्त होने में समर्थ होते हैं॥७॥

पुनरेतस्य गुणा उपदिश्यन्ते॥

फिर भी अगले मन्त्र में पूर्वोक्त सभाध्यक्ष और सूर्य के गुणों का वर्णन किया है॥

वि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु।

म॒हत्त॑ इन्द्र वी॒र्यं॑ बा॒ह्वोस्ते॒ बलं॑ हि॒तमर्च॒न्ननु॑ स्व॒राज्य॑म्॥८॥

वि। ते॒। वज्रा॑सः। अ॒स्थि॒र॒न्। न॒व॒तिम्। ना॒व्या॑ः। अनु॑। म॒हत्। ते॒। इ॒न्द्र॒। वी॒र्य॑म्। बा॒ह्वोः। ते॒। बल॑म्। हि॒तम्। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥८॥

पदार्थः-(**वि**) विशेषार्थे (**ते**) तव (**वज्रासः**) शस्त्रकलाः समूहा (**अस्थिरन्**) तिष्ठन्ति (**नवतिम्**) एतत्संख्याकाः (**नाव्याः**) नौकाः (**अनु**) आनुकूल्ये (**महत्**) (**ते**) तव (**इन्द्र**) (**वीर्य्यम्**) (**बाह्वोः**) (**ते**) तव (**बलम्**) (**हितम्**) सुखकारि (**अर्चन्**) (**अनु**) (**स्वराज्यम्**)॥८॥

अन्वयः-हे इन्द्र! सभापते! ते वज्रासो नवतिं नाव्या अनु व्यस्थिरन्, यत् ते बाह्वोर्महद्वीर्यं बलं हितमस्ति, तेन स्वराज्यमन्वर्चन् राज्यश्रियं त्वं प्राप्नुहि॥८॥

भावार्थः-ये राज्यं वर्धयितुमिच्छेयुस्ते बृहतीरग्न्यश्वतरीर्नौका निर्ममीरँस्ताभिर्द्वीपान्तरं गत्वाऽऽगत्य व्यवहारलाभान्नुन्नीय स्वराज्यं धनधान्यैरलंकुर्युः॥८॥

पदार्थः-हे (**इन्द्र**)! जो (**ते**) तेरी (**वज्रासः**) शस्त्रास्त्रयुक्त दृढ़तर सेना (**नवतिम्**) नब्बे (**नाव्याः**) तारनेवाली नौकाओं को (**अनुव्यस्थिरन्**) अनुकूलता से व्यवस्थित करती है और जो (**ते**) तेरी (**बाह्वोः**) भुजाओं में (**महत्**) बड़ा (**वीर्यम्**) पराक्रम और (**ते**) तेरी भुजाओं में (**बलम्**) बस (**हितम्**) स्थित है, उससे (**स्वराज्यम्**) अपने राज्य का (**अन्वर्चन्**) यथावत् सत्कार करता हुआ राज्यलक्ष्मी को तू प्राप्त हो॥८॥

भावार्थः-जो विद्वान् राज्य के बढ़ाने की इच्छा करें, वे बड़ी अग्नियन्त्र से चलाने योग्य नौकाओं को बनाकर द्वीप-द्वीपान्तरों में जा-आ के व्यवहार से धन आदि के लाभों को बढ़ा के अपने राज्य को धन-धान्य से सुभूषित करें॥८॥

पुनः राजपुरुषैः किं कर्त्तव्यमित्युपदिश्यते॥

फिर राजपुरुषों को क्या करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

स॒हस्रं॑ सा॒कमर्च॒त परि॑ ष्टोभत विंश॒तिः।
श॒तैन॒मन्वनोनवु॒रिन्द्रा॑य॒ ब्रह्मोद्य॑तमर्च॒न्ननु॑ स्व॒राज्य॑म्॥९॥

स॒हस्र॑म्। सा॒कम्। अ॒र्च॒त॒। परि॑। स्तो॒भ॒त॒। विं॒श॒तिः। श॒ता। ए॒न॒म्। अनु॑। अ॒नो॒न॒वुः॒। इन्द्रा॑य। ब्रह्म॑। उत्ऽय॑तम्। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥९॥

पदार्थः-(**सहस्रम्**) असंख्यातगुणसम्पन्नम् (**साकम्**) परस्परं मिलित्वा (**अर्चत**) सत्कुरुत (**परि**) सर्वतः (**स्तोभत**) स्तम्भयत (**विंशतिः**) एतत्संख्याकानि (**शता**) शतानि सैन्यानि (**एनम्**) सभाध्यक्षम् (**अनु**) आनुकूल्ये (**अनोनवुः**) स्तुवत (**इन्द्राय**) उत्कृष्टैश्वर्य्याय (**ब्रह्म**) वेदं सुसंस्कृमन्नं वा (**उद्यतम्**) उद्वृत्तम् (**अर्चन्**) (**अनु**) (**स्वराज्यम्**)॥९॥

अन्वयः-हे मनुष्या! यूयं यः स्वराज्यं स्वकीयं राष्ट्रमर्चन् सत्कुर्वन् वर्त्तते तमाश्रित्य तदधर्माचरणात् पृथक् परिष्टोभत साकं सहस्रमर्चत यं विंशतिः शतान्यन्वनोनवुर्य उद्यतं ब्रह्मार्चन् वर्त्तते तस्मा इन्द्राय सभाध्यक्षायानु स्तुवत॥९॥

भावार्थः-नहि विरोधत्यागेन विना परस्परं सुखं भवति, नहि मनुष्यैर्विद्योत्तमसुशिक्षारहितो निन्दितो मनुष्यः सभाद्यध्यक्षः कार्य्यः॥९॥

पदार्थः-हे मनुष्यो! तुम लोग जो सभाध्यक्ष **(स्वराज्यम्)** अपने राज्य का **(अन्वर्चन्)** सत्कार करता हुआ वर्त्तमान होता है **(एनम्)** उसका आश्रय करके उस अपने राज्य को सब प्रकार से अधर्माचरण से **(परिष्टोभत)** रोको, **(साकम्)** परस्पर मिल के **(सहस्रम्)** असंख्यात गुणों से युक्त पुरुषों से सहित **(अर्चत)** सत्कार करो। जिसको **(विंशतिः)** बीस **(शता)** सैकड़े **(अनु)** अनुकूलता से **(अनोनवुः)** स्तुति करो, जो **(उद्यतम्)** प्रसिद्ध **(ब्रह्म)** वेद वा अन्न को **(अर्चन्)** सत्कार करता हुआ वर्त्तता है, उस **(इन्द्राय)** अधिक सम्पत्ति वाले सभाध्यक्ष के लिये अनुकूल हो के स्तुति करो॥९॥

भावार्थः-मनुष्यों को विरोध के विना छोड़े परस्पर सुख कभी नहीं होता। मनुष्यों को उचित है कि विद्या तथा उत्तम सुख से रहित और निन्दित मनुष्य को सभाध्यक्ष आदि का अधिकार कभी न देवें॥९॥

पुनस्तस्य गुणा उपदिश्यन्ते॥

फिर भी पूर्वोक्त सभाध्यक्ष के गुणों का उपदेश अगले मन्त्र में किया है॥

इन्द्रो॑ वृ॒त्रस्य॒ तवि॑षीं॒ निर॑हन्त्सह॑सा सह॑ः।

म॒हत्तद॑स्य॒ पौंस्यं॑ वृ॒त्रं ज॑घ॒न्वाँ अ॑सृज॒दर्च॒न्ननु॑ स्व॒राज्य॑म्॥ १०॥ ३०॥

इन्द्रः॑। वृ॒त्रस्य॑। तवि॑षीम्। निः॑। अ॒ह॒न्। सह॑सा। सह॑ः। म॒हत्। तत्। अ॒स्य॒। पौंस्य॑म्। वृ॒त्रम्। ज॒घ॒न्वान्। अ॒सृ॒ज॒त्। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ १०॥

पदार्थः-**(इन्द्रः)** विद्युदिव पराक्रमी सभाध्यक्षः **(वृत्रस्य)** मेघस्य वा शत्रोः **(तविषीम्)** बलम् **(निः)** नितराम् **(अहन्)** हन्यात् **(सहसा)** बलेन **(सहः)** बलम् **(महत्)** **(तत्)** **(अस्य)** **(पौंस्यम्)** पुंसो भावः कर्म बलं वा। **पौंस्यानीति बलनामसु पठितम्।** (निघं०२.९) **(वृत्रम्)** **(जघन्वान्)** हतवान् **(असृजत्)** सृजति **(अर्चन्)** **(अनु)** **(स्वराज्यम्)**॥१०॥

अन्वयः-य इन्द्रो वृत्रमिव शत्रुं जघन्वान् यः सहसा वृत्रस्य सूर्य्य इव शत्रोस्तविषीं निरहन्, स्वराज्यमन्वर्चन्, सुखमसृजत्, तदस्य महत्पौंस्यं सहोऽस्तीति विद्वान् विजानातु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो महता बलेन तेजसा सर्वमाकृष्य प्रकाशते, तथैव सभाद्यध्यक्षादिभिर्महता बलेन शुभगुणानाकृष्य न्यायप्रकाशेन राज्यमनुशासनीयम्॥१०॥

पदार्थः-जो **(इन्द्रः)** सभाध्यक्ष विद्युत्स्वरूप सूर्य्य **(वृत्रम्)** मेघ को नष्ट करने के समान शत्रु को **(जघन्वान्)** मारता हुआ निरन्तर हनन करता है तथा जो **(सहसा)** बल से सूर्य जैसे **(वृत्रस्य)** मेघ के बल को वैसे शत्रु के **(तविषीम्)** बल को **(निरहन्)** निरन्तर हनन करता और **(स्वराज्यम्)** अपने राज्य का **(अन्वर्चन्)** सत्कार करता हुआ सुख को **(असृजत्)** उत्पन्न करता है **(तत्)** वही **(अस्य)** इस का **(महत्)** बड़ा **(पौंस्यम्)** पुरुषार्थरूप बल के **(सहः)** सहन का हेतु है॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य अत्यन्त बल और तेज से सबका आकर्षण और प्रकाश करता है, वैसे सभाध्यक्ष आदि को उचित है कि अपने अत्यन्त बल से शुभ गुणों के आकर्षण और न्याय के प्रकाश से राज्य की शिक्षा करें॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

इ॒मे चि॒त्तव॑ म॒न्यवे॒ वेपे॑ते भि॒यसा॑ म॒ही।
यदि॑न्द्र वज्रि॒न्नोज॑सा वृ॒त्रं म॒रुत्वाँ॒ अव॑धी॒रर्च॒न्ननु॑ स्व॒राज्य॑म्॥ ११॥

इ॒मे इति॑। चि॒त्। तव॑। म॒न्यवे॑। वेपे॑ते॒ इति॑। भि॒यसा॑। म॒ही इति॑। यत्। इ॒न्द्र॒। व॒ज्रि॒न्। ओज॑सा। वृ॒त्रम्। म॒रुत्वा॑न्। अव॑धीः। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ ११॥

पदार्थः-**(इमे)** वक्ष्यमाणे **(चित्)** अपि **(तव)** **(मन्यवे)** न्यायव्यवस्थापालनहेतवे **(वेपेते)** चलतः **(भियसा)** भयेन **(मही)** महत्यौ द्यावापृथिव्यौ **(यत्)** यस्य **(इन्द्र)** सभाद्यध्यक्षराजन् **(वज्रिन्)** सुशिक्षितशस्त्रविद्यायुक्त **(ओजसा)** सेनाबलेन **(वृत्रम्)** मेघमिवारीन् **(मरुत्वान्)** प्रशस्तवायुमान् **(अवधीः)** हिन्धि **(अर्चन्)** **(अनु)** **(स्वराज्यम्)**॥११॥

अन्वयः-हे वज्रिन्निन्द्र सभाद्यध्यक्ष! यद्यस्य तवौजसा यथा सूर्यस्याकर्षणेन ताडनेन चेमे मही वेपेते तत्तुल्यस्य तव भियसा मन्यवे बलेन शत्रवोऽनुकम्पन्ते यथा मरुत्वानिन्द्रो वृत्रं हन्ति तथा स्वराज्यमन्वर्चन्नरांश्चिदवधीः॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सभाप्रबन्धेन प्रजाः सुखेन सन्मार्गेण गच्छन्त्यागच्छन्ति तथैव सूर्यस्याकर्षणेन सर्वे भूगोला गच्छन्त्यागच्छन्ति यथा सूर्यो मेघं हत्वा जलेन प्रजाः पालयति, तथैव सभासभाद्यध्यक्षौ शत्रवन्यायौ हत्वा विद्यान्यायप्रचारेण प्रजाः पालयेताम्॥११॥

पदार्थः-हे **(वज्रिन्)** शस्त्रविद्या को ठीक-ठीक जाननेवाले **(इन्द्र)** सभाध्यक्ष राजन्! **(यत्)** जिस **(तव)** आपके **(ओजसा)** सेना के बल से जैसे सूर्य के आकर्षण और ताड़न से **(इमे)** ये **(मही)** लोक **(वेपेते)** कँपते हैं, उनके समान जो आप **(भियसा)** भयबल से **(मन्यवे)** क्रोध की शान्ति के लिये शत्रु लोग **(अनु)** अनुकूल होके कम्पते रहते हैं जैसे **(मरुत्वान्)** बहुत वायु से युक्त सूर्य **(वृत्रम्)** मेघ को

मारता है, वैसे ही **(स्वराज्यम्)** अपने राज्य का **(अर्चन्)** सत्कार करता हुआ **(चित्)** और शत्रु को **(अवधीः)** मारा कर॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सभाप्रबन्ध के होने से सुखपूर्वक प्रजा के मनुष्य अच्छे मार्ग में चलते-चलाते हैं, वैसे ही सूर्य के आकर्षण से सब भूगोल इधर-उधर चलते-फिरते हैं। जैसे सूर्य मेघ को वर्षा के सब प्रजा का पालन करता है, वैसे सभा और सभापति आदि को भी चाहिये कि शत्रु और अन्याय का नाश करके विद्या और न्याय के प्रचार से प्रजा का पालन करें॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर भी सभाध्यक्ष कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

न वेप॑सा॒ न त॑न्य॒तेन्द्रं॑ वृ॒त्रो वि बी॑भयत्।
अ॒भ्ये॑नं॒ वज्र॑ आय॒सः स॒हस्र॑भृष्टिराय॒तार्च॒न्ननु॑ स्व॒राज्य॑म्॥ १२॥

न। वेप॑सा। न। त॒न्य॒ता। इन्द्र॑म्। वृ॒त्रः। वि। बी॒भ॒य॒त्। अ॒भि। ए॒न॒म्। वज्र॑ः। आ॒य॒सः। स॒हस्र॑ऽभृष्टिः। आ॒य॒त॒। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ १२॥

पदार्थः-(**न**) निषेधार्थे **(वेपसा)** वेगेन **(न)** निषेधे **(तन्यता)** तन्यतुना गर्जनेन शब्देन। अत्र **सुपां सुलुगि**ति डादेशः। **(इन्द्रम्)** सभाद्यध्यक्षम् **(वृत्रः)** मेघ इव शत्रुः **(वि)** विशेषे **(बीभयत्)** भयितुं शक्नोति **(अभि)** आभिमुख्ये **(एनम्)** शत्रुं पर्जन्यं वा **(वज्रः)** शस्त्रसमूहः किरणसमूहो वा **(आयसः)** अयसा निष्पन्नस्तेजोमयो वा **(सहस्रभृष्टिः)** सहस्रमसंख्याता भृष्टयः पीडा दाहा वा यस्मात् सः **(आयत)** समन्ताद्धन्ति। अत्र **यमो गन्धने।** (अष्टा०१.२.१५) **(अर्चन्) (अनु) (स्वराज्यम्)**॥१२॥

अन्वयः-हे सभाध्यक्ष! स्वराज्यमन्वर्चंस्त्वं यथा वृत्र इन्द्रं वेपसा न विबीभयत् तन्यता न विबीभयदेनं मेघं प्रति सूर्यप्रेरितः सहस्रभृष्टिरायसो वज्रोऽभ्यायत तथा शत्रून् प्रति भव॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मेघादयः सूर्यस्य पराजयं कर्तुं न शक्नुवन्ति, तथैव शत्रवो धार्मिकौ सभाद्यध्यक्षौ परिभवतुिन्न शक्नुवन्ति॥१२॥

पदार्थः-हे सभापते! **(स्वराज्यमन्वर्चन्)** अपने राज्य का सत्कार करता हुआ तू जैसे **(वृत्रः)** मेघ **(वेपसा)** वेग से **(इन्द्रम्)** सूर्य्य को **(न विबीभयत्)** भय प्राप्त नहीं करा सकता और वह मेघ **[**गर्जन वा**]** प्रकाश की हुई **(तन्यता)** बिजुली से भी भय को **(न)** नहीं दे सकता **(एनम्)** इस मेघ के ऊपर सूर्यप्रेरित **(सहस्रभृष्टिः)** सहस्र प्रकार के दाह से युक्त **(आयसः)** लोहा के शस्त्र वा आग्नेयास्त्र के तुल्य **(वज्रः)** वज्ररूप किरण **(अभ्यायत)** चारों और से प्राप्त होता है, वैसे शत्रुओं पर आप हूजिये॥१२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मेघ आदि सूर्य्य को नहीं जीत सकते, वैसे ही शत्रु भी धर्मात्मा सभा और सभापति का तिरस्कार नहीं कर सकते॥१२॥

पुन स कीदृश इत्युपदिश्यते॥

फिर भी अगले मन्त्र में सभाध्यक्ष के गुणों का उपदेश किया है॥

यद्वृत्रं तवं चाशनिं वज्रेण समयोधयः।
अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यम्॥१३॥

यत्। वृत्रम्। तवं। च। अशनिम्। वज्रेण। सम्ऽअयोधयः। अहिम्। इन्द्र। जिघांसतः। दिवि। ते। बद्बधे। शवः। अर्चन्। अनु। स्वऽराज्यम्॥१३॥

पदार्थः–(**यत्**) यथा (**वृत्रम्**) (**तव**) (**च**) समुच्चये (**अशनिम्**) विद्युतम् (**वज्रेण**) प्रापणेन (**समयोधयः**) सम्यग्योधयसि (**अहिम्**) व्यापनशीलं मेघम् (**इन्द्र**) परमैश्वर्ययुक्त (**जिघांसतः**) हन्तुमिच्छतः (**दिवि**) आकाशे (**ते**) तव (**बद्बधे**) अत्र **वाच्छन्दसी**ति सन् हलादिः शेषो न भवति। (**शवः**) बलम् (**अर्चन्**) (**अनु**) (**स्वराज्यम्**)॥१३॥

अन्वयः–हे इन्द्र! स्वराज्यमन्वर्चंस्त्वं यद्यथा दिवि सूर्य्योऽशनिं प्रहृत्याऽहिं बद्बधे तथा वज्रेण शस्त्रास्त्रैः स्वसेनास्ता शत्रुभिस्सह समयोधयः शत्रून् जिघांसतस्तव शवो बलमुत्तमं भवतु एवं वर्त्तमानस्य ते तव यशश्च वर्धिष्यते॥१३॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यः किरणसमूहेन विद्युतं वृत्रेण योधयति, तथैव सेनाध्यक्ष आग्नेयास्त्रयुक्ता सेना शत्रुबलेन सह योधयेत्। न हीदृशस्य सेनापतेः कदाचित्पराजयो भवितुं शक्यः॥१३॥

पदार्थः–हे (**इन्द्र**) परमैश्वर्य्ययुक्त सभेश! (**स्वराज्यम्**) अपने राज्य का (**अन्वर्चन्**) सत्कार करता हुआ तू (**यत्**) जैसे (**दिवि**) आकाश में सूर्य्य (**अशनिम्**) बिजुली का प्रहार करके (**वृत्रम्**) कुटिल (**अहिम्**) मेघ का (**बद्बधे**) हनन करता है वैसे (**वज्रेण**) शस्त्रास्त्रों से सहित अपनी सेनाओं का शत्रुओं के साथ (**समयोधयः**) अच्छे प्रकार युद्ध करा शत्रुओं को (**जिघांसतः**) मारनेवाले (**तव**) आपके (**शवः**) बल अर्थात् सेना का विजय हो, इस प्रकार वर्त्तमान करनेहारे (**ते**) आपका (**च**) यश बढ़ेगा॥१३॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य अपने बहुत से किरणों से बिजुली और मेघ का परस्पर युद्ध करता है, वैसे ही सेनापति आग्नेय आदि अस्त्रयुक्त सेना को शत्रुसेना के साथ युद्ध करावे। इस प्रकार के सेनापति का कभी पराजय नहीं हो सकता॥१३॥

पुनस्तस्य किं कृत्यमस्तीत्युपदिश्यते॥

फिर इस सभाध्यक्ष को क्या करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते।

त्वष्टा चित्तवे मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम्॥ १४॥

अभिऽस्तने। ते। अद्रिऽवः। यत्। स्थाः। जगत्। च। रेजते। त्वष्टा। चित्। तवे। मन्यवे। इन्द्र। वेविज्यते। भिया। अर्चन्। अनु। स्वऽराज्यम्॥ १४॥

पदार्थः-(**अभिष्टने**) अभितः शब्दयुक्ते व्यवहारे (**ते**) तव (**अद्रिवः**) बहुमेघयुक्तसूर्य्यवत्सेनायुक्त (**यत्**) यदा (**स्थाः**) स्थावरम् (**जगत्**) जङ्गमम् (**च**) (**रेजते**) कम्पते (**त्वष्टा**) छेत्ता (**चित्**) अपि (**तव**) (**मन्यवे**) क्रोधाय (**इन्द्र**) राज्यधारक सभाद्यध्यक्ष (**वेविज्यते**) अत्यन्तं बिभेति सम्यक् (**भिया**) भयेन (**अर्चन्**) (**अनु**) (**स्वराज्यम्**)॥ १४॥

अन्वयः-हे अद्रिव इन्द्र! यद्यदा ते तवाभिष्टने स्था जगच्च रेजते त्वष्टा सेनापतिस्तव मन्यवे ते भिया चिद्वेविज्यते तदा भवान् स्वराज्यमन्वर्चन् सुखी भवेत्॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा सूर्यस्य योगेन प्राणिनः स्वस्वकर्मसु प्रवर्त्तन्ते, भूगोला यथानुक्रमं भ्रमन्ति, तथैव सभया प्रशासितस्य राज्यस्य योगेन सर्वे प्राणिनो धर्मेण स्वस्वव्यवहारे वर्त्तित्वा सन्मार्गेऽनुचलन्तीति वेद्यम्॥ १४॥

पदार्थः-हे (**अद्रिवः**) बहुमेघयुक्त सूर्य्य के समान (**इन्द्रः**) परमैश्वर्ययुक्त सभाध्यक्ष (**यत्**) जब (**ते**) आपके (**अभिष्टने**) सर्वथा उत्तम न्याययुक्त व्यवहार में (**स्थाः**) स्थावर (**जगच्च**) और जङ्गम (**रेजते**) कम्पायमान होता है तथा जो (**त्वष्टा**) शत्रुच्छेदक सेनापति है (**तव**) उसके (**मन्यवे**) क्रोध के लिये (**भिया चित्**) भय से भी (**वेविज्यते**) उद्विग्न होता है, तब आप (**स्वराज्यम्**) अपने राज्य का (**अन्वर्चन्**) सत्कार करते हुए सुखी हो सकते हैं॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिए कि जैसे सूर्य के योग से प्राणधारी अपने-अपने कर्म में वर्त्तते और सब भूगोल अपनी-अपनी कक्षा में यथावत् भ्रमण करते हैं, वैसे ही सभा से प्रशासन किये राज्य के संयोग से सब मनुष्यादि प्राणि धर्म के साथ अपने-अपने व्यवहार में वर्त्त के सन्मार्ग में अनुकूलता से गमनागमन करते हैं॥ १४॥

अथेश्वरं परमविद्वांसञ्च प्राप्य विद्वांसः किं कुर्वन्तीत्युपदिश्यते॥

अब ईश्वर और परम विद्वान् को प्राप्त होकर विद्वान् लोग क्या-क्या करें, यह विषय अगले मन्त्र में कहा है॥

नहि नु यादधीमसीन्द्रं को वीर्या परः।
तस्मिन् नृम्णमुत क्रतुं देवा ओजांसि सं दधुरर्चन्ननु स्वराज्यम्॥ १५॥

नहि। नु। यात्। अधिऽइमसि। इन्द्रम्। कः। वीर्या। परः। तस्मिन्। नृम्णम्। उत। क्रतुम्। देवाः। ओजांसि। सम्। दधुः। अर्चन्। अनु। स्वऽराज्यम्॥ १५॥

पदार्थः-(**नहि**) निषेधे (**नु**) शीघ्रं (**यात्**) यायात्। लेट् प्रयोगः। (**अधीमसि**) सर्वोपरि विराजमानं प्राप्नुमः (**इन्द्रम्**) अनन्तपराक्रमं जगदीश्वरं पूर्णं वीर्य्यं विद्वांसं वा (**कः**) कश्चित् (**वीर्या**) विद्यादिवीर्याणि (**परः**) प्रकृष्टगुणः (**तस्मिन्**) इन्द्रे (**नृम्णम्**) धनम् (**उत**) अपि (**क्रतुम्**) प्रज्ञां पुरुषार्थं वा (**देवाः**) विद्वांसः (**ओजांसि**) शरीरात्ममनः पराक्रमान् (**सम्**) सम्यक् (**दधुः**) दधति। अन्यत् सर्वे पूर्ववद् बोध्यम्। (**अर्चन्**) (**अनु**) (**स्वराज्यम्**)॥१५॥

अन्वयः-यः परः स्वराज्यमन्वर्चन् वर्त्तते यस्मिन् देवा नृम्णमुत क्रतुमुताप्योजांसि नु नहि संदधुर्यं प्राप्य वीर्य्याधीमसि तमिन्द्रं प्राप्य कः नृम्णं नहि यात् तस्मिन् को नृम्णमुत क्रतुमप्योजांसि नहि सन्दध्यात्॥१५॥

भावार्थः-नहि कश्चिदपि परमेश्वरं विद्वांसं चाप्राप्य विद्यां शुद्धां धियमुत्कृष्टं सामर्थ्यं प्राप्तुं शक्नोति, तस्मादेतदाश्रयः सदा सर्वैः कर्त्तव्यः॥१५॥

पदार्थः-जो (**परः**) उत्तमगुणयुक्त राजा (**स्वराज्यम्**) अपने राज्य का (**अन्वर्चन्**) अनुकूलता से सत्कार करता हुआ वर्त्तता है, जिस राज्य में (**देवाः**) दिव्यगुणयुक्त विद्वान् लोग (**नृम्णम्**) धन को (**क्रतुम्**) और बुद्धि वा पुरुषार्थ को (**उत**) और भी (**ओजांसि**) शरीर, आत्मा और मन के पराक्रमों को (**संदधुः**) धारण करते हैं तथा जिस परमेश्वर को प्राप्त होकर हम लोग (**वीर्य्या**) विद्या आदि वीर्यों को (**अधीमसि**) प्राप्त होवें उस (**इन्द्रम्**) अनन्त पराक्रमी जगदीश्वर वा पूर्ण वीर्य्ययुक्त राजा को प्राप्त होकर (**कः**) कौन मनुष्य धन को (**नु**) शीघ्र (**नहि**) (**यात्**) प्राप्त हो, उस राज्य में कौन पुरुष धन को तथा बुद्धि वा पुरुषार्थ वा बलों को शीघ्र नहीं धारण करता॥१५॥

भावार्थः-कोई भी मनुष्य परमेश्वर वा परम विद्वान् की प्राप्ति के विना उत्तम विद्या और श्रेष्ठ सामर्थ्य को नहीं प्राप्त हो सकता, इस हेतु से इनका सदा आश्रय करना चाहिये॥१५॥

पुनर्मनुष्यस्तौ प्राप्य किं प्राप्नोतीत्युपदिश्यते॥

फिर मनुष्य उनको प्राप्त होकर किसको प्राप्त होते हैं, इस विषय को अगले मन्त्र में कहा है॥

यामथ॑र्वा॒ मनु॑ष्पि॒ता दु॒ध्यङ् धिय॒मत्न॑त।
तस्मि॒न् ब्रह्मा॑णि पू॒र्वथेन्द्र॑ उ॒क्था सम॑ग्म॒तार्च॒न्ननु॑ स्व॒राज्य॑म्॥ १६॥ ३१॥ ५॥

याम्। अथ॑र्वा। मनु॑ः। पि॒ताः। दु॒ध्यङ्। धिय॑म्। अत्न॑त। तस्मि॑न्। ब्रह्मा॑णि। पू॒र्वऽथा॑। इन्द्रे॑। उ॒क्था। सम्। अ॒ग्म॒त॒। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ १६॥

पदार्थः-(**याम्**) वक्ष्यमाणम् (**अथर्वा**) हिंसादिदोषरहितः (**मनुः**) विज्ञानवान् (**पिता**) अनूचानोऽध्यापकः (**दध्यङ्**) दधति यैस्ते दधयः सद्गुणास्तानञ्चति प्रापयति वा सः। अत्र **कृतो बहुलम्**इति करणे किस्ततोऽञ्चतेः क्विप्। (**धियम्**) शुभविद्यादिगुणक्रियाधारिकां बुद्धिम् (**अत्नत**)

प्रयतध्वम् **(तस्मिन्)** **(ब्रह्माणि)** प्रकृष्टान्यन्नानि धनानि **(पूर्वथा)** पूर्वाणि **(इन्द्रे)** सम्यक् सेविते **(उक्था)** वक्तुं योग्यानि **(सम्)** सम्यक् **(अग्मत)** प्राप्नुत अन्यत्सर्वं पूर्ववत् **(अर्चन्)** **(अनु)** **(स्वराज्यम्)**॥१६॥

अन्वयः-हे मनुष्या! यथा स्वराज्यमन्वर्चन् दध्यङ्ङ्थर्वा पिता मनुर्यां धियं प्राप्य यस्मिन् सुखानि तनुते तथैतां प्राप्य यूयं सुखान्यत्नत, यस्मिन्निन्द्रे पूर्वथा ब्रह्माण्युक्था प्राप्नोति तस्मिन् सेविते सप्येतानि समग्मत सङ्गच्छध्वम्॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः परमेश्वरोपासकानां विद्वत्सङ्गप्रीतीनामनुकरणं कृत्वा प्रशस्तां प्रज्ञामनुत्तमान्यन्नानि धनानि वा वेदविद्यासुशिक्षितानि भाषणानि प्राप्यैतानि सर्वेभ्यो देयानि॥१६॥

अस्मिन् सूक्ते सभाध्यक्षसूर्यविद्वदीश्वरशब्दार्थवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्यशीतितमं ८० सूक्तमेकत्रिंशत्तमो ३१ वर्गश्च समाप्तः॥

अस्मिन्नध्याय इन्द्रमरुदग्निसभाद्यध्यक्षस्वराज्यपालनाद्युक्तत्वाच्चतुर्थाध्यायार्थेन सहास्य पञ्चमाध्यायार्थस्य सङ्गतिरस्तीति वेदितव्यम्॥

इति श्रीमत्परिव्राजकाचार्याणां श्रीयुतविरजानन्दसरस्वतीस्वामिनां शिष्येण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाभ्यां सुविभूषिते ऋग्वेदभाष्ये पञ्चमोऽध्यायः समाप्तिमगमत्॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे **(स्वराज्यम्)** अपने राज्य की उन्नति से सबका **(अन्वर्चन्)** सत्कार करता हुआ **(दध्यङ्)** उत्तम गुणों को प्राप्त होनेवाला **(अथर्वा)** हिंसा आदि दोषरहित **(पिता)** वेद का प्रवक्ता अध्यापक वा **(मनुः)** विज्ञानवाला मनुष्य ये **(याम्)** जिस **(धियम्)** शुभ विद्या आदि गुण क्रिया के धारण करनेवाली बुद्धि को प्राप्त होकर जिस व्यवहार में सुखों को **(अत्नत)** विस्तार करते हैं, वैसे इसको प्राप्त होकर **(तस्मिन्)** उस व्यवहार में सुखों का विस्तार करो और जिस **(इन्द्रे)** अच्छे प्रकार सेवित परमेश्वर में **(पूर्वथा)** पूर्व पुरुषों के तुल्य **(ब्रह्माणि)** उत्तम अन्न, धन **(उक्था)** कहने योग्य वचन प्राप्त होते हैं **(तस्मिन्)** उसको सेवित कर तुम भी उनको **(समग्मत)** प्राप्त होओ॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य परमेश्वर की उपासना करनेवाले विद्वानों के संग प्रीति के सदृश कर्म करके सुन्दर बुद्धि, उत्तम अन्न, धन और वेदविद्या से सुशिक्षित संभाषणों को प्राप्त होकर उनको सब मनुष्यों के लिये देने चाहिये॥१६॥

इस सूक्त में सभा आदि अध्यक्ष, सूर्य, विद्वान् और ईश्वर शब्दार्थ का वर्णन करने से पूर्वसूक्त के साथ इस सूक्त के अर्थ की संगति जाननी चाहिये॥

यह अस्सीवाँ ८० सूक्त और इकत्तीसवां ३१ वर्ग समाप्त हुआ॥

इस अध्याय में इन्द्र, मरुत्, अग्नि, सभा आदि के अध्यक्ष और अपने राज्य का पालन आदि का वर्णन करने से चतुर्थ अध्याय के अर्थ के साथ पञ्चम अध्याय के अर्थ की संगति जाननी चाहिये॥

इति श्रीमत्परिव्राजकाचार्य श्रीयुतविरजानन्दसरस्वतीस्वामी जी के शिष्य श्रीमद्दयानन्दसरस्वतीस्वामी ने संस्कृत और आर्यभाषाओं से सुभूषित ऋग्वेदभाष्य में पञ्चम अध्याय पूरा किया॥

॥ओ३म्॥

अथ प्रथमाष्टके षष्ठाध्याय आरम्भते

अथ पञ्चमाध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ नवर्चस्यैकाशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। इन्द्रो देवता। १,७,८ विराट् पङ्क्तिः। ३-६, ९ निचृदास्तारपङ्क्तिश्छन्दः। पञ्चमः स्वरः। २ भुरिग् बृहती छन्दः। मध्यमः स्वरः॥

अथ सभाध्यक्षगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में सभाध्यक्ष के गुणों का उपदेश किया है॥

इन्द्रो॒ मदा॑य वावृधे॒ शव॑से वृत्र॒हा नृभिः॑।
तमिन्म॒हत्स्वा॒जिषू॒तेमर्भे॑ हवामहे॒ स वाजे॑षु॒ प्र नो॑ऽविषत्॥ १॥

इन्द्रः॑। मदा॑य। व॒वृ॒धे॒। शव॑से। वृ॒त्र॒ऽहा। नृऽभिः॑। तम्। इत्। म॒हत्ऽसु॑। आ॒जिषु॑। उ॒त। ई॒म्। अ॒र्भे॑। ह॒वा॒म॒हे॒। सः। वाजे॑षु। प्र। नः॒। अ॒वि॒ष॒त्॥ १॥

पदार्थः-(**इन्द्रः**) शत्रुगणविदारयिता सेनाध्यक्षः (**मदाय**) स्वस्य भृत्यानां हर्षकरणाय (**वावृधे**) वर्धते। अत्र **तुजादीनामि**त्यभ्यासदीर्घः। (**शवसे**) बलाय (**वृत्रहा**) मेघहन्ता सूर्य इव शत्रूणां हन्ता (**नृभिः**) सेनासभाप्रजास्थैः पुरुषैः सह मित्रत्वेन वर्त्तमानः (**तम्**) (**इत्**) एव (**महत्सु**) महाप्रबलेषु (**आजिषु**) संग्रामेषु (**उत**) अपि (**ईम्**) प्राप्तव्यो विजयः (**अर्भे**) अल्पे संग्रामे (**हवामहे**) आदद्मः (**सः**) (**वाजेषु**) संग्रामेषु (**प्र**) प्रकृष्टार्थे (**नः**) अस्मान्नस्माकं वा (**अविषत्**) रणादिकं व्याप्नोतु॥ १॥

अन्वयः-वयं यो वृत्रहा सूर्य इवेन्द्रः सेनाध्यक्षो नृभिः सह वर्त्तमानः शवसे मदाय वावृधे यं महत्स्वाजिषूताप्यर्भे हवामहे तमिदीं सेनाद्यध्यक्षं स्वीकुर्य्याम स वाजेषु नः प्राविषत्॥ १॥

भावार्थः-मनुष्यैर्यः पूर्णविद्यो बलिष्ठो धार्मिकः सर्वहितैषी शस्त्रास्त्रप्रहारे शिक्षायां च कुशलो भृत्येषु वीरेषु योद्धृषु पितृवद्वर्त्तमानो देशकालानुकूलत्वेन युद्धकरणाय सामयिकव्यवहारज्ञो भवेत् स सेनाध्यक्षः कर्त्तव्यो नेतरः॥ १॥

पदार्थः-हम लोग जो (**वृत्रहा**) सूर्य्य के समान (**इन्द्रः**) सेनापति (**नृभिः**) शूरवीर नायकों के साथ (**शवसे**) बल और (**मदाय**) आनन्द के लिये (**वावृधे**) बढ़ता है, जिस (**महत्सु**) बड़े (**आजिषु**) संग्रामों (**उत**) और (**अर्भे**) छोटे-संग्रामों में (**हवामहे**) बुलाते और (**तमित्**) उसीको (**ईम्**) सब प्रकार से

सेनाध्यक्ष कहते हैं **(सः)** वह **(वाजेषु)** संग्रामों में **(नः)** हम लोगों की **(प्राविषत्)** अच्छे प्रकार रक्षा करे॥१॥

भावार्थः-मनुष्यों को उचित है कि जो पूर्ण विद्वान्, अति बलिष्ठ, धार्मिक सबका हित चाहने वाला, शस्त्रास्त्र क्रिया और शिक्षा में अतिचतुर, भृत्य, वीरपुरुष और योद्धाओं में पिता के समान, देशकाल के अनुकूलता से युद्ध करने के लिये समय के अनुकूल व्यवहार जाननेवाला हो, उसी को सेनापति करना चाहिये, अन्य को नहीं॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

असि॒ हि वी॑र॒ सेन्योऽसि॒ भूरि॑ परादु॒दिः।
असि॑ दु॒भ्रस्य॑ चिद्वृ॒धो यज॑मानाय शिक्षसि सुन्व॒ते भूरि॑ ते॒ वसु॑॥२॥

असि॑। हि। वी॑र॒। सेन्य॑ः। असि॑। भूरि॑। प॒रा॒ऽउ॒दिः। असि॑। दु॒भ्रस्य॑। चि॒त्। वृ॒धः। यज॑मानाय। शि॒क्ष॒सि॒। सु॒न्व॒ते। भूरि॑। ते॒। वसु॑॥२॥

पदार्थः-**(असि)** **(हि)** खलु **(वीर)** शत्रूणां सेनाबलं व्याप्तुं शील **(सेन्यः)** सेनासु साधुस्सेनाभ्यो हितो वा **(भूरि)** बहु **(पराददिः)** पराञ्च्छत्रूनादाता **(असि)** **(दभ्रस्य)** ह्रस्वस्य। **दभ्रमिति ह्रस्वनामसु पठितम्।** (निघं०३.२) **(चित्)** अपि **(वृधः)** ये युद्धे वर्त्तन्ते तान् **(यजमानाय)** अभयदात्रे **(शिक्षसि)** युद्धविद्यां ददासि **(सुन्वते)** सुखानामभिषवित्रे **(भूरि)** बहु **(ते)** तुभ्यम् **(वसु)** उत्तमं द्रव्यम्॥२॥

अन्वयः-हे वीर सेनापते! यस्त्वं हि भूरि सेन्योऽसि पराददिरसि दभ्रस्य चिन्महतो युद्धस्यापि विजेतासि वृधो वीरान् शिक्षसि तस्मै सुन्वते यजमानाय ते तुभ्यं भूरि वस्वस्ति॥२॥

भावार्थः-यथा सेनापतिभिः सेना सदा शिक्षणीया पालनीया हर्षयितव्याऽस्ति, तथैव सेनास्थैः सेनापतयः पालनीयाः सन्तीति॥२॥

पदार्थः-हे वीर सेनापते! जो तू **(हि)** निश्चय करके **(भूरि)** बहुत **(सेन्यः)** सेनायुक्त **(असि)** है **(भूरि)** बहुत प्रकार से **(पराददिः)** शत्रुओं के बल को नष्ट कर ग्रहण करनेवाला है **(दभ्रस्य)** छोटे **(चित्)** और **(महतः)** बड़े युद्ध का जीतनेवाला **(असि)** है **(वृधः)** बल से बढ़ानेवाले वीरों को **(शिक्षसि)** शिक्षा करता है, उस **(सुन्वते)** विजय की प्राप्ति करनेहारे **(यजमानाय)** सुख देनेवाले **(ते)** तेरे लिये **(भूरि)** बहुत **(वसु)** धन प्राप्त हो॥२॥

भावार्थः-भृत्य लोग जैसे सेनापतियों से सेना शिक्षित, पाली और सुखी की जाती है, वैसे सेनास्थ भृत्यों से सेनापतियों का पालन और उनको आनन्दित करना योग्य है॥२॥

पुनरेतैः परस्परं कथं वर्त्तितव्यमित्युपदिश्यते॥

फिर इनको परस्पर कैसे वर्त्ताव रखना चाहिये, सो अगले मन्त्र में कहा है॥

यदुदीरत आजयो धृष्णवे धीयते धना।

युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः॥३॥

यत्। उत्ऽईरते। आजयः। धृष्णवे। धीयते। धना। युक्ष्व। मदऽच्युता। हरी इति। कम्। हनः। कम्। वसौ। दधः। अस्मान्। इन्द्र। वसौ। दधः॥३॥

पदार्थः-(**यत्**) यदा (**उदीरते**) उत्कृष्टा जायन्ते (**आजयः**) संग्रामाः (**धृष्णवे**) दृढत्वाय (**धीयते**) धरति (**धना**) धनानि (**युक्ष्व**) योजय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**मदच्युता**) यौ मदान्हर्षान् च्यवेते प्राप्नुतस्तौ (**हरी**) रथादीनां हरणशीलावश्वौ (**कम्**) शत्रुम् (**हनः**) हन्याः (**कम्**) मित्रम् (**वसौ**) धने (**दधः**) दध्याः (**अस्मान्**) (**इन्द्र**) पालयितः (**वसौ**) धनसमूहे (**दधः**) दध्याः॥३॥

अन्वयः-हे इन्द्र! यद्यदाऽऽजय उदीरते तदा भवान् धृष्णवे [धना धीयते एवं मदच्युता हरी युक्ष्व कं] कञ्चिच्छत्रुं हनः कञ्चिन्मित्रं वसौ दधोऽतोऽस्मान् वसौ दधः॥३॥

भावार्थः-यदा युद्धानि कर्त्तव्यानि भवेयुस्तदा सेनापतयो यानशस्त्रास्त्रभोजनाच्छादनसामग्रीरलंकृत्य कांश्चिच्छत्रून् हत्वा कांश्चिन्मित्रान् सत्कृत्य युद्धादिकार्येषु धार्मिकान् संयोज्य युक्त्या योधयित्वा युध्वा च सततं विजयान् प्राप्नुयुः॥३॥

पदार्थः-हे (**इन्द्र**) सेना के स्वामी! (**यत्**) जब (**आजयः**) संग्राम (**उदीरते**) उत्कृष्टता से प्राप्त हों तब (**धृष्णवे**) दृढ़ता के लिये (**धना**) धनों को (**धीयते**) धरता है सो तू (**मदच्युता**) बड़े बलिष्ठ (**हरी**) घोड़ों को रथादि में (**युक्ष्व**) युक्त कर (**कम्**) किसी शत्रु को (**हनः**) मार (**कम्**) किसी मित्र को (**वसौ**) धन कोष में (**दधः**) धारण कर और (**अस्मान्**) हमको (**वसौ**) धन में (**दधः**) अधिकारी कर॥३॥

भावार्थः-जब युद्ध करना हो तो तब सेनापति लोग सवारी शतघ्नी (तोप), भुशुण्डी (बंदूक) आदि शस्त्र, आग्नेय आदि अस्त्र और भोजन-आच्छादन आदि सामग्री को पूर्ण करके किन्हीं शत्रुओं को मार, किन्ही मित्रों का सत्कार कर, युद्धादि कर्मों में धर्मात्मा जनों को संयुक्त कर, युक्ति से युद्ध कराके सदा विजय को प्राप्त हों॥३॥

पुनः सेनापतिः किं कुर्यादित्युपदिश्यते॥

फिर सेनापति क्या करे, इस विषय को अगले मन्त्र में कहा है॥

क्रत्वा महाँ अनुष्वधं भीम आ ववृधे शवः।

श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान् दधे हस्तयोर्वज्रमायसम्॥४॥

क्रत्वा। महान्। अनुऽस्वधम्। भीमः। आ। ववृधे। शवः। श्रिये। ऋष्वः। उपाकयोः। नि। शिप्री। हरिऽवान्। दधे। हस्तयोः। वज्रम्। आयसम्॥४॥

पदार्थः-(**क्रत्वा**) प्रज्ञया कर्मणा वा (**महान्**) सर्वोत्कृष्टः (**अनुष्वधम्**) स्वधामन्नमनुकूलम् (**भीमः**) बिभेति यस्मात् सः (**आ**) सर्वतः (**वावृधे**) वर्धते (**शवः**) सुखवर्धकं बलम् (**श्रिये**) शोभायै धनप्राप्तये वा (**ऋष्वः**) प्राप्तविद्यः (**उपाकयोः**) समीपस्थयोः सेनयोः (**नि**) नितराम् (**शिप्री**) शत्रूणामाक्रोशकः (**हरिवान्**) प्रशस्ता हरयोऽश्वा विद्यन्ते यस्य सः (**दधे**) धरामि (**हस्तयोः**) करयोर्मध्ये (**वज्रम्**) शस्त्रसमूहम् (**आयसम्**) अयोमयम्॥४॥

अन्वयः-यो हरिवान् शिप्री भीमो महानृष्वः शवः सेनापतिः क्रत्वाऽनुष्वधं निववृधे श्रिय उपाकयो-र्हस्तयोरायसं वज्रमादधे, स एव शत्रून् विजित्य राज्याधिकारी भवति॥४॥

भावार्थः-मनुष्यैर्यो बुद्धिमान् महोत्तमगुणविशिष्टः शत्रूणां भयङ्करः सेनाशिक्षकोऽतियोद्धा वर्त्तते तं सेनापतिं कृत्वा धर्मेण राज्यं प्रशासनीयम्॥४॥

पदार्थः-जो (**हरिवान्**) बहुत उत्तम अश्वों से युक्त (**शिप्री**) शत्रुओं को रुलाने (**भीमः**) और भय देनेवाला (**महान्**) बड़ा (**ऋष्वः**) प्राप्तविद्या सेनापति (**शवः**) बल (**क्रत्वा**) प्रज्ञा वा कर्म से (**अनुष्वधम्**) अनुकूल अन्न को (**नि, ववृधे**) अत्यन्त बढ़ाता है (**श्रिये**) शोभा और लक्ष्मी के अर्थ (**उपाकयोः**) समीप में प्राप्त हुई अपनी और शत्रुओं की सेना के समीप (**हस्तयोः**) हाथों में (**आयसम्**) लोहे आदि से बनाये हुए (**वज्रम्**) शस्त्रसमूह को (**आदधे**) धारण करके शत्रुओं को जीतता है, वही राज्याऽधिकारी होता है॥४॥

भावार्थः-मनुष्यों को योग्य है कि जो बुद्धिमान्, बड़े-बड़े उत्तम गुणों से युक्त, शत्रुओं को भयकर्त्ता, सेनाओं का शिक्षक, अत्यन्त युद्ध करनेहारा पुरुष है, उसको सेनापति करके धर्म से राज्यपालन की न्यायव्यवस्था करनी चाहिये॥४॥

अथेश्वरगुणा उपदिश्यन्ते॥

अब अगले मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि।
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ॥५॥ १॥

आ। पप्रौ। पार्थिवम्। रजः। बद्बधे। रोचना। दिवि। न। त्वाऽवान्। इन्द्र। कः। चन। न। जातः। न। जनिष्यते। अति। विश्वम्। ववक्षिथ॥५॥

पदार्थः-(**आ**) समन्तात् (**पप्रौ**) प्रपूर्त्ति (**पार्थिवम्**) पृथिवीमयं पृथिव्यामन्तरिक्षे विदितं वा (**रजः**) परमाण्वादिकं वस्तु लोकसमूहं वा (**बद्बधे**) बीभत्सते (**रोचना**) सूर्यादिदीप्तिः (**दिवि**) प्रकाशे (**न**) निषेधे (**त्वावान्**) त्वया सदृशः (**इन्द्र**) परमैश्वर्ययुक्त परमात्मन् (**कः**) (**चन**) अपि (**न**) (**जातः**) उत्पन्नः (**न**) (**जनिष्यते**) उत्पत्स्यते (**अति**) अतिशये (**विश्वम्**) सर्वम् (**ववक्षिथ**) वक्षसि॥५॥

अन्वयः-हे इन्द्र! यतः कश्चन त्वावान्न जातो न जनिष्यतेऽतस्त्वं विश्वं सर्वं जगद्ववक्षिथ यो भवान् पार्थिवं विश्वं रज आ पप्रौ दिवि रोचनाऽतिबद्बधेऽतः स त्वमुपास्योऽसि॥५॥

भावार्थः-हे मनुष्या! यूयं येन सर्वं जगद्रचयित्वा व्याप्य रक्ष्यते योऽजन्माऽनुपमः येन तुल्यं किंचिदपि वस्तु नास्ति कुतश्चातोऽधिकं किंचिदपि भवेत् तमेव सततमुपासीध्वम्। एतस्मात्पृथग्वस्तु नैव ग्राह्यं गणनीयं च॥५॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य्ययुक्त ईश्वर! जिससे **(कश्चन)** कोई भी **(त्वावान्)** तेरे सदृश **(न जातः)** न हुआ **(न जनिष्यते)** न होगा और तू **(विश्वम्)** जगत् को **(ववक्षिथ)** यथा योग्य नियम में प्राप्त करता है और जो **(पार्थिवम्)** पृथिवी और आकाश में वर्त्तमान **(रजः)** परमाणु और लोक में **(आ पप्रौ)** सब ओर से व्याप्त हो रहा है **(दिवि)** प्रकाशरूप सूर्यादि जगत् में **(रोचना)** प्रकाशमान भूगोलों को **(अति बद्बधे)** एक-दूसरे वस्तु के आकर्षण से बद्ध करता है, वह सबका उपास्य देव है॥५॥

भावार्थः-हे मनुष्यो! आप लोग जिसने सब जगत् को रचके व्याप्त कर रक्षित किया है, जो जन्म और उपमा से रहित, जिसके तुल्य कुछ भी वस्तु नहीं है, तो उस परमेश्वर से अधिक कुछ कैसे होवे! इसकी उपासना को छोड़के अन्य किसी पृथक् वस्तु का ग्रहण वा गणना मत करो॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह परमात्मा कैसा है, इस विषय को अगले मन्त्र में कहा है॥

यो अ॒र्यो म॑र्त॒भोज॑नं परा॒ददा॑ति दा॒शुषे॑।
इन्द्रो॑ अ॒स्मभ्यं॑ शिक्षतु॒ वि भ॑जा॒ भूरि॑ ते॒ वसु॑ भक्षीय तव॒ राध॑सः॥६॥

यः। अ॒र्यः। म॒र्त॒ऽभोज॑नम्। प॒रा॒ऽददा॑ति। दा॒शुषे॑। इन्द्रः॑। अ॒स्मभ्य॑म्। शि॒क्ष॒तु॒। वि। भ॒ज॒। भूरि॑। ते॒। वसु॑। भ॒क्षी॒य॒। तव॑। राध॑सः॥६॥

पदार्थः-**(यः)** वक्ष्यमाणः **(अर्यः)** सर्वस्वामीश्वरः **(मर्त्तभोजनम्)** मर्तेभ्यो मनुष्येभ्यो भोजनं मर्त्तानां पालनं वा **(परादद्दाति)** पूर्वं प्रयच्छति **(दाशुषे)** दानशीलाय जीवाय **(इन्द्रः)** परमैश्वर्ययुक्तः **(अस्मभ्यम्)** **(शिक्षतु)** विद्यामुपाददातु **(वि)** विशेषे **(भज)** सेवस्व **(भूरि)** बहु **(ते)** तव **(वसु)** वस्तुजातम् **(भक्षीय)** सेवय **(तव)** **(राधसः)** वृद्धिकारकस्य कार्यरूपस्य धनस्य। शेषत्वात् कर्मणि षष्ठी॥६॥

अन्वयः-हे विद्वन्! यं इन्द्रोऽर्य ईश्वरः ते दाशुषेऽस्मभ्यं भूरि वसु मर्त्तभोजनं च परादद्दाति तदुत्पन्नं भवानस्मभ्यं सदा शिक्षतु। तस्य तव शिक्षितस्य राधसोऽहमपि भक्षीय॥६॥

भावार्थः-यदीश्वर इदं जगद्रचयित्वा धृत्वा जीवेभ्यो न दद्यात्तर्हि न कस्यापि किंचिन्मात्रा भोगसामग्री भवितुं शक्या। यद्ययं वेदद्वारा शिक्षां न कुर्यात्तर्हि न कस्यापि विद्यालेशो भवेत्तस्माद्विदुषा सर्वेषां सुखाय विद्या प्रसारणीया॥६॥

पदार्थः-हे विद्वन्! **(यः)** जो **(इन्द्र)** परम ऐश्वर्य का देनेहारा **(अर्यः)** ईश्वर **(ते)** तुझ **(दाशुषे)** दाता और **(अस्मभ्यम्)** हमारे लिये **(भूरि)** बहुत **(वसु)** धन को **(मर्त्तभोजनम्)** वा मनुष्य के भोजनार्थ पदार्थ को **(परादददाति)** देता है उस ईश्वरनिर्मित पदार्थों की आप हमको सदा **(शिक्षतु)** शिक्षा करो और **(तव)** आपके **(राधसः)** शिक्षित कार्यरूप धन का मैं **(भक्षीय)** सेवन करूं॥६॥

भावार्थः-जो ईश्वर इस जगत् को रच धारण कर जीवों को न देता तो किसी को कुछ भी भोग सामग्री प्राप्त न हो सकती। जो यह परमात्मा वेद द्वारा मनुष्यों को शिक्षा न करता तो किसी को विद्या का लेश भी प्राप्त न होता, इससे विद्वान् को योग्य है कि सबके सुख के लिए विद्या का विस्तार करना चाहिये॥६॥

पुनः स ईश्वरोपासकः कीदृश इत्युपदिश्यते॥

फिर वह ईश्वर का उपासक कैसा है, इस विषय को अगले मन्त्र में कहा है॥

मदेमदे॒ हि नो॑ द॒दिर्यू॒था गवा॑मृजु॒क्रतुः॑।
सं गृ॑भाय पु॒रू श॒तोभ॑याह॒स्त्या वसु॑ शिशी॒हि रा॒य आ भ॑र॥७॥

मदे॑ऽमदे। हि। नः॑। द॒दिः॑। यू॒था। गवा॑म्। ऋ॒जु॒ऽक्रतुः॑। सम्। गृ॒भा॒य॒। पु॒रु। श॒ता। उ॒भ॒या॒ह॒स्त्या। वसु॑। शि॒शी॒हि। रा॒यः। आ। भ॒र॒॥७॥

पदार्थः-**(मदेमदे)** हर्षे हर्षे **(हि)** खलु **(नः)** अस्मभ्यम् **(ददिः)** दाता **(यूथा)** समूहान् **(गवाम्)** रश्मीनामिन्द्रियाणां पशूनां वा **(ऋजुक्रतुः)** ऋजवः क्रतवः प्रज्ञाः कर्माणि वा यस्य सः **(सम्)** सम्यक् **(गृभाय)** गृहाण **(पुरु)** बहूनि **(शता)** असंख्यातानि **(उभयाहस्त्या)** समन्तादुभयत्र हस्तो येषु कर्मसु तानि तेषु साधूनि **(वसु)** वासस्थानानि **(शिशीहि)** शिनु। अत्र **बहुलं छन्दसी**ति श्लुर**न्येषामपी**ति दीर्घश्च। **(रायः)** विद्यासुवर्णादिधनसमूहान् **(आ)** समन्तात् **(भर)** धेहि॥७॥

अन्वयः-हे विद्वन्! ऋजुक्रतुर्ददिस्त्वमीश्वरोपासनेन मदेमदे हि नोऽस्मभ्यममुभया हस्त्या पुरु शता वसु गवां यूथा चाभर रायः सङ्गृभाय शिशीहि॥७॥

भावार्थः-हे मनुष्या! यः सर्वानन्दप्रदः सर्वसाधनसाध्योत्पादकः सर्वाणि धनानि प्रयच्छति, स एवेश्वरोऽस्माभिरुपास्यो नेतरः॥७॥

पदार्थः-हे विद्वान्! **(ऋजुक्रतुः)** सरल ज्ञान और कर्मयुक्त **(ददिः)** दाता आप ईश्वर की आज्ञापालन और उपासना से **(मदेमदे)** आनन्द-आनन्द में **(हि)** निश्चय से **(नः)** हमारे लिये **(उभयाहस्त्या)** दोनों हाथों की क्रिया में उत्तम **(पुरु)** बहुत **(शता)** सैकड़ों **(वसु)** द्रव्यों का **(शिशीहि)**

प्रबन्ध कीजिये **(गवाम्)** किरण, इन्द्रियां और पशुओं के **(यूथा)** समूहों को **(आभर)** चारों ओर से धारण कर **(रायः)** धनों को **(संगृभाय)** सम्यक् ग्रहण कर॥७॥

भावार्थः-हे मनुष्यो! जो सब आनन्दों का देनेवाला, सब साधन-साध्य रूप पदार्थों का उत्पादक, सब धनों को देता है, वही ईश्वर हमारा उपास्य है, अन्य नहीं॥७॥

पुनः स सभेशः कीदृश स्यादित्याह॥

फिर वह सभापति कैसा हो, यह विषय अगले मन्त्र में कहा है॥

मादयस्व सुते सचा शवसे शूर राधसे।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव॥८॥

मादयस्व। सुते। सचा। शवसे। शूर। राधसे। विद्म। हि। त्वा। पुरुऽवसुम्। उप। कामान्। ससृज्महे। अथ। नः। अविता। भव॥८॥

पदार्थः-(**मादयस्व**) आनन्दं प्रापय (**सुते**) उत्पन्नेऽस्मिन् जगति (**सचा**) सुखसमवेतेन युक्ताय (**शवसे**) बलाय (**शूर**) दुष्टदोषान् शत्रून् वा निवारयन् (**राधसे**) संसिद्धाय धनाय (**विद्म**) विजानीमः (**हि**) खलु (**त्वा**) त्वाम् (**पुरुवसुम्**) बहुषु धनेषु वासयितारम् (**उप**) सामीप्ये (**कामान्**) मनोभिलषितान् (**ससृज्महे**) निष्पादयेम (**अथ**) आनन्तर्ये (**नः**) अस्माकमस्मान् वा (**अविता**) रक्षणादिकर्त्ता (**भव**)॥८॥

अन्वयः-हे शूर! वयं सुते पुरुवसुं त्वामुपाश्रित्याथ कामान् ससृज्महे हि विद्म च स त्वं नोऽविता भव सचा शवसे राधसे मादयस्व॥८॥

भावार्थः-मनुष्याणां सेनापत्याश्रयेण विना शत्रुविजयः कामसमृद्धिः स्वरक्षणमुत्कृष्टे धनबले परमं सुखं च प्राप्तुं न शक्यते॥८॥

पदार्थः-हे (**शूर**) दुष्ट दोष और शत्रुओं का निवारण करनेहारे! हम (**सुते**) इस उत्पन्न जगत् में (**पुरुवसुम्**) बहुतों को बसानेवाले (**त्वा**) आपका (**उप**) आश्रय करके (**अथ**) पश्चात् (**कामान्**) अपनी कामनाओं को (**ससृज्महे**) सिद्ध करते हैं (**हि**) निश्चय करके (**विद्म**) जानते भी हैं तू (**नः**) हमारा (**अविता**) रक्षक (**भव**) हो और इस जगत् में (**सचा**) संयुक्त (**शवसे**) बलकारक (**राधसे**) धन के लिये (**मादयस्व**) आनन्द कराया कर॥८॥

भावार्थः-मनुष्यों को सेनापति के आश्रय के विना शत्रु का विजय, काम की सिद्धि, अपना रक्षण, उत्तम धन, बल और परमसुख प्राप्त नहीं हो सकता॥८॥

अथेश्वरः कीदृश इत्याह॥

अब ईश्वर कैसा है, यह विषय अगले मन्त्र में कहा है॥

एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम्।

अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेदु आ भर॥९॥२॥

एते। ते। इन्द्र। जन्तवः। विश्वम्। पुष्यन्ति। वार्यम्। अन्तः। हि। ख्यः। जनानाम्। अर्यः। वेदः। अदाशुषाम्। तेषाम्। नः। वेदः। आ। भर॥९॥

पदार्थः-(**एते**) सृष्टौ विद्यमानाः (**ते**) तव (**इन्द्र**) परमैश्वर्यप्रद जगदीश्वर सेनाध्यक्षो वा (**जन्तवः**) जीवाः (**विश्वम्**) जगत् (**पुष्यन्ति**) आनन्दयन्ति (**वार्यम्**) स्वीकर्त्तुमर्हम् (**अन्तः**) मध्ये (**हि**) खलु (**ख्यः**) प्रकथयसि (**जनानाम्**) सज्जानानां मनुष्याणाम् (**अर्यः**) स्वामीश्वरः (**वेदः**) विदन्ति सुखानि येन तद्धनम् (**अदाशुषाम्**) अदातॄणाम् (**तेषाम्**) (**नः**) अस्मभ्यमस्माकं वा (**वेदः**) विज्ञानधनम् (**आ**) समन्तात् (**भर**) प्रापय॥९॥

अन्वयः-हे इन्द्र! यस्य ते सृष्टौ य एते जन्तवो वार्यं विश्वं पुष्यन्ति, तेषां जनानामन्तर्मध्ये वर्त्तमानामदाशुषां दानशीलतारहितानामर्यस्त्वं वेदो हि ख्यः प्रकथयसि स त्वं नोऽस्मभ्यं वेद आ भर॥९॥

भावार्थः-हे मनुष्या! य ईश्वरोऽन्तर्बहिः सर्वत्र व्याप्य सर्वमन्तर्बहिःस्थं व्यवहारं जानाति सदुपदेशान् करोति सर्वजीवानां हितं चिकीर्षति तमाश्रित्य पारमार्थिकव्यावहारिकसुखे प्राप्नुत॥९॥

अस्मिन् सूक्ते सेनापतिरीश्वरसभाध्यक्षगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकाशीतितमं ८१ सूक्तं द्वितीयो २ वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) परमेश्वर! जिस (**ते**) तेरी सृष्टि में जो (**एते**) ये (**जन्तवः**) जीव (**वार्यम्**) स्वीकार के योग्य (**विश्वम्**) जगत् को (**पुष्यन्ति**) पुष्ट करते हैं (**तेषाम्**) उन (**जनानाम्**) मनुष्य आदि प्राणियों के (**अन्तः**) मध्य में वर्त्तमान (**अदाशुषाम्**) दानादिकर्मरहित मनुष्यों के (**अर्यः**) ईश्वर तू (**वेदः**) जिससे सुख प्राप्त होता है उसको (**हि**) निश्चय करके (**ख्यः**) उपदेश करता है, वह तू (**नः**) हमारे लिये (**वेदः**) विज्ञानरूप धन का (**आभर**) दान कीजिये॥९॥

भावार्थः-हे मनुष्यो! जो ईश्वर बाहर-भीतर सर्वत्र व्याप्त होकर सब भीतर-बाहर के व्यवहारों को जानता, सत्य उपदेश और सब जीवों के हित की इच्छा करता है, उसका आश्रय लेकर परमार्थ और व्यवहार सिद्ध करके सुखों को तुम प्राप्त होओ॥

इस सूक्त में सेनापति, ईश्वर और सभाध्यक्ष के गुणों का वर्णन करने से इस सूक्त के अर्थ की सङ्गति पूर्व सूक्तार्थ के साथ समझनी चाहिये॥

यह इक्यासीवाँ ८१ सूक्त और दूसरा २ वर्ग समाप्त हुआ॥

अथ षडर्चस्य द्व्यशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। इन्द्रो देवता। १,४ निचृदास्तारपङ्क्तिः। २,३,५ विराडास्तारपङ्क्तिश्छन्दः। पञ्चमः स्वरः। ६ विराड् जगती छन्दः। निषादः स्वरः॥

पुनस्तदुपासकः सेनेशः कीदृश इत्युपदिश्यते॥

फिर परमात्मा का उपासक सेनापति कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

उपो॒ षु शृ॑णु॒ही गिरो॒ मघ॑व॒न्मात॑था इव।
य॒दा नः॑ सू॒नृता॑व॒तः कर॒ आद॒र्थया॑स॒ इद्योजा॒ न्वि॑न्द्र ते॒ हरी॑॥ १॥

उ॒पो इति॑। सु। शृ॒णु॒हि। गिरः॑। मघ॑ऽवन्। मा। अत॑थाःऽइव। य॒दा। नः॒। सू॒नृता॑ऽवतः। करः॑। आत्। अ॒र्थया॑से। इत्। योज॑। नु। इ॒न्द्र॒। ते॒। हरी॒ इति॑॥ १॥

पदार्थः–(**उपो**) सामीप्ये (**सु**) शोभने (**शृणुहि**) (**गिरः**) वाणीः (**मघवन्**) प्रशस्तगुणप्रापक (**मा**) निषेधे (**अतथाइव**) प्रतिकूल इव। अत्राऽऽचारे क्विप् तदन्ताच्च प्रत्ययः। (**यदा**) यस्मिन् काले (**नः**) अस्माकम् (**सूनृतावतः**) सत्यवाणीयुक्तान् (**करः**) कुरु (**आत्**) आनन्तर्य्ये (**अर्थयासे**) याचस्व (**इत्**) एव (**योज**) युक्तान् कुरु (**नु**) शीघ्रम् (**इन्द्र**) परमैश्वर्य्यप्रापक सेनाध्यक्ष (**ते**) तव (**हरी**) हरणशीलौ धारणाकर्षणगुणावुत्तमाश्वौ वा॥१॥

अन्वयः–हे इन्द्र! यौ ते तव हरी स्तस्तौ त्वं नु योज प्रियवाणीवतो विदुषोऽर्थयासे याचस्व। हे मघवँस्त्वं नोऽस्माकं गिर उपो सुशृणुह्यान्नोऽतथा इवेन्मा भव यदा वयं त्वां सुखानि याचामहे तदा त्वं नोऽस्मान् सूनृतावतः करः॥१॥

भावार्थः–मनुष्यैर्यथा राजा सुसेवितजगदीश्वरात् सेनापतेर्वा सेनापतिना सुसेविता सेना वा सुखानि प्राप्नोति यथा च सभाद्यध्यक्षाः प्रजासेनाजनानामानुकूल्ये वर्त्तेरंस्तथैवैतेषामानुकूल्ये प्रजासेनास्थैर्भवितव्यम्॥१॥

पदार्थः–हे (**इन्द्र**) सेनापते! जो (**ते**) आपके (**हरी**) धारणाऽऽकर्षण के लिये घोड़े वा अग्नि आदि पदार्थ हैं, उनको (**नु**) शीघ्र (**योज**) युक्त करो, प्रियवाणी बोलनेहारे विद्वान् से (**अर्थयासे**) याञ्चा कीजिये। हे (**मघवन्**) अच्छे गुणों के प्राप्त करनेवाले! (**नः**) हमारी (**गिरः**) वाणियों को (**उपो सु शृणुहि**) समीप होकर सुनिये (**आत्**) पश्चात् हमारे लिये (**अतथाइवेत्**) विपरीत आचरण करनेवाले जैसे ही (**मा**) मत हो (**यदा**) जब हम तुमसे सुखों की याचना करते हैं, तब आप (**नः**) हमको (**सूनृतावतः**) सत्य वाणीयुक्त (**करः**) कीजिये॥१॥

भावार्थः–मनुष्यों को योग्य है कि जैसे राजा ईश्वर के सेवक या सेनापति वा सेनापति से पालन की हुई सेना सुखों को प्राप्त होती है। जैसे सभाध्यक्ष प्रजा और सेना के अनुकूल वर्त्तमान करें, वैसे उनके अनुकूल प्रजा और सेना के मनुष्य को आचरण करना चाहिये॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।

अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥ २॥

अक्षन्। अमीमदन्त। हि। अव। प्रियाः। अधूषत। अस्तोषत। स्वऽभानवः। विप्राः। नविष्ठया। मती। योज। नु। इन्द्र। ते। हरी इति॥ २॥

पदार्थः-(**अक्षन्**) शुभगुणान् प्राप्नुवन्तु (**अमीमदन्त**) आनन्दन्तु (**हि**) खलु (**अव**) विरुद्धार्थे (**प्रियाः**) प्रीतियुक्ताः सन्तः (**अधूषत**) शत्रून् दुःखानि वा दूरीकुरुत (**अस्तोषत**) स्तुत (**स्वभानवः**) स्वकीया भानवो दीप्तयो येषां ते (**विप्राः**) मेधाविनः (**नविष्ठया**) अतिशयेन नूतनया (**मती**) बुद्ध्या (**योज**) योजय (**नु**) शीघ्रम् (**इन्द्र**) सभाध्यक्ष (**ते**) (**हरी**)॥ २॥

अन्वयः-हे इन्द्र! यौ ये तव हरी वर्त्तेते तावस्मदर्थं नु योज। हे स्वभानवो विप्रा! भवन्तः सूर्यादय इव नविष्ठया मती सह सर्वेषां प्रिया भवन्तु सर्वाणि शास्त्राणि ह्यस्तोषत शत्रून् दुःखान्यवाधूषताक्षन्नमीमदन्ता-स्मानपीदृशान् कुर्वन्तु॥ २॥

भावार्थः-मनुष्यैरुत्तमगुणकर्मस्वभावयुक्तस्य सर्वथा प्रशंसिताचरणस्य सेनाद्यध्यक्षस्योपदेशकस्य वा गुणप्रशंसनाऽनुकरणाभ्यां नवीनौ विज्ञानपुरुषार्थौ वर्धयित्वा सर्वदा प्रसन्नतयाऽऽनन्दो भोक्तव्यः॥ २॥

पदार्थः-हे (**इन्द्र**) सभापते! जो (**ते**) तेरे (**हरी**) धारण-आकर्षण करनेहारे वाहन वा घोड़े हैं उनको तू हमारे लिये (**नु योज**) शीघ्र युक्त कर, हे (**स्वभानवः**) स्वप्रकाशस्वरूप सूर्यादि के तुल्य (**विप्राः**) बुद्धिमान् लोगो! आप (**नविष्ठया**) अतिशय नवीन (**मती**) बुद्धि के सहित होके (**प्रियाः**) प्रिय हूजिये, सबके लिये सब शास्त्रों की (**हि**) निश्चय से (**अस्तोषत**) प्रशंसा आप किया करिये, शत्रु और दुःखों को (**अवाधूषत**) छुड़ाइये, (**अक्षन्**) विद्यादि शुभगुणों में व्याप्त हूजिये, (**अमीमदन्त**) अतिशय करके आनन्दित हूजिये और हमको भी ऐसे ही कीजिये॥ २॥

भावार्थः-मनुष्यों को योग्य है कि श्रेष्ठ गुण-कर्म्म-स्वभावयुक्त सब प्रकार उत्तम आचरण करनेहारे सेना और सभापति तथा सत्योपदेशक आदि के गुणों की प्रशंसा और कर्मों से नवीन-नवीन विज्ञान और पुरुषार्थ को बढ़ाकर सदा प्रसन्नता से आनन्द का भोग करें॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि।

प्र नूनं पूर्णबन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी॥ ३॥

सुऽसंदृशम्। त्वा। वयम्। मघऽवन्। वन्दिषीमहि। प्र। नूनम्। पूर्णऽबन्धुरः। स्तुतः। याहि। वशान्। अनु। योज। नु। इन्द्र। ते। हरी इति॥ ३॥

पदार्थः-(**सुसंदृशम्**) एकीभावेन सर्वकर्मणां द्रष्टारम् (**त्वा**) त्वां सेनाद्यध्यक्षं वा (**वयम्**) (**मघवन्**) प्रशस्तगुणधनप्रापक (**वन्दिषीमहि**) नमस्कुर्मः (**प्र**) प्रकृष्टे (**नूनम्**) निश्चये (**पूर्णबन्धुरः**) पूर्णैः सत्यैः प्रेमबन्धनैर्युक्तः (**स्तुतः**) प्रशंसितः सन् (**याहि**) प्राप्नुहि (**वशान्**) शमदमादियुक्तान् धार्मिकान् जनान् (**अनु**) अर्वाक् (**योज**) योजय (**नु**) शीघ्रम् (**इन्द्र**) दुःखविदारक (**ते**) (**हरी**)॥ ३॥

अन्वयः-हे मघवन्निन्द्र! यथा वयं सुसंदृशं त्वा वन्दिषीमहि तथाऽस्माभिर्नूनं पूर्णबन्धुरः स्तुतः संस्त्वं येऽस्माकं शत्रवस्तान्नु वशान् कुरु यौ ते तव हरी स्तस्तावनु योज विजयाय प्रयाहि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा मनुष्याः सर्वद्रष्टः परमेश्वरस्य स्तोतारं सभेशमाश्रयन्ति तदैतानरीन् सद्यो निगृह्णन्ति॥ ३॥

पदार्थः-हे (**मघवन्**) परमपूजित धनयुक्त (**इन्द्र**) सुखप्रद! जैसे (**वयम्**) हम (**सुसंदृशम्**) कल्याणदृष्टियुक्त (**त्वा**) आपको (**वन्दिषीमहि**) प्रशंसित करें, वैसे हमसे सहित होके (**पूर्णबन्धुरः**) समस्त सत्य प्रबन्ध और प्रेमयुक्त (**स्तुतः**) प्रशंसा को प्राप्त होके आप जो प्रजा के शत्रु हैं, उन को (**नु**) शीघ्र (**वशान्**) वश में करो, जो (**ते**) आपके (**हरी**) सूर्य के धारणाकर्षणादिगुणवत् सुशिक्षित अश्व हैं, उनको (**अनुयोज**) युक्त करो, विजय के लिये (**नूनम्**) निश्चय करके (**प्रयाहि**) अच्छे प्रकार जाया करो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब मनुष्य सबके द्रष्टा परमेश्वर की स्तुति करनेहारे सभापति का आश्रय लेते हैं, तब इन शत्रुओं का शीघ्र निग्रह कर सकते हैं॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

स घा तं वृषणं रथमधि तिष्ठाति गोविदम्।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी॥ ४॥

सः। घ। तम्। वृषणम्। रथम्। अधि। तिष्ठाति। गोऽविदम्। यः। पात्रम्। हारिऽयोजनम्। पूर्णम्। इन्द्र। चिकेतति। योज। नु। इन्द्र। ते। हरी इति॥ ४॥

पदार्थः-(**सः**) विद्वान् वीरः (**घ**) एव (**तम्**) (**वृषणम्**) शत्रूणां शक्तिबन्धकम् (**रथम्**) ज्ञानम् (**अधि**) उपरि (**तिष्ठाति**) तिष्ठतु (**गोविदम्**) गां भूमिं विन्दति येन तम् (**यः**) (**पात्रम्**) पद्यते येन तत् (**हारियोजनम्**) हरयोऽश्वा युज्यन्ते यस्मिंस्तत् (**पूर्णम्**) समग्रशस्त्रास्त्रसामग्रीसहितम् (**इन्द्र**)

परमैश्वर्य्यप्रापक **(चिकेतति)** जानाति **(योज)** अश्वैर्युक्तं कुरु **(नु)** शीघ्रम् **(इन्द्र)** परमैश्वर्यप्रापक **(ते)** तव **(हरी)** हरणशीलौ वेगाकर्षणाख्यावश्वौ॥४॥

अन्वयः-हे इन्द्र! यो भवान् हारियोजनं पूर्णं पात्र रथं चिकेतति, स त्वं तस्मिन् रथे हरी नु योज। हे इन्द्र! यस्ते तं वृषणं गोविदं रथमधितिष्ठाति स घ कथं न विजयते॥४॥

भावार्थः-सेनाध्यक्षेण पूर्णशिक्षाबलहर्षितां हस्त्यश्वरथशस्त्रादिसामग्रीपरिपूर्णां सेनां सम्पाद्य शत्रवो विजेयाः॥४॥

पदार्थः-हे **(इन्द्र)** परमविद्याधनयुक्त! **(यः)** जो आप **(हारियोजनम्)** अग्नि वा घोड़ों से युक्त किये इस **(पूर्णम्)** सब सामग्री से युक्त **(पात्रम्)** रक्षा निमित्त **(रथम्)** रथ को बनाना **(चिकेतति)** जानते हो **(सः)** सो उस रथ में **(हरी)** वेदादिगुणयुक्त घोड़ों को **(नु योज)** शीघ्र युक्त कर। हे **(इन्द्र)** सेनापते! जो **(ते)** आप के **(वृषणम्)** शत्रु के सामर्थ्य का नाशक **(गोविदम्)** जिससे भूमि का राज्य प्राप्त हो **(तम्)** उस रथ पर **(अधितिष्ठाति)** बैठे, **(घ)** वही विजय को प्राप्त क्यों न होवे॥४॥

भावार्थः-सेनापति को योग्य है कि शिक्षा बल से हृष्ट-पुष्ट हाथी, घोड़े रथ, शस्त्र-अस्त्रादि सामग्री से पूर्ण सेना को प्राप्त करके शत्रुओं को जीता करे॥४॥

पुनः स कथं कुर्यादित्युपदिश्यते॥

फिर वह कैसे करे, इस विषय को अगले मन्त्र में कहा है॥

युक्तस्ते॑ अस्तु॒ दक्षि॑ण॒ उत स॒व्यः श॑तक्रतो।
तेन॑ जा॒यामुप॑ प्रि॒यां म॑न्दा॒नो या॒ह्यन्धं॑सो॒ योजा॒ न्वि॑न्द्र ते॒ हरी॑॥५॥

युक्तः। ते। अस्तु। दक्षिणः। उत। सव्यः। शतक्रतो॒ इति॑ शतऽक्रतो। तेन॑। जायाम्। उप॑। प्रियाम्। मन्दानः। याहि। अन्धसः। योज॑। नु। इन्द्र। ते। हरी॒ इति॑॥५॥

पदार्थः-(**युक्तः**) कृतयोजनः (**ते**) तव (**अस्तु**) भवतु (**दक्षिणः**) एको दक्षिणपार्श्वस्थः (**उत**) अपि (**सव्यः**) द्वितीयो वामपार्श्वस्थः (**शतक्रतो**) शतधाक्रतुः प्रज्ञाकर्म वा यस्य तत्सम्बुद्धौ (**तेन**) रथेन (**जायाम्**) स्वस्त्रियम् (**उप**) समीपे (**प्रियाम्**) प्रीतिकारिणीम् (**मन्दानः**) आनन्दयन् (**याहि**) गच्छ प्राप्नुहि वा (**अन्धसः**) अन्नादेः (**योज**) (**नु**) शीघ्रम् (**इन्द्र**) (**ते**) (**हरी**)॥५॥

अन्वयः-हे इन्द्र! शतक्रतो तव यौ सुशिक्षितौ हरी स्त एतौ रथे त्वं नु योज, यस्य ते तव रथस्यैकोऽश्वो दक्षिणपार्श्वे युक्त उतापि द्वितीयः सव्यो युक्तोऽस्तु तेन रथेनाऽरीन् जित्वा प्रियां जायां मन्दानस्त्वमन्धस उपयाहि प्राप्नुहि द्वौ मिलित्वा शत्रुविजयार्थं गच्छेताम्॥५॥

भावार्थः-राज्ञा स्वपत्न्या सह सुशिक्षितैरश्वैर्युक्ते याने स्थित्वा युद्धे विजयो व्यवहारे आनन्दः प्राप्तव्यः। यत्र यत्र युद्धे क्वचिद् भ्रमणार्थं वा गच्छेत्, तत्र तत्र सुशिल्परचिते दृढे रथे स्त्रिया सहितः स्थित्वैव यायात्॥५॥

पदार्थः-हे **(इन्द्र)** सबको सुख देनेहारे **(शतक्रतो)** असंख्य उद्यम बुद्धि और क्रियाओं से युक्त! **(ते)** आपके जो सुशिक्षित **(हरी)** घोड़े हैं, उनको रथ में तू **(नु योज)** शीघ्र युक्त कर, जिस **(ते)** तेरे रथ के **(एकः)** एक घोड़ा **(दक्षिणः)** दाहिने **(उत)** और दूसरा **(सव्यः)** बांई ओर **(अस्तु)** हो **(तेन)** उस रथ पर बैठ शत्रुओं को जीत के **(प्रियाम्)** अतिप्रिय **(जायाम्)** स्त्री को साथ बैठा **(मन्दानः)** आप प्रसन्न और उसको प्रसन्न करता हुआ **(अन्धसः)** अन्नादि सामग्री के **(उप याहि)** समीपस्थ होके तुम दोनों शत्रुओं को जीतने के अर्थ जाया करो॥५॥

भावार्थः-राजा को योग्य है कि अपनी राणी के साथ अच्छे सुशिक्षित घोड़ों से युक्त रथ में बैठ के युद्ध में विजय और व्यवहार में आनन्द को प्राप्त होवें। जहाँ-जहाँ युद्ध में वा भ्रमण के लिये जावें, वहाँ-वहाँ उत्तम कारीगरों से बनाये सुन्दर रथ में स्त्री के सहित स्थित हो के ही जावें॥५॥

पुनर्भुत्याः किं कुर्य्युस्तेन स किं कुर्यादित्याह॥

फिर उसके भृत्य क्या करें और उस रथ से वह क्या करे, इस विषय को अगले मन्त्र में कहा है॥

युनज्मि॑ ते ब्रह्म॑णा के॒शिना॒ हरी॒ उप॒ प्र या॑हि दधि॒षे गभ॑स्त्योः।
उत्त्वा॑ सु॒तासो॑ रभ॒सा अ॑मन्दिषुः पूष॒ण्वान् व॑ज्रि॒न्त्समु॒ पत्न्या॑मदः॥६॥३॥

युन॑ज्मि। ब्रह्म॑णा। के॒शिना॑। हरी॒ इति॑। उप॑। प्र। या॒हि॒। दु॒धि॒षे। गभ॑स्त्योः। उत्। त्वा॒। सु॒तासः॑। र॒भ॒साः। अ॒म॒न्दि॒षुः॒। पू॒ष॒ण्ऽवान्। व॒ज्रि॒न्। सम्। ऊ॒म् इति॑। पत्न्या॑। अ॒म॒दः॒॥६॥

पदार्थः-**(युनज्मि)** युक्तौ करोमि **(ते)** तव **(ब्रह्मणा)** अनादिना सह **(केशिना)** सूर्यरश्मिवत्प्रशस्त-केशयुक्तौ **(हरी)** बलिष्ठावश्वौ **(उप)** सामीप्ये **(प्र)** **(याहि)** गच्छाऽऽगच्छ **(दधिषे)** धरसि **(गभस्त्योः)** हस्तयोः। **गभस्ती इति बाहुनामसु पठितम्।** (निघं०२.५) **(उत्)** उत्कृष्टे **(त्वा)** त्वाम् **(सुतासः)** विद्याशिक्षाभ्यामुत्तमाः सम्पादिताः **(रभसाः)** वेगयुक्ताः **(अमन्दिषुः)** हर्षयन्तु **(पूषण्वान्)** अरिशक्तिनिरोधकैर्वीरैः सह **(वज्रिन्)** प्रशस्तास्त्रयुक्त **(सम्)** सम्यक् **(उ)** वितर्के **(पत्न्या)** युद्धादौ सङ्गमनीये यज्ञे संयुक्तया स्त्रिया **(अमदः)** आनन्दः॥६॥

अन्वयः-हे वज्रिन् सेनाध्यक्ष! यथाऽहं ते तव ब्रह्मणा युक्ते रथे केशिना हरी युनज्मि यत्र स्थित्वा त्वं गभस्त्योरश्वरशनां दधिषे उपप्रयाहि यथा रभसाः सुतासः सुशिक्षिता भृत्या यं त्वा उ उदमन्दिषुरानन्दयेयुस्तथैतानानन्दय। पूषण्वान् स्वकीयया पत्न्या सह सममदः सम्यगानन्द॥६॥

भावार्थः-मनुष्यैर्येऽश्वादिसंयोजका भृत्यास्ते सुशिक्षिता एव रक्षणीयाः स्वस्त्र्यादयोऽपि स्वानुरक्ता एव करणीयाः स्वयमप्येतेष्वनुरक्तास्तिष्ठेयुः सर्वदा युक्तः सन् सुपरीक्षितैरेतैर्धर्म्याणि कार्याणि संसाधयेत्॥

अत्र सेनापतिरीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति द्व्यशीतितमं ८२ सूक्तं तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः–हे **(वज्रिन्)** उत्तम शस्त्रयुक्त सेनाध्यक्ष! जैसे मैं **(ते)** तेरे **(ब्रह्मणा)** अन्नादि से युक्त नौका रथ में **(केशिना)** सूर्य की किरण के समान प्रकाशमान **(हरी)** घोड़ों को **(युनज्मि)** जोड़ता हूं, जिसमें बैठ के तू **(गभस्त्योः)** हाथों में घोड़ों की रस्सी को **(दधिषे)** धारण करता है, उस रथ से **(उप प्र याहि)** अभीष्ट स्थानों को जा। जैसे बलवेगादि युक्त **(सुतासः)** सुशिक्षित **(भृत्याः)** नौकर लोग जिस **(त्वा)** तुझको **(उ)** अच्छे प्रकार **(उदमन्दिषुः)** आनन्दित करें, वैसे इनको तू भी आनन्दित कर और **(पूषण्वान्)** शत्रुओं की शक्तियों को रोकनेहारा तू अपनी **(पत्न्या)** स्त्री के साथ **(सममदः)** अच्छे प्रकार आनन्द को प्राप्त हो॥६॥

भावार्थः–मनुष्यों को योग्य है कि जो अश्वादि की शिक्षा सेवा करनेहारे और उनको सवारियों में चलानेवाले भृत्य हों, वे अच्छी शिक्षायुक्त हों और अपनी स्त्री आदि को भी अपने से प्रसन्न रख के आप भी उनमें यथावत् प्रीति करे। सर्वदा युक्त होके सुपरीक्षित स्त्री आदि में धर्म कार्यों को साधा करें॥६॥

इस सूक्त में सेनापति और ईश्वर के गुणों का वर्णन करने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति समझनी चाहिये॥

यह ८२ बियासीवाँ सूक्त और ३ तीसरा वर्ग पूरा हुआ॥

अथ षडर्च्चस्य त्र्यशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। इन्द्रो देवता। १,३-५ निचृज्जगती। २ जगती छन्दः। निषादः स्वरः। ६ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनः स कीदृशे रथे तिष्ठन्कार्याणि साधयेदित्युपदिश्यते॥

फिर वह कैसे रथ में बैठा हुआ कामों को सिद्ध करे, इस विषय को अगले मन्त्र में कहा है॥

अश्वा॑वति प्रथ॒मो गोषु॑ गच्छति सुप्रा॒वीरि॑न्द्र॒ मर्त्य॒स्तवो॒तिभि॑:।
तमित्पृ॑णक्षि॒ वसु॑ना॒ भवी॑यसा॒ सिन्धु॒मापो॒ यथा॒भितो॒ विचे॑तसः॥ १॥

अश्व॑ऽवति। प्र॒थ॒मः। गोषु॑। ग॒च्छ॒ति॒। सुप्र॒ऽअ॒वीः। इ॒न्द्र॒। मर्त्यः॑। तव॑। ऊ॒तिऽभिः॑। तम्। इत्। पृ॒ण॒क्षि॒। वसु॑ना। भवी॑यसा। सिन्धु॑म्। आपः॑। यथा॑। अ॒भित॑ः। विऽचे॑तसः॥ १॥

पदार्थः-(**अश्वावति**) संबद्धा अश्वा यस्मिंस्तस्मिन् रथे (**प्रथमः**) आदिमो भूमिगमनार्थो रथः (**गोषु**) पृथिवीषु (**गच्छति**) चलति (**सुप्रावीः**) सुष्ठु प्रजारक्षाकर्त्ता (**इन्द्र**) परमैश्वर्यप्रापकसेनापते! (**मर्त्यः**) सुशिक्षितो धार्मिको भृत्यो मनुष्यः (**तव**) (**ऊतिभिः**) रक्षणादिभिः (**तम्**) (**इत्**) एव (**पृणक्षि**) संयुनक्षि (**वसुना**) प्रशस्तेन धनेन (**भवीयसा**) यदतिशयितं भवति तेन (**सिन्धुम्**) समुद्रं नदीं वा (**आपः**) जलानि (**यथा**) येन प्रकारेण (**अभितः**) सर्वतः (**विचेतसः**) विगतं चेतः संज्ञानं याभ्यस्ताः॥ १॥

अन्वयः-हे इन्द्र! यो मर्त्यस्तवोतिभिः सह वर्त्तमानो भृत्योऽश्वावति रथे स्थित्वा गोषु युद्धाय प्रथमो गच्छति तेन त्वं प्रजाः सुप्रावीस्तमिद्यथा विचेतस आपोऽभितः सिन्धुमाप्नुवन्ति यथा भवीयसा वसुना सह प्रजाः पृणक्षि संयुनक्षि तथैव सर्वे संयुजन्तु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। सेनाध्यक्षादिभी राजपुरुषैर्ये भृत्याः स्वस्वाऽधिकृतेषु कर्मसु यथावन्न वर्त्तेरन् तान् सुदण्ड्य ये चानुवर्त्तेरंस्तान् सुसत्कृत्य बहुभिरुत्तमैः पदार्थैः सत्कारैः सह योजितानां संतोषं सम्पाद्य राजकार्याणि संसाधनीयानि नहि कश्चिद्यथापराधिने दण्डदानेन सुकर्मानुष्ठानाय पारितोषेण च विना यथावद्राजव्यवस्थां संस्थापयितुं शक्नोत्यत एतत्कर्म सदानुष्ठेयम्॥ १॥

पदार्थः-हे (**इन्द्र**) सबकी रक्षा करनेहारे राजन्! जो (**मर्त्यः**) अच्छी शिक्षायुक्त धार्मिक मनुष्य (**तव**) तेरी (**ऊतिभिः**) रक्षा आदि से रक्षित भृत्य (**अश्वावति**) उत्तम घोड़ों से युक्त रथ में बैठ के (**गोषु**) पृथिवी विभागों में युद्ध के लिये (**प्रथमः**) प्रथम (**गच्छति**) जाता है, उससे तू प्रजाओं को (**सुप्रावीः**) अच्छे प्रकार रक्षा कर (**तमित्**) उसी को (**यथा**) जैसे (**विचेतसः**) चेतनता रहित जड़ (**आपः**) जल वा वायु (**अभितः**) चारों ओर से (**सिन्धुम्**) नदी को प्राप्त होते हैं, जैसे (**भवीयसा**) अत्यन्त उत्तम (**वसुना**) धन से तू प्रजा को (**पृणक्षि**) युक्त करता है, वैसे ही सब प्रजा और राजपुरुष पुरुषार्थ करके ऐश्वर्य से संयुक्त हों॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सेनापति आदि राजपुरुषों को योग्य है कि जो भृत्य अपने-अपने अधिकार के कर्मों में यथायोग्य न वर्त्तें, उन-उन को अच्छे प्रकार दण्ड और जो न्याय के

अनुकूल वर्त्ते, उनका सत्कार कर शत्रुओं को जीत प्रजा की रक्षा कर पुरुषों को प्रसन्न रखके राजकार्यों को सिद्ध करना चाहिये। कोई भी पुरुष अपराधी के योग्य दण्ड और अच्छे कर्मकर्त्ता के योग्य प्रतिष्ठा किये विना यथावत् राज्य की व्यवस्था को स्थिर करने को समर्थ नहीं हो सकता, इससे इस कर्म का अनुष्ठान सदा करना चाहिये॥१॥

पुनर्विद्वांसः किं कुर्वन्तीत्युपदिश्यते॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहा है॥

आपो॒ न दे॒वीरुप॑ यन्ति होत्रिय॑म॒वः प॑श्यन्ति॒ वित॑तं॒ यथा॒ रज॑ः।
प्रा॒चैर्दे॒वास॒ः प्र ण॑यन्ति देव॒युं ब्र॒ह्मप्रिय॑ं जोषयन्ते व॒राइ॑व॥२॥

आप॑ः। न। दे॒वीः। उप॑। य॒न्ति॒। होत्रिय॑म्। अ॒वः। प॒श्यन्ति॒। विऽत॑तम्। यथा॑। रज॑ः। प्रा॒चैः। दे॒वास॑ः। प्र। न॒य॒न्ति॒। दे॒व॒ऽयुम्। ब्र॒ह्मऽप्रिय॑म्। जो॒ष॒य॒न्ते॒। व॒राःऽइ॑व॥२॥

पदार्थः-(**आपः**) व्याप्तिशीलानि (**न**) इव (**देवीः**) देदीप्यमानाः (**उप**) सामीप्ये (**यन्ति**) प्राप्नुवन्ति (**होत्रियम्**) दातव्यादातव्यानामिदम् (**अवः**) रक्षणादिकम् (**पश्यन्ति**) प्रेक्षन्ते (**विततम्**) विस्तृतम् (**यथा**) येन प्रकारेण (**रजः**) सूक्ष्मं सर्वलोककारणं परमाण्वादिकम् (**प्राचैः**) प्राचीनैर्विद्वद्भिः (**देवासः**) प्रशस्ता विद्वांसः (**प्र**) (**नयन्ति**) प्राप्नुवन्ति (**देवयुम्**) आत्मानं देवमिच्छन्तम् (**ब्रह्मप्रियम्**) ईश्वरो वेदो वा प्रियो यस्य तम् (**जोषयन्ते**) प्रीतयन्ति (**वराइव**) यथा प्रशस्तविद्याधर्मकर्मस्वभावाः॥२॥

अन्वयः-ये देवासो मेघमापो न देवीरुपयन्ति तथा प्राचैः सह विततं रजो होत्रियमवः पश्यन्ति वराइव ब्रह्मप्रियं देवयुं प्रणयन्ति जोषयन्ते ते सततं सुखिनः कथं न स्युः॥२॥

भावार्थः-अत्रोपमालङ्कारः। केन हेतुनेमे विद्वांस इमेऽविद्वांस इति विवेचनीयमित्याह जलवच्छान्ता, प्राणवत्प्रियाः, धर्म्यादिदिव्यक्रियाः कुर्युः, सर्वेषां शरीरात्मनोः यथार्थरक्षणं जानीयुः, भूगर्भादिविद्याभिः प्राचीनवेदविद्विद्वद् वर्त्तेरन्, वेदद्वारेश्वरप्रणीतं धर्मं प्रचारयेयुस्ते विद्वांसो विज्ञेयाः, एतद्विपरीताः स्युस्तेऽविद्वांसश्चेति निश्चिनुयुः॥२॥

पदार्थः-जो (**देवासः**) विद्वान् लोग मेघ को (**आपो न**) जैसे जल प्राप्त होते हैं, वैसे (**देवीः**) विदुषी स्त्रियों को (**उपयन्ति**) प्राप्त होते हैं और (**यथा**) जैसे (**प्राचैः**) प्राचीन विद्वानों के साथ (**विततम्**) विशाल और जैसे (**रजः**) परमाणु आदि जगत् का कारण (**होत्रियम्**) देने-लेने के योग्य (**अवः**) रक्षण को (**पश्यन्ति**) देखते हैं (**वराइव**) उत्तम पतिव्रता विद्वान् स्त्रियों के समान (**ब्रह्मप्रियम्**) वेद और ईश्वर की आज्ञा में प्रसन्न (**देवयुम्**) अपने आत्मा को विद्वान् होने की चाहनायुक्त (**प्रणयन्ति**) नीतिपूर्वक करते और (**जोषयन्ते**) इसका सेवन करते औरों को ऐसा कराते हैं, वे निरन्तर सुखी क्यों न हो॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। किस हेतु से विद्वान् और अविद्वान् भिन्न-भिन्न कहाते हैं, इसका उत्तर-जो धर्मयुक्त शुद्ध क्रियाओं को करें, सबके शरीर और आत्मा का यथावत् रक्षण करना

जानें और भूगर्भादि विद्याओं से प्राचीन आप्त विद्वानों के तुल्य वेदद्वारा ईश्वरप्रणीत सत्यधर्म मार्ग का प्रचार करें, वे विद्वान् हैं और जो इनसे विपरीत हों वे अविद्वान् हैं, इस प्रकार निश्चय से जानें॥ २॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते॥ ३॥

अधि। द्वयोः। अदधाः। उक्थ्यम्। वचः। यतऽस्रुचा। मिथुना। या। सपर्यतः। असम्ऽयत्तः। व्रते। ते। क्षेति। पुष्यति। भद्रा। शक्तिः। यजमानाय। सुन्वते॥ ३॥

पदार्थः-(**अधि**) उपरिभावे (**द्वयोः**) स्वात्मपरात्मनोः प्रियम् (**अदधाः**) धेहि (**उक्थ्यम्**) वक्तुमर्हम् (**वचः**) सत्यं वचनम् (**यतस्रुचा**) यता नियताः स्रुचः साधनानि याभ्यामुपदेशाभ्यां तौ (**मिथुना**) विरोधं विहाय मिलितौ (**या**) यौ (**सपर्यतः**) परिचरतः (**असंयत्तः**) अजितेन्द्रियोऽपि (**व्रते**) सत्यभाषणादिलक्षणे व्यवहारे (**ते**) तव (**क्षेति**) निवसति (**पुष्यति**) पुष्टो भवति (**भद्रा**) कल्याणकारिणी (**शक्तिः**) समर्थता (**यजमानाय**) उपदेश्याय पालकाय वा (**सुन्वते**) ऐश्वर्यमिच्छुकाय प्राप्ताय वा॥ ३॥

अन्वयः-हे मनुष्य! यथा या यतस्रुचा मिथुना द्वयोर्यदुक्थ्यं वचः सपर्यतस्तथैतौ त्वमदधाः। यो संयतोऽपि ते व्रते क्षेति तस्मिन् भद्रा शक्तिरधि निवसति स पुष्यति पुष्टो भवति तर्हि तस्मै सुन्वते यजमानाय सुखं कथं न वर्द्धेत॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः परोपकारबुद्ध्या सर्वेषां शरीरात्मनोर्मध्ये पुष्टिविद्याबले ज्ञात्वा विरोधं त्यक्त्वा धर्म्यं व्यवहारं सेवित्वा सततं सर्वान् मनुष्यान् सत्ये व्यवहारे प्रवर्त्तयन्ति, ते मोक्षमाप्नुवन्ति नेतर इति वेद्यम्॥ ३॥

पदार्थः-हे मनुष्य! जैसे (**या**) जो (**यतस्रुचा**) साधनोपसाधनयुक्त पढ़ाने और उपदेश करनेहारे (**मिथुना**) दोनों मिलके (**द्वयोः**) अपना और पराया कल्याण करके जो (**उक्थ्यम्**) प्रशंसा के योग्य (**वचः**) वचन को (**सपर्यतः**) सेवते हैं, वैसे इसका तू (**अदधाः**) धारण कर। जो (**असंयत्तः**) अजितेन्द्रिय भी (**ते**) तेरे (**व्रते**) सत्यभाषणादि नियम पालन में (**क्षेति**) निवास करता है, उसमें (**भद्रा**) कल्याण करनेहारी (**शक्तिः**) सामर्थ्य (**क्षेति**) बसती है और वह (**पुष्यति**) पुष्ट होता है, तब (**सुन्वते**) ऐश्वर्यप्राप्ति होनेवाले (**यजमानाय**) सबको सुखके दाता के लिये निरन्तर सुख कैसे न बढ़े॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य परोपकारी बुद्धि से सबके शरीर और आत्मा के मध्य पुष्टि और विद्याबल को उत्पन्न कर विरोध छोड़के धर्मयुक्त व्यवहार को सेवन करके निरन्तर सब मनुष्यों को सत्यव्यवहार में प्रवृत्त करते हैं, वे मोक्ष को प्राप्त होते हैं॥ ३॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया।
सर्वं पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः॥४॥

आत्। अङ्गिराः। प्रथमम्। दधिरे। वयः। इद्धऽअग्नयः। शम्या। ये। सुऽकृत्यया। सर्वम्। पणेः। सम्। अविन्दन्त। भोजनम्। अश्वऽवन्तम्। गोऽमन्तम्। आ। पशुम्। नरः॥४॥

पदार्थः-(**आत्**) अनन्तरम् (**अङ्गिराः**) प्राण इव प्रियो वत्सः। अत्र जसः स्थाने सुः। **अङ्गिरस इति पदनामसु पठितम्।** (निघं०५.५) (**प्रथमम्**) आदिमं ब्रह्मचर्यार्थम् (**दधिरे**) दधति (**वयः**) जीवनम् (**इद्धाग्नयः**) इद्धाः प्रदीप्ता मानसब्राह्माग्नयो यैस्ते (**शम्या**) शान्तियुक्तक्रियया। **शमीति कर्मनामसु पठितम्।** (निघं०२.१) (**ये**) (**सुकृत्यया**) शोभनानि कृत्यानि कर्माणि यस्यां तया (**सर्वम्**) अखिलम् (**पणेः**) स्तुत्यस्य व्यवहारस्य (**सम्**) सम्यक् (**अविन्दन्त**) विन्दन्ते प्राप्नुवन्ति (**भोजनम्**) पालनं भोग्यमानन्दं वा (**अश्वावन्तम्**) प्रशस्ता अश्वा विद्यन्ते यस्मिंस्तम् (**गोमन्तम्**) बह्व्यो गावः सन्त्यस्मिंस्तम् (**आ**) समन्तात् (**पशुम्**) स्वमातरम् (**नरः**) नेतारः॥४॥

अन्वयः-हे इद्धाग्नयो ये नरो मनुष्या यया सुकृत्यया शम्या पणेः प्रथमं वयो ब्रह्मचर्यार्थमादधिरे सर्वतो दधति ते सर्वं भोजनं समविन्दन्त प्राप्नुवन्त्वाद्यथाऽङ्गिराः अश्वावन्तं गोमन्तं राज्यं प्राप्यानन्दितः पशुं लब्ध्वानन्दी भवति तथा भवन्तु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। केचिदपि मनुष्या ब्रह्मचर्यसेवनेन विना साङ्गोपाङ्गविद्याः प्राप्तुं न शक्नुवन्ति, विद्याशक्तिभ्यां विना राज्यऽधिकारं लब्धुं नार्हन्ति, न चैतद्विरहा जनाः सत्यानि सुखानि प्राप्तुमर्हन्ति॥४॥

पदार्थः-हे (**इद्धाग्नयः**) अग्निविद्या को प्रदीप्त करनेहारे (**ये**) (**नरः**) नायक मनुष्यो! आप जैसे (**सुकृत्यया**) सुकृतयुक्त (**शम्या**) कर्म और (**पणेः**) प्रशंसनीय व्यवहार करनेवाले के उपदेश से (**प्रथमम्**) पहिले (**वयः**) उमर को ब्रह्मचर्य के लिये (**आदधिरे**) सब प्रकार से धारण करते हैं वे (**सर्वम्**) सब (**भोजनम्**) आनन्द को भोग और पालन को (**समविन्दन्त**) अच्छे प्रकार प्राप्त होते हैं (**आत्**) इससे अनन्तर जैसे (**अङ्गिराः**) प्राणवत् प्रिय बछड़ा (**पशुम्**) अपनी माता को प्राप्त होके आनन्दित होता है, वैसे आप (**अश्वावन्तम्**) उत्तम घोड़ों से युक्त (**गोमन्तम्**) श्रेष्ठ गाय और भूमि आदि से सहित राज्य को प्राप्त होके आनन्दित हूजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। कोई भी मनुष्य ब्रह्मचर्य से विद्या पढ़े विना साङ्गोपाङ्ग विद्याओं को प्राप्त होने को समर्थ नहीं हो सकते और विद्या सत्कर्म के विना राज्याधिकार को प्राप्त होने योग्य नहीं होते, उक्त प्रकार से रहित मनुष्य सत्य सुख को प्राप्त नहीं हो सकते॥४॥

पुनस्ते केन किं संगच्छन्त इत्युपदिश्यते॥

फिर वे किससे किसको प्राप्त होते हैं, यह विषय कहा है॥

यज्ञैरथर्वा प्रथमः पथस्ततेे ततः सूर्यो व्रतपा वेन आजनि।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे॥५॥

यज्ञैः। अथर्वा। प्रथमः। पथः। ततेे। ततः। सूर्यः। व्रतऽपाः। वेनः। आ। अजनि। आ। गाः। आजत्। उशना। काव्यः। सचा। यमस्य। जातम्। अमृतम्। यजामहे॥५॥

पदार्थः-(**यज्ञैः**) विद्याविज्ञानप्रचारैः (**अथर्वा**) अहिंसकः (**प्रथमः**) प्रख्यातो विद्वान् (**पथः**) मार्गम् (**ततेे**) तनुते। अत्र **बहुलं छन्दसी**ति विकरणस्य लुक्। (**ततः**) विस्तृतः। अत्र **तनिमृङ्**। (उणा०३.८६) अनेन तन्प्रत्ययः किच्च। (**सूर्यः**) यथा सविता तथा (**व्रतपाः**) सत्यनियमरक्षकः (**वेनः**) कमनीयः (**आ**) अभितः (**अजनि**) जायते (**आ**) समन्तात् (**गाः**) पृथिवीः (**आजत्**) अजत्याकर्षणेन प्रक्षिपति वा (**उशना**) कामयिता (**काव्यः**) यथा कवेः पुत्रः शिष्यो वा (**सचा**) विज्ञानेन (**यमस्य**) सर्वनियन्तुः (**जातम्**) प्रसिद्धिगतम् (**अमृतम्**) अधर्मजन्मदुःखरहितं मोक्षसुखम् (**यजामहे**) सङ्गच्छामहे॥५॥

अन्वयः-यथा प्रथमोऽथर्वा पथस्तते यथा वेनो व्रतपा आजनि समन्ताज्जायते यथा ततः सूर्यो गा आजदजति यथा काव्य उशना विद्वान् विद्याः प्राप्नोति तथा वयं यज्ञैर्यमस्य सचा जातममृतमायजामहे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि मनुष्यैः सन्मार्गे स्थित्वा सत्क्रियाभिर्विज्ञानेन च परमेश्वरं विज्ञाय मोक्षसुखमिष्यते तर्ह्यवश्यं ते मुक्तिमश्नुवते॥५॥

पदार्थः-जैसे (**प्रथमः**) प्रसिद्ध विद्वान् (**अथर्वा**) हिंसारहित (**पथः**) सन्मार्ग को (**ततेे**) विस्तृत करता है, जैसे (**वेनः**) बुद्धिमान् (**व्रतपाः**) सत्य का पालन करनेहारा सब प्रकार (**आजनि**) प्रसिद्ध होता है, जैसे (**ततः**) विस्तृत (**सूर्यः**) सूर्यलोक (**गाः**) पृथिवी में देशों को (**आजत्**) धारण करके घुमाता है, जैसे (**काव्यः**) कवियों में शिक्षा को प्राप्त (**उशना**) विद्या की कामना करनेवाला विद्वान् विद्याओं को प्राप्त होता है, वैसे हम लोग (**यज्ञैः**) विद्या के पढ़ने-पढ़ाने सत्संयोगादि क्रियाओं से (**यमस्य**) सब जगत् के नियन्ता परमेश्वर के (**सचा**) साथ (**जातम्**) प्राप्त हुए (**अमृतम्**) मोक्ष को (**आयजामहे**) प्राप्त होवें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि सत्य मार्ग में स्थित होके सत्य क्रिया और विज्ञान से परमेश्वर को जान के मोक्ष की इच्छा करें, वे विद्वान् मुक्ति को प्राप्त होते हैं॥५॥

पुनः स कथं किं कुर्यादित्युपदिश्यते॥

फिर वह किस प्रकार से क्या करे, इस विषय को अगले मन्त्र में कहा है॥

बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि।
ग्रावा यत्र वदति कारुरुक्थ्य१स्तस्येदिन्द्रो अभिपित्वेषु रण्यति॥ ६॥ ४॥

बर्हिः। वा। यत्। सुऽअपत्याय। वृज्यते। अर्कः। वा। श्लोकम्। आऽघोषते। दिवि। ग्रावा। यत्र। वदति। कारुः। उक्थ्यः। तस्य। इत्। इन्द्रः। अभिऽपित्वेषु। रण्यति॥ ६॥

पदार्थः-(**बर्हिः**) विज्ञानम् (**वा**) समुच्चयार्थे। **वेत्यथापि समुच्चयार्थे।** (निरु०१.४) (**यत्**) यस्मै। अत्र **सुपां सुबि**ति डेर्लुक्। (**स्वपत्याय**) शोभनान्यपत्यानि यस्य तस्मै (**वृज्यते**) त्यज्यते (**अर्कः**) विद्यमानः सूर्यः (**वा**) विचारणे। (निरु०१.४) (**श्लोकम्**) विद्यासहितां वाचम् (**आघोषते**) विद्याप्राप्तय उच्चरति (**दिवि**) आकाश इव दिव्ये विद्याव्यवहारे (**ग्रावा**) मेघः। **ग्रावेति मेघनाम।** (निघं०१.१०) (**यत्र**) यस्मिन्देशे (**वदति**) उपदिशति (**कारुः**) स्तुत्यानां शिल्पकर्मणां कर्त्ता। **कारुरहमस्मि स्तोमानां कर्त्ता।** (निरु०६.६) (**उक्थ्यः**) उक्थेषु वक्तव्येषु व्यवहारेषु साधु (**तस्य**) (**इत्**) एव (**इन्द्रः**) परमैश्वर्यप्रदो विद्वान् (**अभिपित्वेषु**) अभितः सर्वतः प्राप्तव्येषु व्यवहारेषु। अत्र पदधातोर्बाहुलकादौणादिक इत्वन् प्रत्ययो डिच्च। (**रण्यति**) उपदिशति। अत्र विकरणव्यत्ययः॥ ६॥

अन्वयः-यत्र दिव्युक्थ्यः कारुरिन्द्रोऽभिपित्वेषु यद्यस्मै स्वपत्याय बर्हिर्वृज्यतेऽर्को वा श्लोकमाघोषते ग्रावा वदति रण्यति तत्र तस्येदेव विद्या जायते॥ ६॥

भावार्थः-विद्वद्भिर्यथा जलं विच्छिद्यान्तरिक्षं गत्वा वर्षित्वा सुखं जनयति तथैव कुव्यसनानि छित्त्वा विद्यामुपगृह्य सर्वे जनाः सुखयितव्याः। यथा सूर्योऽन्धकारं विनाश्य प्रकाशं जनयित्वा सर्वान् प्राणिनः सुखयति दुष्टान् भीषयते, तथैव जनानामज्ञानं विनाश्य ज्ञानं जनयित्वा सदैव सुखं सम्पादनीयम्। यथा मेघो गर्जित्वा वर्षित्वा दौर्भिक्ष्यं विनाश्य सौभिक्ष्यं करोति तथैव सदुपदेशवृष्ट्याऽधर्मं विनाश्य धर्मं प्रकाश्य जनाः सर्वदाऽऽनन्दयितव्याः॥ ६॥

अत्र सेनापत्युपदेशकयोः कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति त्र्यशीतितमं ८३ सूक्तं चतुर्थो ४ वर्गश्च समाप्तः॥

पदार्थः-(**यत्र**) जिस (**दिवि**) प्रकाशयुक्त व्यवहार में (**उक्थ्यः**) कथनीय व्यवहारों में निपुण प्रशंसनीय शिल्प कामों का कर्त्ता (**इन्द्रः**) परमैश्वर्य को प्राप्त करनेहारा विद्वान् (**अभिपित्वेषु**) प्राप्त होने योग्य व्यवहारों में (**यत्**) जिस (**स्वपत्याय**) सुन्दर सन्तान के अर्थ (**बर्हिः**) विज्ञान को (**वृज्यते**) छोड़ता है (**अर्कः**) पूजनीय विद्वान् (**श्लोकम्**) सत्यवाणी को (**वा**) विचारपूर्वक (**आघोषते**) सब प्रकार सुनाता है (**ग्रावा**) मेघ के समान गम्भीरता से (**वदति**) बोलता है (**वा**) अथवा (**रण्यति**) उत्तम उपदेशों को करता है, वहाँ (**तस्येत्**) उसी सन्तान को विद्या प्राप्त होती है॥ ६॥

भावार्थ:-विद्वान् लोगों को योग्य है कि जैसे जल छिन्न-भिन्न होकर आकाश में जा वहाँ से वर्षा से सुख करता है, वैसे कुव्यसनों को छिन्न-भिन्न कर विद्या को ग्रहण करके सब मनुष्यों को सुखी करें। जैसे सूर्य अन्धकार का नाश और प्रकाश करके सब प्राणियों को सुखी और दुष्ट चोरों को दु:खी करता है, वैसे मनुष्यों के अज्ञान का नाश विज्ञान की प्राप्ति करा के सबको सुखी करें। जैसे मेघ गर्जना कर और वर्ष के दुर्भिक्ष को छुड़ा सुभिक्ष करता है, वैसे ही सत्योपदेश की वृष्टि से अधर्म का नाश धर्म के प्रकाश से सब मनुष्यों को आनन्दित किया करें॥६॥

इस सूक्त में सेनापति और उपदेशक के गुणों का वर्णन करने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह त्र्यासीवां ८३ सूक्त और चौथा ४ वर्ग समाप्त हुआ॥

अथ विंशत्यृचस्य चतुरशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। इन्द्रो देवता। १,३-५ निचृदनुष्टुप्। विराडनुष्टुप्। गान्धारः स्वरः। ६ भुरिगुष्णिक्। ७-९ उष्णिक् छन्दः। ऋषभः स्वरः। १०,१२ विराडास्तारपङ्क्तिः। ११ आस्तारपङ्क्तिः। २० पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १३-१५ निचृद्गायत्रीछन्दः। षड्जः स्वरः। १६ निचृत् त्रिष्टुप् छन्दः। १७ विराट् त्रिष्टुप् छन्दः। १८ त्रिष्टुप् छन्दः॥

पुनः सेनाध्यक्षकृत्यमुपदिश्यते॥

अब चौरासीवें सूक्त का आरम्भ किया जाता है। इसके प्रथम मन्त्र में सेनापति के गुणों का उपदेश किया है॥

असा॑वि॒ सोम॑ इन्द्र॒ ते॒ शवि॑ष्ठ धृष्ण॒वा ग॑हि।
आ त्वा॑ पृणक्त्विन्द्रि॒यं रज॒: सूर्यो॒ न र॒श्मिभि॑:॥ १॥

असा॑वि। सोम॑:। इ॒न्द्र॒। ते॒। शवि॑ष्ठ। धृ॒ष्णो॒ इति॑॥ आ। ग॒हि॒। आ। त्वा॒। पृ॒ण॒क्तु॒। इ॒न्द्रि॒यम्। रज॑:। सूर्य॑:। न। र॒श्मिभि॑:॥ १॥

पदार्थः-(**असावि**) उत्पाद्यते (**सोमः**) उत्तमोऽनेकविधरोगनाशक ओषधिरसः (**इन्द्र**) सर्वैश्वर्यप्राप्तिहेतो (**ते**) तुभ्यम् (**शविष्ठ**) बलिष्ठ (**धृष्णो**) प्रगल्भ (**आ**) आभिमुख्ये (**गहि**) प्राप्नुहि (**आ**) समन्तात् (**त्वा**) त्वाम् (**पृणक्तु**) सम्पर्कं करोतु (**इन्द्रियम्**) मनः (**रजः**) लोकसमूहम् (**सूर्यः**) सविता (**न**) इव (**रश्मिभिः**) किरणैः॥१॥

अन्वयः-हे धृष्णो शविष्ठेन्द्र! ते तुभ्यं यः सोमोऽस्माभिरसावि यस्ते तवेन्द्रियं सूर्यो रश्मिभी रजो नेव प्रकाशयेत् तं त्वमागहि समन्तात् प्राप्नुहि स च त्वा त्वामापृणक्तु॥१॥

भावार्थः-अत्रोपमालङ्कारः। प्रजासेनाशालासभास्थैः पुरुषैः सुपरीक्ष्य सूर्यसदृशं प्रजासेनाशालासभाध्यक्षं कृत्वा सर्वथा स सत्कर्त्तव्य एवं सभ्या अपि प्रतिष्ठापयितव्याः॥१॥

पदार्थः-हे (**धृष्णो**) प्रगल्भ (**शविष्ठ**) प्रशंसित बलयुक्त (**इन्द्र**) परमैश्वर्य देनेहारे सत्पुरुष (**ते**) तेरे लिये जो (**सोमः**) अनेक प्रकार के रोगों को विनाश करनेहारी औषधियों का सार हमने (**असावि**) सिद्ध किया है, जो तेरी (**इन्द्रियम्**) इन्द्रियों को (**सूर्यः**) सविता (**रश्मिभिः**) किरणों से (**रजः**) लोकों का प्रकाश करने के (**न**) तुल्य प्रकाश करे उसको तू (**आगहि**) प्राप्त हो, वह (**त्वा**) तुझे (**आ पृणक्तु**) बल और आरोग्यता से युक्त करे॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। प्रजा, सेना और पाठशालाओं की सभाओ में स्थित पुरुषों को योग्य है कि अच्छे प्रकार सूर्य के समान तेजस्वी पुरुष को प्रजा, सेना और पाठशालाओं में अध्यक्ष करके सब प्रकार से उसका सत्कार करना चाहिये, वैसे सभ्यजनों की भी प्रतिष्ठा करनी चाहिये॥१॥

पुनस्तं कथं सत्कुर्युरित्युपदिश्यते॥

फिर उसका सत्कार किस प्रकार करे, इस विषय को अगले मन्त्र में कहा है॥

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम्।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम्॥ २॥

इन्द्रम्। इत्। हरी इति। वहतः। अप्रतिधृष्टऽशवसम्। ऋषीणाम्। च। स्तुतीः। उप। यज्ञम्। च। मानुषाणाम्॥ २॥

पदार्थः-(**इन्द्रम्**) प्रजासेनापतिम् (**इत्**) एव (**हरी**) दुःखहरणशीलौ (**वहतः**) प्राप्नुतः (**अप्रतिधृष्टशवसम्**) न प्रतिधृष्यते शवो बलं यस्य तम् (**ऋषीणाम्**) मन्त्रार्थविदाम् (**च**) समुच्चये (**स्तुतीः**) प्रशंसाः (**उप**) सामीप्ये (**यज्ञम्**) सर्वैः सङ्गमनीयम् (**च**) समुच्चये (**मानुषाणाम्**) मानवानाम्॥ २॥

अन्वयः-हे मनुष्या! यूयं यमप्रतिधृष्टशवसमृषीणां स्तुतीः प्राप्तं महाशुभगुणसम्पन्नं च मानुषाणामन्येषां प्राणिनां च विद्यादानसंरक्षणाख्यं यज्ञं पालयन्तमिन्द्रं हरी उपवहतस्तमित्सदा स्वीकुरुत॥ २॥

भावार्थः-नहि प्रशंसितपुरुषैः सत्कृतैरधिष्ठातृभिर्विना प्राणिनां सुखं भवितुं शक्यम्। न खलु सत्क्रियया विना चक्रवर्त्तिराज्यादिप्राप्तिरक्षणे च भवितुं शक्येते तस्मात् सर्वैरेतत्सर्वदाऽनुष्ठेयम्॥ २॥

पदार्थः-हे मनुष्यो! तुम जिस (**अप्रतिधृष्टशवसम्**) अहिंसित अत्यन्त बलयुक्त (**ऋषीणाम्**) वेदों के अर्थ जाननेहारों की (**स्तुतीः**) प्रशंसा को प्राप्त (**च**) महागुणसम्पन्न (**मानुषाणाम्**) मनुष्यों (**च**) और प्राणियों के विद्यादान संरक्षण नाम (**यज्ञम्**) यज्ञ को पालन करनेहारे (**इन्द्रम्**) प्रजा, सेना और सभा आदि ऐश्वर्य को प्राप्त करानेवाले को (**हरी**) दुःखहरण स्वभाव, श्री, बल, वीर्य, नाम, गुण, रूप, अश्व (**उप वहतः**) प्राप्त होते हैं, उसको (**इत्**) ही सदा प्राप्त हूजिये॥ २॥

भावार्थः-जो प्रशंसा सत्कार अधिकार को प्राप्त है उनके विना प्राणियों को सुख नहीं हो सकता तथा सत्क्रिया के विना चक्रवर्त्तिराज्य आदि की प्राप्ति और रक्षण नहीं हो सकते, इस हेतु से सब मनुष्यों को यह अनुष्ठान करना उचित है॥ २॥

पुनः सेनाध्यक्षः स्वभृत्यान् प्रति किं किमादिशेदित्युपदिश्यते॥

फिर सेनापति अपनी सेना के भृत्यों को क्या-क्या आज्ञा देवे, इस विषय को अगले मन्त्र में कहा है॥

आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना॥ ३॥

आ। तिष्ठ। वृत्रऽहन्। रथम्। युक्ता। ते। ब्रह्मणा। हरी इति। अर्वाचीनम्। सु। ते। मनः। ग्रावा। कृणोतु। वग्नुना॥ ३॥

पदार्थः-(**आ**) अभितः (**तिष्ठ**) (**वृत्रहन्**) मेघं सवित इव शत्रुमतिविच्छेत्तः (**रथम्**) विमानादियानम् (**युक्ता**) सम्यक् सम्बद्धौ (**ते**) तव (**ब्रह्मणा**) अन्नादिसामग्र्या सह वर्त्तमानेन शिल्पिना सारथिना वा (**हरी**) हरणशीलावग्निजलाख्यौ तुरङ्गौ वा (**अर्वाचीनम्**) अधस्ताद् भूमिजलयोरुपगन्तारम् (**सु**) शोभने (**ते**) तव (**मनः**) विज्ञानम् (**ग्रावा**) मेघ इव विद्वान् यो गृणाति सः (**कृणोतु**) करोतु (**वग्नुना**) वाण्या। **वग्नुरिति वाङ्नामसु पठितम्।** (निघं०१.११)॥३॥

अन्वयः-हे वृत्रहन् शूरवीर! ते तव यस्मिन् ब्रह्मणा चालितौ हरी युक्ता स्तस्तमर्वाचीनं रथं त्वमातिष्ठ ग्रावेव वग्नुना वक्तृत्वं सुकृणोत्वित्थं ते मनो वीरान् सुष्ठूत्साहयतु॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सभाध्यक्षैः सेनायां द्वावध्यक्षौ रक्ष्येतां तयोरेकः सेनापतिर्योधयिता द्वितीयो वक्तृत्वेनोत्साहायोपदेशकः। यदा युद्धं प्रवर्त्तेत तदा सेनापतिर्भृत्यान् सुपरीक्ष्योत्साह्य शत्रुभिः सह योधयेद्यतो ध्रुवो विजयस्स्याद् यदा युद्धं निवर्त्तेत तदोपदेशकः सर्वान् योद्धॄन् परिचारकांश्च शौर्यकृतज्ञता धर्म्मकर्मोपदेशेन सूत्साहयुक्तान् कुर्यादेवं कर्तॄणां कदाचित् पराजयो भवितुन्न शक्यते इति वेद्यम्॥३॥

पदार्थः-हे (**वृत्रहन्**) मेघ को सविता के समान शत्रुओं के मारनेहारे शूरवीर! (**ते**) तेरे जिस (**ब्रह्मणा**) अन्नादिसामग्री से युक्त शिल्पि वा सारथि के चलाये हुए (**हरी**) पदार्थ को पहुंचाने वाले जलाग्नि वा घोड़े (**युक्ता**) युक्त हैं, उस (**अर्वाचीनम्**) भूमि, जल के नीचे-ऊपर आदि को जाने वाले (**रथम्**) रथ में तू (**आतिष्ठ**) बैठ (**ग्रावा**) मेघ के समान (**वग्नुना**) सुन्दर मधुर वाणी में वक्तृत्व को (**सुकृणोतु**) अच्छे प्रकार कर, उससे (**ते**) तेरा (**मनः**) विज्ञान वीरों को अच्छे प्रकार उत्साहित किया करे॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सभापतियों को योग्य है कि सेना में दो प्रकार के अधिकारी रक्खें। उनमें एक सेना को लड़ावे और दूसरा अच्छे भाषणों से योद्धाओं को उत्साहित करे। जब युद्ध हो तब सेनापति अच्छी प्रकार परीक्षा और उत्साह से शत्रुओं के साथ ऐसा युद्ध करावे कि जिससे निश्चित विजय हो और जब युद्ध बन्द हो जाये, तब उपदेशक योद्धा और सब सेवकों को धर्मयुक्त कर्म के उपदेश से अच्छे प्रकार उत्साहित करें, ऐसे करनेहारे मनुष्यों का कभी पराजय नहीं हो सकता॥३॥

पुनः स किमादिशेदित्युपदिश्यते॥

फिर वह क्या आज्ञा करे, इस विषय को अगले मन्त्र में कहा है॥

इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम्।

शुक्रस्य॑ त्वाभ्य॑क्षर॒न्धारा॑ ऋ॒तस्य॒ साद॑ने॥४॥

इ॒मम्। इ॒न्द्र॒। सु॒तम्। पि॒ब॒। ज्येष्ठ॑म्। अम॑र्त्यम्। मद॑म्। शु॒क्रस्य॑। त्वा॒। अ॒भि। अ॒क्ष॒र॒न्। धारा॑:। ऋ॒तस्य॑। सद॑ने॥४॥

पदार्थ:-(**इमम्**) प्रत्यक्षम् (**इन्द्र**) शत्रूणां विदारयित: (**सुतम्**) निष्पादितम् (**पिब**) (**ज्येष्ठम्**) अतिशयेन प्रशस्तम् (**अमर्त्यम्**) दिव्यम् (**मदम्**) हर्षम् (**शुक्रस्य**) पराक्रमस्य। (**त्वा**) त्वाम् (**अभि**) आभिमुख्ये (**अक्षरन्**) चालयन्ति (**धारा:**) वाच:। **धारेति वाङ् नामसु पठितम्।** (निघं०१.११) (**ऋतस्य**) सत्यस्य (**सदने**) स्थाने॥४॥

अन्वय:-हे इन्द्र! यं त्वा या धारा ऋतस्य शुक्रस्य सदन अभ्यक्षरंस्ता: प्राप्येमं सुतं सोमं पिब तेन ज्येष्ठममर्त्यं मदं प्राप्य शत्रून् विजयस्व॥४॥

भावार्थ:-कश्चिदपि विद्यासुभोजनैर्विना वीर्यं प्राप्तुं न शक्नोति, तेन विना सत्यस्य विज्ञानं विजयश्च न जायते॥४॥

पदार्थ:-हे (**इन्द्र**) शत्रुओं को विदारण करनेहारे! जिस (**त्वा**) तुझे जो (**धारा:**) वाणी (**ऋतस्य**) सत्य (**शुक्रस्य**) पराक्रम के (**सदने**) स्थान में (**अभ्यक्षरन्**) प्राप्त करती हैं, उनको प्राप्त होके (**इमम्**) इस (**सुतम्**) अच्छे प्रकार से सिद्ध किये उत्तम ओषधियों के रस को (**पिब**) पी, उससे (**ज्येष्ठम्**) प्रशंसित (**अमर्त्यम्**) साधारण मनुष्य को अप्राप्त दिव्यस्वरूप (**मदम्**) आनन्द को प्राप्त होके शत्रुओं को जीत॥४॥

भावार्थ:-कोई भी मनुष्य विद्या और अच्छे पान-भोजन के विना पराक्रम को प्राप्त होने को समर्थ नहीं और इसके विना सत्य का विज्ञान और विजय नहीं हो सकता॥४॥

पुनस्तं कीदृशं सभाध्यक्षं सत्कुर्युरित्युपदिश्यते॥

फिर किस प्रकार के सभाध्यक्ष का सत्कार करें, इस विषय को अगले मन्त्र में कहा है॥

इन्द्रा॑य नू॒नम॑र्चतो॒क्थानि॑ च ब्रवीतन।
सु॒ता अ॑मत्सु॒रिन्द॑वो॒ ज्येष्ठं॑ नमस्यता॒ सह॑:॥५॥५॥

इन्द्रा॑य। नू॒नम्। अ॒र्च॒त॒। उ॒क्थानि॑। च॒। ब्र॒वी॒त॒न॒। सु॒ता:। अ॒म॒त्सु॒:। इन्द॑व:। ज्येष्ठ॑म्। न॒म॒स्य॒त॒। सह॑:॥५॥

पदार्थ:-(**इन्द्राय**) अत्यन्तोत्कृष्टाय (**नूनम्**) निश्चितम् (**अर्चत**) सत्कुरुत (**उक्थानि**) वक्तव्यानि वचनानि (**च**) समुच्चये (**ब्रवीतन**) उपदिशत (**सुता:**) निष्पादिता: (**अमत्सु:**) हर्षयेयु: (**इन्दव:**) सोमा: (**ज्येष्ठम्**) प्रशस्तम् (**नमस्यत**) पूजयत (**सह:**) बलम्॥५॥

अन्वय:-हे मनुष्या! यूयं यं सुता इन्दवोऽमत्सुहर्षयेयुर्यं ज्येष्ठं सह: प्राप्नुयात् तस्मा इन्द्राय नमस्यत तं मुख्यकार्येषु नियोज्य नूनमर्चतोक्थानि ब्रवीतन तस्मात् सत्कारं च प्राप्नुत॥५॥

भावार्थः-मनुष्यैर्यः सर्वान् सत्कुर्याच्छरीरात्मबलं प्राप्य परोपकारी भवेत् तं विहायान्यः सेनाद्यधिकारे कदाचिन्नैव संस्थाप्यः॥५॥

पदार्थः-हे मनुष्यो! तुम जिसको **(सुताः)** सिद्ध **(इन्दवः)** उत्तम रसीले पदार्थ **(अमत्सुः)** आनन्दित करें, जिसको **(ज्येष्ठम्)** उत्तम **(सहः)** बल प्राप्त हो उस **(इन्द्राय)** सभाध्यक्ष को **(नमस्यत)** नमस्कार करो और उसको मुख्य कामों में युक्त करके **(नूनम्)** निश्चय से **(अर्चत)** सत्कार करो **(उक्थानि)** अच्छे-अच्छे वचनों से **(ब्रवीतन)** उपदेश करो, उससे सत्कारों को **(च)** भी प्राप्त हो॥५॥

भावार्थः-मनुष्यों को योग्य है कि जो सबका सत्कार करे, शरीर और आत्मा के बल को प्राप्त होके परोपकारी हो, उसको छोड़ के अन्य को सेनापति आदि अधिकारों में कभी स्थापन न करें॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

नकि॒ष्ट्वद्र॒थीत॑रो॒ हरी॒ यदि॑न्द्र॒ यच्छ॑से।

नकि॒ष्ट्वानु॑ म॒ज्मना॒ नकि॒: स्वश्व॑ आनशे॥६॥

नकिः। त्वत्। र॒थिऽत॑रः। हरी॒ इति॑। यत्। इ॒न्द्र॒। यच्छ॑से। नकिः। त्वा॒। अनु॑। म॒ज्मना॑। नकिः। सु॒ऽअश्वः। आ॒न॒शे॒॥६॥

पदार्थः-**(नकिः)** प्रश्ने **(त्वत्)** **(रथीतरः)** अतिशयेन रथयुक्तो योद्धा **(हरी)** अश्वौ **(यत्)** यः **(इन्द्र)** सेनेश **(यच्छसे)** ददासि **(नकिः)** **(त्वा)** त्वाम् **(अनु)** आनुकूल्ये **(मज्मना)** बलेन **(नकिः)** न किल **(स्वश्वः)** शोभना अश्वा यस्य सः **(आनशे)** व्याप्नोति॥६॥

अन्वयः-हे इन्द्र! यस्त्वं रथीतरस्स हरीर्यच्छसे त्वा त्वां मज्मना कश्चित् किं नकिरन्वानशे त्वदधिकः कश्चित् स्वश्वः किं नकिर्विद्यते तस्मात् त्व सर्वैरङ्गैर्युक्तो भव॥६॥

भावार्थः-हे मनुष्या! यूयं सेनेशमेवमुपदिशत किं त्वं सर्वेभ्योऽधिकः? किं त्वया सदृश एव नास्ति? किं कश्चिदपि त्वां विजेतुं न शक्नोति? तस्मात् त्वया समाहितेन वर्त्तितव्यमिति॥६॥

पदार्थः-हे **(इन्द्र)** सेना के धारण करनेहारे सेनापति! **(यत्)** जो तू **(रथीतरः)** अतिशय करके रथयुक्त योद्धा है सो **(हरी)** अग्न्यादि वा घोड़ों को **(नकिः)** **(यच्छसे)** क्या रथ में नहीं देता अर्थात् युक्त नहीं करता? क्या **(त्वा)** तुझको **(मज्मना)** बल से कोई भी **(नकिः)** **(अन्वानशे)** व्याप्त नहीं हो सकता? क्या **(त्वत्)** तुझसे अधिक कोई भी **(स्वश्वः)** अच्छे घोड़ों वाला **(नकिः)** नहीं है? इससे तू सब अङ्गों से युक्त हो॥६॥

भावार्थः-हे मनुष्यो! तुम सेनापति को इस प्रकार उपदेश करो कि क्या तू सब से बड़ा है? क्या तेरे तुल्य कोई भी नहीं है? क्या कोई तेरे जीतने को भी समर्थ नहीं है? इससे तू निरभिमानता से सावधान होकर वर्त्ता कर॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

य एक इद्विदयते वसु मर्ताय दाशुषे।

ईशानो अप्रतिष्कुत इन्द्रो अङ्ग॥७॥

यः। एकः। इत्। विऽदयते। वसु। मर्ताय। दाशुषे। ईशानः। अप्रतिऽस्कुतः। इन्द्रः। अङ्ग॥७॥

पदार्थः-(**यः**) एक असहायः (**इत्**) अपि (**विदयते**) विविधं दापयति (**वसु**) द्रव्यम् (**मर्त्ताय**) मनुष्याय (**दाशुषे**) दानशीलाय (**ईशानः**) समर्थः (**अप्रतिष्कुतः**) असंचलितः (**इन्द्रः**) सभाद्यध्यक्षः (**अङ्ग**) मित्र॥७॥

अन्वयः-हे अङ्ग मित्र मनुष्य! य इन्द्र एक इद् दाशुषे मर्त्ताय वसु विदयते ईशानोऽप्रतिष्कुतोऽस्ति, तमेव सेनायामधिकुरुत॥७॥

भावार्थः-हे मनुष्या! यूयं यः सहायरहितोऽपि निर्भयो युद्धादपलायनशीलोऽतिशूरो भवेत्, तमेव सेनाध्यक्षं कुरुत॥७॥

पदार्थः-हे (**अङ्ग**) मित्र मनुष्य! (**यः**) जो (**इन्द्रः**) सभा आदि का अध्यक्ष (**एकः**) सहायरहित (**इत्**) ही (**दाशुषे**) दाता (**मर्त्ताय**) मनुष्य के लिये (**वसु**) द्रव्य को (**विदयते**) बहुत प्रकार देता है और (**ईशानः**) समर्थ (**अप्रतिष्कुतः**) निश्चल है, उसी को सेना आदि में अध्यक्ष कीजिए॥७॥

भावार्थः-हे मनुष्यो! तुम लोग जो सहायरहित भी निर्भय होके युद्ध से नहीं हटता तथा अत्यन्त शूर है, उसी को सेना का स्वामी करो॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत्।

कदा नः शुश्रवद् गिर इन्द्रो अङ्ग॥८॥

कदा। मर्तम्। अराधसम्। पदा। क्षुम्पम्ऽइव। स्फुरत्। कदा। नः। शुश्रवत्। गिरः। इन्द्रः। अङ्ग॥८॥

पदार्थः-(**कदा**) कस्मिन् काले (**मर्त्तम्**) मनुष्यम् (**अराधसम्**) धनरहितम् (**पदा**) पदार्थप्राप्त्या (**क्षुम्पमिव**) यथा सर्पः फणम् (**स्फुरत्**) संचालयेत् (**कदा**) (**नः**) अस्माकम् (**शुश्रवत्**) श्रुत्वा श्रावयेत् (**गिरः**) वाणीः (**इन्द्रः**) सभाद्यध्यक्षः (**अङ्ग**) शीघ्रकारी। यास्कमुनिरिमं मन्त्रमेवं समाचष्टे। **क्षुम्पमहिच्छत्रकं भवति यत् क्षुभ्यते कदा मर्त्तमनाराधयन्तं पादेन क्षुम्पमिवावस्फुरिष्यति। कदा नः श्रोष्यति गिर इन्द्रो अङ्ग। अङ्गेति क्षिप्रनाम।** (निरु०५.१६)॥८॥

अन्वयः-हे अङ्ग क्षिप्रकारिन्निन्द्रो! भवान् पदा क्षुम्पमिवाराधसं मर्त्तं कदा स्फुरत् कदा नोऽस्मान् पदा क्षुम्पमिव स्फुरत् कदा नोऽस्माकं गिरः शुश्रवदिति वयमाशास्महे॥८॥

भावार्थः-हे मनुष्या! यूयं यो दरिद्रानपि धनाढ्यानलसान् पुरुषार्थयुक्तानश्रुतान् बहुश्रुतांश्च कुर्यात्, तमेव सभाध्यक्षं कुरुत। कदायमस्मद्वार्त्तां श्रोष्यति कदा वयमेतस्य वार्त्तां श्रोष्याम इत्थमाशास्महे॥८॥

पदार्थः-(**अङ्ग**) शीघ्रकर्त्ता (**इन्द्रः**) सभा आदि का अध्यक्ष (**पदा**) विज्ञान वा धन की प्राप्ति से (**क्षुम्पमिव**) जैसे सर्प्प फण को (**स्फुरत्**) चलाता है, वैसे (**अराधसम्**) धनरहित (**मर्त्तम्**) मनुष्य को (**कदा**) किस काल में चलावोगे (**कदा**) किस काल में (**नः**) हमको उक्त प्रकार से अर्थात् विज्ञान वा धन की प्राप्ति से जैसे सर्प्प फण को चलाता है, वैसे (**गिरः**) वाणियों को (**शुश्रवत्**) सुन कर सुनावोगे॥८॥

भावार्थः-हे मनुष्यो! तुम लोग में से जो दरिद्रों को भी धनयुक्त, आलसियों को पुरुषार्थी और श्रवणरहितों को श्रवणयुक्त करे, उस पुरुष ही को सभा आदि का अध्यक्ष करो। कब यहाँ हमारी बात को सुनोगे और हम कब आपकी बात को सुनेंगे, ऐसी आशा हम करते हैं॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति।

उग्रं तत्पत्यते शव इन्द्रो अङ्ग॥९॥

यः। चित्। हि। त्वा। बहुऽभ्यः। आ। सुतऽवान्। आऽविवासति। उग्रम्। तत्। पत्यते। शवः। इन्द्रः। अङ्ग॥९॥

पदार्थः-(**यः**) (**चित्**) अपि (**हि**) खलु (**त्वा**) त्वाम् (**बहुभ्यः**) मनुष्येभ्यः (**आ**) समन्तात् (**सुतावान्**) प्रशस्तोत्पन्नपदार्थयुक्तः (**आविवासति**) समन्तात् परिचरति (**उग्रम्**) उत्कृष्टम् (**तत्**) (**पत्यते**) प्राप्यते (**शवः**) बलम् (**इन्द्रः**) सभाद्यध्यक्षः (**अङ्ग**) क्षिप्रकारी सर्वसुहृद्॥९॥

अन्वयः-हे अङ्ग! त्वं यः सुतावानिन्द्रो बहुभ्यस्त्वा त्वामाविवासति य उग्रं शवश्चित्तदा पत्यते, तं हि खलु राजानं मन्यध्वम्॥९॥

भावार्थः-हे मनुष्या! यूयं यः शत्रूणां बलं हत्वा युष्मान् दुःखेभ्यो वियोज्य सुखिनः कर्त्तुं शक्नोति, यस्य भयपराक्रमाभ्यां शत्रवो निलीयन्ते, तं किल सेनापतिं कृत्वानन्दत॥९॥

पदार्थः-हे (**अङ्ग**) मित्र! तू जो (**सुतावान्**) अन्नादि पदार्थों से युक्त (**इन्द्रः**) परमैश्वर्य का प्रापक (**बहुभ्यः**) मनुष्यों से (**त्वा**) तुझको (**आविवासति**) सेवा करता है, जो शत्रुओं का (**उग्रम्**) अत्यन्त (**शवः**) बल (**तत्**) उसको (**चित्**) भी (**आपत्यते**) प्राप्त होता है (**तम्**) (**हि**) उसी को राजा मानो॥९॥

भावार्थः-हे मनुष्यो! तुम लोग जो शत्रुओं के बल का हनन करके तुमको दुःखों से हटाकर सुखयुक्त करने को समर्थ हो तथा जिसके भय और पराक्रम से शत्रु नष्ट होते हैं, उसे सेनापति करके आनन्द को प्राप्त होओ॥९॥

पुनः स कीदृशः स्यादित्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स्वा॒दोरि॒त्था वि॑षू॒वतो॒ मध्व॑: पिबन्ति गौ॒र्य॑:।
या इन्द्रे॑ण स॒याव॑री॒र्वृष्णा॒ मद॑न्ति शो॒भसे॒ वस्वी॒रनु॑ स्व॒राज्य॑म्॥ १०॥ ६॥

स्वा॒दोः। इ॒त्था। वि॒षु॒ऽव॑तः। मध्व॑:। पि॒ब॒न्ति॒। गौ॒र्य॑:। याः। इन्द्रे॑ण। स॒ऽया॒व॑रीः। वृष्णा॑। मद॑न्ति। शो॒भसे॑। वस्वी॑:। अनु॑। स्व॒राज्य॑म्॥ १०॥

पदार्थः-(**स्वादोः**) स्वादयुक्तस्य (**इत्था**) अनेन हेतुना विषुवतः प्रशस्ता विषुर्व्याप्तिर्यस्य तस्य (**मध्वः**) मधुरादिगुणयुक्तस्य (**पिबन्ति**) (**गौर्यः**) शुभ्रा किरणा इव उद्यमयुक्ताः सेनाः (**याः**) (**इन्द्रेण**) सूर्य्येण सह वर्त्तमानाः (**सयावरीः**) याः समानं यान्ति ताः (**वृष्णा**) बलिष्ठेन (**मदन्ति**) हर्षन्ति (**शोभसे**) शोभितुम् (**वस्वीः**) पृथिव्यादिसंबन्धिनीः (**अनु**) आनुकूल्ये (**स्वराज्यम्**) स्वकीयराष्ट्रम्॥१०॥

अन्वयः-हे इन्द्र! वृष्णेन्द्रेण सयावरीर्वस्वीगौर्यः (**किरणाः**) स्वराज्यं शोभसेऽनुमदन्ती इत्था स्वादोर्विषुवतो मध्वः पिबन्तीव त्वमपि वर्त्तस्व॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि स्वसेनापतिभिर्वीरसेनाभिश्च विना स्वराज्यस्य शोभारक्षणे भवितुं शक्ये इति। यथा सूर्यस्य किरणाः सूर्येण विना स्थातुं वायुना जलाकर्षणं कृत्वा वर्षितुं च नु शक्नुवन्ति तथा सेनापतिना राज्ञा चान्तरेण प्रजाश्चानन्दितुं न शक्नुवन्ति॥१०॥

पदार्थः-जैसे (**वृष्णा**) सुख के वर्षाने (**इन्द्रेण**) सूर्य के साथ (**सयावरीः**) तुल्य गमन करनेवाली (**वस्वीः**) पृथिवी [आदि से सम्बन्ध करनेवाली] (**गौर्यः**) किरणों से (**स्वराज्यम्**) अपने प्रकाशरूप राज्य के (**शोभसे**) शोभा के लिये (**अनुमदन्ति**) हर्ष का हेतु होती हैं, वे (**इत्था**) इस प्रकार से (**स्वादोः**) स्वादयुक्त (**विषुवतः**) व्याप्ति वाले (**मध्वः**) आदि गुण को (**पिबन्ति**) पीती हैं, वैसे तुम भी वर्त्ता करो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। अपनी सेना के पति और वीरपुरुषों की सेना के विना निज राज्य की शोभा तथा रक्षा नहीं हो सकती। जैसे सूर्य की किरण सूर्य के विना स्थित और वायु के विना जल का आकर्षण करके वर्षाने के लिये समर्थ नहीं हो सकती, वैसे सेनाध्यक्ष और राजा के विना प्रजा आनन्द करने को समर्थ नहीं हो सकती॥१०॥

पुनस्तत्सम्बन्धिगुणा उपदिश्यन्ते॥

अब फिर उससे सम्बन्धित गुणों का उपदेश किया है॥

ता अ॑स्य पृशना॒युव॒: सोमं॑ श्रीणन्ति॒ पृश्न॑यः।

प्रि॒या इन्द्र॑स्य धे॒नवो॒ वज्रं॑ हिन्वन्ति॒ साय॑कं॒ वस्वी॒रनु॑ स्व॒राज्य॑म्॥ ११॥

ताः। अ॒स्य॒। पृ॒श॒न॒ऽयुव॑ः। सोम॑म्। श्री॒ण॒न्ति॒। पृश्न॑यः। प्रि॒याः। इन्द्र॑स्य। धे॒नवः॑। वज्र॑म्। हि॒न्व॒न्ति॒। साय॑कम्। वस्वीः॑। अनु॑। स्व॒ऽराज्य॑म्॥ ११॥

पदार्थः-(**ताः**) उक्ता वक्ष्यमाणाश्च (**अस्य**) (**पृशनायुवः**) आत्मनः स्पर्शमिच्छन्त्यः। अत्र **छान्दसो वर्णलोपो वे**ति सलोपः। (**सोमम्**) पदार्थरसमैश्वर्यं वा (**श्रीणन्ति**) पचन्ति (**पृश्नयः**) याः स्पृशन्ति ताः। अत्र **घृणिपृश्नि०** (उणा०४.५४) अनेनायं निपातितः। (**प्रियाः**) तर्पयन्ति ताः (**इन्द्रस्य**) सूर्यस्य वा सेनाध्यक्षस्य वा (**धेनवः**) किरणा गावो वाचो वा (**वज्रम्**) तापसमूहं किरणसमूहं वा (**हिन्वन्ति**) प्रेरयन्ति (**सायकम्**) स्यन्ति क्षयन्ति येन तम् (**वस्वीः**) पृथिवीसम्बन्धिन्यः (**अनु**) (**स्वराज्यम्**)॥ ११॥

अन्वयः-हे मनुष्या! यूयमस्येन्द्रस्य याः पृशनायुवः पृश्नयः प्रिया धेनवः सोमं श्रीणन्ति सायकं वज्रं हिन्वन्ति वस्वीः स्वराज्यमनुभवन्ति ताः प्राप्नुत॥ ११॥

भावार्थः-यथा गोपालस्य धेनवो जलं पीत्वा घासं जग्ध्वा सुखं वर्धित्वाऽन्येषामानन्दं वर्धयन्ति, तथैव सेनाध्यक्षस्य सेनाः सूर्यस्य च किरणा ओषधीभ्यो वैद्यकशास्त्रसम्पादितं परिपक्वं वा रसं पीत्वा विजयं प्रकाशं वा कृत्वानन्दयन्ति॥ ११॥

पदार्थः-हे मनुष्यो! तुम लोग (**अस्य**) इस (**इन्द्रस्य**) सूर्य वा सेना के अध्यक्ष की (**पृशनायुवः**) अपने को स्पर्श करनेवाली अर्थात् उलट-पलट अपना स्पर्श करना चाहती (**पृश्नयः**) स्पर्श करती और (**प्रियाः**) प्रसन्न करनेहारी (**धेनवः**) किरण वा गौ वा वाणी (**सोमम्**) ओषधि रस वा ऐश्वर्य को (**श्रीणन्ति**) सिद्ध करती और (**सायकम्**) दुर्गुणों को क्षय करनेहारे ताप वा शस्त्रसमूह को (**हिन्वन्ति**) प्रेरणा देती है (**वस्वीः**) और वे पृथिवी से सम्बन्ध करनेवाली (**स्वराज्यम्**) अपने राज्य के (**अनु**) अनुकूल होती है, उनको प्राप्त होओ॥ ११॥

भावार्थः-जैसे गोपाल की गौ जल रस को पी, घास को खा, निज सुख को बढ़ाकर, औरों के आनन्द को बढ़ाती है, वैसे ही सेनाध्यक्ष की सेना और सूर्य की किरण औषधियों से वैद्यकशास्त्र के अनुकूल वा उत्पन्न हुए परिपक्व रस को पीकर विजय और प्रकाश को करके आनन्द कराती हैं॥ ११॥

पुनरेताः किं कुर्वन्तीत्युपदिश्यते॥

फिर वे क्या करती हैं, इस विषय को अगले मन्त्र में कहा है॥

ता अ॑स्य॒ नम॑सा॒ सह॑: सप॒र्यन्ति॒ प्रचे॑तसः।

व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम्॥ १२॥

ताः। अस्य। नमसा। सहः। सपर्यन्ति। प्रऽचेतसः। व्रतानि। अस्य। सश्चिरे। पुरूणि। पूर्वऽचित्तये। वस्वीः। अनु। स्वऽराज्यम्॥ १२॥

पदार्थः-(**ताः**) (**अस्य**) प्रतिपादितस्य (**नमसा**) अन्नेन वज्रेण वा (**सहः**) बलम् (**सपर्यन्ति**) सेवन्ते (**प्रचेतसः**) प्रकृष्टं चेतो विज्ञानं यासां ताः (**व्रतानि**) नियमानुगतानि धर्म्याणि कर्माणि (**अस्य**) (**सश्चिरे**) गच्छन्ति (**पुरूणि**) बहूनि (**पूर्वचित्तये**) पूर्वेषां संज्ञानाय संज्ञापनाय वा (**वस्वीः**) (**अनु**) (**स्वराज्यम्**) इति पूर्ववत्॥ १२॥

अन्वयः-हे मनुष्या! यूयं यथा स्वराज्यमर्चन् न्यायाधीशः सर्वान् पालयति, तथाऽस्य नमसा सह वर्त्तमानाः प्रचेतसः सेनाः सहः सपर्यन्ति, या अस्य पूर्वचित्तये पुरूणि व्रतानि सश्चिरे ता वस्वीरनुमोदितुं सेवध्वम्॥ १२॥

भावार्थः-मनुष्यैर्नहि सामग्र्या बलेन नियमैर्विनाऽनेकानि राज्यादीनि सुखानि सम्पद्यन्ते तस्माद् यमनियमानामानुयोग्यमेतत्सर्वं संचिन्त्य विजयादीनि कर्माणि साधनीयानि॥ १२॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे (**स्वराज्यम्**) अपने राज्य का सत्कार करता हुआ न्यायाधीश सबका पालन करता है, वैसे (**अस्य**) इस अध्यक्ष के (**नमसा**) अन्न वा वज्र के साथ वर्त्तमान (**प्रचेतसः**) उत्तम ज्ञानयुक्त सेना (**सहः**) बल को (**सपर्यन्ति**) सेवन करती हैं (**याः**) जो (**अस्य**) सेनाध्यक्ष के (**पूर्वचित्तये**) पूर्वज्ञान के लिये (**पुरूणि**) बहुत (**व्रतानि**) सत्यभाषण नियम आदि को (**सश्चिरे**) प्राप्त होती हैं (**ताः**) उन (**वस्वीः**) पृथिवी सम्बन्धियों को देशों के आनन्द भोगने के लिये सेवन करो॥ १२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि सामग्री बल और अच्छे नियमों के विना बहुत राज्य आदि के सुख नहीं प्राप्त होते, इस हेतु से यम-नियमों के अनुकूल जैसा चाहिये, वैसा इसका विचार करके विजय आदि धर्मयुक्त कर्मों को सिद्ध करें॥ १२॥

पुनस्तस्य कृत्यमुपदिश्यते॥

फिर उस राजा के कृत्य का उपदेश अगले मन्त्र में किया है॥

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव॥ १३॥

इन्द्रः। दधीचः। अस्थऽभिः। वृत्राणि। अप्रतिऽस्कुतः। जघान। नवतीः। नव॥ १३॥

पदार्थः-(**इन्द्रः**) सूर्यलोकः (**दधीचः**) ये दधीन् वाय्वादीनञ्चन्ति तान् (**अस्थभिः**) अस्थिरैश्चञ्चलैः किरणचलनैः। अत्र **छन्दस्यपि दृश्यते।** (अष्टा०७.१) अनेनानङादेशः। (**वृत्राणि**) वृत्रसंबन्धिभूतानि जलानि (**अप्रतिष्कुतः**) असंचलितः (**जघान**) हन्ति (**नवतीः**) नवतिसंख्याकाः (**नव**) नव दिशामवयवाः॥ १३॥

अन्वयः-हे सेनेश! यथाप्रतिष्कुत इन्द्रोऽस्थभिर्नवनवतीर्दधीचो वृत्राणि कणीभूतानि जलानि जघान हन्ति तथा शत्रून् हिन्धि॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः स एव सेनापतिः कार्यो यः सूर्यवच्छत्रूणां हन्ता स्वसेनारक्षकोऽस्तीति वेद्यम्॥१३॥

पदार्थः-हे सेनापते! जैसे **(अप्रतिष्कुतः)** सब ओर से स्थिर **(इन्द्रः)** सूर्यलोक **(अस्थभिः)** अस्थिर किरणों से **(नव नवतीः)** निन्नानवे प्रकार के दिशाओं के अवयवों को प्राप्त हुए **(दधीचः)** जो धारण करनेहारे वायु आदि को प्राप्त होते हैं, उन **(वृत्राणि)** मेघ के सूक्ष्म अवयव रूप जलों को **(जघान)** हनन करता है, वैसे तू अनेक अधर्मी शत्रुओं का हनन कर॥१३॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। वही सेनापति होने के योग्य होता है, जो सूर्य के समान दुष्ट शत्रुओं का हन्ता और अपनी सेना का रक्षक है॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

इ॒च्छन्नश्व॑स्य॒ यच्छिर॒: पर्व॑ते॒ष्वप॑श्रितम्। तद्विदच्छर्य॒णाव॑ति॥ १४॥

इ॒च्छन्। अश्व॑स्य। यत्। शिर॑:। पर्व॑तेषु। अप॑ऽश्रितम्। तत्। वि॒द॒त्। श॒र्य॒णाऽव॑ति॥ १४॥

पदार्थः-**(इच्छन्)** **(अश्वस्य)** आशुगामिनः **(यत्)** **(शिरः)** उत्तमाङ्गम् **(पर्वतेषु)** शैलेषु मेघावयवेषु वा **(अपश्रितम्)** आसेवितम् **(तत्)** **(विदत्)** विद्यात् **(शर्यणावति)** शर्यणोऽन्तरिक्षदेशस्तस्यादूरभवे। अत्र **मध्वादिभ्यश्च।** (अ०।४.२.८३) अनेन मतुप्॥१४॥

अन्वयः-यथेन्द्रोऽश्वस्य यच्छर्यणावति पर्वतेष्वपश्रितं शिरोऽस्ति तज्जघान हन्ति तद्वच्छत्रुसेनाया उत्तमाङ्गं छेत्तुमिच्छन् सुखानि विदल्लभेत्॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्योऽन्तरिक्षमाश्रितं मेघं छित्त्वा भूमौ निपातयति, तथैव पर्वतदुर्गाश्रितमपि शत्रुं हत्वा भूमौ निपातयेत् नैवं विना राज्यव्यवस्था स्थिरा भवितुं शक्या॥१४॥

पदार्थः-जैसे **(इन्द्रः)**[१२] सूर्य **(अश्वस्य)** शीघ्रगामी मेघ का **(यत्)** जो **(शर्यणावति)** आकाश में **(पर्वतेषु)** पहाड़ वा मेघों में **(अपश्रितम्)** आश्रित **(शिरः)** उत्तमाङ्ग के समान अवयव है, उसको छेदन करता है, वैसे शत्रु की सेना के उत्तमाङ्ग के नाश की **(इच्छन्)** इच्छा करता हुआ सुखों को सेनापति **(विदत्)** प्राप्त होवे॥१४॥

---

१२. 'इन्द्रः' पद मन्त्र में पठित नहीं है।

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य आकाश में रहनेहारे मेघ का छेदन कर भूमि में गिराता है, वैसे पर्वत और किलों में भी रहनेहारे दुष्ट शत्रु का हनन करके भूमि में गिरा देवे, इस प्रकार किये विना राज्य की व्यवस्था स्थिर नहीं हो सकती॥१४॥

अथ राज्ञः सूर्यवत्कृत्यमुपदिश्यते॥

अब राजा का सूर्य के समान करने योग्य कर्म का उपदेश अगले मन्त्र में किया है॥

अत्राह॒ गोर॑मन्वत॒ नाम॒ त्वष्टु॑रपी॒च्य॑म्। इ॒त्था च॒न्द्रम॑सो गृ॒हे॥ १५॥ ७॥

अत्र॑। अह॑। गोः। अ॒म॒न्व॒त॒। नाम॑। त्वष्टुः॑। अ॒पी॒च्य॑म्। इ॒त्था। च॒न्द्रम॑सः। गृ॒हे॥ १५॥

पदार्थः-(**अत्र**) अस्मिञ्जगति (**अह**) विनिग्रहे (**गोः**) पृथिव्याः (**अमन्वत**) मन्यन्ते (**नाम**) प्रसिद्धं रचनं नामकरणं वा (**त्वष्टुः**) मूर्तद्रव्यछेदकस्य (**अपीच्यम्**) येऽप्यञ्चन्ति प्राप्नुवन्ति तेषु साधुम् (**इत्था**) अनेन हेतुना (**चन्द्रमसः**) चन्द्रलोकादेः (**गृहे**) स्थाने॥१५॥

अन्वयः-हे राजादयो मनुष्या! यूयं यथाऽत्रनाम गोश्चन्द्रमसस्त्वष्टुरपीच्यमस्तीत्थामन्वत तथाऽह न्यायप्रकाशाय प्रजागृहे वर्त्तध्वम्॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्ज्ञातव्यमीश्वरविद्यावृद्ध्योर्हानिर्विपरीतता भवितुं न शक्या, सर्वेषु कालेषु सर्वासु क्रियास्वेकरससृष्टिनियमा भवन्ति। यथा सूर्यस्य पृथिव्या सहाकर्षणप्रकाशादिसम्बन्धाः सन्ति, तथैवान्यभूगोलैः सह सन्ति। कुत ईश्वरेण संस्थापितस्य नियमस्य व्यभिचारो न भवति॥१५॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे (**अत्र**) इस जगत् में (**नाम**) प्रसिद्ध (**गौः**) पृथिवी और (**चन्द्रमसः**) चन्द्रलोक के मध्य में (**त्वष्टुः**) छेदन करनेहारे सूर्य का (**अपीच्यम्**) प्राप्त होनेवालों में योग्य प्रकाशरूप व्यवहार है (**इत्था**) इस प्रकार (**अमन्वत**) मानते हैं, वैसे (**अह**) निश्चय से जाके (**गृहे**) घरों में न्यायप्रकाशार्थ वर्त्तो॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को जानना चाहिये कि ईश्वर की विद्यावृद्धि की हानि और विपरीतता नहीं हो सकती। सब काल सब क्रियाओं में एकरस सृष्टि के नियम होते हैं। जैसे सूर्य का पृथिवी के साथ आकर्षण और प्रकाश आदि सम्बन्ध हैं, वैसे ही अन्य भूगोलों के साथ। क्योंकि ईश्वर से स्थिर किये नियम का व्यभिचार अर्थात् भूल कभी नहीं होती॥१५॥

पुनः सेनापतेः कृत्यमुपदिश्यते॥

फिर सेनापति के योग्य कर्म का उपदेश करते हैं॥

को अ॒द्य यु॑ङ्क्ते धु॒रि गा ऋ॒तस्य॒ शिमी॑वतो भा॒मिनो॑ दु॒र्हणा॑यून्।
आ॒सन्नि॑षून् हृ॒त्स्वसो॑ मयो॒भून् य एषां॑ भृ॒त्यामृ॒णध॒त् स जी॑वात्॥ १६॥

कः। अद्य। युऽङ्क्ते। धुरि। गाः। ऋतस्य। शिमीऽवतः। भामिनः। दुःऽहृणायून्। आसन्ऽइषून्। हृत्सुऽअसः। मयःऽभून्। यः। एषाम्। भृत्याम्। ऋणधत्। सः। जीवात्॥ १६॥

पदार्थः-(**कः**) (**अद्य**) इदानीम् (**युङ्क्ते**) युक्तो भवति (**धुरि**) शत्रुहिंसने युद्धे (**गाः**) भूमिः (**ऋतस्य**) सत्याचारस्य (**शिमीवतः**) प्रशस्तकर्मयुक्तान् (**भामिनः**) शत्रूणामुपरिक्रोधकारिणः (**दुर्हृणायून्**) शत्रुभिर्दुर्लभं हृणं प्रसह्यकरणं येषां ते दुर्हृणास्त इवाचरन्तीति दुर्हृणायवस्तान् यन्त्यत्र **क्याच्छन्दसी**त्युः प्रत्ययः। (**आसन्निषून्**) आसने प्राप्ता बाणा यैस्तान् (**हृत्स्वसः**) ये हृत्स्वस्यन्ति बाणान् तान् (**मयोभून्**) मयः सुखं भावुकान् (**यः**) (**एषाम्**) (**भृत्याम्**) भृत्येषु साध्वीं सेनाम् (**ऋणधत्**) समृध्नुयात् (**सः**) (**जीवात्**) चिरञ्जीवेत्॥ १६॥

अन्वयः-कोऽद्यर्तस्य शिमीवतो भामिनो दुर्हृणायूनासन्निषून् हृत्स्वसो मयोभून् सुवीरान् धुरि युङ्क्ते य एषां भृत्यां गा ऋणधत् स चिरञ्जीवात्॥ १६॥

भावार्थः-सर्वाध्यक्षो राजा सर्वान् प्रसिद्धामाज्ञां दद्यात् सर्वान् सेनास्थवीरान् सत्याचारेण युञ्जीत सदैषां जीविकां वर्द्धयित्वा स्वयं दीर्घायुः स्यात्॥ १६॥

पदार्थः-(**कः**) कौन (**अद्य**) इस समय (**ऋतस्य**) सत्य आचरण सम्बन्धी (**शिमीवतः**) उत्तम क्रियायुक्त (**भामिनः**) शत्रुओं के ऊपर क्रोध करने (**दुर्हृणायून्**) शत्रुओं को जिनका दुर्लभ सहसा कर्म उनके समान आचरण करने (**आसन्निषून्**) अच्छे स्थान में बाण पहुंचाने (**हृत्स्वसः**) शत्रुओं के हृदय में शस्त्र प्रहार करने और (**मयोभून्**) स्वराज्य के लिये सुख करनेहारे श्रेष्ठ वीरों को (**धुरि**) संग्राम में (**युङ्क्ते**) युक्त करता है वा (**यः**) जो (**एषाम्**) इनकी जीविका के निमित्त (**गाः**) भूमियों को (**ऋणधत्**) समृद्धियुक्त करे (**सः**) वह (**जीवात्**) बहुत समय पर्यन्त जीवे॥ १६॥

भावार्थः-सबका अध्यक्ष राजा सबको प्रकट आज्ञा देवे। सब सेना वा प्रजास्थ पुरुषों को सत्य आचरणों में नियुक्त करे। सर्वदा उनकी जीविका बढ़ाके आप बहुत काल पर्यन्त जीवे॥ १६॥

अथ प्रश्नोत्तरै राजधर्ममुपदिश्यते॥

अब अगले मन्त्र में प्रश्नोत्तर से राजधर्म का उपदेश किया है॥

क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति।
कस्तोकाय क इभायोत रायेऽधिं ब्रवत् तन्वे३ को जनाय॥ १७॥

कः। ईषते। तुज्यते। कः। बिभाय। कः। मंसते। सन्तम्। इन्द्रम्। कः। अन्ति। कः। तोकाय। कः। इभाय। उत। राये। अधिं। ब्रवत्। तन्वे। कः। जनाय॥ १७॥

पदार्थः-(**कः**) कश्चित् (**ईषते**) युद्धमिच्छेत् (**तुज्यते**) हिंस्यते (**कः**) (**बिभाय**) बिभेति (**कः**) (**मंसते**) मन्यते (**सन्तम्**) राजव्यवहारेषु वर्त्तमानम् (**इन्द्रम्**) परमैश्वर्यकारकम् (**कः**) (**अन्ति**) समीपे (**कः**)

(तोकाय) सन्तानाय **(कः)** **(इभाय)** हस्तिने **(उत)** अपि **(राये)** उत्तमश्रिये **(अधि)** अध्यक्षतया **(ब्रवत्)** ब्रूयात् **(तन्वे)** शरीराय **(कः)** **(जनाय)** प्रधानाय॥१७॥

अन्वयः-हे सेनापते! सेनास्थभृत्यानां मध्ये कः शत्रूनीषते? कः शत्रुभिस्तुज्यते? को युद्धे बिभाय? कः सन्तमिन्द्रं मंसते? कस्तोकायान्ति वर्त्तते? क इभाय शिक्षते? उतापि को राये प्रवर्त्तेत? कस्तन्वे जनाय चाधिब्रवदिति? त्वं ब्रूहि॥१७॥

भावार्थः-ये दीर्घब्रह्मचर्येण सुशिक्षयान्यैः शुभैर्गुणैर्युक्तास्ते सर्वाण्येतानि कर्म्माणि कर्त्तुं शक्नुवन्ति, नेतरे। यथा राजा सेनापतिं प्रति सर्वां स्वसेनाभृत्यव्यवस्थां पृच्छेत् तथा सेनाध्यक्षः स्वाधीनान्नध्यक्षान् स्वयमेतां पृच्छेत्। यथा राजा सेनापतिमाज्ञापयेत् तथा स्वयं सेनाध्यक्षान्नाज्ञापयेत्॥१७॥

पदार्थः-हे सेनापते! सेनाओं में स्थित भृत्यों में **(कः)** कौन शत्रुओं को **(ईषते)** मारता है। **(कः)** कौन शत्रुओं से **(तुज्यते)** मारा जाता है **(कः)** कौन युद्ध में **(बिभाय)** भय को प्राप्त होता है **(कः)** कौन **(सन्तम्)** राजधर्म में वर्त्तमान **(इन्द्रम्)** उत्तम ऐश्वर्य के दाता को **(मंसते)** जानता है **(कः)** कौन **(तोकाय)** सन्तानों के **(अन्ति)** समीप में रहता है **(कः)** कौन **(इभाय)** हाथी के उत्तम होने के लिये शिक्षा करता है **(उत)** और **(कः)** कौन **(राये)** बहुत धन करने के लिए वर्त्तता और **(तन्वे)** शरीर और **(जनाय)** मनुष्यों के लिये **(अधिब्रवत्)** आज्ञा देवे, इसका उत्तर आप कहिये॥१७॥

भावार्थः-जो अड़तालीस वर्ष पर्यन्त ब्रह्मचर्य, उत्तम शिक्षा और अन्य शुभ गुणों से युक्त होते हैं, वे विजयादि कर्मों को कर सकते हैं। जैसे राजा सेनापति को सब अपनी सेना के नौकरों की व्यवस्था को पूछे, वैसे सेनापति भी अपने अधीन छोटे सेनापतियों को स्वयं सब वार्त्ता पूछे। जैसे राजा सेनापति को आज्ञा देवे, वैसे (सेनापति स्वयं) सेना के प्रधान पुरुषों को करने योग्य कर्म की आज्ञा देवे॥१७॥

पुनस्तदेवोपदिश्यते॥

फिर भी उक्त विषय का उपदेश किया है॥

को अ॒ग्निमीट्टे॒ ह॒विषा॑ घृ॒तेन॑ स्रु॒चा य॑जाता ऋ॒तुभि॑र्ध्रु॒वेभि॑:।
कस्मै॑ दे॒वा आ व॑हाना॒शु होम॒ को मं॑सते वी॒तिहो॑त्रः सुदे॒वः॥१८॥

कः। अ॒ग्निम्। ईट्टे॒। ह॒विषा॑। घृ॒तेन॑। स्रु॒चा। य॒जा॒तै॒। ऋ॒तुऽभि॑:। ध्रु॒वेभि॑:। कस्मै॑। दे॒वाः। आ। व॒हा॒न्। आ॒शु। होम॑। कः। मं॒स॒ते॒। वी॒तिऽहो॑त्रः। सु॒ऽदे॒वः॥१८॥

पदार्थः-**(कः)** **(अग्निम्)** पावकमाग्नेयाऽस्त्रं वा **(ईट्टे)** ऐश्वर्यहेतुं विदधाति **(हविषा)** होतव्येन विज्ञानेन धनादिना वा **(घृतेन)** आज्येनोदकेन वा **(स्रुचा)** कर्मणा **(यजातै)** यजेत **(ऋतुभिः)** वसन्तादिभिः **(ध्रुवेभिः)** निश्चलैः कालावयवैः **(कस्मै)** **(देवाः)** विद्वांसः **(आ)** **(वहान्)** समन्तात् प्राप्नुयुः **(आशु)**

सद्यः **(होम)** ग्रहणं दानं वा **(कः)** **(मंसते)** जानाति **(वीतिहोत्रः)** प्राप्ताप्तविज्ञानः **(सुदेवः)** शुभैर्गुणकर्मस्वभावै-र्देदीप्यमानः॥१८॥

अन्वयः-हे ऋत्विक्! त्वं को वीतिहोत्रो हविषा घृतेनाऽग्निमीट्टे स्रुचा ध्रुवेभिर्ऋतुभिर्यजाते देवाः कस्मै होमाऽऽश्वावहान् कः सुदेव एतत्सर्वं मंसत इति ब्रूहि॥१८॥

भावार्थः-हे विद्वन्! केन साधनेन कर्मणा वाऽग्निविद्याऽस्मान् प्राप्नुयात्? केन यज्ञः सिध्यते? कस्मै प्रयोजनाय विद्वांसो विज्ञानयज्ञं तन्वते?॥१८॥

पदार्थः-हे विद्वान्! **(कः)** कौन **(वीतिहोत्रः)** विज्ञान और श्रेष्ठ क्रियायुक्त पुरुष **(हविषाः)** विचार और **(घृतेन)** घी से **(अग्निम्)** अग्नि को **(ईट्टे)** ऐश्वर्य प्राप्ति का हेतु करता है, **(कः)** कौन **(स्रुचा)** कर्म से **(ध्रुवेभिः)** निश्चल **(ऋतुभिः)** वसन्तादि ऋतुओं में **(यजातै)** ज्ञान और क्रियायज्ञ को करे, **(देवाः)** विद्वान् लोग **(कस्मै)** किसके लिये **(होम)** ग्रहण वा दान को **(आशु)** शीघ्र **(आवहान्)** प्राप्त करावें, कौन **(सुदेवः)** उत्तम विद्वान् इस सबको **(मंसते)** जानता है, इस का उत्तर कहिये॥१८॥

भावार्थः-हे विद्वन्! किस साधन वा कर्म से अग्निविद्या को प्राप्त हों? और किससे क्रियारुप यज्ञ सिद्ध होवे? किस प्रयोजन के लिये विद्वान् लोग यज्ञ का विस्तार करते हैं?॥१८॥

पुनरीश्वरसभाद्यध्याक्षौ कीदृशौ जानीयादित्युपदिश्यते॥

फिर ईश्वर और सभा आदि के अध्यक्षों को कैसे जानें, इस विषय को अगले मन्त्र में कहा है॥

त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः॥१९॥

त्वम्। अङ्ग। प्र। शंसिषः। देवः। शविष्ठ। मर्त्यम्। न। त्वत्। अन्यः। मघऽवन्। अस्ति। मर्डिता। इन्द्र। ब्रवीमि। ते। वचः॥१९॥

पदार्थः-**(त्वम्)** **(अङ्ग)** मित्र **(प्र)** **(शंसिषः)** प्रशंसे **(देवः)** दिव्यगुणः **(शविष्ठ)** अतिबलयुक्त **(मर्त्यम्)** मनुष्यम् **(न)** निषेधे **(त्वत्)** **(अन्यः)** भिन्नः **(मघवन्)** परमधनप्रापक **(अस्ति)** **(मर्डिता)** सुखप्रदाता **(इन्द्र)** दुःखविदारकं **(ब्रवीमि)** उपदिशामि **(ते)** तुभ्यम् **(वचः)** धर्म्यं वचनम्॥१९॥

अन्वयः-हे अङ्ग शविष्ठ! यतस्त्वं देवोऽसि तस्मान् मर्त्यं प्रशंसिषः। हे मघवन्निन्द्र! यतस्त्वदन्यो मर्डिता सुखप्रदाता नाऽस्ति तस्मात् ते वचो ब्रवीमि॥१९॥

भावार्थः-मनुष्यैः प्रशंसितकर्मणानुपमेन सततं सुखप्रदेन धार्मिकेण मनुष्येण सहैव मित्रतां कृत्वा परस्परं हितोपदेशः कर्तव्यः॥१९॥

पदार्थः-हे **(अङ्ग)** मित्र **(शविष्ठ)** परम बलयुक्त! जिससे **(त्वम्)** तू **(देवः)** विद्वान् है, उससे **(मर्त्यम्)** मनुष्य को **(प्र शंसिषः)** प्रशंसित कर। हे **(मघवन्)** उत्तम धन के दाता **(इन्द्र)** दुःखों का

नाशक! जिससे **(त्वम्)** तुझसे **(अन्यः)** भिन्न कोई भी **(मर्डिता)** सुखदायक **(नास्ति)** नहीं है, उससे **(ते)** तुझे **(वचः)** धर्म्मयुक्त वचनों का **(ब्रवीमि)** उपदेश करता हूँ॥१९॥

भावार्थः-मनुष्यों को योग्य है कि उत्तम कर्म करने, असाधारण सदा सुख देनेहारे धार्मिक मनुष्यों के साथ ही मित्रता करके एक-दूसरे को सुख देने का उपदेश किया करें॥१९॥

पुनः स सभाध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

मा ते॑ राधा॑ꣳसि॒ मा त॑ ऊ॒तयो॑ वसो॒ऽस्मान् कदा॑ च॒ना द॑भन्।
विश्वा॑ च न उपमिमी॒हि मा॑नुष॒ वसू॑नि चर्ष॒णिभ्य॒ आ॥२०॥८॥१३॥

मा। ते॒। राधा॑ꣳसि। मा। ते॒। ऊ॒तयः॑। व॒सो॒ इति॑। अ॒स्मान्। कदा॑। च॒न। द॒भ॒न्। विश्वा॑। च॒। नः॒। उ॒प॒ऽमि॒मी॒हि॒। मा॒नु॒ष॒। वसू॑नि। च॒र्ष॒णिऽभ्यः॑। आ॥२०॥

पदार्थः-(**मा**) निषेधे (**ते**) (**राधांसि**) धनानि (**मा**) (**ते**) (**ऊतयः**) रक्षणादीनि कर्माणि (**वसो**) सुखेषु वासयित (**अस्मान्**) (**कदा**) (**चन**) कस्मिन्नपि काले (**दभन्**) हिंस्युः (**विश्वा**) सर्वाणि (**च**) समुच्चये (**नः**) अस्मान् (**उपमिमीहि**) श्रेष्ठैरुपमितान् कुरु (**मानुष**) मनुष्यस्वभावयुक्त (**वसूनि**) विज्ञानादिधनानि (**चर्षणिभ्यः**) उत्तमेभ्यो मनुष्येभ्यः (**आ**) अभितः॥२०॥

अन्वयः-हे वसो! ते राधांस्यस्मान् कदाचन मा दभन्। त ऊतयोऽस्मान् मा हिंसन्तु। हे मानुष! यथा त्वं चर्षणिभ्यो विश्वा वसूनि ददासि तथा च नोऽस्मान् उपमिमीहि॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव धार्मिका मनुष्या सन्ति येषां तनुर्मनो धनानि च सर्वान् सुखयेयुः। त एव प्रशंसिता भवन्ति ये च जगदुपकाराय प्रयतन्त इति ॥२०॥

अस्मिन् सूक्ते सेनापतिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति चतुरशीतितमं ८४ सूक्तमष्टमो ८ वर्गश्च समाप्तः॥

पदार्थः-हे (**वसो**) सुख में वास करनेहारे! (**ते**) आपके (**राधांसि**) धन (**अस्मान्**) हमको (**कदाचन**) कभी भी (**मा दभन्**) दुःखदायक न हों (**ते**) तेरी (**ऊतयः**) रक्षा (**अस्मान्**) हमको (**मा**) मत दुःखदायी होवे। हे (**मानुष**) मनुष्यस्वभावयुक्त! जैसे तू (**चर्षणिभ्यः**) उत्तम मनुष्यों को (**विश्वा**) विज्ञान आदि सब प्रकार के (**वसूनि**) धनों को देता है, वैसे हमको भी दे (**च**) और (**नः**) हमको विद्वान् धार्मिकों की (**आ**) सब ओर से (**उपमिमीहि**) उपमा को प्राप्त कर॥२०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही धार्मिक मनुष्य हैं जिनका शरीर, मन और धन सबको सुखी करे, वे ही प्रशंसा के योग्य हैं जो जगत् के उपकार के लिये प्रयत्न करते हैं॥२०॥

इस सूक्त में सेनापति के गुण-वर्णन होने से इस सूक्तार्थ की संगति पूर्व सूक्तार्थ के संग जाननी चाहिये॥

यह चौरासीवां ८४ सूक्त और आठवाँ ८ वर्ग समाप्त हुआ॥

अथ द्वादशर्च्चस्य पञ्चाशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। मरुतो देवताः।
१,२,६,११ जगती। ३,७,८ निचृज्जगती। ४,९,१० विराड्जगती छन्दः। निषादः स्वरः। ५
विराट् त्रिष्टुप्। १२ त्रिष्टुप् छन्दः। धैवतः स्वरः॥
पुनस्ते सेनाध्यक्षादयः कीदृश इत्युपदिश्यते॥

फिर वे सेनाध्यक्ष आदि कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र ये शुम्भन्ते जनयो न सप्तयो यामन् रुद्रस्य सूनवः सुदंससः॥
रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः॥ १॥

प्र। ये। शुम्भन्ते। जनयः। न। सप्तयः। यामन्। रुद्रस्य। सूनवः। सुऽदंससः। रोदसी इति। हि। मरुतः। चक्रिरे। वृधे। मदन्ति। वीराः। विदथेषु। घृष्वयः॥ १॥

पदार्थः-(**प्र**) प्रकृष्टे (**ये**) वक्ष्यमाणाः (**शुम्भन्ते**) शोभन्ते (**जनयः**) जायाः (**न**) इव (**सप्तयः**) अश्वा इव। **सप्तिरित्यश्वनामसु पठितम्।** (निघं०१.१४) (**यामन्**) यान्ति यस्मिन् मार्गे तस्मिन्। अत्र **सुपां सुलुगिति** डेर्लुक्। **सर्वधातुभ्यो मनिन्नि**त्यौणादिको मनिन् प्रत्ययः। (**रुद्रस्य**) शत्रूणां रोदयितुर्महावीरस्य (**सूनवः**) पुत्राः (**सुदंससः**) शोभनानि दंसांसि कर्माणि येषां ते। **दंस इति कर्मनामसु पठितम्।** (निघं०२.१) (**रोदसी**) द्यावापृथिव्यौ (**हि**) खलु (**मरुतः**) तथा वायवस्तथा (**चक्रिरे**) कुर्वन्ति (**वृधे**) वर्धनाय (**मदन्ति**) हर्षन्ति। विकरणव्यत्ययेन श्यः स्थाने शप्। (**वीराः**) शौर्यादिगुणयुक्ताः पुरुषाः (**विदथेषु**) संग्रामेषु (**घृष्वयः**) सम्यग् घर्षणशीलाः। **कृविधृष्वि०।** (उणा०४.५७) **घृषु संघर्ष** इत्यस्माद्विन् प्रत्ययः॥१॥

अन्वयः-ये रुद्रस्य सूनवः सुदंससो घृष्वयो वीरा हि यामन्मार्गेऽलङ्कारैः शुम्भमाना अलंकृता जनयो नेव सप्तयोऽश्वा इव गच्छन्तो मरुतो रोदसी इव वृधे विदथेषु विजयं चक्रिरे ते प्रशुम्भन्ते मदन्ति तैः सह त्वं प्रजायाः पालनं कुरु॥१॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा सुशिक्षिता पतिव्रता स्त्रियः पतीन् वा स्त्रीव्रताः पतयो जायाः सेवित्वा सुखयन्ति। यथा शोभमाना बलवन्तो हयाः पथि शीघ्रं गमयित्वा हर्षयन्ति तथा धार्मिका वीराः सर्वाः प्रजा मोदयन्ति॥१॥

पदार्थः-(**ये**) जो (**रुद्रस्य**) दुष्टों के रुलाने वाले के (**सूनवः**) पुत्र (**सुदंससः**) उत्तम कर्म करनेहारे (**घृष्वयः**) आनन्दयुक्त (**वीराः**) वीरपुरुष (**हि**) निश्चय (**यामन्**) मार्ग में जैसे अलङ्कारों से सुशोभित (**जनयः**) सुशील स्त्रियों के (**न**) तुल्य और (**सप्तयः**) अश्व के समान शीघ्र जाने-आनेहारे (**मरुतः**) वायु (**रोदसी**) प्रकाश और पृथ्वी के धारण के समान (**वृधे**) बढ़ने के अर्थ राज्य का धारण करते (**विदथेषु**) संग्रामों में विजय को (**चक्रिरे**) करते हैं, वे (**प्र शुम्भन्ते**) अच्छे प्रकार शोभायुक्त और (**मदन्ति**) आनन्द को प्राप्त होते हैं, उनसे तू प्रजा का पालन कर॥१॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे अच्छी शिक्षा और विद्या को प्राप्त हुई पतिव्रता स्त्रियां अपने पतियों का अथवा स्त्रीव्रत सदा अपनी स्त्रियों ही से प्रसन्न ऋतुगामी पति लोग अपनी स्त्रियों का सेवन करके सुखी और जैसे सुन्दर बलवान् घोड़े मार्ग में शीघ्र पहुंचा के आनन्दित करते हैं, वैसे धार्मिक राजपुरुष सब प्रजा को आनन्दित किया करें॥१॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

त उक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः।
अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः॥२॥

ते। उक्षितासः। महिमानम्। आशत। दिवि। रुद्रासः। अधि। चक्रिरे। सदः। अर्चन्तः। अर्कम्। जनयन्तः। इन्द्रियम्। अधि। श्रियः। दधिरे। पृश्निऽमातरः॥२॥

पदार्थः–(**ते**) पूर्वोक्ताः (**उक्षितासः**) वृष्टिद्वारा सेक्तारः (**महिमानम्**) उत्तमप्रतिष्ठाम् (**आशत**) व्याप्नुवन्ति। अत्र **बहुलं छन्दसी**ति श्नोर्लुक्। (**दिवि**) दिव्यन्तरिक्षे (**रुद्रासः**) वायवः (**अधि**) उपरिभावे (**चक्रिरे**) कुर्वन्ति (**सदः**) स्थिरम् (**अर्चन्तः**) सत्कुर्वन्तः (**अर्कम्**) सत्कर्त्तव्यम् (**जनयन्तः**) प्रकटयन्तः (**इन्द्रियम्**) धनम्। **इन्द्रियमिति धननामसु पठितम्।** (निघं०२.१०) (**अधि**) उपरिभावे (**श्रियः**) चक्रवर्त्यादिराज्यलक्ष्मीः (**दधिरे**) धरन्ति (**पृश्निमातरः**) पृश्निरन्तरिक्षं माता येषां वायूनां ते॥२॥

अन्वयः–हे मनुष्या! यथोक्षितासः पृश्निमातरः ते रुद्रासो वायवो दिवि सदो महिमानमध्याशत वाधिचक्रिर इन्द्रियं दधिरे तथार्कमर्चन्तो यूयं श्रियो जनयन्त आनन्दत॥२॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा वायवो वृष्टिहेतवो भूत्वा दिव्यानि सुखानि जनयन्ति तथा सभाध्यक्षादयो विद्यया सुशिक्षिताः परस्परमुपकारिणः प्रीतिमन्तो भवन्तु॥२॥

पदार्थः–हे मनुष्यो! जैसे (**उक्षितासः**) वृष्टि से पृथ्वी का सेचन करनेहारे (**पृश्निमातरः**) जिनकी आकाश माता है (**ते**) वे (**रुद्रासः**) वायु (**दिवि**) आकाश में (**सदः**) स्थिर (**महिमानम्**) प्रतिष्ठा को (**अध्याशत**) अधिक प्राप्त होते और उसी को (**अधिचक्रिरे**) अधिक करते और (**इन्द्रियम्**) धन को (**दधिरे**) धारण करते हैं, वैसे (**अर्कम्**) पूजनीय का (**अर्चन्तः**) पूजन करते हुए आप लोग (**श्रियः**) लक्ष्मी को (**जनयन्तः**) बढ़ा के आनन्दित रहो॥२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायु वृष्टि का निमित्त होके उत्तम सुखों को प्राप्त कराते हैं, वैसे सभाध्यक्ष लोग विद्या से सुशिक्षित हो के परस्पर उपकारी और प्रीतियुक्त होवें॥२॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

गोमा॑तरो॒ यच्छु॒भय॑न्ते अ॒ञ्जिभि॑स्त॒नूषु॑ शु॒भ्रा द॑धिरे वि॒रुक्म॑तः।
बाध॑न्ते॒ विश्वम॑भिमा॒ति॒नम॒प॒ वर्त्मा॑न्येषा॒मनु॑ रीयते घृ॒तम्॥ ३॥

गोऽमा॑तारः। यत्। शु॒भय॑न्ते। अ॒ञ्जिऽभि॑ः। त॒नूषु॑। शु॒भ्राः। द॒धि॒रे॒। वि॒रुक्म॑तः। बाध॑न्ते। विश्व॑म्। अ॒भि॒ऽमा॒ति॒न॑म्। अप॑। वर्त्मा॑नि। ए॒षा॒म्। अनु॑। री॒य॒ते॒। घृ॒तम्॥ ३॥

पदार्थः-(**गोमातरः**) गौः पृथिवीव माता मानप्रदा येषां वीराणां ते (**यत्**) ये (**शुभयन्ते**) शुभमाऽऽचक्षते (**अञ्जिभिः**) व्यक्तैर्विज्ञानादिगुणनिमित्तैः (**तनूषु**) विस्तृतबलयुक्तेषु शरीरेषु (**शुभ्राः**) शुद्धधर्माः (**दधिरे**) धरन्ति (**विरुक्मतः**) प्रशस्ता विविधा रुचो दीप्तयो विद्यन्ते येषु ते (**बाधन्ते**) (**विश्वम्**) सर्वम् (**अभिमातिनम्**) शत्रुगणम् (**अप**) विरुद्धार्थे (**वर्त्मानि**) मार्गान् (**एषाम्**) सेनाध्यक्षादीनाम् (**अनु**) आनुकूल्ये (**रीयते**) गच्छति (**घृतम्**) उदकम्॥ ३॥

अन्वयः-हे मनुष्या! यद्ये गोमातरो विरुक्मतः शुभ्रा वीरा यथा मरुतस्तनूष्वञ्जिभिः शुभयन्ते विश्वमनुदधिर एषां सकाशाद् घृतं रीयते वर्त्मानि यान्ति तथाऽभिमातिनमपबाधन्ते तैः सह यूयं विजयं लभध्वम्॥ ३॥

भावार्थः-यथा वायुभिरनेकानि सुखानि प्राणबलेन पुष्टिश्च भवति, तथैव शुभगुणयुक्तविद्याशरीरात्म-बलान्वितसभाध्यक्षादिभिः प्रजाजना अनेकानि रक्षणानि लभन्ते॥ ३॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**गोमातरः**) पृथिवी समान मातावाले (**विरुक्मतः**) विशेष अलंकृत (**शुभ्राः**) शुद्ध स्वभावयुक्त शूरवीर लोग जैसे प्राण (**तनूषु**) शरीरों में (**अञ्जिभिः**) प्रसिद्ध विज्ञानादि गुणनिमित्तों से (**शुभयन्ते**) शुभ कर्मों का आचरण कराके शोभायमान करते हैं, (**विश्वम्**) जगत् के सब पदार्थों का (**अनुदधिरे**) अनुकूलता से धारण करते हैं, (**एषाम्**) इनके संबन्ध से (**घृतम्**) जल (**रीयते**) प्राप्त और (**वर्त्मानि**) मार्गों को जाते हैं, वैसे (**अभिमातिनम्**) अभिमानयुक्त शत्रुगण का (**अपबाधन्ते**) बाध करते हैं, उनके साथ तुम लोग विजय को प्राप्त हो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायुओं से अनेक सुख और प्राण के बल से पुष्टि होती है, वैसे ही शुभगुणयुक्त विद्या, शरीर और आत्मा के बलयुक्त सभाध्यक्षों से प्रजाजन अनेक प्रकार के रक्षणों को प्राप्त होते हैं॥ ३॥

पुनस्ते किं किं कुर्य्युरित्युपदिश्यते॥

फिर वे क्या-क्या करें, इस विषय को अगले मन्त्र में कहा है॥

वि ये भ्राज॑न्ते सुम॑खास ऋ॒ष्टिभि॑: प्रच्या॒वय॑न्तो॒ अच्यु॑ता चि॒दोज॑सा।
म॒नो॒जुवो॒ यन्म॑रुतो॒ रथे॒ष्वा वृष॑व्रातास॒: पृष॑तीरयु॒ग्ध्वम्॥ ४॥

वि। ये। भ्राजन्ते। सुऽमखासः। ऋष्टिऽभिः। प्रऽच्यवयन्तः। अच्युता। चित्। ओजसा। मनुःऽजुवः। यत्। मरुतः। रथेषु। आ। वृषऽव्रातासः। पृषतीः। अयुग्ध्वम्॥४॥

पदार्थः-(**वि**) विशेषार्थे (**ये**) सभाद्यध्यक्षादयः (**भ्राजन्ते**) प्रकाशन्ते (**सुमखासः**) शोभनाः शिल्पसंबन्धिनः संग्रामा यज्ञा येषान्ते (**ऋष्टिभिः**) यन्त्रचालनार्थैर्गमनागमननिमित्तैर्दण्डैः (**प्रच्यावयन्तः**) विमानादीनि यानानि प्रचालयन्तः सन्तः (**अच्युता**) क्षेतुमशक्येन (**चित्**) इव (**ओजसा**) बलयुक्तेन सैन्येन सह वर्त्तमानाः (**मनोजुवः**) मनोवद्गतयः (**यत्**) याः (**मरुतः**) वायवः (**रथेषु**) विमानादियानेषु (**आ**) समन्तात् (**वृषव्रातासः**) वृषाः शस्त्रास्त्रवर्षयितारो व्रातासो मनुष्या येषान्ते (**पृषतीः**) मरुत्सम्बन्धिनीरपः (**अयुग्ध्वम्**) योजयत॥४॥

अन्वयः-हे प्रजासभामनुष्या! ये मनोजुवो मरुतश्चिदिव वृषव्रातासः सुमखास ऋष्टिभिरच्युतौजसा शत्रुसैन्यानि प्रच्यावयन्तः सन्तो व्याभ्राजन्ते तैः सह येषु रथेषु यत् पृषतीरयुग्ध्वं तैः शत्रून् विजयध्वम्॥४॥

भावार्थः-मनुष्यैर्मनोजवेषु विमानादियानेषु जलाग्निवायून् संप्रयुज्य तत्र स्थित्वा सर्वत्रभूगोले गत्वागत्य शत्रून् विजित्य प्रजाः सम्पाल्य शिल्पविद्याकार्याणि प्रवृध्य सर्वोपकाराः कर्त्तव्याः॥४॥

पदार्थः-हे प्रजा और सभा के मनुष्यो! (**ये**) जो (**मनोजुवः**) मन के समान वेगवाले (**मरुतः**) वायुओं के (**चित्**) समान (**वृषव्रातासः**) शस्त्र और अस्त्रों को शत्रुओं के ऊपर वर्षानेवाले मनुष्यों से युक्त (**सुमखासः**) उत्तम शिल्पविद्या सम्बन्धी वा संग्रामरूप क्रियाओं के करनेहारे (**ऋष्टिभिः**) यन्त्र कलाओं को चलानेवाले दण्डों और (**अच्युता**) अक्षय (**ओजसा**) बल पराक्रम युक्त सेना से शत्रु की सेनाओं को (**प्रच्यावयन्तः**) नष्ट-भ्रष्ट करते हुए (**व्याभ्राजन्ते**) अच्छे प्रकार शोभायमान होते हैं, उनके साथ (**यत्**) जिन (**रथेषु**) रथों में (**पृषतीः**) वायु से युक्त जलों को (**अयुग्ध्वम्**) संयुक्त करो, उनसे शत्रुओं को जीतो॥४॥

भावार्थः-मनुष्यो को उचित है कि मन के समान वेगयुक्त विमानादि यानों में जल, अग्नि और वायु को संयुक्त कर, उसमें बैठ के, सर्वत्र भूगोल में जा-आके शत्रुओं को जीतकर, प्रजा को उत्तम रीति से पाल के, शिल्पविद्या कर्मों को बढ़ा के सबका उपकार किया करें॥४॥

पुनस्ते किं कुर्युरित्युपदिश्यते॥

फिर वे कैसे करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयन्तः।
उतारुषस्य वि ष्यन्ति धाराश्चर्मेवोदभिर्व्युन्दन्ति भूम॥५॥

प्र। यत्। रथेषु। पृषतीः। अयुग्ध्वम्। वाजे। अद्रिम्। मरुतः। रंहयन्तः। उत। अरुषस्य। वि। स्यन्ति। धाराः। चर्मऽइव। उदऽभिः। वि। उन्दन्ति। भूम॥५॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**यत्**) येषु (**रथेषु**) विमानादियानेषु (**पृषतीः**) अग्निवायुयुक्ता अपः (**अयुग्ध्वम्**) संप्रयुग्ध्वम् (**वाजे**) युद्धे (**अद्रिम्**) मेघम्। **अद्रिरिति मेघनामसु पठितम्।** (निघं०१.१०) (**मरुतः**) वायवः (**रंहयन्तः**) गमयन्तः (**उत**) अपि (**अरुषस्य**) अश्वस्येव। **अरुष इति अश्वनामसु पठितम्।** (निघं०१.१४) (**वि**) विशेषार्थे (**स्यन्ति**) कार्याणि समापयति (**धाराः**) जलप्रवाहान् (**चर्मेव**) चर्मवत् काष्ठादिनाऽऽवृत्य (**उद्भिः**) उदकैः (**वि**) (**उन्दन्ति**) क्लेदन्ति (**भूम**) भूमिम्। अत्र **सुपां सुलुगि**ति सुप्लुगिकारस्य स्थानेऽकारश्च॥५॥

अन्वयः-हे मनुष्या! यूयं यथा विद्वांसः शिल्पिनो यद्येषु रथेषु पृषतीः प्रयुग्ध्वं संप्रयुग्ध्वमुताद्रिं रंहयन्तो मरुतोऽरुषस्य वाजे चर्मेवोद्भिर्धारा विष्यन्ति भूम भूमिं व्युन्दन्ति तैरन्तरिक्षे गत्वागत्य श्रियं वर्द्धयत॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथा वायुर्घनान् संधत्ते गमयति तथा शिल्पिनः सुशिक्षयाऽग्न्यादेः संप्रयोगेण स्थानान्तरं प्रापय्य कार्याणि साध्नुवन्ति॥५॥

पदार्थः-हे मनुष्यो! तुम जैसे विद्वान् शिल्पी लोग (**यत्**) जिन (**रथेषु**) विमानादि यानों में (**पृषतीः**) अग्नि और पवनयुक्त जलों को (**प्रयुग्ध्वम्**) संयुक्त करें (**उत**) और (**अद्रिम्**) मेघ को (**रंहयन्तः**) अपने वेग से चलाते हुए (**मरुतः**) पवन जैसे (**अरुषस्य**) घोड़े के समान (**वाजे**) युद्ध में (**चर्मेव**) चमड़े के तुल्य काष्ठ धातु और चमड़े से भी मढ़े कलाघरों में (**उद्भिः**) जलों से (**धाराः**) उनके प्रवाहों को (**विष्यन्ति**) काम की समाप्ति करने के लिये समर्थ करते और (**भूम**) भूमि को (**व्युन्दन्ति**) गीली करते अर्थात् रथ को चलाते हुए जल टपकाते जाते हैं, वैसे उन यानों से अन्तरिक्ष मार्ग से देश-देशान्तर और द्वीप-द्वीपान्तर में जा-आ के लक्ष्मी को बढ़ाओ॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे वायु बादलों को संयुक्त करता और चलाता है, वैसे शिल्पि लोग उत्तम शिक्षा और हस्तक्रिया अग्नि आदि अच्छे प्रकार जाने हुए वेगकर्त्ता पदार्थों के योग से स्थानान्तर को प्राप्त हो के कार्यों को सिद्ध करते हैं॥५॥

पुनस्ते किं कुर्वन्तीत्युपदिश्यते॥

फिर वे क्या करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ वो॑ वहन्तु सप्तयो रघुष्यदो॑ रघुपत्वा॑नः प्र जि॑गात बा॒हुभि॑ः।
सीदु॒ता ब॒र्हिरु॒रु व॒ः सद॑स्कृतं मा॒दय॑ध्वं मरुतो॒ मध्वो॒ अन्ध॑सः॥६॥९॥

आ। व॒ः। व॒हन्तु॒। सप्त॑यः। र॒घु॒ऽस्यद॑ः। र॒घु॒ऽप॒त्वा॑नः। प्र। जि॒गा॒त॒। बा॒हुऽभि॑ः। सीद॑त। आ। ब॒र्हिः। उ॒रु। व॒ः। सद॑ः। कृ॒तम्। मा॒दय॑ध्वम्। म॒रु॒तः। मध्व॑ः। अन्ध॑सः॥६॥

पदार्थः-**(आ)** समन्तात् **(वः)** युष्मान् **(वहन्तु)** देशान्तरं प्रापयन्तु **(सप्तयः)** संयुक्ताः शीघ्रं गमयितारोऽग्निवायुजलादयोऽश्वाः **(रघुस्यदः)** ये मार्गान् स्यन्दन्ते ते। गत्यर्थाद् रघिधातोर्बाहुलकादौणादिक उः प्रत्ययो नकारलोपश्च। **(रघुपत्वानः)** ये रघून् पथः पतन्ति ते। अत्रा**न्येभ्योऽपि दृश्यन्त** इति वनिप् प्रत्ययः। **(प्र)** उत्कृष्टार्थे **(जिगात)** स्तुत्यानि कर्माणि कुरुत **(बाहुभिः)** हस्तक्रियाभिः **(सीदत)** देशान्तरं गच्छत **(आ)** सर्वतः **(बर्हिः)** अन्तरिक्षम् **(उरु)** बहु **(वः)** युष्माकम् **(सदः)** स्थानम्। अत्र छन्दसि वा **अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य।** (अष्टा०८.३.४६) अनेन सूत्रेण विसर्जनीयस्य सत्वम्। **(कृतम्)** निष्पादितम् **(मादयध्वम्)** आनन्दं प्रापयत **(मरुतः)** वायव इव ज्ञानयोगेन शीघ्रं गन्तारो मनुष्याः **(मध्वः)** मधुरगुणयुक्तानि **(अन्धसः)** अन्नानि॥६॥

अन्वयः-हे मनुष्या! ये रघुस्यदो रघुपत्वानो मरुत इव सप्तयोऽश्वा वो युष्मान् वहन्तु तान् बाहुभिः प्राऽऽजिगात तैरुरुबर्हिरासीदत यैर्वो युष्माकं सदस्कृतं भवेत् तैर्मध्वोऽन्धसः प्राप्यास्मान् मादयध्वम्॥६॥

भावार्थः-सभाद्यध्यक्षादयो मनुष्याः क्रियाकौशलेन शिल्पविद्यासिद्धानि कार्याणि कृत्वा संभोगान् प्राप्नुवन्तु, नहि केनचिदस्मिन् जगति पदार्थविज्ञानक्रियाभ्यां विनोत्तमा भोगाः प्राप्तुं शक्यन्ते तस्माद् एतन्नित्यमनुष्ठेयम्॥६॥

पदार्थः-हे मनुष्यो! जो **(रघुस्यदः)** गमन करने-करानेहारे **(रघुपत्वानः)** थोड़े वा बहुत गमन करनेवाले **(मरुतः)** वायुओं के समान **(सप्तयः)** शीघ्र चलनेहारे अश्व **(वः)** तुमको **(वहन्तु)** देश-देशान्तर में प्राप्त करें, उनको **(बाहुभिः)** बल पराक्रमयुक्त हाथों से **(प्राजिगात)** उत्तम गतिमान् करो उनसे **(उरु)** बहुत **(बर्हिः)** उत्तम आसन पर **(आसीदत)** बैठ के आकाशादि में गमनागमन करो। जिनसे तुम्हारे **(सदः)** स्थान **(कृतम्)** सिद्ध **(भवेत्)** होवे, उनसे **(मध्वः)** मधुर **(अन्धसः)** अन्नों को प्राप्त हो के हमको **(मादयध्वम्)** आनन्दित करो॥६॥

भावार्थः-सभाध्यक्षादि मनुष्य लोग क्रियाकौशल से शिल्पविद्या से सिद्ध करने योग्य कार्यों को करके अच्छे भोगों को प्राप्त हों, कोई भी मनुष्य इस जगत् में पदार्थविज्ञान क्रिया के विना उत्तम भोगों को प्राप्त होने में समर्थ नहीं होता। इससे इस काम का नित्य अनुष्ठान करना चाहिये॥६॥

पुनस्ते किं कुर्युरित्युपदिश्यते॥

फिर वे क्या करें, यह विषय अगले मन्त्र में कहा है॥

तेऽवर्धन्त स्वतवसो महित्वना नाक तस्थुरुरु चक्रिरे सदः।
विष्णुर्यद्धावद् वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये॥७॥

ते। अवर्धन्त। स्वऽतवसः। महिऽत्वना। आ। नाकम्। तस्थुः। उरु। चक्रिरे। सदः। विष्णुः। यत्। ह। आवत्। वृषणम्। मदऽच्युतम्। वयः। न। सीदन्। अधि। बर्हिषि। प्रिये॥७॥

पदार्थः-(**ते**) मनुष्याः (**अवर्धन्त**) वर्धन्ते (**स्वतवसः**) स्वं स्वकीयं तवो बलं येषां ते (**महित्वना**) महिम्ना। महित्वेनेति प्राप्ते **वा च्छन्दसि सर्वे विधयो भवन्ती**ति विभक्तेर्नादेशः। अत्र सायणाचार्येण व्यत्ययेन नाभावः कृतः सोऽशुद्धः। (**आ**) समन्तात् (**नाकम्**) सुखविशेषं स्वर्गम् (**तस्थुः**) तिष्ठन्तु (**उरु**) बहु (**चक्रिरे**) कुर्वन्ति (**सदः**) सुखस्थानम् (**विष्णुः**) शिल्पविद्याव्यापनशीलो मनुष्यः (**यत्**) यम् (**ह**) किल (**आवत्**) रक्षणादिकं कुर्यात् (**वृषणम्**) अग्निजलवर्षणयुक्तं यानसमूहम् (**मदच्युतम्**) यो मदं हर्षं च्योतति तम् (**वयः**) पक्षी (**न**) इव (**सीदन्**) गच्छन् (**अधि**) उपरिभावे (**बर्हिषि**) अन्तरिक्षे (**प्रिये**) प्रीतकरे॥७॥

अन्वयः-हे मनुष्या! यथा विष्णुः प्रिये बर्हिषि वृषणमधिसीदन् वयो न यन्मदच्युतं शत्रुनिरोधकमावत् स्वतवसस्ते ह महित्वना (अवर्धन्त) वर्धन्ते ये विमानादियानेन तस्थुरुरुसदः गच्छन्त्याऽऽगच्छन्ति ते नाकं चक्रिरे॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा पक्षिण आकाशे सुखेन गत्वाऽऽगच्छन्ति, तथैव ये प्रशस्ताशिल्पविद्याविद्भ्योऽध्यापकेभ्यः साङ्गोपाङ्गां शिल्पविद्यां साक्षात्कृत्य तया यानानि संसाध्य सम्यग्रक्षित्वा वर्धयन्ति, त एवोत्तमां प्रतिष्ठां प्रशस्तानि धनानि च प्राप्य नित्यं वर्धन्त इति ॥७॥

पदार्थः-हे मनुष्यो! जैसे (**विष्णुः**) सूर्यवत् शिल्पविद्या में निपुण मनुष्य (**प्रिये**) अत्यन्त सुन्दर (**बर्हिषि**) आकाश में (**वृषणम्**) अग्नि-जल के वर्षायुक्त विमान के (**अधिसीदन्**) ऊपर बैठ के (**वयो न**) जैसे पक्षी आकाश में उड़ते और भूमि में आते हैं, वैसे (**यत्**) जिस (**मदच्युतम्**) हर्ष को प्राप्त दुष्टों को रोकनेहारे मनुष्यों की (**आवत्**) रक्षा करता है, उसको जो (**स्वतवसः**) स्वकीय बलयुक्त मनुष्य प्राप्त होते हैं (**ते ह**) वे ही (**महित्वना**) महिमा से (**अवर्धन्त**) बढ़ते हैं और जो विमानादि यानों में (**आतस्थुः**) बैठ के (**उरु**) बहुत सुखसाधक (**सदः**) स्थान को जाते-आते हैं, वे (**नाकम्**) विशेष सुख (**चक्रिरे**) करते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पक्षी आकाश में सुखपूर्वक जाके आते हैं, वैसे ही साङ्गोपाङ्ग शिल्पविद्या को साक्षात् करके उससे उत्तम यानादि सिद्ध करके अच्छी सामग्री को रख के बढ़ाते हैं, वे ही उत्तम प्रतिष्ठा और धनों को प्राप्त होकर नित्य बढ़ा करते हैं॥७॥

पुनस्ते वायवः कीदृश इत्युपदिश्यते॥

फिर वे वायु कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

शूरा॑इ॒वेद्युयु॒धयो॒ न जग्म॑यः श्रव॒स्यवो॒ न पृत॑नासु येतिरे।
भय॑न्ते॒ विश्वा॒ भुव॑ना म॒रुद्भ्यो॒ राजा॑नइव त्वे॒षसं॑दृशो॒ नरः॑॥८॥

शूरा॑ऽइव। इत्। युयु॑धयः। न। जग्म॑यः। श्रव॒स्यव॑ः। न। पृत॑नासु। ये॒ति॒रे॒। भय॑न्ते। विश्वा॑। भुव॑ना। म॒रुत्ऽभ्यः॑। राजा॑नःऽइव। त्वे॒षऽस॑न्दृशः। नरः॑॥८॥

पदार्थः-(**शूराइव**) यथा शस्त्राऽस्त्रप्रक्षेपयुद्धकुशलाः पुरुषास्तथा (**इत्**) एव (**युयुधयः**) साधुयुद्धकारिणः। **उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्।** (अष्टा०वा०३.२.१७१) अनेन वार्तिकेनाऽत्र युधधातोः किन् प्रत्ययः। (**न**) इव (**जग्मयः**) शीघ्रगमनशीलाः (**श्रवस्यवः**) आत्मनः श्रवोऽन्नमिच्छन्तः (**न**) इव (**पृतनासु**) सेनासु (**येतिरे**) प्रयतन्ते (**भयन्ते**) बिभ्यति। अत्र **बहुलं छन्दसी**ति शपः स्थाने श्लुर्न व्यत्ययेनात्मनेपदं च। (**विश्वा**) विश्वानि सर्वाणि (**भुवना**) भुवनानि लोकाः (**मरुद्भ्यः**) वायूनामाधारबलाकर्षणेभ्यः (**राजानइव**) यथा सभाध्यक्षास्तथा (**त्वेषसंदृशः**) त्वेषं दीप्तिं पश्यन्ति ते सम्यग्दर्शयितारः (**नरः**) नेतारः॥८॥

अन्वयः-ये वायवः शूरा इवेदेव वृत्रेण सह युयुधयो नेव जग्मयः पृतनासु श्रवस्यवो नेव येतिरे। राजान इव त्वेषसंदृशो नरः सन्ति येभ्यो मरुद्भ्यो विश्वा भुवना प्राणिनो भयन्ते बिभ्यति तान् सुयुक्त्योपयुञ्जत॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा निर्भयाः पुरुषाः युद्धान्न निवर्त्तन्ते, यथा यौद्धारो युद्धाय शीघ्रं धावन्ति, यथा बुभुक्षवोऽन्नमिच्छन्ति तथा ये सेनासु युद्धमिच्छन्ति, यथा दण्डाधीशेभ्यः सभाद्यध्यक्षेभ्योऽन्यायकारिणो जना उद्विजन्ते, तथैव वायुभ्योऽपि सर्वे कुपथ्यकारिणोऽन्यथा तत्सेविनः प्राणिन उद्विजन्ते स्वमर्यादायां तिष्ठन्ति॥८॥

पदार्थः-हे मनुष्यो! तुम लोग जो वायु (**शूराइव**) शूरवीरों के समान (**इत्**) ही मेघ के साथ (**युयुधयो न**) युद्ध करने वाले के समान (**जग्मयः**) जाने-आनेहारे (**पृतनासु**) सेनाओं में (**श्रवस्यवः**) अन्नादि पदार्थों को अपने लिये बढ़ानेहारे के समान (**येतिरे**) यत्न करते हैं (**राजान इव**) राजाओं के समान (**त्वेषसंदृशः**) प्रकाश को दिखानेहारे (**नरः**) नायक के समान हैं, जिन (**मरुद्भ्यः**) वायुओं से (**विश्वा**) सब (**भुवना**) संसारस्थ प्राणी (**भयन्ते**) डरते हैं, उन वायुओं का अच्छी युक्ति से उपयोग करो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे भयरहित पुरुष युद्ध से निवर्त्त नहीं होते, जैसे युद्ध करनेहारे लड़ने के लिये शीघ्र दौड़ते हैं, जैसे क्षुधातुर मनुष्य अन्न की इच्छा और जैसे सेनाओं में युद्ध की इच्छा करते हैं, जैसे दण्ड देनेहारे न्यायाधीशों से अन्यायकारी मनुष्य उद्विग्न होते हैं, वैसे ही कुपथ्यकारी, [वायुओं का] अच्छे प्रकार उपयोग न करनेहारे मनुष्य वायुओं से भय को प्राप्त होते और अपनी मर्यादा में रहते हैं॥८॥

पुनस्ते सभाध्यक्षादयः कीदृशा इत्युपदिश्यते॥

फिर वे सभाध्यक्ष आदि कैसे हों, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत्।
धत्त इन्द्रो नर्यपांसि कर्तवेऽहन् वृत्रं निरपामौब्जदर्णवम्॥ ९॥

त्वष्टा। यत्। वज्रम्। सुऽकृतम्। हिरण्ययम्। सहस्रऽभृष्टिम्। सुऽअपाः। अवर्तयत्। धत्ते। इन्द्रः। नरि। अपांसि। कर्तवे। अहन्। वृत्रम्। निः। अपाम्। औब्जत्। अर्णवम्॥ ९॥

पदार्थः-(**त्वष्टा**) दीप्तिमत्त्वेन छेदकः। **त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वं च।** (अष्टा०वा०३.२.१३५) अनेन वार्त्तिकेन त्विषधातोस्तृन्। (**यत्**) यम् (**वज्रम्**) किरणसमूहजन्यं विद्युदाख्यम् (**सुकृतम्**) सुष्ठु निष्पन्नम् (**हिरण्ययम्**) ज्योतिमर्यम्। **ऋत्व्यवा०।** (अष्टा०६.४.१७५) अनेन सूत्रेण मयट् प्रत्ययस्य मकारलोपो निपात्यते (**सहस्रभृष्टिम्**) सहस्रमसंख्याता भृष्टयः पाका यस्मात्तम् (**स्वपाः**) सुष्ठु अपांसि कर्माणि यस्मात् (**अवर्त्तयत्**) वर्त्तयति (**धत्ते**) धरति (**इन्द्रः**) सूर्यः (**नरि**) नीतिमार्गे मनुष्ये (**अपांसि**) कर्माणि (**कर्त्तवे**) कर्त्तुम् (**अहन्**) हन्ति (**वृत्रम्**) मेघम् (**निः**) नितराम् (**अपाम्**) उदकानाम् (**औब्जत्**) उब्जति सरलीकरोति (**अर्णवम्**) समुद्रम्॥ ९॥

अन्वयः-प्रजासेनास्थाः पुरुषा यथा स्वपास्त्वष्टेन्द्रः सूर्यः कर्त्तवेऽपांसि यत् सुकृतं हिरण्ययं सहस्रभृष्टं वज्रं प्रहृत्य वृत्रमहन् अपामर्णवं निरौब्जत् तथा दुष्टान् पर्यवर्त्तयच्छत्रून् हत्वा नर्याऽऽधत्ते स राजा भवितुमर्हेत्॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो मेघं धृत्वा वर्षयित्वा प्रजाः पालयति तथा राजादयोऽविद्याऽन्याययुक्तान् दुष्टान् हत्वा सर्वहिताय सुखसागरं साध्नुवन्तु॥ ९॥

पदार्थः-प्रजा और सेना में स्थित पुरुष जैसे (**स्वपाः**) उत्तम कर्म करता (**त्वष्टा**) छेदन करनेहारा (**इन्द्रः**) सूर्य (**कर्त्तवे**) करने योग्य (**अपांसि**) कर्मों को और (**यत्**) जिस (**सुकृतम्**) अच्छे प्रकार सिद्ध किये (**हिरण्ययम्**) प्रकाशयुक्त (**सहस्रभृष्टिम्**) जिससे हजारह पदार्थ पकते हैं, उस (**वज्रम्**) वज्र का प्रहार करके (**वृत्रम्**) मेघ का (**अहन्**) हनन करता है, (**अपाम्**) जलों के (**अर्णवम्**) समुद्र को (**निरौब्जत्**) निरन्तर सरल करता है, वैसे दुष्टों को (**पर्यवर्त्तयत्**) छिन्न-भिन्न करता हुआ शत्रुओं का हनन करके (**नरि**) मनुष्यों में श्रेष्ठों को (**आधत्ते**) धारण करता है, वह राजा होने को योग्य होता है॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य मेघ को धारण और हनन कर वर्षा के समुद्र को भरता है, वैसे सभापति लोग विद्या न्याययुक्त प्रजा के पालन व धारण करके, अविद्या अन्याययुक्त दुष्टों का ताड़न करके, सबके हित के लिये सुखसागर को पूर्ण भरें॥ ९॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम्।

धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे॥ १०॥

ऊर्ध्वम्। नुनुद्रे। अवतम्। ते। ओजसा। ददृहाणम्। चित्। बिभिदुः। वि। पर्वतम्। धमन्तः। वाणम्। मरुतः। सुऽदानवः। मदे। सोमस्य। रण्यानि। चक्रिरे॥ १०॥

पदार्थः-(**ऊर्ध्वम्**) उत्कृष्टमार्गं प्रति (**नुनुद्रे**) नुदन्ति (**अवतम्**) रक्षणादियुक्तम् (**ते**) मनुष्याः (**ओजसा**) बलपराक्रमाभ्याम् (**ददृहाणम्**) दंहितुं शीलम् (**चित्**) इव (**बिभिदुः**) भिन्दन्तु (**वि**) विविधार्थे (**पर्वतम्**) मेघम् (**धमन्तः**) कम्पयमानाः (**वाणम्**) वाणादिशस्त्रास्त्रसमूहम् (**मरुतः**) वायवः (**सुदानवः**) शोभनानि दानानि येषां ते (**मदे**) हर्षे (**सोमस्य**) उत्पन्नस्य जगतो मध्ये (**रण्यानि**) रणेषु साधूनि कर्माणि (**चक्रिरे**) कुर्वन्ति॥ १०॥

अन्वयः-यथा मरुत ओजसाऽवतं ददृहाणं पर्वतं मेघं बिभिदुरूर्ध्वं नुनुद्रे तथा ये वाणं धमन्तः सुदानवः सोमस्य मदे रण्यानि विचक्रिरे ते राजानश्चिदिव जायन्ते॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या अस्य जगतो मध्ये जन्म प्राप्य विद्याशिक्षां गृहीत्वा वायुवत् कर्माणि कृत्वा सुखानि भुञ्जीरन्॥ १०॥

पदार्थः-जैसे (**मरुतः**) वायु (**ओजसा**) बल से (**अवतम्**) रक्षणादि का निमित्त (**ददृहाणम्**) बढ़ाने के योग्य (**पर्वतम्**) मेघ को (**बिभिदुः**) विदीर्ण करते और (**ऊर्ध्वम्**) ऊंचे को (**नुनुद्रे**) ले जाते हैं, वैसे जो (**वाणम्**) बाण से लेके शस्त्रास्त्र समूह को (**धमन्तः**) कंपाते हुए (**सुदानवः**) उत्तम पदार्थ के दान करनेहारे (**सोमस्य**) उत्पन्न हुए जगत् के मध्य में (**मदे**) हर्ष में (**रण्यानि**) संग्रामों में उत्तम साधनों को (**विचक्रिरे**) करते हैं (**ते**) वे राजाओं के (**चित्**) समान होते हैं॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य लोग इस जगत् में जन्म पा, विद्या शिक्षा का ग्रहण और वायु के समान कर्म्म करके सुखों को भोगें॥ १०॥

पुनस्ते कस्मै किं कुर्य्युरित्युपदिश्यते॥

फिर वे किसके लिये क्या करें, इस विषय को अगले मन्त्र में कहा है॥

जिह्मं नुनुद्रेऽवतं तया दिशासिञ्चन्नुत्सं गोतमाय तृष्णजे।
आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः॥ ११॥

जिह्मम्। नुनुद्रे। अवतम्। तया। दिशा। असिञ्चन्। उत्सम्। गोतमाय। तृष्णऽजे। आ। गच्छन्ति। ईम्। अवसा। चित्रऽभानवः। कामम्। विप्रस्य। तर्पयन्त। धामऽभिः॥ ११॥

पदार्थः-(**जिह्मम्**) कुटिलम् (**नुनुद्रे**) प्रेरयन्ति (**अवतम्**) निम्नदेशस्थम् (**तया**) अभीष्टया (**दिशा**) (**असिञ्चन्**) सिञ्चन्ति (**उत्सम्**) कूपम्। **उत्स इति कूपनामसु पठितम्।** (निघं०३.२३) (**गोतमाय**) गच्छतीति गौः सोऽतिशयितो गोतमस्तस्मै भृशं मार्गे गन्त्रे जनाय (**तृष्णजे**) तृषितुं शीलाय।

स्वपितृषोर्नजिङ्। (अष्टा०३.२.१७२) अनेन सूत्रेण तृषधातोर्नजिङ् प्रत्ययः। **(आ)** समन्तात् **(गच्छन्ति)** यान्ति **(ईम्)** पृथिवीम् **(अवसा)** रक्षणादिना **(चित्रभानवः)** आश्चर्यप्रकाशाः **(कामम्)** इच्छासिद्धिम् **(विप्रस्य)** मेधाविनः **(तर्पयन्त)** तर्प्पयन्ति **(धामभिः)** स्थानविशेषैः॥११॥

अन्वयः-यथा दातारोऽवतं जिह्ममुत्सं खनित्वा तृष्णजे गोतमाय जलेन ईमसिञ्चन् तया दिशा पिपासां नुनुद्रे चित्रभानवः प्राणा इव धामभिर्विप्रस्यावसा कामं तर्पयन्त सर्वतः सुखमागच्छन्ति तथोत्तमैर्मनुष्यैर्भवितव्यम्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याः कूपं सम्पाद्य क्षेत्रवाटिकादीनि संसिच्य तत्रोत्पन्नेभ्योऽन्नफलादिभ्यः प्राणिनः सन्तर्प्य सुखयन्ति तथैव सभाध्यक्षादयः शास्त्रविशारदान् विदुषः कामै-रलंकृत्यैतैर्विद्यासुशिक्षाधर्मान् सम्प्रचार्य प्राणिन आनन्दयन्तु॥११॥

पदार्थः-जैसे दाता लोग **(अवतम्)** निम्नदेशस्थ **(जिह्मम्)** कुटिल **(कुत्सम्)** कूप को खोद के **(तृष्णजे)** तृषायुक्त **(गोतमाय)** बुद्धिमान् पुरुष को **(ईम्)** जल से **(असिञ्चन्)** तृप्त करके **(तया)** **(दिशा)** उस अभीष्ट दिशा से **(नुनुद्रे)** उसकी तृषा को दूर कर देते हैं, जैसे **(चित्रभानवः)** विविध प्रकाश के आधार प्राणों के समान **(धामभिः)** जन्म, नाम और स्थानों से **(विप्रस्य)** विद्वान् के **(अवसा)** रक्षण से **(कामम्)** कामना को **(तर्पयन्त)** पूर्ण करते और सब ओर से सुख को **(आगच्छन्ति)** प्राप्त होते हैं, वैसे उत्तम मनुष्यों को होना चाहिये॥११॥

भावार्थः-जैसे मनुष्य कूप को खोद खेत वा बगीचे आदि को सींचके उसमें उत्पन्न हुए अन्न और फलादि से प्राणियों को तृप्त करके सुखी करते हैं, वैसे ही सभाध्यक्ष आदि लोग वेदशास्त्रों में विशारद विद्वानों को कामों से पूर्ण करके इनसे विद्या, उत्तम शिक्षा और धर्म का प्रचार कराके सब प्राणियों को आनन्दित करें॥११॥

पुनस्तेभ्यो मनुष्यैः किं किमाशंसनीयमित्युपदिश्यते॥

फिर उनसे मनुष्यों को क्या-क्या आशा करनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि।
अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम्॥१२॥१०॥

या। वः। शर्म। शशमानाय। सन्ति। त्रिऽधातूनि। दाशुषे। यच्छत। अधि। अस्मभ्यम्। तानि। मरुतः। वि। यन्त। रयिम्। नः। धत्त। वृषणः। सुऽवीरम्॥१२॥

पदार्थः-**(या)** यानि **(वः)** युष्माकम् **(शर्म)** शर्माणि सुखानि **(शशमानाय)** विज्ञानवते। **शशमान इति पदनामसु पठितम्।** (निघं०४.३) **(सन्ति)** वर्त्तन्ते **(त्रिधातूनि)** त्रयो वातपित्तकफा येषु शरीरेषु वाऽयः सुवर्णरजतानि येषु धनेषु तानि **(दाशुषे)** दानशीलाय **(यच्छत)** दत्त **(अधि)** उपरिभावे **(अस्मभ्यम्)**

(तानि) **(मरुतः)** मरणधर्माणो मनुष्यास्तत्सम्बुद्धौ **(वि)** **(यन्त)** प्रयच्छत। अत्र यमधातो**र्बहुलं छन्दसी**ति शपो लुक्। **(रयिम्)** श्रीसमूहम् **(नः)** अस्मान् **(धत्त)** **(वृषणः)** वर्षन्ति ये तत्सम्बुद्धौ **(सुवीरम्)** शोभना वीरा यस्मात्तम्॥१२॥

अन्वयः–हे सभाद्यध्यक्षादयो मनुष्या! यूयं मरुत इव वो या त्रिधातूनि शर्म शर्माणि सन्ति तानि शशमानाय दाशुषे यच्छतास्मभ्यं वि यन्त हे वृष्णो! नोऽस्मभ्यं सुवीरं रयिमधिधत्त॥१२॥

भावार्थः–सभाद्यध्यक्षादिभिः सुखदुःखावस्थायां सर्वान् प्राणिनः स्वात्मवन्मत्वा सुखधनादिभिः पुत्रवत् पालनीयाः। प्रजासेनास्थैः पुरुषैश्चैते पितृवत्सत्कर्त्तव्या इति ॥१२॥

अत्र वायुवत्सभाद्यध्यक्षराजप्रजाधर्मवर्णनादेतदर्थेन सह पूर्वसूक्तार्थस्य सङ्गतिरस्तीति वेद्यम्॥

इति पञ्चाशीतितमं ८५ सूक्तं दशमो १० वर्गश्च समाप्तः॥

पदार्थः–हे सभाध्यक्ष आदि मनुष्यो! तुम लोग **(मरुतः)** वायु के समान **(वः)** तुम्हारे **(या)** जो **(त्रिधातूनि)** वात, पित्त, कफयुक्त शरीर अथवा लोहा, सोना, चांदी आदि धातुयुक्त **(शर्म)** घर **(सन्ति)** हैं **(तानि)** उन्हें **(शशमानाय)** विज्ञानयुक्त **(दाशुषे)** दाता के लिये **(यच्छत)** देओ और **(अस्मभ्यम्)** हमारे लिये भी वैसे घर **(वि यन्त)** प्राप्त करो। हे **(वृषणः)** सुख की वृष्टि करनेहारे! **(नः)** हमारे लिये **(सुवीरम्)** उत्तम वीर की प्राप्ति करनेहारे **(रयिम्)** धन को **(अधिधत्त)** धारण करो॥१२॥

भावार्थः–सभाध्यक्षादि लोगों को योग्य है कि सुख-दुःख की अवस्था में सब प्राणियों को अपने आत्मा के समान मान के, सुख धनादि से युक्त करके पुत्रवत् पालें और प्रजा सेना के मनुष्यों को योग्य है कि उनका सत्कार पिता के समान करें॥१२॥

इस सूक्त में वायु के समान सभाध्यक्ष राजा और प्रजा के गुणों का वर्णन होने से इस सूक्तार्थ की संगति पूर्व सूक्तार्थ के साथ समझनी चाहिये॥

यह पिचासीवाँ ८५सूक्त और दसवाँ १० वर्ग समाप्त हुआ॥

अथ दशर्चस्य षडशीतितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। मरुतो देवताः। १,४,८,९ गायत्री। २,३,७ पिपीलिका मध्या निचृद्गायत्री। ५,६,१० निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

पुनः स गृहस्थः कीदृश इत्युपदिश्यते॥

फिर वह गृहस्थ कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

मरुतो॒ यस्य॒ हि क्षये॑ पा॒था दि॒वो वि॑महसः।
स सु॑गो॒पात॑मो॒ जनः॥ १॥

मरुतः। यस्य॑। हि। क्षये॑। पा॒थ। दि॒वः। वि॒ऽम॒ह॒सः॒। सः। सु॒ऽगो॒पात॑मः। जनः॥ १॥

पदार्थः-(**मरुतः**) प्राणा इव प्रिया विद्वांसः (**यस्य**) (**हि**) खलु (**क्षये**) गृहे (**पाथ**) रक्षका भवथ। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**दिवः**) विद्यान्यायप्रकाशकाः (**विमहसः**) विविधानि महांसि पूज्यानि कर्माणि येषां तत्सम्बुद्धौ (**सः**) (**सुगोपातमः**) अतिशयेन सुष्ठु स्वस्यान्येषां च रक्षकः (**जनः**) मनुष्यः॥१॥

अन्वयः-हे विमहसो! दिवो यूयं मरुतो यस्य क्षये पाथ स हि खलु सुगोपातमो जनो जायेत॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्राणेन विना शरीरादिरक्षणं न सम्भवति, तथैव सत्योपदेशकेन विना प्रजारक्षणं न जायते॥१॥

पदार्थः-हे (**विमहसः**) नाना प्रकार पूजनीय कर्मों के कर्त्ता! (**दिवः**) विद्यान्यायप्रकाशक तुम लोग (**मरुतः**) वायु के समान विद्वान् जन (**यस्य**) जिसके (**क्षये**) घर में (**पाथ**) रक्षक हो (**स हि**) वही (**सुगोपातमः**) अच्छे प्रकार (**जनः**) मनुष्य होवे॥१॥

भावार्थः-जैसे प्राण के विना शरीरादि का रक्षण नहीं हो सकता, वैसे सत्योपदेशकर्त्ता के विना प्रजा की रक्षा नहीं होती॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय का उपदेश अगले मन्त्र में किया है॥

य॒ज्ञैर्वा॑ यज्ञवाहसो॒ विप्र॑स्य वा मती॒नाम्। मरु॑तः शृणु॒ता ह॑व॒म्॥ २॥

य॒ज्ञैः। वा॒। य॒ज्ञ॒ऽवा॒ह॒सः॒। विप्र॑स्य। वा॒। म॒ती॒नाम्। मरु॑तः। शृ॒णु॒त। ह॒व॒म्॥ २॥

पदार्थः-(**यज्ञैः**) अध्ययनाध्यापनोपदेशनाऽऽदिभिः (**वा**) पक्षान्तरे (**यज्ञवाहसः**) यज्ञान् वोढुं शीलं येषान्ते (**विप्रस्य**) मेधाविनः (**वा**) पक्षान्तरे (**मतीनाम्**) विदुषां मनुष्याणाम् (**मरुतः**) परीक्षका विपिश्चितः (**शृणुत**) (**हवम्**) परीक्षितुमर्हमध्ययनमध्यापनं वा॥२॥

अन्वयः-हे यज्ञवाहसो! यूयं मरुत इव स्वकीयैर्यज्ञैः परकीयैर्वा विप्रस्य मतीनां वा हवं शृणुत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विज्ञानविज्ञापनाख्यैः क्रियाजन्यैर्वा यज्ञैः सह वर्त्तमाना भूत्वाऽन्यान् मनुष्यानेतैर्योजयित्वा यथावत्सुपरीक्ष्य विद्वांसो निष्पादनीयाः॥ २॥

पदार्थः-हे **(यज्ञवाहसः)** सत्सङ्गरूप प्रिय यज्ञों को प्राप्त करानेवाले विद्वानो! तुम लोग **(मरुतः)** वायु के समान **(यज्ञैः)** अपने **(वा)** पराये पढ़ने-पढ़ाने और उपदेशरूप यज्ञों से **(विप्रस्य)** विद्वान् **(वा)** वा **(मतीनाम्)** बुद्धिमानों के **(हवम्)** परीक्षा के योग्य पठन-पाठनरूप व्यवहार को **(शृणुत)** सुना कीजिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि जानने-जनाने वा क्रियाओं से सिद्ध यज्ञों से युक्त होकर, अन्य मनुष्यों को युक्त करा, यथावत्परीक्षा करके विद्वान् करना चाहिये॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, यह विषय अगले मन्त्र में कहा है॥

उ॒त वा॒ यस्य॑ वा॒जिनोऽनु॒ विप्र॒मत॑क्षत। स गन्ता॒ गोम॑ति व्र॒जे॥ ३॥

उ॒त। वा॒। यस्य॑। वा॒जिनः॑। अनु॑। विप्र॑म्। अत॑क्षत। सः। गन्ता॑। गोऽम॑ति। व्र॒जे॥ ३॥

पदार्थः-**(उत)** अपि **(वा)** विकल्पे **(यस्य)** **(वाजिनः)** प्रशस्तविज्ञानयुक्ताः **(अनु)** पश्चादर्थे **(विप्रम्)** मेधाविनम् **(अतक्षत)** अतिसूक्ष्मां धियं कुर्वन्ति **(सः)** **(गन्ता)** **(गोमति)** प्रशस्ता गाव इन्द्रियाणि विद्यन्ते यस्मिँस्तस्मिन् **(व्रजे)** व्रजन्ति जना यस्मिंस्तस्मिन्॥ ३॥

अन्वयः-हे वाजिनो! यूयं यस्य क्रियाकुशलस्य विदुषो वाऽध्यापकस्य सकाशात् प्राप्तविद्यं विप्रमन्वतक्षत, स गोमति व्रज उत गन्ता भवेत्॥ ३॥

भावार्थः-तीव्रया बुद्धया शिल्पविद्यया च सिद्धैर्विमानादिभिर्विना मनुष्यैर्देशदेशान्तरे सुखेन गन्तुमागन्तुं वा न शक्यते, तस्मादतिपुरुषार्थेनैतानि निष्पादनीयानि॥ ३॥

पदार्थः-**(वाजिनः)** उत्तम विज्ञानयुक्त विद्वानो! तुम **(यस्य)** जिस क्रियाकुशल विद्वान् **(वा)** पढ़ानेहारे के समीप से विद्या को प्राप्त हुए **(विप्रम्)** विद्वान् को **(अन्वतक्षत)** सूक्ष्म प्रज्ञायुक्त करते हो **(सः)** वह **(गोमति)** उत्तम इन्द्रिय विद्या प्रकाशयुक्त **(वज्रे)** प्राप्त होने के योग्य मार्ग में **(उत)** भी **(गन्ता)** प्राप्त होवे॥ ३॥

भावार्थः-तीव्रबुद्धि और शिल्पविद्या सिद्ध विमानादि यानों के विना मनुष्य देश-देशान्तर में सुख से जाने-आने को समर्थ नहीं हो सकते, उस कारण अति पुरुषार्थ से विमानादि यानों को यथावत् सिद्ध करें॥ ३॥

पुनस्तै शिक्षितै: किं जायत इत्युपदिश्यते॥

फिर उन शिक्षित मनुष्यों से क्या होता है, इस विषय को अगले मन्त्र में कहा है॥

अस्य वीरस्य बर्हिषि सुत: सोमो दिविष्टिषु।

उक्थं मदश्च शस्यते॥४॥

अस्य। वीरस्य। बर्हिषि। सुत:। सोम:। दिविष्टिषु। उक्थम्। मद:। च। शस्यते॥४॥

पदार्थ:-(**अस्य**) (**वीरस्य**) विज्ञानशौर्य्यनिर्भयाद्युपेतस्य (**बर्हिषि**) उत्तमे व्यवहारे कृते सति (**सुत:**) निष्पन्न: (**सोम:**) ऐश्वर्यसमूह: (**दिविष्टिषु**) दिव्या इष्टय: सङ्गतानि कर्माणि सुखानि वा येषु व्यवहारेषु तेषु (**उक्थम्**) शास्त्रप्रवचनम् (**मद:**) आनन्द: (**च**) विद्यादयो गुणा: (**शस्यते**) स्तूयते॥४॥

अन्वय:-हे विद्वांसो! भवच्छिक्षितस्यास्य वीरस्य सुत: सोमो दिविष्टिषूक्थं बर्हिषि मदो गुणसमूहश्च शक्यते नेतरस्य॥४॥

भावार्थ:-विदुषां शिक्षया विना मनुष्येषूत्तमा गुणा न जायन्ते तस्मादेतन्नित्यमनुष्ठेयम्॥४॥

पदार्थ:-हे विद्वानो! आपके सुशिक्षित (**अस्य**) इस (**वीरस्य**) वीर का (**सुत:**) सिद्ध किया हुआ (**सोम:**) ऐश्वर्य (**दिविष्टिषु**) उत्तम इष्टिरूप कर्मों से सुखयुक्त व्यवहारों में (**उक्थम्**) प्रशंसित वचन (**बर्हिषि**) उत्तम व्यवहार के करने में (**मद:**) आनन्द (**च**) और सद्विद्यादि गुणों का समूह (**शस्यते**) प्रशंसित होता है, अन्य का नहीं॥४॥

भावार्थ:-विद्वानों की शिक्षा के विना मनुष्यों में उत्तम गुण उत्पन्न नहीं होते। इससे इसका अनुष्ठान नित्य करना चाहिये॥४॥

पुनस्ते किं कुर्युरित्युपदिश्यते

फिर वे क्या करें, इस विषय को अगले मन्त्र में कहा है॥

अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि। सूरं चित्सस्सुषीरिष:॥५॥ ११॥

अस्य। श्रोषन्तु। आ। भुव:। विश्वा:। य:। चर्षणी:। अभि। सूरम्। चित्। सस्सुषी:। इष:॥५॥

पदार्थ:-(**अस्य**) सुशिक्षितस्य मनुष्यस्य (**श्रोषन्तु**) शृण्वन्तु। अत्र विकरणव्यत्ययेन लेटि सिप्। (**आ**) सर्वत: (**भुव:**) भूमय: (**विश्वा:**) सर्वा: (**य:**) (**चर्षणी:**) मनुष्यान् (**अभि**) आभिमुख्ये (**सूरम्**) प्रेरयितारमध्यापकम् (**चित्**) इव (**सस्सुषी:**) प्राप्तव्या: (**इष:**) इष्टसाधका: किरणा:॥५॥

अन्वय:-हे मनुष्या! भवन्तोऽस्य सुशिक्षितस्येषश्चिदिव विश्वा: सस्सुषीराभुवश्चर्षणी: प्रजा: किरणा: सूरमिवाभिश्रोषन्तु॥५॥

भावार्थः-यो मनुष्यः सुशिक्षितः सुपरीक्षितः शुभलक्षणः सर्वविद्यो दृढिष्ठो बलिष्ठोऽध्यापकः सुसहायः पुरुषार्थी धार्मिको विद्वानस्ति, स एव पूर्णान् धर्मार्थकाममोक्षान् प्राप्तः सन् प्रजाया दुःखानि निवार्य परां विद्यां श्रुत्वा प्राप्नोति नातो विरुद्धः॥५॥

पदार्थः-हे मनुष्यो आप लोग **(अस्य)** इस सुशिक्षित विद्वान् के **(इषः)** इष्टसाधक किरणों के **(चित्)** समान **(विश्वाः)** सब **(सस्रुषीः)** प्राप्त होने के योग्य **(आभुवः)** सब ओर से सुखयुक्त **(चर्षणीः)** मनुष्यरूप प्रजा को जैसे किरणें **(सूरम्)** सूर्य को प्राप्त होती हैं, वैसे **(अभि श्रोषन्तु)** सब ओर से सुनो॥५॥

भावार्थः-जो मनुष्य अच्छी शिक्षा से युक्त, अच्छे प्रकार परीक्षित, शुभलक्षणयुक्त, सम्पूर्ण विद्याओं का वेत्ता, दृढ़ाङ्ग, अतिबली, पढ़ानेहारा, श्रेष्ठ सहाय से सहित, पुरुषार्थी धार्मिक विद्वान् है, वही धर्म, अर्थ, काम और मोक्ष को प्राप्त होके प्रजा के दुःख का निवारण कर पराविद्या को सुनके प्राप्त होता है, इससे विरुद्ध मनुष्य नहीं॥५॥

सर्वे वयं मिलित्वा किं कुर्य्यामेत्युपदिश्यते॥

सब हम मिल के क्या करें, इस विषय को अगले मन्त्र में कहा है॥

पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम्। अवोभिश्चर्षणीनाम्॥६॥

पूर्वीभिः। हि। ददाशिम। शरत्ऽभिः। मरुतः। वयम्। अवःऽभिः। चर्षणीनाम्॥६॥

पदार्थः-(**पूर्वीभिः**) पुरातनीभिः **(हि)** खलु **(ददाशिम)** दद्याम **(शरद्भिः)** शरदादिभिर्ऋतुभिः **(मरुतः)** सभाद्यध्यक्षादयः **(वयम्)** सभाप्रजाशालास्थाः **(अवोभिः)** रक्षणादिभिः **(चर्षणीनाम्)** मनुष्याणाम्॥६॥

अन्वयः-हे मरुतो! यथा यूयं पूर्वीभिः शरद्भिः सर्वैर्ऋतुभिरवोभिश्चर्षणीनां सुखाय प्रवर्त्तध्वम्। तथा वयमपि हि खलु युष्मदादिभ्यः सुखानि ददाशिम॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा ऋतुस्था वायवः प्राणिनो रक्षित्वा सुखयन्ति तथा विद्वांसः सर्वेषां सुखाय प्रवर्त्तेरन्, न किल कस्यचिद् दुःखाय॥६॥

पदार्थः-हे **(मरुतः)** सभाध्यक्ष आदि सज्जनो! जैसे तुम लोग **(पूर्वीभिः)** प्राचीन सनातन **(शरद्भिः)** सब ऋतु वा **(अवोभिः)** रक्षा आदि अच्छे-अच्छे व्यवहारों से **(चर्षणीनाम्)** सब मनुष्यों के सुख के लिये अच्छे प्रकार अपना वर्त्ताव वर्त्त रहे हो, वैसे **(हि)** निश्चय से **(वयम्)** हम प्रजा, सभा और पाठशालास्थ आदि प्रत्येक शाला के पुरुष आप लोगों को सुख **(ददाशिम)** देवें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सब ऋतु में ठहरने वाले वायु प्राणियों की रक्षा कर उनको सुख पहुंचाते हैं, वैसे ही विद्वान् लोग सबके सुख के लिये प्रवृत्त हों, न कि किसी के दुःख के लिये॥६॥

तैः पालितः शिक्षितो जनः कीदृशो भवतीत्युपदिश्यते॥

उनकी रक्षा और शिक्षा पाया हुआ मनुष्य कैसा होता है, इस विषय को अगले मन्त्र में कहा है॥

सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः। यस्य प्रयांसि पर्षथ॥७॥

सुऽभगः। सः। प्रऽयज्यवः। मरुतः। अस्तु। मर्त्यः। यस्य। प्रयांसि। पर्षथ॥७॥

पदार्थः-(**सुभगः**) शोभनो भगो धनमैश्वर्य्यं वा यस्य सः। **भग इति धननामसु पठितम्।** (निघं०२.१०) (**सः**) (**प्रयज्यवः**) प्रकृष्टा यज्यवो येषाम् तत्सम्बुद्धौ (**मरुतः**) सभाध्यक्षादयः (**अस्तु**) भवतु (**मर्त्यः**) मनुष्यः (**यस्य**) यस्मै। अत्र **चतुर्थ्यर्थे बहुलं छन्दसी**ति षष्ठीप्रयोगः। (**प्रयांसि**) प्रीतानि कान्तानि वस्तूनि (**पर्षथ**) सिञ्चत दत्त॥७॥

अन्वयः-हे प्रयज्यवो मरुतो! यूयं यस्य प्रयांसि पर्षथ स मर्त्यः सुभगोऽस्तु॥७॥

भावार्थः-येषां जनानां सभाद्यध्यक्षादयो विद्वांसो रक्षकाः सन्ति, ते कथं न सुखैश्वर्य्यं प्राप्नुयुः॥७॥

पदार्थः-हे (**प्रयज्यवः**) अच्छे-अच्छे यज्ञादि कर्म करनेवाले (**मरुतः**) सभाध्यक्ष आदि विद्वानो! तुम (**यस्य**) जिसके लिये (**प्रयांसि**) अत्यन्त प्रीति करने योग्य मनोहर पदार्थों को (**पर्षथ**) परसते अर्थात् देते हो (**सः**) वह (**मर्त्यः**) मनुष्य (**सुभगः**) श्रेष्ठ धन और ऐश्वर्य्ययुक्त (**अस्तु**) हो॥७॥

भावार्थः-जिन मनुष्यों के सभाध्यक्ष आदि विद्वान् रक्षा करनेवाले हैं, वे क्योंकर सुख और ऐश्वर्य्य को न पावें?॥७॥

मनुष्यैस्तेषां सङ्गेन किं विज्ञातव्यमित्युपदिश्यते॥

उनके सङ्ग से मनुष्यों को क्या जानना चाहिये, यह विषय अगले मन्त्र में कहा है॥

शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः॥८॥

शशमानस्य। वा। नरः। स्वेदस्य। सत्यऽशवसः। विद। कामस्य। वेनतः॥८॥

पदार्थः-(**शशमानस्य**) विज्ञातव्यस्य। अत्र सर्वत्र **अधिगर्थ** इति शेषत्वविवक्षायां षष्ठी। (**वा**) अथवा (**नरः**) सर्वकार्यनेतारो मनुष्यास्तत्सम्बुद्धौ (**स्वेदस्य**) पुरुषार्थेन जायमानस्य (**सत्यशवसः**) नित्यदृढबलस्य (**विद**) वित्थ। **द्व्यचोऽतस्तिङ** इति दीर्घः। (**कामस्य**) (**वेनतः**) सर्वशास्त्रैः श्रुतस्य कमनीयस्य। अत्र वेनृधातोर्बाहुलकादौणादिकोऽतन् प्रत्ययः॥८॥

अन्वयः-हे नरो! यूयं सभाद्यध्यक्षादीनां सङ्गेन स्वपुरुषार्थेन वा शशमानस्य सत्यशवसो वेनतः स्वेदस्य कामस्य विद विजानीत॥८॥

भावार्थः-नहि कश्चिद्विदुषां सङ्गेन विना सत्यान् कामान् सदसद्विज्ञातुं च शक्नोति, तस्मादेतत् सर्वैरनुष्ठेयम्॥८॥

पदार्थः–हे **(नरः)** मनुष्यो! तुम सभाध्यक्षादिकों के संग **(वा)** पुरुषार्थ से **(शशमानस्य)** जानने योग्य **(सत्यशवसः)** जिसमें नित्य पुरुषार्थ करना हो **(वेनतः)** जो कि सब शास्त्रों से सुना जाता हो तथा कामना के योग्य और **(स्वेदस्य)** पुरुषार्थ से सिद्ध होता है, उस **(कामस्य)** काम को **(विद)** जानो अर्थात् उसको स्मरण से सिद्ध करो॥८॥

भावार्थः–कोई पुरुष विद्वानों के संग विना सत्य काम और अच्छे–बुरे को जान नहीं सकता। इससे सबको विद्वानों का संग करना चाहिये॥८॥

अथेतरमनुष्यैस्ते सभाध्यक्षादयो मनुष्याः कथं प्रार्थनीया इत्युपदिश्यते॥

अब और मनुष्यों को उन सभाध्यक्ष आदि मनुष्यों से कैसे प्रार्थना करनी चाहिये, यह विषय अगले मन्त्र में कहा है॥

यूयं तत्सत्यशवस आविष्कर्त महित्वना। विध्यता विद्युता रक्षः॥९॥

यूयम्। तत्। सत्यऽशवसः। आविः। कर्त। महिऽत्वना। विध्यत। विऽद्युता। रक्षः॥९॥

पदार्थः–**(यूयम्)** **(तत्)** **(सत्यशवसः)** नित्यं बलं येषान्तत्सम्बुद्धौ **(आविः)** प्रकटीभावे **(कर्त्त)** कुरुत। विकरणस्यात्र लुक्। **(महित्वना)** महिम्ना **(विध्यता)** ताडनकर्त्रा **(विद्युता)** विद्युन्निष्पन्नेनास्त्रसमूहेन **(रक्षः)** दुष्टकर्मकारी मनुष्यः॥९॥

अन्वयः–हे सत्यशवसः सभाद्यध्यक्षादयो! यूयं महित्वना तत्काममाविष्कर्त येन विद्युता रक्षो विध्यता मया सर्वे कामाः प्राप्येरन्॥९॥

भावार्थः–मनुष्यैः परस्परं प्रीत्या पुरुषार्थेन विद्याः प्राप्य दुष्टस्वभावगुणमनुनिवार्य कामसिद्धिर्नित्यं कार्येति॥९॥

पदार्थः–हे **(सत्यशवसः)** नित्यबलयुक्त सभाद्यध्यक्ष आदि सज्जनो! **(यूयम्)** तुम **(महित्वना)** उत्तम यश से **(तत्)** उस काम को **(आविः)** प्रकट **(कर्त्त)** करो कि जिससे **(विद्युता)** बिजुली के लोहे से बनाये हुए शस्त्र वा आग्नेयादि अस्त्रों के समूह से **(रक्षः)** खोटे काम करनेवाले दुष्ट मनुष्यों को **(विध्यता)** ताड़ना देते हुए मेरी सब कामना सिद्ध हों॥९॥

भावार्थः–मनुष्यों को चाहिए कि परस्पर प्रीति और पुरुषार्थ के साथ विद्युत् आदि पदार्थविद्या और अच्छे–अच्छे गुणों को पाकर दुष्ट स्वभावी और दुर्गुणी मनुष्यों को दूर कर नित्य अपनी कामना सिद्ध करें॥९॥

पुनस्ते किं कुर्य्युरित्युपदिश्यते॥

फिर वे क्या करें, यह विषय अगले मन्त्र में कहा है॥

गूहता गुह्यं तमो वि यात विश्वमत्रिणम्। ज्योतिष्कर्ता यदुश्मसि॥१०॥१२॥

गूहत। गुह्यम्। तमः। वि। यात। विश्वम्। अत्रिणम्। ज्योतिः। कर्त। यत्। उश्मसि॥१०॥

पदार्थः-(**गूहत**) आच्छादयत। अत्रा**न्येषामपी**ति दीर्घः। (**गुह्यम्**) गोपनीयम् (**तमः**) रात्रिवदविद्याऽन्धकारम् (**वि**) विगतार्थे (**यात**) गमयत (**विश्वम्**) सर्वम् (**अत्रिणम्**) परसुखमत्तारम्। **अदेस्त्रिनिश्च।** (उणा०४.६९) अनेन सूत्रेणाऽदधातोस्त्रिनिः प्रत्ययः। (**ज्योतिः**) विद्याप्रकाशम् (**कर्त्त**) कुरुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**यत्**) (**उश्मसि**) कामयामहे॥१०॥

अन्वयः-हे सत्यशवसः सभाद्यध्यक्षादयो! यूयं यथा स्वमहित्वना गुह्यं गूहत विश्वं तमोऽत्रिणं वियात विनष्टं कुरुत तथा वयं यज्ज्योतिर्विद्याप्रकाशमुश्मसि तत्कर्त्त॥१०॥

भावार्थः-मरुतः सत्यशवसो महित्वनेति पदत्रयमनुवर्त्तते। सभाद्यध्यक्षादिभिः। परमपुरुषार्थेन सततं राज्यं रक्ष्यमविद्याऽधर्मान्धकारः शत्रवश्च निवारणीयाः। विद्याधर्मसज्जनसुखानि प्रचारणीयानीति॥१०॥

अत्र यथा शरीरस्थाः प्राणवायवः प्रियाणि साधयित्वा सर्वान् रक्षन्ति तथैव सभाध्यक्षादिभिः सर्वं राज्यं यथावत् संरक्ष्यमत एतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति षडशीतितमं ८६ सूक्तं द्वादशो १२ वर्गश्च समाप्तः॥

पदार्थः-हे (**सत्यशवसः**) नित्यबलयुक्त सभाध्यक्ष आदि सज्जनो! जैसे तुम (**महित्वना**) अपने उत्तम यश से (**गुह्यम्**) गुप्त करने योग्य व्यवहार को (**गूहत**) ढांपो और (**विश्वम्**) समस्त (**तमः**) अविद्या रूपी अन्धकार को जो कि (**अत्रिणम्**) उत्तम सुख का विनाश करनेवाला है, उस को (**वि यात**) दूर पहुंचाओ तथा हम लोग (**यत्**) जो (**ज्योतिः**) विद्या के प्रकाश को (**उश्मसि**) चाहते हैं, उसको (**कर्त्त**) प्रकट करो॥१०॥

भावार्थः-इस मन्त्र में (**मरुतः, सत्यशवसः, महित्वना**) इन तीनों पदों की अनुवृत्ति है। सभाध्यक्षादि को परम पुरुषार्थ से निरन्तर राज्य की रक्षा करनी तथा अविद्यारूपी अन्धकार और शत्रुजन दूर करने चाहिये तथा विद्या, धर्म और सज्जनों के सुखों का प्रचार करना चाहिये॥१०॥

इस सूक्त में जैसे शरीर में ठहरनेहारे प्राण आदि पवन चाहे हुए सुखों को सिद्ध कर सबकी रक्षा करते हैं, वैसे ही सभाध्यक्षादिकों को चाहिये कि समस्त राज्य की यथावत् रक्षा करें। इस अर्थ के वर्णन से इस सूक्त में कहे हुए अर्थ की उस पिछले सूक्त के अर्थ के साथ एकता जाननी चाहिये॥

यह छियासीवां ८६ सूक्त और बारहवां १२ वर्ग पूरा हुआ॥

अथास्य षड्चस्य सप्ताशीतितमस्य सूक्तस्य राहूगणपुत्रो गोतम ऋषिः। मरुतो देवताः। १,२,५ विराड् जगती। ३ जगती। ६ निचृज्जगती छन्दः। निषादः स्वरः। ४ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनस्ते सभाध्यक्षादयः कीदृशा इत्युपदिश्यते॥

अब सतासीवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में पूर्वोक्त सभाध्यक्ष कैसे होते हैं, यह उपदेश किया है॥

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः।
जुष्टतमासो नृतमासो अञ्जिभिर्व्यानज्रे के चिदुस्राइव स्तृभिः॥ १॥

प्रऽत्वक्षसः। प्रऽतवसः। विऽरप्शिनः। अनानताः। अविथुराः। ऋजीषिणः। जुष्टऽतमासः। नृऽतमासः। अञ्जिऽभिः। वि। आनज्रे। के। चित्। उस्राःऽइव। स्तृऽभिः॥ १॥

पदार्थः-(**प्रत्वक्षसः**) प्रकृष्टतया शत्रूणां छेत्तारः (**प्रतवसः**) प्रकृष्टानि तवांसि बलानि सैन्यानि येषान्ते (**विरप्शिनः**) सर्वसामग्र्या महान्तः (**अनानताः**) शत्रूणामभिमुखे खल्वनम्राः (**अविथुराः**) कम्पभयरहिताः। अत्र बाहुलकादौणादिकः कुरच् प्रत्ययः। (**ऋजीषिणः**) सर्वविद्यायुक्तः उत्कृष्टसेनाङ्गोपार्जकाः (**जुष्टतमासः**) राजधर्मिभिरतिशयेन सेविताः (**नृतमासः**) अतिशयेन नायकाः (**अञ्जिभिः**) व्यक्तैरक्षणविज्ञानादिभिः (**वि**) (**आनज्रे**) अजन्तु शत्रून् क्षिपन्तु। व्यत्ययेनात्मनेपदम्। (**के**) (**चित्**) अपि (**उस्राइव**) यथा किरणास्तथा (**स्तृभिः**) शत्रुबलाच्छादकैर्गुणैः। **स्तृञ् आच्छादन** इत्यस्मात् क्विप् **वा च्छन्दसि सर्वे विधयो भवन्ती**ति तुगभावः॥ १॥

अन्वयः-हे सभाध्यक्षादयो! भवत्सेनासु ये केचित्स्तृभिरञ्जिभिः सह वर्त्तमाना उस्रा इव प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणो जुष्टतमासो नृतमासश्च शत्रुबलानि व्यानज्रे व्यजन्तु प्रक्षिपन्तु ते भवद्भिर्नित्यं पालनीयाः॥ १॥

भावार्थः-यथा किरणास्तथा प्रतापवन्तो मनुष्या येषां समीपे सन्ति, कुतस्तेषां पराजयः। अतः सभाध्यक्षादिभिरेतल्लक्षणाः पुरुषाः सुपरीक्ष्य सुशिक्ष्य सत्कृत्योत्साह्य रक्षणीयाः। नैवं विना केचिद्राज्यं कर्त्तुं शक्नुवन्तीति॥ १॥

पदार्थः-हे सभाध्यक्ष आदि सज्जनो! आप लोगों को (**के**) (**चित्**) उन लोगों की प्रतिदिन रक्षा करनी चाहिये जो कि अपनी सेनाओं में (**स्तृभिः**) शत्रुओं को लज्जित करने के गुणों से (**अञ्जिभिः**) प्रकट रक्षा और उत्तम ज्ञान आदि व्यवहारों के साथ वर्त्ताव रखते और (**उस्रा इव**) जैसे सूर्य की किरण जल को छिन्न-भिन्न करती हैं, वैसे (**प्रत्वक्षसः**) शत्रुओं को अच्छे प्रकार छिन्न-भिन्न करते हैं तथा (**प्रतवसः**) प्रबल जिनके सेनाजन (**विरप्शिनः**) समस्त पदार्थों के विज्ञान से महानुभाव (**अनानताः**) कभी शत्रुओं के सामने न दीन हुए और (**अविथुराः**) न कँपे हो (**ऋजीषिणः**) समस्त विद्याओं को जाने और उत्कर्षयुक्त

सेना के अङ्गों को इकट्ठे करें **(जुष्टतमास:)** राजा लोगों ने जिनकी बार-बार चाहना करी हो **(नृतमास:)** सब कामों को यथायोग्य व्यवहार में अत्यन्त वर्त्तानेवाले हों **(व्यानज्रे)** शत्रुओं के बलों को अलग करें, उनका सत्कार किया करो॥१॥

भावार्थ:-जैसे सूर्य की किरणें तीव्र प्रतापवाली हैं, वैसे प्रबल प्रतापवाले मनुष्य जिनके समीप है, क्योंकर उनकी हार हो। इससे सभाध्यक्ष आदिकों को उक्त लक्षणवाले पुरुष अच्छी शिक्षा, सत्कार और उत्साह देकर रखने चाहिये, विना ऐसे किये कोई राज्य नहीं कर सकते हैं॥१॥

सभाध्यक्षस्य भृत्यादय: किं कुर्युरित्युपदिश्यते॥

सभाध्यक्ष के कामवाले मनुष्य क्या करें, यह विषय अगले मन्त्र में कहा है॥

उप॒ह्वरे॑षु॒ यदचि॑ध्वं य॒यिं वय॑इव मरुत॒: केन॑ चित्प॒था।
श्वोत॑न्ति॒ कोशा॒ उप॑ वो॒ रथे॒ष्वा घृ॒तमु॒क्षता॒ मधु॑वर्ण॒मर्च॑ते॥२॥

उप॒ऽह्वरे॑षु। यत्। अचि॑ध्वम्। य॒यिम्। वय॑:ऽइव। म॒रु॒त॒:। केन॑। चि॒त्। प॒था। श्वोत॑न्ति। कोशा॑:। उप॑। व॒:। रथे॑षु। आ। घृ॒तम्। उ॒क्ष॒त॒। मधु॑ऽवर्णम्। अर्च॑ते॥२॥

पदार्थ:-**(उपह्वरेषु)** उपस्थितेषु कुटिलेषु मार्गेषु **(यत्)** यम् **(अचिध्वम्)** संचिनुत **(ययिम्)** प्राप्तव्यं विजयम् **(वयइव)** यथा पक्षिणस्तथा **(मरुत:)** सभाद्यध्यक्षादयो मनुष्या: **(केन)** **(चित्)** अपि **(पथा)** मार्गेण **(श्वोतन्ति)** रक्षन्तु संचलन्तु **(कोशा:)** यथा मेघा:। **कोश इति मेघनामसु पठितम्।** (निघं०१.१०) **(उप)** **(व:)** युष्माकम् **(रथेषु)** विमानादियानेषु **(आ)** समन्तात् **(घृतम्)** उदकम् **(उक्षत)** सिञ्चत। अत्रा**न्येषामपि दृश्यत** इति दीर्घ:। **(मधुवर्णम्)** यन्मधुरं च वर्णोपेतं च तत् **(अर्चते)** सत्कर्त्रे सभाद्यध्यक्षप्रियाय॥२॥

अन्वय:-हे मरुतो भृत्यादयो! यूयमुपह्वरेषु रथेषु स्थित्वा वय इव केनचित्पथा यद्यं ययिमचिध्वं संचिनुत तमर्चते दत्त ये वो युष्माकं रथा: कोशा इवाकाशे श्वोतन्ति तेषु मधुवर्णं घृतमुपोक्षत। अग्निवायुकलागृहसमीपे सिञ्चत॥२॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्विमानादियानानि रचयित्वा तत्राग्निवायुजलस्थानानि निर्माय तत्र तत्र तानि स्थापयित्वा कलाभि: संचाल्य वाष्पादीनि संनिरुद्धयैतान्युपरि नीत्वा पक्षिवन्मेघवच्चाकाशमार्गेण यथेष्टं स्थानं गत्वागत्य व्यवहारेण युद्धेन विजयं राज्यधनं वा प्राप्यैतै: परोपकारं कृत्वा निरभिमानिनो भूत्वा सर्वानन्दान् प्राप्नुयुरेते सर्वेभ्य: प्रापयितव्याश्च॥२॥

पदार्थ:-हे **(मरुत:)** सभा आदि कामों में नियत किये हुए मनुष्यो! तुम **(उपह्वरेषु)** प्राप्त हुए टेढ़े-सूधे भूमि आकाशादि मार्गों में **(रथेषु)** विमान आदि रथों पर बैठ **(वयइव)** पक्षियों के समान

(केनचित्) किसी **(पथा)** मार्ग से **(यत्)** जिस **(ययिम्)** प्राप्त होने योग्य विजय को **(अचिध्वम्)** सम्पादन करो, जाओ-आओ उसको **(अर्चते)** जिसका सत्कार करते और सभा आदि कामों के अधीश जिसको प्यारे हैं, उसके लिये देओ, जो **(वः)** तुमहारे रथ **(कोशाः)** मेघों के समान आकाश में **(श्वोतन्ति)** चलते हैं, उनमें **(मधुवर्णम्)** मधुर और निर्मल **(घृतम्)** जल को **(उप+आ+उक्षत)** अच्छे प्रकार उपसिक्त करो अर्थात् उन रथों की आग और पवन के कलघरों के समीप अच्छे प्रकार छिड़को॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि विमान आदि रथ रचकर उनमें आग, पवन और जल के घरों को बनाकर, उनमें आग, पवन, जल धर कर कलों से उनको चलाकर उनकी भाप रोक रथों को ऊपर ले जायें, जैसे कि पखेरू वा मेघ जाते हैं, वैसे आकाश मार्ग से अभीष्ट स्थान को जा-आकर व्यवहार से धन और युद्ध सर्वथा जीत वा राज्यधन को प्राप्त होकर उन धन आदि पदार्थों से परोपकार कर निरभिमानी होकर सब प्रकार के आनन्द पावें और उन आनन्दों को सबके लिये पहुँचावें॥ २॥

पुनस्ते किं कुर्युरित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः॥ ३॥

प्र। एषाम्। अज्मेषु। विथुराऽइव। रेजते। भूमिः। यामेषु। यत्। ह। युञ्जते। शुभे। ते। क्रीळयः। धुनयः। भ्राजत्ऽऋष्टयः। स्वयम्। महिऽत्वम्। पनयन्त। धूतयः॥ ३॥

पदार्थः-**(प्र)** **(एषाम्)** सभाध्यक्षादीनां रथाऽश्वहस्तिभृत्यादिशब्दैः **(अज्मेषु)** सङ्ग्रामेषु। **अज्म इति सङ्ग्रामनाम।** (निघं०२.१७) **(विथुरेव)** शीतज्वरव्यथितोद्विग्ना कन्येव **(रेजते)** कम्पते **(भूमिः)** **(यामेषु)** यान्ति येषु मार्गेषु तेषु **(यत्)** ये **(ह)** खलु **(युञ्जते)** **(शुभे)** शुभ्यते यस्तस्मै शुभाय विजयाय। अत्र कर्मणि क्विप्। **(ते)** **(क्रीळयः)** क्रीडन्तः **(धुनयः)** शत्रून् कम्पयन्तः **(भ्राजदृष्टयः)** प्रदीप्तायुधाः **(स्वयम्)** **(महित्वम्)** महिमानम् यथास्यात्तथा **(पनयन्त)** पनं व्यवहारं कुर्वन्ति। अत्र **बहुलं छन्दस्यमाङ्योगेऽपी**त्यडभावः। अत्र **तत्करोति तदाचष्ट** इति णिच्। **(धूतयः)** धूयन्ते युद्धक्रियासु ये ते॥ ३॥

अन्वयः-यद्ये क्रीडयो धुनयो भ्राजदृष्टयो धूतयो वीराः शुभेऽज्मेषु प्रयुञ्जते ते महित्वं यथा स्यात्तथा स्वयं ह पनयन्त। एषां यामेषु गच्छद्भिर्यानादिर्भूमिर्विथुरेव रेजते॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यथा शीघ्रं गच्छन्तो वायवो वृक्षतृणौषधिभूमिकणान् कम्पयन्ति, तथैव वीराणां सेनारथचक्रप्रहारैः पृथिवी शस्त्रप्रहारैर्भीरवश्च कम्पन्तो यथा च व्यापारवन्तो व्यवहारेण धनं प्राप्य महान्तो धनाढ्या भवन्ति, तथैव सभाद्यध्यक्षादयः शत्रुर्विजेयन स्वमहत्त्वं प्रख्यापयन्ति॥ ३॥

पदार्थः-(**यत्**) जो (**क्रीळयः**) अपने सत्य चालचलन को वर्त्तते हुए (**धुनयः**) शत्रुओं को कंपावें (**भ्राजदृष्टयः**) ऐसे तीव्र शस्त्रोंवाले (**धूतयः**) जो कि युद्ध की क्रियाओं में विचरके वे वीर (**शुभे**) श्रेष्ठ विजय के लिये (**अज्मेषु**) संग्रामों में (**प्र+युञ्जते**) प्रयुक्त अर्थात् प्रेरणा को प्राप्त होते हैं (**ते**) वे (**महित्वम्**) बड़प्पन जैसे हो वैसे (**स्वयम्**) आप (**ह**) ही (**पनयन्त**) व्यवहारों को करते हैं (**एषाम्**) इनके (**यामेषु**) उन मार्गों में कि जिनमें मनुष्य आदि प्राणी जाते हैं, चलते हुए रथों से (**भूमिः**) धरती (**विथुरा+इव+रेजते**) ऐसे कम्पती है कि मानो शीतज्वर से पीड़ित लड़की कंपे॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शीघ्र चलनेवाले पवन वृक्ष, तृण, ओषधि और धूलि को कंपाते हैं, वैसे वीरों की सेना के रथों के पहियों के प्रहार से धरती और उनके शस्त्रों की चोटों से डरनेहारे मनुष्य कंपा करते हैं और जैसे व्यापारवाले मनुष्य व्यवहार से धन को पाकर बड़े धनाढ्य होते हैं, वैसे ही सभा आदि कामों के अधीश शत्रुओं को जीतने से अपना बड़प्पन और प्रतिष्ठा विख्यात करते हैं॥३॥

पुनः सेनायुक्तः सेनापतिर्वीरः कीदृशो भवतीत्युपदिश्यते॥

फिर सेनायुक्त सेना का अधीश वीर कैसा होता है, यह विषय अगले मन्त्र में कहा है॥

स हि स्वसृत्पृषदश्वो युवा गणो३या ईशानस्तविषीभिरावृतः।
असि सत्य ऋणयावानेद्योऽस्या धियः प्राविताथा वृषा गणः॥४॥

सः। हि। स्वऽसृत्। पृषत्ऽअश्वः। युवा। गणः। अया। ईशानः। तविषीभिः। आऽवृतः। असि। सत्यः। ऋणऽयावा। अनेद्यः। अस्याः। धियः। प्रऽअविता। अथ। वृषा। गणः॥४॥

पदार्थः-(**सः**) (**हि**) यतः (**स्वसृत्**) यः स्वान् सरति प्राप्नोति सः (**पृषदश्वः**) पृषदिव वेगवन्तस्तुरङ्गा यस्य सः (**युवा**) प्राप्तयुवास्थः (**गणः**) गणनीयः (**अया**) एति जानाति सर्वा विद्या यया प्रज्ञया तया। अत्र **सुपां सुलुगि**त्याकारादेशः। (**ईशानः**) पूर्णसामर्थ्ययुक्तः (**तविषीभिः**) पूर्णबलयुक्ताभिः सेनाभिः (**आवृतः**) युक्तः (**असि**) (**सत्यः**) सत्सु साधुः (**ऋणयावा**) य ऋणं याति प्राप्नोति सः (**अनेद्यः**) प्रशस्यः। **अनेद्य इति प्रशस्यनामसु पठितम्।** (निघं०३.८) (**अस्याः**) (**धियः**) प्रज्ञायाः कर्मणो वा (**प्राविता**) रक्षणादिकर्त्ता (**अथ**) आनन्तर्ये (**वृषा**) सुखवर्षणसमर्थः (**गणः**) मरुतां समूह इव॥४॥

अन्वयः-हे सेनापते! त्वं ह्यया वृषा गणः स्वसृत्पृषदश्वो युवा गण ईशानः सत्य ऋणयावाऽनेद्योऽस्या धियः प्राविता समस्तविषीभिरावृतोऽस्याथेत्यनन्तरमस्माभिः सत्कर्त्तव्योऽप्यसि॥४॥

भावार्थः-ब्रह्मचर्येण विद्यया पूर्णशरीरात्मबलः स्वसेनया रक्षितः सेनापतिः स्वसेनां सततं रक्ष्य शत्रून् विजित्य प्रजां पालयेत्॥४॥

पदार्थः-हे सेनापते! **(सः)** **(हि)** वही तू **(अया)** जिससे सब विद्या जानी जाती हैं, उस बुद्धि से युक्त **(वृषाः)** शीतल मन्द सुगन्धिपन से सुखरूपी वर्षा करने में समर्थ **(गणः)** पवनों के समान वेग बलयुक्त **(स्वसृत्)** अपने लोगों को प्राप्त होनेवाला **(पृषदश्वः)** वा मेघ के वेग के समान जिसके घोड़े हैं **(युवा)** तथा जवानी को पहुंचा हुआ **(गणः)** अच्छे सज्जनों में गिनती करने के योग्य **(ईशानः)** परिपूर्णसामर्थ्य युक्त **(सत्यः)** सज्जनों में सीधे स्वभाव वा **(ऋणयावा)** दूसरों का ऋण चुकानेवाला **(अनेद्यः)** प्रशंसनीय और **(अस्याः)** इस **(धियः)** बुद्धि वा कर्म की **(प्राविता)** रक्षा करनेहारा **(तविषीभिः)** परिपूर्णबलयुक्त सेनाओं से **(आवृतः)** युक्त **(असि)** है **(अथ)** इसके अनन्तर हम लोगों के सत्कार करने योग्य भी है॥४॥

भावार्थः-ब्रह्मचर्य और विद्या से परिपूर्ण शारीरिक और आत्मिक बलयुक्त अपनी सेना से रक्षा को प्राप्त सेनापति सेना की निरन्तर रक्षा करके शत्रुओं को जीतके प्रजा का पालन करे॥४॥

पुनस्ते किं कुर्युरित्युपदिश्यते॥

फिर वे क्या करते हैं, यह विषय अगले मन्त्र में कहा है॥

पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा।
यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे॥५॥

पितुः। प्रत्नस्य। जन्मना। वदामसि। सोमस्य। जिह्वा। प्र। जिगाति। चक्षसा। यत्। ईम्। इन्द्रम्। शमि। ऋक्वाणः। आशत। आत्। इत्। नामानि। यज्ञियानि। दधिरे॥५॥

पदार्थः-(**पितुः**) पालकस्य जनकस्य **(प्रत्नस्य)** पुरातनस्याऽनादेः **(जन्मना)** शरीरेण संयुक्ताः **(वदामसि)** वदामः **(सोमस्य)** उत्पन्नस्य जगतः **(जिह्वा)** रसनेन्द्रियं वाग्वा **(प्र)** **(जिगाति)** प्रशंसति **(चक्षसा)** दर्शनेन वा **(यत्)** यानि **(ईम्)** प्राप्तव्यम् **(इन्द्रम्)** विद्युदाख्यमग्निम् **(शमि)** कर्मणि। **शमीति कर्मनामसु पठितम्।** (निघं०२.१) **(ऋक्वाणः)** प्रशस्ता ऋचः स्तुतयो विद्यन्ते येषां ते **(आशत)** प्राप्नुत **(आत्)** अनन्तरे **(इत्)** एव **(नामानि)** जलानि **(यज्ञियानि)** शिल्पादियज्ञार्हाणि **(दधिरे)** धरन्तु॥५॥

अन्वयः-ऋक्वाणो वयं प्रत्नस्य पितुर्जगदीश्वरस्य व्यवस्थया कर्माऽनुसारतः प्राप्तेन मनुष्यदेहधारणाख्येन जन्मना सोमस्य चक्षसा यानि यज्ञियानि नामानि च प्रवदामसि भवतः प्रत्युपदिशमो वा यदीमिन्द्रं जिह्वा प्रजिगाति तानि यूयमाऽऽशत प्राप्नुतादिद् दधिर एवं धरन्तु॥५॥

भावार्थः-मनुष्यैरिमं देहमाश्रित्य पितृभावेन परमेश्वरस्याज्ञापालनरूपप्रार्थनां कृत्वोपास्योपदिश्य जगत्पदार्थगुणविज्ञानोपकारान् सङ्गृह्य जन्मसाफल्यं कार्य्यम्॥५॥

पदार्थः-(**ऋक्वाणः**) प्रशंसित स्तुतियों वाले हम लोग **(प्रत्नस्य)** पुरातन अनादि **(पितुः)** पालनेहारे जगदीश्वर की व्यवस्था से अपने कर्म्म के अनुसार पाये हुए मनुष्य देह के **(जन्मना)** जन्म से **(सोमस्य)** प्रकट संसार के **(चक्षसा)** दर्शन से जिन **(यज्ञियानि)** शिल्प आदि कर्मों के योग्य **(नामानि)**

जलों को **(वदामसि)** तुम्हारे प्रति उपदेश करें वा **(यत्)** जो **(ईम्)** प्राप्त होने योग्य **(इन्द्रम्)** बिजुली अग्नि के तेज को **(शमि)** कर्म के निमित्त **(जिह्वा)** जीभ वा वाणी **(प्रजिगाति)** स्तुति करती है, उन सब की तुम लोग **(आशत)** प्राप्त होओ और **(आत+इत्)** उसी समय इनको **(दधिरे)** सब लोग धारण करो॥५॥

भावार्थः-मनुष्यों को चाहिये कि इस मनुष्य देह को पाकर पितृभाव से परमेश्वर की आज्ञापालन रूप प्रार्थना, उपासना और परमेश्वर का उपदेश, संसार के पदार्थ और उनके विशेष ज्ञान से उपकारों को लेकर अपने जन्म को सफल करें॥५॥

पुनस्ते किं कुर्युरित्युपदिश्यते॥

फिर वे क्या करें, इस विषय को अगले मन्त्र में कहा है॥

श्रियसे॒ कं भा॒नुभि॒: सं मि॑मिक्षिरे॒ ते र॒श्मिभि॒स्त ऋक्व॑भि: सुखा॒दय॑:।
ते वाशी॑मन्त इ॒ष्मिणो॒ अभी॑रवो वि॒द्रे प्रि॒यस्य॒ मारु॑तस्य॒ धाम्न॑:॥६॥१३॥

श्रि॒यसे॑। कम्। भा॒नुभि॑:। सम्। मि॒मि॒क्षि॒रे॒। ते। र॒श्मिभि॑:। ते। ऋक्व॑ऽभिः। सु॒ऽख॒ादय॑:। ते। वाशी॑ऽमन्तः। इ॒ष्मिण॑:। अभी॑रवः। वि॒द्रे। प्रि॒यस्य॑। मारु॑तस्य। धाम्न॑:॥६॥

पदार्थः-**(श्रियसे)** श्रयितुम् **(कम्)** सुखम् **(भानुभिः)** दिवसैः **(सम्)** सम्यक् **(मिमिक्षिरे)** मेढुमिच्छन्ति **(ते)** **(रश्मिभिः)** अग्निकिरणैः **(ते)** **(ऋक्वभिः)** प्रशस्ता ऋचः स्तुतयो विद्यन्ते येषु कर्मसु तैः **(सुखादयः)** सुष्ठु खादयो भोजनादीनि येषां ते **(ते)** **(वाशीमन्तः)** प्रशस्ता वाशी वाग् विद्यते येषां ते **(इष्मिणः)** प्रशस्तविज्ञानगतिमन्तः **(अभीरवः)** भयरहिताः **(विद्रे)** विन्दन्ति लभन्ते। **छन्दसि वा द्वे भवतः।** (अष्टा०वा०६.१.८) अनेन वार्त्तिकेन द्विर्वचनाभावः। **(प्रियस्य)** प्रसन्नकारकस्य **(मारुतस्य)** कलायन्त्रवायोः प्राणस्य वा **(धाम्नः)** गृहात्॥६॥

अन्वयः-ये भानुभि कं श्रियसे प्रियस्य मारुतस्य धाम्नो विद्यां जलं वा संमिमिक्षिरे ते शिल्पविद्याविदो भवन्ति। ये रश्मिभिरग्निकिरणैः कं श्रियसे कलाभिर्यानानि चालयन्ति ते शीघ्रं स्थानान्तरप्राप्तिं विद्रे लभन्ते। ऋक्वभिर्ये कं श्रियसे सुखादयो भवन्ति, ते आरोग्यं लभन्ते। ये वाशीमन्त इष्मिणोऽभीरवः प्रियस्य मारुतस्य धाम्नो युद्धे प्रवर्त्तन्ते ते विद्रे विजयं लभन्ते॥६॥

भावार्थः-ये मनुष्याः प्रतिदिनं सृष्टिपदार्थविद्यां लब्ध्वाऽनेकोपकारान् गृहीत्वा तद्विद्याध्ययनाऽध्यापनैर्वाग्मिनो भूत्वा शत्रून् शुद्धाचारे वर्त्तन्ते त एव सर्वदा सुखिनो भवन्तीति॥६॥

अत्र राजप्रजापुरुषाणां कर्त्तव्यानि कर्माण्युक्तान्यत एतत्सूक्तार्थेन सह पूर्वसूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति सप्ताशीतितमं ८७ सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः–जो **(भानुभिः)** दिन–दिन से **(कम्)** सुख को **(श्रियसे)** सेवन करने के लिये **(ते)** वे **(प्रियस्य)** प्रेम उत्पन्न करानेवाले **(मारुतस्य)** कला के पवन वा प्राणवायु के **(धाम्नः)** घर से विद्या वा जल को **(सम्+मिमिक्षिरे)** अच्छे प्रकार छिड़कना चाहते हैं **(ते)** वे शिल्पविद्या के जाननेवाले होते हैं तथा जो **(रश्मिभिः)** अग्निकिरणों से सुख के सेवन के लिये कलाओं से यानों को चलाते हैं, वे शीघ्र एक स्थान से दूसरे स्थान का **(विद्रे)** लाभ पाते हैं **(ऋक्वभिः)** जिनमें प्रशंसनीय स्तुति विद्यमान है, उनसे जो सुख के सेवन करने के लिये **(सुखादयः)** अच्छे–अच्छे पदार्थों के भोजन करनेवाले होते हैं **(ते)** वे आरोग्यपन को पाते हैं **(वाशीमन्तः)** प्रशंसित जिनकी वाणी वा **(इष्मिणः)** विशेष ज्ञान है वे **(अभीरवः)** निर्भय पुरुष प्रेम उत्पन्न करानेहारे प्राणवायु वा कलाओं के पवन के घर से युद्ध में प्रवृत्त होते हैं, वे विजय को प्राप्त होते हैं॥६॥

भावार्थः–जो मनुष्य प्रतिदिन सृष्टिपदार्थविद्या को पा अनेक उपकारों को ग्रहण कर उस विद्या के पढ़ने और पढ़ाने से वाचाल अर्थात् बातचीत में कुशल हो और शत्रुओं को जीतकर अच्छे आचरण में वर्त्तमान होते हैं, वे ही सब कभी सुखी होते हैं॥६॥

इस सूक्त में राजा प्रजाओं के कर्त्तव्य कहे हैं, इस कारण इस सूक्त के अर्थ से पिछले सूक्त के अर्थ की संगति है, यह जानना चाहिये॥

यह सत्तासी ८७ वां सूक्त और तेरह १३वाँ वर्ग भी पूरा हुआ॥

अथास्य षड्चस्याष्टाशीतितमस्य सूक्तस्य राहूगणपुत्रो गोतम ऋषिः। मरुतो देवताः। १ पङ्क्तिः। २ भुरिक्पङ्क्तिः। ५ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३ निचृत् त्रिष्टुप्। ४ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ६ निचृद् बृहती छन्दः। मध्यमः स्वरः॥

पुनः पूर्वोक्तसभाध्यक्षादिपुरुषाणां कृत्यमुपदिश्यते॥

अब छः मन्त्रोंवाले अठासीवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र से फिर भी सभाध्यक्ष आदि का उपदेश किया है॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः॥ १॥

आ। विद्युन्मत्ऽभिः। मरुतः। सुऽअर्कैः। रथेभिः। यात। ऋष्टिमत्ऽभिः। अश्वऽपर्णैः। आ। वर्षिष्ठया। नः। इषा। वयः। न। पप्तत। सुऽमायाः॥ १॥

पदार्थः-(**आ**) अभितः (**विद्युन्मद्भिः**) तारयन्त्रादिसंबद्धा विद्युतो विद्यन्ते येषु तैः (**मरुतः**) सभाध्यक्षप्रजा मनुष्याः (**स्वर्कैः**) शोभना अर्का मन्त्रा विचारा वा देवा विद्वांसो येषु तैः। (**रथेभिः**) विमानादिभिर्यानैः (**यात**) गच्छत (**ऋष्टिमद्भिः**) कलाभ्रामणार्थयष्टिशस्त्रास्त्रादियुक्तैः (**अश्वपर्णैः**) अग्न्यादीनामश्वानां पतनैः सह वर्त्तमानैः (**आ**) समन्तात् (**वर्षिष्ठया**) अतिशयेन वृद्धया (**नः**) अस्माकम् (**इषा**) उत्तमान्नादिसमूहेन (**वयः**) पक्षिणः (**न**) इव (**पप्तत**) उत्पतत (**सुमायाः**) शोभना माया प्रज्ञा येषान्ते॥ १॥

अन्वयः-हे सुमाया मरुतः सभाध्यक्षप्रजापुरुषा! यूयं नोऽस्माकं वर्षिष्ठयेषा पूर्णैः स्वर्कैर्ऋष्टिमद्भिरश्वपर्णै-र्विद्युन्मद्भी रथेभिर्वयो न पप्ततापप्तत यातायात॥ १॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा पक्षिण उपर्यधः सङ्गत्याऽभीष्टं देशान्तरं सुखेन गच्छन्त्यागच्छन्ति तथैव सुसाधितैस्तडित्तारयन्त्रैर्विमानादिभिर्यानैरुपर्यधः समागमनेनाभीष्टान् समाचरान् वा देशान् सुखेन गत्वागत्य स्वकार्य्याणि संसाध्य सततं सुखयितव्यम्॥ १॥

पदार्थः-हे (**सुमायाः**) उत्तम बुद्धिवाले (**मरुतः**) सभाध्यक्ष वा प्रजा पुरुषो! तुम (**नः**) हमारे (**वर्षिष्ठया**) अत्यन्त बुढ़ापे से (**इषा**) उत्तम अन्न आदि पदार्थों (**स्वर्कैः**) श्रेष्ठ विचारवाले विद्वानों (**ऋष्टिमद्भिः**) तारविद्या में चलाने अर्थ डण्डे और शस्त्रास्त्र (**अश्वपर्णैः**) अग्नि आदि पदार्थरूपी घोड़ों के गमन के साथ वर्तमान (**विद्युन्मद्भिः**) जिनमें कि तार बिजली हैं, उन (**रथेभिः**) विमान आदि रथों से (**वयः**) पक्षियों के (**न**) समान (**पप्तत**) उड़ जाओ (**आ**) उड़ आओ (**यात**) जाओ (**आ**) आओ॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जैसे पखेरू ऊपर-नीचे आके चाहे हुए एक स्थान से दूसरे स्थान को सुख से जाते हैं, वैसे अच्छे प्रकार सिद्ध किये हुए तारविद्या

प्रयोग से चलाये हुए विमान आदि यानों से आकाश और भूमि वा जल में अच्छे प्रकार जा-आके अभीष्ट देशों को सुख से जा-आके अपने कार्य्यों को सिद्ध करके निरन्तर सुख को प्राप्त हों॥ १॥

तैस्ते किं प्राप्नुवन्तीत्युपदिश्यते॥

उक्त कामों से वे क्या पाते हैं, इस विषय को अगले मन्त्र में कहा है॥

तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः।
रुक्मो न चित्रः स्वधितीवान् पव्या रथस्य जङ्घनन्त भूम॥ २॥

ते। अरुणेभिः। वरम्। आ। पिशङ्गैः। शुभे। कम्। यान्ति। रथतूःऽभिः। अश्वैः। रुक्मः। न। चित्रः। स्वधितिऽवान्। पव्या। रथस्य। जङ्घनन्त। भूम॥ २॥

पदार्थः-(**ते**) शिल्पविद्याविचक्षणाः (**अरुणेभिः**) आरक्तवर्णैरग्निप्रयोगजैः (**वरम्**) श्रेष्ठम् (**आ**) आभिमुख्ये (**पिशङ्गैः**) अग्निजलसंयोगजैर्वाष्पैः पीतैः (**शुभे**) श्रेष्ठाय व्यवहाराय (**कम्**) सुखम् (**यान्ति**) गच्छन्ति (**रथतूर्भिः**) ये रथान् विमानादियानानि तूर्वन्ति शीघ्रं गमयन्ति तैः (**अश्वैः**) आशुगमनहेतुभिरग्नि-जलकलागृहरूपैरश्वैः (**रुक्मः**) देदीप्यमानः (**न**) इव (**चित्रः**) शौर्यादिगुणैरद्भुतः (**स्वधितिवान्**) स्वधितिः प्रशस्तो वज्रो विद्यते यस्य (**पव्या**) वज्रतुल्यया चक्रधारया (**रथस्य**) विमानादियानसमूहस्य (**जङ्घनन्त**) अत्यन्तं घ्नन्ति। लडर्थे लङ्। **छन्दस्युभयथे**ति आर्द्धधातुसंज्ञयाऽकारयकारयोर्लोपः अडभावश्च। (**भूम**) भवेम। अत्र लुङ्यडभावश्च॥ २॥

अन्वयः-यथा शिल्पविदो विद्वांसः शुभे अरुणेभिः पिशङ्गै रथतूर्भिरश्वै रथस्य पव्या स्वधितिवान् रुक्मश्चित्रो नेव जङ्घनन्त ते वरं कमायान्ति प्राप्नुवन्ति तथा वयमपि भूम॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारौ। यथा शूरवीरः सुशस्त्रवान् पुरुषो वेगेन गत्वागत्य शत्रून् हन्ति, तथैव मनुष्या वेगवत्सु यानेषु स्थित्वा देशदेशान्तरं गत्वा शत्रून् विजयन्ते॥ २॥

पदार्थः-जैसे कारीगरी को जाननेहारे विद्वान् लोग (**शुभे**) उत्तम व्यवहार के लिये (**अरुणेभिः**) अच्छे प्रकार अग्नि के ताप से लाल (**पिशङ्गैः**) वा अग्नि और जल के संयोग की उठी हुई भाफों से कुछेक श्वेत (**रथतूर्भिः**) जो कि विमान आदि रथों को चलानेवाले अर्थात् अति शीघ्र उनको पहुंचाने के कारण आग और पानी की कलों के घररूपी (**अश्वैः**) घोड़े हैं, उनके साथ (**रथस्य**) विमान आदि रथ की (**पव्या**) वज्र के तुल्य पहियों की धार से (**स्वधितिवान्**) प्रशंसित वज्र से अन्तरिक्ष वायु को काटने (**रुक्मः**) और उत्तेजना रखनेवाले (**चित्रः**) शूरता, धीरता, बुद्धिमता आदि गुणों से अद्भुत मनुष्य के (**न**) समान मार्ग को (**जङ्घनन्त**) हनन करते और देश-देशान्तर को जाते-आते हैं (**ते**) वे (**वरम्**) उत्तम (**कम्**) सुख को (**आयान्ति**) चारों ओर से प्राप्त होते हैं, वैसे हम भी (**भूम**) इसको करके आनन्दित होवें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे शूरवीर अच्छे शस्त्र रखनेवाला पुरुष वेग से जाकर शत्रुओं को मारता है, वैसे मनुष्य वेगवाले रथों पर बैठ देश-देशान्तर को जा-आ के शत्रुओं को जीतते हैं॥२॥

अथ सभाध्यक्षाद्युपदेशमाह॥

अब सभाध्यक्षादिकों को उपदेश अगले मन्त्र में किया है॥

श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम्॥३॥

श्रिये। कम्। वः। अधि। तनूषु। वाशीः। मेधा। वना। न। कृणवन्ते। ऊर्ध्वा। युष्मभ्यम्। कम्। मरुतः। सुऽजाताः। तुविऽद्युम्नासः। धनयन्ते। अद्रिम्॥३॥

पदार्थः-(**श्रिये**) विद्याराज्यशोभाप्राप्तये (**कम्**) सुखम् (**वः**) युष्माकम् (**अधि**) आधेयत्वे (**तनूषु**) शरीरेषु (**वाशीः**) वेदविद्यायुक्ता वाणीः (**मेधा**) पवित्रकारिका प्रज्ञा। केचिद् भ्रान्ताः '**मेधा**' इत्यत्र '**मेध्या**' इति पदमाश्रित्याद्युदात्तेन मेध्यपदार्थायै तत्पदमिच्छन्ति। तच्चासमञ्जसमेव। कुतः? '**मेधा**' इत्यन्तोदात्तस्य दर्शनात्। भट्टमोक्षमूलरोऽपि '**मेधा**' इति सविसर्गं पदं मत्वा बुद्धिपदार्थायैनत् पदं विवृणोति तच्चाप्यसमञ्जसमेव। कुतः? '**मेधा**' इति निर्विसर्जनीयस्य पदस्य जागरूकत्वात्। (**वना**) वनानि (**न**) इव (**कृणवन्ते**) कुर्वन्ति। व्यत्ययेनात्रात्मनेपदम्। (**ऊर्ध्वा**) उत्कृष्टसुखप्रापिकाः (**युष्मभ्यम्**) (**कम्**) कल्याणम् (**मरुतः**) (**सुजाताः**) शोभनेषु विद्यादिगुणेषु प्रसिद्धाः (**तुविद्युम्नासः**) तुवीनि बहूनि द्युम्नानि विद्याप्रकाशनानि येषान्ते (**धनयन्ते**) धनं कुर्वन्ति (**अद्रिम्**) पर्वतमिव॥३॥

अन्वयः-हे मरुतो! ये वस्तनूषूर्ध्वा वाशीर्मेधा वना नोच्छ्रितवनवृक्षसमूहानि वाधिकृणवन्ते तदाचरणायाधिकारं ददति। हे सुजातास्तुविद्युम्नासो महान्तो! युष्मभ्यं कं यथा स्यात् तथाद्रिं धनयन्ते पर्वतसदृशं महान्तं धनं कुर्वन्ति ते युष्माभिः सदा सेवनीयाः॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा मेघेन कूपोदकेन वा सिक्ताः वनान्युपवनानि वा निजफलैः प्राणिनः सुखयन्ति, तथैव विद्वांसो विद्यासुशिक्षा जनयित्वा निजपरिश्रमफलेन सर्वान् मनुष्यान् सुखयन्तीति॥३॥

पदार्थः-हे (**मरुतः**) सभाध्यक्षादि सज्जनो! जो (**वः**) तुम्हारे (**तनूषु**) शरीरों में (**श्रिये**) लक्ष्मी के लिये (**कम्**) सुख (**ऊर्ध्वा**) अच्छे सुख को प्राप्त करनेवाली (**वाशीः**) वेदवाणी (**मेधा**) शुद्ध बुद्धियों को (**वना**) ऊंचे-ऊंचे बनैले पेड़ों के (**न**) समान (**अधि कृणवन्ते**) अधिकृत करते हैं अर्थात् उनके आचरण के लिये अधिकार देते हैं। हे (**सुजाताः**) विद्यादि श्रेष्ठ गुणों में प्रसिद्ध उक्त सज्जनो! जो (**तुविद्युम्नासः**) बहुत विद्या प्रकाशों वाले महात्मा जन (**युष्मभ्यम्**) तुम लोगों के लिये (**कम्**) अत्यन्त

सुख जैसे हो वैसे **(अद्रिम्)** पर्वत के समान **(धनयन्ते)** बहुत धन प्रकाशित कराते हैं, वे तुम लोगों को सदा सेवने योग्य हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मेघ वा कूप जल से सिंचे हुए वन और उपवन, बाग-बगीचे अपने फलों से प्राणियों को सुखी करते हैं, वैसे विद्वान् लोग विद्या और अच्छी शिक्षा करके अपने परिश्रम के फल से सब मनुष्यों को सुखसंयुक्त करते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर भी उक्त विषय का उपदेश अगले मन्त्र में किया है॥

अहा॑नि॒ गृध्रा॒: पर्या व॒ आगु॑रि॒मां धिय॑ं वार्का॒र्यां च॑ दे॒वीम्।
ब्रह्म॑ कृ॒ण्वन्तो॒ गोत॑मासो अ॒र्कैरू॒र्ध्वं नु॑नुद्र उत्स॒धिं पिब॑ध्यै॥४॥

अहा॑नि। गृध्रा॑:। परि॑। आ। व॒:। आ। अ॒गु॒:। इ॒माम्। धिय॑म्। वा॒र्का॒र्याम्। च॒। दे॒वीम्। ब्रह्म॑। कृ॒ण्वन्त॑:। गोत॑मास:। अ॒र्कै:। ऊ॒र्ध्वम्। नु॒नु॒द्रे॒। उ॒त्स॒ऽधिम्। पिब॑ध्यै॥४॥

पदार्थः-(**अहानि**) दिनानि (**गृध्राः**) अभिकाङ्क्षन्तः (**परि**) सर्वतः (**आ**) आभिमुख्ये (**वः**) युष्मभ्यम् (**आ**) समन्तात् (**अगुः**) प्राप्तवन्तः (**इमाम्**) (**धियम्**) धारणवतीं प्रज्ञाम् (**वार्कार्य्याम्**) जलमिव निर्मलां सम्पत्तव्याम् (**च**) अनुक्तसमुच्चये (**देवीम्**) देदीप्यमानाम् (**ब्रह्म**) धनमन्नं वेदाध्यापनम् (**कृण्वन्तः**) कुर्वन्तः (**गोतमासः**) अतिशयेन ज्ञानवन्तः (**अर्कैः**) वेदमन्त्रैः (**ऊर्ध्वम्**) उत्कृष्टभागम्। (**नुनुद्रे**) प्रेरते (**उत्सधिम्**) उत्साः कूपा धीयन्ते यस्मिन् भूमिभागे तम् (**पिबध्यै**) पातुम्॥४॥

अन्वयः-हे मनुष्या! ये गृध्रा गोतमासो ब्रह्म कृण्वन्तः सन्तोऽर्कैरहान्यूर्ध्वं पिबध्या उत्सधिमिवानुनुद्रे ते वो युष्मभ्यं वार्कार्यामिमां देवीं धियं धनं च पर्यागुस्ते सदा सेवनीयाः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे जिज्ञासवो मनुष्या! यथा पिपासानिवारणादिप्रयोजनायातिश्रमेण जलाशयं निर्माय स्वकार्याणि साध्नुवन्ति, तथैव भवन्तोऽतिपुरुषार्थेन विदुषां सङ्गेन विद्याभ्यासं यथावत् कृत्वा सर्वविद्याप्रकाशां प्रज्ञां प्राप्यां तदनुकूलां क्रियां साध्नुवन्तु॥४॥

पदार्थः-हे मनुष्यो! जो **(गृध्राः)** सब प्रकार से अच्छी काङ्क्षा करनेवाले **(गोतमासः)** अत्यन्त ज्ञानवान् सज्जन **(ब्रह्म)** धन, अन्न और वेद का पठन **(कृण्वन्तः)** करते हुए **(अर्कैः)** वेदमन्त्रों से **(अहानि)** दिनोंदिन **(ऊर्ध्वम्)** उत्कर्षता से **(पिबध्यै)** पीने के लिये **(उत्सधिम्)** जिस भूमि में कुएं नियत किये जावें, उसके समान **(आ+नुनुद्रे)** सर्वथा उत्कर्ष होने के लिये **(वः)** तुम्हारे सामने होकर प्रेरणा करते हैं वे **(वार्कार्य्याम्)** जल के तुल्य निर्मल होने के योग्य **(देवीम्)** प्रकाश को प्राप्त होती हुई **(इमाम्)** इस **(धियम्)** धारणवती बुद्धि **(च)** और धन को **(परि+आ+अगुः)** सब कहीं से अच्छे प्रकार प्राप्त हो के अन्य को प्राप्त कराते हैं, वे सदा सेवा के योग्य हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे ज्ञान गौरव चाहनेवालो! जैसे मनुष्य पिआस के खोने आदि प्रयोजनों के लिये परिश्रम के साथ कुंआ, बावरी, तालाब आदि खुदा कर अपने-अपने कामों को सिद्ध करते हैं, वैसे आप लोग अत्यन्त पुरुषार्थ और विद्धानों के संग से विद्या के अभ्यास को जैसे चाहिये वैसा करके समस्त विद्या से प्रकाशित उत्तम बुद्धि को पाकर उसके अनुकूल क्रिया को सिद्ध करो॥४॥

विद्वान् मनुष्यान् प्रति किं किं शिक्षेतेत्युपदिश्यते॥

विद्वान् मनुष्यों को क्या-क्या शिक्षा दे, यह विषय अगले मन्त्र में कहा है॥

एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः।
पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराहून्॥५॥

एतत्। त्यत्। न। योजनम्। अचेति। सस्वः। ह। यत्। मरुतः। गोतमः। वः। पश्यन्। हिरण्यऽचक्रान्। अयःऽदंष्ट्रान्। विऽधावतः। वराहून्॥५॥

पदार्थः-(**एतत्**) प्रत्यक्षम् (**त्यत्**) उक्तम् (**न**) इव (**योजनम्**) योक्तुमर्हं विमानादियानम् (**अचेति**) संज्ञाप्यते। **चिती संज्ञाने**। लुङि कर्मणि चिण्। (**सस्वः**) उपदिशति। स्वृधातोर्लङि प्रथमैकवचने **बहुलं छन्दसी**ति शपःस्थाने श्लुः। **हल्ङ्याब्भ्य** इति तलोपः। (**ह**) खलु (**यत्**) (**मरुतः**) मनुष्याः (**गोतमः**) विद्वान् (**वः**) युष्मभ्यं जिज्ञासुभ्यः (**पश्यन्**) पर्य्यालोचमानः (**हिरण्यचक्रान्**) हिरण्यानि सुवर्णादीनि तेजांसि चक्रेषु येषां विमानादीनां तान् (**अयोदंष्ट्रान्**) अयोदंष्ट्रायोदंसनानि येषु तान् (**विधावतः**) विविधान् मार्गान् धावतः (**वराहून्**) वरमाह्वयतः शब्दायमानान्॥५॥

अन्वयः-हे मरुतो! यूयं यद्यो गोतमो न वो योजनं हिरण्यचक्रानयोदंष्ट्रान् वराहून् विधावतो रथानेतत्पश्यन् ह सस्वस्त्यदचेति तं विज्ञाय सत्कुरुत॥५॥

भावार्थः-अत्रोपमालङ्कारः हे मनुष्या! यथा परावरज्ञो विद्वान् सुक्रियाः कृत्वाऽऽनन्दं भुङ्क्ते, तथैव भवन्तोऽपि विद्वत्सङ्गेन विद्यासिद्धाः क्रियाः कृत्वा सुखानि भुञ्जीरन्॥५॥

पदार्थः-हे (**मरुतः**) मनुष्यो! तुम (**गोतमः**) विद्वान् के (**न**) तुल्य (**वः**) विद्या का ज्ञान चाहनेवाले तुम लोगों को (**यत्**) जो (**योजनम्**) जोड़ने योग्य विमान आदि यान (**हिरण्यचक्रान्**) जिनके पहियों में सोने का काम वा अति चमक दमक हो, उन (**अयोदंष्ट्रान्**) बड़ी लोहे की कीलों वाले (**वराहून्**) अच्छे शब्दों को करने (**विधावतः**) न्यारे-न्यारे मार्गों को चलनेवाले विमान आदि रथों को (**एतत्**) प्रत्यक्ष (**पश्यन्**) देख के (**ह**) ही (**सस्वः**) उपदेश करता है, (**त्यत्**) वह उसका उपदेश किया हुआ तुम लोगों को (**अचेति**) चेत करता है, उसको तुम जान के मानो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे अगली-पिछली बातों को जाननेवाला विद्वान् अच्छे-अच्छे काम कर आनन्द को भोगता है, वैसे आप लोग भी विद्या से सिद्ध हुए कामों को करके सुखों को भोगो॥५॥

पुनर्जिज्ञासुरेतेषु कथं वर्त्तित्वा किं गृह्णीयादित्युपदिश्यते॥

अब विद्या ज्ञान चाहनेवाला पुरुष उनमें कैसे वर्त्त कर, क्या ग्रहण करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी।
अस्तोभयद् वृथासामनु स्वधां गभस्त्योः॥६॥१४॥

एषा। स्या। वः। मरुतः। अनुऽभर्त्री। प्रति। स्तोभति। वाघतः। न। वाणी। अस्तोभयत्। वृथा। आसाम्। अनु। स्वधाम्। गभस्त्योः॥६॥

पदार्थः-(**एषा**) उक्तविद्या (**स्या**) वक्ष्यमाणा (**वः**) युष्मान् (**मरुतः**) (**अनुभर्त्री**) अनुगतसुखधारणस्वभावा (**प्रति**) प्रतिबन्धेन (**स्तोभति**) बध्नाति (**वाघतः**) ऋत्विक् (**न**) इव (**वाणी**) (**अस्तोभयत्**) बन्धयति (**वृथा**) (**आसाम्**) विद्यया क्रियमाणानाम् (**अनु**) (**स्वधाम्**) स्वकीयां धारणशक्तिम् (**गभस्त्योः**) बाह्वोः॥६॥

अन्वयः-हे मरुतो! वो युष्माकं यैषा स्यानुभर्त्री वाणी वाघतो नेव विद्याः प्रतिष्टोभत्यासां गभस्त्योरनु स्वधां प्रतिष्टोभति वृथा व्यवहारानस्तोभयदेतां भवद्भ्यो वयं प्राप्नुयाम॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा ऋत्विजो वाक्यज्ञकार्याणि प्रकाश्य दोषान् निवारयन्ति, तथैव विदुषां वाणी विद्याः प्रकाश्याऽविद्यां निवारयति। अत एव सर्वैर्विद्वत्सङ्गः सततं सेवनीयः॥६॥

अत्र मनुष्याणां विद्यासिद्धयेऽध्ययनाऽध्यापनरीतिः प्रकाशितैतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोद्धव्यम्॥

इति अष्टाशीतितमं ८८ सूक्तं चतुर्दशो १४ वर्गश्च समाप्तः॥

पदार्थः-हे (**मरुतः**) मनुष्यो! तुम लोगों की जो (**एषा**) यह कही हुई वा (**स्या**) कहने को है, वह (**अनुभर्त्री**) इष्ट सुख धारण करानेहारी (**वाणी**) वाक् (**वाघतः**) ऋतु-ऋतु में यज्ञ करने-करानेहारे विद्वान् के (**न**) समान विद्याओं का (**प्रति+स्तोभति**) प्रतिबन्ध करती अर्थात् प्रत्येक विद्याओं को स्थिर करती हुई (**आसाम्**) विद्या के कामों को (**गभस्त्योः**) भुजाओं में (**अनु**) (**स्वधाम्**) अपने साधारण सामर्थ्य के अनुकूल प्रतिबन्धन करती है तथा (**वृथा**) झूंठ व्यवहारों को (**अस्तोभयत्**) रोक देती है, इस वाणी को आप लोगों से हम सुनें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे ऋतु-ऋतु में यज्ञ करानेवाले की वाणी यज्ञ कामों का प्रकाश कर दोषों को निवृत्त करती है, वैसे ही विद्वानों की वाणी विद्याओं का प्रकाश कर अविद्या को निवृत्त करती है, इसीसे सब मनुष्यों को विद्वानों के संग का निरन्तर सेवन करना चाहिये॥६॥

इस सूक्त में मनुष्यों को विद्यासिद्धि के लिये पढ़ने-पढ़ाने की रीति प्रकाशित की है, इस कारण इसके अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह अठासीवाँ ८८ सूक्त और चौदहवाँ १४ वर्ग पूरा हुआ॥

अथास्यैकोननवतितमस्य दशर्चस्य सूक्तस्य राहूगणपुत्रो गोतम ऋषिः। विश्वे देवा देवताः। १,५ निचृज्जगती। २,३,७ जगती छन्दः। निषादः स्वरः। ४ भुरिक् त्रिष्टुप्। ८ विराट् त्रिष्टुप्। ९,१० त्रिष्टुप् छन्दः। धैवतः स्वरः। ६ स्वराड् बृहती छन्दः। मध्यमः स्वरः॥

सर्वे विद्वांसः कीदृशा भवेयुर्जगज्जनैः सह कथं वर्त्तेरंश्चेत्युपदिश्यते॥

अब नवासीवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र से सब विद्वान् लोग कैसे हों और संसारी मनुष्यों के साथ कैसे अपना वर्त्ताव करें, यह उपदेश किया है॥

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे॥ १॥

आ। नः। भद्राः। क्रतवः। यन्तु। विश्वतः। अदब्धासः। अपरिऽइतासः। उत्ऽभिदः। देवाः। नः। यथा। सदम्। इत्। वृधे। असन्। अप्रऽआयुवः। रक्षितारः। दिवेऽदिवे॥ १॥

पदार्थः–(**आ**) समन्तात् (**नः**) अस्मान् (**भद्राः**) कल्याणकारकाः (**क्रतवः**) प्रशस्तक्रियावन्तः शिल्पयज्ञधियो वा (**यन्तु**) प्राप्नुवन्तु (**विश्वतः**) सर्वाभ्यो दिग्भ्यः (**अदब्धासः**) अहिंसनीयाः (**अपरीतासः**) अवर्जनीयाः (**उद्भिदः**) उत्कृष्टतया दुःखविदारकाः (**देवाः**) दिव्यगुणाः (**नः**) अस्माकम् (**यथा**) येन प्रकारेण (**सदम्**) विज्ञानं गृहं वा (**इत्**) एव (**वृधे**) सुखवर्द्धनाय (**असन्**) सन्तु। **लेट्प्रयोगः।** (**अप्रायुवः**) न विद्यते प्रगतः प्रणष्ट आयुर्बोधो येषान्ते। **जसादिषु छन्दसि वा वचनमि**ति गुणविकल्पात् **इयङुवङ्प्रकरणे तन्वादीनां छन्दसि बहुलमुपसङ्ख्यानम्** (अष्टा०वा०६.४.७७) इति वार्तिकेनोवङादेशः। (**रक्षितारः**) (**दिवेदिवे**) प्रतिदिनम्॥ १॥

अन्वयः–यथा ये विश्वतो भद्राः क्रतवोऽदब्धासोऽपरीतास उद्भिदोऽप्रायुवो देवाश्च नः सदमायन्तु, तथैते दिवे नोऽस्माकं वृधे रक्षितारोऽसन् सन्तु॥ १॥

भावार्थः–अत्रोपमालङ्कारः। यथा श्रेष्ठं सर्वर्तुकं गृहं सर्वाणि सुखानि प्रापयति, तथैव विद्वांसो विद्याः शिल्पयज्ञाश्च सर्वसुखकारकाः सन्तीति वेदितव्यम्॥ १॥

पदार्थः–(**यथा**) जैसे जो (**विश्वतः**) सब ओर से (**भद्राः**) सुख करने और (**क्रतवः**) अच्छी क्रिया वा शिल्पयज्ञ में बुद्धि रखनेवाले (**अदब्धासः**) अहिंसक (**अपरीतासः**) न त्याग के योग्य (**उद्भिदः**) अपने उत्कर्ष से दुःखों का विनाश करनेवाले (**अप्रायुवः**) जिनकी उमर का वृथा नाश होना प्रतीत न हो (**देवाः**) ऐसे दिव्य गुणवाले विद्वान् लोग जैसे (**नः**) हम लोगों को (**सदम्**) विज्ञान व घर को (**आ+यन्तु**) अच्छे प्रकार पहुंचावें, वैसे (**दिवेदिवे**) प्रतिदिन (**नः**) हमारे (**वृधे**) सुख के बढ़ाने के लिये (**रक्षितारः**) रक्षा करनेवाले (**इत्**) ही (**असन्**) हों॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सब श्रेष्ठ सब ऋतुओं में सुख देने योग्य घर सब सुखों को पहुँचाता है, वैसे ही विद्वान् लोग, विद्या और शिल्पयज्ञ सुख करनेवाले होते हैं, यह जानना चाहिये॥१॥

सर्वैर्मनुष्यैस्तेभ्यः किं प्रापणीयमित्युपदिश्यते॥

सब मनुष्यों को विद्वानों से क्या-क्या पाना चाहिये, यह विषय अगले मन्त्र में कहा है॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम्।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे॥२॥

देवानाम्। भद्रा। सुऽमतिः। ऋजुऽयताम्। देवानाम्। रातिः। अभि। नः। नि। वर्ततताम्। देवानाम्। सख्यम्। उप। सेदिम। वयम्। देवाः। नः। आयुः। प्र। तिरन्तु। जीवसे॥२॥

पदार्थः-(**देवानाम्**) विदुषाम् (**भद्रा**) कल्याणकारिणी (**सुमतिः**) शोभना बुद्धिः (**ऋजूयताम्**) आत्मन ऋजुमिच्छताम् (**देवानाम्**) दिव्यगुणानाम् (**रातिः**) विद्यादानम्। अत्र **मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः।** (अष्टा०३.३.१६) अनेन भावे क्तिन् स चान्तोदात्तः। (**अभि**) आभिमुख्ये (**नः**) अस्मभ्यम् (**नि**) नित्यम् (**वर्त्तताम्**) (**देवानाम्**) दयया विद्यावृद्धिं चिकीर्षताम् (**सख्यम्**) मित्रभावम् (**उप**) (**सेदिम**) प्राप्नुयाम। अत्र**न्येषामपि दृश्यत** इति दीर्घः। (**वयम्**) (**देवाः**) विद्वांसः (**नः**) अस्माकम् (**आयुः**) जीवनम् (**प्र**) (**तिरन्तु**) सुशिक्षया वर्द्धयन्तु (**जीवसे**) जीवितुम्। इमं मन्त्रं यास्कमुनिरेवमाचष्टे। **देवानां वयं सुमतौ कल्याण्यां मतौ। ऋजुगामिनाम्। ऋतुगामिनामिति वा। देवानां दानमभि नो निवर्तताम्। देवानां सख्यमुपसीदेम वयम्। देवा न आयुः प्रवर्धयन्तु चिरं जीवनाय।** (निरु०१२.३९)॥२॥

अन्वयः-वयं या ऋजूयतां देवानां भद्रा सुमतिर्या ऋजयूतां देवानां रातिः यदृजूयतां देवानां भद्रं सख्यं चाऽस्ति तदेतत्सर्वं नोऽस्मभ्यमभिनिवर्त्तताम्। तच्चोपसेदिमोपप्राप्नुयाम य उक्ता देवास्ते नोऽस्माकं जीवस आयुः प्रतिरन्तु॥२॥

भावार्थः-नह्याप्तानां विदुषां सङ्गेन ब्रह्मचर्यादिनियमैश्च विना कस्यापि शरीरात्मबलं वर्द्धितुं शक्यं तस्मात्सर्वैरेतेषां सङ्गो नित्यं विधेयः॥२॥

पदार्थः-(**वयम्**) हम लोग जो (**ऋजूयताम्**) अपने को कोमलता चाहते हुए (**देवानाम्**) विद्वान् लोगों की (**भद्रा**) सुख करनेवाली (**सुमतिः**) श्रेष्ठ बुद्धि वा जो अपने को निरभिमानता चाहनेवाले (**देवानाम्**) दिव्य गुणों की (**रातिः**) विद्या का दान और जो अपने को सरलता चाहते हुए (**देवानाम्**) दया से विद्या की वृद्धि करना चाहते हैं, उन विद्वानों का जो सुख देनेवाला (**सख्यम्**) मित्रपन है, यह सब (**नः**) हमारे लिये (**अभि+नि+वर्त्तताम्**) सम्मुख नित्य रहे। और उक्त समस्त व्यवहारों को

(उप+सेदिम) प्राप्त हों। और उक्त जो **(देवाः)** विद्वान् लोग हैं, वे **(नः)** हम लोगों के **(जीवसे)** जीवन के लिये **(आयुः)** उमर को **(प्र+तिरन्तु)** अच्छी शिक्षा से बढ़ावें॥२॥

भावार्थः-उत्तम विद्वानों के सङ्ग और ब्रह्मचर्य्य आदि नियमों के विना किसी का शरीर और आत्मा का बल बढ़ नहीं सकता, इससे सबको चाहिये कि इन विद्वानों का सङ्ग नित्य करें और जितेन्द्रिय रहें॥२॥

मनुष्याः कया कान् प्राप्य विश्वसिते विश्वसेयुरित्युपदिश्यते॥

मनुष्य किससे किन्हें पाकर विश्वासयुक्त पदार्थ में विश्वास करें, यह उपदेश अगले मन्त्र में किया है॥

तान्पूर्व्यया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम्।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करन्॥३॥

तान्। पूर्व्यया। निऽविदा। हूमहे। वयम्। भगम्। मित्रम्। अदितिम्। दक्षम्। अस्रिधम्। अर्यमणम्। वरुणम्। सोमम्। अश्विना। सरस्वती। नः। सुऽभगा। मयः। करत्॥३॥

पदार्थः-(**तान्**) उक्तान् वक्ष्यमाणान् सर्वान् विदुषः (**पूर्वया**) सनातन्या (**निविदा**) वेदावाण्याऽभिलक्षितान् निश्चितानर्थान् विदन्ति यया तया वाचा। **निविदिति वाङ्नामसु पठितम्।** (निघं०१.११) (**हूमहे**) प्रशंसेम (**वयम्**) (**भगम्**) ऐश्वर्य्यवन्तम् (**मित्रम्**) सर्वसुहृदम् (**अदितिम्**) सर्वविद्याप्रकाशवन्तम् (**दक्षम्**) विद्याचातुर्य्यबलयुक्तम् (**अस्रिधम्**) अहिंसकम् (**अर्य्यमणम्**) न्यायकारिणम् (**वरुणम्**) वरगुणयुक्तं दुष्टानां बन्धकारिणम् (**सोमम्**) सृष्टिक्रमेण सर्वपदार्थाभिषवकर्त्तारं शान्तम् (**अश्विना**) शिल्पविद्याध्यापकाध्ययनक्रियायुक्तावग्निजलादिद्वन्द्वं वा (**सरस्वती**) विद्यासुशिक्षया युक्ता वागिव विदुषी स्त्री (**नः**) अस्माकम् (**सुभगा**) सुष्ठ्वैश्वर्यपुत्रपौत्रादिसौभाग्यसहिता (**मयः**) सुखम् (**करन्**) कुर्य्युः। लेट् प्रयोगोऽयम्। **बहुलं छन्दसी**ति विकरणाभावः॥३॥

अन्वयः-हे मनुष्या! यथा वयं पूर्वया निविदाऽभिलक्षितानुक्तांस्तान् सर्वान् विदुषोऽस्रिधं भगं मित्रमदितिं दक्षमर्यमणं वरुणं सोमं च हूमहे। यथैतेषां समागमोत्पन्ना सुभगा सरस्वत्यश्विना नोऽस्माकं मयस्करन् सुखकारिणो भवेयुस्तथा यूयं कुरुत॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि कस्यचिद्वेदोक्तलक्षणैर्विना विदुषामविदुषां च लक्षणानि यथावद्विदितानि भवितुं शक्यानि न च विद्यासुशिक्षासंस्कृता वाक् सुखकारिणी भवितुं शक्या तस्मात्सर्वे मनुष्या वेदार्थविज्ञानेनैतेषां लक्षणानि विदित्वा विद्वत्सङ्गस्वीकरणमविद्वत्सङ्गत्यागं च कृत्वा सर्वविद्यायुक्ता भवन्तु॥३॥

पदार्थः-हे मनुष्यो! जैसे **(वयम्)** हम लोग **(पूर्वया)** सनातन **(निविदा)** वेदवाणी जिससे सब प्रकार से निश्चित किये हुए पदार्थों को प्राप्त होते हैं, उससे कहे हुए वा जिनको कहेंगे **(तान्)** उन सब

विद्वानों को वा **(अस्रिधम्)** अहिंसक अर्थात् जो हिंसा नहीं करता उस **(भगम्)** ऐश्वर्ययुक्त **(मित्रम्)** सबका मित्र **(अदितिम्)** समस्त विद्याओं का प्रकाश **(दक्षम्)** और उनकी चतुराइयोंवाला विद्वान् **(अर्य्यमणम्)** न्यायकारी **(वरुणम्)** उत्तम गुणयुक्त दुष्टों का बन्धनकर्त्ता **(सोमम्)** सृष्टि के क्रम से सब पदार्थों का निचोड़ करनेवाला तथा जो शान्तचित्त है, उस **(अश्विना)** विद्या के पढ़ने-पढ़ाने का काम रखनेवाले वा जल और आग दो-दो पदार्थों को **(हूमहे)** स्तुति करते हैं और जो संग से उत्पन्न हुई **(सरस्वती)** विद्या और **(सुभगा)** श्रेष्ठ शिक्षा से युक्त वाणी **(नः)** हम लोगों को **(मयः)** सुख **(करन्)** करें, वैसे तुम भी करो और वाणी तुम्हारे लिये भी वैसे कहें॥३॥

भावार्थः-किसी को **[**भी**]** वेदोक्त लक्षणों के विना विद्वान् और मूर्खों के लक्षण जाने नहीं जा सकते और न उनके विना विद्या और श्रेष्ठ शिक्षा से सिद्ध की हुई वाणी सुख करनेवाली हो सकती है। इससे सब मनुष्य वेदार्थ के विशेष ज्ञान से विद्वान् और मूर्खों के लक्षण जानकर विद्वानों का संग कर, मूर्खों का संग छोड़ के समस्त विद्यावाले हों॥३॥

पुनस्तौ किं कुर्यातामित्युपदिश्यते॥

फिर वे क्या करें, यह विषय अगले मन्त्र में कहा है॥

तन्नो॒ वातो॑ मयो॒भु वा॑तु भेष॒जं तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः।

तद्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतं धिष्ण्या यु॒वम्॥४॥

तत्। नः॒। वातः॑। म॒य॒ः॒ऽभु। वा॒तु॒। भे॒ष॒जम्। तत्। मा॒ता। पृ॒थि॒वी। तत्। पि॒ता। द्यौः। तत्। ग्रावा॑णः। सो॒म॒ऽसुतः॑। म॒य॒ः॒ऽभुवः॑। तत्। अ॒श्वि॒ना॒। शृ॒णु॒त॒म्। धि॒ष्ण्या॒। यु॒वम्॥४॥

पदार्थः-(**तत्**) विज्ञानम् (**नः**) अस्मभ्यम् (**वातः**) (**मयोभु**) परमसुखं भवति यस्मात्तत् (**वातु**) प्रापयतु (**भेषजम्**) सर्वदुःखनिवारकमौषधम् (**तत्**) मान्यम् (**माता**) मातृवन्मान्यहेतुः (**पृथिवी**) विस्तीर्णा भूमिः (**तत्**) पालनम् (**पिता**) जनक इव पालनहेतुः (**द्यौः**) प्रकाशमयः सूर्यः (**तत्**) कर्म (**ग्रावाणः**) मेघादयः पदार्थाः (**सोमसुतः**) सोमाः सुता येभ्यस्ते (**मयोभुवः**) सुखस्य भावयितारः (**तत्**) क्रियाकौशलम् (**अश्विना**) शिल्पविद्याध्येत्रध्यापकौ (**शृणुतम्**) यथावत् श्रवणं कुरुतम् (**धिष्ण्या**) शिल्पविद्योपदेष्टारौ (**युवम्**) युवाम्॥४॥

अन्वयः-हे धिष्ण्यावश्विनावध्येत्रध्यापकौ! युवं यच्छृणुतं तन्मयोभु भेषजं नो वात इव वैद्यो वातु मातेव पृथिवी तन्मयोभु भेषजं वातु द्यौः पिता तन्मयोभु भेषजं वातु सोमसुतस्तत् ग्रावाणस्तन्मयोभुवो भेषजं वान्तु॥४॥

भावार्थः–शिल्पविद्यावर्द्धितारावध्येत्रध्यापकौ यावदधीत्य विजानीयतां तावत् सर्वे सर्वेषां मनुष्याणां सुखाय निष्कपटतया नित्यं प्रकाशयेताम्। यतो वयमीश्वरसृष्टिस्थानां वाय्वादीनां पदार्थानां सकाशादनेकानुपकारान् गृहीत्वा सुखिनः स्याम॥४॥

पदार्थः–हे **(धिष्ण्या)** शिल्पविद्या के उपदेश करने और **(अश्विना)** पढ़ने–पढ़ानेवालो! **(युवम्)** तुम दोनों जो **(शृणुतम्)** सुनो **(तत्)** उस **(मयोभु)** सुखदायक उत्तम **(भेषजम्)** सब दुःखों को दूर करनेहारी ओषधि को **(नः)** हम लोगों के लिये **(वातः)** पवन के तुल्य वैद्य **(वातु)** प्राप्त करे वा **(पृथिवी)** विस्तारयुक्त भूमि जो कि **(माता)** माता के समान मान–सम्मान देने की निदान है वह **(तत्)** उस मान करानेहारे जिससे कि अत्यन्त सुख होता और समस्त दुःख की निवृत्ति होती है, औषधि को प्राप्त करावे वा **(द्यौः)** प्रकाशमय सूर्य्य **(पिता)** पिता के तुल्य जो कि रक्षा का निदान है, वह **(तत्)** उस रक्षा करानेहारे जिससे कि समस्त दुःख की निवृत्ति होती है, औषधि को प्राप्त करे वा **(सोमसुतः)** औषधियों का रस जिनसे निकाला जाय **(तत्)** वह कर्म तथा **(ग्रावाणः)** मेघ आदि पदार्थ **(तत्)** जो उनसे रस का निकालना वा जो **(मयोभुवः)** सुख के करानेहारे उक्त पदार्थ हैं, वे **(तत्)** उस क्रियाकुशलता और अत्यन्त दुःख की निवृत्ति करानेवाले ओषधि को प्राप्त करें॥४॥

भावार्थः–शिल्पविद्या की उन्नति करनेहारे जो उसके पढ़ने–पढ़ानेहारे विद्वान् हैं, वे जितना पढ़के समझें उतना यथार्थ सबके सुखके लिये नित्य प्रकाशित करें, जिससे हम लोग ईश्वर की सृष्टि के पवन आदि पदार्थों से अनेक उपकारों को लेकर सुखी हों॥४॥

मनुष्यैः सर्वाविद्याप्रकाशकं जगदीश्वरमाश्रित्य स्तुत्वा प्रार्थयित्वोपास्य सर्वविद्यासिद्धये परमपुरुषार्थः कार्य्य इत्युपदिश्यते॥

मनुष्यों को सर्वविद्या के प्रकाश करनेवाले जगदीश्वर की आश्रयता, स्तुति, प्रार्थना और उपासना करके सब विद्या की सिद्धि के लिये अत्यन्त पुरुषार्थ करना चाहिये, यह उपदेश अगले मन्त्र में किया है॥

तमीशानं॒ जग॑तस्तस्थुष॒स्पतिं॑ धियंजि॒न्वमव॑से हूमहे व॒यम्।
पू॒षा नो॒ यथा॒ वेद॑सा॒मस॑द्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑॥५॥१५॥

तम्। ईशा॑नम्। जग॑तः। त॒स्थुषः॑। पति॑म्। धि॒य॒म्ऽजि॒न्वम्। अव॑से। हू॒म॒हे॒। व॒यम्। पू॒षा। नः॒। यथा॑। वेद॑साम्। अस॑त्। वृ॒धे। र॒क्षि॒ता। पा॒युः। अद॑ब्धः। स्व॒स्तये॑॥५॥

पदार्थः–**(तम्)** सृष्टिविद्याप्रकाशकम् **(ईशानम्)** सर्वस्याः सृष्टेर्विधातारम् **(जगतः)** जङ्गमस्य **(तस्थुषः)** स्थावरस्य **(पतिम्)** पालकम् **(धियम्)** समस्तपदार्थचिन्तकम् **(जिन्वम्)** सर्वैः सुखैस्तर्प्पकम् **(अवसे)** रक्षणाय **(हूमहे)** स्पर्धामहे **(वयम्)** **(पूषा)** पुष्टिकर्त्ता परमेश्वरः **(नः)** अस्माकम् **(यथा)**

(वेदसाम्) विद्यादिधनानाम्। **वेद इति धननाम।** (निघं०२.१०) **(असत्)** भवेत् **(वृधे)** वृद्धये **(रक्षिता)** **(पायुः)** पालनकर्त्ता **(अदब्धः)** अहिंसिता **(स्वस्तये)** सुखाय॥५॥

अन्वयः-हे विद्वन्! यथा पूषा नोऽस्माकं वेदसां वृधे यो रक्षिता स्वस्तयेऽदब्धः पूषा पायुरसत्तथा त्वं भव यथा वयमवसे तं जगतस्तस्थुषस्पतिं धियं जिन्वमीशानं परमात्मानं हूमहे तथैतं त्वमप्याह्वय॥५॥

भावार्थः-अत्र श्लेषवाचकलुप्तोपमालङ्कारौ। मनुष्यैस्तथाऽनुष्ठातव्यं यथेश्वरोपदेशानुकूल्यं स्यात्। यथेश्वरः सर्वस्याऽधिपतिस्तथा मनुष्यैरपि सर्वोत्तमविद्याशुभगुणप्राप्त्या सुपुरुषार्थेन सर्वाऽधिपत्यं साधनीयम्। यथेश्वरो विज्ञानमयः पुरुषार्थमयः सर्वसुखप्रदो जगद्वर्धकः सर्वाभिरक्षकः सर्वेषां सुखाय प्रवर्त्तते, तथैव मनुष्यैरपि भवितव्यम्॥५॥

पदार्थः-हे विद्वन्! **(यथा)** जैसे **(पूषा)** पुष्टि करनेवाला परमेश्वर **(नः)** हम लोगों के **(वेदसाम्)** विद्या आदि धनों की **(वृधे)** वृद्धि के लिये **(रक्षिता)** रक्षा करनेवाला **(स्वस्तये)** सुख के लिये **(अदब्धः)** अहिंसक अर्थात् जो हिंसा में प्राप्त न हुआ हो **(पूषा)** सब प्रकार की पुष्टि का दाता और **(पायुः)** सब प्रकार से पालना करनेवाला **(असत्)** होवे वैसे तू हो जैसे **(वयम्)** हम **(अवसे)** रक्षा के लिये **(तम्)** उस सृष्टि का प्रकाश करने **(जगतः)** जङ्गम और **(तस्थुषः)** स्थावरमात्र जगत् के **(पतिम्)** पालनेहारे **(धियम्)** समस्त पदार्थों का चिन्तनकर्त्ता **(जिन्वम्)** सुखों से तृप्त करने **(ईशानम्)** समस्त सृष्टि की विद्या के विधान करनेहारे ईश्वर को **(हूमहे)** आह्वान करते हैं, वैसे तू भी कर॥५॥

भावार्थः-इस मन्त्र में श्लेष और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि वैसा अपना व्यवहार करें कि जैसा ईश्वर के उपदेश के अनुकूल हो और जैसे ईश्वर सबका अधिपति है, वैसे मनुष्यों को भी सदा उत्तम विद्या और शुभ गुणों की प्राप्ति और अच्छे पुरुषार्थ से सब पर स्वामिपन सिद्ध करना चाहिये। और जैसे ईश्वर विज्ञान से पुरुषार्थयुक्त, सब सुखों को देने, संसार की उन्नति और सब की रक्षा करनेवाला सब के सुख के लिये प्रवृत्त हो रहा है, वैसे ही मनुष्यों को भी होना चाहिये॥५॥

पुनर्मनुष्यैः कथं प्रार्थित्वा किमेष्टव्यमित्युपदिश्यते॥

फिर मनुष्यों को किस प्रकार ईश्वर की प्रार्थना करके किसकी इच्छा करनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति न॑: पू॒षा वि॒श्ववे॑दाः।
स्व॒स्ति न॒स्तार्क्ष्यो॑ अरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॥६॥

स्व॒स्ति। न॒:। इन्द्रः॑। वृ॒द्धऽश्र॑वाः। स्व॒स्ति। न॒:। पू॒षा। वि॒श्वऽवे॑दाः। स्व॒स्ति। न॒:। तार्क्ष्यः॑। अरि॑ष्टऽनेमिः। स्व॒स्ति। न॒:। बृह॒स्पति॑:। दु॒धा॒तु॒॥६॥

पदार्थः-(**स्वस्ति**) शरीरसुखम् (**नः**) अस्मभ्यम् (**इन्द्रः**) परमैश्वर्यवान् परमेश्वरः (**वृद्धश्रवाः**) वृद्धं श्रवः श्रवणमन्नं वा सृष्टौ यस्य सः (**स्वस्ति**) धातुसाम्यसुखम् (**नः**) अस्मभ्यम् (**पूषा**) पुष्टिकर्त्ता (**विश्ववेदाः**) विश्वस्य वेदो विज्ञानं विश्वेषु सर्वेषु पदार्थेषु वेदः स्मरणं वा यस्य सः (**स्वस्ति**) इन्द्रियशान्तिसुखम् (**नः**) अस्मभ्यम् (**तार्क्ष्यः**) तृक्षितुं वेदितुं योग्यस्तृक्ष्यः। तृक्ष्य एव तार्क्ष्यः। अत्र गत्यर्थात् तृक्ष धातोर्ण्यत्। ततः स्वार्थेऽण्। (**अरिष्टनेमिः**) अरिष्टानां दुःखानां नेमिर्वज्रवच्छेता। **नेमिरिति वज्रनामसु पठितम्।** (निघं०२.२०) (**स्वस्ति**) विद्ययाऽऽत्मसुखम् (**नः**) अस्मभ्यम् (**बृहस्पतिः**) बृहत्या वेदवाचः पतिः (**दधातु**) धारयतु॥६॥

अन्वयः-वृद्धश्रवा इन्द्रो नः स्वस्ति दधातु विश्ववेदाः पूषा नः स्वस्ति दधातु। अरिष्टनेमिस्तार्क्ष्यो न स्वस्ति दधातु बृहस्पतिर्नः स्वस्ति दधातु॥६॥

भावार्थः-न हीश्वरप्रार्थनास्वपुरुषार्थाभ्यां विना कस्यचिच्छरीरेन्द्रियात्मसुखं सम्पूर्णं सम्भवति तस्मादेतदनुष्ठेयम्॥६॥

पदार्थः-(**वृद्धश्रवाः**) संसार में जिसकी कीर्त्ति वा अन्न आदि सामग्री अति उन्नति को प्राप्त है वह (**इन्द्रः**) परम ऐश्वर्यवान् परमेश्वर (**नः**) हम लोगों के लिये (**स्वस्ति**) शरीर के सुख को (**दधातु**) धारण करावे (**विश्ववेदाः**) जिसको संसार का विज्ञान और जिसका सब पदार्थों में स्मरण है, वह (**पूषा**) पुष्टि करनेवाला परमेश्वर (**नः**) हम लोगों के लिये (**स्वस्ति**) धातुओं की समता के सुख को धारण करावे जो (**अरिष्टनेमिः**) दुःखों का वज्र के तुल्य विनाश करनेवाला (**तार्क्ष्यः**) और जानने योग्य परमेश्वर है, वह (**नः**) हम लोगों के लिये (**स्वस्ति**) इन्द्रियों की शान्तिरूप सुख को धारण करावे और जो (**बृहस्पतिः**) वेदवाणी का प्रभु परमेश्वर है, वह (**नः**) हम लोगों को (**स्वस्ति**) विद्या से आत्मा के सुख को धारण करावे॥६॥

भावार्थः-ईश्वर की प्रार्थना और अपने पुरुषार्थ के विना किसी को शरीर, इन्द्रिय और आत्मा का परिपूर्ण सुख नहीं होता, इससे उसका अनुष्ठान अवश्य करना चाहिये॥६॥

पुनस्तदुपासकैर्मनुष्यैः कथं भवितव्यमित्युपदिश्यते॥

फिर ईश्वर की उपासना करनेवाले मनुष्यों को कैसा होना चाहिये, यह उपदेश अगले मन्त्र में किया है॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह॥७॥

पृषत्ऽअश्वाः। मरुतः। पृश्निऽमातरः। शुभम्ऽयावानः। विदथेषु। जग्मयः। अग्निऽजिह्वाः। मनवः। सूरऽचक्षसः। विश्वे। नः। देवाः। अवसा। आ। गमन्। इह॥७॥

पदार्थः-(**पृषदश्वाः**) सेनाया पृषान्तोऽश्वा येषान्ते (**मरुतः**) वायवः (**पृश्निमातरः**) आकाशादुत्पद्यमाना इव (**शुभंयावानः**) शुभस्य प्रापकाः। अत्र **तत्पुरुषे कृति बहुलमि**ति बहुलवचनाद् द्वितीयाया अलुक्। (**विदथेषु**) संग्रामेषु यज्ञेषु वा। (**जग्मयः**) गमनशीलाः (**अग्निजिह्वाः**) अग्निर्जिह्वाः हूयमानो येषान्ते (**मनवः**) मननशीलाः (**सूरचक्षसः**) सूरे सूर्ये प्राणे वा चक्षो व्यक्तं वचो दर्शनं वा येषान्ते (**विश्वे**) सर्वे (**नः**) अस्मान् (**देवाः**) विद्वांसः (**अवसा**) रक्षणादिना सह वर्त्तमानाः (**आ**) (**अगमन्**) आगच्छन्तु प्राप्नुवन्तु। अत्र लिङर्थे लुङ् प्रयोगः। (**इह**) अस्मिन् संसारे॥७॥

अन्वयः-शुभंयावानोऽग्निजिह्वा मनवः सूरचक्षसः पृषदश्वा विदथेषु जग्मयो विश्वेदेवा इह नोऽस्मभ्यमवसा पृश्निमातरो मरुत इवागमन्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा बाह्याभ्यन्तरस्था वायवः सर्वान् प्राणिनः सुखाय प्राप्नुवन्ति, तथैव विद्वांसः सर्वेषा प्राणिनां सुखाय प्रवर्त्तेरन्॥७॥

पदार्थः-हे (**शुभंयावानः**) जो श्रेष्ठ व्यवहार की प्राप्ति कराने (**अग्निजिह्वाः**) और अग्नि को हवनयुक्त करनेवाले (**मनवः**) विचारशील (**सूरचक्षसः**) जिनके प्राण और सूर्य में प्रसिद्ध वचन वा दर्शन है (**पृषदश्वाः**) सेना में रङ्ग-विरङ्ग घोड़ों से युक्त पुरुष (**विदथेषु**) जो के संग्राम वा यज्ञों में (**जग्मयः**) जाते हैं, वे (**विश्वे**) समस्त (**देवाः**) विद्वान् लोग (**इह**) संसार में (**नः**) हम लोगों को (**अवसा**) रक्षा आदि व्यवहारों के साथ (**पृश्निमातरः**) आकाश से उत्पन्न होने वाले (**मरुतः**) पवनों के तुल्य (**आ**) (**अगमन्**) आवें प्राप्त हुआ करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैस बाहर और भीतरले पवन सब प्राणियों के सुख के लिये प्राप्त होते हैं, वैसे विद्वान् लोग सबके सुख के लिये प्रवृत्त होवें॥७॥

मनुष्यैरेवं कृत्वा किं किमाचरणीयमित्युपदिश्यते॥

मनुष्यों को ऐसा करके क्या-क्या करना चाहिये, यह उपदेश अगले मन्त्र में किया है॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥८॥

भद्रम्। कर्णेभिः। शृणुयाम। देवाः। भद्रम्। पश्येम। अक्षऽभिः। यजत्राः। स्थिरैः। अङ्गैः। तुस्तुऽवांसः। तनूभिः। वि। अशेम। देवऽहितम्। यत्। आयुः॥८॥

पदार्थः-(**भद्रम्**) कल्याणकारकमध्ययनाध्यापनम् (**कर्णेभिः**) श्रोत्रैः। अत्र ऐसभावः। (**शृणुयाम**) (**देवाः**) विद्वांसः (**भद्रम्**) शरीरात्मसुखम् (**पश्येम**) (**अक्षभिः**) बाह्याभ्यन्तरैर्नेत्रैः। **छन्दस्यपि दृश्यते।** (अष्टा०७.१.७६) अनेन सूत्रेणाक्षिशब्दस्य भिस्यनङादेशः। (**यजत्रा**) यजन्ति सङ्गच्छन्ते ये ते। **अमिनक्षियजिवधिपतिभ्योऽत्रन्।** (उणा०३.१०३। अनेनौणादिकसूत्रेण यजधातोरत्रन्। (**स्थिरैः**) निश्चलैः

(अङ्गैः) शिर आदिभिर्ब्रह्मचर्याभिर्वा **(तुष्टुवांसः)** पदार्थगुणान् स्तुवन्तः **(तनूभिः)** विस्तृतबलैः शरीरैः **(वि)** विविधार्थे **(अशेम)** प्राप्नुयाम। अत्राऽशूङ् धातो **लिङ्याशिष्यङ्** (अष्टा०३.१.८६) इत्यङ्। सार्वधातुकसंज्ञया **लिङः सलोप** इति सकारलोपः। आर्द्धधातुकसंज्ञया शपोऽभावः। **(देवहितम्)** देवेभ्यो विद्वद्भ्यो हितम् **(यत्)** **(आयुः)** जीवनम्॥८॥

अन्वयः-हे यजत्रा देवा! भवत्सङ्गेन तनूभिः स्थिरैरङ्गैस्तुष्टुवांसः सन्तो वयं कर्णेभिर्यद्भद्रं तच्छृणुयामाक्षभिर्यद्भद्रं तत्पश्येम एवं तनूभिः स्थिरैरङ्गैर्यद्देवहितमायुस्तदशेम॥८॥

भावार्थः-नहि विदुषां सत्पुरुषाणामाप्तानां सङ्गेन विना कश्चित्ससत्यविद्यावचः सत्यं दर्शनं सत्यनिष्ठामायुश्च प्राप्तुं शक्नोति, न ह्येतैर्विना कस्यचिच्छरीमात्मा च दृढो भवितुं शक्यस्तस्मादेतत्सर्वैर्मनुष्यैः सदाऽनुष्ठेयम्॥८॥

पदार्थः-हे **(यजत्राः)** संगम करनेवाले **(देवाः)** विद्वानो! आप लोगों के संग से **(तनूभिः)** बढ़े हुए बलोंवाले शरीर **(स्थिरैः)** दृढ़ **(अङ्गैः)** पुष्ट शिर आदि अङ्ग वा ब्रह्मचर्यादि नियमों से **(तुष्टुवांसः)** पदार्थों के गुणों की स्तुति करते हुए हम लोग **(कर्णेभिः)** कानों से **(यत्)** जो **(भद्रम्)** कल्याणकारक पढ़ना-पढ़ाना है, उसको **(शृणुयाम)** सुनें-सुनावें **(अक्षभिः)** बाहरी-भीतरली आंखों से जो **(भद्रम्)** शरीर और आत्मा का सुख है, उसको **(पश्येम)** देखें, इस प्रकार उक्त शरीर और अङ्गों से जो **(देवहितम्)** विद्वानों की हित करनेवाली **(आयुः)** अवस्था है, उसको **(वि)** **(अशेम)** वार-वार प्राप्त होवें॥८॥

भावार्थः-विद्वान्, आप्त और सज्जनों के संग के विना कोई सत्यविद्या का वचन सत्य-दर्शन और सत्य व्यवहारमय अवस्था को नहीं पा सकता और न इसके विना किसी का शरीर और आत्मा दृढ़ हो सकता है, इससे सब मनुष्यों को यह उक्त व्यवहार वर्त्तना योग्य है॥८॥

पुनर्विद्वांसो विद्यार्थिनः प्रति कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर विद्वान् लोग विद्यार्थियों के साथ कैसे वर्त्तें, यह उपदेश अगले मन्त्र में किया है॥

श॒तमित्नु श॒रदो॒ अन्ति॑ देवा॒ यत्रा॑ नश्च॒क्रा ज॒रस॑ं त॒नूना॑म्।
पु॒त्रासो॒ यत्र॑ पि॒तरो॒ भव॑न्ति॒ मा नो॑ म॒ध्या रीरि॑षतायु॒र्गन्तो॑:॥९॥

श॒तम्। इत्। नु। श॒रदः॑। अन्ति॑। दे॒वा॒:। यत्र॑। न॒:। च॒क्र॒। ज॒रस॑म्। त॒नूना॑म्। पु॒त्रास॑:। यत्र॑। पि॒तर॑:। भव॑न्ति। मा। न॒:। म॒ध्या। रीरि॑षत। आयु॑:। गन्तो॑॥९॥

पदार्थः-**(शतम्)** शतवर्षसंख्याकान् **(इत्)** एव **(नु)** शीघ्रम् **(शरदः)** शरदृतूपलक्षितान् संवत्सरान् **(अन्ति)** अनन्ति जीवन्ति विद्यादिसुखसाधनैर्ये तेऽन्तयः। अत्रानधातोरौणादिकस्तिन् प्रत्ययः। **सुपां सुलुगिति** जसो लुक् च। **(देवाः)** विद्वांसः **(यत्र)** यस्मिन् सत्ये व्यवहारे। अत्र **ऋचि तुनुघेति** दीर्घः। **(नः)** अस्माकम् **(चक्र)** कुरुत। लोडर्थे लिट्। **ह्यचोऽतस्तिङ** इति दीर्घः। **(जरसम्)** जरां वृद्धावस्थाम्।

जराया जरसन्यतरस्याम्। (अष्टा०७.२.१०१) अनेन जराशब्दस्य जरसादेशः। **(तनूनाम्)** शरीराणाम् **(पुत्रासः)** **(यत्र)** **(पितरः)** वयोविद्यावृद्धाः **(भवन्ति)** **(मा)** निषेधे **(नः)** अस्माकम् **(मध्या)** मध्ये। अत्र **सुपां सुलुगि**ति सप्तम्याः स्थाने डादेशः। **(रीरिषत)** हिंस्त **(आयुः)** जीवनम् **(गन्तोः)** गन्तुम् प्राप्तुम्॥९॥

अन्वयः-हे अन्ति देवा! यूयं यत्र तनूनां शतं शरदो जरसं चक्र यत्राऽस्माकं नो मध्या मध्ये पुत्रास इत्पितरो नु भवन्ति, तदायुर्गन्तोर्गन्तुं प्रवृत्तान्नोऽस्मान्नु मा रिरीषत॥९॥

भावार्थः-यस्यां प्राप्तायां विद्यायां बालका अपि वृद्धा भवन्ति, यत्र शुभाचरणेन वृद्धावस्था जायते, तत्सर्वं विदुषां सङ्गेनैव भवितुं शक्यते। विद्वद्भिरेतत्सर्वेभ्यः प्रापयितव्यं च॥९॥

पदार्थः-हे **(अन्ति)** विद्या आदि सुख साधनों से जीनेवाले **(देवाः)** विद्वानो! तुम **(यत्र)** जिस सत्य व्यवहार में **(तनूनाम्)** अपने शरीरों के **(शतम्)** सौ **(शरदः)** वर्ष **(जरसम्)** वृद्धापन का **(चक्र)** व्यतीत कर सको **(यत्र)** जहाँ **(नः)** हमारे **(मध्या)** मध्य में **(पुत्रासः)** पुत्र लोग **(इत्)** ही **(पितरः)** अवस्था और विद्या से युक्त वृद्ध **(नु)** शीघ्र **(भवन्ति)** होते हैं, उस **(आयुः)** जीवन को **(गन्तोः)** प्राप्त होने को प्रवृत्त हुए **(नः)** हम लोगों को शीघ्र **(मा रीरिषत)** नष्ट मत कीजिये॥९॥

भावार्थः-जिस विद्या में बालक भी वृद्ध होते वा जिस शुभ आचरण में वृद्धावस्था होती है, वह सब व्यवहार विद्वानों के संग ही से हो सकता है और विद्वानों को चाहिये कि यह उक्त व्यवहार सबको प्राप्त करावें॥९॥

एतेषां संगेन किं किं सेवितुं विज्ञातुं च योग्यमित्युपदिश्यते॥

अब इन विद्वानों के संग से क्या-क्या सेवने और जानने योग्य है, यह विषय अगले मन्त्र में कहा है॥

अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑तिर्मा॒ता स पि॒ता स पु॒त्रः।
विश्वे॑ दे॒वा अदि॑तिः पञ्च॒ जना॒ अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम्॥ १०॥ १६॥

अदि॑तिः। द्यौः। अदि॑तिः। अ॒न्तरि॑क्षम्। अदि॑तिः। मा॒ता। सः। पि॒ता। सः। पु॒त्रः। विश्वे॑। दे॒वाः। अदि॑तिः। पञ्च॑। जना॑ः। अदि॑तिः। जा॒तम्। अदि॑तिः। जनि॑ऽत्वम्॥ १०॥

पदार्थः-(**अदितिः**) विनाशरहिता **(द्यौः)** प्रकाशमानः परमेश्वरः सूर्य्यादिर्वा **(अदितिः)** **(अन्तरिक्षम्)** **(अदितिः)** **(माता)** मान्यहेतुर्जननी विद्या वा **(सः)** **(पिता)** जनकः पालको वा **(सः)** **(पुत्रः)** औरसः क्षेत्रजादिर्विद्याजो वा **(विश्वे)** सर्वे **(देवाः)** विद्वांसो दिव्यगुणाः पदार्था वा **(अदितिः)** **(पञ्च)** इन्द्रियाणि **(जनाः)** जीवाः **(अदितिः)** उत्पत्तिनाशरहिता **(जातम्)** यत्किञ्चिदुत्पन्नम् **(अदितिः)** **(जनित्वम्)** उत्पत्स्यमानम्॥१०॥

अन्वयः-हे मनुष्या! युस्मभिर्द्यौरदितिरन्तरिक्षमदितिर्माताऽदितिः स पिता स पुत्रश्चादितिर्विश्वे देवा अदितिः पञ्चेन्द्रियाणि जनाश्च तथा एवं जातमात्रं कार्य्यं जनित्वं जन्यञ्च सर्वमदितिरेवेति वेदितव्यम्॥१०॥

भावार्थः-अत्र **(द्यौः)** इत्यादीनां कारणरूपेण प्रवाहरूपेण वाऽविनाशित्वं मत्वा दिवादीनामदितिसंज्ञा क्रियते। अत्र यत्र वेदेष्वदितिशब्दः पठितस्तत्र प्रकरणाऽनुकूलतया दिवादीनां मध्याद्यस्य यस्य योग्यता भवेत्तस्य तस्य ग्रहणं कार्य्यम्। ईश्वरस्य जीवानां कारणस्य प्रकृतेश्चाविनाशित्वादददितिसंज्ञा वर्त्तत एव॥१०॥

अत्र विदुषां विद्यार्थिनां प्रकाशादीनां च विश्वे देवान्तर्गतत्वाद्वर्णनं कृतमत एतदुक्तार्थस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति नवाशीतितमं ८९ सूक्तं षोडशो १६ वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! तुमको चाहिये कि **(द्यौः)** प्रकाशयुक्त परमेश्वर वा सूर्य्य आदि प्रकाशमय पदार्थ **(अदितिः)** अविनाशी **(अन्तरिक्षम्)** आकाश **(अदितिः)** अविनाशी **(माता)** माँ वा विद्या **(अदितिः)** अविनाशी **(सः)** वह **(पिता)** उत्पन्न करनेवा पालनेहारा पिता **(सः)** वह **(पुत्रः)** औरस अर्थात् निज विवाहित पुरुष से उत्पन्न वा क्षेत्रज अर्थात् नियोग करके दूसरे से क्षेत्र में हुआ विद्या से उत्पन्न पुत्र **(अदितिः)** अविनाशी है तथा **(विश्वे)** समस्त **(देवाः)** विद्वान् वा दिव्य गुणवाले पदार्थ **(अदितिः)** अविनाशी हैं **(पञ्च)** पांचों ज्ञानेन्द्रिय और **(जनाः)** जीव भी **(अदितिः)** अविनाशी हैं, इस प्रकार जो कुछ **(जातम्)** उत्पन्न हुआ वा **(जनित्वम्)** होनेहारा है, वह सब **(अदितिः)** अविनाशी अर्थात् नित्य है॥१०॥

भावार्थः-इस मन्त्र में परमाणुरूप वा प्रवाहरूप से सब पदार्थ नित्य मानकर दिव् आदि पदार्थों की अदिति संज्ञा की है। जहाँ-जहाँ वेद में अदिति शब्द पढ़ा है, वहाँ-वहाँ प्रकरण की अनुकूलता से दिव् आदि पदार्थों में से जिस-जिस की योग्यता हो उस-उस का ग्रहण करना चाहिये। ईश्वर, जीव और प्रकृति अर्थात् जगत् का कारण इनके अविनाशी होने से उसकी भी अदिति संज्ञा है॥१०॥

इस सूक्त में विद्वान्, विद्यार्थी और प्रकाशमय पदार्थों का विश्वेदेव पद के अन्तर्गत होने से वर्णन किया है। इससे इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, ऐसा जानना चाहिये॥

यह नवासीवां ८९सूक्त और सोलहवाँ १६ वर्ग समाप्त हुआ॥

अथास्य नवर्च्चस्य नवतितमस्य सूक्तस्य रहूगणपुत्रो ऋषिः। विश्वे देवा देवताः। १,८ पिपीलिकामध्या निचृद् गायत्री। २,७ गायत्री। ३ पिपीलिकामध्या विराड्गायत्री। ४ विराड् गायत्री। ५,६ निचृद् गायत्री च छन्दः। षड्जः स्वरः। ९ निचृत् त्रिष्टुप् छन्दः। गान्धारः स्वरः।

पुनः *स विद्वान् मनुष्येषु कथं वर्त्तेतित्युपदिश्यते॥*

अब नब्बेवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में फिर वह विद्वान् मनुष्यों में कैसे वर्त्ताव करे, यह उपदेश किया है॥

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः॥ १॥

ऋजुऽनीती। नः। वरुणः। मित्रः। नयतु। विद्वान्। अर्यमा। देवैः। सऽजोषाः॥ १॥

पदार्थः–(**ऋजुनीती**) ऋजुः सरला शुद्ध चासौ नीतिश्च तया। अत्र **सुपां सुलुगि**ति तृतीयायाः पूर्वसवर्णादेशः। (**नः**) अस्मान् (**वरुणः**) श्रेष्ठगुणस्वभावः (**मित्रः**) सर्वोपकारी (**नयतु**) प्रापयतु (**विद्वान्**) अनन्तविद्य ईश्वर आप्त मनुष्यो वा (**अर्य्यमा**) न्यायकारी (**देवैः**) दिव्यैर्गुणकर्मस्वभावैर्विद्वद्भिर्वा (**सजोषाः**) समानप्रीतिसेवी॥ १॥

अन्वयः–यथेश्वरो धार्मिकमनुष्यान् धर्म्मं नयति, तथा देवैः सजोषा वरुणो मित्रोऽर्य्यमा विद्वानृजुनीती नोऽस्मान् धर्मविद्यामार्गं नयतु॥ १॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। परमेश्वर आप्तमनुष्यो वा सत्यविद्याग्रहणस्वभावपुरुषार्थिनं मनुष्यमनुत्तमे धर्मक्रिये च प्रापयति नेतरम्॥ १॥

पदार्थः–जैसे परमेश्वर धार्मिक मनुष्यों को धर्म प्राप्त कराता है, वैसे (**देवैः**) दिव्य गुण, कर्म और स्वभाववाले विद्वानों से (**सजोषाः**) समान प्रीति करनेवाला (**वरुणः**) श्रेष्ठ गुणों में वर्त्तने (**मित्रः**) सबका उपकारी और (**अर्यमा**) न्याय करनेवाला (**विद्वान्**) धर्मात्मा सज्जन विद्वान् (**ऋजुनीती**) सीधी नीति से (**नः**) हम लोगों को धर्मविद्यामार्ग को (**नयतु**) प्राप्त करावे॥ १॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। परमेश्वर वा आप्त मनुष्य सत्यविद्या के ग्राहक स्वभाववाले पुरुषार्थी मनुष्य को उत्तम धर्म और उत्तम क्रियाओं को प्राप्त कराता है, और को नहीं॥ १॥

पुनस्ते विद्वांसः कथंभूत्वा किं कुर्य्युरित्युपदिश्यते॥

फिर वे विद्वान् कैसे होकर क्या करें, यह विषय अगले मन्त्र में कहा है॥

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः। व्रता रक्षन्ते विश्वाहा॥ २॥

ते। हि। वस्वः। वसवानाः। ते। अप्रऽमूराः। महःऽभिः। व्रता। रक्षन्ते। विश्वाहा॥ २॥

पदार्थः–(**ते**) (**हि**) खलु (**वस्वः**) वसूनि द्रव्याणि। **वा च्छन्दसि सर्वे विधयो भवन्ती**ति नुमभावे। **जसादिषु छन्दसि वा वचनमि**ति गुणाभावे च यणादेशः। (**वसवानाः**) स्वगुणैः सर्वानाच्छादयन्तः। अत्र **बहुलं छन्दसी**ति शपो लुङ् न शानचि व्यत्ययेन मकारस्य वकारः। (**ते**)

(अप्रमूराः) मूढत्वरहिता धार्मिकाः। अत्रापि वर्णव्यत्येन ढस्य स्थाने रेफादेशः। **(महोभिः)** महद्भिर्गुणकर्मभिः **(व्रता)** सत्यपालननियतानि व्रतानि **(रक्षन्ते)** व्यत्ययेनात्मनेपदम् **(विश्वाहा)** सर्वदिनानि॥२॥

अन्वयः–ते पूर्वोक्ता वसवाना हि महोभिर्विश्वाहा विश्वाहानि वस्वो रक्षन्ते। ये अप्रमूरा धार्मिकास्ते महोभिर्विश्वाहानि व्रता रक्षन्ते॥२॥

भावार्थः–नहि विद्वद्भिर्विना केनचिद्धनानि धर्माचरणानि च रक्षितुं शक्यन्ते, तस्मात् सर्वैर्मनुष्यैर्नित्यं विद्या प्रचारणीया यतः सर्वे विद्वांसो भूत्वा धार्मिका भवेयुरिति॥२॥

पदार्थः–**(ते)** वे पूर्वोक्त विद्वान् लोग **(वसवानाः)** अपने गुणों से सबको ढाँपते हुए **(हि)** निश्चय से **(महोभिः)** प्रशंसनीय गुण और कर्मों से **(विश्वाहा)** सब दिनों में **(वस्वः)** धन आदि पदार्थों की **(रक्षन्ते)** रक्षा करते हैं तथा जो **(अप्रमूराः)** मूढ़त्वप्रमादरहित धार्मिक विद्वान् हैं **(ते)** वे प्रशंसनीय गुण कर्मों से सब दिन **(व्रता)** सत्यपालन आदि नियमों को रखते हैं॥२॥

भावार्थः–विद्वानों के विना किसी से धन और धर्मयुक्त आचार रक्खे नहीं जा सकते। इससे सब मनुष्यों को नित्य विद्याप्रचार करना चाहिये, जिससे सब मनुष्य विद्वान् होके धार्मिक हों॥२॥

पुनस्ते कीदृशाः किं कुर्य्युरित्युपदिश्यते॥

फिर वे कैसे हों और क्या करें, यह विषय अगले मन्त्र में कहा है॥

ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः। बाधमाना अप द्विषः॥३॥

ते। अस्मभ्यम्। शर्म। यंसन्। अमृताः। मर्त्येभ्यः। बाधमानाः। अप। द्विषः॥३॥

पदार्थः–**(ते)** विद्वांसः **(अस्मभ्यम्)** **(शर्म्म)** सुखम् **(यंसन्)** यच्छन्तु ददतु **(अमृताः)** जीवन-मुक्ताः **(मर्त्येभ्यः)** मनुष्येभ्यः **(बाधमानाः)** निवारयन्तः **(अप)** दूरीकरणे **(द्विषः)** दुष्टान्॥३॥

अन्वयः–ये द्विषोऽपबाधमाना अमृता विद्वांसः सन्ति ते मर्त्येभ्योऽस्मभ्यं शर्म यंसन् प्रापयन्तु॥३॥

भावार्थः–मनुष्यैर्विद्वद्भ्यः शिक्षां प्राप्य दुष्टस्वभावान्निवार्य्य नित्यमानन्दितव्यम्॥३॥

पदार्थः–जो **(द्विषः)** दुष्टों को **(अप बाधमानाः)** दुर्गति के साथ निवारण करते हुए **(अमृताः)** जीवनमुक्त विद्वान् हैं **(ते)** वे **(मर्त्येभ्यः)** **(अस्मभ्यम्)** अस्मदादि मनुष्यों के लिये **(शर्म)** सुख **(यंसन्)** देवें॥३॥

भावार्थः–मनुष्यों को चाहिये कि विद्वानों से शिक्षा को पाकर खोटे स्वभाववालों को दूर कर नित्य आनन्दित हों॥३॥

पुनस्ते कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर वे कैसे वर्त्तें, यह उपदेश अगले मन्त्र में कहा है॥

वि नः॑ प॒थः सु॑वि॒ताय॑ चि॒यन्त्विन्द्रो॑ म॒रुत॑ः। पू॒षा भगो॒ वन्द्या॑सः॥४॥

वि। न॒ः। प॒थः। सु॒वि॒ताय॑। चि॒यन्तु॑। इन्द्रः॑। म॒रुत॑ः। पू॒षा। भग॑ः। वन्द्या॑सः॥४॥

पदार्थः-(**वि**) विशेषार्थे (**नः**) अस्मान् (**पथः**) उत्तममार्गान् (**सुविताय**) ऐश्वर्यप्राप्तये (**चियन्तु**) चिन्वन्तु। अत्र **बहुल छन्दसी**ति विकरणलुक् इयङादेशश्च। (**इन्द्रः**) विद्यैश्वर्यवान् (**मरुतः**) मनुष्याः (**पूषा**) पोषकः (**भगः**) सौभाग्यवान् (**वन्द्यासः**) स्तोतव्याः सत्कर्त्तव्याश्च॥४॥

अन्वयः-य इन्द्रः पूषा भगश्च वन्द्यासो मरुतस्ते नोऽस्मान् सुविताय पथो विचियन्तु॥४॥

भावार्थः-विद्वद्भिर्मनुष्यैरैश्वर्यं पुष्टिं सौभाग्यं प्राप्यान्येऽपि तादृशा सौभाग्यवन्तः कर्त्तव्याः॥४॥

पदार्थः-जो (**इन्द्रः**) विद्या और ऐश्वर्ययुक्त वा (**पूषा**) दूसरे का पोषण पालन करनेवाला (**भगः**) और उत्तम भाग्यशाली (**वन्द्यासः**) स्तुति और सत्कार करने योग्य (**मरुतः**) मनुष्य हैं वे (**नः**) हम लोगों को (**सुविताय**) ऐश्वर्य की प्राप्ति के लिये (**पथः**) उत्तम मार्गों को (**वि चियन्तु**) नियत करें॥४॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों से ऐश्वर्य, पुष्टि और सौभाग्य पाकर उस सौभाग्य की योग्यता को औरों को भी प्राप्त करावें॥४॥

पुनस्ते किं कुर्य्युरित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

उ॒त नो॒ धियो॒ गोअ॑ग्राः॒ पूष॒न् विष्णु॒वेव॑यावः। कर्ता॑ नः॒ स्वस्ति॒मत॑ः॥५॥१७॥

उ॒त। न॒ः। धिय॑ः। गोऽअ॑ग्राः। पूष॑न्। विष्णो॒ इति॑। एव॑ऽयावः। कर्त॑। न॒ः। स्व॒स्ति॒ऽमत॑ः॥५॥

पदार्थः-(**उत**) अपि (**नः**) अस्मभ्यम् (**धियः**) उत्तमाः प्रज्ञाः कर्माणि च (**गोअग्राः**) गाव इन्द्रियाण्यग्रे यासां ताः। **सर्वत्र त्रिभाषा गोः।** (अष्टा०६.१.१२२) अनेन सूत्रेणाऽत्र प्रकृतिभावः। (**पूषन्**) विद्याशिक्षाभ्यां पुष्टिकर्त्तः (**विष्णो**) सर्वविद्यासु व्यापनशील (**एवयावः**) एति जानाति सर्वव्यवहारं येन स एवो बोधस्तं याति प्राप्नोति प्रापयति वा तत्सम्बुद्धौ। **मतुवसोरादेशे वन उपसंख्यानम्।** (अष्टा०वा०८.३.१) अनेन वार्त्तिकेनात्र सम्बोधने रुः। (**कर्त्त**) कुरुत। अत्र **बहुलं छन्दसी**ति विकरणस्य लुक् लोडादेशस्य तस्य स्थाने तवादेशः। **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**नः**) अस्मान् (**स्वस्तिमतः**) सुखयुक्तान्॥५॥

अन्वयः-हे पूषन् विष्णवेवयावश्च विद्वांसो! यूयं नोऽस्मभ्यं गोअग्रा धियः कर्त्तः। उतापि नोऽस्मान् स्वस्तिमतः कर्त्तः॥५॥

भावार्थः-अध्येतृभिर्यथाऽध्यापका विद्याशिक्षाः कुर्य्युस्तथैव सद्गृह्यैताः सुविचारेण नित्यमुन्नेया॥५॥

पदार्थः-हे **(पूषन्)** विद्या और उत्तम शिक्षा से पोषण करने वा **(विष्णो)** समस्त विद्याओं में व्यापक होने वा **(एवयावः)** जिससे सब व्यवहार ज्ञात होता है, उस अगाध बोध को प्राप्त होनेवाले विद्वान् लोगो! तुम **(नः)** हम लोगों के लिये **(गोअग्राः)** इन्द्रिय अग्रगामी जिनमें हों, उन **(धियः)** उत्तम बुद्धि वा उत्तम कर्मों को **(कर्त्त)** प्रसिद्ध करो **(उत)** उसके पश्चात् **(नः)** हम लोगों को **(स्वस्तिमतः)** सुखयुक्त करो॥५॥

भावार्थः-पढ़नेवालों को चाहिये कि पढ़ानेवाले जैसे विद्या की शिक्षा करे, वैसे उनका ग्रहण कर अच्छे विचार से नित्य उनकी उन्नति करें॥५॥

विद्यया किं जायत इत्युपदिश्यते॥

विद्या से क्या उत्पन्न होता है, यह विषय अगले मन्त्र में कहा है॥

मधु॒ वाता॑ ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः। माध्वी॑र्नः स॒न्त्वोष॑धीः॥६॥

मधु॑। वाता॑ः। ऋ॒त॒ऽय॒ते। मधु॑। क्ष॒र॒न्ति॒। सिन्ध॑वः। माध्वी॑ः। न॒ः। स॒न्तु॒। ओष॑धीः॥६॥

पदार्थः-**(मधु)** मधुरं ज्ञानम् **(वाताः)** पवनाः **(ऋतायते)** ऋतमात्मन इच्छवे। **वा च्छन्दसि सर्वे विधयो भवन्ती**ति क्यच ईत्वं न। **(मधु)** मधुताम् **(क्षरन्ति)** वर्षन्ति **(सिन्धवः)** समुद्रा नद्यो वा **(माध्वीः)** मधुविज्ञाननिमित्तं विद्यते यासु ताः। **मधोर्ञ च।** (अष्टा०४.४.१२९) अनेन मधुशब्दाञ् ञः। **ऋत्व्यवास्त्व्य०** इति यणादेशनिपातनम्। **वाच्छन्दसी**ति पूर्वसवर्णादेशः। **(नः)** अस्मभ्यम् **(सन्तु) (ओषधीः)** सोमलतादय ओषध्यः। अत्रापि पूर्ववत्पूर्वसवर्णदीर्घः॥६॥

अन्वयः-हे पूर्णविद्य! यथा युष्मभ्यमृतायते च वाता मधु सिन्धवश्च मधु क्षरन्ति तथा न ओषधीर्माध्वीः सन्तु॥६॥

भावार्थः-हे अध्यापका! यूयं वयं चैवं प्रयतेमहि यतः सर्वेभ्यः पदार्थेभ्योऽखिलानन्दाय विद्ययोपकारान् ग्रहीतुं शक्नुयाम॥६॥

पदार्थः-हे पूर्ण विद्यावाले विद्वानो! जैसे तुम्हारे लिये और **(ऋतायते)** अपने को सत्य व्यवहार चाहनेवाले पुरुष के लिये **(वाताः)** वायु **(मधु)** मधुरता और **(सिन्धवः)** समुद्र वा नदियां **(मधु)** मधुर गुण को **(क्षरन्ति)** वर्षा करती हैं, वैसे **(नः)** हमारे लिये **(ओषधीः)** सोमलता आदि ओषधि **(माध्वीः)** मधुरगुण के विशेष ज्ञान करानेवाली **(सन्तु)** हों॥६॥

भावार्थः-हे पढ़ाने वालो! तुम और हम ऐसा अच्छा यत्न करें कि जिससे सृष्टि के पदार्थों से समग्र आनन्द के लिये विद्या करके उपकारों को ग्रहण कर सकें॥६॥

पुनर्वयं कस्मै कं पुरुषार्थं कुर्य्यामेत्युपदिश्यते॥

फिर हम किसके लिये किस पुरुषार्थ को करें, इस विषय को अगले मन्त्र में कहा है॥

मधु॒ नक्त॑मु॒तोष॒सो॒ मधु॑म॒त्पार्थि॑वं॒ रज॑ः। मधु॒ द्यौर॑स्तु नः पि॒ता॥७॥

मधु॑। नक्त॑म्। उ॒त। उ॒षस॑:। मधु॑ऽमत्। पार्थि॑वम्। रज॑:। मधु॑। द्यौ:। अ॒स्तु॒। न॒:। पि॒ता॥७॥

पदार्थ:-(**मधु**) मधुरा (**नक्तम्**) रात्रि: (**उत**) अपि (**उषस:**) दिवसानि (**मधुमत्**) मधुरगुणयुक्तम् (**पार्थिवम्**) पृथिव्यां विदितम् (**रज:**) अणुत्रसरेण्वादि (**मधु**) माधुर्यसुखकारिका (**द्यौ:**) सूर्यकान्ति: (**अस्तु**) भवतु (**न:**) अस्मभ्यम् (**पिता**) पालक:॥७॥

अन्वय:-हे विद्वांसो! यथा नोऽस्मभ्यं नक्तं मधूषसो मधूनि पार्थिवं रजो मधुमदुत पिता द्यौर्मध्वस्तु तथा युष्मभ्यमप्येते स्यु:॥७॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। अध्यापकैर्यथा मनुष्येभ्य: पृथिवीस्था: पदार्था आनन्दप्रदा: स्युस्तथा गुणज्ञानेन हस्तक्रियया च विद्योपयोग: सर्वैरनुष्ठेय:॥७॥

पदार्थ:-हे विद्वानो! जैसे (**न:**) हम लोगों के लिये (**नक्तम्**) रात्रि (**मधु**) मधुर (**उषस:**) दिन मधुर गुणवाले (**पार्थिवम्**) पृथिवी में (**रज:**) अणु और त्रसरेणु आदि छोटे-छोटे भूमि के कणके (**मधुमत्**) मधुर गुणों से युक्त सुख करनेवाले (**उत**) और पिता पालन करनेवाली (**द्यौ:**) सूर्य्य की कान्ति (**मधु**) मधुर गुणवाली (**अस्तु**) हो, वैसे तुम लोगों के लिये भी हो॥७॥

भावार्थ:-पढ़ानेवाले लोगों से जैसे मनुष्यों के लिये पृथिवीस्थ पदार्थ आनन्दायक हों, वैसे सब मनुष्यों को गुण, ज्ञान, और हस्तक्रिया से विद्या का उपयोग करना चाहिए॥७॥

पुनरस्माभि: किमर्थं विद्याऽनुष्ठानं कर्त्तव्यमित्युपदिश्यते॥

फिर हम लोगों को किसलिए विद्या का अनुष्ठान करना चाहिये॥

मधु॑मान्नो वन॒स्पति॒र्मधु॑माँ अस्तु॒ सूर्य॑:। माध्वी॒र्गावो॑ भवन्तु न:॥८॥

मधु॑ऽमान्। न॒:। वन॒स्पति॑:। मधु॑ऽमान्। अ॒स्तु॒। सूर्य॑:। माध्वी॑:। गाव॑:। भ॒व॒न्तु॒। न॒:॥८॥

पदार्थ:-(**मधुमान्**) प्रशस्तानि मधूनि सुखानि विद्यन्ते यस्मिन्स: (**न:**) अस्मदर्थम् (**वनस्पति:**) वनानां मध्ये रक्षणीयो वटादिवृक्षसमूहो मेघो वा (**मधुमान्**) प्रशस्तो मधुर: प्रकाशे विद्यते यस्मिन् स: (**अस्तु**) भवतु (**सूर्य:**) ब्रह्माण्डस्थो मार्त्तण्ड: शरीरस्थ: प्राणो वा (**माध्वी:**) माध्व्य: (**गाव:**) किरणा: (**भवन्तु**) (**न:**) अस्माकं हिताय॥८॥

अन्वय:-भो विद्वांसो! यथा नोऽस्मभ्यं वनस्पतिर्मधुमान् सूर्यश्च मधुमानस्तु नोऽस्माकं गावो माध्वीर्भवन्तु तथा यूयमस्मान् शिक्षध्वम्॥८॥

भावार्थ:-हे विद्वांसो! यूयं वयं चेत्थं मिलित्वैवं पुरुषार्थं कुर्याम, येनाऽस्माकं सर्वाणि कार्याणि सिध्येयु:॥८॥

पदार्थ:-हे विद्वानो! जैसे (**न:**) हम लोगों के लिये (**मधुमान्**) जिसमें प्रशंसित मधुर सुख है, ऐसा (**वनस्पति:**) वनों में रक्षा के योग्य वट आदि वृक्षों का समूह वा मेघ और (**सूर्य:**) ब्रह्माण्डों में

स्थिर होनेवाला सूर्य वा शरीरों में ठहरनेवाला प्राण **(मधुमान्)** जिसमें मधुर गुणों का प्रकाश है, ऐसा **(अस्तु)** हो तथा **(नः)** हम लोगों के हित के लिये **(गावः)** सूर्य को किरणें **(माध्वीः)** मधुर गुणवाली **(भवन्तु)** होवें, वैसी तुम लोग हमको शिक्षा करो॥८॥

भावार्थः–हे विद्वान् लोगो! तुम और हम आओ मिलके ऐसा पुरुषार्थ करें कि जिससे हम लोगों के सब काम सिद्ध होवें॥८॥

पुनरीश्वरो विद्वांसश्च मनुष्येभ्यः किं कुर्वन्तीत्युपदिश्यते॥

फिर ईश्वर और विद्वान् लोग मनुष्यों के लिये क्या-क्या करते हैं, यह विषय अगले मन्त्र में कहा है॥

शं नो॑ मि॒त्रः शं वरु॑ण॒ः शं नो॑ भवत्वर्य॒मा।

शं न॒ इन्द्रो॒ बृह॒स्पति॒ः शं नो॒ विष्णु॑रुरुक्र॒मः॥९॥१८॥

शम्। न॒ः। मि॒त्रः। शम्। वरु॑णः। शम्। न॒ः। भ॒व॒तु॒। अ॒र्य॒मा। शम्। न॒ः। इन्द्रः॑। बृह॒स्पति॑ः। शम्। न॒ः। विष्णु॑ः। उ॒रु॒ऽक्र॒मः॥९॥

पदार्थः–**(शम्)** सुखकारी **(नः)** अस्मभ्यम् **(मित्रः)** सर्वसुखकारी **(शम्)** शान्तिप्रदः **(वरुणः)** सर्वोत्कृष्टः **(शम्)** आरोग्यसुखदः **(नः)** अस्मभ्यम् **(भवतु)** **(अर्यमा)** न्यायव्यवस्थाकारी **(शम्)** ऐश्वर्यसौख्यप्रदः **(नः)** अस्मदर्थम् **(इन्द्रः)** परमैश्वर्यप्रदः **(बृहस्पतिः)** बृहत्यो वाचो विद्यायाः पतिः पालकः **(शम्)** विद्याव्याप्तिप्रदः **(नः)** अस्मभ्यम् **(विष्णुः)** सर्वगुणेषु व्यापनशीलः **(उरुक्रमः)** बहवः क्रमाः पराक्रमा यस्य सः॥९॥

अन्वयः–हे मनुष्या! यथाऽस्मदर्थमुरुक्रमो मित्रो नः शमुरुक्रमो वरुणो नः शमुरुक्रमोऽर्यमा नः शमुरुक्रमो बृहस्पतिरिन्द्रो नः शमुरुक्रमो विष्णुर्नः शं च भवतु तथा युष्मदर्थमपि भवतु॥९॥

भावार्थः–नहि परमेश्वरेण समः कश्चित्सखा श्रेष्ठो न्यायकार्यैश्वर्यवान् बृहत्स्वामी व्यापकः सुखकारी च विद्यते। नहि च विदुषा तुल्यः प्रियकारी धार्मिकः सत्यकारी विद्यादिधनप्रदो विद्यापालकः शुभगुणकर्मसु व्याप्तिमान् महापराक्रमी च भवितुं शक्यः। तत्स्मात्सर्वैर्मनुष्यैरीश्वरस्य स्तुतिप्रार्थनोपासना विदुषां सेवासङ्गौ च सततं कृत्वा नित्यमानन्दयितव्यमिति॥९॥

अत्राऽध्यापकाऽध्येतृणामीश्वरस्य च कर्त्तव्यफलस्योक्तत्वादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति नवतितमं ९० सूक्तं अष्टादशो १८ वर्गश्च समाप्तः॥

पदार्थः–हे मनुष्यो! जैसे हमारे लिये **(उरुक्रमः)** जिसके बहुत पराक्रम हैं, वह **(मित्रः)** सबका सुख करनेवाला, **(नः)** हम लोगों के लिये **(शम्)** सुखकारी, वा जिसके बहुत पराक्रम हैं, वह **(वरुणः)** सबमें अति उन्नतिवाला, हम लोगों के लिये **(शम्)** शान्ति सुख का देनेवाला, वा जिसके बहुत पराक्रम

हैं, वह (**अर्य्यमा**) न्याय करनेवाला, (**नः**) हम लोगों के लिये (**शम्**) आरोग्य सुख का देनेवाला, जिसके बहुत पराक्रम हैं, वह (**बृहस्पतिः**) महत् वेदविद्या का पालनेवाला, वा जिसके बहुत पराक्रम हैं वह (**इन्द्रः**) परमैश्वर्य देनेवाला, (**नः**) हम लोगों के लिये (**शम्**) ऐश्वर्य सुखकारी, वा जिसके बहुत पराक्रम हैं, वह (**विष्णुः**) सब गुणों में व्याप्त होनेवाला परमेश्वर तथा उक्त गुणोंवाला विद्वान् सज्जन पुरुष (**नः**) हम लोगों के लिये पूर्वोक्त सुख और (**शम्**) विद्या में सुख देनेवाला (**भवतु**) हो॥९॥

भावार्थः-परमेश्वर के समान मित्र, उत्तम न्याय का करनेवाला, ऐश्वर्य्यवान्, बड़े-बड़े पदार्थों का स्वामी तथा व्यापक सुख देनेवाला और विद्वान् के समान प्रेम उत्पादन करने, धार्मिक सत्य व्यवहार वर्त्तने, विद्या आदि धनों को देने और विद्या पालनेवाला शुभ गुण और सत्कर्मों में व्याप्त महापराक्रमी कोई नहीं हो सकता। इससे सब मनुष्यों को चाहिये कि परमात्मा की स्तुति, प्रार्थना, उपासना, निरन्तर विद्वानों की सेवा और संग करके नित्य आनन्द में रहें॥९॥

इस सूक्त में पढ़ने-पढ़ानेवालों के और ईश्वर के कर्त्तव्य काम तथा उनके फल का कहना है, इससे इस सूक्त के अर्थ के साथ पिछले सूक्त के अर्थ की संगति जाननी चाहिये॥

यह नब्बेवां ९० सूक्त और अठाहरवां १८ वर्ग समाप्त हुआ॥

ISBN 978-81-909957-0-4

॥ओ३म्॥

॥ऋग्वेदभाष्यम्॥

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समन्वितम्।

॥प्रथमं मण्डलम्॥

(ऋग्वेद १.९१-१.१३२ सूक्तपर्यन्तम्)

सम्पादनम्

श्रद्धानन्द-वैदिक-शोधसंस्थानम्

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्

तृतीयो भागः

प्रकाशनम्

श्रद्धानन्द-अनुसन्धान-प्रकाशन-केन्द्रः

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्.

वर्ष २०११

सम्पादक-मण्डल

मुख्यसंरक्षक	श्री सुदर्शन शर्मा, कुलाधिपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
संरक्षक	प्रो. स्वतन्त्र कुमार, कुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सहसंरक्षक	प्रो. महावीर, आचार्य एवं उपकुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रधान सम्पादक	प्रो. ज्ञानप्रकाश शास्त्री, प्रोफेसर, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सम्पादक	डॉ. सत्यदेव निगमालङ्कार, अध्यक्ष, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
व्यवसाय-प्रबन्धक	डॉ. जगदीश विद्यालङ्कार, पुस्तकालयाध्यक्ष, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रकाशक	प्रो. ए.के. चोपड़ा, कुलसचिव, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. उत्तराखण्ड)

प्रकाशनः-

श्रद्धानन्द-अनुसन्धान-प्रकाशनकेन्द्र

गुरुकुल काँगड़ी विश्वविद्यालय

हरिद्वार.

सन् २०१०

मूल्य-रु०४३०

मुद्रकः-

भारत प्रिंटर्स एण्ड पब्लिशर्स

दिल्ली.

दूरभाष-09212390469

अथास्य त्रयोविंशतिर्ऋचस्यैकनवतितमस्य सूक्तस्य रहूगणपुत्रो गोतम ऋषिः। सोमो देवता। १,३,४ स्वराट् पङ्क्तिः। २ पङ्क्तिः। १८,२० भुरिक्पङ्क्तिः। २२ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५ पादनिचृद्गायत्री। ६,८,९,११ निचृद्गायत्री। ७ वर्धमाना गायत्री। १०,१२ गायत्री। १३,१४ विराड्गायत्री। १५,१६ पिपीलिकामध्या निचृद्गायत्री च छन्दः। षड्जः स्वरः। १७ परोष्णिक्छन्दः। ऋषभः स्वरः। १९,२१,२३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सोमशब्दार्थ उपदिश्यते॥

अब तेईस मन्त्रवाले इक्कानवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सोम शब्द के अर्थ का उपदेश किया है॥

त्वं सो॑म॒ प्र चि॑कितो मनी॒षा त्वं रजि॑ष्ठमनु॒ नेषि॒ पन्था॑म्।
तव॒ प्रणी॑ती॒ पि॒तरो॑ न इन्दो दे॒वेषु॑ रत्न॑मभजन्त॒ धीरा॑:॥ १॥

त्वम्। सो॒म॒। प्र। चि॒कि॒तः। म॒नी॒षा। त्वम्। रजि॑ष्ठम्। अनु॑। नेषि॒। पन्था॑म्। तव॑। प्रऽनी॑ती। पि॒तरः॑। नः॒। इ॒न्दो॒ इति॑। दे॒वेषु॑। रत्न॑म्। अ॒भ॒ज॒न्त॒। धीराः॑॥ १॥

पदार्थः-(**त्वम्**) परमेश्वरो विद्वान् वा (**सोम**) सर्वैश्वर्यवान् (**प्र**) (**चिकितः**) जानासि। मध्यमैकवचने लेट्प्रयोगः। (**मनीषा**) मनस ईषया प्रज्ञानुरूपया। अत्र **सुपां सुलुगि**ति तृतीयास्थाने डादेशः। (**त्वम्**) (**रजिष्ठम्**) अतिशयेन ऋजु रजिष्ठम्। ऋजुशब्दादिष्ठन्।[१] **विभाषर्जोश्छन्दसि।** (अष्टा०६.४.१६२) इति ऋकारस्य रेफादेशः। (**अनु**) (**नेषि**) प्रापयसि। अत्र नीधातोर्लटि **बहुलं छन्दसी**ति शपो लुक्। अत्रान्तर्गतो ण्यर्थः। (**पन्थाम्**) पन्थानम्। अत्र **छान्दसो वर्णलोपो वे**ति नकारलोपः। (**तव**) (**प्रणीती**) प्रकृष्टा चासौ नीतिस्तया। अत्र **सुपां सुलुगि**ति पूर्वसवर्णदीर्घः। (**पितरः**) ज्ञानिनः (**नः**) अस्मभ्यम् (**इन्दो**) सोम्यगुणसम्पन्न (**देवेषु**) विद्वत्सु दिव्यगुणकर्मस्वभावेषु वा (**रत्नम्**) रत्नमणीयं धनम् (**अभजन्त**) भजन्ति (**धीराः**) ध्यानधैर्ययुक्ताः॥१॥

अन्वयः-हे इन्दो सोम! त्वं यया मनीषा चिकितस्तव प्रणीती धीराः पितरो देवेषु रत्नं प्राभजन्त, तया नोऽस्मान् रजिष्ठं पन्थामनुनेषि, तस्मात् त्वमस्माभिः सत्कर्तव्योऽसि॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। यथा परमेश्वरः परमविद्वान् वाऽविद्यां विनाश्य विद्याधर्ममार्गे प्रापयति, तथैव वैद्यकशास्त्ररीत्या सेवितः सोमाद्योषधिगणः सर्वान् रोगान् विनाश्य सुखानि प्रापयति॥१॥

पदार्थः-हे (**इन्दो**) सोम के समान (**सोम**) समस्त ऐश्वर्य्ययुक्त (**त्वम्**) परमेश्वर वा अति उत्तम विद्वान्! जिस (**मनीषा**) मन को वश में रखनेवाली बुद्धि से (**चिकितः**) जानते हो वा (**तव**) आपकी

---

१. अतिशायने तमबिष्ठनौ। अष्टा०५.३.५५

(प्रणीती) उत्तम नीति से **(धीराः)** ध्यान और धेर्ययुक्त **(पितरः)** ज्ञानी लोग **(देवेषु)** विद्वान् वा दिव्य गुण, कर्म और स्वभावों में **(रत्नम्)** अत्युत्तम धन को **(प्र) (अभजन्त)** सेवते हैं, उससे शान्तिगुणयुक्त आप **(नः)**हम लोगों को **(रजिष्ठम्)** अत्यन्त सीधे **(पन्थाम्)** मार्ग को **(अनु)** अनुकूलता से **(नेषि)** पहुंचाते हो, इससे **(त्वम्)** आप हमारे सत्कार के योग्य हो॥१॥

भावार्थः- इस मन्त्र में श्लेषालङ्कार है। जैसे परमेश्वर वा अत्यन्त उत्तम विद्वान् अविद्या विनाश करके विद्या और धर्ममार्ग को पहुंचाता है, वैसे ही वैद्यकशास्त्र की रीति से सेवा किया हुआ सोम आदि ओषधियों का समूह सब रोगों का विनाश करके सुखों को पहुंचाता है॥१॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

त्वं सो॑म क्रतु॑भिः सुक्रतु॑र्भूस्त्वं दक्षै॑ः सुदक्षो॑ विश्ववे॑दाः।
त्वं वृषा॑ वृष॒त्वेभि॑र्महि॒त्वा द्यु॒म्नेभि॑र्द्यु॒म्न्य॑भवो नृ॒चक्षा॑ः॥२॥

त्वम्। सो॒म॒। क्र॒तु॒ऽभिः। सु॒ऽक्र॒तुः॒। भूः॒। त्वम्। दक्षै॑ः। सु॒ऽदक्षः॑। वि॒श्व॒ऽवे॒दाः॒। त्वम्। वृषा॑। वृ॒ष॒ऽत्वेभि॑ः। म॒हि॒ऽत्वा। द्यु॒म्नेभि॑ः। द्यु॒म्नी। अ॒भ॒वः॒। नृ॒ऽचक्षा॑ः॥२॥

पदार्थः-(त्वम्) (सोम) (क्रतुभिः) प्रज्ञाभिः कर्मभिर्वा **(सुक्रतुः)** शोभनप्रज्ञः सुकर्म वा **(भूः)** भवसि। अत्राडभावो लडर्थे लुङ् च। **(त्वम्) (दक्षैः)** विज्ञानादिगुणैः **(सुदक्षः)** सुष्ठु विज्ञानः **(विश्ववेदाः)** प्राप्तसर्वविद्यः **(त्वम्) (वृषा)** विद्यासुखवर्षकः **(वृषत्वेभिः)** विद्यासुखवर्षणैः **(महित्वा)** महागुणवत्त्वेन। अत्र **सुपां सुलुगि**त्याकारादेशः। **(द्युम्नेभिः)** चक्रवर्त्यादिराजधनैः सह **(द्युम्नी)** प्रशस्तधनी यशस्वी वा **(अभवः)** भवसि **(नृचक्षाः)** नृषु चक्षो दर्शनं यस्य सः॥२॥

अन्वयः-हे सोम! यतस्त्वं क्रतुभिः सुक्रतुर्दक्षैः सुदक्षो विश्ववेदा भूः। यतस्त्वं महित्वा वृषत्वेभिर्वृषा द्युम्नेभिर्द्युम्नी नृचक्षा अभवस्तस्मान् त्वं सर्वोत्कृष्टोऽसि॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। यथा सुरीत्या सेवितः सोमाद्योषधिगणः प्रज्ञाचातुर्यवीर्यधनानि जनयति, तथैव सूपासित ईश्वरः सुसेवितो विद्वांश्चैवं तानि प्रज्ञादीनि जनयतीति॥२॥

पदार्थः-हे **(सोम)** शान्ति गुणयुक्त परमेश्वर वा उत्तम विद्वान्! जिस कारण **(त्वम्)** आप **(क्रतुभिः)** उत्तम बुद्धि व कर्मों से **(सुक्रतुः)** श्रेष्ठ बुद्धिशाली वा श्रेष्ठ काम करनेवाले तथा **(दक्षैः)** विज्ञान आदि गुणों से **(सुदक्षः)** अति श्रेष्ठ ज्ञानी **(विश्ववेदाः)** और सब विद्या पाये हुए **(भूः)** होते हैं वा जिस कारण **(त्वम्)** आप **(महित्वा)** बड़े-बड़े गुणोंवाले होने से **(वृषत्वेभिः)** विद्यारूपी सुखों की **(वृषा)** वर्षा और **(द्युम्नेभिः)** कीर्त्ति और चक्रवर्त्ति आदि राज्य धर्मों से **(द्युम्नी)** प्रशंसित धनी **(नृचक्षाः)** मनुष्यों में दर्शनीय **(अभवः)** होते हो, इससे **(त्वम्)** आप सब में उत्तम उत्कर्षयुक्त हूजिये॥२॥

भावार्थः–इस मन्त्र में श्लेषालङ्कार है। जैसे अच्छी रीति से सेवा किया हुआ सोम आदि ओषधियों का समूह बुद्धि, चतुराई, वीर्य और धनों को उत्पन्न कराता है, वैसे ही अच्छी उपासना को प्राप्त हुआ ईश्वर वा अच्छी सेवा को प्राप्त हुआ विद्वान् उक्त कामों को उत्पन्न कराता है॥२॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हों, यह विषय अगले मन्त्र में कहा है॥

राज्ञो॒ नु ते॒ वरु॑णस्य व्र॒तानि॑ बृ॒हद्ग॑भी॒रं तव॑ सोम॒ धाम॑।
शुचि॒ष्ट्वम॑सि प्रि॒यो न मि॒त्रो द॒क्षाय्यो॑ अ॒र्य॒मेवा॑सि सोम॥३॥

राज्ञः। नु। ते॒। वरु॑णस्य। व्र॒तानि॑। बृ॒हत्। ग॒भी॒रम्। तव॑। सो॒म॒। धाम॑ शुचि॑ः। त्वम्। अ॒सि॒। प्रि॒यः। न। मि॒त्रः। द॒क्षाय्य॑ः। अ॒र्य॒माऽइ॑व। अ॒सि॒। सो॒म॒॥३॥

पदार्थः–(**राज्ञः**) सर्वस्य जगतोऽधिपतेर्विद्याप्रकाशवतो वा (**नु**) सद्यः (**ते**) तव (**वरुणस्य**) वरस्य (**व्रतानि**) सत्यपालनादीनि कर्माणि (**बृहत्**) महत् (**गभीरम्**) महोत्तमगुणागाधम् (**तव**) (**सोम**) महैश्वर्ययुक्त (**धाम**) धीयन्ते पदार्था यस्मिंस्तत् (**शुचिः**) पवित्रः पवित्रकारको वा (**त्वम्**) (**असि**) भवसि (**प्रियः**) प्रीतः (**न**) इव (**मित्रः**) सुहृत् (**दक्षाय्यः**) विज्ञानकारकः (**अर्यमेव**) यथार्थन्यायकारीव (**असि**) भवसि (**सोम**) शुभकर्मगुणेषु प्रेरक॥३॥

अन्वयः–हे सोम! यतस्त्वं प्रियो मित्रो नेव शुचिरसि। अर्यमेव दक्षाय्योऽसि। हे सोम! यतो वरुणस्य राज्ञस्ते तव व्रतानि सत्यप्रकाशकानि कर्माणि सन्ति यतस्तव बृहद्गभीरं धामास्ति तस्माद्भवान् नु सर्वदोपास्यः सेवनीयो वास्ति॥३॥

भावार्थः–अत्र श्लेषापमालङ्कारौ। मनुष्या यथा यथाऽस्यां सृष्टौ रचनानियमैरीश्वरस्य गुणकर्मस्वभावांश्च दृष्ट्वा प्रयत्नान् कुर्वीरन् तथा तथा विद्यासुखं जायत इति वेद्यम्॥३॥

पदार्थः–हे (**सोमः**) महा ऐश्वर्ययुक्त परमेश्वर वा विद्वान्! जिससे (**त्वम्**) आप (**प्रियः**) प्रसन्न (**मित्रः**) मित्र के (**न**) तुल्य (**शुचि**) पवित्र और पवित्रता करनेवाले (**असि**) हैं तथा (**अर्यमेव**) यथार्थ न्याय करनेवाले के समान (**दक्षाय्यः**) विज्ञान करनेवाले (**असि**) हैं। हे (**सोम**) शुभ कर्म और गुणों में प्रेरणेवाले (**वरुणस्य**) श्रेष्ठ (**राज्ञः**) सब जगत् के स्वामी वा विद्याप्रकाशयुक्त (**ते**) आपके (**व्रतानि**) सत्यप्रकाश करनेवाले काम हैं, जिससे (**तव**) आपका (**बृहत्**) बड़ा (**गभीरम्**) अत्यन्त गुणों से अथाह (**धाम**) जिसमें पदार्थ धरे जायें, वह स्थान है, इससे आप (**नु**) शीघ्र और सदा उपासना और सेवा करने योग्य हैं॥३॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार है। मनुष्य जैसे-जैसे इस सृष्टि में सृष्टि की रचना के नियमों से ईश्वर के गुण, कर्म और स्वभावों को देखके अच्छे यत्न को करें, वैसे-वैसे विद्या और सुख उत्पन्न होते हैं॥३॥

पुनस्तयोः कीदृशानि कर्माणि सन्तीत्युपदिश्यते॥

फिर उन दोनों के कैसे काम हैं, यह विषय अगले मन्त्र में कहा है॥

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु।
तेभिर्नो विश्वैः सुमना अहेळन् राजन्त्सोम प्रति हव्या गृभाय॥४॥

या। ते। धामानि। दिवि। या। पृथिव्याम्। या। पर्वतेषु। ओषधीषु। अप्ऽसु। तेभिः। नः। विश्वैः। सुऽमनाः। अहेळन्। राजन्। सोम। प्रति। हव्या। गृभाय॥४॥

पदार्थः-(**या**) यानि (**ते**) तव (**धामानि**) नामजन्मस्थानानि (**दिवि**) प्रकाशमये सूर्य्यादौ दिव्यवहारे वा (**या**) यानि (**पृथिव्याम्**) (**या**) यानि (**पर्वतेषु**) (**ओषधीषु**) (**अप्सु**) (**तेभिः**) तैः (**नः**) अस्मान् (**विश्वैः**) सर्वैः (**सुमनाः**) शोभनविज्ञानः (**अहेडन्**) अनादरमकुर्वन् (**राजन्**) सर्वाधिपते (**सोम**) सर्वोत्पादक (**प्रति**) (**हव्या**) हव्यानि दातुमादातुं योग्यानि (**गृभाय**) गृहाण ग्राहय वा। अत्रान्तर्गतो ण्यर्थः। ग्रह धातोर्हस्य भत्वं श्नः स्थाने शायजादेशश्च॥४॥

अन्वयः-हे सोम! राजन् ते तव या यानि धामानि दिवि या यानि पृथिव्यां या यानि पर्वतेष्वोषधीष्वप्सु सन्ति। तेभिर्विश्वैः सर्वैरहेडन् सुमनास्त्वं हव्यानि नः प्रति गृभाय॥४॥

भावार्थः-यथा जगदीश्वरः स्वसृष्टौ वेदद्वारा सृष्टिक्रमान् दर्शयित्वा सर्वा विद्याः प्रकाशयति, तथैव विद्वांसोऽधीतैः साङ्गोपाङ्गैर्वेदैर्हस्तक्रियया च कलाकौशलानि दर्शयित्वा सर्वान् सकला विद्या ग्राहयेयुः॥४॥

पदार्थः-हे (**सोम**) सबको उत्पन्न करनेवाले (**राजन्**) राजा! (**ते**) आपके (**या**) जो (**धामानि**) नाम, जन्म और स्थान (**दिवि**) प्रकाशमय सूर्य्य आदि पदार्थ वा दिव्य व्यवहार में वा (**या**) जो (**पृथिव्याम्**) पृथिवी में वा (**या**) जो (**पर्वतेषु**) पर्वतों वा (**ओषधीषु**) ओषधियों वा (**अप्सु**) जलों में हैं, (**तेभिः**) उन (**विश्वैः**) सबसे (**अहेडन्**) अनादर न करते हुए (**सुमनाः**) उत्तम ज्ञानवाले आप (**हव्याः**) देने-लेने योग्य कामों को (**नः**) हमको (**प्रति+गृभाय**) प्रत्यक्ष ग्रहण कराइये॥४॥

भावार्थः-जैसे जगदीश्वर अपनी रची सृष्टि में वेद के द्वारा इस सृष्टि के कामों को दिखाकर सब विद्याओं का प्रकाश करता है, वैसे ही विद्वान् पढ़े हुए अङ्ग और उपाङ्ग सहित वेदों से हस्तक्रिया के साथ कलाओं की चतुराई को दिखाकर सबको समस्त विद्या का ग्रहण करावें॥४॥

पुनः स सोम कीदृश इत्युपदिश्यते॥

फिर वह सोम कैसा है, यह विषय अगले मन्त्र में कहा है॥

त्वं सो॑मासि॒ सत्प॑ति॒स्त्वं राजो॒त वृ॑त्र॒हा। त्वं भ॒द्रो अ॑सि॒ क्रतुः॑॥५॥ १९॥

त्वम्। सो॒म॒। अ॒सि॒। सत्ऽप॑तिः। त्वम्। राजा॑। उ॒त। वृ॒त्र॒ऽहा। त्वम्। भ॒द्रः। अ॒सि॒। क्रतुः॑॥५॥

पदार्थः-(**त्वम्**) परमेश्वरः शालाध्यक्ष ओषधिराजो वा (**सोम**) सकलजगदुत्पादक सर्वविद्याप्रद सर्वौषधिगुणप्रदो वा (**असि**) वा (**सत्पतिः**) सतोऽविनाशिनः कारणस्य विद्यमानस्य कार्य्यस्य सत्यपथ्यकारिणां वा पालकः (**त्वम्**) (**राजा**) सर्वाध्यक्षो विद्याध्यक्षो रोगनाशकगुणप्रकाशको वा (**उत**) अपि (**वृत्रहा**) यो दुःखप्रदान् शत्रून् मेघदोषान् वा हन्ति सः (**त्वम्**) (**भद्रः**) कल्याणकारकः सेवनीयो वा (**असि**) भवति वा (**क्रतुः**) प्रज्ञामयः प्रज्ञाप्रदः प्रज्ञाहेतुर्वा॥५॥

अन्वयः-हे सोम! यतस्त्वमयं सोमो वा सत्पतिरस्युतापि त्वमयं च वृत्रहां च राजासि अस्ति वा यतस्त्वमयं च भद्रोऽसि भवति वा क्रतुरसि भवति वा तस्मात् त्वमयं च विद्वद्भिः सेव्यः॥५॥

भावार्थः-अत्र श्लेषालङ्कारः। परमेश्वरो विद्वान् सोमलताद्योषधिगणो वा सर्वैश्वर्यप्रकाशकः सतां रक्षकोऽधिपतिर्दुःखविनाशको विज्ञानप्रदः कल्याणकार्य्यस्तीति सम्यग्विदित्वा सेव्यः॥५॥

पदार्थः-हे (**सोम**) संसार के उत्पन्न करने वा सब विद्याओं के देनेवाले! (**त्वम्**) परमेश्वर वा पाठशाला आदि व्यवहारों के स्वामी विद्वान् आप (**सत्पतिः**) अविनाशी जो जगत् कारण वा विद्यमान कार्य्य जगत् है, उसके पालनेहारे (**असि**) हैं (**उत**) और (**त्वम्**) आप (**वृत्रहा**) दुःख देनेवाले दुष्टों के विनाश करनेहारे (**राजा**) सबके स्वामी विद्या के अध्यक्ष हैं वा जिस कारण (**त्वम्**) आप (**भद्रः**) अत्यन्त सुख करनेवाले हैं वा (**क्रतुः**) समस्त बुद्धियुक्त वा बुद्धि देनेवाले (**असि**) हैं, इसीसे आप सब विद्वानों के सेवने योग्य हैं॥१॥५॥

द्वितीय-(**सोम**) सब ओषधियों का गुणदाता सोम ओषधि (**त्वम्**) यह ओषधियों में उत्तम (**सत्पतिः**) ठीक-ठीक पथ्य करनेवाले जनों की पालना करनेहारा है (**उत**) और (**त्वम्**) यह सोम (**वृत्रहा**) मेघ के समान दोषों का नाशक (**राजा**) रोगों के विनाश करने के गुणों का प्रकाश करनेवाला है वा जिस कारण (**त्वम्**) यह (**भद्रः**) सेवने के योग्य वा (**क्रतुः**) उत्तम बुद्धि का हेतु है, इसीसे वह सब विद्वानों के सेवने योग्य है॥१॥५॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। परमेश्वर, विद्वान्, सोमलता आदि ओषधियों का समूह, ये समस्त ऐश्वर्य को प्रकाश करने, श्रेष्ठों की रक्षा करने और उनके स्वामी, दुःख का विनाश करने और विज्ञान के देनेहारे और कल्याणकारी हैं, ऐसा अच्छी प्रकार जानके सबको इनका सेवन करना योग्य है॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं च॑ सोम नो॒ वशो॑ जी॒वातुं॒ न म॑रामहे। प्रि॒यस्तो॑त्रो॒ व॒न॒स्पति॑:॥६॥

त्वम्। च॒। सो॒म॒। नः॒। वशः॑। जी॒वात॑वे॒म्। न। म॒रा॒म॒हे॒। प्रि॒यऽस्तो॑त्रः। व॒न॒स्पतिः॑॥६॥

पदार्थः-(**त्वम्**) (**च**) समुच्चये (**सोम**) सत्कर्मसु प्रेरक प्रेरको वा (**नः**) अस्माकम् (**वशः**) वशित्वगुणप्रापकः (**जीवातुम्**) जीवनम् (**न**) निषेधार्थे (**मरामहे**) अकालमृत्युं क्षणभङ्गदेहे प्राप्नुयाम्। अत्र विकरणव्यत्ययः। (**प्रियस्तोत्रः**) प्रियं प्रति प्रियकारि स्तोत्रं गुणस्तवनं यस्य सः (**वनस्पतिः**) संभक्तस्य पदार्थसमूहस्य जङ्गलस्य वा पालकः श्रेष्ठतमो वा॥६॥

अन्वयः-हे सोम! यतस्त्वमयं च नोऽस्माकं जीवातुं वशः प्रियस्तोत्रो वनस्पतिर्भवसि भवति वा तदेतद् विज्ञाय वयं सद्यो न मरामहे॥६॥

भावार्थः-अत्र श्लेषालङ्कारः। ये मनुष्या ईश्वराज्ञापालिनो विदुषामोषधीनां च सेविनः सन्ति, ते पूर्णमायुः प्राप्नुवन्ति॥६॥

पदार्थः-हे (**सोम**) श्रेष्ठ कामों में प्रेरणा देनेहारे परमेश्वर वा श्रेष्ठ कामों में प्रेरणा देता जो (**त्वम्**) सो यह (**च**) और आप (**नः**) हम लोगों के (**जीवातुम्**) जीवन को (**वशः**) वश होने के गुणों का प्रकाश करने वा (**प्रियस्तोत्रः**) जिनके गुणों का कथन प्रेम करने-करानेवाला है वा (**वनस्पतिः**) सेवनीय पदार्थों की पालना करनेहारे वा यह सोम जङ्गली ओषधियों में अत्यन्त श्रेष्ठ है, इस व्यवस्था से इन दोनों को जानकर हम लोग शीघ्र (**न**) (**मरामहे**) अकालमृत्यु और अनायास मृत्यु न पावें॥६॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य ईश्वर की आज्ञा पालनेहारे विद्वानों और औषधियों का सेवन करते हैं, वे पूरी आयुर्दा पाते हैं॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह उपदेश अगले मन्त्र में किया है॥

त्वं सो॑म म॒हे भगं॒ त्वं यू॒न॑ ऋताय॒ते। दक्षं॑ दधासि जी॒वसे॑॥७॥

त्वम्। सो॒म॒। म॒हे। भग॑म्। त्वम्। यू॒ने॑। ऋ॒त॒ऽय॒ते। दक्ष॑म्। द॒धा॒सि॒। जी॒वसे॑॥७॥

पदार्थः-(**त्वम्**) विद्यासौभाग्यप्रदः (**सोम**) सोमायं वा (**महे**) महापूज्यगुणाय (**भगम्**) विद्याश्रीसमूहम् (**त्वम्**) (**यूने**) ब्रह्मचर्य्यविद्याभ्यां शरीरत्मानोर्युवावस्थां प्राप्ताय (**ऋतायते**) आत्मन ऋतं विज्ञानमिच्छते (**दक्षम्**) बलम् (**दधासि**) (**जीवसे**) जीवितुम्॥७॥

अन्वयः-हे सोम! त्वमयं च ऋतायते महे यूने भगं तथा त्वं जीवसे दक्षं दधासि तस्मात् सर्वैः सङ्गमनीयः॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि मष्याणां परमेश्वरस्य विदुषामोषधीनां च सेवनेन विना सुखं भवितुमर्हति तस्मादेतत् सर्वैर्नित्यमनुष्ठेयम्॥७॥

पदार्थः-हे **(सोम)** परमेश्वर वा सोम अर्थात् औषधियों का समूह **(त्वम्)** विद्या और सौभाग्य के देनेहारे! आप वा यह सोम **(ऋतायते)** अपने को विशेष ज्ञान की इच्छा करनेहारे **(महे)** अति उत्तम गुणयुक्त **(यूने)** ब्रह्मचर्य्य और विद्या से शरीर और आत्मा की तरुण अवस्था को प्राप्त हुए ब्रह्मचारी के लिये **(भगम्)** विद्या और धनराशि तथा **(त्वम्)** आप **(जीवसे)** जीने के अर्थ **(दक्षम्)** बल को **(दधासि)** धारण कराने से सबको चाहने योग्य हैं॥७॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को परस्पर विद्वान् और ओषधियों के सेवन के विना सुख होने को योग्य नहीं है, इससे यह आचरण सबको नित्य करने योग्य है॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह उपदेश अगले मन्त्र में कहा है॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत् त्वावतः सखा॥८॥

त्वम्। नः। सोम। विश्वतः। रक्ष। राजन्। अघऽयतः। न। रिष्येत्। त्वाऽवतः। सखा॥८॥

पदार्थः-**(त्वम्)** **(नः)** **(सोम)** सर्वसुहृत्सौहार्दप्रदो वा **(विश्वतः)** सर्वस्मात् **(रक्ष)** रक्षति वा। **द्व्यचोऽतस्तिङ** इति दीर्घः। **(राजन्)** सर्वरक्षणस्याभिप्रकाशक प्रकाशको वा **(अघायतः)** आत्मनोऽघमिच्छतो दोषकारिणः **(न)** निषेधे **(रिष्येत्)** हिंसितो भवेत् **(त्वावतः)** त्वत्सदृशस्य **(सखा)** मित्रः॥८॥

अन्वयः-हे सोम! त्वमयं च विश्वतोऽघायतो नोऽस्मान् रक्ष रक्षति वा। हे राजन्! त्वावतः सखा न रिष्येद् विनिष्टो न भवेत्॥८॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैरेवमीश्वरं प्रार्थयित्वा प्रयतितव्यम्। यतो धर्मं त्यक्तुमधर्मं ग्रहीतुमिच्छापि न समुत्तिष्ठेत। धर्माधर्मप्रवृत्तौ मनस इच्छैव कारणमस्ति तत्प्रवृत्तौ तन्निरोधे च कदाचिद् धर्मत्यागोऽधर्मग्रहणं च नैवोत्पद्यते॥८॥

पदार्थः-हे **(सोम)** सबके मित्र वा मित्रता देनेवाला **(त्वम्)** आप वा यह औषधिसमूह! **(विश्वतः)** समस्त **(अघायतः)** अपने को दोष की इच्छा करते हुए वा दोषकारी से **(नः)** हम लोगों की **(रक्ष)** रक्षा कीजिये वा यह ओषधिराज रक्षा करता है, हे **(राजन्)** सबकी रक्षा का प्रकाश करनेवाले!

(त्वावतः) तुम्हारे समान पुरुष का **(सखा)** कोई मित्र **(न)** न **(रिष्येत्)** विनाश को प्राप्त होवे वा सबका रक्षक जो ओषधिगण इसके समान ओषधि का सेवनेवाला पुरुष विनाश को न प्राप्त होवे॥८॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को इस प्रकार ईश्वर की प्रार्थना करके उत्तम यत्न करना चाहिये कि जिससे धर्म को छोड़ने और अधर्म के ग्रहण करने को इच्छा भी न उठे। धर्म और अधर्म की प्रवृत्ति में मन की इच्छा ही कारण है, उसकी प्रवृत्ति और उसके रोकने से कभी धर्म का त्याग और अधर्म का ग्रहण उत्पन्न न हो॥८॥

स कं रक्षतीत्युपदिश्यते॥

वह किनसे रक्षा करता है, यह विषय अगले मन्त्र में कहा है॥

सोम॒ यास्ते॑ मयो॒भुव॑ ऊ॒तय॒: सन्ति॑ दा॒शुषे॑। ताभि॑र्नोऽवि॒ता भ॑व॥ ९॥

सोम॑। याः। ते॒। म॒य॒ःऽभुव॑ः। ऊ॒तयः॑। सन्ति॑। दा॒शुषे॑। ताभिः॑। नः॒। अ॒वि॒ता। भ॒व॒॥ ९॥

पदार्थः-(**सोम**) (**याः**) (**ते**) तव तस्य वा (**मयोभुवः**) सुखकारिका (**ऊतयः**) रक्षणादिकाः क्रियाः (**सन्ति**) भवन्ति (**दाशुषे**) दानशीलाय मनुष्याय (**ताभिः**) (**नः**) अस्माकं (**अविता**) रक्षणादिकर्त्ता (**भव**) भवति वा॥९॥

अन्वयः-हे सोम! यास्ते तवास्य वा मयोभुव ऊतयो दाशुषे सन्ति, ताभिर्नोऽस्माकमविता भव भवति वा॥९॥

भावार्थः-येषां प्राणिनां परमेश्वरो विद्वांसः सुनिष्पादिता ओषधिसमूहाश्च रक्षका भवन्ति, कुतस्ते दुःखं पश्येयुः॥९॥

पदार्थः-हे (**सोम**) परमेश्वर! (**याः**) जो (**ते**) आपकी वा सोम आदि ओषधिगण की (**मयोभुवः**) सुख को उत्पन्न करनेवाली (**ऊतयः**) रक्षा आदि क्रिया (**दाशुषे**) दानी मनुष्य के लिये (**सन्ति**) हैं (**ताभिः**) उनसे (**नः**) हम लोगों के (**अविता**) रक्षा आदि करने वाले (**भव**) हूजिये वा जो यह ओषधिगण होता है, इनका उपयोग हम लोग सदा करें॥९॥

भावार्थः-जिन प्राणियों की परमेश्वर, विद्वान् और अच्छी सिद्ध की हुई ओषधि रक्षा करनेवाली होती हैं, वे कहाँ से दुःख देखें॥९॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह क्या करता है, इस विषय को अगले मन्त्र में कहा है॥

इ॒मं य॒ज्ञमि॒दं वचो॑ जुजुषा॒ण उ॒पाग॑हि। सोम॒ त्वं नो॑ वृ॒धे भ॑व॥ १०॥ २०॥

इ॒मम्। य॒ज्ञम्। इ॒दम्। वचः॑। जु॒जु॒षा॒णः। उ॒प॒ऽआग॑हि। सोम॑। त्वम्। नः॒। वृ॒धे। भ॒व॒॥ १०॥

पदार्थः-(**इमम्**) प्रत्यक्षम् (**यज्ञम्**) विद्यारक्षाकारकं शिल्पसिद्धं वा (**इदम्**) विद्याधर्मयुक्तम् (**वचः**) वचनम् (**जुजुषाणः**) सेवमानः (**उपागहि**) उपागच्छ उपागच्छति वा (**सोम**) (**त्वम्**) (**नः**) अस्माकम् (**वृधे**) वृद्धये (**भव**) भवति वा॥१०॥

अन्वयः-हे सोम! यत इमं यज्ञमिदं वचो जुजुषाणः संस्त्वमुपागहि। उपागच्छति वाऽतो नो वृधे भव भवतु वा॥१०॥

भावार्थः-अत्र श्लेषालङ्कारः। यदा विज्ञानेनेश्वरः सेवाकृतज्ञताभ्यां विद्वांसो वैद्यकसत्क्रियाभ्यामोषधिगण- श्चोपागता भवन्ति तदा मनुष्याणां सर्वाणि सुखानि जायन्ते॥१०॥

पदार्थः-हे (**सोम**) परमेश्वर वा विद्वन्! जिससे (**इमम्**) इस (**यज्ञम्**) विद्या की रक्षा करनेवाले वा शिल्प कर्मों से सिद्ध किये हुए यज्ञ को तथा (**इदम्**) इस विद्या और धर्मसंयुक्त (**वचः**) वचन को (**जुजुषाणः**) प्रीति से सेवन करते हुए (**त्वम्**) आप (**उपागहि**) समीप प्राप्त होते हैं वा यह सोम आदि ओषधिगण समीप प्राप्त होता है (**नः**) हम लोगों की (**वृधे**) वृद्धि के लिये (**भव**) हूजिये वा उक्त ओषधिगण होवे॥१०॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जब विज्ञान से ईश्वर और सेवा तथा कृतज्ञता से विद्वान्, वैद्यकविद्या वा उत्तम क्रिया से औषधियां मिलती हैं, तब मनुष्यों के सब सुख उत्पन्न होते हैं॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

सोम॑ गी॒र्भिष्ट्वा॑ व॒यं व॒र्धया॑मो वचो॒विद॑:। सु॒मृ॒ळी॒को न॒ आ वि॑श॥११॥

सोम॑। गी॒:ऽभिः। त्वा॒। व॒यम्। व॒र्धया॑मः। व॒चः॒ऽविद॑:। सु॒ऽमृ॒ळी॒कः। न॒:। आ। वि॒श॒॥११॥

पदार्थः-(**सोम**) विज्ञातव्यगुणकर्मस्वभाव! (**गीर्भिः**) विद्यासुसंस्कृताभिर्वाग्भिः (**त्वा**) त्वाम् (**वयम्**) (**वर्धयामः**) (**वचोविदः**) विदितवेदितव्याः (**सुमृळीकः**) सुष्ठु सुखकारी (**नः**) अस्मान् (**आ**) आभिमुख्ये (**विशः**)॥११॥

अन्वयः-हे सोम! यतः सुमृळीको वैद्यस्त्वं नोऽस्मानाविश तस्मात् त्वा त्वां वचोविदो वयं गीर्भिर्नित्यं वर्द्धयामः॥११॥

भावार्थः-अत्र श्लेषालङ्कारः। न हीश्वरविद्वदोषधिगणैस्तुल्यः प्राणिनां सुखकारी कश्चिद् वर्त्तते तस्मात् सुशिक्षाध्ययनाभ्यामेतेषां बोधवृद्धिं कृत्वा तदुपयोगश्च मनुष्यैर्नित्यमनुष्ठेयः॥११॥

पदार्थः-हे (**सोम**) जानने योग्य गुण, कर्म, स्वभावयुक्त परमेश्वर! जिस कारण (**सुमृळीकः**) अच्छे सुख के करनेवाले वैद्य आप और सोम आदि ओषधिगण (**नः**) हम लोगों को (**आ**) (**विश**) प्राप्त

हों, इससे **(त्वा)** आपको और उस औषधिगण को **(वचोविदः)** जानने योग्य पदार्थों को जानते हुए **(वयम्)** हम **(गीर्भिः)** विद्या से शुद्ध की हुई वाणियों से नित्य **(वर्द्धयामः)** बढ़ाते हैं॥११॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। ईश्वर, विद्वान् और ओषधिसमूह के तुल्य प्राणियों को कोई सुख करनेवाला नहीं है, इससे उत्तम शिक्षा और विद्याध्ययन से उक्त पदार्थों के बोध की वृद्धि करके मनुष्यों को नित्य वैसे ही आचरण करना चाहिये॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

ग॒य॒स्फानो॑ अमीव॒हा व॑सु॒वित्पु॑ष्टि॒वर्ध॑नः। सु॒मि॒त्रः सो॑म नो भव॥१२॥

ग॒य॒ऽस्फा॑नः। अ॒मी॒व॒ऽहा। व॒सु॒ऽवित्। पु॒ष्टि॒ऽवर्ध॑नः। सु॒ऽमि॒त्रः। सो॒म॒। नः॒। भ॒व॒॥१२॥

पदार्थः-(**गयस्फानः**) गयानां प्राणानां वर्धयिता। **स्फायी वृद्धौ**इत्यस्माद् धातोर्नन्द्यादेराकृतिगणत्वाल्ल्युः। **छान्दसो वर्णलोप** इति यलोपः। अत्र सायणाचार्येण स्फान इति कर्त्तरि ल्युडन्तं व्याख्यातं तदशुद्धम्। **(अमीवहा)** अमीवानामविद्यादीनां ज्वरादीनां वा हन्ता **(वसुवित्)** वसूनि सर्वाणि द्रव्याणि विदन्ति ये येन वा **(पुष्टिवर्द्धनः)** शरीरात्मपुष्टेर्वर्धयिता **(सुमित्रः)** शोभनाः सुष्ठुकारिणो मित्रा यतः **(सोम)** **(नः)** अस्माकम् **(भव)** भवतु वा॥१२॥

अन्वयः-हे सोम! यतस्त्वं नोऽस्माकं गयस्फानोऽमीवहा वसुवित्सुमित्रः पुष्टिवर्धनो भव भवसि वा तस्मादस्माभिः सेव्यः॥१२॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि प्राणिनामीश्वरस्यौषधीनां च सेवनेन विदुषां सङ्गेन च विना रोगनाशो बलवर्द्धनं द्रव्यज्ञानं धनप्राप्तिः सुहृन्मेलनं च भवितुं शक्यं तस्मादेतेषां समाश्रयः सेवा च सर्वैः कार्या॥१२॥

पदार्थः-हे **(सोम)** परमेश्वर वा विद्वन्! जिस कारण आप वा यह उत्तमौषध **(नः)** हम लोगों के **(गयस्फानः)** प्राणों के बढ़ाने वा **(अमीवहा)** अविद्या आदि दोषों तथा ज्वर आदि दुःखों के विनाश करने वा **(वसुवित्)** द्रव्य आदि पदार्थों के ज्ञान कराने वा **(सुमित्रः)** जिनसे उत्तम कामों के करनेवाले मित्र होते हैं, वैसे **(पुष्टिवर्द्धनः)** शरीर और आत्मा की पुष्टि को बढ़ानेवाले **(भव)** हूजिये वा यह ओषधिसमूह हम लोगों को यथायोग्य उक्त गुण देनेवाला होवे, इससे आप और यह हम लोगों के सेवने योग्य हैं॥१२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। प्राणियों को ईश्वर और ओषधियों के सेवन और विद्वानों के सङ्ग के विना रोगनाश, बलवृद्धि, पदार्थों का ज्ञान, धन की प्राप्ति तथा मित्रमिलाप नहीं हो सकता, इससे उक्त पदार्थों का यथायोग्य आश्रय और सेवा सबको करनी चाहिए॥१२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

सोम॑ रारन्धि नो॑ हृ॒दि गावो॒ न यव॑सेष्वा। मर्य॑ इव॒ स्व ओ॒क्ये॑॥ १३॥

सोम॑। रारन्धि। नः॑। हृ॒दि। गाव॑ः। न। यव॑सेषु। आ। मर्य॑ः॑ऽइव। स्वे। ओ॒क्ये॑॥ १३॥

पदार्थः-(सोम) (रारन्धि) रमस्व रमेत वा। अत्र रमधातोर्लोटि मध्यमैकवचने **बहुलं छन्दसी**ति शपः स्थाने श्लुः। व्यत्ययेन परस्मैपदं **वाच्छन्दसी**ति हेः पित्वादङित्श्चेति[२] धिः। **(नः)** अस्माकम् **(हृदि)** हृदये **(गावः)** धेनवः **(न)** इव **(यवसेषु)** भक्षणीयेषु घासेषु **(आ)** समन्तात् **(मर्यइव)** यथा मनुष्यः **(स्वे)** स्वकीये **(ओक्ये)** गृहे॥१३॥

अन्वयः-हे सोम! यतस्त्वमयं च नो हृदि नेव यवसेषु गावो स्व ओक्ये मर्य इवारारन्धि समन्ताद् रमस्व रमते वा तस्मात्सर्वैः सदा सेवनीयः॥१३॥

भावार्थ-अत्र श्लेषोपमालङ्काराः। हे जगदीश्वर! यथा प्रत्यक्षतया गावो मनुष्याश्च स्वकीये भोक्तव्ये पदार्थे स्थाने वा क्रीडन्ति तथैवाऽस्माकमात्मनि प्रकाशितो भवेः। यथा पृथिव्यादिषु कार्य्यद्रव्येषु प्रत्यक्षाः किरणा राजन्ते तथैवास्माकमात्मनि राजस्व। अत्रासंभवत्वाद्विद्वान्न गृह्यते॥१३॥

पदार्थः-हे **(सोम)** परमेश्वर! जिस कारण आप **(नः)** हम लोगों के **(हृदि)** हृदय में **(न)** जैसे **(यवसेषु)** खाने योग्य घास आदि पदार्थों में **(गावः)** गौ रमती हैं, वैसे वा जैसे **(स्वे)** अपने **(ओक्ये)** घर में **(मर्य्यइव)** मनुष्य विरमता है, वैसे **(आ)** अच्छे प्रकार **(रारन्धि)** रमिये वा ओषधिसमूह उक्त प्रकार से रमे, इससे सबके सेवने योग्य आप वा यह है॥१३॥

भावार्थः-इस मन्त्र में श्लेष और दो उपमालङ्कार हैं। हे जगदीश्वर! जैसे प्रत्यक्षता से गौ और मनुष्य अपने भोजन करने योग्य पदार्थ वा स्थान में उत्साहपूर्वक अपना वर्त्ताव वर्त्तते हैं, वैसे हम लोगों के आत्मा में प्रकाशित हूजिये। जैसे पृथिवी आदि कार्य्य पदार्थों में प्रत्यक्ष सूर्य्य की किरणें प्रकाशमान होती हैं, वैसे हम लोगों के आत्मा में प्रकाशमान हूजिये। इस मन्त्र में असंभव होने से विद्वान् का ग्रहण नहीं किया॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

यः सो॑म सु॒ख्ये तव॑ रा॒रण॑द्देव॒ मर्त्य॑ः। तं दक्ष॑ः सचते क॒विः॥ १४॥

यः। सो॒म॒। सु॒ख्ये। तव॑। र॒रण॑त्। दे॒व॒। मर्त्य॑ः। तम्। दक्ष॑ः। सु॒च॒ते॒। क॒विः॥ १४॥

---

२. अङित्श्च। अष्टा०६.४.१०३ हेर्धिः। सं०।

पदार्थः-(**यः**) (**सोम**) विद्वन् (**सख्ये**) मित्रस्य भावाय कर्मणे वा (**तव**) (**रारणत्**) उपसंवदते। अत्र रणधातोर्**बहुलं छन्दसी**ति शपः स्थाने श्लुः। लडर्थे लेट् च। **तुजादित्वाद्** दीर्घः। (**देव**) दिव्यगुणप्रापक दिव्यगुणनिमित्तो वा (**मर्त्यः**) मनुष्यः (**तम्**) मनुष्यम् (**दक्षः**) विद्यमानशरीरात्मबलः (**सचते**) समवैति (**कविः**) क्रान्तप्रज्ञादर्शनः॥१४॥

अन्वयः-हे देव सोम! यस्तव सख्ये दक्षः कविर्मर्त्यो रारणत् सचते च तं सुखं कथं न प्राप्नुयात्॥१४॥

भावार्थः-अत्र श्लेषालङ्कारः। ये मनुष्याः परमेश्वरेण विद्वद्भिरुत्तमौषधिभिर्वा सह मित्रभावं कुर्वन्ति, ते विद्यां प्राप्य न कदाचिद् दुःखभागिनो भवन्ति॥१४॥

पदार्थः-हे (**देव**) दिव्यगुणों को प्राप्त करानेवाले वा अच्छे गुणों का हेतु (**सोम**) वैद्यराज विद्वान् वा यह उत्तम ओषधि! (**यः**) जो (**तव**) आप वा इसके (**सख्ये**) मित्रपन वा मित्र के काम में (**दक्षः**) शरीर और आत्मबलयुक्त (**कविः**) दर्शनीय वा अव्याहत प्रज्ञायुक्त (**मर्त्यः**) मनुष्य (**रारणत्**) संवाद करता और (**सचते**) संबन्ध रखता है (**तम्**) उस मनुष्य को सुख क्यों न प्राप्त होवे॥१४॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य परमेश्वर, विद्वान् वा उत्तम औषधि के साथ मित्रपन करते हैं, वे विद्या को प्राप्त होके कभी दुःखभागी नहीं होते हैं॥१४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह उपदेश अगले मन्त्र में किया है॥

उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः। सखा सुशेव एधि नः॥१५॥२१॥

उरुष्य। नः। अभिऽशस्तेः। सोम। नि। पाहि। अंहसः। सखा। सुऽशेवः। एधि। नः॥१५॥

पदार्थः-(**उरुष्य**) रक्ष। **उरुष्यतीति रक्षतिकर्मा।** (निरु०५.२३) अत्र **ऋचि तुनु०** इति दीर्घः। (**नः**) अस्मान् (**अभिशस्तेः**) सुखहिंसकात् (**सोम**) रक्षक (**नि**) नितराम् (**पाहि**) पालय (**अंहसः**) अविद्याज्वरादिरोगात् (**सखा**) मित्रः (**सुशेवः**) सुष्ठु सुखदः (**एधि**) भवसि (**नः**) अस्माकम्॥१५॥

अन्वयः-हे सोम! यः सुशेवः सखाऽभिशस्तेर्न उरुष्यांहसोऽस्मान्निपाहि नोऽस्माकं सुखकार्य्येधि भवसि सोऽस्माभिः कथं न सत्कर्त्तव्यः॥१५॥

भावार्थः-मनुष्यैः सुसेवितः परमवैद्यो विद्वान् सर्वेभ्योऽविद्यादिरोगेभ्यः पृथक्कृत्यैतानानन्दयति तस्मात्, स सदैव सङ्गमनीयः॥१५॥

पदार्थः-हे (**सोम**) रक्षा करने और (**सुशेवः**) उत्तम सुख देनेवाले (**सखा**) मित्र! जो आप (**अभिशस्तेः**) सुखविनाश करनेवाले काम से (**नः**) हम लोगों को (**उरुष्य**) बचाओ वा (**अंहसः**) अविद्या

तथा ज्वरादिरोग से हम लोगों की **(नि)** निरन्तर **(पाहि)** पालना करो और **(नः)** हम लोगों के सुख करनेवाले **(एधि)** होओ, वह आप हमको सत्कार करने योग्य क्यों न होवें॥१५॥

भावार्थः-मनुष्यों को अच्छी प्रकार सेवा किया हुआ वैद्य, उत्तम विद्वान्, समस्त अविद्या आदि राजरोगों से अलग कर उनको आनन्दित करता है, इससे यह सदैव संगम करने योग्य है॥१५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह उपदेश अगले मन्त्र में किया है॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे॥ १६॥

आ। प्यायस्व। सम्। एतु। ते। विश्वतः। सोम। वृष्ण्यम्। भव। वाजस्य। सम्ऽगथे॥ १६॥

पदार्थः-**(आ)** अभितः **(प्यायस्व)** वर्धस्व **(सम्)** **(एतु)** प्राप्नोतु **(ते)** तव **(विश्वतः)** सर्वस्याः सृष्टेः सकाशात् **(सोम)** वीर्य्यवत्तम **(वृष्ण्यम्)** वृषसु वीर्य्यवत्सु भवम्। वृषन् शब्दाद् **भवे छन्दसी**ति यत्। **वा च्छन्दसी**ति प्रकृतिभावनिषेधः पक्षेऽल्लोपः। **(भव)** **द्व्यचोऽतस्तिङ** इति दीर्घः। **(वाजस्य)** वेगयुक्तस्य सैन्यस्य **(संगथे)** संग्रामे। **सङ्गथ इति संग्रामनामसु पठितम्।** (निघं०२.७)॥१६॥

अन्वयः-हे सोम विद्वन्! वैद्यकवित्ते विश्वतो वृष्ण्यमस्मान् समेतु त्वमाप्यायस्व वाजस्य सङ्गथे रोगापहा भव॥१॥

भावार्थः-मनुष्यैर्विद्वदोषधिगणान् संसेव्य बलविद्ये प्राप्य सर्वस्याः सृष्टेरनुत्तमा विद्या उन्नीय शत्रून् विजित्य सज्जनान् संरक्ष्य शरीरात्मपुष्टिः सततं वर्धनीया॥१६॥

पदार्थः-हे **(सोम)** अत्यन्त पराक्रमयुक्त वैद्यक शास्त्र को जाननेहारे विद्वान्! **(ते)** आप का **(विश्वतः)** सम्पूर्ण सृष्टि से **(वृष्ण्यम्)** वीर्य्यवानों में उत्पन्न पराक्रम है, वह हम लोगों को **(सम्+एतु)** अच्छी प्रकार प्राप्त हो तथा आप **(आप्यायस्व)** उन्नति को प्राप्त और **(वाजस्य)** वेगवाली सेना के **(संगथे)** संग्राम में रोगनाशक **(भव)** हूजिये॥१६॥

भावार्थः-मनुष्यों को चाहिये कि विद्वान् और औषधिगणों का सेवन कर, बल और विद्या को प्राप्त हो, समस्त सृष्टि की अत्युत्तम विद्याओं की उन्नति कर, शत्रुओं को जीत और सज्जनों की रक्षा कर, शरीर और आत्मा की पुष्टि निरन्तर बढ़ावें॥१६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः। भवा नः सुश्रवस्तमः सखा वृधे॥ १७॥

आ। प्यायस्व। मदिन्ऽतम। सोम। विश्वेभिः। अंशुऽभिः। भव। नः। सुश्रवःऽतमः। सखा। वृधे॥ १७॥

पदार्थः-**(आ)** समन्तात् **(प्यायस्व)** वर्धस्व **(मदिन्तम)** मदः प्रशस्तो हर्षो विद्यतेऽस्मिन् सोऽतिशयितस्तत्सम्बुद्धौ **(सोम)** विद्यैश्वर्य्यस्य प्रापक **(विश्वेभिः)** सर्वैः **(अंशुभिः)** सृष्टितत्त्वावयवैः **(भवः)** अत्राऽपि **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्माकम् **(सुश्रवस्तमः)** शोभनानि श्रवांसि श्रवणान्यन्नानि वा यस्मात्स सुश्रवाः। अतिशयेन सुश्रवा इति सुश्रवस्तमः। **(सखा)** सुहृत् **(वृधे)** वर्धनाय॥१७॥

अन्वयः-हे मदिन्तम सोम! सुश्रवस्तमः सखा त्वं नो वृधे भव विश्वेभिरंशुभिराप्यायस्व॥१७॥

भावार्थः-यः परमविद्वान् सर्वोत्तमौषधिगणेन सृष्टिक्रमविद्यासु मनुष्यान् वर्धयति, स सर्वैरनुगन्तव्यः॥१७॥

पदार्थः-हे **(मदिन्तम)** अत्यन्त प्रशंसित आनन्दयुक्त **(सोम)** विद्या और ऐश्वर्य के देने वाले! जो **(सुश्रवस्तमः)** बहुश्रुत वा अच्छे अन्नादि पदार्थों से युक्त **(सखा)** आप मित्र हैं सो **(नः)** हम लोगों के **(वृधे)** उन्नति के लिये **(भव)** हूजिये और **(विश्वेभिः)** समस्त **(अंशुभिः)** सृष्टि के सिद्धान्तभागों (तत्त्वावयवों) से **(आ)** अच्छे प्रकार **(प्यायस्व)** वृद्धि को प्राप्त हूजिये॥१७॥

भावार्थः-जो उत्तम विद्वान् समस्त उत्तम ओषधिगण से सृष्टिक्रम की विद्याओं में मनुष्यों की उन्नति करता है, उसके अनुकूल सबको चलना चाहिये॥१७॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व॥१८॥

सम्। ते। पयांसि। सम्। ऊम्ऽइति। यन्तु। वाजाः। सम्। वृष्ण्यानि। अभिमातिऽसहः। आऽप्यायमानः। अमृताय। सोम। दिवि। श्रवांसि। उत्ऽउत्तमानि। धिष्व॥१८॥

पदार्थः-**(सम्)** **(ते)** तव सृष्टौ **(पयांसि)** जलान्यन्नानि वा **(सम्)** **(उ)** वितर्के **(यन्तु)** प्राप्नुवन्तु **(वाजाः)** संग्रामाः **(सम्)** **(वृष्ण्यानि)** वीर्य्यप्रापकानि **(अभिमातिषाहः)** अभिमातीन् शत्रून् सहन्ते यैस्ते **(आप्यायमानः)** पुष्टः पुष्टिकारकः **(अमृताय)** मोक्षाय **(सोम)** ऐश्वर्य्यस्य प्रापक **(दिवि)** विद्याप्रकाशे **(श्रवांसि)** श्रवणान्यन्नानि वा **(उत्तमानि)** श्रेष्ठतमानि **(धिष्व)** धर। अत्र **सुधितवसुधितनेमधित०।** (अष्टा०७.४.४५) अस्मिन् सूत्रेऽयं निपातितः॥१८॥

अन्वयः-हे सोम! ते तव यानि वृष्ण्यानि पयांस्यस्मान् संयन्तु अभिमातिषाहो वाजाः संयन्तु तैर्दिव्यमृतायाप्यायमानस्त्वमुत्तमानि श्रवांसि संधिष्व॥१८॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्विद्यापुरुषार्थाभ्यां विद्वत्सङ्गादोषधिसेवनपथ्याभ्यां च यानि प्रशस्तानि कर्माणि प्रशस्ता गुणाः श्रेष्ठानि वस्तूनि च प्राप्नुवन्ति, तानि धृत्वा रक्षित्वा धर्मार्थकामान् संसाध्य मुक्तिसिद्धिः कार्य्या॥१८॥

पदार्थः-हे **(सोम)** ऐश्वर्य्य को पहुंचानेवाले विद्वान्! **(ते)** आपके जो **(वृष्ण्यानि)** पराक्रमवाले **(पयांसि)** जल वा अन्न हम लोगों को **(संयन्तु)** अच्छे प्रकार प्राप्त हों और **(अभिमातिषाहः)** जिनसे शत्रुओं को सहें वे **(वाजाः)** संग्राम **(सम्)** प्राप्त हों उनसे **(दिवि)** विद्याप्रकाश में **(अमृताय)** मोक्ष के लिये **(आप्यायमानः)** दृढ़ बलवाले आप वा उत्तम रस के लिये दृढ़ बलकारक ओषधिगण **(उत्तमानि)** अत्यन्त श्रेष्ठ **(श्रवांसि)** वचनों वा अन्नों को **(संधिष्व)** धारण कीजिये वा करता है॥१८॥

भावार्थः-मनुष्यों को चाहिये कि विद्या और पुरुषार्थ से विद्वानों के संग, ओषधियों के सेवन और प्रयोजन से जो-जो प्रशंसित कर्म, प्रशंसित गुण और श्रेष्ठ पदार्थ प्राप्त होते हैं, उनका धारण और उनकी रक्षा तथा धर्म, अर्थ, कामों को सिद्ध कर मोक्ष की सिद्धि करें॥१८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्।
गयस्फानः। प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान्॥ १९॥

या। ते। धामानि। हविषा। यजन्ति। ता। ते। विश्वा। परिऽभूः। अस्तु। यज्ञम्। गयऽस्फानः। प्रऽतरणः। सुऽवीरः। अवीरऽहा। प्र। चर। सोम। दुर्यान्॥ १९॥

पदार्थः-**(या)** यानि **(ते)** तव **(धामानि)** स्थानानि वस्तूनि **(हविषा)** विद्यादानाऽऽदानाभ्याम् **(यजन्ति)** सङ्गच्छन्ते **(ता)** तानि **(ते)** तव **(विश्वा)** विश्वानि सर्वाणि **(परिभूः)** सर्वतो भवन्तीति **(अस्तु)** भवतु **(यज्ञम्)** क्रियामयम् **(गयस्फानः)** धनवर्धकः **(प्रतरणः)** दुःखात् प्रकृष्टतया तारकः **(सुवीरः)** शोभनैर्वीरैर्युक्तः **(अवीरहा)** विद्यासुशिक्षाभ्यां रहितान् प्राप्नोति सः **(प्र)** **(चर)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(सोम)** सोमस्य वा **(दुर्यान्)** प्रासादान्॥१९॥

अन्वयः-हे सोम! ते तव या यानि विश्वा धामानि हविषा यज्ञं यजन्ति, ता तानि सर्वाणि ते तवाऽस्मान् प्राप्नुवन्तु। यतस्त्वं परिभूर्गयस्फानः प्रतरणः सुवीरोऽवीरहाऽस्तु तस्मादस्माकं दुर्यान् प्रचर प्राप्नुहि॥१९॥

भावार्थः-अत्र श्लेषालङ्कारः। न हि कश्चिदपि सृष्टिपदार्थानां गुणविज्ञानेन विनोपकारान् ग्रहीतुं शक्नोति, तस्माद्विदुषां सङ्गेन पृथिवीमारभ्य परमेश्वरपर्य्यन्तात् पदार्थान् ज्ञात्वा मनुष्यैः क्रियासिद्धिः सदैव कार्या॥१९॥

पदार्थः-हे **(सोम)** परमेश्वर वा विद्वान्! **(ते)** आपके वा इस ओषधिसमूह के **(या)** जो **(विश्वा)** समस्त **(धामानि)** स्थान वा पदार्थ **(हविषा)** विद्यादान वा ग्रहण करने की क्रियाओं से **(यज्ञम्)** क्रियामय यज्ञ को **(यजन्ति)** संगत करते हैं **(ता)** वे सब **(ते)** आपके वा इस ओषधिसमूह के हम लोगों को प्राप्त हों, जिससे आप **(परिभूः)** सबके ऊपर विराजमान होने **(गयस्फानः)** धन बढ़ाने और **(प्रतरणः)** दुःख से प्रत्यक्ष तारनेवाले **(सुवीरः)** उत्तम-उत्तम वीरों से युक्त **(अवीरहा)** अच्छी शिक्षा और विद्या से कातरों को भी सुख देनेवाले **(अस्तु)** हों, इससे हम लोगों के **(दुर्य्यान्)** उत्तम स्थानों को **(चर)** प्राप्त हूजिये॥१९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। कोई भी सृष्टि के पदार्थों के गुणों को विना जाने उनसे उपकार नहीं ले सकता है, इससे विद्वानों के संग से पृथ्वी से लेकर ईश्वरपर्यन्त यथायोग्य सब पदार्थों को जानकर मनुष्यों को चाहिये कि क्रियासिद्धि सदैव करें॥१९॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

सोमो॑ धे॒नुं सोमो॒ अर्व॑न्तमा॒शुं सोमो॑ वी॒रं क॑र्म॒ण्यं॑ ददाति।
सा॒दु॒न्यं॑ विदु॒थ्यं॑ स॒भेयं॑ पितृ॒श्रव॑णं॒ या द॑दा॒शदस्मै॑॥ २०॥ २२॥

सोमः॑। धे॒नुम्। सोमः॑। अर्व॑न्तम्। आ॒शुम्। सोमः॑। वी॒रम्। क॒र्म॒ण्य॑म्। द॒दा॒ति॒। स॒दु॒न्य॑म्। वि॒दु॒थ्य॑म्। स॒भेय॑म्। पि॒तृ॒ऽश्रव॑णम्। यः। द॒दा॒शत्। अ॒स्मै॒॥ २०॥

पदार्थः-**(सोमः)** उक्तः **(धेनुम्)** वाणीम् **(सोमः)** **(अर्वन्तम्)** अश्वम् **(आशुम्)** शीघ्रगामिनम् **(सोमः)** **(वीरम्)** विद्याशौर्यादिगुणोपेतम् **(कर्मण्यम्)** कर्मणा सम्पन्नम्। **कर्मवेषाद्यत्।** (अष्टा०५.१.१००) इति कर्मशब्दाद्यत्। **ये चाऽभावकर्मणोः** (अष्टा०६.४.१६८) इति प्रकृतिभावश्च। **(ददाति)** **(सदन्यम्)** सदनं गृहमर्हति। **छन्दसि च।** (अष्टा०५.१.६७) इति सदनशब्दाद्यत्। **अन्येषामपी**ति दीर्घः। **(विदथ्यम्)** विदथेषु यज्ञेषु युद्धेषु वा साधुम् **(सभेयम्)** सभायां साधुम्। **ढश्छन्दसि।** (अष्टा०४.४.१०६) इति सभाशब्दाद्यत्। **(पितृश्रवणम्)** पितरो ज्ञानिनः श्रूयन्ते येन तम् **(यः)** सभाध्यक्षः सोमराजो वा **(ददाशत्)** दाशति। लडर्थे लेट्। **बहुलं छन्दसी**ति शपःस्थाने श्लुः। **(अस्मै)** धर्मात्मने॥२०॥

अन्वयः-यः सोमोऽस्मै सादन्यं विदथ्यं सभेयं पितृश्रवणं ददाशत् स सोमोऽस्मै धेनुं स सोम आशुमर्वन्तं सोमः कर्मण्यं वीरं च ददाति॥२०॥

भावार्थः-अत्र श्लेषालङ्कारः। यथा विद्वांसः सुशिक्षितां वाणीमुपदिश्य सुपुरुषार्थं प्राप्यं कार्यसिद्धिः कारयन्ति, तथैव सोमराज ओषधिगणः श्रेष्ठानि बलानि पुष्टिं च करोति॥२०॥

पदार्थः-(**यः**) जो सभाध्यक्ष आदि (**अस्मै**) इस धर्मात्मा पुरुष को (**सादन्यम्**) घर बनाने के योग्य सामग्री (**विदथ्यम्**) यज्ञ वा युद्धों में प्रशंसनीय तथा (**सभेयम्**) सभा में प्रशंसनीय सामग्री और (**पितृश्रवणम्**) ज्ञानी लोग जिससे सुने जाते हैं, ऐसे व्यवहार को (**ददाशत्**) देता है, वह (**सोमः**) सोम अर्थात् सभाध्यक्ष आदि सोमलतादि ओषधि के लिये (**धेनुम्**) वाणी को (**आशुम्**) शीघ्र गमन करनेवाले (**अर्वन्तम्**) अश्व को या (**सोमः**) उत्तम कर्मकर्त्ता सोम (**कर्मण्यम्**) अच्छे-अच्छे कामों से सिद्ध हुए (**वीरम्**) विद्या और शूरता आदि गुणों से युक्त मनुष्य को (**ददाति**) देता है॥२०॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जैसे विद्वान् उत्तम शिक्षा को प्राप्त वाणी का उपदेश कर अच्छे पुरुषार्थ को प्राप्त होकर कार्यसिद्ध कराते हैं, वैसे ही सोम औषधियों का समूह श्रेष्ठ बल और पुष्टि को कराता है॥२०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम्।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम॥२१॥

अषाळ्हम्। युत्सु। पृतनासु। पप्रिम्। स्वः सताम्। अप्साम्। वृजनस्य। गोपाम्। भरेषुजाम्। सुक्षितिम्। सुश्रवसम्। जयन्तम्। त्वाम्। अनु। मदेम। सोम॥२१॥

पदार्थः-(**अषाढम्**) शत्रुभिरसह्यमतिरस्करणीयम् (**युत्सु**) संग्रामेषु। अत्र संपदादिलक्षणः क्विप्। (**पृतनासु**) सेनासु (**पप्रिम्**) पालनशीलम् (**स्वर्षाम्**) यः स्वः सुखं सनोति तम्। **सनोतेरनः।** (अष्टा०८.३.१०८) अनेन षत्वम्। (**अप्साम्**) योऽपो जलानि सनुते तम् (**वृजनस्य**) बलस्य पराक्रमस्य। **वृजनमिति बलनामसु पठितम्।** (निघं०२.९) (**गोपाम्**) रक्षकम् (**भरेषुजाम्**) बिभर्ति राज्यं यैस्ते भराः। भराश्च त इषवस्तान् भरेषून् जनयति तम्। अत्रापि विट् अनुनासिकस्यात्वं च। (**सुक्षितिम्**) शोभनाः क्षितयो राज्ये यस्य यस्माद्वा तम्। (**सुश्रवसम्**) शोभनानि श्रवांसि यशांसि श्रवणानि वा यस्य यस्माद्वा तम् (**जयन्तम्**) विजयहेतुम् (**त्वाम्**) (**अनु**) आनुकूल्ये (**मदेम**) आनन्दिता भवेम। अत्र विकरणव्यत्ययेन श्यनः स्थाने शप्। (**सोम**) सेनाद्यध्यक्ष॥२१॥

अन्वयः-हे सोम! यथौषधिगणो युत्स्वषाढं पृतनासु पप्रिं वृजनस्य गोपां भरेषुजां सुक्षितिं स्वर्षामप्सां सुश्रवसं जयन्तं त्वामरोगं कृत्वाऽऽनन्दयति, तथैतं प्राप्य वयमनुमदेम॥२१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि मनुष्याणां सर्वगुणसम्पन्नेन सेनाध्यक्षेण सर्वगुणकारकाभ्यां सोमाद्योषधिगणविज्ञानसेवनाभ्यां च विना कदाचिदुत्तमराज्यमारोग्यं च भवितुं शक्यम्। तस्मादेतदाश्रयः सर्वैः सर्वदा कर्त्तव्यः॥२१॥

पदार्थः-हे **(सोम)** सेना आदि कार्यों के अधिपति! जैसे सोमलतादि ओषधिगण **(युत्सु)** संग्रामों में **(अषाढम्)** शत्रुओं से तिरस्कार को न प्राप्त होने योग्य **(पृतनासु)** सेनाओं में **(पप्रिम्)** सब प्रकार की रक्षा करनेवाले **(वृजनस्य)** पराक्रम के **(गोपाम्)** रक्षक **(भरेषुजाम्)** राज्यसामग्री के साधक बाणों के बनानेवाले **(सुक्षितिम्)** जिसके राज्य में उत्तम-उत्तम भूमि हैं **(स्वर्षाम्)** सब के सुखदाता **(अप्साम्)** जलों को देनेवाले **(सुश्रवसम्)** जिसके उत्तम यश वा वचन सुने जाते हैं **(जयन्तम्)** विजय के करनेवाले **(त्वाम्)** आपको रोगरहित करके आनन्दित करता है, वैसे उसको प्राप्त होकर हम लोग **(अनुमदेम)** अनुमोद को प्राप्त होवें॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को सब गुणों से युक्त सेनाध्यक्ष और समस्त गुण करनेवाले सोमलता आदि ओषधियों के विज्ञान और सेवन के विना कभी उत्तम राज्य और आरोग्यपन प्राप्त नहीं हो सकता, इससे उक्त प्रबन्धों का आश्रय सबको करना चाहिये॥ २१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

त्वमि॒मा ओष॑धीः सोम॒ विश्वा॒स्त्वम॒पो अ॑जनय॒स्त्वं गाः।
त्वमा त॑तन्थो॒र्व१॑न्तरि॑क्षं॒ त्वं ज्योति॑षा॒ वि तमो॑ ववर्थ॥ २२॥

त्वम्। इ॒माः। ओष॑धीः। सो॒म॒। विश्वाः॑। त्वम्। अ॒पः। अ॒ज॒न॒यः॒। त्वम्। गाः। त्वम्। आ। त॒त॒न्थ॒। उ॒रु। अ॒न्तरि॑क्षम्। त्वम्। ज्योति॑षा। वि। तमः॑। व॒व॒र्थ॒॥ २२॥

पदार्थः-**(त्वम्)** जगदीश्वरः **(इमाः)** प्रत्यक्षीभूताः **(ओषधीः)** सर्वरोगनाशिकाः सोमाद्योषधीः **(सोम)** सोम्यगुणसम्पन्न आरोग्यबलप्रापक **(विश्वाः)** अखिलाः **(त्वम्)** **(अपः)** बलानि जलानि वा **(अजनयः)** जनयसि। अत्र लडर्थे लङ्। **(त्वम्)** अयं वा **(गाः)** इन्द्रियाणि किरणान् वा **(त्वम्)** **(आ)** **(ततन्थ)** विस्तृणोषि। अत्र **बभूथाततन्थ जगृम्भववर्थेति निगमे।** (अष्टा०७.२.६४) अनेन सूत्रेणाततन्थ, ववर्थेत्येतौ निपात्येते। **(उरु)** बहु **(अन्तरिक्षम्)** आकाशम् **(त्वम्)** **(ज्योतिषा)** विद्यासुशिक्षाप्रकाशेन शीतलेन तेजसा वा **(वि)** विगतार्थे **(तमः)** अविद्याकुत्सिताख्यं चक्षुदृष्ट्यावरकं वाऽन्धकारम् **(ववर्थ)** वृणोषि। अत्राऽपि वर्त्तमाने लिट्॥ २२॥

अन्वयः-हे सोमेश्वर! यतस्त्वं चेमा विश्वा ओषधीरजनयस्त्वमपस्त्वं गाश्चाजनयस्त्वं ज्योतिषाऽन्तरिक्षमुर्वाततन्थ त्वं ज्योतिषा तमो वि ववर्थ तस्माद्वयमस्माभिः सर्वैः सेव्यः॥ २२॥

भावार्थः-येनेश्वरेण विविधा सृष्टिरुत्पादिता स एव सर्वेषामुपास्य इष्टदेवोऽस्ति॥ २२॥

पदार्थः-हे **(सोम)** समस्त गुणयुक्त आरोग्यपन और बल देनेवाले ईश्वर! जिस कारण **(त्वम्)** आप **(इमाः)** प्रत्यक्ष **(विश्वाः)** समस्त **(ओषधीः)** रोगों का विनाश करनेवाली सोमलता आदि ओषधियों को **(अजनयः)** उत्पन्न करते हो **(त्वम्)** आप **(अपः)** जलों **(त्वम्)** आप **(गाः)** इन्द्रियों और किरणों को प्रकाशित करते हो **(त्वम्)** आप **(ज्योतिषा)** विद्या और श्रेष्ठशिक्षा के प्रकाश से **(अन्तरिक्षम्)** आकाश को **(उरु)** बहुत **(आ)** अच्छी प्रकार **(ततन्थ)** विस्तृत करते हो और **(त्वम्)** आप उक्त **(विद्या)** आदि गुणों से **(तमः)** अविद्या, निन्दित शिक्षा वा अन्धकार को **(वि ववर्थ)** स्वीकार नहीं करते, इससे आप सब लोगों से सेवा करने योग्य हैं॥२२॥

भावार्थः-जिस ईश्वर ने नाना प्रकार की सृष्टि बनाई है, वही सब मनुष्यों को उपासना के योग्य इष्टदेव है॥२२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह उपदेश अगले मन्त्र में किया है॥

देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ॥२३॥२३॥

देवेन। नः। मनसा। देव। सोम। रायः। भागम्। सहसाऽवन्। अभि। युध्य। मा। त्वा। आ। तनत्। ईशिषे। वीर्यस्य। उभयेभ्यः। प्र। चिकित्स। गोऽइष्टौ॥२३॥

पदार्थः-(**देवेन**) दिव्यगुणसम्पन्नेन **(नः)** अस्मभ्यम् **(मनसा)** शिल्पक्रियादिविचारेण **(देव)** दिव्यगुणसम्पन्न **(सोम)** सर्वविद्यायुक्त **(रायः)** धनस्य **(भागम्)** भजनीयमंशम् **(सहसावन्)** अत्यन्तबलवन्। सहसेत्यव्ययम्। भूमार्थे मतुप् च। **(अभि)** आभिमुख्ये **(युध्य)** युध्यस्व। अत्र व्यत्ययेन परस्मैपदम्। **(मा)** निषेधे **(त्वा)** **(तनत्)** विस्तारयेत् **(ईशिषे)** **(वीर्यस्य)** पराक्रमस्य **(उभयेभ्यः)** सोमाद्योषधिगणेभ्यः शत्रुभ्यश्च **(प्र)** **(चिकित्स)** **(गविष्टौ)** गवामिन्द्रियपृथिवीराज्यविद्याप्रकाशानामिष्टयो यस्मिँस्तस्मिन्॥२३॥

अन्वयः-हे सहसावन् देव सोम! त्वं देवेन मनसा शत्रुभिः सह रायोऽभियुध्य यस्त्वं नोऽस्मभ्यम् रायो भागमीशिषे तं त्वा गविष्टौ शत्रुर्मा तनत् क्लेशयुक्तं क्लेशप्रदं वा मा कुर्यात् त्वं वीर्यस्योभयेभ्यो मा प्रचिकित्स॥२३॥

भावार्थः-मनुष्यैः परमोत्तमस्य सेनाध्यक्षस्यौषधिगणस्य वाश्रयं कृत्वा युद्धे प्रवृत्योत्साहे स्वसेनां संयोज्य शत्रुसेनां पराजय्य चक्रवर्त्तिराज्यैश्वर्यं प्राप्तव्यमिति॥२३॥

अत्राध्येत्रध्यापकादीनां विद्याध्ययनादिकर्मणां च सिद्धिकारकस्य सोमार्थस्योक्तत्वादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकनवतितमं ९१ सूक्तं त्रयोविंशतिः २३ वर्गश्च समाप्तः॥

पदार्थः-हे **(सहसावन्)** अत्यन्त बलवान् **(देव)** दिव्यगुणसम्पन्न **(सोम)** सर्व विद्या और सेना के अध्यक्ष! आप **(देवेन)** दिव्यगुणयुक्त **(मनसा)** विचार से **(रायः)** राज्यधन के लाभ को **(अभि)** शत्रुओं के सम्मुख **(युध्य)** युद्ध कीजिये जो आप **(नः)** हमारे लिये धन के **(भागम्)** भाग के **(ईशिषे)** स्वामी हो उस **(त्वा)** तुझको **(गविष्टौ)** इन्द्रिय और भूमि के राज्य के प्रकाशों की सङ्गतियों में शत्रु **(मा तनत्)** पीड़ायुक्त न करें। आप **(वीर्यस्य)** पराक्रम को **(उभयेभ्यः)** अपने और पराये योद्धाओं से **(मा प्र चिकित्स)** संशययुक्त मत हो॥२३॥

भावार्थः-मनुष्यों को चाहिये कि परम उत्तम सेनाध्यक्ष और ओषधिगण का आश्रय और युद्ध में प्रवृत्ति कर उत्साह के साथ अपनी सेना को जोड़ और शत्रुओं की सेना का पराजय कर चक्रवर्त्ति राज्य के ऐश्वर्य को प्राप्त हों॥२३॥

इस सूक्त में पढ़ने-पढ़ानेवालों आदि की विद्या के पढ़ने आदि कामों की सिद्धि करनेवाले **(सोम)** शब्द के अर्थ के कथन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इक्कानवाँ ९१ सूक्त और तेईसवाँ २३ वर्ग समाप्त हुआ॥

अथाऽष्टादशर्चस्य द्विनवतितमस्य सूक्तस्य राहूगणपुत्रो गोतम ऋषिः। उषा देवता। १,२ निचृज्जगती। ३ जगती। ४ विराड् जगती छन्दः। निषादः स्वरः। ५,७,१२ विराट् त्रिष्टुप्। ६,१० निचृत् त्रिष्टुप्। ८,९ त्रिष्टुप् छन्दः। धैवतः स्वरः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १३ निचृत्परोष्णिक्। १४,१५ विराट्परोष्णिक्। १६-१८ उष्णिक् छन्दः। ऋषभः स्वरः॥

अथोषसः संबन्ध्यर्थकृत्यान्युपदिश्यन्ते॥

अब अठारह ऋचावाले बानवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र से उषस शब्द के अर्थसंबन्धी कामों का उपदेश किया है॥

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः॥ १॥

एताः। ऊम् इति। त्याः। उषसः। केतुम्। अक्रत। पूर्वे। अर्धे। रजसः। भानुम्। अञ्जते। निःऽकृण्वानाः। आयुधानिऽइव। धृष्णवः। प्रति। गावः। अरुषीः। यन्ति। मातरः॥ १॥

पदार्थः-(**एताः**) प्रत्यक्षाः (**उ**) वितर्के (**त्याः**) दूरलोकस्था अप्रत्यक्षाः (**उषसः**) प्रातःकालस्था प्रकाशाः (**केतुम्**) विज्ञानम् (**अक्रत**) कारयन्ति। अत्र णिलोपः। (**पूर्वे**) पुरो देशे (**अर्धे**) (**रजसः**) भूगोलस्य (**भानुम्**) सूर्यदीप्तिम् (**अञ्जते**) प्रापयन्ति (**निष्कृण्वाना**) दिनानि निष्पादयन्त्यः (**आयुधानीव**) यथा वीरैर्युद्धविद्यया प्रक्षिप्तानि शस्त्राणि गच्छन्त्यागच्छनति तथा (**धृष्णवः**) प्रगल्भगुणप्रदाः (**प्रति**) क्रमार्थे (**गावः**) गमनशीलाः (**अरुषीः**) अरुष्यो रक्तगुणविशिष्टाः (**यन्ति**) प्राप्नुवन्ति (**मातरः**) मातृवत्सर्वेषां प्राणिनां मान्यकारिण्यः॥१॥ **एतास्ता उषसः केतुमकृषत प्रज्ञानम्। एकस्या एव पूजनार्थे बहुवचनं स्यात्। पूर्वेऽर्धेऽन्तरिक्षलोकस्य समञ्जते भानुना। निष्कृण्वाना आयुधानीव धृष्णवः। निरित्येष समित्येतस्य स्थाने। 'एमीदेषां निष्कृतं जारिणीव। (ऋ०१०.३४.४) इत्यपि निगमो भवति। प्रति यन्ति। गावो गमनात्। अरुषीरारोचनात्। मातरो भासो निर्मात्र्यः।** (निरु०१२.७)॥१॥

अन्वयः-हे मनुष्या! यूयं या एता उ त्या उषसः केतुमक्रत या रजसः पूर्वेऽर्धे भानुमञ्जते निष्कृण्वानाऽऽयुधानीव धृष्णवोऽरुषीर्मातरः प्रति गावो यन्ति ताः सम्यग् विजानीत॥१॥

भावार्थः-इह सृष्टौ सर्वदा सूर्यप्रकाशो भूगोलार्धं प्रकाशयति भूगोलार्द्धे च तमस्तिष्ठति। सूर्यप्रकाशमन्तरेण कस्यचिद्वस्तुनो ज्ञानविशेषो नैव जायते। सूर्यकिरणाः प्रतिक्षणं भूगोलानां भ्रमणेन गच्छन्तीव दृश्यन्ते योषाः स्वस्वलोकस्था सा प्रत्यक्षा या दूरलोकस्था साऽप्रत्यक्षा। इमाः सर्वा सर्वेषु लोकेषु सदृशगुणाः सर्वासु दिक्षु प्रविष्टाः सन्ति। यथाऽऽयुधान्यऽभिमुखदेशाभिगमनेन

लोमप्रतिलोमगतीर्गच्छन्ति तथैवोषसोऽनेकविधानामन्येषां लोकानां गतियोगाल्लोमप्रतिलोमगतयो गच्छन्तीति मनुष्यैर्वेद्यम्॥१॥

पदार्थः-हे मनुष्यो! तुम जो **(एताः)** देखे जाते **(उ)** और जो **(त्याः)** देखे नहीं जाते अर्थात् दूर देश में वर्त्तमान हैं वे **(उषसः)** प्रातःकाल के सूर्य्य के प्रकाश **(केतुम्)** सब पदार्थों के ज्ञान को **(अक्रतः)** कराते हैं, जो **(रजसः)** भूगोल के **(पूर्व)** आधे भाग में **(भानुम्)** सूर्य के प्रकाश को **(अञ्जते)** पहुंचाती और **(निष्कृण्वानाः)** दिन-रात को सिद्ध करती हैं वे **(आयुधानीव)** जैसे वीरों की युद्ध विद्या से छोड़े हुए बाण आदि शस्त्र सूधे-तिरछे जाते-आते हैं वैसे **(धृष्णवः)** प्रगल्भता के गुणों को देने **(अरुषीः)** लालगुणयुक्त और **(मातरः)** माता के तुल्य सब प्राणियों का मान करनेवाली **(प्रतिगावः)** उस सूर्य के प्रकाश के प्रत्यागमन अर्थात् क्रम से घटने-बढ़ने से जगह-जगह में **(यन्ति)** घटती-बढ़ती से पहुंचती है, उनको तुम लोग जानो॥१॥

भावार्थः-इस सृष्टि में सदैव सूर्य का प्रकाश भूगोल के आधे भाग को प्रकाशित करता है और आधे भाग में अन्धकार रहता है। सूर्य के प्रकाश के विना किसी पदार्थ का विशेष ज्ञान नहीं होता। सूर्य की किरणें क्षण-क्षण भूगोल आदिलोकों के घूमने से गमन करतीसी दीख पड़ती हैं। जो प्रातःकाल के रक्त प्रकाश अपने-अपने देश में हैं वे प्रत्यक्ष और दूसरे देश में हैं वे अप्रत्यक्ष। ये सब प्रत्यक्ष और अप्रत्यक्ष प्रातःकाल की वेला सब लोकों में एकसी सब दिशाओं में प्रवेश करती है। जैसे शस्त्र आगे-पीछे जाने से सीधी-उलटी चाल को प्राप्त होते हैं, वैसे अनेक प्रकार के प्रातःप्रकाश भूगोल आदि लोकों की चाल से सीधी-तिरछी चालों से युक्त होते हैं, यह बात मनुष्यों को जाननी चाहिये॥१॥

पुनस्ताः कीदृश्य इत्युपदिश्यते॥

फिर वे प्रातःकाल की वेला कैसी हैं, इस विषय को अगले मन्त्र में कहा है॥

उदप्पप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः॥२॥

उत्। अपप्तन्। अरुणाः। भानवः। वृथा। सुऽआयुजः। अरुषीः। गाः। अयुक्षत। अक्रन्। उषसः। वयुनानि। पूर्वऽथा। रुशन्तम्। भानुम्। अरुषीः। अशिश्रयुः॥२॥

पदार्थः-(**उत्**) ऊर्ध्वे **(अपप्तन्)** पतन्ति **(अरुणाः)** आरक्ताः **(भानवः)** सूर्यस्य किरणाः **(वृथा)** **(स्वायुजः)** याः सुष्ठु समन्ताद्युञ्जन्ति ताः **(अरुषीः)** आरक्तगुणाः **(गाः)** पृथिवीः **(अयुक्षत)** युञ्जते **(अक्रन्)** कुर्वन्ति **(उषसः)** प्रातःकालीनाः सूर्यस्य रश्मयः। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। **(वयुनानि)** विज्ञानानि कर्माणि वा **(पूर्वथा)** पूर्वा इव। अत्र **प्रत्नपूर्व०** (अष्टा०५.३.१११) इत्याकारकेण योगेनेवार्थे थाल् प्रत्ययः। **(रुशन्तम्)** हिंसन्तम्। **रुशदिति वर्णनाम, रोचतेर्ज्वलतिकर्मणः।** (निरु०२.२०) **(भानुम्)**

सूर्य्यम् **(अरुषीः)** अरुष्य आरक्तगुणाः **(अशिश्रयुः)** श्रयन्ति सेवन्ते। अत्र लङि प्रथमस्य बहुवचने विकरणव्यत्ययेन शपः स्थाने श्लुः। **सिजभ्यस्त०** (अष्टा०३.४.१०९) इति झेर्जुस्। **जुसि च।** (अष्टा०७.३.८३।) इति गुणः॥२॥

अन्वयः–हे विद्वांसो! या अरुणाः स्वायुज उषसो भानवः वृथोदपप्तन् गा अरुषीरयुक्षत युञ्जते। या अरुषीर्वयुनान्यक्रन् पूर्वथा पूर्वा इव पूर्वदैनिक्युषा इव परं परं रुशन्तं भानुमशिश्रयुस्ता युक्त्या सेवनीयाः॥२॥

भावार्थः–ये सूर्यस्य किरणा भूगोलान् सेवित्वा क्रमशो गच्छति ते सायंप्रातर्भूमियोगेनारक्ता भूत्वाऽऽकाशं शोभयन्ति। यदैता उषसः प्रवर्त्तन्ते तदा प्राणिनां विज्ञानानि जायन्ते। ये भूमिं स्पृष्ट्वा आरक्ताः सूर्यं सेवित्वा रक्तं कृत्यौषधीः सेवन्ते ता जागरितैर्मनुष्यैः सेवनीयाः॥२॥

पदार्थः–हे विद्वानो! जो **(अरुणाः)** रक्तगुणवाली **(स्वायुजः)** और अच्छे प्रकार सब पदार्थों से युक्त होती हैं, वे **(उषसः)** प्रातःकालीन सूर्य की **(भानवः)** किरणें **(वृथा)** मिथ्या सी **(उत्)** ऊपर **(अपप्तन्)** पड़ती हैं अर्थात् उनमें ताप न्यून होता है, इससे शीतल सी होती हैं और उनसे **(गाः)** पृथिवी आदि लोक **(अरुषीः)** रक्त गुणों से **(अयुक्षत)** युक्त होते हैं। जो **(अरुषीः)** रक्तगुण वाली सूर्य की उक्त किरणें **(वयुनानि)** सब पदार्थों का विशेष ज्ञान वा सब कामों को **(अक्रन्)** कराती हैं, वे **(पूर्वथा)** पिछले-पिछले **(रुशन्तम्)** अन्धकार के छेदक **(भानुम्)** सूर्य के समान अलग-अलग दिन करनेवाले सूर्य का **(अशिश्रयुः)** सेवन करती हैं, उनका सेवन युक्ति से करना चाहिये॥२॥

भावार्थः–जो सूर्य की किरणें भूगोल आदि लोकों का सेवन अर्थात् उन पर पड़ती हुई क्रम-क्रम से चलती जाती हैं, वे प्रातः और सायङ्काल के समय भूमि के संयोग से लाल होकर बादलों को लाल कर देती हैं और जब ये प्रातःकाल लोकों में प्रवृत्त अर्थात् उदय को प्राप्त होती हैं, तब प्राणियों को सब पदार्थों के विशेष ज्ञान होते हैं। जो भूमि पर गिरी हुई लालवर्ण की किरणें हैं, वे सूर्य के आश्रय होकर और उसको लाल कर ओषधियों का सेवन करती हैं, उनका सेवन जागरितावस्था में मनुष्यों को करना चाहिये॥२॥

पुनस्ताः किं कुर्वन्तीत्युपदिश्यते॥

फिर वे क्या करती हैं, इस विषय को अगले मन्त्र में कहा है॥

अर्चन्ति॒ नारी॑रपसो॒ न वि॒ष्टिभिः॑ समा॒नेन॒ योज॑ने॒ना प॑रा॒वत॑ः।
इष॒ं वह॑न्तीः सु॒कृते॑ सु॒दान॑वे॒ विश्वेदह॒ यज॑मानाय सुन्व॒ते॥३॥

अर्चन्ति। नारीः। अपसः। न। विष्टिऽभिः। समानेन। योजनेन। आ। पराऽवतः। इषम्। वहन्तीः। सुऽकृते। सुऽदानवे। विश्वा। इत्। अह। यजमानाय। सुन्वते॥३॥

पदार्थः-(**अर्चन्ति**) सत्कुर्वन्ति (**नारीः**) स्त्रीः (**अपसः**) उत्तमानि कर्माणि (**न**) इव (**विष्टिभिः**) व्याप्तिभिः (**समानेन**) तुल्येन (**योजनेन**) योगेन (**आ**) समन्तात् (**परावतः**) दूरदेशात् (**इषम्**) अन्नादिकम् (**वहन्तीः**) प्रापयन्तीः (**सुकृते**) धर्मात्मने (**सुदानवे**) सुष्ठु दानकरणशीलाय (**विश्वा**) विश्वानि सर्वाणि (**इत्**) एव (**अह**) दुःखविनिग्रहे (**यजमानाय**) पुरुषार्थिने (**सुन्वते**) ओषध्याद्यभिषवसेवनं कुर्वते॥३॥

अन्वयः-या उषसो विष्टिभिः समानेन योजनेन परावतो देशान्नारीर्न पुरुषान् सुकृते सुदानवे सुन्वते यजमानाय विश्वान्यपसः इषं चावहन्तीरह तद् दुःखविनाशनेनार्चन्तीदेव वर्त्तन्ते ता यथायोग्यं सर्वैः सेवनीयाः॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा पतिव्रताः स्त्रियः स्वस्वपतीन् सेवित्वा सत्कुर्वन्ति, तथैव सूर्यस्य किरणा भूमिं प्राप्य ततो निवृत्यान्तरिक्षे प्रकाशं जनयित्वा सर्वाणि वस्तूनि सम्पोष्य सर्वान् प्राणिनः सुखयन्ति॥३॥

पदार्थः-सूर्य की किरणें (**विष्टिभिः**) अपनी व्याप्तियों से (**समानेन**) समान (**योजनेन**) योग से अर्थात् सब पदार्थों में एकसी व्याप्त होकर (**परावतः**) दूर देश से (**न**) जैसे (**नारीः**) पुरुषों के अनुकूल स्त्रियां (**सुकृते**) धर्मिष्ठ (**सुदानवे**) उत्तम दाता (**सुन्वते**) ओषधि आदि पदार्थों के रस निकाल कर सेवन कर्त्ता (**यजमानाय**) और पुरुषार्थी पुरुष के लिये (**विश्वा**) समस्त उत्तम-उत्तम (**अपसः**) कर्मों और (**इषम्**) अन्नादि पदार्थों को (**आवहन्तीः**) अच्छे प्रकार प्राप्त करती हुई उनके (**अह**) दुःखों के विनाश से (**अर्चन्ति**) सत्कार करती हैं, वैसे उषा भी हैं, उनका सेवन यथायोग्य सबको करना चाहिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पतिव्रता स्त्रियां अपने-अपने पति का सेवन कर उनका सत्कार करती हैं, वैसे ही सूर्य की किरणें भूमि को प्राप्त हुई वहाँ से निवृत्त हो और अन्तरिक्ष में प्रकाश प्रकट कर समस्त वस्तुओं को पुष्ट करके सब प्राणियों को सुख देती हैं॥३॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वे कैसी हैं, इस विषय को अगले मन्त्र में कहा है॥

अधि॒ पेशां॑सि॒ वप॑ते नृ॒तूरि॒वापो॑र्णुते॒ वक्ष॑ उ॒स्रेव॒ बर्ज॑हम्।
ज्योति॒र्विश्व॑स्मै॒ भुव॑नाय कृण्व॒ती गावो॒ व्र॒जं व्यु१॑षा आ॑व॒र्तम॑:॥४॥

अधि॑। पेशां॑सि। व॒पते॒। नृ॒तूःऽइ॑व। अप॑। ऊ॒र्णु॒ते॒। वक्ष॑:। उ॒स्राऽइ॑व। बर्ज॑हम्। ज्योति॑:। विश्व॑स्मै। भुव॑नाय। कृ॒ण्व॒ती। गाव॑:। न। व्र॒जम्। वि। उ॒षा:। आ॒व॒रित्या॑व:। तम॑:॥४॥

पदार्थः-(**अधि**) उपरिभावे (**पेशांसि**) रूपाणि (**वपते**) स्थापयति (**नृतूरिव**) यथा नर्त्तको रूपाणि धरति तथा। **नृतिशृध्योः कूः।** (उणा०१.९१) अनेन नृतिधातोः कूप्रत्ययः। (**अप**) दूरीकरणे (**ऊर्णुते**)

आच्छादयति (**वक्षः**) वक्षस्थलम् (**उस्रेव**) यथा गौस्तथा (**बर्जहम्**) अन्धकारवर्जकं प्रकाशं हन्ति तत् (**ज्योतिः**) प्रकाशम् (**विश्वस्मै**) सर्वस्मै (**भुवनाय**) जाताय लोकाय (**कृण्वती**) कुर्वती (**गावः**) धेनवः (**न**) इव (**व्रजम्**) निवासस्थानम् (**वि**) विविधार्थे (**उषाः**) (**आवः**) वृणोति (**तमः**) अन्धकारम्॥४॥

अन्वयः–हे मनुष्या! योषा नृतूरिव पेशांस्यधि वपते वक्ष उस्रेव बर्जहं तमोऽपोर्णुते विश्वस्मै भुवनाय ज्योतिः कृण्वती व्रजं गावो न गच्छति तमोऽन्धकारं व्यावश्च स्वप्रकाशेनाच्छादयति तथा साध्वी स्त्री स्वपतिं प्रसादयेत्॥४॥

भावार्थः–अत्रोपमालङ्कारः। सूर्यस्य यत्केवलं ज्योतिस्तद्दिनं यत्तिर्यग्गति भूमिस्पृक् तदुषाश्चेत्युच्यते, नैतया विना जगत्पालनं संभवति तस्मादेतद्विद्या मनुष्यैरवश्यं भावनीया॥४॥

पदार्थः–हे मनुष्यो! जो (**उषाः**) सूर्य्य की किरण (**नृतूरिव**) जैसे नाटक करनेवाला वा नट वा नाचनेवाला वा बहुरूपिया अनेक रूप धारण करता है, वैसे (**पेशांसि**) नाना प्रकार के रूपों (**अधिवपते**) ठहराती है वा (**वक्षः+उस्रेव**) जैसे गौ अपनी छाती को वैसे (**बर्जहम्**) अन्धेरे को नष्ट करनेवाले प्रकाश के नाशक अन्धकार को (**अप+ऊर्णुते**) ढांपती वा (**विश्वस्मै**) समस्त (**भुवनाय**) उत्पन्न हुए लोक के लिये (**ज्योतिः**) प्रकाश को (**कृण्वती**) करती हुई (**व्रजम्**) (**गावो**) (**न**) जैसे निवासस्थान को गो जाती है, वैसे स्थानान्तर को जाती और (**तमः**) अन्धकार को (**व्यावः**) अपने प्रकाश में ढांप लेती है, वैसे उत्तम स्त्री अपनी पति को प्रसन्न करे॥४॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो सूर्य्य की केवल ज्योति है, वह दिन कहाता और जो तिरछी हुई भूमि पर पड़ती है वह (**उषा**) प्रातःकाल की वेला कहाती है अर्थात् प्रातः समय अति मन्द सूर्य्य की उजेली तिरछी चाल से जहाँ–तहां लोक लोकान्तरों पर पड़ती है, उसके विना संसार का पालन नहीं हो सकता। इससे इस विद्या की भावना मनुष्यों को अवश्य होनी चाहिये॥४॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, इस विषय को अगले मन्त्र में कहा है॥

प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम्।
स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत्॥५॥२४॥

प्रति। अर्चिः। रुशत्। अस्याः। अदर्शि। वि। तिष्ठते। बाधते। कृष्णम्। अभ्वम्। स्वरुम्। न। पेशः। विदथेषु। अञ्जन्। चित्रम्। दिवः। दुहिता। भानुम्। अश्रेत्॥५॥

पदार्थः–(**प्रति**) प्रतियोगे (**अर्चिः**) दीप्तिः (**रुशत्**) तमो हिंसत् (**अस्याः**) उषसः (**अदर्शि**) दृश्यते (**वि**) (**तिष्ठते**) (**बाधते**) (**कृष्णम्**) अन्धकारम्। **कृष्णं कृष्यतेर्निकृष्टो वर्णः।** (निरु०२.२०) (**अभ्वम्**) महत्तरम् (**स्वरुम्**) तापकमादित्यम् (**न**) इव (**पेशः**) रूपम् (**विदथेषु**) यज्ञेषु (**अञ्जन्**) अञ्जन्ति

गच्छन्ति **(चित्रम्)** अद्भुतम् **(दिव:)** सूर्यस्य **(दुहिता)** दुहिता दूरे हिता पुत्री वा **(भानुम्)** कान्तिम् **(अश्रेत्)** श्रयति। अत्र लडर्थे लङ् **बहुलं छन्दसी**ति शपो लुक् च॥५॥

अन्वय:-यस्या अस्या उषसो रुशदर्चिरभ्वं कृष्णं तमो बाधते। या दिवो दुहिता स्वरुं न चित्रं भानुं पेशोऽश्रेत्। यथर्त्विजो विदथेषु क्रिया अञ्जँस्तथा वितिष्ठते सोषा अस्माभि: प्रत्यदर्शि॥५॥

भावार्थ:-अत्रोपमावाचकलुप्तोमालङ्कारौ। या सूर्य्यदीप्ति: स्वयं प्रकाशमाना सर्वान् प्रति दृश्यते सोषा: सूर्य्यदुहितेवास्तीति सर्वैर्मनुष्यैरवगन्तव्यम्॥५॥

पदार्थ:-जिस **(अस्या:)** इस प्रात:समय अन्धकार के विनाशरूप उषा की **(रुशत्)** अन्धकार का नाश करनेवाली **(अर्चि:)** दीप्ति **(अभ्वम्)** बड़े **(कृष्णम्)** काले वर्णरूप अन्धकार को **(बाधते)** अलग करती है जो **(दिव:)** प्रकाशरूप सूर्य की **(दुहिता)** पुत्री के तुल्य **(स्वरुम्)** तपनेवाले सूर्य के **(न)** समान **(चित्रम्)** अद्भुत **(भानुम्)** कान्ति **(पेश:)** रूप को **(अश्रेत्)** आश्रय करती है वा जैसे ऋत्विज् लोग **(विदथेषु)** यज्ञ की क्रियाओं में **(अञ्जन्)** प्राप्त होते हैं, वैसे **(वितिष्ठते)** विविध प्रकार से स्थिर होती है, वह प्रात: समय की वेला हम लोगों को **(प्रत्यदर्शि)** प्रतीत होती है॥५॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सूर्य्य की उजेली आप ही उजाला करती हुई सबको प्रकाशित कर सीधी-उलटी दिखलाती है, वह प्रात:काल की वेला सूर्य्य की पुत्री के समान है, ऐसा मानना चाहिये॥५॥

पुन: सा कीदृश्यनया जीव: किं करोतीत्युपदिश्यते॥

फिर वह कैसी है और इससे जीव क्या करता है, यह विषय अगले मन्त्र में कहा है॥

अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीग:॥६॥

अतारिष्म। तमस:। पारम्। अस्य। उषा:। उच्छन्ती। वयुना। कृणोति। श्रिये। छन्द:। न। स्मयते। विऽभाती। सुऽप्रतीका। सौमनसाय। अजीगरिति॥६॥

पदार्थ:-**(अतारिष्म)** संतरेम प्लवेमहि वा **(तमस:)** अन्धकारस्येव दु:खस्य **(पारम्)** परभागम् **(अस्य)** प्रत्यक्षस्य **(उषा:)** **(उच्छन्ती:)** विवासयन्ती दूरीकुर्वन्ती **(वयुना)** वयुनानि प्रशस्यानि कमनीयानि वा कर्माणि **(कृणोति)** कारयति **(श्रिये)** विद्याराज्यलक्ष्मीप्राप्तये **(छन्द:)** **(न)** इव **(स्मयते)** आनन्दयति। अत्रान्तर्गतो ण्यर्थ:। **(विभाती)** विविधानि मूर्त्तद्रव्याणि प्रकाशयन्ती **(सुप्रतीका)** शोभनानि प्रतीकानि यस्या: सा **(सौमनसाय)** धर्मे सुष्ठु प्रवृत्तमनस आह्लादनाय **(अजीग:)** अन्धकारं निगलति। **गृ निगरणे** इत्यस्माद् **बहुलं छन्दसी**ति शप: स्थाने श्लु:। **तुजादीनामि**ति दीर्घश्च॥६॥

अन्वयः-या श्रिये छन्दो नेवोच्छन्ती विभाती सुप्रतीकोषा सर्वेषां सौमनसाय वयुनानि कृणोत्यन्धकारमजीगः स्मयते तथास्य तमसः पारमतारिष्म॥६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथेयमुषाः कर्मज्ञानानन्दपुरुषार्थधनप्राप्तिमिव दुःखस्य पारमन्धकारनिवारणहेतुरस्ति तथाऽस्यां सुपुरुषार्थेन प्रयत्नमास्थाय सुखोन्नतिर्दुःखहानिश्च कार्य्या॥६॥

पदार्थः-जो **(श्रिये)** विद्या और राज्य की प्राप्ति के लिये **(छन्दः)** वेदों के **(न)** समान **(उच्छन्ती)** अन्धकार को दूर करती और **(विभाती)** विविध प्रकार के मूर्तिमान् पदार्थों को प्रकाशित और **(सुप्रतीका)** पदार्थों की प्रतीति कराती है, वह **(उषाः)** प्रातःकाल की वेला सबके **(सौमनसाय)** धार्मिक जनों के मनोरञ्जन के लिये **(वयुनानि)** प्रशंसनीय वा मनोहर कामों को **(कृणोति)** कराती **(अजीगः)** अन्धकार को निगल जाती और **(स्मयते)** आनन्द देती है, उससे **(अस्य)** इस **(तमसः)** अन्धकार के **(पारम्)** पार को प्राप्त होते हैं, वैसे दुःख के परे आनन्द को हम **(अतारिष्म)** प्राप्त होते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को योग्य है कि जैसे यह उषा प्रातःकाल की वेला कर्म, ज्ञान, आनन्द, पुरुषार्थ, धनप्राप्ति के द्वारा दुःखरूपी अन्धकार के निवारण का निदान है, वैसे इस वेला में उत्तम पुरुषार्थ से प्रयत्न में स्थित होके सुख की बढ़ती और दुःख का नाश करें॥६॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, यह विषय अगले मन्त्र में कहा है॥

भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोतमेभिः।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान्॥७॥

भास्वती। नेत्री। सूनृतानाम्। दिवः। स्तवे। दुहिता। गोतमेभिः। प्रजाऽवतः। नृऽवतः। अश्वऽबुध्यान्। उषः। गोऽअग्रान्। उप। मासि। वाजान्॥७॥

पदार्थः-**(भास्वती)** दीप्तिमती **(नेत्री)** या जनान् व्यवहारान्नयति सा **(सूनृतानाम्)** शोभनकर्मान्नानाम् **(दिवः)** द्योतमानस्य सवितुः **(स्तवे)** प्रशंसामि। अत्र शपो लुङ् न। **(दुहिता)** कन्येव **(गोतमेभिः)** सर्वविद्यास्तावकैर्विद्वद्भिः **(प्रजावतः)** प्रशस्ताः प्रजा येषु तान् **(नृवतः)** बहुनायकसहितान्। **छन्दसीर** इति वत्वम्। सायणचार्येणेदमशुद्धं व्याख्यातम्। **(अश्वबुध्यान्)** अश्वान् वेगवतस्तुरङ्गान् वा बोधयन्त्यवगमयन्त्येषु तान्। अथान्तर्गतो ण्यर्थो बाहुलकादौणादिकोऽधिकरणे यक् च। **(उषः)** उषाः **(गोअग्रान्)** गौर्भूमिरग्रे प्राप्नुवन्ति यैस्तान्। गौरित्युपलक्षणं तेन भूम्यादिसर्वपदार्थनिमित्तानि सम्पद्यन्ते। **(उप)** **(मासि)** प्रापयसि **(वाजान्)** सङ्ग्रामान्॥७॥

अन्वयः-यथा सूनृतानां भास्वती नेत्री दिवो दुहितोषरुषा गोतमेभिः स्तूयते तथैतामहं स्तवे। हे स्त्रि! यथेयं प्रजावतो नृवतोऽश्वबुध्यान् गोअग्रान् वाजानुपमासि तथा त्वं भव॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारौ। यथा सर्वगुणसम्पन्नया सुलक्षणया कन्यया पितरौ सुखिनौ भवतः तथोषर्विद्यया विद्वांसः सुखिनो भवन्तीति॥७॥

पदार्थः-जैसे **(सूनृतानाम्)** अच्छे-अच्छे काम वा अन्न आदि पदार्थों को **(भास्वती)** प्रकाशित **(नेत्री)** और मनुष्यों को व्यवहारों की प्राप्ति कराती वा **(दिवः)** प्रकाशमान सूर्य्य की **(दुहिता)** कन्या के समान **(उषः)** प्रातः समय की वेला **(गोतमेभिः)** समस्त विद्याओं को अच्छे प्रकार कहने-सुननेवाले विद्वानों से स्तुति की जाती है, वैसे इसकी मैं **(स्तवे)** प्रशंसा करूँ। हे स्त्री! जैसे यह उषा **(प्रजावतः)** प्रशंसित प्रजायुक्त **(नृवतः)** वा सेना आदि कामों के बहुत नायकों से युक्त **(अश्वबुध्यान्)** जिनसे वेगवान् घोड़ों को वार-वार चैतन्य करें **(गोअग्रान्)** जिनसे राज्य भूमि आदि पदार्थ मिलें, उन **(वाजान्)** संग्रामों को **(उप मासि)** समीप प्राप्त करती है अर्थात् जैसे प्रातःकाल की वेला से अन्धकार का नाश होकर सब प्रकार के पदार्थ प्रकाशित होते हैं, वैसे तू भी हो॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे सब गुणआगरी सुलक्षणी कन्या से पिता, माता, चाचा आदि सुखी होते हैं, वैसे ही प्रातःकाल की वेला के गुण-अपगुण प्रकाशित करनेवाली विद्या से विद्वान् लोग सुखी होते हैं॥७॥

पुनस्तया किं प्राप्यते सा किं करोतीत्युपदिश्यते॥

फिर उससे क्या मिलता है और वह क्या करती है, यह विषय अगले मन्त्र में कहा है॥

उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम्।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम्॥८॥

उषः। तम्। अश्याम्। यशसम्। सुऽवीरम्। दासऽप्रवर्गम्। रयिम्। अश्वऽबुध्यम्। सुऽदंससा। श्रवसा। या। विऽभासि। वाजऽप्रसूता। सुऽभगे। बृहन्तम्॥८॥

पदार्थः-**(उषः)** उषाः **(तम्)** **(अश्याम्)** प्राप्नुयाम्। अत्र व्यत्ययेन परस्समैपदं **बहुलं छन्दसी**ति विकरणस्य लुक्। **(यशसम्)** अतिकीर्त्तियुक्तम्। **(सुवीरम्)** शोभनाः सुशिक्षिता वीरा यस्मात्तम् **(दासप्रवर्गम्)** दासानां सेवकानां प्रवर्गाः समूहा यस्मिँस्तम् **(रयिम्)** विद्याराज्यश्रियम् **(अश्वबुध्यम्)** अश्वा बुध्यन्ते सुशिक्षन्ते येन तम् **(सुदंससा)** शोभनानि दंसांसि कर्माणि यस्मिन् **(श्रवसा)** पृथिव्याद्यन्नेन सह **(या)** **(विभासि)** विविधान् दीपयति **(वाजप्रसूता)** वाजेन सूर्यस्य गमनेन प्रसूतोत्पन्ना **(सुभगे)** शोभना भगा ऐश्वर्ययोगा यस्याः सा **(बृहन्तम्)** सर्वदा वृद्धियोगेन महत्तमम्॥८॥

अन्वयः-या वाजप्रसूता सुभगा उषरुषा अस्ति सा यं सुदंससा श्रवसा सह वर्त्तमानमश्वबुध्यं दासप्रवर्गं सुवीरं बृहन्तं यशसं रयिं विभासि विविधतया प्रकाशयति तमहमश्यां प्राप्नुयाम्॥८॥

भावार्थः-य उषर्विद्यया प्रयतन्ते त एवैतत्सर्वं वस्तु प्राप्य सम्पन्ना भूत्वा सदानन्दन्ति नेतरे॥८॥

पदार्थः-जो **(वाजप्रसूता)** सूर्य की गति से उत्पन्न हुई **(सुभगा)** जिसके साथ अच्छे-अच्छे ऐश्वर्य के पदार्थ संयुक्त होते हैं, वह **(उषः)** प्रातः समय की वेला है, वह जिस **(सुदंससा)** अच्छे कर्मवाले **(श्रवसा)** पृथिवी आदि अन्न के साथ वर्त्तमान वा **(अश्वबुध्यम्)** जिस सहायता से घोड़े सिखाये जाते **(दासप्रवर्गम्)** जिससे सेवक अर्थात् दासी का काम करनेवाले रह सकते हैं **(सुवीरम्)** जिससे अच्छे सीखे हुए वीरजन हों, उस **(बृहन्तम्)** सर्वदा अत्यन्त बढ़ते हुए और **(यशसम्)** सब प्रकार प्रशंसायुक्त **(रयिम्)** विद्या और राज्य धन को **(विभासि)** अच्छे प्रकार प्रकाशित करती है, **(तम्)** उसको मैं **(अश्याम्)** पाऊँ॥८॥

भावार्थः-जो लोग प्रातःकाल की वेला के गुण-अवगुणों को जतानेवाली विद्या से अच्छे-अच्छे यत्न करते हैं, वे यह सब वस्तु पाकर सुख से परिपूर्ण होते हैं, किन्तु और नहीं॥८॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, यह विषय अगले मन्त्र में कहा है॥

विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचमविदन्मनायोः॥९॥

विश्वानि। देवी। भुवना। अभिऽचक्ष्य। प्रतीची। चक्षुः। उर्विया। वि। भाति। विश्वम्। जीवम्। चरसे। बोधयन्ती। विश्वस्य। वाचम्। अविदत्। मनायोः॥९॥

पदार्थः-(**विश्वानि**) सर्वाणि (**देवी**) देदीप्यमाना (**भुवना**) लोकान् (**अभिचक्ष्य**) अभितः सर्वतः प्रकाश्य। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। (**प्रतीची**) प्रतीचीनं गच्छन्ती (**चक्षुः**) नेत्रवद्दर्शनहेतुः (**उर्विया**) उर्व्या पृथिव्या सह। अत्रोर्वी शब्दाट्टास्थाने डियाजादेशः। (**वि**) विविधार्थे (**भाति**) प्रकाशयते (**विश्वम्**) सर्वम् (**जीवम्**) जीवसमूहम् (**चरसे**) व्यवहर्तुं भोजयितुं वा (**बोधयन्ती**) चेतयन्ती (**विश्वस्य**) सर्वस्य प्राणिजातस्य (**वाचम्**) वाणीम् (**अविदत्**) (**मनायोः**) यो मान इवाचरति तस्य। अत्र मानशब्दस्य ह्रस्वत्वं पृषोदरादित्वात्॥९॥

अन्वयः-हे स्त्रि! यथा प्रतीची चरसे विश्वं जीवं बोधयन्ती देव्युषा मनायोर्विश्वस्य वाचमविदत् विन्दति चक्षुरिव विश्वानि भुवनाभिचक्ष्योर्विया सह विभाति तथा त्वं भव॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सती स्त्री सर्वथा स्वपतिमानन्दयति तथैवोषाः समग्रं जगदानन्दयति॥९॥

पदार्थः-हे स्त्रि! जैसे **(प्रतीची)** सूर्य की चाल से परे को ही जाती और **(चरसे)** व्यवहार करने वा सुख और दुःख भोगने के लिये **(विश्वम्)** सब **(जीवम्)** जीवों को **(बोधयन्ती)** चिताती हुई **(देवी)**

प्रकाश को प्राप्त **(उषाः)** प्रातःसमय की वेला **(मनायोः)** मान के समान आचरण करनेवाले **(विश्वस्य)** जीवमात्र की **(वाचम्)** वाणी को **(अविदत्)** प्राप्त होती **(चक्षुः)** और आंखों के समान सब वस्तु के दिखाई पड़ने का निदान **(विश्वानि)** समस्त **(भुवना)** लोकों को **(अभिचक्ष्य)** सब प्रकार से प्रकाशित करती हुई **(उर्विया)** पृथिवी के साथ **(विभाति)** अच्छे प्रकार प्रकाशित होती है, वैसी तू भी हो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे उत्तम स्त्री सब प्रकार से अपने पति को आनन्दित करती है, वैसे प्रातःकाल की वेला समस्त जगत् को आनन्द देती है॥९॥

पुनः सा कीदृशी किं करोतीत्युपदिश्यते॥

फिर वह कैसी है और क्या करती है, इस विषय को अगले मन्त्र में कहा है॥

पुनः॑पुन॒र्जाय॑माना पुरा॒णी स॑मा॒नं वर्ण॑म॒भि शुम्भ॑माना।
श्व॒घ्नीव॑ कृ॒त्नुर्विज॑ आमिना॒ना मर्त॑स्य दे॒वी ज॒रय॒न्त्यायु॑ः॥ १०॥ २५॥

पुनः॑ऽपुनः। जाय॑माना। पुरा॒णी। स॒मा॒नम्। वर्ण॑म्। अ॒भि। शुम्भ॑माना। श्व॒घ्नीऽइ॑व। कृ॒त्नुः। विज॑ः। आ॒ऽअमि॒ना॒ना। मर्त॑स्य। दे॒वी। ज॒रय॑न्ती। आयु॑ः॥

पदार्थः-(**पुनःपुनः**) प्रतिदिनम् **(जायमाना)** उत्पद्यमाना **(पुराणी)** प्रवाहरूपेण सनातनी **(समानम्)** तुल्यम् **(वर्णम्)** रूपम् **(अभि)** अभितः **(शुम्भमाना)** प्रकाशयन्ती **(श्वघ्नीव)** यथा वृकी शुनः श्वादीन् मृगान् कृन्तन्ती **(कृत्नुः)** छेदिका श्येनी इव **(विजः)** इस्ततश्चलतः पक्षिणः **(आमिनाना)** समन्ताद्धिंसन्ती। **मीञ् हिंसायाम**इत्यस्य रूपम्। **(मर्त्तस्य)** मरणधर्मसहितस्य प्राणिजातस्य **(देवी)** प्रकाशमाना **(जरयन्ती)** हीनं कुर्वती **(आयुः)** जीवनम्॥१०॥

अन्वयः-या श्वघ्नीव कृत्नुर्विज आमिनानेव मर्त्तस्यायुर्जरयन्ती पुनःपुनर्जायमाना समानं वर्णमभिशुम्भमाना पुराणी देव्युषा अस्ति सा जागरितैर्मनुष्यैः सेवनीया॥१०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथाऽन्तर्धाना प्रसिद्धा वा वृकीः मृगान् छिनत्ति यथा वा श्येन्युड्डीयमानान् पक्षिणो हन्ति तथैवेयमुषा अस्माकमायुः शनैः शनैः कृन्ततीति विदित्वाऽस्माभिरालस्यं त्यक्त्वा रजन्याश्चरमे याम उत्थाय विद्याधर्मपरोपकारादिषु व्यवहारेषु यथावन्नित्यं वर्त्तितव्यम्। येषामीदृशी बुद्धिरस्ति आलस्याऽधर्मयोर्मध्ये कथं प्रवर्त्तेरन्॥१०॥

पदार्थः-जो **(श्वघ्नीव)** कुत्ते और हिरणों को मारनेहारी वृकी के समान वा जैसे **(कृत्नुः)** छेदन करनेवाली श्येनी **(विजः)** इधर-उधर चलते हुए पक्षियों का छेदन करती है, वैसे **(आमिनाना)** हिंसिका **(मर्त्तस्य)** मरने-जीनेहारे जीवमात्र की **(आयुः)** आयुर्दा को **(जरयन्ती)** हीन करती हुई **(पुनःपुनः)** दिनोंदिन **(जायमाना)** उत्पन्न होनेवाली **(समानम्)** एकसे **(वर्णम्)** रूप को **(अभि)** **(शुम्भमाना)** सब

ओर से प्रकाशित करती हुई वा **(पुराणी)** सदा से वर्त्तमान **(देवी)** प्रकाशमान प्रातःकाल की वेला है, वह जागरित होके मनुष्यों को सेवने योग्य है॥१०॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे छिपके वा देखते-देखते भेड़िया की स्त्री वृकी वन के जीवों को तोड़ती और जैसे बाजिनी उड़ते हुए पखेरुओं को विनाश करती है, वैसे ही यह प्रातःसमय की वेला सोते हुए हम लोगों की आयुर्दा को धीरे-धीरे अर्थात् दिनों-दिन काटती है, ऐसा जान और आलस्य छोड़ कर हम लोगों को रात्रि के चौथे प्रहर में जाग के विद्या, धर्म और परोपकार आदि व्यवहारों में नित्य उचित वर्त्ताव रखना चाहिये। जिनकी इस प्रकार की बुद्धि है, वे लोग आलस्य और अधर्म्म के बीच में कैसे प्रवृत्त हों!॥१०॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, इस विषय को अगले मन्त्र में कहा है॥

व्यू॒र्ण्व॒ती दि॒वो अन्ताँ॑ अबो॒ध्यप॒ स्वसा॑रं सनु॒तर्यु॑योति।
प्र॒मि॒न॒ती म॑नु॒ष्या॑ युगा॒नि॒ योषा॑ जा॒रस्य॒ चक्ष॑सा॒ वि भा॑ति॥११॥

वि॒ऽऊ॒र्ण्व॒ती। दि॒वः। अन्ता॑न्। अ॒बो॒धि॒। अप॑। स्वसा॑रम्। स॒नु॒तः। यु॒यो॒ति॒। प्र॒ऽमि॒न॒ती। म॒नु॒ष्या॑। युगा॑नि। योषा॑। जा॒रस्य॑। चक्ष॑सा। वि। भा॒ति॒॥११॥

पदार्थः-(**व्यूर्ण्वती**) विविधान् पदार्थानाच्छादयन्ती (**दिवः**) प्रकाशमयस्य सूर्यस्य (**अन्तान्**) समीपस्थान् पदार्थान् (**अबोधि**) बोधयति (**अप**) निवारणे (**स्वसारम्**) भगिनीस्वरूपां रात्रिम् (**सनुतः**) सततम् (**युयोति**) मिश्रयति (**प्रमिनती**) प्रकृष्टतया हिंसन्ती (**मनुष्या**) मनुष्याणां सम्बन्धीनि (**युगानि**) संवत्सरादीनि (**योषा**) कामिनी स्त्रीव (**जारस्य**) लम्पटस्य रात्रेर्जरयितुः सूर्यस्य वा (**चक्षसा**) तन्निमित्तभूतेन दर्शनेन (**वि**) विशेषे (**भाति**) प्रकाशते॥११॥

अन्वयः-हे मनुष्या! योषा जारस्य योषेव सर्वेषामायुः सनुतः प्रमिनती या स्वसारं व्यूर्ण्वत्यपयुयोति स्वयं विभाति चक्षसा दिवोऽन्तान् मनुष्या युगानि चाबोधि सा यथावत्सेव्या॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा व्यभिचारिणी स्त्री जारपुरुषस्यायुः प्रणाशयति, तथा सूर्यस्य सम्बन्ध्यन्धकारनिवारणेन दिनकारिण्युषा वर्त्तते इति बुध्वा रात्रिंदिवयोर्मध्ये युक्त्या वर्त्तित्वा पूर्णमायुर्भोक्तव्यम्॥११॥

पदार्थः-हे मनुष्यो! जो प्रातःकाल की वेला जैसे **(योषा)** कामिनी स्त्री **(जारस्य)** व्यभिचारी लम्पट कुमार्गी पुरुष की उमर का नाश करे, वैसे सब आयुर्दा को **(सनुतः)** निरन्तर **(प्रमिनती)** नाश करती **(स्वसारम्)** और अपनी बहिन के समान जो रात्रि है, उसको **(व्यूर्ण्वती)** ढांपती हुई **(अपयुयोति)** उसको दूर करती अर्थात् दिन से अलग करती है और आप **(वि)** अच्छी प्रकार **(भाति)** प्रकाशित होती

जाती है **(चक्षसा)** उस प्रातः समय की वेला के निमित्त उससे दर्शन **(दिवः)** प्रकाशवान् सूर्य्य के **(अन्तान्)** समीप के पदार्थों को और **(मनुष्या)** मनुष्यों के सम्बन्धी **(युगानि)** वर्षों को **(अबोधि)** जनाती है, उसका सेवन तुम युक्ति से किया करो॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे व्यभिचारिणी स्त्री जारकर्म करनेहारे पुरुष की उमर का विनाश करती है, वैसे सूर्य्य से सम्बन्ध रखनेहारे अन्धकार की निवृत्ति से दिन को प्रसिद्ध करनेवाली प्रातःकाल की वेला है, ऐसा जानकर रात और दिन के बीच युक्ति के साथ वर्त्ताव वर्त्तकर पूरी आर्युदा को भोगें॥११॥

पुनः सा कीदृशीत्युपदिश्यते॥

फिर वह कैसी है, यह विषय अगले मन्त्र में कहा है॥

पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोदो उर्विया व्यश्वैत्।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना॥१२॥

पशून्। न। चित्रा। सुऽभगा। प्रथाना। सिन्धुः। न। क्षोदः। उर्विया। वि। अश्वैत्। अमिनती। दैव्यानि। व्रतानि। सूर्यस्य। चेति। रश्मिऽभिः। दृशाना॥१२॥

पदार्थः-(**पशून्**) गवादीन् (**न**) इव (**चित्रा**) विचित्रस्वरूपोषाः। **चित्रेत्युषर्नामसु पठितम्।** (निघं०१.८) (**सुभगा**) सौभाग्यकारिणी (**प्रथाना**) प्रथते तरङ्गैः शब्दायमाना। उषः पक्षे पक्षिशब्दैः शब्दायमाना (**सिन्धुः**) विस्तीर्णा नदी (**न**) इव (**क्षोदः**) अगाधजलम् (**उर्विया**) अत्र टास्थाने डियाजादेशः। (**वि**) (**अश्वैत्**) व्याप्नोति (**अमिनती**) अहिंसन्ती (**दैव्यानि**) देवेषु विद्वत्सु जातानि (**व्रतानि**) सत्यपालनादीनि कर्माणि (**सूर्यस्य**) मार्तण्डस्य (**चेति**) संज्ञायते। अत्र चितीधातोर्लुङ्यडभावश्चिण् च। (**रश्मिभिः**) किरणैः (**दृशाना**) दृश्यमाना। अत्र कर्मणि लटः शानच् **बहुलं छन्दसी**ति विकरणस्य लुक् च॥१२॥

अन्वयः-मनुष्यैर्या पशून्नेव यथा पशून् प्राप्य वणिग्जनः सुभगा प्रथाना सिन्धुः क्षोदो नेव वा चित्रोषा उर्विया पृथिव्या सह सूर्यस्य रश्मिभिर्दृशानाऽमिनती रक्षां कुर्वती सती दैव्यानि व्रतानि व्यश्वैच्चेति संज्ञायते तद्विद्यानुसारवर्त्तमानेन सततं सुखयितव्यम्॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा पशूनां प्राप्त्या विना वणिग्जनो, जलस्य प्राप्त्या विना नद्यादिः सौभाग्यकारको न भवति, तथोषर्विद्यया पुरुषार्थेन च विना मनुष्याः प्रशस्तैश्वर्य्या न भवन्तीति वेद्यम्॥१२॥

पदार्थः–मनुष्यों को चाहिये कि **(न)** जैसे **(पशून्)** गाय आदि पशुओं को पाकर वैश्य बढ़ता और **(न)** जैसे **(सुभगा)** सुन्दर ऐश्वर्य्य करनेहारी **(प्रथाना)** तरङ्गों से शब्द करती हुई **(सिन्धुः)** अति वेगवती नदी **(क्षोदः)** जल को पाकर बढ़ती है, वैसे सुन्दर ऐश्वर्य्य करानेहारी प्रातःसमय चूं–चां करनेहारे पखेरुओं के शब्दों से शब्दवाली और कोसों फैलती हुई **(चित्रा)** चित्र–विचित्र प्रातःसमय की वेला **(उर्विया)** पृथिवी के साथ **(सूर्यस्य)** मार्त्तण्डमण्डल की **(रश्मिभिः)** किरणों से **(दृशाना)** जो देखी जाती है, वह **(अमिनती)** सब प्रकार से रक्षा करती हुई **(दैव्यानि)** विद्वानों में प्रसिद्ध **(व्रतानि)** सत्यपालन आदि कामों को **(व्यश्वैत्)** व्याप्त हो अर्थात् जिसमें विद्वान् जन नियमों को पालते हैं, वैसे प्रतिदिन अपने नियमों को पालती हुई **(चेति)** जानी जाती है, उस प्रातःसमय की वेला की विद्या के अनुसार वर्त्ताव रखकर निरन्तर सुखी हों॥१२॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जैसे पशुओं की प्राप्ति के विना वैश्य लोग वा जल की प्राप्ति के विना नदी–नद आदि अति उत्तम सुख करनेवाले नहीं होते, वैसे प्रातःसमय की वेला के गुण जतानेवाली विद्या और पुरुषार्थ के विना मनुष्य प्रशंसित ऐश्वर्य्यवाले नहीं होते, ऐसा जानना चाहिये॥१२॥

मनुष्यैरेतया किं विज्ञातव्यमित्युपदिश्यते॥

मनुष्यों को इससे क्या जानना चाहिये, यह विषय अगले मन्त्र में कहा है॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे॥१३॥

उषः। तत्। चित्रम्। आ। भर। अस्मभ्यम्। वाजिनीऽवति। येन। तोकम्। च। तनयम्। च। धामहे॥१३॥

पदार्थः–**(उषः)** उषाः **(तत्)** **(चित्रम्)** अद्भुतं सौभाग्यम् **(आ)** समन्तात् **(भर)** धर **(अस्मभ्यम्)** **(वाजिनीवति)** प्रशस्तक्रियान्नयुक्ते **(येन)** **(तोकम्)** पुत्रम् **(च)** तत्पालनक्षमान् पदार्थान् **(तनयम्)** पौत्रम् **(च)** स्त्रीभृत्यपृथिवीराज्यादीन् **(धामहे)** धरेम। अत्र धाञ्धातोर्लेटि **बहुलं छन्दसी**ति श्लोरभावः। अत्र निरुक्तम् **उषस्तच्चित्रं चायनीयं मंहनीयं धनमाहरास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि।** (निरु०१२.६)॥१३॥

अन्वयः–हे सुभगे! वाजिनीवति त्वमुषरिवास्मभ्यं चित्रं चित्रं धनमाभर येन वयं तोकं च तनयं च धामहे॥१३॥

भावार्थः–मनुष्यैः प्रातःकालमारभ्य कालविभागयोग्यान् व्यवहारान् कृत्वैव सर्वाणि सुखसाधनानि सुखानि च कर्त्तुं शक्यन्ते तस्मादेतन्मनुष्यैर्नित्यमनुष्ठेयम्॥१३॥

पदार्थः–हे सौभाग्यकारिणी स्त्री! **(वाजिनीवति)** उत्तम क्रिया और अन्नादि ऐश्वर्य्ययुक्त तू **(उषः)** प्रभात के तुल्य **(अस्मभ्यम्)** हम लोगों के लिये **(चित्रम्)** अद्भुत सुखकर्त्ता धन को **(आ भर)**

धारण कर **(येन)** जिससे हम लोग **(तोकम्)** पुत्र **(च)** और इसके पालनार्थ ऐश्वर्य **(तनयम्)** पौत्रादि **(च)** स्त्री, भृत्य और भूमि के राज्यादि को **(धामहे)** धारण करें॥१३॥

भावार्थः-मनुष्यों से प्रातःसमय से लेके समय के विभागों के योग्य अर्थात् समय-समय के अनुसार व्यवहारों को करके ही सब सुख के साधन और सुख किये जा सकते हैं, इससे उनको यह अनुष्ठान नित्य करना चाहिये॥१३॥

पुनः सा किं करोतीत्युपदिश्यते॥

फिर वह क्या करती है, इस विषय का उपदेश अगले मन्त्र में किया है॥

उषो॑ अ॒द्येह गो॑म॒त्यश्वा॑वति विभावरि। रे॒वद॒स्मे व्यु॑च्छ सूनृतावति॥१४॥

उष॑ः। अ॒द्य। इ॒ह। गो॒ऽम॒ति॒। अश्व॑ऽवति। वि॒भा॒ऽव॒रि॒। रे॒वत्। अ॒स्मे इति॑। वि। उ॒च्छ॒। सू॒नृ॒ता॒ऽव॒ति॒॥१४॥

पदार्थः-**(उषः)** उषाः **(अद्य)** अस्मिन्नहनि **(इह)** अस्मिन् संसारे **(गोमति)** गावो यस्याः सम्बन्धेन भवन्ति **(अश्वावति)** अश्वा अस्याः सम्बन्धे सन्ति सा। अत्र **मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ।** (अष्टा०६.३.१३१) इत्यश्वशब्दस्य दीर्घः। अत्रोभयत्र सम्बन्धार्थे मतुप्। **(विभावरि)** विविधदीप्तियुक्ते **(रेवत्)** प्रशस्तानि रायो धनानि विद्यन्ते यस्मिन् सुखे तत् **(अस्मे)** अस्मभ्यम् **(वि)** विगतार्थे **(उच्छ)** उच्छति विवासयति **(सूनृतावति)** सूनृतान्यनृशंस्यानि प्रशस्तानि कर्माण्यस्याः सा॥१४॥

अन्वयः-हे स्त्रि! यथा गोमत्यश्वावति सूनृतावति विभावर्युषोऽस्मे रेवद् व्युच्छति तथा वयमद्येह सुखानि धामहे॥१४॥

भावार्थः-अत्र धामह इति पदमनुवर्त्तते। मनुष्यैः प्रत्युषःकालमुत्थाय यावच्छयनं न कुर्य्युस्तावन्निरालस्यतया परमप्रयत्नेन विद्याधनराज्यानि धर्मार्थकाममोक्षाश्च साधनीयाः॥१४॥

पदार्थः-हे स्त्री! जैसे **(गोमति)** जिसके सम्बन्ध में गौ होतीं **(अश्वावति)** घोड़े होते तथा **(सूनृतावति)** जिसके प्रशंसनीय काम हैं, वह **(विभावरि)** क्षण-क्षण बढ़ती हुई दीप्तिवाली **(उषः)** प्रातःसमय की वेला **(अस्मे)** हम लोगों के लिये **(रेवत्)** जिसमें प्रशंसित धन हों, उस सुख को **(वि, उच्छ)** प्राप्त कराती है, उससे हम लोग **(अद्य)** आज **(इह)** इस जगत् में सुखों को **(धामहे)** धारण करते हैं॥१४॥

भावार्थः-इस मन्त्र में **(धामहे)** इस पद की अनुवृत्ति आती है। मनुष्यों को चाहिये कि प्रतिदिन प्रातःकाल सोने से उठ कर जब तक फिर न सोवें, तब तक अर्थात् दिन भर निरालसता से उत्तम यत्न के साथ विद्या, धन और राज्य तथा धर्म, अर्थ, काम और मोक्ष इन सब उत्तम-उत्तम पदार्थों को सिद्ध करें॥१४॥

पुनः सा किं करोतीत्युपदिश्यते॥

फिर वह क्या करती है, इस विषय को अगले मन्त्र में कहा है॥

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः।
अथा नो विश्वा सौभगान्या वह॥ १५॥ २६॥

युक्ष्व। हि। वाजिनीऽवति। अश्वान्। अद्य। अरुणान्। उषः। अथ। नः। विश्वा। सौभगानि। आ। वह॥ १५॥

पदार्थः-(**युक्ष्व**) युनक्ति। अत्र **बहुलं छन्दसी**ति विकरणस्य लुक्। **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**हि**) खलु (**वाजिनीवति**) वाजयन्ति ज्ञापयन्ति गमयन्ति वा यासु क्रियासु ताः प्रशस्ता वाजिन्यो विद्यन्तेऽस्यां सा (**अश्वान्**) वेगवतः किरणान् (**अद्य**) अस्मिन्नहनि (**अरुणान्**) अरुणविशिष्टान् (**उषः**) उषाः (**अथ**) अनन्तरम्। अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मभ्यम् (**विश्वा**) अखिलानि (**सौभगानि**) सुभगानां सुष्ठ्वैश्वर्यवतां पुरुषाणाम् (**आ**) समन्तात् (**वह**) प्रापय॥ १५॥

अन्वयः-हे स्त्रि! यथा वाजिनीवत्युषोऽरुणानश्वान् युक्ष्व युनक्ति। अथेत्यनन्तरं नोऽस्मभ्यं विश्वाऽखिलानि सौभगानि प्रापयति हि तथाद्य त्वं शुभान् गुणान् युङ्ग्ध्यावह॥ १५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि प्रतिदिनं सततं पुरुषार्थेन विना मनुष्याणामैश्वर्य्यप्राप्तिर्जायते तस्मादेवं तैर्नित्यं प्रयतितव्यं यत ऐश्वर्य्यं वर्धेत॥ १५॥

पदार्थः-हे स्त्रि! जैसे (**वाजिनीवति**) जिसमें ज्ञान वा गमन करानेवाली क्रिया है, वह (**उषः**) प्रातःसमय की वेला (**अरुणान्**) लाल (**अश्वान्**) चमचमाती फैलती हुई किरणों का (**युक्ष्व**) संयोग करती है, (**अथ**) पीछे (**नः**) हम लोगों के लिये (**विश्वा**) समस्त (**सौभगानि**) सौभाग्यपन के कामों को अच्छे प्रकार प्राप्त करती (**हि**) ही है, वैसे (**अद्य**) आज तू शुभ गुणों को युक्त और (**आवह**) सब ओर से प्राप्त कर॥ १५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। प्रतिदिन निरन्तर पुरुषार्थ के विना मनुष्यों को ऐश्वर्य्य की प्राप्ति नहीं होती, इससे उनको चाहिये कि ऐसा पुरुषार्थ नित्य करें, जिससे ऐश्वर्य बढ़े॥ १५॥

पुनस्तया किं कर्त्तव्यमित्युपदिश्यते॥

फिर उससे क्या करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

अश्विना वर्त्तिरस्मदा गोमद्दस्रा हिरण्यवत्। अर्वाग् रथं समनसा नि यच्छतम्॥ १६॥

अश्विना। वर्तिः। अस्मत्। आ। गोऽमत्। दस्रा। हिरण्यऽवत्। अर्वाक्। रथम्। सऽमनसा। नि। यच्छतम्॥ १६॥

पदार्थः-(**अश्विना**) अश्विनावग्निजले (**वर्त्तिः**) वर्त्तन्ते यस्मिन् गमनागमनकर्मणि तत् (**अस्मत्**) अस्माकम्। **सुपां सुलुगि**ति षष्ठ्या लुक्। (**आ**) (**गोमत्**) प्रशस्ता गावो भवन्ति यस्मिंस्तत् (**दस्रा**) कलाकौशलादिनिमित्तैर्दुःखोपक्षयितारौ (**हिरण्यवत्**) प्रशस्तानि हिरण्यादीनि विद्यादीनि वा तेजांसि विद्यन्ते

यस्मिंस्तत् **(अर्वाक्)** अधः **(रथम्)** भूजलान्तरिक्षेषु रमणसाधनं विमानादियानसमूहम् **(समनसा)** समानेन मनसा विचारेण सह वर्त्तमानौ **(नि)** नितराम् **(यच्छतम्)** यच्छतो यमनं कुरुतः॥१६॥

अन्वयः-हे जनाः! यथा वयं यौ दस्रा समनसाऽश्विनाऽस्मद् गोमद्धिरण्यवद्वर्तिरर्वाग्रथं न्यायच्छतं प्रापयतस्ताभ्यामुषर्युक्ताभ्यां युक्तं रथं प्रतिदिनं साध्नुयाम तथा यूयमपि साध्नुत॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः प्रतिदिनं क्रियाकौशलाभ्यामग्निजलादीनां सकाशाद् विमानादीनि यानानि साधित्वाऽक्षय्यधनं प्राप्य सुखयितव्यम्॥१६॥

पदार्थः-हे मनुष्यो! जैसे हम लोग जो **(दस्रा)** कला-कौशलादि निमित्त से दुःख आदि की निवृत्ति करनेहारे **(समनसा)** एक से विचार के साथ वर्त्तमान के तुल्य **(अश्विना)** अग्नि, जल **(अस्मत्)** हम लोगों के **(गोमत्)** जिसमें इन्द्रियां प्रशंसित होतीं वा **(हिरण्यवत्)** प्रशंसित सुवर्ण आदि पदार्थ वा विद्या आदि गुणों के प्रकाश विद्यमान वा **(वर्त्तिः)** आने-जाने के काम में वर्त्तमान उस **(अर्वाक्)** नीचे अर्थात् जल, स्थलों तथा अन्तरिक्ष में **(रथम्)** रमण करानेवाले विमान आदि रथसमूह को **(नि+आ+यच्छतम्)** अच्छे प्रकार नियम में रखते हैं, वे उषःकाल से युक्त अग्नि, जल तथा उनसे युक्त उक्त रथसमूह को प्रतिदिन सिद्ध करते हैं, वैसे तुम लोग भी सिद्ध करो॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि प्रतिदिन क्रिया और चतुराई तथा अग्नि और जल आदि की उत्तेजना से विमान आदि यानों को सिद्ध करके नित्य उन्नति को प्राप्त होनेवाले धन को प्राप्त होकर सुखयुक्त हों॥१६॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः।

आ न ऊर्जं वहतमश्विना युवम्॥१७॥

यौ। इत्था। श्लोकम्। आ। दिवः। ज्योतिः। जनाय। चक्रथुः। आ। नः। ऊर्जम्। वहतम्। अश्विना। युवम्॥१७॥

पदार्थः-(**यौ**) (**इत्था**) इत्थमस्मै हेतवे (**श्लोकम्**) उत्तमां वाणीम् (**आ**) समन्तात् (**दिवः**) सूर्यात् (**ज्योतिः**) प्रकाशम् (**जनाय**) जनसमूहाय (**चक्रथुः**) कुरुतः (**आ**) सर्वतः (**नः**) अस्मभ्यम् (**ऊर्जम्**) पराक्रममन्नादिकं वा (**वहतम्**) प्रापयतम् (**अश्विना**) अश्विनावग्निवायू (**युवम्**) युवाम्॥१७॥

अन्वयः-हे शिल्पविद्याध्यापकोपदेशकौ! युवं यावश्विनाऽश्विनावित्था जनाय दिवो ज्योतिराचक्रथुः समन्तात् कुरुतस्ताभ्यां नोऽस्मभ्यं श्लोकमूर्जं चावहतम्॥१७॥

भावार्थः–मनुष्यैर्नहि वायुविद्युद्भ्यां विना सूर्यज्योतिर्जायते, न किल तयोर्विद्योपकाराभ्यां विना कस्यचिद् विद्यासिद्धिर्जायत इति वेदितव्यम्॥१७॥

पदार्थः–हे शिल्पविद्या के पढ़ाने और उपदेश करनेहारे विद्वानो! **(युवम्)** तुम लोग जो **(अश्विना)** अग्नि और वायु **(जनाय)** मनुष्य समूह के लिये **(दिवः)** सूर्य्य के **(ज्योतिः)** प्रकाश को **(आ, चक्रथुः)** अच्छे प्रकार सिद्ध करते हैं **(इत्था)** इसलिये **(नः)** हम लोगों के लिये **(श्लोकम्)** उत्तम वाणी और **(ऊर्जम्)** पराक्रम वा अन्नादि पदार्थों को **(आ, वहतम्)** सब प्रकार से प्राप्त कराओ॥१७॥

भावार्थः–मनुष्यों को चाहिये कि पवन और बिजुली के विना सूर्य का प्रकाश नहीं होता और उन दोनों ही के विद्या और उपकार के विना किसी की विद्यासिद्धि नहीं होती है, ऐसा जानें॥१७॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे अग्नि और पवन कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी।
उषर्बुधो वहन्तु सोमपीतये॥१८॥२७॥

आ। इह। देवा। मयःऽभुवा। दस्रा। हिरण्यवर्तनी इति हिरण्यऽवर्तनी। उषःऽबुधः। वहन्तु। सोमऽपीतये॥१८॥

पदार्थः–**(आ)** समन्तात् **(इह)** अस्मिन् संसारे **(देवा)** दिव्यगुणौ **(मयोभुवा)** सुखं भावयितारौ **(दस्रा)** विद्योपयोगं प्राप्नुवन्तावशेषदुःखोपक्षयितारौ वाय्वग्नी **(हिरण्यवर्त्तनी)** हिरण्यं प्रकाशं वर्त्तयन्तौ **(उषर्बुधः)** य उषःकालं बोधयन्ति तान् किरणान् **(वहन्तु)** प्रापयन्तु **(सोमपीतये)** पुष्टिशान्त्यादिगुणयुक्तानां पदार्थानां पानं यस्मिन् व्यवहारे तस्मै॥१८॥

अन्वयः–हे मनुष्या! भवन्तौ यौ देवा मयोभुवा हिरण्यवर्त्तनी दस्राश्विनावुषर्बुधो जनयतस्ताभ्यां सोमपीतये सर्वान् सामर्थ्यमिहावहन्तु॥१८॥

भावार्थः–मनुष्यैर्जातेष्वपि दिवसेष्वग्निवायुभ्यां विना पदार्थभोगाः प्राप्तुं न शक्यास्तस्मादेतन्नित्य–मनुष्ठेयमिति॥१८॥

अत्रोषोऽश्विगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति द्वानवतितमं ९२ सूक्तं सप्तविंशो २७ वर्गश्च समाप्तः॥

पदार्थः–हे मनुष्यो! आप लोग जो **(देवा)** दिव्यगुणयुक्त **(मयोभुवा)** सुख की भावना करानेहारे **(हिरण्यवर्त्तनी)** प्रकाश के बर्त्ताव को रखते और **(दस्रा)** विद्या के उपयोग को प्राप्त हुए समस्त दुःख का विनाश करनेवाले अग्नि, पवन **(उषर्बुधः)** प्रातःकाल की वेला को जतानेहारी सूर्य्य की किरणों को प्रकट

करते हैं, उनसे **(सोमपीतये)** जिस व्यवहार में पुष्टि, शान्त्यादि तथा गुणवाले पदार्थों का पान किया जाता है, उसके लिये सब मनुष्यों को सामर्थ्य **(इह)** इस संसार में **(आवहन्तु)** अच्छे प्रकार प्राप्त करें॥१८॥

भावार्थः-मनुष्यों को चाहिये कि उत्पन्न हुए दिनों में भी अग्नि और पवन के विना पदार्थ भोगना नहीं हो सकता, इससे अग्नि और पवन से उपयोग लेने का पुरुषार्थ नित्य करें॥१८॥

इस सूक्त में उषा और अश्वि पदार्थों के गुणों के वर्णन से पूर्व सूक्त के अर्थ के साथ इस सूक्तार्थ की संगति जाननी चाहिये॥

यह बानवां ९२ सूक्त और सत्ताईसवां २७ वर्ग समाप्त हुआ॥

अथास्य द्वादशर्च्चस्य त्रयोनवततितमस्य सूक्तस्य रहूगणपुत्रो गोतम ऋषिः। अग्नीषोमौ देवते। १ अनुष्टुप्। ३ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। २ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ४ स्वराट् पङ्क्तश्छन्दः। पञ्चमः स्वरः। ५,७ निचृत्त्रिष्टुप्। ६ विराट् त्रिष्टुप्। ८ स्वराट् त्रिष्टुप्। २ त्रिष्टुप् छन्दः। धैवतः स्वरः। ९-११ गायत्री छन्दः। षड्जः स्वरः॥

अथाऽध्यापकपरीक्षकौ प्रति विद्यार्थिभिर्वक्तव्यमुपदिश्यते॥

अब तिरानवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में पढ़ाने और परीक्षा लेनेवालों के प्रति विद्यार्थी लोग क्या-क्या कहें, यह विषय कहा है॥

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम्॥
प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः॥ १॥

अग्नीषोमौ। इमम्। सु। मे। शृणुतम्। वृषणा। हवम्। प्रति। सुऽउक्तानि। हर्यतम्। भवतम्। दाशुषे। मयः॥ १॥

पदार्थः-(**अग्नीषोमौ**) तेजश्चन्द्राविव विज्ञानसोम्यगुणावध्यापकपरीक्षकौ (**इमम्**) अध्ययनजन्यं शास्त्रबोधम् (**सु**) (**मे**) मम (**शृणुतम्**) (**वृषणा**) विद्यासुशिक्षावर्षकौ (**हवम्**) देयं ग्राह्यं विद्याशब्दार्थ-सम्बन्धमयं वाक्यम् (**प्रति**) (**सूक्तानि**) सुष्ठ्वर्था उच्यन्ते येषु गायत्र्यादिछन्दोयुक्तेषु वेदस्थेषु तानि (**हर्य्यतम्**) कामयेथाम् (**भवतम्**) (**दाशुषे**) अध्ययने चित्तं दत्तवते विद्यार्थिने (**मयः**) सुखम्॥ १॥

अन्वयः-हे वृषणावग्नीषोमौ! युवां मे प्रतिसूक्तानीमं हवं सुशृणुतं दाशुषे मह्यं मयो हर्य्यतमेवं विद्याप्रकाशकौ भवतम्॥ १॥

भावार्थः-नहि कस्यापि मनुष्यस्याध्यापनेन परीक्षया च विना विद्यासिद्धिर्जायते नहि पूर्णविद्यया विनाऽध्यापनं परीक्षां च कर्त्तुं शक्नोति। नह्येतया विना सर्वाणि सुखानि जायन्ते तस्मादेतन्नित्यमनुष्ठेयम्॥ १॥

पदार्थः-हे (**वृषणा**) विद्या और उत्तम शिक्षा देनेवाले (**अग्नीषोमौ**) अग्नि और चन्द्र के समान विशेष ज्ञान और शान्ति गुणयुक्त पढ़ाने और परीक्षा लेनेवाले विद्वानो! तुम दोनों (**मे**) मेरा (**प्रतिसूक्तानि**) जिनमें अच्छे-अच्छें अर्थ उच्चारण किये जाते हैं, उन गायत्री आदि छन्दों से युक्त वेदस्थ सूक्तों और (**इमम्**) इस (**हवम्**) ग्रहण करने-कराने योग्य विद्या के शब्द अर्थ और सम्बन्धयुक्त वचन को (**सुशृणुतम्**) अच्छे प्रकार सुनो (**दाशुषे**) और पढ़ने में चित्त देनेवाले मुझ विद्यार्थी के लिये (**मयः**) सुख की (**हर्य्यतम्**) कामना करो, इस प्रकार विद्या के प्रकाशक (**भवतम्**) हूजिये॥ १॥

भावार्थः-किसी मनुष्य को पढ़ाने और परीक्षा के विना विद्या की सिद्धि नहीं होती और कोई मनुष्य पूरी विद्या के विना किसी दूसरे को पढ़ा और उसकी परीक्षा नहीं कर सकता और इस विद्या के विना समस्त सुख नहीं होते, इससे इसका सम्पादन नित्य करें॥१॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

अग्नीषोमा॒ यो अ॒द्य वा॑मि॒दं वचः॑ सप॒र्यति॑।
तस्मै॑ धत्तं सु॒वीर्यं॑ गवां॒ पोषं॒ स्वश्व्यं॑म्॥ २॥

अग्नीषोमा। यः। अ॒द्य। वा॒म्। इ॒दम्। वचः॑। स॒प॒र्यति॑ तस्मै॑। ध॒त्त॒म्। सु॒ऽवीर्य॑म्। गवा॑म्। पोष॑म्। सु॒ऽअश्व्य॑म्॥ २॥

पदार्थः-(**अग्नीषोमा**) अध्यापकसुपरीक्षकौ। अत्र **सुपां सुलुगि**त्याकारादेशः। (**यः**) अध्येता (**अद्य**) (**वाम्**) युवयोः (**इदम्**) (**वचः**) वचनम् (**सपर्य्यति**) (**तस्मै**) (**धत्तम्**) प्रयच्छतम् (**सुवीर्यम्**) शोभनानि वीर्य्याणि यस्माद्विद्याभ्यासात्तम् (**गवाम्**) इन्द्रियाणां पशूनां वा (**पोषम्**) शरीरात्मपुष्टिकारकम् (**स्वश्व्यम्**) शोभनेष्वश्वेषु साधुम्॥२॥

अन्वयः-हे अग्नीषोमावध्यापकसुपरीक्षकौ! योऽद्य वामिदं वचः सपर्य्यति तस्मै स्वश्व्यं सुवीर्य्य गवां पोषं च धत्तम्॥२॥

भावार्थः-यो ब्रह्मचारी विद्यार्थमध्यापकपरीक्षकौ प्रति सुप्रीतिं कृत्वैनौ नित्यं सेवते, स एव महाविद्वान् भूत्वा सर्वाणि सुखानि लभते॥२॥

पदार्थः-हे (**अग्नीषोमा**) पढ़ाने और परीक्षा लेनेवाले विद्वानो! (**यः**) जो पढ़नेवाला (**अद्य**) आज (**वाम्**) तुम्हारे (**इदम्**) इस (**वचः**) विद्या के वचन को (**सपर्य्यति**) सेवे (**तस्मै**) उसके लिये (**स्वश्व्यम्**) जो अच्छे-अच्छे घोड़ों से युक्त (**सुवीर्य्यम्**) उत्तम-उत्तम बल जिस विद्याभ्यास से हों, उस (**गवाम्**) इन्द्रिय और गाय आदि पशुओं के (**पोषम्**) सर्वथा शरीर और आत्मा की पुष्टि करनेहारे सुख को (**धत्तम्**) दीजिये॥२॥

भावार्थः-जो ब्रह्मचारी विद्या के लिये पढ़ाने और परीक्षा करनेवालों के प्रति उत्तम प्रीति को करके और उनकी नित्य सेवा करता है, वही बड़ा विद्वान् होकर सब सुखों को पाता है॥२॥

पुनरेताभ्यां भौतिकसम्बन्धकृत्यमुपदिश्यते॥

अब उक्त अग्नि, सोम शब्दों से भौतिक सम्बन्धी कार्यों का उपदेश अगले मन्त्र में किया है॥

अग्नीषोमा॒ य आहु॑ति॒ यो वां॒ दाशा॒द्धवि॑ष्कृतिम्।

स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत्॥ ३॥

अग्नीषोमा। यः। आऽहुतिम्। यः। वाम्। दाशात्। हविःऽकृतिम्। सः। प्रऽजया। सुऽवीर्यम्। विश्वम्। आयुः। वि। अश्नवत्॥ ३॥

पदार्थः-(**अग्नीषोमा**) अग्निवाय्वोः। अत्र षष्ठीद्विवचनस्य स्थाने डादेशः। (**यः**) सर्वस्य हितं प्रेप्सुर्मनुष्यः (**आहुतिम्**) घृतादिसुसंस्कृताम् (**यः**) यज्ञानुष्ठाता (**वाम्**) एतयोः (**दाशात्**) दाशेद् दद्यात् (**हविष्कृतिम्**) हविषो होतव्यस्य पदार्थस्य कृतिं कारणरूपाम् (**सः**) (**प्रजया**) सुपुत्रादियुक्त्या (**सुवीर्यम्**) सुष्ठु पराक्रमयुक्तम् (**विश्वम्**) समग्रम् (**आयुः**) जीवनम् (**वि**) विविधार्थे (**अश्नवत्**) व्याप्नुयात्। अत्र व्यत्ययेन परस्मैपदं शप् च॥ ३॥

अन्वयः-यो यो मनुष्योऽग्नीषोमयोर्वामेतयोर्मध्ये हविष्कृतिमाहुतिं दाशात् स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत्॥ ३॥

भावार्थः-ये विद्वांसो वायुवृष्टिजलौषधिशुद्ध्यर्थं सुसंस्कृतं हविरग्नौ हुत्वोत्तमान्सोमलतादीन् प्राप्यः तैः प्राणिनः सुखयन्ति च ते शरीरात्मबलयुक्ताः सन्तः पूर्णसुखमायुः प्राप्नुवन्ति नेतरे॥ ३॥

पदार्थः-(**यः**) सबके हित को चाहनेवाला और (**यः**) जो यज्ञ का अनुष्ठान करनेवाला मनुष्य (**अग्नीषोमा**) भौतिक अग्नि और पवन (**वाम्**) इन दोनों के बीच (**हविष्कृतिम्**) होम करने के योग्य पदार्थ का कारणरूप (**आहुतिम्**) घृत आदि उत्तम-उत्तम सुगन्धितादि पदार्थों से युक्त आहुति को (**दाशात्**) देवे (**सः**) वह (**प्रजया**) उत्तम-उत्तम सन्तानयुक्त प्रजा से (**सुवीर्य्यम्**) श्रेष्ठ पराक्रमयुक्त (**विश्वम्**) समग्र (**आयुः**) आयुर्दा को (**व्यश्नवत्**)प्राप्त होवे॥ ३॥

भावार्थः-जो विद्वान् वायु, वृष्टि, जल और ओषधियों की शुद्धि के लिये अच्छे संस्कार किये हुए हवि को अग्नि के बीच होम के श्रेष्ठ सोमलतादि ओषधियों की प्राप्ति कर उनसे प्राणियों को सुख देते हैं, वे शरीर आत्मा के बल से युक्त होते हुए पूर्ण सुख करनेवाली आयु को प्राप्त होते हैं, अन्य नहीं॥ ३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः।
अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः॥ ४॥

अग्नीषोमा। चेति। तत्। वीर्यम्। वाम्। यत्। अमुष्णीतम्। अवसम्। पणिम्। गाः। अव। अतिरतम्। बृसयस्य। शेषः। अविन्दतम्। ज्योतिः। एकम्। बहुऽभ्यः॥ ४॥

पदार्थः-(**अग्नीषोमा**) वायुविद्युतौ (**चेति**) विज्ञातं प्रख्यातमस्ति (**तत्**) (**वीर्यम्**) पृथिव्यादिलोकानां बलम् (**वाम्**) ययोः (**यत्**) (**अमुष्णीतम्**) चोरवद्धरतम् (**अवसम्**) रक्षणादिकम्

(पणिम्) व्यवहारम् **(गाः)** किरणान् **(अव)** **(अतिरतम्)** तमो हिंस्तः। **अवतिरतिरिति वधकर्मसु पठितम्।** (निघं०२.१९) **(बृसयस्य)** आच्छादकस्य। **वस आच्छादन** इत्यस्मात् पृषोदरादित्वादिष्टसिद्धिः। **(शेषः)** अवशिष्टो भागः **(अविन्दतम्)** लम्भयतम् **(ज्योतिः)** दीप्तिम् **(एकम्)** असहायम् **(बहुभ्यः)** अनेकेभ्यः पदार्थेभ्यः॥४॥

अन्वयः-यावग्नीषोमा यदवसं पणिं चामुष्णीतं गा विस्तार्य्य तमोऽवातिरतं बहुभ्य एक ज्योतिरविन्दतं ययोर्बृसयस्य शेषो लोकान् प्राप्नोति तद् वामनयोर्वीर्यं चेति सर्वैविदितमस्ति॥४॥

भावार्थः-मनुष्यैर्यावत्प्रसिद्धं तमस आच्छादकं सर्वलोकप्रकाशकं तेजो जायते तावत्सर्वं कारणभूतयोर्वायुविद्युतोः सकाशाद्भवतीति बोध्यम्॥४॥

पदार्थः-जो **(अग्नीषोमा)** वायु और विद्युत् **(यत्)** जिस **(अवसम्)** रक्षा आदि **(पणिम्)** व्यवहार को **(अमुष्णीतम्)** चोरते प्रसिद्धाप्रसिद्ध ग्रहण करते **(गाः)** सूर्य्य की किरणों का विस्तार कर **(अवातिरतम्)** अन्धकार का विनाश करते **(बहुभ्यः)** अनेकों पदार्थों से **(एकम्)** एक **(ज्योतिः)** सूर्य के प्रकाश को **(अविन्दतम्)** प्राप्त कराते हैं, जिनके **(बृसयस्य)** ढांपनेवाले सूर्य का **(शेषः)** अवशेष भाग लोकों को प्राप्त होता है, **(वाम्)** इनका **(तत्)** वह **(वीर्य्यम्)** पराक्रम **(चेति)** विदित है, सब कोई जानते हैं॥४॥

भावार्थः-मनुष्यों को यह जानना चाहिये कि जितना प्रसिद्ध अन्धकार को ढांप देने और सब लोकों को प्रकाशित करनेहारा तेज होता है, उतना सब कारणरूप पवन और बिजुली की उत्तेजना से होता है॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह उपदेश अगले मन्त्र में किया है॥

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम्।
युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान्॥५॥

युवम्। एतानि। दिवि। रोचनानि। अग्निः। च। सोम। सक्रतू इति सऽक्रतू। अधत्तम्। युवम्। सिन्धून्। अभिऽशस्तेः। अवद्यात्। अग्नीषोमौ। अमुञ्चतम्। गृभीतान्॥५॥

पदार्थः-(**युवम्**) एतौ **(एतानि)** प्रत्यक्षाणि **(दिवि)** सूर्यप्रकाशे **(रोचनानि)** तेजांसि **(अग्निः)** विद्युत् **(च)** सर्वेषां लोकानां समुच्चये **(सोम)** बहुसुखप्रसावको वायुः **(सक्रतू)** समानक्रियौ **(अधत्तम्)** धत्तो धारयतः **(युवम्)** एतौ **(सिन्धून्)** समुद्रादीन् **(अभिशस्तेः)** अभितो हिंसकात् **(अवद्यात्)** निन्दितात्

(अग्नीषोमौ) **(अमुञ्चतम्)** मुञ्चतो मोचयतो वा **(गृभीतान्)** गृहीतान् लोकान्। अत्र गृहधातोर्हस्य भादेशः॥५॥

अन्वयः-युवमेतौ सूक्रतू अग्निः सोम च सोमश्च यानि दिवि रोचनानि तारासमूहे प्रकाशनानि सन्त्येतान्यधत्तं धरतः युवं यौ सिन्धूनधत्तं तान् गृभीतान् सिन्धूस्तावग्नीषोमाववद्यादभिशस्तेर्गर्ह्यादभितो रमणनिरोधकाद्धेतोरमुञ्चतं वर्षणनिमित्तेन तद्गृहीतमम्भः पृथिव्यां पातयतमिति यावत्॥५॥

भावार्थः-मनुष्यैर्वायुविद्युतावेव सर्वलोकसुखधारणादिव्यवहारे हेतू भवत इति बोध्यम्॥५॥

पदार्थः-**(युवम्)** ये **(सुक्रतू)** एकसा काम देनेवाले दो अर्थात् **(अग्निः)** बिजुली **(च)** और **(सोम)** बहुत सुख को उत्पन्न करनेहारा पवन **(दिवि)** तारागण में जो **(रोचनानि)** प्रकाश हैं **(एतानि)** इनको **(अधत्तम्)** धारण करते हैं, **(युवम्)** ये दोनों **(सिन्धून्)** समुद्रों को धारण करते अर्थात् उनके जल को सोखते हैं, उन **(गृभीतान्)** सोखे हुए नदी, समुद्रों को वे **(अग्नीषोमा)** बिजुली और पवन **(अवद्यात्)** निन्दित **(अभिशस्तेः)** उनके प्रवाहरूप रमण को रोकनेहारे हेतु से **(अमुञ्चतम्)** छोड़ते हैं अर्थात् वर्षा के निमित्त से उनके लिये हुए जल को पृथिवी पर छोड़ते हैं॥५॥

भावार्थः-मनुष्यों को जानना चाहिये कि पवन और बिजुली ये ही दोनों सब लोकों के सुख के धारण आदि व्यवहार के कारण हैं॥५॥

पुनस्तौ कि कुरुत इत्युपदिश्यते॥

फिर वे क्या करते हैं, इस विषय को अगले मन्त्र में कहा है॥

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः।

अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम्॥६॥२८॥

आ। अन्यम्। दिवः। मातरिश्वा। जभार। अमथ्नात्। अन्यम्। परि। श्येनः। अद्रेः। अग्नीषोमा। ब्रह्मणा। ववृधाना। उरुम्। यज्ञाय। चक्रथुः। ऊम् इति। लोकम्॥६॥

पदार्थः-**(आ)** समन्तात् **(अन्यम्)** भिन्नमप्रसिद्धम् **(दिवः)** सूर्य्यादेः **(मातरिश्वा)** आकाशशयानो वायुः **(जभार)** हरति। अत्रापि हस्य भः। **(अमथ्नात्)** मथ्नाति **(अन्यम्)** भिन्नमप्रसिद्धं कारणाख्यम् **(परि)** सर्वतः **(श्येनः)** वेगवानश्च इव वर्त्तमानः। **श्येनास इत्यश्वनामसु पठितम्।** (निघं०१.१४) **(अद्रेः)** मेघात् **(अग्नीषोमा)** कारणाख्यौ वायुविद्युतौ **(ब्रह्मणा)** परमेश्वरेण **(वावृधाना)** वर्धमानौ **(उरुम्)** बहुविधम् **(यज्ञाय)** ज्ञानक्रियामयाय यागाय **(चक्रथुः)** कुरुतः **(उ)** वितर्के **(लोकम्)** दृश्यमानं भुवनसमूहम्॥६॥

अन्वयः-हे मनुष्या! यूयं यौ ब्रह्मणा वावृधानाग्नीषोमा यज्ञायोरुं लोकं चक्रथुस्तयोर्मध्यान्मातरिश्वा दिवोऽन्यमाजभार हरति द्वितीयः श्येनोऽग्निरद्रेरन्यमुपर्य्यमथ्नात् सर्वतो मथ्नाति तौ विदित्वा सम्प्रयोजयत॥६॥

भावार्थः-हे मनुष्या! यूयमेतयोर्वायुविद्युतोर्द्वे स्वरूपे स्ते एकं कारणभूतं द्वितीयं कार्यभूतं च तयोर्यत्कारणाख्यं तद्विज्ञानगम्यं यच्च कार्याख्यं तदिन्द्रियग्राह्यमेतेन कार्याख्येन विदितगुणोपकारकृतेन वायुनाऽग्निना वा कारणाख्ये प्रवेशं कुरुतः। अयमेव सुगमो मार्गो यत् कार्यद्वारा कारणे प्रवेश इति विजानीत॥६॥

पदार्थः-हे मनुष्यो! तुम लोग जो **(ब्रह्मणा)** परमेश्वर से **(वावृधाना)** उन्नति को प्राप्त हुए **(अग्नीषोमा)** अग्नि और पवन **(यज्ञाय)** ज्ञान और क्रियामय यज्ञ के लिये **(उरुम्)** बहुत प्रकार **(लोकम्)** जो देखा जाता है, उस लोकसमूह को **(चक्रथुः)** प्रकट करते हैं, उनमें से **(मातरिश्वा)** पवन जो कि आकाश में सोनेवाला है, वह **(दिवः)** सूर्य्य आदि लोक से **(अन्यम्)** और दूसरा अप्रसिद्ध जो कारण लोक है, उसको **(आ, जभार)** धारण करता है तथा **(श्येनः)** वेगवान् घोड़े के समान वर्त्तनेवाला अग्नि **(अद्रेः)** मेघ से **(अमथ्नात्)** मथा करता है, उनको जानकर उपयोग में लाओ॥६॥

भावार्थः-हे मनुष्यो! तुम लोग जो पवन और बिजुली के दो रूप हैं, एक कारण और दूसरा कार्य्य। उनसे जो पहिला है, वह विशेष ज्ञान से जानने योग्य और जो दूसरा है, वह प्रत्यक्ष इन्द्रियों से ग्रहण करने योग्य है। जिसके गुण और उपकार जाने हैं, उस पवन वा अग्नि से कारणरूप में उक्त अग्नि और पवन प्रवेश करते हैं, यही सुगम मार्ग है, जो कार्य के द्वारा कारण में प्रवेश होता है, ऐसा जानो॥६॥

पुनरेतौ किं कुरुत इत्युपदिश्यते॥

फिर वे क्या करते हैं, यह विषय अगले मन्त्र में कहा है॥

अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम्।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः॥७॥

अग्नीषोमा। हविषः। प्रऽस्थितस्य। वीतम्। हर्यतम्। वृषणा। जुषेथाम्। सुऽशर्माणा। सुऽअवसा। हि। भूतम्। अथ। धत्तम्। यजमानाय। शम्। योः॥७॥

पदार्थः-**(अग्नीषोमा)** अग्नीषोमौ प्रसिद्धौ वाय्वग्नी **(हविषः)** प्रक्षिप्तस्य घृतादेर्द्रव्यस्य **(प्रस्थितस्य)** देशान्तरं प्रतिगच्छतः **(वीतम्)** व्याप्नुतः **(हर्य्यतम्)** प्राप्नुतः **(वृषणा)** वृष्टिहेतू **(जुषेथाम्)** जुषेते सेवेते **(सुशर्म्माणा)** सुष्ठु सुखकारिणौ **(स्ववसा)** सुष्ठु रक्षकौ **(हि)** खलु **(भूतम्)** भवतः। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(अथ)** आनन्तर्ये **(धत्तम्)** धरतः। अत्र सर्वत्र लडर्थे लोट्। **(यजमानाय)** जीवाय **(शम्)** सुखम् **(योः)** पदार्थानां पृथक्करणम्। अत्र युधातोर्डोसिः प्रत्ययोऽव्ययत्वं च॥७॥

अन्वयः-हे मनुष्या! यूयं यौ वृषणा सुशर्म्माणाऽग्नीषोमा प्रस्थितस्य हविषो वीतं हर्यतं जुषेथां स्ववसा भूतमथैतस्माद्धि यजमानाय शं धत्तं पदार्थान् योः पृथक् कुरुतस्तौ सम्प्रयोजयत॥७॥

भावार्थः-मनुष्यैरग्नौ यावन्ति सुगन्ध्यादियुक्तानि द्रव्याणि हूयन्ते, तावन्ति वायुना सहाकाशं गत्वा मेघमण्डलस्थं जलं शोधयित्वा सर्वेषां जीवानां सुखहेतुकानि भूत्वा धर्मार्थकाममोक्षसाधकानि भवन्तीति वेद्यम्॥७॥

पदार्थः-हे मनुष्यो! तुम लोग जो **(वृषणा)** वर्षा होने के निमित्त **(सुशर्माणा)** श्रेष्ठ सुख करनेवाले **(अग्नीषोमा)** प्रसिद्ध वायु और अग्नि **(प्रस्थितस्य)** देशान्तर में पहुंचनेवाले **(हविषः)** होमे हुए घी आदि को **(वीतम्)** व्याप्त होते **(हर्य्यतम्)** पाते **(जुषेथाम्)** सेवन करते और **(स्ववसा)** उत्तम रक्षा करनेवाले **(भूतम्)** होते हैं, **(अथ)** इसके पीछे **(हि)** इसी कारण **(यजमानाय)** जीव के लिये अनन्त **(शम्)** सुख को **(धत्तम्)** धारण करते तथा **(योः)** पदार्थों को अलग-अलग करते हैं, उनको अच्छे प्रकार उपयोग में लाओ॥७॥

भावार्थः-मनुष्यों को यह जानना चाहिये कि आग में जितने सुगन्धियुक्त पदार्थ होमे जाते हैं, सब पवन के साथ आकाश में जा मेघमण्डल के जल को शोध और सब जीवों के सुख के हेतु होकर उसके अनन्तर धर्म, अर्थ, काम और मोक्ष की सिद्धि करनेहारे होते हैं॥७॥

एवमेतौ संप्रयुक्तौ किं कुरुत इत्युपदिश्यते॥

ऐसे उत्तमता से काम में लाये हुए ये दोनों क्या करते हैं, यह विषय अगले मन्त्र में कहा है॥

यो अ॒ग्नीषोमा॑ ह॒विषा॑ सप॒र्याद् दे॑व॒द्रीचा॒ मन॑सा॒ यो घृ॒तेन॑।
तस्य॑ व्र॒तं र॑क्षतं पा॒तमंह॑सो वि॒शे जना॑य॒ महि॒ शर्म॑ यच्छतम्॥८॥

यः। अ॒ग्नीषोमा॑। ह॒विषा॑। स॒प॒र्यात्। दे॒व॒द्रीचा॑। मन॑सा। यः। घृ॒तेन॑। तस्य॑। व्र॒तम्। र॒क्ष॒त॒म्। पा॒तम्। अंह॑सः। वि॒शे। जना॑य। महि॑। शर्म॑। य॒च्छ॒त॒म्॥८॥

पदार्थः-**(यः)** विद्वान् मनुष्यः **(अग्नीषोमा)** वाय्वग्नी **(हविषा)** सुसंस्कृतेन हविषा शोधितौ **(सपर्यात्)** सेवेत **(देवद्रीचा)** देवान् विदुषोऽञ्चता सत्कारिणा। **विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये।** (अष्टा०६.३.९२) अनेन देवशब्दस्य टेरद्रिरादेशः। **(मनसा)** स्वान्तेन **(यः)** क्रियाकारी मानवः **(घृतेन)** आज्येनोदकेन वा **(तस्य)** **(व्रतम्)** सत्यभाषणादिशीलम् **(रक्षतम्)** रक्षतः **(पातम्)** पालयतः **(अंहसः)** क्षुज्ज्वरादिरोगात् **(विशे)** प्रजायै **(जनाय)** सेवकाय जीवाय **(महि)** महत्तमं पूजनीयम् **(शर्म)** सुखं गृहं वा **(यच्छतम्)** दत्तः॥८॥

अन्वयः-यो देवद्रीचा मनसा घृतेन हविषाऽग्नीषोमा सपर्याद्यश्चैतद्गुणान् विजानीयात् तस्य द्वयस्य व्रतमिमौ रक्षतमंहसः पातं विशे जनाय महि शर्म यच्छतम्॥८॥

भावार्थः-यो मनुष्योऽग्निहोत्रादिकर्मणा वायुवृष्टिजलशुद्धिद्वारा पदार्थान् पवित्रयति, स प्राणिनः सुखयति॥८॥

पदार्थः-(**यः**) जो विद्वान् मनुष्य (**देवद्रीचा**) उत्तम विद्वानों का सत्कार करते हुए (**मनसा**) मन से वा (**घृतेन**) घी और जल तथा (**हविषा**) अच्छे संस्कार किये हुए हवि से (**अग्निषोमा**) वायु और अग्नि को (**सपर्यात्**) सेवे और (**यः**) जो क्रिया करनेवाला मनुष्य इनके गुणों को जाने (**तस्य**) उन दोनों के (**व्रतम्**) सत्यभाषण आदि शील की ये दोनों (**रक्षतम्**) रक्षा करते (**अंहसः**) क्षुधा और ज्वर आदि रोग से (**पातम्**) नष्ट होने से बचाते (**विशे**) प्रजा और (**जनाय**) सेवक जन के लिये (**महि**) अत्यन्त प्रशंसा करने योग्य (**शर्म्म**) सुख वा घर को (**यच्छतम्**) देते हैं॥८॥

भावार्थः-जो मनुष्य अग्निहोत्र आदि काम से वायु और वर्षा की शुद्धि द्वारा सब वस्तुओं को पवित्र करता है, वह सब प्राणियों को सुख देता है॥८॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः॥९॥

अग्नीषोमा। सऽवेदसा। सहूती इति सऽहूती। वनतम्। गिरः। सम्। देवऽत्रा। बभूवथुः॥९॥

पदार्थः-(**अग्नीषोमा**) यज्ञफलसाधकौ (**सवेदसा**) समानेन हुतद्रव्येण युक्तौ (**सहूती**) समाना हूतिराह्वानं ययोस्तौ (**वनतम्**) संभजतः (**गिरः**) वाणीः (**सम्**) (**देवत्रा**) देवेषु विद्वत्सु दिव्यगुणेषु वा (**बभूवथुः**) भवतः॥९॥

अन्वयः-यो सहूती सवेदसाग्नीषोमा देवत्रा सम्बभूवथुः सम्भवतस्तौ गिरो वनतं भजतः॥९॥

भावार्थः-मनुष्यैर्नहि यज्ञादिक्रियया वायोः शोधनेन विना प्राणिनां सुखं संभवति, तस्मादेतन्नित्यमनुष्ठेयम्॥९॥

पदार्थः-जो (**सहूती**) एक-सी वाणीवाले (**सवेदसा**) बराबर होमे हुए पदार्थ से युक्त (**अग्नीषोमा**) यज्ञफल के सिद्ध करनेहारे अग्नि और पवन (**देवत्रा**) विद्वान् वा दिव्य गुणों में (**सम्बभूवथुः**) संभावित होते हैं, वे (**गिरः**) वाणियों को (**वनतम्**) अच्छे प्रकार सेवते हैं॥९॥

भावार्थः-मनुष्य लोग यज्ञ आदि उत्तम कामों से वायु के शोधे विना प्राणियों को सुख नहीं हो सकता, इससे इसका अनुष्ठान नित्य करें॥९॥

एतदनुष्ठातुः किं जायत इत्युपदिश्यते॥

इसके अनुष्ठान करनेवाले को क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है॥

अग्नीषोमावनेनं वां यो वां घृतेनं दाशति। तस्मै दीदयतं बृहत्॥१०॥

अग्नीषोमौ। अनेनं। वाम्। यः। वाम्। घृतेनं। दाशति। तस्मै। दीदयतम्। बृहत्॥१०॥

पदार्थः-(**अग्नीषोमौ**) विद्युत्पवनौ (**अनेन**) प्रत्यक्षेण (**वाम्**) युवयोर्मध्ये (**यः**) एकः (**वाम्**) एतयोः सकाशात् (**घृतेन**) आज्येनोदकेन वा (**दाशति**) आहुतीर्ददाति (**तस्मै**) (**दीदयतम्**) प्रकाशयतः (**बृहत्**) महत्॥१०॥

अन्वयः-यो वामेतयोर्मध्येऽनेन घृतेनाहुतीर्दाशति वां सकाशादुपकारान् गृह्णाति, तस्मा अग्नीषोमौ बृहद्दीदयतम्॥१०॥

भावार्थः-ये मनुष्याः क्रियायज्ञानुष्ठानं कुर्वन्ति, तेऽस्मिञ्जगति महत्सौभाग्यं प्राप्नुवन्ति॥१०॥

पदार्थः-(**यः**) जो मनुष्य (**वाम्**) इनके बीच (**अनेन**) इस (**घृतेन**) घी वा जल से आहुतियों को देता है वा (**वाम्**) इनकी उत्तेजना से उपकारों को ग्रहण करता है, उसके लिये (**अग्नीषोमा**) बिजुली और पवन (**बृहत्**) बड़े विज्ञान और सुख को (**दीदयतम्**) प्रकाशित करते हैं॥१०॥

भावार्थः-जो मनुष्य क्रियारूपी यज्ञों का अनुष्ठान करते हैं, वे इस संसार में अत्यन्त सौभाग्य को प्राप्त होते हैं॥१०॥

पुनस्तौ किं कुरुत इत्युपदिश्यते॥

फिर वे क्या करते हैं, इस विषय को अगले मन्त्र में कहा है॥

अग्नीषोमाविमानि नो युवं हव्या जुजोषतम्। आ यातमुप नः सचा॥११॥

अग्नीषोमौ। इमानि। नः। युवम्। हव्या। जुजोषतम्। आ। यातम्। उप। नः। सचा॥११॥

पदार्थः-(**अग्नीषौमौ**) सर्वमूर्त्तद्रव्यसंयोगिनौ (**इमानि**) (**नः**) अस्माकम् (**युवम्**) यौ (**हव्या**) दातुमादातुं योग्यानि वस्तूनि (**जुजोषतम्**) अत्यन्तं सेवेते। अत्र **जुषी प्रीतिसेवनयो**रिति धातोः शब्विकरणस्य स्थाने श्लुः। **बहुलं छन्दसी**ति शप् च। (**आ**) समन्तात् (**यातम्**) प्राप्नुतः (**उप**) (**नः**) अस्मान् (**सचा**) यज्ञविज्ञानयुक्तान्॥११॥

अन्वयः-यावग्नीषोमौ नोऽस्माकमिमानि हव्या जुजोषतमत्यन्तं सेवेते तौ सचा नोऽस्मानुपायातम्॥११॥

भावार्थः-यदा यज्ञेन सुगन्धितादिद्रव्ययुक्तावग्निवायू सर्वान् पदार्थानुपागत्य स्पृशतस्तदा सर्वेषां पुष्टिर्जायते॥११॥

पदार्थः-(**युवम्**) जो (**अग्नीषोमौ**) समस्त मूर्त्तिमान् पदार्थों का संयोग करनेहारे अग्नि और पवन (**नः**) हम लोगों के (**इमानि**) इन (**हव्या**) देने-लेने योग्य पदार्थों को (**जुजोषतम्**) बार-बार सेवन करते हैं, वे (**सचा**) यज्ञ के विशेष विचार करने वाले (**नः**) हम लोगों को (**उप, आ, यातम्**) अच्छे प्रकार मिलते हैं॥११॥

भावार्थः-जब यज्ञ से सुगन्धित आदि द्रव्ययुक्त अग्नि, वायु सब पदार्थों के समीप मिलकर उनमें लगते हैं, तब सबकी पुष्टि होती है॥११॥

पुनस्तौ किं कुरुत इत्युपदिश्यते॥

फिर वे क्या करते हैं, इस विषय को अगले मन्त्र में कहा है॥

अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम्॥१२॥२९॥१४॥

अग्नीषोमा। पिपृतम्। अर्वतः। नः। आ। प्यायन्ताम्। उस्रियाः। हव्यऽसूदः। अस्मे इति। बलानि। मघवत्ऽसु। धत्तम्। कृणुतम्। नः। अध्वरम्। श्रुष्टिऽमन्तम्॥१२॥

पदार्थः-(**अग्नीषोमा**) पालनहेतू अग्निवायू इव (**पिपृतम्**) प्रपिपूर्त्तम् (**अर्वतः**) अश्वान् (**नः**) अस्माकम् (**आ**) (**प्यायन्ताम्**) पुष्टा भवन्तु (**उस्रियाः**) गावः (**हव्यसूदः**) हव्यानि दुग्धादीनि क्षरन्ति ताः (**अस्मे**) अस्मभ्यम् (**बलानि**) (**मघवत्सु**) प्रशस्तपूज्यधनयुक्तेषु स्थानेषु व्यवहारेषु विद्वत्सु वा (**धत्तम्**) धरतम् (**कृणुतम्**) कुरुतम् (**नः**) अस्माकम् (**अध्वरम्**) व्यवहारयज्ञम् (**श्रुष्टिमन्तम्**) शीघ्रं बहुसुखहेतुम्॥१२॥

अन्वयः-हे राजप्रजाजनौ! युवामग्नीषोमेव नोऽस्माकमर्वतः पिपृतं यथा हव्यसूद उस्रिया आप्यायन्तां तथा नोऽस्माकं श्रुष्टिमन्तमध्वरं मघवत्सु कृणुतमस्मे बलानि धत्तम्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि वायुविद्युद्भ्यां विना कस्यचिद् बलपुष्टी जायेते तस्मादेते सुविचारेण कार्य्येषूपयोजनीये॥१२॥

अत्र वायुविद्युतोर्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति षष्ठाध्यायस्यैकोनत्रिंशत्तमो वर्गः। प्रथममण्डले चतुर्दशोऽनुवाकस्त्रयोनवतितमं सूक्तं च समाप्तम्॥

पदार्थः-हे राज प्रजा के पुरुषो! तुम (**अग्नीषोमा**) पालन के हेतु अग्नि और पवन के समान (**नः**) हम लोगों के (**अर्वतः**) घोड़ों को (**पिपृतम्**) पालो, जैसे (**हव्यसूदः**) दूध, दही आदि पदार्थों की देनेवाली (**उस्रियाः**) गौ (**आ, प्यायन्ताम्**) पुष्ट हों वैसे (**नः**) हम लोगों के (**श्रुष्टिमन्तम्**) शीघ्र बहुत सुख के हेतु (**अध्वरम्**) व्यवहाररूपी यज्ञ को (**मघवत्सु**) प्रशंसित धनयुक्त स्थान, व्यवहार वा विद्वानों में (**कृणुतम्**) प्रकट करो, (**अस्मे**) हम लोगों के लिये (**बलानि**) बलों को (**धत्तम्**) धारण करो॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पवन और बिजुली के विना किसी की बल और पुष्टि नहीं होती, इससे इनको अच्छे विचार से कामों में लाना चाहिये॥१२॥

इस सूक्त में पवन और बिजुली के गुणवर्णन करने से इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह छठे अध्याय का उनतीसवां २९ वर्ग और प्रथम मण्डल का चौदहवां १४ अनुवाक तथा त्रानवां ९३ सूक्त समाप्त हुआ॥

अथास्य षोडशर्च्चस्य चतुर्नवतितमस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। अग्निर्देवता। १,४,५,७,९,१० निचृज्जगती। १२-१४ विराड् जगती छन्दः। निषादः स्वरः। २,३,१६ त्रिष्टुप्। ६ स्वराट् त्रिष्टुप्। ११ भुरिक् त्रिष्टुप्। ८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। १५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाऽग्निशब्देन विद्वद्भौतिकार्थावुपदिश्येते॥

अब सोलह ऋचावाले चौरानवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि शब्द से विद्वान् और भौतिक अर्थों का उपदेश किया है॥

इ॒मं स्तोम॒मर्ह॑ते जा॒तवे॑दसे॒ रथ॑मिव॒ सं म॑हेमा मनी॒षया॑।
भ॒द्रा हि नः॒ प्रम॑तिरस्य सं॒सद्यग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑॥ १॥

इ॒मम्। स्तोम॑म्। अर्ह॑ते। जा॒तऽवे॑दसे। रथ॑म्ऽइव। सम्। म॒हे॒म॒। म॒नी॒षया॑। भ॒द्रा। हि। नः॒। प्रऽम॑तिः। अ॒स्य॒। स॒म्ऽसदि॑। अग्ने॑। स॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑॥ १॥

पदार्थः-(**इमम्**) प्रत्यक्षं कार्यनिष्ठम् (**स्तोमम्**) गुणकीर्त्तनम् (**अर्हते**) योग्याय (**जातवेदसे**) यो विद्वान् जातं सर्वं वेत्ति तस्मै जातेषु कार्येषु विद्यमानाय वा (**रथमिव**) यथा रमणसाधनं विमानादियानं तथा (**सम्**) (**महेम**) सत्कुर्याम। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। (**मनीषया**) विद्याक्रियासुशिक्षाजातया प्रज्ञया (**भद्रा**) कल्याणकारिणी (**हि**) खलु (**नः**) अस्माकम् (**प्रमतिः**) प्रकृष्टा बुद्धिः (**अस्य**) सभाध्यक्षस्य (**संसदि**) संसीदन्ति विद्वांसो यस्याम् तस्याम् (**अग्ने**) विद्यादिगुणैर्विख्यात (**सख्ये**) सख्युर्भावे कर्मणि वा (**मा**) निषेधे (**रिषाम**) हिंसिता भवेम। अत्रा**न्येषामपी**ति दीर्घः। (**वयम्**) (**तव**)॥१॥

अन्वयः-हे अग्ने! विद्वान् यथा वयं मनीषयाऽर्हते जातवेदसे रथमिवेमं स्तोमं संमहेम वास्य तव सख्ये संसदि नो या भद्रा प्रमतिरस्ति तां हि खलु मा रिषाम तथा त्वं मा रिष॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा शिल्पविद्यासिद्धानि विमानादीनि संसाध्य मित्रान् सत्कुर्युस्तथैव पुरुषार्थेन विदुषः सत्कुर्युः। यदा यदा सभासदः सभायामासीरंस्तदा तदा हठदुराग्रहं त्यक्त्वा सर्वेषां कल्याणकरं कार्य्यं न त्यजेयुः। यद्यदग्न्यादिपदार्थेषु विज्ञानं स्यात्तत्तत्सर्वैः सह मित्रभावमाश्रित्य सर्वेभ्यो निवेदयेयुः। नैतेन विना मनुष्याणां हितं संभवति॥१॥

पदार्थः-हे (**अग्ने**) विद्यादि गुणों से विदित विद्वन्! जैसे (**वयम्**) हम लोग (**मनीषया**) विद्या, क्रिया, और उत्तम शिक्षा से उत्पन्न हुई बुद्धि से (**अर्हते**) योग्य (**जातवेदसे**) जो कि उत्पन्न हुए जगत् के पदार्थों को जानता है वा उत्पन्न हुए कार्य्यरूप द्रव्यों में विद्यमान उस विद्वान् के लिये (**रथमिव**) जैसे विहार करानेहारे विमान आदि यान को वैसे (**इमम्**) कार्यों में प्रवृत्त इस (**स्तोतम्**) गुणकीर्त्तन को (**सं महेम**) प्रशंसित करें वा (**अस्य**) इस (**तव**) आपके (**सख्ये**) मित्रपन के निमित्त (**संसदि**) जिसमें विद्वान्

स्थित होते हैं, उस सभा में **(नः)** हम लोगों को **(भद्रा)** कल्याण करनेवाली **(प्रमतिः)** प्रबल बुद्धि है उसको **(हि)** ही **(मा, रिषामा)** मत नष्ट करें, वैसे आप भी न नष्ट करें॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे विद्या से सिद्ध होते हुए विमानों को सिद्ध कर मित्रों का सत्कार करें, वैसे ही पुरुषार्थ से विद्वानों का भी सत्कार करें। जब-जब सभासद् जन सभा में बैठें तब-तब हठ और दुराग्रह को छोड़ सबके सुख करने योग्य काम को न छोड़ें। जो-जो अग्नि आदि पदार्थों में विज्ञान हो उस-उस को सबके साथ मित्रपन का आश्रय करके और सबके लिये दें, क्योंकि इसके विना मनुष्यों के हित की संभावना नहीं होती॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

यस्मै॒ त्वमा॒यज॑से॒ स सा॑धत्यनु॒र्वा क्षे॑ति॒ दध॑ते सु॒वीर्य॑म्।
स तू॑ताव॒ नैन॑मश्नोत्यंहु॒तिरग्ने॑ सु॒ख्ये मा रि॑षामा व॒यं तव॑॥२॥

यस्मै॑। त्वम्। आ॒ऽयज॑से। सः। सा॒ध॒ति॒। अ॒नु॒र्वा। क्षे॒ति॒। दध॑ते। सु॒ऽवीर्य॑म्। सः। तू॒ता॒व॒। न। ए॒न॒म्। अ॒श्नो॒ति॒। अं॒हु॒तिः। अग्ने॑। सु॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑॥२॥

पदार्थः-**(यस्मै)** जीवाय **(त्वम्)** **(आयजसे)** समन्तात् सुखं ददते **(सः)** **(साधति)** साध्नोति। विकरणव्यत्ययेनात्र श्नोः स्थाने शप्। **(अनर्वा)** अविद्यमानाश्वो रथ इव **(क्षेति)** क्षयति निवसति। अत्र **बहुलं छन्दसी**ति विकरणस्य लुक् **(दधते)** **(सुवीर्यम्)** शोभनानि वीर्याणि यस्मिन् सखीनां कर्मणि तत् **(सः)** **(तूताव)** वर्धयति। अत्रान्तर्गतो ण्यर्थः। **तुजादीनां दीर्घोऽभ्यासस्ये**ति दीर्घः। **(न)** निषेधे **(एनम्)** पूर्वोक्तगुणम्। **(अश्नोति)** व्याप्नोति व्यत्येयनात्र परस्मैपदम्। **(अंहतिः)** दारिद्र्यम् **(अग्ने, सख्ये, मा, रिषाम, वयम्, तव)** इति पूर्ववत्॥२॥

अन्वयः-हे अग्ने! अनर्वेव त्वं यस्मा आयजसे भवान् जीवाय रक्षणं साधति, स सुवीर्यं दधते स तूताव चैनमंहतिर्नाश्नोति स सुखे क्षेति। ईदृशस्य तव सख्ये वयं मा रिषाम॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विदुषां सभायामग्निविद्यायां वा मित्रतामाचरन्ति, ते पूर्णं शरीरात्मबलं प्राप्य सुखसम्पन्ना भूत्वा निवसन्ति नेतरे॥२॥

पदार्थः-हे **(अग्ने)** सब विद्या के विशेष जनानेवाले विद्वान्! **(अनर्वा)** विना घोड़ों के अग्न्यादिकों से चलाये हुए विमान आदि यान के समान **(त्वम्)** आप **(यस्मै)** जिस **(आयजसे)** सर्वथा सुख को देनेहारे जीव के लिये रक्षा को **(साधति)** सिद्ध करते हो **(सः)** वह **(सुवीर्य्यम्)** जिन मित्रों के काम में अच्छे-अच्छे पराक्रम हैं, उनको **(दधते)** धारण करता और वह **(तूताव)** उस को बढ़ाता भी है, **(एनम्)** इस उत्तम गुणयुक्त पुरुष को **(अंहतिः)** दरिद्रता **(न, अश्नोति)** नहीं प्राप्त होती, **(सः)** वह

(क्षेति) सुख में रहता है, ऐसे **(तव)** आपके **(सख्ये)** मित्रपन में **(वयम्)** हम लोग **(मा, रिषाम)** दुःखी न हों॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वानों की सभा वा अग्निविद्या में मित्रपन प्रसिद्ध करते हैं, वे पूरे शरीर तथा आत्मा के बल को पाकर सुखयुक्त रहते हैं, अन्य नहीं॥२॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम्।
त्वमादित्याँ आ वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव॥३॥

शकेम। त्वा। समऽइधम्। साधय। धियः। त्वे इति। देवाः। हविः। अदन्ति। आऽहुतम्। त्वम्। आदित्यान्। आ। वह। तान्। हि। उश्मसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥३॥

पदार्थः-(**शकेम**) शक्नुयाम (**त्वा**) त्वाम् (**समिधम्**) सम्यगिध्यते यया तां क्रियाम् (**साधय**) अत्रा**न्येषामपी**ति दीर्घः। (**धियः**) प्रज्ञाः कर्माणि वा (**त्वे**) त्वयि (**देवाः**) विद्वांसः (**हविः**) अत्तुमर्हमन्नम् (**अदन्ति**) भुञ्जते (**आहुतम्**) समन्तात् स्वीकृतम् (**त्वम्**) सभाद्यध्यक्षः (**आदित्यान्**) अष्टचत्वारिंशद्-वर्षकृतब्रह्मचर्य्यान् (**आ**) (**वह**) प्राप्नुहि (**तान्**) (**हि**) खलु (**उश्मसि**) कामयेमहि। (**अग्ने, सख्ये, मा, रिषाम, वयं, तव**) इति पूर्ववत्॥३॥

अन्वयः-हे अग्ने! वयं त्वाऽऽश्रित्य समिधं कर्त्तुं शकेम त्वं नो धियः साधय त्वे सति देवा आहुतं हविरदन्त्यतस्त्वमादित्यानावह तान् हि वयमुश्मसीदृशस्य तव सख्ये वयं मा रिषाम॥३॥

भावार्थः-ये मनुष्या विदुषां सङ्गमाश्रित्य विद्यामग्निकार्य्याणि च साद्धुं सहनशीलतां दधते, ते प्रज्ञाक्रियावन्तो भूत्वा सुखिनो भवन्ति॥३॥

पदार्थः-हे (**अग्ने**) सब विद्याओं में प्रवीण सभाध्यक्ष! (**वयम्**) हम लोग (**त्वा**) आपका आश्रय लेकर (**समिधम्**) जिससे अच्छे प्रकार प्रकाश होता है, उस क्रिया को (**शकेम**) कर सकें, (**त्वम्**) आप हम लोगों की (**धियः**) बुद्धि वा कर्मों को (**साधय**) सिद्ध कीजिये, (**त्वे**) आपके होते (**देवाः**) विद्वान् लोग (**आहुतम्**) अच्छे प्रकार स्वीकार किये हुए (**हविः**) खाने के योग्य अन्न का (**अदन्ति**) भोजन करते हैं, इससे आप (**आदित्यान्**) अड़तालीस वर्ष ब्रह्मचर्य्य को किये हुए ब्रह्मचारियों को (**आ वह**) प्राप्त कीजिये, (**तान्**) उनको (**हि**) ही हम लोग (**उश्मसि**) चाहते हैं, ऐसे (**तव**) आपके (**सख्ये**) मित्रपन में हम लोग (**मा, रिषाम**) दुःखी न हों॥३॥

भावार्थः–जो मनुष्य विद्वानों के सङ्ग का आश्रय लेकर विद्या और अग्निकार्यों के सिद्ध करने के लिये सहनशीलता को धारण करते हैं, वे प्रबल विज्ञान और अनेक क्रियाओं से युक्त होकर सुखी होते हैं॥३॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम्।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव॥४॥

भराम। इध्मम्। कृणवाम। हवींषि। ते। चितयन्तः। पर्वणाऽपर्वणा। वयम्। जीवातवे। प्रऽतरम्। साधय। धियः। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥४॥

पदार्थः–(**भराम**) हरेम। अत्र हस्य भत्वम्। (**इध्मम्**) इन्धनम् (**कृणवाम**) कुर्याम। अत्रा**न्येषामपी**ति दीर्घः। (**हवींषि**) यज्ञार्थानि द्रव्याणि (**ते**) तुभ्यमस्मै वा (**चितयन्तः**) गुणानां चितिं कुर्वन्तः (**पर्वणापर्वणा**) पूर्णेन पूर्णेन साधनेन। अत्र **नित्यवीप्सयो**रिति द्विर्वचनम्। (**वयम्**) (**जीवातवे**) जीवनाय (**प्रतरम्**) प्रकृष्टम् (**साधय**) अत्रा**न्येषामपी**ति दीर्घः। (**धियः**) प्रज्ञाः कर्माणि वा (**अग्ने, सख्ये०**) इति पूर्ववत्॥४॥

अन्वयः–हे अग्ने! पर्वणापर्वणा चितयन्तो वयं ते हवींषि कृणवामेध्मं च भराम त्वं जीवातवे धियः प्रतरं साधयेदृशस्य तव सख्ये वयं मा रिषाम॥४॥

भावार्थः–अत्र श्लेषालङ्कारः। सेनासभाप्रजास्थैः पुरुषैर्येन सज्जनेन प्रज्ञा पुरुषार्थाश्च वर्द्धेरंस्तदर्थं सर्वे संभाराः संसाधनीयास्तेन सह मित्रता केनापि नैव त्यक्तव्या॥४॥

पदार्थः–हे (**अग्ने**) विद्वन्! (**पर्वणापर्वणा**) पूरे-पूरे साधन से (**चितयन्तः**) गुणों को चुनते हुए (**वयम्**) हम लोग (**ते**) आपके लिये वा इस अग्नि के लिये (**हवींषि**) यज्ञ के योग्य जो पदार्थ हैं, उनको अच्छे प्रकार (**कृणवाम**) करें और (**इध्मम्**) ईंधन (**भराम**) लावें, आप (**जीवातवे**) हमारे जीवन के लिये (**धियः**) उत्तम बुद्धि वा कर्मों को (**प्रतरम्**) अति उत्तमता जैसे हो, वैसे (**साधय**) सिद्ध करो, ऐसे (**तव**) आपके वा (**अग्ने**) इस भौतिक अग्नि के (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) मत दुःखी हों॥४॥

भावार्थः–इस मन्त्र में श्लेषालङ्कार है। सेना, सभा और प्रजा के जनों में रहनेहारे पुरुषों को चाहिये कि जिस सज्जन पुरुष से बुद्धि वा पुरुषार्थ बढ़ें, उसके लिये सब सामग्री अच्छी सिद्ध करें और उस पुरुष के साथ मित्रता को कोई भी न छोड़े॥४॥

अथेश्वरसभाध्यक्षगुणा उपदिश्यन्ते॥

अब ईश्वर और सभाध्यक्ष के गुणों का उपदेश अगले मन्त्र में करते हैं॥

विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदुक्तुभिः।
चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव॥५॥३०॥

विशाम्। गोपाः। अस्य। चरन्ति। जन्तवः। द्विऽपत्। च। यत्। उत। चतुःऽपत्। अक्तुऽभिः। चित्रः। प्रऽकेतः। उषसः। महान्। असि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥५॥

पदार्थः- (**विशाम्**) प्रजानाम् (**गोपाः**) रक्षका गुणाः (**अस्य**) जगदीश्वरस्य सृष्टौ सभाद्यध्यक्षस्य राज्ये वा (**चरन्ति**) प्रवर्त्तन्ते (**जन्तवः**) मनुष्याः (**द्विपत्**) द्वौ पादौ यस्य। अत्र द्विपच्चतुष्पदित्युभयत्र द्विपाच्चतुष्पादाविति भवितव्येऽयस्मयादित्वाद्धसंज्ञा भत्वात् पादः पदिति पद्भावः। (**च**) अपादः सर्पादयोऽपि (**यत्**) ये (**उत**) अपि (**चतुष्पत्**) चत्वारः पादा यस्य (**अक्तुभिः**) प्रसिद्धैः कर्मभिर्मार्गैः प्रसिद्धाभी रात्रिभिर्वा (**चित्रः**) अद्भुतगुणकर्मस्वभावः (**प्रकेतः**) प्रज्ञापकः (**उषसः**) दिवसान् (**महान्**) (**असि**) अस्ति वा (**अग्ने**) विज्ञापक। (**सख्ये०**) इति पूर्ववत्॥५॥

अन्वयः-हे अग्ने! तवास्य विशां यद्ये गोपा जन्तवोऽक्तुभिरुषसश्चरन्ति। ये द्विपच्चोतापि चतुष्पच्चरन्ति यश्चित्रः प्रकेतो महांस्त्वमसि तस्य तव सख्ये वयं मा रिषाम॥५॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैः किल यस्य परमेश्वरस्य सभाध्यक्षस्य विदुषो वा महत्त्वेन कार्य्यजगदुत्पत्तिस्थितिभङ्गा जायन्ते तस्य मित्रभावे कर्मणि वा कदाचिद्विघ्नो न कर्त्तव्यः॥५॥

पदार्थः-हे (**अग्ने**) उत्तम सुखों के समझानेवाले सभा आदि कामों के अध्यक्ष! आपके राज्य में वा उत्तम सुखों का विज्ञान करानेवाले (**अस्य**) इस जगदीश्वर की सृष्टि में (**विशाम्**) प्रजाजनों के (**यत्**) जो (**गोपाः**) पालनेहारे गुण वा (**जन्तवः**) मनुष्य (**चरन्ति**) विचरते हैं वा (**अक्तुभिः**) प्रसिद्ध कर्म, प्रसिद्ध मार्ग और प्रसिद्ध रात्रियों के साथ (**उषसः**) दिनों को प्राप्त होते हैं वा जो (**द्विपत्**) दो पगवाले जीव (**च**) वा पगहीन सर्प आदि (**उत**) और (**चतुष्पत्**) चौपाये पशु आदि विचरते हैं तथा जो (**चित्रः**) अद्भुत गुणकर्मस्वभावान् (**प्रकेतः**) सब वस्तुओं को जनाते हुए जगदीश्वर वा सभाध्यक्ष आप (**महान्**) उत्तमोत्तम (**असि**) हैं, उन (**तव**) आप के (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) बेमन कभी न हों॥५॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को चाहिये कि जिस जगदीश्वर वा सभाध्यक्ष विद्वान् के बड़प्पन से जगत् की उत्पत्ति, पालना और भङ्ग होते हैं, उसके मित्रपन वा मित्र के काम में कभी विघ्न न करें॥५॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे ईश्वर और सभाध्यक्ष कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव॥६॥

त्वम्। अध्वर्युः। उत। होता। असि। पूर्व्यः। प्रऽशास्ता। पोता। जनुषा। पुरःऽहितः। विश्वा। विद्वान्। आर्त्विज्या। धीर। पुष्यसि। अग्ने। सख्ये। मा। रिषाम्। वयम्। तव॥६॥

पदार्थः-(**त्वम्**) (**अध्वर्युः**) अध्वरस्य योजको नेता कामयिता वा। अत्राध्वरशब्दोपपदाद् युजधातोर्बाहुलकात् क्युः प्रत्ययष्टिलोपश्च। **अध्वर्युः। अध्वर्युरध्वरयुः। अध्वरं युनक्ति। अध्वरस्य नेता। अध्वरं कामयत इति वा। अपि वाधीयाने युरुपबन्धः। अध्वर इति यज्ञनाम। ध्वरतिर्हिंसाकर्मा। तत्प्रतिषेधः।** (निरु०१.८) (**उत**) अपि (**होता**) दाता खल्वादाता (**असि**) (**पूर्व्यः**) पूर्वैः कृत इष्टः (**प्रशास्ता**) धर्मसुशिक्षोपदेशप्रचारकः (**पोता**) पवित्रः पवित्रकर्त्ता (**जनुषा**) जातेन जगता सह (**पुरोहितः**) हितप्रसाधकः (**विश्वा**) समग्राणि (**विद्वान्**) यो वेत्ति सः (**आर्त्विज्या**) ऋत्विजां गुणप्रकाशकानि कर्माणि (**धीर**) धारणादिगुणयुक्त (**पुष्यसि**) पोषयसि वा (**अग्ने**) (**सख्ये०**) [इति पूर्ववत्]॥६॥

अन्वयः-हे धीराग्ने! यतः पूर्व्योऽध्वर्युर्होता प्रशास्ता पोता पुरोहितो विद्वांस्त्वमस्युतापि जनुषा विश्वार्त्विज्या पुष्यसि, तस्मात्तव सख्ये वयं मा रिषाम॥६॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि सर्वाधिष्ठात्रा जगदीश्वरेण विद्वद्भिर्वा विना जगतः पालनादीनि संभवन्ति, तस्माज्जनैस्तस्याहर्निशमुपासनमेतेषां सङ्गं च कृत्वा सुखयितव्यम्॥६॥

पदार्थः-हे (**धीर**) धारणा आदि गुणयुक्त! (**अग्ने**) उत्तम ज्ञान देनेवाले परमेश्वर वा सभाध्यक्ष! जिस कारण (**पूर्व्यः**) पिछले महाशयों के किये और चाहे हुए (**अध्वर्युः**) यज्ञ के यथोक्त व्यवहार से युक्त करने, वर्त्तने और चाहने (**होता**) देने-लेने (**प्रशास्ता**) धर्म, उत्तम शिक्षा और उपदेश का प्रचार करने (**पोता**) पवित्र और दूसरों को पवित्र करने (**पुरोहितः**) हित प्रसिद्ध करने और (**विद्वान्**) यथावत् जाननेहारे (**त्वम्**) आप (**असि**) हैं (**उत**) और (**जनुषा**) उत्पन्न हुए जगत् के साथ (**विश्वा**) समग्र (**आर्त्विज्या**) ऋत्विजों के गुणप्रकाशक कामों को (**पुष्यसि**) दृढ़ करते-कराते हैं, इससे (**तव**) आपके (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) दुःखी कभी न होवें॥६॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। सबके अधिष्ठाता जगदीश्वर वा विद्वानों के विना जगत् के पालने आदि व्यवहारों के होने का संभव नहीं होता, इससे मनुष्यों को चाहिये कि दिन-रात ईश्वर की उपासना और इन विद्वानों का संग करके सुखी हों॥६॥

पुनः सभाध्यक्षभौतिकाग्नी कीदृशावित्युपदिश्यते॥

फिर सभाध्यक्ष और भौतिक अग्नि कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे।
रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥७॥

यः। विश्वतः। सुऽप्रतीकः। सऽदृङ्। असि। दूरे। चित्। सन्। तळित्ऽइव। अति। रोचसे। रात्र्याः। चित्। अन्धः। अति। देव। पश्यसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥७॥

पदार्थः-(**यः**) सभापतिः शिल्पविद्यासाधको वा (**विश्वतः**) सर्वतः (**सुप्रतीकः**) सुष्ठु प्रतीतिकारकः (**सदृङ्**) समानदर्शनः (**असि**) (**दूरे**) (**चित्**) एव (**सन्**) (**तडिदिव**) यथा विद्युत्तथा (**अति**) (**रोचसे**) (**रात्र्याः**) (**चित्**) इव (**अन्धः**) नेत्रहीनः (**अति**) (**देव**) सत्यप्रकाशक (**पश्यसि**) (**अग्ने**) (**सख्ये०**) इति पूर्ववत्॥७॥

अन्वयः-हे देवाग्ने! त्वं यथा यः सदृङ् सुप्रतीकोऽसि दूरे चित्सन् सूर्यरूपेण विश्वतस्तडिदिवाऽतिरोचसे येन विना रात्र्या मध्येऽन्धश्चिदिवातिपश्यसि तस्य तव सख्ये वयं मा रिषाम॥७॥

भावार्थः-अत्र श्लेषालङ्कारः। दूरस्थोऽपि सभाध्यक्षो न्यायव्यवस्थाप्रकाशेन यथा विद्युत्सूर्यो वा स्वप्रकाशेन मूर्त्तद्रव्याणि प्रकाशयति तथा गुणहीनान् प्राणिनः प्रकाशयति तेन सह केन विदुषा मित्रता न कार्याऽपि तु सर्वैः कर्त्तव्येति॥७॥

पदार्थः-हे (**देव**) सत्य के प्रकाश करने और (**अग्ने**) समस्त ज्ञान देनेहारे सभाध्यक्ष! जैसे (**यः**) जो (**सदृङ्**) एक से देखनेवाले (**त्वम्**) आप (**सुप्रतीकः**) उत्तम प्रतीति करानेहारे (**असि**) हैं वा मूर्तिमान् पदार्थों को प्रकाशित कराने (**दूरे, चित्**) दूर ही में (**सन्**) प्रकट होते हुए सूर्य्यरूप से जैसे (**तडिदिव**) बिजुली चमके वैसे (**विश्वतः**) सब ओर से (**अति**) अत्यन्त (**रोचसे**) रुचते हैं तथा भौतिक अग्नि सूर्य्यरूप से दूर ही में प्रकट होता हुआ अत्यन्त रुचता है कि जिसके विना (**रात्र्याः**) रात्रि के बीच (**अन्धः चित्**) अन्धे ही के समान (**अति, पश्यसि**) अत्यन्त देखते-दिखलाते हैं, उस अग्नि के वा (**तव**) आपके (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) प्रीतिरहित कभी न हों॥७॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं।[३] दूरस्थ भी सभाध्यक्ष न्यायव्यवस्थाप्रकाश से जैसे बिजुली वा सूर्य्य मूर्त्तिमान् पदार्थों को प्रकाशित करता है, वैसे गुणहीन प्राणियों को अपने प्रकाश से प्रकाशित करता है, उसके साथ वा उसमें किस विद्वान् को मित्रता न करनी चाहिये, किन्तु सबको करना चाहिये॥७॥

---

३. संस्कृत भावार्थ में केवल श्लेषालङ्कार है, जबकि हिन्दी में उपमा का भी उल्लेख है। सं०

पुनः शिल्पिभौतिकाग्निकर्माण्युपदिश्यन्ते॥

अब शिल्पी और भौतिक अग्नि के कामों का उपदेश किया है॥

पूर्वो॑ देवा भवतु सुन्व॒तो रथो॒ऽस्माक॒ं शंसो॑ अ॒भ्य॑स्तु दू॒ढ्य॑:।
तदा जा॑नीतो॒त पु॑ष्यता॒ वचोऽग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑॥८॥

पूर्व॑:। दे॒वा॒:। भ॒व॒तु॒। सु॒न्व॒तः। रथ॑:। अ॒स्माक॑म्। शंस॑:। अ॒भि। अ॒स्तु॒। दु॒:ऽध्य॑:। तत्। आ। जा॒नी॒त॒। उ॒त। पु॒ष्य॒त॒। वच॑:। अग्ने॑। स॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑॥८॥

पदार्थः-(**पूर्वः**) प्रथमः सुखकारी (**देवाः**) विद्वांसः (**भवतु**) (**सुन्वतः**) सुखाभिषवकर्त्तुः (**रथः**) विमानादियानम् (**अस्माकम्**) शिल्पविद्याजिज्ञासूनाम् (**शंसः**) शस्यते यः सः (**अभि**) आभिमुख्ये (**अस्तु**) (**दूढ्यः**) अनधिकारिभिर्दुःखेन ध्यातुं योग्यः। अत्र दुरुपपदाद् ध्यैधातो**र्घञर्थे कविधानमि**ति कः प्रत्ययः। दुरुपसर्ग्गस्योकारादेश उत्तरपदस्य ष्टुत्वञ्च पृषोदरादित्वात्। (**तत्**) विद्यासुशिक्षायुक्तम् (**आ**) (**जानीत**) (**उत**) अपि (**पुष्यत**) **अन्येषामपी**ति दीर्घः। (**वचः**) वचनम् (**अग्ने, सख्ये०**) इत्यादि पूर्ववत्॥८॥

अन्वयः-हे देवा विद्वांसो! यूयं येनाऽस्माकं पूर्वो रथो दूढ्यो भवतु पूर्वो दूढ्यं शंसश्चाभ्यस्तु तद्वच आजानीत। उतापि तेन स्वयं पुष्यताऽस्मान् पोषयत च। हे अग्ने परमशिल्पिन्! सुन्वतस्तवास्याग्नेर्वा सख्ये वयं मा रिषाम॥८॥

भावार्थः-अत्र श्लेषवाचकलुप्तोपमालङ्कारौ। हे विद्वांसो! येन प्रकारेणमनुष्येष्वात्मशिल्पव्यवहारविद्याः प्रकाशिता भूत्वा सुखोन्नतिः स्यात् तथा प्रयतध्वम्॥८॥

पदार्थः-हे (**देवाः**) विद्वानो! तुम जिससे (**अस्माकम्**) हम लोग जो कि शिल्पविद्या को जानने की इच्छा करनेहारे हैं, उनका (**पूर्वः**) प्रथम सुख करनेहारा (**रथः**) विमानादि यान (**दूढ्यः**) जिनको अधिकार नहीं है, दुःखपूर्वक विचारने योग्य (**भवतु**) हो तथा उक्त गुणवाला रथ (**शंसः**) प्रशंसनीय (**अभि**) आगे (**अस्तु**) हो, (**तत्**) उस विद्या और उत्तम शिक्षा से युक्त (**वचः**) वचन की (**आ, जानीत**) आज्ञा देओ (**उत**) और उसी से आप (**पुष्यत**) पुष्ट होओ तथा हम लोगों को पुष्ट करो। हे (**अग्ने**) उत्तम शिल्प विद्या के जाननेहारे परमप्रवीण! (**सुन्वतः**) सुख का निचोड़ करते हुए (**तव**) आपके वा इस भौतिक अग्नि के (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) दुःखी कभी न हों॥८॥

भावार्थः-इस मन्त्र में श्लेष और वाचकलुप्तोपमालङ्कार हैं। हे विद्वानो! जिस ढंग से मनुष्यों में आत्मज्ञान और शिल्पव्यवहार की विद्या प्रकाशित होकर सुख की उन्नति हो, वैसा यत्न करो॥८॥

अथ सभासेनाशालाद्यध्यक्षगुणा उपदिश्यन्ते॥

अब सभा, सेना और शाला आदि के अध्यक्षों के गुणों का उपदेश किया है॥

व॒धैर्दु॒:शंसा॒ँ अप॑ दू॒ढ्यो॑ जहि दू॒रे वा॒ ये अन्ति॑ वा॒ के चि॑दु॒त्रिण॑:।

अथा॑ य॒ज्ञाय॑ गृण॒ते सु॒गं कृ॒ध्यग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑॥९॥

व॒धैः। दु॒ःऽशंसा॑न्। अप॑। दु॒ःऽध्यः॑। ज॒हि॒। दू॒रे। वा॒। ये। अन्ति॑। वा॒। के। चि॒त्। अ॒त्रिण॑ः। अथ॑। य॒ज्ञाय॑। गृ॒ण॒ते। सु॒ऽगम्। कृ॒धि॒। अग्ने॑। स॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑॥९॥

पदार्थः-(**वधैः**) ताडनैः (**दुःशंसान्**) दुष्टाः शंसा शासनानि येषां तान् (**अप**) निवारणे (**दूढ्यः**) दुष्टधियः। पूर्ववदस्य सिद्धिः। (**जहि**) (**दूरे**) (**वा**) (**ये**) (**अन्ति**) अन्तिके (**वा**) पक्षान्तरे (**के**) (**चित्**) अपि (**अत्रिणः**) शत्रवः (**अथ**) आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। (**यज्ञाय**) क्रियामयाय यागाय (**गृणते**) विद्याप्रशंसां कुर्वते पुरुषाय (**सुगम्**) विद्यां गच्छन्ति प्राप्नुवन्ति यस्मिन् कर्मणि (**कृधि**) कुरु (**अग्ने**) विद्याविज्ञापक सभासेनाशालाऽध्यक्ष (**सख्ये०**) इति पूर्ववत्॥९॥

अन्वयः-हे अग्ने सभासेनाशालाध्यक्ष विद्वन्! स त्वं दूढ्यो दुःशंसान् दस्यवादीनत्रिणो मनुष्यान् वधैरपजहि ये शरीरेणात्मभावेन वा दूरे वान्ति केचिद्वर्त्तन्ते तानपि सुशिक्षया वधैर्वाऽपजहि। एवं कृत्वाऽथ यज्ञाय गृणते पुरुषाय वा सुगं कृधि तस्मादीदृशस्य तव सख्ये वयं मा रिषाम॥९॥

भावार्थः-सभाध्यक्षादिभिः प्रयत्नेन प्रजायां दुष्टोपदेशपठनपाठनादीनि कर्माणि निवार्य दूरसमीपस्थान् मनुष्यान् मित्रवन्मत्वा सर्वथाऽविरोधः सम्पादनीयः, येन परस्परं निश्चलानन्दो वर्धेत॥९॥

पदार्थः-हे सभा, सेना और शाला आदि के अध्यक्ष विद्वान्! आप जैसे (**दूढ्यः**) दुष्ट बुद्धियों और (**दुःशंसान्**) जिनकी दुःख देनेहारी सिखावटें हैं, उन डाकू आदि (**अत्रिणः**) शत्रुजनों को (**वधैः**) ताड़नाओं से (**अप, जहि**) अपघात अर्थात् दुर्गति से दुःख देओ और शरीर (**वा**) वा आत्मभाव से (**दूरे**) दूर (**वा**) अथवा (**अन्ति**) समीप में (**ये**) जो (**केचित्**) कोई अधर्मी शत्रु वर्त्तमान हों, उनको (**अपि**) भी अच्छी शिक्षा वा प्रबल ताड़नाओं से सीधा करो। ऐसे करके (**अथ**) पीछे (**यज्ञाय**) क्रियामय यज्ञ के लिये (**गृणते**) विद्या की प्रशंसा करते हुए पुरुष के योग्य (**सुगम्**) जिस काम में विद्या पहुंचती है, उसको (**कृधि**) कीजिये, इस कारण ऐसे समर्थ (**तव**) आपके (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) मत दुःख पावें॥९॥

भावार्थः-सभाध्यक्षादिकों को चाहिये कि उत्तम यत्न के साथ प्रजा में अयोग्य उपदेशों के पढ़ने-पढ़ाने आदि कामों को निवार के दूरस्थ मनुष्यों को मित्र के समान मान के सब प्रकार से प्रेमभाव उत्पन्न करें, जिससे परस्पर निश्चल आनन्द बढ़े॥९॥

अथ शिल्प्यग्निगुणा उपदिश्यन्ते॥

अब शिल्पी और भौतिक अग्नि के गुणों का उपदेश किया है॥

यद॑यु॒क्था अरु॒षा रोहि॑ता॒ रथे॒ वात॑जूता वृष॒भस्ये॑व ते॒ रवः॑।

आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव॥ १०॥ ३१॥

यत्। अयुक्थाः। अरुषा। रोहिता। रथे। वातऽजूता। वृषभस्यऽइव। ते। रवः। आत्। इन्वसि। वनिनः। धूमऽकेतुना। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥ १०॥

पदार्थः-(**यत्**) ये (**अयुक्थाः**) योजयसि (**अरुषा**) अहिंसकावश्वौ (**रोहिता**) दृढबलादिगुणोपेतौ। अत्रोभयत्र द्विवचनस्याकारदेशः। (**रथे**) विमानादौ याने (**वातजूता**) वायुवद्वेगौ। अत्राप्याकारादेशः। (**वृषभस्येव**) यथा वोढुर्बलीवर्दस्य तथा (**ते**) तवैतस्य वा (**रवः**) ध्वनिः (**आत्**) अनन्तरे (**इन्वसि**) व्याप्नोसि व्याप्नोति वा (**वनिनः**) वनस्य संविभागस्य रश्मीनां वा प्रशस्तः सम्बन्धो विद्यते यस्य तस्य। अत्र सम्बन्धार्थ इनिः। (**धूमकेतुना**) धूमः केतुर्ध्वजावद्यस्मिन् रथे तेन (**अग्ने**) (**सख्ये०**) इति पूर्ववत्॥ १०॥

अन्वयः-हे अग्ने विद्वन्! यतस्त्वं यद्यौ ते तवास्य वृषभस्येव वातजूता अरुषा रोहिताश्वौ रथे योक्तुमर्हौ स्तस्तावयुक्था योजयसि योजयति वा तज्जन्यो यो रवस्तेन सह वर्त्तमानेन धूमकेतुना रथेन सर्वान् व्यवहारानिन्वसि व्याप्नोसि व्याप्नोति वा तस्मादादथ वनिनस्तवास्य वा सख्ये वयं मा रिषाम॥ १०॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। यस्माच्छिल्प्यग्निर्वा सर्वहितानि कार्याणि कर्त्तुं शक्नोति, तस्माद्विमानादियानं संभावयितुं योग्योऽस्ति॥ १०॥

पदार्थः-(**अग्ने**) समस्त शिल्पव्यवहार के ज्ञान देनेवाले क्रियाचतुर विद्वन्! जिस कारण आप (**यत्**) जो कि (**ते**) आपके वा इस अग्नि के (**वृषभस्येव**) पदार्थों के ले जानेहारे बलवान् बैल के समान वा (**वातजूता**) पवन के वेग के समान वेगयुक्त (**अरुषा**) सीधे स्वभाव (**रोहिता**) दृढ़ बल आदि युक्त घोड़े (**रथे**) विमान आदि यानों में जोड़ने के योग्य हैं, उनको (**अयुक्थाः**) जुड़वाते हैं वा यह भौतिक अग्नि जुड़वाता है, उस रथ से निकला जो (**रवः**) शब्द उसके साथ वर्त्तमान (**धूमकेतुना**) जिसमें धूम ही पताका है, उस रथ से सब व्यवहारों को (**इन्वसि**) व्याप्त होते हो वा यह भौतिक अग्नि उक्त प्रकार से व्यवहारों को व्याप्त होता है, इससे (**आत्**) पीछे (**वनिनः**) जिनको अच्छे विभाग वा सूर्यकिरणों का सम्बन्ध है (**तव**) उन आपके वा जिस भौतिक अग्नि को किरणों का सम्बन्ध है, उसके (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) पीड़ित न हों॥ १०॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। जिससे शिल्पी और भौतिक अग्नि सर्वहित करनेवाले कामों को सिद्ध कर सकते हैं, उससे विमान आदि यानों की संभावना करना योग्य है॥ १०॥

पुनरेतयोः कीदृशा गुणा इत्युपदिश्यते॥

फिर इनके कैसे गुण हैं, इस विषय को अगले मन्त्र में कहा है॥

अध॑ स्व॒नादु॒त बि॑भ्युः पत॒त्रिणो॑ द्र॒प्सा यत्ते॑ यव॒सादो॒ व्यस्थि॑रन्।
सु॒गं तत्ते॑ ताव॒केभ्यो॒ रथे॒भ्योऽग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑॥ ११॥

अध॑। स्व॒नात्। उ॒त। बि॒भ्यु॒रिति॑। प॒त॒त्रिणः॑। द्र॒प्साः। यत्। ते॒। य॒व॒स॒ऽअदः॑। वि। अस्थि॑रन्। सु॒ऽगम्। तत्। ते॒। ता॒व॒केभ्यः॑। रथे॑भ्यः। अग्ने॑। स॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑॥ ११॥

पदार्थः-(**अध**) अथ (**स्वनात्**) शब्दात् (**उत**) अपि (**बिभ्युः**) भयं प्राप्नुवन्तु (**पतत्रिणः**) शत्रवः पक्षिणो वा (**द्रप्साः**) हर्षयुक्ता भृत्या ज्वालादयो गुणा वा (**यत्**) यदा (**ते**) तवास्य वा (**यवसादः**) ये यवसमन्नादिकमदन्ति ते (**वि**) विविधार्थे (**अस्थिरन्**) तिष्ठेरन्। अत्र लिडर्थे लुङ् **वाच्छन्दसी**ति झस्य रनादेशः **छान्दसो वर्णलोप** इति सिचः सलोपः। (**सुगम्**) सुखेन गच्छन्त्यस्मिन्मार्गे तम् (**तत्**) तदा (**ते**) तव (**तावकेभ्यः**) त्वदीयेभ्यस्तत्सिद्धेभ्यो वा (**रथेभ्यः**) विमानादिभ्यः (**अग्ने**) (**सख्ये०**) इति पूर्ववत्॥ ११॥

अन्वयः-हे अग्ने! यद्यदा ते तवास्याग्नेर्वा यवसादो द्रप्सा सुगं व्यस्थिरन् मार्गे वितिष्ठेरँस्तत्तदा ते तवास्य वा तावकेभ्यो रथेभ्यः पतत्रिणो बिभ्युः। अधाथोतापि तेषां रथानां स्वनात्पतत्रिणः पक्षिण इव शत्रवो भयं प्राप्ता विलीयन्त ईदृशस्य तव सख्ये वयं मा रिषाम॥ ११॥

भावार्थः-मनुष्यैर्यदाऽऽग्नेयास्त्रविमानादियुक्ताः सेनाः संसाध्य शत्रुविजयार्थं वेगेन गत्वा शस्त्रास्त्रप्रहारैः सुहर्षितशब्दैः शत्रुभिः सह युध्यते तदा ध्रुवो विजयो जायत इति विज्ञेयम्। नह्येष स्थिरो विजयः खलु विद्वद्विरोधिनामग्न्यादिविद्याविरहाणां कदाचिद्भवितुं शक्यः। तस्मादेतत्सर्वदाऽनुष्ठेयम्॥ ११॥

पदार्थः-हे (**अग्ने**) समस्त विज्ञान देनेहारे शिल्पिन्! (**यत्**) जब (**ते**) तुम्हारे (**यवसादः**) अन्नादि पदार्थों को खानेहारे (**द्रप्साः**) हर्षयुक्त भृत्य वा लपट आदि गुण (**सुगम्**) उस मार्ग को कि जिसमें सुख से जाते हैं (**वि**) अनेक प्रकारों से (**अस्थिरन्**) स्थिर होवें (**तत्**) तब (**ते**) आपके वा इस भौतिक अग्नि के (**तावकेभ्यः**) जो आपके वा इस अग्नि के सिद्ध किये हुए रथ हैं, उन (**रथेभ्यः**) विमान आदि रथों से (**पतत्रिणः**) पक्षियों के तुल्य शत्रु (**बिभ्युः**) डरें (**अध**) उसके अनन्तर (**उत**) एक निश्चय के साथ ही उन रथों के (**स्वनात्**) शब्द से पक्षियों के समान डरे हुए शत्रु बिलाय जाते हैं, ऐसे (**तव**) आपके वा इस अग्नि के (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) मत अप्रसन्न हों॥ ११॥

भावार्थः-जब आग्नेय अस्त्र-शस्त्र और विमानादि यानयुक्त सेना इकट्ठी कर शत्रुओं के जीतने के लिये वेग से जाकर शस्त्रों के प्रहार वा अच्छे आनन्दित शब्दों से शत्रुओं के साथ मनुष्यों का युद्ध कराया जाता है, तब दृढ़ विजय होता है ,यह जानना चाहिये। यह स्थिर दृढ़तर विजय निश्चय है कि

विद्वानों के विरोधियों, अग्न्यादि विद्यारहित पुरुषों का कभी नहीं हो सकता, इससे सब दिन इसका अनुष्ठान करना चाहिये॥११॥

अथ सभाद्यध्यक्षगुणा उपदिश्यन्ते॥

अब सभा आदि के अधिपति के गुणो का उपदेश करते हैं॥

अ॒यं मि॒त्रस्य॒ वरु॑णस्य॒ धाय॑सेऽवया॒तां म॒रुता॑ं हे॒ळो॒ अद्भु॑तः।
मृ॒ळा सु नो॒ भूत्वे॑षां मन॒: पुन॒रग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑॥१२॥

अ॒यम्। मि॒त्रस्य॑। वरु॑णस्य। धाय॑से। अ॒व॒या॒ताम्। म॒रुता॑म्। हे॒ळः॑। अद्भु॑तः। मृ॒ळ। सु। नः॑। भूतु॑। ए॒षा॒म्। मनः॑। पुनः॑। अग्ने॑। स॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑॥१२॥

पदार्थः-(**अयम्**) प्रत्यक्षः (**मित्रस्य**) सख्युः (**वरुणस्य**) वरस्य (**धायसे**) धारणाय (**अवयाताम्**) धर्मविरोधिनाम् (**मरुताम्**) मरणधर्माणां मनुष्याणाम् (**हेळः**) अनादरः (**अद्भुतः**) आश्चर्ययुक्तः (**मृड**) आनन्दय। अत्रान्तर्गतोण्यर्थः **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**सु**) (**नः**) अस्माकम् (**भूतु**) भवतु। अत्र शपो लुक्। **भूसुवोस्तिङि**। (अष्टा०७.३.८८) इति गुणाभावः। (**एषाम्**) भद्राणाम् (**मनः**) अन्तःकरणम् (**पुनः**) मुहुर्मुहः (**अग्ने, सख्ये०**) इति पूर्ववत्॥१२॥

अन्वयः-हे अग्ने! यतस्त्वया मित्रस्य वरुणस्य धायसे योऽयमवयातां मरुतामद्भुतो हेळः क्रियते तेनैषां नोऽस्माकं मनः पुनः सुमृडैवं भूतु तस्मात् तव सख्ये वयं मा रिषाम॥१२॥

भावार्थः-मनुष्यैः सभाध्यक्षस्य यच्छ्रेष्ठानां पालनं दुष्टानां ताडनं तद्विदित्वा सदाचरणीयम्॥१२॥

पदार्थः-हे (**अग्ने**) समस्त ज्ञान देनेहारे सभा आदि के अधिपति! जिस कारण आपने (**मित्रस्य**) मित्र वा (**वरुणस्य**) श्रेष्ठ के (**धायसे**) धारण वा सन्तोष के लिये जो (**अयम्**) यह प्रत्यक्ष (**अवयाताम्**) धर्मविरोधी (**मरुताम्**) मरने जीनेवाले मनुष्यों का (**अद्भुतः**) अद्भुत (**हेळः**) अनादर किया है, उससे (**एषाम्**) इन (**नः**) हम लोगों के (**मनः**) मन को (**पुनः**) बार-बार (**सु मृड**) अच्छी प्रकार आनन्दित करो ऐसे (**भूतु**) हो, इससे (**तव**) तुम्हारे (**सख्ये**) मित्रपन में (**वयम्**) हम लोग (**मा, रिषाम**) मत बेमन हों॥१२॥

भावार्थः-मनुष्यों को चाहिये कि सभाध्यक्ष को जो श्रेष्ठों का पालन और दुष्टों को ताड़ना देनी है, उसको जानकर यह सदा आचरण करें॥१२॥

पुनरीश्वरसभाद्यध्यक्षाभ्यां सह मित्रता किमर्था कार्य्येत्युपदिश्यते॥

फिर ईश्वर और सभा आदि के अधिपतियों के साथ मित्रभाव क्यों करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

दे॒वो दे॒वाना॑मसि मि॒त्रो अद्भु॑तो॒ वसु॒र्वसू॑नामसि॒ चारु॑रध्व॒रे।

शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव॥ १३॥

देवः। देवानाम्। असि। मित्रः। अद्भुतः। वसुः। वसूनाम्। असि। चारुः। अध्वरे। शर्मन्। स्याम। तव। सप्रथःऽतमे। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥ १३॥

पदार्थः-(**देवः**) दिव्यगुणसम्पन्नः (**देवानाम्**) दिव्यगुणसम्पन्नानां विदुषां पदार्थानां वा (**असि**) भवसि (**मित्रः**) बहुसुखकारी सर्वदुःखविनाशकः (**अद्भुतः**) आश्चर्य्यगुणकर्मस्वभावकः (**वसुः**) वस्ता वासयिता वा (**वसूनाम्**) वसतां वासयितॄणां मनुष्याणाम् (**असि**) भवसि (**चारुः**) श्रेष्ठः (**अध्वरे**) अहिंसनीयेऽहातव्य उपासनाख्ये कर्त्तव्ये संग्रामे वा (**शर्मन्**) शर्मणि सुखे (**स्याम**) भवेम (**तव**) (**सप्रथस्तमे**) अतिशयितैः प्रथोभिः सुविस्तृतैः श्रेष्ठैर्गुणकर्मस्वभावैः सह वर्त्तमाने (**अग्ने**) जगदीश्वर विद्वन् वा (**सख्ये०**) इति सर्वं पूर्ववत्॥ १३॥

अन्वयः-हे अग्ने! यतस्त्वमध्वरे देवानां देवोऽद्भुतश्चारुर्मित्रोऽसि वसूनां वसुरसि तस्मात्तव सप्रथस्तमे शर्मन् शर्मणि वयं सुनिश्चिताः स्याम तव सख्ये कदाचिन्मा रिषाम च॥ १३॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि कस्यचित्खलु परमेश्वरस्य विदुषां च सुखकारकं मित्रत्वं सुस्थितं तस्मादेतस्मिन् सर्वैरस्मदादिभिर्मनुष्यैः सुस्थिरया बुद्ध्या प्रवर्त्तितव्यम्॥ १३॥

पदार्थः-हे (**अग्ने**) जगदीश्वर वा विद्वन्! जिस कारण आप (**अध्वरे**) न छोड़ने योग्य उपासनारूपी यज्ञ वा संग्राम में (**देवानाम्**) दिव्यगुणों से परिपूर्ण विद्वान् वा दिव्यगुणयुक्त पदार्थों में (**देवः**) दिव्यगुणसम्पन्न (**अद्भुतः**) आश्चर्य्यरूप गुण, कर्म और स्वभाव से युक्त (**चारुः**) अत्यन्त श्रेष्ठ (**मित्रः**) बहुत सुख करने और सब दुःखों का विनाश करनेवाले (**असि**) हैं तथा (**वसूनाम्**) वसने और वसानेवाले मनुष्यों के बीच (**वसुः**) वसने और वसानेवाले (**असि**) हैं, इस कारण (**तव**) आपके (**सप्रथस्तमे**) अच्छे प्रकार अति फैले हुए गुण, कर्म, स्वभावों के साथ वर्त्तमान (**शर्मन्**) सुख में (**वयम्**) हम लोग अच्छे प्रकार निश्चित (**स्याम**) हों, और (**तव**) आप के (**सख्ये**) मित्रपन में कभी (**मा रिषाम**) बेमन न हों॥ १३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। किसी मनुष्य को भी परमेश्वर और विद्वानों की सुख प्रकट करनेवाली मित्रता अच्छे प्रकार स्थिर नहीं होती, इससे इसमें हम मनुष्यों को स्थिर मति के साथ प्रवृत्त होना चाहिये॥ १३॥

पुनः कीदृशाभ्यां सह सर्वैः प्रेमभावः कार्य इत्युपदिश्यते॥

फिर कैसों के साथ सबको प्रेमभाव करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः।

दधा॑सि॒ रत्नं॒ द्रवि॑णं च दा॒शुषेऽग्ने॑ स॒ख्ये मा रि॑षाम व॒यं तव॑॥ १४॥

तत्। ते॒। भ॒द्रम्। यत्। सम्ऽइ॑द्धः। स्वे। दमे॑। सोम॑ऽआहुतः। जर॑से। मृ॒ळ॒यत्ऽत॑मः। दधा॑सि। रत्न॑म्। द्रवि॑णम्। च॒। दा॒शुषे॑। अग्ने॑। सख्ये॑। मा। रि॒षा॒म॒। व॒यम्। तव॑॥ १४॥

पदार्थः-(**तत्**) तस्मात् (**ते**) तव (**भद्रम्**) कल्याणकारकं शीलम् (**यत्**) यस्मात् (**समिद्धः**) सुप्रकाशितः (**स्वे**) स्वकीये (**दमे**) दान्ते संसारे (**सोमाहुतः**) सोमैरैश्वर्य्यकारकैर्गुणैः पदार्थैर्वाऽहुतो वर्द्धितः सन् (**जरसे**) अर्च्यसे पूज्यसे। अत्र विकरणव्यत्ययेन कर्मणि यकः स्थाने शप्। **जरत इत्यर्चति कर्मसु पठितम्।** (निघं०३.१४) (**मृडयत्तमः**) अतिशयेन सुखयिता (**दधासि**) (**रत्नम्**) रमणीयम् (**द्रविणम्**) चक्रवर्त्तिराज्यादिसिद्धं धनम् (**च**) शुभानां गुणानां समुच्चये (**दाशुषे**) सुशीले वर्त्तमानं कुर्वते मनुष्याय (**अग्ने**) (**सख्ये०**) इति पूर्ववत्॥ १४॥

अन्वयः-हे अग्ने! यद्यस्मात् स्वे दमे समिद्धः सोमाहुतोऽग्निरिव मृडयत्तमस्त्वं सर्वैर्विद्वद्भिर्जरसे दाशुषे रत्नं द्रविणञ्च विद्यादिशुभान् गुणान् दधासि। तदीदृशस्य ते तव भद्रं शीलं कदाचिद्वयं मा रिषाम तव सख्ये सुस्थिराश्च स्याम॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्वेदसृष्टिक्रमप्रमाणैः सत्पुरुषस्येश्वरस्य विदुषो वा कर्मशीलं च धृत्वा सर्वैः प्राणिभिः सह मित्रतामाचर्य्य सर्वदा विद्याधर्मशिक्षोन्नतिः कार्य्या॥ १४॥

पदार्थः-हे (**अग्ने**) समस्त विज्ञान देनेवाले ईश्वर वा विद्वन्! (**यत्**) जिस कारण (**स्वे**) अपने (**दमे**) दमन किये हुए संसार में (**समिद्धः**) अच्छे प्रकार प्रकाशित (**सोमाहुतः**) और ऐश्वर्य्य करनेवाले गुण और पदार्थों से वृद्धि को प्राप्त किये हुए अग्नि के समान (**मृडयत्तमः**) अत्यन्त सुख देनेहारे आप सब विद्वानों से (**जरसे**) अर्चन पूजन को प्राप्त होते हैं वा (**दाशुषे**) उत्तम शील के निमित्त अपना वर्त्ताव वर्त्तते हुए मनुष्य के लिये (**रत्नम्**) अति रमणीय (**द्रविणम्**) चक्रवर्त्ति राज्य आदि कामों से सिद्ध धन (**च**) और विद्या आदि अच्छे गुणों को (**दधासि**) धारण करते हैं (**तत्**) इस कारण ऐसे (**ते**) आपके (**भद्रम्**) सुख करनेवाले स्वभाव को (**वयम्**) हम लोग कभी (**मा, रिषाम**) मत भूलें किन्तु (**तव**) आपके (**सख्ये**) मित्रपन में अच्छे प्रकार स्थिर हों॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि वेदप्रमाण और संसार के वार-वार होने न होने आदिव्यवहार के प्रमाण तथा सत्पुरुषों के वाक्यों से वा ईश्वर और विद्वान् के काम वा स्वभाव को जी में धर सब प्राणियों के साथ मित्रता वर्त्तकर सब दिन विद्या, धर्म और शिक्षा की उन्नति करें॥ १४॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

यस्मै॒ त्वं सु॑द्रविणो॒ ददा॑शोऽनागा॒स्त्वम॑दिते सु॒वर्ता॑ता।
यं भ॒द्रेण॒ शव॑सा चो॒दया॑सि प्र॒जाव॑ता॒ राध॑सा॒ ते स्या॑म॥ १५॥

यस्मै॑। त्वम्। सु॒ऽद्र॒वि॒णः॒। ददा॑शः। अ॒ना॒गाः॒ऽत्वम्। अ॒दि॒ते॒। सु॒वर्ऽता॑ता। यम्। भ॒द्रेण॑। शव॑सा। चो॒दया॑सि। प्र॒जाऽव॑ता। राध॑सा। ते। स्या॒म॒॥ १५॥

पदार्थः-(**यस्मै**) मनुष्याय (**त्वम्**) जगदीश्वरो विद्वान् वा (**सुद्रविणः**) शोभनानि द्रविणांसि यस्मात्तत्सम्बुद्धौ (**ददाशः**) ददासि। अत्र दाशृधातोर्लेटो मध्यमैकवचने शपः श्लुः। (**आनागास्त्वम्**) निष्पापत्वम्। **इण आग अपराधे च।** (उणा०४.२१२) अत्र नञ्पूर्वादागःशब्दात्त्वे प्रत्ययेऽन्येषामपि **दृश्यते** इत्युपधाया दीर्घत्वम्। (**अदिते**) विनाशरहित (**सर्वताता**) सर्वतातौ सर्वस्मिन् व्यवहारे। अत्र **सर्वदेवात्तातिल्।** (अष्टा०४.४.१४२) इति सूत्रेण सर्वशब्दात्स्वार्थे तातिल् प्रत्ययः। **सुपां सुलुगिति** सप्तम्या डादेशः। (**यम्**) (**भद्रेण**) सुखकारकेण (**शवसा**) शरीरात्मबलेन (**चोदयासि**) प्रेरयसि (**प्रजावता**) प्रशस्ताः प्रजा विद्यन्ते यस्मिंस्तेन (**राधसा**) विद्यासुवर्णादिधनेन सह (**ते**) त्वदाज्ञायां वर्त्तमानाः (**स्याम**) भवेम॥ १५॥

अन्वयः-हे सुद्रविणोऽदिते जगदीश्वर विद्वन्! वा यतस्त्वं सर्वताता यस्मा अनागास्त्वं ददाशः। यं भद्रेण शवसा प्रजावता राधसा सह वर्त्तमानं कृत्वा शुभे व्यवहारे चोदयासि प्रेरयेः। तस्मात्तवाज्ञायां विद्वच्छिक्षायां च वर्त्तमाना ये वयं प्रयतेमहि ते वयमेतस्मिन् कर्मणि स्थिराः स्याम॥ १५॥

भावार्थः-अत्र श्लेषालङ्कारः। यस्मिन् मनुष्येऽन्तर्यामीश्वरः पापाकरणत्वं प्रकाशयति, स मनुष्यो विद्वत्सङ्गप्रीतिः सन् सर्वविधं धनं शुभान् गुणांश्च प्राप्य सर्वदा सुखी भवति, तस्मादेतत्कृत्यं वयमपि नित्यं कुर्याम॥ १५॥

पदार्थः-हे (**सुद्रविणः**) अच्छे-अच्छे धनों के देने और (**अदिते**) विनाश को न प्राप्त होनेवाले जगदीश्वर वा विद्वन्! जिस कारण (**त्वम्**) आप (**सर्वताता**) समस्त व्यवहार में (**यस्मै**) जिस मनुष्य के लिये (**अनागास्त्वम्**) निरपराधता को (**ददाशः**) देते हैं तथा (**यम्**) जिस मनुष्य को (**भद्रेण**) सुख करनेवाले (**शवसा**) शारीरिक, आत्मिक बल और (**प्रजावता**) जिसमें प्रशंसित पुत्र आदि हैं, उस (**राधसा**) विद्या, सुवर्ण आदि धन से युक्त करके अच्छे व्यवहार में (**चोदयासि**) लगाते हैं, इससे आपकी वा विद्वानों की शिक्षा में वर्त्तमान जो हम लोग अनेकों प्रकार से यत्न करें (**ते**) वे हम इस काल में स्थिर (**स्याम**) हों॥ १५॥

वह सब वृत्तान्त **(अस्माकम्)** हम लोगों को **(सौभगत्वस्य)** अच्छे-अच्छे ऐश्वर्य्यों के होने का **(आयुः)** जीवन वा ज्ञान है **(इह)** इस कार्य्यरूप जगत् में **(सः)** वह **(विद्वान्)** समस्त विद्या की प्राप्ति करानेवाले जगदीश्वर व आपका प्रमाणपूर्वक विद्या देनेवाला विद्वान् तुम दोनों **(प्रतिर)** अच्छे प्रकार दुःखों से तारो॥१६॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को चाहिये कि परमेश्वर और विद्वानों के आश्रय से पदार्थविद्या को पाकर इस संसार में सौभाग्य और आयुर्दा को बढ़ावें॥१६॥

इस सूक्त में ईश्वर, सभाध्यक्ष, विद्वान् और अग्नि के गुणों का वर्णन है, इससे इस सूक्तार्थ की पूर्व सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥ इस अध्याय में सेनापति के उपदेश और उसके काम आदि का वर्णन है, इससे इस छठे अध्याय के अर्थ की पञ्चमाध्याय के अर्थ के साथ एकता समझनी चाहिये॥

चौरानवेंवाँ ९४ सूक्त और बत्तीसवाँ ३२ वर्ग समाप्त हुआ॥

यह श्रीमान् संन्यासियों में भी जो आचार्य्य श्रीयुत महाविद्वान् विरजानन्द सरस्वती स्वामी जी उनके शिष्य दयानन्द सरस्वती स्वामी जी के बनाये संस्कृत और आर्य्यभाषा से शोभित अच्छे प्रमाणों से युक्त ऋग्वेद-भाष्य के प्रथमाष्टक में छठा अध्याय समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तमाध्यायारम्भः

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथास्य पञ्चनवतितमस्यैकादशर्च्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। सत्यगुणविशिष्टोऽग्निः शुद्धोऽग्निर्वा देवता। १,३ विराट् त्रिष्टुप्। २,७,८,११ त्रिष्टुप्। ४,५,६,१० निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ९ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ रात्रिदिवसौ कीदृशौ स त इत्युपदिश्यते॥

अब रात्रि और दिन कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

द्वे विरू॑पे चरत॒: स्वर्थे॑ अ॒न्यान्या॑ व॒त्समुप॑ धापयेते।
हरि॑र॒न्यस्यां॒ भव॑ति स्व॒धाव॑ाञ्छु॒क्रो अ॒न्यस्यां॑ ददृशे॑ सु॒वर्चा॑:॥ १॥

द्वे इति॑। विरू॑पे इति॒ विऽरू॑पे। च॒र॒त॒:। स्वर्थे॒ इति॑ सु॒ऽअर्थे॑। अ॒न्याऽअ॑न्या। व॒त्सम्। उप॑। धा॒प॒येते॒ इति॑। हरि॑:। अ॒न्यस्या॑म्। भव॑ति। स्व॒धाऽवा॑न्। शु॒क्र:। अ॒न्यस्या॑म्। द॒दृ॒शे॒। सु॒ऽवर्चा॑:॥ १॥

पदार्थः-(**द्वे**) रात्रिदिने (**विरूपे**) प्रकाशान्धकाराभ्यां विरुद्धरूपे (**चरतः**) (**स्वर्थे**) शोभनार्थे (**अन्यान्या**) परस्परं वर्त्तमाना (**वत्सम्**) जातं संसारम् (**उप**) (**धापयेते**) पाययेते (**हरिः**) हरत्युष्णतामिति हरिश्चन्द्रः (**अन्यस्याम्**) दिवसादन्यस्यां रात्रौ (**भवति**) (**स्वधावान्**) स्वेन स्वकीयेन गुणेन धार्य्यत इति स्वधाऽमृतरूप ओषध्यादिरसस्तद्वान् (**शुक्रः**) तेजस्वी (**अन्यस्याम्**) रात्रेरन्यस्यां दिनरूपायां वेलायाम् (**ददृशे**) दृश्यते (**सुवर्चाः**) शोभनदीप्तिः॥१॥

अन्वयः-हे मनुष्या! ये विरूपे स्वर्थे द्वे रात्रिदिने परस्परं चरतोऽन्यान्या वत्समुपधापयेते। तयोरन्यस्यां स्वधावान् हरिर्भवति। अन्यस्यां शुक्रः सुवर्चा सूर्यो ददृशे ते सर्वदा वर्त्तमाने रेखादिगणितविद्यया विज्ञायानयोर्मध्य उपयुञ्जीध्वम्॥१॥

भावार्थः-मनुष्यैर्नह्यहोरात्रौ कदाचिन्निवर्त्तेते, किन्तु देशान्तरे सदा वर्त्तेते। यानि कार्य्याणि रात्रौ कर्त्तव्यानि यानि च दिवसे तान्यनालस्येनानुष्ठाय सर्वकार्य्यसिद्धिः कर्त्तव्या॥१॥

पदार्थः-हे मनुष्यो! जो (**विरूपे**) उजेले और अन्धेरे से अलग-अलग रूप और (**स्वर्थे**) उत्तम प्रयोजनवाले (**द्वे**) दो अर्थात् रात और दिन परस्पर (**चरतः**) वर्त्ताव वर्त्तते और (**अन्यान्या**) परस्पर (**वत्सम्**) उत्पन्न हुए संसार का (**उपधापयेते**) खान-पान कराते हैं (**अन्यस्याम्**) दिन से अन्य रात्रि में (**स्वधावान्**) जो अपने गुण से धारण किया जाता वह औषधि आदि पदार्थों का रस जिसमें विद्यमान है,

ऐसा **(हरिः)** उष्णता आदि पदार्थों का निवारण करने वाला चन्द्रमा **(भवति)** प्रकट होता है वा **(अन्यस्याम्)** रात्रि से अन्य दिवस होनेवाली वेला में **(शुक्रः)** आतपवान् **(सुवर्चाः)** अच्छे प्रकार उजेला करनेवाला सूर्य्य **(ददृशे)** देखा जाता है, वे रात्रि-दिन सर्वदा वर्त्तमान हैं, इनको रेखागणित आदि गणित विद्या से जानकर इनके बीच उपयोग करो॥१॥

भावार्थः-मनुष्यों को चाहिये कि दिन-रात कभी निवृत्त नहीं होते, किन्तु सर्वदा बने रहते हैं अर्थात् एक देश में नहीं तो दूसरे देश में होते हैं। जो काम रात और दिन में करने योग्य हों, उनको निरालस्य से करके सब कामों की सिद्धि करें॥१॥

अथाहोरात्रव्यवहारो दिशां मिषेणोपदिश्यते॥

अब दिन-रात का व्यवहार दिशाओं के मिष से अगले मन्त्र में कहा है॥

दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम्।
तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति॥२॥

दश। इमम्। त्वष्टुः। जनयन्त। गर्भम्। अतन्द्रासः। युवतयः। विऽभृत्रम्। तिग्मऽअनीकम्। स्वऽयशसम्। जनेषु। विऽरोचमानम्। परि। सीम्। नयन्ति॥२॥

पदार्थः-**(दश)** दिशः **(इमम्)** प्रत्यक्षमहोरात्रप्रसिद्धम् **(त्वष्टुः)** विद्युतो वायोर्वा **(जनयन्त)** जनयन्ति। अत्राडभावः। **(गर्भम्)** सर्वव्यवहारादिकारणम् **(अतन्द्रासः)** नियतरूपत्वादनालस्यादियुक्ताः **(युवतयः)** मिश्रामिश्रत्वकर्मणा सदाऽजराः **(विभृत्रम्)** विविधक्रियाधारकम् **(तिग्मानीकम्)** तिग्मानि निशितानि तीक्ष्णान्यनीकानि सैन्यानि यस्मिँस्तम् **(स्वयशसम्)** स्वकीयगुणकर्मस्वभावकीर्तियुक्तम् **(जनेषु)** गणितविद्यावित्सु विद्वत्सु मनुष्येषु **(विरोचमानम्)** विविधप्रकारेण प्रकाशमानम् **(परि)** सर्वतोभावे **(सीम्)** प्राप्तव्यमहोरात्रव्यवहारम् **(नयन्ति)** प्रापयन्ति। अत्रान्तर्गतो ण्यर्थः॥२॥

अन्वयः-हे मनुष्या! या अतन्द्रासो युवतय इव दश दिशस्त्वष्टुरिमं गर्भं विभृत्रं तिग्मानीकं जनेषु विरोचमानं स्वयशसं सीं जनयन्त जनयन्ति परिणयन्ति ता यूयं विजानीत॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरनियतदेशकाला विभुस्वरूपा पूर्वादिक्रमजन्याः सर्वव्यवहारसाधिका दश दिशः सन्ति तासु नियता व्यवहाराः साधनीया नात्र खलु केनचिद् विरुद्धो व्यवहारोऽनुष्ठेयः॥२॥

पदार्थः-हे मनुष्यो! तुम **(अतन्द्रासः)** जो एक नियम के साथ रहने से निरालसता आदि गुणों से युक्त **(युवतयः)** जवान स्त्रियों के समान एक-दूसरे के साथ मिलने वा न मिलने से सब कभी अजर-अमर रहनेवाली **(दश)** दश दिशा **(त्वष्टुः)** बिजुली वा पवन के **(इमम्)** इस प्रत्यक्ष अहोरात्र से प्रसिद्ध

(गर्भम्) समस्त व्यवहार का कारणरूप **(विभृत्रम्)** जो कि अनेकों प्रकार की क्रिया को धारण किये हुए **(तिग्मानीकम्)** जिसमें अत्यन्त तीक्ष्ण सेना जन विद्यमान जो **(जनेषु)** गणितविद्या के जाननेवाले मनुष्यों में **(विरोचमानम्)** अनेक रीति से प्रकाशमान **(स्वयशसम्)** अनेक गुण, कर्म्म, स्वभाव और प्रशंसायुक्त **(सीम्)** प्राप्त होने के योग्य उस दिन-रात के व्यवहार को **(जनयन्त)** उत्पन्न करतीं और **(परि)** सब ओर से **(नयन्ति)** स्वीकार करती हैं, उनको तुम लोग जानो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जिनके देश काल का नियम अनुमान में नहीं आता ऐसी अनन्तरूप पूर्व आदि क्रम से प्रसिद्ध सब व्यवहारों की सिद्धि करानेवाली दश दिशा हैं, उनमें नियमयुक्त व्यवहारों को सिद्ध करें, इनमें किसी को विरुद्ध व्यवहार न करना चाहिये॥ २॥

पुनः सोऽहोरात्रः किं करोतीत्युपदिश्यते॥

फिर वह दिन और रात क्या करता है, इस विषय को अगले मन्त्र में कहा है॥

त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु।
पूर्वामनु प्र दिशं पार्थिवानामृतून् प्रशासद्वि दधावनुष्ठु॥ ३॥

त्रीणि। जाना। परि। भूषन्ति। अस्य। समुद्रे। एकम्। दिवि। एकम्। अप्ऽसु। पूर्वाम्। अनु। प्र। दिशम्। पार्थिवानाम्। ऋतून्। प्रऽशासत्। वि। दधौ। अनुष्ठु॥ ३॥

पदार्थः-**(त्रीणि)** भूतभविष्यद्वर्त्तमानविभागजन्यकर्माणि **(जाना)** जनेषु भवानि। अत्रोत्सादेराकृतिगणत्वाद्भवार्थेऽञ् **शेश्छन्दसि बहुलमि**ति शेर्लोपः। अत्र सायणाचार्येण पृषोदराद्याकृतिगणत्वादाद्युदात्तत्वं प्रतिपादितं तदशुद्धम्, अनुत्सर्गापवादत्वात्। **(परि)** सर्वतः **(भूषन्ति)** अलं कुर्वन्ति **(अस्य)** अहोरात्रस्य **(समुद्रे)** **(एकम्)** चरणम् **(दिवि)** द्योतमाने सूर्ये **(एकम्)** चरणम् **(अप्सु)** प्राणेषु अप्सु वा **(पूर्वाम्)** प्राचीम् **(अनु)** आनुकूल्ये **(प्र)** **(दिशम्)** दिश्यते सवैर्जनैस्ताम् **(पार्थिवानाम्)** पृथिव्यामन्तरिक्षे विदितानाम् **(ऋतून्)** वसन्तादीन् **(प्रशासत्)** प्रशासनं कुर्वन् सन् **(वि)** **(दधौ)** विदधाति **(अनुष्ठु)** अनुतिष्ठन्ति यस्मिंस्तत्॥ ३॥

अन्वयः-हे गणितविद्याविदो मनुष्या! योऽहोरात्रः पूर्वां प्रदिशमनुष्ठु पार्थिवानां मध्ये ऋतून् प्रशासदनु तान् विदधौ। अस्याऽहोरात्रस्यैकं चरणं दिव्येकं समुद्र एकं चाप्स्वस्ति तथास्यावयवास्त्रीणि जाना परिभूषन्त्येतानि यूयं विजानीत॥ ३॥

भावार्थः-नह्यहोरात्राद्यवयववर्त्तमानेन विना भूतभविष्यद्वर्त्तमानाकालाः संभवितुं शक्याः। नैतैर्विना कस्यचिदृतोः सम्भवोऽस्ति। यः सूर्य्यान्तरिक्षस्थवायुगत्या कालावयवसमूहः प्रसिद्धोऽस्ति तं सर्वं विज्ञाय सर्वैर्मनुष्यैर्व्यवहारसिद्धिः कार्य्या॥ ३॥

पदार्थः-हे गणितविद्या को जाननेवाले मनुष्यो! जो दिन-रात **(पूर्वाम्)** पूर्व **(प्र, दिशम्)** जिसका कि मनुष्य उपदेश किया करते हैं, उसको **(अनुष्टु)** तथा उसके अनुकूल **(पार्थिवानाम्)** पृथिवी और अन्तरिक्ष में विदित हुए पदार्थों के बीच **(ऋतून्)** वसन्त आदि ऋतुओं को **(प्रशासत्)** प्रेरणा देता हुआ **(अनु)** तदनन्तर उनका **(वि, दधौ)** विधान करता है **(अस्य)** इस दिन-रात का **(एकम्)** एक पांव **(दिवि)** सूर्य्य में, एक **(समुद्रे)** समुद्र में और **(एकम्)** एक **(अप्सु)** प्राण आदि पवनों में है तथा इस दिन-रात के अङ्ग **(त्रीणि)** अर्थात् भूत, भविष्यत् और वर्त्तमान के पृथग्भाव से उत्पन्न **(जाना)** मनुष्यों में हुए व्यवहारों को **(परि, भूषन्ति)** शोभित करते हैं, इन सबको जानो॥३॥

भावार्थः-दिन-रात आदि समय के अङ्गों के वर्त्ताव के विना भूत, भविष्यत् और वर्त्तमान कालों की संभावना भी नहीं हो सकती और न इसके विना किसी ऋतु के होने का सम्भव है। जो सूर्य्य और अन्तरिक्ष में ठहरे हुए पवन की गति से समय के अवयव अर्थात् दिन-रात्रि आदि प्रसिद्ध हैं, उन सबको जान के सब मनुष्यों को चाहिये कि व्यवहारसिद्धि करें॥३॥

पुनः स कालसमूहः कीदृश इत्युपदिश्यते॥

फिर वह दिन-रात्रि के समय का समूह कैसा है, यह विषय अगले मन्त्र में कहा है॥

क इ॒मं वो॑ नि॒ण्यमा चि॑केत व॒त्सो मा॒तॄर्ज॑नयत स्व॒धाभिः॑।
ब॒ह्वीनां॒ गर्भो॑ अ॒पसा॑मु॒पस्था॑न्म॒हान्क॒विर्नि॑श्चरति स्व॒धावा॑न्॥४॥

कः। इ॒मम्। वः। नि॒ण्यम्। आ। चि॒के॒त॒। व॒त्सः। मा॒तॄः। ज॒न॒य॒त॒। स्व॒धाभिः॑। ब॒ह्वीना॑म्। गर्भः॑। अ॒पसा॑म्। उ॒प॒ऽस्था॑त्। म॒हान्। क॒विः। निः। च॒र॒ति॒। स्व॒धाऽवा॑न्॥४॥

पदार्थः-(**कः**) मनुष्यः (**इमम्**) प्रत्यक्षम् (**वः**) एतेषां कालावयवानाम् (**निण्यम्**) निश्चितं स्वरूपम् (**आ**) (**चिकेत**) विजानीयात् (**वत्सः**) स्वव्याप्त्या सर्वाच्छादकः (**मातॄः**) मातृवत्पालिका रात्रीः (**जनयत**) जनयति। अत्र लङ्यडभावो **बुधयुधनशजनेङ्प्रद्रुस्रुभ्यो णेः।** (अष्टा०३.१.८६) इति परस्मैपदे प्राप्ते व्यत्ययेनात्मनेपदम्। (**स्वधाभिः**) द्यावापृथिव्यादिभिः सह (**बह्वीनाम्**) अनेकासां द्यावापृथिव्यादीनां दिशां वा (**गर्भः**) आवरकः (**अपसाम्**) जलानाम् (**उपस्थात्**) समीपस्थव्यवहारात् (**महान्**) व्याप्त्यादिमहागुणविशिष्टः (**कविः**) क्रान्तदर्शनः (**निः**) नितराम् (**चरति**) प्राप्तोऽस्ति (**स्वधावान्**) स्वधाः स्वकीया अवयवाः प्रशस्ता विद्यन्तेऽस्मिन् सः॥४॥

अन्वयः-यो बह्वीनामपसामुपस्थात् गर्भः स्वधावान् महान् वत्सः कविः कालोऽनिश्चरति स्वधाभिर्मातॄर्जनयतेमं निण्यं क आचिकेत व एतेषामवयवानां स्वरूपं च॥४॥

भावार्थः-मनुष्यैर्यस्य परमसूक्ष्मो बोधोऽस्ति यः सर्वान् कालविभागान् प्रकटयति कर्माणि व्याप्नोति सर्वत्रैकरसः कालोऽस्ति तं कश्चिन्निपुणो विद्वान् ज्ञातुं शक्नोति, नहि सर्व इति वेद्यम्॥४॥

पदार्थः-जो **(बह्वीनाम्)** अनेकों अन्तरिक्ष और भूमि तथा दिशाओं वा **(अपसाम्)** जलों के **(उपस्थात्)** समीपस्थ व्यवहार से **(गर्भः)** अच्छा आच्छादन करनेवाला **(स्वधावान्)** जिसके कि प्रशंसित अपने अङ्ग विद्यमान हैं **(महान्)** व्याप्ति आदि गुणों से युक्त **(वत्सः)** किन्तु अपनी व्याप्ति से सर्वोपरि सबको ढांपने वा **(कविः)** क्रम-क्रम से दृष्टिगत होनेवाला समय **(निः)** **(चरति)** निरन्तर अर्थात् एकतार चल रहा है और **(स्वधाभिः)** सूर्य्य वा भूमि के साथ **(मातृः)** माता के तुल्य पालनेहारी रात्रियों को **(जनयत)** प्रकट करता है **(इमम्)** इस **(निण्यम्)** निश्चय से एक से रहनेवाले समय को **(कः)** कौन मनुष्य **(आ, चिकेत)** अच्छे प्रकार जान सके **(वः)** इन समय के अवयवों अर्थात् क्षण, घड़ी प्रहर, दिन, रात, मास, वर्ष आदि के स्वरूप को भी कौन जान सके॥४॥

भावार्थः-मनुष्यों को जानना चाहिये कि जिसका सूक्ष्म से सूक्ष्म बोध है, जो समस्त अपने अवयवों को प्रकट करता, सब कामों में व्याप्त होता, जिसमें सब जगत् एक रस रहता है, उस समय को कोई विद्वान् जान सकता है, सब कोई नहीं॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे।
उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते॥५॥१॥

आविःऽत्यः। वर्धते। चारुः। आसु। जिह्मानाम्। ऊर्ध्वः। स्वऽयशाः। उपऽस्थे। उभे इति। त्वष्टुः। बिभ्यतुः। जायमानात्। प्रतीची इति। सिंहम्। प्रति। जोषयेते इति॥५॥

पदार्थः-**(आविष्ट्यः)** आविर्भूतेषु व्यवहारेषु प्रसिद्धः **(वर्धते)** **(चारुः)** सुन्दरः **(आसु)** दिक्षु प्रजासु वा **(जिह्मानाम्)** कुटिलानां सकाशात् **(ऊर्ध्वः)** उपरिस्थः **(स्वयशाः)** स्वकीयकीर्तिः **(उपस्थे)** कर्तृणां समीपस्थे देशे **(उभे)** रात्रिदिवसौ **(त्वष्टुः)** छेदकात्कालात् **(बिभ्यतुः)** भीषयेते। अत्र लडर्थे लिङन्तर्गतो ण्यर्थश्च। **(जायमानात्)** प्रसिद्धात् **(प्रतीची)** पश्चिमा दिक् **(सिंहम्)** हिंसकम् **(प्रति)** **(जोषयेते)** सर्वान् सेवयतः॥५॥

अन्वयः-हे मनुष्या! यस्माज्जायमानात् त्वष्टुरुभे बिभ्यतुर्यस्मात् प्रतीची जायते सर्वान् व्यवहारान् प्रति जोषयेते। य उपस्थे स्वयशा जिह्मानामूर्ध्वं आसु चारुराविष्ट्यो वर्धते तं सिंह हिंसकमग्निं यूयं यथावद्विजानीत॥५॥

भावार्थः-मनुष्यैर्यः सृष्ट्युत्पत्तिसमयाज्जातोऽग्निश्छेदकत्वादूर्ध्वगामी काष्ठादिष्वाविष्टतया वर्धमानः सूर्य्यरूपेण दिग्बोधकोऽस्ति सोऽपि कालादुत्पद्य कालेन विनश्यतीति वेद्यम्॥५॥

पदार्थः-हे मनुष्यो! तुम जिस **(जायमानात्)** प्रसिद्ध **(त्वष्टुः)** छेदन करने अर्थात् सब की अवधि को पूरी करनेहारे समय से **(उभे)** दोनों रात्रि और दिन **(बिभ्यतुः)** सबको डरपाते हैं वा जिससे **(प्रतीची)** पछांह की दिशा प्रकट होती है वा उक्त रात्रि-दिन सब व्यवहारों का **(प्रति, जोषयेते)** सेवन तथा जो समय **(उपस्थे)** काम करनेवालों के समीप **(स्वयशाः)** अपनी कीर्ति अर्थात् प्रशंसा को प्राप्त होता वा **(जिह्मानाम्)** कुटिलों से **(ऊर्ध्वः)** ऊपर-ऊपर अर्थात् उन के शुभ कर्म में नहीं व्यतीत होता **(आसु)** इन दिशा वा प्रजाजनों में **(चारुः)** सुन्दर **(आविष्ट्यः)** प्रकट हुए व्यवहारों में प्रसिद्ध **(वर्धते)** और उन्नति को पाता है, उस **(सिंहम्)** हम तुम सबको काटनेहारे समय को तुम लोग यथावत् जानो॥५॥

भावार्थः-मनुष्यों को यह जानना चाहिये कि संसार की उत्पत्ति के समय से जो उत्पन्न हुआ अग्नि है, वह छेदन गुण से ऊर्ध्वगामी अर्थात् जिसकी लपट ऊपर को जाती और काष्ठ आदि पदार्थों में अपनी व्याप्ति से बढ़ता और सूर्यरूप से दिशाओं का बोध करानेवाला है, वह भी सब समय से उत्पन्न होकर समय पाकर ही नष्ट होता है॥५॥

पुनः स कालः कीदृश इत्युपदिश्यते॥

फिर वह समय कैसा है, इस विषय को अगले मन्त्र में कहा है॥

उ॒भे भ॒द्रे जो॑षयेते॒ न मेने॒ गावो॒ न वा॒श्रा उप॑ तस्थु॒रेवैः॑।
स दक्षा॑णां॒ दक्ष॑पतिर्बभूवा॒ञ्जन्ति॒ यं द॑क्षिण॒तो ह॒विर्भिः॑॥६॥

उ॒भे इति॑। भ॒द्रे इति॑। जो॒ष॒येते॒ इति॑। न। मेने॒ इति॑। गावः॑। न। वा॒श्राः। उप॑। त॒स्थुः॒। एवैः॑। सः। दक्षा॑णाम्। दक्ष॑ऽपतिः। ब॒भू॒व॒। अ॒ञ्जन्ति॑। यम्। द॒क्षि॒ण॒तः। ह॒विःऽभिः॑॥६॥

पदार्थः-**(उभे)** द्यावापृथिव्यौ **(भद्रे)** सुखप्रदे **(जोषयेते)** सेवते। अत्र स्वार्थे णिच्। **(न)** उपमार्थे **(मेने)** वत्सले स्त्रियाविव **(गावः)** धेनवः **(न)** इव **(वाश्राः)** वत्सान् कामयमानाः **(उप)** **(तस्थुः)** तिष्ठन्ते **(एवैः)** प्रापकैर्गुणैः सह **(सः)** **(दक्षाणाम्)** विद्याक्रियाकौशलेषु चतुराणां विदुषाम् **(दक्षपतिः)** विद्याचातुर्य्यपालकः **(बभूव)** भवति **(अञ्जन्ति)** कामयन्ते **(यम्)** कालम् **(दक्षिणतः)** दक्षिणायनकालविभागात् **(हविर्भिः)** यज्ञसामग्रीभिः॥६॥

अन्वयः-भद्रे उभे रात्रिदिने मेने न यं समयं जोषयेते वाश्रा गावो नेवान्ये कालावयवा एवैरुपतस्थुर्दक्षिणवतो हविर्भिर्यं विद्वांसोऽञ्जन्ति स कालो दक्षाणामत्युत्तमानां पदार्थानां मध्ये दक्षपतिर्बभूव॥६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरात्रिदिनादिकालावयवाः संसेवनीयाः। धर्मतस्तेषु यज्ञानुष्ठानादिश्रेष्ठव्यवहारा एवाचरणीया न त्वन्येऽधर्मादय इति ॥६॥

पदार्थः-(**भद्रे**) सुख देनेवाले (**उभे**) दोनों रात्रि और दिन (**मेने**) प्रीति करती हुई स्त्रियों के (**न**) समान (**यम्**) जिस समय को (**जोषयेते**) सेवन करते हैं (**वाश्राः**) बछड़ों को चाहती हुई (**गावः**) गौओं के (**न**) समान समय के और अङ्ग अर्थात् महीने वर्ष आदि (**एवैः**) सब व्यवहार को प्राप्त करानेवाले गुणों के साथ (**उपतस्थुः**) समीपस्थ होते हैं वा (**दक्षिणतः**) दक्षिणायन काल के विभाग से (**हविर्भिः**) यज्ञसामग्री करके जिस समय को विद्वान् जन (**अञ्जन्ति**) चाहते हैं (**सः**) वह (**दक्षाणाम्**) विद्या और क्रिया की कुशलताओं में चतुर विद्वान् अत्युत्तम पदार्थों में (**दक्षपतिः**) विद्या तथा चतुराई का पालनेहारा (**बभूव**) होता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि रात-दिन आदि प्रत्येक समय के अवयव का अच्छी तरह सेवन करें। धर्म से उनमें यज्ञ के अनुष्ठान आदि श्रेष्ठ व्यवहारों का ही आचरण करें और अधर्म व्यवहार वा अयोग्य काम तो कभी न करें॥६॥

पुनः स कालः कीदृश इत्युपदिश्यते॥

फिर वह समय कैसा है, इस विषय को अगले मन्त्र में कहा है॥

उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन्।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति॥७॥

उत्। यंयमीति। सविताऽइव। बाहू इति। उभे इति। सिचौ। यततेे। भीमः। ऋञ्जन्। उत्। शुक्रम्। अत्कम्। अजते। सिमस्मात्। नवा। मातृऽभ्यः। वसना। जहाति॥७॥

पदार्थः-(**उत्**) उत्कृष्टे (**यंयमीति**) पुनःपुनरतिशयेन नियमं करोति (**सवितेव**) यथा सूर्य्य आकर्षणेन भूगोलान् धरति तथा (**बाहू**) बलवीर्य्ये (**उभे**) द्यावापृथिव्यौ (**सिचौ**) वृष्टिद्वारा सेचकौ वाय्वग्नी (**यतते**) व्यवहारयति (**भीमः**) बिभेत्यस्मात्सः (**ऋञ्जन्**) प्राप्नुवन् (**उत्**) (**शुक्रम्**) पराक्रमम् (**अत्कम्**) निरन्तरम् (**अजते**) क्षिपति। व्यत्ययेनात्मनेपदम्। (**सिमस्मात्**) सर्वस्माज्जगतः (**नवा**) नवीनानि (**मातृभ्यः**) मानविधायकेभ्यः क्षणादिभ्यः (**वसना**) आच्छादनानि (**जहाति**) त्यजति॥७॥

अन्वयः-हे मनुष्या! यो भीम ऋञ्जन् कालो मातृभ्यः सवितेवोद्यंयमीति, बाहू उभे सिचौ यतते स कालोऽत्कं शुक्रं सिमस्मादुदजते, नवा वसना जहातीति जानीत॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! युष्माभिर्येन कालेन सूर्य्यादिकं जगज्जायते यो वा क्षणादिना सर्वमाच्छादयन्ति सर्वनियमहेतुः सर्वेषां प्रवृत्त्यधिकरणोऽस्ति, तं विज्ञाय यथासमयं कृत्यानि कर्त्तव्यानि॥७॥

पदार्थः-हे मनुष्यो! जो **(भीमः)** भयङ्कर **(ऋञ्जन्)** सबको प्राप्त होता हुआ काल **(मातृभ्यः)** मान करनेहारे क्षण आदि अपने अवयवों से **(सवितेव)** जैसे सूर्य्यलोक अपनी आकर्षणशक्ति से भूगोल आदि लोकों को धारण करता है, वैसे **(उद्यंयमीति)** बार-बार नियम रखता है **(बाहू)** बल और पराक्रम वा **(उभे)** सूर्य्य और पृथिवी **(सिचौ)** वा वर्षा के द्वारा सींचनेवाले पवन और अग्नि को **(यतते)** व्यवहार में लाता है, वह काल **(अत्कम्)** निरन्तर **(शुक्रम्)** पराक्रम को **(सिमस्मात्)** सब जगत् से **(उद्)** ऊपर की श्रेणी को **(अजते)** पहुँचता और **(नवा)** नवीन **(वसना)** आच्छादनों को **(जहाति)** छोड़ता है, यह जानो॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम लोगों को जिस काल से सूर्य आदि जगत् प्रकट होता है और जो क्षण आदि अङ्गों से सबका आच्छादन करता, सबके नियम का हेतु वा सबकी प्रवृत्ति का अधिकरण, है, उसको जान के समय-समय पर काम करने चाहिये॥७॥

पुनः स किं करोतीत्युपदिश्यते॥

फिर वह काल क्या करता है, इस विषय को अगले मन्त्र में कहा है॥

त्वेषं रूपं कृणुत उत्तरं यत्सम्पृञ्जानः सदने गोभिरद्भिः।
कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव॥८॥

त्वेषम्। रूपम्। कृणुते। उत्ऽतरम्। यत्। सम्ऽपृञ्जानः। सदने। गोभिः। अत्ऽभिः। कविः। बुध्नम्। परि। मर्मृज्यते। धीः। सा। देवऽताता। सम्ऽइतिः। बभूव॥८॥

पदार्थः-**(त्वेषम्)** कमनीयम् **(रूपम्)** स्वरूपम् **(कृणुते)** करोति **(उत्तरम्)** उत्पद्यमानम् **(यत्)** यः **(सम्पृञ्जानः)** सम्पर्कं कुर्वन् कारयन् वा **(सदने)** भुवने **(गोभिः)** किरणैः **(अद्भिः)** प्राणैः **(कविः)** क्रान्तदर्शनः **(बुध्नम्)** प्राणबलसम्बन्धिविज्ञानम्। **इदमपीतरद् बुध्नमेतस्मादेव बद्धा अस्मिन् धृताः प्राणा इति।** (निरु०१०.४४) **(परि)** सर्वतः **(मर्मृज्यते)** अतिशयेन शुध्यते **(धीः)** प्रज्ञा कर्म वा **(सा)** **(देवताता)** देवेनेश्वरेण विद्वद्भिर्वा सह। अत्र देवशब्दात् **सर्वदेवात्तातिल्।** (अष्टा०४.४.१४२) इति तातिलि कृते **सुपां सुलुगिति** तृतीया स्थाने डादेशः। **(समितिः)** विज्ञानमर्यादा **(बभूव)** भवति॥८॥

अन्वयः-मनुष्यैर्यद्यः सम्पृञ्जानः कविः कालसदने गोभिरद्भिरुत्तरं त्वेषं बुध्नं रूपं कृणुते या धीः परिमर्मृज्यते सा च देवताता समितिर्बभूव तदेतत्सर्वं विज्ञाय प्रज्ञोत्पादनीया॥८॥

भावार्थः-मनुष्यैर्न खलु कालेन विना कार्य्यस्वरूपमुत्पद्य प्रलीयते, नैव ब्रह्मचर्यादिकालसेवनेन विना सर्वशास्त्रबोधसम्पन्ना बुद्धिर्जायते, तस्मात्कालस्य परमसूक्ष्मस्वरूपं विज्ञायैष व्यर्थो नैव नेयः, किन्त्वालस्यं त्यक्त्वा समयानुकूलं व्यावहारिकपारमार्थिकं कर्म सदानुष्ठेयम्॥८॥

पदार्थः–मनुष्यों को चाहिये **(यत्)** जो **(सम्पृञ्जानः)** अच्छा परिचय करता–कराता हुआ **(कविः)** जिसका कर्म से दर्शन होता है, यह समय **(सदने)** भुवन में **(गोभिः)** सूर्य्य की किरणों वा **(अद्भिः)** प्राण आदि पवनों से **(उत्तरम्)** उत्पन्न होनेवाले **(त्वेषम्)** मनोहर **(बुध्नम्)** प्राण और बल सम्बन्धी विज्ञान और **(रूपम्)** स्वरूप को **(कृणुते)** करता है तथा जो **(धीः)** उत्तम बुद्धि वा क्रिया **(परि)** **(मर्मृज्यते)** सब प्रकार से शुद्ध होती है **(सा)** वह **(देवताता)** ईश्वर और विद्वानों के साथ **(समितिः)** विशेष ज्ञान की मर्यादा **(बभूव)** होती है, इस समस्त उक्त व्यवहार को जानकर बुद्धि को उत्पन्न करें॥८॥

भावार्थः–मनुष्यों को चाहिये कि काल के विना कार्य्य स्वरूप उत्पन्न होकर और नष्ट हो जाये, यह होता ही नहीं और न ब्रह्मचर्य्य आदि उत्तम समय के सेवन विना शास्त्रबोध करानेवाली बुद्धि होती है। इस कारण काल के परमसूक्ष्म स्वरूप को जानकर थोड़ा भी समय व्यर्थ न खोवें, किन्तु आलस्य छोड़ के समय के अनुकूल व्यवहार और परमार्थ काम का सदा अनुष्ठान करें॥८॥

पुनस्तेन किं भवतीत्युपदिश्यते॥

फिर उस समय के सेवन करने से क्या होता है, यह विषय अगले मन्त्र में कहा है॥

उरु ते व्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान्॥९॥

उरु। ते। व्रयः। परि। एति। बुध्नम्। विऽरोचमानम्। महिषस्य। धाम। विश्वेभिः। अग्ने। स्वयशःऽभिः। इद्धः। अदब्धेभिः। पायुऽभिः। पाहि। अस्मान्॥९॥

पदार्थः–(**उरु**) बहु **(ते)** तव **(व्रयः)** व्रयन्त्यभिभवन्त्यायुर्येन तत् **(परि)** **(एति)** पर्य्यायेण प्राप्नोति **(बुध्नम्)** उक्तपूर्वम् **(विरोचमानम्)** विविधदीप्तियुक्तम् **(महिषस्य)** महतो लोकसमूहस्य। **महिष इति महन्नामसु पठितम्।** (निघं०३.३) **(धाम)** अधिकरणम् **(विश्वेभिः)** सर्वैः **(अग्ने)** विद्वन् **(स्वयशोभिः)** स्वगुणस्वभावकीर्त्तिभिः **(इद्धः)** प्रदीप्तः **(अदब्धेभिः)** केनापि हिंसितुमशक्यैः **(पायुभिः)** अनेकविधै रक्षणैः **(पाहि)** **(अस्मान्)**॥९॥

अन्वयः–हे अग्ने विद्वंस्ते तव संबन्धेन सूर्य्य इवेद्धः सन् कालो विश्वेभिः स्वयशोभिरदब्धेभिः पायुभिर्युक्तं विरोचमानं बुध्नमुरु व्रयोऽस्मान् महिषस्य धाम च पर्य्येति तथास्मान् पाहि सेवस्व च॥९॥

भावार्थः–मनुष्यैर्नहि विभुना कालेन विना सूर्यादिकार्यजगतः पुनः पुनर्वर्तमानं जायते न च तस्मात्पृथगस्माकं किंचिदपि कर्म संभवतीति विज्ञातव्यम्॥९॥

पदार्थः–हे **(अग्ने)** विद्वन्! **(ते)** आपके सम्बन्ध से जैसे सूर्य्य वैसे **(इद्धः)** प्रकाशमान हुआ समय **(विश्वेभिः)** समस्त **(स्वयशोभिः)** अपने प्रशंसित गुण, कर्म, और स्वभावों से **(अदब्धेभिः)** वा किसी से न मिट सकें, ऐसे **(पायुभिः)** अनेक प्रकार के रक्षा आदि व्यवहारों से युक्त **(विरोचमानम्)**

विविध प्रकार से प्रकाशमान **(बुध्नम्)** प्रथम कहे हुए अन्तरिक्ष को **(उरु)** वा बहुत **(व्रयः)** जिससे आर्युदा व्यतीत करते हैं, उस वृत्त को वा **(अस्मान्)** हम लोगों को और **(महिषस्य)** बड़े लोक के **(धाम)** स्थानान्तर को **(पर्येति)** पर्य्याय से प्राप्त होता है, वैसे हमारी **(पाहि)** रक्षा कर और उसकी सेवा कर॥९॥

भावार्थः-मनुष्यों को यह जानना चाहिये कि समय के विना सूर्य्य आदि कार्य्य जगत् का वार-वार वर्त्ताव नहीं होता और न उससे अलग हम लोगों का कुछ भी काम अच्छी प्रकार होता है॥९॥

अथ कालोऽग्निर्वा कीदृश इत्युपदिश्यते॥

अब समय वा अग्नि किस प्रकार का है, इस विषय का उपदेश अगले मन्त्र में किया है॥

धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम्।
विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु॥ १०॥

धन्वन्। स्रोतः। कृणुते। गातुम्। ऊर्मिम्। शुक्रैः। ऊर्मिऽभिः। अभि। नक्षति। क्षाम्। विश्वा। सनानि। जठरेषु। धत्ते। अन्तः। नवासु। चरति। प्रऽसूषु॥ १०॥

पदार्थः-(**धन्वन्**) अन्तरिक्षे **धन्वान्तरिक्षं धन्वन्त्यस्मादापः।** (निरु०५.५) **(स्रोतः)** स्रवन्ति वस्तूनि जलानि वा येन तत् **(कृणुते)** करोति **(गातुम्)** प्राप्तव्यम् **(ऊर्मिम्)** उषसं जलवीचिं वा **(शुक्रैः)** शुद्धैः क्रमैः किरणैर्वा **(ऊर्मिभिः)** प्रापकैः प्रकारैस्तरङ्गैर्वा। **अर्त्तेरुच्च।** (उणा०४.४४) अत्र ऋधातोरूर्मिः प्रत्यय ऊकारादेशश्च। **(अभि)** सर्वतः **(नक्षति)** व्याप्नोति गच्छति वा **(क्षाम्)** भूमिम् **(विश्वा)** सर्वाणि **(सनानि)** संविभागयुक्तानि वस्तूनि **(जठरेषु)** अन्तर्वर्त्तिष्वन्नादिपचनाधिकरणेषु वा **(धत्ते)** **(अन्तः)** आभ्यन्तरे **(नवासु)** अर्वाचीनासु प्रजासु वा **(चरति)** **(प्रसूषु)** प्रसूयन्ते यास्तासु॥१०॥

अन्वयः-हे मनुष्या! यः कालो विद्युदग्निर्वा धन्वन् स्रोतो गातुमूर्मिं च कृणुते शुक्रैरूर्मिभिः क्षां चाभिनक्षति जठरेषु विश्वा सनानि धत्ते प्रसूषु नवासु वा प्रजास्वन्तश्चरति तं यथावद्विजानीत॥१०॥

भावार्थः-आप्तैर्विद्वद्भिर्व्यापनशीलौ कालविद्युदग्नी विज्ञाय तन्निमित्तान्यनेकानि कार्याणि यथावत्साधनीयानि॥१०॥

पदार्थः-हे मनुष्यो! जो समय वा बिजुलीरूप आग **(धन्वन्)** अन्तरिक्ष में **(स्रोतः)** जिससे और-और वस्तु वा जल प्राप्त होते हैं, उस **(गातुम्)** प्राप्त होने योग्य **(ऊर्मिम्)** प्रातःसमय की वेला वा जल की तरङ्ग को **(कृणुते)** प्रकट करता है वा **(शुक्रैः)** शुद्ध क्रम वा किरणों और **(ऊर्मिभिः)** पदार्थ प्राप्त करानेहारे तरङ्गों से **(क्षाम्)** भूमि को भी **(अभि, नक्षति)** सब ओर से व्याप्त और प्राप्त होता है वा जो **(जठरेषु)** भीतरले व्यवहारों और पेट के भीतर अन्न आदि पचाने के स्थानों में **(विश्वा)** समस्त **(सनानि)**

न्यारे-न्यारे पदार्थों को **(धत्ते)** स्थापित करता वा जो **(प्रसूषु)** पदार्थ उत्पन्न होते हैं, उनमें वा **(नवासु)** नवीन प्रजाजनों में **(अन्तः)** भीतर **(चरति)** विचरता है, उसको यथावत् जानो॥१०॥

भावार्थः-आप्त विद्वान् मनुष्यों को चाहिये कि व्यापनशील काल और बिजुलीरूप अग्नि को जानकर उनके निमित्त से अनेक कामों को यथावत् सिद्ध करें॥१०॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे काल और भौतिक अग्नि कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥११॥२॥

एव। नः। अग्ने। समऽइधा। वृधानः। रेवत्। पावक। श्रवसे। वि। भाहि। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥११॥

पदार्थः-(**एव**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्माकम् (**अग्ने**) विद्वन् (**समिधा**) सम्यक् प्रदीप्तेन स्वभावेन प्रदीपकेनेन्धनादिना वा (**वृधानः**) वर्धमानो वर्धयिता वा (**रेवत्**) परमोत्तमधनवते। अत्र **सुपां सुलुगि**ति चतुर्थ्या एकवचनस्य लुक्। (**पावक**) पवित्र (**श्रवसे**) श्रवणायान्नाय वा (**वि**) (**भाहि**) विविधतया प्रकाशते प्रकाशयति वा। **तन्नो मित्रो०** इत्यादि पूर्वसूक्तान्त्यमन्त्रवद् व्याख्येयम्॥११॥

अन्वयः-हे पावकाग्ने विद्वन्! यथा कालो विद्युदग्निर्वा नोऽस्माकं समिधा वृधानो यस्मै रेवदेव श्रवसे विभाति विविधतया प्रकाशत उत तन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौर्नोऽस्मान् मामहन्तां तथा त्वमस्मान् विभाहि॥११॥

भावार्थः-अत्र श्लेषालङ्कारः। नहि कस्यचित्कालाग्निविद्यया विना विद्यायुक्तं धनं प्राप्तुं शक्यं न खलु कश्चित्समयानुकूलानुष्ठानेन विना प्राणादिभ्य उपकारान् ग्रहीतुं यथावच्छक्नोति तस्मादेतत्सर्वं प्रबुध्य सर्वकार्य्यसिद्धिं कृत्वा सदानन्दयितव्यमिति॥११॥

अत्र कालाग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्व सूक्तार्थेन सह सङ्गतिरस्तीत्यवगन्तव्यम्॥

इति पञ्चनवतितमं ९५ सूक्तं तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः-हे **(पावक)** पवित्र **(अग्ने)** विद्वान्! समय और बिजुली रूप भौतिक अग्नि **(नः)** हम लोगों के **(समिधा)** अच्छे प्रकाश को प्राप्त किये हुए अपने भाव से वा इन्धन आदि **(वृधानः)** बढ़ता वा वृद्धि कराता हुआ जिस **(रेवत्)** परम उत्तम धनवान् **(श्रवसे)** सुनने तथा अन्न के लिये **(एव)** ही अनेक प्रकार से प्रकाशित होता है **(उत)** और **(तत्)** इससे **(मित्रः)** प्राण **(वरुणः)** उदान **(अदितिः)** अन्तरिक्ष आदि **(सिन्धुः)** समुद्र **(पृथिवी)** भूमि वा **(द्यौः)** बिजुली का प्रकाश **(नः)** हम लोगों को **(मामहन्ताम्)**

वृद्धि देते हैं, वैसे आप हम लोगों को **(वि, भाहि)** प्रकाशित करो वा काल वा भौतिक अग्नि प्रकाशित होता है॥११॥

भावार्थ:-इस मन्त्र में श्लेषालङ्कार है। काल और भौतिक अग्नि की विद्या के विना किसी को विद्यायुक्त धन नहीं हो सकता और न कोई समय के अनुकूल वर्त्ताव वर्त्तने के विना प्राणादिकों से उपकार यथावत् ले सकता है, इससे इस समस्त उक्त व्यवहार को जानके सब कार्य की सिद्धि कर सदा आनन्द करना चाहिये॥११॥

इस सूक्त में काल और अग्नि के गुणों के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति है, ऐसा जानना चाहिये॥

यह पिच्चानवेवाँ ९५ सूक्त और तीसरा ३ वर्ग समाप्त हुआ॥

अथ नवर्च्चस्य षण्णवतितमस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। द्रविणोदा अग्निः शुद्धोऽग्निर्वा देवता। त्रिष्टुप् छन्दः। गान्धारः स्वरः॥

अथाऽग्निशब्देन विद्वद्गुणा उपदिश्यन्ते॥

अब नव ऋचावाले छानवें सूक्त का प्रारम्भ है। इसके प्रथम मन्त्र में अग्नि शब्द से विद्वान् के गुणों का उपदेश किया है॥

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा।
आपश्च मित्रं धिषणां च साधन् देवा अग्निं धारयन्द्रविणोदाम्॥ १॥

सः। प्रत्नऽथा। सहसा। जायमानः। सद्यः। काव्यानि। बट्। अधत्त। विश्वा। आपः। च। मित्रम्। धिषणा। च। साधन्। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥ १॥

पदार्थः-(**सः**) (**प्रत्नथा**) प्रत्नः प्राचीन इव (**सहसा**) बलेन (**जायमानः**) प्रादुर्भवन् (**सद्यः**) शीघ्रम् (**काव्यानि**) कवेः कर्माणि (**बट्**) यथावत् (**अधत्त**) दधाति (**विश्वा**) विश्वानि (**आपः**) प्राणाः (**च**) अध्यापनादीनि कर्माणि (**मित्रम्**) सुहृत् (**धिषणा**) प्रज्ञा (**च**) हस्तक्रियासमुच्चये (**साधन्**) साध्नुवन्ति साधयन्ति वा (**देवाः**) विद्वांसः (**अग्निम्**) परमेश्वरं भौतिकं वा (**धारयन्**) धारयन्ति (**द्रविणोदाम्**) यो द्रव्याणि ददाति तम्। अत्रा**न्येभ्योऽपि दृश्यन्त** इति विच्॥ १॥

अन्वयः-ये देवा द्रविणोदामग्निं धारयँस्ते सर्वाणि कार्याणि च साधँस्तेषामापश्चाध्यापनादीनि कर्माणि मित्रं धिषणा हस्तक्रियया सिध्यन्ति, यो मनुष्यः सहसा प्रत्नथा प्राचीन इव जायमानो विश्वा काव्यानि सद्यो बडधत्त यथावद् दधाति स विद्वान् सुखी च भवति॥ १॥

भावार्थः-नहि मनुष्यो ब्रह्मचर्येण विद्याप्राप्त्या विना कविर्भवितुं शक्नोति न च कवित्वेन विना परमेश्वरं विद्युतं च विज्ञाय कार्याणि कर्त्तुं शक्नोति तस्मादेतन्नित्यमनुष्ठेयम्॥

पदार्थः-जो (**देवाः**) विद्वान् लोग (**द्रविणोदाम्**) द्रव्य के देनेहारे (**अग्निम्**) परमेश्वर वा भौतिक अग्नि को (**धारयन्**) धारण करते-कराते हैं, वे सब कामों को (**साधन्**) सिद्ध करते वा कराते हैं, उनके (**आपः**) प्राण (**च**) और विद्या पढ़ाना आदि काम (**मित्रम्**) मित्र (**धिषणा**) (**च**) और बुद्धि हस्तक्रिया से सिद्ध होती हैं, जो मनुष्य (**सहसा**) बल से (**प्रत्नथा**) प्राचीनों के समान (**जायमानः**) प्रकट होता हुआ (**विश्वा**) समस्त (**काव्यानि**) विद्वानों के किये काव्यों को (**सद्यः**) शीघ्र (**बट्**) यथावत् (**अधत्त**) धारण करता है, (**सः**) वह विद्वान् और सुखी होता है॥ १॥

भावार्थः-मनुष्य ब्रह्मचर्य से विद्या की प्राप्ति के विना कवि नहीं हो सकता और न कविताई के विना परमेश्वर वा बिजुली को जानकर कार्य्यों को कर सकता है, इससे उक्त ब्रह्मचर्य्य आदि नियम का अनुष्ठान नित्य करना चाहिये॥ १॥

पुनः स परमेश्वरः कीदृश इत्युपदिश्यते॥

फिर वह परमेश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स पूर्व्या निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम्।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम्॥ २॥

सः। पूर्व्या। निऽविदा। कव्यता। आयोः। इमाः। प्रऽजाः। अजनयत्। मनूनाम्। विवस्वता। चक्षसा। द्याम्। अपः। च। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥ २॥

पदार्थः-(**सः**) जगदीश्वरः (**पूर्वया**) प्राचीनया (**निविदा**) वेदवाचा (**कव्यता**) कव्यं कवित्वं तन्यते यया तया (**आयोः**) सनातनात् कारणात् (**इमाः**) प्रत्यक्षाः (**प्रजाः**) प्रजायन्ते यास्ताः (**अजनयत्**) जनयति (**मनूनाम्**) मननशीलानां मनुष्याणां सन्निधौ (**विवस्वता**) सूर्य्येण (**चक्षसा**) दर्शकेन (**द्याम्**) प्रकाशम् (**अपः**) जलानि (**च**) पृथिव्योषध्यादिसमुच्चये (**देवाः**) आप्ता विद्वांसः (**अग्निम्**) परमेश्वरम्। अन्यत्पूर्ववत्॥ २॥

अन्वयः-मनुष्यैर्यः पूर्वया निविदा कव्यतामनूनामायोरिमाः प्रजा अजनयज्जनयति विवस्वता चक्षसा द्यामपः पृथिव्योषध्यादिकं च यं द्रविणोदामग्निं परमेश्वरं देवा धारयन् धारयन्ति स नित्यमुपासनीयः॥ २॥

भावार्थः-नहि ज्ञानवतोत्पादकेन विना किंचिज्जडं कार्य्यकरं स्वयमुत्पत्तुं शक्नोति। तस्मात् सकलजगदुत्पादकं सर्वशक्तिमन्तं जगदीश्वरं सर्वे मनुष्या मन्येरन्॥ २॥

पदार्थः-मनुष्यों को जो (**पूर्वया**) प्राचीन (**निविदा**) वेदवाणी (**कव्यता**) जिससे कि कविताई आदि कामों का विस्तार करें, उससे (**मनूनाम्**) विचारशील पुरुषों के समीप (**आयोः**) सनातन कारण से (**इमाः**) इन प्रत्यक्ष (**प्रजाः**) उत्पन्न होनेवाले प्रजाजनों को (**अजनयन्**) उत्पन्न करता है वा (**विवस्वता**) (**चक्षसा**) सब पदार्थों को दिखानेवाले सूर्य्य से (**द्याम्**) प्रकाश (**अपः**) जल (**च**) पृथिवी वा ओषधि आदि पदार्थों तथा जिस (**द्रविणोदाम्**) धन देनेवाले (**अग्निम्**) परमेश्वर को (**देवाः**) आप्त विद्वान् जन (**धारयन्**) धारण करते हैं (**सः**) वह नित्य उपासना करने योग्य है॥ २॥

भावार्थः-ज्ञानवान् अर्थात् जो चेतनायुक्त है, उसके विना उत्पन्न किये कुछ जड़ पदार्थ कार्य्य करने वाला आप नहीं उत्पन्न हो सकता। इससे समस्त जगत् के उत्पन्न करनेहारे सर्वशक्तिमान् जगदीश्वर को सब मनुष्य मानें अर्थात् तृणमात्र जो आप से नहीं उत्पन्न हो सकता तो वह कार्य्य जगत् कैसे उत्पन्न हो सके। इससे इसको उत्पन्न करनेवाला जो चेतनरूप है, वही परमेश्वर है॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

तमी॑ळत प्रथ॒मं य॑ज्ञ॒साधं॒ विश॒ आरी॒राहु॑तमृ॒ञ्जसा॒नम्।

ऊ॒र्जः पु॒त्रं भ॑र॒तं सु॒प्रदा॑नुं दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम्॥ ३॥

तम्। ई॒ळ॒त॒। प्र॒थ॒मम्। य॒ज्ञ॒ऽसाध॑म्। विशः॑। आरीः॑। आऽहु॑तम्। ऋ॒ञ्जसा॒नम्। ऊ॒र्जः॑। पु॒त्रम्। भ॒र॒तम्। सु॒प्रऽदा॑नुम्। दे॒वाः॑। अ॒ग्निम्। धा॒र॒य॒न्। द्र॒वि॒ण॒ऽदाम्॥ ३॥

पदार्थः-(**तम्**) परमात्मानम् (**ईळत**) स्तुत (**प्रथमम्**) सर्वस्य जगत आदिमं स्रष्टारम् (**यज्ञसाधम्**) यो यज्ञैर्विज्ञानादिभिर्ज्ञातुं शक्यस्तम् (**विशः**) प्रजाः (**आरीः**) आप्तुं योग्याः (**आहुतम्**) विद्वद्भिः सत्कृतम् (**ऋञ्जसानम्**) विवेकादिसाधनैः प्रसाध्यमानम् (**ऊर्जः**) वायुरूपात् कारणात् (**पुत्रम्**) प्रसिद्धं प्राणम् (**भरतम्**) धारकम् (**सुप्रदानुम्**) सुप्रं सर्पणं दानुर्दानं यस्मात्तम् (**देवाः०**) इत्यादि पूर्ववत्॥ ३॥

अन्वयः-हे मनुष्या! यं प्रथमं यज्ञसाधमृञ्जसानं विद्वद्भिराहुतमारीर्विशो भरतं सुप्रदानुमूर्जः पुत्रं प्राणं च जनयन्तं द्रविणोदामग्निं देवा धारयन् धरन्ति धारयन्ति वा तं परमेश्वरं यूयं नित्यमीळत॥ ३॥

भावार्थः-हे जिज्ञासवो मनुष्या! यूयं येनेश्वरेण सर्वेभ्यो जीवेभ्यः सर्वाः सृष्टीर्निष्पाद्य प्रापिता, येन सृष्टिधारको वायुः सूर्यश्च निर्मितस्तं विहायाऽन्यस्य कदाचिदपीश्वरत्वेनोपासनं मा कुरुत॥ ३॥

पदार्थः-हे मनुष्यो! जो (**प्रथमम्**) समस्त उत्पन्न जगत् के पहिले वर्त्तमान (**यज्ञसाधम्**) विज्ञान योगाभ्यासादि यज्ञों से जाना जाता (**ऋञ्जसानम्**) विवेक आदि साधनों से अच्छे प्रकार सिद्ध किया जाता (**आहुतम्**) विद्वानों से सत्कार को प्राप्त (**आरीः**) प्राप्त होने योग्य (**विशः**) प्रजाजनों और (**भरतम्**) धारणा वा पुष्टि करनेवाला (**सुप्रदानुम्**) जिससे कि ज्ञान देना बनता है, उस (**ऊर्जः**) कारणरूप पवन से (**पुत्रम्**) प्रसिद्ध हुए प्राण को उत्पन्न करने और (**द्रविणोदाम्**) धन आदि पदार्थों के देनेवाले (**अग्निम्**) जगदीश्वर को (**देवाः**) विद्वान् जन (**धारयन्**) धारण करते वा कराते हैं (**तम्**) उस परमेश्वर की तुम नित्य (**ईडत**) स्तुति करो॥ ३॥

भावार्थः-हे जिज्ञासु अर्थात् परमेश्वर का विज्ञान चाहनेवाले मनुष्यो! तुमको जिस ईश्वर ने सब जीवों के लिये सब सृष्टियों को उत्पन्न करके प्राप्त कराई हैं वा जिसने सृष्टि धारण करनेहारा पवन और सूर्य रचा है, उसको छोड़ के अन्य किसी की कभी ईश्वरभाव से उपासना मत करो॥ ३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

स मा॑त॒रिश्वा॑ पुरु॒वार॑पुष्टि॒र्विद॒द् गात॑वे त॒नया॑य स्व॒र्वित्।

वि॒शां गो॒पा ज॑नि॒ता रोद॑स्योर्दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम्॥ ४॥

सः। मा॒त॒रिश्वा॑। पु॒रु॒वार॑ऽपुष्टिः। वि॒दत्। गा॒तु॒म्। त॒नया॑य। स्व॒रिति॑ स्वः॒ऽवित्। वि॒शाम्। गो॒पाः। ज॒नि॒ता। रोद॑स्योः। दे॒वाः॑। अ॒ग्निम्। धा॒र॒य॒न्। द्र॒वि॒ण॒ऽदाम्॥ ४॥

पदार्थः-(**सः**) (**मातरिश्वा**) मातर्यन्तरिक्षे श्वसिति स वायुः (**पुरुवारपुष्टिः**) पुरु बहु वारा वरणीया पुष्टिर्यस्मात् सः (**विदत्**) लम्भयन् (**गातुम्**) वाचम् (**तनयाय**) पुत्राय (**स्वर्वित्**) सुखप्रापकः (**विशाम्**) प्रजानाम् (**गोपाः**) रक्षकः (**जनिता**) उत्पादकः (**रोदस्योः**) प्रकाशाप्रकाशलोकसमूहयोः (**देवाः**) इत्यादि पूर्ववत्॥४॥

अन्वयः-मनुष्यैर्येनेश्वरेण तनयाय स्वर्विद् गातुं विदद् पुरुवारपुष्टिर्मातरिश्वा बाह्याभ्यन्तरस्थो वायुर्निर्मितो यो विशां गोपा रोदस्योर्जनिताऽस्ति यं द्रविणोदामिवाग्निं देवा धारयन् स सर्वदेष्टदेवो मन्तव्यः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि वायुनिमित्तेन विना कस्यापि वाक् प्रवर्त्तितुं शक्नोति, न च कस्यापि पुष्टिर्भवितुं योग्यास्ति, नहीश्वरमन्तरेण जगत उत्पत्तिरक्षणे भवत इति वेद्यम्॥४॥

पदार्थः-मनुष्यों को चाहिये कि जिस ईश्वर ने (**तनयाय**) अपने पुत्र के समान जीव के लिये (**स्वर्वित्**) सुख को पहुंचानेहारी (**गातुम्**) वाणी को (**विदत्**) प्राप्त कराया, (**पुरुवारपुष्टिः**) जिससे अत्यन्त समस्त व्यवहार के स्वीकार करने की पुष्टि होती है, वह (**मातरिश्वा**) अन्तरिक्ष में सोने और बाहर-भीतर रहनेवाला पवन बनाया है, जो (**विशाम्**) प्रजाजनों का (**गोपाः**) पालने और (**रोदस्योः**) उजेले-अन्धेरे को वर्त्तानेहारे लोकसमूहों का (**जनिता**) उत्पन्न करनेवाला है, जिस (**द्रविणोदाम्**) धन देनेवाले के तुल्य (**अग्निम्**) जगदीश्वर को (**देवाः**) उक्त विद्वान् जन (**धारयन्**) धारण करते वा कराते हैं (**सः**) वह सब दिन इष्टदेव मानने योग्य है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पवन के निमित्त के विना किसी की वाणी प्रवृत्त नहीं हो सकती, न किसी की पुष्टि होने के योग्य और न ईश्वर के विना इस जगत् की उत्पत्ति और रक्षा के होने की संभावना है॥४॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाम्॥५॥३॥

नक्तोषसा। वर्णम्। आमेम्याने इत्याऽमेम्याने। धापयेते इति। शिशुम्। एकम्। समीची इति सम्ऽईची। द्यावाक्षामा। रुक्मः। अन्तः। वि। भाति। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥५॥

पदार्थः-(**नक्तोषासा**) रात्रिन्दिवम् (**वर्णम्**) स्वरूपम् (**आमेम्याने**) पुनः पुनरहिंसन्त्यौ (**धापयेते**) दुग्धं पाययतः (**शिशुम्**) बालकम् (**एकम्**) (**समीची**) प्राप्तसङ्गती (**द्यावाक्षामा**) प्रकाशभूमी (**रुक्मः**) स्वप्रकाशस्वरूपः (**अन्तः**) सर्वस्य मध्ये (**वि**) विशेषे (**भाति**) (**देवाः०**) इति पूर्ववत्॥५॥

अन्वयः-हे मनुष्या! यस्य सृष्टौ वर्णमामेम्याने समीची नक्तोषासा द्यावाक्षामा शिशुं धापयेते येनोत्पादितविद्युद्युक्तो रुक्मः प्राणः सर्वस्यान्तर्मध्ये विभाति यं द्रविणोदामेकमग्निं देवा धारयन् स एव सर्वस्य पिताऽस्तीति यूयं मन्यध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा धाप्यमानस्य बालकस्य पार्श्वे स्थिते द्वे स्त्रियौ दुग्धं पाययतस्तथैवाहोरात्रौ सूर्य्यपृथिवी च वर्तेते यस्य नियमेनैनं भवति स सर्वस्य जनकः कथं न स्यात्॥५॥

पदार्थः-हे मनुष्य लोगो! जिनकी सृष्टि में (**वर्णम्**) स्वरूप अर्थात् उत्पन्न मात्र को (**आमेम्याने**) बार-बार विनाश न करते हुए (**समीची**) संग को प्राप्त (**नक्तोषासा**) रात्रि-दिवस वा (**द्यावाक्षामा**) सूर्य्य और भूमि लोक (**शिशुम्**) बालक को (**धापयेते**) दुग्धपान करानेवाले माता-पिता के समान रस आदि का पान करवाते हैं, जिसकी उत्पन्न की बिजुली से युक्त (**रुक्मः**) आप ही प्रकाशस्वरूप प्राण (**अन्तः**) सबके बीच (**वि, भाति**) विशेष प्रकाश को प्राप्त होता है, जिस (**द्रविणोदाम्**) धनादि पदार्थ देनेहारे के समान (**एकम्**) अद्वितीयमात्र स्वरूप (**अग्निम्**) परमेश्वर को (**देवाः**) आप्त विद्वान् जन (**धारयन्**) धारणा करते वा कराते हैं, वही सबका पिता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे दूध पिलानेहारे बालक के समीप में स्थित दो स्त्रियां उस बालक को दूध पिलाती हैं, वैसे ही दिन और रात्रि तथा सूर्य और पृथिवी है, जिसके नियम से ऐसा होता है, वह सबका उत्पन्न करनेवाला कैसे न हो॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह परमेश्वर कैसा है, इस विषय को अगले मन्त्र में कहा है॥

रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम्॥६॥

रायः। बुध्नः। सम्ऽगमनः। वसूनाम्। यज्ञस्य। केतुः। मन्मऽसाधनः। वेरिति वेः। अमृतऽत्वम्। रक्षमाणासः। एनम्। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥६॥

पदार्थः-(**रायः**) विद्याचक्रवर्त्तिराज्यधनस्य (**बुध्नः**) यो बोधयति सर्वान् पदार्थान् वेदद्वारा सः (**सङ्गमनः**) यः सम्यग्गमयति सः (**वसूनाम्**) अग्निपृथिव्याद्यष्टानां त्रयस्त्रिंशद्देवान्तर्गतानाम् (**यज्ञस्य**) सङ्गमनीयस्य विद्याबोधस्य (**केतुः**) ज्ञापकः (**मन्मसाधनः**) यो मन्मानि विचारयुक्तानि कार्य्याणि साधयति

सः **(वेः)** कमनीयस्य **(अमृतत्वम्)** प्राप्तमोक्षाणां भावम् **(रक्षमाणासः)** ये रक्षन्ति ते **(एनम्)** यथोक्तम् **(देवाः, अग्निम्०)** इति पूर्ववत्॥६॥

अन्वयः-यं वेर्यज्ञस्य बुध्नः केतुर्मन्मसाधनो रायो वसूनां सङ्गमनो वाऽमृतत्वं रक्षमाणासो देवा यं द्रविणोदामग्निं धारयंस्तमेवैनमिष्टदेवं यूयं मन्यध्वम्॥६॥

भावार्थः-जीवनमुक्ता विदेहमुक्ता वा विद्वांसो यमाश्रित्यानन्दन्ति स एव सर्वैरुपासनीयः॥६॥

पदार्थः-हे मनुष्यो! **(वेः)** मनोहर **(यज्ञस्य)** अच्छे प्रकार समझने योग्य विद्याबोध को **(बुध्नः)** समझाने और **(केतुः)** सब व्यवहारों को अनेक प्रकारों से चितानेवाला **(मन्मसाधनः)** वा विचारयुक्त कामों को सिद्ध कराने तथा **(रायः)** विद्या, चक्रवर्त्तिराज्य, धन और **(वसूनाम्)** तेंतीस देवताओं में अग्नि, पृथिवी आदि देवताओं का **(संगमनः)** अच्छे प्रकार प्राप्त करानेवाला है वा **(अमृतत्वम्)** मोक्ष मार्ग को **(रक्षमाणासः)** राखे हुए **(देवाः)** आप्त विद्वान् जन जिस **(द्रविणोदाम्)** धन आदि पदार्थ देनेवाले के समान सब जगत् को देनेहारे **(अग्निम्)** परमेश्वर को **(धारयन्)** धारण करते वा कराते हैं **(एनम्)** उसीको तुम लोग इष्टदेव मानो॥६॥

भावार्थः-जीवनमुक्त अर्थात् देहाभिमान आदि को छोड़े हुए वा शरीरत्यागी मुक्तविद्वान् जन जिसका आश्रय करके आनन्द को प्राप्त होते हैं, वही ईश्वर सबके उपासना करने योग्य है॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

नू च॑ पु॒रा च॒ सद॑नं रयी॒णां जा॒तस्य॑ च॒ जाय॑मानस्य च॒ क्षाम्।
स॒तश्च॑ गो॒पां भव॑तश्च॒ भूरे॑र्दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम्॥७॥

नु। च॒। पु॒रा। च॒। सद॑नम्। र॒यी॒णाम्। जा॒तस्य॑। च॒। जाय॑मानस्य। च॒। क्षाम्। स॒तः। च॒। गो॒पाम्। भव॑तः। च॒। भूरे॑ः। दे॒वाः। अ॒ग्निम्। धा॒र॒य॒न्। द्र॒वि॒ण॒ः॒ऽदाम्॥७॥

पदार्थः-(**नु**) शीघ्रम्। **ऋचि तुनु०।** इति दीर्घः। **(च)** विलम्बेन **(पुरा)** कार्यात्प्राक्काले **(च)** वर्त्तमाने **(सदनम्)** उत्पत्तिस्थितिभङ्गस्य निमित्तकारणम् **(रयीणाम्)** वर्त्तमानानां पृथिव्यादिकार्य्यद्रव्याणाम् **(जातस्य)** उत्पन्नस्य कार्य्यस्य **(च)** प्रलयस्य **(जायमानस्य)** कल्पान्ते पुनरुत्पद्यमानस्य कार्यस्य जगतः **(च)** पुनर्वर्त्तमानप्रलययोः समुच्चये **(क्षाम्)** व्यापकत्वान्निवासहेतुम् **(सतः)** अनादिवर्त्तमानस्य विनाशरहितस्य कारणस्य **(च)** कार्यस्य **(गोपाम्)** रक्षकम् **(भवतः)** वर्त्तमानस्य **(च)** भूतभविष्यतोः **(भूरे)** व्यापकस्य **(देवाः)** **(अग्निम्०)** इति पूर्ववत्॥७॥

अन्वयः-हे मनुष्या! य देवां विद्वांसो नु च पुरा च रयीणां सदनं जातस्य जायमानस्य च क्षां भूरेः सतश्च भवतश्च गोपा द्रविणोदामग्निं परमेश्वरं धारयंस्तमेवैकं सर्वशक्तिमन्तं यूयं धरध्वं धारयत वा॥७॥

भावार्थः-भूतभविष्यद्वर्त्तमानानां त्रयाणां कालानामीश्वराद्विना वेत्ता प्रभुः कार्यकारणयोः पापपुण्यात्मककर्मणां व्यवस्थापकोऽन्यः कश्चिदर्थो नास्तीति सदा सर्वैर्जनैर्मन्तव्यम्॥७॥

पदार्थः-हे मनुष्यो! जिसको **(देवाः)** विद्वान् जन **(नु)** शीघ्र **(च)** और विलम्ब से वा **(पुरा)** कार्य्य से पहिले **(च)** और बीच में **(रयीणाम्)** वर्त्तमान पृथिवी आदि कार्य्य द्रव्यों के **(सदनम्)** उत्पत्ति, स्थिति और विनाश के निमित्त वा **(जातस्य)** उत्पन्न कार्यजगत् के **(च)** नाश होने तथा **(जायमानस्य)** कल्प के अन्त में फिर उत्पन्न होनेवाले कार्यरूप जगत् के **(च)** फिर इसी प्रकार जगत् के उत्पन्न और विनाश होने में **(क्षाम्)** अपनी व्याप्ति से निवास के हेतु वा **(भूरेः)** व्यापक **(सतः)** अनादिवर्त्तमान विनाशरहित कारणरूप तथा **(च)** कार्यरूप **(भवतः)** वर्त्तमान **(च)** भूत और भविष्यत् उक्त जगत् के **(गोपाम्)** रक्षक और **(द्रविणोदाम्)** धन आदि पदार्थों को देनेवाले **(अग्निम्)** जगदीश्वर को **(धारयन्)** धारण करते वा कराते हैं, उसी एक सर्वशक्तिमान् जगदीश्वर को धारण करो वा कराओ॥७॥

भावार्थः-भूत, भविष्यत् और वर्त्तमान इन तीन कालों का ईश्वर से विना जाननेवाला प्रभु, कार्य कारण वा पापी और पुण्यात्मा जनों के कामों की व्यवस्था करनेवाला अन्य कोई पदार्थ नहीं है, सब यह मनुष्यों को मानना चाहिये॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह जगदीश्वर कैसा है, यह विषय अगले मन्त्र में कहा है॥

द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत्।
द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः॥८॥

द्रविणः॒दा। द्रविणसः। तुरस्य। द्रविणः॒दा। सनरस्य। प्र। यंसत्। द्रविणः॒दाः। वीरऽवतीम्। इषम्। नः। द्रविणः॒दाः। रासते। दीर्घम्। आयुः॥८॥

पदार्थः-**(द्रविणोदाः)** यो द्रविणांसि ददाति सः **(द्रविणसः)** द्रव्यसमूहस्य विज्ञानं प्रापणं वा **(तुरस्य)** शीघ्रं सुखकरस्य **(द्रविणोदाः)** विभागविज्ञापकः **(सनरस्य)** संभज्यमानस्य। अत्र सन्धातोर्बाहुलकादौणादिकोऽरन् प्रत्ययः। **(प्र)** **(यंसत्)** नियच्छेत् **(द्रविणोदाः)** शौर्य्यादिप्रदः **(वीरवतीम्)** प्रशस्ता वीरा विद्यन्तेऽस्याम् **(इषम्)** अन्नादिप्राप्तीष्टाम् **(नः)** अस्मभ्यम् **(द्रविणोदाः)** जीवनविद्याप्रदः **(रासते)** रातु ददातु। लेट् प्रयोगो व्यत्ययेनात्मानेपदम्। **(दीर्घम्)** बहुकालपर्य्यन्तम् **(आयुः)** विद्याधर्मोपयोजकं जीवनम्॥८॥

अन्वयः-यो द्रविणोदास्तुरस्य द्रविणसः प्रयंसत्। यो द्रविणोदा सनरस्य प्रयंसत्। यो द्रविणोदा वीरवतीमिषं प्रयंसत् यो द्रविणोदा नोऽस्मभ्यं दीर्घमायू रासते तमीश्वरं सर्वे मनुष्या उपासीरन्॥८॥

भावार्थः-हे मनुष्या! यूयं येन परमगुरुणेश्वरेण वेदद्वारा सर्वपदार्थविज्ञानं कार्य्यते तमाश्रित्य यथायोग्यव्यवहाराननुष्ठाय धर्मार्थकाममोक्षसिद्धये चिरजीवित्वं संरक्षत॥८॥

पदार्थः-हे मनुष्यो! जो **(द्रविणोदाः)** धन आदि पदार्थों का देनेवाला **(तुरस्य)** शीघ्र सुख करनेवाले **(द्रविणसः)** द्रव्यसमूह के विज्ञान को **(प्र, यंसत्)** नियम में रक्खे वा जो **(द्रविणोदाः)** पदार्थों का विभाग जतानेवाला **(सनरस्य)** एक-दूसरे से जो अलग किया जाये, उस पदार्थ वा व्यवहार के विज्ञान को नियम में रक्खे वा जो **(द्रविणोदाः)** शूरता आदि गुणों का देनेवाला **(वीरवतीम्)** जिससे प्रशंसित वीर होवें, उस **(इषम्)** अन्नादि प्राप्ति की चाहना को नियम में रक्खे वा जो **(द्रविणोदाः)** आयुर्वेद अर्थात् वैद्यकशास्त्र का देनेवाला **(नः)** हम लोगों के लिये **(दीर्घम्)** बहुत समय तक **(आयुः)** जीवन **(रासते)** देवे, उस ईश्वर की सब मनुष्य उपासना करें॥८॥

भावार्थः-हे मनुष्यो! तुमको जिस परम गुरु परमेश्वर ने वेद के द्वारा सब पदार्थों का विशेष ज्ञान कराया है, उसका आश्रय करके यथायोग्य व्यवहारों का अनुष्ठान कर धर्म, अर्थ, काम और मोक्ष की सिद्धि के लिये बहुत काल पर्य्यन्त जीवन की रक्षा करो॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥९॥४॥

एव। नः। अग्ने। सम्ऽइधा। वृधानः। रेवत्। पावक। श्रवसे। वि। भाहि। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥९॥

पदार्थः-**(एव)** अवधारणे। **निपातस्य चे**ति दीर्घः। **(नः)** अस्मान् **(अग्ने)** सर्वमङ्गलकारक परमेश्वर **(समिधा)** सम्यगिध्यते प्रदीप्यते यया स्ववेदविद्यया तया **(वृधानः)** नित्यं वर्द्धमानः **(रेवत्)** राज्यादिप्रशस्ताय श्रीमते **(पावक)** पवित्र पवित्रकारक वा **(श्रवसे)** सर्वविद्याश्रवणाय सर्वान्नप्राप्तये वा **(वि)** विविधार्थे **(भाहि)** प्रकाशय **(तत्)** तेन **(नः)** अस्मान् **(मित्रः)** ब्रह्मचर्य्येण प्राप्तबलः प्राणः **(वरुणः)** ऊर्ध्वगतिहेतुरुदानः **(मामहन्ताम्)** सत्कारहेतवो भवन्तु **(अदितिः)** अन्तरिक्षम् **(सिन्धुः)** समुद्रः **(पृथिवी)** भूमिः **(उत)** अपि **(द्यौः)** प्रकाशमानः सूर्य्यादिः॥९॥

अन्वयः–हे पावकाग्ने! समिधा वृधानस्त्वं नोऽस्मान् रेवच्छ्रवस एव विभाहि, तेन त्वया निर्मिता मित्रो वरुणोऽदितिः सिन्धुः पृथिव्युतापि द्यौर्नोऽस्मान् मामहन्ताम्॥९॥

भावार्थः–हे मनुष्या! यस्य विद्यया विना यथार्थं विज्ञानं न जायते येन भूमिमारभ्याकाशपर्य्यन्ता सृष्टिर्निर्मिता यं वयमुपास्महे तमेव यूयमुपासीरन्॥९॥

अस्मिन् सूक्तेऽग्निशब्दगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति षण्णवतितमं ९६ सूक्तं चतुर्थो ४ वर्गश्च समाप्तः॥

पदार्थः–हे **(पावक)** आप पवित्र और संसार को पवित्र करने तथा **(अग्ने)** समस्त मङ्गल प्रकट करनेवाले परमेश्वर! **(समिधा)** जिससे समस्त व्यवहार प्रकाशित होते हैं, उस वेदविद्या से **(वृधानः)** नित्यवृद्धियुक्त जो आप **(नः)** हम लोगों को **(रेवत्)** राज्य आदि प्रशंसित श्रीमान् के लिये वा **(श्रवसे)** समस्त विद्या की सुनावट और अन्नों की प्राप्ति के लिये **(एव)** ही **(वि, भाहि)** अनेक प्रकार से प्रकाशमान कराते हैं **(तत्)** उन आपके बनाये हुए **(मित्रः)** ब्रह्मचर्य्य के नियम से बल को प्राप्त हुआ प्राण **(वरुणः)** ऊपर को उठानेवाला उदान वायु **(अदितिः)** अन्तरिक्ष **(सिन्धुः)** समुद्र **(पृथिवी)** भूमि **(उत)** और **(द्यौः)** प्रकाशमान सूर्य्य आदि लोक **(नः)** हम लोगों के **(मामहन्ताम्)** सत्कार के हेतु हों॥९॥

भावार्थः–हे मनुष्यो! जिसकी विद्या के विना यथार्थ विज्ञान नहीं होता वा जिसने भूमि से ले के आकाशपर्यन्त सृष्टि बनाई है और हम लोग जिसकी उपासना करते हैं, तुम लोग भी उसी की उपासना करो॥९॥

इस सूक्त में अग्नि शब्द के गुणों के वर्णन से इसके अर्थ की पूर्व सूक्तार्थ के साथ संगति है, यह जानना चाहिये॥

यह छियानवां ९६ सूक्त और चतुर्थ ४ वर्ग समाप्त हुआ॥

अथास्य सप्तनवतितमस्याष्टर्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। अग्निर्देवता। १,७,८ पिपीलिकामध्या निचृद् गायत्री। २,४,५ गायत्री। ३,६ निचृद्गायत्री च छन्दः। षड्जः स्वरः॥

अथायं सभाध्यक्षः कीदृश इत्युपदिश्यते॥

अब आठ ऋचावाले सत्तानवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में सभाध्यक्ष कैसा हो, यह उपदेश किया है॥

अप॑ नः शोशु॑चदघमग्ने॑ शुशु॒ग्ध्या र॒यिम्। अप॑ नः शोशु॑चदघम्॥ १॥

अप॑। नः। शोशु॑चत्। अ॒घम्। अग्ने॑। शु॒शु॒ग्धि। आ। र॒यिम्। अप॑। नः। शोशु॑चत्। अ॒घम्॥ १॥

पदार्थः–(**अप**) दूरीकरणे (**नः**) अस्माकम् (**शोशुचत्**) शोशुच्यात् (**अघम्**) रोगालस्यं पापम् (**अग्ने**) सभापते (**शुशुग्धि**) शोधय प्रकाशय। अत्र विकरणव्यत्ययेन श्लुः। (**आ**) समन्तात् (**रयिम्**) धनम् (**अप**) दूरीकरणे (**नः**) अस्माकम् (**शोशुचत्**) दूरीकुर्यात् (**अघम्**) मनोवाक्छरीरजन्यं पापम्॥ १॥

अन्वयः–हे अग्ने! भवान् नोऽस्माकमघमपशोशुचत् पुनः पुनर्दूरीकुर्य्यात्। रयिमाशुशुग्धि। नोऽस्माकमघमपशोशुचत्॥ १॥

भावार्थः–सभाध्यक्षेण सर्वमनुष्येभ्यो यद्यदहितकरं कर्म प्रमादोऽस्ति, तं दूरीकृत्यानालस्येन श्रीः प्रापयितव्या॥ १॥

पदार्थः–हे (**अग्ने**) सभापते! आप (**नः**) हम लोगों के (**अघम्**) रोग और आलस्यरूपी पाप का (**अप, शोशुचत्**) बार-बार निवारण कीजिये (**रयिम्**) धन को (**आ**) अच्छे प्रकार (**शुशुग्धि**) शुद्ध और प्रकाशित कराइये तथा (**नः**) हम लोगों के (**अघम्**) मन, वचन और शरीर से उत्पन्न हुए पाप की (**अप, शोशुचत्**) शुद्धि के अर्थ दण्ड दीजिये॥ १॥

भावार्थः–सभाध्यक्ष को चाहिये कि सब मनुष्यों के लिये जो-जो उनका अहितकारक कर्म और प्रमाद है, उसको मेट के निरालस्यपन से धन की प्राप्ति करावे॥ १॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

सु॒क्षे॒त्रि॒या सु॒॑गात॒ुया व॒॑सू॒या च॒॑ यजामहे। अप॑ नः शोशु॑चद॒घम्॥ २॥

सु॒ऽक्षे॒त्रि॒या। सु॒गा॒तु॒ऽया। व॒सु॒ऽया। च॒। य॒जा॒म॒हे॒। अप॑। नः। शोशु॑चत्। अ॒घम्॥ २॥

पदार्थः–(**सुक्षेत्रिया**) शोभनं क्षेत्रं वपनाधिकरणं यया नीत्या तया। अत्रे**याडियाजीकाराणामि**ति डियाजादेशः। (**सुगातुया**) शोभना गातुः पृथिवी यस्यां तया। अत्र याजादेशः। (**वसूया**) आत्मनो वसूनीच्छन्ति तया (**च**) सर्वशस्त्रास्त्रादीनां समुच्चये (**यजामहे**) सङ्गच्छामहे (**अप, नः०**) इति पूर्ववत्॥ २॥

अन्वयः-हे अग्ने! यं त्वां वसूया सुगातुया सुक्षेत्रिया च शस्त्रास्त्रसेनया वयं यजामहे स भवान्नोऽस्माकमघमपशोशुचत्॥ २॥

भावार्थः-पूर्वमन्त्रादग्ने इति -पदमनुवर्त्तते। सभाध्यक्षेण सामदण्डभेदक्रियान्वितां नीतिं संप्राप्य प्रजानां दुःखानि नित्यं दूरीकर्त्तुमुद्यमः कर्त्तव्यः प्रजयेदृश एव सभाध्यक्षः कर्त्तव्यः॥ २॥

पदार्थः-(**अग्ने**) सभाध्यक्ष! जिन आपको (**वसूया**) जिससे अपने को धनों की चाहना हो (**सुगातया**) जिसमें अच्छी पृथिवी हो और (**सुक्षेत्रिया**) अनाज बोने को जो अच्छा खेत हो, वह जिस नीति से हो, उससे (**च**) तथा शस्त्र और अस्त्र बांधनेवाली सेना से हम लोग (**यजामहे**) संग देते हैं, वे आप (**नः**) हम लोगों के (**अघम्**) दुष्ट व्यसन को (**अपशोशुचत्**) दूर कीजिये॥ २॥

भावार्थः-पिछले मन्त्र से (**अग्ने**) इस पद की अनुवृत्ति आती है। सभाध्यक्ष को चाहिये कि शान्तिवचन कहने, दुष्टों को दण्ड देने और शत्रुओं को परस्पर फूट कराने की क्रियाओं से नीति को अच्छे प्रकार प्राप्त हो के प्रजाजनों के दुःख को नित्य दूर करने के लिये उद्यम करे, प्रजाजन भी ऐसे पुरुष ही को सभाध्यक्ष करें॥ २॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह सभाध्यक्ष कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः। अप नः शोशुचदघम्॥ ३॥

प्र। यत्। भन्दिष्ठः। एषाम्। प्र। अस्माकासः। च। सूरयः। अप। नः। शोशुचत्। अघम्॥ ३॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**यत्**) यस्य (**भन्दिष्ठः**) अतिशयेन कल्याणकारकः (**एषाम्**) मनुष्यादिप्रजास्थप्राणिनाम् (**प्र**) (**अस्माकासः**) येऽस्माकं मध्ये वर्त्तमानाः। अत्राणि **वाच्छन्दसि सर्वे विधयो भवन्ती**ति वृद्ध्यभावः। (**च**) वीराणां समुच्चये (**सूरयः**) मेधाविनो विद्वांसः (**अप, नः०**) इति पूर्ववत्॥ ३॥

अन्वयः-हे अग्ने! यद्यस्य तव सभायामेषां मध्येऽस्माकासः प्रसूरयो वीराश्च सन्ति, ते सभासदः सन्तु। स भन्दिष्ठो भवान् नोऽस्माकमघं प्रापशोशुचत्॥ ३॥

भावार्थः-अत्राप्यग्ने-इति पदमनुवर्त्तते। विद्वांसः यदा सभाद्यध्यक्षा आप्ताः सभासदः पूर्णशरीरबला भृत्याश्च भवेयुस्तदा राज्यपालनं विजयश्च सम्यग्भवेताम्, अतो विपर्य्यये विपर्य्ययः॥ ३॥

पदार्थः-हे अग्ने सभापते! (**यत्**) जिस आपकी सभा में (**एषाम्**) इस मनुष्य आदि प्रजाजनों के बीच (**अस्माकासः**) हम लोगों में से (**प्र, सूरयः**) अत्यन्त बुद्धिमान् विद्वान् (**च**) और वीर पुरुष हैं, वे सभासद् हों, (**भन्दिष्ठः**) अति कल्याण करनेहारे आप (**नः**) हम लोगों के (**अघम्**) शत्रुजन्य दुःखरूप पाप को (**प्र, अप, शोशुचत्**) दूर कीजिये॥ ३॥

भावार्थः-इस मन्त्र में भी **(अग्ने)** इस पद की अनुवृत्ति आती है। जब विद्वान् सभा आदि के अधीश आप्त अर्थात् प्रामाणिक सत्य वचन को कहनेवाले सभासद् और आत्मिक, शारीरिक बल से परिपूर्ण सेवक हों, तब राज्यपालन और विजय अच्छे प्रकार होते हैं, इससे उलटेपन में उलटा ही ढंग होता है॥३॥

पुनस्तस्य कीदृशस्य कीदृशाश्चेत्युपदिश्यते॥

फिर उसके कैसे के कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

प्र यत्ते॑ अग्ने सू॒रयो॒ जाय॑ेमहि॒ प्र ते॑ व॒यम्। अप॑ न॒: शोशु॑चदघम्॥४॥

प्र। यत्। ते॒। अ॒ग्ने॒। सू॒रय॑:। जाय॑ेमहि। प्र। ते॒। व॒यम्। अप॑। न॒:। शोशु॑चत्। अ॒घम्॥४॥

पदार्थः-**(प्र)** **(यत्)** यस्य **(ते)** तव **(अग्ने)** आप्तानूचानाध्यापक **(सूरयः)** पूर्णविद्यावन्तो विद्वांसः **(जायेमहि)** **(प्र)** **(ते)** तव **(वयम्)** **(अप, नः०)** इति पूर्ववत्॥४॥

अन्वयः-हे अग्ने! यद्यस्य ते तव यादृशाः सूरयः सभासदः सन्ति, तस्य ते तव तादृशा वयमपि प्रजायेमहीदृशस्त्वं नोऽस्माकमघं प्रापशोशुचत्॥४॥

भावार्थः-इह संसारे यादृशाः धर्मिष्ठाः सभाद्यध्यक्षा मनुष्या भवेयुस्तादृशैरेव प्रजास्थैर्मनुष्यैर्भवितव्यम्॥४॥

पदार्थः-हे **(अग्ने)** आप उत्तर-प्रत्युत्तर से कहनेवाले **(यत्)** जिन **(ते)** आपके जैसे **(सूरयः)** पूरी विद्या पढ़े हुए विद्वान् सभासद् हैं, उन **(ते)** आपके वैसे ही **(वयम्)** हम लोग भी **(प्र, जायेमहि)** प्रजाजन हों और ऐसे तुम **(नः)** हम लोगों के **(अघम्)** विरोधरूप पाप को **(प्र, अप, शोशुचत्)** अच्छे प्रकार दूर कीजिये॥४॥

भावार्थः-इस संसार में जैसे धर्मिष्ठ सभा आदि के अधीश मनुष्य हों, वैसे ही प्रजाजनों को भी होना चाहिये॥४॥

अथ भौतिकोऽग्निः कीदृश इत्युपदिश्यते॥

अब भौतिक अग्नि कैसा है, यह विषय अगले मन्त्र में कहा है॥

प्र यदु॒ग्नेः स॑हस्वतो वि॒श्वतो॒ यन्ति॑ भा॒नव॑:। अप॑ न॒: शोशु॑चदघम्॥५॥

प्र। यत्। अ॒ग्नेः। सह॑स्वतः। वि॒श्वत॑:। यन्ति॑। भा॒नव॑:। अप॑। न॒:। शोशु॑चत्। अ॒घम्॥५॥

पदार्थः-**(प्र)** **(यत्)** यस्य **(अग्नेः)** पावकस्य **(सहस्वतः)** प्रशस्तं सहो बलं विद्यते यस्मिन् **(विश्वतः)** सर्वतः **(यन्ति)** गच्छन्ति **(भानवः)** प्रदीप्ताः किरणाः **(अप)** **(नः)** **(शोशुचत्)** शोशुच्यात् **(अघम्)** दारिद्र्यम्॥५॥

अन्वयः-हे विद्वांसो! यूयं यद्यस्य सहस्वतोऽग्नेर्भानवो विश्वतः प्रयन्ति, यो नोऽस्माकमघं दारिद्र्यमपशोशुचद् दूरीकरोति तं कार्येषु संप्रयुङ्ग्ध्वम्॥५॥

भावार्थः-नह्येतया विद्युता विना मूर्त्तद्रव्यमव्याप्तमस्ति यः शिल्पविद्यया कार्येषु संप्रयुक्तोऽग्निर्धनकारी जायते, स मनुष्यैः सम्यग्वेदितव्यः॥५॥

पदार्थः-हे विद्वानो! तुम **(यत्)** जिस **(सहस्वतः)** प्रशंसित बलवाले **(अग्नेः)** भौतिक अग्नि की **(भानवः)** उजेला करती हुई किरण **(विश्वतः)** सब जगह से **(प्रयन्ति)** फैलती हैं वा जो **(नः)** हम लोगों के **(अघम्)** दरिद्रपन को **(अप, शोशुचत्)** दूर करता है, उसको कामों में अच्छे प्रकार जोड़ो॥५॥

भावार्थः-ऐसा कोई मूर्त्तिमान् पदार्थ नहीं कि जो इस बिजुली से अलग हो अर्थात् सब में बिजुली व्याप्त है और जो भौतिक अग्नि शिल्पविद्या से कामों में लगाया हुआ धन इकट्ठा करनेवाला होता है, वह मनुष्यों को अच्छे प्रकार जानना चाहिये॥५॥

अथेश्वरः कीदृशोऽस्तीत्युपदिश्यते॥

अब ईश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप नः शोशुचदघम्॥६॥

त्वम्। हि। विश्वतः। मुख। विश्वतः। परिऽभूः। असि। अप। नः। शोशुचत्। अघम्॥६॥

पदार्थः-**(त्वम्)** जगदीश्वरः **(हि)** खलु **(विश्वतोमुख)** सर्वत्र व्यापकत्वादन्तर्यामितया सर्वोपदेष्टः **(विश्वतः)** सर्वतः **(परिभूः)** सर्वोपरि विराजमानः **(असि)** **(अप०)** इति पूर्ववत्॥६॥

अन्वयः-हे विश्वतोमुख जगदीश्वर! यतस्त्वं हि खलु विश्वतः परिभूरसि, तस्माद् भवान्नोऽस्माकमघमपशोशुचद्॥६॥

भावार्थः-मनुष्यैः सत्यप्रेमभावेन प्रार्थितोऽन्तर्यामीश्वर आत्मनि सत्योपदेशेन पापादेतान् पृथक्कृत्य शुभगुणकर्मस्वभावेषु प्रवर्त्तयति, तस्मादयं नित्यमुपासनीयः॥६॥

पदार्थः-हे **(विश्वतोमुख)** सबमें व्याप्त होने और अन्तर्यामीपन से सबको शिक्षा देनेवाला जगदीश्वर! जिस कारण **(त्वं, हि)** आप ही **(विश्वतः)** सब ओर से **(परिभूः)** सबके ऊपर विराजमान **(असि)** हैं, इससे **(नः)** हम लोगों के **(अघम्)** दुष्ट स्वभाव संगरूप पाप को **(अप, शोशुचत्)** दूर कराइये॥६॥

भावार्थः-सत्य-सत्य प्रेमभाव से प्रार्थना को प्राप्त हुआ अन्तर्यामी जगदीश्वर मनुष्यों के आत्मा में जो सत्य-सत्य उपदेश से उन मनुष्यों को पाप से अलग कर शुभ गुण, कर्म और स्वभाव में प्रवृत्त करता है, इससे यह नित्य उपासना करने योग्य है॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर भी वह परमेश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

द्विषो॑ नो विश्वतोमु॒खाति॑ ना॒वेव॑ पारय। अप॑ नः॒ शोशु॑चदु॒घम्॥७॥

द्विष॑:। न॒:। वि॒श्व॒त॒:ऽमु॒ख॒। अति॑। ना॒वाऽइ॑व। पा॒र॒य॒। अप॑। न॒:। शोशु॑चत्। अ॒घम्॥७॥

पदार्थः-(**द्विषः**) ये धर्मं द्विषन्ति तान् (**नः**) अस्मान् (**विश्वतोमुख**) विश्वतः सर्वतो मुखमुत्तममैश्वर्यं यस्य तत्सम्बुद्धौ (**अति**) उल्लङ्घने (**नावेव**) यथा सुदृढया नौकया समुद्रपारं गच्छति तथा (**पारय**) पारं प्रापय (**अप, नः०**) इति पूर्ववत्॥७॥

अन्वयः-हे विश्वतोमुख परमात्मँस्त्वं नो नावेव द्विषोऽतिपारय नोऽस्माकमघं शत्रूद्भवं दुःखं भवानपशोशुचत्॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा न्यायाधीशो नौकायां स्थापयित्वा समुद्रपारे निर्जने जाङ्गले देशे दस्व्वादीन् प्रजाः पालयति, तथैव सम्यगुपासित ईश्वर उपासकानां कामक्रोधलोभमोहभयशोकादीन् शत्रून् सद्यो निवार्य्य जितेन्द्रियत्वादीन् गुणान् प्रयच्छति॥७॥

पदार्थः-हे (**विश्वतोमुख**) सबसे उत्तम ऐश्वर्य्य से युक्त परमात्मन्! आप (**नावेव**) जैसे नाव से समुद्र के पार हों वैसे (**नः**) हम लोगों को (**द्विषः**) जो धर्म से द्वेष करनेवाले अर्थात् उससे विरुद्ध चलनेवाले उनसे (**अति, पारय**) पार पहुंचाइये और (**नः**) हम लोगों के (**अघम्**) शत्रुओं से उत्पन्न हुए दुःख को (**अप, शोशुचत्**) दूर कीजिये॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे न्यायधीश नाव में बैठा कर समुद्र के पार वा निर्जन जङ्गल में डाकुओं को रोक के प्रजा की पालना करता है, वैसे ही अच्छे प्रकार उपासना को प्राप्त हुआ ईश्वर अपनी उपासना करनेवालों के काम, क्रोध, लोभ, मोह, भय, शोकरूपी शत्रुओं को शीघ्र निवृत्त कर जितेन्द्रियपन आदि गुणों को देता है॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

स न॒: सिन्धु॑मिव ना॒वयाति॑ पर्षा स्व॒स्तये॑। अप॑ नः॒ शोशु॑चदु॒घम्॥८॥५॥

सः। न॒:। सिन्धु॑म्ऽइव। ना॒वया॑। अति॑। प॒र्ष॒। स्व॒स्तये॑। अप॑। न॒:। शोशु॑चत्। अ॒घम्॥८॥

पदार्थः-(**सः**) जगदीश्वरः (**नः**) अस्माकम् (**सिन्धुमिव**) यथा समुद्रं तथा (**नावया**) नावा। अत्र नौशब्दात् तृतीयैकवचनस्यायाजादेशः। (**अति**) (**पर्ष**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**स्वस्तये**) सुखाय (**अप, नः०**) इति पूर्ववत्॥८॥

अन्वयः-हे जगदीश्वर! स भवान् कृपया नोऽस्माकं स्वस्तये नावया सिन्धुमिव दुःखान्यति पर्ष, नोऽस्माकमघमपशोशुचद् भृशं दूरीकुर्यात्॥८॥

भावार्थः–अत्रोपमालङ्कारः। संतारकः सुखेन मनुष्यादीन् नावा सिन्धोरिव परमेश्वरो विज्ञानेन दुःखसागरात् तारयति स सद्यः सुखयति च॥८॥

अत्राग्नीश्वरसभाध्यक्षगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति सप्तनवतितमं ९७ सूक्तं पञ्चमो ५ वर्गश्च समाप्तः॥

पदार्थः–हे जगदीश्वर! **(सः)** सो आप कृपा करके **(नः)** हम लोगों के **(स्वस्तये)** सुख के लिये **(नावया)** नाव से **(सिन्धुमिव)** जैसे समुद्र को पार होते हैं, वैसे दुःखों के **(अति, पर्ष)** अत्यन्त पार कीजिये **(नः)** हम लोगों के **(अघम्)** अशान्ति और आलस्य को **(अप, शोशुचत्)** निरन्तर दूर कीजिये॥८॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जैसे पार करानेवाला मल्लाह सुखपूर्वक मनुष्य आदि को नाव से समुद्र के पार करता है, वैसे तारनेवाला परमेश्वर विशेष ज्ञान से दुःखसागर से पार करता और वह शीघ्र सुखी करता है॥८॥

इस सूक्त में सभाध्यक्ष, अग्नि और ईश्वर के गुणों के वर्णन से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥॥

यह सत्तानवां ९७ सूक्त और पाँचवा ५ वर्ग समाप्त हुआ॥

अथास्याष्टनवतितमस्य ऋचस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। वैश्वानरो देवता। १ विराट् त्रिष्टुप्। २ त्रिष्टुप्। ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाऽग्नी कीदृशावित्युपदिश्यते॥

अब अट्ठानवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में ईश्वर और भौतिक अग्नि कैसे हैं, यह विषय कहा है॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण॥ १॥

वैश्वानरस्य। सुऽमतौ। स्याम। राजा। हि। कम्। भुवनानाम्। अभिऽश्रीः। इतः। जातः। विश्वम्। इदम्। वि। चष्टे। वैश्वानरः। यतते। सूर्येण॥ १॥

पदार्थः-(**वैश्वानरस्य**) विश्वेषु नरेषु जीवेषु भवस्य (**सुमतौ**) शोभना मतिर्यस्य यस्माद्वा तस्याम् (**स्याम**) भवेम (**राजा**) न्यायाधीशः सर्वाऽधिपतिरीश्वरः। प्रकाशमानौ विद्युदग्निर्वा (**हि**) खलु (**कम्**) सुखम् (**भुवनानाम्**) लोकानाम् (**अभिश्रीः**) अभिताः श्रियो यस्माद्वा (**इतः**) कारणात् (**जातः**) प्रसिद्धः (**विश्वम्**) सकलं जगत् (**इदम्**) प्रत्यक्षम् (**वि**) (**चष्टे**) दर्शयति (**वैश्वानरः**) सर्वेषां जीवानां नेता (**यतते**) संयतो भवति (**सूर्येण**) प्राणेन वा मार्त्तण्डेन सह। अत्राहुर्नैरुक्ताः-**इतो जातः सर्वमिदमभिविपश्यति। वैश्वानरः संयतते सूर्येण। राजा यः सर्वेषां भूतानामभिश्रयणीयस्तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामेति। तत्को वैश्वानरः? मध्यम इत्याचार्याः वर्षकर्मणा ह्येनं स्तौति** (निरु०७.२२)॥१॥

अन्वयः-यो वैश्वानर इतो जात इदं कं विश्वं जगद्विचष्टे यः सूर्येण सह यतते यो भुवनानामभिश्री राजास्ति तस्य वैश्वानरस्य सुमतौ हि वयं स्याम॥१॥

भावार्थः-अत्र श्लेषालङ्कारः। हे मनुष्या! योऽभिव्याप्य सर्वं जगत्प्रकाशयति तस्यैव सुगुणैः प्रसिद्धायां तदाज्ञायां नित्यं प्रवर्त्तध्वम्। यस्तथा सूर्य्यादिप्रकाशकोऽग्निरस्ति तस्य विद्यासिद्धौ च नैवं विना कस्यापि मनुष्यस्य पूर्णाः श्रियो भवितुं शक्यन्ते॥१॥

पदार्थः-जो (**वैश्वानरः**) समस्त जीवों को यथायोग्य व्यवहारों में वर्त्तानेवाला ईश्वर वा जाठराग्नि (**इतः**) कारण से (**जातः**) प्रसिद्ध हुए (**इदम्**) इस प्रत्यक्ष (**कम्**) सुख को (**विश्वम्**) वा समस्त जगत् को (**विचष्टे**) विशेष भाव से दिखलाता है और जो (**सूर्येण**) प्राण वा सूर्यलोक के साथ (**यतते**) यत्न करनेवाला होता है या जो (**भुवनानाम्**) लोकों का (**अभिश्रीः**) सब प्रकार से धन है तथा जिस भौतिक अग्नि से सब प्रकार का धन होता है वा (**राजा**) जो न्यायाधीश सबका अधिपति है तथा प्रकाशमान बिजुलीरूप अग्नि है, उस (**वैश्वानरस्य**) समस्त पदार्थों को देनेवाले ईश्वर का भौतिक अग्नि की (**सुमतौ**)

श्रेष्ठ मति में अर्थात् जो कि अत्यन्त उत्तम अनुपम ईश्वर की प्रसिद्ध की हुई मति वा भौतिक अग्नि से अतीव प्रसिद्ध हुई मति उसमें **(हि)** ही **(वयम्)** हम लोग **(स्याम)** स्थिर हों॥१॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। हे मनुष्यो! जो सबसे बड़ा व्याप्त होकर सब जगत् को प्रकाशित करता है, उसीके अति उत्तम गुणों से प्रसिद्ध उसकी आज्ञा में नित्य प्रवृत्त होओ तथा जो सूर्य्य आदि को प्रकाश करनेवाला अग्नि है, उसकी विद्या की सिद्धि में भी प्रवृत्त होओ, इसके विना किसी मनुष्य को पूर्ण धन प्राप्त नहीं हो सकता॥१॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्यां पृ॒ष्टो विश्वा॒ ओष॑धी॒रा वि॑वेश।
वै॒श्वा॒न॒रः सह॑सा पृ॒ष्टो अ॒ग्निः स नो॒ दिवा॑ स रि॒षः पा॑तु॒ नक्त॑म्॥२॥

पृ॒ष्टः। दि॒वि। पृ॒ष्टः। अ॒ग्निः। पृ॒थि॒व्याम्। पृ॒ष्टः। विश्वाः॑। ओष॑धीः। आ। वि॒वे॒श॒। वै॒श्वा॒न॒रः। सह॑सा। पृ॒ष्टः। अ॒ग्निः। सः। नः॒। दिवा॑। सः। रि॒षः। पा॒तु॒। नक्त॑म्॥२॥

पदार्थः-(**पृष्टः**) विदुषः प्रति यः पृच्छ्यते (**दिवि**) दिव्यगुणसम्पन्ने जगति (**पृष्टः**) (**अग्निः**) विज्ञानस्वरूपम् ईश्वरो विद्युदग्निर्वा (**पृथिव्याम्**) अन्तरिक्षे भूमौ वा (**पृष्टः**) प्रष्टव्यः (**विश्वाः**) अखिलाः (**ओषधीः**) सोमलताद्याः (**आ**) सर्वतः (**विवेश**) प्रविष्टोऽस्ति (**वैश्वानरः**) सर्वस्य नरसमूहस्य नेता (**सहसा**) बलादिगुणैः सह वर्त्तमानाः (**पृष्टः**) (**अग्निः**) (**सः**) (**नः**) अस्मान् (**दिवा**) विज्ञानान्धकारप्रकाशेन सह (**सः**) (**रिषः**) हिंसकात् (**पातु**) पाति वा (**नक्तम्**) रात्रौ॥२॥

अन्वयः-योऽग्निर्विद्वद्भिर्दिवि पृष्टो यः पृथिव्यां पृष्टो यः पृष्टो वैश्वानरोऽग्निर्विश्वा ओषधीराविवेश सहसा पृष्टः स नो दिवा रिषः स नक्तं च पातु पाति वा॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्यैर्विदुषां समीपं गत्वेश्वरस्य विद्युदादेश्च गुणान् पृष्ट्वोपकारं चाश्रित्य हिंसायां च न स्थातव्यम्॥२॥

पदार्थः-जो (**अग्निः**) ईश्वर वा भौतिक अग्नि (**दिवि**) दिव्यगुण सम्पन्न जगत् में (**पृष्टः**) विद्वानों के प्रति पूछा जाता वा जो (**पृथिव्याम्**) अन्तरिक्ष वा भूमि में (**पृष्टः**) पूछने योग्य है वा जो (**पृष्टः**) पूछने योग्य (**वैश्वानरः**) सब मनुष्यमात्र को सत्य व्यवहार में प्रवृत्त करानेहारा (**अग्निः**) ईश्वर और भौतिक अग्नि (**विश्वा**) समस्त (**ओषधीः**) सोमलता आदि ओषधियों में (**आ, विवेश**) प्रविष्ट हो रहा और (**सहसा**) बल आदि गुणों के साथ वर्त्तमान (**पृष्टः**) पूछने योग्य है, वह (**नः**) (**सः**) हम लोगों को (**दिवा**) दिन में (**रिषः**) मारनेवाले से और (**नक्तम्**) रात्रि में मारनेवाले से (**पातु**) बचावे वा भौतिक अग्नि बचाता है॥२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को चाहिये कि विद्वानों के समीप जाकर ईश्वर वा बिजुली आदि अग्नि के गुणों को पूछ कर ईश्वर की उपासना और अग्नि के गुणों से उपकारों का आश्रय करके हिंसा में न ठहरें॥ २॥

अथेश्वरविद्वांसौ कीदृशावित्युपदिश्यते॥

अब ईश्वर और विद्वान् कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

वैश्वा॑नर॒ तव॒ तत्स॒त्यम॑स्त्व॒स्मान् रायो॑ म॒घवा॑नः सचन्ताम्।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः सिन्धुः पृथि॒वी उ॒त द्यौः॥ ३॥ ६॥

वैश्वा॑नर। तव॑। तत्। स॒त्यम्। अ॒स्तु॒। अ॒स्मान्। रायः॑। म॒घऽवा॑नः। स॒च॒न्ता॒म्। तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒ह॒न्ता॒म्। अदि॑तिः। सिन्धुः॑। पृ॒थि॒वी। उ॒त। द्यौः॥ ३॥

पदार्थः-(**वैश्वानर**) सर्वेषु मनुष्येषु विद्याप्रकाशक (**तव**) (**तत्**) (**सत्यम्**) व्रतम (**अस्तु**) प्राप्तं भवतु (**अस्मान्**) (**रायः**) विद्याराजश्रियः (**मघवानः**) मघं परमपूज्यं विद्याधनं विद्यते येषां विदुषां राज्ञां वा ते (**सचन्ताम्**) समवयन्तु (**तत्**) (**नः**) अस्मान् (**मित्रः**) सुहृत् (**वरुणः**) उत्तमगुणस्वभावो मनुष्यः (**मामहन्ताम्**) (**अदितिः**) विश्वेदेवाः सर्वे विद्वांसः (**सिन्धुः**) अन्तरिक्षस्थो जलसमूहः (**पृथिवी**) भूमिः (**उत**) (**द्यौः**) विद्युत्प्रकाशः॥ ३॥

अन्वयः-हे वैश्वानर! यत्तव सत्यं शीलमस्ति तदस्मान् प्राप्तमस्तु। यन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौश्च मामहन्तां तदैश्वर्यमपि नोऽस्मान् प्राप्तमस्तु। मघवानो यान् रायः सचन्तां तान् वयमुताऽपि प्राप्नुयाम॥ ३॥

भावार्थः-मनुष्या ईश्वरस्य विदुषां च सकाशात् सत्यं शीलं धर्म्याणि धनानि धार्मिकान् मनुष्यान् सक्रियाः पदार्थविद्याश्च पुरुषार्थेन प्राप्य सर्वसुखाय प्रयतेरन्॥ ३॥

अत्रेश्वराग्निविद्वत्संबन्धिकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोद्धव्या॥

इत्यष्टानवतितमं ९८ सूक्तं षष्ठो ६ वर्गश्च समाप्तः॥

पदार्थः-हे (**वैश्वानर**) सब मनुष्यों में विद्या का प्रकाश करनेहारे ईश्वर वा विद्वान्! जो (**तव**) आपका (**सत्यम्**) सत्यशील है (**तत्**) वह (**अस्मान्**) हम लोगों को प्राप्त (**अस्तु**) हो, जो (**मित्रः**) मित्र (**वरुणः**) उत्तम गुणयुक्त स्वभाववाला मनुष्य (**अदितिः**) समस्त विद्वान् जन (**सिन्धुः**) अन्तरिक्ष में ठहरनेवाला जल (**पृथिवी**) भूमि और (**द्यौः**) बिजुली का प्रकाश (**मामहन्ताम्**) उन्नति देवे (**तत्**) वह ऐश्वर्य्य (**नः**) हम लोगों को प्राप्त हो, वा (**मघवानः**) जिन के परम सत्कार करने योग्य विद्या धन हैं, वे

विद्वान् व राजा लोग जिन **(रायः)** विद्या और राज्य श्री को **(सचन्ताम्)** निःसन्देह युक्त करें, उनको हम लोग **(उत)** और भी प्राप्त हों॥३॥

भावार्थः-ईश्वर और विद्वानों की उत्तेजना से सत्यशील धर्मयुक्त धन धार्मिक मनुष्य और क्रिया कौशलयुक्त पदार्थविद्याओं को पुरुषार्थ से पाकर समस्त सुख के लिये अच्छे प्रकार यत्न करें॥३॥

इस सूक्त में अग्नि और विद्वानों से सम्बन्ध रखनेवाले कर्म के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अट्ठानवां ९८ सूक्त और ६ छठा वर्ग पूरा हुआ॥

अथास्यैकर्चस्यैकोनशततमस्य सूक्तस्य मरीचिपुत्रः कश्यप ऋषिः। जातवेदा अग्निर्देवता। निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेश्वरः कीदृश इत्युपदिश्यते॥

अब एक ऋचावाले निन्नानवें सूक्त का आरम्भ है। इसमें ईश्वर कैसा है, यह वर्णन किया है॥

जा॒तवे॑दसे सुनवाम॒ सोम॑मरा॒तीय॒तो नि द॑हाति॒ वेद॑:।
स न॑: पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धुं॑ दु॒रित॑ात्य॒ग्नि:॥ १॥ ७॥

जा॒तऽवे॑दसे। सु॒न॒वा॒म॒। सोम॑म्। अ॒रा॒ति॒ऽय॒तः। नि। द॒हा॒ति॒। वेद॑:। सः। न॒:। प॒र्ष॒त्। अति॑। दु॒:गानि॑। विश्वा॑। ना॒वाऽइ॑व। सिन्धु॑म्। दु॒:ऽइ॑ता। अति॑। अ॒ग्नि:॥ १॥

पदार्थः–(**जातवेदसे**) यो जातं सर्वं वेत्ति विन्दति जातेषु विद्यमानोऽस्ति तस्मै (**सुनवाम**) पूजयाम (**सोमम्**) सकलैश्वर्य्यमुत्पन्नं संसारस्थं पदार्थसमूहम् (**अरातीयतः**) शत्रोरिवाचरणशीलस्य (**नि**) निश्चयार्थे (**दहाति**) दहति (**वेदः**) धनम् (**सः**) (**नः**) अस्मान् (**पर्षत्**) संतारयति (**अति**) (**दुर्गाणि**) दुःखेन गन्तुं योग्यानि स्थानानि (**विश्वा**) सर्वाणि (**नावेव**) यथा नौका तथा (**सिन्धुम्**) समुद्रम् (**दुरिता**) दुःखेन नेतुं योग्यानि (**अति**) (**अग्निः**) विज्ञानस्वरूपो जगदीश्वरः। **इमं मन्त्र यास्काऽऽचार्य्य एवं समाचष्टे। जातवेदस इति जातमिदं सर्वं सचराचरं स्थित्युत्पत्तिप्रलयन्यायेनास्थाय सुनवाम सोममिति प्रसवेनाभिषवाय सोमं राजानममृतमरातीयतो यज्ञार्थमिति स्मो निश्चये निदहाति दहति भस्मीकरोति सोमो दददित्यर्थः। स नः पर्षदति दुर्गाणि दुर्गमनानि स्थानानि नावेव सिन्धुं यथा कश्चित्कर्णधारो नावेव सिन्धोः स्यन्दनान्नदीं जलदुर्गां महाकूलां तारयति दुरितात्यग्निरिति दुरितानि तारयति॥** (निरु०१४.३३)॥१॥

अन्वयः–यस्मै जातवेदसे जगदीश्वराय वयं सोमं सुनवाम यश्चारातीयतो वेदो निदहाति, सोऽग्निर्नावेव सिन्धुं नोऽतिदुर्गाण्यतिदुरिता विश्वा पर्षत् सोऽत्रान्वेषणीयः॥१॥

भावार्थः–अत्रोपमालङ्कारः। यथा कर्णधाराः कठिनमहासमुद्रेषु महानौकाभिर्मनुष्यादीन् सुखेन पारं नयन्ति तथैव सुपासितो जगदीश्वरो दुःखरूपे महासमुद्रे स्थितान् मनुष्यान् विज्ञानादिदानैस्तत्पारं नयति, परमेश्वरोपासक एव मनुष्यः शत्रुपराभवं कृत्वा परमानन्दं प्राप्तुं शक्नोति, किं सामर्थ्यमन्यस्य॥१॥

अत्रेश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्यकोनशततमं ९९ सूक्तं सप्तमो ७ वर्गश्च समाप्तः॥

पदार्थः–जिस (**जातवेदसे**) उत्पन्न हुए चराचर जगत् को जानने और प्राप्त होनेवाले वा उत्पन्न हुए सर्व पदार्थों में विद्यमान जगदीश्वर के लिये हम लोग (**सोमम्**) समस्त ऐश्वर्य्ययुक्त सांसारिक पदार्थों का (**सुनवाम**) निचोड़ करते हैं अर्थात् यथायोग्य सबको वर्त्तते हैं और जो (**अरातीयतः**) अधर्मियों के समान वर्त्ताव रखनेवाले दुष्ट जन के (**वेदः**) धन को (**नि, दहाति**) निरन्तर नष्ट करता है (**सः**) वह

(अग्निः) विज्ञानस्वरूप जगदीश्वर जैसे मल्लाह **(नावेव)** नौका से **(सिन्धुम्)** नदी वा समुद्र के पार पहुंचाता है, वैसे **(नः)** हम लोगों को **(अति)** अत्यन्त **(दुर्गाणि)** दुर्गति और **(अतिदुरिता)** अतीव दुःख देनेवाले **(विश्वा)** समस्त पापाचरणों के **(पर्षत्)** पार करता है, वही इस जगत् में खोजने के योग्य है॥१॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जैसे मल्लाह कठिन बड़े समुद्रों में अत्यन्त विस्तारवाली नावों से मनुष्यादिकों को सुख से पार पहुंचाते हैं, वैसे ही अच्छे प्रकार उपासना किया हुआ जगदीश्वर दुःखीरूपी बड़े भारी समुद्र में स्थित मनुष्यों को विज्ञानादि दानों से उसके पार पहुँचाता है। इसलिये उसकी उपासना करनेहारा ही मनुष्य शत्रुओं को हरा के उत्तम वीरता के आनन्द को प्राप्त हो सकता, और का क्या सामर्थ्य है॥१॥

इस सूक्त में ईश्वर के गुणों के वर्णन से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह निन्नानवाँ ९९ सूक्त और सातवाँ ७ वर्ग समाप्त हुआ॥

अथाऽस्यैकोनविंशर्चस्य शततमस्य सूक्तस्य वृषागिरो महाराजस्य पुत्रभूता वार्षागिरा ऋज्राश्वाम्बरीषसहदेवभयमानसुराधस ऋषयः। इन्द्रो देवता। १,५ पङ्क्तिः। २,१३,१७ स्वराट् पङ्क्तिः। ६,१०,१६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३,४,११,१८ विराट् त्रिष्टुप्। ७-९, १२,१४,१५,१९ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथायं सूर्यलोकः कीदृश इत्युपदिश्यते॥

अब उन्नीस ऋचावाले सौवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सूर्य्यलोक कैसा है, यह विषय कहा है॥

स यो वृषा॒ वृष्ण्ये॑भि॒: समो॑का म॒हो दि॒वः पृ॑थि॒व्याश्च॑ स॒म्राट्।
स॒ती॒न॒स॑त्वा॒ हव्यो॒ भरे॑षु म॒रुत्वा॑न्नो भवत्विन्द्र ऊ॒ती॥ १॥

सः। यः। वृषा। वृष्ण्येभिः। सम्ऽओकाः। महः। दिवः। पृथिव्याः। च। सम्ऽराट्। सतीनऽसत्वा। हव्यः। भरेषु। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥ १॥

पदार्थः-(**सः**) (**यः**) (**वृषा**) वृष्टिहेतुः (**वृष्ण्येभिः**) वृषसु भवैः किरणैः। **वाच्छन्दसि सर्वे विधयो भवन्ती**ति प्रकृतिभावाभावेऽल्लोपः। (**समोकाः**) सम्यगोकांसि निवासस्थानानि यस्मिन् सः (**महः**) (**दिवः**) प्रकाशस्य (**पृथिव्याः**) भूमेर्मध्ये (**च**) सर्वमूर्त्तलोकद्रव्यसमुच्चये (**सम्राट्**) यः सम्यग्राजते सः (**सतीनसत्वा**) यः सतीनं जलं सादयति सः। **सतीनमित्युदकनामसु पठितम्।** (निघं०१.१२) (**हव्यः**) होतुमादातुमर्हः (**भरेषु**) पालनपोषणनिमित्तेषु पदार्थेषु (**मरुत्वान्**) प्रशस्ता मरुतो विद्यन्तेऽस्य सः (**नः**) अस्माकम् (**भवतु**) (**इन्द्रः**) सूर्यो लोकः (**ऊती**) ऊतये रक्षणाद्याय। अत्र **सुपां सुलुगि**ति चतुर्थ्या एकवचनस्य पूर्वसवर्णादेशः॥ १॥

अन्वयः-हे मनुष्या! यूयं यो वृषा समोकाः सतीनसत्वा हव्यो मरुत्वान् महो दिवः पृथिव्याश्च लोकानां मध्ये सम्राडिन्द्रोऽस्ति, स यथा वृष्ण्येभिर्भरेषु न ऊत्यूतये भवतु तथा प्रयतध्वम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यः परिमाणेन महान् वायुनिमित्तेन प्रसिद्धः प्रकाशस्वरूपः सूर्यलोको वर्त्तते, तस्मादनेक उपकारा विद्यया ग्रहीतव्याः॥ १॥

पदार्थः-हे मनुष्यो! तुम (**यः**) जो (**वृषा**) वर्षा का हेतु (**समोकाः**) जिसमें समीचीन निवास के स्थान हैं (**सतीनसत्वा**) जो जल को इकठ्ठा करता (**हव्यः**) और ग्रहण करने योग्य (**मरुत्वान्**) जिसके प्रशंसित पवन हैं जो (**महः**) अत्यन्त (**दिवः**) प्रकाश तथा (**पृथिव्याः**) भूमि लोक (**च**) और समस्त मूर्तिमान् लोकों वा पदार्थों के बीच (**सम्राट्**) अच्छा प्रकाशमान (**इन्द्रः**) सूर्य्यलोक है (**सः**) वह जैसे (**वृष्ण्येभिः**) उत्तमता में प्रकट होनेवाली किरणों से (**भरेषु**) पालन और पुष्टि करानेवाले पदार्थों में (**नः**) हमारे (**ऊती**) रक्षा आदि व्यवहारों के लिये (**भवतु**) होता है, वैसे उत्तम-उत्तम यत्न करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जो परिणाम से बड़ा, वायुरूप कारण से प्रकट और प्रकाशस्वरूप सूर्य्य लोक है, उससे विद्यापूर्वक अनेक उपकार लेवें॥१॥

अथेश्वरविद्वांसौ कीदृक्कर्माणावित्युपदिश्यते॥

अब ईश्वर और विद्वान् कैसे कर्मवाले हैं, इस विषय को अगले मन्त्र में कहा है॥

यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति।
वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती॥२॥

यस्य। अनाप्तः। सूर्यस्यऽइव। यामः। भरेऽभरे। वृत्रऽहा। शुष्मः। अस्ति। वृषन्ऽतमः। सखिऽभिः। स्वेभिः। एवैः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥२॥

पदार्थः-(**यस्य**) परमेश्वरस्याप्तस्य विदुषः सभाध्यक्षस्य वा (**अनाप्तः**) मूर्खैः शत्रुभिरप्राप्तः (**सूर्यस्येव**) यथा प्रत्यक्षस्य मार्तण्डस्य लोकस्य तथा (**यामः**) मर्यादा (**भरेभरे**) धर्त्तव्ये धर्त्तव्ये पदार्थे युद्धे युद्धे वा (**वृत्रहा**) तत्तत्पापफलदानेन वृत्रान् धर्मावरकान् हन्ति (**शुष्मः**) प्रशस्तानि शुष्माणि बलानि विद्यन्तेऽस्मिन् (**अस्ति**) वर्त्तते (**वृषन्तमः**) अतिशयेन सुखवर्षकः (**सखिभिः**) धर्मानुकूलस्वाज्ञापालकैर्मित्रं (**स्वेभिः**) स्वकीयभक्तैः (**एवैः**) प्राप्तैः प्रशस्तज्ञानैः (**मरुत्वान्**) यस्य सृष्टौ सेनायां वा प्रशस्ता वायवो मनुष्या वा विद्यन्ते सः (**नः**) (**भवतु**) (**इन्द्रः**) परमैश्वर्य्यवान् (**ऊती**) रक्षणादिव्यवहारसिद्धये॥२॥

अन्वयः-यस्य भरेभरे सूर्यस्येव वृत्रहा शुष्मो यामोऽनाप्तोऽस्ति स वृषन्तमो मरुत्वानिन्द्रः स्वेभिरेवैः सखिभिरुपसेवितो नः सततमूत्यूतये भवतु॥२॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यदि सवितृलोकस्याप्तविदुषश्च गुणान्तो दुर्विज्ञेयोऽस्ति, तर्हि परमेश्वरस्य तु का कथा! नहि खल्वेतयोराश्रयेण विना कस्यचित्पूर्णं रक्षणं संभवति, तस्मादेताभ्यां सह सदा मित्रता रक्ष्येति वेद्यम्॥२॥

पदार्थः-(**यस्य**) जिस परमेश्वर वा विद्वान् सभाध्यक्ष के (**भरेभरे**) धारण करने योग्य पदार्थ-पदार्थ वा युद्ध-युद्ध में (**सूर्य्यस्येव**) प्रत्यक्ष सूर्यलोक के समान (**वृत्रहा**) पापियों के यथायोग्य पाप फल को देने से धर्म को छिपानेवालों का विनाश करता और (**शुष्मः**) जिस में प्रशंसित बल है, वह (**यामः**) मर्यादा का होना (**अनाप्तः**) मूर्ख और शत्रुओं ने नहीं पाया (**अस्ति**) है (**सः**) वह (**वृषन्तमः**) अत्यन्त सुख बढ़ानेवाला तथा (**मरुत्वान्**) प्रशंसित सेना जनयुक्त वा जिसकी सृष्टि में प्रशंसित पवन है, वह (**इन्द्रः**) परमैश्वर्यवान् ईश्वर वा सभाध्यक्ष सज्जन (**स्वेभिः**) अपने सेवकों के (**एवैः**) पाये हुए प्रशंसित ज्ञानों और (**सखिभिः**) धर्म के अनुकूल आज्ञापालनेहारे मित्रों से उपासना और प्रशंसा को प्राप्त हुआ (**नः**) हम लोगों के (**ऊती**) रक्षा आदि व्यवहारों के सिद्ध करने के लिये (**भवतु**) हो॥२॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। मनुष्यों को यह जानना चाहिये कि यदि सूर्यलोक तथा आप्त विद्वान् के गुण और स्वभावों का पार दुःख से जानने योग्य है तो परमेश्वर का तो क्या ही कहना है! इन दोनों के आश्रय के विना किसी की पूर्ण रक्षा नहीं होती, इससे इनके साथ सदा मित्रता रखें॥२॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः।
तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती॥३॥

दिवः। न। यस्य। रेतसः। दुघानाः। पन्थासः। यन्ति। शवसा। अपरिऽइताः। तरत्ऽद्वेषाः। ससहिः। पौंस्येभिः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥३॥

पदार्थः-(**दिवः**) प्रकाशकर्मणः सूर्य्यलोकस्य (**न**) इव (**यस्य**) जगदीश्वरस्याऽध्यापकस्यानूचानविदुषो वा (**रेतसः**) वीर्यस्य (**दुघानाः**) प्रपूरकाः। अत्र वर्णव्यत्ययेन हस्य घः। (**पन्थासः**) मार्गाः (**यन्ति**) प्राप्नुवन्ति गच्छन्ति वा (**शवसा**) बलेन (**अपरीताः**) अवर्जिताः (**तरद्द्वेषाः**) तरन्ति द्वेषान् येषु ते (**सासहिः**) अतिशयेन सहनशीलः। **सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ।** (अष्टा०वा०३.२.१७१। इति यङन्तात्सहधातोः किः प्रत्ययः। (**पौंस्येभिः**) बलैः सह वर्त्तमानाः। **पौंस्यानीति बलनामसु पठितम्।** (निघं०२.९) (**मरुत्वान्नो०**) इति पूर्ववत्॥३॥

अन्वयः-यस्य दिवो नेव रेतसः शवसाऽपरीता दुघानास्तरद्द्वेषाः पन्थासो यन्ति पौंस्येभिः सासहिर्मरुत्वानस्ति स इन्द्रो न ऊती भवतु॥३॥

भावार्थः-अत्रोपमालङ्कारः।[४] यथा सूर्य्यस्य प्रकाशेन सर्वे मार्गा सुदृश्या गमनीया अदृश्यदस्युचोरकण्टका भवन्ति, तथैव वेदद्वारा परमेश्वरस्य विदुषो वा मार्गाः सुप्रकाशिता भवन्ति, न किल तेषु गमनेन विना कश्चिदपि मनुष्यः द्वेषादिदोषेभ्यः पृथग्भवितुं शक्नोति, तस्मात् सर्वैरेतन्मार्गैर्नित्यं गन्तव्यम्॥३॥

पदार्थः-(**यस्य**) जिस ईश्वर वा सभाध्यक्ष वा उपदेश करनेवाले विद्वान् के (**दिवः**) सूर्य्यलोक के (**न**) समान (**रेतसः**) पराक्रम की (**शवसा**) प्रबलता से (**अपरीताः**) न छोड़े हुए (**दुघानाः**) व्यवहारों को पूर्ण करनेवाला (**तरद्द्वेषाः**) जिनमें विरोधों के पार हों वे (**पन्थासः**) मार्ग (**यन्ति**) प्राप्त होते और

---

४. हिन्दी भावार्थ में श्लेष भी लिखा है। सं०

जाते हैं वा जो (**पौंस्येभिः**) बलों के साथ वर्त्तमान (**सासहिः**) अत्यन्त सहन करनेवाला (**मरुत्वान्**) जिसकी सृष्टि में प्रशंसित प्रजा है, वह (**इन्द्रः**) परमैश्वर्य्यवान् परमेश्वर वा सभाध्यक्ष (**नः**) हम लोगों के (**ऊती**) रक्षा आदि व्यवहारों के लिये (**भवतु**) हो॥३॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। जैसे सूर्य्य के प्रकाश से समस्त मार्ग अच्छे देखने और गमन करने योग्य वा डाकू, चोर और कांटों से यथायोग्य अप्रतीत होते हैं, वैसे वेदद्वारा परमेश्वर वा विद्वान् के मार्ग अच्छे प्रकाशित होते हैं। निश्चय है कि उनमें चले विना कोई मनुष्य वैर आदि दोषों से अलग नहीं हो सकता, इससे सबको चाहिये कि इन मार्गों से नित्य चलें॥३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

सो अङ्गिरोभिरङ्गिरस्तमो भूद् वृषा वृषभिः सखिभिः सखा सन्।
ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती॥४॥

सः। अङ्गिरःऽभिः। अङ्गिरःऽतमः। भूत्। वृषा। वृषऽभिः। सखिऽभिः। सखा। सन्। ऋग्मिऽभिः। ऋग्मी। गातुऽभिः। ज्येष्ठः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥४॥

पदार्थः-(**सः**) (**अङ्गिरोभिः**) अङ्गेषु रसभूतैः प्राणैः सह (**अङ्गिरस्तमः**) अतिशयेन प्राणवद्वर्त्तमानः (**भूत्**) भवति। अत्राडभावः। (**वृषा**) सुखसेचकः (**वृषभिः**) सुखवृष्टिनिमित्तैः (**सखिभिः**) सुहृद्भिः (**सखा**) सुहृत् (**सन्**) (**ऋग्मिभिः**) ऋच ऋग्वेदमन्त्राः सन्ति येषान्त ऋग्मयस्तैः। अत्र मत्वर्थीयो बाहुलकाद् ग्मिनिः प्रत्ययः। (**ऋग्मी**) ऋग्वेदी (**गातुभिः**) विद्यासुशिक्षिताभिर्वाणीभिः (**ज्येष्ठः**) अतिशयेन प्रशंसनीयः। अत्र **ज्य च।** (अष्टा०५.३.६१) इति सूत्रेण प्रशस्यस्य स्थाने ज्यादेशः। (**मरुत्वान्नो०**) इति पूर्ववत्॥४॥

अन्वयः-योऽङ्गिरोभिरङ्गिरस्तमो वृषभिर्वृषा सखिभिः सखा ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठः सन् भूदस्ति, स मरुत्वानिन्द्रो न ऊती भवतु॥४॥

भावार्थः-हे मनुष्या! यो यथावदुपकारी सर्वोत्कृष्टः परमेश्वरो वा सभाद्यध्यक्षो विद्वानस्ति, तं नित्यं भजध्वम्॥४॥

पदार्थः-जो (**अङ्गिरोभिः**) अङ्गों में रसरूप हुए प्राणों के साथ (**अङ्गिरस्तमः**) अत्यन्त प्राण के समान वा (**वृषभिः**) सुख की वर्षा के कारणों से (**वृषा**) सुख सींचनेवाला वा (**सखिभिः**) मित्रों के साथ (**सखा**) मित्र वा (**ऋग्मिभिः**) ऋग्वेद के पढ़े हुओं के साथ (**ऋग्मी**) ऋग्वेद वा (**गातुभिः**) विद्या से अच्छी शिक्षा को प्राप्त हुई वाणियों से (**ज्येष्ठः**) प्रशंसा करने योग्य (**सन्**) हुआ (**भूत्**) है (**सः**) वह

(मरुत्वान्) अपनी सृष्टि में प्रजा को उत्पन्न करनेवाला वा अपनी सेना में प्रशंसित वीर पुरुष रखनेवाला **(इन्द्रः)** ईश्वर और सभापति **(नः)** हम लोगों के **(ऊती)** रक्षा आदि व्यवहार के लिये **(भवतु)** हो॥४॥

भावार्थः-हे मनुष्यो! जो यथावत् उपकार करनेवाला सबसे अति उत्तम परमेश्वर वा सभा आदि का अध्यक्ष विद्वान् है, उसको नित्य सेवन करो॥४॥

पुनः सेनाद्यध्यक्षः कीदृश इत्युपदिश्यते॥

फिर वह सेना आदि का अधिपति कैसा है, इस विषय को अगले मन्त्र में कहा है॥

स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान्।
सनीळेभिः श्रवस्यानि तूर्वन् मरुत्वान्नो भवत्विन्द्र ऊती॥५॥८॥

सः। सूनुऽभिः। नः। रुद्रेभिः। ऋभ्वा। नृऽसह्ये। ससह्वान्। अमित्रान्। सऽनीळेभिः। श्रवस्यानि। तूर्वन्। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥५॥

पदार्थः-(**सः**) यः सत्यगुणकर्मस्वभावः (**सूनुभिः**) पुत्रैः पुत्रवद्भृत्यैर्वा (**न**) इव (**रुद्रेभिः**) दुष्टान् रोदयद्भिः प्राणैरिव वीरैः (**ऋभ्वा**) महता मेधाविना मन्त्रिणा। अत्र **सुपां सुलुगित्याकारादेशः**। (**नृषाह्ये**) शूरवीरैः सोढुमर्हे संग्रामे (**सासह्वान्**) तिरस्कर्त्ता। अत्र **सह अभिभवे** इत्यस्मात् क्वसुः। **तुजादीनां दीर्घोऽभ्यासस्येति** दीर्घः। (**अमित्रान्**) शत्रून् (**सनीडेभिः**) समीपवर्त्तिभिः (**श्रवस्यानि**) श्रवःसु धनेषु साधूनि वीरसैन्यानि (**तूर्वन्**) हिंसन् (**मरुत्वान्नो०**) इति पूर्ववत्॥५॥

अन्वयः-मरुत्वान् सासह्वानिन्द्रः सूनुभिर्न सनीडेभी रुद्रेभिर्ऋभ्वा च सह वर्त्तमानानि श्रवस्यानि सम्पाद्य नृषाह्येऽमित्रान् तूर्वन् प्रयतते, स न ऊत्यूतये भवतु॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये सेनाद्यधिपतिः पुत्रवत्सत्कृतैः शस्त्रास्त्रयुद्धविद्यया सुशिक्षितैः सह वर्त्तमानां बलवतीं सेनां संभाव्यातिकठिनेऽपि संग्रामे दुष्टान् शत्रून् पराजयमानो धार्मिकान् मनुष्यान् पालयन् चक्रवर्त्तिराज्यं कर्त्तुं शक्नोति, स एव सर्वैः सेनाप्रजापुरुषैः सदा सत्कर्त्तव्यः॥५॥

पदार्थः-(**मरुत्वान्**) जिसकी सेना में प्रशंसित वीर पुरुष हैं वा (**सासह्वानः**) जो शत्रुओं का तिरस्कार करता है, वह (**इन्द्रः**) परम ऐश्वर्य्यवान् सभापति (**सूनुभिः**) पुत्र वा पुत्रों के तुल्य सेवकों के (**न**) समान (**सनीडेभिः**) अपने समीप रहनेवाले (**रुद्रेभिः**) जो कि शत्रुओं को रुलाते हैं, उनके और (**ऋभ्वा**) बड़े बुद्धिमान् मन्त्री के साथ वर्त्तमान (**श्रवस्यानि**) धनादि पदार्थों में उत्तम वीर जनों को इकठ्ठा कर (**नृषाह्ये**) जो कि शूरवीरों के सहने योग्य है, उस संग्राम में (**अमित्रान्**) शत्रुजनों को (**तुर्वन्**) मारता हुआ उत्तम यत्न करता है। (**सः**) वह (**नः**) हम लोगों के (**ऊती**) रक्षा आदि व्यवहार के लिये (**भवतु**) हो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सेना आदि का अधिपति पुत्र के तुल्य सत्कार किये और शस्त्र-अस्त्रों से सिद्ध होनेवाली युद्धविद्या से शिक्षा दिये हुए सेवकों के साथ वर्त्तमान बलवान् सेना को अच्छे प्रकार प्रकट कर अति कठिन संग्राम में भी दुष्ट शत्रुओं को हरा देता और धार्मिक मनुष्यों की पालना करता हुआ चक्रवर्त्ति राज्य कर सकता है, वही सब सेना तथा प्रजा के जनों को सदा सत्कार करने योग्य है॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

स मन्युमीः समदनस्य कर्त्ताऽस्माकेभिर्नृभिः सूर्यं सनत्।
अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती॥६॥

सः। मन्युऽमीः। सऽमदनस्य। कर्ता। अस्माकेभिः। नृऽभिः। सूर्यम्। सनत्। अस्मिन्। अहन्। सत्ऽपतिः। पुरुऽहूतः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥६॥

पदार्थः-(**सः**) (**मन्युमीः**) यो मन्युं मीनाति हिनस्ति सः (**समदनस्य**) मदनं हर्षणं यस्मिन्नस्ति तेन सहितस्य (**कर्त्ता**) निष्पादकः (**अस्माकेभिः**) अस्मदीयैः शरीरात्मबलयुक्तैर्वीरैः (**नृभिः**) मनुष्यैः सहितः (**सूर्य्यम्**) सवितृप्रकाशमिव युद्धन्यायम् (**सनत्**) संभजेत्। लेट् प्रयोगोऽयम्। (**अस्मिन्**) प्रत्यक्षे (**अहन्**) अहनि (**सत्पतिः**) सतां पुरुषाणां वा पालकः (**पुरुहूतः**) पुरुभिर्बहुभिर्विद्वद्भिः शूरवीरैर्वाहूतः स्पर्द्धितो वा (**मरुत्वान्नो०**) इति पूर्ववत्॥६॥

अन्वयः-यो मन्युमीः समदनस्य कर्त्ता सत्पतिः पुरुहूतो मरुत्वानिन्द्रः परमैश्वर्य्यवान् सेनापतिरस्माकेभि- र्नृभिः सह वर्त्तमानः सन् सूर्यमिव युद्धन्यायं सनत्संभजेत्सोऽस्मिन्नहन् नः सततमूती भवतु॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यं प्राप्य समस्ताः पदार्था विभक्ताः प्रकाशिताः सन्त आनन्दकारका भवन्ति, तथैव धार्मिकान् न्यायाधीशान् प्राप्य पुत्रपौत्रकलत्रभृत्यादिभिः सह वर्त्तमाना विद्याधर्मन्यायेषु प्रसिद्धाऽऽचरणा जना भूत्वा कल्याणकारका भवन्ति, यः सर्वदा क्रोधजित्सर्वथा नित्यं प्रसन्नताकारको भवति, स एव सैन्यापत्याधिकारेऽभिषेक्तुं योग्यो भवति। यो भूतकाले शेषज्ञो वर्त्तमानकाले क्षिप्रकारी विचारशीलोऽस्ति, स एव सर्वदा विजयी भवति, नेतरः॥६॥

पदार्थः-जो (**मन्युमीः**)क्रोध का मारने वा (**समदनस्य**) जिसमें आनन्द है, उसका (**कर्त्ता**) करने और (**सत्पतिः**) सज्जन तथा उत्तम कामों को पालनेहारा (**पुरुहूतः**) वा बहुत विद्वान् और शूरवीरों ने जिसकी स्तुति और प्रशंसा की है (**मरुत्वान्**) जिसकी सेना में अच्छे-अच्छे वीरजन हैं (**इन्द्रः**) वह परमैश्वर्यवान् सेनापति (**अस्माकेभिः**) हमारे शरीर, आत्मा और बल के तुल्य बलों से युक्त वीर (**नृभिः**)

मनुष्यों के साथ वर्त्तमान होता हुआ **(सूर्य्यम्)** सूर्य के प्रकाशतुल्य युद्ध न्याय को **(सनत्)** अच्छे प्रकार सेवन करे **(सः)** वह **(अस्मिन्)** आज के दिन **(नः)** हम लोगों के **(ऊती)** रक्षा आदि व्यवहार के लिये निरन्तर **(भवतु)** हो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य को प्राप्त होकर सब पदार्थ अलग-अलग प्रकाशित हुए आनन्द के करनेवाले होते हैं, वैसे ही धार्मिक न्यायाधीशों को प्राप्त होकर पुत्र, पौत्र, स्त्रीजन तथा सेवकों के साथ वर्त्तमान विद्या, धर्म और न्याय में प्रसिद्ध आचरणवाले होकर मनुष्य अपने और दूसरों के कल्याण करनेवाले होते हैं। जो सब कभी क्रोध को अपने वश में करने और सब प्रकार से नित्य प्रसन्नता आनन्द करनेवाला होता है, वही सेनाधीश होने में नियत करने योग्य होता है। जो बीते हुए व्यवहार के बचे हुए को जाने, चलते हुए व्यवहार में शीघ्र कर्त्तव्य काम के विचार में तत्पर है, वही सर्वदा विजय को प्राप्त होता है, दूसरा नहीं॥६॥

पुनः स कीदृश इत्यपुदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम्।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती॥७॥

तम्। ऊतयः। रणयन्। शूरऽसातौ। तम्। क्षेमस्य। क्षितयः। कृण्वत। त्राम्। सः। विश्वस्य। करुणस्य। ईशे। एकः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥७॥

पदार्थः-**(तम्)** सेनाद्यधिपतिम् **(ऊतयः)** रक्षणादीनि **(रणयन्)** शब्दयन्तु स्तुवन्तु। अत्र लङ्यडभावः। **(शूरसातौ)** शूराणां सातिर्यस्मिन् संग्रामे तस्मिन् **(तम्) (क्षेमस्य)** रक्षणस्य **(क्षितयः)** मनुष्याः। **क्षितय इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(कृण्वत)** कुर्वन्तु। अत्र लङ्यडभावः। **(त्राम्)** रक्षकम् **(सः) (विश्वस्य)** अखिलम् **(करुणस्य)** कृपामयं कर्म **(ईशे)** ईष्टे। अत्र **लोपस्त आत्मनेपदेष्वि**ति त लोपः। **(एकः)** असहायः **(मरुत्वान्नो०)** इति पूर्ववत्॥७॥

अन्वयः-यमूतयो भजन्तु तं शूरसातौ क्षितयस्त्रां कृण्वन्त कुर्वन्तु। यः क्षेमस्य कर्त्ता तं त्रां कुर्वन्तो शूरसातौ रणयन्। य एको विश्वस्य करुणस्येशे स मरुत्वानिन्द्रः सेनादिरक्षको न ऊती भवतु॥७॥

भावार्थः-मनुष्यैर्योऽसहायोऽप्यनेकान् योद्धॄन् विजयते संग्रामेऽन्यत्र वा प्रोत्साहनीयः। यथा प्रोत्साहेन वीरेषु शौर्य्यं जायते, न तथा खल्वन्येन प्रकारेण भवितुं शक्यम्॥७॥

पदार्थः-जिसको **(ऊतयः)** रक्षा आदि व्यवहार सेवन करें **(तम्)** उस सेना आदि के अधिपति को **(शूरसातौ)** जिसमें शूरों का सेवन होता है, उस संग्राम में **(क्षितयः)** मनुष्य **(त्राम्)** अपनी रक्षा करनेवाला **(कृण्वत)** करें, जो **(क्षेमस्य)** अत्यन्त कुशलता का करनेवाला है **(तम्)** उसको अपनी पालना

करनेहारा किये हुए उक्त संग्राम में **(रणयन्)** रटें अर्थात् बार-बार उसी की विनती करें जो **(एकः)** अकेला सभाध्यक्ष **(विश्वस्य)** समस्त **(करुणस्य)** करुणारूपी काम को करने में **(ईशे)** समर्थ है **(सः)** वह **(मरुत्वान्)** अपनी सेना में प्रशंसित वीरों को रखने वा **(इन्द्रः)** सेना आदि की रक्षा करनेहारा **(नः)** हम लोगों के **(ऊती)** रक्षा आदि व्यवहार के लिये **(भवतु)** हो॥७॥

भावार्थः-मनुष्यों को चाहिये कि जो अकेला भी अनेक योद्धाओं को जीतता है, उसका उत्साह संग्राम और व्यवहारों में अच्छे प्रकार बढ़ावें। अच्छे उत्साह से वीरों में जैसी शूरता होती है, वैसी निश्चय है कि और प्रकार से नहीं होती॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह किस प्रकार का हो, यह विषय अगले मन्त्र में कहा है॥

तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय।
सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती॥८॥

तम्। अप्सन्त। शवसः। उत्ऽसवेषु। नरः। नरम्। अवसे। तम्। धनाय। सः। अन्धे। चित्। तमसि। ज्योतिः। विदत्। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥८॥

पदार्थः-(**तम्**) अतिरथं सेनाद्यधिपतिम् **(अप्सन्त)** प्राप्नुवन्तु। अत्र प्साधातोर्लङि **छन्दस्युभयथे**त्यार्द्धधातुकत्वाद् **आतो लोप इटि चे**त्याकारलोपश्च। **प्सातीति गतिकर्मासु पठितम्।** (निघं०२.१४) **(शवसः)** बलानि **(उत्सवेषु)** आनन्दयुक्तेषु कर्मसु **(नरः)** नेतारो मनुष्याः **(नरम्)** नायकम् **(अवसे)** रक्षणाद्याय **(तम्)** **(धनाय)** उत्तमधनप्राप्तये **(सः)** **(अन्धे)** अन्धकारके **(चित्)** इव **(तमसि)** अन्धकारे **(ज्योतिः)** सूर्य्यादिप्रकाशः **(विदत्)** विन्दति। अत्र लडर्थे लुङडभावश्च। **(मरुत्वान्नो०)** इति पूर्ववत्॥८॥

अन्वयः-हे मनुष्या! यं नरं शवसोऽप्सन्त तमुत्सवेषु सत्कुरुत तं नरोऽवसे धनायाप्सन्त। योऽन्धे तमसि ज्योतिश्चिदिव विजयं विदद्विन्दति, स मरुत्वानिन्द्रो न ऊती भवतु॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यः शत्रून् विजित्य धार्मिकान् संरक्ष्य विद्याधने उन्नयति, यं प्राप्य सूर्य्यप्रकाशमिव विद्याप्रकाशमाप्नुवन्ति, तं जनमानन्ददिवसेषु सत्कुर्युः। नह्येवं विना कस्यचिच्छ्रेष्ठेषु कर्मसूत्साहो भवितुं शक्यः॥८॥

पदार्थः-हे मनुष्यो! **(नरम्)** सब काम को यथायोग्य चलानेहारे जिस मनुष्य को **(शवसः)** विद्या, बल तथा धन आदि अनेक बल **(अप्सन्त)** प्राप्त हों **(तम्)** उस अत्यन्त प्रबल युद्ध करने से भी युद्ध करनेवाले सेना आदि के अधिपति को **(उत्सवेषु)** उत्सव अर्थात् आनन्द के कामों में सत्कार देओ तथा **(तम्)** उसको **(नरः)** श्रेष्ठाधिकार पानेवाले मनुष्य **(अवसे)** रक्षा आदि व्यवहार और **(धनाय)** उत्तम

धन पाने के लिये प्राप्त होवें, जो **(अन्धे)** अन्धे के तुल्य करनेहारे **(तमसि)** अन्धेरे में **(ज्योतिः)** सूर्य्य आदि के उजेले रूप प्रकाश **(चित्)** ही को **(विदत्)** प्राप्त होता है **(सः)** वह **(मरुत्वान्)** अपनी सेना में उत्तम वीरों को राखनेहारा **(इन्द्रः)** परमैश्वर्यवान् सेनापति वा सभापति **(नः)** हम लोगों के **(ऊती)** अच्छे आनन्दों के लिये **(भवतु)** हो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो शत्रुओं को जीत और धार्मिकों की पालना कर विद्या और धन की उन्नति करता है, जिसको पाकर जैसे सूर्य्यलोक का प्रकाश है, वैसे विद्या के प्रकाश को प्राप्त होते हैं, उस मनुष्य को आनन्द-मङ्गल के दिनों में आदर-सत्कार देवें, क्योंकि ऐसे किये विना किसी को अच्छे कामों में उत्साह नहीं हो सकता॥८॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

स सव्येन यमति व्राधतश्चित् स दक्षिणे संगृभीता कृतानि।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती॥९॥

सः। सव्येन। यमति। व्राधतः। चित्। सः। दक्षिणे। सम्ऽगृभीता। कृतानि। सः। कीरिणा। चित्। सनिता। धनानि। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥९॥

पदार्थः-(**सः**) **(सव्येन)** सेनाया दक्षिणभागेन **(यमति)** नियमयति। अत्र **छन्दस्युभयथे**ति शप आर्द्धधातुकत्वाण्णिलोपः। **(व्राधतः)** अतिप्रवृद्धान् शत्रून् **(चित्)** अपि **(सः)** **(दक्षिणे)** दक्षिणभागस्थेन सैन्येन। अत्र **सुपां सुलुगि**ति तृतीयास्थाने शेआदेशः। **(संगृभीता)** सम्यग्गृहीतानि सेनाङ्गानि। अत्र ग्रहधातोर्हस्य भत्वम्। अत्र सायणाचार्येण सुबन्तं तिङन्तं साधितमतोऽशुद्धमेव निघाताभावात्। **(कृतानि)** कर्माणि **(सः)** **(कीरिणा)** शत्रूणां विक्षेपकेन प्रबन्धेन **(चित्)** अपि **(सनिता)** संभक्तानि। अत्र **वनसनसंभक्ताविति** धातोर्बाहुलकात् तन् प्रत्ययः। **(धनानि)** **(मरुत्वान्नो०)** इति पूर्ववत्॥९॥

अन्वयः-यः सव्येन स्वसेन्येन व्राधतश्चिद्यमति स विजयी जायते, यो दक्षिणे संगृभीता कृतानि कर्माणि नियमयति स स्वसेनां रक्षितुं शक्नोति, यः कीरिणा चित् शत्रुभिः सनिता धनानि स्वीकरोति, स मरुत्वानिन्द्रः सेनापतिर्न ऊती भवतु॥९॥

भावार्थः-यः सेनाव्यूहान् सेनाङ्गशिक्षारक्षणविज्ञानं पूर्णां युद्धसामग्रीञ्चार्जितुं शक्नोति, स एव शत्रुपराजयेन विजये प्रजारक्षणे च योग्यो भवति॥९॥

पदार्थः-जो **(सव्येन)** सेना के दाहिनी और खड़ी हुई अपनी सेना से **(व्राधतः)** अत्यन्त बल बढ़े हुए शत्रुओं को **(चित्)** भी **(यमति)** ढंग में चलाता है, वह उन शत्रुओं का जीतनेहारा होता है, जो

(दक्षिणे) दाहिनी ओर में खड़ी हुई उस सेना से **(संगृभीता)** ग्रहण किये हुए सेना के अङ्गों तथा **(कृतानि)** किये हुए कामों को यथोचित नियम में लाता है **(सः)** वह अपनी सेना की रक्षा कर सकता है, जो **(कीरिणाः)** शत्रुओं के गिराने के प्रबन्ध से **(चित्)** भी उनके **(सनिता)** अच्छी प्रकार इकठ्ठे किये हुए **(धनानि)** धनों को ले लेता है, **(सः)** वह **(मरुत्वान्)** अपनी सेना में उत्तम-उत्तम वीरों को राखनेहारा **(इन्द्रः)** परमैश्वर्यवान् सेनापति **(नः)** हम लोगों के **(ऊती)** रक्षा आदि व्यवहारों के लिये **(भवतु)** हो॥९॥

भावार्थः-जो सेना की रचनाओं और सेना के अङ्गों की शिक्षा वा रक्षा के विशेष ज्ञान को तथा पूर्ण युद्ध की सामग्री को इकठ्ठा कर सकता है, वही शत्रुओं को जीत लेने से अपनी और प्रजा की रक्षा करने के योग्य है॥९॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्वद्य।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती॥ १०॥ ९॥

सः। ग्रामेभिः। सनिता। सः। रथेभिः। विदे। विश्वाभिः। कृष्टिऽभिः। नु। अद्य। सः। पौंस्येभिः। अभिऽभूः। अशस्तीः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥ १०॥

पदार्थः-**(सः)** **(ग्रामेभिः)** ग्रामस्थैः प्रजापुरुषैः **(सनिता)** संविभक्तानि **(सः)** **(रथेभिः)** विमानादिभिः सेनाङ्गैः **(विदे)** विदन्ति युद्धविद्या विजयान् वा यया क्रियया तस्यै। अत्र सम्पदादित्वात् क्विप्। **(विश्वाभिः)** समग्राभिः **(कृष्टिभिः)** विलेखनक्रियाभिः **(नु)** सद्यः **(अद्य)** अस्मिन्नहनि **(सः)** **(पौंस्येभिः)** उत्कृष्टे शरीरात्मबलैः सह वर्त्तमानः **(अभिभूः)** शत्रूणां तिरस्कर्त्ता **(अशस्तीः)** अप्रशंसनीयाः शत्रुक्रियाः **(मरुत्वान्नो०)** इति पूर्ववत्॥१०॥

अन्वयः-यो मरुत्वानिन्द्रो सेनाद्यधिपतिर्ग्रामेभिः सह सनिता धनानि भुङ्क्ते स आनन्दी जायते, यो विदे रथेभिर्विश्वाभिः कृष्टिभिश्च प्रकाशते स यश्चाशस्तीः क्रिया विदित्वाभिभूर्भवति स पौंस्येभिर्न्वद्य न ऊती भवतु॥१०॥

भावार्थः-मनुष्यैर्यः पुरनगरग्रामाणां सम्यग्रक्षिता पूर्णसेनाङ्गसामग्रीसहितो विदितकलाकौशलशस्त्रास्त्रयुद्ध- क्रियः पूर्णविद्याबलाभ्यां पुष्टः शत्रूणां पराजयेन प्रजापालनप्रसन्नो भवति, स एव सेनाद्यधिपतिः कर्त्तव्यो नेतरः॥१०॥

पदार्थः-जो **(मरुत्वान्)** अपनी सेना में उत्तम वीरों को राखनेहारा **(इन्द्रः)** परमैश्वर्य्यवान् सेना आदि का अधीश **(ग्रामेभिः)** ग्रामों में रहनेवाले प्रजाजनों के साथ **(सनिता)** अच्छे प्रकार अलग-अलग किये हुए धनों को भोगता है **(सः)** वह आनन्दित होता है। जो **(विदे)** युद्धविद्या तथा विजयों को जिससे

जाने उस क्रिया के लिये **(रथेभिः)** सेना के विमान आदि अङ्गों और **(विश्वाभिः)** समस्त **(कृष्टिभिः)** शिल्पकामों की अति कुशलताओं से प्रकाशमान हो **(सः)** वह और जो **(अशस्तीः)** शत्रुओं की बड़ाई करने योग्य क्रियाओं को जान कर उनका **(अभिभूः)** तिरस्कार करनेवाला है **(सः)** वह **(पौंस्येभिः)** उत्तम शरीर और आत्मा के बल के साथ वर्त्तमान **(नु)** शीघ्र **(अद्य)** आज **(नः)** हम लोगों के **(ऊती)** रक्षा आदि व्यवहारों के लिये **(भवतु)** होवे॥१०॥

भावार्थः-मनुष्यों को चाहिये कि जो पुर, नगर और ग्रामों का अच्छे प्रकार रक्षा करनेवाला वा पूर्ण सेनाङ्गों की सामग्री सहित जिसने कलाकौशल तथा शस्त्र-अस्त्रों से युद्ध क्रिया को जाना हो और परिपूर्ण विद्या तथा बल से पुष्ट शत्रुओं के पराजय से प्रजा की पालना करने में प्रसन्न होता है, वही सेना आदि का अधिपत्ति करने योग्य है, अन्य नहीं॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

स जा॒मिभि॒र्यत्स॒मजा॑ति मी॒ळ्हेऽजा॑मिभिर्वा पुरुहू॒त एवैः॑।
अ॒पां तो॒कस्य॒ तन॑यस्य जे॒षे म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती॥११॥

सः। जा॒मिऽभिः॑। यत्। स॒म्ऽअजा॑ति। मी॒ळ्हे। अजा॑मिऽभिः। वा॒। पु॒रु॒ऽहू॒तः। एवैः॑। अ॒पाम्। तो॒कस्य॑। तन॑यस्य। जे॒षे। म॒रुत्वा॑न्। नः॒। भ॒व॒तु॒। इन्द्रः॑। ऊ॒ती॥११॥

पदार्थः-**(सः)** **(जामिभिः)** बन्धुवर्गैः सह **(यत्)** यदा **(समजाति)** संजानीयात् **(मीळ्हे)** संग्रामे। **मीळ्हे इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(अजामिभिः)** अबन्धुवर्गैः शत्रुभिः **(वा)** उदासीनैः **(पुरुहूतः)** बहुभिः स्तुतो युद्ध आहूतो **(एवैः)** प्राप्तैः **(अपाम्)** प्राप्तानां मित्रशत्रूदासीनानां पुरुषाणां मध्ये **(तोकस्य)** अपत्यस्य **(तनयस्य)** पौत्रादेः **(जेषे)** उत्कृष्टुं विजेतुम्। अत्र जिधातोस्तुमर्थे से प्रत्ययः। सायणाचार्य्येणेदमपि पदमशुद्धं व्याख्यातमर्थगत्यासंभवात् **(मरुत्वान्नः)** इति पूर्ववत्॥११॥

अन्वयः-योऽपां तोकस्य तनयस्य च मध्ये वर्त्तमानः सन् यन्मीळ्ह एवैर्जामिभिः सहित एवैरजामिभिः शत्रुभिर्वोदासीनैः सह विरुद्धयन् पुरुहूतो मरुत्वानिन्द्रः सेनाद्यधिपतिर्जेष एतान् स्वीयानुत्कर्ष्टुं शत्रून् विजेतुं वा समजाति तदा स न ऊती समर्थो भवतु॥११॥

भावार्थः-नह्यत्र राज्यव्यवहारे केनचिद् गृहस्थेन विना ब्रह्मचारिणो वनस्थस्य यतेर्वा प्रवृत्तेर्योग्यतास्ति, न कश्चित्सुमित्रैर्बन्धुवर्गैर्विना युद्धे शत्रून् पराजेतुं शक्नोति, न खल्वेवंभूतेन धार्मिकेण विना कश्चित्सेनाद्यधिपतित्वमर्हतीति वेदितव्यम्॥११॥

पदार्थः-जो **(अपाम्)** प्राप्त हुए मित्र, शत्रु और उदासीनों वा **(तोकस्य)** बालकों के वा **(तनयस्य)** पौत्र आदि के बीच वर्त्ताव रखता हुआ **(यत्)** जब **(मीळ्हे)** संग्रामों में **(एवैः)** प्राप्त हुए

(जामिभिः) शत्रुजनों के सहित **(अजामिभिः)** बन्धुवर्गों से अन्य शत्रुओं के सहित **(वा)** अथवा उदासीन मनुष्यों के साथ विरोधभाव प्रकट करता हुआ **(पुरुहूतः)** बहुतों से प्रशंसा को प्राप्त वा युद्ध में बुलाया हुआ **(मरुत्वान्)** अपनी सेना में उत्तम वीरों को रखनेवाला **(इन्द्रः)** परमैश्वर्य्यवान् सेना आदि का अधीश **(जेषे)** उक्त अपने बन्धु भाइयों को उत्साह और उत्कर्ष देने वा शत्रुओं के जीत लेने का **(समजाति)** अच्छा ढङ्ग जानता है **(सः)** वह **(नः)** हम लोगों के **(ऊती)** रक्षा आदि व्यवहार के लिये समर्थ **(भवतु)** हो॥११॥

भावार्थः-इस राज्यव्यवहार में किसी गृहस्थ को छोड़ ब्रह्मचारी वनस्थ वा यति की प्रवृत्ति होने योग्य नहीं है और न कोई अच्छे मित्र और बन्धुओं के विना युद्ध में शत्रुओं को परास्त कर सकता है। ऐसे धार्मिक विद्वानों के विना कोई सेना आदि का अधिपति होने योग्य नहीं है, यह जानना चाहिये॥११॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा।
चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान्नो भवत्विन्द्र ऊती॥१२॥

सः। वज्रऽभृत्। दस्युऽहा। भीमः। उग्रः। सहस्रऽचेताः। शतऽनीथः। ऋभ्वा। चम्रीषः। न। शवसा। पाञ्चऽजन्यः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥१२॥

पदार्थः-**(सः)** **(वज्रभृत्)** यो वज्रं शस्त्रास्त्रसमूहं बिभर्त्ति सः **(दस्युहा)** दुष्टानां चौराणां हन्ता **(भीमः)** एतेषां भयङ्करः **(उग्रः)** अतिकठिनदण्डप्रदः **(सहस्रचेताः)** असंख्यातविज्ञानविज्ञापनः **(शतनीथः)** शतानि नीथानि यस्य सः **(ऋभ्वा)** महता **(चम्रीषः)** ये चमूभिः शत्रुसेना ईषन्ते हिंसन्ति ते **(न)** इव **(शवसा)** बलयुक्तेन सैन्येन **(पाञ्चजन्यः)** पञ्चसु सकलविद्येष्वध्यापकोपदेशकराजसभासेनासर्वजनाधीशेषु जनेषु भवः पाञ्चजन्यः। **बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्।** (अष्टा०४.३.५८) **(मरुत्वान्नो भवन्त्विन्द्र०)** इति पूर्ववत्॥१२॥

अन्वयः-यश्चम्रीषो न वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथः पाञ्चजन्यो मरुत्वानिन्द्रः सेनाद्यधिपतिर्ऋभ्वा शवसा शत्रून् समजाति, स न ऊती भवतु॥१२॥

भावार्थः-अत्रोपमालङ्कारः। नहि कश्चिन्मनुष्यो धनुर्वेदविज्ञानप्रयोगाभ्यां शत्रूणां हनने भयप्रदेन तीव्रेण सामर्थ्येन प्रवृद्धेन सैन्येन च विना सेनापतिर्भवितुं शक्नोति, नैवं भूतेन विना शत्रुपराजयः प्रजापालनं च संभवतीति वेदितव्यम्॥१२॥

पदार्थः-(**चम्रीषः**) जो अपनी सेना से शत्रुओं की सेनाओं के मारनेहारों के (**न**) समान (**वज्रभृत्**) अति कराल शस्त्रों को बांधने (**दस्युहा**) डाकू, चोर, लम्पट, लवाड़ आदि दुष्टों को मारने (**भीमः**) उनको डर और (**उग्रः**) अति कठिन दण्ड देने (**सहस्रचेताः**) हजारहों अच्छे प्रकार के ज्ञान प्रकट करनेवाला (**शतनीथः**) जिसके सैकड़ों यथायोग्य व्यवहारों के वर्त्ताव हैं (**पाञ्चजन्यः**) जो सब विद्याओं से युक्त पढ़ाने, उपदेश करने, राज्यसम्बन्धी सभा, सेना और सब अधिकारियों के अधिष्ठाताओं में उत्तमता से हुआ (**मरुत्वान्**) और अपनी सेना में उत्तम वीरों को राखनेवाला (**इन्द्रः**) परमैश्वर्य्यवान् सेना आदि का अधीश (**ऋभ्वा**) अतीव (**शवसा**) बलवान् सेना से शत्रुओं को अच्छे प्रकार प्राप्त होता है (**सः**) वह (**नः**) हम लोगों के (**ऊती**) रक्षा आदि व्यवहारों के लिये (**भवतु**) होवे॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को जानना चाहिए कि कोई मनुष्य धनुर्वेद के विशेष ज्ञान और उसको यथायोग्य व्यवहारों में वर्त्तने और शत्रुओं के मारने में भय के देनेवाले वा तीव्र अगाध सामर्थ्य और प्रबल बढ़ी हुई सेना के विना सेनापति नहीं हो सकता और ऐसे हुए विना शत्रुओं का पराजय और प्रजा का पालन हो सके, यह भी सम्भव नहीं, ऐसा जानें॥१२॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

तस्य॒ वज्रः॑ क्रन्दति॒ स्मत्स्व॒र्षा दि॒वो न त्वे॒षो र॒वथ॒ः शिमी॑वान्।
तं स॑चन्ते स॒नय॒स्तं धना॑नि म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती॥ १३॥

तस्य॑। वज्रः॑। क्र॒न्द॒ति॒। स्मत्। स्व॒रिति॑ स्वः॑। दि॒वः॑। न। त्वे॒षः॑। रव॑थः॑। शिमी॑वान्। तम्। स॒च॒न्ते॒। स॒नयः॑। तम्। धना॑नि। म॒रुत्वा॑न्। नः॑। भ॒व॒तु॒। इन्द्रः॑। ऊ॒ती॥ १३॥

पदार्थः-(**तस्य**) (**वज्रः**) शस्त्राऽस्त्रसमूहः (**क्रन्दति**) श्रेष्ठानाह्वयति दुष्टान् रोदयति। अत्रान्तर्गतो ण्यर्थः। (**स्मत्**) तत्कर्मानुष्ठानोक्तम्। (**स्वर्षाः**) स्वः सुखेन सनोति सः। अत्र स्वःपूर्वात् सन् धातोः **कृतो बहुलमि**ति करणे विच्। (**दिवः**) प्रकाशस्य (**न**) इव (**त्वेषः**) यस्त्वेषति प्रदीप्तो भवति सः (**रवथः**) महाशब्दकारी (**शिमीवान्**) प्रशस्तानि कर्माणि भवन्ति यस्य सकाशात्। अत्र **छन्दसीर** इति मतुपो मकारस्य वत्वम्। **शिमीति कर्मनामसु पठितम्।** (निघं०२.१) (**तम्**) (**सचन्ते**) सेवन्ते (**सनयः**) उत्तमाः सेवाः (**तम्**) (**धनानि**) (**मरुत्वान्नः**) इति पूर्ववत्॥१३॥

अन्वयः-यस्य सभाद्यध्यक्षस्य स्मत् स्वर्षा रवथः शिमीवान् वज्रः क्रन्दति तस्य दिवस्त्वेषो न सूर्य्यस्य प्रकाश इव गुणकर्मस्वभावाः प्रकाशन्ते। य एवं भूतस्तं सनयः सचन्ते तं धनानि चेत्थं यो मरुत्वानिन्द्रो न ऊती प्रयतते सोऽस्माकं राजा भवतु॥१३॥

भावार्थः–अत्रोपमालङ्कारः। सभासद्भृत्यसेनाप्रजाभिरीदृशान्युत्तमानि कर्माणि सेवनीयानि येभ्यो विद्यान्यायधर्मपुरुषार्था वर्धमानाः सूर्यवत्प्रकाशिताः स्युः। न हीदृशैः। कर्मभिर्विनोत्तमानि सुखसेवनानि धनानि रक्षाश्च भवितुं शक्या। तस्मादेवंभूतानि कर्माणि सभाद्यध्यक्षैः सेवनीयानि॥१३॥

पदार्थः–जिस सभाद्यध्यक्ष का **(स्मत्)** काम के वर्त्ताव की अनुकूलता का **(स्वर्षाः)** सुख से सेवन और **(रवथः)** भारी कोलाहल शब्द करनेवाला **(शिमीवान्)** जिससे प्रशंसित काम होते हैं, वह **(वज्रः)** शस्त्र और अस्त्रों का समूह **(क्रन्दति)** अच्छे जनों को बुलाता और दुष्टों को रुलाता है **(तस्य)** उसके **(दिवः)** सूर्य्य के **(त्वेषः)** उजेले के **(नः)** समान गुण, कर्म और स्वभाव प्रकाशित होते हैं, जो ऐसा है **(तम्)** उसको **(सनयः)** उत्तम सेवा अर्थात् सज्जनों के किये हुए उत्साह **(सचन्ते)** सेवन करते और **(तम्)** उसको **(धनानि)** समस्त धन सेवन करते हैं, इस प्रकार **(मरुत्वान्)** जो सभाध्यक्ष अपनी सेना में उत्तम वीरों को रखनेवाला **(इन्द्रः)** परमैश्वर्य्यवान् तथा **(नः)** हम लोगों के **(ऊती)** रक्षादि व्यवहारों के लिये यत्न करता है, वह हम लोगों का राजा **(भवतु)** होवे॥३॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। सभासद्, भृत्य, सेना के पुरुष और प्रजाजनों को चाहिये कि ऐसे उत्तम कामों का सेवन करें कि जिनसे विद्या, न्याय, धर्म वा पुरुषार्थ बढ़े हुए सूर्य के समान प्रकाशित हों, क्योंकि ऐसे कामों के विना उत्तम सुखों के सेवन, धन और रक्षा हो नहीं सकती, इससे ऐसे काम सभाध्यक्ष आदि को करने योग्य हैं॥१३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

यस्याजस्रꣳ शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीम्।
स पारिषत्क्रतुभिर्मन्दसानो मरुत्वान्नो भवत्विन्द्र ऊती॥१४॥

यस्य। अजस्रम्। शवसा। मानम्। उक्थम्। परिऽभुजत्। रोदसी इति। विश्वतः। सीम्। सः। पारिषत्। क्रतुऽभिः। मन्दसानः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥१४॥

पदार्थः–**(यस्य)** सभाद्यध्यक्षस्य **(अजस्रम्)** सततम् **(शवसा)** शरीरात्मबलेन **(मानम्)** सत्कारम् **(उक्थम्)** वेदविद्याः **(परिभुजत्)** सर्वतो भुञ्ज्यात् पालयेत्। अत्र भुजधातोर्लिटि विकरणव्यत्ययेन शः। **(रोदसी)** विद्याप्रकाशपृथिवीराज्ये **(विश्वतः)** सर्वतः **(सीम्)** धर्म्मन्यायमर्य्यादापरिग्रहे। **सीमिति परिग्रहार्थीयः।** (निरु०१.७) **(सः)** **(पारिषत्)** सुखैः प्रजाः पालयेत्। अत्र पृधातोर्लेटि सिप्। **सिब्बहुलं छन्दसि णित्** इति वार्त्तिकेन णित्वाद् वृद्धिः। **(क्रतुभिः)** श्रेष्ठैः कर्मभिः सह **(मन्दसानः)** प्रशंसादियुक्तः **(मरुत्वान्नो०)** इति पूर्ववत्॥१४॥

अन्वयः-यस्य शवसा प्रजाः मानुमुक्थं सीं विश्वतोऽजस्रं परिभुजद्रोदसी च यः क्रतुभिर्मन्दसानः सुखैः प्रजाः पारिषत् स मरुत्वानिन्द्रो न ऊत्यजस्रं भवतु॥१४॥

भावार्थः-यः सत्पुरुषाणां मानं दुष्टानां परिभवं पूर्णां विद्याधर्ममर्य्यादां पुरुषार्थमानन्दं च कर्त्तुं शक्नुयात्, स एव सभाद्यध्यक्षाद्यधिकारमर्हेत्॥१४॥

पदार्थः-(**यस्य**) जिस सभा आदि के अधीश के (**शवसा**) शारीरिक तथा आत्मिक बल से युक्त प्रजाजन (**मानम्**) सत्कार (**उक्थम्**) वेदविद्या तथा (**सीम्**) धर्म न्याय की मर्यादा को (**विश्वतः**) सब ओर से (**अजस्रम्**) निरन्तर पालन और जो (**रोदसी**) विद्या के प्रकाश और पृथिवी के राज्य को भी (**परिभुजत्**) अच्छे प्रकार पालन करे। जो (**क्रतुभिः**) उत्तम बुद्धिमानी के कामों के साथ (**मन्दसानः**) प्रशंसा आदि से परिपूर्ण हुआ सुखों से प्रजाओं को (**पारिषत्**) पालता है (**सः**) वह (**मरुत्वान्**) अपनी सेना में उत्तम वीरों का रखनेवाला (**इन्द्रः**) परमैश्वर्य्यवान् सभापति (**नः**) हम लोगों के (**ऊती**) रक्षा आदि व्यवहार को सिद्ध करनेवाला निरन्तर (**भवतु**) होवे॥१४॥

भावार्थः-जो सत्पुरुषों का मान, दुष्टों का तिरस्कार, पूरी विद्या, धर्म की मर्यादा, पुरुषार्थ और आनन्द कर सके, वही सभाध्यक्षादि अधिकार के योग्य हो॥१४॥

अथेतस्याः सर्वप्रजायाः कर्त्तेश्वरः कीदृशोऽस्तीत्युपदिश्यते॥

अब इस समस्त प्रजा को उत्पन्न करनेवाला ईश्वर कैसा है, इस विषय को अगले मन्त्र में कहा है॥

न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती॥१५॥१०॥

नः। यस्यः। देवाः। देवताः। नः। मर्ताः। आपः। चन। शवसः। अन्तम्। आपुः। सः। प्रऽरिक्वा। त्वक्षसा। क्ष्मः। दिवः। च। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥१५॥

पदार्थः-(**न**) निषेधे (**यस्य**) इन्द्रस्य परमैश्वर्यवतो जगदीश्वरस्य (**देवाः**) विद्वांसः (**देवता**) दिव्यजनानां मध्ये। निर्धारणेऽत्र षष्ठी **सुपां सुलुगित्यामो** लुक् च। (**न**) (**मर्त्ताः**) साधारणा मनुष्याः (**आपः**) अन्तरिक्षं प्राणा वा (**चन**) अपि (**शवसः**) बलस्य (**अन्तम्**) सीमानम् (**आपुः**) प्राप्नुवन्ति (**सः**) (**प्ररिक्वा**) यः सर्वाः प्रजाः प्रकृष्टतया निर्माय व्याप्तवान् (**त्वक्षसा**) स्वेन बलेन सामर्थ्येन। **त्वक्ष इति बलनामसु पठितम्।** (निघं०२.९) (**क्ष्मः**) पृथिवीः (**दिवः**) सूर्यादिप्रकाशलोकान् (**च**) एतद्भिन्नलोकसमुच्चये (**मरुत्वान्नो०**) इति पूर्वत्॥१५॥

अन्वयः-यस्येन्द्रस्य जगदीश्वरस्य शवसोऽन्तं देवता देवा न मर्त्ता नापश्च नापुः। यस्त्वक्षसा क्ष्मो दिवश्चान्यांश्च लोकान् प्ररिक्वा स मरुत्वानिन्द्रो न ऊती भवतु॥१५॥

भावार्थः-किमनन्तगुणकर्मस्वभाव तस्य परमात्मनोऽन्तं ग्रहीतुं कश्चिदपि शक्नोति, यः स्वसामर्थ्येनैव प्रकृत्याख्यात् परमसूक्ष्मात् सनातनात् कारणात् सर्वान् पदार्थान् संहत्य संरक्ष्य प्रलये छिनत्ति, स सर्वैः कथं नोपासनीय इति ॥१५॥

पदार्थः-(**यस्य**) जिस परम ऐश्वर्यवान् जगदीश्वर के (**शवसः**) बल की (**अन्तम्**) अवधि को (**देवता**) दिव्य उत्तम जनों में (**देवाः**) विद्वान् लोग (**न**) नहीं (**मर्त्ताः**) साधारण मनुष्य (**न**) नहीं (**चन**) तथा (**अपः**) अन्तरिक्ष वा प्राण भी (**आपुः**) नहीं पाते, जो (**त्वक्षसा**) अपने बलरूप सामर्थ्य से (**क्ष्मः**) पृथिवी (**दिवः**) सूर्य्यलोक तथा (**च**) और लोकों को (**प्ररिक्वा**) रच के व्याप्त हो रहा है (**सः**) वह (**मरुत्वान्**) अपनी प्रजा को प्रशंसित करनेवाला (**इन्द्रः**) परम ऐश्वर्यवान् परमेश्वर (**नः**) हम लोगों के (**ऊती**) रक्षा आदि व्यवहार के लिये निरन्तर उद्यत (**भवतु**) होवे॥१५॥

भावार्थः-क्या अनन्त गुण, कर्म, स्वभाववाले उस परमेश्वर का पार कोई ले सकता है कि जो अपने सामर्थ्य से ही प्रकृतिरूप अतिसूक्ष्म सनातन कारण से सब पदार्थों को स्थूलरूप उत्पन्न कर उनकी पालना और प्रलय के समय सबका विनाश करता है, वह सबके उपासना करने के योग्य क्यों न होवे?॥१५॥

अथ शिल्पिभिः सेनादिषु प्रयुक्तोऽग्निः कथम्भूतः सन् किं करोतीत्युपदिश्यते॥

अब शिल्पीजनों का सेनादिकों में अच्छे प्रकार युक्त किया हुआ अग्नि कैसा होता है और क्या करता है, यह विषय अगले मन्त्र में कहा है॥

रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु॥१६॥

रोहित्। श्यावा। सुमत्ऽअंशुः। ललामीः। द्युक्षा। राये। ऋज्रऽअश्वस्य। वृषणऽवन्तम्। बिभ्रती। धूःऽसु। रथम्। मन्द्रा। चिकेत। नाहुषीषु। विक्षु॥१६॥

पदार्थः-(**रोहित्**) अधस्ताद्रक्तवर्णा (**श्यावा**) उपरिष्टाच्छ्यामवर्णा ज्वाला (**सुमदंशुः**) शोभनोंऽशुर्ज्वलनं यस्याः सा (**ललामीः**) शिरोवदुपरिभागः प्रशस्तो यस्याः सा (**द्युक्षा**) दिवि प्रकाशे निवासो यस्याः सा। अत्र **क्षि निवासगत्योः**रित्यस्मादौणादिको डः प्रत्ययः। (**राये**) धनप्राप्तये (**ऋज्राश्वस्य**) ऋज्रा ऋतुगामिनोऽश्वा वेगवन्तो यस्य तस्य सभाद्यध्यक्षस्य (**वृषण्वन्तम्**) वेगवन्तम् (**बिभ्रती**) (**धूर्षु**) अयःकाष्ठविशेषासु कलासु (**रथम्**) विमानादियानसमूहम् (**मन्द्रा**) आनन्दप्रदा (**चिकेत**) विजानीयाम् (**नाहुषीषु**) नहुषाणां मनुष्याणामिमास्तासु (**विक्षु**) प्रजासु॥१६॥

अन्वयः-या ऋज्राश्वस्य सम्बन्धिभिः शिल्पिभिः सुमदंशुर्ललामीर्द्युक्षा रोहिच्छ्यावा धूर्षु संप्रयुक्ता ज्वाला वृषण्वन्तं रथं बिभ्रती मन्द्रा नाहुषीषु विक्षु राये वर्त्तते, तां यश्चिकेत स आढ्यो जायते॥१६॥

भावार्थः-यदा विमानचालनादिकार्य्येष्विन्धनैः संप्रयुक्तोऽग्निः प्रज्वलति तदा द्वे रूपे लक्ष्येते। एकं भास्वरं द्वितीयं श्यामञ्च। अत एवाग्नेः श्यामकर्णाश्च इति संज्ञा वर्त्तते। यथाऽश्वस्य शिरस उपरि कर्णौ दृश्येते तथाऽग्नेरुपरि श्यामा कज्जलाख्या शिखा भवति। सोऽयं कार्य्येषु सम्यक् प्रयुक्तो बहुविधं धनं प्रापय्य प्रजा आनन्दिताः करोति॥१६॥

पदार्थः-जो **(ऋजाश्वस्य)** सीधी चाल से चले हुए जिसके घोड़े वेगवाले उस सभा आदि के अधीश का सम्बन्ध करनेवाले शिल्पियों को **(सुमदंशुः)** जिसका उत्तम जलाना **(ललामीः)** प्रशंसित जिसमें सौन्दर्य्य **(द्युक्षा)** और जिसका प्रकाश ही निवास है, वह **(रोहित्)** नीचे से लाल **(श्यावा)** ऊपर से काली अग्नि की ज्वाला **(धूर्षु)** लोहे की अच्छी-अच्छी बनी हुई कलाओं में प्रयुक्त की गई **(वृषण्वन्तम्)** वेगवाले **(रथम्)** विमान आदि यान समूह को **(बिभ्रती)** धारण करती हुई **(मन्द्रा)** आनन्द की देनेहारी **(नाहुषीषु)** मनुष्यों के इन **(विक्षु)** सन्तानों के निमित्त **(राये)** धन की प्राप्ति के लिये वर्त्तमान है, उसको जो **(चिकेत)** अच्छे प्रकार जाने वह धनी होता है॥१५॥

भावार्थः-जब विमानों के चलाने आदि कार्यों में इन्धनों से अच्छे प्रकार युक्त किया अग्नि जलता है, तब उसके दो ढंग के रूप देख पड़ते हैं-एक उजेला लिये हुए दूसरा काला। इसीसे अग्नि को श्यामकर्णाश्व कहते हैं। जैसे घोड़े के शिर पर कान दीखते हैं, वैसे अग्नि के शिर पर श्याम कज्जल की चुटेली होती है। यह अग्नि कामों में अच्छे प्रकार जोड़ा हुआ बहुत प्रकार के धन को प्राप्त कराकर प्रजाजनों को आनन्दित करता है॥१६॥

पुनः स कथम्भूत इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

एतत्त्यत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः।

ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः॥१७॥

एतत्। त्यत्। ते। इन्द्र। वृष्णे। उक्थम्। वार्षागिराः। अभि। गृणन्ति। राधः। ऋज्रऽअश्वः। प्रष्टिऽभिः। अम्बरीषः। सहऽदेवः। भयमानः। सुऽराधाः॥१७॥

पदार्थः-(**एतत्**) प्रत्यक्षम् (**त्यत्**) अग्रस्थमानुमानिकं च (**ते**) तव (**इन्द्र**) परमविद्यैश्वर्ययुक्त (**वृष्णे**) शरीरात्मसेचकाय (**उक्थम्**) प्रशंसनीयं वचनं कर्म वा (**वार्षागिराः**) वृषस्योत्तमस्य गीर्भिर्निष्पन्नाः पुरुषाः (**अभि**) आभिमुख्ये (**गृणन्ति**) वदन्ति (**राधः**) धनम् (**ऋज्राश्वः**) ऋज्रा ऋजवोऽश्वा महत्यो नीतयो यस्य सः। **अश्व इति महन्नामसु पठितम्।** (निघं०३.३) (**प्रष्टिभिः**) प्रश्नैः पृष्टः सन् (**अम्बरीषः**)

शब्दविद्यावित्। अत्र शब्दार्थादबि धातोरौणादिक ईषन् प्रत्ययो रुगागमश्च। (**सहदेवः**) देवैः सह वर्त्तते सः (**भयमानः**) अधर्माचरणाद्भीत्वा पृथग्वर्त्तमानो दुष्टानां भयङ्करः (**सुराधाः**) शोभनै राधोभिर्धनैर्युक्तः॥१७॥

अन्वयः–हे इन्द्र! वार्षागिरा यदेतत्ते तवोक्थमभिगृणन्ति त्यद्राधो वृष्णे जायते। योऽम्बरीषः सहदेवो भयमानः सुराधा ऋज्राश्वो भवान् प्रष्टिभिः पुष्टः समादधाति, सोऽस्माभिः कथं न सेवनीयः॥१७॥

भावार्थः–यदा विद्वांसः सुप्रीत्योपदेशान् कुर्वन्ति तदाऽज्ञानिनो जना विश्वस्ता भूत्वोपदेशाञ्छ्रुत्वा सुविद्या धृत्वाऽऽढ्या भूत्वाऽऽनन्दिता भवन्ति॥१७॥

पदार्थः–हे (**इन्द्र**) परमविद्या ऐश्वर्य से युक्त सभाध्यक्ष! जो (**वार्षागिराः**) उत्तम प्रशंसित विद्वान् की वाणियों से प्रशंसित पुरुष (**एतत्**) इस प्रत्यक्ष (**ते**) आपके (**उक्थम्**) प्रशंसा करने योग्य वचन वा काम को सब लोग (**अभिगृणन्ति**) आपके मुख पर कहते हैं वह और (**त्वत्**) अगला वा अनुमान करने योग्य आपका (**राधः**) धन (**वृष्णे**) शरीर और आत्मा की प्रसन्नता के लिये होता है तथा जो (**अम्बरीषः**) शब्द शास्त्र के जानने (**सहदेवः**) विद्वानों के साथ रहने (**भयमानः**) अधर्माचरण से डरकर उससे अलग वर्त्ताव वर्त्तने और दुष्टों को भय करनेवाले (**सुराधाः**) जो कि उत्तम-उत्तम धनों से युक्त (**ऋज्राश्वः**) जिनकी सीधी बड़ी-बड़ी राजनीति हैं और (**प्रष्टिभिः**) प्रश्नों से पूछे हुए समाधानों को देते हैं, वे हम लोगों को सेवने योग्य कैसे न हों?॥१७॥

भावार्थः–जब विद्वान् उत्तम प्रीति के साथ उपदेशों को करते हैं, तब अज्ञानी जन विश्वास को पा उन उपदेशों को सुन अच्छी विद्याओं को धारण कर धनाढ्य होके आनन्दित होते हैं॥१७॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

दस्यूञ्छिम्यूंश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत्।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः॥१८॥

दस्यून्। शिम्यून्। च। पुरुऽहूतः। एवैः। हत्वा। पृथिव्याम्। शर्वा। नि। बर्हीत्। सनत्। क्षेत्रम्। सखिऽभिः। श्वित्न्येभिः। सनत्। सूर्यम्। सनत्। अपः। सुऽवज्रः॥१८॥

पदार्थः–(**दस्यून्**) दुष्टान् (**शिम्यून्**) शान्तान् प्राणिनः (**च**) मध्यस्थप्राणिसमुच्चये (**पुरुहूतः**) बहुभिः पूजितः (**एवैः**) प्रशस्तज्ञानैः कर्मभिर्वा (**हत्वा**) (**पृथिव्याम्**) स्वराज्ययुक्तायां भूमौ (**शर्वा**) सर्वदुःखहिंसकः (**नि**) नितराम् (**बर्हीत्**) बर्हति। अत्र वर्त्तमाने लुङ्डभावश्च। (**सनत्**) सेवेत (**क्षेत्रम्**) स्वनिवासस्थानम् (**सखिभिः**) सुहृद्भिः (**श्वित्न्येभिः**) श्वेतवर्णयुक्तैस्तेजस्विभिः (**सनत्**) सदा (**सूर्यम्**) सवितारं प्राणं वा (**सनत्**) यथावन्निरन्तरम् (**अपः**) जलानि (**सुवज्रः**) शोभनो वज्रः शस्त्राऽस्त्रसमूहोऽस्य सः॥१८॥

अन्वयः-य सुवज्रः पुरुहूतः शर्वा सभाद्यध्यक्षः श्वित्न्येभिः सखिभिरेवैः सहितो दस्यून् हत्वा शिम्यूञ्छान्तान् धार्मिकान् मनुष्यान् भृत्यादींश्च सनत् दुःखानि निबर्हीत् पृथिव्यां क्षेत्रं सूर्य्यमपः सनद् रक्षेत्, सः सर्वैः सनत्सेवनीयः॥१८॥

भावार्थः-यः सज्जनैः सहितोऽधर्म्यं व्यवहारं निवार्य्य धर्म्यं प्रचार्य्य विद्यायुक्त्या सिद्धं संसेव्य प्रजादुःखानि हन्यात्, स सभाद्यध्यक्षः सर्वैर्मन्तव्यो नेतरः॥१८॥

पदार्थः-(**सुवज्रः**) जिसका श्रेष्ठ अस्त्र और शस्त्रों का समूह और (**पुरुहूतः**) बहुतों ने सत्कार किया हो वह (**शर्वा**) समस्त दुःखों का विनाश करनेवाला सभा आदि का अधीश (**श्वित्न्येभिः**) श्वेत अर्थात् स्वच्छ तेजस्वी (**सखिभिः**) मित्रों के साथ और (**एवैः**) प्रशंसित ज्ञान वा कर्मों के साथ (**दस्यून्**) डाकुओं को (**हत्वा**) अच्छे प्रकार मारकर (**शिम्यून्**) शान्त धार्मिक सज्जनों (**च**) और भृत्य आदि को (**सनत्**) दुःखों को (**नि, बर्हीत्**) दूर करे, जो (**पृथिव्याम्**) अपने राज्य से युक्त भूमि में (**क्षेत्रम्**) अपने निवासस्थान (**सूर्यम्**) सूर्य लोक, प्राण (**अपः**) और जलों को (**सनत्**) सेवे, वह सबको सदा सेवने के योग्य होवे॥१८॥

भावार्थः-जो सज्जनों से सहित सभापति अधर्मयुक्त व्यवहार को निवृत्त और धर्म्य व्यवहार का प्रचार करके विद्या की युक्ति से सिद्ध व्यवहार का सेवन कर प्रजा के दुःखों को नष्ट करे, वह सभा आदि का अध्यक्ष सबको मानने योग्य होवे, अन्य नहीं॥१८॥

पुनः स कीदृशस्तत्सहायेन किं प्राप्नुयामेत्युपदिश्यते॥

फिर वह कैसा है और उसके सहाय से हम लोग क्या पावें, इस विषय का उपदेश अगले मन्त्र में किया है॥

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥१९॥११॥

विश्वाहा। इन्द्रः। अधिऽवक्ता। नः। अस्तु। अपरिऽह्वृताः। सनुयाम। वाजम्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥१९॥

पदार्थः-(**विश्वाहा**) विश्वानि सर्वाण्यहानि (**इन्द्रः**) प्रशस्तविद्यैश्वर्य्यौ विद्वान् (**अधिवक्ता**) अधिकं वक्तीति (**नः**) अस्मभ्यम् (**अस्तु**) भवतु (**अपरिह्वृताः**) सर्वतो कुटिला ऋजवो भूत्वा। **अपरिह्वृताश्च।** (अष्टा०७.२.३२) इत्यनेन निपातनाच्छन्दसि प्राप्तो ह्रुभावो निषिध्यते। (**सनुयाम**) दद्याम संभजेम। अत्र पक्षे विकरणव्यत्ययः। (**वाजम्**) विज्ञानम् (**तत्**) विज्ञानम् (**नः**) अस्माकम् (**मित्रः**) सुहृत् (**वरुणः**) श्रेष्ठः

(मामहन्ताम्) सत्कारेण वर्धयन्ताम् **(अदितिः)** अन्तरिक्षम् **(सिन्धुः)** समुद्रो नदी वा **(पृथिवी)** भूमिः **(उत)** अपि **(द्यौः)** सूर्यादिप्रकाशः॥१९॥

अन्वयः–य इन्द्रो नोऽस्मभ्यं विश्वाहाधिवक्तास्तु तस्मादापरिह्वृता वयं यं वाजं सनुयाम तन्नो मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्मामहन्ताम्॥१९॥

भावार्थः–मनुष्यैर्यो नित्यं विद्याप्रदाताऽस्ति तमृजुभावेन सेवित्वा विद्याः प्राप्य मित्राञ्छ्रेष्ठादाकाशान्नदीभ्यो भूमेर्दिवश्चोपकारं गृहीत्वा सर्वेषु मनुष्येषु सत्कारेण भवितव्यम्। नैव कदाचिद्विद्या गोपनीया किन्तु सर्वैरियं प्रसिद्धीकार्य्येति॥१९॥

अत्र सभाद्यध्यक्षेश्वराध्यापकगुणानां वर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोद्धव्यम्॥

इति शततमं १०० सूक्तमेकादशो ११ वर्गश्च समाप्तः॥

पदार्थः–जो **(इन्द्रः)** प्रशंसित विद्या और ऐश्वर्य्ययुक्त विद्वान् **(नः)** हम लोगों के लिये **(विश्वाहा)** सब दिनों **(अधिवक्ता)** अधिक–अधिक उपदेश करनेवाला **(अस्तु)** हो, उससे **(अपरिह्वृताः)** सब प्रकार कुटिलता को छोड़े हुए हम लोग जिस **(वाजम्)** विशेष ज्ञान को **(सनुयाम)** दूसरे को देवें, आप सेवन करें **(नः)** हमारे **(तत्)** उस विज्ञान को **(मित्रः)** मित्र **(वरुणः)** श्रेष्ठ सज्जन **(अदितिः)** अन्तरिक्ष **(सिन्धुः)** समुद्र, नदी **(पृथिवी)** भूमि **(उत)** और **(द्यौः)** सूर्य्य आदि प्रकाशयुक्त लोकों का प्रकाश **(मामहन्ताम्)** मान से बढ़ावें॥१९॥

भावार्थः–मनुष्यों को उचित है कि जो नित्य विद्या का देनेवाला है, उसकी सीधेपन से सेवा करके विद्याओं को पाकर मित्र, श्रेष्ठ आकाश, नदियों, भूमि और सूर्य्य आदि लोकों से उपकारों को ग्रहण करके सब मनुष्यों में सत्कार के साथ होना चाहिये, कभी विद्या छिपानी नहीं चाहिये, किन्तु सबको यह प्रकट करनी चाहिये॥

इस सूक्त में सभा आदि के अधिपति, ईश्वर और पढ़ानेवालों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ एकता समझनी चाहिये॥

यह सौवां १०० सूक्त और ग्यारहवाँ ११ वर्ग पूरा हुआ॥

अथास्यैकाधिकशततमस्यैकादशर्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। इन्द्रो देवता। १,४ निचृज्जगती। २,५,७ विराड्जगती छन्दः। निषादः स्वरः। ३ भुरिक् त्रिष्टुप्। ६ स्वराट् त्रिष्टुप्। ८,१० निचृत् त्रिष्टुप्। ९,११ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ शालाध्यक्षः कीदृश इत्युपदिश्यते॥

अब एक सौ एकवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में शाला का अधीश कैसा होवे, यह विषय कहा है॥

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे॥ १॥

प्र। मन्दिने। पितुऽमत्। अर्चत। वचः। यः। कृष्णऽगर्भाः। निःऽअहन्। ऋजिश्वना। अवस्यवः। वृषणम्। वज्रऽदक्षिणम्। मरुत्वन्तम्। सख्याय। हवामहे॥ १॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**मन्दिने**) आनन्दित आनन्दप्रदाय (**पितुमत्**) सुसंस्कृतमन्नाद्यम् (**अर्चत**) प्रदत्तेन पूजयत। अत्रा**न्येषामपी**ति दीर्घः। (**वचः**) प्रियं वचनम् (**यः**) अनूचानोऽध्यापकः (**कृष्णगर्भाः**) कृष्णा विलिखिता रेखाविद्यादयो गर्भा यैस्ते (**निरहन्**) निरन्तरं हन्ति (**ऋजिश्वना**) ऋजवः सरलाः श्वानो वृद्धयो यस्मिन्नध्ययने तेन। अत्र श्वन्शब्दः श्विधातोः कनिन्प्रत्ययान्तो निपातित उणादौ। (**अवस्यवः**) आत्मनोऽवो रक्षणादिकमिच्छवः (**वृषणम्**) विद्यावृष्टिकर्त्तारम् (**वज्रदक्षिणम्**) वज्रा अविद्याछेदका दक्षिणा यस्मात्तम् (**मरुत्वन्तम्**) प्रशस्ता मरुतो विद्यावन्त ऋत्विजोऽध्यापका विद्यन्ते यस्मिँस्तम् (**सख्याय**) सख्युः कर्मणे भावाय वा (**हवामहे**) स्वीकुर्महे॥ १॥

अन्वयः-यूयं य ऋजिश्वनाऽविद्यात्वं निरहंस्तस्मै मन्दिने पितुमद् वचः प्रार्चतावस्यवः कृष्णगर्भा वयं सख्याय यं वृषणं वज्रदक्षिणं मरुत्वन्तमध्यापकं हवामहे तं यूयमपि प्रार्चत॥ १॥

भावार्थः-मनुष्यैर्यस्माद्विद्या ग्राह्या स मनोवचः कर्मधनैः सदा सत्कर्त्तव्यः। येऽध्याप्यास्ते प्रयत्नेन सुशिक्ष्य विद्वांसः सम्पादनीयाः सर्वदा श्रेष्ठैर्मैत्रीं संभाव्य सत्कर्मनिष्ठा रक्षणीया॥ १॥

पदार्थः-तुम लोग (**यः**) जो उपदेश करने वा पढ़ानेवाला (**ऋजिश्वना**) ऐसे पाठ से कि जिसमें उत्तम वाणियों की धारणाशक्ति की अनेक प्रकार से वृद्धि हो, उससे मूर्खपन को (**नि, अहन्**) निरन्तर हनें, उस (**मन्दिने**) आनन्दी पुरुष और आनन्द देनेवाले के लिये (**पितुमत्**) अच्छा बनाया हुआ अन्न अर्थात् पूरी, कचौरी, लड्डू, बालूशाही, जलेबी, इमरती, आदि अच्छे-अच्छे पदार्थोंवाले भोजन और (**वचः**) पियारी वाणी को (**प्रार्चत**) अच्छे प्रकार निवेदन कर उसका सत्कार करो। और (**अवस्यवः**) अपने को रक्षा आदि व्यवहारों को चाहते हुए (**कृष्णगर्भाः**) जिन्होंने रेखागणित आदि विद्याओं के मर्म खोले हैं, वे हम लोग (**सख्याय**) मित्र के काम वा मित्रपनके लिये (**वृषणम्**) विद्या की वृद्धि करनेवाले

(वज्रदक्षिणम्) जिससे अविद्या का विनाश करनेवाली वा विद्यादि धन देनवाली दक्षिणा मिले **(मरुत्वन्तम्)** जिसके समीप प्रशंसित विद्या वाले ऋत्विज् अर्थात् आप यज्ञ करें दूसरे को करावें, ऐसे पढ़ानेवाले हों उस अध्यापक अर्थात् उत्तम पढ़ानेवाले को **(हवामहे)** स्वीकार करते हैं, उनको तुम लोग भी अच्छे प्रकार सत्कार के साथ स्वीकार करो॥१॥

भावार्थः-मनुष्यों को चाहिये कि जिससे विद्या लेवें, उसका सत्कार मन, वचन, कर्म और धन से सदा करें और पढ़ानेवालों को चाहिये कि जो पढ़ाने योग्य हों, उन्हें अच्छे यत्न के साथ उत्तम-उत्तम शिक्षा देकर विद्वान् करें और सब दिन श्रेष्ठों के साथ मित्रभाव रख उत्तम-उत्तम काम में चित्तवृत्ति की स्थिरता रक्खें॥१॥

अथ सभासेनाध्यक्षः किं कुर्यादित्युपदिश्यते॥

अब सभा और सेना का अध्यक्ष क्या करें, यह विषय अगले मन्त्र में कहा है॥

यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन् पिप्रुमव्रतम्।
इन्द्रो यः शुष्णमशुषं न्यावृणङ् मरुत्वन्तं सख्याय हवामहे॥२॥

यः। विऽअंसम्। जहृषाणेन। मन्युना। यः। शम्बरम्। यः। अहन्। पिप्रुम्। अव्रतम्। इन्द्रः। यः। शुष्णम्। अशुषम्। नि। अवृणक्। मरुत्वन्तम्। सख्याय। हवामहे॥२॥

पदार्थः-**(यः)** सभासेनाध्यक्षः **(व्यंसम्)** विगता अंसाः स्कन्धा यस्य तत् **(जाहृषाणेन)** सज्जनानां सन्तोषकेन। अत्र **हृष तुष्टौ**वित्स्माल्लिटः कानच्। **तुजादित्वाद्**दीर्घश्च **(मन्युना)** क्रोधेन **(यः)** शौर्यादिगुणोपेतो वीरः **(शम्बरम्)** अधर्मसम्बन्धिनम्। अत्र शम्बधातोरौणादिकोऽरन् प्रत्ययः। **(यः)** धर्मात्मा **(अहन्)** हन्यात् **(पिप्रुम्)** उदरम्भरम्। अत्र पृधातोर्बाहुलकादौणादिकः कुः प्रत्ययः सन्वद्भावश्च। **(अव्रतम्)** ब्रह्मचर्यरीत्याचरणादिनियमपालनरहितम् **(इन्द्रः)** सकलैश्वर्ययुक्तः **(यः)** अतिबलवान् **(शुष्णम्)** बलवन्तम् **(अशुषम्)** शोकरहितं हर्षितम् **(नि)** **(अवृणक्)** वर्जयेत्। अत्रान्तर्गतो ण्यर्थः। **(मरुत्वन्तं०)** इति पूर्ववत्॥२॥

अन्वयः-य इन्द्रो जाहृषाणेन मन्युना दुष्टं शत्रुं व्यंसं न्यहन्, यः शम्बरं न्यहन्, यः पिप्रुं न्यहन्, योऽव्रतमवृणक् शुष्णमशुषं मरुत्वन्तमिन्द्रं सख्याय वयं हवामहे स्वीकुर्मः॥२॥

भावार्थः-मनुष्यैर्यः प्रदीप्तेन क्रोधेन दुष्टान् हत्वा विद्योन्नतये ब्रह्मचर्यादि व्रतानि प्रचार्याविद्याकुशिक्षा निषिध्य सर्वेषां सुखाय सततं प्रयतते, स एव सुहन्मन्तव्यः॥२॥

पदार्थः-**(यः)** जो सभा सेना आदि का अधिपति **(इन्द्रः)** समस्त ऐश्वर्य को प्राप्त **(जाहृषाणेन)** सज्जनों को सन्तोष देनेवाले **(मन्युना)** अपने क्रोधों से दुष्ट और शत्रुजनों को **(व्यंसम्, नि, अहन्)** ऐसा मारे कि जिससे कन्धा अलग हो जाये वा **(यः)** जो शूरता आदि गुणों से युक्त वीर **(शम्बरम्)** अधर्म से

सम्बन्ध करनेवाले को अत्यन्त मारे वा **(यः)** धर्मात्मा सज्जन पुरुष **(पिप्रुम्)** जो कि अधर्मी अपना पेट भरता उसको निरन्तर मारे और **(यः)** जो अति बलवान् **(अव्रतम्)** जिसके कोई नियम नहीं अर्थात् ब्रह्मचर्य, सत्यपालन आदि व्रतों को नहीं करता उसको **(अवृणक्)** अपने से अलग करे, उस **(शुष्णम्)** बलवान् **(अशुषम्)** शोकरहित हर्षयुक्त **(मरुत्वन्तम्)** अच्छे प्रशंसित पढ़नेवालों को रखनेहारे सकल ऐश्वर्ययुक्त सभापति को **(सख्याय)** मित्रों के काम वा मित्रपन के लिये हम लोग **(हवामहे)** स्वीकार करते हैं॥२॥

भावार्थः-मनुष्यों को चाहिये कि जो चमकते हुए क्रोध से दुष्टों को मारकर विद्या की उन्नति के लिये ब्रह्मचर्यादि नियमों को प्रचारित और मूर्खपन और खोटी सिखावटों को रोक के सबके सुखके लिये निरन्तर अच्छा यत्न करे, वही मित्र मानने योग्य है॥२॥

अथेश्वरसभाध्यक्षौ कीदृशगुणावित्युपदिश्यते॥

अब ईश्वर और सभाध्यक्ष कैसे-कैसे गुणवाले होते हैं, यह विषय अगले मन्त्र में कहा है॥

यस्य द्यावापृथिवी पौंस्यं महद् यस्य व्रते वरुणो यस्य सूर्यः।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे॥३॥

यस्य। द्यावापृथिवी इति। पौंस्यम्। महत्। यस्य। व्रते। वरुणः। यस्य। सूर्यः। यस्य। इन्द्रस्य। सिन्धवः। सश्चति। व्रतम्। मरुत्वन्तम्। सख्याय। हवामहे॥३॥

पदार्थः-**(यस्य)** **(द्यावापृथिवी)** प्रकाशभूमी इव क्षमान्यायप्रकाशो **(पौंस्यम्)** पुरुषार्थयुक्तं बलम् **(महत्)** महोत्तमगुणविशिष्टम् **(यस्य)** **(व्रते)** सामर्थ्ये शीले वा **(वरुणः)** चन्द्र एतद्गुणो वा **(यस्य)** **(सूर्य्यः)** सवितृलोकः। एतद्गुणो वा **(यस्य)** **(इन्द्रस्य)** परमैश्वर्यवतो जगदीश्वरस्य सभाध्यक्षस्य वा **(सिन्धवः)** समुद्राः **(सश्चति)** प्राप्नोति। **सश्चति गतिकर्म्मा।** (निघं०२.१४) **(व्रतम्)** सामर्थ्यं शीलं वा **(मरुत्वन्तम्)** सर्वप्राणियुक्तमृत्विग्युक्तं वा। अन्यत्पूर्ववत्॥३॥

अन्वयः-वयं यस्येन्द्रस्य व्रते महत्पौंस्यमस्ति यस्य द्यावापृथिवी यस्य व्रतं वरुणो यस्य व्रतं सूर्य्यः सिन्धवश्च सश्चति, तं मरुत्वन्तं सख्याय हवामहे॥३॥

भावार्थः-अत्र श्लेषालङ्कारः। मनुष्या यस्य सामर्थ्येन विना पृथिव्यादीनां स्थितिर्न संभवतीति, यस्य सभाद्यध्यक्षस्य प्रकाशवद्विद्या पृथिवीवत् क्षमा चन्द्रवच्छान्तिः सूर्य्यवन्नीतिप्रदीप्तिः समुद्रवद् गाम्भीर्यं वर्त्तते तं विहायाऽन्यं सुहृदं नैव कुर्य्युः॥३॥

पदार्थः-हम लोग **(यस्य)** जिस **(इन्द्रस्य)** परमैश्वर्य्यवान् जगदीश्वर वा सभाध्यक्ष राजा के **(व्रते)** सामर्थ्य वा शील में **(महत्)** अत्यन्त उत्तम गुण और **(पौंस्यम्)** पुरुषार्थयुक्त बल है **(यस्य)** जिसका **(द्यावापृथिवी)** सूर्य्य और भूमि के सदृश सहनशीलता और नीति का प्रकाश वर्त्तमान है **(यस्य)** जिसके

(व्रतम्) सामर्थ्य वा शील को **(वरुणः)** चन्द्रमा वा चन्द्रमा का शान्ति आदि गुण **(यस्य)** जिसके सामर्थ्य वा शील को **(सूर्यः)** सूर्यमण्डल वा उसका गुण **(सश्चति)** प्राप्त होता और **(सिन्धवः)** समुद्र प्राप्त होते हैं, उस **(मरुत्वन्तम्)** समस्त प्राणियों से और समय-समय पर यज्ञादि करनेहारों से युक्त सभाध्यक्ष को **(सख्याय)** मित्र के काम वा मित्रपन के लिये **(हवामहे)** स्वीकार करते हैं॥३॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को चाहिये कि जिस परमेश्वर के सामर्थ्य के विना पृथिवी आदि लोकों की स्थिति अच्छे प्रकार नहीं होती तथा जिस सभाध्यक्ष के स्वभाव और वर्त्ताव की प्रकाश के समान विद्या, पृथिवी के समान सहनशीलता, चन्द्रमा के तुल्य शान्ति, सूर्य्य के तुल्य नीति का प्रकाश और समुद्र के समान गम्भीरता है, उसको छोड़के और को अपना मित्र न करें॥३॥

अथ सभाध्यक्षः कीदृश इत्युपदिश्यते॥

अब सभाध्यक्ष कैसा होता, इस विषय को अगले मन्त्र में कहा है॥

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः।
वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे॥४॥

यः। अश्वानाम्। यः। गवाम्। गोऽपतिः। वशी। यः। आरितः। कर्मणिऽकर्मणि। स्थिरः। वीळोः। चित्। इन्द्रः। यः। असुन्वतः। वधः। मरुत्वन्तम्। सख्याय। हवामहे॥४॥

पदार्थः- **(यः)** सभाद्यध्यक्षः **(अश्वानाम्)** तुरङ्गानाम् **(यः)** **(गवाम्)** गवां पृथिव्यादीनां वा **(गोपतिः)** गवां स्वेषामिन्द्रियाणां स्वामी **(वशी)** वशं कर्त्तुं शीलः **(यः)** **(आरितः)** सभया विज्ञापितः **(कर्मणिकर्मणि)** क्रियायां क्रियायाम् **(स्थिरः)** निश्चलप्रवृत्तिः **(वीळोः)** बलवतः **(चित्)** इव **(इन्द्रः)** दुष्टानां विदारयिता **(यः)** **(असुन्वतः)** यज्ञकर्त्तुं विरोधिनः **(वधः)** वज्र इव। **वध इति वज्रनामसु पठितम्।** (निघं० २.२०) **(मरुत्वन्तं०)** इति पूर्ववत्॥४॥

अन्वयः-य इन्द्रः सभाद्यध्यक्षोऽश्वानामधिष्ठाता यो गवां रक्षकः यो गोपतिर्वश्यारितः सन् कर्मणिकर्मणि स्थितो भवेद्योऽसुन्वतो वीळोर्वधश्चिद्धन्ता स्यात् तं मरुत्वन्तं सख्याय वयं हवामहे॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यः सर्वपालको जितेन्द्रियः शान्तो यत्र यत्र सभयाऽऽज्ञापितस्तस्मिँस्तस्मिन्नेव कर्मणि स्थिरबुद्ध्या प्रवर्त्तमानो दुष्टानां बलवतां शत्रूणां विजयकर्त्ता वर्त्तते तेन सह सततं मित्रतां संभाव्य सुखानि सदा भोक्तव्यानि॥४॥

पदार्थः- **(यः)** जो **(इन्द्रः)** दुष्टों का विनाश करनेवाला सभा आदि का अधिपति **(अश्वानाम्)** घोड़ों का अध्यक्ष **(यः)** जो **(गवाम्)** गौ आदि पशु वा पृथिवी आदि की रक्षा करनेवाला **(यः)** जो **(गोपतिः)** अपनी इन्द्रियों का स्वामी अर्थात् जितेन्द्रिय होकर अपनी इच्छा के अनुकूल उन इन्द्रियों को चलाने **(वशी)** और मन, बुद्धि, चित्त, अहंकार को यथायोग्य वश में रखनेवाला **(आरितः)** सभा से

आज्ञा को प्राप्त हुआ **(कर्मणिकर्मणि)** कर्म-कर्म में **(स्थिरः)** निश्चित **(यः)** जो **(असुन्वतः)** यज्ञकर्त्ताओं से विरोध करनेवाले **(वीळोः)** बलवान् को **(वधः चित्)** वज्र के तुल्य मारनेवाला हो, उस **(मरुत्वन्तम्)** अच्छे प्रशंसित पढ़ानेवालों को राखनेहारे सभापति को **(सख्याय)** मित्रता वा मित्र के काम के लिये **(हवामहे)** हम स्वीकार करते हैं॥४॥

भावार्थः-यहाँ वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जो सबकी पालना करनेवाला जितेन्द्रिय, शान्त और जिस-जिस कर्म में सभा की आज्ञा को पावे, उसी-उसी कर्म में स्थिरबुद्धि से प्रवर्त्तमान, बलवान्, दुष्ट शत्रुओं को जीतनेवाला हो, उसके साथ निरन्तर मित्रता की संभावना करके सुखों को सदा भोगें॥४॥

अथ सेनाध्यक्षः कीदृश इत्युपदिश्यते॥

अब सेनाध्यक्ष कैसा होता है, यह विषय अगले मन्त्र में कहा है॥

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत्।
इन्द्रो यो दस्यूँरधराँ अवातिरन्मरुत्वन्तं सख्याय हवामहे॥५॥

यः। विश्वस्य। जगतः। प्राणतः। पतिः। यः। ब्रह्मणे। प्रथमः। गाः। अविन्दत्। इन्द्रः। यः। दस्यून्। अधरान्। अवऽअतिरत्। मरुत्वन्तम्। सख्याय। हवामहे॥५॥

पदार्थः- **(यः)** सेनापतिः **(विश्वस्य)** समग्रस्य **(जगतः)** जङ्गमस्य **(प्राणतः)** प्राणतो जीवतः। अत्र **षष्ठ्याः पतिपुत्र०।** (अष्टा०८.३.५३) इति विसर्जनीयस्य सः। **(पतिः)** अधिष्ठाता **(यः)** प्रदाता **(ब्रह्मणे)** चतुर्वेदविदे **(प्रथमः)** सर्वस्य प्रथयिता। अत्र **प्रथेरमच्।** (उणा०५.६८) **(गाः)** पृथिवीरिन्द्रियाणि प्रकाशयुक्तान् लोकान् वा **(अविन्दन्)** प्राप्नोति **(इन्द्रः)** इन्द्रियवान् जीवः **(यः)** शौर्यादिगुणयुक्तः **(दस्यून्)** सहसा परपदार्थहर्त्तॄन् **(अधरान्)** नीचान् **(अवातिरत्)** अधः प्रापयति **(मरुत्वन्त०)** इति पूर्ववत्॥५॥

अन्वयः-यः प्रथम इन्द्रो ब्रह्मणे गा अविन्दत्। यो दस्यूनधरानवातिरत्। यो विश्वस्य जगतः प्राणतस्पतिर्वर्त्तते, तं मरुत्वन्तं सख्याय वयं हवामहे॥५॥

भावार्थः-पुरुषार्थेन विना विद्याऽन्नधनप्राप्तिर्न जायते शत्रुपराजयश्च। यो धार्मिकः सेनाध्यक्षः सुहृद्भावेन स्वप्राणवत् सर्वान् प्रीणयति, तस्य कदाचित्खलु दुःखं न जायते तस्मादेतत्सदाचरणीयम्॥५॥

पदार्थः- **(यः)** जो उत्तमदानशील **(प्रथमः)** सबका विख्यात करनेवाला **(इन्द्रः)** इन्द्रियों से युक्त जीव **(ब्रह्मणे)** चारों वेदों के जाननेवाले के लिये **(गाः)** पृथिवी, इन्द्रियों और प्रकाशयुक्त लोकों को **(अविन्दत्)** प्राप्त होता वा **(यः)** जो शूरता आदि गुणवाला वीर **(दस्यून्)** हठ से औरों का धन

हरनेवालों को **(अधरान्)** नीचता को प्राप्त कराता हुआ **(अवातिरत्)** अधोगति को पहुंचाता वा **(यः)** जो सेनाधिपति **(विश्वस्य)** समग्र **(जगतः)** जङ्गमरूप **(प्राणतः)** जीवसमूह का **(पतिः)** अधिपति अर्थात् स्वामी हो, उस **(मरुत्वन्तम्)** अपने समीप पढ़ानेवालों को रखनेवाले सभाध्यक्ष को हम लोग **(सख्याय)** मित्रपन के लिये **(हवामहे)** स्वीकार करते हैं॥५॥

भावार्थः–पुरुषार्थ के विना विद्या, अन्न और धन की प्राप्ति तथा शत्रुओं का पराजय नहीं हो सकता, जो धार्मिक सेनाध्यक्ष सुहृद्भाव से अपने प्राण के समान सबको प्रसन्न करता है, उस पुरुष को निश्चय है कि कभी दुःख नहीं होता, इससे उक्त विषय का आचरण सदा करना चाहिये॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, इस विषय को अगले मन्त्र में कहा है॥

यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः।
इन्द्रं यं विश्वा भुवनाभि संदधुर्मरुत्वन्तं सख्याय हवामहे॥६॥१२॥

यः। शूरेभिः। हव्यः। यः। च। भीरुऽभिः। यः। धावत्ऽभिः। हूयते। यः। च। जिग्युऽभिः। इन्द्रम्। यम्। विश्वा। भुवना। अभि। सम्ऽदधुः। मरुत्वन्तम्। सख्याय। हवामहे॥६॥

पदार्थः–(**यः**) सेनाध्यक्षः (**शूरेभिः**) शूरवीरैः (**हव्यः**) आहवनीयः (**यः**) (**च**) निर्भयैः (**भीरुभिः**) कातरैः (**यः**) (**धावद्भिः**) वेगवद्भिः (**हूयते**) स्पर्द्ध्यते (**यः**) (**च**) आसीनैर्गच्छद्भिर्वा (**जिग्युभिः**) विजेतृभिः (**इन्द्रम्**) परमैश्वर्य्यवन्तं सेनाध्यक्षम् (**यम्**) (**विश्वा**) अखिलानि (**भुवना**) लोकाः प्राणिनश्च (**अभि**) आभिमुख्ये (**संदधुः**) संदधति (**मरुत्वन्तं०**) इति पूर्ववत्॥६॥

अन्वयः–य इन्द्रः शूरेभिर्हव्यो यो भीरुभिश्च यो धावद्भिर्हूयते यश्च जिग्युभिर्यमिन्द्रं विश्वा भुवनाभिसंदधुस्तं मरुत्वन्तं सख्याय हवामहे॥६॥

भावार्थः–यः परमात्मा सेनाधीशश्च सर्वांल्लोकान् सर्वतो मेलयति स सर्वैः सेवनीयः सुहृद्भावेन मन्तव्यश्च॥६॥

पदार्थः–(**यः**) जो परमैश्वर्यवान् सेना आदि का अधिपति (**शूरेभिः**) शूरवीरों से (**हव्यः**) आह्वान करने अर्थात् चाहने योग्य (**यः**) जो (**भीरुभिः**) डरनेवालों (**च**) और निर्भयों से तथा (**यः**) जो (**धावद्भिः**) दौड़ते हुए मनुष्यों से वा (**यः**) जो (**च**) बैठे और चलते हुए उनसे (**जिग्युभिः**) वा जीतनेवालो लोगों से (**हूयते**) बुलाया जाता वा (**यम्**) जिस (**इन्द्रम्**) उक्त सेनाध्यक्ष को (**विश्वा**) समस्त (**भुवना**) लोकस्थ प्राणी (**अभि**) सम्मुखता से (**संदधुः**) अच्छे प्रकार धारण करते हैं, उस (**मरुत्वन्तम्**) अच्छे पढ़ानेवालों को रखनेहारे सेनाधीश को (**सख्याय**) मित्रपन के लिये हम लोग (**हवामहे**) स्वीकार करते हैं, उसको तुम भी स्वीकार करो॥६॥

भावार्थः-जो परमात्मा और सेना का अधीश सब लोकों का सब प्रकार से मेल करता है, वह सबको सेवन करने और मित्रभाव से मानने के योग्य है॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः।
इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे॥७॥

रुद्राणाम्। एति। प्रऽदिशा। विऽचक्षणः। रुद्रेभिः। योषा। तनुते। पृथु। ज्रयः। इन्द्रम्। मनीषा। अभि। अर्चति। श्रुतम्। मरुत्वन्तम्। सख्याय। हवामहे॥७॥

पदार्थः-(**रुद्राणाम्**) प्राणानामिव दुष्टान् श्रेष्ठांश्च रोदयिताम् (**एति**) प्राप्नोति (**प्रदिशा**) प्रदेशेन ज्ञानमार्गेण। अत्र **घञर्थे कविधानमि**ति कः **सुपां सुलुगि**त्यकारादेशश्च। (**विचक्षणः**) प्रशस्तचातुर्यादिगुणोपेतः (**रुद्रेभिः**) प्राणैर्विद्यार्थिभिः सह (**योषा**) विद्याभिर्मिश्रिताया अविद्याभिः पृथग्भूताया स्त्रियाः। अत्र युधातोर्बाहुलकात् कर्मणि सः प्रत्ययः। (**तनुते**) विस्तृणाति (**पृथु**) विस्तीर्णम्। **प्रथिभ्रदिभ्रस्जां संप्रसारणं सलोपश्च।** (उणा०१.२८) इति प्रथधातोः कुः प्रत्ययः संप्रासरणं च। (**ज्रयः**) तेजः (**इन्द्रम्**) शालाद्यधिपतिम् (**मनीषा**) मनीषया प्रशस्तबुद्ध्या। अत्र **सुपां सुलुगि**ति तृतीयाया एकवचनस्याकारादेशः। (**अभि**) (**अर्चति**) सत्करोति (**श्रुतम्**) प्रख्यातम् (**मरुत्वन्तं०**) इति पूर्ववत्॥७॥

अन्वयः-विचक्षणो विद्वान् रुद्राणां प्रदिशा पृथु ज्रय एति रुद्रेभिर्योषा तत्तनुते चातो यो विचक्षणो मनीषा श्रुतमिन्द्रमभ्यर्चति तं मरुत्वन्तं सख्याय वयं हवामहे॥७॥

भावार्थः-यैर्मनुष्यैः प्राणायामैः प्राणान् सत्कारेण श्रेष्ठान् तिरस्कारेण दुष्टान् विजित्य सकला विद्या विस्तार्य्य परमेश्वरमध्यापकं वाभ्यर्च्योपकारेण सर्वे प्राणिनः सत्क्रियन्ते ते सुखिनो भवन्ति॥७॥

पदार्थः-(**विचक्षणः**) प्रशंसित चतुराई आदि गुणों से युक्त विद्वान् (**रुद्राणाम्**) प्राणों के समान बुरे-भलों को रुलाते हुए विद्वानों के (**प्रदिशा**) ज्ञानमार्ग से (**पृथु**) विस्तृत (**ज्रयः**) प्रताप को (**एति**) प्राप्त होता है और (**रुद्रेभिः**) प्राण वा छोटे-छोटे विद्यार्थियों के साथ (**योषा**) विद्या से मिली और मूर्खपन से अलग हुई स्त्री उसको (**तनुते**) विस्तारती है, इससे जो विचक्षण विद्वान् (**मनीषा**) प्रशंसित बुद्धि से (**श्रुतम्**) प्रख्यात (**इन्द्रम्**) शाला आदि के अध्यक्ष का (**अभ्यर्चति**) सब ओर से सत्कार करता, उस (**मरुत्वन्तम्**) अपने समीप पढ़ानेवालों को रखनेवाले को (**सख्याय**) मित्रपन के लिये हम लोग (**हवामहे**) स्वीकार करते हैं॥७॥

भावार्थः-जिन मनुष्यों से प्राणायामों से प्राणों को, सत्कार से श्रेष्ठों और तिरस्कार से दुष्टों को वश में कर समस्त विद्याओं को फैलाकर परमेश्वर वा अध्यापक का अच्छे प्रकार मान-सत्कार करके उपकार के साथ सब प्राणी सत्कारयुक्त किये जाते हैं, वे सुखी होते हैं॥७॥

अथ शालाध्यक्षः कीदृश इत्युपदिश्यते॥

अब शाला आदि का अधिपति कैसा है, इस विषय को अगले मन्त्र में कहा है॥

यद्वा॑ मरुत्वः पर॒मे स॒धस्थे॒ यद्वा॑व॒मे वृ॒जने॑ मा॒दया॑से।
अत॒ आ या॑ह्यध्व॒रं नो॒ अच्छा॑ त्वा॒याहु॒विश्च॑कृमा सत्यराधः॥८॥

यत्। वा॒। म॒रु॒त्वः॒। प॒र॒मे। स॒धऽस्थे॑। यत्। वा॒। अ॒व॒मे। वृ॒जने॑। मा॒दया॑से। अतः॑। आ। या॒हि॒। अ॒ध्व॒रम्। नः॒। अच्छ॑। त्वा॒ऽया। हु॒विः॒। च॒कृ॒म॒। स॒त्यऽरा॑धः॥८॥

पदार्थः-(**यत्**) यतः (**वा**) उत्तमे (**मरुत्वः**) प्रशस्तविद्यायुक्त (**परमे**) अत्यन्तोत्कृष्टे (**सधस्थे**) स्थाने (**यत्**) यः (**वा**) मध्यमे व्यवहारे (**अवमे**) निकृष्टे (**वृजने**) वर्जन्ति दुःखानि जना यत्र तस्मिन् व्यवहारे (**मादयासे**) हर्षयसे। लेट्प्रयोगोऽयम्। (**अतः**) कारणात् (**आ**) (**याहि**) प्राप्नुयाः (**अध्वरम्**) अध्ययना- ध्यापनाख्यमहिंसनीयं यज्ञम् (**नः**) अस्माकम् (**अच्छ**) उत्तमरीत्या। अत्र **निपातस्य चे**ति दीर्घः। (**त्वाया**) त्वया **सुपां सुलुगि**ति तृतीयास्थानेऽयाजादेशः। (**हविः**) आदेयं विज्ञानम् (**चकृम**) कुर्याम। अत्रा**न्येषामपी**ति दीर्घः। (**सत्यराधः**) सत्यानि राधांसि विद्यादिधनानि यस्य तत्सम्बुद्धौ॥८॥

अन्वयः-हे मरुत्वः सत्यराधो विद्वान्! यद्यतस्त्वं परमे सधस्थे यद्यतो वाऽवमे वा वृजने व्यवहारे मादयासेऽतो नोऽस्माकमध्वरमच्छायाहि त्वया सह वर्त्तमाना वयं हविश्चकृम॥८॥

भावार्थः-मनुष्यैर्यो विद्वान् सर्वत्रानन्दयिता विद्याप्रदाता सत्यगुणकर्मस्वभावोऽस्ति, तत्सङ्गेन सततं सर्वा विद्याः सुशिक्षाश्च प्राप्य सर्वदानन्दितव्यम्॥८॥

पदार्थः-हे (**मरुत्वः**) प्रशंसित विद्यायुक्त (**सत्यराधः**) विद्या आदि सत्यधनों वाले विद्वान्! (**यत्**) जिस कारण आप (**परमे**) अत्यन्त उत्कृष्ट (**सधस्थे**) स्थान में और (**यत्**) जिस कारण (**वा**) उत्तम (**अवमे**) अधम (**वा**) वा मध्यम व्यवहार में (**वृजने**) कि जिसमें मनुष्य दुःखों को छोड़ें (**मादयासे**) आनन्द देते हैं, (**अतः**) इस कारण (**नः**) हम लोगों के (**अध्वरम्**) पढ़ने-पढ़ाने के अहिंसनीय अर्थान् न छोड़ने योग्य यज्ञ को (**अच्छ**) अच्छे प्रकार (**आ, याहि**) आओ प्राप्त होओ (**त्वाया**) आपके साथ हम लोग (**हविः**) ग्रहण करने योग्य विशेष ज्ञान को (**चकृम**) करें अर्थात् उस विद्या को प्राप्त होवें॥८॥

भावार्थः-मनुष्यों को चाहिये कि जो विद्वान् सर्वत्र आनन्दित कराने और विद्या का देनेहारा सत्यगुण, कर्म और स्वभावयुक्त है, उसके संग से निरन्तर समस्त विद्या और उत्तम शिक्षा को पाकर सर्वदा आनन्दित होवें॥८॥

पुनस्तत्सङ्गेन किं कार्य्यं स चास्माकं यज्ञे किं कुर्यादित्युपदिश्यते॥

फिर उसके सङ्ग से क्या करना चाहिये और वह हम लोगों के यज्ञ में क्या करे, यह विषय अगले मन्त्र में कहा है॥

त्वा॒येन्द्र॒ सोमं॑ सुषुमा सुदक्ष त्वा॒या ह॒विश्च॑कृमा ब्रह्मवाहः।
अधा॑ नियुत्व॒: सग॑णो म॒रुद्भि॑र॒स्मिन् य॒ज्ञे ब॒र्हिषि॑ मादयस्व॥ ९॥

त्वा॒ऽया। इ॒न्द्र॒। सोम॑म्। सु॒सु॒म॒। सु॒ऽद॒क्ष॒। त्वा॒ऽया। ह॒विः। च॒कृ॒म॒। ब्र॒ह्म॒ऽवा॒हः॒। अध॑। नि॒युत्व॒ः। सऽग॑णः। म॒रुत्ऽभिः॑। अ॒स्मिन्। य॒ज्ञे। ब॒र्हिषि॑। मा॒द॒य॒स्व॒॥ ९॥

पदार्थः-(**त्वाया**) त्वया सहिताः (**इन्द्रः**) परमविद्यैश्वर्ययुक्त (**सोमम्**) ऐश्वर्यकारकं वेदशास्त्रबोधम् (**सुसुम**) सुनुयाम प्राप्नुयाम। **वाच्छन्दसि सर्वे विधयो भवन्ती**तीडभावः। **अन्येषामपी**ति दीर्घश्च। (**सुदक्ष**) शोभनं दक्षं चातुर्य्ययुक्तं बलं यस्य तत्सम्बुद्धौ। (**त्वाया**) त्वया सह संयुक्ताः (**हविः**) क्रियाकौशलयुक्तं कर्म (**चकृम**) विदध्याम। अत्राप्**यन्येषामपि दृश्यत** इति दीर्घः। (**ब्रह्मवाहः**) अनन्तधन वेदविद्याप्रापक (**अध**) अथ। अत्र वर्णव्यत्ययेन धकारो **निपातस्य चे**ति दीर्घश्च। (**नियुत्वः**) समर्थ (**सगणः**) गणैर्विद्यार्थिनां समूहैः सह वर्त्तमानः (**मरुद्भिः**) ऋत्विग्भिः सहितः (**अस्मिन्**) प्रत्यक्षे (**यज्ञे**) अध्ययनाध्यापनसत्कारप्राप्ते व्यवहारे (**बर्हिषि**) अत्युत्तमे (**मादयस्व**) आनन्दय हर्षितो वा भव॥ ९॥

अन्वयः-हे इन्द्र! त्वाया त्वया सह वर्त्तमाना वयं सोमं सुसुम। हे सुदक्ष! ब्रह्मवाहस्त्वाया त्वया सहिता वयं हविश्चकृम। हे नियुत्वोऽधाथा मरुद्भिः सहितः सगणस्त्वामस्मिन् बर्हिषि यज्ञेऽस्मान् मादयस्व॥ ९॥

भावार्थः-नहि विदुषां सङ्गेन विना कश्चित् खलु विद्यैश्वर्य्यमानन्दं च प्राप्तुं शक्नोति, तस्मात्सर्वे मनुष्या विदुषः सदा सत्कृत्यैतेभ्यो विद्यासुशिक्षाः प्राप्य सर्वथा सत्कृता भवन्तु॥ ९॥

पदार्थः-हे (**इन्द्र**) परम विद्यारूपी ऐश्वर्य से युक्त विद्वान्! (**त्वाया**) आपके साथ हुए हम लोग (**सोमम्**) ऐश्वर्य करनेवाले वेदशास्त्र के बोध को (**सुसुम**) प्राप्त हों। हे (**सुदक्ष**) उत्तम चतुराईयुक्त बल और (**ब्रह्मवाहः**) अनन्तधन तथा वेदविद्या की प्राप्ति करानेहारे विद्वान्! (**त्वाया**) आपके सहित हम लोग (**हविः**) क्रियाकौशलयुक्त काम का (**चकृम**) विधान करें। हे (**नियुत्वः**) समर्थ! (**अधा**) इसके अनन्तर (**मरुद्भिः**) ऋत्विज् अर्थात् पढ़ानेवालों और (**सगणः**) अपने विद्यार्थियों के गोलों के साथ वर्त्तमान आप (**अस्मिन्**) इस (**बर्हिषि**) अत्यन्त उत्तम (**यज्ञे**) पढ़ने-पढ़ाने के सत्कार से पाये हुए व्यवहार में (**मादयस्व**) आनन्दित होओ और हम लोगों को आनन्दित करो॥ ९॥

भावार्थः–विद्वानों के संग के विना निश्चय है कि कोई ऐश्वर्य्य और आनन्द को नहीं पा सकता है, इससे सब मनुष्यों विद्वानों का सदा सत्कार कर इनसे विद्या और अच्छी–अच्छी शिक्षाओं को प्राप्त होकर सब प्रकार से सत्कार युक्त होवें॥९॥

पुनः सेनाध्यक्षः किं कुर्यादित्युपदिश्यते॥

फिर सेना आदि का अध्यक्ष क्या करें, यह विषय अगले मन्त्र में कहा है॥

मा॒दय॑स्व॒ हरि॑भि॒र्ये ते॑ इन्द्र॒ वि ष्य॑स्व॒ शिप्रे॒ वि सृ॑जस्व॒ धेने॑।
आ त्वा॑ सुशिप्र॒ हर॑यो वहन्तू॒शन्ह॒व्यानि॒ प्रति॑ नो जुषस्व॥ १०॥

मा॒दय॑स्व। हरि॑ऽभिः। ये। ते॒। इ॒न्द्र॒। वि। स्य॒स्व॒। शिप्रे॒ इति॑। वि। सृ॒ज॒स्व॒। धेने॒ इति॑। आ। त्वा॒। सु॒ऽशि॒प्र॒। हर॑यः। व॒ह॒न्तु॒। उ॒शन्। ह॒व्यानि॑। प्रति॑। नः॒। जु॒ष॒स्व॒॥ १०॥

पदार्थः–(**मादयस्व**) हर्षयस्व (**हरिभिः**) प्रशस्तैर्युद्धकुशलैः सुशिक्षितैरश्वादिभिः (**ये**) (**ते**) तव (**इन्द्र**) परमैश्वर्ययुक्त सेनाधिपते (**वि, ष्यस्व**) स्वराज्येन विशेषतः प्राप्नुहि (**शिप्रे**) सर्वसुखप्रापिके द्यावापृथिव्यौ। **शिप्रे इति पदनामसु पठितम्।** (निघं०४.१) (**विसृजस्व**) (**धेने**) धेनावत्सर्वानन्दरसप्रदे (**आ**) (**त्वा**) त्वाम् (**सुशिप्र**) सुष्ठु सुखप्रापक (**हरयः**) अश्वादयः (**वहन्तु**) प्रापयन्तु (**उशन्**) कामयमानः (**हव्यानि**) आदातुं योग्यानि युद्धादिकार्य्याणि (**प्रति**) (**नः**) अस्मान् (**जुषस्व**) प्रीणीहि॥१०॥

अन्वयः–हे सुशिप्र इन्द्र! ये ते तव हरयः सन्ति तैर्हरिभिर्नोऽस्मान् मादयस्व। शिप्रे धेने विष्यस्व विसृजस्व च। ये हरयस्त्वा त्वामावहन्तु यैरुशन्कामयमानस्त्वं हव्यानि जुषसे तान् प्रति नोऽस्माञ्जुषस्व॥१०॥

भावार्थः–सेनाधिपतिना सर्वाणि सेनाङ्गानि पूर्णबलानि सुशिक्षितानि साधयित्वा सर्वान् विघ्नान् निवार्य्य स्वराज्यं सुपाल्य सर्वाः प्रजाः सततं रञ्जयितव्याः॥१०॥

पदार्थः–हे (**सुशिप्र**) अच्छा सुख पहुंचानेवाले (**इन्द्र**) परमैश्वर्य्ययुक्त सेना के अधीश! (**ये**) जो (**ते**) आपके प्रशंसित युद्ध में अतिप्रवीण और उत्तमता से चालें सिखाये हुए घोड़े हैं, उन (**हरिभिः**) घोड़ों से (**नः**) हम लोगों को (**मादयस्व**) आनन्दित कीजिये (**शिप्रे**) और सर्व सुखप्राप्ति कराने तथा (**धेने**) वाणी के समान समस्त आनन्दरस को देनेहारे आकाश और भूमि लोक को (**वि ष्यस्व**) अपने राज्य से निरन्तर प्राप्त हो (**विसृजस्व**) और छोड़ अर्थात् वृद्धावस्था में तप करने के लिये उस राज्य को छोड़ दे, जो (**हरयः**) घोड़े (**त्वाम्**) आपको (**आ, वहन्तु**) ले चलते हैं वा जिनसे (**उशन्**) आप अनेक प्रकार की कामनाओं को करते हुए (**हव्यानि**) ग्रहण करने योग्य युद्ध आदि के कामों को सेवन करते हैं, उन कामों के प्रति (**नः**) हम लोगों को (**जुषस्व**) प्रसन्न कीजिये॥१०॥

भावार्थः-सेनापति को चाहिये कि सेना के समस्त अङ्गों को पूर्ण बलयुक्त और अच्छी-अच्छी शिक्षा दे, उनके युद्ध के योग्य सिद्ध कर, समस्त विघ्नों की निवृत्ति कर और अपने राज्य की उत्तम रक्षा करके सब प्रजा को निरन्तर आनन्दित करे॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहा है॥

मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ ११॥ १३॥

मरुत्ऽस्तोत्रस्य। वृजनस्य। गोपाः। वयम्। इन्द्रेण। सनुयाम। वाजम्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ ११॥

पदार्थः-(**मरुत्स्तोत्रस्य**) मरुतां वेगादिगुणैः स्तुतस्य (**वृजनस्य**) दुःखवर्जितस्य व्यवहारस्य (**गोपाः**) रक्षकः (**वयम्**) (**इन्द्रेण**) ऐश्वर्य्यप्रदेन सेनापतिना सह वर्त्तमानाः (**सनुयाम**) संभजेमहि। अत्र विकरणव्यत्ययः। (**वाजम्**) संग्रामम् (**तत्**) तस्मात् (**नः**) अस्मान् (**मित्रो वरु०**) इति पूर्ववत्॥ ११॥

अन्वयः-यो मरुत्स्तोत्रस्य वृजनस्य गोपा सेनाधिपतिरस्ति तेनेन्द्रेणैश्वर्यप्रदेन सह वर्त्तमाना वयं यतो वाजं सनुयाम तन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्नोऽस्मान् मामहन्तां सत्कारहेतवः स्युः॥ ११॥

भावार्थः-न खलु संग्रामे केषांचित् पूर्णबलेन सेनाधिपतिना विना शत्रुपराजयो भवितुं शक्यः। नैव किल कश्चित् सेनाधिपतिः सुशिक्षितया पूर्णबलया साङ्गोपाङ्गया हृष्टपुष्टया सेनया विना शत्रून् विजेतुं राज्यं पालयितुं च शक्नोति। नैतावदन्तरेण मित्रादयः सुखकारका भवितुं योग्यास्तस्मादेतत्सर्वं सर्वैर्मनुष्यैर्यथावन्मन्तव्यमिति॥ ११॥

अत्रेश्वरसभासेनाशालाद्यध्यक्षाणां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोद्धव्यम्॥

इत्येकाधिकशततमं १०१ सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः-जो (**मरुस्तोत्रस्य**) पवन आदि के वेगादि गुणों से प्रशंसा को प्राप्त (**वृजनस्य**) और दुःखवर्जित अर्थात् जिसमें दुःख नहीं होता, उस व्यवहार का (**गोपाः**) रखनेवाला सेनाधिपति है, उस (**इन्द्रेण**) ऐश्वर्य के देनेवाले सेनापति के साथ वर्त्तमान (**वयम्**) हम लोग जिस कारण (**वाजम्**) संग्राम का (**सनुयाम**) सेवन करें (**तत्**) इस कारण (**मित्रः**) मित्र (**वरुणः**) उत्तम गुणयुक्त जन (**अदितिः**) समस्त विद्वान् मण्डली (**सिन्धुः**) समुद्र (**पृथिवी**) पृथिवी (**उत**) और (**द्यौः**) सूर्यलोक (**नः**) हम लोगों के (**मामहन्ताम्**) सत्कार करने के हेतु हों॥ ११॥

भावार्थः-निश्चय है कि संग्राम में किसी पूर्णबली सेनाधिपति के विना शत्रुओं का पराजय नहीं हो सकता और न कोई सेनाधिपति अच्छी शिक्षा की हुई पूर्ण, बल, अङ्ग और उपाङ्ग सहित आनन्दित

और पुष्ट सेना के विना शत्रुओं के जीतने वा राज्य की पालना करने को समर्थ हो सकता है। न उक्त व्यवहारों के विना मित्र आदि सुख करने के योग्य होते हैं, इससे उक्त समस्त व्यवहार सब मनुष्यों को यथावत् मानना चाहिये॥११॥

इस सूक्त में ईश्वर, सभा, सेना और शाला आदि के अधिपतियों के गुणों का वर्णन है। इससे इस सूक्तार्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह एकसौ एकवां १०१ सूक्त और तेरहवां १३ वर्ग समाप्त हुआ॥

अथ द्व्यधिकशततमस्यैकादशर्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। इन्द्रो देवता। १ जगती। ३,५-८ निचृज्जगती छन्दः। निषादः स्वरः। २,४,९ स्वराड् त्रिष्टुप्। १०,११ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ शालाद्यध्यक्षेण किं किं स्वीकृत्य कथं भवितव्यमित्युपदिश्यते॥

अब शाला आदि के अध्यक्ष को क्या-क्या स्वीकार कर कैसा होना चाहिये, यह विषय अगले मन्त्र में कहा है॥

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु॥ १॥

इमाम्। ते। धियम्। प्र। भरे। महः। महीम्। अस्य। स्तोत्रे। धिषणा। यत्। ते। आनजे। तम्। उत्ऽसवे। च। प्रऽसवे। च। ससहिम्। इन्द्रम्। देवासः। शवसा। अमदन्। अनु॥ १॥

पदार्थः-(**इमाम्**) प्रत्यक्षाम् (**ते**) तव विद्याशालाधिपतेः (**धियम्**) प्रज्ञां कर्म वा (**प्र**) (**भरे**) धरे (**महः**) महतीम् (**महीम्**) पूज्यतमाम् (**अस्य**) (**स्तोत्रे**) स्तोतव्ये व्यवहारे (**धिषणा**) विद्यासुशिक्षिता वाक् (**यत्**) या यस्य वा (**ते**) तव (**आनजे**) सर्वैः काम्यते प्रकट्यते विज्ञायते। अत्राञ्जूधातोः कर्मणि लिट्। (**तम्**) (**उत्सवे**) हर्षनिमित्ते व्यवहारे (**च**) दुःखनिमित्ते वा (**प्रसवे**) उत्पत्तौ (**च**) मरणे वा (**सासहिम्**) अतिषोढारम् (**इन्द्रम्**) विद्यैश्वर्यप्रापकम् (**देवासः**) विद्वांसः (**शवसा**) बलेन (**अमदन्**) हृष्येयुर्हर्षयेयुर्वा (**अनु**)॥ १॥

अन्वयः-हे सर्वविद्याप्रद शालाद्यधिपते! यद्या ते तवास्य धिषणा सर्वैरानजे तस्य ते तव यामिमां महो महीं धियमहं स्तोत्रे प्रभरे। उत्सवेऽनुत्सवे च प्रसवे मरणे च यं त्वां सासहिमिन्द्रं देवासः शवसाऽन्वमदन् तं त्वामहमप्यन्वमदेयम्॥ १॥

भावार्थः-सर्वैर्मनुष्यैः सर्वेषां धार्मिकाणां विदुषां विद्यां प्रज्ञाः कर्माणि च धृत्वा स्तुत्या च व्यवहाराः सेवनीयाः। येभ्यो विद्यासुखे प्राप्येते ते सर्वान् सुखदुःखव्यवहारयोर्मध्ये सत्कृत्यैव सर्वदानन्दयेयुरिति॥ १॥

पदार्थः-हे सर्व विद्या देनेवाले शाला आदि के अधिपति! (**यत्**) जो (**ते**) (**अस्य**) इन आपकी (**धिषणा**) विद्या और उत्तम शिक्षा की हुई वाणी (**आनजे**) सब लोगों ने चाही प्रकट की और समझी है, जिन (**ते**) आपके (**इमाम्**) इस (**महः**) बड़ी (**महीम्**) सत्कार करने योग्य (**धियम्**) बुद्धि को (**स्तोत्रे**) प्रशंसनीय व्यवहार में (**प्रभरे**) अतीव धरे अर्थात् स्वीकार करे वा (**उत्सवे**) उत्सव (**च**) और साधारण काम में वा (**प्रसवे**) पुत्र आदि के उत्पन्न होने और (**च**) गमी होने में जिन (**सासहिम्**) अति क्षमापन

करने **(इन्द्रम्)** विद्या और ऐश्वर्य्य की प्राप्ति करानेवाले आपको **(देवासः)** विद्वान् जन **(शवसा)** बल से **(अनु, अमदन्)** आनन्द दिलाते वा आनन्दित होते हैं **(तम्)** उन आपको मैं भी अनुमोदित करूं॥१॥

भावार्थः-सब मनुष्यों को चाहिये कि सब धार्मिक विद्वानों की विद्या, बुद्धियों और कामों को धारण और उनकी स्तुति कर उत्तम-उत्तम व्यवहारों का सेवन करें, जिनसे विद्या और सुख मिलते हैं, वे विद्वान् जन सबको सुख और दुःख के व्यवहारों में सत्कारयुक्त करके ही सदा आनन्दित करावें॥१॥

अथेश्वराध्यापककर्मणा किं जायत इत्युपदिश्यते॥

अब ईश्वर और अध्यापक के काम से क्या होता है, यह विषय अगले मन्त्र में कहा है॥

अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम्॥२॥

अस्य। श्रवः। नद्यः। सप्त। बिभ्रति। द्यावाक्षामा। पृथिवी। दर्शतम्। वपुः। अस्मे इति। सूर्याचन्द्रमसा। अभिऽचक्षे। श्रद्धे। कम्। इन्द्र। चरतः। विऽतर्तुरम्॥२॥

पदार्थः-**(अस्य)** अखिलविद्यस्य जगदीश्वरस्य सर्वविद्याध्यापकस्य वा **(श्रवः)** सामर्थ्यमन्नं वा **(नद्यः)** सरितः **(सप्त)** सप्तविद्याः स्वादोदकाः **(बिभ्रति)** धरन्ति पोषयन्ति वा **(द्यावाक्षामा)** प्रकाशभूमी। अत्र **दिवो द्यावा।** (अष्टा०६.३.२९) अनेन दिव् शब्दस्य द्यावादेशः। **(पृथिवी)** अन्तरिक्षम् **(दर्शतम्)** द्रष्टव्यम् **(वपुः)** शरीरम् **(अस्मे)** अस्माकम् **(सूर्याचन्द्रमसा)** सूर्यचन्द्रादिलोकसमूहौ **(अभिचक्षे)** आभिमुख्येन दर्शनाय **(श्रद्धे)** श्रद्धारणाय **(कम्)** सुखकारकम् **(इन्द्र)** विद्यैश्वर्यप्रद **(चरतः)** प्राप्नुतः। **(वितर्तुरम्)** अतिशयेन विविधप्लवे तरणार्थम्। अत्र यङ्लुङन्तात्तृधातोरच् प्रत्ययो **बहुलं छन्दसी**त्युत्वम्॥२॥

अन्वयः-हे इन्द्रास्य तव श्रवः सप्त नद्यो दर्शतं वितर्त्तुरं कं वपुर्बिभ्रति द्यावाक्षामा पृथिवी सूर्य्याचन्द्रमसा च बिभ्रत्येते सर्व अस्मे अभिचक्षे श्रद्धे चरन्ति चरतः चरन्ति चरतो वा॥२॥

भावार्थः-अत्र श्लेषालङ्कारः। परमेश्वरस्य सर्जनेन पृथिव्यादयो लोकास्तत्रस्थाः पदार्थाश्च स्वं स्वं रूपं धृत्वा सर्वेषां प्राणिनां दर्शनाय श्रद्धायै च भूत्वा सुखं सम्पाद्य गमनागमनादिव्यवहारहेतवो भवन्ति। नहि कथंचिद् विद्यया विनैतेभ्यः सुखानि संजायन्ते तस्मादीश्वरस्योपासनेन विदुषां सङ्गेन च लोकविद्याः प्राप्य सर्वैः सदा सुखयितव्यम्॥२॥

पदार्थः-हे **(इन्द्र)** विद्या और ऐश्वर्य के देनेवाले! **(अस्य)** निःशेष विद्यायुक्त जगदीश्वर का वा समस्त विद्या पढ़ानेहारे आप लोगों का **(श्रवः)** सामर्थ्य वा अन्न और **(सप्त)** सात प्रकार की स्वादयुक्त जलवाली **(नद्यः)** नदी **(दर्शतम्)** देखने और **(वितर्त्तुरम्)** अनेक प्रकार के नौका आदि पदार्थों से तरने योग्य महानद में तरने के अर्थ **(कम्)** सुख करनेहारे **(वपुः)** रूप को **(बिभ्रति)** धारण करतीं वा पोषण

करातीं तथा **(द्यावाक्षामा)** प्रकाश और भूमि मिल कर वा **(पृथिवी)** अन्तरिक्ष **(सूर्याचन्द्रमसा)** सूर्य और चन्द्रमा आदि लोक धरते पुष्ट कराते हैं, ये सब **(अस्मे)** हम लोगों के **(अभिचक्षे)** सुख के सम्मुख देखने **(श्रद्धे)** और श्रद्धा कराने के लिये प्रकाश और भूमि वा सूर्य-चन्द्रमा दो-दो **(चरतः)** प्राप्त होते तथा अन्तरिक्ष प्राप्त होता और भी उक्त पदार्थ प्राप्त होते हैं॥२॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। परमेश्वर की रचना से पृथिवी आदि लोक और उनमें रहनेवाले पदार्थ अपने-अपने रूप को धारण करके सब प्राणियों के देखने और श्रद्धा के लिये हो और सुख को उत्पन्न कर चालचलन के निमित्त होते हैं, परन्तु किसी प्रकार विद्या के विना इन सांसारिक पदार्थों से सुख नहीं होता। इससे सबको चाहिये कि ईश्वर की उपासना और विद्वानों के संग से लोकसम्बन्धी विद्या को पाकर सदा सुखी होवें॥२॥

पुनः सेनाधिपतिः किं कुर्यादित्युपदिश्यते॥

फिर सेना का अधिपति क्या करे, इस विषय को अगले मन्त्र में कहा है॥

तं स्मा॒ रथं॑ मघव॒न्प्राव॑ सा॒तये॑ जैत्रं॒ यं ते॑ अनु॒मदा॑म संग॒मे।
आ॒जा नं॑ इन्द्र॒ मन॑सा पुरुष्टुत त्वा॒यद्भ्यो॑ मघव॒ञ्छर्म॑ यच्छ नः॥३॥

तम्। स्म॒। रथ॑म्। म॒घ॒ऽव॒न्। प्र। अ॒व॒। सा॒तये॑। जैत्र॑म्। यम्। ते॒। अ॒नु॒ऽमदा॑म। स॒म्ऽग॒मे॒। आ॒जा। नः॒। इ॒न्द्र॒। मन॑सा। पु॒रु॒ऽस्तु॒त॒। त्वा॒यत्ऽभ्यः॑। म॒घ॒ऽव॒न्। शर्म॑। य॒च्छ॒। नः॒॥३॥

पदार्थः-**(तम्)** **(स्म)** आश्चर्यगुणप्रकाशे। **निपातस्य चे**ति दीर्घः। **(रथम्)** विमानादियानसमूहम् **(मघवन्)** प्रशस्तपूज्यधनयुक्त **(प्र, अव)** प्रापय **(सातये)** बहुधनप्राप्तये **(जैत्रम्)** जयन्ति येन तम्। अत्र जि धातोः **सर्वधातुभ्यः ष्ट्रन्नि**ति ष्ट्रन् प्रत्ययो बाहुलकाद् वृद्धिश्च। **(यम्)** **(ते)** तव **(अनुमदाम)** अनुहृष्येम। अत्र विकरणव्यत्ययेन शप्। **(संगमे)** संग्रामे। **संगम इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(आजा)** अजन्ति सङ्गच्छन्ते वीराः शत्रुभिर्यस्मिन् **(नः)** अस्माकम् **(इन्द्र)** परमैश्वर्यप्रद **(मनसा)** विज्ञानेन **(पुरुष्टुत)** बहुभिः शूरैः प्रशंसित **(त्वायद्भ्यः)** आत्मनस्त्वामिच्छद्भ्यः **(मघवन्)** प्रशंसितधन **(शर्म)** सुखम् **(यच्छ)** देहि **(नः)** अस्मभ्यम्॥३॥

अन्वयः-हे मघवन्निन्द्र सेनाधिपते! त्वं नोऽस्माकं सातये तं जैत्रं स्म रथं योजयित्वाऽऽजा सङ्गमे प्राव तं कमित्यपेक्षायामाह यं ते तव रथं वयमनुमदाम। हे पुरुष्टुत मघवन्! त्वं मनसा त्वायद्भ्यो नोऽस्मभ्यं शर्म यच्छ॥३॥

भावार्थः-यदा शूरवीरैर्भृत्यैः सेनाधिपतिना च संग्रामं कर्त्तुं गम्यते तदाऽन्योऽन्यमनुमोद्य संरक्ष्य शत्रुभिः संयोध्य तेषां पराजयं कृत्वा स्वकीयान् हर्षयित्वा शत्रूनपि संतोष्य सदा वर्त्तितव्यम्॥३॥

पदार्थः-हे **(मघवन्)** प्रशंसित और मान करने योग्य धनयुक्त **(इन्द्र)** परमैश्वर्य्य के देनेवाले सेना के अधिपति! आप **(नः)** हम लोगों के **(सातये)** बहुत से धन की प्राप्ति होने के लिये **(जैत्रम्)** जिससे संग्रामों में जीतें **(तम्)** उस **(स्म)** अद्भुत-अद्भुत गुणों को प्रकाशित करनेवाले **(रथम्)** विमान आदि रथसमूह को जुता के **(आजा)** जहाँ शत्रुओं से वीर जा-जा मिलें उस **(संगमे)** संग्राम में **(प्र, अव)** पहुंचाओ अर्थात् अपने रथ को वहाँ ले जाओ, कौन रथ को? कि **(यम्)** जिस **(ते)** आपके रथ को हम लोग **(अनु, मदाम)** पीछे से सराहें। हे **(पुरुष्टुत)** बहुत शूरवीर जनों से प्रशंसा को प्राप्त **(मघवन्)** प्रशंसित धनयुक्त! आप **(मनसा)** विशेष ज्ञान से **(त्वायद्भ्यः)** अपने को आप की चाहना करते हुए **(नः)** हम लोगों के लिये अद्भुत **(शर्म)** सुख को **(यच्छ)** देओ॥३॥

भावार्थः-जब शूरवीर सेवकों के साथ सेनापति को संग्राम करने को जाना होता है, तब परस्पर अर्थात् एक-दूसरे का उत्साह बढ़ा के अच्छे प्रकार रक्षा, शत्रुओं के साथ अच्छा युद्ध, उनकी हार और अपने जनों को आनन्द देकर शत्रुओं को भी किसी प्रकार सन्तोष देकर सदा अपना वर्त्ताव रखना चाहिये॥३॥

पुनस्तेन सह किं कर्तव्यमित्युपदिश्यते॥

फिर उसके साथ क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

व॒यं ज॑येम॒ त्वया॑ यु॒जा वृ॑त॒मस्माक॒मंश॒मुद॑वा॒ भरे॑भरे।
अ॒स्मभ्य॑मिन्द्र॒ वरि॑वः सु॒गं कृ॑धि॒ प्र शत्रू॑णां मघवन् वृष्ण्या॑ रुज॥४॥

व॒यम्। ज॒येम॒। त्वया॑। यु॒जा। वृ॒त॒म्। अ॒स्माक॑म्। अंश॑म्। उत्। अ॒व॒। भरे॑ऽभरे। अ॒स्मभ्य॑म्। इ॒न्द्र॒। वरि॑वः। सु॒ऽगम्। कृ॒धि॒। प्र। शत्रू॑णा॒म्। म॒घ॒ऽव॒न्। वृ॒ष्ण्या॑। रु॒ज॒॥४॥

पदार्थः-**(वयम्)** योद्धारः **(जयेम)** शत्रून् विजयेमहि **(त्वया)** सेनाधिपतिना सह वर्त्तमानाः **(युजा)** युक्तेन **(वृतम्)** स्वीकर्तव्यम् **(अस्माकम्)** **(अंशम्)** सेवाविभागम्। भोजनाच्छादनधनयानशस्त्रकोशविभागं वा **(उत्)** उत्कृष्टे **(अव)** रक्षादिकं कुर्याः। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(भरे-भरे)** संग्रामे संग्रामे **(अस्मभ्यम्)** **(इन्द्र)** शत्रुदलविदारक **(वरिवः)** सेवनम् **(सुगम्)** सुष्ठु गच्छन्ति प्राप्नुवन्ति यस्मिँस्तत्। **(कृधि)** कुरु **(प्र)** **(शत्रूणाम्)** वैरिणां सेनाः **(मघवन्)** प्रशस्तबल **(वृष्ण्या)** वृष्णां वर्षकाणां शस्त्रवृष्टये हितया सेनया **(रुज)** भङ्ग्धि॥४॥

अन्वयः-हे इन्द्र! त्वं भरे भरेऽस्माकं वृतमंशमवास्मभ्यं वरिवः सुगं कृधि। हे मघवंस्त्वं वृष्ण्या स्वसेनया शत्रूणां सेनाः प्ररुज। एवंभूतेन त्वया युजा सह वर्त्तमाना वयं शत्रून्नुज्जयेम॥४॥

भावार्थः-राजपुरुषा यदा यदा युद्धाऽनुष्ठानाय प्रवर्त्तेरन् तदा तदा धनशस्त्रकोशयानसेनासामग्रीः पूर्णाः कृत्वा प्रशस्तेन सेनापतिना रक्षिता भूत्वा प्रशस्तविचारेण युक्त्या च शत्रुभिः सह युद्ध्वा शत्रुपृतनाः सदा विजयेरन्। नैवं पुरुषार्थेन विना कस्यचित् खलु विजयो भवितुमर्हति तस्मादेतत्सदाऽनुतिष्ठेयुः॥४॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के दल को विदीर्ण करनेवाले सेना आदि के अधीश! तुम **(भरेभरे)** प्रत्येक संग्राम में **(अस्माकम्)** हम लोगों के **(वृतम्)** स्वीकार करने योग्य **(अंशम्)** सेवाविभाग को **(अव)** रक्खो, चाहो, जानो, प्राप्त होओ, अपने में रमाओ, मांगो, प्रकाशित करो, उससे आनन्दित होने आदि क्रियाओं से स्वीकार करो वा भोजन, वस्त्र, धन, यान, कोश को बांट लेओ तथा **(अस्मभ्यम्)** हम लोगों के लिये **(वरिवः)** अपना सेवन **(सुगम्)** **(कृधि)** करो। हे **(मघवन्)** प्रशंसित बलवाले! तुम **(वृष्ण्या)** शस्त्र वर्षानेवालों की शस्त्रवृष्टि के लिये हितरूप अपनी सेना से **(शत्रूणाम्)** शत्रुओं की सेनाओं को **(प्र, रुज)** अच्छी प्रकार काटो और ऐसे साथी **(त्वया, युजा)** जो आप उनके साथ **(वयम्)** युद्ध करनेवाले हम लोग शत्रुओं के बलों को **(उत् जयेम)** उत्तम प्रकार से जीतें॥४॥

भावार्थः-राजपुरुष जब-जब युद्ध करने को प्रवृत्त होवें तब-तब धन, शस्त्र, यान, कोश, सेना आदि सामग्री को पूरी कर और प्रशंसित सेना के अधीश से रक्षा को प्राप्त होकर, प्रशंसित विचार और युक्ति से शत्रुओं के साथ युद्ध कर, उनकी सेनाओं को सदा जीतें। ऐसे पुरुषार्थ के विना किये किसी को जीत होने योग्य नहीं, इससे इस वर्त्ताव को सदा वर्त्तें॥४॥

पुनस्तैः परस्परं तत्र कथं वर्त्तितव्यमित्युपदिश्यते॥

फिर उनको परस्पर युद्ध में कैसे वर्त्तना चाहिये, यह विषय अगले मन्त्र में कहा है॥

नाना॒ हि त्वा॒ हव॑माना॒ जना॑ इ॒मे धना॑नां धर्त॒रव॑सा विप॒न्यव॑ः।
अ॒स्माक॑ꣳ स्मा रथ॒मा ति॑ष्ठ सा॒तये॒ जैत्रं॑ हीन्द्र॒ निभृ॑तं मन॒स्तव॑॥५॥१४॥

नाना॑। हि। त्वा॒। हव॑मानाः। जना॑ः। इ॒मे। धना॑नाम्। ध॒र्त्तः॒। अव॑सा। वि॒प॒न्यव॑ः। अ॒स्माक॑म्। स्म॒। रथ॑म्। आ। ति॒ष्ठ॒। सा॒तये॑। जैत्र॑म्। हि। इ॒न्द्र॒। निऽभृ॑तम्। मन॑ः। तव॑॥५॥

पदार्थः-**(नाना)** अनेकप्रकाराः **(हि)** खलु **(त्वा)** त्वाम् **(हवमानाः)** स्पर्द्धमानाः **(जनाः)** शौर्य्यधनुर्वेदकुशला अतिरथा मनुष्याः **(इमे)** प्रत्यक्षतया सुपरीक्षिताः **(धनानाम्)** राज्यविभूतीनाम् **(धर्त्तः)** धारक **(अवसा)** रक्षणादिना सह वर्त्तमानाः **(विपन्यवः)** विविधव्यवहारकुशला मेधाविनः **(अस्माकम्)** **(स्म)** हर्षे। पूर्ववदत्र दीर्घः। **(रथम्)** विजयहेतुं विमानादियानम् **(आ)** **(तिष्ठ)** **(सातये)** संविभागाय **(जैत्रम्)** दृढं वैयाघ्रं विजयनिमित्तम् **(हि)** प्रसिद्धम् **(इन्द्र)** यथावद्वीराणां रक्षक **(निभृतम्)** नितरां धृतम् **(मनः)** मननशीलान्तःकरणवृत्तिः **(तव)**॥५॥

अन्वयः-हे इन्द्र! त्वं धनानां सातये स्म यत्र तव मनो निभृतं तमस्माकं जैत्रं रथं ह्यातिष्ठ। हे धर्त्तस्तवाज्ञायां स्थिता अवसा सह वर्त्तमाना नाना हवमाना विपन्यवो जना इमे वयं त्वानुकूलं हि वर्तेमहि॥५॥

भावार्थः-यदा मनुष्या युद्धादिव्यवहारे प्रवर्तेरंस्तदा विरोधेर्ष्याभयालस्यं विहाय परस्पररक्षायां तत्परा भूत्वा शत्रून् विजित्य विजितधनानां विभागान् कृत्वा सेनापत्यादयो यथायोग्यं योद्धृभ्यः सत्कारायैतानि दद्युर्यतोऽग्रेऽप्युत्साहो वर्धेत। सर्वथाऽऽदानमप्रियकरं दानञ्च प्रियकारकमिति बुद्ध्वैतत्सदाऽनुतिष्ठेयुः॥५॥

पदार्थः-हे **(इन्द्र)** यथायोग्य वीरों के रखनेवाले! तुम **(धनानाम्)** राज्य की विभूतियों के **(सातये)** अलग-अलग बांटने के लिये **(स्म)** आनन्द ही के साथ जिसमें **(तव)** तुम्हारी **(मनः)** विचार करनेवाली चित्त की वृत्ति **(निभृतम्)** निरन्तर धरी हो, उस **(अस्माकम्)** हमारे **(जैत्रम्)** जो बड़ा दृढ़ जिससे शत्रु जीते जायें, **(रथम्)** ऐसे विजय करानेवाले विमानादि यान **(हि)** ही को **(आ तिष्ठ)** अच्छे प्रकार स्वीकार कर स्थित हो। हे **(धर्त्तः)** धारण करनेवाले! तुम्हारी आज्ञा में अपना वर्त्ताव रखते हुए **(अवसा)** रक्षा आदि आपके गुणों के साथ वर्त्तमान **(नाना)** अनेक प्रकार **(हवमानाः)** चाहे हुए **(विपन्यवः)** विविध व्यवहारों में चतुर बुद्धिमान् **(जनाः)** जन **(इमे)** ये प्रत्यक्षता से परीक्षा किये हम लोग **(त्वाम्)** तुम्हारे अनुकूल **(हि)** ही वर्त्ताव रक्खें॥५॥

भावार्थः-जब मनुष्य युद्ध आदि व्यवहारों में प्रवृत्त होवें तब विरोध, ईर्ष्या, डर और आलस्य को छोड़ एक-दूसरे की रक्षा में तत्पर हो शत्रुओं को जीत और जीते हुए धनों को बांट कर सेनापति आदि लड़नेवालों की योग्यता के अनुकूल उनके सत्कार के लिये देवें कि जिससे लड़ने का उत्साह आगे को बढ़े। सब प्रकार से ले लेना प्रीति करनेवाला नहीं और देना प्रसन्नता करनेवाला होता है, यह विचार कर सदा उक्त व्यवहार को वर्त्तें॥५॥

पुनः स सेनापतिः कीदृश इत्युपदिश्यते॥

फिर वह सेनापति कैसा हो, यह विषय अगले मन्त्र में कहा है॥

गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः।
अकल्प इन्द्रः प्रतिमानमोजसाथा जना वि ह्वयन्ते सिषासवः॥६॥

गोऽजिता। बाहू इति। अमितऽक्रतुः। सिमः। कर्मन्ऽकर्मन्। शतम्ऽऊतिः। खजम्ऽकरः। अकल्पः। इन्द्रः। प्रतिऽमानम्। ओजसा। अथ। जनाः। वि। ह्वयन्ते। सिसासवः॥६॥

पदार्थः-**(गोजिता)** गाः पृथिवीर्जयति याभ्यां तौ। अत्र **कृतो बहुलमिति** करणे क्विप्। **सुपां सुलुगिति** विभक्तेराकारादेशश्च। **(बाहू)** अतिबलपराक्रमयुक्तौ भुजौ **(अमितक्रतुः)** अमिताः क्रतवः प्रजा यस्यः सः **(सिमः)** व्यवस्थया शत्रूणां बन्धकः **(कर्म्मन्कर्म्मन्)** कर्मणि कर्मणि **(शतमूतिः)** शतमसंख्याता

ऊतयो रक्षणादिका क्रिया यस्य सः। अत्र **वाच्छन्दसि सर्वे विधयो भवन्ती**ति सुपो लुगभावः। **(खजङ्करः)** यः संग्रामं करोति सः। अत्र **खज मन्थने** इति धातोः **कर्मण्यण्** (अष्टा०३.२.१) इत्यण्। **वाच्छन्दसि सर्वे विधयो भवन्ती**ति वृद्ध्यभावः। सुपो लुगभावश्च। **(अकल्पः)** कल्पैरन्यैः समर्थैरसदृशोऽन्येभ्योऽधिक इति **(इन्द्रः)** अनेकैश्वर्य्यः **(प्रतिमानम्)** अतिसमर्थानामुपमा **(ओजसा)** बलेन **(अथ)** आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। **(जनाः)** विद्वांसः **(वि) (ह्वयन्ते)** स्पर्द्धन्ते **(सिषासवः)** सनितुं संभजितुमिच्छवः॥६॥

अन्वयः-हे सभापते! यस्य ते गोजिता बाहू यो भवानिन्द्र ओजसा कर्मन्कर्मनमितक्रतुरकल्पः सिमः खजङ्करः शतमूतिः प्रतिमानं वर्त्ततेऽथ तं त्वां सिषासवो जनाः विह्वयन्ते॥६॥

भावार्थः-मनुष्यैर्यः सर्वथा समर्थः प्रतिकर्मकर्त्तुं वेत्ताऽन्यैरजेयः सर्वेषां जेता सर्वैः स्पृहणीयोऽनुपमो मनुष्यो वर्त्तते, तं सेनाधिपतिं कृत्वा विजयादीनि कार्य्याणि साधनीयानि॥६॥

पदार्थः-हे सभापति! जिन आपकी **(गोजिता)** पृथिवी की जितानेवाली **(बाहू)** अत्यन्त बल पराक्रमयुक्त भुजा **(अथ)** इसके अनन्तर जो आप **(इन्द्रः)** अनेक ऐश्वर्य्ययुक्त **(ओजसा)** बल से **(कर्मन्कर्मन्)** प्रत्येक को काम में **(अमितक्रतुः)** अतुल बुद्धिवाले **(अकल्पः)** और बड़े-बड़े समर्थ जनों से अधिक **(सिमः)** व्यवस्था से शत्रुओं के बांधने और **(खजङ्करः)** संग्राम करने वाले **(शतमूतिः)** जिनकी सैकड़ों रक्षा आदि क्रिया हैं। **(प्रतिमानम्)** जिनको अत्यन्त सामर्थ्यवालों की उपमा दी जाती है, उन आपको **(सिषासवः)** सेवन करने की इच्छा करनेवाले **(जनाः)** विद्वान् जन **(वि, ह्वयन्ते)** चाहते हैं॥६॥

भावार्थः-मनुष्यों को चाहिये कि जो सर्वथा समर्थ, प्रत्येक काम के करने को जानता, औरों से न जीतने योग्य, आप सबको जीतनेवाला, सबके हित चाहने योग्य और अनुपम मनुष्य हो, उसको सेनाधिपति करके विजय आदि कामों को साधें॥६॥

पुनः स कीदृशः किं करोतीत्युपदिश्यते॥

फिर वह कैसा और क्या करता है, इस विषय को अगले मन्त्र में कहा है॥

उत्ते॑ श॒तान्म॑घव॒न्नुच्च॒ भूय॑स॒ उत्स॒हस्रा॑द्रिरिचे कृ॒ष्टिषु॒ श्रव॑ः।
अ॒मा॒त्रं त्वा॑ धि॒षणा॑ तित्विषे म॒ह्यधा॑ वृ॒त्राणि॑ जिघ्नसे पुरंदर॥७॥

उत्। ते॒। श॒तात्। म॒घ॒ऽव॒न्। उत्। च॒। भूय॑सः। उत्। स॒हस्रा॑त्। रि॒रि॒चे॒। कृ॒ष्टिषु॑। श्रव॑ः। अ॒मा॒त्रम्। त्वा॒। धि॒षणा॑। ति॒त्वि॒षे॒। म॒ही। अध॑। वृ॒त्राणि॑। जि॒घ्न॒से॒। पु॒र॒म्ऽद॒र॒॥७॥

पदार्थः-**(उत्)** उत्कृष्टे **(ते)** तव **(शतात्)** असंख्यात् **(मघवन्)** असंख्यातैश्वर्य्य **(उत्) (च) (भूयसः)** अधिकात् **(उत्) (सहस्रात्)** असंख्येयात् **(रिरिचे)** अतिरिच्यते **(कृष्टिषु)** मनुष्येषु **(श्रवः)**

कीर्तनं श्रवणं धनं वा **(अमात्रम्)** अपरिमितम् **(त्वा)** त्वाम् **(धिषणा)** विद्यासुशिक्षिता वाक् प्रज्ञा वा **(तित्विषे)** त्वेषति प्रदीप्यते **(मही)** महागुणविशिष्टा **(अध)** आनन्तर्ये। **निपातस्य चे**ति दीर्घः। **(वृत्राणि)** यथा मेघावयवान् सूर्य्यस्तथा शत्रून् **(जिघ्नसे)** हन्याः। अत्र हनधातोर्लेटि शपः स्थाने श्लुः। व्यत्येनात्मनेपदं च। **(पुरन्दर)** यः शत्रूणां पुरो दृणाति तत्सम्बुद्धौ॥७॥

अन्वयः–हे मघवन्निन्द्र! ते कृष्टिषु श्रवः शतादुद्रिरिचे सहस्रादुद्रिरिचे भूयसश्चोद्रिरिचेऽधाऽमात्रं त्वा मही धिषणा तित्विषे। हे पुरन्दर! वृत्राणि सूर्य्य इव त्वं शत्रून् जिघ्नसे॥७॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा सूर्योऽन्धकारमेघादिकं हत्वाऽपरिमितं स्वकीयं तेजः प्रकाश्य सर्वेषु तेजस्विष्वधिको वर्त्तते, तथाभूतं विद्वांसं सभापतिं मत्वा शत्रवः पराजेयाः॥७॥

पदार्थः–हे **(मघवन्)** असंख्यात ऐश्वर्य्य से युक्त सेनापति! **(ते)** आपका **(कृष्टिषु)** मनुष्यों में **(श्रवः)** कीर्त्तन, श्रवण वा धन **(शतात्)** सैकड़ों से **(उत्)** ऊपर **(रिरिचे)** निकल गया **(सहस्रात्)** हजारों से **(उत)** ऊपर **(च)** और **(भूयसः)** अधिक से भी **(उत्)** ऊपर अर्थात् अधिक निकल गया। **(अध)** इसके अनन्तर **(अमात्रम्)** परिमाणरहित **(त्वा)** आपकी **(मही)** महागुणयुक्त **(धिषणा)** विद्या और अच्छी शिक्षा को पाये हुई वाणी वा बुद्धि **(तित्विषे)** प्रकाशित करती है। हे **(पुरन्दर)** शत्रुओं के पुरों के विदारनेवाले! **(वृत्राणि)** जैसे मेघ के अङ्ग अर्थात् बद्दलों को सूर्य्य हनन करता है, वैसे आप शत्रुओं को **(जिघ्नसे)** मारते हो॥७॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे सूर्य्य अन्धकार और मेघ आदि का हनन करके अपरिमित अर्थात् जिसका परिमाण न हो सके उस अपने तेज को प्रकाशित करके, सब तेजवाले पदार्थों में बढ़ के वर्त्तमान है, वैसे विद्वान् को सभा का अधीश मान के शत्रुओं को जीतें॥७॥

अथेश्वरः सभापतिश्च कीदृश इत्युपदिश्यते॥

अब ईश्वर और सभापति कैसा है, इस विषय को अगले मन्त्र में कहा है॥

त्रिवि॒ष्टिधा॑तु॒ प्रति॒मान॒मोज॑सस्ति॒स्रो भूमी॑र्नृ॒पते॒ त्रीणि॑ रोच॒ना।
अती॒दं विश्वं॒ भुव॑नं ववक्षिथाश॒त्रुरि॑न्द्र ज॒नुषा॑ स॒नाद॑सि॥८॥

त्रि॒वि॒ष्टि॒ऽधातु॑। प्र॒ति॒ऽमान॑म्। ओज॑सः। ति॒स्रः। भूमीः॑। नृ॒ऽप॒ते॒। त्रीणि॑। रो॒च॒ना। अति॑। इ॒दम्। विश्व॑म्। भुव॑नम्। व॒व॒क्षि॒थ॒। अ॒श॒त्रुः। इ॒न्द्र॒। ज॒नुषा॑। स॒नात्। अ॒सि॒॥८॥

पदार्थः–**(त्रिविष्टिधातु)** त्रिधोत्तममध्यमनिकृष्टा विष्टयो व्याप्तयो धातूनां पृथिव्यादीनां यस्मिँस्तत् **(प्रतिमानम्)** प्रतिमीयते यत् **(ओजसः)** बलात् **(तिस्रः)** त्रिविधाः **(भूमीः)** अधऊर्ध्वमध्यस्था

उत्तमाधममध्यमाः क्षितीः **(नृपते)** नृणां स्वामिन्नीश्वर नृप वा **(त्रीणि)** त्रिविधानि **(रोचना)** रोचनानि विद्याशब्दसूर्य्यादीनि न्यायबलराज्यपालनादीनि च **(अति)** **(इदम्)** प्रत्यक्षम् **(विश्वम्)** समग्रम् **(भुवनम्)** भवन्ति भूतानि यस्मिञ्जगति तत् **(ववक्षिथ)** वोढुमिच्छसि। अत्र लडर्थे लिट्। सन्नन्तस्य वहधातोरयं प्रयोगः। **बहुलं छन्दसी**त्यनेनाभ्यासस्येत्वाभावः। **(अशत्रुः)** न सन्ति शत्रवो यस्य सः **(इन्द्र)** बह्वैश्वर्य्ययुक्त **(जनुषा)** प्रादुर्भूतेन कर्मणा **(सनात्)** सनातनात् कारणात् **(असि)** भवसि॥८॥

अन्वयः-हे नृपत इन्द्र! बह्वैश्वर्यवतोऽशत्रुस्त्वं त्रिविष्टिधातु प्रतिमानं सनादोजसो जनुषा तिस्रो भूमिस्त्रीणि रोचना निर्वहन्नसि त्रिविष्टिधातु प्रतिमानमिदं विश्वं भुवनमतिववक्षिथ तस्मात्सत्कर्त्तव्योऽसि॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्येनाप्रतिमेश्वरेण कारणात्सर्वं कार्यं जगन्निर्माय संरक्ष्य संह्रियते स एवेष्टो माननीयस्तथा योऽतुलसामर्थ्यो सभाधिपतिः प्रसिद्धैर्न्यायादिगुणैः सर्वं राज्यं संतोषयति, स च सत्कर्त्तव्यः॥८॥

पदार्थः-हे **(नृपते)** मनुष्यों के स्वामी ईश्वर वा राजन्! **(इन्द्र)** बहुत ऐश्वर्य से युक्त **(अशत्रुः)** शत्रुरहित आप **(त्रिविष्टिधातु)** जिसमें तीन प्रकार की पृथिवी, जल, तेज, पवन, आकाश की व्याप्ति अर्थात् परिपूर्णता है, उस संसार की **(प्रतिमानम्)** परिमाण वा उपमान जैसे हो वैसे **(सनात्)** सनातन कारण वा **(ओजसः)** बल वा **(जनुषा)** उत्पन्न किये हुए काम से **(तिस्रः)** तीन प्रकार **(भूमीः)** अर्थात् नीचली, ऊपरली, और बीचली उत्तम, अधम और मध्यम भूमि तथा **(त्रीणि)** तीन प्रकार के **(रोचना)** प्रकाशयुक्त विद्या, शब्द और सूर्य्य और न्याय करने, बल और राज्यपालन आदि काम के तुम दोनों यथायोग्य निर्वाह करनेवाले **(असि)** हो और उक्त पञ्चभूतमय **(इदम्)** इस **(विश्वम्)** समस्त **(भुवनम्)** जिसमें कि प्राणी होते हैं, उस जगत् के **(अति, ववक्षिथ)** अतीव निर्वाह करने की इच्छा करते हो, इससे ईश्वर उपासना करने योग्य और विद्वान् आप सत्कार करने योग्य हो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जिसकी उपमा नहीं है, उस ईश्वर ने कारण से सब कार्य्यरूप जगत् को रच और उसकी रक्षा कर उसका संहार किया है, वही इष्टदेव मानने योग्य है तथा जो अतुल सामर्थ्ययुक्त सभापति प्रसिद्ध न्याय आदि गुणों से समस्त राज्य को सन्तोषित करता है, सो भी सदा सत्कार करने योग्य है॥८॥

अथ सेनाध्यक्षः कीदृश इत्युपदिश्यते॥

अब सेना का अध्यक्ष कैसा है, इस विषय को अगले मन्त्र में कहा है॥

त्वां दे॒वेषु॑ प्रथ॒मं ह॑वामहे॒ त्वं ब॑भूथ॒ पृत॑नासु सास॒हिः।
सेमं नः॑ का॒रुमु॑प॒मन्यु॒मुद्दि॑दु॒मिन्द्रः॑ कृणोतु प्रस॒वे रथं॑ पु॒रः॥९॥

त्वाम्। देवेषु। प्रथमम्। हवामहे। त्वम्। बभूथ। पृतनासु। ससहिः। सः। इमम्। नः। कारुम्। उपऽमन्युम्। उत्ऽभिदम्। इन्द्रः। कृणोतु। प्रऽसवे। रथम्। पुरः॥ ९॥

पदार्थः-(**त्वाम्**) सर्वसेनाधिपतिम् (**देवेषु**) विद्वत्सु (**प्रथमम्**) आदिमम् (**हवामहे**) स्वीकुर्महे (**त्वम्**) (**बभूथ**) भवसि। **बभूथाततन्थ०** इतीडभावो निपातनात्। (**पृतनासु**) स्वेषां शत्रूणां वा सेनासु (**सासहिः**) अतिशयेन षोढा (**सः**) **सोऽचि लोपे चेत्पादपूरणमि**ति सुलोपः। (**इमम्**) प्रत्यक्षम् (**नः**) अस्मभ्यम् (**कारुम्**) शिल्पकार्यकर्त्तारम् (**उपमन्युम्**) उपसमीपे मन्तुं योग्यम् (**उद्भिदम्**) पृथिवीं भित्वा जातेन काष्ठेन निर्मितम् (**इन्द्रः**) अखिलैश्वर्यकारकः (**कृणोतु**) (**प्रसवे**) प्रकृष्टतया सुवन्ति प्रेरयन्ति वीरान् यस्मिन् राज्ये तस्मिन् (**रथम्**) विमानादियानम् (**पुरः**) पुरःसरम्॥ ९॥

अन्वयः-हे सेनापते! यतस्त्वं पृतनासु सासहिर्बभूथ तस्माद् देवेषु प्रथमं त्वां वयं हवामहे। स इन्द्रो भवान् प्रसव उद्भिदं रथं पुरः करोति स नोऽस्मभ्यमिममुपमन्युं कारुं कृणोतु॥ ९॥

भावार्थः-मनुष्यैर्य उत्तमो विद्वान् स्वसेनापालने शत्रुबलविदारणे चतुरः शिल्पवित् प्रियो युद्धे पुरःसरणादतियोद्धा वर्तते, स एव सेनापतिः कर्त्तव्यः॥ ९॥

पदार्थः-हे सेनापते! जिस कारण (**त्वम्**) आप (**पृतनासु**) अपनी वा शत्रुओं की सेनाओं में (**सासहिः**) अतीव सहनशील (**बभूथ**) होते हैं, इससे (**देवेषु**) विद्वानों में (**प्रथमम्**) पहिले (**त्वाम्**) समग्र सेना के अधिपति तुमको (**हवामहे**) हम लोग स्वीकार करते हैं, जो (**इन्द्रः**) समस्त ऐश्वर्य के प्रकट करनेहारे आप (**प्रसवे**) जिसमें वीरजन चिताये जाते हैं, उस राज्य में (**उद्भिदम्**) पृथिवी का विदारण करके उत्पन्न होनेवाले काष्ठ विशेष से बनाये हुए (**रथम्**) विमान आदि रथ को (**पुरः**) आगे करते हैं (**सः**) वह आप (**नः**) हम लोगों के लिये (**इमम्**) इस (**उपमन्युम्**) समीप में मानने योग्य (**कारुम्**) क्रिया कौशल काम के करनेवाले जन को (**कृणोतु**) प्रसिद्ध करें॥ ९॥

भावार्थः-मनुष्यों को चाहिये कि जो उत्तम विद्वान्, अपनी सेना को पालन और शत्रुओं के बल को विदारने में चतुर, शिल्पकार्य्यों को जाननेवाला, प्रेमी, युद्ध में आगे होने से अत्यन्त युद्ध करता है, उसी को सेना का अधीश करें॥ ९॥

पुनः स किं कुर्यादित्युपदिश्यते॥

फिर वह क्या करे, यह विषय अगले मन्त्र में कहा है॥

त्वं जिगेथ न धना रुरोधिथाभीष्वाजा मघवन्महत्सु च।
त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय॥ १०॥

त्वम्। जिगेथ। न। धना। रुरोधिथ। अभीषु। आजा। मघऽवन्। महत्ऽसु। च। त्वाम्। उग्रम्। अवसे। सम्। शिशीमसि। अथ। नः। इन्द्र। हवनेषु। चोदय॥ १०॥

पदार्थः-(**त्वम्**) चतुरङ्गसेनायुक्तः (**जिगेथ**) जितवानसि (**न**) निषेधे (**धना**) धनानि (**रुरोधिथ**) रुद्धवानसि (**अर्भेषु**) अल्पेषु (**आजा**) आजिषु संग्रामेषु (**मघवन्**) परमपूज्यधनादिसामग्रीयुक्त (**महत्सु**) (**च**) मध्यस्थेषु (**त्वाम्**) (**उग्रम्**) शत्रुबलविदारणक्षमम् (**अवसे**) रक्षणाद्याय (**सम्**) (**शिशीमसि**) शत्रून् सूक्ष्मान् जीर्णान् कुर्मः। अत्र **शो तनूकरण** इत्यस्माल्लटि श्यनः स्थाने व्यत्ययेन श्लुः। **छन्दस्युभयथे**ति श्लोरार्द्धधातुकत्वादाकारादेशः। (**अथ**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्माकमस्मान् वा (**इन्द्र**) शत्रूणां विदारक (**हवनेषु**) आदानयोग्येषु कर्मसु (**चोदय**)॥१०॥

अन्वयः-हे मघवन्निन्द्र! यस्त्वमर्भेषु महत्सु मध्यस्थेषु चाजा शत्रून् जिगेथ धना न रुरोधिथ तमुग्रं त्वामवसे स्वीकृत्य शत्रून् संशिशीमसि। अथ हवनेषु नोऽस्मान् चोदय॥१०॥

भावार्थः-यो मनुष्यः शत्रूणां समयं प्राप्य धनानां च विजेता सत्कर्मसु प्रेरको दुष्टानां छेत्तास्ति, स एव सर्वैः सेनापतिर्मन्तव्यः॥१०॥

पदार्थः-हे (**मघवन्**) परम सराहने योग्य धन आदि सामग्री लिये हुए (**इन्द्र**) शत्रुओं के विदारनेवाले सेनापति! जो (**त्वम्**) आप चतुरङ्ग अर्थात् चौतरफी नाकेबन्दी की सेना सहित (**अर्भेषु**) थोड़े (**महत्सु**) बड़े (**च**) और मध्यम (**आजा**) संग्रामों में शत्रुओं को (**जिगेथ**) जीते हुए हो और उक्त संग्रामों में (**धना**) धन आदि पदार्थों को (**न**) न (**रुरोधिथ**) रोकते हो, उन (**उग्रम्**) शत्रुओं के बल को विदीर्ण करने में अत्यन्त बली (**त्वाम्**) आपको (**अवसे**) रक्षा आदि के लिये स्वीकार करके हम लोग शत्रुओं को (**संशिशीमसि**) अच्छे प्रकार निर्मूल नष्ट करते हैं, (**अथ**) इसके अनन्तर आप भी ऐसा कीजिये की (**हवनेषु**) ग्रहण करने योग्य कामों में (**नः**) हम लोगों को (**चोदय**) प्रवृत्त कराइये॥१०॥

भावार्थः-जो मनुष्य शत्रुओं और समय को पाकर धनों को जीतने, श्रेष्ठ कामों में सबको लगाने और दुष्टों को छिन्न-भिन्न करनेवाला हो, वही सबको सेनाओं का अधीश मानना चाहिये॥१०॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥११॥१५॥

विश्वाहा। इन्द्रः। अधिऽवक्ता। नः। अस्तु। अपरिऽह्वृताः। सनुयाम। वाजम्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥११॥

पदार्थः-(**विश्वाहा**) विश्वान् सर्वान् हन्ति सः (**इन्द्रः**) परमैश्वर्यः सभाध्यक्षः (**अधिवक्ता**) यथावदनुशासिता (**नः**) अस्माकम् (**अस्तु**) भवतु (**अपरिह्वृताः**) अपरिवर्जिताः (**सनुयाम**) दद्याम (**वाजम्**) सुसंस्कृतमन्नम् (**तत्**) (**नः**) अस्माकम् (**मित्रः**) इति पूर्ववत्॥११॥

अन्वयः-अपरिह्वृताः वयं यो विश्वाहेन्द्रो नोऽअस्माकमधिवक्ताऽस्तु तस्मै वाजं सनुयाम येन तन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्नोऽस्मान् मामहन्ताम्॥११॥

भावार्थः-सर्वेषां भृत्यानामियं रीतिः स्याद् यदा यादृशीमाज्ञां स्वस्वामी कुर्यात्तदैव साऽनुष्ठातव्या, योऽखिलविद्यस्तस्मादेवोपदेशाः श्रोतव्या इति ॥११॥

अत्र शालाद्यध्यक्षेश्वराध्यापकसेनाधिपतीनां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोद्धव्यम्॥

इति द्व्युत्तरशततमं १०२ सूक्तं पञ्चदशो १५ वर्गश्च समाप्तः॥

पदार्थः-(**अपरिह्वृताः**) आज्ञा को पाये हुए हम लोग जो (**विश्वाहा**) सब शत्रुओं को मारनेवाला (**इन्द्रः**) परमैश्वर्य्ययुक्त सभाध्यक्ष (**नः**) हम लोगों को (**अधिवक्ता**) यथावत् शिक्षा देनेवाला (**अस्तु**) हो, उसके लिये (**वाजम्**) अच्छे संस्कार किये हुए अन्न को (**सनुयाम**) देवें, जिससे (**तत्**) उसको (**नः**) हम लोगों के (**मित्रः**) मित्रजन (**वरुणः**) उत्तम गुणयुक्त (**अदितिः**) समस्त विद्वान् अन्तरिक्ष (**सिन्धुः**) समुद्र (**पृथिवी**) पृथिवी (**उत**) और (**द्यौः**) सूर्य्यलोक (**मामहन्ताम्**) बढ़ावें॥११॥

भावार्थः-सब सेवकों की यह रीति हो कि जब अपना स्वामी जैसे आज्ञा करे, उसी समय उसको वैसे ही करें और जो समग्र विद्या पढ़ा हो उसी से उपदेश सुनने चाहिए॥११॥

इस सूत्र में शाला आदि के अधिपति ईश्वर, पढ़ानेवाले और सेनापति के गुणों के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ से एकता है, यह जानना चाहिये॥

यह एक सौ दो वां १०२ सूक्त और पन्द्रहवां १५ वर्ग समाप्त हुआ॥

अथ त्र्युत्तरशततमस्याष्टर्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिरिन्द्रो देवता। १,३,५,६ निचृत्त्रिष्टुप्। २,४ विराट् त्रिष्टुप्। ७,८ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ परमेश्वरस्य कार्ये जगति कीदृशं प्रसिद्धं लिङ्गमस्तीत्युपदिश्यते॥

अब एक सौ तीनवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में यह उपदेश है कि ईश्वर का कार्य्य जगत् में कैसा प्रसिद्ध चिह्न है॥

तत्त॑ इन्द्रि॒यं प॑र॒मं प॑रा॒चैरधा॑रयन्त क॒वय॑: पु॒रेदम्।
क्षमेद॑म॒न्यद्दि॒व्य१॑न्यद॑स्य॒ समी॑ पृच्यते सम॒नेव॑ के॒तुः॥ १॥

तत्। ते॒। इ॒न्द्रि॒यम्। प॒र॒मम्। प॒रा॒चैः। अधा॑रयन्त। क॒वय॑ः। पु॒रा। इ॒दम्। क्षमा। इ॒दम्। अ॒न्यत्। दि॒वि। अ॒न्यत्। अ॒स्य॒। सम्। ई॒म्। इति॑। पृ॒च्य॒ते॒। स॒म॒नाऽइ॑व। के॒तुः॥ १॥

पदार्थः-(**तत्**) (**ते**) तव (**इन्द्रियम्**) इन्द्रस्य परमैश्वर्य्यवतस्तव जीवस्य च लिङ्गम् (**परमम्**) प्रकृष्टम् (**पराचैः**) बाह्यचिह्नैर्युक्तम् (**अधारयन्त**) धृतवन्तः (**कवयः**) मेधाविनो विद्वांसः (**पुरा**) पूर्वम् (**इदम्**) प्रत्यक्षाप्रत्यक्षं सामर्थ्यम् (**क्षमा**) सर्वसहनयुक्ता पृथिवी (**इदम्**) वर्त्तमानम् (**अन्यत्**) भिन्नम् (**दिवि**) प्रकाशवति सूर्य्यादौ (**अन्यत्**) विलक्षणम् (**अस्य**) संसारस्य मध्ये (**सम्**) (**ई**) **ईमित्युदकनामसु पठितम्।** (निघं०१.१२) **छन्दसो वर्णलोपो वे**ति मलोपः। (**पृच्यते**) संयुज्यते (**समनेव**) यथा युद्धे प्रवृत्ता सेना तथा (**केतुः**) विज्ञापकः॥१॥

अन्वयः-हे जगदीश्वर! यत्ते तव जीवस्य च सृष्टाविदं परममिन्द्रियं कवयः पराचैः पुरा धारयन्त क्षमा पृथिवीदं धृतवती यद्दिवीदं वर्त्तते यदन्यत्कारणेऽस्त्यस्य संसारस्य मध्ये ई-ईमुदकं धरति यदन्यददृष्टे कार्य्ये भवति तत्सर्वं समनेव केतुः सन् प्रकाशयति तच्चात्र सम्पृच्यते॥१॥

भावार्थः-हे मनुष्या! यद्यदस्मिञ्जगति रचनाविशेषयुक्तं सुष्ठु वस्तु वर्त्तते तत्तत्सर्वं परमेश्वरस्य रचनेनैव प्रसिद्धमस्तीति विजानीत, नहीदृशं विचित्रं जगद्विधात्रा विना संभवितुमर्हति तस्मादस्ति खल्वस्य जगतो निर्मातेश्वरो जैवीं सृष्टिं कर्त्ता जीवश्चेति निश्चयः॥१॥

पदार्थः-हे जगदीश्वर! जो (**ते**) आप वा जीव की सृष्टि में (**इदम्**) यह प्रत्यक्ष वा अप्रत्यक्ष सामर्थ्य (**परमम्**) प्रबल अति उत्तम (**इन्द्रियम्**) परम ऐश्वर्य्ययुक्त आप और जीव का एक चिह्न जिसको (**कवयः**) बुद्धिमान् विद्वान् जन (**पराचैः**) ऊपर के चिह्नों से सहित (**पुरा**) प्रथम (**अधारयन्त**) धारण करते हुए (**क्षमा**) सबको सहनेवाली पृथिवी (**इदम्**) इस वर्त्तमान चिह्न को धारण करती जो (**दिवि**) प्रकाशमान सूर्य्य आदि लोक में वर्त्तमान वा जो (**अन्यत्**) उससे भिन्न कारण में वा (**अस्य**) इस संसार के बीच में है, इसको (**ई**) जल धारण करता वा जो (**अन्यत्**) और विलक्षण न देखे हुए कार्य्य में होता है

(तत्) उस सबको **(समनेव)** जैसे युद्ध में सेना आ जुटे, ऐसे **(केतुः)** विज्ञान देनेवाले होते हुए आप वा जीव प्रकाशित करता,यह सब इस जगत् में **(सम्पृच्यते)** सम्बद्ध होता है॥१॥

भावार्थः-हे मनुष्यो! इस जगत् में जो-जो रचना विशेष चतुराई के साथ अच्छी-अच्छी वस्तु वर्त्तमान है, वह-वह सब परमेश्वर की रचना से ही प्रसिद्ध है, यह तुम जानो, क्योंकि ऐसा विचित्र जगत् विधाता के विना कभी होने योग्य नहीं। इससे निश्चय है कि इस जगत् का रचनेवाला परमेश्वर है और जीव सम्बन्धी सृष्टि का रचनेवाला जीव है॥१॥

अथैतस्मिञ्जगति तद्रचितोऽयं सूर्य्यः किं कर्माऽस्तीत्युपदिश्यते॥

अब इस जगत् में परमेश्वर से बनाया हुआ यह सूर्य्य क्या काम करता है, यह विषय अगले मन्त्र में कहा है॥

स धारयत् पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज।
अहन्नहिमभिनद्रौहिणं व्यहन् व्यंसं मघवा शचीभिः॥२॥

सः। धारयत्। पृथिवीम्। पप्रथत्। च। वज्रेण। हत्वा। निः। अपः। ससर्ज। अहन्। अहिम्। अभिनत्। रौहिणम्। वि। अहन्। विऽअंसम्। मघऽवा। शचीभिः॥२॥

पदार्थः-(**सः**) (**धारयत्**) धरति (**पृथिवीम्**) भूमिम् (**पप्रथत्**) स्वतेजो विस्तार्य स्वेन तेजसा सर्वं जगत् प्रकाशयति (**च**) एवं विद्युदादीन् (**वज्रेण**) किरणसमूहेन (**हत्वा**) (**निः**) निरन्तरम् (**अपः**) जलानि (**ससर्ज**) सृजति (**अहन्**) हन्ति (**अहिम्**) मेघम् (**अभिनत्**) भिनत्ति (**रौहिणम्**) रोहिण्यां प्रादुर्भूतम् (**वि**) (**अहन्**) हन्ति (**व्यंसम्**) विगता अंसा यस्य तम् (**मघवा**) सूर्यः (**शचीभिः**) कर्मभिः॥२॥

अन्वयः-हे मनुष्या! यो मघवा शचीभिः पृथिवीं धारयत्स्वतेजः पप्रथद्विद्युदादींश्च वज्रेण मेघं हत्वाऽपो निःससर्ज पुनरहिमहन् रौहिणमभिनत् न केवलं साधारणमेव हन्ति, किन्तुं व्यंसं यथा स्यात् तथा व्यहन् स ईश्वरेण रचितोऽस्तीति विजानीत॥२॥

भावार्थः-मनुष्यैरिदं द्रष्टव्यं प्रसिद्धो यः सूर्य्यलोकोऽस्ति, स विदारणाकर्षणप्रकाशनादिकर्मभिर्वृष्टिं कृत्वा पृथिवीं धृत्वाऽव्यक्तपदार्थान् प्रकाश्य सर्वान् प्राणिनो व्यवहारयति, स परमात्मनो रचनेन विना कदाचिदपि संभवितुं नार्हति॥२॥

पदार्थः-हे मनुष्यो! जो **(मघवा)** सूर्य्यलोक **(शचीभिः)** कामों से **(पृथिवीम्)** पृथिवी को **(धारयत्)** धारण करता अपने तेज **(च)** और बिजुली आदि को **(पप्रथत्)** फैलाता उस अपने तेज से सब जगत् को प्रकाशित करता **(वज्रेण)** अपने किरणसमूह से मेघ को **(हत्वा)** मार के **(अपः)** जलों को **(निः)** **(ससर्ज)** निरन्तर उत्पन्न करता, फिर **(अहिम्)** मेघ को **(अहन्)** हनता **(रौहिणम्)** रोहिणी नक्षत्र में उत्पन्न हुए मेघ को **(अभिनत्)** विदारण करता **(व्यंसम्)** **(वि, अहन्)** केवल साधारण ही विदारता हो

सो नहीं, किन्तु कटि जाय भुजा आदि जिसकी ऐसे रुण्ड, मुण्ड, मुचण्ड, उद्दण्ड, वीर के समान विशेष करके मेघों को हनता है **(सः)** वह सूर्य्यलोक ईश्वर ने रचा है, यह जानो॥ २॥

भावार्थः-मनुष्यों को यह देखना चाहिये कि प्रसिद्ध जो सूर्यलोक है, वह मेघों के विदारण, लोकों के खीचनें और प्रकाश आदि कामों से जल, वर्षा, पृथिवी को धारण और अप्रकट अर्थात् अन्धकार से ढंपे हुए जो पदार्थ हैं, उनको प्रकाशित कर सब प्राणियों को व्यवहार में चलाता है, वह परमात्मा के बनाने के विना उत्पन्न नहीं हो सकता॥ २॥

अथ सेनाद्यध्यक्षः कीदृश इत्युपदिश्यते॥

अब सेना आदि का अध्यक्ष कैसा हो, यह विषय अगले मन्त्र में कहा है॥

स जा॒तूभ॑र्मा श्र॒द्दधा॑न ओज॒: पुरो॑ विभि॒न्दन्न॑चर॒द्वि दासी॑:।
वि॒द्वान् व॑ज्रि॒न् दस्य॑वे हे॒तिम॒स्यार्यं॑ सहो॑ वर्धया द्यु॒म्नमि॑न्द्र॥ ३॥

सः। जा॒तूऽभ॑र्मा। श्र॒त्ऽदधा॑नः। ओजः॑। पुरः॑। वि॒ऽभि॒न्दन्। अ॒च॒र॒त्। वि। दासीः॑। वि॒द्वान्। व॒ज्रि॒न्। दस्य॑वे। हे॒तिम्। अ॒स्य॒। आर्य॑म्। सहः॑। व॒र्ध॒य॒। द्यु॒म्नम्। इ॒न्द्र॒॥ ३॥

पदार्थः-(**सः**) (**जातूभर्मा**) यो जातान् जन्तून् बिभर्ति सः। अत्र जनीधातोस्तुः प्रत्ययो नकारस्याकारादेशोऽ**न्येषामपी**ति दीर्घः। (**श्रद्दधानः**) सत्कर्मसु प्रीतियुक्तः (**ओजः**) पराक्रमम् (**पुरः**) नगरी (**विभिन्दन्**) विदारयन् सन् (**अचरत्**) चरति (**वि**) (**दासीः**) दासीशीला नगरीः। अत्र **दंसेष्टटनौ न आ च।** (उणा०५.१०) (**विद्वान्**) (**वज्रिन्**) प्रशस्तशस्त्रसमूहयुक्त (**दस्यवे**) दुष्टकर्मकर्त्रे (**हेतिम्**) सुखवर्धकं वज्रम् (**अस्य**) दुष्टस्य (**आर्य्यम्**) आर्य्याणामर्याणां वा इदम् (**सहः**) बलम् (**वर्धय**) अत्रा**न्येषामपी**ति दीर्घः। (**द्युम्नम्**) धनम् (**इन्द्र**) प्रकृष्टपदार्थप्रद॥ ३॥

अन्वयः-हे वज्रिन्निन्द्र! यो जातूभर्मा श्रद्दधानो विद्वान् भवानस्य दुष्टस्य दासीः पुरो दस्यवे विभिन्दन् सन् व्यचरत् स त्वं श्रेष्ठेभ्यो हेतिमार्य्यं सहो द्युम्नमोजश्च वर्धय॥ ३॥

भावार्थः-यो मनुष्यो दस्यून् विनाश्य श्रेष्ठान् संहर्ष्य शरीरात्मबलं सम्पाद्य धनादिभिः सुखानि वर्धयति, स एव सर्वैः श्रद्धेयः॥ ३॥

पदार्थः-हे (**वज्रिन्**) प्रशंसित शस्त्रसमूहयुक्त (**इन्द्र**) अच्छे-अच्छे पदार्थों के देनेवाले सेना आदि के स्वामी! जो (**जातूभर्मा**) उत्पन्न हुए सांसारिक पदार्थों को धारण (**श्रद्दधानः**) और अच्छे कामों में प्रीति करनेवाले (**विद्वान्**) विद्वान् आप (**अस्य**) इस दुष्ट जन की (**दासीः**) नष्ट होनेहारीसी दासी प्रधान (**पुरः**) नगरियों को (**दस्यवे**) दुष्ट काम करते हुए जन के लिये (**विभिन्दन्**) विनाश करते हुए (**व्यचरत्**) विचरते हो (**सः**) वह आप श्रेष्ठ सज्जनों के लिये (**हेतिम्**) सुख के बढ़ानेवाले वज्र को (**आर्य्यम्**) श्रेष्ठ

वा अति श्रेष्ठों के इस **(सहः)** बल **(द्युम्नम्)** धन वा **(ओजः)** और पराक्रम को **(वर्धय)** बढ़ाया करो॥३॥

भावार्थः-जो मनुष्य समस्त डाकू, चोर, लवाड़, लम्पट, लड़ाई करनेवालों का विनाश और श्रेष्ठों को हर्षित कर शारीरिक और आत्मिक बल का सम्पादन कर, धन आदि पदार्थों से सुख को बढ़ाता है, वही सबको श्रद्धा करने योग्य है॥३॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत्।
उपप्रयन् दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे॥४॥

तत्। ऊचुषे। मानुषा। इमा। युगानि। कीर्तेन्यम्। मघऽवा। नाम। बिभ्रत्। उपऽप्रयन्। दस्युऽहत्याय। वज्री। यत्। ह। सूनुः। श्रवसे। नाम। दधे॥४॥

पदार्थः-(**तत्**) (**ऊचुषे**) वक्तुमर्हाय (**मानुषा**) मानुषेषु भवानि (**इमा**) इमानि (**युगानि**) वर्षाणि (**कीर्तेन्यम्**) कीर्तनीयम् (**मघवा**) भूयांसि मघानि धनानि विद्यन्ते यस्य सः (**नाम**) प्रसिद्धिं जलं वा (**बिभ्रत्**) धारयन् (**उपप्रयन्**) साधुसामीप्यङ्गच्छन् (**दस्युहत्याय**) दस्यूनां हत्या यस्मै तस्मै (**वज्री**) प्रशस्तशस्त्रसमूहयुक्तः सेनाधिपतिः (**यत्**) (**ह**) खलु (**सूनुः**) वीरपुत्रः (**श्रवसे**) धनाय (**नाम**) प्रसिद्धं कर्म (**दधे**) दधाति॥४॥

अन्वयः-मघवा सूनुर्वज्री सेनापतिर्यथा सूर्यस्तथोचुषे दस्युहत्याय श्रवसे इमा मानुषा युगानि कीर्त्तेन्यं नाम बिभ्रदुपप्रयन् यन्नाम दधे तद्ध खलु वयमपि दधीमहि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यः कालावयवान् जलं च धृत्वा सर्वप्राणिसुखायान्धकारं हत्वा सर्वान् सुखयति, तथैव सेनाधिपतिः सुखपूर्वकं संवत्सरान् कीर्तिं च धृत्वा शत्रुहननेन सर्वसुखाय धनं जनयेत्॥४॥

पदार्थः-जो **(मघवा)** बहुत धनोंवाला **(सूनुः)** वीर का पुत्र **(वज्री)** प्रशंसित शस्त्र-अस्त्र बांधे हुए सेनापति जैसे सूर्य प्रकाशयुक्त है, वैसे प्रकाशित होकर **(ऊचुषे)** कहने की योग्यता के लिये वा **(दस्युहत्याय)** जिसके लिये डाकुओं को हनन किया जाये, उस **(श्रवसे)** धन के लिये **(इमा)** इन **(मानुषा)** मनुष्यों में होनेवाले **(युगानि)** वर्षों को तथा **(कीर्तेन्यम्)** कीर्त्तनीय **(नाम)** प्रसिद्ध और जल को **(बिभ्रत्)** धारण करता हुआ **(उपप्रयन्)** उत्तम महात्मा के समीप जाता हुआ **(यत्)** जिस **(नाम)** प्रसिद्ध काम को **(दधे)** धारण करता है, **(तत्)** उस उत्तम काम को **(ह)** निश्चय से हम लोग भी धारण करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य-काल के अवयव अर्थात् संवत्सर, महीना, दिन, घड़ी आदि और जल को धारण कर सब प्राणियों के सुख के लिये अन्धकार का विनाश करके सबको सुख देता है, वैसे ही सेनापति सुखपूर्वक संवत्सर और कीर्त्ति को धारण करके शत्रुओं के मारने से सबके सुख के लिये धन को उत्पन्न करे॥४॥

मनुष्यैस्तस्मात् किं किं कर्म धार्यमित्युपदिश्यते॥

मनुष्यों को उससे कौन-कौन काम धारण करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय।

स गा अविन्दत् सो अविन्ददश्वान्त्स ओषधीः सो अपः स वनानि॥५॥१६॥

तत्। अस्य। इदम्। पश्यत। भूरि। पुष्टम्। श्रत्। इन्द्रस्य। धत्तन। वीर्याय। सः। गाः। अविन्दत्। सः। अविन्दत्। अश्वान्। सः। ओषधीः। सः। अपः। सः। वनानि॥५॥

पदार्थः-(**तत्**) कर्म (**अस्य**) सेनापतेः (**इदम्**) प्रत्यक्षम् (**पश्यत**) अत्रा**न्येषामपी**ति दीर्घः। (**भूरि**) बहु (**पुष्टम्**) दृढम् (**श्रत्**) सत्याचरणम्। **श्रदिति सत्यनामसु पठितम्।** (निघं०३.१०) (**इन्द्रस्य**) सेनाबलयुक्तस्य (**धत्तन**) धरत (**वीर्याय**) बलाय (**सः**) सूर्य इव (**गाः**) पृथिवीः (**अविन्दत्**) लभते (**सः**) (**अविन्दत्**) लभते (**अश्वान्**) महतः पदार्थान्। **अश्व इति महन्नामसु पठितम्।** (निघं०३.३) (**सः**) (**ओषधीः**) गोधूमाद्या ओषधीः (**सः**) (**अपः**) कर्माणि जलानि वा (**सः**) (**वनानि**) जङ्गलान् किरणान् वा॥५॥

अन्वयः-हे मनुष्या! यः स सेनाधिपतिः सूर्य इव गा अविन्दत् सोऽश्वानविन्दत् स ओषधीरविन्दत् स अपोऽविन्दत् स वनान्यविन्दत्तदस्येन्द्रस्येदं भूरि पुष्टं श्रत् सत्याचरणं यूयं पश्यत वीर्याय धत्तन॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्योत्तमेन सत्याचरणेन प्राप्तिः सैव धार्या नैतया विना सत्यः पराक्रमः सर्वपदार्थलाभश्च जायते॥५॥

पदार्थः-हे मनुष्यो! जो (**सः**) वह सेनापति सूर्य के तुल्य (**गाः**) भूमियों को (**अविन्दत्**) प्राप्त होता (**सः**) वह (**अश्वान्**) बड़े पदार्थों को (**अविन्दत्**) प्राप्त होता (**सः**) वह (**ओषधीः**) ओषधियों अर्थात् गेहूं, उड़द, मूँग, चना आदि को प्राप्त होता (**सः**) वह (**अपः**) सूर्य्य जलों को जैसे वैसे कर्मों को प्राप्त होता (**सः**) तथा वह सूर्य (**वनानि**) किरणों को जैसे वैसे जङ्गलों को प्राप्त होता है, (**अस्य**) इस (**इन्द्रस्य**) सेना बलयुक्त सेनापति के (**तत्**) उस कर्म को वा (**इदम्**) इस (**भूरि**) बहुत (**पुष्टम्**) दृढ़

(श्रत्) सत्य के आचरण को तुम **(पश्यत)** देखो और **(वीर्य्याय)** बल होने के लिये **(धत्तन)** धारण करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जो श्रेष्ठ जनों के सत्य आचरण से प्राप्ति है, उसी को धारण करें। उसके विना सत्य पराक्रम और सब पदार्थों का लाभ नहीं होता॥५॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा हो, यह विषय अगले मन्त्र में कहा है॥

भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम्।
य आदृत्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः॥६॥

भूरिऽकर्मणे। वृषऽभाय। वृष्णे। सत्यऽशुष्माय। सुनवाम। सोमम्। यः। आऽदृत्य। परिपन्थीऽइव। शूरः। अयज्वनः। विऽभजन्। एति। वेदः॥६॥

पदार्थः-(**भूरिकर्मणे**) बहुकर्मकारिणे (**वृषभाय**) श्रेष्ठाय (**वृष्णे**) सुखप्रापकाय (**सत्यशुष्माय**) नित्यबलाय (**सुनवाम**) निष्पादयेम (**सोमम्**) ऐश्वर्य्यसमूहम् (**यः**) (**आदृत्य**) आदरं कृत्वा (**परिपन्थीव**) यथा दस्युस्तथा चौराणां प्राणपदार्थहर्त्ता (**शूरः**) निर्भयः (**अयज्वनः**) यज्ञविरोधिनः (**विभजन्**) विभागं कुर्वन् (**एति**) प्राप्नोति (**वेदः**) धनम्॥६॥

अन्वयः-वयं यः शूर आदृत्य परिपन्थीव विभजन्नयज्वनो वेद एति तस्मै भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्मायेन्द्राय सेनापतये यथा सोमं सुनवाम तथा यूयमपि सुनुत॥६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यो दस्युवत् प्रगल्भः साहसी सन् चौराणां सर्वस्वं हृत्वा सत्कर्मणामादरं विधाय पुरुषार्थी बलवानुत्तमो वर्त्तते, स एव सेनापतिः कार्य्यः॥६॥

पदार्थः-हम लोग (**यः**) जो (**शूरः**) निडर, शूरवीर पुरुष (**आदृत्य**) आदर सत्कार कर (**परिपन्थीव**) जैसे सब प्रकार से मार्ग में चले हुए डाकू दूसरे का धन आदि सर्वस्व हर लेते हैं, वैसे चोरों के प्राण और उनके पदार्थों को छीन-छान हर लेवे वह (**विभजन्**) विभाग अर्थात् श्रेष्ठ और दुष्ट पुरुषों को अलग-अलग करता हुआ उनमें से (**अयज्वनः**) जो यज्ञ नहीं करते उनके (**वेदः**) धन को (**एति**) छीन लेता, उस (**भूरिकर्मणे**) भारी काम के करनेवाले (**वृषभाय**) श्रेष्ठ (**वृष्णे**) सुख पहुंचानेवाले (**सत्यशुष्माय**) नित्य बली सेनापति के लिये जैसे (**सोमम्**) ऐश्वर्य्य समूह को (**सुनवाम**) उत्पन्न करें, वैसे तुम भी करो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जो ऐसा ढीठ है कि जैसे डाकू आदि होते हैं और साहस करता हुआ चोरों के धन आदि पदार्थों को हर सज्जनों का आदर कर पुरुषार्थी बलवान् उत्तम से उत्तम हो, उसी को सेनापति करें॥६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

तदिन्द्र प्रेव वीर्यं चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम्।
अनु त्वा पत्नीर्हर्षितं वयश्च विश्वे देवासो अमदन्ननु त्वा॥७॥

तत्। इन्द्र। प्रऽइव। वीर्यम्। चकर्थ। यत्। ससन्तम्। वज्रेण। अबोधयः। अहिम्। अनु। त्वा। पत्नीः। हर्षितम्। वयः। च। विश्वे। देवासः। अमदन्। अनु। त्वा॥७॥

पदार्थः-(**तत्**) (**इन्द्र**) सेनाध्यक्ष (**प्रेव**) प्रकटं यथा स्यात्तथा (**वीर्य्यम्**) स्वकीयं बलम् (**चकर्थ**) करोषि (**यत्**) (**ससन्तम्**) स्वपन्तं चिन्तारहितं वा (**वज्रेण**) तीक्ष्णशस्त्रेण (**अबोधयः**) बोधयसि (**अहिम्**) सर्प्पं शत्रुं वा (**अनु**) (**त्वा**) त्वाम् (**पत्नीः**) पत्न्यः (**हर्षितम्**) जातहर्षम् (**वयः**) ज्ञानिनः (**च**) (**विश्वे**) अखिलाः (**देवासः**) विद्वांसः (**अमदन्**) हर्षयन्ति (**अनु**) (**त्वा**) त्वाम्॥७॥

अन्वयः-हे इन्द्र! ससन्तमहिं यद् वज्रेणाबोधयस्तद्वीर्यं प्रेव चकर्थानुहृषितं पत्नीर्वयो विश्वेदेवासश्चाऽन्वमदन्॥७॥

भावार्थः-अत्रोपमालङ्कारः। बलवता सेनापतिना दुष्टप्राणिनो दुष्टशत्रवश्च यथाविधि हन्यन्ते॥७॥

पदार्थः-हे (**इन्द्र**) सेनाध्यक्ष! आप (**ससन्तम्**) सोते हुए वा चिन्तारहित (**अहिम्**) सर्प्प वा शत्रु को (**यत्**) जो (**वज्रेण**) तीक्ष्ण शस्त्र से (**अबोधयः**) सचेत कराते हो (**तत्**) सो (**वीर्य्यम्**) अपने बल को (**प्रेव**) प्रकट सा (**चकर्थ**) करते हो (**अनु**) उसके पीछे (**हर्षितम्**) उत्पन्न हुआ है आनन्द जिनको उन (**त्वा**) आपको (**पत्नीः**) आपके स्त्री जन और (**वयः**) ज्ञानवान् (**विश्वे**) समस्त (**देवासश्च**) विद्वान् जन भी (**त्वा**) आपको (**अन्वमदन्**) अनुकूलता से प्रसन्न करते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। बलवान सेनापति से दुष्ट जीव तथा दुष्ट शत्रुजन मारे जाते हैं॥७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥८॥१७॥

शुष्णम्। पिप्रुम्। कुयवम्। वृत्रम्। इन्द्र। यदा। अवधीः। वि। पुरः। शम्बरस्य। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥८॥

पदार्थः-(**शुष्णम्**) बलवन्तम् (**प्रिपुम्**) प्रपूरकम्। अत्र पृधातोर्बाहुलकादौणादिकः कुः प्रत्ययः। (**कुयवम्**) कौ पृथिव्यां यवा यस्मात् तम् (**वृत्रम्**) मेघं शत्रुं वा (**इन्द्र**) (**यदा**) (**अवधीः**) हंसि (**वि**) (**पुरः**) पुराणि (**शम्बरस्य**) मेघस्य बलवतः शत्रोर्वा। **शम्बर इति मेघनामसु पठितम्।** (निघं०१.१०) **बलनामसु च।** (निघं०२.९) (**तन्नो० मित्रो०**) इति पूर्ववत्॥८॥

अन्वयः-हे इन्द्र! यदा त्वं यथा सूर्यः शुष्णं कुवयं पिप्रुं वृत्रं शम्बरस्य पुरश्च व्यवधीस्तन् मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्नोऽस्मान् मामहन्ताम्, सत्कारहेतवो भवेयुः॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा सूर्यगुणास्तानुपमीकृत्य स्वैर्गुणभृत्यादिभ्यः पृथिव्यादिभ्यश्चोपकारान् सङ्गृह्य शत्रून् हत्वा सततं सुखयितव्यम्॥८॥

अत्रेश्वरसूर्य्यसेनाधिपतीनां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति त्र्युत्तरमेकशततमं १०३ सूक्तं सप्तदशो वर्गश्च १७ समाप्तः॥

पदार्थः-हे (**इन्द्र**) सेनापति (**यदा**) जब सूर्य (**शुष्णम्**) बलवान् (**कुवयम्**) जिससे कि यवादि होते और (**पिप्रुम्**) जल आदि पदार्थों को परिपूर्ण करता उस (**वृत्रम्**) मेघ वा (**शम्बरस्य**) अत्यन्त वर्षनेवाले बलवान् मेघ की (**पुरः**) पूरी-पूरी घटा और घुमड़ी हुई मण्डलियों को हनता है, वैसे शत्रुओं की नगरियों को (**वि, अवधीः**) मारते हो (**तत्**) तब (**मित्रः**) मित्र (**वरुणः**) उत्तम गुणयुक्त (**अदितिः**) अन्तरिक्ष (**सिन्धुः**) समुद्र (**पृथिवी**) पृथिवी (**उत**) और (**द्यौः**) सूर्यलोक (**नः**) हम लोगों के (**मामहन्ताम्**) सत्कार कराने के हेतु होते हैं॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे सूर्य्य के गुण हैं, उनकी उपमा अर्थात् अनुसार लेकर अपने गुणों से, सेवकादिकों से और पृथिवी आदि लोकों से उपकारों को ले और शत्रुओं को मारकर निरन्तर सुखी हों॥८॥

इस सूक्त में ईश्वर, सूर्य और सेनाधिपति के गुणों के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह एकसौ तीनवाँ १०३ सूक्त और सत्रहवाँ १७ वर्ग समाप्त हुआ॥

अथास्य नवर्चस्य चतुरधिकशततमस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। इन्द्रो देवता। १ पङ्क्तिः। २,४,५ स्वराट् पङ्क्तिः। ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३,७ त्रिष्टुप्। ८,९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनः स सभापतिः किं कुर्यादित्युपदिश्यते॥

अब नव ऋचावाले एकसौ चार सूक्त का आरम्भ है। उसके प्रथम मन्त्र में फिर सभापति क्या करे, यह उपदेश किया है॥

योनिष्ट इन्द्र निषदे अकारि तमा निषीद स्वानो नार्वा।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे॥ १॥

योनिः। ते। इन्द्र। निऽसदे। अकारि। तम्। आ। नि। सीद। स्वानः। न। अर्वा। विऽमुच्य। वयः। अवऽसाय। अश्वान्। दोषा। वस्तोः। वहीयसः। प्रऽपित्वे॥ १॥

पदार्थः-(**योनिः**) न्यायासनम् (**ते**) तव (**इन्द्र**) न्यायाधीश (**निषदे**) स्थित्यर्थम् (**अकारि**) क्रियते (**तम्**) (**आ**) (**नि**) (**सीद**) आस्व (**स्वानः**) शब्दं कुर्वन् (**न**) इव (**अर्वा**) अश्वः (**विमुच्य**) त्यक्त्वा। अत्रा**न्येषामपी**ति दीर्घः। (**वयः**) पक्षिणो जीवनं वा (**अवसाय**) रक्षणाद्याय (**अश्वान्**) वेगवतस्तुरङ्गान् (**दोषा**) रात्रौ (**वस्तोः**) दिने (**वहीयसः**) सद्यो देशान्तरे प्रापकानग्न्यादीन् (**प्रपित्वे**) प्राप्तव्ये समये स्थाने वा। **प्रपित्वेऽभीक इत्यासन्नस्य, प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते।** (निरु०३.२०)॥१॥

अन्वयः-हे इन्द्र! ते निषदे योनिः सभासद्भिरस्माभिरकारि तं त्वमानिषीद स्वानोऽर्वा न प्रपित्वे जिगमिषुस्त्वं वयोऽवसायाश्वान् विमुच्य दोषा वस्तोर्वहीयसोऽभियुङ्क्ष्व॥१॥

भावार्थः-अत्रोपमालङ्कारः। न्यायाधीशैर्न्यायासनेषु स्थित्वा प्रसिद्धैः शब्दैरर्थिप्रत्यर्थीन् संबोध्य प्रतिदिनं यथावन्न्यायं कृत्वा प्रसन्नान् सम्पाद्य सर्वे ते सुखयितव्याः। अतिपरिश्रमेणावश्यं वयोहानिर्भवतीति विमृश्य त्वरितगमनाय क्रियाकौशलेनाग्न्यादिभिर्विमानादियानानि सम्पादनीयानि॥१॥

पदार्थः-हे (**इन्द्र**) न्यायाधीश! (**ते**) आपके (**निषदे**) बैठने के लिये (**योनिः**) जो राज्यसिंहासन हम लोगों ने (**अकारि**) किया है (**तम्**) उस पर आप (**आ निषीद**) बैठो और (**स्वानः**) हींसते हुए (**अर्वा**) घोड़े के (**न**) समान (**प्रपित्वे**) पहुंचने योग्य स्थान में किसी समय पर जाया चाहते हुए आप (**वयः**) पक्षी वा अवस्था की (**अवसाय**) रक्षा आदि व्यवहार के लिये (**अश्वान्**) दौड़ते हुए घोड़ों को (**विमुच्य**) छोड़ के (**दोषा**) रात्रि वा (**वस्तोः**) दिन में (**वहीयसः**) आकाश मार्ग से बहुत शीघ्र पहुंचानेवाले अग्नि आदि पदार्थों को जोड़ो अर्थात् विमानादि रथों को अग्नि, जल आदि की कलाओं से युक्त करो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। न्यायाधीशों को चाहिये कि न्यायासन पर बैठ के चलते हुए प्रसिद्ध शब्दों से अर्थी-प्रत्यर्थी अर्थात् लड़ने और दूसरी ओर से लड़नेवालों को अच्छी प्रकार समझा कर प्रतिदिन यथोचित न्याय करके उन सबको प्रसन्न कर सुखी करें। और अत्यन्त परिश्रम से अवस्था की अवश्य हानि होती है, जैसे डाक आदि में अति दौड़ने से घोड़ा मरते हैं, इसको विचार कर बहुत शीघ्र जाने-आने के लिये क्रियाकौशल से विमान आदि यानों को अवश्य रचें॥१॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है॥

ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात्।
देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णम्॥२॥

ओ इति। त्ये। नरः। इन्द्रम्। ऊतये। गुः। नु। चित्। तान्। सद्यः। अध्वनः। जगम्यात्। देवासः। मन्युम्। दासस्य। श्चम्नन्। ते। नः। आ। वक्षन्। सुविताय। वर्णम्॥२॥

पदार्थः-(**ओ**) आभिमुख्ये (**त्ये**) ये (**नरः**) (**इन्द्रम्**) सभादिपतिम् (**ऊतये**) रक्षार्थम् (**गुः**) प्राप्नुवन्ति (**नु**) शीघ्रम् (**चित्**) अपि (**तान्**) (**सद्यः**) (**अध्वनः**) सन्मार्गान् (**जगम्यात्**) भृशं गच्छेत् (**देवासः**) विद्वांसः (**मन्युम्**) क्रोधम्। **मन्युरिति क्रोधनामसु पठितम्।** (निघं०२.१३) (**दासस्य**) सेवकस्य (**श्चम्नन्**) हिंसन्तु। श्चमुधातुर्हिंसार्थः। (**ते**) (**नः**) अस्माकम् (**आ**) (**वक्षन्**) वहन्तु प्रापयन्तु (**सुविताय**) प्रेरिताय दासाय (**वर्णम्**) आज्ञापालनस्वीकरणम्॥२॥

अन्वयः-त्ये ये नर ऊतय इन्द्रं सद्य ओ गुस्तांश्चिदयमध्वनो जगम्यात् ये देवासो दासस्य मन्युं श्चम्नन्ते नोऽस्माकं सुविताय प्रेरिताय दासाय वर्णं न्वावक्षन्॥२॥

भावार्थः-ये प्रजासेनास्था मनुष्याः सत्यपालनाय सभाद्यध्यक्षादीनां शरणं प्राप्नुयुस्तानेते यथावद् रक्षेयुः, ये विद्वांसो वेदसुशिक्षाभ्यां मनुष्याणां दोषान्निवार्य्य शान्त्यादीन् सेवयेयुस्ते सर्वैः सेवनीयाः॥२॥

पदार्थः-(**त्ये**) जो (**नरः**) सज्जन (**ऊतये**) रक्षा के लिये (**इन्द्रम्**) सभा सेना आदि के अधीश के (**सद्यः**) शीघ्र (**ओ, गुः**) सम्मुख प्राप्त होते हैं (**तान्**) उनको (**चित्**) भी यह सभापति (**अध्वनः**) श्रेष्ठ मार्गों को (**जगम्यात्**) निरन्तर पहुंचावे। तथा जो (**देवासः**) विद्वान् जन (**दासस्य**) अपने सेवक के (**मन्युम्**) क्रोध को (**श्चम्नन्**) निवृत्त करें (**ते**) वे (**नः**) हम लोगों की (**सुविताय**) प्रेरणा को प्राप्त हुए दास के लिये (**वर्णम्**) आज्ञपालन करने को (**नु**) शीघ्र (**आ, वक्षन्**) पहुंचावें॥२॥

भावार्थः-जो प्रजा वा सेना के जन सत्य के राखने को सभा आदि के अधीशों के शरण को प्राप्त हों, उनकी वे यथावत् रक्षा करें। जो विद्वान् लोग वेद और उत्तम शिक्षाओं से मनुष्यों के क्रोध आदि दोषों को निवृत्त कर शान्ति आदि गुणों का सेवन करावें, वे सबको सेवन करने के योग्य हैं॥२॥

अथ राजप्रजे परस्परं कथं वर्त्तेयातामित्युपदिश्यते॥

अब राजा और प्रजा परस्पर कैसे वर्त्तें, यह अगले मन्त्र में उपदेश किया है॥

अव॒ त्मना॑ भरते॒ केत॑वेदा॒ अव॒ त्मना॑ भरते॒ फेन॑मु॒दन्।
क्षी॒रेण॑ स्नात॒: कुय॑वस्य॒ योषे॑ ह॒ते ते स्या॑तां प्रव॒णे शिफा॑याः॥ ३॥

अव॑। त्मना॑। भ॒र॒ते॒। केत॑ऽवेदाः। अव॑। त्मना॑। भ॒र॒ते॒। फेन॑म्। उ॒दन्। क्षी॒रेण॑। स्नात॒:। कुय॑वस्य। योषे॑ इति॑। ह॒ते इति॑। ते इति॑। स्या॒ता॒म्। प्र॒व॒णे। शिफा॑याः॥ ३॥

पदार्थः-**(अव) (त्मना)** आत्मना **(भरते)** विरुद्धं धरति **(केतवेदाः)** केतः प्रज्ञातं वेदो धनं येन सः। **केत इति प्रज्ञानामसु पठितम्।** (निघं०३.९) **(अव) (त्मना)** आत्मना **(भरते)** अन्यायेन स्वीकरोति **(फेनम्)** चक्रवृद्ध्यादिना वर्धितं धनम् **(उदन्)** उदकमये जलाशये **(क्षीरेण)** जलेन। **क्षीरमित्युदकनामसु पठितम्।** (निघं०१.१२) **(स्नातः)** स्नानं कुरुतः **(कुयवस्य)** कुत्सिता धर्माधर्ममिश्रिता व्यवहारा यस्य तस्य **(योषे)** कृतपूर्वापरविवाहे परस्परं विरुद्धे स्त्रियाविव **(हते)** हिंसिते **(ते) (स्याताम्) (प्रवणे)** निम्नप्रवाहे **(शिफायाः)** नद्याः। अत्र **शिञ् निशाने** धातोरौणादिकः फक् प्रत्ययः॥ ३॥

अन्वयः-यः केतवेदा राजपुरुषस्त्मना प्रजाधनमवभरतेऽन्यायेन स्वीकरोति यश्च प्रजापुरुषस्त्मना फेनं वर्धितं राजधनमवभरतेऽधर्मेण स्वीकरोति तौ क्षीरेणोदन् जलेन पूर्णे जलाशये स्नात उपरिष्टाच्छुद्धौ भवतोऽपि यथा कुयवस्य योषे शिफायाः प्रवणे हते स्यातां तथैव विनष्टौ भवतः॥ ३॥

भावार्थः-यः प्रजाविरोधी राजपुरुषो राजविरोधी वा प्रजापुरुषोऽस्ति न खलु तौ सुखोन्नतिं कर्त्तुं शक्नुतः। यो राजपुरुषः पक्षपातेन स्वप्रयोजनाय प्रजापुरुषान् पीडयित्वा धनं संचिनोति। यः प्रजापुरुषस्तेयकपटाभ्यां राजधनस्य नाशं च तौ यथा सपत्न्यौ परस्परस्य कलहक्रोधाभ्यां नद्या मध्ये निमज्य प्राणांस्त्यजतस्तथा सद्यो विनश्यतः। तस्माद्राजपुरुषः प्रजापुरुषेण प्रजापुरुषो राजपुरुषेण च सह विरोधं त्यक्त्वाऽन्योऽन्यस्य सहायकारी भूत्वा सदा वर्त्तेत॥ ३॥

पदार्थः-**(केतवेदाः)** जिसने धन जान लिया है, वह राजपुरुष **(त्मना)** अपने से प्रजा के धन को **(अव, भरते)** अपना कर धर लेता है अर्थात् अन्याय से ले लेता है और जो प्रजापुरुष **(त्मना)** अपने से **(फेनम्)** ब्याज पर ब्याज ले लेकर बढ़ाये हुए वा और प्रकार अन्याय से बढ़ाये हुए राजधन को **(अव, भरते)** अधर्म से लेता है, वे दोनों **(क्षीरेण)** जल से पूरे भरे हुए **(उदन्)** जलाशय अर्थात् नद-नदियों में **(स्नातः)** नहाते हैं, उससे ऊपर से शुद्ध होते भी जैसे **(कुयवस्य)** धर्म और अधर्म से मिले जिसके व्यवहार हैं, उस पुरुष की **(योषे)** अगले-पिछले विवाह की परस्पर विरोध करती हुई स्त्रियां **(शिफायाः)** अति काट करती हुई नदी के **(प्रवणे)** प्रबल बहाव में गिर कर **(हते)** नष्ट **(स्याताम्)** हों, वैसे नष्ट हो जाते हैं॥ ३॥

भावार्थः-जो प्रजा का विरोधी राजपुरुष वा राजा का विरोधी प्रजा पुरुष है, ये दोनों निश्चय है कि सुखोन्नति को नहीं पाते हैं। और जो राजपुरुष पक्षपात से अपने प्रयोजन के लिये प्रजापुरुषों को पीड़ा देके धन इकट्ठा करता तथा जो प्रजापुरुष चोरी वा कपट आदि से राजधन को नाश करता है, वे दोनों जैसे एक पुरुष की दो पत्नी परस्पर अर्थात् एक-दूसरे से कलह करके क्रोध से नदी के बीच गिर के मर जाती हैं, वैसे ही शीघ्र विनाश हो जाते हैं। इससे राजपुरुष प्रजा के साथ और प्रजापुरुष राजा के साथ विरोध छोड़ के परस्पर सहायकारी होकर सदा अपना वर्त्ताव रक्खें॥३॥

पुनस्तौ कथं वर्त्तेयातामित्युपदिश्यते॥

फिर वे कैसे वर्त्ताव वर्तें, यह विषय अगले मन्त्र में कहा है॥

युयोप॒ नाभि॒रुप॑रस्या॒योः प्र पूर्वा॑भिस्तिरते॒ राष्ट्रि शूर॑ः।
अ॒ञ्जसी कु॑ली॒शी वी॒रप॑त्नी॒ पयो॑ हिन्वा॒ना उ॒दभि॑र्भरन्ते॥४॥

युयोप॑। नाभि॑ः। उप॑रस्य। आ॒योः। प्र। पूर्वा॑भिः। ति॒र॒ते॒। राष्ट्रि॑। शूर॑ः। अ॒ञ्जसी॑। कु॒ली॒शी। वी॒रऽप॑त्नी। पयः॑। हि॒न्वा॒नाः। उ॒दऽभि॑ः। भ॒र॒न्ते॒॥४॥

पदार्थः-(**युयोप**) युप्यति विमोहं करोति (**नाभिः**) बन्धनमिव (**उपरस्य**) मेघस्य। **उपर इति मेघनामसु पठितम्।** (निघं०१.१०) (**आयोः**) प्राप्तुं योग्यस्य। **छन्दसीणः।** (उणा०१.२) (**प्र**) (**पूर्वाभिः**) प्रजाभिस्सह (**तिरते**) प्लवते सन्तरति वा। अत्र व्यत्ययेनात्मनेपदम्। विकरणव्यत्ययेन शश्च। (**राष्ट्रि**) राजते। अत्र विकरणस्य लुक्। (**शूरः**) निर्भयेन शत्रूणां हिंसिता (**अञ्जसी**) प्रसिद्धा (**कुलिशी**) कुलिशेन वज्रेणाभिरक्ष्या (**वीरपत्नी**) वीरः पतिर्यस्याः सा (**पयः**) जलम् (**हिन्वानाः**) प्रीतिकारिका नद्यः (**उदभिः**) उदकैः (**भरन्ते**) पुष्यन्ति। अत्र पक्षेऽन्तर्गतो ण्यर्थः॥४॥

अन्वयः-यदा शूरः प्रपूर्वाभिस्तिरते राज्यं संतरति तत्र राष्ट्रि प्रकाशते तदायोरुपरस्य नाभिर्युयोप सा न न्यूना किन्त्वञ्जसी कुलिशी वीरपत्नी नद्यः पयो हिन्वाना उदभिर्भरन्ते॥४॥

भावार्थः-सुराज्येन सर्वसुखं प्रजासु भवति सुराज्येन विना दुःखं दुर्भिक्षं च भवति। अतो वीरपुरुषेण रीत्या राज्यपालनं कर्त्तव्यमिति॥४॥

पदार्थः-जब (**शूरः**) निडर शत्रुओं का मारनेवाला शूरवीर (**प्र, पूर्वाभिः**) प्रजाजनों के साथ (**तिरते**) राज्य का यथावत् न्याय कर पार होता और (**राष्ट्रि**) उस राज्य में प्रकाशित होता है तब (**आयोः**) प्राप्त होने योग्य (**उपरस्य**) मेघ की (**नाभिः**) बन्धन चारों ओर से घुमड़ी हुई बादलों की दवन (**युयोप**) सबको मोहित करती है अर्थात् राजधर्म से प्रजासुख के लिये जलवर्षा भी होती है, वह थोड़ी नहीं किन्तु (**अञ्जसी**) प्रसिद्ध (**कुलिशी**) जो सूर्य के किरणरूपी वज्र से सब प्रकार रही हुई अर्थात् सूर्य

के विकट आतप से सूखने से बची हुई **(वीरपत्नी)** बड़ी-बड़ी नदी जिनसे बड़ा वीर समुद्र ही है, वे **(पयः)** जल को **(हिन्वानाः)** हिड़ोलती हुई **(उदभिः)** जलों से **(भरन्ते)** भर जाती हैं॥४॥

भावार्थः-अच्छे राज्य से सब सुख प्रजा में होता है और विना अच्छे राज्य के दुःख और दुर्भिक्ष आदि उपद्रव होते हैं, इससे वीर पुरुषों को चाहिये कि रीति से राज्य पालन करें॥४॥

पुनस्ते कथ वर्त्तेयातामित्युपदिश्यते॥

फिर वे कैसे वर्त्ताव वर्त्तें, यह विषय अगले मन्त्र में कहा है॥

प्रति॒ यत्स्या नीथाद॑र्शि॒ दस्यो॒रोको॒ नाच्छा॒ सद॑नं जान॒ती गा॑त्।
अध॑ स्मा नो मघवञ्चर्कृ॒तादिन्मा नो॑ म॒घेव॑ निष्ष॒पी परा॑ दाः॥५॥१८॥

प्रति॑। यत्। स्या। नीथा॑। अद॑र्शि। दस्यो॑ः। ओक॑ः। न। अच्छ॑। सद॑नम्। जा॒न॒ती। गा॒त्। अध॑। स्म॒। नः॒। म॒घ॒ऽव॒न्। च॒र्कृ॒तात्। इत्। मा। नः॒। म॒घाऽइ॑व। निष्ष॒पी। परा॑। दा॒ः॥५॥

पदार्थः-**(प्रति)** **(यत्)** या **(स्या)** सा प्रजा **(नीथा)** न्यायरक्षणे प्रापिता **(अदर्शि)** दृश्यते **(दस्योः)** परस्वादातुश्चोरस्य **(ओकः)** स्थानम् **(न)** इव **(अच्छ)** सुष्ठु **निपातस्य चे**ति दीर्घः। **(सदनम्)** अवस्थितिम् **(जानती)** प्रबुध्यमाना **(गात्)** एति **(अध)** अथ **(स्म)** आनन्दे **(नः)** अस्मान् **(मघवन्)** सभाद्यध्यक्ष **(चर्कृतात्)** सततं कर्तुं योग्यात्कर्मणः **(इत्)** निश्चये **(मा)** निषेधे **(नः)** अस्माकम् **(मघेव)** यथा धनानि तथा **(निष्षपी)** स्त्रिया सह नितरां समवेता **(परा)** **(दाः)** द्येरवखण्डयेर्विनाशयेः॥५॥

एतन्मन्त्रस्य कानिचित्पदानि यास्क एवं समाचष्टे-**निष्षपी स्त्रीकामो भवति विनिर्गतपसाः पसः पसतेः स्पृशतिकर्मणः। मा नो॑ म॒घेव॑ निष्ष॒पी परा॑ दाः। स यथा धनानि विनाशयति मा नस्त्वं तथा परादाः।** (निरु०५.१६)॥५॥

अन्वयः-सभादिपतिना यद्या नीथा प्रजा दस्योरोको न यथा गृहं तथा पालितादर्शि स्या साऽच्छ जानती सदनं प्रतिगात् प्रत्येति। हे मघवन्! निष्षपी संस्त्वं नोऽस्मान् मघेव मा परादाः। अधेत्यनन्तरं नोऽस्माकं चर्कृतादिदेव विरुद्धं मा स्म दर्शय॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा सुदृढं सम्यग्रक्षितं गृहं चोरेभ्यः शीतोष्णवर्षाभ्यश्च मनुष्यान् धनादिकं च रक्षति तथैव सभाधिपतिभी राजभिः सम्यग्रक्षिता प्रजैतान् पालयति। यथा कामुकः स्वशरीरधर्मविद्याशिष्टाचारान् विनाशयति, यथा च प्राप्तानि बहूनि धनानीर्ष्याभिमानयोगेन मनुष्या अन्यायेषु बद्ध्वा हीनानि कुर्वन्ति तथा प्रजाविनाशं नैव कुर्युः। किन्तु प्रजाकृतान् सततमुपकारान् बुद्धवा निरभिमानसंप्रीतिभ्यामेतान् सदा पालयेयुः, नैव कदाचित् दुष्टेभ्यः शत्रुभ्यो भीत्वा पलायनं कुर्युः॥५॥

पदार्थः-सभा आदि के स्वामी ने **(यत्)** जो **(नीथा)** न्याय रक्षा को पहुंचाई हुई प्रजा **(दस्योः)** पराया धन हरनेवाले डाकू के **(ओकः)** घर के **(न)** समान पाली सी **(अदर्शि)** देख पड़ती है **(स्या)** वह **(अच्छ)** अच्छा **(जानती)** जानती हुई **(सदनम्)** घर को **(प्रति, गात्)** प्राप्त होती अर्थात् घर को लौट जाती है। हे **(मघवन्)** सभा आदि के स्वामी! **(निष्षपी)** स्त्री के साथ निरन्तर लगे रहनेवाले तू **(नः)** हम लोगों को **(मघेव)** जैसे धनों को वैसे **(मा, परा, दाः)** मत बिगाड़े **(अध)** इसके अनन्तर **(नः)** हम लोगों के **(चर्कृतात्)** निरन्तर करने योग्य काम से **(इत्)** ही विरुद्ध व्यवहार मत **(स्म)** दिखावे॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अच्छा दृढ़, अच्छे प्रकार रक्षा किया हुआ घर चोरों वा शीत, गर्मी और वर्षा से मनुष्य और धन आदि पदार्थों की रक्षा करता है, वैसे ही सभापति राजाओं से अच्छी प्रकार पाली हुई प्रजा इनको पालती है। जैसे कामी जन अपने शरीर, धर्म, विद्या और अच्छे आचरण को बिगाड़ता और जैसे पाये हुए बहुत धनों को मनुष्य ईर्ष्या और अभिमान से अन्यायों में फंस कर बहाते हैं, वैसे उक्त राजा जन प्रजा का विनाश न करें, किन्तु प्रजा के किये निरन्तर उपकारों को जान कर अभिमान छोड़ और प्रेम बढ़ाकर इनको सब दिन पालें और दुष्ट शत्रुजनों से डर के पालयन न करें॥५॥

पुनस्ते कथं वर्त्तेयातामित्युपदिश्यते॥

फिर वे कैसे अपना वर्त्ताव वर्त्तें, यह विषय अगले मन्त्र में कहा है॥

स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे।
मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय॥६॥

सः। त्वम्। नः। इन्द्र। सूर्ये। सः। अप्ऽसु। अनागाःऽत्वे। आ। भज। जीवऽशंसे। मा। अन्तराम्। भुजम्। आ। रिरिषः। नः। श्रद्धितम्। ते। महते। इन्द्रियाय॥६॥

पदार्थः-**(सः)** **(त्वम्)** **(नः)** अस्माकम् **(इन्द्र)** सभादिस्वामिन् **(सूर्ये)** सवितृमण्डले प्राणे वा **(सः)** **(अप्सु)** जलेषु **(अनागास्त्वे)** निष्पापभावे। अत्र वर्णव्यत्ययेनाकारस्य स्थान आकारः। **(आ)** **(भज)** सेवस्व **(जीवशंसे)** जीवानां शंसास्तुतिर्यस्मिँस्तस्मिन् व्यवहारे चोपमाम् **(मा)** **(अन्तराम्)** मध्ये पृथग्वा **(भुजम्)** भोक्तव्यां प्रजाम् **(आ)** **(रीरिषः)** हिंस्याः **(नः)** **(श्रद्धितम्)** श्रद्धा संजाताऽस्येति **(ते)** **(महते)** बृहते पूजिताय वा **(इन्द्रियाय)** धनाय। **इन्द्रियमिति धननामसु पठितम्।** (निघं०२.१०)॥६॥

अन्वयः-हे इन्द्र! यस्य ते महत इन्द्रियाय नोऽस्माकं श्रद्धितमस्ति स त्वं नोऽस्माकं भुजं प्रजामन्तरां मारीरिषः। स त्वं सूर्य्येऽप्स्वनागास्त्वे जीवशंसे चोपमामाभज॥६॥

भावार्थः-सभापतिभिर्याः प्रजा श्रद्धया राज्यव्यवहारसिद्धये महद्धनं प्रयच्छन्ति ताः कदाचिन्नैव हिंसनीयाः। यास्तु दस्युचोरभूताः सन्त्येताः सदैव हिंसनीयाः। यः सेनापत्यधिकारं प्राप्नुयात् स

सूर्य्यवन्न्यायविद्याप्रकाशं जलवच्छान्तितृप्ती अन्यायापराधराहित्यं प्रजाप्रशंसनीयं व्यवहारं च सेवित्वा राष्ट्रं रञ्जयेत्॥६॥

पदार्थः-हे **(इन्द्र)** सभा के स्वामी जिन **(ते)** आपके **(महते)** बहुत और प्रशंसा करने योग्य **(इन्द्रियाय)** धन के लिये **(नः)** हम लोगों का **(श्रद्धितम्)** श्रद्धाभाव है **(सः)** वह **(त्वम्)** आप **(नः)** हम लोगों के **(भुजम्)** भोग करने योग्य प्रजा को **(अन्तराम्)** बीच में **(मा)** मत **(आ रीरिषः)** रिषाइये मत मारिये और **(सः)** सो आप **(सूर्य्ये)** सूर्य्य, प्राण **(अप्सु)** जल **(अनागास्त्वे)** और निष्पाप में तथा **(जीवशंसे)** जिसमें जीवों की प्रशंसा स्तुति हो, उस व्यवहार में उपमा को **(आ, भज)** अच्छे प्रकार भजिये॥६॥

भावार्थः-सभापतियों को जो प्रजाजन श्रद्धा से राज्यव्यवहार की सिद्धि के लिये बहुत धन देवें, वे कभी मारने योग्य नहीं और जो प्रजाओं में डाकू वा चोर हैं, वे सदैव ताड़ना देने योग्य हैं। जो सेनापति के अधिकार को पावे वह सूर्य्य के तुल्य न्यायविद्या का प्रकाश, जल के समान शान्ति और तृप्ति कर, अन्याय और अपराध का त्याग और प्रजा के प्रशंसा करने योग्य व्यवहार का सेवन कर राज्य को प्रसन्न करे॥६॥

पुनरेताभ्यां परस्परं कथं प्रतिज्ञातव्यमित्युपदिश्यते॥

फिर इन दोनों को परस्पर कैसी प्रतिज्ञा करनी चाहिये, यह विषय अगले मन्त्र में कहा है॥

अधा॑ मन्ये॒ श्रत्ते॑ अस्मा अधायि॒ वृषा॑ चोदस्व महते॒ धना॑य।
मा नो॒ अक॑ृते पुरुहुत॒ योना॒विन्द्र॒ क्षुध्य॑द्भ्यो॒ वय॑ आसु॒तिं दाः॥७॥

अध॑। म॒न्ये॒। श्रत्। ते॒। अ॒स्मै॒। अ॒धा॒यि॒। वृषा॑। चो॒द॒स्व॒। म॒ह॒ते। धना॑य। मा। नः॒। अक॑ृते। पु॒रु॒ऽहू॒त॒। योनौ॑। इन्द्र॑। क्षुध्य॑त्ऽभ्यः। वय॑ः। आ॒ऽआ॒सु॒तिम्। दा॒ः॥७॥

पदार्थः-**(अध)** अनन्तरम् **(मन्ये)** विजानीयाम् **(श्रत्)** श्रद्धां सत्याचरणं वा **(ते)** तव **(अस्मै)** **(अधायि)** धीयताम् **(वृषा)** सुखवर्षयिता **(चोदस्व)** प्रेर्स्व **(महते)** बहुविधाय **(धनाय)** **(मा)** निषेधे **(नः)** अस्माकमस्मान् वा **(अकृते)** अनिष्पादिते **(पुरुहूत)** अनेकैः सत्कृत **(योनौ)** निमित्ते **(इन्द्र)** परमैश्वर्यप्रद शत्रुविदारक **(क्षुध्यद्भ्यः)** बुभुक्षितेभ्यः **(वयः)** कमनीयमन्नम् **(आसुतिम्)** प्रजाम् **(दाः)** छिन्द्याः॥७॥

अन्वयः-हे पुरुहूतेन्द्र! वृषा त्वमकृते योनौ नोऽस्माकं वय आसुतिं च मा दाः त्वया क्षुध्यद्भ्योऽन्नादिकमधायि नोऽस्मान् महते धनाय चोदस्व। अधास्मै ते तवैतच्छ्रदहं मन्ये॥७॥

भावार्थः-न्यायाधीशादिभी राजपुरुषैरकृतापराधानां प्रजानां हिंसनं कदाचिन्नैव कार्य्यम्। सर्वदैताभ्यः करा ग्राह्याः एनाः सम्पाल्य वर्धयित्वा विद्यापुरुषार्थयोर्मध्ये प्रवर्त्याऽऽनन्दनीयाः। एतत्सभापतीनां सत्यं कर्म प्रजास्थैः सदैव मन्तव्यम्॥७॥

पदार्थः-हे **(पुरुहूत)** अनेकों से सत्कार पाये हुए **(इन्द्र)** परमैश्वर्य्य देने और शत्रुओं का नाश करनेहारे सभापति! **(वृषा)** अति सुख वर्षानेवाले आप **(अकृते)** विना किये विचारे **(योनौ)** निमित्त में **(नः)** हम लोगों के **(वयः)** अभीष्ट अन्न और **(आसुतिम्)** सन्तान को **(मा, दाः)** मत छिन्न-भिन्न करो और **(क्षुध्यद्भ्यः)** भूखों के लिये अन्न, जल आदि **(अधायि)** धरो, हम लोगों को **(महते)** बहुत प्रकार के **(धनाय)** धन के लिये **(चोदस्व)** प्रेरणा कर, **(अध)** इसके अनन्तर **(अस्मै)** इस उक्त काम के लिये **(ते)** तेरी **(श्रत्)** यह श्रद्धा वा सत्य आचरण मैं **(मन्ये)** मानता हूं॥७॥

भावार्थः-न्यायाधीश आदि राजपुरुषों को चाहिये कि जिन्होंने अपराध न किया हो, उन प्रजाजनों को कभी ताड़ना न करें, सब दिन इनसे राज्य का कर धन लेवें, तथा इनको अच्छे प्रकार पाल और उन्नति दिलाकर विद्या और पुरुषार्थ के बीच प्रवृत्त कराकर आनन्दित करावें। सभापति आदि के इस सत्य काम को प्रजाजनों को सदैव मानना चाहिये॥७॥

पुनरेताभ्यां कथं प्रतिज्ञातव्यमित्युपदिश्यते॥

फिर इनको कैसी प्रतिज्ञा करनी चाहिए, यह विषय अगले मन्त्र में कहा है॥

मा नो॑ वधीरिन्द्र मा परा॑ दा॒ मा नः॑ प्रि॒या भोज॑नानि॒ प्र मो॒षीः।
आ॒ण्डा मा नो॑ मघवञ्छक्र॒ निर्भे॒न्मा नः॒ पात्रा॑ भेत्स॒हजा॑नुषाणि॥८॥

मा। नः॒। व॒धीः॒। इ॒न्द्र॒। मा। परा॑। दा॒ः। मा। नः॒। प्रि॒या। भोज॑नानि। प्र। मो॒षीः॒। आ॒ण्डा। मा। नः॒। म॒घ॒ऽव॒न्। श॒क्र॒। निः। भे॒त्। मा। नः॒। पात्रा॑। भे॒त्। स॒हऽजा॑नुषाणि॥८॥

पदार्थः-**(मा)** निषेधे **(नः)** अस्मान् प्रजस्थान्मनुष्यादीन् **(वधीः)** हिंस्याः **(इन्द्र)** शत्रुविनाशक **(मा)** **(परा)** **(दाः)** दद्याः **(मा)** **(नः)** अस्माकम् **(प्रिया)** प्रियाणि **(भोजनानि)** भोजनवस्तूनि **(प्र)** **(मोषीः)** स्तेनयेः **(आण्डा)** अण्डवद्गर्भे स्थितान् **(मा)** **(नः)** अस्माकम् **(मघवन्)** पूजितधनयुक्त **(शक्र)** शक्नोति सर्वं व्यवहारं कर्त्तुं तत्सम्बुद्धौ **(निः)** नितराम् **(भेत्)** भिन्द्याः। **बहुलं छन्दसी**तीडभावो **झलो झली**ति सलोपो **हल्ङ्याब्भ्य** इति सिब्लोपश्च। **(मा)** **(नः)** अस्माकम् **(पात्रा)** पात्राणि सुवर्णरजतादीनि **(भेत्)** भिन्द्याः **(सहजानुषाणि)** जनुर्भिर्जन्मभिर्निर्वृत्तानि जानुषाणि कर्माणि तैः सह वर्त्तमानानि॥८॥

अन्वयः-हे मघवञ्छक्रेन्द्र सभाधिपते! त्वं नो मा वधीः। मा परादाः। नः सहजानुषाणि प्रिया भोजनानि मा प्रमोषीः। नोऽस्माकमाण्डा मा निर्भेत्। नोऽस्माकं पात्रा मा भेत्॥८॥

भावार्थः-हे सभापते! त्वं यथान्यायेन कंचिदप्यहिंसित्वा कस्माच्चिदपि धार्मिकादपराङ्मुखो भूत्वा स्तेयादिदोषरहितो परमेश्वरो दयां प्रकाशयति, तथैव प्रवर्त्तस्व नह्येवं वर्त्तमानेन विना प्रजा संतुष्टा जायते॥८॥

पदार्थः-हे **(मघवन्)** प्रशंसित धनयुक्त **(शक्र)** सब व्यवहार के करने को समर्थ **(इन्द्र)** शत्रुओं को विनाश करनेवाले सभा के स्वामी आप **(नः)** हम प्रजास्थ मनुष्यों को **(मा, वधीः)** मत मारिये **(मा, परा, दाः)** अन्याय से दण्ड मत दीजिये, स्वाभाविक काम और **(नः)** हम लोगों के **(सहजानुषाणि)** जो जन्म से सिद्ध उन के वर्त्तमान **(प्रिया)** पियारे **(भोजनानि)** भोजन पदार्थों को **(मा, प्र, मोषीः)** मत चोरिये, **(नः)** हमारे **(आण्डा)** अण्डे के समान जो गर्भ में स्थित हैं, उन प्राणियों को **(मा, निर्भेत्)** विदीर्ण मत कीजिये, **(नः)** हम लोगों के **(पात्रा)** सोने चांदी के पात्रों को **(मा, भेत्)** मत बिगाड़िये॥८॥

भावार्थः-हे सभापति! तू जैसे अन्याय से किसी को न मार के किसी भी धार्मिक सज्जन से विमुख न होकर चोरी-चपारी आदि दोषरहित परमेश्वर दया का प्रकाश करता है, वैसे ही अपने राज्य के काम करने में प्रवृत्त हो, ऐसे वर्त्ताव के विना राजा से प्रजा सन्तोष नहीं पाती॥८॥

पुनः प्रजया तेन सह किं प्रतिज्ञातव्यमित्युपदिश्यते॥

फिर प्रजा को इस सभापति के साथ क्या प्रतिज्ञा करनी चाहिये, यह विषय अगले मन्त्र में कहा है॥

अ॒र्वाङेहि॒ सोम॑कामं त्वाहु॒र॒यं सु॒तस्तस्य॑ पिबा॒ मदा॑य।
उ॒रु॒व्यचा॑ ज॒ठर॒ आ वृ॑षस्व पि॒तेव॑ नः शृणुहि हू॒यमा॑नः॥९॥१९॥

अ॒र्वाङ्। आ। इ॒हि॒। सोम॑ऽकामम्। त्वा॒। आ॒हुः॒। अ॒यम्। सु॒तः। तस्य॑। पि॒ब॒। मदा॑य। उ॒रु॒ऽव्यचा॑ः। ज॒ठरे॑। आ। वृ॒ष॒स्व॒। पि॒ताऽइ॑व। नः॒। शृ॒णु॒हि॒। हू॒यमा॑नः॥९॥

पदार्थः-**(अर्वाङ्)** अर्वाचीने व्यवहारे **(आ, इहि)** आगच्छ **(सोमकामम्)** अभिषुतानां पदार्थानां रसं कामयते यस्तम् **(त्वा)** त्वाम् **(आहुः)** कथयन्ति **(अयम्)** प्रसिद्धः **(सुतः)** निष्पादितः **(तस्य)** तम्। अत्र शेषत्वविवक्षायां कर्मणि षष्ठी। **(पिब)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मदाय)** हर्षाय **(उरुव्यचाः)** उरु बहुविधं व्यचो विज्ञानं पूजनं सत्करणं वा यस्य सः **(जठरे)** जायन्ते यस्मादुदराद्वा तस्मिन्। **जनेररष्ठ च।** (उणा०५.३८) अत्र जन धातोऽरः प्रत्ययो नकारस्य ठकारश्च। **(आ) (वृषस्व)** सिञ्चस्व **(पितेव)** यथा दयमानः पिता तथा **(नः)** अस्माकम् **(शृणुहि) (हूयमानः)** कृताह्वानः सन्॥९॥

अन्वयः-हे सभाध्यक्ष! यतस्त्वा त्वां सोमकाममाहुरतस्त्वमर्वाङेहि। अयं सुतस्तस्य मदाय पिब। उरुव्यचास्त्वं जठरे आवृषस्व। अस्माभिर्हूयमानस्त्वं पितेव नः शृणुहि॥९॥

भावार्थः-प्रजास्थैः सभापत्यादयो राजपुरुषा अन्नपानवस्त्रधनयानमधुरभाषणादिभिः सदा हर्षयितव्याः। राजपुरुषैश्चः प्रजास्थाः प्राणिनः पुत्रवत्सततं पालनीया इति॥९॥

अत्र सभापते राज्ञः प्रजायाश्च कर्त्तव्यकर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति चतुरधिकशतं १०४ सूक्तमेकोनविंशो १९ वर्गश्च समाप्तः॥

पदार्थः–हे सभाध्यक्ष! जिससे **(त्वा)** आपको **(सोमकामम्)** कूटे हुए पदार्थों के रस की कामना करनेवाले **(आहुः)** बतलाते हैं, इससे आप **(अर्वाङ्)** अन्तरङ्ग व्यवहार में **(आ, इहि)** आओ, **(अयम्)** यह जो **(सुतः)** निकाला हुआ पदार्थों का रस है **(तस्य)** उसको **(मदाय)** हर्ष के लिये **(पिब)** पिओ, **(उरुव्यचाः)** जिसका बहुत और अनेक प्रकार का पूजन सत्कार है, वह आप **(जठरे)** जिससे सब व्यवहार होते हैं, उस पेट में **(आ, वृषस्व)** आसेचन कर अर्थात् उस पदार्थ को अच्छी प्रकार पीओ तथा हम लोगो से **(हूयमानः)** प्रार्थना को प्राप्त हुए आप **(पितेव)** जैसे प्रेम करता हुआ पिता पुत्र की सुनता है, वैसे **(नः)** हमारी **(शृणुहि)** सुनिये॥९॥

भावार्थः–प्रजाजनों को चाहिये कि सभापति आदि राजपुरुषों को खान, पान, वस्त्र, धन, यान और मीठी–मीठी बातों से सदा आनन्दित बनाये रहें और राजपुरुषों को भी चाहिये कि प्रजाजनों को पुत्र के समान निरन्तर पालें॥९॥

इस सूक्त में सभापति राजा और प्रजा के करने योग्य व्यवहार के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह एकसौ चारवाँ १०४ सूक्त और उन्नीसवां १९ वर्ग पूरा हुआ॥

अथैकोनविंशत्यृचस्य पञ्चाधिकशततमस्य सूक्तस्याप्त्यस्त्रित ऋषिराङ्गिरसः कुत्सो वा। विश्वेदेवा देवताः। १,२,१२,१६,१७ निचृत्पङ्क्तिः। ३,४,६,९,१५,१८ विराट्पङ्क्तिः। ८,१० स्वराट् पङ्क्तिः। ११,१४ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५ निचृद्बृहती। ७ भुरिग्बृहती। १३ महाबृहती छन्दः। मध्यमः स्वरः। १९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ चन्द्रलोकः कीदृश इत्युपदिश्यते॥

अब एकसौ पांचवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में चन्द्रलोक कैसा है, इस विषय को कहा है॥

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी॥ १॥

चन्द्रमाः। अप्ऽसु। अन्तः। आ। सुऽपर्णः। धावते। दिवि। न। वः। हिरण्यऽनेमयः। पदम्। विन्दन्ति। विद्युतः। वित्तम्। मे। अस्य। रोदसी इति॥ १॥

पदार्थः-(**चन्द्रमाः**) आह्लादकारकः इन्दुलोकः (**अप्सु**) प्राणभूतेषु वायुषु (**अन्तः**) (**आ**) (**सुपर्णः**) शोभनं पर्ण पतनं गमनं यस्य (**धावते**) (**दिवि**) सूर्य्यप्रकाशे (**न**) निषेधे (**वः**) युष्माकम् (**हिरण्यनेमयः**) हिरण्यस्वरूपा नेमिः सीमा यासां ताः (**पदम्**) विचारमयं शिल्पव्यवहारम् (**विन्दन्ति**) लभन्ते (**विद्युतः**) सौदामिन्यः (**वित्तम्**) विजानीतम् (**मे**) मम पदार्थविद्याविदः सकाशात् (**अस्य**) (**रोदसी**) द्यावापृथिव्याविव राजप्रजे जनसमूहौ॥ १॥

अन्वयः-हे रोदसी! मे मम सकाशाद् योऽप्स्वन्तः सुपर्णश्चन्द्रमा दिव्याधावते हिरण्यनेमयो विद्युतश्च धावत्योः वः पदं न विन्दन्त्यस्य पूर्वोक्तस्येमं पूर्वोक्तं विषयं युवां वित्तम्॥ १॥

भावार्थः-हे राजप्रजापुरुषौ! यश्चन्द्रमसश्छायान्तरिक्षजलसंयोगेन शीतलत्वप्रकाशस्तं विजानीतम्। या विद्युतः प्रकाशन्ते ताश्चक्षुर्ग्राह्या भवन्ति याः प्रसीनास्तासां चिह्नं चक्षुषा ग्रहीतुमशक्यम्। एतत्सर्वं विदित्वा सुखं सम्पादयेतम्॥ १॥

पदार्थः-हे (**रोदसी**) सूर्यप्रकाश वा भूमि के तुल्य राज और प्रजा जनसमूह! (**मे**) मुझ पदार्थ विद्या जाननेवाले की उत्तेजना से जो (**अप्सु**) प्राणरूपी पवनों के (**अन्तः**) बीच (**सुपर्णः**) अच्छा गमन करने वा (**चन्द्रमाः**) आनन्द देनेवाला चन्द्रलोक (**दिवि**) सूर्य के प्रकाश में (**आ, धावते**) अति शीघ्र घूमता है और (**हिरण्यनेमयः**) जिनको सुवर्णरूपी चमक-दमक चिलचिलाहट है, वे (**विद्युतः**) बिजली लपट-झपट से दौड़ती हुईं (**वः**) तुम लोगों की (**पदम्**) विचारवाली शिल्प चतुराई को (**न**) नहीं (**विन्दन्ति**) पाती हैं अर्थात् तुम उनको यथोचित काम में नहीं लाते हो (**अस्य**) इस पूर्वोक्त विषय को तुम (**वित्तम्**) जानो॥ १॥

भावार्थः-हे राजा और प्रजा के पुरुष! जो चन्द्रमा की छाया और अन्तरिक्ष के जल के संयोग से शीतलता का प्रकाश है, उसको जानो तथा जो बिजुली लपट-झपट से दमकती हैं, वे आखों से देखने योग्य हैं और जो विलाय जाती हैं, उनका चिह्न भी आँख से देखा नहीं जा सकता, इस सबको जानकर सुख को उत्पन्न करो॥१॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे राजा और प्रजा कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम्।
तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी॥२॥

अर्थम्। इत्। वै। ऊम्ऽइति। अर्थिनः। आ। जाया। युवते। पतिम्। तुञ्जाते इति। वृष्ण्यम्। पयः। परिऽदाय। रसम्। दुहे। वित्तम्। मे। अस्य। रोदसी इति॥२॥

पदार्थः-(**अर्थम्**) य ऋच्छति प्राप्नोति तम् (**इत्**) अपि (**वै**) खलु (**उ**) वितर्के (**अर्थिनः**) प्रशस्तोऽर्थः प्रयोजनं येषान्ते (**आ**) (**जाया**) स्त्रीव (**युवते**) युनते बध्नन्ति। अत्र विकरणव्यत्ययेन शः। (**पतिम्**) स्वामिनम् (**तुञ्जाते**) दुःखानि हिंस्तः। व्यत्ययेनात्रात्मनेपदम्। (**वृष्ण्यम्**) वृषसु साधुम् (**पयः**) अन्नम्। **पय इत्यन्ननामसु पठितम्।** (निघं०२.७) (**परिदाय**) सर्वतो दत्वा (**रसम्**) स्वादिष्ठमोषध्यादिभ्यो निष्पन्नं सारम् (**दुहे**) वर्धयेयम् (**वित्तं, मे०**) इति पूर्ववत्॥२॥

अन्वयः-यथार्थिनोऽर्थं वै पतिं जायेव आयुवते यथा राजप्रजे यद् वृष्ण्यं पयो रसमित् परिदाय दुःखानि तुञ्जाते तथा तच्चाहमपि दुहे। अन्यत् पूर्ववत्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा स्त्रीष्टं पतिं प्राप्य पुरुषश्चेष्टां स्त्रियं वाऽऽनन्दयतस्तथाऽर्थ- साधनतत्परा विद्युत्पृथिवीसूर्यप्रकाशविद्यां गृहीत्वा पदार्थान् प्राप्य सदा सुखयति नह्येतद्विद्याविदां सङ्गेन विनैषा विद्या भवितुमर्हति दुःखविनाशश्च संभवति। तस्मादेषा सर्वैः प्रयत्नेन स्वीकार्य्या॥२॥

पदार्थः-जैसे (**अर्थिनः**) प्रशंसित प्रयोजनवाले जन (**अर्थम्**) जो प्राप्त होता है, उसको (**वै**) ही (**पतिम्**) पति का (**जाया**) सम्बन्ध करनेवाली स्त्री के समान (**आ, युवते**) अच्छे प्रकार सम्बन्ध करते हैं (**उ**) या तो जैसे राजा-प्रजा जिस (**वृष्ण्यम्**) श्रेष्ठों में उत्तम (**पयः**) अन्न (**इत्**) और (**रसम्**) स्वादिष्ठ ओषधियों से निकाले रस को (**परिदाय**) सब ओर से देके दुःखों को (**तुञ्जाते**) दूर करते हैं, वैसे उस-उस को मैं भी (**दुहे**) बढ़ाऊँ। शेष अर्थ प्रथम मन्त्र में कहे समान जानना चाहिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे स्त्री अपनी इच्छा के अनुकूल पति को वा पति अपनी इच्छा के अनुकूल स्त्री को पाकर परस्पर आनन्दित करते हैं, वैसे प्रयोजन सिद्ध कराने में

तत्पर बिजुली, पृथिवी और सूर्यप्रकाश की विद्या के ग्रहण से पदार्थों को प्राप्त होकर सदा सुख देती है। इसकी विद्या को जाननेवालों के संग के विना यह विद्या होने को कठिन है और दुःख का भी विनाश अच्छी प्रकार नहीं होता। इससे सबको चाहिये कि इस विद्या को यत्न से लेवें॥ २॥

अत्र जगति विद्वांसः कथं प्रष्टव्या इत्युपदिश्यते॥

इस जगत् में विद्वान् जन कैसे पूछने के योग्य हैं, यह अगले मन्त्र में उपदेश किया है॥

मो षु देवा अदः स्व१रव पादि दिवस्परि।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी॥ ३॥

मो इति। सु। देवाः। अदः। स्वः। अव। पादि। दिवः। परि। मा। सोम्यस्य। शम्ऽभुवः। शूने। भूम। कदा। चन। वित्तम्। मे। अस्य। रोदसी इति॥ ३॥

पदार्थः-(**मो**) निषेधे (**सु**) शोभने। अत्र सुषामादित्वात् षत्वम्। (**देवाः**) विद्वांसः (**अदः**) प्राप्स्यमानम् (**स्वः**) सुखम् (**अव**) विरुद्धे (**पादि**) प्रतिपद्यतां प्राप्यताम् (**दिवः**) सूर्यप्रकाशात् (**परि**) उपरिभावे। अत्र **पञ्चम्याः परावध्यर्थे।** (अष्टा०८.३.५१) इति विसर्जनीयस्य सः। (**मा**) निषेधे (**सोम्यस्य**) सोममैश्वर्यमर्हस्य (**शंभुवः**) सुखं भवति यस्मात्तस्य। अत्र **कृतो बहुलमि**त्यपादाने क्विप्। (**शूने**) वर्धने। अत्र **नपुंसके भावे क्तः।** (अष्टा०३.३.११४) (**भूम**) भवेम (**कदा**) कस्मिन् काले (**चन**) अपि वित्तं, मे, अस्येति पूर्ववत्॥ ३॥

अन्वयः-देवा युष्माभिर्दिवस्पर्य्यदः स्वः कदाचन मोऽवपादि वयं सोम्यस्य शंभुवः सुशूने विरुद्धकारिणः कदाचिन्मा भूम। अन्यत्पूर्ववत्॥ ३॥

भावार्थः-मनुष्यैरस्मिन् संसारे धर्मसुखविरुद्धं कर्म नैवाचरणीयम्। पुरुषार्थेन सुखोन्नतिः सततं कार्या॥ ३॥

पदार्थः-हे (**देवाः**) विद्वानो! तुम लोगों से (**दिवः**) सूर्य के प्रकाश से (**परि**) ऊपर (**अदः**) वह प्राप्त होनेहारा (**स्वः**) सुख (**कदा, चन**) कभी (**मो, अव, पादि**) विरुद्ध न उत्पन्न हुआ है। हम लोग (**सोम्यस्य**) ऐश्वर्य के योग्य (**शंभुवः**) सुख जिससे हो उस व्यवहार की (**सु, शूने**) सुन्दर उन्नति में विरुद्ध भाव से चलनेहारे कभी (**मा**) (**भूम**) मत होवें। और अर्थ प्रथम मन्त्र के समान जानना चाहिये॥

भावार्थः-मनुष्यों को चाहिये कि इस संसार में धर्म और सुख से विरुद्ध काम नहीं करें और पुरुषार्थ से निरन्तर सुख की उन्नति करें॥ ३॥

पुनस्तैः प्रष्टृभिः समाधातृभिश्च परस्परं कथं वर्त्तित्वा विद्यावृद्धिकार्येत्युपदिश्यते॥

फिर पूंछने और समाधान देनेवालों को परस्पर कैसे वर्त्ताव रख कर विद्या की वृद्धि करनी

चाहिये, इस विषय को अगले मन्त्र में कहा है॥

यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति।
क्व ऋतं पूर्व्यं गतं कस्तद् बिभर्ति नूतनो वित्तं मे अस्य रोदसी॥४॥

यज्ञम्। पृच्छामि। अवमम्। सः। तत्। दूतः। वि। वोचति। क्व। ऋतम्। पूर्व्यम्। गतम्। कः। तत्। बिभर्ति नूतनः। वित्तम्। मे। अस्य। रोदसी इति॥४॥

पदार्थः-(**यज्ञम्**) सर्वविद्यामयम् (**पृच्छामि**) (**अवमम्**) रक्षादिसाधकमुत्तममर्वाचीनं वा (**सः**) भवान् (**तत्**) (**दूतः**) इतस्ततो वार्ताः पदार्थान् वा विजानन् (**वि**) विविच्य (**वोचति**) उच्याद्वदेत्। अत्र लेटि वचधातोर्व्यत्ययेनौकारादेशः। (**क्व**) कुत्र (**ऋतम्**) सत्यमुदकं वा (**पूर्व्यम्**) पूर्वैः कृतम् (**गतम्**) प्राप्तम् (**कः**) (**तत्**) (**बिभर्ति**) दधाति (**नूतनः**) नवीनः। वित्तं मे० इति पूर्ववत्॥४॥

अन्वयः-हे विद्वन्नहं त्वां प्रति यमवमं यज्ञं पूर्व्यमृतं क्व गतं को नूतनस्तद्बिभर्तीति पृच्छामि स दूतो भवांस्तत्सर्वं विवोचति विविच्योपदिशतु। अन्यत्पूर्ववत्॥४॥

भावार्थः-विद्यां चिकीर्षुभिर्ब्रह्मचारिभिर्विदुषां समीपं गत्वाऽनेकविधान् प्रश्नान् कृत्वोत्तराणि प्राप्य विद्या वर्धनीया। भो अध्यापका विद्वांसो! यूयं स्वगतमागच्छत मत्तोऽस्य संसारस्य पदार्थसमूहस्य विद्या अभिज्ञाय सर्वानन्यानेवमेवाध्याप्य सत्यमसत्यं च यथार्थतया विज्ञापयत॥४॥

पदार्थः-हे विद्वन्! मैं आपके प्रति जिस (**अवमम्**) रक्षा आदि करनेवाले उत्तम वा निकृष्ट (**यज्ञम्**) समस्त विद्या से परिपूर्ण (**पूर्व्यम्**) पूर्वजों ने सिद्ध किया (**ऋतम्**) सत्यमार्ग वा उत्तम जल स्थान (**क्व**) कहाँ (**गतम्**) गया (**कः**) और कौन (**नूतनः**) नवीन जन (**तत्**) उसको (**बिभर्ति**) धारण करता है, इसको (**पृच्छामि**) पूछता हूँ (**सः**) सो (**दूतः**) इधर-उधर से बातचीत वा पदार्थों को जानते हुए आप (**तत्**) उस सब विषय को (**वि वोचति**) विवेक कर कहो। और अर्थ सब प्रथम के तुल्य जानना॥४॥

भावार्थः-विद्या को चाहते हुए ब्रह्मचारियों को चाहिये कि विद्वानों के समीप जाकर अनेक प्रकार के प्रश्नों को करके और उनसे उत्तर पाकर विद्या को बढ़ावें और हे पढ़ानेवाले विद्वानो! तुम लोग अच्छा गमन जैसे हो वैसे आओ और हमसे इस संसार के पदार्थों की विद्या को सब प्रकार से जान, औरों को पढ़ा कर सत्य और असत्य को यथार्थभाव से समझाओ॥४॥

पुनरेते परस्परं कथं किं कुर्य्युरित्युपदिश्यते॥

फिर ये परस्पर कैसे क्या करें, यह विषय अगले मन्त्र में कहा है॥

अमी ये देवाः स्थन त्रिष्वारोचने दिवः।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी॥५॥२०॥

अमी इति। ये। देवाः। स्थन। त्रिषु। आ। रोचने। दिवः। कत्। वः। ऋतम्। कत्। अनृतम्। क्व। प्रत्ना। वः। आऽहुतिः। वित्तम्। मे। अस्य। रोदसी इति॥५॥

पदार्थः-(**अमी**) प्रत्यक्षाऽप्रत्यक्षाः (**ये**) (**देवाः**) दिव्यगुणाः पृथिव्यादयो लोकाः (**स्थन**) सन्ति। अत्र **तप्तनप्तनथनाश्चे**ति थनादेशः। (**त्रिषु**) नामस्थानजन्मसु (**आ**) समन्तात् (**रोचने**) प्रकाशविषये (**दिवः**) द्योतकस्य सूर्यमण्डलस्य (**कत्**) कुत्र। **पृषोदरादित्वात्** क्वेत्यस्य स्थाने कत्। (**वः**) एषां मध्ये (**ऋतम्**) सत्यं कारणम् (**कत्**) (**अनृतम्**) कार्यम् (**क्व**) (**प्रत्ना**) प्राचीनानि (**वः**) एतेषाम् (**आहुतिः**) होमः प्रलयः। अन्यत्पूर्ववत्॥५॥

अन्वयः-हे विद्वांसो! यूयं दिवो रोचने त्रिष्वमी ये देवा आस्थन वस्तेषामृतं कदनृतं कत्। वस्तेषां प्रत्ना आहुतिश्च क्व भवतीत्येषामुत्तराणि ब्रूत। अन्यत्पूर्ववत्॥५॥

भावार्थः-यदा सर्वेषां लोकानामाहुतिः प्रलयो जायते तदा कार्यं कारणं जीवाश्च क्व तिष्ठन्तीति प्रश्नः। एतदुत्तरं सर्वव्यापक ईश्वर आकाशे च कारणरूपेण सर्वं जगत्सुषुप्तवज्जीवाश्च वर्त्तन्त इति। एकैकस्य सूर्यस्य प्रकाशाकर्षणविषये यावन्तो यावन्तो लोका वर्त्तन्ते तावन्तस्तावन्तः सर्व ईश्वरेण रचयित्वा धृत्वा व्यवस्थाप्यन्त इति वेद्यम्॥५॥

पदार्थः-हे विद्वानो! तुम (**दिवः**) प्रकाश करनेवाले सूर्य्य के (**रोचने**) प्रकाश में (**त्रिषु**) तीन अर्थात् नाम, स्थान और जन्म में (**अमी**) प्रकट और अप्रकट (**ये**) जो (**देवाः**) दिव्य गुणवाले पृथिवी आदि लोक (**आ**) अच्छी (**स्थन**) स्थिति करते हैं (**वः**) इनके बीच (**ऋतम्**) सत्य कारण (**कत्**) कहाँ और (**अनृतम्**) झूंठ कार्यरूप (**कत्**) कहाँ और (**वः**) उनके (**प्रत्ना**) पुराने पदार्थ तथा उनका (**आहुतिः**) होम अर्थात् विनाश (**क्व**) कहाँ होता है, इन सब प्रश्नों के उत्तर कहो? शेष मन्त्र का अर्थ पूर्व के तुल्य जानना चाहिये॥५॥

भावार्थः-**प्रश्न**-जब सब लोकों की आहुति अर्थात् प्रलय होता है, तब कार्य्यकारण और जीव कहाँ ठहरते हैं? इसका **उत्तर**-सर्वव्यापी ईश्वर और आकाश में कारण रूप से सब जगत् और अच्छी गाढ़ी नींद में सोते हुए के समान जीव रहते हैं। एक-एक सूर्य्य के प्रकाश और आकर्षण के विषय में जितने-जितने लोक हैं उतने-उतने सब ईश्वर ने बनाये धारण किये तथा इनकी व्यवस्था की है, यह जानना चाहिये॥५॥

पुनरेतैः परस्परं किं किं प्रष्टव्यं समाधातव्यं चेत्युपदिश्यते॥

फिर इनको परस्पर क्या-क्या पूछना और समाधान करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम्।

कदर्य॒म्णो म॒हस्प॒थाति॑ क्रामेम दू॒ढ्यो॑ वि॒त्तं मे॑ अ॒स्य रो॑दसी॥६॥

कत्। व॒:। ऋ॒तस्य॑। ध॒र्ण॒सि॒। कत्। वरु॑णस्य। चक्ष॑णम्। कत्। अ॒र्य॒म्ण:। म॒ह:। प॒था। अति॑। क्रा॒मे॒म॒। दु॒:ऽध्य॑:। वि॒त्तम्। मे॒। अ॒स्य। रो॒द॒सी॒ इति॑॥६॥

पदार्थ:-(**कत्**) क्व (**व:**) एतेषाम् (**ऋतस्य**) कारणस्य (**धर्णसि**) धर्त्ता। अत्र **सुपां सुलुगिति** विभक्तेर्लुक्। (**कत्**) (**वरुणस्य**) जलादिकार्यस्य (**चक्षणम्**) दर्शनम् (**कत्**) केन (**अर्यम्ण:**) सूर्यस्य (**मह:**) महत: (**पथा**) मार्गेण (**अति**) (**क्रामेम**) उल्लङ्घयेम (**दूढ्य:**) दु:खेन ध्यातुं योग्यो व्यवहार: (**वित्तं, मे अस्य, रोदसी**) इति पूर्ववत्॥६॥

अन्वय:-हे विद्वांसो! व एतेषां स्थूलानां पदार्थानामृतस्य सत्यकारणस्य धर्णसि कत् क्वास्ति वरुणस्य चक्षणं कदस्ति महोऽर्यम्णे यो दूढ्यो व्यवहारस्तं कत् केन पथाऽतिक्रामेम तस्य पारं गच्छाम तद्विद्यया परिपूर्णा भवेमेति यावत्। अन्यत् पूर्ववत्॥६॥

भावार्थ:-विद्या चिकीर्षुभिर्विदुषां सविधं प्राप्य कार्यकारणविद्यामार्गप्रश्नान् कृत्वोत्तराणि लब्ध्वा क्रियाकौशलेन कार्याणि संसाध्य दु:खं निहत्य सुखानि लब्धव्यानि॥६॥

पदार्थ:-हे विद्वानो! (**व:**) इन स्थूल पदार्थों के (**ऋतस्य**) सत्य कारण का (**धर्णसि**) धारण करनेवाला (**कत्**) कहाँ है (**वरुणस्य**) जल आदि कार्यरूप पदार्थों का (**चक्षणम्**) देखना (**कत्**) कहाँ है तथा (**मह:**) महान् (**अर्यम्ण:**) सूर्य्यलोक का जो (**दूढ्य:**) अति गम्भीर दु:ख से ध्यान में आने योग्य व्यवहार है, उसको (**कत्**) किस (**पथा**) मार्ग से हम (**अति, क्रामेम**) पार हों अर्थात् उस विद्या से परिपूर्ण हों। और शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥६॥

भावार्थ:-विद्या प्राप्ति की इच्छावाले पुरुषों को चाहिये कि विद्वानों के समीप जाकर कार्य्य और कारण के विद्यामार्ग विषयक प्रश्नों को कर उनसे उत्तर पाकर क्रियाकुशलता से कामों को सिद्ध करके दु:ख का नाश कर सुख पावें॥६॥

अथ विदुष एतेषामुत्तराण्येवं दद्युरित्युपदिश्यते॥

अब विद्वान् जन इनके उत्तर ऐसे देवें, यह विषय अगले मन्त्र में कहा है॥

अ॒हं सो अ॑स्मि॒ य: पु॒रा सु॒ते वदा॑मि॒ कानि॑ चि॒त्।
तं मा॑ व्यन्त्या॒ध्यो॒३॑ वृको॒ न तृ॒ष्णजं॑ मृ॒गं वि॒त्तं मे॑ अ॒स्य रो॑दसी॥७॥

अ॒हम्। स:। अ॒स्मि॒। य:। पु॒रा। सु॒ते। वदा॑मि। कानि॑। चि॒त्। तम्। मा॒। व्य॒न्ति॒। आ॒ऽध्य॑:। वृक॑:। न। तृ॒ष्णऽज॑म्। मृ॒गम्। वि॒त्तम्। मे॒। अ॒स्य। रो॒द॒सी॒ इति॑॥७॥

पदार्थ:-(**अहम्**) अहमीश्वरो विद्वान् वा (**स:**) (**अस्मि**) (**य:**) (**पुरा**) सृष्टेर्विद्योत्पत्ते: प्राग्वा (**सुते**) उत्पन्नेऽस्मिन् कार्य्ये जगति (**वदामि**) उपदिशामि (**कानि**) (**चित्**) अपि (**तम्**) (**मा**) माम् (**व्यन्ति**)

कामयन्ताम्। **वाच्छन्दसि सर्वे विधयो भवन्ती**तीयङभावे यणादेशः लेट्प्रयोगोऽयम्। **(आध्यः)** समन्ताद् ध्यायन्ति चिन्तयन्ति ये ते **(वृकः)** स्तेनो व्याधः। **वृक इति स्तेननामसु पठितम्।** (निघं०३.२४) **(न)** इव **(तृष्णजम्)** तृष्णा जायते यस्मात्तम्। अत्र जन धातोर्डः। **ड्यापोः संज्ञाछन्दसोर्बहुलमि**ति ह्रस्वत्वम्। **(मृगम्) (वित्तं मे०)** इति पूर्ववत्॥७॥

अन्वयः-हे मनुष्या! योऽहं सृष्टिकर्ता विद्वान् वा सुतेऽस्मिञ्जगति कानिचित्पुरा वदामि सोऽहमस्मि सेवनीयः। तं माध्यो भवन्तो वृकस्तृष्णजं मृगं न व्यन्ति कामयन्तामन्यत्पूर्ववत्॥७॥

भावार्थः-अत्र श्लेषोपमालङ्कारौ। सर्वान् मनुष्यान् प्रतीश्वर उपदिशति हे मानवा! यूयं यथा मया सृष्टिं रचयित्वा वेदद्वारा यादृशा उपदेशाः कृताः सन्ति तान् तथैव स्वीकुरुत। उपास्यं मां विहायाऽन्यं कदाचिन्नोपासीरन्। यथा कश्चिन्मृगयायां प्रवर्त्तमानश्चोरो व्याधो वा मृगं प्राप्तुं कामयते, तथैव सर्वान् दोषान् हित्वा मां कामयध्वम्। एवं विद्वांसमपि॥७॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अहम्)** संसार का उत्पन्न करनेवाला **(सुते)** उत्पन्न हुए इस जगत् में **(कानि) (चित्)** किन्हीं व्यवहारों को **(पुरा)** सृष्टि के पूर्व वा विद्वान् मैं उत्पन्न हुए संसार में किन्हीं व्यवहारों को विद्या की उत्पत्ति से पहिले **(वदामि)** कहता हूं **(सः)** वह मैं सेवन करने योग्य **(अस्मि)** हूं **(तम्)** उस **(मा)** मुझको **(आध्यः)** अच्छी प्रकार चिन्तन करनेवाले आप लोग जैसे **(वृकः)** चोर वा व्याघ्र **(तृष्णजम्)** पियासे **(मृगम्)** हरिण को **(न)** वैसे **(व्यन्ति)** चाहो। और शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥७॥

भावार्थः-इस मन्त्र में श्लेष और उपमालङ्कार हैं। सब मनुष्यों के प्रति ईश्वर उपदेश करता है कि हे मनुष्यो! तुम लोग जैसे मैंने सृष्टि को रच के वेद द्वारा जैसे-जैसे उपदेश किये हैं, उनको वैसे ही ग्रहण करो और उपासना करने योग्य मुझको छोड़ के अन्य किसी की उपासना कभी मत करो। जैसे कोई जीव मृग या रसिक चोर वा बधेरा हरिण को प्राप्त करना चाहता है, वैसे ही सब दोषों को निर्मूल छोड़कर मेरी चाहना करो और ऐसे विद्वान् को भी चाहो॥७॥

अथ न्यायाधीशस्य समीपेऽर्थिप्रत्यर्थिनौ किंचित् क्लेशादिकं निवेदयेतां तयोर्यथावन्न्यायं स कुर्य्यादित्युपदिश्यते॥

अब न्यायाधीश के समीप वाद-विवाद करनेवाले वादी-प्रतिवादी जन अपने कुछ क्लेश का निवेदन करें और वह उनका न्याय यथावत् करे, इस विषय को अगले मन्त्र में कहा है॥

सं मा॑ तपन्त्य॒भितः॑ स॒पत्नी॑रिव॒ पर्श॑वः।
मू॒षो॒ न शि॒श्ना व्य॑दन्ति मा॒ध्यः॑ स्तो॒तार॑ं ते शतक्रतो वि॒त्तं मे॑ अ॒स्य रो॑दसी॥८॥

सम्। मा। तपन्ति। अभितः। सपत्नीःऽइव। पर्शवः। मूषः। न। शिश्ना। वि। अदन्ति। मा। आऽध्यः। स्तोतारम्। ते। शतक्रतो इति शतऽक्रतो। वित्तम्। मे। अस्य। रोदसी इति॥८॥

पदार्थः-(**सम्**) (**मा**) मां प्रजास्थं वा पुरुषम् (**तपन्ति**) क्लेशयन्ति (**अभितः**) सर्वतः (**सपत्नीरिव**) यथाऽनेकाः पत्न्यः समानमेकपतिं दुःखयन्ति (**पर्शवः**) परानन्यान् शृणन्ति हिंसन्ति ते पर्शवः पार्श्वस्था मनुष्यादयः प्राणिनः। (**मूषः**) आखवः। अत्र जातिपक्षमाश्रित्यैकवचनम्। (**न**) इव (**शिश्ना**) अशुद्धानि सूत्राणि (**वि**) विविधार्थे (**अदन्ति**) विच्छिद्य भक्षयन्ति (**मा**) (**आध्यः**) परस्य मनसि शोकादिजनकाः (**स्तोतारम्**) धर्मस्य स्तावकम् (**ते**) तव (**शतक्रतो**) असंख्यातोत्तमप्रज्ञ बहूत्तमकर्मन् वा न्यायाध्यक्ष (**वित्तं, मे, अस्य, रोदसी**) इति पूर्ववत्॥८॥

अत्राह निरुक्तकारः-**मूषो मूषिका इत्यर्थः। मूषिकाः पुनर्मुष्णातेः। मूषोऽप्येतस्मादेव। सन्तपन्ति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवः। मूषिका इवास्नातानि सूत्राणि व्यदन्ति। स्वाङ्गाभिधानं वा स्यात्। शिश्नानि व्यदन्तीति वा। सन्तपन्ति माध्यः कामाः। स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी। जानीतं मेऽस्य द्यावापृथिव्याविति। त्रितं कूपेऽवहितमेतत्सूक्तं प्रतिबभौ। तत्र ब्रह्मेतिहासमिश्रमृङ्मिश्रं गाथामिश्रं भवति। त्रितस्तीर्णतमो मेधया बभूव। अपि वा सङ्ख्यानामैवाभिप्रेतं स्यात्। एकतो द्वितस्त्रित इति त्रयो बभूवुः।** (निरु०४.५-६)॥८॥

अन्वयः-हे शतक्रतो न्यायाधीश! ते तव प्रजास्थं स्तोतारं मा मां ये पर्शवः सपत्नीरिवाभितः संतपन्ति य आध्यो मूषः शिश्ना व्यदन्ति न मा मामभितः संतपन्ति तानन्यायकारिणो जनांस्त्वं यथावच्छाधि। अन्यत्पूर्ववत्॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे न्यायाध्यक्षादयो मनुष्या! यूयं यथा सपत्न्यः स्वपतिमुद्वेजयन्ति, यथा वा स्वार्थसिद्ध्यसिद्धिका मूषिकाः परद्रव्याणि विनाशयन्ति, यथा च व्यभिचारिण्यो गणिकादयः स्त्रियः सौदामन्य इव प्रकाशवत्यः कामिनः शिश्नादिरोगद्वारा धर्मार्थकाममोक्षानुष्ठानप्रतिबन्धकत्वेन तं पीडयन्ति, तथा ये दस्व्यादयो मिथ्यानिश्चयकर्मवचनादस्मान् क्लेशयन्ति तान् संदण्डयैतानस्मांश्च सततं पालयत, नैवं विना सततं राज्यैश्वर्ययोगोऽधिको भवितुं शक्यः॥८॥

पदार्थः-हे (**शतक्रतो**) असंख्य उत्तम विचारयुक्त वा अनेकों उत्तम-उत्तम कर्म करनेवाले न्यायाधीश! (**ते**) आपकी प्रजा वा सेना में रहने और (**स्तोतारम्**) धर्म का गानेवाला मैं हूं (**मा**) मुझको जो (**पर्शवः**) औरों को मारने और तीर के रहनेवाले मनुष्य आदि प्राणी (**सपत्नीरिव**) (**अभितः, सम्, तपन्ति**) जैसे एक पति को बहुत स्त्रियां दुःखी करती हैं, ऐसे दुःख देते हैं। जो (**आध्यः**) दूसरे के मन में व्यथा उत्पन्न करनेहारे (**मूषः**) मूषे जैसे (**शिश्ना**) अशुद्ध सूतों को (**वि, अदन्ति**) विदार-विदार अर्थात्

काट-काट खाते हैं **(न)** वैसे **(मा)** मुझको संताप देते हैं, उन अन्याय करनेवाले जनों को तुम यथावत् शिक्षा करो। और शेष मन्त्रार्थ प्रथम मन्त्र के समान जानिये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे न्याय करने के अध्यक्ष आदि मनुष्यो! तुम जैसे सौतेली स्त्री अपने पति को कष्ट देती है वा जैसे अपने प्रयोजन मात्र का बनाव-बिगाड़ देखनेवाले मूषे पराये पदार्थों का अच्छी प्रकार नाश करते हैं और जैसे व्यभिचारिणी वेश्या आदि कामिनी दामिनी स्त्री दमकती हुई कामीजन के लिङ्ग आदि रोगरूपी कुकर्म्म के द्वारा उसके धर्म्म, अर्थ, काम और मोक्ष के करने की रुकावट से उस कामीजन को पीड़ा देती हैं, वैसे ही जो डाकू, चोर, चवाई, अताई, लड़ाई, भिड़ाई, करनेवाले झूठ की प्रतीति और झूठे कामों की बातों में हम लोगों को क्लेश देते हैं, उनको अच्छे प्रकार दण्ड देकर हम लोगों को तथा उनको भी निरन्तर पालो, ऐसे करने के विना राज्य का ऐश्वर्य्य नहीं बढ़ सकता॥८॥

अथ न्यायाधीशादिभिः सह प्रजाः कथं वर्त्तेरन्नित्युपदिश्यते॥

अब न्यायाधीशों के साथ प्रजाजन कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहा है॥

अ॒मी ये स॒प्त र॒श्मय॒स्तत्रा॑ मे नाभि॒रात॑ता।
त्रि॒तस्तद्वे॑दा॒प्यः स जा॑मि॒त्वाय॑ रेभति वि॒त्तं मे॑ अ॒स्य रो॑दसी॥९॥

अ॒मी इति॑। ये। स॒प्त। र॒श्मय॑ः। तत्र॑। मे। नाभि॑ः। आऽत॑ता। त्रि॒तः। तत्। वे॒दु॒। आ॒प्यः। सः। जा॒मि॒ऽत्वाय॑। रे॒भ॒ति॒। वि॒त्तम्। मे॒। अ॒स्य। रो॒दु॒सी॒ इति॑॥९॥

पदार्थः-**(अमी)** **(ये)** **(सप्त)** सप्ततत्वाङ्गमिश्रितस्य भावाः सप्तधा **(रश्मयः)** **(तत्र)** तस्मिन्। **ऋचि तुनुघे**ति दीर्घः। **(मे)** मम **(नाभिः)** शरीरमध्यस्था सर्वप्राणबन्धनाङ्गम् **(आतता)** समन्ताद्विस्तृता **(त्रितः)** त्रिभ्यो भूतभविष्यद्वर्त्तमानकालेभ्यः **(तत्)** तान् **(वेद)** जानाति **(आप्यः)** य आप्तेषु भवः सः **(सः)** **(जामित्वाय)** कन्यावत्पालनाय प्रजाभावाय **(रेभति)** अर्चति। अन्यत् पूर्ववत्॥९॥

अन्वयः-यत्रामी ये सप्त रश्मय इव सप्तधा नीतिप्रकाशाः सन्ति, तत्र मे नाभिराततता यत्र नैरन्तर्येण स्थितिर्मम तद् य आप्त्यो विद्वान् त्रितो वेद स जामित्वाय राजभोगाय प्रजा रेभति। अन्यत्सर्वं पूर्ववत्॥९॥

भावार्थः-यथा सूर्येण सह रश्मीनां शोभासङ्गौ स्तस्तथा राजपुरुषैः प्रजानां शोभासङ्गौ भवेताम्। यो मनुष्यः कर्मोपासनाज्ञानानि यथावत् विजानाति, सः प्रजापालने पितृवद्भूत्वा सर्वाः प्रजा रञ्जयितुं शक्नोति नेतरः॥९॥

पदार्थः-जहाँ **(अमी)** **(ये)** ये **(सप्त)** सात **(रश्मयः)** किरणों के समान नीतिप्रकाश हैं **(तत्र)** वहाँ **(मे)** मेरी **(नाभिः)** सब नसों को बांधनेवाली तोंद **(आतता)** फैली है, जिसमें निरन्तर मेरी स्थिति है

(तत्) उसको जो **(आप्त्यः)** सज्जनों में उत्तम जन **(त्रितः)** तीनों अर्थात् भूत, भविष्यत् और वर्त्तमान काल से **(वेद)** जाने अर्थात् रात-दिन विचारे **(सः)** वह पुरुष **(जामित्वाय)** राज्य भोगने के लिये कन्या के तुल्य **(रेभति)** प्रजाजनों की रक्षा तथा प्रशंसा और चाहना करता है। और अर्थ प्रथम मन्त्रार्थ के समान जानो॥९॥

भावार्थः-जैसे सूर्य्य के साथ किरणों की शोभा और सङ्ग है, वैसे राजपुरुषों के साथ प्रजाजनों की शोभा और सङ्ग हो तथा जो मनुष्य कर्म, उपासना और ज्ञान को यथावत् जानता है, वह प्रजा के पालने में पितृवत् होकर समस्त प्रजाजनों का मनोरञ्जन कर सकता है, और नहीं॥९॥

पुनरेते परस्परं कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर ये परस्पर कैसे वर्त्तें, यह विषय अगले मन्त्र में कहा है॥

अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी॥१०॥२१॥

अमी इति। ये। पञ्च। उक्षणः। मध्ये। तस्थुः। महः। दिवः। देवऽत्रा। नु। प्रऽवाच्यम्। सध्रीचीनाः। नि। ववृतुः। वित्तम्। मे। अस्य। रोदसी इति॥१०॥

पदार्थः-**(अमी)** प्रत्यक्षाप्रत्यक्षाः **(ये)** **(पञ्च)** यथाग्निवायुमेघविद्युत्सूर्य्यमण्डलप्रकाशास्तथा **(उक्षणः)** जलस्य सुखस्य वा सेक्तारो महान्तः। **उक्षा इति महन्नामसु पठितम्।** (निघं०३.३) **(मध्ये)** **(तस्थुः)** तिष्ठन्ति **(महः)** महतः **(दिवः)** दिव्यगुणपदार्थयुक्तस्याकाशस्य **(देवत्रा)** देवेषु विद्वत्सु वर्त्तमानाः **(नु)** शीघ्रम् **(प्रवाच्यम्)** अध्यापनोपदेशार्थं विद्याऽऽज्ञापकं वचः **(सध्रीचीनाः)** सहवर्त्तमानाः **(नि)** **(वावृतुः)** वर्त्तन्ते। अत्र वर्त्तमाने लिट्। व्यत्ययेन परस्मैपदम्। **तुजादीनां दीर्घोऽभ्यासस्ये**ति दीर्घत्वम्। अन्यत् पूर्ववत्॥१०॥

अन्वयः-हे सभाध्यक्षादयो जना! युष्माभिर्यथाऽमी उक्षणः पञ्च महो दिवो मध्ये तस्थुर्यथा च सध्रीचीना देवत्रा निवावृतुस्तथा ये नितरां वर्त्तन्ते तान् प्रजाराजप्रसङ्गिनः प्रति विद्यान्यायप्रकाशवचो नु प्रवाच्यम्। अन्यत् पूर्ववत्॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यादयो घटपटादिपदार्थेषु संभुज्य वृष्ट्यादिद्वारा महत्सुखं सम्पादयन्ति सर्वेषु पृथिव्यादिपदार्थेष्वाकर्षणादिना सहिता वर्त्तन्ते च। तथैव सभाद्यध्यक्षादयो महद्गुणविशिष्टान् मनुष्यान् सम्पाद्यैतैः सह न्यायप्रीतिभ्यां सह वर्त्तित्वा सुखिनः सततं कुर्युः॥१०॥

पदार्थः-हे सभाध्यक्ष आदि सज्जनो! तुमको जैसे **(अमी)** प्रत्यक्ष वा अप्रत्यक्ष **(उक्षणः)** जल सींचने वा सुख सींचनेहारे बड़े **(पञ्च)** अग्नि, पवन, बिजुली, मेघ और सूर्य्यमण्डल का प्रकाश **(महः)** अपार **(दिवः)** दिव्यगुण और पदार्थयुक्त आकाश के **(मध्ये)** बीच **(तस्थुः)** स्थिर हैं और जैसे

(सध्रीचीना:) एक साथ रहनेवाले गुण **(देवत्रा)** विद्वानों में **(नि, वावृतु:)** निरन्तर वर्त्तमान हैं, वैसे **(ये)** जो निरन्तर वर्त्तमान हैं, उन प्रजा तथा राजाओं के संगियों के प्रति विद्या और न्याय प्रकाश की बात **(नु)** शीघ्र **(प्रवाच्यम्)** कहनी चाहिये। और शेष मन्त्रार्थ प्रथम मन्त्र के समान जानना चाहिये॥१०॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य आदि घटपटादि पदार्थों में संयुक्त होकर वृष्टि आदि के द्वारा अत्यन्त सुख को उत्पन्न करते हैं और समस्त पृथिवी आदि पदार्थों में आकर्षणशक्ति से वर्त्तमान हैं वैसे ही सभाध्यक्ष आदि महात्मा जनों के गुणों वा बड़े-बड़े उत्तम गुणों से युक्त मनुष्यों को सिद्ध करके इनसे न्याय और प्रीति के साथ वर्त्तकर निरन्तर सुखी करें॥१०॥

पुनरेतै: सह प्रजापुरुषा: कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर इन राजपुरुषों के साथ प्रजापुरुष कैसे वर्त्ताव रक्खें, यह विषय अगले मन्त्र में कहा है॥

सुऽपर्णा एत आसते मध्य आरोधने दिव:।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी॥ ११॥

सुऽपर्णा:। एते। आसते। मध्ये। आऽरोधने। दिव:। ते। सेधन्ति। पथ:। वृकम्। तरन्तम्। यह्वती:। अप:। वित्तम्। मे। अस्य। रोदसी इति॥ ११॥

पदार्थ:-**(सुपर्णा:)** सूर्यस्य किरणा: **(एते)** **(आसते)** **(मध्ये)** **(आरोधने)** **(दिव:)** सूर्यप्रकाशयुक्तस्याकाशस्य **(ते)** **(सेधन्ति)** निवर्त्तयन्तु **(पथ:)** मार्गान् **(वृकम्)** विद्युतम् **(तरन्तम्)** संप्लावकम् **(यह्वती:)** यह्वान् महत इवाचरन्ती। **यह्व इति महन्नामसु पठितम्।** (निघं०३.३) यह्वशब्दादाचारे क्विप्। **(अप:)** जलानि प्राणवती प्रजा वा। अन्यत् पूर्ववत्॥११॥

अन्वय:-हे प्रजास्था मनुष्या! यथैते सुपर्णा दिवो मध्य आरोधने आसते। यथा च ते तरन्तं वृकं प्रक्षिप्य यह्वतीरप: पथश्च सेधन्ति, तथैव यूयं राजकर्माणि सेवध्वम्। अन्यत्पूर्ववत्॥११॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथेश्वरनियमे सूर्यकिरणादय: पदार्था यथावद्वर्त्तन्ते तथैव प्रजास्थैर्युष्माभिरपि राजनीतिनियमे च वर्त्तितव्यम्। यथैते सभाद्यध्यक्षादयो दुष्टान् मनुष्यान् निवर्त्य प्रजा रक्षन्ति तथैव युष्माभिरप्येते सदैवेर्ष्यादीन्निवर्त्य रक्ष्या:॥११॥

पदार्थ:-हे प्रजाजनो! आप लोग जैसे **(एते)** ये **(सुपर्णा:)** सूर्य्य की किरणें **(दिव:)** सूर्य्य के प्रकाश से युक्त आकाश के **(मध्ये)** बीच **(आरोधने)** रुकावट में **(आसते)** स्थिर हैं और जैसे **(ते)** वे **(तरन्तम्)** पार कर देनेवाली **(वृकम्)** बिजुली को गिरा के **(यह्वती:)** बड़ों के वर्त्ताव रखते हुए **(अप:)** जलों और **(पथ:)** मार्गों को **(सेधन्ति)** सिद्ध करते हैं, वैसे ही आप लोग राज कामों को सिद्ध करो। और शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर के नियमों में सूर्य की किरणें आदि पदार्थ यथावत् वर्त्तमान हैं, वैसे ही तुम प्रजा-पुरुषों को भी राजनीति के नियमों में वर्त्तना चाहिये। जैसे सभाध्यक्ष आदि जन दुष्ट मनुष्यों की निवृत्ति करके प्रजाजनों की रक्षा करते हैं, वैसे तुम लोगों को भी ये ईर्ष्या, अभिमान आदि दोषों को निवृत्त करके रक्षा करने योग्य हैं॥११॥

पुनरेतान् प्रति विद्वांसः किं किमुपदिशेयुरित्युपदिश्यते॥

फिर विद्वान् जन इनके प्रति क्या-क्या उपदेश करें, यह विषय अगले मन्त्र में कहा है॥

नव्यं॑ तदु॒क्थ्यं॑ हि॒तं देवा॑सः सुप्रवाच॒नम्।
ऋ॒तमर्॑षन्ति॒ सिन्ध॑वः स॒त्यं ता॑ता॒न॒ सूर्यो॑ वि॒त्तं मे॑ अ॒स्य रो॑दसी॥१२॥

नव्य॑म्। तत्। उ॒क्थ्य॑म्। हि॒तम्। देवा॑सः। सु॒ऽप्र॒वा॒च॒नम्। ऋ॒तम्। अ॒र्ष॒न्ति॒। सिन्ध॑वः। स॒त्यम्। त॒ता॒न॒। सूर्यः॑। वि॒त्तम्। मे॒। अ॒स्य। रो॒द॒सी॒ इति॑॥१२॥

पदार्थः-(**नव्यम्**) उत्तमेषु नवेषु नूतनेषु व्यवहारेषु भवम् (**तत्**) (**उक्थ्यम्**) उक्थेषु प्रशंसनीयेषु भवम् (**हितम्**) सर्वाविरुद्धम् (**देवासः**) विद्वांसः (**सुप्रवाचनम्**) सुष्ठ्वध्यापनमुपदेशनं यथा तथा (**ऋतम्**) वेदसृष्टिक्रमप्रत्यक्षादिप्रमाणविद्वदाचरणानुभवस्वात्मपवित्रतानामनुकूलम् (**अर्षन्ति**) प्रापयन्तु। लेट् प्रयोगोऽयम्। (**सिन्धवः**) यथा समुद्राः (**सत्यम्**) जलम्। **सत्यमित्युदकनामसु पठितम्।** (निघं०१.१२) (**ततान**) विस्तारयति। **तुजादित्वाद्दीर्घः।** (**सूर्य्यः**) सविता। अन्यत् पूर्ववत्॥१२॥

अन्वयः-हे देवासो! भवन्तो यथा सिन्धवः सत्यमर्षन्ति सूर्यश्च ततान तथा यद्दतं नव्यमुक्थ्यं हितं तत् सुप्रवाचनमर्षन्तु। अन्यत् पूर्ववत्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सागरेभ्यो जलमुत्थितमूर्ध्वं गत्वा सूर्यातपेन वितत्य प्रवर्ष्य च सर्वेभ्यः प्रजाजनेभ्यः सुखं प्रयच्छति तथा विद्वज्जनैर्नित्यनवीनविचारेण गूढा विद्या ज्ञात्वा प्रकाश्य सकलहितं सम्पाद्य सत्यधर्मं विस्तार्य प्रजाः सतत सुखयितव्याः॥१२॥

पदार्थः-हे (**देवासः**) विद्वानो! आप जैसे (**सिन्धवः**) समुद्र (**सत्यम्**) जल की (**अर्षन्ति**) प्राप्ति करावें और (**सूर्य्यः**) सूर्य्यमण्डल (**ततान**) उसका विस्तार कराता अर्थात् वर्षा कराता है, वैसे जो (**ऋतम्**) वेद, सृष्टिक्रम, प्रत्यक्षादि प्रमाण, विद्वानों के आचरण, अनुभव अर्थात् आप ही आप कोई बात मन से उत्पन्न होना और आत्मा की शुद्धता के अनुकूल (**नव्यम्**) उत्तम नवीन-नवीन व्यवहारों और (**उक्थ्यम्**) प्रशंसनीय वचनों में होनेवाला (**हितम्**) सबका प्रेमयुक्त पदार्थ (**तत्**) उसको (**सुप्रवाचनम्**) अच्छी प्रकार पढ़ाना, उपदेश करना जैसे बने वैसे प्राप्त कीजिये। शेष मन्त्रार्थ प्रथम मन्त्र के समान जानना चाहिये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे समुद्रों से उड़कर जल ऊपर को चढ़ा हुआ, सूर्य्य के ताप से फैल कर, बरस के, सब प्रजाजनों को सुख देता है, वैसे विद्वान् जनों को नित्य नवीन-नवीन विचार से गूढ़ विद्याओं को जान और प्रकाशित कर सबके हित का सम्पादन और सत्य धर्म्म के विचार से प्रजा को निरन्तर सुख देना चाहिये॥१२॥

पुनर्विद्वान् प्रजासु किं कुर्यादित्युपदिश्यते॥

फिर विद्वान् प्रजाजनों में क्या करे, यह विषय अगले मन्त्र में कहा है॥

अग्ने॒ तव॒ त्यदु॒क्थ्यं॑ दे॒वेष्व॒स्त्याप्य॑म्।
स नः॑ स॒त्तो म॑नु॒ष्वदा दे॒वान् य॑क्षि वि॒दुष्ट॑रो वि॒त्तं मे॑ अ॒स्य रो॑दसी॥१३॥

अग्ने॑। तव॑। त्यत्। उ॒क्थ्य॑म्। दे॒वेषु॑। अ॒स्ति॒। आप्य॑म्। सः। नः॒। स॒त्तः। म॒नु॒ष्वत्। आ। दे॒वान्। य॒क्षि॒। वि॒दुः॒ऽत॑रः। वि॒त्तम्। मे॒। अ॒स्य। रो॒दसी॒ इति॑॥१३॥

पदार्थः-(**अग्ने**) सकलविद्याविज्ञातः (**तव**) (**त्यत्**) तत् (**उक्थ्यम्**) प्रकृष्टं विद्यावचः (**देवेषु**) विद्वत्सु (**अस्ति**) वर्त्तते (**आप्यम्**) आप्तुं योग्यम्। अत्राप्लृधातोर्बाहुलकादौणादिको यन् प्रत्ययः। (**सः**) (**नः**) अस्मान् (**सत्तः**) अविद्यादिदोषान् हिंसित्वा विज्ञानप्रदः। अत्र बाहुलकाद् सद्लृधातोरौणादिकः क्तः प्रत्ययः। (**मनुष्वत्**) मनुषु मनुष्येष्विव (**आ**) (**देवान्**) विदुषः (**यक्षि**) सङ्गमयेत् (**विदुष्टरः**) अतिशयेन विद्वान्। अन्यत् पूर्ववत्॥१३॥

अन्वयः-हे अग्ने विद्वन्! यस्य तव त्यद्यदाप्यं मनुष्वदुक्थ्यं देवेष्वस्ति स सत्तो विदुष्टरस्त्वं नोऽस्मान् देवान् सम्पादयन्नायक्षि। अन्यत् पूर्ववत्॥१३॥

भावार्थः-यः सर्वा विद्या अध्याप्य विद्वत्सम्पादने कुशलोऽस्ति तस्मात् सकलविद्याधर्मोपदेशान् सर्वे मनुष्या गृह्णीयुः, नेतरस्मात्॥१३॥

पदार्थः-हे (**अग्ने**) समस्त विद्याओं को जाने हुए विद्वान् जन! (**तव**) आपका (**त्यत्**) वह जो (**आप्यम्**) पाने योग्य (**मनुष्वत्**) मनुष्यों में जैसा हो वैसा (**उक्थ्यम्**) अति उत्तम विद्यावचन (**देवेषु**) विद्वानों में (**अस्ति**) है। (**सः**) वह (**सत्तः**) अविद्या आदि दोषों को नाश करनेवाले (**विदुष्टरः**) अति विद्या पढ़े हुए आप (**नः**) हम लोगों को (**देवान्**) विद्वान् करते हुए उनकी (**आ यक्षि**) संगति को पहुंचाइये अर्थात् विद्वानों की पदवी को पहुंचाइये। और मन्त्रार्थ प्रथम मन्त्र के समान है॥१३॥

भावार्थः-जो विद्वान् समस्त विद्या को पढ़ाकर विद्वान्पन के उत्पन्न कराने में कुशल है, उससे समस्त विद्या और धर्म के उपदेशों को सब मनुष्य ग्रहण करें, और से नहीं॥३॥

पुनः स तत्र किं कुर्यादित्युपदिश्यते॥

फिर वह विद्वान् वहाँ क्या करे, इस विषय का उपदेश अगले मन्त्र में किया है॥

सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी॥ १४॥

सत्तः। होता। मनुष्वत्। आ। देवान्। अच्छ। विदुःऽतरः। अग्निः। हव्या। सुसूदति। देवः। देवेषु। मेधिरः। वित्तम्। मे। अस्य। रोदसी इति॥ १४॥

पदार्थः-(**सत्तः**) विज्ञानवान् दुःखहन्ता (**होता**) ग्रहीता (**मनुष्वत्**) यथोत्तमा मनुष्या श्रेष्ठानि कर्माण्यनुष्ठाय पापानि त्यक्त्वा सुखिनो भवन्ति तथा (**आ**) (**देवान्**) विदुषो दिव्यक्रियायोगान् वा (**अच्छ**) सम्यग्रीत्या। अत्र **निपातस्य चे**ति दीर्घः। (**विदुष्टरः**) अतिशयेन वेत्ता (**अग्निः**) सद्विद्याया वेत्ता विज्ञापयिता वा (**हव्या**) दातुं ग्रहीतुं योग्यानि (**सुषूदति**) ददाति (**देवः**) प्रशस्तो विद्वान्मनुष्यः (**देवेषु**) विद्वत्सु (**मेधिरः**) मेधावी। अत्र **मेधारथाभ्यामीरन्निरचौ।** (अष्टा०वा०५.२।१०९) इति वार्त्तिकेन मत्वर्थीय ईरन् प्रत्ययः। (**वित्तं, मे०**) इति पूर्ववत्॥ १४॥

अन्वयः-हे मनुष्या! यः सत्तो देवान् होता विदुष्टरोऽग्निर्मेधिरो देवेषु देवो मनुष्वद्धव्याच्छ सुषूदति तस्मात् सर्वैर्विद्याशिक्षे ग्राह्ये। अन्यत्पूर्ववत्॥ १४॥

भावार्थः-ईदृशो भाग्यहीनः को मनुष्यः स्याद्यो विदुषां सकाशाद् विद्याशिक्षे अगृहीत्वैषां विरोधी भवेत्॥ १४॥

पदार्थः-हे मनुष्यो! जो (**सत्तः**) विज्ञानवान् दुःख दुःख हरनेवाला (**देवान्**) विद्वान् वा दिव्य-दिव्य क्रियायोगों का (**होता**) ग्रहण करनेवाला (**विदुष्टरः**) अत्यन्त ज्ञानी (**अग्निः**) श्रेष्ठ विद्या का जानने वा समझानेवाला (**मेधिरः**) बुद्धिमान् (**देवेषु**) विद्वानों में (**देवः**) प्रशंसनीय विद्वान् मनुष्य (**मनुष्वत्**) जैसे उत्तम मनुष्य श्रेष्ठ कर्मों का अनुष्ठान कर पापों को छोड़ सुखी होते हैं, वैसे (**हव्या**) देने-लेने योग्य पदार्थों को (**अच्छ आ, सुषूदति**) अच्छी रीति से अत्यन्त देता है, उस उत्तम विद्वान् से विद्या और शिक्षा को ग्रहण करनी चाहिये॥ १४॥

भावार्थः-ऐसा भाग्यहीन कौन जन होवे जो विद्वानों के समीप से विद्या और शिक्षा न लेके और इनका विरोधी हो॥ १४॥

पुनरेतं कीदृशं प्राप्नुयादित्युपदिश्यते॥

फिर कैसे इसको पावे, यह उपदेश अगले मन्त्र में किया है॥

ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी॥ १५॥ २२॥

ब्रह्मा। कृणोति। वरुणः। गातुऽविदम्। तम्। ईमहे। वि। ऊर्णोति। हृदा। मतिम्। नव्यः। जायताम्। ऋतम्। वित्तम्। मे। अस्य। रोदसी इति॥ १५॥

पदार्थः-(**ब्रह्म**) परमेश्वरः। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। (**कृणोति**) करोति (**वरुणः**) सर्वोत्कृष्टः (**गातुविदम्**) वेदवाग्वेत्तारम् (**तम्**) (**ईमहे**) याचामहे (**वि**) (**ऊर्णोति**) निष्पादयति (**हृदा**) हृदयेन। अत्र **पद्दन्नो०।** (अष्टा०६.१.६३) इति हृदयस्य हृदादेशः। (**मतिम्**) विज्ञानम् (**नव्यः**) नवीनो विद्वान् (**जायताम्**) (**ऋतम्**) सत्यरूपम् (**वित्तं, मे, अस्य०**) इति पूर्ववत्॥ १५॥

अन्वयः-वयं यदृतं ब्रह्म वरुणो गातुविदं कृणोति तमीमहे तत्कृपया यो नव्यो विद्वान् हृदा मतिं व्यूर्णोति सोऽस्माकं मध्ये जायताम्। अन्यत् पूर्ववत्॥ १५॥

भावार्थः-नहि कस्यचिन्मनुष्यस्योपरि प्राक्पुण्यसंचयविशुद्धक्रियमाणाभ्यां कर्मभ्यां विना परमेश्वरानुग्रहो जायते। नह्येतेन विना कश्चित्पूर्णां विद्यां प्राप्तुं शक्नोति तस्मात्सर्वैर्मनुष्यैरस्माकं मध्ये प्राप्तपूर्णविद्याः शुभगुणकर्मस्वभावयुक्ता मनुष्याः सदा भूयासुरिति परमात्मा प्रार्थनीयः। एवं नित्यं प्रार्थितः सन्नयं सर्वव्यापकतया तेषामात्मानं सम्प्रकाशयतीति निश्चयः॥ १५॥

पदार्थः-हम लोग जो (**ऋतम्**) सत्यस्वरूप (**ब्रह्म**) परमेश्वर वा (**वरुणः**) सबसे उत्तम विद्वान् (**गातुविदम्**) वेदवाणी के जाननेवाले को (**कृणोति**) करता है (**तम्**) उसको (**ईमहे**) याचते अर्थात् उससे मांगते हैं कि उसकी कृपा से जो (**नव्यः**) नवीन विद्वान् (**हृदा**) हृदय से (**मतिम्**) विशेष ज्ञान को (**व्यूर्णोति**) उत्पन्न करता है अर्थात् उत्तम-उत्तम रीतियों को विचारता है, वह हम लोगों के बीच (**जायताम्**) उत्पन्न हो। शेष अर्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥ १५॥

भावार्थः-किसी मनुष्य पर पिछले पुण्य इकट्ठे होने और विशेष शुद्ध क्रियमाण कर्म करने के विना परमेश्वर की दया नहीं होती और उक्त व्यवहार के विना कोई पूरी विद्या नहीं पा सकता, इससे सब मनुष्यों को परमात्मा की ऐसी प्रार्थना करनी चाहिये कि हम लोगों में परिपूर्ण विद्यावान् अच्छे-अच्छे गुण, कर्म, स्वभावयुक्त मनुष्य सदा हों। ऐसी प्रार्थना को नित्य प्राप्त हुआ परमात्मा सर्वव्यापकता से उनके आत्मा का प्रकाश करता है, यह निश्चय है॥ १५॥

अथायं मार्गः कीदृश इत्युपदिश्यते॥

अब यह मार्ग कैसा है, यह विषय अगले मन्त्र में कहा है॥

असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी॥ १६॥

असौ। यः। पन्थाः। आदित्यः। दिवि। प्रऽवाच्यम्। कृतः। न। सः। देवाः। अतिऽक्रमे। तम्। मर्तासः। न। पश्यथ। वित्तम्। मे। अस्य। रोदसी इति॥ १६॥

पदार्थः-(**असौ**) (**यः**) (**पन्थाः**) वेदप्रतिपादितो मार्गः (**आदित्यः**) विनाशरहितः सूर्य्यवत्प्रकाशकः (**दिवि**) सर्वविद्याप्रकाशे (**प्रवाच्यम्**) प्रकृष्टतया वक्तुं योग्यं यथास्यात्तथा (**कृतः**) नितरां स्थापितः (**न**) निषेधे (**सः**) (**देवाः**) विद्वांसः (**अतिक्रमे**) अतिक्रमितुमुल्लङ्घितुम् (**तम्**) मार्गम् (**मर्त्तासः**) मरणधर्माणः (**न**) निषेधे (**पश्यथ**) (**वित्तं, मे, अस्य**) इति पूर्ववत्॥१६॥

अन्वयः-हे देवा! असावादित्यो यः पन्था दिवि प्रवाच्यं कृतः स युष्माभिर्नातिक्रमेऽतिक्रमितुं न उल्लङ्घितुं न योग्यः। हे मर्त्तासस्तं पूर्वोक्तं यूयं न पश्यथ। अन्यत् पूर्ववत्॥१६॥

भावार्थः-मनुष्यैर्यो वेदोक्तो मार्गः स एव सत्य इति विज्ञाय सर्वाः सत्यविद्याः प्राप्य सदानन्दितव्यम्। सोऽयं विद्वद्भिर्नैव कदाचित् खण्डनीयो विद्यया विनाऽयं विज्ञातोऽपि न भवति॥१६॥

पदार्थः-हे (**देवाः**) विद्वान् लोगो! (**असौ**) यह (**आदित्यः**) अविनाशी सूर्य्य के तुल्य प्रकाश करनेवाला (**यः**) जो (**पन्थाः**)वेद से प्रतिपादित मार्ग (**दिवि**) समस्त विद्या के प्रकाश में (**प्रवाच्यम्**) अच्छे प्रकार से कहने योग्य जैसे हो वैसे (**कृतः**) ईश्वर ने स्थापित किया (**सः**) वह तुम लोगों को (**अतिक्रमे**) उल्लङ्घन करने योग्य (**न**) नहीं है। हे (**मर्त्तासः**) केवल मरने-जीने वाले विचाररहित मनुष्यो! (**तम्**) उस पूर्वोक्त मार्ग को तुम (**न**) नहीं (**पश्यथ**) देखते हो। शेष मन्त्रार्थ पूर्व के तुल्य जानना चाहिये॥१६॥

भावार्थः-मनुष्यों को चाहिये कि जो वेदोक्त मार्ग है वही सत्य है, ऐसा जान और समस्त सत्यविद्याओं को प्राप्त होकर सदा आनन्दित हों, सो यह वेदोक्त मार्ग विद्वानों को कभी खण्डन करने योग्य नहीं और यह मार्ग विद्या के विना विशेष जाना भी नहीं जाता॥१६॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह विषय अगले मन्त्र में कहा है॥

त्रितःकूपेऽवहितो देवान् हवत ऊतये।

तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी॥१७॥

त्रितः। कूपे। अवऽहितः। देवान्। हवते। ऊतये। तत्। शुश्राव। बृहस्पतिः। कृण्वन्। अंहूरणात्। उरु। वित्तम्। मे। अस्य। रोदसी इति॥१७॥

पदार्थः-(**त्रितः**) यस्त्रीन् विषयान् विद्याशिक्षाब्रह्मचर्याणि तनोति सः। अत्र त्र्युपपदात्तनोतेरौणादिको डः प्रत्ययः। (**कूपे**) कूपाकारे हृदये (**अवहितः**) अवस्थितः (**देवान्**) दिव्यगुणान्वितान् विदुषो दिव्यान् गुणान् वा (**हवते**) गृह्णाति। अत्र **बहुलं छन्दसी**ति शपः स्थाने श्लोरभावः। (**ऊतये**) रक्षणाद्याय (**तत्**) विद्याध्यापनम् (**शुश्राव**) श्रुतवान् (**बृहस्पतिः**) बृहत्या वाचः

पालकः **(कृण्वन्)** कुर्वन् **(अंहूरणात्)** अंहूरं पापं विद्यतेऽस्मिन् व्यवहारे ततः **(उरु)** बहु **(वित्तं, मे, अस्य०)** इति पूर्ववत्॥१७॥

अन्वयः-य उरु तच्छ्रवणं शुश्राव स विज्ञानं कृण्वन् त्रितः कूपेऽवहितो बृहस्पतिरंहूरणात् पृथग्भूत्वोतये देवान् हवते। अन्यत् पूर्ववत्॥१७॥

भावार्थः-यो मनुष्यो देहधारी जीवास्स्वबुद्ध्या प्रयत्नेन विदुषां सकाशात् सर्वा विद्याः श्रुत्वा मत्वा निदिध्यास्य साक्षात्कृत्वा दुष्टगुणस्वभावपापानि त्यक्त्वा विद्वान् जायते, स आत्मशरीररक्षणादिकं प्राप्य बहुसुखं प्राप्नोति॥१७॥

पदार्थः-जो **(उरु)** बहुत **(तत्)** उस विद्या के पाठ को **(शुश्राव)** सुनता है, वह विज्ञान को **(कृण्वन्)** प्रकट करता हुआ **(त्रितः)** विद्या, शिक्षा और ब्रह्मचर्य्य इन तीन विषयों का विस्तार करने अर्थात् इनको बढ़ाने **(कूपे)** कूआ के आकार वाले अपने हृदय में **(अवितः)** स्थिरता रखने और **(बृहस्पतिः)** बड़ी वेदवाणी का पालनेहारा **(अंहूरणान्)** जिस व्यवहार में अधर्म है, उससे अलग होकर **(ऊतये)** रक्षा, आनन्द, कान्ति, प्रेम, तृप्ति आदि अनेकों सुखों के लिये **(देवान्)** दिव्य गुणयुक्त विद्वानों वा दिव्य गुणों को **(हवते)** ग्रहण करता है। और शेष मन्त्रार्थ प्रथम के तुल्य जानना चाहिये॥१७॥

भावार्थः-जो मनुष्य वा देहधारी जीव अर्थात् स्त्री आदि भी अपनी बुद्धि से प्रयत्न के साथ पण्डितों की उत्तेजना से समस्त विद्याओं को सुन, मान, विचार और प्रकट कर खोटे गुण, स्वभाव वा खोटे कामों को छोड़ कर विद्वान् होता है, वह आत्मा और शरीर की रक्षा आदि को पाकर बहुत सुख पाता है॥१७॥

पुनः स कीदृश इत्युपदिश्यते॥

फिर वह कैसा है, यह अगले मन्त्र में उपदेश किया है॥

अरुणो मा सकृद् वृकः पथा यन्तं ददर्श हि।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी॥१८॥

अरुणः। मा। सकृत्। वृकः। पथा। यन्तम्। ददर्श। हि। उत्। जिहीते। निऽचाय्य। तष्टाऽइव। पृष्टिऽआमयी। वित्तम्। मे। अस्य। रोदसी इति॥१८॥

पदार्थः-**(अरुणः)** य ऋच्छति सर्वा विद्या स आरोचको वा। अत्र ऋधातोरौणादिक उनच् प्रत्ययः। **(मा, सकृत्)** मामेकवारम्। अथवैकपद्यम्, मासानां चार्द्धमासादीनां च कर्त्ता। अत्र मासकृदित्येकं पदं निरुक्तकारप्रामाण्यादनुमीयते। अथ शाकल्यस्तु **(मा, सकृत्)** इति पदद्वयमभिजानीते। **(वृकः)** यथा चन्द्रमाः शान्तगुणस्तथा **(पथा)** उत्तममार्गेण **(यन्तम्)** गच्छन्तं प्राप्नुवन्तं वा। इण् धातोः शतृ प्रत्ययः।

(ददर्श) पश्यति **(हि)** खलु **(उत्)** उत्कृष्टे **(जिहीते)** विज्ञापयति **(निचाय्य)** समाधाय। अत्र निशामनार्थस्य चायृ धातोः प्रयोगः। **अन्येषामपी**ति दीर्घश्च। **(तष्टेव)** यथा तक्षकः शिल्पी शिल्पविद्याव्यवहारान् विज्ञापयति तथा **(पृष्ट्यामयी)** पृष्टौ पृष्ठ आमयः क्लेशरूपो रोगो विद्यते यस्य सः। अन्यत्पूर्ववत्॥१८॥

अत्र निरुक्तम्। **वृकश्चन्द्रमा भवति। विवृतज्योतिष्को वा। विकृतज्योतिष्को वा। विक्रान्तज्योतिष्को वा। अरुण आरोचनः। मासकृन्मासानां चार्धमासानां च कर्ता भवति। चन्द्रमा वृकः। पथा यन्तं ददर्श नक्षत्रगणम्। अभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चन्द्रमाः। तक्ष्णुवन्निव पृष्ठरोगी। जानीतं मेऽस्य द्यावापृथिव्याविति।** (निरु०५.२०-२१)॥१८॥

अन्वयः-योऽरुणो वृको मासकृत् पथा यन्तं ददर्श स निचाय्य पृष्ट्यामयी तष्टे वोज्जिहीते हि। अन्यत्पूर्ववत्॥१८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यो विद्वान् चन्द्रवच्छान्तस्वभावं सूर्य्यवत् विद्याप्रकाशकरणं स्वीकृत्य विश्वस्मिन् सर्वा विद्याः प्रसारयति स एवाप्तोऽस्ति॥१८॥

पदार्थः-जो **(अरुणः)** समस्त विद्याओं को प्राप्त होता वा प्रकाशित करता **(वृकः)** शान्ति आदि गुणयुक्त चन्द्रमा के समान विद्वान् **(मा, सकृत्)** मुझको एक बार **(पथा, यन्तम्)** अच्छे मार्ग में चलते हुए को **(ददर्श)** देखता वा उक्त गुणयुक्त महीना आदि काल विभागों को करनेवाले चन्द्रमा के तुल्य विद्वान् अच्छे मार्ग से चलते हुए को देखता है, वह **(निचाय्य)** यथायोग्य समाधान देकर **(पृष्ट्यामयी)** पीठ में क्लेशरूप रोगवान् **(तष्टेव)** शिल्पी विद्वान् जैसे शिल्प व्यवहारों को समझाता वैसे **(उज्जिहीते)** उत्तमता से समझाता **(हि)** ही है। शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥१८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो विद्वान् चन्द्रमा के तुल्य शान्तस्वभाव और सूर्य्य के तुल्य विद्या के प्रकाश करने को स्वीकार करके संसार में समस्त विद्याओं को फैलाता है, वही आप्त अर्थात् अति उत्तम विद्वान् है॥१८॥

पुनस्तेन युक्ता वयं कीदृशा भवेमेत्युपदिश्यते॥

फिर उससे युक्त हम लोग कैसे होवें, यह विषय अगले मन्त्र में कहा है॥

एनाङ्गूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥१९॥२३॥१५॥

एना। आङ्गूषेण। वयम्। इन्द्रऽवन्तः। अभि। स्याम। वृजने। सर्वऽवीराः। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥१९॥

पदार्थः-**(एना)** एनेन **(आङ्गूषेण)** परमविदुषा **(वयम्) (इन्द्रवन्तः)** परमैश्वर्य्ययुक्त इन्द्रस्तद्वन्तः **(अभि)** आभिमुख्ये **(स्याम)** भवेम **(वृजने)** विद्याधर्मयुक्ते बले। **वृजनमिति बलनामसु पठितम्।** (निघं०२.९) **(सर्ववीराः)** सर्वे च ते वीराश्च। अन्यत् पूर्ववत्॥१९॥

अन्वयः-येनैनाङ्गूषेण विदुषा सर्ववीरा इन्द्रवन्तो वयं वृजनेऽभिष्याम नस्तन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्मामहन्ताम्॥१९॥

भावार्थः-मनुष्यैर्यस्याध्यापनेन विद्यासुशिक्षे वर्धेतां तस्य सङ्गेन सर्वा विद्याः सर्वथा निश्चेतव्याः॥१९॥

अत्र विश्वेषां देवानां गुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति पञ्चोत्तरशततमं १०५ सूक्तं पञ्चदशोऽनुवाकस्त्रयोविंशो २३ वर्गश्च समाप्तः॥

पदार्थः-जिस **(एना)** इस **(आङ्गूषेण)** परम विद्वान् से **(सर्ववीराः)** समस्त वीरजन **(इन्द्रवन्तः)** जिनका परमैश्वर्य्ययुक्त सभापति है व **(वयम्)** हम लोग **(वृजने)** विद्याधर्मयुक्त बल में **(अभि, स्याम)** अभिमुख हों, अर्थात् सब प्रकार से उसमें प्रवृत्त हों **(नः)** हम लोगों के **(तत्)** उस विज्ञान को **(मित्रः)** प्राण **(वरुणः)** उदान **(अदितिः)** अन्तरिक्ष **(सिन्धुः)** समुद्र **(पृथिवी)** पृथिवी **(उत)** और **(द्यौः)** सूर्य्य प्रकाश वा विद्या का प्रकाश ये सब **(मामहन्ताम्)** बढ़ावें॥१९॥

भावार्थः-मनुष्यों को चाहिये कि जिसके पढ़ाने से विद्या और अच्छी शिक्षा बढ़े, उसके सङ्ग से समस्त विद्याओं का सर्वथा निश्चय करें॥१९॥

इस सूक्त में समस्त विद्वानों के गुण और काम के वर्णन से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह एकसौ पांचवाँ १०५ सूक्त पन्द्रहवां १५ अनुवाक और तेईसवाँ २३ वर्ग पूरा हुआ॥

अथ षडुत्तरस्य शततमस्य सप्तर्च्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। विश्वे देवा देवताः। १-६ जगतीच्छन्दः। निषादः स्वरः। ७ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विश्वस्थानां देवानां गुणकर्माण्युपदिश्यन्ते॥

अब एकसौ छः वें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में संसार में ठहरनेवाले विद्वानों के गुण और कामों को वर्णन किया है॥

इन्द्रं॑ मि॒त्रं वरु॑ण॒मग्नि॑मू॒तये॒ मारु॑तं॒ शर्धो॑ अदि॑तिं हवामहे।
रथं॒ न दुर्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन॥ १॥

इन्द्र॑म्। मि॒त्रम्। वरु॑णम्। अ॒ग्निम्। ऊ॒तये॑। मारु॑तम्। शर्धः॑। अदि॑तिम्। ह॒वा॒म॒हे॒। रथ॑म्। न। दुः॒ऽगात्। व॒स॒वः॒। सु॒ऽदा॒न॒वः॒। विश्व॑स्मात्। नः॒। अंह॑सः। निः॒। पि॒प॒र्त॒न॒॥ १॥

पदार्थः-(**इन्द्रम्**) विद्युतं परमैश्वर्यवन्तं सभाध्यक्षं वा (**मित्रम्**) सर्वप्राणं सर्वसुहृदं वा (**वरुणम्**) क्रियाहेतुमुदानं वरगुणयुक्तं विद्वांसं वा (**अग्निम्**) सूर्यादिरूपं ज्ञानवन्तं वा (**ऊतये**) रक्षणाद्यर्थाय (**मारुतम्**) मरुतां वायूनां मनुष्याणामिदं वा (**शर्द्धः**) बलम् (**अदितिम्**) मातरं पितरं पुत्रं जातं सकलं जगत् तत्कारणं जनित्वं वा (**हवामहे**) कार्यसिद्ध्यर्थं गृह्णीमः स्वीकुर्मः (**रथम्**) विमानादिकं यानम् (**न**) इव (**दुर्गात्**) कठिनाद् भूजलान्तरिक्षस्थमार्गात् (**वसवः**) विद्यादिशुभगुणेषु ये वसन्ति तत्सम्बुद्धौ (**सुदानवः**) शोभना दानवो दानानि येषां तत्सम्बुद्धौ (**विश्वस्मात्**) अखिलात् (**नः**) अस्मान् (**अंहसः**) पापाचरणात् तत्फलाद् दुःखाद्वा (**निः**) नितराम् (**पिपर्तन**) पालयन्तु॥ १॥

अन्वयः-हे सुदानवो वसवो विद्वांसो! यूयं रथं न दुर्गान्नोऽस्मान् विश्वस्मादंहसो निष्पिपर्तन वयमूतय इन्द्रं मित्रं वरुणमग्निमदितिं मारुतं शर्द्धश्च हवामहे॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्याः सम्यङ् निष्पादितेन विमानादियानेनातिकठिनेषु मार्गेष्वपि सुखेन गमनागमने कृत्वा कार्याणि संसाध्य सर्वस्माद् दारिद्र्यादिदुःखान्मुक्त्वा जीवन्ति तथैवेश्वरसृष्टिस्थान् पृथिव्यादि- पदार्थान् विदुषो वा विदित्वोपकृत्य संसेव्यातुलं सुखं प्राप्तुं शक्नुवन्ति॥ १॥

पदार्थः-(**सुदानवः**) जिनके उत्तम-उत्तम दान आदि काम वा (**वसवः**) जो विद्यादि शुभ गुणों में वस रहे हों वे हे विद्वानो! तुम लोग (**रथम्**) विमान आदि यान को (**न**) जैसे (**दुर्गात्**) भूमि, जल वा अन्तरिक्ष के कठिन मार्ग से बचा लाते हो वैसे (**नः**) हम लोगों को (**विश्वस्मात्**) समस्त (**अंहसः**) पाप के आचरण से (**निष्पिपर्तन**) बचाओ, हम लोग (**ऊतये**) रक्षा आदि प्रयोजन के लिये (**इन्द्रम्**) बिजुली वा परम ऐश्वर्य्यवाले सभाध्यक्ष (**मित्रम्**) सब के प्राणरूपीवन वा सर्वमित्र (**वरुणम्**) काम करानेवाले उदान वायु वा श्रेष्ठगुणयुक्त विद्वान् (**अग्निम्**) सूर्य्य आदि रूप अग्नि वा ज्ञानवान् जन (**अदितिम्**) माता, पिता,

पुत्र उत्पन्न हुए समस्त जगत् के कारण वा जगत् की उत्पत्ति **(मारुतम्)** पवनों वा मनुष्यों के समूह और **(शर्द्धः)** बल को **(हवामहे)** अपने कार्य की सिद्धि के लिये स्वीकार करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य अच्छी प्रकार सिद्ध किये हुए विमान आदि यान से अति कठिन मार्गों में भी सुख से जाना-आना करके कामों को सिद्ध कर समस्त दरिद्रता आदि दुःख से छूटते हैं, वैसे ही ईश्वर की सृष्टि के पृथिवी आदि पदार्थों वा विद्वानों को जान उपकार में लाकर उनका अच्छे प्रकार सेवन कर बहुत सुख को प्राप्त हो सकते हैं॥१॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥२॥

ते। आदित्याः। आ। गत। सर्वऽतातये। भूत। देवाः। वृत्रतूर्येषु। शम्ऽभुवः। रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥२॥

पदार्थः-(**ते**) (**आदित्याः**) कारणरूपेण नित्याः सूर्यादयः पदार्थाः (**आ**) क्रियायोगे (**गत**) गच्छत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सर्वतातये**) सर्वस्मै सुखाय (**भूत**) भवत। अत्र गत भूतेत्युभयत्र लोटि मध्यमबहुवचने **बहुलं छन्दसी**ति शपो लुक्। (**देवाः**) दिव्यगुणवन्तस्तत्संबुद्धौ दिव्यगुणा वा (**वृत्रतूर्येषु**) वृत्राणां शत्रूणां मेघावयवानां वा तूर्येषु हिंसनकर्मसु संग्रामेषु (**शंभुवः**) ये शं सुखं भावयन्ति ते। (**रथं, न, दुर्गात्**) इति पूर्ववत्॥२॥

अन्वयः-हे देवा विद्वांसो! यथा ये आदित्या देवाः सूर्यादयः पदार्थास्ते वृत्रतूर्येषु शंभुवो भवन्ति, तथैव यूयमस्माकं सनीडमागतागत्य वृत्रतूर्येषु सर्वतातये शंभुवो भूत। अन्यत् पूर्ववत्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरेण सृष्टाः पृथिव्यादयः पदार्थाः सर्वेषां प्राणिनामुपकाराय वर्त्तन्ते, तथैव सर्वेषामुपकाराय विद्वद्भिर्नित्यं वर्त्तितव्यम्। यथा सुदृढस्य यानस्योपरि स्थित्वा देशान्तरं गत्वा व्यापारेण विजयेन वा धनप्रतिष्ठे प्राप्य दारिद्र्याप्रतिष्ठाभ्यां विमुच्य सुखिनो भवन्ति, तथैव विद्वांस उपदेशेन विद्यां प्रापय्य सर्वान् सुखिनः सम्पादयन्तु॥२॥

पदार्थः-हे (**देवाः**) दिव्यगुणवाले विद्वान् जनो! जैसे (**आदित्याः**) कारणरूप से नित्य दिव्यगुण वाले जो सूर्य्य आदि पदार्थ हैं (**ते**)वे (**वृत्रतूर्य्येषु**) मेघावयवों अर्थात् बादलों का हिंसन विनाश करना जिनमें होता है, उन संग्रामों में (**शंभुवः**) सुख की भावना करानेवाले होते हैं, वैसे ही आप लोग हमारे समीप को (**आ, गत**) आओ और आकर शत्रुओं का हिंसन जिनमें हो उन संग्रामों में (**सर्वतातये**) समस्त

सुख के लिये **(शंभुवः)** सुख की भावना करानेवाले **(भूत)** होओ। शेष मन्त्रार्थ प्रथम मन्त्र के समान जानना चाहिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर के बनाये हुए पृथिवी आदि पदार्थ सब प्राणियों के उपकार के लिये हैं, वैसे ही सबके उपकार के लिये विद्वानों को नित्य अपना वर्त्ताव रखना चाहिये। जैसे अच्छे दृढ़ विमान आदि यान पर बैठ देश-देशान्तर को जा-आकर व्यापार वा विजय से धन और प्रतिष्ठा को प्राप्त हो, दरिद्रता और अयश से छूट कर सुखी होते हैं, वैसे ही विद्वान् जन अपने उपदेश से विद्या को प्राप्त कराकर सबको सुखी करें॥२॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में उपदेश किया है॥

अव॑न्तु नः पि॒तर॑: सुप्रवाच॒ना उ॒त दे॒वी दे॒वपु॑त्रे ऋता॒वृधा॑।
रथं॒ न दुर्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन॥३॥

अव॑न्तु। नः। पि॒तर॑:। सु॒ऽप्र॒वा॒च॒नाः। उ॒त। दे॒वी इति॑। दे॒वपु॑त्रे इति॑ दे॒वऽपु॑त्रे। ऋ॒त॒ऽवृधा॑। रथ॑म्। न। दुः॒ऽगात्। व॒स॒वः॒। सु॒ऽदा॒न॒वः॒। विश्व॑स्मात्। नः॒। अंह॑सः। निः॒। पि॒प॒र्त॒न॒॥३॥

पदार्थः-**(अवन्तु)** रक्षणादिभिः पालयन्तु **(नः)** अस्मान् **(पितरः)** विज्ञानवन्तो मनुष्याः **(सुप्रवाचनाः)** सुष्ठु प्रवाचनमध्यापनमुपदेशनं च येषां ते **(उत)** अपि **(देवी)** दिव्यगुणयुक्ते द्यावापृथिव्यौ भूमिसूर्यप्रकाशौ **(देवपुत्रे)** देवा दिव्या विद्वांसो दिव्यरत्नादियुक्ताः पर्वतादयो वा पुत्रा पालयितारो ययोस्ते **(ऋतावृधा)** ये ऋतेन कारणेन वर्धेतां ते **(रथं, न०)** इति पूर्ववत्॥३॥

अन्वयः-देवपुत्रे ऋतावृधा देवी यथा नोऽस्मान्नवतस्तथैव सुप्रवाचनाः पितरोऽस्मानुतावन्तु। अन्यत् पूर्ववत्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा दिव्यौषध्यादिभिः प्रकाशादिभिश्च भूमिसवितारौ सर्वान् सुखेन वर्धयतः तथैवाप्ता विद्वांसः सर्वान् मनुष्यान् सुशिक्षाध्यापनाभ्यां विद्यादिसद्गुणेषु वर्धयित्वा सुखिनः कुर्वन्ति। यथा चोत्तमस्य यानस्योपरि स्थित्वा दुःखेन गम्यानां मार्गाणां सुखेन पारं गत्वा समग्रात् क्लेशाद्विमुच्य सुखिनो भवन्ति, तथैव ते दुष्टगुणकर्मस्वभावात् पृथक्कृत्याऽस्मान् धर्माचरणे वर्धयन्तु॥३॥

पदार्थः-**(देवपुत्रे)** जिनके दिव्य गुण अर्थात् अच्छे-अच्छे विद्वान् जन वा अच्छे रत्नों से युक्त पर्वत आदि पदार्थ पालनेवाले हैं वा जो **(ऋतावृधा)** सत्य कारण से बढ़ते हैं वे **(देवी)** अच्छे गुणोंवाले भूमि और सूर्य्य का प्रकाश जैसे **(नः)** हम लोगों की रक्षा करते हैं, वैसे ही **(सुप्रवाचनाः)** जिनका अच्छा पढ़ाना वा उपदेश है, वे **(पितरः)** विशेष ज्ञानवाले मनुष्य हम लोगों को **(उत)** निश्चय से **(अवन्तु)** रक्षादि व्यवहारों से पालें। शेष मन्त्रार्थ प्रथम मन्त्रार्थ के तुल्य समझना चाहिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे दिव्य औषधियों और प्रकाश आदि गुणों से भूमि और सूर्य्यमण्डल सबको सुख के साथ बढ़ाते हैं, वैसे ही आप्त विद्वान् जन सब मनुष्यों को अच्छी शिक्षा और पढ़ाने से विद्या आदि अच्छे गुणों में उन्नति देकर सुखी करते हैं और जैसे उत्तम रथ आदि पर बैठ के दुःख से जाने योग्य मार्ग के पार सुखपूर्वक जाकर समग्र क्लेश से छूट के सुखी होते हैं, वैसे ही वे उक्त विद्वान् दुष्ट गुण, कर्म और स्वभाव से अलग कर हम लोगों को धर्म के आचरण में उन्नति देवें॥३॥

पुनस्तान् कथं भूतानुपयुञ्जीरन्नित्युपदिश्यते॥

फिर उनको कैसे उपयोग में लावें, यह विषय अगले मन्त्र में कहा है॥

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥४॥

नराशंसम्। वाजिनम्। वाजयन्। इह। क्षयत्ऽवीरम्। पूषणम्। सुम्नैः। ईमहे। रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥४॥

पदार्थः-(**नराशंसम्**) नृभिराशंसितुं योग्यं विद्वांसम् (**वाजिनम्**) विज्ञानयुद्धविद्याकुशलम् (**वाजयन्**) विज्ञापयन्तो योधयन्तो वा। अत्र **सुपां सुलुगि**ति जसः स्थाने सुः। (**इह**) अस्यां सृष्टौ (**क्षयद्वीरम्**) क्षयन्तः शत्रूणां नाशकर्त्तारो वीरा यस्य सेनाध्यक्षस्य तम् (**पूषणम्**) शरीरात्मनोः पोषयितारम् (**सुम्नैः**) सुखैर्युक्तम् (**ईमहे**) प्राप्नुयाम्। अत्र **बहुलं छन्दसी**ति श्यनो लुक्। (**रथं, न०**) इति पूर्ववत्॥४॥

अन्वयः-हे विद्वन्! यथा वाजयन् वयमिह सुम्नैर्युक्तं नराशंसं वाजिनं क्षयद्वीरं पूषणं चेमहे तथा त्वं याचस्व। अन्यत् पूर्ववत्॥४॥

भावार्थः-वयं शुभगुणयुक्तान् सुखिनो मनुष्यान् मित्रतया प्राप्य श्रेष्ठयानयुक्ताः शिल्पिन इव दुःखात्पारं गच्छेम॥४॥

पदार्थः-हे विद्वान्! जैसे (**वाजयन्**) उत्तमोत्तम पदार्थों के विशेष ज्ञान कराने वा युद्ध करानेहारे हम लोग (**इह**) इस सृष्टि में (**सुम्नैः**) सुखों से युक्त (**नराशंसम्**) मनुष्यों के प्रार्थना कराने योग्य विद्वान् को तथा (**वाजिनम्**) विशेष ज्ञान और युद्धविद्या में कुशल (**क्षयद्वीरम्**) जिसके शत्रुओं को काट करनेहारे वीर और जो (**पूषणम्**) शरीर वा आत्मा की पुष्टि करानेहारा है, उस सभाध्यक्ष को (**ईमहे**) प्राप्त होवें, वैसे तू शुभ गुणों की याचना कर। शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥४॥

भावार्थः-हम लोग शुभ गुणों से युक्त सुखी मनुष्यों की मित्रता को प्राप्त होकर श्रेष्ठ यानयुक्त हुए शिल्पियों के समान दुःख से पार हों॥४॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

बृहस्पते सदमित्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥५॥

बृहस्पते। सदम्। इत्। नः। सुऽगम्। कृधि। शम्। योः। यत्। ते। मनुःऽहितम्। तत्। ईमहे। रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥५॥

पदार्थः–(**बृहस्पते**) परमाध्यापक (**सदम्**) (**इत्**) एव (**नः**) अस्मभ्यम् (**सुगम्**) सुष्ठु गच्छन्ति यस्मिन् (**कृधि**) कुरु निष्पादय (**शम्**) सुखम् (**योः**) धर्मार्थमोक्षप्रापणम् (**यत्**) (**ते**) (**मनुर्हितम्**) मनुषो मनसो हितकारिणम् (**तत्**) (**ईमहे**) याचामहे (**रथं न०**) इति पूर्ववत्॥५॥

अन्वयः–हे बृहस्पते! ते तव यन्मनुर्हितं शं योश्चास्ति यत्सदमित्वं नोऽस्मभ्यं सुगं कृधि तद्वयमीमहे। अन्यत्पूर्ववत्॥५॥

भावार्थः–मनुष्यैर्यथाऽध्यापकाद्विद्या सङ्गृह्यते तथैव सर्वेभ्यो विद्वद्भ्यश्च स्वीकृत्य दुःखानि विनाशनीयानि॥५॥

पदार्थः–हे (**बृहस्पते**) परम अध्यापक अर्थात् उत्तम रीति से पढ़ानेवाले! (**ते**) आपका जो (**मनुर्हितम्**) मन का हित करनेवाला (**शम्**) सुख वा (**योः**) धर्म, अर्थ और मोक्ष की प्राप्ति कराना है तथा (**यत्**) जो (**सदम् इत्**) सदैव तुम (**नः**) हमारे लिये (**सुगम्**) सुख (**कृधि**) करो अर्थात् सिद्ध करो (**तत्**) उस उक्त समस्त सुख को हम लोग (**ईमहे**) मांगते हैं। शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य समझना चाहिये॥५॥

भावार्थः–मनुष्यों को चाहिये कि जैसे गुरुजन से विद्या ली जाती है, वैसे ही सब विद्वानों से विद्या लेकर दुःखों का विनाश करें॥५॥

पुनरध्यापकोऽध्येता च किं कुर्य्यादित्युपदिश्यते॥

फिर पढ़ने और पढ़ानेवाले क्या करें, यह विषय अगले मन्त्र में कहा है॥

इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निवाढ ऋषिरह्वदूतये।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥६॥

इन्द्रम्। कुत्सः। वृत्रऽहनम्। शचीऽपतिम्। काटे। निऽवाढः। ऋषिः। अह्वत्। ऊतये। रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥६॥

पदार्थः–(**इन्द्रम्**) परमैश्वर्यवन्तं शालाद्यध्यक्षम् (**कुत्सः**) विद्यावज्रयुक्तश्छेत्ता पदार्थानां भेत्ता वा। **कुत्स इति वज्रनामसु पठितम्।** (निघं०२.२०) **कुत्स इत्येतत्कृन्ततेर्ऋषिः कुत्सो भवति कर्ता स्तोमानामित्यौपमन्यवोऽत्राप्यस्य वधकर्मैव भवति।** (निरु०३.११) (**वृत्रहणम्**) शत्रूणां हन्तारम्। अत्र

हन्तेरत्पूर्वस्य। (अष्टा०८.४.२२) इति णत्वम्। **(शचीपतिम्)** वेदवाचः पालकम् **(काटे)** कटन्ति वर्षन्ति सकला विद्या यस्मिन्नध्यापने व्यवहारे तस्मिन् **(निवाढः)** नित्यं सुखानां प्रापयिता **(ऋषिः)** अध्यापकोऽध्येता वा **(अह्वत्)** अह्वयेत् **(ऊतये)** रक्षणाद्याय **(रथं, न, दुर्गात्०)** इति पूर्ववत्॥६॥

अन्वयः-कुत्सो निवाढ ऋषिः काट ऊतये यं वृत्रहणं शचीपतिमिन्द्रमह्वत्, तं वयमप्याह्वयेम। अन्यत्पूर्ववत्॥६॥

भावार्थः-नहि विद्यार्थिना कपटिनोऽध्यापकस्य समीपे स्थातव्यं किन्तु विदुषां समीपे स्थित्वा विद्वान् भूत्वर्षिस्वभावेन भवितव्यम्। स्वात्मरक्षणायाधर्माद्भीत्वा धर्मे सदा स्थातव्यम्॥६॥

पदार्थः-**(कुत्सः)** विद्यारूपी वज्र लिये वा पदार्थों को छिन्न-भिन्न करने **(निवाढः)** निरन्तर सुखों को प्राप्त करानेवाला **(ऋषिः)** गुरु और विद्यार्थी **(काटे)** जिसमें समस्त विद्याओं की वर्षा होती है, उस अध्यापन व्यवहार में **(ऊतये)** रक्षा आदि के लिये जिस **(वृत्रहणम्)** शत्रुओं को विनाश करने वा **(शचीपतिम्)** वेदवाणी के पालनेहारे **(इन्द्रम्)** परमैश्वर्य्यवान् शाला आदि के अधीश को **(अह्वत्)** बुलावे, हम लोग भी उसी को बुलावें। शेष मन्त्रार्थ प्रथम मन्त्र के तुल्य जानना चाहिये॥६॥

भावार्थः-विद्यार्थी को कपटी पढ़ानेवाले के समीप ठहरना नहीं चाहिये, किन्तु आप्त विद्वानों के समीप ठहर और विद्वान् होकर ऋषिजनों के स्वभाव से युक्त होना चाहिये और अपने आत्मा की रक्षा के लिये अधर्म से डर कर धर्म में सदा रहना चाहिये॥६॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में कहा है॥

दे॒वैर्नो॑ दे॒व्यदि॑तिर्नि पा॑तु दे॒वस्त्रा॒ता त्राय॑ता॒मप्र॑युच्छन्।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः सिन्धुः पृथि॒वी उ॒त द्यौः॥७॥२४॥

दे॒वैः। नः॒। दे॒वी। अदि॑तिः। नि। पा॒तु॒। दे॒वः। त्रा॒ता। त्राय॑ता॒म्। अप्र॑युच्छन्। तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒ह॒न्ता॒म्। अदि॑तिः। सिन्धुः। पृ॒थि॒वी। उ॒त। द्यौः॥७॥

पदार्थः-**(देवैः)** विद्वद्भिर्दिव्यगुणैर्वा सह वर्त्तमानः **(नः)** अस्मान् **(देवी)** दिव्यगुणयुक्ता **(अदितिः)** प्रकाशमयी विद्या **(नि)** **(पातु)** **(देवः)** विद्वान् **(त्राता)** सर्वाभिरक्षकः **(त्रायताम्)** **(अप्रयुच्छन्)** अप्रमाद्यन् **(तन्नो मित्रो०)** इति पूर्ववत्॥७॥

अन्वयः-यो देवैः सह वर्त्तमानोऽप्रयुच्छँस्त्राता देवो विद्वानस्ति स नो निपातु, या देव्यदितिः सर्वांस्त्रायताम्। तन्नो मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्मामहन्ताम्॥७॥

भावार्थः–मनुष्यैर्योऽप्रमादी विद्वत्सु विद्वान् विद्यारक्षको विद्यादानेन सर्वेषां सुखवर्द्धकोऽस्ति तं सत्कृत्य विद्याधर्मौ जगति प्रसारणीयौ॥७॥

अत्र विश्वेषां देवानां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति षडुत्तरशततमं १०६ सूक्तं चतुर्विंशो २४ वर्गश्च समाप्तः॥

पदार्थः–जो **(देवैः)** विद्वानों वा दिव्य गुणों के साथ वर्त्तमान **(अप्रयुच्छन्)** प्रमाद न करता हुआ **(त्राता)** सबकी रक्षा करनेवाला **(देवः)** विद्वान् है, वह **(नः)** हम लोगों की **(नि, पातु)** निरन्तर रक्षा करे तथा **(देवी)** दिव्य गुण भरी सब गुण अगरी **(अदितिः)** प्रकाशयुक्त विद्या सबकी **(त्रायताम्)** रक्षा करे **(तत्)** उस पूर्वोक्त समस्त कर्म को **(नः)** और हम लोगों को **(मित्रः)** मित्रजन **(वरुणः)** श्रेष्ठ विद्वान् **(अदितिः)** अखण्डित नीति **(सिन्धुः)** समुद्र **(पृथिवी)** भूमि **(उत)** और **(द्यौः)** सूर्य्य का प्रकाश **(मामहन्ताम्)** बढ़ावें अर्थात् उन्नति देवें॥७॥

भावार्थः–मनुष्यों को चाहिये कि जो अप्रमादी, विद्वानों में विद्वान्, विद्या की रक्षा करनेवाला विद्यादान से सबके सुख को बढ़ाता है, उसका सत्कार करके विद्या और धर्म का प्रचार संसार में करें॥७॥

इस सूक्त में समस्त विद्वानों के गुणों का वर्णन है। इससे इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह एक सौ छः वाँ १०६ सूक्त और चौबीसवाँ २४ वर्ग पूरा हुआ॥

अथ त्र्यृचस्य सप्तोत्तरशततमस्य सूक्तस्याङ्गिरसः ऋषिः। विश्वे देवा देवताः। १ विराट् त्रिष्टुप्। २ निचृत् त्रिष्टुप्। ३ त्रिष्टुप् च च्छन्दः। धैवतः स्वरः॥

विश्वे देवाः कीदृशा इत्युपदिश्यते॥

अब तीन ऋचावाले एकसौ सातवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में समस्त विद्वान् जन कैसे हों, यह उपदेश किया है॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत्॥ १॥

यज्ञः। देवानाम्। प्रति। एति। सुम्नम्। आदित्यासः। भवत। मृळयन्तः। आ। वः। अर्वाची। सुऽमतिः। ववृत्यात्। अंहोः। चित्। या। वरिवोवित्ऽतरा असत्॥ १॥

पदार्थः-(**यज्ञः**) सङ्गत्या सिद्धः शिल्पाख्यः **(देवानाम्)** **(प्रति)** **(एति)** प्राप्नोति प्रापयति। अत्रान्तर्गतो ण्यर्थः। **(सुम्नम्)** सुखम् **(आदित्यासः)** सूर्य्यवद्विद्यायोगेन प्रकाशिता विद्वांसः **(भवत)** अत्रा**न्येषामपि दृश्यत** इति दीर्घः। **(मृडयन्तः)** आनन्दयन्तः **(आ)** **(वः)** युष्माकम् **(अर्वाची)** इदानीन्तनी **(सुमतिः)** शोभना प्रज्ञा **(ववृत्यात्)** वर्त्तेत। अत्र व्यत्ययेन परस्मैपदम् शपः स्थाने श्लुश्च। **(अंहोः)** विज्ञानवत्। अत्राहि धातोरौणादिक उः प्रत्ययः। **(चित्)** अपि **(या)** **(वरिवोवित्तरा)** वरिवः सेवनं विद्वद्वन्दनं वा यया सुमत्या सातिशयिता **(असत्)** भवतु॥ १॥

अन्वयः-हे मृडयन्त आदित्यासो विद्वांसो! यूयं यो देवानां यज्ञः सुम्नं प्रत्येति तस्य प्रकाशका भवत। या वोंऽहोरर्वाची सुमतिर्ववृत्यात् सा चिदस्मभ्यं वरिवोवित्तराऽऽसद् भवतु॥ १॥

भावार्थः-अस्मिञ्जगति विद्वद्भिः स्वपुरुषार्थेन याः शिल्पक्रियाः प्रत्यक्षीकृतास्ताः सर्वेभ्यो मनुष्येभ्यः प्रकाशिताः कार्या यतो बहवो मनुष्या शिल्पक्रियाः कृत्वा सुखिनः स्युः॥ १॥

पदार्थः-(**मृडयन्तः**) हे आनन्दित करते हुए **(आदित्यासः)** सूर्य्य के तुल्य विद्यायोग से प्रकाश को प्राप्त विद्वानो! तुम जो **(देवानाम्)** विद्वानों की **(यज्ञः)** संगति से सिद्ध हुआ शिल्प काम **(सुम्नम्)** सुख की **(प्रति, एति)** प्रतीति कराता है, उसको प्रकट करनेहारे **(भवत)** होओ, **(या)** जो **(वः)** तुम लोगों को **(अंहोः)** विशेष ज्ञान जैसे हो, वैसे **(अर्वाची)** इस समय की **(सुमतिः)** उत्तम बुद्धि **(ववृत्यात्)** वर्त्ति रही है वह **(चित्)** भी हम लोगों के लिये **(वरिवोवित्तरा)** ऐसी हो कि जिससे उत्तम जनों की अच्छी प्रकार शुश्रुषा **(आ, असत्)** सब ओर से होवे॥ १॥

भावार्थः-इस संसार में विद्वानों को चाहिये कि जो उन्होंने अपने पुरुषार्थ से शिल्पक्रिया प्रत्यक्ष कर रक्खी हैं, उनको सब मनुष्यों के लिये प्रकाशित करें कि जिससे बहुत मनुष्य शिल्पक्रियाओं को करके सुखी हों॥ १॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में कहा है॥

उप॑ नो दे॒वा अव॒सा ग॑म॒न्त्वङ्गि॑रसां॒ साम॑भिः स्तू॒यमा॑नाः।
इन्द्र॑ इन्द्रि॒यैर्म॒रुतो॑ म॒रुद्भि॑रादि॒त्यैर्नो॑ अदि॑तिः॒ शर्म॑ यंसत्॥ २॥

उप॑। नः॒। दे॒वाः॒। अव॑सा। आ। ग॒म॒न्तु॒। अङ्गि॑रसाम्। साम॑ऽभिः। स्तू॒यमा॑नाः। इन्द्रः॑। इ॒न्द्रि॒यैः। म॒रुतः॑। म॒रुत्ऽभिः॑। आ॒दि॒त्यैः। नः॒। अदि॑तिः। शर्म॑। यं॒स॒त्॥ २॥

पदार्थः-(**उप**) सामीप्ये (**नः**) अस्माकम् (**देवाः**) विद्वांसः (**अवसा**) रक्षणादिना (**आ**) सर्वतः (**गमन्तु**) गच्छन्तु (**अङ्गिरसाम्**) प्राणविद्याविदाम् (**सामभिः**) सामवेदस्थैर्गानैः (**स्तूयमानाः**) (**इन्द्रः**) सभाद्यध्यक्षः (**इन्द्रियैः**) धनैः (**मरुतः**) पवनाः (**मरुद्भिः**) विद्वद्भिः पवनैर्वा (**आदित्यैः**) पूर्णविद्यैर्मनुष्यैर्द्वादशभिर्मासैर्वा सह (**नः**) अस्मभ्यम् (**अदितिः**) विद्वत्पिता सूर्यदीप्तिर्वा (**शर्म्म**) सुखम् (**यंसत्**) यच्छन्तु प्रददतु। अत्र वचनव्यत्ययेन बहुवचनस्थान एकवचनम्॥ २॥

अन्वयः-सामभिः स्तूयमाना आदित्यैर्मरुद्भिरिन्द्रियैः सहेन्द्रो मरुतोऽदितिर्देवाश्चाङ्गिरसां नोऽस्माकमवसोपागमन्तु ते नोऽस्मभ्यं शर्म्म यंसत् प्रददतु॥ २॥

भावार्थः-जिज्ञासवो येषां विदुषां विद्वांसो वा जिज्ञासूनां सामीप्यं गच्छेयुस्ते नैव विद्याधर्मसुशिक्षाव्यवहारं विहायान्यत्कर्म कदाचित्कुर्य्युः, यतो दुःखहान्या सुखं सततं सिध्येत्॥ २॥

पदार्थः-(**सामभिः**) सामवेद के गानों से (**स्तूयमानाः**) स्तुति को प्राप्त होते हुए (**आदित्यैः**) पूर्ण विद्यायुक्त मनुष्य वा बारह महीनों (**मरुद्भिः**) विद्वानों वा पवनों और (**इन्द्रियैः**) धनों के सहित (**इन्द्रः**) सभाध्यक्ष (**मरुतः**) वा पवन (**अदितिः**) विद्वानों का पिता वा सूर्य्य प्रकाश और (**देवाः**) विद्वान् जन (**अङ्गिरसाम्**) प्राणविद्या के जाननेवाले (**नः**) हम लोगों के (**अवसा**) रक्षा आदि व्यवहार से (**उप, आ, गमन्तु**) समीप में सब प्रकार से आवें और (**न**) हम लोगों के लिये (**शर्म**) सुख (**यंसत्**) देवें॥ २॥

भावार्थः-ज्ञानप्रचार सीखनेहारे जन जिन विद्वानों के समीप वा विद्वान् जन जिन विद्यार्थियों के समीप जावें वे विद्या, धर्म और अच्छी शिक्षा के व्यवहार को छोड़ कर और कर्म कभी न करें, जिससे दुःख की हानि होके निरन्तर सुख की सिद्धि हो॥ २॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में कहा है॥

तन्न॒ इन्द्र॒स्तद्व॑रु॒ण॒स्तद॒ग्निस्तद॑र्य॒मा तत्स॑वि॒ता च॑नो॑ धात्।
तन्नो॑ मि॒त्रो व॑रु॒णो मामह॑न्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः॥ ३॥ २५॥

तत्। नः। इन्द्रः। तत्। वरुणः। तत्। अग्निः। तत्। अर्यमा। तत्। सविता। चनः। धात्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ ३॥

पदार्थः-(**तत्**) धनम्। अन्नम् (**नः**) अस्मभ्यम् (**इन्द्रः**) विद्युत् धनाध्यक्षो वा (**तत्**) शारीरं सुखम् (**वरुणः**) जलं गुणैरुत्कृष्टो वा (**तत्**) आत्मसुखम् (**अग्निः**) प्रसिद्धो भौतिको न्यायमार्गे गमयिता विद्वान् वा (**तत्**) इन्द्रियसुखम् (**अर्यमा**) नियन्ता वायुर्न्यायकर्त्ता वा (**तत्**) सामाजिकं सुखम् (**सविता**) सूर्यो धर्मकृत्येषु प्रेरको वा (**तन्नो मित्रो०**) इति पूर्ववत्॥ ३॥

अन्वयः-यथा मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्वा मामहन्तां तत् तथेन्द्रो नस्तद्वरुणस्तदग्निस्तदर्यमा तत् सविता तच्च नो धात्॥ ३॥

भावार्थः-विद्वद्भिर्यथा संसारस्थाः पृथिव्यादयः पदार्थाः सुखप्रदाः सन्ति, तथैव सुखप्रदातृभिर्भवितव्यम्॥ ३॥

अत्र विश्वेषां देवानां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति सप्तोत्तरशततमं १०७ सूक्तं पञ्चविंशो २५ वर्गश्च समाप्तः॥

पदार्थः-जैसे (**मित्रः**) मित्रजन (**वरुणः**) श्रेष्ठ विद्वान् (**अदितिः**) अखण्डित आकाश (**सिन्धुः**) समुद्र (**पृथिवी**) भूमि (**उत**) और (**द्यौः**) सूर्य आदि का प्रकाश (**नः**) हम को (**मामहन्ताम्**) आनन्दित करते हैं (**तत्**) वैसे (**इन्द्रः**) बिजुली वा धनाढ्य जन (**नः**) हमारे लिये (**तत्**) उस धन वा अन्न को अर्थात् उनके दिये हुए धनादि पदार्थ को (**वरुणः**) जल वा गुणों से उत्कृष्ट (**तत्**) उस शरीरसुख को (**अग्निः**) पावक अग्नि वा न्यायमार्ग में चलानेवाला विद्वान् (**तत्**) उस आत्मसुख को (**अर्यमा**) नियमकर्त्ता पवन वा न्यायकर्त्ता सभाध्यक्ष (**तत्**) इन्द्रियों के सुख को (**सविता**) सूर्य वा धर्म कार्य्यों में प्रेरणा करनेवाला धर्मज्ञ जन (**तत्**) उस सामाजिक सुख और (**चनः**) अन्न को (**धात्**) धारण करता वा धारण करे॥ ३॥

भावार्थः-जैसे संसारस्थ पृथिवी आदि पदार्थ सुख देनेवाले हैं, वैसे ही विद्वानों को सुख देनेवाले होना चाहिये॥

इस सूक्त में समस्त विद्वानों के गुणों का वर्णन है। इनसे इस सूक्त की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह एकसौ सातवाँ १०७ सूक्त और पच्चीसवाँ २५ वर्ग समाप्त हुआ॥

अथाष्टोत्तरस्य शततमस्य त्रयोदशर्च्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। इन्द्राग्नी देवते। १,८,१२ निचृत् त्रिष्टुप्। २,३,६,११ विराट् त्रिष्टुप्। ७,९,१०,१३ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक् पङ्क्तिः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ युग्मयोर्गुणा उपदिश्यन्ते॥

अब एक सौ आठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र से दो-दो इकट्ठे पदार्थों वा उनके गुणों का उपदेश किया है॥

य इ॑न्द्राग्नी चि॒त्रत॑मो॒ रथो॑ वा॒मभि विश्वा॑नि॒ भुव॑नानि॒ चष्टे॑।
तेना या॑तं स॒रथं॑ तस्थि॒वांसाथा॒ सोम॑स्य पिबतं सु॒तस्य॑॥ १॥

यः। इ॒न्द्रा॒ग्नी॒ इति॑। चि॒त्रऽत॑मः। रथः॑। वा॒म्। अ॒भि। विश्वा॑नि। भुव॑नानि। चष्टे॑। तेन॑। आ। या॒त॒म्। स॒ऽरथ॑म्। त॒स्थि॒ऽवांसा॑। अथ॑। सोम॑स्य। पि॒ब॒त॒म्। सु॒तस्य॑॥ १॥

पदार्थः-(**यः**) (**इन्द्राग्नी**) वायुपावकौ (**चित्रतमः**) अतिशयेनाश्चर्य्यस्वरूपगुणक्रियायुक्तः (**रथः**) विमानादियानसमूहः (**वाम्**) एतौ (**अभि**) अभितः (**विश्वानि**) सर्वाणि (**भुवनानि**) भूगोलस्थानानि (**चष्टे**) दर्शयति। अत्रान्तर्गतो ण्यर्थः। (**तेन**) (**आ**) (**यातम्**) गच्छतो गमयतो वा (**सरथम्**) रथैः सह वर्त्तमानं सैन्यमुत्तमां सामग्रीं वा (**तस्थिवांसा**) स्थितिमन्तौ (**अथ**) (**सोमस्य**) रसवतः सोमवल्ल्यादीनां समूहस्य रसम् (**पिबतम्**) पिबतः (**सुतस्य**) ईश्वरेणोत्पादितस्य॥ १॥

अन्वयः-यश्चित्रतमो रथो वामेतौ तस्थिवांसेन्द्राग्नी प्राप्य विश्वानि भुवनान्यभिचष्टेऽभितो दर्शयति। अथ येनैतौ सरथमायातं समन्ताद् गमयतः सुतस्य सोमस्य रसं पिबतं पिबतस्तेन सर्वैः शिल्पिभिः सर्वत्र गमनागमने कार्य्ये॥ १॥

भावार्थः-मनुष्यैः कलासु सम्प्रयोज्य चालितैर्वाय्वग्न्यादिभिर्युक्तैर्विमानादिभिर्यानैराकाशसमुद्रभूमिमार्गेषु देशान्तरान् गत्वाऽऽगत्य सर्वदा स्वाभिप्रायसिद्ध्यानन्दरसो भोक्तव्यः॥ १॥

पदार्थः-(**यः**) जो (**चित्रतमः**) एकीएका अद्भुत गुण और क्रिया को लिए हुए (**रथः**) विमान आदि यानसमूह (**वाम्**) इन (**तस्थिवांसा**) ठहरे हुए (**इन्द्राग्नी**) पवन और अग्नि को प्राप्त होकर (**विश्वानि**) सब (**भुवनानि**) भूगोल के स्थानों को (**अभि, चष्टे**) सब प्रकार से दिखाता है। (**अथ**) इसके अनन्तर जिससे ये दोनों अर्थात् पवन और अग्नि (**सरथम्**) रथ आदि सामग्री सहित सेना वा उत्तम सामग्री को (**आ, यातम्**) प्राप्त हुए अच्छी प्रकार अभीष्ट स्थान को पहुंचाते हैं तथा (**सुतस्य**) ईश्वर के उत्पन्न किये हुए (**सोमस्य**) सोम आदि के रस को (**पिबतम्**) पीते हैं (**तेन**) उसे समस्त शिल्पी मनुष्यों को सब जगह जाना-आना चाहिये॥ १॥

भावार्थः-मनुष्यों को चाहिये कि कलाओं में अच्छी प्रकार जोड़ के चलाये हुए वायु और अग्नि आदि पदार्थों से युक्त विमान आदि रथों से आकाश, समुद्र और भूमि मार्गों में एक देश से दूसरे देशों को जा-आकर सर्वदा अपने अभिप्राय की सिद्धि से आनन्दरस भोगें॥१॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम्।
तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम्॥२॥

यावत्। इदम्। भुवनम्। विश्वम्। अस्ति। उरुऽव्यचा। वरिमता। गभीरम्। तावान्। अयम्। पातवे। सोमः। अस्तु। अरम्। इन्द्राग्नी इति। मनसे। युवऽभ्याम्॥२॥

पदार्थः-(**यावत्**) (**इदम्**) प्रत्यक्षाप्रत्यक्षलक्षणम् (**भुवनम्**) सर्वेषामधिकरणम् (**विश्वम्**) जगत् (**अस्ति**) वर्त्तते (**उरुव्यचा**) बहुव्याप्त्या (**वरिमता**) बहुस्थूलत्वेन सह (**गभीरम्**) अगाधम् (**तावान्**) तावत्प्रमाणः (**अयम्**) (**पातवे**) पातुम् (**सोमः**) उत्पन्नः पदार्थसमूहः (**अस्तु**) भवतु (**अरम्**) पर्याप्तम् (**इन्द्राग्नी**) वायुसवितारौ (**मनसे**) विज्ञापयितुम् (**युवभ्याम्**) एताभ्याम्॥२॥

अन्वयः-हे मनुष्या! यूयं यावदुरुव्यचा वरिमता सह वर्त्तमानं गभीरं भुवनमिदं विश्वमस्ति तावानयं सोमोऽस्ति मनस इन्द्राग्नी अरमतो युवभ्याम् पातवे तावन्तं बोधं पुरुषार्थं च स्वीकुरुत॥२॥

भावार्थः-विचक्षणैः सर्वैरिदमवश्यं बोध्यं यत्र यत्र मूर्त्तिमन्तो लोकाः सन्ति, तत्र तत्र वायुविद्युतौ व्यापकत्वस्वरूपेण वर्त्तेते। यावन्मनुष्याणां सामर्थ्यमस्ति तावदेतद्गुणान् विज्ञाय पुरुषार्थेनोपयोज्यालं सुखेन भवितव्यम्॥२॥

पदार्थः-हे मनुष्यो! तुम (**यावत्**) जितना (**उरुव्यचा**) बहुत व्याप्ति अर्थात् पूरेपन और (**वरिमता**) बहुत स्थूलता के साथ वर्त्तमान (**गभीरम्**) गहरा (**भुवनम्**) सब वस्तुओं के ठहरने का स्थान (**इदम्**) यह प्रकट अप्रकट (**विश्वम्**) जगत् (**अस्ति**) है, (**तावान्**) उतना (**अयम्**) यह (**सोमः**) उत्पन्न हुआ पदार्थों का समूह है, उसका (**मनसे**) विज्ञान कराने को (**इन्द्राग्नी**) वायु और अग्नि (**अरम्**) परिपूर्ण हैं, इससे (**युवभ्याम्**) उन दोनों से (**पातवे**) रक्षा आदि के लिये उतने बोध और पदार्थ को स्वीकार करो॥२॥

भावार्थः-विचारशील पुरुषों को यह अवश्य जानना चाहिये कि जहाँ-जहाँ मूर्तिमान् लोक हैं, वहाँ-वहाँ पवन और बिजुली अपनी व्याप्ति से वर्त्तमान हैं। जितना मनुष्यों का सामर्थ्य है, उतने तक इनके गुणों को जानकर और पुरुषार्थ से उपयोग लेकर परिपूर्ण सुखी होवें॥२॥

पुनस्तौ कथंभूतावित्युपदिश्यते॥

फिर वे कैसे हैं, यह अगले मन्त्र में उपदेश किया है॥

चक्राथे हि सध्र्यङ् नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः।
ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम्॥ ३॥

चक्राथे इति। हि। सध्र्यक्। नाम। भद्रम्। सध्रीचीना। वृत्रऽहनौ। उत। स्थः। तौ। इन्द्राग्नी इति। सध्र्यञ्चा। निऽसद्य। वृष्णः। सोमस्य। वृषणा। आ। वृषेथाम्॥ ३॥

पदार्थः–(**चक्राथे**) कुरुतः (**हि**) खलु (**सध्र्यक्**) सहाञ्चतीति (**नाम**) जलम् (**भद्रम्**) वृष्ट्यादिद्वारा कल्याणकरम् (**सध्रीचीना**) सहाञ्चतः सङ्गतौ (**वृत्रहणौ**) वृत्रस्य मेघस्य हन्तारौ (**उत**) अपि (**स्थः**) भवतः (**तौ**) (**इन्द्राग्नी**) पूर्वोक्तौ (**सध्र्यञ्चा**) सहप्रशंसनीयौ (**निषद्य**) नित्यं स्थित्वा। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। (**वृष्णः**) पुष्टिकारकस्य (**सोमस्य**) रसवतः पदार्थसमूहस्य (**वृषणा**) पोषकौ। अत्र सर्वत्र द्विवचनस्थाने **सुपां सुलुगि**त्याकारादेशः। (**आ**) (**वृषेथाम्**) वर्षतः। व्यत्ययेन शः प्रत्यय आत्मनेपदं च॥ ३॥

अन्वयः–हे मनुष्या! यौ सध्रीचीना वृत्रहणौ सध्र्यञ्चा निषद्य वृष्णः सोमस्य वृषणेन्द्राग्नी भद्रं सध्र्यङ् नाम चक्राथे कुरुत उतापि कार्यसिद्धिकरौ स्थो वृषेथां सुखं वर्षतस्तौ ह्या विजानन्तु॥ ३॥

भावार्थः–मनुष्यैरत्यन्तमुपयोगिनाविन्द्राग्नी विदित्वा कथं नोपयोजनीयाविति॥ ३॥

पदार्थः–हे मनुष्यो! जो (**सध्रीचीना**) एक साथ मिलने और (**वृत्रहणौ**) मेघ के हननेहारे (**सध्र्यञ्चा**) और एक साथ बड़ाई करने योग्य (**निषद्य**) नित्य स्थिर होकर (**वृष्णः**) पुष्टि करते हुए (**सोमस्य**) रसवान् पदार्थसमूह की (**वृषणा**) पुष्टि करनेहारे (**इन्द्राग्नी**) पूर्व कहे हुए अर्थात् पवन और सूर्य्यमण्डल (**भद्रम्**) वृष्टि आदि काम से परम सुख करनेवाले (**सध्र्यक्**) एक संग प्रकट होते हुए (**नाम**) जल को (**चक्राथे**) करते हैं (**उत**) और कार्य्यसिद्धि करनेहारे (**स्थः**) होते (**वृषेथाम्**) और सुखरूपी वर्षा करते हैं (**तौ**) उनको (**हि**) ही (**आ**) अच्छी प्रकार जानो॥ ३॥

भावार्थः–मनुष्यों को अत्यन्त उपयोग करनेहारे वायु और सूर्य्यमण्डल को जान के कैसे उपयोग में न लाने चाहिये॥ ३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरुं तिस्तिराणा।
तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम्॥ ४॥

सम्ऽइद्धेषु। अग्निषु। आनजाना। यतऽस्रुचा। बर्हिः। ऊम्ऽइति। तिस्तिराणा। तीव्रैः। सोमैः। परिऽसिक्तेभिः। अर्वाक्। आ। इन्द्राग्नी इति। सौमनसाय। यातम्॥ ४॥

पदार्थः-(**समिद्धेषु**) प्रदीप्तेषु (**अग्निषु**) कलायन्त्रस्थेषु (**आनजाना**) प्रसिद्धौ प्रसिद्धिकारकौ। अत्राञ्जु धातोर्लिटः स्थाने कानच्। (**यतस्रुचा**) यता उद्यता स्रुचः स्रुग्वत्कलादयो ययोस्तौ। अत्र सर्वत्र **सुपां सुलुगि**ति द्विवचनस्थान आकारादेशः। (**बर्हिः**) अन्तरिक्षे (**उ**) (**तिस्तिराणा**) यन्त्रकलाभिराच्छादितौ (**तीव्रैः**) तीक्ष्णवेगादिगुणैः (**सोमैः**) रसभूतैर्जलैः (**परिषिक्तेभिः**) सर्वथा कृतसिञ्चनैः सहितौ (**अर्वाक्**) पश्चात् (**आ**) समन्तात् (**इन्द्राग्नी**) वायुविद्युतौ (**सौमनसाय**) अनुत्तमसुखाय (**यातम्**) गमयतः॥४॥

अन्वयः-हे मनुष्या! यूयं यौ यतस्रुचा तिस्तिराणानजानेन्द्राग्नी तीव्रैः सोमैः परिषिक्तेभिः समिद्धेष्वग्निषु सत्स्ववर्वाग् बर्हिर्यातमु सौमनसायायातं गमयतस्तौ सम्यक् परीक्ष्य कार्य्यसिद्धये प्रयोज्यौ॥४॥

भावार्थः-यदा शिल्पिभिः पवनस्सौदामिनी च कार्यसिद्ध्यर्थं संप्रयुज्येते तदैते सर्वसुखलाभाय प्रभवन्ति॥४॥

पदार्थः-हे मनुष्यो! जो तुम (**यतस्रुचा**) जिनमें स्रुच् अर्थात् होम करने के काम में जो स्रुचा होती है, उनके समान कलाघर विद्यमान (**तिस्तिराणा**) वा जो यन्त्रकलादिकों से ढांपे हुए होते हैं (**आनजाना**) वे आप प्रसिद्ध और प्रसिद्धि करनेवाले (**इन्द्राग्नी**) वायु और विद्युत् अर्थात् पवन और बिजुली (**तीव्रैः**) तीक्ष्ण और वेगादिगुणयुक्त (**सोमैः**) रसरूप जलों से (**परिषिक्तेभिः**) सब प्रकार की, की हुई सिंचाइयों के सहित (**समिद्धेषु**) अच्छी प्रकार जलते हुए (**अग्निषु**) कलाघरों की अग्नियों के होते (**अर्वाक्**) पीछे (**बर्हिः**) अन्तरिक्ष में (**यातम्**) पहुँचाते हैं (**उ**) और (**सौमनसाय**) उत्तम से उत्तम सुख के लिये (**आ**) अच्छे प्रकार आते भी हैं, उनकी अच्छी शिक्षा कर कार्यसिद्धि के लिये कलाओं में लगाने चाहिये॥४॥

भावार्थः-जब शिल्पियों से पवन और बिजुली कार्यसिद्धि के अर्थ कलायन्त्रों की क्रियाओं से युक्त किये जाते हैं, तब ये सर्वसुखों के लाभ के लिये समर्थ होते हैं॥४॥

अथैश्वर्ययुक्तस्य स्वामिनः शिल्पविद्याक्रियाकुशलस्य शिल्पिनश्च कर्माण्युपदिश्यन्ते॥

अब ऐश्वर्य्ययुक्त स्वामी और शिल्पविद्या की क्रियाओं में कुशल शिल्पीजन के कामों को अगले मन्त्र में कहा है॥

यानी॑न्द्राग्नी च॒क्रथु॑र्वी॒र्या॑णि यानि॑ रू॒पाण्यु॒त वृष्ण्या॑नि।
या वां॑ प्र॒त्नानि॑ स॒ख्या शि॒वानि॒ तेभि॒: सोम॑स्य पिबतं सु॒तस्य॑॥५॥२६॥

यानि॒। इ॒न्द्रा॒ग्नी॒ इति॑। च॒क्रथु॑:। वी॒र्या॑णि। यानि॑। रू॒पाणि॑। उ॒त। वृष्ण्या॑नि। या। वा॒म्। प्र॒त्नानि॑। स॒ख्या। शि॒वानि॑। तेभि॑:। सोम॑स्य। पि॒ब॒त॒म्। सु॒तस्य॑॥५॥

पदार्थः-(**यानि**) (**इन्द्राग्नी**) स्वामिभृत्यौ (**चक्रथुः**) कुर्य्यातम् (**वीर्याणि**) पराक्रमयुक्तानि कर्माणि (**यानि**) (**रूपाणि**) शिल्पसिद्धानि चित्ररूपाणि यानादीनि वस्तूनि (**उत**) अपि (**वृष्ण्यानि**) पुरुषार्थयुक्तानि कर्माणि (**या**) यानि (**वाम्**) युवयोः (**प्रत्नानि**) प्राक्तनानि (**सख्या**) सख्यानि सख्युः कर्माणि (**शिवानि**) मङ्गलमयानि (**तेभिः**) तैः (**सोमस्य**) संसारस्थपदार्थसमूहस्य रसम् (**पिबतम्**) (**सुतस्य**) निष्पादितस्य॥५॥

अन्वयः-हे इन्द्राग्नी! यो वां यानि वीर्याणि यानि रूपाणि वृष्ण्यानि कर्माणि या प्रत्नानि शिवानि सख्या सन्ति तेभिस्तैः सुतस्य सोमस्य रसं पिबतमुतास्मभ्यं सुखं चक्रथुः कुर्यातम्॥५॥

भावार्थः-अत्रेन्द्रशब्देन धनाढ्योऽग्निशब्देन विद्यावान् शिल्पी गृह्यते, नहि विद्यापुरुषार्थाभ्यां विना कार्यसिद्धिः कदापि जायते न च मित्रभावेन विना सर्वदा व्यवहारः सिद्धो भवितुं शक्यस्तस्मादेतत् सर्वदाऽनुष्ठेयम्॥५॥

पदार्थः-हे (**इन्द्राग्नी**) स्वामी और सेवक! (**वाम्**) तुम्हारे (**यानि**) जो (**वीर्याणि**) पराक्रमयुक्त काम (**यानि**) जो (**रूपाणि**) शिल्पविद्या से सिद्ध, चित्र, विचित्र, अद्भुत जिनका रूप वे विमान आदि यान और (**वृष्ण्यानि**) पुरुषार्थयुक्त काम (**या**) वा जो तुम दोनों के (**प्रत्नानि**) प्राचीन (**शिवानि**) मङ्गलयुक्त (**सख्या**) मित्रों के काम हैं (**तेभिः**) उनसे (**सुतस्य**) निकाले हुए (**सोमस्य**) संसारी वस्तुओं के रस को (**पिबतम्**) पिओ (**उत**) और हम लोगों के लिये (**चक्रथुः**) उनसे सुख करो॥५॥

भावार्थः-इस मन्त्र में इन्द्र शब्द से धनाढ्य और अग्नि शब्द से विद्यावान् शिल्पी का ग्रहण किया जाता है, विद्या और पुरुषार्थ के विना कामों की सिद्धि कभी नहीं होती और न मित्रभाव के विना सर्वदा व्यवहार सिद्ध हो सकता है, इससे उक्त काम सर्वदा करने योग्य हैं॥५॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यदब्रवं प्रथमं वां वृणानो३ऽयं सोमो असुरैर्नो विहव्यः।
तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य॥६॥

यत्। अब्रवम्। प्रथमम्। वाम्। वृणानः। अयम्। सोमः। असुरैः। नः। विऽहव्यः। ताम्। सत्याम्। श्रद्धाम्। अभि। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥६॥

पदार्थः-(**यत्**) वचः (**अब्रवम्**) उक्तवानस्मि (**प्रथमम्**) (**वाम्**) युवाभ्यां युवयोर्वा (**वृणानः**) स्तूयमानः (**अयम्**) प्रत्यक्षः (**सोमः**) उत्पन्नः पदार्थसमूहः (**असुरैः**) विद्याहीनैर्मनुष्यैः (**नः**) अस्माकम् (**विहव्यः**) विविधतया ग्रहीतुं योग्यः (**ताम्**) (**सत्याम्**) (**श्रद्धाम्**) (**अभि**) (**आ**) (**हि**) किल (**यातम्**) आगच्छतम् (**अथ**) आनन्तर्ये। (**सोमस्य**) इति पूर्ववत्॥६॥

अन्वयः-हे स्वामिशिल्पनौ! वां प्रथमं यदहमब्रवमसुरैर्वृणानो विहव्योऽयं सोमो युवयोरस्ति तेन नोऽस्माकं तां सत्यां श्रद्धामभ्यायातमथ हि किल सुतस्य सोमस्य रसं पिबतम्॥६॥

भावार्थः-जन्मसमये सर्वेऽविद्वांसो भवन्ति पुनर्विद्याभ्यासं कृत्वा विद्वांसश्च तस्माद्विद्याहीना मूर्खा ज्येष्ठा विद्यावन्तश्च कनिष्ठा गण्यन्ते कोऽपि भवेत् परन्तु तं प्रति सत्यमेव वाच्यं न कञ्चित् प्रत्यसत्यम्॥६॥

पदार्थः-हे स्वामी और शिल्पी जनो! **(वाम्)** तुम्हारे लिये **(प्रथमम्)** पहिले **(यत्)** जो मैंने **(अब्रवम्)** कहा वा **(असुरैः)** विद्याहीन मनुष्यों की **(वृणानः)** बड़ाई किई हुई **(विहव्यः)** अनेकों प्रकार से ग्रहण करने योग्य **(अयम्)** यह प्रत्यक्ष **(सोमः)** उत्पन्न हुआ पदार्थों का समूह **[**तुम दोनों का**]** है, उससे **(नः)** हम लोगों की **(ताम्)** उस **(सत्याम्)** सत्य **(श्रद्धाम्)** प्रीति को **(अभि, आ, यातम्)** अच्छी प्रकार प्राप्त होओ **(अथ)** इसके पीछे **(हि)** एक निश्चय के साथ **(सुतस्य)** निकाले हुए **(सोमस्य)** संसारी वस्तुओं के रस को **(पिबतम्)** पिओ॥६॥

भावार्थः-जन्म के समय में सब मूर्ख होते हैं और फिर विद्या का अभ्यास करके विद्वान् भी हो जाते हैं, इससे विद्याहीन मूर्ख जन ज्येष्ठ और विद्वान् जन कनिष्ठ गिने जाते हैं। सबको यही चाहिये कि कोई हो परन्तु उसके प्रति सांची (सत्य) ही कहें, किन्तु किसी के प्रति असत्य न कहें॥६॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यदिन्द्राग्नी मदथः स्वे दुरोणे यद् ब्रह्मणि राजनि वा यजत्रा।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥७॥

यत्। इन्द्राग्नी इति। मदथः। स्वे। दुरोणे। यत्। ब्रह्मणि। राजनि। वा। यजत्रा। अतः। परि। वृषणौ आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥७॥

पदार्थः-(**यत्**) यतः **(इन्द्राग्नी)** **(मदथः)** हर्षथः **(स्वे)** स्वकीये **(दुरोणे)** गृहे **(यत्)** यतः **(ब्रह्मणि)** ब्राह्मणसभायाम् **(राजनि)** राजसभायाम् **(वा)** अन्यत्र **(यजत्रा)** सङ्गम्य सत्कर्त्तव्यौ **(अतः)** कारणात् **(परि)** **(वृषणौ)** सुखानां वर्षयितारौ। अन्यत्पूर्ववत्॥७॥

अन्वयः-हे वृषणौ यजत्रा इन्द्राग्नी! युवां यद्यतः स्वे दुरोणे यद् यस्मिन् ब्रह्मणि राजनि वा मदथोऽतः कारणात् पर्य्यायातमथ हि खलु सुतस्य सोमस्य पिबतम्॥७॥

भावार्थः-यत्र यत्र स्वामिशिल्पिनावध्यापकाध्येतारौ राजप्रजापुरुषौ वा गच्छेतां खल्वागच्छेतां वा तत्र तत्र सभ्यतया स्थित्वा विद्याशान्तियुक्तं वचः संभाष्य सुशीलतया सत्यं वदतां सत्यं शृणुतां च॥७॥

पदार्थः-हे **(वृषणौ)** सुखरूपी वर्षा के करनेहारे **(यजत्रा)** अच्छी प्रकार मिल कर सत्कार करने के योग्य **(इन्द्राग्नी)** स्वामी सेवको! तुम दोनों **(यत्)** जिस कारण **(स्वे)** अपने **(दुरोणे)** घर में वा **(यत्)**

जिस कारण **(ब्रह्मणि)** ब्राह्मणों की सभा और **(राजनि)** राजजनों की सभा **(वा)** वा और सभा में **(मदथः)** आनन्दित होते हो **(अतः)** इस कारण से **(परि, आ, यातम्)** सब प्रकार से आओ **(अथ, हि,)** इसके अनन्तर एक निश्चय के साथ **(सुतस्य)** उत्पन्न हुए **(सोमस्य)** संसारी पदार्थों के रस को **(पिबतम्)** पिओ॥७॥

भावार्थः-जहाँ-जहाँ स्वामि और शिल्पि वा पढ़ाने और पढ़नेवाले वा राजा और प्रजाजन जायें वा आवें वहाँ-वहाँ सभ्यता से स्थित हों, विद्या और शान्तियुक्त वचन को कह और अच्छे शील का ग्रहण कर सत्य कहें और सुनें॥७॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥८॥

यत्। इन्द्राग्नी इति। यदुषु। तुर्वशेषु। यत्। द्रुह्युषु। अनुषु। पूरुषु। स्थः। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥८॥

पदार्थः-(**यत्**) यतः **(इन्द्राग्नी)** पूर्वोक्तौ **(यदुषु)** प्रयत्नकारिषु मनुष्येषु **(तुर्वशेषु)** तूर्वन्तीति तुरस्तेषां वशा वशं कर्तारो मनुष्यास्तेषु **(यत्)** यतः **(द्रुह्युषु)** द्रोहकारिषु **(अनुषु)** प्राणप्रदेषु **(पूरुषु)** परिपूर्णसद्गुणविद्याकर्मसु मनुष्येषु। **यदव इत्यादि पञ्चविंशतिर्मनुष्यनामसु पठितम्।** (निघं०२.३) **(स्थः)** **(अतः)** **(परि०)** इति पूर्ववत्॥८॥

अन्वयः-हे इन्द्राग्नी! युवां यद् यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु यथोचितव्यवहारवर्त्तिनौ स्थोऽतः कारणात् सर्वेषु वृषणौ सन्तावायातं हि खल्वथ सुतस्य सोमस्य रसं परि पिबतम्॥८॥

भावार्थः-यौ न्यायसेनाधिकृतौ मनुष्येषु यथायोग्यं वर्त्तेते, तावेव तत्कर्मसु सर्वैर्मनुष्यैः स्थापयित्वा कार्यसिद्धिः सम्पादनीयाः॥८॥

पदार्थः-हे **(इन्द्राग्नी)** स्वामि शिल्पिजनो! तुम दोनों **(यत्)** जिस कारण **(यदुषु)** उत्तम यत्न करनेवाले मनुष्यों में वा **(तुर्वषु)** जो हिंसक मनुष्यों को वश में करें उनमें वा **(यत्)** जिस कारण **(द्रुह्युषु)** द्रोही जनों में वा **(अनुषु)** प्राण अर्थात् जीवन सुख देनेवालों में तथा **(पुरुषु)** जो अच्छे गुण, विद्या वा कामों में परिपूर्ण हैं, उनमें यथोचित अर्थात् जिससे जैसा चाहिये वैसा वर्त्तनेवाले **(स्थः)** हो **(अतः)** इस कारण से सब मनुष्यों में **(वृषणौ)** सुखरूपी वर्षा करते हुए **(आ, यातम्)** अच्छे प्रकार आओ **(हि)** एक निश्चय के साथ, **(अथ)** इसके अनन्तर **(सुतस्य)** निकाले हुए **(सोमस्य)** जगत् के पदार्थों के रस को **(परि, पिबतम्)** अच्छी प्रकार पिओ॥८॥

भावार्थः-जो न्याय और सेना के अधिकार को प्राप्त हुए मनुष्यों में यथायोग्य वर्त्तमान हैं, सब मनुष्यों को चाहिये कि उनको ही उन कामों में स्थापन अर्थात् मानकर कामों की सिद्धि करें॥८॥

पुनरेतौ भौतिकौ च कीदृशावित्युपदिश्यते॥

फिर वे और भौतिक इन्द्र और अग्नि कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥९॥

यत्। इन्द्राग्नी इति। अवमस्याम्। पृथिव्याम्। मध्यमस्याम्। परमस्याम्। उत। स्थः। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥९॥

पदार्थः-(**यत्**) यौ (**इन्द्राग्नी**) न्यायसेनाध्यक्षौ वायुविद्युतौ वा (**अवमस्याम्**) अनुत्कृष्टगुणायाम् (**पृथिव्याम्**) स्वराज्यभूमौ (**मध्यमस्याम्**) मध्यमगुणायाम् (**परमस्याम्**) उत्कृष्टगुणायाम् (**उत्**) अपि (**स्थः**) भवथो भवतो वा (**अतः०**) इति पूर्ववत्॥९॥

अन्वयः-हे इन्द्राग्नी! यद् युवामवमस्यां मध्यमस्यामुतापि परमस्यां पृथिव्यां स्वराज्यभूमावधिकृतौ स्थस्तौ सर्वदा सर्वे रक्षणीयौ स्तः। अतोऽत्र परिवृषणौ भूत्वाऽऽयातं हि खल्वथ तत्रस्थं सुतस्य सोमस्य रसं पिबतमित्येकः॥१॥९॥

यद् याविमाविन्द्राग्नी अवमस्यां मध्यमस्यामुतापि परमस्यां पृथिव्यां स्थोऽतोऽत्र परिवृषणौ भूत्वाऽऽयातमागच्छतो हि खल्वथ यौ सुतस्य सोमस्य रसं पिबतं पिबतस्तौ कार्यसिद्धये प्रयुज्य मनुष्यैर्महालाभः सम्पादनीयः॥२॥९॥

भावार्थः-अत्र श्लेषालङ्कारः उत्तममध्यमनिकृष्टगुणकर्मस्वभावभेदेन यद्यद्राज्यमस्ति तत्र तत्रोत्तममध्यमनिकृष्टगुणकर्मस्वभावान् मनुष्यान् संस्थाप्य चक्रवर्त्तिराज्यं कृत्वाऽऽनन्दः सर्वैर्भोक्तव्यः। एवमेतत्सृष्टिस्थौ सर्वलोकेष्ववस्थितौ पवनविद्युतौ विज्ञाय संप्रयुज्य कार्यसिद्धिं सम्पाद्य दारिद्र्यादिदुःखं सर्वैर्विनाशनीयम्॥९॥

पदार्थः-हे (**इन्द्राग्नी**) न्यायाधीश और सेनाधीश! (**यत्**) जो तुम दोनों (**अवमस्याम्**) निकृष्ट (**मध्यमस्याम्**) मध्यम (**उत**) और (**परमस्याम्**) उत्तम गुणवाली (**पृथिव्याम्**) अपनी राज्यभूमि में अधिकार पाए हुए (**स्थः**) हो वे सब कभी सबकी रक्षा करने योग्य हो (**अतः**) इस कारण इस उक्त राज्य में (**परि, वृषणौ**) सब प्रकार सुखरूपी वर्षा करनेहारे होकर (**आ, यातम्**) आओ (**हि**) एक निश्चय के साथ (**अथ**) इसके उपरान्त उस राज्यभूमि में (**सुतस्य**) उत्पन्न हुए (**सोमस्य**) संसारी पदार्थों के रस को (**पिबतम्**) पिओ, यह एक अर्थ हुआ॥१॥९॥

(यत्) जो ये **(इन्द्राग्नी)** पवन और बिजुली **(अवमस्याम्)** निकृष्ट **(मध्यमस्याम्)** मध्यम **(उत)** वा **(परमस्याम्)** उत्तम गुणवाली **(पृथिव्याम्)** पृथिवी में **(स्थः)** हैं **(अतः)** इससे यहाँ **(परि, वृषणौ)** सब प्रकार से सुखरूपी वर्षा करनेवाले होकर **(आ, यातम्)** आते और **(अथ)** इसके उपरान्त **(हि)** एक निश्चय के साथ जो **(सुतस्य)** निकाले हुए **(सोमस्य)** पदार्थों के रस को **(पिबतम्)** पीते हैं, उनको काम सिद्धि के लिये कलाओं में संयुक्त करके महान् लाभ सिद्ध करना चाहिये॥२॥९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। उत्तम, मध्यम और निकृष्ट गुण, कर्म और स्वभाव के भेद से जो-जो राज्य हैं, वहाँ-वहाँ वैसे ही उत्तम, मध्यम, गुण, कर्म और स्वभाव के मनुष्यों को स्थापन कर और चक्रवर्त्ती राज्य करके सबको आनन्द भोगना-भोगवाना चाहिये। ऐसे ही इस सृष्टि में ठहरे और सब लोकों में प्राप्त होते हुए पवन और बिजुली को जान और उनका अच्छे प्रकार प्रयोग कर तथा कार्य्यों की सिद्धि करके दारिद्र्य दोष सबको नाश करना चाहिये॥९॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥१०॥

यत्। इन्द्राग्नी इति। परमस्याम्। पृथिव्याम्। मध्यमस्याम्। अवमस्याम्। उत। स्थः। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥१०॥

पदार्थः-(यत्) यौ **(इन्द्राग्नी)** **(परमस्याम्)** **(पृथिव्याम्)** **(मध्यमस्याम्)** **(अवमस्याम्)** **(उत)** **(स्थः)** पूर्ववदर्थः **(अतः०)** इत्यापि पूर्ववत्॥१०॥

अन्वयः-अन्वयोऽपि पूर्ववद्विज्ञेयः॥१०॥

भावार्थः-द्विविधाविन्द्राग्नी स्तः। एकावुत्तमगुणकर्मस्वभावेषु स्थितौ पवित्रभूमौ वा तावुत्तमौ यावपवित्रगुणकर्मस्वभावेष्वशुद्धभूम्यादिपदार्थेषु वा तिष्ठतस्तावबरौ इमौ द्विधा पवनाग्नी उपरिष्टादधोऽधस्तादुपर्य्यागच्छतस्तस्मादुभाभ्यां मन्त्राभ्यामवमपरमशब्दाभ्यां पूर्वप्रयुक्ताभ्यां विज्ञापितोऽयमर्थ इति वेद्यम्॥१०॥

पदार्थः-इस मन्त्र का अर्थ पिछले मन्त्र के समान जानना चाहिये॥१०॥

भावार्थः-इन्द्र और अग्नि दो प्रकार के हैं। एक तो वे कि जो उत्तम गुण, कर्म, स्वभाव में स्थिर वा पवित्र भूमि में स्थिर हैं, वे उत्तम और जो अपवित्र गुण, कर्म, स्वभाव में वा अपवित्र भूमि आदि पदार्थों में स्थिर होते हैं वे निकृष्ट; ये दोनों प्रकार के पवन और अग्नि ऊपर-नीचे सर्वत्र चलते हैं। इससे दोनों मन्त्रों से **(अवम)** और **(परम)** शब्द जो पहिले प्रयोग किये हुए हैं, उनसे दो प्रकार के **(इन्द्र)** और **(अग्नि)** के अर्थ को समझाया है, ऐसा जानना चाहिये॥१०॥

अथ भौतिकाविन्द्राग्नी क्व क्व वर्त्तेते इत्युपदिश्यते॥

अब भौतिक इन्द्र और अग्नि कहाँ-कहाँ रहते हैं, यह उपदेश अगले मन्त्र में किया है॥

यदि॑न्द्राग्नी दि॒वि ष्ठो यत्पृ॑थि॒व्यां यत्पर्व॑ते॒ष्वोष॑धीष्व॒प्सु।
अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑॥ ११॥

यत्। इ॒न्द्रा॒ग्नी॒ इति॑। दि॒वि। स्थः। यत्। पृ॒थि॒व्याम्। यत्। पर्व॑तेषु। ओष॑धीषु। अ॒प्ऽसु। अत॑:। परि॑। वृ॒ष॒णौ॒। आ। हि। या॒तम्। अथ॑। सोम॑स्य। पि॒ब॒त॒म्। सु॒तस्य॑॥ ११॥

पदार्थः-(**यत्**) यतः (**इन्द्राग्नी**) पवनविद्युतौ (**दिवि**) प्रकाशमान आकाशे सूर्य्यलोके वा (**स्थः**) वर्त्तेते (**यत्**) यतः (**पृथिव्याम्**) भूमौ (**यत्**) यतः (**पर्वतेषु**) (**अप्सु**) (**अतः०**) इति पूर्ववत्॥ ११॥

अन्वयः-यदिन्द्राग्नी दिवि यत् पृथिव्यां यत् पर्वतेष्वप्स्वोषधीषु स्थो वर्त्तेते। अतः परिवृषणौ तौ ह्यायातमागच्छतोऽथ सुतस्य सोमस्य रसं पिबतम्॥ ११॥

भावार्थः-यौ धनञ्जयवायुकारणाख्यावग्नी सर्वपदार्थस्थौ विद्येते, तौ यथावद्विदितौ संप्रयोजितौ च बहूनि कार्य्याणि साधयतः॥ ११॥

पदार्थः-(**यत्**) जिस कारण (**इन्द्राग्नी**) पवन और बिजुली (**दिवि**) प्रकाशमान आकाश में (**यत्**) जिस कारण (**पृथिव्याम्**) पृथिवी में (**यत्**) वा जिस कारण (**पर्वतेषु**) पर्वतों (**अप्सु**) जलों में और (**ओषधीषु**) ओषधियों में (**स्थः**) वर्त्तमान हैं (**अतः**) इस कारण (**परि, वृषणौ**) सब प्रकार से सुख की वर्षा करनेवाले वे (**हि**) निश्चय से (**आ, यातम्**) प्राप्त होते (**अथ**) इसके अनन्तर (**सुतस्य**) निकाले हुए (**सोमस्य**) जगत् के पदार्थों के रस को (**पिबतम्**) पीते हैं॥ ११॥

भावार्थः-जो धनञ्जय पवन और कारणरूप अग्नि सब पदार्थों में विद्यमान हैं, वे जैसे के वैसे जाने और क्रियाओं में जोड़े हुए बहुत कामों को सिद्ध करते हैं॥ ११॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

यदि॑न्द्राग्नी॒ उदि॑ता॒ सूर्य॑स्य॒ मध्ये॑ दि॒वः स्व॒धया॑ मा॒दये॑थे।
अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑॥ १२॥

यत्। इ॒न्द्रा॒ग्नी॒ इति॑। उत्ऽइ॑ता। सूर्य॑स्य। मध्ये॑। दि॒वः। स्व॒धया॑। मा॒दये॑थे॒ इति॑। अत॑:। परि॑। वृ॒ष॒णौ॒। आ। हि। या॒तम्। अथ॑। सोम॑स्य। पि॒ब॒त॒म्। सु॒तस्य॑॥ १२॥

पदार्थः-(**यत्**) यतः (**इन्द्राग्नी**) पूर्वोक्तौ (**उदिता**) उदित्तौ प्राप्तोदयौ (**सूर्य्यस्य**) सवितृमण्डलस्य (**मध्ये**) (**दिवः**) अन्तरिक्षस्य (**स्वधया**) उदकेनान्नेन वा सह वर्त्तमानौ (**मादयेथे**) हर्षयतः (**अतः, परि०**) इति पूर्ववत्॥१२॥

अन्वयः-यत् याविन्द्राग्नी उदिता सूर्यस्य दिवो मध्ये स्वधया सर्वान् मादयेथे हर्षयतोऽतो वृषणौ पर्य्यायातं परितो बाह्याभ्यन्तरत आगच्छतो हि खल्वथ सुतस्य सोमस्य रसं पिबतं पिबतः॥१२॥

भावार्थः-नहि पवनविद्युद्भ्यां विना कस्यापि लोकस्य प्राणिनो वा रक्षा जीवनं च संभवति तस्मादेतौ जगत्पालने मुख्यौ स्तः॥१२॥

पदार्थः-(**यत्**) जिस कारण (**इन्द्राग्नी**) पवन और बिजुली (**उदिता**) उदय को प्राप्त हुए (**सूर्य्यस्य**) सूर्य्यमण्डल के वा (**दिवः**) अन्तरिक्ष के (**मध्ये**) बीच में (**स्वधया**) अन्न और जल से सबको (**मादयेथे**) हर्ष देते हैं (**अतः**) इससे (**वृषणा**) सुख की वर्षा करनेवाले (**परि**) सब प्रकार से (**आ, यातम्**) आते अर्थात् बाहर और भीतर से प्राप्त होते और (**हि**) निश्चय है कि (**अथ**) इसके अनन्तर (**सुतस्य**) निकाले हुए (**सोमस्य**) जगत् के पदार्थों के रस को (**पिबतम्**) पीते हैं॥१२॥

भावार्थः-पवन और बिजुली के विना किसी लोक वा प्राणी की रक्षा और जीवन नहीं होते हैं, इससे संसार की पालना में ये ही मुख्य हैं॥१२॥

पुनर्धनपतिसेनाध्यक्षौ कीदृशावित्युपदिश्यते॥

अब धनपति और सेनापति कैसे हों, यह विषय अगले मन्त्र में कहा है॥

एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥१३॥२७॥

एव। इन्द्राग्नी इति। पपिवांसा। सुतस्य। विश्वा। अस्मभ्यम्। सम्। जयतम्। धनानि। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥१३॥

पदार्थः-(**एव**) अवधारणे (**इन्द्राग्नी**) परमधनाढ्यो युद्धविद्याप्रवीणश्च (**पपिवांसा**) पीतवन्तौ (**सुतस्य**) निष्पन्नस्य (**विश्वा**) अखिलानि (**अस्मभ्यम्**) (**सम्**) (**जयतम्**) (**धनानि**) (**तन्नो, मित्रो०**) इति पूर्ववत्॥१३॥

अन्वयः-मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्यानि नोऽस्मभ्यं मामहन्तां तत् तान्येव विश्वा धनानि सुतस्य निष्पन्नस्य रसं पपिवांसा इन्द्राग्नी संजयतं सम्यक् साधयतः॥१३॥

भावार्थः-नहि विद्वद्भ्यां बलिष्ठाभ्यां धार्मिकाभ्यां कोशसेनाध्यक्षाभ्यां विनोत्तमपुरुषार्थिनां विद्यादिधनानि वर्धितुं शक्यानि तथा मित्रादयः स्वमित्रेभ्यः सुखानि प्रयच्छन्ति, तथैव कोशसेनाध्यक्षादयः प्रजास्थेभ्यः प्राणिभ्यः सुखानि ददति तस्मात्सर्वैरेतौ सदा सम्पालनीयौ॥३॥

अत्र पवनविद्युदादिगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्यष्टोत्तरशततमं १०८ सूक्तं सप्तविंशो २७ वर्गश्च समाप्तः॥

पदार्थः-(**मित्रः**) मित्र (**वरुणः**) श्रेष्ठ गुणयुक्त (**अदितिः**) उत्तम विद्वान् (**सिन्धुः**) समुद्र (**पृथिवी**) पृथिवी (**उत**) और (**द्यौः**) सूर्य का प्रकाश जिनको (**नः**) हम लोगों के लिये (**मामहन्ताम्**) बढ़ावें (**तत्, एव**) उन्हीं (**विश्वा**) समस्त (**धनानि**) धनों को (**सुतस्य**) पदार्थों के निकाले हुए रस को (**पपिवांसा**) पिये हुए (**इन्द्राग्नी**) अति धनी वा युद्धविद्या में कुशल वीरजन (**अस्मभ्यम्**) हम लोगों के लिये (**संजयताम्**) अच्छी प्रकार जीतें अर्थात् सिद्ध करें॥१३॥

भावार्थः-विद्वान्, बलिष्ठ, धार्मिक, कोशस्वामी और सेनाध्यक्ष और उत्तम पुरुषार्थ करनेवालों के विना विद्या आदि धन नहीं बढ़ सकते हैं। जैसे मित्र आदि अपने मित्रों के लिये सुख देते हैं, वैसे ही कोशस्वामी और सेनाध्यक्ष आदि प्रजाजनों के लिये सुख देते हैं। इससे सबको चाहिये कि इनकी सदा पालना करें॥१३॥

इस सूक्त में पवन और बिजुली आदि गुणों के वर्णन से उसके अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह एकसौ आठवाँ १०८ सूक्त और सत्ताईसवाँ २७ वर्ग पूरा हुआ॥

अथ नवोत्तरशततमस्याष्टर्च्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। इन्द्राग्नी देवते। १,३,४,६,८ निचृत्त्रिष्टुप्। २,५ त्रिष्टुप्। ७ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनस्तौ विद्युत्प्रसिद्धाग्नी कीदृशावित्युपदिश्यते॥

अब एकसौ नववें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से फिर वे भौतिक अग्नि और बिजुली कैसे हैं, यह उपदेश किया है॥

वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान्
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम्॥ १॥

वि। हि। अख्यम्। मनसा। वस्यः। इच्छन्। इन्द्राग्नी इति। ज्ञासः। उत। वा। सऽजातान्। न। अन्या। युवत्। प्रऽमतिः। अस्ति। मह्यम्। सः। वाम्। धियम्। वाजऽयन्तीम्। अतक्षम्॥ १॥

पदार्थः-(**वि**) विविधार्थे (**हि**) खलु (**अख्यम्**) अन्यान् प्रति कथयेयम् (**मनसा**) विज्ञानेन (**वस्यः**) वसुषु साधुः। **छान्दसो वर्णलोपो वे**त्युकारलोपः। (**इच्छन्**) (**इन्द्राग्नी**) विद्युद्भौतिकावग्नी (**ज्ञासः**) जानन्ति ये तान् विदुषः सृष्टिस्थान् ज्ञातव्यान् पदार्थान् वा (**उत**) अपि (**वा**) विद्यार्थिनां ज्ञापकानां समुच्चये वा (**सजातान्**) सहोत्पन्नान् (**न**) नहि (**अन्या**) भिन्ना (**युवत्**) मिश्रयित्रमिश्रकौ वा (**प्रमतिः**) प्रकृष्टा चासौ मतिश्च प्रमतिः (**अस्ति**) (**मह्यम्**) (**सः**) (**वाम्**) युवाभ्याम् (**धियम्**) उत्तमां प्रज्ञाम् (**वाजयन्तीम्**) सबलानां विद्यानां प्रज्ञापिकाम् (**अतक्षम्**) तनूकुर्य्याम्॥ १॥

अन्वयः-यथेन्द्राग्नी इच्छन् वस्योऽहं ज्ञासः सजातानुत वा मनसा ज्ञातुमिच्छन् युवदहमेतान् हि खलु व्यख्यं तथा यूयमपि विख्यात या मम प्रमतिरस्ति सा युष्मभ्यमप्यस्तु नान्या यथाहं वामध्यापकाध्येतृभ्यां वाजयन्तीं धियमतक्षं तथा सोऽध्यापकोऽध्येता चैनां मह्यं तक्षतु॥ १॥

भावार्थः-अत्र लुप्तोपमालङ्कारौ। मनुष्याणां योग्यतास्ति सत्प्रीतिपुरुषार्थाभ्यां सद्विद्यादिबोधयन्तोऽत्युत्तमां बुद्धिं जनयित्वा व्यवहारपरमार्थसिद्धिकराणि कार्याण्यवश्यं साध्नुवन्तु॥ १॥

पदार्थः-जैसे (**इन्द्राग्नी**) बिजुली और जो दृष्टिगोचर अग्नि हैं, उनको (**इच्छन्**) चाहता हुआ (**वस्यः**) जिन्होंने चौबीस वर्ष पर्य्यन्त ब्रह्मचर्य्य किया है, उनमें प्रशंसनीय मैं तथा (**ज्ञासः**) जो ज्ञाताजन हैं उनको वा जानने योग्य पदार्थों को (**सजातान्**) वा एक संग हुए पदार्थों को (**उत**) और (**वा**) विद्यार्थी वा समझानेवालों को (**मनसा**) विशेष ज्ञान से जानने की इच्छा करता हुआ (**युवत्**) सब वस्तुओं को यथायोग्य कार्य्य में लगवानेहारा मैं इनको (**हि**) निश्चय से (**वि, अख्यम्**) औरों के प्रति उत्तमता के साथ कहूं, वैसे तुम लोग भी कहो, जो मेरी (**प्रमतिः**) प्रबल मति (**अस्ति**) है, वह तुम लोगों को भी हो, (**न, अन्या**) और न हो। जैसे मैं (**वाम्**) तुम दोनों पढ़ाने-पढ़नेवालों से (**वाजयन्तीम्**) समस्त विद्याओं को

जतानेवाली **(धियम्)** उत्तम बुद्धि को **(अतक्षम्)** सूक्ष्म करूं अर्थात् बहुत कठिन विषयों को सुगमता से जानूं, वैसे **(सः)** वह पढ़ाने और पढ़नेवाला इसको **(मह्यम्)** मेरे लिये सूक्ष्म करे॥१॥

भावार्थः-इस मन्त्र में दो लुप्तोपमालङ्कार हैं। मनुष्यों की योग्यता यह है कि अच्छी प्रीति और पुरुषार्थ से श्रेष्ठ विद्या आदि का बोध कराते हुए अति उत्तम बुद्धि उत्पन्न कराकर व्यवहार और परमार्थ की सिद्धि करानेवाले कामों को अवश्य सिद्ध करें॥१॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

अश्र॑वं॒ हि भू॑रि॒दाव॑त्तरा वां॒ विजा॑मातुरु॒त वा॑ घा स्या॒लात्।
अथा॒ सोम॑स्य॒ प्रय॑ती यु॒वभ्या॒मिन्द्रा॑ग्नी॒ स्तोमं॑ जनयामि॒ नव्य॑म्॥२॥

अश्र॑वम्। हि। भू॒रि॒दाव॑त्ऽतरा। वा॒म्। विऽजा॑मातुः। उ॒त। वा॒। घ॒। स्या॒लात्। अथ॑। सोम॑स्य। प्रऽय॑ती। यु॒वऽभ्या॑म्। इन्द्रा॑ग्नी॒ इति॑। स्तोम॑म्। ज॒न॒या॒मि॒। नव्य॑म्॥२॥

पदार्थः-**(अश्रवम्)** शृणोमि **(हि)** किल **(भूरिदावत्तरा)** अतिशयेन बहुधनदानप्राप्तिनिमित्तौ **(वाम्)** एतौ **(विजामातुः)** विगतो विरुद्धश्च जामाता च तस्मात् **(उत)** अपि **(वा)** **(घ)** एव। अत्र **ऋचि तु०** इति दीर्घः। **(स्यालात्)** स्वस्त्रीभ्रातुः **(अथ)** **निपातस्य चे**ति दीर्घः। **(सोमस्य)** ऐश्वर्य्यप्रापकस्य व्यवहारस्य **(प्रयती)** प्रयत्यै प्रदानाय। अत्र प्रपूर्वाद्यमधातोः क्तिन् तस्माच्चतुर्थ्येकवचने **सुपां सुलुगि**तीकारादेशः। **(युवभ्याम्)** एताभ्याम् **(इन्द्राग्नी)** पूर्वोक्तौ **(स्तोमम्)** गुणप्रकाशम् **(जनयामि)** प्रकटयामि **(नव्यम्)** नवीनम्॥२॥

अन्वयः-यौ वामेतौ भूरिदावत्तरेन्द्राग्नी वर्त्तेते यौ विजामातुः स्यालादुतापि वा धान्येभ्यश्चैव धनानि दापयत इत्यहमश्रवं अथ हि युवभ्यामेताभ्यां सोमस्य प्रयती ऐश्वर्य्यप्रदानाय नव्यं स्तोममहं जनयामि॥१॥

भावार्थः-सर्वेषां मनुष्याणां विद्युदादिपदार्थानां गुणज्ञानसंप्रयोगाभ्यां नूतनं कार्य्यसिद्धिकरं कलायन्त्रादिकं विधायानेकानि कार्य्याणि निर्वृत्य धर्मार्थकामसिद्धिः सम्पादनीयेति॥२॥

पदार्थः-जो **(वाम्)** ये **(भूरिदावत्तरा)** अतीव बहुत से धन की प्राप्ति करानेहारे **(इन्द्राग्नी)** बिजुली और भौतिक अग्नि हैं वा जो उक्त इन्द्राग्नी **(विजामातुः)** विरोधी जमाई **(स्यालात्)** साले से **(उत, वा)** अथवा और **(घ)** अन्यों जनों से धनों को दिलाते हैं, यह मैं **(अश्रवम्)** सुन चुका हूं **(अथ, हि)** अभि **(युवभ्याम्)** इनसे **(सोमस्य)** ऐश्वर्य्य अर्थात् धनादि पदार्थों की प्राप्ति करनेवाले व्यवहार के

(प्रयती) अच्छे प्रकार देने के लिये **(नव्यम्)** नवीन **(स्तोमम्)** गुण के प्रकाश को मैं **(जनयामि)** प्रकट करता हूं॥२॥

भावार्थः-सब मनुष्यों को बिजुली आदि पदार्थों के गुणों का ज्ञान और उनके अच्छे प्रकार कार्य में युक्त करने से नवीन-नवीन कार्य्य की सिद्धि करनेवाले कलायन्त्र आदि का विधान कर अनेक कामों को बना कर धर्म, अर्थ और अपनी कामना की सिद्धि करनी चाहिये॥२॥

पुनरेताभ्यां किन्न कर्त्तव्यमित्युपदिश्यते॥

फिर उनको क्या न करना चाहिये, यह विषय अगले मन्त्र में कहा है॥

मा छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे॥३॥

मा। छेद्म। रश्मीन्। इति। नाधमानाः। पितॄणाम्। शक्तीः। अनुऽयच्छमानाः। इन्द्राग्निऽभ्याम्। कम्। वृषणः। मदन्ति। ता। हि। अद्री इति। धिषणायाः। उपऽस्थे॥३॥

पदार्थः-**(मा)** निषेधे **(छेद्म)** छिन्द्याम **(रश्मीन्)** विद्याविज्ञानतेजांसि **(इति)** प्रकारार्थे **(नाधमानाः)** ऐश्वर्य्येणाप्तिमिच्छुकाः **(पितॄणाम्)** पालकानां विज्ञानवतां विदुषां रक्षानुयुक्तानामृतूनां वा **(शक्तीः)** सामर्थ्यानि **(अनुयच्छमानाः)** आनुकूल्येन नियन्तारः। अत्र व्यत्ययेनात्मनेपदम्। **(इन्द्राग्निभ्याम्)** पूर्वोक्ताभ्याम् **(कम्)** सुखम् **(वृषणः)** बलवन्तः **(मदन्ति)** मदन्ते कामयन्ते। अत्र **वा च्छन्दसि सर्वे विधयो भवन्ती**ति नुमभावो व्यत्ययेन परस्मैपदं च। **(ता)** तौ **(हि)** खलु **(अद्री)** यौ न द्रवतो विनश्यतः कदाचित्तौ **(धिषणायाः)** प्रज्ञायाः **(उपस्थे)** समीपे स्थापयितव्ये व्यवहारे। अत्र **घञर्थे कविधानमिति कः प्रत्ययः**॥३॥

अन्वयः-यथा वृषणो यावद्री वर्त्तेते ता सम्यग्विज्ञायैताभ्यामिन्द्राग्निभ्यां धिषणाया उपस्थे कं प्राप्य मदन्ति तथा पितॄणां रश्मीन् नाधमानाः शक्तीरनुयच्छमाना वयं मदेमहीति विज्ञायैतदादिविद्यानां मूलं मा छेद्म॥३॥

भावार्थः-ऐश्वर्यकामैर्मनुष्यैर्न कदाचिद्विदुषां सेवासङ्गौ त्यक्त्वा वसन्तादीनामृतूनां यथायोग्ये विज्ञानसेवने च विहाय वर्त्तितव्यम्। विद्याबुद्ध्युन्नतिर्व्यवहारस्य सिद्धिश्च प्रयत्नेन कार्या॥३॥

पदार्थः-जैसे **(वृषणः)** बलवान् जन जो **(अद्री)** कभी विनाश को न प्राप्त होनेवाले हैं **(ता)** उन इन्द्र और अग्नियों को अच्छी प्रकार जान **(इन्द्राग्निभ्याम्)** इनसे **(धिषणायाः)** अति विचारयुक्त बुद्धि के **(उपस्थे)** समीप में स्थिर करने योग्य अर्थात् उस बुद्धि के साथ में लाने योग्य व्यवहार में **(कम्)** सुख को पाकर **(मदन्ति)** आनन्दित होते हैं वा उस सुख की चाहना करते हैं, वैसे **(पितॄणाम्)** रक्षा करनेवाले ज्ञानी विद्वानों वा रक्षा से अनुयोग को प्राप्त हुए वसन्त आदि ऋतुओं के **(रश्मीन्)** विद्यायुक्त ज्ञानप्रकाशों

को **(नाधमाना:)** ऐश्वर्य के साथ चाहते **(शक्ती:)** वा सामर्थ्यों को **(अनु यच्छमाना:)** अनुकूलता के साथ नियम में लाते हुए हम लोग आनन्दित होते **(हि)** ही हैं और **(इति)** ऐसा जानके इन विद्याओं की जड़ को हम लोग **(मा छेद्म)** न काटें॥३॥

भावार्थ:-ऐश्वर्य्य की कामना करते हुए हम लोगों को कभी विद्वानों का संग और उनकी सेवा को छोड़ तथा वसन्त आदि ऋतुओं का यथायोग्य अच्छी प्रकार ज्ञान और सेवन का न त्यागकर अपना वर्त्ताव रखना चाहिये और विद्या तथा बुद्धि की उन्नति और व्यवहार सिद्धि उत्तम प्रयत्न के साथ करना चाहिये॥३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे कैसे हों, यह विषय अगले मन्त्र में कहा है॥

युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु॥४॥

युवाभ्याम्। देवी। धिषणा। मदाय। इन्द्राग्नी इति। सोमम्। उशती। सुनोति। तौ। अश्विना। भद्रऽहस्ता। सुपाणी इति सुऽपाणी। आ। धावतम्। मधुना। पृङ्क्तम्। अप्ऽसु॥४॥

पदार्थ:-**(युवाभ्याम्)** **(देवी)** दिव्यशिक्षाशास्त्रविद्याभिर्देदीप्यमाना **(धिषणा)** प्रज्ञा **(मदाय)** हर्षाय **(इन्द्राग्नी)** पूर्वोक्तौ **(सोमम्)** ऐश्वर्यम् **(उशती)** कामयमाना **(सुनोति)** निष्पादयति **(तौ)** **(अश्विना)** व्याप्तिशीलौ **(भद्रहस्ता)** भद्रकरणहस्ताविव गुणा ययोस्तौ **(सुपाणी)** शोभना: पाण्यो व्यवहारा ययोस्तौ **(आ)** समन्तात् **(धावतम्)** धावयत: **(मधुना)** जलेन **(पृङ्क्तम्)** सम्पृङ्क्त **(अप्सु)** कलास्थेषु जलाशयेषु वर्त्तमानौ॥४॥

अन्वय:-या सोममुशती देवी धिषणा मदाय युवाभ्यां कार्य्याणि सुनोति तया याविन्द्राग्नी अप्सु मधुना पृङ्क्तं भद्रहस्ता सुपाणी अश्विना स्तस्ताविन्द्राग्नी यानेषु संप्रयुक्तौ सन्तवाधावतं समन्तात् यानानि धावयतम्॥४॥

भावार्थ:-मनुष्या यावत् सुशिक्षासुविद्याक्रियाकौशलयुक्ताधियो न सम्पादयन्ति तावद्विद्युदादिभ्य: पदार्थेभ्य उपकारं ग्रहीतुं न शक्नुवन्ति तस्मादेतत् प्रयत्नेन साधनीयम्॥४॥

पदार्थ:-जो **(सोमम्)** ऐश्वर्य की **(उशती)** कान्ति करानेवाली **(देवी)** अच्छी-अच्छी शिक्षा और शास्त्रविद्या आदि से प्रकाशमान **(धिषणा)** बुद्धि **(मदाय)** आनन्द के लिये **(युवाभ्याम्)** जिनसे कामों को **(सुनोति)** सिद्ध करती है, उस बुद्धि से जो **(इन्द्राग्नी)** बिजुली और भौतिक अग्नि **(अप्सु)** कलाघरों के जल के स्थानों में **(मधुना)** जल से **(पृङ्क्तम्)** सम्पर्क अर्थात् संबन्ध करते हैं वा **(भद्रहस्ता)** जिनके उत्तम सुख के करनेवाले हाथों के तुल्य गुण **(सुपाणी)** और अच्छे-अच्छे व्यवहार वा **(अश्विना)** जो सब में

व्याप्त होनेवाले हैं **(तौ)** वे बिजुली और भौतिक अग्नि रथों में अच्छी प्रकार लगाये हुए उनको **(आ, धावतम्)** चलाते हैं॥४॥

भावार्थः-मनुष्य जब तक अच्छी शिक्षा, उत्तम विद्या और क्रियाकौशलयुक्त बुद्धियों को न सिद्ध करते हैं, तब तक बिजुली आदि पदार्थों से उपकार को नहीं ले सकते। इससे इस काम को अच्छे यत्न से सिद्ध करना चाहिये॥४॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये।
तावासद्या बर्हिषि यज्ञे अस्मिन् प्र चर्षणी मादयेथां सुतस्य॥५॥२८॥

युवाम्। इन्द्राग्नी इति। वसुनः। विऽभागे। तवःऽतमा। शुश्रव। वृत्रऽहत्ये। तौ। आऽसद्य। बर्हिषि। यज्ञे। अस्मिन्। प्र। चर्षणी इति। मादयेथाम्। सुतस्य॥५॥

पदार्थः-(**युवाम्**) एतौ द्वौ (**इन्द्राग्नी**) पूर्वोक्तौ (**वसुनः**) धनस्य (**विभागे**) सेवनव्यवहारे (**तवस्तमा**) अतिशयेन बलयुक्तौ बलप्रदौ वा (**शुश्रव**) शृणोमि (**वृत्रहत्ये**) वृत्रस्य शत्रूसमूहस्य मेघस्य वा हत्या हननं येन तस्मिन् सङ्ग्रामे (**तौ**) (**आसद्य**) प्राप्य वा। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। (**बर्हिषि**) उपवर्धयितव्ये (**यज्ञे**) सङ्गमनीये शिल्पव्यवहारे (**अस्मिन्**) (**प्र, चर्षणी**) सम्यक् सुखप्रापकौ। **चर्षणिरिति पदनामसु पठितम्।** (निघं०४.२) (**मादयेथाम्**) मादयेते हर्षयतः (**सुतस्य**) निष्पादितस्य। कर्मणि षष्ठी॥५॥

अन्वयः-अहं वसुनो विभागे वृत्रहत्ये वा युवामिन्द्राग्नी तवस्तमा स्त इति शुश्रव शृणोमि। अतस्तौ प्रचर्षणी अस्मिन् बर्हिषि यज्ञे सुतस्य निष्पादितं यानमासद्य मादयेथाम्॥५॥

भावार्थः-मनुष्या याभ्यां धनानि विभजन्ति वा शत्रून् विजित्य सार्वभौमं राज्यं कर्त्तुं शक्नुवन्ति, तौ कार्यसिद्धये कथं न संप्रयुञ्जीरन्॥५॥

पदार्थः-मैं (**वसुनः**) धन के (**विभागे**) सेवन व्यवहार में (**वृत्रहत्ये**) वा जिसमें शत्रुओं और मेघों का हनन हो उस संग्राम में (**युवाम्**) ये दोनों (**इन्द्राग्नी**) बिजुली और साधारण अग्नि (**तवस्तमा**) अतीव बलवान् और बल के देनेहारे हैं, यह (**शुश्रव**) सुनता हूं, इससे (**तौ**) वे दोनों (**प्रचर्षणी**) अच्छे सुख को प्राप्त करानेहारे (**अस्मिन्**) इस (**बर्हिषि**) समीप में बढ़नेहारे (**यज्ञे**) शिल्पव्यवहार के निमित्त (**सुतस्य**) उत्पन्न किये विमान आदि रथ को (**आसद्य**) प्राप्त होकर (**मादयेथाम्**) आनन्द देते हैं॥५॥

भावार्थः-मनुष्य जिससे धनों का विभाग करते हैं वा शत्रुओं को जीत के समस्त पृथिवी पर राज्य कर सकते हैं, उनको कार्य की सिद्धि के लिये कैसे न यथायोग्य कामों में युक्त करें॥५॥

अथ वायुविद्युतौ कीदृशावित्युपदिश्यते॥

अब पवन और बिजुली कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च।

प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या॥६॥

प्र। चर्षणिऽभ्यः। पृतनाऽहवेषु। प्र। पृथिव्याः। रिरिचाथे इति। दिवः। च। प्र। सिन्धुऽभ्यः। प्र। गिरिऽभ्यः। महित्वा। प्र। इन्द्राग्नी इति। विश्वा। भुवना। अति अन्या॥६॥

पदार्थः-(**प्र**) प्रकृष्टार्थे (**चर्षणिभ्यः**) मनुष्येभ्यः (**पृतनाहवेषु**) सेनाभिः प्रवृत्तेषु युद्धेषु (**प्र**) (**पृथिव्याः**) भूमेः (**रिरिचाथे**) अतिरिक्तौ भवतः (**दिवः**) सूर्यात् (**च**) अन्येभ्योऽपि लोकेभ्यः (**प्र**) (**सिन्धुभ्यः**) समुद्रेभ्यः (**प्र**) (**गिरिभ्यः**) शैलेभ्यः (**महित्वा**) प्रशंसय्य (**प्र**) (**इन्द्राग्नी**) वायुविद्युतौ (**विश्वा**) अखिला (**भुवना**) भुवनानि लोकान् (**अति**) (**अन्या**) अन्यानि॥६॥

अन्वयः-इन्द्राग्नी अन्या विश्वा भुवना अन्यान् सर्वाँल्लोकान् महित्वा पृतनाहवेषु चर्षणिभ्यः प्रपृथिव्या प्रसिन्धुभ्यः प्रगिरिभ्यः प्रदिवश्च प्रातिरिरिचाथे प्रातिरिक्तौ भवतः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि वायुविद्युद्भ्यां सदृशो महान् कश्चिदपि लोको भवितुमर्हति कुत एतौ सर्वाँल्लोकानभिव्याप्य स्थितावतः॥६॥

पदार्थः-(**इन्द्राग्नी**) वायु और बिजुली (**अन्या**) (**विश्वा**) (**भुवना**) और समस्त लोकों को (**महित्वा**) प्रशंसित करा के (**पृतनाहवेषु**) सेनाओं से प्रवृत्त होते हुए युद्धों में (**चर्षणिभ्यः**) मनुष्यों से (**प्र, पृथिव्याः**) अच्छे प्रकार पृथिवी वा (**प्र, सिन्धुभ्यः**) अच्छे प्रकार समुद्रों वा (**प्र गिरिभ्यः**) अच्छे प्रकार पर्वतों वा (**प्र दिवश्च**) और अच्छे प्रकार सूर्य्य से (**प्र, अति रिरिचाथे**) अत्यन्त बढ़ कर प्रतीत होते अर्थात् कलायन्त्रों के सहाय से बढ़कर काम देते हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पवन और बिजुली के समान बड़ा कोई लोक नहीं होने योग्य है, क्योंकि ये दोनों सब लोकों को व्याप्त होकर ठहरे हुए हैं॥६॥

अथाध्यापकाध्येतारौ कीदृशावित्युपदिश्यते॥

अब पढ़ाने और पढ़नेवाले कैसे होते हैं, यह उपदेश अगले मन्त्र में इन्द्र और अग्नि नाम से किया है॥

आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः।

इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन्॥७॥

आ। भरतम्। शिक्षतम्। वज्रबाहू इति वज्रऽबाहू। अस्मान्। इन्द्राग्नी इति। अवतम्। शचीभिः। इमे। नु। ते। रश्मयः। सूर्यस्य। येभिः। सऽपित्वम्। पितरः। नः। आसन्॥७॥

पदार्थः-(**आ**) (**भरतम्**) धारयतम् (**शिक्षतम्**) विद्योपादानं कारयतम् (**वज्रबाहू**) वज्रौ बलवीर्य्ये बाहू ययोस्तौ (**अस्मान्**) (**इन्द्राग्नी**) अध्येत्रध्यापकौ (**अवतम्**) रक्षणादिकं कुरुतम् (**शचीभिः**) कर्मभिः प्रज्ञाभिर्वा (**इमे**) प्रत्यक्षाः (**नु**) शीघ्रम् (**ते**) (**रश्मयः**) किरणाः (**सूर्य्यस्य**) मार्त्तण्डमण्डलस्य (**येभिः**) (**सपित्वम्**) समानं च तत् पित्वं प्रापणं वा विज्ञानं च तत्। अत्र **पिगताव**ित्यस्माद् धातोरौणादिकस्त्वन् प्रत्ययः। (**पितरः**) यथा जनकाः (**नः**) अस्मभ्यम् (**आसन्**) भवन्ति॥७॥

अन्वयः-हे वज्रबाहू इन्द्राग्नी! युवां य इमे सूर्यस्य रश्मयः सन्ति ते रक्षणादिकं च कुर्वन्ति यथा च पितरो येभिर्यैः कर्मभिर्नोऽस्मभ्यं सपित्वं प्रदायोपकारका आसन् तथा शचीभिरस्मान्नाभरतं शिक्षतं सततं न्ववतं च॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यः सुशिक्षया मनुष्येषु सूर्यवद्विद्याप्रकाशको मातापितृवत्कृपया रक्षकोऽध्यापकस्तथा सूर्यवत् प्रकाशितप्रज्ञोध्येता चास्ति तौ नित्यं सत्कुरुत नह्येतेन कर्मणा विना कदाचिद्विद्योन्नतिः सम्भवति॥७॥

पदार्थः-(**वज्रबाहू**) जिनके वज्र के तुल्य बल और वीर्य हैं, वे (**इन्द्राग्नी**) हे पढ़ने और पढ़ानेवालो! तुम दोनों जैसे (**इमे**) ये (**सूर्यस्य**) सूर्य की (**रश्मयः**) किरणें हैं और (**ते**) रक्षा आदि करते हैं और जैसे (**पितरः**) पितृजन (**येभिः**) जिन कामों से (**नः**) हम लोगों के लिये (**सपित्वम्**) समान व्यवहारों की प्राप्ति करने वा विज्ञान को देकर उपकार के करनेवाले (**आसान्**) होते हैं, वैसे (**शचीभिः**) अच्छे काम वा उत्तम बुद्धियों से (**अस्मान्**) हम लोगों को (**आ, भरतम्**) स्वीकार करो, (**शिक्षतम्**) शिक्षा देओ और (**नु**) शीघ्र (**अवतम्**) पालो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो अच्छी शिक्षा से मनुष्यों में सूर्य के समान विद्या का प्रकाशकर्ता और माता-पिता के तुल्य कृपा से रक्षा करने वा पढ़ानेवाला तथा सूर्य के तुल्य प्रकाशित बुद्धि को प्राप्त और दूसरा पढ़नेवाला है, उन दोनों का नित्य सत्कार करो। इस काम के विना कभी विद्या की उन्नति होने का संभव नहीं है॥७॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हों, यह विषय अगले मन्त्र में कहा है॥

पुरंदरा शिक्षतं वज्रहस्ताऽस्माँ इन्द्राग्नी अवतं भरेषु।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥८॥२९॥

पुर॑म्ऽदरा। शिक्ष॑तम्। व॒ज्र॒ऽह॒स्ता॒। अ॒स्मान्। इ॒न्द्रा॒ग्नी॒ इति॑। अ॒व॒त॒म्। भरे॑षु। तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒ह॒न्ता॒म्। अदि॑तिः। सिन्धुः॑। पृ॒थि॒वी। उ॒त। द्यौः॥८॥

पदार्थः-(**पुरन्दरा**) यौ शत्रूणां पुराणि दारयतस्तौ (**शिक्षतम्**) (**वज्रहस्ता**) वज्रहस्तौ वज्रं विद्यारूपं वीर्यं हस्त इव ययोस्तौ। **वज्रो वै वीर्यम्।** (शत०७.४.२.२४) अत्रोभयत्र **सुपां सुलुगि**त्याकारादेशः। (**अस्मान्**) (**इन्द्राग्नी**) उपदेश्योपदेष्टारौ (**अवतम्**) रक्षादिकं कुरुतम् (**भरेषु**) (**तन्नो मित्रो०**) इति पूर्ववत्॥८॥

अन्वयः-हे पुरन्दरा वज्रहस्तेन्द्राग्नी! युवां यथा मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्नो मामहन्तां तथाऽस्मान् तद्विज्ञानं शिक्षतं भरेष्ववतञ्च॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मित्रादयः स्वमित्रादीन् रक्षित्वा वर्धयन्त्यानुकूल्ये वर्त्तन्ते तथोपदेश्योपदेष्टारौ परस्परं विद्यां वर्धयित्वा संप्रीत्या सखित्वे वर्त्तेयाताम्॥८॥

अत्रेन्द्राग्निशब्दार्थवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति नवोत्तरशततमं १०९ सूक्तमेकोनत्रिंशो २९ वर्गश्च समाप्तः॥

पदार्थः-जो (**पुरन्दरा**) शत्रुओं के पुरों को विध्वंस करनेवाले वा (**वज्रहस्ता**) जिनका विद्यारूपी वज्र हाथ के समान है, वे (**इन्द्राग्नी**) उपदेश के सुनने वा करनेवाले तुम जैसे (**मित्रः**) सुहृज्जन (**वरुणः**) उत्तम गुणयुक्त (**अदितिः**) अन्तरिक्ष (**सिन्धुः**) समुद्र (**पृथिवी**) पृथिवी (**उत**) और (**द्यौः**) सूर्य का प्रकाश (**नः**) हम लोगों को (**मामहन्ताम्**) उन्नति देता है, वैसे (**अस्मान्**) हम लोगों को (**तत्**) उन उक्त पदार्थों के विशेष ज्ञान की (**शिक्षतम्**) शिक्षा देओ और (**भरेषु**) संग्राम आदि व्यवहारों में (**अवतम्**) रक्षा आदि करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मित्र आदि जन अपने मित्रादिकों की रक्षा कर और उन्नति करते वा एक-दूसरे की अनुकूलता में रहते हैं, वैसे उपदेश के सुनने और सुनाने वाले परस्पर विद्या की वृद्धि कर प्रीति के साथ मित्रपन में वर्त्ताव रक्खें॥८॥

इस सूक्त में इन्द्र और अग्नि शब्द के अर्थ का वर्णन है। इससे इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह एकसौ नववाँ १०९ सूक्त और उनतीसवाँ २९ वर्ग पूरा हुआ॥

अथ दशोत्तरशततमस्य नवर्च्चस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। ऋभवो देवताः। १,४ जगती। २,३,७ विराड्जगती। ६,८ निचृज्जगती छन्दः। निषादः स्वरः। ५ निचृत् त्रिष्टुप्। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः।

अथ विद्वांसो मनुष्याः कथं वर्त्तेरन्नित्युपदिश्यते।

अब ११० एकसौ दशवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से विद्वान् मनुष्य कैसे अपना वर्ताव रक्खें, यह उपदेश किया है॥

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः॥ १॥

ततम्। मे। अपः। तत्। ऊम् इति। तायते। पुनरिति। स्वादिष्ठा। धीतिः। उचथाय। शस्यते। अयम्। समुद्रः। इह। विश्वऽदेव्यः। स्वाहाऽकृतस्य। सम्। ऊम् इति। तृप्णुत। ऋभवः॥ १॥

पदार्थः-(ततम्) विस्तृतम् **(मे)** मम **(अपः)** कर्म **(तत्)** तथा **(उ)** वितर्के **(तायते)** पालयति। अत्रान्तर्गतो ण्यर्थः। **(पुनः)** **(स्वादिष्ठा)** अतिशयेन स्वाद्वी **(धीतिः)** धीः **(उचथाय)** प्रवचनायाध्यापनाय **(शस्यते)** **(अयम्)** **(समुद्रः)** सागरः **(इह)** अस्मिँल्लोके **(विश्वदेव्यः)** विश्वान् समग्रान् देवान् दिव्यगुणानर्हति **(स्वाहाकृतस्य)** सत्यवाङ् निष्पन्नस्य धर्मस्य **(सम्)** **(उ)** **(तृप्णुत)** सुखयत **(ऋभवः)** मेधाविनः। **ऋभुरिति मेधाविनामसु पठितम्।** (निघं०३.१५) अत्राह निरुक्ताकारः-**ऋभव उरु भान्तीति वा। ऋतेन भान्तीति वा। ऋतेन भवन्तीति वा।** (निरु०११.१५)॥१॥

अन्वयः-हे ऋभवो मेधाविनो विद्वांसो! यथेहायं विश्वदेव्यः समुद्रो यथा च युष्माभिः स्वाहाकृतस्योचथाय स्वादिष्ठा धीतिः शस्यते यथो मे ततमपस्तायते तदु पुनरस्मान् येयं संतृप्णुत॥१॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। यथा समस्तरत्नैर्युक्तः सागरो दिव्यगुणो वर्त्तते, तथैव धार्मिकैरध्यापकैर्मनुष्येषु सत्यकर्मप्रज्ञे प्रचार्य्य दिव्यगुणाः प्रसिद्धाः कार्य्याः॥१॥

पदार्थः-हे **(ऋभवः)** बुद्धिमान् विद्वानो! तुम लोग जैसे **(इह)** इस लोक में **(अयम्)** यह **(विश्वदेव्यः)** समस्त अच्छे गुणों के योग्य **(समुद्रः)** समुद्र है और जैसे तुम लोगों में **(स्वाहाकृतस्य)** सत्य वाणी से उत्पन्न हुए धर्म के **(उचथाय)** कहने के लिये **(स्वादिष्ठा)** अतीव मधुर गुणवाली **(धीतिः)** बुद्धि **(शस्यते)** प्रशंसनीय होती है **(उ)** वा जैसे **(मे)** मेरा **(ततम्)** बहुत फैला हुआ अर्थात् सबको विदित **(अपः)** काम **(तायते)** पालना करता है **(तत् उ पुनः)** वैसे फिर तो हम लोगों को **(सम् तृप्णुत)** अच्छा तृप्त करो॥१॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जैसे समस्त रत्नों से भरा हुआ समुद्र दिव्य गुणयुक्त है, वैसे ही धार्मिक पढ़ानेवालों को चाहिये कि मनुष्यों में सत्य काम और अच्छी बुद्धि का प्रचार कर दिव्य गुणों की प्रसिद्धि करें॥१॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

आ॒भो॒गय॒ं प्र यदि॒च्छन्त॒ ऐत॒नापा॑का॒ः प्राञ्चो॒ मम॒ के चि॑दा॒पय॑ः।
सौध॑न्वनासश्चरि॒तस्य॑ भू॒मनाग॑च्छत सवि॒तुर्दा॒शुषो॑ गृ॒हम्॥ २॥

आ॒ऽभो॒गय॑म्। प्र। यत्। इ॒च्छन्त॑ः। ऐत॑न। अपा॑काः। प्राञ्च॑ः। मम॑। के। चि॒त्। आ॒पय॑ः। सौध॑न्वनासः। च॒रि॒तस्य॑। भू॒मना॑। अग॑च्छत। स॒वि॒तुः। दा॒शुष॑ः। गृ॒हम्॥ २॥

पदार्थः-(आभोगयम्) आसमन्ताद्भोगेषु साधुं व्यवहारम्। अत्रो**भयसंज्ञान्यपि छन्दांसि दृश्यन्त** इति भसंज्ञा निषेधादल्लोपाभावः। **(प्र)** **(यत्)** यम् **(इच्छन्तः)** **(ऐतन)** प्राप्नुत **(अपाकाः)** वर्जितपाकयज्ञा यतयः **(प्राञ्चः)** प्राचीनाः **(मम)** **(के)** **(चित्)** **(आपयः)** विद्याव्याप्तुकामाः **(सौधन्वनासः)** शोभनानि धन्वानि धनूंषि येषु ते सुधन्वानस्तेषु कुशला सौधन्वनाः **(चरितस्य)** अनुष्ठितस्य कर्मणः **(भूमना)** बहुत्वेन। अत्रो**भयसंज्ञान्यपी**ति भसंज्ञाऽभावादल्लोपाभावः। **(आगच्छत)** **(सवितुः)** ऐश्वर्य्ययुक्तस्य **(दाशुषः)** दानशीलस्य **(गृहम्)** निवासस्थानम्॥२॥

अन्वयः-हे प्राञ्चोऽपाका यतयो! यूयं ये केचिन्ममापयो यद्ययमाभोगयमिच्छन्तो वर्त्तन्ते, तान् तं प्रैतन। हे सौधन्वनासो! यदा यूयं भूमना चरितस्य सवितुर्दाशुषो गृहमगच्छत खल्वागच्छत तदा जिज्ञासून् प्रति सत्यधर्मग्रहणमुपदिशत॥२॥

भावार्थः-हे गृहस्थादयो मनुष्या! यूयं परिव्राजां सकाशात् सत्या विद्याः प्राप्य क्वचिद्दानशीलस्य सभां गत्वा तत्र युक्त्या स्थित्वा निरभिमानत्वेन वर्त्तित्वा विद्याविनयौ प्रचारयत॥२॥

पदार्थः-हे **(प्राञ्चः)** प्राचीन **(अपाकाः)** रोटी आदि का स्वयं पाक तथा यज्ञादि कर्म न करनेहारे संन्यासी जनो! आप जो **(के, चित्)** कोई जन **(मम)** मेरे **(आपयः)** विद्या में अच्छी प्रकार व्याप्त होने की कामना किए **(यत्)** जिस **(आ भोगयम्)** अच्छे प्रकार भोगने के पदार्थों में प्रशंसित भोग की **(इच्छन्तः)** चाह कर रहे हैं, उनको उसी भोग को **(प्र, ऐतन)** प्राप्त करो। हे **(सौधन्वनासः)** धनुष बाण के बांधनेवालों में अतीव चतुरो! जब तुम **(भूमना)** बहुत **(चरितस्य)** किये हुए काम के **(सवितुः)** ऐश्वर्य से युक्त **(दाशुषः)** दान करनेवाले के **(गृहम्)** घर को **(आगच्छत)** आओ तब जिज्ञासुओं अर्थात् उपदेश सुननेवालों के प्रति सांचे धर्म के ग्रहण करने का उपदेश करो॥२॥

भावार्थः-हे गृहस्थ आदि मनुष्यो! तुम संन्यासियों से सत्य विद्या को पाकर, कहीं दान करनेवालों की सभा में जाकर, वहाँ युक्ति से बैठ और निरभिमानता से वर्त्तकर विद्या और विनय का प्रचार करो॥२॥

पुनस्ते कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर वे कैसे वर्तें, यह विषय अगले मन्त्र में कहा है॥

तत्स॑वि॒ता वो॑ऽमृत॒त्वमासु॑व॒दगो॑ह्यं॒ यच्छ्र॒वय॑न्त॒ ऐत॑न।
त्यं चि॑च्च॒मस॑मसु॒रस्य॒ भक्ष॑ण॒मेकं॒ सन्त॑मकृणुता॒ चतु॑र्वयम्॥ ३॥

तत्। स॒वि॒ता। वः॒। अ॒मृ॒त॒ऽत्वम्। आ। अ॒सु॒व॒त्। अगो॑ह्यम्। यत्। श्र॒वय॑न्तः। ऐत॑न। त्यम्। चि॒त्। च॒म॒सम्। असु॑रस्य। भक्ष॑णम्। एक॑म्। सन्त॑म्। अ॒कृ॒णु॒त॒। चतुः॑ऽवयम्॥ ३॥

पदार्थः-(तत्) (सविता) ऐश्वर्यप्रदो विद्वान् **(वः)** युष्मभ्यम् **(अमृतत्वम्)** मोक्षभावम् **(आ) (असुवत्)** ऐश्वर्ययोगं कुर्यात् **(अगोह्यम्)** गोप्तुमनर्हम् **(यत्) (श्रवयन्तः)** श्रावयन्तः **(ऐतन)** विज्ञापयत **(त्यम्)** अमुम् **(चित्)** इव **(चमसम्)** चमन्त्यस्मिन् मेघे **(असुरस्य)** असुषु प्राणेषु रतस्य। **असुरताः।** (निरु०३.८) **(भक्षणम्)** सूर्य्यप्रकाशस्याभ्यवहरणम् **(एकम्)** असहायम् **(सन्तम्)** वर्त्तमानम् **(अकृणुत)** कुरुत। अत्रा**न्येषामपी**ति दीर्घः। **(चतुर्वयम्)** चत्वारो धर्मार्थाकाममोक्षा वया व्याप्तव्या येन तम्॥३॥

अन्वयः-हे बुद्धिमन्तो! यूयं यः सविता वो यदमृतत्वमासुवत् तदगोह्यं श्रवयन्तः सकला विद्या ऐतन विज्ञापयत। असुरस्य चमसं त्यं भक्षणं चिदिव चतुर्वयमेकं सन्तमकृणुत॥३॥

भावार्थः-हे विद्वांसो! यथा मेघः प्राणपोषकान्नजलादिपदार्थप्रदो भूत्वा सुखयति, तथैव यूयं विद्यादातारो भूत्वा विद्यार्थिनो विदुषः सम्पाद्य सूपकारान् कुरुत॥३॥

पदार्थः-हे बुद्धिमानो! तुम जो **(सविता)** ऐश्वर्य्य का देनेवाला विद्वान् **(वः)** तुम्हारे लिये **(यत्)** जिस **(अमृतत्वम्)** मोक्षभाव के **(आ, असुवत्)** अच्छे प्रकार ऐश्वर्य्य का योग करे **(तत्)** उसको **(अगोह्यम्)** प्रकट **(श्रवयन्तः)** सुनाते हुए सब विद्याओं को **(ऐतन)** समझाओ, **(असुरस्य)** जो प्राणों में रम रहा है, उस मेघ के **(चमसम्)** जिसमें सब भोजन करते हैं अर्थात् जिससे उत्पन्न हुए अन्न को सब खाते हैं **(त्यम्)** उस **(भक्षणम्)** सूर्य के प्रकाश को निगल जाने के **(चित्)** समान **(चतुर्वयम्)** जिसमें धर्म, अर्थ, काम और मोक्ष हैं ऐसे **(एकम्)** एक **(सन्तम्)** अपने वर्त्ताव को **(अकृणुत)** करो॥३॥

भावार्थः-हे विद्वानो! जैसे मेघ प्राण की पुष्टि करनेवाले अन्न आदि पदार्थों को देनेवाला होकर सुखी करता है वैसे ही आप लोग विद्या के दान करनेवाले होकर विद्यार्थियों को विद्वान् कर सुन्दर उपकार करो॥३॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तोऽअमृतत्वमानशुः।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः॥४॥

विष्ट्वी। शमी। तरणिऽत्वेन। वाघतः। मर्तासः। सन्तः। अमृतऽत्वम्। आनशुः। सौधन्वनाः। ऋभवः। सूरऽचक्षसः। संवत्सरे। सम्। अपृच्यन्त। धीतिऽभिः॥४॥

पदार्थः-(विष्ट्वी) व्यापनशीलानि **(शमी)** कर्माणि। **विष्ट्वी शमीत्येतद्द्वयं कर्मनामसु पठितम्।** (निघं०२.१) **(तरणित्वेन)** शीघ्रत्वेन **(वाघतः)** वाग्विद्यायुक्ताः **(मर्त्तासः)** मरणधर्माणः **(सन्तः)** **(अमृतत्वम्)** मोक्षभावम् **(आनशुः)** अश्नुवन्ति **(सौधन्वनाः)** शोभनविज्ञानाः **(ऋभवः)** मेधाविनः **(सूरचक्षसः)** सूरप्रज्ञानाः **(संवत्सरे)** वर्षे **(सम्)** **(अपृच्यन्त)** पृच्यन्ति **(धीतिभिः)** कर्मभिः। इमं मन्त्रं निरुक्तकार एवं समाचष्टे- **कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा, मर्त्तासः सन्तोऽमृतत्वमानशिरे, सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा, संवत्सरे समपृच्यन्त धीतिभिः कर्मभिः, ऋभुर्विभ्वा वाज इति।** (निरु०११.१६)॥४॥

अन्वयः-ये सौधन्वनाः सूरचक्षसो वाघतो मर्त्तास ऋभवः संवत्सरे धीतिभिः सततं पुरुषार्थयुक्तैः कर्मभिः कार्यसिद्धिं समपृच्यन्त सम्यक् पृञ्चन्ति ते तरणित्वेन विष्ट्वी शमी कुर्वन्तः सन्तोऽमृतत्वं मोक्षभाव- मानशुरश्नुवन्ति॥४॥

भावार्थः-ये मनुष्याः प्रतिक्षणं सुपुरुषार्थान् कुर्वन्ति ते मोक्षपर्यन्तान् पदार्थान् प्राप्य सुखयन्ति, न खल्वलसा मनुष्याः कदाचित् सुखानि प्राप्तुमर्हन्ति॥४॥

पदार्थः-जो **(सौधन्वनाः)** अच्छे ज्ञानवाले **(सूरचक्षसः)** अर्थात् जिनका प्रबल ज्ञान है **(वाघतः)** वा वाणी को अच्छे कहने, सुनने **(मर्त्तासः)** मरने और जीनेहारे **(ऋभवः)** बुद्धिमान् जन **(संवत्सरे)** वर्ष में **(धीतिभिः)** निरन्तर पुरुषार्थयुक्त कामों से कार्यसिद्धि का **(समपृच्यन्त)** संबन्ध रखते अर्थात् काम का ढंग रखते हैं वे **(तरणित्वेन)** शीघ्रता से **(विष्ट्वी)** व्याप्त होने वाले **(शमी)** कामों को करते **(सन्तः)** हुए **(अमृतत्वम्)** मोक्षभाव को **(आनशुः)** प्राप्त होते हैं॥४॥

भावार्थः-जो मनुष्य प्रत्येक क्षण अच्छे-अच्छे पुरुषार्थ करते हैं, वे संसार से ले के मोक्ष पर्यन्त पदार्थों को प्राप्त होकर सुखी होते हैं, किन्तु आलसी मनुष्य कभी सुखों को नहीं प्राप्त हो सकते॥४॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम्।

उप॑स्तुता उप॒मं नाध॑मानाॅ॒ अम॑र्त्येषु॒ श्रव॑ इ॒च्छमा॑नाः॥५॥३०॥

क्षेत्र॑म्ऽइव। वि। म॒मुः॒। तेज॑नेन। एक॑म्। पात्र॑म्। ऋ॒भव॑ः। जेह॑मानम्। उप॑ऽस्तुताः। उ॒प॒ऽमम्। नाध॑मानाः। अम॑र्त्येषु। श्रव॑ः। इ॒च्छमा॑नाः॥५॥

पदार्थः-(क्षेत्रमिव) यथा क्षेत्रं तथा **(वि) (ममुः)** मानं कुर्वन्ति **(तेजनेन)** तीव्रेण कर्मणा **(एकम्) (पात्रम्)** पत्राणां ज्ञानानां समूहम् **(ऋभवः) (जेहमानम्)** प्रयत्नसाधकम् **(उपस्तुताः)** उपगतेन स्तुताः **(उपमम्)** उपमानम् **(नाधमानाः)** याचमानाः **(अमर्त्येषु)** मरणधर्मरहितेषु पदार्थेषु **(श्रवः)** अन्नम् **(इच्छमानाः)** इच्छन्तः। व्यत्ययेनात्रात्मनेपदम्॥५॥

अन्वयः-ये उपस्तुता नाधमाना अमर्त्येषु श्रव इच्छमाना ऋभवो मेधाविनस्तेजनेन क्षेत्रमिव जेहमानमेकमुपमं पात्रं विममुर्विविधं मान्ति ते सुखं प्राप्नुवन्ति॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा जनाः क्षेत्रं कर्षित्वा उप्त्वा संरक्ष्य ततोऽन्नादिकं प्राप्य भुक्त्वाऽऽनन्दन्ति तथा वेदोक्तकलाकौशलेन प्रशस्तानि यानानि रचित्वा तत्र स्थित्वा संचाल्य देशान्तरं गत्वा व्यवहारेण राज्येन वा धनं प्राप्य सुखयन्ति॥५॥

पदार्थः-जो **(उपस्तुताः)** तीर आनेवालों से प्रशंसा को प्राप्त हुए **(नाधमानाः)** और लोगों से अपने प्रयोजन से याचे हुए **(अमर्त्येषु)** अविनाशी पदार्थों में **(श्रवः)** अन्न को **(इच्छमानाः)** चाहते हुए **(ऋभवः)** बुद्धिमान् जन **(तेजनेन)** अपनी उत्तेजना से **(क्षेत्रमिव)** खेत के समान **(जेहमानम्)** प्रयत्नों को सिद्ध करानेहारे **(एकम्)** एक **(उपमम्)** उपमा रूप अर्थात् अति श्रेष्ठ **(पात्रम्)** ज्ञानों के समूह का **(वि, ममुः)** विशेष मान करते हैं, वे सुख पाते हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य खेत को जोत, बोय और सम्यक् रक्षा कर उससे अन्न आदि को पाके उसका भोजन कर आनन्दित होते हैं, वैसे वेद में कहे हुए कलाकौशल से प्रशंसित यानों को रचकर उनमें बैठ और उन्हें चला और एक देश से दूसरे देश में जाकर व्यवहार वा राज्य से धन को पाकर सुखी होते हैं॥५॥

अथ सूर्य्यकिरणाः कीदृशा इत्युपदिश्यते॥

अब सूर्य्य की किरणें कैसी हैं, यह विषय अगले मन्त्र में कहा है॥

आ म॑नी॒षाम॒न्तरि॑क्षस्य॒ नृभ्य॑ः स्रु॒चेव॑ घृ॒तं जु॒॑हवा॑म वि॒द्मना॑।
त॒र॒णि॒त्वा ये पि॒तुर॑स्य सश्चि॒र ऋ॒भवो॒ वाज॑मरुहन्दि॒वो रज॑ः॥६॥

आ। म॒नी॒षाम्। अ॒न्तरि॑क्षस्य। नृऽभ्य॑ः। स्रु॒चाऽइ॑व। घृ॒तम्। जु॒॒हवा॑म। वि॒द्मना॑। त॒र॒णि॒ऽत्वा। ये। पि॒तुः। अ॒स्य॒। स॒श्चि॒रे। ऋ॒भव॑ः। वाज॑म्। अ॒रु॒हन्। दि॒वः। रज॑ः॥६॥

पदार्थः-(आ) (मनीषाम्) प्रज्ञाम् **(अन्तरिक्षस्य)** आकाशस्य मध्ये **(नृभ्यः)** मनुष्येभ्यः **(स्रुचेव)** यथा होमोपकरणेन तथा **(घृतम्)** उदकमाज्यं वा **(जुहवाम)** आदद्याम **(विद्मना)** वेत्ति येन तेन विज्ञानेन **(तरणित्वा)** शीघ्रत्वेन **(ये) (पितुः)** अन्नम् **(अस्य) (सश्चिरे)** सज्जन्ति प्राप्नुवन्ति प्रापयन्ति वा **(ऋभवः)** किरणाः। **आदित्यरश्मयोऽप्यृभव उच्यन्ते।** (निरु०११.१६) **(वाजम्)** पृथिव्यादिकमन्नम् **(अरुहन्)** रोहन्ति **(दिवः)** प्रकाशितस्याकाशस्य मध्ये **(रजः)** लोकसमूहम्॥६॥

अन्वयः-ये ऋभवो तरणित्वा वाजमरुहन् दिवो रजः सश्चिरे, अस्यान्तरिक्षस्य मध्ये वर्त्तमाना नृभ्यः स्रुचेव घृतं पितुरन्नं च सश्चिरे, तेभ्यो वयं विद्मना मनीषामा जुहवाम॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथेम आदित्यरश्मयो लोकलोकान्तरानारुह्य सद्यो जलं वर्षयित्वौषधीरुत्पाद्य सर्वान् प्राणिनः सुखयन्ति तथा राजादयो जनाः प्रजाः सुखयन्तु॥६॥

पदार्थः-(ये) जो **(ऋभवः)** सूर्य्य की किरणें **(तरणित्वा)** शीघ्रता से **(वाजम्)** पृथिवी आदि अन्न पर **(अरुहन्)** चढ़तीं और **(दिवः)** प्रकाशयुक्त आकाश के बीच **(रजः)** लोकसमूह को **(सश्चिरे)** प्राप्त होती हैं। और **(अस्य)** इस **(अन्तरिक्षस्य)** आकाश के बीच वर्त्तमान हुई **(नृभ्यः)** मनुष्यों के लिये **(स्रुचेव)** जैसे होम करने के पात्र से घृत को छोड़े वैसे **(घृतम्)** जल तथा **(पितुः)** अन्न को प्राप्त कराती हैं, उनके सकाश से हम लोग **(विद्मना)** जिससे विद्वान् सत्-असत् का विचार करता है, उस ज्ञान से **(मनीषाम्)** विचारवाली बुद्धि को **(आ, जुहवाम)** ग्रहण करें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे ये सूर्य की किरणें लोक-लोकान्तरों को चढ़ कर शीघ्र जल वर्षा और उसने ओषधियों को उत्पन्न कर सब प्राणियों को सुखी करती हैं, वैसे राजादि जन प्रजाओं को सुखी करें॥६॥

पुनर्विद्वानस्मदर्थं केन किं कुर्यादित्युपदिश्यते॥

फिर श्रेष्ठ विद्वान् हमारे लिये किससे क्या करे, यह विषय अगले मन्त्र में कहा है॥

ऋ॒भुर्न॒ इन्द्रः॑ शव॑सा॒ नवी॑यानृ॒भुर्वाजे॑भि॒र्वसु॑दे॒दिः।
यु॒ष्माक॑ देवा॒ अव॒साह॑नि प्रि॒ये ३॑ऽभि ति॑ष्ठेम पृ॒त्सु॒तीर॑सु॒न्वता॑म्॥७॥

ऋ॒भुः। न॒ः। इन्द्रः॑। शव॑सा। नवी॑यान्। ऋ॒भुः। वाजे॑भिः। वसु॑ऽभिः। वसु॑ः। दे॒दिः। यु॒ष्माक॑म्। दे॒वा॒ः। अव॑सा। अह॑नि। प्रि॒ये। अ॒भि। ति॒ष्ठे॒म॒। पृ॒त्सु॒तीः। अ॒सु॒न्वता॑म्॥७॥

पदार्थः-(ऋभुः) बहुविद्याप्रकाशको विद्वान् **(नः)** अस्मभ्यम् **(इन्द्रः)** यथा सूर्यः स्वस्य प्रकाशाकर्षणाभ्यां सर्वानाह्लादयति तथा **(शवसा)** विद्यासुशिक्षाबलेन **(नवीयान्)** अतिशयेन नवः **(ऋभुः)** मेधाव्याऽऽयुःसभ्यताप्रकाशकः **(वाजेभिः)** विज्ञानैरन्नैः संग्रामैर्वा **(वसुभिः)** चक्रवर्त्यादिराज्यश्रीभिः सह

(वसुः) सुखेषु वस्ता **(ददिः)** सुखानां दाता **(युष्माकम्)** **(देवाः)** विद्यासुशिक्षे जिज्ञासवः **(अवसा)** रक्षणादिना सह वर्त्तमानाः **(अहनि)** दिने **(प्रिये)** प्रसन्नताकारके **(अभि)** आभिमुख्ये **(तिष्ठेम)** **(पृत्सुतीः)** याः सम्पर्ककारकाणां सुतय ऐश्वर्यप्रापिकाः सेनास्ताः। अत्र पृची धातोः क्विपि वर्णव्यत्ययेन तकारः। तदुपपदादैश्वर्यार्थात् सुधातोः संज्ञायां क्तिच् प्रत्ययः। **(असुन्वताम्)** स्वैश्वर्यविरोधिनां शत्रूणाम्॥७॥

अन्वयः–यो नवीयानृभुर्यथेन्द्रस्तथा शवसा नोऽस्मभ्यं सुखं प्रयच्छेदृभुर्वाजेभिर्वसुभिर्वसुर्ददिस्तेन स्वराज्यसेनानामवसा सह देवा वयं प्रियेऽहन्यसुन्वतां युष्माकं शत्रूणां पृत्सुतीः सेना अभितिष्ठेमाभिभवेम सदा तिरस्कुर्याम॥७॥

भावार्थः–अत्र लुप्तोपमालङ्कारः। यथा सविता स्वप्रकाशेन तेजस्वी सर्वान् चराचरान् पदार्थान् जीवननिमित्ततयाऽऽह्लादयति तथा विद्वच्छूरवीरविद्वत्कुशलसहाययुक्ता वयं सुशिक्षिताभिर्हृष्टपुष्टाभिः स्वसेनाभिः ससेनान् शत्रूंस्तिरस्कृत्य धार्मिकाः प्रजाः सम्पाल्य चक्रवर्त्तिराज्यं सततं सेवेमहि॥७॥

पदार्थः–जो **(नवीयान्)** अतीव नवीन **(ऋभुः)** बहुत विद्याओं का प्रकाश करनेवाला विद्वान् जैसे **(इन्द्रः)** सूर्य्य अपने प्रकाश और आकर्षण से सबको आनन्द देता है, वैसे **(शवसा)** विद्या और उत्तम शिक्षा के बल से **(नः)** हमको सुख देवे वा जो **(ऋभुः)** धीरबुद्धि आयुर्दा और सभ्यता का प्रकाश करनेवाला **(वाजेभिः)** विज्ञान, अन्न और संग्रामों से वा **(वसुभिः)** चक्रवर्त्ती राज्य आदि के धनों से **(वसुः)** आप सुख में वसने और **(ददिः)** दूसरों को सुखों का देनेवाला होता है, उससे अपने राज्य के और सेनाजनों के **(अवसा)** रक्षा आदि व्यवहार के साथ वर्त्तमान **(देवाः)** विद्या और अच्छी शिक्षा को चाहते हुए हम विद्वान् लोग **(प्रिये)** उत्पन्न करनेवाले **(अहनि)** दिन में **(असुन्वताम्)** अच्छे ऐश्वर्य के विरोधी **(युष्माकम्)** तुम शत्रुजनों की **(पृत्सुतीः)** उन सेनाओं के जो कि संबन्ध करानेवालों को ऐश्वर्य पहुंचानेवाली हैं **(अभि)** सम्मुख **(तिष्ठेम)** स्थित होवें अर्थात् उनका तिरस्कार करें॥७॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य अपने प्रकाश से तेजस्वी समस्त चर और अचर जीवों और समस्त पदार्थों के जीवन कराने से आनन्दित करता है, वैसे विद्वान्, शूरवीर और विद्वानों में अच्छे विद्वान् के सहायों से युक्त हम लोग अच्छी शिक्षा की हुई, प्रसन्न और पुष्ट अपनी सेनाओं से जो सेना को लिए हुए हैं, उन शत्रुओं का तिरस्कार कर धार्मिक प्रजाजनों को पाल चक्रवर्त्ति राज्य को निरन्तर सेवें॥७॥

पुनस्ते विद्वांसः किं कुर्य्युरित्युपदिश्यते॥

फिर वे विद्वान् क्या करें, यह विषय अगले मन्त्र में कहा है॥

निश्चर्मणऽऋभवो गामपिंशत स वत्सेनासृजता मातरं पुनः।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन॥८॥

निः। चर्मणः। ऋभवः। गाम्। अपिंशत। सम्। वत्सेन। असृजत। मातरम्। पुनरिति। सौधन्वनासः। सुऽअपस्यया। नरः। जिव्री इति। युवाना। पितरा। अकृणोतन॥८॥

पदार्थः-(निः) नितराम् **(चर्मणः)** मेधाविनः **(गाम्)** **(अपिंशत)** अवयवीकुरुत **(सम्)** **(वत्सेन)** तद्बालेन सह **(असृजत)** अत्रान्येषामपीति दीर्घः। **(मातरम्)** **(पुनः)** **(सौधन्वनासः)** शोभनेषु धन्वसु धनुर्विद्यास्विमे कुशलाः **(स्वपस्यया)** शोभनान्यपांसि कर्माणि यस्यां तया **(नरः)** नायका विद्वांसः **(जिव्री)** सुजीवनयुक्तौ **(युवाना)** युवानौ युवसदृशौ **(पितरा)** मातापितरौ **(अकृणोतन)** कुरुत॥८॥

अन्वयः-हे ऋभवो मेधाविनो मनुष्या! यूयं चर्मणो गां निरपिंशत पुनर्वत्सेन मातरं समसृजत। हे सौधन्वनासो नरो! यूयं स्वपस्यया जिव्री वृद्धौ पितरा युवानाऽकृणोतन॥८॥

भावार्थः-नहि पूर्वोक्तेन कर्मणा विना केचिद्राज्यं कर्त्तुं शक्नुवन्ति तस्मादेतन्मनुष्यैः सदाऽनुष्ठेयम्॥८॥

पदार्थः-हे **(ऋभवः)** बुद्धिमान् मनुष्यो! तुम **(चर्मणः)** चाम से **(गाम्)** गौ को **(निरपिंशत)** निरन्तर अवयवी करो अर्थात् उसके चाम आदि को खिलाने-पिलाने से पुष्ट करो **(पुनः)** फिर **(वत्सेन)** उसके बछड़े के साथ **(मातरम्)** उस माता गौ को **(समसृजत)** युक्त करो। हे **(सौधन्वनासः)** धनुर्वेदविद्याकुशल **(नरः)** और व्यवहारों को यथायोग्य वर्त्तानेवाले विद्वानो! तुम **(स्वपस्यया)** सुन्दर जिसमें काम बने उस चतुराई से **(जिव्री)** अच्छे जीवनयुक्त बुड्ढे **(पितरा)** अपने माँ-बाप को **(युवाना)** युवावस्थावालों के सदृश **(अकृणोतन)** निरन्तर करो॥८॥

भावार्थः-पिछले कहे हुए काम के विना कोई भी राज्य नहीं कर सकते, इससे मनुष्यों को चाहिये कि उन कामों का सदा अनुष्ठान किया करें॥८॥

अथ सेनाध्यक्षः कीदृशा इत्युपदिश्यते॥

अब सेनाध्यक्ष कैसा हो, यह विषय अगले मन्त्र में कहा है॥

वाजेभिर्नो वाजसाताविविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥९॥३१॥

वाजेभिः। नः। वाजऽसातौ। अविड्ढि। ऋभुऽमान्। इन्द्र। चित्रम्। आ। दर्षि। राधः। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥९॥

पदार्थः-(वाजेभिः) वाजैरन्नादिसामग्रीभिः सह **(नः)** **(वाजसातौ)** संग्रामे **(अविड्ढि)** व्याप्नुहि। अत्र विष्लृधातोः शपो लुकि लोटि मध्यमैकवचने हेर्धिः ष्टुत्वं जश्त्वं च **छन्दस्यपि दृश्यत** इत्यडागमः। **(ऋभुमान्)** प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्य सः **(इन्द्र)** परमैश्वर्य्ययुक्त सेनाध्यक्ष **(चित्रम्)**

आश्चर्य्यगुणयुक्तम् **(आ)** **(दर्षि)** द्रियस्वादरं कुरु। अत्र **दृङ् आदर** इत्यस्माल्लोटि मध्यमैकवचने **वाच्छन्दसी**ति तिपः पित्वाद् गुणः। **(राधः)** धनम्। **(तन्नो मित्रो वरुणो मामहन्ताम्)** इति पूर्ववत्॥९॥

अन्वयः–हे इन्द्र ऋभुमाँस्त्वं नो यद्राधो मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्मामहन्तां तच्चित्रं राधोऽविड्ढि नोऽस्माँश्च वाजेभिर्वाजसातावादर्षि समन्तादादरयुक्तान् कुरु॥९॥

भावार्थः–नहि कश्चित्सेनाध्यक्षो बुद्धिमतां सहायेन विना शत्रून् विजेतुं शक्नोतीति॥९॥

अत्र मेधाविनां कर्मगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकत्रिंशो ३१ वर्गो दशोत्तरं शततमं ११० सूक्तं च समाप्तम्॥

पदार्थः–हे **(इन्द्र)** परमैश्वर्य्ययुक्त सेनाध्यक्ष! **(ऋभुमान्)** जिनके प्रशंसित बुद्धिमान् जन विद्यमान हैं, वे आप **(नः)** हमारे लिये जिस **(राधः)** धन को **(मित्रः)** सुहृत् जन **(वरुणः)** श्रेष्ठ गुणयुक्त **(अदितिः)** अन्तरिक्ष **(सिन्धुः)** समुद्र **(पृथिवी)** पृथिवी **(उत)** और **(द्यौः)** सूर्य्य का प्रकाश **(मामहन्ताम्)** बढ़ावें **(तत्)** उस **(चित्रम्)** अद्भुत धन को **(अविड्ढि)** व्याप्त हूजिये अर्थात् सब प्रकार समझिये और **(नः)** हम लोगों को **(वाजेभिः)** अन्नादि सामग्रियों से **(वाजसातौ)** संग्राम में **(आदर्षि)** आदरयुक्त कीजिये॥९॥

भावार्थः–कोई सेनाध्यक्ष बुद्धिमानों के सहाय के विना शत्रुओं को जीत नहीं सकता॥९॥

इस सूक्त में बुद्धिमानों के काम और गुणों का वर्णन है। इससे इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एकतीसवाँ ३१ वर्ग और एकसौ दशवां ११० सूक्त पूरा हुआ॥

अथ पञ्चर्चस्यैकादशोत्तरशततमस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। ऋभवो देवताः। १-४ जगती छन्दः। निषादः स्वरः। ५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ शिल्पकुशला मेधाविनः किं कुर्य्युरित्युपदिश्यते।

अब एकसौ ग्यारहवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में शिल्पविद्या में चतुर बुद्धिमान् क्या करें, यह उपदेश किया है॥

तक्षन् रथं सुवृतं विद्मनापसस्तक्षन्हरी इन्द्रवाहा वृषण्वसू।
तक्षन् पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम्॥ १॥

तक्षन्। रथम्। सुऽवृतम्। विद्मनाऽअपसः। तक्षन्। हरी इति। इन्द्रऽवाहा। वृषण्वसू इति वृषण्ऽवसू। तक्षन्। पितृऽभ्याम्। ऋभवः। युवत्। वयः। तक्षन्। वत्साय। मातरम्। सचाऽभुवम्॥ १॥

पदार्थः-(**तक्षन्**) सूक्ष्मरचनायुक्तं कुर्वन्तु (**रथम्**) विमानादियानसमूहम् (**सुवृतम्**) शोभनविभागयुक्तम् (**विद्मनापसः**) विज्ञानेन युक्तानि कर्माणि येषां ते। अत्र तृतीयाया अलुक्। (**तक्षन्**) सूक्ष्मीकुर्वन्तु (**हरी**) हरणशीलौ जलाग्न्याख्यौ (**इन्द्रवाहा**) याविन्द्रं विद्युतं परमैश्वर्य्यं वहतस्तौ। अत्राकारादेशः। (**वृषण्वसू**) वृषाणो विद्याक्रियाबलयुक्ता वसवो वासकर्त्तारो मनुष्या ययोस्तौ (**तक्षन्**) विस्तीर्णीकुर्वन्तु (**पितृभ्याम्**) अधिष्ठातृशिक्षकाभ्याम् (**ऋभवः**) क्रियाकुशला मेधाविनः (**युवत्**) मिश्रणामिश्रणयुक्तम्। अत्र युधातोरौणादिको बाहुलकात् क्तिन् प्रत्ययः। (**वयः**) जीवनम् (**तक्षन्**) विस्तारयन्तु (**वत्साय**) सन्तानाय (**मातरम्**) जननीम् (**सचाभुवम्**) सचा विज्ञानादिना भावयन्तीम्॥ १॥

अन्वयः-ये पितृभ्यां युक्ता विद्मनापस ऋभवो मेधाविनो जना वृषण्वसू हरी इन्द्रवाहा तक्षन् सुवृतं रथं तक्षन् वयस्तक्षन् वत्साय सचाभुवं मातरं युवत्तक्षंस्तेऽधिकमैश्वर्यं लभेरन्॥ १॥

भावार्थः-विद्वांसो यावदिह जगति कार्यगुणदर्शनपरीक्षाभ्यां कारणं प्रति न गच्छन्ति तावच्छिल्पविद्यासिद्धिं कर्त्तुं न शक्नुवन्ति॥ १॥

पदार्थः-जो (**पितृभ्याम्**) स्वामी और शिक्षा करनेवालों से युक्त (**विद्मनापसः**) जिनके अति विचारयुक्त कर्म हों वे (**ऋभवः**) क्रिया में चतुर मेधावीजन (**वृषण्वसू**) जिनमें विद्या और शिल्पक्रिया के बल से युक्त मनुष्य निवास करते-कराते हैं (**हरी**) उन एक स्थान से दूसरे स्थान को शीघ्र पहुंचाने तथा (**इन्द्रवाहा**) परमैश्वर्य को प्राप्त करानेवाले जल और अग्नि को (**तक्षन्**) अति सूक्ष्मता के साथ सिद्ध करें वा (**सुवृतम्**) अच्छे-अच्छे कोठे-परकोठेयुक्त (**रथम्**) विमान आदि रथ को (**तक्षन्**) अति सूक्ष्म क्रिया से बनावें वा (**वयः**) अवस्था को (**तक्षन्**) विस्तृत करें तथा (**वत्साय**) सन्तान के लिये (**सचाभुवम्**) विशेष ज्ञान की भावना कराती हुई (**मातरम्**) माता का (**युवत्**) मेल जैसे हो वैसे (**तक्षन्**) उसे उन्नति देवें, वे अधिक ऐश्वर्य को प्राप्त होवें॥ १॥

भावार्थः-विद्वान् जन जब तक इस संसार में कार्य्य के दर्शन और गुणों की परीक्षा से कारण को नहीं पहुंचते हैं, तब तक शिल्पविद्या को नहीं सिद्ध कर सकते हैं॥१॥

पुनस्ते कीदृशा इत्युपदिश्यते॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहा है॥

आ नो॑ य॒ज्ञाय॑ तक्षत ऋभु॒मद्व॒यः॒ क्रत्वे॒ दक्षा॑य सुप्र॒जाव॑तीमिष॑म्।
यथा॒ क्षया॑म॒ सर्व॑वीरया वि॒शा तन्नः॒ शर्धा॑य धासथा॒ स्वि॑न्द्रि॒यम्॥२॥

आ। नः॒। य॒ज्ञाय॑। तक्षत। ऋ॒भु॒ऽमत्। वयः॒। क्रत्वे॑। दक्षा॑य। सु॒ऽप्र॒जाव॑तीम्। इष॑म्। यथा॑। क्षया॑म। सर्व॑ऽवीरया। वि॒शा। तत्। नः॒। शर्धा॑य। धा॒स॒थ॒। सु। इ॒न्द्रि॒यम्॥२॥

पदार्थः-(आ) समन्तात् **(नः)** अस्माकम् **(यज्ञाय)** सङ्गतिकरणाख्यशिल्पक्रियासिद्धये **(तक्षत)** निष्पादयत **(ऋभुमत्)** प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्मिँस्तत् **(वयः)** आयुः **(क्रत्वे)** प्रज्ञायै न्यायकर्मणे वा **(दक्षाय)** बलाय **(सुप्रजावतीम्)** सुष्ठु प्रजा विद्यन्ते यस्यां ताम् **(इषम्)** इष्टमन्नम् **(यथा) (क्षयाम)** निवासं करवाम **(सर्ववीरया)** सर्वैर्वीरैर्युक्तया **(विशा)** प्रजया **(तत्) (नः)** अस्माकम् **(शर्द्धाय)** बलाय **(धासथ)** धरत। अत्रा**न्येषामपी**ति दीर्घः। **(सु) (इन्द्रियम्)** विज्ञानं धनं वा॥२॥

अन्वयः-हे ऋभवो यूयं नोऽस्माकं यज्ञाय क्रत्वे दक्षाय ऋभुमद्वयः सुप्रजावतीमिषं चातक्षत यथा वयं सर्ववीरया विशा क्षयाम तथा यूयमपि प्रजया सह निवसत यथा वयं शर्द्धाय स्विन्द्रियं दध्याम तथा यूयमपि नोऽस्माकं शर्द्धाय तत् स्विन्द्रियं धासथ॥२॥

भावार्थः-अत्रोपमालङ्कारः। इह जगति विद्वद्भिः सहाविद्वांसोऽविद्वद्भिः सह विद्वांसश्च प्रीत्या नित्यं वर्त्तेरन्। नैतेन कर्मणा विना शिल्पविद्यासिद्धिः प्रजाबलं शोभनाः प्रजाश्च जायन्ते॥२॥

पदार्थः-हे बुद्धिमानो! तुम **(नः)** हमारी **(यज्ञाय)** जिससे एक-दूसरे से पदार्थ मिलाया जाता है, उस शिल्पक्रिया की सिद्धि के लिये वा **(क्रत्वे)** उत्तम ज्ञान और न्याय के काम और **(दक्षाय)** बल के लिये **(ऋभुमत्)** जिसमें प्रशंसित मेधावी अर्थात् बुद्धिमान् जन विद्यमान हैं, उस **(वयः)** जीवन को तथा **(सुप्रजावतीम्)** जिसमें अच्छी प्रजा विद्यमान हो अर्थात् प्रजाजन प्रसन्न होते हों **(इषम्)** उस चाहे हुए अन्न को **(आतक्षत)** अच्छे प्रकार उत्पन्न करो, **(यथा)** जैसे हम लोग **(सर्ववीरया)** समस्त वीरों से युक्त **(विशा)** प्रजा के साथ **(क्षयाम)** निवास करें तुम भी प्रजा के साथ निवास करो वा जैसे हम लोग **(शर्द्धाय)** बल के लिये **(तत्)** उस **(सु, इन्द्रियम्)** उत्तम विज्ञान और धन को धारण करें वैसे तुम भी **(नः)** हमारे बल होने के लिये उत्तम ज्ञान और धन को **(धासथ)** धारण करो॥२॥

भावार्थः-इस संसार में विद्वानों के साथ अविद्वान् और अविद्वानों के साथ विद्वान् जन प्रीति से नित्य अपना वर्त्ताव रक्खें। इस काम के विना शिल्पविद्यासिद्धि, उत्तम बुद्धि, बल और श्रेष्ठ प्रजाजन कभी नहीं हो सकते॥२॥

पुनस्ते किं कुर्य्युरित्युपदिश्यते॥

फिर वे क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम्॥३॥

आ। तक्षत। सातिम्। अस्मभ्यम्। ऋभवः। सातिम्। रथाय। सातिम्। अर्वते। नरः। सातिम्। नः। जैत्रीम्। सम्। महेत। विश्वहा। जामिम्। अजामिम्। पृतनासु। सक्षणिम्॥३॥

पदार्थः-(आ) अभितः **(तक्षत)** निष्पादयत **(सातिम्)** विद्यादिदानम् **(अस्मभ्यम्)** **(ऋभवः)** मेधाविनः **(सातिम्)** संविभागम् **(रथाय)** विमानादियानसमूहसिद्धये **(सातिम्)** अश्वशिक्षाविभागम् **(अर्वते)** अश्वाय **(नरः)** विद्यानायकाः **(सातिम्)** संभक्तिम् **(नः)** अस्मभ्यम् **(जैत्रीम्)** जयशीलाम् **(सम्)** **(महेत)** पूज्येत **(विश्वहा)** सर्वाणि दिनानि। अत्र **कृतो बहुलमि**त्यधिकरणे क्विप्। **सुपां सुलुगि**त्यधिकरणस्य स्थान आकारादेशः। **(जामिम्)** प्रसिद्धं **(अजामिम्)** अप्रसिद्धं वैरिणम् **(पृतनासु)** सेनासु **(सक्षणिम्)** सोढारम्॥३॥

अन्वयः-हे ऋभवो नरो! यूयमस्मभ्यं विश्वहा रथाय सातिमर्वते च सातिमातक्षत पृतनासु सातिं जामिमजामिं सक्षणिं शत्रुं जित्वा नोऽस्मभ्यं जैत्रीं सातिं संमहेत॥३॥

भावार्थः-ये विद्वांसोऽस्माकं रक्षकाः शत्रूणां विजेतारः सन्ति तेषां सत्कारं वयं सततं कुर्य्याम॥३॥

पदार्थः-हे **(ऋभवः)** शिल्पक्रिया में अति चतुर **(नरः)** मनुष्यो! तुम **(अस्मभ्यम्)** हम लोगों के लिये **(विश्वहा)** सब दिन **(रथाय)** विमान आदि यानसमूह की सिद्धि के लिये **(सातिम्)** अलग विभाग करना और **(अवते)** उत्तम अश्व के लिये **(सातिम्)** अलग-अलग घोड़ों की सिखावट को **(आ, तक्षत)** सब प्रकार से सिद्ध करो और **(पृतनासु)** सेनाओं में **(सातिम्)** विद्यादि उत्तम-उत्तम पदार्थ वा **(जामिम्)** प्रसिद्ध और **(अजामिम्)** अप्रसिद्ध **(सक्षणिम्)** सहन करनेवाले शत्रू को जीत के **(नः)** हमारे लिये **(जैत्रीम्)** जीत देनेहारी **(सातिम्)** उत्तम भक्ति को **(सम्, महेत)** अच्छे प्रकार प्रशंसित करो॥३॥

भावार्थः-जो विद्वान् जन हमारी रक्षा करने और शत्रुओं को जीतनेहारे हैं, उनका सत्कार हम लोग निरन्तर करें॥३॥

एतान् किमर्थं सत्कुर्यामेत्युपदिश्यते॥

इनका किसलिये हम सत्कार करें, इस विषय को अगले मन्त्र में कहा है॥

ऋ॒भु॒क्षण॒मिन्द्र॒मा हु॑व ऊ॒तय॑ ऋ॒भून्वाजा॑न्म॒रुत॒: सोम॑पीतये।
उ॒भा मि॒त्रावरु॑णा नू॒नम॒श्विना॒ ते नो॑ हिन्वन्तु सा॒तये॑ धि॒ये जि॒षे॥४॥

ऋ॒भु॒क्षण॑म्। इन्द्र॑म्। आ। हु॒वे॒। ऊ॒तये॑। ऋ॒भून्। वाजा॑न्। म॒रुत॑:। सोम॑ऽपीतये। उ॒भा। मि॒त्रावरु॑णा। नू॒नम्। अ॒श्विना॑। ते। न॒:। हि॒न्व॒न्तु॒। सा॒तये॑। धि॒ये। जि॒षे॥४॥

पदार्थ:-(ऋभुक्षणम्) य ऋभून् मेधाविन: क्षाययति निवासयति ज्ञापयति वा तम् **(इन्द्रम्)** परमैश्वर्ययुक्तम् **(आ)** समन्तात् **(हुवे)** आददामि गृह्णामि **(ऊतये)** रक्षणाद्याय **(ऋभून्)** मेधाविन: **(वाजान्)** ज्ञानोत्कृष्टान् **(मरुत:)** ऋत्विज: **(सोमपीतये)** सोमपानार्थाय यज्ञाय **(उभा)** उभौ द्वौ। अत्र **सुपां सुलुगि**त्याकारादेश:। **(मित्रावरुणा)** सर्वसुहृत्सर्वोत्कृष्टौ। अत्राप्याकारादेश:। **(नूनम्)** निश्चये **(अश्विना)** सर्वशुभगुणव्यापनशीलावध्यापकाध्येतारौ **(ते)** **(न:)** अस्मान् **(हिन्वन्तु)** विज्ञापयन्तु वर्द्धयन्तु वा **(सातये)** संविभागाय **(धिये)** प्रज्ञाप्राप्तये **(जिषे)** शत्रूञ्जेतुम्। **तुमर्थे से०** इति क्से प्रत्यय:॥४॥

अन्वय:-अहमूतय ऋभुक्षणमिन्द्रमाहुवे। अहं सोमपीतये वाजान् मरुत ऋभूनाहुवे। अहमुभा मित्रावरुणाश्विना हुवे। ये धिये सातये शत्रून् जिषे नोऽस्मान् विज्ञापयन्तु वर्द्धयितुं शक्नुवन्तु ते विद्वांसो नोऽस्मान् नूनं हिन्वन्तु॥४॥

भावार्थ:-य आप्तान् क्रियाकुशलान् सेवन्ते ते सुशिक्षाविद्यायुक्तां प्रज्ञां प्राप्य शत्रून् विजित्य कुतो न वर्द्धेरन्॥४॥

पदार्थ:-मैं **(ऊतये)** रक्षा आदि व्यवहार के लिये **(ऋभुक्षणम्)** जो बुद्धिमानों को वसाता वा समझाता है, उस **(इन्द्रम्)** परमैश्वर्ययुक्त उत्तम बुद्धिमान् को **(आहुवे)** अच्छी प्रकार स्वीकार करता हूं। मैं **(सोमपीतये)** पदार्थों के निकाले हुए रस पिआनेहारे यज्ञ के लिये **(वाजान्)** जो कि अतीव ज्ञानवान् **(मरुत:)** और ऋतु-ऋतु में अर्थात् समय-समय पर यज्ञ करने वा करानेहारे **(ऋभून्)** ऋत्विज् हैं, उन बुद्धिमानों को स्वीकार करता हूं। मैं **(उभा)** दोनों **(मित्रावरुणा)** सबके मित्र, सबसे श्रेष्ठ, **(अश्विना)** समस्त अच्छे-अच्छे गुणों में रहनेहारे, पढ़ाने और पढ़नेहारों को स्वीकार करता हूं। जो **(धिये)** उत्तम बुद्धि पाने के लिये **(सातये)** वा बांट-चूंट के लिये वा **(जिषे)** शत्रुओं के जीतने को **(न:)** हम लोगों के समझाने वा बढ़ाने को समर्थ हैं **(ते)** वे विद्वान् जन हम लोगों को **(नूनम्)** एक निश्चय से **(हिन्वन्तु)** बढ़ावें और समझावें॥४॥

भावार्थ:-जो शास्त्र में दक्ष, सत्यवादी, क्रियाओं में अति चतुर और विद्वानों का सेवन करते हैं, वे अच्छी शिक्षायुक्त उत्तम बुद्धि को प्राप्त हो और शत्रुओं को जीत कर कैसे न उन्नति को प्राप्त हों॥४॥

पुनः स मेधावी नरः किं कुर्यादित्युपदिश्यते॥

फिर वह मेधावी श्रेष्ठ विद्वान् क्या करे, यह विषय अगले मन्त्र में कहा है॥

ऋ॒भुर्भरा॑य॒ सं शि॑शातु सा॒तिं स॑मर्य॒जिद्वाजो॑ अ॒स्माँ अ॑विष्टु।

तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒: सिन्धु॑: पृथि॒वी उ॒त द्यौः॥५॥३२॥

ऋ॒भुः। भरा॑य। सम्। शि॒शा॒तु॒। सा॒तिम्। स॒म॒र्य॒ऽजित्। वाजः॑। अस्मान्। अ॒वि॒ष्टु॒। तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒ह॒न्ता॒म्। अदि॑तिः। सिन्धुः॑। पृ॒थि॒वी। उ॒त। द्यौः॥५॥

पदार्थः-(ऋभुः) प्रशस्तो विद्वान् **(भराय)** संग्रामाय। **भर इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(सम्) (शिशातु)** क्षयतु। अत्र **शो तनूकरण** इत्यस्मात् श्यनः स्थाने **बहुलं छन्दसी**ति श्लुः। ततः श्लाविति द्वित्वम्। **(सातिम्)** संविभागम् **(समर्यजित्)** यः समर्यान् संग्रामान् जयति सः। **समर्य इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(वाजः)** वेगादिगुणयुक्तः **(अस्मान्) (अविष्टु)** रक्षणादिकं करोतु। अत्रावधातोर्लोटि सिबुत्सर्ग इति सिब्विकरणः। **(तन्नः०)** इत्यादि पूर्ववत्॥५॥

अन्वयः-हे मेधाविन् समर्यजिदृभुर्वाजो भवान् भवान् शत्रून् संशिशातु। अस्मानविष्टु तथा नोऽस्मदर्थं यन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्मामहन्तां तथैव भवांस्तत् तां सातिं नोऽस्मदर्थं निष्पादयतु॥५॥

भावार्थः-विदुषामिदमेव मुख्यं कर्मास्ति यद् जिज्ञासूनविदुषो विद्यार्थिनः सुशिक्षाविद्यादानाभ्यां वर्द्धयेयुः। यथा मित्रादयः प्राणादयो वा सर्वान् वर्द्धयित्वा सुखयन्ति, तथैव विद्वांसोऽपि वर्त्तेरन्॥५॥

अत्र मेधाविनां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥५॥

इति द्वात्रिंशो वर्ग ३२ एतत्सूक्तं (१११) च समाप्तम्॥

पदार्थः-हे मेधावी **(समर्य्यजित्)** संग्रामों के जीतनेवाले **(ऋभुः)** प्रशंसित विद्वान्! **(वाजः)** वेगादि गुणयुक्त आप **(भराय)** संग्राम के अर्थ आये शत्रुओं का **(संशिशातु)** अच्छी प्रकार नाश कीजिये **(अस्मान्)** हम लोगों की **(अविष्टु)** रक्षा आदि कीजिये जैसे **(नः)** हम लोगों के लिये जो **(मित्रः)** मित्र **(वरुणः)** उत्तम गुणवाला **(अदितिः)** विद्वान् **(सिन्धुः)** समुद्र **(पृथिवी)** पृथिवी **(उत)** और **(द्यौः)** सूर्य्य का प्रकाश **(मामहन्ताम्)** सिद्ध करें उन्नति देवें, वैसे ही आप **(तत्)** उस **(सातिम्)** पदार्थों के अलग-अलग करने को हम लोगों के लिये सिद्ध कीजिये॥५॥

भावार्थः-विद्वानों का यही मुख्य कार्य्य है कि जो जिज्ञासु अर्थात् ज्ञान चाहनेवाले, विद्या के न पढ़े हुए विद्यार्थियों को अच्छी शिक्षा और विद्यादान से बढ़ावें, जैसे मित्र आदि सज्जन वा प्राण आदि पवन सबकी वृद्धि करके उनको सुखी करते हैं, वैसे ही विद्वान् जन भी अपना वर्त्ताव रक्खें॥५॥

इस सूक्त में बुद्धिमानों के गुणों के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह बत्तीसवां ३२ वर्ग और एकसौ ग्यारहवां १११ सूक्त समाप्त हुआ॥

अथ पञ्चविंशत्यृचस्य द्वादशोत्तरशततमस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। आदिमे मन्त्रे प्रथमपादस्य द्यावापृथिव्यौ, द्वितीयस्याग्निः, शिष्टस्य सूक्तस्याश्विनौ देवते। १,२,६,७,१३,१५,१७,१८,२०-२२ निचृज्जगती। ४,८,९,११,१२,१४,१६,२३ जगती। १९ विराड् जगती छन्दः। निषादः स्वरः। ३,५,२४ विराट् त्रिष्टुप्। १३ भुरिक् त्रिष्टुप्। २५ त्रिष्टुप् च छन्दः। धैवतः स्वरः॥

तत्रादौ द्यावाभूमिगुणा उपदिश्यन्ते।

अब एकसौ बारहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में सूर्य्य और भूमि के गुणों का कथन किया है॥

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्॥ १॥

ईळे। द्यावापृथिवी इति। पूर्वऽचित्तये। अग्निम्। घर्मम्। सुऽरुचम्। यामन्। इष्टये। याभिः। भरे। कारम्। अंशाय। जिन्वथः। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १॥

पदार्थः-(ईळे) **(द्यावापृथिवी)** प्रकाशभूमी **(पूर्वचित्तये)** पूर्वैः कृतचयनाय **(अग्निम्)** विद्युतम् **(घर्मम्)** प्रतापस्वरूपम् **(सुरुचम्)** सुष्ठु दीप्तं रुचिकारकम् **(यामन्)** यान्ति यस्मिंस्तस्मिन्मार्गे **(इष्टये)** इष्टसुखाय **(याभिः)** वक्ष्यमाणाभिः **(भरे)** संग्रामे **(कारम्)** कुर्वन्ति यस्मिंस्तम् **(अंशाय)** भागाय **(जिन्वथः)** प्राप्नुतः। **जिन्वतीति गतिकर्मासु पठितम्।** (निघं०२.१४) **(ताभिः)** **(उ)** वितर्के **(सु)** शोभने **(ऊतिभिः)** रक्षाभिः **(अश्विना)** विद्याव्यापनशीलौ **(आ)** **(गतम्)** आगच्छतम्॥ १॥

अन्वयः-हे अश्विना सर्वविद्याव्यापिनावध्यापकोपदेशकौ भवन्तौ! यथा यामन् पूर्वचित्तये इष्टये द्यावापृथिवी याभिरूतिभिर्भरे घर्मं सुरुचमग्निं प्राप्नुतस्तथा ताभिरंशाय कारं सु जिन्वथः कार्य्यसिद्धय आगतमित्यहमीळे॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा प्रकाशाऽप्रकाशयुक्तौ सूर्य्यभूमिलोकौ सर्वेषां गृहादीनां चयनायाधाराय च भवतो विद्युता सहैतौ संबन्धं कृत्वा सर्वेषां धारकौ च वर्त्तेते तथा यूयमपि प्रजासु वर्त्तध्वम्॥ १॥

पदार्थः-हे **(अश्विना)** विद्याओं में व्याप्त होनेवाले अध्यापक और उपदेशक! आप जैसे **(यामन्)** मार्ग में **(पूर्वचित्तये)** पूर्व विद्वानों में संचित किये हुए **(इष्टये)** अभीष्ट सुख के लिये **(द्यावापृथिवी)** सूर्य्य का प्रकाश और भूमि **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से युक्त **(भरे)** संग्राम में **(घर्मम्)** प्रतापयुक्त **(सुरुचम्)** अच्छे प्रकार प्रदीप्त और रुचिकारक **(अग्निम्)** विद्युतरूप अग्नि को प्राप्त होते हैं, वैसे **(ताभिः)** उन रक्षाओं से **(अंशाय)** भाग के लिये **(कारम्)** जिस में क्रिया करते हैं, उस विषय को **(सु,**

जिन्वथः) उत्तमता से प्राप्त होते हैं **(उ)** तो कार्य्यसिद्धि करने के लिये **(आ, गतम्)** सदा आवें, इस हेतु मैं **(ईळे)** आपकी स्तुति करता हूं॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे प्रकाशयुक्त सूर्य्यादि और अन्धकारयुक्त भूमि आदि लोक सब घर आदिकों के चिनने और आधार के लिये होते और बिजुली के साथ सम्बन्ध करके सबके धारण करनेवाले होते हैं, वैसे तुम भी प्रजा में वर्त्ता करो॥१॥

अथाध्यापकोपदेशकविषयमाह॥

अब पढ़ाने और उपदेश करनेवालों के विषय में अगले मन्त्र में कहा है॥

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम्॥२॥

युवोः। दानाय। सुऽभराः। असश्चतः। रथम्। आ। तस्थुः। वचसम्। न। मन्तवे। याभिः। धियः। अवथः। कर्मन्। इष्टये। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥२॥

पदार्थः-(युवोः) युवयोः **(दानाय)** सुखवितरणाय **(सुभराः)** ये सुष्ठु भरन्ति पुष्णन्ति वा **(असश्चतः)** असमवेताः **(रथम्)** रमणसाधनं यानम् **(आ)** **(तस्थुः)** तिष्ठन्ति **(वचसम्)** सर्वैः स्तुत्या परिभाषितं मनुष्यम् **(न)** इव **(मन्तवे)** विज्ञातुम् **(याभिः)** **(धियः)** प्रज्ञाः **(अवथः)** रक्षथः **(कर्मन्)** कर्मणि **(इष्टये)** इष्टसुखाय **(ताभिः)** **(उ)** **(सु)** **(ऊतिभिः)** **(अश्विना)** विद्यादिदातारावध्यापकोपदेशकौ **(आ)** समन्तात् **(गतम्)** प्राप्नुतम्॥२॥

अन्वयः-हे अश्विना! सुभरा असश्चतो जना मन्तवे वचसं न युवोर्यं रथमातस्थुस्ते नो याभिर्धियः कर्मन्निष्टयेऽवथस्ताभिरूतिभिश्च युवां दानाय स्वागतमस्मान् प्रतिश्रेष्ठतयाऽऽगच्छतम्॥२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये युष्मान् प्रज्ञां प्रापयेयुस्तान् सर्वथा सुरक्षय। यथा भवन्तो तेषां सेवनं कुर्युस्तथैव तेऽपि युष्मान् शुभां विद्यां बोधयेयुः॥२॥

पदार्थः-हे **(अश्विना)** पढ़ाने और उपदेश करानेहारे विद्वानो! **(सुभराः)** जो अच्छे प्रकार धारण वा पोषण करते कि जो अति आनन्द के सिद्ध करनेहारे हैं, वा **(असश्चतः)** जो किसी बुरे कर्म और कुसंग में नहीं फँसते वे सज्जन **(मन्तवे)** विशेष जानने के लिये जैसे **(वचसम्, न)** सबने प्रशंसा के साथ विख्यात किये हुए अत्यन्त बुद्धिमान् विद्वान् जन को प्राप्त होवे, वैसे **(युवोः)** आप लोगों के **(रथम्)** जिस विमान आदि यान को **(आ, तस्थुः)** अच्छे प्रकार प्राप्त होकर स्थिर होते हैं, उसके साथ **(उ)** और **(याभिः)** जिन से **(धियः)** उत्तम बुद्धियों को **(कर्मन्)** काम के बीच **(इष्टये)** चाहे हुए सुख के लिये **(अवथः)** राखते हैं **(ताभिः)** उन **(ऊतिभिः)** रक्षाओं के साथ तुम **(दानाय)** सुख देने के लिये हम लोगों के प्रति **(सु, आ, गतम्)** अच्छे प्रकार आओ॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो तुमको उत्तम बुद्धि की प्राप्ति करावें, उनकी सब प्रकार से रक्षा करो। जैसे आप लोग उनका सेवन करें, वैसे ही वे लोग भी तुम को शुभ विद्या का बोध कराया करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना।
याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम्॥३॥

युवम्। तासाम्। दिव्यस्य। प्रऽशासने। विशाम्। क्षयथः। अमृतस्य। मज्मना। याभिः। धेनुम्। अस्वम्। पिन्वथः। नरा। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥३॥

पदार्थः-(युवम्) युवामुपदेशकाध्यापकौ **(तासाम्)** पूर्वोक्तानाम् **(दिव्यस्य)** अतिशुद्धस्य **(प्रशासने)** **(विशाम्)** मनुष्यादिप्रजानाम् **(क्षयथः)** निवसथः **(अमृतस्य)** नाशरहितस्य परमात्मनः **(मज्मना)** बलेन **(याभिः)** **(धेनुम्)** वाचम् **(अस्वम्)** या दुष्कर्म न सूते नोत्पादयति ताम् **(पिन्वथः)** सेवेथाम् **(नरा)** नायकौ **(ताभि)** **(उ)** वितर्के **(सु)** शोभने **(ऊतिभिः)** रक्षणादिभिः **(अश्विना)** **(आ)** **(गतम्)** समन्तात् प्राप्नुतम्॥३॥

अन्वयः-हे नराऽश्विना युवं दिव्यस्याऽमृतस्य मज्मना सह यास्तत्संबन्धे प्रजास्सन्ति तासां विशां प्रशासने क्षयथ उ याभिरूतिभिरस्वं धेनुं पिन्वथस्ताभिः स्वागतम्॥३॥

भावार्थः-त एव धन्या विद्वांसो ये प्रजाजनान् विद्यासुशिक्षासुखवृद्धये प्रसादयन्ति तेषां शरीरात्मनो बलं च नित्यं वर्द्धयन्ति॥३॥

पदार्थः-हे **(नरा)** विद्याव्यवहार में प्रधान **(अश्विना)** अध्यापक और उपदेशक लोगो! **(युवम्)** तुम दोनों **(दिव्यस्य)** अतीव शुद्ध **(अमृतस्य)** नाशरहित परमात्मा के **(मज्मना)** अनन्त बल के साथ जो परमात्मा के सम्बन्ध में प्रजाजन हैं **(तासाम्)** उन **(विशाम्)** प्रजाओं के **(प्रशासने)** शिक्षा करने में **(क्षयथः)** निवास करते हो **(उ)** और **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(अस्वम्)** जो दुष्ट काम को न उत्पन्न करती है, उस **(धेनुम्)** सब सुख वर्षानेवाली वाणी का **(पिन्वथः)** सेवन करते हो **(ताभिः)** उन रक्षाओं के साथ **(सु, आ, गतम्)** अच्छे प्रकार हम लोगों को प्राप्त होओ॥३॥

भावार्थः-वे ही धन्य विद्वान् हैं जो प्रजाजनों को विद्या, अच्छी शिक्षा और सुख की वृद्धि होने के लिये प्रसन्न करते और उनके शरीर तथा आत्मा के बल को नित्य बढ़ाया करते हैं॥३॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

याभि॒: परि॑ज्मा॒ तन॑यस्य म॒ज्मना॑ द्विमा॒ता तू॒र्षु त॒रणि॑र्वि॒भूष॑ति।
याभि॑स्त्रि॒मन्तु॒रभ॑वद्विचक्ष॒णस्ताभि॑रू॒ षु ऊ॒तिभि॑रश्वि॒ना ग॑तम्॥ ४॥

याभि॑:। परि॑ऽज्मा। तन॑यस्य। म॒ज्मना॑। द्वि॒ऽमा॒ता। तू॒र्षु। त॒रणि॑:। वि॒ऽभूष॑ति। याभि॑:। त्रि॒ऽमन्तु॑:। अभ॑वत्। वि॒ऽच॒क्ष॒ण:। ताभि॑:। ऊ॒म् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥ ४॥

पदार्थ:-(याभि:) (परिज्मा) परित: सर्वतो गन्ता वायु: **(तनयस्य)** अपत्यस्याग्ने: **(मज्मना)** बलेन **(द्विमाता)** द्वयोरग्निजलयोर्माता प्रमापक: **(तूर्षु)** शीघ्रकारिषु **(तरणि:)** प्लविताऽतिवेगवान् **(विभूषति)** अलङ्करोति **(याभि:) (त्रिमन्तु:)** तिसृणां कर्मोपासनाज्ञानविद्यानां मन्तुर्मन्ता **(अभवत्)** भवेत् **(विचक्षण:)** विविधतया दर्शक: **(ताभि:०)** इत्यादि पूर्ववत्॥ ४॥

अन्वय:-हे अश्विना! युवां याभिरूतिभिर्द्विमाता तूर्षु तरणि: परिज्मा वायुस्तनयस्य मज्मना सुविभूषत्यु याभिरूतिभिस्त्रिमन्तुर्विचक्षणोऽभवद् भवेत् ताभिरूतिभि: सर्वानस्मान् विद्यादानायाऽगतम्॥ ४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। मनुष्यै: प्राणवत् प्रियत्वेन संन्यासिवदुपकारकत्वेन सर्वेभ्यो विद्योन्नति: सम्पादनीया॥ ४॥

पदार्थ:-हे **(अश्विना)** विद्या और उपदेश की प्राप्ति करानेहारे विद्वान् लोगो! **(याभि:)** जिन से **(द्विमाता)** दोनों अग्नि और जल का प्रमाण करनेवाला **(तूर्षु)** शीघ्र करनेवालों में **(तरणि:)** उछलता सा अतीव वेगवाला **(परिज्मा)** सर्वत्र गमन करता वायु **(तनयस्य)** अपने से उत्पन्न अग्नि के **(मज्मना)** बल से **(सु, विभूषति)** अच्छे प्रकार सुशोभित होता **(उ)** और **(याभि:)** जिनसे **(त्रिमन्तु:)** कर्म, उपासना और ज्ञान विद्या और माननेहारा **(विचक्षण:)** विविध प्रकार से सब विद्याओं को प्रत्यक्ष करानेहारा **(अभवत्)** होवे **(ताभि:)** उन **(ऊतिभि:)** रक्षाओं से सहित सब हम लोगों को विद्या देने के लिये **(आ, गतम्)** प्राप्त हूजिये॥ ४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि प्राण के समान प्रीति और संन्यासियों के समान उपकार करने से सबके लिये विद्या की उन्नति किया करें॥ ४॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हैं, यह विषय अगले मन्त्र में कहा है॥

याभी॑ रे॒भं नि॒वृ॑तं सि॒तम॒द्धय उद्व॑न्द॒नमै॑रय॒तं स्व॑र्दृ॒शे।
याभि॒: कण्वं॒ प्र सि॒षास॑न्तमाव॒तं ताभि॑रू॒ षु ऊ॒तिभि॑रश्वि॒ना ग॑तम्॥ ५॥ ३३॥

याभिः। रेभम्। निऽवृतम्। सितम्। अत्ऽभ्यः। उत्। वन्दनम्। ऐरयतम्। स्वः। दृशे। याभिः। कण्वम्। प्र। सिसासन्तम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥५॥

पदार्थः-(याभिः) (रेभम्) स्तोतारम् **(निवृतम्)** नितरां स्वीकृतं शास्त्रबोधम् **(सितम्)** शुद्धधर्मम् **(अद्भ्यः)** जलेभ्यः **(उत्)** उत्कृष्टे **(वन्दनम्)** गुणकीर्त्तनम् **(ऐरयतम्)** गमयतम् **(स्वः)** सुखम् **(दृशे)** द्रष्टुम् **(याभिः) (कण्वम्)** मेधाविनम् **(प्र) (सिसासन्तम्)** विभाजितुमिच्छन्तम् **(आवतम्)** पालयतम् **(ताभिः०)** इत्यादि पूर्ववत्॥५॥

अन्वयः-हे अश्विना! युवां याभिरूतिभिः सितं निवृतं रेभं वन्दनं स्वर्दृशऽद्भ्य उदैरयतं याभिश्च सिषासन्तं कण्वं प्रावतं ताभिरु स्वागतम्॥५॥

भावार्थः-ये मनुष्या विदुषः सुरक्ष्य तेभ्यो विद्याः प्राप्य जलादिपदार्थेभ्यः शिल्पविद्याः संपाद्य वर्द्धन्ते ते सर्वाणि सुखानि प्राप्नुवन्ति॥५॥

पदार्थः-(अश्विना) पढ़ाने और उपदेश करनेवालो! तुम **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(सितम्)** शुद्ध धर्मयुक्त **(निवृतम्)** निरन्तर स्वीकार किये हुए शास्त्रबोध की **(रेभम्)** स्तुति और **(वन्दनम्)** गुणों की प्रशंसा करनेहारे को **(स्वः)** सुख के **(दृशे)** देखने के अर्थ **(अद्भ्यः)** जलों से **(उत्, ऐरयतम्)** प्रेरणा करो और **(याभिः)** जिनसे **(सिषासन्तम्)** विभाग कराने की इच्छा करनेहारे **(कण्वम्)** बुद्धिमान् विद्वान् की **(प्र, आवतम्)** रक्षा करो **(ताभिः, उ)** उन्हीं रक्षाओं से हम लोगों के प्रति **(सु, आ, गतम्)** उत्तमता से आइये॥५॥

भावार्थः-जो मनुष्य विद्वानों की अच्छे प्रकार रक्षाकर, उनसे विद्याओं को प्राप्त हो, जलादि पदार्थों से शिल्पविद्या को सिद्ध करके बढ़ते हैं वे सब सुखों को प्राप्त होते हैं॥५॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हों, यह विषय अगले मन्त्र में कहा है॥

याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः।
याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्॥६॥

याभिः। अन्तकम्। जसमानम्। आऽअरणे। भुज्युम्। याभिः। अव्यथिऽभिः। जिजिन्वथुः। याभिः। कर्कन्धुम्। वय्यम्। च। जिन्वथः। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥६॥

पदार्थः-(याभिः) (अन्तकम्) दुःखनाशकर्त्तारम् **(जसमानम्)** शत्रून् हिंसन्तम् **(आरणे)** सर्वतो युद्धभावे **(भुज्युम्)** पालकम् **(याभिः) (अव्यथिभिः)** व्यथारहिताभिः **(जिजिन्वथुः)** प्रीणीथः। अत्र सायणाचार्य्येण भ्रमाल्लिटि मध्यमपुरुषद्विवचनान्तप्रयोगे सिद्धेऽत्यन्ताशुद्धं प्रथमपुरुषबहुवचनान्तं साधितमिति वेद्यम् **(याभिः) (कर्कन्धुम्)** कर्कान् कारुकानन्तति व्यवहारे बध्नाति तम् **(वय्यम्)** ज्ञातारम्।

अत्र बाहुलकाद् गत्यर्थाद् वयधातोर्यन् प्रत्ययः। **(च)** **(जिन्वथः)** तर्प्पयथः **(ताभिः)** इत्यादि पूर्ववत्॥६॥

अन्वयः-हे अश्विना! युवां याभिरूतिभिरारणेऽन्तकं जसमानं याभिरव्यथिभिर्भुज्युं च जिजिन्वथुर्याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरूतिभिरु स्वागतम्॥६॥

भावार्थः-रक्षकैरधिष्ठातृभिश्च विना न खलु योद्धारः शत्रुभिस्सह संग्रामैर्योद्धुं प्रजां पालयितुं च शक्नुवन्ति, ये प्रबन्धेन विदुषां रक्षणं न कुर्वन्ति ते पराजयं प्राप्य राज्यं कर्त्तुं न शक्नुवन्ति॥६॥

पदार्थः-हे **(अश्विना)** सभा सेना के स्वामी विद्वान् लोगो! आप **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(आरणे)** सब ओर से युद्ध होने में **(अन्तकम्)** दुःखों के नाशक और **(जसमानम्)** शत्रुओं को मारते हुए पुरुष को **(याभिः)** जिन **(अव्यथिभिः)** पीड़ारहित आनन्दकारक रक्षाओं से **(भुज्युम्)** पालनेहारे पुरुष को **(जिजिन्वथुः)** प्रसन्न करते **(च)** और **(याभिः)** जिन रक्षाओं से **(कर्कन्धुम्)** कारीगरी करनेहारे **(वय्यम्)** ज्ञाता पुरुष की **(जिन्वथः)** प्रसन्नता करते हो **(ताभिः, उ)** उन्हीं रक्षाओं के साथ हम लोगों के प्रति **(सु, आ, गतम्)** अच्छे प्रकार आइये॥६॥

भावार्थः-रक्षा करनेवाले और अधिष्ठाताओं के विना योद्धा लोग शत्रुओं के साथ संग्राम में युद्ध करने और प्रजाओं के पालने को समर्थ नहीं हो सकते। जो प्रबन्ध से विद्वानों की रक्षा नहीं करते, वे पराजय को प्राप्त होकर राज्य करने को समर्थ नहीं होते॥६॥

पुनस्तौ कीदृशावित्युपदिश्यते॥

फिर वे दोनों कैसे हों, यह विषय अगले मन्त्र में कहा है॥

याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥७॥

याभिः। शुचन्तिम्। धनऽसाम्। सुऽसंसदम्। तप्तम्। घर्मम्। ओम्याऽवन्तम्। अत्रये। याभिः। पृश्निऽगुम्। पुरुऽकुत्सम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥७॥

पदार्थः-(याभिः) **(शुचन्तिम्)** पवित्रकारकम् **(धनसाम्)** यो धनानि सनोति विभजति तम्। अत्र धनोपपदात् सन् धातोर्विट्। **(सुषंसदम्)** शोभना संसद् यस्य तम् **(तप्तम्)** ऐश्वर्ययुक्तम्। ऐश्वर्यार्थात् तप्धातोस्तः प्रत्ययः। **(घर्मम्)** प्रशस्ता घर्मा यज्ञा विद्यन्ते यस्य तम्। **घर्म इति यज्ञनामसु पठितम्।** (निघं०३.१७) घर्मशब्दादर्शआदित्वादच्। **(ओम्यावन्तम्)** ये अवन्ति ते ओमानस्तान् ये यान्ति प्राप्नुवन्ति त ओम्याः, एते प्रशस्ता विद्यन्ते यस्य तम् **(अत्रये)** अविद्यमानानि त्रीण्याध्यात्मिकाधिभौतिकाधिदैविकानि

दुःखानि यस्मिन् व्यवहारे तस्मै **(याभिः)** **(पृश्निगुम्)** अन्तरिक्षे गन्तारम् **(पुरुकुत्सम्)** बहवः कुत्सा वज्राः शस्त्रविशेषा यस्मिँस्तम् **(आवतम्)** पालयतम् **(ताभिरिति)** पूर्ववत्॥७॥

अन्वयः–हे अश्विना! युवां याभिरूतिभिरत्रये शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तं जनं पृश्निगुं पुरुकुत्सं चावतं ताभिरु स्वागतम्॥७॥

भावार्थः–विद्वद्भिर्धर्मात्मरक्षणेन दुष्टानां दण्डनेन च सत्यविद्या प्रकाशनीयाः॥७॥

पदार्थः–हे **(अश्विना)** उपदेश करने और पढ़ानेवालो! तुम दोनों **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(अत्रये)** जिसमें आध्यात्मिक, आधिभौतिक और आधिदैविक दुःख नहीं हैं, उस व्यवहार के लिये **(शुचन्तिम्)** पवित्रकारक **(धनसाम्)** धन के विभागकर्त्ता **(सुषंसदम्)** अच्छी सभावाले **(तप्तम्)** ऐश्वर्ययुक्त **(घर्मम्)** उत्तम यज्ञवान् **(ओम्यावन्तम्)** रक्षकों को प्राप्त होनेहारे पुरुष प्रशंसित जिसके हैं, उसकी और **(याभिः)** जिन रक्षाओं से **(पृश्निगुम्)** विमानादि से अन्तरिक्ष में जानेहारे **(पुरुकुत्सम्)** बहुत शस्त्राऽस्त्रयुक्त पुरुष की **(आवतम्)** रक्षा करें **(ताभिः, उ)** उन्हीं रक्षाओं से हम लोगों को **(सु, आ, गतम्)** उत्तमता से प्राप्त हूजिये॥७॥

भावार्थः–विद्वानों को योग्य है कि धर्मात्माओं की रक्षा और दुष्टों की ताड़ना से सत्यविद्याओं का प्रकाश करें॥७॥

अथ सभासेनाध्यक्षौ किं कुर्यातामित्युपदिश्यते॥

अब सभा और सेना के अध्यक्ष क्या करें, इस विषय को अगले मन्त्र में कहा है॥

याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षसे एतवे कृथः।
याभिर्वर्तिकां ग्रसिताममुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम्॥८॥

याभिः। शचीभिः। वृषणा। परावृजम्। प्र। अन्धम्। श्रोणम्। चक्षसे। एतवे। कृथः। याभिः। वर्तिकाम्। ग्रसिताम्। अमुञ्चतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥८॥

पदार्थः-(याभिः) वक्ष्यमाणाभिः **(शचीभिः)** रक्षाकर्मभिः प्रज्ञाभिर्वा। **शचीति कर्मनामसु पठितम्।** (निघं०२.१) **प्रजानामसु पठितम्।** (निघं०३.९) **(वृषणा)** वर्षयितारौ। अत्राकारादेशः। **(परावृजम्)** धर्मविरुद्धगामिनम् **(प्र)** **(अन्धम्)** अविद्यान्धकारयुक्तम् **(श्रोणम्)** वधिरवद्वर्त्तमानं पुरुषम् **(चक्षसे)** विद्यायुक्तवाण्याः प्रकाशाय **(एतवे)** एतुं गन्तुम् **(कृथः)** कुरुतम्। अत्र लोडर्थे लट् विकरणस्य लुक् च। **(याभिः)** **(वर्त्तिकाम्)** शकुनिस्त्रियम् **(ग्रसिताम्)** निगलिताम् **(अमुञ्चतम्)** मुञ्चतम्। अत्र लोडर्थे लङ्। **(ताभिः)** **(उ)** **(सु)** सुष्ठु गतौ **(ऊतिभिः)** रक्षणादिभिः **(अश्विना)** द्यावापृथिवीवच्छुभगुणकर्मस्वभाव- व्यापिनौ। अत्राऽऽकारादेशः। **(आ)** समन्तात् **(गतम्)** गच्छतम्। अत्र विकरणलोपश्च॥८॥

अन्वय:-हे वृषणाश्विना सभासेनाध्यक्षौ! युवां याभि: शचीभि: परावृजमन्धं श्रोणं च चक्षस एतवे विद्यां गन्तुं प्रकृथ:। याभिर्ग्रसितां वर्त्तिकामिव प्रजाममुञ्चतं ताभिरू० इति पूर्ववत्॥८॥

भावार्थ:-सभासेनापतिभ्यां स्वविद्याधर्माश्रयेण प्रजासु विद्याविनयौ प्रचार्याविद्याऽधर्मनिवारणेन सर्वेभ्योऽभयदानं सततं कार्यम्॥८॥

पदार्थ:-हे **(वृषणा)** सुख के वर्षानेहारे **(अश्विना)** सभा और सेना के अधीशो! तुम **(याभि:)** जिन **(शचीभि:)** रक्षा सम्बन्धी कामों और प्रजाओं से **(परावृजम्)** विरोध करनेहारे **(अन्धम्)** अविद्यान्धकारयुक्त **(श्रोणम्)** वधिर के तुल्य वर्त्तमान पुरुष को **(चक्षसे)** विद्यायुक्त वाणी के प्रकाश के लिये **(एतवे)** शुभ विद्या प्राप्त होने को **(प्र, कृथ:)** अच्छे प्रकार योग्य करो और **(याभि:)** जिन रक्षाओं से **(ग्रसिताम्)** निगली हुई **(वर्त्तिकाम्)** छोटी चिड़िया के समान प्रजा को दु:खों से **(अमुञ्चतम्)** छुड़ाओ **(ताभिरू)** उन्हीं **(ऊतिभि:)** रक्षाओं से हम लोगों को **(सु, आ, गतम्)** अच्छे प्रकार प्राप्त हूजिये॥८॥

भावार्थ:-सभा और सेना के पति को योग्य है कि अपनी विद्या और धर्म के आश्रय से प्रजाओं में विद्या और विनय का प्रचार करके अविद्या और अधर्म के निवारण से सब प्राणियों को अभयदान निरन्तर किया करें॥८॥

पुनस्तौ किं कुर्य्यातामित्याह॥

फिर वे दोनों क्या करें, इस विषय का उपदेश अगले मन्त्र में किया है॥

याभि: सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम्।
याभि: कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥९॥

याभि:। सिन्धुम्। मधुऽमन्तम्। असश्चतम्। वसिष्ठम्। याभि:। अजरौ। अजिन्वतम्। याभि:। कुत्सम्। श्रुतर्यम्। नर्यम्। आवतम्। ताभि:। ऊम् इति। सु। ऊतिऽभि:। अश्विना। आ। गतम्॥९॥

पदार्थ:-(याभि:) (सिन्धुम्) समुद्रम् **(मधुमन्तम्)** माधुर्यगुणोपेतम् **(असश्चतम्)** जानीतम्। अत्र सर्वत्र लोडर्थे लङ्। **सश्चतीति गतिकर्मा।** (निघं०२.१४) **(वसिष्ठम्)** यो वसति धर्मादिकर्मसु सोऽतिशयितस्तम् **(याभि:) (अजरौ)** जरारहितौ। **(अजिन्वतम्)** प्रीणीतम् **(याभि:) (कुत्सम्)** वज्रायुधयुक्तम्। **कुत्स इति वज्रनामसु पठितम्।** (निघं०२.२०) **(श्रुतर्यम्)** श्रुतानि अर्य्याणि विज्ञानशास्त्राणि येन तम्। अत्र शकन्ध्वादिना ह्यकारलोप:। **(नर्यम्)** नृषु नायकेषु साधुम् **(आवतम्)** रक्षतम्। अग्रे पूर्ववदर्थो वेद्य:॥९॥

अन्वय:-हे अश्विनाजरौ! युवां याभिरूतिभिर्मधुमन्तं सिन्धुमसश्चतं याभिर्वसिष्ठमजिन्वतं याभि: श्रुतर्य्यं नर्य्यं चावतं ताभिरू ऊतिभिरस्माकं रक्षायै स्वागतम् अस्मान् प्राप्नुतम्॥९॥

भावार्थः–मनुष्यैर्यज्ञविधिना सर्वान् पदार्थान् संशोध्य सर्वान् सेवित्वा रोगान् निवार्य सदा सुखयितव्यम्॥९॥

पदार्थः–हे **(अश्विना)** विद्या पढ़ाने और उपदेश करनेवाले **(अजरौ)** जरावस्थारहित विद्वानो! तुम **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(मधुमन्तम्)** मधुर गुणयुक्त **(सिन्धुम्)** समुद्र को **(असश्चतम्)** जानो वा **(याभिः)** जिन रक्षाओं से **(वसिष्ठम्)** जो अत्यन्त धर्मादि कर्मों में वसनेवाला उसकी **(अजिन्वतम्)** प्रसन्नता करो, वा **(याभिः)** जिनसे **(कुत्सम्)** वज्र लिये हुए **(श्रुतर्यम्)** श्रवण से अति श्रेष्ठ **(नर्यम्)** मनुष्यों में अत्युत्तम पुरुष को **(आवतम्)** रक्षा करो, **(ताभिरु)** उन्हीं रक्षाओं के साथ हमारी रक्षा के लिये **(स्वागतम्)** अच्छे प्रकार आया कीजिये॥९॥

भावार्थः–मनुष्यों को योग्य है कि यज्ञविधि से सब पदार्थों को अच्छे प्रकार शोधन कर सबका सेवन और रोगों का निवारण करके सदैव सुखी रहें॥९॥

पुनस्तौ कीदृशावित्याह॥

फिर वे दोनों कैसे हों, यह विषय अगले मन्त्र में कहा है॥

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम्।

याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥१०॥३४॥

याभिः। विश्पलाम्। धनऽसाम्। अथर्व्यम्। सहस्रऽमीळ्हे। आजौ। अजिन्वतम्। याभिः। वशम्। अश्व्यम्। प्रेणिम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥१०॥

पदार्थः-(याभिः) (विश्पलाम्) विशः प्रजाः पात्यनेन सैन्येन तल्लाति यया ताम् **(धनसाम्)** धनानि सनन्ति संभजन्ति येन ताम् **(अथर्व्यम्)** अहिंसनीयां स्वसेनाम् **(सहस्रमीळ्हे)** सहस्राणि मीळ्हानि धनानि यस्मात् तस्मिन् **(आजौ)** संग्रामे। **आजाविति संग्रामनामसु पठितम्।** (निघं०२.१७) **(अजिन्वतम्)** प्रीणीतम् **(याभिः) (वशम्)** कमनीयम् **(अश्व्यम्)** तुरङ्गेषु वेदादिषु वा साधुम् **(प्रेणिम्)** शत्रुनाशाय प्रेरितुमर्हम् **(आवतम्)** रक्षतम्। अन्यत् पूर्ववत्॥१०॥

अन्वयः–हे अश्विना! सेनायुद्धाधिकृतौ युवां याभिरूतिभिः सहस्रमीळ्ह आजौ विश्पलां धनसामथर्व्यमजिन्वतं याभिर्वशं प्रेणिमश्व्यमावतं ताभिरूतिभिर्युक्तौ भूत्वा प्रजापालनाय स्वागतम्॥१०॥

भावार्थः–मनुष्यैरिदमवश्य ज्ञातव्यं शरीरात्मपुष्ट्या सुशिक्षितया सेनया च विना युद्धे विजयस्तमन्तरा प्रजापालनं श्रीसञ्चयो राजवृद्धिश्च भवितुमयोग्यास्ति॥१०॥

पदार्थः–हे **(अश्विना)** सेना और युद्ध के अधिकारी लोगो! **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(सहस्रमीळ्हे)** असंख्य पराक्रमादि धन जिसमें हैं, उस **(आजौ)** संग्राम में **(विश्पलाम्)** प्रजा के पालन करनेहारों को ग्रहण करने **(धनसाम्)** और पुष्कल धन देनेहारी **(अथर्व्यम्)** न नष्ट करने योग्य अपनी सेना

को **(अजिन्वतम्)** प्रसन्न करो, वा **(याभिः)** जिन रक्षाओं से **(वशम्)** मनोहर **(प्रेणिम्)** और शत्रुओं के नाश के लिये प्रेरणा करने योग्य **(अश्व्यम्)** घोड़ों वा अग्न्यादि पदार्थों के वेगों में उत्तम की **(आवतम्)** रक्षा करो, **(ताभिरु)** उन्हीं रक्षाओं के साथ प्रजा पालन के लिये **(स्वागतम्)** अच्छे प्रकार आया कीजिये॥१०॥

भावार्थः-मनुष्यों को यह अवश्य जानना चाहिये कि शरीर, आत्मा की पुष्टि और अच्छे प्रकार शिक्षा की हुई सेना के विना युद्ध में विजय और विजय के विना प्रजापालन, धन का संचय और राज्य की वृद्धि होने को योग्य नहीं है॥१०॥

पुनस्तौ कस्मै किं कुर्य्यातामित्याह॥

फिर वे दोनों किसके लिये क्या करें, इस विषय को अगले मन्त्र में कहा है॥

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत्।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ ११॥

याभिः। सुदानू इति सुऽदानू। औशिजाय। वणिजे। दीर्घऽश्रवसे। मधु। कोशः। अक्षरत्। कक्षीवन्तम्। स्तोतारम्। याभिः। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ११॥

पदार्थः-(याभिः) **(सुदानू)** सुष्ठु दानकर्त्तारौ **(औशिजाय)** मेधाविपुत्राय। **उशिज इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(वणिजे)** व्यवहर्त्तुं शीलाय **(दीर्घश्रवसे)** दीर्घाणि महान्ति श्रवांसि विद्यादीन्यन्नानि धनानि वा यस्य तस्मै। **श्रव इत्यन्ननामसु पठितम्।** (निघं०२.७) **धननामसु च।** (निघं०२.१०) **(मधु)** मधुरं जलम् **(कोशः)** मेघः। **कोश इति मेघनामसु पठितम्।** (निघं०१.१०) **(अक्षरत्)** क्षरति **(कक्षीवन्तम्)** प्रशस्ताः कक्षा सहाया विद्यन्ते यस्य तम् **(स्तोतारम्)** विद्यागुणस्तावकम् **(याभिः)** अन्यत्पूर्ववत्॥११॥

अन्वयः-हे सुदानू अश्विना! याभिरूतिभिर्दीर्घश्रवसे वणिज औशिजाय कोशो मध्वक्षरद् याभिर्वा युवां कक्षीवन्तं स्तोतारमावतं ताभिरु ऊतिभिरस्मान् रक्षितुं स्वागतम्॥११॥

भावार्थः-राजपुरुषाणां योग्यमस्ति ये द्वीपद्वीपान्तरे वा देशदेशान्तरे व्यापारकरणाय गच्छेयुरागच्छेयुश्च तेषां रक्षा प्रयत्नेन विधेया॥११॥

पदार्थः-हे **(सुदानू)** अच्छे प्रकार दान करनेवाले **(अश्विना)** अध्यापक और उपदेशक विद्वानो! **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(दीर्घश्रवसे)** जिसके बड़े-बड़े विद्यादि पदार्थ, अन्न और धन विद्यमान उस **(वणिजे)** व्यवहार करनेवाले **(औशिजाय)** उत्तम बुद्धिमान् के पुत्र के लिये **(कोशः)** मेघ **(मधु)** मधुर गुणयुक्त जल को **(अक्षरत्)** वर्षता वा तुम **(याभिः)** जिन रक्षाओं से **(कक्षीवन्तम्)** उत्तम

सहाय से युक्त **(स्तोतारम्)** विद्या के गुणों की प्रशंसा करनेवाले जन की **(आवतम्)** रक्षा करो **(ताभिरु)** उन्हीं रक्षाओं से सहित हमारी रक्षा करने को **(स्वागतम्)** अच्छे प्रकार शीघ्र आया कीजिये॥११॥

भावार्थः-राजपुरुषों को योग्य है कि जो द्वीप-द्वीपान्तर और देश-देशान्तर में व्यापार करने के लिये जावें-आवें, उनकी रक्षा प्रयत्न से किया करें॥११॥

अथ शिल्पदृष्टान्तेन सभासेनापतिकृत्यमुपदिश्यते॥

अब शिल्प दृष्टान्त से सभापति और सेनापति के काम का उपदेश किया है॥

याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे।
याभिस्त्रिशोक उस्त्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम्॥१२॥

याभिः। रसाम्। क्षोदसा। उद्नः। पिपिन्वथुः। अनश्वम्। याभिः। रथम्। आवतम्। जिषे। याभिः। त्रिऽशोकः। उस्त्रियाः। उत्ऽआजत। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥१२॥

पदार्थः-(याभिः) शिल्पक्रियाभिः **(रसाम्)** प्रशस्तं रसं जलं विद्यते यस्यां ताम्। **रस इति उदकनामसु पठितम्।** (निघं०१.१२) अत्राऽर्शआदित्वान्मत्वर्थीयोऽच्। **(क्षोदसा)** प्रवाहेण **(उद्नः)** जलस्य **(पिपिन्वथुः)** पिपूर्त्तम् **(अनश्वम्)** अविद्यमाना अश्वा तुरङ्गादयो यस्मिन् **(याभिः)** गमनागमनाख्याभिर्गतिभिः **(रथम्)** विमानादियानसमूहम् **(आवतम्)** रक्षतम् **(जिषे)** शत्रून् जेतुम् **(याभिः)** सेनाभिः **(त्रिशोकः)** त्रिषु दुष्टगुणकर्मस्वभावेषु शोको यस्य विदुषः सः **(उस्त्रियाः)** उस्रासु रश्मिषु भवा विद्युतः। **उस्रा इति रश्मिनामसु पठितम्।** (निघं०१.५) **(उदाजत)** ऊर्ध्वं समन्तात् क्षिपतु। अत्र लोडर्थे लङ्। ताभिरित्यादि पूर्ववत्॥१२॥

अन्वयः-हे अश्विना! युवां याभिरुद्नः क्षोदसा रसां पिपिन्वथुर्याभिर्जिषेऽनश्वं रथमावतं याभिर्वा त्रिशोको विद्वानुस्त्रिया उदाजत ताभिरु ऊतिभिः स्वागतम्॥१२॥

भावार्थः-यथा सर्वशिल्पशास्त्रकुशलो विद्वान् विमानादियानेषु कलायन्त्राणि रचयित्वा तेषु जलविद्युदादीन् प्रयुज्य यन्त्रैः कलाः संचाल्य स्वाभीष्टे गमनागमने करोति तथैव सभासेनापती आचरेताम्॥१२॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशको! आप दोनों **(याभिः)** जिन शिल्पक्रियाओं से **(उद्नः)** जल के **(क्षोदसा)** प्रवाह के साथ **(रसाम्)** जिसमें प्रशंसित जल विद्यमान हो, उस नदी को **(पिपिन्वथुः)** पूरी करो अर्थात् नहर आदि के प्रबन्ध से उसमें जल पहुंचाओ, वा **(याभिः)** जिन आने-जाने की चालों से **(जिषे)** शत्रुओं को जीतने के लिये **(अनश्वम्)** विना घोड़ों के **(रथम्)** विमान आदि रथसमूह को **(आवतम्)** राखो, वा **(याभिः)** जिन सेनाओं से **(त्रिशोकः)** जिनको दुष्ट गुण, कर्म, स्वभावों में शोक है, वह विद्वान् **(उस्त्रियाः)** किरणों में हुए विद्युत् अग्नि की चिलकों को **(उदाजत)** ऊपर

को पहुंचावे, **(ताभिरु)** उन्हीं **(ऊतिभिः)** सब रक्षारूप उक्त वस्तुओं से **(स्वागतम्)** हम लोगों के प्रति अच्छे प्रकार आइये॥१२॥

भावार्थः-जैसे सब शिल्पशास्त्रों में चतुर विद्वान् विमानादि यानों में कलायन्त्रों को रचा के, उनमें जल विद्युत् आदि का प्रयोग कर, यन्त्र से कलाओं को चला, अपने अभीष्ट स्थान में जाना-आना करता है, वैसे ही सभा सेना के पति किया करें॥१२॥

पुनस्तौ काविव किं कुर्यातामित्युपदिश्यते॥

फिर वे किसके समान क्या करें, यह विषय अगले मन्त्र में कहा है॥

याभि॒: सूर्यं॑ परिया॒थः पर॒वति॑ मन्धा॒तार॑ं क्षैत्र॑पत्ये॒ष्वाव॑तम्।
याभि॒र्विप्रं॒ प्र भ॒रद्वा॑ज॒माव॑तं॒ ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना॒ गत॑म्॥ १३॥

याभि॑:। सूर्य॑म्। प॒रि॒ऽया॒थः। प॒रा॒ऽअव॑ति। म॒न्धा॒तार॑म्। क्षैत्र॑ऽपत्येषु। आव॑तम्। याभि॑:। विप्र॑म्। प्र। भ॒रत्ऽवा॑जम्। आव॑तम्। ताभि॑:। ऊ॒म् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥१३॥

पदार्थः-(याभिः) **(सूर्य्यम्)** प्रकाशमयम् **(परियाथः)** सर्वतः प्राप्नुतम् **(परावति)** विप्रकृष्टे मार्गे **(मन्धातारम्)** यानेन सद्यो दूरदेशं गमयितारं मेधाविनम्। **मन्धातेति मेधाविनामसु पठितम्।** (निघं०३.१५) **(क्षैत्रपत्येषु)** क्षेत्राणां भूमण्डलानां पतयः पालकास्तेषां कर्मसु **(आवतम्)** रक्षतम् **(याभिः)** रक्षाभिः **(विप्रम्)** मेधाविनम् **(प्र)** **(भरद्वाजम्)** विद्यासद्गुणान् भरतां वाजं विज्ञापयितारम् **(आवतम्)** विजानीतम्। अन्यत् पूर्ववत्॥१३॥

अन्वयः-हे अश्विना! शिल्पविद्यास्वामिभृत्यौ! युवां याभिरूतिभिः परावति सूर्यमिव मन्धातारं परियाथः। याभिः क्षैत्रपत्येषु तमावतं भरद्वाजं विप्रं च प्रावतं ताभिरु स्वागतम्॥१३॥

भावार्थः-व्यावहारिकजनैर्विमानादियानैर्विना दूरदेशेषु गमनागमने कर्त्तुमशक्यतेऽतो महान् लाभो भवितुं न शक्यते तस्मादेतत् सर्वदाऽनुष्ठेयम्॥१३॥

पदार्थः-हे **(अश्विना)** शिल्पविद्या के स्वामी और भृत्यो! तुम दोनों **(याभिः)** जिन **(ऊतिभिः)** रक्षादि से **(परावति)** दूर देश में **(सूर्य्यम्)** प्रकाशमान सूर्य के समान **(मन्धातारम्)** विमानादि यान से शीघ्र दूर देश को पहुंचाने वाले बुद्धिमान् को **(परियाथः)** सब ओर से प्राप्त होओ, **(याभिः)** जिन रक्षाओं से **(क्षैत्रपत्येषु)** माण्डलिक राजाओं के काम में उसकी **(आवतम्)** रक्षा करो और **(भरद्वाजम्)** विद्या सद्गुणों के धारण करनेवालों को समझानेवाले **(विप्रम्)** मेधावी पुरुष की **(प्रावतम्)** अच्छे प्रकार रक्षा करो, **(ताभिः, उ)** उन्हीं रक्षाओं से हम लोगों के प्रति **(सु, आ, गतम्)** प्राप्त हूजिये॥१३॥

भावार्थः–व्यवहार करनेवाले मनुष्यों से विमानादि यानों के विना दूसरे देशों में जाना–आना नहीं हो सकता, इससे बड़ा लाभ नहीं हो सकता। इस कारण नाव–विमानादि की रचना अवश्य सदा करनी चाहिये॥१३॥

अथ प्रजासेनाजनसभाध्यक्षैः परस्परं किं किं कर्त्तव्यमित्याह॥

अब प्रजा सेनाजन और सभाध्यक्ष को परस्पर क्या–क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभि॑र्म॒हाम॑तिथि॒ग्वं क॑शो॒जुवं॒ दिवो॑दासं शम्बर॒हत्य॒ आव॑तम्।
याभि॒: पूर्भिद्यो॑ त्र॒सद॑स्युमाव॒तं ताभि॑रू॒ षु ऊ॒तिभि॑रश्वि॒ना ग॑तम्॥ १४॥

याभि॑:। म॒हाम्। अ॒ति॒थि॒ऽग्वम्। क॒श॒:ऽजुव॑म्। दिव॑:ऽदासम्। श॒म्ब॒र॒ऽहत्यै॑। आव॑तम्। याभि॑:। पू॒:ऽभिद्यो॑। त्र॒सद॑स्युम्। आव॑तम्। ताभि॑:। ऊ॒म् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥ १४॥

पदार्थः–**(याभिः)** **(महाम्)** महान्तम् पूज्यम् **(अतिथिग्वम्)** अतिथीन् प्राप्नुवन्तम् **(कशोजुवम्)** कशांस्युदकानि जवयति गमयति तम्। **कश इत्युदकनामसु पठितम्।** (निघं०१.१२) **(दिवोदासम्)** दिवो विद्याधर्मप्रकाशस्य दातारम्। **दिवश्च दास उपसंख्यानम्।** (अष्टा०वा०६.३.२१) इति षष्ठ्या अलुक्। **(शम्बरहत्ये)** शम्बरस्य बलस्य हत्या हननं यस्मिन् युद्धादिव्यवहारे तस्मिन्। **शम्बरमिति बलनामसु पठितम्।** (निघं०२.९) **(आवतम्)** रक्षतम् **(याभिः)** क्रियाभिः **(पूर्भिद्ये)** शत्रूणां पुराणि भिद्यन्ते यस्मिन् संग्रामे तस्मिन् **(त्रसदस्युम्)** यो दस्युभ्यस्त्रस्यति तम् **(आवतम्)** रक्षतम्। ताभिरिति पूर्ववत्॥१४॥

अन्वयः–हे अश्विना! राजप्रजयोः शूरवीरजनौ युवां शम्बरहत्ये याभिरूतिभिर्महामतिथिग्वं कशोजुवं दिवोदासं सेनापतिमावतम्। याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरु स्वागतम्॥१४॥

भावार्थः–प्रजासेनाजनैः सकलविद्यं धार्मिकं पुरुषं सभापतिं कृत्वा संरक्ष्य सर्वस्मै भयप्रदं दुष्टं तस्करं हत्वा सुखानि प्राप्तव्यानि प्रापयितव्यानि च॥१४॥

पदार्थः–हे **(अश्विना)** राजा और प्रजा में शूरवीर पुरुषो! तुम दोनों **(शम्बरहत्ये)** सेना वा दूसरे के बल पराक्रम का मारना जिसमें हो उस युद्धादि व्यवहार में **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(महाम्)** बड़े प्रशंसनीय **(अतिथिग्वम्)** अतिथियों को प्राप्त होने, **(कशोजुवम्)** जलों को चलाने और **(दिवोदासम्)** दिव्य विद्यारूप क्रियाओं के देनेवाले सेनापति की **(आवतम्)** रक्षा करो, वा जिन रक्षाओं से **(पूर्भिद्ये)** शत्रुओं के नगर विदीर्ण हों, जिससे उस संग्राम में **(त्रसदस्युम्)** डाकुओं से डरे हुए श्रेष्ठ जन की **(आवतम्)** रक्षा करो, **(ताभिः)** उन्हीं रक्षाओं से हमारी रक्षा के लिये **(सु, आ, गतम्)** अच्छे प्रकार आइये॥१४॥

भावार्थः-प्रजा और सेना के मनुष्यों को योग्य है कि सब विद्या में निपुण धार्मिक पुरुष को सभापति कर उसकी सब प्रकार रक्षा करके सब को भय देनेवाले दुष्ट डाकू को मार के आप सुखों को प्राप्त हों और सब को सुखी करें॥१४॥

मनुष्यैर्वैद्यशिल्पपुरुषार्थिनः किमर्थं सेव्या इत्युपदिश्यते॥

मनुष्यों को वैद्य और शिल्पविद्या में पुरुषार्थ रखनेवाले जन किसलिये सेवन करने योग्य हैं, यह विषय अगले मन्त्र में कहा है॥

याभिर्वग्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ १५॥ ३५॥

याभिः। वग्रम्। विऽपिपानम्। उपऽस्तुतम्। कलिम्। याभिः। वित्तऽजानिम्। दुवस्यथः। याभिः। विऽअश्वम्। उत। पृथिम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १५॥

पदार्थः-(याभिः) (वग्रम्) रोगनिवृत्तये वमनकर्त्तारम् **(विपिपानम्)** औषधरसानां विविधं पानं कर्त्तुं शीलम् **(उपस्तुतम्)** उपगतैर्गुणैः प्रशंसितम् **(कलिम्)** यः किरति विक्षिपति दुःखानि दूरीकरोति तं गणकं वा **(याभिः) (वित्तजानिम्)** वित्ता प्रतीता जाया हृद्या स्त्री येन तम्। अत्र **जायाया निङ्।** (अष्टा०५.४.१३४) इति जायाशब्दस्य समासान्तो निङादेशः। **(दुवस्यथः)** परिचरतम् **(याभिः)** रक्षणक्रियाभिः **(व्यश्वम्)** विविधा विगता वा अश्वास्तुरङ्गा अग्न्यादयो वा यस्मिन् सैन्ये याने वा तम् **(उत)** अपि **(पृथिम्)** विशालबुद्धिम् **(आवतम्)** कामयतम् **(ताभिः)** इत्यादि पूर्ववत्॥१५॥

अन्वयः-हे अश्विना राजप्रजाजनौ! युवां याभिरूतिभिर्विपिपानमुपस्तुतं कलिं वित्तजानिं वग्रं दुवस्यथः। याभिर्व्यश्वं दुवस्यथ उत याभिः पृथिमावतं ताभिरु नैरोग्यं स्वागतम्॥१५॥

भावार्थः-मनुष्यैः सद्वैद्यद्वारोत्तमान्यौषधानि सेवित्वा रोगान्निवार्य बलबुद्धौ वर्धित्वा सेनापतिं शिल्पिनं विस्तृतपुरुषार्थिनं च जनं संसेव्य शरीरात्मसुखानि सततं लब्धव्यानि॥१५॥

पदार्थः-हे **(अश्विना)** राज प्रजाजनो! तुम **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(विपिपानम्)** विशेष कर ओषधियों के रसों को जो पीने के स्वभाववाला **(उपस्तुतम्)** आगे प्रतीत हुए गुणों से प्रशंसा को प्राप्त **(कलिम्)** जो सब दुःखों से दूर करने वा ज्योतिष शास्त्रोक्त गणितविद्या को जाननेवाला **(वित्तजानिम्)** और जिसने हृदय को प्रिय सुन्दर स्त्री पाई हो उस **(वग्रम्)** रोगनिवृत्ति करने के लिये वमन करते हुए पुरुष की **(दुवस्यथः)** सेवा करो, **(याभिः)** वा जिन रक्षाओं से **(व्यश्वम्)** विविध घोड़े व अग्न्यादि पदार्थों से युक्त सेना वा यान की सेवा करो **(उत)** और **(याभिः)** जिन रक्षाओं से **(पृथिम्)**

विशाल बुद्धिवाले पुरुष की **(आवतम्)** रक्षा करो **(ताभिः, उ)** उन्हीं से आरोग्य को **(सु, आ, गतम्)** अच्छे प्रकार सब ओर से प्राप्त हूजिये॥१५॥

भावार्थः-मनुष्यों को उचित है कि सद्वैद्यों के द्वारा उत्तम ओषधियों के सेवन से रोगों का निवारण, बल और बुद्धि को बढ़ा सेना के अध्यक्ष और विस्तृत पुरुषार्थयुक्त शिल्पीजन की सम्यक् सेवा कर शरीर और आत्मा के सुखों को प्राप्त होवें॥१५॥

अथाध्यापकोपदेशकाभ्यां किं कर्तव्यमित्याह॥

अब अध्यापक और उपदेशकों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः।
याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम्॥ १६॥

याभिः नरा। शयवे। याभिः। अत्रये। याभिः। पुरा। मनवे। गातुम्। ईषथुः। याभिः। शारीः। आजतम्। स्यूमऽरश्मये। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १६॥

पदार्थः-(याभिः) (नरा) नयनकर्त्तारो **(शयवे)** सुखेन शयनशीलाय **(याभिः) (अत्रये)** अविद्यमाना आत्मिकवाचिकशारीरिकदोषा यस्मिंस्तस्मै **(याभिः) (पुरा)** पूर्वम् **(मनवे)** धार्मिकप्रजापतये राज्ञे। **प्रजापतिर्वै मनुः।** (शत०६.४.३.१९) **(गातुम्)** पृथिवीम्। **गातुरिति पृथिवीनामसु पठितम्।** (निघं०१.१) **गातुमिति वाङ्नामसु पठितम्।** (निघं०१.११) **(ईषथुः)** प्रापयितुमिच्छतम् **(याभिः) (शारीः)** शराणामिमा गतीः **(आजतम्)** जानीतम् **(स्यूमरश्मये)** स्यूमाः संयुक्तरश्मयो न्यायदीप्तयो यस्य तस्मै **(ताभिः०)** इत्यादि पूर्ववत्॥१६॥

अन्वयः-हे नराऽश्विनाध्यापकोपदेशकौ विद्वांसौ! युवां पुरा याभिरूतिभिः शयवे शान्तिर्याभिरत्रये सर्वाणि सुखानि याभिर्मनवे गातुं चेषथुः। याभिः स्यूमरश्मये न्यायकारिणे चेषथुर्याभिः शत्रुभ्यः शारीराजतं ताभिरु स्वसेनारक्षायै स्वागतम्॥१६॥

भावार्थः-अध्यापकोपदेशकयोरिदं योग्यमस्ति विद्याधर्मोपदेशेन सर्वान् जनान् विदुषो धार्मिकान् सम्पाद्य पुरुषार्थिनः सततं कुर्य्याताम्॥१६॥

पदार्थः-हे **(नरा)** उत्तम कार्य्य में प्रवृत्ति करानेवाले **(अश्विना)** सब विद्याओं के पढ़ाने और उपदेश करनेवाले विद्वान् लोगो! तुम दोनों **(पुरा)** प्रथम **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(शयवे)** सुख से शयन करनेवाले को शान्ति वा **(याभिः)** जिन रक्षाओं से **(अत्रये)** शरीर, मन, वाणी के दोषों से रहित पुरुष के लिये सब सुख और **(याभिः)** जिन रक्षाओं से **(मनवे)** मननशील पुरुष के लिये **(गातुम्)** पृथिवी वा उत्तम वाणी को **(ईषथुः)** प्राप्त कराने की इच्छा करो वा **(याभिः)** जिन रक्षाओं से **(स्यूमरश्मये)** सूर्यवत् संयुक्त न्यायप्रकाश करनेवाले पुरुष के लिये सुख की इच्छा करो वा जिनसे

शत्रुओं को **(शारीः)** बाणों की गतियों को **(आजतम्)** प्राप्त कराओ **(ताभिरु)** उन्हीं रक्षाओं से अपनी सेनाओं की रक्षा के लिये **(सु, आ, गतम्)** अच्छे प्रकार उत्साह को प्राप्त हूजिये॥१६॥

भावार्थः-अध्यापक और उपदेष्टाओं को यह योग्य है कि विद्या और धर्म के उपदेश से सब जनों को विद्वान् धार्मिक करके पुरुषार्थयुक्त निरन्तर किया करें॥१६॥

अथ सभासेनापतिभ्यां कथमनुष्ठेयमित्याह॥

अब सभापति और सेनापति को कैसा अनुष्ठान करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभि॒: पठ॑र्वा॒ जठ॑रस्य म॒ज्मना॒ग्निर्नादी॑दे॒च्चित॒ इद्धो॒ अज्म॒न्ना।
याभि॒: शर्या॑त॒मव॑थो महाध॒ने ताभि॑रू॒ षु ऊ॒तिभि॒रश्वि॒ना ग॑तम्॥ १७॥

याभि॑:। पठ॑र्वा। जठ॑रस्य। म॒ज्मना॑। अ॒ग्नि:। न। अदी॑दे॒त्। चि॒त:। इ॒द्ध:। अज्म॑न्। आ। याभि॑:। शर्या॑तम्। अव॑थ:। म॒हाऽध॒ने। ताभि॑:। ऊ॒म् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥ १७॥

पदार्थः-(याभिः) (पठर्वा) ये पठन्ति तान् विद्यार्थिन ऋच्छति प्राप्नोति स सेनाध्यक्षः **(जठरस्य)** उदरस्य मध्ये। **जठरमुदरं भवति जग्धमस्मिन् ध्रियते धीयते वा।** (निरु०४.७) **(मज्मना)** बलेन **(अग्निः)** पावकः **(न)** इव **(अदीदेत्)** प्रदीप्येत्। **दीदयतीति ज्वलतिकर्मसु पठितम्।** (निघं०१.१६) अत्र दीदिधातोर्लङि प्रथमैकवचने शपो लुक्। **(चितः)** इन्धनैः संयुक्तः **(इद्धः)** प्रदीप्तः **(अज्मन्)** अजन्ति प्रक्षिपन्ति शत्रून् यस्मिंस्तत्र **(आ) (याभिः) (शर्य्यातम्)** शरौ हिंसकान् प्राप्तम् **(अवथः)** रक्षथः **(महाधने)** महान्ति धनानि यस्मात् तस्मिँस्ताभिरिति पूर्ववत्॥१७॥

अन्वयः-हे अश्विना! युवां याभिरूतिभिः पठर्वा मज्मना जठरस्य मध्ये चित् इद्धोऽग्निर्नेवाज्मन् महाधन आदीदेत्। याभिः शर्य्यातमवथस्ताभिरु प्रजासेनारक्षार्थं स्वागतम्॥१७॥

भावार्थः-अत्रोपमालङ्कारः। यथा कश्चित् शौर्य्यादिगुणैः शुम्भमानौ राजा रक्ष्यान् रक्षेत्, घात्यान् हन्यादग्निर्वनमिव शत्रुसेना दहेत्, शत्रूणां महान्ति धनानि प्रापय्यानन्दयेत्, तथैव सभासेनापतिभ्यामनुष्ठेयम्॥१७॥

पदार्थः-हे **(अश्विना)** सभा और सेना के अधीश! तुम दोनों **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(पठर्वा)** पढ़नेवाले विद्यार्थियों को जो प्राप्त होता वा **(मज्मना)** बल से **(जठरस्य)** उदर के मध्य **(चितः)** सञ्चित किये **(इद्धः)** प्रदीप्त **(अग्निः)** अग्नि के **(न)** समान **(अज्मन्)** जिसमें शत्रुओं को गिराते हैं, उस बड़े-बड़े धन की प्राप्ति करानेहारे युद्ध में **(आ, अदीदेत्)** अच्छे प्रदीप्त होवें, वा **(याभिः)** जिन

रक्षाओं के **(शर्य्यातम्)** हिंसा करनेहारे को प्राप्त पुरुष की **(अवथः)** रक्षा करो, **(ताभिरु)** इन्हीं रक्षाओं से प्रजा सेना की रक्षा के लिये **(सु, आगतम्)** आया-जाया कीजिये॥१७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कोई शौर्य्यादि गुणों से शोभायमान राजा रक्षणीय की रक्षा करे और मारने योग्यों को मारे और जैसे अग्नि वन का दाह करे, वैसे शत्रु की सेना को भस्म करे और शत्रुओं के बड़े-बड़े धनों को प्राप्त कराकर आनन्दित करावे, वैसे ही सभा और सेना के पति काम किया करें॥१७॥

अथ सर्वै राजजनैः किंवत्सुखानि भोग्यानीत्याह॥

अब सब राजजनों को किसके तुल्य सुख भोगने चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः।
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥१८॥

याभिः। अङ्गिरः। मनसा। निऽरण्यथः। अग्रम्। गच्छथः। विऽवरे। गोऽअर्णसः। याभिः। मनुम्। शूरम्। इषा। सम्ऽआवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥१८॥

पदार्थः-(याभिः) **(अङ्गिरः)** अङ्गति जानाति यो विद्वांस्तत्सम्बुद्धौ **(मनसा)** विज्ञानेन **(निरण्यथः)** नित्यं रणथो युद्धमाचरथः। अत्र विकरणव्यत्ययेन श्यन्। **(अग्रम्)** उत्तमविजयम् **(गच्छथः)** **(विवरे)** अवकाशे **(गोअर्णसः)** गौः पृथिव्याः जलस्य च। अत्र **सर्वत्र विभाषा गो**रिति प्रकृतिभावः। **(याभिः)** **(मनुम्)** युद्धज्ञातारम् **(शूरम्)** शत्रुहिंसकम् **(इषा)** इच्छया **(समावतम्)** सम्यग् रक्षतम् **(ताभिः०)** इति पूर्ववत्॥१८॥

अन्वयः-हे अङ्गिरस्त्वं मनसा विद्याधर्मौ सर्वान् बोधय। हे अश्विना! सेनापालकयोधयितारौ युवां याभिरूतिभिर्गोअर्णसो विवरे निरण्यथोऽग्रं गच्छथो याभिः शूरं मनुं समावतं ताभिरु इषाऽस्मद्रक्षणाय स्वागतम्॥१८॥

भावार्थः-यथा विद्वान् विज्ञानेन सर्वाणि सुखानि साध्नोति तथा सर्वै राजजनैरनेकैः साधनैः पृथिव्या नदीसमुद्रादाकशस्य मध्ये शत्रून् विजित्य सुखानि सुष्ठु गन्तव्यानि॥१८॥

पदार्थः-हे **(अङ्गिरः)** जाननेहारे विद्वान्! तू **(मनसा)** विज्ञान से विद्या और धर्म्म का सबको बोध करा। हे **(अश्विना)** सेना के पालने और युद्ध करानेहारे जन! तुम **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं के साथ **(गोअर्णसः)** पृथिवी जल के **(विवरे)** अवकाश में **(निरण्यथः)** संग्राम करते और **(अग्रम्)** उत्तम विजय को **(गच्छथः)** प्राप्त होते वा **(याभिः)** जिन रक्षाओं से **(शूरम्)** शूरवीर **(मनुम्)** मननशील

मनुष्य को **(समावतम्)** सम्यक् रक्षा करो **(ताभिरु)** उन्हीं रक्षा और **(इषा)** इच्छा से हमारी रक्षा के लिये **(सु, आ, गतम्)** उचित समय पर आया कीजिये॥१८॥

भावार्थः-जैसे विद्वान् विज्ञान से सब सुखों को सिद्ध करता है, वैसे सब राजपुरुषों को अनेक साधनों से पृथिवी, नदी और समुद्र से आकाश के मध्य में शत्रुओं को जीत के सुखों को अच्छे प्रकार प्राप्त होना चाहिये॥१८॥

अथ स्त्रीपुंसाभ्यां कथं कदा विवाहः कार्य इत्याह॥

अब स्त्री-पुरुष को कैसे और कब विवाह करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभि॒: पत्नी॑र्वि॒मद॑ाय॒ न्यू॑हथु॒रा घ॑ वा॒ याभि॑ररु॒णीरशि॑क्षतम्।
याभि॑: सु॒दास॑ ऊ॒हथु॑: सु॒देव्यं॑ ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना ग॑तम्॥ १९॥

याभि॑:। पत्नी॑:। वि॒ऽम॒दाय॑। नि॒ऽऊ॒हथु॑:। आ। घ॒। वा॒। याभि॑:। अ॒रु॒णी:। अशि॑क्षतम्। याभि॑:। सु॒ऽदासे॑। ऊ॒हथु॑:। सु॒ऽदे॒व्य॑म्। ताभि॑:। ऊ॒म् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥ १९॥

पदार्थः-(याभिः) (पत्नीः) पत्युर्यज्ञसंबन्धिनीर्विदुषीः **(विमदाय)** विविधानन्दाय **(न्यूहथुः)** नितरां वहतम् **(आ) (घ)** एव **(वा)** पक्षान्तरे **(याभिः) (अरुणीः)** ब्रह्मचारिणीः कन्याः **(अशिक्षतम्)** पाठयतम् **(याभिः) (सुदासे)** सुष्ठुदाने **(ऊहथुः)** प्राप्नुतम् **(सुदेव्यम्)** सुष्ठु देवेषु विद्वत्सु भवं विज्ञानम् **(ताभिः०)** इति पूर्ववत्॥१९॥

अन्वयः-हे अश्विनाध्यापकाध्येतारौ! युवां याभिरूतिभिर्विमदाय पत्नीर्न्यूहथुः। याभिरूतिभिररुणी- र्घैवाशिक्षतम्। याभिः सुदासे सुदेव्यमूहथुश्च ताभिर्विद्या उ विनयं स्वागतम्॥१९॥

भावार्थः-सुखं जिगमिषुभिः पुरुषैः स्त्रीभिश्च धर्मसेवितेन ब्रह्मचर्य्येण च पूर्णां विद्यां युवावस्थां च प्राप्य स्वतुल्यतयैव विवाहः कर्त्तव्योऽथवा ब्रह्मचर्य एव स्थित्वा सर्वदा स्त्रीपुरुषाणां सुशिक्षा कार्या, नहि तुल्यगुणकर्मस्वभावैर्विना गृहाश्रमं धृत्वा केचित् किञ्चिदपि सुखं सुसंतानं प्राप्तुं शक्नुवन्त्यत एवमेव विवाहः कर्त्तव्यः॥१९॥

पदार्थः-हे **(अश्विना)** पढ़ने-पढ़ानेहारे ब्रह्मचारी लोगो! तुम **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(विमदाय)** विविध आनन्द के लिये **(पत्नीः)** पति के साथ यज्ञसम्बन्ध करनेवाली विदुषी स्त्रियों को **(न्यूहथुः)** निश्चय से ग्रहण करो, **(वा)** वा **(याभिः)** जिन रक्षाओं से **(अरुणीः)** ब्रह्मचारिणी कन्याओं को **(घ)** ही **(आ, अशिक्षतम्)** अच्छे प्रकार शिक्षा करो और **(याभिः)** जिन रक्षादि क्रियाओं से **(सुदासे)** अच्छे प्रकार दान करने में **(सुदेव्यम्)** उत्तम विद्वानों में उत्पन्न हुए विज्ञान को **(ऊहथुः)** प्राप्त कराओ, **(ताभिः)** उन रक्षाओं से विद्या **(उ)** और विनय को **(सु, आ, गतम्)** अच्छे प्रकार प्राप्त हूजिये॥१९॥

भावार्थः-सुख पाने की इच्छा करनेवाले पुरुष और स्त्रियों को धर्म से सेवित ब्रह्मचर्य से पूर्ण विद्या और युवावस्था को प्राप्त होकर अपनी तुल्यता से ही विवाह करना योग्य है अथवा ब्रह्मचर्य ही में ठहर के सर्वदा स्त्री-पुरुषों को अच्छी शिक्षा करना योग्य है, क्योंकि तुल्य गुण-कर्म-स्वभाववाले स्त्री-पुरुषों के विना गृहाश्रम को धारण करके कोई किञ्चित् भी सुख वा उत्तम सन्तान को प्राप्त होने में समर्थ नहीं होते, इससे इसी प्रकार विवाह करना चाहिये॥१९॥

अथ सभाध्यक्षादिराजपुरुषैः कथं भवितव्यमित्याह॥

अब सभाध्यक्ष आदि राजपुरुषों को कैसा होना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभि॒: शंता॑ती॒ भव॑थो दद॒ाशुषे॑ भु॒ज्युं याभि॒रव॑थो॒ याभि॒रध्रि॑गुम्।
ओ॒म्याव॑तीं सु॒भरा॑मृत॒स्तुभं॒ ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना ग॑तम्॥ २०॥ ३६॥

याभि॑:। शंता॑ती॒ इति॑ शम्ऽता॑ती। भव॑थः। द॒दा॒शुषे॑। भु॒ज्युम्। याभि॑:। अव॑थः। याभि॑:। अध्रि॑ऽगुम्। ओ॒म्याऽव॑तीम्। सु॒ऽभरा॑म्। ऋ॒त॒ऽस्तुभ॑म्। ताभि॑:। ऊम् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥ २०॥

पदार्थः-(याभिः) (शन्तातौ) शं सुखस्य कर्त्तारौ। अत्र **शिवशमरिष्टस्य करे।** (अष्टा०४.४.१४३) इति तातिल् प्रत्ययः। **(भवथः)** भवतम् **(ददाशुषे)** विद्यासुखे दातुं शीलाय **(भुज्युम्)** सुखस्य भोक्तारं पालकं वा **(याभिः) (अवथः) (याभिः) (अध्रिगुम्)** इन्द्रं परमैश्वर्यवन्तम्। **इन्द्रोऽप्यध्रिगुरुच्यते।** (निरु०५.११) **(ओम्यावतीम्)** अवन्ति त ओमास्तेषु भवा प्रशस्ता विद्या तद्वतीम् **(सुभराम्)** सुष्ठु बिभ्रति सुखानि यया ताम् **(ऋतस्तुभम्)** यया ऋतं स्तोभते स्तभ्नाति धरति **(ताभिः०)** इति पूर्ववत्॥२०॥

अन्वयः-हे अश्विना सभासेनेशौ! युवां ददाशुषे याभिरूतिभिः शन्तातौ भवथो भवतं याभिर्भुज्युमवथोऽवतं याभिरध्रिगुमोम्यावतीमृतस्तुभं सुभरां नीतिमवथोऽवतं ताभिरु ऊतिभिः सत्यं स्वागतम्॥२०॥

भावार्थः-राजादिभिः राजपुरुषैः सर्वस्य सुखकारिभिर्भवितव्यम्। आप्तविद्यानीती धृत्वा मङ्गलमाप्तव्यम्॥२०॥

पदार्थः-हे **(अश्विना)** सभा और सेना के अधीशो! तुम दोनों **(ददाशुषे)** विद्या और सुख देनेवाले के लिये **(याभिः)** जिन **(ऊतिभिः)** रक्षा आदि क्रियाओं से **(शन्तातौ)** सुख के कर्त्ता **(भवथः)** होते वा **(याभिः)** जिन रक्षाओं से **(भुज्यम्)** सुख के भोक्ता वा पालन करनेहारे की **(अवथः)** रक्षा करते वा **(याभिः)** जिन रक्षाओं से **(अध्रिगुम्)** परमैश्वर्यवाले इन्द्र और **(ओम्यावतीम्)** रक्षा करनेहारे विद्वानों में उत्पन्न जो उत्तम विद्या उससे युक्त **(सुभराम्)** जिससे कि अच्छे प्रकार सुखों को **(ऋतस्तुभम्)** और सत्य का धारण होता है, उस नीति की रक्षा करते हो, **(ताभिरु)** उन्हीं रक्षाओं से सत्य को **(सु, आ, गतम्)** अच्छे प्रकार प्राप्त होओ॥२०॥

भावार्थः-राजादि राजपुरुषों को योग्य है कि सबको सुख देवें और आप्त पुरुषों की विद्या और नीति को धारण कर कल्याण को प्राप्त होवें॥ २०॥

पुनस्तैः किं किं कार्य्यमित्याह॥

फिर उन लोगों को क्या-क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभि॒: कृ॒शानु॒मस॑ने दुव॒स्यथो॑ ज॒वे याभि॒र्यूनो॒ अर्व॑न्तमाव॑तम्।
मधु॑ प्रि॒यं भ॑रथो॒ यत्स॒रड्भ्य॒स्ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना ग॑तम्॥ २१॥

याभि॑:। कृ॒शानु॑म्। असने। दु॒व॒स्यथ॑:। ज॒वे। याभि॑:। यून॑:। अर्व॑न्तम्। आव॑तम्। मधु॑। प्रि॒यम्। भ॒र॒थ॒:। यत्। स॒रट्ऽभ्य॑:। ताभि॑:। ऊ॒म् इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। ग॒त॒म्॥ २१॥

पदार्थः-(याभिः) (कृशानुम्) कृषम् **(असने)** क्षेपणे **(दुवस्यथः)** परिचरतम् **(जवे)** वेगे **(याभिः) (यूनः)** यौवनस्थान् वीरान् **(अर्वन्तम्)** वाजिनम् **(आवतम्)** पालयतम् **(मधु)** मिष्टमन्नादिकम् **(प्रियम्) (भरथः)** धरतम् **(यत्) (सरड्भ्यः)** युद्धे विजयकर्तृसेनाजनादिभ्यः **(ताभिः)** इति पूर्ववत्॥ २१॥

अन्वयः-हे अश्विना सभासेनेशौ! युवां याभिरूतिभिरसने कृशानुं दुवस्यथः। याभिर्जवे यूनोऽर्वन्तं चावतमु सरड्भ्यो यत् प्रियं तन्मधु च भरथस्ताभी राष्ट्रपालनाय स्वागतम्॥ २१॥

भावार्थः-राजपुरुषाणां योग्यमस्ति दुःखैः कृशितान् प्राणिनो यौवनावस्थान् व्यभिचारात्पालयेयुः, अश्वादिसेनाङ्गरक्षार्थं सर्वं प्रियं वस्तु संभरन्तु प्रतिक्षणं समीक्षया सर्वान् वर्धयेयुः॥ २१॥

पदार्थः-हे **(अश्विना)** सभा और सेना के अधीशो! तुम दोनों **(याभिः)** जिन **(ऊतिभिः)** रक्षादि क्रियाओं से **(असने)** फेंकने में **(कृशानुम्)** दुर्बल की **(दुवस्यथः)** सेवा करो, वा **(याभिः)** जिन रक्षाओं से **(जवे)** वेग में **(यूनः)** युवावस्था युक्त वीरों **(अर्वन्तम्)** और घोड़े की **(आवतम्)** रक्षा करो **(उ)** और **(सरड्भ्यः)** युद्ध में विजय करनेवाले सेनादि जनों से **(यत्)** जो **(प्रियम्)** कामना के योग्य है उस **(मधु)** मीठे अन्न आदि पदार्थ को **(भरथः)** धारण करो, **(ताभिः)** उन रक्षाओं से युक्त होकर राज्यपालन के लिये **(सु, आ, गतम्)** अच्छे प्रकार आया कीजिये॥ २१॥

भावार्थः-राजपुरुषों को योग्य है कि दुःखों से पीड़ित प्राणियों और युवावस्थावाले स्त्री-पुरुषों की व्यभिचार से रक्षा करें और घोड़े आदि सेना के अङ्गों की रक्षा के लिये सब प्रिय वस्तु को धारण करें, प्रतिक्षण सम्हाल से सबको बढ़ाया करें॥ २१॥

पुनस्तैर्युद्धे कथमाचरणीयमित्याह॥

फिर उनको युद्ध में कैसा आचरण करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

याभिर्नरं गोषुयुधं नृषाह्वे क्षेत्रस्य साता तनयस्य जिन्वथः।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम्॥ २२॥

याभिः। नरम्। गोषुऽयुधम्। नृऽसह्वे। क्षेत्रस्य। साता। तनयस्य। जिन्वथः। याभिः। रथान्। अवथः। याभिः। अर्वतः। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ २२॥

पदार्थः-(याभिः) (नरम्) नेतारम् **(गोषुयुधम्)** पृथिव्यादिषु योद्धारम् **(नृषाह्वे)** नृभिः षोढव्ये **(क्षेत्रस्य)** स्त्रियाः **(साता)** संभजनीये संग्रामे। सप्तम्येकवचनस्य डादेशः। **(तनयस्य) (जिन्वथः)** प्रीणीत **(याभिः) (रथान्)** विमानादियानानि **(अवथः)** वर्धयेतम् **(याभिः) (अर्वतः)** अश्वान् **(ताभिः०)** इति पूर्ववत्॥ २२॥

अन्वयः-हे अश्विना सभासेनाध्यक्षौ! युवां नृषाह्वे साता संग्रामे याभिरूतिभिर्गोषु युधं नरं जिन्वथो याभिः क्षेत्रस्य तनयस्य जिन्वथ उ याभी रथानर्वतोऽवथस्ताभिः सर्वाः प्रजाश्च संरक्षितुं स्वागतम्॥ २२॥

भावार्थः-मनुष्यैर्युद्धे शत्रून् हत्वा स्वभृत्यादीन् संरक्ष्य सेनाङ्गानि वर्धनीयानि न जातु स्त्री बालकौ हन्तव्यौ नायोद्धा संप्रेक्षका दूताश्चेति॥ २२॥

पदार्थः-हे **(अश्विना)** सभासेना के अध्यक्ष तुम दोनों! **(नृषाह्वे)** वीरों को सहने और **(साता)** सेवन करने योग्य संग्राम में **(याभिः)** जिन **(ऊतिभिः)** रक्षाओं से **(गोषुयुधम्)** पृथिवी पर युद्ध करनेहारे **(नरम्)** नायक को **(जिन्वथः)** प्रसन्न करो **(याभिः)** वा जिन रक्षाओं से **(क्षेत्रस्य)** स्त्री और **(तनयस्य)** सन्तान को प्रसन्न रक्खो **(उ)** और **(याभिः)** जिन रक्षाओं से **(रथान्)** रथों **(अर्वतः)** और घोड़ों की **(अवथः)** रक्षा करो **(ताभिः)** उन रक्षाओं से सब प्रजाओं की रक्षा करने को **(सु, आ, गतम्)** अच्छे प्रकार प्रवृत्त हूजिये॥ २२॥

भावार्थः-मनुष्यों को योग्य है कि युद्ध में शत्रुओं को मार अपने भृत्य आदि की रक्षा करके सेना के अङ्गों को बढ़ावें और स्त्री, बालकों, युद्ध के देखनेवाले और दूतों को कभी न मारें॥ २२॥

अथ ते दुष्टनिवृत्तिं श्रेष्ठरक्षां कथं कुर्य्युरित्याह॥

अब वे राजजन दुष्टों की निवृत्ति और श्रेष्ठों की रक्षा कैसे करें, इस विषय को अगले मन्त्र में कहा है॥

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दुभीतिमावतम्।
याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ २३॥

याभिः। कुत्सम्। आर्जुनेयम्। शतक्रतू इति शतऽक्रतू। प्र। तुर्वीतिम्। प्र। च। दुभीतिम्। आवतम्। याभिः। ध्वसन्तिम्। पुरुऽसन्तिम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ २३॥

पदार्थः-(याभिः) (कुत्सम्) वज्रम् **(आर्जुनेयम्)** अर्जुनेन रूपेण निर्वृत्तम्। अत्र चातुरर्थिको ढक्। **(शतक्रतू)** शतं प्रज्ञा कर्माणि वा ययोस्तौ **(प्र) (तुर्वीतिम्)** हिंसकम्। अत्र बाहुलकात् कीतिः प्रत्ययः। **(प्र) (च)** समुच्चये **(दभीतिम्)** दम्भिनम् **(आवतम्)** हन्यातम् **(याभिः) (ध्वसन्तिम्)** अधोगन्तारं पापिनम् **(पुरुषन्तिम्)** पुरूणां बहूनां सन्ति विभाजितारम् **(आवतम्)** रक्षतम् **(ताभिः)** इति पूर्ववत्॥ २३॥

अन्वयः-हे शतक्रतू अश्विना सभासेनेशौ! युवां याभिरूतिभिः सूर्यचन्द्रवत् प्रकाशमानौ सन्तावार्जुनेयं कुत्सं सङ्गृह्य तुर्वीतिं दभीतिं ध्वसन्तिं प्रावतम्। याभिः पुरुषन्ति च प्रावतं ताभिरु धर्मं रक्षितुं स्वागतम्॥ २३॥

भावार्थः- राजादिमनुष्यैः शस्त्रास्त्रप्रयोगान् विदित्वा दुष्टान् शत्रून् निवार्य यावन्तीहाधर्मयुक्तानि कर्माणि सन्ति तावन्ति धर्मोपदेशेन निवार्य विविधा रक्षा विधाय प्रजाः सम्पाल्य परमानन्दो भोक्तव्यः॥ २३॥

पदार्थः-हे **(शतक्रतू)** असंख्योत्तम बुद्धिकर्मयुक्त **(अश्विना)** सभा सेना के पति! आप दोनों **(याभिः)** जिन **(ऊतिभिः)** रक्षा आदि से सूर्य-चन्द्रमा के समान प्रकाशमान होकर **(आर्जुनेयम्)** सुन्दर रूप के साथ सिद्ध किये हुए **(कुत्सम्)** वज्र का ग्रहण करके **(तुर्वीतिम्)** हिंसक **(दभीतिम्)** दम्भी **(ध्वसन्तिम्)** नीच गति को जानेवाले पापी को **(प्र, आवतम्)** अच्छे प्रकार मारो **(च)** और **(याभिः)** जिन रक्षाओं से **(पुरुषन्तिम्)** बहुतों को अलग बांटनेवाले की **(प्र, आवतम्)** रक्षा करो, **(ताभिः, उ)** उन्हीं रक्षाओं से धर्म की रक्षा करने को **(सु, आ, गतम्)** अच्छे प्रकार तत्पर हूजिये॥ २३॥

भावार्थः-राजादि मनुष्यों को योग्य है कि शस्त्रास्त्र प्रयोगों को जान, दुष्ट शत्रुओं का निवारण करके, जितने इस संसार में अधर्मयुक्त कर्म हैं उतनों का धर्म्मोपदेश से निवारण कर, नाना प्रकार की रक्षा का विधान कर, प्रजा का अच्छे प्रकार पालन करके परम आनन्द का भोग किया करें॥ २३॥

अध्यापकोपदेशकाभ्यां किं कर्त्तव्यमित्याह॥

अध्यापक और उपदेशकों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम्।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ॥ २४॥

अप्नस्वतीम्। अश्विना। वाचम्। अस्मे इति। कृतम्। नः। दस्रा। वृषणा। मनीषाम्। अद्यूत्ये। अवसे। नि। ह्वये। वाम्। वृधे। च। नः। भवतम्। वाजसातौ॥ २४॥

पदार्थः-(अप्नस्वतीम्) प्रशस्तापत्ययुक्ताम् **(अश्विना)** आप्तावध्यापकोपदेशकौ **(वाचम्)** वेदादिशास्त्रसंस्कृतां वाणीम् **(अस्मे)** अस्मासु **(कृतम्)** कुरुतम्। अत्र विकरणस्य लुक्। **(नः)** अस्मभ्यम्

(दस्रा) दुःखोपक्षयितारौ **(वृषणा)** सुखाभिवर्षकौ **(मनीषाम्)** योगविज्ञानवतीं बुद्धिम् **(अद्यूत्ये)** द्यूते भवो व्यवहारो द्यूत्यश्छलादिदूषितस्तद्भिन्ने **(अवसे)** रक्षणाद्याय **(नि)** नितराम् **(ह्वये)** आह्वानं कुर्वे **(वाम्)** युवाम् **(वृधे)** सर्वतो वर्धनाय **(च)** अन्येषां समुच्चये **(नः)** अस्माकम् **(भवतम्)** **(वाजसातौ)** युद्धादिव्यवहारे॥ २४॥

अन्वयः–हे दस्रा वृषणाऽश्विनाध्यापकोपदेशकौ! युवामस्मेऽस्मभ्यमप्नस्वतीं वाचं कृतम्। अद्यूत्ये नोऽवसे मनीषां कृतम्। वाजसातौ नोऽस्माकमन्येषां च वृधे सततं भवतम्। एतदर्थं वां युवामहं निह्वये॥ २४॥

भावार्थः–न खलु कश्चिदप्याप्तयोर्विदुषोः समागमेन विना पूर्णविद्यायुक्तां वाचं प्रज्ञां च प्राप्तुमर्हति, नह्येते अन्तरा शत्रुजयमभितो वृद्धिं च॥ २४॥

पदार्थः–हे **(दस्रा)** सब के दुःखनिवारक **(वृषणा)** सुख को वर्षानेहारे **(अश्विना)** अध्यापक उपदेशक लोगो! तुम दोनों **(अस्मे)** हम में **(अप्नस्वतीम्)** बहुत पुत्र-पौत्र करनेहारी **(वाचम्)** वाणी को **(कृतम्)** कीजिये **(अद्यूत्ये)** छलादि दोषरहित व्यवहार में **(नः)** हमारी **(अवसे)** रक्षादि के लिये **(मनीषाम्)** योग विज्ञानवाली बुद्धि को कीजिये **(वाजसातौ)** युद्धादि व्यवहार में **(नः)** हमारी **(च)** और अन्य लोगों की **(वृधे)** वृद्धि के लिये निरन्तर **(भवतम्)** उद्यत हूजिये, इसीके लिये **(वाम्)** तुम दोनों को मैं **(निह्वये)** नित्य बुलाता हूं॥ २४॥

भावार्थः–कोई भी पुरुष आप्त विद्वानों के समागम के विना पूर्ण विद्यायुक्त वाणी और बुद्धि को प्राप्त नहीं हो सकता, न इन दोनों के विना शत्रुओं का जय और सब ओर से बढ़ती को प्राप्त हो सकता है॥ २४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्युभि॑र॒क्तुभि॒: परि॑ पातम॒स्मानरि॑ष्टेभिरश्विना॒ सौभ॑गेभिः।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒: सिन्धु॑: पृथि॒वी उ॒त द्यौः॥ २५॥ ३७॥ ७॥

द्युऽभि॑:। अ॒क्तुऽभि॑:। परि॑। पा॒त॒म्। अ॒स्मान्। अरि॑ष्टेभिः। अ॒श्वि॒ना॒। सौभ॑गेभिः। तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒ह॒न्ता॒म्। अदि॑तिः। सिन्धु॑:। पृ॒थि॒वी। उ॒त। द्यौः॥ २५॥

पदार्थः-(**द्युभिः**) दिवसैः (**अक्तुभिः**) रात्रिभिः सह वर्त्तमानान् (**परि**) सर्वतः (**पातम्**) रक्षतम् (**अस्मान्**) भवदाश्रितान् (**अरिष्टेभिः**) हिंसितुमनर्हैः (**अश्विना**) (**सौभगेभिः**) शोभनैश्वर्यैः (**तत्**) (**नः**) (**मित्रः**) (**वरुणः**) (**मामहन्ताम्**) (**अदितिः**) (**सिन्धुः**) (**पृथिवी**) (**उत**) (**द्यौः**) एषां पूर्ववदर्थः॥ २५॥

अन्वयः-हे अश्विना! पूर्वोक्तौ युवां द्युभिरक्तुभिररिष्टेभिः सौभगेभिः सह वर्त्तमानानस्मान् सदा परिपातं तत् युष्मत्कृत्यं मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्नोऽस्मभ्यं मामहन्ताम्॥ २५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मातापितरौ सन्तानान् मित्रः सखायं प्राणश्च शरीरं प्रीणाति समुद्रो गाम्भीर्यादिकं पृथिवी वृक्षादीन् सूर्यः प्रकाशं च धृत्वा सर्वान् प्राणिनः सुखिनः कृत्वोपकारं जनयन्ति तथाऽध्यापकोपदेष्टारस्सर्वाः सत्यविद्याः सुशिक्षाश्च प्रापय्येष्टं सुखं प्रापयेयुः॥ २५॥

अत्र द्यावापृथिवीगुणवर्णनं सभासेनाध्यक्षकृत्यं तत्कृतपरोपकारवर्णनं च कृतमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

अस्मिन्नध्यायेऽहोरात्राग्निविद्वदादिगुणवर्णनादेतदध्यायोक्तार्थानां षष्ठाध्यायोक्तार्थैः सह सङ्गतिर्वेदितव्या॥

इति सप्तत्रिंशत्तमो ३७ वर्गो द्वादशोत्तरशततमं ११२ सूक्तं च समाप्तम्॥

पदार्थः-हे **(अश्विना)** पूर्वोक्त अध्यापक और उपदेशक लोगो! तुम दोनों **(द्युभिः)** दिन और **(अक्तुभिः)** रात्रि **(अरिष्टेभिः)** हिंसा के न योग्य **(सौभगेभिः)** सुन्दर ऐश्वर्यों के साथ वर्त्तमान **(अस्मान्)** हम लोगों को सर्वदा **(परि, पातम्)** सब प्रकार रक्षा कीजिये **(तत्)** तुम्हारे उस काम को **(मित्रः)** सबका सुहृद् **(वरुणः)** धर्मादि कार्यों में उत्तम **(अदितिः)** माता **(सिन्धुः)** समुद्र वा नदी **(पृथिवी)** भूमि वा आकाशस्थ वायु **(उत)** और **(द्यौः)** विद्युत् वा सूर्य का प्रकाश **(नः)** हमारे लिये **(मामहन्ताम्)** वार-वार बढ़ावें॥ २५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे माता और पिता अपने-अपने सन्तानों, सखा मित्रों और प्राण शरीर को प्रसन्न करते हैं और समुद्र गम्भीरतादि, पृथिवी वृक्षादि और सूर्य प्रकाश को धारण कर और सब प्राणियों को सुखी करके उपकार को उत्पन्न करते हैं, वैसे पढ़ाने और उपदेश करनेहारे सब सत्य विद्या और अच्छी शिक्षा को प्राप्त कराके सबको इष्ट सुख से युक्त किया करें॥ २५॥

इस सूक्त में सूर्य पृथिवी आदि के गुणों और सभा सेना के अध्यक्षों के कर्त्तव्यों तथा उनके किये परोपकारादि कर्मों का वर्णन किया है, इससे इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

इस अध्याय में दिन, रात्रि, अग्नि और विद्वान् आदि के गुणों के वर्णन से इस सप्तमाध्याय में कहे अर्थों की षष्ठाध्याय में कहे अर्थों के साथ सङ्गति जाननी चाहिये॥

यह सैंतीसवां वर्ग और एकसौ बारहवां सूक्त पूरा हुआ॥

इति श्रीपरमहंसपरिव्राजकाचार्याणां महाविदुषां श्रीयुतविरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्विद्वद्वरेण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृताऽऽर्यभाषाभ्यां विभूषिते सुप्रमाणयुक्ते ऋग्वेदभाष्ये प्रथमाष्टके सप्तमोऽध्यायः समाप्तः॥

ओ३म्।

अथाष्टमोऽध्यायः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथास्य विंशत्यृचस्य त्रयोदशोत्तरशततमस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। उषा देवता। द्वितीयस्यार्धर्चस्य रात्रिरपि। १,३,९,१२,१७ निचृत्त्रिष्टुप्। ६ त्रिष्टुप्। ७,१८-२० विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २,५ स्वराट् पङ्क्तिः। ४,८,१०,११,१५,१६ भुरिक् पङ्क्तिः। १३,१४ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

तत्रादिमन्त्रे विद्वद्गुणा उपदिश्यन्ते।

अब आठवें अध्याय का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का उपदेश किया है॥

इ॒दं श्रेष्ठं॒ ज्योति॑षां॒ ज्योति॒रागा॑च्चि॒त्रः प्र॑के॒तो अ॑जनिष्ट॒ विभ्वा॑।
यथा॒ प्रसू॑ता सवि॒तुः स॒वाय॑ एवा रात्र्यु॒षसे॒ योनि॑मारैक्॥ १॥

इ॒दम्। श्रेष्ठ॑म्। ज्योति॑षाम्। ज्योतिः॑। आ। अ॒गा॒त्। चि॒त्रः। प्र॒ऽके॒तः। अ॒ज॒नि॒ष्ट॒। विऽभ्वा॑। यथा॑। प्रऽसू॑ता। स॒वि॒तुः॑। स॒वाय॑। ए॒व। रात्री॑। उ॒षसे॑। योनि॑म्। आ॒रै॒क्॥ १॥

पदार्थः-(इदम्) प्रत्यक्षं वक्ष्यमाणम् **(श्रेष्ठम्)** प्रशस्तम् **(ज्योतिषाम्)** प्रकाशानाम् **(ज्योतिः)** प्रकाशम् **(आ)** समन्तात् **(अगात्)** प्राप्नोति **(चित्रः)** अद्भुतः **(प्रकेतः)** प्रकृष्टप्रज्ञः **(अजनिष्ट)** जायते **(विभ्वा)** विभुना परमेश्वरेण सह। अत्र तृतीयैकवचनस्थाने आकारादेशः। **(यथा) (प्रसूता)** उत्पन्ना **(सवितुः)** सूर्य्यस्य सम्बन्धेन **(सवाय)** ऐश्वर्याय **(एव)** अत्र **निपातस्य चे**ति दीर्घः। **(रात्री) (उषसे)** प्रातःकालाय **(योनिम्) (गृहम्) (आरैक्)** व्यतिरिणक्ति॥ १॥

अन्वयः-यथा प्रसूता रात्री सवितुः सवायोषसे योनिमारैक् तथैव चित्रः प्रकेतो विद्वान् यदिदं ज्योतिषां श्रेष्ठं ज्योतिर्ब्रह्मागात् तेनैव विभ्वा सह सुखैश्वर्य्यायाजनिष्ट दुःखस्थानादारैक्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्योदयं प्राप्यान्धकारो विनश्यति, तथैव ब्रह्मज्ञानमवाप्य दुःखं विनश्यति। अतः सर्वैर्ब्रह्मज्ञानाय यतितव्यम्॥ १॥

पदार्थः-(यथा) जैसे **(प्रसूता)** उत्पन्न हुई **(रात्री)** निशा **(सवितुः)** सूर्य्य के सम्बन्ध से **(सवाय)** ऐश्वर्य्य के हेतु **(उषसे)** प्रातःकाल के लिये **(योनिम्)** घर-घर को **(आरैक्)** अलग-अलग प्राप्त होती है, वैसे ही **(चित्रः)** अद्भुत गुण, कर्म स्वभाववाला **(प्रकेतः)** बुद्धिमान् विद्वान् जिस **(इदम्)** इस **(ज्योतिषाम्)** प्रकाशकों के बीच **(श्रेष्ठम्)** अतीवोत्तम **(ज्योतिः)** प्रकाशस्वरूप ब्रह्म को **(आ, अगात्)**

प्राप्त होता है **(एव)** उसी **(विभ्वा)** व्यापक परमात्मा के साथ सुखैश्वर्य के लिये **(अजनिष्ट)** उत्पन्न होता है और दु:खस्थान से पृथक् होता है॥१॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे सूर्योदय को प्राप्त होकर अन्धकार नष्ट हो जाता है, वैसे ही ब्रह्मज्ञान को प्राप्त होकर दु:ख दूर हो जाता है। इससे सब मनुष्यों को योग्य है कि परमेश्वर को जानने के लिये प्रयत्न किया करें॥१॥

अथोषोरात्रिव्यवहारमाह॥

अब रात्रि और प्रभातवेला के व्यवहार को अगले मन्त्र में कहा है॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्या:।
समानबन्धू अमृते अनूची द्यावा वर्ण चरत आमिनाने॥२॥

रुशत्ऽवत्सा। रुशती। श्वेत्या। आ। अगात्। अरैक्। ऊम् इति। कृष्णा। सदनानि। अस्या:। समानबन्धू इति समानऽबन्धू। अमृते इति। अनूची इति। द्यावा। वर्णम्। चरत:। आमिनाने इत्याऽमिनाने॥२॥

पदार्थ:-(रुशद्वत्सा) रुशज्ज्वलित: सूर्य्यो वत्सो यस्या: सा **(रुशती)** रक्तवर्णयुक्ता **(श्वेत्या)** शुभ्रस्वरूपा **(आ)** **(अगात्)** समन्तात् प्राप्नोति **(अरैक्)** अतिरिणक्ति **(उ)** अद्भुते **(कृष्णा)** कृष्णवर्णा रात्री **(सदनानि)** स्थानानि **(अस्या:)** उषस: **(समानबन्धू)** यथा सहवर्त्तमानौ मित्रौ भ्रातरौ वा **(अमृते)** प्रवाहरूपेण विनाशरहिते **(अनूची)** अन्योऽन्यवर्त्तमाने **(द्यावा)** द्यावौ स्वस्वप्रकाशेन प्रकाशमानौ **(वर्णम्)** स्वस्वरूपम् **(चरत:)** प्राप्नुत: **(आमिनाने)** परस्परं प्रक्षिपन्तौ पदार्थाविव॥२॥

इमं मन्त्रं यास्कमुनिरेव व्याख्यातवान्-**रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मण:। सूर्यमस्या वत्समाह साहचर्य्याद्रसहरणाद्वा रुशती श्वेत्यागात्। श्वेत्या श्वेततेररिचत् कृष्णा सदनान्यस्या: कृष्णवर्णा रात्रि:। कृष्णं कृष्यतेर्निकृष्टो वर्ण:। अथैने संस्तौति। समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची अनुच्याविती तरेतरमभिप्रेत्य द्यावा वर्णं चरतस्त एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे।** (निरु०२.२०)॥२॥

अन्वय:-हे मनुष्या! येयं रुशद्वत्सा वा रुशतीव श्वेत्योषा आगादस्या उ सदनानि प्राप्ता कृष्णा रात्र्यारैक् ते द्वे अमृते आमिमाने अनूची द्यावा समानबन्धू इव वर्णं चरतस्ते यूयं युक्त्या सेवध्वम्॥२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यस्मिन् स्थाने रात्री वसति तस्मिन्नेव स्थाने कालान्तरे उषा च वसति। आभ्यामुत्पन्न: सूर्य्यो द्वैमातुर इव वर्त्तते, इमे सदा बन्धूवद् गतानुगामिन्यौ रात्र्युषसौ वर्त्तेते एवं यूयं वित्त॥२॥

पदार्थः-हे मनुष्यो! जो यह **(रुषद्वत्सा)** प्रकाशित सूर्यरूप बछड़े की कामना करनेहारी वा **(रुशती)** लाल-लाल सी **(श्वेत्या)** शुक्लवर्णयुक्त अर्थात् गुलाबी रङ्ग की प्रभात वेला **(आ, अगात्)** प्राप्त होती है **(अस्याः, उ)** इस अद्भुत उषा के **(सदनानि)** स्थानों को प्राप्त हुई **(कृष्णा)** काले वर्णवाली रात **(आरैक्)** अच्छे प्रकार अलग-अलग वर्त्तती है, वे दोनों **(अमृते)** प्रवाह रूप से नित्य **(आमिनाने)** परस्पर एक-दूसरे को फेंकती हुई सी **(अनूची)** वर्त्तमान **(द्यावा)** अपने-अपने प्रकाश से प्रकाशमान **(समानबन्धू)** दो सहोदर वा दो मित्रों के तुल्य **(वर्णम्)** अपने-अपने रूप को **(चरतः)** प्राप्त होती हैं, उन दोनों का युक्ति से सेवन किया करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिस स्थान में रात्री वसती है, उसी स्थान में कालान्तर में उषा भी वसती है। इन दोनों से उत्पन्न हुआ सूर्य्य जानो दोनों माताओं से उत्पन्न हुए लड़के के समान है और ये दोनों सदा बन्धु के समान जाने-आनेवाली उषा और रात्रि हैं, ऐसा तुम लोग जानो॥ २॥

पुनस्तदेवाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे॥ ३॥

समानः। अध्वा। स्वस्रोः। अनन्तः। तम्। अन्याऽअन्या। चरतः। देवशिष्टे इति देवऽशिष्टे। न। मेथेते इति। न। तस्थतुः। सुमेके इति सुऽमेके। नक्तोषसा। सऽमनसा। विरूपे इति विऽरूपे॥ ३॥

पदार्थः-(समानः) तुल्यः **(अध्वा)** मार्गः **(स्वस्रोः)** भगिनीवद्वर्त्तमानयोः **(अनन्तः)** अविद्यमानान्त आकाशः **(तम्)** **(अन्यान्या)** परस्परं वर्त्तमाने **(चरतः)** गच्छतः **(देवशिष्टे)** देवस्य जगदीश्वरस्य शासनं नियमं प्राप्ते **(न)** निषेधे **(मेथेते)** हिंस्तः **(न)** **(तस्थतुः)** तिष्ठतः **(सुमेके)** नियमे निक्षिप्ते **(नक्तोषासा)** रात्र्युषसौ **(समनसा)** समानं मनो विज्ञानं ययोस्ताविव **(विरूपे)** विरुद्धस्वरूपे॥ ३॥

अन्वयः-हे मनुष्या! ययोः स्वस्रोरनन्तः समानोऽध्वास्ति ये देवशिष्टे विरूपे समनसेव वर्त्तमाने सुमेके नक्तोषसाः तमन्यान्या चरतस्ते कदाचिन्न मेथेते न च तस्थतुस्ते यूयं यथावज्जानीत॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विरुद्धस्वरूपौ सखायावस्मिन्नमर्यादेऽनन्ताकाशे न्यायाधीशनियमितौ सहैव नित्यं चरतस्तथा रात्र्युषसौ परमेश्वरनियमनियते भूत्वा वर्त्तेते॥ ३॥

पदार्थः-हे मनुष्यो! जिन **(स्वस्रोः)** बहिनियों के समान वर्त्ताव रखनेवाली रात्री और प्रभातवेलाओं का **(अनन्तः)** अर्थात् सीमारहित आकाश **(समानः)** तुल्य **(अध्वा)** मार्ग है, जो **(देवशिष्टे)**

परमेश्वर के शासन अर्थात् यथावत् नियम को प्राप्त **(विरूपे)** विरुद्धरूप **(समनसा)** तथा समान चित्तवाले मित्रों के तुल्य वर्तमान **(सुमेके)** और नियम से छोड़ी हुई **(नक्तोषसा)** रात्रि और प्रभात वेला **(तम्)** उस अपने नियम को **(अन्यान्या)** अलग-अलग **(चरतः)** प्राप्त होतीं और वे कदाचित् **(न)** नहीं **(मेथेते)** नष्ट होतीं और **(न, तस्थतुः)** न ठहरती हैं, उनको तुम लोग यथावत् जानो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विरुद्ध स्वरूपवाले मित्र लोग इस निःसीम अनन्त आकाश में न्यायाधीश के नियम के साथ ही नित्य वर्त्तते हैं, वैसे रात्रि-दिन परमेश्वर के नियम से नियत होकर वर्त्तते हैं॥३॥

पुनरुषो विषयमाह॥

फिर उषा का विषय अगले मन्त्र में कहा है॥

भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः।
प्रार्प्या जगद्व्युनो रायो अख्यदुषा अजीगर्भुवनानि विश्वा॥४॥

भास्वती। नेत्री। सूनृतानाम्। अचेति। चित्रा। वि। दुरः। नः। आवरित्यावः। प्रऽअर्प्या। जगत्। वि। ऊम् इति। नः। रायः। अख्यत्। उषाः। अजीगः। भुवनानि। विश्वा॥४॥

पदार्थः-(भास्वती) प्रशस्ता भाः कान्तिर्विद्यते यस्याः सा **(नेत्री)** प्रापिका **(सूनृतानाम्)** वाग्जागरितादिव्यवहाराणाम् **(अचेति)** सम्यग् विज्ञायताम् **(चित्रा)** विविधव्यवहारसिद्धिप्रदा **(वि)** **(दुरः)** द्वाराणि। अत्र पृषोदरादित्वात् संप्रसारणेनेष्टरूपसिद्धिः। **(नः)** अस्माकं **(आवः)** विवृणोतीव **(प्रार्प्य)** अर्पयित्वा **(जगत्)** संसारम् **(वि)** **(उ)** **(नः)** अस्मभ्यम् **(रायः)** धनानि **(अख्यत्)** प्रख्याति **(उषाः)** सुप्रभातः **(अजीगः)** स्वव्याप्त्या निगलतीव **(भुवनानि)** लोकान् **(विश्वा)** सर्वान्। अत्र शेर्लोपः॥४॥

अन्वयः-हे विद्वांसो मनुष्या! युष्माभिर्या भास्वती सूनृतानां नेत्री चित्रोषा नो दुरो व्यावो या नोऽस्मभ्यं जगत् प्रार्प्य रायो व्यख्यदु इति वितर्के विश्वा भुवनान्यजीगः साचेति अवश्यं विज्ञायताम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। योषा सर्वं जगत् प्रकाश्य सर्वान् प्राणिनो जागरयित्वा सर्वं विश्वमभिव्याप्य सर्वान् पदार्थान् वृष्टिद्वारा समर्थयित्वा पुरुषार्थं प्रवर्त्य धनादीनि प्रापय्य मातेव सर्वान् प्राणिनः पात्यत आलस्ये व्यर्था सा वेला नैव नेया॥४॥

पदार्थः-हे विद्वन् मनुष्यो! तुम लोगों को जो **(भास्वती)** अतीवोत्तम प्रकाशवाले **(सूनृतानाम्)** वाणी और जागृत के व्यवहारों को **(नेत्री)** प्राप्त करने और **(चित्रा)** अद्भुत गुण, कर्म, स्वभाववाली **(उषाः)** प्रभात वेला **(नः)** हमारे लिये **(दुरः)** द्वारों **(वि, आवः)** को प्रकट करती हुई सी वा जो **(नः)** हमारे लिये **(जगत्)** संसार को **(प्रार्प्य)** अच्छे प्रकार अर्पण करके **(रायः)** धनों को **(वि, अख्यत्)**

प्रसिद्ध करती है **(उ)** और **(विश्वा)** सब **(भुवनानि)** लोकों को **(अजीगः)** अपनी व्याप्ति से निगलती सी है, वह **(अचेति)** अवश्य जाननी है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो उषा सब जगत् को प्रकाशित करके, सब प्राणियों को जगा, सब संसार में व्याप्त होकर, सब पदार्थों को वृष्टि द्वारा समर्थ करके, पुरुषार्थ में प्रवृत्त करा, धनादि की प्राप्ति करा, माता के समान सब प्राणियों को पालती है, इससे आलस्य में उत्तम प्रातः समय की वेला व्यर्थ न गमाना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जिह्मश्ये३ चरितवे मघोन्याभोगय इष्टये राय उ त्वम्।
दभ्रं पश्यद्भ्य उर्विया विचक्षे उषा अजीगर्भुवनानि विश्वा॥५॥१॥

जिह्मऽश्ये। चरितवे। मघोनी। आऽभोगये। इष्टये। राये। ऊम् इति। त्वम्। दभ्रम्। पश्यत्ऽभ्यः। उर्विया। विऽचक्षे। उषाः। अजीगः। भुवनानि। विश्वा॥५॥

पदार्थः-(जिह्मश्ये) जिह्मः शेते स जिह्मशीस्तस्मै शयने वक्रत्वं प्राप्ताय जनाय। **जहातेः सन्वदाकारलोपश्च।** (उणा०१.१४१) अनेनायं सिद्धः। **जिह्मं जिहीतेरूर्ध्वं उच्छ्रितो भवति।** (निरु०८.१५) **(चरितवे)** चरितुं व्यवहर्त्तुम् **(मघोनी)** प्रशस्तानि मघानि धनानि प्राप्तानि यस्यां सा **(आभोगये)** समन्ताद्भुञ्जते सुखानि यस्यां तस्यै पुरुषार्थयुक्तायै। अत्र बहुवचनादौणादिको घिः प्रत्ययः। **(इष्टये)** यजन्ति सङ्गच्छन्ते यस्मिन् यज्ञे तस्मै। अत्र बाहुलकादौणादिकस्तिः प्रत्ययः किच्च। **(राये)** राज्यश्रिये **(उ)** अपि **(त्वम्)** पुरुषार्थी **(दभ्रम्)** ह्रस्वं वस्तु। **दभ्रमिति ह्रस्वनामसु पठितम्।** (निघं०३.२) **(पश्यद्भ्यः)** संप्रेक्षमाणेभ्यः **(उर्विया)** बहुरूपा **(विचक्षे)** विविधप्रकटत्वाय **(उषा)** दाहारम्भनिमित्ता **(अजीगः०)** इति पूर्ववत्॥५॥

अन्वयः-हे विद्वँस्त्वं योर्विया मघोन्युषा विश्वा भुवनान्यजीगः जिह्मश्ये चरितवे विचक्ष आभोगय इष्टये राये धनानि पश्यद्भ्यो दभ्रमु ह्रस्वमपि वस्तु प्रकाशयति तां विजानीहि॥५॥

भावार्थः-ये मनुष्या रजन्याश्चतुर्थे यामे जागरित्वा शयनपर्यन्तव्यर्थं समयं न गमयन्ति, त एव सुखिनो भवन्ति नेतरे॥५॥

पदार्थः-हे विद्वन्! **(त्वम्)** तू जो **(उर्विया)** अनेक रूपयुक्त **(मघोनी)** अधिक धन प्राप्त करानेहारी **(उषाः)** प्रातर्वेला **(विश्वा)** सब **(भुवनानि)** लोकों को **(अजीगः)** निगलती **(जिह्मश्ये)** वा जो टेढ़े सोने अर्थात् सोने में टेढ़ापन को प्राप्त हुए जन के लिये वा **(चरितवे)** विचरने को **(विचक्षे)** विविध प्रकटता के लिये **(आभोगये)** सब ओर से सुख के भोग जिसमें हों, उस पुरुषार्थ से युक्त क्रिया के लिये

(इष्टये) वा जिसमें मिलते हैं, उस यज्ञ के लिये वा **(राये)** धनों के लिये वा **(पश्यद्भ्यः)** देखते हुए मनुष्यों के लिये **(दभ्रम्)** छोटे से **(उ)** भी वस्तु को प्रकाश करती है, उस उषा को जान॥५॥

भावार्थः-जो मनुष्य रात्री के चौथे प्रहर में जाग कर शयन पर्य्यन्त व्यर्थ समय को नहीं जाने देते, वे ही सुखी होते हैं, अन्य नहीं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

क्षत्रायं त्वं श्रवसे त्वं महीया इष्टयें त्वमर्थमिव त्वमित्यै।
विसदृशा जीविताभिप्रचक्षं उषा अजीगर्भुवनानि विश्वा॥६॥

क्षत्रायं। त्वम्। श्रवसे। त्वम्। महीयै। इष्टयें। त्वम्। अर्थम्ऽइव। त्वम्। इत्यै। विऽसदृशा। जीविता। अभिऽप्रचक्षे। उषाः। अजीगः। भुवनानि। विश्वा॥६॥

पदार्थः-(क्षत्राय) राज्याय **(त्वम्)** **(श्रवसे)** सकलविद्याश्रवणायान्नाय वा **(त्वम्)** **(महीयै)** पूज्यायै नीतये **(इष्टये)** इष्टरूपायै **(त्वम्)** **(अर्थमिव)** द्रव्यवत् **(त्वम्)** **(इत्यै)** सङ्गत्यै प्राप्तये वा **(विसदृशा)** विविधधर्म्यव्यवहारैस्तुल्यानि **(जीविता)** जीवनानि **(अभिप्रचक्षे)** अभिगतप्रसिद्धवागादिव्यवहाराय **(उषा अजीगर्भु०)** इति पूर्ववत्॥६॥

अन्वयः-हे विद्वन् सभाध्यक्ष राजन्! यथोषा स्वप्रकाशेन विश्वाभुवनान्यजीगस्तथा त्वमभिप्रचक्षे क्षत्राय त्वं श्रवसे त्वमिष्टये महीयै त्वमित्यै विसदृशाऽर्थमिव जीविता सदा साध्नुहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्याविनयेन प्रकाशमानाः सत्पुरुषाः सर्वान् संनिहितान् पदार्थानभिव्याप्य तद्गुणप्रकाशेन सर्वार्थसाधका भवन्ति, तथा राजादयो जना विद्यान्यायधर्मादीनभिव्याप्य सार्वभौमराज्यसंरक्षणेन सर्वानन्दं साध्नुयुः॥६॥

पदार्थः-हे विद्वन् सभाध्यक्ष राजन्! जैसे **(उषाः)** प्रातर्वेला अपने प्रकाश से **(विश्वा)** सब **(भुवनानि)** लोकों को **(अजीगः)** ढांक लेती है **(त्वम्)** तू **(अभिप्रचक्षे)** अच्छे प्रकार शास्त्र-बोध से सिद्ध वाणी आदि व्यवहाररूप **(क्षत्राय)** राज्य के लिये और **(त्वम्)** तू **(श्रवसे)** श्रवण और अन्न के लिये **(त्वम्)** तू **(इष्टये)** इष्ट सुख और **(महीयै)** सत्कार के लिये और **(त्वम्)** तू **(इत्यै)** सङ्गति प्राप्ति के लिये **(विसदृशा)** विविध धर्मयुक्त व्यवहारों के अनुकूल **(अर्थमिव)** द्रव्यों के समान **(जीविता)** जीवनादि को सदा किया कर॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्या विनय से प्रकाशमान सत्पुरुष सब समीपस्थ पदार्थों को व्याप्त होकर उनके गुणों के प्रकाश से समस्त अर्थों को सिद्ध करनेवाले होते हैं,

वैसे राजादि पुरुष विद्या न्याय और धर्मादि को सब ओर से व्याप्त होकर चक्रवर्ती राज्य की यथावत् रक्षा से सब आनन्द को सिद्ध करें॥६॥

अथोषो दृष्टान्तेन विदुषीव्यवहारमाह॥

अब उषा के दृष्टान्त से विदुषी स्त्री के व्यवहार को अगले मन्त्र में कहा है॥

एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ॥७॥

एषा। दिवः। दुहिता। प्रति। अदर्शि। विऽउच्छन्ती। युवतिः। शुक्रऽवासाः। विश्वस्य। ईशाना। पार्थिवस्य। वस्वः। उषः। अद्य। इह। सुऽभगे। वि। उच्छ॥७॥

पदार्थः-(एषा) वक्ष्यमाणा **(दिवः)** प्रकाशमानस्य सूर्यस्य **(दुहिता)** पुत्री **(प्रति)** **(अदर्शि)** दृश्यते **(व्युच्छन्ती)** विविधानि तमांसि विवासयन्ती **(युवतिः)** प्राप्तयौवनावस्था **(शुक्रवासाः)** शुक्रानि शुद्धानि वासांसि यस्याः सा शुद्धवीर्य्या वा **(विश्वस्य)** सर्वस्य **(ईशाना)** प्रभवित्री **(पार्थिवस्य)** पृथिव्यां विदितस्य **(वस्वः)** द्रव्यस्य **(उषः)** सुखे निवासिनि विदुषि। अत्र **वस निवास** इत्यस्मादौणादिकोऽसुन् स च बाहुलकात् कित्। **(अद्य)** **(इह)** **(सुभगे)** सुष्ठ्वैश्वर्य्याणि यस्यास्तत्सम्बुद्धौ **(वि)** **(उच्छ)** विवासय॥७॥

अन्वयः-यथा शुक्रवासाः शुद्धवीर्या विश्वस्य पार्थिवस्य वस्व ईशाना व्युच्छन्त्येषा दिवो युवतिर्दुहिता उषा प्रत्यदर्शि वारंवारमदर्शि तथा हे सुभग उषोऽद्य दिने इह व्युच्छ दुःखानि विवासय॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा कृतब्रह्मचर्य्येण विदुषा साधुना यूना स्वतुल्या कृतब्रह्मचर्या सुरूपवीर्या साध्वी सुखप्रदा पूर्णयुवतीर्विंशतिवर्षादारभ्य चतुर्विंशतिवार्षिकी कन्याऽऽध्युद्वहेत तदैवोषर्वत् सुप्रकाशितौ भूत्वा विवाहितौ स्त्रीपुरुषौ सर्वाणि सुखानि प्राप्नुयाताम्॥७॥

पदार्थः-जैसे **(शुक्रवासाः)** शुद्ध पराक्रमयुक्त **(विश्वस्य)** समस्त **(पार्थिवस्य)** पृथिवी में प्रसिद्ध हुए **(वस्वः)** धन की **(ईशाना)** अच्छे प्रकार सिद्ध करानेवाली **(व्युच्छन्ती)** और नाना प्रकार के अन्धकारों को दूर करती हुई **(एषा)** यह **(दिवः)** सूर्य्य की **(युवतीः)** युवावस्था को प्राप्त अर्थात् अति पराक्रमवाली **(दुहिता)** पुत्री प्रभात वेला **(प्रत्यदर्शि)** वार-वार देख पड़ती है वैसे हे **(सुभगे)** उत्तम भाग्यवती **(उषः)** सुख में निवास करनेहारी विदुषी! **(अद्य)** आज तू **(इह)** यहाँ **(व्युच्छ)** दुःखों को दूर कर॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब ब्रह्मचर्य किया हुआ सन्मार्गस्थ जवान विद्वान् पुरुष अपने तुल्य, अपने विद्यायुक्त, ब्रह्मचारिणी, सुन्दर रूप, बल, पराक्रमवाली, साध्वी=अच्छे स्वभावयुक्त सुख देनेहारी, युवति अर्थात् बीसवें वर्ष, से चौबीसवें वर्ष की आयु युक्त कन्या से विवाह करे, तभी विवाहित स्त्री-पुरुष उषा के समान सुप्रकाशित होकर सुखों को प्राप्त होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम्।
व्युच्छन्ती जीवमुदीरयन्त्युषा मृतं कं चन बोधयन्ती॥८॥

परायतीनाम्। अनु। एति। पाथः। आयतीनाम्। प्रथमा। शश्वतीनाम्। विऽउच्छन्ती। जीवम्। उत्ऽईरयन्ती। उषाः। मृतम्। कम्। चन। बोधयन्ती॥८॥

पदार्थः-(परायतीनाम्) पूर्वं गतानाम् **(अनु)** **(एति)** पुनः प्राप्नोति **(पाथः)** अन्तरिक्षमार्गम् **(आयतीनाम्)** आगामिनीनामुषसाम् **(प्रथमा)** विस्तृतादिमा **(शश्वतीनाम्)** प्रवाहरूपेणानादीनाम् **(व्युच्छन्ती)** तमो नाशयन्ती **(जीवम्)** प्राणधारिणम् **(उदीरयन्ती)** कर्मसु प्रवर्त्तयन्ती **(उषाः)** दिननिमित्तः प्रकाशः **(मृतम्)** मृतमिव सुप्तम् **(कम्)** **(चन)** प्राणिनम् **(बोधयन्ती)** जागरयन्ती॥८॥

अन्वयः-हे सुभगे! यथेयमुषाः शश्वतीनां परायतीनामुषसामन्त्याऽऽयतीनां प्रथमा व्युच्छन्ती जीवमुदीरयन्ती कञ्चन मृतमिवापि बोधयन्ति सती पाथोऽन्वेति, तथैव त्वं पतिव्रता भव॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सौभाग्यमिच्छन्त्यः स्त्रिय उषर्वदतीतानागतवर्त्तमानानां साध्वीनां पतिव्रतानां शाश्वतं धर्ममाश्रित्य स्वस्वपतीन् सुशोभमानाः सन्तानान्युत्पाद्य परिपाल्य विद्यासुशिक्षा बोधयन्त्यः सततमानन्दयेयुः॥८॥

पदार्थः-हे उत्तम सौभाग्य बढ़ानेहारी स्त्री! जैसे यह **(उषाः)** प्रभात वेला **(शश्वतीनाम्)** प्रवाहरूप से अनादिस्वरूप **(परायतीनाम्)** पूर्व व्यतीत हुई प्रभात वेलाओं के पीछे **(आयतीनाम्)** आनेवाली वेलाओं में **(प्रथमा)** पहिली **(व्युच्छन्ती)** अन्धकार का विनाश करती और **(जीवम्)** जीव को **(उदीरयन्ती)** कामों में प्रवृत्त कराती हुई **(कम्)** किसी **(चन)** **(मृतम्)** मृतक के समान सोए हुए जन को **(बोधयन्ती)** जगाती हुई **(पाथः)** आकाश मार्ग को **(अन्वेति)** अनुकूलता से जाती-आती है, वैसे ही तू पतिव्रता हो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सौभाग्य की इच्छा करनेवाली स्त्रीजन उषा के तुल्य भूत, भविष्यत्, वर्त्तमान समयों में हुई उत्तम शील पतिव्रता स्त्रियों के सनातन वेदोक्त धर्म का आश्रय कर अपने-अपने पति को सुखी करती और उत्तम शोभावाली होती हुई सन्तानों को उत्पन्न कर और सब ओर से पालन करके उन्हें सत्य विद्या और उत्तम शिक्षाओं का बोध कराती हुई सदा आनन्द को प्राप्त करावें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उषो॒ यदु॒ग्निं स॒मिधे॑ च॒कर्थ॒ वि यदाव॒श्चक्ष॑सा॒ सूर्य॑स्य।

यन्मानु॑षान् य॒क्ष्यमा॑णाँ॒ अजी॑ग॒स्तद्दे॒वेषु॑ चकृषे भ॒द्रमप्न॑:॥ ९॥

उष॑:। यत्। अ॒ग्निम्। स॒म्ऽइद्धे॑। च॒कर्थ॑। वि। यत्। आव॑:। चक्ष॑सा। सूर्य॑स्य। यत्। मानु॑षान्। य॒क्ष्यमा॑णान्। अजी॑ग॒रिति॑। तत्। दे॒वेषु॑। च॒कृ॒षे॒। भ॒द्रम्। अप्न॑:॥ ९॥

पदार्थः-(**उषः**) प्रातर्वत् (**यत्**) या (**अग्निम्**) विद्युदग्निम् (**समिधे**) सम्यक्प्रदीपनाय (**चकर्थ**) करोषि (**वि**) (**यत्**) या (**आवः**) वृणोषि (**चक्षसा**) प्रकाशेन (**सूर्य्यस्य**) मार्तण्डस्य (**यत्**) या (**मानुषान्**) मनुष्यान् (**यक्ष्यमाणान्**) यज्ञं निवर्त्स्यतः (**अजीगः**) प्रसन्नान् करोति (**तत्**) सा (**देवेषु**) विद्वत्सु पतिषु पालकेषु सत्सु (**चकृषे**) कुर्याः (**भद्रम्**) कल्याणम् (**अप्नः**) अपत्यम्॥ ९॥

अन्वयः-हे उषर्वद्वर्त्तमाने! यद्या त्वं सूर्य्यस्य चक्षसा समिधेऽग्निं चकर्थ, यद्या दुःखानि व्यावः, यद्या यक्ष्यमाणान् मानुषानजीगः प्रीणासि तत् सा त्वं देवेषु पतिषु भद्रमप्नश्चकृषे कुर्याः॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यस्य सम्बन्धिन्युषाः सवः प्राणिभिः सङ्गत्य सर्वाञ्जीवान् सुखयति तथा साध्व्यो विदुष्यः स्त्रियः पतीन् प्रीणयन्त्यः सत्यः प्रशस्तान्यपत्यानि जनयितुं शक्नुवन्ति नेतराः कुभार्य्याः॥ ९॥

पदार्थः-हे (**उषः**) प्रभात वेला के समान वर्त्तमान विदुषि स्त्रि! (**यत्**) जो तू (**सूर्य्यस्य**) सूर्य्य के (**चक्षसा**) प्रकाश से (**समिधे**) अच्छे प्रकार प्रकाश के लिये (**अग्निम्**) विद्युत् अग्नि को प्रदीप्त (**चकर्थ**) करती है वा (**यत्**) जो तू दुःखों को (**वि, आवः**) दूर करती वा (**यत्**) जो तू (**यक्ष्यमाणान्**) यज्ञ के करनेवाले (**मानुषान्**) मनुष्यों को (**अजीगः**) प्राप्त होकर प्रसन्न करती है (**तत्**) सो तू (**देवेषु**) विद्वान् पतियों में वस कर (**भद्रम्**) कल्याण करनेहारे (**अप्नः**) सन्तानों को उत्पन्न (**चकृषे**) किया कर॥ ९॥

भावार्थः-इस मन्त्र मे वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य की संबन्धिनी प्रातःकालः की वेला सब प्राणियों के साथ संयुक्त होकर सब जीवों को सुखी करती है, वैसे सज्जन विदुषी स्त्री अपने पतियों को प्रसन्न करती हुई उत्तम सन्तानों के उत्पन्न करने को समर्थ होती हैं, इतर दुष्ट भार्य्या वैसा काम नहीं कर सकती॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

किया॒त्या यत्स॒मया॒ भवा॑ति॒ या व्यू॒षुर्याश्च॑ नू॒नं व्यु॒च्छान्।

अनु॒ पूर्वा॑: कृपते वावशा॒ना प्र॒दीध्या॑ना॒ जोष॑म॒न्याभि॑रेति॥ १०॥ २॥

किय॑ति। आ। यत्। स॒मया॑। भवा॑ति। या:। वि॒ऽऊ॒षुः। या:। च॒। नू॒नम्। वि॒ऽउ॒च्छान्। अनु॑। पूर्वा॑:। कृ॒प॒ते॒। वा॒व॒शा॒ना। प्र॒ऽदीध्या॑ना। जोष॑म्। अ॒न्याभि॑:। एति॥ १०॥

पदार्थः-(कियति) अत्रान्येषामपीति दीर्घः। **(आ) (यत्)** तथा **(समया)** काले **(भवाति)** भवेत् **(याः)** उषसः **(व्यूषुः) (याः) (च) (नूनम्)** निश्चितम् **(व्युच्छान्)** व्युच्छन्ति तान् **(अनु)** आनुकूल्ये **(पूर्वाः)** अतीताः **(कृपते)** समर्थयतु। व्यत्येनात्र शः। **(वावशाना)** भृशं कामयमानेव **(प्रदीध्याना)** प्रदीप्यमाना **(जोषम्)** प्रीतिम् **(अन्याभिः)** स्त्रीभिः **(एति)** प्राप्नोति॥१०॥

अन्वयः-हे स्त्रि! यद् यथा याः पूर्वा उषसस्ताः सर्वान् पदार्थान् कियति समया व्यूषुर्याश्च व्युच्छान् वावशाना प्रदीध्याना सती कृपते नूनमाभवाति तद्वदन्याभिः सह जोषमन्वेति तथा मया पत्या सह सदा वर्त्तस्व॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। कियत्समयोषा भवतीति प्रश्नः। सूर्य्योदयात् प्राग्यावान् पञ्चघटिकासमय इत्युत्तरम्। का स्त्रियः सुखमाप्नुवन्तीति, या अन्याभिर्विदुषीभिः पतिभिश्च सह सततं सङ्गच्छेयुस्ताः प्रशंसनीयाश्च स्युः। याः करुणां विदधति ताः पतीन् प्रीणयन्ति, याः पत्यनुकूला वर्त्तन्ते ताः सदाऽऽनन्दिता भवन्ति॥१०॥

पदार्थः-हे स्त्रि! **(यत्)** जैसे **(याः)** जो **(पूर्वाः)** प्रथम गत हुई प्रभात वेला सब पदार्थों को **(कियति)** कितने **(समया)** समय **(व्यूषुः)** प्रकाश करती रही **(याः, च)** और जो **(व्युच्छान्)** स्थिर पदार्थों की **(वावशाना)** कामना सी करती **(प्रदीध्याना)** और प्रकाश करती हुई **(कृपते)** अनुग्रह करती **(नूनम्)** निश्चय से **(आ, भवाति)** अच्छे प्रकार होती अर्थात् प्रकाश करती उसके तुल्य यह दूसरी विद्यावती विदुषी **(अन्याभिः)** और स्त्रियों के साथ **(जोषमन्वेति)** प्रीति को अनुकूलता से प्राप्त होती है, वैसे तू मुझ पति के साथ सदा वर्त्ता कर॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है।

(प्रश्न-) कितने समय तक उषःकाल होता है?

(उत्तर-) सूर्य्योदय से पूर्व पाँच घड़ी उषःकाल होता है।

(प्रश्न-) कौन स्त्री सुख को प्राप्त होती है?

(उत्तर-) जो अन्य विदुषी स्त्रियों और अपने पतियों के साथ सदा अनुकूल रहती हैं; और वे स्त्री प्रशंसा को भी प्राप्त होती हैं, जो कृपालु होती हैं वे स्त्री पतियों को प्रसन्न करती हैं, जो पतियों के अनुकूल वर्त्तती हैं, वे सदा सुखी रहती हैं॥१०॥

पुनः प्रभातविषयं प्राह॥

फिर प्रभात विषय को अगले मन्त्र में कहा है॥

ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः।

अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान्॥ ११॥

ईयुः। ते। ये। पूर्वऽतराम्। अपऽश्यन्। विऽउच्छन्तीम्। उषसम्। मर्त्यासः। अस्माभिः। ऊम् इति। नु। प्रतिऽचक्ष्या। अभूत्। ओ इति। ते। यन्ति ये। अपरीषु। पश्यान्॥ ११॥

पदार्थः-(ईयुः) प्राप्नुयुः **(ते)** **(ये)** **(पूर्वतराम्)** अतिशयेन पूर्वाम् **(अपश्यन्)** पश्येयुः **(व्युच्छन्तीम्)** निद्रां विवासयन्तीम् **(उषसम्)** प्रभातसमयम् **(मर्त्यासः)** मनुष्याः **(अस्माभिः)** **(उ)** वितर्के **(नु)** शीघ्रम् **(प्रतिचक्ष्या)** प्रत्यक्षेण द्रष्टुं योग्या **(अभूत्)** भवति **(ओ)** अवधारणे **(ते)** **(यन्ति)** **(ये)** **(अपरीषु)** आगामिनीषूषस्सु **(पश्यान्)** पश्येयुः॥ ११॥

अन्वयः-ये मर्त्यासो व्युच्छन्ती पूर्वतरामुषसमीयुस्तेऽस्माभिः सह सुखमपश्यन् योषा अस्माभिः प्रतिचक्ष्याभूद् भवति सा नु सुखप्रदा भवति। उ ये अपरीषु पूर्वतरां पश्यान् त ओ एव सुखं यन्ति प्राप्नुवन्ति॥ ११॥

भावार्थः-हे मनुष्या! उषसः प्राक् शयनादुत्थायावश्यकं कृत्वा परमेश्वरं ध्यायन्ति ते धीमन्तो धार्मिका जायन्ते। ये स्त्री पुरुषा जगदीश्वरं ध्यात्वा प्रीत्या संवदते तेऽनेकविधानि सुखानि प्राप्नुवन्ति॥ ११॥

पदार्थः-(ये) जो **(मर्त्यासः)** मनुष्य लोग **(व्युच्छन्तीम्)** जगाती हुए **(पूर्वतराम्)** अति प्राचीन **(उषसम्)** प्रभात वेला को **(ईयुः)** प्राप्त होवें **(ते)** वे **(अस्माभिः)** हम लोगों के साथ सुख को **(अपश्यन्)** देखते हैं, जो प्रभात वेला हमारे साथ **(प्रतिचक्ष्या)** प्रत्यक्ष से देखने योग्य **(अभूत्)** होती है वह **(नु)** शीघ्र सुख देनेवाली होती है। **(उ)** और **(ये)** जो **(अपरीषु)** आनेवाली उषाओं में व्यतीत हुई उषा को **(पश्यान्)** देखें **(ते)** वे **(ओ)** ही सुख को **(यन्ति)** प्राप्त होते हैं॥ ११॥

भावार्थः-जो मनुष्य उषा के पहिले शयन से उठ आवश्यक कर्म कर के परमेश्वर का ध्यान करते हैं, वे बुद्धिमान् और धार्मिक होते हैं। जो स्त्री-पुरुष परमेश्वर का ध्यान करके प्रीति से आपस में बोलते-चालते हैं, वे अनेक विध सुखों को प्राप्त होते हैं॥ ११॥

पुनरुषःप्रसंगेन स्त्रीविषयमाह॥

फिर उषा के प्रसङ्ग से स्त्रीविषय को अगले मन्त्र में कहा है॥

यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती।
सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ॥ १२॥

यावयत्ऽद्वेषाः। ऋतऽपाः। ऋतेऽजाः। सुम्नऽवरी। सूनृताः। ईरयन्ती। सुऽमङ्गलीः। बिभ्रती। देवऽवीतिम्। इह। अद्य। उषः। श्रेष्ठऽतमा। वि। उच्छ॥ १२॥

पदार्थः-(यावयद्द्वेषाः) यवयन्ति दूरीकृतानि द्वेषांस्यप्रियकर्माणि यया सा **(ऋतपाः)** सत्यपालिका **(ऋतेजाः)** सत्ये प्रादुर्भूता **(सुम्नावरी)** सुम्नानि प्रशस्तानि सुखानि विद्यन्ते यस्यां सा **(सूनृताः)** वेदादिसत्यशास्त्रसिद्धान्तवाचः **(ईरयन्ती)** सद्यः प्रेरयन्ती **(सुमङ्गलीः)** शोभनानि मङ्गलानि यासु ताः **(देववीतिम्)** विदुषां वीतिं विशिष्टां नीतिम् **(इह)** **(अद्य)** **(उषः)** उषर्वद् वर्त्तमाने विदुषि **(श्रेष्ठतमा)** अतिशयेन प्रशंसिता **(न)** **(उच्छ)** दुःखं विवासय॥१२॥[५]

अन्वयः-हे उषरुषर्वद्यावयद्द्वेषा ऋतपाः ऋतेजाः सुम्नावरी सुमङ्गलीः सूनृताः ईरयन्ती श्रेष्ठतमा देववीतिं बिभ्रती त्वमिहाद्य व्युच्छ॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषास्तमो विवार्य प्रकाशं प्रादुर्भाव्य धार्मिकान् सुखयित्वा चोरादीन् पीडयित्वा सर्वान् प्राणिन आह्लादयति, तथैव विद्याधर्मप्रकाशवत्यः शमादिगुणान्विता विदुष्यस्सत्स्त्रियः स्वपतिभ्योऽपत्यानि कृत्वा सुशिक्षया विद्यान्धकारं निवार्य्य विद्यार्कं प्रापय्य कुलं सुभूषयेयुः॥१२॥

पदार्थः-हे **(उषः)** उषा के समान वर्त्तमान विदुषी स्त्री! **(यावयद्द्वेषाः)** जिसने द्वेषयुक्त कर्म दूर किये **(ऋतपाः)** सत्य की रक्षक **(ऋतेजाः)** सत्य व्यवहार में प्रसिद्ध **(सुम्नावरी)** जिसमें प्रशंसित सुख विद्यमान वा **(सुमङ्गलीः)** जिनमें सुन्दर मङ्गल होवे, उन **(सूनृताः)** वेदादि सत्यशास्त्रों की सिद्धान्तवाणियों को **(ईरयन्ती)** शीघ्र प्रेरणा करती हुई **(श्रेष्ठतमा)** अतिशय उत्तम गुण, कर्म और स्वभाव से युक्त **(देववीतिम्)** विद्वानों की विशेष नीति को **(बिभ्रती)** धारण करती हुई तू **(इह)** यहाँ **(अद्य)** आज **(व्युच्छ)** दुःख को दूर कर॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोमालङ्कार है। जैसे प्रभात वेला अन्धकार का निवारण, प्रकाश का प्रादुर्भाव करा, धार्मिकों को सुखी और चोरादि को पीड़ित करके सब प्राणियों को आनन्दित करती है, वैसे ही विद्या, धर्म, प्रकाशवती शमादि गुणों से युक्त विदुषी उत्तम स्त्री अपने पतियों से सन्तानोत्पत्ति करके, अच्छी शिक्षा से अविद्यान्धकार को छुड़ा, विद्यारूप सूर्य को प्राप्त करा कुल को सुभूषित करें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शश्वꣳत्पुरोषा व्युꣳवास देव्यथाꣳ अद्येदं व्यꣳवो मघोनीꣳ।

---

५. अत्र 'बिभ्रती' पदं नैव व्याख्यातम्। सं०।

अथो॒ व्यु॑च्छा॒दुत्त॑रा॒ँ अनु॒ द्यून॒जरा॒मृता॑ चरति स्व॒धाभि॑:॥ १३॥

शश्व॑त्। पु॒रा। उ॒षाः। वि। उ॒वा॒स॒। दे॒वी। अथो॒ इति॑। अ॒द्य। इ॒दम्। वि। आ॒व॒:। म॒घोनी॑। अथो॒ इति॑। वि। उ॒च्छा॒त्। उत्ऽत॑रान्। अनु॑। द्यून्। अ॒जरा॑। अ॒मृता॑। च॒र॒ति॒। स्व॒धाभि॑:॥ १३॥

पदार्थः-(शश्वत्) नैरन्तर्य्ये **(पुरा)** पुरस्तात् **(उषाः)** **(वि)** **(उवास)** वस **(देवी)** देदीप्यमाना **(अथो)** आनन्तर्य्ये **(अद्य)** इदानीम् **(इदम्)** विश्वम् **(वि)** **(आवः)** रक्षति **(मघोनी)** प्रशस्तधनप्राप्तिनिमित्ता **(अथो)** **(वि)** **(उच्छात्)** विवसेत् **(उत्तरान्)** आगामिनः **(अनु)** **(द्यून्)** दिवसान् **(अजरा)** वयोहानिरहिता **(अमृता)** विनाशविरहा **(चरति)** गच्छति **(स्वधाभिः)** स्वयं धारितैः पदार्थैः सह॥ १३॥

अन्वयः-हे स्त्रि! त्वं पुरा देवी मघोनी अजरामृतोषा इव उवास अथो यथोषा उत्तराननुद्यूंश्च स्वधाभिः शश्वद्विचरति व्युच्छादद्येदं व्यावस्तथा त्वं भव॥ १३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे स्त्रि! यथोषा कारणप्रवाहरूपत्वेन नित्या सती त्रिषु कालेषु प्रकाश्यान् पदार्थान् प्रकाश्य वर्त्तते तथाऽऽत्मत्वेन नित्यस्वरूपा त्वं त्रिकालस्थान् सद्व्यवहारान् विद्यासुशिक्षाभ्यां दीपयित्वा सौभाग्यवती भूत्वा सदा सुखिनी भव॥ १३॥

पदार्थः-हे स्त्रीजन! **(पुरा)** प्रथम **(देवी)** अत्यन्त प्रकाशमान **(मघोनी)** प्रशंसित धन प्राप्ति करनेवाली **(अजरा)** पूर्ण युवावस्थायुक्त **(अमृता)** रोगरहित **(उषाः)** प्रभात वेला के समान **(उवास)** वास कर और **(अथो)** इसके अनन्तर जैसे प्रभात-वेला **(उत्तरान्)** आगे आनेवाले **(अनु, द्यून्)** दोनों के अनुकूल **(स्वधाभिः)** अपने आप धारण किये हुए पदार्थों के साथ **(शश्वत्)** निरन्तर **(वि, चरति)** विचरती और अन्धकार को **(वि, उच्छात्)** दूर करती तथा **(अद्य)** वर्त्तमान दिन में **(इदम्)** इस जगत् की **(व्यावः)** विविध प्रकार से रक्षा करती है, वैसे तू हो॥ १३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे स्त्रि! जैसे प्रभातवेला कारण और प्रवाहरूप से नित्य हुई तीनों कालों में प्रकाश करने योग्य पदार्थों का प्रकाश करके वर्त्तमान रहती है, वैसे आत्मपन से नित्यस्वरूप तू तीनों कालों में स्थित सत्य व्यवहारों को विद्या और सुशिक्षा से प्रकाश करके पुत्र, पौत्र, ऐश्वर्यादि सौभाग्ययुक्त हो के सदा सुखी हो॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व्य१॑ञ्जि॒भि॑र्दि॒व आ॒ताँ॑स्वद्यौ॒दप॑ कृ॒ष्णां नि॒र्णिज॑ं देव्याव॑:।
प्र॒बो॒धय॑न्त्यरु॒णेभि॒रश्वै॒रोषा या॑ति सु॒यु॒जा॒ रथे॑न॥ १४॥

वि। अञ्जिऽभिः। दिवः। आतासु। अद्यौत्। अप। कृष्णाम्। निः।ऽनिजम्। देवी। आवरित्यावः। प्रऽबोधयन्ती। अरुणेभिः। अश्वैः। आ। उषाः। याति। सुऽयुजा। रथेन॥ १४॥

पदार्थः-(वि) (अञ्जिभिः) प्रकटीकरणैर्गुणैः **(दिवः)** आकाशात् **(आतासु)** व्याप्तासु दिक्षु। **आता इति दिङ्नामसु पठितम्।** (निघं०१.६) **(अद्यौत्)** विद्योतयति प्रकाशते **(अप) (कृष्णाम्)** रात्रिम् **(निर्णिजम्)** रूपम्। **निर्णिगिति रूपनामसु पठितम्।** (निघं०३.७) **(देवी)** दिव्यगुणा **(आवः)** निवारयति **(प्रबोधयन्ती)** जागरणं प्रापयन्ती **(अरुणेभिः)** ईषद्रक्तैः **(अश्वैः)** व्यापनशीलैः किरणैः **(आ) (उषाः) (याति) (सुयुजा)** सुष्ठु युक्तेन **(रथेन)** रमणीयस्वरूपेण॥ १४॥

अन्वयः-हे स्त्रियो! यूयं यथा प्रबोधयन्ती देव्युषा अञ्जिभिर्दिव आतासु सर्वान् पदार्थान् व्यद्यौत् निर्णिजं कृष्णामपावः अरुणेभिरश्वैः सह वर्त्तमानेन सुयुजा रथेनायाति तद्वद्वर्त्तध्वम्॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषाः काष्ठासु व्याप्ताऽस्ति तथा कन्या विद्यासु व्याप्नुयुः। यथेयमुषाः स्वकान्तिभिः सुशोभना रमणीयेन स्वरूपेण प्रकाशते तथैताः स्वशीलादिभिः सुन्दरेण रूपेण शुम्भेयुः। यथेयमुषा अन्धकारनिवारणेन प्रकाशं जनयति तथैता मौर्ख्यं निवार्य सुसभ्यतादिगुणैः प्रकाशन्ताम्॥ १४॥

पदार्थः-हे स्त्रीजनो! तुम जैसे **(प्रबोधयन्तीः)** सोतों को जगाती हुई **(देवी)** दिव्यगुणयुक्त **(उषाः)** प्रातः समय की वेला **(अञ्जिभिः)** प्रकट करनेहारे गुणों के साथ **(दिवः)** आकाश से **(आतासु)** सर्वत्र व्याप्त दिशाओं में सब पदार्थों को **(व्यद्यौत्)** विशेष कर प्रकाशित करती **(निर्णिजम्)** वा निश्चितरूप **(कृष्णाम्)** कृष्णवर्ण रात्रि को **(अपावः)** दूर करती वा **(अरुणेभिः)** रक्तादि गुणयुक्त **(अश्वैः)** व्यापनशील किरणों के साथ वर्त्तमान **(सुयुजा)** अच्छे युक्त **(रथेन)** रमणीय स्वरूप से **(आ, याति)** आती है, उसके समान तुम लोग वर्त्ता करो॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रातः समय की वेला दिशाओं में व्याप्त है, वैसे कन्या लोग विद्याओं में व्याप्त होवें, वा जैसे यह उषा अपनी कान्तियों से शोभायमान होकर रमणीय स्वरूप से प्रकाशवान् रहती है, वैसे यह कन्याजन अपने शील आदि गुण और सुन्दर रूप से प्रकाशमान हों, जैसे यह उषा अन्धकार के निवारण रूप प्रकाश को उत्पन्न करती है, वैसे ये कन्याजन मूर्खता आदि का निवारण कर सुसभ्यतादि शुभ गुणों से सदा प्रकाशित रहें॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत्॥ १५॥ ३॥

आऽवहन्ती। पोष्या। वार्याणि। चित्रम्। केतुम्। कृणुते। चेकिताना। ईयुषीणाम्। उपऽमा। शश्वतीनाम्। विऽभातीनाम्। प्रथमा। उषाः। वि। अश्वैत्॥ १५॥

पदार्थः-(आवहन्ती) प्रापयन्ती **(पोष्या)** पोषयितुमर्हाणि **(वार्य्याणि)** वरीतुमर्हाणि धनादीनि **(चित्रम्)** अद्भुतम् **(केतुम्)** किरणम् **(कृणुते)** करोति **(चेकिताना)** भृशं चेतयन्ती **(ईयुषीणाम्)** गच्छन्तीनाम् **(उपमा)** दृष्टान्तः **(शश्वतीनाम्)** अनादिभूतानां घटिकानाम् **(विभातीनाम्)** प्रकाशयन्तीनां सूर्य्यकान्तीनाम् **(प्रथमा)** आदिमा **(उषाः)** **(वि)** **(अश्वैत्)** व्याप्नोति॥ १५॥

अन्वयः-हे स्त्रियो! यूयं यथोषाः पौष्या वार्य्याण्यावहन्ती चेकिताना चित्रं केतुं कृणुते विभातीनामीयुषीणां शश्वतीनां प्रथमोपमा व्यश्वैत्तथा शुभगुणकर्मसु विचरत॥ १५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं निश्चितं जानीत यथोषसमारभ्य कर्माण्युत्पद्यन्ते, तथा स्त्रिय आरभ्य गृहकल्पानि जायन्ते॥ १५॥

पदार्थः-हे स्त्री लोगो! तुम जैसे **(उषाः)** प्रातर्वेला **(पोष्या)** पुष्टि कराने और **(वार्याणि)** स्वीकार करने योग्य धनादि पदार्थों को **(आवहन्ती)** प्राप्त कराती और **(चेकिताना)** अत्यन्त चिताती हुई **(चित्रम्)** अद्भुत **(केतुम्)** किरण को **(कृणुते)** करती अर्थात् प्रकाशित करती है **(विभातीनाम्)** विशेष कर प्रकाशित करती हुई सूर्य्यकान्तियों और **(ईयुषीणाम्)** चलती हुई **(शश्वतीनाम्)** अनादि रूप घड़ियो की **(प्रथमा)** पहिली **(उपमा)** दृष्टान्त **(व्यश्वैत्)** व्याप्त होती है, वैसे ही शुभ गुण कर्मों में **(चरत)** विचरा करो॥ १५॥

भावार्थः-हे मनुष्यो! तुम लोग यह निश्चित जानो कि जैसे प्रातःकाल से आरम्भ करके कर्म उत्पन्न होते हैं, वैसे स्त्रियों के आरम्भ से घर के कर्म हुआ करते हैं॥ १५॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति।
आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः॥ १६॥

उत्। ईर्ध्वम्। जीवः। असुः। नः। आ। अगात्। अप। प्र। अगात्। तमः। आ। ज्योतिः। एति। अरैक्। पन्थाम्। यातवे। सूर्याय। अगन्म। यत्र। प्रऽतिरन्त। आयुः॥ १६॥

पदार्थः-(उत्) ऊर्ध्वम् **(ईर्ध्वम्)** कम्पध्वम् **(जीवः)** इच्छादिगुणविशिष्टः **(असुः)** प्राणः **(नः)** अस्मान् **(आ)** **(अगात्)** आगच्छति **(अप)** **(प्र)** **(अगात्)** गच्छति **(तमः)** तिमिरम् **(एति)** प्राप्नोति **(अरैक्)** न्यतिरिणक्ति **(पन्थाम्)** पन्थानम्। अत्र **छान्दसो वर्णलोपो वे**ति नलोपः। **(यातवे)** यातुम्

(सूर्याय) सूर्यम्। **गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ०।** (अष्टा०२.३.१२) **(अगन्म)** गच्छामः **(यत्र) (प्रतिरन्ते)** प्रकृष्टतया तरन्ति उल्लङ्घयन्ति **(आयुः)** जीवनम्॥१६॥[६]

अन्वयः-हे मनुष्या! यस्या उषसः सकाशान् नोऽस्माञ्जीवोऽसुरागाज्ज्योतिः प्रगात्तमोऽपैति यातवे पन्थामरैक् तथा यतो वयं सूर्यायागन्म प्राणिनो यत्रायुः प्रतिरन्ते तां विदित्वोदीर्ध्वम्॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। प्रातःकालीनोषाः सर्वान् प्राणिनो जागरयति अन्धकारं च निवर्त्तयति। यथेयं सायंकालस्था सर्वान् कार्येभ्यो निवर्त्य स्वापयति मातृवत् सर्वान् सम्पाल्य व्यवहारयति, तथैव सती विदुषी स्त्री भवति॥१६॥

पदार्थः-हे मनुष्यो! जिस उषा की उत्तेजना से **(नः)** हम लोगों का **(जीवः)** जीवन का धर्त्ता इच्छादि गुणयुक्त **(असुः)** प्राण **(आ, अगात्)** सब ओर से प्राप्त होता, **(ज्योतिः)** प्रकाश **(प्र, अगात्)** प्राप्त होता, **(तमः)** रात्रि **(अप, एति)** दूर हो जाती और **(यातवे)** जाने-आने का **(पन्थाम्)** मार्ग **(अरैक्)** अलग प्रकट होता, जिससे हम लोग **(सूर्याय)** सूर्य को **(आ, अगन्)** अच्छे प्रकार प्राप्त होते तथा **(यत्र)** जिसमें प्राणी **(आयुः)** जीवन को **(प्रतिरन्ते)** प्राप्त होकर आनन्द से बिताते हैं, उसको जान कर **(उदीर्ध्वम्)** पुरुषार्थ करने में चेष्टा किया करो॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यह प्रातःकाल की उषा सब प्राणियों को जगाती, अन्धकार को निवृत्त करती है। और जैसे सायंकाल की उषा सबको कार्य्यों से निवृत्त करके सुलाती है अर्थात् माता के समान सब जीवों को अच्छे प्रकार पालन कर व्यवहार में नियुक्त कर देती है, वैसे ही सज्जन विदुषी स्त्री होती है॥१६॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

स्यू॒म॑ना वा॒च उदि॑यर्ति॒ वह्निः॒ स्तवा॑नो रे॒भ उ॒षसो॑ विभा॒तीः।
अ॒द्या तदु॑च्छ गृणते म॑घोन्य॒स्मे आयु॒र्नि दि॑दीहि प्र॒जाव॑त्॥ १७॥

स्यू॒म॑ना। वा॒चः। उत्। इ॒य॒र्ति॒। वह्निः॑। स्तवा॑नः। रे॒भः। उ॒षसः॑। वि॒ऽभा॒तीः। अ॒द्य। तत्। उ॒च्छ॒। गृ॒ण॒ते। म॒घो॒नि॒। अ॒स्मे इति॑। आयुः॑। नि। दि॒दी॒हि॒। प्र॒जाऽव॑त्॥ १७॥

पदार्थः-(स्यूमना) स्यूमानः सकलविद्यायुक्ताः। अत्राकारादेशः। **(वाचः)** देववाणीः **(उत्)** उत्कृष्टतया **(इयर्ति)** जानाति **(वह्निः)** पावकवद्वोढा विद्वान् **(स्तवानः)** स्तोतुं शीलः। अत्र

---

६. अत्र 'आ, ज्योतिः, इत्येते पदे नैव व्याख्याते। सं०

स्वरव्यत्ययेनाद्यु-दात्तत्वम्। **(रेभः)** बहुश्रोता। अत्र रीङ् धातोरौणादिको भः प्रत्ययः। **(तत्)** **(उच्छ)** विशिष्टतया वासय **(गृणते)** प्रशंसते **(मघोनि)** प्रशस्तधनयुक्ते **(अस्मे)** अस्मभ्यम् **(आयुः)** जीवनहेत्वन्नम्। **आयुरित्यन्नामसु पठितम्।** (निघं०२.७) **(नि)** **(दिदीहि)** प्रकाशय **(प्रजावत्)** प्रशस्ताः प्रजा भवन्ति यस्मात् तत्॥१७॥[७]

अन्वयः-हे मघोनि स्त्रि! त्वमस्मे गृणते पत्ये च यत्प्रजावदायुरस्ति तदद्य निदिदीहि, यस्तव रेभः स्तवानो वह्निर्वोढा पतिस्त्वदर्थं विभातीरुषसः सूर्य्य इव स्यूमना प्रिया वाच उदियर्त्ति तं त्वमुच्छ॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा दम्पती सौहार्देन परस्परं विद्यासुशिक्षाः सङ्गृह्य प्रशस्तान्यन्नधनादीनि वस्तूनि संचित्य सूर्यवद्धर्मन्यायं प्रकाश्य सुखे निवसतस्तदैव गृहाश्रमस्य पूर्णं सुखं प्राप्नुतः॥१७॥

पदार्थः-हे **(मघोनि)** प्रशंसित धनयुक्त स्त्री! तू **(अस्मे)** हमारे और **(गृणते)** प्रशंसा करते हुए **(पत्ये)** पति के अर्थ जो **(प्रजावत्)** बहुत प्रजायुक्त **(आयु)** जीव का हेतु अन्न है **(तत्)** वह **(अद्य)** आज **(नि)** निरन्तर **(दिदीहि)** प्रकाशित कर। जो तेरा **(रेभः)** बहुश्रुत **(स्तवानः)** गुण प्रशंसाकर्त्ता **(वह्निः)** अग्नि के समान निर्वाह करनेहारा पति तेरे लिये **(विभातीः)** प्रकाशवती **(उषसः)** प्रभात वेलाओं को जैसे सूर्य वैसे **(स्यूमना)** सकल विद्याओं से युक्त प्रिय **(वाचः)** वेदवाणियों को **(उत्, इयर्ति)** उत्तमता से जानता है, उसको तू **(उच्छ)** अच्छा निवास कराया कर॥१७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब स्त्री-पुरुष सुहृद्भाव से परस्पर विद्या और अच्छी शिक्षाओं को ग्रहण कर उत्तम अन्न, धनादि वस्तुओं का संचय करके सूर्य के समान धर्म न्याय का प्रकाश कर सुख में निवास करते हैं तभी गृहाश्रम के पूर्ण सुख को प्राप्त होते हैं॥१७॥

पुनरुषःप्रसंगेन स्त्रीपुरुषविषयमाह॥

फिर उषःकाल के प्रसंग से स्त्री-पुरुष के विषय को अगले मन्त्र में कहा है॥

या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय।
वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा॥१८॥

याः। गोऽमतीः। उषसः। सर्वऽवीराः। विऽउच्छन्ति। दाशुषे। मर्त्याय। वायोःऽइव। सूनृतानाम्। उत्ऽअर्के। ताः। अश्वऽदाः। अश्नवत्। सोमऽसुत्वा॥१८॥

पदार्थः-(याः) **(गोमतीः)** बह्व्यो गावो धेनवः किरणा वा विद्यन्ते यासां ताः **(उषसः)** सर्ववीराः सर्वे वीराः भवन्ति यासु सतीषु ताः **(व्युच्छन्ति)** दुःखं विवासयन्ति **(दाशुषे)** सुखं दात्रे **(मर्त्याय)**

---

७. अत्र 'उषसः, विभातीः, अद्य' इत्येतानि पदानि नैव व्याख्यातानि। सं०।

(वायोरिव) यथा पवनात् **(सूनृतानाम्)** वाचामन्नादिपदार्थानाम् **(उदर्के)** उत्कृष्टतयाप्तौ **(ताः)** विदुष्यः **(अश्वदाः)** या अश्वादीन् पशून् प्रददति **(अश्नवत्)** अश्नुते **(सोमसुत्वाः)** यः सोममैश्वर्यं सवति सः॥१८॥

अन्वयः-हे मनुष्या! यूयं या सूनृतानामुदर्के वायोरिव वर्त्तमाना गोमतीरुषसो विदुष्यः स्त्रियो दाशुषे मर्त्याय व्युच्छन्ति। अश्वदाः सर्ववीराः प्राप्नुत यथा सोमसुत्वाश्नवत् तथैता प्राप्नुत॥१८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ब्रह्मचारिणां योग्यमस्ति समावर्त्तनानन्तरं स्वसदृशीर्विद्या-सुशीलतारूपलावण्यसम्पन्ना हृद्याः प्रभातवेला इव प्रशंसायुक्ता ब्रह्मचारिणीरुद्वाह्य गृहाश्रमे सुखमलंकुर्य्युः॥१८॥

पदार्थः-हे मनुष्यो! तुम लोग **(याः)** जो **(सूनृतानाम्)** श्रेष्ठ वाणी और अन्नादि की **(उदर्के)** उकृष्टता से प्राप्ति में **(वायोरिव)** जैसे वायु से **(गोमतीः)** बहुत गौ वा किरणोंवाली **(उषसः)** प्रभात वेला वर्त्तमान हैं, वैसे विदुषी स्त्री **(दाशुषे)** सुख देनेवाले **(मर्त्याय)** मनुष्य के लिये **(व्युच्छन्ति)** दुःख दूर करती और **(अश्वदाः)** अश्व आदि पशुओं को देनेवाली **(सर्ववीराः)** जिनके होते समस्त वीरजन होते हैं **(ताः)** उन विदुषी स्त्रियों को **(सोमसुत्वा)** ऐश्वर्य की सिद्धि करनेहारा जन **(अश्नवत्)** प्राप्त होता है, वैसे ही इनको प्राप्त होओ॥१८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। ब्रह्मचारी लोगों को योग्य है कि समावर्त्तन के पश्चात् अपने सदृश विद्या, उत्तम शीलता, रूप और सुन्दरता से सम्पन्न हृदय को प्रिय, प्रभात वेला के समान प्रशंसित, ब्रह्मचारिणी कन्याओं से विवाह करके गृहाश्रम में पूर्ण सुख करें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि।
प्रशस्तिकृद् ब्रह्मणे नो व्युच्छा नो जने जनय विश्ववारे॥ १९॥

माता। देवानाम्। अदितेः। अनीकम्। यज्ञस्य। केतुः। बृहती। वि। भाहि। प्रशस्तिऽकृत्। ब्रह्मणे। नः। वि। उच्छ। आ। नः। जने। जनय। विश्वऽवारे॥ १९॥

पदार्थः-(माता) (देवानाम्) विदुषाम् **(अदितेः)** जातस्यापत्यस्य अदितिर्जातमिति मन्त्रप्रमाणात्। **(अनीकम्)** सैन्यवद्रक्षयित्री **(यज्ञस्य)** विद्वत्सत्कारादेः कर्मणः **(केतुः)** ज्ञापयित्री पताकेव प्रसिद्धा **(बृहती)** महासुखवर्द्धिका **(वि)** विविधतया **(भाहि) (प्रशस्तिकृत्)** प्रशंसां विधात्री **(ब्रह्मणे)** परमेश्वराय वेदाय वा **(नः)** अस्मान् **(वि) (उच्छ)** सुखे स्थिरी कुरु **(आ) (जने)** संबन्धिनी पुरुषे **(जनय) (विश्ववारे)** या विश्वं सर्वं भद्रं वृणोति तत्सम्बुद्धौ॥१९॥

अन्वयः-हे विश्ववारे कुमारि! यज्ञस्य केतुरदितेः पालनायानीकमिव प्रशस्तिकृद् बृहती देवानां माता सती ब्रह्मणे त्वमुषर्वद्विभाहि नोऽस्माकं जने प्रीतिमाजनय व्युच्छ च॥१९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सत्पुरुषेण सत्येव स्त्री विवोढव्या यतः सुसन्ताना ऐश्वर्यं च नित्यं वर्धेत, भार्य्यासंबन्धजन्यदुःखेन तुल्यमिह किञ्चिदपि महत् कष्टं न विद्यते, तस्मात् पुरुषेण सुलक्षणया स्त्रिया परीक्षां कृत्वा पाणिग्रहणं स्त्रिया च हृद्यस्य प्रशंसितरूपगुणयुक्तस्य पुरुषस्यैव ग्रहणं कार्य्यम्॥१९॥

पदार्थः-हे **(विश्ववारे)** समस्त कल्याण को स्वीकार करनेहारी कुमारी! **(यज्ञस्य)** गृहाश्रम व्यवहार में विद्वानों के सत्कारादि कर्म की **(केतुः)** जतानेहारी पताका के समान प्रसिद्ध **(अदितेः)** उत्पन्न हुए सन्तान की रक्षा के लिये **(अनीकम्)** सेना के समान **(प्रशस्तिकृत्)** प्रशंसा करने और **(बृहती)** अत्यन्त सुख की बढ़ानेहारी **(देवानाम्)** विद्वानों की **(माता)** जननी हुई **(ब्रह्मणे)** वेदविद्या वा परमेश्वर के ज्ञान के लिये प्रभात वेला के समान **(विभाहि)** विशेष प्रकाशित हो, **(नः)** हमारे **(जने)** कुटुम्बी जन में प्रीति को **(आ, जनय)** अच्छे प्रकार उत्पन्न किया कर और **(नः)** हमको सुख में **(व्युच्छ)** स्थिर कर॥१९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सत्पुरुष को योग्य है कि उत्तम विदुषी स्त्री के साथ विवाह करे, जिससे अच्छे सन्तान हों और ऐश्वर्य नित्य बढ़ा करें, क्योंकि स्त्रीसंबन्ध से उत्पन्न हुए दुःख के तुल्य इस संसार में कुछ भी बड़ा कष्ट नहीं है, उससे पुरुष सुलक्षणा स्त्री की परीक्षा करके पाणिग्रहण करे और स्त्री को भी योग्य है कि अतीव हृदय के प्रिय प्रशंसित रूप गुणवाले पुरुष ही का पाणिग्रहण करे॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥२०॥४॥

यत्। चित्रम्। अप्नः। उषसः। वहन्ति। ईजानाय। शशमानाय। भद्रम्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥२०॥

पदार्थः-(यत्) **(चित्रम्)** अद्भुतम् **(अप्नः)** अपत्यम् **(उषसः)** प्रभातवेला इव स्त्रियः **(वहन्ति)** प्रापयन्ति **(ईजानाय)** सङ्गन्तुं शीलाय **(शशमानाय)** प्रशंसिताय **(भद्रम्)** कल्याणकरम् **(तत्०)** इति पूर्ववत्॥२०॥

अन्वयः-हे मनुष्या या उषस इव वर्त्तमानाः सत्स्त्रियः! शसमानायेजानाय पुरुषाय नोऽस्मभ्यं च यच्चित्रं भद्रमप्नो वहन्ति याभिर्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उतापि द्यौश्च पालनीयाः सन्ति तास्तच्च भवन्तः सततं मामहन्ताम्॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। श्रेष्ठा विदुष्यः स्त्रिय एव सन्तानानुत्पाद्य संरक्ष्य सुशिक्षया वर्धयितुं शक्नुवन्ति। ये पुरुषाः स्त्रीः सत्कुर्वन्ति याः पुरुषांश्च तेषा कुले सर्वाणि सुखानि वसन्ति दुःखानि च पलायन्ते॥ २०॥

अत्र रात्र्युषर्गुणवर्णनं तद्दृष्टान्तेन स्त्रीपुरुषकर्त्तव्यकर्मोपदेशोऽत एतदर्थस्य पूर्वसूक्तार्थेन सङ्गतिरस्तीति वेद्यम्॥

इति त्रयोदशोत्तरशततमं ११३ सूक्तमष्टमे चतुर्थो ४ वर्गश्च सम्पूर्णः॥

पदार्थः-हे मनुष्यो! जो (**उषसः**) उषा के समान स्त्री (**शशमानाय**) प्रशंसित गुणयुक्त (**ईजानाय**) संग शील पुरुष के लिये और (**नः**) हमारे लिये (**यत्**) जो (**चित्रम्**) अद्भुत (**भद्रम्**) कल्याणकारी (**अप्नः**) सन्तान की (**वहन्ति**) प्राप्ति करातीं वा जिन स्त्रियों से (**मित्रः**) सखा (**वरुणः**) उत्तम पिता (**अदितिः**) श्रेष्ठ माता (**सिन्धुः**) समुद्र वा नदी (**पृथिवी**) भूमि (**उत**) और (**द्यौः**) विद्युत् वा सूर्यादि प्रकाशमान पदार्थ पालन करने योग्य हैं, उन स्त्रियों वा (**तत्**) उस सन्तान को निरन्तर (**मामहन्ताम्**) उपकार में लगाया करो॥ २०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। श्रेष्ठ विद्वान् ही सन्तानों को उत्पन्न, अच्छे प्रकार रक्षित और उनको अच्छी शिक्षा करके उनके बढ़ाने को समर्थ होते हैं। जो पुरुष स्त्रियों और जो स्त्री पुरुषों का सत्कार करती हैं, उनके कुल में सब सुख निवास करते हैं और दुःख भाग जाते हैं॥ २०॥

इस सूक्त में रात्रि और प्रभात समय के गुणों का वर्णन और इनके दृष्टान्त से स्त्री-पुरुषों के कर्त्तव्य कर्म का उपदेश किया है। इससे इस सूक्त के अर्थ की पूर्व सूक्त से कहे अर्थ के साथ संगति है, यह जानना चाहिये॥

यह एकसौ तेरहवां ११३ सूक्त और ४ चौथा वर्ग समाप्त हुआ॥

अथैकादशर्चस्य चतुर्दशोत्तरशततमस्यास्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। रुद्रो देवता। १ जगती। २,७ निचृज्जगती। ३,६,८,९ विराड् जगती च च्छन्दः। निषादः स्वरः। ४,५,११ भुरिक् त्रिष्टुप्। १० निचृत् त्रिष्टुप्छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह।

अब ग्यारह ऋचावाले एकसौ चौदहवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में विद्वद्विषय को कहते हैं॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥ १॥

इमाः। रुद्राय। तवसे। कपर्दिने। क्षयत्ऽवीराय। प्र। भरामहे। मतीः। यथा। शम्। असत्। द्विऽपदे। चतुःऽपदे। विश्वम्। पुष्टम्। ग्रामे। अस्मिन्। अनातुरम्॥ १॥

पदार्थः-(इमा) प्रत्यक्षतयाऽऽप्तोपदिष्टा वेदादिशास्त्रोत्थबोधसंयुक्ताः **(रुद्राय)** कृतचतुश्चत्वारिंशद्वर्षब्रह्मचर्य्याय **(तवसे)** बलयुक्ताय **(कपर्दिने)** ब्रह्मचारिणे **(क्षयद्वीराय)** क्षयन्तो दोषनाशका वीरा यस्य तस्मै **(प्र)** **(भरामहे)** धरामहे **(मतीः)** प्रज्ञाः **(यथा)** **(शम्)** सुखम् **(असत्)** भवेत् **(द्विपदे)** मनुष्याद्याय **(चतुष्पदे)** गवाद्याय **(विश्वम्)** सर्वं जीवादिकम् **(पुष्टम्)** पुष्टिं प्राप्तम् **(ग्रामे)** शालासमुदाये नगरादौ **(अस्मिन्)** संसारे **(अनातुरम्)** दुःखवर्जितम्॥ १॥

अन्वयः-वयमध्यापकाः उपदेशका वा यथा द्विपदे चतुष्पदे शमसदस्मिन् ग्रामे विश्वमनातुरं पुष्टमसत्तथा तवसे क्षयद्वीराय रुद्राय कपर्दिन इमा मतीः प्रभरामहे॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यदाऽऽप्ता वेदविदः पाठका उपदेष्टारश्च पाठिका उपदेष्ट्र्यश्च सुशिक्षया ब्रह्मचारिणः श्रोतॄँश्च ब्रह्मचारिणीः श्रोत्रीँश्च विद्यायुक्ताः कुर्वन्ति तदैवेमे शरीरात्मबलं प्राप्य सर्वं जगत् सुखयन्ति॥ १॥

पदार्थः-हम अध्यापक वा उपदेशक लोग **(यथा)** जैसे **(द्विपदे)** मनुष्यादि **(चतुष्पदे)** और गौ आदि के लिये **(शम्)** सुख **(असत्)** होवे **(अस्मिन्)** इस **(ग्रामे)** बहुत घरोंवाले नगर आदि ग्राम में **(विश्वम्)** समस्त चराचर जीवादि **(अनातुरम्)** पीड़ारहित **(पुष्टम्)** पुष्टि को प्राप्त **(असत्)** हो तथा **(तवसे)** बलयुक्त **(क्षयद्वीराय)** जिसके दोषों का नाश करनेहारे वीर पुरुष विद्यमान **(रुद्राय)** उस चवालीस वर्ष पर्यन्त ब्रह्मचर्य कनरेहारे **(कपर्दिने)** ब्रह्मचारी पुरुष के लिये **(इमाः)** प्रत्यक्ष आप्तों के उपदेश और वेदादि शास्त्रों के बोध से संयुक्त **(मतीः)** उत्तम प्रज्ञाओं को **(प्र, भरामहे)** धारण करते हैं॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जब आप्त, सत्यवादी, धर्मात्मा, वेदों के ज्ञाता, पढ़ाने और उपदेश करनेहारे विद्वान् तथा पढ़ाने और उपदेश करनेहारी स्त्री, उत्तम शिक्षा से ब्रह्मचारी और श्रोता पुरुषों तथा ब्रह्मचारिणी और सुननेहारी स्त्रियों को विद्यायुक्त करते हैं, तभी ये लोग शरीर और आत्मा के बल को प्राप्त होकर सब संसार को सुखी कर देते हैं॥१॥

अथ राजविषयः प्रोच्यते॥

अब राजविषय कहा जाता है॥

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु॥२॥

मृळ। नः। रुद्र। उत। नः। मयः। कृधि। क्षयत्ऽवीराय। नमसा। विधेम। ते। यत्। शम्। च। योः। च। मनुः। आऽयेजे। पिता। तत्। अश्याम। तव। रुद्र। प्रऽनीतिषु॥२॥

पदार्थः-(मृड) सुखय। अत्र दीर्घः। **(नः)** अस्मान् **(रुद्र)** दुष्टान् शत्रून् रोदयितः **(उत)** अपि **(नः)** अस्मभ्यम् **(मयः)** सुखम् **(कृधि)** कुरु **(क्षयद्वीराय)** क्षयन्तो विनाशिताः शत्रुसेनास्था वीरा येन तस्मै **(नमसा)** अन्नेन सत्कारेण वा **(विधेम)** सेवेमहि **(ते)** तुभ्यम् **(यत्)** **(शम्)** रोगनिवारणम् **(च)** ज्ञानम् **(योः)** दुःखवियोजनम्। अत्र युधातोर्डोसिः प्रत्ययः। **(च)** गुणप्रापणसमुच्चये **(मनुः)** मननशीलः **(आयेजे)** समन्ताद्याजयति **(पिता)** पालकः **(तत्)** **(अश्याम)** प्राप्नुयाम। अत्र व्यत्ययेन श्यन् परस्मैपदं च। **(तव)** **(रुद्र)** न्यायाधीश **(प्रणीतिषु)** प्रकृष्टासु नीतिषु॥२॥

अन्वयः-हे रुद्र! ये वयं क्षयद्वीराय ते तुभ्यन्नमसा विधेम तान्नो त्वं मृड नोऽस्मभ्यं मयस्कृधि च। हे रुद्र! मनुः पितेव भवान् यच्छ स योश्चायेजे तदश्याम त उत वयं तव प्रणीतिषु वर्त्तमाना सततं सुखिनः स्याम॥२॥

भावार्थः-राजपुरुषाः स्वयं सुखिनो भूत्वा सर्वाः प्रजाः सुखयेयुः नैवात्र कदाचिदालस्यं कुर्युः, प्रजाजनाश्च राजनीतिनियमेषु वर्त्तित्वा राजपुरुषान् सदा प्रीणयेयुः॥२॥

पदार्थः-हे **(रुद्र)** दुष्ट शत्रुओं को रुलानेहारे राजन्! जो हम **(क्षयद्वीराय)** विनाश किये शत्रु सेनास्थ वीर जिसने उस **(ते)** आपके लिये **(नमसा)** अन्न वा सत्कार से **(विधेम)** विधान करें अर्थात् सेवा करें, उन **(नः)** हम लोगों को तुम **(मृड)** सुखी करो और **(नः)** हम लोगों के लिये **(मयः)** सुख **(कृधि)** कीजिये। हे **(रुद्र)** न्यायाधीश! **(मनुः)** मननशील **(पिता)** पिता के समान आप **(यत्)** जो रोगों का **(शम्)** निवारण **(च)** ज्ञान **(योः)** दुःखों का अलग करना **(च)** और गुणों की प्राप्ति का **(आयेजे)** सब

प्रकार सङ्ग कराते हो **(तत्)** उसको **(अश्याम)** प्राप्त होवें **(उत)** वे ही हम लोग **(तव)** तुम्हारी **(प्रणीतिषु)** उत्तम नीतियों में प्रवृत्त होकर निरन्तर सुखी होवें॥२॥

भावार्थः-राजपुरुषों को योग्य है कि स्वयं सुखी होकर सब प्रजाओं को सुखी करें। इस काम में आलस्य कभी न करें और प्रजाजन राजनीति के नियम में वर्त्त के राजपुरुषों को सदा प्रसन्न रक्खें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अश्याम॑ ते सुम॒तिं दे॑वय॒ज्ययो॑ क्षयद्वी॑रस्य॒ तव॑ रुद्र मीढ्वः।
सुम्ना॒यन्निद्विशो॑ अस्माक॒मा च॑रारि॑ष्टवीरा जुहवाम ते ह॒विः॥३॥

अश्याम॑। ते। सु॒ऽम॒तिम्। दे॒व॒ऽय॒ज्ययो॑। क्षयत्ऽवी॑रस्य। तव॑। रुद्र। मी॒ढ्वः॒। सुम्न॒ऽयन्। इत्। विशः॑। अ॒स्माक॑म्। आ। च॒र॒। अरि॑ष्टऽवीराः। जु॒ह॒वा॒म॒। ते॒। ह॒विः॥३॥

पदार्थः-(अश्याम) प्राप्नुयाम **(ते)** तव **(सुमतिम्)** शोभनां बुद्धिम् **(देवयज्यया)** विदुषां सङ्गत्या सत्कारेण च **(क्षयद्वीरस्य)** क्षयन्तो निवासिता वीरा येन तस्य **(तव)** **(रुद्र)** रुतः सत्योपदेशान् राति ददाति तत्सम्बुद्धौ **(मीढ्वः)** सुखैः सिञ्चन् **(सुम्नयन्)** सुखयन् **(इत्)** अपि **(विशः)** प्रजाः **(अस्माकम्)** **(आ)** **(चर)** **(अरिष्टवीराः)** अरिष्टा अहिंसिता वीरा यासु ताः **(जुहवाम)** दद्याम **(ते)** तुभ्यम् **(हविः)** ग्रहीतुं योग्यं करम्॥३॥

अन्वयः-हे मीढ्वो रुद्र सभाध्यक्ष राजन्! वयं देवयज्यया क्षयद्वीरस्य तव सुमतिमश्याम यः सुम्नयँ- स्त्वमस्माकमरिष्टवीरा विश आचर समन्तात् प्राप्नुयाः तस्य ते तव वयमिदश्याम ते तुभ्यं हविर्जुहवाम च॥३॥

भावार्थः-राज्ञा प्रज्ञाः सततं सुखयितव्याः प्रजाभी राजा च यदि राजा प्रजाभ्यः करं गृहीत्वा न पालयेत्तर्हि स राजा दस्युवद्विज्ञेयः या पालिताः प्रजा राजभक्ता न स्युस्ता अपि चोरतुल्या बोध्या अत एव प्रजा राज्ञे करं ददति यतोऽयमस्माकं पालनं कुर्य्यात् राजाप्येतत्प्रयोजनाय पालयति यतः प्रजा मह्यं करं प्रदद्युः॥३॥

पदार्थः-हे **(मीढ्वः)** प्रजा को सुख से सीचने और **(रुद्र)** सत्योपदेश करनेवाले सभाध्यक्ष राजन्! हम लोग **(देवयज्यया)** विद्वानों की संगति और सत्कार से **(क्षयद्वीरस्य)** वीरों का निवास करानेहारे **(तव)** तेरी **(सुमतिम्)** श्रेष्ठ प्रज्ञा को **(अश्याम)** प्राप्त होवें, जो **(सुम्नयन्)** सुख कराता हुआ तू **(अस्माकम्)** हमारी **(अरिष्टवीराः)** हिंसारहित वीरोंवाली **(विशः)** प्रजाओं को **(आ, चर)** सब ओर से प्राप्त हो उस **(ते)** तेरी प्रजाओं को हम लोग **(इत्)** भी प्राप्त हों और **(ते)** तेरे लिये **(हविः)** देने योग्य पदार्थ को **(जुहवाम)** दिया करें॥३॥

भावार्थः-राजा को योग्य है कि प्रजाओं को निरन्तर प्रसन्न रक्खे और प्रजाओं को उचित है कि राजा को आनन्दित करें। जो राजा प्रजा से कर लेकर पालन न करे तो वह राजा डाकुओं के समान जानना चाहिये। जो पालन की हुई प्रजा राजभक्त न हों, वे भी चोर के तुल्य जाननी चाहिये। इसलिये प्रजा राजा को कर देती है कि जिससे यह हमारा पालन करे और राजा इसलिये पालन करता है कि जिससे प्रजा मुझको कर देवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे॥४॥

त्वेषम्। वयम्। रुद्रम्। यज्ञऽसाधम्। वङ्कुम्। कविम्। अवसे। नि। ह्वयामहे। आरे। अस्मत्। दैव्यम्। हेळः। अस्यतु। सुऽमतिम्। इत्। वयम्। अस्य। आ। वृणीमहे॥४॥

पदार्थः-(त्वेषम्) विद्यान्यायदीप्तिमन्तम् **(वयम्)** **(रुद्रम्)** शत्रुरोद्धारम् **(यज्ञसाधम्)** यो यज्ञं प्रजापालनं साध्नोति तम् **(वङ्कुम्)** दुष्टशत्रून् प्रति कुटिलम् **(कविम्)** सर्वेषां शास्त्राणां क्रान्तदर्शिनम् **(अवसे)** रक्षणाद्याय **(नि)** **(ह्वयामहे)** स्वसुखदुःखनिवेदनं कुर्महे **(आरे)** दूरे **(अस्मत्)** **(दैव्यम्)** देवेषु विद्वत्सु कुशलम् **(हेडः)** धार्मिकाणामनादरकर्तृनधार्मिकाञ्जनान् **(अस्यतु)** प्रक्षिपतु **(सुमतिम्)** धर्म्यां प्रज्ञाम् **(इत्)** एव **(वयम्)** **(अस्य)** **(आ)** समन्तात् **(वृणीमहे)** स्वीकुर्महे॥४॥

अन्वयः-वयमवसे यं त्वेषं वङ्कुं कविं यज्ञसाधं दैव्यं रुद्रं निह्वयामहे तथा वयं यस्यास्य सुमतिमावृणीमहे स इदेव सभाध्यक्षो हेडोऽस्मदारे अस्यतु॥४॥

भावार्थः-यथा प्रजास्था जना राजाज्ञां स्वीकुर्वन्ति तथा राजपुरुषा अपि प्रज्ञाज्ञां मन्येरन्॥४॥

पदार्थः-(वयम्) हम लोग **(अवसे)** रक्षा आदि के लिये जिस **(त्वेषम्)** विद्या और न्याय से प्रकाशवान् **(वङ्कुम्)** दुष्ट शत्रुओं के प्रति कुटिल **(कविम्)** समस्त शास्त्रों को क्रम-क्रम से देखने और **(यज्ञसाधम्)** प्रजापालनरूप यज्ञ को सिद्ध करनेहारे **(दैव्यम्)** विद्वानों में कुशल **(रुद्रम्)** शत्रुओं के रोकनेहारे को **(नि, ह्वयामहे)** अपना सुख-दुःख का निवदेन करें तथा **(वयम्)** हम लोग जिस **(अस्य)** इस रुद्र की **(सुमतिम्)** धर्मानुकूल उत्तम प्रज्ञा को **(आ, वृणीमहे)** सब ओर से स्वीकार करें **(इत्)** वही सभाध्यक्ष **(हेडः)** धार्मिक जनों का अनादर करनेहारे अधार्मिक जनों को **(अस्मत्)** हमसे **(आरे)** दूर **(अस्यतु)** निकाल देवे॥४॥

भावार्थः-जैसे प्रजाजन राजा को स्वीकार करते हैं, वैसे राजपुरुष भी प्रजा की आज्ञा को माना करें॥४॥

अथ वैद्यविषयमाह॥

अब वैद्यजन के विषय को अगले मन्त्र में कहा है॥

दि॒वो व॑रा॒हम॑रु॒षं क॑प॒र्दिन॑ं त्वे॒षं रू॒पं नम॑सा॒ नि ह्व॑यामहे।
हस्ते॒ बिभ्र॑द् भेष॒जा वार्या॑णि॒ शर्म॒ वर्म॑ च्छ॒र्दिर॒स्मभ्य॑ं यंसत्॥५॥५॥

दि॒वः। व॒रा॒हम्। अ॒रु॒षम्। क॒प॒र्दिन॑म्। त्वे॒षम्। रू॒पम्। नम॑सा। नि। ह्व॒या॒म॒हे॒। हस्ते॑। बिभ्र॑त्। भे॒ष॒जा। वार्या॑णि। शर्म॑। वर्म॑। छ॒र्दिः। अ॒स्मभ्य॑म्। यं॒स॒त्॥५॥

पदार्थः-(दिवः) विद्यान्यायप्रकाशितव्यवहारान् **(वराहम्)** मेघमिव **(अरुषम्)** अश्वादिकम् **(कपर्दिनम्)** कृतब्रह्मचर्यं जटिलं विद्वांसम् **(त्वेषम्)** प्रकाशमानम् **(रूपम्)** सुरूपम् **(नमसा)** अन्नेन परिचर्यया च **(नि)** **(ह्वयामहे)** स्पर्द्धामहे **(हस्ते)** करे **(बिभ्रत्)** धारयन् **(भेषजा)** रोगनिवारकाणि **(वार्याणि)** ग्रहीतुं योग्यानि साधनानि **(शर्म)** गृहं सुखं वा **(वर्म)** कवचम् **(छर्दिः)** दीप्तियुक्तं शस्त्रास्त्रादिकम् **(अस्मभ्यम्)** **(यंसत्)** यच्छेत्॥५॥

अन्वयः-वयं नमसा यो हस्ते भेषजा वार्याणि बिभ्रत् सन् शर्म वर्म छर्दिरस्मभ्यं यंसत् तं कपर्दिनं वैद्यं दिवो वराहमरुषं त्वेषं रूपं च निह्वयामहे॥५॥

भावार्थः-ये मनुष्या वैद्यमित्राः पथ्यकारिणो जितेन्द्रियाः सुशीला भवन्ति, त एवास्मिञ्जगति नीरोगा भूत्वा राज्यादिकं प्राप्य सुखमेधन्ते॥५॥

पदार्थः-हम लोग **(नमसा)** अन्न और सेवा से जो **(हस्ते)** हाथ में **(भेषजा)** रोगनिवारक औषध **(वार्य्याणि)** और ग्रहण करने योग्य साधनों को **(बिभ्रत्)** धारण करता हुआ **(शर्म्म)** घर, सुख **(वर्म्म)** कवच **(छर्दिः)** प्रकाशयुक्त शस्त्र और अस्त्रादि को **(अस्मभ्यम्)** हमारे लिये **(यंसत्)** नियम से रक्खे, उस **(कपर्दिनम्)** जटाजूट ब्रह्मचारी वैद्य विद्वान् वा **(दिवः)** विद्यान्यायप्रकाशित व्यवहारों वा **(वराहम्)** मेघ के तुल्य **(अरुषम्)** घोड़े आदि के **(त्वेषम्)** प्रकाशमान **(रूपम्)** सुन्दर रूप की **(निह्वयामहे)** नित्य स्पर्द्धा करें॥५॥

भावार्थः-जो मनुष्य वैद्य के मित्र पथ्यकारी जितेन्द्रिय उत्तम शीलवाले होते हैं, वे ही इस जगत् में रोगरहित और राज्यादि को प्राप्त होकर सुख को बढ़ाते हैं॥५॥

पुनर्वैद्योपदेशकौ कथं वर्त्तेयातामित्युपदिश्यते॥

फिर वैद्य और उपदेश करनेवाले कैसे अपना वर्त्ताव वर्त्तें, यह विषय अगले मन्त्र में कहा है॥

इ॒दं पि॒त्रे म॒रुता॑मुच्यते॒ वचः॑ स्वा॒दोः स्वादी॑यो रु॒द्राय॒ वर्ध॑नम्॥
रास्वा॑ च नो अमृत मर्त॒भोज॑नं॒ त्मने॑ तो॒काय॒ तन॑याय मृळ॥६॥

इ॒दम्। पि॒त्रे। म॒रुता॑म्। उ॒च्यते॒। वचः॑। स्वा॒दोः॑। स्वादी॑यः। रु॒द्राय॑। वर्धन॑म्। रास्व॑। च॒। नः॒। अ॒मृ॒त॒। म॒र्त॒ऽभोज॑नम्। त्मने॑। तो॒काय॑। तन॑याय। मृ॒ळ॒॥६॥

पदार्थः-(इदम्) (पित्रे) पालकाय **(मरुताम्)** ऋतावृतौ यजतां विदुषाम् **(उच्यते)** उपदिश्यते **(वचः)** वचनम् **(स्वादोः)** स्वादिष्ठात् **(स्वादीयः)** अतिशयेन स्वादु प्रियकरम् **(रुद्राय)** सभाध्यक्षाय **(वर्धनम्)** वृद्धिकरम् **(रास्व)** देहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(च)** अनुक्तसमुच्चये **(नः)** अस्मभ्यमस्माकं वा **(अमृत)** नास्ति मृतं मरणदुःखं येन तत्सम्बुद्धौ **(मर्तभोजनम्)** मर्त्तानां मनुष्याणां भोग्यं वस्तु **(त्मने)** आत्मने **(तोकाय)** ह्रस्वाय बालकाय **(तनयाय)** यूने पुत्राय **(मृड)** सुखय॥६॥

अन्वयः-हे अमृत विद्वन् वैद्यराजोपदेशक वा! त्वं नोऽस्मभ्यमस्माकं वा त्मने तोकाय तनयाय च स्वादोः स्वादीयो मर्त्तभोजनं रास्वा यदिदं मरुतां वर्धनं वचः पित्रे रुद्राय त्वयोच्यते तेनास्मान् मृड॥६॥

भावार्थः-वैद्यस्योपदेशकस्य चेयं योग्यतास्ति स्वयमरोगः सत्याचारी भूत्वा सर्वेभ्यो मनुष्येभ्य औषधदानेनोपदेशेन चोपकृत्य सर्वान् सततं रक्षेत्॥६॥

पदार्थः-हे **(अमृत)** मरण दुःख दूर कराने तथा आयु बढ़ानेहारे वैद्यराज व उपदेशक विद्वान्! आप **(नः)** हमारे **(त्मने)** शरीर **(तोकाय)** छोटे-छोटे बाल-बच्चे **(तनयाय)** जवान बेटे **(च)** और सेवक वैतनिक वा आयुधिक भृत्य अर्थात् चाकरों के लिये **(स्वादीः)** स्वादिष्ट से **(स्वादीयः)** स्वादिष्ठ अर्थात् सब प्रकार स्वादवाला जो खाने में बहुत अच्छा लगे उस **(मर्त्यभोजनम्)** मनुष्यों के भोजन करने के पदार्थ को **(रास्व)** देओ, जो **(इदम्)** यह **(मरुताम्)** ऋतु-ऋतु में यज्ञ करनेहारे विद्वानों को **(वर्द्धनम्)** बढ़ानेवाला **(वचः)** वचन **(पित्रे)** पालना करने **(रुद्राय)** और दुष्टों को रुलानेहारे सभाध्यक्ष के लिये **(उच्यते)** कहा जाता है, उससे हम लोगों को **(मृड)** सुखी कीजिये॥६॥

भावार्थः-वैद्य और उपदेश करनेवाले को यह योग्य है कि आप नीरोग और सत्याचारी होकर सब मनुष्यों के लिये औषध देने और उपदेश करने से उपकार कर सबकी निरन्तर रक्षा करें॥६॥

अथ न्यायाधीशः कथं वर्त्तेतित्युपदिश्यते॥

अब न्यायाधीश कैसे वर्त्ते, यह विषय अगले मन्त्र में कहा है॥

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम्।
मा नो॑ वधीः पि॒तर॑ं मोत मा॒तर॑ं मा नः॑ प्रि॒यास्त॒न्वो॑ रुद्र रीरिषः॥७॥

मा। नः॒। म॒हान्त॑म्। उ॒त। मा। नः॒। अ॒र्भ॒कम्। मा। नः॒। उक्ष॑न्तम्। उ॒त। मा। नः॒। उ॒क्षि॒तम्। मा। नः॒। व॒धीः॒। पि॒तर॑म्। मा। उ॒त। मा॒तर॑म्। मा। नः॒। प्रि॒याः। त॒न्वः॑। रु॒द्र॒। रि॒रि॒षः॒॥७॥

पदार्थः-(मा) निषेधे **(नः)** अस्माकम् **(महान्तम्)** वयोविद्यावृद्धं जनम् **(उत)** अपि **(मा) (नः) (अर्भकम्)** बाल्यावस्थापन्नम् **(मा) (नः) (उक्षन्तम्)** वीर्यसेचनसमर्थं युवानम् **(उत) (मा) (नः) (उक्षितम्)** वीर्यसेचनस्थितं गर्भम् **(मा) (नः) (वधीः)** हिन्धि **(पितरम्)** पालकं जनकं विद्वांसं वा **(मा) (उत) (मातरम्)** मानसम्मानकर्त्रीं जननीं विदुषीं वा **(मा) (नः) (प्रियाः)** अभीप्सिताः **(तन्वः)** तनूः शरीराणि **(रुद्र)** न्यायाधीश दुष्टरोदयितः **(रीरिषः)** जहि। अत्र **तुजादित्वाद्दीर्घः**॥७॥

अन्वयः-हे रुद्र! त्वं नोऽस्माकं महान्तं मा वधीरुतापि नोऽर्भकं मा वधीः। न उक्षन्तं मा वधीरुतापि न उक्षितं मा वधीः। नः पितरं मा वधीः उत मातरं मा वधीः। नः प्रियास्तन्वस्तनू मां वधीरन्यायकारिणो दुष्टांश्च रीरिषः॥७॥

भावार्थः-हे मनुष्या! यथा जगदीश्वरः पक्षपातं विहाय धार्मिकानुत्तमकर्मफलदानेन सुखयति पापिनश्च पापफलदानेन पीडयति तथैव यूयं प्रयतध्वम्॥७॥

पदार्थः-(रुद्र) न्यायाधीश दुष्टों को रुलानेहारे सभापति **(नः)** हम लोगों में से **(महान्तम्)** बुड्ढे वा पढ़े-लिखे मनुष्य को **(मा)** मत **(वधीः)** मारो **(उत)** और **(नः)** हमारे **(अर्भकम्)** बालक को **(मा)** मत मारो **(नः)** हमारे **(उक्षन्तम्)** स्त्रीसङ्ग करने में समर्थ युवावस्था से परिपूर्ण मनुष्य को **(मा)** मत मारो **(उत)** और **(नः)** हमारे **(उक्षितम्)** वीर्यसेचन से स्थित हुए गर्भ को **(मा)** मत मारो **(नः)** हम लोगों के **(पितरम्)** पालने और उत्पन्न करनेहारे पिता वा उपदेश करनेवाले को **(मा)** मत मारो **(उत)** और **(मातरम्)** मान-सम्मान और उत्पन्न करनेहारी माता वा विदुषी स्त्री को **(मा)** मत मारो **(नः)** हम लोगों की **(प्रियाः)** स्त्री आदि के पियारे **(तन्वः)** शरीरों को **(मा)** मत मारो और अन्यायकारी दुष्टों को **(रीरिषः)** मारो॥७॥

भावार्थः-हे मनुष्यो! जैसे ईश्वर पक्षपात को छोड़ के धार्मिक सज्जनों को उत्तम कर्मों के फल देने से सुख देता और पापियों को पाप का फल देने से पीड़ा देता है, वैसे ही तुम लोग भी अच्छा यत्न करो॥७॥

पुनः राजजनाः कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर राजजन कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहा है॥

मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥८॥

मा। नः। तोके। तनये। मा। नः। आयौ। मा। नः। गोषु। मा। नः। अश्वेषु। रिरिषः। वीरान्। मा। नः। रुद्र। भामितः। वधीः। हविष्मन्तः। सदम्। इत्। त्वा। हवामहे॥८॥

पदार्थः-(मा) (**नः**) अस्माकम् (**तोके**) सद्योजातेऽपत्ये पुत्रे (**तनये**) अतीतशैशवावस्थे (**मा**) (**नः**) (**आयौ**) जीवनविषये (**मा**) (**नः**) (**गोषु**) धेनुषु (**मा**) (**नः**) (**अश्वेषु**) वाजिषु (**रीरिषः**) हिंस्याः (**वीरान्**) (**मा**) (**नः**) अस्माकम् (**रुद्र**) (**भामितः**) क्रुद्धः सन् (**वधीः**) हन्याः (**हविष्मन्तः**) हवींषि प्रशस्तानि जगदुपकरणानि कर्माणि विद्यन्ते येषां ते (**सदम्**) स्थिरं वर्त्तमानं ज्ञानमाप्तम् (**इत्**) एव (**त्वा**) त्वाम् (**हवामहे**) स्वीकुर्महे॥८॥

अन्वयः-हे रुद्र! हविष्मन्तो वयं यतस्सदं त्वामिदेव हवामहे तस्माद्भामितस्त्वं नस्तोके तनये मा रीरिषो न आयौ मा रीरिषः, नो गोषु मा रीरिषः, नोऽश्वेषु मा रीरिषः, नो वीरान् मा वधीः॥८॥

भावार्थः-न कदाचिद्राजपुरुषैः क्रुद्धैः सद्भिः कस्याप्यन्यायेन हननं कार्य्यं गवादयः पशवः सदा रक्षणीयाः, प्रजास्थैर्जनैश्च राजाश्रयेणैव निरन्तरमानन्दितव्यम्। सर्वैर्मिलित्वैवं जगदीश्वरः प्रार्थनीयश्च हे परमेश्वर! भवत्कृपया वयं बाल्याऽवस्थायां विवाहादिभिः कुकर्मभिः पुत्रादीनां हिंसनं कदाचिन्न कुर्य्याम, पुत्रादयोऽप्यस्माकमप्रियं न कुर्य्युः, जगदुपकारकान् गवादीन् पशून् कदाचिन्न हिंस्यामेति॥८॥

पदार्थः-हे (**रुद्र**) दुष्टों को रुलानेहारे सभापति! (**हविष्मन्तः**) जिनके प्रशंसायुक्त संसार के उपकार करने के काम हैं, वे हम लोग जिस कारण (**सदम्**) स्थिर वर्त्तमान ज्ञान को प्राप्त (**त्वाम्, इत्**) आप ही को (**हवामहे**) अपना करते हैं, इससे (**भामितः**) क्रोध को प्राप्त हुए आप (**नः**) हम लोगों के (**तोके**) उत्पन्न हुए बालक वा (**तनये**) बालिकाओं से जो ऊपर है, उस बालक में (**मा**) (**रीरिषः**) घात मत करो (**नः**) हम लोगों के (**आयौ**) जीवन विषय में (**मा**) मत हिंसा करो (**नः**) हम लोगों के (**गोषु**) गौ आदि पशुसंघात में (**मा**) मत घात करो (**नः**) हम लोगों के (**अश्वेषु**) घोड़ों में (**मा**) घात मत करो (**नः**) हमारे (**वीरान्**) वीरों को (**मा**) मत (**वधीः**) मारो॥८॥

भावार्थः-क्रोध को प्राप्त हुए सज्जन राजपुरुषों को किसी का अन्याय से हनन न करना चाहिये और गौ आदि पशुओं की सदा रक्षा करनी चाहिये। प्रजाजनों को भी राजा के आश्रय से ही निरन्तर आनन्द करना चाहिये और सबों को मिल कर ईश्वर की ऐसी प्रार्थना करनी चाहिये कि हे परमेश्वर! आप की कृपा से हम लोग बाल्यावस्था में विवाह आदि बुरे काम करके पुत्रादिकों का विनाश कभी न करें और वे पुत्र आदि भी हम लोगों के विरुद्ध काम को न करें तथा संसार का उपकार करने हारे गौ आदि पशुओं का कभी विनाश न करें॥८॥

पुना राजप्रजाजनाः परस्परं कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर राजा प्रजाजन परस्पर कैसे वर्त्तें, यह विषय अगले मन्त्र में कहा है॥

उप॑ ते॒ स्तोमा॑न् पशु॒पाᳬ॑वाक॑रं॒ रास्वा॑ पितर्मरुतां सु॒म्नम॒स्मे।
भ॒द्रा हि ते॑ सुम॒तिर्मृ॑ळ॒यत्त॒माथा॑ व॒यमव॒ इत्ते॑ वृणीमहे॥९॥

उप॑। ते॒। स्तोमा॑न्। प॒शु॒पाऽइ॑व। आ। अ॒क॒र॒म्। रास्व॑। पि॒तः॒। म॒रु॒ता॒म्। सु॒म्न॒म्। अ॒स्मे इति॑। भ॒द्रा। हि। ते॒। सुऽम॑तिः। मृ॒ळ॒य॒त्ऽत॑मा। अथ॑। व॒यम्। अव॑ः। इत्। ते॒। वृ॒णी॒म॒हे॒॥ ९॥

पदार्थः-(उप) (ते) तुभ्यम् **(स्तोमान्)** स्तुत्यान् रत्नादिद्रव्यसमूहान् **(पशुपाइव)** यथा पशुपालको गवादिभ्यो दुग्धादिकं गृहीत्वा गोस्वामिने समर्पयति **(आ) (अकरम्)** करोमि **(रास्व)** देहि। **द्व्यचोऽतस्तिङ** इति दीर्घः। **(पितः)** पालयिता रुद्र **(मरुताम्)** ऋत्विजाम् **(सुम्नम्)** सुखम् **(अस्मे)** मह्यम् **(भद्रा)** कल्याणरूपा **(हि)** यतः **(ते)** तव **(सुमतिः)** शोभना प्रज्ञा **(मृडयत्तमा)** अतिशयेन सुखकर्त्री **(अथ)** अत्र **निपातस्य चे**ति दीर्घः। **(वयम्) (अवः)** रक्षणादिकम् **(इत्)** एव **(ते)** तव **(वृणीमहे)** स्वीकुर्महे॥ ९॥

अन्वयः-हे मरुतां पितर्यहं पशुपाइव स्तोमाँस्त उपाकरमतस्त्वमस्मे मह्यं सुम्नं रास्वाथ या ते तव मृडयत्तमा भद्रा सुमतिर्यत् ते तवावोऽस्ति तां तच्च वयं यथा वृणीमहे तथेत्त्वमप्यस्मान् स्वीकुरु॥ ९॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। प्रजापुरुषाः राजपुरुषेभ्यो राजनीतिं राजपुरुषाः प्रजापुरुषेभ्यः प्रजाव्यवहारं बुद्ध्वा विदितवेदितव्याः सन्तः सनातनं धर्ममाश्रयेयुः॥ ९॥

पदार्थः-हे **(मरुताम्)** ऋतु-ऋतु में यज्ञ करानेहारे की **(पितः)** पालना करते हुए दुष्टों को रुलानेहारे सभापति! **(हि)** जिस कारण मैं **(पशुपाइव)** जैसे पशुओं को पालनेहारा चरवाहा अहीर गौ आदि पशुओं से दूध, दही, घी, मट्ठा आदि ले के पशुओं के स्वामी को देता है, वैसे **(स्तोमान्)** प्रशंसनीय रत्न आदि पदार्थों को **(ते)** आपके लिये **(उप, आ, अकरम्)** आगे करता हूँ, इस कारण आप **(अस्मे)** मेरे लिये **(सुम्नम्)** सुख **(रास्व)** देओ, **(अथ)** इसके अनन्तर जो **(ते)** आपकी **(मृडयत्तमा)** सब प्रकार से सुख करनेवाली **(भद्रा)** सुखरूप **(सुमतिः)** श्रेष्ठ मति और जो **(ते)** आपका **(अवः)** रक्षा करना है, उस मति और रक्षा करने को **(वयम्)** हम लोग जैसे **(वृणीमहे)** स्वीकार करते हैं **(इत्)** वैसे ही आप भी हम लोगों को स्वीकार करें॥ ९॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। प्रजापुरुष राजपुरुषों से राजनीति और राजपुरुष प्रजापुरुषों से प्रजाव्यवहार को जान; जानने योग्य को जाने हुए सनातन धर्म का आश्रय करें॥ ९॥

पुना राजाप्रजाधर्म उपदिश्यते॥

फिर राजा-प्रजा के धर्म का उपदेश अगले मन्त्र में किया है॥

आ॒रे ते॑ गो॒घ्नमु॒त पू॑रुष॒घ्नं क्षय॑द्वीर सु॒म्नम॒स्मे॑ ते॑ अस्तु।
मृ॒ळा च॑ नो॒ अधि॑ च ब्रूहि दे॒वाधा॑ च नः॒ शर्म॑ यच्छ द्वि॒बर्हा॑:॥ १०॥

आरे। ते। गोऽघ्नम्। उत। पुरुषऽघ्नम्। क्षयत्ऽवीर। सुम्नम्। अस्मे इति। ते। अस्तु। मृळ। च। नः। अधि। च। ब्रूहि। देव। अध। च। नः। शर्म। यच्छ। द्विऽबर्हाः॥ १०॥

पदार्थः-(आरे) समीपे दूरे च **(ते)** तव सकाशात् **(गोघ्नम्)** गवां हन्तारम् **(उत)** **(पुरुषघ्नम्)** पुरुषाणां हन्तारम् **(क्षयद्वीर)** शूरवीरनिवासक **(सुम्नम्)** सुखम् **(अस्मे)** अस्मभ्यम् **(ते)** तुभ्यम् **(अस्तु)** भवतु **(मृड)** अत्रान्तर्भावितो ण्यर्थः। **व्यचोऽतस्तिङ** इति दीर्घश्च। **(च)** **(नः)** अस्मान् **(अधि)** आधिक्ये **(च)** **(ब्रूहि)** आज्ञापय **(देव)** दिव्यकर्मकारिन् **(अध)** आनन्तर्ये। अत्र वर्णव्यत्ययेन थस्य धो **निपातस्य चे**ति दीर्घश्च। **(च)** **(नः)** **(शर्म)** गृहसुखम् **(यच्छ)** देहि **(द्विबर्हाः)** द्वयोर्व्यवहारपरमार्थयोर्वर्धकः॥ १०॥

अन्वयः-हे क्षयद्वीर देव! पुरुषघ्नं गोघ्नं च निवार्य तेऽस्मे च सुम्नमस्तु। अधाथ त्वं नोऽस्मान् मृडाहं च त्वां मृडानि त्वं नोऽस्मानधिब्रूहि। अहं त्वां चाधिब्रुवाणि। द्विबर्हास्त्वं नः शर्म यच्छ। अहं वः शर्म यच्छानि सर्वे वयमारे धर्मात्मनां निकटे दुष्टात्मभ्यो दूरे च वसेम॥ १०॥

भावार्थः-मनुष्यैः प्रयत्नेन पशुघातिकेभ्यो मनुष्यमारेभ्यश्च दूरे निवसनीयम्। स्वेभ्य एते दूरे निवासनीयाः। राज्ञा प्रजापुरुषैश्च परस्परमुपदिश्य सभां निर्माय रक्षणं विधाय व्यवहारपरमार्थौ साधनीयौ॥ १०॥

पदार्थः-हे **(क्षयद्वीर)** शूरवीर जनों का निवास कराने और **(देव)** दिव्य अच्छे-अच्छे कर्म करानेहारे विद्वान् सभापति! **(पुरुषघ्नम्)** पुरुषों को मारने **(च)** और **(गोघ्नम्)** गौ आदि उपकार करनेहारे पशुओं के विनाश करनेवाले प्राणी को निवार करके **(ते)** आपके **(च)** और **(अस्मे)** हम लोगों के लिये **(सुम्नम्)** सुख **(अस्तु)** हो, **(अधा)** इसके अनन्तर **(नः)** हम लोगों को **(मृड)** सुखी कीजिये **(च)** और मैं आपको सुख देऊं, आप हम लोगों को **(अधिब्रूहि)** अधिक उपदेश देओ **(च)** और मैं आपको अधिक उपदेश करूं **(द्विबर्हाः)** व्यवहार और परमार्थ के बढ़ानेवाले आप **(नः)** हम लोगों के लिये **(शर्म्म)** घर का सुख **(यच्छ)** दीजिये **(च)** और आपके लिये मैं सुख देऊं। सब हम लोग धर्मात्माओं के **(आरे)** निकट और दुराचारियों से दूर रहें॥ १०॥

भावार्थः-मनुष्यों को चाहिये कि यत्न के साथ पशु और मनुष्यों के विनाश करनेहारे दुराचारियों से दूर रहें और अपने से उनका दूर निवास करावें। राजा और प्रजाजनों को परस्पर एक-दूसरे से उपदेश कर सभा बना और सबकी रक्षा कर व्यवहार और परमार्थ का सुख सिद्ध करना चाहिये॥ १०॥

पुनरध्यापकोपदेशकव्यवहारमाह॥

फिर अध्यापक और उपदेशकों के व्यवहारों को अगले मन्त्र में कहा है॥

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ ११॥ ६॥

अवोचाम। नमः। अस्मै। अवस्यवः। शृणोतु। नः। हवम्। रुद्रः। मरुत्वान्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ ११॥

पदार्थः-(**अवोचाम**) वदेम (**नमः**) नमस्त इति वाक्यम् (**अस्मै**) माननीयाय सभाध्यक्षाय (**अवस्यवः**) आत्मनोऽवो रक्षणादिकमिच्छवः (**शृणोतु**) (**नः**) अस्माकम् (**हवम्**) आह्वानरूपं प्रशंसावाक्यम् (**रुद्रः**) अधीतविद्यः (**मरुत्वान्**) बलवान् (**तत्**) (**नः०**) इति पूर्ववत्॥ ११॥

अन्वयः-अवस्यवो वयमस्मै सभाध्यक्षाय नमोऽवोचाम स मरुत्वान् रुद्रो नस्तन्नोऽस्माकं हवं च शृणोतु। हे मनुष्या! यन्नो नमो मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौर्वर्धयन्ति तद्भवन्तो मामहन्ताम्॥ ११॥

भावार्थः-प्रजास्थैः पुरुषै राज्ञां प्रियाचरणानि नित्यं कर्त्तव्यानि राजभिश्च प्रजाजनानां वचांसि श्रोतव्यानि। एवं मिलित्वा न्यायमुन्नीयान्यायं निराकुर्य्युः॥ ११॥

अत्र ब्रह्मचारिविद्वत्सभाध्यक्षसभासदादिगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति चतुर्दशोत्तरं शततमं ११४ सूक्तं षष्ठो ६ वर्गश्च समाप्तः॥

पदार्थः-(**अवस्यवः**) अपनी रक्षा चाहते हुए हम लोग (**अस्मै**) इस मान करने योग्य सभाध्यक्ष के लिये (**नमः**) 'नमस्ते' ऐसे वाक्य को (**अवोचाम**) कहें और वह (**मरुत्वान्**) बलवान् (**रुद्रः**) विद्या पढ़ा हुआ सभापति (**तत्**) उस (**नः**) हमारे (**हवम्**) बुलानेरूप प्रशंसावाक्य को (**शृणोतु**) सुने। हे मनुष्यो! जो (**नः**) हमारे 'नमस्ते' शब्द को (**मित्रः**) प्राण (**वरुणः**) श्रेष्ठ विद्वान् (**अदितिः**) अन्तरिक्ष (**सिन्धुः**) समुद्र (**पृथिवी**) पृथ्वी (**उत**) और (**द्यौः**) प्रकाश बढ़ाते हैं अर्थात् उक्त पदार्थों को जाननेहारे सभापति को वार-वार 'नमस्ते' शब्द कहा जाता, उसको आप (**मामहन्ताम्**) वार-वार प्रशंसायुक्त करें॥ ११॥

भावार्थः-प्रजापुरुषों को राजा लोगों के प्रिय आचरण नित्य करने चाहियें और राजा लोगों को प्रजाजनों के कहे वाक्य सुनने योग्य हैं। ऐसे सब राजा-प्रजा मिलकर न्याय की उन्नति और अन्याय को दूर करें॥ ११॥

इस सूक्त में ब्रह्मचारी, विद्वान्, सभाध्यक्ष और सभासद् आदि गुणों का वर्णन होने से इस सूक्त में कहे अर्थ की पिछले सूक्त के अर्थ के साथ एकता जानने योग्य है॥

यह एकसौ चौदहवां ११४ सूक्त और छठा ६ वर्ग समाप्त हुआ॥

अथ षड्चस्य पञ्चदशोत्तरशततमस्यास्य सूक्तस्याङ्गिरसः कुत्स ऋषिः। सूर्यो देवता। १,२,६ निचृत् त्रिष्टुप्। ३ विराट् त्रिष्टुप्। ४,५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

तत्रादावीश्वरगुणा उपदिश्यन्ते॥

अब छः ऋचावाले एक सौ पन्द्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में ईश्वर के गुणों का उपदेश किया है॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ १॥

चित्रम्। देवानाम्। उत्। अगात्। अनीकम्। चक्षुः। मित्रस्य। वरुणस्य। अग्नेः। आ। अप्राः। द्यावापृथिवी इति। अन्तरिक्षम्। सूर्यः। आत्मा। जगतः। तस्थुषः। च॥ १॥

पदार्थः-(चित्रम्) अद्भुतम् **(देवानाम्)** विदुषां दिव्यानां पदार्थानां वा **(उत्)** उत्कृष्टतया **(अगात्)** प्राप्तमस्ति **(अनीकम्)** चक्षुरादीन्द्रियैरप्राप्तम् **(चक्षुः)** दर्शकं ब्रह्म **(मित्रस्य)** सुहृद इव वर्त्तमानस्य सूर्यस्य **(वरुणस्य)** आह्लादकस्य जलचन्द्रादेः **(अग्नेः)** विद्युदादेः **(आ)** समन्तात् **(अप्राः)** पूरितवान् **(द्यावापृथिवी)** प्रकाशभूमी **(अन्तरिक्षम्)** आकाशम् **(सूर्यः)** सवितेव ज्ञानप्रकाशः **(आत्मा)** अतति सर्वत्र व्याप्नोति सर्वान्तर्यामी **(जगतः)** जङ्गमस्य **(तस्थुषः)** स्थावरस्य **(च)** सकलजीवसमुच्चये॥ १॥

अन्वयः-हे मनुष्या! यदनीकं देवानां मित्रस्य वरुणस्याग्नेश्चित्रं चक्षुरुदगाद्यो जगदीश्वरः सूर्य इव विज्ञानमयो जगतस्तस्थुषश्चात्मा योऽन्तरिक्षं द्यावापृथिवी चाप्राः परिपूरितवानस्ति तमेव यूयमुपाध्वम्॥ १॥

भावार्थः-न खलु दृश्यं परिच्छिन्नं वस्तु परमात्मा भवितुमर्हति, नो कश्चिदप्यव्यक्तेन सर्वशक्तिमता जगदीश्वरेण विना सर्वस्य जगत उत्पादनं कर्त्तुं शक्नोति, नैव कश्चित् सर्वव्यापकसच्चिदानन्दस्वरूपमन्तर्यामिणं सर्वात्मानं परमेश्वरमन्तरा जगद्धर्त्तुं जीवानां पापपुण्यानां साक्षित्वं फलदानं च कर्त्तुमर्हति, नह्येतस्योपासनया विना धर्मार्थकाममोक्षान् लब्धुं कोऽपि जीवः शक्नोति, तस्मादयमेवोपास्य इष्टदेवः सर्वैर्मन्तव्यः॥ १॥

पदार्थः-हे मनुष्यो! जो **(अनीकम्)** नेत्र से नही देखने में आता तथा **(देवानाम्)** विद्वान् और अच्छे-अच्छे पदार्थों वा **(मित्रस्य)** मित्र के समान वर्त्तमान सूर्य वा **(वरुणस्य)** आनन्द देनेवाले जल, चन्द्रलोक और अपनी व्याप्ति आदि पदार्थों वा **(अग्नेः)** बिजुली आदि अग्नि वा और सब पदार्थों का **(चित्रम्)** अद्भुत **(चक्षुः)** दिखानेवाला है, वह ब्रह्म **(उदगात्)** उत्कर्षता से प्राप्त है, जो जगदीश्वर **(सूर्य्यः)** सूर्य्य के समान ज्ञान का प्रकाश करनेवाला विज्ञान से परिपूर्ण **(जगतः)** जङ्गम **(च)** और **(तस्थुषः)** स्थावर अर्थात् चराचर जगत् का **(आत्मा)** अन्तर्यामी अर्थात् जिसने **(अन्तरिक्षम्)** आकाश

(द्यावापृथिवी) प्रकाश और भूमिलोक को **(आ, अप्राः)** अच्छे प्रकार परिपूर्ण किया अर्थात् उनमें आप भर रहा है, उसी परमात्मा की तुम लोग उपासना करो॥ १॥

भावार्थः-जो देखने योग्य परिमाणवाला पदार्थ है, वह परमात्मा होने को योग्य नहीं। न कोई भी उस अव्यक्त सर्वशक्तिमान् जगदीश्वर के विना समस्त जगत् को उत्पन्न कर सकता है और न कोई सर्वव्यापक, सच्चिदानन्दस्वरूप, अनन्त, अन्तर्यामी, चराचर जगत् के आत्मा परमेश्वर के विना संसार के धारण करने, जीवों को पाप और पुण्यों को साक्षीपन और उनके अनुसार जीवों को सुख-दुःख रूप फल देने को योग्य है। न इस परमेश्वर की उपासना के विना धर्म, अर्थ, काम और मोक्ष के पाने को कोई जीव समर्थ होता है, इससे वही परमेश्वर उपासना करने योग्य इष्टदेव सब को मानना चाहिये॥ १॥

पुनरीश्वरकृत्यमाह॥

फिर ईश्वर का कृत्य अगले मन्त्र में कहा है॥

सूर्यो॑ देवीमुषसं॒ रोच॑मानां॒ मर्यो॒ न योषा॑म॒भ्ये॑ति प॒श्चात्।
यत्रा॒ नरो॑ देव॒यन्तो॑ यु॒गानि॑ वितन्व॒ते प्रति॑ भ॒द्राय॑ भ॒द्रम्॥ २॥

सूर्यः॑। देवीम्। उ॒षस॑म्। रोच॑मानाम्। मर्यः॑। न। योषा॑म्। अभि॒। ए॒ति॒। प॒श्चात्। यत्र॑। नरः॑। देव॒ऽयन्तः॑। यु॒गानि॑। वि॒ऽत॒न्व॒ते। प्रति॑। भ॒द्राय॑। भ॒द्रम्॥ २॥

पदार्थः-(**सूर्य्यः**) सविता (**देवीम्**) द्योतिकाम् (**उषसम्**) सन्धिवेलाम् (**रोचमानाम्**) रुचिकारिकाम् (**मर्यः**) पतिर्मनुष्यः (**न**) इव (**योषाम्**) स्वभार्याम् (**अभि**) अभितः (**एति**) (**पश्चात्**) (**यत्रा**) यस्मिन्। अत्र दीर्घः। (**नरः**) नयनकर्त्तारो गणकाः (**देवयन्तः**) कामयमाना गणितविद्यां जानन्तो ज्ञापयन्तः (**युगानि**) वर्षाणि कृतत्रेताद्वापरकलिसंज्ञानि वा (**वितन्वते**) विस्तारयन्ति (**प्रति**) (**भद्राय**) कल्याणाय (**भद्रम्**) कल्याणम्॥ २॥

अन्वयः-हे मनुष्या! येनेश्वरेणोत्पाद्य स्थापितोऽयं सूर्यो रोचमानां देवीमुषसं पश्चान्मर्यो योषां नेवाभ्येति, यत्र यस्मिन् विद्यमाने मार्त्तण्डे देवयन्तो नरो युगानि भद्राय भद्रं प्रति वितन्वते, तमेव सकलस्रष्टारं यूयं विजानीत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! युष्माभिर्येनेश्वरेण सूर्य्यं निर्माय प्रति ब्रह्माण्डस्य मध्ये स्थापित- स्तमाश्रित्य गणितादयः सर्वे व्यवहाराः सिध्यन्ति, स कुतो न सेव्येत॥ २॥

पदार्थः-हे मनुष्यो! जिस ईश्वर ने उत्पन्न करके नियम (कक्षा) में स्थापन किया यह (**सूर्य्यः**) सूर्य्यमण्डल (**रोचमानाम्**) रुचि कराने (**देवीम्**) और सब पदार्थों को प्रकाशित करनेहारी (**उषसम्**) प्रातःकाल की वेला को उसके होने के (**पश्चात्**) पीछे जैसे (**मर्य्यः**) पति (**योषाम्**) अपनी स्त्री को प्राप्त हो (**न**) वैसे (**अभ्येति**) सब ओर से दौड़ा जाता है, (**यत्र**) जिस विद्यमान सूर्य में (**देवयन्तः**) मनोहर

चाल-चलन से सुन्दर गणितविद्या को जानते-जनाते हुए **(नरः)** ज्योतिष विद्या के भावों को दूसरे की समझ में पहुँचानेहारे ज्योतिषी जन **(युगानि)** पांच-पांच संवत्सरों की गणना से ज्योतिष में युग वा सत्ययुग, त्रेतायुग, द्वापरयुग और कलियुग को जान **(भद्राय)** उत्तम सुख के लिये **(भद्रम्)** उस उत्तम सुख के **(प्रति, वितन्वते)** प्रति विस्तार करते हैं, उसी परमेश्वर को सबका उत्पन्न करनेहारा तुम लोग जानो॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! तुम लोगों से जिस ईश्वर ने सूर्य्य को बनाकर प्रत्येक ब्रह्माण्ड में स्थापन किया, उसके आश्रय से गणित आदि समस्त व्यवहार सिद्ध होते हैं, वह ईश्वर क्यों न सेवन किया जाए॥२॥

पुनः सूर्य्यकृत्यमाह॥

फिर सूर्य्य के काम का अगले मन्त्र में वर्णन किया है॥

भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः॥३॥

भद्राः। अश्वाः। हरितः। सूर्यस्य। चित्राः। एतऽग्वाः। अनुऽमाद्यासः। नमस्यन्तः। दिवः। आ। पृष्ठम्। अस्थुः। परि। द्यावापृथिवी इति। यन्ति। सद्यः॥३॥

पदार्थः-(**भद्रा**) कल्याणहेतवः **(अश्वाः)** महान्तो व्यापनशीलाः किरणाः **(हरितः)** दिशः। **हरित इति दिङ्नामसु पठितम्।** (निघं०१.६) **(सूर्य्यस्य)** सवितृलोकस्य **(चित्राः)** अद्भुता अनेकवर्णाः **(एतग्वाः)** एतान् प्रत्यक्षान् पदार्थान् गच्छन्तीति **(अनुमाद्यासः)** अनुमोदकारकगुणेन प्रशंसनीयाः **(नमस्यन्तः)** सत्कुर्वन्तः **(दिवः)** प्रकाशयस्य पदार्थस्य **(आ) (पृष्ठम्)** पश्चाद् भागम् **(अस्थुः)** तिष्ठन्ति **(परि)** सर्वतः **(द्यावापृथिवी)** आकाशभूमी **(यन्ती)** प्राप्नुवन्ति **(सद्यः)** शीघ्रम्॥३॥

अन्वयः-भद्रा अनुमाद्यासो नमस्यन्तो विद्वांसो जना ये सूर्यस्य चित्रा एतग्वा अश्वाः किरणा हरितो द्यावापृथिवी सद्यः परि यन्ति दिवः पृष्ठमास्थुः समन्तात् तिष्ठन्ति, तान् विद्ययोपकुर्वन्तु॥३॥

भावार्थः-मनुष्याणां योग्यमस्ति श्रेष्ठानध्यापकानाप्तान् प्राप्य नमस्कृत्य गणितादिक्रियाकौशलतां परिगृह्य सूर्यसम्बन्धिव्यवहारानुष्ठानेन कार्यसिद्धिं कुर्युः॥३॥

पदार्थः-(**भद्राः**) सुख के करानेहारे **(अनुमाद्यासः)** आनन्द करने के गुण से प्रशंसा के योग्य **(नमस्यन्तः)** सत्कार करते हुए विद्वान् जन जो **(सूर्य्यस्य)** सूर्य्यलोक की **(चित्राः)** चित्र-विचित्र **(एतग्वाः)** इन प्रत्यक्ष पदार्थों को प्राप्त होती हुई **(अश्वाः)** बहुत व्याप्त होनेवाली किरणें **(हरितः)** दिशा और **(द्यावापृथिवी)** आकाश-भूमि को **(सद्यः)** शीघ्र **(परि, यन्ति)** सब ओर से प्राप्त होतीं **(दिवः)** तथा

प्रकाशित करने योग्य पदार्थ के **(पृष्ठम्)** पिछले भाग पर **(आ, अस्थुः)** अच्छे प्रकार ठहरती हैं, उनको विद्या से उपकार में लाओ॥३॥

भावार्थः-मनुष्यों को योग्य है कि श्रेष्ठ पढ़ानेवाले शास्त्रवेत्ता विद्वानों को प्राप्त हो, उनका सत्कार कर, उनसे विद्या पढ़ गणित आदि क्रियाओं की चतुराई को ग्रहण कर, सूर्यसम्बन्धि व्यवहारों का अनुष्ठान कर कार्यसिद्धि करें॥३॥

पुनस्तत्कृत्यमाह॥

फिर उसी सूर्य का काम अगले मन्त्र में कहा है॥

तत् सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्वितंतं सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥४॥

तत्। सूर्यस्य। देवऽत्वम्। तत्। महिऽत्वम्। मध्या। कर्त्तोः। विऽततम्। सम्। जभार। यदा। इत्। अयुक्त। हरितः। सधऽस्थात्। आत्। रात्री। वासः। तनुते। सिमस्मै॥४॥

पदार्थः-(**तत्**) यत् प्रथममन्त्रोक्तं ब्रह्म (**सूर्यस्य**) सूर्यमण्डलस्य (**देवत्वम्**) देवस्य प्रकाशमयस्य भावः (**तत्**) (**महित्वम्**) (**मध्या**) मध्ये। अत्र सप्तम्येकवचनस्याकारः। (**कर्त्तोः**) कर्म (**विततम्**) व्याप्तम् (**सम्**) (**जभार**) हरति (**यदा**) (**इत्**) (**अयुक्त**) युनक्ति (**हरितः**) दिशः (**सधस्थात्**) समानस्थानात् (**आत्**) अनन्तरम् (**रात्री**) (**वासः**) वसनम् (**तनुते**) (**सिमस्मै**) सर्वस्मै लोकाय॥४॥

अन्वयः-हे मनुष्या! यदा तत् सूर्यस्य मध्या विततं सत् ब्रह्मैतस्य देवत्वं महित्वं कर्त्तोः सञ्जभार प्रलयसमये संहरति आत् यदा सृष्टिं करोति तदा सूर्यमयुक्तोत्पाद्य कक्षायां स्थापयति, सूर्यः सधस्थाद्धरितः किरणैर्व्याप्य सिमस्मै वासस्तनुते, यस्य तत्त्वाद्रात्री जायते तदिदेव ब्रह्म यूयमुपाध्वं तदेव जगत्कर्त्तृ विजानीत॥४॥

भावार्थः-हे सज्जना! यद्यपि सूर्य आकर्षणेन पृथिव्यादि पदार्थान् धरति पृथिव्यादिभ्यो महानपि वर्त्तते विश्वं प्रकाश्य व्यवहारयति च तदप्ययं परमेश्वरस्योत्पादनधारणाकर्षणैर्विनोत्पत्तुं स्थातुमाकर्षितुं च न शक्नोति नैतमीश्वरमन्तरेणेदृशानां लोकानां रचनं धारणं प्रलयं च कर्त्तुं कश्चित् समर्थो भवति॥४॥

पदार्थः-हे मनुष्यो! **(यदा)** जब **(तत्)** वह पहिले मन्त्र में कहा हुआ **(सूर्य्यस्य)** सूर्यमण्डल के **(मध्या)** बीच में **(विततम्)** व्याप्त ब्रह्म इस सूर्य्य के **(देवत्वम्)** प्रकाश **(महित्वम्)** बड़प्पन **(कर्त्तोः)** और काम का **(संजभार)** संहार करता अर्थात् प्रलय समय सूर्य्य के समस्त व्यवहार को हर लेता **(आत्)** और फिर जब सृष्टि को उत्पन्न करता है, तब सूर्य्य को **(अयुक्त)** युक्त अर्थात् उत्पन्न करता और नियत कक्षा में स्थापन करता है। सूर्य्य **(सधस्थात्)** एक स्थान से **(हरितः)** दिशाओं को अपनी किरणों से व्याप्त हो कर **(सिमस्मै)** समस्त लोक के लिये **(वासः)** अपने निवास का **(तनुते)** विस्तार करता

तथा जिस ब्रह्म के तत्त्व से **(रात्री)** रात्री होती है **(तत्, इत्)** उसी ब्रह्म की उपासना तुम लोग करो तथा उसी को जगत् का कर्त्ता जानो॥४॥

भावार्थः-हे सज्जनो! यद्यपि सूर्य्य आकर्षण से पृथिवी आदि पदार्थों का धारण करता है, पृथिवी आदि लोकों से बड़ा भी वर्त्तमान है। संसार का प्रकाश कर व्यवहार भी कराता है तो भी यह सूर्य्य परमेश्वर के उत्पादन, धारण और आकर्षण आदि गुणों के विना उत्पन्न होने, स्थिर रहने और पदार्थों का आकर्षण करने को समर्थ नहीं हो सकता। न इस ईश्वर के विना ऐसे-ऐसे लोक-लोकान्तरों की रचना, धारणा और इनके प्रलय करने को कोई समर्थ होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति॥५॥

तत्। मित्रस्य। वरुणस्य। अभि।ऽचक्षे। सूर्यः। रूपम्। कृणुते। द्योः। उप।ऽस्थे। अनन्तम्। अन्यत्। रुशत्। अस्य। पाजः। कृष्णम्। अन्यत्। हरितः। सम्। भरन्ति॥५॥

पदार्थः-(**तत्**) चेतनं ब्रह्म (**मित्रस्य**) प्राणस्य (**वरुणस्य**) उदानस्य (**अभिचक्षे**) संमुखदर्शनाय (**सूर्य्यः**) सविता (**रूपम्**) चक्षुर्ग्राह्यं गुणम् (**कृणुते**) करोति (**द्योः**) प्रकाशस्य (**उपस्थे**) समीपे (**अनन्तम्**) देशकालवस्तुपरिच्छेदशून्यम् (**अन्यत्**) सर्वेभ्यो भिन्नं सत् (**रुशत्**) ज्वलितवर्णम् (**अस्य**) (**पाजः**) बलम्। **पाज इति बलनामसु पठितम्।** (निघं०२.९) (**कृष्णम्**) तिमिराख्यम् (**अन्यत्**) भिन्नम् (**हरितः**) दिशः (**सम्**) (**भरन्ति**) धरन्ति॥५॥

अन्वयः-हे मनुष्या! यूयं यस्य सामर्थ्यान्मित्रस्य वरुणस्याभिचक्षे द्योरुपस्थे स्थितः सन् सूर्योऽनेकविधं रूपं कृणुते। अस्य सूर्य्यस्यान्यद्रुशत्पाजो रात्रेरन्यत्कृष्णं रूपं हरितो दिशः संभरन्ति तदनन्तं ब्रह्म सततं सेवध्वम्॥५॥

भावार्थः-यस्य सामर्थ्येन रूपदिनरात्रिप्राप्तिनिमित्तः सूर्यः श्वेतकृष्णरूपविभाजकत्वेनाहर्निशं जनयति, तदनन्तं ब्रह्म विहाय कस्याप्यन्यस्योपासनं मनुष्या नैव कुर्य्युरिति विद्वद्भिः सततमुपदेष्टव्यम्॥५॥

पदार्थः-हे मनुष्यो! तुम लोग जिसके सामर्थ्य से **(मित्रस्य)** प्राण और **(वरुणस्य)** उदान का **(अभिचक्षे)** सम्मुख दर्शन होने के लिये **(द्योः)** प्रकाश के **(उपस्थे)** समीप में ठहराता हुआ **(सूर्य्यः)** सूर्य्यलोक अनेक प्रकार **(रूपम्)** प्रत्यक्ष देखने योग्य रूप को **(कृणुते)** प्रकट करता है। **(अस्य)** इस सूर्य के **(अन्यत्)** सबसे अलग **(रुशत्)** लाल आग के समान जलते हुए **(पाजः)** बल तथा रात्रि के **(अन्यत्)**

अलग **(कृष्णम्)** काले-काले अन्धकार रूप को **(हरितः)** दिशा-विदिशा **(सं, भरन्ति)** धारण करती हैं **(तत्)** उस **(अनन्तम्)** देश, काल और वस्तु के विभाग से शून्य परब्रह्म का सेवन करो॥५॥

भावार्थः-जिसके सामर्थ्य से रूप, दिन और रात्रि की प्राप्ति का निमित्त सूर्य श्वेत-कृष्ण रूप के विभाग से दिन रात्रि को उत्पन्न करता है, उस अनन्त परमेश्वर को छोड़ कर किसी और की उपासना मनुष्य नहीं करें, यह विद्वानों को निरन्तर उपदेश करना चाहिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥६॥७॥१६॥

अद्य। देवाः। उत्ऽइता। सूर्यस्य। निः। अंहसः। पिपृत। निः। अवद्यात्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥६॥

पदार्थः-(**अद्य**) इदानीम्। अत्र दीर्घः। (**देवाः**) विद्वांसः (**उदिता**) उत्कृष्टप्राप्तौ (**सूर्य्यस्य**) जगदीश्वरस्य (**निः**) नितराम् (**अंहसः**) पापात् (**पिपृत**) अत्र दीर्घः। (**निः**) (**अवद्यात्**) गर्ह्यात् (**तत्, नः०**) पूर्ववत्॥६॥

अन्वयः-हे देवाः! सूर्यस्योपासनेनोदिता प्रकाशमानाः सन्तो यूयं निरवद्यादंहसो निष्पिपृत यन्मित्रो वरुणोऽदितिः सिन्धुः पृथिवी उत द्यौः प्रसाध्नुवन्ति तन्नोऽस्मान् सुखयति तदद्य भवन्तो मामहन्ताम्॥६॥

भावार्थः-मनुष्यैः पापाद्दूरे स्थित्वा धर्ममाचर्य जगदीश्वरमुपास्य शान्त्या धर्मार्थकाममोक्षाणां पूर्त्तिः सम्पाद्या॥६॥

अत्र सूर्यशब्देनेश्वरसवितृलोकार्थवर्णनादस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति प्रथमण्डले षोडशोऽनुवाकः १६ पञ्चदशोत्तरशततमं ११५ सूक्तं सप्तमो ७ वर्गश्च समाप्तः॥

पदार्थः-हे (**देवाः**) विद्वानो! (**सूर्य्यस्य**) समस्त जगत् को उत्पन्न करनेवाले जगदीश्वर की उपासना से (**उदिता**) उदय अर्थात् सब प्रकार से उत्कर्ष की प्राप्ति में प्रकाशमान हुए तुम लोग (**निः**) निरन्तर (**अवद्यात्**) निन्दित (**अंहसः**) पाप आदि कर्म से (**निष्पिपृत**) निर्गत होओ अर्थात् अपने आत्मा, मन और शरीर आदि को दूर रक्खो तथा जिसको (**मित्रः**) प्राण (**वरुणः**) उदान (**अदितिः**) अन्तरिक्ष (**सिन्धुः**) समुद्र (**पृथिवी**) पृथिवी (**उत**) और (**द्यौः**) प्रकाश आदि पदार्थ सिद्ध करते हैं (**तत्**) वह वस्तु वा कर्म (**नः**) हम लोगों को सुख देता है, उसको तुम लोग (**अद्य**) आज (**मामहन्ताम्**) वार-वार प्रशंसित करो॥६॥

भावार्थः-मनुष्यों को चाहिये कि पाप से दूर रह धर्म का आचरण और जगदीश्वर की उपासना कर शान्ति के साथ धर्म, अर्थ, काम और मोक्ष की परिपूर्ण सिद्धि करें॥६॥

इस सूक्त में सूर्य्य शब्द से ईश्वर और सूर्य्यलोक के अर्थ का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ एकता है, यह जानना चाहिये॥

यह प्रथम मण्डल में सोलहवाँ १६ अनुवाक एक सौ पन्द्रहवाँ ११५ सूक्त और सातवाँ ७ वर्ग समाप्त हुआ॥

अथास्य पञ्चविंशत्यृचस्य षोडशोत्तरशततमस्य सूक्तस्य कक्षीवानृषिः। अश्विनौ देवते।
१,१०,२२,२३ विराट् त्रिष्टुप्। २,८,९,१२-१५,१८,२०,२४,२५ निचृत् त्रिष्टुप्।
३,४,५, ७,२१ त्रिष्टुप् छन्दः। धैवतः स्वरः। ६,१६,१९ भुरिक् पङ्क्तिः। ११ पङ्क्तिः।
१७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ शिल्पविषयमाह॥

अब २५ पच्चीस ऋचावाले एकसौ सोलहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र से शिल्पविद्या के विषय का वर्णन किया है॥

नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः।
यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन॥ १॥

नासत्याभ्याम्। बर्हिःऽइव। प्र। वृञ्जे। स्तोमान्। इयर्मि। अभ्रियाऽइव। वातः। यौ। अर्भगाय। विऽमदाय। जायाम्। सेनाऽजुवा। निऽऊहतुः। रथेन॥ १॥

पदार्थः-(**नासत्याभ्याम्**) अविद्यमानासत्याभ्यां पुण्यात्मभ्यां शिल्पिभ्याम् (**बर्हिरिव**) परिबृंहकं छेदकमुदकमिव। **बर्हिरित्युदकनामसु पठितम्।** (निघं०१.१२) (**प्र**) (**वृञ्जे**) छिनद्मि (**स्तोमान्**) मार्गाय समूढान् पृथिवीपर्वतादीन् (**इयर्मि**) गच्छामि (**अभ्रियेव**) यथाऽभ्रेषु भवान्युदकानि (**वातः**) पवनः (**यौ**) (**अर्भगाय**) ह्रस्वाय बालकाय। अत्र वर्णव्यत्ययेन कस्य गः। (**विमदाय**) विशिष्टो मदो हर्षो यस्मात्तस्मै (**जायाम्**) पत्नीम् (**सेनाजुवा**) वेगेन सेनां गमयितारौ (**न्यूहतुः**) नितरां देशान्तरं प्रापयतः (**रथेन**) विमानादियानेन॥ १॥

अन्वयः-हे मनुष्या! यथा नासत्याभ्यां शिल्पिभ्यां योजितेन रथेन यौ सेनाजुवाऽर्भगाय विमदाय जायामिव संभारान् न्यूहतुस्तथा प्रयत्नवानहं स्तोमान् बर्हिरिव प्रवृञ्जे वातोऽभ्रियेव सद्य इयर्मि॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यानेषूपकृताः पृथिवीविकारजलाग्न्यादयः किं किमद्भुतं कार्य्यं न साध्नुवन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**नासत्याभ्याम्**) सच्चे पुण्यात्मा शिल्पी अर्थात् कारीगरों ने जोड़े हुए (**रथेन**) विमानादि रथ से (**यौ**) जो (**सेनाजुवा**) वेग के साथ सेना को चलानेहारे दो सेनापति (**अर्भगाय**) छोटे बालक वा (**विमदाय**) विशेष जिससे आनन्द होवे उस जवान के लिये (**जायाम्**) स्त्री के समान पदार्थों को (**न्यूहतुः**) निरन्तर एक देश से दूसरे देश को पहुंचाते हैं, वैसे अच्छा यत्न करता हुआ मैं (**स्तोमान्**) मार्ग के सूधे होने के लिये बड़े-बड़े पृथिवी, पर्वत आदि को (**बर्हिरिव**) बढ़े हुए जल को जैसे वैसे (**प्र, वृञ्जे**) छिन्न-भिन्न करता तथा (**वातः**) पवन जैसे (**अभ्रियेव**) बादलों को प्राप्त हो, वैसे एक देश को (**इयर्मि**) जाता हूं॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। रथ आदि यानों में उपकारी किए पृथिवी विकार, जल और अग्नि आदि पदार्थ क्या-क्या अद्भुत कार्यों को सिद्ध नहीं करते हैं?॥१॥

अथ युद्धविषयमाह॥

अब युद्ध के विषय को अगले मन्त्र में कहते हैं।

वी॒ळु॒पत्म॑भिराशु॒हेम॑भिर्वा दे॒वानां॑ वा जू॒तिभि॒: शाश॑दाना।
तद्रास॑भो नासत्या स॒हस्र॑म॒ाजा य॒मस्य॑ प्र॒धने॑ जिगाय॥ २॥

वी॒ळु॒पत्म॑ऽभिः। आ॒शु॒हेम॑ऽभिः। वा॒। दे॒वाना॑म्। वा॒। जू॒तिऽभि॑:। शाश॑दाना। तत्। रास॑भः। ना॒स॒त्या॒। स॒हस्र॑म्। आ॒जा। य॒मस्य॑। प्र॒ऽधने॑। जि॒गा॒य॒॥ २॥

पदार्थः-(**वीळुपत्मभिः**) बलेन पतनशीलैः (**आशुहेमभिः**) शीघ्रं गमयद्भिः (**वा**) (**देवानाम्**) विदुषाम् (**वा**) (**जूतिभिः**) जूयते प्राप्यतेऽर्थो याभिस्ताभिर्युद्धक्रियाभिः (**शाशदाना**) छेदकौ (**तत्**) (**रासभः**) आदिष्टोपयोजनपृथिव्यादिगुणसमूहवत्पुरुषः। **रासभावश्विनोरित्यादिष्टोपयोजननामसु पठितम्।** (निघं०१.१५) (**नासत्या**) सत्यस्वभावौ (**सहस्रम्**) असंख्यातम् (**आजा**) संग्रामे (**यमस्य**) उपरतस्य मृत्योरिव शत्रुसमूहस्य (**प्रधने**) प्रकृष्टानि धनानि यस्मात्तस्मिन् (**जिगाय**) जयेत्॥ २॥

अन्वयः-हे शाशदाना नासत्या सभासेनापती! भवन्तौ यथा वीळुपत्मभिराशुहेमभिर्वा देवानां जूतिभिर्वा स्वकार्य्याणि न्यूहतुस्तथा तदाचरन् रासभः प्रधन आजा संग्रामे यमस्य सहस्रं जिगाय शत्रोरसंख्यान् वीरान् जयेत्॥ २॥

भावार्थः-यथाग्निर्जलं वा वनं पृथिवीं वा प्रविष्टं सद्दहति छिनत्ति वा तथाऽतिवेगकारिभिर्विद्युदादिभिः साधितैः शस्त्रास्त्रैः शत्रवो जेतव्याः॥ २॥

पदार्थः-हे (**शाशदाना**) पदार्थों को यथायोग्य छिन्न-छिन्न करनेहारे (**नासत्या**) सत्यस्वभावी सभापति और सेनापति! आप जैसे (**वीळुपत्मभिः**) बल से गिरते और (**आशुहेमभिः**) शीघ्र पहुंचाते हुए पदार्थों से (**वा**) अथवा (**देवानाम्**) विद्वानों की (**जूतिभिः**) जिनसे अपना चाहा हुआ काम मिले सिद्ध हो उन युद्ध की क्रियाओं से (**वा**) निश्चय कर अपने कामों को निरन्तर तर्क-वितर्क से सिद्ध करते हों, वैसे (**तत्**) उस आचारण को करता हुआ (**रासभः**) कहे हुए उपयोग को जो प्राप्त उस पृथिवी आदि पदार्थसमूह के समान पुरुष (**प्रधने**) उत्तम-उत्तम गुण जिसमें प्राप्त होते, उस (**आजा**) संग्राम में (**यमस्य**) समीप आये हुए मृत्यु के समान शत्रुओं के (**सहस्रम्**) असंख्यात वीरों को (**जिगाय**) जीते॥ २॥

भावार्थः-जैसे अग्नि वा जल वन वा पृथिवी को प्रवेश कर उसको जलाता वा छिन्न-भिन्न करता है, वैसे अत्यन्त वेग करनेहारे बिजुली आदि पदार्थों से किये हुए शस्त्र और अस्त्रों से शत्रुजन जीतने चाहिये॥ २॥

अथ नौकादिनिर्माणविद्योपदिश्यते॥

अब नाव आदि के बनाने की विद्या का उपदेश अगले मन्त्र में किया है॥

तुग्रो॑ ह भुज्युम॑श्विनोदमे॒घे र॒यिं न कश्चि॑न्ममृ॒वाँ अवा॑हाः।
तमू॑हथुर्नौ॒भिरा॑त्म॒न्वती॑भिरन्तरिक्षप्रु॒द्भिरपो॑दकाभिः॥ ३॥

तुग्रः। ह। भुज्युम्। अश्विना। उदऽमेघे। रयिम्। न। कः। चित्। ममृऽवान्। अव। अहाः। तम्। ऊहथुः। नौऽभिः। आत्मन्ऽवतीभिः। अन्तरिक्षप्रुत्ऽभिः। अपऽउदकाभिः॥ ३॥

पदार्थः-(**तुग्रः**) शत्रुहिंसकः सेनापतिः (**ह**) किल (**भुज्युम्**) राज्यपालकं सुखभोक्तारं वा (**अश्विना**) वायुविद्युताविव बलिष्ठौ (**उदमेघे**) यस्योदकैर्मिह्यते सिच्यते जगत् तस्मिन् समुद्रे (**रयिम्**) धनम् (**न**) इव (**कः**) (**चित्**) (**ममृवान्**) मृतः सन् (**अव**) (**अहाः**) त्यजति। अत्र **ओहाक् त्याग** इत्यस्माल्लुङि प्रथमैकवचने आगमानुशासनस्यानित्यत्वात् सगिटौ न भवतः। (**तम्**) (**ऊहथुः**) वहेतम् (**नौभिः**) नौकाभिः (**आत्मन्वतीभिः**) प्रशस्ता आत्मन्वन्तो विचारवन्तः क्रियाकुशलाः पुरुषा विद्यन्ते यासु ताभिः (**अन्तरिक्षप्रुद्भिः**) अवकाशे गच्छन्तीभिः (**अपोदकाभिः**) अपगत उदकप्रवेशो यासु ताभिः॥ ३॥

अन्वयः-हे अश्विना सेनापती! युवां तुग्रः शत्रुहिंसनाय यं भुज्युमुदमेघे कश्चिन्ममृवान् रयिं नेवावाहास्तं हापोदकाभिरन्तरिक्षप्रुद्भिरात्मन्वतीभिर्नौभिरूहथुर्वहेतम्॥ ३॥

भावार्थः-यथा कश्चिन्मुमूर्षुर्जनो धनपुत्रादीनां मोहाद्विरज्य शरीरान्निर्गच्छति तथा युयुत्सुभिः शूरैरनुभावनीयम्। यदा मनुष्यो द्वीपान्तरे समुद्रं तीर्त्वा शत्रुविजयाय गन्तुमिच्छेत्तदा दृढाभिर्बृहतीभिरन्तरप्प्रवेशादि- दोषरहिताभिः परिवृतात्मीयजनाभिः शस्त्रास्त्रादिसम्भारालंकृताभिर्नौकाभिः सहैव यायात्॥ ३॥

पदार्थः-हे (**अश्विना**) पवन और बिजुली के समान बलवान् सेनाधीशो! तुम (**तुग्रः**) शत्रुओं के मारनेवाला सेनापति शत्रुजन के मारने के लिये जिस (**भुज्युम्**) राज्य की पालना करने वा सुख भोगनेहारे पुरुष को (**उदमेघे**) जिसके जलों से संसार सींचा जाता है, उस समुद्र में जैसे (**कश्चित्**) कोई (**ममृवान्**) मरता हुआ (**रयिम्**) धन को छोड़े (**न**) वैसे (**अवाहाः**) छोड़ता है (**तम्, ह**) उसी को (**अपोदकाभिः**) जल जिसमें आते-जाते (**अन्तरिक्षप्रुद्भिः**) अवकाश में चलती हुई (**आत्मन्वतीभिः**) और प्रशंसायुक्त विचारवाले क्रिया करने में चतुर पुरुष जिनमें विद्यमान उन (**नौभिः**) नावों से (**ऊहथुः**) एक स्थान से दूसरे स्थान को पहुंचाओ॥ ३॥

भावार्थः-जैसे कोई मरण चाहता हुआ मनुष्य धन, पुत्र आदि के मोह से छूट के शरीर से निकल जाता है, वैसे युद्ध चाहते हुए शूरों को अनुभव करना चाहिए। जब मनुष्य पृथिवी के किसी भाग से किसी भाग को समुद्र उतर कर शत्रुओं के जीतने को जाया चाहें, तब पुष्ट बड़ी-बड़ी कि जिनमें भीतर जल न जाता हो और जिनमें आत्मज्ञानी विचारवाले पुरुष बैठे हों और जो शस्त्र-अस्त्र आदि युद्ध की सामग्री से शोभित हों, उन नावों के साथ जावें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः॥४॥

तिस्रः। क्षपः। त्रिः। अहा। अतिव्रजत्ऽभिः। नासत्या। भुज्युम्। ऊहथुः। पतङ्गैः। समुद्रस्य। धन्वन्। आर्द्रस्य। पारे। त्रिऽभिः। रथैः। शतपत्ऽभिः। षट्ऽअश्वैः॥४॥

पदार्थः-(**तिस्रः**) त्रिसंख्याकाः (**क्षपः**) रात्रीः (**त्रिः**) त्रिवारम् (**अहा**) त्रीणि दिनानि (**अतिव्रजद्भिः**) अतिशयेन गमयतृभिर्द्रव्यैः (**नासत्या**) सत्येन परिपूर्णौ (**भुज्युम्**) राज्यपालकम् (**ऊहथुः**) प्राप्नुतम् (**पतङ्गैः**) अश्ववद्वेगिभिः (**समुद्रस्य**) सम्यग्द्रवन्त्यापो यस्मिन् तस्यान्तरिक्षस्य (**धन्वन्**) धन्वनो बहुसिकतस्य स्थलस्य (**आर्द्रस्य**) सपङ्कस्य सागरस्य (**पारे**) परभागे (**त्रिभिः**) भूम्यन्तरिक्षजलेषु गमयितृभिः (**रथैः**) रमणीयैर्विमानादिभिर्यानैः (**शतपद्भिः**) शतैर्गमनशीलैः पादवेगैः (**षडश्वैः**) षट् अश्वा आशुगमकाः कलायन्त्रस्थितिप्रदेशा येषु तैः॥४॥

अन्वयः-हे नासत्या सभासेनापती! युवां तिस्रः क्षपस्त्र्यहा दिनान्यतिव्रजद्भिः पतङ्गैः सहयुक्तैः षडश्वैः शतपद्भिस्त्रिभी रथैर्भुज्युं समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिरूहथुर्गमयेतम्॥४॥

भावार्थः-अहो मनुष्या यदा त्रिष्वहोरात्रेषु समुद्रादिपारावारं गमिष्यन्त्यागमिष्यन्ति तदा किमपि सुखं दुर्लभं स्थास्यति न किमपि॥४॥

पदार्थः-हे (**नासत्या**) सत्य से परिपूर्ण सभापति और सेनापति! तुम दोनों (**तिस्रः**) तीन (**क्षपः**) रात्रि (**अहा**) तीन दिन (**अतिव्रजद्भिः**) अतीव चलते हुए पदार्थ (**पतङ्गैः**) जो कि घोड़े के समान वेगवाले हैं, उनके साथ वर्त्तमान (**षडश्वैः**) जिनमे जल्दी ले जानेहारे छः कलों के घर विद्यमान उन (**शतपद्भिः**) सैकड़ों पग के समान वेगयुक्त (**त्रिभिः**) भूमि, अन्तरिक्ष और जल में चलनेहारे (**रथैः**) रमणीय सुन्दर मनोहर विमान आदि रथों से (**भुज्युम्**) राज्य की पालना करनेवाले को (**समुद्रस्य**) जिसमें अच्छे प्रकार

परमाणुरूप जल जाते हैं, उस अन्तरिक्ष वा **(धन्वन्)** जिसमें बहुत बालू है, उस भूमि वा **(आर्द्रस्य)** कींच के सहित जो समुद्र उसके **(पारे)** पार में **(त्रिः)** तीन बार **(ऊहथुः)** पहुंचाओ॥४॥

भावार्थः-आश्चर्य इस बात का है कि मनुष्य जो तीन दिन-रात में समुद्र स्थानों के अवार-पार जावें-आवेंगे तो कुछ भी सुख दुर्लभ रहेगा! किन्तु कुछ भी नहीं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम्॥५॥८॥

अनारम्भणे। तत्। अवीरयेथाम्। अनास्थाने। अग्रभणे। समुद्रे। यत्। अश्विनौ। ऊहथुः। भुज्युम्। अस्तम्। शतऽअरित्राम्। नावम्। आतस्थिऽवांसम्॥५॥

पदार्थः-**(अनारम्भणे)** अविद्यमानमारम्भणं यस्मिँस्तस्मिन् **(तत्)** तौ **(अवीरयेथाम्)** विक्रमेथाम् **(अनास्थाने)** अविद्यमानं स्थित्यधिकरणं यस्मिन् **(अग्रभणे)** न विद्यते ग्रहणं यस्मिन्। अत्र हस्यः भः। **(समुद्रे)** अन्तरिक्षे सागरे वा **(यत्)** यौ **(अश्विनौ)** विद्याप्राप्तिशीलौ **(ऊहथुः)** विद्युद्वायू इव सद्यो गमयेतम् **(भुज्युम्)** भोगसमूहम् **(अस्तम्)** अस्यन्ति दूरीकुर्वन्ति दुःखानि यस्मिँस्तद्गृहम्। **अस्तमिति गृहनामसु पठितम्।** (निघं०३.४) **(शतारित्राम्)** शतसंख्याकान्यरित्राणि जलपरिमाणग्रहणार्थानि स्तम्भनानि वा यस्याम् **(नावम्)** नुदन्ति चालयन्ति प्रेरते वा यां ताम्। **ग्लानुदिभ्यां डौः।** (उणा०२.६४) अनेनायं सिद्धः। **(आतस्थिवांसम्)** आस्थितम्॥५॥

अन्वयः-हे अश्विनौ! यद्यौ युवामनारम्भणेऽनास्थानेऽग्रभणे समुद्रे शतारित्रां नावमूहथुरस्तमातस्थिवांसं भुज्युमवीरयेथां विक्रमेथां तत् वयं सदा सत्कुर्याम॥५॥

भावार्थः-राजपुरुषैरालम्बविरहे मार्गे विमानादिभिरेव गन्तव्यं यावद् योद्धारो यथावन्न रक्ष्यन्ते तावच्छत्रवो जेतुं न शक्यन्ते। यत् शतमरित्राणि विद्यन्ते सा महाविस्तीर्णा नौर्विधातुं शक्यते। अत्र शतशब्दोऽसंख्यातवाच्यपि ग्रहीतुं शक्यते। अतोऽतिदीर्घाया नौकाया विधानमत्र गम्यते। मनुष्यैर्यावती नौर्विधातुं शक्यते तावतो निर्मातव्यैवं सद्योगामी जनो भूम्यन्तरिक्षगमनागमनार्थान्यपि यानानि विदध्यात्॥५॥

पदार्थः-हे **(अश्विनौ)** विद्या में व्याप्त होनेवाले सभा सेनापति! **(यत्)** जो तुम दोनों **(अनारम्भणे)** जिसमें आने-जाने का आरम्भ **(अनास्थाने)** ठहरने की जगह और **(अग्रभणे)** पकड़ नहीं है, उस **(समुद्रे)** अन्तरिक्ष वा सागर में **(शतारित्राम्)** जिसमें जल की थाह लेने को सौ बल्ली वा सौ खम्भे लगे रहते और **(नावम्)** जिसको जलाते वा पठाते उस नाव को बिजुली और पवन के वेग के

समान **(ऊहथुः)** बहाओ और **(अस्तम्)** जिसमें दुःखों को दूर करें उस घर में **(आतस्थिवांसम्)** धरे हुए **(भुज्युम्)** खाने-पीने के पदार्थ समूह को **(अवीरयेथाम्)** एक देश से दूसरे देश को ले जाओ, **(तत्)** उन तुम लोगों का हम सदा सत्कार करें॥५॥

भावार्थः-राजपुरुषों को चाहिये कि निरालम्ब मार्ग में अर्थात् जिसमें कुछ ठहरने का स्थान नहीं है, वहाँ विमान आदि यानों से ही जावें। जब तक युद्ध में लड़नेवाले वीरों की जैसी चाहिये वैसी रक्षा न की जाये, तब तक शत्रु जीते नहीं जा सकते। जिसमें सौ वल्ली विद्यमान हैं, वह बड़े फैलाव की नाव बनाई जा सकती है। इस मन्त्र में शत शब्द असंख्यातवाची भी लिया जा सकता है, इससे अतिदीर्घ नौका का बनाना इस मन्त्र में जाना जाता है। मनुष्य जितनी बड़ी नौका बना सकते हैं, उतनी बड़ी बनानी चाहिये। इस प्रकार शीघ्र जानेवाला पुरुष भूमि और अन्तरिक्ष में जाने-आने के लिये यानों को बनावे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति।
तद्वां दात्रं महि कीर्तेन्यं भूत् पैद्वो वाजी सदमिद्धव्यो अर्यः॥६॥

यम्। अश्विना। ददथुः। श्वेतम्। अश्वम्। अघऽअश्वाय। शश्वत्। इत्। स्वस्ति। तत्। वाम्। दात्रम्। महि। कीर्तेन्यम्। भूत्। पैद्वः। वाजी। सदम्। इत्। हव्यः। अर्यः॥६॥

पदार्थः-(यम्) **(अश्विना)** जलपृथिव्याविवाशुसुखदातारौ **(ददथुः)** **(श्वेतम्)** प्रवृद्धम् **(अश्वम्)** अध्वव्यापिनमग्निम् **(अघाश्वाय)** हन्तुमयोग्याय शीघ्रं गमयित्रे **(शश्वत्)** निरन्तरम् **(इत्)** एव **(स्वस्ति)** सुखम् **(तत्)** कर्म **(वाम्)** युवयोः **(दात्रम्)** दातुं योग्यम् **(महि)** महद्राज्यम् **(कीर्त्तेन्यम्)** कीर्त्तितुम् **(भूत्)** भवति **(पैद्वः)** सुखेन प्रापकः **(वाजी)** ज्ञानवान् **(सदम्)** सीदन्ति यस्मिन् याने तत् **(इत्)** एव **(हव्यः)** आदातुमर्हः **(अर्यः)** वणिग्जनः॥६॥

अन्वयः-हे अश्विना! युवामघाश्वाय वैश्याय यं श्वेतमश्वं भास्वरं विद्युदाख्यं ददथुर्दत्तः। येन शश्वत् स्वस्ति प्राप्य वां कीर्त्तेन्यं महि दात्रमिदेव गृहीत्वा पैद्वो वाजी तत् सदं रचयित्वाऽर्यश्च हव्यो भूद् भवति तदिदेव विधत्ताम्॥६॥

भावार्थः-यौ सभासेनाध्यक्षौ वणिजः संरक्ष्य यानेषु स्थापयित्वा द्वीपद्वीपान्तरे प्रेषयेतां तौ श्रियायुक्तौ भूत्वा सततं सुखिनौ जायेते॥६॥

पदार्थः-हे **(अश्विना)** जल और पृथिवी के समान शीघ्र सुख देनेहारो सभासेनापति! तुम दोनों **(अघाश्वाय)** जो मारने के न योग्य और शीघ्र पंहुचानेवाला है, उस वैश्य के लिये **(यम्)** जिस **(श्वेतम्)**

अच्छे बड़े हुए (**अश्वम्**) मार्ग में व्याप्त प्रकाशमान बिजुलीरूप अग्नि को (**ददथुः**) देते हो तथा जिससे (**शश्वत्**) निरन्तर (**स्वस्ति**) सुख को पाकर (**वाम्**) तुम दोनों की (**कीर्त्तेन्यम्**) कीर्त्ति होने के लिये (**महि**) बड़े राज्यपद (**दात्रम्**)और देने योग्य (**इत्**) ही पदार्थ को ग्रहण कर (**पैद्वः**) सुख से ले जानेहारा (**वाजी**) अच्छा ज्ञानवान् पुरुष उस (**सदम्**) रथ को कि जिसमें बैठते हैं, रच के (**अर्यः**) वणियां (**हव्यः**) पदार्थों के लेने योग्य (**भूत्**) होता है (**तत्, इत्**) उसी पूर्वोक्त विमानादि को बनाओ॥६॥

भावार्थः-जो सभा और सेना के अधिपति वणियों (=वणिकों) की भली-भांति रक्षा कर रथ आदि यानों मे बैठा कर द्वीप-द्वीपान्तर में पंहुचावे, वे बहुत धनयुक्त होकर निरन्तर सुखी होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिम्।
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः॥७॥

युवम्। नरा। स्तुवते। पज्रियाय। कक्षीवते। अरदतम्। पुरंमऽधिम्। कारोतरात्। शफात्। अश्वस्य। वृष्णः। शतम्। कुम्भान्। असिञ्चतम्। सुरायाः॥७॥

पदार्थः-(युवम्) युवाम् **(नरा)** नेतारौ विनयं प्राप्तौ **(स्तुवते)** स्तुतिं कुर्वते **(पज्रियाय)** पज्रेषु पद्रेषु पदेषु भवाय। अत्र पदधातोरौणादिको रक् वर्णव्यत्ययेन दस्य जः। ततो भवार्थे घः। **(कक्षीवते)** प्रशस्तशासनयुक्ताय **(अरदतम्)** सन् मार्गादिकं विज्ञापयताम् **(पुरन्धिम्)** पुरुं बहुविधां धियम्। पृषोदरादित्वादिष्टसिद्धिः। **(कारोतरात्)** कारान् व्यवहारान् कुर्वतः शिल्पिन उ इति वितर्के तरति येन **(शफात्)** खुरादिव जलसेकस्थानात् **(अश्वस्य)** तुरङ्गस्येवाग्निगृहस्य **(वृष्णः)** बलवतः **(शतम्)** शतसंख्याकान् **(कुम्भान्)** **(असिञ्चतम्)** सिञ्चतम् **(सुरायाः)** अभिषुतस्य रसस्य॥७॥

अन्वयः-हे नरा! युवं युवां पज्रियाय कक्षीवते स्तुवते विद्यार्थिने पुरन्धिमरदतम्। वृष्णोऽश्वस्य कारोतराच्छफात्सुरायाः पूर्णान् शतं कुम्भानसिञ्चतम्॥७॥

भावार्थः-आप्तावध्यापको पुरुषौ यस्मै शमादियुक्ताय सज्जनाय विद्यार्थिने शिल्पकार्याय हस्तक्रियायुक्तां बुद्धिं जनयतः स प्रशस्तः शिल्पी भूत्वा यानानि रचयितुं शक्नोति। शिल्पिनो यस्मिन् याने जलं संसिच्याधोऽग्निं प्रज्वाल्य वाष्पैर्यानानि चालयन्ति तेन तेऽश्वैरिव विद्युदादिभिः पदार्थैः सद्यो देशान्तरं गन्तुं शक्नुयुः॥७॥

पदार्थः-हे **(नरा)** विनय को पाये हुए सभा सेनापति! **(युवम्)** तुम दोनों **(पज्रियाय)** पदों मे प्रसिद्ध होनेवाले **(कक्षीवते)** अच्छी सिखावट को सीखे और **(स्तुवते)** स्तुति करते हुए विद्यार्थी के लिये **(पुरन्धिम्)** बहुत प्रकार की बुद्धि और अच्छे मार्ग को **(अरदतम्)** चिन्ताओं तथा **(वृष्णः)** बलवान्

(अश्वस्य) घोड़े के समान अग्नि संबन्धी कलाघर के **(कारोतरात्)** जिससे व्यवहारों को करते हुए शिल्पी लोग तर्क के साथ पार होते हैं, उस **(शफात्)** खुर के समान जल सींचने के स्थान से **(सुरायाः)** खींचे हुए रस से भरे **(शतम्)** सौ **(कुम्भान्)** घड़ों को ले **(असिञ्चतम्)** सींचा करो॥७॥

भावार्थः-जो शास्त्रवेत्ता अध्यापक विद्वान् जिस शान्तिपूर्वक इन्द्रियों को विषयों से रोकने आदि गुणों से युक्त सज्जन विद्यार्थी के लिये शिल्पकार्य्य अर्थात् कारीगरी सिखाने को हाथ की चतुराईयुक्त बुद्धि उत्पन्न कराते अर्थात् सिखाते हैं, वह प्रशंसायुक्त शिल्पी अर्थात् कारीगर होकर रथ आदि को बना सकता है। शिल्पीजन जिस यान अर्थात् उत्तम विमान आदि रथ में जलघर से जल सींच और नीचे आग जलाकर भाफों से उसे चलाते हैं, उससे वे घोड़े से जैसे वैसे बिजुली आदि पदार्थों से शीघ्र एक देश से दूसरे देश को जा सकते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम्।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति॥८॥

हिमेन। अग्निम्। घ्रंसम्। अवारयेथाम्। पितुऽमतीम्। ऊर्जम्। अस्मै। अधत्तम्। ऋबीसे। अत्रिम्। अश्विना। अवऽनीतम्। उत्। निन्यथुः। सर्वऽगणम्। स्वस्ति॥८॥

पदार्थः-(हिमेनाग्निम्) शीतेनाग्निम् **(घ्रंसम्)** रात्र्या दिनम्। **घ्रंस इत्यहर्नामसु पठितम्।** (निघं०१.९) **(अवारयेथाम्)** निवारयेतम् **(पितुमतीम्)** प्रशस्तान्नयुक्ताम् **(ऊर्जम्)** पराक्रमाख्यां नीतिम् **(अस्मै)** **(अधत्तम्)** पोषयतम् **(ऋबीसे)** दुर्गतभासे व्यवहारे **(अत्रिम्)** अत्तारम्। **अदेस्त्रिनिश्च।** (उणा०४.६८) अत्र चकारात् त्रिबनुवर्त्तते। तेनादधातोस्त्रिप्। **(अश्विना)** यज्ञानुष्ठानशीलौ **(अवनीतम्)** अर्वाक् प्रापितम् **(उत्)** **(निन्यथुः)** नयतम् **(सर्वगणम्)** सर्वे गणा यस्मिंस्तत् **(स्वस्ति)** सुखम्॥८॥

यास्कमुनिरिमं मन्त्रमेवं व्याचष्टे-**ऋबीसमपगतभासमपहृतभासमन्तर्हितभासं गतभासं वा। हिमेनोदकेन ग्रीष्मान्तेऽग्निं घ्रंसमहरवारयेथाम्। अन्नवतीं चास्मा ऊर्जमधत्तमग्नये। योऽयमृबीसे पृथिव्यामग्निरन्तरौषधिवनस्पतिष्वप्सु तमुन्निन्यथुः। सर्वगणं सर्वनामानम्। गणो गणनात् गुणश्च। यद् वृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनो रूपम्। तेनैनौ स्तौति स्तौति।** (निरु० ६.३५.३६)॥८॥

अन्वयः-हे अश्विना! युवां हिमेनोदकेनाग्निं घ्रंसं चावारयेथामस्मै पितुमतीमूर्जमधत्तमृबीसेऽत्रिमवनीतं सर्वगणं स्वस्ति चोन्निन्यथुरूर्ध्वं नयतम्॥८॥

भावार्थः-विद्वद्भिरेतत्संसारसुखाय यज्ञेन शोधितेन जलेन वनरक्षणेन च परितापो निवारणीयः, संस्कृतेनान्नेन बलं प्रजननीयम्। यज्ञानुष्ठानेन त्रिविधदुःखं निवार्य सुखमुन्नेयम्॥८॥

पदार्थः-हे **(अश्विना)** यज्ञानुष्ठान करनेवाले पुरुषो! तुम दोनों **(हिमेन)** शीतल जल से **(अग्निम्)** आग और **(घ्रंसम्)** रात्रि के साथ दिन को **(अवारयेथाम्)** निर्वारो अर्थात् बिताओ। **(अस्मै)** इसके लिये **(पितुमतीम्)** प्रशंसित अन्नयुक्त **(ऊर्जम्)** बलरूपी नीति को **(अधत्तम्)** पुष्ट करो और **(ऋबीसे)** दुःख से जिसकी आभा जाती रही उस व्यवहार में **(अत्रिम्)** भोगनेहारे **(अवनीतम्)** पीछे प्राप्त कराये हुए **(सर्वगणम्)** जिसमे समस्त उत्तम पदार्थों का समूह है, उस **(स्वस्ति)** सुख को **(उन्नित्यथुः)** उन्नति देओ॥८॥

भावार्थः-विद्वानों को चाहिये कि इस संसार के सुख के लिये यज्ञ से शोधे हुए जल से और वनों के रखने से अति उष्णता **(खुश्की)** दूर करें। अच्छे बनाए हुए अन्न से बल उत्पन्न करें और यज्ञ के आचरण से तीन प्रकार के दुःख को निवार के सुख को उन्नति देवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मवारम्।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य॥९॥

परा। अवतम्। नासत्या। अनुदेथाम्। उच्चाऽबुध्नम्। चक्रथुः। जिह्मऽवारम्। क्षरन्। आपः। न। पायनाय। राये। सहस्राय। तृष्यते। गोतमस्य॥९॥

पदार्थः-(परा) **(अवतम्)** रक्षतम् **(नासत्या)** अग्निवायू इव वर्तमानौ **(अनुदेथाम्)** प्रेरयेथाम् **(उच्चाबुध्नम्)** उच्चा ऊर्ध्वं बुध्नमन्तरिक्षं यस्मिँस्तम् **(चक्रथुः)** कुरुतम् **(जिह्मवारम्)** जिह्मं कुटिलं वारो वरणं यस्य तम् **(क्षरन्)** क्षरन्ति **(आपः)** वाष्परूपाणि जलानि **(न)** इव **(पायनाय)** पानाय **(राये)** धनाय **(सहस्राय)** असंख्याताय **(तृष्यते)** तृषिताय **(गोतमस्य)** अतिशयेन गौः स्तोता गोतमस्तस्य॥९॥

अन्वयः-हे अग्निवायुवद्वर्तमानौ नासत्याऽश्विनौ! युवां जिह्मवारमुच्चाबुध्नमवतमनेन कार्य्यसिद्धिं चक्रथुः कुरुतम्। तं पराऽनुदेथां यो गोतमस्य याने तृष्यते पायनायापः क्षरन्नेव सहस्राय राये जायेत तादृशं निर्मिमाथाम्॥९॥

भावार्थः-अत्रोपमालङ्कारः। शिल्पिभिर्विमानादियानेषु पुष्कलमधुरोदकाधारं कुण्डं निर्मायाग्निना संचाल्य तत्र संभारान् धृत्वा देशान्तरं गत्वाऽसंख्यातं धनं प्राप्य परोपकारः सेवनीयः॥९॥

पदार्थः-हे **(नासत्या)** आग और पवन के समान वर्त्तमान सभापति और सेनाधिपति! तुम दोनों **(जिह्मवारम्)** जिसकी टेड़ी लगन और **(उच्चाबुध्नम्)** उससे जिसमें ऊँचा अन्तरिक्ष अर्थात् अवकाश उस

रथ आदि को **(अवतम्)** रक्खो और अनेक कामों की सिद्धि **(चक्रथुः)** करो और उसको यथायोग्य व्यवहार में **(परा, अनुदेथाम्)** लगाओ। जो **(गोतमस्य)** अतीव स्तुति करने वाले के रथ पर **(तृष्यते)** प्यासे के लिये **(पायनाय)** पीने को **(आपः)** भाफरूप जल जैसे **(क्षरन्)** गिरते हैं **(न)** वैसे **(सहस्राय)** असंख्यात **(राये)** धन देने के लिये प्रसिद्ध होता है, वैसे रथ आदि को बनाओ॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। शिल्पी लोगों को विमानादि यानों में जिसमें बहुत मीठे जल की धार मावे, ऐसे कुण्ड को बना, आग से उस विमान आदि यान को चला, उसमें सामग्री को धर, एक देश से दूसरे देश को जाय और असंख्यात धन पाय के परोपकार का सेवन करना चाहिये॥९॥

अथ विधिः सामान्यत उपदिश्यते॥

अब सामान्य से विधि का उपदेश अगले मन्त्र में किया है॥

जुजुरुषो॑ नासत्योत व॒व्रिं प्रामु॑ञ्चतं द्रा॒पिमि॑व॒ च्यवा॑नात्।
प्राति॑रतं जहि॒तस्यायु॑र्दस्रादित्पति॑मकृणुतं क॒नीना॑म्॥ १०॥ ९॥

जु॒जु॒रुषः॑। ना॒स॒त्या॒। उ॒त। व॒व्रिम्। प्र। अ॒मु॒ञ्च॒त॒म्। द्रा॒पिम्ऽइ॑व। च्यवा॑नात्। प्र। अ॒ति॒र॒त॒म्। ज॒हि॒तस्य॑। आयुः॑। दस्रा॒। आत्। इत्। पति॑म्। अ॒कृ॒णु॒त॒म्। क॒नीना॑म्॥ १०॥

पदार्थः-(**जुजुरुषः**) जीर्णाद् वृद्धात् **(नासत्या)** **(उत)** अपि **(वव्रिम्)** संविभक्तारम् **(प्र, अमुञ्चतम्)** प्रमुञ्चेतम् **(द्रापिमिव)** यथा कवचम् **(च्यवानात्)** पालयमानात् **(प्र, अतिरतम्)** प्रतरेतम् **(जहितस्य)** हातुः। अत्र हा धातोरौणादिक इतच् प्रत्ययो बाहुलकात् सन्वच्च। **(आयुः)** जीवनम् **(दस्रा)** दातारौ **(आत्)** अनन्तरम् **(इत्)** एव **(पतिम्)** पालकं स्वामिनम् **(अकृणुतम्)** कुरुतम् **(कनीनाम्)** यौवनत्वेन दीप्तिमतीनां ब्रह्मचारिणीनां कन्यानाम्॥१०॥

अन्वयः-हे नासत्या राजधर्मसभापती! युवां च्यवानाद् द्रापिमिव वव्रिं प्राऽमुञ्चतं दुःखात् पृथक् कुरुतम्। उतापि जुजुरुषो विद्यावयोवृद्धादाप्तादध्यापकात् कनीनां शिक्षामकृणुतमात् समये प्राप्त एकैकस्या इदेवैकैकं पतिं च। हे दस्रा वैद्याविव प्राणदातारौ! जहितस्यायुः प्राऽतिरतम्॥१०॥

भावार्थः-अत्रोपमालङ्कारः। राजपुरुषैरुपदेशकैश्च दातॄणां दुःखं विनाशनीयम्। विद्यासुप्रवृत्तानां कुमारकुमारीणां रक्षणं विधाय विद्यासुशिक्षे प्रदापनीये, बाल्यावस्थायामर्थात् पञ्चविंशाद् वर्षात्प्राक् पुरुषस्य षोडशात् प्राक् स्त्रियाश्च विवाहं निवार्य्यात ऊर्ध्वं यावदष्टाचत्वारिंशद्वर्षं पुरुषस्याचतुर्विंशतिवर्षं स्त्रियाः स्वयंवरं विवाहं कारयित्वा सर्वेषामात्मशरीरबलमलं कर्त्तव्यम्॥१०॥

पदार्थः-हे **(नासत्या)** राजधर्म की सभा के पति! तुम दोनों **(च्यवानात्)** भागे हुये से **(द्रापिमिव)** कवच के समान **(वव्रिम्)** अच्छे विभाग करानेवाले को **(प्रामुञ्चतम्)** भलीभांति दुःख से पृथक् करो **(उत)** और **(जुजुरुषः)** बुड्ढे विद्यावान् शास्त्रज्ञ पढ़ानेवाले से **(कनीनाम्)** यौवनपन से

तेजधारिणी ब्रह्मचारिणी कन्याओं को शिक्षा **(अकृणुतम्)** करो **(आत्)** इसके अनन्तर नियत समय की प्राप्ति में उनमें से एक-एक **(इत्)** ही का एक-एक **(पतिम्)** रक्षक पति करो। हे **(दस्रा)** वैद्यों के समान प्राण के देनेहारो! **(जहितस्य)** त्यागी की **(आयुः)** आयुर्दा को **(प्रातिरतम्)** अच्छे प्रकार पार लों पहुंचाओ॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजपुरुष और उपदेश करनेवालों को देनेवालों का दुःख दूर करना चाहिये, विद्याओं में प्रवृत्ति करते हुए कुमार और कुमारियों की रक्षा कर विद्या और अच्छी शिक्षा उनको दिलवाना चाहिये। बालकपन में अर्थात् पच्चीस वर्ष के भीतर पुरुष और सोलह वर्ष के भीतर स्त्री के विवाह को रोक, इसके उपरान्त अड़तालीस वर्ष पर्य्यन्त पुरुष और चौबीस वर्ष पर्यन्त स्त्री का स्वयंवर विवाह कराकर सबके आत्मा और शरीर के बल को पूर्ण करना चाहिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तद्वां॑ नरा॒ शंस्यं॑ राध्यं॑ चाभिष्टि॒मन्ना॑सत्या॒ वरू॑थम्।
यद्वि॒द्वांसा॑ नि॒धिमि॒वाप॑गूळ्ह॒मुद्दर्श॒तादू॒पथु॒र्वन्द॑नाय॥ ११॥

तत्। वा॒म्। न॒रा॒। शंस्य॑म्। राध्य॑म्। च॒। अ॒भि॒ष्टि॒ऽमत्। ना॒स॒त्या॒। वरू॑थम्। यत्। वि॒द्वांसा॑। नि॒धिम्ऽइ॑व। अप॑ऽगूळ्हम्। उत्। दर्श॑तात्। ऊ॒पथुः॑। वन्द॑नाय॥ ११॥

पदार्थः-(तत्) (वाम्) युवयोः **(नरा)** धर्मनेतारौ **(शंस्यम्)** स्तुत्यं संसिद्धिकरम् **(राध्यम्)** राद्धुं संसाद्धुं योग्यम् **(च)** धर्मादिफलम् **(अभिष्टिमत्)** अभीष्टानि प्रशस्तानि सुखानि विद्यन्ते यस्मिंस्तत् **(नासत्या)** सर्वदा सत्यपालकौ **(वरूथम्)** वरणीयमुत्तमम् **(यत्) (विद्वांसा)** सकलविद्यावेत्तारौ **(निधिमिव) (अपगूढम्)** अपगतं संवरणमाच्छादनं यस्मात्तत् **(उत्) (दर्शतात्)** सुन्दराद् रूपात् **(ऊपथुः)** वपेथाम् **(वन्दनाय)** अभितः सत्कारार्हायापत्याय प्रशंसायै च॥११॥

अन्वयः-हे नरा नासत्या विद्वांसा धर्मराज सभास्वामिनौ! वां युवयोर्यच्छंस्यं राध्यं चाभिष्टिमद्वरूथमपगूढं पूर्वोक्तं गृहाश्रमसंबन्धि कर्मास्ति तन्निधिमिव दर्शताद्वन्दनायोदूपथुरूर्ध्वं सततं वपेथाम्॥११॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! विद्याकोशात्परं सुखप्रदं धनं किमपि यूयं मा जानीत, न खल्वेतेन कर्मणा विनाऽभीष्टान्यपत्यानि सुखानि च प्राप्तुं शक्यानि नैव समीक्षया विना विद्या वृद्धिर्जायत इत्यवगच्छत॥११॥

पदार्थः-हे **(नरा)** धर्म की प्राप्ति **(नासत्या)** और सदा सत्य की पालना करने और **(विद्वांसा)** समस्त विद्या जाननेवाले धर्मराज, सभापति विद्वानो! **(वाम्)** तुम दोनों का **(यत्)** जो **(शंस्यम्)**

प्रशंसनीय **(च)** और **(राध्यम्)** सिद्ध करने योग्य **(अभिष्टिमत्)** जिसमें चाहे हुए प्रशंसित सुख हैं **(वरूथम्)** जो स्वीकार करने योग्य **(अपगूढम्)** जिसमें गुप्तपन अलग हो गया ऐसा जो प्रथम कहा हुआ गृहाश्रमसंबन्धि कर्म है, **(तत्)** उसको **(निधिमिव)** धन के कोष के समान **(दर्शतात्)** दिखनौट **[**दर्शनीय सुन्दर**]** रूप से **(वन्दनाय)** सब ओर से सत्कार करने योग्य संतान और प्रशंसा के लिये **(उत्, ऊपथुः)** उच्च श्रेणी को पहुँचाओ अर्थात् उन्नति देओ॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! विद्यानिधि के परे सुख देनेवाला धन कोई भी तुम मत जानो। न इस कर्म के विना चाहे हुए संतान और सुख मिल सकते हैं और न सत्यासत्य के विचार से निर्णीत ज्ञान के विना विद्या की वृद्धि होती है, यह जानो॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तद्वां॑ नरा स॒नये॒ दंस॑ उ॒ग्रमा॒विष्कृ॑णोमि तन्य॒तुर्न वृ॒ष्टिम्।
दु॒ध्यङ् ह यन्मध्वा॑थर्व॒णो वा॒मश्व॑स्य शी॒र्ष्णा प्र यदी॑मु॒वाच॑॥ १२॥

तत्। वा॒म्। न॒रा॒। स॒नये॑। दंस॑ः। उ॒ग्रम्। आ॒विः। कृ॒णो॒मि॒। त॒न्य॒तुः। न। वृ॒ष्टिम्। दु॒ध्यङ्। ह॒। यत्। मधु॑। आ॒थ॒र्व॒णः। वा॒म्। अश्व॑स्य। शी॒र्ष्णा। प्र। यत्। ई॒म्। उ॒वाच॑॥ १२॥

पदार्थः-(तत्) (वाम्) (नरा) सुनीतिमन्तौ **(सनये)** सुखसेवनाय **(दंसः)** कर्म **(उग्रम्)** उत्कृष्टम् **(आविः)** प्रादुर्भावे **(कृणोमि) (तन्यतुः)** विद्युत् **(न)** इव **(वृष्टिम्) (दध्यङ्)** दधीन् विद्याधर्मधारकानञ्चन्ति प्राप्नोति सः **(ह)** किल **(यत्) (मधु)** मधुरं विज्ञानम् **(आथर्वणः)** अथर्वणोऽहिंसकस्यापत्यम् **(वाम्)** युवाभ्याम् **(अश्वस्य)** आशुगमकस्य द्रव्यस्य **(शीर्ष्णा)** शिरोवत्कर्मणा **(प्र) (यत्) (ईम्)** शास्त्रबोधम्। **ईमिति पदनामसु पठितम्।** (निघं०४.२) **(उवाच)** उच्यात्॥१२॥

अन्वयः-हे नरा वां युवयोः सकाशाद् दध्यङ्ङाथर्वणोऽहं सनये तन्यतुर्वृष्टिं नेव यदुग्रं दंस आविष्कृणोमि यद्यो विद्वान् वाम् मह्यं चाश्वस्य शीर्ष्णा मध्वीं ह प्रोवाच तद्युवां लोके सततमाविष्कुर्य्याथाम्॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा वृष्ट्या विना कस्यचिदपि सुखं न जायते, तथा विदुषोऽन्तरा विद्यामन्तरेण च सुखं बुद्धिवर्धनमेतेन विना धर्मादयः पदार्था न सिध्यन्ति, तस्मादेतत्कर्म मनुष्यैः सदाऽनुष्ठेयम्॥१२॥

पदार्थः-हे **(नरा)** अच्छी नीतियुक्त सभासेना के पति जनो! **(वाम्)** तुम दोनों से **(दध्यङ्)** विद्या धर्म को धारण करनेवालों का आदर करनेवाला **(आथर्वणः)** रक्षा करते हुए का सन्तान मैं **(सनये)** सुख के भलीभांति सेवन करने के लिये जैसे **(तन्यतुः)** बिजुली **(वृष्टिम्)** वर्षा को **(न)** वैसे जिस **(उग्रम्)**

उत्कृष्ट (**दंसः**) कर्म को (**आविष्कृणोमि**) प्रकट करता हूं, जो (**यत्**) विद्वान् (**वाम्**) तुम दोनों के लिये और मेरे लिये (**अश्वस्य**) शीघ्र गमन करानेहारे पदार्थ के (**शीर्ष्णा**) शिर के समान उत्तम काम से (**मधु**) मधुर (**ईम्**) शास्त्र के बोध को (**ह**) (**प्रोवाच**) कहे (**तत्**) उसे तुम दोनों लोक में निरन्तर प्रकट करो॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे वृष्टि के विना किसी को भी सुख नहीं होता है, वैसे विद्वानों और विद्या के विना सुख और बुद्धि बढ़ना और इसके विना धर्म आदि पदार्थ नहीं सिद्ध होते हैं, इससे इस कर्म का अनुष्ठान मनुष्यों को सदा करना चाहिये॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अजोॅहवीन्नासत्या क॒रा वां॑ म॒हे यामं॑न्पुरुभुजा॒ पुरं॑धिः।
श्रु॒तं तच्छासु॑रिव वध्रिम॒त्या हिर॑ण्यहस्तमश्विनावदत्तम्॥ १३॥

अजोॅहवीत्। नास॒त्या॒। क॒रा। वा॒म्। म॒हे। यामं॑न्। पुरु॑ऽभुजा॒। पुरं॑ऽधिः। श्रु॒तम्। तत्। शासु॑ःऽइव। वध्रि॑ऽम॒त्याः। हिर॑ण्यऽहस्तम्। अ॒श्वि॒नौ॒। अ॒द॒त्त॒म्॥ १३॥

पदार्थः-(अजोहवीत्) भृशं गृह्णीयात् (**नासत्या**) असत्याज्ञानविनाशनेन सत्यप्रकाशिनौ (**करा**) कुर्वाणौ (**वाम्**) युवयोः (**महे**) महते (**यामन्**) याम्ने सुखप्राप्तये। अत्र या धातोरौणादिको मनिन्। (**पुरुभुजा**) पुरून् बहूनानन्दान् भुङ्क्तस्तौ (**पुरन्धिः**) बहुविद्यायुक्तः (**श्रुतम्**) पठितम् (**तत्**) (**शासुरिव**) यथा पूर्णविद्यस्याध्यापकस्य सकाशाच्छिष्याः (**वध्रिमत्याः**) वध्रयः प्रशस्ता वृद्धयो विद्यन्ते यस्यास्तस्याः सत्स्त्रियः। अत्र वृधु धातोरौणादिको रिक् प्रत्ययो बाहुलकात् रेफलोपः। (**हिरण्यहस्तम्**) हिरण्यं हस्ते यस्मात् तम् (**अश्विनौ**) शुभगुणविद्याव्यापिनौ (**अदत्तम्**) दद्यातम्॥१३॥

अन्वयः-हे नासत्या पुरुऽभुजाऽश्विनावध्यापकौ! यः पुरन्धिर्विद्वान् वध्रिमत्याः करा महे यामन्नजोहवीद्वां युवयोर्यच्छुतं तच्छासुरिवाजोहवीत् तौ युवां सर्वेभ्यो विद्यां जिज्ञासुभ्यो यद्धिरण्यहस्तं श्रुतं तददत्तं सततं दद्यातम्॥१३॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! यथा विद्वान् विदुष्याः पाणिं गृहीत्वा गृहाश्रमव्यवहारं साधयति तथा बुद्धिमतो विद्यार्थिनः सङ्गृह्य पूर्णं विद्याप्रचारं कुरुत यथा चाध्यापकादध्येतारो विद्याः सङ्गृह्यानन्दिता भवन्ति तथा विद्वांसौ स्त्रीपुरुषौ स्वीयपरकीयापत्येभ्यः सुशिक्षया विद्यां दत्वा सदा प्रमोदेताम्॥१३॥

पदार्थः-हे (**नासत्या**) असत्य अज्ञान के विनाश से सत्य का प्रकाश करने (**पुरुभुजा**) बहुत आनन्दों के भोगने तथा (**अश्विनौ**) शुभ गुण और विद्या में व्याप्त होनेवाले अध्यापको! जो (**पुरन्धिः**)

बहुत विद्यायुक्त विद्वान् **(वध्रिमत्या:)** प्रशंसित जिसकी वृद्धि है, उस उत्तम स्त्री के **(करा)** कर्म करते हुए दो पुत्रों का **(महे)** अत्यन्त **(यामन्)** सुख भोगने के लिये **(अजोहवीत्)** निरन्तर ग्रहण करे और **(वाम्)** तुम दोनों का जो **(श्रुतम्)** सुना-पढ़ा है **(तत्)** उसको **(शासुरिव)** जैसे पूर्ण विद्यायुक्त पढ़ानेवाले से शिष्य ग्रहण करे, वैसे निरन्तर ग्रहण करे। वे तुम दोनों विद्या चाहनेवाले सब जनों के लिये जो ऐसा है कि **(हिरण्यहस्तम्)** जिससे हाथ में सुवर्ण आता है, उस पढ़े सीखे बोध को **(अदत्तम्)** निरन्तर देवो॥१३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! जैसे विद्वान् जन विदुषी स्त्री का पाणिग्रहण कर गृहाश्रम के व्यवहार को सिद्ध करे, वैसे बुद्धिमान् विद्यार्थियों का संग्रह कर पूर्ण विद्याप्रचार को करो और जैसे पढ़ानेवाले से पढ़नेवाले विद्या का संग्रह कर आनन्दित होते हैं, वैसे विद्वान् स्त्री-पुरुष अपने तथा औरों के सन्तानों को उत्तम शिक्षा से विद्या देकर सदा प्रमुदित होवें॥१३॥

पुनर्मनुष्यै: कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्तना चाहिये, यह विषय अगले मन्त्र में कहा है॥

आ॒स्नो वृ॑क॒स्य॒ वर्ति॑काम॒भीके॑ यु॒वं न॑रा नासत्यामुमुक्तम्।
उ॒तो क॒विं पु॑रुभुजा यु॒वं ह॒ कृ॒प॒माणमकृणुतं वि॒चक्षे॑॥ १४॥

आ॒स्न:। वृ॒क॒स्य। वर्ति॑काम्। अ॒भीके॑। यु॒वम्। न॒रा॒। ना॒स॒त्या॒। अ॒मु॒मु॒क्त॒म्। उ॒तो इति॑। क॒विम्। पु॒रु॒ऽभु॒जा॒। यु॒वम्। ह॒। कृ॒प॒माणम्। अ॒कृ॒णु॒त॒म्। वि॒ऽचक्षे॑॥ १४॥

पदार्थ:-(आस्न:) आस्यान्मुखात् **(वृकस्य)** **(वर्तिकाम्)** चटका पक्षिणीमिव **(अभीके)** कामिते व्यवहारे **(युवम्)** युवाम् **(नरा)** सुखप्रापकौ **(नासत्या)** असत्यविरहौ **(अमुमुक्तम्)** मोचयतम् **(उतो)** अपि **(कविम्)** विद्यापारदर्शिनं मेधाविनम् **(पुरुभुजा)** पुरून् बहून् जनान् सुखानि भोजयितारौ **(युवम्)** युवाम् **(ह)** खलु **(कृपमाणम्)** कृपां कर्त्तारम्। अत्र विकरणव्यत्ययेन श:। **(अकृणुतम्)** कुरुतम् **(विचक्षे)** विख्यापयितुम्। अत्र **तुमर्थे सेसेन्०।** (अष्टा०३.४.९)॥१४॥

अन्वय:-हे पुरुभुजा नासत्या नरा अश्विनौ! युवं युवामभीके वृकस्यास्न आस्याद् वर्तिकामिव सर्वान् मनुष्यानविद्याजन्यदु:खादमुमुक्तं मोचयतम्। उतो ह खल्वपि युवं सर्वा विद्या विचक्षे कृपमाणं कविमकृणुतम्॥१४॥

भावार्थ:-मनुष्यै: सुखरूपे सर्वस्याभीष्टे विद्याग्रहणव्यवहाराख्ये सर्वान् मनुष्यान् प्रवर्त्य दु:खफलादन्याय्यात् कर्मणो निवर्त्य सर्वेषां प्राणिनामुपरि कृपां विधाय सुखयितव्यम्॥१४॥

पदार्थ:-हे **(पुरुभुजा)** बहुत जनों को सुख को भोग कराने **(नासत्या)** झूठ से अलग रहने **(नरा)** और सुखों को पहुंचानेहारे सभा सेनापतियो! **(युवम्)** तुम दोनों **(अभीके)** चाहे हुए व्यवहार में

(वृकस्य) भेड़िया के **(आस्नः)** मुख से **(वर्तिकाम्)** चिरौटी के समान सब मनुष्यों को अविद्याजन्य दुःख से **(अमुमुक्तम्)** छुड़ाओ **(उतो)** और **(ह)** भी **(युवम्)** तुम दोनों सब विद्याओं को **(विचक्षे)** विख्यात करने को **(कृपमाणम्)** कृपा करनेवाले **(कविम्)** विद्या के पारगंता पुरुष को **(अकृणुतम्)** सिद्ध करो॥१४॥

भावार्थः–मनुष्यों को चाहिये कि सुखरूप सबके चाहे हुए विद्या ग्रहण के व्यवहार करने में सब मनुष्यों को प्रवृत्त करके जिसका दुःख फल है, उस अन्यायरूप काम से निवृत्त करके उन सब प्राणियों पर कृपा कर सुख देवें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम्।
सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम्॥ १५॥ १०॥

चरित्रम्। हि। वेः।इव। अच्छेदि। पर्णम्। आजा। खेलस्य। परि।ऽतक्म्यायाम्। सद्यः। जङ्घाम्। आयसीम्। विश्पलायै। धने। हिते। सर्तवे। प्रति। अधत्तम्॥ १५॥

पदार्थः-(चरित्रम्) शत्रुशीलम् **(हि)** प्रसिद्धौ **(वेरिव)** उड्डीयमानस्य पक्षिण इव **(अच्छेदि)** छिद्येत **(पर्णम्)** पक्षम् **(आजा)** संग्रामे **(खेलस्य)** खण्डस्य **(परितक्म्यायाम्)** रात्रौ। **परितक्म्या रात्रिः परित एनां तक्म। तक्मेत्युष्णनाम तकत इति सतः।** (निरु०११.२५) **(सद्यः)** शीघ्रम् **(जङ्घाम्)** हन्ति यया ताम् **(आयसीम्)** अयोविकाराम् **(विश्पलायै)** विशां प्रजानां पलायै सुखप्रापिकायै नीत्यै **(धने)** सुवर्णरत्नादौ **(हिते)** सुखवर्धके **(सर्त्तवे)** सर्त्तुं गन्तुम् **(प्रति)** प्रत्यक्षे **(अधत्तम्)** भरतम्॥१५॥

अन्वयः–हे अश्विनौ! युवाभ्यामाजा परितक्म्यायां खेलस्य चरित्रं वेरिव पर्णं सद्योऽच्छेदि। हिते धने विश्पलायै आयसीं जङ्घां सर्तवे हि प्रत्यधत्तम्॥१५॥

भावार्थः–अत्रोपमालङ्कारः। भद्रैः प्रजापालनतत्परै राजादिजनैः पक्षिणः पक्षाविव दुष्टचरित्रं युद्धे छेत्तव्यम्। शस्त्रास्त्राणि धृत्वा प्रजाः पालनीयाः। कुतो यः प्रजायाः करो गृह्यते तस्य प्रत्युपकारो रक्षणमेव वेद्यम्॥१५॥

पदार्थः–हे सभा सेनाधिपति! तुम दोनों से **(आजा)** संग्राम में **(परितक्म्यायाम्)** रात्रि में **(खेलस्य)** शत्रु के खण्ड का **(चरित्रम्)** स्वाभाविक चरित्र अर्थात् शत्रुजनों की अलग-अलग बनी हुई टोली-टोली की चालाकियाँ **(वेरिव)** उड़ते हुए पक्षी का जैसे **(पर्णम्)** पंख काटा जाये, वैसे **(सद्यः)** शीघ्र **(अच्छेदि)** छिन्न-भिन्न की जाये तथा तुम **(हिते)** सुख बढ़ानेवाले **(धने)** सुवर्ण आदि धन के **(निमित्त)** **(विश्पलायै)** प्रजाजनों को सुख पहुंचानेवाली नीति के लिये **(आयसीम्)** लोहे के विकार से

बनी हुई **(जङ्घाम्)** जिससे कि मारते हैं उसकी खाल को **(सर्त्तवे)** शत्रुओं पर जाने अर्थात् चढ़ाई करने के लिये **(हि)** ही **(प्रत्यधत्तम्)** प्रत्यक्ष धारण करो॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। प्रजाजनों की पालना करने में अत्यन्त चित्त दिये हुए भद्र राजा आदि जनों को चाहिये कि पखेरू के पंखों के समान दुष्टों के चरित्र को युद्ध में छिन्न-भिन्न करें। शस्त्र और अस्त्रों को धारण कर प्रजाजनों की पालना करें, क्योंकि जो प्रजाजनों से कर लिया जाता है, उसका बदला देना उन प्रजाजनों की रक्षा करना ही समझना चाहिये॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शतं मेषान् वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन्॥१६॥

शतम्। मेषान्। वृक्ये। चक्षदानम्। ऋज्राऽअश्वम्। तम्। पिता। अन्धम्। चकार। तस्मै। अक्षी इति। नासत्या। विऽचक्षे। आ। अधत्तम्। दस्रा। भिषजौ। अनर्वन्॥१६॥

पदार्थः-(शतम्) शतसंख्याकान् **(मेषान्)** स्पर्द्धकान् **(वृक्ये)** वृकस्य स्तेनस्य स्त्रियै स्तेन्यै **(चक्षदानम्)** व्यक्तोपदेशकम्। अत्र चक्षिङ् धातौरौणादिक आनक् प्रत्ययोऽदुगागमश्च बाहुलकात्। **(ऋज्राश्वम्)** सरलतुरङ्गम् **(तम्)** **(पिता)** प्रजापालकौ राजा **(अन्धम्)** चक्षुर्हीनम् **(चकार)** कुर्यात् **(तस्मै)** **(अक्षी)** चक्षुषी **(नासत्या)** सत्येन सह वर्त्तमानौ **(विचक्षे)** विविधदर्शनाय **(आ)** **(अधत्तम्)** पुष्येतम् **(दस्रा)** रोगोपक्षयितारौ **(भिषजौ)** सद्वैद्यौ **(अनर्वन्)** अनर्वणोऽविद्यमानज्ञानाय। **सुपां सु०** इति विभक्तिलुक्॥१६॥

अन्वयः-यो वृक्ये शतं मेषान् दद्याद् य ईदृगुपदिशेद् यस्स्तेनेषु ऋज्राश्वः स्यात्तं चक्षदानमृज्राश्वं पिताऽन्धमिव दुःखारूढं चकार। हे नासत्या दस्रा भिषजाविव वर्त्तमानावश्विनौ धर्मराजसभाधीशौ! युवां योऽविद्यावान् कुपथगामी जारो रोगी वर्त्तते तस्मा अनर्वन्नविदुषे विचक्षे अक्षी व्यवहारपरमार्थविद्यारूपे अक्षिणी आऽधत्तं समन्तात्पोषयतम्॥१६॥

भावार्थः-ससभो राजा हिंसकान् चोरान् लम्पटान् जनान् कारागृहेऽन्धानिव कृत्वोपदेशेन व्यवहारशिक्षया च धार्मिकान् सम्पाद्य धर्मविद्याप्रियान् पथ्यौषधिदानेनारोग्यांश्च कुर्य्यात्॥१६॥

पदार्थः-जो **(वृक्ये)** वृकी अर्थात् चोर की स्त्री के लिये **(शतम्)** सैकड़ों **(मेषान्)** ईर्ष्या करनेवालों को देवे वा जो ऐसा उपदेश करे और जो चारों में सूधे घोड़ोंवाला हो **(तम्)** उस **(चक्षदानम्)** स्पष्ट उपदेश करने वा **(ऋज्राश्वम्)** सूधे घोड़ेवाले को **(पिता)** प्रजाजनों की पालना करनेहारा राजा जैसे

(अन्धम्) अन्धा दु:खी होवे वैसा दु:खी **(चकार)** करे। हे **(नासत्या)** सत्य के साथ वर्त्ताव रखने और **(दस्रा)** रोगों का विनाश करनेवाले धर्मराज सभापति **(भिषजौ)** वैद्यजनों के तुल्य वर्त्ताव रखनेवालो! तुम दोनों जो अज्ञानी कुमार्ग से चलनेवाले व्यभिचारी और रोगी है, **(तस्मै)** उस **(अनर्वन्)** अज्ञानी के लिये **(विचक्षे)** अनेकविध देखने को **(अक्षी)** व्यवहार और परमार्थ विद्यारूपी आँखों को **(आ, अधत्तम्)** अच्छे प्रकार पोढ़ी **[**पुष्ट**]** करो॥१६॥

भावार्थ:-सभा के सहित राजा हिंसा करनेवाले, चोर, कपटी, छली मनुष्यों को काराघर में अन्धों के समान रख कर और अपने उपदेश अर्थात् आज्ञारूप शिक्षा और व्यवहार की शिक्षा से धर्मात्मा कर, और विद्या में प्रीति रखनेवालों को उनकी प्रकृति के अनुकूल ओषधि देकर उनको आरोग्य करे॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वां॑ रथं॑ दुहि॒ता सूर्य॑स्य॒ कार्ष्मे॑वातिष्ठ॒दर्व॑ता॒ जय॑न्ती।
विश्वे॑ दे॒वा अन्व॑मन्यन्त हृ॒द्भिः सम्॒ श्रिया॑ ना॑सत्या सचेथे॥ १७॥

आ। वा॒म्। रथ॑म्। दु॒हि॒ता। सूर्य॑स्य। कार्ष्म॑ऽइव। अ॒ति॒ष्ठ॒त्। अर्व॑ता। जय॑न्ती। विश्वे॑। दे॒वाः॒। अनु॑। अ॒म॒न्य॒न्त॒। हृ॒त्ऽभिः। सम्। ऊ॒म्ऽइति॑। श्रि॒या। ना॒स॒त्या॒। स॒चे॒थे॒ इति॑॥ १७॥

पदार्थ:-(आ) **(वाम्)** युवयो: सभासेनेशयो: **(रथम्)** विमानादियानम् **(दुहिता)** दूरे हिता कन्येव कान्तिरूषा: **(सूर्य्यस्य)** **(कार्ष्मेव)** यथा काष्ठादिकं द्रव्यम् **(अतिष्ठत्)** तिष्ठतु **(अर्वता)** अश्वेन युक्तम् **(जयन्ती)** उत्कर्षतां प्राप्नुवती सेना **(विश्वे)** सर्वे **(देवा:)** विद्वांस: **(अनु)** पश्चात् **(अमन्यन्त)** मन्यन्ताम् **(हृद्भि:)** चित्तै: **(सम्)** **(उ)** **(श्रिया)** शुभलक्षणा लक्ष्म्या **(नासत्या)** सद्विज्ञानप्रकाशकौ **(सचेथे)** सङ्गच्छेथाम्॥१७॥

अन्वय:-हे नासत्या सभासेनेशौ! सूर्य्यस्य दुहितेव कार्ष्मेव वां युवयोर्जयन्ती सेनार्वता युक्तं रथमातिष्ठत् समन्तात्तिष्ठतु। यं विश्वे देवा हृद्भिरन्वमन्यन्त तामु श्रिया युक्तां सेना युवां सं सचेथे॥१७॥

भावार्थ:-अत्रोपमालङ्कार:। हे मनुष्या! अखिलविद्वत्प्रशंसितां शस्त्रास्त्रवाहनसंभारादिसहितां श्रीमतीं सेनां संसाध्य सूर्य्य इव धर्मन्यायं यूयं प्रकाशयत॥१७॥

पदार्थ:-हे **(नासत्या)** अच्छे विज्ञान का प्रकाश करनेवाले सभा सेनापति जनो! **(सूर्य्यस्य)** सूर्य्य की **(दुहिता)** जो दूरदेश में हित करनेवाली कन्या जैसी कान्ति प्रात:समय की वेला और **(कार्ष्मेव)** काठ आदि पदार्थों के समान **(वाम्)** तुम लोगों की **(जयन्ती)** शत्रुओं को जीतनेवाली सेना **(अर्वता)** घोड़े से जुड़े हुए **(रथम्)** रथ को **(आ, अतिष्ठत्)** स्थित हो अर्थात् रथ पर स्थित होवे वा जिसको **(विश्वे)**

समस्त **(देवाः)** विद्वान् जन **(हृद्भिः)** अपने चित्तों से **(अनु, अमन्यन्त)** अनुमान करें, उसको **(उ)** तो **(श्रिया)** शुभ लक्षणों वाली लक्ष्मी अर्थात् अच्छे धन से युक्त सेना को तुम लोग **(सं, सचेथे)** अच्छे प्रकार इकट्ठा करो॥१७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! समस्त विद्वानों ने प्रशंसा की हुई शस्त्र, अस्त्र, वाहन तथा सामग्री आदि सहित धनवती सेना को सिद्ध कर जैसे सूर्य्य अपना प्रकाश करे, वैसे तुम लोग धर्म और न्याय का प्रकाश कराओ॥१७॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

यदया॑तं दिवो॑दासाय व॒र्तिर्भ॒रद्वा॑जायाश्विना॒ हय॑न्ता।
रे॒वदु॑वाह सच॒नो रथो॑ वां वृष॒भश्च॑ शिंशु॒मार॑श्च यु॒क्ता॥१८॥

यत्। अया॑तम्। दिव॑ःऽदासाय। व॒र्तिः। भ॒रत्ऽवा॑जाय। अ॒श्वि॒ना॒। हय॑न्ता। रे॒वत्। उ॒वा॒ह॒। स॒च॒नः। रथ॑ः। वा॒म्। वृ॒ष॒भः। च॒। शिं॒शु॒मार॑ः। च॒। यु॒क्ता॥१८॥

पदार्थः-(यत्) (अयातम्) प्राप्नुतम् **(दिवोदासाय)** न्यायविद्याप्रकाशस्य दात्रे **(वर्त्तिः)** वर्त्तमानम् **(भरद्वाजाय)** भरन्तः पुष्यन्तः पुष्टिमन्तो वाजा वेगवन्तो योद्धारो तस्य तस्मै **(अश्विना)** शत्रुसेनाव्यापिनौ **(हयन्ता)** गच्छन्तौ **(रेवत्)** बहुधनयुक्तम् **(उवाह)** वहति **(सचनः)** सर्वैः सेनाङ्गैः स्वाङ्गैश्च समवेतः **(रथः)** रमणीयः **(वाम्)** युवयोः **(वृषभः)** विजयवर्षकः **(च)** दृढः **(शिंशुमारः)** शिंशून् धर्मोल्लङ्घिनः शत्रून् मारयति येन सः **(च)** तत्सहायकान् **(युक्ता)** कृतयोगाभ्यासौ॥१८॥

अन्वयः-हे हयन्ता युक्ताश्विना सभासेनाधीशौ! युवां दिवोदासाय भरद्वाजाय यद्वर्त्ती रेवदयातं प्राप्नुतम्। यच्च वां युवयोर्वृषभः शिंशमारः सचनो रथ उवाह तं तच्च सततं संरक्षतम्॥१८॥

भावार्थः-राजादिभिः राजपुरुषैः सर्वा स्वसामग्री न्यायेन राज्यपालनायैव विधेया॥१८॥

पदार्थः-हे **(हयन्ता)** चलने **(युक्ता)** योगाभ्यास करने और **(अश्विना)** शत्रुसेना में व्याप्त होनेवाले सभा सेना के पतियो! तुम दोनों **(दिवोदासाय)** न्याय और विद्या के प्रकाश के देनेवाले **(भरद्वाजाय)** जिसके कि पुष्ट होते हुए पुष्टिमान् वेगवाले योद्धा हैं, उसके लिये **(यत्)** जिस **(वर्त्तिः)** वर्त्तमान **(रेवत्)** अत्यन्त धनयुक्त गृह आदि वस्तु को **(अयातम्)** प्राप्त होओ **(च)** और जो **(वाम्)** तुम दोनों का **(वृषभः)** विजय की वर्षा करानेहारा **(शिंशुमारः)** जिससे धर्म को उल्लङ्घ के चलानेहारों का विनाश करता है, जो कि **(सचनः)** समस्त अपने सेनाङ्गों से युक्त **(रथः)** मनोहर विमानादि रथ तुम लोगों को चाहे हुए स्थान में **(उवाह)** पहुंचाता है, उसकी **(च)** तथा उक्त गृह आदि की रक्षा करो॥१८॥

भावार्थः–राजा आदि राजपुरुषों को समस्त अपनी सामग्री न्याय से राज्य की पालना करने ही के लिये बनानी चाहिये॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

र॒यिं सु॑क्ष॒त्रं स्व॑प॒त्यमायु॑: सु॒वीर्यं॑ नासत्या॒ वह॑न्ता।
आ ज॒ह्नावी॑ं सम॑न॒सोप॒ वाजै॒स्त्रिरह्नो॑ भा॒गं दध॑तीमयातम्॥१९॥

र॒यिम्। सु॒ऽक्ष॒त्रम्। सु॒ऽअ॒प॒त्यम्। आयु॑:। सु॒ऽवीर्य॑म्। ना॒स॒त्या॒। वह॑न्ता। आ। ज॒ह्नावी॑म्। सऽम॑नसा। उप॑। वाजै॑:। त्रि:। अह्न॑:। भा॒गम्। दध॑तीम्। अ॒या॒त॒म्॥१९॥

पदार्थः-(रयिम्) श्रीसमूहम् **(सुक्षत्रम्)** शोभनं राज्यम् **(स्वपत्यम्)** शोभनं सन्तानम् **(आयुः)** चिरञ्जीवनम् **(सुवीर्यम्)** उत्तमं पराक्रमम् **(नासत्या)** सत्यपालकौ सन्तौ **(वहन्ता)** प्राप्नुवन्तौ **(आ) (जह्नावीम्)** जहत्यास्त्याज्यायाः शत्रुसेनाया इमां विरोधिनीं सेनाम्। अत्र **जहातेर्ड्वेऽन्त्यलोपश्च**। (उणा०३.३६) इति हाधातो नुस्ततस्**तस्येदमि**त्यण्। पृषोदरादित्वाद्वर्णविपर्ययः। **(समनसा)** समानं मनो विज्ञानं ययोस्तौ **(उप) (वाजैः)** ज्ञानवेगयुक्तैर्भृत्यादिभिः सह वर्त्तमानम् **(त्रिः)** त्रिवारम् **(अह्नः)** दिवसस्य **(भागम्)** भजनीयं समयम् **(दधतीम्)** धरन्तीम् **(अयातम्)** प्राप्नुतम्॥१९॥

अन्वयः–हे समनसा वहन्ता नासत्याश्विनौ सभासेनेशौ! युवां सनातनन्यायसेवनाद्रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं वाजैः सह वर्तमानां जह्नावीमह्नो भागं त्रिर्दधतीं सेनामुपायातं सम्यक् प्राप्नुतम्॥१९॥

भावार्थः–नहि कश्चिद्विद्यासत्यन्यायसेवनमन्तरैतानि धनादीनि प्राप्य रक्षित्वा सुखं कर्त्तुं शक्नोति तस्माद्धर्मसेवनेनैव राज्यादिकं प्राप्तुं शक्यम्॥१९॥

पदार्थः–हे **(समनसा)** समान विज्ञानवाले **(वहन्ता)** उत्तम सुख को प्राप्त हुए **(नासत्या)** सत्यधर्मपालक सभा सेना के अधिपतियो! तुम दोनों सनातन न्याय के सेवन से **(रयिम्)** धनसमूह **(सुक्षत्रम्)** अच्छे राज्य **(स्वपत्यम्)** अच्छे सन्तान **(आयुः)** चिरकाल जीवन **(सुवीर्य्यम्)** उत्तम पराक्रम को और **(वाजैः)** ज्ञान वा वेगयुक्त भृत्यादिकों के साथ वर्त्तमान **(जह्नावीम्)** छोड़ने योग्य शत्रुओं की सेना की विरोधिनी इस सेना को तथा **(अह्नः)** दिन के **(भागम्)** सेवने योग्य विभाग अर्थात् समय को और **(त्रिः)** तीन वार **(दधतीम्)** धारण करती हुई सेना के **(उप, आ, अयातम्)** समीप अच्छे प्रकार प्राप्त होओ॥१९॥

भावार्थः–कोई विद्या और सत्यन्याय के सेवन के विना इन धन आदि पदार्थों को प्राप्त हो और इनकी रक्षा कर सुख नहीं कर सकता है, इससे धर्म के सेवन से ही राज्य आदि प्राप्त हो सकता है॥१९॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम्॥ २०॥ ११॥

परिऽविष्टम्। जाहुषम्। विश्वतः। सीम्। सुऽगेभिः। नक्तम्। ऊहथुः। रजःऽभिः। विऽभिन्दुना। नासत्या। रथेन। वि। पर्वतान्। अजरयू इति। अयातम्॥ २०॥

पदार्थः-(परिविष्टम्) सर्वतो व्याप्नुतम् **(जाहुषम्)** जहुषां गन्तव्यानामिदं गमनम्। अत्र **ओहाङ्गतौ**वित्यस्मादौणादिक उसिस्ततस्**तस्येदम**मित्यण्। **(विश्वतः)** सर्वतः **(सीम्)** मर्य्यादाम् **(सुगेभिः)** सुखेन गमनाधिकरणैर्मार्गैः **(नक्तम्)** रात्रिम् **(ऊहथुः)** वहतम् **(रजोभिः)** लोकैः **(विभिन्दुना)** विविधभेदकेन **(नासत्या) (रथेन) (वि) (पर्वतान्)** मेघान् शैलान् वा **(अजरयू)** जरादिदोषरहितौ **(अयातम्)** प्राप्नुयातम्॥ २०॥

अन्वयः-हे नासत्या! युवां यथाऽजरयू सूर्याचन्द्रमसौ सुगेभी रजोभिर्लोकैः सह नक्तं पर्वतान् मेघान् वहतस्तथा विभिन्दुना रथेन सैन्यमूहथुः। विश्वतः सीं परिविष्टं जाहुषं राज्यं प्राप्य पर्वततुल्यान् शत्रून् व्ययातम्॥ २०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्काराः। यथा राजसभासदो धर्म्यमार्गे राज्यं प्राप्य दुर्गस्थान् पर्वतादिस्थांश्चापि शत्रून् वशीकृत्य स्वप्रभावं प्रकाशयन्ति तथा सूर्याचन्द्रमसौ पृथिवीस्थान् पदार्थान् प्रकाशयतः। यथैतयोरसन्निहितेऽन्धकारो जायते तथैतेषामभावेऽन्यायतमः प्रवर्त्तते॥ २०॥

पदार्थः-हे **(नासत्या)** सत्य धर्म के पालनेहारे सभासेनाधीशो! तुम दोनों जैसे **(अजरयू)** जीर्णता आदि दोषों से रहित सूर्य और चन्द्रमा **(सुगेभिः)** जिनमें कि सुख से गमन हो उन मार्ग और **(रजोभिः)** लोकों के साथ **(नक्तम्)** रात्रि और **(पर्वतान्)** मेघ वा पहाड़ों को यथायोग्य व्यवहारों में लाते हैं, वैसे **(विभिन्दुना)** विविध प्रकार से छिन्न-भिन्न करनेवाले **(रथेन)** रथ से सेना को यथायोग्य कार्य में **(ऊहथुः)** पहुंचाओ, **(विश्वतः)** सब ओर से **(सीम्)** मर्यादा को **(परिविष्टम्)** व्याप्त होओ, **(जाहुषम्)** प्राप्त होने योग्य नगरादि के राज्य को पाकर पर्वत के तुल्य शत्रुओं को **(वि, अयातम्)** विभेद कर प्राप्त होओ॥ २०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार हैं। जैसे राजा के सभासद् जन धर्म के अनुकूल मार्गों से राज्य पाकर किला में वा पर्वत आदि स्थानों में ठहरे हुए शत्रुओं को वश में करके अपने प्रभाव को प्रकाशित करते हैं, वैसे सूर्य और चन्द्रमा पृथिवी के पदार्थों को प्रकाशित करते हैं। जैसे इन सूर्य्य

और चन्द्रमा के निकट न होने से अन्धकार उत्पन्न होता है, वैसे राजपुरुषों के अभाव में अन्यायरूपी अन्धकार प्रवृत हो जाता है॥ २०॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः॥ २१॥

एकस्याः। वस्तोः। आवतम्। रणाय। वशम्। अश्विना। सनये। सहस्रा। निः। अहतम्। दुच्छुनाः। इन्द्रऽवन्ता। पृथुऽश्रवसः। वृषणौ। अरातीः॥ २१॥

पदार्थः-(एकस्याः) सेनायाः **(वस्तोः)** दिनस्य मध्ये **(आवतम्)** विजयं कामयतम् **(रणाय)** संग्रामाय **(वशम्)** स्वाधीनताम् **(अश्विना)** सूर्य्याचन्द्रमसाविव सभासेनेशौ **(सनये)** राज्यसेवनाय **(सहस्रा)** असंख्यातानि धनादिवस्तूनि **(निः)** नितराम् **(अहतम्)** हन्याताम् **(दुच्छुनाः)** दुर्गतं शुनं सुखं याभ्यस्ताः। अत्र वर्णव्यत्ययेन सस्य तः। **शुनमिति सुखनामसु पठितम्।** (निघं०३.६) **(इन्द्रवन्ता)** बह्वैश्वर्ययुक्तो **(पृथुश्रवसः)** पृथूनि विस्तृतानि श्रवांस्यन्नानि यासां ताः **(वृषणौ)** शस्त्रास्त्रवर्षयितारौ बलवन्तौ **(अरातीः)** सुखदानरहिताः शत्रुसेनाः॥ २१॥

अन्वयः-हे वृषणाविन्द्रवन्ताश्विना सभासेनेशौ! दुच्छुना यथा तमो मेघांश्च सूर्य्यो जयति तथैकस्याः सेनाया रणाय प्रेषणेन वस्तोर्दिनस्य मध्ये स्वसेनामावतं वशं सहस्रा सनये पृथुश्रवसोऽरातीः शत्रुसेना निरहतम्॥ २१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्याचन्द्रमसोरुदयेन तमो निवृत्य सर्वे प्राणिन आनन्दन्ति तथा धर्मव्यवहारेण शत्रूणामधर्मस्य च निवृत्या धार्मिकाः सुराज्ये सुखयन्ति॥ २१॥

पदार्थः-हे **(वृषणौ)** शस्त्र-अस्त्र की वर्षा करनेवाले **(इन्द्रवन्ता)** बहुत ऐश्वर्ययुक्त **(अश्विना)** सूर्य्य और चन्द्रमा के तुल्य सभा और सेना के अधीशो! **(दुच्छुनाः)** जिससे सुख निकल गया, उन शत्रु सेनाओं को जैसे अन्धकार और मेघों को सूर्य्य जीतता है, वैसे **(एकस्याः)** एक सेना के **(रणाय)** संग्राम के लिये जो पठाना है, उससे **(वस्तोः)** एक दिन के बीच **(आवतम्)** अपनी सेना के विजय को चाहो और उन सेनाओं को अपने **(वशम्)** वश में लाकर **(सहस्रा)** **(सनये)** हजारों धनादि पदार्थों को भोगने के लिये **(पृथुश्रवसः)** जिनके बहुत अन्न आदि पदार्थ हैं और **(अरातीः)** जो किसी को सुख नहीं देती उन शत्रुसेनाओं को **(निरहतम्)** निरन्तर मारो॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य और चन्द्रमा के उदय से अन्धकार की निवृत्ति होकर सब प्राणी सुखी होते हैं, वैसे धर्मरूपी व्यवहार से शत्रुओं और अधर्म की निवृत्ति होने से धर्मात्मा जन अच्छे राज्य में सुखी होते हैं॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शरस्य॑ चिदार्च॒त्कस्या॑व॒तादा नी॒चादु॒च्चा च॑क्रथुः पात॑वे॒ वाः॥
शय॑वे॑ चिन्नासत्या॒ शची॑भि॒र्जसु॑रये॒ स्तर्य॑म् पिप्यथु॒र्गाम्॥ २२॥

शर॑स्य॑। चित्। आ॒र्च॒त्ऽकस्य॑। अ॒व॒तात्। आ। नी॒चात्। उ॒च्चा। च॒क्र॒थुः। पात॑वे। वारिति॒ वाः। शय॑वे॑। चि॒त्। ना॒स॒त्या॒। शची॑भिः। जसु॑रये। स्तर्य॑म्। पि॒प्य॒थुः। गाम्॥ २२॥

पदार्थः-(**शरस्य**) हिंसकस्य सकाशात् (**चित्**) अपि (**आर्चत्कस्य**) अर्चतः सत्कुर्वतः शिष्टस्यानुकम्पकस्य। अत्रार्चधातोर्बाहुलकादौणादिकोऽतिः प्रत्ययस्ततोऽनुकम्पायां कः। (**अवतात्**) हिंसकाद् रक्षकाद्वा (**आ**) (**नीचात्**) निकृष्टानि कर्माणि सेवमानात् (**उच्चा**) उच्चादुत्कृष्टकर्मसेवमानात्। अत्र **सुपां सुलुगिति** पञ्चम्यैकवचनस्याकारादेशः। (**चक्रथुः**) कुर्य्याताम् (**पातवे**) पातुम् (**वाः**) वारि। **वारित्युदकनामसु पठितम्।** (निघं०१.१२) (**शयवे**) शयानाय (**चित्**) अपि (**नासत्या**) सत्यविज्ञानौ (**शचीभिः**) प्रज्ञाभिः (**जसुरये**) हिंसकाय (**स्तर्यम्**) स्तरीषु नौकादियानेषु साधुम् (**पिप्यथुः**) वर्द्धेथाम्। अत्र व्यत्ययेन परस्मैपदम्। (**गाम्**) पृथिवीम्॥ २२॥

अन्वयः-हे नासत्या! युवां शचीभिः शरस्य सकाशादागतान्नीचादवताच्चिदप्यार्चत्कस्य सकाशादागतादुच्चावतात् प्रजाः पातवे बलमाचक्रथुः चिदपि शयवे जसुरये स्तर्यं वार्गां च पिप्यथुः॥ २२॥

भावार्थः-हे मनुष्या! यूयं शत्रुनाशकस्य मित्रपूजकस्य जनस्य सत्कारं कुरुत तस्मै पृथिवीं दद्यात् च। यथा वायुसूर्यौ भूमिवृक्षेभ्यो जलमुत्कृष्य वर्षयित्वा सर्वं वर्धयतस्तथैवोत्कृष्टैः कर्मभिर्जगद्वर्धयत॥ २२॥

पदार्थः-हे (**नासत्या**) सत्यविज्ञानयुक्त सभासेनाधीशो! तुम दोनों (**शचीभिः**) अपनी बुद्धियों से (**शरस्य**) मारनेवाले की ओर से आये (**नीचात्**) नीच कामों का सेवन करते हुए (**अवतात्**) हिंसा करने वाले से (**चित्**) और (**आर्चत्कस्य**) दूसरों की प्रशंसा करने वा सत्कार करते हुए शिष्टजन की ओर से आये (**उच्चा**) उत्तम कर्म को सेवते हुए रक्षा करनेवाले से प्रजाजनों को (**पातवे**) पालने के लिये बल को (**आ, चक्रथुः**) अच्छे प्रकार करो (**चित्**) और (**शयवे**) सोते हुए और (**जसुरये**) हिंसक जनों के लिये

(स्तर्य्यम्) जो नौका आदि यानों में अच्छा है, उस **(वाः)** जल और **(गाम्)** पृथिवी को **(पिप्यथुः)** बढ़ाओ॥ २२॥

भावार्थः-हे मनुष्यो! तुम शत्रुओं के नाशक और मित्रजनों की प्रशंसा करनेवाले जन का सत्कार करो और उसके लिये पृथिवी देओ, जैसे पवन और सूर्य भूमि और वृक्षों से जल को खैंच और वर्षा कर सबको बढ़ाते हैं, वैसे ही उत्तम कामों से संसार को बढ़ाओ॥ २२॥

अथाध्यापकोपदेशकौ किं कुर्यातामित्याह॥

अब पढ़ाने और उपदेश करनेवाले क्या करें, यह विषय अगले मन्त्र में कहा है॥

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः।
पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय॥ २३॥

अवस्यते। स्तुवते। कृष्णियाय। ऋजुऽयते। नासत्या। शचीभिः। पशुम्। न। नष्टम्ऽइव। दर्शनाय। विष्णाप्वम्। ददथुः। विश्वकाय॥ २३॥

पदार्थः-(अवस्यते) आत्मनोऽवो रक्षणादिकमिच्छते **(स्तुवते)** धर्मं श्लाघमानाय **(कृष्णियाय)** कृष्णमाकर्षणमर्हाय। **वा छन्दसि सर्वे विधयो भवन्ती**ति घः। **(ऋजूयते)** ऋजुरिवाचरति तस्मै **(नासत्या)** असत्यत्यागेन सत्यग्रहिणौ **(शचीभिः)** सुशिक्षिकाभिर्वाग्भिः **(पशुम्) (न)** इव **(नष्टमिव)** यथाऽदर्शनं प्राप्तं वस्तु **(दर्शनाय)** प्रेक्षमाणाय **(विष्णाप्वम्)** विष्णान् विद्याव्यापिनो विदुष आप्नोति बोधस्तम्। अत्र विष्लृ धातोर्नक् तत आप्लृधातोरू। **वा छन्दसीति** पूर्वसवर्णप्रतिषेधाद्यण्। **(ददथुः)** दद्यातम् **(विश्वकाय)** विश्वस्याऽनुकम्पकाय॥ २३॥

अन्वयः-हे नासत्योपदेशकाध्यापकौ! युवां शचीभिरवस्यते स्तुवत ऋजूयते कृष्णियाय विश्वकाय दर्शनाय पशुं न नष्टमिव विष्णाप्वं ददथुः॥ २३॥

भावार्थः-अत्रोपमालङ्कारौ। आप्ता उपदेशकाध्यापका जना यथा प्रत्यक्षं गवादिकमदृष्टं वस्तु वा दर्शयित्वा साक्षात्कारयन्ति तथा शमादिगुणान्वितेभ्यो धीमद्भ्यः श्रोतृभ्योऽध्येतृभ्यश्च पृथिवीमारभ्येश्वरपर्यन्तानां पदार्थानां साङ्गोपाङ्गा विद्याः साक्षात्कारयन्तु नात्र कपटालस्यादिकुत्सितं कर्म कदाचित्कुर्य्युः॥ २३॥

पदार्थः-हे **(नासत्या)** असत्य के छोड़ने से सत्य के ग्रहण करने, पढ़ाने और उपदेश करनेवालो! तुम दोनों **(शचीभिः)** अच्छी शिक्षा देनेवाली वाणियों से **(अवस्यते)** अपनी रक्षा और **(स्तुवते)** धर्म को चाहते हुए **(ऋजूयते)** सीधे स्वभाववाले के समान वर्त्तनेवाले **(कृष्णियाय)** आकर्षण के योग्य अर्थात् बुद्धि जिसको चाहती उस **(विश्वकाय)** संसार पर दया करनेवाले **(दर्शनाय)** धर्म-अधर्म को देखते हुये मनुष्य के लिये **(पशुम्, न)** जैसे पशु को प्रत्यक्ष दिखावे वैसे और जैसे **(नष्टमिव)** खोए

हुए वस्तु को ढूंढ़ के बतावें, वैसे **(विष्णाप्वम्)** विद्या में रमे हुए विद्वानों को जो बोध प्राप्त होता है, उसको **(ददथुः)** देओ॥२३॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। शास्त्र के वक्ता, उपदेश करने और विद्या पढ़ानेवाले विद्वान् जन जैसे प्रत्यक्ष गौ आदि पशु को वा छिपे हुए वस्तु को दिखाकर प्रत्यक्ष कराते हैं, वैसे शम्, दम आदि गुणों से युक्त बुद्धिमान् श्रोता वा अध्येताओं को पृथिवी से लेके ईश्वर पर्य्यन्त पदार्थों का विज्ञान देनेवाली साङ्गोपाङ्ग विद्याओं को प्रत्यक्ष करावे और इस विषय में कपट और आलस्य आदि निन्दित कर्म कभी न करें॥२३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दश॒ रात्री॒रशि॑वेना॒ नव॒ द्यूनव॑नद्धं श्नथि॒तम॒प्स्व१॑न्तः।
विप्रु॑तं रे॒भमु॒दनि॒ प्रवृ॑क्त॒मुन्नि॑न्यथुः सोम॑मिव स्रु॒वेण॑॥२४॥

दश॑। रात्री॑ः। नव॑। द्यून्। अव॑ऽनद्धम्। श्न॒थि॒तम्। अ॒प्ऽसु। अ॒न्तरिति॑। विऽप्रु॑तम्। रे॒भम्। उ॒दनि॑। प्रऽवृ॑क्तम्। उत्। नि॒न्य॒थुः॒। सोम॑म्ऽइव। स्रु॒वेण॑॥२४॥

पदार्थः-(दश) **(रात्रीः)** **(अशिवेन)** असुखेन। अत्रा**न्येषामपी**ति दीर्घः। **(नव)** **(द्यून्)** दिनानि **(अवनद्धम्)** अधोबद्धम् **(श्नथितम्)** शिथिलीकृतं नौकादिकम् **(अप्सु)** जलेषु **(अन्तः)** आभ्यन्तरे **(विप्रुतम्)** विप्रवमाणम् **(रेभम्)** स्तोतारम्। **रेभ इति स्तोतृनामसु पठितम्।** (निघं०३.१६) **(उदनि)** उदके। **पदन्न०** इत्युदकस्योदन्नादेशः। **(प्रवृक्तम्)** प्रवर्जितम् **(उत्)** ऊर्ध्वम् **(निन्यथुः)** नयतम् **(सोममिव)** यथा सोमवल्ल्यादि हविः **(स्रुवेण)** उत्थापकेन यज्ञपात्रेण॥२४॥

अन्वयः-हे नासत्या युवां यथा शचीभिरशिवेनामङ्गलकारिणा युद्धेन सह वर्त्तमानौ शिल्पिनाववनद्धं श्नथितमुदनि विप्रुतं प्रवृक्तं नौकादिकं दश रात्रीर्नव द्यूनप्स्वन्तः संस्थाप्य पुनरूर्ध्वं नयत एवं स्रुवेण सोममिव रेभमुन्निन्यथुः॥२४॥

भावार्थः-अत्रोपमालङ्कारः। पूर्वस्मान् मन्त्रान् नासत्या शचीभिरति पदद्वयमनुवर्त्तते। हे जना! यथा जलाभ्यन्तरे नौकादिषु स्थिताः सेनाः शत्रुभिर्हन्तुं न शक्यन्ते तथा विद्यासत्यधर्मोपदेशेषु स्थापिता जना अविद्याजन्यदुःखेन न पीड्यन्ते। यथा समये शिल्पिनो नौकादिकं जल इतस्ततो नीत्वा शत्रून् विजयन्ते तथा विद्यादानेनाविद्यां यूयं विजयध्वम्, यथा यज्ञे हुतं द्रव्यं वायुजलादिशुद्धिकरं जायते तथा सदुपदेश आत्मशुद्धिकरो भवति॥२४॥

पदार्थः-हे **(नासत्या)** असत्य को छोड़कर कर सत्य का ग्रहण करने, पढ़ाने और उपदेश करनेवालो! तुम दोनों जैसे **(शचीभिः)** अच्छी शिक्षा देनेवाली वाणियों से **(अशिवेन)** अमङ्गल करनेवाले

युद्ध के साथ वर्त्तमान शिल्पी जन (**अवनद्धम्**) नीचे से बँधी (**श्नथितम्**) ढीली की हुई (**उदनि**) जल में (**विप्रुतम्**) चलाई (**प्रवृक्तम्**) और इधर-उधर जाने से रोकी हुई नौका आदि को (**दश**) दश (**रात्रीः**) रात्रि (**नव**) नौ (**द्यून्**) दिनों तक (**अप्सु**) जलों में (**अन्तः**) भीतर स्थिर कर फिर ऊपर को पहुंचावें उस ढंग से और जैसे (**स्रुवेण**) घी आदि के उठाने के साधन स्रुवा से (**सोममिव**) सोमलतादि ओषधियों को उठाते हैं, वैसे (**रेभम्**) सबकी प्रशंसा करनेहारे अच्छे सज्जन को (**उन्निन्यथुः**) उन्नति को पहुंचाओ॥ २४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। पिछले मन्त्र से (**नासत्या, शचीभिः**) इन दो पदों की अनुवृत्ति आती है। हे मनुष्यो! जैसे जल के भीतर नौका आदि में स्थित हुई सेना शत्रुओं से मारी नहीं जा सकती, वैसे विद्या और सत्यधर्म के उपदेशों में स्थापित किये हुए जन अविद्याजन्य दुःख से पीड़ा नहीं पाते। जैसे नियत समय पर कारीगर लोग नौकादि यानों को जल में इधर-उधर ले जाके शत्रुओं को जीतते हैं, वैसे विद्यादान से अविद्याओं को आप जीतो। जैसे यज्ञकर्म में होमा हुआ द्रव्य वायु और जल आदि की शुद्धि करनेवाला होता है, वैसे सज्जनों का उपदेश आत्मा की शुद्धि करनेवाला होता है॥ २४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र वां॒ दंसां॑स्यश्विनाववोचम॒स्य पति॑ः स्यां सु॒गव॑ः सु॒वीर॑ः।
उ॒त पश्य॑न्नश्नु॒वन् दी॒र्घमायु॒रस्त॑मि॒वेज्ज॑रि॒माणं॑ जगम्याम्॥ २५॥ १२॥

प्र। वा॒म्। दंसां॑सि। अ॒श्वि॒नौ॒। अ॒वो॒च॒म्। अ॒स्य। पति॑ः। स्या॒म्। सु॒ऽगव॑ः। सु॒ऽवीर॑ः। उ॒त। पश्य॑न्। अ॒श्नु॒वन्। दी॒र्घम्। आयु॑ः। अस्त॑म्ऽइव। इत्। ज॒रि॒माण॑म्। ज॒ग॒म्या॒म्॥ २५॥

पदार्थः-(प्र) (**वाम्**) युवयोरुपदेशकाध्यापकयोः (**दंसांसि**) उपदेशाध्यापनादीनि कर्माणि (**अश्विनौ**) सर्वशुभकर्मविद्याव्यापिनौ (**अवोचम्**) वदेयम् (**अस्य**) व्यवहारस्य राज्यस्य वा (**पतिः**) पालकः (**स्याम्**) भवेयम् (**सुगवः**) शोभना गावो यस्य (**सुवीरः**) शोभनपुत्रादिभृत्यः (**उत**) अपि (**पश्यन्**) सत्यासत्यं प्रेक्षमाणः (**अश्नुवन्**) विद्यासुखेन व्याप्नुवन् (**दीर्घम्**) वर्षशतादप्यधिकम् (**आयुः**) जीवनम् (**अस्तमिव**) गृहं प्राप्येव (**जरिमाणम्**) प्राप्तजरसं देहम् (**इत्**) एव (**जगम्याम्**) भृशं गच्छेयम्॥ २५॥

अन्वयः-हे अश्विनावहं वां युवयोर्दंसांसि प्रावोचं तेन सुगवः सुवीरः पश्यन्नुतापि दीर्घमायुरश्नुवन् सन्नस्य पतिः स्याम्। परिव्राजकोऽस्तमिव जरिमाणं देहं त्यक्त्वा सुखेनेज्जगम्याम्॥ २५॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्याः सदा धार्मिकाणामाप्तानां कर्माणि संसेव्य धर्मजितेन्द्रियत्वाभ्यां विद्याः प्राप्यायुर्वर्धयित्वा सुसहायाः सन्तो जगत्पालयेयुः। योगाभ्यासेन जीर्णानि शरीराणि त्यक्त्वा विज्ञानान्मुक्तिं च गच्छेयुरिति॥ २५॥

अत्र पृथिव्यादिपदार्थगुणदृष्टान्तेनानुकूलतया सभासेनापत्यादिगुणकर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति द्वादशो १२ वर्गः षोडशोत्तरशततमस्य ११६ सूक्तं च समाप्तम्॥

पदार्थः-हे **(अश्विनौ)** समस्त शुभ कर्म और विद्या में रमे हुए सज्जनो! मैं **(वाम्)** तुम दोनों उपदेश करने और पढ़ानेवालों के **(दंसांसि)** उपदेश और विद्या पढ़ाने आदि कामों को **(प्र, अवोचम्)** कहूं उससे **(सुगवः)** अच्छी-अच्छी गौ और उत्तम-उत्तम वाणी आदि पदार्थोंवाला **(सुवीरः)** पुत्र-पौत्र आदि भृत्ययुक्त **(पश्यन्)** सत्य-असत्य को देखता **(उत)** और **(दीर्घम्)** बड़ी **(आयुः)** आयुर्दा को **(अश्नुवन्)** सुख से व्याप्त हुआ **(अस्य)** इस राज्य वा व्यवहार का **(पतिः)** पालनेवाला **(स्याम्)** होऊं तथा संन्यासी महात्मा जैसे **(अस्तमिव)** घर को पाकर निर्लोभ से छोड़ दे, वैसे **(जरिमाणम्)** बुड्ढे हुए शरीर को छोड़ सुख से **(इत्)** ही **(जगम्यात्)** शीघ्र चला जाऊं॥ २५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य सदा धार्मिक शास्त्रवक्ताओं के कर्मों को सेवन कर धर्म और जितेन्द्रियपन से विद्याओं को पाकर आयुर्दा बढ़ा के अच्छे सहाययुक्त हुए संसार की पालना करें और योगाभ्यास से जीर्ण अर्थात् बुड्ढे शरीरों को छोड़ विज्ञान से मुक्ति को प्राप्त होवें॥ २५॥

इस सूक्त में पृथिवी आदि पदार्थों के गुणों के दृष्टान्त तथा अनुकूलता से सभासेनापति आदि के गुण कर्मों के वर्णन से इस सूक्त में कहे अर्थ की पिछले सूक्त में कहे अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बारहवाँ १२ वर्ग और एक सौ सोलहवाँ ११६ सूक्त समाप्त हुआ॥

अथास्य पञ्चविंशत्यृचस्य सप्तदशोत्तरशततमस्य सूक्तस्य कक्षीवानृषिः। अश्विनौ देवते। १ निचृत् पङ्क्तिः। ६,२२ विराट् पङ्क्तिः। ११,२१,२५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,४,७,१२,१६-१९ निचृत् त्रिष्टुप्। ८-१०, १३-१५,२०,२३ विराट् त्रिष्टुप्। ३,५,२४ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजधर्मविषयमाह।

अब एक सौ सत्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजधर्म का उपदेश किया है॥

मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम्।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः॥ १॥

मध्वः। सोमस्य। अश्विना। मदाय। प्रत्नः। होता। आ। विवासते। वाम्। बर्हिष्मती। रातिः। विऽश्रिता। गीः। इषा। यातम्। नासत्या। उप। वाजैः॥ १॥

पदार्थः-(मध्वः) मधुरस्य **(सोमस्य)** सोमवल्ल्याद्यौषधस्य। अत्र कर्मणि षष्ठी। **(अश्विना) (मदाय)** रोगनिवृत्तेरानन्दाय **(प्रत्नः)** प्राचीनविद्याध्येता **(होता)** सुखदाता **(आ) (विवासते)** परिचरति **(वाम्)** युवयोः **(बर्हिष्मती)** प्रशस्तवृद्धियुक्ता **(रातिः)** दत्तिः **(विश्रिता)** विविधैराप्तैः श्रिता सेविता **(गीः)** वाग् **(इषा)** स्वेच्छया **(यातम्)** प्राप्नुतम् **(नासत्या)** असत्यात्पृथग्भूतौ **(उप) (वाजैः)** विज्ञानादिभिर्गुणैः॥ १॥

अन्वयः-हे अश्विना! नासत्या युवामिषा प्रत्नो होता वाजैर्मदाय वां युवयोर्मध्वः सोमस्य या बर्हिष्मती रातिर्विश्रिता गौश्चास्ति तां विवासत इवोपयातम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे सभासेनेशावाप्तगुणकर्मसेवया विज्ञानादिकमुपगम्य शरीररोगनिवारणाय सोमाद्योषधिविद्याऽविद्यानिवारणाय विद्याश्च संसेव्याभीष्टं सुखं सम्पादयेतम्॥ १॥

पदार्थः-हे **(अश्विना)** विद्या में रमे हुए **(नासत्या)** झूठ से अलग रहनेवाले सभा सेनाधीशो! तुम दोनों **(इषा)** अपनी इच्छा से **(प्रत्नः)** पुरानी विद्या पढ़नेहारा **(होता)** सुखदाता जैसे **(वाजैः)** विज्ञान आदि गुणों के साथ **(मदाय)** रोग दूर होने के आनन्द के लिये **(वाम्)** तुम दोनों को **(मध्वः)** मीठी **(सोमस्य)** सोमवल्ली आदि औषध की जो **(बर्हिष्मती)** प्रशंसित बढ़ी हुई **(रातिः)** दानक्रिया और **(विश्रिता)** विविध प्रकार के शास्त्रवक्ता विद्वानों से सेवन की हुई **(गीः)** वाणी है, उसका जो **(आ, विवासते)** अच्छे प्रकार सेवन करता है, उसके समान **(उप, यातम्)** समीप आ रही अर्थात् उक्त अपनी क्रिया और वाणी का ज्यों का त्यों प्रचार करते रहो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे सभा और सेना के अधीशो! तुम उत्तम शास्त्रवेत्ता विद्वानों के गुण और कर्मों की सेवा से विशेष ज्ञान आदि को पाकर शरीर के रोग दूर करने के

लिये सोमवल्ली आदि ओषधियों की विद्या और अविद्या अज्ञान के दूर करने को विद्या का सेवन कर चाहे हुए सुख की सिद्धि करो॥१॥

पुना राजधर्ममाह॥

फिर राजधर्म को अगले मन्त्र में कहते हैं॥

यो वा॑मश्विना॒ मन॑सो॒ जवी॑या॒न् रथ॒: स्वश्वो॒ विश॑ आ॒जिगा॑ति।
येन॒ गच्छ॑थ: सु॒कृतो॑ दुरो॒णं तेन॑ नरा व॒र्तिर॒स्मभ्यं॑ यातम्॥२॥

य:। वा॒म्। अ॒श्विना॒। मन॑स:। जवी॑यान्। रथ॑:। सु॒ऽअश्व॑:। विश॑:। आ॒ऽजिगा॑ति। येन॑। गच्छ॑थ:। सु॒ऽकृत॑:। दुरो॒णम। तेन॑। न॒रा॒। व॒र्ति:। अ॒स्मभ्य॑म्। या॒त॒म्॥२॥

पदार्थ:-(य:) (वाम्) युवयो: **(अश्विना)** मनस्विनौ **(मनस:)** मननशीलाद्वेगवत्तरात् **(जवीयान्)** अतिशयेन वेगयुक्त: **(रथ:)** युद्धक्रीडासाधकतम: **(स्वश्व:)** शोभना अश्वा वेगवन्तो विद्युदादयस्तुरङ्गा वा यस्मिन् स: **(विश:)** प्रजा: **(आजिगाति)** समन्तात्प्रशंसयति। अत्रान्तर्गतो ण्यर्थ:। **(येन) (गच्छथ:) (सुकृत:)** सुष्ठु साधनै: कृतो निष्पादित: **(दुरोणम्)** गृहम् **(तेन) (नरा)** न्यायनेतारौ **(वर्त्ति:)** वर्त्तमानम् **(अस्मभ्यम्) (यातम्)** प्राप्नुतम्॥२॥

अन्वय:-हे नराश्विना सभासेनेशौ! य: सुकृत: स्वश्वो मनसो जवीयान् रथोऽस्ति, स विश आजिगाति वा युवां येन रथेन वर्त्तिर्दुरोणं गच्छथस्तेनास्मभ्यं यातम्॥२॥

भावार्थ:-राजपुरुषैर्मनोवद्वेगानि विद्युदादियुक्तानि विविधानि यानान्यास्थाय प्रजा: संतोषितव्या। येन येन कर्मणा प्रशंसा जायेत तत्तदेव सततं सेवितव्यं नेतरत्॥२॥

पदार्थ:-हे **(नरा)** न्याय की प्राप्ति करानेवाले **(अश्विना)** विचारशील सभा सेनाधीशो! **(य:)** जो **(सुकृत:)** अच्छे साधनों से बनाया हुआ **(स्वश्व:)** जिसमें अच्छे वेगवान् बिजुली आदि पदार्थ वा घोड़े लगे हैं, वह **(मनस:)** विचारशील अत्यन्त वेगवान् मन से भी **(जवीयान्)** अधिक वेगवाला और **(रथ:)** युद्ध की अत्यन्त क्रीड़ा करानेवाला रथ है, वह **(विश:)** प्रजाजनों की **(आजिगाति)** अच्छे प्रकार प्रशंसा कराता और **(वाम्)** तुम दोनों **(येन)** जिस रथ से **(वर्त्ति:)** वर्त्तमान **(दुरोणम्)** घर को **(गच्छथ:)** जाते हो **(तेन)** उससे **(अस्मभ्यम्)** हम लोगों को **(यातम्)** प्राप्त हूजिये॥२॥

भावार्थ:-राजपुरुषों को चाहिये कि मन के समान वेगवाले, बिजुली आदि पदार्थों से युक्त, अनेक प्रकार के रथ आदि यानों को निश्चित कर प्रजाजनों को सन्तोष देवें। और जिस-जिस कर्म से प्रशंसा हो, उसी-उसी का निरन्तर सेवन करें, उससे और कर्म का सेवन न करें॥२॥

अथाध्ययनाऽध्यापनाख्यमाह॥

अब पढ़ने और पढ़ाने रूप राजधर्म का उपदेश अगले मन्त्र में किया है॥

ऋषिं॑ नरा॒वंह॑स॒: पाञ्च॑जन्यमृ॒बीसा॒दत्रिं॑ मुञ्चथो गृ॒णेन॑।
मि॒नन्ता॒ दस्यो॒रशि॑वस्य मा॒या अ॑नुपू॒र्वं वृ॑षणा चो॒दय॑न्ता॥ ३॥

ऋषि॑म्। न॒रौ॒। अंह॑सः। पाञ्च॑ऽजन्यम्। ऋ॒बीसा॑त्। अत्रि॑म्। मु॒ञ्च॒थ॒:। गृ॒णेन॑। मि॒नन्ता॑। दस्यो॑:। अशि॑वस्य। मा॒याः। अ॒नु॒ऽपू॒र्वम्। वृ॒ष॒णा॒। चो॒दय॑न्ता॥ ३॥

पदार्थः-(ऋषिम्) वेदपारगाध्यापकम् **(नरौ)** विद्यानेतारौ **(अंहसः)** विद्याध्ययननिरोधकाद्विघ्नाख्यात् पापात् **(पाञ्चजन्यम्)** पञ्चसु जनेसु प्राणादिषु भवां प्राप्तयोगसिद्धिम् **(ऋबीसात्)** नष्टविद्याप्रकाशविद्यारूपात्। **ऋबीसमपगतभासमपहृतभासमन्तर्हितभासं गतभासं वा।** (निरु०६.३५) **(अत्रिम्)** अविद्यमानान्यात्ममनः- शरीरदुःखानि येन तम् **(मुञ्चथः)** **(गणेन)** अन्याध्यापकविद्यार्थिसमूहेन **(मिनन्ता)** हिसन्तौ **(दस्योः)** उत्कोचकस्य **(अशिवस्य)** सर्वस्मै दुःखप्रदस्य **(मायाः)** कपटादियुक्ताः क्रियाः **(अनुपूर्वम्)** अनुकूलाः पूर्वे वेदोक्ता आप्तसिद्धान्ता यस्य तम् **(वृषणा)** सुखस्य वर्षकौ **(चोदयन्ता)** विद्यादिशुभगुणेषु प्रेरयन्तौ॥ ३॥

अन्वयः-हे नरौ! वृषणा चोदयन्ताऽशिवस्य दस्योर्माया मिनन्ताऽनुपूर्वं पाञ्चजन्यमत्रिं गणेनर्षिमृबीसादंहसो मुञ्चथः॥ ३॥

भावार्थः-राजपुरुषाणामिदमुत्तमतमं कर्मास्ति यद्विद्याप्रचारर्त्तृणां दुःखात् संरक्षणं सुखे संस्थापनं दस्व्वादीनां निवर्त्तनं स्वयं विद्याधर्मयुक्ता भूत्वा विदुषो विद्याधर्मप्रचारे संप्रेर्य्य धर्मार्थकाममोक्षान् संसाधयेयुः॥ ३॥

पदार्थः-हे **(नरौ)** विद्या प्राप्ति कराने **(वृषणा)** सुख के वर्षाने **(चोदयन्ता)** और विद्या आदि शुभ गुणों में प्रेरणा करनेवाले तथा **(अशिवस्य)** सबको दुःख देनेहारे **(दस्योः)** उचक्के की **(मायाः)** कपटक्रियाओं को **(मिनन्ता)** काटनेवाले सभासेनाधीशो! तुम दोनों **(अनुपूर्वम्)** अनुकूल वेद में कहे और उत्तम विद्वानों में माने हुए सिद्धान्त जिसके, उस **(पाञ्चजन्यम्)** प्राण, अपान, उदान, व्यान और समान में सिद्ध हुई योगसिद्ध को और जिसके सम्बन्ध में **(अत्रिम्)** आत्मा, मन और शरीर के दुःख नष्ट हो जाते हैं, उस **(गणेन)** पढ़ने-पढ़ानेवालों के साथ वर्त्तमान **(ऋषिम्)** वेदपारगन्ता अध्यापक को **(ऋबीसात्)** नष्ट हुआ है विद्या का प्रकाश जिससे उस अविद्यारूप अन्धकार **(अंहसः)** और विद्या पढ़ाने को रोक देने रूप अत्यन्त पाप से **(मुञ्चथः)** अलग रखते हो॥ ३॥

भावार्थः-राजपुरुषों का यह अत्यन्त उत्तम काम है कि जो विद्याप्रचार करनेहारों को दुःख से बचाना, उनको सुख में राखना और डाकू उचक्के आदि दुष्ट जनों को दूर करना और वे राजपुरुष आप

विद्या और धर्मयुक्त हो विद्वानों को विद्या और धर्म्म के प्रचार में लगा कर धर्म, अर्थ, काम और मोक्ष की सिद्धि करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अश्वं॑ न गू॒ळ्हमश्विना दु॒रेवै॒र्ऋषिं॑ नरा वृषणा रे॒भमप्सु।
सं तं रि॑णीथो॒ विप्रु॑तं दंसो॒भिर्न वां॑ जू॒र्यन्ति पू॒र्व्या कृ॒तानि॑॥४॥

अश्व॑म्। न। गू॒ळ्हम्। अ॒श्वि॒ना॒। दु॒ःऽएवैः। ऋषि॑म्। न॒रा॒। वृ॒ष॒णा॒। रे॒भम्। अप्ऽसु। सम्। तम्। रि॒णी॒थ॒ः। विऽप्रु॑तम्। दंस॑ःऽभिः। न। वा॒म्। जू॒र्य॒न्ति॒। पू॒र्व्या। कृ॒ता॒नि॑॥४॥

पदार्थः-(अश्वम्) विद्युतम् **(न)** इव **(गूढम्)** गूढाशयम् **(अश्विना)** सभासेनेशौ **(दुरेवैः)** दुःखं प्रापकैदुष्टैर्मनुष्यादिप्राणिभिः **(ऋषिम्)** पूर्वोक्तम् **(नरा)** सुखनेतारौ **(वृषणा)** विद्यावर्षयितारौ **(रेभम्)** सकलविद्यागुणस्तोतारम् **(अप्सु)** विद्याव्यापकेषु वेदादिषु सुनिष्ठितम् **(सम्)** **(तम्)** **(रिणीथः)** **(विप्रुतम्)** विविधानां व्यवहाराणां वेत्तारम् **(दंसोभिः)** शिष्टानुष्ठितैः कर्मभिः **(न)** निषेधे **(वाम्)** युवयोः **(जूर्य्यन्ति)** जीर्य्यन्ति जीर्णानि भवेयुः **(पूर्व्याः)** पूर्वैः कृतानि कार्य्याणि विद्याप्रचाररूपाणि॥४॥

अन्वयः-हे नरा वृषणाश्विना! दुरेवैर्दंसोभिः पीडितमश्वमिव विप्रुतं रेभमप्सु सुनिष्ठितं तमृषिं न सुखेन गूढं संरिणीथः। यतो वां युवयोः पूर्व्या कृतान्येतानि कर्माणि न जूर्य्यन्ति॥४॥

भावार्थः-अत्रोपमालङ्कारः। राजपुरुषैर्यथा दस्युभिरपहृतं गुप्ते स्थाने स्थापितं पीडितमश्वं सङ्गृह्य सुखेन संरक्ष्यते तथा मूढैर्दुष्कर्मकारिभिस्तिरस्कृतान् विद्याप्रचारकान् मनुष्यानखिलपीडातः पृथक्कृत्य सम्पूज्य सङ्गत्यैते सेव्यन्ते यानि च तेषां विद्युद्विद्याप्रचाराणि कर्माणि तान्यजरामराणि सन्तीति वेद्यम्॥४॥

पदार्थः-हे **(नरा)** सुख की प्राप्ति **(वृषणा)** और विद्या की वर्षा करानेवाले **(अश्विना)** सभा सेनापतियो! तुम दोनों **(दुरेवैः)** दुःख को पहुँचानेवाले दुष्ट मनुष्य आदि प्राणियों **(दंसोभिः)** और श्रेष्ठ विद्वानों ने आचरण किये हुए कर्मों से ताड़ना को प्राप्त **(अश्वम्)** अति चलनेवाली बिजुली के समान **(विप्रुतम्)** विविध प्रकार अच्छे व्यवहारों को जानने **(रेभम्)** समस्त विद्या गुणों की प्रशंसा करने **(अप्सु)** विद्या में व्याप्त होने और वेदादि शास्त्रों में निश्चय रखनेवाले **(तम्)** उस पूर्व मन्त्र में कहे हुए **(ऋषिम्)** वेदपारगन्ता विद्वान् के **(न)** समान **(गूढम्)** अपने आशय को गुप्त रखनेवाले सज्जन पुरुष को सुख से **(सं, रिणीथः)** अच्छे प्रकार युक्त करो, जिससे **(वाम्, पूर्व्या, कृतानि)** तुम लोगो के जो पूर्वजों ने किए हुए विद्याप्रचाररूप काम वे **(न)** नहीं **(जूर्यन्ति)** जीर्ण होते अर्थात् नाश को नहीं प्राप्त होते॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजपुरुषों से जैसे डाकुओं द्वारा हरे, छिपे हुए स्थान में ठहराये और पीड़ा दिये हुए घोड़े को लेकर वह सुख के साथ अच्छी प्रकार रक्षा किया जाता है, वैसे

मूढ़ दुराचारी मनुष्यों द्वारा तिरस्कार किये हुए विद्याप्रचार करनेवाले मनुष्यों को समस्त पीड़ाओं से अलग कर, सत्कार के साथ संग कर, ये सेवा को प्राप्त किये जाते हैं और जो उनके बिजुली की विद्या के प्रचार के काम हैं वे अजर-अमर हैं, यह जानना चाहिये॥४॥

अथ राजधर्मविषयमाह॥

अब अगले मन्त्र में राजधर्म विषय को कहते हैं॥

सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम्।
शुभे रुक्मं दर्शतं निखातमुदूपथुरश्विना वन्दनाय॥५॥१३॥

सुसुप्वांसम्। न। निःऽऋतेः। उपऽस्थे। सूर्यम्। न। दस्रा। तमसि। क्षियन्तम्। शुभे। रुक्मम्। न। दर्शतम्। निऽखातम्। उत्। ऊपथुः। अश्विना। वन्दनाय॥५॥

पदार्थः-(सुषुप्वांसम्) सुखेन शयानम् **(न)** इव **(निर्ऋतेः)** भूमेः। **निर्ऋतिरिति पृथिवीनामसु पठितम्।** (निघं०१.१) **(उपस्थे)** उत्सर्गे **(सूर्य्यम्)** सवितारम् **(न)** इव **(दस्रा)** दुःखहिंसको **(तमसि)** रात्रौ। **तम इति रात्रिनामसु पठितम्।** (निघं०१.७) **(क्षियन्तम्)** निवसन्तम् **(शुभे)** शोभनाय **(रुक्मम्)** सुवर्णम्। **रुक्ममिति हिरण्यनामसु पठितम्।** (निघं०१.२) **(न)** इव **(दर्शतम्)** द्रष्टव्यं रूपम् **(निखातम्)** फालकृष्टं क्षेत्रम् **(उत्)** ऊर्ध्वम् **(ऊपथुः)** वपेतम् **(अश्विना)** कृषिकर्मविद्याव्यापिनौ **(वन्दनाय)** स्तवनाय॥५॥

अन्वयः-हे दस्राश्विना! युवां वन्दनाय निर्ऋतेरुपस्थे तमसि क्षियन्तं सुषुप्वांसं न सूर्यं नाशुभे रुक्मं न दर्शतं निखातमुदूपथुः॥५॥

भावार्थः-अत्र तिस्र उपमाः। यथा प्रजास्थाः प्राणिनः सुराज्यं प्राप्य रात्रौ सुखेन सुप्त्वा दिने स्वाभीष्टानि कर्माणि सेवन्ते, सुशोभायै सुवर्णादिकं प्राप्नुवन्ति, कृष्यादिकर्माणि कुर्वन्ति तथा सुप्रजाः प्राप्य राजपुरुषा महीयन्ते॥५॥

पदार्थः-हे **(दस्रा)** दुःख का विनाश करनेवाले **(अश्विना)** कृषिकर्म की विद्या में परिपूर्ण सभा सेनाधीशो! तुम दोनों **(वन्दनाय)** प्रशंसा करने के लिये **(निर्ऋतेः)** भूमि के **(उपस्थे)** ऊपर **(तमसि)** रात्रि में **(क्षियन्तम्)** निवास करते और **(सुषुप्वांसम्)** सुख से सोते हुए के **(न)** समान वा **(सूर्य्यम्)** सूर्य के **(न)** समान और **(शुभे)** शोभा के लिये **(रुक्मम्)** सुवर्ण के **(न)** समान **(दर्शतम्)** देखने योग्य रूप **(निखातम्)** फारे से जोते हुए खेत को **(उदूपथुः)** ऊपर से बोओ॥५॥

भावार्थः-इस मन्त्र में तीन उपमालङ्कार हैं। जैसे प्रजास्थ जन अच्छे राज्य को पाकर रात्रि में सुख से सोके दिन में चाहे हुए कामों मे मन लगाते हैं वा अच्छी शोभा होने के लिये सुवर्ण आदि

वस्तुओं को पाते वा खेती आदि कामों को करते हैं, वैसे अच्छी प्रजा को प्राप्त होकर राजपुरुष प्रशंसा पाते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

तद्वां॑ नरा॒ शंस्यं॑ पज्रि॒येण॑ क॒क्षीव॑ता॒ नास॑त्या॒ परि॑ज्मन्।

शफा॒दश्व॑स्य वा॒जिनो॒ जना॑य श॒तं कु॒म्भाँ अ॑सिञ्चतं॒ मधू॑नाम्॥६॥

तत्। वा॒म्। न॒रा॒। शंस्य॑म्। प॒ज्रि॒येण॑। क॒क्षीव॑ता। ना॒स॒त्या॒। परि॑ऽज्मन्। श॒फात्। अश्व॑स्य। वा॒जिन॑:। जना॑य। श॒तम्। कु॒म्भान्। अ॒सि॒ञ्च॒त॒म्। मधू॑नाम्॥६॥

पदार्थ:-(तत्) (वाम्) युवयो: **(नरा)** नृषूत्तमौ नायकौ **(शंस्यम्)** प्रशंसनीयम् **(पज्रियेण)** प्राप्तव्येषु भवेन **(कक्षीवता)** शिक्षकेण विदुषा सहितेन **(नासत्या) (परिज्मन्)** परित: सर्वतो गच्छन्ति यस्मिन्मार्गे **(शफात्)** खुरात् शं फणति प्रापयतीति शफो वेगस्तस्माद्वा। अत्र**ान्येभ्योऽपि दृश्यत** इति ड: पृषोदरादित्वान्मलोपश्च। **(अश्वस्य)** तुरगस्य **(वाजिन:)** वेगवत: **(जनाय)** शुभगुणविद्यासु प्रादुर्भूताय विदुषे **(शतम्) (कुम्भान्)** कलशान् **(असिञ्चतम्)** सुखेन सिञ्चतम् **(मधूनाम्)** उदकानाम्। **मध्वित्युदकनामसु पठितम्।** (निघं०१.१२)॥६॥

अन्वय:-हे पज्रियेण कक्षीवता सह वर्त्तमानौ नासत्या नरा! वां यत् परिज्मन् वाजिनोऽश्वस्य शफादिव विद्युद्वेगात् जनाय मधूनां शतं कुम्भानसिञ्चतं तद्वां युवयो: शंस्यं कर्म विजानीम:॥६॥

भावार्थ:-राजपुरुषैर्मनुष्यादिसुखाय मार्गेऽनेककुम्भजलेन सेचनं प्रत्यहं कारयितव्यम्, यतस्तुरङ्गादीनां पादापस्करणाद् धूलिर्नोत्तिष्ठेत येन मार्गे स्वसेनास्था जना: सुखेन गमनागमने कुर्य्यु:। एवमीदृशानि स्तुत्यानि कर्माणि कृत्वा प्रजा: सततमाह्लादितव्या:॥६॥

पदार्थ:-हे **(पज्रियेण)** प्राप्त होने योग्यों में प्रसिद्ध हुए **(कक्षीवता)** शिक्षा करनेहारे विद्वान् के साथ वर्त्तमान **(नासत्या)** सत्य व्यवहार वर्त्तनेवाले **(नरा)** मनुष्यों में उत्तम सबको अपने-अपने ढंग में लगानेहारे सभासेनाधीशो! तुम दोनों जो **(परिज्मन्)** सब प्रकार से जिसमें जाते हैं, उस मार्ग को **(वाजिन:)** वेगवान् **(अश्वस्य)** घोड़ा की **(शफात्)** टाप के समान बिजुली के वेग से **(जनाय)** अच्छे गुणों और उत्तम विद्याओं में प्रसिद्ध हुए विद्वान् के लिये **(मधूनाम्)** जलों के **(शतम्)** सैकड़ों **(कुम्भान्)** घड़ों को **(असिञ्चतम्)** सुख से सींचो अर्थात् भरो **(तत्)** उस **(वाम्)** तुम लोगों के **(शंस्यम्)** प्रशंसा करने योग्य काम को हम जानते हैं॥६॥

भावार्थः-राजपुरुषों को चाहिये कि मनुष्य आदि प्राणियों के सुख के लिये मार्ग में अनेक घड़ों के जल से नित्य सींचाव कराया करें, जिससे घोड़े बैल आदि के पैरों की खूंदन से धूर न उड़े। और जिससे मार्ग में अपनी सेना के जन सुख से आवें-जावें। इस प्रकार ऐसे प्रशंसित कामों को करके प्रजाजनों को निरन्तर आनन्द देवें॥६॥

पुनरध्यापकोपदेशकगुणा उपदिश्यन्ते॥

फिर अध्यापक और उपदेश करनेवालों के गुण अगले मन्त्र में कहते हैं॥

युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय।
घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम्॥७॥

युवम्। नरा। स्तुवते। कृष्णियाय। विष्णाप्वम्। ददथुः। विश्वकाय। घोषायै। चित्। पितृऽसदे। दुरोणे। पतिम्। जूर्यन्त्यै। अश्विनौ। अदत्तम्॥७॥

पदार्थः-(युवम्) युवाम् **(नरा)** प्रधानौ **(स्तुवते)** सत्यवक्त्रे **(कृष्णियाय)** कृष्णं विलेखनं कृषिकर्मार्हति यस्तस्मै **(विष्णाप्वम्)** विष्णानि कृषिव्याप्तानि कर्माण्याप्नोति येन पुरुषेण तम् **(ददथुः) (विश्वकाय)** अनुकम्पिताय समग्राय राज्ञे **(घोषायै)** घोषाः प्रशंसिताः शब्दाः गवादिस्थित्यर्थाः स्थानविशेषा वा विद्यन्ते यस्यां तस्यै **(चित्)** अपि **(पितृषदे)** पितरो विद्याविज्ञापका विद्वांसः सीदन्ति यस्मिँस्तस्मै **(दुरोणे)** गृहे **(पतिम्)** पालकं स्वामिनम् **(जूर्य्यन्त्यै)** जीर्णावस्थाप्राप्तनिमित्तायै **(अश्विनौ) (अदत्तम्)** दद्यातम्॥७॥

अन्वयः-हे नराश्विनौ! युवं युवां कृष्णियाय स्तुवते पितृषदे विश्वकाय दुरोणे विष्णाप्वं पतिं ददथुः। चिदपि जूर्यन्त्यै घोषायै पतिमदत्तम्॥७॥

भावार्थः-राजादयो न्यायाधीशाः कृष्यादिकर्मकारिभ्यो जनेभ्यः सर्वाण्युपकरणानि पालकान् पुरुषान् सत्यन्यायं च प्रजाभ्यो दत्वा पुरुषार्थे प्रवर्त्तयेयुः। एताभ्यः कार्य्यसिद्धिसम्पन्नाभ्यो धर्म्यं स्वांशं यथावत् संगृह्णीयुः॥७॥

पदार्थः-हे **(नरा)** सब कामों में प्रधान और **(अश्विनौ)** सब विद्याओं में व्याप्त सभासेनाधीशो! **(युवम्)** तुम दोनों **(कृष्णियाय)** खेती के काम की योग्यता रखने और **(स्तुवते)** सत्य बोलनेवाले **(पितृषदे)** जिसके समीप विद्या विज्ञान देनेवाले स्थित होते **(विश्वकाय)** और जो सभों पर दया करता है, उस राजा के लिये **(दुरोणे)** घर में **(विष्णाप्वम्)** जिस पुरुष से खेती के भरे हुए कामों को प्राप्त होता, उस खेती रखनेवाले पुरुष को **(ददथुः)** देओ **(चित्)** और **(जूर्य्यन्त्यै)** बुड्ढेपन को प्राप्त करनेवाली **(घोषायै)** जिसमें प्रशंसित शब्द वा गौ आदि के रहने के विशेष स्थान हैं, उस खेती के लिये **(पतिम्)** स्वामी अर्थात् उस की रक्षा करनेवाले को **(अदत्तम्)** देओ॥७॥

भावार्थः-राजा आदि न्यायाधीश खेती आदि कामों के करनेवाले पुरुषों से सब उपकार पालना करनेवाले पुरुष और सत्य न्याय को प्रजाजनों को देकर उन्हें पुरुषार्थ में प्रवृत्त करें। इन कार्य्यों की सिद्धि को प्राप्त हुए प्रजाजनों से धर्म के अनुकूल अपने भाग को यथायोग्य ग्रहण करें॥७॥

पुनरत्र राजधर्ममाह॥

फिर यहाँ राजधर्म का उपदेश अगले मन्त्र में किया है॥

युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम्॥८॥

युवम्। श्यावाय। रुशतीम्। अदत्तम्। महः। क्षोणस्य। अश्विना। कण्वाय। प्रऽवाच्यम्। तत्। वृषणा। कृतम्। वाम्। यत्। नार्सदाय। श्रवः। अधिऽअधत्तम्॥८॥

पदार्थः-(युवम्) युवाम् **(श्यावाय)** ज्ञानिने। श्यैङ्धातोरौणादिको वन्। **(रुशतीम्)** प्रकाशिकां विद्याम् **(अदत्तम्)** दद्यातम् **(महः)** महतः **(क्षोणस्य)** अध्यापकस्य **(अश्विना)** बहुश्रुतौ **(कण्वाय)** मेधाविने **(प्रवाच्यम्)** प्रकर्षेण वक्तु योग्यं शास्त्रम् **(तत्)** **(वृषणा)** बलिष्ठौ **(कृतम्)** कर्त्तव्यम् कर्म **(वाम्)** युवयोः **(यत्)** **(नार्सदाय)** नृषु नायकेषु सीदति तदपत्याय। **(श्रवः)** श्रवणम् **(अध्यधत्तम्)** उपरि धरतम्॥८॥

अन्वयः-हे वृषणाऽश्विना! युवं युवां महः क्षोणस्य सकाशाच्छ्यावाय कण्वाय रुशतीमदत्तम्। यद्वां युवयोः प्रवाच्यं कृतं श्रवोऽस्ति तन्नार्सदायाध्यधत्तम्॥८॥

भावार्थः-सभाध्यक्षेण यादृश उपदेशो धीमतः प्रति क्रियते तादृश एव सर्वलोकाधीशायोपदिशेत्। एवमेव सर्वान् मनुष्यान् प्रति वर्त्तितव्यम्॥८॥

पदार्थः-हे **(वृषणा)** बलवान् **(अश्विना)** बहुत ज्ञान-विज्ञान की बातें सुने जाने हुए सभा सेनाधीशो! **(युवम्)** तुम दोनों **(महः)** बड़े **(क्षोणस्य)** पढ़ानेवाले के तीर से **(श्यावाय)** ज्ञानी **(कण्वाय)** बुद्धिमान् के लिये **(रुशतीम्)** प्रकाश करनेवाली विद्या को **(अदत्तम्)** देओ तथा **(यत्)** जो **(वाम्)** तुम दोनों का **(प्रवाच्यम्)** भली-भांति कहने योग्य शास्त्र **(कृतम्)** करने योग्य काम और **(श्रवः)** सुनना है **(तत्)** उसको तथा **(नार्सदाय)** उत्तम-उत्तम व्यवहारों में मनुष्य आदि को पहुंचानेहारे जनों में स्थित होते हुए लड़के को **(अध्यधत्तम्)** अपने पर धारण करो॥८॥

भावार्थः-सभाध्यक्ष पुरुष से जिस प्रकार का उपदेश अच्छे बुद्धिमानों के प्रति किया जाता हो, वैसा ही सब लोकों के स्वामी के लिये उपदेश करें। ऐसे ही सब मनुष्यों के प्रति वर्त्ताव करना चाहिये॥८॥

अथात्र तारविद्यामूलमाह॥

अब यहाँ तारविद्या के मूल का उपदेश अगले मन्त्र में किया है॥

पुरू वर्पांस्यश्विना दधाना नि पेदव ऊहथुराशुमश्वम्।
सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं१ तरुत्रम्॥ ९॥

पुरु। वर्पांसि। अश्विना। दधाना। नि। पेदवे। ऊहथुः। आशुम्। अश्वम्। सहस्रऽसाम्। वाजिनम्। अप्रतिऽइतम्। अहिऽहनम्। श्रवस्यम्। तरुत्रम्॥ ९॥

पदार्थः-(पुरु) बहूनि। **शेश्छन्दसी**ति शेर्लोपः। **(वर्पांसि)** रूपाणि **(अश्विना)** शिल्पिनौ **(दधाना)** धरन्तौ **(नि) (पेदवे)** गमनाय। पदधातोरौणादिरुः प्रत्ययो वर्णव्यत्ययेनास्यैकारश्च। **(ऊहथुः)** वाहयतम् **(आशुम्)** शीघ्रगमकम् **(अश्वम्)** विद्युदाख्यमग्निम् **(सहस्रसाम्)** सहस्राण्यसंख्यातानि कर्माणि सतति संभजति तम् **(वाजिनम्)** वेगवन्तम् **(अप्रतीतम्)** अदृश्यम् **(अहिहनम्)** मेघस्य हन्तारम् **(श्रवस्यम्)** श्रवस्यन्ने पृथिव्यादौ भवम् **(तरुत्रम्)** समुद्रादितारकम्॥ ९॥

अन्वयः-हे अश्विना! पुरु वर्पांसि दधाना सन्तौ युवां पेदवे श्रवस्यमप्रतीतं वाजिनमहिहनं सहस्रसामाशुं तरुत्रंमश्वं न्यूहथुः॥ ९॥

भावार्थः-नहीदृशेन सद्योगमकेन विद्युदग्न्यादिना विना देशान्तरं सुखेन शीघ्रं गन्तुमागन्तुं सद्यः समाचारं ग्रहीतुं च कश्चिदपि शक्नोति॥ ९॥

पदार्थः-हे **(अश्विना)** शिल्पीजनो! **(पुरु)** बहुत **(वर्पांसि)** रूपों को **(दधाना)** धारण किए हुए तुम दोनों **(पेदवे)** शीघ्र जाने के लिये **(श्रवस्यम्)** पृथिवी आदि पदार्थों में हुए **(अप्रतीतम्)** गुप्त **(वाजिनम्)** वेगवान् **(अहिहनम्)** मेघ के मारनेवाले **(सहस्रसाम्)** हजारों कर्मों को सेवन करने **(आशुम्)** शीघ्र पहुंचानेवाले **(तरुत्रम्)** और समुद्र आदि से पार उतारनेवाले **(अश्वम्)** बिजुली रूप अग्नि को **(न्यूहथुः)** चलाओ॥ ९॥

भावार्थः-ऐसे शीघ्र पहुंचानेवाले बिजुली आदि अग्नि के विना एक देश से दूसरे देश को सुख से जाने-आने तथा शीघ्र समाचार लेने को कोई समर्थ नहीं हो सकता है॥ ९॥

अथ विद्युदादिजगन्निर्मातृ ब्रह्मैवोपास्यमित्युपदिश्यते॥

अब बिजुली आदि पदार्थरूप संसार का बनानेवाला परमेश्वर ही उपासनीय है, यह विषय अगले मन्त्र में कहा है॥

एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः।
यद्वां पत्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजम्॥ १०॥ १४॥

एतानि। वाम्। श्रवस्या। सुदानू इति सुऽदानू। ब्रह्म। आङ्गूषम्। सदनम्। रोदस्योः। यत्। वाम्। पत्रासः। अश्विना। हवन्ते। यातम्। इषा। च। विदुषे। च। वाजम्॥ १०॥

पदार्थः-(एतानि) कर्माणि **(वाम्)** युवयोः **(श्रवस्या)** श्रवस्स्वन्नादिषु साधूनि **(सुदानू)** शोभनदानशीलौ **(ब्रह्म)** सर्वज्ञं परमेश्वरम् **(आङ्गूषम्)** अङ्गूषाणां विद्यानां विज्ञापकमिदम्। अत्रागिधातोरूषन्ततस्**तस्येदमि**त्यण्। **(सदनम्)** अधिकरणम् **(रोदस्योः)** पृथिवीसूर्ययोः **(यत्)** **(वाम्)** युवयोः **(पत्रासः)** विज्ञापयितॄणि मित्राणि **(अश्विना)** **(हवन्ते)** आददति। हुधातो**र्बहुलं छन्दसी**ति श्लोरभावः। **(यातम्)** प्राप्नुतम् **(इषा)** इच्छया **(च)** प्रयत्नेन योगाभ्यासेन च **(विदुषे)** प्राप्तविद्याय **(च)** विद्यार्थिभ्यः **(वाजम्)** विज्ञानम्॥ १०॥

अन्वयः-हे सुदानू अश्विना! वां युवयोरेतानि श्रवस्या कर्माणि प्रशंसनीयानि सन्त्यतो वां पत्रासो यद्रोदस्योः सदनमाङ्गूषं ब्रह्म हवन्ते यच्च युवां यातं तस्य वाजमिषा च विदुषे सम्यक् प्रापयतम्॥ १०॥

भावार्थः-सर्वैर्मनुष्यैः सर्वाधिष्ठानं सर्वोपास्यं सर्वनिर्मातृ ब्रह्म यैरुपायैर्विज्ञायते तैर्विज्ञायान्येभ्योऽप्येवमेव विज्ञाप्याखिलानन्द आप्तव्यः॥ १०॥

पदार्थः-हे **(सुदानू)** अच्छे दान देनेवाले **(अश्विनौ)** सभा सेनाधीशो! **(वाम्)** तुम दोनों के **(एतानि)** ये **(श्रवस्या)** अन्न आदि पदार्थों में उत्तम प्रशंसा योग्य कर्म हैं, इस कारण **(वाम्)** तुम दोनों **(पत्रासः)** विशेष ज्ञान देनेवाले मित्र जन **(यत्)** जिस **(रोदस्योः)** पृथिवी और सूर्य के **(सदनम्)** आधाररूप **(आङ्गूषम्)** विद्याओं के ज्ञान देनेवाले **(ब्रह्म)** सर्वज्ञ परमेश्वर को **(हवन्ते)** ध्यान मार्ग से ग्रहण करते **(च)** और जिसको तुम लोग **(यातम्)** प्राप्त होते हो उसके **(वाजम्)** विज्ञान को **(इष)** इच्छा और **(च)** अच्छे यत्न तथा योगाभ्यास से **(विदुषे)** विद्वान् के लिये भलीभांति पहुंचाओ॥ १०॥

भावार्थः-सब मनुष्यों को चाहिये कि सबका आधार, सबके उपासना के योग्य, सबका रचनेहारा ब्रह्म जिन उपायों से जाना जाता है, उनसे जान औरों के लिये भी ऐसे ही जनाकर पूर्ण आनन्द को प्राप्त होवें॥ १०॥

पुनर्विद्युद्विद्योपदिश्यते॥

फिर बिजुली की विद्या का उपदेश अगले मन्त्र में किया है॥

सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम्॥ ११॥

सूनोः। मानेन। अश्विना। गृणाना। वाजम्। विप्राय। भुरणा। रदन्ता। अगस्त्ये। ब्रह्मणा। वावृधाना। सम्। विश्पलाम्। नासत्या। अरिणीतम्॥ ११॥

पदार्थः-(सूनोः) स्वापत्यस्येव **(मानेन)** सत्कारेण **(अश्विना)** व्याप्नुवन्तौ **(गृणाना)** उपदिशन्तौ **(वाजम्)** सत्यं बोधम् **(विप्राय)** मेधाविने **(भुरणा)** सुखं धरन्तौ **(रदन्ता)** सुष्ठु लिखन्तौ **(अगस्त्ये)** अगस्तिषु ज्ञातव्येषु व्यवहारेषु साधूनि कर्माणि। अत्रागधातोरौणदिकस्तिः प्रत्ययोऽसुडागमश्च। **(ब्रह्मणा)** वेदेन **(वावृधाना)** वर्द्धमानौ। **तुजादित्वाद**भ्यासदीर्घः। **(सम्)** **(विश्पलाम्)** विशां पालिका विद्याम् **(नासत्या)** **(अरिणीतम्)** गच्छतम्॥११॥

अन्वयः-हे रदन्ता! सूनोरिव मानेन विप्राय वाजं गृणाना भुरणा नासत्या वावृधाना ब्रह्मणाऽगस्त्ये विश्पलां नाश्विना मित्रत्वेन प्रजया सह समरिणीतं सङ्गच्छेथाम्॥११॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। यथा मातापितरावपत्यान्यपत्यानि च मातापितरावध्यापकाः शिष्यान् शिष्या अध्यापकांश्च पतयः स्त्रीः स्त्रियः पतींश्च सुहृदो मित्राणि परस्परं प्रीणन्ति तथैव राजानः प्रजाः प्रजाश्च राज्ञः सततं प्रीणन्तु॥११॥

पदार्थः-हे **(रदन्ता)** अच्छे लिखनेवालो! **(सूनोः)** अपने लड़के के समान **(मानेन)** सत्कार से **(विप्राय)** अच्छी सुध रखनेवाले बुद्धिमान् जन के लिये **(वाजम्)** सच्चे बोध को **(गृणाना)** उपदेश और **(भुरणा)** सुख धारण करते हुए **(नासत्या)** सत्य से भरे-पूरे **(वावृधाना)** बुद्धि को प्राप्त और **(ब्रह्मणा)** वेद से **(अगस्त्ये)** जानने योग्य व्यवहारों में उत्तम काम के निमित्त **(विश्पलाम्)** प्रजाजनों के पालनेवाली विद्या को **(अश्विना)** प्राप्त होते हुए सभासेनाधीशो! तुम दोनों मित्रपने से प्रजा के साथ **(समरिणीतम्)** मिलो॥११॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जैसे माता-पिता संतानों और संतान माता-पिताओं, पढ़ानेवाले और पढ़नेवाले और पढ़नेवाले पढ़ानेवालों, पति स्त्रियों और स्त्री पतियों तथा मित्र मित्रों को परस्पर प्रसन्न करते हैं, वैसे ही राजा प्रजाजनों और प्रजा राजजनों को निरन्तर प्रसन्न करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कुह॒ यान्ता॑ सुष्टु॒तिं का॒व्यस्य॒ दिवो॑ नपाता वृषणा शयु॒त्रा।
हिर॑ण्यस्येव क॒लशं॑ निखा॒तमुद्पथु॑र्दश॒मे अ॑श्विनाहन्॥१२॥

कुह॑। यान्ता॑। सु॒ऽस्तु॒तिम्। का॒व्यस्य॑। दिवः॑। न॒पा॒ता॒। वृ॒ष॒णा॒। श॒यु॒ऽत्रा। हिर॑ण्यस्यऽइव। क॒लश॑म्। निऽख॑तम्। उत्। ऊ॒पथुः॑। द॒श॒मे। अ॒श्वि॒ना॒। अह॑न्॥१२॥

पदार्थः-(कुह) कुत्र **(यान्ता)** गच्छन्ती **(सुष्टुतिम्)** प्रशस्तां स्तुतिम् **(काव्यस्य)** कवेः कर्मणः **(दिवः)** विज्ञानयुक्तस्य **(नपाता)** अविद्यमानपतनौ **(वृषणा)** श्रेष्ठौ कामवर्षयितारौ **(शयुत्रा)** यौ शयून्

शयानान् त्रायतस्तौ **(हिरण्यस्येव)** यथा सुवर्णस्य **(कलशम्)** घटम् **(निखातम्)** मध्यावकाशम् **(उत्) (ऊपथुः)** वपतः **(दशमे) (अश्विना) (अहन्)** दिने॥१२॥

अन्वयः-हे यान्ता नपाता वृषणा शयुत्राऽश्विना! युवां दशमेऽहन् हिरण्यस्येव निखातं कलशं दिवः काव्यस्य सुष्टुतिं कुहोदूपथुः॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा धनाढ्याः सुवर्णादीनां पात्रेषु दुग्धादिकं संस्थाप्य प्रपच्य भुञ्जानाः स्तूयन्ते तथा शिल्पिनावेतद्विद्यान्यायमार्गेषु प्रजाः संवेश्य धर्मन्यायोपदेशैः परिपक्वाः संसाध्य राज्यश्रीसुखं भुञ्जानौ प्रशंसितौ कुह स्याताम्? धार्मिकेषु विद्वत्स्वित्युत्तरम्॥१२॥

पदार्थः-हे **(यान्ता)** गमन करने **(नपाता)** न गिरने **(वृषणा)** श्रेष्ठ कामनाओं की वर्षा कराने और **(शयुत्रा)** सोते हुए प्राणियों की रक्षा करनेवाले **(अश्विना)** सभा सेनाधीशो! तुम दोनों **(दशमे)** दशवें **(अहन्)** दिन **(हिरण्यस्येव)** सुवर्ण के **(निखातम्)** बीच में पोले **(कशलम्)** घड़ा के समान **(दिवः)** विज्ञानयुक्त **(काव्यस्य)** कविताई की **(सुष्टुतिम्)** अच्छी बड़ाई की **(कुह)** कहाँ **(उदूपथुः)** उत्कर्ष से बोते हो॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे धनाढ्यजन सुवर्ण आदि धातुओं के वासनों में दूध, घी, दही आदि पदार्थों को धर और उनको पका कर खाते हुए प्रशंसा पाते हैं, वैसे दो शिल्पीजन इस विद्या और न्यायमार्गों में प्रजाजनों का प्रवेश कराकर धर्म और न्याय के उपदेशों से उनको पक्के कर राज्य और धन के सुख को भोगते हुए प्रशंसित कहाँ होवें? इसका यह उत्तर है कि धार्मिक विद्वान् जनों में होवें॥१२॥

पुनर्युवाऽवस्थायामेव विवाहकरणाऽवश्यकत्वमाह॥

फिर जवान अवस्था में ही विवाह करना अवश्य है, यह विषय अगले मन्त्र में कहा है॥

युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत॥१३॥

युवम्। च्यवानम्। अश्विना। जरन्तम्। पुनः। युवानम्। चक्रथुः। शचीभिः। युवोः। रथम्। दुहिता। सूर्यस्य। सह। श्रिया। नासत्या। अवृणीत॥१३॥

पदार्थः-(युवम्) युवाम् **(च्यवानम्)** गच्छन्तम् **(अश्विना)** शरीरात्मबलयुक्तौ **(जरन्तम्)** स्तवानम् **(पुनः) (युवानम्)** सम्पादितयौवनम् **(चक्रथुः)** कुरुतम् **(शचीभिः)** प्रज्ञाभिः कर्मभिर्वा **(युवोः) (रथम्)** रमणीयं पतिम् **(दुहिता)** पूर्णयुवतिः कन्या **(सूर्यस्य)** सवितुरुषा इव **(सह) (श्रिया)** लक्ष्म्या शोभया विद्यया सेवया वा **(नासत्या) (अवृणीत)** वृणुयात्॥१३॥

अन्वयः-हे नासत्याऽश्विना! युवं शचीभिः सह वर्त्तमानान् स्वसन्तानान् सम्यग् यूनश्चक्रथुः। पुनर्युवोर्युवयोर्युवतिः सूर्यस्योषा इव दुहिता श्रिया सह वर्त्तमानं च्यवानं जरन्तं युवानं रथं पतिं चावृणीत। पुत्रोऽपि युवा सन् युवतिं च॥१३॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। मातापित्रादीनामतीव योग्यमस्ति यदा स्वापत्यानि पूर्णसुशिक्षाविद्या- शरीरात्मबलरूपलावण्यशीलारोग्यधर्मेश्वरविज्ञानादिभिः शुभैर्गुणैः सह वर्त्तमानानि स्युस्तदा स्वेच्छापरीक्षाभ्यां स्वयंवरविधानेनाभिरूपौ तुल्यगुणकर्मस्वभावौ पूर्णयुवावस्थौ बलिष्ठौ कुमारौ विवाहं कृत्वर्त्तुगामिनौ भूत्वा धर्मेण वर्त्तित्वा प्रजाः सूत्पादयेतामित्युपदेष्टव्यानि नह्येतेन विना कदाचित् कुलोत्कर्षो भवितुं योग्योऽस्तीति तस्मात् सज्जनैरेवमेव सदा विधेयम्॥१३॥

पदार्थः-हे **(नासत्या)** सत्य वर्त्ताव वर्त्तनेवाले **(अश्विना)** शरीर और आत्मा के बल से युक्त सभासेनाधीशो! **(युवम्)** तुम दोनों **(शचीभिः)** अच्छी बुद्धियों वा कर्मों के साथ वर्त्तमान अपने सन्तानों को भली-भांति सेवा कर जवान **(चक्रथुः)** करो **(पुनः)** फिर **(युवोः)** तुम दोनों की युवती अर्थात् यौवन अवस्था को प्राप्त **(सूर्यस्य)** सूर्य की किई हुई प्रातःकाल की वेला के समान **(दुहिता)** कन्या **(श्रिया)** धन, शोभा, विद्या वा सेवा के **(सह)** साथ वर्त्तमान **(च्यवानम्)** गमन और **(जरन्तम्)** प्रशंसा करनेवाले **(युवानम्)** जवानी से परिपूर्ण **(रथम्)** रमण करने योग्य मनोहर पति को **(अवृणीत)** वरे और पुत्र भी ऐसा जवान होता हुआ युवति स्त्री को वरे॥१३॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। माता-पिता आदि को अतीव योग्य है कि जब अपने सन्तान पूर्ण अच्छी सिखावट, विद्या, शरीर और आत्मा के बल, रूप, लावण्य, स्वभाव, आरोग्यपन, धर्म और ईश्वर को जानने आदि उत्तम गुणों के साथ वर्त्ताव रखने को समर्थ हों, तब अपनी इच्छा और परीक्षा के साथ आप ही स्वयंवर विधि से दोनों सुन्दर समान गुण, कर्म, स्वभावयुक्त पूरे जवान, बली, लड़की-लड़के विवाह कर ऋतु समय में साथ का संयोग करनेवाले होकर, धर्म के साथ अपना वर्त्ताव वर्त्त कर प्रजा अर्थात् सन्तानों को अच्छे उत्पन्न कर, ये उपदेश देने चाहियें। विना इसके कभी कुल की उन्नति होने के योग्य नहीं है, इससे सज्जन पुरुषों को ऐसा ही सदा करना चाहिये॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना।
युवं भुज्युमर्णसो निः समुद्राद् विभिरूहथुर्ऋज्रेभिरश्वैः॥१४॥

युवम्। तुग्राय। पूर्व्येभिः। एवैः। पुनः। मन्यौ। अभवतम्। युवाना। युवम्। भुज्युम्। अर्णसः। निः। समुद्रात्। विऽभिः। ऊहथुः। ऋज्रेभिः। अश्वैः॥१४॥

पदार्थः-(युवम्) युवाम् **(तुग्राय)** बलाय **(पूर्व्येभिः)** पूर्वैः कृतैः **(एवैः)** विज्ञानादिभिः **(पुनर्मन्यौ)** पुनः पुनर्मन्येते विजानीतस्तौ **(अभवतम्)** भवेतम् **(युवाना)** प्राप्तयौवनौ **(युवम्)** युवाम् **(भुज्युम्)** शरीरात्मपालकं पदार्थसमूहम् **(अर्णसः)** प्रचुरजलात् **(निः)** नितराम् **(समुद्रात्)** जलद्रावाधारात् **(विभिः)** वियति गन्तृभिः पक्षिभिरिव **(ऊहथुः)** वहतम् **(ऋज्रेभिः)** ऋजुगमकैः **(अश्वैः)** आशुगामिभिर्विद्युदादिना निर्मितैर्विमानादियानैः॥१४॥

अन्वयः-हे पुनर्मन्यौ! युवानां कृतविद्यौ स्त्रीपुंसौ युवं युवां तुग्राय पूर्व्येभिरेवैः सुखिनावभवतम्। युवं युवां विभिरिव युक्तैर्ऋज्रेभिरश्वैरर्णसः समुद्राद्भुज्युं निरूहथुः॥१४॥

भावार्थः-स्त्रीपुरुषौ पूर्वैराप्तैः कृतानि कर्माण्यनुष्ठाय धर्मयुक्तेन ब्रह्मचर्य्येण पूर्णा विद्या अवाप्य क्रियाकौशलेन विमानादियानानि सम्पाद्य भूगोलस्याभितो विहृत्य नित्यमानन्देताम्॥१४॥

पदार्थः-हे **(पुनर्मन्यौ)** वार-वार जाननेवाले **(युवाना)** युवावस्था को प्राप्त विद्या पढ़े हुए स्त्री-पुरुषो! **(युवम्)** तुम दोनों **(तुग्राय)** बल के लिये **(पूर्व्येभिः)** अगले सज्जनों से किये हुए **(एवैः)** विज्ञान आदि उत्तम व्यवहारों से सुखी **(अभवतम्)** होओ, **(युवम्)** तुम दोनों **(विभिः)** आकाश में उड़नेवाले पक्षियों के समान **(ऋज्रेभिः)** जिनसे हाल न लगे न उन जोड़े हुए सरल चाल से चलाने वाले और **(अश्वैः)** शीघ्र जानेवाले बिजुली आदि पदार्थों से बने हुए विमानादि यानों से **(अर्णसः)** अगाध जल से भरे हुए **(समुद्रात्)** समुद्र से पार **(भुज्युम्)** शरीर और आत्मा की पालना करनेवाले पदार्थों को **(निरूहथुः)** निर्वाहो अर्थात् निरन्तर पहुंचाओ॥१४॥

भावार्थः-स्त्री-पुरुष अगले (पूर्व) महात्मा, ऋषि, महर्षियों ने किये जो काम हैं, उनका आचरण कर धर्मयुक्त ब्रह्मचर्य्य से शीघ्र पूर्ण विद्याओं को पाकर क्रिया की कुशलता से विमान आदि यानों को बनाकर भूगोल के सब ओर विहार कर नित्य आनन्दयुक्त हों॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान्।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति॥१५॥१५॥

अजोहवीत्। अश्विना। तौग्र्यः। वाम्। प्रऽऊळ्हः। समुद्रम्। अव्यथिः। जगन्वान्। निः। तम्। ऊहथुः। सुऽयुजा। रथेन। मनःऽजवसा। वृषणा। स्वस्ति॥१५॥

पदार्थः-(अजोहवीत्) पुनः पुनः स्पर्द्धेत **(अश्विना)** विद्यासुशीलव्यापिनौ **(तौग्र्यः)** तुग्रेण बलेन निर्वृत्तः सेनावृन्दः **(वाम्)** युवयोः **(प्रोढः)** प्रकर्षेणोढः प्राप्तः **(समुद्रम्)** **(अव्यथिः)** अविद्यमाना

व्यथिर्व्यथा यस्य सः **(जगन्वान्)** भृशं गन्ता **(नः)** नितराम् **(तम्)** **(ऊहथुः)** प्रापयेतम् **(सुयुजा)** सुष्ठु युक्तेन **(रथेन)** **(मनोजवसा)** मनोवद्वेगेन गच्छता **(वृषणा)** सुबलौ **(स्वस्ति)** सुखेन॥१५॥

अन्वयः–हे वृषणाऽश्विना दम्पती! युवां यो वां तौग्र्यः प्रोढोऽव्यथिर्न जगन्वान् सेनासमुदायः समुद्रमजोहवीत्तं सुयुजा मनोजवसा रथेन स्वस्ति निरुहथुः॥१५॥

भावार्थः–यदा कृतब्रह्मचर्य्यः पुरुषः शत्रुविजयाय समुद्रपारं गन्तुमिच्छेत्तदा सभार्यः सबल एव वेगवद्भिर्यानैर्गच्छेदागच्छेच्च॥१५॥

पदार्थः–हे **(वृषणा)** उत्तम बलवाले **(अश्विना)** विद्या और उत्तम शीलों में व्याप्त स्त्री–पुरुषो! तुम दोनों जो **(वाम्)** तुम्हारा **(तौग्र्यः)** बल से सिद्ध हुआ **(प्रोढः)** उत्तमता से प्राप्त **(अव्यथिः)** जिसको व्यथा वा कष्ट नहीं है **(जगन्वान्)** जो निरन्तर गमन करनेवाला सेना का समुदाय है, वह **(समुद्रम्)** समुद्र का **(अजोहवीत्)** वार–वार तिरस्कार करे अर्थात् उससे उत्तीर्ण हो उसकी गम्भीरता न गिने, **(तम्)** उस उक्त सेना समुदाय को **(सुयुजा)** सुन्दरता से जुड़े **(मनोजवसा)** मन के समान वेग से जाते हुए **(रथेन)** रमणीय विमान आदि यानसमुदाय से **(स्वस्ति)** सुखपूर्वक **(निरूहथुः)** निर्वाहो अर्थात् एक देश से दूसरे देश को पहुंचाओ॥१५॥

भावार्थः–जब ब्रह्मचर्य किये पुरुष शत्रुओं के विजय के लिये समुद्र के पार जाना चाहें, तब स्त्री और सेना के साथ ही वेगवान् यानों से जावें–आवें॥१५॥

पुना राजधर्ममाह॥

फिर राजधर्म विषय को अगले मन्त्र में कहा है॥

अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण॥१६॥

अजोहवीत्। अश्विना। वर्तिका। वाम्। आस्नः। यत्। सीम्। अमुञ्चतम्। वृकस्य। वि। जयुषा। ययथुः। सानु। अद्रेः। जातम्। विष्वाचः। अहतम्। विषेण॥१६॥

पदार्थः-(अजोहवीत्) भृशमाह्वयेत् **(अश्विना)** सद्यो यातारौ **(वर्त्तिका)** संग्रामे प्रवर्त्तमाना **(वाम्)** युवाम् **(आस्नः)** आस्यात् **(यत्)** यदा **(सीम्)** खलु **(अमुञ्चतम्)** मोचयतम् **(वृकस्य)** वन्यस्य शुनः **(वि)** **(जयुषा)** जयप्रदेन **(ययथुः)** यातम् **(सानु)** शिखरम् **(अद्रेः)** शैलस्य **(जातम्)** प्रसिद्धमुत्पन्नबलम् **(विष्वाचः)** विविधगतिमतः शत्रुमण्डलस्य **(अहतम्)** हन्यातम् **(विषेण)** विपर्ययकरेण निजबलेन॥१६॥

अन्वयः–हे अश्विना! वर्त्तिका सेना यत् सीं वामजोहवीत् तदा तां वृकस्यास्न इव शत्रुमण्डलादमुञ्चतम्। युवां जयुषा निजरथेनाद्रेः सानु वि ययथुः। विष्वाचो जातं बलं विषेणाहतं च॥१६॥

भावार्थः-राजपुरुषा यथा बलवान् दयालुः शूरवीरो व्याघ्रमुखादजां निर्मोचयति, तथा दस्युभयात् प्रजाः पृथग्रक्षेयुः। यदा शत्रवः पर्वतेषु वर्त्तमाना हन्तुमशक्याः स्युस्तदा तदन्नपानादिकं विदूष्य वशं नयेयुः॥१६॥

पदार्थः-हे **(अश्विना)** शीघ्र जानेहारे सभासेनाधीशो! **(वर्त्तिका)** संग्राम में वर्त्तमान सेना **(यत्सीम्)** जिस समय **(वाम्)** तुम दोनों को **(अजोहवीत्)** निरन्तर बुलावे तब उसको **(वृकस्य)** भेड़िया के **(आस्नः)** मुख से जैसे वैसे शत्रुमण्डल से **(अमुञ्चतम्)** छुड़ावो अर्थात् उस को जीतो और अपनी सेना को बचाओ, तुम दोनों **(जयुषा)** जय देनेवाले अपने रथ से **(अद्रेः)** पर्वत के **(सानु)** शिखर को **(वि, ययथुः)** विविध प्रकार जाओ और **(विष्वाचः)** विविध गति वाले शत्रुमण्डल के **(जातम्)** उत्पन्न हुए बल को **(विषेण)** उसका विपर्य्यय करने वाले विषरूप अपने बल से **(अहतम्)** विनाशो नष्ट करो॥१६॥

भावार्थः-राजपुरुष जैसे बलवान् दयालु शूरवीर बघेले के मुख से छेरी को छुड़ाता है, वैसे डाकुओं के भय से प्रजाजनों को अलग रक्खें। जब शत्रुजन पर्वतों में वर्त्तमान मारे नहीं जा सकते हों, तब उनके अन्न-पान आदि को विदूषित कर उनको वश में लावें॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शतं मेषान् वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे॥ १७॥

शतम्। मेषान्। वृक्ये। ममहानम्। तमः। प्रऽनीतम्। अशिवेन। पित्रा। आ। अक्षी इति। ऋज्रऽअश्वे। अश्विनौ। अधत्तम्। ज्योतिः। अन्धाय। चक्रथुः। विऽचक्षे॥ १७॥

पदार्थः- **(शतम्)** **(मेषान्)** **(वृक्ये)** वृकस्त्रियै **(मामहानम्)** दत्तवन्तम् **(तमः)** अन्धकाररूपं दुःखम् **(प्रणीतम्)** प्रकृष्टतया प्रापितम् **(अशिवेन)** अमङ्गलकारिणा न्यायाधीशेन **(पित्रा)** पालकेन **(आ)** **(अक्षी)** चक्षुषी **(ऋज्राश्वे)** सुशिक्षिततुरङ्गादियुक्ते सैन्ये **(अश्विनौ)** सभासेनेशौ **(अधत्तम्)** दध्यातम् **(ज्योतिः)** प्रकाशम् **(अन्धाय)** दृष्टिनिरुद्धायेवाज्ञानिने **(चक्रथुः)** कुरुतम् **(विचक्षे)**॥१७॥

अन्वयः-हे अश्विनौ! युवां येनाशिवेन पित्रा तमः प्रणीतं तं वृक्ये शतं मेघान् मामहानमिव प्रजाजनान् पीडयन्तं मुञ्चतं पृथकक्कुर्य्यातम्। ऋज्राश्वे अक्षी चक्षुषी आधत्तम्। अन्धाय विचक्षे ज्योतिश्चक्रथुः॥१७॥

भावार्थः-हे सभासेनेशादयो राजपुरुषा यूयं प्रजायामन्यायेन वृक्यः स्वार्थसाधनाय मेषेषु यथा प्रवर्त्तन्ते तथा प्रवर्त्तमानान् स्वभृत्यान् सम्यग्दण्डयित्वान्यैर्धार्मिकैर्भृत्यैः प्रजासु सूर्य्यवद्रक्षणादिकं सततं

प्रकाशयत। यथा चक्षुष्मान् कूपादन्धं निवार्य्य सुखयति तथाऽन्यायकारिभ्यो भृत्येभ्यः पीडिताः प्रजाः पृथक् रक्षेत॥१७॥

पदार्थः-हे **(अश्विनौ)** सभा सेनाधीशो! तुम दोनों जिस **(अशिवेन)** अमंगलकारी **(पित्रा)** प्रजा पालनेहारे न्यायाधीश ने **(तमः)** दुःखरूप अन्धकार **(प्रणीतम्)** भली-भांति पहुंचाया उस **(वृक्ये)** भेड़िनी के लिये **(शतम्)** सैकड़ों **(मेषान्)** मेंढ़ों को **(मामहानम्)** देते हुए के समान प्रजाजनों को पीड़ा देते हुए राज्याधिकारी को छुड़ाओ, अलग करो **(ऋज्राश्वे)** अच्छे सीखे हुए घोड़े आदि पदार्थों से युक्त सेना में **(अक्षी)** आँखों का **(आ, अधत्तम्)** आधान करो अर्थात् दृष्टि देओ, वहाँ के बने-बिगड़े व्यवहार को विचारो और **(अन्धाय)** अन्धे के समान अज्ञानी के लिये **(विचक्षे)** विज्ञानपूर्वक देखने के लिये **(ज्योतिः)** विद्याप्रकाश को **(चक्रथुः)** प्रकाशित करो॥१७॥

भावार्थः-हे सभासेना आदि के पुरुषो! तुम लोग प्रजाजनों में अन्याय से भेड़िनी अपने प्रयोजन के लिये भेड़ बकरों में जैसे प्रवृत्त होती है, वैसे वर्त्ताव रखनेवाले अपने भृत्यों को अच्छे दण्ड देकर अन्य धर्मात्मा भृत्यों से प्रजाजनों में सूर्य्य के समान रक्षा आदि व्यवहारों को निरन्तर प्रकाशित करो। जैसे आँखवाला कुएँ से अन्धे को बचा कर सुख देता है, वैसे अन्याय करनेवाले भृत्यों से पीड़ा को प्राप्त हुए प्रजाजनों को अलग रक्खो॥१७॥

पुना राजविषयमाह॥

फिर राज-विषय को अगले मन्त्र में कहा है॥

शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति।
जारः कनीनइव चक्षदान ऋज्राश्वः शतमेकं च मेषान्॥१८॥

शुनम्। अन्धाय। भरम्। अह्वयत्। सा। वृकीः। अश्विना। वृषणा। नरा। इति। जारः। कनीनः।ऽइव। चक्षदानः। ऋज्रऽअश्वः। शतम्। एकम्। च। मेषान्॥१८॥

पदार्थः-(शुनम्) सुखम् **(अन्धाय)** चक्षुर्हीनाय **(भरम्)** पोषणम् **(अह्वयत्)** उपदिशेत् **(सा) (वृकीः)** स्तेनस्त्री। अत्र **सुपा०** इति सोः स्थाने सुः। **(अश्विना)** सभासेनेशौ **(वृषणा)** सुखवर्षकौ **(नरा) (इति)** प्रकारार्थे **(जारः)** व्यभिचारी वृद्धो वा **(कनीनइव)** यथा प्रकाशमानो जनः **(चक्षदानः)** चक्षो विद्यावचो दीयते येन सः **(ऋज्राश्वः)** ऋजुगतिमदश्वः पुरुषः **(शतम्) (एकम्) (च)** समुच्चये **(मेषान्)** अवीन्॥१८॥

अन्वयः-हे वृषणा नराऽश्विना! सा वृकीः शतमेकं च मेषानह्वयदितीव ऋज्राश्वश्चक्षदानो जारः कनीनइव युवामन्धाय भरं शुनमधत्तम्॥१८॥

भावार्थः-अत्रोपमालङ्कारः। राजपुरुषा अविद्यान्धान् जनानन्यायकारिणां सकाशात् सतीः स्त्रीर्जाराणां संबन्धाद् वृकाणां सकाशादजा इव विमोच्य सततं पालयेयुः॥१८॥

पदार्थः-हे **(वृषणा)** सुख वर्षाने और **(नरा)** धर्म-अधर्म का विवेक करनेहारे **(अश्विना)** सभा सेनाधीशो! **(सा)** वह **(वृकीः)** चोर की स्त्री **(शतम्)** सौ **(च)** और **(एकम्)** एक **(मेषान्)** भेंड़ मेढ़ों को **(अह्वयत्)** हांक देकर जैसे बुलावे **(इति)** इस प्रकार वा **(ऋज्राश्वः)** सीधी चाल चलनेहारे घोड़ोंवाला **(चक्षदानः)** जिससे कि विद्यावचन दिया जाता है, उस **(जारः)** बुड्ढे वा जार कर्म करनेहारे चालाक **(कनीनइव)** प्रकाशमान मनुष्य के समान तुम **(अन्धाय)** अन्धे के लिये **(भरम्)** पोषण अर्थात् उसकी पालना और **(शुनम्)** सुख धारण करो॥१८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजपुरुष अविद्या से अन्धे हो रहे जनों को अन्यायकारियों से, उत्तम सती स्त्रियों को लंपट, वेश्याबाजों से, जैसे भेड़ियों से भेड़-बकरों को बचावें, वैसे निरन्तर बचा कर पालें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः।
अथा युवामिदह्वयत् पुरंधिरागच्छतं सीं वृषणावोभिः॥१९॥

मही। वाम्। ऊतिः। अश्विना। मयः।ऽभू। उत। स्रामम्। धिष्ण्या। सम्। रिणीथः। अथ। युवाम्। इत्। अह्वयत्। पुरम्।ऽधिः। आ। अगच्छतम्। सीम्। वृषणौ। अवः।ऽभिः॥१९॥

पदार्थः-(मही) महती **(वाम्)** युवयोः **(ऊतिः)** रक्षणादियुक्ता नीतिः **(अश्विना)** प्रजापालनाधिकृतौ सभासेनेशौ **(मयोभूः)** मयः सुखं भावयति या सा **(उत)** **(स्रामम्)** दुःखप्रदमन्यायम् **(धिष्ण्या)** धीमन्तौ **(सम्)** **(रिणीथः)** हिंस्तम् **(अथ)** अत्र **निपातस्य चे**ति दीर्घः। **(युवाम्)** द्वौ **(इत्)** **(अह्वयत्)** आह्वयेत् **(पुरन्धिः)** पुष्कलप्रज्ञः **(आ)** **(अगच्छतम्)** **(सीम्)** निश्चये **(वृषणौ)** **(अवोभिः)** रक्षणादिभिः॥१९॥

अन्वयः-हे वृषणौ धिष्ण्याश्विना! वां या मह्युत मयोभूरूतिर्नीतिरस्ति तया स्रामं युवां संरिणीथः। अथ यः पुरन्धिर्युवा युवतिमह्वयत्तमिदेवावोभिः सह सीमागच्छतम्॥१९॥

भावार्थः-राजपुरुषैर्न्यायादन्यायं पृथक्कृत्य धर्मप्रवृत्तान् शरणागतान् संरक्ष्य सर्वतः कृतकृत्यैर्भवितव्यम्॥१९॥

पदार्थः-हे **(वृषणौ)** सुख वर्षानेवाले **(धिष्ण्या)** बुद्धिमान् **(अश्विना)** सभा और सेना में अधिकार पाये हुए जनो! **(वाम्)** तुम दोनों की जो **(मही)** बड़ी **(उत)** और **(मयोभूः)** सुख को उत्पन्न करानेवाली **(ऊतिः)** रक्षा आदि युक्त नीति है, उससे **(स्रामम्)** दुःख देनेवाले अन्याय को **(युवाम्)** तुम **(सं, रिणीथः)** भली-भांति दूर करो **(अथ)** इसके पीछे जो **(पुरन्धिः)** अति बुद्धिमान् जवान यौवन से पूर्ण स्त्री को **(अह्वयत्)** बुलावे **(इत्)** उसी के समान **(अवोभिः)** रक्षा आदि के साथ **(सीम्)** ही **(आ, अगच्छतम्)** आओ॥१९॥

भावार्थः-राजपुरुषों को चाहिये कि न्याय से अन्याय को अलग कर धर्म में प्रवृत्त, शरण आये हुए जनों को अच्छे प्रकार पाल के सब ओर से कृतकृत्य हों॥१९॥

अथ स्त्रीपुरुषविषयमाह॥

अब स्त्री-पुरुष विषय को अगले मन्त्र में कहा है॥

अधेनुं दस्रा स्तर्यꣳ विषक्तामपिन्वतं शयवेऽश्विना गाम्।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम्॥२०॥१६॥

अधेनुम्। दस्रा। स्तर्यम्। विऽसक्ताम्। अपिन्वतम्। शयवे। अश्विना। गाम्। युवम्। शचीभिः। विऽमदाय। जायाम्। नि। ऊहथुः। पुरुऽमित्रस्य। योषाम्॥२०॥

पदार्थः-(अधेनुम्) अदोहयित्रीम् **(दस्रा)** **(स्तर्य्यम्)** सुखैराच्छादिकाम् **(विषक्ताम्)** विविधैः पदार्थैर्युक्ताम् **(अपिन्वतम्)** जलादिभिः सिञ्चतम् **(शयवे)** शयानाय **(अश्विना)** भूगर्भविद्याविदौ स्त्रीपुरुषौ **(गाम्)** पृथिवीम् **(युवम्)** युवाम् **(शचीभिः)** कर्मभिः **(विमदाय)** विशेषमदयुक्ताय **(जायाम्)** **(नि)** **(ऊहथुः)** प्राप्नुतम् **(पुरुमित्रस्य)** बहुसुहृदः **(योषाम्)** युवतिं कन्याम्॥२०॥

अन्वयः-हे दस्राऽश्विना! युवं युवां शचीभिर्विषक्तां स्तर्य्यं स्तरीमधेनुं गामपिन्वतं विमदाय शयवे पुरुमित्रस्य योषा जायां न्यूहथुर्निंतरां प्राप्नुतम्॥२०॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। हे राजपुरुषा! यूयं यथा सर्वमित्रस्य सुलक्षणां हृद्यां ब्रह्मचारिणीं विदुषीं सुशीलां सततं सुखप्रदां धार्मिकीं कुमारीं भार्यत्वायोदूढ्वा संरक्षथ, तथैव सामादिभी राजकर्मभिर्भूमिराज्यं प्राप्य धर्मेण सदा पालयत॥२०॥

पदार्थः-हे **(दस्रा)** दुःख दूर करनेहारे **(अश्विना)** भूगर्भ विद्या को जानते हुए स्त्री-पुरुषो! **(युवम्)** तुम दोनों **(शचीभिः)** कर्मों के साथ **(विषक्ताम्)** विविध प्रकार के पदार्थों से युक्त **(स्तर्य्यम्)** सुखों से ढांपनेवाली नाव वा **(अधेनुम्)** नहीं दुहानेहारी **(गाम्)** गौ को **(अपिन्वतम्)** जलों से सींचो **(विमदाय)** विशेष मदयुक्त अर्थात् पूर्ण युवावस्थावाले **(शयवे)** सोते हुए पुरुष के लिये **(पुरुमित्रस्य)**

बहुत मित्रवाले की **(योषाम्)** युवति कन्या को **(जायाम्)** पत्नीपन को **(न्यूहथुः)** निरन्तर प्राप्त कराओ॥२०॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। हे राजपुरुषो! तुम जैसे सबके मित्र की सुलक्षणा मन लगती, ब्रह्मचारिणी, पण्डिता, अच्छे शीलस्वभाव की, निरन्तर सुख देनेवाली, धर्मशील, कुमारी को भार्य्या करने के लिये स्वीकार कर उसकी रक्षा करते हो, वैसे ही साम, दाम, दण्ड, भेद अर्थात् शान्ति, किसी प्रकार का दबाब, दंड देना और एक से दूसरे को तोड़-फोड़ उसको बेमन करना आदि राज कामों से भूमि के राज्य को पाकर धर्म से सदैव उसकी रक्षा करो॥२०॥

पुना राजधर्ममाह॥

फिर राजधर्म विषय को अगले मन्त्र में कहा है॥

यवं॒ वृके॑णाश्विना॒ वप॒न्तेषं॑ दु॒हन्ता॒ मनु॑षाय दस्रा।
अ॒भि दस्युं॑ बकु॑रेणा॒ धम॑न्तो॒रु ज्योति॑श्चक्रथु॒रार्या॑य॥२१॥

यव॑म्। वृके॑ण। अ॒श्वि॒ना॒। वप॑न्ता। इष॑म्। दु॒हन्ता॑। मनु॑षाय। दस्रा॒। अ॒भि। दस्यु॑म्। बकु॑रेण। धम॑न्ता। उ॒रु। ज्योति॑:। च॒क्र॒थु॒:। आर्या॑य॥२१॥

पदार्थः-(यवम्) यवादिकमिव **(वृकेण)** छेदकेन शस्त्रादिना **(अश्विना)** सुखव्यापिनौ **(वपन्ता) (इषम्)** अन्नम् **(दुहन्ता)** प्रपूरयन्तौ **(मनुषाय)** मननशीलाय जनाय **(दस्रा)** दुःखविनाशकौ **(अभि) (दस्युम्) (बकुरेण)** भासमानेन सूर्य्येण तम इव। अत्रा**न्येषामपी**ति दीर्घः। **(धमन्ता)** अग्निं संयुञ्जानौ **(उरु) (ज्योतिः)** विद्याविनयप्रकाशम् **(चक्रथुः) (आर्य्याय)** अर्य्यस्येश्वरस्य पुत्रवद्वर्त्तमानाय॥२१॥

यास्कमुनिरिमं मन्त्रमेवं व्याचष्टे-**बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा॥२५॥ यवमिव वृकेणाश्विनौ निवपन्तौ। वृको लाङ्गलं भवति विकर्तनात्। लाङ्गलं लङ्गतेः। लाङ्गूलवद्वा। लाङ्गूलं लगतेर्लङ्गतेर्लम्बतेर्वा। अन्नं दुहन्तौ मनुष्याय दर्शनीयावभिधमन्तौ दस्युं बकुरेण ज्योतिषा वोदकेन वार्य्य ईश्वरपुत्रः। (निरु०६.२६)॥२१॥**

अन्वयः-हे दस्राश्विना! युवां मनुषाय वृकेण यवमिव वपन्तेषं दुहन्ताऽऽर्य्याय बकुरेण ज्योतिस्तम इव दस्युमभिधमन्तोरु राज्यं चक्रथुः कुरुतम्॥२१॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। राजपुरुषैः प्रजाकण्टकान् लम्पटचोरानृतपरुषवादिनो दुष्टान् निरुध्य कृष्यादिकर्मयुक्तान् प्रजास्थान् वैश्यान् संरक्ष्य कृष्यादिकर्माण्युन्नीय विस्तीर्णं राज्यं सेवनीयम्॥२१॥

पदार्थः-हे **(दस्रा)** दुःख दूर करनेहारे **(अश्विना)** सुख में रमे हुए सभासेनाधीशो! तुम दोनों **(मनुषाय)** विचारवान् मनुष्य के लिये **(वृकेण)** छिन्न-भिन्न करनेवाले हल आदि शस्त्र-अस्त्र से **(यवम्)** यव आदि अन्न के समान **(वपन्ता)** बोते और **(इषम्)** अन्न को **(दुहन्ता)** पूर्ण करते हुए तथा **(आर्य्याय)** ईश्वर के पुत्र के तुल्य वर्त्तमान धार्मिक मनुष्य के लिये **(बकुरेण)** प्रकाशमान सूर्य्य ने किया **(ज्योतिः)** प्रकाश जैसे अन्धकार को वैसे **(दस्युम्)** डाकू, दुष्ट प्राणी को **(अभि, धमन्ता)** अग्नि से जलाते हुए **(उरु)** अत्यन्त बड़े राज्य को **(चक्रथुः)** करो॥२१॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। राजपुरुषों को चाहिये कि प्रजाजनों में जो कण्टक, लम्पट, चोर, झूठा और खारे बोलनेवाले दुष्ट मनुष्य हैं, उनको रोक, खेती आदि कामों से युक्त वैश्य प्रजाजनों की रक्षा और खेती आदि कामों की उन्नति कर अत्यन्त विस्तीर्ण राज्य का सेवन करें॥२१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम्।
सं वां मधु प्रवोचदृतायन् त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम्॥२२॥

आथर्वणाय। अश्विना। दधीचे। अश्व्यम्। शिरः। प्रति। ऐरयतम्। सः। वाम्। मधु। प्र। वोचत्। ऋतऽयन्। त्वाष्ट्रम्। यत्। दस्रौ। अपिऽकक्ष्यम्। वाम्॥२२॥

पदार्थः-(आथर्वणाय) छिन्नसंशयस्य पुत्राय **(अश्विना)** सत्कर्मसु प्रेरकौ **(दधीचे)** दधीन् विद्याधर्मधरानञ्चति पूजयति तस्मै **(अश्व्यम्)** अश्वेषु भवम् **(शिरः)** उत्तमं स्वाङ्गम् **(प्रति)** **(ऐरयतम्)** प्रापयतम् **(सः)** **(वाम्)** युवाभ्याम् **(मधु)** मधुरम्। मन् धातोरयं प्रयोगः। **(प्र)** **(वोचत्)** उपदिशेत् **(ऋतायन्)** ऋतं सत्यमात्मन इच्छन् **(त्वाष्ट्रम्)** तूर्णं यः सकला विद्या अश्नुते तस्येदं विज्ञानम्। **त्वष्टा तूर्णमश्नुत इति नैरुक्ताः।** (निरु०८.१३) **(यत्)** यस्मै **(दस्रौ)** दुःखनिवर्त्तकौ **(अपिकक्ष्यम्)** कक्षासु विद्याप्रदेशेषु भवा बोधाः कक्ष्यास्तान् प्रति वर्त्तते तत् **(वाम्)** युवम्॥२२॥

अन्वयः-हे दस्रावश्विना! वां युवां यदाथर्वणाय दधीचेऽश्व्यं शिरः प्रत्यैरयतम्। स ऋतायन् सन् वामपिकक्ष्यं त्वाष्ट्रं मधु प्र वोचत्॥२॥

भावार्थः-सभासेनेशादयो राजपुरुषाः विद्वत्सु श्रद्दधीरन् सत्कर्मसु प्रेरयन्तु ते च युष्मभ्यं सत्यमुपदिश्य प्रमादादधर्माच्च निवर्त्तयेयुः॥२२॥

पदार्थः-हे **(दस्रौ)** दुःख की निवृत्ति करने और **(अश्विना)** अच्छे कामों में प्रवृत्त करानेहारे सभासेनाधीशो! **(वाम्)** तुम दोनों **(यत्)** जिस **(आथर्वणाय)** जिसके संशय कट गए उसके पुत्र के लिये तथा **(दधीचे)** विद्या और धर्मों को धारण किये हुए मनुष्यों की प्रशंसा करनेवाले के लिये **(अश्व्यम्)**

घोड़ों में हुए (**शिरः**) उत्तम अङ्ग को (**प्रत्यैरयतम्**) प्राप्त करो (**सः**) वह (**ऋतायन्**) अपने को सत्य व्यवहार चाहता हुआ (**वाम्**) तुम दोनों के लिये (**अपिकक्ष्यम्**) विद्या की कक्षाओं में हुए बोधों के प्रति जो वर्त्तमान उस (**त्वाष्ट्रम्**) शीघ्र समस्त विद्याओं में व्याप्त होनेवाले विद्वान् के (**मधु**) मधुर विज्ञान का (**प्र, वोचत्**) उपदेश करे॥२२॥

भावार्थः-सभासेनाधीश आदि राजजन विद्वानों में श्रद्धा करें और अच्छे कामों में प्रेरणा दें और वे तुम लोगों के लिये सत्य का उपदेश देकर प्रमाद और अधर्म से निवृत्त करें॥२२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सदा॑ कवी सुम॒तिमा च॑के वां॒ विश्वा॒ धियो॑ अश्विना॒ प्राव॑तं मे।
अ॒स्मे र॒यिं ना॑सत्या बृ॒हन्त॑मपत्य॒साचं॒ श्रुत्यं॑ रराथाम्॥२३॥

सदा॑। क॒वी॒ इति॑। सु॒ऽम॒तिम्। आ। च॒के॒। वा॒म्। विश्वाः॑। धियः॑। अ॒श्वि॒ना॒। प्र। अ॒व॒त॒म्। मे॒। अ॒स्मे इति॑। र॒यिम्। ना॒स॒त्या॒। बृ॒हन्त॑म्। अ॒प॒त्य॒ऽसाच॑म्। श्रु॒त्य॑म्। र॒रा॒था॒म्॥२३॥

पदार्थः-(सदा) (कवी) सर्वेषां क्रान्तप्रज्ञौ **(सुमतिम्)** धर्म्यां धियम् **(आ) (चके)** शृणुयाम्। **कै शब्दे**ऽस्माल्लिट् व्यत्ययेनात्मनेपदम्। **(वाम्)** युवयोः **(विश्वाः) (धियः)** धारणावतीर्बुद्धीः **(अश्विना)** विद्याप्रापकौ **(प्र) (अवतम्)** प्रवेशयतम् **(मे)** मह्यम् **(अस्मे)** अस्मभ्यम् **(रयिम्)** धनम् **(नासत्या) (बृहन्तम्)** अतिप्रवृद्धम् **(अपत्यसाचम्)** पुत्रपौत्रादिसमेतम् **(श्रुत्यम्)** श्रोतुं योग्यम् **(रराथाम्)** दद्यातम्। अत्र राधातोर्लोटि **बहुलं छन्दसी**ति शपः श्लुर्व्यत्ययेनात्मनेपदं च॥२३॥

अन्वयः-हे नासत्या कवी अश्विना! वां सुमतिमहमाचके युवां मे मह्यं विश्वा धियः सदा प्रावतमस्मे बृहन्तमपत्यसाचं श्रुत्यं रयिं रराथाम्॥२३॥

भावार्थः-विद्यार्थिभी राजादिगृहस्थैश्चाप्तानां विदुषां सकाशादुत्तमाः प्रज्ञाः प्रापणीयास्ते च विद्वांसस्तेभ्यो विद्यादिधनं प्रदाय सततं सुशिक्षितान् धार्मिकान् विदुषः सम्पादयन्तु॥२३॥

पदार्थः-हे **(नासत्या)** सत्यव्यवहारयुक्त **(कवी)** सब पदार्थों में बुद्धि को चलाने और **(अश्विना)** विद्या की प्राप्ति करानेवाले सभासेनाधीशो! **(वाम्)** तुम लोगों की **(सुमतिम्)** धर्मयुक्त उत्तम बुद्धि को मैं **(आ, चके)** अच्छे प्रकार सुनूं। तुम दोनों **(मे)** मेरे लिये **(विश्वाः)** समस्त **(धियः)** धारणावती बुद्धियों को **(सदा)** सब दिन **(प्र, अवतम्)** प्रवेश कराओ तथा **(अस्मे)** हम लोगों के लिये **(बृहन्तम्)** अति बढ़े हुए **(अपत्यसाचम्)** पुत्र-पौत्र आदि युक्त **(श्रुत्यम्)** सुनने योग्य **(रयिम्)** धन को **(रराथाम्)** दिया करो॥२३॥

भावार्थः-विद्यार्थी और राजा आदि गृहस्थों को चाहिये कि शास्त्रवेत्ता विद्वानों के निकट से उत्तम बुद्धियों को लेवें और वे विद्वान् भी उनके लिये विद्या आदि धन को दे निरन्तर उन्हें अच्छी सिखावट सिखाकर के धर्मात्मा विद्वान् करें॥ २३॥

अथाध्यापककृत्यमाह॥

अब अध्यापक का कृत्य अगले मन्त्र में कहते हैं॥

हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम्।
त्रिधा ह श्यावमश्विना विकस्तमुज्जीवसे ऐरयतं सुदानू॥ २४॥

हिरण्यऽहस्तम्। अश्विना। रराणा। पुत्रम्। नरा। वध्रिऽमत्याः। अदत्तम्। त्रिधा। ह। श्यावम्। अश्विना। विऽकस्तम्। उत्। जीवसे। ऐरयतम्। सुदानू इति सुऽदानू॥ २४॥

पदार्थः-(हिरण्यहस्तम्) हिरण्यानि सुवर्णादीनि हस्ते यस्य यद्वा विद्यातेजांसि हस्ताविव यस्य तम् **(अश्विना)** ऐश्वर्यवन्तौ **(रराणा)** दातारौ **(पुत्रम्)** त्रातारम् **(नरा)** नेतारौ **(वध्रिमत्याः)** वर्धिकाया विद्यायाः **(अदत्तम्)** दद्यातम् **(त्रिधा)** त्रिभिः प्रकारैर्मनोवाक्छरीरशिक्षादिभिः सह **(ह)** किल **(श्यावम्)** प्राप्तविद्यं **(अश्विना)** रक्षादिकर्मव्यापिनौ **(विकस्तम्)** विविधतया शासितारम् **(उत्)** **(जीवसे)** जीवितुम् **(ऐरयतम्)** प्रेरयतम् **(सुदानू)** सुष्ठु दानशीलाविव वर्त्तमानौ॥ २४॥

अन्वयः-हे रराणा नरा अश्विना! युवां हिरण्यहस्तं वध्रिमत्याः पुत्रं मह्यमदत्तम्। हे सुदानू अश्विना! युवां तं श्यावं विकस्तं जीवसे ह किल त्रिधोदैरयतम्॥ २४॥

भावार्थः-अध्यापकाः पुत्रानध्यापिकाः पुत्रींश्च ब्रह्मचर्येण संयोज्य तेषां द्वितीयं विद्याजन्म सम्पाद्य जीवनोपायान् सुशिक्ष्य समये पितृभ्यः समर्पयेयुः। ते च गृहं प्राप्यापि तच्छिक्षां न विस्मरेयुः॥ २४॥

पदार्थः-हे **(रराणा)** उत्तम गुणों के देने **(नरा)** श्रेष्ठ पदार्थों की प्राप्ति कराने और **(अश्विना)** रक्षा आदि कर्मों में व्याप्त होनेवाले अध्यापको! तुम दोनों **(हिरण्यहस्तम्)** जिसके हाथ में सुवर्ण आदि धन वा हाथ के समान विद्या और तेज आदि पदार्थ हैं, उस **(वध्रिमत्याः)** वृद्धि देनेवाली विद्या की **(पुत्रम्)** रक्षा करनेवाले जन को मेरे लिये **(अदत्तम्)** देओ। हे **(सुदानू)** अच्छे दानशील सज्जनों के समान वर्त्तमान **(अश्विना)** ऐश्वर्य्ययुक्त पढ़ानेवालो! तुम दोनों उस **(श्यावम्)** विद्या पाये हुए **(विकस्तम्)** अनेकों प्रकार शिक्षा देनेहारे मनुष्य को **(जीवसे)** जीने के लिये **(ह)** ही **(त्रिधा)** तीन प्रकार अर्थात् मन, वाणी और शरीर की शिक्षा आदि के साथ **(उद्, ऐरयतम्)** प्रेरणा देओ अर्थात् समझाओ॥ २४॥

भावार्थः-पढ़ानेवाले सज्जन पुत्रों और पढ़ानेवाली स्त्रियां पुत्रियों को ब्रह्मचर्य्य नियम में लगा कर, इनके दूसरे विद्याजन्म को सिद्ध कर, जीवन के उपाय अच्छे प्रकार सिखाकर के, समय पर उनके माता-पिता को देवें और वे घर पर आकर भी उन गुरुजनों की शिक्षाओं को न भूलें॥ २४॥

पुनः स्त्रीपुरुषौ कदा विवाहं कुर्यातामित्युपदिश्यते॥

फिर स्त्री-पुरुष कब विवाह करें, यह विषय अगले मन्त्र में कहा है॥

एतानि॑ वामश्विना वी॒र्या॑णि॒ प्र पू॒र्व्याण्या॒यवो॑ऽवोचन्।

ब्रह्म॑ कृ॒ण्वन्तो॑ वृषणा यु॒वभ्या॑ सु॒वीरा॑सो वि॒दथ॒मा व॑देम॥ २५॥ १७॥

एतानि॑। वा॒म्। अ॒श्वि॒ना॒। वी॒र्या॑णि। प्र। पू॒र्व्याणि॑। आ॒यवः॑। अ॒वो॒च॒न्। ब्रह्म॑। कृ॒ण्वन्तः॑। वृ॒ष॒णा॒। यु॒वऽभ्या॑म्। सु॒ऽवीरा॑सः। वि॒दथ॑म्। आ। व॒दे॒म॒॥ २५॥

पदार्थः-(एतानि) प्रशंसितानि **(वाम्)** युवयोः **(अश्विना)** प्रशंसितकर्मव्यापिनौ स्त्रीपुरुषौ **(वीर्याणि)** पराक्रमयुक्तानि कर्माणि **(प्र)** **(पूर्व्याणि)** पूर्वैर्विद्वद्भिः कृतानि **(आयवः)** मनुष्याः। **आयव इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(अवोचन्)** वदन्तु **(ब्रह्म)** अन्न धनं वा। **ब्रह्मेत्यन्ननामसु पठितम्।** (निघं०२.७) तथा **ब्रह्मेति धननामसु पठितम्।** (निघं०२.१०) **(कृण्वन्तः)** निष्पादयन्तः **(वृषणा)** विद्यावर्षकौ **(युवभ्याम्)** प्राप्तयुवावस्थाभ्यां युवाभ्याम् **(सुवीरासः)** सुशिक्षाविद्यायुक्ता वीराः पुत्राः भृत्याश्च येषां ते **(विदथम्)** विज्ञानकारकमध्ययनाध्यापनं यज्ञम् **(आ)** **(वदेम)** उपदिशेम॥ २५॥

अन्वयः-हे वृषणाऽश्विना! वां यान्येतानि पूर्व्याणि वीर्याणि कर्माणि तान्यायवः प्रवोचन् युवभ्यां ब्रह्म कृण्वन्तो सुवीरासो वयं विदथमावदेम॥ २५॥

भावार्थः-मनुष्या यैर्विद्वद्भिर्लोकोपकारकाणि विद्याधर्मोपदेशप्रचाराणि कर्माणि कृतानि क्रियन्ते वा तेषां प्रशंसामन्नादिना धनेन वा तत् सेवां च सततं कुर्वन्तु। नहि केचिद्विद्वत्सङ्गेन विना विद्यादिरत्नानि प्राप्तुं शक्नुवन्ति। न किल केचित् कपटादि दोषरहितानामाप्तानां विदुषां सङ्गाध्ययने अन्तरा सुशीलतां विद्यावृद्धिं च कर्त्तुं समर्थयन्ति॥ २५॥

अत्र राजप्रजाऽध्ययनाध्यापनादिकर्मवर्णनात् पूर्वसूक्तार्थेन सहैतत्सूक्तार्थस्य सङ्गतिरस्तीति बोध्यम्॥

इति प्रथमस्याष्टमे सप्तदशो १७ वर्गः सप्तदशोत्तरशततमं ११७ सूक्तं च समाप्तम्॥

पदार्थः-हे **(वृषणा)** विद्या के वर्षाने और **(अश्विना)** प्रशंसित कर्मों में व्याप्त स्त्रीपुरुषो! **(वाम्)** तुम दोनों के जो **(एतानि)** ये प्रशंसित **(पूर्व्याणि)** अगले विद्वानों के नियत किये हुए **(वीर्याणि)** पराक्रमयुक्त काम हैं, उनको **(आयवः)** मनुष्य **(प्रावोचन्)** भली-भांति कहें, **(युवभ्याम्)** तरुण अवस्थावाले तुम दोनों के लिये **(ब्रह्म)** अन्न और धन को **(कृण्वन्तः)** सिद्ध करते हुए **(सुवीरासः)** जिनके अच्छी सिखावट और उत्तम विद्यायुक्त वीर पुत्र, पौत्र और सेवक हैं, वे हम लोग **(विदथम्)** विज्ञान करानेवाले पढ़ने-पढ़ाने रूप यज्ञ का **(आ, वदेम)** उपदेश करें॥ २५॥

भावार्थः- जिन विद्वान् मनुष्यों ने लोक के उपकारक विद्या और धर्मोपदेश के प्रचार करनेवाले काम किये वा जिनसे किये जाते हैं, उनकी प्रशंसा और अन्न वा धन आदि से सेवा करें, क्योंकि कोई विद्वानों के संग के विना विद्या आदि उत्तम-उत्तम रत्नों को नहीं पा सकते। न कोई कपट आदि दोषों से रहित शास्त्र जाननेवाले विद्वानों के संग और उनसे विद्या पढ़ने के विना अच्छी शिक्षा शीलता और विद्या की वृद्धि करने को समर्थ नहीं होते हैं॥ २५॥

इस सूक्त में राजा, प्रजा और पढ़ने-पढ़ाने आदि कामों के वर्णन से पूर्व सूक्तार्थ के साथ इस सूक्त के अर्थ की सङ्गति है, यह समझना चाहिये॥

यह प्रथम अष्टक के आठवें अध्याय में सत्रहवां १७ वर्ग और एकसौ सत्रहवां ११७ सूक्त पूरा हुआ॥

अथास्यैकादशर्चस्याष्टादशोत्तरशततमस्य सूक्तस्य कक्षीवानृषिः। अश्विनौ देवते। १,११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,५,७ त्रिष्टुप्। ३,६,९,१० निचृत् त्रिष्टुप्। ४,८ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अस्यादौ विद्वत्स्त्रीपुरुषौ किं कुर्य्यातामित्युपदिश्यते।

अब ग्यारह ११ ऋचावाले एक सौ अठारहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वान् स्त्री-पुरुष क्या करें, यह विषय कहा है॥

आ वां॑ रथो॑ अश्विना श्ये॒नप॑त्वा सुमृळी॒कः स्ववाँ॑ यात्व॒र्वाङ्।
यो मर्त्या॑स्य॒ मन॑सो॒ जवी॑यान् त्रिबन्धु॒रो वृ॑षणा॒ वात॑रंहाः॥ १॥

आ। वा॒म्। रथ॑ः। अ॒श्वि॒ना॒। श्ये॒नऽप॑त्वा। सु॒ऽमृ॒ळी॒कः। स्वऽवा॑न्। या॒तु॒। अ॒र्वाङ्। यः। मर्त्या॑स्य। मन॑सः। जवी॑यान्। त्रि॒ऽब॒न्धु॒रः। वृ॒ष॒णा॒। वात॑ऽरंहाः॥ १॥

पदार्थः-(आ) (वाम्) युवयोः **(रथः) (अश्विना)** शिल्पविदौ दम्पती **(श्येनपत्वा)** श्येन इव पतति। अत्र पतधातो**रन्येभ्योऽपि दृश्यन्त** इति वनिप्। **(सुमृडीकः)** सुष्ठु सुखयिता **(स्ववान्)** प्रशस्ताः स्वे भृत्याः पदार्था वा विद्यन्ते यस्मिन् **(यातु)** गच्छतु **(अर्वाङ्)** अधः **(यः) (मर्त्यस्य) (मनसः) (जवीयान्) (त्रिबन्धुरः)** त्रयो बन्धुरा अधोमध्योर्ध्वं बन्धा यस्मिन् **(वृषणा)** बलिष्ठौ **(वातरंहाः)** वात इव रंहो गमनं यस्य॥ १॥

अन्वयः-हे वृषणाऽश्विना! वां यस्त्रिबन्धुरः श्येनपत्वा वातरंहा मर्त्यस्य मनसो जवीयान् सुमृडीकः स्ववान् रथोऽस्ति सोऽर्वाङ्ङायातु॥ १॥

भावार्थः-स्त्रीपुरुषौ यदेदृशं यानं निर्मायोपयुञ्जीयातां तदा किं तत्सुखं यत्साद्धुं न शक्नुयाताम्॥ १॥

पदार्थः-हे **(वृषणा)** बलवान् **(अश्विना)** शिल्प कामों के जाननेवाले स्त्री-पुरुषो! **(वाम्)** तुम दोनों को **(यः)** जो **(त्रिबन्धुरः)** त्रिबन्धुर अर्थात् जिसमें नीचे, बीच में और ऊपर बंधन हों **(श्येनपत्वा)** वाज पखेरू के समान जानेवाला **(वातरंहाः)** जिसका पवन समान वेग **(मर्त्यस्य)** मनुष्य के **(मनसः)** मन से भी **(जवीयान्)** अत्यन्त धावने और **(सुमृडीकः)** उत्तम सुख देनेवाला **(स्ववान्)** जिसमें प्रशंसित भृत्य वा अपने पदार्थ विद्यमान हैं, ऐसा **(रथः)** रथ है, वह **(अर्वाङ्)** नीचे **(आ, यातु)** आवे॥ १॥

भावार्थः-स्त्री-पुरुष जब ऐसे यान को उत्पन्न कर उपयोग में लावें तब ऐसा कौन सुख है, जिसको वे सिद्ध नहीं कर सकें॥ १॥

पुना राज्यसहायेन स्त्रीपुरुषविषयमाह॥

फिर राज्य के सहाय से स्त्री-पुरुष के विषय को अगले मन्त्र में कहा है॥

त्रिबन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक्।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे॥ २॥

त्रिऽबन्धुरेण। त्रिऽवृता। रथेन। त्रिऽचक्रेण। सुऽवृता। आ। यातम्। अर्वाक्। पिन्वतम्। गाः। जिन्वतम्। अर्वतः। नः। वर्धयतम्। अश्विना। वीरम्। अस्मे इति॥ २॥

पदार्थः-(त्रिबन्धुरेण) त्रिविधबन्धनयुक्तेन **(त्रिवृता)** त्र्यावरणेन **(रथेन)** **(त्रिचक्रेण)** त्रीणि कलानां चक्राणि यस्मिन् **(सुवृता)** शोभनैर्मनुष्यैः शृङ्गारैर्वा सह वर्त्तमानेन **(आ)** **(यातम्)** प्राप्नुतम् **(अर्वाक्)** भूमेरधोभागम् **(पिन्वतम्)** सेवेथाम् **(गाः)** भूगोलस्था भूमीः **(जिन्वतम्)** सुखयतम् **(अर्वतः)** प्राप्तराज्यान् जनानश्वान् वा **(नः)** अस्माकम् **(वर्धयतम्)** **(अश्विना)** **(वीरम्)** शूरपुरुषम् **(अस्मे)** अस्मान्॥ २॥

अन्वयः-हे अश्विना! युवां त्रिबन्धुरेण त्रिचक्रेण त्रिवृता सुवृता रथेनार्वागायातम्। नो गाः पिन्वतमर्वतो जिन्वतमस्मेऽस्मान्नस्माकं वीरं च वर्धयतम्॥ २॥

भावार्थः-राजपुरुषाः सुसंभारा आप्तसहाया भूत्वा सर्वान् स्त्रीपुरुषान् समृद्धियुक्तान् कृत्वा प्रशंसिताः स्युः॥ २॥

पदार्थः-हे **(अश्विना)** सभासेनाधीशो! तुम दोनों **(त्रिबन्धुरेण)** जो तीन प्रकार के बन्धनों से युक्त **(त्रिचक्रेण)** जिसमें कलों के तीन चक्कर लगे **(त्रिवृता)** और तीन ओढ़ने के वस्त्रों से युक्त जो **(सुवृता)** अच्छे-अच्छे मनुष्य शृङ्गारों के साथ वर्त्तमान **(रथेन)** रथ है उससे **(अर्वाक्)** भूमि के नीचे **(आ, यातम्)** आओ, **(नः)** हम लोगों की **(गाः)** पृथिवी में जो भूमि हैं, उनका **(पिन्वतम्)** सेवन करो, **(अर्वतः)** राज्य पाये हुए मनुष्य वा घोड़ों को **(जिन्वतम्)** जीआओ सुख देओ, **(अस्मे)** हम लोगों को और हम लोगों के **(वीरम्)** शूरवीर पुरुष को **(वर्द्धयतम्)** बढ़ाओ वृद्धि देओ॥ २॥

भावार्थः-राजपुरुष अच्छी सामग्री और उत्तम शास्त्रवेत्ता विद्वानों का सहाय ले और तब स्त्री-पुरुषों को समृद्धि और सिद्धियुक्त करके प्रशंसित हों॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः॥ ३॥

प्रवत्ऽयामना। सुऽवृता। रथेन। दस्रौ। इमम्। शृणुतम्। श्लोकम्। अद्रेः। किम्। अङ्ग। वाम्। प्रति। अवर्तिम्। गमिष्ठा। आहुः। विप्रासः। अश्विना। पुराऽजाः॥ ३॥

पदार्थः-(प्रवद्यामना) प्रकृष्टं याति गच्छति यस्तेन **(सुवृता)** शोभनैः साधनैः सह वर्त्तमानेन **(रथेन)** विमानादियानेन **(दस्रौ)** दातारौ **(इमम्)** **(शृणुतम्)** **(श्लोकम्)** वाचम्। **श्लोक इति वाङ्नामसु पठितम्।** (निघं०१.११) **(अद्रेः)** पर्वतस्य **(किम्)** **(अङ्ग)** **(वाम्)** युवाम् **(प्रति)** **(अवर्त्तिम्)** अवाच्यम् **(गमिष्ठा)** अतिशयेन गन्तारौ **(आहुः)** उपदिशन्ति **(विप्रासः)** मेधाविनो विद्वांसः **(अश्विना)** **(पुराजाः)** पूर्वं जाता वृद्धाः॥३॥

अन्वयः-हे प्रवद्यामना सुवृता रथेनाद्रेरुपरि गच्छन्तौ दस्रावश्विना! वां युवामिमं श्लोकं शृणुतम्। अङ्ग हे सभासेनेशौ! पुराजा विप्रासो गमिष्ठा वां प्रति किमवर्त्तिमाहुः किमपि नेत्यर्थः॥३॥

भावार्थः-हे राजादयः स्त्रीपुरुषा! यूयं यद्यदाप्तैरुपदिश्यते तत्तदेव स्वीकुरुत। नहि सत्पुरुषोपदेशमन्तरा जगति जनानामुन्नतिर्जायते, यत्राप्तोपदेशा न प्रवर्त्तन्ते तत्रान्धकारावृताः सन्तः पशुवद्वर्तित्वा दुःखं सञ्चिन्वन्ति॥३॥

पदार्थः-हे **(प्रवद्यामना)** भली-भांति चलने वाले **(सुवृता)** अच्छे-अच्छे साधनों से युक्त **(रथेन)** विमान आदि रथ से **(अद्रेः)** पर्वत के ऊपर जाने और **(दस्रौ)** दान आदि उत्तम कामों के करनेवाले **(अश्विना)** सभासेनाधीशो वा हे स्त्री-पुरुषो! **(वाम्)** तुम दोनों **(इमम्)** इस **(श्लोकम्)** वाणी को **(शृणुतम्)** सुनो कि **(अङ्ग)** हे उक्त सज्जनो! **(पुराजाः)** अगले वृद्ध **(विप्रासः)** उत्तम बुद्धिवाले विद्वान् जन **(गमिष्ठा)** अति चलते हुए तुम दोनों के **(प्रति)** प्रति **(किम्)** किस **(अवर्त्तिम्)** न वर्त्तने न कहने योग्य निन्दित व्यवहार का **(आहुः)** उपदेश करते हैं अर्थात् कुछ भी नहीं॥३॥

भावार्थः-हे राजा आदि स्त्री-पुरुषो! तुम जो-जो विद्वानों ने उपदेश किया उसी-उसी को स्वीकार करो, क्योंकि सत्पुरुषों के उपदेश के विना संसार में मनुष्यों की उन्नति नहीं होती। जहाँ उत्तम विद्वानों के उपदेश नहीं प्रवृत्त होते हैं, वहाँ सब अज्ञानरूपी अंधेरे से ढपे ही होकर पशुओं के समान वर्त्ताव कर दुःख को इकट्ठा करते हैं॥३॥

पुनस्तौ किं कुर्यातामित्युपदिश्यते॥

फिर वे स्त्री-पुरुष क्या करें, यह विषय अगले मन्त्र में कहा है॥

आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतङ्गाः।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति॥४॥

आ। वाम्। श्येनासः। अश्विना। वहन्तु। रथे। युक्तासः। आशवः। पतङ्गाः। ये। अप्ऽतुरः। दिव्यासः। न। गृध्राः। अभि। प्रयः। नासत्या। वहन्ति॥४॥

पदार्थः-(आ) (वाम्) युवयोः **(श्येनासः)** श्येन इव गन्तारः **(अश्विना) (वहन्तु)** प्रापयन्तु **(रथे) (युक्तासः)** संयोजिताः **(आशवः)** शीघ्रगामिनोऽश्वा इवाग्न्यादयः। **आशुरित्यश्वनामसु पठितम्।** (निघं०१.१४) **(पतङ्गाः)** सूर्य्य इव देदीप्यमानाः **(ये) (अप्तुरः)** अप्स्वन्तरिक्षे त्वरन्ति ते **(दिव्यासः)** दिवि क्रीडायां साधवः **(न)** इव **(गृध्राः)** पक्षिणः **(अभि) (प्रयः)** प्रियमाणं स्थानम् **(नासत्या) (वहन्ति)** प्रापयन्ति॥४॥

अन्वयः-हे नासत्याश्विना! येऽप्तुरो दिव्यासो गृध्रा नेव प्रयोऽभि वहन्ति ते श्येनासः पतङ्गा आशवो रथे युक्तासः सन्तो वामावहन्ति॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे स्त्रीपुरुषा! यथाकाशे स्वपक्षाभ्यामुड्डीयमाना गृध्रादयः पक्षिणः सुखेन गच्छन्त्यागच्छन्ति, तथैव यूयं सुसाधितैर्विमानादिभिर्यानैरन्तरिक्षे गच्छतागच्छत॥४॥

पदार्थः-हे **(नासत्या)** सत्य के साथ वर्त्तमान **(अश्विना)** सब विद्याओं में व्याप्त स्त्री पुरुषो! **(ये)** जो **(अप्तुरः)** अन्तरिक्ष में शीघ्रता करने **(दिव्यासः)** और अच्छे खेलनेवाले **(गृध्राः)** गृध्र पखेरुओं के **(न)** समान **(प्रयः)** प्रीति किये अर्थात् चाहे हुए स्थान को **(अभि, वहन्ति)** सब ओर से पहुंचाते हैं, वे **(श्येनासः)** वाज पखेरू के समान चलने **(पतङ्गाः)** सूर्य के समान निरन्तर प्रकाशमान **(आशवः)** और शीघ्रतायुक्त घोड़ों के समान अग्नि आदि पदार्थ **(रथे)** विमानादि रथ में **(युक्तासः)** युक्त किये हुए **(वाम्)** तुम दोनों को **(आ, वहन्ति)** पहुंचाते हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे स्त्री-पुरुषो! जैसे आकाश में अपने पङ्खों से उड़ते हुए गृध्र आदि पखेरू सुख से आते-जाते हैं, वैसे ही तुम अच्छे सिद्ध किये विमान आदि यानों से अन्तरिक्ष में आओ-जाओ॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वां॑ रथं॑ युव॒तिस्ति॑ष्ठदत्र॑ जु॒ष्ट्वी नं॑रा दुहि॒ता सूर्य॑स्य।
परि॑ वा॒मश्वा॒ वपु॑षः पत॒ङ्गा वयो॑ वहन्त्वरु॒षा अ॒भीके॑॥५॥१८॥

आ। वा॒म्। रथ॑म्। यु॒व॒तिः। ति॒ष्ठ॒त्। अत्र॑। जु॒ष्टऽवी। न॒रा॒। दु॒हि॒ता। सूर्य॑स्य। परि॑। वा॒म्। अश्वाः॑। वपु॑षः। प॒त॒ङ्गाः॑। वयः॑। व॒ह॒न्तु॒। अ॒रु॒षाः॑। अ॒भीके॑॥५॥

पदार्थः-(आ) (वाम्) युवयोः **(रथम्) (युवतिः)** नवयौवना **(तिष्ठत्) (अत्र) (जुष्टवी)** प्रीता सेवमाना वा **(नरा) (दुहिता) (सूर्यस्य)** कान्तिः **(परि) (वाम्)** युवाम् **(अश्वाः) (वपुषः)** सुरूपस्य। **वपुरिति रूपनामसु पठितम्।** (निघं०३.७) **(पतङ्गाः) (वयः)** पक्षिण इव **(वहन्तु) (अरुषाः)**

रक्तादिगुणविशिष्टा अग्न्यादयः **(अभीके)** संग्रामे। **अभीक इति संग्रामनामसु पठितम्।** (निघं०२.१७)॥५॥

अन्वयः-हे नरा नेतारौ सभासेनाधीशौ! वपुषो जुष्ट्वी युवतिर्दुहिता सूर्य्यस्योषाः पृथिवीमिव वां रथमातिष्ठत्। अत्राभीके पतङ्गा अरुषा वयोऽश्वा वां परिवहन्तु॥५॥

भावार्थः-अत्र लुप्तोपमालङ्कारौ। यथा सूर्य्यस्य किरणाः सर्वतो विहरन्ति यथा पतिव्रता साध्वी पतिं सुखं नयति यथा पक्षिण उपर्यधो गच्छन्ति तथा युद्धे श्रेष्ठानि यानान्युत्तमा वीराश्चाभीष्टं साध्नुवन्ति॥५॥

पदार्थः-हे **(नरा)** सबके नायक सभासेनाधीशो! **(वपुषः)** सुन्दर रूप की **(जुष्ट्वी)** प्रीति को पाए हुए वा सुन्दर रूप की सेवा करती सुन्दरी **(युवतिः)** नवयौवना **(दुहिता)** कन्या **(सूर्यस्य)** सूर्य्य की किरण जो प्रातःसमय की वेला जैसे पृथिवी पर ठहरे वैसे **(वाम्)** तुम दोनों के **(रथम्)** रथ पर **(आ, तिष्ठत्)** आ बैठे **(अत्र)** इस **(अभीके)** संग्राम में **(पतङ्गाः)** गमन करते हुए **(अरुषाः)** लाल रङ्गवाले **(वयः)** पखेरुओं के समान **(अश्वाः)** शीघ्रगामी अग्नि आदि पदार्थ **(वाम्)** तुम दोनों को **(परि, वहन्तु)** सब ओर से पहुंचावें॥५॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। जैसे सूर्य्य कि किरणें सब ओर से आती-जाती हैं वा जैसे पतिव्रता उत्तम स्त्री पति को सुख पहुंचाती है वा जैसे पखेरू ऊपर-नीचे जाते हैं, वैसे युद्ध में उत्तम यान और उत्तम वीर जन चाहे हुए सुख को सिद्ध करते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः।
निष्टौग्र्यं पारयथः समुद्रात् पुनश्च्यवानं चक्रथुर्युवानम्॥६॥

उत्। वन्दनम्। ऐरतम्। दंसनाभिः। उत्। रेभम्। दस्रा। वृषणा। शचीभिः। निः। तौग्र्यम्। पारयथः। समुद्रात्। पुनरिति। च्यवानम्। चक्रथुः। युवानम्॥६॥

पदार्थः-(**उत्**) (**वन्दनम्**) स्तुत्यं यानम् (**ऐरतम्**) गच्छतम् (**दंसनाभिः**) भाषणैः (**उत्**) (**रेभम्**) स्तोतारम् (**दस्रा**) (**वृषणा**) (**शचीभिः**) कर्मभिः प्रज्ञाभिर्वा (**निः**) (**तौग्र्यम्**) बलवतो हिंसकस्य राज्ञः पुत्रं राजन्यम् (**पारयथः**) (**समुद्रात्**) सागरात् (**पुनः**) (**च्यवानम्**) गन्तारम् (**चक्रथुः**) कुरुतः (**युवानम्**) बलवन्तम्॥६॥

अन्वयः-हे दस्रा वृषणा! युवां शचीभिर्दंसनाभिर्यथा तौग्र्यं च्यवानं युवानं समुद्रान्निःपारयथः। पुनरवारं प्राप्तमुच्चक्रथुस्तथैव वन्दनं रेभं चोदैरतम्॥६॥

भावार्थः-यथा पोतगमयितारो जनान् समुद्रपारं नीत्वा सुखयन्ति तथा राजसभा शिल्पिनं उपदेशकांश्च दुःखात् पारं प्रापय्य सततमानन्दयेत्॥६॥

पदार्थः-हे **(दस्रा)** दुःखों के दूर करने और **(वृषणा)** सुख वर्षानेवाले सभासेनाधीशो! तुम दोनों **(शचीभिः)** कर्म और बुद्धियों वा **(दंसनाभिः)** वचनों के साथ जैसे **(तौग्र्यम्)** बलवान् मारनेवाला राजा का पुत्र **(च्यवानम्)** जो गमनकर्त्ता बली **(युवानम्)** जवान है उसको **(समुद्रात्)** सागर से **(निः, पारयथः)** निरन्तर पार पहुंचाते **(पुनः)** फिर इस ओर आए हुए को **(उत्, चक्रथुः)** उधर पहुंचाते हो, वैसे ही **(वन्दनम्)** प्रशंसा करने योग्य यान और **(रेभम्)** प्रशंसा करनेवाले मनुष्य को **(उदैरतम्)** इधर-उधर पहुंचाओ॥६॥

भावार्थः-जैसे नाव के चलानेवाले मल्लाह आदि मनुष्यों को समुद्र के पार पहुंचा कर सुखी करते हैं, वैसे राजसभा शिल्पीजनों और उपदेश करनेवालों को दुःख से पार पहुंचा कर निरन्तर आनन्द देवें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम्।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा॥७॥

युवम्। अत्रये। अवऽनीताय। तप्तम्। ऊर्जम्। ओमानम्। अश्विनौ। अधत्तम्। युवम्। कण्वाय। अपिऽरिप्ताय। चक्षुः। प्रति। अधत्तम्। सुऽस्तुतिम्। जुजुषाणा॥७॥

पदार्थः-(युवम्) युवां स्त्रीपुरुषौ **(अत्रये)** अविद्यमानत्रिविधदुःखाय **(अवनीताय)** अविद्यानामपगमनाय **[**अविद्याऽज्ञानापगमनाय**]** **(तप्तम्)** तपोजनितम् **(ऊर्जम्)** पराक्रमम् **(ओमानम्)** रक्षणादिसत्कर्मपालकम् **(अश्विनौ)** **(अधत्तम्)** दध्यातम् **(युवम्)** **(कण्वाय)** मेधाविने **(अपिरिप्ताय)** सकलविद्योपचयनाय। लिपधातोर्निष्ठा कपिलकादित्वाल्लत्वविकल्पः। **(चक्षुः)** दर्शकं विज्ञानम् **(प्रति)** **(अधत्तम्)** **(सुष्टुतिम्)** शोभना प्रशंसाम् **(जुजुषाणा)** सेवितौ प्रीतौ वा॥७॥

अन्वयः-हे जुजुषाणाऽश्विनौ! युवं युवामवनीतायापिरिप्तायात्रये कण्वाय तप्तमोमानमूर्जमधत्तम्। युवं युवां तस्माच्चक्षुः सुष्टुतिं च प्रत्यधत्तम्॥७॥

भावार्थः-सभासेनाध्यक्षादिभी राजपुरुषैर्धार्मिकाणां वेदादिविद्याप्रचाराय प्रयत्नमानानां विदुषां रक्षां विधाय तेभ्यो विनयं प्राप्य प्रजाः पालनीयाः॥७॥

पदार्थः-हे **(जुजुषाणा)** सेवा प्रीति को प्राप्त **(अश्विनौ)** समस्त गुणों में व्याप्त स्त्री-पुरुषो! **(युवम्)** तुम दोनों **(अवनीताय)** अविद्या अज्ञान के दूर होने **(अपिरिप्ताय)** और समस्त विद्याओं के बढ़ने के लिये **(अत्रये)** जिसको तीन प्रकार का दुःख नहीं है, उस **(कण्वाय)** बुद्धिमान् के लिये **(तप्तम्)** तपस्या से उत्पन्न हुए **(ओमानम्)** रक्षा आदि अच्छे कामों की पालना करनेवाले **(ऊर्जम्)** पराक्रम को **(अधत्तम्)** धारण करो और **(युवम्)** तुम दोनों उस से **(चक्षुः)** सकल व्यवहारों के दिखलानेहारे उत्तम ज्ञान और **(सुष्टुतिम्)** सुन्दर प्रशंसा को **(प्रति, अधत्तम्)** प्रतीति के साथ धारण करो॥७॥

भावार्थः-सभासेनाधीश आदि राजपुरुषों को चाहिये कि धर्मात्मा जो कि वेद आदि विद्या के प्रचार के लिये अच्छा प्रयत्न करते हैं, उन विद्वानों की रक्षा का विधान कर उनसे विनय को पाकर प्रजाजनों की पालना करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय।
अमुञ्चतं वर्तिकामंहसो निः प्रति जङ्घां विश्पलाया अधत्तम्॥८॥

युवम्। धेनुम्। शयवे। नाधिताय। अपिन्वतम्। अश्विना। पूर्व्याय। अमुञ्चतम्। वर्तिकाम्। अंहसः। निः। प्रति। जङ्घाम्। विश्पलायाः। अधत्तम्॥८॥

पदार्थः-(युवम्) सुशिक्षितां वाचम् **(धेनुम्)** सुखेन शयानाय **(शयवे)** ऐश्वर्ययुक्ताय **(नाधिताय)** सुशिक्षितौ स्त्रीपुरुषौ **(अपिन्वतम्)** पूर्वैर्विद्वद्भिः कृताय निष्पादिताय विदुषे **(अश्विना)** मुञ्चेताम् **(अमुञ्चतम्)** विनयादिसहितां नीतिम् **(वर्त्तिकाम्)** अधर्मानुष्ठानात् **(अंहसः)** निर्गते **(निः)** **(प्रति)** सर्वसुखजनिकाम्। **(जङ्घाम्)** **अच् तस्य जङ्घ च।** (उणा०५.३१) इति जन धातोरच् प्रत्ययो जङ्घ आदेशश्च। **(विश्पलायाः)** प्रजायाः **(अधत्तम्)** दध्यातम्॥८॥

अन्वयः-हे अश्विना सकलविद्याव्यापिनौ स्त्रीपुरुषौ! युवं युवां नाधिताय पूर्व्याय शयवे धेनुमपिन्वतं यमंहसो निरमुञ्चतं तस्माद्विश्पलाया पालनाय जङ्घां वर्त्तिकां प्रत्यधत्तम्॥८॥

भावार्थः-राजपुरुषाः सर्वानैश्वर्ययुक्तान् परस्परं धनाढ्यकुलोद्गतान् प्रजास्थान् सत्यन्यायेन सन्तोष्य ब्रह्मचर्येण विद्याग्रहणाय प्रवर्त्तयध्वम्। यतः कस्यापि पुत्रः पुत्री च विद्यासुशिक्षे अन्तरा नावशिष्येत्॥८॥

पदार्थः-हे **(अश्विना)** अच्छी सीख पाये हुए समस्त विद्याओं में रमते हुए स्त्री-पुरुषो! **(युवम्)** तुम दोनों **(नाधिताय)** ऐश्वर्ययुक्त **(पूर्व्याय)** अगले विद्वानों ने किये हुए **(शयवे)** जो कि सुख से सोता है, उस विद्वान् के लिये **(धेनुम्)** अच्छी सीख दी हुई वाणी को **(अपिन्वतम्)** सेवन करो, जिसको **(अंहसः)**

अधर्म के आचरण से **(निरमुञ्चतम्)** निरन्तर छुड़ाओ उससे **(विश्पलायाः)** प्रजाजनों की पालना के लिये **(जङ्घाम्)** सब सुखों की उत्पन्न करनेवाली **(वर्त्तिकाम्)** विनय, नम्रता आदि गुणों के सहित उत्तम नीति को **(प्रत्यधत्तम्)** प्रतीति से धारण करो॥८॥

भावार्थः-राजपुरुष सब ऐश्वर्ययुक्त परस्पर धनीजनों के कुल में हुए प्रजाजनों को सत्य-न्याय से सन्तोष दे उनको ब्रह्मचर्य के नियम से विद्या ग्रहण करने के लिये प्रवृत करावें, जिससे किसी का लड़का और लड़की विद्या और उत्तम शिक्षा के विना न रह जाये॥८॥

अथ विद्युद्विद्यां दम्पती गृह्णीयातामित्याह॥

अब बिजुली की विद्या को स्त्रीपुरुष ग्रहण करें, इस विषय को अगले मन्त्र में कहा है॥

युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम्।
जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वङ्गम्॥९॥

युवम्। श्वेतम्। पेदवे। इन्द्रऽजूतम्। अहिऽहनम्। अश्विना। अदत्तम्। अश्वम्। जोहूत्रम्। अर्यः। अभिऽभूतिम्। उग्रम्। सहस्रऽसाम्। वृषणम्। वीळुऽअङ्गम्॥९॥

पदार्थः-(युवम्) (श्वेतम्) (पेदवे) गमनागमनाय **(इन्द्रजूतम्)** सभाध्यक्षेण प्रेरितम् **(अहिहनम्)** मेघहन्तारं सूर्य्यमिव **(अश्विना)** पत्नीसर्वलोकाधिपती **(अदत्तम्)** दद्यातम् **(अश्वम्)** व्यापनशीलम् **(जोहूत्रम्)** अतिशयेन स्पर्धितम् **(अर्य्यः)** सर्वस्वामी सर्वसभाध्यक्षो राजा **(अभिभूतिम्)** शत्रूणां तिरस्कर्तारम् **(उग्रम्)** दुष्टैः शत्रुभिरसहम् **(सहस्रसाम्)** सहस्राणि कार्य्याणि सनति संभजति यस्तम् **(वृषणम्)** शत्रुसेनाया उपरि शस्त्रास्त्रवर्षानिमित्तम् **(वीड्वङ्गम्)** वीडूनि बलयुक्तानि दृढान्यङ्गानि यस्य तम्॥९॥

अन्वयः-हे अश्विना! युवं युवां पेदवेऽर्य्यो य इन्द्रजूतं जोहूत्रं वृषणं वीड्वङ्गमुग्रमभिभूतिं सहस्रसां श्वेतमश्वमहिहनमिव युवाभ्यां ददाति तस्मै सततं सुखमदत्तम्॥९॥

भावार्थः-यथा सूर्य्यो मेघं वर्षयित्वा सर्वस्यै प्रजायै सुखं ददाति तथा शिल्पविद्याविदः स्त्रीपुरुषा अखिलप्रजायै सुखं प्रदद्युः। स्वेषां मध्ये येऽतिरथिनो वीरस्त्रीपुरुषास्तान् सदा सत्कुर्य्युः॥९॥

पदार्थः-हे **(अश्विना)** यज्ञादि कर्म करानेवाली स्त्री और समस्त लोकों के अधिपति पुरुष! **(युवम्)** तुम दोनों **(पेदवे)** जाने-आने के लिये जो **(अर्य्यः)** सबका स्वामी सब सभाओं का प्रधान राजा **(इन्द्रजूतम्)** सभाध्यक्ष राजा ने प्रेरणा किये **(जोहूत्रम्)** अत्यन्त ईर्ष्या करते वा शत्रुओं को घिसते हुए **(वृषणम्)** शत्रुओं की सेना पर शस्त्र और अस्त्रों की वर्षा करानेवाले **(वीड्वङ्गम्)** बली, पोढ़े अंगों से युक्त **(उग्रम्)** दुष्ट शत्रुजनों से नहीं सहे जाते **(अभिभूतिम्)** और शत्रुओं का तिरस्कार करने **(सहस्रसाम्)** वा हजारों कामों को सेवनेवाले **(श्वेतम्)** सुपेद **(अश्वम्)** सभों में व्याप्त बिजुली रूप आग को

(अहिहनम्) मेघ के छिन्न-भिन्न करनेवाले सूर्य्य के समान तुम दोनों के लिये देता है, उसके लिये निरन्तर सुख **(अदत्तम्)** देओ॥९॥

भावार्थः-जैसे सूर्य्य मेघ को वर्षा के सब प्रजा के लिये सुख देता है, वैसे शिल्पविद्या के जाननेवाले स्त्री-पुरुष समस्त प्रजा के लिये सुख देवें और अपने बीच में जो अतिरथी वीर स्त्री-पुरुष हैं, उनका सदा सत्कार करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ता वां॑ नरा॒ स्ववं॑से सुजा॒ता हवा॑महे अश्विना॒ नाध॑माना:।
आ न॒ उप॒ वसु॑मता॒ रथे॑न॒ गिरो॑ जुषा॒णा सु॑वि॒ताय॑ यातम्॥१०॥

ता। वा॒म्। न॒रा॒। सु। अव॑से। सु॒ऽजा॒ता। हवा॑महे। अ॒श्वि॒ना॒। नाध॑मानाः। आ। न॒ः। उप॑। वसु॑ऽमता। रथे॑न। गिर॑ः। जु॒षा॒णा। सु॒वि॒ताय॑। या॒त॒म्॥१०॥

पदार्थः-(ता) तौ **(वाम्)** युवाम् **(नरा)** नैतारौ स्त्रीपुरुषौ **(सु)** **(अवसे)** रक्षणाद्याय **(सुजाता)** शोभनेषु सद्विद्याग्रहणाख्यकर्मसु प्रादुर्भूतौ **(हवामहे)** आह्वयामहे **(अश्विना)** प्रजाङ्गपालकौ **(नाधमानाः)** प्राप्तपुष्कलैश्वर्याः **(आ)** **(नः)** अस्मान् **(उप)** **(वसुमता)** प्रशस्तानि सुवर्णादीनि विद्यन्ते यस्मिँस्तेन **(रथेन)** रमणीयेन विमानादियानेन **(गिरः)** शुभा वाणीः **(जुषाणा)** सेवमानौ **(सुविताय)** ऐश्वर्याय। अत्र सु धातोरौणादिक इतच् किच्च। **(यातम्)** प्राप्नुतम्॥१०॥

अन्वयः-हे सुजाता गिरो जुषाणाऽश्विना नरा! नाधमाना वयं ययोर्वामवसे सुहवामहे ता युवां वसुमता रथेन नोऽस्मान् सुवितायोपायातम्॥१०॥

भावार्थः-प्रजास्थैः स्त्रीपुरुषैर्ये राजपुरुषाः प्रीयेरन् ते प्रजाजनान् सततं प्रीणयन्तु, यतः परस्पराणां रक्षणेनैश्वर्यवृन्दो नित्यं वर्द्धेत॥१०॥

पदार्थः-हे **(सुजाता)** श्रेष्ठ विद्याग्रहण करने आदि उत्तम कामों में प्रसिद्ध हुए **(गिरः)** शुभ वाणियों का **(जुषाणा)** सेवन और **(अश्विना)** प्रजा के अङ्गों की पालना करने वाले **(नरा)** न्याय में प्रवृत्त करते हुए स्त्री-पुरुषो! **(नाधमानाः)** जिनको कि बहुत ऐश्वर्य मिला, वे हम जिन **(वाम्)** तुम लोगों को **(अवसे)** रक्षा आदि के लिये **(सु, हवामहे)** सुन्दरता से बुलावें **(ता)** वे तुम **(वसुमता)** जिसमें प्रशंसित सुवर्ण आदि धन विद्यमान है, उस **(रथेन)** मनोहर विमान आदि यान से **(नः)** हम लोगों को **(सुविताय)** ऐश्वर्य्य के लिये **(उप, आ, यातम्)** आ मिलो॥१०॥

भावार्थः-प्रजाजनों के स्त्री-पुरुषों से जो राजपुरुष प्रीति को पावें, प्रसन्न हों, वे प्रजाजनों को प्रसन्न करें, जिससे एक-दूसरे की रक्षा से ऐश्वर्यसमूह नित्य बढ़े॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ श्ये॒नस्य॒ जव॑सा॒ नूत॑नेना॒स्मे या॑तं नासत्या सु॒जोषा॑:।
हवे॒ हि वा॑मश्विना रा॒तह॑व्य: शश्वत्त॒मायां॒ उ॒षसो॒ व्यु॑ष्टौ॥ ११॥ १९॥

आ। श्ये॒नस्य॑। जव॑सा। नूत॑नेन। अ॒स्मे इति॑। या॒त॒म्। ना॒स॒त्या॒। सु॒ऽजोषा॑:। हवे॑। हि। वा॒म्। अ॒श्वि॒ना॒। रा॒तऽह॑व्यः। श॒श्व॒त्ऽत॒मायां॑:। उ॒षस॑:। विऽउ॑ष्टौ॥ ११॥

पदार्थः-(आ) (श्येनस्य) (जवसा) वेगेनेव **(नूतनेन)** नवीनरथेन **(अस्मे)** अस्मान् **(यातम्)** उपागतम् **(नासत्या) (सजोषाः)** समानप्रेमा **(हवे)** स्तौमि **(हि)** किल **(वाम्)** युवाम् **(अश्विना) (रातहव्यः)** प्रदत्तहविः **(शश्वत्तमायाः)** अतिशयेनानादिरूपायाः **(उषसः)** प्रभातवेलायाः **(व्युष्टौ)** विशेषेण कामयमाने समये॥११॥

अन्वयः-हे नासत्याऽश्विना! सजोषा रातहव्योऽहं शश्वत्तमाया उषसो व्युष्टौ यौ वां हवे तौ युवां हि किल श्येनस्य जवसेव नूतनेन रथेनास्मैऽस्मानायातम्॥११॥

भावार्थः-स्त्रीपुरुषा रात्रेश्चतुर्थे याम उत्थायावश्यकं कृत्वा जगदीश्वरमुपास्य योगाभ्यासं कृत्वा राजप्रजाकार्य्याण्यनुष्ठातुं प्रवर्तेरन्। राजादिभिः प्रशंसनीयाः प्रजाजनाः सत्कर्तव्याः प्रजापुरुषैश्च स्तोतुमर्हा राजजनाश्च स्तोतव्याः। नहि केनचिदधर्मसेवी स्तोतुमर्हो धर्मसेवी निन्दितुं वा योग्योऽस्ति तस्मात्सर्वे धर्मव्यवस्थामाचरेयुः॥११॥

अत्र स्त्रीपुरुषराजप्रजाधर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इत्यष्टादशोत्तरशततमं ११८ सूक्तं एकोनविंशो १९ वर्गश्च समाप्तः॥

पदार्थः-हे **(नासत्या)** सत्ययुक्त **(अश्विना)** समस्त गुणों में रमे हुए स्त्री-पुरुषो वा सभासेनाधीशो! **(सजोषाः)** जिसका एकसा प्रेम **(रातहव्यः)** वा जिसने भलीभांति होम की (सामग्री) दी वह मैं **(शश्वत्तमायाः)** अतीव अनादि रूप **(उषसः)** प्रातःकाल की वेला के **(व्युष्टौ)** विशेष करके चाहे हुए समय में जिन **(वाम्)** तुमको **(हवे)** स्तुति से बुलाऊं, वे तुम **(हि)** निश्चय के साथ **(श्येनस्य)** वाज पखेरू के **(जवसा)** वेग के समान **(नूतनेन)** नये रथ से **(अस्मे)** हम लोगों को **(आ, यातम्)** आ मिलो॥११॥

भावार्थः-स्त्री-पुरुष रात्रि के चौथे प्रहर में उठ अपना आवश्यक अर्थात् शरीर शुद्धि आदि काम कर, फिर जगदीश्वर की उपासना और योगाभ्यास को करके राजा और प्रजा के कामों का आचरण करने को प्रवृत्त हों। राजा आदि सज्जनों को चाहिए कि प्रशंसा के योग्य प्रजाजनों का सत्कार करें और प्रजाजनों को चाहिये कि स्तुति के योग्य राजजनों की स्तुति करें। क्योंकि किसी को अधर्म सेवनेवाले दुष्ट

जन की स्तुति और धर्म का सेवन करनेवाले धर्मात्मा जन की निन्दा करने योग्य नहीं है, इससे सब जन धर्म की व्यवस्था का आचरण करें॥११॥

इस सूक्त में स्त्री-पुरुष और राजा-प्रजा के धर्म का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति समझनी चाहिये॥

यह एकसौ अट्ठारहवां ११८ सूक्त और उन्नीसवां १९ वर्ग समाप्त हुआ॥

अथास्य दशर्चस्यैकोनविंशतिशततमस्य सूक्तस्य दैर्घतमसः कक्षीवानृषिः। अश्विनौ देवते। १,४,६ निचृज्जगती। ३,७,१० जगती। ८ विराड्जगतीछन्दः। निषादः स्वरः। २,५,९ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनः स्त्रीपुरुषौ कथं वर्त्तेयातामित्युपदिश्यते।

अब एकसौ उन्नीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में फिर स्त्री-पुरुष कैसे अपना वर्ताव वर्त्तें, यह उपदेश किया है॥

आ वां॑ रथं॑ पुरुमा॒यं म॑नो॒जुवं॑ जी॒राश्वं॑ य॒ज्ञियं॑ जी॒वसे॑ हुवे।
स॒हस्र॑केतुं व॒निनं॑ श॒तद्व॑सुं श्रु॒ष्टी॒वानं॑ वरिवो॒धाम॒भि प्रय॑ः॥ १॥

आ। वा॒म्। रथ॑म्। पु॒रु॒ऽमा॒यम्। म॒नः॒ऽजुव॑म्। जी॒रऽअ॑श्वम्। य॒ज्ञिय॑म्। जी॒वसे॑। हु॒वे॒। स॒हस्र॑ऽकेतुम्। व॒निन॑म्। श॒त॒त्ऽव॑सुम्। श्रु॒ष्टी॒ऽवान॑म्। व॒रि॒व॒ः॒ऽधाम्। अ॒भि। प्रय॑ः॥ १॥

पदार्थः-(आ) (वाम्) युवयोः स्त्रीपुरुषयोः **(रथम्)** रमणीयं विमानादियानम् **(पुरुमायम्)** पूर्व्या मायया प्रज्ञया सम्पादितम् **(मनोजुवम्)** मनोवद्वेगवन्तम् **(जीराश्वम्)** जीरान् जीवान् प्राणधारकानश्नुते येन तम् **(यज्ञियम्)** यज्ञयोग्यं देशं गन्तुमर्हम् **(जीवसे)** जीवनाय **(हुवे)** स्तुवे **(सहस्रकेतुम्)** असंख्यातध्वजम् **(वनिनम्)** वनं बहूदकं विद्यते यस्मिँस्तम्। **वनमित्युदकनामसु पठितम्।** (निघं०१.१२) **(शतद्वसुम्)** शतान्यसंख्यातानि वसूनि यस्मिंस्तम्। अत्र पृषोदरादित्वात् पूर्वपदस्य तुगागमः। **(श्रुष्टीवानम्)** श्रुष्टीः क्षिप्रगतीर्वनति भाजयति यस्तम्। **श्रुष्टीति क्षिप्रनामसु पठितम्।**[८] वनधातोर्ण्यन्तादच्। **(वरिवोधाम्)** वरिवः परिचरणं सुखसेवनं दधाति येन तम् **(अभि) (प्रयः)** प्रीणाति यः सः। औणादिकोऽन् प्रत्ययः॥ १॥

अन्वयः-हे अश्विना! प्रयोऽहं जीवसे वां युवयोः पुरुमायं जीराश्वं यज्ञियं सहस्रकेतुं शतद्वसुं वनिनं श्रुष्टीवान् मनोजुवं वरिवोधां रथमभ्याहुवे॥ १॥

भावार्थः-पूर्वस्मान् मन्त्रादश्विनेत्यनुवर्त्तते। प्रयतमानैर्विद्वद्भिः शिल्पिभिर्यदीष्येत तर्हि ईदृशो रथो निर्मातुं शक्येत॥ १॥

पदार्थः-हे समस्त गुणों में व्याप्त स्त्री-पुरुषो! **(प्रयः)** प्रीति करनेवाला मैं **(जीवसे)** जीवन के लिये **(वाम्)** तुम दोनों का **(पुरुमायम्)** बहुत बुद्धि से बनाया हुआ **(जीराश्वम्)** जिस से प्राणधारी जीवों को प्राप्त होता वा उनको इकट्ठा करता **(यज्ञियम्)** जो यज्ञ के देश को जाने योग्य **(सहस्रकेतुम्)** जिसमें सहस्रों झंडी लगी हों **(शतद्वसुम्)** सैकड़ों प्रकार के धन **(वनिनम्)** और बहुत जल विद्यमान हों **(श्रुष्टीवानम्)** जो शीघ्रचालियों को चलता हुआ **(मनोजुवम्)** मन के समान वेगवाला **(वरिवोधाम्)**

---

८. पदनामसु। (निघं०४.३) क्षिप्रनामसु नोपलभ्यते। सं०

जिससे मनुष्य सुख सेवन को धारण करता **(रथम्)** उस मनोहर विमान आदि यान की **(अभ्याहुवे)** सब प्रकार प्रशंसा करता हूं॥१॥

भावार्थः-इस मन्त्र में पिछले सूक्त के अन्तिम मन्त्र से **(अश्विना)** इस पद की अनुवृत्ति आती है। अच्छा यत्न करते हुए विद्वान् शिल्पी जनों ने जो चाहा हो तो जैसा कि सब गुणों से युक्त विमान आदि रथ इस मन्त्र में वर्णन किया, वैसा बन सके॥१॥

पुनर्मनुष्याः किं कुर्य्युरित्युपदिश्यते॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

ऊ॒र्ध्वा धी॒तिः प्रत्य॑स्य॒ प्रया॑म॒न्यधा॑यि॒ शस्म॒न्त्समय॑न्त॒ आ दिश॑ः।
स्वदा॑मि घ॒र्मं प्रति॑ यन्त्यू॒तय॒ आ वा॑मू॒र्जानी॒ रथ॑मश्विनारुहत्॥२॥

ऊ॒र्ध्वा। धी॒तिः। प्रति॑। अ॒स्य॒। प्रऽया॑मनि। अधा॑यि। शस्म॑न्। सम्। अ॒य॒न्ते॒। आ। दिश॑ः। स्वदा॑मि। घ॒र्मम्। प्रति॑। य॒न्ति॒। ऊ॒तयः॑। आ। वा॒म्। ऊ॒र्जानी॑। रथ॑म्। अ॒श्वि॒ना॒। अ॒रु॒ह॒त्॥२॥

पदार्थः-(ऊर्ध्वा) (धीतिः) धारणा **(प्रति) (अस्य) (प्रयामनि)** प्रयाणे **(अधायि)** धृता **(शस्मन्)** स्तोतुमर्हे **(सम्) (अयन्ते)** गच्छन्ते **(आ) (दिशः)** ये दिशन्त्यतिसृजन्ति ते जनाः **(स्वदामि) (घर्मम्)** प्रदीप्तं सुगन्धियुक्तं भोज्यं पदार्थम् **(प्रति) (यन्ति)** प्रापयन्ति **(ऊतयः)** कमनीया रक्षादयः **(आ) (वाम्)** युवयोः **(ऊर्जानी)** पराक्रमयुक्ता नीतिः **(रथम्)** विमानादियानम् **(अश्विना)** सभासेनेशौ **(अरुहत्)** रोहति॥२॥

अन्वयः-हे अश्विना! वां युवयोः शस्मन् प्रयामन्यूर्जान्यूर्ध्वा धीतिश्च यैर्जनैरधायि ते दिशः समायन्ते। यं रथं शिल्प्यारुहत्तं युवामारोहेताम्। यं घर्ममूतयो नो यन्ति तं युवां प्रति यन्तु। यं घर्ममहं स्वदाम्यस्य स्वादं युवां प्रति यातम्॥२॥

भावार्थः-हे मनुष्या! यूयं सुसंस्कृतानि रोगापहारकाणि बलप्रदान्यन्नानि भुङ्ग्ध्वम्। यात्रायां सर्वाः सामग्रीः सङ्गृह्य परस्परं प्रीतिरक्षणे विधाय देशान्तरं गच्छत कुत्रापि नीतिं मा त्यजत॥२॥

पदार्थः-हे **(अश्विना)** सभासेनाधीशो! **(वाम्)** तुम दोनों की **(शस्मन्)** प्रशंसा के योग्य **(प्रयामनि)** अति उत्तम यात्रा में जो **(ऊर्जानी)** पराक्रमयुक्त नीति और **(ऊर्ध्वा) (धीतिः)** उन्नतियुक्त धारणा वा ऊंची धारणा जिन मनुष्यों ने **(अधायि)** धारण की वे **(दिशः)** दान आदि उत्तम कर्म करनेहारे मनुष्य **(सम्, आ, अयन्ते)** भली-भांति आते हैं। जिस **(रथम्)** मनोहर विमान आदि यान का शिल्पी कारुक जन **(आ, अरुहत्)** आरोहरण करता अर्थात् उस पर चढ़ता है, उस पर तुम लोग चढ़ो। जिस **(घर्मम्)** उज्ज्वल सुगन्धियुक्त भोजन करने योग्य पदार्थ को **(ऊतयः)** मनोहर रक्षा आदि व्यवहार हम लोगों के लिये **(यन्ति)** प्राप्त करते हैं, उसको **(प्रति)** तुम प्राप्त होओ और जिस उज्ज्वल सुगन्धियुक्त

भोजन करने योग्य पदार्थ का मैं **(स्वदामि)** स्वाद लेऊं **(अस्य)** इसके स्वाद को तुम **(प्रति)** प्रतीति से प्राप्त होओ॥२॥

भावार्थः-हे मनुष्यो! तुम अच्छे बने हुए, रोगों का विनाश करने और बल के देनेहारे अन्नों को भोगो। यात्रा में सब सामग्री को लेकर एक-दूसरे से प्रीति और रक्षा कर-करा देश-परदेश को जाओ, पर कहीं नीति को न छोड़ो॥२॥

पुनः स्त्रीपुरुषकृत्यमाह॥

फिर अगले मन्त्र में स्त्री-पुरुष के करने योग्य काम का उपदेश किया है॥

सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम्॥३॥

सम्। यत्। मिथः। पस्पृधानासः। अग्मत। शुभे। मखाः। अमिताः। जायवः। रणे। युवोः। अह। प्रवणे। चेकिते। रथः। यत्। अश्विना। वहथः। सूरिम्। आ। वरम्॥३॥

पदार्थः-(**सम्**) (**यत्**) यस्मै (**मिथः**) परस्परम् (**पस्पृधानासः**) स्पर्द्धमानाः (**अग्मत**) गच्छत (**शुभे**) शुभगुणप्राप्तये (**मखाः**) यज्ञा इवोपकर्त्तारः (**अमिताः**) अप्रक्षिप्ताः (**जायवः**) शत्रून् विजेतारः (**रणे**) संग्रामे (**युवोः**) (**अह**) शत्रुविनिग्रहे (**प्रवणे**) प्रवन्ते गच्छन्ति वीरा यस्मिन् (**चेकिते**) योद्धुं जानाति (**रथः**) (**यत्**) यः (**अश्विना**) दम्पती (**वहथः**) प्राप्नुथः (**सूरिम्**) युद्धविद्याकुशलं धार्मिकं विद्वांसम् (**आ**) समन्तात् (**वरम्**) अतिश्रेष्ठम्॥३॥

अन्वयः-हे अश्विना! यद्यो विद्वांश्चिकिते यो युवोरथो मिथो युद्धे साधकतमोऽस्ति, यं वरं सूरिं युवां वहथस्तेनाह सह वर्त्तमाना यच्छुभे प्रवणे रणे पस्पृधानासो मखा अमिता जायवः समग्मत सङ्गच्छन्तां तस्मा आप्रयतन्ताम्॥३॥

भावार्थः-राजपुरुषा यदा शत्रुजयाय स्वसेनाः प्रेषयेयुस्तदा लब्धलक्ष्मीकाः कृतज्ञा युद्धकुशला योधयितारो विद्वांसः सेनाभिः सहावश्यं गच्छेयुः, सर्वाः सेनास्तदनुमत्यैव युध्येरन् यतो ध्रुवो विजयः स्यात्। यदा युद्धं निवर्तेत स्वस्वस्थाने वीरा आसीरँस्तदा तान् समूह्य प्रहर्षविजयार्थानि व्याख्यानानि कुर्युर्यतः ते सर्वे युद्धायोत्साहिता भूत्वा शत्रूनवश्यं विजयेरन्॥३॥

पदार्थः-हे (**अश्विना**) स्त्री-पुरुषो! (**यत्**) जो विद्वान् (**चेकिते**) युद्ध करने को जानता है वा जो (**युवोः**) तुम दोनों का (**रथः**) अति सुन्दर रथ (**मिथः**) परस्पर युद्ध के बीच लड़ाई करनेहारा है वा जिस (**वरम्**) अतिश्रेष्ठ (**सूरिम्**) युद्ध विद्या के जाननेवाले धार्मिक विद्वान् को तुम (**वहथः**) प्राप्त होते उसके साथ वर्त्तमान (**अह**) शत्रुओं के बांधने वा उनको हार देने में (**यत्**) जिस (**शुभे**) अच्छे गुण के पाने के लिये (**प्रवणे**) जिसमें वीर जाते हैं, उस (**रणे**) संग्राम में (**पस्पृधानासः**) ईर्ष्या से एक-दूसरे को बुलाते

हुए **(मखाः)** यज्ञ के समान उपकार करनेवाले **(अमिताः)** न गिराये हुए **(जायवः)** शत्रुओं को जीतनेहारे वीरपुरुष **(समग्मत)** अच्छे प्रकार जायें, उसके लिये **(आ)** उत्तम यत्न भी करें॥३॥

भावार्थः-राजपुरुष जब शत्रुओं को जीतने को अपनी सेना पठावें, तब जिन्होंने धन पाया, जो करे को जाननेवाला, युद्ध में चतुर, औरों से युद्ध करानेवाले विद्वान् जन वे सेनाओं के साथ अवश्य जावें। और सब सेना उन विद्वानों के अनुकूलता से युद्ध करें, जिससे निश्चल विजय हो। जब युद्ध निवृत्त हो रुक जाय और अपने-अपने स्थान पर वीर बैठें, तब उन सबको इकट्ठा कर आनन्द देकर जीतने के ढंग की बातें-चीतें करें, जिससे वे सब युद्ध करने के लिये उत्साह बांध के शत्रुओं को अवश्य जीतें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ।
यासिष्टं वर्त्तिर्वृषणा विजेन्यं दिवोदासाय महि चेति वामवः॥४॥

युवम्। भुज्युम्। भुरमाणम्। विऽभिः। गतम्। स्वयुक्तिऽभिः। निऽवहन्ता। पितृऽभ्यः। आ। यासिष्टम्। वर्तिः। वृषणा। विऽजेन्यम्। दिवः।ऽदासाय। महि। चेति। वाम्। अवः॥४॥

पदार्थः-(युवम्) युवाम् **(भुज्यम्)** भोगमर्हम् **(भुरमाणम्)** पुष्टिकारकम्। डुभृञ्धातोः शानचि व्यत्ययेन शो **बहुलं छन्दसी**त्युत्वं च। **(विभिः)** पक्षिभिरिव **(गतम्)** प्राप्तम् **(स्वयुक्तिभिः)** आत्मीयप्रकारैः **(निवहन्ता)** नितरां प्रापयन्तौ **(पितृभ्यः)** राजपालकेभ्यो वीरेभ्यः **(आ) (यासिष्टम्)** यातम् **(वर्त्तिः)** वर्त्तमानं सैन्यम् **(वृषणा)** सुखवर्षकौ **(विजेन्यम्)** विजेतुं योग्यम् **(दिवोदासाय)** विद्याप्रकाशदात्रे सेनाध्यक्षाय **(महि)** महत् **(चेति)** संज्ञायते। अत्राडभावः। **(वाम्)** युवयोः **(अवः)** रक्षकम्॥४॥

अन्वयः-हे वृषणाऽश्विना! युवं वां भुरमाणं भुज्युं विभिर्गतमिव स्वयुक्तिभिः पितृभ्यो निवहन्ता सन्तौ यद्वां मह्यवो वर्त्तिः सैन्यं चेति तच्च सङ्गृह्य दिवोदासाय विजेन्यमायासिष्टम्॥४॥

भावार्थः-सेनापतिभिर्यत्सैन्यं हृष्टं पुष्टं स्वभक्तं विज्ञायेत तद्विविधैर्भोगैः सुशिक्षया च संयोज्यागामिलाभाय प्रवर्त्येदृशेन युध्वा शत्रवो विजेतुं शक्यन्ते॥४॥

पदार्थः-(वृषणा) सुख वर्षाने और सब गुणों में रमनेहारे सभासेनाधीशो! **(युवम्)** तुम दोनों **(वाम्)** अपनी **(भुरमाणम्)** पुष्टि करनेवाले **(भुज्युम्)** भोजन करने के योग्य पदार्थ को **(विभिः)** पक्षियों ने **(गतम्)** पाये हुए के समान **(स्वयुक्तिभिः)** अपनी रीतियों से **(पितृभ्यः)** राज्य की पालना करनेहारे वीरों के लिये **(निवहन्ता)** निरन्तर पहुंचाते हुए **(महि)** अतीव **(अवः)** रक्षा करनेवाले पदार्थ और

(वर्त्तिः) जो सेनासमूह **(चेति)** जाना जाये, उसको भी लेकर **(दिवोदासाय)** विद्या का प्रकाश देनेवाले सेनाध्यक्ष के लिये **(विजेन्यम्)** जीतने योग्य शत्रुसेनासमूह को **(आ, यासिष्टम्)** प्राप्त होओ॥४॥

भावार्थः-सेनापतियों से जो सेनासमूह हृष्ट-पुष्ट अर्थात् सुख से भरा-पूरा खाने-पीने से पुष्ट अपने को चाहता हुआ जान पडे, उसको अनेक प्रकार के भोग और अच्छी सिखावट से युक्त कर अर्थात् उक्त पदार्थ उनको देकर आगे होनेवाले लाभ के लिये प्रवृत्त करा ऐसे सेनासमूह से युद्ध कर शत्रुजन जीते जा सकते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम्।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती॥५॥२०॥

युवोः। अश्विना। वपुषे। युवायुजम्। रथम्। वाणी इति। येमतुः। अस्य। शर्ध्यम्। आ। वाम्। पतित्वम्। सख्याय। जग्मुषी। योषा। अवृणीत। जेन्या। युवाम्। पती इति॥५॥

पदार्थः-(युवोः) **(अश्विना)** सभासेनाधीशौ **(वपुषे)** सुरूपाय **(युवायुजम्)** युवाभ्यां युज्यते तम्। **वा छन्दसि सर्वे विधयो भवन्ती**त्यप्राप्तोऽपि युवादेशः। **(रथम्)** रमणीयं सैन्यादियुक्तं यानम् **(वाणी)** उपदेशकाविव। **इञ् वपादिभ्य** इति शब्दार्थाद्वणधातोरिञ्। **(येमतुः)** नियच्छतः **(अस्य)** राज्यकार्य्यस्य मध्ये **(शर्ध्यम्)** शर्द्धेषु बलेषु भवम् **(आ)** **(वाम्)** युवयोः **(पतित्वम्)** पालकभावम् **(सख्याय)** सख्युः कर्मणे **(जग्मुषी)** गन्तुं शीला **(योषा)** प्रौढा ब्रह्मचारिणी युवतिः **(अवृणीत)** स्वीकुर्य्यात् **(जेन्या)** जनेषु नयनकर्तृषु साधू **(युवाम्)** **(पती)** अन्योऽन्यस्य पालकौ॥५॥

अन्वयः-हे अश्विना! युवोः शर्ध्ये युवायुजं रथमस्य मध्ये स्थितौ वाणी वपुषे येमतुर्वां युवयोः सख्याय जेन्या पती युवां पतित्वं जग्मुषी योषा सती हृद्यं स्त्रियं पतिमावृणीत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा ब्रह्मचर्यं कृत्वा प्राप्तयौवनावस्था विदुषी कुमारी स्वप्रियं पतिं प्राप्य सततं सेवते यथा च कृतब्रह्मचर्यो युवा स्वाभीष्टां स्त्रियं प्राप्यानन्दति, तथैव सभासेनापती सदा भवेताम्॥५॥

पदार्थः-हे **(अश्विना)** सभासेनाधीशो! **(युवोः)** तुम अपने **(शर्ध्यम्)** बलों से युक्त **(युवायुजम्)** तुमने जोड़े **(रथम्)** मनोहर सेना आदि युक्त यान को **(अस्य)** इस राजकार्य के बीच में स्थिर हुए **(वाणी)** उपदेश करनेवालों के समान **(वपुषे)** अच्छे रूप के होने के लिये **(येमतुः)** नियम में रखते हो **(वाम्)** तुम दोनों के **(सख्याय)** मित्रपन अर्थात् अतीव प्रीति के लिये **(जेन्या)** नियम करते हुओं में श्रेष्ठ **(पती)** पालना करनेहारे **(युवाम्)** तुम्हारे साथ **(पतित्वम्)** पतिभाव को **(जग्मुषी)** प्राप्त होनेवाली

(योषा) यौवन अवस्था से परिपूर्ण ब्रह्मचारिणी युवति स्त्री तुम में से अपने मन से चाहे हुए पति को **(आ, अवृणीत)** अच्छे प्रकार वरे॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विदुषी कुमारी कन्या ब्रह्मचर्य्य करके यौवन अवस्था को पाए हुए अपने प्यारे पति को पाकर निरन्तर उसकी सेवा करती है और जैसे ब्रह्मचर्य को किये हुए जवान पुरुष अपनी प्रीति के अनुकूल चाही हुई स्त्री को पाकर आनन्दित होता है, वैसे ही सभा और सेनापति सदा होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तारयायुषा॥६॥

युवम्। रेभम्। परिऽसूतेः। उरुष्यथः। हिमेन। घर्मम्। परिऽतप्तम्। अत्रये। युवम्। शयोः। अवसम्। पिप्यथुः। गवि। प्र। दीर्घेण। वन्दनः। तारि। आयुषा॥६॥

पदार्थः-(युवम्) युवाम् **(रेभम्)** सकलविद्यास्तोतारम् **(परिसूतेः)** परितः सर्वतोः विद्याजन्मनि प्रादुर्भूतान् **(उरुष्यथः)** रक्षथः। **उरुष्यती रक्षाकर्मा।** (निरु०५.२३) **(हिमेन)** शीतेन **(घर्मम्)** सूर्य्यतापम् **(परितप्तम्)** सर्वतः संक्लिष्टम् **(अत्रये)** अविद्यमानान्याध्यात्मिकादीनि त्रीणि दुःखानि यस्मिंस्तस्मै सुखाय **(युवम्)** युवाम् **(शयोः)** शयानस्य **(अवसम्)** रक्षणादिकम् **(पिप्यथुः)** वर्धयतम् **(गवि)** पृथिव्याम् **(प्र)** **(दीर्घेण)** प्रलम्बितेन **(वन्दनः)** स्तोतुमर्हः **(तारि)** तीर्यते **(आयुषा)** जीवनेन॥६॥

अन्वयः-हे अश्विना! यथा युवमत्रये परिसूतेः प्राप्तविद्यं परितप्तं रेभं विद्वांसं जनं हिमेन घर्ममिवोरुष्यथः। युवं गवि शयोरवसं पिप्यथुर्वन्दनो दीर्घेणायुषा युवाभ्यां तारि तथा वयमपि प्रयतेमहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विवाहितौ स्त्रीपुरुषौ! यथा शीतेनोष्णता हन्यते तथाऽविद्या विद्यया हतं यत आध्यात्मिकाधिभौतिकाधिदैविकानि दुःखानि नश्येयुः। यथा धार्मिकाराजपुरुषाश्चोरादीन् निवार्य शयानान् प्रजाजनान् रक्षन्ति यथा च सूर्याचन्द्रमसौ सर्वं जगत् सम्पोष्य जीवनप्रदौ स्तस्तथाऽस्मिञ्जगति प्रवर्त्तेथाम्॥६॥

पदार्थः-हे सब विद्याओं में व्याप्त स्त्री-पुरुषो! जैसे **(युवम्)** तुम दोनों **(अत्रये)** आध्यात्मिक, आधिभौतिक, आधिदैविक ये तीन दुःख जिसमें नहीं हैं, उस उत्तम सुख के लिये **(परिसूतेः)** सब ओर से दूसरे विद्या जन्म में प्रसिद्ध हुए विद्वान् से विद्या को पाये हुए **(परितप्तम्)** सब प्रकार क्लेश को प्राप्त **(रेभम्)** समस्त विद्या की प्रशंसा करनेवाले विद्वान् मनुष्य को **(हिमेन)** शीत से **(घर्मम्)** घाम (धूप) के

समान **(उरुष्यथः)** पालो अर्थात् शीत से घाम जैसे बचाया जावे, वैसे पालो **(युवम्)** तुम दोनों **(गवि)** पृथिवी में **(शयोः)** सोते हुए की **(अवसम्)** रक्षा आदि को **(पिप्यथुः)** बढ़ाओ **(वन्दनः)** प्रशंसा करने योग्य व्यवहार **(दीर्घेण)** लम्बी बहुत दिनों की **(आयुषा)** आयु से तुम दोनों ने **(तारि)** पार किया, वैसा हम लोग भी **(प्र)** प्रयत्न करें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विवाह किये हुए स्त्री-पुरुषो! जैसे शीत से गरमी मारी जाती है, वैसे अविद्या को विद्या से मारो; जिससे आध्यात्मिक, आधिभौतिक, आधिदैविक ये तीन प्रकार के दुःख नष्ट हों। जैसे धार्मिक राजपुरुष चोर आदि को दूर कर सोते हुए प्रजाजनों की रक्षा करते हैं और जैसे सूर्य्य चन्द्रमा सब जगत् की पुष्टि देकर जीवन के आनन्द को देनेवाले हैं, वैसे इस जगत् में प्रवृत्त होओ॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं वन्दनं निर्ऋतिं जरण्ययारथं न दस्रा करणा समिन्वथः।
क्षेत्रादा विप्रं जनथो विपन्ययाप्र वामत्र विधते दंसना भुवत्॥७॥

युवम्। वन्दनम्। निःऽऋतिम्। जरण्ययाा। रथम्। न। दस्रा। करणा। सम्। इन्वथुः। क्षेत्रात्। आ। विप्रम्। जनथुः। विपन्ययाा। प्र। वाम्। अत्र। विधते। दंसनाा। भुवत्॥७॥

पदार्थः-(युवम्) युवां स्त्रीपुरुषौ **(वन्दनम्)** वन्दनीयम् **(निर्ऋतम्)** निरन्तरमृतं सत्यमस्मिन् **(जरण्यया)** जरणान् विद्यावृद्धानर्हति यया विद्यया तया युक्तम् **(रथम्)** विमानादियानम् **(न)** इव **(दस्रा)** **(करणा)** कुर्वन्तौ **(सम्)** **(इन्वथः)** प्राप्नुतम् **(क्षेत्रात्)** गर्भाशयोदरान्निवासस्थानात् **(आ)** **(विप्रम्)** विद्यासुशिक्षायोगेन मेधाविनम् **(जनथः)** जनयतम्। शप आर्धधातुकत्वाण्णिलुक्। **(विपन्यया)** स्तोतुं योग्यया धर्म्यया नीत्या युक्तानि **(प्र)** **(वाम्)** युवयोः **(अत्र)** अस्मिञ्जगति **(विधते)** विधात्रे **(दंसना)** कर्माणि **(भुवत्)** भवेत्। अत्र लेट्॥७॥

अन्वयः-हे करणा दस्राश्विनौ स्त्रीपुरुषौ! युवं जरण्यया युक्तं निर्ऋतं वन्दनं विप्रं रथं न समिन्वथः क्षेत्रादुत्पन्नमिवाजनथो योऽत्र वां युवयोर्गृहाश्रमे संबन्धः प्रभुवत्तत्र विपन्यया युक्तानि दंसना कर्माणि विधते विधातुं प्रवर्त्तमानायोत्तमान् राज्यधर्माधिकारान् दद्यातम्॥७॥

भावार्थः-मननशीलाः स्त्रीपुरुषा जन्मारभ्य यावत् ब्रह्मचर्य्येण सकला विद्या गृह्णीयुस्तावत्सन्तानान् सुशिक्ष्य यथायोग्येषु व्यवहारेषु सततं नियोजयेयुः॥७॥

पदार्थः-हे **(करणा)** उत्तम कर्मों के करने वा **(दस्रा)** दुःख दूर करनेवाले स्त्री पुरुषो! **(युवम्)** तुम दोनों **(जरण्यया)** विद्यावृद्ध अर्थात् अतीव विद्या पढ़े हुए विद्वानों के योग्य विद्या से युक्त **(निर्ऋतम्)**

जिसमें निरन्तर सत्य विद्यमान **(वन्दनम्)** प्रशंसा करने योग्य **(विप्रम्)** विद्या और अच्छी शिक्षा के योग से उत्तम बुद्धिवाले विद्वान् को **(रथम्)** विमान आदि यान के **(न)** समान **(समिन्वथः)** अच्छे प्रकार प्राप्त होओ और **(क्षेत्रात्)** गर्भ के ठहरने की जगह से उत्पन्न हुए सन्तान के समान अपने निवास से उत्तम काम को **(आ, जनथः)** अच्छे प्रकार प्रकट करो, जो **(अत्र)** इस संसार में **(वाम्)** तुम दोनों का गृहाश्रम के बीच सम्बन्ध **(प्र, भुवत्)** प्रबल हो, उस में **(विपन्यया)** प्रशंसा करने योग्य धर्म की नीति से युक्त **(दंसना)** कामों को **(विधते)** विधान करने को प्रवृत्त हुए मनुष्य के लिये उत्तम राज्य के अधिकारों को देओ॥

भावार्थः-विचार करनेवाले स्त्रीपुरुष जन्म से लेके जब तक ब्रह्मचर्य्य से समस्त विद्या ग्रहण करें, तब तक उत्तम शिक्षा देकर सन्तानों को यथायोग्य व्यवहारों में निरन्तर युक्त करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग॑च्छतं कृप॑माणं परा॒वति॑ पि॒तुः स्वस्य॒ त्य॑जसा॒ निबा॑धितम्।
स्व॑र्वतीरि॒त ऊ॒तीर्यु॒वोरह॑ चि॒त्रा अ॒भीके॑ अभवन्नभिष्ट॑यः॥८॥

अग॑च्छतम्। कृप॑माणम्। प॒रा॒ऽवति॑। पि॒तुः। स्वस्य॑। त्य॑जसा। निऽबा॑धितम्। स्व॑:ऽवतीः। इ॒तः। ऊ॒तीः। यु॒वोः। अह॑। चि॒त्राः। अ॒भीके॑। अ॒भ॒व॒न्। अ॒भिष्ट॑यः॥८॥

पदार्थः-(अगच्छतम्) प्राप्नुताम् **(कृपमाणम्)** कृपां कर्त्तुं शीलम् **(परावति)** दूरदेशेऽपि स्थितम् **(पितुः)** जनकवद्वर्त्तमानस्याध्यापकस्य सकाशात् **(स्वस्य)** स्वकीयस्य **(त्यजसा)** संसारसुखत्यागेन **(निबाधितम्)** पीडितं संन्यासिनम् **(स्वर्वतीः)** स्वः प्रशस्तानि सुखानि विद्यन्ते यासु ताः **(इतः)** अस्माद्वर्त्तमानाद्यतेः **(ऊतीः)** रक्षणाद्याः **(युवोः)** युवयोः **(अह)** निश्चये **(चित्राः)** अद्भुताः **(अभीके)** समीपे **(अभवन्)** भवन्तु **(अभिष्टयः)** अभीप्सिताः॥८॥

अन्वयः-हे अश्विनौ स्त्रीपुरुषौ! भवन्तौ स्वस्य पितुः परावति स्थितं त्यजसा निबाधितं कृपमाणं परिव्राजं नित्यमगच्छतम्। इत एव युवोरभीकेऽह चित्रा अभिष्टयः स्वर्वतीरूतिरभवन्॥८॥

भावार्थः-सर्वे मनुष्या पूर्णविद्यमाप्तं रागद्वेषपक्षपातरहितं सर्वेषामुपरि कृपां कुर्वन्तं सर्वथासत्ययुक्तमसत्यत्यागिनं जितेन्द्रियं प्राप्तयोगसिद्धान्तं परावरज्ञं जीवन्मुक्तं संन्यासाश्रमे स्थितमुपदेशाय नित्यं भ्रमन्तं वेदविदं जनं प्राप्य धर्मार्थकाममोक्षाणां सविधानाः सिद्धिः प्राप्नुवन्तु, न खल्वीदृग्जनसङ्गोपदेशश्रवणाभ्यां विना कश्चिदपि यथार्थबोधमाप्तुं शक्नोति॥८॥

पदार्थः-हे विद्या के विचार में रमे हुए स्त्री-पुरुषो! आप **(स्वस्य)** अपने **(पितुः)** पिता के समान वर्त्तमान पढ़ानेवाले से **(परावति)** दूर देश में भी ठहरे और **(त्यजसा)** संसार के सुख को छोड़ने

से **(निबाधितम्)** कष्ट पाते हुए **(कृपमाणम्)** कृपा करने के शीलवाले संन्यासी को नित्य **(अगच्छतम्)** प्राप्त होओ **(इतः)** इसी यति से **(युवोः)** तुम दोनों के **(अभीके)** समीप में **(अह)** निश्चय से **(चित्राः)** अद्भुत **(अभिष्टयः)** चाही हुई **(स्ववर्वतीः)** जिनमें प्रशंसित सुख विद्यमान हैं **(ऊतीः)** वे रक्षा आदि कामना **(अभवन्)** सिद्ध हों॥८॥

भावार्थः-सब मनुष्य पूरी विद्या जानने और शस्त्रसिद्धान्त में रमनेवाले राग-द्वेष और पक्षपातरहित सबके ऊपर कृपा करते सर्वथा सत्ययुक्त असत्य को छोड़े इन्द्रियों को जीते और योग के सिद्धान्त को पाये हुए अगले-पिछले व्यवहार को जाननेवाले जीवन्मुक्त संन्यास के आश्रम में स्थित, संसार में उपदेश करने के लिये नित्य भ्रमते हुए, वेदविद्या के जाननेवाले संन्यासीजन को पाकर धर्म, अर्थ, काम और मोक्षों की सिद्धियों को विधान के साथ पावें। ऐसे संन्यासी आदि उत्तम विद्वान् के सङ्ग और उपदेश के सुने विना कोई भी मनुष्य यथार्थ बोध को नहीं पा सकता॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत्॥९॥

उत। स्या। वाम्। मधुऽमत्। मक्षिका। अरपत्। मदे। सोमस्य। औशिजः। हुवन्यति। युवम्। दधीचः। मनः। आ। विवासथः। अथ। शिरः। प्रति। वाम्। अश्व्यम्। वदत्॥९॥

पदार्थः-(**उत**) अपि **(स्या)** असौ **(वाम्)** युवाम् **(मधुमत्)** प्रशस्ता मधुरा मधवो गुणा विद्यन्ते यस्मिन् तत् **(मक्षिका)** मशति शब्दयति या सा मक्षिका। **हनिमशिभ्यां सिकन्।** (उणा०४.१५४) इति मश धातोः सिकन्। **(अरपत्)** रपति गुञ्जति **(मदे)** हर्षे **(सोमस्य)** धर्मप्रेरकस्य **(औशिजः)** कमनीयस्य पुत्रः **(हुवन्यति)** आत्मनो हुवनं दानमादानं चेच्छति। अत्र हुवन् शब्दात् क्यचि **वाच्छन्दसी**तीत्वाभावेऽल्लोपः। **(युवम्)** युवाम् **(दधीचः)** विद्याधर्मधारकानञ्चति विज्ञापयति तस्य सकाशात् **(मनः)** विज्ञानम् **(आ)** **(विवासथः)** सेवेथाम् **(अथ)** आनन्तर्ये। **निपातस्य चे**ति दीर्घः। **(शिरः)** शिर उत्तमाङ्गवत् प्रशस्तम् **(प्रति)** **(वाम्)** युवाम् **(अश्व्यम्)** अश्वेषु व्याप्तविद्येषु साधु **(वदत्)** वदेत्॥९॥

अन्वयः-हे अश्विनौ माङ्गलिकौ राजप्रजाजनौ! युवं युवां य औशिजः परिव्राड् मदे प्रवर्त्तमाना स्या मक्षिका यथारपत्तथा वां मधुमद्धुवन्यति तस्य सोमस्य दधीचः सकाशान्मन आविवासथः। अथोत स वां प्रीत्यैतदश्व्यं सततं प्रति वदत्॥९॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। हे मनुष्या! तथा मक्षिकाः पार्थिवेभ्यो रसं गृहीत्वा वसतौ संचित्यानन्दन्ति तथैव योगविद्यैश्वर्योपपन्नस्य सत्योपदेशेन सुखे विधातुर्ब्रह्मनिष्ठस्य विदुषः संन्यासिनः समीपात् सत्यां शिक्षां श्रुत्वा मत्वा निदिध्यास्य सदा यूयं सुखिनो भवेत॥९॥

पदार्थः-हे मंगलयुक्त राजा और प्रजाजनो! **(युवम्)** तुम दोनों जो **(औशिजः)** मनोहर उत्तम पुरुष का पुत्र संन्यासी **(मदे)** मद के निमित्त प्रवर्त्तमान **(स्या)** वह **(मक्षिका)** शब्द करनेवाली मक्खी जैसे **(अरपत्)** गूंजती है, वैसे **(वाम्)** तुम दोनों को **(मधुमत्)** मधुमत् अर्थात् जिसमें प्रशंसित गुण हैं, उस व्यवहार के तुल्य **(हुवन्यति)** अपने को देना-लेना चाहता है, उस **(सोमस्य)** धर्म्म की प्रेरणा करने और **(दधीचः)** विद्या धर्म की धारणा करनेहारे के तीर से **(मनः)** विज्ञान को **(आ, विवासथः)** अच्छे प्रकार सेवो **(अथ)** इसके अनन्तर **(उत)** तर्क-वितर्क से वह **(वाम्)** तुम दोनों के प्रति प्रीति से इस ज्ञान को और **(अश्व्यम्)** विद्या में व्याप्त हुए विद्वानों में उत्तम **(शिरः)** शिर के समान प्रशंसित व्याख्यान को **(प्रति, वदत्)** कहे॥९॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। हे मनुष्यो! जैसे मक्खी पृथिवी में उत्पन्न हुए वृक्ष वनस्पतियों से रस, जिसको शहद कहते हैं, उसको लेकर अपने निवासस्थान में इकट्ठा कर आनन्द करती है, वैसे ही योगविद्या के ऐश्वर्य्य को प्राप्त सत्य उपदेश से सुख का विधान करनेवाले ब्रह्म-विचार में स्थिर विद्वान् संन्यासी के समीप से सत्यशिक्षा को सुन, मान और विचार के सर्वदा तुम लोग सुखी होओ॥९॥

अथ तडित्तारविद्योपदेशः क्रियते॥

अब बिजुलीरूप अग्नि से जो तारविद्या प्रकट होती है, उसका उपदेश अगले मन्त्र में किया है॥

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम्॥ १०॥ २१॥

युवम्। पेदवे। पुरुऽवारम्। अश्विना। स्पृधाम्। श्वेतम्। तरुतारम्। दुवस्यथः। शर्यैः। अभिऽद्युम्। पृतनासु। दुस्तरम्। चर्कृत्यम्। इन्द्रम्ऽइव। चर्षणिऽसहम्॥ १०॥

पदार्थः-(युवम्) युवाम् **(पेदवे)** प्राप्तुं गन्तुं वा **(पुरुवारम्)** पुरूणि बहूनि वरितुं योग्यानि कर्माणि यस्मात्तम् **(अश्विना)** सर्वविद्याव्याप्तिमन्तौ समासेनेशौ **(स्पृधाम्)** शत्रुभिः सह स्पर्धमानाम् **(श्वेतम्)** सततं गन्तुं प्रवृद्धम् **(तरुतारम्)** शब्दान् संतारकं प्लावकं वा ताराख्यं व्यवहारम् **(दुवस्यथः)** सेवेथाम् **(शर्य्यैः)** हिंसितुं ताडितुमर्हैर्यन्त्रैर्युक्तम् **(अभिद्युम्)** अभितो दिवो विद्युद्योगप्रकाशा यस्मिँस्तम् **(पृतनासु)** सेनासु **(दुष्टरम्)** शत्रुभिर्दुःखेनोल्लङ्घयितुं शक्यम् **(चर्कृत्यम्)** भृशं कर्त्तुं योग्यम् **(इन्द्रमिव)** सूर्य्यप्रकाशमिव सद्यो गन्तारम् **(चर्षणीसहम्)** चर्षणयो मनुष्याः शत्रून् सहन्ते येन तम्॥१०॥

अन्वयः-हे अश्विना! युवं पेदवे स्पृधां पृतनासु चर्कृत्यं श्वेतं पुरुवारं दुष्टरं चर्षणीसहं शर्य्यैरभिद्युमिन्द्रमिव तरुतारं दुवस्यथः॥१०॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्यैस्तडिद्विद्ययाऽभीष्टानि कार्य्याणि संसाध्यन्ते तथैव परिव्राट्सङ्गेन सर्वा विद्याः प्राप्य धर्मादिकार्य्याणि कर्त्तुं प्रभूयन्ते। एताभ्यामेव व्यवहारपरमार्थसिद्धिः कर्त्तुं शक्या तस्मात्प्रयत्नेन तडिद्विद्याऽवश्यं साधनीया॥१०॥

अत्र राजप्रजापरिव्राड्विद्याविचारानुष्ठानोक्तत्वादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इत्येकविंशतिः २१ वर्ग एकोनविंशतिशततमं ११९ सूक्तं च समाप्तम्॥

पदार्थः-हे **(अश्विना)** सब विद्याओं में व्याप्त सभा सेनाधीशो! **(युवम्)** तुम दोनों **(पेदवे)** पहुंचने वा जाने को **(स्पृधाम्)** शत्रुओं को ईर्ष्या से बुलानेवालों को **(पृतनासु)** सेनाओं में **(चर्कृत्यम्)** निरन्तर करने के योग्य **(श्वेतम्)** अतीव गमन करने को बढ़े हुए **(पुरुवारम्)** जिससे कि बहुत लेने योग्य काम होते हैं **(दुष्टरम्)** जो शत्रुओं से दुःख के साथ उलांघा जा सकता **(चर्षणीसहम्)** जिससे मनुष्य शत्रुओं को सहते जो **(शर्य्यैः)** तोड़ने-फोड़ने के योग्य पेंचों से बांधा वा **(अभिद्युम्)** जिसमें सब ओर बिजुली की आग चमकती, उस **(इन्द्रमिव)** सूर्य के प्रकाश के समान वर्त्तमान **(तरुतारम्)** संदेशों को तारने अर्थात् इधर-उधर पहुंचानेवाले तारयन्त्र को **(दुवस्यथः)** सेवो॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्यों से बिजली से सिद्ध की हुई तारविद्या से चाहे हुए काम सिद्ध किये जाते हैं, वैसे ही संन्यासी के संग से समस्त विद्याओं को पाकर धर्म आदि काम करने को समर्थ होते हैं। इन्हीं दोनों से व्यवहार और परमार्थ सिद्धि की जा सकती है। इससे यत्न के साथ तडित्-तारविद्या अवश्य सिद्ध करनी चाहिये॥१०॥

इस सूक्त में राजप्रजा, संन्यासी महात्माओं की विद्या के विचार का आचरण कहने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह इक्कीसवां २१ वर्ग और एकसौ उन्नीसवाँ ११९ सूक्त पूरा हुआ॥

अथास्य द्वादशर्च्चस्य विंशत्युत्तरशततमस्य सूक्तस्योशिक्पुत्रः कक्षीवानृषिः। अश्विनौ देवते। १,१२ पिपीलिकामध्या निचृद्गायत्री। २ भुरिग्गायत्री। १० गायत्री। ११ पिपीलिकामध्या विराड् गायत्री छन्दः। षड्जः स्वरः। ३ स्वराट् ककुबुष्णिक्। ५ आर्ष्युष्णिक्। ६ विराडार्ष्युष्णिक्। ८ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ४ आर्ष्यनुष्टुप्। ७ स्वराडार्ष्यनुष्टुप्। ९ भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः॥

तत्रादौ प्रश्नोत्तरविधिमाह॥

अब एकसौ बीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में प्रश्नोत्तरविधि का उपदेश करते हैं॥

का राध॒द्धोत्रा॑श्विना वां॒ को वां॒ जोष॑ उ॒भयो॑:। क॒था वि॑धा॒त्यप्र॑चेताः॥ १॥

का। रा॒ध॒त्। होत्रा॑। अ॒श्वि॒ना॒। वा॒म्। कः। वा॒म्। जोष॑। उ॒भयो॑:। क॒था। वि॒धा॒ति॒। अप्र॑ऽचेताः॥ १॥

पदार्थः-(का) सेना **(राधत्)** राध्नुयात् **(होत्रा)** शत्रुबलमादातुं विजयं च दातुं योग्या **(अश्विना)** गृहाश्रमधर्मव्यापिनौ स्त्रीपुरुषौ **(वाम्)** युवयोः **(कः)** शत्रुः **(वाम्)** युवयोः **(जोषे)** प्रीतिजनके व्यवहारे **(उभयोः)** **(कथा)** केन प्रकारेण **(विधाति)** विदध्यात् **(अप्रचेताः)** विद्याविज्ञानरहितः॥१॥

अन्वयः-हे अश्विना! वामुभयोः का होत्रा सेना विजयं राधत्। वां जोषे कथा कोऽप्रचेताः पराजयं विधाति॥१॥

भावार्थः-सभासेनेशौ शूरविद्वद् व्यवहाराभिज्ञैः सह व्यवहरेतां पुनरेतयोः पराजयं कर्त्तुं विजयं निरोद्धुं समर्थौ स्यातां न कदाचित् कस्यापि मूर्खसहायेन प्रयोजनं सिध्यति तस्मात् सदा विद्वन्मैत्रीं सेवेताम्॥१॥

पदार्थः-हे **(अश्विना)** गृहाश्रम धर्म में व्याप्त स्त्री-पुरुषो! **(वाम्)** तुम **(उभयोः)** दोनों की **(का)** कौन **(होत्रा)** सेना शत्रुओं के बल को लेने और उत्तम जीत देने की **(राधत्)** सिद्धि करे **(वाम्)** तुम दोनों के **(जोषे)** प्रीति उत्पन्न करनेहारे व्यवहार में **(कथा)** कैसे **(कः)** कौन **(अप्रचेताः)** विद्या विज्ञानरहित अर्थात् मूढ़ शत्रु हार को **(विधाति)** विधान करे॥१॥

भावार्थः-सभासेनाधीश शूर और विद्वान् के व्यवहारों को जाननेहारों के साथ अपना व्यवहार करें, फिर शूर और विद्वान् के हार देने और उनकी जीत को रोकने को समर्थ हों, कभी किसी का मूढ़ के सहाय से प्रयोजन नहीं सिद्ध होता। इससे सब दिन विद्वानों से मित्रता रक्खें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वि॒द्वांसा॒विद्दु॒रः पृ॒च्छे॒दवि॑द्वा॒नि॒त्थाप॑रो अचे॒ताः। नू चि॒न्नु मर्ते॑ अक्रौ॥ २॥

वि॒द्वांसौ॑। इ॒त्। दु॒रः। पृ॒च्छे॒त्। अवि॑द्वान्। इ॒त्था। अप॑रः। अ॒चे॒ताः। नु। चि॒त्। नु। मर्ते॑। अक्रौ॑॥ २॥

पदार्थः-(विद्वांसौ) सकलविद्यायुक्तौ **(इत्)** एव **(दुरः)** शत्रून् हिंसितुं हृदयहिंसकान् प्रश्नान् वा **(पृच्छेत्)** **(अविद्वान्)** विद्याहीनो भृत्योऽन्यो वा **(इत्था)** इत्थम् **(अपरः)** अन्यः **(अचेताः)** ज्ञानरहितः **(नु)** सद्यः **(चित्)** अपि **(नु)** शीघ्रम् **(मर्त्ते)** मनुष्ये **(अक्रौ)** अकर्त्तरि। अत्र नञ्युपपदात् कृधातोः **इव कृषादिभ्य** इति बहुलवचनात् कर्त्तरीक्॥ २॥

अन्वयः-यथाऽचेता अविद्वान् विद्वांसौ दुरः पृच्छेदित्थाऽपरो विद्वानिदेव नु पृच्छेत्। अक्रौ मर्त्ते चिदपि नु पृच्छेद्यतोऽयमालस्यं त्यक्त्वा पुरुषार्थे प्रवर्त्तेत॥ २॥

भावार्थः-यथा विद्वांसो विदुषां संमत्या वर्तेरँस्तथाऽन्येऽपि वर्त्तन्ताम्। सदैव विदुषः प्रति पृष्ट्वा सत्यासत्यनिर्णयं कृत्वा सत्यमाचरेयुरसत्यं च परित्यजेयुः। नात्र केनचित्कदाचिदालस्यं कर्त्तव्यम्। कुतो नापृष्ट्वा विजानातीत्यतः नैव केनचिदविदुषामुपदेशे विश्वसितव्यम्॥ २॥

पदार्थः-जैसे **(अचेताः)** अज्ञान **(अविद्वान्)** मूर्ख **(विद्वांसौ)** दो विद्यावान् पण्डितजनों को **(दुरः)** शत्रुओं के मारने वा मन को अत्यन्त क्लेश देनेहारी बातों को **(पृच्छेत्)** पूछे **(इत्था)** ऐसे **(अपरः)** और विद्वान् महात्मा अपने ढङ्ग से **(इत्)** ही **(नु)** शीघ्र पूछे **(अक्रौ)** नहीं करनेवाले **(मर्त्ते)** मनुष्य के निमित्त **(चित्)** भी **(नु)** शीघ्र पूछे, जिससे यह आलस्य को छोड़ के पुरुषार्थ में प्रवृत्त हो॥ २॥

भावार्थः-जैसे विद्वान् विद्वानों की सम्मति से वर्त्ताव वर्त्ते, वैसे और भी वर्त्ते। सदैव विद्वानों को पूछ कर सत्य और असत्य का निर्णय कर आचरण करें और झूठ का त्याग करें। इस बात में किसी को कभी आलस्य न करना चाहिये, क्योंकि विना पूछे कोई नहीं जानता है। इससे किसी को मूर्खों के उपदेश पर विश्वास न लाना चाहिये॥ २॥

अथाध्यापकोपदेशकौ विद्वांसौ किं कुर्य्यातामित्याह॥

अब अध्यापक और उपदेशक विद्वान् क्या करें, इस विषय को अगले मन्त्र में कहा है॥

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य।
प्रार्चद्दयमानो युवाकुः॥ ३॥

ता। विद्वांसा। हवामहे। वाम्। ता। नः। विद्वांसा। मन्म। वोचेतम्। अद्य। प्र। आर्चत्। दयमानः। युवाकुः॥ ३॥

पदार्थः-(ता) तौ सकलविद्याजन्यप्रश्नानुत्तरैः समाधातारौ **(विद्वांसा)** पूर्णविद्यायुक्तावाप्तावध्याप- कोपदेशकौ। अत्राकारादेशः। **(हवामहे)** आदद्मः **(वाम्)** युवाम् **(ता)** तौ **(नः)** अस्मभ्यम् **(विद्वांसा)** सर्वशुभविद्याविज्ञापकौ **(मन्म)** मन्तव्यं वेदोक्तं ज्ञानम् **(वोचेतम्)** ब्रूतम् **(अद्य)** अस्मिन् वर्त्तमानसमये **(प्र)** **(आर्चत्)** सत्कुर्यात् **(दयमानः)** सर्वेषामुपरि दयां कुर्वन् **(युवाकुः)** यो यावयति मिश्रयति संयोजयति सर्वाभिर्विद्याभिः सह जनान् सः॥ ३॥

अन्वयः-यौ विद्वांसोऽद्य नो मन्म वोचेतं ता विद्वांसा वां वयं हवामहे, यो दयमानो युवाकुर्जनस्ता प्रार्चत, तं सत्कुर्यातम्॥३॥

भावार्थः-अस्मिन् संसारे यो यस्मै सत्या विद्याः प्रदद्यात् स तं मनोवाक्कायैः सेवेत। यः कपटेन विद्यां गूहेत तं सततं तिरस्कुर्यात्। एवं सर्वे मिलित्वा विदुषां मानमविदुषामपमानं च सततं कुर्युर्यतः सत्कृता विद्वांसो विद्याप्रचारे प्रयतेरन्नसत्कृता अविद्वांसश्च॥३॥

पदार्थः-जो **(विद्वांसा)** पूरी विद्या पढ़े उत्तम आप्त अध्यापक तथा उपदेशक विद्वान् **(अद्य)** इस समय में **(नः)** हम लोगों के लिये **(मन्म)** मानने योग्य उत्तम वेदों में कहे हुए ज्ञान का **(वोचेतम्)** उपदेश करें **(ता)** उन समस्त विद्या से उत्पन्न हुए प्रश्नों के उत्तर देने और **(विद्वांसा)** सब उत्तम विद्याओं के जतानेहारे **(वाम्)** तुम दोनों विद्वानों को हम लोग **(हवामहे)** स्वीकार करते हैं, जो **(दयमानः)** सबके ऊपर दया करता हुआ **(युवाकुः)** मनुष्यों को समस्त विद्याओं के साथ संयोग करानेहारा मनुष्य **(ता)** उन तुम दोनों विद्वानों का **(प्र, आर्चत्)** सत्कार करे, उसका तुम सत्कार करो॥३॥

भावार्थः-इस संसार में जो जिसके लिये सत्य विद्याओं को देवे, वह उसको मन, वाणी और शरीर से सेवे और जो कपट से विद्या को छिपावे उसका निरन्तर तिरस्कार करे। ऐसे सब लोग मिल-मिला के विद्वानों का मान और मूर्खों का अपमान निरन्तर करें, जिससे सत्कार को पाये हुए विद्वान् विद्या के प्रचार करने में अच्छे-अच्छे यत्न करें और अपमान को पाये हुए मूर्ख भी करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वि पृ॑च्छामि पा॒क्या॒३॑ न दे॒वान् वष॑ट्कृतस्याद्भु॒तस्य॑ दस्रा।
पा॒तं च॒ सह्या॑सो यु॒वं च॒ रभ्या॑सो नः॥४॥

वि। पृ॒च्छा॒मि॒। पा॒क्या॑। न। दे॒वान्। वष॑ट्ऽकृतस्य। अ॒द्भु॒तस्य॑। द॒स्रा॒। पा॒तम्। च॒। सह्या॑सः। यु॒वम्। च॒। रभ्या॑सः। न॒ः॥४॥

पदार्थः-**(वि)** **(पृच्छामि)** **(पाक्या)** विद्यायोगाभ्यासेन परिपक्वधियः। अत्राकारादेशः। **(न)** इव **(देवान्)** विदुषः **(वषट्कृतस्य)** क्रियानिष्पादितस्य शिल्पविद्याजन्यस्य **(अद्भुतस्य)** आश्चर्यगुणयुक्तस्य **(दस्रा)** दुःखोपक्षयितारौ **(पातम्)** रक्षतम् **(च)** **(सह्यासः)** सहीयोऽतिशयेन बलवतः। अत्र सह धातोरसुन् ततो मतुप् तत ईयसुनि **विन्मतो**रिति मतुब् लोपः। **टे**रिति टिलोपः। **छान्दसो वर्णलोपो वे**तीकारलोपः। **(युवम्)** युवाम् **(च)** **(रभ्यसः)** अतिशयेन रभस्विनः सततं प्रौढपुरुषार्थान्। पूर्ववदस्यापि सिद्धिः **(नः)** अस्मान्॥४॥

अन्वयः-हे दस्राश्विनावध्यापकोपदेशकावहं युवं युवां सह्यसो रभ्यसः पाक्या देवान्नेव वषट्कृतस्याद्भुतस्य विज्ञानाय प्रश्नान् विपृच्छामि युवां च तान् समाधत्तम्। यतोऽहं भवन्तौ सेवे युवां च नोऽस्मान् पातम्॥४॥

भावार्थः-विद्वांसो नित्यमाबालवृद्धान् प्रति सिद्धान्तविद्या उपदिशेयुर्यतस्तेषां रक्षोन्नती स्याताम्। ते च तान् सेवित्वा सुशीलतया पृष्ट्वा समाधानानि दधीरन्। एवं परस्परोपकारेण सर्वे सुखिनः स्युः॥४॥

पदार्थः-हे **(दस्रा)** दुःखों के दूर करने, पढ़ाने और उपदेश करनेहारे विद्वानो! मैं **(युवम्)** तुम दोनों को **(सह्यसः)** अतीव विद्याबल से भरे हुए **(रभ्यसः)** अत्यन्त उत्तम पुरुषार्थ युक्त **(पाक्या)** विद्या और योग के अभ्यास से जिनकी बुद्धि पक गई उन **(देवान्)** विद्वानों के **(न)** समान **(वषट्कृतस्य)** क्रिया से सिद्धि किये हुए शिल्पविद्या से उत्पन्न होनेवाले **(अद्भुतस्य)** आश्चर्य्य रूप काम के विज्ञान के लिये प्रश्नों को **(वि, पृच्छामि)** पूछता हूं **(च)** और तुम दोनों उनके उत्तर देओ, जिससे मैं तुम्हारी सेवा करता हूं **(च)** और तुम **(नः)** हमारी **(पातम्)** रक्षा करो॥४॥

भावार्थः-विद्वान् जन नित्य बालक आदि वृद्ध पर्य्यन्त मनुष्यों को सिद्धान्त विद्याओं का उपदेश करें, जिससे उनकी रक्षा और उन्नति होवे और वे भी उनकी सेवा कर अच्छे स्वभाव से पूछ कर विद्वानों के दिये हुए समाधानों को धारण करें, ऐसे हिलमिल के एक-दूसरे के उपकार से सब सुखी हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र या घोषे भृगवाणे न शोभे ययाव वाचा यजति पज्रियो वाम्। प्रैषयुर्न विद्वान्॥५॥२२॥

प्र। या। घोषे। भृगवाणे। न। शोभे। ययाव। वाचा। यजति। पज्रियः। वाम्। प्र। इषयुः। न। विद्वान्॥५॥

पदार्थः-(प्र) **(या)** विदुषी **(घोषे)** उत्तमायां वाचि **(भृगवाणे)** यो भृगुः परिपक्वधीर्विद्वानिवाचरति तस्मिन्। भृगुशब्दाचारे क्विप् ततो नामधातोर्व्यत्ययेनात्मनेपदे शानच् **छन्दस्युभयथे**ति शानच् आर्द्धधातुकत्वाद् गुणः। **(न)** इव **(शोभे)** प्रदीप्तो भवेयम् **(यया)** **(वाचा)** विद्यासुशिक्षायुक्तया वाण्या **(यजति)** पूजयति **(पज्रियः)** यः पज्रान् प्राप्तव्यान् बोधानर्हति सः **(वाम्)** युवाम् **(प्र)** **(इषयुः)** इष्यते सर्वैर्जनैर्विज्ञायते यत्तद्याति प्राप्नोतीति। इष धातो**र्घञर्थे कविधानमिति कः।** तस्मिन्नुपपदे याधातोरौणादिकः कुः। **(न)** इव **(विद्वान्)**॥५॥

अन्वयः-हे अश्विनौ! पज्रिय इषयुर्विद्वान्न यया वाचा वां प्रजयति तयाऽहं शोभे या विदुषी स्त्री भृगवाणे घोषे यजति न दृश्यते तयाऽहं तां प्रयजेयम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे अध्यापकोपदेशकौ! भवन्तावाप्तवत्सर्वस्य कल्याणाय नित्यं प्रवर्त्तेताम्। एवं विदुषी स्त्र्यपि। सर्वे जना विद्याधर्मसुशीलतादियुक्ताः सन्तः सततं शोभेरन्। नैव कोऽपि

विद्वानविदुष्या स्त्रिया सह विवाहं कुर्यात्, न कापि खलु मूर्खेण सह विदुषी च, किन्तु मूर्खो मूर्खया विद्वान् विदुष्या च सह सम्बन्धं कुर्यात्॥५॥

पदार्थः-हे समस्त विद्याओं में रमे हुए पढ़ाने और उपदेश करनेहारे विद्वानो! **(पञ्रियः)** पाने योग्य बोधों को प्राप्त **(इषयुः)** सब जनों के अभीष्ट सुख को प्राप्त होनेवाला मनुष्य **(विद्वान्)** विद्यावान् सज्जन के **(न)** समान **(यया)** जिस **(वाचा)** वाणी से **(वाम्)** तुम्हारा **(प्र, यजति)** अच्छा सत्कार करता है, उस वाणी से मैं **(शोभे)** शोभा पाऊं, **(प्र)** जो विदुषी स्त्री **(भृगवाणे)** अच्छे गुणों से पक्की बुद्धिवाले विद्वान् के समान आचरण करनेवाले में **(घोषे)** उत्तम वाणी के निमित्त सत्कार करती **(न)** सी दीखती है, उस वाणी से मैं उक्त स्त्री का **(प्र)** सत्कार करूं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे पढ़ाने उपदेश करनेहारे विद्वानो! आप उत्तम शास्त्र जाननेहारे श्रेष्ठ सज्जन के समान सबके सुख के लिये नित्य प्रवृत्त रहो, ऐसे विदुषी स्त्री भी हो। सब मनुष्य विद्याधर्म और अच्छे शीलयुक्त होते हुए निरन्तर शोभायुक्त हों। कोई विद्वान् मूर्ख स्त्री के साथ विवाह न करे और न कोई पढ़ी स्त्री मूर्ख के साथ विवाह करे, किन्तु मूर्ख मूर्खा से और विद्वान् मनुष्य विदुषी स्त्री से सम्बन्ध करें॥५॥

पुनरध्ययनाध्यापनविधिरुच्यते॥

फिर पढ़ने-पढ़ाने की विधि का उपदेश अगले मन्त्र में कहा है॥

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम्। आक्षी शुभस्पती दन्॥६॥

श्रुतम्। गायत्रम्। तकवानस्य। अहम्। चित्। हि। रिरेभ। अश्विना। वाम्। आ। अक्षी इति। शुभःऽपती इति। दन्॥६॥

पदार्थः-(श्रुतम्) **(गायत्रम्)** गायन्तं त्रातृविज्ञानम् **(तकवानस्य)** प्राप्तविद्यस्य। गत्यर्थात् तकधातोरौणादिक उः पश्चाद् भृगवाणवत्। **(अहम्)** **(चित्)** अपि **(हि)** खलु **(रिरेभ)** रेभ उपदिशानि। व्यत्ययेन परस्मैपदम्। **(अश्विना)** विद्याप्रापकावध्यापकोपदेष्टारौ **(वाम्)** युवाम् **(आ)** **(अक्षी)** रूपप्रकाशके नेत्रे इव **(शुभस्पती)** धर्मस्य पालकौ **(दन्)** ददन्। डुदाञ् धातोः **शतरि छन्दसि वेति वक्तव्यमिति** द्विवर्चनाभावे सार्वधातुकत्वान् ङित्वमार्द्धधातुकत्वादाकारलोपश्च॥६॥

अन्वयः-हे अक्षी इव वर्त्तमानौ शुभस्पती अश्विना! वां युवयोः सकाशात् तकवानस्य चिदपि गायत्रं श्रुतमादन्नहं हि रिरेभ॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यदाप्तेभ्योऽधीयते श्रूयते तत्तदन्येभ्यो नित्यमध्याप्यमुपदेशनीयं च। यथाऽन्येभ्यः स्वयं विद्यां गृह्णीयात् तथैव प्रदद्यात्। नो खलु विद्यादानेन सदृशोऽन्यः कश्चिदपि धर्मोऽधिको विद्यते॥६॥

पदार्थः-हे **(अक्षी)** रूपों के दिखानेहारी आँखों के समान वर्त्तमान **(शुभस्पती)** धर्म के पालने और **(अश्विना)** विद्या की प्राप्ति कराने वा उपदेश करनेहारे विद्वानो! **(वाम्)** तुम्हारे तीर से **(तकवानस्य)** विद्या पाये विद्वान् के **(चित्)** भी **(गायत्रम्)** उस ज्ञान को जो गानेवाले की रक्षा करता है वा **(श्रुतम्)** सुने हुए उत्तम व्यवहार को **(आ, दन्)** ग्रहण करता हुआ **(अहम्)** मैं **(हि)** ही **(रिरेभ)** उपदेश करूं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जो-जो उत्तम विद्वानों से पढ़ा वा सुना है, उस-उस को औरों को नित्य पढ़ाया और उपदेश किया करें। मनुष्य जैसे औरों से विद्या पावे, वैसे ही देवे, क्योंकि विद्यादान के समान कोई और धर्म बड़ा नहीं है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं ह्यास्तं महो रन् युवं वा यन्निरततंसतम्।
ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः॥७॥

युवम्। हि। आस्तम्। महः। रन्। युवम्। वा। यत्। निः।ऽअततंसतम्। ता। नः। वसू इति। सुऽगोपा। स्यातम्। पातम्। नः। वृकात्। अघऽयोः॥७॥

पदार्थः-(युवम्) युवाम् **(हि)** किल **(आस्तम्)** आसाथाम्। व्यत्ययेन परस्मैपदम्। **(महः)** महतः **(रन्)** ददमानौ। दन्वदस्य सिद्धिः। **(युवम्)** युवाम् **(वा)** पक्षान्तरे **(यत्)** **(निरततंसतम्)** नितरां विद्यादिभिर्भूषणैरलंकुरुतम्। **(ता)** तौ **(नः)** अस्मान् **(वसू)** वासयितारौ **(सुगोपा)** सुष्ठुरक्षकौ **(स्यातम्)** **(पातम्)** पालयतम् **(नः)** अस्माकम् **(वृकात्)** स्तेनात् **(अघायोः)** आत्मनोऽन्यायाचरणेनाघमिच्छतः॥७॥

अन्वयः-हे वसू अश्विनौ! रन् यौ युवं यदास्तं वा युवं नोऽस्माकं सुगोपा स्यातं तौ महोऽघायोर्वृकान्नोऽस्मान् पातं ता हि युवां निरततंसतं च॥७॥

भावार्थः-यथा सभासेनेशौ चोरादिभयात् प्रजास्त्रायेतां तथैतौ सर्वैः पालनीयौ स्याताम्। सर्वे धर्मेष्वासीनाः सन्तोऽध्यापकोपदेशकशिक्षका अधर्मं विनाशयेयुः॥७॥

पदार्थः-हे **(वसू)** निवास करानेहारे अध्यापक-उपदेशको! **(रन्)** औरों को सुख देते हुए जो **(युवम्)** तुम **(यत्)** जिस पर **(आस्तम्)** बैठो **(वा)** अथवा **(युवम्)** तुम दोनों **(नः)** हम लोगों के **(सुगोपा)** भली भांति रक्षा करनेहारे **(स्यातम्)** होओ, वे **(महः)** बड़ा **(अघायोः)** जो कि अपने को अन्याय करने से पाप चाहता **(वृकात्)** उस चोर डाकू से **(नः)** हम लोगों को **(पातम्)** पालो और **(ता)** वे **(हि)** ही आप दोनों **(निरततंसतम्)** विद्या आदि उत्तम भूषणों से परिपूर्ण शोभायमान करो॥७॥

भावार्थः-जैसे सभा, सेनाधीश, चोर आदि के भय से प्रजाजनों की रक्षा करें, वैसे ये भी सब प्रजाजनों के पालना करने योग्य होवें। सब अध्यापक, उपदेशक तथा शिक्षक आदि मनुष्य धर्म में स्थिर हुए अधर्म का विनाश करें॥७॥

अथ राजधर्ममाह॥

अब राजधर्म का उपदेश अगले मन्त्र में किया है॥

मा कस्मै॑ धातम॒भ्य॑मि॒त्रिणे॑ नो॒ माकु॒त्रा॑ नो गृ॒हेभ्यो॑ धे॒नवो॑ गुः।
स्त॒ना॒भुजो॒ अशि॑श्वीः॥८॥

मा। कस्मै॑। धा॒त॒म्। अ॒भि। अ॒मि॒त्रिणे॑। न॒ः। मा। अ॒कुत्र॑। न॒ः। गृ॒हेभ्यः। धे॒नवः॑। गुः। स्त॒न॒ऽभुजः॑। अशि॑श्वीः॥८॥

पदार्थः-(मा) निषेधे **(कस्मै)** **(धातम्)** धरतम् **(अभि)** आभिमुख्ये **(अमित्रिणे)** अविद्यमानानि मित्राणि सखायो यस्य तस्मै जनाय **(नः)** अस्मान् **(मा)** **(अकुत्र)** अविषये। अत्र **ऋचि तुनु०** इति दीर्घः। **(न)** अस्माकम् **(गृहेभ्यः)** प्रासादेभ्यः **(धेनवः)** दुग्धदात्र्यो गावः **(गुः)** प्राप्नुवन्तु **(स्तनाभुजः)** दुग्धयुक्तैः स्तनैः सवत्सान् मनुष्यादीन् पालयन्त्यः **(अशिश्वीः)** वत्सरहिताः॥८॥

अन्वयः-हे रक्षकाश्विनौ सभासेनेशौ! युवां कस्मैचिदप्यमित्रिणे नोऽस्मान् माभिधातम्। भवद्रक्षणेन नोऽस्माकं स्तनाभुजो धेनवोऽशिश्वीर्मा भवन्तु ता अस्माकं गृहेभ्योऽकुत्र मा गुः॥८॥

भावार्थः-प्रजाजना राजजनानेवं शिक्षेरन्नस्मात् शत्रवो मा पीडयेयुरस्माकं गवादिपशून् मा हरेयुरेवं भवन्तः प्रयतन्तामिति॥८॥

पदार्थः-हे रक्षा करनेहारे सभासेनाधीश! तुम लोग **(कस्मै)** किसी **(अमित्रिणे)** ऐसे मनुष्य के लिये कि जिसके मित्र नहीं अर्थात् सबका शत्रु **(नः)** हम लोगों को **(मा)** मत **(अभिधातम्)** कहो, आपकी रक्षा से **(नः)** हम लोगों की **(स्तनाभुजः)** दूध भरे हुए थनों से अपने बछड़ों समेत मनुष्य आदि प्राणियों को पालती हुई **(धेनवः)** गौयें **(अशिश्वीः)** बछड़ों से रहित अर्थात् वन्ध्या **(मा)** मत हों और वे हमारे **(गृहेभ्यः)** घरों से **(अकुत्र)** विदेश में मत **(गुः)** पहुंचे॥८॥

भावार्थः-प्रजाजन राजजनों को ऐसी शिक्षा देवें कि हम लोगों को शत्रुजन मत पीड़ा दें और हमारे गौ, बैल, घोड़े आदि पशुओं को न चोर लें, ऐसा आप यत्न करो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दु॒ही॒यन् मि॒त्रधि॑तये यु॒वाकु॑ रा॒ये च॑ नो मिमी॒तं वाज॑वत्यै।

इ॒षे च॑ नो मिमीतं धे॒नु॒मत्यै॑॥ ९॥

दु॒ही॒यन्। मि॒त्र॒ऽधि॒तये। यु॒वा॒कु॒। रा॒ये। च॒। नः॒। मि॒मी॒तम्। वाज॑ऽवत्यै। इ॒षे। च॒। नः॒। मि॒मी॒त॒म्। धे॒नु॒ऽम॒त्यै॑॥ ९॥

पदार्थः-(दुहीयन्) या दुग्धादिभिः प्रपिपुरति। दुह धातोरौणादिक इः किच्च तस्मात् क्यजन्ताल्लेड् बहुवचनम्। **(मित्रधितये)** मित्राणां धितिर्धारणं यस्मात् तस्मै **(युवाकु)** सुखेन मिश्रिताय दुःखैः पृथग्भूताय वा। **सुपां सुलुगि**ति विभक्तिलुक्। **(राये)** धनाय **(च)** **(नः)** अस्माकम् **(मिमीतम्)** मन्येथाम् **(वाजवत्यै)** वाजः प्रशस्तं ज्ञानं विद्यते यस्यां तस्यै **(इषे)** इच्छायै **(च)** **(नः)** अस्मान् **(मिमीतम्)** **(धेनुमत्यै)** गोः संबन्धिन्यै॥ ९॥

अन्वयः-हे अश्विनौ सभासेनाधीशौ! युवां या गावो दुहीयँस्ता नोऽस्माकं मित्रधितये युवाकु राये च जीवनाय मिमीतम्। वाजवत्यै धेनुमत्या इषे च नोऽस्मान् मिमीतं प्रेरयतम्॥ ९॥

भावार्थः-ये गवादयः पशवो मित्रपालनज्ञानधननिमित्ता भवेयुस्तान् मनुष्याः सततं रक्षेयुः सर्वान् पुरुषार्थाय प्रवर्त्तयेयुः, यतः सुखसंयोगो दुःखवियोजनं च स्यात्॥ ९॥

पदार्थः-हे सब विद्याओं में व्याप्त सभासेनाधीशो! तुम दोनों जो गौयें **(दुहीयन्)** दूध आदि से पूर्ण करती हैं, उनको **(नः)** हमारे **(मित्रधितये)** जिससे मित्रों की धारणा हो तथा **(युवाकु)** सुख से मेल वा दुःख से अलग होना हो, उस **(राये)** धन के **(च)** और जीने के लिये **(मिमीतम्)** मानो तथा **(वाजवत्यै)** जिसमें प्रशंसित ज्ञान वा **(धेनुमत्यै)** गौ का संबन्ध विद्यमान है, उसके **(च)** और **(इषे)** इच्छा के लिये **(नः)** हमको **(मिमीतम्)** प्रेरणा देओ अर्थात् पहुँचाओ॥ ९॥

भावार्थः-जो गौ आदि पशु, मित्रों की पालना, ज्ञान और धन के कारण हों, उनको मनुष्य निरन्तर राखें और सबको पुरुषार्थ के लिये प्रवृत्त करें, जिससे सुख का मेल और दुःख से अलग रहें॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒श्विनो॑रसनं॒ रथ॑मन॒श्वं वा॒जिनी॑वतोः। तेना॒हं भूरि॑ चाकन॥ १०॥

अ॒श्विनो॑ः। अ॒स॒न॒म्। रथ॑म्। अ॒न॒श्वम्। वा॒जिनी॑ऽवतोः। तेन॑। अ॒हम्। भूरि॑। चा॒क॒न॒॥ १०॥

पदार्थः-(अश्विनोः) सभासेनेशयोः **(असनम्)** संभजेयम् **(रथम्)** रमणीयं विमानादियानम् **(अनश्वम्)** अविद्यमानतुरङ्गम् **(वाजिनीवतोः)** प्रशस्ता विज्ञानादियुक्ता सभा सेना च विद्यते ययोस्तयोः **(तेन)** **(अहम्)** **(भूरि)** बहु **(चाकन)** प्रकाशितो भवेयम्। **तुजादित्वाद**भ्यासदीर्घः॥ १०॥

अन्वयः-अहं वाजिनीवतोरश्विनोर्यमनश्वं रथमसनं तेन भूरि चाकन॥ १०॥

भावार्थः-यानि भूजलान्तरिक्षगमनार्थानि यानानि निर्मितानि भवन्ति तत्र पशवो नो युज्यन्ते, किन्तु तानि जलाग्निकलायन्त्रादिभिरेव चलन्ति॥१०॥

पदार्थः-(अहम्) मैं **(वाजिनीवतोः)** जिनके प्रशंसित विज्ञानयुक्त सभा और सेना विद्यमान हैं, उन **(अश्विनोः)** सभासेनाधीशों के **(अनश्वम्)** अनश्व अर्थात् जिसमें घोड़ा आदि नहीं लगते **(रथम्)** उस रमण करने योग्य विमानादि यान का **(असनम्)** सेवन करूं और **(तेन)** उससे **(भूरि)** बहुत **(चाकन)** प्रकाशित होऊं॥१०॥

भावार्थः-जो भूमि, जल और अन्तरिक्ष में चलने के विमान आदि यान बनाये जाते हैं, उनमें पशु नहीं जोड़े जाते, किन्तु वे पानी और अग्नि के कलायन्त्रों से चलते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒यं स॑मह मा तनू॒ह्या॒ते॒ जना॑ँ अनु॑। सो॒म॒पेय॑ सु॒खो रथ॑:॥११॥

अ॒यम्। स॒म॒ह॒। मा॒। त॒नु॒। ऊ॒ह्या॒ते॑। जना॑न्। अनु॑। सो॒म॒ऽपेय॑म्। सु॒ऽखः। रथ॑:॥११॥

पदार्थः-(अयम्) (समह) यो महेन सत्कारेण सह वर्त्तते तत्सम्बुद्धौ **(मा)** माम् **(तनु)** विस्तृणुहि **(ऊह्याते)** देशान्तरं गम्येते **(जनान्) (अनु) (सोमपेयम्)** सोमैरैश्वर्ययुक्तैः पातुं योग्यं रसम् **(सुखः)** शोभनानि खान्यवकाशा विद्यन्ते यस्मिन् सः **(रथः)** रमणाय तिष्ठति यस्मिन्॥११॥

अन्वयः-हे समह विद्वँस्त्वं योऽयं सुखो रथोऽस्ति, येनाश्विनावनूह्याते तेन मा जनान् सोमपेयं च सुखेन तनु॥११॥

भावार्थः-योऽनुत्तमयानकारी शिल्पी भवेत् स सर्वैः सत्कर्त्तव्योऽस्ति॥११॥

पदार्थः-हे **(समह)** सत्कार के साथ वर्त्तमान विद्वान्! आप जो **(अयम्)** यह **(सुखः)** सुख अर्थात् जिसमें अच्छे-अच्छे अवकाश तथा **(रथः)** रमण विहार करने के लिये जिसमें स्थित होते, वह विमान आदि यान है, जिससे पढ़ाने और उपदेश करनेहारे **(अनूह्याते)** अनुकूल एकदेश से दूसरे देश को पहुंचाए जाते हैं, उससे **(मा)** मुझे **(जनान्)** वा मनुष्यों अथवा **(सोमपेयम्)** ऐश्वर्य्ययुक्त मनुष्यों के पीने योग्य उत्तम रस को **(तनु)** विस्तारो अर्थात् उन्नति देओ॥११॥

भावार्थः-जो अत्यन्त उत्तम अर्थात् जिससे उत्तम और न बन सके, उस यान का बनाने वाला शिल्पी हो, वह सबको सत्कार करने योग्य है॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध॒ स्वप्न॑स्य निर्वि॒देऽभुञ्जतश्च॒ रे॒वत॑:। उ॒भा ता बस्रि॑ नश्यतः॥१२॥२३॥१७॥

अध॑। स्वप्न॑स्य। निः। वि॒दे॒। अभु॑ञ्जतः। च॒। रे॒वत॑ः। उ॒भा। ता। बस्रि॑। न॒श्य॒त॒ः॥ १२॥

पदार्थः-(अध) अथ **(स्वप्नस्य)** निद्रायाः **(निः)** **(विदे)** प्राप्नुयाम् **वाच्छन्दसी**ति नुमभावः। **(अभुञ्जतः)** स्वयमपि भोगमकुर्वतः **(च)** **(रेवतः)** श्रीमतः **(उभा)** द्वौ **(ता)** तौ **(बस्रि)** सुखस्तम्भनात्। **बसुस्तम्भ** इत्यस्मादौणादिको रिक् विभक्तिलुक्च। **(नश्यतः)** अदर्शनं प्राप्नुतः॥ १२॥

अन्वयः-अहं स्वप्नस्याभुञ्जतो रेवतश्च सकाशान्निर्विदे निर्विण्णो भवेयमधोभा यौ पुरुषार्थहीनौ स्तस्ता बस्रि नश्यतः॥ १२।

भावार्थः-य ऐश्वर्यवानदाता यो दरिद्रो महामनास्तावलसिनौ सन्तौ दुखःभागिनौ सततं भवतः। तस्मात् सर्वैः पुरुषार्थे प्रयतितव्यम्॥ १२॥

अत्र प्रश्नोत्तराध्ययनाध्यापनराजधर्मविषयवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति विंशत्युत्तरशततमं १२० सूक्तं सप्तदशोऽनुवाकः १७ त्रयोविंशो २३ वर्गश्च समाप्तः॥

पदार्थः-मैं **(स्वप्नस्य)** नींद **(अभुञ्जतः)** आप भी जो नहीं भोगता उस **(च)** और **(रेवतः)** धनवान् पुरुष के निकट से **(निर्विदे)** उदासीन भाव को प्राप्त होऊं **(अध)** इसके अनन्तर जो **(उभा)** दो पुरुषार्थहीन हैं **(ता)** वे दोनों **(बस्रि)** सुख के रुकने से **(नश्यतः)** नष्ट होते हैं॥ १२॥

भावार्थः-जो ऐश्वर्यवान् न देनेवाला वा जो दरिद्री उदारचित्त है, वे दोनों आलसी होते हुए दुःख भोगनेवाले निरन्तर होते हैं, इससे सबको पुरुषार्थ के निमित्त अवश्य यत्न करना चाहिये॥ १२॥

इस सूक्त में प्रश्नोत्तर, पढ़ने-पढ़ाने और राजधर्म के विषय का वर्णन होने से इसके अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ बीसवां १२० सूक्त, सत्रहवां १७ अनुवाक और तेईसवां २३ वर्ग पूरा हुआ॥

अथास्य पञ्चदशर्चस्यैकविंशत्युत्तरशततमस्य सूक्तस्यौशिजः कक्षीवान् ऋषिः। विश्वेदेवा इन्द्रश्च देवताः। १,७,१३ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,८,१० त्रिष्टुप्। ३,४,६,१२,१४,१५ विराट् त्रिष्टुप्। ५,९,११ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

तत्रादौ स्त्रीपुरुषाः कथं वर्तेरन्नित्युपदिश्यते।

अब १५ ऋचावाले एक सौ इक्कीसवें सूक्त का आरम्भ है। उसके पहिले मन्त्र में स्त्रीपुरुष कैसे वर्त्ताव वर्त्तें, यह उपदेश किया है॥

कदित्था नॄः पात्रं देवयतां श्रवद्गिरो अङ्गिरसां तुरण्यन्।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः॥ १॥

कत्। इत्था। नॄन्। पात्रम्। देवऽयताम्। श्रवत्। गिरः। अङ्गिरसाम्। तुरण्यन्। प्र। यत्। आनट्। विशः। आ। हर्म्यस्य। उरु। क्रंसते। अध्वरे। यजत्रः॥ १॥

पदार्थः-(कत्) कदा। **छान्दसो वर्णलोपो** वेत्याकारलोपः। **(इत्था)** अनेन प्रकारेण **(नॄन्)** प्राप्तव्यशिक्षान् **(पात्रम्)** पालनम् **(देवयताम्)** कामयमानानाम् **(श्रवत्)** शृणुयात् **(गिरः)** वेदविद्याशिक्षिता वाचः **(अङ्गिरसाम्)** प्राप्तविद्यासिद्धान्तरसानाम् **(तुरण्यन्)** त्वरन् **(प्र)** **(यत्)** याः **(आनट्)** अश्नुवीत। व्यत्ययेन श्नम् परस्मैपदं च। **(विशः)** प्रजाः **(आ)** **(हर्म्यस्य)** न्यायगृहस्य मध्ये **(उरु)** बहु **(क्रंसते)** क्रमेत **(अध्वरे)** अहिंसनीये प्रजापालनाख्ये व्यवहारे **(यजत्रः)** सङ्गमकर्त्ता॥ १॥

अन्वयः–हे पुरुष! त्वमध्वरे यजत्रस्तुरण्यन् सन् यथा जिज्ञासुर्नॄन् पात्रं कुर्याद् देवयतामङ्गिरसां यद्या गिरः श्रवत्ता इत्था कच्छ्रोष्यसि। यथा च धार्मिको राजा हर्म्यस्य मध्ये वर्त्तमानः सन् विनयेन विशः प्रानड्वार्क्रंसत इत्था कद्भविष्यसि॥ १॥

भावार्थः–अत्र लुप्तोपमालङ्कारः। हे स्त्रीपुरुषौ! यथा आप्ताः सर्वान् मनुष्यादीन् सत्यं बोधयन्तोऽसत्यान्निवारयन्तः सुशिक्षन्ते तथा स्वापत्यादीन् भवन्तः सततं सुशिक्षन्ताम्। यतो युष्माकं कुलेऽयोग्याः सन्तानाः कदाचिन्न जायेरन्॥ १॥

पदार्थः–हे पुरुष! तू **(अध्वरे)** न विनाश करने योग्य प्रजापालन रूप व्यवहार में **(यजत्रः)** सङ्ग करनेवाला **(तुरण्यन्)** शीघ्रता करता हुआ जैसे ज्ञान चाहनेहारा **(नॄन्)** सिखाने योग्य बालक वा मनुष्यों की **(पात्रम्)** पालना करे तथा **(देवयताम्)** चाहते **(अङ्गिरसाम्)** और विद्या के सिद्धान्त रस को पाये हुए विद्वानों की **(यत्)** जिन **(गिरः)** वेदविद्या की शिक्षारूप वाणियों को **(श्रवत्)** सुने, उनको **(इत्था)** इस प्रकार से **(कत्)** कब सुनेगा और जैसे धर्मात्मा राजा **(हर्म्यस्य)** न्यायघर के बीच वर्त्तमान हुआ विनय से **(विशः)** प्रजाजनों को **(प्रानट्)** प्राप्त होवे **(उरु)** और बहुत **(आ, क्रंसते)** आक्रमण करे अर्थात् उनके व्यवहारों में बुद्धि को दौड़ावे, इस प्रकार का कब होगा॥ १॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। हे स्त्री पुरुषो! जैसे शास्त्रवेत्ता विद्वान् सब मनुष्यादि को सत्य बोध कराते और झूठ से रोकते हुए उत्तम शिक्षा देते हैं, वैसे अपने सन्तान आदि को आप निरन्तर अच्छी शिक्षा देओ, जिससे तुम्हारे कुल में अयोग्य सन्तान कभी न उत्पन्न हो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तभ्नी॑द्ध द्यां स ध॒रुणं॑ प्रुषायद्ऋ॒भुर्वाजा॑य॒ द्रवि॑णं॒ नरो॒ गोः।
अनु॑ स्व॒जां म॑हि॒षश्चक्ष॑त॒ व्रां मेना॒मश्व॑स्य॒ परि॑ मा॒तर॑ं गोः॥२॥

स्तभ्नी॑त्। ह॒। द्याम्। सः। ध॒रुण॑म्। प्रु॒षा॒य॒त्। ऋ॒भुः। वाजा॑य। द्रवि॑णम्। नरः॑। गोः। अनु॑। स्व॒ऽजाम्। म॒हि॒षः। च॒क्ष॒त॒। व्राम्। मेना॑म्। अश्व॑स्य। परि॑। मा॒तर॑म्। गोः॥२॥

पदार्थः-(स्तभ्नीत्) धरेत्। अडभावः। **(ह)** खलु **(द्याम्)** प्रकाशम् **(सः)** मनुष्यः **(धरुणम्)** उदकम्। **धरुणमित्युदकनामसु पठितम्।** (निघं०१.१२) **(प्रुषायत्)** प्रुष्णीयात् सिञ्चेत्। अत्र शायच्। **(ऋभुः)** सकलविद्याजातप्रज्ञो मेधावी **(वाजाय)** विज्ञानायान्नाय वा **(द्रविणम्)** धनम् **(नरः)** धर्मविद्यानेता **(गोः)** पृथिव्याः **(अनु) (स्वजाम्)** स्वात्मजनिताम् **(महिषः)** महान्। **महिष इति महन्नामसु पठितम्।** (निघं०३.३) **(चक्षत)** चक्षीत। अत्र शपोऽलुक्। **(व्राम्)** वरीतुमर्हाम्। वृञ् धातो**र्घञर्थे कः**। **(मेनाम्)** विद्यासुशिक्षाभ्यां लब्धां वाचम् **(अश्वस्य)** व्याप्तुमर्हस्य राज्यस्य **(परि)** सर्वतः **(मातरम्)** मातृवत्पालिकाम् **(गोः)** भूमेः॥२॥

अन्वयः-यथा महिषः सूर्यो गोर्धर्त्ताऽस्ति तथा ऋभुर्नरो वाजायाश्वस्य स्वजां व्रां मातरं मेनां परि चक्षत यथा वा स सूर्य्यो द्यां स्तभ्नीत्तथा सह गोर्मध्ये द्रविणं वर्धयित्वा क्षेत्रं धरुणमिवानु प्रुषायत्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य आप्तविद्वत्सङ्गेन विद्यां विनयन्यायादिकं च धरेत्स सुखेन वर्धेत महान् पूज्यश्च स्यात्॥२॥

पदार्थः-जैसे **(महिषः)** बड़ा सूर्य्य **(गोः)** भूमि का धारण करनेवाला है, वैसे **(ऋभुः)** सकल विद्याओं से युक्त आप्तबुद्धि मेधावी **(नरः)** धर्म और विद्या की प्राप्ति करानेवाला सज्जन **(वाजाय)** विज्ञान वा अन्न के लिये **(अश्वस्य)** व्याप्त होने योग्य राज्य की **(स्वजाम्)** आप से उत्पन्न की गई **(व्राम्)** स्वीकार करने के योग्य **(मातरम्)** माता के समान पालनेवाली **(मेनाम्)** विद्या और अच्छी शिक्षा से पाई हुई वाणी को **(परि, चक्षत)** सब ओर से कहे वा जैसे सूर्य्य **(द्याम्)** प्रकाश को **(स्तभ्नीत्)** धारण करे, वैसे **(स, ह)** वही **(गोः)** पृथिवी पर **(द्रविणम्)** धन को बढ़ा खेत को **(धरुणम्)** जल के समान **(अनु, प्रुषायत्)** सींचा करें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो आप्त अर्थात् उत्तम शास्त्री विद्वान् के संग से विद्या, विनय और न्याय आदि का धारण करे, वह सुख से बढ़े और बड़ा सत्कार करने योग्य हो॥२॥

अथ राजधर्मविषयमाह॥

अब राजधर्म विषय को अगले मन्त्र में कहा है॥

नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून्।
तक्षद्वज्रं नियुतं तस्तम्भद् द्यां चतुष्पदे नर्याय द्विपादे॥३॥

नक्षत्। हवम्। अरुणीः। पूर्व्यम्। राट्। तुरः। विशाम्। अङ्गिरसाम्। अनु। द्यून्। तक्षत्। वज्रम्। नियुतम्। तस्तम्भत्। द्याम्। चतुष्पदे। नर्याय। द्विपादे॥३॥

पदार्थः-(नक्षत्) प्राप्नुयात् **(हवम्)** दातुमादातुमर्हं न्यायम् **(अरुणीः)** उषसोऽरुण्यो दीप्तय इव वर्त्तमानराजनीतीः **(पूर्व्यम्)** पूर्वैर्विद्वद्भिः कृतमनुष्ठितम् **(राट्)** राजते सः **(तुरः)** त्वरितोऽनलसः सन् **(विशाम्)** पालनीयानां प्रजानाम् **(अङ्गिरसाम्)** अङ्गानां रसप्राणवत् प्रियाणाम् **(अनु)** **(द्यून्)** दिनानि **(तक्षत्)** तीक्ष्णीकृत्य शत्रून् हिंस्यात् **(वज्रम्)** शस्त्रास्त्रसमूहम् **(नियुतम्)** नित्यं युक्तम् **(तस्तम्भत्)** स्तभ्नीयात् **(द्याम्)** विद्यान्यायप्रकाशम् **(चतुष्पदे)** गवाद्याय पशवे **(नर्य्याय)** नृषु साधवे **(द्विपादे)** मनुष्याद्याय॥३॥

अन्वयः-यस्तुरो मनुष्यो विद्वान् चतुष्पदे द्विपादे नर्य्याय चानुद्यून् पूर्व्यं हवमुषसो दीप्तय इवारुणीश्च नक्षद् वियुतं वज्रं तक्षद् द्यां तस्तम्भत् सोऽङ्गिरसां विशां मध्ये राड् भवति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विनयादिभिर्मनुष्यादीन् गवादींश्चातीताप्तराजवद् रक्षन्त्यन्यायेन कंचिन्न हिंसन्ति त एव सुखानि प्राप्नुवन्ति नेतरे॥३॥

पदार्थः-जो **(तुरः)** तुरन्त आलस्य छोड़े हुए विद्वान् मनुष्य **(चतुष्पदे)** गोआदि पशु वा **(द्विपादे)** मनुष्य आदि प्राणियों वा **(नर्य्याय)** मनुष्यों में अति उत्तम महात्माजन के लिये **(अनु, द्यून्)** प्रतिदिन **(पूर्व्यम्)** अगले विद्वानों ने अनुष्ठान किये हुए **(हवम्)** देने-लेने योग्य और **(अरुणीः)** प्रातः समय की वेला लाल रंगवाली उजेली के समान राजनीतियों को **(नक्षत्)** प्राप्त हो **(नियुतम्)** नित्य कार्य में युक्त किये हुए **(वज्रम्)** शस्त्र-अस्त्रों को **(तक्षत्)** तीक्ष्ण करके शत्रुओं को मारे तथा उनके **(द्याम्)** विद्या और न्याय के प्रकाश का **(तस्तम्भत्)** निबन्ध करे, वह **(अङ्गिरसाम्)** अङ्गों के रस अथवा प्राण के समान प्यारे **(विशाम्)** प्रजाजनों के बीच **(राट्)** प्रकाशमान राजा होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विनय आदि से मनुष्य आदि प्राणी और गौ आदि पशुओं को व्यतीत हुए आप्त, निष्कपट, सत्यवादी राजाओं के समान पालते और अन्याय से किसी को नहीं मारते हैं, वे ही सुखों को पाते हैं, और नहीं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम्।
यद्ध प्रसर्गे त्रिककुम्निवर्तदप दुहो मानुषस्य दुरो वः॥४॥

अस्य। मदे। स्वर्यम्। दाः। ऋताय। अपिऽवृतम्। उस्रियाणाम्। अनीकम्। यत्। ह। प्रऽसर्गे। त्रिऽककुप्। निऽवर्तत्। अप। दुहः। मानुषस्य। दुरः। वरिति। वः॥४॥

पदार्थः-(अस्य) प्रत्यक्षविषयस्य **(मदे)** आनन्दनिमित्ते सति **(स्वर्य्यम्)** स्वरेषु विद्यासु शिक्षितासु वाक्षु साधु **(दाः)** दद्यात्। अत्र पुरुषव्यत्ययः। **(ऋताय)** सत्यलक्षणान्वितायोदकाय वा **(अपिवृतम्)** सुखबलैर्युक्तम् **(उस्रियाणाम्)** गवाम् **(अनीकम्)** सैन्यम् **(यत्)** यः **(ह)** खलु **(प्रसर्गे)** प्रकृष्ट उत्पादने **(त्रिककुप्)** त्रिभिः सेनाध्यापकोपदेशकैर्युक्ताः ककुभो दिशो यस्य सः **(निवर्त्तत्)** निवर्त्तयेत्। व्यत्ययेन परस्मैपदम्। **(अप) (दुहः)** गोहिंसकान् शत्रून् **(मानुषस्य)** मनुष्यजातस्य **(दुरः)** द्वाराणि **(वः)** वृणुयात्॥४॥

अन्वयः-यद्यस्त्रिककुम् मनुष्योऽस्य मानुषस्योस्रियाणां च प्रसर्गे मदे ऋतायापीवृतं स्वर्य्यमनीकं दाः। एतान् दुहो निवर्त्तत् दुरोऽपवः स ह सम्राड् भवितुं योग्यो भवेत्॥४॥

भावार्थः-त एव राजपुरुषा उत्तमा भवन्ति ये प्रजास्थानां मनुष्यगवादिप्राणिनां सुखाय हिंसकान् मनुष्यान् निवर्त्य धर्मे राजन्ते परोपकारिणश्च सन्ति। येऽधर्ममार्गान्निरुध्य धर्ममार्गान् प्रकाशयन्ति त एव राजकर्माण्यर्हन्ति॥४॥

पदार्थः-(यत्) जो **(त्रिककुप्)** मनुष्य ऐसा है कि जिसकी पूर्व आदि दिशा सेना वा पढ़ाने और उपदेश करनेवालों से युक्त हैं **(अस्य)** इस प्रत्यक्ष **(मानुषस्य)** मनुष्य के **(उस्रियाणाम्)** गौओं के **(प्रसर्गे)** उत्तमता से उत्पन्न कराने रूप **(मदे)** आनन्द के निमित्त **(ऋताय)** सत्य व्यवहार वा जल के लिये **(अपीवृतम्)** सुख और बलों से युक्त **(स्वर्य्यम्)** विद्या और अच्छी शिक्षा रूप वचनों में श्रेष्ठ **(अनीकम्)** सेना को **(दाः)** देवे तथा इन **(दुहः)** गो आदि पशुओं के द्रोही अर्थात् मारनेहारे पशुहिंसक मनुष्यों को **(निवर्त्तत्)** रोके, हिंसा न होने दे, **(दुरः)** उक्त दुष्टों के द्वारे **(अप, वः)** बन्द कर देवे **(ह)** वही चक्रवर्त्ती राजा होने को योग्य है॥४॥

भावार्थः-वे ही राजपुरुष उत्तम होते हैं जो प्रजास्थ मनुष्य और गौ आदि प्राणियों के सुख के लिये हिंसक दुष्ट पुरुषों की निवृत्ति कर धर्म में प्रकाशमान होते और जो परोपकारी होते हैं। जो अधर्म मार्गों को रोक धर्म मार्गों को प्रकाशित करते हैं, वे ही राजकामों के योग्य होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तुभ्यं पयो यत् पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पयं उस्रियायाः॥५॥२४॥

तुभ्यम्। पयः। यत्। पितरौ। अनीताम्। राधः। सुऽरेतः। तुरणे। भुरण्यू इति। शुचि। यत्। ते। रेक्णः। आ। अयजन्त। सबरुऽदुघायाः। पयः। उस्रियायाः॥५॥

पदार्थः-(तुभ्यम्) (पयः) दुग्धम् **(यत्)** यस्मै **(पितरौ)** जननी जनकौ **(अनीताम्)** प्रापयेताम् **(राधः)** संसिद्धिकरं धनम् **(सुरेतः)** शोभनं रेतो वीर्य्यं यस्मात्तत् **(तुरणे)** दुग्धादिपानार्थं त्वरमाणय। अत्र तुरण धातोः क्विप्। **(भुरण्यू)** धारणपोषणकर्त्तारौ **(शुचि)** पवित्रं शुद्धिकारकम् **(यत्)** यस्मै **(ते)** तुभ्यम् **(रेक्णः)** प्रशस्तं धनमिव **(आ) (अयजन्त)** ददतु **(सबर्दुघायाः)** समानं सुखं बिभर्त्ति येन दुग्धेन तत्सबस्तद् दोग्धि तस्याः। अत्र समानोपपदाद् भृञ्धातोर्विच् वर्णव्यत्ययेन भस्य बः। **(पयः)** पातुमर्हम् **(उस्रियायाः)** धेनोर्गोः॥५॥

अन्वयः-हे सज्जन! यद्यस्मै तुरणे तुभ्यं भुरण्यू पितरौ सुरेतः पयो राधश्चानीताम्। यद्यस्मै तुरणे ते तुभ्यं दयालवो गोरक्षका मनुष्याः सबर्दुघाया उस्रियायाः शुचि पयो रेक्णो धनं चायजन्तेव त्वमेतान् सततं सेवस्व कदाचिन्मा हिन्धि॥५॥

भावार्थः-मनुष्या यथा मातापितृविदुषां सेवनेन धर्मेण सुखमाप्नुयुस्तथैव गवादीनां रक्षणेन धर्मेण सुखमाप्नुयुः। एतेषामप्रियाचरणं कदाचिन्न कुर्युः, कुत एते सर्वस्योपकारका सन्त्यतः॥५॥

पदार्थः-हे सज्जन! **(यत्)** जिस **(तुरणे)** दूध आदि पदार्थ के पीने को जल्दी करते हुए **(तुभ्यम्)** तेरे लिये **(भुरण्यू)** धारण और पुष्टि करनेवाले **(पितरौ)** माता-पिता **(सुरेतः)** जिससे उत्तम वीर्य उत्पन्न होता उस **(पयः)** दूध और **(राधः)** उत्तम सिद्धि करनेवाले धन की **(अनीताम्)** प्राप्ति करावें और जैसे **(यत्)** दूध आदि के पीने को जल्दी करते हुए जिस **(ते)** तेरे लिये दयालु गौ आदि पशुओं को राखनेवाले मनुष्य **(सबर्दुघायाः)** जिससे एकसा सुख धारण करना होता है, उस दूध को पूरा करनेहारी **(उस्रियायाः)** उत्तम पुष्टि देती हुई गौ के **(शुचि)** शुद्ध पवित्र **(पयः)** पीने योग्य दूध को **(रेक्णः)**

प्रशंसित धन के समान **(आ, अयजन्त)** भली-भांति देवें, वैसे उन मनुष्यों की तू निरन्तर सेवा कर और उनके उपकार को कभी मत तोड़॥५॥

भावार्थः-मनुष्य लोग जैसे माता-पिता और विद्वानों की सेवा से धर्म के साथ सुखों को प्राप्त होवें, वैसे ही गौ आदि पशुओं की रक्षा से धर्म के साथ सुख पावें। इनके मन के विरुद्ध आचरण को कभी न करें, क्योंकि ये सबका उपकार करनेवाली प्राणी हैं, इससे॥५॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्युपदिश्यते॥

फिर मनुष्य कैसे वर्त्तें, यह विषय अगले मन्त्र में कहा है॥

अध॒ प्र ज॑ज्ञे॒ त॒रणि॑र्ममत्तु॒ प्र रो॑च्य॒स्या उ॒षसो॒ न सूर॑ः।
इन्दु॒र्येभि॒राष्ट॒ स्वेदु॑हव्यै॒ः स्रु॒वेण॑ सि॒ञ्चञ्ज॒रणा॒भि धाम॑॥६॥

अध॑। प्र। ज॒ज्ञे॒। त॒रणि॑ः। म॒म॒त्तु॒। प्र। रो॒चि॒। अ॒स्याः। उ॒षसः॑। न। सूर॑ः। इन्दु॑ः। येभि॑ः। आष्ट॑। स्वऽइदु॑हव्यैः। स्रु॒वेण॑। सि॒ञ्चन्। ज॒रणा॑। अ॒भि। धाम॑॥६॥

पदार्थः-(अध) अथ **(प्र) (जज्ञे)** जायताम् **(तरणिः)** दुःखात् पारगः सुखविस्तारकः **(ममत्तु)** आनन्द। अत्र विकरणस्य श्लुः। **(प्र) (रोचि)** जगति प्रकाश्येत **(अस्याः)** गोः **(उषसः)** प्रभातात् **(न)** इव **(सूरः)** सविता **(इन्दुः) (येभिः)** यैः **(आष्ट)** अश्नुवीत। अत्र लिङि लुङ् विकरणस्य लुक्। **(स्वेदुहव्यैः)** स्वानि इदूनि ऐश्वर्य्याणि हव्यानि दातुमादातुं योग्यानि येभ्यो दुग्धादिभ्यस्तैः **(स्रुवेण) (सिञ्चन्) (जरणा)** जरणानि स्तुत्यानि कर्माणि **(अभि) (धाम)** स्थलम्॥६॥

अन्वयः-हे सत्कर्मानुष्ठातो! भवानुषसः सूरो न येभिः स्वेदुहव्यैः स्रुवेण धामाभिसिञ्चन्निवास्या दुग्धादिभिः प्ररोचि। इन्दुः सन् जरणाष्ट तरणिः सन् ममत्तु। अध प्रजज्ञे प्रसिद्धौ भवतु॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्या गवादीन् संरक्ष्योन्नीय वैद्यकशास्त्रानुसारेणैतेषां दुग्धादीनि सेवमाना बलिष्ठा अत्यैश्वर्ययुक्ताः सततं भवन्तु, यथा कश्चिदुपसाधनेन युक्त्या क्षेत्रं निर्माय जलेन सिञ्चन्नन्नादियुक्तो भूत्वा बलैश्वर्येण सूर्यवत्प्रकाशते तथैवैतानि स्तुत्यानि कर्माणि कुर्वन्तः प्रदीप्यन्ताम्॥६॥

पदार्थः-हे अच्छे कामों के अनुष्ठान करनेवाले मनुष्य! आप **(उषसः)** प्रभात समय से **(सूरः)** सूर्य के **(न)** समान **(येभिः)** जिनसे **(स्वेदुहव्यैः)** अपने देने-लेने के योग्य दूध आदि पदार्थों से ऐश्वर्य्य अर्थात् उत्तम पदार्थ सिद्ध होते हैं, उनसे और **(स्रुवेण)** श्रुवा आदि के योग से **(धाम)** यज्ञभूमि को **(अभिसिञ्चन्)** सब ओर से सींचते हुए सज्जनों के समान **(अस्याः)** इन गौ के दूध आदि पदार्थों से **(प्र, रोचि)** संसार में भली-भांति प्रकाशमान हो और **(इन्दुः)** ऐश्वर्य्ययुक्त **(जरणा)** प्रशंसित कामों को

(आष्ट) प्राप्त हो **(तरणिः)** दुःख से पार पहुंचे हुए सुख का विस्तार करने अर्थात् बढ़ानेवाले आप **(ममत्तु)** आनन्द भोगो, **(अध)** इसके अनन्तर **(प्र, जज्ञे)** प्रसिद्ध होओ॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्य गौ आदि पशुओं को राख और उनकी वृद्धि कर वैद्यकशास्त्र के अनुसार इन पशुओं से दूध आदि को सेवते हुए बलिष्ठ और अत्यन्त ऐश्वर्ययुक्त निरन्तर हों, जैसे कोई हल, पटेला आदि साधनों से युक्ति के साथ खेत को सिद्ध कर जल सींचता हुआ अन्न आदि पदार्थों से युक्त होकर बल और ऐश्वर्य्य से सूर्य्य के समान प्रकाशमान होता है, वैसे इन प्रशंसा योग्य कामों को करते हुए प्रकाशित हों॥६॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहा है॥

स्विध्मा यद्वनधितिरपस्यात् सूरो अध्वरे परि रोधना गोः।
यद्ध प्रभासि कृत्व्याँ अनु द्यूनन्विर्विशे पश्विषे तुराय॥७॥

सुऽइध्मा। यत्। वनऽधितिः। अपस्यात्। सूरः। अध्वरे। परि। रोधना। गोः। यत्। ह। प्रऽभासि। कृत्व्यान्। अनु। द्यून्। अनर्विशे। पशुऽइषे। तुराय॥७॥

पदार्थः-(स्विध्मा) सुष्ठु इध्मा सुखप्रदीप्तिर्यया सा **(यत्)** या **(वनधितिः)** वनानां धृतिः **(अपस्यात्)** आत्मगोऽपांसि कर्माणीच्छेत् **(सूरः)** प्रेरकः सविता **(अध्वरे)** अविद्यमानोऽध्वरो हिंसन् यस्मिन् रक्षणे **(परि)** सर्वतः **(रोधना)** रक्षणार्थानि **(गोः)** धेनोः **(यत्)** यानि **(ह)** किल **(प्रभासि)** प्रदीप्यसे **(कृत्व्यान्)** कर्मसु साधून्। **कृत्वीति कर्मनामसु पठितम्।** (निघं०२.१) **(अनु)** **(द्यून्)** दिवसान् **(अनर्विशे)** अनस्सु शकटेषु विट् प्रवेशस्तस्मै। अत्र **वा छन्दसी**त्युत्त्वाभावः। **(पश्विषे)** पशूनामिषे वृद्धीच्छायै **(तुराय)** सद्यो गमनाय॥७॥

अन्वयः-हे सज्जन! त्वया यद्या स्विध्मा वनधितिः कृता यानि गोरोधना कृतानि तैस्त्वमध्वरे कृत्व्याननुद्यून् सूर इवानर्विशे पश्विषे तुराय यद्ध प्रभासि तद्धवान् पर्यपस्यात्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः पशुपालनवर्द्धनाद्याय वनानि रक्षित्वा तत्रैताञ्चारयित्वा दुग्धादीनि सेवित्वा कृष्यादीनि कर्माणि यथावत् कुर्युस्ते राज्यैश्वर्येण सूर्य इव प्रकाशमाना भवन्ति नेतरे गवादिहिंसकाः॥७॥

पदार्थः-हे सज्जन मनुष्य! तूने **(यत्)** जो ऐसी उत्तम क्रिया कि **(स्विध्मा)** जिससे सुन्दर सुख का प्रकाश होता वह **(वनधितिः)** वनों की धारणा अर्थात् रक्षा किई और जो **(गोः)** गौ की **(रोधना)** रक्षा होने के अर्थ काम किये हैं, उनसे तू **(अध्वरे)** जिसमें हिंसा आदि दुःख नहीं हैं, उस रक्षा के निमित्त

(कृत्व्यान्) उत्तम कामों का **(अनु, द्यून्)** प्रतिदिन **(सूरः)** प्रेरणा देनेवाले सूर्यलोक के समान **(अनर्विशे)** लढ़ा आदि गाड़ियों में जो बैठना होता उसके लिये और **(पश्विषे)** पशुओं के बढ़ने की इच्छा के लिये और **(तुराय)** शीघ्र जाने के लिये **(यत्)** जो **(ह)** निश्चय से **(प्रभासि)** प्रकाशित होता है सो आप **(पर्यपस्यात्)** अपने को उत्तम-उत्तम कामों की इच्छा करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य पशुओं की रक्षा और बढ़ने आदि के लिये वनों को राख, उन्हीं में उन पशुओं को चरा, दूध आदि का सेवन कर, खेती आदि कामों को यथावत् करें, वे राज्य के ऐश्वर्य से सूर्य के समान प्रकाशमान होते हैं और गौ आदि पशुओं के मारनेवाले नहीं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम्।
हरिं यत्ते मन्दिनं दुक्षन् वृधे गोरभसमद्रिभिर्वाताप्यम्॥८॥

अष्टा। महः। दिवः। आदः। हरी इति। इह। द्युम्नऽसहम्। अभि। योधानः। उत्सम्। हरिम्। यत्। ते। मन्दिनम्। धुक्षन्। वृधे। गोऽरभसम्। अद्रिऽभिः। वाताप्यम्॥८॥

पदार्थः-(अष्टा) व्यापकः **(महः)** महतः **(दिवः)** दीप्त्याः **(आदः)** अत्ता। अत्र **कृतो बहुलमिति** कर्त्तरि घञ्। **बहुलं छन्दसी**ति घस्लादेशो न। **(हरी)** सूर्यस्य प्रकाशाकर्षणे इव **(इह)** जगति **(द्युम्नासाहम्)** द्युम्नानि धनानि सहन्ते येन **(अभि)** **(योधानः)** योद्धुं शीलाः। अत्रौणादिको निः प्रत्ययः। **(उत्सम्)** कूपम् **(हरिम्)** हयम् **(यत्)** ये **(ते)** तव **(मन्दिनम्)** कमनीयम् **(दुक्षन्)** अधुक्षन् दुहन्तु प्रपिपुरतु **(वृधे)** सुखानां वर्धनाय **(गोरभसम्)** गवां महत्त्वम्। **रभस इति महन्नामसु पठितम्।** (निघं०३.३) **(अद्रिभिः)** मेघैः शैलैर्वा **(वाताप्यम्)** वातेन शुद्धेन वायुनाप्तुं योग्यम्॥८॥

अन्वयः-हे राजँस्ते यद्योधानो वृध आदोऽष्टा सूर्यो महो दिवो हरी अद्रिभिः प्रचरती वेह उत्सं विधाय द्युम्नसाहं हरिं मन्दिनं वाताप्यं गोरभसमभिदुक्षँस्ते त्वया सत्कर्त्तव्याः॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं यथा सूर्यो स्वप्रकाशेन सर्वं जगदानन्द्याकर्षणेन भूगोलं धरति, तथैव नदीस्रोतः कूपादीन्निर्माय वनेषु वा घासादिकं वर्द्धयित्वा गोऽश्वादीनां रक्षणवर्द्धने विधाय दुग्धादिसेवनेन सततमानन्दत॥८॥

पदार्थः-हे राजन्! **(ते)** तुम्हारे **(यत्)** जो **(योधानः)** युद्ध करनेवाले **(वृधे)** सुखों के बढ़ने के लिये जैसे **(आदः)** रस आदि पदार्थ का भक्षण करने और **(अष्टा)** सब जगह व्याप्त होने वाला सूर्यलोक **(महः)** बड़ी **(दिवः)** दीप्ति से अपने **(हरी)** प्रकाश और आकर्षण को **(अद्रिभिः)** मेघ वा पर्वतों के साथ

प्रचरित करता है, वैसे **(इह)** इस संसार में **(उत्सम्)** कुएँ को बनाय **(द्युम्नसाहम्)** जिससे धन सहे जाते अर्थात् मिलते उस **(हरिम्)** घोड़ा और **(मन्दिनम्)** मनोहर **(वाताप्यम्)** शुद्ध वायु से पाने योग्य **(गोरभसम्)** गौओं के बड़प्पन को **(अभि, दुक्षन्)** सब प्रकार से पूर्ण करें, वे आपको सत्कार करने योग्य हैं॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम जैसे सूर्य्य अपने प्रकाश से सब जगत् को आनन्द देकर अपनी आकर्षण शक्ति से भूगोल का धारण करता है, वैसे ही नदी, सोता, कुआं, बावरी, तालाब आदि को बना कर वन वा पर्वतों में घास आदि को बढ़ा, गौ और घोड़े आदि पशुओं की रक्षा और वृद्धि कर, दूध आदि के सेवन से निरन्तर आनन्द को प्राप्त होओ॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमा॑यसं प्रति॑ वर्तयो॒ गोर्दि॒वो अश्मा॑न॒मुप॑नीत॒मृभ्वा॑।
कुत्सा॑य॒ यत्र॑ पुरुहूत व॒न्वञ्छुष्णा॑मन॒न्तैः प॑रि॒यासि॑ व॒धैः॥९॥

त्वम्। आ॒य॒सम्। प्रति॑। व॒र्त॒य॒ः। गोः। दि॒वः। अश्मा॑नम्। उप॑ऽनीतम्। ऋभ्वा॑। कुत्सा॑य। यत्र॑। पु॒रु॒ऽहू॒त॒। व॒न्व॒न्। शुष्णा॑म्। अ॒न॒न्तैः। प॒रि॒ऽयासि॑। व॒धैः॥९॥

पदार्थः-(त्वम्) प्रजापालकः **(आयसम्)** अयोनिर्मितं शस्त्रास्त्रादिकम् **(प्रति) (वर्त्तयः) (गोः)** गवादेः पशोः **(दिवः)** दिव्यसुखप्रदात् प्रकाशात् **(अश्मानम्)** व्यापनशीलं मेघम्। **अश्मेति मेघनामसु पठितम्।** (निघं०१.१०) **(उपनीतम्)** प्राप्तसमीपम् **(ऋभ्वा)** मेधाविना **(कुत्साय)** वज्राय **(यत्र)** स्थले **(पुरुहूत)** बहुभिः स्पर्द्धित **(वन्वन्)** संभजमान **(शुष्णम्)** शोषकं बलम् **(अनन्तैः)** अविद्यमानसीमभिः **(परियासि)** सर्वतो याहि **(वधैः)** गोहिंस्राणां मारणोपायैः॥९॥

अन्वयः-हे वन्वन् पुरुहूत! त्वं सूर्यो दिवस्तमो हत्वाऽश्मानमुपनीतं प्रापयतीव ऋभ्वा सहायसं गृहीत्वा कुत्साय शुष्णं चादधन् यत्र गोहिंसका वर्त्तन्ते, तत्र तेषामनन्तैर्वधैः परियासि तान् गोः सकाशात्प्रति वर्त्तयश्च॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं यथा सविता मेघं वर्षयित्वाऽन्धकारं निवर्त्य सर्वमाह्लादयति, तथा गवादीनां रक्षणं विधायैतद्धिंसकान् प्रतिरोध्य सततं सुखयत नह्येतत्कर्म बुद्धिमत्सहायमन्तरा संभवति तस्माद्धीमतां सहायेनैव तदाचरत॥९॥

पदार्थः-हे **(वन्वन्)** अच्छे प्रकार सेवन करते और **(पुरुहूत)** बहुत मनुष्यों से ईर्ष्या के साथ बुलाये हुए मनुष्य! **(त्वम्)** तू जैसे सूर्य **(दिवः)** दिव्य सुख देनेहारे प्रकाश से अन्धकार को दूर करके **(अश्मानम्)** व्याप्त होनेवाले **(उपनीतम्)** अपने समीप आये हुए मेघ को छिन्न-भिन्न कर संसार में

पहुंचाता है, वैसे **(ऋभ्वा)** मेधावी अर्थात् धीरबुद्धि वाले पुरुष के साथ **(आयसम्)** लोहे से बनाये हुए शस्त्र-अस्त्रों को ले के **(कुत्साय)** वज्र के लिये **(शुष्णम्)** शत्रुओं के पराक्रम को सुखानेहारे बल को धारण करता हुआ **(यत्र)** जहां गौओं के मारनेवाले हैं, वहाँ उनको **(अनन्तैः)** जिनकी संख्या नहीं उन **(वधैः)** गोहिंसकों को मारने के उपायों से **(परियासि)** सब ओर से प्राप्त होते हो, उनको **(गोः)** गौ आदि पशुओं के समीप से **(प्रति, वर्त्तयः)** लौटाओ भी॥९।

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम लोग जैसे सूर्य मेघ की वर्षा और अन्धकार को दूर कर सबको हर्ष आनन्दयुक्त करता है, वैसे गौ आदि पशुओं की रक्षा कर उनके मारनेवालों को रोक निरन्तर सुखी होओ। यह काम बुद्धिमानों के सहाय के विना होने को संभव नहीं है, इससे बुद्धिमानों के सहाय से ही उक्त काम का आचरण करो॥९॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

पुरा यत् सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य।
शुष्णस्य चित् परिहितं यदोजो दिवस्परि सुग्रथितं तदादः॥१०॥२५॥

पुरा। यत्। सूरः। तमसः। अपिऽइतेः। तम्। अद्रिऽवः। फलिगम्। हेतिम्। अस्य। शुष्णस्य। चित्। परिऽहितम्। यत्। ओजः। दिवः। परि। सुऽग्रथितम्। तत्। आ। अदुरित्यदः॥१०॥

पदार्थः-(पुरा) पूर्वम् **(यत्)** यम् **(सूरः)** सविता **(तमसः)** **(अपीतेः)** विनाशनात् **(तम्)** शत्रुबलम् **(अद्रिवः)** प्रशस्ता अद्रयो विद्यन्ते यस्य राज्ये तत्सम्बुद्धौ **(फलिगम्)** मेघम्। **फलिग इति मेघनामसु पठितम्।** (निघं०१.१०) **(हेतिम्)** वज्रम्। **हेतिरिति वज्रनामसु पठितम्।** (निघं०२.२०) **(अस्य)** **(शुष्णस्य)** शोषकस्य शत्रोः **(चित्)** अपि **(परिहितम्)** सर्वतः सुखप्रदम् **(यत्)** **(ओजः)** बलम् **(दिवः)** प्रकाशात् **(परि)** **(सुग्रथितम्)** सुष्ठु निबद्धम् **(तत्)** **(आ)** **(अदः)** विदृणीहि। विकरणस्यालुक् लङ् प्रयोगः॥१०॥

अन्वयः-हे अद्रिवस्त्वं सूरः फलिगं हत्वा तमसोऽपीतेर्दिवः प्रकाशत इव सेनया तमादः यद्यं पुरा निवर्त्तयस्तं सुग्रथितं स्थापय। यदस्य परिहितमोजोऽस्ति तन्निवार्य शुष्णस्य परि चिदपि हेतिं निपातय। यतोऽयं गोहन्ता न स्यात्॥१०॥

भावार्थः-अत्र लुप्तोपमालङ्कारः। हे राजपुरुषा! यथा सूर्यो मेघं हत्वा भूमौ निपात्य सर्वान् प्राणिनः प्रीणयति तथैव गोहिंस्रान्निपात्य गवादीन् सततं सुखयत॥१०॥

पदार्थः-(अद्रिवः) जिनके राज्य में प्रशंसित पर्वत विद्यमान हैं, वैसे विख्यात हे राजन्! आप जैसे **(सूरः)** सूर्य **(फलिगम्)** मेघ छिन्न-भिन्न कर **(तमसः)** अन्धकार के **(अपीतेः)** विनाश करनेहारे

(दिवः) प्रकाश से प्रकाशित होता है, वैसे अपनी सेना से **(तम्)** उस शत्रुबल को **(आ, अदः)** विदारो अर्थात् उसका विनाश करो, **(यत्)** जिसको **(पुरा)** पहिले निवृत्त करते रहे हो, उसको **(सुग्रथितम्)** अच्छा बांध कर ठहराओ, **(यत्)** जो **(अस्य)** इसका **(परिहितम्)** सब ओर से सुख देनेवाला **(ओजः)** बल है **(तत्)** उसको निवृत्त कर **(शुष्णस्य)** सुखानेवाले शत्रु के **(परि)** सब ओर से **(चित्)** भी **(हेतिम्)** वज्र को उसके हाथ से गिरा देओ, जिससे यह गौओं का मारनेवाला न हो॥१०॥

भावार्थः-इस मन्त्र में लुप्तोपमालङ्कार है। हे राजपुरुषो! जैसे सूर्य मेघ को मार और उसको भूमि में गिराय सब प्राणियों को प्रसन्न करता है, वैसे ही गौओं के मारनेवालों को मार गौ आदि पशुओं को निरन्तर सुखी करो॥१०॥

पुना राजप्रजाकृत्यमाह॥

फिर राजा और प्रजा का काम यह विषय अगले मन्त्र में कहा है॥

अनु॑ त्वा म॒ही पाज॑सी अच॒क्रे द्यावा॒क्षामा॑ मदतामिन्द्र॒ कर्म॑न्।
त्वं वृ॒त्रमा॒शया॑नं सि॒रासु॑ म॒हो वज्रे॑ण सिष्वपो व॒राहु॑म्॥ ११॥

अनु॑। त्वा॒। म॒ही इति॑। पाज॑सी॒ इति॑। अ॒च॒क्रे इति॑। द्यावा॒क्षामा॑। म॒द॒ता॒म्। इ॒न्द्र॒। कर्म॑न्। त्वम्। वृ॒त्रम्। आ॒ऽशया॑नम्। सि॒रासु॑। म॒हः। वज्रे॑ण। सि॒स्व॒पः॒। व॒राहु॑म्॥ ११॥

पदार्थः-(अनु) **(त्वा)** त्वाम् **(मही)** महत्यौ **(पाजसी)** रक्षणनिमित्ते। अत्र विभक्तेः पूर्वसवर्णः। **पातेर्बले जुट् च।** (उणा०४.२०३) इति पा धातोरसुन् जुडागमश्च। **(अचक्रे)** अप्रतिहते। **चक्रं चकतेर्वा।** (निरु०४.२७) **(द्यावाक्षामा)** क्षमा एव क्षामा द्यौश्च क्षामा च द्यावाक्षामा सूर्यपृथिव्यौ **(मदताम्)** आनन्दतु **(इन्द्र)** प्राप्तपरमैश्वर्य **(कर्मन्)** राज्यकर्मणि **(त्वम्)** **(वृत्रम्)** मेघम् **(आशयानम्)** समन्तात् प्राप्तनिद्रम् **(सिरासु)** बन्धनरूपासु नाडीषु **(महः)** महता **(वज्रेण)** शस्त्रास्त्रसमूहेन **(सिष्वपः)** स्वापय। छन्दसीति संप्रसारणनिषेधः। **(वराहुम्)** वराणां धर्म्याणां व्यवहाराणां धार्मिकाणां जनानां च हन्तारं दस्युं शत्रुम्॥११॥

अन्वयः-हे इन्द्र! त्वं सूर्यो वृत्रमिव सिरासु सहो वज्रेण वराहुं हत्वाऽऽशयानमिव सिस्वपः। यतो मही पाजसी अचक्रे द्यावाक्षामा त्वा प्राप्य प्रत्येककर्मन्ननुमदताम्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषैर्विनयपराक्रमाभ्यां दुष्टान् शत्रून् बध्वा हत्वा निवर्त्य मित्राणि धार्मिकान् सम्पाद्य सर्वाः प्रजाः सत्कर्मसु प्रवर्त्यानन्दनीयाः॥११॥

पदार्थः-हे **(इन्द्र)** परम ऐश्वर्य को पाये हुए सभाध्यक्ष आदि सज्जन पुरुष! **(त्वम्)** आप सूर्य जैसे **(वृत्रम्)** मेघ को छिन्न-भिन्न करे वैसे **(सिरासु)** बन्धनरूप नाड़ियों में **(महः)** बड़े **(वज्रेण)** शस्त्र

और अस्त्रों के समूह से **(वराहुम्)** धर्मयुक्त उत्तम व्यवहार वा धार्मिक जनों के मारनेवाले दुष्ट शत्रु को मारके **(आशयानम्)** जिसने सब ओर से गाढ़ी नींद पाई उसके समान **(सिष्वपः)** सुलाओ जिससे **(मही)** बड़े **(पाजसी)** रक्षा करनेहारा और अपने प्रकाश करने में **(अचक्रे)** न रुके हुए **(द्यावाक्षामा)** सूर्य और पृथिवी **(त्वा)** आपको प्राप्त होकर उनमें से प्रत्येक **(कर्मन्)** राज्य के काम में तुमको **(अनु मदताम्)** अनुकूलता से आनन्द देवें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुषों को चाहिये कि विनय और पराक्रम से दुष्ट शत्रुओं को बांध, मार और निवार अर्थात् उनको धार्मिक मित्र बनाकर समस्त प्रजाजनों को अच्छे कामों में प्रवृत्त करा आनन्दित करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमि॑न्द्र नर्यो॒ याँ अवो॒ नॄन् तिष्ठा॒ वात॑स्य सु॒युजो॒ वहि॑ष्ठान्।
यं ते॑ का॒व्य उ॒शना॑ म॒न्दिनं॒ दाद् वृ॑त्र॒हणं॒ पार्यं॑ ततक्ष॒ वज्र॑म्॥ १२॥

त्वम्। इ॒न्द्र॒। नर्यः॑। यान्। अवः॑। नॄन्। तिष्ठ॑। वात॑स्य। सु॒ऽयुजः॑। वहि॑ष्ठान्। यम्। ते॒। का॒व्यः॑। उ॒शना॑। म॒न्दिन॑म्। दात्। वृ॒त्र॒ऽह॒न॑म्। पार्य॑म्। त॒त॒क्ष॒। वज्र॑म्॥ १२॥

पदार्थः-(त्वम्) (इन्द्र) प्रजापालक **(नर्य्यः)** नृषुः साधुः सन् **(यान्) (अवः)** रक्षेः **(नॄन्)** धार्मिकान् जनान् **(तिष्ठ)** धर्मे वर्त्तस्व। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(वातस्य)** प्राणस्य मध्ये योगाभ्यासेन **(सुयुजः)** सुष्ठु युक्तान् योगिनः **(वहिष्ठान्)** अतिशयेन वोढॄन् विद्याधर्मप्रापकान् **(यम्) (ते)** तुभ्यम् **(काव्यः)** कवेर्मेधाविनः पुत्रः **(उशना)** धर्मकामुकः। अत्र डादेशः। **(मन्दिनम्)** स्तुत्यं जनम् **(दात्)** दद्यात् **(वृत्रहणम्)** शत्रुहन्तारं वीरम् **(पार्य्यम्)** पार्य्यते समाप्यते कर्म येन तम् **(ततक्ष)** प्रक्षिपेत् **(वज्रम्)** शस्त्रास्त्रसमूहम्॥१२॥

अन्वयः-हे इन्द्र काव्य उशना नर्यस्त्वं यान् वहिष्ठान् वातस्य सुयुजो नॄनवस्तैः सह धर्मे तिष्ठ यस्ते यं वृत्रहणं मन्दिनं पार्यं जनं दात् यः शत्रूणामुपरि वज्रं ततक्ष तेनापि सह धर्मेण वर्त्तस्व॥१२॥

भावार्थः-यथा राजपुरुषाः परमेश्वरोपासकानध्यापकोपदेशकानन्योत्तमव्यवहारस्थान् प्रजासेनाजनान् रक्षेयुस्तथैवैतानेतेऽपि सततं रक्षेयुः॥१२॥

पदार्थः-हे **(इन्द्र)** प्रजा पालनेहारे **(काव्यः)** धीर उत्तम बुद्धिमान् के पुत्र **(उशना)** धर्म की कामना करनेहारे **(नर्य्यः)** मनुष्यों में साधु श्रेष्ठ हुए जन! **(त्वम्)** आप **(यान्)** जिन **(वहिष्ठान्)** अतीव विद्या धर्म की प्राप्ति करानेहारे **(वातस्य)** प्राण के बीच योगाभ्यास से **(सुयुजः)** अच्छे युक्त योगी **(नॄन्)** धार्मिक जनों की **(अवः)** रक्षा करते हो उनके साथ धर्म के बीच **(तिष्ठ)** स्थिर होओ, जो **(ते)** आपके

लिये **(यम्)** जिस **(वृत्रहणम्)** शत्रुओं के मारनेवाले वीर **(मन्दिनम्)** प्रशंसा के योग्य **(पार्य्यम्)** जिससे पूर्ण काम बने, उस मनुष्य को **(दात्)** देवे वा जो शत्रुओं पर **(व्रजम्)** अति तेज शस्त्र और अस्त्रों को **(ततक्ष)** फेंके, उस-उसके साथ भी धर्म से वर्त्तो॥१२॥

भावार्थः-जैसे राजपुरुष परमेश्वर की उपासना करने, पढ़ने और उपदेश करनेवाले तथा और उत्तम व्यवहारों में स्थिर प्रजा और सेनाजनों की रक्षा करें, वैसे वे भी उनकी निरन्तर रक्षा किया करें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं सूरो हरितो रामयो नॄन् भरच्चक्रमेतशो नायमिन्द्र।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून्॥ १३॥

त्वम्। सूरः। हरितः। रमयः। नॄन्। भरत्। चक्रम्। एतशः। न। अयम्। इन्द्र। प्रऽअस्य। पारम्। नवतिम्। नाव्यानाम्। अपि। कर्तम्। अवर्तयः। अयज्यून्॥ १३॥

पदार्थः-(त्वम्) राज्यपालनाधिकृतः **(सूरः)** सवितेव **(हरितः)** रश्मीन्। **हरित इति रश्मिनामसु पठितम्।** (निघं०१.६) **(रामयः)** आनन्देन क्रीडय। अत्रा**न्येषामपी**ति दीर्घः। **(नॄन्)** प्रजाधर्मनायकान् **(भरत्)** भरेः **(चक्रम्)** क्रामति रथो येन तत् **(एतशः)** साधुरश्वः। **एतश इत्यश्वनामसु पठितम्।** (निघं०१.१४) **(न)** इव **(अयम्)** **(इन्द्र)** परमैश्वर्यप्रद **(प्रास्य)** प्रकृष्टतया प्रापय **(पारम्)** **(नवतिम्)** **(नाव्यानाम्)** नौभिस्तार्य्याणाम् **(अपि)** **(कर्त्तम्)** कूपम्। **कर्त्तमिति कूपनामसु पठितम्।** (निघं०३.२३) **(अवर्त्तयः)** प्रवर्त्तय **(अयज्यून्)** असङ्गतिकर्तॄन्॥१३॥

अन्वयः-हे इन्द्र! त्वमयं सूरो हरित इवैतशश्चक्रं नायज्यून् नॄन् भरत्। नाव्यानां नवतिं नवतिसंख्याकानि जलगमनार्थानि यानानि पारं प्रास्यैतान् पुरुषार्थिनोऽपि कर्त्तुं खनितुं कर्म कर्त्तुं चावर्त्तयस्त्वमत्रास्मान् सदा रमयः॥१३॥

भावार्थः-अत्र लुप्तोपमाश्लेषालङ्कारौ। यथा सूर्यः सर्वान् स्वे स्वे कर्मणि प्रेरयति तथाप्ता विद्वांसोऽविदुषः शास्त्रशारीरकर्मणि प्रवर्त्य सर्वाणि सुखानि संसाधयन्तु॥१३॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य के देनेवाले सभाध्यक्ष! **(त्वम्)** आप **(अयम्)** यह **(सूरः)** सूर्य्यलोक जैसे **(हरितः)** किरणों को वा जैसे **(एतशः)** उत्तम घोड़ा **(चक्रम्)** जिससे रथ ढुरकता है, उस पहिये को यथायोग्य काम में लगाता है **(न)** वैसे **(अयज्यून्)** विषयों में न संग करने और **(नॄन्)** प्रजाजनों को धर्म की प्राप्ति करानेहारे मनुष्यों की **(भरत्)** पुष्टि और पालना करो तथा **(नाव्यानाम्)** नौकाओं से पार करने

योग्य जो **(नवतिम्)** जल में चलने के लिये नब्बे रथ हैं, उनको **(पारम्)** समुद्र के पार **(प्रास्य)** उत्तमता से पहुंचावो। तथा उन उक्त पुरुषार्थी पुरुषों को **(अपि)** भी **(कर्त्तम्)** कूंआ खुदाने और कर्म करने को **(अवर्त्तय:)** प्रवृत्त कराओ और आप यहाँ हम लोगों को सदा **(रमय:)** आनन्द से रमाओ॥१३॥

भावार्थ:-इस मन्त्र में लुप्तोपमा और श्लेषालङ्कार हैं। जैसे सूर्य्य सबको अपने-अपने-अपने कामों में लगाता है, वैसे उत्तम शास्त्र जाननेवाले विद्वान् जन मूर्खजनों को शास्त्र और शरीर कर्म मे प्रवृत्त करा सब सुखों को सिद्ध करावें॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं नो॑ अ॒स्या इ॑न्द्र दु॒र्हणा॑याः पा॒हि व॑ज्रिवो दुरि॒तादभी॑के।
प्र नो॒ वाजा॑न् र॒थ्यो॒३॑ अश्व॑बुध्यान्इषे य॑न्धि श्रव॑से सू॒नृता॑यै॥ १४॥

त्वम्। नः। अ॒स्याः। इ॒न्द्र॒। दु॒:ऽहना॑यायाः। पा॒हि। व॒ज्रि॒व॒:। दु॒:ऽइ॒तात्। अ॒भीके॑। प्र। नः॒। वाजा॑न्। र॒थ्यः॑। अश्व॑ऽबुध्यान्। इ॒षे। य॒न्धि॒। श्रव॑से। सू॒नृता॑यै॥ १४॥

पदार्थ:-(त्वम्) (**न:**) अस्मान् **(अस्या:)** प्रत्यक्षाया: **(इन्द्र)** अधर्मविदारक **(दुर्हणाया:)** दु:खेन हन्तुं योग्याया: शत्रुसेनाया: **(पाहि)** **(वज्रिव:)** प्रशस्ता वज्रयो विज्ञानयुक्ता नीतयो विद्यन्तेऽस्य तत्सम्बुद्धौ। वज धातोरौणादिक इ: प्रत्ययो रुडागमश्च ततो मतुप् च। **(दुरितात्)** दुष्टाचारात् **(अभीके)** संग्रामे। **अभीक इति संग्रामनामसु पठितम्।** (निघं०२.१७) **(प्र)** **(न:)** अस्माकम् **(वाजान्)** विज्ञानवेगयुक्तान् संबन्धिन: **(रथ्य:)** रथस्य वोढा सन् **(अश्वबुध्यान्)** अश्वानन्तरिक्षे भवानग्न्यादीन् चालयितुं वर्द्धितुं बुध्यन्ते तान् **(इषे)** इच्छायै **(यन्धि)** यच्छ **(श्रवसे)** श्रवणायान्नाय वा। **श्रव इत्यन्ननामसु पठितम्।** (निघं०२.७) **(सूनृतायै)** उत्तमायै प्रियसत्यवाचे॥१४॥

अन्वय:-हे वज्रिव इन्द्र! रथस्त्वमभीकेऽस्या दुर्हणाया दुरिताच्च न: पाहि। इषे श्रवसे सूनृतायै नोऽस्माकमश्वबुध्यान् वाजान् सुखं प्रयन्धि॥१४॥

भावार्थ:-सेनाधीशेन स्वसेना शत्रुहननाद् दुष्टाचाराच्च पृथग्रक्षणीया वीरेभ्यो बलमिच्छानुकूलं बलवर्द्धकं पेयं पुष्कलमन्नं च प्रदाय हर्षयित्वा शत्रून् विजित्य प्रजा: सततं पालनीया:॥१४॥

पदार्थ:-(वज्रिव:) जिसकी प्रशंसित विशेष ज्ञानयुक्त नीति विद्यमान सो **(इन्द्र)** अधर्म का विनाश करनेहारे हे सेनाध्यक्ष! **(रथ्य:)** रथ का लेजानेवाला होता हुआ **(त्वम्)** तू **(अभीके)** संग्राम में **(अस्या:)** इस प्रत्यक्ष **(दुर्हणाया:)** दु:ख से मारने योग्य शत्रुओं की सेना और **(दुरितात्)** दुष्ट आचरण से **(न:)** हम लोगों की **(पाहि)** रक्षा कर तथा **(इषे)** इच्छा **(श्रवसे)** सुनना वा अन्न और **(सूनृतायै)** उत्तम सत्य तथा प्रिय वाणी के लिये **(न:)** हम लोगों के **(अश्वबुध्यान्)** अन्तरिक्ष में हुए अग्नि आदि पदार्थों को

चलाने वा बढ़ाने को जो जानते उन्हें और **(वाजान्)** विशेष ज्ञान वा वेगयुक्त सम्बन्धियों को **(प्र, यन्धि)** भली-भांति दे॥१४॥

भावार्थः-सेनाधीश को चाहिये कि अपनी सेना को शत्रु के मारने से और दुष्ट आचरण से अलग रक्खे तथा वीरों के लिये बल तथा उनकी इच्छा के अनुकूल बल के बढ़ानेवाले पीने योग्य पदार्थ तथा पुष्कल अन्न दे, उनको प्रसन्न और शत्रुओं को अच्छे प्रकार जीत कर प्रजा की निरन्तर रक्षा करें॥१४॥

अथेश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहा है॥

मा सा ते॑ अ॒स्मत्सु॑म॒तिर्वि द॑स॒द् वाज॑प्रमह॒: समिषो॑ वरन्त।
आ नो॑ भज मघव॒न् गोष्व॒र्यो मंहि॑ष्ठास्ते सध॒माद॑: स्याम॥ १५॥ २६॥ ८॥ १॥

मा। सा। ते॒। अ॒स्मत्। सु॒ऽम॒तिः। वि। द॒स॒त्। वाज॑ऽप्रमहः। सम्। इषः॑। व॒र॒न्त॒। आ। नः॒। भ॒ज॒। म॒घ॒ऽव॒न्। गोऽषु॑। अ॒र्यः॑। मंहि॑ष्ठाः। ते॒। स॒ध॒ऽमादः॑। स्या॒म॒॥ १५॥

पदार्थः-(मा) निषेधे **(सा)** प्रतिपादितपूर्वा **(ते)** तव **(अस्मत्)** अस्माकं सकाशात् **(सुमतिः)** शोभना बुद्धिः **(वि) (दसत्)** क्षयेत् **(वाजप्रमहः)** वाजैर्विज्ञानादिर्विद्वद्भिर्वा प्रकृष्टतया मह्यते पूज्यते यस्तत्सम्बुद्धौ **(सम्) (इषः)** इच्छा अन्नादीनि वा **(वरन्त)** वृणवन्तु। विकरणव्यत्ययेन शप्। **(आ) (नः)** अस्मान् **(भज)** अभिलष **(मघवन्)** प्रशस्तपूज्यधनयुक्त **(गोषु)** पृथिवीवाणीधेनुधर्मप्रकाशेषु **(अर्यः)** स्वामीश्वरः **(मंहिष्ठा)** अतिशयेन सुखविद्यादिभिर्वर्द्धमानाः **(ते)** तव **(सधमादः)** महानन्दिताः **(स्याम)** भवेम॥१५॥

अन्वयः-हे वाजप्रमहो मघवञ्जगदीश्वर! ते तव कृपया या सुमतिस्साऽस्मन्मा वि दसत्कदाचिन्न विनश्येत् सर्वे जना इषः संवरन्त। अर्यस्त्वं नोऽस्मान् गोष्वाभज यतो मंहिष्ठाः सन्तो वयं ते तव सधमादः स्याम॥१५॥

भावार्थः-मनुष्यैः सुप्रज्ञादिप्राप्तये परमेश्वरः स्वामी मन्तव्यः प्रार्थनीयश्च। यत ईश्वरस्य यादृशा गुणकर्मस्वभावाः सन्ति तादृशान् स्वकीयान् सम्पाद्य परमात्मना सहानन्दे सततं तिष्ठेयुः॥१५॥

अत्र स्त्रीपुरुषराजप्रजादिधर्मवर्णनादेतदुक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

हे जगदीश्वर! यथा भवत्कृपाकटाक्षसहायप्राप्तेन मयर्ग्वेदस्य प्रथमाष्टकस्य भाष्यं सुखेन सम्पादितं तथैवाग्रेऽपि कर्त्तुं शक्येत्॥

इति प्रथमाष्टकेऽष्टमेऽध्याये षड्विंशो २६ वर्गः प्रथमोऽष्टकोऽष्टमोऽध्याय एकविंशत्युत्तरं शततमं १२१ सूक्तं च समाप्तम्॥

पदार्थः–हे **(वाजप्रमहः)** विशेष ज्ञान वा विद्वानों से अच्छे प्रकार सत्कार को प्राप्त किये **(मघवन्)** और प्रशंसित सत्कार करने योग्य धन से युक्त जगदीश्वर! **(ते)** आपकी कृपा से जो **(सुमतिः)** उत्तम बुद्धि है **(सा)** सो **(अस्मत्)** हमारे निकट से **(मा)** मत **(वि, दसत्)** विनाश को प्राप्त होवे, सब मनुष्य **(इषः)** इच्छा और अन्न आदि पदार्थों को **(सं, वरन्त)** अच्छे प्रकार स्वीकार करें **(अर्यः)** स्वामी ईश्वर आप **(नः)** हम लोगों को **(गोषु)** पृथिवी, वाणी, धेनु और धर्म के प्रकाशों में **(आ, भज)** चाहो, जिससे **(मंहिष्ठाः)** अत्यन्त सुख और विद्या आदि पदार्थों से वृद्धि को प्राप्त हुए हम लोग **(ते)** आपके **(सधमादः)** अति आनन्दसहित **(स्याम)** अर्थात् आप के विचार में मग्न हों॥१५॥

भावार्थः–मनुष्यों को चाहिये कि उत्तम बुद्धि आदि की प्राप्ति के लिये परमेश्वर को स्वामी मानें और उनकी प्रार्थना करें। जिससे ईश्वर के जैसे गुण, कर्म और स्वभाव हैं, वैसे अपने सिद्ध करके परमात्मा के साथ आनन्द में निरन्तर स्थित हों॥१५॥

इस सूक्त में स्त्री–पुरुष और राज–प्रजा आदि के धर्म का वर्णन होने से पूर्व सूक्तार्थ के साथ इस सूक्त के अर्थ की सङ्गति जाननी चाहिये॥

हे जगदीश्वर! जैसे आपकी कृपाकटाक्ष का सहाय जिसको प्राप्त हुआ, उस मैने ऋग्वेद के प्रथम अष्टक का भाष्य सुख से बनाया, वैसे आगे भी वह ऋग्वेदभाष्य मुझसे बन सके॥

यह प्रथम अष्टक के आठवें अध्याय में छब्बीसवां २६ वर्ग, प्रथम अष्टक, आठवां अध्याय और एकसौ इक्कीसवां १२१ सूक्त समाप्त हुआ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीपरमविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण परमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाभ्यां समन्विते सुप्रमाणयुक्ते ऋग्वेदभाष्ये प्रथमाष्टकेऽष्टमोऽध्यायोऽलमगात्॥

॥ओ३म्॥

अथ द्वितीयाष्टकारम्भः॥

तत्र प्रथमोऽध्यायः॥

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

प्र व इत्यस्य पञ्चदशर्चस्य द्वाविंशत्युत्तरशततमस्य सूक्तस्य कक्षीवान् ऋषिः। विश्वेदेवा देवताः। १,५,१४ भुरिक् पङ्क्तिः। ४ निचृत्पङ्क्तिः। ३,१५ स्वराट्पङ्क्तिः। ६ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,९,१०,१३ विराट् त्रिष्टुप्। ८,१२ निचृत् त्रिष्टुप्। ७,११ त्रिष्टुप् च छन्दः। धैवतः स्वरः॥

तत्रादौ सभापतिकार्यमुपदिश्यते॥

अब द्वितीय अष्टक के प्रथम अध्याय का आरम्भ है। उसमें एक सौ बाईसवें सूक्त के प्रथम मन्त्र में सभापति के कार्य्य का उपदेश किया जाता है॥

प्र व॒: पान्तं॑ रघुमन्य॒वोऽन्धो॑ य॒ज्ञं रु॒द्राय॑ मी॒ळ्हुषे॑ भरध्वम्।
दि॒वो अ॑स्तो॒ष्यसु॑रस्य वी॒रैरि॑षु॒ध्येव॑ म॒रुतो॒ रोद॑स्योः॥ १॥

प्र। व॒:। पान्त॑म्। र॒घु॒ऽम॒न्य॒व॒:। अन्ध॑:। य॒ज्ञम्। रु॒द्राय॑। मी॒ळ्हुषे॑। भ॒र॒ध्व॒म्। दि॒व:। अ॒स्तो॒षि॒। असु॑रस्य। वी॒रै:। इ॒षु॒ध्याऽइ॑व। म॒रुत॑:। रोद॑स्यो:॥ १॥

पदार्थः-(**प्र**) प्रकृष्टे (**वः**) युष्मान् (**पान्तम्**) रक्षन्तम् (**रघुमन्यवः**) लघुक्रोधाः। अत्र वर्णव्यत्ययेन लस्य रः। (**अन्धः**) अन्नम् (**यज्ञम्**) सङ्गन्तव्यम् (**रुद्राय**) दुष्टानां रोदयित्रे (**मीढुषे**) सज्जनान् प्रति सुखसेचकाय (**भरध्वम्**) धरध्वम् (**दिवः**) विद्याप्रकाशान् (**अस्तोषि**) स्तौमि (**असुरस्य**) अविदुषः (**वीरैः**) (**इषुध्येव**) इषवो धीयन्ते यस्यां तयेव (**मरुतः**) वायवः (**रोदस्योः**) भूमिसूर्ययोः॥१॥

अन्वयः-हे रघुमन्यवो! रोदस्योर्मरुत इव इषुध्येव वीरैः सह वर्त्तमाना यूयं मीढुषे रुद्राय वः पान्तं यज्ञमन्धश्च दिवोऽसुरस्य सम्बन्धे वर्त्तमानान् यथा प्रभरध्वं तथाहमेतमस्तोषि॥१॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्यदा योग्यपुरुषैः सह प्रयत्यते तदा कठिनमपि कृत्यं सहजतया साद्धुं शक्यते॥१॥

पदार्थः-हे (**रघुमन्यवः**) थोड़े क्रोधवाले मनुष्यो! (**रोदस्योः**) भूमि और सूर्य्यमण्डल में जैसे (**मरुतः**) पवन विद्यमान वैसे (**इषुध्येव**) जिसमें वाण धरे जाते उस धुनष से जैसे वैसे (**वीरैः**) वीर

मनुष्यों के साथ वर्त्तमान तुम **(मीढुषे)** सज्जनों के प्रति सुखरूपी वृष्टि करने और **(रुद्राय)** दुष्टों को रुलानेहारे सभाध्यक्षादि के लिये **(वः)** तुम लोगों की **(पान्तम्)** रक्षा करते हुए **(यज्ञम्)** सङ्गम करने योग्य उत्तम व्यवहार और **(अन्धः)** अन्न को तथा **(दिवः)** विद्या प्रकाशों जो कि **(असुरस्य)** अविद्वानों के सम्बन्ध में वर्त्तमान उपदेश आदि उनको जैसे **(प्र, भरध्वम्)** धारण वा पुष्ट करो, वैसे मैं इस तुम्हारे व्यवहार की **(अस्तोषि)** स्तुति करता हूँ॥१॥

भावार्थः-इस मन्त्र में पूर्णोपमा और वाचकलुप्तोपमा ये दोनों अलङ्कार हैं। जब मनुष्यों का योग्य पुरुषों के साथ अच्छा यत्न बनता है, तब कठिन भी काम सहज से सिद्ध कर सकते हैं॥१॥

अथ दम्पत्योर्व्यवहारमाह॥

अब स्त्री-पुरुषों के व्यवहार को अगले मन्त्र में कहा है॥

पत्नीव पूर्वहूतिं वावृधध्यां उषासानक्ता पुरुधा विदाने।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः॥२॥

पत्नीऽइव। पूर्वऽहूतिम्। ववृधध्यै। उषसानक्ता। पुरुधा। विदाने इति। स्तरीः। न। अत्कम्। विऽउतम्। वसाना। सूर्यस्य। श्रिया। सुऽदृशी। हिरण्यैः॥२॥

पदार्थः-(**पत्नीव**) यथा विदुषी स्त्री (**पूर्वहूतिम्**) पूर्वा हूतिराह्वानं यस्य तम् (**ववृधध्यै**) वर्धयितुम्। अत्र **बहुलं छन्दसी**ति शपः श्लुस्**तुजादित्वा**द्दीर्घश्च। (**उषासानक्ता**) रात्रिदिने (**पुरुधा**) ये पुरून् बहून् धरतस्ते (**विदाने**) विज्ञायमाने (**स्तरीः**) कलायन्त्रादिसंयोगेनास्तारिषत यास्ता नौकाः (**न**) इव (**अत्कम्**) कूपमिव (**व्युतम्**) विविधतयोतं विस्तृतं वस्त्रम् (**वसाना**) परिदधती (**सूर्यस्य**) सवितुः (**श्रिया**) शोभया (**सुदृशी**) सुष्ठु दर्शनं यस्याः सा (**हिरण्यैः**) ज्योतिर्भिरिव॥२॥

अन्वयः-हे सति स्त्रि! त्वं पत्नीव ववृधध्यै पूर्वहूतिं पतिं स्वीकृत्य पुरुधा विदाने उषासानक्तेव वर्त्तस्व सूर्यस्य हिरण्यैः श्रिया च सुदृशी अत्कमिव व्युतं वसाना सती स्तरीर्न सततं भव॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। पतिव्रता सन्तं पतिं प्रीणाति स्त्रीव्रतः पतिः स्त्रियं च तौ यथाऽहोरात्रः सम्बद्धो वर्त्तते तथा वर्त्तमानौ वस्त्रालङ्कारैः सुशोभितौ धर्म्ये व्यवहारे यथावत्प्रयतेताम्॥२॥

पदार्थः-हे सरलस्वभावयुक्त उत्तम स्त्री! तू (**पत्नीव**) जैसे यज्ञादि कर्म में साथ रहने वाली विद्वान् की स्त्री (**ववृधध्यै**) वृद्धि करने को अर्थात् गृहस्थाश्रम् आदि व्यवहारों के बढ़ाने को (**पूर्वहूतिम्**) जिसका पहिले बुलाना होता अर्थात् सब कामों से जिसकी प्रथम सेवा करनी होती, उस अपने पति को स्वीकार कर (**पुरुधा**) जो बहुत व्यवहार वा पदार्थों की धारण करने हारे (**विदाने**) जाने जाते उन (**उषासानक्ता**) रात्रिदिन के समान वर्त्त वैसी वर्त्ता कर तथा (**सूर्यस्य**) सूर्यमण्डल की (**हिरण्यैः**) सुवर्ण

सी चिलकती हुई ज्योतियों और **(श्रिया)** उत्तम शोभा से **(सुदृशी)** जिस तेरा अच्छा दर्शन वह **(अत्कम्)** कुएं के समान **(व्युतम्)** अनेक प्रकार बुने हुए विस्तारयुक्त वस्त्र को **(वसाना)** पहिनती हुई **(स्तरीः)** जैसे कलायन्त्रादिकों के संयोग से ढांपी हुई नाव हों **(न)** वैसी निरन्तर हो॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। पतिव्रता स्त्री विद्यमान अपने पति को प्रसन्न करती और स्त्रीवत् अर्थात् नियम से अपनी स्त्री में रमनेहारा पति जैसे दिनरात्रि सम्बन्ध से मिला हुआ वर्त्तमान है, वैसे सम्बन्ध से वर्त्तमान कपड़े और गहने पहिने हुए सुशोभित धर्मयुक्त व्यवहार में यथावत् प्रयत्न करें॥ २॥

अथ सद्गुणानां व्यवसायं व्यवहारं चाह॥

अब अगले मन्त्र में अच्छे गुणों के विचार और व्यवहार का उपदेश करते हैं॥

मꣳमत्तु॑ नः परि॑ज्मा वस॒र्हा मꣳमत्तु॒ वातो॑ अ॒पां वृष॑ण्वान्।
शि॒शी॒तमि॑न्द्रापर्वता यु॒वं न॒स्तन्नो॒ विश्वे॑ वरिवस्यन्तु दे॒वाः॥ ३॥

मꣳमत्तु॑। नः॑। परि॑ऽज्मा। व॒स॒र्हा। मꣳमत्तु॑। वातः॑। अ॒पाम्। वृष॑ण्ऽवान्। शि॒शी॒तम्। इ॒न्द्रा॒प॒र्व॒ता॒। यु॒वम्। नः॑। तत्। नः॑। विश्वे॑। व॒रि॒व॒स्य॒न्तु॒। दे॒वाः॥ ३॥

पदार्थः-(**ममत्तु**) हर्षयतु (**नः**) अस्मान् (**परिज्मा**) परितो जमत्यत्ति यः सोऽग्निः (**वसर्हा**) वसानां वासहेतूनामर्हकः। अत्र **शकन्ध्वादिना** पररूपम्। (**ममत्तु**) (**वातः**) वायुः (**अपाम्**) जलानाम् (**वृषण्वान्**) वृष्टिहेतुः (**शिशीतम्**) तीक्ष्णबुद्धियुक्तान् कुरुतम् (**इन्द्रापर्वता**) सूर्य्यमेघाविव (**युवम्**) युवाम् (**नः**) अस्मान् (**तत्**) (**नः**) अस्मभ्यम् (**विश्वे**) सर्वे (**वरिवस्यन्तु**) परिचरन्तु (**देवाः**) विद्वांसः॥ ३॥

अन्वयः-यथा वसर्हा परिज्मा नो ममत्त्वपां वृषण्वान् वातो नो ममत्तु। हे इन्द्रापर्वतेव वर्त्तमानावध्यापकोपदेशकौ! युवं नश्शिशीतं विश्वे देवा नो वरिवस्यन्तु तथा तत् तान् सर्वान् सत्कृतान् वयं सततं कुर्याम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या यथाऽस्मान् प्रसादयेयुस्तथा वयमप्येतान् प्रीणयेम॥ ३॥

पदार्थः-जैसे **(वसर्हा)** निवास कराने की योग्यता को प्राप्त होता और **(परिज्मा)** पाये हुए पदार्थों को सब ओर से खाता जलाता हुआ अग्नि **(नः)** हम लोगों को **(ममत्तु)** आनन्दित करावे वा **(अपाम्)** जलों की **(वृषण्वान्)** वर्षा करानेहारा **(वातः)** पवन हम लोगों को **(ममत्तु)** आनन्दयुक्त करावे। हे **(इन्द्रापर्वता)** सूर्य्य और मेघ के समान वर्त्तमान पढ़ाने और उपदेश करनेवालो! **(युवम्)** तुम दोनों **(नः)** हम लोगों को **(शिशीतम्)** अतितीक्ष्ण बुद्धि से युक्त करो वा **(विश्वे)** सब **(देवाः)** विद्वान् लोग

(नः) हम लोगों के लिये **(वरिवस्यन्तु)** सेवन अर्थात् आश्रय करें, वैसे **(तत्)** उन सबको सत्कारयुक्त हम लोग निरन्तर करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य जैसे हम लोगों को प्रसन्न करें, वैसे हम लोग भी उन मनुष्यों को प्रसन्न करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः॥४॥

उत्। त्या। मे। यशसा। श्वेतनायै। व्यन्ता। पान्ता। औशिजः। हुवध्यै। प्र। वः। नपातम्। अपाम्। कृणुध्वम्। प्र। मातरा। रास्पिनस्य। आयोः॥४॥

पदार्थः-(**उत**) अपि (**त्या**) तौ (**मे**) मम (**यशसा**) सत्कीर्त्या (**श्वेतनायै**) प्रकाशाय (**व्यन्ता**) विविधबलोपेतौ (**पान्ता**) रक्षकौ (**औशिजः**) कामयमानपुत्रः (**हुवध्यै**) आदातुम् (**प्रः**) (**वः**) युष्माकम् (**नपातम्**) पातरहितम् (**अपाम्**) जलानाम् (**कृणुध्वम्**) कुरुध्वम् (**प्र**) (**मातरा**) मानकारकौ (**रास्पिनस्य**) आदातुमर्हस्य (**आयोः**) जीवनस्य॥४॥

अन्वयः-हे मनुष्या! यथा मे यशसा श्वेतनायै व्यन्ता पान्ता त्या हुवध्यै मातरा रास्पिनस्यायोर्वर्द्धनाय प्रवर्त्तेते यथापां नपातं यूयं प्रकृणुध्वं तथोतौशिजोऽहं व आयुः सततं प्रवर्द्धयेयम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सुशिक्षयाऽस्माकमायुर्यूयं वर्द्धयत तथा वयमपि युष्माकं जीवनमुन्नयेम॥४॥

पदार्थः-हे मनुष्यो! जैसे (**मे**) मेरे (**यशसा**) उत्तम यश से (**श्वेतनायै**) प्रकाश के लिये (**व्यन्ता**) अनेक प्रकार के बल से युक्त (**पान्ता**) रक्षा करनेवाले (**त्या**) वे पूर्वोक्त पढ़ाने और उपदेश करनेहारे (**हुवध्यै**) हम लोगों के ग्रहण करने को (**मातरा**) मान करनेहारे (**रास्पिनस्य**) ग्रहण करने योग्य (**आयोः**) जीवन अर्थात् आयुर्दा के बढ़ाने को (**प्र**) प्रवृत्त होते हैं तथा जैसे तुम लोग (**अपाम्**) जलों के (**नपातम्**) विनाशरहित मार्ग को वा जलों के न गिरने को (**प्र, कृणुध्वम्**) सिद्ध करो वैसे (**उत**) निश्चय से (**औशिजः**) कामना करते हुए का सन्तान मैं (**वः**) तुम लोगों की आयुर्दा को निरन्तर बढ़ाऊं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सुन्दर शिक्षा से हम लोगों की आयुर्दा को तुम बढ़ाओ, वैसे हम भी तुम्हारी आयुर्दा की उन्नति किया करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वो॑ रुव॒ण्युमौ॑शि॒जो हु॒वध्यै॒ घोषे॑व॒ शंस॒मर्जु॑नस्य॒ नंशे॑।
प्र व॑ पू॒ष्णे दा॒वन॒ आँ अच्छा॑ वोचेय व॒सुता॑ति॒मग्ने॑:॥५॥ १॥

आ। व॒:। रु॒व॒ण्युम्। औ॒शि॒ज:। हु॒वध्यै॑। घोषा॑ऽइव। शंस॑म्। अर्जु॑नस्य। नंशे॑। प्र। व॒:। पू॒ष्णे। दा॒वने॑। आ। अच्छ॑। वो॒चे॒य॒। व॒सुऽता॑तिम्। अ॒ग्ने:॥५॥

पदार्थ:-**(आ) (व:)** युष्माकम् **(रुवण्युम्)** सुशब्दायमानम् **(औशिज:)** विद्याकामस्य पुत्र: **(हुवध्यै)** होतुमादातुम् **(घोषेव)** आप्तानां वागिव **(शंसम्)** प्रशस्तम् **(अर्जुनस्य)** रूपस्य। **अर्जुनमिति रूपनामसु पठितम्।** (निघं०३.७) **(नंशे)** नाशनाय **(प्र) (व:) (पूष्णे)** पोषणाय **(दावने)** दात्रे **(आ) (अच्छ) (वोचेय) (वसुतातिम्)** धनमेव **(अग्ने:)** पावकात्॥५॥

अन्वय:-हे विद्वांस! औशिजोऽहं वो रुवण्युमाहुवध्यै अर्जुनस्य शंसं घोषेव दु:खं नंशे व: पूष्णे दावनेऽग्नेर्वसुतातिं प्राच्छा वोचेय॥५॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा वैद्या: सर्वेभ्य: आरोग्यं प्रदाय रोगान् सद्यो निवर्त्तयन्ति तथा सर्वे विद्यावन्त: सर्वान् सुखिनो विधाय सुप्रतिष्ठितान् कुर्वन्तु॥५॥

पदार्थ:-हे विद्वानो! **(औशिज:)** विद्या की कामना करनेवाले का पुत्र मैं **(व:)** तुम लोगों के **(रुवण्युम्)** अच्छे कहे हुए उत्तम उपदेश के **(आ, हुवध्यै)** ग्रहण करने के लिये **(अर्जुनस्य)** रूप के **(शंसम्)** प्रशंसित व्यवहार को वा **(घोषेव)** विद्वानों की वाणी के समान दु:ख के **(नंशे)** नाश और **(व:)** तुम लोगों की **(पूष्णे)** पुष्टि करने तथा **(दावने)** दूसरों को देने के लिये **(अग्ने:)** अग्नि के सकाश से जो **(वसुतातिम्)** धन उसको ही **(प्र, आ, अच्छा, वोचेय)** उत्तमता से भली भांति अच्छा कहूं॥५॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे वैद्यजन सबके लिये आरोग्यपन देके रोगों को जल्दी दूर कराते, वैसे सब विद्यावान् सबको सुखी कर अच्छी प्रतिष्ठा वाले करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

श्रु॒तं मे॑ मित्रावरुणा॒ हवे॒मोत श्रु॒तं सद॑ने वि॒श्वत॑: सीम्।
श्रोतु॑ न॒: श्रोतु॑रा॒ति: सु॒श्रोतु॑: सु॒क्षेत्रा॒ सिन्धु॑र॒द्भि:॥६॥

श्रु॒तम्। मे॒। मि॒त्रा॒व॒रु॒णा॒। हवा॑। इ॒मा। उ॒त। श्रु॒तम्। सद॑ने। वि॒श्वत॑:। सी॒म्। श्रोतु॑। न॒:। श्रोतु॑ऽराति:। सु॒ऽश्रोतु॑:। सु॒ऽक्षेत्रा॑। सिन्धु॑:। अ॒त्ऽभि:॥६॥

पदार्थः-(**श्रुतम्**) (**मे**) मम (**मित्रावरुणा**) सुहृद्वरौ (**हवा**) होतुमर्हाणि वचनानि (**इमा**) इमानि (**उत**) अपि (**श्रुतम्**) अत्र विकरणलुक्। (**सदने**) सदसि सभायाम् (**विश्वतः**) सर्वतः (**सीम्**) सीमायाम् (**श्रोतु**) शृणोतु (**नः**) अस्माकम् (**श्रोतुरातिः**) श्रोतुः श्रवणं रातिर्दानं यस्य (**सुश्रोतुः**) सुष्ठु शृणोति यस्तस्य (**सुक्षेत्रा**) शोभनानि क्षेत्राणि (**सिन्धुः**) नदी (**अद्भिः**) जलैः॥६॥

अन्वयः-हे मित्रावरुणा! सुश्रोतुर्मे इमा हवा श्रुतमुतापि सदने विश्वतः सीं श्रुतमद्भिः सिन्धुः सुक्षेत्रेव श्रोतुरातिर्नो वचनानि श्रोतु॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वद्भिः सर्वेषां प्रश्नाञ्छ्रुत्वा यथावत् समाधेयाः॥६॥

पदार्थः-हे (**मित्रावरुणा**) मित्र और उत्तम जन (**सुश्रोतुः, मे**) मुझ अच्छे सुननेवाले के (**इमा**) इन (**हवा**) देने-लेने योग्य वचनों को (**श्रुतम्**) सुनो (**उत**) और (**सदने**) सभा वा (**विश्वतः**) सब ओर से (**सीम्**) मर्य्यादा में (**श्रुतम्**) सुनो अर्थात् वहाँ की चर्चा को समझो तथा (**अद्भिः**) जलों से जैसे (**सिन्धुः**) नदी (**सुक्षेत्रा**) उत्तम खेतों को प्राप्त हो, वैसे (**श्रोतुरातिः**) जिसका सुनना दूसरे को देना है, वह (**नः**) हम लोगों के वचनों को (**श्रोतु**) सुने॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों को चाहिये कि सबके प्रश्नों को सुनके यथावत् उनका समाधान करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन्॥७॥

स्तुषे। सा। वाम्। वरुण। मित्र। रातिः। गवाम्। शता। पृक्षऽयामेषु। पज्रे। श्रुतऽरथे। प्रियऽरथे। दधानाः। सद्यः। पुष्टिम्। निऽरुन्धानासः। अग्मन्॥७॥

पदार्थः-(**स्तुषे**) स्तौति। अत्र व्यत्ययेन मध्यमः। (**सा**) (**वाम्**) युवाम् (**वरुण**) गुणोत्कृष्ट (**मित्र**) सुहृत् (**रातिः**) या राति ददाति सा (**गवाम्**) वाणीनाम् (**शता**) शतानि (**पृक्षयामेषु**) पृच्छ्यन्ते ये ते पृक्षास्तेषामिमे यामास्तेषु। अत्र पृच्छधातोर्बाहुलकादौणादिकः क्सः प्रत्ययः। (**पज्रे**) गमके (**श्रुतरथे**) श्रुते रमणीये रथे (**प्रियरथे**) कमनीये रथे (**दधानाः**) धरन्तः (**सद्यः**) (**पुष्टिम्**) (**निरुन्धानासः**) निरोधं कुर्वाणाः (**अग्मन्**) गच्छेयुः॥७॥

अन्वयः-यथा विद्वांसः पज्रे श्रुतरथे प्रियरथे सद्यः पुष्टिं दधाना दुःखं निरुन्धानासोऽग्मंस्तथा हे वरुण मित्र! युवां पृक्षयामेषु गवां शता गच्छतम् या युवयो रातिः स्त्री सा वां युवां यथा स्तुषे तथाऽहमपि स्तौमि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेह विद्वांसः पुरुषार्थेनानेकान्यद्भुतानि यानानि रचयन्ति तथान्यैरपि रचनीयानि॥७॥

पदार्थः-जैसे विद्वान् जन **(पज्रे)** पदार्थों के पहुंचानेवाले **(श्रुतरथे)** सुने हुए रमण करने योग्य रथ वा **(प्रियरथे)** अति मनोहर रथ में **(सद्यः)** शीघ्र **(पुष्टिम्)** पुष्टि को **(दधानाः)** धारण करते और दुःख को **(निरुन्धानासः)** रोकते हुए **(अग्मन्)** जावें, वैसे हे **(वरुण)** गुणों से उत्तमता को प्राप्त और **(मित्र)** मित्र! तुम **(पृक्षयामेषु)** जो पूंछे जाते उनके यम-नियमों में **(गवाम्, शता)** सैकड़ों वचनों को प्राप्त होओ। और जो तुम्हारी **(रातिः)** दान देनेवाली स्त्री हैं **(सा)** वह **(वाम्)** तुम दोनों की **(स्तुषे)** स्तुति करती हैं, वैसे मैं भी स्तुति करूं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इस संसार में विद्वान् जन पुरुषार्थ से अनेकों अद्भुत यानों को बनाते हैं, वैसे औरों को भी बनाने चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः।
जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः॥८॥

अस्य। स्तुषे। महिऽमघस्य। राधः। सचा। सनेम। नहुषः। सुऽवीराः। जनः। यः। पज्रेभ्यः। वाजिनीऽवान्। अश्वऽवतः। रथिनः। मह्यम्। सूरिः॥८॥

पदार्थः-**(अस्य) (स्तुषे) (महिमघस्य)** महन्मघं पूज्यं धनं यस्य तस्य **(राधः)** धनम् **(सचा)** समवायेन **(सनेम)** संभजेम **(नहुषः)** शुभाशुभकर्मबद्धो मनुष्यः। **नहुष इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(सुवीराः)** उत्कृष्टशूरवीराः **(जनः) (यः) (पज्रेभ्यः)** गमकेभ्यो यानेभ्यः **(वाजिनीवान्)** प्रशस्तवेदक्रियायुक्तः **(अश्वावतः)** बह्वश्वयुक्तस्य। **मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ।** (अष्टा०६.३.१३१) इत्यश्वशब्दस्य मतौ दीर्घः। **(रथिनः)** प्रशस्तरथस्य **(मह्यम्) (सूरिः)** विद्वान्॥८॥

अन्वयः-हे विद्वंस्त्वमस्याश्वावतो रथिनो महिमघस्य जनस्य राधः स्तुषे तस्य तत्सुवीरा वयं सचा सनेम यो नहुषो जनः पज्रेभ्यो वाजिनीवान् जायते स सूरिर्मह्यमेतां विद्यां ददातु॥८॥

भावार्थः-यथा पुरुषार्थी समृद्धिमान् जायते तथा सर्वैर्भवितव्यम्॥८॥

पदार्थः-हे विद्वान्! आप **(अस्य)** इस **(अश्वावतः)** बहुत घोड़ों से युक्त **(रथिनः)** प्रशंसित रथ और **(महिमघस्य)** प्रशंसा करने योग्य उत्तम धनवाले जन के **(राधः)** धन की **(स्तुषे)** स्तुति अर्थात् प्रशंसा करते हो उन आपके उस काम को **(सुवीराः)** सुन्दर शूरवीर मनुष्यों वाले हम लोग **(सचा)**

सम्बन्ध से **(सनेम)** अच्छे प्रकार सेवें **(यः)** जो **(नहुषः)** शुभ-अशुभ कामों से बंधा हुआ **(जनः)** मनुष्य **(पत्रेभ्यः)** एक स्थान को पहुंचानेहारे यानों से **(वाजिनीवान्)** प्रशंसित वेदोक्त क्रियायुक्त होता है, वह **(सूरिः)** विद्वान् **(मह्यम्)** मेरे लिये इस वेदोक्त शिल्पविद्या को देवे॥८॥

भावार्थः-जैसे पुरुषार्थी मनुष्य समृद्धिमान् होता है, वैसे सब लोगों को होना चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जनो॒ यो मि॑त्रावरुणावभि॒ध्रुग॒पो न वां॑ सु॒नोत्यक्ष्णया॒ध्रुक्।
स्व॒यं स यक्ष्मं॒ हृद॑ये॒ नि ध॑त्त॒ आप॒ यदी॑मृ॒होत्राभि॑र्ऋ॒तावा॑॥९॥

जनः॑। यः। मि॒त्रा॒व॒रु॒णौ॒। अ॒भि॒ऽध्रुक्। अ॒पः। न। वा॒म्। सु॒नोति॑। अ॒क्ष्ण॒या॒ऽध्रुक्। स्व॒यम्। सः। यक्ष्म॑म्। हृद॑ये। नि। ध॒त्ते॒। आप॑। यत्। ई॒म्। होत्रा॑भिः। ऋ॒तऽवा॑॥९॥

पदार्थः-(**जनः**) विद्वान् (**यः**) (**मित्रावरुणौ**) प्राणोदानाविव (**अभिध्रुक्**) अभितो द्रोहं कुर्वन् (**अपः**) प्राणान् (**न**) निषेधे (**वाम्**) युवयोः (**सुनोति**) निष्पन्नान् करोति (**अक्ष्णयाध्रुक्**) कुटिलया रीत्या द्रुह्यति सः (**स्वयम्**) (**सः**) (**यक्ष्मम्**) राजरोगम् (**हृदये**) (**नि**) (**धत्ते**) (**आप**) आप्नोति (**यत्**) यः (**ईम्**) सर्वतः (**होत्राभिः**) आदातुमर्हाभिः क्रियाभिः (**ऋतावा**) य ऋतेन सत्येन वनोति संभजति सः॥९॥

अन्वयः-हे सत्योपदेशकयाजकौ! यो जनो वामपो मित्रावरुणाविवाभिध्रुगक्ष्णयाध्रुक् सन्न सुनोति, स स्वयं हृदये यक्ष्मं निधत्ते यद्यऋतावा होत्राभिरीमाप स स्वयं हृदये सुखं निधत्ते॥९॥

भावार्थः-यो मनुष्यः परोपकारकान् विदुषो द्रह्यति स सदा दुःखी यश्च प्रीणाति स च सुखी जायते॥९॥

पदार्थः-हे सत्य उपदेश और यज्ञ करानेवालो! (**यः**) जो (**जनः**) विद्वान् (**वाम्**) तुम दोनों के (**अपः**) प्राण अर्थात् बलों को (**मित्रावरुणा**) प्राण तथा उदान जैसे वैसे (**अभिध्रुक्**) आगे से द्रोह करता वा (**अक्ष्णयाध्रुक्**) कुटिलरीति से द्रोह करता हुआ (**न**) नहीं (**सुनोति**) उत्पन्न करता (**सः**) वह (**स्वयम्**) आप (**हृदये**) अपने हृदय में (**यक्ष्मम्**) राजरोग को (**नि, धत्ते**) निरन्तर धारण करता वा (**यत्**) जो (**ऋतावा**) सत्य भाव से सेवन करनेवाला (**होत्राभिः**) ग्रहण करने योग्य क्रियाओं से (**ईम्**) सब ओर से आपके व्यवहारों को प्राप्त होता है, वह (**आप**) अपने हृदय में सुख को निरन्तर धारण करता है॥९॥

भावार्थः-जो मनुष्य परोपकार करनेवाले विद्वानों से द्रोह करता वह सदा दुःखी और जो प्रीति करता है, वह सुखी होता है॥९॥

अथ युद्धविषय उपदिश्यते॥

अब युद्ध के विषय का उपदेश अगले मन्त्र में किया है॥

स व्राधंतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः।
विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः॥ १०॥ २॥

सः। व्राधंतः। नहुषः। दम्ऽसुजूतः। शर्धःऽतरः। नराम्। गूर्तऽश्रवाः। विसृष्टऽरातिः। याति। बाळ्हऽसृत्वा। विश्वासु। पृत्ऽसु। सदम्। इत्। शूरः॥ १०॥

पदार्थः-(**सः**) (**व्राधतः**) विरोधिनः (**नहुषः**) मनुष्यः (**दंसुजूतः**) यो दंसुभिरुपक्षयितृभिर्वीरैर्जूतः प्रेरितः सः (**शर्धस्तरः**) अतिशयेन बलवान् (**नराम्**) नायकानां वीराणाम् (**गूर्त्तश्रवाः**) गूर्त्तेनोद्यमेन श्रवः श्रवणमन्नं वा यस्य सः (**विसृष्टरातिः**) विविधाः सृष्टा रातयो दानादीनि येन सः (**याति**) प्राप्नोति (**बाढसृत्वा**) यो बाढेन प्रशस्तेन बलेन सरति सः (**विश्वासु**) (**पृत्सु**) सेनासु (**सदम्**) शत्रुहिंसकसैन्यम् (**इत्**) एव (**शूरः**) शत्रूणां हिंसकः॥ १०॥

अन्वयः-यो दंसुजूतः शर्धस्तरो गूर्त्तश्रवा विसृष्टरातिर्बाढसृत्वा नहुषो नरां विश्वासु पृत्सु सदमिद् गृहीत्वा व्राधतो युद्धाय याति स विजयमाप्नोति॥ १०॥

भावार्थः-मनुष्यैः शत्रोरधिकां युद्धसामग्रीं कृत्वा सुसहायेन स शत्रुर्विजेतव्यः॥ १०॥

पदार्थः-जो (**दंसुजूतः**) विनाश करनेहारे वीरों ने प्रेरणा किया (**शर्धस्तरः**) अत्यन्त बलवान् (**गूर्त्तश्रवाः**) जिसका उद्यम के साथ सुनना और अन्न आदि पदार्थ (**विसृष्टरातिः**) जिसने अनेक प्रकार के दान आदि उत्तम-उत्तम सिद्ध किये (**बाढसृत्वा**) जो प्रशंसित बल से चलने (**शूरः**) और शत्रुओं को मारनेवाला (**नहुषः**) मनुष्य (**नराम्**) नायक वीरों की (**विश्वासु**) समस्त (**पृत्सु**) सेनाओं में (**सदम्**) शत्रुओं के मारनेवाले वीर सेनाजन को (**इत्**) ही ग्रहण कर (**व्राधतः**) विरोध करनेवालों को युद्ध के लिये (**याति**) प्राप्त होता है (**सः**) वह विजय को पाता है॥ १०॥

भावार्थः-मनुष्यों को चाहिये कि अपने शत्रु से अधिक युद्ध की सामग्री को इकट्ठी कर अच्छे पुरुषों के सहाय से उस शत्रु को जीतें॥ १०॥

पुनरुपदेशककृत्यमाह॥

फिर उपदेश करनेवाले का कर्त्तव्य अगले मन्त्र में कहा है॥

अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते॥ ११॥

अध। ग्मन्त। नहुषः। हवम्। सूरेः। श्रोत। राजानः। अमृतस्य। मन्द्राः। नभःऽजुवः। यत्। निरवस्य। राधः। प्रऽशस्तये। महिना। रथऽवते॥ ११॥

पदार्थः-(**अध**) आनन्तर्ये (**ग्मन्त**) प्राप्नुत्। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नहुषः**) विदुषो नरस्य (**हवम्**) उपदेशाख्यं शब्दम् (**सूरेः**) सर्वविद्याविदः (**श्रोत**) शृणुत। अत्र विकरणलुक् **द्व्यचोऽतस्तिङ** इति दीर्घश्च। (**राजानः**) राजमानाः (**अमृतस्य**) अविनाशिनः (**मन्द्राः**) आह्लादयितारः (**नभोजुवः**) विमानादिना नभसि गच्छन्तः (**यत्**) (**निरवस्य**) निर्गतोऽवो रक्षणं स्य (**राधः**) धनम् (**प्रशस्तये**) प्रशस्ताय (**महिना**) महत्त्वेन (**रथवते**) बहवो रथा विद्यन्ते यस्य तस्मै॥११॥

अन्वयः-हे मन्द्रा राजानो! यूयममृतस्य सूरेर्नहुषो हवं श्रोत नभोजुवो यूयं यन्निरवस्य राधस्तद् ग्मन्ताध महिना प्रशस्तये रथवते राधो दत्त॥११॥

भावार्थः-ये परमेश्वरस्य परमविदुषः स्वात्मनश्च सकाशादविरोधिनस्तदुपदेशांश्च गृह्णीयुस्ते प्राप्तविद्या महाशया जायन्ते॥११॥

पदार्थः-हे (**मन्द्राः**) आनन्द करानेवाले (**राजानः**) प्रकाशमान सज्जनो! तुम (**अमृतस्य**) आत्मरूप से मरणधर्म रहित (**सूरेः**) समस्त विद्याओं को जाननेवाले (**नहुषः**) विद्वान् जन के (**हवम्**) उपदेश को (**श्रोत**) सुनो (**नभोजुवः**) विमान आदि से आकाश में गमन करते हुए तुम (**यत्**) जो (**निरवस्य**) रक्षाहीन का (**राधः**) धन है, उसको (**ग्मन्त**) प्राप्त होओ (**अध**) इसके अनन्तर (**महिना**) बड़प्पन से (**प्रशस्तये**) प्रशंसित (**रथवते**) बहुत रथवाले को धन देओ॥११॥

भावार्थः-जो परमेश्वर, परम विद्वान् और अपने आत्मा के सकाश से विरोधी नहीं होते और उनके उपदेशों का ग्रहण करें, वे विद्याओं को प्राप्त हुए महाशय होते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एतं शर्धं धाम यस्य सूरेरित्यवोचन् दशतयस्य नंशे।
द्युम्नानि येषु वसुताती रारन् विश्वे सन्वन्तु प्रभृथेषु वाजम्॥१२॥

एतम्। शर्धम्। धाम। यस्य। सूरेः। इति। अवोचन्। दशऽतयस्य। नंशे। द्युम्नानि। येषु। वसुऽतातिः। ररन्। विश्वे। सन्वन्तु। प्रऽभृथेषु। वाजम्॥१२॥

पदार्थः-(**एतम्**) पूर्वोक्तं सर्वं वस्तुजातम् (**शर्द्धम्**) बलयुक्तम् (**धाम**) स्थानम् (**यस्य**) (**सूरेः**) विदुषः (**इति**) अनेन प्रकारेण (**अवोचन्**) वदेयुः (**दशतयस्य**) दशधा विद्यस्य (**नंशे**) अदर्शयेयम् (**द्युम्नानि**) यशांसि धनानि वा (**येषु**) (**वसुतातिः**) धनाद्यैश्वर्य्ययुक्तः (**रारन्**) दद्युः (**विश्वे**) सर्वे (**सन्वन्तु**) संभजन्तु (**प्रभृथेषु**) (**वाजम्**) ज्ञानमन्नं वा॥१२॥

अन्वयः-वसुतातिरहं यथा विद्वांसो यस्य दशतयस्य सूरेः सकाशाद् यच्छर्द्धं धामावोचन्। ये विश्वे वाजं रारन् येषु प्रभृथेषु द्युम्नानि सन्वन्त्विति तदेतं सर्वं सेवित्वा दुःखानि नंशे॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कार। ये विपश्चितो मनुष्याः पूर्णविद्याविदोऽखिलाविद्याः प्राप्यान्यानुपदिशन्ति ते यशस्विनो भवन्ति॥१२॥

पदार्थः-(**वसुतातिः**) धन आदि ऐश्वर्य्ययुक्त मैं जैसे विद्वान् जन (**यस्य**) जिस (**दशतयस्य**) दश प्रकार की विद्याओं से युक्त (**सूरेः**) विद्वान् के सकाश से जिस (**शर्द्धम्**) बलयुक्त (**धाम**) स्थान को (**अवोचन्**) कहें वा जो (**विश्वे**) सब विद्वान् (**वाजम्**) ज्ञान वा अन्न को (**रारन्**) देवें (**येषु**) जिन (**प्रभृथेषु**) अच्छे धारण किये हुए पदार्थों में (**द्युम्नानि**) यश वा धनों का (**सन्वन्तु**) सेवन करें (**इति**) इस प्रकार उस ज्ञान और (**एतम्**) इन पूर्वोक्त सब पदार्थों का सेवन कर दुःखों को (**नंशे**) नाश करूं॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् मनुष्य पूर्ण विद्याओं को जाननेहारे समस्त विद्याओं को पाकर औरों को उपदेश देते हैं, वे यशस्वी होते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मन्दामहे दशतयस्य धासेर्द्विर्यत्पञ्च बिभ्रतो यन्त्यन्ना।
किमिष्टाश्वा इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन्॥१३॥

मन्दामहे। दशऽतयस्य। धासेः। द्विः। यत्। पञ्च। बिभ्रतः। यन्ति। अन्ना। किम्। इष्टऽअश्वः। इष्टऽरश्मिः। एते। ईशानासः। तरुषः। ऋञ्जते। नॄन्॥१३॥

पदार्थः-(**मन्दामहे**) स्तुमः (**दशतयस्य**) दशविधस्य (**धासेः**) विद्यासुखधारकस्य विदुषः (**द्विः**) द्विवारम् (**यत्**) (**पञ्च**) अध्यापकोपदेशकाऽध्येत्र्युपदेश्यसामान्याः (**बिभ्रतः**) विद्यासुखेन सर्वान् पुष्यतः (**यन्ति**) प्राप्नुवन्ति (**अन्ना**) सुसंस्कृतान्यन्नानि (**किम्**) प्रश्ने (**इष्टाश्वः**) इष्टाः संगता अश्वा यस्य सः (**इष्टरश्मिः**) इष्टाः संयोजिता रश्मयो येन (**एते**) (**ईशानासः**) समर्थाः (**तरुषः**) अविद्यासंप्लवकान् (**ऋञ्जते**) (**नॄन्**) विद्यानायकान्॥१३॥

अन्वयः-यद्ये पञ्च दशतयस्य धासेर्विद्यामन्ना च द्विर्यन्ति य एत ईशानासस्तरुष ऋञ्जते प्रसाध्नुवन्ति तान् बिभ्रतो नॄन् जनान् वयं मन्दामहे तच्छिक्षां प्राप्य जन इष्टाश्व इष्टरश्मिः किं न जायते?॥१३॥

भावार्थः-ये सुशिक्षया सर्वान् विदुषः कुर्वन्तः साधनैरिष्टसाधकान् समर्थान् विदुषो न सेवन्ते त इष्टं सुखमपि न लभन्ते॥१३॥

पदार्थः-(**यत्**) जो (**पञ्च**) पढ़ाने, उपदेश करने, पढ़ने और उपदेश सुननेवाले तथा सामान्य मनुष्य (**दशतयस्य**) दश प्रकार के (**धासेः**) विद्या सुख का धारण करनेवाले विद्वान् की विद्या को और

(अन्ना) अच्छे संस्कार से सिद्ध किये हुए अन्नों को **(द्विः)** दो वार **(यन्ति)** प्राप्त होते हैं वा जो **(एते)** ये **(ईशानासः)** समर्थ अविद्या अज्ञान में डुबानेवालों को **(ऋञ्जते)** प्रसिद्ध करते हैं, उन **(बिभ्रतः)** विद्या सुख से सब की पुष्टि **(नॄन्)** और विद्याओं की प्राप्ति करनेहारे मनुष्यों की हम लोग **(मन्दामहे)** स्तुति करते हैं, उनकी शिक्षा को पाकर मनुष्य **(इष्टाश्वः)** जिसको घोड़े प्राप्त हुए वा **(इष्टरश्मिः)** जिसने कला यन्त्रादिकों की किरणें जोड़ी ऐसा **(किम्)** क्या नहीं होता है ?॥१३॥

भावार्थः–जो अच्छी शिक्षा से सबको विद्वान् करते हुए साधनों से चाहे हुए को सिद्ध करनेवाले समर्थ विद्वानों का सेवन नहीं करते, वे अभीष्ट सुख को भी नहीं प्राप्त होते हैं॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे॥१४॥

हिरण्यऽकर्णम्। मणिऽग्रीवम्। अर्णः। तत्। नः। विश्वे। वरिवस्यन्तु। देवाः। अर्यः। गिरः। सद्यः। आ। जग्मुषीः। आ। उस्राः। चाकन्तु। उभयेषु। अस्मे इति॥१४॥

पदार्थः–(**हिरण्यकर्णम्**) हिरण्यं कर्णे यस्य तम् (**मणिग्रीवम्**) मणयो ग्रीवायां यस्य तम् (**अर्णः**) सुसंस्कृतमुदकम् (**तत्**) (**नः**) अस्मभ्यम् (**विश्वे**) अखिलाः (**वरिवस्यन्तु**) सेवन्ताम् (**देवाः**) विद्वांसः (**अर्य्यः**) वैश्यः (**गिरः**) सर्वदेशभाषाः (**सद्यः**) तूर्णम् (**आ**) (**जग्मुषीः**) प्राप्तुं योग्याः (**आ**) (**उस्राः**) गावः (**चाकन्तु**) कामयन्तु (**उभयेषु**) स्वेष्वन्येषु च (**अस्मे**) अस्मासु॥१४॥

अन्वयः–ये विश्वे देवा नो जग्मुषीर्गिरस्सद्य आचकन्तूभयेष्वस्मे च यदर्णः कामयेरन् योऽर्यो जग्मुषीर्गिर उस्राश्च कामयते तं हिरण्यकर्णं मणिग्रीवं तदस्मांश्चावरिवस्यन्तु तानेतान् कर्णं प्रतिष्ठापयेम॥१४॥

भावार्थः–ये विद्वांसो याश्च विदुष्यस्तनयान् दुहितरश्च सद्यो विदुषो विदुषीश्च कुर्वन्ति, ये वणिग्जनाः सकलदेशभाषा विज्ञाय देशदेशान्तराद् द्वीपद्वीपान्तराच्च धनमाहृत्य श्रीमन्तो भवन्ति ते सर्वैः सर्वथा सत्कर्त्तव्याः॥१४॥

पदार्थः–जो **(विश्वे, देवाः)** समस्त विद्वान् **(नः)** हम लोगों के लिये **(जग्मुषीः)** प्राप्त होने योग्य **(गिरः)** वाणियों की **(सद्यः)** शीघ्र **(आ, चाकन्तु)** अच्छे प्रकार कामना करें वा **(उभयेषु)** अपने और दूसरों के निमित्त तथा **(अस्मे)** हम लोगों में जो **(अर्णः)** अच्छा बना हुआ जल है, उसकी कामना करें और जो **(अर्यः)** वैश्य प्राप्त होने योग्य सब देश, भाषाओं और **(उस्राः)** गौओं की कामना करे उस **(हिरण्यकर्णम्)** कानों में कुण्डल और **(मणिग्रीवम्)** गले में मणियों को पहिने हुए वैश्य को **(तत्)** तथा

उस उक्त व्यवहार और हम लोगों की **(आ, वरिवस्यन्तु)** अच्छे प्रकार सेवा करें, उन सबकी हम लोग प्रतिष्ठा करावें॥१४॥

भावार्थः-जो विद्वान् मनुष्य वा विदुषी पण्डिता स्त्री लड़के-लड़कियों को शीघ्र विद्वान् और विदुषी करते वा जो वणियें सब देशों की भाषाओं को जानके देश-देशान्तर और द्वीप-द्वीपान्तर से धन को लाकर ऐश्वर्ययुक्त होते हैं, वे सबको सब प्रकारों से सत्कार करने योग्य हैं॥१४॥

अथ राजधर्मविषयमाह॥

अब राजधर्म विषय को अगले मन्त्र में कहा है॥

चत्वारो॑ मा मशर्शार॑स्य शिश्वस्त्रयो॒ राज्ञ॒ आय॑वसस्य जि॒ष्णोः।
रथो॑ वां मित्रावरुणा दी॒र्घाप्सा॒ः स्यूम॑गभस्ति॒ः सूरो॒ नाद्यौ॑त्॥ १५॥ ३॥

चत्वार॑ः। मा॒। मशर्शार॑स्य। शिश्व॑ः। त्रय॑ः। राज्ञ॑ः। आय॑वसस्य। जि॒ष्णोः। रथ॑ः। वा॒म्। मित्रावरुणा। दी॒र्घऽअ॑प्साः। स्यूम॑ऽगभस्तिः। सूर॑ः। न। अ॒द्यौ॒त्॥ १५॥

पदार्थः-(**चत्वारः**) वर्णा आश्रमाश्च **(मा)** माम् **(मशर्शारस्य)** यो मशान् दुष्टान् शब्दान् शृणाति हिनस्ति तस्य। अत्र **पृषोदरादिना** पूर्वपदस्य रुगागमः। **(शिश्वः)** शासनीयाः **(त्रयः)** अध्यक्षप्रजाभृत्याः **(राज्ञः)** न्यायविनयाभ्यां राजमानस्य प्रकाशमानस्य **(आयवसस्य)** पूर्णसामग्रीकस्य **(जिष्णोः)** जयशीलस्य **(रथः)** यानम् **(वाम्)** युवयोः **(मित्रावरुणा)** सुहृद्वरौ **(दीर्घाप्साः)** दीर्घा बृहन्तोऽप्साः शुभगुणव्याप्तयो येषां ते **(स्यूमगभस्तिः)** समूहकिरणः **(सूरः)** सविता **(न)** इव **(अद्यौत्)** प्रकाशयति॥१५॥

अन्वयः-हे मित्रावरुणा! यो वां रथः स मा मां प्राप्नोतु यस्य मशर्शारस्यायवसस्य जिष्णो राज्ञः स्यूमगभस्तिः सूरो न रथोऽद्यौत् तथा यस्य दीर्घाप्साश्चत्वारस्त्रयश्च शिश्वः स्युः स राज्यं कर्तुमर्हेत्॥१५॥

भावार्थः-अत्रोपमालङ्कारः। यस्य राज्ञो राष्ट्रे विद्यासुशिक्षायुक्ता गुणकर्मस्वभावतो नियता धार्मिकाश्चत्वारो वर्णा आश्रमाश्च त्रयः सेनाप्रजान्यायाधीशाश्च सन्ति स सूर्य इव कीर्त्या सुशोभितो भवति॥१५॥

अत्र राजप्रजामनुष्यधर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह संगतिरस्तीति बोध्यम्॥

इति द्वाविंशत्युत्तरं शततमं १२२ सूक्तं तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः-हे **(मित्रावरुणा)** मित्र और उत्तम जन! जो **(वाम्)** तुम लोगों का **(रथः)** रथ है वह **(मा)** मुझको प्राप्त होवे जिस **(मशर्शारस्य)** दुष्ट शब्दों का विनाश करते हुए **(आयवसस्य)** पूर्ण सामग्रीयुक्त **(जिष्णोः)** शत्रुओं को जीतनेहारे **(राज्ञः)** न्याय और विनय से प्रकाशमान राजा का

(**स्यूमगभस्तिः**) बहुत किरणों से युक्त (**सूरः**) सूर्य के (**न**) समान रथ (**अद्यौत्**) प्रकाश करता तथा जिसके (**दीर्घाप्साः**) जिनको अच्छे गुणों में बहुत व्याप्ति वे (**चत्वारः**) ब्राह्मण, क्षत्रिय, वैश्य, शूद्र वर्ण और ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, संन्यास ये चार आश्रम तथा (**त्रयः**) सेना आदि कामों के अधिपति, प्रजाजन तथा भृत्यजन ये तीन (**शिश्वः**) सिखाने योग्य हों, वह राज्य करने को योग्य हो॥१५॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जिस राजा के राज्य में विद्या और अच्छी शिक्षायुक्त, गुण, कर्म, स्वभाव से नियमयुक्त धर्मात्माजन, चारों वर्ण और आश्रम तथा सेना, प्रजा और न्यायाधीश हैं, वह सूर्य्य के तुल्य कीर्ति से अच्छी शोभायुक्त होता है॥१५॥

इस सूक्त में राजा, प्रजा और साधारण मनुष्यों के धर्म के वर्णन से इस सूक्त में कहे हुए अर्थ की पिछले सूक्त के साथ एकता है, यह जानना चाहिये॥

यह एक सौ बाईसवां १२२ सूक्त और तीसरा ३ वर्ग पूरा हुआ॥

पृथुरित्यस्य त्रयोदशर्चस्य त्रयोविंशत्युत्तरशततमस्य सूक्तस्य दीर्घतमसः पुत्रः कक्षीवानृषिः। उषा देवता। १,३,६,७,९,१०,१३ विराट् त्रिष्टुप्। २,४,८,१२ निचृत् त्रिष्टुप्। ५ त्रिष्टुप् च छन्दः। धैवतः स्वरः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ दम्पत्योर्विषयमाह॥

अब १२३ एक सौ तेईसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में स्त्री-पुरुष के विषय को कहते हैं॥

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः।
कृष्णादुदस्थादुर्या३ विहायाश्चिकित्सन्ती मानुषाय क्षयाय॥ १॥

पृथुः। रथः। दक्षिणायाः। अयोजि। आ। एनम्। देवासः। अमृतासः। अस्थुः। कृष्णात्। उत्। अस्थात्। अर्या। विऽहायाः। चिकित्सन्ती। मानुषाय। क्षयाय॥ १॥

पदार्थः-(**पृथुः**) विस्तीर्णः (**रथः**) वाहनम् (**दक्षिणायाः**) दिशः (**अयोजि**) युज्यते (**आ**) एनम् (**देवासः**) दिव्यगुणाः (**अमृतासः**) मरणधर्मरहिताः (**अस्थुः**) तिष्ठन्तु (**कृष्णात्**) अन्धकारात् (**उत्**) (**अस्थात्**) ऊर्ध्वमुदेति (**अर्या**) वैश्यकन्या (**विहायाः**) महती (**चिकित्सन्ती**) चिकित्सां कुर्वती (**मानुषाय**) मनुष्याणामस्मै (**क्षयाय**) गृहाय॥ १॥

अन्वयः-या मनुष्याय क्षयाय चिकित्सन्ती विहाया अर्या उषाः कृष्णादुदस्थादिव विदुषाऽयोजि सा चैनं पतिं च युनक्ति ययोर्दक्षिणायाः पृथू रथश्चरति तावमृतासो देवास आऽस्थुः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। या उषर्गुणा स्त्री चन्द्रगुणश्च पुमान् भवेत् तयोर्विवाहे जाते सततं सुखं भवति॥ १॥

पदार्थः-जो (**मानुषाय**) मनुष्यों के इस (**क्षयाय**) घर के लिये (**चिकित्सन्ती**) रोगों को दूर करती हुई (**विहायाः**) बड़ी प्रशंसित (**अर्या**) वैश्य की कन्या जैसे प्रातःकाल की वेला (**कृष्णात्**) अंधेरे से (**उदस्थात्**) ऊपर को उठती उदय करती है, वैसे विद्वान् ने (**अयोजि**) संयुक्त की अर्थात् अपने सङ्ग ली और वह (**एनम्**) इस विद्वान् को पतिभाव से युक्त करती अपना पति मानती तथा जिन स्त्री-पुरुषों का (**दक्षिणायाः**) दक्षिण दिशा में (**पृथुः**) विस्तारयुक्त (**रथः**) रथ चलता है, उनको (**अमृतासः**) विनाशरहित (**देवासः**) अच्छे-अच्छे गुण (**आ, अस्थुः**) उपस्थित होते हैं॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो प्रातःसमय की वेला के गुणयुक्त अर्थात् शीतल स्वभाववाली स्त्री और चन्द्रमा के समान शीतल गुणवाला पुरुष हो, उनका परस्पर विवाह हो तो निरन्तर सुख होता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पूर्वा॒ विश्व॑स्मा॒द्भुव॑नादबोधि॒ जय॑न्ती॒ वाज॑ं बृह॒ती सनु॑त्री।
उ॒च्चा व्य॑ख्यद्युव॒तिः पु॑न॒र्भूरोषा अ॑गन्प्रथ॒मा पू॒र्वहू॑तौ॥ २॥

पूर्वा॑। विश्व॑स्मात्। भुव॑नात्। अ॒बो॒धि॒। जय॑न्ती। वाज॑म्। बृ॒ह॒ती। सनु॑त्री। उ॒च्चा। वि। अ॒ख्य॒त्। यु॒व॒तिः। पु॒न॒रिति॑ पुनः। भूः। आ। उ॒षाः। अ॒ग॒न्। प्र॒थ॒मा। पू॒र्वऽहू॑तौ॥ २॥

पदार्थः-(**पूर्वा**) (**विश्वस्मात्**) अखिलात् (**भुवनात्**) जगत्स्थात्पदार्थसमूहात् (**अबोधि**) बुध्यते (**जयन्ती**) जयशीलां (**वाजम्**) विज्ञानम् (**बृहती**) महती (**सनुत्री**) विभाजिका (**उच्चा**) उच्चानि वस्तूनि (**वि**) (**अख्यत्**) ख्यापयति। अत्रान्तर्गतो ण्यर्थः। (**युवतिः**) (**पुनर्भूः**) या विवाहितपतिमरणानन्तरं नियोगेन पुनः सन्तानोत्पादिका भवति सा (**आ**) (**उषाः**) (**अगन्**) गच्छति। अत्र लङि प्रथमैकवचने **बहुलं छन्दसी**ति शपो लुक् संयोगत्वेन तलोपे **मो नो धातोः** (अष्टा०८.२.६४) इति मस्य नकारादेशः। (**प्रथमा**) (**पूर्वहूतौ**) पूर्वेषां विद्यावृद्धानां हूतिराह्वानं यस्मिन् गृहाश्रमे तस्मिन्॥ २॥

अन्वयः-या पूर्वहूतौ पुनर्भूर्वाजं जयन्ती बृहती सनुत्री प्रथमा युवतिर्यथोषा विश्वस्माद्भुवनात् पूर्वाऽबोधि। उच्चा व्यख्यत् तथा आगन्त्सा विवाहे योग्या भवति॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वाः कन्याः शतस्य चतुर्थांशं वयौ विद्याभ्यासे व्यतीत्य पूर्णविद्या भूत्वा स्वसदृशं पतिमुदुह्य प्रभातवत्सुरूपा भवन्तु॥ २॥

पदार्थः-(**पूर्वहूतौ**) जिसमें वृद्धजनों का बुलाना होता उस गृहस्थाश्रम में जो (**पुनर्भूः**) विवाहे हुए पति के मर जाने के पीछे नियोग से फिर सन्तान उत्पन्न करनेवाली होती वह (**वाजम्**) उत्तम ज्ञान को (**जयन्ती**) जीतती हुई (**बृहती**) बड़ी (**सनुत्री**) सब व्यवहारों को अलग-अलग करने और (**प्रथमा**) प्रथम (**युवतिः**) युवा अवस्था को प्राप्त होनेवाली नवोढ़ा स्त्री जैसे (**उषाः**) प्रातःकाल की वेला (**विश्वस्मात्**) समस्त (**भुवनात्**) जगत् के पदार्थों से (**पूर्वा**) प्रथम (**अबोधि**) जानी जाती और (**उच्च**) ऊंची-ऊंची वस्तुओं को (**वि, अख्यत्**) अच्छे प्रकार प्रकट करती वैसे (**आ, अगन्**) आती है, वह विवाह में योग्य होती है॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब कन्या पच्चीस वर्ष अपनी आयु को विद्या के अभ्यास करने में व्यतीत कर पूरी विद्यावाली होकर अपने समान पति से विवाह कर प्रातःकाल की वेला के समान अच्छे रूपवाली हों॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदु॒द्य भा॒गं वि॒भजा॑सि॒ नृभ्य॒ उषो॑ देवि मर्त्य॒त्रा सु॒जाते।

देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय॥ ३॥

यत्। अद्य। भागम्। विऽभजासि। नृऽभ्यः। उषः। देवि। मर्त्यऽत्रा। सुऽजाते। देवः। नः। अत्र। सविता। दमूनाः। अनागसः। वोचति। सूर्याय॥ ३॥

पदार्थः-(**यत्**) यम् (**अद्य**) (**भागम्**) भजनीयम् (**विभजासि**) विभजेः (**नृभ्यः**) नायकेभ्यः (**उषः**) प्रभातवत् (**देवि**) सुलक्षणैः सुशोभिते (**मर्त्यत्रा**) मर्त्येषु मनुष्येषु (**सुजाते**) सत्कीर्त्या प्रकाशिते (**देवः**) देदीप्यमानः (**नः**) अस्मभ्यम् (**अत्र**) अस्मिने गृहाश्रमे (**सविता**) सूर्यः (**दमूनाः**) सहृद्वरः (**अनागसः**) अनपराधिनः (**वोचति**) उच्याः (**सूर्याय**) परमेश्वरविज्ञानाय॥ ३॥

अन्वयः-हे सुजाते देवि कन्ये! त्वमद्य नृभ्य उषरिव यद्यं भागं विभजासि यश्चात्र दमूना मर्त्यत्रा सवितेव देवस्तव पतिः सूर्याय नोऽनागसो वोचति तौ युवां वयं सततं सत्कुर्याम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा द्वौ स्त्रीपुरुषौ विद्यावन्तौ धर्माचारिणौ विद्याप्रचारकौ सदा परस्परस्मिन् प्रसन्नौ भवेतां तदा गृहाश्रमेऽतीव सुखभाजिनौ स्याताम्॥ ३॥

पदार्थः-हे (**सुजाते**) उत्तम कीर्त्ति से प्रकाशित और (**देवि**) अच्छे लक्षणों से शोभा को प्राप्त सुलक्षणी कन्या! तू (**अद्य**) आज (**नृभ्यः**) व्यवहारों की प्राप्ति करनेहारे मनुष्यों के लिये (**उषः**) प्रातः समय की वेला के समान (**यत्**) जिस (**भागम्**) सेवने योग्य व्यवहार का (**विभजासि**) अच्छे प्रकार सेवन करती और जो (**अत्र**) इस गृहाश्रम में (**दमूनाः**) मित्रों में उत्तम (**मर्त्यत्रा**) मनुष्यों में (**सविता**) सूर्य के समान (**देवः**) प्रकाशमान तेरा पति (**सूर्याय**) परमात्मा के विज्ञान के लिये (**नः**) हम लोगों को (**अनागसः**) विना अपराध के व्यवहारों को (**वोचति**) कहे उन तुम दोनों का सत्कार हम लोग निरन्तर करें॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब दो स्त्री-पुरुष विद्यावान्, धर्म का आचरण और विद्या का प्रचार करनेहारे सब कभी परस्पर में प्रसन्न हों, तब गृहाश्रम में अत्यन्त सुख का सेवन करनेहारे होवें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना।
सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनाम्॥ ४॥

गृहम्ऽगृहम्। अहना। याति। अच्छ। दिवेऽदिवे। अधि। नाम। दधाना। सिसासन्ती। द्योतना। शश्वत्। आ। अगात्। अग्रम्ऽअग्रम्। इत्। भजते। वसूनाम्॥ ४॥

पदार्थः-(**गृहंगृहम्**) निकेतनं निकेतनम् (**अहना**) दिवसेन व्याप्त्या वा। अत्र **वाच्छन्दसी**त्यल्लोपो न। (**याति**) (**अच्छ**) उत्तमरीत्या। अत्र **निपातस्य चे**ति दीर्घः। (**दिवेदिवे**) प्रतिदिनम् (**अधि**) उपरिभावे (**नाम**) संज्ञाम् (**दधाना**) धरन्ती (**सिषासन्ती**) दातुमिच्छन्ती (**द्योतना**) प्रकाशमाना (**शश्वत्**) निरन्तरम् (**आ**) (**अगात्**) प्राप्नोति (**अग्रमग्रम्**) पुरः पुरः (**इत्**) एव (**भजते**) सेवते (**वसूनाम्**) पृथिव्यादीनाम्॥४॥

अन्वयः-या स्त्री यथोषा अहना गृहंगृहमच्छाधियाति दिवेदिवे नाम दधाना द्योतना सती वसूनामग्रमग्रं भजते शश्वदिदागात् तथा सिषासन्ती भवेत् सा गृहाकार्य्यालङ्कारिणी स्यात्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यदीप्तिः पदार्थानां पुरोभागं सेवते नियमेन प्रतिसमयं प्राप्नोति तथा स्त्रियापि भवितव्यम्॥४॥

पदार्थः-जो स्त्री जैसे प्रातःकाल की वेला (**अहना**) दिन वा व्याप्ति से (**गृहंगृहम्**) घर-घर को (**अच्छाधियाति**) उत्तम रीति के साथ अच्छी ऊपर से आती (**दिवेदिवे**) और प्रतिदिन (**नाम**) नाम (**दधाना**) धरती अर्थात् दिन-दिन का नाम आदित्यवार, सोमवार आदि धरती (**द्योतना**) प्रकाशमान (**वसूनाम्**) पृथिवी आदि लोकों के (**अग्रमग्रम्**) प्रथम-प्रथम स्थान को (**भजते**) भजती और (**शश्वत्**) निरन्तर (**इत्**) ही (**आ, अगात्**) आती है, वैसे (**सिषासन्ती**) उत्तम पदार्थ पति आदि को दिया चाहती हो, वह घर के काम को सुशोभित करनेहारी हो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य की कान्ति-धाम सब पदार्थों के अगले-अगले भाग को सेवन करती और नियम से प्रत्येक समय प्राप्त होती है, वैसे स्त्री को भी होना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व।
पश्चा स दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन॥५॥४॥

भगस्य। स्वसा। वरुणस्य। जामिः। उषः। सूनृते। प्रथमा। जरस्व। पश्चा। सः। दध्याः। यः। अघस्य। धाता। जयेम। तम्। दक्षिणया। रथेन॥५॥

पदार्थः-(**भगस्य**) ऐश्वर्यस्य (**स्वसा**) भगिनीव (**वरुणस्य**) श्रेष्ठस्य (**जामिः**) कन्येव (**उषः**) उषाः (**सूनृते**) सत्याचरणयुक्ते (**प्रथमा**) (**जरस्व**) स्तुहि (**पश्चा**) पश्चात् (**सः**) (**दध्याः**) तिरस्कुरु (**यः**) (**अघस्य**) पापस्य (**धाता**) (**जयेम**) (**तम्**) (**दक्षिणया**) सुशिक्षितया सेनया (**रथेन**) विमानादियानेन॥५॥

अन्वयः-हे सूनृते! त्वमुषरुषा इव भगस्य स्वसेव वरुणस्य जामिरिव प्रथमा सती विद्या जरस्व योऽघस्य धाता भवेत् तं दक्षिणया रथेन यथा वयं जयेम तथा त्वं दध्याः। यो जनः पापी स्यात् स पश्चा तिरस्करणीयः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। स्त्रीभिः स्वस्वगृह ऐश्वर्योन्नतिः श्रेष्ठा रीतिर्दुष्टताडनं च सततं कार्य्यम्॥५॥

पदार्थः-हे **(सूनृते)** सत्य आचरणयुक्त स्त्री! तू **(उषः)** प्रातः समय की वेला के समान वा **(भगस्य)** ऐश्वर्य्य की **(स्वसा)** बहिन के समान वा **(वरुणस्य)** उत्तम पुरुष की **(जामिः)** कन्या के समान **(प्रथमा)** प्रख्यात प्रशंसा को प्राप्त हुई विद्याओं की **(जरस्व)** स्तुति कर, **(यः)** जो **(अघस्य)** अपराध का **(धाता)** धारण करनेवाला हो **(तम्)** उसको **(दक्षिणया)** अच्छी सिखाई हुई सेना और **(रथेन)** विमान आदि यान से जैसे हम लोग **(जयेम)** जीतें, वैसे तू **(दध्याः)** उसका तिरस्कार कर, जो मनुष्य पापी हो **(सः)** वह **(पश्चा)** पीछा करने अर्थात् तिरस्कार करने योग्य है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। स्त्रियों को चाहिये कि अपने-अपने घर में ऐश्वर्य की उन्नति, श्रेष्ठ रीति और दुष्टों का ताड़न निरन्तर किया करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः।
स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः॥६॥

उत्। ईरताम्। सूनृताः। उत्। पुरम्ऽधीः। उत्। अग्नयः। शुशुचानासः। अस्थुः। स्पार्हा। वसूनि। तमसा। अपऽगूळ्हा। आविः। कृण्वन्ति। उषसः। विऽभातीः॥६॥

पदार्थः-(**उत्**) उत्कृष्टतया **(ईरताम्)** प्रेरयन्तु **(सूनृताः)** सत्यभाषणादिक्रियाः **(उत्)** **(पुरन्धीः)** याः पुरं श्रितां दधाति ताः **(उत्)** **(अग्नयः)** पावका इव **(शुशुचानासः)** भृशं पवित्रकारकाः **(अस्थुः)** तिष्ठन्तु **(स्पार्हा)** स्पृहणीयानि **(वसूनि)** **(तमसा)** अन्धकारेण **(अपगूढा)** आच्छादितानि **(आविः)** प्राकट्ये **(कृण्वन्ति)** कुर्वन्ति **(उषसः)** प्रभाताः **(विभातीः)** विशिष्टप्रकाशान्॥६॥

अन्वयः-हे सत्पुरुषाः! सूनृताः सन्तो यूयं यथा पुरन्धीश्शुशुचानासोऽग्नय इव स्त्रिय उदीरताम् स्पार्हा वसूनि उदस्थुः। यथोषसस्तमसापगूढा द्रव्याणि विभातीश्चोदाविष्कृण्वन्ति तथा भवत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा स्त्रिय उषर्वद्वर्त्तमाना अविद्यामलिनतादि निष्कृत्य विद्यापवित्रतादि संप्रकाश्यैश्वर्यमुन्नयन्ति तदा ताः सततं सुखिन्यो भवन्ति॥६॥

पदार्थः-हे सत्पुरुषो! (**सूनृताः**) सत्यभाषणादि क्रियावान् होते हुए तुम लोग जैसे (**पुरन्धीः**) शरीर के आश्रित क्रिया को धारण करती और (**शुशुचानासः**) निरन्तर पवित्र करानेवाले (**अग्नयः**) अग्नियों के समान चमकती-दमकती हुई स्त्री लोग (**उदीरताम्**) उत्तमता से प्रेरणा देवें वा (**स्पार्हा**) चाहने योग्य (**वसूनि**) धन आदि पदार्थों को (**उदस्थुः**) उन्नति से प्राप्त हों वा जैसे (**उषसः**) प्रभातसमय (**तमसा**) अन्धकार से (**अपगूढा**) ढंपे हुए पदार्थों और (**विभातीः**) अच्छे प्रकाशों को (**उदाविष्कृण्वन्ति**) ऊपर से प्रकट करते हैं, वैसे होओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब स्त्रीजन प्रभात समय की वेलाओं के समान वर्त्तमान अविद्या, मैलापन आदि दोषों को निकाल कर विद्या और पाकपन आदि गुणों को प्रकाश कर ऐश्वर्य की उन्नति करती हैं, तब वे निरन्तर सुखयुक्त होती हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अप॒ान्यदेत्य॒भ्य१॑न्यदे॑ति॒ विषु॑रूपे॒ अह॑नी॒ सं च॑रेते।
प॒रि॒क्षित॒ोस्तमो॑ अ॒न्या गुहा॑क॒रद्यौ॑दु॒षाः शोशु॑चता॒ रथे॑न॥७॥

अप॑। अ॒न्यत्। एति॑। अ॒भि। अ॒न्यत्। ए॒ति॒। विषु॑रूपे॒ऽइति॑ विषु॑ऽरूपे। अह॑नी॒ इति॑। सम्। च॒रे॒ते॒ इति॑। प॒रि॒ऽक्षित॑ोः। तमः॑। अ॒न्या। गुहा॑। अ॒क॒रित्य॑कः। अद्यौ॑त्। उ॒षाः॑। शोशु॑चता। रथे॑न॥७॥

पदार्थः-(**अप**) (**अन्यत्**) (**एति**) प्राप्नोति (**अभि**) (**अन्यत्**) (**एति**) (**विषुरूपे**) व्याप्तस्वरूपे (**अहनी**) रात्रिदिने (**सम्**) (**चरेते**) (**परिक्षितोः**) सर्वतो निवसतोः। अत्र तुमर्थे तोसुन्। (**तमः**) रात्री (**अन्या**) भिन्नानि (**गुहा**) आच्छादिका (**अकः**) करोति (**अद्यौत्**) द्योतयति (**उषाः**) दिनम् (**शोशुचता**) अत्यन्तं प्रकाशमानेन (**रथेन**) रम्येण स्वरूपेण॥७॥

अन्वयः-ये विषुरूपे अहनी रात्रिदिने सह संचरेते तयोः परिक्षितोस्तमः प्रकाशयोर्मध्याद् गुहातमोऽन्याऽकः कृत्यानि करोति उषाः शोशुचता रथेनाद्यौत्। अन्यदपैति। अन्यदभ्येतीव दम्पती वर्त्तेताम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। अस्मिञ्जगति तमः प्रकाशरूपौ द्वौ पदार्थौ स्तः, याभ्यां सदा लोकार्द्धो दिनं रात्रिश्च वर्त्तेते। यद्वस्तु तमस्त्यजति तत् त्विषं गृह्णाति यावद्दीप्तिस्तमस्त्यजति तावत्तमिस्रादत्ते द्वौ पर्य्यायैण सदैव स्वव्याप्त्या प्राप्तं प्राप्तं द्रव्यमाच्छादयतः सहैव वर्त्तेते तयोर्यत्र यत्र संयोगस्तत्र तत्र संध्या यत्र-यत्र वियोगस्तत्र तत्र रात्रिर्दिनं च यौ स्त्रीपुरुषावेवं संयुक्तौ वियुक्तौ च भूत्वा दुःखनिमित्तानि जहीतः सुखकारणानि चादत्तस्तौ सदानन्दितौ भवतः॥७॥

पदार्थः-जो **(विषुरूपे)** संसार में व्याप्त **(अहनी)** रात्रि और दिन एक साथ **(सं, चरेते)** सञ्चार करते अर्थात् आते-जाते हैं, उनमें **(परिक्षितोः)** सब ओर से वसनेहारे अन्धकार और उजेले के बीच में **(गुहा)** अन्धकार से संसार को ढांपनेवाली **(तमः)** रात्री **(अन्या)** और कामों को **(अकः)** करती तथा **(उषाः)** सूर्य के प्रकाश से पदार्थों को तपानेवाला दिन **(शोशुचता)** अत्यन्त प्रकाश और **(रथेन)** रमण करने योग्य रूप से **(अद्यौत्)** उजेला करता **(अन्यत्)** अपने से भिन्न प्रकाश को **(अप, एति)** दूर करता तथा **(अन्यत्)** अन्य प्रकाश को **(अभ्येति)** सब ओर से प्राप्त होता, इस सब व्यवहार के समान स्त्री-पुरुष अपना वर्त्ताव वर्त्तें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। इस जगत् में अन्धेरा-उजेला दो पदार्थ हैं, जिनसे सदैव पृथिवी आदि लोकों के आधे भाग में दिन और आधे में रात्रि रहती है। जो वस्तु अन्धकार को छोड़ता वह उजेले का ग्रहण करता और जितना प्रकाश अन्धकार को छोड़ता उतना रात्रि लेती; दोनों पारी से सदैव अपनी व्याप्ति के साथ पाये-पाये हुए पदार्थ को ढांपते और दोनों एक साथ वर्त्तमान हैं। उनका जहाँ-जहाँ संयोग है, वहाँ-वहाँ संध्या और जहाँ-जहाँ वियोग होता अर्थात् अलग होते वहाँ-वहाँ रात्रि और दिन होता। जो स्त्री-पुरुष ऐसे मिल और अलग होकर दुःख के कारणों को छोड़ते और सुख के कारणों को ग्रहण करते, वे सदैव आनन्दित होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम।
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः॥८॥

सऽदृशीः। अद्य। सऽदृशीः। इत्। ऊम् इति। श्वः। दीर्घम्। सचन्ते। वरुणस्य। धाम। अनवद्याः। त्रिंशतम्। योजनानि। एकाऽएका। क्रतुम्। परि। यन्ति। सद्यः॥८॥

पदार्थः-**(सदृशीः)** सदृश्यो रात्र्य उषसश्च **(अद्य)** अस्मिन् दिने **(सदृशीः)** **(इत्)** एव **(उ)** वितर्के **(श्वः)** आगामिदिने **(दीर्घम्)** महान्तं समयम् **(सचन्ते)** समवेता वर्त्तन्ते **(वरुणस्य)** वायोः **(धाम)** स्थानम् **(अनवद्याः)** अनिन्दिताः **(त्रिंशतम्)** **(योजनानि)** विंशत्यधिकशतं क्रोशान् **(एकैका)** **(क्रतुम्)** कर्म **(परि)** **(यन्ति)** **(सद्यः)** शीघ्रम्॥८॥

अन्वयः-या अद्य अनवद्या सदृशीरु श्वः सदृशीर्वरुणस्य दीर्घं धाम सचन्ते। एकैका त्रिंशतं योजनानि क्रतुं सद्यः परियन्ति ता इद् व्यर्थाः केनचिन्नो नेयाः॥८॥

भावार्थः-यथेश्वरनियमनियतानां गतानां वर्त्तमानानामागामिनां च रात्रिदिनानामन्यथात्वं न जायते, तथैव सर्वस्याः सृष्टेः क्रमविपर्यासो न भवति तथा ये मनुष्या आलस्यं विहाय सृष्टिक्रमानुकूलतया प्रयतन्ते

ते प्रशंसितविद्यैश्वर्या जायन्ते यथैतद्रात्रिदिनं यथासमयं यात्यायाति च तथैव मनुष्यैर्व्यवहारेषु सदा वर्त्तितव्यम्॥८॥

पदार्थः-जो **(अद्य)** आज के दिन **(अनवद्याः)** प्रशंसित **(सदृशीः)** एकसी **(उ)** अथवा तो **(श्वः)** अगले दिन **(सदृशीः)** एकसी रात्रि और प्रभात वेला **(वरुणस्य)** पवन के **(दीर्घम्)** बड़े समय वा **(धाम)** स्थान को **(सचन्ते)** संयोग को प्राप्त होती और **(एकैका)** उन में से प्रत्येक **(त्रिंशतम्, योजनानि)** एक सौ बीस क्रोश और **(क्रतुम्)** कर्म को **(सद्यः)** शीघ्र **(परि, यन्ति)** पर्य्याय से प्राप्त होती हैं, वे **(इत्)** व्यर्थ किसी को न खोना चाहिये॥८॥

भावार्थः-जैसे ईश्वर के नियम को जो प्राप्त हो गये, होते और होनेवाले रात्रि-दिन हैं, उनका अन्यथापन नहीं होता, वैसे ही इस सब संसार के क्रम का विपरीत भाव नहीं होता तथा जो मनुष्य आलस को छोड़ सृष्टिक्रम की अनुकूलता से अच्छा यत्न किया करते हैं, वे प्रशंसित विद्या और ऐश्वर्य्यवाले होते हैं और जैसे यह रात्रि-दिन नियत समय आता और जाता, वैसे ही मनुष्यों को व्यवहारों में सदा अपना वर्त्ताव रखना चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची।
ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती॥९॥

जानती। अह्नः। प्रथमस्य। नाम। शुक्रा। कृष्णात्। अजनिष्ट। श्वितीची। ऋतस्य। योषा। न। मिनाति। धाम। अहरिति। अहः। निरिति। कृतम्। आचरन्ती॥९॥

पदार्थः-**(जानती)** ज्ञापयन्ती **(अह्नः)** दिनस्य **(प्रथमस्य)** विस्तीर्णस्यादिमावयवस्य वा **(नाम)** संज्ञाम् **(शुक्रा)** शुद्धिकरी **(कृष्णात्)** निकृष्टवर्णात् तमसः **(अजनिष्ट)** जायते **(श्वितीची)** या श्वितिं श्वेतवर्णमञ्चति सा **(ऋतस्य)** सत्यव्यवहारयुक्तजनस्य **(योषा)** भार्या **(न)** निषेधे **(मिनाति)** हिनस्ति **(धाम)** स्थानम् **(अहरहः)** **(निष्कृतम्)** निष्पन्नं निश्चितं वा **(आचरन्ती)**॥९॥

अन्वयः-हे स्त्रि! यथा प्रथमस्याह्नो नाम जानती शुक्रा श्वितीच्युषाः कृष्णादजनिष्ट। ऋतस्य योषेवाऽहरहराचरन्ती सती निष्कृतं धाम न मिनाति तथा त्वं भव॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषा अन्धकारादुत्पद्य दिनं प्रसाधयति दिनविरोधिनी न जायते तथा स्त्री सत्याचरणेन स्वमातापितृपतिकुलं सत्कीर्त्या प्रशस्तं श्वशुरं प्रति पतिं प्रत्यप्रियं किञ्चिन्नाचरेत्॥९॥

पदार्थः-हे स्त्रि! जैसे **(प्रथमस्य)** विस्तरित पहिले **(अह्नः)** दिन वा दिन के आदिम भाग का **(नाम)** नाम **(जानती)** जानती हुई **(शुक्रा)** शुद्धि करनेहारी **(श्वितीची)** सुपेदी को प्राप्त होती हुई प्रातःसमय की वेला **(कृष्णात्)** काले रङ्गवाले अन्धेरे से **(अजनिष्ट)** प्रसिद्ध हाती है वा **(ऋतस्य)** सत्य आचरणयुक्त मनुष्य की **(योषा)** स्त्री के समान **(अहरहः)** दिन-दिन **(आचरन्ती)** आचरण करती हुई **(निष्कृतम्)** उत्पन्न हुए वा निश्चय को प्राप्त **(धाम)** स्थान को **(न)** नहीं **(मिनाति)** नष्ट करती वैसे तू हो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रातःसमय की वेला अन्धकार से उत्पन्न होकर दिन को प्रसिद्ध करती है, दिन से विरोध करनेहारी नहीं होती, वैसे स्त्री सत्य आचरण से तथा अपने माता, पिता और पति के कुल को उत्तम कीर्त्ति से प्रशस्त कर अपने श्वसुर और पति के प्रति उनके अप्रसन्न होने का व्यवहार कुछ न करे॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणम्।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती॥१०॥५॥

कन्याऽइव। तन्वा। शाशदाना। एषि। देवि। देवम्। इयक्षमाणम्। सम्ऽस्मयमाना। युवतिः। पुरस्तात्। आविः। वक्षांसि। कृणुषे। विऽभाती।१०॥

पदार्थः-(**कन्येव**) कन्यावद्वर्त्तमाना **(तन्वा)** शरीरेण **(शाशदाना)** व्यवहारेष्वतितीक्ष्णतामाचरन्ती **(एषि)** प्राप्नोषि **(देवि)** कामयमाने **(देवम्)** विद्वांसम् **(इयक्षमाणम्)** अतिशयेन संगच्छमानम् **(संस्मयमाना)** सम्यङ् मन्दहासयुक्ता **(युवतिः)** चतुर्विंशतिवार्षिकी **(पुरस्तात्)** प्रथमतः **(आविः)** प्रसिद्धौ **(वक्षांसि)** उरांसि **(कृणुषे)** **(विभाती)** विविधतया सद्गुणैः प्रकाशमाना॥१०॥

अन्वयः-हे देवि! या त्वं तन्वा कन्येव शाशदानेयक्षमाणं देवं पतिमेषि पुरस्तात् विभाती युवतिः संस्मयमानाविष्कृणुषे सोषरूपमा जायसे॥१०॥

भावार्थः-अत्रोपमालङ्कारः। यथा विदुषी ब्रह्मचारिणी पूर्णां विद्यां शिक्षां स्वसदृशं हृद्यं पतिं च प्राप्य सुखिनी भवति तथान्याभिरप्याचरणीयम्॥१०॥

पदार्थः-हे **(देवि)** कामना करनेहारी कुमारी! जो तू **(तन्वा)** शरीर से **(कन्येव)** कन्या के समान वर्त्तमान **(शाशदाना)** व्यवहारों में अति तेजी दिखाती हुई **(इयक्षमाणम्)** अत्यन्त सङ्ग करते हुए **(देवम्)** विद्वान् पति को **(एषि)** प्राप्त होती **(पुरस्तात्)** और सम्मुख **(विभाती)** अनेक प्रकार सद्गुणों से प्रकाशमान

(युवतिः) जवानी को प्राप्त हुई **(संस्मयमाना)** मन्द-मन्द हंसती हुई **(वक्षांसि)** छाती आदि अङ्गों को **(आविः, कृणुषे)** प्रसिद्ध करती है सो तू प्रभात वेला की उपमा को प्राप्त होती है॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विदुषी ब्रह्मचारिणी स्त्री पूरी विद्या शिक्षा और अपने समान मनमाने पति को पाकर सुखी होती है, वैसे ही और स्त्रियों को भी आचरण करना चाहिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम्।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त॥११॥

सुऽसंकाशा। मातृमृष्टाऽइव। योषा। आविः। तन्वम्। कृणुषे। दृशे। कम्। भद्रा। त्वम्। उषः। विऽतरम्। वि। उच्छ। न। तत्। ते। अन्याः। उषसः। नशन्त॥११॥

पदार्थः-(**सुसंकाशा**) सुष्ठु शिक्षया सम्यक् शासिता (**मातृमृष्टेव**) विदुष्या मात्रा सत्यशिक्षाप्रदानेन शोधितेव (**योषा**) प्राप्तयौवना (**आविः**) (**तन्वम्**) शरीरम् (**कृणुषे**) करोषि (**दृशे**) द्रष्टुम् (**कम्**) सुखस्वरूपम् (**भद्रा**) मङ्गलाचारिणी (**त्वम्**) (**उषः**) उषर्वद् वर्त्तमाने (**वितरम्**) सुखदातारम् (**वि**) विगतार्थे (**उच्छ**) विवासय (**न**) (**तत्**) (**ते**) तव (**अन्याः**) (**उषसः**) प्रभाताः (**नशन्त**) नश्यन्ति॥११॥

अन्वयः-हे कन्ये सुसंकाशा योषा मातृमृष्टेव या दृशे तन्वमाविष्कृणुषे भद्रा सती कं पतिं प्राप्नोषि सा त्वं वितरं सुखं व्युच्छ। हे उषो! यथा अन्या उषसो न नशन्त तथा ते तत्सुखं मा नश्यतु॥११॥

भावार्थः-अत्रोपमालङ्कारः। यथोषसो नियमेन स्वं स्वं समयं देशं च प्राप्नुवन्ति तथा स्त्रियः स्वकीयं स्वकीयं पतिं प्राप्यर्त्तुं प्राप्नुवन्तु॥११॥

पदार्थः-हे कन्या! **(सुसंकाशा)** अच्छी सिखावट से सिखाई हुई **(योषा)** युवति **(मातृमृष्टेव)** पढ़ी हुई पण्डिता माता ने सत्यशिक्षा देकर शुद्ध की सी जो **(दृशे)** देखने को **(तन्वम्)** अपने शरीर को **(आविः)** प्रकट **(कृणुषे)** करती **(भद्रा)** और मङ्गलरूप आचरण करती हुई **(कम्)** सुखस्वरूप पति को प्राप्त होती है सो **(त्वम्)** तू **(वितरम्)** सुख देनेवाले पदार्थ और सुख को **(व्युच्छ)** स्वीकार कर, हे **(उषः)** प्रभात वेला के समान वर्त्तमान स्त्री! जैसे **(अन्याः)** और **(उषसः)** प्रभात समय **(न)** नहीं **(नशन्त)** विनाश को प्राप्त होते, वैसे **(ते)** तेरा **(तत्)** उक्त सुख न विनाश को प्राप्त हो॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्रातःकाल की वेला नियम से अपने-अपने समय और देश को प्राप्त होती हैं, वैसे स्त्री अपने-अपने पति को पाकर ऋतुधर्म को प्राप्त होवें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अश्वा॑वती॒र्गोम॑तीर्वि॒श्ववा॑रा॒ यत॑माना र॒श्मिभि॒: सूर्य॑स्य।
परा॑ च॒ यन्ति॒ पुन॒रा च॑ यन्ति भ॒द्रा नाम॒ वह॑माना उ॒षास॑:॥ १२॥

अश्व॑ऽवती:। गोऽम॑ती:। वि॒श्वऽवा॑रा:। यत॑माना:। र॒श्मिऽभि॑:। सूर्य॑स्य। परा॑। च॒। यन्ति॑। पुन॑:। आ। च॒। य॒न्ति॒। भ॒द्रा। नाम॑। वह॑माना:। उ॒षस॑:॥ १२॥

पदार्थ:-(**अश्वावती:**) प्रशस्ता अश्वा व्याप्तयो विद्यन्ते यासां ता:। अत्र मतौ पूर्वपदस्य दीर्घ:। (**गोमती:**) बहुपृथिवीकिरणयुक्ता: (**विश्ववारा:**) या: सर्वं जगद् वृण्वन्ति ता: (**यतमाना:**) प्रयत्नं कुर्वत्य: (**रश्मिभि:**) किरणै: सह (**सूर्यस्य**) सवितृलोकस्य (**परा**) (**च**) (**यन्ति**) गच्छन्ति (**पुन:**) (**आ**) (**च**) (**यन्ति**) (**भद्रा**) भद्राणि (**नाम**) नामानि (**वहमाना:**) प्राप्नुवत्य: (**उषस:**) प्रत्यूषसमया:। अत्रा**न्येषामपी**ति दीर्घ:॥ १२॥

अन्वय:-हे स्त्रियो! सूर्यस्य रश्मिभिस्सहोत्पन्ना यतमाना अश्वावतीर्गोमतीर्विश्ववारा भद्रा नाम वहमाना उषस: परा यन्ति च पुनरायन्ति च तथा यूयं वर्त्तध्वम्॥ १२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा प्रभातवेला: सूर्यस्य सन्नियोगेन नियता: सन्ति तथा विवाहिता: स्त्रीपुरुषा परस्परं प्रेमास्पदा: स्यु:॥ १२॥

पदार्थ:-हे स्त्रियो! जैसे (**सूर्यस्य**) सूर्यमण्डल की (**रश्मिभि:**) किरणों के साथ उत्पन्न (**यतमाना:**) उत्तम यत्न करती हुई (**अश्वावती:**) जिनकी प्रशंसित व्याप्तियाँ (**गोमती:**) जो बहुत पृथिवी आदि लोक और किरणों से युक्त (**विश्ववारा:**) समस्त जगत् को अपने में लेती और (**भद्रा**) अच्छे (**नाम**) नामों को (**वहमाना:**) सबकी बुद्धियों में पहुंचाती हुई (**उषस:**) प्रभातवेला नियम के साथ (**परा, यन्ति**) पीछे को जाती (**च**) और (**पुन:**) फिर (**च**) भी (**आ, यन्ति**) आती हैं, वैसे नियम से तुम अपना वर्त्ताव वर्त्तो॥ १२॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभातवेला सूर्य के संयोग से नियम को प्राप्त है, वैसे विवाहित स्त्री-पुरुष परस्पर प्रेम के स्थिर करनेहारे हों॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒तस्य॑ र॒श्मिमनु॒यच्छ॑माना भ॒द्रंभ॑द्रं क्रतु॒मस्मासु॑ धेहि।
उषो॑ नो अ॒द्य सु॒हवा॒ व्यु॑च्छा॒स्मासु॒ रायो॑ म॒घव॑त्सु च स्यु:॥ १३॥ ६॥

ऋ॒तस्य॑। र॒श्मिम्। अ॒नु॒ऽयच्छ॑माना। भ॒द्रम्ऽभ॑द्रम्। क्र॒तु॒म्। अ॒स्मासु॑। धे॒हि॒। उष॑:। न॒:। अ॒द्य। सु॒ऽहवा॑। वि। उ॒च्छ॒। अ॒स्मासु॑। राय॑:। म॒घव॑त्ऽसु। च॒। स्यु॒रिति॑ स्यु:॥ १३॥

पदार्थः-(**ऋतस्य**) जलस्य (**रश्मिम्**) किरणम् (**अनुयच्छमाना**) अनुकूलतया प्राप्ता (**भद्रंभद्रम्**) कल्याणकल्याणकारकम् (**क्रतुम्**) प्रज्ञां कर्म वा (**अस्मासु**) (**धेहि**) (**उषः**) उषर्वद्वर्त्तमाने (**नः**) अस्मान् (**अद्य**) (**सुहवा**) सुष्ठु सुखप्रदा (**वि**) (**उच्छ**) (**अस्मासु**) (**रायः**) श्रियः (**मघवत्सु**) पूजितेषु धनेषु (**च**) (**स्युः**)॥१३॥

अन्वयः-हे उषर्वत्पत्नि! त्वमद्य ऋतस्य रश्मिमुषा इव हृद्यं पतिमनुयच्छमानाऽस्मासु भद्रं भद्रं क्रतुं धेहि। सुहवा सती नोऽस्मान् व्युच्छ यतो मघवत्स्वस्मासु रायश्च स्युः॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सत्यः स्त्रियः स्वस्वपत्यादीन् यथावत् संसेव्य प्रज्ञाधर्मैश्वर्याणि नित्यं वर्द्धयन्ति तथोषसोऽपि वर्त्तन्ते॥१३॥

अत्रोषर्दृष्टान्तेन स्त्रीधर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह संगतिरस्तीति वेदितव्यम्॥

इति त्रयोविंशत्युत्तरं शततमं १२३ सूक्तं षष्ठो ६ वर्गश्च समाप्तः॥

पदार्थः-हे (**उषः**) प्रातःसमय की वेला सी अलवेली स्त्री! तू (**अद्य**) आज जैसे (**ऋतस्य**) जल की (**रश्मिम्**) किरण को प्रभात समय की वेला स्वीकार करती, वैसे मन से प्यारे पति को (**अनुयच्छमाना**) अनुकूलता से प्राप्त हुई (**अस्मासु**) हम लोगों में (**भद्रंभद्रम्, क्रतुम्**) अच्छी-अच्छी बुद्धि वा अच्छे-अच्छे काम को (**धेहि**) धर (**सुहवा**) और उत्तम सुख देनेवाली होती हुई (**नः**) हम लोगों को (**व्युच्छ**) ठहरा जिससे (**मघवत्सु**) प्रशंसित धनवाले (**अस्मासु**) हम लोगों में (**रायः**) शोभा (**च**) भी (**स्युः**) हों॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे श्रेष्ठ स्त्री अपने-अपने पति आदि की यथावत् सेवा कर बुद्धि, धर्म और ऐश्वर्य्य को नित्य बढ़ाती हैं, वैसे प्रभात समय की वेला भी है॥१३॥

इस सूक्त में प्रभात समय की वेला के दृष्टान्त से स्त्रियों के धर्म का वर्णन करने से इस सूक्त में कहे हुए अर्थ की पिछले सूक्त में कहे अर्थ के साथ एकता है, यह जानना चाहिये॥

यह एक सौ तेईसवां १२३ सूक्त और छठा ६ वर्ग पूरा हूआ॥

अथ चतुर्विंशत्युत्तरशततमस्य त्रयोदशर्चस्य सूक्तस्य दैर्घतमसः कक्षीवान् ऋषिः। उषा देवता।
१,३,६,९,१० निचृत् त्रिष्टुप्। ४,७,११ त्रिष्टुप्। १२ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः।
२,१३ भुरिक् पङ्क्तिः। ५ पङ्क्तिः। ८ विराट् पङ्क्तिश्च छन्दः। पञ्चमः स्वरः॥

अथ सूर्यलोकविषयमाह॥

अब तेरह ऋचावाले एक सौ चौबीसवें १२४ सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सूर्यलोक के विषय का वर्णन किया है॥

उ॒षा उ॒च्छन्ती॑ समिधा॒ने अ॒ग्ना उ॒द्यन्त्सूर्य॑ उर्वि॒या ज्योति॑रश्रेत्।
दे॒वो नो॒ अत्र॑ सवि॒ता न्वर्थं॑ प्रासा॑वीद् द्विप॒त्र चतु॑ष्पदि॒त्यै॥ १॥

उ॒षाः। उ॒च्छन्ती॑। स॒म्ऽइ॒धा॒ने। अ॒ग्नौ। उ॒त्ऽयन्। सूर्यः॑। उ॒र्वि॒या। ज्योतिः॑। अ॒श्रे॒त्। दे॒वः। नः॒। अत्र॑। स॒वि॒ता। नु। अर्थ॑म्। प्र। अ॒सा॒वी॒त्। द्वि॒ऽप॒त्। प्र। चतुः॑ऽपत्। इ॒त्यै॥ १॥

पदार्थः-(**उषाः**) (**उच्छन्तीः**) अन्धकारं निस्सारयन्ती (**समिधाने**) प्रदीप्ते (**अग्नौ**) पावके (**उद्यन्**) उदयं प्राप्नुवन् (**सूर्य्यः**) सविता (**उर्विया**) पृथिव्या। **उर्वीति पृथिवीनामसु पठितम्।** (निघं०१.१) (**ज्योतिः**) प्रकाशः (**अश्रेत्**) श्रयति (**देवः**) दिव्यप्रकाशः (**नः**) अस्माकम् (**अत्र**) जगति (**सविता**) कर्म्मसु (**प्रेरकः**) (**नु**) शीघ्रम् (**अर्थम्**) प्रयोजनम् (**प्र**) (**असावीत्**) सुनोति (**द्विपत्**) द्वौ पादौ यस्य तत् (**प्र**) (**चतुष्पत्**) (**इत्यै**) प्रापयितुम्॥ १॥

अन्वयः-यदा समिधानेऽग्नौ सूर्य्य उद्यन्सन्नुर्विया सह ज्योतिरश्रेत् तदोच्छन्त्युषा जायते। एवमत्र सविता देवो नोऽर्थमित्यै प्रासावीत्, द्विपच्चतुष्पच्च नु प्रासावीत्॥ १॥

भावार्थः-पृथिव्या सूर्य्यकिरणैः सह संयोगो जायते स एव तिर्य्यग्गतः सन्नुषसः कारणं भवति यदि सूर्य्यो न स्यात्, तर्हि विविधरूपाणि द्रव्याणि पृथक् पृथक् द्रष्टुमशक्यानि स्युः॥ १॥

पदार्थः-जब (**समिधाने**) जलते हुए (**अग्नौ**) अग्नि का निमित्त (**सूर्यः**) सूर्यमण्डल (**उद्यन्**) उदय होता हुआ (**उर्विया**) पृथिवी के साथ (**ज्योतिः**) प्रकाश को (**अश्रेत्**) मिलाता तब (**उच्छन्ती**) अन्धकार को निकालती हुई (**उषाः**) प्रातःकाल की वेला उत्पन्न होती है, ऐसे (**अत्र**) इस संसार में (**सविता**) कामों में प्रेरणा देनेवाला (**देवः**) उत्तम प्रकाशयुक्त उक्त सूर्यमण्डल (**नः**) हम लोगों के (**अर्थम्**) प्रयोजन को (**इत्यै**) प्राप्त कराने के लिये (**प्रासावीत्**) सारांश को उत्पन्न करता तथा (**द्विपत्**) दो पगवाले मनुष्यादि वा (**चतुष्पत्**) चार पगवाले चौपाये पशु आदि प्राणियों को (**नु**) शीघ्र (**प्र**) उत्तमता से उत्पन्न करता है॥ १॥

भावार्थः-पृथिवी का सूर्य की किरणों के साथ संयोग होता है, वही संयोग तिरछा जाता हुआ प्रभात समय के होने का कारण होता है, जो सूर्य न हो तो अनेक प्रकार के पदार्थ अलग अलग देखे नहीं जा सकते हैं॥१॥

अथोषर्दृष्टान्तेन स्त्रीविषयमाह॥

अब उषा के दृष्टान्त से स्त्री के विषय को अगले मन्त्र में कहा है॥

अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत्॥२॥

अमिनती। दैव्यानि। व्रतानि। प्रऽमिनती। मनुष्या। युगानि। ईयुषीणाम्। उपऽमा। शश्वतीनाम्। आऽयतीनाम्। प्रथमा। उषाः। वि। अद्यौत्॥२॥

पदार्थः-(**अमिनती**) अहिंसन्ती (**दैव्यानि**) दिव्यगुणानि (**व्रतानि**) वर्त्तमानानि सत्यानि वस्तूनि कर्माणि वा (**प्रमिनती**) प्रकृष्टतया हिंसन्ती (**मनुष्या**) मानुषसंबन्धीनि (**युगानि**) वर्षाणि (**ईयुषीणाम्**) अतीतानाम् (**उपमा**) दृष्टान्तः (**शश्वतीनाम्**) सनातनीनामुषसां प्रकृतीनां वा (**आयतीनाम्**) आगच्छन्तीनाम् (**प्रथमा**) (**उषाः**) (**वि**) (**अद्यौत्**) विविधतया प्रकाशयति॥२॥

अन्वयः-हे स्त्रि! यथोषा दैव्यानि व्रतान्यमिनती मनुष्या युगानि प्रमिनती शश्वतीनामीयुषीणामुपमाऽऽयतीनां च प्रथमा विश्वं व्यद्यौत्। जागृतैर्मनुष्यैर्युक्त्या सदा सेव्या तथा त्वं वर्त्तस्व॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेयमुषाः सन्ततेन पृथिवीसूर्यसंयोगेन सह चरिता यावन्तं पूर्वं देशं जहाति तावन्तमुत्तरं देशमादत्ते वर्त्तमानाऽतीतानामुषसामुपमाऽऽगामिनीनामादिमा सती कार्य्यकारणयोर्ज्ञानं प्रज्ञापयन्ती सत्यधर्माचरणनिमित्तकालावयवत्वादायुर्व्ययन्ती वर्त्तते सा सेविता सती बुद्ध्यारोग्यादीन् शुभगुणान् प्रयच्छति तथा विदुष्यः स्त्रियः स्युः॥२॥

पदार्थः-हे स्त्री! जैसे (**उषाः**) प्रातःसमय की वेला (**दैव्यानि**) दिव्य गुणवाले (**व्रतानि**) सत्य पदार्थ वा सत्य कर्मों को (**अमिनती**) न छोड़ती और (**मनुष्या**) मनुष्यों के सम्बन्धी (**युगानि**) वर्षों को (**प्रमिनती**) अच्छे प्रकार व्यतीत करती हुई (**शश्वतीनाम्**) सनातन प्रभातवेलाओं वा प्रकृतियों और (**ईयुषीणाम्**) हो गई प्रभातवेलाओं की (**उपमा**) उपमा दृष्टान्त और (**आयतीनाम्**) आनेवाली प्रभातवेलाओं में (**प्रथमा**) पहिली संसार को (**व्यद्यौत्**) अनेक प्रकार से प्रकाशित कराती और जागते अर्थात् व्यवहारों को करते हुए मनुष्य को युक्ति के साथ सदा सेवन करने योग्य है, वैसे तू अपना वर्त्ताव रख॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यह प्रातःसमय की वेला विस्तारयुक्त पृथ्वी और सूर्य के साथ चलनेहारी जितने पूर्व देश को छोड़ती उतने उत्तर देश को ग्रहण करती है तथा वर्त्तमान और व्यतीत हुई प्रातःसमय की वेलाओं की उपमा और आनेवालियों की पहिली हुई कार्यरूप जगत् का और जगत् के कारण का अच्छे प्रकार ज्ञान कराती और सत्य धर्म के आचरण निमित्तक समय का अङ्ग होने से उमर को घटाती हुई वर्त्तमान है, वह सेवन की हुई बुद्धि और आरोग्य आदि अच्छे गुणों को देती है, वैसे पण्डिता स्त्री हों॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात्।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति॥३॥

एषा। दिवः। दुहिता। प्रति। अदर्शि। ज्योतिः। वसाना। समना। पुरस्तात्। ऋतस्य। पन्थाम्। अनु। एति। साधु। प्रजानतीऽइव। न। दिशः। मिनाति॥३॥

पदार्थः-(**एषा**) (**दिवः**) प्रकाशस्य (**दुहिता**) कन्येव (**प्रति**) (**अदर्शि**) दृश्यते (**ज्योतिः**) प्रकाशम् (**वसाना**) स्वीकुर्वती (**समना**) संग्रामे। अत्र **सुपां स्वि**त्याकारादेशः। (**पुरस्तात्**) प्रथमतः (**ऋतस्य**) सत्यस्य कारणस्य (**पन्थाम्**) मार्गम् (**अनु**) (**एति**) (**साधु**) सम्यक् यथा स्यात् तथा (**प्रजानतीव**) यथा विज्ञानवती विदुषी (**न**) निषेधे (**दिशः**) (**मिनाति**) त्यजति॥३॥

अन्वयः-यथैवैषा ज्योतिर्वसाना समना दिवो दुहितेवास्माभिः पुरस्तात् प्रत्यदर्शि यथाऽऽप्तो वीर ऋतस्य पन्थामन्वेति साधु प्रजानतीवोषा दिशो न मिनाति तद्वद्वर्त्तमानाः स्त्रियो वराः स्युः॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुनियमेन वर्त्तमाना सत्युषाः सर्वानाह्लादयति सोत्तमं स्वभावं न हिनस्ति तथा स्त्रियो गार्हस्थ्यधर्मे वर्त्तेरन्॥३॥

पदार्थः-जैसे ही (**एषा**) यह प्रातःसमय की वेला (**ज्योतिः**) प्रकाश को (**वसाना**) ग्रहण करती हुई (**समना**) संग्राम में (**दिवः**) सूर्य के प्रकाश की (**दुहिता**) लड़कीसी हम लोगों ने (**पुरस्तात्**) दिन के पहिले (**प्रत्यदर्शि**) प्रतीति से देखी वा जैसे समस्त विद्या पढ़ा हुआ वीर जन (**ऋतस्य**) सत्य कारण के (**पन्थाम्**) मार्ग को (**अन्वेति**) अनुकूलता से प्राप्त होता वा (**साधु**) अच्छे प्रकार जैसे हो वैसे (**प्रजानतीव**) विशेष ज्ञानवाली विदुषी पढ़ी हुई पण्डिता स्त्री के समान प्रभात वेला (**दिशः**) दिशाओं को (**न**) नहीं (**मिनाति**) छोड़ती, वैसे अपना वर्त्ताव वर्त्तती हुई स्त्री उत्तम हों॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अच्छे नियम से वर्त्तमान हुई प्रातःसमय की वेला सबको आनन्दित कराती और अपने उत्तम स्वभाव को नहीं नष्ट करती, वैसे स्त्री लोग गिरस्ती के धर्म में वर्त्तें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उपो॑ अदर्शि शुन्ध्युवो॒ न वक्षो॑ नो॒धाइ॑वा॒विर॑कृत प्रि॒याणि॑।
अ॒द्मस॑न्न स॑स॒तो बो॒धय॑न्ती शश्वत्तमागा॒त्पुन॑रेयु॒षी॑णाम्॥४॥

उपो॒ इति॑। अ॒द॒र्शि॒। शु॒न्ध्यु॒व॑ः। न। वक्ष॑ः। नो॒धाः॒इ॑व। आ॒विः। अ॒कृ॒त॒। प्रि॒याणि॑। अ॒द्म॒ऽस॒त्। न। स॒स॒तः। बो॒धय॑न्ती। श॒श्व॒त्ऽत॒मा। आ। अ॒गा॒त्। पुन॑ः। आ॒ऽई॒युषी॑णाम्॥४॥

पदार्थः-(**उपो**) सामीप्ये (**अदर्शि**) दृश्यते (**शुन्ध्युवः**) आदित्यकिरणाः। **शुन्ध्युरादित्यो भवति।** (निरु०४.१६) (**न**) उपमायाम्। (निरु०१.४) (**वक्षः**) प्राप्तं वस्तु। **वक्ष इति पदनामसु।** (निघं०४.२) (**नोधाइव**) यो नौति सर्वाणि शास्त्राणि तद्वत्। **नुवो धुट् च।** (उणा०४.२२६) अनेन नुधातोरसिप्रत्ययो धुडागमश्च। (**आविः**) प्राकट्ये (**अकृत**) करोति (**प्रियाणि**) वचनानि (**अद्मसत्**) योऽद्मानि सादयति परिपचति सः (**न**) इव (**ससतः**) स्वपतः प्राणिनः (**बोधयन्ती**) जागारयन्ती (**शश्वत्तमा**) यातिशयेन सनातनी (**आ**) (**अगात्**) प्राप्नोति (**पुनः**) (**एयुषीणाम्**) समन्तादतीतानामुषसाम्॥४॥

अन्वयः-यथोषा वक्षः शुन्ध्युवो न प्रियाणि नोधाइवाद्मसन्न ससतो बोधयन्त्येयुषीणां शश्वत्तमा सती पुनरागादाविरकृत च साऽस्माभिरुपो अदर्शि तथाभूताः स्त्रियो वरा भवन्ति॥४॥

भावार्थः-अत्रोपमालङ्काराः। याः स्त्र्युषर्वत्सूर्यवद्विद्वद्वच्च स्वापत्यानि सुशिक्षया विदुषः करोति सा सर्वैः सत्कर्त्तव्येति॥४॥

पदार्थः-जैसे प्रभात वेला (**वक्षः**) पाये पदार्थ को (**शुन्ध्युवः**) सूर्य की किरणों के (**न**) समान वा (**प्रियाणि**) प्रिय वचनों की (**नोधाइव**) सब शास्त्रों की स्तुति प्रशंसा करनेवाले विद्वान् के समान वा (**अद्मसत्**) भोजन के पदार्थों को पकानेवाले के (**न**) समान (**ससतः**) सोते हुए प्राणियों को (**बोधयन्ती**) निरन्तर जगाती हुई और (**एयुषीणाम्**) सब ओर से व्यतीत हो गई प्रभात वेलाओं की (**शश्वत्तमा**) अतीव सनातन होती हुई (**पुनः**) फिर (**आ, अगात्**) आती और (**आविरकृत**) संसार को प्रकाशित करती, वह हम लोगों ने (**उपो**) समीप में (**अदर्शि**) देखी, वैसी स्त्री उत्तम होती हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार हैं। जो स्त्री प्रभात वेला वा सूर्य वा विद्वान् के समान अपने सन्तानों को उत्तम शिक्षा से विद्वान् करती है, वह सबको सत्कार करने योग्य है॥४॥

पुनस्तमेव विषयमाह

फिर उसी विषय को अगले मन्त्र में कहा है॥

पूर्वे॑ अर्धे॑ रज॑सो अ॒प्यस्य॒ गवा॒ं जनि॑त्र्यकृत॒ प्र के॒तुम्।
व्यु॑ प्रथते वित॒रं वरी॑य॒ ओभा पृ॒णन्ती॑ पि॒त्रोरु॒पस्था॑॥५॥७॥

पूर्वे॑। अर्धे॑। रज॑सः। अ॒प्यस्य॑। गवा॑म्। जनि॑त्री। अ॒कृ॒त॒। प्र। के॒तुम्। वि। ऊ॒म् इति॑। प्र॒थ॒ते॒। वि॒ऽत॒रम्। वरी॑यः। आ। उ॒भा। पृ॒णन्ती॑। पि॒त्रोः। उ॒पऽस्था॑॥५॥

पदार्थः-(**पूर्वे**) सम्मुखे वर्त्तमाने (**अर्द्धे**) (**रजसः**) लोकसमूहस्य (**अप्यस्य**) अप्तौ विस्तीर्णे संसारे भवस्य (**गवाम्**) किरणानाम् (**जनित्री**) उत्पादिका (**अकृत**) करोति (**प्र**) (**केतुम्**) किरणम् (**वि**) (**उ**) वितर्के (**प्रथते**) विस्तृणोति (**वितरम्**) विविधानि दुःखानि तरन्ति येन कर्मणा तत् (**वरीयः**) अतिशयेन वरम् (**आ**) (**उभा**) (**पृणन्ती**) सुखयन्ती (**पित्रोः**) जनकयोरिव भूमिसूर्ययोः (**उपस्था**) क्रोडे तिष्ठति सा॥५॥

अन्वयः-यथोषा उभा लोकौ पृणन्ती पित्रोरुपस्था सती वितरं वरीयो व्युप्रथते गवां जनित्र्यप्त्यस्य रजसः पूर्वेऽर्द्धे केतुं प्राकृत तथा वर्त्तमाना भार्य्योत्तमा भवति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। उषस उत्पन्नः सूर्यप्रकाशो भूगोलार्द्धे सर्वदा प्रकाशतेऽपरेऽर्द्धे रात्रिर्भवति तयोर्मध्ये सर्वदोषा विराजत एवं नैरन्तर्येण रात्र्युषर्दिनानि क्रमेण वर्त्तन्तेऽतः किमागतं यावान् भूगोलप्रदेशः सूर्यस्य संनिधौ तावति दिनं यावानसंनिधौ तावति रात्रिः। सन्ध्योरुषाश्चैवं लोकभ्रमणद्वारैतान्यपि भ्रमन्तीव दृश्यन्ते॥५॥

पदार्थः-जैसे प्रातः समय की वेला कन्या के तुल्य (**उभा**) दोनों लोकों को (**पृणन्ती**) सुख से पूरती और (**पित्रोः**) अपने माता-पिता के समान भूमि और सूर्यमण्डल की (**उपस्था**) गोद में ठहरी हुई (**वितरम्**) जिससे विविध प्रकार के दुःखों से पार होते हैं, उस (**वरीयः**) अत्यन्त उत्तम काम को (**वि, उ, प्रथते**) विशेष करके तो विस्तारती तथा (**गवाम्**) सूर्य की किरणों को (**जनित्री**) उत्पन्न करानेवाली (**अप्यस्य**) विस्तार युक्त संसार में हुए (**रजसः**) लोक समूह के (**पूर्वे**) प्रथम आगे वर्त्तमान (**अर्द्धे**) आधेभाग में (**केतुम्**) किरणों को (**प्र, आ, अकृत**) प्रसिद्ध करती है, वैसा वर्त्तमान करती हुई स्त्री उत्तम होती है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। प्रभात वेला से प्रसिद्ध हुआ सूर्यमण्डल का प्रकाश भूगोल के आधे भाग में सब कहीं उजेला करता है और आधे भाग में रात्रि होती है, उन दिन रात्रि के बीच में प्रातःसमय की वेला विराजमान है, ऐसे निरन्तर रात्रि प्रभातवेला और दिन क्रम से वर्त्तमान हैं। इससे क्या आया कि जितना पृथिवी का प्रदेश सूर्यमण्डल के आगे होता उतने में दिन और

जितना पीछे होता जाता उतने में रात्रि होती तथा सायं और प्रात:काल की सन्धि में उषा होती है। इसी उक्त प्रकार से लोकों के घूमने के द्वारा ये सायं प्रात:काल भी घूमते से दिखाई देते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम्।
अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती॥६॥

एव। इत्। एषा। पुरुऽतमा। दृशे। कम्। न। अजामिम्। न। परि। वृणक्ति। जामिम्। अरेपसा। तन्वा। शाशदाना। न। अर्भात्। ईषते। न। महः। विऽभाती॥६॥

पदार्थः-(**एव**) (**इत्**) अपि (**एषा**) (**पुरुतमा**) या बहून् पदार्थान् ताम्यति काङ्क्षति सा (**दृशे**) द्रष्टुम् (**कम्**) सुखम् (**न**) इव (**अजामिम्**) अभार्य्याम् (**न**) इव (**परि**) (**वृणक्ति**) त्यजति (**जामिम्**) भार्याम् (**अरेपसा**) अकम्पितेन (**तन्वा**) शरीरेण (**शाशदाना**) अतीव सुन्दरी (**न**) निषेधे (**अर्भात्**) अल्पात् (**ईषते**) गच्छति (**न**) निषेधे (**महः**) महत् (**विभाती**) प्रकाशयन्ती॥६॥

अन्वयः-यथारेपसा तन्वा शाशदाना पुरुतमा स्त्री देशे कं सुखं पतिं न न परिवृणक्ति पतिश्च जामिं न सुखं न परित्यजति। अजामिं च परित्यजति तथैवैषोषा अर्भादिन्महो विभाती सती स्थूलं न परिजहाति किन्तु सर्वमीषते॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पतिव्रता स्त्री स्वं पतिं विहायान्यं न संगच्छते यथा च स्त्रीव्रतः पुमान् स्वस्त्रीभिन्नां स्त्रियं न समवैति, विवाहितौ स्त्रीपुरुषौ यथानियमं यथासमयं संगच्छेते तथैवोषा नियतं देशं समयं च विहायान्यत्र युक्ता न भवति॥६॥

पदार्थः-जैसे (**अरेपसा**) न कँपते हुए निर्भय (**तन्वा**) शरीर से (**शाशदाना**) अति सुन्दरी (**पुरुतमा**) बहुत पदार्थों को चाहनेवाली स्त्री (**दृशे**) देखने के लिये (**कम्**) सुख को पति के (**न**) समान (**परि, वृणक्ति**) सब ओर से (**न**) नहीं छोड़ती पति भी (**जामिम्**) अपनी स्त्री के (**न**) समान सुख को (**न**) नहीं छोड़ता और (**अजामिम्**) जो अपनी स्त्री नहीं उसको सब प्रकार से छोड़ता है, वैसे (**एव**) ही (**एषा**) यह प्रात:समय की वेला (**अर्भात्**) थोड़े से (**इत्**) भी (**महः**) बहुत सूर्य के तेज का (**विभाती**) प्रकाश कराती हुई बड़े फैलते हुए सूर्य के प्रकाश को नहीं छोड़ती, किन्तु समस्त को (**ईषते**) प्राप्त होती है॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पतिव्रता स्त्री अपने पति को छोड़ और के पति का सङ्ग नहीं करती वा जैसे स्त्रीव्रत पुरुष अपने स्त्री से भिन्न दूसरी स्त्री का सम्बन्ध नहीं करता

और विवाह किये हुए स्त्रीपुरुष नियम और समय के अनुकूल सङ्ग करते हैं, वैसे ही प्रातःसमय की वेला नियमयुक्त देश और समय को छोड़ अन्यत्र युक्त नहीं होती॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम्।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः॥७॥

अभ्राताऽइव। पुंसः। एति। प्रतीची। गर्त्तऽआरुगिव। सनये। धनानाम्। जायाऽइव। पत्ये। उशती। सुऽवासाः। उषाः। हस्राऽइव। नि। रिणीते। अप्सः॥७॥

पदार्थः-(**अभ्रातेव**) यथाऽबन्धुस्तथा (**पुंसः**) पुरुषस्य (**एति**) प्राप्नोति (**प्रतीची**) प्रत्यञ्चतीति (**गर्त्तारुगिव**) गर्त्ते आरुगारोहणं गर्त्तारुक् तद्वत् (**सनये**) विभागाय (**धनानाम्**) द्रव्याणाम् (**जायेव**) स्त्रीव (**पत्ये**) स्वस्वामिने (**उशती**) कामयमाना (**सुवासाः**) शोभनानि वासांसि यस्याः सा (**उषाः**) (**हस्रेव**) हसन्तीव (**नि**) (**रिणीते**) प्राप्नोति (**अप्सः**) रूपम्। **अप्स इति रूपनामसु पठितम्।** (निघं०३.७)॥७॥

अन्वयः-इयमुषाः प्रतीची सत्यभ्रातेव पुंसो धनानां सनये गर्त्तारुगिव सर्वानेति पत्य उशती सुवासा जायेव पदार्थान् सेवते हस्रेव अप्सो निरिणीते॥७॥

भावार्थः-अत्र चत्वार उपमालङ्काराः। यथा भ्रातृरहिता कन्या स्वप्रीतं पतिं स्वयं प्राप्नोति, यथा न्यायाधीशो राजा राजपत्नीधनानां विभागाय न्यायाऽऽसनमाप्नोति, यथा प्रसन्नवदना स्त्री आनन्दितं पतिं प्राप्नोति, सुरूपेण हावभावं च प्रकाशयति, तथैवेयमुषा अस्तीति वेद्यम्॥७॥

पदार्थः-यह (**उषाः**) प्रातःसमय की वेला (**प्रतीची**) प्रत्येक स्थान को पहुंचती हुई (**अभ्रातेव**) विना भाई की कन्या जैसे (**पुंसः**) पुरुष को प्राप्त हो उसके समान वा जैसे (**गर्त्तारुगिव**) दुःखरूपी गढ़े में पड़ा हुआ जन (**धनानाम्**) धन आदि पदार्थों के (**सनये**) विभाग करने के लिये राजगृह को प्राप्त हो, वैसे सब ऊंचे-नीचे पदार्थों के (**एति**) पहुंचती तथा (**पत्ये**) अपने पति के लिये (**उशती**) कामना करती हुई (**सुवासाः**) और सुन्दर वस्त्रों वाली (**जायेव**) विवाहिता स्त्री के समान पदार्थों का सेवन करती और (**हस्रेव**) हँसती हुई स्त्री के तुल्य (**अप्सः**) रूप को (**नि, रिणीते**) निरन्तर प्राप्त होती है॥७॥

भावार्थः-इस मन्त्र में चार उपमालङ्कार हैं। जैसे विना भाई की कन्या अपनी प्रीति से चाहे हुए पति को आप प्राप्त होती वा जैसे न्यायाधीश राजा, राजपत्नी और धन आदि पदार्थों के विभाग करने के लिये न्यायासन अर्थात् राजगद्दी **[को]**, जैसे हँसमुखी स्त्री आनन्दयुक्त पति को प्राप्त होती और अच्छे रूप से अपने हावभाव को प्रकाशित करती, वैसे ही यह प्रातःसमय की वेला है, यह समझना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्वसा॒ स्वस्रे॒ ज्याय॑स्यै॒ योनि॑मारै॒गपै॑त्यस्याः प्रति॒चक्ष्ये॑व।
व्युच्छन्ती॑ र॒श्मिभि॒: सूर्य॑स्याञ्जि॑ङ्क्ते॒ समन॒गाइ॑व व्राः॥८॥

स्वसा॑। स्वस्रे॑। ज्याय॑स्यै। योनि॑म्। अ॒रै॒क्। अप॑। ए॒ति॒। अ॒स्याः॒। प्र॒ति॒चक्ष्य॑ऽइव। वि॒ऽउ॒च्छन्ती॑। र॒श्मिऽभि॑:। सूर्य॑स्य। अ॒ञ्जि॒। अ॒ङ्क्ते॒। सम॒न॒गाःऽइ॑व। व्राः॥८॥

पदार्थः-(**स्वसा**) भगिनी (**स्वस्रे**) भगिन्यै (**ज्यायस्यै**) ज्येष्ठायै (**योनिम्**) गृहम् (**अरैक्**) अतिरिणक्ति (**अप**) (**एति**) दूरं गच्छति (**अस्याः**) भगिन्याः (**प्रतिचक्ष्येव**) प्रत्यक्षं दृष्ट्वेव (**व्युच्छन्ती**) तमो विवासयन्ती (**रश्मिभिः**) किरणैः सह (**सूर्यस्य**) सवितुः (**अञ्जि**) व्यक्तं रूपम् (**अङ्क्ते**) प्रकाशयति (**समनगाइव**) समनमनवधारितं स्थानं गच्छन्तीव (**व्राः**) या वृणोति॥८॥

अन्वयः-हे कन्ये! यथा व्युच्छन्ती व्रा उषाः सूर्यस्य रश्मिभिः सहाञ्जि समनगाइवाङ्क्ते यथा वा स्वसा ज्यायस्यै स्वस्रे योनिमारैगस्या वर्त्तमानं प्रतिचक्ष्येवापैति विवाहाय दूरं गच्छति तथा त्वं भव॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। कनिष्ठा भगिनी ज्येष्ठाया वर्त्तमानं वृत्तं विज्ञाय स्वयंवराय दूरेऽपि स्थितं योग्यं पतिं गृह्णीयात्। यथा शान्ताः पतिव्रताः स्त्रियः स्वं स्वं पतिं सेवन्ते तथा स्वं पतिं सेवेत यथा च सूर्यः स्वकान्त्या कान्तिः सूर्येण च सह नित्यमानुकूल्येन वर्त्तेत तथैव स्त्रीपुरुषौ स्याताम्॥८॥

पदार्थः-हे कन्या! जैसे (**व्युच्छन्ती**) अन्धकार का निवारण करती हुई (**व्राः**) पदार्थों को स्वीकार करनेवाली प्रातःसमय की वेला (**सूर्यस्य**) सूर्यमण्डल की (**रश्मिभिः**) किरणों के साथ (**अञ्जि**) प्रसिद्ध रूप को (**समनगाइव**) निश्चय किये स्थान को जानने वाली स्त्री के समान (**अङ्क्ते**) प्रकाश करती है वा जैसे (**स्वसा**) बहिन (**ज्यायस्यै**) जेठी (**स्वस्रे**) बहिन के लिये (**योनिम्**) अपने स्थान को (**अरैक्**) छोड़ती अर्थात् उत्थान देती तथा (**अस्याः**) इस अपनी बहिन के वर्त्तमान हाल को (**प्रतिचक्ष्येव**) प्रत्यक्ष देख के जैसे वैसे विवाह के लिये (**अपैति**) दूर जाती है, वैसी तू हो॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। छोटी बहिन जेठी बहिन के वर्त्तमान हाल को जानकर आप स्वयंवर विवाह के लिये दूर भी ठहरे हुए अपने अनुकूल पति का ग्रहण करे, जैसे शान्त पतिव्रता स्त्री अपने पति को सेवन करती है, वैसे अपने पति का सेवन करे, जैसे सूर्य अपनी कान्ति के साथ और कान्ति सूर्य के साथ नित्य अनुकूलता से वर्त्ते, वैसे ही स्त्री-पुरुष हों॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात्।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः॥ ९॥

आसाम्। पूर्वासाम्। अहऽसु। स्वसॄणाम्। अपरा। पूर्वाम्। अभि। एति। पश्चात्। ताः। प्रत्नऽवत्। नव्यसीः। नूनम्। अस्मे इति। रेवत्। उच्छन्तु। सुऽदिनाः। उषसः॥ ९॥

पदार्थः-(**आसाम्**) (**पूर्वासाम्**) ज्येष्ठानाम् (**अहसु**) दिनेषु। अत्र **वाच्छन्दसी**ति रोरभावे नलोपः। (**स्वसॄणाम्**) भगिनीनाम् (**अपरा**) (**पूर्वाम्**) (**अभि**) (**एति**) प्राप्नुयात् (**पश्चात्**) (**ताः**) (**प्रत्नवत्**) प्रत्नः प्राचीनो निधिर्विद्यते यस्मिन् (**नव्यसीः**) (**नूनम्**) निश्चितम् (**अस्मे**) अस्मभ्यम् (**रेवत्**) प्रशस्तपदार्थयुक्तं द्रव्यम् (**उच्छन्तु**) तमो विवासयन्तु (**सुदिनाः**) शोभनानि दिनानि याभ्यस्ताः (**उषसः**) उषसः प्रभाताः। अत्रा**न्येषाप**पी**ति दीर्घः॥ ९॥

अन्वयः-यथाऽऽसां पूर्वासां स्वसॄणामपरा काचिद्भगिन्यहसु केषु चिदहःसु पूर्वां भगिनीमभ्येति पश्चात् स्वगृहं गच्छेत् तथा सुदिना उषासोऽस्मे नूनं प्रत्नवद्रेवन्नव्यसीः प्रकाशयन्तु ता उच्छन्तु च॥ ९॥

भावार्थः-यथा बहवो भगिन्यो दूरे दूरे देशे विवाहिताः कदाचित् कयाचित् सह काचिन्मिलती स्वव्यवहारमाख्याति तथा पूर्वा उषसो वर्त्तमानया सह संयुज्य स्वव्यवहारं प्रकटयन्ति॥ ९॥

पदार्थः-जैसे (**आसाम्**) इन (**पूर्वासाम्**) प्रथम उत्पन्न जेठी (**स्वसॄणाम्**) बहिनों में (**अपरा**) अन्य कोई पीछे उत्पन्न हुई छोटी बहिन (**अहसु**) किन्हीं दिनों में अपनी (**पूर्वाम्**) जेठी बहिन के (**अभ्येति**) आगे जावे और (**पश्चात्**) पीछे अपने घर को चली जावे, वैसे (**सुदिनाः**) जिनसे अच्छे-अच्छे दिन होते वे (**उषसः**) प्रातःसमय की वेला (**अस्मे**) हम लोगों के लिये (**नूनम्**) निश्चययुक्त (**प्रत्नवत्**) जिसमें पुरानी धन की धरोहर है, उस (**रेवत्**) प्रशंसित पदार्थयुक्त धन को (**नव्यसीः**) प्रतिदिन अत्यन्त नवीन होती हुई प्रकाश करे (**ताः**) वे (**उच्छन्तु**) अन्धकार को निकाला (दूर) करें॥ ९॥

भावार्थः-जैसे बहुत बहिनें दूर-दूर देश में विवाही हुई होती उनमें कभी किसी के साथ कोई मिलती और अपने व्यवहार को कहती है, वैसे पिछली प्रातःसमय की वेला वर्त्तमान वेला के साथ संयुक्त होकर अपने व्यवहार को प्रसिद्ध करती हैं॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत् स्तोत्रे सूनृते जारयन्ती॥ १०॥ ८॥

प्र। बोधय। उषः। पृणतः। मघोनि। अबुध्यमानाः। पणयः। ससन्तु। रेवत्। उच्छ। मघवद्भ्यः। मघोनि। रेवत्। स्तोत्रे। सूनृते। जरयन्ती।१०॥

पदार्थः-(**प्र**) (**बोधय**) (**उषः**) उषर्वद्वर्त्तमाने (**पृणतः**) पालयतः (**पुष्टान्**) प्राणिनः (**मघोनि**) पूजितधनयुक्ते (**अबुध्यमानाः**) (**पणयः**) व्यवहारयुक्ताः (**ससन्तु**) स्वपन्तु (**रेवत्**) प्रशस्तधनवत् (**उच्छ**) (**मघवद्भ्यः**) प्रशंसितधनेभ्यः (**मघोनि**) बहुधनकारिके (**रेवत्**) नित्यं संबद्धं धनम् (**स्तोत्रे**) स्तावकाय (**सूनृते**) सुष्ठु सत्यस्वभावे (**जारयन्ती**) वयो गमयन्ती॥१०॥

अन्वयः-हे मघोन्युषः स्त्रि! त्वं येऽबुध्यमानाः पणयः उषस्समये दिने वा ससन्तु तान् पृणत उषर्वत् प्रबोधय। हे मघोनि सूनृते! त्वमुषर्वज्जारयन्ती मघवद्भ्यो रेवत् स्तोत्रे रेवदुच्छ प्रापय॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। न केनचिद् रात्रेः पश्चिमे यामे दिने वा शयितव्यम्। कुतो निद्रादिनयोरधिकोष्णतायोगेन रोगाणां प्रादुर्भावात् कार्यावस्थयोर्हानेश्च। यथा पुरुषार्थयुक्त्या पुष्कलं धनं प्राप्नोति तथा सूर्योदयात् प्रागुत्थाय यत्नवान् दारिद्र्यं जहाति॥१०॥

पदार्थः-हे (**मघोनि**) उत्तम धनयुक्त (**उषः**) प्रभातवेला के तुल्य वर्त्तमान स्त्री! तू जो (**अबुध्यमानाः**) अचेत नींद में डूबे हुए वा (**पणयः**) व्यवहारयुक्त प्राणी प्रभात समय वा दिन में (**ससन्तु**) सोवें उनकी (**पृणतः**) पालना करनेवाले पुष्ट प्राणियों को प्रातःसमय की वेला के प्रकाश के समान (**प्र, बोधय**) बोध करा। हे (**मघोनि**) अतीव धन इकट्ठा करनेवाली (**सूनृते**) उत्तम सत्यस्वभावयुक्त युवति! तू प्रभात वेला के समान (**जारयन्ती**) अवस्था व्यतीत कराती हुई (**मघवद्भ्यः**) प्रशंसित धनवानों के लिये (**रेवत्**) उत्तम धनयुक्त व्यवहार जैसे हो वैसे (**स्तोत्रे**) स्तुति प्रशंसा करनेवाले के लिये (**रेवत्**) स्थिर धन की (**उच्छ**) प्राप्ति करा॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। किसी को रात्रि के पिछले पहर में वा दिन में न सोना चाहिये, क्योंकि नींद और दिन के (धूप) घाम आदि की अधिक गरमी के योग से रोगों की उत्पत्ति होने से तथा काम और अवस्था की हानि से, जैसे पुरुषार्थ की युक्ति से बहुत धन को प्राप्त होता, वैसे सूर्योदय से पहिले उठ कर यत्नवान् पुरुष दरिद्रता का त्याग करता है॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अवेयमश्वैद्युवतिः पुरस्ताद्युडक्ते गवामरुणानामनीकम्।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः॥११॥

अव। इयम्। अश्वैत्। युवतिः। पुरस्तात्। युड्क्ते। गवाम्। अरुणानाम्। अनीकम्। वि। नूनम्। उच्छात्। असति। प्र। केतुः। गृहम्ऽगृहम्। उप। तिष्ठाते। अग्निः॥११॥

पदार्थः-(**अव**) (**इयम्**) (**अश्वैत्**) वर्द्धते (**युवतिः**) पूर्णचतुर्विंशतिवार्षिकी (**पुरस्तात्**) प्रथमतः (**युङ्क्ते**) समवैति (**गवाम्**) किरणानां गवादीनां पशूनां वा (**अरुणानाम्**) रक्तानाम् (**अनीकम्**) सैन्यमिव समूहम् (**वि**) (**नूनम्**) (**उच्छात्**) प्राप्नुयात् (**असति**) स्यात् (**प्र**) (**केतुः**) उद्गतशिखा प्रज्ञावती वा (**गृहंगृहम्**) (**उप**) (**तिष्ठाते**) तिष्ठेत (**अग्निः**) अरुणतरुणतापस्तीव्रप्रतापो वा॥११॥

अन्वयः-यथेयमुषा अरुणानां गवामनीकं युङ्क्ते पुरस्तादवाश्वैच्च तथा युवतिररुणानां गवामनीकं युङ्क्तेऽवाश्वैत्ततः प्रकेतुरुषा असति नूनं व्युच्छात्। अग्निरस्या प्रतापो गृहंगृहमुपतिष्ठाते युवतिश्च प्रकेतुरसति नूनं व्युच्छात्। अग्निरस्याः प्रतापो गृहंगृहमुपतिष्ठाते॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषर्दिने सदैव समवेते वर्त्तेते तथैव विवाहितौ स्त्रीपुरुषौ वर्त्तेयातां यथानियतं सर्वान् पदार्थान् प्राप्नुयातां च तदानयोः प्रतापो वर्द्धते॥११॥

पदार्थः-जैसे (**इयम्**) यह प्रभातवेला (**अरुणानाम्**) लाली लिये हुए (**गवाम्**) सूर्य की किरणों के (**अनीकम्**) सेना के समान समूह को (**युङ्क्ते**) जोड़ती और (**पुरस्तादवाश्वैत्**) पहिले से बढ़ती है, वैसे (**युवतिः**) पूरी चौबीस वर्ष की जवान स्त्री लाल रङ्ग के गौ आदि पशुओं के समूह को जोड़ती पीछे उन्नति को प्राप्त होती इससे (**प्र, केतुः**) उठी है शिखा जिसकी वह बढ़ती हुई प्रभात वेला (**असति**) हो और (**नूनम्**) निश्चय से (**व्युच्छात्**) सबको प्राप्त हो (**अग्निः**) तथा सूर्यमण्डल का तरुण ताप उत्कट धाम (**गृहंगृहम्**) घर-घर (**उप, तिष्ठाते**) उपस्थित हो युवति भी उत्तम बुद्धिवाली होती, निश्चय से सब पदार्थों को प्राप्त होती और इसका उत्कट प्रताप घर-घर उपस्थित होता अर्थात् सब स्त्री पुरुष जानते और मानते हैं॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभातवेला और दिन सदैव मिले हुए वर्त्तमान हैं, वैसे ही विवाहित स्त्री-पुरुष मेल से अपना वर्त्ताव रक्खें और जिस नियम के जो पदार्थ हों उस नियम से उनको पावें तब इनका प्रताप बढ़ता है॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒त्ते वय॑श्चिद्वस॒तेर॑पप्तन् नर॑श्च॒ ये पि॑तु॒भाजो॒ व्यु॑ष्टौ।
अ॒मा स॒ते व॑हसि॒ भूरि॑ वा॒ममुषो॑ देवि दा॒शुषे॒ मर्त्या॑य॥ १२॥

उत्। ते॒। वयः॑। चि॒त्। व॒स॒तेः॒। अ॒प॒प्त॒न्। नरः॑। च॒। ये। पि॒तु॒ऽभाजः॑। विऽउ॑ष्टौ। अ॒मा। स॒ते। व॒ह॒सि॒। भूरि॑। वा॒मम्। उषः॑। दे॒वि॒। दा॒शुषे॑। मर्त्या॑य॥ १२॥

पदार्थः-(**उत्**) (**ते**) तुभ्यम् (**वयः**) (**चित्**) अपि (**वसतेः**) निवासात् (**अपप्तन्**) पतन्ति (**नरः**) मनुष्याः (**च**) (**ये**) (**पितुभाजः**) अन्नस्य विभाजकाः (**व्युष्टौ**) विशिष्टे निवासे (**अमा**) समीपस्थगृहाय (**सते**) वर्त्तमानाय (**वहसि**) (**भूरि**) बहु (**वामम्**) प्रशस्यम् (**उषः**) उषर्वद्विद्याप्रकाशयुक्ते (**देवि**) दात्रि (**दाशुषे**) दात्रे (**मर्त्याय**) नराय पतये॥१२॥

अन्वयः-हे नरो! ये पितुभाजो यूयं चिद् यथा वयो वसतेरुदपप्तन् तथा व्युष्टावमा सते भवत। हे उषर्वद्देवि स्त्रि! या त्वं च दाशुषे मर्त्यायामासते भूरि वामं वहसि तस्यै ते तुभ्यमेतत्पतिरपि वहतु॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पक्षिण उपर्य्यधो गच्छन्ति तथोषा रात्रिदिनयोरुपर्य्यधो गच्छति, या स्त्री पत्युः प्रियाचरणं कुर्य्यात्तथैवं पतिरपि करोतु॥१२॥

पदार्थः-हे (**नरः**) मनुष्यो! (**ये**) जो (**पितुभाजः**) अन्न का विभाग करनेवाले तुम लोग (**चित्**) भी जैसे (**वयः**) अवस्था को (**वसतेः**) वसीति से (**उत्, अपप्तन्**) उत्तमता के साथ प्राप्त होते, वैसे ही (**व्युष्टौ**) विशेष निवास में (**अमा**) समीप के घर वा (**सते**) वर्त्तमान व्यवहार के लिये होओ और हे (**उषः**) प्रातःसमय के प्रकाश के समान विद्याप्रकाशयुक्त (**देवि**) उत्तम व्यवहार की देनेवाली स्त्री! जो तू (**च**) भी (**दाशुषे**) देनेवाले (**मर्त्याय**) अपने पति के लिये तथा समीप के घर और वर्त्तमान व्यवहार के लिये (**भूरि**) बहुत (**वामम्**) प्रशंसनीय व्यवहार की (**वहसि**) प्राप्ति करती उस (**ते**) तेरे लिये उक्त व्यवहार की प्राप्ति तेरा पति भी करे॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पखेरू ऊपर नीचे जाते हैं, वैसे प्रातःसमय की वेला रात्रि और दिन के ऊपर और नीचे जाती है तथा जैसे स्त्री पति के प्रियाचरण को करे, वैसे ही पति भी स्त्री के प्यारे आचरण को करे॥१२॥

पुनः कीदृश्यः स्त्रियो वरा भवेयुरित्याह॥

फिर कैसी स्त्री श्रेष्ठ हों, इस विषय को अगले मन्त्र में कहा है॥

अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः।
युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजम्॥१३॥९॥

अस्तोढ्वम्। स्तोम्याः। ब्रह्मणा। मे। अवीवृधध्वम्। उशतीः। उषसः। युष्माकम्। देवीः। अवसा। सनेम। सहस्रिणम्। च। शतिनम्। च। वाजम्॥१३॥

पदार्थः-(**अस्तोढ्वम्**) स्तुवत (**स्तोम्याः**) स्तोतुमर्हाः (**ब्रह्मणा**) वेदेन (**मे**) मह्यम् (**अवीवृधध्वम्**) वर्द्धयत (**उशतीः**) कामयमानाः (**उषासः**) प्रभाताः। अत्रा**न्येषामपी**त्युपधादीर्घः। (**युष्माकम्**) (**देवीः**) दिव्यविद्यायुक्ताः (**अवसा**) रक्षणाद्येन (**सनेम**) अन्येभ्यो दद्याम। (**सहस्रिणम्**)

सहस्रमसंख्याता गुणा विद्यन्ते यस्मिंस्तम् **(च)** **(शतिनम्)** शतशो विद्यायुक्तम् **(च)** **(वाजम्)** विज्ञानमयं बोधम्॥१३॥

अन्वयः-हे उषास! उषोभिस्तुल्या स्तोम्या देवीर्विदुष्यो ब्रह्मणा उशतीर्यूयं मे विद्या अस्तोढ्वमवीवृधध्वम्। युष्माकमवसा सहस्रिणं च शतिनं च वाजं साङ्गसरहस्यवेदादिशास्त्रबोधं सनेम॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषसः शुभगुणकर्मस्वभावाः सन्ति, तद्वत् स्त्रियो भवेयुस्तथाऽत्युत्तमा मनुष्या भवेयुः। यथान्यस्माद्विदुषः स्वप्रयोजनाय विद्या गृह्णीयुस्तथैव प्रीत्यान्येभ्योऽपि दद्युः॥१३॥

अत्रोषसो दृष्टान्तेन स्त्रीणां गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति बोध्यम्॥

इति चतुर्विंशतत्युत्तरशततमं १२४ सूक्तं नवमो ९ वर्गश्च समाप्तः॥

पदार्थः-हे **(उषासः)** प्रभात वेलाओं के तुल्य **(स्तोम्याः)** स्तुति करने योग्य **(देवीः)** दिव्य विद्यागुणवाली पण्डिताओ! **(ब्रह्मणा)** वेद से **(उशतीः)** कामना और कान्ति को प्राप्त होती हुई तुम **(मे)** मेरे लिये विद्याओं की **(अस्तोढ्वम्)** स्तुति प्रशंसा करो और **(अवीवृधध्वम्)** हम लोगों की उन्नति कराओ तथा **(युष्माकम्)** तुम्हारी **(अवसा)** रक्षा आदि से **(सहस्रिणम्)** जिसमें सहस्रों गुण विद्यमान **(च)** और जो **(शतिनम्)** सैकड़ो प्रकार की विद्याओं से युक्त **(च)** और **(वाजम्)** अङ्ग, उपाङ्ग, उपनिषदों सहित वेदादि शास्त्रों का बोध उसको दूसरों के लिये हम लोग **(सनेम)** देवें॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रातर्वेला अच्छे गुण, कर्म और स्वभाववाली हैं, वैसी स्त्री हों और वैसे उत्तम गुण, कर्म वाले मनुष्य हों। जैसे अन्य विद्वान् से अपने प्रयोजन के लिये विद्या लेवें, वैसे ही प्रीति से औरों के लिये भी विद्या देवें॥१३॥

इस सूक्त में प्रभात वेला के दृष्टान्त से स्त्रियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ चौबीसवां १२४ सूक्त और नवां ९ वर्ग समाप्त हुआ॥

प्राता रत्नमिति पञ्चविंशत्युत्तरशततमस्य सप्तर्चस्य सूक्तस्य दैर्घतमसः कक्षीवान् ऋषिः। दम्पती देवते। १,३,७ त्रिष्टुप् छन्दः। २,६ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४,५ जगती छन्दः। निषादः स्वरः॥

अथ कोऽत्र धन्यवादार्हो भूत्वाऽखिलसुखानि प्राप्नुयादित्याह॥

अब सात ऋचावाले एक सौ पच्चीसवें १२५ सूक्त का आरम्भ है। उसके प्रथम मन्त्र में इस संसार में कौन धन्यवाद के योग्य होकर सब सुखों को प्राप्त हो, इस विषय को कहते हैं॥

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान् प्रतिगृह्या नि धत्ते।
तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः॥ १॥

प्रातरिति। रत्नम्। प्रातः।इत्वा। दधाति। तम्। चिकित्वान्। प्रति।गृह्य। नि। धत्ते। तेन। प्र।जाम्। वर्धयमानः। आयुः। रायः। पोषेण। सचते। सु।वीरः॥ १॥

पदार्थः-(**प्रातः**) प्रभाते (**रत्नम्**) रम्यानन्दं वस्तु (**प्रातरित्वा**) यः प्रातरेव जागरणमेति सः। अत्र प्रातरूपपदादिण् धातोः क्वनिप्। (**दधाति**) (**तम्**) (**चिकित्वान्**) विज्ञानवान् (**प्रतिगृह्य**) दत्वा गृहीत्वा च। अत्रा**न्येषामपी**ति दीर्घः। (**नि**) (**धत्ते**) नित्यं धरति (**तेन**) (**प्रजाम्**) पुत्रपौत्रादिकाम् (**वर्द्धयमानः**) विद्यासुशिक्षयोन्नयमानः (**आयुः**) जीवनम् (**रायः**) धनस्य (**पोषेण**) पुष्ट्या (**सचते**) समवैति (**सुवीरः**) शोभनश्चासौ वीरश्च सः॥ १॥

अन्वयः-यश्चिकित्वान् प्रातरित्वा सुवीरो मनुष्यः प्राता रत्नं दधाति प्रतिगृह्य तं निधत्ते तेन रायस्पोषेण प्रजामायुश्च वर्द्धयमानः सचते स सततं सुखी भवति॥ १॥

भावार्थः-य आलस्यं विहाय धर्म्येण व्यवहारेण धनं प्राप्य संरक्ष्य भुक्त्वा भोजयित्वा दत्वा गृहीत्वा च सततं प्रयतेत, स सर्वाणि सुखानि प्राप्नुयात्॥ १॥

पदार्थः-जो (**चिकित्वान्**) विशेष ज्ञानवान् (**प्रातरित्वा**) प्रातःकाल में जागनेवाला (**सुवीरः**) सुन्दर वीर मनुष्य (**प्रातः, रत्नम्**) प्रभात समय में रमण करने योग्य आनन्दमय पदार्थ को (**दधाति**) धारण करता और (**प्रतिगृह्य**) दे लेकर फिर (**तम्**) उसको (**नि, धत्ते**) नित्य धारण वा (**तेन**) उस (**रायस्पोषेण**) धन की पुष्टि से (**प्रजाम्**) पुत्र-पौत्र आदि सन्तान और (**आयुः**) आयुर्दा को (**वर्द्धयमानः**) विद्या और उत्तम शिक्षा से बढ़ाता हुआ (**सचते**) उसका सम्बन्ध करता है, वह निरन्तर सुखी होता है॥ १॥

भावार्थः-जो आलस्य को छोड़ धर्म सम्बन्धी व्यवहार से धन को पा उसकी रक्षा, उसका स्वयं भोग कर, दूसरों को भोग करा और दे-लेकर निरन्तर उत्तम यत्न करे, वह सब सुखों को प्राप्त होवे॥ १॥

कोऽत्र धर्मात्मा यशस्वी जायत इत्याह॥

इस संसार में कौन धर्मात्मा और यशस्वी कीर्त्तिमान् होता है, इस विषय को अगले मन्त्र में कहा है॥

सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति।
यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति॥ २॥

सुऽगुः। असत्। सुऽहिरण्यः। सुऽअश्वः। बृहत्। अस्मै। वयः। इन्द्रः। दधाति। यः। त्वा। आऽयन्तम्। वसुना। प्रातःऽइत्वः। मुक्षीजयाऽइव। पदिम्। उत्ऽसिनाति॥ २॥

पदार्थः-(**सुगुः**) शोभना गावो यस्य सः (**असत्**) भवेत् (**सुहिरण्यः**) शोभनानि हिरण्यानि यस्य सः (**स्वश्वः**) शोभना अश्वा यस्य सः (**बृहत्**) महत् (**अस्मै**) (**वयः**) चिरंजीवनम् (**इन्द्रः**) ऐश्वर्यवान् (**दधाति**) (**यः**) (**त्वा**) त्वाम् (**आयन्तम्**) आगच्छन्तम् (**वसुना**) उत्तमेन द्रव्येण सह (**प्रातरित्वः**) प्रातःकालमारभ्य प्रयत्नकर्त्तः (**मुक्षीजयेव**) मुक्ष्या मुञ्जाया जायते सा मुक्षीजा तयेव (**पदिम्**) पद्यते गम्यते या श्रीस्ताम् (**उत्सिनाति**) उत्कृष्टतया बध्नाति॥ २॥

अन्वयः-हे प्रातरित्वो य इन्द्रो वसुना आयन्तं त्वा दधात्यस्मै बृहद्वयश्च मुक्षीजयेव पदिमुत्सिनाति स सुगुस्सुहिरण्यस्स्वश्वोऽसद्भवेत्॥ २॥

भावार्थः-यो विद्वान् प्राप्तान् शिष्यान् सुशिक्षयाऽधर्मविषयलोलुपतात्यागोपदेशेन दीर्घायुषो विद्यावतः श्रीमतश्च करोति सोऽत्र पुण्यकीर्त्तिर्जायते॥ २॥

पदार्थः-हे (**प्रातरित्वः**) प्रातःसमय से लेकर अच्छा यत्न करनेहारे (**यः**) जो (**इन्द्रः**) ऐश्वर्य्यवान् पुरुष (**वसुना**) उत्तम धन के साथ (**आयन्तम्**) आते हुए (**त्वा**) तुझको (**दधाति**) धारण करता (**अस्मै**) इस कार्य के लिये (**बृहत्**) बहुत (**वयः**) चिरकाल तक जीवन और (**मुक्षीजयेव**) जो मूंज से उत्पन्न होती उससे जैसे बांधना बने जैसे साधन से (**पदिम्**) प्राप्त होते हुए धन को (**उत्सिनाति**) अत्यन्त बांधता अर्थात् सम्बन्ध करता, वह (**सुगुः**) सुन्दर गौंओं (**सुहिरण्यः**) अच्छे-अच्छे सुवर्ण आदि धनों और (**स्वश्वः**) उत्तम-उत्तम घोड़ोंवाला (**असत्**) होवे॥ २॥

भावार्थः-जो विद्वान् पाये हुए शिष्यों को उत्तम शिक्षा अर्थात् अधर्म और विषय भोग की चञ्चलता के त्याग आदि के उपदेश से बहुत आर्युदायुक्त विद्या और धनवाले करता है, वह इस संसार में उत्तम कीर्त्तिमान् होता है॥ २॥

पुनरत्र स्त्रीपुरुषौ कीदृशौ भवेतामित्याह॥

फिर इस संसार में स्त्री और पुरुष कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

आय॑म॒द्य सु॒कृतं॑ प्रा॒तरि॒च्छन्नि॒ष्टेः पु॒त्रं वसु॑मता॒ रथे॑न।
अं॒शोः सु॒तं पा॑यय मत्स॒रस्य॑ क्षयद्वी॒रं व॑र्धय सू॒नृता॑भिः॥ ३॥

आय॑म्। अ॒द्य। सु॒ऽकृत॑म्। प्रा॒तः। इ॒च्छन्। इ॒ष्टेः। पु॒त्रम्। वसु॑ऽमता। रथे॑न। अं॒शोः। सु॒तम्। पा॒य॒य॒। म॒त्स॒रस्य॑। क्षयत्ऽवीरम्। व॒र्ध॒य॒। सू॒नृता॑भिः॥ ३॥

पदार्थः-(**आयम्**) आगच्छेयं प्राप्नुयाम् (**अद्य**) अस्मिन् दिने (**सुकृतम्**) धर्म्यं कर्म (**प्रातः**) प्रभाते (**इच्छन्**) (**इष्टेः**) इष्टस्य गृहाश्रमस्य स्थानात् (**पुत्रम्**) पवित्रं तनयम् (**वसुमता**) प्रशंसितधनयुक्तेन (**रथेन**) रमणीयेन यानेन (**अंशोः**) स्त्रीशरीरस्य भागात् (**सुतम्**) उत्पन्नम् (**पायय**) (**मत्सरस्य**) हर्षनिमित्तस्य (**क्षयद्वीरम्**) क्षयतां शत्रूहन्तॄणां मध्ये प्रशंसायुक्तम् (**वर्द्धय**) उन्नय (**सूनृताभिः**) विद्यासत्यभाषणादिशुभ-गुणयुक्ताभिर्वाणीभिः॥ ३॥

अन्वयः-हे धात्रि! अहमद्य वसुमता रथेन प्रातरिष्टेः सुकृतमिच्छन् यं पुत्रमायँस्तं सुतं मत्सरस्यांशो रसं पायय सूनृताभिः क्षयद्वीरं वर्द्धय॥ ३॥

भावार्थः-स्त्रीपुरुषौ पूर्णब्रह्मचर्य्येण विद्यां संगृह्य परस्परस्य प्रसन्नतया विवाहं कृत्वा धर्म्येण व्यवहारेण पुत्रादीनुत्पादयेताम्। तद्रक्षायै धार्मिकी धात्रीं समर्प्पयेतां सा चेमं सुशिक्षया सम्पन्नं कुर्यात्॥ ३॥

पदार्थः-हे धायि! मैं (**अद्य**) (**वसुमता**) प्रशंसित धनयुक्त (**रथेन**) मनोहर रमण करने योग्य रथ आदि यान से (**प्रातः**) प्रभात समय (**इष्टेः**) चाहे हुए गृहाश्रम के स्थान से (**सुकृतम्**) धर्मयुक्त काम की (**इच्छन्**) इच्छा करता हुआ जिस (**पुत्रम्**) पवित्र बालक को (**आयम्**) पाऊं उस (**सुतम्**) उत्पन्न हुए पुत्र को (**मत्सरस्य**) आनन्द करानेवाला जो (**अंशोः**) स्त्री का शरीर उसके भाग से जो रस अर्थात् दूध उत्पन्न होता, उस दूध को (**पायय**) पिला। हे वीर! (**सूनृताभिः**) विद्या, सत्यभाषण आदि शुभगुणयुक्त वाणियों से (**क्षयद्वीरम्**) शत्रुओं का क्षय करनेवालों में प्रशंसित वीर पुरुष की (**वर्द्धय**) उन्नति कर॥ ३॥

भावार्थः-स्त्री-पुरुष पूरे ब्रह्मचर्य से विद्या का संग्रह और एक-दूसरे की प्रसन्नता से विवाह कर धर्मयुक्त व्यवहार से पुत्र आदि सन्तानों को उत्पन्न करें और उनकी रक्षा कराने के लिये धर्मवती धायि को देवें और वह इस सन्तान को उत्तम शिक्षा से युक्त करे॥ ३॥

पुनःस्त्रीपुरुषौ किं कुर्यातामित्याह॥

फिर स्त्री-पुरुष क्या करें, इस विषय को अगले मन्त्र में कहा है॥

उप॑ क्षरन्ति॒ सिन्ध॑वो मयो॒भुव॑ ई॒जा॒नं च॑ यु॒क्ष्यमा॑णं च धे॒नव॑ः।
पृ॒णन्तं॑ च॒ पपु॑रिं च श्रव॒स्यवो॑ घृ॒तस्य॒ धारा॒ उप॑ यन्ति वि॒श्वत॑ः॥ ४॥

उप॑। क्ष॒र॒न्ति॒। सिन्ध॑वः। म॒य॒ःऽभुव॑ः। ई॒जा॒नम्। च॒। यु॒क्ष्यमा॑णम्। च॒। धे॒नव॑ः। पृ॒णन्त॑म्। च॒। पपु॑रिम्। च॒। श्र॒व॒स्यव॑ः। घृ॒तस्य॑। धारा॑ः। उप॑। य॒न्ति॒। वि॒श्वत॑ः॥ ४॥

पदार्थः-**(उप) (क्षरन्ति)** वर्षन्तु **(सिन्धवः)** नदा इव **(मयोभुवः)** सुखं भावुकाः **(ईजानम्)** यज्ञं कुर्वन्तम् **(च) (यक्ष्यमाणम्)** यज्ञं करिष्यमाणम् **(च) (धेनवः)** पयःप्रदा गाव इव **(पृणन्तम्)** पुष्यन्तम् **(च) (पपुरिम्)** पुष्टम् **(च) (श्रवस्यवः)** स्वयं श्रोतुमिच्छवः **(घृतस्य)** जलस्य **(धाराः) (उप) (यन्ति) (विश्वतः)** सर्वतः॥४॥

अन्वयः-ये सिन्धव इव मयोभुवा जना धेनव इव पत्न्यो धात्र्यो वा ईजानं यक्ष्यमाणं चोपक्षरन्ति। ये श्रवस्यवो विद्वांसो विदुष्यश्च पृणन्तं पपुरिं च शिक्षन्ते ते विश्वतो घृतस्य धारा इव सुखान्युपयन्ति प्राप्नुवन्ति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये पुरुषाः स्त्रियश्च गृहाश्रमे परस्परस्य प्रियाचरणं कृत्वा विद्या अभ्यस्य सन्तानानभ्यासयन्ति ते सततं सुखान्यश्नुवते॥४॥

पदार्थः-जो **(सिन्धवः)** बड़े नदों के समान **(मयोभुवः)** सुख की भावना करानेवाले मनुष्य और **(धेनवः)** दूध देनेहारी गौओं के समान विवाही हुई स्त्री वा धायी **(ईजानम्)** यज्ञ करते **(च)** और **(यक्ष्यमाणम्)** यज्ञ करनेवाले पुरुष के **(उप, क्षरन्ति)** समीप आनन्द वर्षावें वा जो **(श्रवस्यवः)** आप सुनने की इच्छा करते हुए विद्वान् **(च)** और विदुषी स्त्री **(पृणन्तम्)** पुष्ट होते **(च)** और **(पपुरिम्)** पुष्ट हुए **(च)** भी पुरुष को शिक्षा देते हैं, वे **(विश्वतः)** सब ओर से **(घृतस्य)** जल की **(धाराः)** धाराओं के समान सुखों को **(उप, यन्ति)** प्राप्त होते हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पुरुष और स्त्री गृहाश्रम में एक-दूसरे के प्रिय आचरण और विद्याओं का अभ्यास करके सन्तानों को अभ्यास कराते हैं, वे निरन्तर सुखों को प्राप्त होते हैं॥४॥

मनुष्यैः कैः कर्मभिरत्र मोक्ष आप्तव्य इत्याह॥

इस संसार में मनुष्यों को किन कामों से मोक्ष प्राप्त हो सकता है, इस विषय को अगले मन्त्र में कहा है॥

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा॥५॥

नाकस्य। पृष्ठे। अधि। तिष्ठति। श्रितः। यः। पृणाति। सः। ह। देवेषु। गच्छति। तस्मै। आपः। घृतम्। अर्षन्ति। सिन्धवः। तस्मै। इयम्। दक्षिणा। पिन्वते। सदा॥५॥

पदार्थः-**(नाकस्य)** अविद्यमानदुःखस्यानन्दस्य **(पृष्ठे)** आधारे **(अधि)** उपरिभावे **(तिष्ठति) (श्रितः)** विद्यामाश्रितः **(यः) (पृणाति)** विद्यासुशिक्षासंस्कृताऽन्नाद्यैः स्वयं पुष्यति सन्तानान् पोषयति च

(सः) (ह) किल **(देवेषु)** दिव्येषु गुणेषु विद्वत्सु वा **(गच्छति)** **(तस्मै)** **(आपः)** प्राणा जलानि वा **(घृतम्)** आज्यम् **(अर्षन्ति)** वर्षन्ति **(सिन्धवः)** नद्यः **(तस्मै)** **(इयम्)** अध्यापनजन्या **(दक्षिणा)** **(पिन्वते)** प्रीणाति **(सदा)**॥५॥

अन्वयः-यो मनुष्यो देवेषु गच्छति स ह विद्यामाश्रितः सन् नाकस्य पृष्ठेऽधि तिष्ठति सर्वान् पृणाति तस्मा आपः सदा घृतमर्षन्ति तस्मा इयं दक्षिणा सिन्धवः सदा पिन्वते॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या नरदेहमाश्रित्य सत्पुरुषसंगं धर्म्याऽचारं च सदा कुर्वन्ति, ते सदैव सुखिनो भवन्ति। ये विद्वांसो या विदुष्यो बालकान् यूनो वृद्धांश्च कन्या युवतिर्वृद्धाश्च निष्कपटतया विद्यासुशिक्षे सततं प्रापयन्ति, तेऽत्राखिलं सुखं प्राप्य मोक्षमधिगच्छन्ति॥५॥

पदार्थः-**(यः)** जो मनुष्य **(देवेषु)** दिव्यगुण वा उत्तम विद्वानों में **(गच्छति)** जाता है **(सः, ह)** वही विद्या के **(श्रितः)** आश्रय को प्राप्त हुआ **(नाकस्य)** जिसमें किञ्चित् दुःख नहीं उस उत्तम सुख के **(पृष्ठे)** आधार पर **(अधि, तिष्ठति)** स्थिर होता वा **(पृणाति)** विद्या उत्तम शिक्षा और अच्छे बनाए हुए अन्न आदि पदार्थों से आप पुष्ट होता और सन्तान को पुष्ट करता है **(तस्मै)** उसके लिये **(आपः)** प्राण वा जल **(सदा)** सब कभी **(घृतम्)** घी **(अर्षन्ति)** वर्षाते तथा **(तस्मै)** उसके लिये **(इयम्)** यह पढ़ाने से मिली हुई **(दक्षिणा)** दक्षिणा और **(सिन्धवः)** नदी, नद **(सदा)** सब कभी **(पिन्वते)** प्रसन्नता करते हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य इस मनुष्य देह का आश्रय कर सत्पुरुषों का सङ्ग और धर्म के अनुकूल आचरण को सदा करते वे सदैव सुखी होते हैं। जो विद्वान् व जो विदुषी पण्डिता स्त्री, बालक, जवान और बुड्ढे मनुष्यों तथा कन्या, युवति और बुड्ढी स्त्रियों को निष्कपटता से विद्या और उत्तम शिक्षा को निरन्तर प्राप्त कराते, वे इस संसार में समग्र सुख को प्राप्त होकर अन्तकाल में मोक्ष को अधिगत होते अर्थात् अधिकता से प्राप्त होते हैं॥५॥

पुनश्चतुर्वर्णस्थाः किं कुर्युरित्याह॥

फिर चारों वर्णों में स्थिर होनेवाले मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

दक्षि॑णावता॒मिदि॒मानि॑ चि॒त्रा दक्षि॑णावतां दि॒वि सूर्या॑सः।
दक्षि॑णावन्तो अ॒मृत॑ं भजन्ते॒ दक्षि॑णावन्तः॒ प्र ति॑रन्त॒ आयु॑ः॥६॥

दक्षि॑णाऽवताम्। इत्। इ॒मानि॑। चि॒त्रा। दक्षि॑णाऽवताम्। दि॒वि। सूर्या॑सः। दक्षि॑णाऽवन्तः। अ॒मृत॑म्। भ॒ज॒न्ते॒। दक्षि॑णाऽवन्तः। प्र। ति॒र॒न्ते॒। आयु॑ः॥६॥

पदार्थः-**(दक्षिणावताम्)** धर्मोपार्जिता धनविद्यादयो बहवः पदार्था विद्यन्ते येषां तेषाम् **(इत्)** एव **(इमानि)** प्रत्यक्षाणि **(चित्रा)** चित्राण्यद्भुतानि **(दक्षिणावताम्)** प्रशंसितयोर्धर्म्यधनविद्ययोर्दक्षिणा दानं येषां

तेषाम्। प्रशंसायां मतुप्। **(दिवि)** दिव्ये प्रकाशे **(सूर्यासः)** सवितार इव तेजस्विनो जनाः **(दक्षिणावन्तः)** बहुविद्यादानयुक्ताः **(अमृतम्)** मोक्षम् **(भजन्ते)** **(दक्षिणावन्तः)** बह्वभयदानदातारः **(प्र)** **(तिरन्ते)** संतरन्ति **(आयुः)** प्राणधारणम्॥६॥

अन्वयः-दक्षिणावतां जनानामिमानि चित्राऽद्भुतानि सुखानि दक्षिणावतां दिवि सूर्य्यासः प्राप्नुवन्ति दक्षिणावन्त इदेवामृतं भजन्ते दक्षिणावन्त आयुः प्रतिरन्ते प्राप्नुवन्ते॥६॥

भावार्थः-ये ब्राह्मणाः सार्वजनिकसुखाय विद्यासुशिक्षादानं, ये च क्षत्रिया न्यायेन व्यवहारेणाभयदानम्, ये वैश्या धर्मोपार्जितधनस्य दानम्, ये च शूद्राः सेवादानं च कुर्वन्ति ते पूर्णायुषो भूत्वेहामुत्रानन्दं सततं भुञ्जते॥६॥

पदार्थः-**(दक्षिणावताम्)** जिनके धर्म से इकट्ठे किये धन, विद्या आदि बहुत पदार्थ विद्यमान हैं, उन मनुष्यों को **(इमानि)** ये प्रत्यक्ष **(चित्रा)** चित्र-विचित्र अद्भुत सुख **(दक्षिणावताम्)** जिनके प्रशंसित धर्म के अनुकूल धन और विद्या की दक्षिणा का दान होता उन सज्जनों को **(दिवि)** उत्तम प्रकाश में **(सूर्य्यासः)** सूर्य्य के समान तेजस्वी जन प्राप्त होते हैं **(दक्षिणावन्तः)** बहुत विद्या-दानयुक्त सत्पुरुष **(इत्)** ही **(अमृतम्)** मोक्ष का **(भजन्ते)** सेवन करते और **(दक्षिणावन्तः)** बहुत प्रकार का अभय देनेहारे जन **(आयुः)** आयु के **(प्रतिरन्ते)** अच्छे प्रकार पार पहुंचे अर्थात् पूरी आयु भोगते हैं॥६॥

भावार्थः-जो ब्राह्मण सब मनुष्यों के सुख के लिये विद्या और उत्तम शिक्षा का दान, वा जो क्षत्रिय न्याय के अनुकूल व्यवहार से प्रजा जनों को अभयदान, वा जो वैश्य धर्म से इकट्ठे किये हुए धन का दान और जो शूद्र सेवा दान करते हैं, वे पूर्ण आयुवाले होकर इस जन्म और दूसरे जन्म में निरन्तर आनन्द को भोगते हैं॥६॥

इह संसारे कतिविधाः पुरुषा भवन्तीत्याह॥

इस संसार में कितने प्रकार के पुरुष होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः॥७॥१०॥

मा। पृणन्तः। दुःऽइतम्। एनः। आ। अरन्। मा। जारिषुः। सूरयः। सुऽव्रतासः। अन्यः। तेषाम्। परिऽधिः। अस्तु। कः। चित्। अपृणन्तम्। अभि। सम्। यन्तु। शोकाः॥७॥

पदार्थः-**(मा)** निषेधे **(पृणन्तः)** स्वं स्वकीयांश्च पुष्यन्तः **(दुरितम्)** दुःखायेतं प्राप्तम् **(एनः)** पापाचरणम् **(आ)** समन्तात् **(अरन्)** आचरन्तु **(मा)** **(जारिषुः)** जारकर्माणि कुर्वन्तु **(सूरयः)** विद्वांसः **(सुव्रतासः)** शोभनानि व्रतानि सत्याचरणानि येषान्ते **(अन्यः)** भिन्नः **(तेषाम्)** धार्मिकाणां

विदुषामधार्मिकाणां मूर्खाणां च (**परिधिः**) आवरणं मर्य्यादा (**अस्तु**) (**कः**) (**चित्**) अपि (**अपृणन्तम्**) धर्मेणापुष्यन्तमन्यानपोषयन्तम् (**अभि**) सर्वतः (**सम्**) सम्यक् (**यन्तु**) प्राप्नुवन्तु (**शोकाः**) विलापाः॥७॥

अन्वयः–हे मनुष्या! भवन्तः पृणन्तः सन्तो दुरितमेनो माऽरन् दुरितमेनो मा जारिषुः, किन्तु सुव्रतासः सूरयः सन्तो धर्ममेवाचरन्तु ये च युष्मदध्यापकास्तेषां युष्माकं च कश्चिदन्यः परिधिरस्तु। अपृणन्तं जनं शोका अभिसंयन्तु॥७॥

भावार्थः–अस्मिन् जगति द्विविधा जनाः सन्ति। एके धार्मिका अपरे पापाश्च, ते प्रभिन्नप्रस्थानास्सन्ति। ये धार्मिकास्ते धार्मिकस्याऽनुकरणेनैव धर्ममार्गे चलन्ति। ये च दुष्टास्ते त्वधार्मिकानुकरणेनैवाधर्मे चलन्ति। नैव कदाचिद् धार्मिकैरधार्मिकमार्गे गन्तव्यमधार्मिकैस्तु धार्मिकमार्गे गन्तुं योग्यमेवं प्रत्येकजातौ धार्मिकाधार्मिकयोर्द्वौ मार्गौ स्तः, तत्र धार्मिकान् सुखान्यधार्मिकान् दुःखानि च सदाप्नुवन्ति॥७॥

अस्मिन् सूक्ते धर्म्याचरणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति पञ्चविंशोत्तरशततमं १२५ सूक्तं दशमो १० वर्गश्च समाप्तः॥

पदार्थः–हे मनुष्यो! आप लोग (**पृणन्तः**) स्वयं वा अपने सन्तान आदि को पुष्ट करते हुए (**दुरितम्**) दुःख के लिये जो प्राप्त होता अर्थात् (**एनः**) पाप का आचरण (**मा, आ, अरन्**) मत करो और दुःख के लिये प्राप्त होनेवाला पापाचरण जैसे हो वैसे (**मा, जारिषुः**) खोटे कामों को मत करो, किन्तु (**सुव्रतासः**) उत्तम सत्य आचरणवाले (**सूरयः**) विद्वान् होते हुए धर्म ही का आचरण करो और जो तुम्हारे अध्यापक हों (**तेषाम्**) उन धार्मिक विद्वानों तथा तुम लोगों के बीच (**कश्चित्**) कोई (**अन्यः**) भिन्न (**परिधिः**) मर्य्यादा अर्थात् तुम सभी को ढांपने, गुप्त राखने, मूर्खपन से बचानेवाला प्रकार (**अस्तु**) हो और (**अपृणन्तम्**) धर्म से न पुष्ट होने न दूसरों को पुष्ट करनेवाले किन्तु अधर्म से पुष्ट होने तथा अधर्म ही से औरों को पुष्ट करनेवाले मनुष्य को (**शोकाः**) शोक विलाप (**अभि, सम्, यन्तु**) सब ओर से प्राप्त हों॥७॥

भावार्थः–इस संसार में दो प्रकार के मनुष्य होते हैं– एक धार्मिक और दूसरे पापी। ये दोनों अच्छे प्रकार अलग-अलग स्थान और आचरणवाले हैं अर्थात् जो धार्मिक हैं वे धर्मात्माओं के अनुकरण ही से धर्म मार्ग में चलते और जो दुष्ट आचरण करनेवाले पापी हैं, वे अधर्मी दुष्ट जनों के आचरण ही से अधर्म में चलते हैं। कभी किन्हीं धर्मात्माओं को अधर्मी दुष्टजनों के मार्ग में नहीं चलना चाहिये और अधर्मी दुष्टों को अपनी दुष्टता छोड़ धार्मिकों के मार्ग में चलना योग्य है। इस प्रकार प्रत्येक जाति के पीछे धार्मिक और अधार्मिकों के दो मार्ग हैं, उनमें धर्म करनेवालों को सुख और अधर्मी दुष्टों को दुःख सदा प्राप्त होते हैं॥७॥

इस सूक्त में धर्म के अनुकूल आचरण का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ पच्चीसवां १२५ सूक्त और दशवाँ १० वर्ग समाप्त हुआ॥

अमन्दानित्यस्य सप्तर्चस्य षड्विंशत्युत्तरशततमस्य सूक्तस्य १-५ कक्षीवान्। ६ भावयव्यः। ७ रोमशा ब्रह्मवादिनी चर्षिः। विद्वांसो देवताः। १-२, ४-५ निचृत् त्रिष्टुप्। ३ त्रिष्टुप् छन्दः। धैवतः स्वरः। ६,७ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

कोऽत्र राज्याधिकारे न स्थापनीय इत्याह॥

अब सात ऋचावाले एक सौ छब्बीसवें १२६ सूक्त का आरम्भ है। उसके प्रथम मन्त्र में इस संसार के राज्य के अधिकार में कौन न स्थापन करने योग्य है, इस विषय को अगले मन्त्र में कहा है॥

अमन्दान् स्तोमान् प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रवइच्छमानः॥ १॥

अमन्दान्। स्तोमान्। प्र। भरे। मनीषा। सिन्धौ। अधि। क्षियतः। भाव्यस्य। यः। मे। सहस्रम्। अमिमीत। सवान्। अतूर्तः। राजा। श्रवः। इच्छमानः॥ १॥

पदार्थः-(**अमन्दान्**) मन्दभावरहितान् तीव्रान् (**स्तोमान्**) स्तोतुमर्हान् विद्याविशेषान् (**प्र**) (**भरे**) धरे (**मनीषा**) बुद्ध्या (**सिन्धौ**) नद्याः समीपे (**अधि**) स्वीयचित्ते (**क्षियतः**) निवसतः (**भाव्यस्य**) भवितुं योग्यस्य (**यः**) (**मे**) मम (**सहस्रम्**) (**अमिमीत**) निमिमीते (**सवान्**) ऐश्वर्ययोग्यान् (**अतूर्त्तः**) अहिंसितः (**राजा**) (**श्रवः**) श्रवणम् (**इच्छमानः**) व्यत्ययेनात्मनेपदम्॥ १॥

अन्वयः-योऽतूर्त्तः श्रव इच्छमानो राजा सिन्धौ क्षियतो भाव्यस्य मे सकाशात् सहस्रं सवानमन्दान् स्तोमांश्च मनीषाऽमिमीत तमहमधिप्रभरे॥ १॥

भावार्थः-यावदाप्तस्य विदुष आज्ञया पुरुषार्थी विद्वान् नरो न भवेत्, तावत्तस्य राज्याधिकारे स्थापनं न कुर्यात्॥ १॥

पदार्थः-(**यः**) जो (**अतूर्त्तः**) हिंसा आदि के दुःख को न प्राप्त और (**श्रवः**) उत्तम उपदेश सुनने की (**इच्छमानः**) इच्छा करता हुआ (**राजा**) प्रकाशमान सभाध्यक्ष (**सिन्धौ**) नदी के समीप (**क्षियतः**) निरन्तर वसते हुए (**भाव्यस्य**) प्रसिद्ध होने योग्य (**मे**) मेरे निकट (**सहस्रम्**) हजारों (**सवान्**) ऐश्वर्य योग्य (**अमन्दान्**) मन्दपनरहित तीव्र और (**स्तोमान्**) प्रशंसा करने योग्य विद्यासम्बन्धी विशेष ज्ञानों का (**मनीषा**) बुद्धि से (**अमिमीत**) निरन्तर मान करता उसको मैं (**अधि**) अपने मन के बीच (**प्र, भरे**) अच्छे प्रकार धारण करूं॥ १॥

भावार्थः-जब तक सकल शास्त्र जाननेहारे विद्वान् की आज्ञा से पुरुषार्थी विद्वान् न हो, तब तक उसका राज्य के अधिकार में स्थापन न करे॥ १॥

केऽत्र यशो विस्तारयन्तीत्याह॥

कौन इस संसार में यश का विस्तार करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान् प्रयतान्त्सद्य आदम्।

शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान॥ २॥

शतम्। राज्ञः। नाधमानस्य। निष्कान्। शतम्। अश्वान्। प्रऽयतान्। सद्यः। आदम्। शतम्। कक्षीवान्। असुरस्य। गोनाम्। दिवि। श्रवः। अजरम्। आ। ततान॥ २॥

पदार्थः-(**शतम्**) (**राज्ञः**) (**नाधमानस्य**) प्राप्तैश्वर्यस्य (**निष्कान्**) सौवर्णान् (**शतम्**) (**अश्वान्**) तुरङ्गान् (**प्रयतान्**) सुशिक्षितान् (**सद्यः**) (**आदम्**) आददामि (**शतम्**) (**कक्षीवान्**) बह्व्यः कक्षयः विद्याप्रदेशा विदिताः सन्ति यस्य सः (**असुरस्य**) मेघस्य (**गोनाम्**) किरणानाम् (**दिवि**) आकाशे (**श्रवः**) श्रूयमाणं यशः (**अजरम्**) वयोनाशहीनम् (**आ**) (**ततान**) विस्तृणाति॥ २॥

अन्वयः-यः कक्षीवान् विद्वानसुरस्येव नाधमानस्य राज्ञः शतं निष्कान् प्रयतान् शतमश्वान् दिव्यजरं गोनां शतमिव श्रव आततान तमहं सद्य आदम्॥ २॥

भावार्थः-ये न्यायकारिणो विदुषो राज्ञः सकाशात् सत्कारं प्राप्नुवन्ति, ते यशो वितन्वते॥ २॥

पदार्थः-जो (**कक्षीवान्**) विद्या के बहुत व्यवहारों को जानता हुआ विद्वान् (**असुरस्य**) मेघ के समान उत्तम गुणी (**नाधमानस्य**) ऐश्वर्यवान् (**राज्ञः**) राजा के (**शतम्**) सौ (**निष्कान्**) निष्क सुवर्णों (**प्रयतान्**) अच्छे सिखाये हुए (**शतम्**) सौ (**अश्वान्**) घोड़ों और (**दिवि**) आकाश में (**अजरम्**) अविनाशी (**गोनाम्, शतम्**) सूर्यमण्डल की सैकड़ो किरणों के समान (**श्रवः**) श्रूयमाण यश को (**आ, ततान**) विस्तारता है, उसको मैं (**सद्यः**) शीघ्र (**आदम्**) स्वीकार करता हूँ॥ २॥

भावार्थः-जो न्यायकारी विद्वान् राजा के समीप से सत्कार को प्राप्त होते, वे यश का विस्तार करते हैं॥ २॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय का उपदेश अगले मन्त्र में किया है॥

उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः।

षष्टिः सहस्रमनु गव्यमागात् सनत्कक्षीवाँ अभिपित्वे अह्नाम्॥ ३॥

उप। मा। श्यावाः। स्वनयेन। दत्ताः। वधूऽमन्तः। दश। रथासः। अस्थुः। षष्टिः। सहस्रम्। अनु। गव्यम्। आ। अगात्। सनत्। कक्षीवान्। अभिऽपित्वे। अह्नाम्॥ ३॥

पदार्थः-(**उप**) (**मा**) माम् (**श्यावाः**) सवितुः किरणाः (**स्वनयेन**) स्वस्य नयनं यस्य दातुस्तेन (**दत्ताः**) (**वधूमन्तः**) प्रशस्ता वध्वः स्त्रियो विद्यन्ते येषु ते (**दश**) एतत्संख्याकाः (**रथासः**) यानानि

(अस्थुः) तिष्ठन्ति **(षष्टिः)** **(सहस्रम्)** **(अनु)** **(गव्यम्)** गवां भावम् **(आ)** **(अगात्)** गच्छेत् **(सनत्)** सदा **(कक्षीवान्)** युद्धे प्रशस्तकक्षः **(अभिपित्वे)** सर्वतः प्राप्तौ **(अह्नाम्)** दिनानाम्॥३॥

अन्वयः-येन स्वनयेन दात्रा सवितुः श्यावा इव दत्ता दशरथासो वधूमन्तो मा मां सेनापतिमुपास्थुः। यः कक्षीवानभिपित्वेऽह्नां सहस्रं गव्यमन्वागाद् यस्य षष्टिः पुरुषा अनुगच्छन्ति स सनत् सुखवर्द्धकोऽस्ति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यतः सर्वे योद्धारो राज्ञः सकाशाद्धनादिकं प्राप्तुमिच्छन्ति तस्माद्राज्ञा तेभ्यो यथायोग्यं देयमेवं विनोत्साहो न जायते॥३॥

पदार्थः-जिस **(स्वनयेन)** अपने धन आदि पदार्थ के पहुंचाने अर्थात् देनेवाले ने **(श्यावाः)** सूर्य की किरणों के समान **(दत्ताः)** दिये हुए **(दश)** दश **(रथासः)** रथ **(वधूमन्तः)** जिनमें प्रशंसित बहुएं विद्यमान वे **(मा)** मुझ सेनापति के **(उपास्थुः)** समीप स्थित होते तथा जो **(कक्षीवान्)** युद्ध में प्रशंसित कक्षावाला अर्थात् जिसके और अच्छे वीर योद्धा हैं, वह **(अभिपित्वे)** सब ओर से प्राप्ति के निमित्त **(अह्नाम्, सहस्रम्)** हजार दिन **(गव्यम्)** गौओं के दुग्ध आदि पदार्थ को **(अन्वागात्)** प्राप्त होता और जिसके **(षष्टिः)** साठ पुरुष पीछे चलते वह **(सनत्)** सदा सुख का बढ़ानेवाला है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस कारण सब योद्धा राजा के समीप से धन आदि पदार्थ की प्राप्ति चाहते हैं, इससे राजा को उनके लिये यथायोग्य धन आदि पदार्थ देना योग्य है, ऐसे विना किये उत्साह नहीं होता॥३॥

केऽत्र चक्रवर्त्तिराज्यं कर्त्तुमर्हन्तीत्याह॥

इस संसार में कौन चक्रवर्त्ति राज्य करने को योग्य होते हैं, इस विषय को अगले मन्त्र में कहा है॥

चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति।
मदच्युतः कृशनावतो अत्यान् कक्षीवन्त उदमृक्षन्त पुत्राः॥४॥

चत्वारिंशत्। दशऽरथस्य। शोणाः। सहस्रस्य। अग्रे। श्रेणिम्। नयन्ति। मदऽच्युतः। कृशनऽवतः। अत्यान्। कक्षीवन्तः। उत्। अमृक्षन्त। पुत्राः॥४॥

पदार्थः-**(चत्वारिंशत्)** **(दशरथस्य)** दश रथा यस्य सेनेशस्य **(शोणाः)** रक्तगुणविशिष्टा अश्वाः **(सहस्रस्य)** **(अग्रे)** पुरतः **(श्रेणिम्)** पङ्क्तिम् **(नयन्ति)** **(मदच्युतः)** ये मदान् च्यवन्ते ते **(कृशनावतः)** कृशनं बहु सुवर्णादिभूषणं विद्यते येषान्ते **(अत्यान्)** येऽतन्ति मार्गान् व्याप्नुवन्ति तान् **(कक्षीवन्तः)**

प्रशस्ता कक्षयो विद्यन्ते येषान्ते **(उत्)** **(अमृक्षन्त)** मृषन्ति सहन्ते **(पञ्राः)** पद्यते गच्छति मार्गान् यैस्ते। अत्र वर्णव्यत्ययेन दस्य जः॥४॥

अन्वयः-यस्य दशरथस्य चत्वारिंशच्छोणाः सहस्रस्याग्रे श्रेणिं नयन्ति। यस्य वा पञ्राः कक्षीवन्तो भृत्या मदच्युतः कृशनावतोऽत्यानुदमृक्षन्त स शत्रून् जेतुमर्हति॥४॥

भावार्थः-येषां चतुरश्वयुक्ता दशसु दिक्षु रथाः सहस्राण्याश्विका लक्षाणि पदातयोऽक्षयः कोशाः पूर्णा विद्याविनयाः सन्ति, त एव साम्राज्यं कर्त्तुमर्हन्ति॥४॥

पदार्थः-जिस **(दशरथस्य)** दशरथों से युक्त सेनापति के **(चत्वारिंशत्)** चालीस **(शोणाः)** लाल घोड़े **(सहस्रस्य)** सहस्र योद्धा वा सहस्र रथों के **(अग्रे)** आगे **(श्रेणिम्)** अपनी पाँति (पङ्क्ति) को **(नयन्ति)** पहुंचाते अर्थात् एक साथ होकर आगे चलते वा जिस सेनापति के भृत्य ऐसे हैं **(पञ्राः)** कि जिनके साथ मार्गों को जाते और **(कक्षीवन्तः)** जिनकी प्रशंसित कक्षा विद्यमान अर्थात् जिनके साथी छटे हुए वीर लड़नेवाले हैं वे **(मदच्युतः)** जो मद को चुआते उन **(कृशनावतः)** सुवर्ण आदि के गहने पहिने हुए तथा **(अत्यान्)** जिनसे मार्गों को रमते पहुंचते उन घोड़ा हाथी, रथ आदि को **(उदमृक्षन्त)** उत्कर्षता से सहते हैं, वह शत्रुओं के जीतने को योग्य होता है॥४॥

भावार्थः-जिनके चार घोड़ा युक्त दशों दिशाओं में रथ, सहस्रों अश्ववार (असवार,) लाखों पैदल जानेवाले, अत्यन्त पूर्ण कोश धन और पूर्ण विद्या, विनय, नम्रता आदि गुण हैं, वे ही चक्रवर्त्ति राज्य करने को योग्य हैं॥४॥

केऽत्रोत्तमा भवन्तीत्याह॥

कौन मनुष्य इस जगत् में उत्तम होते हैं, इस विषय को अगले मन्त्र में कहा है॥

पूर्वा॒मनु॒ प्रय॑ति॒मा द॑दे व॒स्त्रीन् यु॒क्ताँ अ॒ष्टाव॒रिधा॑यसो॒ गाः।
सु॒बन्ध॑वो॒ ये वि॒श्याइ॑व व्रा अन॑स्वन्तः श्रव॒ ऐष॑न्त॒ प॒ञ्राः॥५॥

पूर्वा॑म्। अनु॑। प्रऽय॑तिम्। आ। द॒दे॒। व॒ः। त्रीन्। यु॒क्तान्। अ॒ष्टौ। अ॒रिऽधा॑यसः। गाः। सु॒ऽबन्ध॑वः। ये। वि॒श्याः॑ऽइव। व्राः। अन॑स्वन्तः। श्रव॑ः। ऐष॑न्त। प॒ञ्राः॥५॥

पदार्थः-(**पूर्वाम्**) आदिमाम् **(अनु)** आनूकूल्ये **(प्रयतिम्)** प्रयतन्ते यया ताम् **(आ)** **(ददे)** गृह्णामि **(वः)** युष्माकम् **(त्रीन्)** **(युक्तान्)** नियुक्तान् **(अष्टौ)** **(अरिधायसः)** अरीन् शत्रून् दधाति यैस्ते **(गाः)** वृषभान् **(सुबन्धवः)** शोभना बन्धवो येषान्ते **(ये)** **(विश्याइव)** यथा विक्षु प्रजासु साधवो वणिग्जनाः **(व्राः)** ये व्रजन्ति ते। अत्र व्रजधातोर्बाहुलकादौणादिको डः प्रत्ययः। **व्रा इति पदनामसु पठितम्।** (निघं०४.२) **(अनस्वन्तः)** बहून्यनांसि शकटानि विद्यन्ते येषान्ते **(श्रवः)** अन्नम् **(ऐषन्त)** इच्छेयुः **(पञ्राः)** प्रपन्नाः॥५॥

अन्वयः-ये सुबन्धवोऽनस्वन्तो व्राः पज्रा विश्याइव श्रव ऐषन्त तान् वस्त्रीन् युक्तानध्यक्षान् अष्टौ सभ्यानरिधायसो वीरान् गाश्चैषां पूर्वां प्रयतिमहमन्वाददे॥५॥

भावार्थः-ये जनाः सभासेनाशालाऽध्यक्षान् कुशलानष्टौ सभासदः शत्रुविनाशकान् वीरान् गवादीन् पशून् मित्राणि धनाढ्यान् वणिग्जनान् कृषीवलाँश्च संरक्ष्यान्नाद्यैश्वर्य्यमुन्नयन्ति ते मनुष्यशिरोमणयः सन्ति॥५॥

पदार्थः-(**ये**) जो ऐसे हैं कि (**सुबन्धवः**) जिनके उत्तम बन्धुजन (**अनस्वन्तः**) और बहुत लढ़ा छकड़ा विद्यमान (**व्राः**) तथा जो गमन करनेवाले और (**पज्राः**) दूसरों को प्राप्त वे (**विश्याइव**) प्रजाजनों में उत्तम वणिक् जनों के समान (**श्रवः**) अन्न को (**ऐषन्त**) चाहें उन (**वः**) तुम्हारे (**त्रीन्**) तीन (**युक्तान्**) आज्ञा दिये और अधिकार पाये भृत्यों (**अष्टौ**) आठ सभासदों (**अरिधायसः**) जिनसे शत्रुओं को धारण करते समझते, उन वीरों और (**गाः**) बैल आदि पशुओं को तथा इन सभी की (**पूर्वाम्**) पहली (**प्रयतिम्**) उत्तम यत्न की रीति को मैं (**अनु, आ, ददे**) अनुकूलता से ग्रहण करता हूँ॥५॥

भावार्थः-जो जन सभा, सेना और शाला के अधिकारी, कुशल चतुर आठ सभासदों, शत्रुओं का विनाश करनेवाले वीरों, गौ, बैल आदि पशुओं, मित्र, धनी, वणिक्जनों और खेती करनेवालों की अच्छे प्रकार रक्षा करके अन्न आदि ऐश्वर्य्य की उन्नति करते हैं, वे मनुष्यों में शिरोमणि अर्थात् अत्यन्त उत्तम होते हैं॥५॥

कैः काऽत्र राज्येऽवश्यं प्राप्तव्येत्याह॥

किनसे इस राज्य में क्या अवश्य पानी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

आग॑धिता॒ परि॑गधिता॒ या क॑शी॒केव॒ जङ्ग॑हे।
दद॑ाति॒ मह्यं॑ यादु॑री॒ याशू॑नां भो॒ज्या॑ श॒ता॥६॥

आऽग॑धिता। परि॑ऽगधिता। या। क॒शी॒काऽइ॑व। जङ्ग॑हे। दद॑ाति। मह्य॑म्। यादु॑री। याशू॑नाम्। भो॒ज्या॑। श॒ता॥६॥

पदार्थः-(**आगधिता**) समन्ताद् गृहीता। **गध्यं गृह्णातेः।** (निरु०५.१५) (**परिगधिता**) परितः सर्वतो गधिता शुभैर्गुणैर्युक्ता नीतिः। **गध्यतिर्मिश्रीभावकर्मा।** (निरु०५.१५) (**या**) (**कशीकेव**) यथा ताडनार्था कशीका (**जङ्गहे**) अत्यन्तं ग्रहीतव्ये (**ददाति**) (**मह्यम्**) (**यादुरी**) प्रत्यनशीला। अत्र यतधातोर्बाहुलकादौणादिक उरी प्रत्ययः तस्य दः। (**याशूनाम्**) प्रयतमानानाम्। अत्र **यसु प्रयत्ने** धातोर्बाहुलकादुण्प्रत्ययः सत्य शश्च। (**भोज्या**) भोक्तुं योग्यानि (**शता**) शतानि असंख्यातानि वस्तूनि॥६॥

अन्वयः-या आगधिता परिगधिता जङ्गहे कशीकेव याशूनां यादुरी शता भोज्या मह्यं ददाति सा सर्वैः स्वीकार्य्या॥६॥

भावार्थः-अत्रोपमालङ्कारः यया नीत्याऽसंख्यातानि [सुखानि] स्युः सा सर्वैः संपादनीया॥६॥

पदार्थः-(**या**) जो (**आगधिता**) अच्छे प्रकार ग्रहण की हुई (**परिगधिता**) सब ओर से उत्तम-उत्तम गुणों से युक्त (**जङ्गहे**) अत्यन्त ग्रहण करने योग्य व्यवहार में (**कशीकेव**) पशुओं के ताड़ना देने के लिये जो औगी होती उसके समान (**याशूनाम्**) अच्छा यत्न करनेवालों की (**यादुरी**) उत्तम यत्नवाली नीति (**भोज्या**) भोगने योग्य (**शता**) सैकड़ों वस्तु (**मह्यम्**) मुझे (**ददाति**) देती है, वह सबको स्वीकार करने योग्य है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस नीति अर्थात् धर्म की चाल से अगणित सुख हों, वह सबको सिद्ध करनी चाहिये॥६॥

पुना राज्ञी किं कुर्यादित्याह॥

फिर रानी क्या करे, इस विषय को अगले मन्त्र में कहा है॥

उपोप॑ मे॒ परा॑ मृश॒ मा मे॑ दु॒भ्राणि॑ मन्यथाः।
सर्वा॒हम॑स्मि रोम॒शा ग॒न्धारी॑णामिवावि॒का॥७॥ ११॥ १८॥

उपो॑ऽउप। मे॒। परा॑। मृ॒श॒। मा। मे॒। दु॒भ्राणि॑। म॒न्य॒थाः॒। सर्वा॑। अ॒हम्। अ॒स्मि॒। रो॒म॒शा। ग॒न्धारी॑णाम्ऽइव। अ॒वि॒का॥७॥

पदार्थः-(**उपोप**) अतिसमीपत्वे (**मे**) मम (**परा**) (**मृश**) विचारय (**मा**) निषेधे (**मे**) मम (**दभ्राणि**) अल्पानि कर्माणि (**मन्यथाः**) जानीयाः (**सर्वा**) (**अहम्**) (**अस्मि**) (**रोमशा**) प्रशस्तलोमा (**गन्धारीणामिव**) यथा पृथिवीराज्यधर्त्रीणां मध्ये (**अविका**) रक्षिका॥७॥

अन्वयः-हे पते राजन्! याऽहं गन्धारीणामिवाविका रोमशा सर्वास्मि तस्या मे गुणान् परा मृश मे दभ्राणि कर्माणि मोपोप मन्यथाः॥७॥

भावार्थः-राज्ञी राजानं प्रति ब्रूयादहं भवतो न्यूना नास्मि, यथा भवान् पुरुषाणां न्यायाधीशोऽस्ति तथाऽहं स्त्रीणां न्यायकारिणी भवामि, यथा पूर्वा राजपत्न्यः प्रजास्थानां स्त्रीणां न्यायकारिण्योऽभूवन् तथाहमपि स्याम्॥७॥

अत्र राजधर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेदितव्यम्॥

इति षड्विंशत्युत्तरं शततमं १२६ सूक्तमेकादशो ११ वर्गोऽष्टादशोऽनुवाकश्च समाप्तः॥

भावार्थः-रानी राजा के प्रति कहे कि मैं आप से न्यून नहीं हूँ, जैसे आप पुरुषों के न्यायाधीश हो, वैसे मैं स्त्रियों का न्याय करनेवाली होती हूँ, और जैसे पहिले राजा-महाराजाओं की स्त्री प्रजास्थ स्त्रियों की न्याय करनेवाली हुईं वैसी मैं भी होऊं॥७॥

इस सूक्त में राजाओं के धर्म का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ एकता है, यह जानना चाहिये॥

यह एक सौ छब्बीसवां १२६ सूक्त, ग्यारहवां ११ वर्ग और अठारहवां १८ अनुवाक समाप्त हुआ॥

अथाग्निमित्यस्यैकादशर्चस्य सप्तविंशत्युत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। अग्निर्देवता। १-३ ८-९ अष्टिश्छन्दः। ४,७,११ भुरिगष्टिश्छन्दः। मध्यमः स्वरः। ५-६ अत्यष्टिश्छन्दः। गान्धारः स्वरः। १० भुरिगतिशक्वरी छन्दः। पञ्चमः स्वरः॥

अथ कीदृशयोः स्त्रीपुरुषयोर्विवाहो भवितुं योग्य इत्याह॥

अब ग्यारह ऋचावाले एक सौ सत्ताईसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में कैसे स्त्री-पुरुषों का विवाह होना चाहिये, इस विषय का वर्णन किया है॥

अ॒ग्निं होता॑रं मन्ये॒ दास्व॑न्तं॒ वसुं॑ सू॒नुं सह॑सो जा॒तवे॑दसं॒ विप्रं॒ न जा॒तवे॑दसम्।
य ऊ॒र्ध्वया॑ स्वध्व॒रो दे॒वो दे॒वाच्या॑ कृ॒पा।
घृ॒तस्य॑ वि॒भ्रा॑ष्टि॒मनु॑ वष्टि शो॒चिषा॒ऽऽजुह्वा॑नस्य स॒र्पिष॑ः॥ १॥

अ॒ग्निम्। होता॑रम्। म॒न्ये॒। दास्व॑न्तम्। वसु॑म्। सू॒नुम्। सह॑सः। जा॒तऽवे॑दसम्। विप्र॑म्। न। जा॒तऽवे॑दसम्। यः। ऊ॒र्ध्वया॑। सु॒ऽअ॒ध्व॒रः। दे॒वः। दे॒वाच्या॑। कृ॒पा। घृ॒तस्य॑। वि॒ऽभ्रा॑ष्टिम्। अनु॑। व॒ष्टि॒। शो॒चिषा॑। आ॒ऽजुह्वा॑नस्य। स॒र्पिष॑ः॥ १॥

पदार्थः- (**अग्निम्**) अग्निवद्वर्त्तमानम् (**होतारम्**) ग्रहीतारम् (**मन्ये**) जानीयाम् (**दास्वन्तम्**) दातारम् (**वसुम्**) ब्रह्मचर्येण कृतविद्यानिवासम् (**सूनुम्**) पुत्रम् (**सहसः**) बलवतः (**जातवेदसम्**) प्रसिद्धविद्यम् (**विप्रम्**) मेधाविनम् (**न**) इव (**जातवेदसम्**) प्रकटविद्यम् (**यः**) (**ऊर्ध्वया**) उत्कृष्टया विद्यया (**स्वध्वरः**) सुष्ठु यज्ञस्याऽनुष्ठाता (**देवः**) कमनीयः (**देवाच्या**) या देवानञ्चति तया (**कृपा**) कल्पते समर्थयति यया तया (**घृतस्य**) आज्यस्य (**विभ्राष्टिम्**) विविधतया भृज्जन्ति परिपचन्ति येन तम् (**अनु**) (**वष्टि**) कामयेत (**शोचिषा**) प्रकाशेन (**आजुह्वानस्य**) समन्ताद् हूयमानस्य (**सर्पिषः**) गन्तुं प्राप्तुमर्हस्य॥ १॥

अन्वयः-हे कन्ये! यथाऽहं य ऊर्ध्वया स्वध्वरो देवाच्या कृपादेवोऽस्ति तमाजुह्वानस्य सर्पिषो घृतस्य शोचिषा सह विभ्राष्टिं जनमनुवष्टि। यमग्निमिव होतारं दास्वन्तं वसुं सहसस्सूनुं जातवेदसं विप्रन्न जातवेदसं पतिं मन्ये तथेदृशं पतिं त्वमपि स्वीकुरु॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्य शुभगुणशीलेषु महती प्रशंसा यस्योत्कृष्टं शरीरात्मबलं भवेत् तं पुरुषं स्त्री पतित्वाय वृणुयात् एवं पुरुषोऽपीदृशीं स्त्रियं भार्यत्वाय स्वीकुर्यात्॥ १॥

पदार्थः-हे कन्या! जैसे मैं (**यः**) जो (**ऊर्ध्वया**) उत्तम विद्या से (**स्वध्वरः**) सुन्दर यज्ञ का अनुष्ठान अर्थात् आरम्भ करनेवाली वह (**देवाच्या**) जो कि विद्वानों को प्राप्त होती और जिससे व्यवहार को समर्थ करते उस (**कृपा**) कृपा से (**देवः**) जो मनोहर अतिसुन्दर है, उस जन को (**आजुह्वानस्य**) अच्छे प्रकार होमने और (**सर्पिषः**) प्राप्त होने योग्य (**घृतस्य**) घी के (**शोचिषा**) प्रकाश के साथ

(विभ्राष्टिम्) जिससे अनेक प्रकार पदार्थ को पकाते उस अग्नि के समान **(अनुवष्टि)** अनुकूलता से चाहता है वा जिस **(अग्निम्)** अग्नि के समान **(होतारम्)** ग्रहण करने **(दास्वन्तम्)** देनेवाले **(वसुम्)** तथा ब्रह्मचर्य से विद्या के बीच में निवास किये हुए **(सहसः)** बलवान् पुरुष के **(सूनुम्)** पुत्र को **(जातवेदसम्)** जिसकी प्रसिद्ध वेदविद्या उस **(विप्रम्)** मेधावी के **(न)** समान **(जातवेदसम्)** प्रकट विद्यावाले विद्वान् को पति **(मन्ये)** मानती हूँ, वैसे ऐसे पति को तू भी स्वीकार कर॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिसकी उत्तम गुणवालों में बहुत प्रशंसा, जिसका अति उत्तम शरीर और आत्मा का बल हो, उस पुरुष को स्त्री पतिपने के लिये स्वीकार करे, ऐसा पुरुष भी इसी प्रकार की स्त्री को भार्यापन के लिये स्वीकार करे॥१॥

पुनः प्रजा राजत्वाय कीदृशं जनमाश्रयेयुरित्याह॥

फिर प्रजाजन राज्य के लिये कैसे जन का आश्रय करें, इस विषय को अगले मन्त्र में कहा है॥

यजि॑ष्ठं त्वा॒ यजमाना हुवेम॒ ज्येष्ठ॒मङ्गि॑रसां विप्र॒ मन्म॑भि॒र्विप्रे॑भिः शुक्र॒ मन्म॑भिः।
परि॑ज्मानमिव॒ द्यां होता॑रं चर्षणी॒नाम्।
शो॒चिष्के॑शं॒ वृष॑णं॒ यमि॒मा विश॒ः प्राव॑न्तु जू॒तये॒ विश॑ः॥२॥

यजि॑ष्ठम्। त्वा॒। यज॑मानाः। हु॒वे॒म॒। ज्येष्ठ॑म्। अङ्गि॑रसाम्। वि॒प्र॒। मन्म॑ऽभिः। विप्रे॑भिः। शु॒क्र॒। मन्म॑ऽभिः। परि॑ज्मानम्ऽइव। द्याम्। होता॑रम्। च॒र्ष॒णी॒नाम्। शो॒चिः॒ऽके॑शम्। वृष॑णम्। यम्। इ॒माः। विश॑ः। प्र। अ॒व॒न्तु॒। जू॒तये॑। विश॑ः॥२॥

पदार्थः-**(यजिष्ठम्)** अतिशयेन यष्टारम् **(त्वा)** त्वाम् **(यजमानाः)** संगन्तारः **(हुवेम)** प्रशंसेम **(ज्येष्ठम्)** अतिशयेन प्रशस्तम् **(अङ्गिरसाम्)** प्राणिनाम् **(विप्र)** मेधाविन् **(मन्मभिः)** मान्यमानैः **(विप्रेभिः)** विपश्चिद्भिः सह **(शुक्र)** शुद्धात्मन् **(मन्मभिः)** विज्ञानैः **(परिज्मानमिव)** परितः सर्वतो भोक्तारमिव **(द्याम्)** प्रकाशम् **(होतारम्)** दातारम् **(चर्षणीनाम्)** मनुष्याणाम् **(शोचिष्केशम्)** शोचींषीव केशा यस्य तम् **(वृषणम्)** बलिष्ठम् **(यम्)** **(इमाः)** **(विशः)** प्रजाः **(प्र)** **(अवन्तु)** प्राप्नुवन्तु **(जूतये)** रक्षणाद्याय **(विशः)** प्रजाः॥२॥

अन्वयः-हे विप्र यजमाना! वयं मन्मभिर्विप्रेभिः सहाङ्गिरसां मध्ये ज्येष्ठं त्वा हुवेम। शुक्र यं मन्मभिश्चर्षणीनां होतारं परिज्मानमिव द्यां शोचिष्केशं वृषणं त्वामिमा विशः प्रावन्तु स त्वं जूतये इमा विशः प्राव॥२॥

भावार्थः-मनुष्या यं विद्वांसं प्रशंसेयुः प्रजाश्च तमेवाप्तमाश्रयन्तु॥२॥

पदार्थः-हे **(विप्र)** उत्तम बुद्धिवाले विद्वान्! **(यजमानाः)** व्यवहारों का सङ्ग करनेहारे लोग **(मन्मभिः)** मान करनेवाले **(विप्रेभिः)** विचक्षण विद्वानों के साथ **(अङ्गिरसाम्)** प्राणियों के बीच **(ज्येष्ठम्)** अतिप्रशंसित **(यजिष्ठम्)** अत्यन्त यज्ञ करनेवाले **(त्वा, हुवेम)** तुझको प्रशंसित करते हैं **(शुक्र)** शुद्ध आत्मा वाले धर्मात्मा जन **(यम्)** जिस **(मन्मभिः)** विज्ञानों के साथ **(चर्षणीनाम्)** मनुष्यों के बीच **(होतारम्)** दान करनेवाले **(परिज्मानमिव)** सब ओर से भोगनेहारे के समान **(द्याम्)** प्रकाशरूप **(शोचिष्केशम्)** जिसके लपट जैसे चिलकते हुए केश हैं उस **(वृषणम्)** बलवान् तुझको **(इमाः)** ये **(विशः)** प्रजाजन **(प्रावन्तु)** अच्छे प्रकार प्राप्त होवें, वह तू **(जूतये)** रक्षा आदि के लिये **(विशः)** प्रजा जनों को अच्छे प्रकार प्राप्त हो और पाल॥२॥

भावार्थः-विद्वान् और प्रजाजन जिसकी प्रशंसा करें, उसी आप्त सर्वशास्त्रवेत्ता विद्वान् का आश्रय सब मनुष्य करें॥२॥

कोऽत्र प्रजापालनायोत्तमो भवतीत्याह॥

इस संसार में कौन प्रजा की पालना करने के लिये उत्तम होता है, इस विषय को अगले मन्त्र में कहा है॥

स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम्।
निष्षहमाणो यमते नायते धन्वासहा नायते॥३॥

सः। हि। पुरू। चित्। ओजसा। विरुक्मता। दीद्यानः। भवति। द्रुहम्ऽतरः। परशुः। न। द्रुहम्ऽतरः। वीळु। चित्। यस्य। सम्ऽऋतौ। श्रुवत्। वनाऽइव। यत्। स्थिरम्। निःऽसहमानः। यमते। न। अयते। धन्वऽसहा। न। अयते॥३॥

पदार्थः-**(सः)** सभेशः **(हि)** किल **(पुरु)** बहु। अत्र **संहितायामिति** दीर्घः। **(चित्)** अपि **(ओजसा)** बलेन **(विरुक्मता)** विविधा रुचो भवन्ति यस्मात्तेन **(दीद्यानः)** प्रकाशमानः **(भवति)** **(द्रुहन्तरः)** यो द्रोग्धॄन् तरति **(परशुः)** कुठारः **(न)** इव **(द्रुहन्तरः)** द्रुहं तरति येन सः **(वीळु)** दृढम् **(चित्)** **(यस्य)** **(समृतौ)** सम्यक् ऋतिः प्राप्तिर्यया तस्याम् **(श्रुवत्)** यः शृणोति सः **(वनेव)** यथा वनानि तथा **(यत्)** स्थिरं निश्चलम् **(निःसहमानः)** नितरां सहमाना वीरा यस्य सः **(यमते)** यच्छति। अत्र **वाच्छन्दसी**ति छादेशो न। **(न)** निषेधे **(अयते)** प्राप्नोति **(धन्वासहा)** यो धनुषा शत्रून् सहते। अत्र छन्दसोऽन्त्यलोपः। **(न)** निषेधे **(अयते)** प्राप्नोति॥३॥

अन्वयः-हे मनुष्या! यस्य समृतौ चिद्वनेव वीळु स्थिरं बलं यो निःसहमानः श्रुवत् शत्रून् यमते यं शत्रुर्नायते धन्वासहारीन् विजयते यत् यस्य विजयं शत्रुर्नायते यो द्रुहन्तरः परशुर्न पुरु विरुक्मतौजसा सह दीद्यानो द्रुहन्तरो भवति स हि चिद्विजयी जायते॥३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यः शत्रुभिर्नाभिभूयते प्रशस्तबलेन तान् विजेतुं शक्नोति, स एव प्रजापालकेषु शिरोमणिर्भवतीति वेदितव्यम्॥३॥

पदार्थः-हे मनुष्यो! **(यस्य)** जिसकी **(समृतौ)** अच्छे प्रकार प्राप्ति करानेवाली क्रिया के निमित्त **(चित्)** ही **(वनेव)** वनों के समान **(वीळु)** दृढ़ **(स्थिरम्)** निश्चल बल को **(निःसहमानः)** निरन्तर सहनशील वीरों वाला **(श्रुवत्)** सुनता हुआ शत्रुओं को **(यमते)** नियम में लाता अर्थात् उनके सुने हुए उस बल को छिन्न-भिन्न कर उनको शत्रुता करने से रोकता वा जिसको शत्रुजन **(नायते)** नहीं प्राप्त होता वा **(धन्वासहा)** जो अपने धनुष् से शत्रुओं को सहनेवाला शत्रु जनों को अच्छे प्रकार जीतता वा **(यत्)** जिसके विजय को शत्रु जन **(नायते)** नहीं प्राप्त होता वा जो **(द्रुहन्तरः)** द्रोह करनेवालों को तरता वह **(परशुः)** फरसा वा कुलाड़ा के **(न)** समान **(पुरु)** तीव्र बहुत प्रकार से ज्यों हो त्यों **(विरुक्मता)** जिससे, अनेक प्रकार की प्रीतियां हों, उस **(ओजसा)** बल के साथ **(दीद्यानः)** प्रकाशमान **(द्रुहन्तरः)** द्रुहन्तर **(भवति)** होता अर्थात् जिसके सहाय से अति द्रोह करनेवाले शत्रु को जीतता **(सः, हि, चित्)** वही कभी विजयी होते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को जानना चाहिये कि जो शत्रुओं से नहीं पराजित होता और अपने प्रशंसित बल से उनको जीत सकता है, वही प्रजा पालनेवालों में शिरोमणि होता है॥३॥

पुनर्न्यायाधीशैः कथं वर्त्तितव्यमित्याह॥

फिर न्यायाधीशों को कैसे वर्त्तना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

दृ॒ळ्हा चि॑दस्मा॒ अनु॑ दु॒र्यथा॑ वि॒दे तेजि॑ष्ठाभिर॒रणि॑भिर्दा॒ष्ट्यव॑से॒ऽग्नये दा॒ष्ट्यव॑से।
प्र यः पु॒रूणि॒ गाह॑ते॒ तक्ष॒द्वने॑व शो॒चिषा॑।
स्थि॒रा चि॒दन्ना॒ नि रि॑णा॒त्योज॑सा॒ नि स्थि॒राणि॑ चि॒दोज॑सा॥४॥

दृ॒ळ्हा चि॒त्। अ॒स्मै॒। अनु॑। दुः। यथा॑। वि॒दे। तेजि॑ष्ठाभिः। अ॒रणि॑ऽभिः। दा॒ष्टि॒। अव॑से। अ॒ग्नये॑। दा॒ष्टि॒। अव॑से। प्र। यः। पु॒रूणि॑। गाह॑ते। तक्ष॑त्। वना॑ऽइव। शो॒चिषा॑। स्थि॒रा। चि॒त्। अन्ना॑। नि। रि॒णा॒ति॒। ओज॑सा। नि। स्थि॒राणि॑। चि॒त्। ओज॑सा॥४॥

पदार्थः-**(दृढा)** दृढानि **(चित्)** **(अस्मै)** सभाध्यक्षाय **(अनु)** **(दुः)** दद्युः। अत्र लुङ्यडभावः। **(यथा)** येन प्रकारेण **(विदे)** विदुषे **(तेजिष्ठाभिः)** अतिशयेन तेजस्विनीभिः **(अरणिभिः)** **(दाष्टि)** दशति

(अवसे) रक्षकाय **(अग्नये)** अग्नय इव वर्त्तमानाय **(दाष्टि)** दशति **(अवसे)** रक्षणाद्याय **(प्र)** **(यः)** **(पुरूणि)** बहूनि **(गाहते)** विलोडते **(तक्षत्)** जलादीनि तनूकुर्वन् **(वनेव)** रश्मय इव। **वनमिति रश्मिनामसु पठितम्।** (निघं०१.५) **(शोचिषा)** न्यायसेनाप्रकाशेन **(स्थिरा)** स्थिराणि **(चित्)** अपि **(अन्ना)** अत्तुमर्हाण्यन्नानि **(नि)** **(रिणाति)** प्राप्नोति **(ओजसा)** पराक्रमेण **(नि)** **(स्थिराणि)** **(चित्)** अपि **(ओजसा)** कोमलेन कर्मणा॥४॥

अन्वयः–हे मनुष्या! यथा विद्वाँस्तेजिष्ठाभिररणिभिरस्मै विदेऽवसेऽग्नये दाष्टि विद्वांसो वा दृढा स्थिरा निश्चलानि चिद्विज्ञानान्यनुदुस्तथा योऽवसे दाष्टि तक्षत्सन् सूर्यो वनेव शोचिषा पुरूणि शत्रुदलानि प्रगाहते। ओजसा स्थिराणि कर्माणि निरिणाति चिदोजसाऽन्ना चिन्निरिणाति स सुखमवाप्नोति॥४॥

भावार्थः–अत्रोपमालङ्कारः। यथा विपश्चितो विद्याप्रचारेण मनुष्याणामात्मनः प्रकाश्य सर्वान् पुरुषार्थे नयन्ति तथा विद्वांसो न्यायाधीशाः प्रजा उद्यमयन्ति॥४॥

पदार्थः–हे मनुष्यो! **(यथा)** जैसे विद्वान् **(तेजिष्ठाभिः)** अत्यन्त तेजवाली **(अरणिभिः)** अरणियों से **(अस्मै)** इस **(विदे)** शास्त्रवेत्ता **(अवसे)** रक्षा करनेवाले **(अग्नये)** अग्नि के समान वर्त्तमान सभाध्यक्ष के लिये **(दाष्टि)** ओविली को घिसने से काटता वा विद्वान् जन **(दृढा)** स्थिर निश्चल **(चित्)** भी विज्ञानों के **(अनु, दुः)** अनुक्रम से देवें वैसे **(यः)** जो **(अवसे)** रक्षा आदि करने के लिये **(दाष्टि)** काटता अर्थात् उक्त क्रिया को करता वा **(तक्षत्)** अपने तेज से जल आदि को छिन्न-भिन्न करता हुआ सूर्यमण्डल **(वनेव)** किरणों को जैसे वैसे **(शोचिषा)** न्याय और सेना के प्रकाश से **(पुरूणि)** बहुत शत्रुदलों को **(प्र, गाहते)** अच्छे प्रकार विलोडता वा **(ओजसा)** पराक्रम से **(स्थिराणि)** स्थिर कर्मों को **(नि)** निरन्तर प्राप्त होता **(चित्)** और **(ओजसा)** कोमल काम से **(अन्ना)** खाने योग्य अन्नों को **(चित्)** भी **(नि, रिणाति)** निरन्तर प्राप्त होता है, वह सुख को प्राप्त होता है॥४॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् जन विद्या के प्रचार से मनुष्यों के आत्माओं को प्रकाशित कर सबको पुरुषार्थी बनाते हैं, वैसे न्यायाधीश विद्वान् प्रजाजनों को उद्यमी करते हैं॥४॥

पुनर्न्यायाधीशैः किमनुष्ठेयमित्याह॥

फिर न्यायाधीशों को क्या अनुष्ठान वा आचरण करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

तमꣳस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात्।
आदुस्यायुर्गृभणवद् वीळु शर्म न सूनवे।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः॥५॥१२॥

तम्। अ॒स्य॒। पृ॒क्षम्। उप॑रासु। धी॒म॒हि॒। नक्त॑म्। यः। सु॒दर्श॑ऽतरः। दिवा॑ऽतरात्। अप्र॑ऽआयुषे। दिवा॑ऽतरात्। आत्। अ॒स्य॒। आयुः॑। ग्रभ॑णऽवत्। वी॒ळु। शर्म॑। न। सू॒नवे॑। भ॒क्तम्। अभ॑क्तम्। अवः॑। व्यन्तः॑। अ॒जराः॑। अ॒ग्नयः॑। व्यन्तः॑। अ॒जराः॑॥५॥

पदार्थः-(**तम्**) (**अस्य**) संसारस्य (**पृक्षम्**) सम्पृक्तारम् (**उपरासु**) दिक्षु। **उपरा इति दिङ्नामसु पठितम्।** (निघं०१.६) (**धीमहि**) दधीमहि (**नक्तम्**) रात्रौ (**यः**) (**सुदर्शतरः**) सुष्ठु दुष्टुं योग्यः सुदर्शोऽतिशयेन सुदर्शः पूर्णकालश्चन्द्र इव (**दिवातरात्**) अतिशयेन दिवा दिवातरस्तस्मात् सूर्यात् (**अप्रायुषे**) यः प्रैति स प्रायुट् न प्रायुडप्रायुट् तस्मै (**दिवातरात्**) अतिशयेन दिवातरः सूर्यइव तस्मात् (**आत्**) (**अस्य**) जनस्य (**आयुः**) जीवनम् (**ग्रभणवत्**) प्रशस्तं ग्रभणं ग्रहणं विद्यते यस्मिंस्तत् (**वीळु**) दृढम् (**शर्म**) गृहम् (**न**) इव (**सूनवे**) पुत्राय (**भक्तम्**) सेवितम् (**अभक्तम्**) असेवितम् (**अवः**) रक्षणादियुक्तम् (**व्यन्तः**) व्याप्नुवन्तः (**अजराः**) वयोहानिरहिताः (**अग्नयः**) विद्युत इव (**व्यन्तः**) कामयमानाः (**अजराः**) वयोहानिविरहाः॥५॥

अन्वयः-हे मनुष्या! यः सुदर्शतरोऽस्य दिवातरादप्रायुषे नक्तं सर्वान् दर्शयतीव तं पृक्षं दिवातरादुपरासु वयं धीमहि। आदस्य ग्रभणवद्वीळु भक्तमभक्तमव आयुः सूनवे न शर्म व्यन्तोऽजरा अग्नय इव व्यन्तोऽजरा वयं धीमहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा चन्द्रो नक्षत्राण्योषधीश्च पोषयति तथा सज्जनैः प्रजाः पोषणीयाः। यथा सन्तानान् पितरौ प्रीणीतस्तथा सर्वान् प्राणिनो वयं प्रीणीयाम॥५॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**सुदर्शतरः**) अतीव सुन्दर देखने योग्य पूरी कलाओं से युक्त चन्द्रमा के समान राजा (**अस्य**) इस संसार का (**दिवातरात्**) अत्यन्त प्रकाशवान् सूर्य से (**अप्रायुषे**) जो व्यवहार नहीं प्राप्त होता उसके लिये (**नक्तम्**) रात्रि में सब पदार्थों को दिखलाता सा है (**तम्**) उस (**पृक्षम्**) उत्तम कामों का सम्बन्ध करनेवाले को (**दिवातरात्**) अतीव प्रकाशवान् सूर्य के तुल्य उससे (**उपरासु**) दिशाओं में हम लोग (**धीमहि**) धारण करें अर्थात् सुनें (**आत्**) इसके अनन्तर (**अस्य**) इस मनुष्य का (**ग्रभणवत्**) जिसमें प्रशंसित सब व्यवहारों का ग्रहण उस (**वीळु**) दृढ़ (**भक्तम्**) सेवन किये वा (**अभक्तम्**) न सेवन किये हुए (**अवः**) रक्षा आदि युक्त कर्म और (**आयुः**) जीवन को (**सूनवे**) पुत्र के लिये (**न**) जैसे वैसे (**शर्म**) घर को (**व्यन्तः**) विविध प्रकार से प्राप्त होते हुए (**अजराः**) पूरी अवस्थावाले वा (**अग्नयः**) बिजुली रूप अग्नि के समान (**व्यन्तः**) सब पदार्थों की कामना करते हुए (**अजराः**) अवस्था होने से रहित हम लोग धारण करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे चन्द्रमा तारागण और ओषधियों को पुष्ट करता है, वैसे सज्जनों को प्रजाजनों का पालन-पोषण करना चाहिये। जैसे सन्तानों को पिता-माता तृप्त करते हैं, वैसे सब प्राणियों को हम लोग तृप्त करें॥५॥

अथ राजादयः किं कुर्य्युरित्याह॥

अब राजा आदि क्या करें, इस विषय को अगले मन्त्र में कहा है॥

स हि शर्धो॒ न मारु॑तं तुवि॒ष्वणि॒रप्न॑स्वतीषू॒र्वरा॑स्वि॒ष्टनि॒रार्त॑नास्वि॒ष्टनिः॑।
आद॑द्धव्यान्या॒दुर्दि॒र्यज्ञस्य॑ के॒तुर॒र्हणा॑।
अध॑ स्मास्य॒ हर्ष॑तो॒ हृषी॑वतो॒ विश्वे॑ जुषन्त॒ पन्था॑ां नर॑ः। शु॒भे न पन्था॑म्॥६॥

सः। हि। शर्धः। न। मारु॑तम्। तु॒वि॒ऽस्वनिः॑। अप्न॑स्वतीषु। उ॒र्वरा॑सु। इ॒ष्टनिः॑। आर्त॑नासु। इ॒ष्टनिः॑। आद॑त्। ह॒व्यानि॑। आ॒ऽउ॒दिः॑। य॒ज्ञस्य॑। के॒तुः॑। अ॒र्हणा॑। अध॑। स्म॒। अ॒स्य॒। हर्ष॑तः। हृषी॑वतः। विश्वे॑। जु॒ष॒न्त॒। पन्था॑म्। नर॑ः। शु॒भे। न। पन्था॑म्॥६॥

पदार्थः-(**सः**) विद्वान् (**हि**) खलु (**शर्धः**) बलम् (**न**) इव (**मारुतम्**) मरुतामिमम् (**तुविस्वनिः**) तुविर्वृद्धास्वनिरुपदेशो यस्य सः (**अप्नस्वतीषु**) प्रशस्तमप्नोऽपत्यं विद्यते यासां तासु (**उर्वरासु**) सुन्दरवर्णयुक्तासु (**इष्टनिः**) इच्छाविशिष्टः। अत्रेषधातोर्बाहुलकादौणादिकोऽनिः प्रत्ययस्तुगागमश्च। (**आर्त्तनासु**) या आर्त्तयन्ति सत्ययन्ति (**इष्टनिः**) यष्टुं योग्यः (**आदत्**) अद्यात् (**हव्यानि**) अत्तुमर्हाणि (**आददिः**) आदाता (**यज्ञस्य**) संगन्तव्यस्य व्यवहारस्य (**केतुः**) ज्ञानवान् (**अर्हणा**) सत्कृतानि (**अध**) अथ (**स्म**) एव (**अस्य**) (**हर्षतः**) प्राप्तहर्षस्य (**हृषीवतः**) बह्वाऽऽनन्दयुक्तस्य। अत्रा**न्येषामपि दृश्यत** इति पूर्वपदस्य दीर्घः। (**विश्वे**) सर्वे (**जुषन्त**) सेवन्ताम् (**पन्थाम्**) पन्थानम् (**नरः**) नायकाः (**शुभे**) शोभनाय (**न**) इव (**पन्थाम्**) धर्म्यं मार्गम्। अत्र वर्णव्यत्ययेन नस्य स्थाने अकारादेशः॥६॥

अन्वयः-हे विश्वे नरो! यूयं हृषीवतो हर्षतोऽस्य यज्ञस्य शुभे न पन्थां जुषन्ताम् यं केतुरादददिरर्हणा हव्यान्यादन्मारुतं शर्धो नाप्नस्वतीषूर्वरास्वार्त्तनासु तुविष्वणिरिष्टनिरस्ति स स्मेष्टनिर्हि न्यायपन्थां प्राप्तुमर्हति॥६॥

भावार्थः-अत्रोपमालङ्कारौ। ये मनुष्या धर्मेणोपार्जितानां पदार्थानां भोगं कुर्वन्तः प्रजासु धर्मविद्याः प्रचारयन्ति ते धर्ममार्गं प्रचारयितुं शक्नुवन्ति॥६॥

पदार्थः-हे (**विश्वे**) सब (**नरः**) व्यवहारों की प्राप्ति करानेवाले मनुष्यो! तुम (**हृषीवतः**) जो बहुत आनन्द से भरा (**हर्षतः**) और जिससे सब प्रकार का आनन्द प्राप्त हुआ (**अस्य**) इस (**यज्ञस्य**) सङ्ग करने अर्थात् पाने योग्य व्यवहार की (**शुभे**) उत्तमता के लिये (**न**) जैसे हो वैसे (**पन्थाम्**) धर्मयुक्त मार्ग का (**जुषन्त**) सेवन करो (**अध**) इसके अनन्तर जो (**केतुः**) ज्ञानवान् (**आददिः**) ग्रहण करनेहारा (**अर्हणा**)

सत्कार किये अर्थात् नम्रता के साथ हुए **(हव्यानि)** भोजन के योग्य पदार्थों को **(आदत्)** खावे वा **(मारुतम्)** पवनों के **(शर्धः)** बल के **(न)** समान **(अप्नस्वतीषु)** जिनके प्रशंसित सन्तान विद्यमान उन **(उर्वरासु)** सुन्दरी **(आर्त्तनासु)** सत्य आचरण करनेवाली स्त्रियों के समीप **(तुविष्वणिः)** जिसकी बहुत उत्तम निरन्तर बोल-चाल **(इष्टनिः)** और जो सत्कार करने योग्य है **(सः, स्म)** वही विद्वान् **(इष्टनिः)** इच्छा करनेवाला **(हि)** निश्चय के साथ **(पन्थाम्)** न्यायमार्ग को प्राप्त होने योग्य होता है॥६॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। जो मनुष्य धर्म से इकट्ठे किये हुए पदार्थों का भोग करते हुए प्रजाजनों में धर्म और विद्या आदि गुणों का प्रचार करते हैं, वे दूसरों से धर्ममार्ग का प्रचार करा सकते हैं॥६॥

अथाऽध्यापकाऽध्येतारः कथं वर्त्तेरन्नित्याह॥

अब पढ़ाने-पढ़ने वाले कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहा है॥

द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः।
अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम्।
प्रियाँ अपिधाँवनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः॥७॥

द्विता। यत्। ईम्। कीस्तासः। अभिऽद्यवः। नमस्यन्तः। उपऽवोचन्त। भृगवः। मथ्नन्तः। दाशा। भृगवः। अग्निः। ईशे। वसूनाम्। शुचिः। यः। धर्णिः। एषाम्। प्रियान्। अपिऽधीन्। वनिषीष्ट। मेधिरः। आ। वनिषीष्ट। मेधिरः॥७॥

पदार्थः-(**द्विता**) द्वयोर्भावः (**यत्**) ये (**ईम्**) अभिगताम् (**कीस्तासः**) मेधाविनः। **कीस्तास इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**अभिद्यवः**) अभिगता द्यवो दीप्तयो येषां ते (**नमस्यन्तः**) धर्मं परिचरन्तः (**उपवोचन्त**) उपगतमुपदिशन्तु (**भृगवः**) अविद्याऽधर्मनाशनशीलाः (**मथ्नन्तः**) मन्थनं कुर्वन्तः (**दाशा**) दानाय। अत्र **सुपां सुलुगि**त्याकारादेशः। (**भृगवः**) दुःखभर्जकाः (**अग्निः**) विद्युत् (**ईशे**) ईष्टे। अत्र **लोपस्त आत्मनेपदेषु** (अष्टा०७.१.४१) इति त लोपः। (**वसूनाम्**) पृथिव्यादीनां मध्ये (**शुचिः**) पवित्रः शुद्धिकरः (**यः**) (**धर्णिः**) यो धरति सः (**एषाम्**) प्रत्यक्षाणाम् (**प्रियान्**) प्रसन्नान् (**अपिधीन्**) सद्गुणधारकान् दुःखाच्छादकान् (**वनिषीष्ट**) याचेत (**मेधिरः**) मेधावी (**आ**) समन्तात् (**वनिषीष्ट**) (**मेधिरः**) सङ्गमकः॥७॥

अन्वयः-हे मनुष्या! यत् कीस्तासोऽभिद्यवो नमस्यन्तो भृगवो ज्ञानं मथ्नन्तो भृगवश्च दाशा विद्यादानाय विद्यार्थिने द्वितेमुपवोचन्त। यथैषां वसूनां मध्ये यो धर्णिः शुचिरग्निरस्ति यथा मेधिरः प्रियानपिधीन् वनिषीष्ट यथा मेधिरो दातॄनावनिषीष्ट विद्यामीशे तथैव तं तान् सेवध्वम्॥७॥

भावार्थः–ये विद्यार्थिनो विद्वद्भ्यो नित्यं विद्या याचेरन् विद्वांसश्च तेभ्यो नित्यमेव विद्यां दद्युर्नैतेन दानेन ग्रहणेन वा तुल्यं किंचिदप्युत्तमं कर्म विद्यते॥७॥

पदार्थः–हे मनुष्यो! **(यत्)** जो **(कीस्तासः)** उत्तम बुद्धिवाले विद्वान् **(अभिद्यवः)** जिनके आगे विद्या आदि गुणों के प्रकाश **(नमस्यन्तः)** जो धर्म का सेवन **(भृगवः)** तथा अविद्या और अधर्म के नाश करते ज्ञान को **(मथ्नन्तः)** मथते हुए **(भृगवः)** और दुःख मिटाते हैं, वे **(दाशा)** विद्या दान के लिये विद्यार्थियों को **(द्विता)** जैसे दो का होना हो वैसे अर्थात एक पर एक **(ईम्)** सम्मुख प्राप्त हुई विद्या **(उपवोचन्त)** और गुण का उपदेश करे वा जैसे **(एषाम्)** इन **(वसूनाम्)** पृथिवी, आदि लोकों के बीच **(यः)** जो **(धर्णिः)** शिल्पविद्या विषयक कामों का धारण करनेहारा **(शुचिः)** पवित्र और दूसरों को युद्ध करनेहारा **(अग्निः)** अग्नि है वा जैसे **(मेधिरः)** उत्तम बुद्धिवाला **(प्रियान्)** प्रसन्नचित्त और **(अपिधीन्)** श्रेष्ठ गुणों को धारण करने और दुःखों को ढांपने वाले विद्वानों को **(वनिषीष्ट)** याचे अर्थात् उनसे किसी पदार्थ को मांगे वा **(मेधिरः)** सङ्ग करनेवाला पुरुष देनेवालों को **(आ, वनिषीष्ट)** अच्छे प्रकार याचे वा विद्या की **(ईशे)** ईश्वरता प्रकट करे अर्थात् विद्या के अधिकार को प्रकाशित करे, वैसे ही तुम उक्त विद्वान् और अग्नि आदि पदार्थों का सेवन करो॥७॥

भावार्थः–जो विद्यार्थी विद्वानों से नित्य विद्या मांगे उनके लिये विद्वान् भी नित्य ही विद्या को अच्छे प्रकार देवें, क्योंकि इस देने-लेने के तुल्य कुछ भी उत्तम काम नहीं हैं॥७॥

अथ कथं राजप्रजाजनोन्नतिः स्यादित्याह॥

अब कैसे राजा और प्रजाजनों की उन्नति हो, इस विषय को अगले मन्त्र में कहा है॥

विश्वा॑सां त्वा वि॒शां पति॑ हवामहे॒ सर्वा॑सां समा॒नं दम्प॑तिं भु॒जे स॒त्यगि॑र्वाहसं भु॒जे।
अति॑थिं मानु॒षाणां पि॒तुर्न यस्या॑स॒या।
अ॒मी च॒ विश्वे॑ अ॒मृता॑स॒ आ वयो॑ हव्या दे॒वेष्वा वय॑ः॥८॥

विश्वा॑साम्। त्वा। वि॒शाम्। पति॑म्। ह॒वा॒म॒हे॒। सर्वा॑साम्। स॒मा॒नम्। दम्ऽप॑तिम्। भु॒जे। स॒त्यऽगि॑र्वाहसम्। भु॒जे। अति॑थिम्। मानु॒षाणाम्। पि॒तुः। न। यस्य॑। आ॒स॒या। अ॒मी इति॑। च॒। विश्वे॑। अ॒मृता॑सः। आ। वय॑ः। ह॒व्या। दे॒वेषु॑। आ। वय॑ः॥८॥

पदार्थः–**(विश्वासाम्)** सर्वासाम् **(त्वा)** त्वाम् **(विशाम्)** प्रजानाम् **(पतिम्)** स्वामिनम् **(हवामहे)** स्वीकुर्महे **(सर्वासाम्)** समग्राणां क्रियाणाम् **(समानम्)** पक्षपातरहितम् **(दम्पतिम्)** स्त्रीपुरुषाख्यं द्वन्द्वम् **(भुजे)** शरीरे विद्यानन्दभोगाय **(सत्यगिर्वाहसम्)** सत्याया गिरः प्रापकम् **(भुजे)** विद्यानन्दभोगाय **(अतिथिम्)** अतिथिमिव पूजनीयम् **(मानुषाणाम्)** नराणाम् **(पितुः)** अन्नम् **(न)** **(यस्य)** **(आसया)**

उपवेशनेन **(अमी)** **(च)** **(विश्वे)** सर्वे **(अमृतासः)** मृत्युरहिताः **(आ)** अभितः **(वयः)** विद्याः कामयमानाः **(हव्या)** होतुमादातुमर्हाणि ज्ञानानि **(देवेषु)** विद्वत्सु **(आ)** समन्तात् **(वयः)** प्राप्तविद्याः॥८॥

अन्वयः-हे मनुष्य! यथा वयं भुजे विश्वासां विशां सर्वासां प्रजानां पतिं त्वा हवामहे। यथा चामी देवेष्वा वयो हव्या गृहीतवन्त आवयो विश्वेऽमृतासस्सन्तो वयं यस्यासया पितुर्न भुजे मानुषाणां समानमतिथिं सत्यगिर्वाहसं त्वां पतिं हवामहे तथा दम्पतिं भजामः॥८॥

भावार्थः-अत्रोपमालङ्कारः। यावत्पक्षपातरहिता आप्ता विद्वांसो राज्याऽधिकारिणो न भवन्ति, तावद्राजप्रजयोरुन्नतिरपि न भवति॥८॥

पदार्थः-हे मनुष्य! जैसे हम लोग **(भुजे)** शरीर में विद्या का आनन्द भोगने के लिये **(विश्वासाम्)** सब **(विशाम्)** प्रजाजनों के वा **(सर्वासाम्)** समस्त क्रियाओं के **(पतिम्)** पालनेहारे अधिपति **(त्वा)** तुझको **(हवामहे)** स्वीकार करते हैं **(च)** और जैसे **(अमी)** वे **(देवेषु)** **(आ)** अच्छे प्रकार **(वयः)** विद्यादि गुणों को चाहनेवाले **(हव्या)** ग्रहण करने योग्य ज्ञानों का ग्रहण किये और **(आ, वयः)** अच्छे प्रकार विद्या आदि गुणों को पाये हुए **(विश्वे)** सब **(अमृतासः)** अमर अर्थात् विद्या प्रकाश से मृत्य दुःख से रहित हुए हम लोग **(यस्य)** जिसकी **(आसया)** बैठक के **(पितुः)** अन्न के **(न)** समान **(भुजे)** विद्यानन्द भोगने के लिये **(मानुषाणाम्)** मनुष्यों के **(समानम्)** पक्षपातरहित **(अतिथिम्)** अतिथि के तुल्य सत्कार करने योग्य **(सत्यगिर्वाहसम्)** सत्यवाणी की प्राप्ति करानेवाले तुझ पालनेहारे को स्वीकार करते, वैसे **(दम्पतिम्)** स्त्री-पुरुष का सेवन करते हैं॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जब तक पक्षपातरहित समग्र विद्या को जाने हुए धर्मात्मा विद्वान् राज्य के अधिकारी नहीं होते हैं, तब तक राजा और प्रजाजनों की उन्नति भी नहीं होती है॥८॥

पुनः राजादयो जनाः कीदृशा जायन्त इत्याह॥

फिर राजा आदि कैसे होते, इस विषय को अगले मन्त्र में कहा है॥

त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर॥९॥

त्वम्। अग्ने। सहसा। सहन्ऽतमः। शुष्मिन्ऽतमः। जायसे। देवऽतातये। रयिः। न। देवऽतातये। शुष्मिन्ऽतमः। हि। ते। मदः। द्युम्निन्ऽतमः। उत। क्रतुः। अध। स्म। ते। परि। चरन्ति। अजर। श्रुष्टीऽवानः। न। अजर॥९॥

पदार्थः-(**त्वम्**) (**अग्ने**) शूरवीर विद्वन् (**सहसा**) बलेन (**सहन्तमः**) अतिशयेन सहा इति सहन्तमः (**शुष्मिन्तमः**) प्रशंसितं बलं विद्यते यस्य स शुष्मी सोऽतिशयितः (**जायसे**) (**देवतातये**) देवाय विदुषे (**रयिः**) श्रीः (**न**) इव (**देवतातये**) देवानां विदुषामेव सत्काराय (**शुष्मिन्तमः**) अतिशयेन बलवान् (**हि**) खलु (**ते**) तव (**मदः**) हर्षः (**द्युम्निन्तमः**) बहूनि द्युम्नानि धनानि विद्यन्ते यस्य स द्युम्नी इति द्युम्निन्तमः। अत्र सर्वत्र **नाद् घस्य** (अष्टा०८.२.१७) इति नुट्। (**उत**) अपि (**क्रतुः**) (**अध**) आनन्तर्ये (**स्म**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**ते**) तव (**परि**) सर्वतः (**चरन्ति**) (**अजर**) जरादोषरहित (**श्रुष्टीवानः**) शीघ्रक्रियायुक्ताः (**न**) इव (**अजर**) योऽजे जन्मरहित ईश्वरे रमते तत्सम्बुद्धौ। अत्र **वाच्छन्दसी**त्यविहितोः डः॥९॥

अन्वयः-हे अजर नेवाजराग्ने विद्वन्! देवतातये रयिर्नेव देवतातये सहन्तमः शुष्मिन्तमस्त्वं सहसा जायसे यस्य ते तव शुष्मिन्तमो द्युम्निन्तमो मद उतापि क्रतुर्हि विद्यते। अध ते तव श्रुष्टीवानः स्म परिचरन्ति तं त्वां सर्वे वयमाश्रयेम॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सशरीरात्मबलाः प्राज्ञाः श्रीमत्प्रजा जायन्ते ते सुखकारका भवन्ति॥९॥

पदार्थः-हे (**अजर**) तरुण अवस्थावाले के (**न**) समान (**अजर**) अजन्मा परमेश्वर में रमते हुए (**अग्ने**) शूरवीर विद्वान्! (**देवतातये**) विद्वान् के लिये (**रयिः**) धन जैसे (**न**) वैसे (**देवतातये**) विद्वानों के सत्कार के लिये (**सहन्तमः**) अतीव सहनशील (**शुष्मिन्तमः**) अत्यन्त प्रशंसित बलवान् (**त्वम्**) आप (**सहसा**) बल से (**जायसे**) प्रकट होते हो जिन (**ते**) आपका (**शुष्मिन्तमः**) अत्यन्त बलयुक्त (**द्युम्निन्तमः**) जिनके सम्बन्ध में बहुत धन विद्यमान वह अत्यन्त धनी (**मदः**) हर्ष (**उतः**) और (**क्रतुः**) यज्ञ (**हि**) ही है (**अध**) अनन्तर (**ते**) आपके (**श्रुष्टीवानः**) शीघ्र क्रियावाले (**स्म**) ही (**परि, चरन्ति**) सब ओर से चलते वा आपकी परिचर्या करते, उन आपका हम लोग आश्रय करें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य शरीर और आत्मा के बल से युक्त अच्छे प्रकार ज्ञाता, विद्या आदि धन प्रकाश युक्त सन्तानोंवाले होते हैं, वे सुख करनेवाले होते हैं॥९॥

पुनरखिलैर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर समस्त मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

प्र वो॑ म॒हे सह॑सा॒ सह॑स्वत उष॒र्बुधे॑ पशु॒षे नाग्नये॒ स्तोमो॑ बभूत्व॒ग्नये॑।
प्रति॒ यदी॑ ह॒विष्मा॒न् विश्वा॑सु॒ क्षासु॒ जोगु॑वे।
अग्ने॑ रे॒भो न ज॑रत ऋष्॒णां जूर्णि॒र्होत॑ ऋष्॒णाम्॥ १०॥

प्र। वः। महे। सहसा। सहस्वते। उषःऽबुधे। पशुऽसे। न। अग्नये। स्तोमः। बभूतु। अग्नये। प्रति। यत्। ईम्। हविष्मान्। विश्वासु। क्षासु। जोगुवे। अग्रे। रेभः। न। जरते। ऋषूणाम्। जूर्णिः। होता। ऋषूणाम्॥ १०॥

पदार्थः-(**प्र**) (**वः**) युष्माकम् (**महे**) महते (**सहसा**) बलेन (**सहस्वते**) बहुबलयुक्ताय (**उषर्बुधे**) प्रत्युषःकालजागरकाय (**पशुषे**) बन्धकाय (**न**) इव (**अग्नये**) प्रकाशमानाय (**स्तोमः**) (**बभूतु**) भवतु। अत्र **बहुलं छन्दसी**ति शप श्लुः। (**अग्नये**) विद्युत इव (**प्रति**) प्रत्यक्षे (**यत्**) (**ईम्**) सर्वतः (**हविष्मान्**) प्रशस्तानि हवीषिं गृहीतानि विद्यन्ते यस्य सः (**विश्वासु**) सर्वासु (**क्षासु**) भूमिषु। **क्षेति पृथिविनामसु पठितम्।** (निघं०१.१) (**जोगुवे**) भृशमुपदेशकाय (**अग्रे**) प्रथमतः (**रेभः**) उपदेशकः (**न**) इव (**जरते**) स्तौति (**ऋषूणाम्**) प्राप्तविद्यानां जिज्ञासूनां वा (**जूर्णिः**) रोगवान् (**होता**) अत्ता (**ऋषूणाम्**) प्राप्तवैद्यकविद्यानाम्॥ १०॥

अन्वयः-हे मनुष्या! वः सहस्वत उषर्बुधे पशुषे महे जोगुवेऽग्नये नाग्नये विश्वासु क्षासु हविष्मान् स्तोमः सहसा प्रबभूतु रेभो नाग्रे ऋषूणां विद्या ईम् प्रति जरते यद्यो होता जूर्णिर्भवेत् स ऋषूणां सामीप्यं गत्वाऽरोगी भवेत्॥ १०॥

भावार्थः-अत्रोपमालङ्कारः। यथा विद्वांसो विद्याप्राप्तये प्रयतन्ते, तथेह सर्वैर्मनुष्यैः प्रयतितव्यम्॥ १०॥

पदार्थः-हे मनुष्यो! (**वः**) तुम लोगों के (**सहस्वते**) बहुत बलयुक्त (**उषर्बुधे**) प्रत्येक प्रभात समय में जागने और (**पशुषे**) प्रबन्ध बाँधनेहारे (**महे**) बड़े (**जोगुवे**) निरन्तर उपदेशक (**अग्नये**) बिजुली के (**न**) समान (**अग्नये**) प्रकाशमान के लिये (**विश्वासु**) सब (**क्षासु**) भूमियों में (**हविष्मान्**) प्रशंसित ग्रहण किये हुए व्यवहार जिसमें विद्यमान वह (**स्तोमः**) प्रशंसा (**सहसा**) बल के साथ (**प्र, बभूतु**) समर्थ हो (**रेभः**) उपदेश करनेवाले के (**न**) समान (**अग्रे**) आगे (**ऋषूणाम्**) जिन्होंने विद्या पाई वा जो विद्या को जानना चाहते उनकी विद्याओं की (**ईम्**) सब ओर से (**प्रति, जरते**) प्रत्यक्ष में स्तुति करता (**यत्**) जो (**होता**) भोजन करनेवाला (**जूर्णिः**) जूड़ी आदि रोग से रोगी हो वह (**ऋषूणाम्**) जिन्होंने वैद्य विद्या पाई अर्थात् उत्तम वैद्य हैं, उनके समीप जाकर रोगरहित हो॥ १०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् जन विद्या प्राप्ति के लिये अच्छा यत्न करते हैं, वैसे इस संसार में सब मनुष्यों को प्रयत्न करना चाहिये॥ १०॥

पुनर्विद्यार्थिभिः किं कर्त्तव्यमित्याह॥

फिर विद्यार्थियों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना।

महि॑ शविष्ठ नस्कृधि सं॒चक्षे॑ भु॒जे अ॒स्यै।
महि॑ स्तो॒तृभ्यो॑ मघवन्सु॒वीर्यं॒ मथी॑रु॒ग्रो न शव॑सा॥ ११॥ १३॥

सः। न॒:। नेदि॑ष्ठम्। दद्॒शानः। आ। भ॒र॒। अग्ने॑। दे॒वेभि॑:। सऽच॑नाः। सु॒ऽचे॒तुना॑। म॒हः। रा॒यः। सु॒ऽचे॒तुना॑। महि॑। श॒वि॒ष्ठ॒। न॒:। कृ॒धि॒। स॒म्ऽचक्षे॑। भु॒जे। अ॒स्यै। महि॑। स्तो॒तृऽभ्य॑:। म॒घ॒ऽव॒न्। सु॒ऽवीर्य॑म्। मथी॑:। उ॒ग्रः। न। शव॑सा॥ ११॥

पदार्थः-(**सः**) विद्वान् (**नः**) अस्मभ्यम् (**नेदिष्ठम्**) अतिशयेनान्तिकम् (**ददृशानः**) दृष्टवान् सन् (**आ**) समन्तात् (**भर**) धर (**अग्ने**) पावक इव वर्त्तमान (**देवेभिः**) विद्वद्भिः सह (**सचनाः**) समवैतुं योग्याः (**सुचेतुना**) सुष्ठु विज्ञात्रा (**महः**) महतः (**रायः**) धनानि (**सुचेतुना**) सुष्ठु चेतयित्रा (**महि**) महत् (**शविष्ठ**) अतिशयेन बलवान् प्राप्तविद्य (**नः**) अस्मान् (**कृधि**) कुरु (**संचक्षे**) सम्यगाख्यानाय (**भुजे**) पालनाय (**अस्यै**) प्रजायै (**महि**) महद्भ्यः (**स्तोतृभ्यः**) (**मघवन्**) पूजितधनयुक्त (**सुवीर्यम्**) शोभनं पराक्रमं (**मथीः**) यो दुष्टान् मथ्नाति सः (**उग्रः**) तेजस्वी (**न**) इव (**शवसा**) बलेन॥ ११॥

अन्वयः-हे मघवन् शविष्ठाग्ने! स ददृशानस्त्वं सुचेतुना देवेभिश्च सह नो महः सचना राय आभरास्यै प्रजायै संचक्षे भुजे शवसोग्रो न मथीस्त्वं नेदिष्ठं महि सुवीर्यमाभराऽनेन सुचेतुना महि स्तोतृभ्यो नोऽस्मान् विद्यावतः कृधि॥ ११॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। विद्यार्थिभिराप्तानध्यापकान् संप्रार्थ्य संसेव्य पूर्णा विद्याः प्रापणीयाः, येन राजप्रजाजना विद्यावन्तो भूत्वा सततं धर्ममाचरेयुः॥ ११॥

इति सप्तविंशत्युत्तरं शततमं १२७ सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः-हे (**मघवन्**) प्रशंसित धनयुक्त (**शविष्ठ**) अतीव बलवान् विद्यादि गुणों को पाये हुए (**अग्ने**) अग्नि के समान प्रकाशमान (**सः**) वह (**ददृशानः**) देखे हुए विद्वान्! आप (**सुचेतुना**) सुन्दर समझनेवाले और (**देवेभिः**) विद्वानों के साथ (**नः**) हम लोगों के लिये (**महः**) बहुत (**सचनाः**) सम्बन्ध करने योग्य (**रायः**) धनों को (**आ, भर**) अच्छे प्रकार धारण करें (**अस्यै**) इस प्रजा के लिये (**संचक्षे**) उत्तमता में कहने उपदेश देने और (**भुजे**) इसको पालना करने के लिये (**शवसा**) अपने पराक्रम से (**उग्रः**) प्रचण्ड प्रतापवान् (**न**) के समान (**मथीः**) दुष्टों को मथनेवाले आप (**नेदिष्ठम्**) अत्यन्त समीप (**महि**) बहुत (**सुवीर्यम्**) उत्तम पराक्रम को अच्छे प्रकार धारण करो और इस (**सुचेतुना**) सुन्दर ज्ञान देनेवाले गुण से (**महि**) अधिकता से जैसे हो, वैसे (**स्तोतृभ्यः**) स्तुति प्रशंसा करनेवालों से (**नः**) हम लोगों को विद्यावान् (**कृधि**) करो॥ ११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। विद्यार्थियों को चाहिये कि सकल शास्त्र पढ़े हुए धार्मिक विद्वानों की प्रार्थना और सेवा कर पूरी विद्याओं को पावें, जिससे राजा और प्रजाजन विद्यावान् होकर निरन्तर धर्म का आचरण करें॥११॥

इस सूक्त में विद्वान् और राजधर्म का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ एकता जाननी चाहिये॥

यह एक सौ सत्ताईसवां १२७ सूक्त और तेरहवाँ १३ वर्ग समाप्त हुआ॥

अयमित्यस्याऽष्टर्चस्याऽष्टविंशत्युत्तरशततमस्य सूक्तस्य परुच्छेप ऋषिः। अग्निर्देवता। १ निचृदत्यष्टिः। ४,३,६,८ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। २ भुरिगष्टिः। ५,७ निचृदष्टिश्छन्दः। मध्यमः स्वरः॥

पुनर्विद्यार्थिनः कीदृशा भवेयुरित्याह॥

फिर विद्यार्थी लोग कैसे होवें, इस विषय को अगले मन्त्र में कहा है॥

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनु व्रतम्।
विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते।
अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे॥ १॥

अयम्। जायत। मनुषः। धरीमणि। होता। यजिष्ठः। उशिजाम्। अनु। व्रतम्। अग्निः। स्वम्। अनु। व्रतम्। विश्वऽश्रुष्टिः। सखिऽयते। रयिःऽइव। श्रवस्यते। अदब्धः। होता। नि। सदत्। इळः। पदे। परिऽवीतः। इळः। पदे॥ १॥

पदार्थः-(**अयम्**) (**जायत**) जायते (**मनुषः**) विद्वान् (**धरीमणि**) धरन्ति सुखानि यस्मिँस्तस्मिन् व्यवहारे (**होता**) आदाता (**यजिष्ठः**) अतिशयेन यष्टा संगन्ता (**उशिजाम्**) कामयमानानां जनानाम् (**अनु**) आनुकूल्ये (**व्रतम्**) शीलम् (**अग्निः**) पावक इव (**स्वम्**) स्वकीयम् (**अनु**) (**व्रतम्**) (**विश्वश्रुष्टिः**) विश्वाः श्रुष्टस्त्वरिता गतयो यस्य सः। अत्र श्रुधातोर्बाहुलकादौणादिकः क्तिन् प्रत्ययः। (**सखीयते**) सखेवाचरति (**रयिरिव**) श्रीरिव (**श्रवस्यते**) श्रोष्यमाणाय (**अदब्धः**) अहिंसितः (**होता**) दाता (**नि**) नितराम् (**सदत्**) सीदति (**इळः**) स्तोतुमर्हस्य जगदीश्वरस्य (**पदे**) प्राप्तव्ये विज्ञाने (**परिवीतः**) परितः सर्वतो वीतं प्राप्तं विज्ञानं येन सः (**इळः**) प्रशंसितस्य धर्मस्य (**पदे**) पदनीये॥ १॥

अन्वयः-योऽयमिडस्पद इवेडस्पदेऽदब्धो होता परिवीतस्सन् निषदद्रयिरिव विश्वश्रुष्टिः सन् श्रवस्यतेऽग्निरिवोशिजामनुव्रतमिवाऽनुव्रतं स्वं प्राप्तो धरीमणि होता यजिष्ठः सन् जायत स मनुषो सर्वैः सह सखीयते पूज्यश्च स्यात्॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यो विद्यां कामयमानानामनुगामि सुशीलो धर्म्ये व्यवहारे सुनिष्ठः सर्वस्य सुहृत् शुभगुणदाता स्यात् स एव मनुष्यमुकुटमणिर्भवेत्॥ १॥

पदार्थः-जो (**अयम्**) यह मनुष्य (**इळः**) स्तुति के योग्य जगदीश्वर के (**पदे**) प्राप्त होने योग्य विशेष ज्ञान में जैसे वैसे (**इळः**) प्रशंसित धर्म के (**पदे**) पाने योग्य व्यवहार में (**अदब्धः**) हिंसा आदि दोषरहित (**होता**) उत्तम गुणों का ग्रहण करनेहारा (**परिवीतः**) जिसने सब ओर से ज्ञान पाया ऐसा हुआ (**नि, षदत्**) स्थिर होता (**रयिरिव**) वा धन के समान (**विश्वश्रुष्टिः**) जिसकी समस्त शीघ्र चालें ऐसा हुआ (**श्रवस्यते**) सुननेवाले के लिये (**अग्निः**) आग के समान वा (**उशिजाम्**) कामना करनेवाले मनुष्यों के

(अनु) अनुकूल **(व्रतम्)** स्वभाव के तुल्य **(अनु, व्रतम्, स्वम्)** अनुकूल ही अपने आचरण को प्राप्त वा **(धरीमणि)** जिसमें सुखों को धारण करते उस व्यवहार में **(होता)** देनेहारा **(यजिष्ठः)** और अत्यन्त सङ्ग करता हुआ **(जायत)** प्रकट होता वह **(मनुषः)** मननशील विद्वान् सबके साथ **(सखीयते)** मित्र के समान आचरण करनेवाला और सबको सत्कार करने योग्य होवे॥१॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो विद्या की इच्छा करनेवालों के अनुकूल चालचलन चलनेवाला, सुशील, धर्मयुक्त व्यवहार में अच्छी निष्ठा रखनेवाला, सबका मित्र, शुभ गुणों का ग्रहण करनेवाला हो, वही मनुष्यों का मुकुटमणि अर्थात् अति श्रेष्ठ शिरधरा होवे॥१॥

पुनर्विद्वान् किं करोतीत्याह॥

फिर विद्वान् क्या करता है, इस विषय को अगले मन्त्र में कहा है॥

तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः॥२॥

तम्। यज्ञऽसाधम्। अपि। वातयामसि। ऋतस्य। पथा। नमसा। हविष्मता। देवऽताता। हविष्मता। सः। नः। ऊर्जाम्। उपऽआभृति। अया। कृपा। न। जूर्यति। यम्। मातरिश्वा। मनवे। पराऽवतः। देवम्। भारिति भाः। पराऽवतः॥२॥

पदार्थः-**(तम्)** अग्निमिव विद्वांसम् **(यज्ञसाधम्)** यज्ञं साध्नुवन्तम् **(अपि)** **(वातयामसि)** वात इव प्रेरयेम **(ऋतस्य)** सत्यस्य **(पथा)** मार्गेण **(नमसा)** सत्कारेण **(हविष्मता)** बहुदानयुक्तेन **(देवताता)** देवेनेव **(हविष्मता)** बहुग्रहणं कुर्वता **(सः)** **(नः)** अस्मान् **(ऊर्जाम्)** पराक्रमवताम् **(उपाभृति)** उपगतमाभृत्याभूषणं च तत् **(अया)** अनया। अत्र **पृषोदरादिना** नलोपः। **(कृपा)** कल्पनया **(न)** निषेधे **(जूर्यति)** रुजति **(यम्)** **(मातरिश्वा)** वायुः **(मनवे)** मनुष्याय **(परावतः)** दूरदेशात् **(देवम्)** दातारम् **(भाः)** सूर्यदीप्तिरिव **(परावतः)** दूरदेशात्॥२॥

अन्वयः-यथा यं देवं परावतो भारिव मनवे मातरिश्वा परावतो देशाद् दधाति सोऽया कृपा न ऊर्जामुपाभृति न जूर्यति यथा च स देवताता हविष्मता ऋतस्य पथा गच्छति तथा हविष्मता नमसा तं यज्ञसाधमपि वयं वातयामसि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वान् मनुष्यो यथा वायुः सर्वान् मूर्त्तिमतः पदार्थान् धृत्वा प्राणिनः सुखयति, तथैव विद्याधर्मौ धृत्वा सर्वान् मनुष्यान् सुखयतु॥२॥

पदार्थः–जैसे **(यम्)** जिस **(देवम्)** गुण देनेवाले को **(परावतः)** दूर से जो **(भाः)** सूर्य की कान्ति उसके समान **(मनवे)** मनुष्य के लिये **(मातरिश्वा)** पवन **(परावतः)** दूर से धारण करता **(सः)** वह देनेवाला विद्वान् **(अया)** इस **(कृपा)** कल्पना से **(नः)** हम लोगों को **(ऊर्जाम्)** पराक्रमवाले पदार्थों का **(उपाभृति)** समीप आया हुआ आभूषण अर्थात् सुन्दरपन जैसे हो वैसे **(न)** नहीं **(जूर्यति)** रोगी करा और जैसे वह **(देवताता)** विद्वान् के समान **(हविष्मता)** बहुत देनेवाले (**ऋतस्य**) सत्य के **(पथा)** मार्ग से चलता है, वैसे **(हविष्मता)** बहुत ग्रहण करनेवाले **(नमसा)** सत्कार के साथ **(तम्)** उस अग्नि के समान प्रतापी **(यज्ञसाधम्)** यज्ञ साधनेवाले विद्वान् को **(अपि)** निश्चय के साथ हम लोग **(वातयामसि)** पवन के समान सब कार्यों में प्रेरणा देवें॥ २॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् मनुष्य जैसे पवन सब मूर्त्तिमान् पदार्थों को धारण करके प्राणियों को सुखी करता, वैसे ही विद्वान् मनुष्य विद्या और धर्म को धारण कर सब मनुष्यों को सुख देवे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवेन॑ सद्यः॒ पर्येति॒ पार्थिवं॑ मुहुर्गी॑ रेतो॑ वृषभः॒ कनि॑क्रदद् दधद्रेतः॒ कनि॑क्रदत्।
शतं॑ चक्षा॑णो अक्षभि॒र्देव॑ वने॑षु तु॒र्वणि॑:।
सदो॑ दधा॒न उप॑रेषु सानु॑ष्वग्निः॒ परे॑षु सानु॑षु॥ ३॥

एवे॑न। सद्यः॑। परि॑। एति॒। पार्थि॑वम्। मुहुः॑ऽगी। रेत॑:। वृ॒ष॒भः॒। कनि॑क्रदत्। दध॑त्। रेत॑:। कनि॑क्रदत्। श॒तम्। चक्षा॑णः। अ॒क्ष॒ऽभि॑:। दे॒वः॒। वने॑षु। तु॒र्वणि॑:। सद॑:। दधा॑नः। उप॑रेषु। सानु॑षु। अ॒ग्निः॒। परे॑षु। सानु॑षु॥ ३॥

पदार्थः–(**एवेन**) गमनेन (**सद्यः**) शीघ्रम् (**परि**) सर्वतः (**एति**) प्राप्नोति (**पार्थिवम्**) पृथिव्यां विदितम् (**मुहुर्गीः**) मुहुर्मुहुर्गिरं प्राप्तः (**रेतः**) जलम् (**वृषभः**) वर्षकः (**कनिक्रदत्**) भृशं शब्दयन् (**दधत्**) धरन् (**रेतः**) वीर्यम् (**कनिक्रदत्**) अत्यन्तं शब्दयन् (**शतम्**) असंख्यातानुपदेशान् (**चक्षाणः**) उपदिशन् (**अक्षभिः**) इन्द्रियैः (**देवः**) देदीप्यमानः (**वनेषु**) रश्मिषु (**तुर्वणिः**) तमः शीतं हिंसन् (**सदः**) सीदन्ति येषु तान् (**दधानः**) धरन् (**उपरेषु**) मेघेषु (**सानुषु**) विभक्तेषु शिखरेषु (**अग्निः**) विद्युत्सूर्यरूपः (**परेषु**) उत्कृष्टेषु (**सानुषु**) शैलशिखरेषु॥ ३॥

अन्वयः–हे विद्वंस्त्वं यथा मुहुर्गी रेतः कनिक्रददिव रेतः कनिक्रदद्दधद् वृषभो वनेषु तुर्वणिर्देव उपरेषु सानुषु परेषु सानुषु च सदो दधानोऽग्निरेवेन पार्थिवं सद्यः पर्येति तथाऽक्षभिः शतं चक्षाणो भव॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो वायुश्च सर्वं धृत्वा मेघं वर्षयित्वा सर्वं जगदानन्दयति तथा विद्वांसो वेदविद्यां धृत्वाऽन्येषामात्मसूपदेशान् वर्षयित्वा सर्वान् मनुष्यान् सुखयन्ति॥३॥

पदार्थः-हे विद्वान्! आप जैसे (**मुहुर्गीः**) वार-वार वाणी को प्राप्त (**रेतः**) जल को (**कनिक्रदत्**) निरन्तर गर्जाता सा (**रेतः**) पराक्रम को (**कनिक्रदत्**) अतीव शब्दायमान करता और (**दधत्**) धारण करता हुआ (**वृषभः**) वर्षा करने और (**वनेषु**) किरणों में (**तुर्वणिः**) अन्धकार और शीत का विनाश करता हुआ (**देवः**) निरन्तर प्रकाशमान (**उपरेषु**) मेघों और (**सानुषु**) अलग-अलग पर्वत के शिखरों वा (**परेषु**) उत्तम (**सानुषु**) पर्वतों के शिखरों में (**सदः**) जिनमें जन बैठते हैं, उन स्थानों को (**दधानः**) धारण करता हुआ (**अग्निः**) बिजुली तथा सूर्यरूप अग्नि (**एवेन**) अपनी लपट-झपट चाल से (**पार्थिवम्**) पृथिवी में जाने हुए पदार्थ को (**सद्यः**) शीघ्र (**पर्येति**) सब ओर से प्राप्त होता, वैसे (**अक्षभिः**) इन्द्रियों से (**शतम्**) सैकड़ों उपदेशों को (**चक्षाणः**) करनेवाले होते हुए प्रसिद्ध हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य और वायु सबको धारण और मेघ को वर्षाकर सब जगत् का आनन्द करते, वैसे विद्वान् जन वेदविद्या को धारण कर औरों के आत्माओ में अपने उपदेशों को वर्षा कर सब मनुष्यों को सुख देते हैं॥३॥

पुनः के विद्वांसोऽर्चनीया भवन्तीत्याह॥

फिर कौन विद्वान् सत्कार के योग्य होते हैं, इस विषय को अगले मन्त्र में कहा है॥

स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे।
यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत॥४॥

सः। सुऽक्रतुः। पुरःऽहितः। दमेऽदमे। अग्निः। यज्ञस्य। अध्वरस्य। चेतति। क्रत्वा। यज्ञस्य। चेतति। क्रत्वा। वेधाः। इषुऽयते। विश्वा। जातानि। पस्पशे। यतः। घृतऽश्रीः। अतिथिः। अजायत। वह्निः। वेधाः। अजायत॥४॥

पदार्थः-(**सः**) विद्वान् (**सुक्रतुः**) सुष्ठु कर्मप्रज्ञः (**पुरोहितः**) संपादितहितपुरस्सरः (**दमेदमे**) गृहे गृहे (**अग्निः**) पावक इव वर्त्तमानः (**यज्ञस्य**) विद्वत्सत्काराऽभिधस्य (**अध्वरस्य**) हिंसितुमनर्हस्य (**चेतति**) ज्ञापयति (**क्रत्वा**) प्रज्ञया कर्मणा वा (**यज्ञस्य**) संगन्तुमर्हस्य (**चेतति**) ज्ञापयति (**क्रत्वा**) प्रज्ञया कर्मणा वा (**वेधाः**) मेधावी (**इषूयते**) इषूरिवाचरति (**विश्वा**) सर्वाणि (**जातानि**) उत्पन्नानि (**पस्पशे**) प्रबध्नाति (**यतः**) (**घृतश्रीः**) घृतमाज्यं सेवमानः (**अतिथिः**) पूजनीयोऽविद्यमानतिथिः (**अजायत**) जायेत (**वह्निः**) वोढेव (**वेधाः**) मेधावी (**अजायत**) जायेत॥४॥

अन्वयः-हे मनुष्याः! यः सुक्रतुः पुरोहितोऽग्निरिव दमेदमे क्रत्वा यज्ञस्य चेततीवाऽध्वरस्य चेतति क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे यतो घृतश्रीरतिथिरजायत वह्निरिव वेधा अजायत स एव सर्वैर्विद्योपदेशाय समाश्रयितव्यः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसो देशे देशे, नगरे नगरे, द्वीपे द्वीपे, ग्रामे ग्रामे, गृहे गृहे च सत्यमुपदिशन्ति ते सर्वैः सत्कर्त्तव्या भवन्ति॥४॥

पदार्थः-हे मनुष्यो! जो (**सुक्रतुः**) उत्तम बुद्धि और कर्मवाला (**पुरोहितः**) प्रथम जिसने हित सिद्ध किया और (**अग्निः**) आग के समान प्रतापी वर्त्तमान (**दमे, दमे**) घर-घर में (**क्रत्वा**) उत्तम बुद्धि वा कर्म से (**यज्ञस्य**) विद्वानों के सत्काररूप कर्म की (**चेतति**) अच्छी चितौनी देते हुए के समान (**अध्वरस्य**) न छोड़ने (**यज्ञस्य**) किन्तु सङ्ग करने योग्य उत्तम यज्ञ आदि काम का (**चेतति**) विज्ञान कराता वा जो (**क्रत्वा**) श्रेष्ठ बुद्धि वा कर्म से (**वेधाः**) धीर बुद्धिवाला (**इषूयते**) बाण के समान विषयों में प्रवेश करता और (**विश्वा**) समस्त (**जातानि**) उत्पन्न हुए पदार्थों का (**पस्पशे**) प्रबन्ध करता वा (**यतः**) जिससे (**घृतश्रीः**) घी का सेवन करता हुआ (**अतिथिः**) जिसकी कोई कहीं ठहरने की तिथि निश्चित नहीं वह सत्कार के योग्य विद्वान् (**अजायत**) प्रसिद्ध होवे और (**वह्निः**) वस्तु के गुणादिकों की प्राप्ति करानेवाले अग्नि के समान (**वेधाः**) धीर बुद्धि पुरुष (**अजायत**) प्रसिद्ध होवे (**सः**) वही विद्वान् विद्या के उपदेश के लिये सबको अच्छे प्रकार आश्रय करने योग्य है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् देश-देश, नगर-नगर, द्वीप-द्वीप, गांव-गांव, घर-घर में सत्य का उपदेश करते वे सबको सत्कार करने योग्य होते हैं॥४॥

केऽत्र कल्याणविधायका भवन्तीत्याह॥

इस संसार में उत्तम सुख का विधान करनेवाले कौन होते हैं, इस विषय को अगले मन्त्र में कहा है॥

क्रत्वा॒ यद॑स्य॒ तवि॑षीषु पृ॒ञ्चते॒ऽग्नेरवे॑ण म॒रुता॑ं न भो॒ज्ये॑षिराय॒ न भो॒ज्या॑।
स हि ष्मा॒ दान॒मिन्व॑ति॒ वसू॑नां च म॒ज्मना॑।
स नः॑ त्रासते दुरि॒तादभि॒ह्रुतः शंसा॑दु॒घाद॑भि॒ह्रुतः॥५॥१४॥

क्रत्वा॑। यत्। अ॒स्य॒। तवि॑षीषु। पृ॒ञ्चते॑। अ॒ग्नेः। अवे॑न। म॒रुता॑म्। न। भो॒ज्या॑। इ॒षि॒राय॑। न। भो॒ज्या॑। सः। हि। स्म॒। दान॑म्। इन्व॑ति। वसू॑नाम्। च॒। म॒ज्मना॑। सः। नः॒। त्रा॒स॒ते॒। दुः॒ऽइ॒तात्। अ॒भि॒ऽह्रुतः। शंसा॑त्। अ॒घात्। अ॒भि॒ऽह्रुतः॥५॥

पदार्थः-(**क्रत्वा**) प्रज्ञया (**यत्**) यः (**अस्य**) सेनेशस्य (**तविषीषु**) प्रशस्तबलयुक्तासु सेनासु (**पृञ्चते**) सम्बध्नाति (**अग्नेः**) विद्युतः (**अवेन**) रक्षणाद्येन (**मरुताम्**) वायूनाम् (**न**) इव (**भोज्या**) भोक्तुं

योग्यानि **(इषिराय)** प्राप्तविद्याय **(न)** इव **(भोज्या)** पालयितुं योग्यानि **(सः)** **(हि)** **(स्म)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(दानम्)** दीयते यत्तत् **(इन्वति)** प्राप्नोति **(वसूनाम्)** प्रथमकोटिप्रविष्टानां विदुषाम् **(च)** पृथिव्यादीनां वा **(मज्मना)** बलेन **(सः)** **(नः)** अस्मान् **(त्रासते)** उद्वेजयति **(दुरितात्)** दुःखप्रदायिनः **(अभिह्रुतः)** आभिमुख्यं प्राप्तात् कुटिलात् **(शंसात्)** प्रशंसनात् **(अघात्)** पापात् **(अभिह्रुतः)** अभितः सर्वतो वक्रात्॥५॥

अन्वयः-यदस्य क्रत्वाऽवेन मरुतामग्नेरिषिराय भोज्या नेव भोज्या न तविषीषु पृञ्चते, यो हि मज्मना वसूनां च दानमिन्वति, यो नोऽभिह्रुतो दुरितादभिह्रुतोऽघात् त्रासते शंसात् संयोजयति स स्म सुखं प्राप्नोति, स च सुखकारी जायते, स स्म विद्वान् पूज्यः स सर्वाऽभिरक्षको भवति॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये सुशिक्षाविद्यादानेन दुष्टस्वभावगुणेभ्योऽधर्माचरणेभ्यश्च निवर्त्य शुभगुणेषु प्रवर्त्तयन्ति, तेऽत्र कल्याणकारका आप्ता भवन्ति॥५॥

पदार्थः-**(यत्)** जो **(अस्य)** इस सेनापति की **(क्रत्वा)** बुद्धि और **(अवेन)** रक्षा आदि काम से **(मरुताम्)** पवनों और **(अग्नेः)** बिजुली आग की **(इषिराय)** विद्या को प्राप्त हुए पुरुष के लिये **(भोज्या)** भोजन करने योग्य पदार्थों के **(न)** समान वा **(भोज्या)** पालने योग्य पदार्थों के **(न)** समान पदार्थों का **(तविषीषु)** प्रशंसित बलयुक्त सेनाओं में **(पृञ्चते)** सम्बन्ध करता वा जो **(हि)** ठीक-ठीक **(मज्मना)** बल से **(वसूनाम्)** प्रथम कक्षावाले विद्वानों तथा **(च)** पृथिव्यादि लोकों का **(दानम्)** जो दिया जाता पदार्थ उसको **(इन्वति)** प्राप्ति होता वा जो **(नः)** हम लागों को **(अभिह्रुतः)** आगे आये हुए कुटिल **(दुरितात्)** दुःखदायी **(अभिह्रुतः)** सब ओर से टेढ़े-मेढ़े छोटे-बड़े **(अघात्)** पाप से **(त्रासते)** उद्वेग करता अर्थात् उठाता वा **(शंसात्)** प्रशंसा से संयोग कराता **(सः, स्म)** वही सुख को प्राप्त होता और **(सः)** वह सुख करनेवाला होता तथा वही विद्वान् सबके सत्कार करने योग्य और वह सभी की ओर से रक्षा करनेहारा होता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो उत्तम शिक्षा और विद्या के दान से दुष्टस्वभावी प्राणियों और अधर्म के आचरणों से निवृत्त कराके अच्छे गुणों में प्रवृत्त कराते, वे इस संसार में कल्याण करनेवाले धर्मात्मा विद्वान् होते हैं॥५॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहा है॥

विश्वो॒ विहा॑या अर॒तिर्व॑सु॒र्दधे॒ हस्ते॒ दक्षि॑णे त॒रणि॒र्न शिश्र॑थच्छ्रव॒स्यया॒ न शिश्र॑थत्।
विश्वस्मा॒ इदि॑षुध्य॒ते दे॑व॒त्रा ह॒व्यमोहि॑षे।

विश्वा॑स्मा॒ इत्सु॒कृते॒ वार॑मृण्वत्य॒ग्निर्द्वारा॒ व्यृ॑ण्वति॥ ६॥

विश्वा॑:। विऽहा॑याः। अ॒र॒तिः। वसु॑:। द॒धे॒। हस्ते॑। दक्षि॑णे। त॒र॒णि॑:। न। शि॒श्र॒थ॒त्। श्र॒व॒स्यया॑। न। शि॒श्र॒थ॒त्। विश्वा॑स्मै। इत्। इ॒षु॒ध्य॒ते। दे॒व॒ऽत्रा। ह॒व्यम्। आ। ऊ॒हि॒षे॒। विश्वा॑स्मै। इत्। सु॒ऽकृते॑। वार॑म्। ऋ॒ण्व॒ति॒। अ॒ग्निः। द्वारा॑। वि। ऋ॒ण्व॒ति॒॥ ६॥

पदार्थः-(**विश्वः**) सर्वः (**विहायाः**) शुभगुणव्याप्तः (**अरतिः**) प्रापकः (**वसुः**) प्रथमकल्पब्रह्मचर्यः (**दधे**) धरामि (**हस्ते**) (**दक्षिणे**) (**तरणिः**) तारकः (**न**) निषेधे (**शिश्रथत्**) श्रथयेत् (**श्रवस्यया**) आत्मनः श्रव इच्छया (**न**) निषेधे (**शिश्रथत्**) श्रथयेत्। अत्रोभयत्राऽडभावः। (**विश्वस्मै**) सर्वस्मै (**इत्**) एव (**इषुध्यते**) इषुध इवाचरति तस्मै (**देवत्रा**) देवेष्विति (**हव्यम्**) दातुमर्हम् (**आ**) (**ऊहिषे**) वितर्कयसि (**विश्वस्मै**) (**इत्**) इव (**सुकृते**) सुष्ठु कर्त्तुं (**वारम्**) पुनः पुनर्वर्त्तुम् (**ऋण्वति**) प्राप्नोति (**अग्निः**) विद्युदिव (**द्वारा**) द्वाराणि (**वि**) विशेषाऽर्थे (**ऋण्वति**) प्राप्नोति॥ ६॥

अन्वयः-विश्वो विहाया अरतिस्तरणिर्वसुः श्रवस्ययाऽग्निर्न शिश्रथदिव न शिश्रथद्दक्षिणे हस्ते आमलक इव देवत्राहं विद्या दधे विश्वस्मा इषुध्यते त्वं हव्यमोहिषे तथेद्यो विश्वस्मै सुकृते द्वारा ऋण्वति स सुखमिद्वारं व्यृण्वति॥ ६॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्यः सर्वान् व्यक्तान् पदार्थान् प्रकाश्य सर्वेभ्यः सर्वाणि सुखानि जनयति तथाऽहिंसका विद्वांसो विद्याः प्रकाश्य सर्वानानन्दयन्ति॥ ६॥

पदार्थः-(**विश्वः**) समग्र (**विहायाः**) विद्या आदि शुभगुणों में व्याप्त (**अरतिः**) उत्तम व्यवहारों की प्राप्ति कराता और (**तरणिः**) तारनेहारा (**वसुः**) प्रथम श्रेणी का ब्रह्मचारी विद्वान् (**श्रवस्यया**) अपनी उत्तम उपदेश सुनने की इच्छा से जैसे (**अग्निः**) बिजुली न (**शिश्रथत्**) शिथिल हो वैसे (**न**) नहीं (**शिश्रथत्**) शिथिल हो वा (**दक्षिणे**) दाहिने (**हस्ते**) हाथ में जैसे आमलक धरें वैसे (**देवत्रा**) विद्वानों में मैं विद्या को (**दधे**) धारण करूं वा (**विश्वस्मै**) सब (**इषुध्यते**) धनुष् के समान आचरण करते हुए जनसमूह के लिये तू (**हव्यम्**) देने योग्य पदार्थ का (**आ, ऊहिषे**) तर्क-वितर्क करता (**इत्**) वैसे ही जो (**विश्वस्मै**) सब (**सुकृते**) सुकर्म करनेवाले जनसमूह के लिये (**द्वारा**) उत्तम व्यवहारों के द्वारों को (**ऋण्वति**) प्राप्त होता वह सुख (**इत्**) ही के (**वारम्**) स्वीकार करने को (**वि, ऋण्वति**) विशेषता से प्राप्त होता है॥ ६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य सब व्यक्त पदार्थों को प्रकाशित कर सबके लिये सब सुखों को उत्पन्न करता, वैसे हिंसा आदि दोषों से रहित विद्वान् जन विद्या का प्रकाश कर सबको आनन्दित करते हैं॥ ६॥

पुनस्ते किं कुर्युरित्याह॥

फिर वे क्या करें, इस विषय को अगले मन्त्र में कहा है॥

स मानुषे वृजने शंतमो हितो३ऽग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः।
स हव्या मानुषाणामिळा कृतानि पत्यते।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः॥७॥

सः। मानुषे। वृजने। शम्ऽतमः। हितः। अग्निः। यज्ञेषु। जेन्यः। न। विश्पतिः। प्रियः। यज्ञेषु। विश्पतिः। सः। हव्या। मानुषाणाम्। इळा। कृतानि। पत्यते। सः। नः। त्रासते। वरुणस्य। धूर्तेः। महः। देवस्य। धूर्तेः॥७॥

पदार्थः-(**सः**) विद्वान् (**मानुषे**) मानुषाणामस्मिन् (**वृजने**) व्रजन्ति यस्मिन् मार्गे तस्मिन् **पृषोदरादिना**स्य सिद्धिः। (**शंतमः**) अतिशयेन सुखकारी (**हितः**) हितसंपादकः (**अग्निः**) पावक इव (**यज्ञेषु**) अग्निहोत्रादिषु (**ज्येन्यः**) जेतुं शीलः (**न**) इव (**विश्पतिः**) विशां पालको राजा (**प्रियः**) प्रीणाति सः (**यज्ञेषु**) संगन्तव्येषु व्यवहारेषु (**विश्पतिः**) विशां प्रजानां पालयिता (**सः**) (**हव्या**) हव्यान्यादातुमर्हाणि (**मानुषाणाम्**) (**इळा**) सुसंस्कृतानि वचनानि (**कृतानि**) निष्पन्नानि (**पत्यते**) प्राप्यते (**सः**) (**नः**) अस्मान् (**त्रासते**) उद्वेजयति (**वरुणस्य**) श्रेष्ठस्य (**धूर्त्तेः**) हिंसकस्य सकाशात् (**महः**) महतः (**देवस्य**) विद्याप्रदस्य (**धूर्त्तेः**) अविद्या हिंसकस्य॥७॥

अन्वयः-यः प्रियो विश्पतिर्नोऽस्मान् धूर्त्तेस्त्रासते स धूर्त्तेर्महो देवस्य वरुणस्य सकाशात् यज्ञेषु मानुषाणामिळा कृतानि हव्या स्थिरीकरोति स सर्वैः पत्यते यो यज्ञेष्वग्निरिव जेन्यो न विश्पतिर्मानुषे वृजने हितश्शन्तमो भवति स सर्वैः सत्कर्त्तव्यो भवति॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये धर्ममार्गे जनानुपदेशेन प्रवर्त्तयन्ति न्यायेशो राजेव प्रजापालका दस्व्यादिभयनिवारकाः विदुषां मित्राणि जनाः सन्ति त एवान्धपरम्परानिरोधका भवितुमर्हन्ति॥७॥

पदार्थः-जो (**प्रियः**) तृप्ति करनेवाला है, वह (**विश्पतिः**) प्रजाओं का पालक राजा (**नः**) हम लोगों को (**धूर्त्तेः**) हिंसक से (**त्रासते**) वेमन कराता और (**सः**) वह (**धूर्तेः**) अविद्या को नाशने और (**महः**) बड़े (**देवस्य**) विद्या देनेवाले (**वरुणस्य**) उत्तम विद्वान् के पास से जो (**यज्ञेषु**) सङ्ग करने योग्य व्यवहारों में (**मानुषाणाम्**) मनुष्यों के (**इळा**) अच्छे संस्कारों से युक्त (**कृतानि**) सिद्ध किये शुद्ध वचन (**हव्या**) जो कि ग्रहण करने योग्य हों उनको स्थिर करता तथा (**सः**) वह सबको (**पत्यते**) प्राप्त होता वा (**यज्ञेषु**) अग्निहोत्र आदि यज्ञों में (**अग्निः**) अग्नि के समान वा (**जेन्यः**) विजयशील के (**नः**) समान (**विश्पतिः**) प्रजाजनों का पालनेवाला (**मानुषे**) मनुष्यों के (**वृजने**) उस मार्ग में कि जिसमें गमन करते (**हितः**) हित सिद्ध करनेवाला (**शंतमः**) अतीव सुखकारी होता (**सः**) वह विद्वान् सबको सत्कार करने योग्य होता है॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो धर्म मार्ग में मनुष्यों को उपदेश से प्रवृत्त कराते, न्यायाधीश राजा के समान प्रजाजनों को पालने, डाकू आदि दुष्ट प्राणियों से जो डर उसको निवृत्त करानेवाले विद्वानों के मित्रजन हैं, वे ही अन्धपरम्परा अर्थात् कुमार्ग के रोकनेवाले होने को योग्य होते हैं॥७॥

कस्य समागमेन किं प्राप्तव्यमित्याह॥

किसके मिलाप से क्या पाने योग्य है, इस विषय को अगले मन्त्र में कहा है॥

अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे।
विश्वायुं विश्ववेदसं होतारं यजतं कविम्।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः॥८॥१५॥

अग्निम्। होतारम्। ईळते। वसुऽधितिम्। प्रियम्। चेतिष्ठम्। अरतिम्। नि। एरिरे। हव्यऽवाहम्। नि। एरिरे। विश्वऽआयुम्। विश्वऽवेदसम्। होतारम्। यजतम्। कविम्। देवासः। रण्वम्। अवसे। वसुऽयवः। गीःऽभिः। रण्वम्। वसुऽयवः॥८॥

पदार्थः-(**अग्निम्**) पावकमिव वर्त्तमानम् (**होतारम्**) दातारम् (**ईळते**) स्तुवन्ति (**वसुधितिम्**) वसूनां धितयो यस्य तम् (**प्रियम्**) प्रीतिकारकम् (**चेतिष्ठम्**) अतिशयेन चेतितारम् (**अरतिम्**) प्राप्तविद्यम् (**नि**) (**एरिरे**) प्रेरयन्ति (**हव्यवाहम्**) हव्यानां वोढारम् (**नि**) (**एरिरे**) प्राप्नुवन्ति (**विश्वायुम्**) यो विश्वं सर्वं बोधमेति तम् (**विश्ववेदसम्**) विश्वं समग्रं वेदो धनं यस्य तम् (**होतारम्**) आदातारम् (**यजतम्**) पूजितुमर्हम् (**कविम्**) पूर्णविद्यम् (**देवासः**) विद्वांसः (**रण्वम्**) सत्योपदेशकम् (**अवसे**) रक्षणाद्याय (**वसूयवः**) य आत्मनो वसूनि द्रव्याणीच्छन्ति ते (**गीर्भिः**) सुसंस्कृताभिर्वाग्भिः (**रण्वम्**) सत्यवादिनम् (**वसूयवः**) अत्रोभयत्र वसुशब्दात् **सुप आत्मनः क्यजि**ति क्यच् प्रत्ययः। **क्याच्छन्दसी**त्युः प्रत्ययः, **अन्येषामपी**ति दीर्घः॥८॥

अन्वयः-हे मनुष्या! ये देवासो यमग्निमिव होतारं वसुधितिमरतिं हव्यवाहं चेतिष्ठं प्रियं विद्वांसं जिज्ञासवो न्येरिरे विश्वायुं विश्ववेदसं होतारं यजतं कविं रण्वं वसूयव इव न्येरिरे वसूयवोऽवसे गीर्भी रण्वमीळते तान् यूयमपीळिध्वम्॥८॥

भावार्थः-अत्रवाचकलुप्तोपमालङ्कारः। हे मनुष्या! विद्वांसो यस्य सेवासंगेन विद्याः प्राप्नुवन्ति, तस्यैव सेवासङ्गेन युष्माभिरप्येता आप्तव्याः॥८॥

अत्र विद्वद्गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इत्यष्टाविंशत्युत्तरं शततमं १२८ सूक्तं पञ्चदशो १५ वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(देवासः)** विद्वान् जन जिस **(अग्निम्)** अग्नि के समान वर्त्तमान **(होतारम्)** देनेवाले **(वसुधितिम्)** जिसके कि धनों की धारणा हैं **(अरतिम्)** और जो विद्या पाये हुए हैं, उस **(हव्यवाहम्)** देने-लेने योग्य व्यवहार की प्राप्ति कराने **(चेतिष्ठम्)** चिताने और **(प्रियम्)** प्रीति उत्पन्न करानेहारे विद्वान् के जानने की इच्छा किये हुए **(न्येरिरे)** निरन्तर प्रेरणा देते वा **(विश्वायुम्)** जो सब विद्यादि गुणों के बोध को प्राप्त होता **(विश्ववेदसम्)** जिसका समग्र वेद धन उस **(होतारम्)** ग्रहण करनेवाले **(यजतम्)** सत्कार करने योग्य **(कविम्)** पूर्णविद्यायुक्त और **(रण्वम्)** सत्योपदेशक सत्यवादी पुरुष को **(वसूयवः)** जो धन आदि पदार्थों की इच्छा करते हैं, उनके समान **(न्येरिरे)** निरन्तर प्राप्त होते हैं वा जो **(वसूयवः)** धन आदि पदार्थों को चाहनेवाले **(अवसे)** रक्षा आदि के लिये (**गीर्भिः**) अच्छी संस्कार की हुई वाणियों से **(रण्वम्)** सत्य बोलनेवाले की **(ईळते)** स्तुति करते हैं, उन-सबों की तुम भी स्तुति करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! विद्वान् लोग जिसकी सेवा और सङ्ग से विद्यादि गुणों को पाते हैं, उसी की सेवा और सङ्ग से तुम लोगों को चाहिये कि इनको पाओ॥८॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ एकता है, यह जानना चाहिये॥

यह एक सौ अट्ठाईसवां १२८ सूक्त और पन्द्रहवाँ १५ वर्ग पूरा हुआ॥

अथ यं त्वमित्यस्यैकादशर्चस्यैकोनत्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। १,२ निचृदत्यष्टिः। ३ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। ४ अष्टिः। ६,११ भुरिगष्टिः। १० निचृदष्टिः छन्दः। मध्यमः स्वरः। ५ भुरिगतिशक्वरी। ७ स्वराडतिशक्वरी। पञ्चमः स्वरः। ८,९ स्वराट् शक्वरी छन्दः। धैवतः स्वरः॥

विद्वांसः किं कुर्युरित्याह॥

अब ग्यारह ऋचावाले एक सौ उनतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् जन क्या करें, इस विषय को कहते हैं॥

यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम्।
सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम्॥ १॥

यम्। त्वम्। रथम्। इन्द्र। मेधऽसातये। अपाका। सन्तम्। इषिर। प्रऽनयसि। प्र। अनवद्य। नयसि। सद्यः। चित्। तम्। अभिष्टये। करः। वशः। च। वाजिनम्। सः। अस्माकम्। अनवद्य। तूतुजान। वेधसाम्। इमाम्। वाचम्। न। वेधसाम्॥ १॥

पदार्थः–(**यम्**) (**त्वम्**) (**रथम्**) रमणीयम् (**इन्द्र**) विद्वन् सभेश (**मेधसातये**) मेधानां पवित्राणां संविभागाय (**अपाका**) अपगतमविद्याजन्यं दुःखं यस्य तम् (**सन्तम्**) विद्यमानम् (**इषिर**) इच्छो (**प्रणयसि**) (**प्र**) (**अनवद्य**) प्रशंसित (**नयसि**) प्रापयसि (**सद्यः**) (**चित्**) इव (**तम्**) (**अभिष्टये**) इष्टप्राप्तये (**करः**) कुर्य्याः। अत्र लेट्। (**वशः**) कामयमानः (**च**) (**वाजिनम्**) प्रशस्तज्ञानवन्तम् (**सः**) (**अस्माकम्**) (**अनवद्य**) प्रशंसितगुणयुक्त (**तूतुजान**) क्षिप्रकारिन् (**वेधसाम्**) मेधाविनाम् (**इमाम्**) (**वाचम्**) सुशिक्षितां वाणीम् (**न**) इव (**वेधसाम्**) मेधाविनाम्॥ १॥

अन्वयः–हे इषिरेन्द्र! त्वं मेधसातये यमपाका सन्तं रथं प्रणयसीव विद्यां प्रणयसि च, हे अनवद्य! वशस्त्वमभिष्टये च वाजिनं चित्तं सद्यः करः। हे तूतुजानानवद्य! स त्वमस्माकं वेधसान्न वेधसामिमां वाचं करः॥ १॥

भावार्थः–अत्रोपमालङ्कारः। ये विद्वांसः सर्वान् मनुष्यान् विद्याविनयेषु प्रवर्त्तयन्ति तेऽभीष्टानि साद्धुं शक्नुवन्ति॥ १॥

पदार्थः–हे (**इषिर**) इच्छा करनेवाले (**इन्द्र**) विद्वान् सभापति! (**त्वम्**) आप (**मेधसातये**) पवित्र पदार्थों के अच्छे प्रकार विभाग करने के लिये (**यम्**) जिस (**अपाका**) पूर्ण ज्ञानवाले (**सन्तम्**) विद्यमान (**रथम्**) विद्वान् को रमण करने योग्य रथ को (**प्रणयसि**) प्राप्त कराने के समान विद्या को (**प्रणयसि**) प्राप्त करते हो (**च**) और हे (**अनवद्य**) प्रशंसायुक्त! (**वशः**) कामना करते हुए आप (**अभिष्टये**) चाहे हुए

पदार्थ की प्राप्ति के लिये **(वाजिनम्)** प्रशंसित ज्ञानवान् के **(चित्)** समान **(तम्)** उसको **(सद्यः)** शीघ्र **(करः)** सिद्ध करें वा हे **(तूतुजान)** शीघ्र कार्यों के कर्त्ता **(अनवद्य)** प्रशंसित गुणों से युक्त! **(सः)** सो आप **(अस्माकम्)** हम **(वेधसाम्)** धीर बुद्धिवालों के **(न)** समान **(वेधसाम्)** बुद्धिमानों की **(इमाम्)** इस **(वाचम्)** उत्तम शिक्षायुक्त वाणी को सिद्ध करें अर्थात् उसको उपदेश करें॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन सब मनुष्यों को विद्या और विनय आदि गुणों में प्रवृत्त कराते हैं, वे सब ओर से चाहे हुए पदार्थों की सिद्धि कर सकते हैं॥१॥

पुनर्विद्वांसः कीदृशा भवन्तीत्याह॥

फिर विद्वान् कैसे होते हैं, इस विषय को अगले मन्त्र में कहा है॥

स श्रुधि यः स्मा पृतनासु कासु चिद् दक्षाय्यो इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः।
यः शूरैः स्वऽ१ःसनिता यो विप्रैर्वाजं तरुता।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम्॥२॥

सः। श्रुधि। यः। स्म। पृतनासु। कासु। चित्। दक्षाय्यः। इन्द्र। भरऽहूतये। नृऽभिः। असि। प्रऽतूर्तये। नृऽभिः। यः। शूरैः। स्वऽरिति स्वः। सनिता। यः। विप्रैः। वाजम्। तरुता। तम्। ईशानासः। इरधन्त। वाजिनम्। पृक्षम्। अत्यम्। न। वाजिनम्॥२॥

पदार्थः-(**सः**) सेनेशः (**श्रुधि**) शृणु (**यः**) (**स्म**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**पृतनासु**) सेनासु (**कासु**) (**चित्**) अपि (**दक्षाय्यः**) यो राजकर्मसु प्रवीणः (**इन्द्र**) परमैश्वर्ययुक्त (**भरहूतये**) भराणां पालकानां हूतये स्पर्द्धायै (**नृभिः**) नायकैः (**असि**) (**प्रतूर्त्तये**) सद्योऽनुष्ठानाय (**नृभिः**) नायकैः (**यः**) (**शूरैः**) निर्भयैः (**स्वः**) सुखम् (**सनिता**) संविभाजकः (**यः**) (**विप्रैः**) मेधाविभिः (**वाजम्**) विज्ञानम् (**तरुता**) प्लविता (**तम्**) (**ईशानासः**) समर्थाः (**इरधन्त**) ये इरान् इळान् प्रेरकान् दधति ते इरधास्त इवाचरन्तु (**वाजिनम्**) विज्ञानवन्तम् (**पृक्षम्**) सुखैः सेचकम् (**अत्यम्**) व्याप्तिशीलम् (**न**) इव (**वाजिनम्**) अश्वम्॥२॥

अन्वयः-हे इन्द्र सेनेश! यस्त्वं प्रतूर्त्तये नृभिरिव नृभिर्भरहूतये कासु चित्पृतनासु दक्षाय्योऽसि यस्त्वं शूरैः सनिता यो विप्रैर्वाजं तरुता वाजिनमत्यं नेव पृक्षं वाजिनं धरसि तं त्वामीशानास इरधन्त स स्मैव सर्वस्य न्यायं श्रुधि॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वद्भिर्न्यायाधीशैः सह राजधर्मं नयन्ति ते प्रजास्वानन्दप्रदा भवन्ति॥२॥

पदार्थः–हे **(इन्द्र)** परम ऐश्वर्ययुक्त सेनापति! **(यः)** जो आप **(प्रतूर्त्तये)** शीघ्र आरम्भ करने के लिये **(नृभिः)** मुख्य अग्रगन्ता मनुष्यों के समान **(नृभिः)** अपने अधिकारी कामचारी मनुष्यों से **(भरहूतये)** दूसरों की पालना करनेवाले राजजनों की स्पर्द्धा अर्थात् उनकी हार करने के लिये **(कासु, चित्)** किन्हीं **(पृतनासु)** सेनाओं में और **(दक्षाय्यः)** राजकामों में अति चतुर **(असि)** हो वा **(यः)** जो आप **(शूरैः)** निडर शूरवीरों के साथ **(स्वः)** सुख को **(सनिता)** अच्छे बांटनेवाले वा **(यः)** जो **(विप्रैः)** धीर बुद्धिवालों के साथ **(वाजम्)** विशेष ज्ञान को **(तरुता)** पार होनेवाले **(वाजिनम्)** विशेष ज्ञानवान् **(अत्यम्)** व्याप्त होनेवाले के **(न)** समान **(पृक्षम्)** सुखों को सीचनेंवाले **(वाजिनम्)** घोड़े को धारण करते हो **(तम्)** उन आपको **(ईशानासः)** समर्थ जन **(इरधन्तः)** जो प्रेरणा करनेवालों को धारण करते उनके जैसा आचरण करें अर्थात् प्रेरणा दें और **(सः)** **(स्म)** वही आप सबके न्याय को **(श्रुधि)** सुनें॥ २॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो विद्वान् और न्यायाधीशों के साथ राजधर्म को प्राप्त करते, वे प्रजाजनों में आनन्द को अच्छे प्रकार देनेवाले होते हैं॥ २॥

पुनः के जगदुपकारका भवन्तीत्याह॥

फिर कौन संसार का उपकार करनेवाले होते हैं, इस विषय को अगले मन्त्र में कहा है॥

दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यम्।
इन्द्रोत तुभ्यं तदिवे तदुद्राय स्वयशसे।
मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः॥ ३॥

दस्मः। हि। स्म। वृषणम्। पिन्वसि। त्वचम्। कम्। चित्। यावीः। अररुम्। शूर। मर्त्यम्। परिऽवृणक्षि। मर्त्यम्। इन्द्र। उत। तुभ्यम्। तत्। दिवे। तत्। रुद्राय। स्वऽयशसे। मित्राय। वोचम्। वरुणाय। सऽप्रथः। सुऽमृळीकाय। सऽप्रथः॥ ३॥

पदार्थः–**(दस्मः)** शत्रूणामुपक्षयिता **(हि)** यतः **(स्म)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(वृषणम्)** विद्यावर्षकम् **(पिन्वसि)** सेवसे **(त्वचम्)** आच्छादकम् **(कम्)** **(चित्)** अपि **(यावीः)** अयावीः पृथक् करोषि **(अररुम्)** प्रापकम् **(शूर)** शत्रुहिंसक **(मर्त्यम्)** मनुष्यम् **(परिवृणक्षि)** सर्वतस्त्यजसि **(मर्त्यम्)** मनुष्यमिव **(इन्द्र)** सभेश **(उत)** अपि **(तुभ्यम्)** **(तत्)** **(दिवे)** कामयमानाय **(तत्)** **(रुद्राय)** दुष्टानां रोदयित्रे **(स्वयशसे)** स्वकीयं यशः कीर्त्तिर्यस्य तस्मै **(मित्राय)** सुहृदे **(वोचम्)** उच्याम् **(वरुणाय)** वराय **(सप्रथः)** प्रथसा विस्तारेण युक्तम् **(सुमृळीकाय)** सुष्ठु सुखकराय **(सप्रथः)** सप्रसिद्धिः॥ ३॥

अन्वयः–हे शूरेन्द्र हि यतो दस्मस्त्वं यं कञ्चित् त्वचं यावीर्वृषणमररुं मर्त्यमिव मर्त्यम् परिवृणक्षि पिन्वस्यतस्तस्मै स्वयशसे मित्राय तुभ्यं च तद्वोचं दिवे रुद्राय वरुणाय सुमृळीकाय सप्रथ इव सप्रथोऽहं तदुत स्म वोचम्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सर्वेभ्यो मनुष्येभ्यो मित्रभावेन सत्यमुपदिशन्ति धर्मं सेवन्ते ते परमसुखप्रदा भवन्ति॥३॥

पदार्थः-हे **(शूर)** शत्रुओं को मारनेवाले **(इन्द्र)** सभापति! **(हि)** जिस कारण **(दस्मः)** शत्रुओं को विनाशनेहारे आप जिस **(कञ्चित्)** किसी **(त्वचम्)** धर्म के ढांपनेवाले को **(यावीः)** पृथक् करते और **(वृषणम्)** विद्यादि गुणों के वर्षाने **(अररुम्)** वा दूसरे को उनकी प्राप्ति करानेवाले **(मर्त्यम्)** मनुष्य के समान **(मर्त्यम्)** मनुष्य को **(परिवृणक्षि)** सब ओर से छोड़ते स्वतन्त्रता देते वा **(पिन्वसि)** उसका सेवन करते हैं, इस कारण उस **(स्वयशसे)** स्वकीर्त्ति से युक्त **(मित्राय)** सबके मित्र के लिये वा **(तुभ्यम्)** आपके लिये **(तत्)** उस व्यवहार को **(वोचम्)** मैं कहूं वा **(दिवे)** कामना करने **(रुद्राय)** दुष्टों को रुलाने **(वरुणाय)** श्रेष्ठ धर्म आचरण करने **(सुमृळीकाय)** और उत्तम सुख करनेवाले के लिये **(सप्रथः)** सब प्रकार के विस्तार से युक्त मनुष्य के समान **(सप्रथः)** प्रसिद्धि अर्थात् उत्तम कीर्त्तियुक्त **(तत्)** उस उक्त आप के उत्तम व्यवहार को **(उत)** तर्क-वितर्क से **(स्म)** ही कहूं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सब मनुष्यों के लिये मित्रभाव से सत्य का उपदेश करते वा धर्म का सेवन करते, वे परम सुख के देनेवाले होते हैं॥३॥

पुनर्मनुष्यैः कैः सह किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को किनके साथ क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम्।
अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित्।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम्॥४॥

अस्माकम्। वः। इन्द्रम्। उश्मसि। इष्टये। सखायम्। विश्वऽआयुम्। प्रऽसहम्। युजम्। वाजेषु। प्रऽसहम्। युजम्। अस्माकम्। ब्रह्म। ऊतये। अव। पृत्सुषु। कासु। चित्। नहि। त्वा। शत्रुः। स्तरते। स्तृणोषि। यम्। विश्वम्। शत्रुम्। स्तृणोषि। यम्॥४॥

पदार्थः-**(अस्माकम्)** **(वः)** युष्माकम् **(इन्द्रम्)** परमैश्वर्यम् **(उश्मसि)** कामयेमहि **(इष्टये)** इष्टप्राप्तये **(सखायम्)** मित्रम् **(विश्वायुम्)** प्राप्तसमग्रशुभगुणम् **(प्रासहम्)** प्रकृष्टतया सहनशीलम् **(युजम्)** योगयुक्तम् **(वाजेषु)** राजजनैः प्राप्तव्येषु **(प्रासहम्)** अतीवसोढारम् **(युजम्)** योक्तारम् **(अस्माकम्)** **(ब्रह्म)** वेदम् **(ऊतये)** रक्षाद्याय **(अव)** रक्ष। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(पृत्सुषु)** संग्रामेषु। **पृत्सुरिति संग्रामनामसु पठितम्।** (निघं०२.१७) **(कासु)** **(चित्)** **(नहि)** **(त्वा)** त्वाम् **(शत्रुः)** **(स्तरते)**

स्तृणोत्याच्छादयति। अत्र व्यत्ययेन शप्। **(स्तृणोषि)** आच्छादयसि **(यम्)** **(विश्वम्)** समग्रम्। **(शत्रुम्)** विरोधिनम् **(स्तृणोषि)** आच्छादयसि **(यम्)**॥४॥

अन्वयः-हे मनुष्या! यथा वयमस्माकं वो युष्माकं चेन्द्रं परमैश्वर्य्ययुक्तं वाजेषु पृत्सुषु कासु चित् प्रासहं युजमिव प्रासहं युजं विश्वायुं सखायमिष्टय उश्मसि तथा यूयमपि कामयध्वम्। हे विद्वन्नस्माकमूतये त्वं ब्रह्माऽव। एवं सति यं विश्वं स्तृणोषि यं च विरोधिनं स्तृणोषि स शत्रुस्त्वा नहि स्तरते॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यावच्छक्यं तावद्बहुमित्राणि कर्तुं प्रयतितव्यम्। परन्तु नाऽधार्मिकाः सखायः कार्य्याः न च दुष्टेषु मित्रता समाचरणीया। एवं सति शत्रूणां बलं नैव वर्द्धते॥४॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(अस्माकम्)** हमारे और **(वः)** तुम्हारे **(इन्द्रम्)** परम ऐश्वर्य्ययुक्त वा **(वाजेषु)** राजजनों को प्राप्त होने योग्य **(पृत्सुषु, कासु, चित्)** किन्हीं सेनाओं में **(प्रासहम्)** उत्तमता से सहनशील **(युजम्)** और योगाभ्यासयुक्त धर्मात्मा पुरुष के समान **(प्रासहम्)** अतीव सहने **(युजम्)** और योग करनेवाले **(विश्वायुम्)** समग्र शुभ गुणों को पाये हुए **(सखायम्)** मित्र जन की **(इष्टये)** चाहे हुए पदार्थ की प्राप्ति के लिये **(उश्मसि)** कामना करते हैं वैसे तुम भी कामना करो। हे विद्वान्! **(अस्माकम्)** हमारी **(ऊतये)** रक्षा आदि होने के लिये आप **(ब्रह्म)** वेद की **(अव)** रक्षा करो, ऐसे हुए पर **(यम्)** जिस **(विश्वम्)** समग्र **(शत्रुम्)** शत्रुगण को **(स्तृणोषि)** आच्छादन करते अर्थात् अपने प्रताप से ढांपते और **(यम्)** जिस विरोध करनेवाले को **(स्तृणोषि)** ढांपते अर्थात् अपने प्रचण्ड प्रताप से रोकते हुए **(शत्रुः)** शत्रु **(त्वा)** आपको (**नहि)** नहीं **(स्तरते)** ढांपता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जितना सामर्थ्य हो सके उतने से बहुत मित्र करने को उत्तम यत्न करें, परन्तु अधर्मी दुष्ट जन मित्र न करने चाहिये और न दुष्टों में मित्रपन का आचरण करना चाहिये, ऐसे हुए पर शत्रुओं का बल नहीं बढ़ता है॥४॥

कोऽत्र सुखदायी भवतीत्याह॥

इस संसार में कौन सुख का देनेवाला होता है, इस विषय को अगले मन्त्र में कहा है॥

नि षू नमातिमतिं कयस्य चित् तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः।
नेषि णो यथा पुरानेनाः शूर मन्यसे।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ॥५॥ १६॥

नि। सु। नम। अतिऽमतिम्। कयस्य। चित्। तेजिष्ठाभिः। अरणिभिः। नः। ऊतिऽभिः। उग्राभिः। उग्र। ऊतिऽभिः। नेषि। नः। यथा। पुरा। अनेनाः। शूर। मन्यसे। विश्वानि। पूरोः। अपः। पर्षि। वह्निः। आसा। वह्निः। नः। अच्छ॥५॥

पदार्थः-(**नि**) (**सु**) शोभने (**नम**) नम्रो भव (**अतिमतिम्**) अतिशयिता चासौ मतिश्च ताम् (**कयस्य**) विज्ञातुः (**चित्**) अपि (**तेजिष्ठाभिः**) अतिशयेन तेजस्विनीभिः (**अरणिभिः**) सुखप्रापिकाभिः (**न**) इव (**ऊतिभिः**) रक्षणाद्याभिः (**उग्राभिः**) तीव्राभिः (**उग्र**) तेजस्विन् (**ऊतिभिः**) रक्षणादिभिः (**नेषि**) (**नः**) अस्मान् (**यथा**) येन प्रकारेण (**पुरा**) पूर्वम् (**अनेनाः**) अविद्यमानमेनः पापं यस्य सः (**शूर**) दुष्टहिंसक (**मन्यसे**) जानासि (**विश्वानि**) सर्वाणि (**पूरोः**) विदुषो मनुष्यस्य। **पूरव इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**अप**) (**पर्षि**) सिञ्चसि (**वह्निः**) वोढा (**आसा**) अन्तिके (**वह्निः**) वोढा (**नः**) अस्मान् (**अच्छ**) शोभने॥५॥

अन्वयः-हे उग्र शूर विद्वंस्त्वं तेजिष्ठाभिररणिभिरुग्राभिरूतिभिर्नोतिभिरतिमतिं विनम। यथऽनेनाः पुरा नयति तथा नो मन्यसे सुनेष्यासा वह्निरिव नोऽच्छ पर्षि कयस्य पुरोश्चित् वह्निस्त्वं विश्वानि दुःखान्यपनेषि स त्वमस्माभिः सेवनीयोऽसि॥५॥

भावार्थः-अत्रोपमालङ्कारः। यो मनुष्याणां बुद्धिं सुरक्षया वर्द्धयित्वा पापेष्वश्रद्धां जनयति स एव सर्वान् सुखानि नेतुं शक्नोति॥५॥

पदार्थः-हे (**उग्र**) तेजस्वी (**शूर**) दुष्टों को मारनेवाले विद्वान्! (**तेजिष्ठाभिः**) अतीव प्रतापयुक्त (**अरणिभिः**) सुख देनेवाली (**उग्राभिः**) तीव्र (**ऊतिभिः**) रक्षा आदि क्रियाओं (**न**) के समान (**ऊतिभिः**) रक्षाओं से (**अतिमतिम्**) अत्यन्त विचारवाली बुद्धि को (**नि, नम**) नमो अर्थात् नम्रता के साथ वर्तो वा (**यथा**) जैसे (**अनेनाः**) पापरहित मनुष्य (**पुरा**) पहिले उत्तम कामों की प्राप्ति करता वैसे (**नः**) हम लोगों को आप (**मन्यसे**) जानते और (**सु, नेषि**) सुन्दरता से अच्छे कामों को प्राप्त कराते वा (**आसा**) अपने पास (**वह्निः**) पहुंचानेवाले के समान (**नः**) हम को (**अच्छ, पर्षि**) अच्छे सींचते वा (**कयस्य**) विशेष ज्ञान देने और (**पूरोः**) पूरे विद्वान् मनुष्य के (**चित्**) भी (**वह्निः**) पहुँचानेवाले आप (**विश्वानि**) समग्र दुःखों को (**अप**) दूर करते हो सो आप हम लोगों के सेवन करने योग्य हो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्यों की बुद्धि को उत्तम रक्षा से बढ़ा कर पाप कर्मों में अश्रद्धा उत्पन्न करता है, वही सभी को सुख पहुंचा सकता है॥५॥

केभ्यो विद्या देयेत्याह॥

किनके लिये विद्या देनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम्।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत्॥६॥

प्र। तत्। वोचेयम्। भव्याय। इन्दवे। हव्यः। न। यः। इषवान्। मन्म। रेजति। रक्षोहा। मन्म। रेजति। स्वयम्। सः। अस्मत्। आ। निदः। वधैः। अजेत। दुःऽमतिम्। अव। स्रवेत्। अघऽशंसः। अवऽतरम्। अव। क्षुद्रम्ऽइव। स्रवेत्॥६॥

पदार्थः-(**प्र**) (**तत्**) उपदेश्यं ज्ञानम् (**वोचेयम्**) उपदिशेयम् (**भव्याय**) यो विद्याग्रहणेच्छुर्भवति तस्मै (**इन्दवे**) आर्द्राय (**हव्यः**) होतुमादातुमर्हः (**न**) इव (**यः**) (**इषवान्**) ज्ञानवान् (**मन्म**) मन्तुं योग्यं ज्ञानम् (**रेजति**) उपार्जति (**रक्षोहा**) दुष्टगुणकर्मस्वभावहन्ता (**मन्म**) ज्ञातुं योग्यम् (**रेजति**) उपार्जति (**स्वयम्**) (**सः**) (**अस्मत्**) (**आ**) (**निदः**) निन्दकान् (**वधैः**) हननैः (**अजेत**) प्रक्षिपेत्। अत्र व्यत्ययेनात्मनेपदम्। (**दुर्मतिम्**) दुष्टा चासौ मतिश्च ताम् (**अव**) वैपरीत्ये (**स्रवेत्**) गमयेत् (**अघशंसः**) योऽघं पापं शंसति सः (**अवतरम्**) अवाङ्मुखम् (**अव**) (**क्षुद्रमिव**) यथा क्षुद्राऽऽशयम् (**स्रवेत्**) दण्डेयत्॥६॥

अन्वयः-अहं स्वयं यथा हव्यो रक्षोहा मन्म रेजति न य इषवान् मन्म रेजति तद्भव्यायेन्दवे प्रवोचेयम्। योऽस्मत् शिक्षां प्राप्य वधैर्निंदो दुर्मतिं चाजेत सोऽवतरं क्षुद्रमिवावस्रवेत। योऽघशंसोऽवास्रवेत् तं वाढं दण्डयेत्॥६॥

भावार्थः-अत्रोपमालङ्कारः। विद्वान् ये शुभगुणकर्मस्वभावा विद्यार्थिनः सन्ति तेभ्यः प्रीत्या विद्या प्रदद्यात्। निन्दकान् चोरान् निस्सारयेत् स्वयमपि सदा धार्मिकः स्यात्॥६॥

पदार्थः-मैं (**स्वयम्**) आप जैसे (**हव्यः**) स्वीकार करने योग्य (**रक्षोहा**) दुष्ट गुण, कर्म, स्वभाववालों को मारनेवाला (**मन्म**) विचार करने योग्य ज्ञान का (**रेजति**) संग्रह करते हुए के (**न**) समान (**यः**) जो (**इषवान्**) ज्ञानवान् (**मन्म**) जानने योग्य व्यवहार को (**रेजति**) संग्रह करता है (**तत्**) उस उपदेश करने योग्य ज्ञान को (**भव्याय**) जो विद्याग्रहण की इच्छा करनेवाला होता है उस (**इन्दवे**) आर्द्र अर्थात् कोमल हृदयवाले के लिये (**प्र, वोचेयम्**) उत्तमता से कहूं जो (**अस्मत्**) हमसे शिक्षा पाकर (**वधैः**) मारने के उपायों से (**निदः**) निन्दा करनेहारों और (**दुर्मतिम्**) दुष्ट मतिवाले जन को (**अजेत**) दूर करे (**सः**) वह (**अवतरम्**) अधोमुखी लज्जित मुखवाले पुरुष को (**क्षुद्रमिव**) तुच्छ आशयवाले के समान (**अव, स्रवेत्**) उसके स्वभाव से विपरीत दण्ड देवे और (**अघशंसः**) जो पाप की प्रशंसा करता वह चोर, डाकू, लम्पट, लवाड़ आदि जन (**अव, आ, स्रवेत्**) अपने स्वभाव से अच्छे प्रकार उलटी चाल चले॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। अध्यापक विद्वान् जो शुभ, गुण, कर्म स्वभाववाले विद्यार्थी हैं, उनके लिये प्रीति से विद्याओं को देवे और निन्दा करनेहारे चोरों को निकाल देवे और आप भी सदैव धर्मात्मा हो॥६॥

पुनर्मात्रादिभिः सन्ताना: कथमुपदेष्टव्या इत्याह॥

फिर माता आदि को सन्तान कैसे उपदेशों से समझाने चाहिये, इस विषय को अगले मन्त्र में कहा है॥

व॒नेम॒ तद्धोत्र॑या चि॒तन्त्या॑ व॒नेम॑ र॒यिं र॑यिवः सु॒वीर्य॑ꣳ र॒ण्वं सन्तं॑ सु॒वीर्य॑म्।
दु॒र्मन्मा॑नं सु॒मन्तु॑भि॒रेमि॒षा पृ॑चीमहि।
आ स॒त्याभि॒रिन्द्रं॑ द्यु॒म्नहू॑तिभि॒र्यज॑त्रं द्यु॒म्नहू॑तिभिः॥७॥

व॒नेम॑। तत्। होत्र॑या। चि॒तन्त्या॑। व॒नेम॑। र॒यिम्। र॒यि॒ऽवः॒। सु॒ऽवीर्य॑म्। र॒ण्वम्। सन्त॑म्। सु॒ऽवीर्य॑म्। दुः॒ऽमन्मा॑नम्। सु॒मन्तु॑ऽभिः। आ। ई॒म्। इ॒षा। पृ॒ची॒म॒हि॒। आ। स॒त्याभिः॑। इन्द्र॑म्। द्यु॒म्नहू॑तिऽभिः। यज॑त्रम्। द्यु॒म्नहू॑तिऽभिः॥७॥

पदार्थः-(**वनेम**) संभजेम (**तत्**) विज्ञानम् (**होत्रया**) आदातुमर्हया (**चितन्त्या**) बुद्धिमत्या (**वनेम**) विभज्य दद्याम (**रयिम्**) श्रियम् (**रयिवः**) श्रीमन् (**सुवीर्यम्**) श्रेष्ठपराक्रमम् (**रण्वम्**) उपदेशकम् (**सन्तम्**) वर्त्तमानम् (**सुवीर्यम्**) विद्याधर्माभ्यां सुष्ठ्वात्मबलम् (**दुर्मन्मानम्**) यो दुष्टं मन्यते स दुर्मन् यस्तं मिनाति तम् (**सुमन्तुभिः**) शोभनविद्यायुक्तैः (**आ**) समन्तात् (**ईम्**) प्राप्तव्यया (**इषा**) इच्छया (**पृचीमहि**) सम्बन्धीयाम (**आ**) (**सत्याभिः**) सत्याचरणान्विताभिः (**इन्द्रम्**) परमैश्वर्यम् (**द्युम्नहूतिभिः**) द्युम्नस्य धनस्य यशसो वाऽऽह्वानैः (**यजत्रम्**) संगन्तव्यम् (**द्युम्नहूतिभिः**)॥७॥

अन्वयः-हे रयिवो! यथा वयं होत्रया चितन्त्या यद् ज्ञानं वनेम सुवीर्यं रयिं सन्तं रण्वं सुवीर्यं च वनेम सुमन्तुभिरीमिषा च दुर्मन्मानमापृचीमहि द्युम्नहूतिभिर्यजत्रमिव सत्याभिद्युम्नहूतिभिरिन्द्रमापृचीमहि तथा तदेतत्सर्वे त्वं वन पृङ्क्ष्व॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मातापित्रादिभिर्विद्वद्भिर्वा स्वसन्ताना इत्थमुपदेष्टव्या यान्यस्माकं धर्म्याणि कर्माणि तान्याचरणीयानि नो इतराणि एवं सत्याचरणैः परोपकारेणैश्वर्यं सततमुन्नेयम्॥७॥

पदार्थः-हे (**रयिवः**) धनवान्! जैसे हम लोग (**होत्रया**) ग्रहण करने योग्य (**चितन्त्या**) चेतानेवाली बुद्धिमती (=बुद्धिमानी) से जिस ज्ञान का (**वनेम**) अच्छे प्रकार सेवन करें वा (**सुवीर्यम्**) श्रेष्ठ पराक्रमयुक्त (**रयिम्**) धन तथा (**सन्तम्**) वर्त्तमान (**रण्वम्**) उपदेश करनेवाले (**सुवीर्य्यम्**) विद्या और धर्म से उत्तम आत्मा के बल का (**वनेम**) सेवन करें वा (**सुमन्तुभिः**) उत्तम विद्यायुक्त पुरुषों और (**ईम्**) पाने योग्य (**इषा**) इच्छा से (**दुर्मन्मानम्**) दुष्ट जन मान करनेहारे को जो मारनेवाला उसका (**आ, पृचीमहि**) अच्छे प्रकार सम्बन्ध करें तथा (**द्युम्नहूतिभिः**) धन वा यश की बातचीतों से (**यजत्रम्**) अच्छे

प्रकार सङ्ग करने योग्य व्यवहार के समान (**सत्याभिः**) सत्य आचरणयुक्त (**द्युम्नहूतिभिः**) धनविषयक बातों से (**इन्द्रम्**) परम ऐश्वर्य का (**आ**) अच्छे प्रकार सम्बन्ध करें वैसे (**तत्**) उक्त समस्त व्यवहार को आप भजो और उससे सम्बन्ध करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। माता और पिता आदि को वा विद्वानों को चाहिये कि अपने सन्तानों को इस प्रकार उपदेश करें कि जो हमारे धर्म के अनुकूल काम हैं, वे आचरण करने योग्य किन्तु और काम आचरण करने योग्य नहीं, ऐसे सत्याचरणों और परोपकार से निरन्तर ऐश्वर्य्य की उन्नति करनी चाहिये॥७॥

पुनर्मनुष्याः किं कृत्वा कीदृशा भवेयुरित्याह॥

फिर मनुष्य क्या कर के कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

प्रप्रा॑ वो अ॒स्मे स्वय॑शोभिरू॒ती प॑रिव॒र्ग इन्द्रो॑ दुर्मती॒नां दरी॑मन् दुर्मती॒नाम्।
स्व॒यं सा रि॑ष॒यध्यै॒ या न॑ उपे॒षे अ॒त्रैः।
हतेम॑स॒न्न व॑क्षति क्षि॒प्ता जू॒र्णिर्न व॑क्षति॥८॥

प्रऽप्र॑। व॒रिति॑। अ॒स्मे इति॑। स्वय॑शःऽभिः। ऊ॒ती। प॒रि॒ऽव॒र्गे। इन्द्रः॑। दु॒ःऽम॒ती॒नाम्। दरी॑मन्। दु॒ःऽम॒ती॒नाम्। स्व॒यम्। सा। रि॒ष॒यध्यै॑। या। नः॒। उप॒ऽई॒षे। अ॒त्रैः॒। हता। ई॒म्। अ॒स॒त्। न। व॒क्ष॒ति॒। क्षि॒प्ता। जू॒र्णिः॒। न। व॒क्ष॒ति॒॥८॥

पदार्थः-(**प्रपा**) अत्र पादपूरणाय द्वित्त्वम्। **निपातस्य चे**ति दीर्घः। (**वः**) युष्मभ्यम् (**अस्मे**) अस्मभ्यम् (**स्वयशोभिः**) स्वकीयाभिः प्रशंसाभिः (**ऊती**) ऊत्या रक्षया (**परिवर्गे**) परितः सर्वतः सम्बन्धे (**इन्द्रः**) ऐश्वर्यवान् (**दुर्मतीनाम्**) दुष्टानां मनुष्याणाम् (**दरीमन्**) अतिशयेन विदारणे। अत्रा**न्येषामपि दृश्यत** इत्युपधादीर्घः। **सुपामि**ति सप्तम्या लुक्। (**दुर्मतीनाम्**) दुष्टाचारिणां मनुष्याणाम् (**स्वयम्**) (**सा**) (**रिषयध्यै**) रिषयितुम् (**या**) सेना (**नः**) अस्मान् (**उपेषे**) (**अत्रैः**) अतन्तीत्याततायिनस्तान् गच्छन्तीत्यत्राः शत्रवस्तैः (**हता**) (**ईम्**) सर्वतः (**असत्**) भवेत् (**न**) निषेधे (**वक्षति**) उच्यात् (**क्षिप्ता**) प्रेरिता (**जूर्णिः**) शीघ्रकारिणी (**न**) इव (**वक्षति**) प्राप्ता भवतु॥८॥

अन्वयः-हे मित्राणि! वोऽस्मे इन्द्रो दुर्मतीनां परिवर्गे दुर्मतीनां दरीमंश्च स्वयशोभिरूती प्रप्र वक्षति या सेना न उपेषेऽत्रैः क्षिप्ता सा रिषयध्यै प्रवृत्ता स्वयमीं हतासत् किन्तु सा जूर्णिर्न न वक्षति॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये दुष्टसंगं विहाय सत्सङ्गेन कीर्तिमन्तो भूत्वाऽतिप्रशंसितसेनया प्रजा रक्षन्ति ते स्वैश्वर्य्या जायन्ते॥८॥

पदार्थः-हे मित्रो! (**वः**) तुम लोगों के लिये (**अस्मे**) और हमारे लिये (**इन्द्रः**) ऐश्वर्यवान् विद्वान् (**दुर्मतीनाम्**) दुष्ट बुद्धिवाले दुष्ट मनुष्यों के (**परिवर्गे**) सब ओर से सम्बन्ध में और (**दुर्मतीनाम्**) दुष्ट बुद्धिवाले दुराचारी मनुष्यों के (**दरीमन्**) अतिशय कर विदारने में (**स्वयशोभिः**) अपनी प्रशंसाओं और

(ऊती) रक्षा से **(प्रप्र, वक्ष्यति)** उत्तमता से उपदेश करे **(या)** जो सेना **(नः)** हम लोगों के **(उपेषे)** समीप आने के लिये **(अत्रैः)** आततायी शत्रुजनों ने **(क्षिप्ता)** प्रेरित की अर्थात् पठाई (भेजना) हो **(सा)** वह **(रिषयध्यै)** दूसरों को हनन कराने के लिये प्रवृत्त हुई **(स्वयम्)** आप **(ईम्)** सब ओर से **(हता)** नष्ट **(असत्)** हो, किन्तु वह **(जूर्णिः)** शीघ्रता करनेवाली के **(न)** समान **(न)** न **(वक्षति)** प्राप्त हो अर्थात् शीघ्रता करने ही न पावे, किन्तु तावत् नष्ट हो जावे॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो दुष्टों के सङ्ग को छोड़ सत्सङ्ग से कीर्त्तिमान् होकर अतीव प्रशंसित सेना से प्रजा की रक्षा करते हैं, वे उत्तम ऐश्वर्यवाले होते हैं॥८॥

पुनरुपदेशकैः कथं वर्त्तितव्यमित्याह॥

फिर उपदेश करनेवालों को कैसे वर्त्ताव रखना चाहिये इस विषय को अगले मन्त्र में कहा है॥

त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा।

सचस्व नः पराक आ सचस्वास्तमीक आ।

पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः॥९॥

त्वम्। नः। इन्द्र। राया। परीणसा। याहि। पथा। अनेहसा। पुरः। याहि। अरक्षसा। सचस्व। नः। पराके। आ। सचस्व। अस्तम्ऽईके। आ। पाहि। नः। दूरात्। आरात्। अभिष्टिऽभिः। सदा। पाहि। अभिष्टिऽभिः॥९॥

पदार्थः-**(त्वम्)** **(नः)** अस्मान् **(इन्द्र)** विद्यैश्वर्यवन् **(राया)** श्रिया **(परीणसा)** बहुना। **परीणस इति बहुनामसु पठितम्।** (निघं०३.१) **(याहि)** प्राप्नुहि **(पथा)** मार्गेण **(अनेहसा)** अहिंसामयेन धर्मेण **(पुरः)** पुरो वर्त्तमानान् **(याहि)** प्राप्नुहि **(अरक्षसा)** अविद्यमानानि दुष्टानि रक्षांसि यस्मिँस्तेन **(सचस्व)** समवेहि **(नः)** अस्मान् **(पराके) पराकइति दूरनामसु पठितम्।** (निघं०३.२६) **(आ)** समन्तात् **(सचस्व)** समवेहि प्राप्नुहि **(अस्तमीके)** समीपे **(आ)** समन्तात् **(पाहि)** **(नः)** अस्मान् **(दूरात्)** **(आरात्)** समीपात् **(अभिष्टिभिः)** अभितः सर्वतो यजन्ति संगच्छन्ति याभिस्ताभिः **(सदा)** सर्वस्मिन् काले **(पाहि)** रक्ष **(अभिष्टिभिः)** अभीष्टाभिः क्रियाभिः॥९॥

अन्वयः-हे इन्द्र विद्वँस्त्वं परीणसा राया नोऽस्मान् याह्यनेहसाऽरक्षसा पथा पुरो याहि नः पराके आसचस्व। अस्तमीके समीपेऽस्मानासचस्व। अभिष्टिभिर्दूरादाराच्च नः पाहि। सदाऽभिष्टिभिरस्मान् पाहि॥९॥

भावार्थः-उपदेशकैर्धर्म्ये मार्गे प्रवृत्य सर्वान् प्रवर्त्योपदेशद्वारा समीपस्थान् दूरस्थाँश्च संगत्य भ्रमोच्छेदनेन सत्यविज्ञानप्रापणेन च सर्वे सततं संरक्षणीयाः॥९॥

पदार्थः-हे **(इन्द्र)** विद्या वा ऐश्वर्ययुक्त विद्वान्! **(त्वम्)** आप **(परीणसा)** बहुत **(राया)** धन से **(नः)** हम लोगों को **(याहि)** प्राप्त हो और **(अनेहसः)** रक्षामय जो धर्म उस से **(अरक्षसा)** और जिसमें दुष्ट प्राणी विद्यमान नहीं उस **(पथा)** मार्ग से **(पुरः)** प्रथम जो वर्त्तमान उनको **(याहि)** प्राप्त हो और **(नः)** हमको **(पराके)** दूर देश में **(आ, सचस्व)** अच्छे प्रकार प्राप्त होओ मिलो और **(अस्तमीके)** समीप में हम लोगों को **(आ, सचस्व)** अच्छे प्रकार मिलो और जो **(अभिष्टिभिः)** सब ओर से क्रियाओं से सङ्ग करते उन **(दूरात्)** दूर और **(आरात्)** समीप से **(नः)** हम लोगों की **(पाहि)** रक्षा करो और **(सदा)** सब कभी **(अभिष्टिभिः)** सब ओर से चाही हुई क्रियाओं से हम लोगों की **(पाहि)** रक्षा करो॥९॥

भावार्थः-उपदेशकों को चाहिये कि धर्म के अनुकूल मार्ग से आप प्रवृत्त हों और सबको प्रवृत्त करा कर अपने उपदेश के द्वारा समीपस्थ और दूरस्थ पदार्थों का सङ्ग कर भ्रम मिटाने और सत्यविज्ञान की प्राप्ति कराने से सबकी निरन्तर अच्छी रक्षा करें॥९॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

त्वं न॑ इन्द्र रा॒या तरू॑षसो॒ग्रं चि॑त् त्वा महि॒मा स॑क्ष॒दव॑से म॒हे मि॒त्रं नाव॑से।
ओजि॑ष्ठ त्रात॒रवि॑ता॒ रथं॑ कं चि॑दमर्त्य।
अ॒न्यम॒स्मद्रि॑रिषे॒: कं चि॑दद्रिवो॒ रिरि॑क्षन्तं चिदद्रिवः॥ १०॥

त्वम्। नः। इन्द्र। राया। तरूषसा। उग्रम्। चित्। त्वा। महिमा। सक्षत्। अवसे। महे। मित्रम्। न। अवसे। ओजिष्ठ। त्रातः। अवितरिति। रथम्। कम्। चित्। अमर्त्य। अन्यम्। अस्मत्। रिरिषेः। कम्। चित्। अद्रिऽवः। रिरिक्षन्तम्। चित्। अद्रिऽवः॥ १०॥

पदार्थः-**(त्वम्)** **(नः)** **(इन्द्र)** परमैश्वर्ययुक्त राजन् **(राया)** परमलक्ष्म्या **(तरूषसा)** तरन्ति शत्रुबलानि येन तत्तरुषस्तेन **(उग्रम्)** तीव्रम् **(चित्)** अपि **(त्वा)** त्वाम् **(महिमा)** महतो भावः प्रतापः **(सक्षत्)** संबध्नीयात् **(अवसे)** रक्षणाद्याय **(महे)** महते **(मित्रम्)** सखायम् **(न)** इव **(अवसे)** रक्षणाद्याय **(ओजिष्ठ)** अतिशयेनौजस्विन् **(त्रातः)** रक्षितः **(अवितः)** रक्षक **(रथम्)** रमणीयम् **(कम्)** सुखकरम् **(चित्)** अपि **(अमर्त्य)** कीर्त्या मरणधर्मरहित **(अन्यम्)** भिन्नम् **(अस्मत्)** **(रिरिषेः)** हिन्धि। अत्र **बहुलं छन्दसी**ति शस्य श्लुः। **(कम्)** **(चित्)** अपि **(अद्रिवः)** अद्रयो बहवो मेघा विद्यन्ते यस्मिन् सूर्ये तदिव तेजस्विन् **(रिरिक्षन्तम्)** रेष्टुं हिंसितुमिच्छन्तम् **(चित्)** इव **(अद्रिवः)** बहुशैलराज्ययुक्त॥ १०॥

अन्वयः-हे इन्द्र! तरूषसा राया महेऽवसे मित्रं नेवावसे यं त्वा महिमा सक्षत् स त्वं चिन्नोऽस्मान् पाहि। हे ओजिष्ठावितरमर्त्य त्रातस्त्वं कं चिद्रथं प्राप्नुहि। हे अद्रिवस्त्वमस्मत्कञ्चिदन्यं रिरिषेः। हे अद्रिवस्त्वं रिरिक्षन्तमुग्रं चिद्रिरिषे॥१०॥

भावार्थः-अयमेव मनुष्याणां महिमा यच्छ्रेष्ठपालनं दुष्टहिंसनं चेति॥१०॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त राजन् **(त्वम्)** आप **(तरूषसा)** जिससे शत्रुओं के बलों को पार होते उस काल और **(राया)** उत्तम लक्ष्मी से **(महे)** अत्यन्त **(अवसे)** रक्षा आदि सुख के लिये वा **(मित्रम्)** मित्र के **(न)** समान **(अवसे)** रक्षा आदि व्यवहार के लिये जिन **(त्वा)** आप को **(महिमा)** बड़प्पन प्रताप **(सक्षत्)** सम्बन्धे अर्थात् मिले सो आप **(चित्)** भी **(नः)** हम लोगों की रक्षा करो। हे **(ओजिष्ठ)** अतीव प्रतापी **(अवितः)** रक्षा करनेवाले **(अमर्त्य)** अपनी कीर्त्ति कलाप से मरण धर्म रहित **(त्रातः)** राज्य पालनेहारे! आप **(कं, चित्)** किसी **(रथम्)** रमण करने योग्य रथ को प्राप्त होओ। हे **(अद्रिवः)** बहुत मेघोंवाले सूर्य के समान तेजस्वी आप **(अस्मत्)** हम लोगों से **(कं, चित्)** किसी **(अन्यम्)** और ही को **(रिरिषेः)** मारो। हे **(अद्रिवः)** पर्वत भूमियों के राज्य से युक्त आप **(रिरिक्षन्तम्)** हिंसा करने की इच्छा करते हुए **(उग्रम्)** तीव्र प्राणी को **(चित्)** भी मारो ताड़ना देओ॥१०॥

भावार्थः-मनुष्यों की यही महिमा है जो श्रेष्ठों की पालना और दुष्टों की हिंसा करना॥१०॥

पुनर्विदुषा किं कर्त्तव्यमस्तीत्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

पा॒हि न॑ इन्द्र सुष्टुत स्रि॒धोऽव॑याता सद॒मिद्दु॑र्म॒ती॒नां दे॒वः स॑न्दु॑र्मती॒नाम्।
ह॒न्ता पा॒पस्य॑ र॒क्षस॑स्त्रा॒ता विप्र॑स्य॒ माव॑तः।
अध॑ा॒ हि त्वा॑ जनि॒ता जी॑ज॒नद्व॑सो र॒क्षो॒ह॑णं त्वा॒ जी॑ज॒नद्व॑सो॥११॥१७॥

पा॒हि। न॒ः। इ॒न्द्र॒। सु॒ऽस्तु॒त॒। स्रि॒धः। अव॑ऽयाता। सद॑म्। इत्। दु॒ः॒ऽम॒ती॒नाम्। दे॒वः। सन्। दु॒ः॒ऽम॒ती॒नाम्॥ ह॒न्ता। पा॒पस्य॑। र॒क्षस॑ः। त्रा॒ता। विप्र॑स्य। माऽव॑तः। अध॑। हि। त्वा॒। ज॒नि॒ता। जी॒ज॒नत्। व॒सो॒ इति॑। र॒क्षः॒ऽह॑नम्। त्वा॒। जी॒ज॒नत्। व॒सो॒ इति॑॥११॥

पदार्थः-**(पाहि)** **(नः)** अस्मान् **(इन्द्र)** सभेश **(सुष्टुत)** सुष्ठु प्रशंसित **(स्रिधः)** दुःखनिमित्तात् पापात् **(अवयाता)** विरुद्धं गन्ता **(सदम्)** स्थानम् **(इत्)** इव **(दुर्मतीनाम्)** दुष्टानां मनुष्याणाम् **(देवः)** सत्यं न्यायं कामयमानः **(सन्)** **(दुर्मतीनाम्)** दुष्टधियां मनुष्याणाम् **(हन्ता)** **(पापस्य)** पापाचारस्य **(रक्षसः)** परपीडकस्य **(त्राता)** रक्षकः **(विप्रस्य)** मेधाविनो धार्मिकस्य **(मावतः)** मच्छदृशस्य **(अध)**

आनन्तर्ये **(हि)** खलु **(त्वा)** त्वाम् **(जनिता)** **(जीजनत्)** जनयेत्। अत्र लुङ्यडभावः। **(वसो)** यः सज्जनेषु वसति तत्संबुद्धौ **(रक्षोहणम्)** **(त्वा)** त्वाम् **(जीजनत्)** जनयेत् **(वसो)** विद्यासु वासयितः॥११॥

अन्वयः–हे सुष्टुतेन्द्रावयाता देवः सन् दुर्मतीनां सदमिव दुर्मतीनां प्रचारं हत्वा स्रिधो नोऽस्मान् पाहि। हे वसो जनिता! यं रक्षोहणं त्वा जीजनत्। हे वसो! यं त्वा रक्षकं जीजनत् स हि त्वमध पापस्य रक्षसो हन्ता मावतो विप्रस्य त्राता भव॥११॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। इदमेव विदुषां प्रशंसनीयं कर्माऽस्ति यत् पापस्य खण्डनं धर्मस्य मण्डनमिति न केनाऽपि दुष्टस्य सङ्गः श्रेष्ठसङ्गत्यागश्च कर्त्तव्य इति॥११॥

अत्र विद्वद्राजधर्मवर्णनादेतत्सूक्तोक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इत्येकोनत्रिंदुत्तरं शततमं १२९ सूक्तं सप्तदशो १७ वर्गश्च समाप्तः॥

पदार्थः–हे **(सुष्टुत)** उत्तम प्रशंसा को प्राप्त **(इन्द्र)** सभापति! **(अवयाता)** विरुद्ध मार्ग को जाते और **(देवः)** सत्य न्याय की कामना अर्थात् खोज करते **(सन्)** हुए **(दुर्मतीनाम्)** दुष्ट मनुष्यों के **(सदम्)** स्थान के **(इत्)** समान **(दुर्मतीनाम्)** दुष्ट बुद्धिवाले मनुष्यों के प्रचार का विनाश कर **(स्रिधः)** दुःख के हेतु पाप से **(नः)** हम लोगों की **(पाहि)** रक्षा करो। हे **(वसो)** सज्जनों में वसनेहारे **(जनिता)** उत्पन्न करनेहारा पिता, गुरु जिस **(रक्षोहणम्)** दुष्टों के नाश करनेहारे **(त्वा)** आपको **(जीजनत्)** उत्पन्न करे। वा हे **(वसो)** विद्याों में वास अर्थात् प्रवेश करानेहारे! जिन रक्षा करनेवाले **(त्वा)** आपको **(जीजनत्)** उत्पन्न करे सो **(हि)** ही आप **(अथ)** इसके अनन्तर **(पापस्य)** पाप आचरण करनेवाले **(रक्षसः)** राक्षस अर्थात् औरों को पीड़ा देनेहारे के **(हन्ता)** मारनेवाले तथा **(मावतः)** मेरे समान **(विप्रस्य)** बुद्धिमान् धर्मात्मा पुरुष की **(त्राता)** रक्षा करनेवाले हूजिये॥११॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यही विद्वानों का प्रशंसा करने योग्य काम है जो पाप का खण्डन और धर्म का मण्डन करना, किसी को दुष्ट का सङ्ग और श्रेष्ठजन का त्याग न करना चाहिये॥११॥

इस सूक्त में विद्वानों और राजजनों के धर्म का वर्णन होने से इस सूक्त में कहे हुए अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ उनतीसवाँ १२९ सूक्त और सत्रहवाँ १७ वर्ग समाप्त हुआ॥

एन्द्रेत्यस्य दशर्चस्य त्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। १,५ भुरिगष्टिः। २,३,६,९ स्वराडष्टिः। ४,८ अष्टिश्छन्दः। मध्यमः स्वरः। ७ निचृदत्यष्टिश्छन्दः। गान्धारः स्वरः। १० विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजप्रजाजनाः परस्परं प्रीत्या वर्त्तेरन्नित्याह॥

अब दश ऋचावाले एक सौ तीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजा और प्रजाजन आपस में प्रीति के साथ वर्त्तें, इस विषय को कहा है॥

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः।
हवामहे त्वा वयं प्रयस्वन्तः सुते सचा।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये॥ १॥

आ। इन्द्र। याहि। उप। नः। परावतः। न। अयम्। अच्छ। विदथानिऽइव। सत्ऽपतिः। अस्तम्। राजाऽइव। सत्ऽपतिः। हवामहे। त्वा। वयम्। प्रयस्वन्तः। सुते। सचा। पुत्रासः। न। पितरम्। वाजऽसातये। मंहिष्ठम्। वाजऽसातये॥ १॥

पदार्थः–(**आ**) (**इन्द्र**) परमैश्वर्यवन् (**याहि**) प्राप्नुहि (**उप**) (**नः**) अस्मानस्माकं वा (**परावतः**) दूरदेशात् (**न**) निषेधे (**अयम्**) (**अच्छा**) निश्शेषार्थे। अत्र **निपातस्य च**ेति दीर्घः। (**विदथानीव**) संग्रामानिव (**सत्पतिः**) सतां धार्मिकाणां पतिः। (**अस्तम्**) गृहम् (**राजेव**) (**सत्पतिः**) सत्याचाररक्षकः (**हवामहे**) स्तुमः (**त्वा**) त्वाम् (**वयम्**) (**प्रयस्वन्तः**) बहुप्रयत्नशीलाः (**सुते**) निष्पन्ने (**सचा**) समवायेन (**पुत्रासः**) (**न**) इव (**पितरम्**) जनकम् (**वाजसातये**) युद्धविभागाय (**मंहिष्ठम्**) अतिशयेन पूजितम् (**वाजसातये**) पदार्थविभागाय॥ १॥

अन्वयः–हे इन्द्र! अयं विदथानीवायात्यतस्त्वं नोऽस्मान् परावते नोपायाहि सत्पती राजेव सत्पतिस्त्वं नोऽस्माकमस्तमुपायाहि। प्रयस्वन्तो वयं सचा सुते वाजसातये वाजसातये च पुत्रासः पितरं नेव मंहिष्ठं त्वाच्छ हवामहे॥ १॥

भावार्थः–अत्रोपमालङ्कारः। सर्वे राजप्रजाजनाः पितापुत्रवदिह वर्त्तित्वा पुरुषार्थिनः स्युः॥ १॥

पदार्थः–हे (**इन्द्र**) परमैश्वर्यवान् राजन्! (**अयम्**) यह शत्रुजन (**विदथानीव**) संग्रामों को जैसे वैसे आकर प्राप्त होता इससे आप (**नः**) हम लोगों के समीप (**परावतः**) दूर देश से (**न**) मत (**उपायाहि**) आइये, किन्तु निकट से आइये (**सत्पतिः**) धार्मिक सज्जनों का पति (**राजेव**) जो प्रकाशमान उसके समान (**सत्पतिः**) सत्याचरण की रक्षा करनेवाले आप हमारे (**अस्तम्**) घर को प्राप्त हो (**प्रयस्वन्तः**) अत्यन्त प्रयत्नशील (**वयम्**) हम लोग (**सचा**) सम्बन्ध से (**सुते**) उत्पन्न हुए संसार में (**वाजसातये**) युद्ध के विभाग के लिये और (**वाजसातये**) पदार्थों के विभाग के लिये (**पुत्रासः**) पुत्रजन जैसे (**पितरम्**) पिता को

(न) वैसे **(मंहिष्ठम्)** अति सत्कारयुक्त **(त्वा)** आपकी **(अच्छ)** अच्छे प्रकार **(हवामहे)** स्तुति करते हैं॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। समस्त राजप्रजाजन पिता और पुत्र के समान इस संसार में वर्त्तकर पुरुषार्थी हों॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पिबा॒ सोम॑मिन्द्र सु॒वा॒नमद्रि॑भि॒: कोशे॑न सि॒क्तम॑व॒तं न वंस॑गस्तातृषा॒णो न वंस॑गः।
मदा॑य हर्य॒ताय॑ ते तुविष्ट॒माय॒ धाय॑से।
आ त्वा॑ यच्छन्तु ह॒रितो॒ न सूर्य॒महा॒ विश्वे॑व॒ सूर्य॑म्॥२॥

पिब॑। सोम॑म्। इ॒न्द्र॒। सु॒वा॒नम्। अद्रि॑ऽभिः। कोशे॑न। सि॒क्तम्। अ॒व॒तम्। न। वंस॑गः। त॒तृ॒षा॒णः। न। वंस॑गः। मदा॑य। ह॒र्य॒ताय॑। ते॒। तुविःऽतमाय। धाय॑से। आ। त्वा॒। य॒च्छ॒न्तु॒। ह॒रितः॑। न। सूर्य॑म्। अहा॑। विश्वा॑ऽइव। सूर्य॑म्॥२॥

पदार्थः-(**पिब**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(सोमम्)** दिव्यौषधिरसम् **(इन्द्र)** सभेश **(सुवानम्)** सोतुमर्हम् **(अद्रिभिः)** शिलाखण्डादिभिः **(कोशेन)** मेघेन **(सिक्तम्)** संयुक्तम् **(अवतम्)** वृद्धम् **(न)** इव **(वंसगः)** संभक्ता **(तातृषाणः)** अतिशयेन पिपासितः **(न)** इव **(वंसगः)** वृषभः **(मदाय)** आनन्दाय **(हर्यताय)** कामिताय **(ते)** तुभ्यम् **(तुविष्टमाय)** अतिशयेन तुविर्बहुस्तस्मै। **तुविरिति बहुनामसु पठितम्।** (निघं०३.१) **(धायसे)** धर्त्रे **(आ)** **(त्वा)** **(यच्छन्तु)** निगृह्णन्तु **(हरितः)** **(न)** इव **(सूर्यम्)** **(अहा)** अहानि **(विश्वेव)** विश्वानीव **(सूर्यम्)**॥२॥

अन्वयः-हे इन्द्र! वंसगो न वंसगस्त्वमद्रिभिः सुवानं कोशेनाऽवतं सिक्तं नेव सोमं पिब। तुविष्टमाय धायसे मदाय हर्य्यताय ते तुभ्यमयं सोम आप्नोतु सूर्यमहा विश्वेव सूर्यं हरिता न त्वा य आयच्छन्तु ते सुखमाप्नुवन्तु॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये साधनोपसाधनैरायुर्वेदरीत्या महौषधिरसान् निर्माय सेवन्ते तेऽरोगा भूत्वा प्रयतितुं शक्नुवन्ति॥२॥

पदार्थः-हे **(इन्द्र)** सभापति! **(तातृषाणः)** अतीव प्यासे **(वंसगः)** बैल के **(न)** समान बलिष्ठ **(वंसगः)** अच्छे विभाग करनेवाले आप **(अद्रिभिः)** शिलाखण्डों से **(सुवानम्)** निकालने के योग्य **(कोशेन)** मेघ से **(अवतम्)** बढ़े **(सिक्तम्)** और संयुक्त किये हुए के **(न)** समान **(सोमम्)** सुन्दर ओषधियों के रस को **(पिब)** अच्छे प्रकार पिओ **(तुविष्टमाय)** अतीव बहुत प्रकार **(धायसे)** धारणा करनेवाले **(मदाय)** आनन्द के लिये **(हर्य्यताय)** और कामना किये हुए **(ते)** आपके लिये यह दिव्य ओषधियों का रस प्राप्त होवे अर्थात् चाहे हुए **(सूर्यम्)** सूर्य को **(अहा)** **(विश्वेव)** सब दिन जैसे वा

(सूर्यम्) सूर्यमण्डल को **(हरितः)** दिशा-विदिशा **(न)** जैसे वैसे **(त्वा)** आपको जो लोग **(आ, यच्छन्तु)** अच्छे प्रकार निरन्तर ग्रहण करें, वे सुख को प्राप्त होवें॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो बड़े साधन और छोटे साधनों और आयुर्वेद अर्थात् वैद्यकविद्या की रीति से बड़ी-बड़ी ओषधियों के रसों को बनाकर उसका सेवन करते, वे आरोग्यवान् होकर प्रयत्न कर सकते हैं॥२॥

पुनः के परमात्मानं ज्ञातुं शक्नुवन्तीत्याह॥

फिर कौन परमात्मा को जान सकते हैं, इस विषय को अगले मन्त्र में कहा है॥

अविन्दद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यन्ते अन्तरश्मनि।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः।
अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः॥३॥

अविन्दत्। दिवः। निऽहितम्। गुहा। निऽधिम्। वेः। न। गर्भम्। परिऽवीतम्। अश्मनि। अनन्ते। अन्तः। अश्मनि। व्रजम्। वज्री। गवाम्ऽइव। सिसासन्। अङ्गिरःऽतमः। अप। अवृणोत्। इषः। इन्द्रः। परिऽवृताः। द्वारः। इषः। परिऽवृताः॥३॥

पदार्थः-(**अविन्दत्**) प्राप्नोति (**दिवः**) विज्ञानप्रकाशात् (**निहितम्**) स्थितम् (**गुहा**) गुहायां बुद्धौ (**निधिम्**) निधीयन्ते पदार्था यस्मिँस्तम् (**वेः**) पक्षिणः (**न**) इव (**गर्भम्**) (**परिवीतम्**) परितः सर्वतो वीतं व्याप्तं कमनीयं च जलम् (**अश्मनि**) मेघमण्डले (**अनन्ते**) देशकालवस्त्वपरिछिन्ने (**अन्तः**) मध्ये (**अश्मनि**) मेघे (**व्रजम्**) व्रजन्ति गावो यस्मिन् तम् (**वज्री**) वज्रो दण्डः शासनार्थो यस्य सः (**गवामिव**) (**सिषासन्**) ताडयितुं दण्डयितुमिच्छन् (**अङ्गिरस्तमः**) अतिप्रशस्तः (**अप**) (**अवृणोत्**) वृणोति (**इषः**) एष्टव्या रथ्याः (**इन्द्रः**) परमैश्वर्यवान् सूर्यः (**परीवृताः**) परितोऽन्धकारेणावृताः (**द्वारः**) द्वाराणि (**इषा**) (**परीवृताः**)॥३॥

अन्वयः-यो वज्री व्रजं गवामिव सिषासन्नङ्गिरस्तम इन्द्र इषः परीवृता इव परीवृता इषो द्वारश्चापावृणोदनन्तेऽश्मन्यश्मन्यन्तः परिवीतं वेर्गर्भं न गुहा निहितं निधिं परमात्मानं दिवोऽविन्दत् सोऽतुलं सुखमाप्नोति॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये योगाङ्गधर्मविद्यासत्सङ्गानुष्ठानेन स्वात्मनि स्थितं परमात्मानं विजानीयुस्ते सूर्यस्तम इव स्वसङ्गिनामविद्यां निवार्य विद्याप्रकाशं जनयित्वा सर्वान् मोक्षमार्गे प्रवर्त्याऽनन्दितान् कर्त्तुं शक्नुवन्ति॥३॥

पदार्थः-जो **(वज्री)** शासना के लिये दण्ड धारण किये हुए **(वज्रं, गवामिव)** जैसे गौओं के समूह गोशाला में गमन करते जाते-आते वैसे **(सिषासन्)** जनों को ताड़ना देने अर्थात् दण्ड देने की इच्छा करता हुआ अथवा जैसे **(अङ्गिरस्तमः)** अति श्रेष्ठ **(इन्द्रः)** परमैश्वर्यवान् सूर्य **(इषः)** इच्छा करने योग्य **(परीवृताः)** अन्धकार से ढंपी हुई वीथियों को खोले, वैसे **(परीवृताः)** ढपी हुई **(इषः)** इच्छाओं और **(द्वारः)** द्वारों को **(अपावृणोत्)** खोले तथा **(अनन्ते)** देश, काल, वस्तु भेद से न प्रतीत होते हुए **(अश्मनि)** आकाश में **(अश्मनि)** वर्त्तमान मेघ के **(अन्तः)** बीच **(परिवीतम्)** सब ओर से व्याप्त और अति मनोहर जल वा **(वेः)** पक्षी के **(गर्भम्)** गर्भ के **(न)** समान **(गुहा)** बुद्धि में **(निहितम्)** स्थित **(निधिम्)** जिसमें निरन्तर पदार्थ धरे जायें, उस निधिरूप परमात्मा को **(दिवः)** विज्ञान के प्रकाश से **(अविदन्त्)** प्राप्त होता है, वह अतुल सुख को प्राप्त होता है॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो योग के अङ्ग, धर्म, विद्या और सत्सङ्ग के अनुष्ठान से अपनी आत्मा में स्थित परमात्मा को जानें, वे सूर्य जैसे अन्धकार को वैसे अपने सङ्गियों की अविद्या छुड़ा विद्या के प्रकाश को उत्पन्न कर सबको मोक्षमार्ग में प्रवृत्त करा के उन्हें आनन्दित कर सकते हैं॥३॥

केऽत्र सुशोभन्त इत्याह॥

इस संसार में कौन अच्छी शोभा को प्राप्त होते हैं, इस विषय को अगले मन्त्र में कहा है॥

दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत्।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि॥४॥

ददृहाणः। वज्रम्। इन्द्रः। गभस्त्योः। क्षद्मऽइव। तिग्मम्। असनाय। सम्। श्यत्। अहिऽहत्याय। सम्। श्यत्। सम्ऽविव्यानः। ओजसा। शवःऽभिः। इन्द्र। मज्मना। तष्टाऽइव। वृक्षम्। वनिनः। नि। वृश्चसि। परश्वाऽइव। नि। वृश्चसि॥४॥

पदार्थः-**(दादृहाणः)** दोषान् हिंसन्। अत्र व्यत्ययेनात्मनेपदम्, **तुजादित्वाद्** दैर्घ्यम्, **बहुलं छन्दसी**ति शपः श्लुः। **(वज्रम्)** तीव्रं शस्त्रं गृहीत्वा **(इन्द्रः)** विद्वान् **(गभस्त्योः)** बाह्वोः। **गभस्तीति बाहुनामसु पठितम्।** (निघं०२.४) **(क्षद्मेव)** उदकमिव **(तिग्मम्)** तीव्रम् **(असनाय)** प्रक्षेपणाय **(सम्)** सम्यक् **(श्यत्)** तनूकरोति **(अहिहत्याय)** मेघहननाय **(सम्)** **(श्यत्)** **(संविव्यानः)** सम्यक् प्राप्नुवन् **(ओजसा)** पराक्रमेण **(शवोभिः)** सेनाद्यैर्बलैः **(इन्द्र)** दुष्टदोषविदारक **(मज्मना)** बलेन **(तष्टेव)** यथा छेत्ता **(वृक्षम्)** **(वनिनः)** वनानि बहवो रश्मयो विद्यन्ते येषां त इव **(नि)** **(वृश्चसि)** छिनत्सि **(परश्वेव)** यथा परशुना **(नि)** नितराम् **(वृश्चसि)** छिनत्सि॥४॥

अन्वयः-हे विद्वन्! भवान् यथा सूर्योऽहिहत्याय तिग्मं वज्रं संश्यत् तथा गभस्त्योः क्षद्मेवासनाय तिग्मं वज्रं निधाय दादृहाणः इन्द्रस्सन् शत्रून् संश्यत्। हे इन्द्र! त्वं वृक्षं मज्मना तष्टेवौजसा शवोभिः सह संविव्यानस्सन् वनिन इव दोषान् निवृश्चसि परश्वेवाविद्यां निवृश्चसि तथा वयमपि कुर्याम॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः प्रमादालस्यादीन् दोषान् पृथक्कृत्य जगति गुणान्निदधति ते सूर्यरश्मय इवेह संशोभन्ते॥४॥

पदार्थः-हे विद्वान्! आप जैसे सूर्य **(अहिहत्याय)** मेघ के मारने को **(तिग्मम्)** तीव्र अपने किरणरूपी वज्र को **(सं, श्यत्)** तीक्ष्ण करता वैसे **(गभस्त्योः)** अपनी भुजाओं के **(क्षद्मेव)** जल के समान **(असनाय)** फेंकने के लिये तीव्र **(वज्रम्)** शस्त्र को निरन्तर धारण करके **(दादृहाणः)** दोषों का विनाश करते **(इन्द्रः)** और विद्वान् होते हुए शत्रुओं को **(सं, श्यत्)** अति सूक्ष्म करते अर्थात् उनका विनाश करते वा हे **(इन्द्र)** दुष्टों का दोष नाशनेवाले! आप **(वृक्षम्)** वृक्ष को **(मज्मना)** बल से **(तष्टेव)** जैसे बढ़ई आदि काटनेहारा वैसे **(ओजसा)** पराक्रम और **(शवोभिः)** सेना आदि बलों के साथ **(संविव्यानः)** अच्छे प्रकार प्राप्त होते हुए **(वनिनः)** वन वा बहुत किरणें जिनके विद्यमान उनके समान दोषों को **(नि, वृश्चसि)** निरन्तर काटते वा **(परश्वेव)** जैसे फरसा से कोई पदार्थ काटता, वैसे अविद्या अर्थात् मूर्खपन को अपने ज्ञान से **(नि, वृश्चसि)** काटते हो, वैसे हम लोग भी करें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य प्रमाद और आलस्य आदि दोषों को अलग कर संसार में गुणों को निरन्तर धारण करते हैं, वे सूर्य की किरणों के समान यहाँ अच्छी शोभा को प्राप्त होते हैं॥४॥

पुनः केऽत्र प्रकाशिता जायन्त इत्याह॥

फिर इस संसार में कौन प्रकाशित होते हैं, इस विषय को अगले मन्त्र में कहा है॥

त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँइव वाजयतो रथाँइव।
इत ऊतीरयुञ्जत समानमर्थमक्षितम्।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः॥५॥१८॥

त्वम्। वृथा। नद्यः। इन्द्र। सर्तवे। अच्छ। समुद्रम्। असृजः। रथान्ऽइव। वाजऽयतः। रथान्ऽइव। इतः। ऊतीः। अयुञ्जत। समानम्। अर्थम्। अक्षितम्। धेनूःऽइव। मनवे। विश्वऽदोहसः। जनाय। विश्वऽदोहसः॥५॥

पदार्थः-**(त्वम्)** **(वृथा)** निष्प्रयोजनाय **(नद्यः)** **(इन्द्र)** विद्येश **(सर्त्तवे)** सर्त्तुं गन्तुम् **(अच्छ)** उत्तमरीत्या **(समुद्रम्)** सागरम् **(असृजः)** सृजेः **(रथाँइव)** यथा रथानधिष्ठाय **(वाजयतः)** सङ्ग्रामयतः **(रथाँइव)** **(इतः)** प्राप्ताः **(ऊतीः)** रक्षाद्याः क्रियाः **(अयुञ्जत)** युञ्जते **(समानम्)** तुल्यम् **(अर्थम्)** द्रव्यम्

(अक्षितम्) क्षयरहितम् **(धेनूरिव)** यथा दुग्धदात्रीर्गाः **(मनवे)** मननशीलाय मनुष्याय **(विश्वदोहसः)** विश्वं सर्वं जगद्गुणैर्दुहन्ति पिपुरति ते **(जनाय)** धर्म्ये प्रसिद्धाय **(विश्वदोहसः)** विश्वस्मिन् सुखप्रपूरकाः॥५॥

अन्वयः–हे इन्द्र! त्वं यथा नद्यः समुद्रं वृथा सृजन्ति तथा रथानिव वाजयतो रथानिव सर्त्तवे अच्छासृजः। जनाय विश्वदोहस इव ये मनवे विश्वदोहसस्सन्तो भवन्तो धेनूरिवेत ऊती रक्षितं समानमर्थं चायुञ्जत तेऽत्यन्तमानन्दं प्राप्नुवन्ति॥५॥

भावार्थः–अत्रोपमालङ्काराः। ये धेनुवत्सुखं रथवद्धर्म्यमार्गमवलम्ब्य धार्मिकन्यायधीशवद्भूत्वा सर्वान् स्वसदृशान् कुर्वन्ति तेऽत्र प्रशंसिता जायन्ते॥५॥

पदार्थः–हे **(इन्द्र)** विद्या के अधिपति! **(त्वम्)** आप जैसे **(नद्यः)** नदी **(समुद्रम्)** समुद्र को **(वृथा)** निष्प्रयोजन भर देती वैसे **(रथानिव)** रथों पर बैठनेहारों के समान **(वाजयतः)** संग्राम करते हुओं को **(रथानिव)** रथों के समान ही **(सर्त्तवे)** जाने को **(अच्छ, असृजः)** उत्तम रीति से कलायन्त्रों से युक्त मार्गों को बनावें वा **(जनाय)** धर्मयुक्त व्यवहार में प्रसिद्ध मनुष्य के लिये जो **(विश्वदोहसः)** समस्त जगत् को अपने गुणों से परिपूर्ण करते उनके समान **(मनवे)** विचारशील पुरुष के लिये **(विश्वदोहसः)** संसार सुख को परिपूर्ण करनेवाले होते हुए आप **(धेनूरिव)** दूध देनेवाली गौओं के समान **(इतः)** प्राप्त हुई **(ऊतीः)** रक्षादि क्रियाओं और **(अक्षितम्)** अक्षय **(समानम्)** समान अर्थात् काम के तुल्य **(अर्थम्)** पदार्थ का **(अयुञ्जत)** योग करते हैं, वे अत्यन्त आनन्द को प्राप्त होते हैं॥५॥

भावार्थः–इस मन्त्र में उपमालङ्कार हैं। जो पुरुष गौओं के समान सुख, रथ के समान धर्म के अनुकूल मार्ग का अवलम्ब कर धार्मिक न्यायाधीश के समान होकर सबको अपने समान करते हैं, वे इस संसार में प्रशंसित होते हैं॥५॥

पुनर्मनुष्याः कस्मात्किं प्राप्य कीदृशा भवन्तीत्याह॥

फिर मनुष्य किससे क्या पाकर कैसे होते हैं, इस विषय को अगले मन्त्र में कहा है॥

इ॒मां ते॒ वाचं॑ वसू॒यन्त॑ आ॒यवो॒ रथं॒ न धीर॒: स्वपा॑ अतक्षिषु: सु॒म्नाय॒ त्वाम॑तक्षिषु:।
शु॒म्भन्तो॒ जेन्यं॑ यथा॒ वाजे॑षु विप्र वा॒जिन॑म्।
अत्यं॑मिव॒ शव॑से सा॒तये॒ धना॒ विश्वा॒ धनानि॑ सा॒तये॑॥ ६॥

इ॒माम्। ते॒। वाच॑म्। व॒सु॒ऽयन्त॑:। आ॒यव॑:। रथ॑म्। न। धीर॑:। सु॒ऽअपा॑:। अ॒त॒क्षि॒षु॒:। सु॒म्नाय॑। त्वाम्। अ॒त॒क्षि॒षु॒:। शु॒म्भन्त॑:। जेन्य॑म्। य॒था॒। वाजे॑षु। वि॒प्र॒। वा॒जिन॑म्। अत्य॑म्ऽइव। शव॑से। सा॒तये॑। धना॑। विश्वा॑। धना॑नि। सा॒तये॑॥ ६॥

पदार्थः–**(इमाम्)** **(ते)** तव सकाशात् **(वाचम्)** विद्याधर्मसत्याऽन्वितां वाणीम् **(वसूयन्तः)** आत्मनो वसूनि विज्ञानादीनि धनानीच्छन्तः **(आयवः)** विद्वांसः **(रथम्)** प्रशस्तं रमणीयं यानम् **(न)** इव

(धीरः) ध्यानयुक्तः **(स्वपाः)** शोभनानि धर्म्याण्यपांसि कर्माणि यस्य सः **(अतक्षिषुः)** संवृणुयुः। **तक्ष त्वचने** त्वचनं संवरणमिति। **(सुम्नाय)** सुखाय **(त्वा)** त्वाम् **(अतक्षिषुः)** सूक्ष्मधियं संपादयन्तु **(शुम्भन्तः)** प्राप्तशोभाः **(जेन्यम्)** जयति येन तम् **(यथा)** येन प्रकारेण **(वाजेषु)** संग्रामेषु **(विप्र)** मेधाविन् **(वाजिनम्) (अत्यमिव)** यथाऽश्वम् **(शवसे)** बलाय **(सातये)** संविभक्तये **(धना)** द्रव्याणि **(विश्वा)** सर्वाणि **(धनानि) (सातये)** संभोगाय॥६॥

अन्वयः-हे विप्र! यस्य ते तव सकाशादिमां वाचं प्राप्ता आयवो वसूयन्तः स्वपा धीरो रथं नातक्षिषुः शुम्भन्तो यथा वाजेषु जेन्यं वाजिनमत्यमिव शवसे सातये धनानीव विश्वा धना प्राप्य सुम्नाय सातये त्वामतक्षिषुस्ते सुखिनो जायन्ते॥६॥

भावार्थः-अत्रोपमालङ्कारः। येऽनूचानादाप्ताद्विदुषोऽखिला विद्याः प्राप्य विस्तृतधियो जायन्ते, ते समग्रमैश्वर्य्यं प्राप्य रथवदश्ववद्धीरवद्धर्म्यमार्गं गत्वा कृतकृत्या जायन्ते॥६॥

पदार्थः-हे **(विप्र)** मेधावी धीर बुद्धिवाले जन! जिन **(ते)** आपके निकट से **(इमाम्)** इस **(वाचम्)** विद्या, धर्म और सत्ययुक्त वाणी को प्राप्त **(आयवः)** विद्वान् जन **(वसूयन्तः)** अपने को विज्ञान आदि धन चाहते हुए **(स्वपाः)** जिसके उत्तम धर्म के अनुकूल काम वह **(धीरः)** धीरपुरुष **(रथम्)** प्रशंसित रमण करने योग्य रथ को **(न)** जैसे वैसे **(अतक्षिषुः)** सूक्ष्मबुद्धि को स्वीकार करें वा **(शुम्भन्तः)** शोभा को प्राप्त हुए **(यथा)** जैसे **(वाजेषु)** संग्रामों में **(जेन्यम्)** जिससे शत्रुओं को जीतते उस **(वाजिनम्)** अतिचतुर वा संग्रामयुक्त पुरुष को **(अत्यमिव)** घोड़ा के समान **(शवसे)** बल के लिये और **(सातये)** अच्छे प्रकार विभाग करने के लिये **(धनानि)** द्रव्य आदि पदार्थों के समान **(विश्वा)** समस्त **(धना)** विद्या आदि पदार्थों को प्राप्त होकर **(सुम्नाय)** सुख और **(सातये)** संभोग के लिये। **(त्वाम्)** आपको **(अतक्षिषुः)** उत्तमता से स्वीकार करे वा अपने गुणों से ढांपे वे सुख होते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार हैं। जो उपदेश करनेवाले धर्मात्मा विद्वान् जन से समस्त विद्याओं को पाकर विस्तारयुक्त बुद्धि अर्थात् सब विषयों में बुद्धि फैलानेहारे होते हैं, वे समग्र ऐश्वर्य को पाकर, रथ, घोड़ा और धीर पुरुष के समान धर्म के अनुकूल मार्ग को प्राप्त होकर कृतकृत्य होते हैं॥६॥

केऽत्रैश्वर्यमुन्नयन्तीत्याह॥

इस संसार में कौन ऐश्वर्य की उन्नति करते हैं, इस विषय को अगले मन्त्र में कहा है॥

भिनत्पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो।
अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत्।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा॥७॥

भि॒नत्। पु॑रः। न॒व॒तिम्। इ॒न्द्र॒। पू॒र्वे। दि॒वः॑ऽदासाय। मही॑। दा॒शुषे॑। नृ॒तो॒ इति॑। वज्रे॑ण। दा॒शुषे॑। नृ॒तो॒ इति॑। अ॒ति॒थि॒ऽग्वाय॑। शम्ब॑रम्। गि॒रेः। उ॒ग्रः। अव॑। अ॒भ॒र॒त्। म॒हः। धना॑नि। दय॑मानः। ओज॑सा। विश्वा॑। धना॑नि। ओज॑सा॥७॥

पदार्थः-(**भिनत्**) विदृणाति (**पुरः**) पुराणि (**नवतिम्**) एतत् संख्याकानि (**इन्द्र**) दुष्टविदारक (**पूरवे**) अलं साधनाय मनुष्याय। **पूरव इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**दिवोदासाय**) कमितस्य प्रदात्रे (**महि**) महते पूजिताय (**दाशुषे**) विद्यादत्तवते (**नृतो**) विद्याप्राप्तयेऽङ्गानां प्रक्षेप्तः (**वज्रेण**) शस्त्रेणेवोपदेशेन (**दाशुषे**) दानं कुर्वते (**नृतो**) स्वगात्राणां विक्षेप्तः (**अतिथिग्वाय**) अतिथीन् गच्छते (**शम्बरम्**) मेघम् (**गिरेः**) शैलस्याग्रे (**उग्रः**) तीक्ष्णस्वभावः सूर्यः (**अव**) (**अभरत्**) बिभर्त्ति (**महः**) महान्ति (**धनानि**) (**दयमानः**) दाता (**ओजसा**) पराक्रमेण (**विश्वा**) सर्वाणि (**धनानि**) (**ओजसा**) पराक्रमेण॥७॥

अन्वयः-हे नृतो नृतविन्द्र! यो भवान् वज्रेण शत्रूणां नवतिं पुरोऽभिनत् महि दिवोदासाय दाशुषे पूरवे सुखमवाभरत्। हे नृतो! भवान् अतिथिग्वाय दाशुष उग्रो गिरेः शम्बरमिवोजसा महो धनानि दयमान ओजसा विश्वा धनान्यवाभरत् स किञ्चिदपि दुःखं कथं प्राप्नुयात्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नवतिमिति पदं बहूपलक्षणार्थम्। ये शत्रून् विजयमाना अतिथीन् सत्कुर्वन्तः धार्मिकान् विद्या ददमाना वर्त्तन्ते ते सूर्यो मेघमिवाऽखिलमैश्वर्यं बिभ्रति॥७॥

पदार्थः-हे (**नृतो**) अपने अङ्गों को युद्ध आदि में चलाने वा (**नृतो**) विद्या की प्राप्ति के लिये अपने शरीर की चेष्टा करने (**इन्द्र**) और दुष्टों का विनाश करनेवाले! जो आप (**वज्रेण**) शस्त्र वा उपदेश से शत्रुओं की (**नवतिम्**) नब्बे (**पुरः**) नगरियों को (**भिनत्**) विदारते नष्ट-भ्रष्ट करते वा (**महि**) बड़प्पन पाये हुए सत्कारयुक्त (**दिवोदासाय**) चहीते पदार्थ को अच्छे प्रकार देनेवाले और (**दाशुषे**) विद्यादान किये हुए (**पूरवे**) पूरे साधनों से युक्त मनुष्य के लिये सुख को धारण करते तथा (**अतिथिग्वाय**) अतिथियों को प्राप्त होने और (**दाशुषे**) दान करनेवाले के लिये (**उग्रः**) तीक्ष्ण स्वभाव अर्थात् प्रचण्ड प्रतापवान् सूर्य (**गिरेः**) पर्वत के आगे (**शम्बरम्**) मेघ को जैसे वैसे (**ओजसा**) अपने पराक्रम से (**महः**) बड़े-बड़े (**धनानि**) धन आदि पदार्थों के (**दयमानः**) देनेवाले (**ओजसा**) पराक्रम से (**विश्वा**) समस्त (**धनानि**) धनों को (**अवाभरत्**) धारण करते सो आप किञ्चित् भी दुःख को कैसे प्राप्त होवें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। इस मन्त्र में '**नवतिम्**' यह पद बहुतों का बोध कराने के लिये है। जो शत्रुओं को जीतते, अथितियों का सत्कार करते और धार्मिकों को विद्या आदि गुण देते हुए वर्त्तमान हैं, वे सूर्य्य जैसे मेघ को वैसे समस्त ऐश्वर्य धारण करते हैं॥७॥

पुनर्मनुष्यैः कीदृशैर्भवितव्यमित्याह॥

फिर मनुष्यों को कैसा होना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु।
मनवे शासदव्रतान्त्वचं कृष्णामरन्धयत्।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति॥८॥

इन्द्रः। समत्ऽसु। यजमानम्। आर्यम्। प्र। आवत्। विश्वेषु। शतम्ऽऊतिः। आजिषु। स्वः।ऽमीळ्हेषु। आजिषु। मनवे। शासत्। अव्रतान्। त्वचम्। कृष्णाम्। अरन्धयत्। धक्षत्। न। विश्वम्। ततृषाणम्। ओषति। नि। अर्शसानम्। ओषति॥८॥

पदार्थः-(**इन्द्रः**) परमैश्वर्यवान् राजा (**समत्सु**) संग्रामेषु (**यजमानम्**) अभयस्य दातारम् (**आर्यम्**) उत्तमगुणकर्मस्वभावम् (**प्र**) प्रकृष्टे (**आवत्**) रक्षेत् (**विश्वेषु**) समग्रेषु (**शतमूतिः**) शतमसंख्याता ऊतयो रक्षा यस्मात् सः (**आजिषु**) प्राप्तेषु (**स्वर्मीढेषु**) स्वः सुखं मिह्यते सिच्यते येषु तेषु (**आजिषु**) संग्रामेषु (**मनवे**) मननशीलधार्मिकमनुष्यरक्षणाय (**शासत्**) शिष्यात् (**अव्रतान्**) दुष्टाचारान् दस्यून् (**त्वचम्**) सम्पर्कमिन्द्रियम् (**कृष्णाम्**) कर्षिताम् (**अरन्धयत्**) हिंस्यात् (**धक्षत्**) दहेत्। अत्र **वाच्छन्दसतीति** भस्त्वं न। (**न**) इव (**विश्वम्**) सर्वम् (**ततृषाणम्**) प्राप्ततृषम् (**ओषति**) (**नि**) (**अर्शसानम्**) प्राप्तं सत् (**ओषति**) दहेत्॥८॥

अन्वयः-यश्शतमूतिरिन्द्रः स्वर्मीढेष्वाजिष्वाजिषु धार्मिकाः शूरा इव विश्वेषु समत्सु यजमानमार्य्यं प्रावत् मनवे व्रतान् शासदेषां त्वचं कृष्णां कुर्वन्नरन्धयदग्निर्विश्वं धक्षंस्ततृषाणमोषति नार्शसानं न्योषति स एव साम्राज्यं कर्त्तुमर्हति॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैरार्यगुणकर्मस्वभावान् स्वीकृत्य दस्युगुणकर्मस्वभावान् विहाय श्रेष्ठान् संरक्ष्य दुष्टान् संदण्डय धर्मेण राज्यं शासनीयम्॥८॥

पदार्थः-जो (**शतमूतिः**) अर्थात् जिससे असंख्यात रक्षा होती वह (**इन्द्रः**) परम ऐश्वर्यवान् राजा (**स्वर्मीढेषु**) जिनमें सुख सिञ्चन किया जाता उन (**आजिषु**) प्राप्त हुए (**आजिषु**) संग्रामों में धार्मिक शूरवीरों के समान (**विश्वेषु**) समग्र (**समत्सु**) संग्राम में (**यजमानम्**) अभय के देनेवाले (**आर्यम्**) उत्तम गुण, कर्म, स्वभाववाले पुरुष को (**प्रावत्**) अच्छे प्रकार पाले वा (**मनवे**) विचारशील धार्मिक मनुष्य की रक्षा के लिये (**अव्रतान्**) दुष्ट आचरण करनेवाले डाकुओं को (**शासत्**) शिक्षा देवे और इनकी (**त्वचम्**) सम्बन्ध करने वाली खाल को (**कृष्णाम्**) खैंचता हुआ (**अरन्धयत्**) नष्ट करे वा अग्नि जैसे (**विश्वम्**) सब पदार्थ मात्र को (**धक्षत्**) जलावे और (**ततृषाणम्**) प्यासे प्राणी को (**ओषति**) दाहे अति जलन देवे (**न**)

वैसे **(अर्शसानम्)** प्राप्त हुए शत्रूगण को **(न्योषति)** निरन्तर जलावे, वही चक्रवर्त्ति राज्य करने योग्य होता है॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि श्रेष्ठ गुण, कर्म, स्वभावों को स्वीकार और दुष्टों के गुण, कर्म, स्वभावों का त्याग कर श्रेष्ठों की रक्षा और दुष्टों को ताड़ना देकर धर्म में राज्य की शासना करें॥८॥

पुनर्विद्वद्भिरत्र कथं भवितव्यमित्याह॥

फिर इस संसार में विद्वानों को कैसा होना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

सूरश्चक्रं प्र वृहज्जात् ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति।
उशना यत्परावतोऽजगन्नूतये कवे।
सुम्नानि विश्वा मनुषेव तुर्वणिरहाविश्वेव तुर्वणिः॥९॥

सूरः। चक्रम्। प्र। वृहत्। जातः। ओजसा। प्रऽपित्वे। वाचम्। अरुणः। मुषायति। ईशानः। आ। मुषायति। उशना। यत्। पराऽवतः। अजगन्। ऊतये। कवे। सुम्नानि। विश्वा। मनुषाऽइव। तुर्वणिः। अहा। विश्वाऽइव। तुर्वणिः॥९॥

पदार्थः-(**सूरः**) सूर्यः (**चक्रम्**) चक्रवद्वर्त्तमानं जगत् पृथिव्यादिकम् (**प्र**) बृहत् (**जातः**) प्रकटः सन् (**ओजसा**) स्वबलेन (**प्रपित्वे**) उत्तरस्मिन् (**वाचम्**) (**अरुणः**) रक्तवर्णः (**मुषायति**) मुषः खण्डक इवाचरति (**ईशानः**) शक्तिमान् सन् (**आ**) (**मुषायति**) (**उशना**) (**यत्**) यः (**परावतः**) दूरतः (**अजगन्**) गच्छेत्। अत्र लङि तिपि **बहुलं छन्दसी**ति शपः श्लुः, **मो नो धातो**रिति मस्य नः। (**ऊतये**) रक्षणाद्याय (**कवे**) विद्वन् (**सुम्नानि**) सुखानि (**विश्वा**) सर्वाणि (**मनुषेव**) मनुष्यवत् (**तुर्वणिः**) हिंसकः (**अहा**) दिनानि (**विश्वेव**) यथा सर्वाणि (**तुर्वणिः**) हिंसन्॥९॥

अन्वयः-हे कवे! यद्य ओजसाऽरुणस्तुर्वणिर्जातः सूरो विश्वेवाहा प्रपित्वे बृहच्चक्रं प्रजनयतीव तुर्वणिर्मनुषेव विश्वा सुम्नानि वाचमाजनयतु मुषायतीव वेशान उशना भवानूतये परावतोऽजगन् दुष्टान् मुषायति स सर्वैः सत्कर्त्तव्यः॥९॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये सूर्यवद्विद्याविनयधर्मप्रकाशकाः सर्वेषामुन्नतये प्रयतन्ते ते स्वयमप्युन्नता भवन्ति ॥९॥

पदार्थः-हे (**कवे**) विद्वान्! (**यत्**) जो (**ओजसा**) अपने बल से (**अरुणः**) लालरङ्ग युक्त (**तुर्वणिः**) मेघ को छिन्न-भिन्न करता और (**जातः**) प्रकट होता हुआ (**सूरः**) सूर्य्यमण्डल जैसे (**विश्वेवाहा**) सब दिनों को वा (**प्रपित्वे**) उत्तरायण से (**बृहत्**) महान् (**चक्रम्**) चाक के समान वर्त्तमान जगत् को (**प्र**) प्रकट करता, वैसे और (**तुर्वणिः**) दुष्टों की हिंसा करनेवाले उत्तमोत्तम (**मनुषेव**) मनुष्य के

समान **(विश्वा)** समस्त **(सुम्नानि)** सुखों और **(वाचम्)** वाणी को **(आ)** अच्छे प्रकार प्रकट करें वा सूर्य जैसे **(मुषायति)** खण्डन करनेवाले के समान आचरण करता वैसे **(ईशानः)** समर्थ होते हुए **(उशना)** विद्यादि गुणों से कान्तियुक्त आप **(ऊतये)** रक्षा आदि व्यवहार के लिये **(परावतः)** परे अर्थात् दूर से **(अजगन्)** प्राप्त हों और दुष्टों को **(मुषायति)** खण्ड-खण्ड करें, सो सबको सत्कार करने योग्य हैं॥९॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सूर्य के तुल्य विद्या, विनय और धर्म का प्रकाश करनेवाले सबकी उन्नति के लिये अच्छा यत्न करते हैं, वे आप भी उन्नतियुक्त होते हैं॥९॥

पुना राजप्रजाजनैः परस्परं कथं वर्त्तितव्यमित्याह॥

फिर राजा और प्रजाजनों को परस्पर कैसे वर्त्तना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

स नो॒ नव्यो॑भिर्वृषकर्मन्नु॒क्थैः पुरां॑ दर्तः पा॒युभि॑: पाहि श॒ग्मैः।
दि॒वो॒दा॒सेभि॑रिन्द्र॒ स्तवा॑नो वावृधी॒था अहो॑भिरिव॒ द्यौः॥ १०॥ १९॥

सः। नः। नव्येभिः। वृषऽकर्मन्। उक्थैः। पुराम्। दर्तरिति दर्तः। पायुऽभिः। पाहि। शग्मैः। दिवःऽदासेभिः। इन्द्र। स्तवानः। ववृधीथाः। अहोभिःऽइव। द्यौः॥ १०॥

पदार्थः-(**सः**) (**नः**) अस्मान् (**नव्येभिः**) नवीनैः (**वृषकर्मन्**) वृषस्य मेघस्य कर्माणीव कर्माणि यस्य तत्सम्बुद्धौ (**उक्थैः**) प्रशंसनीयैः (**पुराम्**) शत्रुनगराणाम् (**दर्त्तः**) विदारक (**पायुभिः**) रक्षणैः (**पाहि**) रक्ष (**शग्मैः**) सुखैः। **शग्ममिति सुखनामसु पठितम्।** (निघं०३.६) (**दिवोदासेभिः**) प्रकाशस्य दातृभिः (**इन्द्र**) सर्वरक्षक सभेश (**स्तवानः**) स्तूयमानः। अत्र कर्मणि शानच्। (**वावृधीथाः**) वर्धेथाः। अत्र **वाच्छन्दसी**ति शपः श्लुः, **तुजादीनामि**त्यभ्यासस्य दैर्घ्यम्, **वाच्छन्दसी**त्युपधागुणो न। (**अहोभिरिव**) यथा दिवसैः (**द्यौः**) सूर्य्यः॥१०॥

अन्वयः-हे वृषकर्मन्! पुरां दर्त्तरिन्द्र यो दिवोदासेभिः स्तवानः स त्वं नव्येभिरुक्थैश्शग्मैः पायुभिर्द्यौरहोभिरिव नः पाहि वावृधीथाः॥१०॥

भावार्थः-अत्रोपमालङ्कारः। राजपुरुषैः सूर्यवत् विद्यासुशिक्षाधर्मोपदेशं प्रजा उत्साहनीयाः प्रशंसनीयाश्चैवं प्रजाजनैः राजजनाश्चेति॥१०॥

अत्र राजप्रजाकर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति त्रिंशदुत्तरं शततमं १३० सूक्तमेकोनविंशो १९ वर्गश्च समाप्तः॥

पदार्थः-(**वृषकर्मन्**) जिनके वर्षनेवाले मेघ के कामों के समान काम वह (**पुराम्**) शत्रुनगरों को (**दर्त्तः**) दरने-विदारने-विनाशने (**इन्द्र**) और सबकी रक्षा करनेवाले हे सेनापति! (**दिवोदासेभिः**) जो

प्रकाश देनेवाली (**स्तवानः**) स्तुति प्रशंसा को प्राप्त हुए हैं (**सः**) वह आप (**नव्येभिः**) नवीन (**उक्थैः**) प्रशंसा करने योग्य (**शग्मैः**) सुखों और (**पायुभिः**) रक्षाओं से (**द्यौः**) जैसे सूर्य (**अहोभिरिव**) दिनों से वैसे (**नः**) हम लोगों की (**पाहि**) रक्षा करें और (**वावृधीथाः**) वृद्धि को प्राप्त होवें॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजपुरुषों को सूर्य के समान विद्या, उत्तम शिक्षा और धर्म के उपदेश से प्रजाजनों को उत्साह देना और उनकी प्रशंसा करनी चाहिये और वैसे ही प्रजाजनों को राजजन वर्त्तने चाहिये॥१०॥

इस सूक्त में राजा और प्रजाजन के काम का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ एकता है, यह जाननी चाहिये॥

यह एक सौ तीसवां १३० सूक्त और उन्नीसवां १९ वर्ग पूरा हुआ॥

इन्द्रायेत्यस्य सप्तर्चस्य एकत्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। १,२ निचृदत्यष्टिः। ४ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। ३,५,६,७ भुरिगष्टिश्छन्दः। मध्यमः स्वरः॥

अथेदं कस्य राज्यमस्तीत्याह॥

अब सात ऋचावाले एक सौ एकतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में यह किसका राज्य है, इस विषय को कहा है॥

इन्द्रा॑य॒ हि द्यौरसु॑रो॒ अन॑म्न॒तेन्द्रा॑य म॒ही पृ॑थि॒वी वरी॑मभिर्द्यु॒म्नसा॑ता॒ वरी॑मभिः।
इन्द्रं॒ विश्वे॑ स॒जोष॑सो दे॒वासो॑ दधिरे पु॒रः।
इन्द्रा॑य॒ विश्वा॒ सव॑नानि॒ मानु॑षा रा॒तानि॑ सन्तु॒ मानु॑षा॥ १॥

इन्द्रा॑य। हि। द्यौः। असु॑रः। अन॑म्नत। इन्द्रा॑य। म॒ही। पृ॒थि॒वी। वरी॑मऽभिः। द्यु॒म्नऽसा॑ता। वरी॑मऽभिः। इन्द्र॑म्। विश्वे॑। स॒ऽजोष॑सः। दे॒वासः॑। द॒धि॒रे॒। पु॒रः। इन्द्रा॑य। विश्वा॑। सव॑नानि। मानु॑षा। रा॒तानि॑। स॒न्तु॒। मानु॑षा॥ १॥

पदार्थः-(**इन्द्राय**) परमैश्वर्याय (**हि**) किल (**द्यौः**) सूर्यः (**असुरः**) मेघः (**अनम्नत**) (**इन्द्राय**) परमैश्वर्याय (**मही**) प्रकृतिः (**पृथिवी**) भूमिः (**वरीमभिः**) वरणीयैः (**द्युम्नसाता**) द्युम्नस्य प्रशंसाया विभागे (**वरीमभिः**) वरणीयैः (**इन्द्रम्**) सर्वदुःखविदारकम् (**विश्वे**) सर्वे (**सजोषसः**) समानप्रीतिसेवनाः (**देवासः**) विद्वांसः (**दधिरे**) दध्युः (**पुरः**) सत्कारपुरःसरम् (**इन्द्राय**) परमेश्वराय (**विश्वा**) सर्वाणि (**सवनानि**) ऐश्वर्याणि (**मानुषा**) मानुषाणामिमानि (**रातानि**) दत्तानि (**सन्तु**) भवन्तु (**मानुषा**) मानुषाणामिमानीव॥ १॥

अन्वयः-हे मनुष्या! यस्मा इन्द्राय द्यौरसुरः यस्मा इन्द्राय मही पृथिवी वरीमभिर्द्युम्नसातानम्नत यमिन्द्रं सजोषसो विश्वे देवासः पुरो दधिरे तस्मा इन्द्राय हि मानुषेव वरीमभिर्धर्मैर्विश्वा सवनानि मानुषा रातानि सन्त्विति विजानीत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यः यावत् किञ्चिदत्र कार्यकारणात्मकं जगत् यावन्तो जीवाश्च वर्त्तन्त एतत् सर्वं परमेश्वरस्य राज्यमस्तीति बोध्यम्॥ १॥

पदार्थः-हे मनुष्यो! जिस (**इन्द्राय**) परमैश्वर्ययुक्त ईश्वर के लिये (**द्यौः**) सूर्य (**असुरः**) और मेघ वा जिस (**इन्द्राय**) परमैश्वर्ययुक्त ईश्वर के लिये (**मही**) बड़ी प्रकृति और (**पृथिवी**) भूमि (**वरीमभिः**) स्वीकार करने योग्य व्यवहारों से (**द्युम्नसाता**) प्रशंसा के विभाग अर्थात् अलग-अलग प्रतीति होने के निमित्त (**अनम्नत**) नमे नम्रता को धारण करे वा जिसे (**इन्द्रम्**) सर्व दुःख विनाशनेवाले परमेश्वर को (**सजोषसः**) एकसी प्रीति करनेहारे (**विश्वे**) समस्त (**देवासः**) विद्वान् जन (**पुरः**) सत्कारपूर्वक (**दधिरे**) धारण करें, उस (**इन्द्राय**) परमेश्वर के लिये (**हि**) ही (**मानुषा**) मनुष्यों के इन व्यवहारों के समान

(वरीमभिः) स्वीकार करने योग्य धर्मों से **(विश्वा)** समस्त **(सवनानि)** ऐश्वर्य जो **(मानुषा)** मनुष्य सम्बन्धी हैं, वे **(रातानि)** दिये हुए **(सन्तु)** होवें, इसको जानो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को जानना चाहिये कि जितना कुछ यहाँ कार्यकारणात्मक जगत् और जितने जीव वर्त्तमान हैं, यह सब परमेश्वर का राज्य है॥१॥

पुनर्मनुष्यैः परमात्मैवोपासनीय इत्याह॥

फिर मनुष्यों को परमात्मा की ही उपासना करनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

विश्वे॑षु हि त्वा॒ सव॑नेषु तुञ्जते॑ सम्॒॑नमेकं॒ वृष॑मण्यव॒॑ः पृथक् स्व॑॑ः सनि॒ष्यव॒॑ः पृथ॑क्।
तं त्वा॒ नाव॑ं न पु॒र्षाणि॑ शूषस्य॑ धु॒रि धी॑महि।
इन्द्रं॑ न य॒ज्ञैश्चि॒तय॑न्त आ॒यव॒॑ः स्तोमे॑भि॒रिन्द्र॑मा॒यव॑॑ः॥२॥

विश्वे॑षु। हि। त्वा॒। सव॑नेषु। तुञ्जते॑। स॒मा॒नम्। एक॑म्। वृष॑ऽमन्यवः। पृथ॑क्। स्व॒॑रिति॑ स्व॑॑ः। स॒नि॒ष्यव॑॑ः। पृथ॑क्। तम्। त्वा॒। नाव॑म्। न। पु॒र्षणि॑म्। शूष॑स्य। धु॒रि। धी॒म॒हि॒। इन्द्र॑म्। न। य॒ज्ञैः। चि॒तय॑न्तः। आ॒यव॑॑ः। स्तोमे॑भिः। इन्द्र॑म्। आ॒यव॑॑ः॥२॥

पदार्थः-(**विश्वेषु**) सर्वेषु (**हि**) खलु (**त्वा**) त्वाम् (**सवनेषु**) ऐश्वर्येषु (**तुञ्जते**) तुञ्जन्ति पालयन्ति। अत्र व्यत्ययेनात्मनेपदमेकवचनं च। (**समानम्**) सर्वत्रैव स्वव्याप्त्यैकरसम् (**एकम्**) अद्वितीयमसहायम् (**वृषमण्यवः**) वृषस्य मन्युरिव मन्युर्येषां ते (**पृथक्**) (**स्वः**) सुखस्वरूपम् (**सनिष्यवः**) संभजमानाः (**पृथक्**) (**तम्**) (**त्वा**) त्वाम् (**नावम्**) (**न**) इव (**पर्षणिम्**) सेचनीयाम् (**शूषस्य**) बलवतः (**धुरि**) धारके काष्ठे (**धीमहि**) धरेम। अत्र डुधाञ् धातोर्लिङि **छन्दस्युभयथे**ति शब्भाव आर्द्धधातुकत्वादीत्वम्। (**इन्द्रम्**) परमैश्वर्यम् (**न**) इव (**यज्ञैः**) विद्वत्संगसेवनैः (**चितयन्तः**) संचेतयन्तः। अत्र **वाच्छन्दसी**त्युपधागुणो न। (**आयवः**) ये पुरुषार्थं यन्ति ते मनुष्याः (**स्तोमेभिः**) स्तुतिभिः (**इन्द्रम्**) परमैश्वर्यकारकं सूर्यम् (**आयवः**) ये सूर्यमभितो यन्ति ते लोकाः॥२॥

अन्वयः-हे परमेश्वर! पृथक् पृथक् सनिष्यवो वृषमण्यवो वयं यं समानमेकं स्वस्त्वा विश्वेषु सवनेषु विद्वांसो यथा तुञ्जते पालयन्ति तथा हि तं त्वा शूषस्य धुरि पर्षणिं नावं न धीमहि इन्द्रमायव इव यज्ञैरिन्द्रं न चितयन्त आयवो वयं स्तोमेभिश्च प्रशंसेम॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्विद्वांसोऽयं सच्चिदानन्दं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वत्रैकरसव्यापिनं सर्वाधारं सर्वैश्वर्यप्रदमेकमद्वैतं परमात्मानमुपासते स एव निरन्तरमुपासनीयः॥२॥

पदार्थः-हे परमेश्वर! **(पृथक्, पृथक्)** अलग-अलग **(सनिष्यवः)** उत्तमता से सेवनवाले **(वृषमण्यवः)** जिनका बैल के क्रोध के समान क्रोध वे हम लोग जिन **(समानम्)** सर्वत्र एक रस व्याप्त

(एकम्) जिसका दूसरा कोई सहायक नहीं उन **(स्वः)** सुखस्वरूप **(त्वा)** आपको **(विश्वेषु)** समग्र **(सवनेषु)** ऐश्वर्य आदि पदार्थों में विद्वान् लोग जैसे **(तुञ्जते)** राखते अर्थात् मानते-जानते हैं, वैसे **(हि)** **(तम्)** उन **(त्वा)** आपको **(शूषस्य)** बलवान् पुरुष के **(धुरि)** धारण करनेवाले काठ पर **(पर्षणिम्)** सींचने योग्य **(नावम्)** नाव के **(न)** समान **(धीमहि)** धारण करें वा **(इन्द्रम्)** परम ऐश्वर्य कराने वाले सूर्यमण्डल को जैसे उसके **(आयवः)** चारों ओर घूमते हुए लोक वैसे वा जैसे **(यज्ञैः)** विद्वानों के सङ्ग और सेवनों से **(इन्द्रम्)** परम ऐश्वर्य को **(न)** वैसे **(चितयन्तः)** अच्छे प्रकार चिन्तवन करते हुए **(आयवः)** पुरुषार्थ को प्राप्त होनेवाले हम लोग **(स्तोमेभिः)** स्तुतियों से आपकी प्रशंसा करें॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि विद्वान् जन जिस सच्चिदानन्दस्वरूप, नित्य, शुद्ध, बुद्ध और मुक्तस्वभाव, सर्वत्र एकरसव्यापी, सबका आधार, सब ऐश्वर्य देनेवाले एक अद्वैत (जिसकी तुल्यता का दूसरा नहीं) परमात्मा की उपासना करते, वही निरन्तर सबको उपासना करने योग्य है॥२॥

पुनः सर्वैः क उपासनीय इत्याह॥

फिर सबको किसकी उपासना करनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः।
यद्गव्यन्ता द्वा जना स्वर्यन्ता समूहसि।
आविष्करिक्रद्वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम्॥३॥

वि। त्वा। ततस्रे। मिथुनाः। अवस्यवः। व्रजस्य। साता। गव्यस्य। निःऽसृजः। सक्षन्तः। इन्द्र। निःऽसृजः। यत्। गव्यन्ता। द्वा। जना। स्वः। यन्ता। सम्ऽऊहसि। आविः। करिक्रत्। वृषणम्। सचाऽभुवम्। वज्रम्। इन्द्र। सचाऽभुवम्॥३॥

पदार्थः-(**वि**) (**त्वा**) त्वां जगदीश्वरम् (**ततस्रे**) तस्यन्ति दुःखान्युपक्षयन्ति (**मिथुना**) मिथुनानि स्त्रीपुरुषाख्यद्वन्द्वानि (**अवस्यवः**) आत्मनोऽवमिच्छवः (**व्रजस्य**) व्रजितुं गन्तुं योग्यस्य (**साता**) सम्यक् सेवने (**गव्यस्य**) गोभ्यो हितस्य (**निःसृजः**) नितरां सृजन्तः निष्पादयन्तः (**सक्षन्तः**) सहन्तः। अत्र सह धातोः पृषोदरादिवत्सकारागमः। (**इन्द्र**) परमैश्वर्यप्रद (**निःसृजः**) नितरां संपन्नाः (**यत्**) यौ (**गव्यन्ता**) गौरिवाचरन्तौ (**द्वा**) द्वौ (**जना**) जनौ (**स्वः**) सुखस्वरूपम् (**यन्ता**) यन्तौ प्राप्नुवन्तौ (**समूहसि**) सम्यक् चेतयसि (**आविः**) प्राकट्ये (**करिक्रत्**) भृशं कुर्वन् (**वृषणम्**) सेचकम् (**सचाभुवम्**) यः समवाये भवति तम् (**वज्रम्**) दुष्टानां व्रजमिव दण्डप्रदम् (**इन्द्र**) दुःखविदारक (**सचाभुवम्**) सत्यं भावुकम्॥३॥

अन्वयः-हे इन्द्र! सक्षन्तो निःसृजोऽवस्यवो निःसृजो मिथुना त्वा प्राप्य व्रजस्य गव्यस्य सातेव दुःखानि विततस्रे। हे इन्द्र! यद्यौ गव्यन्ता द्वा स्वर्यन्ता जना आविष्करिक्रत्सँत्वं समूहसि तं सचाभुवं वज्रं वृषणं सचाभुवं त्वा तौ नित्यमुपासेताम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये पुरुषाः स्त्रियश्च सर्वस्य जगतः प्रकाशकं कर्त्तारं धर्त्तारं दातारं सर्वान्तर्यामिजगदीश्वरमेव सेवन्ते ते सततं सुखिनो भवन्ति॥३॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य्य के देनेहारे जगदीश्वर! **(सक्षन्तः)** सहते हुए **(निःसृज)** निरन्तर अनेकानेक व्यवहारों को उत्पन्न करने **(अवस्यवः)** और अपनी रक्षा चाहनेवाले **(निःसृजः)** अतीव सम्पन्न **(मिथुना)** स्त्री और पुरुष दो-दो जने **(त्वा)** आपको प्राप्त होके **(व्रजस्य)** जाने योग्य **(गव्यस्य)** गौओं के लिये हित करनेवाले अर्थात् जिसमें आराम पाने को गौएँ जातीं उस गोड़ा आदि स्थान के **(साता)** सेवन में जैसे दुःख छूटें, वैसे दुःखों को **(विततस्रे)** छोड़ते हैं। हे **(इन्द्र)** दुःखों का विनाश करनेवाले! **(यत्)** जो **(गव्यन्ता)** गौओं के समान आचरण करते **(द्वा)** दो **(स्वः)** सुखस्वरूप आपको **(यन्ता)** प्राप्त होते हुए **(जना)** स्त्री-पुरुषों को **(आविष्करिक्रत्)** प्रकट करते हुए आप **(समूहसि)** उनको अच्छे प्रकार चेतना देते हो, उन **(सचाभुवम्)** समवाय सम्बन्ध में प्रसिद्ध होते हुए **(वज्रम्)** दुष्टों को वज्र के समान दण्ड देने **(वृषणम्)** सबको सींचने **(सचाभुवम्)** और सत्य की भावना करानेवाले आपकी वे दोनों नित्य उपासना करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पुरुष और स्त्री सब जगत् को प्रकाशित करने, उत्पन्न करने, धारण करने और देनेवाले सर्वान्तर्यामी जगदीश्वर ही का सेवन करते हैं, वे निरन्तर सुखी होते हैं॥३॥

पुनः के किं कृत्वा किं कुर्युरित्याह॥

फिर कौन क्या करके क्या करें, इस विषय को अगले मन्त्र में कहा है॥

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः।
शासस्तमिन्द्र मर्त्यमयज्युं शवसपस्ते।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः॥४॥

विदुः। ते। अस्य। वीर्यस्य। पूरवः। पुरः। यत्। इन्द्र। शारदीः। अवऽअतिरः। ससहानः। अवऽअतिरः। शासः। तम्। इन्द्र। मर्त्यम्। अयज्युम्। शवसः। पते। महीम्। अमुष्णाः। पृथिवीम्। इमाः। अपः। मन्दसानः। इमाः। अपः॥४॥

पदार्थः-(**विदुः**) जानीयुः **(ते)** तव **(अस्य)** **(वीर्यस्य)** पराक्रमस्य **(पूरवः)** मनुष्याः **(पुरः)** पूर्वम् **(यत्)** यः **(इन्द्र)** सर्वेषां धर्त्ता **(शारदीः)** शरदः इमाः **(अवातिरः)** अवतरेत् **(सासहानः)** सहमानः

(अवातिरः) अवतरेत् **(शासः)** शिष्याः **(तम्)** **(इन्द्र)** सर्वाभिरक्षक **(मर्त्यम्)** मनुष्यम् **(अयज्युम्)** अयजमानम् **(शवसः)** बलस्य **(पते)** स्वामिन् **(महीम्)** महतीम् **(अमुष्णाः)** मुष्णीयाः **(पृथिवीम्)** **(इमाः)** प्रजाः **(अपः)** जलानि **(मन्दसानः)** कामयमानः **(इमाः)** प्रजाः **(अपः)** प्राणा इव वर्त्तमानाः॥४॥

अन्वयः-हे इन्द्र! यथा पूरवस्ते तवाऽस्य वीर्यस्य पुरः प्रभावं विदुस्तथाऽन्येऽपि जानन्तु। यद्यः सासहानो जन इमाः शारदीरपोऽवातिरस्तथा त्वमपि जानीह्यवातिरश्च। हे शवसस्पत इन्द्र! यथा त्वं यमयज्युं मर्त्यं शासः। यो मन्दसानो महीं पृथिवीं प्राप्य इमा अपः प्राणिनः पीडयेत्तं त्वममुष्णा वयमपि च शिष्याम॥४॥

भावार्थः-अत्र वाचलुप्तोपमालङ्कारः। य आप्तानां प्रभावं विदित्वा धर्ममाचरन्ति ते दुष्टान् शासितुं शक्नुवन्ति॥४॥

पदार्थः-हे **(इन्द्र)** सब के धारण करनेहारे! जैसे **(पूरवः)** मनुष्य **(ते)** आपके **(अस्य)** इस **(वीर्य्यस्य)** पराक्रम के **(पुरः)** प्रथम प्रभाव को **(विदुः)** जानें वैसे और भी जानें और **(यत्)** जो **(सासहानः)** सहन करता हुआ जन **(इमाः)** इन प्रजा और **(शारदीः)** शरद् ऋतुसम्बन्धी **(अपः)** जलों को **(अवातिरः)** प्रकट करे, वैसे आप भी जानो और **(अवातिरः)** प्रकट करो। हे **(शवसः)** बल के **(पते)** स्वामी **(इन्द्र)** सबकी रक्षा करनेहारे! जैसे आप जिस **(अयज्युम्)** यज्ञ न करनेहारे **(मर्त्यम्)** मनुष्य को **(शासः)** सिखाओ वा जो **(मन्दसानः)** कामना करता हुआ **(महीम्)** बड़ी **(पृथिवीम्)** पृथिवी को पाकर **(इमाः)** इन **(अपः)** प्राणों के समान वर्त्तमान प्रजाजनों को पीड़ा देवे **(तम्)** उसको आप **(अमुष्णाः)** चुराओ, छिपाओ और हम भी सिखावें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो धर्मात्मा सज्जनों के प्रभाव को जानकर धर्माचरण करते हैं, वे दुष्टों को सिखला सकते हैं अर्थात् उनकी दुष्टता दूर होने को अच्छी शिक्षा दे सकते हैं॥४॥

पुनः प्रजारक्षकाः किं कुर्युरित्याह॥

फिर प्रजा की रक्षा करनेहारे क्या करें, इस विषय को अगले मन्त्र में कहा है॥

आदित्ते॑ अ॒स्य वी॒र्य॑स्य चर्किर॒न्मदे॑षु वृषन्नु॒शिजो॒ यदावि॑थ सखीय॒तो यदावि॑थ।
च॒कर्थ॑ का॒रमे॑भ्य॒: पृत॑नासु॒ प्रव॑न्तवे।
ते अ॒न्यामन्यां न॒द्यं॑ सनिष्णत श्रव॒स्यन्त॑: सनिष्णत॥५॥

आत्। इत्। ते। अस्य। वीर्यस्य। चर्किरन्। मदेषु। वृषन्। उशिजः। यत्। आविथ। सखिऽयतः। यत्। आविथ। चकर्थ। कारम्। एभ्यः। पृतनासु। प्रऽवन्तवे। ते। अन्याम्ऽअन्याम्। नद्यम्। सनिष्णत। श्रवस्यन्तः। सनिष्णत॥५॥

पदार्थः-(**आत्**) (**इत्**) एव (**ते**) तव (**अस्य**) (**वीर्यस्य**) पराक्रमस्य (**चर्किरन्**) भृशं विक्षिप्येयुः (**मदेषु**) हर्षेषु (**वृषन्**) आनन्दं वर्षयन् (**उशिजः**) धर्मं कामयमानाः (**यत्**) ये (**आविथ**) रक्षेः (**सखीयतः**) सखेवाचरतः (**यत्**) यतः (**आविथ**) पालय (**चकर्थ**) कुरु (**कारम्**) क्रियते यस्तम् (**एभ्यः**) धार्मिकेभ्यः (**पृतनासु**) मनुष्येषु। **पृतना इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**प्रवन्तवे**) प्रविभागं कर्त्तुम् (**ते**) (**अन्यामन्याम्**) भिन्नां भिन्नाम् (**नद्यम्**) नदीम् (**सनिष्णत**) संभजेयुः (**श्रवस्यन्तः**) आत्मनः श्रवोऽन्नमिच्छन्तः (**सनिष्णत**) संभजन्तु॥५॥

अन्वयः-हे वृषन् विद्वन्! यद्य आप्तास्ते तवास्य वीर्यस्य प्रभावेण मदेषु वर्त्तमाना उशिजो धर्मं कामयमाना दुष्टांश्चर्किरन् श्रवस्यन्तः सन्तः प्रवन्तवे पृतनासु सनिष्णत। अन्यामन्यां नद्यं मेघ इव कारं सनिष्णत तान् सखीयतो जनास्त्वमाविथ यद्यतो यानाविथ तान् पुरुषार्थवतश्चकर्थैभ्यः सर्वं राज्यमाविथ यद्ये च ते भृत्यास्तेऽपि धर्मेणादित् प्रजा पालयेयुः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः प्रजारक्षणेऽधिकृतास्ते धर्मेण प्रजापालनं चिकीर्षन्तः प्रयतेरन्॥५॥

पदार्थः-हे (**वृषन्**) आनन्द को वर्षाते हुए विद्वान्! (**यत्**) जो धर्मात्मा जन (**ते**) आपके (**अस्य**) इस (**वीर्यस्य**) पराक्रम के प्रभाव से (**मदेषु**) आनन्दों में वर्त्तमान (**उशिजः**) धर्म की कामना करते हुए जन (**चर्किरन्**) दुष्टों को निरन्तर दूर करें वा (**श्रवस्यन्तः**) अपने को अन्न की इच्छा करते हुए (**प्रवन्तवे**) अच्छे विभाग करने को (**पृतनासु**) मनुष्यों में (**सनिष्णत**) सेवन करें अर्थात् (**अन्यामन्याम्**) अलग-अलग (**नद्यम्**) नदी को जैसे मेघ वैसे (**कारम्**) जो किया जाता उस कार का (**सनिष्णत**) सेवन करें उन (**सखीयतः**) मित्र के समान आचरण करते हुए जनों को आप (**आविथ**) पालो (**यत्**) जिस कारण जिनको (**आविथ**) पालो इससे उनको पुरुषार्थवाले (**चकर्थ**) करो (**एभ्यः**) इन धार्मिक सज्जनों से सब राज्य की पालना करो और जो आप के कर्मचारी पुरुष हों (**ते**) वे भी धर्म से (**आदित्**) ही प्रजाजनों की पालना करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य प्रजा की रक्षा करने में अधिकार पाये हुए हैं, वे धर्म के साथ प्रजा पालने की इच्छा करते हुए उत्तम यत्नवान् हों॥५॥

पुनर्मनुष्याः केन किं कुर्युरित्याह॥

फिर मनुष्य किससे क्या करें, इस विषय को अगले मन्त्र में कहा है॥

उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः।
यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः॥ ६॥

उतो इति। नः। अस्याः। उषसः। जुषेत। हि। अर्कस्य। बोधि। हविषः। हवीमऽभिः। स्वः।ऽसाता। हवीमऽभिः। यत्। इन्द्र। हन्तवे। मृधः। वृषा। वज्रिन्। चिकेतसि। आ। मे। अस्य। वेधसः। नवीयसः। मन्म। श्रुधि। नवीयसः॥ ६॥

पदार्थः-(**उतो**) अपि (**नः**) अस्मान् (**अस्याः**) (**उषसः**) प्रातःकालस्य मध्ये (**जुषेत**) सेवेत (**हि**) खलु (**अर्कस्य**) सूर्यस्य (**बोधि**) बोधय (**हविषः**) दातुमर्हस्य (**हवीमभिः**) आह्वातुमर्हैः कर्मभिः (**स्वर्षाता**) सुखानां विभागे। अत्र **सुपां सुलुगिति** डेर्डा। (**हवीमभिः**) स्तोतुमर्हैः (**यत्**) ये (**इन्द्र**) दुष्टविदारक (**हन्तवे**) हन्तुम्। अत्र तवेन् प्रत्ययः। (**मृधः**) संग्रामस्थान् शत्रून्। **मृध इति संग्रामनामसु पठितम्।** (निघं०२.१७) (**वृषा**) वृषेव बलिष्ठः (**वज्रिन्**) प्रशस्तशस्त्रयुक्त (**चिकेतसि**) जानीयाः (**आ**) (**मे**) मम (**अस्य**) (**वेधसः**) मेधाविनः (**नवीयसः**) अतिशयेन नवस्य नवीनविद्याध्येतुः (**मन्म**) विज्ञानजनकं शास्त्रम् (**श्रुधि**) श्रुणु (**नवीयसः**) अतिशयेन नवाऽध्यापकस्य॥ ६॥

अन्वयः-हे वज्रिन्निन्द्र! भवान् यथाऽर्कस्यास्या उषसश्च प्रभावेण जना बुद्ध्यन्ते तथा नोऽस्मान् बोधि हि किलोतो स्वर्षाता हवीमभिर्हविषो जुषेत यद्यो वृषा त्वं मृधो हन्तवे चिकेतसि नवीयसो वेधसो मेऽस्य नवीयसो मन्माश्रुधि॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्योत्पन्नयोषसा प्रबुद्धजनाः प्रकाशे स्वान् स्वान् व्यवहाराननुतिष्ठन्ति तथा विद्वद्भिस्सुबोधिता नरा विज्ञानप्रकाशे स्वानि स्वानि कर्माणि कुर्वन्ति, ये दुष्टान्निवार्य श्रेष्ठान् संसेव्य नूतनाऽधीतविदुषां सकाशाद्विद्या गृह्णन्ति तेऽभीष्टप्राप्तौ सिद्धा जायन्ते॥ ६॥

पदार्थः-हे (**वज्रिन्**) प्रशंसित शस्त्रयुक्त विद्वान्! (**इन्द्र**) दुष्टों का संहार करनेवाले आप जैसे (**अर्कस्य**) सूर्य और (**अस्याः**) इस (**उषसः**) प्रभात वेला के प्रभाव से जन सचेत होते जागते हैं, वैसे (**नः**) हम लोगों को (**बोधि**) सचेत करो (**हि, उतो**) और निश्चय से (**स्वर्षाता**) सुखों के अलग-अलग करने में (**हवीमभिः**) स्पर्द्धा करने योग्य कामों के समान (**हवीमभिः**) प्रशंसा के योग्य कामों से (**हविषः**) देने योग्य पदार्थ का (**जुषेत**) सेवन करो (**यत्**) जो (**वृषा**) बैल के समान बलवान् आप (**मृधः**) संग्रामों में स्थित शत्रुओं को (**हन्तवे**) मारने को (**चिकेतसि**) जानो (**नवीयसः**) अतीव नवीन विद्या पढ़ने वाले (**वेधसः**) बुद्धिमान् (**मे**) मुझ विद्यार्थी और (**अस्य**) इस (**नवीयसः**) अत्यन्त नवीन पढ़ानेवाले विद्वान् के (**मन्म**) विज्ञान उत्पन्न करनेवाले शास्त्र को (**आश्रुधि**) अच्छे प्रकार सुनो॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य से प्रकट हुई प्रभात वेला से जागे हुए जन सूर्य के उजाले में अपने-अपने व्यवहारों का आरम्भ करते हैं, वैसे विद्वानों से सुबोध किये मनुष्य विशेष ज्ञान के प्रकाश में अपने-अपने कामों को करते हैं। जो दुष्टों की निवृत्ति और श्रेष्ठों की उत्तम सेवा वा नवीन पढ़े हुए विद्वानों के निकट से विद्या का ग्रहण करते हैं, वे चाहे हुए पदार्थ की प्राप्ति में सिद्ध होते हैं॥६॥

पुना राजप्रजाजनैः किं निवार्य्य किं कर्त्तव्यमित्याह॥

फिर राजा और प्रजाजनों को किसको छोड़ क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम्।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः॥७॥२०॥

त्वम्। तम्। इन्द्र। ववृधानः। अस्मऽयुः। अमित्रऽयन्तम्। तुविऽजात। मर्त्यम्। वज्रेण। शूर। मर्त्यम्। जहि। यः। नः। अघऽयति। शृणुष्व। सुश्रवःऽतमः। रिष्टम्। न। यामन्। अप। भूतु। दुःऽमतिः। विश्वा। अप। भूतु। दुःऽमतिः॥७॥

पदार्थः-(**त्वम्**) (**तम्**) जनम् (**इन्द्र**) विद्यैश्वर्य्याढ्य (**वावृधानः**) वर्धमानः (**अस्मयुः**) अस्मास्वात्मानमिच्छुः (**अमित्रयन्तम्**) शत्रूयन्तम् (**तुविजात**) तुविषु बहुषु प्रसिद्ध (**मर्त्यम्**) मनुष्यम् (**वज्रेण**) शस्त्रेण (**शूर**) शत्रूणां हिंसक (**मर्त्यम्**) मनुष्यम् (**जहि**) (**यः**) (**नः**) अस्मभ्यम् (**अघायति**) आत्मनोऽघमिच्छति (**शृणुष्व**) (**सुश्रवस्तमः**) अतिशयेन सुष्ठु शृणोति सः (**रिष्टम्**) हिंसितम् (**न**) इव (**यामन्**) यामनि (**अप**) (**भूतु**) भवतु (**दुर्मतिः**) दुष्टा मतिर्यस्य सः (**विश्वा**) अखिला (**अप**) (**भूतु**) (**दुर्मतिः**) दुष्टा चासौ मतिश्च दुर्मतिः॥७॥

अन्वयः-हे तुविजात शूरेन्द्र! सुश्रवस्तमो वावृधानोऽस्मयुस्त्वं वज्रेणामित्रयन्तं मर्त्यं जहि। यो नोऽघायति तं मर्त्यं जहि। यो यामन् दुर्मतिरभूतु तं रिष्टन्नेव जहि। या दुर्मतिः स्यात् सा विश्वाऽस्मत्तोऽपभूत्विति शृणुष्व॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये धार्मिका राजप्रजाजनास्ते सर्वाभिश्चातुर्य्यैर्द्वेषकारिपरस्वापहारिणो हत्वा धर्म्यं राज्यं प्रशास्य निर्भयान् मार्गान् कृत्वा विद्यावृद्धिं कुर्य्युः॥७॥

अत्र श्रेष्ठाऽश्रेष्ठमनुष्यसत्कारताडनवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकत्रिंशदुत्तरं शततमं १३१ सूक्तं विंशो २० वर्गश्च समाप्तः॥

पदार्थः-हे **(तुविजात)** बहुतों में प्रसिद्ध **(शूर)** शत्रुओं को मारनेवाले **(इन्द्र)** विद्या और ऐश्वर्य्य से युक्त **(सुश्रवस्तमः)** अतीव सुन्दरता से सुननेहारे और **(वावृधानः)** बढ़ते हुए **(अस्मयुः)** हम लोगों में अपनी इच्छा करनेवाले **(त्वम्)** आप **(वज्रेण)** शस्त्र से **(अमित्रयन्तम्)** शत्रुता करते हुए **(मर्त्यम्)** मनुष्य को **(जहि)** मारो **(यः)** जो **(नः)** हम लोगों के लिये **(अघायति)** अपना दुष्कर्म चाहता है **(तम्)** उस **(मर्त्यम्)** मनुष्य को मारो और जो **(यामन्)** रात्रि में **(दुर्मतिः)** दुष्टमतिवाला मनुष्य **(अप, भूतु)** अप्रसिद्ध हो छिपे, उसको **(रिष्टम्)** दो मारनेवाले **(न)** जैसे मारें वैसे **(जहि)** मारो अर्थात् अत्यन्त दण्ड देओ जो **(दुर्मतिः)** दुष्टमति हो वह **(विश्वा)** समस्त हम लोगों से **(अप, भूतु)** छिपे दूर हो, यह आप **(शृणुष्व)** सुनो॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो धार्मिक राजा और प्रजाजन हों, वे सब चतुराइयों से द्वेष वैर करने और पराया माल हरनेवाले दुष्टों को मार धर्म के अनुकूल राज्य की शिक्षा बेखटक मार्ग और विद्या की वृद्धि करें॥७॥

इस सूक्त में श्रेष्ठ और दुष्ट मनुष्यों का सत्कार और ताड़ना के वर्णन से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ इकतीसवां १३१ सूक्त और बीसवां २० वर्ग समाप्त हुआ॥

अथ त्वयेत्यस्य षडर्चस्य द्वात्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। १,३,५,६ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। २ भुरिगतिशक्वरी छन्दः। पञ्चमः स्वरः। ४ निचृदष्टिश्छन्दः। मध्यमः स्वरः॥

पुनर्युद्धसमये सेनेशः किं कुर्यादित्याह॥

फिर युद्ध समय में सेनापति क्या करे, इस विषय को अगले मन्त्र में कहा है॥

त्वया॑ व॒यं म॑घवन्पू॒र्व्ये॒ ध॒न॒ इन्द्र॑त्वोताः॒ सास॑ह्याम पृतन्य॒तो व॑नु॒याम॑ वनुष्य॒तः।
नेदि॑ष्ठे अ॒स्मिन्नह॒न्यधि॑ वोचा॒ नु सु॑न्व॒ते।
अ॒स्मिन्य॒ज्ञे वि च॑येमा॒ भरे॑ कृ॒तं वा॑ज॒यन्तो॒ भरे॑ कृ॒तम्॥ १॥

त्वया॑। व॒यम्। म॒घ॒ऽव॒न्। पूर्व्ये॑। धने॑। इन्द्र॑त्वाऽऊताः। स॒स॒ह्या॒म॒। पृ॒त॒न्य॒तः। व॒नु॒या॑म। व॒नु॒ष्य॒तः। नेदि॑ष्ठे। अ॒स्मिन्। अह॑नि। अधि॑। वो॒च॒। नु। सु॒न्व॒ते। अ॒स्मिन्। य॒ज्ञे। वि। च॒येम॒। भरे॑। कृ॒तम्। वा॒ज॒ऽयन्तः॑। भरे॑। कृ॒तम्॥ १॥

पदार्थः–(**त्वया**) (**वयम्**) (**मघवन्**) परमपूजितबहुधनयुक्त (**पूर्व्ये**) पूर्वैः कृते (**धने**) (**इन्द्रत्वोताः**) इन्द्रेण त्वया पालिताः (**सासह्याम**) भृशं सहेम (**पृतन्यतः**) पृतना मनुष्या तानिवाचरतः (**वनुयाम**) संभजेम (**वनुष्यतः**) संभक्तान् (**नेदिष्ठे**) अतिशयेन निकटे (**अस्मिन्**) (**अहनि**) (**अधि**) उपरिभावे (**वोच**) उपदिश। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नु**) शीघ्रम् (**सुन्वते**) निष्पाद्यते (**अस्मिन्**) (**यज्ञे**) (**वि**) (**चयेम**) चिनुयाम। अत्राऽन्येषामपीति दीर्घः। (**भरे**) पालने (**कृतम्**) निष्पन्नम् (**वाजयन्तः**) ज्ञापयन्तः (**भरे**) संग्रामे। **भर इति संग्रामनामसु पठितम्।** (निरु०४.२४) (**कृतम्**) निष्पन्नम्॥१॥

अन्वयः–हे मघवन्! इन्द्रत्वोता वयं त्वया सह पूर्व्ये धने पृतन्यतः सासह्याम। वनुष्यतो वनुयाम भरे कृतं विचयेम नेदिष्ठेऽस्मिन्नहनि सुन्वते त्वं सत्योपदेशं न्वधिवोच॥१॥

भावार्थः–सर्वैर्मनुष्यैर्धार्मिकेण सेनेशेन सह प्रीतिं विधायोत्साहेन शत्रून्विजित्य परश्रीनिचयः संपादनीयः सेनापतिश्च तात्कालीनवक्तृत्वेन शौर्यादिगुणानुपदिश्य शत्रूभिः सह सैन्यान् योधयेत्॥१॥

पदार्थः–हे (**मघवन्**) परम प्रशंसित बहुत धनवाले (**इन्द्रत्वोताः**) अति उत्तम ऐश्वर्ययुक्त जो आप उन्होंने पाले हुए (**वयम्**) हम लोग (**त्वया**) आप के साथ (**पूर्व्ये**) अगले महाशयों ने किये (**धने**) धन के निमित्त (**पृतन्यतः**) मनुष्यों के समान आचरण करते हुए मनुष्यों को (**सासह्याम**) निरन्तर सहें (**वनुष्यतः**) और सेवन करनेवालों का (**वनुयाम**) सेवन करें तथा (**भरे**) रक्षा में (**कृतम्**) प्रसिद्ध हुए को (**वाजयन्तः**) समझाते हुए हम लोग (**अस्मिन्**) इस (**यज्ञे**) यज्ञ में तथा (**भरे**) संग्राम में (**कृतम्**) उत्पन्न हुए व्यवहार को (**विचयेम**) विशेष कर खोजें और (**नेदिष्ठे**) अति निकट (**अस्मिन्**) इस (**अहनि**) आज के दिन (**सुन्वते**) व्यवहारों की सिद्धि करते हुए के लिये आप सत्य उपदेश (**नु**) शीघ्र (**अधिवोच**) सबके उपरान्त करो॥१॥

भावार्थः-सब मनुष्यों को चाहिये कि धार्मिक सेनापति के साथ प्रीति और उत्साह कर शत्रुओं को जीत के अति उत्तम धन का समूह सिद्ध करें और सेनापति समय-समय पर अपनी वक्तृता से शूरता आदि गुणों का उपदेश कर शत्रुओं के साथ अपने सैनिकजनों का युद्ध करावे॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्व॒र्जेषे॑ भर॑ आ॒प्रस्य॒ वक्म॑न्यु॒षर्बु॑धः॒ स्वस्मि॒न्नञ्जसि क्रा॒णस्य॒ स्वस्मि॒न्नञ्जसि।
अह॒न्निन्द्रो॒ यथा॑ वि॒दे शी॒र्ष्णाशी॑र्ष्णोप॒वाच्यः॑।
अ॒स्म॒त्रा ते॑ स॒ध्र्यक्सन्तु रा॒तयो॑ भ॒द्रा भ॒द्रस्य॑ रा॒तयः॑॥ २॥

स्व॒ःऽजे॒षे। भरे॑। आ॒प्रस्य॒। वक्म॑नि। उ॒ष॒ःऽबु॑धः॑। स्वस्मि॑न्। अञ्ज॑सि। क्रा॒णस्य॑। स्वस्मि॑न्। अञ्ज॑सि। अह॑न्। इन्द्रः॑। यथा॑। वि॒दे। शी॒र्ष्णाऽशी॑र्ष्णा। उ॒प॒ऽवाच्यः॑। अ॒स्मऽत्रा। ते॒। स॒ध्र्य॑क्। स॒न्तु॒। रा॒तयः॑। भ॒द्राः॑। भ॒द्रस्य॑। रा॒तयः॑॥ २॥

पदार्थः-(**स्वर्जेषे**) सुखेन जयशीलाय (**भरे**) संग्रामे (**आप्रस्य**) पूर्णबलस्य (**वक्मनि**) उपदेशे (**उषर्बुधः**) रात्रिचतुर्थप्रहरे जागृताः (**स्वस्मिन्**) (**अञ्जसि**) प्रकटे (**क्राणस्य**) कुर्वाणस्य। अव **वा छन्दसी**ति शपो लुक्। (**स्वस्मिन्**) (**अञ्जसि**) कामयमाने (**अहन्**) हन्ति (**इन्द्रः**) सूर्यः (**यथा**) (**विदे**) ज्ञानवते (**शीर्ष्णा शीर्ष्णा**) शिरसा शिरसा (**उपवाच्यः**) उपवक्तुं योग्यः (**अस्मत्रा**) अस्मासु (**ते**) तव (**सध्र्यक्**) सहाऽञ्चतीति (**सन्तु**) भवन्तु (**रातयः**) दानानि (**भद्राः**) कल्याणकराः (**भद्रस्य**) कल्याणकरस्य (**रातयः**) दानानि॥२॥

अन्वयः-हे मनुष्या! यथा सध्र्यगिन्द्रो स्वर्जेषे विदे शीर्ष्णाशीर्ष्णोपवाच्यस्तथा भरे आप्रस्य क्राणस्योषर्बुधो वक्मनि स्वस्मिन्नञ्जसीव स्वस्मिन्नञ्जसि मेघं सूर्योऽहन्निव शत्रून् घ्नन्तु या अस्मत्रा भद्रा रातयस्ते भद्रस्य रातय इव स्युस्तास्ते सन्तु॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यस्सभेशः सर्वान् शूरवीरान् स्ववत्सत्करोति स शत्रून् जित्वा सर्वेभ्यः सुखं दातुं शक्नोति। संग्रामे स्वकीयाः पदार्था अन्यार्था अन्येषां च स्वार्थाः कर्त्तव्या एवं परस्परस्मिन् प्रीत्या विरोधं विहाय विजयः प्राप्तव्यः॥२॥

पदार्थः-हे मनुष्यो! (**यथा**) जैसे (**सध्र्यक्**) साथ जानेवाला (**इन्द्रः**) सूर्य्यमण्डल (**स्वर्जेषे**) सुख से जीतनेवाले (**विदे**) ज्ञानवान् पुरुष के लिये (**शीर्ष्णाशीर्ष्णा**) शिर माथे (**उपवाच्यः**) समीप कहने योग्य है, वैसे (**भरे**) संग्राम में (**आप्रस्य**) पूर्ण बल (**क्राणस्य**) करते हुए समय के विभाग (**उषर्बुधः**) उषःकाल अर्थात् रात्रि के चौथे प्रहर में जागे हुए तुम लोग (**वक्मनि**) उपदेश में जैसे (**स्वस्मिन्**) अपने (**अञ्जसि**)

प्रसिद्ध व्यवहार के निमित्त वैसे **(स्वस्मिन्)** अपने **(अञ्जसि)** चाहे हुए व्यवहार में जैसे मेघ को सूर्य्य **(अहन्)** मारता वैसे शत्रुओं को मारो, जो **(अस्मत्रा)** हम लोगों के बीच **(भद्राः)** कल्याण करनेवाले **(रातयः)** दान आदि काम **(ते)** तुम **(भद्रस्य)** कल्याण करनेवाले के **(रातयः)** दोनों के समान हों वे **(ते)** तेरे **(सन्तु)** हों॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सभापति सब शूरवीरों का अपने समान सत्कार करता है, वह शत्रुओं को जीतकर सबके लिये सुख दे सकता है। संग्राम में अपने पदार्थ औरों के लिये और औरों के अपने लिये करने चाहिये। ऐसे एक-दूसरे में प्रीति के साथ विरोध छोड़ उत्तम जय प्राप्त करना चाहिये॥ २॥

पुनर्मनुष्याः किं कृत्वा कीदृशा भवेयुरित्याह॥

फिर मनुष्य क्या करके कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्षयमृतस्य वारसि क्षयम्।
वि तद्वोचेरध द्विताः पश्यन्ति रश्मिभिः।
स घा विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः॥ ३॥

तत्। तु। प्रयः। प्रत्नऽथा। ते। शुशुक्वनम्। यस्मिन्। यज्ञे। वारम्। अकृण्वत। क्षयम्। ऋतस्य। वाः। असि। क्षयम्। वि। तत्। वोचेः। अध। द्विता। अन्तरिति। पश्यन्ति। रश्मिऽभिः। सः। घ। विदे। अनु। इन्द्रः। गोऽएषणः। बन्धुक्षित्ऽभ्यः। गोऽएषणः॥ ३॥

पदार्थः-(**तत्**) पूर्वोक्तम् (**तु**) (**प्रयः**) प्रीतिकारकं वचः (**प्रत्नथा**) प्राचीनम् (**ते**) तव (**शुशुक्वनम्**) अतिशयेन प्रदीप्तम् (**यस्मिन्**) (**यज्ञे**) व्यवहारे (**वारम्**) वर्त्तुम् (**अकृण्वत**) कुर्वन्तु (**क्षयम्**) निवासम् (**ऋतस्य**) सत्यस्य (**वाः**) जलमिव (**असि**) (**क्षयम्**) प्राप्तव्यम् (**वि**) (**तत्**) (**वोचेः**) ब्रूयाः (**अध**) अथ (**द्विता**) द्वयोर्भावः (**अन्तः**) आभ्यन्तरे (**पश्यन्ति**) प्रेक्षन्ते (**रश्मिभिः**) किरणैः (**सः**) (**घ**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**विदे**) वेद्मि। अत्र व्यत्ययेनात्मनेपदम्। (**अनु**) (**इन्द्रः**) ऐश्वर्यवान् (**गवेषणः**) यो गां वाणीमिच्छति सः (**बन्धुक्षिद्भ्यः**) बन्धून् निवासयद्भ्यः (**गवेषणः**) गवां किरणानामिष्टः सूर्य इव॥ ३॥

अन्वयः-हे विद्वन्! गवेषण इन्द्र इव ते तव प्रत्नथा यस्मिन् यज्ञ ऋतस्य शुशुक्वनं क्षयं वारं वाः क्षयमिव ये प्रयोऽकृण्वत तेषां तत्तु त्वं प्राप्तोऽसि। अधाथ द्विता रश्मिभिरन्तर्यत् पश्यन्ति तत्त्वं विवोचेः स बन्धुक्षिद्भ्यो गवेषण इन्द्रोऽहं यदनुविदे घ तदेव त्वं जानीहि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सत्यगुणेषु प्रीतिं कुर्वन्ति ते विद्वांसो जायन्ते ये विद्वांसः स्युस्ते सूर्यप्रकाशेन सर्वान् पदार्थान् हस्तामलकवद् द्रष्टुं शक्नुवन्ति॥ ३॥

पदार्थः-हे विद्वान्! **(गवेषणः)** जो वाणी की इच्छा करता है, उस **(इन्द्रः)** ऐश्वर्यवान् के समान **(ते)** आपका **(प्रत्नथा)** प्राचीन **(यस्मिन्)** जिस **(यज्ञे)** व्यवहार में **(ऋतस्य)** सत्य का **(शुशुक्वनम्)** अतिप्रकाशित **(क्षयम्)** निवास का **(वारम्)** स्वीकार करने को **(वाः)** जल और **(क्षयम्)** प्राप्त होने योग्य पदार्थ के समान जो **(प्रयः)** प्रीति करनेवाले वचन को **(अकृण्वत)** उच्चारण करें उनके **(तत्)** उस पूर्वोक्त वचन को **(तु)** तो आप प्राप्त **(असि)** हैं **(अध)** इसके अनन्तर **(द्विता)** दो का होना जैसे हो वैसे **(रश्मिभिः)** किरणों के साथ **(अन्तः)** भीतर जिसको **(पश्यन्ति)** देखते हैं **(तत्)** उसको तू **(वि, वोचेः)** अच्छे कह और **(सः)** वह **(बन्धुक्षिद्भ्यः)** बन्धुओं को निवास कराते हुए पुरुषों के लिये **(गवेषणः)** किरणों को इष्ट सूर्य के समान ऐश्वर्यवान् मैं **(अनु, विदे)** अनुकूलता से जानता हूँ **(घ)** उसी को आप भी जानो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सत्य गुणों में प्रीति करते हैं, वे विद्वान् होते और जो विद्वान् हों वे सूर्य के प्रकाश से सब हाथ में आमले के समान पदार्थों को देख सकते हैं॥३॥

पुनः के चक्रवर्त्तिराज्यं कर्त्तुमर्हन्तीत्याह॥

फिर कौन चक्रवर्त्ति राज्य करने को योग्य होते हैं, इस विषय को अगले मन्त्र में कहा है॥

नू इ॒त्था ते॑ पू॒र्वथा॑ च प्र॒वाच्यं॒ यदङ्गि॑रोभ्योऽवृ॑णोरप॑ व्र॒जमिन्द्र॒ शिक्ष॒न्नप॑ व्र॒जम्।
ऐभ्य॑: समा॒न्या दि॒शास्मभ्यं॑ जेषि॒ योत्सि॑ च।
सुन्वद्भ्यो॑ रन्धया॒ कं चि॑दव्र॒तं ह्व॑णा॒यन्तं॑ चिदव्र॒तम्॥४॥

नु। इ॒त्था। ते॒। पू॒र्वऽथा॑। च॒। प्र॒ऽवाच्य॑म्। यत्। अङ्गि॑रःऽभ्यः। अवृ॑णोः। अप॑। व्र॒जम्। इन्द्र॑। शिक्ष॑न्। अप॑। व्र॒जम्। आ। ए॒भ्यः॒। स॒मा॒न्या। दि॒शा। अ॒स्मभ्य॑म्। जे॒षि॒। योत्सि॑। च॒। सुन्वत्ऽभ्यः। र॒न्धय॒। कम्। चि॒त्। अ॒व्र॒तम्। ह्व॒णा॒यन्त॑म्। चि॒त्। अ॒व्र॒तम्॥४॥

पदार्थः-**(नु)** शीघ्रम् **(इत्था)** अनेन प्रकारेण **(ते)** तव **(पूर्वथा)** पूर्वैः प्रकारैः **(च)** **(प्रवाच्यम्)** प्रवक्तुं योग्यम् **(यत्)** **(अङ्गिरोभ्यः)** प्राणेभ्य इव विद्वद्भ्यः **(अवृणोः)** वृणुयाः **(अप)** निषेधे **(व्रजम्)** ज्ञातव्यम् **(इन्द्र)** अध्यापनादविद्याच्छेत्तः **(शिक्षन्)** विद्यामुपादापयन् **(अप)** दूरीकरणे **(व्रजम्)** अधर्ममार्गम् **(आ)** **(एभ्यः)** विद्वद्भ्यः **(समान्या)** समं वर्त्तमानया **(दिशा)** समन्तात् **(अस्मभ्यम्)** **(जेषि)** जयसि। अत्राऽडभावः। **(योत्सि)** युध्यसे। अत्र **बहुलं छन्दसी**ति श्यनभावः। **(च)** **(सुन्वद्भ्यः)** अभिषवं कुर्वद्भ्यः **(रन्धय)** हिन्द्धि। अत्रा**ऽन्येषामपि दृश्यत** इति दीर्घः। **(कम्)** **(चित्)** **(अव्रतम्)** सत्यभाषणादिव्यवहाररहितम् **(ह्वणायन्तम्)** हरतीति ह्वणो हरिणस्तद्वदाचरन्तम् **(चित्)** इव **(अव्रतम्)** मिथ्याचारयुक्तम्॥४॥

अन्वयः-हे इन्द्र! त्वं शिक्षन् सन्नप व्रजं कुटिलगामिनमिव व्रजं जनमपावृणोः। अङ्गिरोभ्यो यत्पूर्वथा प्रवाच्यं तच्च नु गृहाण। यस्त्वमेभ्यः सुन्वद्भ्योऽस्मभ्यं समान्या दिशा शत्रूनायोत्सि जेषि च हृणायन्तमवृतं चिदिव वर्तमानमव्रतं जनं रन्धय च तादृशं कञ्चिदपि दुष्टं दण्डदानेन विना मा त्यज। इत्था वर्त्तमानस्य ते तव इहामुत्रानन्द-सिद्धिर्भविष्यतीति जानीहि॥४॥

भावार्थः-येषां राज्ये दुष्टवाचः स्तेना दुष्टवाचो व्यभिचारिणो न सन्ति ते साम्राज्यं कर्त्तुं प्रभवन्ति॥४॥

पदार्थः-हे **(इन्द्र)** पढ़ाने से अज्ञान का विनाश करनेवाले **(शिक्षन्)** विद्या का ग्रहण कराते हुए आप **(अप, व्रजम्)** न जानने योग्य कुटिलगामी के समान **(व्रजम्)** अधर्ममार्गी जन को **(अपावृणोः)** मत स्वीकार करो, **(अङ्गिरोभ्यः)** प्राणों के समान विद्वान् जनों ने **(यत्)** जो **(पूर्वथा)** प्राचीन ढंगों से **(प्रवाच्यम्)** अच्छे प्रकार कहने योग्य उसको **(च)** भी **(नु)** शीघ्र ग्रहण करो, जो आप **(एभ्यः)** इन विद्वान् और **(सुन्वद्भ्यः)** पदार्थों के सार को खींचते हुए **(अस्मभ्यम्)** हम लोगों के लिये **(समान्या)** एक सी वर्त्तमान **(दिशा)** दिशा से शत्रुओं को **(आ, योत्सि)** अच्छे प्रकार लड़ते-लड़ते **(च)** और **(जेषि)** जीतते वा **(हृणायन्तम्)** हिरण के समान ऊलते-फांदते हुए **(अव्रतम्)** सत्यभाषणादि व्यवहाररहित पुरुष के **(चित्)** समान **(अव्रतम्)** झूठे आचार से युक्त जन को **(रन्धय)** मारो **(च)** और वैसे **(कं, चित्)** किसी दुष्ट को दण्ड देने के विना मत छोड़ो **(इत्था)** ऐसे वर्त्तते हुए **(ते)** आपकी इस जन्म और परजन्म में आनन्द की सिद्धि होगी, इसको जानो॥४॥

भावार्थः-जिनके राज्य में दुष्ट वचन कहनेवाले चोर भी व्यभिचारी नहीं हैं, वे चक्रवर्ति राज्य करने को समर्थ होते हैं॥४॥

पुनर्मनुष्याः किं कर्त्तुं शक्नुवन्तीत्याह॥

फिर मनुष्य क्या करके क्या कर सकते हैं, इस विषय को अगले मन्त्र में कहा है॥

सं यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः।
तस्मा आयुः प्रजावदिद्बाधे अर्चन्त्योजसा।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः॥५॥

सम्। यत्। जनान्। क्रतुऽभि। शूरः। ईक्षयत्। धने। हिते। तरुषन्त। श्रवस्यवः। प्र। यक्षन्त। श्रवस्यवः। तस्मै। आयुः। प्रजाऽवत्। इत्। बाधे। अर्चन्ति। ओजसा। इन्द्र। ओक्यम्। दिधिषन्त। धीतयः। देवान्। अच्छ। न। धीतयः॥५॥

पदार्थः-**(सम्)** सम्यक् **(यत्)** यान् **(जनान्)** धार्मिकान् **(क्रतुभिः)** प्रज्ञाभिः कर्मभिर्वा **(शूरः)** निर्भयः **(ईक्षयत्)** दर्शयेत् **(धने)** **(हिते)** सुखकारके **(तरुषन्त)** ये दुःखानि तरन्ति तद्वदाचरत **(श्रवस्यवः)**

आत्मनः श्रवः श्रणमिच्छवः **(प्र)** **(यक्षन्त)** रोषत हिंस्त **(श्रवस्यवः)** आत्मनः श्रवणमिच्छव इव वर्त्तमानाः **(तस्मै)** **(आयुः)** जीवनम् **(प्रजावत्)** बह्व्यः प्रजा विद्यन्ते यस्मिंस्तत् **(इत्)** एव **(बाधे)** **(अर्चन्ति)** सत्कुर्वन्ति **(ओजसा)** पराक्रमेण **(इन्द्रे)** परमैश्वर्ययुक्ते **(ओक्यम्)** ओकेषु गृहेषु साधु **(दिधिषन्त)** उपदिशन्ति। अत्र व्यत्ययेनात्मनेपदम्। **(धीतयः)** धरन्तः **(देवान्)** विदुषः **(अच्छ)** उत्तमरीत्या **(न)** इव **(धीतयः)** धरन्तः॥५॥

अन्वयः-हे विद्वांसः! श्रवस्यव इव वर्त्तमानाः श्रवस्यवो यूयं क्रतुभिर्यज्जनान् हिते धने तरुषन्त प्रयक्षन्त च। यः शूरः समीक्षयत् तस्मै प्रजावदायुर्भवतु। हे विपश्चितो! ये यूयं धीतयो न धीतयः सन्त इन्द्रे परमैश्वर्य्ययुक्त ओक्यं संपाद्य देवानाच्छादिधिषन्त बाध ओजसाऽर्चन्तीव बाध इद्रक्षत॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये विद्वत्संगसेवाभ्यां विद्याः प्राप्य पुरुषार्थेन परमैश्वर्यमुन्नयन्ति ते सर्वान् प्राज्ञान् सुखिनः संपादयितुं शक्नुवन्ति॥५॥

पदार्थः-हे विद्वानो! **(श्रवस्यवः)** अपने को सुनने में चाहना करनेवालों के समान वर्त्तमान **(श्रवस्यवः)** अपने को सुनने की इच्छा करनेवाले तुम जैसे **(क्रतुभिः)** बुद्धि वा कर्मों से **(यत्)** जिन **(जनान्)** धार्मिक जनों को **(हिते)** सुख करनेहारे **(धने)** धन के निमित्त **(तरुषन्त)** पार करो उद्धार करो और **(प्रयक्षन्त)** दुष्टों को दण्ड देओ और जो **(शूरः)** निर्भय शूरवीर पुरुष **(समीक्षयत्)** ज्ञान करावे व्यवहार को दर्शावे **(तस्मै)** उसके लिये **(प्रजावत्)** जिसमें बहुत सन्तान विद्यमान वह **(आयुः)** आयुर्दा हो। हे उत्तम विचारशील पुरुषो! तुम **(धीतयः)** धारणा करते हुओं के **(न)** समान **(धीतयः)** धारणा करनेवाले होते हुए परम ऐश्वर्य्युक्त परमेश्वर में **(ओक्यम्)** घरों में श्रेष्ठ व्यवहार उसको सिद्ध कर **(देवान्)** विद्वानों को **(अच्छ)** अच्छा **(दिधिषन्त)** उपदेश करते समझाते हो वे आप **(बाधे)** दुष्ट व्यवहारों की बाधा के लिये **(ओजसा)** पराक्रम से **(अर्चन्ति)** सत्कार करते हुओं के समान कष्ट में **(इत्)** ही रक्षा करो॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो विद्वानों के सङ्ग और सेवा में विद्याओं को पाकर पुरुषार्थ से परम ऐश्वर्य्य की उन्नति करते हैं, वे सब ज्ञानवान् पुरुषों को सुखयुक्त कर सकते हैं॥५॥

पुनः सेनाजनाः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर सेना जन परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहा है॥

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम्।
दूरे चत्ताय च्छंत्सद्गहनं यदिनक्षत्।

अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः॥ ६॥ २१॥

युवम्। तम्। इन्द्रापर्वता। पुरःऽयुधा। यः। नः। पृतन्यात्। अप। तम्ऽतम्। इत्। हतम्। वज्रेण। तम्ऽतम्। इत्। हतम्। दूरे। चत्ताय। छन्त्सत्। गहनम्। यत्। इनक्षत्। अस्माकम्। शत्रून्। परि। शूर। विश्वतः। दर्मा। दर्षीष्ट। विश्वतः॥ ६॥

पदार्थः-(**युवम्**) युवाम् (**तम्**) (**इन्द्रापर्वता**) सूर्यमेघाविव वर्त्तमानौ सभासेनेशौ (**पुरोयुधा**) पुरः पूर्वं युध्येते यौ तौ (**यः**) (**नः**) अस्माकम् (**पृतन्यात्**) पृतनां सेनामिच्छेत् (**अप**) (**तंतम्**) (**इत्**) एव (**हतम्**) नाशयतम् (**वज्रेण**) तीव्रेण शस्त्राऽस्त्रेण (**तंतम्**) (**इत्**) एव (**हतम्**) (**दूरे**) (**चत्ताय**) याचिताय (**छन्त्सत्**) संवृणुयात् (**गहनम्**) कठिनम् (**यत्**) यः (**इनक्षत्**) व्याप्नुयात् (**अस्माकम्**) (**शत्रून्**) (**परि**) (**शूर**) (**विश्वतः**) सर्वतः (**दर्मा**) विदारकः सन् (**दर्षीष्ट**) दृणीहि (**विश्वतः**) अभितः॥ ६॥

अन्वयः-हे पुरोयुधेन्द्रापर्वता युवं यो नः पृतन्यात् तं वज्रेणाऽप हतं यथा युवां यं यं हतं तंतमिद्वयमपि हन्याम। यं यं वयं हन्याम तंतमिद् युवामप हतम्। हे शूर दर्मा! त्वं यानस्माकं शत्रून्विश्वतो दर्षीष्ट तान् वयमपि विश्वतो परि दर्षीष्महि यच्चत्ताय गहनं दूरे छन्त्सत् शत्रुसेनामिनक्षत् तं युवां सततं रक्षतम्॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सेनापुरुषैर्ये सेनेशादीनां शत्रवस्सन्ति ते स्वेषामपि शत्रवो वेद्याः शत्रुभिः परस्परं भेदमप्राप्ताः सन्तः शत्रून् विदीर्य प्रजाः संरक्षन्तु॥ ६॥

अत्र राजधर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति द्वात्रिंशदुत्तरं शततमं १३२ सूक्तमेकविंशो २१ वर्गश्च समाप्तः॥

पदार्थः-हे (**पुरोयुधा**) पहिले युद्ध करनेवाले (**इन्द्रापर्वता**) सूर्य्य और मेघ के समान वर्त्तमान सभा सेनाधीशो! (**युवम्**) तुम (**यः**) जो (**नः**) हम लोगों की (**पृतन्यात्**) सेना को चाहे (**तम्**) उसको (**वज्रेण**) पैने तीक्ष्ण शस्त्र वा अस्त्र अर्थात् कलाकौशल से बने हुए शस्त्र से (**अप, हतम्**) अत्यन्त मारो, जैसे तुम दोनों जिस जिसको (**हतम्**) मारो (**तं, तम्**) उस उसको (**इत्**) ही हम लोग भी मारें और जिस जिसको हम लोग मारें (**तं, तम्**) उस उसको (**इत्**) ही तुम मारो। हे (**शूर**) शूरवीर! (**दर्मा**) शत्रुओं को विदीर्ण करते हुए आप जिन (**अस्माकम्**) हमारे (**शत्रून्**) शत्रुओं को (**विश्वतः**) सब ओर से (**दर्षीष्ट**) दरो विदीर्ण करो, इनको हम लोग भी (**विश्वतः**) सब ओर से (**परि**) सब प्रकार दरें विदीर्ण करें, (**यत्**) जो (**चत्ताय**) मांगे हुए के लिये (**गहनम्**) कठिन व्यवहार को (**दूरे**) दूर में (**छन्त्सत्**) स्वीकार करे और शत्रुओं की सेना को (**इनक्षत्**) व्याप्त हो, उसकी तुम निरन्तर रक्षा करो॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सेना पुरुषों को जो सेनापति आदि पुरुषों के शत्रु हैं, वे अपने भी शत्रु जानने चाहिये, शत्रुओं से परस्पर फूट को न प्राप्त हुए धार्मिक जन उन शत्रुओं को विदीर्ण कर प्रजाजनों की रक्षा करें॥६॥

इस सूक्त में राजधर्म का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ बत्तीसवाँ १३२ सूक्त और इक्कीसवां २१ वर्ग समाप्त हुआ॥

ISBN 978-81-909957-0-4

॥ओ३म्॥

॥ऋग्वेदभाष्यम्॥

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समन्वितम्।

॥प्रथमं मण्डलम्॥

(ऋग्वेद १.१३३-१.१९१ सूक्तपर्यन्तम्)

सम्पादनम्

श्रद्धानन्द-वैदिक-शोधसंस्थानम्

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्

चतुर्थो भागः

प्रकाशनम्

श्रद्धानन्द-अनुसन्धान-प्रकाशन-केन्द्रः

गुरुकुल-काँगड़ी-विश्वविद्यालयः, हरिद्वारम्.

वर्ष २०११

सम्पादक-मण्डल

मुख्यसंरक्षक	श्री सुदर्शन शर्मा, कुलाधिपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
संरक्षक	प्रो. स्वतन्त्र कुमार, कुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सहसंरक्षक	प्रो. महावीर, आचार्य एवं उपकुलपति, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रधान सम्पादक	प्रो. ज्ञानप्रकाश शास्त्री, प्रोफेसर, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
सम्पादक	डॉ. सत्यदेव निगमालङ्कार, अध्यक्ष, श्रद्धानन्द वैदिक शोध-संस्थान, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
व्यवसाय-प्रबन्धक	डॉ. जगदीश विद्यालङ्कार, पुस्तकालयाध्यक्ष, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. (उत्तराखण्ड)
प्रकाशक	प्रो. ए.के. चोपड़ा, कुलसचिव, गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार. उत्तराखण्ड)

प्रकाशनः-

श्रद्धानन्द-अनुसन्धान-प्रकाशनकेन्द्र

गुरुकुल काँगड़ी विश्वविद्यालय

हरिद्वार.

सन् २०१०

मूल्य-रु०४३०

मुद्रकः-

भारत प्रिंटर्स एण्ड पब्लिशर्स

दिल्ली.

दूरभाष-09212390469

उभे इत्यस्य सप्तर्चस्य त्रयस्त्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। १ त्रिष्टुप् छन्दः। धैवतः स्वरः। २,३ निचदनुष्टुप्। ४ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः। ५ आर्षी गायत्री छन्दः। गान्धारः स्वरः। ६ स्वराड् ब्राह्मीजगती छन्दः। निषादः स्वरः। ७ विराडष्टिश्छन्दः। मध्यमः स्वरः॥

कथं स्थिरं राज्यं स्यादित्याह॥

अब सात ऋचावाले एक सौ तैंतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में कैसे स्थिर राज्य हो, इस विषय का उपदेश किया है॥

उ॒भे पु॑नामि॒ रोद॑सी ऋ॒तेन॒ द्रुहो॑ दहामि॒ सं म॒हीर॑नि॒न्द्राः।
अ॒भि॒ष्ल॒ग्य॒ यत्र॑ हृ॒ता अ॒मित्रा॑ वैलस्था॒नं परि॑ तृ॒ळ्हा अशे॑रन्॥ १॥

उ॒भे इति॑। पु॒ना॒मि॒। रोद॑सी॒ इति॑। ऋ॒तेन॑। द्रुहः॑। द॒हा॒मि॒। सम्। म॒हीः॑। अ॒नि॒न्द्राः॑। अ॒भि॒ऽअ॑ल्लग्य॑। यत्र॑। हृ॒ताः॑। अ॒मित्राः॑। वै॒ल॒ऽस्था॒नम्। परि॑। तृ॒ळ्हाः॑। अशे॑रन्॥ १॥

पदार्थः–(**उभे**) (**पुनामि**) पवित्रयामि (**रोदसी**) द्यावापृथिव्यौ (**ऋतेन**) सत्येन (**द्रुहः**) हन्तुमिच्छून् (**दहामि**) भस्मीकरोमि (**सम्**) सम्यक् (**महीः**) **महीति पृथिवीनामसु पठितम्।** (निघं०१.१) (**अनिन्द्राः**) अविद्यमाना इन्द्रा राजानो यासु ताः (**अभिष्लग्य**) अभितः सर्वतो लगित्वा। अत्र **पृषोदरादिना** वृगागमः। (**यत्र**) यस्मिन् (**हताः**) विनाशिताः (**अमित्राः**) मित्रभाववर्जिताः (**वैलस्थानम्**) विलानामिदं वैलं तदेव स्थानं वैलस्थानम् (**परि**) सर्वतः (**तृढाः**) हिंसिताः (**अशेरन्**) शयीरन्॥१॥

अन्वयः–हे मनुष्या! यथाहमनिन्द्रा महीरभिष्लग्य तेनोभे रोदसी पुनामि। द्रुहः सन्दहामि यत्र वैलस्थानं प्राप्ताः परि तृढा हताः सन्तोऽमित्रा अशेरँस्तत्राऽहं प्रयते तथा यूयमप्याचरत॥१॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सर्वैरिदं सततमेष्टव्यं येन सत्येन व्यवहारेण राज्योन्नतिः पवित्रता शत्रुनिवृत्तिर्निष्कण्टकं राज्यं च स्यादिति॥१॥

पदार्थः–हे मनुष्यो! जैसे मैं (**अनिन्द्राः**) जिनमें अविद्यमान राजजन हैं, उन (**महीः**) पृथिवी भूमियों का (**अभिष्लग्य**) सब ओर से सङ्ग कर अर्थात् उनको प्राप्त होकर (**ऋतेन**) सत्य से (**उभे**) दोनों (**रोदसी**) प्रकाश और पृथिवी को (**पुनामि**) पवित्र कर्त्ता हूँ और (**द्रुहः**) द्रोह करनेवालों को (**सं, दहामि**) अच्छी प्रकार जलाता हूँ (**यत्र**) जहाँ (**वैलस्थानम्**) विलरूप स्थान को प्राप्त (**परि, तृढाः**) सब ओर से मारे (**हताः**) मरे हुए (**अमित्राः**) मित्रभाव रहित शत्रुजन (**अशेरन्**) सोवें वहाँ मैं यत्न करता हूँ, वैसा तुम भी आचरण करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को यह निरन्तर इच्छा करनी चाहिये कि जिस सत्य व्यवहार से राज्य की उन्नति, पवित्रता, शत्रुओं की निवृत्ति और निर्वैर निश्शत्रु राज्य हो॥१॥

पुनः शत्रवः कथं हन्तव्या इत्युपदिश्यते॥

फिर शत्रुजन कैसे मारने चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अभिऽव्लग्यां चिदद्रिवः शीर्षा यातुमतीनाम्।
छिन्धि वटूरिणा पदा महावटूरिणा पदा॥२॥

अभिऽव्लग्य। चित्। अद्रिऽवः। शीर्षा। यातुऽमतीनाम्। छिन्धि। वटूरिणा। पदा। महाऽवटूरिणा। पदा॥२॥

पदार्थः-(**अभिव्लग्य**) (**अभितः**) सर्वतः प्राप्य। अत्राऽन्येषामपीति दीर्घः। (**चित्**) इव (**अद्रिवः**) अद्रिवन्मेघ इव वर्त्तमान (**शीर्षा**) शीर्षाणि (**यातुमतीनाम्**) बहवो यातवो हिंसका विद्यन्ते यासु सेनासु तासाम् (**छिन्धि**) (**वटूरिणा**) वेष्टितेन। अत्र **वट वेष्टन** इति धातोर्बाहुलकादौणादिक ऊरिः प्रत्ययः। (**महावटूरिणा**) महावर्णयुक्तेन (**पदा**) पादेन॥२॥

अन्वयः-हे अद्रिवः शूर! त्वं प्रशस्तं बलमभिव्लग्य यातुमतीनां महावटूरिणा पदा चिद्वटूरिणा पदा शीर्षा छिन्धि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यः स्वबलमुन्नीय शत्रुबलानि छित्वाऽरीन् पादाक्रान्तान् करोति, स राज्यं कर्त्तुमर्हति॥२॥

पदार्थः-हे (**अद्रिवः**) मेघ के समान वर्त्तमान शूरवीर तू प्रशंसित बल को (**अभिव्लग्य**) सब ओर से पाकर (**यातुमतीनाम्**) जिनमें बहुत हिंसक मार-धार करनेहारे विद्यमान हैं, उन सेनाओं के (**महावटूरिणा**) बड़े-बड़े रंग से युक्त (**पदा**) चौथे भाग से जैसे (**चित्**) वैसे (**वटूरिणा**) लपेटे हुए (**पदा**) शस्त्रों के चौथे भाग से वा अपने पैर से दबा के (**शीर्षा**) शत्रुओं के शिरों को (**छिन्धि**) छिन्न-भिन्न कर॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अपने बल की उन्नति कर शत्रुओं के बलों को छिन्न-भिन्न कर उनको पैर से दबाता है, वह राज्य करने को योग्य होता है॥२॥

पुनः शत्रुसेनाः कथं हन्तव्या इत्याह॥

फिर शत्रुओं की सेना कैसे मारनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अवासां मघवञ्जहि शर्धो यातुमतीनाम्।
वैलस्थानके अर्मके महावैलस्थे अर्मके॥३॥

अव। आसाम्। मघऽवन्। जहि। शर्धः। यातुमतीनाम्। वैलऽस्थानके। अर्मके। महाऽवैलस्थे। अर्मके॥३॥

पदार्थः-(**अव**) (**आसाम्**) वक्ष्यमाणानाम् (**मघवन्**) परमधनयुक्त (**जहि**) (**शर्धः**) बलम् (**यातुमतीनाम्**) हिंस्राणां सेनानाम्। (**वैलस्थानके**) वैलानि विलयुक्तानि स्थानानि यस्मिँस्तस्मिन् (**अर्मके**) दुःखप्रापके (**महावैलस्थे**) महागर्त्तयुक्ते (**अर्मके**) दुःखप्रापके॥३॥

अन्वयः-हे मघवन्! अर्मके वैलस्थानक इवार्मके महावैलस्थ आसां यातुमतीनां शर्धोऽव जहि॥३॥

भावार्थः-सेनावीरैः शत्रुसेना अतिदुर्गे गर्तादियुक्ते स्थले निपात्य हन्तव्या॥३॥

पदार्थः-हे (**मघवन्**) परम धनयुक्त राजन्! (**अर्मके**) जो दुःख पहुंचानेहारा और (**वैलस्थानके**) जिसमें विलयुक्त स्थान है, उनके समान (**अर्मके**) दुःख पहुंचानेहारे (**महावैलस्थे**) बड़े-बड़े गढ़ेलों से युक्त स्थान में (**आसाम्**) इन (**यातुमतीनाम्**) हिंसक सेनाओं के (**शर्धः**) बल को (**अव, जहि**) छिन्न-भिन्न करो॥३॥

भावार्थः-सेनावीरों को चाहिये कि शत्रुओं की सेनाओं को अतीव दुःख से जाने योग्य गढ़ेले आदि से युक्त स्थान में गिरा कर मारें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यासां॑ ति॒स्रः पञ्चा॒शतो॑ऽभिव्ल॒ङ्गै॑र॒पाव॑पः।

तत्सु ते॑ मनायति॒ तक॒त्सु ते॑ मनायति॥४॥

यासा॑म्। ति॒स्रः। पञ्चा॒शत॑ः। अ॒भि॒ऽव्ल॒ङ्गैः। अ॒प॒ऽअव॑पः। तत्। सु। ते॒। म॒नायति॒। तक॒त्। सु। ते॒। म॒नायति॒॥४॥

पदार्थः-(**यासाम्**) (**तिस्रः**) त्रित्वसंख्याताः (**पञ्चाशतः**) एतत्संख्याताः (**अभिव्लङ्गैः**) अभितो गमनागमनैः (**अपावपः**) दूरे प्रक्षिप (**तत्**) (**सु**) (**ते**) तुभ्यम् (**मनायति**) आत्मनो मन इवाचरति (**तकत्**) (**सु**) (**ते**) तुभ्यम् (**मनायति**)॥४॥

अन्वयः-हे मघवन्! यासां तिस्रः पञ्चाशतः सेना अभिव्लङ्गैरपावपस्तासां तत् ते सुमनायति तकत् ते सु मनायति॥४॥

भावार्थः-मनुष्यैरीदृशं बलं वर्द्धनीयं येनैकोऽपि दुष्टानां सार्धशतस्य विजयं कुर्यात् स्वकीयं बलं रक्षेत्॥४॥

पदार्थः-हे परम उत्तम धनयुक्त राजन्! (**यासाम्**) जिन शत्रुसेनाओं के बीच (**तिस्रः**) तीन वा (**पञ्चाशतः**) पचास सेनाओं को (**अभिव्लङ्गैः**) चारों ओर से जाने-आने आदि व्यवहारों से (**अपावपः**) दूर पहुंचाओ, उन सेनाओं का (**तत्**) वह पहुंचाना (**ते**) तेरे लिये (**सुमनायति**) अच्छे अपने मन के

समान आचरण करता फिर भी **(तकत्)** वह **(ते)** तेरे लिये **(सुमनायति)**अच्छे अपने मन के समान आचरण करता है॥४॥

भावार्थः-मनुष्यों को चाहिये कि ऐसा बल बढ़ावें जिससे एक ही वीर पचास दुष्ट शत्रुओं को जीते और अपने बल की रक्षा करे॥४॥

पुना राजजनैः किं कृत्वा किं वर्द्धनीयमित्याह॥

फिर राजजनों को क्या करके क्या बढ़ाना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण।

सर्वं रक्षो नि बर्हय॥५॥

पिशङ्गऽभृष्टिम्। अम्भृणम्। पिशाचिम्। इन्द्र। सम्। मृण। सर्वम्। रक्षः। नि। बर्हय॥५॥

पदार्थः-(**पिशङ्गभृष्टिम्**) पीतवर्णेन भृष्टिः पाको यस्य तम् **(अम्भृणम्)** शत्रुभ्यो भयंकरम् **(पिशाचिम्)** यः पिशति तम् **(इन्द्र)** दुष्टविदारक **(सम्)** **(मृण)** हिन्धि **(सर्वम्)** **(रक्षः)** दुष्टम् **(नि)** **(बर्हय)** निस्सारय॥५॥

अन्वयः-हे इन्द्र! त्वं पिशङ्गभृष्टिमम्भृणं पिशाचिं संमृण सर्वं रक्षो निबर्हय॥५॥

भावार्थः-राजपुरुषैर्दुष्टान् निर्मूलीकृत्य सर्वैः सज्जनाः सततं वर्द्धनीयाः॥५॥

पदार्थः-हे **(इन्द्र)** दुष्टों को विदीर्ण करनेहारे राजजन! आप **(पिशङ्गभृष्टिम्)** अच्छे प्रकार पीला वर्ण होने से जिसका पाक होता **(अम्भृणम्)** उस निरन्तर भयङ्कर **(पिशाचिम्)** पीसने दुःख देनेहारे जन को **(सम्मृण)** अच्छे प्रकार मारो और **(सर्वम्)** समस्त **(रक्षः)** दुष्टजन को **(निबर्हय)** निकालो॥५॥

भावार्थः-राजपुरुषों को चाहिये कि दुष्ट शत्रुओं को निर्मूल कर सब सज्जनों को निरन्तर बढ़ावें॥५॥

पुनरुत्तमैर्नरैः किं निवार्य्य किं प्रचारणीयमित्याह॥

फिर उत्तम मनुष्यों को किसकी निवृत्ति कर क्या प्रचार करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अवर्महऽइन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः।

शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे।

अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः॥६॥

अवः। महः। इन्द्र। ददृहि। श्रुधि। नः। शुशोच। हि। द्यौः। क्षाः। न। भीषा। अद्रिऽवः। घृणात्। न। भीषा। अद्रिऽवः। शुष्मिन्ऽतमः। हि। शुष्मिऽभिः। वधैः। उग्रेभिः। ईयसे। अपुरुषऽघ्नः। अप्रतिऽइत। शूर। सत्वऽभिः। त्रिऽसप्तैः। शूर। सत्वऽभिः॥६॥

पदार्थः-(**अवः**) अधोमुखम् (**महः**) महत् (**इन्द्र**) (**ददृहि**) विदारय। अत्र श्नः श्लुः, **तुजादीनामित्यभ्यासदीर्घः**। (**श्रुधि**) शृणु। अत्रा**ऽन्येषामपि दृश्यत** इति दीर्घः। (**नः**) अस्मान् (**शुशोच**) शोच (**हि**) (**द्यौः**) प्रकाश इव (**क्षाः**) पृथिवीः (**न**) इव (**भीषा**) भयेन (**अद्रिवः**) प्रशस्तमेघयुक्त सूर्यवद्वर्त्तमान (**घृणात**) दीप्तात् (**न**) इव (**भीषा**) भयेन (**अद्रिवः**) प्रशस्ता अद्रयः शैला विद्यन्ते यस्य तत्सम्बुद्धौ (**शुष्मिन्तमः**) बहुविधं बलं विद्यते यस्य स शुष्मिः सोऽतिशयितः (**हि**) खलु (**शुष्मिभिः**) बलिष्ठैः (**वधैः**) हननैः (**उग्रेभिः**) तीक्ष्णस्वभावैः (**ईयसे**) गच्छसि (**अपूरुषघ्नः**) पुरुषान्न हन्ति सः (**अप्रतीत**) यो न प्रतीयते तत्संबुद्धौ (**शूर**) निर्भय (**सत्वभिः**) विज्ञानवद्भिः (**त्रिसप्तैः**) एकविंशत्या (**शूर**) दुष्टहिंसक (**सत्वभिः**) पदार्थैः॥६॥

अन्वयः-हे अद्रिव इन्द्र! त्वमवर्दादृहि नः शुशोच नोऽस्माकं न्यायं श्रुधि द्यौः क्षा नेव महो रक्ष। हे अद्रिवस्त्वं हि भीषा भयेन घृणान्नेव न्यायं द्योतयस्व भीषा दुष्टान् ताडय। हे शूर! यः शुष्मिन्तमोऽपूरुषघ्नस्त्वमुग्रेभिः शुष्मिभिः सह शत्रूणां वधैरीयसे स त्वं त्रिसप्तैः सत्वभिः सहैव वर्त्तस्व। हे अप्रतीत शूर! त्वं हि सत्वभिः सम्पन्नो भव॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। धार्मिकैर्नीचतां निवार्य्य श्रेष्ठतां प्रचार्य्य प्रशस्तबलोन्नतये शूरवीरैः पुरुषैः प्रजाः संरक्ष्य दशप्राणैरेकेन जीवेन दशभिरिन्द्रियैरिव पुरुषार्थं कृत्वा यथायोग्या पदार्थवृद्धिः प्राप्तव्या॥६॥

पदार्थः-हे (**अद्रिवः**) प्रशंसित मेघयुक्त सूर्य के समान वर्त्तमान (**इन्द्र**) उत्तम गुणों से प्रकाशित पुरुष! आप (**अवः**) नीचे को मुख राखनेवाले कुटिल को (**ददृहि**) विदारो मारो (**नः**) हम लोगों को (**शुशोच**) शोचो, हमारे न्याय को (**श्रुधि**) सुनो और (**द्यौः**) प्रकाश जैसे (**क्षाः**) भूमियों को (**न**) वैसे (**महः**) अत्यन्त रक्षा करो, हे (**अद्रिवः**) प्रशंसित पर्वतोंवाले! आप (**हि**) ही (**भीषा**) भय से (**घृणात्**) प्रकाशित के समान न्याय को प्रकाश करो और (**भीषा**) भय से दुष्टों को दण्ड देओ। हे (**शूर**) निर्भय निडर शूरवीर पुरुष! (**शुष्मिन्तमः**) जिनके अतीव बहुत बल विद्यमान (**अपूरुषघ्नः**) जो पुरुषों को न मारनेवाले आप (**उग्रेभिः**) तीक्ष्ण स्वभाववाले (**शुष्मिभिः**) बली पुरुषों के साथ तीक्ष्ण शत्रुओं के (**वधैः**) मारने के उपायों से (**ईयसे**) जाते हो सो आप (**त्रिसप्तैः**) इक्कीस (**सत्वभिः**) विद्वानों के साथ ही वर्त्ताव रक्खो। हे (**अप्रतीत**) न प्रतीत होनेवाले गूढ़ विचारयुक्त (**शूरः**) दुष्टों को मारनेवाले! आप (**हि**) ही (**सत्वभिः**) पदार्थों से युक्त होओ॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। धार्मिक पुरुषों को नीचपन की निवृत्ति और उत्तमता का प्रचार कर प्रशंसित बल की उन्नति के लिये शूरवीर पुरुषों से प्रजाजनों की अच्छे प्रकार रक्षा कर दश प्राण और एक जीव से दश इन्द्रियों के समान पुरुषार्थ कर यथायोग्य पदार्थों की वृद्धि प्राप्त करने योग्य है॥६॥

पुनः किं कृत्वा किं निवार्य्य मनुष्याः समर्था जायन्त इत्याह॥

फिर क्या करके और किसकी निवृत्ति कर मनुष्य समर्थ होते हैं, इस विषय को अगले मन्त्र में कहा है॥

वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः।
सुन्वान इत्सिषासति सहस्रा वाज्यवृतः।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम्॥७॥२२॥१९॥

वनोति। हि। सुन्वन्। क्षयम्। परीणसः। सुन्वानः। हि। स्म। यजति। अव। द्विषः। देवानाम्। अव। द्विषः। सुन्वानः। इत्। सिषासति। सहस्रा। वाजी। अवृतः। सुन्वानाय। इन्द्रः। ददाति। आऽभुवम्। रयिम्। ददाति। आऽभुवम्॥७॥

पदार्थः-**(वनोति)** याचते। अत्र व्यत्ययेन परस्मैपदम्। **(हि)** खलु **(सुन्वन्)** निष्पादयन् **(क्षयम्)** गृहम् **(परीणसः)** बहून् **(सुन्वानः)** निष्पादयन् **(हि)** यतः **(स्म)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(यजति)** संगच्छते **(अव)** **(द्विषः)** द्वेष्ट्रीन् **(देवानाम्)** विदुषाम् **(अव)** **(द्विषः)** शत्रून् **(सुन्वानः)** अभिषवान् कुर्वन् **(इत्)** एव **(सिषासति)** सनितुं विभक्तुमिच्छति **(सहस्रा)** सहस्राण्यसंख्यातानि **(वाजी)** प्रशस्तज्ञानवान् **(अवृतः)** अनावृतः **(सुन्वानाय)** अभिषवं कुर्वते **(इन्द्रः)** सुखप्रदाता **(ददाति)** **(आभुवम्)** यत्र समन्ताद्भवति सुखं तम्। अत्र **घञर्थे कविधानमि**ति कः। **(रयिम्)** द्रव्यम् **(ददाति)** **(आभुवम्)**॥७॥

अन्वयः-य इन्द्रः सुन्वानायाभुवं रयिं ददाति स सुन्वानोऽवृतो वाजी सहस्रा देवानामवद्विष इत् सिषासति योऽवद्विषः सर्वस्मायाभुवं श्रियं ददाति यो हि सुन्वानो यजति स स्म परीणसः क्षयं सुन्वन् सन् हि सुखं वनोति॥७॥

भावार्थः-ये सर्वेषु मैत्रीं भावयित्वा सर्वेषां शत्रून्निवर्त्तन्ति ते सर्वेषां श्रेयस्करा भूत्वा सर्वेभ्यो बहूनि सुखानि दातुं शक्नुवन्ति॥७॥

अत्र श्रेष्ठपालनदुष्टनिवारणाभ्यां राज्यस्थिरतावर्णनमुक्तमत एतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति त्रयस्त्रिंशदुत्तरं शततमं १३३ सूक्तं द्वाविंशो २२ वर्ग एकोनविंशोऽनुवाकश्च समाप्तः॥

पदार्थः–जो **(इन्द्रः)** सुख देनेवाला **(सुन्वानाय)** पदार्थों का सार निकालते हुए पुरुष को **(आभुवम्)** जिसमें अच्छे प्रकार सुख होता उस **(रयिम)** धन को **(ददाति)** देता है, वह **(सुन्वानः)** पदार्थों के सारों को प्रकट हुआ **(अवृतः)** प्रकट **(वाजी)** प्रशस्त ज्ञानवान् पुरुष **(सहस्रा)** हजारों **(देवानाम्)** विद्वानों के **(अव, द्विषः)** अति शत्रुओं को **(इत्)** ही **(सिषासति)** अलग करने को चाहता है जो **(अव, द्विषः)** अत्यन्त वैर करनेवालों को अलग करना चाहता है, वह सबके लिये **(आभुवम्)** जिसमें उत्तम सुख हो, उस धन को **(ददाति)** देता है और जो **(हि)** निश्चय से **(सुन्वानः)** पदार्थों के सार को सिद्ध करता हुआ **(यजति)** सङ्ग करता है **(स्म)** वही **(परीणसः)** बहुत पदार्थों और **(क्षयम्)** घर को **(सुन्वन्)** सिद्ध करता हुआ **(हि)** ही सुख **(वनोति)** मांगता है॥७॥

भावार्थः–जो सब में मित्रता की भावना कराकर सबके शत्रुओं की निवृत्ति कराते हैं, वे सबके सुख करनेवाले होकर सबके लिये बहुत सुख दे सकते हैं॥७॥

इस सूक्त में श्रेष्ठों की पालना और दुष्टों की निवृत्ति से राज्य की स्थिरता का वर्णन है, इससे इस सूक्त में कहे हुए अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ तेंतीसवां १३३ सूक्त बाईसवां २२ वर्ग और उन्नीसवां १९ अनुवाक पूरा हुआ॥

आ त्वेत्यस्य षड्चस्य चतुस्त्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। वायुर्देवता। १,३ निचृदत्यष्टिः। २,४ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। ५ अष्टिः। ६ विराडष्टिश्छन्दः। मध्यमः स्वरः॥

अथ विद्वांसः कीदृशा भवेयुरित्याह॥

अब छः ऋचावाले एक सौ चौतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् कैसे हों, इस विषय को कहा है॥

आ त्वा॒ जुवो॑ रारहा॒णा अ॒भि प्रयो॒ वायो॒ वह॑न्त्विह पू॒र्वपी॑तये॒ सोम॑स्य पू॒र्वपी॑तये॒।
ऊ॒र्ध्वा ते॒ अनु॑ सू॒नृता॒ मन॑स्तिष्ठतु जान॒ती।
नि॒युत्व॑ता॒ रथे॒ना या॑हि दा॒वने॒ वायो॑ म॒खस्य॑ दा॒वने॑॥ १॥

आ। त्वा॒। जुव॑ः। रा॒र॒हा॒णाः। अ॒भि। प्रय॑ः। वायो॒ इति॑। वह॑न्तु। इ॒ह। पू॒र्व॒ऽपी॑तये। सोम॑स्य। पू॒र्व॒ऽपी॑तये। ऊ॒र्ध्वा। ते॒। अनु॑। सू॒नृता॑। मन॑ः। ति॒ष्ठ॒तु॒। जा॒न॒ती। नि॒युत्व॑ता। रथे॑न। आ। या॒हि॒। दा॒वने॑। वायो॒ इति॑। म॒खस्य॑। दा॒वने॑॥ १॥

पदार्थः-(**आ**) समन्तात् (**त्वा**) त्वाम् (**जुवः**) वेगवन्तः (**रारहाणाः**) त्यक्तारः। अत्र **तुजादीनामि**त्यभ्यासदीर्घः। (**अभि**) (**प्रयः**) प्रीतिम् (**वायो**) वायुरिव वर्त्तमान (**वहन्तु**) प्राप्नुवन्तु (**इह**) अस्मिन् संसारे (**पूर्वपीतये**) पूर्वेषां पीतिः पानं तस्यै (**सोमस्य**) ओषध्यादिरसस्य (**पूर्वपीतये**) पूर्वेषां पानायेव (**ऊर्ध्वा**) उत्कृष्टा (**ते**) तव (**अनु**) (**सूनृता**) प्रिया वाक् (**मनः**) अन्तःकरणम् (**तिष्ठतु**) (**जानती**) या जानाति सा स्त्री (**नियुत्वता**) बहवो नियुतोऽश्वा विद्यन्ते यस्मिंस्तेन (**रथेन**) रमणीयेन यानेन (**आ**) समन्तात् (**याहि**) गच्छ (**दावने**) दात्रे (**वायो**) ज्ञानवान् (**मखस्य**) यज्ञस्य (**दावने**) दात्रे॥ १॥

अन्वयः-हे वायो! विद्वन्निह सोमस्य पूर्वपीतय इव पूर्वपीतये जुवो रारहाणा वायवस्त्वा प्रयोभ्यावहन्तु। हे वायो! यस्य ते ऊर्ध्वा सूनृता जानती मनोऽनुतिष्ठतु स त्वं मखस्य दावन इव दावने नियुत्वता रथेना याहि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वांसः सर्वेषु प्राणिषु प्राणवत् प्रिया भूत्वाऽनेकाश्वयुक्तैर्यानै- र्गच्छन्त्वागच्छन्तु च॥ १॥

पदार्थः-हे (**वायो**) पवन के समान वर्त्तमान विद्वान्! (**इह**) इस संसार में (**सोमस्य**) ओषधि आदि पदार्थों के रस को (**पूर्वपीतये**) अगले सज्जनों के पीने के समान (**पूर्वपीतये**) जो पीना है, उसके लिये (**जुवः**) वेगवान् (**रारहाणाः**) छोड़नेवाले पवन (**त्वा**) आपको (**प्रयः**) प्रीतिपूर्वक (**अभि, आ, वहन्तु**) चारों ओर से पहुंचावें। हे (**वायो**) ज्ञानवान् पुरुष! जिस (**ते**) आपकी (**ऊर्ध्वा**) उन्नतियुक्त अति उत्तम (**सूनृता**) प्रिय वाणी (**जानती**) और ज्ञानवती हुई स्त्री (**मनः**) मन के (**अनु, तिष्ठतु**) अनुकूल स्थित

हो सो आप **(मखस्य)** यज्ञ के सम्बन्ध में **(दावने)** दान करनेवाले के लिये जैसे वैसे **(दावने)** देनेवाले के लिये **(नियुत्वता)** जिसमें बहुत घोड़े विद्यमान हैं, उस **(रथेन)** रमण करने योग्य यान से **(आ, याहि)** आओ॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् लोग सर्व प्राणियों में प्राण के समान प्रिय होकर अनेक घोड़ों से जुते हुए रथों से जावें-आवें॥१॥

पुनर्मनुष्यैः किं संसेव्य किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को किसका सेवन कर क्या प्राप्त करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो
गोभिः क्राणा अभिद्यवः।
यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः।
सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः॥२॥

मन्दन्तु। त्वा। मन्दिनः। वायो इति। इन्दवः। अस्मत्। क्राणासः। सुऽकृताः। अभिऽद्यवः। गोभिः। क्राणाः। अभिऽद्यवः। यत्। ह। क्राणाः। इरध्यै। दक्षम्। सचन्ते। ऊतयः। सध्रीचीनाः। निऽयुतः। दावने। धियः। उप। ब्रुवते। ईम्। धियः॥२॥

पदार्थः-(**मन्दन्तु**) कामयन्तु (**त्वा**) त्वाम् (**मन्दिनः**) सुखं कामयमानाः (**वायो**) वायुरिव कमनीय (**इन्दवः**) आर्द्रीभूता (**अस्मत्**) अस्माकं सकाशात् (**क्राणासः**) उत्तमानि कर्माणि कुर्वन्तः (**सुकृताः**) सुष्ठु कर्म येषां ते (**अभिद्यवः**) अभितो द्यवो विद्याप्रकाशा येषान्ते (**गोभिः**) पृथिवीभिस्सह (**क्राणाः**) पुरुषार्थं कुर्वाणाः (**अभिद्यवः**) अभितो द्यवः सूर्यकिरणा इव देदीप्यमानाः (**यत्**) ये (**ह**) (**क्राणाः**) कर्त्तुं शीलाः (**इरध्यै**) ईरितुं प्राप्तुम्। अत्र वर्णव्यत्ययेन ईकारस्थान इः। (**दक्षम्**) बलम् (**सचन्ते**) समवयन्ति (**ऊतयः**) रक्षादिक्रियावन्तः (**सध्रीचीनाः**) सहाञ्चन्तः (**नियुतः**) नियुक्ताः (**दावने**) दानाय (**धियः**) प्रज्ञाः (**उप**) (**ब्रुवते**) उपदिशन्ति (**ईम्**) सर्वतः (**धियः**) कर्माणि॥२॥

अन्वयः-हे वायो विद्वन्यद्येऽस्मत् क्राणासोऽभिद्यवः सुकृता अभिद्यव इवेन्दवः क्राणा इव मन्दिनस्त्वा मन्दन्तु ते ह ऊतयः क्राणा दक्षं गोभिरिरध्यै सचन्ते ये दावने सध्रीचीना नियुतो धिय उप ब्रुवते त ईं धियः प्राप्नुवन्ति॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विदुषः सेवन्ते सत्यमुपदिशन्ति च ते शरीरात्मबलं कथन्नाप्नुयुः॥२॥

पदार्थः-हे **(वायो)** पवन के समान मनोहर विद्वान्! **(यत्)** जो **(अस्मत्)** हम लोगों से **(क्राणासः)** उत्तम कर्म करते हुए **(अभिद्यवः)** जिनके चारों ओर से प्रकाश विद्यमान **(सुकृताः)** जो सुन्दर उत्तम कर्मवाले **(अभिद्यवः)** और सब ओर से सूर्य की किरणों के समान अत्यन्त प्रकाशमान **(इन्दवः)** आर्द्रचित्त **(क्राणाः)** पुरुषार्थ करते हुए सज्जनों के समान **(मन्दिनः)** और सुख की कामना करते हुए **(त्वा)** आपको **(मन्दन्तु)** चाहे वे **(ह)** ही **(ऊतयः)** रक्षा आदि क्रियावान् **(क्राणाः)** कर्म करनेवाले **(दक्षम्)** बल को **(गोभिः)** भूमियों के साथ **(इरध्यै)** प्राप्त होने को **(सचन्त)** युक्त होते अर्थात् सम्बन्ध करते हैं। जो **(दावने)** दान के लिये **(सध्रीचीनाः)** साथ सत्कार पाने वा जाने आनेवाले **(नियुतः)** नियुक्त की अर्थात् किसी विषय में लगाई हुई **(धियः)** बुद्धियों का **(उप, ब्रुवते)** उपदेश करते हैं, वे **(ईम्)** सब ओर से **(धियः)** कर्मों को प्राप्त होते हैं॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वानों का सेवन करते और सत्य का उपदेश करते हैं, वे शरीर और आत्मा के बल को कैसे न प्राप्त हों॥२॥

पुनर्विद्वद्भिः कथं वर्त्तितव्यमित्याह॥

फिर विद्वानों को कैसे वर्त्तना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे।
प्र बोधया पुरंधिं जार आ ससतीमिव।
प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः॥३॥

वायुः। युङ्क्ते। रोहिता। वायुः। अरुणा। वायुः। रथे। अजिरा। धुरि। वोळ्हवे। वहिष्ठा। धुरि। वोळ्हवे। प्र। बोधय। पुरम्ऽधिम्। जारः। आ। ससतीम्ऽइव। प्र। चक्षय। रोदसी इति। वासय। उषसः। श्रवसे। वासय। उषसः॥३॥

पदार्थः-**(वायुः)** पवन इव **(युङ्क्ते)** कलाकौशलेन प्रेरितः संपर्चयति **(रोहिता)** रोहितानि रक्तगुणविशिष्टान्यग्न्यादीनि द्रव्याणि **(वायुः)** सूक्ष्मः **(अरुणा)** पदार्थप्रापणसमर्थानि **(वायुः)** स्थूलः पवनः **(रथे)** रमणीये याने **(अजिरा)** अजिराणि क्षेप्तुं गमयितुमनर्हाणि **(धुरि)** सर्वाधारे **(वोढवे)** वोढुम् अत्र। तुमर्थे तवेन्प्रत्ययः। **(वहिष्ठा)** अतिशयेन वोढा। अत्राकारादेशः। **(धुरि) (वोढवे)** वोढुं देशान्तरे वहनाय **(प्र, बोधय) (पुरन्धिम्)** बहुप्रज्ञम् **(जारः) (आ)** समन्तात् **(ससतीमिव)** यथा सुप्ताम् **(प्र) (चक्षय)** प्रख्यापय **(रोदसी)** द्यावापृथिव्यौ **(वासय)** कलायन्त्रादिषु स्थापय **(उषसः)** दाहादिकर्तॄन् पदार्थान् **(श्रवसे)** संदेशादि श्रवणाय **(वासय)** विद्युद्विद्यया स्थापय **(उषसः)** दिनानि॥३॥

अन्वयः-हे विद्वन्! धुरि वोढवे वहिष्ठा वायुर्वोढवे धुरि रोहिता वायुररुणा वायुरजिरा रथे युङ्क्त इति त्वं जारः ससतीमिव पुरन्धिं प्राबोधय रोदसी प्रचक्षय तदुणानाख्यापयोषसो वासय श्रवसे चोषसो वासय॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये वायुवत्प्रयतन्त आप्तवज्जनान् प्रबोधयन्ति ते सूर्यवत्पृथिवीवच्च प्रकाशिता सोढारो जायन्ते॥३॥

पदार्थः-हे विद्वान् **(धुरि)** सबके आधारभूत जगत् में **(वोढवे)** पदार्थों के पहुंचाने को **(वहिष्ठा)** अतीव पहुंचानेवाला **(वायुः)** पवन **(वोढवे)** देशान्तर में पहुंचाने के लिये **(धुरि)** चलाने के मुख्य भाग में **(रोहिता)** लाल-लाल रङ्ग के अग्नि आदि पदार्थों को वा **(वायुः)** पवन **(अरुणा)** पदार्थों को पहुंचाने में समर्थ जल, धुआं आदि पदार्थों को **(वायुः)** पवन **(अजिरा)** फेंकने योग्य पदार्थों को **(रथे)** रथ में **(युङ्क्ते)** जोड़ता है अर्थात् कलाकौशल से प्रेरणा को प्राप्त हुआ उन पदार्थों का सम्बन्ध करता है, इससे आप **(जारः)** जाल्म पुरुष जैसे **(ससतीमिव)** सोती हुई स्त्री को जगावे वैसे **(पुरन्धिम्)** बहुत उत्तम बुद्धिमती स्त्री को **(प्राबोधय)** भलीभांति बोध कराओ, **(रोदसी)** प्रकाश और पृथिवी का **(प्र, चक्षय)** उत्तम व्याख्यान करो अर्थात् उनके गुणों को कहो, **(उषसः)** दाह आदि के करनेवाले पदार्थों अर्थात् अग्नि आदि को कलायन्त्रादिकों में **(वासय)** वसाओ, स्थापन करो और **(श्रवसे)** सन्देशादि सुनने के लिये **(उषसः)** दिनों को **(वासय)** तार बिजुली की विद्या से स्थिर करो॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो पवन के समान अच्छा यत्न करते और उत्तम धर्मात्मा के समान मनुष्यों को बोध कराते हैं, वे सूर्य्य और पृथिवी के समान प्रकाश और सहनशीलता से युक्त होते हैं॥३॥

पुनः के मनुष्याः कल्याणकरा भवन्तीत्याह॥

फिर कौन मनुष्य कल्याण करने वाले होते हैं, इस विषय को अगले मन्त्र में कहा है॥

तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु।
तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः॥४॥

तुभ्यम्। उषसः। शुचयः। परावति। भद्रा। वस्त्रा। तन्वते। दम्सु। रश्मिषु। चित्रा। नव्येषु। रश्मिषु। तुभ्यम्। धेनुः। सबःदुघा। विश्वा। वसूनि। दोहते। अजनयः। मरुतः। वक्षणाभ्यः। दिवः। आ। वक्षणाभ्यः॥४॥

पदार्थः-**(तुभ्यम्)** **(उषासः)** प्रभातवाताः। अत्रान्येषामपीति दीर्घः। **(शुचयः)** पवित्राः **(परावति)** दूरदेशे **(भद्रा)** कल्याणकराणि **(वस्त्रा)** वस्त्राण्याच्छादनानि **(तन्वते)** विस्तृणन्ति **(दंसु)** दाम्यन्ति जना येषु **(रश्मिषु)** किरणेषु **(चित्रा)** चित्राण्यद्भुतानि **(नव्येषु)** नवीनेषु **(रश्मिषु)** किरणेषु **(तुभ्यम्)** **(धेनुः)**

वाणी: **(सबर्दुघा)** सर्वान् कामान् पूरयन्ति **(विश्वा)** सर्वाणि **(वसूनि)** धनानि **(दोहते)** प्रपिपर्त्ति **(अजनय:)** अजायमाना: **(मरुत:)** वायव: **(वक्षणाभ्य:)** वोढ्रीभ्यो नदीभ्य: **(दिव:)** प्रकाशस्य मध्ये **(आ)** समन्तात् **(वक्षणाभ्य:)** वहमानाभ्य:॥४॥

अन्वय:-हे मनुष्य! यथा शुचय उषास: परावति दंसु रश्मिषु नव्येषु रश्मिष्विव तुभ्यं चित्रा भद्रा वस्त्रा तन्वते। यथा सबर्दुघा धेनुर्वाक् तुभ्यं विश्वा वसूनि दोहते यथाऽजनयो मरुतो वक्षणाभ्य इव दिवो वक्षणाभ्यो जलमातन्वते तथा त्वं भव॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये मनुष्या रश्मिवन्न्यायप्रकाशं सुशिक्षितवाणीवद्वक्तृत्वं नदीवत् शुभगुणवहनं कुर्वन्ति ते समग्रं कल्याणमश्नुवते॥४॥

पदार्थ:-हे मनुष्य! जैसे **(शुचय:)** शुद्ध **(उषास:)** प्रात: समय के पवन **(परावति)** दूर देश में **(दंसु)** जिनमें मनुष्य मन का दमन करते उन **(रश्मिषु)** किरणों में और **(नव्येषु)** नवीन **(रश्मिषु)** किरणों में वैसे **(तुभ्यम्)** तेरे लिये **(चित्रा)** चित्र-विचित्र अद्भुत **(भद्रा)** सुख करनेवाले **(वस्त्रा)** वस्त्र वा ढांपने के अन्य पदार्थों का **(तन्वते)** विस्तार करते वा जैसे **(सबर्दुघा)** सब कामों को पूर्ण करती हुई **(धेनु:)** वाणी **(तुभ्यम्)** तेरे लिये **(विश्वा)** समस्त **(वसूनि)** धनों को **(दोहते)** पूरा करती वा जैसे **(अजनय:)** न उत्पन्न होनेवाले **(मरुत:)** पवन **(वक्षणाभ्य:)** जो जलादि पदार्थों को बहानेवाली नदियों में **(दिव:)** प्रकाश के बीच **(वक्षणाभ्य:)** बहानेवाली किरणों से जल का **(आ)** अच्छे प्रकार विस्तार करते वैसा तू हो॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य किरणों के समान न्याय के प्रकाश और अच्छी शिक्षा युक्त वाणी के समान वक्तृता बोल-चाल और नदी के समान अच्छे गुणों की प्राप्ति करते वे समग्र सुख को प्राप्त होते हैं॥४॥

पुनर्मनुष्या: कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य कैसे अपना वर्त्ताव वर्त्तें, इस विषय को अगले मन्त्र में कहा है॥

तुभ्यꣳ शुक्रास: शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीर्यं।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा॥५॥

तुभ्यम्। शुक्रास:। शुचय:। तुरण्यव:। मदेषु। उग्रा:। इषणन्त। भुर्वणि। अपाम्। इषन्त। भुर्वणि। त्वाम्। त्सारी। दसमान:। भगम्। ईट्टे। तक्वऽवीर्यं। त्वम्। विश्वस्मात्। भुवनात्। पासि। धर्मणा। असुर्यात्। पासि। धर्मणा॥५॥

पदार्थः- **(तुभ्यम्)** **(शुक्रासः)** शुद्धवीर्य्याः **(शुचयः)** पवित्रकारकाः **(तुरण्यवः)** पालकाः **(मदेषु)** हर्षेषु **(उग्राः)** तीव्राः **(इषणन्त)** इच्छन्तु **(भुर्वणि)** धारणवति **(अपाम्)** **(इषन्त)** प्राप्नुवन्तु **(भुर्वणि)** पोषणवति **(त्वाम्)** **(त्सारी)** कुटिलगामी **(दसमानः)** शत्रूनुपक्षयन् **(भगम्)** ऐश्वर्य्यम् **(ईट्टे)** स्तौति **(तक्ववीये)** तक्वनां स्तेनानामसम्बन्धे मार्गे **(त्वम्)** **(विश्वस्मात्)** सर्वस्मात् **(भुवनात्)** संसारात् **(पासि)** रक्षसि **(धर्मणा)** **(असुर्यात्)** असुराणां दुष्टानां निजव्यवहारात् **(पासि)** **(धर्मणा)** धर्मेण॥५॥

अन्वयः-हे विद्वन्! यस्त्वं धर्मणाऽसुर्यात् पासि धर्मणा विश्वस्माद्भुवनात् पासि त्सारी दसमानो भवान् तक्ववीये भगमीट्टे तं त्वां येऽपां भुर्वणीषन्त। तुरण्यवः शुचयः शुक्रास उग्रा मदेषु भुर्वणि तुभ्यमिषणन्त॥५॥

भावार्थः-मनुष्याणां योग्यताऽस्ति ये यान् रक्षेयुस्तांस्तेऽपि रक्षेयुर्दुष्टानां निवारणेनैश्वर्यमिच्छन्तु न कदाचिद् दुष्टेषु विश्वासं कुर्युः॥५॥

पदार्थः-हे विद्वान्! जो **(त्वम्)** आप **(धर्मणा)** धर्म से **(असुर्यात्)** दुष्टों के निज व्यवहार से **(पासि)** रक्षा करते हो वा **(धर्मणा)** धर्म के साथ **(विश्वस्मात्)** समग्र **(भुवनात्)** संसार से **(पासि)** रक्षा करते हो तथा **(त्सारी)** तिरछे-बांके चलते और **(दसमानः)** शत्रुओं का संहार करते हुए आप **(तक्ववीये)** जिसमें चोरों का सम्बन्ध नहीं उस मार्ग में **(भगम्)** ऐश्वर्य्य की **(ईट्टे)** प्रशंसा करते उन **(त्वाम्)** आपको जो **(अपाम्)** जल वा कर्मों की **(भुर्वणि)** धारणावाले व्यवहार में **(इषन्त)** चाहते हैं वे **(तुरण्यवः)** पालना और **(शुचयः)** पवित्रता करनेवाले **(शुक्रासः)** शुद्ध वीर्य **(उग्राः)** तीव्र जन **(मदेषु)** आनन्दों में **(भुर्वणि)** और पालन-पोषण करनेवाले व्यवहार में **(तुभ्यम्)** तुम्हारे लिये **(इषणन्त)** इच्छा करें॥५॥

भावार्थः-मनुष्यों को योग्य है कि जो जिनकी रक्षा करें उनकी वे भी रक्षा करें। दुष्टों की निवृत्ति से ऐश्वर्य्य को चाहें और कभी दुष्टो में विश्वास न करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं नो॑ वायवेषा॒मपू॑र्व्यः सोमा॑नां प्रथ॒मः पी॒तिम॑र्हसि सु॒तानां॑ पी॒तिम॑र्हसि।
उ॒तो वि॒हुत्म॑तीनां वि॒शां व॑वर्जुषी॑णाम्।
विश्वा॒ इत्ते॑ धे॒नवो॑ दुह्र आ॒शिरं॑ घृ॒तं दु॑ह्रत आ॒शिर॑म्॥ ६॥ २३॥

त्वम्। नः॑। वा॒यो॒ इति॑। ए॒षा॒म्। अपू॑र्व्यः। सोमा॑नाम्। प्र॒थ॒मः। पी॒तिम्। अ॒र्ह॒सि॒। सु॒ता॒नाम्। पी॒तिम्। अ॒र्ह॒सि॒। उ॒तो इति॑। वि॒हुत्म॑तीनाम्। वि॒शाम्। व॒व॒र्जु॒षी॒णाम्। विश्वाः॑। इत्। ते॒। धे॒नवः॑। दु॒ह्रे॒। आ॒ऽशिर॑म्। घृ॒तम्। दु॒ह्र॒ते॒। आ॒ऽशिर॑म्॥ ६॥

पदार्थः-(**त्वम्**) (**नः**) अस्माकम् (**वायो**) प्राण इव वर्त्तमान (**एषाम्**) (**अपूर्व्यः**) पूर्वैः कृतः पूर्व्यो न पूर्व्योऽपूर्व्यः (**सोमानाम्**) ऐश्वर्यकारकाणां महौषधिरसानाम् (**प्रथमः**) आदिमः प्रख्याता वा (**पीतिम्**) पानम् (**अर्हसि**) कर्तुं योग्योऽसि (**सुतानाम्**) सुक्रियया निष्पादितानाम् (**पीतिम्**) पानम् (**अर्हसि**) (**उतो**) अपि (**विहुत्मतीनाम्**) जुह्वति स्वीकुर्वन्ति याभिस्ता विहुतो मतयो यासु तासाम् (**विशाम्**) प्रजानाम् (**ववर्जुषीणाम्**) भृशं दोषान् वर्जयन्तीनाम्। अत्र यङ्लुगन्ताद् व्रजेः क्विबन्तं रूपम्। (**विश्वाः**) सर्वाः (**इत्**) एव (**ते**) तव (**धेनवः**) गावः (**दुह्रे**) पिपुरति (**आशिरम्**) भोगम् (**घृतम्**) प्रदीप्तम् (**दुह्रते**) प्रपूरयन्ति (**आशिरम्**) समन्ताद्भोग्यम्॥६॥

अन्वयः-हे वायो परमबलवन्! अपूर्व्यस्त्वं नः सुतानां सोमानां पीतिमर्हसि प्रथमस्त्वमेषां पीतिमर्हसि यास्ते विश्वा धेनव इदेवाशिरं घृतं दुह्रत आशिरं दुह्रे तासां ववर्जुषीणां विहुत्मतीनां विशामुतो रक्षणं सततं कुरु॥६॥

भावार्थः-अत्रोपमालङ्कारः। राजपुरुषैर्ब्रह्मचर्यस्वौषधसेवनयुक्ताहारविहारैः शरीरात्मबलमुन्नीय धर्मेण प्रजापालने स्थिरैर्भवितव्यम्॥६॥

अत्र वायुदृष्टान्तेन शूरन्यायेषु प्रजाकर्मवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीत्यवगन्तव्यम्॥

इति चतुस्त्रिंशदुत्तरं शततमं १३४ सूक्तं त्रयोविंशो २३ वर्गश्च समाप्तः॥

पदार्थः-हे (**वायो**) प्राण के समान वर्त्तमान परम बलवान्! (**अपूर्व्यः**) जो अगलों ने नहीं प्रसिद्ध किये वे अपूर्व गुणी (**त्वम्**) आप (**नः**) हमारे (**सुतानाम्**) उत्तम क्रिया से निकाले हुए (**सोमानाम्**) ऐश्वर्य करनेवाली बड़ी-बड़ी ओषधियों के रसों के (**पीतिम्**) पीने को (**अर्हसि**) योग्य हो और (**प्रथमः**) प्रथम विख्यात आप (**एषाम्**) इन उक्त पदार्थों के रसों के (**पीतिम्**) (**अर्हसि**) पीने को योग्य हो जो (**ते**) आपकी (**विश्वाः**) समस्त (**धेनवः**) गौएं (**इत्**) ही (**आशिरम्**) भोगने के (**घृतम्**) कान्तियुक्त घृत को (**दुह्रते**) पूरा करती और (**आशिरम्**) अच्छे प्रकार भोजन करने योग्य दुग्ध आदि पदार्थ को (**दुह्रे**) पूरा करती उनकी और (**ववर्जुषीणाम्**) निरन्तर दोषों को त्याग करती हुई (**विहुत्मतीनाम्**) जिनमें विशेषता से होम करनेवाला विचारशील मनुष्य विद्यमान उन (**विशाम्**) प्रजाओं की (**उतो**) निश्चय से पालना कीजिये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजपुरुषों को चाहिये कि ब्रह्मचर्य और उत्तम औषध के सेवन और योग्य आहार-विहारों से शरीर और आत्मा के बल की उन्नति कर धर्म से प्रजा की पालना करने में स्थिर हों॥६॥

इस सूक्त में पवन के दृष्टान्त से शूरवीरों के न्यायविषयकों में प्रजा कर्म के वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ चौंतीसवां १३४ सूक्त और तेईसवां २३ वर्ग पूरा हुआ॥६॥

स्तीर्णमित्यस्य नवर्चस्य पञ्चत्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। वायुर्देवता। १,३ निचृदत्यष्टिः। २,४ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। ५,९ भुरिगष्टिः। ६,८ निचृदष्टिः। ७ अष्टिश्छन्दः। मध्यमः स्वरः॥

पुनः के केषां केन किं प्राप्नुयुरित्याह॥

अब नव ऋचावाले एक सौ पैंतींसवे सूक्त का आरम्भ है। इसके प्रथम मन्त्र में कौन किनके किससे किसको प्राप्त हो, इस विषय को कहा है॥

स्तीर्णं बर्हिरूप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे।
प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन्॥ १॥

स्तीर्णम्। बर्हिः। उप। नः। याहि। वीतये। सहस्रेण। नियुता। नियुत्वते। शतिनीभिः। नियुत्वते। तुभ्यम्। हि। पूर्वपीतये। देवाः। देवाय। येमिरे। प्र। ते। सुतासः। मधुमन्तः। अस्थिरन्। मदाय। क्रत्वे। अस्थिरन्॥ १॥

पदार्थः-(**स्तीर्णम्**) आच्छादितम् (**बर्हिः**) उत्तमं विशालं गृहम् (**उप**) सामीप्ये (**नः**) अस्माकम् (**याहि**) प्राप्नुहि (**वीतये**) सुखप्राप्तये (**सहस्रेण**) असंख्यातेन (**नियुता**) निश्चितेन (**नियुत्वते**) नियुतो बहवोऽश्वा विद्यन्ते यस्य तस्मै (**शतिनीभिः**) शतानि बहवो वीरा विद्यन्ते यासु सेनासु ताभिः (**नियुत्वते**) बहुबलमिश्रिताय (**तुभ्यम्**) (**हि**) खलु (**पूर्वपीतये**) पूर्वस्य पानाय (**देवाः**) विद्वांसः (**देवाय**) दिव्यगुणाय (**येमिरे**) यच्छेयुः (**प्र**) (**ते**) तव (**सुतासः**) निष्पादिताः (**मधुमन्तः**) प्रशस्तमधुरगुणयुक्ताः (**अस्थिरन्**) स्थिराः स्युः (**मदाय**) हर्षाय (**क्रत्वे**) प्रज्ञायै (**अस्थिरन्**) स्थिरा इवाचरेयुः॥ १॥

अन्वयः-हे विद्वन्! यस्मै देवाय तुभ्यं हि पूर्वपीतये देवा येमिरे यस्य ते तव मदाय क्रत्वे मधुमन्तः सुतासः प्राऽस्थिरन् भद्राऽस्थिरन् स त्वं नः स्तीर्णं बर्हिर्वीतय उप याहि नियुत्वते सहस्रेण नियुता उप याहि शतिनीभिस्सह नियुत्वते उप याहि॥ १॥

भावार्थः-विद्याधर्मजिज्ञासुभिर्मनुष्यैः विदुषामाह्वानं सर्वदा कार्य्यं तेषां सेवासङ्गाभ्यां विज्ञानमुन्नीय नित्यमानन्दितव्यम्॥ १॥

पदार्थः-हे विद्वान्! जिस (**देवाय**) दिव्यगुण के लिये (**तुभ्यम्**) (**हि**) आपको ही (**पूर्वपीतये**) प्रथम रस आदि पीने को (**देवाः**) विद्वान् जन (**येमिरे**) नियम करें, उन (**ते**) आपके (**मदाय**) आनन्द और (**क्रत्वे**) उत्तम बुद्धि के लिये (**मधुमन्तः**) प्रशंसित मधुरगुणयुक्त (**सुतासः**) उत्पन्न किये हुए पदार्थ (**प्रास्थिरन्**) अच्छे प्रकार स्थिर हों और सुखरूप (**अस्थिरन्**) स्थिर हों वैसे सो आप (**नः**) हमारे (**स्तीर्णम्**) ढंपे हुए (**बर्हिः**) उत्तम विशाल घर को (**वीतये**) सुख पाने के लिये (**उप, याहि**) पास पहुंचो (**नियुत्वते**) जिसके बहुत घोड़े विद्यमान उसके लिये (**सहस्रेण**) हजारों (**नियुता**) निश्चित व्यवहार से पास

पहुंचो और **(शतिनीभिः)** जिनमें सैकड़ों वीर विद्यमान उन सेनाओं के साथ **(नियुत्वते)** बहुत बल से मिले हुए के लिये अर्थात् अत्यन्त बलवान् के लिये पास पहुंचो॥१॥

भावार्थः-विद्या और धर्म को जानने की इच्छा करनेवाले मनुष्यों को चाहिये कि विद्वानों का बुलाना सब कभी करें। उनकी सेवा और सङ्ग से विशेष ज्ञान की उन्नति कर नित्य आनन्दयुक्त हों॥१॥

पुनर्मनुष्यैः किं कृत्वा किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या करके क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति।
तवायं भाग आयुषु सोमो देवेषु हूयते।
वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः॥२॥

तुभ्य। अयम्। सोम। परिऽपूतः। अद्रिऽभिः। स्पार्हा। वसानः। परि। कोशम्। अर्षति। शुक्रा। वसानः। अर्षति। तव। अयम्। भागः। आयुषु। सोमः। देवेषु। हूयते। वह। वायो इति। निऽयुतः। याहि। अस्मऽयुः। जुषाणः। याहि। अस्मऽयुः॥२॥

पदार्थः-**(तुभ्य)** तुभ्यम्। अत्र **छान्दसो वर्णलोप** इति मकारलोपः। **(अयम्)** सोमः ओषधिगण इव **(परिपूतः)** सर्वतः पवित्रः **(अद्रिभिः)** मेघैः **(स्पार्हा)** ईप्सितव्यानि वस्त्राणि **(वसानः)** आच्छादयन् **(परि)** **(कोशम्)** मेघम् **(अर्षति)** गच्छति **(शुक्रा)** शुद्धानि **(वसानः)** धरन् **(अर्षति)** प्राप्नुयात्। ऋधातोर्लेट्प्रयोगोऽयम्। **(तव)** **(अयम्)** **(भागः)** भजनीयः **(आयुषु)** जीवनेषु **(सोमः)** चन्द्र इव **(देवेषु)** विद्वत्सु **(हूयते)** स्तूयते **(वह)** **(वायो)** पवन इव **(नियुतः)** नियुक्तानश्वान् **(याहि)** **(अस्मयुः)** अहमिवाचरन् **(जुषाणः)** प्रीतः **(याहि)** **(अस्मयुः)**॥२॥

अन्वयः-हे वायो! त्वं नियुतः पवन इव स्वयानानि देशान्तरं वह जुषाणोऽस्मयुर्याहि। अस्मयुस्सन्नायाहि यस्य तवऽयमायुषु देवेषु सोमो भागोऽस्ति यो भवान् हूयते स वसानः सन् शुक्राऽर्षति योऽयमद्रिभिः परिपूतः सोमो हूयते कोशं पर्य्यर्षति तद्वत्स्पार्हा वसानस्त्वं याहि तस्य तुभ्य तत्सर्वमाप्नोतु॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः प्रशस्तवस्त्राभरणवेशाः शुभमाचरन्ति ते सर्वत्र प्रशंसां प्राप्नुवन्ति॥२॥

पदार्थः-हे **(वायो)** विद्वान्! आप **(नियुतः)** कला कौशल से नियत किये हुए घोड़ों को जैसे पवन वैसे अपने यानों को एक देश से दूसरे देश को **(वह)** पहुंचाओं और **(जुषाणः)** प्रसन्नचित **(अस्मयुः)** मेरे समान आचरण करते हुए **(याहि)** पहुंचो **(अस्मयुः)** मेरे समान आचरण करते हुए आओ जिस **(तव)** आपका **(अयम्)** यह **(आयुषु)** जीवनों और **(देवेषु)** विद्वानों में **(सोमः)** ओषधिगण के

समान **(भागः)** सेवन करने योग्य भाग है वा जो आप **(हूयते)** स्तुति किये जाते हैं सो **(वसानः)** वस्त्र आदि ओढ़े हुए **(शुक्रा)** शुद्ध व्यवहारों को **(अर्षति)** प्राप्त होते हैं, जो **(अयम्)** यह **(अद्रिभिः)** मेघों से **(परिपूतः)** सब ओर से पवित्र हुआ **(सोमः)** चन्द्रमा के समान प्रशंसा किया जाता वा **(कोशम्)** मेघ को **(पर्य्यर्षति)** सब ओर से प्राप्त होता उसके समान **(स्पार्हा)** चाहे हुए वस्त्रों को **(वसानः)** धारण किये हुए आप प्राप्त होवें, उन **(तुभ्य)** आपके लिये उक्त सब वस्तु प्राप्त हों॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य प्रशंसित कपड़े-गहने पहिने हुए सुन्दर रूपवान् अच्छे आचरण करते हैं, वे सर्वत्र प्रशंसा को प्राप्त होते हैं॥२॥

पुना राज्ञा प्रजाभ्यः किं ग्राह्यमित्याह॥

फिर राजा को प्रजाजनों से क्या लेना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्त्रिणीभिरुपयाहि वीतये वायो हव्यानि वीतये।
तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा।
अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत॥ ३॥

आ। नः। नियुत्ऽभिः। शतिनीभिः। अध्वरम्। सहस्त्रिणीभिः। उप। याहि। वीतये। वायो इति। हव्यानि। वीतये। तव। अयम्। भागः। ऋत्वियः। सऽरश्मिः। सूर्ये। सचा। अध्वर्युऽभिः। भरमाणाः। अयंसत। वायो इति। शुक्रा। अयंसत॥ ३॥

पदार्थः-**(आ)** **(नः)** अस्माकम् **(नियुद्भिः)** वायुगुणवद्वर्त्तमानैरश्वैः **(शतिनीभिः)** प्रशस्तासंख्यातसेनाङ्गयुक्ताभिश्चमूभिः **(अध्वरम्)** राज्यपालनाख्ययज्ञम् **(सहस्त्रिणीभिः)** बहूनि सहस्राणि शूरवीरसंघा यासु ताभिः **(उप)** **(याहि)** **(वीतये)** कामनायै **(वायो)** विद्वन् **(हव्यानि)** आदातुमर्हाणि **(वीतये)** व्याप्तये **(तव)** **(अयम्)** **(भागः)** **(ऋत्वियः)** ऋतुः प्राप्तोऽस्य स ऋत्वियः **(सरश्मिः)** रश्मिभिः प्रकाशैः सह वर्त्तमानः **(सूर्ये)** **(सचा)** समवेताः **(अध्वर्य्युभिः)** य आत्मानमध्वरमिच्छन्ति तैः **(भरमाणाः)** धरमाणाः **(अयंसत)** उपयच्छेयुः **(वायो)** प्रशस्तबलयुक्त **(शुक्राः)** शुद्धाः **(अयंसत)**॥३॥

अन्वयः-हे वायो! तव येऽध्वर्य्युभिर्भरमाणा जना अयंसत ते सुखमयंसत यस्य तव सूर्ये सचा शुक्राः किरणा इव सरश्मिर्ऋत्विजोऽयं भागोऽस्ति स त्वं वीतये हव्यान्युपयाहि। हे वायो! ये शतिनीभिस्सहस्त्रिणीभि- र्नियुद्भिर्वीतये नोऽध्वरमुपयान्ति तांस्त्वमुपायाहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषैः शत्रोर्बलाच्चतुर्गुणं वाऽधिकं बलं कृत्वाऽधार्मिकैः शत्रुभिस्सह योद्धव्यम्। ते प्रतिवर्षं प्रजाभ्यो गृहीतव्यो यावान् करो भवेत् तावन्तमेव गृह्णीयुः, सदैव धार्मिकान् विदुष उपसेवेरन्॥३॥

पदार्थः-हे **(वायो)** विद्वान्! **(तव)** आपके जो **(अध्वर्य्युभिः)** अपने को यज्ञ की इच्छा करनेवालों ने **(भरमाणाः)** धारण किये मनुष्य **(अयंसत)** निवृत्त होवें सुख जैसे हो वैसे **(अयंसत)** निवृत्त हों अर्थात् सांसारिक सुख को छोड़े जिन आपका **(सूर्ये)** सूर्य्ये के बीच **(सचा)** अच्छे प्रकार संयोग किये हुई **(शुक्राः)** शुद्ध किरणों के समान **(सरश्मिः)** प्रकाशों के साथ वर्त्तमान **(ऋत्वियः)** जिसका ऋतु समय प्राप्त हुआ वह **(अयम्)** यह **(भागः)** भाग है सो आप **(वीतये)** व्याप्त होने के लिये **(हव्यानि)** ग्रहण करने योग्य पदार्थों को **(उपयाहि)** समीप पहुंचें, प्राप्त हों। हे **(वायो)** प्रशंसित बलयुक्त! जो **(शतिनीभिः)** प्रशंसित सैकड़ों अङ्गों से युक्त सेनाओं के साथ वा **(सहस्त्रिणीभिः)** जिनमें बहुत हजार शूरवीरों के समूह उन सेनाओं के साथ वा **(नियुद्भिः)** पवन के गुण के समान घोड़ों से **(वीतये)** कामना के लिये **(नः)** हम लोगों के **(अध्वरम्)** राज्यपालनरूप यज्ञ को प्राप्त होते उनको आप **(आ)** आकर प्राप्त होओ॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुषों को चाहिये कि शत्रुओं के बल से चौगुना वा अधिक बल कर दुष्ट शत्रुओं के साथ युद्ध करें और वे प्रतिवर्ष प्रजाजनों से जितना कर लेना योग्य हो उतना ही लेवें तथा सदैव धर्मात्मा विद्वानों की सेवा करें॥३॥

पुनर्मनुष्यैः किंवद्भवितव्यमित्याह॥

फिर मनुष्यों को किसके समान होना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये।
पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम्।
वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम्॥४॥

आ। वाम्। रथः। नियुत्वान्। वक्षत्। अवसे। अभि। प्रयांसि। सुऽधितानि। वीतये। वायो इति। हव्यानि। वीतये। पिबतम्। मध्वः। अन्धसः। पूर्वऽपेयम्। हि। वाम्। हितम्। वायो इति। आ। चन्द्रेण। राधसा। आ। गतम्। इन्द्रः। च। राधसा। आ। गतम्॥४॥

पदार्थः-**(आ)** **(वाम्)** युवयोः **(रथः)** **(नियुत्वान्)** वायुवद्वेगवान् **(वक्षत्)** वहेत् **(अवसे)** विजयाऽगमाय **(अभि)** आभिमुख्ये **(प्रयांसि)** प्रीतानि **(सुधितानि)** सुष्ठु धृतानि **(वीतये)** आनन्दप्राप्तये **(वायो)** वायुवत् प्रिय **(हव्यानि)** दातुमर्हाणि **(वीतये)** धर्मप्रवेशाय **(पिबतम्)** **(मध्वः)** मधुरगुणयुक्तस्य **(अन्धसः)** अन्नस्य **(पूर्वपेयम्)** पूर्वैः पातुं योग्यम् **(हि)** खलु **(वाम्)** युवाभ्याम् **(हितम्)** **(वायो)** दुष्टानां हिंसक **(आ)** समन्तात् **(चन्द्रेण)** सुवर्णेन। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२) **(राधसा)** राध्नुवन्ति संसिद्धिं प्राप्नुवन्ति येन तेन **(आ)** **(गतम्)** गच्छतं प्राप्नुतम् **(इन्द्रः)** विद्युत् **(च)** चकाराद्वायुः

(राधसा) **(आ)** संसिद्धिकरेण साधनेन सह **(गतम्)** प्राप्नुतम्। अत्रोभयत्र **बहुलं छन्दसी**ति शपो लुक्॥४॥

अन्वयः-हे सभासेनेशौ! यो वां नियुत्वान् रथो वीतये सुधितानि प्रयांस्यभ्यावक्षदवसे वीतये हव्यानि च तौ युवां यथेन्द्रो वायुश्च तथा राधसा गतम्। वां हि यन्मध्वोऽन्धसः पूर्वपेयं वां हितमस्ति तत्पिबतं चन्द्रेण राधसाऽगतम्। हे वायो! त्वं चन्द्रेण राधसा हितमायाहि, हे वायो! हव्यानि चायाहि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायुविद्युतौ सर्वाऽभिव्याप्ते भूत्वा सर्वाणि वस्तूनि सेवेते तथा सज्जनैरैश्वर्यप्राप्तये सर्वाणि साधनानि सेवनीयानि॥४॥

पदार्थः-हे सभासेनाधीशो! जो **(वाम्)** तुम्हारा **(नियुत्वान्)** पवन के समान वेगवान् **(रथः)** रथ **(पीतये)** आनन्द की प्राप्ति के लिये **(सुधितानि)** अच्छे प्रकार धारण किये हुए **(प्रयांसि)** प्रीति के अनुकूल पदार्थों को **(अभ्यावक्षत्)** चारों ओर से अच्छे प्रकार पहुंचे और **(अवसे)** विजय की प्राप्ति वा **(वीतये)** धर्म की प्रवृत्ति के लिये **(हव्यानि)** देने योग्य पदार्थों को चारों ओर भली-भांति पहुंचावे, वे तुम जैसे **(इन्द्रः)** बिजुली रूप आग **(च)** और पवन आवे वैसे **(राधसा)** जिससे सिद्धि को प्राप्त होते उस पदार्थ के साथ **(आ गतम्)** आओ, जो **(मध्वः)** मीठे **(अन्धसः)** अन्न का **(पूर्वपेयम्)** अगले मनुष्यों के पीने योग्य **(वाम्)** और तुम दोनों के लिये **(हितम्)** सुखरूप भाग है, उसको **(पिबतम्)** पिओ और **(चन्द्रेण)** सुवर्णरूप **(राधसा)** उत्तम सिद्धि करनेवाले धन के साथ **(आगतम्)** आओ। हे **(वायो)** पवन के समान प्रिय! आप उत्तम सिद्धि करनेवाले सुवर्ण के साथ सुखभोग को **(आ)** प्राप्त होओ और हे **(वायो)** दुष्टों की हिंसा करनेवाले! लेने-देने योग्य पदार्थों को भी **(आ)** प्राप्त होओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पवन और बिजुली सब में अभिव्याप्त होकर सब वस्तुओं का सेवन करते, वैसे सज्जनों को चाहिये कि ऐश्वर्य्य की प्राप्ति के लिये सब साधनों का सेवन करें॥४॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम्।
तेषां पिबतमस्मयू आ नो गन्तमिहोत्या।
इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम्॥५॥२४॥

आ। वाम्। धियः। ववृत्युः। अध्वरान्। उप। इमम्। इन्दुम्। मर्मृजन्त। वाजिनम्। आशुम्। अत्यम्। न। वाजिनम्। तेषाम्। पिबतम्। अस्मयू। इत्यस्मऽयू। आ। नः। गन्तम्। इह। ऊत्या। इन्द्रवायू इति। सुतानाम्। अद्रिऽभिः। युवम्। मदाय। वाजऽदा। युवम्॥५॥

पदार्थः-**(आ)** **(वाम्)** युवयोः **(धियः)** प्रज्ञाः कर्माणि वा **(ववृत्युः)** वर्त्तेरन्। अत्र **बहुलं छन्दसी**ति शपः श्लुर्व्यत्ययेन परस्मैपदम्। **(अध्वरान्)** अहिंसकान् जनान् **(उप)** **(इमम्)** **(इन्दुम्)** परमैश्वर्यम्। अत्रेदिधातोर्बाहुलकादुः प्रत्ययः। **(मर्मृजन्त)** अत्यन्तं मार्जयन्तु शोधयन्तु **(वाजिनम्)** प्रशस्तवेगम् **(आशुम्)** शीघ्रकारिणम् **(अत्यम्)** अतन्तमश्वम् **(न)** इव **(वाजिनम्)** बहुशुभलक्षणाऽन्वितम् **(तेषाम्)** **(पिबतम्)** **(अस्मयू)** आवामिवाचरन्तौ **(आ)** **(नः)** अस्मान् **(गन्तम्)** गच्छतम्। अत्राडभावो **बहुलं छन्दसी**ति शपो लुक्। **(इह)** अस्मिन् संसारे **(ऊत्या)** रक्षणादिसत्क्रियया **(इन्द्रवायू)** सर्प्पपवनाविव **(सुतानाम्)** संसिद्धानाम् **(अद्रिभिः)** शैलाऽवयवैरुलूखलादिभिः **(युवम्)** **(मदाय)** आनन्दाय **(वाजदा)** विज्ञानप्रदौ **(युवम्)** युवाम्॥५॥

अन्वयः-हे इन्द्रवायू! ये वां धियोऽध्वरानिममिन्दुं वाजिनं चाशु वाजिनमत्यं नेवा ववृत्युरिममिन्दुमुप- मर्मृजन्त तेषामद्रिभिः सुतानां रसं मदाय युवं पिबतमस्मयू वाजदा युवमिहोत्या नोऽस्मानागन्तम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। य उपदेशका अध्यापकाश्च जनानां बुद्धीः शोधयित्वा सुशिक्षिताऽश्ववत्पराक्रमयन्ति त आनन्दभागिनो भवन्ति॥५॥

पदार्थः-हे **(इन्द्रवायू)** सूर्य्य और पवन के समान सभा सेनाधीशो! जो उपदेश करने वा पढ़ानेवाले विद्वान् जन **(वाम्)** तुम्हारे **(धियः)** बुद्धि और कर्मों वा **(अध्वरान्)** हिंसा न करनेवाले जनों **(इमम्)** इस **(इन्दुम्)** परम ऐश्वर्य और **(वाजिनम्)** प्रशंसित वेगयुक्त **(आशुम्)** काम में शीघ्रता करनेवाले **(वाजिनम्)** अनेक शुभ लक्षणों से युक्त **(अत्यम्)** निरन्तर गमन करते हुए घोड़े के **(न)** समान **(आ, ववृत्युः)** अच्छे प्रकार वर्त्तें, कार्य्य में लावें और इस परम ऐश्वर्य को **(उप, मर्मृजन्त)** समीप में अत्यन्त शुद्ध करें **(तेषाम्)** उनके **(अद्रिभिः)** अच्छे प्रकार पर्वत के टूंक वा उखली मूसलों से **(सुतानाम्)** सिद्ध किये अर्थात् कूट-पीट बनाए हुए पदार्थों के रस को **(मदाय)** आनन्द के लिये **(युवम्)** तुम **(पिबतम्)** पीओ तथा **(अस्मयू)** हम लोगों के समान आचरण करते हुए **(वाजदा)** विशेष ज्ञान देनेवाले **(युवम्)** तुम दोनों इस संसार में **(ऊत्या)** रक्षा आदि उत्तम क्रिया से **(नः)** हम लोगों को **(आगन्तम्)** प्राप्त होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो उपदेश करने और पढ़ानेवाले मनुष्यों की बुद्धियों को शुद्ध कर अच्छे सिखाये हुए घोड़े के समान पराक्रम युक्त कराते वे आनन्द सेवनवाले होते हैं॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

इ॒मे वां॑ सोमा॑ अ॒प्स्वा सु॒ता इ॒हाध्व॒र्युभि॒र्भर॑माणा अयंसत॒ वायो॑ शु॒क्रा अ॑यंसत।
ए॒ते वा॑म॒भ्य॑सृक्षत ति॒रः प॒वित्र॑मा॒शव॑:।

युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्ययाऽ॥ ६॥

इमे। वाम्। सोमाः। अप्ऽसु। आ। सुताः। इह। अध्वर्युऽभिः। भरमाणाः। अयंसत। वायो इति। शुक्राः। अयंसत। एते। वाम्। अभि। असृक्षत। तिरः। पवित्रम्। आशवः। युवाऽयवः। अति। रोमाणि। अव्यया। सोमासः। अति। अव्यया॥ ६॥

पदार्थः-(**इमे**) (**वाम्**) (**सोमाः**) महौषधयः (**अप्सु**) जलेषु (**आ**) (**सुताः**) (**इह**) अस्मिँल्लोके (**अध्वर्युभिः**) अध्वरं यज्ञमिच्छद्भिः (**भरमाणाः**) (**अयंसत**) यच्छेयुः (**वायो**) वायुवद् बलिष्ठ (**शुक्राः**) शुद्धाः (**अयंसत**) गृह्णीयुः (**एते**) (**वाम्**) युवाम् (**अभि**) आभिमुख्ये (**असृक्षत**) सृजेयुः (**तिरः**) तिरश्चीनम् (**पवित्रम्**) शुद्धिकरम् (**आशवः**) ये अश्नुवन्ति ते (**युवायवः**) युवामिच्छवः (**अति**) (**रोमाणि**) लोमानि (**अव्यया**) व्ययरहितानि (**सोमासः**) ऐश्वर्य्ययुक्ताः (**अति**) (**अव्यया**) नाशरहितानि सुखानि॥ ६॥

अन्वयः-हे इन्द्र वायो! य इम इहाध्वर्युभिरप्सु सुताः सोमा भरमाणा वामयंसत शुक्रा अयंसत य एते आशवो युवायवः सोमासोऽव्ययाऽतिरोमाण्यत्यव्ययेव तिरः पवित्रं वामभ्यसृक्षत तान् युवां पिबतं संगच्छेतां च॥ ६॥

भावार्थः-हे मनुष्या! येषां सेवनेन दृढाऽरोग्ययुक्ता देहात्मानो भवन्ति, येऽन्तःकरणं शोधयन्ति, तान् यूयं नित्यं सेवध्वम्॥ ६॥

पदार्थः-हे परम ऐश्वर्य्ययुक्त और (**वायो**) पवन के समान बलवान्! जो (**इमे**) ये (**इह**) इस संसार में (**अध्वर्युभिः**) यज्ञ की चाहना करनेवालों ने (**अप्सु**) जलों में (**सुताः**) उत्पन्न की (**सोमाः**) बड़ी-बड़ी ओषधि (**भरमाणाः**) पुष्टि करती हुई तुम दोनों को (**अयंसत**) देवें और (**शुक्राः**) शुद्ध वे (**अयंसत**) लेवें वा जो (**एते**) ये (**आशवः**) इकट्ठे होते और (**युवायवः**) तुम दोनों की इच्छा करते हुए (**सोमासः**) ऐश्वर्य्ययुक्त (**अव्यया**) नाशरहित (**अति, रोमाणि**) अतीव रोमा अर्थात् नारियल की जटाओं के आकार (**अति, अव्यया**) सनातन सुखों के समान (**तिरः**) औरों से तिरछे (**पवित्रम्**) शुद्धि करनेवाले पदार्थों और (**वाम्**) तुम दोनों को (**अभि, असृक्षत**) चारों ओर से सिद्ध करें, उनको तुम पीओ और अच्छे प्रकार प्राप्त होओ॥ ६॥

भावार्थः-हे मनुष्यो! जिनके सेवन से दृढ़ और आरोग्ययुक्त देह और आत्मा होते हैं तथा जो अन्तःकरण को शुद्ध करते उनका तुम नित्य सेवन करो॥ ६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम्।
वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता

याथो अध्वरमिन्द्रश्च याथो अध्वरम्॥७॥

अति। वायो इति। ससतः। याहि। शश्वतः। यत्र। ग्रावा। वदति। तत्र। गच्छतम्। गृहम्। इन्द्रः। च। गच्छतम्। वि। सूनृता। ददृशे। रीयते। घृतम्। आ। पूर्णया। नियुता। याथः। अध्वरम्। इन्द्रः। च। याथः। अध्वरम्॥७॥

पदार्थः-(**अति**) अतिशये (**वायो**) वायुवद् बलवन् (**ससतः**) अविद्यामुल्लङ्घमानान् (**याहि**) (**शश्वतः**) सनातनविद्यायुक्तान् (**यत्र**) (**ग्रावा**) मेधावी (**वदति**) उपदिशति (**तत्र**) (**गच्छतम्**) प्राप्नुतम् (**गृहम्**) (**इन्द्रः**) (**च**) (**गच्छतम्**) (**वि**) (**सूनृता**) सुशिक्षिता सत्यप्रिया वाक् (**ददृशे**) दृश्यते (**रीयते**) श्लिष्यते सम्बध्यते (**घृतम्**) प्रदीप्तविज्ञानम् (**आ**) (**पूर्णया**) (**नियुता**) अखिलाङ्गयुक्तया वायोर्गतिवद्गत्या (**याथः**) प्राप्नुथः (**अध्वरम्**) अहिंसादिलक्षणं धर्मम् (**इन्द्रः**) ऐश्वर्ययुक्तः (**च**) (**याथः**) गच्छथः (**अध्वरम्**) यज्ञम्॥७॥

अन्वयः-हे वायो विद्वँस्त्वं ससतः शश्वतो याहि यत्र ग्रावा वदति तत्र त्वमिन्द्रश्च गच्छतं गृहं गच्छतं यत्र सूनृता विददृशे घृतमारीयते तत्र पूर्णया नियुता यौ त्वमिन्द्रश्चाध्वरं याथस्तौ युवामध्वरं याथः॥७॥

भावार्थः-मनुष्या यस्मिन् देशे स्थले वाऽऽप्ता विद्वांसः सत्यमुपदिशेयुस्तत्स्थानं गत्वा तदुपदेशं नित्यं शृणुयुः। येन विद्यावाणीं सत्यं विज्ञानं धर्मज्ञानं च प्राप्नुयुः॥७॥

पदार्थः-हे (**वायो**) पवन के समान बलवान् विद्वान्! आप (**ससतः**) अविद्या को उल्लङ्घन किये और (**शश्वतः**) सनातन विद्या से युक्त पुरुषों को (**याहि**) प्राप्त होओ (**यत्र**) जहाँ (**ग्रावा**) धीर बुद्धि पुरुष (**अति, वदति**) अत्यन्त उपदेश करता (**तत्र**) वहाँ आप (**च**) और (**इन्द्रः**) ऐश्वर्ययुक्त मनुष्य (**गच्छतम्**) जाओ और (**गृहम्**) घर (**गच्छतम्**) जाओ जहाँ (**सूनृता**) उत्तमशिक्षा युक्त सत्यप्रिय वाणी (**वि, ददृशे**) विशेषता से देखी जाती और (**घृतम्**) प्रकाशित विज्ञान (**आ, रीयते**) अच्छे प्रकार सम्बद्ध होता अर्थात् मिलता वहाँ (**पूर्णया**) पूरी (**नियुता**) पवन की चाल के समान चाल से जो आप (**इन्द्रः, च**) और ऐश्वर्य्ययुक्त जन (**अध्वरम्**) अहिंसादि लक्षण धर्म को (**याथः**) प्राप्त होते हो, वे तुम दोनों (**अध्वरम्**) यज्ञ को (**याथः**) प्राप्त होते हो॥७॥

भावार्थः-मनुष्य लोग जिस देश वा स्थान में शास्त्रवेत्ता आप्त विद्वान् सत्य का उपदेश करें, उनके स्थान पर जाके उनके उपदेश को नित्य सुना करें, जिससे विद्यायुक्त वाणी और सत्य विज्ञान और धर्मज्ञान को प्राप्त होवें॥७॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अत्राह॒ तद्व॑हेथे॒ मध्व॒ आहु॑तिं॒ यम॑श्व॒त्थमु॑प॒तिष्ठ॑न्त जा॒यवो॑ऽस्मे ते स॑न्तु जा॒यव॑:।
सा॒कं गाव॒: सुव॑ते॒ पच्य॑ते॒ यवो॒
न ते॑ वायु॒ उप॑ दस्यन्ति धे॒नवो॒ नाप॑ दस्यन्ति धे॒नव॑:॥८॥

अत्र॑। अह॑। तत्। व॒ह॒ेथे॒ इति॑। मध्व॑:। आऽहु॑तिम्। यम्। अ॒श्व॒त्थम्। उ॒प॒ऽतिष्ठ॑न्त। जा॒यव॑:। अ॒स्मे इति॑। ते। स॒न्तु॒। जा॒यव॑:। सा॒कम्। गाव॑:। सुव॑ते। पच्य॑ते। यव॑:। न। ते॒। वा॒यो॒ इति॑। उप॑। द॒स्य॒न्ति॒। धे॒नव॑:। न। अप॑। द॒स्य॒न्ति॒। धे॒नव॑:॥८॥

पदार्थ:-(**अत्र**) (**अह**) किल (**तत्**) (**वहेथे**) प्रापयत: (**मध्व:**) मधुरस्य विज्ञानस्य (**आहुतिम्**) समन्ताद् ग्रहणम् (**यम्**) (**अश्वत्थम्**) पिप्पलमिव (**उपतिष्ठन्त**) उपतिष्ठन्तु (**जायव:**) जयशीला: (**अस्मे**) अस्माकम् (**ते**) (**सन्तु**) (**जायव:**) जेतार: शूरा: (**साकम्**) सह (**गाव:**) धेनव: (**सुवते**) गर्भान् विमुञ्चन्ति (**पच्यते**) परिपक्वो भवति (**यव:**) मिश्रामिश्रव्यवहार: (**न**) इव (**ते**) तव (**वायो**) वायुवद् बलयुक्त (**उप**) (**दस्यन्ति**) क्षयन्ति (**धेनव:**) (**न**) निषेधे (**अप**) (**दस्यन्ति**) (**धेनव:**) वाण्य:॥८॥

अन्वय:-हे वायो विद्वन्! यावध्यापकोपदेशकावत्राऽह तद्वहेथे अश्वत्थं पक्षिण इव जायवो यं त्वामुपतिष्ठन्त मध्व आहुतिं चोपतिष्ठन्त तेऽस्मे जायव: सन्तु। एवं समाचरतस्ते गाव: साकं सुवते यव: साकं पच्यते धेनवो नापदस्यन्ति धेनवो नोपदस्यन्ति॥८॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यदि सर्वैर्मनुष्यै: श्रेष्ठमनुष्याणां संगस्थकामना परस्परस्मिन् प्रीति: क्रियते तर्हि तेषां विद्याबलह्रासो भेदबुद्धिश्च नोपजायेत॥८॥

पदार्थ:-हे (**वायो**) पवन के समान विद्वान्! जो पढ़ाने और उपदेश करनेवाले (**अत्राह**) यहीं निश्चय से (**तत्**) उस विषय को (**वहेथे**) प्राप्त कराते वा (**अश्वत्थम्**) जैसे पीपलवृक्ष को पखेरू वैसे (**जायव:**) जीतनेहारे (**यम्**) जिन आपके (**उपतिष्ठन्त**) समीप स्थित हों और (**मध्व:**) मधुर विज्ञान के (**आहुतिम्**) सब प्रकार ग्रहण करने को उपस्थित हों (**ते**) वे (**अस्मे**) हम लोगों के बीच (**जायव:**) जीतनेहारे शूर (**सन्त**) हों, ऐसे अच्छे प्रकार आचरण करते हुए (**ते**) आपकी (**गाव:**) गौयें (**साकम्**) साथ (**सुवते**) विआती (**यव:**) मिला वा पृथक-पृथक् व्यवहार साथ (**पच्यते**) सिद्ध होता तथा (**धेनव:**) गौयें जैसे (**अप, दस्यन्ति**) नष्ट नहीं होतीं (**न**) वैसे (**धेनव:**) वाणी (**न, उप, दस्यन्ति**) नहीं नष्ट होतीं॥८॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सब मनुष्यों से श्रेष्ठ मनुष्यों के सङ्ग की कामना और आपस में प्रीति की जाय तो उनकी विद्या बल की हानि और भेद बुद्धि न उत्पन्न हो॥८॥

पुना राज्ञा युद्धाय के प्रेषणीया इत्याह॥

फिर राजा को युद्ध के लिये कौन पठाने योग्य हैं, इस विषय को अगले मन्त्र में कहा है॥

इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः।
धन्वञ्चित्ये अनाशवो जीराश्चिदगिरौकसः।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः॥९॥२५॥

इमे। ये। ते। सु। वायो इति। बाहुऽओजसः। अन्तः। नदी इति। ते। पतयन्ति। उक्षणः। महि। व्राधन्तः। उक्षणः। धन्वन्। चित्। ये। अनाशवः। जीराः। चित्। अगिराऽओकसः। सूर्यस्यऽइव। रश्मयः। दुःऽनियन्तवः। हस्तयोः। दुःऽनियन्तवः॥९॥

पदार्थः-(**इमे**) (**ये**) (**ते**) तव (**सु**) (**वायो**) विद्वन् (**बाह्वोजसः**) भुजबलस्य (**अन्तः**) मध्ये (**नदी**) नदी इव वर्त्तमानौ (**ते**) तव (**पतयन्ति**) पतिरिवाचरन्ति (**उक्षणः**) सेचनसमर्थान् (**महि**) महतः (**व्राधन्तः**) वर्धमानाः। अत्र **पृषोदरादिना** पूर्वस्याऽऽकारादेशो व्यत्ययेन परस्मैपदं च। (**उक्षणः**) बलप्रदान् (**धन्वन्**) धन्वन्यन्तरिक्षे (**चित्**) (**ये**) (**अनाशवः**) अव्याप्ताः (**जीराः**) वेगवन्तः (**चित्**) (**अगिरौकसः**) अविद्यमानया गिरा सहौको गृहं येषां ते। अत्र तृतीयाया अलुक्। (**सूर्यस्येव**) यथा सवितुः (**रश्मयः**) किरणाः (**दुर्नियन्तवः**) दुःखेन नियन्तुं निग्रहीतुं योग्याः (**हस्तयोः**) भुजयोः (**दुर्नियन्तवः**)॥९॥

अन्वयः-हे वायो! य इमे ते तव सहायेन बाह्वोजसोऽन्तः सुपतयन्ति तानुक्षणः संपादय य इमे ते तवोपदेशेन महि व्राधन्तः सुपतयन्ति तानुक्षणः कुरु। ये धन्वन्नदी चिदिवानाशवो जीरा अगिरौकसो दुर्नियन्तवो रश्मयः सूर्यस्येव चिद्धस्तयोः प्रतापेन शत्रुभिर्दुर्नियन्तवः सुपतयन्ति तान् सततं सत्कुरु॥९॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। राजपुरुषैर्बाहूबलयुक्ताः शत्रुभिरधृष्यमाणा वीराः पुरुषाः सेनायां सदैव रक्षणीया येन राजप्रतापः सदा वर्द्धेतेति॥९॥

अत्र मनुष्याणां परस्परवर्त्तमानोक्तत्वादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति पञ्चत्रिंशदुत्तरं शततमं १३५ सूक्तं पञ्चविंशो २५ वर्गश्च समाप्तः॥

पदार्थः-हे (**वायो**) विद्वन्! (**ये**) जो (**इमे**) ये योद्धा लोग (**ते**) आपके सहाय से (**बाह्वोजसः**) भुजाओं के बल के (**अन्तः**) बीच (**सु, पतयन्ति**) पालनेवाले के समान आचरण करते उनको (**उक्षणः**) सींचने में समर्थ कीजिये, (**ये**) जो (**ते**) आपके उपदेश से (**महि**) बहुत (**व्राधन्तः**) बढ़ते हुए अच्छे प्रकार पालनेवाले के समान आचरण करते हैं, उनको (**उक्षणः**) बल देनेवाले कीजिये, जो (**धन्वन्**) अन्तरिक्ष में (**नदी**) नदी के (**चित्**) समान वर्त्तमान (**अनाशवः**) किसी में व्याप्त नहीं (**जीराः**) वेगवान् (**अगिरौकसः**) जिनका अविद्यमान वाणी के साथ ठहरने का स्थान (**दुर्नियन्तवः**) जो दुःख से ग्रहण करने के योग्य वे (**रश्मयः**) किरण जैसे (**सूर्यस्येव**) सूर्य को वैसे (**चित्**) और (**हस्तयोः**) अपनी

भुजाओं के प्रताप से शत्रुओं ने (**दुर्नियन्तवः**) दुःख से ग्रहण करने योग्य अच्छी पालना करनेवाले के समान आचरण करें, उन वीरों का निरन्तर सत्कार करो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार हैं।[१] राजपुरुषों को चाहिये कि बाहुबलयुक्त शत्रुओं से न डरनेवाले वीर पुरुषों को सेना में सदैव रक्खें, जिससे राज्य का प्रताप सदा बढ़े॥९॥

इस सूक्त में मनुष्यों का परस्पर वर्त्ताव कहने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ एकता है, यह जानना चाहिये॥

यह एक सौ पैतीसवाँ १३५ सूक्त और पच्चीसवाँ २५ वर्ग समाप्त हुआ॥

---

१. संस्कृत भावार्थ में उपमा अलङ्कार भी है। सं०

अथ प्र स्वित्यस्य सप्तर्चस्य षट्त्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। मित्रावरुणौ देवते। षष्ठसप्तमयोर्मन्त्रोक्ता देवताः। १,३,५,६ स्वराडत्यष्टिः। गान्धारः स्वरः। २ निचृदष्टिश्छन्दः। ४ भुरिगष्टिश्छन्दः। मध्यमः स्वरः। ७ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ के केभ्यः किं गृहीत्वा कीदृशा भवेयुरित्याह॥

अब सात ऋचावाले एक सौ छत्तीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में कौन किनसे क्या लेकर कैसे हों, इस विषय को कहा है॥

प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मळयद्भ्याम्।
ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता।
अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे॥ १॥

प्र। सु। ज्येष्ठम्। निऽचिराभ्याम्। बृहत्। नमः। हव्यम्। मतिम्। भरत। मृळयत्ऽभ्याम्। स्वादिष्ठम्। मृळयत्ऽभ्याम्। ता। सम्ऽराजा। घृतासुती इति घृतऽआसुती। यज्ञेऽयज्ञे। उपऽस्तुता। अथ। एनोः। क्षत्रम्। न। कुतः। चन। आऽधृषे। देवऽत्वम्। नु। चित्। आऽधृषे॥ १॥

पदार्थः-(**प्र**) प्रकर्षे (**सु**) शोभने (**ज्येष्ठम्**) अतिशयेन प्रशस्यम् (**निचिराभ्याम्**) नितरां सनातनाभ्याम् (**बृहत्**) महत् (**नमः**) अन्नम् (**हव्यम्**) ग्रहीतुं योग्यम् (**मतिम्**) प्रज्ञाम् (**भरत**) स्वीकुरुत (**मृळयद्भ्याम्**) सुखयद्भ्याम् (**स्वादिष्ठम्**) अतिशयेन स्वादु (**मृळयद्भ्याम्**) सुखकारकाभ्यां मातापितृभ्यां सह (**ता**) तौ (**सम्राजा**) सम्यग्राजेते (**घृतासुती**) घृतेनासुतिः सवनं ययोस्तौ (**यज्ञेयज्ञे**) प्रतियज्ञम् (**उपस्तुता**) उपगतैर्गुणैः प्रशंसितौ (**अथ**) अनन्तरम् (**एनोः**) एनयोः। अत्र **छान्दसो वर्णलोप** इत्यकारलोपः। (**क्षत्रम्**) राज्यम् (**न**) निषेधे (**कुतः**) कस्मादपि (**चन**) (**आधृषे**) आधर्षितुम् (**देवत्वम्**) विदुषां भावम् (**नु**) शीघ्रम् (**चित्**) अपि (**आधृषे**) आधर्षितुम्॥ १॥

अन्वयः-हे मनुष्या! यूयं मृळयद्भ्यामिदं निचिराभ्यां मृळयद्भ्यां सह ज्येष्ठं स्वादिष्ठं हव्यं बृहन्नमो मतिं च नु प्रसुभरत यज्ञेयज्ञ उपस्तुता घृतासुती सम्राजा ता प्रसुभरत। अथैनोः क्षत्रमाधृषे चिदपि देवत्वमाधृषे कुतश्चन न क्षीयेत॥ १॥

भावार्थः-ये बहुकालात् प्रवृत्तानामध्यापकोदेशकानां सकाशाद्विद्यां सदुपदेशाँश्च सद्यो गृह्णन्ति, ते चक्रवर्त्तिराजानो भवितुमर्हन्ति नात्रैषामैश्वर्यं कदाचिद्धीयते॥ १॥

पदार्थः-हे मनुष्यो! तुम (**मृडयद्भ्याम्**) सुख देते हुओं के समान (**निचिराभ्याम्**) निरन्तर सनातन (**मृडयद्भ्याम्**) सुख करनेवाले अध्यापक उपदेशक के साथ (**ज्येष्ठम्**) अतीव प्रशंसा करने योग्य (**स्वादिष्ठम्**) अत्यन्त स्वादु (**हव्यम्**) ग्रहण करने योग्य पदार्थ (**बृहत्**) बहुतसा (**नमः**) अन्न और (**मतिम्**) बुद्धि को (**नु**) शीघ्र (**प्र, सु, भरत**) अच्छे प्रकार सुन्दरता से स्वीकार करो और (**यज्ञेयज्ञे**)

प्रत्येक यज्ञ में **(उपस्तुता)** प्राप्त हुए गुणों से प्रशंसा को प्राप्त **(घृतासुती)** जिनका घी के साथ पदार्थों का सार निकालना **(सम्राजा)** जो अच्छी प्रकाशमान **(ता)** उन उक्त महाशयों को भली-भांति ग्रहण करो, **(अथ)** इसके अनन्तर **(एनोः)** इन दोनों का **(क्षत्रम्)** राज्य **(आधृषे)** ढिठाई देने को **(चित्)** और **(देवत्वम्)** विद्वान् पन **(आधृषे)** ढिठाई देने को **(कुतश्चन)** कहीं से **(न)** न नष्ट हो॥१॥

भावार्थः-जो बहुतकाल से प्रवृत्त पढ़ाने और उपदेश करनेवालों के समीप से विद्या और अच्छे उपदेशों को शीघ्र ग्रहण करते, वे चक्रवर्ति राजा होने के योग्य होते हैं और न इनका ऐश्वर्य कभी नष्ट होता है॥१॥

पुनर्मनुष्याः किं प्राप्य कीदृशा भवन्तीत्याह॥

फिर मनुष्य क्या पाकर कैसे होते हैं, इस विषय को अगले मन्त्र में कहा है॥

अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः।
द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च।
अथा दधाते बृहदुक्थ्यं१ वय उपस्तुत्यं बृहद्वयः॥२॥

अदर्शि। गातुः। उरवे। वरीयसी। पन्थाः। ऋतस्य। सम्। अयंस्त। रश्मिऽभिः। चक्षुः। भगस्य। रश्मिऽभिः। द्युक्षम्। मित्रस्य। सदनम्। अर्यम्णः। वरुणस्य। च। अथ। दधाते इति। बृहत्। उक्थ्यम्। वयः। उपऽस्तुत्यम्। बृहत्। वयः॥२॥

पदार्थः-**(अदर्शि)** **(गातुः)** भूमिः **(उरवे)** विस्तृताय **(वरीयसी)** अतिशयेन वरा **(पन्थाः)** मार्गः **(ऋतस्य)** जलस्य **(सम्)** **(अयंस्त)** उपयच्छति **(रश्मिभिः)** किरणैः **(चक्षुः)** नेत्रम् **(भगस्य)** सूर्यस्येव धनस्य। **भग इति धननामसु पठितम्।** (निघं०२.१०) **(रश्मिभिः)** किरणैः **(द्युक्षम्)** द्युलोकस्थम् **(मित्रस्य)** सुहृदः **(सादनम्)** सीदन्ति यस्मिँस्तत्। अत्रा**न्येषामपि दृश्यत** इति दीर्घः। **(अर्यम्णः)** न्यायाधीशस्य **(वरुणस्य)** श्रेष्ठस्य **(च)** **(अथ)** अत्र **निपातस्य चे**ति दीर्घः। **(दधाते)** **(बृहत्)** महत् **(उक्थ्यम्)** वक्तुं योग्यम् **(वयः)** पक्षिणः **(उपस्तुत्यम्)** **(बृहत्)** **(वयः)** कमितारः॥२॥

अन्वयः-येनोरवे वरीयसी गातुरदर्शि यत्र सूर्य्यस्य रश्मिभिरिव रश्मिभिस्सह चक्षुर्ऋतस्य भगस्य पन्थाः समयंस्त मित्रस्यार्य्यम्णो वरुणस्य द्युक्षं सादनं समयंस्ताथ वयो बृहदिव ये वय उपस्तुत्यं बृहदुक्थ्यं दधति यौ दधाते ते सुखं प्राप्नुवन्ति॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यप्रकाशेन पृथिव्यां मार्गा दृश्यन्ते तथैवोत्तमानां विदुषां संगेन सत्या विद्याः प्रकाश्यन्ते यथा पक्षिण उत्तममाश्रयं प्राप्यानन्दन्ति तथा सद्विद्याः प्राप्य जनाः सदा सुखयन्ति॥२॥

पदार्थः-जिससे **(उरवे)** बहुत बड़े के लिये **(वरीयसी)** अतीव श्रेष्ठ **(गातुः)** भूमि **(अदर्शि)** दीखती वा जहाँ सूर्य के **(रश्मिभिः)** किरणों के समान **(रश्मिभिः)** किरणों के साथ **(चक्षुः)** नेत्र **(ऋतस्य)** जल और **(भगस्य)** सूर्य के समान धन का **(पन्था)** मार्ग **(समयंस्त)** मिलता वा **(मित्रस्य)** मित्र **(अर्यम्णः)** न्यायाधीश और **(वरुणस्य)** श्रेष्ठ पुरुष का **(द्युक्षम्)** प्रकाश लोकस्थ **(सादनम्)** जिसमें स्थिर होते वह घर प्राप्त होता **(अथ)** अथवा जैसे **(वयः)** बहुत पखेरू **(बृहत्)** एक बड़े काम को वैसे जो **(वयः)** मनोहर जन **(उपस्तुत्यम्)** समीप से प्रशंसनीय **(बृहत्)** बड़े **(उक्थ्यम्)** और कहने योग्य काम को धारण करते **(च)** और जो दो मिलकर किसी काम को **(दधाते)** धारण करते, वे सब सुख पाते हैं॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य के प्रकाश से भूमि पर मार्ग दीखते हैं, वैसे ही उत्तम विद्वानों के सङ्ग से सत्य विद्याओं का प्रकाश होता है। वा जैसे पखेरू उत्तम आश्रय स्थान पाकर आनन्द पाते हैं, वैसे उत्तम विद्याओं को पाकर मनुष्य सब कभी सुख पाते हैं॥२॥

पुनर्विद्वद्भिः किंवत्किं प्राप्तव्यमित्याह॥

फिर विद्वानों को किसके समान क्या पाना चाहिये, इस विषय को अगले मन्त्र में कहा हैं॥

ज्योति॑ष्मती॒मदि॑तिं धार॒यत्क्षि॒॑तिं॒ स्व॑र्व॒तीमा स॒चेते दि॒वेदि॑वे जागृ॒वांसा॑ दि॒वेदि॑वे।
ज्योति॑ष्मत्क्ष॒त्रमा॒॑शाते आदि॒त्या दानु॒॑नस्पती॑।
मि॒त्रस्तयो॒र्वरु॑णो यात॒यज्ज॒॑नोऽर्य॒मा या॒॑तय॒ज्जन॑ः॥३॥

ज्योति॑ष्मतीम्। अदि॑तिम्। धा॒र॒यत्ऽक्षि॒॑तिम्। स्व॑ःऽवतीम्। आ। स॒चेते॒ इति॑। दि॒वेऽदि॑वे। जा॒गृ॒वांसा॑। दि॒वेऽदि॑वे। ज्योति॑ष्मत्। क्ष॒त्रम्। आ॒शा॒ते॒ इति॑। आ॒दि॒त्या। दानु॒॑नः। पती॒ इति॑। मि॒त्रः। तयो॑ः। वरु॑णः। या॒त॒यत्ऽज॒॑नः। अ॒र्य॒मा। या॒त॒यत्ऽज॒॑नः॥३॥

पदार्थः-(**ज्योतिष्मतीम्**) बहुतेजोयुक्ताम् (**अदितिम्**) दिवम् (**धारयत्क्षितिम्**) भूमिं धरन्तीम् (**स्वर्वतीम्**) बहुसुखकारिकाम् (**आ**) (**सचेते**) समवेतः (**दिवेदिवे**) प्रतिदिनम् (**जागृवांसा**) जागृतौ (**दिवेदिवे**) प्रतिदिनम् (**ज्योतिष्मत्**) बहुन्याययुक्तम् (**क्षत्रम्**) राज्यम् (**आशाते**) प्राप्नुतः (**आदित्या**) सूर्यप्राणौ (**दानुनः**) दानस्य (**पती**) पालयितारौ (**मित्रः**) सर्वप्राणः (**तयोः**) (**वरुणः**) वरः (**यातयज्जनः**) यातयन्तः प्रयत्नकारयितारो जना यस्य सः (**अर्यमा**) न्यायेशः (**पातयज्जनः**) पुरुषार्थवत्पुरुषः॥३॥

अन्वयः-यथाऽऽदित्या दिवेदिवे स्वर्वतीं धारयित्क्षतिं ज्योतिष्मतीमदितिमासचेते तथा यातयज्जनोऽर्यमा वरुणो यातयज्जनो मित्रश्च दानुनस्पती जागृवांसा सभासेनेशौ दिवेदिवे ज्योतिष्मत् क्षत्रमाशाते तयोः प्रभावेण सर्वाः प्रजाः सेनाश्चाऽत्यन्तं सुखं प्राप्नुवन्ति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यप्राणवद्योगिवच्च सचेतना भूत्वा विद्याविनयधर्मैः सेनाः प्रजाश्च रञ्जयन्ति तेऽत्यन्तं यशः प्राप्नुवन्ति॥३॥

पदार्थः-जैसे **(आदित्या)** सूर्य और प्राण **(दिवेदिवे)** प्रतिदिन **(स्वर्वतीम्)** बहुत सुख करनेवाले **(धारयत्क्षितिम्)** और भूमि को धारण करते हुए **(ज्योतिष्मतीम्)** प्रकाशवान् **(अदितिम्)** द्युलोक का **(आसचेते)** सब ओर से सम्बन्ध करते हैं, वैसे **(यातयज्जनः)** जिसके अच्छे प्रयत्न करानेवाले मनुष्य हैं, वह **(अर्यमा)** न्यायाधीश **(वरुणः)** श्रेष्ठ प्राण तथा **(यातयज्जनः)** पुरुषार्थवान् पुरुष **(मित्रः)** सबका प्राण और **(दानुनः)** दान की **(पती)** पालना करनेवाले **(जागृवांसा)** सब काम में जगे हुए सभा सेनाधीश **(दिवेदिवे)** प्रतिदिन **(ज्योतिष्मत्)** बहुत न्याययुक्त **(क्षत्रम्)** राज्य को **(आशाते)** प्राप्त होते **(तयोः)** उनके प्रभाव से समस्त प्रजा और सेनाजन अत्यन्त सुख को प्राप्त होते हैं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य, प्राण और योगीजन के समान सचेत होकर विद्या, विनय और धर्म से सेना और प्रजाजनों को प्रसन्न करते हैं, वे अत्यन्त यश पाते हैं॥३॥

पुनरत्र मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर इस संसार में मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः।
तं देवासो जुषेरत विश्वे अद्य सजोषसः।
तथा राजाना करथो यदीमह ऋतावाना यदीमहे॥४॥

अयम्। मित्राय। वरुणाय। शम्ऽतमः। सोमः। भूतु। अवऽपानेषु। आऽभगः। देवः। देवेषु। आऽभगः। तम्। देवासः। जुषेरत। विश्वे। अद्य। सऽजोषसः। तथा। राजाना। करथः। यत्। ईमहे। ऋतऽवाना। यत्। ईमहे॥४॥

पदार्थः-(**अयम्**) **(मित्राय)** सर्वसुहृदे **(वरुणाय)** सर्वोत्कृष्टाय **(शंतमः)** अतिशयेन सुखकारी **(सोमः)** सुखैश्वर्यकारको न्यायः **(भूतु)** भवतु। अत्र शपो लुक्, **भसुवोस्तिडी**ति गुणप्रतिषेधः। **(अवपानेषु)** अत्यन्तेषु रक्षणेषु **(आभगः)** समस्तैश्वर्यः **(देवः)** सुखप्रदाता **(देवेषु)** दिव्येषु विद्वत्सु गुणेषु वा **(आभगः)** समस्तसौभाग्यः **(तम्)** **(देवासः)** विद्वांसः **(जुषेरत)** सेवेरन्प्रीणन्तु वा। अत्र **बहुलं छन्दसी**ति रुडागमः। **(विश्वे)** सर्वे **(अद्य)** **(सजोषसः)** समानं धर्मं सेवमानाः **(तथा)** **(राजाना)** प्रकाशमानौ सभासेनेशौ **(करथः)** कुर्य्याताम् **(यत्)** यम् **(ईमहे)** याचामहे **(ऋतावाना)** ऋतस्य सत्यस्य सम्बन्धिनौ। अत्र**ान्येषामपि दृश्यत** इति दीर्घः। **(यत्)** यम् **(ईमहे)**॥४॥

अन्वयः-यथाऽयमवपानेषु मित्राय वरुणायाभगः शंतमः सोमो भूतु तथा यो देवो देवेष्वाभगो भवतु तमद्य सजोषसो विश्वे देवासो जुषेरत यथा यद्यं राजाना करथस्तथा तं वयमीमहे यथा ऋतावाना यद्यं करथस्तथा तं वयमीमहे॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। इह संसारे यथाऽऽप्ता धर्म्येण व्यवहारेणैश्वर्यमुन्नीय सर्वेषामुपकारके कर्मणि व्ययन्ति यथा सत्यं जिज्ञासवो धार्मिकान् विदुषो याचते तथा सर्वे मनुष्याः स्वमैश्वर्यं सत्कर्मणि व्ययेयुः, विद्वद्भ्यो विद्याश्च याचेरन्॥४॥

पदार्थः-जैसे **(अयम्)** यह **(अवपानेषु)** अत्यन्त रक्षा आदि व्यवहारों में **(मित्राय)** सब के मित्र और **(वरुणाय)** सब से उत्तम के लिये **(आभगः)** समस्त ऐश्वर्य **(शंतमः)** अतीव सुख **(सोमः)** और सुखयुक्त ऐश्वर्य्य करनेवाला न्याय **(भूतु)** हो वैसे जो **(देवः)** सुख अच्छे प्रकार देनेवाला **(देवेषु)** दिव्य विद्वानों और दिव्य गुणों में **(आभगः)** समस्त सौभाग्य हो **(तम्)** उसको **(अद्य)** आज **(सजोषसः)** समान धर्म का सेवन करनेवाले **(विश्वे)** समस्त **(देवासः)** विद्वान् जन **(जुषेरत)** सेवन करें वा उससे प्रीति करें और जैसे **(यत्)** जिस व्यवहार को **(राजाना)** प्रकाशमान सभा सेनापति **(करथः)** करें **(तथा)** वैसे उस व्यवहार को हम लोग **(ईमहे)** मांगते और जैसे **(ऋतावाना)** सत्य का सम्बन्ध करनेवाले **(यत्)** जिस काम को करें, वैसे उसको हम लोग भी **(ईमहे)** याचें मांगें॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। इस संसार में जैसे शास्त्रवेत्ता विद्वान् धर्म के अनुकूल व्यवहार (से) ऐश्वर्य्य की उन्नति कर सब के उपकार करनेहारे काम में खर्च करते वा जैसे सत्य व्यवहार को जानने की इच्छा करनेवाले धार्मिक विद्वानों को याचते अर्थात् उनसे अपने प्रिय पदार्थ को मांगते, वैसे सब मनुष्य अपने ऐश्वर्य को अच्छे काम में खर्च करें और विद्वान् महाशयों से विद्याओं की याचना करें॥४॥

पुनर्विद्वांसः कस्मै किं कुर्युरित्याह॥

फिर विद्वान् किसके लिये क्या करें, इस विषय को अगले मन्त्र में कहा है॥

यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं मर्तमंहसः।
तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम्।
उक्थैर्य एनोः परिभूषति व्रतं स्तौमैराभूषति व्रतम्॥५॥

यः। मित्राय। वरुणाय। अविधत्। जनः। अनर्वाणम्। तम्। परि। पातः। अंहसः। दाश्वांसम्। मर्तम्। अंहसः। तम्। अर्यमा। अभि। रक्षति। ऋजुऽयन्तम्। अनु। व्रतम्। उक्थैः। यः। एनोः। परिऽभूषति। व्रतम्। स्तोमैः। आऽभूषति। व्रतम्॥५॥

पदार्थः- **(यः)** **(मित्राय)** सर्वोपकारकाय **(वरुणाय)** सर्वोत्तमस्वभावाय **(अविधत्)** परिचरेत् **(जनः)** यशसा प्रादुर्भूतः **(अनर्वाणम्)** द्वेषादिदोषरहितम् **(तम्)** **(परि)** सर्वतः **(पातः)** रक्षतः **(अंहसः)** दुष्टाचारात् **(दाश्वांसम्)** विद्यादातारम् **(मर्त्तम्)** मनुष्यम् **(अंहसः)** पापात् **(तम्)** **(अर्यमा)** न्यायकारी **(अभि)** **(रक्षति)** **(ऋजूयन्तम्)** आत्मनः ऋजुभावमिच्छन्तम् **(अनु)** **(व्रतम्)** सत्याचारशीलम् **(उक्थैः)**

वक्तुमर्हैरुपदेशैः **(यः)** **(एनोः)** एनयोः **(परिभूषति)** सर्वतोऽलङ्करोति **(व्रतम्)** सुशीलम् **(स्तोमैः)** स्तोतुमर्हैः **(आभूषति)** समन्तादाप्नोति **(व्रतम्)** सुशीलताम्॥५॥

अन्वयः–हे सभासेनेशौ! यो जनो मित्राय वरुणाय युवाभ्यामविधत् तमनर्वाणं मर्त्तमंहसो युवां परिपातस्तं दाश्वांसं मर्त्तमंहसः परि पातः योऽर्यमा व्रतमृजूयन्तमभिरक्षति तं युवामनुरक्षथो य एनोरुक्थैर्व्रतं परिभूषति स्तोमैर्व्रतमाभूषति तं सर्वे विद्वांसः सततमारक्षन्तु॥५॥

भावार्थः–विद्वांसो ये धर्माऽधर्मौ विविदिषेयुर्धर्मस्य ग्रहणमधर्मस्य त्यागं च चिकीर्षेयुस्तानध्याप्योपदिश्य विद्याधर्मादिशुभगुणकर्मस्वभावैः सर्वत आभूषयेयुः॥५॥

पदार्थः–हे सभासेनाधीशो! **(यः)** जो **(जनः)** यश से प्रसिद्ध हुआ **(मित्राय)** सर्वोपकार करने **(वरुणाय)** और सबसे उत्तम स्वभाववाले मनुष्य के लिये तुम दोनों से **(अविधत्)** सेवा करे **(तम्)** उस **(अनर्वाणम्)** वैर आदि दोषों से रहित **(मर्त्तम्)** मनुष्य को **(अंहसः)** दुष्ट आचरण से तुम दोनों **(परिपातः)** सब ओर से बचाओ तथा **(तम्)** उस **(दाश्वांसम्)** विद्या देनेवाले मनुष्य को **(अंहसः)** पाप से बचाओ **(यः)** जो **(अर्यमा)** न्याय करनेवाला सज्जन **(व्रतम्)** सत्य आचरण करने और **(ऋजूयन्तम्)** अपने को कोमलपन चाहते हुए मनुष्य की **(अभिरक्षति)** सब ओर से रक्षा करता उसकी तुम दोनों **(अनु)** पीछे रक्षा करो जो **(एनोः)** इन दोनों के **(उक्थैः)** कहने योग्य उपदेशों से **(व्रतम्)** सुन्दर शील को **(परिभूषति)** सब ओर से सुशोभित करता वा **(स्तौमैः)** प्रशंसा करने योग्य व्यवहारों से **(व्रतम्)** सुन्दर शील को **(आभूषति)** अच्छे प्रकार शोभित करता, उसको सब विद्वान् निरन्तर पालें॥५॥

भावार्थः–विद्वान् जन जो लोग धर्म और अधर्म को जानना चाहें तथा धर्म का ग्रहण और अधर्म का त्याग करना चाहें, उनको पढ़ा और उपदेश कर विद्या और धर्म आदि शुभ गुण, कर्म और स्वभाव से सब ओर से सुशोभित करें॥५॥

पुनर्मनुष्यैः किंवत्किं कुर्युरित्याह॥

फिर मनुष्यों को किसके समान क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

नमो॑ दि॒वे बृ॒॑हते रोद॑सीभ्यां मि॒त्राय॑ वोचं॒ वरु॑णाय मी॒ळ्हुषे॑ सुमृळी॒काय॑ मी॒ळ्हुषे॑।
इन्द्र॑म॒ग्निमुप॑ स्तुहि द्यु॒क्षमर्य॒मण॑ं भग॑म्।
ज्योग्जीव॑न्तः प्र॒जया॑ सचेमहि॒ सोम॑स्यो॒ती स॑चेमहि॥६॥

नम॑ः। दि॒वे। बृ॒हते। रोद॑सीभ्याम्। मि॒त्राय॑। वो॒च॒म्। वरु॑णाय। मी॒ळ्हुषे॑। सु॒ऽमृ॒ळी॒काय॑। मी॒ळ्हुषे॑। इन्द्र॑म्। अ॒ग्निम्। उप॑। स्तु॒हि॒। द्यु॒क्षम्। अ॒र्य॒मण॑म्। भग॑म्। ज्योक्। जीव॑न्तः। प्र॒ऽजया॑। स॒चे॒म॒हि॒। सोम॑स्य। ऊ॒ती। स॒चे॒म॒हि॒॥६॥

पदार्थः-(**नमः**) सत्करणम् (**दिवे**) द्योतकाय (**बृहते**) महते (**रोदसीभ्याम्**) द्यावापृथिवीभ्याम् (**मित्राय**) सर्वसुहृदे (**वोचम्**) उच्याम्। अत्राडभावः। (**वरुणाय**) वराय (**मीढुषे**) शुभगुणसेचकाय (**सुमृळीकाय**) सुखकारकाय (**मीढुषे**) सुखप्रदाय (**इन्द्रम्**) परमैश्वर्यम् (**अग्निम्**) पावकवद्वर्त्तमानम् (**उप**) (**स्तुहि**) प्रशंस (**द्युक्षम्**) द्योतमानम् (**अर्यमणम्**) न्यायाधीशम् (**भगम्**) धर्मं सेवमानम् (**ज्योक्**) निरन्तरम् (**जीवन्तः**) प्राणान् धरन्तः (**प्रजया**) सुसन्तानाद्यया सह (**सचेमहि**) समवयेम (**सोमस्य**) ऐश्वर्यस्य (**ऊती**) ऊत्या रक्षणाद्यया क्रियया साकम् (**सचेमहि**) व्याप्नुयाम॥६॥

अन्वयः-हे विद्वन्! यथाऽहं बृहते दिवे रोदसीभ्यां मित्राय वरुणाय मीढुषे सुमृळीकाय मीढुषे नमो वोचं तथा त्वं वदेथाः। यथाऽहमिन्द्रमग्निं द्युक्षमर्य्यमणं भगं वोचं तथा त्वमुपस्तुहि। यथा जीवन्तो वयं प्रजया सह ज्योक् सचेमहि सोमस्योती सह सचेमहि तथा त्वमपि सचस्व॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्काराः। मनुष्यैर्विदुषामनुकरणं कृत्वा पदार्थविद्यायै प्रवर्त्य प्रजैश्वर्यं प्राप्य सततं मोदितव्यम्॥६॥

पदार्थः-हे विद्वान्! जैसे में (**बृहते**) बहुत (**दिवे**) प्रकाश करनेवाले के लिये वा (**रोदसीभ्याम्**) प्रकाश और पृथिवी से (**मित्राय**) सबके मित्र (**वरुणाय**) श्रेष्ठ (**मीढुषे**) शुभ गुणों से सींचने (**सुमृळीकाय**) सुख करने और (**मीढुषे**) अच्छे प्रकार सुख देनेवाले जन के लिये (**नमः**) सत्कार वचन (**वोचम्**) कहूं वैसे आप कहो, वा जैसे मैं (**इन्द्राय**) परमैश्वर्यवाले (**अग्निम्**) अग्नि के समान वर्त्तमान (**द्युक्षम्**) प्रकाशयुक्त (**अर्य्यमणम्**) न्यायाधीश और (**भगम्**) धर्म सेवनेवाले को कहूं वैसे आप (**उप, स्तुहि**) उसके समीप प्रशंसा करो, वा जैसे (**जीवन्तः**) प्राण धारण किये जीवते हुए हम लोग (**प्रजया**) अच्छे सन्तान आदि सहित प्रजा के साथ (**ज्योक्**) निरन्तर (**सचेमहि**) सम्बद्ध हों और (**सोमस्य**) ऐश्वर्य की (**ऊतीः**) रक्षा आदि किया के साथ (**सचेमहि**) सम्बद्ध हों, वैसे आप भी सम्बद्ध होओ॥६॥

भावार्थः-इस मन्त्र में अनेक वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को विद्वानों के समान चाल-चलन कर पदार्थविद्या के लिये प्रवृत्त हो तथा प्रजा और ऐश्वर्य को पाकर निरन्तर आनन्दयुक्त होना चाहिये॥६॥

पुनर्विद्वांसोऽत्र जगति किंवद्वर्त्तेरन्नित्याह॥

फिर विद्वान् जन इस संसार में किसके समान वर्त्तें, इस विषय को अगले मन्त्र में कहा है॥

ऊ॒ती दे॒वाना॑ व॒यमिन्द्र॑वन्तो मंसी॒महि॒ स्वय॑शसो म॒रुद्भि॑:।

अ॒ग्निर्मि॒त्रो वरु॑ण॒: शर्म॑ यंस॒न्तद॑श्याम म॒घवा॑नो व॒यं च॑॥७॥२६॥१॥

ऊ॒ती। दे॒वाना॑म्। व॒यम्। इन्द्र॑ऽवन्तः। मं॒सी॒महि॑। स्वऽय॑शसः। म॒रुत्ऽभिः॑। अ॒ग्निः। मि॒त्रः। वरु॑णः। शर्म॑। यं॒स॒न्। तत्। अ॒श्या॒म॒। म॒घऽवा॑नः। व॒यम्। च॒॥७॥

पदार्थः-(**ऊती**) रक्षणाद्यया क्रियया। अत्र **सुपां सुलुगि**ति पूर्वसवर्णः (**देवानाम्**) सत्यं कामयमानानां विदुषाम् (**वयम्**) (**इन्द्रवन्तः**) बह्वैश्वर्ययुक्ताः (**मंसीमहि**) जानीयाम (**स्वयशसः**) स्वकीयं यशो येषान्ते (**मरुद्भिः**) प्राणैरिव वर्त्तमानैः श्रेष्ठैर्जनैः सह (**अग्निः**) विद्युदादिस्वरूपः (**मित्रः**) सूर्यः (**वरुणः**) चन्द्रः (**शर्म्म**) सुखम् (**यंसन्**) प्रयच्छन्ति। अत्र **वाच्छन्दसी**त्युसभावः। लुङ्यडभावश्च। (**तत्**) (**अश्याम**) भुञ्जीमहि (**मघवानः**) परमपूजितैश्वर्ययुक्ताः (**वयम्**) (**च**)॥७॥

अन्वयः-यथा मरुद्भिः सहाग्निर्मित्रो वरुणः शर्म यंसँस्तथा तदिन्द्रवन्तः स्वयशसो वयं देवानामूती मंसीमहि। अनेन च वयं मघवानो भद्रमश्याम॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽत्र जगति पृथिव्यादयः पदार्थाः सुखैश्वर्यकारकाः सन्ति तथैव विदुषां शिक्षासंगाः सन्त्येतैर्वयं सुखैश्वर्या भूत्वा सततं मोदेमहीति॥७॥

अत्र वाय्विन्द्रादिपदार्थदृष्टान्तैर्मनुष्येभ्यो विद्याशिक्षावर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

अस्मिन्नध्याये क्रोधादिनिवारणाऽन्नादिरक्षणादयः परमैश्वर्यप्राप्त्यन्ताश्चार्था उक्ता अत एतदध्यायोक्तार्थानां पूर्वाऽध्यायोक्तार्थैः सह संगतिरस्तीति वेद्यम्॥

इत्यृग्वेदे द्वितीयाऽष्टके प्रथमोऽध्यायः षड्विंशो २६ वर्गः प्रथमे मण्डले षट्त्रिंशदुत्तरं शततमं १३६ सूक्तं च समाप्तम्॥

पदार्थः-जैसे (**मरुद्भिः**) प्राणों के समान श्रेष्ठ जनों के साथ (**अग्निः**) बिजुली आदि रूपवाला अग्नि (**मित्रः**) सूर्य (**वरुणः**) चन्द्रमा (**शर्म**) सुख को (**यंसन्**) देते हैं, वैसे (**तत्**) उस सुख को (**इन्द्रवन्तः**) बहुत ऐश्वर्ययुक्त (**स्वयशसः**) जिनके अपना यश विद्यमान वे (**वयम्**) हम लोग (**देवानाम्**) सत्य की कामना करनेवाले विद्वानों की (**ऊती**) रक्षा आदि क्रिया से (**मंसीमहि**) जानें (**च**) और इससे (**वयम्**) हम लोग (**मघवानः**) परम ऐश्वर्ययुक्त हुए कल्याण को (**अश्याम**) भोगें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इस संसार में पृथिवी आदि पदार्थ सुख और ऐश्वर्य करनेवाले हैं, वैसे ही विद्वानों की सिखावट और उनके सङ्ग हैं। इनसे हम लोग सुख और ऐश्वर्यवाले होकर निरन्तर आनन्दयुक्त हों॥७॥

इस सूक्त में वायु और इन्द्र आदि पदार्थों के दृष्टान्तों से मनुष्यों के लिये विद्या और उत्तम शिक्षा का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ एकता है, यह जानना चाहिये॥

इस अध्याय में क्रोध आदि का निवारण, अन्न आदि की रक्षा और परम ऐश्वर्य की प्राप्ति पर्यन्त अर्थ कहे हैं, इससे इस अध्याय में कहे हुए अर्थों को पिछले अध्याय में कहे हुए अर्थों के साथ सङ्गति है, यह जानना चाहिये॥

यह ऋग्वेद में दूसरे अष्टक में पहला अध्याय और छब्बीसवां २६ वर्ग तथा प्रथम मण्डल में एक सौ छत्तीसवां १३६ सूक्त पूरा हुआ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां परमविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाभ्यां समन्विते सुप्रमाणयुक्त ऋग्वेदभाष्ये द्वितीयाष्टके प्रथमोऽध्यायः समाप्तः॥

॥ओ३म्॥

अथ द्वितीयाष्टके द्वितीयाध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

सुषुमेत्यस्य त्र्यृचस्य सप्तत्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। मित्रावरुणौ देवते। १ निचृच्छक्वरी छन्दः। २ विराट् शक्वरी छन्दः। गान्धारः स्वरः। ३ भुरिगतिशक्वरी छन्दः। पञ्चमः स्वरः॥

अथ मनुष्याः किंवदत्र वर्त्तेरन्नित्याह॥

अब दूसरे अष्टक में द्वितीय अध्याय का आरम्भ और तीन ऋचावाले एक सौ सैंतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में मनुष्य इस संसार में किसके समान वर्तें, इस विषय को कहा है॥

सु॒षु॒मा या॑त॒मद्रि॑भि॒र्गोश्री॑ता॒ मत्स॒रा इ॒मे सोमा॑सो॒ मत्स॒रा इ॒मे।
आ रा॑जाना दिविस्पृशास्म॒त्रा ग॑न्त॒मुप॑ नः।
इ॒मे वां॑ मित्रावरुणा॒ गवा॑शिरः॒ सोमा॑: शु॒क्रा गवा॑शिरः॥ १॥

सु॒षु॒म। आ। या॒त॒म्। अद्रि॑ऽभिः। गोऽश्री॑ताः। म॒त्स॒राः। इ॒मे। सोमा॑सः। म॒त्स॒राः। इ॒मे। आ। रा॒जा॒ना॒। दि॒वि॒ऽस्पृ॒शा॒। अ॒स्म॒ऽत्रा। ग॒न्त॒म्। उप॑। नः॒। इ॒मे। वा॒म्। मि॒त्रा॒व॒रु॒णा॒। गोऽआ॑शिरः। सोमा॑ः। शु॒क्राः। गोऽआ॑शिरः॥ १॥

पदार्थः-(**सुषुम**) निष्पादयेम। (**आ**) (**यातम्**) समन्तात् प्राप्नुतम् (**अद्रिभिः**) मेघैः **अद्रिभिरिति मेघनामसु पठितम्।** (निघं०१.१०) (**गोश्रीताः**) गाः किरणान् श्रीताः प्राप्ताः (**मत्सराः**) आनन्दप्रापकाः (**इमे**) (**सोमासः**) सोमाद्योषधिसमूहाः (**मत्सराः**) आनन्दयुक्ताः (**इमे**) (**आ**) (**राजाना**) प्रकाशमानौ (**दिविस्पृशा**) यौ दिवि शुद्धे व्यवहारे स्पृशतस्तौ (**अस्मत्रा**) अस्मासु मध्ये (**गन्तम्**) प्राप्नुतम् (**उप**) (**नः**) अस्मान् (**इमे**) (**वाम्**) युवाम् (**मित्रावरुणा**) प्राणोदानाविव वर्त्तमानौ (**गवाशिरः**) ये गोभिरिन्द्रियैर्वाऽश्यन्ते (**सोमाः**) ऐश्वर्ययुक्ताः पदार्थाः (**शुक्राः**) शुद्धाः (**गवाशिरः**) ये गोभिः किरणैरश्यन्ते॥ १॥

अन्वयः-हे मित्रावरुणा! दिविस्पृशा राजाना य इमेऽद्रिभिर्गोश्रीता मत्सरा वयं सुषुम तान् वां युवामायातम्। य इमे मत्सराः सोमासः सन्ति तानस्मत्राऽऽयातं य इमे गवाशिर इव शुक्राः सोमा गवाशिर- स्तान्नोऽस्मांश्चोपागन्तम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। अस्मिञ्जगति यथा पृथिव्यादयः पदार्था जीवनहेतवः सन्ति, तथा मेघा अतीव प्राणप्रदास्सन्ति यथेमे वर्त्तन्ते तथैव मनुष्याः वर्त्तेरन्॥१॥

पदार्थः-हे **(मित्रावरुणा)** प्राण और उदान के समान वर्त्तमान **(दिविस्पृशा)** शुद्ध व्यवहार में स्पर्श करनेवाले **(राजाना)** प्रकाशमान सभासेनाधीशो! जो **(इमे)** ये **(अद्रिभिः)** मेघों से **(गोश्रीताः)** किरणों को प्राप्त **(मत्सराः)** आनन्दप्रापक हम लोग **(सुषुम)** किसी व्यवहार को सिद्ध करें, उसको **(वाम्)** तुम दोनों **(आयातम्)** आओ अच्छे प्रकार प्राप्त होओ, जो **(इमे)** ये **(मत्सराः)** आनन्द पहुंचानेहारी **(सोमासः)** सोमवल्ली आदि ओषधि हैं, उनको **(अस्मत्रा)** हम लोगों में अच्छी प्रकार पहुंचाओ, जो **(इमे)** ये **(गवाशिरः)** गौएँ वा इन्द्रियों से व्याप्त होते उनके समान **(शुक्राः)** शुद्ध **(सोमाः)** ऐश्वर्ययुक्त पदार्थ और **(गवाशिरः)** गौएं वा किरणों से व्याप्त होते उनको और **(नः)** हम लोगों के **(उपागन्तम्)** समीप पहुंचो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। इस जगत् में जैसे पृथिवी आदि पदार्थ जीवन के हेतु हैं, वैसे मेघ अतीव जीवन देनेवाले हैं, जैसे ये सब वर्त्त रहे हैं, वैसे मनुष्य वर्त्तें॥१॥

अथौषध्यादिरसपानविषयमाह॥

अब ओषधि आदि पदार्थों के रस के पीने आदि के विषय को अगले मन्त्र में कहा है॥

इ॒म आ या॑त॒मिन्द॑वः॒ सोमा॑सो॒ दध्या॑शिरः॒ सुता॑सो॒ दध्या॑शिरः।
उ॒त वा॒मु॒षसो॑ बु॒धि सा॒कं सूर्य॑स्य र॒श्मिभिः॑।
सु॒तो मि॒त्राय॒ वरु॑णाय पी॒तये॒ चारु॒रृ॒ताय॑ पी॒तये॑॥ २॥

इ॒मे। आ। या॒त॒म्। इन्द॑वः। सोमा॑सः। दध्या॑शिरः। सु॒ता॑सः। दध्या॑शिरः। उ॒त। वा॒म्। उ॒षसः॑। बु॒धि। सा॒कम्। सूर्य॑स्य। र॒श्मिऽभिः॑। सु॒तः। मि॒त्राय॑। वरु॑णाय। पी॒तये॑। चारुः॑। ऋ॒ताय॑। पी॒तये॑॥ २॥

पदार्थः-**(इमे)** **(आ)** **(यातम्)** **(इन्दवः)** आर्द्रीभूताः **(सोमासः)** दिव्यौषधिरसाः **(दध्याशिरः)** ये दध्ना अश्यन्ते ते **(सुतासः)** संपादिताः **(दध्याशिरः)** **(उत)** अपि **(वाम्)** युवाभ्याम् **(उषसः)** **(बुधि)** बोधे। अत्र संपदादिलक्षणः क्विप्। **(साकम्)** सह **(सूर्य्यस्य)** **(रश्मिभिः)** किरणैः **(सुतः)** अभिनिष्पादितः **(मित्राय)** सुहृदे **(वरुणाय)** वराय **(पीतये)** पानाय **(चारुः)** सुन्दरः **(ऋताय)** सत्याचाराय **(पीतये)** पानाय॥२॥

अन्वयः-हेऽध्यापकाऽध्येतारौ! यश्चारुर्मित्राय पीतये वरुणायर्ताय पीतये चोषसो बुधि सूर्यस्य रश्मिभिः साकं सोमस्सुतस्तं युवामायातम्। वां य इम इन्दवः सोमासो दध्याशिर इव दध्याशिरस्सुतासः सन्ति तानुताप्यायातम्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरस्मिन् संसारे यावन्तो रसा ओषधयश्च निर्मातव्यास्तावन्तः सर्वे सौहार्दोत्तमकर्मसेवनायालस्यादिनाशाय च समर्पणीयाः॥२॥

पदार्थः-हे पढ़ाने वा पढ़नेवाले! जो **(चारुः)** सुन्दर **(मित्राय)** मित्र के लिये **(पीतये)** पीने को और **(वरुणाय)** उत्तम जन के लिये **(ऋताय)** सत्याचरण और **(पीतये)** पीने को **(उषसः)** प्रभात वेला के **(बुधि)** प्रबोध में सूर्यमण्डल की **(रश्मिभिः)** किरणों के **(साकम्)** साथ ओषधियों का रस **(सुतः)** सब ओर से सिद्ध किया गया है, उसको तुम **(आयातम्)** प्राप्त होओ तथा **(वाम्)** तुम्हारे लिये **(इमे)** ये **(इन्दवः)** गीले वा टपकते हुए **(सोमासः)** दिव्य ओषधियों के रस और **(दध्याशिरः)** जो पदार्थ दही के साथ भोजन किये जाते उनके समान **(दध्याशिरः)** दही से मिले हुए भोजन **(सुतासः)** सिद्ध किये गये हैं **(उत)** उन्हें भी प्राप्त होओ॥२॥

भावार्थः-मनुष्यों को चाहिये कि इस संसार में जितने रस वा ओषधियों को सिद्ध करें, उन सबको मित्रपन और उत्तम कर्म सेवने को तथा आलस्यादि दोषों के नाश करने को समर्पण करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः।
अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः॥३॥१॥

ताम्। वाम्। धेनुम्। न। वासरीम्। अंशुम्। दुहन्ति। अद्रिऽभिः। सोमम्। दुहन्ति। अद्रिऽभिः। अस्मऽत्रा। गन्तम्। उप। नः। अर्वाञ्चा। सोमऽपीतये। अयम्। वाम्। मित्रावरुणा। नृऽभिः। सुतः। सोमः। आ। पीतये। सुतः॥३॥

पदार्थः-**(ताम्)** **(वाम्)** युवयोः **(धेनुम्)** **(न)** इव **(वासरीम्)** निवासयित्रीम् **(अंशुम्)** विभक्तां सोमवल्लीम् **(दुहन्ति)** प्रपिपुरति **(अद्रिभिः)** मेघैः **(सोमम्)** ऐश्वर्यम् **(दुहन्ति)** प्रपूरयन्ति **(अद्रिभिः)** प्रस्तरैः **(अस्मत्रा)** अस्मासु **(गन्तम्)** गमयतम् **(उप)** **(नः)** अस्माकम् **(अर्वाञ्चा)** अर्वागञ्चतौ **(सोमपीतये)** सोमा ओषधिरसाः पीयन्ते यस्मिँस्तस्मै **(अयम्)** **(वाम्)** युवाभ्याम् **(मित्रावरुणा)** प्राणोदानाविव **(नृभिः)** नायकैः सह **(सुतः)** संपादितः **(सोमः)** सोमलतादिरसः **(आ)** समन्तात् **(पीतये)** पानाय **(सुतः)** निष्पादितः॥३॥

अन्वयः-हे मित्रावरुणा! नोऽर्वाञ्चा सन्तौ युवां वां यां वासरीं धेनुनेवाऽद्रिभिरंशुं दुहन्त्यद्रिभिः सोमपीतये सोमं दुहन्ति वामस्मत्रोपागन्तं योऽयं नृभिः सोमः सुतः स वामापीतये सुतोऽस्ति॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा दुग्धदा गावः सुखान्यलङ्कुर्वन्ति तथा युक्त्या निर्मितः सोमलतादिरसः सर्वान् रोगान् निहन्ति॥३॥

अत्र सोमगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तोक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति सप्तत्रिंशदुत्तरं शततमं १३७ सूक्तं प्रथमो १ वर्गश्च समाप्तः॥

पदार्थः-हे **(मित्रावरुणा)** प्राण और उदान के समान सर्वमित्र और सर्वोत्तम सज्जनो! **(नः)** हमारे **(अर्वाञ्चा)** अभिमुख होते हुए तुम **(वाम्)** तुम्हारी जिस **(वासरीम्)** निवास करानेवाली **(धेनुम्)** धेनु के **(न)** समान **(अद्रिभिः)** पत्थरों से **(अंशुम्)** बढ़ी हुई सोमवल्ली को **(दुहन्ति)** दुहते जलादि से पूर्ण करते वा **(अद्रिभिः)** मेघों से **(सोमपीतये)** उत्तम ओषधि रस जिसमें पीये जाते उसके लिये **(सोमम्)** ऐश्वर्य को **(दुहन्ति)** परिपूर्ण करते **(वाम्)** उसको **(अस्मत्रा)** हमारे **(उपागन्तम्)** समीप पहुंचाओं, जो **(अयम्)** यह **(नृभिः)** मनुष्यों ने **(सोमः)** सोमवल्ली आदि लताओं का रस **(सुतः)** सिद्ध किया है, वह **(वाम्)** तुम्हारे लिये **(आपीतये)** अच्छे प्रकार पीने को **(सुतः)** सिद्ध किया गया है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे दूध देनेवाली गौयें सुखों को पूरा करती हैं, वैसे युक्ति से सिद्ध किया हुआ सोमवल्ली आदि का रस सब रोगों का नाश करता है॥३॥

इस सूक्त में सोमलता के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ सैंतीसवां १३७ सूक्त और पहिला १ वर्ग पूरा हुआ॥

प्रप्रेत्यस्य चतुर्ऋचस्याष्टात्रिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। पूषा देवता। १,३ निचृदत्यष्टिः। २ विराडत्यष्टिश्छन्दः। गान्धारः स्वरः। ४ भुरिगष्टिश्छन्दः। मध्यमः स्वरः॥

अथ पुष्टिकर्त्तुः प्रशंसामाह॥

अब चार ऋचावाले एक सौ अड़तीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में पुष्टि करनेहारे की प्रशंसा विषय को कहा है॥

प्रप्र॑ पू॒ष्णस्तु॑विजा॒तस्य॑ शस्यते महि॒त्वम॑स्य॒ त॒वसो॒ न त॑न्दते स्तो॒त्रम॑स्य॒ न त॑न्दते।
अर्चा॑मि सुम्न॒यन्न॒हमन्त्यू॑तिं मयो॒भुव॑म्।
विश्व॑स्य॒ यो मन॑ आयु॒युवे॒ म॒खो दे॒व आ॑यु॒युवे॒ म॒खः॥ १॥

प्रऽप्र॑। पू॒ष्णः। तु॒वि॒ऽजा॒तस्य॑। श॒स्य॒ते॒। म॒हि॒ऽत्वम्। अ॒स्य॒। त॒वसः॑। न। त॒न्द॒ते॒। स्तो॒त्रम्। अ॒स्य॒। न। त॒न्द॒ते॒। अर्चा॑मि। सु॒म्न॒ऽयन्। अ॒हम्। अन्ति॑ऽऊतिम्। म॒यः॒ऽभुव॑म्। विश्व॑स्यः। यः। मन॑ः। आ॒ऽयु॒युवे॒। म॒खः। दे॒वः। आ॒ऽयु॒युवे॒। म॒खः॥ १॥

पदार्थः-(**प्रप्र**) अतिप्रकृष्टे (**पूष्णः**) प्रजापोषकस्य (**तुविजातस्य**) बहुषु प्रसिद्धस्य (**शस्यते**) (**महित्वम्**) महिमा (**अस्य**) (**तवसः**) बलस्य (**न**) निषेधे (**तन्दते**) हिनस्ति (**स्तोत्रम्**) (**अस्य**) (**न**) (**तन्दते**) (**अर्चामि**) (**सुम्नयन्**) सुखमिच्छन् (**अहम्**) (**अन्त्यूतिम्**) अन्ति निकट ऊती रक्षणाद्या क्रिया यस्य तम् (**मयोभुवम्**) सुखं भावुकम् (**विश्वस्य**) संसारस्य (**यः**) (**मनः**) अन्तःकरणम् (**आयुयुवे**) समन्ताद् बध्नाति (**मखः**) प्राप्तविद्यः (**देवः**) विद्वान् (**आयुयुवे**) (**मखः**) यज्ञ इव वर्त्तमानः॥ १॥

अन्वयः-यस्याऽस्य तुविजातस्य पूष्णो महित्वं प्रप्र शस्यते यस्याऽस्य तवसः स्तोत्रं न तन्दते विद्यां च न तन्दते यो मखो देवो विश्वस्य मन आयुयुवे यश्च मखः सुखमायुयुवे तमन्त्यूतिं मयोभुवं पूष्णं सुम्नयन्नहमर्चामि॥ १॥

भावार्थः-ये शुभानि कर्माण्याचरन्ति तेऽतिप्रशंसिता भवन्ति, ये सुशीलताविनयाभ्यां सर्वेषां चित्तं धर्म्येषु बध्नन्ति त एव सर्वैः सत्कर्त्तव्याः॥ १॥

पदार्थः-जिस (**अस्य**) इस (**तुविजातस्य**) बहुतों में प्रसिद्ध (**पूष्णः**) प्रजा की रक्षा करनेवाले राजपुरुष का (**महित्वम्**) बड़प्पन (**प्रप्र, शस्यते**) अतीव प्रशंसित किया जाता वा जिस (**अस्य**) इसके (**तवसः**) बल की (**स्तोत्रम्**) स्तुति (**न**) (**तन्दते**) प्रशंसक जन न नष्ट करते अर्थात् न छोड़ते और विद्या को (**न**) (**तन्दते**) न नष्ट करते हैं वा (**यः**) जो (**मखः**) विद्या पाये हुए (**देवः**) विद्वान् (**विश्वस्य**) संसार के (**मनः**) अन्तःकरण को (**आयुयुवे**) सब ओर से बांधता अर्थात् अपनी ओर खींचता वा जो (**मखः**) यज्ञ के समान वर्त्तमान सुख का (**आयुयुवे**) प्रबन्ध बांधता है, उस (**अन्त्यूतिम्**) अपने निकट रक्षा आदि

क्रिया रखने और **(मयोभुवम्)** सुख की भावना करानेवाले प्रजापोषक का **(सुम्नयन्)** सुख चाहता हुआ **(अहम्)** मैं **(अर्चामि)** सत्कार करता हूँ॥१॥

भावार्थः-जो शुभ अच्छे कर्मों का आचरण करते हैं, वे अत्यन्त प्रशंसित होते हैं। जो सुशीलता और नम्रता से सबके चित्त को धर्मयुक्त व्यवहारों में बाँधते हैं, वे ही सबको सत्कार करने योग्य हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र हि त्वा॑ पूषन्नजि॒रं न याम॑नि॒ स्तोमे॑भिः कृ॒ण्व ऋ॒णवो॒ यथा॒ मृध॒ उष्ट्रो॒ न पी॑परो॒ मृध॑ः।
हु॒वे यत्त्वा॑ मयो॒भुवं॑ दे॒वं स॒ख्याय॒ मर्त्य॑ः।
अ॒स्माक॑माङ्गू॒षान्द्यु॒म्निं॑स्कृधि॒ वाजे॑षु द्यु॒म्निन॑ंस्कृधि॥२॥

प्र। हि। त्वा॒। पू॒ष॒न्। अ॒जि॒रम्। न। याम॑नि। स्तोमे॑भिः। कृ॒ण्वे। ऋ॒णवः॑। यथा॑। मृधः॑। उष्ट्रः॑। न। पी॒प॒रः॑। मृधः॑। हु॒वे। यत्। त्वा॒। म॒यः॒ऽभुव॑म्। दे॒वम्। स॒ख्याय॑। मर्त्यः॑। अ॒स्माक॑म्। आ॒ङ्गू॒षान्। द्यु॒म्निनः॑। कृ॒धि॒। वाजे॑षु। द्यु॒म्निनः॑। कृ॒धि॒॥२॥

पदार्थः-**(प्र)** प्रकर्षे **(हि)** **(त्वा)** त्वाम् **(पूषन्)** पुष्टिकर्त्तः **(अजिरम्)** ज्ञानवन्तम् **(न)** इव **(यामनि)** यातरि **(स्तोमेभिः)** स्तुतिभिः **(कृण्वे)** करोमि **(ऋणवः)** प्राप्नुयाः **(यथा)** **(मृधः)** संग्रामान् **(उष्ट्रः)** **(न)** इव **(पीपरः)** पारये। अत्र लुङि **बहुलं छन्दसी**त्यडभावः। **(मृधः)** संग्रामान् **(हुवे)** स्पर्द्धे **(यत्)** यतः **(त्वा)** त्वाम् **(मयोभुवम्)** सुखकारकम् **(देवम्)** कान्तारम् **(सख्याय)** सखित्वाय **(मर्त्यः)** मनुष्यः **(अस्माकम्)** **(आङ्गूषान्)** प्राप्तविद्यान् **(द्युम्निनः)** यशस्विनः **(कृधि)** कुरु **(वाजेषु)** संग्रामेषु **(द्युम्निनः)** प्रशस्तकीर्त्तिमतः **(कृधि)**॥२॥

अन्वयः-हे पूषन्! यथा त्वं मृध ऋणव उष्ट्रो न मृधः पीपरस्तथा स्तोमेभिर्यामन्यजिरं न त्वा प्रकृण्वे त्वामहं हुवे यत् सख्याय मयोभुवं दैवं त्वा मर्त्योऽहं हुवे ततोऽस्माकमाङ्गूषान् वीरान् द्युम्निनः कृधि। वाजेषु द्युम्निनो हि कृधि॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या धीमतो विद्यार्थिनो विद्यावतः कुर्युः शत्रून् विजयेरन् ते कीर्त्या माननीयाः स्युः॥२॥

पदार्थः-हे **(पूषन्)** पुष्टि करनेवाले! **(यथा)** जैसे आप **(मृधः)** संग्रामों को **(ऋणवः)** प्राप्त करो अर्थात् हम लोगों को पहुंचाओ वा **(उष्ट्रः)** उष्ट्र के **(न)** समान **(मृधः)** संग्रामों को **(पीपरः)** पार कराओ अर्थात् उनसे उद्धार करो वैसे **(स्तोमेभिः)** स्तुतियों से **(यामनि)** पहुंचानेवाले व्यवहार में **(अजिरम्)** ज्ञानवान् अर्थात् अति प्रवीण के **(न)** समान **(त्वा)** आपको **(प्र, कृण्वे)** प्रशंसित करता हूँ और आपको

मैं **(हुवे)** हठ से बुलाता हूँ, **(यत्)** जिस कारण **(सख्याय)** मित्रपन के लिये **(मयोभुवम्)** सुख करनेवाले **(देवम्)** मनोहर **(त्वा)** आपको **(मर्त्यः)** मरणधर्म मनुष्य मैं हठ से बुलाता हूँ, इस कारण **(अस्माकम्)** हमारे **(आङ्गूषान्)** विद्या पाये हुए वीरों को **(द्युम्निनः)** यशस्वी **(कृधि)** करो और **(वाजेषु)** संग्रामों में **(द्युम्निनः)** प्रशंसित कीर्त्तिवाले **(हि)** ही **(कृधि)** करो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य बुद्धिमान् विद्यार्थियों को विद्यावान् करें, शत्रुओं को जीतें, वे अच्छी कीर्त्ति के साथ माननीय हों॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्य॑ ते पूषन्त्स॒ख्ये वि॑प॒न्यव॒: क्रत्वा॑ चि॒त्सन्तोऽव॑सा बुभुज्रि॒र इति॒ क्रत्वा॑ बुभुज्रि॒रे।
तामनु॑ त्वा॒ नवी॑यसीं नि॒युतं॑ रा॒य ई॑महे।
अहे॑ळमान उरुशंस॒ सरी॑ भव॒ वाजे॑वाजे॒ सरी॑ भव॥ ३॥

यस्य। ते॒। पू॒ष॒न्। स॒ख्ये। वि॒प॒न्यवः॑। क्रत्वा॑॥ चि॒त्। सन्तः॑। अव॑सा। बु॒भु॒ज्रि॒रे। इति॑। क्रत्वा॑। बु॒भु॒ज्रि॒रे। ताम्। अनु॑। त्वा॒। नवी॑यसीम्। नि॒ऽयुत॑म्। रा॒यः। ई॒म॒हे॒। अहे॑ळमानः। उ॒रु॒ऽशं॒स॒। सरी॑। भ॒व॒। वाजे॑ऽवाजे। सरी॑। भ॒व॒॥ ३॥

पदार्थः-**(यस्य)** **(ते)** तव **(पूषन्)** पुष्टिकारक **(सख्ये)** **(विपन्यवः)** विशेषेणात्मनः पनं स्तवनमिच्छवः। **विपन्यव इति मेधाविनामसु पठितम्।** (निघं०३.१५) **(क्रत्वा)** प्रज्ञया **(चित्)** **(सन्तः)** **(अवसा)** रक्षणाद्येन **(बुभुज्रिरे)** **(इति)** अनेन प्रकारेण **(क्रत्वा)** **(बुभुज्रिरे)** भुञ्जते **(ताम्)** **(अनु)** **(त्वा)** त्वाम् **(नवीयसीम्)** अतिशयेन नूतनाम् **(नियुतम्)** असंख्यातम् **(रायः)** राज्यश्रियः **(ईमहे)** याचामहे **(अहेळमानः)** अनादृतः सन् **(उरुशंस)** उरु बहु शंसः प्रशंसा यस्य तत्संबुद्धौ **(सरी)** सरति जानाति यः स प्रशस्तो विद्यते यस्य सः **(भव)** **(वाजेवाजे)** संग्रामे संग्रामे **(सरी)** **(भव)**॥ ३॥

अन्वयः-हे पूषन् विद्वन्! यस्य ते तव सख्ये क्रत्वाऽवसा सह विपन्यवो नियुतं रायो बुभुज्रिरे इति चित्सन्तः क्रत्वा यां नियुतं रायो बुभुज्रिरे तां नवीयसीं नियुतं रायोऽनु त्वा वयमीमहे। हे उरुशंस! अस्माभि- रहेडमानस्त्वं वाजेवाजे सरी भव धर्म्ये व्यवहारे च सरी भव॥ ३॥

भावार्थः-ये धीमतां संगमित्रत्वाभ्यां नूतनां नूतनां विद्यां प्राप्नुवन्ति ते प्राज्ञा भूत्वा विजयिनो भवन्ति॥ ३॥

पदार्थः-हे **(पूषन्)** पुष्टि करनेवाले विद्वान्! **(यस्य)** जिस **(ते)** आपकी **(सख्ये)** मित्रता में **(क्रत्वा)** उत्तम बुद्धि से **(अवसा)** रक्षा आदि के साथ **(विपन्यवः)** विशेषता से अपनी प्रशंसा चाहनेवाले जन **(नियुतम्)** असंख्यात **(रायः)** राज्यलक्ष्मियों को **(बुभुज्रिरे)** भोगते हैं **(इति)** इस प्रकार **(चित्)** ही

(सन्तः) होते हुए **(क्रत्वा)** उत्तम बुद्धि से जिस असंख्यात राज्यश्री को **(बुभुज्रिरे)** भोगते हैं **(ताम्)** उस **(नवीयसीम्)** अतीव नवीन उक्त श्री को और **(अनु)** अनुकूलता से **(त्वा)** आपको हम लोग **(ईमहे)** मांगते हैं। हे **(उरुशंस)** बहुत प्रशंसायुक्त विद्वान्! हम लोगों से **(अहेडमानः)** अनादर को न प्राप्त होते हुए आप **(वाजेवाजे)** प्रत्येक संग्राम में **(सरी)** प्रशंसित ज्ञाता जन जिसके विद्यमान ऐसे **(भव)** हूजिये और धर्मयुक्त व्यवहार में भी **(सरी)** उक्त गुणी **(भव)** हूजिये॥३॥

भावार्थः-जो बुद्धिमानों के सङ्ग और मित्रपन से नवीन-नवीन विद्या को प्राप्त होते हैं, वे प्राज्ञ उत्तम ज्ञानवान् होकर विजयी होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्या ऊ षू ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व।
ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे॥४॥२॥

अस्याः। ऊम् इति। सु। नः। उप। सातये। भुवः। अहेळमानः। ररिवान्। अजऽअश्व। श्रवस्यताम्। अजऽअश्व। ओ इति। सु। त्वा। ववृतीमहि। स्तोमेभिः। दस्म। साधुऽभिः। नहि। त्वा। पूषन्। अतिऽमन्ये। आघृणे। न। ते। सख्यम्। अपऽह्नुवे॥४॥

पदार्थः-(**अस्याः**) प्रज्ञायाः (**उ**) वितर्के (**सु**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मभ्यम् (**उप**) (**सातये**) विभागाय (**भुवः**) भव। अत्र लुङि विकरणव्यत्ययेन शः प्रत्ययोऽडभावश्च (**अहेळमानः**) सत्कृतः सन् (**ररिवान्**) दाता (**अजाश्व**) अजा अश्वाश्च विद्यन्ते यस्य तत्सम्बुद्धौ (**श्रवस्यताम्**) आत्मनः श्रवो धनमिच्छताम् (**अजाश्व**) (**ओ**) सम्बोधने (**सु**) (**त्वा**) त्वाम् (**ववृतीमहि**) भृशं वर्त्तेमहि (**स्तोमेभिः**) स्तुतिभिः (**दस्म**) दुःखोपक्षयितः (**साधुभिः**) सज्जनैः सह (**नहि**) (**त्वा**) त्वाम् (**पूषन्**) (**अतिमन्ये**) अतिमानं कुर्याम् (**आघृणे**) समन्ताद् देदीप्यमान (**न**) (**ते**) तव (**सख्यम्**) मित्रस्य भावं कर्म वा (**अपह्नुवे**) आच्छादयेयम्॥४॥

अन्वयः-हे पूषन्नजाश्व! श्रवस्यतामजाश्वेव त्वं नोऽस्याः प्रज्ञायाः सातये ररिवानहेडमानः सूपभुवः। हे आघृणे पूषन्नहं ते तव सख्यं नापह्नुवे त्वा नह्यतिमन्ये ओ दस्म स्तोमेभिः साधुभिः सह वर्त्तमाना वयमु त्वा त्वां सुववृतीमहि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। धार्मिकैर्विद्वद्भिः सह प्रसिद्धं मित्रभावं वर्त्तित्वा बहुविधाः प्रज्ञाः सर्वैर्मनुष्यैः प्राप्तव्याः। न कदाचित् कस्यच्छिष्टस्य तिरस्कारः कर्त्तव्यः॥४॥

अत्र पुष्टिकर्त्तॄणां धार्मिकाणां च प्रशंसावर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति बोध्यम्॥

इत्यष्टत्रिंशदुत्तरं शततमं १३८ सूक्तं द्वितीयो २ वर्गश्च समाप्तः॥

पदार्थः–हे **(पूषन्)** पुष्टि करनेवाले! **(अजाश्व)** जिनके छेरी (बकरी) और घोड़े विद्यमान हैं, ऐसे **(श्रवस्यताम्)** अपने को धन चाहनेवालों में **(अजाश्व)** जिनका छेरी घोड़ों के तुल्य उनके समान हे विद्वन्! आप **(नः)** हमारे लिये **(अस्याः)** इस उत्तम बुद्धि के **(सातये)** बांटने को **(ररिवान्)** देनेवाले और **(अहेडमानः)** सत्कारयुक्त **(सूप, भुवः)** उत्तमता से समीप में हूजिये। हे **(आघृणे)** सब ओर से प्रकाशमान पुष्टि करनेवाले पुरुष! मैं **(ते)** आपके **(सख्यम्)** मित्रपन और मित्रता के काम को **(न)** न **(अपह्नवे)** छिपाऊं **(त्वा)** आपका **(नहि, अतिमन्ये)** अत्यन्त मान्य न करूं, किन्तु यथायोग्य आपको मानूं **(उ)** और **(ओ)** हे **(दस्म)** दुःख मिटानेवाले **(स्तोमेभिः)** स्तुतियों से युक्त **(साधुभिः)** सज्जनों के साथ वर्त्तमान हम लोग **(त्वा)** आपको **(सु, ववृतीमहि)** अच्छे प्रकार निरन्तर वर्तें अर्थात् आपके अनुकूल रहें॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। धार्मिक विद्वानों के साथ प्रसिद्ध मित्रभाव को वर्त्त कर सब मनुष्यों को चाहिये कि बहुत प्रकार की उत्तम-उत्तम बुद्धियों को प्राप्त होवें और कभी किसी शिष्ट पुरुष का तिरस्कार न करें॥४॥

इस सूक्त में पुष्टि करनेवाले विद्वान् वा धार्मिक सामान्य जन की प्रशंसा के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ अड़तीसवाँ १३८ सूक्त और दूसरा २ वर्ग पूरा हुआ।

अस्त्वित्यस्यैकादशर्चस्यैकोनचत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य परुच्छेप ऋषिः। विश्वे देवा देवताः (विभागश्च) १ विश्वेदेवाः। २ मित्रावरुणौ। ३-५ अश्विनौ। ६ इन्द्रः। ७ अग्निः। ८ मरुतः। ९ इन्द्राग्नी। १० बृहस्पतिः। ११ विश्वेदेवाः। १,१० निचृदष्टिः। २,३ विराडष्टिः। ६ अष्टिश्छन्दः। गान्धारः स्वरः। ८ स्वराडत्यष्टिः। ४,९ भुरिगत्यष्टिः। ७ अत्यष्टिश्छन्दः। मध्यमः स्वरः। ५ निचृद्बृहती छन्दः। मध्यमः स्वरः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ पुरुषार्थप्रशंसामाह॥

अब एक सौ उनतालीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में पुरुषार्थ की प्रशंसा का वर्णन करते हैं॥

अस्तु श्रौषट् पुरो अग्निं धिया दधे आ नु तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे।
यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः॥ १॥

अस्तु। श्रौषट्। पुरः। अग्निम्। धिया। दधे। आ। नु। तत्। शर्धः। दिव्यम्। वृणीमहे। इन्द्रवायू इति। वृणीमहे। यत्। ह। क्राणा। विवस्वति। नाभा। सम्ऽदायि। नव्यसी। अध। प्र। सु। नः। उप। यन्तु। धीतयः। देवान्। अच्छ। न। धीतयः॥ १॥

पदार्थः-(**अस्तु**) (**श्रौषट्**) हविर्दात्रीम् (**पुरः**) पूर्णम् (**अग्निम्**) विद्युतम् (**धिया**) कर्मणा (**दधे**) दधीय (**आ**) (**नु**) (**तत्**) (**शर्द्धः**) बलम् (**दिव्यम्**) दिवि शुद्धे भवम् (**वृणीमहे**) संभरेमहि (**इन्द्रवायू**) विद्युत्प्राणौ (**वृणीमहे**) (**यत्**) यौ (**ह**) किल (**क्राणा**) कुर्वाणौ (**विवस्वति**) सूर्ये (**नाभा**) मध्यभागाऽऽकर्षणे (**संदायि**) सम्प्रदीयते (**नव्यसी**) अतीव नूतना प्रज्ञा कर्म वा (**अध**) आनन्तर्ये (**प्र**) (**सु**) अत्रा**न्येषामपी**ति दीर्घः। (**नः**) अस्मान् (**उप**) (**यन्तु**) प्राप्नुवन्तु (**धीतयः**) (**देवान्**) विदुषः (**अच्छ**) अत्रा**ऽन्येषामपी**ति दीर्घः। (**न**) (**धीतयः**) अङ्गुलयः॥ १॥

अन्वयः-हे मनुष्या! धीतयो नेव धीतयो भवन्तो धिया नो देवानच्छोप यन्तु याभ्यां विवस्वति नाभा नव्यसी संदायि तौ क्राणा इन्द्रवायू ह वयं सुवृणीमहे यदहं श्रौषट् पुरोऽग्निं दिव्यं शर्ध आदधे यद्वयं प्रवृणीमहेऽध तत्सर्वेषां न्वस्तु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथाऽङ्गुलयः। सर्वेषु कर्मसूपयुक्ता भवन्ति, तथा यूयमपि पुरुषार्थे भवत, यतो युष्मासु बलं वर्धेत॥ १॥

पदार्थः-हे मनुष्यो! (**धीतयः**) अङ्गुलियों के (**न**) समान (**धीतयः**) धारणा करनेवाले आप (**धिया**) कर्म से (**नः**) हम (**देवान्**) विद्वान् जनों को (**अच्छ**) अच्छे प्रकार (**उप, यन्तु**) समीप में प्राप्त होओ, जिन्होंने (**विवस्वति**) सूर्यमण्डल में (**नाभा**) मध्यभाग की आकर्षण विद्या अर्थात् सूर्यमण्डल के

प्रकाश में बहुत से प्रकाश को यन्त्रकलाओं से खींच के एकत्र उसकी उष्णता करने में **(नव्यसी)** अतीव नवीन उत्तम बुद्धि वा कर्म **(संदायि)** सम्यक् दिया उन **(क्राणा)** कर्म करने के हेतु **(इन्द्रवायू)** बिजुली और प्राण **(ह)** ही को हम लोग **(सु, वृणीमहे)** सुन्दर प्रकार से धारण करें। मैं जिस **(श्रौषट्)** हविष् पदार्थ को देनेवाली विद्या बुद्धि **(पुरः)** पूर्ण **(अग्निम्)** विद्युत् और **(दिव्यम्)** शुद्ध प्राणि में हुए **(शर्धः)** बल को **(आ, दधे)** अच्छे प्रकार धारण करूं **(यत्)** जिन प्राण विद्युत् जन्य सुख को हम लोग **(प्र, वृणीमहे)** अच्छे प्रकार स्वीकार करें, **(अध)** इसके अनन्तर **(तत्)** वह सुख सबको **(नु, अस्तु)** शीघ्र प्राप्त हो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे अङ्गुली सब कर्मों में उपयुक्त होती है, वैसे तुम लोग भी पुरुषार्थ में युक्त होओ, जिससे तुम में बल बढ़े॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्ध॒ त्यन्मि॑त्रावरुणावृ॒तादध्यादु॒दाथे॒ अनृ॑तं॒ स्वेन॑ म॒न्युना॒ दक्ष॑स्य॒ स्वेन॑ म॒न्युना॑।
यु॒वोरि॒त्थाधि॒ सद्म॒स्वप॑श्याम हिर॒ण्ययं॑म्।
धी॒भिश्च॒न मन॑सा॒ स्वेभि॑रक्षभि॒: सोम॑स्य॒ स्वेभि॑रक्षभि॑:॥२॥

यत्। ह॒। त्यत्। मि॒त्रा॒व॒रु॒णौ॒। ऋ॒तात्। अधि॑। आ॒दु॒दाथे॒ इत्या॑दु॒दाथे॑। अनृ॑तम्। स्वेन॑। म॒न्युना॑। दक्ष॑स्य। स्वेन॑। म॒न्युना॑। यु॒वोः॒। इ॒त्था। अधि॑। सद्म॑ऽसु। अप॑श्याम। हि॒र॒ण्यय॑म्॥ धी॒भिः॒। च॒न। मन॑सा। स्वेभि॑:। अ॒क्ष॒ऽभि॑:। सोम॑स्य। स्वेभि॑:। अ॒क्ष॒ऽभि॑:॥२॥

पदार्थः-(**यत्**) (**ह**) (**त्यत्**) अदः (**मित्रावरुणौ**) प्राणोदानवद्वर्त्तमानौ (**ऋतात्**) सत्याद् धर्म्याद् व्यवहारात् (**अधि**) (**आददाथे**) (**अनृतम्**) मिथ्याव्यवहारम् (**स्वेन**) स्वकीयेन (**मन्युना**) (**दक्षस्य**) बलस्य (**स्वेन**) स्वात्मभावेन (**मन्युना**) क्रोधेन (**युवोः**) युवयोः (**इत्था**) अनेन प्रकारेण (**अधि**) (**सद्मसु**) गृहेषु (**अपश्याम**) संप्रेक्षेमहि (**हिरण्ययम्**) हिरण्यप्रभूतं धनम् (**धीभिः**) कर्मभिः (**चन**) अपि (**मनसा**) प्रज्ञया (**स्वेभिः**) स्वकीयैः (**अक्षभिः**) इन्द्रियैः (**सोमस्य**) ऐश्वर्यस्य (**स्वेभिः**) स्वकीयैः प्रज्ञानैः (**अक्षभिः**) प्राणैः॥२॥

अन्वयः-हे मित्रावरुणौ! सद्मसु मनसा धीभिः सोमस्य स्वेभिरक्षभिरिव स्वेभिरक्षाभिः सह वर्त्तमाना वयं युवोः सद्मसु हिरण्ययमध्यपश्याम चनापि यत्सत्यं त्यद्ध ऋताद् गृह्णीयाम। स्वेन मन्युना दक्षस्य ग्रहणेनाऽनृतं त्यजेम युवामपि स्वेन मन्युना त्यजेतं यथा युवामृतात् सत्यमध्याददाथे इत्था वयमप्यध्याददेमहि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सत्यग्रहणमसत्यत्यागं च कृत्वा स्वपुरुषार्थेन पूर्णे बलैश्वर्ये विधाय स्वमन्तःकरणं स्वानीन्द्रियाणि च सत्ये कर्मणि प्रवर्त्तनीयानि॥ २॥

पदार्थः-हे **(मित्रावरुणौ)** प्राण और उदान के समान वर्त्तमान सभासेनाधीश पुरुषो! **(सद्मसु)** घरों में **(मनसा)** उत्तम बुद्धि के साथ **(धीभिः)** कामों से **(सोमस्य)** ऐश्वर्य्य के **(स्वेभिः)** निज उतमोत्तम ज्ञान वा **(अक्षभिः)** प्राणों के समान **(स्वेभिः)** अपनी **(अक्षभिः)** इन्द्रियों के साथ वर्त्ताव रखते हुए हम लोग **(युवोः)** तुम्हारे घरों में **(हिरण्ययम्)** सुवर्णमय धन को **(अधि, अपश्याम)** अधिकता से देखें **(चन)** और भी **(यत्)** जो सत्य है, **(त्यत्, ह)** उसी को **(ऋतात्)** सत्य जो धर्म के अनुकूल व्यवहार उससे ग्रहण करें, **(स्वेन)** अपने **(मन्युना)** क्रोध के व्यवहार से **(दक्षस्य)** बल के साथ **(अनृतम्)** मिथ्या व्यवहार को छोड़ें, तुम भी **(स्वेन)** अपने **(मन्युना)** क्रोधरूपी व्यवहार से मिथ्या व्यवहार को छोड़ो। जैसे आप सत्य व्यवहार से सत्य **(अभि, आ, ददाथे)** अधिकता से ग्रहण करो **(इत्था)** इस प्रकार हम लोग भी ग्रहण करें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को सत्य ग्रहण और असत्य का त्याग कर अपने पुरुषार्थ से पूरा बल और ऐश्वर्य्य सिद्ध कर अपना अन्तःकरण और अपने इन्द्रियों को सत्य काम में प्रवृत्त करना चाहिये॥ २॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय में कहा है॥

युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्तइव श्लोकमायवो युवां हव्याभ्या ३ यवः।
युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा।
प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये॥ ३॥

युवाम्। स्तोमेभिः। देवऽयन्तः। अश्विना। आश्रवयन्तःऽइव। श्लोकम्। आयवः। युवाम्। हव्या। अभि। आयवः। युवोः। विश्वाः। अधि। श्रियः। पृक्षः। च। विश्ववेदसा। प्रुषायन्ते। वाम्। पवयः। हिरण्यये। रथे। दस्रा। हिरण्यये॥ ३॥

पदार्थः-**(युवाम्)** **(स्तोमेभिः)** स्तुतिभिः **(देवयन्तः)** कामयमानाः **(अश्विना)** विद्यान्यायप्रकाशकौ **(आश्रावयन्तइव)** समन्तात् श्रवणं कारयन्त इव **(श्लोकम्)** युवायोर्यशः **(आयवः)** प्राप्नुवन्तः **(युवाम्)** **(हव्या)** आदातुमर्हाणि होमद्रव्याणि **(अभि)** **(आयवः)** **(युवोः)** युवयोः **(विश्वाः)** अखिलाः **(अधि)** अधिकाः **(श्रियः)** लक्ष्म्यः **(पृक्षः)** अन्नम् **(च)** **(विश्ववेदसा)** विश्वं वेदो ज्ञानं ययोस्तौ **(प्रुषायन्ते)** मधूनि स्रवन्ति **(वाम्)** युवयोः **(पवयः)** चक्राणि **(हिरण्यये)** सुवर्णमये **(रथे)** रमणसाधने याने **(दस्रा)** दुःखोपक्षेतारौ **(हिरण्यये)** सुवर्णमये॥ ३॥

अन्वयः-हे अश्विना! श्लोकमाश्रावयन्तइव स्तोमेभिर्युवां देवयन्तो जना युवामभि हव्यायवो न केवलमेतदेवापि तु हे दस्रा विश्ववेदसा! यथा वां हिरण्यये रथे पवयः प्रुषायन्ते तथा युवोः सहायेन हिरण्यये रथे विश्वा अधिश्रियः पृक्षश्चायवोऽभूवन्॥३॥

भावार्थः-ये पूर्णविद्यावाप्तौ विद्वांसावाश्रयन्ति ते धनधान्यैश्वर्य्यैः पूर्णा जायन्ते॥३॥

पदार्थः-हे **(अश्विना)** विद्या और न्याय का प्रकाश करनेवाले विद्वानो! **(श्लोकम्)** तुम्हारे यश का **(आश्रावयन्तइव)** सब ओर से श्रवण करते हुए से **(स्तोमेभिः)** स्तुतियों से **(युवाम्)** तुम्हारी **(देवयन्तः)** कामना करते हुए जन **(युवाम्)** तुम्हारे **(अभि)** सम्मुख **(हव्या)** लेने योग्य होम के पदार्थों को **(आयवः)** प्राप्त हुए, फिर केवल इतना ही नहीं किन्तु हे **(दस्रा)** दुःख दूर करनेहारे **(विश्ववेदसा)** समग्र ज्ञानयुक्त उक्त विद्वानो! जैसे **(वाम्)** तुम्हारे **(हिरण्यये)** सुवर्णमय **(रथे)** विहार की सिद्धि करनेवाले रथ में **(पवयः)** चाक वा पहिये के समान **(प्रुषायन्ते)** मधुरपने आदि को झरते हैं, वैसे **(युवोः)** तुम्हारे सहाय से **(हिरण्यये)** सुवर्णमय रथ में **(विश्वाः)** समग्र **(अधि)** अधिक **(श्रियः)** सम्पत्तियों को **(च)** और **(पृक्षः)** अन्नादि पदार्थों को **(आयवः)** प्राप्त हुए हैं॥३॥

भावार्थः-जो पूर्ण विद्या की प्राप्ति निमित्त विद्वानों का आश्रय करते हैं, वे धन-धान्य और ऐश्वर्य्य आदि पदार्थों से पूर्ण होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अचे॑ति दस्रा॒ व्यु१॑नाक॑मृण्वथो यु॒ञ्जते॑ वां रथ॒युजो॒ दिवि॑ष्टिष्वध्व॒स्मानो॒ दिवि॑ष्टिषु।
अधि॑ वा॒ं स्थाम॑ ब॒न्धुरे॒ रथे॑ दस्रा हिर॒ण्यये॑।
प॒थेव॒ यन्तावनु॒शास॑ता॒ रजोऽञ्ज॑सा॒ शास॑ता॒ रज॑ः॥४॥

अचे॑ति। दस्रा॒। वि। ऊ॒म् इति॑। नाक॑म्। ऋ॒ण्व॒थुः॒। यु॒ञ्जते॑। वा॒म्। र॒थ॒ऽयुजः॑। दिवि॑ष्टिषु। अ॒ध्व॒स्मानः॑। दिवि॑ष्टिषु। अधि॑। वा॒म्। स्थाम॑। ब॒न्धुरे॑। रथे॑। दस्रा॒। हि॒र॒ण्यये॑। प॒थाऽइ॑व। यन्तौ॑। अ॒नु॒ऽशास॑ता। रज॑ः। अञ्ज॑सा। शास॑ता। रज॑ः॥४॥

पदार्थः-**(अचेति)** संज्ञायते **(दस्रा)** **(वि)** **(उ)** **(नाकम्)** अविद्यमानदुःखम् **(ऋण्वथः)** **(युञ्जते)** **(वाम्)** युवयोः **(रथयुजः)** ये रथं युञ्जते ते **(दिविष्टिषु)** आकाशमार्गेषु **(अध्वस्मानः)** ये नाधः पतन्ति। **ध्वसु अधः पतने**। **(दिविष्टिषु)** दिव्येषु व्यवहारेषु **(अधि)** **(वाम्)** युवयोः **(स्थाम)** तिष्ठेम **(बन्धुरे)** दृढबन्धनयुक्ते **(रथे)** **(दस्रा)** **(हिरण्यये)** प्रभूतसुवर्णमये **(पथेव)** यथा मार्गेण **(यन्तौ)** गमयन्तौ **(अनुशासता)** अनुशासितारौ **(रजः)** लोकम् **(अञ्जसा)** शीघ्रम् **(शासता)** **(रजः)** ऐश्वर्यम्॥४॥

अन्वयः-हे दस्रा! युवां यं नाकं व्यृण्वथो दिविष्टिषु वां रथयुजो दिविष्टिष्वध्वस्मानो रथं युञ्जते सोऽचेत्यत उ हे दस्रा! रजोऽनुशासताऽञ्जसा रजः शासता पथेव यन्तौ वां हिरण्यये बन्धुरे रथे वयमधिष्ठाम॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसं प्राप्य शिल्पविद्यामधीत्य विमानं यानं निर्मायाऽन्तरिक्षं गच्छन्ति ते सुखमाप्नुवन्ति॥४॥

पदार्थः-हे **(दस्रा)** दुःख दूर करनेहारे विद्वानो! आप जिस **(नाकम्)** दुःखरहित व्यवहार को **(व्यृण्वथः)** प्राप्त कराते हो तथा **(दिविष्टिषु)** आकाश मार्गों में **(वाम्)** तुम्हारे **(रथयुजः)** रथों को युक्त करनेवाले अग्नि आदि पदार्थ वा **(दिविष्टिषु)** दिव्य व्यवहारों में **(अध्वस्मानः)** न नीच दशा में गिरनेवाले जन **(युञ्जते)** रथ को युक्त करते हैं सो **(अचेति)** ज्ञान होता है, जाना जाता है, इससे **(उ)** ही हे **(दस्रा)** दुःख दूर करने **(रजः)** लोक को **(अनुशासता)** अनुकूल शिक्षा देने **(अञ्जसा)** साक्षात् **(रजः)** ऐश्वर्य्य की **(शासता)** शिक्षा देने **(पथेव)** जैसे मार्ग से वैसे आकाशमार्ग में **(यन्तौ)** चलानेहारो **(वाम्)** तुम्हारे **(हिरण्यये)** सुवर्णमये **(बन्धुरे)** दृढ़ बन्धनों से युक्त **(रथे)** विमान आदि रथ में हम लोग, **(अधि, ष्ठाम)** अधिष्ठित हों बैठें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वानों को प्राप्त हो शिल्पविद्या पढ़ और विमानादि रथ को सिद्ध कर अन्तरिक्ष में जाते हैं, वे सुख को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम्।
मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन॥५॥३॥

शचीभिः। नः। शचीवसू इति शचीऽवसू। दिवा। नक्तम्। दशस्यतम्। मा। वाम्। रातिः। उप। दसत्। कदा। चन। अस्मत्। रातिः। कदा। चन॥५॥

पदार्थः-**(शचीभिः)** **(नः)** अस्मभ्यम् **(शचीवसू)** शचीं प्रज्ञां वासयितारौ **(दिवा)** दिवसे **(नक्तम्)** रात्रौ **(दशस्यतम्)** दद्यातम्। अयं दशस् शब्दः कण्ड्वादिषु द्रष्टव्यः। **(मा)** निषेधे **(वाम्)** युवयोः **(रातिः)** दानम् **(उप)** **(दसत्)** नश्येत् **(कदा)** **(चन)** **(अस्मत्)** **(रातिः)** दानम् **(कदा)** **(चन)**॥५॥

अन्वयः-हे शचीवसू! युवां दिवां नक्तं शचीभिर्नो विद्यां दशस्यतं वां रातिः कदा चन मोपदसत्। अस्मद्रातिः कदा चन मोपदसत्॥५॥

भावार्थः-इहाध्यापकोपदेशकौ सुशिक्षितया वाचाऽहर्निशं विद्या उपदिशेताम्। यतः कस्याऽप्यौदार्यं न नश्येत्॥५॥

पदार्थः-हे **(शचीवसू)** उत्तम बुद्धि का वास करानेहारे विद्वानो! तुम **(दिवा)** दिन वा **(नक्तम्)** रात्रि में **(शचीभिः)** कर्मों से **(नः)** हम लोगों को विद्या **(दशस्यतम्)** देओ, **(वाम्)** तुम्हारा **(रातिः)** देना **(कदा, चन)** कभी **(मा)** मत **(उप, दसत्)** नष्ट हो, **(अस्मत्)** हम लोगों से **(रातिः)** देना **(कदा, चन)** कभी मत नष्ट हो॥५॥

भावार्थः-इस संसार में अध्यापक और उपदेशक अच्छी शिक्षायुक्त वाणी से दिन-रात विद्या का उपदेश करें, जिससे किसी की उदारता न नष्ट हो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वृषन्निन्द्र वृषपाणासु इन्दव इमे सुता अद्रिषुतास उद्भिदुस्तुभ्यं सुतासः उद्भिदः।
ते त्वा मन्दन्तु दावने महे चित्राय राधसे।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ गहि॥६॥

वृषन्। इन्द्र। वृषऽपानासः। इन्दवः। इमे। सुताः। अद्रिऽसुतासः। उत्ऽभिदः। तुभ्यम्। सुतासः। उत्ऽभिदः। ते। त्वा। मन्दन्तु। दावने। महे। चित्राय। राधसे। गीःऽभिः। गिर्वाहः। स्तवमानः। आ। गहि। सुऽमृळीकः। नः। आ। गहि॥६॥

पदार्थः-(**वृषन्**) सेचनसमर्थ वीर्योपेत **(इन्द्र)** परमैश्वर्ययुक्त **(वृषपाणासः)** वर्षन्ति यैस्तानि वृषाणि वृषाणि पानानि येषां ते **(इन्दवः)** रसवन्तः **(इमे)** **(सुताः)** निर्मिताः **(अद्रिसुतासः)** अद्रिणा मेघेन सुता उत्पन्नाः **(उद्भिदः)** ये पृथिवीमुद्भिद्य जायन्ते **(तुभ्यम्)** **(सुतासः)** निर्मिताः **(उद्भिदः)** उद्भेदं विदारणं प्राप्ताः **(ते)** **(त्वा)** त्वाम् **(मदन्तु)** आनन्दयन्तु **(दावने)** सुखं दात्रे **(महे)** महते **(चित्राय)** अद्भुताय **(राधसे)** धनाय **(गीर्भिः)** शास्त्रयुक्ताभिर्वाग्भिः **(गिर्वाहः)** उपदेशगिरां प्रापक **(स्तवमानः)** गुणकीर्त्तनं कुर्वन् **(आ)** **(गहि)** **(सुमृळीकः)** सुष्ठु सुखप्रदः **(नः)** अस्मान् **(आ)** **(गहि)** समन्तात् प्राप्नुहि॥६॥

अन्वयः-हे वृषन्निन्द्र! इमे तुभ्यं वृषपाणासोऽद्रिषुतास उद्भिद इन्दवः सुता उद्भिदः सुतासश्च सन्ति ते दावने महे चित्राय राधसे त्वा मदन्तु। हे गिर्वाहस्त्वं गीर्भिः स्तवमानो न आगहि सुमृळीकः सन्नस्मानागहि॥६॥

भावार्थः-मनुष्यैस्त एव ओषधिरसा ओषधयश्च सेवनीया ये प्रमादं न जनयेयुर्यत ऐश्वर्य्योन्नति-स्स्यादिति॥६॥

पदार्थः-हे (**वृषन्**) सेचन समर्थ अति बलवान् (**इन्द्र**) परमैश्वर्य्ययुक्त जन! जो (**इमे**) ये (**तुभ्यम्**) तुम्हारे लिये (**वृषपाणासः**) मेघ जिनसे वर्षते वे वर्षाविन्दु जिनके पान ऐसे (**अद्रिषुतासः**) जो मेघ से उत्पन्न (**उद्भिदः**) पृथिवी को विदारण करके प्रसिद्ध होते (**इन्दवः**) और रसवान् वृक्ष (**सुताः**) उत्पन्न हुए तथा (**उद्भिदः**) जो विदारण भाव को प्राप्त अर्थात् कूट-पीट बनाये हुए औषध आदि पदार्थ (**सुतासः**) उत्पन्न हुए हैं (**ते**) वे (**दावने**) सुख देनेवाले (**महे**) बड़े (**चित्राय**) अद्भुत (**राधसे**) धन के लिये (**त्वा**) आपको (**मदन्तु**) आनन्दित करें। हे (**गिर्वाहः**) उपदेशरूपी वाणियों की प्राप्ति करानेहारे! आप (**गीर्भिः**) शास्त्रयुक्त वाणियों से (**स्तवमानः**) गुणों का कीर्त्तन करते हुए (**नः**) हम लोगों के प्रति (**आ, गहि**) आओ तथा (**सुमृडीकः**) उत्तम सुख देनेवाले होते हुए हम लोगों के प्रति (**आ, गहि**) आओ॥६॥

भावार्थः-मनुष्यों को चाहिये कि उन्हीं ओषधि और औषधिरसों का सेवन करें कि जो प्रमाद न उत्पन्न करें, जिससे ऐश्वर्य की उन्नति हो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ओ षू णो॑ अग्ने शृणुहि॒ त्वमी॑ळि॒तो दे॒वेभ्यो॑ ब्रवसि य॒ज्ञिये॑भ्यो॒ राज॑भ्यो य॒ज्ञिये॑भ्यः।
यद्ध॒ त्यामङ्गि॑रोभ्यो धे॒नुं दे॒॑वा॒ अद॑त्तन।
वि तां दु॒॑ह्वे अ॑र्य॒मा क॒र्तरी॒ सचाँ॑ ए॒ष तां वेद॑ मे॒ सचा॑॥७॥

ओ इति॑। सु। नः॒। अ॒ग्ने॒। शृ॒णु॒हि॒। त्वम्। ई॒ळि॒तः॒। दे॒वेभ्यः॑। ब्र॒व॒सि॒। य॒ज्ञिये॑भ्यः। राज॑ऽभ्यः। य॒ज्ञिये॑भ्यः। यत्। ह॒। त्याम्। अङ्गि॑रःऽभ्यः। धे॒नुम्। दे॒वाः॒। अद॑त्तन। वि। ताम्। दु॒ह्वे॒। अ॒र्य॒मा। क॒र्तरि॑। सचा॑। ए॒षः। ताम्। वेद॑। मे॒। सचा॑॥७॥

पदार्थः-(**ओ**) अवधारणे (**सु**) (**नः**) अस्माकम् (**अग्ने**) विद्वन् (**शृणुहि**) (**त्वम्**) (**ईळितः**) स्तुतः (**देवेभ्यः**) विद्वद्भ्यः (**ब्रवसि**) ब्रूयाः (**यज्ञियेभ्यः**) यज्ञमनुष्ठातुं योग्येभ्यः (**राजभ्यः**) न्यायाऽधीशेभ्यः (**यज्ञियेभ्यः**) यज्ञमर्हेभ्यः (**यत्**) याम् (**ह**) खलु (**त्याम्**) ताम् (**अङ्गिरोभ्यः**) प्राणविद्याविद्भ्यः (**धेनुम्**) दोग्ध्रीं वाचम् (**देवाः**) विद्वांसः (**अदत्तन**) दद्यात् (**वि**) (**ताम्**) (**दुह्वे**) प्रपिपर्ति (**अर्यमा**) न्यायेशः (**कर्त्तरि**) कारके (**सचा**) सहार्थे। अत्र **संहितायामिति** दीर्घः। (**एषः**) (**ताम्**) (**वेद**) जानाति (**मे**) मम (**सचा**)॥७॥

अन्वयः-हे अग्ने! अस्माभिरीडितस्त्वं यज्ञियेभ्यो देवेभ्यो यज्ञियेभ्यो राजभ्यश्च ब्रवस्यतस्त्वं नो वच ओषु शृणुहि। हे देवा! यद्ध त्यां धेनुं यूयमङ्गिरोभ्योऽदत्तन तां यां च कर्त्तरि सचार्यमा विदुह्वे तां धेनुं मे सचैष वेद॥७॥

भावार्थः–अध्यापकानां योग्यताऽस्ति सर्वेभ्यो विद्यार्थिभ्यो निष्कपटतयाऽखिला विद्याः प्रत्यहमध्याप्य परीक्षायै तदधीतं शृणुयुः। यतोऽधीतं विद्यार्थिनो न विस्मरेयुः॥७॥

पदार्थः–हे **(अग्ने)** विद्वान् हम लोगों से **(ईडितः)** स्तुति प्रशंसायुक्त किये हुए **(त्वम्)** आप **(यज्ञियेभ्यः)** यज्ञानुष्ठान करने को योग्य **(देवेभ्यः)** विद्वानों और **(यज्ञियेभ्यः)** अश्वमेधादि यज्ञ करने को योग्य **(राजभ्यः)** राज्य करनेवाले न्यायाधीशों के लिये **(ब्रवसि)** कहते हो, इस कारण आप **(नः)** हमारे वचन को **(ओ, षु, शृणुहि)** शोभनता जैसे हो वैसे ही सुनिये। हे **(देवाः)** विद्वानो! **(यत्)** **(ह, त्याम्)** जिस प्रसिद्ध ही **(धेनुम्)** गुणों की परिपूर्ण करनेवाली वाणी को तुम **(अङ्गिरोभ्यः)** प्राणविद्या के जाननेवालों के लिये **(अदत्तन)** देओ **(ताम्)** उसको और जिसको **(कर्त्तरि)** कर्म करनेवाले के निमित्त **(सचा)** सहानुभूति करनेवाला **(अर्यमा)** न्यायाधीश **(वि, दुह्रे)** पूरण करता है **(ताम्)** उस वाणी को **(मे)** मेरा **(सचा)** सहायी **(एषः)** यह न्यायाधीश **(वेद)** जानता है॥७॥

भावार्थः–अध्यापकों को योग्य यह है कि सब विद्यार्थियों को निष्कपटता से समस्त विद्या प्रतिदिन पढ़ा के परीक्षा के लिये उनका पढ़ा हुआ सुनें, जिससे पढ़े हुए को विद्यार्थी जन न भूलें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मो षु वो॑ अ॒स्मदु॒भि तानि॒ पौंस्या॒ सना॑ भूवन्द्यु॒म्नानि॒ मोत जा॑रिषु॒रस्मत्पु॒रोत जा॑रिषुः।
यद्वश्चि॒त्रं यु॒गेयु॑गे॒ नव्यं॒ घोषा॒दम॑र्त्यम्।
अ॒स्मासु॒ तन्मरु॒तो॒ यच्च॑ दु॒ष्टरं॑ दिधृ॒ता यच्च॑ दु॒ष्टर॑म्॥८॥

मो इति॑। सु। व॒रिति॑। अ॒स्मत्। अ॒भि। तानि॑। पौंस्या॑। सना॑। भू॒व॒न्। द्यु॒म्नानि॑। मा। उ॒त। जा॒रि॒षुः॑। अ॒स्मत्। पु॒रा। उ॒त। जा॒रि॒षुः॑। यत्। व॒रिति॑। चि॒त्रम्। यु॒गेऽयु॑गे। नव्य॑म्। घोषा॑त्। अम॑र्त्यम्। अ॒स्मासु॑। तत्। मरु॑तः। यत्। च॒। दु॒स्तर॑म्। दि॒धृ॒त। यत्। च॒। दु॒स्तर॑म्॥८॥

पदार्थः–**(मो)** निषेधे **(सु)** शोभने **(वः)** **(अस्मत्)** **(अभि)** **(तानि)** **(पौंस्या)** पुंसु साधूनि बलानि। **पौंस्यानीति बलनामसु पठितम्।** (निघं०२.९) **(सना)** सनातनानि **(भूवन्)** अभूवन् भवन्तु। अत्राडभावः। **(द्युम्नानि)** यशांसि धनानि वा **(मा)** **(उत)** अपि **(जारिषुः)** जरन्तु। अत्राप्यडभावः। **(अस्मत्)** अस्माकं सकाशात् **(पुरा)** **(उत)** अपि **(जारिषुः)** जीर्णानि भवन्तु **(यत्)** **(वः)** **(चित्रम्)** अद्भुतम् **(युगेयुगे)** वर्षे वर्षे **(नव्यम्)** नवेषु नवीनेषु भवम् **(घोषात्)** वाचः। **घोष इति वाङ्नामसु पठितम्।** (निघं०१.११) **(अमर्त्यम्)** नाशरहितम् **(अस्मासु)** **(तत्)** **(मरुतः)** ऋत्विजः। **मरुत इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१८) **(यत्)** **(च)** **(दुस्तरम्)** दुःखेन तरितुं योग्यं बलम् **(दिधृत)** धरत। अत्र **बहुलं छन्दसी**ति शपः श्लुः। **अन्येषामपी**ति दीर्घश्च। **(यत्)** **(च)** **(दुस्तरम्)**॥८॥

अन्वयः-हे मरुतो! वस्तानि सना पौंस्याऽस्मन्मो अभिभूवन्। यानि पुरोत जारिषुस्तान्युत द्युम्नान्यस्मन्मा जारिषुः। यद्वो युगेयुगे चित्रममर्त्यं नव्यं यशो यच्च दुस्तरं यच्च दुस्तरं घोषाद् यूयं दिधृत तदस्मासु सुदिधृत॥८॥

भावार्थः-मनुष्यैरेवमाशंसितव्यं प्रयतितव्यं च यतो बलं यशो धनमायू राज्यं च नित्यं वर्द्धेत॥८॥

पदार्थः-हे (**मरुतः**) ऋतु-ऋतु में यज्ञ करनेवाले विद्वानो! (**वः**) तुम्हारे (**तानि**) वे (**सना**) सनातन (**पौंस्या**) पुरुषों में उत्तम बल (**अस्मत्**) हम लोगों से (**मो, अभि, भूवन्**) मत तिरस्कृत हों, जो (**पुरा, उत**) पहिले भी (**जारिषुः**) नष्ट हुए (**उत**) वे भी (**द्युम्नानि**) यश वा धन (**अस्मत्**) हम लोगों से (**मा, जारिषुः**) फिर नष्ट न होवें (**यत्**) जो (**वः**) तुम्हारा (**युगेयुगे**) युग-युग में (**चित्रम्**) अद्भुत (**अमर्त्यम्**) अविनाशी (**नव्यम्**) नवीनों में हुआ यश (**यत्, च**) और जो (**दुस्तरम्**) शत्रुओं को दुःख से पार होने योग्य बल (**यत्, च**) और जो (**दुस्तरम्**) शत्रुओं को दुःख से पार होने योग्य काम (**घोषात्**) वाणी से तुम (**दिधृत**) धारण करो (**तत्**) वह समस्त (**अस्मासु**) हम लोगों में (**सु**) अच्छापन जैसे हो वैसे धारण करो॥८॥

भावार्थः-मनुष्यों को इस प्रकार आशंसा, इच्छा और प्रयत्न करना चाहिये कि जिससे बल, यश, धन, आयु और राज्य नित्य बढ़े॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः।
तेषां देवेष्वायतिरस्माकं तेषु नाभयः।
तेषां पदेन महा नमे गिरेन्द्राग्नी आ नमे गिरा॥९॥

दध्यङ्। ह। मे। जनुषम्। पूर्वः। अङ्गिराः। प्रियऽमेधः। कण्वः। अत्रिः। मनुः। विदुः। ते। मे। पूर्वे। मनुः। विदुः। तेषाम्। देवेषु। आऽयतिः। अस्माकम्। तेषु। नाभयः। तेषाम्। पदेन। महि। आ। नमे। गिरा। इन्द्राग्नी इति। आ। नमे। गिरा॥९॥

पदार्थः-(**दध्यङ्**) दधीन् धारकानञ्चति (**ह**) (**मे**) मम (**जनुषम्**) विद्याजन्म (**पूर्वः**) शुभगुणैः पूर्णः (**अङ्गिराः**) प्राणविद्यावित् (**प्रियमेधः**) प्रिया मेधा प्रज्ञा यस्य सः (**कण्वः**) मेधावी (**अत्रिः**) सुखानामत्ता भोक्ता। अदधातोरौणादिकस्त्रिः प्रत्ययः। (**मनुः**) मननशीलः। (**विदुः**) जानन्ति (**ते**) (**मे**) मम (**पूर्वे**) शुभगुणैः पूर्णाः (**मनुः**) ज्ञाता (**विदुः**) (**तेषाम्**) (**देवेषु**) विद्वत्सु (**आयतिः**) समन्ताद्

विस्तृतिः **(अस्माकम्)** **(तेषु)** **(नाभयः)** सम्बन्धिनः **(तेषाम्)** **(पदेन)** प्राप्तव्येन विज्ञानेन **(महि)** महत् **(आ)** **(नमे)** नमामि **(गिरा)** वाण्या **(इन्द्राऽग्नी)** प्राणविद्युताविव **(आ)** **(नमे)** **(गिरा)**॥९॥

अन्वयः–यो दध्यङ् पूर्वोऽङ्गिराः प्रियमेधोऽत्रिर्मनुः कण्वो मे महि जनुषं विदुस्ते मे पूर्वे यं मनुरिति विदुः। तेषां देवेष्वायतिरस्ति। अस्माकं तेषु नाभयः सन्ति तेषां पदेन गिरा चाहमानमे याविन्द्राग्नी इवाप्तावध्यापकोपदेशकौ स्यातां तावहं गिरा नमे॥९॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। जगति ये विद्वांसस्सन्ति त एव विदुषां प्रभावं ज्ञातुमर्हन्ति, न क्षुद्राऽशयाः। ये यस्माद्विद्या आददीरन्, ते तेषां प्रियाचरणं सदानुतिष्ठन्तु। सर्वैरितरैर्जनैराप्तानां विदुषां मार्गेणैव गन्तव्यं नेतरेषां मूर्खाणाम्॥९॥

पदार्थः–जो **(दध्यङ्)** धारण करनेवालों को प्राप्त होनेवाला **(पूर्वः)** शुभगुणों से परिपूर्ण **(अङ्गिराः)** प्राण विद्या का जाननेवाला **(प्रियमेधः)** धारणवती बुद्धि जिसको प्रिय वह **(अत्रिः)** सुखों का भोगनेवाला **(मनुः)** विचारशील और **(कण्वः)** मेधावीजन **(मे)** मेरे **(महि)** महान् **(जनुषम्)** विद्यारूप जन्म को **(ह)** प्रसिद्ध **(विदुः)** जानते हैं **(ते)** वे **(मे)** मेरे **(पूर्वे)** शुभ गुणों से परिपूर्ण पिछले जन यह **(मनुः)** ज्ञानवान् है, यह भी **(विदुः)** जानते हैं **(तेषाम्)** उनको **(देवेषु)** विद्वानों में **(आयतिः)** अच्छा विस्तार है **(अस्माकम्)** हमारे **(तेषु)** उनमें **(नाभयः)** सम्बन्ध हैं **(तेषाम्)** उनके **(पदेन)** पाने योग्य विज्ञान और **(गिरा)** वाणी से मैं **(आ, नमे)** अच्छे प्रकार नम्र होता हूँ, जो **(इन्द्राग्नी)** प्राण और बिजुली के समान अध्यापक और उपदेशक हों, उनको मैं **(गिरा)** वाणी से **(आ, नमे)** नमस्कार करता हूँ॥९॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जगत् में जो विद्वान् हैं, वे ही विद्वान् के प्रभाव को जानने योग्य होते हैं, किन्तु क्षुद्राशय नहीं। जो जिनसे विद्या ग्रहण करें, वे उनके प्रियाचरण का सदा अनुष्ठान करें, सब इतर जनों को आप्त विद्वानों के मार्ग ही से चलना चाहिये, किन्तु और मूर्खों के मार्ग से नहीं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

होता॑ यक्षद्वनिनो॑ वन्त॒ वार्यं॒ बृह॒स्पति॑र्यजति वे॒न उ॒क्षभि॑: पुरु॒वारे॑भिरु॒क्षभि॑:।
ज॒गृ॒भ्मा दू॒रआ॑दिशं॒ श्लोक॒मद्रे॑रध॒ त्मना॑।
अधा॑रयद॒रिन्दा॑नि सु॒क्रतु॑: पु॒रू सद्मा॑नि सु॒क्रतु॑:॥ १०॥

होता॑। य॒क्ष॒त्। व॒निन॑:। व॒न्त॒। वार्य॑म्। बृह॒स्पति॑:। य॒ज॒ति॒। वे॒न:। उ॒क्षऽभि॑:। पु॒रु॒ऽवारे॑भि:। उ॒क्षऽभि॑:। ज॒गृ॒भ्म। दू॒रेऽआ॑दिशम्। श्लोक॑म्। अद्रे॑:। अध॑। त्मना॑। अधा॑रयत्। अ॒रि॒न्दा॑नि। सु॒ऽक्रतु॑:। पु॒रु। सद्मा॑नि। सु॒ऽक्रतु॑:॥ १०॥

पदार्थः-**(होता)** गृहीता **(यक्षत्)** यजेत् **(वनिनः)** वनानि प्रशस्तविद्यारश्मयो विद्यन्ते येषां ते **(वन्त)** संभजत। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(वार्यम्)** वर्त्तुमर्हम् **(बृहस्पतिः)** बृहत्या वाचः पालकः **(यजति)** यजेत्। लेट्प्रयोगोऽयम्। **(वेनः)** कामयमानः **(उक्षभिः)** महद्भिः। **उक्षेति महन्नामसु पठितम्।** (निघं०३.३) **(पुरुवारेभिः)** पुरवो बहवो वारा वरितव्या गुणा येषां तैः **(उक्षभिः)** महद्भिरिव **(जगृभ्म)** गृह्णीयाम। अत्रा**न्येषामपी**ति दीर्घः। **(दूरआदिशम्)** दूरे य आदिश्यते तम् **(श्लोकम्)** वाचम् **(अद्रेः)** मेघात् **(अध)** अथ **(त्मना)** आत्मना **(अधारयत्)** धारयेत् **(अररिन्दानि)** उदकानि। **अररिन्दानीत्युदकनामसु पठितम्।** (निघं०१.१२) **(सुक्रतुः)** शोभनप्रज्ञः **(पुरु)** बहूनि **(सद्मानि)** प्राप्तव्यानि **(सुक्रतुः)** शोभनकर्मा॥१०॥

अन्वयः-होता पुरुवारेभिरुक्षभिर्यद्वार्य्यं यक्षत् पुरुवारेभिरुक्षभिस्सह वर्त्तमानो वेनो बृहस्पतिर्यद्वार्य्यं यजति सुक्रतुस्त्मना यानि पुरु सद्मान्यधारयत् सुक्रतुरद्रेररिन्दानीव दूरआदिशं श्लोकमधारयत् तत्सर्वं वनिनो वन्ताऽधैतत्सर्वं वयमपि जगृम्भ॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कार। यथा मेघाच्च्युतानि जलानि सर्वान् प्राण्यप्राणिनो जीवयन्ति तथा वेदादिविद्यानामध्यापकाऽध्येतृभ्यः प्राप्ता विद्याः सर्वान् मनुष्यान् वर्धयन्ति। यथा महद्भिराप्तैः सह संप्रयोगेण सज्जना वेदितव्यं विदन्ति तथा विद्यासंप्रयोगेण मनुष्या कमनीयं प्राप्नुवन्ति॥१०॥

पदार्थः-**(होता)** सद्गुणों का ग्रहण करनेवाला जन **(पुरुवारेभिः)** जिनके स्वीकार करने योग्य गुण हैं, उन **(उक्षभिः)** महात्माजनों के साथ जिस **(वार्यम्)** स्वीकार करने योग्य जन का **(यक्षत्)** सङ्ग कर वा जिनके स्वीकार करने योग्य गुण उन **(उक्षभिः)** महात्मा जनों के साथ वर्त्तमान **(वेनः)** कामना करने और **(बृहस्पतिः)** बड़ी वाणी की पालना करनेवाला विद्वान् जिस स्वीकार करने योग्य का **(यजति)** सङ्ग करता है **(सुक्रतुः)** सुन्दर बुद्धिवाला जन **(त्मना)** आपसे जिन **(पुरु)** बहुत **(सद्मानि)** प्राप्त होने योग्य पदार्थों को **(अधारयत्)** धारण करावे वा **(सुक्रतुः)** उत्तम काम करनेवाला जन **(अद्रेः)** मेघ से **(अररिन्दानि)** जलों को जैसे वैसे **(दूरआदिशम्)** दूर में जो कहा जाय उस विषय और **(श्लोकम्)** वाणी को धारण करावे उस सबको **(वनिनः)** प्रशंसनीय विद्या किरणें जिनके विद्यमान हैं, वे सज्जन **(वन्त)** अच्छे प्रकार सेवें, **(अध)** इसके अनन्तर इस उक्त समस्त विषय को हम लोग भी **(जगृम्भ)** ग्रहण करें॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मेघ से छूटे हुए जल समस्त प्राणी-अप्राणियों अर्थात् जड़-चेतनों को जिलाते उनकी पालना करते हैं, वैसे वेदादि विद्याओं के पढ़ने-पढ़ानेवालों से प्राप्त हुई विद्या सब मनुष्यों को वृद्धि देती हैं और जैसे महात्मा शास्त्रवेत्ता विद्वानों के

साथ सम्बन्ध से सज्जन लोग जानने योग्य विषय को जानते हैं, वैसे विद्या के उत्तम सम्बन्ध से मनुष्य चाहे हुए विषय को प्राप्त होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये दे॑वासो दि॒व्येका॑दश॒ स्थ पृ॑थि॒व्यामध्येका॑दश॒ स्थ।

अ॒प्सु॒क्षितो॑ महि॒नैका॑दश॒ स्थ ते दे॑वासो य॒ज्ञमि॒मं जु॑षध्वम्॥ ११॥ ४॥ २०॥

ये। दे॒वा॒स॒:। दि॒वि। एका॑दश। स्थ। पृ॒थि॒व्याम्। अधि॑। एका॑दश। स्थ। अ॒प्सु॒ऽक्षित॑:। म॒हि॒ना। एका॑दश। स्थ। ते। दे॒वा॒स॒:। य॒ज्ञम्। इ॒मम्। जु॒ष॒ध्व॒म्॥ ११॥

पदार्थ:-(**ये**) (**देवास:**) विद्वांस: (**दिवि**) सूर्यादिलोके (**एकादश**) दश प्राणा जीवात्मा च (**स्थ**) सन्ति (**पृथिव्याम्**) भूमौ (**अधि**) ऊपरि (**एकादश**) (**स्थ**) (**अप्सुक्षित:**) येऽप्सु क्षियन्ति निवसन्ति ते (**महिना**) महिम्ना (**एकादश**) दशेन्द्रियाणि मनश्चेति (**स्थ**) (**ते**) (**देवास:**) विद्वांस: (**यज्ञम्**) संगन्तव्यम् (**इमम्**) (**जुषध्वम्**) सेवध्वम्॥११॥

अन्वय:-हे देवासो विद्वांसो! यूयं ये दिवि एकादश स्थ ये पृथिव्यामेकादशाधिष्ठ ये महिनाऽप्सुक्षित एकादश स्थ ते यथाविधा: सन्ति तथा तान् विज्ञाय हे देवासो! यूयमिमं यज्ञं जुषध्वम्॥११॥

भावार्थ:-इहेश्वरसृष्टौ ये पदार्था: सूर्यादिलोके सन्त्यर्थाद्येऽन्यत्र वर्त्तन्त त एवाऽत्र यावन्तोऽत्र सन्ति तावन्त एव तत्र सन्ति तान् यथावद्विदित्वा मनुष्यैर्योगक्षेम: सततं कर्त्तव्य इति॥११॥

अत्र विदुषां शीलवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्भवतीति बोध्यम्॥

इत्येकोनचत्वारिंशदुत्तरं १३९ शततमं सूक्तं चतुर्थो ४ वर्गो विंशोऽनुवाकश्च समाप्त:॥

पदार्थ:-हे (**देवास:**) विद्वानो! तुम (**ये**) जो (**दिवि**) सूर्यादि लोक में (**एकादश**) दश प्राण और ग्यारहवां जीव (**स्थ**) हैं वा जो (**पृथिव्याम्**) पृथिवी में (**एकादश**) उक्त एकादश गण के (**अधि, स्थ**) अधिष्ठित हैं वा जो (**महिना**) महत्त्व के साथ (**अप्सुक्षित:**) अन्तरिक्ष वा जलों में निवास करनेहारे (**एकादश**) दशेन्द्रिय और एक मन (**स्थ**) हैं (**ते**) वे जैसे हैं, वैसे उन को जान के हे (**देवास:**) विद्वानो! तुम (**इमम्**) इस (**यज्ञम्**) सङ्ग करने योग्य व्यवहाररूप यज्ञ को (**जुषध्वम्**) प्रीतिपूर्वक सेवन करो॥११॥

भावार्थ:-ईश्वर की इस सृष्टि में जो पदार्थ सूर्यादि लोकों में हैं अर्थात् जो अन्यत्र वर्त्तमान हैं, वे ही यहाँ हैं, जितने यहाँ हैं उतने ही वहाँ और लोकों में हैं, उनको यथावत् जानके मनुष्यों को योगक्षेम निरन्तर करना चाहिये॥११॥

इस सूक्त में विद्वानों के शील का वर्णन होने से इसके अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥११॥

यह एक सौ उनतालीसवाँ १३९ सूक्त, चौथा ४ वर्ग और बीसवाँ अनुवाक समाप्त हुआ॥

वेदिषद इत्यस्य त्रयोदशर्चस्य चत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १,५,८ जगती। २,७,११ विराड्जगती। ३,४,९ निचृज्जगती च छन्दः। निषादः स्वरः। ६ भुरिक् त्रिष्टुप्। १०,१२ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। १३ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वत्पुरुषार्थगुणविषयः प्रोच्यते॥

अब १४० एक सौ चालीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में विद्वानों के पुरुषार्थ और गुणों का विषय कहा है॥

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम्॥ १॥

वेदिऽसदे। प्रियऽधामाय। सुऽद्युते। धासिम्ऽइव। प्र। भर। योनिम्। अग्नये। वस्त्रेणऽइव। वासय। मन्मना। शुचिम्। ज्योतिःऽरथम्। शुक्रऽवर्णम्। तमः।ऽहनम्॥ १॥

पदार्थः-(**वेदिषदे**) यो वेद्यां सीदति तस्मै (**प्रियधामाय**) प्रियं धाम यस्य तस्मै (**सुद्युते**) शोभना द्युतिर्यस्य तत्सम्बुद्धौ (**धासिमिव**) दधति प्राणान् येन तमिव। **धासिरित्यन्ननामसु पठितम्।** (निघं०२.७) (**प्र**) (**भर**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**योनिम्**) गृहम् (**अग्नये**) पावकाय (**वस्त्रेणेव**) यथा पटेन (**वासय**) आच्छादय। अत्रा**न्येषामपी**ति दीर्घः। (**मन्मना**) मन्यते जानाति येन तेन (**शुचिम्**) पवित्रम् (**ज्योतीरथम्**) प्रकाशयुक्तं रमणीयं यानम् (**शुक्रवर्णम्**) शुद्धस्वरूपम् (**तमोहनम्**) यस्तमो हन्ति तम्॥१॥

अन्वयः-हे विद्वँस्त्वं मन्मना वेदिषदेऽग्नये धासिमिव प्रियधामाय सुद्युते विदुषे योनिं प्रभर तं ज्योतीरथं तमोहनं शुक्रवर्णं रथं शुचिं वस्त्रेणेव वासय॥१॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा होतारौ वह्नौ काष्ठानि संस्थाप्य घृतादिहविर्हुत्वेमं वर्धयन्ति तथा पवित्रं जनं भोजनाऽऽच्छादनैर्विद्वांसो वर्द्धयेयुः॥१॥

पदार्थः-हे विद्वान्! आप (**मन्मना**) जिससे मानते-जानते उस विचार से (**वेदिषदे**) जो वेदी में स्थिर होता उस (**अग्नये**) अग्नि के लिये (**धासिमिव**) जिससे प्राणों को धारण करते उस अन्न के समान हवन करने योग्य पदार्थ को जैसे वैसे (**प्रियधामाय**) जिसको स्थान प्यारा उस (**सुद्युते**) सुन्दर कान्तिवाले विद्वान् के लिये (**योनिम्**) घर का (**प्र, भर**) अच्छे प्रकार धारण कर और उस (**ज्योतीरथम्**) ज्योति के समान (**तमोहनम्**) अन्धकार का विनाश करनेवाले (**शुक्रवर्णम्**) शुद्धस्वरूप (**शुचिम्**) पवित्र मनोहर यान को (**वस्त्रेणेव**) पट वस्त्र से जैसे (**वासय**) ढांपो॥१॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे होता जन आग में समिधरूप काष्ठों को अच्छे प्रकार स्थिर कर और उसमें घृत आदि हवि का हवन कर इस आग को बढ़ाते हैं, वैसे शुद्ध जन को भोजन और आच्छादन अर्थात् वस्त्र आदि से विद्वान् जन बढ़ावें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमीं पुनः।
अन्यस्यासा जिह्वया जेन्यो वृषा न्यन्येन वनिनो मृष्ट वारणः॥२॥

अभि। द्विऽजन्मा। त्रिऽवृत्। अन्नम्। ऋज्यते। संवत्सरे। ववृधे। जग्धम्। ईमिति। पुनरिति। अन्यस्य। आसा। जिह्वया। जेन्यः। वृषा। नि। अन्येन। वनिनः। मृष्ट। वारणः॥२॥

पदार्थः-(**अभि द्विजन्मा**) विद्याजन्मद्वितीयः (**त्रिवृत्**) यत् कर्मोपासनाज्ञानेषु साधकत्वेन वर्त्तते (**अन्नम्**) अत्तव्यम् (**ऋज्यते**) उपार्ज्यते (**संवत्सरे**) (**वावृधे**) वर्द्धते। अत्र **तुजादीनाम**भ्यासदीर्घत्वम्। (**जग्धम्**) भक्तम् (**ईम्**) सर्वतः (**पुनः**) (**अन्यस्य**) (**आसा**) आस्येन (**जिह्वया**) (**जेन्यः**) जेतुं शीलः (**वृषा**) वृषेव बलिष्ठः (**नि**) (**अन्येन**) (**वनिनः**) वनानि जलानि। **वनमित्युदकनामसु पठितम्।** (निघं०१.१२) (**मृष्ट**) मार्जय (**वारणः**) सर्वदोषनिवारकः॥२॥

अन्वयः-हे जिज्ञासो! येन संवत्सरे पूर्णे त्रिवृदन्नमृज्यतेऽन्यस्यासा जिह्वया तदन्नमीं पुनर्जग्धं स द्विजन्माऽभिवावृधे जेन्यो वृषा च भवत्यतोऽन्येन वारणो वनिनो निमृष्ट॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अन्नादीन् पदार्थान् पुष्कलान् संचित्य सुसंस्कृत्य भुञ्जतेऽन्यान् भोजयन्ति तथा हवनादिना वृष्टिशुद्धिं कुर्वन्ति ते बलिष्ठा जायन्ते॥२॥

पदार्थः-जिसने (**संवत्सरे**) संवत्सर पूरे हुए पर (**त्रिवृत्**) कर्म, उपासना और ज्ञानविषय में जो साधनरूप से वर्त्तमान उस (**अन्नम्**) भोगने योग्य पदार्थ वा (**ऋज्यते**) उपार्जन किया वा (**अन्यस्य**) और के (**आसा**) मुख और (**जिह्वया**) जीभ के साथ (**ईम्**) वही अन्न (**पुनः**) वार-वार (**जग्धम्**) खाया हो वह (**द्विजन्मा**) विद्या में द्वितीय जन्मवाला ब्राह्मण, क्षत्रिय और वैश्य कुल का जन (**अभि, वावृधे**) सब ओर से बढ़ता (**जेन्यः**) विजयशील और (**वृषा**) बैल के समान अत्यन्त बली होता है, इससे (**अन्येन**) और मित्रवर्ग के साथ (**वारणः**) समस्त दोषों की निवृत्ति करनेवाला तू (**वनिनः**) जलों को (**नि, मृष्ट**) निरन्तर शुद्ध कर॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अन्न आदि बहुत पदार्थ इकट्ठे कर उनको बना और भोजन करते वा दूसरों को कराते तथा हवन आदि उत्तम कामों से वर्षा की शुद्धि करते हैं, वे अत्यन्त बली होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कृ॒ष्ण॒प्रु॒तौ॑ वे॒वि॒जे अ॑स्य स॒क्षि॒ता॑ उ॒भा त॑रेते अ॒भि मा॒त॒रा॒ शिशु॑म्।
प्रा॒चा॒जि॑ह्वं ध्व॒स॒य॑न्तं तृषु॒च्यु॒त॒मा साच्यं॒ कु॒प॑यं॒ वर्ध॑नं पि॒तुः॥ ३॥

कृष्ण॒ऽप्रुतौ। वे॒वि॒जे इति॑। अ॒स्य॒। स॒ऽक्षितौ॑। उ॒भा। त॒रे॒ते इति॑। अ॒भि। मा॒तरा॑। शिशु॑म्। प्रा॒चाऽजि॑ह्वम्। ध्व॒सय॑न्तम्। तृ॒षु॒ऽच्यु॒त॒म्। आ। साच्य॑म्। कु॒प॑यम्। वर्ध॑नम्। पि॒तुः॥ ३॥

पदार्थः-(**कृष्णप्रुतौ**) विद्वदुपदेशेन चित्ताकर्षणवृत्तिं प्राप्नुवत्यौ (**वेविजे**) भृशं बिभीतः। **ओविजीभयचलनयो**रित्यस्माद् यङ्लुगन्ताद् व्यत्ययेनात्मनेपदमेकवचनं च। (**अस्य**) (**सक्षितौ**) सह निवसन्त्यौ (**उभा**) उभे (**तरेते**) (**अभि**) (**मातरा**) मातरौ धात्रीजनन्यौ (**शिशुम्**) बालकम् (**प्राचाजिह्वम्**) प्राक्दुग्धप्रदानादितः पूर्वं समन्ताज्जिह्वा यस्य तम् (**ध्वसयन्तम्**) चाञ्चल्येनाधः पतन्तम्। **ध्वसु ध्वंसु अधःपतन** इत्यस्मात् स्वार्थे णिच्। (**तृषुच्युतम्**) क्षिप्रं पतितम्। **तृष्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) (**आ**) (**साच्यम्**) साचितुं समवेतुं योग्यम् (**कुपयम्**) गोपनीयम् (**वर्धनम्**) वर्द्धयितारम् (**पितुः**) जनकस्य॥ ३॥

अन्वयः-यं प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमासाच्यं कुपयं पितुर्वर्द्धनं शिशुं सक्षितौ मातराभितरेते अस्य तावुभा मातरा कृष्णप्रुतौ वेविजे॥ ३॥

भावार्थः-सदसद्ज्ञानवर्द्धकं रोगादिक्लेशनिवारकं प्रेमोत्पादकं विद्वदुपदेशं प्राप्ते अपि बालकस्य जनन्यौ निजप्रेम्णा सर्वदा बिभीतः॥ ३॥

पदार्थः-जिस (**प्राचाजिह्वम्**) दुग्ध आदि के देने से पहिले अच्छे प्रकार जीभ निकालने (**ध्वसयन्तम्**) गोदी से नीचे गिरने (**तृषुच्युतम्**) वा शीघ्र गिरे हुए (**आ, साच्यम्**) अच्छे प्रकार सम्बन्ध करने अर्थात् उठा लेने (**कुपयम्**) गोपित रखने योग्य और (**पितुः**) पिता का (**वर्द्धनम्**) यश वा प्रेम बढ़ानेवाले (**शिशुम्**) बालक को (**सक्षितौ**) एक साथ रहनेवाली (**मातरा**) धायी और माता (**अभि, तरेते**) दुःख से उत्तीर्ण करती (**अस्य**) इस बालक की वे (**उभा**) दोनों मातायें (**कृष्णप्रुतौ**) विद्वानों के उपदेश से चित्त के आकर्षण धर्म को प्राप्त हुई (**वेविजे**) निरन्तर कँपती हैं अर्थात् डरती हैं कि कथंचित् बालक को दुःख न हो॥ ३॥

भावार्थः-भले-बुरे का ज्ञान बढ़ाने, रोग आदि बढ़े क्लेशों को दूर करने और प्रेम उत्पन्न करानेवाले विद्वानों के उपदेश को पाये हुए भी बालक की माता अर्थात् दूध पिलानेवाली धाय और उत्पन्न करनेवाली निज माता अपने प्रेम से सर्वदा डरती हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः॥४॥

मुमुक्ष्वः। मनवे। मानवस्यते। रघुऽद्रुवः। कृष्णऽसीतासः। ऊम् इति। जुवः। असमनाः। अजिरासः। रघुऽस्यदः। वातऽजूताः। उप। युज्यन्ते। आशवः॥४॥

पदार्थः-(**मुमुक्ष्वः**) मोक्तुमिच्छन्तुः। अत्र **जसादिषु वा वचनमि**ति गुणाभावः। (**मनवे**) (**मानवस्यते**) मानवान् आत्मन इच्छते (**रघुद्रुवः**) ये रघून्यास्वादनीयान्यन्नानि द्रवन्ति (**कृष्णसीतासः**) कृष्णा कृषिसाधिनी सीता येषां ते (**उ**) (**जुवः**) जववन्तः (**असमनाः**) असमानमनस्काः (**अजिरासः**) प्राप्तशीलाः (**रघुष्यदः**) ये रघूषु स्यन्दन्ते (**वातजूताः**) वात इव जूतं शीघ्रगमनं येषान्ते (**उप**) (**युज्यन्ते**) अत्र व्यत्ययेनात्मनेपदम्। (**आशवः**) शुभगुणव्यापिनः॥४॥

अन्वयः-ये मुमुक्ष्वस्ते यथा रघुद्रुवो जुवोऽसमना अजिरासो रघुष्यदो वातजूता आशवः कृष्णसीतासः कृषीवलाः कृषिकर्मण्युपयुज्यन्ते तथा मानवस्यते मनवे विदुषे योगिन उपयुज्यन्ताम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कृषीवलाः क्षेत्राणि सम्यक् कर्षित्वा सुसंपाद्य वीजानि उप्त्वा फलवन्तो जायन्ते तथा मुमुक्षवो दमेनेन्द्रियाण्याकृष्य शमेन मन उपशाम्य स्वात्मानं पवित्रीकृत्य ब्रह्मविदो जनान् सेवेरन्॥४॥

पदार्थः-जो (**मुमुक्ष्वः**) संसार से छूटने की इच्छा करनेवाले हैं, वे जैसे (**रघुद्रुवः**) स्वादिष्ठ अन्नों को प्राप्त होनेवाले (**जुवः**) वेगवान् (**असमनाः**) एकसा जिनका मन न हो (**अजिरासः**) जिनको शील प्राप्त है (**रघुष्यदः**) जो सन्मार्गों में चलनेवाले (**वातजूताः**) और पवन के समान वेगयुक्त (**आशवः**) शुभ गुणों में व्याप्त (**कृष्णसीतासः**) जिनके कि खेती का काम निकालनेवाली हर की यष्टि विद्यमान वे खेतीहर खेती के कामों का (**उ**) तर्क-वितर्क के साथ (**उप, युज्यन्ते**) उपयोग करते हैं, वैसे (**मानवस्यते**) अपने को मनुष्यों की इच्छा करनेवाले (**मनवे**) मननशील विद्वान् योगी पुरुष के लिये उपयोग करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे खेती करनेवाले जन खेतों को अच्छे प्रकार जोत बोने के योग्य भलीभांति करके और उसमें बीज बोय फलवान् होते हैं, वैसे मुमुक्षु पुरुष यम-नियम से इन्द्रियों को खैंच और शम अर्थात् शान्तिभाव से मन को शान्त कर अपने आत्मा को पवित्र कर ब्रह्मवेत्ता जनों की सेवा करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः।
यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्त्स्तनयन्नेति नानदत्॥५॥५॥

आत्। अस्य। ते। ध्वसयन्तः। वृथा। ईरते। कृष्णम्। अभ्वम्। महि। वर्पः। करिक्रतः। यत्। सीम्। महीम्। अवनिम्। प्र। अभि। मर्मृशत्। अभिऽश्वसन्। स्तनयन्। एति। नानदत्॥५॥

पदार्थः-(**आत्**) आनन्तर्ये (**अस्य**) (**ते**) (**ध्वसयन्तः**) ध्वसमिवाचरन्तः (**वृथा**) मिथ्या (**ईरते**) (**कृष्णम्**) वर्णम् (**अभ्वम्**) अभवन्तम् (**महि**) महत् (**वर्पः**) (**करिक्रतः**) येऽतिशयेन कुर्वन्ति (**यत्**) ये (**सीम्**) सर्वतः (**महीम्**) महतीम् (**अवनिम्**) पृथिवीम् (**प्र**) (**अभि**) (**मर्मृशत्**) अतिशयेन सहमानः (**अभिश्वसन्**) सर्वतः श्वसन्प्राणं धरन् (**स्तनयन्**) विद्युदिव शब्दयन् (**एति**) गच्छति (**नानदत्**) अतिशयेन नादं कुर्वन्॥५॥

अन्वयः-यद्ये कृष्णमभ्वं महि वर्पो ध्वसयन्तः करिक्रतो वृथा प्रेरते तेऽस्य मोक्षस्य प्राप्तिं नार्हन्ति, यो महीमवनिमभिमर्मृशदभिश्वसन् नानदत् स्तनयन् शुभान् गुणान् सीमेति आत् स मुक्तिमाप्नोति॥५॥

भावार्थः-ये मनुष्या इह शरीरमवलम्ब्याधर्ममाचरन्ति ते दृढं बन्धनमाप्नुवन्ति, ये च शास्त्राण्यधीत्य योगमभ्यस्य धर्ममनुतिष्ठन्ते तेषामेव मुक्तिर्जायत इति॥५॥

पदार्थः-(**यत्**) जो (**कृष्णम्**) काले वर्ण के (**अभ्वम्**) न होनेवाले (**महि**) बड़े (**वर्पः**) रूप को (**ध्वसयन्तः**) विनाश करते हुए से (**करिक्रतः**) अत्यन्त कार्य करनेवाले जन (**वृथा**) मिथ्या (**प्रेरते**) प्रेरणा करते हैं (**ते**) वे (**अस्य**) इस मोक्ष की प्राप्ति को नहीं योग्य हैं, जो (**महीम्**) बड़ी (**अवनिम्**) पृथिवी को (**अभि, मर्मृशत्**) सब ओर से अत्यन्त सहता (**अभिश्वसन्**) सब ओर से श्वास लेता हुआ (**नानदत्**) अत्यन्त बोलता और (**स्तनयन्**) बिजुली के समान गर्जना करता अच्छे गुणों को (**सीम्**) सब ओर से (**एति**) प्राप्त होता है (**आत्**) इसके अनन्तर वह मुक्ति को प्राप्त होता है॥५॥

भावार्थः-जो मनुष्य इस संसार में शरीर का आश्रय कर अधर्म करते हैं, वे दृढ़ बन्धन को पाते हैं और जो शास्त्रों को पढ़ योगाभ्यास कर, धर्म का अनुष्ठान करते उन्हीं की मुक्ति होती है॥५॥

के जना इह शोभन्त इत्याह॥

कौन मनुष्य इस जगत् में शोभायमान होते हैं, इस विषय को अगले मन्त्र में कहा है॥

भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत्।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः॥६॥

भूषन्। नः। यः। अधि। बभ्रूषु। नम्नते। वृषाऽइव। पत्नीः। अभि। एति। रोरुवत्। ओजायमानः। तन्वः। च। शुम्भते। भीमः। न। शृङ्गा। दविधाव। दुःऽगृभिः॥६॥

पदार्थः-(**भूषन्**) अलंकुर्वन् (**न**) इव (**यः**) (**अधि**) (**बभ्रूषु**) धर्म धरन्तीषु (**नम्मते**) (**वृषेव**) यथा वृषा (**पत्नीः**) यज्ञसम्बन्धिनीः स्त्रियः (**अभि**) (**एति**) प्राप्नोति (**रोरुवत्**) अतिशयेन शब्दयन् (**ओजायमानः**) ओज इवाचरन् (**तन्वः**) तनुः शरीराणि (**च**) (**शुम्भते**) सुशोभते। अत्र व्यत्येनात्मनेपदम्। (**भीमः**) भयङ्करः (**न**) इव (**शृङ्गा**) शृङ्गाणि (**दविधाव**) भृशं चालयति (**दुर्गृभिः**) दुःखेन ग्रहीतुं योग्यः॥६॥

अन्वयः-यो भूषन्नेव बभ्रूष्वधिनम्मते पत्नी रोरुवद् वृषेव बलं दुर्गृभिर्भीमः सिंहः शृङ्गा नेवौजायमानस्तन्वश्च शुम्भते दविधाव सोऽत्यन्तं सुखमभ्येति॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये सिंहवच्छत्रुदुर्ग्राह्या वृषभवद् बलिष्ठाः पुष्टाऽऽरोग्यशरीरा महौषधिसेविनः सर्वान् सज्जनान् भूषयेयुस्तेऽत्र सुशोभन्ते॥६॥

पदार्थः-(**यः**) जो (**भूषन्**) अलंकृत करता हुआ (**न**) सा (**बभ्रूषु**) धर्म की धारणा करनेवालियों में (**अधि, नम्मते**) अधिक नम्न होता वा (**पत्नीः**) यज्ञसम्बन्ध करनेवाली स्त्रियों को (**रोरुवत्**) अत्यन्त बातचीत कह सुनाता वा (**वृषेव**) बैल के समान बल को और (**दुर्गृभिः**) दुःख से पकड़ने योग्य (**भीमः**) भयङ्कर सिंह (**शृङ्गा**) सींगों को (**न**) जैसे वैसे (**ओजायमानः**) बैल के समान आचरण करता हुआ (**तन्वः**) शरीर को (**च**) भी (**शुम्भते**) सुन्दर शोभायमान करता वा (**दविधाव**) निरन्तर चलाता अर्थात् उनसे चेष्टा करता, वह अत्यन्त सुख को (**अभि, एति**) प्राप्त होता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सिंह के तुल्य शत्रुओं से अग्राह्य, बैल के तुल्य अति बली, पुष्ट, नीरोग शरीरवाले, बड़ी ओषधियों के सेवक सब सज्जनों को शोभित करें, वे इस जगत् में शोभायमान होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स सं॒स्तिरो॑ वि॒स्तिर॒ सं गृ॑भायति जा॒नन्ने॒व जा॑न॒तीर्नित्य॒ आ शये॑।
पुन॑र्वर्धन्ते अपि॑ यन्ति दे॒व्य॑म॒न्यद्व॒र्पः पि॒त्रोः कृ॑ण्व॒ते सचा॑॥७॥

सः। सम्ऽस्तिरः। विऽस्तिरः। सम्। गृभायति। जानन्। एव। जानतीः। नित्यः। आ। शये। पुनः। वर्धन्ते। अपि। यन्ति। देव्यम्। अन्यत्। वर्पः। पित्रोः। कृण्वते। सचा॥७॥

पदार्थः-(**सः**) (**संस्तिरः**) सम्यगाच्छादकः (**विस्तिरः**) सुखविस्तारकः (**सम्**) (**गृभायति**) गृह्णाति। अत्र हस्य शनः शायच्। (**जानन्**) (**एव**) (**जानतीः**) ज्ञानयुक्ताः (**नित्यः**) (**आ**) (**शये**) (**पुनः**) (**वर्धन्ते**) (**अपि**) (**यन्ति**) (**देव्यम्**) देवेषु विद्वत्सु भवम् (**अन्यत्**) (**वर्पः**) रूपम् (**पित्रोः**) जननीजनकयोः (**कृण्वते**) कुर्वन्ति (**सचा**) समवेतम्॥७॥

अन्वयः-हे मनुष्या! यथा स संस्तिरो विष्टिरो विद्वान् संगृभायति तथा जानन्नित्योऽहं जानतीरेवाशये। ये पित्रोरन्यद्देव्यं वर्पोऽपियन्ति ते पुनर्वर्धन्ते कृण्वत च तथा यूयमपि सचा कुरुत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यैर्विद्यावद्भिः सह विदुषीणां विवाहो जायते ते नित्यं वर्धन्ते। ये सद्गुणान् गृह्णन्ति तेऽत्र पुरुषार्थिनो भूत्वा जन्मान्तरेऽपि सुखिनो जायन्ते॥७॥

पदार्थः-हे मनुष्यो! जैसे **(सः)** वह **(संस्तिरः)** अच्छा ढांपने **(विष्टिरः)** वा सुख फैलानेवाला विद्वान् **(सम्, गृभायति)** सुन्दरता से पदार्थों का ग्रहण करता वैसे **(जानन्)** जानता हुआ **(नित्यः)** नित्य मैं **(जानतीः)** ज्ञानवती उत्तम स्त्रियों के **(एव)** ही **(आ, शये)** पास सोता हूँ। जो **(पित्रोः)** माता-पिता के **(अन्यत्)** और **(देव्यम्)** विद्वानों में प्रसिद्ध **(वर्पः)** रूप को **(अपि, यन्ति)** निश्चय से प्राप्त होते हैं, वे **(पुनः)** बार-बार **(वर्द्धन्ते)** बढ़ते हैं और **(कृण्वते)** उत्तम-उत्तम कार्यों को भी करते हैं, वैसे तुम भी **(सचा)** मिला हुआ काम किया करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिन विद्वानों के साथ विदुषी स्त्रियों का विवाह होता है, वे विद्वान् जन नित्य बढ़ते हैं, जो उत्तम गुणों का ग्रहण करते वे यहाँ पुरुषार्थी होकर जन्मान्तर में भी सुखयुक्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मघुषीः प्रायवे पुनः।
तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम्॥८॥

तम्। अग्रुवः। केशिनीः। सम्। हि। रेभिरे। ऊर्ध्वाः। तस्थुः। मघुषीः। प्र। आयवे। पुनरिति। तासाम्। जराम्। प्रऽमुञ्चन्। एति। नानदत्। असुम्। परम्। जनयन्। जीवम्। अस्तृतम्॥८॥

पदार्थः-**(तम्)** विद्वांसं पतिम् **(अग्रुवः)** अग्रगण्याः **(केशिनीः)** प्रशंसनीयकेशाः **(सम्)** **(हि)** खलु **(रेभिरे)** **(ऊर्ध्वाः)** उच्चपदव्यः **(तस्थुः)** तिष्ठन्ति **(मघुषीः)** म्रियमाणाः **(प्र आयवे)** प्रापणाय **(पुनः)** **(तासाम्)** **(जराम्)** वृद्धावस्थाम् **(प्रमुञ्चन्)** हापयन् **(एति)** प्राप्नोति **(नानदत्)** **(असुम्)** प्राणम् **(परम्)** इष्टम् **(जनयन्)** प्रकाशयन् **(जीवम्)** जीवात्मानम् **(अस्तृतम्)** अहिंसितम्॥८॥

अन्वयः-या अग्रुवः केशिनीस्तं संरेभिरे ता हि प्रायवे मघुषीः पुनरूर्ध्वास्तस्थुः। योऽस्तृतं परमसुं जीवं नानदत् तासां जरां प्रमुञ्चन् विद्या जनयन् सुशिक्षाः प्रचारयति स उत्तमं जन्मैति॥८॥

भावार्थः-याः कन्या ब्रह्मचर्य्येणाऽखिला विद्या अभ्यस्यन्ति ता इह प्रशंसिता भूत्वा बहुसुखं भुक्त्वा जन्मान्तरेऽपि श्रेष्ठं सुखं प्राप्नुवन्ति, ये विद्वांसोऽपि शरीरात्मबलं न हिंसन्ति ते जरारोगरहिता जायन्ते॥८॥

पदार्थः-जो (**अग्रुवः**) अग्रगण्य (**केशिनीः**) प्रशंसनीय केशोंवाली युवास्था को प्राप्त होती हुई कन्या (**तम्**) उस विद्वान् पति को (**सं, रेभिरे**) सुन्दरता से कहती हैं वे (**हि**) ही (**प्रायवे**) पठाने (भेजने) अर्थात् दूसरे देश उस पति के पहुंचाने को (**मम्रुषीः**) मरी सीं हों (**पुनः**) फिर उसी के घर आने समय (**ऊर्ध्वाः**) ऊंची पदवी पाये हुई सी (**तस्थुः**) स्थिर होती हैं, जो (**अस्तृतम्**) नष्ट न किया गया (**परम्**) सबको इष्ट (**असुम्**) ऐसे प्राण को वा (**जीवम्**) जीवात्मा को (**नानदत्**) निरन्तर रटावे और (**तासाम्**) उक्त उन कन्याओं के (**जराम्**) बुढ़ापे को (**प्रमुञ्चन्**) अच्छे प्रकार छोड़ता और विद्याओं को (**जनयन्**) उत्पन्न कराता हुआ उत्तम शिक्षाओं का प्रचार कराता है, वह उत्तम जन्म (**एति**) पाता है॥८॥

भावार्थः-जो कन्याजन ब्रह्मचर्य के साथ समस्त विद्याओं का अभ्यास करती हैं, वे इस संसार में प्रशंसित हो और बहुत सुख भोग जन्मान्तर में भी उत्तम सुख को प्राप्त होती हैं और जो विद्वान् लोग भी शरीर और आत्मा के बल को नष्ट नहीं करते, वे वृद्धावस्था और रोगों से रहित होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ऋयः।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह॥९॥

अधीवासम्। परि। मातुः। रिहन्। अह। तुविऽग्रेभिः। सत्वऽभिः। याति। वि। ऋयः। वयः। दधत्। पत्ऽवते। रेरिहत्। सदा। अनु। श्येनी। सचते। वर्तनिः। अह॥९॥

पदार्थः-(**अधीवासम्**) अधीवासमिव घासादिकम् (**परि**) (**मातुः**) मान्यप्रदायाः पृथिव्याः (**रिहन्**) परित्यजन् (**अह**) (**तुविग्रेभिः**) बहुशब्दवद्भिः (**सत्वभिः**) प्राणिभिः (**याति**) प्राप्नोति (**वि**) (**ऋयः**) वेगयुक्तः (**वयः**) आयुः (**दधत्**) धरन् (**पद्वते**) पादौ विद्येते यस्य तस्मै (**रेरिहत्**) अतिशयेन त्यजेत् (**सदा**) (**अनु**) (**श्येनी**) श्येनस्य स्त्री (**सचते**) प्राप्नोति (**वर्त्तनिः**) वर्त्तमानः (**अह**) निरोधे॥९॥

अन्वयः-हे वीर! यथा ऋयोऽग्निमातुरधिवासं परिरिहन्नह तुविग्रेभिः सत्वभिर्वियाति यथा च वर्त्तनिः श्येनी वयो दधत् पद्वते सचते तथा दुष्टाननु रेरिहत् सन् भवान् सदाह निगृह्णीयात्॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽग्निर्जङ्गलानि दहति पर्वतान् त्रोटयति तथाऽन्यायमधार्मिकांश्च निवर्त्य दुष्टानामभिमानान् त्रोटयित्वा सत्यधर्मं यूयं प्रचारयत॥९॥

पदार्थः-हे वीर! जैसे (**ऋयः**) वेगयुक्त अग्नि (**मातुः**) मान देनेवाली पृथिवी के (**अधिवासम्**) ऊपर से शरीर को जिससे ढांपते उस वस्त्र के समान घास आदि को (**परि, रिहन्**) परित्याग करता हुआ (**अह**) प्रसिद्ध में (**तुविग्रेभिः**) बहुत शब्दों वाले (**सत्वभिः**) प्राणियों के साथ (**वि, याति**) विविध प्रकार से प्राप्त होता है और जैसे (**वर्त्तनिः**) वर्त्तमान (**श्येनी**) बाज पक्षी की स्त्री वाजिनी (**वयः**) अवस्था को

(दधत्) धारण करती हुई **(पद्वते)** पगों वाले द्विपद-चतुष्पद प्राणी के लिये **(सचते)** प्राप्त होती है, वैसे दुष्टों को **(अनु, रेरिहत्)** अनुक्रम से बार-बार छोड़ते हुए आप **(सदा)** **(अह)** ही उनको निग्रह स्थान को पहुंचाओ॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे अग्नि जङ्गलादिकों को जलाता वा पर्वतों को तोड़ता, वैसे अन्याय और अधर्मात्माओं की निवृत्ति कर और दुष्टों के अभिमानों को तोड़ के सत्यधर्म का तुम प्रचार करो॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः॥ १०॥ ६॥

अस्माकम्। अग्ने। मघवत्ऽसु। दीदिहि। अध। श्वसीवान्। वृषभः। दमूनाः। अवऽअस्य। शिशुऽमतीः। अदीदेः। वर्मऽइव। युत्ऽसु। परिऽजर्भुराणः।१०॥

पदार्थः-**(अस्माकम्)** **(अग्ने)** पावक इव वर्त्तमान **(मघवत्सु)** बहुधनेषु **(दीदिहि)** प्रकाशय **(अध)** अनन्तरम् **(श्वसीवान्)** प्राणवान् **(वृषभः)** श्रेष्ठः **(दमूनाः)** दान्तः **(अवास्य)** विरुद्धतया प्रक्षिप्य। अत्रान्येषामपीति दीर्घः। **(शिशुमतीः)** प्रशस्ताः शिशवो बालका विद्यन्ते यासां ताः **(अदीदेः)** प्रकाशयेः **(वर्मेव)** कवचमिव **(युत्सु)** संग्रामेषु **(परिजर्भुराणः)** परितः सर्वतोऽतिशयेन पुष्यन्॥१०॥

अन्वयः-हे अग्ने! वृषभो दमूनाः श्वसीवान् परजर्भुराणस्त्वमस्माकं युत्सु मघवत्सु वर्मेव शिशुमतीर्दीदिहि। अध दुःखान्यवास्य सुखान्यदीदेः॥१०॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वन्! संग्रामे यथा वर्म्मणा शरीरं रक्ष्यते तथा न्यायेन प्रजा रक्षेः संग्रामे स्त्रियो न हन्याः। यथा धनाढ्यानां स्त्रियो नित्यं मोदन्ते तथैव प्रजा मोदयेः॥१०॥

पदार्थः-हे **(अग्ने)** पावक के समान वर्त्तमान विद्वान्! **(वृषभः)** श्रेष्ठ **(दमूनाः)** इन्द्रियों का दमन करनेवाले **(श्वसीवान्)** प्राणवान् और **(परिजर्भुराणः)** सब ओर से पुष्ट होते हुए आप **(अस्माकम्)** हमारे **(युत्सु)** संग्राम और **(मघवत्सु)** बहुत हैं धन जिनमें उन घरों वा मित्रवर्गों में **(वर्मेव)** कवच के समान **(शिशुमतीः)** प्रशंसित बालकोंवाली स्त्री वा प्रजाओं को **(दीदिहि)** प्रकाशित करो **(अध)** इसके अनन्तर दुःखों के **(अवास्य)** विरुद्धता से दूर पहुंचा सुखों को **(अदीदेः)** प्रकाशित करो॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान्! संग्राम में जैसे कवच से शरीर संरक्षित किया जाता है, वैसे न्याय से प्रजाजनों की रक्षा कीजिये और युद्ध में स्त्रियों को न मारिये। जैसे धनी पुरुषों की स्त्रियां नित्य आनन्द भोगती हैं, वैसे ही प्रजाजनों को आनन्दित कीजिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒दम॑ग्ने॒ सुधि॑तं॒ दुर्धि॑ता॒दधि॒ प्रिया॑दु॒ चि॒न्मन्म॑न॒: प्रेयो॑ अस्तु ते।
यत्ते॑ शु॒क्रं त॒न्वो३॑ रोच॑ते शुचि॒ तेना॒स्मभ्यं॑ वनसे॒ रत्न॒मा त्वम्॥ ११॥

इ॒दम्। अ॒ग्ने॒। सुऽधि॑तम्। दु:ऽधि॑तात्। अधि॑। प्रि॒यात्। उ॒म् इति॑। चि॒त्। मन्म॑न:। प्रेय॑:। अ॒स्तु॒। ते॒। यत्। ते॒। शु॒क्रम्। त॒न्व॑:। रोच॑ते। शुचि॑। तेन॑। अ॒स्मभ्य॑म्। व॒न॒से॒। रत्न॑म्। आ। त्वम्॥ ११॥

पदार्थ:-(**इदम्**) (**अग्ने**) विद्वन् (**सुधितम्**) सुष्ठु धृतम् (**दुर्धितात्**) दु:खेन धृतात् (**अधि**) (**प्रियात्**) (उ) वितर्के (**चित्**) अपि (**मन्मन:**) मम मन: (**प्रेय:**) अतिशयेन प्रियम् (**अस्तु**) भवतु (**ते**) तुभ्यम् (**यत्**) (**ते**) तव (**शुक्रम्**) शुद्धम् (**तन्व:**) शरीरस्य (**रोचते**) (**शुचि**) पवित्रकारकम् (**तेन**) (**अस्मभ्यम्**) (**वनसे**) संभजसि (**रत्नम्**) (**आ**) (**त्वम्**)॥ ११॥

अन्वय:-हे अग्ने! दुर्धितादु प्रियात् सुधितमिदं मन्मनस्ते प्रेयोऽस्तु यत्ते चित् तन्व: शुचि शुक्रमधिरोचते तेनास्मभ्यं त्वं रत्नमावनसे॥ ११॥

भावार्थ:-मनुष्यैर्दु:खान्न शोचितव्यं सुखाच्च न हर्षितव्यं यत: परस्परस्योपकाराय चित्तं संलग्येत यदैश्वर्यं तत्सर्वेषां सुखाय विभज्येत॥ ११॥

पदार्थ:-हे (**अग्ने**) विद्वान्! (**दुर्धितात्**) दु:ख के साथ धारण किये हुए व्यवहार (**उ**) या तो (**प्रियात्**) प्रिय व्यवहार से (**सुधितम्**) सुन्दर धारण किया हुआ (**इदम्**) यह (**मन्मन:**) मेरा मन (**ते**) तुम्हारा (**प्रेय:**) अतीव प्यारा (**अस्तु**) हो और (**यत्**) जो (**ते**) तुम्हारे (**चित्**) निश्चय के साथ (**तन्व:**) शरीर का (**शुचि**) पवित्र करनेवाला (**शुक्रम्**) शुद्ध पराक्रम (**अधिरोचते**) अधिकतर प्रकाशमान होता है (**तेन**) उससे (**अस्मभ्यम्**) हम लोगों के लिये (**त्वम्**) आप (**रत्नम्**) मनोहर धन का (**आ, वनसे**) अच्छे प्रकार सेवन करते हैं॥ ११॥

भावार्थ:-मनुष्यों को दु:ख से सोच न करना चाहिये और न सुख से हर्ष मानना चाहिये, जिससे एक-दूसरे के उपकार के लिये चित्त अच्छे प्रकार लगाया जाये और जो ऐश्वर्य हो, वह सब के सुख के लिये बांटा जाये॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

रथा॑य॒ नाव॑मु॒त नो॑ गृ॒हाय॒ नित्या॑रित्रां प॒द्वतीं॑ रास्यग्ने।
अ॒स्माक॑ वी॒राँ उ॒त नो॑ म॒घोनो॒ जनाँ॑श्च॒ या पा॒रया॒च्छर्म॒ या च॑॥ १२॥

रथा॑य। नाव॑म्। उ॒त। न॒:। गृ॒हा॒य॑। नित्य॑ऽअरित्राम्। प॒त्ऽव॑तीम्। रा॒सि॒। अ॒ग्ने॒। अ॒स्माक॑म्। वी॒रान्। उ॒त। न॒:। म॒घोन॑:। जना॑न्। च॒। या। पा॒रया॑त्। शर्म॑। या। च॒॥ १२॥

पदार्थ:-(**रथाय**) समुद्रादिषु रमणाय (**नावम्**) बृहती नौकाम् (**उत**) अपि (**न:**) अस्माकम् (**गृहाय**) निवासस्थानाय (**नित्यारित्राम्**) नित्यानि अरित्राणि नौस्तम्भनानि जलगाम्भीर्य्यपरीक्षकाणि यस्यां ताम् (**पद्वतीम्**) पादा इव प्रशस्तानि चक्राणि विद्यन्ते यस्यां ताम् (**रासि**) ददासि (**अग्ने**) प्राप्तशिल्पविद्य (**अस्माकम्**) (**वीरान्**) अतिरथान्योद्धॄन् (**उत**) अपि (**न:**) अस्मान् (**मघोन:**) धनाढ्यान् (**जनान्**) प्रसिद्धान् विदुष: (**च**) (**या**) (**पारयात्**) समुद्रपारं गमयेत् (**शर्म**) गृहम् (**या**) (**च**)॥१२॥

अन्वय:-हे अग्ने विद्वँस्त्वं या अस्माकं वीरानुत मघोनो जनान्नोऽस्माँश्च समुद्रं पारयात्, या च न: शर्मागमयेत् तां नित्यारित्रां पद्वतीं नावं नो रथायोत गृहाय रासि॥१२॥

भावार्थ:-विद्वद्भिर्यथा मनुष्या अश्वादयश्च पद्भ्यां गच्छन्ति तादृशीं बृहतीं नावं रचयित्वा द्वीपान्तरे समुद्रे युद्धाय व्यवहाराय च गत्वाऽऽगत्य ऐश्वर्योन्नति: सततं कार्य्या॥१२॥

पदार्थ:-हे (**अग्ने**) शिल्पविद्या पाये हुए विद्वान्! आप (**या**) जो (**अस्माकम्**) हमारे (**वीरान्**) वीरों (**उत**) और भी (**मघोन:**) धनवान् (**जनान्**) मनुष्यों और (**न:**) हम लोगों को (**च**) भी समुद्रे के (**पारयात्**) पार उतारे (**च**) और (**या**) जो हमको (**शर्म**) सुख को अच्छे प्रकार प्राप्त करे, उस (**नित्यारित्राम्**) नित्य दृढ़ बन्धनयुक्त जल की गहराई की परीक्षा करते हुए स्तम्भों तथा (**पद्वतीम्**) पैरों के समान प्रशंसित पहियों से युक्त (**नावम्**) बड़ी नाव को (**न:**) हमारे (**रथाय**) समुद्र आदि में रमण के लिये (**उत**) वा (**गृहाय**) घर के लिये (**रासि**) देते हो॥१२॥

भावार्थ:-विद्वानों को चाहिये कि जैसे मनुष्य और घोड़े आदि पशु पैरों से चलते हैं, वैसे चलनेवाली बड़ी नाव रच के और एक द्वीप से दूसरे द्वीप वा समुद्र में युद्ध अथवा व्यवहार के लिये जाय-आय [जाना-आना] करके ऐश्वर्य की उन्नति निरन्तर करें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒भी नो॑ अग्न उ॒क्थमिज्जु॑गु॒र्या॒ द्यावा॒क्षामा॒ सिन्ध॑वश्च॒ स्वगू॑र्ता:।
गव्यं॒ यव्यं॒ यन्तो॑ दी॒र्घाहे॒षं॑ वर॑मरु॒ण्यो वरन्त॥ १३॥ ७॥

अ॒भि। न॒:। अ॒ग्ने॒। उ॒क्थम्। इत्। जु॒गु॒र्या॒:। द्यावा॒क्षामा॑। सिन्ध॑व:। च॒। स्वऽगू॑र्ता:। गव्य॑म्। यव्य॑म्। यन्त॑:। दी॒र्घा। अहा॑। इष॑म्। वर॑म्। अ॒रु॒ण्य॑:। व॒र॒न्त॒॥ १३॥

पदार्थ:-(**अभि**) आभिमुख्ये। अत्र **संहितायामिति** दीर्घ:। (**न:**) अस्मान् (**अग्ने**) विद्वन् (**उक्थम्**) प्रशंसनीयम् (**इत्**) (**जुगुर्या:**) उद्यच्छे:। उद्यमिन: कुर्या: (**द्यावाक्षामा**) अन्तरिक्षं भूमिश्च (**सिन्धव:**)

समुद्रा नद्यश्च **(च)** **(स्वगूर्त्ताः)** स्वैरुद्यताः **(गव्यम्)** गोर्विकारं दुग्धादिकं सुवर्णादिकम्वा **(यव्यम्)** यवानां भवनं क्षेत्रम् **(यन्तः)** प्राप्नुवन्तः **(दीर्घा)** दीर्घाणि **(अहा)** दिनानि **(इषम्)** अन्नम् **(वरम्)** रत्नादिकम् **(अरुण्यः)** उषःकाला **(वरन्त)** स्वीकुर्युः। अत्र व्यत्ययेन शप्॥१३॥

अन्वयः–यथा द्यावाक्षामा सिन्धवोऽरुण्यश्च वरमिषमुक्थं गव्यं यव्यं यन्तः स्वगूर्त्ताः सन्तः दीर्घाहावरन्त तथाग्ने नोऽभीज्जुगुर्य्याः॥१३॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सदा पुरुषार्थिभिर्भवितव्यं यैर्यानैः भूम्यन्तरिक्षसमुद्रनदीषु सुखेन सद्यो गमनं स्यात् तानि यानान्यारुह्य प्रतिदिनं रजन्याश्चतुर्थे प्रहर उत्थाय दिवसेऽसुप्त्वा सदा प्रयतितव्यं यत उद्यमिन ऐश्वर्यमुपयन्त्यत इति॥१३॥

अत्र विद्वत्पुरुषार्थगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति चत्वारिंशदुत्तरं शततमं १४० सूक्तं सप्तमो ७ वर्गश्च समाप्तः॥

पदार्थः–जैसे **(द्यावाक्षामा)** अन्तरिक्ष और भूमि **(सिन्धवः)** समुद्र और नदी तथा **(अरुण्यः)** उषःकाल **(च)** और **(वरम्)** उत्तम रत्नादि पदार्थ **(इषम्)** अन्न **(उक्थम्)** प्रशंसनीय **(गव्यम्)** गौ का दूध आदि वा **(यव्यम्)** जौ के होनेवाले खेत को **(यन्तः)** प्राप्त होते हुए **(स्वगूर्त्ताः)** अपने-अपने स्वाभाविक गुणों से उद्यत **(दीर्घा)** बहुत **(अहा)** दिनों को **(वरन्त)** स्वीकार करें, वैसे हे **(अग्ने)** विद्वान्! **(नः)** हम लोगों को **(अभि, इत्, जुगुर्याः)** सब ओर से उद्यम ही में लगाइये॥१३॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को सदा पुरुषार्थी होना चाहिये। जिन यानों से भूमि, अन्तरिक्ष, समुद्र और नदियों में सुख से शीघ्र जाना हो, उन यानों पर चढ़कर प्रतिदिन रात्रि के चौथे पहर में उठकर और दिन में न सोकर सदा प्रयत्न करना चाहिये, जिससे उद्यमी ऐश्वर्य को प्राप्त होते हैं॥१३॥

इस सूक्त में विद्वानों के पुरुषार्थ और गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ चालीसवां १४० सूक्त और सातवां ७ वर्ग समाप्त हुआ॥

बळित्थेत्यस्य त्रयोदशर्चस्यैकचत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १,२,३,६,११ जगती। ४,७,९,१० निचृज्जगती छन्दः। निषादः स्वरः। ५ स्वराट् त्रिष्टुप्। ८ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। १२ भुरिक् पङ्क्तिः। १३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्विद्वद्गुणानुपदिशति॥

अब एक सौ इकतालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में फिर विद्वानों के गुणों का उपदेश करते हैं॥

बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसा यतो जनि।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः॥ १॥

बट्। इत्था। तत्। वपुषे। धायि। दर्शतम्। देवस्य। भर्गः। सहसः। यतः। जनि। यत्। ईम्। उप। ह्वरते। साधते। मतिः। ऋतस्य। धेनाः। अनयन्त। सऽस्रुतः॥ १॥

पदार्थः-(**बट्**) सत्यम् (**इत्था**) अनेन प्रकारेण विदुषः (**तत्**) (**वपुषे**) सुरूपाय (**धायि**) ध्रियेत (**दर्शतम्**) द्रष्टव्यम् (**देवस्य**) विदुषः (**भर्गः**) शुद्धं तेजः (**सहसः**) विद्याबलवतः (**यतः**) (**जनि**) उत्पद्यते। अत्राऽडभावः। (**यत्**) (**ईम्**) सर्वतः (**उप**) (**ह्वरते**) (**साधते**) (**मतिः**) प्रज्ञा (**ऋतस्य**) सत्यस्य (**धेनाः**) वाण्यः (**अनयन्त**) नयन्ति (**सस्रुतः**) याः समानं सत्यं मार्गं स्रुवन्ति गच्छन्ति ताः॥ १॥

अन्वयः-हे मनुष्या! यद् दर्शतं देवस्य भर्गः प्रति मम मतिरुपह्वरते साधते च सस्रुत ऋतस्य धेना ईमनयन्त यतस्तत् सहसो जनि ततस्तद् बडित्था वपुषे युष्माभिर्धायि॥ १॥

भावार्थः-हे मनुष्या! यया प्रज्ञया वाचा सत्याचारेण च विद्यावतां द्रष्टव्यं स्वरूपं ध्रियते कामश्च साध्यते तां वाचं तत्सत्यं च यूयं नित्यं स्वीकुरुत॥ १॥

पदार्थः-हे मनुष्यो! (**यत्**) जिस (**दर्शतम्**) देखने योग्य (**देवस्य**) विद्वान् के (**भर्गः**) शुद्ध तेजः के प्रति मेरी (**मतिः**) बुद्धि (**उपह्वरते**) जाती कार्यसिद्धि करती और (**सस्रुतः**) जो समान सत्यमार्ग को प्राप्त होतीं वे (**ऋतस्य**) सत्य व्यवहार की (**धेनाः**) वाणियों को (**ईम्**) सब ओर से (**अनयन्त**) सत्यता को पहुंचाती तथा (**यतः**) जिस कारण (**तत्**) वह तेज (**सहसः**) विद्याबल से (**जनि**) उत्पन्न होता उस कारण (**बडित्था**) वह सत्य तेज अर्थात् विद्वानों के गुणों का प्रकाश इस प्रकार अर्थात् उक्त रीति से (**वपुषे**) अपने सुरूप के लिये तुम लोगों से (**धायि**) धारण किया जाय॥ १॥

भावार्थः-हे मनुष्यो! जिस उत्तम बुद्धि और सत्य आचरण से विद्यावानों का देखने योग्य स्वरूप धारण किया जाता और काम सिद्ध किया जाता उस वाणी और उस सत्य आचार को तुम नित्य स्वीकार करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पृ॒क्षो वपु॑: पितु॒मान्नित्य॒ आ श॑ये द्वि॒तीय॒मा स॒प्तशि॑वासु मा॒तृषु॑।
तृ॒तीय॑मस्य वृष॒भस्य॑ दो॒हसे॒ दश॑प्रमतिं जनयन्त॒ योष॑णः॥ २॥

पृ॒क्षः। वपु॑:। पि॒तु॒ऽमान्। नित्य॑:। आ। श॒ये॒। द्वि॒तीय॑म्। आ। स॒प्तऽशि॑वासु। मा॒तृषु॑। तृ॒तीय॑म्। अ॒स्य॒। वृ॒ष॒भस्य॑। दो॒हसे॑। दश॑ऽप्रमतिम्। ज॒न॒य॒न्त॒। योष॑णः॥ २॥

पदार्थः-(**पृक्षः**) प्रष्टव्यम् (**वपुः**) सुन्दरं रूपम् (**पितुमान्**) प्रशस्तान्नयुक्तः (**नित्यः**) नित्यस्स्वरूपः (**आ**) (**शये**) (**द्वितीयम्**) (**आ**) (**सप्तशिवासु**) सप्तविधासु कल्याणकारिणीषु (**मातृषु**) मान्यकारिकासु (**तृतीयम्**) (**अस्य**) (**वृषभस्य**) यज्ञादिकर्मद्वारा वृष्टिकरस्य (**दोहसे**) कामानां प्रपूर्णाय (**दशप्रमतिम्**) दशधा प्रकृष्टा मतिर्यस्मिँस्तम् (**जनयन्त**) प्रकटयन्ति (**योषणः**) मिश्रणशीला युवतयः॥ २॥

अन्वयः-नित्यः पितुमान् अहं प्रथमं पृक्षो वपुराशयेऽस्य वृषभस्य मम द्वितीयं सप्तशिवासु मातृष्वावर्त्तते तृतीयं दशप्रमतिं वपुर्दोहसे योषणो जनयन्त॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अत्र सप्तविधेषु लोकेषु ब्रह्मचर्येणादिमं गृहाश्रमेण द्वितीयं वानप्रस्थसंन्यासाभ्यां तृतीयं कर्मोपासनविज्ञानं लभन्ते ते दशानामिन्द्रियाणां प्राणानां च विषयमनोबुद्धि- चित्ताऽहङ्कारजीवानां च ज्ञानं प्राप्नुवन्ति॥ २॥

पदार्थः-(**नित्यः**) नित्य (**पितुमान्**) प्रशंसित अन्नयुक्त मैं पहिले (**पृक्षः**) पूंछने कहने योग्य (**वपुः**) सुन्दररूप का (**आ, शये**) आशय लेता अर्थात् आश्रित होता हूँ (**अस्य**) इस (**वृषभस्य**) यज्ञादि कर्म द्वारा जल वर्षानेवाले का मेरा (**द्वितीयम्**) दूसरा सुन्दर रूप (**सप्तशिवासु**) सात प्रकार की कल्याण करने (**मातृषु**) और मान्य करनेवाली माताओं के समीप (**आ**) अच्छे प्रकार वर्त्तमान और (**तृतीयम्**) तीसरा (**दशप्रमतिम्**) दश प्रकार की उत्तम मति जिसमें होती उस सुन्दररूप को (**दोहसे**) कामों की परिपूर्णता के लिये (**योषणः**) प्रत्येक व्यवहारों को मिलानेवाली स्त्री (**जनयन्त**) प्रकट करती हैं॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य इस जगत् में सात प्रकार के लोकों में ब्रह्मचर्य से प्रथम, गृहाश्रम से दूसरे और वानप्रस्थ वा संन्यास से तीसरे कर्म और उपासना के विज्ञान को प्राप्त होते वे दश इन्द्रियों, दश प्राणों के विषयक मन, बुद्धि, चित्त, अहङ्कार और जीव के ज्ञान को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

निर्यदी॑ बु॒ध्नान्म॑हि॒षस्य॒ वर्प॑स ईशा॒नास॒: शव॑सा क्र॒न्त सू॒रय॑:।

यदी॑मनु॑ प्र॒दिवो॒ मध्व॑ आध॒वे गुहा॒ सन्तं॑ मात॒रिश्वा॑ मथा॒यति॑॥ ३॥

निः। यत्। ई॒म्। बु॒ध्नात्। म॒हि॒षस्य॑। वर्प॑सः। ई॒शा॒नासः॑। शव॑सा। क्र॒न्त॒। सू॒रयः॑। यत्। ई॒म्। अनु॑। प्र॒ऽदिवः॑। मध्वः॑। आ॒ऽध॒वे। गुहा॑। सन्त॑म्। मा॒त॒रिश्वा॑। मथा॒यति॑॥ ३॥

पदार्थः-(**नि**) नितराम् (**यत्**) यम् (**ईम्**) इमं प्रत्यक्षम् (**बुध्नात्**) अन्तरिक्षात् (**महिषस्य**) महतः। **महिष इति महन्नामसु पठितम्।** (निघं०३.३) (**वर्पसः**) रूपस्य। **वर्प इति रूपनामसु पठितम्।** (निघं०३.७) (**ईशानासः**) ऐश्वर्ययुक्ताः (**शवसा**) बलेन (**क्रन्त**) क्रमन्तु (**सूरयः**) विद्वांसः (**यत्**) ये (**ईम्**) (**अनु**) (**प्रदिवः**) प्रकृष्टद्युतिमतः (**मध्वः**) विज्ञानयुक्तस्य (**आधवे**) समन्तात्प्रक्षेपणे (**गुहा**) बुद्धौ (**सन्तम्**) (**मातरिश्वा**) प्राणः (**मथायति**) मथ्नाति। अत्र **छन्दसि शायजपी**ति शायच्॥ ३॥

अन्वयः-यत् ईशानासः सूरयश्शवसा यथाधवे मातरिश्वाऽग्निं मथायति तथा महिषस्य वर्पसः सम्बन्धे स्थितं बुध्नादीमनुक्रन्त मध्वः प्रदिवो गुहा सन्तमीं यत् निष्क्रन्त ततस्ते सुखिनो जायन्ते॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव ब्रह्मविदो जायन्ते ये धर्माऽनुष्ठानयोगाभ्यासं सत्सङ्गं च कृत्वा स्वात्मानं विदित्वा परमात्मानं विदन्ति त एव मुमुक्षुभ्य एतं ज्ञापयितुमर्हन्ति॥ ३॥

पदार्थः-(**यत्**) जो (**ईशानासः**) ऐश्वर्ययुक्त (**सूरयः**) विद्वान् जन (**शवसा**) बल से जैसे (**आधवे**) सब ओर से अन्न आदि के अलग करने के निमित्त (**मातरिश्वा**) प्राण वायु जाठराग्नि को (**मथायति**) मथता है वैसे (**महिषस्य**) बड़े (**वर्पसः**) रूप अर्थात् सूर्यमण्डल के सम्बन्ध में स्थित (**बुध्नात्**) अन्तरिक्ष से (**ईम्**) इस प्रत्यक्ष व्यवहार को (**अनुक्रन्त**) अनुक्रम से प्राप्त हों वा (**मध्वः**) विशेष ज्ञानयुक्त (**प्रदिवः**) कान्तिमान् आत्मा के (**गुहा**) गृहाशय में अर्थात् बुद्धि में (**सन्तम्**) वर्त्तमान (**ईम्**) प्रत्यक्ष (**यत्**) जिस ज्ञान को (**निष्क्रन्त**) निरन्तर क्रम से प्राप्त हों, उससे वे सुखी होते हैं॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही ब्रह्मवेत्ता विद्वान् होते हैं, जो धर्मानुष्ठान, योगाभ्यास और सत्सङ्ग करके अपने आत्मा को जान परमात्मा को जानते हैं और वे ही मुमुक्षु जनों के लिये इस ज्ञान को विदित कराने के योग्य होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र यत्पि॒तुः प॑र॒मान्नी॒यते॒ पर्या पृ॒क्षुधो॑ वी॒रुधो॒ दंसु॑ रोहति।

उ॒भा यद॑स्य जनु॒षं यदि॑न्व॒त आदिद्यवि॑ष्ठो अभवद् घृ॒णा शुचि॑॥ ४॥

प्र। यत्। पि॒तुः। प॒र॒मात्। नी॒यते॑। परि॑। आ। पृ॒क्षुध॑ः। वी॒रुध॑ः। दम्ऽसु॑। रो॒ह॒ति॒। उ॒भा। यत्। अ॒स्य॒। ज॒नु॒षम्। यत्। इ॒न्व॑तः। आत्। इत्। यवि॑ष्ठः। अ॒भ॒व॒त्। घृ॒णा। शुचि॑॥ ४॥

पदार्थः-(**प्र**) (**यत्**) (**पितुः**) अन्नम् (**परमात्**) उत्कृष्टात् प्रयत्नात् (**नीयते**) प्राप्यते (**परि**) (**आ**) (**पृक्षुधः**) प्रकर्षेण क्षोधितुं भोक्तुमिष्टाः। **क्षुध बुभुक्षायाम्।** अत्र कर्मणि क्विप् पृषोदरादित्वात् पूर्वसंप्रसारणं च। (**वीरुधः**) अतिविस्तृता लताः (**दंसु**) दमेषु (**रोहति**) वर्द्धते (**उभा**) उभौ (**यत्**) (**अस्य**) वृक्षजातेः (**जनुषम्**) जन्म (**यत्**) (**इन्वतः**) प्रियस्य (**आत्**) आनन्तर्य्ये (**इत्**) एव (**यविष्ठः**) अतिशयेन युवा यविष्ठः (**अभवत्**) भवेत् (**घृणा**) दीप्तिः (**शुचिः**) पवित्रा॥४॥

अन्वयः-पुरुषेण परमात् यदस्य पितुः प्रणीयते यो दंसु पृक्षुधो वीरुधः पर्य्यारोहत्यादिन्वतो यज्जनुषमभवत् यद्यः शुचिर्घृणाऽभवत् तावुभा इदेव यविष्ठो जनः प्राप्नुयात्॥४॥

भावार्थः-मनुष्यैरन्नमौषधं च सर्वतो ग्राह्यं तत्संस्कृतेन भुक्तेन सर्वं सुखं भवतीति मन्तव्यम्॥४॥

पदार्थः-पुरुष से (**परमात्**) उत्कृष्ट उत्तम यत्न के साथ (**यत्**) जो (**अस्य**) प्रत्यक्ष वृक्षजाति का सम्बन्धी (**पितुः**) अन्न (**प्रणीयते**) प्राप्त किया जाता है वा जो (**दंसु**) दूसरों के दबाने आदि के निमित्त में (**पृक्षुधः**) अत्यन्त भोगने को इष्ट (**वीरुधः**) अत्यन्त पौंडी हुई लताओं पर (**पर्य्यारोहति**) चारों और से पौंडता है (**आत्**) और (**इन्वतः**) प्रिय इस यजमान का (**यत्**) जो (**जनुषम्**) जन्म (**अभवत्**) हो तथा (**यत्**) जो (**शुचिः**) पवित्र (**घृणा**) चमक-दमक हो उन (**उभा**) दोनों को (**इत्**) ही (**यविष्ठः**) अत्यन्त तरुण जन प्राप्त होवे॥४॥

भावार्थः-मनुष्यों को चाहिये कि अन्न और औषध सब से लेवें और संस्कार किये अर्थात् बनाये हुए उस अन्न के भोजन से समस्त सुख होता है, ऐसा जानना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आदिन्मातृराविँशद्यास्वा शुचिरहिँस्यमान उर्विया वि वावृधे।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते॥५॥८॥

आत्। इत्। मातृः। आ। अविशत्। यासु। आ। शुचिः। अहिंस्यमानः। उर्विया। वि। ववृधे। अनु। यत्। पूर्वाः। अरुहत्। सनाऽजुवः। नि। नव्यसीषु। अवरासु। धावते॥५॥

पदार्थः-(**आत्**) आनन्तर्य्ये (**इत्**) एव (**मातृः**) मातृवन्मान्यप्रदा ओषधीः (**आ**) (**अविशत्**) विशति (**यासु**) (**आ**) (**शुचिः**) (**अहिंस्यमानः**) अहिंसितः सन् (**उर्विया**) बहुना (**वि**) (**वावृधे**) वर्द्धते। अत्र **तुजादीनामित्यभ्यासदैर्घ्यम्**। (**अनु**) (**यत्**) यः (**पूर्वाः**) (**अरुहत्**) वर्धयति (**सनाजुवः**) सनातनी जूर्वेगो यासां ताः (**न**) (**नव्यसीषु**) अतिशयेन नवीनासु (**अवरासु**) अर्वाचीनासु (**धावते**) सद्यो गच्छति॥५॥

अन्वयः-ये यासु नव्यसीष्ववरास्वोषधीषु निधावते यद्यस्सनाजुवः पूर्वा ओषधीरन्वरुहत् स तास्वाशुचिरहिंस्यमानः सन् उर्विया विवावृध आदिन्मातॄराविशत्॥५॥

भावार्थः-ये पुरुषा वैद्यकविद्यामधीत्य महौषधानि युक्त्या सेवन्ते ते बहु वर्द्धन्ते। ओषधयो द्विविधा भवन्ति प्राक्ताना नवीनाश्च तासु ये विचक्षणा भवन्ति त एवारोगा जायन्ते॥५॥

पदार्थः-जो **(यासु)** जिन **(नव्यसीषु)** अत्यन्त नवीन और **(अवरासु)** पिछली ओषधियों के निमित्त **(नि, धावते)** निरन्तर शीघ्र जाता है वा **(यत्)** जो **(सनाजुवः)** सनातन वेगवाली **(पूर्वाः)** पिछली ओषधियों को **(अनु, अरुहत्)** बढ़ाता है, वह उन ओषधियों में **(आ, शुचिः)** अच्छे प्रकार पवित्र और **(अहिंस्यमानः)** विनाश को न प्राप्त होता हुआ **(उर्विया)** बहुत प्रकार **(विवावृधे)** विशेषता से बढ़ता है **(आत्)** इसके पीछे **(इत्)** हो **(मातॄः)** माता के समान मान करनेवाली ओषधियों को **(आ, अविशत्)** अच्छे प्रकार प्रवेश करता है॥५॥

भावार्थः-जो पुरुष वैद्यक विद्या को पढ़, बड़ी-बड़ी ओषधियों का युक्ति के साथ सेवन करते हैं, वे बहुत बढ़ते हैं। ओषधी दो प्रकार की होती हैं अर्थात् पुरानी और नवीन। उनमें जो विचक्षण चतुर होते हैं, वे ही नीरोग होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे॥६॥

आत्। इत्। होतारम्। वृणते। दिविष्टिषु। भगम्ऽइव। पपृचानासः। ऋञ्जते। देवान्। यत्। क्रत्वा। मज्मना। पुरुऽस्तुतः। मर्तम्। शंसम्। विश्वधा। वेति। धायसे॥६॥

पदार्थः-**(आत्)** **(इत्)** **(होतारम्)** दातारम् **(वृणते)** संभजन्ति **(दिविष्टिषु)** दिव्यासु इष्टिषु **(भगमिव)** यथा धनैश्वर्यम् **(पपृचानासः)** संपर्कं कुर्वाणाः **(ऋञ्जते)** भृञ्जति **(देवान्)** दिव्यान् गुणान् **(यत्)** यः **(क्रत्वा)** कर्मणा प्रज्ञया वा **(मज्मना)** बलेन **(पुरुष्टुतः)** पुरुभिर्बहुभिः प्रशंसितः **(मर्त्तम्)** मनुष्यम् **(शंसम्)** प्रशंसितम् **(विश्वधा)** यो विश्वं दधाति सः **(वेति)** प्राप्नोति **(धायसे)** धारणाय॥६॥

अन्वयः-यद्यः पुरुष्टुतो विश्वधा क्रत्वा मज्मना धायसे शंसं मर्त्तं देवाँश्च वेति तमाद्धोतारं ये पपृचानासो दिविष्टिषु भगमिव वृणते त इद् दुःखान्यृञ्जते दहन्ति॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये सद्विद्यं रत्नमिव सेवन्ते ते शरीरात्मबला भूत्वा सुखिनो जायन्ते॥६॥

पदार्थः-(**यत्**) जो (**पुरुष्टुतः**) बहुतों ने प्रशंसा किया हुआ (**विश्वधा**) विश्व को धारण करनेवाला (**क्रत्वा**) कर्म वा विशेष बुद्धि से और (**मज्मना**) बल से (**धायसे**) धारणा के लिये (**शंसम्**) प्रशंसायुक्त (**मर्त्तम्**) मनुष्य को और (**देवान्**) दिव्य गुणों को (**वेति**) प्राप्त होता है, उसको (**आत्**) और (**होतारम्**) देनेवाले को जो (**पपृचानासः**) सम्बन्ध करते हुए जन (**दिविष्टिषु**) सुन्दर यज्ञों में (**भगमिव**) धन ऐश्वर्य्य के समान (**वृणते**) सेवते हैं वे (**इत्**) ही दुःखों को (**ऋञ्जते**) भूंजते हैं अर्थात् जलाते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अच्छे वैद्य का रत्न के समान सेवन करते हैं, वे शरीर और आत्मा के बलवाले होकर सुखी होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः।

तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः॥७॥

वि। यत्। अस्थात्। यजतः। वातऽचोदितः। ह्वारः। न। वक्वा। जरणाः। अनाकृतः। तस्य। पत्मन्। धक्षुषः। कृष्णऽजंहसः। शुचिऽजन्मनः। रजः। आ। विऽअध्वनः॥७॥

पदार्थः-(**वि**) विशेषेण (**यत्**) यः (**अस्थात्**) तिष्ठेत् (**यजतः**) संगन्ता (**वातचोदितः**) वायुना प्राणेन वा प्रेरितः (**ह्वारः**) कुटिलतां कारयन् (**न**) इव (**वक्वा**) वक्ता (**जरणाः**) स्तुतयः (**अनाकृतः**) न आकृतो न निवारितः (**तस्य**) (**पत्मन्**) (**धक्षुषः**) दहतः (**कृष्णजंहसः**) कृष्णानि जंहांसि हननानि यस्मिँस्तस्य (**शुचिजन्मनः**) शुचेः पवित्राज्जन्म यस्य तस्य (**रजः**) कणः (**आ**) (**व्यध्वनः**) विरुद्धोऽध्वा यस्य सः॥७॥

अन्वयः-यद्यो यजतो वक्वा अनाकृतो वातचोदितो विद्वान् ह्वारोऽग्निर्न व्यस्थात् तस्य शुचिजन्मनः पत्मन्मार्गे कृष्णजंहसो धक्षुष आ व्यध्वनोऽग्ने रज इव जरणाः प्रशंसा जायन्ते॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये धर्ममातिष्ठन्ति ते सूर्य इव प्रसिद्धा जायन्ते, तत्कृता कीर्त्तिः सर्वासु दिक्षु विराजते॥७॥

पदार्थः-(**यत्**) जो (**यजतः**) सङ्ग करने और (**वक्वा**) कहनेवाला (**अनाकृतः**) रुकावट को न प्राप्त हुआ (**वातचोदितः**) प्राण वा पवन से प्रेरित विद्वान् (**ह्वारः**) कुटिलता करते हुए अग्नि के (**न**) समान (**व्यस्थात्**) विशेषता से स्थिर है (**तस्य**) उस (**शुचिजन्मनः**) पवित्रजन्मा विद्वान् के (**पत्मन्**) चाल-चलन में (**कृष्णजंहसः**) काले मारने हैं जिसके उस (**धक्षुषः**) जलाते हुए (**आ, व्यध्वनः**) अच्छे प्रकार विरुद्ध मार्गवाले अग्नि के (**रजः**) कण के समान (**जरणाः**) प्रशंसा स्तुति होती हैं॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो धर्म में अच्छी स्थिरता रखते हैं, वे सूर्य के समान प्रसिद्ध होते हैं और उनकी की हुई कीर्त्ति सब दिशाओं में विराजमान होती हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

रथो॒ न या॒तः शिक्व॑भिः कृ॒तो॒ द्यामङ्गे॑भिररु॒षेभि॑रीयते।
आद॑स्य॒ ते कृ॒ष्णासो॑ दक्षि सू॒रय॒ः शूर॑स्येव त्वे॒षथा॑दीषते॒ वय॑ः॥८॥

रथ॑ः। न। या॒तः। शिक्व॑ऽभिः। कृ॒तः। द्याम्। अङ्गे॑भिः। अ॒रु॒षेभि॑ः। ई॒य॒ते॒। आत्। अ॒स्य॒। ते। कृ॒ष्णास॑ः। ध॒क्षि॒। सू॒रय॑ः। शूर॑स्यऽइव। त्वे॒षथा॑त्। ई॒ष॒ते॒। वय॑ः॥८॥

पदार्थः-(**रथः**) रमणीयं यानम् (**न**) इव (**यातः**) प्राप्तः (**शिक्वभिः**) कीलकबन्धनादिभिः (**कृतः**) संपादितः (**द्याम्**) आकाशम् (**अङ्गेभिः**) अङ्गैः (**अरुषेभिः**) रक्तैर्गुणैः (**ईयते**) गच्छति (**आत्**) आनन्तर्ये (**अस्य**) (**ते**) (**कृष्णासः**) ये कृषन्ति ते (**धक्षि**) दहसि। अत्र शपो लुक्। (**सूरयः**) विद्वांसः (**शूरस्येव**) यथा शूरवीरस्य (**त्वेषथात्**) प्रदीप्तात् (**ईषते**) पश्यन्ति (**वयः**) पक्षिण इव॥८॥

अन्वयः-कृष्णासः सूरयः शिक्वभिः कृतो द्यामरुषेभिरङ्गेभिस्सह यातो रथ ईयते नेव वय इव शूरस्येव त्वेषथाद् व्यवहारादिव कलाकौशलादीषते सुखमाप्नुवन्ति। हे विद्वन्नाद्यस्त्वमग्निरिव पापानि धक्षि। अस्य ते सुखं जायते॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा शोभनेन विमानेनान्तरिक्षे गमनाऽऽगमने सुखेन जनाः कुर्वन्ति तथा विद्वांसो विद्यया धर्म्ये मार्गे विचरितुं शक्नुवन्ति॥८॥

पदार्थः-(**कृष्णासः**) जो खींचते हैं वे (**सूरयः**) विद्वान् जन जैसे (**शिक्वभिः**) कीलें और बन्धनों से (**कृतः**) सिद्ध किया (**द्याम्**) आकाश को (**अरुषेभिः**) लाल रङ्गवाले (**अङ्गेभिः**) अङ्गों के साथ (**यातः**) प्राप्त हुआ (**रथः**) रथ (**ईयते**) चलता है (**न**) वैसे वा (**वयः**) पक्षि और (**शूरस्येव, त्वेषथात्**) शूरवीर के प्रकाशित व्यवहार से जैसे वैसे कला-कुशलता से (**ईषते**) देखते हैं वे सुख पाते हैं। हे विद्वन्! (**आत्**) इसके अनन्तर जो आप अग्नि के समान पापों को (**धक्षि**) जलाते हो (**अस्य**) इन (**ते**) आपको सुख होता है॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे उत्तम विमान से अन्तरिक्ष में आना-जाना सुख से जन करते हैं, वैसे विद्वान् जन विद्या से धर्म सम्बन्धी मार्ग में विचरने को समर्थ होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वया॒ ह्य॑ग्ने॒ वरु॑णो धृ॒तव्र॑तो मि॒त्रः शा॑शद्रे॒ अ॑र्य॒मा सु॒दान॑वः।
यत्सी॒मनु॒ क्रतु॑ना वि॒श्वथा॑ वि॒भुर॒रान्न ने॒मिः प॑रि॒भूर॑जा॑यथाः॥ ९॥

त्वया॑। हि। अ॒ग्ने॒। वरु॑णः। धृ॒तऽव्र॑तः। मि॒त्रः। शा॒श॒द्रे॒। अ॒र्य॒मा। सु॒ऽदान॑वः। यत्। सी॒म्। अनु॑। क्रतु॑ना। वि॒श्वऽथा॑। वि॒ऽभुः। अ॒रान्। न। ने॒मिः। प॒रि॒ऽभूः। अजा॑यथाः॥ ९॥

पदार्थः-(**त्वया**) (**हि**) खलु (**अग्ने**) विद्वन् (**वरुणः**) श्रेष्ठः (**धृतव्रतः**) धृतसत्यः (**मित्रः**) (**शाशद्रे**) शातयेः (**अर्यमा**) न्यायाधीशः (**सुदानवः**) सुष्ठु दानं येषान्ते (**यत्**) ये (**सीम्**) सर्वतः (**अनु**) (**क्रतुना**) प्रज्ञया (**विश्वथा**) सर्वथा (**विभुः**) व्यापक ईश्वरः (**अरान्**) चक्रस्याऽवयवान् (**न**) इव (**नेमिः**) चक्रम् (**परिभूः**) सर्वेषामुपरि भवतीति (**अजायथाः**) जायेथाः॥ ९॥

अन्वयः-हे अग्ने! यथा त्वया सह यद्ये वरुणो धृतव्रतो मित्रोऽर्यमा च सुदानवो हि भवन्ति तथा तत्सङ्गेन त्वं नेमिररान्नेव विश्वथा विभुरीश्वर इव क्रतुना परिभूः सीमन्वजायथा यतो दुःखं शाशद्रे छिन्नं कुर्याः॥ ९॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथेश्वरो न्यायकारी सर्वासु विद्यासु प्रवीणोऽस्ति तथा विदुषां सङ्गेन प्राज्ञो न्यायकारी पूर्णविद्यश्च स्यात्॥ ९॥

पदार्थः-हे (**अग्ने**) विद्वान्! जैसे (**त्वया**) तुम्हारे साथ (**यत्**) जो (**वरुणः**) श्रेष्ठ (**धृतव्रतः**) सत्य व्यवहार को धारण किये हुए (**मित्रः**) सबका मित्र और (**अर्यमा**) न्यायाधीश (**सुदानवः**) अच्छे दानशील (**हि**) ही होते हैं, वैसे उनके सङ्ग से आप (**नेमिः**) पहिआ (**अरान्, न**) अरों को जैसे वैसे (**विश्वथा**) वा जैसे सब प्रकार से (**विभुः**) ईश्वर व्यापक है वैसे (**क्रतुना**) उत्तम बुद्धि से (**परिभूः**) सर्वोपरि (**सीम्**) सब ओर से (**अनु, अजायथाः**) अनुक्रम से होओ जिससे दुःख को (**शाशद्रे**) नष्ट करो॥ ९॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे ईश्वर न्यायकारी और सब विद्याओं में प्रवीण है, वैसे विद्वानों के सङ्ग से बुद्धिमान्, न्यायकारी और पूरी विद्यावाला हो॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वम॑ग्ने शशमा॒नाय॑ सुन्व॒ते रत्नं॑ यविष्ठ दे॒वता॑तिमिन्वसि।
तं त्वा॒ नु नव्यं॑ सहसो युवन्व॒यं भगं॒ न का॒रे म॑हिरत्न धीमहि॥ १०॥

त्वम्। अ॒ग्ने॒। श॒श॒मा॒नाय॑। सु॒न्व॒ते। रत्न॑म्। य॒विष्ठ। दे॒वऽता॑तिम्। इ॒न्व॒सि॒। तम्। त्वा॒। नु। नव्य॑म्। स॒हः॒सः॒। यु॒व॒न्। व॒यम्। भग॑म्। न। का॒रे। म॒हि॒ऽर॒त्न॒। धी॒म॒हि॒॥ १०॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव वर्त्तमान विद्वन् (**शशमानाय**) अधर्ममाप्लुत्य धर्मं प्राप्नुवते (**सुन्वते**) ऐश्वर्योत्पादकाय (**रत्नम्**) रमणीयं ज्ञानं साधनं वा (**यविष्ठ**) अतिशयेन युवम् (**देवतातिम्**)

देवतामेव परमात्मानम् (**इन्वसि**) ध्यानयोगेन व्याप्नोषि (**तम्**) (**त्वा**) त्वाम् (**नु**) शीघ्रम् (**नव्यम्**) नवेषु विद्वत्सु भवम् (**सहसः**) बलस्य (**युवन्**) यौवनं प्राप्नुवन् (**वयम्**) (**भगम्**) (**न**) इव (**कारे**) कर्त्तव्ये व्यवहारे (**महिरत्न**) पूज्यैर्गुणै रमणीय (**धीमहि**) धरेमहि॥१०॥

अन्वयः-हे सहसो युवन् यविष्ठ महिरत्नाऽग्ने! यस्त्वं शशमानाय सुन्वते रत्नं देवतातिं चेन्वसि तं नव्यं त्वा कारे भगन्नेव वयन्नु धीमहि॥१०॥

भावार्थः-येऽधर्मं विहाय धर्ममनुष्ठाय परमात्मनं प्राप्नुवन्ति तेऽतिरम्यमानन्दमाप्नुवन्ति॥१०॥

पदार्थः-हे (**सहसः**) बलसम्बन्धी (**युवन्**) यौवनभाव को प्राप्त (**यविष्ठ**) अत्यन्त तरुण (**महिरत्न**) प्रशंसा करने योग्य गुणों से रमणीय (**अग्ने**) अग्नि के समान वर्त्तमान विद्वान्! जो (**त्वम्**) आप (**शशमानाय**) अधर्म को उल्लंघ के धर्म को प्राप्त हुए (**सुन्वते**) और ऐश्वर्य को उत्पन्न करनेवाले उत्तम जन के लिये (**रत्नम्**) रमणीय ज्ञान वा उसके साधन को और (**देवतातिम्**) परमेश्वर को (**इन्वसि**) ध्यानयोग से व्याप्त होते हो (**तम्**) उन (**नव्यम्**) नवीन विद्वानों में प्रसिद्ध (**त्वा**) आपको (**कारे**) कर्त्तव्य व्यवहार में (**भगम्**) ऐश्वर्य के (**न**) समान (**वयम्**) हम लोग (**नु**) शीघ्र (**धीमहि**) धारण करें॥१०॥

भावार्थः-जो अधर्म को छोड़ धर्म का अनुष्ठान कर परमात्मा को प्राप्त होते हैं, वे अति रमणीय आनन्द को प्राप्त होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम्।
रश्मींरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः॥११॥

अस्मे इति। रयिम्। न। सुऽअर्थम्। दमूनसम्। भगम्। दक्षम्। न। पपृचासि। धर्णसिम्। रश्मीन्ऽइव। यः। यमति। जन्मनी इति। उभे इति। देवानाम्। शंसम्। ऋते। आ। च। सुऽक्रतुः॥११॥

पदार्थः-(**अस्मे**) अस्मभ्यम् (**रयिम्**) धनम् (**न**) इव (**स्वर्थम्**) सुष्ठ्वर्थः प्रयोजनं यस्माद् यद्वाऽनर्थसाधनरहितम् (**दमूनसम्**) दमनसाधकम् (**भगम्**) ऐश्वर्यं भजमानम् (**दक्षम्**) अतिचतुरम् (**न**) इव (**पपृचासि**) संबध्नाति। अत्र व्यत्ययेन युष्मत्। (**धर्णसिम्**) धर्त्तारम्। अत्र बाहुलकादसिः प्रत्ययो नुडागमश्च। (**रश्मींरिव**) यथा किरणान् तथा (**यः**) (**यमति**) यच्छेत्। अत्र लेटि **बहुलं छन्दसी**ति शबभावः। (**जन्मनी**) पूर्वापरे (**उभे**) द्वे (**देवानाम्**) विदुषाम् (**शंसम्**) प्रशंसाम् (**ऋते**) सत्ये (**आ**) (**च**) (**सुक्रतुः**) शोभनप्रज्ञः॥११॥

अन्वयः-यः सुक्रतुर्विद्वानस्मे स्वर्थं रयिं न दमूनसं भगं दक्षं न धर्णसिं पपृचासि रश्मींरिव ऋते देवानामुभे जन्मनी शंसं च य आयमति सोऽस्माभिः सत्कर्त्तव्यो भवति॥११॥

भावार्थः-अत्रोपमालङ्काराः। ये सूर्यरश्मिवत्सर्वान् धर्म्ये पुरुषार्थे संयुञ्जन्ति स्वयं च तथैव वर्त्तन्ते ते गताऽगते जन्मनी पवित्रे कुर्वन्ति॥११॥

पदार्थः-जो (**सुक्रतुः**) उत्तम बुद्धिवाला विद्वान्! (**अस्मे**) हम लोगों के लिये (**स्वर्थम्**) जिससे अच्छे प्रयोजन हो वा जो अनर्थ साधनों से रहित उस (**रयिम्**) धन के (**न**) समान (**दमूनसम्**) इन्द्रियों को विषयों में दबा देने के समानरूप (**भगम्**) ऐश्वर्य्य का और (**दक्षम्**) चतुर के (**न**) समान (**धर्णसिम्**) धारण करनेवाले का (**पपृचासि**) सम्बन्ध करता वा (**रश्मींरिव**) जैसे किरणों को वैसे (**ऋते**) सत्य व्यवहार में (**देवानाम्**) विद्वानों के (**उभे**) दो (**जन्मनी**) अगले-पिछले जन्म (**च**) और (**शंसम्**) प्रशंसा को (**यः**) जो (**आ, यमति**) बढ़ाता है, वह हम लोगों को सत्कार करने योग्य है॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सूर्य की किरणों के समान सबको धर्मसम्बन्धी पुरुषार्थ में संयुक्त करते हैं और आप भी वैसे ही वर्त्तते हैं, वे अगले-पिछले जन्मों को पवित्र करते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ॥१२॥

उत। नः। सुऽद्योत्मा। जीरऽअश्वः। होता। मन्द्रः। शृणवत्। चन्द्रऽरथः। सः। नः। नेषत्। नेषऽतमैः। अमूरः। अग्निः। वामम्। सुवितम्। वस्यः। अच्छ॥१२॥

पदार्थः-(**उत**) (**नः**) अस्मान् (**सुद्योत्मा**) सुष्ठु प्रकाशः (**जीराश्वः**) जीरा वेगवन्तो बहवोऽश्वा यस्य सः (**होता**) दाता (**मन्द्रः**) प्रशंसितः (**शृणवत्**) शृणुयात् (**चन्द्ररथः**) चन्द्रं रजतं सुवर्णं वा रथे यस्य सः (**सः**) (**नः**) अस्माकम् (**नेषत्**) नयेत् (**नेषतमैः**) अतिशयेन प्राप्तिकारकैः (**अमूरः**) गन्ता (**अग्निः**) (**वामम्**) सुरूपम् (**सुवितम्**) उत्पादितम् (**वस्यः**) वस्तुं योग्यः (**अच्छ**) सम्यक्॥१२॥

अन्वयः-यो मन्द्रश्चन्द्ररथः सद्योत्मा जीराश्वो होता नोऽस्मान् शृणवत्। उतापि योऽमूरो वस्योऽग्निरिव सुवितं वामं सुरूपं नेषतमैरच्छ नेषत् स नः प्रशंसितो भवति॥१२॥

भावार्थः-यः सर्वेषां न्यायस्य श्रोता साङ्गोपाङ्गसामग्रिर्विद्याप्रकाशयुक्तः सर्वान् विद्योत्सुकान् विद्यायुक्तान् करोति स प्रकाशात्मा जायते॥१२॥

पदार्थः-जो (**मन्द्रः**) प्रशंसायुक्त (**चन्द्ररथः**) जिसके रथ में चाँदी, सोना विद्यमान जो (**सुद्योत्मा**) उत्तम प्रकाशवाला (**जीराश्वः**) जिसके वेगवान् बहुत घोड़े वह (**होता**) दानशील जन (**नः**) हम लोगों को (**शृणवत्**) सुने (**उत**) और जो (**अमूरः**) गमनशील (**वस्यः**) निवास करने योग्य (**अग्निः**) अग्नि के

समान प्रकाशमान जन **(सुवितम्)** उत्पन्न किये हुए **(वामम्)** अच्छे रुप को **(नेषतमैः)** अतीव प्राप्ति करानेवाले गुणों से **(अच्छ)** अच्छा **(नेषत्)** प्राप्त करे **(सः)** वह **(नः)** हम लोगों के बीच प्रशंसित होता है॥१२॥

भावार्थः-जो सबके न्याय का सुननेवाला, साङ्गोपाङ्ग सामग्रीसहित विद्याप्रकाशयुक्त, सब विद्या के उत्साहियों को विद्यायुक्त करता है, वह प्रकाशात्मा होता है॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्ता॑व्य॒ग्निः शिमी॑वद्भि॒रर्कै॒: साम्रा॑ज्याय प्र॒तरं॑ दधा॒नः।
अ॒मी च॒ ये म॒घवा॑नो व॒यं च॒ मिह॑ं न सू॒रो॒ अति॒ निष्ट॑तन्युः॥१३॥९॥

अस्ता॑वि। अ॒ग्निः। शिमी॑वत्ऽभिः। अ॒र्कैः। साम्ऽरा॑ज्याय। प्र॒ऽत॒रम्। दधा॑नः। अ॒मी इति॑। च॒। ये। म॒घऽवा॑नः। व॒यम्। च॒। मिह॑म्। न। सू॒रः॑। अति॑। निः। त॒त॒न्युः॥१३॥

पदार्थः-(**अस्तावि**) स्तूयते (**अग्निः**) सूर्य इव सुशीलप्रकाशितः (**शिमीवद्भिः**) प्रशंसितकर्मयुक्तैः (**अर्कैः**) सत्कर्त्तव्यैर्विद्वद्भिः सह (**साम्राज्याय**) चक्रवर्त्तिनो भावाय (**प्रतरम्**) प्रतरति शत्रुबलानि येन तत् सैन्यम् (**दधानः**) (**अमी**) (**च**) (**ये**) (**मघवानः**) परमपूजितधनयुक्ताः (**वयम्**) (**च**) (**मिहम्**) वृष्टिम् (**न**) इव (**सूरः**) सूर्यः (**अति**) (**निः**) (**ततन्युः**) विस्तृणीयुः॥१३॥

अन्वयः-यः शिमीवद्भिरर्कैः प्रतरं दधानोऽग्निः साम्राज्यायास्तावि ये चामी मघवानः सूरो मिहन्नेव विद्यामतिनिष्टतन्युः तं तांश्च वयं प्रशंसेम॥१३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यैर्धार्मिकैर्विद्वद्भिः सुशिक्षिता धर्मेण राज्यं विस्तृणन्तः प्रयतन्ते, त एव राज्ये विद्याधर्मोपदेशे च संस्थापनीया इति॥१३॥

अत्र विद्वद्गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिर्वर्तत इति वेद्यम्॥

इत्येकचत्वारिंशदुत्तरं शततमं १४१ सूक्तं नवमो ९ वर्गश्च समाप्तः॥

पदार्थः-जो **(शिमीवद्भिः)** प्रशंसित कर्मों से युक्त **(अर्कैः)** सत्कार करने योग्य विद्वानों के साथ **(प्रतरम्)** शत्रुबलों को जिससे तरें उस सेनागण को **(दधानः)** धारण करता हुआ **(अग्निः)** सूर्य के समान सुशीलता से प्रकाशित **(साम्राज्याय)** चक्रवर्त्ति राज्य के लिये **(अस्तावि)** स्तुति पाता है **(च)** और **(ये)** जो **(अमी)** वे **(मघवानः)** परमपूजित धनयुक्त जन **(सूरः)** सूर्य **(मिहम्)** वर्षा को **(न)** जैसे वैसे विद्या को **(अति, नि, ततन्युः)** अतीव निरन्तर विस्तारें उस पूर्वोक्त सज्जन **(च)** और पीछे कहे हुए जनों की **(वयम्)** हम लोग प्रशंसा करें॥१३॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो मनुष्य धार्मिक विद्वानों से अच्छी शिक्षा को पाये हुए धर्म से राज्य का विस्तार करते हुए प्रयत्न करते हैं, वे ही राज्य, विद्या और धर्म के उपदेश में अच्छे प्रकार स्थापना करने योग्य हैं॥१३॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति वर्त्तमान है, यह जानना चाहिये॥

यह एक सौ इकतालीसवां १४१ सूक्त और नववां ९ वर्ग पूरा हुआ॥

समिद्ध इत्यस्य त्रयोदशर्चस्य द्विचत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। १-४ अग्निः। ५ बर्हिः। ६ देव्यो द्वारः। ७ उषासानक्ता। ८ दैव्यौ होतारौ। ९ सरस्वतीळाभारत्यः। १० त्वष्टा। ११ वनस्पतिः। १२ स्वाहाकृतिः। १३ इन्द्रश्च देवताः। १,२,५,६,८,९ निचृदनुष्टुप्। ४ स्वराडनुष्टुप्। ३,७,१०-१२ अनुष्टुप् छन्दः। गान्धारः स्वरः। १३ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः॥

अथाध्यापकाध्येतृविषयमाह॥

अब तेरह ऋचावाले एक सौ बयालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अध्यापक और अध्येता के विषय को कहते हैं॥

समि॑द्धो अग्न॒ आ व॑ह॒ दे॒वाँ अ॒द्य य॒तस्रु॑चे।
तन्तुं॑ तनुष्व पू॒र्व्यं सु॒तसो॑माय दा॒शुषे॑॥ १॥

सम्ऽइ॑द्धः। अ॒ग्ने॒। आ। व॒ह॒। दे॒वान्। अ॒द्य। य॒तऽस्रु॑चे। तन्तु॑म्। त॒नु॒ष्व॒। पू॒र्व्यम्। सु॒तऽसो॑माय। दा॒शुषे॑॥ १॥

पदार्थः-(**समिद्धः**) विद्यया प्रदीप्तोऽध्यापकः (**अग्ने**) अग्निरिव सुप्रकाश (**आ**) (**वह**) प्रापय (**देवान्**) विदुषः (**अद्य**) अस्मिन् दिने (**यतस्रुचे**) उद्यतयज्ञपात्राय यजमानाय (**तन्तुम्**) विस्तारम् (**तनुष्व**) विस्तृणीहि (**पूर्व्यम्**) पूर्वैः कृतम् (**सुतसोमाय**) निष्पादितमहौषधिरसाय (**दाशुषे**) दात्रे॥ १॥

अन्वयः-हे अग्ने पावक इव समिद्धो विद्वांस्त्वमद्य यतस्रुचे सुतसोमाय दाशुषे देवानावह पूर्व्यं तन्तुं तनुष्व॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा बाल्ययुवावस्थायां मातापित्रादयः सन्तानान् सुखयेयुस्तथा पुत्रा ब्रह्मचर्येणाधीत्य विद्यां प्राप्तयौवनाः कृतविवाहाः सन्तः स्वान्मातापित्रादीनानन्दयेयुः॥ १॥

पदार्थः-हे (**अग्ने**) पावक के समान उत्तम प्रकाशवाले (**समिद्धः**) विद्या से प्रकाशित पढ़ानेवाले विद्वन्! आप (**अद्य**) आज के दिन (**सुतसोमाय**) जिसने बड़ी-बड़ी ओषधियों के रस निकाले और (**यतस्रुचे**) यज्ञपात्र उठाये हैं, उस यज्ञ करनेवाले (**दाशुषे**) दानशील जन के लिये (**देवान्**) विद्वानों की (**आ, वह**) प्राप्ति करो और (**पूर्व्यम्**) प्राचीनों के किये हुए (**तन्तुम्**) विस्तार को (**तनुष्व**) विस्तारो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बालकपन और तरुण अवस्था में माता और पिता आदि सन्तानों को सुखी करें, वैसे पुत्रलोग ब्रह्मचर्य से विद्या को पढ़ युवावस्था को प्राप्त और विवाह किये हुए अपने माता-पिता आदि को आनन्द देवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

घृतव॑न्तमुप॑ मासि॒ मधु॑मन्तं तनूनपात्।
य॒ज्ञं विप्र॑स्य॒ माव॑तः शशमा॒नस्य॑ दा॒शुष॑:॥ २॥

घृ॒तऽव॑न्तम्। उप॑। मा॒सि॒। मधु॑ऽमन्तम्। त॒नू॒ऽन॒पा॒त्। य॒ज्ञम्। विप्र॑स्य। माऽव॑तः। श॒श॒मा॒नस्य॑। दा॒शुष॑:॥ २॥

पदार्थः-(**घृतवन्तम्**) बहुघृतयुक्तम् (**उप**) (**मासि**) परिमिमीषे (**मधुमन्तम्**) प्रशस्तमधुरादिगुण-युक्तम् (**तनूनपात्**) यस्तनूं शरीरं न पातयति तत्सम्बुद्धौ (**यज्ञम्**) (**विप्रस्य**) मेधाविनः (**मावतः**) मत्सदृशस्य (**शशमानस्य**) दुःखमुल्लङ्घतः (**दाशुषः**) दातुः॥ २॥

अन्वयः-हे तनूनपाद्विद्वँस्त्वं मावतो दाशुषः शशमानस्य विप्रस्य घृतवन्तं मधुमन्तं यज्ञमुपमासि॥ २॥

भावार्थः-विद्यार्थिभिर्विदुषां संगतिं कृत्वा विद्वदुपमया भवितव्यम्॥ २॥

पदार्थः-हे (**तनूनपात्**) शरीर को नष्ट न करनेवाले विद्वन्! आप (**मावतः**) मेरे सदृश (**दाशुषः**) दानशील (**शशमानस्य**) और दुःख उल्लंघन किये (**विप्रस्य**) मेधावी जन के (**घृतवन्तम्**) बहुत घृत और (**मधुमन्तम्**) प्रशंसित मधुरादि गुणों से युक्त (**यज्ञम्**) यज्ञ का (**उप, मासि**) परिमाण करनेवाले हो॥ २॥

भावार्थः-विद्यार्थियों को विद्वानों की सङ्गति कर विद्वानों के सदृश होना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुचि॑: पाव॒को अद्भु॑तो॒ मध्वा॑ य॒ज्ञं मि॑मिक्षति।
नरा॒शंस॒स्त्रिरा दि॒वो दे॒वो दे॒वेषु॑ य॒ज्ञिय॑:॥ ३॥

शुचि॑:। पा॒व॒कः। अद्भु॑तः। मध्वा॑। य॒ज्ञम्। मि॒मि॒क्ष॒ति॒। नरा॒शंस॑:। त्रिः। आ। दि॒वः। दे॒वः। दे॒वेषु॑। य॒ज्ञिय॑:॥ ३॥

पदार्थः-(**शुचिः**) पवित्रः (**पावकः**) पवित्रकारकोऽग्निरिव (**अद्भुतः**) आश्चर्यगुणकर्मस्वभावः (**मध्वा**) मधुना सह (**यज्ञम्**) (**मिमिक्षति**) मेढुं सिञ्चितुमलङ्कर्त्तुमिच्छति (**नराशंसः**) नरैः प्रशंसितः (**त्रिः**) त्रिवारम् (**आ**) समन्तात् (**दिवः**) कामनातः (**देवः**) कामयमानः (**देवेषु**) विद्वत्सु (**यज्ञियः**) यज्ञं कर्त्तुमर्हः॥ ३॥

अन्वयः-यः पावक इवाद्भुतः शुचिर्यज्ञियो नराशंसो देवो देवेषु दिवो मध्वा यज्ञं त्रिरामिमिक्षति, स सुखमाप्नोति॥ ३॥

भावार्थः-ये मनुष्याः कौमारयौवनवृद्धावस्थासु विद्याप्रचाराख्यं व्यवहारं कुर्युस्ते कायिकवाचिकमानसिकसुखानि प्राप्नुयुः॥ ३॥

पदार्थः-जो (**पावकः**) पवित्र करनेवाले अग्नि के समान (**अद्भुतः**) आश्चर्य गुण, कर्म, स्वभाववाला (**शुचिः**) पवित्र (**यज्ञियः**) यज्ञ करने योग्य (**नराशंसः**) नरों से प्रशंसा को प्राप्त और (**देवः**) कामना करता हुआ जन (**देवेषु**) विद्वानों में (**दिवः**) कामना से (**मध्वा**) मधुर शर्करा वा सहत से (**यज्ञम्**) यज्ञ को (**त्रिः**) तीन वार (**आ, मिमिक्षति**) अच्छे प्रकार सींचने वा पूरे करने की इच्छा करता है, वह सुख पाता है॥३॥

भावार्थः-जो मनुष्य बालकाई, जवानी और बुढ़ापे में विद्याप्रचाररूपी व्यवहार को करें, वे कायिक, वाचिक और मानसिक सुखों को प्राप्त होवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम्।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते॥४॥

ईळितः। अग्ने। आ। वह। इन्द्रम्। चित्रम्। इह। प्रियम्। इयम्। हि। त्वा। मतिः। मम। अच्छ। सुऽजिह्व। वच्यते॥४॥

पदार्थः-(**ईळितः**) प्रशंसितः (**अग्ने**) सूर्य इव प्रकाशात्मन् (**आ**) (**वह**) (**इन्द्रम्**) परमैश्वर्यम् (**चित्रम्**) नानाविधम् (**इह**) अस्मिन् जन्मनि (**प्रियम्**) प्रीतिकरम् (**इयम्**) (**हि**) किल (**त्वा**) (**मतिः**) प्रज्ञा (**मम**) (**अच्छ**) (**सुजिह्व**) शोभना जिह्वा मधुरभाषिणी यस्य तत्सम्बुद्धौ (**वच्यते**) उच्यते॥४॥

अन्वयः-हे सुजिह्वाऽग्ने! ईळितस्त्वमिह प्रियं चित्रमिन्द्रमावह या ममेयं मतिस्त्वयाच्छ वच्यते सा हि त्वा प्राप्नोतु॥४॥

भावार्थः-सर्वैः पुरुषार्थेन विद्वत्प्रज्ञां प्राप्य महदैश्वर्यं संचेतव्यम्॥४॥

पदार्थः-हे (**सुजिह्व**) मधुरभाषिणी जिह्वावाले (**अग्ने**) सूर्य के समान प्रकाशस्वरूप विद्वान्! (**ईडितः**) प्रशंसा को प्राप्त हुए आप (**इह**) इस जन्म में (**प्रियम्**) प्रीति करानेवाले (**चित्रम्**) चित्र-विचित्र नानाप्रकार के (**इन्द्रम्**) परमैश्वर्य को (**आ, वह**) प्राप्त करो जो (**मम**) मेरी (**इयम्**) यह (**मतिः**) प्रज्ञा बुद्धि तुम से (**अच्छ**) अच्छी (**वच्यते**) कही जाती है (**हि**) वही (**त्वा**) आप को प्राप्त हो॥४॥

भावार्थः-सबको पुरुषार्थ से विद्वानों की बुद्धि पाकर महान् ऐश्वर्य का अच्छा संग्रह करना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे।

वृ॒ञ्जे दे॒वव्य॑चस्तम॒मिन्द्रा॑य॒ शर्म॑ स॒प्रथ॑:॥५॥

स्तृ॒णा॒नास॑:। य॒तऽस्रु॑च:। ब॒र्हि:। य॒ज्ञे। सु॒ऽअ॒ध्व॒रे। वृ॒ञ्जे। दे॒वव्य॑च:ऽतमम्। इन्द्रा॑य। शर्म॑। स॒ऽप्रथ॑:॥५॥

पदार्थ:-(**स्तृणानास:**) आच्छादकास्सन्त: (**यतस्रुच:**) प्राप्तोद्यमा: (**बर्हि:**) बृहत् (**यज्ञे**) विद्यादानाख्ये (**स्वध्वरे**) सुशोभमाने (**वृञ्जे**) वृञ्जते। अत्र **लोपस्त आत्मनेपदेष्वि**ति तलोपो व्यत्ययेनात्मनेपदं च। (**देवव्यचस्तमम्**) देवैर्विद्वद्भिर्व्यचो व्याप्तं तदतिशयितम् (**इन्द्राय**) परमैश्वर्याय (**शर्म**) गृहम् (**सप्रथ:**) प्रख्यातगुणैस्सह वर्त्तमानम्॥५॥

अन्वय:-ये स्वध्वरे यज्ञ इन्द्राय सप्रथो बर्हिर्देवव्यचस्तमं शर्म स्तृणानासस्सन्तो यतस्रुचो भवन्ति ते दु:खदारिद्र्यं वृञ्जे त्यजन्ति॥५॥

भावार्थ:-नह्युद्यमिनोऽन्तरा लक्ष्मीराज्यश्रियौ प्राप्नुत:। ये अत्युत्तमे विद्वन्निवासयुक्ते गृह आवसन्ति तेऽविद्यादारिद्र्ये निघ्नन्ति॥५॥

पदार्थ:-जो (**स्वध्वरे**) उत्तम शोभायुक्त (**यज्ञे**) विद्यादानरूप यज्ञ में (**इन्द्राय**) परम ऐश्वर्य के लिये (**सप्रथ:**) प्रख्यात गुणों के साथ वर्त्तमान (**बर्हि:**) बड़े (**देवव्यचस्तमम्**) विद्वानों से अतीव व्याप्त (**शर्म**) घर को (**स्तृणानास:**) ढांपते हुए (**यतस्रुच:**) उद्यम को प्राप्त होते हैं, वे दु:ख और दरिद्रपन का (**वृञ्जे**) त्याग कर देते हैं॥५॥

भावार्थ:-उद्यम करनेवालों के विना लक्ष्मी और राज्य श्री प्राप्त नहीं होती तथा जो अतीव उत्तम विद्वानों के निवास संयुक्त घर में अच्छे प्रकार वसते हैं, वे अविद्या और दरिद्रता को निरन्तर नष्ट करते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वि श्र॑यन्तामृता॒वृध॑: प्र॒यै दे॒वेभ्यो॑ म॒ही:।
पा॒व॒कास॑: पुरु॒स्पृहो॒ द्वारो॑ दे॒वीर॑स॒श्चत॑:॥६॥१०॥

वि। श्र॒य॒न्ता॒म्। ऋ॒त॒ऽवृध॑:। प्र॒ऽयै। दे॒वेभ्य॑:। म॒ही:। पा॒व॒कास॑:। पु॒रु॒ऽस्पृह॑:। द्वार॑:। दे॒वी:। अ॒स॒श्चत॑:॥६॥

पदार्थ:-(**वि**) (**श्रयन्ताम्**) सेवन्ताम् (**ऋतावृध:**) ऋतेन सत्येनाचरणेन विज्ञानेन च वृद्धा: (**प्रयै**) प्रयितुम् (**देवेभ्य:**) विद्वद्भ्य: (**मही:**) पूज्यतमा वाच: पृथिवी वा। **महीति पृथिवीनामसु पठितम्।** (निघं०१.१) **महीति वाङ्नामसु पठितम्।** (निघं०१.११) (**पावकास:**) पवित्रकारिका: (**पुरुस्पृह:**) या: पुरुभि: स्पृह्यन्त ईप्स्यन्ते ता: (**द्वार:**) द्वार इव सुशोभिता: (**देवी:**) कमनीया: (**असश्चत:**) परस्परं विलक्षणा:॥६॥

अन्वयः-हे मनुष्या! देवेभ्यो याः पावकास ऋतावृधः पुरुस्पृहो द्वारो देवीरसश्चतो महीः प्रयै विद्वांसः कामयन्ते ता भवन्तो विश्रयन्ताम्॥६॥

भावार्थः-मनुष्यैः सर्वेषामुपकाराय विद्यासुशिक्षिता वाचो रत्नकर्यो भूमयश्च कमितव्याः तदाश्रयेण पवित्रता संपादनीया॥६॥

पदार्थः-हे मनुष्यो! **(देवेभ्यः)** विद्वानों के लिये जो **(पावकासः)** पवित्र करनेवाली **(ऋतावृधः)** सत्य आचरण और उत्तम ज्ञान से बढ़ाई हुई **(पुरुस्पृहः)** बहुतों से चाही जातीं **(द्वारः)** द्वारों के समान **(देवीः)** मनोहर **(असश्चतः)** परस्पर एक-दूसरे से विलक्षण **(महीः)** प्रशंसनीय वाणी वा पृथिवी जिनकी **(प्रयै)** प्रीति के लिये विद्वान् जन कामना करते उनका आप लोग **(विश्रयन्ताम्)** विशेषता से आश्रय करें॥६॥

भावार्थः-मनुष्यों को सबके उपकार के लिये विद्या और अच्छी शिक्षायुक्त वाणी और रत्नों को प्रसिद्ध करनेवाली भूमियों की कामना करनी चाहिये और उनके आश्रय से पवित्रता संपादन करनी चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ भन्दमाने उपाके नक्तोषासा सुपेशसा।

यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत्॥७॥

आ। भन्दमाने इति। उपाके इति। नक्तोषसा। सुऽपेशसा। यह्वी इति। ऋतस्य। मातरा। सीदताम्। बर्हिः। आ। सुऽमत्॥७॥

पदार्थः-**(आ)** **(भन्दमाने)** कल्याणकारके **(उपाके)** परस्परमसन्निहितवर्त्तमाने **(नक्तोषासा)** रात्रिदिने **(सुपेशसा)** सुरूपे। अत्र सर्वत्र विभक्तेराकारादेशः। **(यह्वी)** कारणसूनू **(ऋतस्य)** सत्यस्य **(मातरा)** मानयित्र्यौ **(सीदताम्)** प्राप्नुतः **(बर्हिः)** उत्तमं गृहम् **(आ)** **(सुमत्)** सुष्ठु माद्यन्ति हृष्यन्ति यस्मिन् तत्॥७॥

अन्वयः-हे मनुष्या! भवन्तो यथा ऋतस्य मातरा यह्वी उपाके सुपेशसा भन्दमाने नक्तोषासा आसीदतां तद्वदासुमद् बर्हिः प्राप्नुवन्तु॥७॥

भावार्थः-यथाऽहोरात्रः सर्वान् प्राण्यप्राणिनो नियमेन स्व स्व क्रियासु प्रवर्त्तयति तथा सर्वैर्विद्वद्भिः सर्वे मनुष्या सत्क्रियासु प्रवर्तनीयाः॥७॥

पदार्थः-हे मनुष्यो! आप जैसे **(ऋतस्य)** सत्य व्यवहार का **(मातरा)** मान करानेवालीं **(यह्वी)** कारण से उत्पन्न हुईं **(उपाके)** एक-दूसरे के साथ वर्त्तमान **(सुपेशसा)** उत्तम रूपयुक्त और **(भन्दमाने)**

कल्याण करनेवाली **(नक्तोषासा)** रात्रि और प्रभात वेला **(आ, सीदताम्)** अच्छे प्रकार प्राप्त होवें जैसे **(आ, सुमत्)** जिसमें बहुत आनन्द को प्राप्त होते हैं, उस **(बर्हिः)** उत्तम घर को प्राप्त होओ॥७॥

भावार्थः-जैसे दिन-रात्रि समस्त प्राणी-अप्राणी को नियम से अपनी अपनी क्रियाओं में प्रवृत्त कराता है, वैसे सब विद्वानों को सर्वसाधारण मनुष्य उत्तम क्रियाओं में प्रवृत्त करने चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम्॥८॥

मन्द्रऽजिह्वा। जुगुर्वणी इति। होतारा। दैव्या। कवी इति। यज्ञम्। नः। यक्षताम्। इमम्। सिध्रम्। अद्य। दिविऽस्पृशम्॥८॥

पदार्थः-(**मन्द्रजिह्वा**) मन्द्रा प्रशंसिता जिह्वा ययोस्तौ (**जुगुर्वणी**) अत्यन्तमुद्यमिनौ (**होतारा**) आदातारौ (**दैव्या**) देवेषु दिव्येषु गुणेषु भवौ (**कवी**) विक्रान्तप्रज्ञौ (**यज्ञम्**) विद्यादिप्राप्तिसाधकं व्यवहारम् (**नः**) अस्मभ्यम् (**यक्षताम्**) संयच्छेते (**इमम्**) (**सिध्रम्**) मङ्गलकरम् (**अद्य**) अस्मिन् दिने (**दिविस्पृशम्**) प्रकाशे स्पर्शनिमित्तम्॥८॥

अन्वयः-हे मनुष्या! यथाऽद्य मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी मेधाविनावध्यापकोपदेशकौ नो दिविस्पृशं सिध्रमिमं यज्ञं यक्षतां तथा यूयमपि सङ्गच्छध्वम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसो धर्म्येण व्यवहारेण सह सङ्गता भवन्ति तथेतरैरपि भवितव्यम्॥८॥

पदार्थः-हे मनुष्यो! जैसे (**अद्य**) आज (**मन्द्रजिह्वा**) जिनकी प्रशंसित जिह्वा है वे (**जुगुर्वणी**) अत्यन्त उद्यमी (**होतारा**) ग्रहण करनेवाले (**दैव्या**) दिव्य गुणों में प्रसिद्ध (**कवी**) प्रबल प्रज्ञायुक्त अध्यापक और उपदेशक लोग (**नः**) हम लोगों के लिये (**दिविस्पृशम्**) प्रकाश में संलग्नता कराने तथा (**सिध्रम्**) मङ्गल करनेवाले (**इमम्**) इस (**यज्ञम्**) विद्यादि की प्राप्ति के साधक व्यवहार का (**यक्षताम्**) सङ्ग करते हैं, वैसे तुम भी सङ्ग करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन धर्मयुक्त व्यवहार के साथ परस्पर सङ्ग करते हैं, वैसे साधारण मनुष्यों को भी होना चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती।

इळा॒ सर॑स्वती म॒ही ब॒र्हिः सीद॑न्तु य॒ज्ञिया॑:॥ ९॥

शुचि॑:। दे॒वेषु॑। अर्पि॑ता। होत्रा॑। म॒रुत्ऽसु॑। भार॑ती। इळा॑। सर॑स्वती। म॒ही। ब॒र्हिः। सी॒द॒न्तु। य॒ज्ञिया॑:॥ ९॥

पदार्थः-(**शुचिः**) पवित्रा (**देवेषु**) विद्वत्सु (**अर्पिता**) समर्पिता (**होता**) दातुमादातुमर्हा (**मरुत्सु**) स्तावकेषु (**भारती**) धारणपोषणकर्त्री (**इळा**) प्रशंसितुं योग्या (**सरस्वती**) प्रशस्तविज्ञानसम्बधिनी (**मही**) पूजितुं सत्कर्त्तुमर्हा (**बर्हिः**) उपगतं वृद्धम् (**सीदन्तु**) प्राप्नुवन्तु (**यज्ञियाः**) यज्ञसाधनाऽर्हाः॥ ९॥

अन्वयः-या देवेष्वर्पिता होत्रा मरुत्सु भारती शुचिरिळा सरस्वती मही च यज्ञिया बर्हिः सीदन्तु ताः सर्वे विद्यार्थिनः प्राप्नुवन्तु॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्यार्थिभिरेवमाशंसितव्यं या विद्वत्सु विद्या वाणी वर्त्तते साऽस्मान् प्राप्नोतु॥ ९॥

पदार्थः-जो (**देवेषु**) विद्वानों में (**अर्पिता**) समर्पण की हुई (**होत्रा**) देने-लेने योग्य किया वा (**मरुत्सु**) स्तुति करनेवालों में (**भारती**) धारण-पोषण करनेवाली (**शुचिः**) पवित्र (**इळा**) प्रशंसा के योग्य (**सरस्वती**) प्रशंसित विज्ञान का सम्बन्ध रखनेवाली (**मही**) और बड़ी (**यज्ञियाः**) यज्ञ सिद्ध कराने के योग्य क्रिया (**बर्हिः**) समीप प्राप्त बड़े हुए व्यवहार को (**सीदन्तु**) प्राप्त होवे, उनको समस्त विद्यार्थी प्राप्त होवें॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार हैं। विद्यार्थियों को ऐसी इच्छा करनी चाहिये कि जो विद्वानों में विद्या वा वाणी वर्त्तमान है, वह हमको प्राप्त होवे॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तन्न॑स्तु॒रीप॒मद्भु॑तं पु॒रु वार॑ं पु॒रु त्मना॑।
त्वष्टा॒ पोषा॑य॒ वि ष्य॑तु रा॒ये नाभा॑ नो अस्म॒युः॥ १०॥

तत्। न॒:। तु॒रीप॑म्। अद्भु॑तम्। पुरु। वा॒। अर॑म्। पु॒रु। त्मना॑। त्वष्टा॑। पोषा॑य। वि। स्य॒तु॒। रा॒ये। नाभा॑। न॒:। अ॒स्म॒ऽयुः॥ १०॥

पदार्थः-(**तत्**) (**नः**) अस्मभ्यम् (**तुरीपम्**) तूर्णं रक्षकम् (**अद्भुतम्**) आश्चर्यस्वरूपम् (**पुरु**) बहु (**वा**) (**अरम्**) अलम् (**पुरु**) बहु (**त्मना**) आत्मना (**त्वष्टा**) विद्याधर्मेण राजमानः (**पोषाय**) पुष्टिकराय (**वि**) (**स्यतु**) प्राप्नोतु (**राये**) धनाय (**नाभा**) नाभौ (**नः**) अस्माकम् (**अस्मयुः**) अस्मान् कामयमानः॥ १०॥

अन्वयः-हे विद्वन्! अस्मयुस्त्वष्टा भवान् नः पुरु पोषाय राये नाभा प्राण इव विष्यतु त्मना तुरीपमद्भुतं पुरु वारं धनमस्ति तन्न आवह॥ १०॥

भावार्थः–यो विद्वानस्मान् कामयेत तं वयमपि कामयेमहि, योऽस्मान्न कामयेत तं वयमपि न कामयेमहि, तस्मात् परस्परस्य विद्यासुखे कामयमानावाचार्य्यविद्यार्थिनौ विद्योन्नतिं कुर्याताम्॥१०॥

पदार्थः–हे विद्वान्! **(अस्मयुः)** हम लोगों की कामना करनेवाले **(त्वष्टा)** विद्या और धर्म से प्रकाशमान आप **(नः)** हम लोगों के **(पुरु)** बहुत **(पोषाय)** पोषण करने के लिये और **(राये)** धन होने के लिये **(नाभा)** नाभि में प्राण के समान **(वि, ष्यतु)** प्राप्त होवें और **(त्मना)** आत्मा से जो **(तुरीपम्)** तुरन्त रक्षा करनेवाला **(अद्भुतम्)** अद्भुत आश्चर्य्यरूप **(पुरु, वा, अरम्)** बहुत वा पूरा धन है **(तत्)** उसको **(नः)** हम लोगों के लिये प्राप्त कीजिये **[**कराइये**]**॥१०॥

भावार्थः–जो विद्वान् हम लोगों की कामना करे उसकी हम लोग भी कामना करें, जो हम लोगों की कामना न करे उसकी हम भी कामना न करें। इससे परस्पर विद्या और सुख की कामना करते हुए आचार्य्य और विद्यार्थी लोग विद्या की उन्नति करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अव॒सृ॒जन्नुप॒ त्मना॑ दे॒वान्य॑क्षि॒ वन॒स्पते।
अ॒ग्निर्ह॒व्या सु॑षू॒दति॑ दे॒वो दे॒वेषु॒ मेधि॑रः॥११॥

अव॒ऽसृ॒जन्। उप॑। त्मना॑। दे॒वान्। य॒क्षि॒। व॒न॒स्प॒ते॒। अ॒ग्निः। ह॒व्या। सु॒सू॒द॒ति॒। दे॒वः। दे॒वेषु॑। मेधि॑रः॥११॥

पदार्थः–(**अवसृजन्**) विविधया विद्ययाऽलंकुर्वन् **(उप)** **(त्मना)** आत्मना **(देवान्)** विद्यां कामयमानान् **(यक्षि)** संगच्छसे **(वनस्पते)** रश्मिपतिः सूर्य्य इव वर्त्तमान **(अग्निः)** पावकः **(हव्या)** दातुमर्हाणि **(सुषूदति)** सुष्ठु क्षरति वर्षति **(देवः)** देदीप्यमानः **(देवेषु)** द्योतमानेषु लोकेषु **(मेधिरः)** संगमयिता॥११॥

अन्वयः–हे वनस्पते! त्वं यतस्त्मना आत्मना देवानुपावसृजन् सन् देवेषु देवो मेधिरोऽग्निर्हव्या सुषूदतीव विद्यां यक्षि तस्मात् सत्कर्त्तव्योऽसि॥११॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यः पृथिव्यादिषु देवेषु दिव्येषु पदार्थेषु दिव्यस्वरूपस्सन् जलं वर्षयति तथा विद्वांसो जगति विद्यार्थिषु विद्यां वर्षयेयुः॥११॥

पदार्थः–हे **(वनस्पते)** रश्मियों के पति सूर्य्य के समान वर्त्तमान! आप जिस कारण **(त्मना)** आत्मा से **(देवान्)** विद्या की कामना करते हुओं को **(उपावसृजन्)** अपने समीप नाना प्रकार की विद्या से परिपूरित करते हुए **(देवेषु)** प्रकाशमान लोकों में **(देवः)** अत्यन्त दीपते हुए **(मेधिरः)** सङ्ग करानेवाले **(अग्निः)** जैसे अग्नि **(हव्या)** होम से देने योग्य पदार्थों को **(सुषूदति)** सुन्दरता से ग्रहण कर परमाणु रूप करता है, वैसे विद्या का **(यक्षि)** सङ्ग करते हो, इससे सत्कार करने योग्य हो॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्यमण्डल पृथिवी आदि दिव्य पदार्थों में दिव्यरूप हुआ जल को वर्षाता है, वैसे विद्वान् जन संसार में विद्यार्थियों में विद्या की वर्षा करावें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पूष॒ण्वते॑ म॒रुत्व॑ते॒ वि॒श्वदे॑वाय॒ वा॒यवे॑।
स्वाहा॑ गाय॒त्रवे॑पसे ह॒व्यमिन्द्रा॑य कर्तन॥ १२॥

पूष॒ण्ऽवते॑। म॒रुत्व॑ते। वि॒श्वदे॑वाय। वा॒यवे॑। स्वाहा॑। गा॒य॒त्रऽवे॑पसे। ह॒व्यम्। इन्द्रा॑य। क॒र्त॒न॥ १२॥

पदार्थः-(**पूषण्वते**) बहवः पूषणः पुष्टिकर्त्तारो गुणा विद्यन्ते यस्मिंस्तस्मिन् (**मरुत्वते**) प्रशंसिता मरुतो विद्यास्तावकाः सन्ति यस्मिन् (**विश्वदेवाय**) विश्वेऽखिला देवा विद्वांसो यस्मिंस्तस्मिन् (**वायवे**) प्राप्तुं योग्याय (**स्वाहा**) सत्यया क्रियया (**गायत्रवेपसे**) गायत्रं गायन्तं त्रायमाणं वेपो रूपं यस्मात् तस्मै (**हव्यम्**) आदातुमर्हं कर्म (**इन्द्राय**) परमैश्वर्याय (**कर्त्तन**) कुरुत॥१२॥

अन्वयः-हे मनुष्या! यूयं स्वाहा पूषण्वते मरुत्वते विश्वदेवाय वायवे गायत्रवेपस इन्द्राय हव्यं कर्त्तन॥१२॥

भावार्थः-येन धनेन पुष्टिर्विद्याविद्वत्सत्कारौ वेदविद्याप्रवृत्तिः सर्वोपकारश्च स्यात्तदेव धर्म्यं धनं भवति नेतरत्॥१२॥

पदार्थः-हे मनुष्यो! तुम (**स्वाहा**) सत्य क्रिया से (**पूषण्वते**) जिसके बहुत पुष्टि करनेवाले गुण (**मरुत्वते**) जिसमें प्रशंसायुक्त विद्या की स्तुति करनेवाले (**विश्वदेवाय**) वा समस्त विद्वान् जन विद्यमान (**वायवे**) प्राप्त होने योग्य (**गायत्रवेपसे**) गानेवाले की रक्षा करता हुआ जिनसे रूप प्रकट होता उस (**इन्द्राय**) परमैश्वर्य के लिये (**हव्यम्**) ग्रहण करने योग्य कर्म को (**कर्त्तन**) करो॥१२॥

भावार्थः-जिस धन से पुष्टि, विद्या, विद्वानों का सत्कार, वेदविद्या की प्रवृत्ति और सर्वोपकार हो, वही धर्म सम्बन्धी धन है, और नहीं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्वाहा॑कृता॒न्या ग॒ह्युप॑ ह॒व्यानि॑ वी॒तये॑।
इन्द्रा ग॑हि श्रु॒धी हव॒ं त्वां ह॑वन्ते अध्व॒रे॥ १३॥ ११॥

स्वाहा॑ऽकृतानि। आ। ग॒हि॒। उप॑। ह॒व्यानि॑। वी॒तये॑। इन्द्र॑। आ। ग॒हि॒। श्रु॒धि॒। हव॑म्। त्वाम्। ह॒व॒न्ते॒। अ॒ध्व॒रे॥ १३॥

पदार्थः-(**स्वाहाकृतानि**) सत्यक्रियया निष्पादितानि (**आ**) (**गहि**) आगच्छ (**उप**) सामीप्ये (**हव्यानि**) आदातुमर्हाणि (**वीतये**) विद्याव्याप्तये (**इन्द्र**) परमैश्वर्ययोजक (**आ**) (**गहि**) (**श्रुधी**) शृणु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हवम्**) स्तवनम् (**त्वाम्**) (**हवन्ते**) स्तुवन्ति (**अध्वरे**) अहिंसनीये व्यवहारे॥१३॥

अन्वयः-हे इन्द्र विद्वन्! अध्वरे वीतये स्वाहाकृतानि हव्यान्युपागहि यं त्वां विद्यां जिज्ञासवो हवन्ते स त्वमागहि हवं श्रुधि॥१३॥

भावार्थः-अध्यापको यावच्छास्त्रमध्यापयेत् तावत्प्रत्यहं प्रतिमासं वा परीक्षेत। विद्यार्थिषु ये येभ्यो विद्याः प्रदद्युस्ते तेषां शरीरेण मनसा धनेन सेवां कुर्युः॥१३॥

अत्राध्यापकाऽध्येतृविद्यागुणप्रशंसनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति बोध्यम्॥

इति द्विचत्वारिंशदुत्तरं शततमं १४२ सूक्तमेकादशो ११ वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्य को युक्त करनेवाले विद्वान्! आप (**अध्वरे**) न नष्ट करने योग्य व्यवहार में (**वीतये**) विद्या की प्राप्ति के लिये (**स्वाहाकृतानि**) सत्य क्रिया से (**हव्यानि**) ग्रहण करने योग्य पदार्थों को (**उपागहि**) प्राप्त होओ, जिन (**त्वाम्**) तुम्हारी (**हवन्ते**) विद्या का ज्ञान चाहते हुए विद्यार्थी जन स्तुति करते हैं, सो आप (**आ, गहि**) आओ और (**हवम्**) स्तुति को (**श्रुधि**) सुनो॥१३॥

भावार्थः-अध्यापक जितना शास्त्र विद्यार्थियों को पढ़ावे उसकी प्रतिदिन वा प्रतिमास परीक्षा करे और विद्यार्थियों में जो जिनको विद्या देवें, वे उनकी तन, मन, धन से सेवा करें॥१३॥

इस सूक्त में पढ़ने-पढ़ानेवालों के गुणों और विद्या की प्रशंसा होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ बयालीसवाँ १४२ सूक्त और ग्यारहवाँ ११ वर्ग पूरा हुआ॥

अथ प्र तव्यसीमित्यस्याष्टर्चस्य त्रिचत्वारिंशदुत्तरशततमस्य सूक्तस्य दीर्घतमा ऋषिः।
अग्निर्देवता। १,७ निचृज्जगती। २,३,५ विराड्जगती। ४,६ जगती च छन्दः। निषादः स्वरः।
८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे।
अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः॥ १॥

प्र। तव्यसीम्। नव्यसीम्। धीतिम्। अग्नये। वाचः। मतिम्। सहसः। सूनवे। भरे। अपाम्। नपात्। यः। वसुभिः। सह। प्रियः। होता। पृथिव्याम्। नि। असीदत्। ऋत्वियः॥ १॥

पदार्थः–(**प्र**) (**तव्यसीम्**) अतिशयेन बलवतीम् (**नव्यसीम्**) अतिशयेन नवीनाम् (**धीतिम्**) धियन्ति विजयं यया ताम् (**अग्नये**) अग्निवत्तीव्रबुद्धये (**वाचः**) वाण्याः (**मतिम्**) प्रज्ञाम् (**सहसः**) शरीरात्मबलवतः (**सूनवे**) (**भरे**) धरे (**अपाम्**) जलानाम् (**नपात्**) यो न पतति सः (**यः**) (**वसुभिः**) प्रथमकल्पैर्विद्वद्भिः (**सह**) (**प्रियः**) प्रीतः (**होता**) गृहीता (**पृथिव्याम्**) (**नि**) (**असीदत्**) सीदति (**ऋत्वियः**) य ऋतूनर्हति सः॥ १॥

अन्वयः–अहमपांनपात् यः सूर्यः पृथिव्यामिव यो वसुभिः सह प्रियो होता ऋत्वियो न्यसीदत् तस्मात् सहसोऽग्नये सूनवे वाचः तव्यसी नव्यसीं धीतिं मतिं प्रभरे॥ १॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। विदुषां योग्यताऽस्ति यथा सूर्योऽपां धर्त्ताऽस्ति तथा पवित्रान् धीमतः प्रियाचरणान् सद्यो विद्यानां ग्रहीतॄन् विद्यार्थिनो गृहीत्वा विद्याविज्ञानं सद्यो जनयेयुरिति॥ १॥

पदार्थः–मैं (**अपां नपात्**) जलों के बीच (**यः**) जो न गिरता वह सूर्य (**पृथिव्याम्**) पृथिवी पर जैसे वैसे जो (**वसुभिः**) प्रथम कक्षा के विद्वानों के (**सह**) साथ (**प्रियः**) प्रीतियुक्त (**होता**) ग्रहण करनेवाला (**ऋत्वियः**) ऋतुओं की योग्यता रखता हुआ (**नि, असीदत्**) निरन्तर स्थिर होता है, उस (**सहसः**) शरीर और आत्मा के बलयुक्त अध्यापक के सकाश से (**अग्नये**) अग्नि के समान तीक्ष्णबुद्धि (**सूनवे**) पुत्र वा शिष्य के लिये (**वाचः**) वाणी की (**तव्यसीम्**) अत्यन्त बलवती (**नव्यसीम्**) अतीव नवीन (**धीतिम्**) जिससे विजय को धारण करें, उस धारणा और (**मतिम्**) उत्तम बुद्धि को (**प्र, भरे**) अच्छे प्रकार धारण करता हूँ॥ १॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों की योग्यता है कि जैसे सूर्य जलों की धारणा करनेवाला है, वैसे पवित्र बुद्धिमान् प्रिय आचरण करने और शीघ्र विद्याओं को ग्रहण करनेवाले विद्यार्थियों को लेकर विद्या का विज्ञान शीघ्र उत्पन्न करावें॥ १॥

अथेश्वरविषयमाह॥

अब ईश्वरविषय अगले मन्त्र में कहते हैं॥

स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत्॥ २॥

सः। जायमानः। परमे। विऽओमनि। आविः। अग्निः। अभवत्। मातरिश्वने। अस्य। क्रत्वा। समिऽइद्धानस्य। मज्मना। प्र। द्यावा। शोचिः। पृथिवी इति। अरोचयत्॥ २॥

पदार्थः–(**सः**) अधीयानः (**जायमानः**) उत्पद्यमानः (**परमे**) प्रकृष्टे (**व्योमनि**) व्योमवद् व्यापके सर्वरक्षादिगुणान्विते ब्रह्मणि (**आविः**) प्राकट्ये (**अग्निः**) पावक इव (**अभवत्**) भवेत् (**मातरिश्वने**) अन्तरिक्षस्थाय वायवे (**अस्य**) (**क्रत्वा**) प्रज्ञया कर्मणा वा (**समिधानस्य**) सम्यक् प्रदीप्तस्य (**मज्मना**) बलेन (**प्र**) (**द्यावा**) (**शोचिः**) पवित्रः (**पृथिवी**) (**अरोचयत्**) प्रकाशयेत्॥ २॥

अन्वयः–यो मातरिश्वनेऽग्निरिव परमे व्योमनि जायमान आविरभवत्, तस्यास्य समिधानस्य जनस्य शोचिः क्रत्वा मज्मना च द्यावा पृथिवी प्रारोचयत्, स सर्वेषां कल्याणकारी जायते॥ २॥

भावार्थः–यदि विद्वांसो विद्यार्थिनः प्रयत्नेन सुविद्यासुशिक्षाधर्मयुक्तान् कुर्युस्तर्हि सर्वदा कल्याणभाजो भवेयुः॥ २॥

पदार्थः–जो (**मातरिश्वने**) अन्तरिक्षस्थ वायु के लिये (**अग्निः**) अग्नि के समान (**परमे**) उत्तम (**व्योमनि**) आकाश के तुल्य सबमें व्याप्त सबकी रक्षा करने आदि गुणों से युक्त ब्रह्म में (**जायमानः**) उत्पन्न हुआ हम लोगों के लिये (**आविः**) प्रकट (**अभवत्**) होवे, उस (**अस्य**) प्रत्यक्ष (**समिधानस्य**) उत्तमता से प्रकाशमान जन का (**शोचिः**) पवित्रभाव (**क्रत्वा**) प्रज्ञा और कर्म वा (**मज्मना**) बल के साथ (**द्यावा पृथिवी**) अन्तरिक्ष और पृथिवी को (**प्रारोचयत्**) प्रकाशित करावे, (**सः**) वह पढ़ा हुआ जन सबका कल्याणकारी होता है॥ २॥

भावार्थः–जो विद्वान् लोग विद्यार्थियों को प्रयत्न के साथ विद्या, अच्छी शिक्षा और धर्म नीतियुक्त करें तो वे सर्वदैव कल्याण का सेवन करनेवाले होवें॥ २॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः।

भात्वक्षसो अत्युक्तुर्न सिन्धवोऽग्ने रेजन्ते असंसन्तो अजराः॥ ३॥

अस्य। त्वेषाः। अजराः। अस्य। भानवः। सुऽसंदृशः। सुऽप्रतीकस्य। सुऽद्युतः। भाऽत्वक्षसः। अति। अक्तुः। न। सिन्धवः। अग्नेः। रेजन्ते। असंसन्तः। अजराः॥ ३॥

पदार्थः-**(अस्य)** **(त्वेषाः)** विद्यासुशीलप्रकाशाः **(अजराः)** हानिरहिताः **(अस्य)** सूर्यस्य **(भानवः)** किरणा इव **(सुसंदृशः)** सत्यासत्ययोः सुष्ठु सम्यग्द्रष्टुः **(सुप्रतीकस्य)** सुष्ठु प्रतीतियुक्तस्य **(सुद्युतः)** अभितः प्रकाशमानस्य **(भात्वक्षसः)** भाः विद्याप्रकाशस्त्वक्षो बलं यासां ताः। **त्वक्ष इति बलनामसु पठितम्।** (निघं०२.९) **(अति)** **(अक्तुः)** रात्रिः **(न)** इव **(सिन्धवः)** प्रवाहरूपः **(अग्नेः)** सूर्यस्य **(रेजन्ते)** कम्पन्ते **(असंसन्तः)** जागृताः **(अजराः)** हानिरहिताः॥ ३॥

अन्वयः-हे मनुष्याः! सुसंदृशः सुप्रतीकस्य सुद्युतोऽग्नेर्भानवोऽस्याध्यापकस्याजराः त्वेषा भवन्ति। अस्याजरा असंसन्तो भात्वक्षसः सिन्धवोऽक्तुर्नाति रेजन्ते॥ ३॥

भावार्थः-ये मनुष्याः सूर्यवद्विद्याप्रकाशका अविद्याऽन्धकारनाशकाः सर्वेषामानन्दप्रदा भवन्ति, त एव मनुष्यशिरोमणयो जायन्ते॥ ३॥

पदार्थः-हे मनुष्यो! **(सुसंदृशः)** सत्य और असत्य को ज्ञानदृष्टि से देखनेवाले **(सुप्रतीकस्य)** सुन्दर प्रतीतियुक्त **(सुद्युतः)** सब ओर से प्रकाशमान **(अग्नेः)** सूर्य के **(भानवः)** किरणों के समान **(अस्य)** इस अध्यापक के **(अजराः)** विनाशरहित **(त्वेषाः)** विद्या और शील के प्रकाश होते हैं और वे **(अस्य)** इस महाशय के **(अजराः)** अजर-अमर **(असंसन्तः)** जागते हुए **(भात्वक्षसः)** विद्या प्रकाशरूपी बलवाले **(सिन्धवः)** प्रवाहरूप उक्त तेज **(अक्तुः)** रात्रि के **(न)** समान अविद्यान्धकार को **(अति, रेजन्ते)** अतिक्रमण करते हैं॥ ३॥

भावार्थः-जो मनुष्य सूर्य के समान विद्या के प्रकाश करने, अविद्यान्धकार के विनाश करने और सबको आनन्द देनेवाले होते हैं, वे ही मनुष्यों के शिरोमणि होते हैं॥ ३॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर विषय को अगले मन्त्र में कहा है॥

यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति॥ ४॥

यम्। आऽईरिरे। भृगवः। विश्वऽवेदसम्। नाभा। पृथिव्याः। भुवनस्य। मज्मना। अग्निम्। तम्। गीःऽभिः। हिनुहि। स्वे। आ। दमे। यः। एकः। वस्वः। वरुणः। न। राजति॥ ४॥

पदार्थः-**(यम्)** परमात्मानम् **(एरिरे)** समन्ताज्जानीयुः **(भृगवः)** विद्ययाऽविद्याया भर्जका निवारका विद्वांसः। **भृगव इति पदनामसु पठितम्।** (निघं०५.५) **(विश्ववेदसम्)** समग्रस्य विदितारम्

(नाभा) मध्ये **(पृथिव्याः)** अन्तरिक्षस्य **(भुवनस्य)** लोकजातस्य **(मज्मना)** अनन्तेन बलेन **(अग्निम्)** सूर्यमिव स्वप्रकाशम् **(तम्)** **(गीर्भिः)** प्रशंसिताभिर्वाग्भिः **(हिनुहि)** जानीहि **(स्वे)** स्वकीये **(आ)** समन्तात् **(दमे)** गृहरूपे हृदयाऽवकाशे **(यः)** **(एकः)** अद्वितीयः **(वस्वः)** वसोर्द्रव्यरूपस्य **(वरुणः)** अतिश्रेष्ठः **(न)** इव **(राजति)** प्रकाशते॥४॥

अन्वयः–हे जिज्ञासो! यं विश्ववेदसं भृगव एरिरे य एको वरुणो मज्मना वरुणो नेव पृथिव्या भुवनस्य वस्वो नाभा मध्ये स्वव्याप्त्या राजति तमग्निं स्वे दमे वर्त्तमानस्त्वं गीर्भिराहिनुहि॥४॥

भावार्थः–हे मनुष्या! यो विद्वद्वेदितव्यः सर्वाऽभिव्यापी प्रशंसितुमर्हः सच्चिदानन्दादिलक्षणः सर्वशक्तिमानद्वितीयोऽतिसूक्ष्मः स्वप्रकाशोऽन्तर्यामी परमेश्वरोऽस्ति तं योगाङ्गानुष्ठानसिद्ध्या स्वस्मिन्विजानीत॥४॥

पदार्थः–हे जिज्ञासु पुरुष! **(यम्)** जिस **(विश्ववेदसम्)** अच्छे संसार के वेत्ता परमात्मा को **(भृगवः)** विद्या से अविद्या को भूंजनेवाले **(एरिरे)** सब ओर से जाने वा **(यः)** जो **(एकः)** एक अति श्रेष्ठ आप्त ईश्वर **(मज्मना)** अत्यन्त बल से **(वरुणः)** अति श्रेष्ठ के **(न)** समान **(पृथिव्याः)** अन्तरिक्ष के वा **(भुवनस्य)** लोक में उत्पन्न हुए **(वस्वः)** धनरूप पदार्थ के **(नाभा)** बीच में अपनी व्याप्ति से **(राजति)** प्रकाशमान है **(तम्)** उस **(अग्निम्)** सूर्य के समान ईश्वर जो कि **(स्वे)** अपने अर्थात् तेरे **(दमे)** घररूप हृदयाकाश में वर्त्तमान है, उसको **(गीर्भिः)** प्रशंसित वाणियों से **(आ, हिनुहि)** जानो॥४॥

भावार्थः–हे मनुष्यो! जो विद्वानों से जानने योग्य, सब में सब प्रकार व्याप्त, प्रशंसा के योग्य, सच्चिदानन्दादि लक्षण, सर्वशक्तिमान्, अद्वितीय, अतिसूक्ष्म, आप ही प्रकाशमान अन्तर्यामी परमेश्वर है, उसको योग के अङ्गों के अनुष्ठान की सिद्धि से अपने हृदय में जानो॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय में कहा है॥

न यो वरा॑य म॒रुता॑मिव स्व॒नः सेने॑व सृ॒ष्टा दि॒व्या यथा॒शनिः॑।
अ॒ग्निर्जम्भै॒स्तिगि॒तैर॑त्ति॒ भर्व॑ति॒ योधो न शत्रू॒न्त्स वना॒ न्यृ॑ञ्जते॥५॥

न। यः। वरा॑य। म॒रुता॑म्ऽइव। स्व॒नः। सेना॑ऽइव। सृ॒ष्टा। दि॒व्या। यथा॑। अ॒शनिः॑। अ॒ग्निः। जम्भैः॑। ति॒गि॒तैः। अ॒त्ति॒। भर्व॑ति। योधः॑। न। शत्रू॒न्। सः। वना॑। नि। ऋ॒ञ्ज॒ते॥५॥

पदार्थः–**(न)** निषेधे **(यः)** **(वराय)** स्वीकरणाय **(मरुतामिव)** यथा वायूनां विदुषां तथा **(स्वनः)** शब्दः **(सेनेव)** **(सृष्टा)** **(दिव्या)** दिवि कारणे वाय्वादिकार्ये च भवा **(यथा)** **(अशनिः)** विद्युत् **(अग्निः)** पावकः **(जम्भैः)** विस्फुरणैः **(तिगितैः)** तीक्ष्णैः **(अत्ति)** भक्षयति **(भर्वति)** हिनस्ति **(योधः)** प्रहर्त्ता **(न)** इव **(शत्रून्)** **(सः)** **(वना)** वनानि **(नि)** **(ऋञ्जते)** साध्नोति॥५॥

अन्वयः-योऽग्निर्मरुतामिव स्वनो वा सृष्टा सेनेव वा यथा दिव्याऽशनिस्तथा वराय न शक्यः स तिगितैर्जम्भैरत्ति योधो न शत्रून् भर्वति वना नि ऋञ्जते॥५॥

भावार्थः-अत्रोपमालङ्कारः। प्रचण्डवायुना प्रेरितोऽग्निः शत्रुहिंसनमिव पदार्थान् दहति नासौ सहसा निवारणीय इति॥५॥

पदार्थः-(**यः**) जो (**अग्निः**) आग (**मरुतामिव**) पवन वा विद्वानों के (**स्वनः**) शब्द के समान (**सृष्टा, सेनेव**) शत्रुदल में चक्रव्यूहादि रचना से रची हुई सेना के समान वा (**यथा**) जैसे (**दिव्या**) कारण वा वायु आदि कार्य द्रव्य में उत्पन्न हुई (**अशनिः**) बिजुली के वैसे (**वराय**) स्वीकार करने के लिये (**न**) नहीं हो सकता अर्थात् तेजी के कारण रुक नहीं सकता (**सः**) वह (**तिगितैः**) तीक्ष्ण (**जम्भैः**) स्फूर्त्तियों से (**अत्ति**) भक्षण करता अर्थात् लकड़ी आदि को खाता है (**योधः**) योधा के (**न**) समान (**शत्रून्**) शत्रुओं को (**भर्वति**) नष्ट करता अर्थात् धनुर्विद्या में प्रविष्ट किया हुआ शत्रुदल को भूंजता है और (**वना**) वनों को (**नि, ऋञ्जते**) निरन्तर सिद्ध करता है॥५॥

भावार्थः-इस मन्त्र में उपमालंकार है। प्रचण्ड वायु से प्रेरित अति जलता हुआ अग्नि शत्रुओं को मारने के तुल्य पदार्थों को जलाता है, वह सहसा नहीं रुक सकता॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कुविन्नो॑ अ॒ग्निरुचथ॑स्य॒ वीरस॒द् वसु॑ष्कुविद्वसु॑भिः काम॑मा॒वर॑त्।
चो॒दः कुवित्तु॑तु॒ज्यात्सा॒तये॒ धिय॒ः शुचि॑प्रतीकं॒ तम॒या धि॒या गृ॑णे॥६॥

कुवित्। नः। अग्निः। उचथस्य। वीः। असत्। वसुः। कुवित्। वसुऽभिः। कामम्। आऽवरत्। चोदः। कुवित्। तुतुज्यात्। सातये। धियः। शुचिऽप्रतीकम्। तम्। अया। धिया। गृणे॥६॥

पदार्थः-(**कुवित्**) महान् (**नः**) अस्मभ्यम् (**अग्निः**) विद्युदादिस्वरूपः (**उचथस्य**) उचितस्य (**वीः**) व्यापकः (**असत्**) भवेत् (**वसुः**) वासयिता (**कुवित्**) महान् (**वसुभिः**) वासयितृभिः (**कामम्**) (**आवरत्**) आवृणुयात् (**चोदः**) चुद्यात् प्रेरयेत् (**कुवित्**) महान् (**तुतुज्यात्**) बलयेत् (**सातये**) विभागाय (**धियः**) प्रज्ञाः (**शुचिप्रतीकम्**) (**तम्**) (**अया**) अनया। अत्र **वाच्छन्दसी**त्येकारादेशाभावः। (**धिया**) प्रज्ञया कर्मणा वा (**गृणे**) स्तौमि॥६॥

अन्वयः-यः कुविदग्निर्न उचथस्य वीरसद्वसुभिस्सह कुविद्वसुः काममावरत्सातये कुविच्चोदो धियस्तुतुज्यात् तं शुचिप्रतीकमया धियाऽहं गृणे॥६॥

भावार्थः-ये विद्युद्वदुचितकामप्रापका बुद्धिबलप्रदायका महान्तो विद्वांसः स्वबुद्ध्या सर्वाञ्जनान् विदुषः कुर्वन्ति तान् सर्वे प्रशंसन्तु॥६॥

पदार्थः-जो (**कुवित्**) बड़ा (**अग्निः**) बिजुली आदि रूपवाला अग्निः (**नः**) हमारे लिये (**उचथस्य**) उचित पदार्थ का (**वीः**) व्यापक (**असत्**) हो वा (**वसुभिः**) वसानेवालों के साथ (**कुवित्**) बड़ा (**वसुः**) वसानेवाला (**कामम्**) काम को (**आवरत्**) भलीभांति स्वीकार करे वा (**सातये**) विभाग के लिये (**कुवित्**) बड़ा प्रशंसित जन (**चोदः**) प्रेरणा दे वा (**धियः**) बुद्धियों को (**तुतुज्यात्**) बलवती करे (**तम्**) उस (**शुचिप्रतीकम्**) पवित्र प्रतीति देनेवाले जन की (**अया**) इस (**धिया**) बुद्धि वा कर्म से (**गृणे**) मैं स्तुति करता हूँ॥६॥

भावार्थः-जो बिजुली के समान उचित काम प्राप्त कराने और बुद्धि बल अत्यन्त देनेवाले बड़े प्रशंसित विद्वान् अपनी बुद्धि से सब मनुष्यों को विद्वान् करते हैं, उनकी सब लोग प्रशंसा करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम्॥७॥

घृतऽप्रतीकम्। वः। ऋतस्य। धूःऽसदम्। अग्निम्। मित्रम्। न। सम्ऽइधानः। ऋञ्जते। इन्धानः। अक्रः। विदथेषु। दीद्यत्। शुक्रऽवर्णाम्। उत्। ऊम् इति। नः। यंसते। धियम्॥७॥

पदार्थः-(**घृतप्रतीकम्**) यो घृतमाज्यं प्रत्येति तम् (**वः**) युष्मभ्यम् (**ऋतस्य**) सत्यस्य (**धूर्षदम्**) यो धूर्षू हिंसकेषु सीदति तम् (**अग्निम्**) पावकम् (**मित्रम्**) सखायम् (**न**) इव (**समिधानः**) सम्यक् प्रकाशमानः (**ऋञ्जते**) प्रसाध्नोति (**इन्धानः**) प्रदीप्तस्सन् (**अक्रः**) अन्यैरक्रान्तः। अत्र पृषोदरादिनेष्टसिद्धिः। (**विदथेषु**) संग्रामेषु (**दीद्यत्**) देदीप्यमानः (**शुक्रवर्णाम्**) शुद्धस्वरूपाम् (**उत्**) (**उ**) इति वितर्के (**नः**) अस्माकम् (**यंसते**) रक्षति (**धियम्**) प्रज्ञाम्॥७॥

अन्वयः-हे मनुष्या! यस्समिधानो वो युष्मभ्यं धूर्षदं घृतप्रतीकमग्निमृतस्य मित्रन्नेव ऋञ्जते य उ इन्धानोऽक्रो विदथेषु दीद्यत्सन् नः शुक्रवर्णां धियमुद्यंसते तं यूयं वयं च पितृवत्सेवेमहि॥७॥

भावार्थः-अत्रोपमालङ्कारः। यो विद्युद्वत्सर्वशुभगुणाकरो मित्रवत्सुखप्रदाता संग्रामेषु वीर इव शत्रुजेता दुःखप्रध्वंसको वर्त्तते तं विद्वांसमाश्रित्य सर्वे मनुष्या विद्याः प्राप्नुयुः॥७॥

पदार्थः-हे मनुष्यो! जो (**समिधानः**) अच्छे प्रकार प्रकाशमान विद्वान् (**वः**) तुम्हारे लिये (**धूर्षदम्**) हिंसकों में स्थिर होते हुए (**घृतप्रतीकम्**) जो घृत को प्राप्त होता उस (**अग्निम्**) आग को (**ऋतस्य**) सत्य व्यवहार के वर्त्तनेवाले (**मित्रम्**) मित्र के (**न**) समान (**ऋञ्जते**) प्रसिद्ध करता है (**उ**) और जो (**इन्धानः**) प्रकाशमान होता हुआ वा (**अक्रः**) औरों ने जिसको न दबा पाया वह (**विदथेषु**) संग्रामों में

(दीद्यत्) निरन्तर प्रकाशित होता हुआ **(नः)** हम लोगों की **(शुक्रवर्णाम्)** शुद्धस्वरूप **(धियम्)** प्रज्ञा को **(उद्यंसते)** उत्तम रखता है, उसको तुम हम पिता के समान सेवें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो बिजुली के समान समस्त शुभ गुणों की खान, मित्र के समान सुख का देने, संग्रामों में वीर के तुल्य शत्रुओं को जीतने और दुःख का विनाश करनेवाला है, उस विद्वान् का आश्रय कर सब मनुष्य विद्याओं को प्राप्त होवें॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः।
अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः॥८॥१२॥

अप्रऽयुच्छन्। अप्रयुच्छत्ऽभिः। अग्ने। शिवेभिः। नः। पायुऽभिः। पाहि। शग्मैः। अदब्धेभिः। अदृपितेभिः। इष्टे। अनिमिषत्ऽभिः। परि। पाहि। नः। जाः॥८॥

पदार्थः-(**अप्रयुच्छन्**) प्रमादमकुर्वन् (**अप्रयुच्छद्भिः**) प्रमादरहितैर्विद्वद्भिस्सह (**अग्ने**) विद्याविज्ञानप्रकाशयुक्त (**शिवेभिः**) कल्याणकारिभिः (**नः**) अस्मान् (**पायुभिः**) रक्षकैः (**पाहि**) रक्ष (**शग्मैः**) सुखप्रापकैः (**अदब्धेभिः**) अहिंसकैः (**अदृपितेभिः**) मोहादिदोषरहितैः (**इष्टे**) पूजितुं योग्य। अत्र संज्ञायां क्तिच्। (**अनिमिषद्भिः**) नैरन्तर्येणालस्यरहितैः (**परि**) सर्वतः (**पाहि**) (**नः**) अस्मान् (**जाः**) यो जनयति सुखानि सः॥८॥

अन्वयः-हे इष्टेऽग्ने अग्निवद् विद्वन्! त्वमप्रयुच्छन्सन्नप्रयुच्छद्भिः शिवेभिः पायुभिः शग्मैर्विद्वद्भिस्सह नः पाहि जास्त्वमनिमिषद्भिरदब्धेभिरदृपितेभिराप्तैस्सह नः परिपाहि॥८॥

भावार्थः-मनुष्यैस्सततमिदमेष्टव्यं प्रयतितव्यं च धार्मिकैर्विद्वद्भिस्सह धार्मिका विद्वांसोऽस्मान् सततं रक्षेयुरिति॥८॥

अत्र विद्वद्दीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति त्रिंचत्वारिंशदुत्तरं शततमं १४३ सूक्तं द्वादशो १२ वर्गश्च समाप्तः॥

पदार्थः-हे **(इष्टे)** सत्कार करने योग्य तथा **(अग्ने)** विद्या विज्ञान के प्रकाश से युक्त अग्नि के समान विद्वान्! आप **(अप्रयुच्छन्)** प्रमाद को न करते हुए **(अप्रयुच्छद्भिः)** प्रमादरहित विद्वानों के साथ वा **(शिवेभिः)** कल्याण करनेवाले **(पायुभिः)** रक्षक **(शग्मैः)** सुखप्रपाक विद्वानों के साथ **(नः)** हम लोगों की **(पाहि)** रक्षा करो तथा **(जाः)** सुखों की उत्पत्ति करानेवाले आप **(अनिमिषद्भिः)** निरन्तर आलस्यरहित **(अदब्धेभिः)** हिंसा और **(अदृपितेभिः)** मोहादि दोषरहित विद्वानों के साथ **(नः)** हम लोगों की **(परि, पाहि)** सब ओर से रक्षा करो॥८॥

भावार्थः–मनुष्यों को निरन्तर यह चाहना और ऐसा प्रयत्न करना चाहिये कि धार्मिक विद्वानों के साथ धार्मिक विद्वान् हमारी निरन्तर रक्षा करें॥८॥

इस सूक्त में विद्वान् और ईश्वर के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जानना चाहिये॥

यह एक सौ तेंतालीसवाँ १४३ सूक्त और बारहवां १२ वर्ग समाप्त हुआ॥

एतीत्यस्य सप्तर्चस्य चतुश्चत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १,३-५,७ निचृज्जगती। २ जगती छन्दः। निषादः स्वरः। ६ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाध्यापकोपदेशकविषयमाह॥

अब एक सौ चवालीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में अध्यापक और उपदेश करनेवालों के विषय को कहते हैं॥

एति॒ प्र होता॑ व्र॒तम॑स्य मा॒ययो॒र्ध्वां द॑धा॒नः शुचि॑पेशस॒ं धिय॑म्।
अ॒भि स्रुचः॑ क्रमते दक्षिणा॒वृतो॒ या अ॑स्य॒ धाम॑ प्रथ॒मं ह॒ निंस॑ते॥ १॥

एति॑। प्र। होता॑। व्र॒तम्। अ॒स्य। मा॒यया॑। ऊ॒र्ध्वाम्। दधा॑नः। शुचि॑ऽपेशसम्। धिय॑म्। अ॒भि॒। स्रुचः॑। क्र॒म॒ते॒। द॒क्षि॒णा॒ऽआ॒वृत॑ः। याः। अ॒स्य॒। धाम॑। प्र॒थ॒मम्। ह॒। निंस॑ते॥ १॥

पदार्थः-(**एति**) प्राप्नोति (**प्र**) (**होता**) सदुणग्रहीता (**व्रतम्**) सत्याचरणशीलम् (**अस्य**) शिक्षकस्य (**मायया**) प्रज्ञया (**ऊर्ध्वाम्**) उत्कृष्टाम् (**दधानः**) (**शुचिपेशसम्**) पवित्ररूपाम् (**धियम्**) प्रज्ञां कर्म वा (**अभि**) (**स्रुचः**) विज्ञानयुक्ताः (**क्रमते**) प्राप्नोति (**दक्षिणावृतः**) या दक्षिणां वृण्वन्ति (**याः**) (**अस्य**) (**धाम**) दधति यस्मिंस्तत् (**प्रथमम्**) (**ह**) (**निंसते**) चुम्बति॥ १॥

अन्वयः-यो होता माययाऽस्य व्रतमूर्ध्वां शुचिपेशसं धियं दधानः प्र क्रमते या अस्य स्रुचो दक्षिणावृतो धियः प्रथमं धाम निंसते ता अभ्येति स ह प्राज्ञतमो जायते॥ १॥

भावार्थः-ये मनुष्या आप्तस्य विदुष उपदेशाध्यापनाभ्यां विद्यायुक्तां बुद्धिमाप्नुवन्ति ते सुशीला जायन्ते॥ १॥

पदार्थः-जो (**होता**) सदुणों का ग्रहण करनेवाला पुरुष (**मायया**) उत्तम बुद्धि से (**अस्य**) इस शिक्षा करनेवाले के (**व्रतम्**) सत्याचरण शील को (**ऊर्ध्वाम्**) और उत्तम (**शुचिपेशसम्**) पवित्र (**धियम्**) बुद्धि वा कर्म को (**दधानः**) धारण करता हुआ (**प्र, क्रमते**) व्यवहारों में चलता है वा (**याः**) जो (**अस्य**) इसकी (**स्रुचः**) विज्ञानयुक्त (**दक्षिणावृतः**) दक्षिणा का आच्छादन करनेवाली बुद्धि हैं, उनको और (**प्रथमम्**) प्रथम (**धाम**) धाम को (**निंसते**) जो प्रीति को पहुंचाता है (**ह**) वही अत्यन्त बुद्धिमान् होता है॥ १॥

भावार्थः-जो मनुष्य शास्त्रवेत्ता विद्वान् के उपदेश और पढ़ाने से विद्यायुक्त बुद्धि को प्राप्त होते हैं, वे सुशील होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते॥ २॥

अभि। ईम्। ऋतस्य। दोहनाः। अनूषत। योनौ। देवस्य। सदने। परिऽवृताः। अपाम्। उपऽस्थे। विऽभृतः। यत्। आ। अवसत्। अध। स्वधाः। अधयत्। याभिः। ईयते॥ २॥

पदार्थः-(**अभि**) आभिमुख्ये (**ईम्**) सर्वतः (**ऋतस्य**) सत्यस्य विज्ञानस्य (**दोहनाः**) पूरकाः (**अनूषत**) स्तुवन्ति। अत्रान्येषामिति दैर्घ्यं व्यत्ययेनात्मनेपदम्। (**योनौ**) गृहे (**देवस्य**) विदुषः (**सदने**) स्थाने (**परिवृताः**) आच्छादिता विदुष्यः (**अपाम्**) (**उपस्थे**) समीपे (**विभृतः**) विशेषेण धृतः (**यत्**) यः (**आ**) (**अवसत्**) वसेत् (**अध**) आनन्तर्ये (**स्वधाः**) उदकानि। **स्वधेत्युदकनामसु पठितम्।** (निघं०१.१२) (**अधयत्**) पिबति (**याभिः**) अद्भिः (**ईयते**) गच्छति॥ २॥

अन्वयः-हे मनुष्या! यथार्तस्य दोहनाः परिवृता देवस्य सदने योनावभ्यनूषत यद्यो वायुरपामुपस्थे विभृत आऽवसदध यथा विद्वान् स्वधा अधयद्याभिरीमीयते तथा तद्वद् यूयमपि वर्त्तध्वम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽऽकाशे जलं स्थिरीभूय ततो वर्षित्वा सर्वं जगत् पोषयति तथा विद्वान् चेतसि विद्यां स्थिरीकृत्य सर्वान् मनुष्यान् पोषयेत्॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**ऋतस्य**) सत्य विज्ञान के (**दोहनाः**) पूरे करनेवाली (**परिवृताः**) वस्त्रादि से ढपी हुई अर्थात् लज्जावती पण्डिता स्त्री (**देवस्य**) विद्वान् के (**सदने**) स्थान वा (**योनौ**) घर में (**अभ्यनूषत**) सम्मुख में प्रशंसा करती हैं वा (**यत्**) जो वायु (**अपाम्**) जलों के (**उपस्थे**) समीप में (**विभृतः**) विशेषता से धारण किया हुआ (**आवसत्**) अच्छे प्रकार वसे (**अध**) इसके अनन्तर जैसे विद्वान् (**स्वधाः**) जलों को (**अधयत्**) पिये वा (**याभिः**) जिन क्रियाओं से (**ईम्**) सब ओर से उनको (**ईयते**) प्राप्त होता है, वैसे उन सभी के समान तुम भी वर्त्तो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे आकाश में जल स्थिर हो और वहाँ से वर्ष कर समस्त जगत् को पुष्ट करता है, वैसे विद्वान् जन चित्त में विद्या को स्थिर कर सब मनुष्यों को पुष्ट करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः।
आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः॥ ३॥

युयूषतः। सऽवयसा। तत्। इत्। वपुः। समानम्। अर्थम्। वितरित्रता। मिथः। आत्। ईम्। भगः। न। हव्यः। सम्। अस्मत्। आ। वोळ्हुः। न। रश्मीन्। सम्। अयंस्त। सारथिः॥ ३॥

पदार्थः-(**युयूषतः**) मिश्रयितुमिच्छतः (**सवयसा**) समानं वयो ययोस्तौ (**तत्**) (**इत्**) (**वपुः**) स्वरूपम् (**समानम्**) तुल्यम् (**अर्थम्**) (**वितरित्रता**) विविधतयाऽतिशयेन तुरितुमिच्छन्तौ सम्पादयितुमिच्छन्तौ। अत्र सर्वत्र विभक्तेराकारादेशः। (**मिथः**) परस्परम् (**आत्**) आनन्तर्ये (**ईम्**) सर्वतः (**भगः**) ऐश्वर्यवान् (**न**) इव (**हव्यः**) होतुमादातुं स्वीकर्त्तुमर्हः (**सम्**) (**अस्मत्**) (**आ**) समन्तात् (**वोढुः**) वाहकस्याश्वादेः (**न**) इव (**रश्मीन्**) (**सम्**) (**अयंस्त**) यच्छतः (**सारथिः**)॥ ३॥

अन्वयः-यदा सवयसा शिष्यौ समानं वपुर्युयूषतस्तदिन्मिथोऽर्थं वितरित्रता भवतः। आदीं भगो न हव्यस्तयो प्रत्येकः सारथिर्वोढू रश्मीन् नास्मदध्यापनान् समायंस्तोपदेशांश्च समयंस्त॥ ३॥

भावार्थः-येऽध्यापकोपदेशका निष्कपटतयाऽन्यान् स्वतुल्यान् कर्त्तुमिच्छया विदुषः कुर्युस्त उत्तमैश्वर्यं प्राप्य जितेन्द्रियाः स्युः॥ ३॥

पदार्थः-जब (**सवयसा**) समान अवस्थावाले दो शिष्य (**समानम्**) तुल्य (**वपुः**) स्वरूप को (**युयूषतः**) मिलाने अर्थात् एक-दूसरे की उन्नति करने को चाहते हैं (**तदित्**) तभी (**वितरित्रता**) अतीव अनेक प्रकार वे (**मिथः**) परस्पर (**अर्थम्**) धनादि पदार्थ की सिद्धि करने की इच्छा करते हैं (**आत्**) इसके अनन्तर (**ईम्**) सब ओर से (**भगः**) ऐश्वर्यवाला पुरुष जैसे (**हव्यः**) स्वीकार करने योग्य हो (**न**) वैसे उक्त विद्यार्थियों में से प्रत्येक (**सारथिः**) सारथी जैसे (**वोढुः**) पदार्थ पहुँचानेवाले घोड़े आदि की (**रश्मीन्**) रस्सियों को (**न**) वैसे (**अस्मत्**) हम अध्यापक आदि जनों से पढ़ाइयों को (**समायंस्त**) भलीभांति स्वीकार करता और उपदेशों को (**सम्**) भलीभांति स्वीकार करता है॥ ३॥

भावार्थः-जो अध्यापक और उपदेशक कपट-छल के विना औरों को अपने तुल्य करने की इच्छा से उन्हें विद्वान् करें, वे उत्तम ऐश्वर्य को पाकर जितेन्द्रिय हों॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा॥ ४॥

यम्। ईम्। द्वा। सऽवयसा। सपर्यतः। समाने। योना। मिथुना। सम्ऽओकसा। दिवा। न। नक्तम्। पलितः। युवा। अजनि। पुरु। चरन्। अजरः। मानुषा। युगा॥ ४॥

पदार्थः-(**यम्**) सन्तानम् (**ईम्**) (**द्वा**) द्वौ (**सवयसा**) समानवयसौ (**सपर्यतः**) परिचरतः (**समाने**) तुल्ये (**योना**) योनौ जन्मनिमित्ते (**मिथुना**) दम्पती (**समोकसा**) समानगृहेण सह वर्त्तमानौ

(दिवा) दिवसे **(न)** इव **(नक्तम्)** रात्रौ **(पलितः)** जातश्वेतकेशः **(युवा)** युवावस्थास्थः **(अजनि)** जायेत **(पुरु)** बहु **(चरन्)** विचरन् **(अजरः)** जरारोगरहितः **(मानुषा)** मनुष्यसम्बन्धीनि **(युगा)** युगानि वर्षाणि॥४॥

अन्वयः-सवयसा द्वा समाने योना मिथुना दम्पती समोकसा सह वर्त्तमानौ दिवा नक्तन्नेव यमीं बालं सपर्यतः सोऽजरो मानुषा युगा पुरु चरन् पलितोऽपि युवाऽजनि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रीत्या सह वर्त्तमानौ स्त्रीपुरुषौ धर्म्येण सुतं जनयित्वा सुशिक्ष्य शीलेन संस्कृत्य भद्रं कुरुतस्तथा समानावध्यापकोपदेशकौ शिष्यान् सुशीलान् कुरुतः। यथा वा दिनं रात्र्या सह वर्त्तमानमपि स्वस्थाने रात्रिं निवारयति तथाऽज्ञानिभिस्सह वर्त्तमानावध्यापकोपदेशकौ मोहे न संलगतः। यथा वा कृतपूर्णब्रह्मचर्यौ रूपलावण्यबलादिगुणयुक्तं सन्तानमुत्पादयतस्तथैतौ सत्याध्यापनोपदेशाभ्यां सर्वेषां पूर्णमात्मबलं जनयतः॥४॥

पदार्थः-**(सवयसा)** समान अवस्थायुक्त **(द्वा)** दो **(समाने)** तुल्य **(योना)** उत्पत्ति स्थान में **(मिथुना)** मैथुन कर्म करनेवाले स्त्री-पुरुष **(समोकसा)** समान घर के साथ वर्त्तमान **(दिवा)** दिन **(नक्तम्)** रात्रि के **(न)** समान **(यम्)** जिस **(ईम्)** प्रत्यक्ष बालक का **(सपर्यतः)** सेवन करें उसको पालें, वह **(अजरः)** जरा अवस्थारूपी रोगरहित **(मानुषा)** मनुष्य सम्बन्धी **(युगा)** वर्षों को **(पुरु)** बहुत **(चरन्)** चलता भोगता हुआ **(पलितः)** सुफेद बालोंवाला भी हो तो **(युवा)** जवान तरुण अवस्थावाला **(अजनि)** प्रकट होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रीति के साथ वर्त्तमान स्त्री-पुरुष धर्मसम्बन्धी व्यवहार से पुत्र को उत्पन्न कर उसे अच्छी शिक्षा दे शीलवान् कर सुखी करते हैं, वैसे समान पढ़ाने और उपदेश करनेवाले दो विद्वान् शिष्यों को सुशील करते हैं। वा जैसे दिन; रात्रि के साथ वर्त्तमान भी अपने स्थान में रात्रि को निवृत्त करता है, वैसे अज्ञानियों के साथ वर्त्तमान पढ़ाने और उपदेश करनेवाले विद्वान् मोह में नहीं लगते हैं। वा जैसे किया है पूरा ब्रह्मचर्य जिन्होंने वे रूपलावण्य और बलादि गुणों से युक्त सन्तान को उत्पन्न करते हैं, वैसे ये सत्य पढ़ाने और उपदेश करने से सबका पूरा आत्मबल उत्पन्न करते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमीं॑ हिन्वन्ति धी॒तयो॒ दश॒ व्रिशो॑ दे॒वं मर्ता॑स ऊ॒तये॑ हवामहे।
धनो॒रधि॑ प्र॒वत॒ आ स ऋ॑ण्वत्यभि॒व्रज॑द्भि॒र्व॒युना॒ नवा॑धित॥५॥

तम्। ईम्। हि॒न्व॒न्ति॒। धी॒तयः॑। दश॑। व्रिशः॑। दे॒वम्। मर्ता॑सः। ऊ॒तये॑। ह॒वा॒म॒हे॒। धनोः॑। अधि॑। प्र॒ऽवतः॑। आ। सः। ऋ॒ण्व॒ति॒। अ॒भि॒व्रज॑त्ऽभिः। व॒युना॑। नवा॑। अ॒धि॒त॒॥५॥

पदार्थः-**(तम्)** **(ईम्)** **(हिन्वन्ति)** हितं कुर्वन्ति प्रीणयन्ति **(धीतयः)** करपादाङ्गुलय इव **(दश)** **(व्रिशः)** प्रजाः। अत्र वर्णव्यत्ययेन वस्य स्थाने व्रः। **(देवम्)** विद्वांसम् **(मर्त्तासः)** मनुष्याः **(ऊतये)** रक्षणाद्याय **(हवामहे)** गृह्णीमः **(धनोः)** धनुषः **(अधि)** उपरि **(प्रवतः)** प्रवणं प्राप्तान् वाणानिव **(आ)** समन्तात् **(सः)** **(ऋण्वति)** प्राप्नोति। अत्र विकरणद्वयम्। **(अभिव्रजद्भिः)** अभितो गच्छद्भिः **(वयुना)** वयुनानि प्रज्ञानानि **(नवा)** नवानि **(अधित)** दधाति॥५॥

अन्वयः-हे मनुष्या! मर्त्तासो वयमूतये यं देवं हवामहे दश धीतयो व्रिशोऽयं हिन्वन्ति तमीं यूयं स्वीकुरुत यो धनुर्विद्धनोरधिक्षिप्तान् प्रवतो गच्छतो वाणानधित सोऽभिव्रजद्भिर्विद्वद्भिस्सह नवा वयुना आ ऋण्वति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कराङ्गुलिभिर्भोजनादिक्रियया शरीराणि वर्द्धन्ते तथा विद्वदध्यापनोपदेशक्रियया प्रजा वर्धन्ते। यथा च धनुर्वेदवित् शत्रून् जित्वा रत्नानि लभते, तथा विद्वत्सङ्गफल- विद्विज्ञानानि प्राप्नोति॥५॥

पदार्थः-हे मनुष्यो! **(मर्त्तासः)** मरणधर्मा मनुष्य हम लोग **(ऊतये)** रक्षा आदि के लिये जिस **(देवम्)** विद्वान् को **(हवामहे)** स्वीकार करते वा **(दश)** दश **(धीतयः)** हाथ-पैरों की अङ्गुलियों के समान **(व्रिशः)** प्रजा जिसको **(हिन्वन्ति)** प्रसन्न करती हैं **(तम्, ईम्)** उसी को तुम लोग ग्रहण करो, जो धुनर्विद्या का जाननेवाला **(धनोः)** धनुष के **(अधि)** ऊपर आरोप कर छोड़े **(प्रवतः)** जाते हुए वाणों को **(अधित)** धारण करता अर्थात् उनका सन्धान करता है **(सः)** वह **(अभिव्रजद्भिः)** सब ओर से जाते हुए विद्वानों के साथ **(नवा)** नवीन **(वयुना)** उत्तम-उत्तम ज्ञानों को **(आ, ऋण्वति)** अच्छे प्रकार प्राप्त होता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे हाथों की अङ्गुलियों से भोजन आदि क्रिया करने से शरीरादि बढ़ते हैं, वैसे विद्वानों के अध्यापन और उपदेशों की क्रिया से प्रजाजन वृद्धि पाते हैं वा जैसे धनुर्वेद का जाननेवाला शत्रुओं को जीत कर रत्नों को प्राप्त होता है, वैसे विद्वानों के सङ्ग के फल को जाननेवाला जन उत्तम ज्ञानों को प्राप्त होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसीविषय को अगले मन्त्र में कहा है॥

त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपाइव त्मना।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते॥६॥

त्वम्। हि। अग्ने। दिव्यस्य। राजसि। त्वम्। पार्थिवस्य। पशुपाः।इव। त्मना। एनी इति। ते। एते इति। बृहती इति। अभिऽश्रिया। हिरण्ययी इति। वक्वरी इति। बर्हिः। आशाते इति॥६॥

पदार्थः-(**त्वम्**) (**हि**) किल (**अग्ने**) सूर्य इव प्रकाशमान (**दिव्यस्य**) दिवि भवस्य वृष्ट्यादिविज्ञानस्य (**राजसि**) प्रकाशयसि (**त्वम्**) (**पार्थिवस्य**) पृथिव्यां विदितस्य पदार्थविज्ञानस्य (**पशुपाइव**) यथा पशुपालकस्तथा (**त्मना**) आत्मना (**एनी**) येइतस्ते (**ते**) तव (**एते**) प्रत्यक्षे (**बृहती**) महत्यौ (**अभिश्रिया**) अभितः शोभायुक्ते (**हिरण्ययी**) प्रभूतहिरण्यमय्यौ (**वक्वरी**) प्रशंसिते (**बर्हिः**) वर्द्धनम् (**आशाते**) व्याप्नुतः॥६॥

अन्वयः-हे अग्ने! त्वं हि पशुपाइव त्मना दिव्यस्य राजसि त्वं पार्थिवस्य राजसि ये एते एनी बृहती अभिश्रिया हिरण्ययी वक्वरी द्यावापृथिव्यौ ते विज्ञानानुकूलं बर्हिराशाते॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा ऋद्धिसिद्धयः पूर्णां श्रियं कुर्वन्ति तथात्मवान् पुरुषः परमेश्वरे भूराज्ये च सुप्रकाशते यथा वा पशुपालः स्वान् पशून् प्रीत्या रक्षति तथा सभापतिः स्वाः प्रजा रक्षेत्॥६॥

पदार्थः-हे (**अग्ने**) सूर्य के समान प्रकाशमान विद्वान्! (**त्वं, हि**) आप ही (**पशुपाइव**) पशुओं की पालना करनेवालों के समान (**त्मना**) अपने से (**दिव्यस्य**) अन्तरिक्ष में हुई वृष्टि आदि के विज्ञान को (**राजसि**) प्रकाशित करते वा (**त्वम्**) आप (**पार्थिवस्य**) पृथिवी में जाने हुए पदार्थों के विज्ञान का प्रकाश करते हो (**एते**) ये प्रत्यक्ष (**एनी**) अपनी-अपनी कक्षा में घूमनेवाले (**बृहती**) अतीव विस्तारयुक्त (**अभिश्रिया**) सब ओर से शोभायमान (**हिरण्ययी**) बहुत हिरण्य जिनमें विद्यमान (**वक्वरी**) प्रशंसित सूर्यमण्डल और भूमण्डल वा (**ते**) आपके ज्ञान के अनुकूल (**बर्हिः**) वृद्धि को (**आशाते**) व्याप्त होते हैं॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे ऋद्धि और सिद्धि पूरी लक्ष्मी को करती हैं, वैसे आत्मवान् पुरुष परमेश्वर और पृथिवी के राज्य में अच्छे प्रकार प्रकाशित होता। जैसे पशुओं का पालनेवाला प्रीति से अपने पशुओं की रक्षा करता है, वैसे सभापति अपने प्रजाजनों की रक्षा करे॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॑ जुषस्व॒ प्रति॑ हर्य॒ तद्व॒चो॒ मन्द्र॒ स्वधा॑व॒ ऋत॑जात॒ सुक्र॑तो।
यो वि॒श्वत॑: प्र॒त्यङ्ङसि॑ दर्श॒तो र॒ण्वः संदृ॑ष्टौ पितु॒माँइ॑व॒ क्षय॑:॥७॥१३॥

अग्ने॑। जु॒षस्व॑। प्रति॑। ह॒र्य॒। तत्। वचः॑। मन्द्र॑। स्वधा॑ऽवः। ऋत॑ऽजात। सुक्र॑तो॒ इति॒ सुऽक्र॑तो। यः। वि॒श्वत॑:। प्र॒त्यङ्। असि॑। द॒र्श॒तः। र॒ण्वः। सम्ऽदृ॑ष्टौ। पि॒तु॒मान्ऽइ॑व। क्षय॑:॥७॥

पदार्थः-(**अग्ने**) विद्युदिव वर्त्तमान (**जुषस्व**) (**प्रति**) (**हर्य**) कामयस्व (**तत्**) (**वचः**) (**मन्द्र**) प्रशंसनीय (**स्वधावः**) प्रशस्तं स्वधाऽन्नं विद्यते यस्य तत्सम्बुद्धौ (**ऋतजात**) ऋतात्सत्यात्प्रादुर्भूत (**सुक्रतो**) सुकर्मन् (**यः**) (**विश्वतः**) (**प्रत्यङ्**) प्रत्यञ्चतीति (**असि**) (**दर्शतः**) द्रष्टव्यः (**रण्वः**) शब्दविद्यावित् (**संदृष्टौ**) सम्यक् दर्शने (**पितुमानिव**) यथाऽन्नादियुक्तः (**क्षयः**) निवासार्थः प्रासादः॥७॥

अन्वयः-हे मन्द्र स्वधाव ऋतजात सुक्रतोऽग्ने! यो विश्वतः प्रत्यङ् संदृष्टौ दर्शतो रण्यो विद्वँस्त्वं क्षयः पितुमानिवासि स त्वं यन्मयेप्सितं वचस्तज्जुषस्व प्रति हर्य॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये प्रशंसितबुद्धयो युक्ताहारविहाराः सत्ये व्यवहारे प्रसिद्धा धर्म्यकर्मप्रज्ञा आप्तानां विदुषां सकाशाद्विद्या उपदेशाँश्च कामयन्ते सेवन्ते च ते सर्वोत्कृष्टा जायन्ते॥७॥

अत्राऽध्यापकोपदेशकगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति चतुश्चत्वारिंशदुत्तरं शततमं १४४ सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः-हे (**मन्द्र**) प्रशंसनीय (**स्वधावः**) प्रशंसित अन्नवाले (**ऋतजात**) सत्य व्यवहार से उत्पन्न हुए (**सुक्रतो**) सुन्दर कर्मों से युक्त (**अग्ने**) बिजुली के समान वर्त्तमान विद्वान्! (**यः**) जो (**विश्वतः**) सब के (**प्रत्यङ्**) प्रति जाने वा सब से सत्कार लेनेवाले (**संदृष्टौ**) अच्छे दीखने में (**दर्शतः**) दर्शनीय (**रण्वः**) शब्दशास्त्र को जाननेवाले विद्वान् आप (**क्षयः**) निवास के लिये घर (**पितुमान्, इव**) अन्नयुक्त जैसे हो वैसे (**असि**) हैं, सो आप जो मेरी अभिलाषाकर (**वचः**) वचन है (**तत्**) उसको (**जुषस्व**) सेवो और (**प्रति, हर्य**) मेरे प्रति कामना करो॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो प्रशंसित बुद्धिवाले यथायोग्य आहार-विहार से रहते हुए सत्य व्यवहार में प्रसिद्ध धर्म के अनुकूल कर्म और बुद्धि रखनेहारे शास्त्रज्ञ विद्वानों के समीप से विद्या और उपदेशों को चाहते और सेवन करते हैं, वे सब से उत्तम होते हैं॥७॥

इस सूक्त में अध्यापक और उपदेशकों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ चवालीसवां १४४ सूक्त और तेरहवां १३ वर्ग समाप्त हुआ॥

तं पृच्छतेत्यस्य पञ्चर्चस्य पञ्चचत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १ विराड्जगती। २,५ निचृज्जगती च च्छन्दः। निषादः स्वरः। ३,४ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथोपदेश्योपदेशकगुणानाह॥

अब एक सौ पैंतालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में उपदेश करने योग्य और उपदेश करनेवालों के गुणों का वर्णन करते हैं॥

तं पृ॑च्छता॒ स ज॑गामा॒ स वे॑द॒ स चि॑कि॒त्वाँ ई॑यते॒ सा न्वी॑यते।
तस्मि॑न्त्सन्ति प्र॒शिष॒स्तस्मि॑न्नि॒ष्टय॒: स वाज॑स्य॒ शव॑सः शु॒ष्मिण॒स्पति॑:॥ १॥

तम्। पृ॒च्छ॒त॒। सः। ज॒गा॒म॒। सः। वे॒द॒। सः। चि॒कि॒त्वान्। ई॒य॒ते॒। सः। नु। ई॒य॒ते॒। तस्मि॑न्। स॒न्ति॒। प्र॒ऽशिषः॑। तस्मि॑न्। इ॒ष्टयः॑। सः। वाज॑स्य। शव॑सः। शु॒ष्मिणः॑। पतिः॑॥ १॥

पदार्थः-तं पूर्वमन्त्रप्रतिपादितं विद्वांसम् **(पृच्छत)** अत्रा**न्येषामपी**ति दीर्घः। **(सः)** **(जगाम)** गच्छति **(सः)** **(वेद)** जानाति **(सः)** **(चिकित्वान्)** विज्ञानयुक्तः **(ईयते)** प्राप्नोति **(सः)** **(नु)** सद्यः **(ईयते)** प्राप्नोति **(तस्मिन्)** **(सन्ति)** **(प्रशिषः)** प्रकृष्टानि शासनानि **(तस्मिन्)** **(इष्टयः)** सत्सङ्गतयः **(सः)** **(वाजस्य)** विज्ञानमयस्य **(शवसः)** बलस्य **(शुष्मिणः)** बहुबलयुक्तस्य सैन्यस्य राज्यस्य वा **(पतिः)** स्वामी॥ १॥

अन्वयः-हे मनुष्याः! स सत्यमार्गे जगाम स ब्रह्म वेद स चिकित्वान् सुखानीयते सान्वीयते तस्मिन् प्रशिषः सन्ति तस्मिन्निष्टयः सन्ति स वाजस्य शवसः शुष्मिणः पतिरस्ति तं यूयं पृच्छत॥ १॥

भावार्थः-यो विद्यासुशिक्षायुक्तो धार्मिकः प्रयत्नशीलः सर्वोपकारी सत्यस्य पालक आप्तो विद्वान् भवेत्, तदाश्रयाध्यापनोपदेशैः सर्वे मनुष्या इष्टविनयप्राप्ताः सन्तु॥ १॥

पदार्थः-हे मनुष्यो! **(सः)** वह विद्वान् सत्य मार्ग में **(जगाम)** चलता है **(सः)** वह **(वेद)** ब्रह्म को जानता है **(सः)** वह **(चिकित्वान्)** विज्ञानयुक्त सुखों को **(ईयते)** प्राप्त होता **(सः)** वह **(नु)** शीघ्र अपने कर्त्तव्य को **(ईयते)** प्राप्त होता है **(तस्मिन्)** उसमें **(प्रशिषः)** उत्तम-उत्तम शिक्षा **(सन्ति)** विद्यमान हैं **(तस्मिन्)** उसमें **(इष्टयः)** सत्सङ्ग विद्यमान हैं **(सः)** वह **(वाजस्य)** विज्ञान का **(शवसः)** बल वा **(शुष्मिणः)** बलयुक्त सेनासमूह वा राज्य का **(पतिः)** पालनेवाला स्वामी है, **(तम्)** उसको तुम **(पृच्छत)** पूछो॥ १॥

भावार्थः-जो विद्या और अच्छी शिक्षायुक्त, धार्मिक और यत्नशील, सबका उपकारी, सत्य की पालना करनेवाला विद्वान् हो, उसके आश्रय जो पढ़ाना और उपदेश हैं, उनसे सब मनुष्य चाहे हुए काम और विनय को प्राप्त हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमित्पृ॑च्छन्ति॒ न सि॒मो वि पृ॑च्छति॒ स्वेने॒वेव धीरो॒ मन॑सा॒ यदग्र॑भीत्।
न मृ॑ष्यते प्रथ॒मं नाप॑रं॒ वचो॒ऽस्य क्रत्वा॑ सचते॒ अप्र॑दृपितः॥ २॥

तम्। इत्। पृ॒च्छ॒न्ति॒ न। सि॒मः। वि। पृ॒च्छ॒ति॒। स्वेन॑ऽइव। धीरः॑। मन॑सा। यत्। अग्र॑भीत्। न। मृ॒ष्य॒ते॒। प्र॒थ॒मम्। न। अप॑रम्। वचः॑। अ॒स्य। क्रत्वा॑। स॒च॒ते॒। अप्र॑ऽदृपितः॥ २॥

पदार्थः-(**तम्**) (**इत्**) एव (**पृच्छन्ति**) (**न**) निषेधे (**सिमः**) सर्वो मनुष्यः (**वि**) (**पृच्छति**) (**स्वेनेव**) (**धीरः**) ध्यानवान् (**मनसा**) विज्ञानेन (**यत्**) (**अग्रभीत्**) गृह्णाति (**न**) निषेधे (**मृष्यते**) संशय्यते (**प्रथमम्**) आदिमम् (**न**) (**अपरम्**) (**वचः**) वचनम् (**अस्य**) आप्तस्य विदुषः (**क्रत्वा**) प्रज्ञया कर्मणा वा (**सचते**) समवैति (**अप्रदृपितः**) न प्रमोहितः॥ २॥

अन्वयः-अप्रदृपितो धीरः स्वेनेव मनसा यद्वचोऽग्रभीद्यदस्य क्रत्वा सह सचते तत् प्रथमं न मृष्यते तदपरं च न मृष्यते यं सिमो न विपृच्छति तमिदेव विद्वांसः पृच्छन्ति॥ २॥

भावार्थः-अत्रोपमालङ्कारः। आप्ता मोहादिदोषरहिता विद्वांसो योगाभ्यासपवित्रीकृतेनात्मना यद्यत्सत्यमसत्यं वा निश्चिन्वन्ति तत्तत्सुनिश्चितं वर्त्तत इतीतरे मनुष्या मन्यन्ताम्। ये तेषां संगममकृत्वा सत्यासत्यनिर्णयं जिज्ञासन्ते ते कदाचिदपि सत्याऽसत्यनिर्णयं कर्त्तुं न शक्नुवन्ति तस्मादाप्तोपदेशेन सत्याऽसत्यविनिर्णयः कर्त्तव्यः॥ २॥

पदार्थः-(**अप्रदृपितः**) जो अतीव मोह को नहीं प्राप्त हुआ वह (**धीरः**) ध्यानवान् विचारशील विद्वान् (**स्वेनेव**) अपने समान (**मनसा**) विज्ञान से (**यत्**) जिस (**वचः**) वचन को (**अग्रभीत्**) ग्रहण करता है वा जो (**अस्य**) इस शास्त्रज्ञ धर्मात्मा विद्वान् की (**क्रत्वा**) बुद्धि वा कर्म के साथ (**सचते**) सम्बन्ध करता है, वह (**प्रथमम्**) प्रथम (**न**) नहीं (**मृष्यते**) संशय को प्राप्त होता और वह (**अपरम्**) पीछे भी (**न**) नहीं संशय को प्राप्त होता है जिसको (**सिमः**) सर्व मनुष्यमात्र (**न**) नहीं (**वि, पृच्छति**) विशेषता से पूछता है (**तमित्**) उसी को विद्वान् जन (**पृच्छन्ति**) पूछते हैं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। आप्त (=साक्षात्कार) जिन्होंने धर्मादि पदार्थ किये वे (शास्त्रवेत्ता) मोहादि दोषरहित विद्वान् योगाभ्यास से पवित्र किये हुए आत्मा से जिस-जिस को सत्य वा असत्य निश्चय करें, वह वह अच्छा निश्चय किया हुआ है, यह और मनुष्य मानें। जो उनका सङ्ग न करके सत्य-असत्य के निर्णय को जानना चाहते हैं, वे कभी सत्य-असत्य का निर्णय नहीं कर सकते। इससे आप्त विद्वानों के उपदेश से सत्य-असत्य का निर्णय करना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमिद॑च्छन्ति जु॒ह्व१॑स्तमर्व॑तीर्वि॒श्वान्येक॑: शृणव॒द्वचां॑सि मे।
पु॒रु॒प्रैष॑स्ततु॒रिर्य॒ज्ञसा॑धनोऽच्छि॑द्रोति॒: शिशु॒रादत्त॒ सं रभ॑:॥ ३॥

तम्। इत्। ग॒च्छ॒न्ति॒। जु॒ह्व॑:। तम्। अर्व॑ती:। विश्वा॑नि। एक॑:। शृ॒ण॒व॒त्। वचां॑सि। मे॒। पु॒रु॒ऽप्रैष॑:। त॒तु॒रि:। य॒ज्ञ॒ऽसाध॑न:। अच्छि॑द्रऽऊति:। शिशु॑:। आ। अ॒द॒त्त॒। सम्। रभ॑:॥ ३॥

पदार्थ:-(**तम्**) (**इत्**) एव (**गच्छन्ति**) प्राप्नुवन्ति (**जुह्व:**) विद्याविज्ञाने आददत्य: (**तम्**) (**अर्वती:**) प्रशस्तबुद्धिमत्य: कन्या: (**विश्वानि**) अखिलानि (**एक:**) अद्वितीय: (**शृणवत्**) शृणुयात् (**वचांसि**) प्रश्नरूपाणि (**वचनानि**) (**मे**) मम (**पुरुप्रैष:**) पुरुभिर्बहुभि: सज्जनै: प्रैष: प्रेरित: (**ततुरि:**) दु:खात् सर्वान् सन्तारक: (**यज्ञसाधन:**) यज्ञस्य विद्वत्सत्कारस्य साधनानि यस्य (**अच्छिद्रोति:**) अच्छिद्राऽप्रच्छिन्नाऽद्वैधीभूता ऊती रक्षणादिक्रिया यस्मात् स: (**शिशु:**) अविद्यादिदोषाणां तनूकर्त्ता (**आ**) समन्तात् (**अदत्त**) गृह्णीयात् (**सम्**) (**रभ:**) महान्॥ ३॥

अन्वय:-हे विद्वान्! भवानेको मे विश्वानि वचांसि शृणवद्यो रभ: पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोऽति: शिशु: सर्वोपकारं कर्तुं प्रयत्नं समादत्त यं धीमन्तो गच्छन्ति तमर्वतीर्गच्छन्ति तमिज्जुह्वो गच्छन्ति॥ ३॥

भावार्थ:-मनुष्यैर्यद्यद्विदितं यद्यदधीतं तस्य तस्य परीक्षामाप्ताय विदुषे यथा प्रदद्युरेवं कन्या अपि स्वाध्यापिकायै परीक्षां प्रदद्युर्नैवं विना सत्याऽसत्ययोस्सम्यग् निर्णयो भवितुमर्हति॥ ३॥

पदार्थ:-हे विद्वान्! आप (**एक:**) अकेले (**मे**) मेरे (**विश्वानि**) समस्त (**वचांसि**) वचनों को (**शृणवत्**) सुनें जो (**रभ:**) बड़ा महात्मा (**पुरुप्रैष:**) जिसको बहुत सज्जनों ने प्रेरणा दी हो (**ततुरि:**) जो दु:ख से सभी को तारनेवाला (**यज्ञसाधन:**) विद्वानों के सत्कार जिसके साधन अर्थात् जिसकी प्राप्ति करानेवाला (**अच्छिद्रोति:**) जिससे नहीं खण्डित हुई रक्षणादि क्रिया (**शिशु:**) और जो अविद्यादि दोषों को छिन्न-भिन्न करे, सबके उपकार करने को अच्छा यत्न (**समादत्त**) भलीभांति ग्रहण करे (**तम्**) उसको (**अर्वती:**) बुद्धिमति कन्या (**गच्छन्ति**) प्राप्त होती (**तमित्**) और उसी को (**जुह्व:**) विद्या विज्ञान को ग्रहण करनेवाली कन्या प्राप्त होती हैं॥ ३॥

भावार्थ:-मनुष्यों ने जो जाना और जो-जो पढ़ा उस-उस की परीक्षा जैसे अपने आप पढ़ानेवाले विद्वान् को देवें, वैसे कन्या भी अपनी पढ़ानेवाली को अपने पढ़े हुए की परीक्षा देवें। ऐसे करने के विना सत्याऽसत्य का सम्यक् निर्णय होने को योग्य नहीं है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप॒स्थाय॑ं चरति॒ यत्स॒मार॑त स॒द्यो जा॒तस्त॑त्सा॒र युज्ये॑भिः।
अ॒भि श्वा॒न्तं मृ॑शते नान्द्ये॑ मु॒दे यदी॑ं गच्छ॑न्त्युश॒तीर॑पिष्ठि॒तम्॥४॥

उप॒ऽस्थाय॑म्। च॒र॒ति॒। यत्। स॒म्ऽआर॑त। स॒द्यः। जा॒तः। त॒त्सा॒र॒। युज्ये॑भिः। अ॒भि। श्वा॒न्तम्। मृ॒श॒ते॒। नान्द्ये॑। मु॒दे॒। यत्। ई॒म्। गच्छ॑न्ति। उ॒श॒तीः। अ॒पि॒ऽअ॒स्थि॒तम्॥४॥

पदार्थः-(**उपस्थायम्**) अभिक्षणमुपस्थातुम् (**चरति**) गच्छन्ति (**यत्**) यः (**समारत**) सम्यक् प्राप्नुत (**सद्यः**) शीघ्रम् (**जातः**) प्रसिद्धः (**तत्सार**) तत्सरेत् (**युज्येभिः**) योजितुं योग्यैः सह (**अभि**) (**श्वान्तम्**) श्रान्तं परिपक्वज्ञानम्। अत्र वर्णव्यत्ययेन रेफस्य स्थानेः वः। (**मृशते**) (**नान्द्ये**) आनन्दाय (**मुदे**) मोदनाय (**यत्**) यम् (**ईम्**) सर्वतः (**गच्छन्ति**) (**उशतीः**) कामयमाना विदुषीः (**अपिस्थितम्**)॥४॥

अन्वयः-हे जिज्ञासवो जना! यद्यो युज्येभिस्सह सद्यो जात उपस्थायं चरति तत्सार श्वान्तमभिमृशते बुद्धिमन्तो यद्यं नान्द्ये मुदेऽपिस्थितमुशतीरीं गच्छन्ति तं यूयं समारत॥४॥

भावार्थः-हे मनुष्या! ये याश्च सद्यः पूर्णविद्या जायन्ते कुटिलतादिदोषान् विहाय शान्त्यादिगुणान् प्राप्य सर्वेषां विद्यासुखाय अभीक्ष्णं प्रयतन्ते ते जगदानन्ददायकाः सन्ति॥४॥

पदार्थः-हे जिज्ञासु जनो (**यत्**) जो (**युज्येभिः**) युक्त करने योग्य पदार्थों के साथ (**सद्यः**) शीघ्र (**जातः**) प्रसिद्ध हुआ (**उपस्थायम्**) क्षण-क्षण उपस्थान करने को (**चरति**) जाता है वा (**तत्सार**) कुटिलपन से जावे वा (**श्वान्तम्**) परिपक्व पूरे ज्ञान को (**अभिमृशते**) सब ओर से विचारता है वा बुद्धिमान् जन (**यम्**) जिस (**नान्द्ये**) अति आनन्द और (**मुदे**) सामान्य हर्ष होने के लिये (**अपिस्थितम्**) स्थिर हुए को और (**उशतीः**) कामना करती हुई पण्डिताओं को (**ईम्**) सब ओर से (**गच्छन्ति**) प्राप्त होते, उसको तुम (**समारत**) अच्छे प्रकार प्राप्त होओ॥४॥

भावार्थः-हे मनुष्यो! जो बालक और जो कन्या शीघ्र पूर्ण विद्यायुक्त होते हैं और कुटिलतादि दोषों को छोड़ शान्ति आदि गुणों को प्राप्त होकर सबको विद्या तथा सुख होने के लिये वार-वार प्रयत्न करते हैं, वे जगत् को आनन्द देनेवाले होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स ई॑ मृ॒गो अप्यो॑ वन॒र्गुरु॑प॑ त्वच्यु॒पम॑स्यां॒ नि धा॑यि।
व्य॑ब्रवीद्वयु॒ना॒ मर्त्ये॑भ्यो॒ऽग्निर्वि॒द्वाँ ऋ॑त॒चिद्धि स॒त्यः॥५॥१४॥

सः। ईम्। मृगः। अप्यः। वनर्गुः। उप। त्वचि। उपऽमस्याम्। नि। धायि। वि। अब्रवीत्। वयुना। मर्त्येभ्यः। अग्निः। विद्वान्। ऋतऽचित्। हि। सत्यः॥५॥

पदार्थः-(**सः**) (**ईम्**) (**मृगः**) (**अप्यः**) योऽपोर्हति (**वनर्गुः**) वनगामी। अत्र वनोपपदादृजु धातोरौणादिक उप्रत्ययो बाहुलकात्कुत्वं च। (**उप**) (**त्वचि**) त्वगिन्द्रिये (**उपमस्याम्**) उपमायाम्। अत्र **वाच्छन्दसी**ति स्याडागमः। (**नि**) (**धायि**) धीयते (**वि**) (**अब्रवीत्**) उपदिशति (**वयुना**) प्रज्ञानानि (**मर्त्येभ्यः**) मनुष्येभ्यः (**अग्निः**) अग्निरिव विद्यादिसद्गुणैः प्रकाशमानः (**विद्वान्**) वेत्ति सर्वा विद्याः सः (**ऋतचित्**) य ऋतं सत्यं चिनोति (**हि**) किल (**सत्यः**) सत्सु पुरुषेषु साधुः॥५॥

अन्वयः-विद्वद्भिर्योऽप्यो वनर्गुर्मृग इव उपमस्यां त्वच्युपनिधायि च ऋतचिदग्निर्विद्वान् मर्त्येभ्यो वयुने व्यब्रवीत् स हि सत्योऽस्ति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा तृषातुरो मृगो जलपानाय वने भ्रमित्वा जलं प्राप्य नन्दति तथा विद्वांसो शुभाचरितान् विद्यार्थिनः प्राप्यानन्दन्ति, ये विद्याः प्राप्याऽन्येभ्यो न प्रयच्छन्ति ते क्षुद्राशयाः पापिष्ठाः सन्तीति॥५॥

अत्रोपदेशकोपदेश्यकर्त्तव्यकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीत्यवगन्तव्यम्॥

इति पञ्चचत्वारिंशदुत्तरं शततमं १४५ सूक्तं चतुर्दशो १४ वर्गश्च समाप्तः॥

पदार्थः-विद्वानों से जो (**अप्यः**) जलों के योग्य (**वनर्गुः**) वनगामी (**मृगः**) हरिण के समान (**उपमस्याम्**) उपमा रूप (**त्वचि**) त्वगिन्द्रिय में (**उप, नि, धायि**) समीप निरन्तर धरा जाता है वा जो (**ऋतचित्**) सत्य व्यवहार को इकट्ठा करनेवाला (**अग्निः**) अग्नि के समान विद्या आदि गुणों से प्रकाशमान (**विद्वान्**) सब विद्याओं को जाननेवाला पण्डित (**मर्त्येभ्यः**) मनुष्यों के लिये (**वयुना**) उत्तम-उत्तम ज्ञानों का (**ईम्**) ही (**वि, अब्रतीत्**) विशेष करके उपदेश देता है (**सः, हि**) वही (**सत्यः**) सज्जनों में साधु है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे तृषातुर मृग जल पीने के लिये वन में डोलता जल को पाकर आनन्दित होता है, वैसे विद्वान् जन शुभ आचरण करनेवाले विद्यार्थियों को पाकर आनन्दित होते हैं और जो शिक्षा पाकर औरों को नहीं देते वे क्षुद्राशय और अत्यन्त पापी होते हैं॥५॥

इस सूक्त में उपदेश करने और उपदेश सुननेवालों के कर्त्तव्य कामों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ पैंतालीसवां १४५ सूक्त और चौदहवां १४ वर्ग समाप्त हुआ॥

त्रिमूर्द्धानमित्यस्य पञ्चर्चस्य षट्चत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः।
अग्निर्देवता। १,२ विराट् त्रिष्टुप्। ३,५ त्रिष्टुप्। ४ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाग्निविद्वद् गुणा उपदिश्यन्ते॥

अब एक सौ छियालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि और विद्वानों के गुणों का उपदेश किया है॥

त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम्॥ १॥

त्रिऽमूर्धानम्। सप्तऽरश्मिम्। गृणीषे। अनूनम्। अग्निम्। पित्रोः। उपऽस्थे। निऽसत्तम्। अस्य। चरतः। ध्रुवस्य। विश्वा। दिवः। रोचना। आपप्रिऽवांसम्॥ १॥

पदार्थः-(**त्रिमूर्द्धानम्**) त्रिषु निकृष्टमध्यमोत्तमेषु पदार्थेषु मूर्द्धा यस्य तम् (**सप्तरश्मिम्**) सप्तसु छन्दस्सु लोकेषु वा रश्मयो यस्य तम् (**गृणीषे**) स्तौषि (**अनूनम्**) हीनतारहितम् (**अग्निम्**) विद्युतम् (**पित्रोः**) वाय्वाकाशयोः (**उपस्थे**) समीपे (**निषत्तम्**) नितरां प्राप्तम् (**अस्य**) (**चरतः**) स्वगत्या व्याप्तस्य (**ध्रुवस्य**) निश्चलस्य (**विश्वा**) सर्वाणि (**दिवः**) प्रकाशमानस्य (**रोचना**) प्रकाशनानि (**आपप्रिवांसम्**) समन्तात् पूर्णम्॥ १॥

अन्वयः-हे धीमन्! यतस्त्वं पित्रोरुपस्थे निषत्तं त्रिमूर्द्धानं सप्तरश्मिमनूनमस्य चरतो ध्रुवस्य चराऽचरस्य दिवश्च विश्वा रोचनापप्रिवांसमग्निमिव वर्त्तमानं विद्वांसं गृणीषे स त्वं विद्यां प्राप्तुमर्हसि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा त्रिभिर्विद्युत्सूर्यप्रसिद्धाग्निरूपैरग्निः चराऽचरस्य कार्यसाधको वर्त्तते तथा विद्वांसोऽखिलस्य विश्वस्योपकारका भवन्ति॥ १॥

पदार्थः-हे धारणशील उत्तम बुद्धिवाले जन! जिससे तू (**पित्रोः**) पालनेवाले पवन और आकाश के (**उपस्थे**) समीप में (**निषत्तम्**) निरन्तर प्राप्त (**त्रिमूर्द्धानम्**) तीनों निकृष्ट, मध्यम और उत्तम पदार्थों में शिर रखनेवाले (**सप्तरश्मिम्**) सात गायत्री आदि छन्दों वा भूरादि सात लोकों में जिसकी प्रकाशरूप किरणें हों ऐसे (**अनूनम्**) हीनपने से रहित और (**अस्य**) इस (**चरतः**) अपनी गति से व्याप्त (**ध्रुवस्य**) निश्चल (**दिवः**) सूर्यमण्डल के (**विश्वा**) समस्त (**रोचना**) प्रकाशों को (**आपप्रिवांसम्**) जिसने सब ओर से पूर्ण किया उस (**अग्निम्**) बिजुली रूप आग के समान वर्त्तमान विद्वान् की (**गृणीषे**) स्तुति करता है, सो तू विद्या पाने योग्य होता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे तीन बिजुली, सूर्य और प्रसिद्ध अग्नि रूपों से अग्नि चराचर जगत् के कार्यों को सिद्ध करनेवाला है, वैसे विद्वान् जन समस्त विश्व का उपकार करनेवाले होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒क्षा म॒हाँ अ॒भि व॑वक्ष ए॒ने अ॒जर॑स्तस्थावि॒तऊ॑तिर्ऋ॒ष्वः।
उ॒र्व्याः प॒दो नि द॑धाति॒ सानौ॑ रि॒हन्त्यूधो॑ अरु॒षासो॑ अस्य॥ २॥

उ॒क्षा। म॒हान्। अ॒भि। व॒व॒क्षे॒। ए॒ने॒ इति॑। अ॒जरः॑। त॒स्थौ॒। इ॒तःऽऊ॑तिः। ऋ॒ष्वः। उ॒र्व्याः। प॒दः। नि। द॒धा॒ति॒। सानौ॑। रि॒हन्ति॑। ऊधः॑। अ॒रु॒षासः॑। अ॒स्य॒॥ २॥

पदार्थः-(**उक्षा**) सेचकः (**महान्**) (**अभि**) (**ववक्षे**) संहन्ति। अयं **वक्ष सङ्घात** इत्यस्य प्रयोगः। (**एने**) द्यावापृथिव्यौ (**अजरः**) हानिरहितः (**तस्थौ**) तिष्ठति (**इतऊतिः**) इतः ऊती रक्षणाद्या क्रिया यस्मात् सः (**ऋष्वः**) गतिमान् (**उर्व्याः**) पृथिव्याः (**पदः**) पदान् (**नि**) (**दधाति**) (**सानौ**) विभक्ते जगति (**रिहन्ति**) प्राप्नुवन्ति (**ऊधः**) जलस्थानम् (**अरुषासः**) अहिंसमानाः किरणाः (**अस्य**) मेघस्य॥ २॥

अन्वयः-हे मनुष्या! यथा उर्व्या महानुक्षा अजर ऋष्वः सूर्य एने द्यावापृथिव्यावभि ववक्षे इतऊतिः सन् पदो निदधाति अस्यारुषासः सानावूधो रिहन्ति यो ब्रह्माण्डस्य मध्ये तस्थौ तद्वद् यूयं भवत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा सूत्रात्मा वायुर्भूमिं सूर्य च धृत्वा जगद्रक्षति यथा वा सूर्यः पृथिव्या महान् वर्त्तते तथा वर्त्तितव्यम्॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**उर्व्याः**) पृथिवी से (**महान्**) बड़ा (**उक्षा**) वर्षा जल से सींचनेवाला (**अजरः**) हानिरहित (**ऋष्वः**) गतिमान् सूर्य (**एने**) इन अन्तरिक्ष और भूमिमण्डल को (**अभि, ववक्षे**) एकत्र करता है (**इतऊतिः**) वा जिससे रक्षा आदि क्रिया प्राप्त होती ऐसा होता हुआ (**पदः**) अपने अंशों को (**नि, दधाति**) निरन्तर स्थापित करता है (**अस्य**) इस सूर्य की (**अरुषासः**) नष्ट होती हुई किरणें (**सानौ**) अलग-अलग विस्तृत जगत् में (**ऊधः**) जलस्थान को (**रिहन्ति**) प्राप्त होती हैं वा जो ब्रह्माण्ड के बीच में (**तस्थौ**) स्थिर है, उसके समान तुम लोग होओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को जैसे सूत्रात्मा वायु; भूमि और सूर्यमण्डल को धारण करके संसार की रक्षा करता है वा जैसे सूर्य पृथिवी से बड़ा है, वैसा वर्त्ताव वर्त्तना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स॒मा॒नं व॒त्सम॒भि सं॑चर॒न्ती॒ विष्व॑ग्धे॒नू वि च॑रतः सु॒मेके॑।
अ॒न॒प॒वृ॒ज्याँ अध्व॑नो मिमा॒ने॒ विश्वा॒न् केताँ॒ अधि॑ म॒हो द॑धा॒ने॥ ३॥

समानम्। वत्सम्। अभि। संचरन्ती इति सम्ऽचरन्ती। विष्वक्। धेनू इति। वि। चरतः। सुमेके इति सुऽमेके। अनपऽवृज्यान्। अध्वनः। मिमाने इति। विश्वान्। केतान्। अधि। महः। दधाने इति॥ ३॥

पदार्थः-(**समानम्**) तुल्यम् (**वत्सम्**) वत्सवद्वर्त्तमानोऽहोरात्रः (**अभि**) अभितः (**संचरन्ती**) सम्यग् गच्छन्ती (**विष्वक्**) विषुं व्याप्तिमञ्चति (**धेनू**) धेनुरिव वर्त्तमाने (**वि**) (**चरतः**) (**सुमेके**) सुष्ठु मेकः प्रक्षेपो ययोस्तौ (**अनपवृज्यान्**) अपवर्जितुमनर्हान् (**अध्वनः**) मार्गस्य (**मिमाने**) निर्माणकर्तृणी (**विश्वान्**) समग्रान् (**केतान्**) बोधान् (**अधि**) (**महः**) महतः (**दधाने**)॥ ३॥

अन्वयः-हे मनुष्या! यूयं यथा द्यावापृथिव्यौ समानं वत्समभिसंचरन्ती सुमेकेऽध्वनोऽनपवृज्यान् मिमाने महो विश्वान् केतानधि दधाने धेनू इव विष्वग् विचरतः तथेमे विदित्वा पक्षपातं विहाय सर्वेषां कामान् पूरयत॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्यवत् न्यायगुणाकर्षकप्रकाशका नानाविधमार्गान् निर्मिमाणा धेनुवत् सर्वान् पुष्यन्तः समग्रा विद्या धरन्ति ते दुःखरहिताः स्युः॥ ३॥

पदार्थः-हे मनुष्यो! तुम लोग जैसे सूर्यलोक और भूमण्डल दोनों (**समानम्**) तुल्य (**वत्सम्**) बछड़े के समान वर्त्तमान दिन-रात्रि को (**अभि, सं, चरन्ती**) सब ओर से अच्छे प्रकार प्राप्त होते हुए (**सुमेके**) सुन्दर जिनका त्याग करना (**अध्वनः**) मार्ग से (**अनपवृज्यान्**) न दूर करने योग्य पदार्थों को (**मिमाने**) बनावट (रचना) करनेवाले (**महः**) बड़े-बड़े (**विश्वान्**) समग्र (**केतान्**) बोधों को (**अधि, दधाने**) अधिकता से धारण करते हुए (**धेनू**) गौओं के समान (**विष्वक्, वि, चरतः**) सब ओर से विचर रहे हैं, वैसे इन्हें जान, पक्षपात को छोड़, सब कामों को पूरा करो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य के समान न्याय, गुणों के आकर्षण और प्रकाश[२] करनेवाले, नानाविध मार्गों का निर्माण करते हुए, धेनु के समान सबकी पुष्टि करते हुए, समग्र विद्याओं को धारण करते हैं, वे दुःखरहित होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम्।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत् सूर्यो नॄन्॥ ४॥

धीरासः। पदम्। कवयः। नयन्ति। नाना। हृदा। रक्षमाणाः। अजुर्यम्। सिसासन्तः। परि। अपश्यन्त। सिन्धुम्। आविः। एभ्यः। अभवत्। सूर्यः। नॄन्॥ ४॥

---

२ गुणों को आकर्षण करनेवालों का प्रकाश-हस्तलेख॥ सं)॥

पदार्थः-(**धीरासः**) ध्यानवन्तो विद्वांसः (**पदम्**) पदनीयम् (**कवयः**) विक्रान्तप्रज्ञाः शास्त्रविदो विद्वांसः (**नयन्ति**) प्राप्नुवन्ति (**नाना**) अनेकान् (**हृदा**) हृदयेन (**रक्षमाणाः**) ये रक्षन्ति ते। अत्र व्यत्ययेनात्मनेपदम्। (**अजुर्यम्**) यदजूर्षु हानिरहितेषु साधु (**सिषासन्तः**) संभक्तुमिच्छन्तः (**परि**) सर्वतः (**अपश्यन्त**) पश्यन्ति (**सिन्धुम्**) नदीम् (**आविः**) प्राकट्ये (**एभ्यः**) (**अभवत्**) भवति (**सूर्य्यः**) सवितेव (**नॄन्**) नायकान् मनुष्यान्॥४॥

अन्वयः-ये धीरासः कवयो हृदा नाना नॄन् रक्षमाणा सिषासन्तः सिन्धुं सूर्य इवाजुर्यं पदं नयन्ति ते परमात्मानं पर्यपश्यन्त य एभ्यो विद्याभिशिक्षे प्राप्याविरभवत् सोऽपि तत्पदमाप्नोति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सर्वानात्मवत्सुखदुःखव्यवस्थायां विदित्वा न्यायमेवाश्रयन्ति तेऽव्ययं पदमाप्नुवन्ति, यथा सूर्यो जलं वर्षयित्वा नदीः पिपर्त्ति तथा विद्वांसो सत्यवचांसि वर्षयित्वा मनुष्यात्मनः पिपुरति॥४॥

पदार्थः-जो (**धीरासः**) ध्यानवान् (**कवयः**) विविध प्रकार के पदार्थों में आक्रमण करनेवाली बुद्धियुक्त विद्वान् (**हृदा**) हृदय से (**नाना**) अनेक (**नॄन्**) मुखियों की (**रक्षमाणाः**) रक्षा करते और (**सिषासन्तः**) अच्छे प्रकार विभाग करने की इच्छा करते हुए (**सूर्यः**) सूर्य के समान अर्थात् जैसे सूर्यमण्डल (**सिन्धुम्**) नदी के जल को स्वीकार करता वैसे (**अजुर्यम्**) हानिरहित (**पदम्**) प्राप्त करने योग्य पद को (**नयन्ति**) प्राप्त होते हैं, वे परमात्मा को (**परि, अपश्यन्त**) सब ओर से देखते अर्थात् सब पदार्थों में विचारते हैं जो (**एभ्यः**) इनसे विद्या और उत्तम शिक्षा को पाके (**आविः**) प्रकट (**अभवत्**) होता है, वह भी उस पद को प्राप्त होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सबको आत्मा के समान सुख-दुःख की व्यवस्था में जान न्याय का ही आश्रय करते हैं, वे अव्यय पद को प्राप्त होते हैं। जैसे सूर्य जल को वर्षा कर नदियों को भरता पूरी करता है, वैसे विद्वान् जन सत्यवचनों को वर्षा कर मनुष्यों के आत्माओं को पूर्ण करते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे।
पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः॥५॥१५॥

दिदृक्षेण्यः। परि। काष्ठासु। जेन्यः। ईळेन्यः। महः। अर्भाय। जीवसे। पुरुत्रा। यत्। अभवत्। सूः। अह। एभ्यः। गर्भेभ्यः। मघऽवा। विश्वऽदर्शतः॥५॥

पदार्थः-(**दिदृक्षेण्यः**) द्रष्टुमिच्छयैष्टव्यः (**परि**) सर्वतः (**काष्ठासु**) दिक्षु (**जेन्यः**) जेतुं शीलः (**ईळेन्यः**) स्तोतुमर्हः (**महः**) महते (**अर्भाय**) अल्पाय (**जीवसे**) जीवितुम् (**पुरुत्रा**) पुरुषु बहुष्विति (**यत्**)

यः **(अभवत्)** भवेत् **(सूः)** यः सूते सः **(अह)** विनिग्रहे **(एभ्यः)** **(गर्भेभ्यः)** गर्त्तुं स्तोतुं योग्येभ्यः **(मघवा)** परमपूजितधनयुक्तः **(विश्वदर्शतः)** विश्वैरखिलैर्विद्वद्भिर्द्रष्टुं योग्यः॥५॥

अन्वयः-हे मनुष्या! यद्योऽहैभ्यो गर्भेभ्यो विद्वत्तमेभ्यो महोऽर्भाय जीवसे पुरुत्रा मघवा विश्वदर्शतो दिदृक्षेण्यः काष्ठासु जेन्य ईळेन्यस्सूः पर्यभवत्स सर्वैः सत्कर्त्तव्यः॥५॥

भावार्थः-ये दिक्षु व्याप्तकीर्त्तयः शत्रूणां जेतारो विद्वत्तमेभ्यः प्राप्तविद्यासुशिक्षाः शुभगुणैर्दर्शनीया जनाः सन्ति ते जगन्मङ्गलाय प्रभवन्ति॥५॥

अस्मिन् सूक्तेऽग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन साकं सङ्गतिर्वेद्या॥

इति षट्चत्वारिंशदुत्तरं शततमं १४६ सूक्तं पञ्चदशो १५ वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(अह)** ही **(एभ्यः)** इन **(गर्भेभ्यः)** स्तुति करने के योग्य उत्तम विद्वानों से **(महः)** बहुत और **(अर्भाय)** अल्प **(जीवसे)** जीवन के लिये **(पुरुत्रा)** बहुतों में **(मघवा)** परम प्रतिष्ठित धनयुक्त **(विश्वदर्शतः)** समस्त विद्वानों से देखने के योग्य **(दिदृक्षेण्यः)** वा देखने की इच्छा से चाहने योग्य **(काष्ठासु)** दिशाओं में **(जेन्यः)** जीतनेवाला अर्थात् दिग्विजयी **(ईळेन्यः)** और स्तुति प्रशंसा करने के योग्य **(सूः)** सब ओर से उत्पन्न **(परि, अभवत्)** हो सो सबको सत्कार करने के योग्य है॥५॥

भावार्थः-जो दिशाओं में व्याप्त कीर्त्ति अर्थात् दिग्विजयी, प्रसिद्ध शत्रुओं को जीतनेवाले, उत्तम विद्वानों से विद्या उत्तम शिक्षाओं को पाये हुए शुभ गुणों से दर्शनीय जन हैं, वे संसार के मङ्गल के लिये समर्थ होते हैं॥५॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जानना चाहिये॥

यह एक सौ छियालीसवाँ १४६ सूक्त और पन्द्रहवाँ १५ वर्ग समाप्त हुआ॥

कथेत्यस्य पञ्चर्चस्य सप्तचत्वारिंशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १,३,४,५ निचृत्त्रिष्टुप्। २ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मित्राऽमित्रयोर्गुणानाह॥

अब एक सौ सैंतालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में मित्र और अमित्र के गुणों का वर्णन करते हैं॥

कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः।
उभे यत्तोके तनये दधाना ऋतस्य सामन् रणयन्त देवाः॥ १॥

कथा। ते। अग्ने। शुचयन्तः। आयोः। ददाशुः। वाजेभिः। आशुषाणाः। उभे इति। यत्। तोके इति। तनये। दधाना। ऋतस्य। सामन्। रणयन्त। देवाः॥ १॥

पदार्थः-(**कथा**) कथम् (**ते**) तव (**अग्ने**) विद्वन् (**शुचयन्तः**) ये शुचीनात्मन इच्छन्ति ते (**आयोः**) विदुषः (**ददाशुः**) दातुः (**वाजेभिः**) विज्ञानादिभिर्गुणैः सह (**आशुषाणाः**) आशुविभाजकाः (**उभे**) द्वे वृत्ते (**यत्**) (**तोके**) अपत्ये (**तनये**) पुत्रे (**दधानाः**) (**ऋतस्य**) सत्यस्य (**सामन्**) सामनि वेदे (**रणयन्त**) शब्दयेयुः। अत्राडभावः। (**देवाः**) विद्वांसः॥ १॥

अन्वयः-हे अग्ने ददाशुरायोस्ते यद्ये वाजेभिः सह आशुषाणास्तनये तोके उभे दधानाः शुचयन्तो देवाः सन्ति ते सामन्नृतस्य कथा रणयन्त॥ १॥

भावार्थः-सर्वे अध्यापका विद्वांसोऽनूचानमाप्तं विद्वांसं प्रति प्रच्छेयुर्वयं कथमध्यापयेम, स तान् सम्यक् शिक्षेत् यथैते प्राप्तविद्यासुशिक्षा जितेन्द्रिया धार्मिकाः स्युस्तथा भवन्तोऽध्यापयन्त्वित्युत्तरम्॥ १॥

पदार्थः-हे (**अग्ने**) विद्वान् (**ददाशुः**) देनेवाले (**आयोः**) विद्वान्! जो आप (**ते**) उन तुम्हारे (**यत्**) जो (**वाजेभिः**) विज्ञानादि गुणों के साथ (**आशुषाणाः**) शीघ्र विभाग करनेवाले (**तनये**) पुत्र और (**तोके**) पौत्र आदि के निमित्त (**उभे**) दो प्रकार के चरित्रों को (**दधानाः**) धारण किये हुए (**शुचयन्तः**) पवित्र व्यवहार अपने को चाहते हुए (**देवाः**) विद्वान् जन हैं, वे (**सामन्**) सामवेद में (**ऋतस्य**) सत्य व्यवहार का (**कथा**) कैसे (**रणयन्त**) वाद-विवाद करें॥ १॥

भावार्थः-सब अध्यापक विद्वान् जन उपदेशक शास्त्रवेत्ता धर्मज्ञ विद्वान् को पूछे कि हम लोग कैसे पढ़ावें, वह उन्हें अच्छे प्रकार सिखावे, क्या सिखावे? कि जैसे ये विद्या तथा उत्तम शिक्षा को प्राप्त इन्द्रियों को जीतनेवाले धार्मिक पढ़नेवाले हों, वैसे आप लोग पढ़ावें, यह उत्तर है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः।

पीय॑ति त्वो॒ अनु॑ त्वो गृणाति व॒न्दारु॑स्ते त॒न्व॑ं वन्दे अग्ने॥ २॥

बोध॑। मे॒। अ॒स्य। वच॑सः। य॒विष्ठ॒। मंहि॑ष्ठस्य। प्रऽभृ॑तस्य। स्व॒धाऽव॒ः। पीय॑ति। त्व॒ः। अनु॑। त्व॒ः। गृ॒णा॒ति॒। व॒न्दारु॑ः। ते॒। त॒न्व॑म्। व॒न्दे॒। अ॒ग्ने॒॥ २॥

पदार्थः-(**बोध**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**मे**) मम (**अस्य**) (**वचसः**) वचनस्य (**यविष्ठ**) अतिशयेन युवा (**मंहिष्ठस्य**) अतिशयेनोरोर्बहुप्रज्ञस्य (**प्रभृतस्य**) प्रकर्षेण धृतस्य (**स्वधावः**) प्रशस्तमन्नं विद्यते यस्य तत्सम्बुद्धौ (**पीयति**) पिबति (**त्वः**) अन्यः (**अनु**) आनुकूल्ये (**त्वः**) द्वितीयः (**गृणाति**) स्तौति (**वन्दारुः**) अभिवादनशीलः (**ते**) तव (**तन्वम्**) शरीरम् (**वन्दे**) अभिवादये (**अग्ने**) विद्वत्तम॥ २॥

अन्वयः-हे स्वधावो यविष्ठ! त्वं मेऽस्य मंहिष्ठस्य प्रभृतस्य वचसो बोध। हे अग्ने! यथा वन्दारुरहं ते तन्वं वन्दे यथा त्वः पीयति यथा त्वोऽनुगृणाति तथाऽहमपि भवेयम्॥ २॥

भावार्थः-यदाऽऽचार्यस्य समीपे शिष्योऽधीयेत तदा पूर्वस्याऽधीतस्य परीक्षां दद्यात्। अध्ययनात्प्रागाचार्यं नमस्कुर्याद् यथाऽन्ये मेधाविनो युक्त्याधीयेरन् तथा स्वयमपि पठेत्॥ २॥

पदार्थः-हे (**स्वधावः**) प्रशंसित अन्नवाले (**यविष्ठ**) अत्यन्त तरुण! तू (**मे**) मेरे (**अस्य**) इस (**मंहिष्ठस्य**) अतीव बुद्धियुक्त (**प्रभृतस्य**) उत्तमता से धारण किये हुए (**वचसः**) वचन को (**बोध**) जान। हे (**अग्ने**) विद्वानों में उत्तम विद्वान्! जैसे (**वन्दारुः**) वन्दना करनेवाला मैं (**ते**) तेरे (**तन्वम्**) शरीर को (**वन्दे**) अभिवादन करता हूँ वा जैसे (**त्वः**) दूसरा कोई जन (**पीयति**) जल आदि को पीता है वा जैसे (**त्वः**) दूसरा कोई और जन (**अनुगृणाति**) अनुकूलता से स्तुति प्रशंसा करता है, वैसे मैं भी होऊं॥ २॥

भावार्थः-जब आचार्य के समीप शिष्य पढ़े, तब पिछले पढ़े हुए की परीक्षा देवे, पढ़ने से पहिले आचार्य को नमस्कार उसकी वन्दना करे और जैसे अन्य धीर बुद्धिवाले पढ़ें, वैसे आप भी पढ़े॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये पा॒यवो॑ मामते॒यं ते॑ अग्ने॒ पश्य॑न्तो अ॒न्धं दु॒॑रि॒तादर॑क्षन्
र॒रक्ष॒ तान्सु॒कृतो॑ वि॒श्ववे॑दा॒ दिप्स॑न्त॒ इद्रि॒पवो॒ नाह॑ देभुः॥ ३॥

ये। पा॒यव॑ः। मा॒म॒ते॒यम्। ते॒। अ॒ग्ने॒। पश्य॑न्तः। अ॒न्धम्। दु॒ःऽइ॒तात्। अर॑क्षन्। र॒रक्ष॑। तान्। सु॒ऽकृ॑तः। वि॒श्वऽवे॑दाः। दिप्स॑न्तः। इत्। रि॒पव॑ः। न। अह॑। दे॒भुः॥ ३॥

पदार्थः-(**ये**) (**पायवः**) रक्षकाः (**मामतेयम्**) ममतायाः प्रजायाः अपत्यम् (**ते**) तव (**अग्ने**) विद्वन् (**पश्यन्तः**) संप्रेक्षमाणाः (**अन्धम्**) अविद्यायुक्तम् (**दुरितात्**) दुष्टाचारात् (**अरक्षन्**) रक्षन्ति (**ररक्ष**)

रक्षेत् **(तान्)** **(सुकृतः)** सुष्ठु कर्मकारिणः **(विश्ववेदाः)** यो विश्वं विज्ञानं वेत्ति सः **(दिप्सन्तः)** अस्मान् दम्भितुं हिंसितुमिच्छन्तः **(इत्)** अपि **(रिपवः)** अरयः **(न)** निषेधे **(अह)** विनिग्रहे **(देभुः)** दभ्नुयुः॥३॥

अन्वयः–हे अग्ने विद्वन्! ते ये पश्यन्तः पायवो मामतेयमन्धं दुरितादरक्षन् तान् सुकृतो विश्ववेदा भवान् ररक्ष यतो दिप्सन्त इद्रिपवो नाह देभुः॥३॥

भावार्थः–ये विद्याचक्षुषोऽन्धं कूपादिव जनानविद्याऽधर्माचरणाद्रक्षेयुस्तान् पितृवत्सत्कुर्युः। ये च व्यसनेषु निपातयेयुस्तान् दूरतो वर्जयेयुः॥३॥

पदार्थः–हे **(अग्ने)** विद्वान्! **(ते)** आपके **(ये)** जो **(पश्यन्तः)** अच्छे देखनेवाले **(पायवः)** रक्षा करनेवाले **(मामतेयम्)** प्रजा का अपत्य जो कि **(अन्धम्)** अविद्यायुक्त हो उसको **(दुरितात्)** दुष्ट आचरण से **(अरक्षन्)** बचाते हैं **(तान्)** उन **(सुकृतः)** सुकृती उत्तम कर्म करनेवाले जनों को **(विश्ववेदाः)** समस्त विज्ञान के जाननेवाले आप **(ररक्ष)** पालें, जिससे **(दिप्सन्तः)** हम लोगों को मारने की इच्छा करते हुए **(इत्)** भी **(रिपवः)** शत्रुजन **(न, अह)** नहीं **(देभुः)** मार सकें॥३॥

भावार्थः–जो विद्याचक्षु जन अन्धे को कूप से जैसे वैसे मनुष्यों को अविद्या और अधर्म के आचरण से बचावें, उनका पितरों के समान सत्कार करें और जो दुष्ट आचरणों में गिरावें उनका दूर से त्याग करे रहें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यो नो॑ अग्ने॒ अर॑रिवाँ अघा॒युर॑राती॒वा म॒र्चय॑ति द्वये॒न।
मन्त्रो॑ गु॒रुः पुन॑रस्तु॒ सो अ॑स्मा॒ अनु॑ मृक्षीष्ट त॒न्व॑ दुरुक्तैः॥४॥

यः। नः। अग्ने। अर॑रिऽवान्। अघ॒ऽयुः। अरा॑ति॒ऽवा। म॒र्चय॑ति। द्वये॑न। मन्त्रः। गु॒रुः। पुनः। अ॒स्तु॒। सः। अ॒स्मै॒। अनु॑। मृ॒क्षी॒ष्ट॒। त॒न्व॑म्। दुः॒ऽउ॒क्तैः॥४॥

पदार्थः–**(यः)** **(नः)** अस्मानस्माकं वा **(अग्ने)** विद्वन् **(अररिवान्)** प्राप्नुवन् **(अघायुः)** आत्मनोऽघमिच्छुः **(अरातीवा)** यो अरातिरिवाचरति **(मर्चयति)** उच्चरति **(द्वयेन)** द्विविधेन कर्मणा **(मन्त्रः)** विचारवान् **(गुरुः)** उपदेष्टा **(पुनः)** **(अस्तु)** भवतु **(सः)** **(अस्मै)** **(अनु)** **(मृक्षीष्ट)** शोधयतु **(तन्वम्)** शरीरम् **(दुरुक्तैः)** दुष्टैरुक्तैः॥४॥

अन्वयः–हे अग्ने यो अररिवानघायुररातिवा द्वयेन दुरुक्तैर्नोऽस्मान् मर्चयति ततो यो नस्तन्वमनुमृक्षीष्ट सोऽस्माकमस्मै पुनर्मन्त्रो गुरुरस्तु॥४॥

भावार्थः–ये मनुष्याणां मध्ये दुष्टं शिक्षन्ते ते त्याज्याः। ये सत्यं शिक्षन्ते ते माननीयास्सन्तु॥४॥

पदार्थः-हे **(अग्ने)** विद्वान्! **(यः)** जो **(अररिवान्)** दुःखों को प्राप्त करता हुआ **(अघायुः)** अपने को अपराध की इच्छा करनेवाला **(अरातीवा)** न देनेवाले जन के समान आचरण करता **(द्वयेन)** दो प्रकार के कर्म से वा **(दुरुक्तैः)** दुष्ट उक्तियों से **(नः)** हम लोगों को **(मर्चयति)** कहता है, उससे जो हमारे **(तन्वम्)** शरीर को **(अनु, मृक्षीष्ट)** पीछे शोधे **(सः)** वह हमारा और **(अस्मै)** उक्त व्यवहार के लिये **(पुनः)** वार-वार **(मन्त्रः)** विचारशील **(गुरुः)** उपदेश करनेवाला **(अस्तु)** होवे॥४॥

भावार्थः-जो मनुष्यों के बीच दुष्ट शिक्षा देते वा दुष्टों को सिखाते हैं, वे छोड़ने योग्य और जो सत्य शिक्षा देते वा सत्य वर्त्ताव वर्त्तनेवाले को सिखाते, वे मानने के योग्य होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत वा यः सहस्य प्रविद्वान् मर्तो मर्तं मर्चयति द्वयेन।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरिताय धायीः॥५॥१६॥

उत। वा। यः। सहस्य। प्रऽविद्वान्। मर्तः। मर्तम्। मर्चयति। द्वयेन। अतः। पाहि। स्तवमान। स्तुवन्तम्। अग्ने। माकिः। नः। दुःऽइताय। धायीः॥५॥

पदार्थः-**(उत)** अपि **(वा)** पक्षान्तरे **(यः)** **(सहस्य)** सहसि भव **(प्रविद्वान्)** प्रकर्षेण वेत्तीति प्रविद्वान् **(मर्त्तः)** मनुष्यः **(मर्त्तम्)** मनुष्यम् **(मर्चयति)** शब्दयति **(द्वयेन)** अध्यापनोपदेशरूपेण **(अतः)** **(पाहि)** **(स्तवमान)** स्तुतिकर्त्तः **(स्तुवन्तम्)** स्तुतिकर्त्तारम् **(अग्ने)** विद्वन् **(माकिः)** निषेधे **(नः)** अस्मान् **(दुरिताय)** दुष्टाचाराय **(धायीः)** धाययेः॥५॥

अन्वयः-हे सहस्य स्तवमानाग्ने! त्वं यः प्रविद्वान् मर्त्तो द्वयेन मर्त्तं मर्चयत्यतस्तं स्तुवन्तं पाहि। उत वा नोऽस्मान् दुरिताय माकिर्धायीः॥५॥

भावार्थः-ये विद्वांसः सुशिक्षाध्यापनाभ्यां मनुष्याणामात्मशरीरबलं वर्धयित्वाऽविद्यापापाचरणात् पृथक् कुर्वन्ति ते विश्वशोधका भवन्ति॥५॥

अस्मिन् सूक्ते मित्राऽमित्रगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिरस्तीति वेद्यम्॥

इति सप्तचत्वारिंशदुत्तरं शततमं १४७ सूक्तं षोडशो १६ वर्गश्च समाप्तः॥

पदार्थः-हे **(सहस्य)** बलादिक में प्रसिद्ध होने **(स्तवमान)** और सज्जनों की प्रशंसा करनेवाले **(अग्ने)** विद्वान्! तू **(यः)** जो **(प्रविद्वान्)** उत्तमता से जाननेवाला **(मर्त्तः)** मनुष्य **(द्वयेन)** अध्यापन और उपदेश रूप से **(मर्त्तम्)** मनुष्य को **(मर्चयति)** कहता है अर्थात् प्रशंसित करता है **(अतः)** इससे **(स्तुवन्तम्)** स्तुति अर्थात् प्रशंसा करते हुए जन को **(पाहि)** पालो **(उत, वा)** अथवा **(नः)** हम लोगों को **(दुरिताय)** दुष्ट आचरण के लिये **(माकिः)** मत कभी **(धायीः)** धायिये (पालिये)॥५॥

भावार्थः–जो विद्वान् उत्तम शिक्षा और पढ़ाने से मनुष्यों के आत्मिक और शारीरिक बल को बढ़ा के और उनको अविद्या और पाप के आचरण से अलग करते हैं, वे सबकी शुद्धि करनेवाले होते हैं॥५॥

इस सूक्त में मित्र और अमित्रों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जानना चाहिये॥

एक सौ सैंतालीसवां १४७ सूक्त और सोलहवां १६ वर्ग समाप्त हुआ॥

मथीदित्यस्य पञ्चर्चस्याष्टचत्वारिंशदुत्तरस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १,२ पङ्क्तिः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३,४ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वदग्निगुणानुपदिशति॥

अब एक सौ अड़तालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् और अग्नि के गुणों का उपदेश किया है॥

मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम्।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम्॥ १॥

मथीत्। यत्। ईम्। विष्टः। मातरिश्वा। होतारम्। विश्वऽअप्सुम्। विश्वऽदेव्यम्। नि। यम्। दधुः। मनुष्यासु। विक्षु। स्वः। न। चित्रम्। वपुषे। विभाऽवम्॥ १॥

पदार्थः-(**मथीत्**) मथ्नाति (**यत्**) यः (**ईम्**) सर्वतः (**विष्टः**) प्रविष्टः (**मातरिश्वा**) अन्तरिक्षे शयानो वायुः (**होतारम्**) आदातारम् (**विश्वाप्सुम्**) विश्वं समग्रं रूपं गुणो यस्य तम् (**विश्वदेव्यम्**) विश्वेषु देवेषु पृथिव्यादिषु भवम् (**नि**) (**यम्**) (**दधुः**) दधति (**मनुष्यासु**) मनुष्यसम्बन्धिनीषु (**विक्षु**) प्रजासु (**स्वः**) सूर्य्यम् (**न**) इव (**चित्रम्**) अद्भुतम् (**वपुषे**) रूपाय (**विभावम्**) विशेषेण भावुकम्॥१॥

अन्वयः-हे मनुष्या! यद्यो विष्टो मातरिश्वा विश्वदेव्यं विश्वाप्सुं होतारमग्निं मथीत् विद्वांसो मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावं यमीं निदधुस्तं यूयं धरत॥१॥

भावार्थः-ये मनुष्या वायुवद् व्यापिकां विद्युतं मथित्वा कार्याणि साध्नुवन्ति, ते अद्भुतानि कर्माणि कर्त्तुं शक्नुवन्ति॥१॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**विष्टः**) प्रविष्ट (**मातरिश्वा**) अन्तरिक्ष में सोनेवाला पवन (**विश्वदेव्यम्**) समस्त पृथिव्यादि दिव्य पदार्थों में हुए (**विश्वाप्सुम्**) समग्र रूप ही जिसका गुण उस (**होतारम्**) सब पदार्थों के ग्रहण करनेवाले अग्नि को (**मथीत्**) मथता है वा विद्वान् जन (**मनुष्यासु**) मनुष्यसम्बन्धिनी (**विक्षु**) प्रजाओं में (**स्वः**) सूर्य के (**न**) समान (**चित्रम्**) अद्भुत और (**वपुषे**) रूप के लिये (**विभावम्**) विशेषता से भावना करनेवाले (**यम्**) जिस अग्नि को (**ईम्**) सब ओर से (**नि, दधुः**) निरन्तर धारण करते हैं, उस अग्नि को तुम लोग धारण करो॥१॥

भावार्थः-जो मनुष्य पवन के समान व्याप्त होनेवाली बिजुली रूप आग को मथ के कार्य्यों की सिद्धि करते हैं, वे अद्भुत कार्यों को कर सकते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ददानमिन्न ददभन्त मन्मागिर्वरूथं मम तस्य चाकन्।

जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः॥ २॥

ददानम्। इत्। न। ददभन्त। मन्म। अग्निः। वरूथम्। मम। तस्य। चाकन्। जुषन्त। विश्वानि। अस्य। कर्म। उपऽस्तुतिम्। भरमाणस्य। कारोः॥ २॥

पदार्थः-(**ददानम्**) दातारम् (**इत्**) (**न**) निषेधे (**ददभन्त**) दभ्नुयुः (**मन्म**) विज्ञानम् (**अग्निः**) (**वरूथम्**) श्रेष्ठम् (**मम**) (**तस्य**) (**चाकन्**) कामयते (**जुषन्त**) सेवन्ताम् (**विश्वानि**) सर्वाणि (**अस्य**) (**कर्म**) कर्माणि (**उपस्तुतिम्**) उपगतां प्रशंसाम् (**भरमाणस्य**) (**कारोः**) शिल्पविद्यासाध्यकर्त्तुः॥ २॥

अन्वयः-हे मनुष्या! भवन्तो योऽग्निर्विद्वान् मम तस्य च वरूथं मन्म ददानं चाकन् तन्नेद् ददभन्त। अस्य भरमाणस्य कारोर्विश्वानि कर्मोपस्तुतिं च भवन्तो जुषन्त॥ २॥

भावार्थः-हे मनुष्यो! यो येभ्यो विद्यां दद्यात् ते तस्य सेवां सततं कुर्युः। अवश्यं सर्वे वेदाभ्यासं च कुर्य्युः॥ २॥

पदार्थः-हे मनुष्यो! आप जो (**अग्निः**) विद्वान् (**मम**) मेरे और (**तस्य**) उसके (**वरूथम्**) उत्तम (**मन्म**) विज्ञान को (**ददानम्**) देते हुए उनकी (**चाकन्**) कामना करता है, उसको (**नेत्**) नहीं (**ददभन्त**) मारो, (**अस्य**) इस (**भरमाणस्य**) भरण-पोषण करते हुए (**कारोः**) शिल्पविद्या से सिद्ध होने योग्य कामों को करनेवाले उनके (**विश्वानि**) समस्त (**कर्म**) कर्मों की (**उपस्तुतिम्**) समीप प्राप्त हुई प्रशंसा को आप (**जुषन्त**) सेवो॥ २॥

भावार्थः-हे मनुष्यो! जो जिनके लिये विद्या देवे उसकी सेवा निरन्तर करें और अवश्य सब लोग वेद का अभ्यास करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः॥ ३॥

नित्ये। चित्। नु। यम्। सदने। जगृभ्रे। प्रशस्तिऽभिः। दधिरे। यज्ञियासः। प्र। सु। नयन्त। गृभयन्तः। इष्टौ। अश्वासः। न। रथ्यः। ररहाणाः॥ ३॥

पदार्थः-(**नित्ये**) नाशरहिते (**चित्**) अपि (**नु**) सद्यः (**यम्**) पावकम् (**सदने**) सीदन्ति यस्मिन्नाकाशे तस्मिन् (**जगृभ्रे**) गृह्णीयुः (**प्रशस्तिभिः**) प्रशंसिताभिः क्रियाभिः (**दधिरे**) धरेयुः (**यज्ञियासः**) ये शिल्पाख्यं यज्ञमर्हन्ति ते (**प्र**) (**सु**) अत्र **संहितायामिति** दीर्घः। (**नयन्त**) प्राप्नुयुः (**गृभयन्तः**) ग्रहीता इवाचरन्तः (**इष्टौ**) गन्तव्यायाम् (**अश्वासः**) सुशिक्षितास्तुरङ्गाः (**न**) इव (**रथ्यः**) रथेषु साधवः (**ररहाणाः**) गच्छन्तः। अत्र **तुजादीनामित्यभ्यासदीर्घः**॥ ३॥

अन्वयः-ये यज्ञियासो जनाः प्रशस्तिभिर्नित्य इष्टौ सदने यं जगृभ्रे चिन्नु दधिरे तस्यालम्बनेन रारहाणा रथ्योऽश्वासो न गृभयन्तः सन्तो यानानि सुप्रणयन्त॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये नित्ये आकाशे स्थितान् वाय्वग्न्यादिपदार्थानुत्तमाभिः क्रियाभिः कार्येषु योजयन्ति ते विमानादीनि यानानि रचयितुं शक्नुवन्ति॥३॥

पदार्थः-जो **(यज्ञियासः)** शिल्प यज्ञ के योग्य सज्जन **(प्रशस्तिभिः)** प्रशंसित क्रियाओं से **(नित्ये)** नित्य नाशरहित **(सदने)** बैठें जिस आकाश में और **(इष्टौ)** प्राप्त होने योग्य क्रिया से **(यम्)** जिस अग्नि का **(जगृभ्रे)** ग्रहण करें **(चित्)** और **(नु)** शीघ्र **(दधिरे)** धरें उसके आश्रय से **(रारहणाः)** जाते हुए जो कि **(रथ्यः)** रथों में उत्तम प्रशंसावाले **(अश्वासः)** अच्छे शिक्षित घोड़े हैं उनके **(न)** समान और **(गृभयन्तः)** पदार्थों को ग्रहण करनेवालों के समान आचरण करते हुए रथों को **(सु, प्र, नयन्त)** उत्तम प्रीति से प्राप्त होवें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो नित्य आकाश में स्थित वायु और अग्नि आदि पदार्थों को उत्तम क्रियाओं से कार्यों में युक्त करते हैं, वे विमान आदि यानों को बना सकते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पुरूणि दस्मो नि रिणाति जम्भैरादोचते वन आ विभावा।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून्॥४॥

पुरूणि। दस्मः। नि। रिणाति। जम्भैः। आत्। रोचते। वने। आ। विभाऽवा। आत्। अस्य। वातः। अनु। वाति। शोचिः। अस्तुः। न। शर्याम्। असनाम्। अनु। द्यून्॥४॥

पदार्थः-**(पुरूणि)** बहूनि **(दस्मः)** दुःखोपक्षेता **(नि)** **(रिणाति)** प्राप्नोति **(जम्भैः)** चालनादिभिः स्वगुणैः **(आत्)** अनन्तरे **(रोचते)** **(वने)** जङ्गले **(आ)** समन्तात् **(विभावा)** यो विभाति सः **(आत्)** अनन्तरम् **(अस्य)** **(वातः)** वायुः **(अनु)** **(वाति)** गच्छति **(शोचिः)** दीप्तिः **(अस्तुः)** प्रक्षेप्तुः **(न)** इव **(शर्याम्)** वायुताडनाख्यां क्रियाम् **(असनाम्)** प्रक्षेपणाम् **(अनु)** **(द्यून्)** दिनानि॥४॥

अन्वयः-यो विभावा दस्मोऽग्निर्जम्भैः पुरूणि वस्तून्यनुद्यून् नि रिणाति आद्वने आ रोचते आदस्य वातोऽनुवाति यस्य शोचिरस्तुरसनां न शर्यां रिणाति तेनोत्तमानि कार्याणि मनुष्यैः साधनीयानि॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्योत्पादनताडनादिक्रियाभिस्तडिद्विद्यां साध्नुवन्ति, ते प्रतिदिनमुन्नतिं लभन्ते॥४॥

पदार्थः-जो **(विभावा)** विशेषता से दीप्ति करने तथा **(दस्मः)** दुःख का नाश करनेवाला अग्नि **(जम्भैः)** चलाने आदि अपने गुणों से **(पुरूणि)** बहुत वस्तुओं को **(अनु, द्यून्)** प्रतिदिन **(नि, रिणाति)**

निरन्तर पहुंचाता है, **(आत्)** इसके अनन्तर **(वने)** जङ्गल में **(आ, रोचते)** अच्छे प्रकार प्रकाशमान होता है **(आत्)** और **(अस्य)** इसका सम्बन्धी **(वातः)** पवन **(अनु, वाति)** इसके पीछे बहता है, जिसकी **(शोचिः)** दीप्ति प्रकाशमान **(अस्तुः)** प्रेरणा देनेवाले शिल्पी जन की **(असनाम्)** प्रेरणा के **(न)** समान **(शर्याम्)** पवन की ताड़ना को प्राप्त होता है, उससे उत्तम काम मनुष्यों को सिद्ध करने चाहिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्या से उत्पन्न की हुई ताड़नादि क्रियाओं से बिजुली की विद्या को सिद्ध करते हैं, वे प्रतिदिन उन्नति को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति।
अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्॥५॥१७॥

न। यम्। रिपवः। न। रिषण्यवः। गर्भे। सन्तम्। रेषणाः। रेषणाः। रेषयन्ति। अन्धाः। अपश्याः। न। दभन्। अभिऽख्या। नित्यासः। ईम्। प्रेतारः। अरक्षन्॥५॥

पदार्थः-**(न)** **(यम्)** **(रिपवः)** शत्रवः **(न)** **(रिषण्यवः)** आत्मनो रेषणामिच्छवः **(गर्भे)** मध्ये **(सन्तम्)** वर्त्तमानम् **(रेषणाः)** हिंसकाः **(रेषयन्ति)** हिंसयन्ति **(अन्धाः)** ज्ञानदृष्टिरहिताः **(अपश्याः)** ये न पश्यन्ति ते **(न)** इव **(दभन्)** दभ्नुयुः **(अभिख्या)** ये अभितः ख्यन्ति ते **(नित्यासः)** अविनाशिनः **(ईम्)** सर्वतः **(प्रेतारः)** प्रीतिकर्त्तारः **(अरक्षन्)** रक्षेयुः॥५॥

अन्वयः-यं रिपवो न रेषयन्ति यं गर्भे सन्तं रेषणा रिषण्यवो न रेषयन्ति नित्यासोऽभिख्याऽपश्या नेवान्धा न दभन् ये प्रेतार ईम् रक्षन् तं तान् सर्वे सत्कुर्वन्तु॥५॥

भावार्थः-हे मनुष्या! यं रिपवो हन्तुं न शक्नुवन्ति यो गर्भेऽपि न क्षीयते स आत्मा वेदितव्यः॥५॥

अस्मिन् सूक्ते विद्वदग्न्यादिगुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिर्बोध्या॥

इत्यष्टचत्वारिंशदुत्तरं शततमं १४८ सूक्तं सप्तदशो १७ वर्गश्च समाप्तः॥

पदार्थः-**(यम्)** जिसको **(रिपवः)** शत्रुजन **(न)** नहीं **(रेषयन्ति)** नष्ट करा सकते वा **(गर्भे, सन्तम्)** मध्य में वर्त्तमान जिसको **(रेषणाः)** हिंसक **(रिषण्यवः)** अपने को नष्ट होने की इच्छा करनेवाले **(न)** नष्ट नहीं करा सकते वा **(नित्यासः)** नित्य अविनाशी **(अभिख्या)** सब ओर से ख्याति करने और **(अपश्याः)** न देखनेवालों के **(न)** समान **(अन्धाः)** ज्ञानदृष्टिरहित **(न)** न **(दभन्)** नष्ट कर सकें जो **(प्रेतारः)** प्रीति करनेवाले **(ईम्)**सब ओर से **(अरक्षन्)** रक्षा करें उस अग्नि को और उनको सब सत्कारयुक्त करें॥५॥

भावार्थः-हे मनुष्यो! जिसको रिपु जन नष्ट नहीं कर सकते हैं, जो गर्भ में भी नष्ट नहीं होता है, वह आत्मा जानने योग्य है॥५॥

इस सूक्त में विद्वान् और अग्नि आदि पदार्थों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है, यह जानने योग्य है॥

यह एक सौ अड़तालीसवां १४८ सूक्त और सत्रहवां १७ वर्ग समाप्त हुआ॥

महरित्यस्य पञ्चर्चस्य एकोनपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १ भुरिगनुष्टुप्। २,४ निचृदनुष्टुप्। ५ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ३ उष्णिक्छन्दः। गान्धारः स्वरः॥

अथ पुनर्विद्वदग्न्यादिगुणानाह॥

अब एक सौ उनचासवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् और अग्न्यादि पदार्थों के गुणों का वर्णन करते हैं॥

मॅहः स रॅाय एषॅते पतिॅर्दन्निन इॅनस्यॅ वसॅुनः पॅद आ।
उॅप ध्रजॅन्तॅमद्रॅयो विॅधन्नित्॥ १॥

मॅहः। सः। रायः। आ। ईॅषॅते। पतिॅः। दन्। इॅनः। इॅनस्यॅ। वसॅुनः। पॅदे। आ। उपॅ। ध्रजॅन्तम्। अद्रॅयः। विॅधन्। इत्॥ १॥

पदार्थः-(**महः**) महतः (**सः**) (**रायः**) धनस्य (**आ**) (**ईषते**) प्राप्नोति (**पतिः**) स्वामी (**दन्**) दाता। अत्र **बहुलं छन्दसी**ति शपो लुक्। (**इनः**) ईश्वरः (**इनस्य**) महदैश्वर्यस्य स्वामिनः (**वसुनः**) धनस्य (**पदे**) प्रापणे (**आ**) (**उप**) (**ध्रजन्तम्**) गच्छन्तम् (**अद्रयः**) मेघाः (**विधन्**) विदधतु (**इत्**) इव॥ १॥

अन्वयः-हे मनुष्या! यूयं य इनस्येनो वसुनो महो रायो दन् पतिरेषते य एतस्य पदे ध्रजन्तमद्रय इदिव उपाविधन्, स सर्वैः सत्कर्त्तव्यः स्यात्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। इह यथा सुपात्रदानेन कीर्त्तिर्भवति न तथाऽन्योपायेन, यः पुरुषार्थमाश्रित्य प्रयतते सोऽखिलं धनमाप्नोति॥ १॥

पदार्थः-हे मनुष्यो! तुम जो (**इनस्य**) महान् ऐश्वर्य के स्वामी का (**इनः**) ईश्वर (**वसुनः**) सामान्य धन का और (**महः**) अत्यन्त (**रायः**) धन का (**दन्**) देनेवाला (**पतिः**) स्वामी (**आ, ईषते**) अच्छे प्रकार का होता है वा जो विद्वान् जन इसकी (**पदे**) प्राप्ति के निमित्त (**ध्रजन्तम्**) पहुँचते हुए को (**अद्रयः**) मेघों के (**इत्**) समान (**उपाविधन्**) निकट होकर अच्छे प्रकार विधान करे (**सः**) वह सबको सत्कार करने योग्य है॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। इस संसार में जैसे सुपात्र को देने से कीर्त्ति होती है, वैसे और उपाय से नहीं। जो पुरुषार्थ का आश्रय कर अच्छा यत्न करता है, वह पूर्ण धन को प्राप्त होता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स यो वृषाॅ नॅरां न रोदॅस्योॅः श्रवोॅभिॅरस्तिॅ जीॅवपीॅतसर्गः।

प्र यः सस्राणः शिश्रीत योनौ॥ २॥

सः। यः। वृषा। नराम्। न। रोदस्योः। श्रवः।ऽभिः। अस्ति। जीवपीतऽसर्गः। प्र। यः। सस्राणः। शिश्रीत। योनौ॥ २॥

पदार्थः- **(सः)** **(यः)** **(वृषा)** श्रेष्ठो बलिष्ठः **(नराम्)** नृणाम् **(न)** इव **(रोदस्योः)** द्यावापृथिव्योः **(श्रवोभिः)** अन्नादिपदार्थैः सह **(अस्ति)** **(जीवपीतसर्गः)** जीवैः सह पीतः सर्गो येन **(प्र)** **(यः)** **(सस्राणः)** सर्वगुणदोषान् प्राप्नुवन् **(शिश्रीत)** श्रयेत **(योनौ)** कारणे॥ २॥

अन्वयः-यः श्रवोभिर्नरां न रोदस्योर्जीवपीतसर्गोऽस्ति यश्च सस्राणो योनौ प्रशिश्रीत स वृषास्ति॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यो नायकेषु नायकः पृथिव्यादिकार्यकारणविद्विद्यामाश्रयति, स एव सुखी जायते॥ २॥

पदार्थः-**(यः)** जो **(श्रवोभिः)** अन्न आदि पदार्थों के साथ **(नराम्)** मनुष्यों के बीच **(न)** जैसे-वैसे **(रोदस्योः)** आकाश और पृथिवी के बीच **(जीवपीतसर्गः)** जीवों के साथ पिया है सृष्टिक्रम जिसने अर्थात् विद्याबल से प्रत्येक जीव के गुण-दोषों को उत्पत्ति के साथ जाना वा **(यः)** जो **(सस्राणः)** सब पदार्थों के गुण-दोषों को प्राप्त होता हुआ **(योनौ)** कारण में अर्थात् सृष्टि के निमित्त में **(प्र, शिश्रीत)** आश्रय करे, उसमें आरूढ़ हो **(सः)** वह **(वृषा)** श्रेष्ठ बलवान् **(अस्ति)** है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो नायकों में नायक, पृथिवी आदि पदार्थों के कार्य कारण को जाननेवालों की विद्या का आश्रय करता है, वही सुखी होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३नार्वा।
सूरो न रुरुक्वाञ्छतात्मा॥ ३॥

आ। यः। पुरम्। नार्मिणीम्। अदीदेत्। अत्यः। कविः। नभन्यः। न। अर्वा। सूरः। न। रुरुक्वान्। शतऽआत्मा॥ ३॥

पदार्थः-**(आ)** समन्तात् **(यः)** **(पुरम्)** **(नार्मिणीम्)** नर्माणि क्रीडाविलासा विद्यन्ते येषां तेषामिमाम् **(अदीदेत्)** **(अत्यः)** अतति व्याप्नोतीति **(कविः)** क्रान्तप्रज्ञः **(नभन्यः)** नभसि भवो नभन्यो वायुः। अत्र वर्णव्यत्ययेन नकारादेशः। **नभ इति साधारणनामसु पठितम्।** (निघं०१.४) **(न)** इव **(अर्वा)** अश्वः **(सूरः)** सूर्यः **(न)** इव **(रुरुक्वान्)** रुचिमान् **(शतात्मा)** शतेष्वसंख्यातेषु पदार्थेष्वात्मा विज्ञानं यस्य सः॥ ३॥

अन्वयः-योऽत्यो नभन्यो न कविरर्वा सूरो न रुरुक्वान् शतात्मा जनो नार्मिणीं पुरमादीदेत् प्रकाशयेत् स न्यायं कर्त्तुमर्हति॥३॥

भावार्थः-अत्रोपमालङ्कारः। योऽसंख्यातपदार्थविद्यावित् सुशोभितां नगरीं वासयेत् स ऐश्वर्यैः सवितेव प्रकाशमानः स्यात्॥३॥

पदार्थः-(**यः**) जो (**अत्यः**) व्याप्त होनेवाला (**नभन्यः**) आकाश में प्रसिद्ध पवन उसके (**न**) समान (**कविः**) क्रम-क्रम से पदार्थों में व्याप्त होनेवाली बुद्धिवाला वा (**अर्वा**) घोड़ा और (**सूरः**) सूर्य के (**न**) समान (**रुरुक्वान्**) रुचिमान् (**शतात्मा**) असंख्यात पदार्थों में विशेष ज्ञान रखनेवाला जन (**नार्मिणीम्**) क्रीडाविलासी आनन्द भोगनेवाले जनों की (**पुरम्**) पुरी को (**आदीदेत्**) अच्छे प्रकार प्रकाशित करे, वह न्याय करने योग्य होता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो असंख्यात पदार्थों की विद्याओं को जाननेवाला अच्छी शोभायुक्त नगरी को वसावे, वह ऐश्वर्यों से सूर्य के समान प्रकाशमान हो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात्।
होता यजिष्ठो अपां सधस्थे॥४॥

अभि। द्विऽजन्मा। त्री। रोचनानि। विश्वा। रजांसि। शुशुचानः। अस्थात्। होता। यजिष्ठः। अपाम्। सधऽस्थे॥४॥

पदार्थः-(**अभि**) आभिमुख्ये (**द्विजन्मा**) द्वाभ्यामाकाशवायुभ्यां जन्म प्रादुर्भावो यस्य (**त्री**) त्रीणि (**रोचनानि**) सूर्यविद्युद्भूमिसम्बन्धीनि तेजांसि (**विश्वा**) सर्वाणि (**रजांसि**) लोकान् (**शुशुचानः**) प्रकाशयन् (**अस्थात्**) तिष्ठति (**होता**) आकर्षणेनादाता (**यजिष्ठः**) अतिशयेन यष्टा सङ्गन्ता (**अपाम्**) जलानाम् (**सधस्थे**) सहस्थाने॥४॥

अन्वयः-हे विद्वन्! यथा द्विजन्मा होता यजिष्ठोऽग्निरपां सधस्थे त्री रोचनानि विश्वा रजांसि शुशुचानः सन्नभ्यस्थात्तथा त्वं भव॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्याधर्म्ये विद्वत्सङ्गप्रकाशिते स्थानेऽनुतिष्ठन्ति ते सर्वान् शुभगुणकर्मस्वभावानादातुमर्हन्ति॥४॥

पदार्थः-हे विद्वन्! जैसे (**द्विजन्मा**) दो अर्थात् आकाश और वायु से प्रसिद्ध जिसका जन्म ऐसा (**होता**) आकर्षण शक्ति से पदार्थों को ग्रहण करने और (**यजिष्ठः**) अतिशय करके सङ्गत होनेवाला अग्नि (**अपाम्**) जलों के (**सधस्थे**) साथ के स्थान में (**त्री**) तीन (**रोचनानि**) अर्थात् सूर्य, बिजुली और भूमि के

प्रकाशों को और **(विश्वा)** समस्त **(रजांसि)** लोकों को **(शुशुचानः)** प्रकाशित करता हुआ **(अभ्यस्थात्)** सब ओर से स्थित हो रहा है, वैसे तुम होओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्या और धर्मसंयुक्त व्यवहार में विद्वानों के सङ्ग से प्रकाशित हुए स्थान के निमित्त अनुष्ठान करते हैं, वे समस्त अच्छे गुण, कर्म और स्वभावों के ग्रहण करने के योग्य होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या।
मर्तो यो अस्मै सुतुको ददाश॥५॥१८॥

अयम्। सः। होता। यः। द्विऽजन्मा। विश्वा। दधे। वार्याणि। श्रवस्या। मर्तः। यः। अस्मै। सुऽतुकः। ददाश॥५॥

पदार्थः-**(अयम्)** **(सः)** **(होता)** ग्रहीता **(यः)** **(द्विजन्मा)** गर्भविद्याशिक्षाभ्यां जातः **(विश्वा)** सर्वाणि **(दधे)** धत्ते **(वार्याणि)** वर्त्तुं स्वीकर्त्तुमर्हाणि **(श्रवस्या)** श्रवसि श्रवणे भवानि **(मर्त्तः)** मनुष्यः **(यः)** **(अस्मै)** विद्यार्थिने **(सुतुकः)** सुष्ठु विद्यावृद्धः **(ददाश)** ददाति॥५॥

अन्वयः-यः सुतुको मर्त्तोऽस्मै विद्यां ददाश यो द्विजन्मा होता विश्वा श्रवस्या वार्य्याणि दधे सोऽयं पुण्यवान् भवति॥५॥

भावार्थः-यस्य विद्यासुशिक्षायुक्तयोर्मातापित्रोः सकाशादेकं जन्माऽऽचार्यविद्याभ्यां द्वितीयं च स द्विजः सन् विद्वान् स्यात्॥५॥

अस्मिन् सूक्ते विद्वदग्न्यादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनपञ्चाशदुत्तरं शततमं १४९ सूक्तमष्टादशो १८ वर्गश्च समाप्तः॥

पदार्थः-**(यः)** जो **(सुतुकः)** सुन्दर विद्या से बड़ा उन्नति को प्राप्त हुआ **(मर्त्तः)** मनुष्य **(अस्मै)** इस विद्यार्थी के लिये विद्या को **(ददाश)** देता है वा **(यः)** जो **(द्विजन्मा)** गर्भ और विद्या शिक्षा से उत्पन्न हुआ **(होता)** उत्तम गुणग्राही **(विश्वा)** समस्त **(श्रवस्या)** सुनने में प्रसिद्ध हुए **(वार्याणि)** स्वीकार करने योग्य विषयों को **(दधे)** धारण करता है **(सः)** **(अयम्)** सो यह पुण्यवान् होता है॥५॥

भावार्थः-जिसको विद्या और उत्तम शिक्षायुक्त माता-पिताओं से एक जन्म और दूसरा जन्म आचार्य और विद्या से हो वह द्विज होता हुआ विद्वान् हो॥५॥

इस सूक्त में विद्वान् और अग्न्यादि पदार्थों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ उनचासवां १४९ सूक्त और अठारहवां १८ वर्ग समाप्त हुआ॥

पुरु त्वेत्यस्य त्र्यृचस्य पञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अग्निर्देवता। १,३ भुरिग्गायत्रीच्छन्दः। षड्जः स्वरः। २ निचृदुष्णिक् छन्दः। ऋषभः स्वरः॥

अथ विद्वद्गुणानाह॥

अब एक सौ पचासवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का उपदेश करते हैं॥

पुरु त्वा दाश्वान् वोचेऽरिरग्ने तव स्विदा।
तोदस्येव शरण आ महस्य॥ १॥

पुरु। त्वा। दाश्वान्। वोचे। अरिः। अग्ने। तव। स्वित्। आ। तोदस्यऽइव। शरणे। आ। महस्य॥ १॥

पदार्थः-(**पुरु**) बहु (**त्वा**) त्वाम् (**दाश्वान्**) दाता (**वोचे**) वदेयम् (**अरिः**) प्रापकः (**अग्ने**) विद्वन् (**तव**) (**स्वित्**) एव (**आ**) (**तोदस्येव**) व्यथकस्येव (**शरणे**) गृहे (**आ**) (**महस्य**) महतः॥ १॥

अन्वयः-हे अग्ने! दाश्वानरिरहं महस्य तोदस्येव तव स्विदा शरणे त्वा पुर्वा वोचे॥ १॥

भावार्थः-यो यस्य भृत्यो भवेत् स तस्याऽज्ञां पालयित्वा कृतार्थो भवेत्॥ १॥

पदार्थः-हे (**अग्ने**) विद्वान्! (**दाश्वान्**) दान देने और (**अरिः**) व्यवहारों की प्राप्ति करानेवाला मैं (**महस्य**) महान् (**तोदस्येव**) व्यथा देनेवाले के जैसे वैसे (**तव**) आपके (**स्वित्**) ही (**आ, शरणे**) अच्छे प्रकार घर में (**त्वा**) आपको (**पुरु, आ, वोचे**) बहुत भली-भांति से कहूं॥ १॥

भावार्थः-जो जिसका रक्खा हुआ सेवक हो वह उसकी आज्ञा का पालन करके कृतार्थ होवे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व्यनिनस्य धनिनः प्रहोषे चिदररुषः।
कदा चन प्रजिगतो अदेवयोः॥ २॥

वि। अनिनस्य। धनिनः। प्रऽहोषे। चित्। अररुषः। कदा। चन। प्रऽजिगतः। अदेवऽयोः॥ २॥

पदार्थः-(**वि**) (**अनिनस्य**) यत्प्रशस्तं प्राणनिमित्तं तस्य (**धनिनः**) बहुधनयुक्तस्य (**प्रहोषे**) यो जुहोति तस्मै (**चित्**) अपि (**अररुषः**) अहिंसकस्य (**कदा**) (**चन**) (**प्रजिगतः**) प्रकर्षेण भृशं प्राप्नुतः। अत्र यङन्तात् परस्य लटः शतृयङो लुक् **वाच्छन्दसी**ति अभ्यासस्येत्वम्। (**अदेवयोः**) न देवौ अदेवौ तयोरदेवयोः॥ २॥

अन्वयः-अहमदेवयोः प्रजिगतो अररुषो व्यनिनस्य धनिनः प्रहोषे कदा चनाऽप्रियं न वोचे। एवं चिदपि त्वं मा वोचेः॥ २॥

भावार्थः-योऽविदुषोरध्यापकोपदेशकयोः संगं त्यक्त्वा विदुषोः सङ्गं करोति स सुखाढ्यो जायते॥२॥

पदार्थः-मैं **(अदेवयोः)** जो नहीं विद्वान् हैं, उनको **(प्रजिगतः)** जो उत्तमता से निरन्तर प्राप्त होता हुआ **(अररुषः)** अहिंसक **(व्यनिनस्य)** विशेषता से प्रशंसित प्राण का निमित्त **(धनिनः)** बहुत धनयुक्त जन हैं उसके **(प्रहोषे)** उसको अच्छे ग्रहण करनेवाले के लिये **(कदा, चन)** कभी अप्रिय वचन न कहूं ऐसे **(चित्)** तू भी मत बोल॥२॥

भावार्थः-जो अविद्वान् पढ़ाने और उपदेश करनेवालों के सङ्ग को छोड़ विद्वानों का सङ्ग करता है, वह सुखों से युक्त होता है॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि।
प्रप्रेत्ते अग्ने वनुषः स्याम॥३॥१९॥

सः। चन्द्रः। विप्र। मर्त्यः। महः। व्राधन्ऽतमः। दिवि। प्रऽप्र। इत्। ते। अग्ने। वनुषः। स्याम॥३॥

पदार्थः-**(सः)** **(चन्द्रः)** आह्लादकारकः **(विप्र)** मेधाविन् **(मर्त्यः)** मनुष्यः **(महः)** महान् **(व्राधन्तमः)** अतिशयेन वर्द्धमानः **(दिवि)** **(प्रप्र)** **(इत्)** एव **(ते)** तव **(अग्ने)** विद्वन् **(वनुषः)** संविभाजकस्य **(स्याम)** भवेम॥३॥

अन्वयः-हे अग्ने विद्वन्! यथा वयं वनुषस्ते तवोपकारकाः प्रप्रेत् स्याम। हे विप्र! यथा स मर्त्यो व्राधन्तमो महश्चन्द्रो दिवीव वर्त्तते तथा त्वं वर्त्तस्व॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पृथिव्यादिपदार्थज्ञा विद्वांसो विद्याप्रकाशे प्रवर्त्तन्ते तथेतरैरपि वर्त्तितव्यम्॥३॥

अस्मिन् सूक्ते विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति पञ्चाशदुत्तरं शततमं १५० सूक्तमेकोनविंशो १९ वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वान्! जैसे हम लोग **(वनुषः)** अलग सबको बांटनेवाले **(ते)** आपके उपकार करनेवाले **(प्रप्र, इत्, स्याम)** उत्तम ही प्रकार से होवें। वा हे **(विप्र)** धीर बुद्धिवाले जन! जैसे **(सः)** वह **(मर्त्यः)** मनुष्य **(व्राधन्तमः)** अतीव उन्नति को प्राप्त जैसे **(महः)** बड़ा **(चन्द्रः)** चन्द्रमा **(दिवि)** आकाश में वर्त्तमान है, वैसे तू भी अपना वर्त्ताव रख॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पृथिव्यादि पदार्थों को जाने हुए विद्वान् जन विद्याप्रकाश में प्रवृत्त होते हैं, वैसे और जनों को भी वर्त्ताव रखना चाहिये॥३॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, वह जानना चाहिये॥

यह एक सौ पचासवाँ १५० सूक्त और उन्नीसवां १९ वर्ग समाप्त हुआ॥

अथ मित्रमित्यस्य नवर्चस्यैकपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। मित्रावरुणौ देवते। १ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। २-५ विराट् जगती। ६,७ जगती। ८,९ निचृज्जगती च छन्दः। निषादः स्वरः॥

अथ मित्रावरुणयोर्लक्षणविशेषानाह॥

अब नव ऋचावाले एक सौ इक्कावनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में मित्रावरुण के विशेष लक्षणों को कहते हैं॥

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन्।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः॥ १॥

मित्रम्। न। यम्। शिम्या। गोषु। गव्यवः। सुऽआध्यः। विदथे। अप्ऽसु। जीजनन्। अरेजेताम्। रोदसी इति। पाजसा। गिरा। प्रति। प्रियम्। यजतम्। जनुषाम्। अवः॥ १॥

पदार्थः-(**मित्रम्**) सखायम् (**न**) इव (**यम्**) (**शिम्या**) कर्मणा। **शिमीति कर्मनामसु पठितम्।** (निघं०२.१) (**गोषु**) धेनुषु (**गव्यवः**) गा इच्छवः (**स्वाध्यः**) सुष्ठु आधीर्येषान्ते (**विदथे**) यज्ञे (**अप्सु**) प्राणेषु (**जीजनन्**) जनयेयुः। अत्राडभावः। (**अरेजेताम्**) कम्पेताम् (**रोदसी**) द्यावापृथिव्यौ (**पाजसा**) बलेन (**गिरा**) सुशिक्षितया वाण्या (**प्रति**) (**प्रियम्**) यः प्रीणाति तम् (**यजतम्**) सङ्गन्तव्यम् (**जनुषाम्**) जनानाम् (**अवः**) रक्षणम्॥ १॥

अन्वयः-प्रियं यजतं यमग्निं जनुषामवः प्रति स्वाध्यो गोषु गव्यवो मित्रं न विदथे शिम्याऽप्सु जीजनन् तस्याग्नेः पाजसा गिरा रोदसी अरेजेताम्॥ १॥

भावार्थः-ये विद्वांसः प्रजापालनमिच्छवस्ते मित्रभावं कृत्वा सर्वं जगत् स्वात्मवत् रक्षेयुः॥ १॥

पदार्थः-(**प्रियम्**) जो प्रसन्न करता वा (**यजतम्**) सङ्ग करने योग्य (**यम्**) जिस अग्नि को (**जनुषाम्**) मनुष्यों के (**अवः**) रक्षा आदि के (**प्रति**) प्रति वा (**स्वाध्यः**) जिनकी उत्तम धीरबुद्धि वे (**गोषु**) गौओं में (**गव्यवः**) गौओं की इच्छा करनेवाले जन (**मित्रम्, न**) मित्र के समान (**विदथे**) यज्ञ में (**शिम्या**) कर्म से (**अप्सु**) प्राणियों के प्राणों में (**जीजनन्**) उत्पन्न कराते अर्थात् उस यज्ञ कर्म द्वारा वर्षा और वर्षा से अन्न होते और अन्नों से प्राणियों के जठराग्नि को बढ़ाते हैं, उस अग्नि के (**पाजसा**) बल (**गिरा**) रूप उत्तम शिक्षित वाणी से (**रोदसी**) सूर्यमण्डल और पृथिवीमण्डल (**अरेजेताम्**) कम्पायमान होते हैं॥ १॥

भावार्थः-जो विद्वान् प्रजापालना किया चाहते हैं, वे मित्रता कर समस्त जगत् की रक्षा करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्ध॒ त्यद्वां॑ पुरुमी॒ळ्हस्य॑ सो॒मिन॒: प्र मि॒त्रासो॒ न द॑धि॒रे स्वा॒भुव॑:।
अध॒ क्रतुं॑ विदतं गा॒तुमर्च॑त उ॒त श्रु॑तं वृषणा प॒स्त्या॑वत:॥ २॥

यत्। ह॒। त्यत्। वा॒म्। पु॒रु॒ऽमी॒ळ्हस्य॑। सो॒मिनः। प्र। मि॒त्रासः॑। न। द॒धि॒रे। सु॒ऽआ॒भुवः॑। अध॑। क्रतु॑म्। वि॒द॒त॒म्। गा॒तुम्। अर्च॑ते। उ॒त। श्रु॒तम्। वृ॒ष॒णा॒। प॒स्त्य॑ऽवतः॥ २॥

पदार्थः-(**यत्**) ये (**ह**) किल (**त्यत्**) तेषाम् (**वाम्**) युवाम् (**पुरुमीढस्य**) पुरुभिर्बहुभिर्गुणैः सिक्तस्य (**सोमिनः**) बह्वैश्वर्ययुक्तस्य (**प्र**) (**मित्रासः**) सखायः (**न**) इव (**दधिरे**) दधति (**स्वाभुवः**) सुष्ठु समन्तात् परोपकारे भवन्ति (**अध**) अनन्तरम् (**क्रतुम्**) प्रज्ञाम् (**विदतम्**) प्राप्नुतम् (**गातुम्**) स्तुतिम् (**अर्चते**) सत्कर्त्रे (**उत**) अपि (**श्रुतम्**) (**वृषणा**) यौ वर्षयतो दुष्टानां शक्तिं बन्धयतस्तौ (**पस्त्यावतः**) प्रशस्तानि पस्त्यानि गृहाणि विद्यन्ते यस्य॥ २॥

अन्वयः-हे वृषणाऽध्यापकोपदेशकौ! युवां पुरुमीढस्य पस्त्यावतः सोमिनः क्रतुं वाचं यद्ध स्वाभुवो मित्रासो न प्रदधिरे त्यत् तेषां गातुं विदतमधोत वामर्चते श्रुतम्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये मित्रवत् सर्वेषु जनेषु प्रज्ञां संस्थाप्य विद्यां निदधति, ते सौभाग्यवन्तो भवन्ति॥ २॥

पदार्थः-हे (**वृषणा**) शर आदि की वर्षा कराते, दुष्टों की शक्ति को बांधते हुए अध्यापक और उपदेशको! तुम दोनों (**पुरुमीढस्य**) बहुत गुणों से सींचे हुए (**पस्त्यावतः**) प्रशंसित घरोंवाले (**सोमिनः**) बहुत ऐश्वर्ययुक्त सज्जन की (**क्रतुम्**) बुद्धि को (**यत्, ह**) जो निश्चय के साथ (**स्वाभुवः**) उत्तमता से परोपकार में प्रसिद्ध होनेवाले जन (**मित्रासः**) मित्रों के (**न**) समान (**प्र, दधिरे**) अच्छे प्रकार धारण करते (**त्यत्**) उनकी (**गातुम्**) पृथिवी को (**विदतम्**) प्राप्त होओ, (**अध, उत**) इसके अनन्तर भी (**वाम्**) तुम दोनों का (**अर्चते**) सत्कार करते हुए जन की (**श्रुतम्**) सुनो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मित्र के समान सब जनों में उत्तम बुद्धि को स्थापन कर विद्याओं का स्थापन करते हैं, वे अच्छे भाग्यशाली होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वां॑ भूषन् क्षि॒तयो॒ जन्म॒ रोद॑स्यो: प्र॒वाच्यं॑ वृषणा॒ दक्ष॑से म॒हे।
यदी॑मृ॒ताय॒ भर॑थो॒ यदर्व॑ते॒ प्र होत्र॑या॒ शिम्या॑ वीथो अध्व॒रम्॥ ३॥

आ। वा॒म्। भू॒ष॒न्। क्षि॒तयः॑। जन्म॑। रोद॑स्योः। प्र॒ऽवाच्य॑म्। वृ॒ष॒णा॒। दक्ष॑से। म॒हे। यत्। ई॒म्। ऋ॒ताय॑। भर॑थः। यत्। अर्व॑ते। प्र। होत्र॑या। शिम्या॑। वी॒थः॒। अ॒ध्व॒रम्॥ ३॥

पदार्थः-(**आ**) समन्तात् (**वाम्**) युवयोः (**भूषन्**) अलंकुर्युः (**क्षितयः**) मनुष्याः (**जन्म**) विद्याप्रादुर्भावम् (**रोदस्योः**) द्यावाभूम्योर्मध्ये (**प्रवाच्यम्**) प्रवक्तुमर्हम् (**वृषणा**) विद्यावर्षयितारौ (**दक्षसे**) आत्मबलाय (**महे**) महते (**यत्**) ये (**ईम्**) सर्वतः (**ऋताय**) सत्यविज्ञानाय (**भरथः**) धरथः (**यत्**) यतः (**अर्वते**) प्रशस्तविज्ञानवते (**प्र**) (**होत्रया**) आदातुमर्हया (**शिम्या**) सुकर्मयुक्तया (**वीथः**) व्याप्नुथः (**अध्वरम्**) अहिंसाधर्मयुक्तं व्यवहारम्॥३॥

अन्वयः-हे वृषणा! यद्ये रोदस्योर्मध्ये वर्त्तमानाः क्षितयो महे दक्षसे वां युवयोः प्रवाच्यं जन्म भूषन् तत्सङ्गेन यद्यतोऽर्वत ऋताय होत्रया शिम्याऽध्वरं युवामाभरथः। ईं प्रवीथः। तस्माद्भवन्तौ प्रशंसनीयौ स्तः॥३॥

भावार्थः-ये विद्वांसो बाल्यावस्थामारभ्य पुत्राणां कन्यानां च विद्याजन्म प्रवर्द्धयन्ति, ते सत्यविद्यानां प्रचारेण सर्वान् विभूषयन्ति॥३॥

पदार्थः-हे (**वृषणा**) विद्या की वर्षा करानेवाले (**यत्**) जो (**रोदस्योः**) अन्तरिक्ष और पृथिवी के बीच वर्त्तमान (**क्षितयः**) मनुष्य (**महे**) अत्यन्त (**दक्षसे**) आत्मबल के लिये (**वाम्**) तुम दोनों का (**प्रवाच्यम्**) अच्छे प्रकार कहने योग्य (**जन्म**) जन्म को (**भूषन्**) सुशोभित करें, उन के सङ्ग से (**यत्**) जिस कारण (**अर्वते**) प्रशंसित विज्ञानवाले (**ऋताय**) सत्यविज्ञान युक्त सज्जन के लिये (**होत्रया**) ग्रहण करने योग्य (**शिम्या**) अच्छे कर्मों से युक्त क्रिया से (**अध्वरम्**) अहिंसा धर्मयुक्त व्यवहार को तुम (**आ, भरथः**) अच्छे प्रकार धारण करते हो और (**ईम्**) सब ओर से उसको (**प्र, वीथः**) व्याप्त होते हो, इससे आप प्रशंसा करने योग्य हो॥३॥

भावार्थः-जो विद्वान् बाल्यावस्था से लेकर पुत्र और कन्याओं को विद्याजन्म की अति उन्नति दिलाते हैं, वे सत्य के प्रचार से सबको विभूषित करते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत्।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः॥४॥

प्र। सा। क्षितिः। असुरा। या। महि। प्रिया। ऋतऽवानौ। ऋतम्। आ। घोषथः। बृहत्। युवम्। दिवः। बृहतः। दक्षम्। आऽभुवम्। गाम्। न। धुरि। उप। युञ्जाथे इति। अपः॥४॥

पदार्थः-(**प्र**) (**सा**) (**क्षितिः**) (**असुर**) प्राणवद् बलिष्ठौ। अत्राकारादेशो **बहुलं छन्दसी**ति ह्रस्वश्च। (**या**) (**महि**) महति (**प्रिया**) सुखकारिणी (**ऋतावानौ**) सत्याचारिणौ (**ऋतम्**) सत्यम् (**आ**) (**घोषथः**) विशेषेण शब्दयथः (**बृहत्**) महत् (**युवम्**) युवाम् (**दिवः**) राज्यप्रकाशस्य (**बृहतः**) अतिवृद्धस्य (**दक्षम्**)

बलम् (**आभुवम्**) समन्ताद्भवनशीलम् (**गाम्**) बलीवर्दम् (**न**) इव (**धुरि**) शकटादिवाहने (**उप**) (**युञ्जाथे**) नियुक्तौ भवतः (**अपः**) कर्म॥४॥

अन्वयः–हे ऋतावानावसुर! युवं यतो बृहतो दिवो दक्षमपश्च धुर्याभुवं गां नोपयुञ्जाथे बृहदृतमा घोषथस्तस्माद् युवां या महि प्रिया क्षितिस्सा प्राप्नोतु॥४॥

भावार्थः–अत्रोपमालङ्कारः। ये सत्यमाचरन्त्युपदिशन्ति तेऽसंख्यं बलं प्राप्य महाराज्यं भुञ्जते॥४॥

पदार्थः–हे (**ऋतावाना**) सत्य आचरण करनेवाले (**असुर**) प्राण के समान बलवान् मित्र–वरुण=राज–प्रजा–जन! (**युवम्**) तुम दोनों जिस कारण (**बृहतः**) अति उन्नति को प्राप्त (**दिवः**) प्रकाश (**दक्षम्**) बल और (**अपः**) कर्म को (**धुरि**) गाड़ी चलाने की धुरि के निमित्त (**आभुवम्**) अच्छे प्रकार होनेवाले (**गाम्**) प्रबल बैल के (**न**) समान (**उप, युञ्जाथे**) उपयोग में लाते हो और (**बृहत्**) अत्यन्त (**ऋतम्**) सत्य व्यवहार को (**आघोषथः**) विशेषता से शब्दायमान कर प्रख्यात करते हो, इससे तुम दोनों को (**या**) जो (**महि**) अत्यन्त (**प्रिया**) सुखकारिणी (**क्षितिः**) भूमि है (**सा**) वह (**प्र**) प्राप्त होवे॥४॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो सत्य का आचरण करते और उसका उपदेश करते हैं, वे असंख्य बल को प्राप्त होकर पृथिवी के राज्य को भोगते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः।
स्वरन्ति ता उपरताति सूर्यमा निम्रुचं उषसस्तक्ववीरिव॥५॥२०॥

मही इति। अत्र। महिना। वारम्। ऋणवथुः। अरेणवः। तुजः। आ। सद्मन्। धेनवः। स्वरन्ति। ताः। उपरऽताति। सूर्यम्। आ। निऽम्रुचः। उषसः। तक्ववीःऽइव॥५॥

पदार्थः–(**मही**) महत्यां मह्याम् (**अत्र**) (**महिना**) महिम्ना (**वारम्**) वर्त्तुमर्हम् (**ऋण्वथः**) प्राप्नुथः (**अरेणवः**) दुष्टानप्राप्ताः (**तुजः**) आदत्ताः (**आ**) (**सद्मन्**) सद्मनि गृहे (**धेनवः**) या धयन्ति पाययन्ति ताः (**स्वरन्ति**) (**ताः**) (**उपरताति**) उपराणां मेघानामवकाशवत्यन्तरिक्षे (**सूर्यम्**) (**आ**) (**निम्रुचः**) नितरां गच्छन्तीः (**उषसः**) प्रभातान् (**तक्कवीरिव**) यस्तकान् सेनाजनान् व्याप्नोति तद्वत्॥५॥

अन्वयः–हे अध्यापकोपदेशकौ! युवां तक्ववीरिवात्र मही महिना उपरताति सूर्यमा निम्रुच उषस इव या अरेणवस्तुजो धेनवः सद्मन् वारमास्वरन्ति ता ऋण्वथः॥५॥

भावार्थः–अत्रोपमालङ्कारः। यथा दुग्धदात्र्यो गावः सर्वान् प्रीणयन्ति तथाऽध्यापकोदेशका विद्यासुशिक्षाः प्रदाय सर्वान् सुखयेयुः॥५॥

पदार्थः-हे पढ़ाने और उपदेश करनेवाले सज्जनो! तुम दोनों **(तक्ववीरिव)** जो सेनाजनों को व्याप्त होता उसके समान **(अत्र)** इस **(मही)** पृथिवी में **(महिना)** बड़प्पन से **(उपरताति)** मेघों के अवकाशवाले अर्थात् मेघ जिसमें आते-जाते उस अन्तरिक्ष में **(सूर्यम्)** सूर्यमण्डल को **(आ, निम्रुचः)** मर्यादा माने निरन्तर गमन करती हुई **(उषसः)** प्रभात वेलाओं के समान **(अरेणवः)** जो दुष्टों को नहीं प्राप्त **(तुजः)** सज्जनों ने ग्रहण की हुई **(धेनवः)** जो दुग्ध पिलाती हैं वे गौयें **(सद्मन्)** अपने गोंडों में **(वारम्)** स्वीकार करने योग्य **(आ, स्वरन्ति)** सब ओर से शब्द करती हैं **(ताः)** उनको **(ऋण्वथः)** प्राप्त होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे दूध देनेवाली गौयें सब प्राणियों को प्रसन्न करती हैं, वैसे पढ़ाने और उपदेश करनेवाले जन विद्या और उत्तम शिक्षा को अच्छे प्रकार देकर सब मनुष्यों को सुखी करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः॥६॥

आ। वाम्। ऋताय। केशिनीः। अनूषत। मित्र। यत्र। वरुण। गातुम्। अर्चथः। अव। त्मना। सृजतम्। पिन्वतम्। धियः। युवम्। विप्रस्य। मन्मनाम्। इरज्यथः॥६॥

पदार्थः-**(आ)** **(वाम्)** युवाम् **(ऋताय)** सत्याचाराय **(केशिनीः)** रश्मिमतीः **(अनूषत)** स्तुवत **(मित्र)** सखे **(यत्र)** **(वरुण)** वर **(गातुम्)** सत्यां स्तुतिम् **(अर्चथः)** सत्कुरुथः **(अव)** **(त्मना)** आत्मना **(सृजतम्)** निष्पादयतम् **(पिन्वतम्)** सिञ्चतम् **(धियः)** प्रज्ञाः **(युवम्)** युवाम् **(विप्रस्य)** मेधाविनः **(मन्मनाम्)** मन्यमानाम् **(इरज्यथः)** ऐश्वर्ययुक्तां कुरुथः॥६॥

अन्वयः-हे मित्र वरुण च विद्वांसौ! यत्रर्ताय केशिनीः सुन्दरस्त्रियो वां युवामनूषत तत्र युवं गातुमार्चथः। त्मना विप्रस्य धियोऽवसृजतं पिन्वतं च मन्मनामिरजथः॥६॥

भावार्थः-या इह प्रशंसिता स्त्रियो ये च य पुरुषास्ते स्वसदृशैस्सह संयुज्यन्तां ब्रह्मचर्य्येण विद्यया विज्ञानमुन्नीयैश्वर्यं वर्द्धयन्तु॥६॥

पदार्थः-हे **(मित्र)** मित्र और **(वरुण)** श्रेष्ठ विद्वानो! **(यत्र)** जहाँ **(ऋताय)** सत्याचरण के लिये **(केशिनीः)** चमक-दमकवाली सुन्दरी स्त्री **(वाम्)** तुम दोनों की **(अनूषत)** स्तुति करें वहाँ **(युवम्)** तुम दोनों **(गातुम्)** सत्य स्तुति को **(आ, अर्चथः)** अच्छे प्रकार प्रशंसित करते हो **(त्मना)** अपने से **(विप्रस्य)**

धीरबुद्धि युक्त सज्जन की (**धियः**) उत्तम बुद्धियों को (**अव, सृजतम्**) निरन्तर उत्पन्न करो और (**पिन्वतम्**) उपदेश द्वारा सींचो (**मन्मनाम्**) और मान करती हुई को (**इरज्यथः**) ऐश्वर्ययुक्त करो॥६॥

भावार्थः-जो यहाँ प्रशंसायुक्त स्त्रियां और जो पुरुष हैं, वे अपने समान पुरुष-स्त्रियों के साथ संयोग करें, ब्रह्मचर्य से और विद्या से विशेष ज्ञान की उन्नति कर ऐश्वर्य को बढ़ावें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू॥७॥

यः। वाम्। यज्ञैः। शशमानः। ह। दाशति। कविः। होता। यजति। मन्मऽसाधनः। उप। अह। तम्। गच्छथः। वीथः। अध्वरम्। अच्छ। गिरः। सुऽमतिम्। गन्तम्। अस्मयू इत्यस्मऽयू॥७॥

पदार्थः-(**यः**) (**वाम्**) युवाभ्याम् (**यज्ञैः**) सङ्गतैः कर्मभिः (**शशमानः**) प्लवमानः (**ह**) किल (**दाशति**) ददाति (**कविः**) महाप्रज्ञः (**होता**) आदाता (**यजति**) सत्करोति (**मन्मसाधनः**) मन्म विज्ञानं साधनं यस्य सः (**उप**) (**अह**) विनिग्रहे (**तम्**) (**गच्छथः**) प्राप्नुथः (**वीथः**) कामयेथाम् (**अध्वरम्**) अहिंसामयं व्यवहारम् (**अच्छ**) उत्तमरीत्या। अत्र **निपातस्य चे**ति दीर्घः। (**गिरः**) सुशिक्षिता वाणीः (**सुमतिम्**) शोभनां प्रज्ञाम् (**गन्तम्**) प्राप्नुतम् (**अस्मयू**) अस्मानिच्छन्तौ॥७॥

अन्वयः-हे अध्यापकोपदेशकौ! यः शशमानः कविर्होता मन्मसाधनो यज्ञैर्वां सुखं दाशति यजति च तं हाऽस्मयू युवामुपागच्छथो तावह अध्वरं गन्तं गिरः सुमतिं चाच्छ वीथः॥७॥

भावार्थः-येऽत्र सत्यविद्याकामुकाः सर्वेभ्यो विद्यादानेन सुशीलतां सम्पादयन्तः सुखं प्रददति, ते सर्वैः सत्कर्त्तव्याः॥७॥

पदार्थः-हे अध्यापक और उपदेशको! (**यः**) जो (**शशमानः**) सब विषयों को पार होता हुआ (**कविः**) अत्यन्त बुद्धियुक्त (**होता**) सब विषयों को ग्रहण करनेवाला (**मन्मसाधनः**) जिस का विज्ञान ही साधन वह सज्जन (**यज्ञैः**) मिल के किये हुए कर्मों से (**वाम्**) तुम दोनों को सुख (**दाशति**) देता है और (**यजति**) तुम्हारा सत्कार करता है (**तम्, ह**) उसी के (**अस्मयू**) हमारी इच्छा करते हुए तुम (**उप, गच्छथः**) सङ्ग पहुंचे हो वे आप (**अह**) बे रोक-टोक (**अध्वरम्**) हिंसारहित व्यवहार को (**गन्तम्**) प्राप्त होओ और (**गिरः**) सुन्दर शिक्षा की हुई वाणी और (**सुमतिम्**) सुन्दर विशेष बुद्धि को (**अच्छ**) उत्तम रीति से (**वीथः**) चाहो॥७॥

भावार्थः-जो इस संसार में सत्य विद्या की कामना करनेवाले सबके लिये विद्या दान से उत्तम शीलपन का सम्पादन करते हुए सुख देते हैं, वे सबको सत्कार करने योग्य हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु।
भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे॥८॥

युवाम्। यज्ञैः। प्रथमाः। गोभिः। अञ्जते। ऋतऽवाना। मनसः। न। प्रऽयुक्तिषु। भरन्ति। वाम्। मन्मना। सम्ऽयता। गिरः। अदृप्यता। मनसा। रेवत्। आशाथे इति॥८॥

पदार्थः-(**युवाम्**) (**यज्ञैः**) सत्करणैः (**प्रथमा**) आदिमौ (**गोभिः**) सुशिक्षिताभिर्वाणीभिः (**अञ्जते**) कामयन्ते (**ऋतावाना**) सत्याचारसंबन्धिनौ (**मनसः**) अन्तःकरणस्य (**न**) इव (**प्रयुक्तिषु**) प्रकृष्टेषु योजनेषु (**भरन्ति**) पुष्यन्ति (**वाम्**) युवयोः (**मन्मना**) विज्ञानेन (**संयता**) संयमयुक्तेन (**गिरः**) विद्यायुक्ता वाणी (**अदृप्यता**) हर्षमोहरहितेन (**मनसा**) अन्तःकरणेन (**रेवत्**) बहवो रायो विद्यन्ते यस्मिँस्तदैश्वर्यम् (**आशाथे**) प्राप्नुथः॥८॥

अन्वयः-हे अध्यापकोपदेशकौ! ये यज्ञैर्गोभिरञ्जते ऋतावाना प्रथमा युवां मनसः प्रयुक्तिषु नेव व्यवहारेषु भरन्ति वां युवयोः सकाशात् शिक्षाः प्राप्य संयता मन्मनादृप्यता मनसा गिरो रेवच्च भरन्ति युवामाशाथे तान् नित्यमध्यापयतं शिक्षेथां च॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! ये युष्मान् विद्याप्राप्तये श्रद्धयाप्नुयुः। ये च जितेन्द्रिया धार्मिकाः स्युस्तान् प्रयत्नेन विद्यावतो धार्मिकान् कुरुत॥८॥

पदार्थः-हे अध्यापकोपदेशक सज्जनो! जो (**यज्ञैः**) यज्ञों से (**गोभिः**) और सुन्दर शिक्षित वाणियों से (**अञ्जते**) कामना करते हैं (**ऋतावाना**) और सत्य आचरण का सम्बन्ध रखनेवाले (**प्रथमा**) आदि में होनेवाले तुम दोनों को (**मनसः**) अन्तःकरण के (**प्रयुक्तिषु**) प्रयोगों को उल्लासों में जैसे (**न**) वैसे व्यवहारों में (**भरन्ति**) पुष्ट करते हैं तथा (**वाम्**) तुम दोनों की शिक्षाओं को पाकर (**संयता**) संयमयुक्त (**अदृप्यता**) हर्ष-मोहरहित (**मन्मना**) विज्ञानरूप (**मनसा**) मन से (**गिरः**) वाणियों और (**रेवत्**) बहुत धनों से भरे हुए ऐश्वर्य को पुष्ट करते हैं और तुमको (**आशाथे**) प्राप्त होते हैं, उनको तुम नित्य पढ़ाओ और सिखाओ॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! जो तुमको विद्या प्राप्ति के लिये श्रद्धा से प्राप्त होवें और जो जितेन्द्रिय, धार्मिक हों उन सभी को अच्छे यत्न के साथ विद्यावान् और धार्मिक करो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम्।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम्॥ ९॥ २१॥

रेवत्। वयः। दधाथे इति। रेवत्। आशाथे इति। नरा। मायाभिः। इतऽऊति। माहिनम्। न। वाम्। द्यावः। अहऽभिः। न। उत। सिन्धवः। न। देवऽत्वम्। पणयः। न। आनशुः। मघम्॥ ९॥

पदार्थः-(**रेवत्**) प्रशस्तधनवत् (**वयः**) कमनीयम् (**दधाथे**) धरथः (**रेवत्**) बह्वैश्वर्ययुक्तम् (**आशाथे**) (**नरा**) नायकौ (**मायाभिः**) प्रज्ञाभिः (**इतऊति**) इतः ऊतिः रक्षा यस्मात् तत् (**माहिनम्**) अत्यन्तं पूज्यं महच्च। **माहिन इति महन्नामसु पठितम्।** (निघं०३.३) (**न**) निषेधे (**वाम्**) युवयोः (**द्यावः**) प्रकाशाः (**अहभिः**) दिनैः (**न**) (**उत**) (**सिन्धवः**) नद्यः (**न**) (**देवत्वम्**) विद्वत्त्वम् (**पणयः**) व्यवहरमाणाः (**न**) (**आनशुः**) व्याप्नुवन्ति (**मघम्**) महदैश्वर्यम्॥ ९॥

अन्वयः-हे नरा! यौ युवां मायाभिर्माहिनमितऊति वयो रेवद्दधाथे रेवदाशाथे च तयोर्वां देवत्वं द्यावो नाहभिरहानि नोत सिन्धवो नानशुः पणयो मघं न नानशुः॥ ९॥

भावार्थः-यद्यद्विद्वांसः प्राप्नुवन्ति तत्तदितरे न यान्ति विदुषामुपमा विद्वांस एव भवन्ति नापरे इति॥ ९॥

अस्मिन् सूक्ते मित्रावरुणलक्षणोक्तत्वादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेदितव्या॥

इति एकपञ्चाशदुत्तरं शततमं १५१ सूक्तमेकविंशो २१ वर्गश्च समाप्तः॥

पदार्थः-हे (**नरा**) अग्रगामी जनो! जो तुम (**मायाभिः**) मानने योग्य बुद्धियों से (**माहिनम्**) अत्यन्त पूज्य और बड़ा भी (**इतऊति**) इधर से रक्षा जिससे उस (**वयः**) अति रम्य मनोहर (**रेवत्**) प्रशंसित धनयुक्त ऐश्वर्य को (**दधाथे**) धारण करते हो और (**रेवत्**) बहुत ऐश्वर्ययुक्त व्यवहार को (**आशाथे**) प्राप्त होते हो उन (**वाम्**) आपको (**देवत्वम्**) विद्वत्ता को (**द्यावः**) प्रकाश (**न**) नहीं (**अहभिः**) दिनों के साथ दिन अर्थात् एकता रसमय (**न**) नहीं (**उत**) और (**सिन्धवः**) बड़ी-बड़ी नदी-नद (**न**) नहीं (**आनशुः**) व्याप्त होते अर्थात् अपने-अपने गुणों से तिरस्कार नहीं कर सकते, जीत नहीं सकते, अधिक नहीं होवे तथा (**पणयः**) व्यवहार करते हुए जन (**मघम्**) तुम्हारे महत् ऐश्वर्य को (**न**) नहीं व्याप्त होते, जीत सकते॥ ९॥

भावार्थः-जिस-जिस को विद्वान् प्राप्त करते हैं, उस-उसको इतर सामान्य जन प्राप्त नहीं होते। विद्वानों के उपमा विद्वान् ही होते हैं, और नहीं होते॥ ९॥

इस सूक्त में मित्र-वरुण के लक्षण अर्थात् मित्र-वरुण शब्द से लक्षित अध्यापक और उपदेशक आदि का वर्णन किया, इससे इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ एकावनवां १५१ सूक्त और इक्कीसवां २१ वर्ग समाप्त हुआ॥

युवमित्यस्य सप्तर्चस्य द्विपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। मित्रावरुणौ देवते। १,२,४-६ त्रिष्टुप्। ३ विराट् त्रिष्टुप्। ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाध्यापकाध्याप्योपदेशकोपदेश्य विषयमाह॥

अब एक सौ बावनवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में पढ़ाने, पढ़ने और उपदेश करने, उपदेश सुननेवालों के विषय को कहते हैं॥

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः।
अवातिरतमनृतानि विश्वा ऋतेन मित्रावरुणा सचेथे॥ १॥

युवम्। वस्त्राणि। पीवसा। वसाथे इति। युवोः। अच्छिद्राः। मन्तवः। ह। सर्गाः। अव। अतिरतम्। अनृतानि। विश्वा। ऋतेन। मित्रावरुणा। सचेथे इति॥ १॥

पदार्थः-(**युवम्**) युवाम् (**वस्त्राणि**) शरीराच्छादकानि (**पीवसा**) स्थूलानि (**वसाथे**) आच्छादयथः (**युवोः**) (**अच्छिद्रा**) छिद्ररहिताः (**मन्तवः**) ज्ञातुं योग्याः (**ह**) खलु (**सर्गाः**) स्रष्टुं योग्याः (**अव**) (**अतिरतम्**) उल्लङ्घयतम् (**अनृतानि**) मिथ्याभाषणादीनि कर्माणि (**विश्वा**) सर्वाणि (**ऋतेन**) सत्येन (**मित्रावरुणा**) प्राणोदानवत्वर्त्तमानावध्यापकोपदेशकौ (**सचेथे**) संङ्गच्छेथे॥ १॥

अन्वयः-हे मित्रावरुणा! यौ युवं पीवसा वस्त्राणि वसाथे ययोर्युवोरच्छिद्रा मन्तवो ह सर्गास्सन्ति यौ युवां विश्वाऽनृतान्यवातिरतमृतेन सचेथे तावस्माभिः कुतो न सत्कर्तव्यौ भवथः॥ १॥

भावार्थः-मनुष्यैः सदैव स्थूलान्यच्छिद्राणि वस्त्राणि परिधाय विज्ञातुं योग्या दोषरहिता वस्त्रादयः पदार्था निर्मातव्याः। सदैव धृतेन सत्याचरणेनासत्याचरणानि त्यक्त्वा धर्मार्थकाममोक्षाः संसाधनीयाः॥ १॥

पदार्थः-हे (**मित्रावरुणा**) प्राण-उदान के समान वर्त्तमान पढ़ाने और उपदेश करनेवाले! जो (**युवम्**) तुम लोग (**पीवसा**) स्थूल (**वस्त्राणि**) वस्त्रों को (**वसाथे**) ओढ़ते हो वा जिन (**युवोः**) तुम्हारे (**अच्छिद्राः**) छेद-भेद रहति (**मन्तवः**) जानने योग्य (**ह**) ही पदार्थ (**सर्गाः**) रचने योग्य हैं, जो तुम (**विश्वा**) समस्त (**अनृतानि**) मिथ्याभाषण आदि कामों को (**अवातिरतम्**) उल्लङ्घते पार होते और (**ऋतेन**) सत्य से (**सचेथे**) सङ्ग करते हो, वे तुम हम लोगों को क्यों न सत्कार करने योग्य होते हो॥ १॥

भावार्थः-मनुष्यों को सदैव स्थूल छिद्ररहित वस्त्र पहन कर जानने के योग्य दोषरहित वस्त्र आदि पदार्थ निर्माण करने चाहियें और सदैव धारण किये हुए सत्याचरण से असत्याचरणों को छोड़ धर्म्म, अर्थ, काम और मोक्ष को अच्छे प्रकार सिद्ध करने चाहियें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान्।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन्॥ २॥

एतत्। चन। त्वः। वि. चिकेतत्। एषाम्। सत्यः। मन्त्रः। कविऽशस्तः। ऋघावान्। त्रिःऽअश्रिम्। हन्ति। चतुःऽअश्रिः। उग्रः। देवऽनिदः। ह। प्रथमाः। अजूर्यन्॥ २॥

पदार्थः-(**एतत्**) (**चन**) अपि (**त्वः**) कश्चित् (**वि**) (**चिकेतत्**) विजानाति (**एषाम्**) (**सत्यः**) अव्यभिचारी (**मन्त्रः**) विचारः (**कविशस्तः**) कविभिः मेधाविभिः शस्तः प्रशंसितः (**ऋघावान्**) ऋघाः बह्व्यः स्तुतयो सत्यासत्यविवेचिका मतयो विद्यन्ते यस्मिन् सः (**त्रिरश्रिम्**) त्रिभिर्वाङ्मनःशरीरैर्योऽश्यते प्राप्यते तम् (**हन्ति**) (**चतुरश्रिः**) चतुरो वेदानश्नुते सः (**उग्रः**) तीव्रस्वभावः (**देवनिदः**) ये देवान्निन्दन्ति तान् (**ह**) खलु (**प्रथमाः**) आदिमाः (**अजूर्यन्**) वृद्धा जायन्ते॥ २॥

अन्वयः-त्वः कश्चिदेवैषां विदुषां य ऋघावान् कविशस्तः सत्यो मन्त्रोऽस्ति एतत् विचिकेतत् यश्चतुरश्रिरुग्रो देवनिदो हन्ति त्रिरश्रिं चिकेतत् ते प्रथमा ह खलु प्रथमाश्चनाजूर्यन्॥ २॥

भावार्थः-ये मनुष्याः विद्वन्निन्दां विहाय निन्दकान् निवार्य सत्यं ज्ञानं प्राप्य सत्याः विद्या अध्यापयन्तः सत्यमुपदिशन्तश्च पृथुसुखा जायन्ते ते धन्याः सन्ति॥ २॥

पदार्थः-(**त्वः**) कोई ही (**एषाम्**) इन विद्वानों में जो ऐसा है कि (**ऋघावान्**) बहुत स्तुति और सत्य असत्य की विवेचना करनेवाली मतियों से युक्त (**कविशस्तः**) मेधावी कवियों ने प्रशंसित किया (**सत्यः**) अव्यभिचारी (**मन्त्रः**) विचार है (**एतत्**) इसको (**विचिकेतत्**) विशेषता से जानता है और जो (**चतुरश्रिः**) चारों वेदों को प्राप्त होता वह (**उग्रः**) तीव्र स्वभाववाला (**देवनिदः**) जो विद्वानों की निन्दा करते हैं, उनको (**हन्ति**) मारता और (**त्रिरश्रिम्**) जो तीनों अर्थात् वाणी, मन और शरीर से प्राप्त किया जाता है, ऐसे उत्तम पदार्थ को जानता है, उक्त वे सब (**प्रथमाः**) आदिम अर्थात् अग्रगामी अगुआ (**ह**) ही हैं और वे प्रथम (**चन**) ही (**अजूर्यन्**) बुड्ढे होते हैं॥ २॥

भावार्थः-जो मनुष्य विद्वानों की निन्दा को छोड़ निन्दकों को निवार के सत्य ज्ञान को प्राप्त हो, सत्य विद्याओं को पढ़ाते हुए और सत्य का उपदेश करते हुए विस्तृत सुख को प्राप्त होते हैं, वे धन्य हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत्॥ ३॥

अपात्। एति। प्रथमा। पत्ऽवतीनाम्। कः। तत्। वाम्। मित्रावरुणा। आ। चिकेत। गर्भः। भारम्। भरति। आ। चित्। अस्य। ऋतम्। पिपर्त्ति। अनृतम्। नि। तारीत्॥३॥

पदार्थः-(**अपात्**) अविद्यमाना पादा यस्याः सा विद्या (**एति**) प्राप्नोति (**प्रथमा**) आदिमा (**पद्वतीनाम्**) प्रशस्ताः पादा विभागा विद्यन्ते यासां तासाम् (**कः**) (**तत्**) ताम् (**वाम्**) युवाभ्याम् (**मित्रावरुणा**) सुहृद्वरावध्यापकोपदेशकौ (**आ**) (**चिकेत**) जानीयात् (**गर्भः**) यो गृह्णाति सः (**भारम्**) पोषम् (**भरति**) धरति (**आ**) (**चित्**) अपि (**अस्य**) (**ऋतम्**) सत्यम् (**पिपर्त्ति**) पूर्णं करोति (**अनृतम्**) मिथ्याभाषणादिकं कर्म (**नि**) (**तारीत्**) उल्लङ्घते॥३॥

अन्वयः-हे मित्रावरुणा! या पद्वतीनां प्रथमाऽपादेति तत् वां क आ चिकेत यो गर्भो भारमाभरति चिदप्यस्य संसारस्य मध्ये ऋतं पिपर्त्ति सोऽनृतं नितारीत्॥३॥

भावार्थः-येऽनृतं विहाय सत्यं धृत्वा संभारान् सञ्चिन्वन्ति ते सत्यां विद्यां प्राप्नुवन्ति॥३॥

पदार्थः-हे (**मित्रावरुणा**) श्रेष्ठ मित्र पढ़ाने और उपदेश करनेवाले विद्वानो! जो (**पद्वतीनाम्**) प्रशंसित विभागोंवाली क्रियाओं में (**प्रथमा**) प्रथम (**अपात्**) विना विभागवाली विद्या (**एति**) प्राप्त होती है (**तत्**) उसको (**वाम्**) तुम से (**कः**) कौन (**आ, चिकेत**) जाने और जो (**गर्भः**) ग्रहण करनेवाला जन (**भारम्**) पुष्टि को (**आ, भरति**) सुशोभित करता वा अच्छे प्रकार धारण करता है (**चित्**) और भी (**अस्य**) इस संसार के बीच (**ऋतम्**) सत्य व्यवहार को (**पिपर्त्ति**) पूर्ण करता है सो (**अनृतम्**) मिथ्याभाषण आदि काम को (**नि, तारीत्**) निरन्तर उल्लङ्घता है॥३॥

भावार्थः-जो झूठ को छोड़ सत्य को धारण कर अपने सब सामान इकट्ठे करते हैं, वे सत्यविद्या को प्राप्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम्।
अनवपृग्णा विततता वसानं प्रियं मित्रस्य वरुणस्य धाम॥४॥

प्रऽयन्तम्। इत्। परि। जारम्। कनीनाम्। पश्यामसि। न। उपऽनिपद्यमानम्। अनवऽपृग्णा। विऽततता। वसानम्। प्रियम्। मित्रस्य। वरुणस्य। धाम॥४॥

पदार्थः-(**प्रयन्तम्**) प्रयत्नं कुर्वन्तम् (**इत्**) एव (**परि**) (**जारम्**) वयोहानिकारकम् (**कनीनाम्**) कामयमानानाम् (**पश्यामसि**) (**न**) (**उपनिपद्यमानम्**) समीपे प्राप्नुवन्तम् (**अनवपृग्णा**) संपर्करहितानि (**विततता**) विस्तृतानि तेजांसि (**वसानम्**) आच्छादयन्तम् (**प्रियम्**) (**मित्रस्य**) सुहृदः (**वरुणस्य**) श्रेष्ठस्य (**धाम**) सुखधारणसाधकं गृहम्॥४॥

अन्वयः-हे मनुष्या! यथा वयं कनीनां जारं प्रयन्तमुपनिपद्यमानमनवपृग्णा विताता वसानं सूर्यमिव मित्रस्य वरुणस्येत्प्रियं धाम परि पश्यामसि। अस्माद्विरुद्धा न भवेम तथा यूयमप्येतत् प्राप्नुत॥४॥

भावार्थः-मनुष्या यथा रात्रीणां निहन्तारं स्वप्रकाशविस्तारकसूर्यं दृष्ट्वा कार्य्याणि साध्नुवन्ति तथाऽविद्यान्धकारनाशकविद्याप्रकाशकमाप्ताऽध्यापकोपदेशकसङ्गं प्राप्य क्लेशान् हन्युः॥४॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(कनीनाम्)** कामना करती हुई प्रजाओं की **(जारम्)** अवस्था हरनेवाले **(प्रयन्तम्)** अच्छे यत्न करते **(उपनिपद्यमानम्)** समीप प्राप्त होते **(अनवपृग्णा)** सम्बन्धरहित अर्थात् अलग के पदार्थ जो **(विताता)** विथरे हैं उनको **(वसानम्)** आच्छादन करते अर्थात् अपने प्रकाश से प्रकाशित करते हुए सूर्य के समान **(मित्रस्य)** मित्र वा **(वरुणस्य)** श्रेष्ठ विद्वान् के **(इत्)** ही **(प्रियम्)** प्रिय **(धाम)** सुखसाधक घर को **(परि, पश्यामसि)** देखते हैं, इससे विरुद्ध **(न)** न हों, वैसे तुम भी इसको प्राप्त होओ॥४॥

भावार्थः-मनुष्य लोग जैसे रात्रियों के निहन्ता अपने प्रकाश का विस्तार करते हुए सूर्य को देख कर कार्य्यों को सिद्ध करते हैं, वैसे अविद्यान्धकार का नाश और विद्या का प्रकाश करनेवाले आप्त अध्यापक और उपदेशक के सङ्ग को पाकर क्लेशों को नष्ट करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः॥५॥

अनश्वः। जातः। अनभीशुः। अर्वा। कनिक्रदत्। पतयत्। ऊर्ध्वऽसानुः। अचित्तम्। ब्रह्म। जुजुषुः। युवानः। प्र। मित्रे। धाम। वरुणे। गृणन्तः॥५॥

पदार्थः-**(अनश्वः)** अविद्यमानतुरङ्गः **(जातः)** प्रकटः **(अनभीशुः)** नियामकरश्मिरहितः **(अर्वा)** प्रापकः **(कनिक्रदत्)** शब्दयन् **(पतयत्)** गच्छन् **(ऊर्ध्वसानुः)** ऊर्ध्वं सानवः शिखरा यस्य सः **(अचित्तम्)** चेतनतारहितम् **(ब्रह्म)** धनादियुक्तमन्नम् **(जुजुषुः)** सेवेरन् **(युवानः)** युवावस्थां प्राप्ताः **(प्र)** **(मित्रे)** सख्यौ **(धाम)** स्थानम् **(वरुणे)** उत्तमे **(गृणन्तः)** प्रशंसन्तः॥५॥

अन्वयः-ये युवानोऽनभीशुरनश्वः कनिक्रदत्पतयज्जात ऊर्ध्वसानुरर्वा सूर्य्य इव मित्रे वरुणे धाम गृणन्तः सन्तोऽचित्तं ब्रह्म प्रजुजुषुस्ते बलवन्तो जायन्ते॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽश्वयानादिरहित आकाश ऊर्ध्वं स्थितः सूर्य्य ईश्वराधारेण राजते तथा विद्वद्विद्याधारा मनुष्याः पुष्कलं धनमन्नं च प्राप्य धर्म्ये व्यवहारे विराजन्ते॥५॥

पदार्थः-जो (**युवानः**) युवावस्था को प्राप्त जन (**अनभीशुः**) नियम करनेवाली किरणों से रहित (**अनश्वः**) जिसके जल्दी चलनेवाले घोड़े नहीं (**कनिक्रदत्**) और वार वार शब्द करता वा (**पतयत्**) गमन करता हुआ (**जातः**) प्रसिद्ध हुआ और (**ऊर्ध्वसानुः**) जिसके ऊपर को शिखा (**अर्वा**) प्राप्त होनेवाले सूर्य्य के समान (**मित्रे**) मित्र वा (**वरुणे**) उत्तम जन के निमित्त (**धाम**) स्थान की (**गृणन्तः**) प्रशंसा करते हुए (**अचित्तम्**) चित्तरहित (**ब्रह्म**) वृद्धि को प्राप्त धन आदि पदार्थों से युक्त अन्न को (**प्र, जुजुषुः**) सेवें वे बलवान् होते हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे घोड़े वा रथ आदि सवारी से रहित आकाश के बीच ऊपर को स्थित सूर्य ईश्वर के अवलम्ब से प्रकाशमान होता है, वैसे विद्वानों की विद्या के आधारभूत मनुष्य बहुत धन और अन्न को पाकर धर्मयुक्त व्यवहार में विराजमान होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन्।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत्॥६॥

आ। धेनवः। मामतेयम्। अवन्तीः। ब्रह्मऽप्रियम्। पीपयन्। सस्मिन्। ऊधन्। पित्वः। भिक्षेत। वयुनानि। विद्वान्। आसा। आऽविवासन्। अदितिम्। उरुष्येत्॥६॥

पदार्थः-(**आ**) (**धेनवः**) (**मामतेयम्**) ममताया अपत्यम् (**अवन्तीः**) रक्षन्त्यः (**ब्रह्मप्रियम्**) ब्रह्म वेदाध्ययनं प्रियं यस्य तम् (**पीपयन्**) वर्द्धयेयुः (**सस्मिन्**) स्वस्मिन्। अत्र **छान्दसो वर्णलोपो वे**ति वलोपः। (**ऊधन्**) ऊधनि दुग्धाधारे (**पित्वः**) अन्नस्य (**भिक्षेत**) याचेत (**वयुनानि**) प्रज्ञानानि (**विद्वान्**) (**आसा**) आस्येन (**आविवासन्**) समन्तात् (**अदितिम्**) अविनाशिकां विद्याम् (**उरुष्येत्**) सेवेत॥६॥

अन्वयः-यथा धेनवः सस्मिन्नूधन्भवेन दुग्धेन वत्सान् पुष्यन्ति तथा या स्त्रियो ब्रह्मप्रियं मामतेयमवन्तीः सत्य आपीपयन् यथा वा विद्वानासा पित्वो भिक्षेताऽदितिमाविवासन् वयुनान्युरुष्येत्तथाऽध्यापिका स्त्री पाठकाः पुरुषा अन्यान् विद्याशिक्षा ग्राहयेयुः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मातरः स्वापत्यानि दुग्धादिदानेन वर्द्धयन्ति, तथा विदुष्यः स्त्रियो विद्वांसः पुरुषाः कुमारीः कुमारांश्च विद्यासुशिक्षाभ्यां वर्द्धयेरन्॥६॥

पदार्थः-जैसे (**धेनवः**) धेनु गौयें (**सस्मिन्**) अपने (**ऊधन्**) ऐन में हुए दूध से बछड़ों को पुष्ट करती हैं, वैसे जो स्त्री (**ब्रह्मप्रियम्**) वेदाध्ययन जिसको प्रिय उस (**मामतेयम्**) ममत्व से माने हुए अपने पुत्र की (**अवन्तीः**) रक्षा करती हुई (**आ, पीपयन्**) उसकी वृद्धि उन्नति करती हैं वा जैसे (**विद्वान्**) विद्यावान् जन (**आसा**) मुख से (**पित्वः**) अन्न की (**भिक्षेत**) याचना करे और (**अदितिम्**) न नष्ट होनेवाली विद्या को

(आविवासन्) सब ओर से सेवन करता हुआ **(वयुनानि)** उत्तम ज्ञानों को **(उरुष्येत्)** सेवे वैसे पढ़ानेवाले पुरुष औरों को विद्या और सिखावट का ग्रहण करावें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे माता जन अपने लड़कों को दूध आदि के देने से बढ़ाती हैं, वैसे विदुषी स्त्री और विद्वान् पुरुष कुमार और कुमारियों को विद्या और अच्छी शिक्षा से बढ़ावें, उन्नति युक्त करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वां॑ मित्रावरुणा ह॒व्यजु॑ष्टिं नम॑सा देवा॒ववं॑सा ववृत्याम्।
अ॒स्माक॒ं ब्रह्म॒ पृत॑नासु सह्या अ॒स्माक॑ं वृ॒ष्टिर्दि॒व्या सु॑पा॒रा॥७॥२२॥

आ। वा॒म्। मि॒त्रा॒व॒रु॒णा॒। ह॒व्यऽजु॑ष्टिम्। नम॑सा। दे॒वौ॒। अव॑सा। व॒वृ॒त्या॒म्। अ॒स्माक॑म्। ब्रह्म॑। पृत॑नासु। स॒ह्याः॒। अ॒स्माक॑म्। वृ॒ष्टिः॒। दि॒व्या। सु॒ऽपा॒रा॥७॥

पदार्थः-**(आ)** **(वाम्)** युवाभ्याम् **(मित्रावरुणा)** सुहृद्वरौ **(हव्यजुष्टिम्)** आदातव्यसेवाम् **(नमसा)** अन्नेन **(देवौ)** दिव्यस्वभावौ **(अवसा)** रक्षणाद्येन कर्मणा **(ववृत्याम्)** वर्त्तयेयम्। अत्र **बहुलं छन्दसी**ति शपः श्लुः। **(अस्माकम्)** **(ब्रह्म)** धनम् **(पृतनासु)** मनुष्येषु **(सह्याः)** सहनं कुर्य्याः **(अस्माकम्)** **(वृष्टिः)** दुष्टानां शक्तिबन्धिका शक्तिः **(दिव्या)** शुद्धा **(सुपारा)** सुखेन पारः पूर्तिर्यस्याः सा॥७॥

अन्वयः-हे देवौ मित्रावरुणा! यथाहं वां नमसा हव्यजुष्टिमाववृत्यां तथा युवामवसाऽस्माकं पृतनासु ब्रह्म वर्द्धयेतम्। हे विद्वन्! याऽस्माकं दिव्या सुपारा वृष्टिरस्ति तां त्वं सह्याः॥७॥

भावार्थः-यथा विद्वांसोऽतिप्रीत्याऽस्मभ्यं विद्याः प्रदद्युस्तथा वयमेतानतिश्रद्धया सेवेमहि यतोऽस्माकं शुद्धा प्रशंसा सर्वत्र विदिता स्यादिति॥७॥

अत्राध्यापकोपदेशकशिष्यक्रमवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति द्विपञ्चाशदुत्तरं शततमं १५२ सूक्तं द्वाविंशो २२ वर्गश्च समाप्तः॥

पदार्थः-हे **(देवौ)** दिव्य स्वभाववाले **(मित्रावरुणा)** मित्र और उत्तम जन! जैसे मैं **(वाम्)** तुम दोनों की **(नमसा)** अन्न से **(हव्यजुष्टिम्)** ग्रहण करने योग्य सेवा को **(आ, ववृत्याम्)** अच्छे प्रकार वर्त्तूं, वैसे तुम दोनों **(अवसा)** रक्षा आदि काम से **(अस्माकम्)** हमारे **(पृतनासु)** मनुष्यों में **(ब्रह्म)** धन की वृद्धि कराइये। हे विद्वन्! जो **(अस्माकम्)** हमारी **(दिव्या)** शुद्ध **(सुपारा)** जिससे कि सुख के साथ सब कामों की परिपूर्णता हो, ऐसी **(वृष्टिः)** दुष्टों की शक्ति बांधनेवाली शक्ति है, उसको **(सह्याः)** सहो॥७॥

भावार्थः–जैसे विद्वान् जन अति प्रीति से हमारे लिये विद्याओं को देवें, वैसे हम लोग इनको अत्यन्त श्रद्धा से सेवें, जिससे हमारी शुद्ध प्रशंसा सर्वत्र विदित हो॥७॥

इस सूक्त में पढ़ाने और उपदेश करनेवाले तथा उन शिष्यों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यहाँ एक सौ बावनवाँ १५२ सूक्त और बाईसवां २२ वर्ग पूरा हुआ॥

यजामह इत्यस्य चतुर्ऋचस्य त्रिपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। मित्रावरुणौ देवते। १,२ निचृत् त्रिष्टुप्। ३ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्मित्रावरुणगुणानाह॥

अब एक सौ त्रेपनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में फिर मित्र-वरुण के गुणों का वर्णन करते हैं॥

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति॥ १॥

यजामहे। वाम्। महः। सऽजोषाः। हव्येभिः। मित्रावरुणा। नमःऽभिः। घृतैः। घृतस्नू इति घृतऽस्नू। अध। यत्। वाम्। अस्मे इति। अध्वर्यवः। न। धीतिऽभिः। भरन्ति॥ १॥

पदार्थः-(**यजामहे**) सत्कुर्महे (**वाम्**) युवाभ्याम् (**महः**) महत् (**सजोषाः**) समानप्रीताः (**हव्येभिः**) दातुमर्हैः (**मित्रावरुणा**) सुहृद्वरौ (**नमोभिः**) अन्नादिभिः (**घृतैः**) आज्यादिभी रसैः (**घृतस्नू**) घृतस्य स्रावकौ (**अध**) अनन्तरम् (**यत्**) (**वाम्**) युवाभ्याम् (**अस्मे**) अस्मभ्यम् (**अध्वर्यवः**) अध्वरं अहिंसाधर्मकाममिच्छवः (**न**) इव (**धीतिभिः**) अङ्गुलिभिः (**भरन्ति**) धरन्ति॥ १॥

अन्वयः-हे घृतस्नू मित्रावरुणा! वां सजोषा वयं धीतिभिरध्वर्यवो न हव्येभिर्नमोभिर्घृतैर्महो यजामहेऽध यद् वामस्मे च विद्वांसो भरन्ति तं धरतां च॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यजमाना अग्निहोत्राद्यनुष्ठानैः सर्वस्य सुखं वर्द्धयन्ति, तथा सर्वे विद्वांसोऽनुतिष्ठन्तु॥ १॥

पदार्थः-हे (**घृतस्नू**) घृत फैलाने (**मित्रावरुणा**) मित्र और श्रेष्ठ जनो! (**वाम्**) तुम दोनों का (**सजोषाः**) समान प्रीति किये हुए हम लोग (**धीतिभिः**) अंगुलियों से (**अध्वर्यवः**) अहिंसा धर्म की कामनावालों के (**न**) समान (**हव्येभिः**) देने योग्य (**नमोभिः**) अन्नादि पदार्थों से (**घृतैः**) और घी आदि रसों से (**महः**) अत्यन्त (**यजामहे**) सत्कार करते हैं, (**अध**) इसके अनन्तर (**यत्**) जिस व्यवहार को (**वाम्**) तुम दोनों के लिये और (**अस्मे**) हमारे लिये विद्वान् जन (**भरन्ति**) धारण करते हैं, उस व्यवहार को धारण करो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे यजमान अग्निहोत्र आदि अनुष्ठानों से सबके सुख को बढ़ाते हैं, वैसे समस्त विद्वान् जन अनुष्ठान करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन्॥ २॥

प्रऽस्तुतिः। वाम्। धाम। न। प्रऽयुक्तिः। अयामि। मित्रावरुणा। सुऽवृक्तिः। अनक्ति। यत्। वाम्। विदथेषु। होता। सुम्नम्। वाम्। सूरिः। वृषणौ। इयक्षन्॥ २॥

पदार्थः-(**प्रस्तुतिः**) प्रकृष्टा स्तुतिर्यस्य सः (**वाम्**) युवाभ्याम् (**धाम**) (**न**) इव (**प्रयुक्तिः**) प्रकृष्टा युक्तिर्यस्य सः (**अयामि**) एमि प्राप्नोमि (**मित्रावरुणा**) सुहृद्वरावध्यापकोपदेष्टारौ (**सुवृक्तिः**) शोभना वृक्तिर्वर्जनं यस्य सः (**अनक्ति**) कामयते (**यत्**) (**वाम्**) युवाभ्याम् (**विदथेषु**) विज्ञानेषु (**होता**) दाता (**सुम्नम्**) सुखम् (**वाम्**) युवाभ्याम् (**सूरिः**) विद्वान् (**वृषणौ**) सुखवर्षकौ (**इयच्छन्**) प्राप्तुमिच्छन्॥ २॥

अन्वयः-वृषणौ मित्रावरुणेयक्षन् सूरिः सुवृक्तिः प्रस्तुतिर्होता प्रयुक्तिरहं धाम न वामयामि यद्यः सूरिर्वां विदथेष्वनक्ति वां सुम्नं वां प्रयच्छति तमप्यहमयामि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या पापहारकाः प्रशंसितगुणग्राहका विद्वत्सङ्गप्रियाः सर्वेभ्यः सुखप्रदा भवन्ति ते कल्याणभाजो भवन्ति॥ २॥

पदार्थः-हे (**वृषणौ**) सुखवृष्टि करनेहारे (**मित्रावरुणा**) मित्र और श्रेष्ठ जन (**इयक्षन्**) प्राप्त होने की इच्छा करता हुआ (**सूरिः**) विद्वान् (**सुवृक्तिः**) जिसका सुन्दर रोकना (**प्रस्तुतिः**) और उत्तम स्तुति (**होता**) वह ग्रहण करनेवाला (**प्रयुक्तिः**) उत्तम युक्ति में (**धाम**) स्थान के (**न**) समान (**वाम्**) तुम दोनों को (**अयामि**) प्राप्त होता हूँ। वा (**यत्**) जो विद्वान् (**वाम्**) तुम दोनों से (**विदथेषु**) विज्ञानों में (**अनक्ति**) कामना करता है वा (**वाम्**) तुम दोनों के लिये (**सुम्नम्**) सुख देता है, उसको मैं प्राप्त होता हूँ॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य आप पाप हरने और प्रशंसित गुणों को ग्रहण करनेवाले, जिनको विद्वानों का सङ्ग प्यारा है और सबके लिये सुख देनेवाले होते हैं, वे कल्याण को सेवनेवाले होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता॥ ३॥

पीपाय। धेनुः। अदितिः। ऋताय। जनाय। मित्रावरुणा। हविःऽदे। हिनोति। यत्। वाम्। विदथे। सपर्यन्। सः। रातऽहव्यः। मानुषः। न। होता॥ ३॥

पदार्थः-(**पीपाय**) वर्द्धयति (**धेनुः**) दुग्धप्रदा गौरिव (**अदितिः**) अखण्डिता (**ऋताय**) सत्यं प्राप्ताय (**जनाय**) प्रसिद्धविदुषे (**मित्रावरुणा**) सत्योपदेशकौ (**हविर्दे**) यो हवींषि ददाति तस्मै (**हिनोति**)

वर्द्धयति **(यत्)** यः **(वाम्)** युवाम् **(विदथे)** विज्ञाने **(सपर्यन्)** सेवमानः **(सः) (रातहव्यः)** रातानि दत्तानि हव्यानि येन सः **(मानुषः)** मनुष्यः **(न)** इव **(होता)** ग्रहीता॥३॥

अन्वयः-हे मित्रावरुणा! यद्योऽदितिर्धेनुरिव हविर्दे ऋताय जनाय सुम्नं पीपाय विदथे वां सपर्यन् रातहव्यो होता मानुषो न हिनोति स जन उत्तमो भवति॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये विद्यादानग्रहणकुशला अध्यापकोपदेशकाः सर्वान् वर्द्धयन्ति, ते शुभगुणैः सर्वतो वर्द्धन्ते॥३॥

पदार्थः-हे **(मित्रावरुणा)** सत्य उपदेश करनेवाले मित्रावरुणो! **(यत्)** जो **(अदितिः)** अखण्डित, विनाश को नहीं प्राप्त हुई **(धेनुः)** दूध देनेवाली गौ के समान **(हविर्दे)** ग्रहण करने योग्य पदार्थों को देता उस **(ऋताय)** सत्य व्यवहार को प्राप्त हुए **(जनाय)** प्रसिद्ध विद्वान् के लिये **(सुम्नम्)** सुख को **(पीपाय)** बढ़ाता और **(विदथे)** विज्ञान के निमित्त **(वाम्)** तुम दोनों की **(सपर्यन्)** सेवा करता हुआ **(रातहव्यः)** जिसने ग्रहण करने योग्य पदार्थ दिये वह **(होता)** लेनेवाले **(मानुषः)** मनुष्य के **(न)** समान **(हिनोति)** वृद्धि को प्राप्त कराता है और **(सः)** वह जन उत्तम होता है॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो विद्या देने-लेने में कुशल, पढ़ाने और उपदेश करनेवाले सबको उन्नति देते हैं, वे शुभ गुणों से सबसे अधिक उन्नति को पाते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒त वां॑ वि॒क्षु मद्या॒स्वन्धो॒ गाव॒ आप॑श्च पीपयन्त दे॒वीः।
उ॒तो नो॑ अ॒स्य पू॒र्व्यः पति॒र्दन् वी॒तं पा॒तं पय॑स उ॒स्रिया॑याः॥४॥२३॥

उ॒त। वा॒म्। वि॒क्षु। मद्या॑सु। अन्धः॑। गावः॑। आपः॑। च॒। पी॒प॒य॒न्त॒। दे॒वीः॑। उ॒तो इति॑। नः॒। अ॒स्य। पू॒र्व्यः॑। पति॑ः। दन्। वी॒तम्। पा॒तम्। पय॑सः। उ॒स्रिया॑याः॥४॥

पदार्थः-**(उत) (वाम्)** युवाम् **(विक्षु)** प्रजासु **(मद्यासु)** हर्षणीयासु **(अन्धः)** अन्नम् **(गावः)** वाण्यः **(आपः)** जलानि **(च) (पीपयन्त)** वर्द्धयन्ति **(देवीः)** दिव्याः **(उतो) (नः)** अस्माकम् **(अस्य)** अध्यापनकर्मणः **(पूर्व्यः)** पूर्वैः कृतः **(पतिः)** पालयिता **(दन्)** ददन्। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(वीतम्)** व्याप्नुतम् **(पातम्)** पिबतम् **(पयसः)** दुग्धस्य **(उस्रियायाः)** दुग्धदाया धेनोः। **उस्रियेति गोनामसु पठितम्।** (निघं०२.११)॥४॥

अन्वयः-हे मित्रावरुणौ यथा देवीर्गाव आपश्च मद्यासु विक्षु वां पीपयन्तोताऽन्धः प्रदद्युः। उतो पूर्व्यः पतिः नोऽस्माकमस्योस्रियायाः पयसो दन् वर्त्तते तथा युवां विद्यां वीतं दुग्धं च पातम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽत्र गोवत्सुखप्रदाः प्राणवत् प्रियाः प्रजासु वर्त्तन्ते तेऽतुलमानन्दमाप्नुवन्ति॥४॥

अत्र मित्रावरुणगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिपञ्चाशदुत्तरं शततमं १५३ सूक्तं त्रयोविंशो २३ वर्गश्च समाप्तः॥

पदार्थः-हे मित्र और वरुण श्रेष्ठ जन! जैसे **(देवीः)** दिव्य **(गावः)** वाणी **(आपः, च)** और जल **(मद्यासु)** हर्षित करने योग्य **(विक्षु)** प्रजाजनों में **(वाम्)** तुम दोनों को **(पीपयन्त)** उन्नति देते हैं **(उत)** और **(अन्धः)** अन्न अच्छे प्रकार देवें **(उतो)** और **(पूर्व्यः)** पूर्वजों ने नियत किया हुआ **(पतिः)** पालना करनेवाला **(नः)** हमारे **(अस्य)** पढ़ाने के काम सम्बन्धी **(उस्रियायाः)** दुग्ध देने वाली गौ के **(पयसः)** दुग्ध को **(दन्)** देता हुआ वर्त्तमान है, वैसे तुम दोनों विद्या को **(वीतम्)** व्याप्त होओ और दुग्ध **(पातम्)** पिओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो यहाँ गौओं के समान सुख देनेवाले और प्राण के समान प्रिय प्रजाजनों में वर्त्तमान हैं, वे इस संसार में अतुल आनन्द को प्राप्त होते हैं॥४॥

इस सूक्त में मित्र और वरुण के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ त्रेपनवां १५३ सूक्त और तेईसवां २३ वर्ग समाप्त हुआ॥

विष्णोरित्यस्य षडर्चस्य चतु:पञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषि:। विष्णुर्देवता। १,२ विराट्त्रिष्टुप् ३,४,६ निचृत् त्रिष्टुप। ५ त्रिष्टुप् छन्द:। धैवत: स्वर:॥

अथेश्वरमुक्तिपदवर्णनमाह॥

अब छ: ऋचावाले १५४ एक सौ चौपनवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में ईश्वर और मुक्तिपद का वर्णन करते हैं॥

विष्णोर्नु कं॑ वी॒र्या॑णि॒ प्र वो॑चं॒ य: पार्थि॑वानि विम॒मे रजां॑सि।
यो अस्क॑भाय॒दुत्त॑रं स॒धस्थं॑ विचक्रमाणस्त्रे॒धोरु॑गा॒य:॥ १॥

विष्णो॑:। नु। क॒म्। वी॒र्या॑णि। प्र। वो॒च॒म्। य:। पार्थि॑वानि। वि॒ऽम॒मे। रजां॑सि। य:। अस्क॑भायत्। उत्ऽत॑रम्। स॒धऽस्थ॑म्। वि॒ऽच॒क्र॒मा॒ण:। त्रे॒धा। उ॒रु॒गा॒य:॥ १॥

पदार्थ:-(**विष्णो:**) वेवेष्टि व्याप्नोति सर्वत्र स विष्णुस्तस्य (**नु**) सद्य: (**कम्**) सुखम् (**वीर्याणि**) पराक्रमान् (**प्र**) (**वोचम्**) वदेयम् (**य:**) (**पार्थिवानि**) पृथिव्यां विदितानि (**विममे**) (**रजांसि**) लोकान् (**य:**) (**अस्कभायत्**) स्तभ्नाति (**उत्तरम्**) प्रलयादनन्तरं कारणाख्यम् (**सधस्थम्**) सहस्थानम् (**विचक्रमाण:**) विशेषेण प्रचालयन् (**त्रेधा**) त्रिभि: प्रकारै: (**उरुगाय:**) य ऊरुभिर्बहुभिर्मन्त्रैर्गीयते स्तूयते वा॥ १॥

अन्वय:-हे मनुष्या! य: पार्थिवानि रजांसि नु विममे य उरुगाय उत्तरं सधस्थं त्रेधा विचक्रमाणोऽस्कभायत्तस्य विष्णोर्वीर्याणि प्रवोचमनेन कं प्राप्नुयां तथा यूयमपि कुरुत॥ १॥

भावार्थ:-यथा सूर्य: स्वाकर्षणेन सर्वान् भूगोलान् धरति तथा सूर्यादींल्लोकान् कारणजीवांश्च जगदीश्वरो धत्ते य इमानसंख्यलोकान् सद्यो निर्ममे यस्मिन्निमे प्रलीयन्ते च स एव सर्वैरुपास्य:॥ १॥

पदार्थ:-हे मनुष्यो! (**य:**) जो (**पार्थिवानि**) पृथिवी में विदित (**रजांसि**) लोकों को अर्थात् पृथिवी में विख्यात सब स्थलों को (**नु**) शीघ्र (**विममे**) अनेक प्रकार से रचता वा (**य:**) जो (**उरुगाय:**) बहुत वेदमन्त्रों से गाया जाता वा स्तुति किया जाता (**उत्तरम्**) प्रलय से अनन्तर (**सधस्थम्**) एक साथ के स्थान को (**त्रेधा**) तीन प्रकार से (**विचक्रमाण:**) विशेषकर कँपाता हुआ (**अस्कभायत्**) रोकता है, उस (**विष्णो:**) सर्वत्र व्याप्त होनेवाले परमेश्वर के (**वीर्याणि**) पराक्रमों को (**प्र, वोचम्**) अच्छे प्रकार कहूं और उससे (**कम्**) सुख पाऊं, वैसे तुम करो॥ १॥

भावार्थ:-जैसे सूर्य अपनी आकर्षण शक्ति से सब भूगोलों को धारण करता है, वैसे सूर्य्यादि लोक, कारण और जीवों को जगदीश्वर धारण कर रहा है। जो इन असंख्य लोकों को शीघ्र निर्माण करता और जिसमें प्रलय को प्राप्त होते हैं, वही सबको उपासना करने योग्य है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥ २॥

प्र। तत्। विष्णुः। स्तवते। वीर्येण। मृगः। न। भीमः। कुचरः। गिरिऽस्थाः। यस्य। उरुषु। त्रिषु। विऽक्रमणेषु। अधिऽक्षियन्ति। भुवनानि। विश्वा॥ २॥

पदार्थः-(**प्र**) (**तत्**) सः (**विष्णुः**) सर्वव्यापीश्वरः (**स्तवते**) स्तौति (**वीर्येण**) स्वपराक्रमेण (**मृगः**) (**न**) इव (**भीमः**) भयङ्करः (**कुचरः**) यः कुत्सितं चरति सः (**गिरिष्ठाः**) यो गिरौ तिष्ठति (**यस्य**) (**उरुषु**) विस्तीर्णेषु (**त्रिषु**) नामस्थानजन्मसु (**विक्रमणेषु**) विविधेषु सृष्टिक्रमेषु (**अधिक्षियन्ति**) आधाररूपेण निवसन्ति (**भुवनानि**) भवन्ति भूतानि येषु तानि लोकजातानि (**विश्वा**) सर्वाणि॥ २॥

अन्वयः-हे मनुष्या! यस्य निर्मितेषूरुषु त्रिषु विक्रमणेषु विश्वा भुवनान्यधिक्षियन्ति, तत् स विष्णुः स्ववीर्येण कुचरो गिरिष्ठा मृगो भीमो नेव विश्वाँल्लोकान् प्रस्तवते॥ २॥

भावार्थः-अत्रोपमालङ्कारः। नहि कश्चिदपि पदार्थ ईश्वरसृष्टिनियमक्रममुल्लङ्घितुं शक्नोति, यो धार्मिकाणां मित्र इवाह्लादप्रदो दुष्टानां सिंह इव भयप्रदो न्यायादिगुणधर्त्ता परमात्माऽस्ति, स एव सर्वेषामधिष्ठाता न्यायाधीशोऽस्तीति वेदितव्यम्॥ २॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिस जगदीश्वर के निर्माण किये हुए (**त्रिषु**) जन्म, नाम और स्थान इन तीन (**विक्रमणेषु**) विविध प्रकार के सृष्टिक्रमों में (**विश्वा**) समस्त (**भुवनानि**) लोक-लोकान्तर (**अधिक्षियन्ति**) आधाररूप से निवास करते हैं (**तत्**) वह (**विष्णुः**) सर्वव्यापी परमात्मा अपने (**वीर्येण**) पराक्रम से (**कुचरः**) कुटिलगामी अर्थात् ऊंचे-नीचे नाना प्रकार विषम स्थलों में चलने और (**गिरिष्ठाः**) पर्वत कन्दराओं में स्थिर होनेवाले (**मृगः**) हरिण के (**न**) समान (**भीमः**) भयङ्कर समस्त लोक-लोकान्तरों को (**प्रस्तवते**) प्रशंसित करता है॥ २॥

भावार्थः-कोई भी पदार्थ ईश्वर और सृष्टि के नियम को उल्लङ्घन नहीं सकता है। जो धार्मिक जनों को मित्र के समान आनन्द देने, दुष्टों को सिंह के समान भय देने और न्यायादि गुणों का धारण करनेवाला परमात्मा है, वही सबका अधिष्ठाता और न्यायाधीश है, यह जानना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः॥ ३॥

प्र। विष्णवे। शूषम्। एतु। मन्म। गिरिऽक्षिते। उरुऽगायाय। वृष्णे। य। इदम्। दीर्घम्। प्रऽयतम्। सधऽस्थम्। एकः। विऽममे। त्रिऽभिः। इत्। पदेभिः॥ ३॥

पदार्थः-(**प्र**) (**विष्णवे**) न्यायकाय (**शूषम्**) बलम् (**एतु**) प्राप्नोतु (**मन्म**) विज्ञानम् (**गिरिक्षिते**) गिरयो मेघाः शैला वा क्षितो व्युष्टा यस्मिँस्तस्मै (**उरुगायाय**) बहुभिः प्रशंसिताय (**वृष्णे**) अनन्तवीर्याय (**यः**) (**इदम्**) (**दीर्घम्**) बृहत् (**प्रयतम्**) प्रयत्नसाध्यम् (**सधस्थम्**) तत्त्वावयवैः सह स्थानम् (**एकः**) असहायोऽद्वितीयः (**विममे**) विशेषेण रचयति (**त्रिभिः**) स्थूलसूक्ष्मातिसूक्ष्मैरवयवैः (**इत्**) एव (**पदेभिः**) ज्ञातुमर्हैः॥ ३॥

अन्वयः-हे मनुष्या! य एक इत् त्रिभिः पदेभिरिदं दीर्घं प्रयतं सधस्थं प्रविममे तस्मै वृष्णे गिरिक्षित उरुगायाय विष्णवे मन्म शूषमेतु॥ ३॥

भावार्थः-न खलु कश्चिदप्यनन्तबलं जगदीश्वरमन्तरेदं विचित्रं जगत्स्रष्टुं धर्त्तुं प्रलाययितुं च शक्नोति तस्मादेतं विहायान्यस्योपासनं केनचिदपि नैव कार्य्यम्॥ ३॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**एकः**) एक (**इत्**) ही परमात्मा (**त्रिभिः**) तीन अर्थात् स्थूल, सूक्ष्म, अतिसूक्ष्म (**पदेभिः**) जानने योग्य अंशों से (**इदम्**) इस (**दीर्घम्**) बढ़े हुए (**प्रयतम्**) उत्तम यत्नसाध्य (**सधस्थम्**) सिद्धान्तावयवों से एक साथ के स्थान को (**प्रविममे**) विशेषता से रचता है, उस (**वृष्णे**) अनन्त पराक्रमी (**गिरिक्षिते**) मेघ वा पर्वतों को अपने-अपने में स्थिर रखनेवाले (**उरुगायाय**) बहुत प्राणियों से वा बहुत प्रकारों से प्रशंसित (**विष्णवे**) व्यापक परमात्मा के लिये (**मन्म**) विज्ञान (**शूषम्**) और बल (**एतु**) प्राप्त होवे॥ ३॥

भावार्थः-कोई भी अनन्त पराक्रमी जगदीश्वर के विना इस विचित्र जगत् के रचने, धारण करने और प्रलय करने को समर्थ नहीं हो सकता, इससे इसको छोड़ और की उपासना किसी को न करनी चाहिये॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा॥ ४॥

यस्य। त्री। पूर्णा। मधुना। पदानि। अक्षीयमाणा। स्वधया। मदन्ति। यः। ऊम् इति। त्रिऽधातु। पृथिवीम्। उत। द्याम्। एकः। दाधार। भुवनानि। विश्वा॥ ४॥

पदार्थः-(**यस्य**) जगदीश्वरस्य मध्ये (**त्री**) त्रीणि (**पूर्णा**) पूर्णानि (**मधुना**) मधुराद्येन गुणेन (**पदानि**) प्राप्तुमर्हाणि (**अक्षीयमाणा**) क्षयरहितानि (**स्वधया**) स्वस्वरूपधारणया क्रियया (**मदन्ति**) (**यः**)

(उ) **(त्रिधातु)** त्रयः सत्वरजस्तम आदिधातवो येषु तानि **(पृथिवीम्)** भूमिम् **(उत)** अपि **(द्याम्)** सूर्य्यम् **(एकः)** अद्वैतः **(दाधार)** धरति पोषयति वा **(भुवनानि)** **(विश्वा)** सर्वाणि॥४॥

अन्वयः-हे मनुष्या! यस्य रचनायां मधुना पूर्णाऽक्षीयमाणा त्री पदानि स्वधया मदन्ति य एक उ पृथिवीमुत द्यां त्रिधातु विश्वा भुवनानि दाधार स एव परमात्मा सर्वैर्वेदितव्यः॥४॥

भावार्थः-योऽनादिकारणात् सूर्यादिप्रकाशवत् क्षितीरुत्पाद्य सर्वैर्भोग्यैः पदार्थैः सह संयोज्याऽऽनन्दयति तदुणकर्मोपासनेनानन्दो हि सर्वैर्वर्द्धनीयः॥४॥

पदार्थः-हे मनुष्यो! **(यस्य)** जिस ईश्वर के बीच **(मधुना)** मधुरादि गुण से **(पूर्णा)** पूर्ण **(अक्षीयमाणा)** विनाशरहित **(त्री)** तीन **(पदानि)** प्राप्त होने योग्य पद अर्थात् लोक **(स्वधया)** अपने-अपने रूप के धारण करने रूप क्रिया से **(मदन्ति)** आनन्द को प्राप्त होते हैं **(यः)** और जो **(एकः)** **(उ)** एक अर्थात् अद्वैत परमात्मा **(पृथिवीम्)** पृथिवीमण्डल **(उत)** और **(द्याम्)** सूर्यमण्डल तथा **(त्रिधातु)** जिनमें सत्व, रजस्, तमस् ये तीनों धातु विद्यमान उन **(विश्वा)** समस्त **(भुवनानि)** लोक-लोकान्तरों को **(दाधार)** धारण करता है, वही परमात्मा सब को मानने योग्य है॥४॥

भावार्थः-जो अनादि कारण से सूर्य आदि के तुल्य प्रकाशमान पृथिवियों को उत्पन्न कर समस्त भोग्य पदार्थों के साथ उनका संयोग करा उनको आनन्दित करता है, उसके गुण कर्म की उपासना से आनन्द ही सबको बढ़ाना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तदस्य॑ प्रि॒यम॒भि पाथो॑ अश्यां॒ नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति।

उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था विष्णोः॑ प॒दे प॑र॒मे मध्व॒ उत्सः॑॥५॥

तत्। अ॒स्य॒। प्रि॒यम्। अ॒भि। पाथः॑। अ॒श्या॒म्। नरः॑। यत्र॑। दे॒व॒ऽयवः॑। मद॑न्ति। उ॒रु॒क्र॒मस्य॑। सः। हि। बन्धुः॑। इ॒त्था। विष्णोः॑। प॒दे। प॒र॒मे। मध्वः॑। उत्सः॑॥५॥

पदार्थः-**(तत्)** **(अस्य)** **(प्रियम्)** येन प्रीणाति तत् **(अभि)** **(पाथः)** वर्त्म **(अश्याम्)** प्राप्नुयाम् **(नरः)** नेतारः **(यत्र)** यस्मिन् **(देवयवः)** ये देवान् दिव्यान् भोगान् कामयन्ते **(मदन्ति)** आनन्दयन्ति **(उरुक्रमस्य)** बहुपराक्रमस्य **(सः)** **(हि)** खलु **(बन्धुः)** दुःखविनाशकत्वेन सुखप्रदः **(इत्था)** अनेन प्रकारेण **(विष्णोः)** व्यापकस्य **(पदे)** प्राप्तव्ये **(परमे)** अत्युत्तमे मोक्षे पदे **(मध्वः)** मधुरादिरसयुक्तस्य **(उत्सः)** कूप इव तृप्तिकरः॥५॥

अन्वयः-अहं यत्र देवयवो नरो मन्दति तदस्योरुक्रमस्य विष्णोः प्रियं पाथोऽभ्यश्यां यस्य परमे पदे मध्व उत्स इव तृप्तिकरो गुणो वर्त्तते स हि इत्था नो बन्धुरिवास्ति॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये परमेश्वरेण वेदद्वारा दत्तमाज्ञामनुगच्छन्ति, ते मोक्षसुखमश्नुवते। यथा जना बन्धुं प्राप्य सहायं लभन्ते तृषिता वा मधुरजलं कूपं प्राप्य तृप्यन्ति तथा परमेश्वरं प्राप्य पूर्णाऽनन्दा जायन्ते॥५॥

पदार्थः-मैं **(यत्र)** जिसमें **(देवयवः)** दिव्य लोगों की कामना करनेवाले **(नरः)** अग्रगन्ता उत्तम जन **(मदन्ति)** आनन्दित होते हैं **(तत्)** उस **(अस्य)** इस **(उरुक्रमस्य)** अनन्त पराक्रमयुक्त **(विष्णोः)** व्यापक परमात्मा के **(प्रियम्)** प्रिय **(पाथः)** मार्ग को **(अभ्यश्याम्)** सब ओर से प्राप्त होऊं, जिस परमात्मा के **(परमे)** अत्युत्तम **(पदे)** प्राप्त होने योग्य मोक्ष पद में **(मध्वः)** मधुरादि गुणयुक्त पदार्थ का **(उत्सः)** कूपसा तृप्ति करनेवाला गुण वर्त्तमान है **(सः, हि)** वही **(इत्था)** इस प्रकार से हमारा **(बन्धुः)** भाई के समान दुःख विनाश करने से सुख देनेवाला है॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो परमेश्वर की वेद्वद्वारा दी हुई आज्ञा के अनुकूल चलते हैं, वे मोक्ष सुख को प्राप्त होते हैं। जैसे जन बन्धु को प्राप्त होकर सहायता को पाते हैं वा प्यासे जन मीठे जल से पूर्ण कुये को पाकर तृप्त होते हैं, वैसे परमेश्वर को प्राप्त होकर पूर्ण आनन्द को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि॥६॥२४॥

ता। वाम्। वास्तूनि। उश्मसि। गमध्यै। यत्र। गावः। भूरिऽशृङ्गाः। अयासः। अत्र। अह। तत्। उरुऽगायस्य। वृष्णः। परमम्। पदम्। अव। भाति। भूरि॥६॥

पदार्थः- **(ता)** तानि **(वाम्)** युवयोरध्यापकोपदेशकयोः परमयोगिनोः **(वास्तूनि)** वासाऽधिकरणानि **(उश्मसि)** कामयेमहि **(गमध्यै)** गन्तुम् **(यत्र)** यस्मिन् **(गावः)** किरणाः **(भूरिशृङ्गाः)** भूरिशृङ्गाणीवोत्कृष्टानि तेजांसि येषु ते **(अयासः)** प्राप्ताः **(अत्र)** **(अह)** **(तत्)** **(उरुगायस्य)** बहुधा प्रशंसितस्य **(वृष्णः)** सुखवर्षकस्य **(परमम्)** प्रकृष्टम् **(पदम्)** प्राप्तुमर्हम् **(अव)** **(भाति)** प्रकाशते **(भूरि)** बहु॥६॥

इमं मन्त्रं यास्कमुनिरेवं व्याचष्टेः-**तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा भूरीति बहुनो नामधेयं भवति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वाऽयासोऽयनाः। तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि। पादः**

पद्यतेस्तन्निधानात्पदं पशुपादप्रकृतिः प्रभागपादः प्रभागपादसामान्यादितराणि पदानीति। (निरु०२.७)॥६॥

अन्वयः–हे आप्तौ विद्वांसौ! यत्रायासो भूरिशृङ्गा गावः सन्ति ता तानि वास्तूनि वां युवयोर्गमध्यै वयमुश्मसि। यदुरुगायस्य वृष्णः परमेश्वरस्य परमं पदं भूर्यवभाति तदत्राह वयमुश्मसि॥६॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यत्र विद्वांसो मुक्तिं प्राप्नुवन्ति तत्र किञ्चिदप्यन्धकारो नास्ति प्राप्तमोक्षाश्च भास्वरा भवन्ति तदेवाप्तानां मुक्तिपदं ब्रह्म सर्वप्रकाशकमस्तीति॥६॥

अत्र परमेश्वरमुक्तिपदवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति चतुःपञ्चाशदुत्तरं शततमं १५४ सूक्त चतुर्विंशो २४ वर्गश्च समाप्तः॥

पदार्थः–हे शास्त्रवेत्ता विद्वानो! **(यत्र)** जहाँ **(अयासः)** प्राप्त हुए **(भूरिशृङ्गाः)** बहुत सींगों के समान उत्तम तेजोंवाले **(गावः)** किरण हैं **(ता)** उन **(वास्तूनि)** स्थानों को **(वाम्)** तुम अध्यापक और उपदेशक परम योगीजनों के **(गमध्यै)** जाने को हम लोग **(उश्मसि)** चाहते हैं। जो **(उरुगायस्य)** बहुत प्रकारों से प्रशंसित **(वृष्णः)** सुख वर्षानेवाले परमेश्वर को **(परमम्)** प्राप्त होने योग्य **(पदम्)** मोक्षपद **(भूरि)** अत्यन्त **(अव, भाति)** उत्कृष्टता से प्रकाशमान है **(तत्)** उसको **(अत्राह)** यहाँ ही हम लोग चाहते हैं॥६॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जहाँ विद्वान् जन मुक्ति पाते हैं, वहाँ कुछ भी अन्धकार नहीं है और वे मोक्ष को प्राप्त हुए प्रकाशमान होते हैं, वही आप्त विद्वानों का मुक्तिपद है सो ब्रह्म सबका प्रकाश करनेवाला है॥६॥

इस सूक्त में परमेश्वर और मुक्ति का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ चौवनवाँ १५४ सूक्त और चौबीसवां १२४ वर्ग समाप्त हुआ॥

प्र वइत्यस्य षड्चस्य पञ्चपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। विष्णुर्देवता। १,३,६ भुरिक् त्रिष्टुप्। ४ स्वराट् त्रिष्टुप्। ५ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ निचृज्जगती छन्दः। निषादः स्वरः॥

अथाध्यापकोपदेशब्रह्मचर्यफलविषयमाह॥

अब एक सौ पचपनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में पढ़ाने, उपदेश करनेवाले और ब्रह्मचर्य सेवन का फल कहते हैं॥

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना॥ १॥

प्र। वः। पान्तम्। अन्धसः। धियाऽयते। महे। शूराय। विष्णवे। च। अर्चत। या। सानुनि। पर्वतानाम्। अदाभ्या। महः। तस्थतुः। अर्वताऽइव। साधुना॥ १॥

पदार्थः-(**प्र**) (**वः**) युष्माकम् (**पान्तम्**) (**अन्धसः**) द्रवीभूतस्यान्नादेः (**धियायते**) प्रज्ञां धारणमिच्छते (**महे**) महते (**शूराय**) शौर्यादिगुणोपेताय (**विष्णवे**) शुभगुणव्याप्ताय (**च**) (**अर्चत**) सत्कुरुत (**या**) यौ (**सानुनि**) शिखरे (**पर्वतानाम्**) मेघानां शैलानां वा (**अदाभ्या**) हिंसितुमयोग्यौ (**महः**) महद्यथास्यात्तथा (**तस्थतुः**) तिष्ठतः (**अर्वतेव**) या ऋच्छति तेनाऽश्वेनेव (**साधुना**) सुशिक्षितेन॥ १॥

अन्वयः-हे मनुष्या! धियायते महे शूराय विष्णवे च वोऽन्धसः पान्तं यूयं प्रार्चत याऽदाभ्या मित्रावरुणौ पर्वतानां सानुन्यर्वतेव साधुना महस्तस्थतुस्तावपि प्रार्चत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्यादानेन सुशिक्षया जनान् विज्ञानेन वर्द्धयन्ति, ते महान्तो भवन्ति॥ १॥

पदार्थः-हे मनुष्यो! (**धियायते**) प्रज्ञा और धारण की इच्छा करनेवाले (**महे**) बड़े और (**शूराय**) शूरता आदि गुणों से युक्त (**विष्णवे, च**) और शुभ गुणों में व्याप्त महात्मा के लिये (**वः**) तुम्हारे (**अन्धसः**) गीले अन्न आदि पदार्थ के (**पान्तम्**) पान को तुम (**प्र, अर्चत**) उत्तमता से सत्कार के साथ देओ। तथा (**या**) जो (**अदाभ्या**) हिंसा न करने योग्य मित्र और वरुण अर्थात् अध्यापक और उपदेशक (**पर्वतानाम्**) पर्वतों के (**सानुनि**) शिखर पर (**अर्वतेव**) जानेवाले घोडे के समान (**साधुना**) उत्तम सिखाये हुए शिष्य से (**महः**) बड़ा जैसे हो वैसे (**तस्थतुः**) स्थित होते अर्थात् जैसे घोड़ा से ऊंचे स्थान पर पहुंच जावें, वैसे विद्या पढ़ाकर कीर्त्ति के शिखर पर चढ़ जाते हैं, उनका भी उत्तम सत्कार करो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्यादान, उत्तम शिक्षा और विज्ञान से जनों को वृद्धि देते हैं, वे महात्मा होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वे॒षमि॒त्था स॒मर॑णं॒ शिमी॑वतो॒रिन्द्रा॑विष्णू सु॒तपा वा॑मुरुष्यति।
या मर्त्या॑य प्रतिधी॒यमा॑न॒मित् कृ॒शानो॒रस्तु॑रस॒नामु॑रुष्यथः॥ २॥

त्वे॒षम्। इ॒त्था। स॒म्ऽअर॑णम्। शिमी॑ऽवतोः। इन्द्रा॑विष्णू॒ इति॑। सु॒त॒ऽपाः। वा॒म्। उ॒रु॒ष्य॒ति॒। या। मर्त्या॑य। प्र॒ति॒ऽधी॒यमा॑नम्। इत्। कृ॒शानोः॑। अस्तुः॑। अ॒स॒नाम्। उ॒रु॒ष्य॒थः॥ २॥

पदार्थः-(**त्वेषम्**) प्रकाशम् (**इत्था**) अनेन प्रकारेण (**समरणम्**) सम्यक् प्रापकम् (**शिमीवतोः**) प्रशस्तकर्मयुक्तयोः (**इन्द्राविष्णू**) विद्युत्सूर्याविव (**सुतपाः**) सुतं पाति रक्षति सः (**वाम्**) युवाम् (**उरुष्यति**) वर्द्धयति (**या**) यौ (**मर्त्याय**) मनुष्याय (**प्रतिधीयमानम्**) सम्यक् ध्रियमाणम् (**इत्**) (**कृशानोः**) विद्युतः (**अस्तुः**) प्रक्षेप्तः (**असनाम्**) प्रक्षेपणां क्रियाम् (**उरुष्यथः**) सेवेथाम्॥ २॥

अन्वयः-यः शिमीवतोरध्यापकोपदेशकयोः सकाशात् समरणं त्वेषं प्राप्य मर्त्याय प्रतिधीयमानमुरुष्यति स सुतपा या इन्द्राविष्णू इवाध्यापकोपदेशकौ युवामस्तुः कृशानोरसनां यथेदुरुष्यथ इत्था वां सेवताम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये तपस्विनो जितेन्द्रियाः सन्तो विद्यामभ्यस्यन्ति, ते सूर्यविद्युद्वत्प्रकाशितात्मानो भवन्ति॥ २॥

पदार्थः-जो (**शिमीवतो**) प्रशस्त कर्मयुक्त अध्यापक और उपदेशक की उत्तेजना से (**समरणम्**) अच्छे प्रकार प्राप्ति करानेवाले (**त्वेषम्**) प्रकाश को प्राप्त होकर (**मर्त्याय**) मनुष्य के लिये (**प्रतिधीयमानम्**) अच्छे प्रकार धारण किये हुए व्यवहार को (**उरुष्यति**) बढ़ाता है वह (**सुतपाः**) सुन्दर तपस्यावाला सज्जन पुरुष (**या**) जो (**इन्द्राविष्णू**) बिजुली और सूर्य के समान पढ़ाने और उपदेश करनेवाले तुम दोनों (**अस्तुः**) एक देश से दूसरे देश को पदार्थ पहुँचा देनेवाले (**कृशानोः**) बिजुली रूप आग की (**असनाम्**) पहुंचाने की क्रिया को जैसे (**इत्**) ही (**उरुष्यथः**) सेवते हो (**इत्था**) इसी प्रकार से (**वाम्**) तुम दोनों को सेवें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो तपस्वी जितेन्द्रिय होते हुए विद्या का अभ्यास करते हैं, वे सूर्य और बिजुली के समान प्रकाशितात्मा होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ता ई॑ वर्धन्ति म॒ह्यस्य॒ पौंस्यं॑ नि मा॒तरा॑ नयति रे॒तसे॑ भु॒जे।
दधा॑ति पु॒त्रोऽव॑रं॒ परं॑ पि॒तुर्नाम॑ तृ॒तीय॒मधि॑ रो॒च॒ने दि॒वः॥ ३॥

ताः। ईम्। वर्धन्ति। महि। अस्य। पौंस्यम्। नि। मातरा। नयति। रेतसे। भुजे। दधाति। पुत्रः। अवरम्। परम्। पितुः। नाम। तृतीयम्। अधि। रोचने। दिवः॥३॥

पदार्थः-(**ताः**) विदुष्यः स्त्रियः (**ईम्**) सर्वतः (**वर्द्धन्ति**) वर्द्धयन्ति (**महि**) महत् (**अस्य**) अपत्यस्य (**पौंस्यम्**) पुंसो भावम् (**नि**) नितराम् (**मातरा**) मान्यकर्त्तारौ मातापितरौ (**नयति**) प्राप्नोति (**रेतसे**) वीर्यस्य वर्द्धनाय (**भुजे**) भोगाय (**दधाति**) (**पुत्रः**) जनकपालकः (**अवरम्**) अर्वाचीनम् (**परम्**) प्रकृष्टम् (**पितुः**) जनकस्य सकाशात् (**नाम**) आख्याम् (**तृतीयम्**) त्रयाणां पूरकम् (**अधि**) उपरि (**रोचने**) प्रकाशे (**दिवः**) द्योतमानस्य सूर्यस्य॥३॥

अन्वयः-या विदुष्योऽस्य रेतसे भुजे महि पौंस्यमीं वर्द्धन्ति स ता नयति यतः पुत्रः पितुर्मातुश्च सकाशात् प्राप्तशिक्षो दिवोऽधिरोचनेऽवरं परं तृतीयं च नाम निमातरा च दधाति॥३॥

भावार्थः-त एव मातापितरौ हितैषिणौ ये स्वाऽपत्यानि दीर्घब्रह्मचर्येण पूर्णा विद्याः सुशिक्षा युवावस्थाञ्च प्रापय्य विवाहयन्ति, त एव प्रथमं द्वितीयं तृतीयं च पदार्थं प्राप्य सूर्यवत् सुप्रकाशात्मनो भवन्ति॥३॥

पदार्थः-जो विदुषी स्त्रियां (**अस्य**) इस लड़के के (**रेतसे**) वीर्य बढ़ाने और (**भुजे**) भोगादि पदार्थ प्राप्त होने के लिये (**महि**) अत्यन्त (**पौंस्यम्**) पुरुषार्थ को (**ईम्**) सब ओर से (**वर्द्धन्ति**) बढ़ाती हैं वह (**ताः**) उनको (**नयति**) प्राप्त होता है। इसमें कारण यह है कि जिससे (**पुत्रः**) पुत्र (**पितुः**) पिता और माता की उत्तेजना से शिक्षा को प्राप्त हुआ (**दिवः**) प्रकाशमान सूर्यमण्डल के (**अधि, रोचने**) ऊपरी प्रकाश में (**अवरम्**) निकृष्ट (**परम्**) उत्कृष्ट वा पिछले-अगले वा उरले और (**तृतीयम्**) तीसरे (**नाम**) नाम को तथा (**नि, मातरा**) निरन्तर मान करनेवाले माता-पिता को (**दधाति**) धारण करता है॥३॥

भावार्थः-वे ही माता-पिता हितैषी होते हैं, जो अपने सन्तानों की दीर्घ ब्रह्मचर्य से पूरी विद्या, उत्तम शिक्षा और युवावस्था को प्राप्त करा विवाह कराते हैं। वे ही प्रथम ब्रह्मचर्य, दूसरी पूरी विद्या, उत्तम शिक्षा और तृतीय युवावस्था को प्राप्त होकर सूर्य के समान प्रकाशमान होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे॥४॥

तत्ऽतत्। इत्। अस्य। पौंस्यम्। गृणीमसि। इनस्य। त्रातुः। अवृकस्य। मीळ्हुषः। यः। पार्थिवानि। त्रिऽभिः। इत्। विगामऽभिः। उरु। क्रमिष्ट। उरुऽगायाय। जीवसे॥४॥

पदार्थः-(**तत्तत्**) (**इत्**) एव (**अस्य**) कृतब्रह्मचर्यस्य जितेन्द्रियस्य (**पौंस्यम्**) पुरुषार्थस्य भावम् (**गृणीमसि**) स्तुमः (**इनस्य**) समर्थस्येश्वरस्य (**त्रातुः**) रक्षकस्य (**अवृकस्य**) चौर्यादिदोषरहितस्य (**मीढुषः**) वीर्यसेचकस्य (**यः**) (**पार्थिवानि**) पृथिवीविकारजातानि (**त्रिभिः**) सत्वादिगुणैः (**इत्**) एव (**विगामभिः**) विविधप्रशंसायुक्तैः (**उरु**) बहु (**क्रमिष्ट**) क्रमते (**उरुगायाय**) बहुप्रशंसिताय (**जीवसे**) जीवनाय प्राणधारणाय॥४॥

अन्वयः-यो विगामभिस्त्रिभिरुरुगायाय जीवसे यद्यत् पार्थिवानीदुरु क्रमिष्ट तत्तत् त्रातुरिनस्येवास्यावृकस्य मीढुषः पौंस्यमिद्वयं गृणीमसि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सुखेन चिरंजीवनाय दीर्घं ब्रह्मचर्यं संसेव्यारोग्येण धातुसाम्यवर्द्धनेन शरीरबलं विद्याधर्मयोगाभ्यासवर्द्धनेनाऽऽत्मबलमुन्नीय सदैव सुखे स्थातव्यम्। य इमामीश्वराज्ञां पालयन्ति ते बाल्यावस्थायां स्वयंवरविवाहं कदाचिन्न कुर्वन्ति, नैतेन विना पूर्णा पुरुषार्थवृद्धिः संभवति॥४॥

पदार्थः-(**यः**) जो (**विगामभिः**) विविध प्रशंसायुक्त (**त्रिभिः**) तीन सत्व, रजस्, तमो गुणों के साथ (**उरुगायाय**) बहुत प्रशंसित (**जीवसे**) जीवन के लिये (**पार्थिवानि**) पृथिवी के किरणों से उत्पन्न हुए (**इत्**) ही पदार्थों को (**उरु, क्रमिष्ट**) क्रम से अत्यन्त प्राप्त होता है (**तत्तत्**) उस-उस (**त्रातुः**) रक्षा करनेवाले (**इनस्य**) समर्थ ईश्वर के समान (**अस्य**) किये हुए ब्रह्मचर्य जितेन्द्रिय इस (**अवृकस्य**) चोरी आदि दोषरहित (**मीढुषः**) वीर्य सेचन समर्थ पुरुष के (**पौंस्यम्**) पुरुषार्थ की (**इत्**) ही हम लोग (**गृणीमसि**) प्रशंसा करते हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि सुख से चिरकाल तक जीने के लिये दीर्घ ब्रह्मचर्य को अच्छे प्रकार सेवन कर आरोग्य और धातुओं की समता बढ़ाने से शरीर के बल और विद्या, धर्म तथा योगाभ्यास के बढ़ाने से आत्मबल की उन्नति कर सदैव सुख में रहें। जो लोग इस ईश्वर की आज्ञा का पालन करते हैं, वे बाल्यावस्था में स्वयंवर विवाह कभी नहीं करते। इसके विना पूर्ण पुरुषार्थ की वृद्धि की संभावना नहीं है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः॥५॥

द्वे इति। इत्। अस्य। क्रमणे इति। स्वः।दृशः। अभि।ख्याय। मर्त्यः। भुरण्यति। तृतीयम्। अस्य। नकिः। आ। दधर्षति। वयः। चन। पतयन्तः। पतत्रिणः॥५॥

पदार्थः-(**द्वे**) शरीरात्मबले (**इत्**) इव (**अस्य**) ब्रह्मचारिणः (**क्रमणे**) अनुक्रमेण गमने (**स्वर्दृशः**) यः सुखं पश्यति तस्य (**अभिख्याय**) अभितः प्रख्यातुम् (**मर्त्यः**) मनुष्यः (**भुरण्यति**) धरति (**तृतीयम्**) त्रित्वसंख्याकं विद्याजन्म (**अस्य**) (**नकिः**) निषेधे (**आ**) समन्तात् (**दधर्षति**) धर्षितुमिच्छति (**वयः**) (**चन**) अपि (**पतयन्तः**) ऊर्ध्वमधो गच्छन्तः (**पतत्रिणः**) पक्षिणः॥५॥

अन्वयः-यो मर्त्यः स्वर्दृशोऽस्य द्वे क्रमणे अभिख्याय भुरण्यति स पतयन्तः पतत्रिणो वयश्चनेदिवास्य तृतीयं नकिरादधर्षति॥५॥

भावार्थः-ये मातापितरः स्वापत्यानां ब्रह्मचर्याऽनुक्रमेण विद्याजन्म वर्द्धयन्ति ते स्वापत्यानि दीर्घायूंषि बलिष्ठानि सुशीलानि कृत्वा नित्यं मोदन्ते॥५॥

पदार्थः-जो (**मर्त्यः**) मनुष्य (**स्वर्दृशः**) सुख देनेवाले (**अस्य**) इस ब्रह्मचारी के (**द्वे, क्रमणे**) दो अनुक्रम से चलनेवाले अर्थात् वर्त्ताव वर्तने वाले शरीर-बल तथा आत्मबल को (**अभिख्याय**) सब ओर से प्रख्यात करने को (**भुरण्यति**) धारण करता है, वह (**पतयन्तः**) ऊपर नीचे जाते हुए (**पतत्रिणः**) पंखोंवाले (**वयः**) पखेरू (**चन**) भी (**इत्**) जैसे किसी पदार्थ का विस्तार करें वैसे भी (**अस्य**) इस ब्रह्मचारी के (**तृतीयम्**) तीसरे विद्या जन्म का (**नकिः, आ, दधर्षति**) तिरस्कार नहीं करता है॥५॥

भावार्थः-जो माता-पिता अपने सन्तानों की ब्रह्मचर्य के अनुक्रम से विद्या जन्म को बढ़ाते हैं, वे अपने सन्तानों को दीर्घ आयुवाले, बलवान्, सुन्दरशीलयुक्त करके नित्य हर्षित होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत्।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम्॥६॥२५॥

चतुर्भिः। साकम्। नवतिम्। च। नामऽभिः। चक्रम्। न। वृत्तम्। व्यतीन्। अवीविपत्। बृहत्ऽशरीरः। विऽमिमानः। ऋक्वऽभिः। युवा। अकुमारः। प्रति। एति। आऽहवम्॥६॥

पदार्थः-(**चतुर्भिः**) चतुष्ट्वसंख्याकैः (**साकम्**) सार्द्धम् (**नवतिम्**) (**च**) (**नामभिः**) आख्याभिः (**चक्रम्**) (**न**) इव (**वृत्तम्**) (**व्यतीन्**) विशेषेण प्राप्तबलान् (**अवीविपत्**) अतिशयेन भ्रामयति (**बृहच्छरीरः**) बृहत् महच्छरीरं यस्य (**विमिमानः**) विशेषेण धातूनां निर्माता (**ऋक्वभिः**) प्रशंसितैर्गुणकर्मस्वभावैः (**युवा**) प्राप्तयौवनावस्थः (**अकुमारः**) पञ्चविंशतिवर्षातीतः (**प्रति**) (**एति**) प्राप्नोति (**आहवम्**) प्रतिष्ठाऽह्वानम्॥६॥

अन्वयः-यो विमिमानो बृहच्छरीरोऽकुमारो युवा वृत्तं चक्रं न चतुर्भिर्नामभिः साकं नवतिं च व्यतीनेकोऽप्यवीविपत् स ऋक्वभिराहवं प्रत्येति॥६॥

भावार्थः-अत्रोपमालङ्काराः। याऽष्टाचत्वारिंशद्वर्षप्रमिताखण्डितं ब्रह्मचर्यं सेवते, स एकोऽसहयोऽपि गोलचक्रवच्चतुर्णवतिं योद्धॄन् भ्रामयितुं शक्नोति। मनुष्याणामादशमात्संवत्सराद् बाल्यावस्था। आपञ्चविंशतेः कुमारावस्था ततः षट्विंशवर्षारम्भाद्युवावस्थारम्भः पूरुषस्य सप्तदशाद्वर्षात्कन्यायाश्च युवावस्थारम्भोऽस्ति। अत ऊर्ध्वं ये स्वयंवरं विवाहं कुर्वन्ति कारयन्ति च ते महाभाग्यशालिनो जायन्ते॥६॥

अत्राध्यापकोपदेशकब्रह्मचर्यफलवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति पञ्चपञ्चाशदुत्तरं १५५ शततमं सूक्तं पञ्चविंशो २५ वर्गश्च समाप्तः॥

पदार्थः-जो (**विमिमानः**) विशेषता से धातुओं की वृद्धि का निर्माण करता हुआ (**बृहच्छरीरः**) बली स्थूल शरीरवाला (**अकुमारः**) पच्चीस वर्ष की अवस्था से निकल गया (**युवा**) किन्तु युवावस्था को प्राप्त ब्रह्मचारी (**वृत्तम्**) गोल (**चक्रम्**) चक्र के (**न**) समान (**चतुर्भिः**) चार (**नामभिः**) नामों के (**साकम्**) साथ (**नवतिं, च**) और नव्वे अर्थात् चौरानवें नामों से (**व्यतीन्**) विशेषता से जिनको बल प्राप्त हुआ उन बलवान् योद्धाओं को एक भी (**अवीविपत्**) अत्यन्त भ्रमाता है, वह (**ऋक्वभिः**) प्रशंसित गुण, कर्म, स्वभावों से (**आहवम्**) प्रतिष्ठा के साथ बुलाने को (**प्रति, एति**) प्राप्त होता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अड़तालीस वर्ष भर अखण्डित ब्रह्मचर्य का सेवन करता है, वह अकेला भी गोलचक्र के समान चौरानवे योद्धाओं को भ्रमा सकता है। मनुष्यों में दश वर्ष तक बाल्यावस्था, पच्चीस वर्ष तक कुमारावस्था, तदनन्तर छब्बीसवें वर्ष के आरम्भ से युवावस्था पुरुष की होती है और सत्रहवें वर्ष से कन्या की युवावस्था का आरम्भ है। इसके उपरान्त जो स्वयंवर विवाह को करते-कराते हैं, वे महाभाग्यशाली होते हैं॥६॥

इस सूक्त में अध्यापकोपदेशक और ब्रह्मचर्य के फल के वर्णन से इसके अर्थ की पिछले सूक्त के अर्थ साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ पचपनवां १५५ सूक्त और पच्चीसवां २५ वर्ग पूरा हुआ॥

भवेत्यस्य पञ्चर्चस्य षट्पञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। विष्णुर्देवता। १ निचृत्त्रिष्टुप्। २ विराट् त्रिष्टुप्। ५ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ निचृज्जगती। ४ जगती छन्दः। निषादःस्वरः॥

अथ विद्वदध्यापकाध्येतृगुणानाह॥

अब पांच ऋचावाले एक सौ छप्पनवें सूक्त का आरम्भ है। उसमें आरम्भ से विद्वान् अध्यापक-अध्येताओं के गुणों को कहते हैं॥

भवा॑ मि॒त्रो न शेव्यो॑ घृ॒तासु॑ति॒र्विभू॑तद्युम्न एव॒या उ॑ स॒प्रथा॑:।
अधा॑ ते विष्णो वि॒दुषा॑ चि॒दर्ध्य॒: स्तोमो॑ य॒ज्ञश्च॒ राध्यो॑ ह॒विष्म॑ता॥ १॥

भव॑। मि॒त्रः। न। शेव्यः॑। घृ॒तऽआ॑सुतिः। विभू॑तऽद्युम्नः। ए॒व॒ऽयाः। उ॒म् इति॑। स॒ऽप्रथाः॑। अध॑। ते॒। वि॒ष्णो॒ इति॑। वि॒दुषा॑। चि॒त्। अर्ध्यः॑। स्तोमः॑। य॒ज्ञः। च॒। राध्यः॑। ह॒विष्म॑ता॥ १॥

पदार्थः-(**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**मित्रः**) (**न**) इव (**शेव्यः**) सुखयितुं योग्यः (**घृतासुतिः**) घृतमासूयते येन सः (**विभूतद्युम्नः**) विशिष्टानि भूतानि द्युम्नानि धनानि यशांसि वा यस्य सः (**एवयाः**) एवान् रक्षकान् याति (**उ**) वितर्के (**सप्रथाः**) सप्रख्यातिः (**अध**) अनन्तरम्। अत्र **निपातस्य चे**ति दीर्घः। (**ते**) तव (**विष्णो**) सर्वासु विद्यासु व्यापिन् (**विदुषा**) आप्तेन विपश्चिता (**चित्**) अपि (**अर्ध्यः**) वर्द्धितुं योग्यः (**स्तोमः**) स्तोतुमर्हो व्यवहारः (**यज्ञः**) सङ्गन्तुमर्हो ब्रह्मचर्याख्यः (**च**) (**राध्यः**) संशोधितुं योग्यः (**हविष्मता**) प्रशस्तविद्यादानग्रहणयुक्तेन व्यवहारेण॥ १॥

अन्वयः-हे विष्णो! ते तव योऽर्द्धर्यः स्तोमो यज्ञश्च हविष्मता राध्योऽस्ति तं चानुष्ठायाऽध शेव्यो मित्रो न एवया उ सप्रथा विदुषा चिदपि घृतासुतिर्विभूतद्युम्नस्त्वं भव॥ १॥

भावार्थः-विद्वांसो यस्य ब्रह्मचर्यानुष्ठानाख्ययज्ञस्य वृद्धिं स्तुतिं संसिद्धिं च चिकीर्षन्ति तं संसेव्य विद्वान् भूत्वा सर्वस्य मित्रं भवेत्॥ १॥

पदार्थः-हे (**विष्णो**) समस्त विद्याओं में व्याप्त! (**ते**) तुम्हारा जो (**अर्द्धयः**) बढ़ने (**स्तोमः**) और स्तुति करने योग्य व्यवहार (**यज्ञः, च**) और सङ्गम करने योग्य ब्रह्मचर्य नामवाला यज्ञ (**हविष्मता**) प्रशस्त विद्या देने और ग्रहण करने से युक्त व्यवहार (**राध्यः**) अच्छे प्रकार सिद्ध करने योग्य है, उसका अनुष्ठान आरम्भ कर (**अध**) इसके अनन्तर (**शेव्यः**) सुखी करने योग्य (**मित्रः**) मित्र के (**न**) समान (**एवयाः**) रक्षा करनेवालों को प्राप्त होनेवाला (**उ**) तर्क-वितर्क के साथ (**सप्रथाः**) उत्तम प्रसिद्धियुक्त (**विदुषा**) और आप्त उत्तम विद्वान् के साथ (**चित्**) भी (**घृतासुतिः**) जिससे घृत उत्पन्न होता (**विभूतद्युम्नः**) और जिससे विशेष धन वा यश हुए हों ऐसा तू (**भव**) हो॥ १॥

भावार्थः-विद्वान् जन जिस ब्रह्मचर्यानुष्ठानरूप यज्ञ की वृद्धि, स्तुति और उत्तमता से सिद्धि करने की इच्छा करते हैं, उसका अच्छे प्रकार सेवन कर विद्वान् होके सबका मित्र हो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति।
यो जातमस्य महतो महि ब्रवत् सेदु श्रवोभिर्युज्यं चिदभ्यसत्॥२॥

यः। पूर्व्याय। वेधसे। नवीयसे। सुमत्ऽजानये। विष्णवे। ददाशति। यः। जातम्। अस्य। महतः। महि। ब्रवत्। सः। इत्। ऊम् इति। श्रवःऽभिः। युज्यम्। चित्। अभि। असत्॥२॥

पदार्थः-(**यः**) (**पूर्व्याय**) पूर्वैर्विद्वद्भिः सुशिक्षया निष्पादिताय (**वेधसे**) मेधाविने (**नवीयसे**) अतिशयेनाधीतविद्याय नूतनाय (**सुमज्जानये**) सुष्ठु प्राप्तविद्याय प्रसिद्धाय (**विष्णवे**) विद्याव्याप्तुं शीलाय (**ददाशाति**) ददाति। अत्र **बहुलं छन्दसी**ति शपः श्लुः। (**यः**) (**जातम्**) उत्पन्नं विज्ञानम् (**अस्य**) विद्याविषयस्य (**महतः**) पूजितव्यस्य (**महि**) महत् पूजितम् (**ब्रवत्**) ब्रूयात् (**सः**) (**इत्**) एव (**उ**) वितर्के (**श्रवोभिः**) श्रवणमननिदिध्यासनैः (**युज्यम्**) समाधातुमर्हम् (**चित्**) अपि (**अभि**) आभिमुख्ये (**असत्**) अभ्यासं कुर्यात्॥२॥

अन्वयः-यो नवीयसे सुमज्जानये पूर्व्याय वेधसे विष्णवे ददाशति योऽस्य महतो महि जातं ब्रवत् य उ श्रवोभिर्जातमहि युज्यमभ्यसत् स चिद्विद्वान् जायेत स इदेवाऽध्यापयितुं योग्यो भवेत्॥२॥

भावार्थः-ये निष्कपटतया धीमतो विद्यार्थिनोऽध्यापयन्त्युपदिशन्ति ये च धर्म्येणाऽधीयतेऽभ्यस्यन्ति च तेऽतिशयेन विद्वांसो धार्मिका भूत्वा महत्सुखं यान्ति॥२॥

पदार्थः-(**यः**) जो (**नवीयसे**) अत्यन्त विद्या पढ़ा हुआ नवीन (**सुमज्जानये**) सुन्दरता से पाई हुई विद्या से प्रसिद्ध (**पूर्व्याय**) पूर्वज विद्वानों ने अच्छी सिखावटों से सिखाये हुए (**वेधसे**) मेधावी अर्थात् धीर (**विष्णवे**) विद्या में व्याप्त होने का स्वभाव रखने वाले के लिये विज्ञान (**ददाशति**) देता है वा (**यः**) जो (**अस्य**) इस (**महतः**) सत्कार करने योग्य जन के (**महि**) महान् प्रशंसित (**जातम्**) उत्पन्न हुए विज्ञान को (**ब्रवत्**) प्रकट कहे (**उ**) और (**श्रवोभिः**) श्रवण, मनन और निदिध्यासन अर्थात् अत्यन्त धारण करने-विचारने से अत्यन्त उत्पन्न हुए (**युज्यम्**) समाधान के योग्य विज्ञान का (**अभ्यसत्**) अभ्यास करे (**सः, चित्**) वही विद्वान् हो और (**इत्**) वही पढ़ाने को योग्य हो॥२॥

भावार्थः-जो निष्कपटता से बुद्धिमान् विद्यार्थियों को पढ़ाते वा उनको उपदेश देते हैं और जो धर्मयुक्त व्यवहार से पढ़ते और अभ्यास करते हैं, वे सब अतीव विद्वान् और धार्मिक होकर बड़े सुख को प्राप्त होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमु॑ स्तोतारः पू॒र्व्यं यथा॑ वि॒द ऋ॒तस्य॒ गर्भं॑ ज॒नुषा॑ पिपर्तन।
आस्य॑ जा॒नन्तो॒ नाम॑ चिद्विवक्तन् म॒हस्ते॑ विष्णो सुम॒तिं भ॑जामहे॥ ३॥

तम्। ऊ॒म् इति॑। स्तो॒तारः॑। पू॒र्व्यम्। यथा॑। वि॒द। ऋ॒तस्य॑। गर्भ॑म्। ज॒नुषा॑। पि॒प॒र्त॒न॒। आ। अ॒स्य॒। जा॒नन्तः॑। नाम॑। चि॒त्। वि॒व॒क्त॒न॒। म॒हः। ते। वि॒ष्णो॒ इति॑। सु॒ऽम॒तिम्। भ॒जा॒म॒हे॥ ३॥

पदार्थः-(**तम्**) तमाप्तमध्यापकं विद्वांसम् (**उ**) वितर्के (**स्तोतारः**) सर्वविद्यास्तावकाः (**पूर्व्यम्**) पूर्वैः कृतम् (**यथा**) (**विद**) विजानीत (**ऋतस्य**) सत्यस्य (**गर्भम्**) विद्याजं बोधम् (**जनुषा**) विद्याजन्मना (**पिपर्त्तन**) पिपृत विद्याभिः सेवया वा पूर्णं कुरुत (**आ**) (**अस्य**) (**जानन्तः**) (**नाम**) प्रसिद्धिम् (**चित्**) अपि (**विवक्तन**) वदतोपदिशत (**महः**) महतीम् (**ते**) तव (**विष्णो**) सकलविद्याव्याप्त (**सुमतिम्**) शोभनां प्रज्ञाम् (**भजामहे**) सेवामहे॥ ३॥

अन्वयः-हे स्तोतारो! यथा यूयं जनुषा पूर्व्यं तं विद। ऋतस्य गर्भमु पिपर्त्तन। अस्य चिन्नामाजानन्तो विवक्तन तथा वयमपि विजानीमः पिपृम च। हे विष्णो! वयं यस्य ते महस्सुमतिं भजामहे स भवान् नोऽस्मान् सुशिक्षस्व॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या विद्यावृद्धयेऽनूचानमध्यापकं प्राप्य सुसेव्य सत्या विद्याः प्रयत्नेन गृहीत्वा पूर्णा विद्वांसः स्युः॥ ३॥

पदार्थः-हे (**स्तोतारः**) समस्त विद्याओं की स्तुति करनेवाले सज्जनो! (**यथा**) जैसे तुम (**जनुषा**) विद्या जन्म से (**पूर्व्यम्**) पूर्व विद्वानों ने किये हुए (**तम्**) उस आप्त अध्यापक विद्वान् को (**विद**) जानो और (**ऋतस्य**) सत्य व्यवहार के (**गर्भम्**) विद्यासम्बन्धी बोध को (**उ**) तर्क-वितर्क से (**पिपर्त्तन**) पालो वा विद्याओं से और सेवा से पूरा करो। तथा (**अस्य**) इसका (**चित्**) भी (**नाम**) नाम (**आ, जानन्तः**) अच्छे प्रकार जानते हुए (**विवक्तन**) कहो, उपदेश करो वैसे हम लोग भी जानें, पालें और पूरा करें। हे (**विष्णो**) सकल विद्याओं में व्याप्त विद्वान्! हम जिन (**ते**) आप से (**महः**) महती (**सुमतिम्**) सुन्दर बुद्धि को (**भजामहे**) भजते सेवते हैं, सो आप हम लोगों को उत्तम शिक्षा देवें॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य विद्या की वृद्धि के लिये शास्त्रवक्ता अध्यापक को पाकर और उसकी उत्तम सेवा कर सत्यविद्याओं को अच्छे यत्न से ग्रहण करके पूरे विद्वान् हों॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तम॑स्य॒ राजा॒ वरु॑ण॒स्तम॒श्विना क्रतुं॑ सचन्त मारु॒तस्य॑ वे॒धसः॑।

दा॒धार॒ दक्ष॑मु॒त्त॒मम॑हर्वि॒दं व्र॒जं च॒ विष्णु॒: सखि॑वाँ अपोर्णु॒ते॥ ४॥

तम्। अ॒स्य॒। राजा॑। वरु॑णः। तम्। अ॒श्विना॑। क्रतु॑म्। स॒च॒न्त॒। मारु॑तस्य। वे॒धसः॑। दा॒धार॑। दक्ष॑म्। उ॒त्ऽउ॒त्तम॑म्। अ॒हः॒ऽविद॑म्। व्र॒जम्। च॒। विष्णुः॑। सखि॑ऽवान्। अ॒प॒ऽऊ॒र्णु॒ते॥ ४॥

पदार्थः-(**तम्**) (**अस्य**) (**राजा**) प्रकाशमानः (**वरुणः**) वरः (**तम्**) (**अश्विना**) अध्यापकोपदेशकौ (**क्रतुम्**) कर्म (**सचन्त**) प्राप्नुत (**मारुतस्य**) मरुतामयं तस्य (**वेधसः**) विधातुः (**दाधार**) धरतु (**दक्षम्**) बलम् (**उत्तमम्**) प्रशस्तम् (**अहर्विदम्**) योऽहानि विन्दति तम् (**व्रजम्**) प्राप्तं देशम् (**च**) (**विष्णुः**) स्वदीप्तया व्यापकः सूर्य्यः (**सखिवान्**) बहवो मरुतः सखायो विद्यन्ते यस्य सः (**अपोर्णुते**) उद्घाटयति प्रकाशयति। आच्छादकमन्धकारं निवारयति॥ ४॥

अन्वयः-यः सखिवान् विष्णुरुत्तमं दक्षं दाधाराहर्विदं व्रजं चापोर्णुत तस्यास्य मारुतस्य वेधसस्तं क्रतुं वरुणो राजा तमश्विना च सचन्त॥ ४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽन्ये सज्जना आप्ताद्विदुषो विद्या गृहीत्वा प्रज्ञामुन्नीय पूर्णं बलं प्राप्नुवन्ति। यथा यत्र यत्र सविताऽन्धकारं निवर्त्तयति तथा तत्र तत्र तन्महत्त्वं दृष्ट्वा सर्वे मनुष्याः पूर्णविद्यात् विद्याशिक्षाः प्राप्याऽविद्यान्धकारं निवर्त्तयेयुः॥ ४॥

पदार्थः-जो (**सखिवान्**) बहुत पवनरूप मित्रोंवाला (**विष्णुः**) अपनी दीप्ति से व्यापक सूर्यमण्डल (**उत्तमम्**) प्रशंसित (**दक्षम्**) बल को (**दाधार**) धारण करे और (**अहर्विदम्**) जो दिनों को प्राप्त होता अर्थात् जहाँ दिन होता उस (**व्रजम्, च**) प्राप्त हुए देश को (**अपोर्णुते**) प्रकाशित करता उस (**अस्य**) इस (**मारुतस्य**) पवनरूप सखायोंवाले (**वेधसः**) विधाता सूर्यमण्डल के (**तम्**) उस (**क्रतुम्**) कर्म को (**वरुणः**) श्रेष्ठ (**राजा**) प्रकाशमान सज्जन और (**तम्**) उस कर्म को (**अश्विना**) अध्यापक और उपदेशक लोग (**सचन्त**) प्राप्त होवें॥ ४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे और सज्जन आप्त विद्वान् से विद्या ग्रहण कर उत्तम बुद्धि की उन्नति कर पूरे बल को प्राप्त होते हैं वा जैसे जहाँ-जहाँ सविता अन्धकार को निवृत्त करता है, वैसे वहाँ-वहाँ उस सवितृमण्डल के महत्त्व को देख के समस्त पतले-मोटे, धनी-निर्धनी जन पूर्ण विद्यावाले से विद्या और शिक्षाओं को पाकर अविद्यारूपी अन्धकार को निवृत्त करें॥ ४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ यो वि॒वाय॑ स॒चथा॑य॒ दैव्य॒ इन्द्रा॑य॒ विष्णु॑: सु॒कृते॑ सु॒कृत्त॑रः।
वे॒धा अ॑जिन्वत्रिषध॒स्थ आर्य॑मृ॒तस्य॑ भा॒गे यज॑मान॒माभजत्॥ ५॥ २६॥ २१॥

आ। यः। विवाय। सचथाय। दैव्यः। इन्द्राय। विष्णुः। सुऽकृते। सुकृत्ऽतरः। वेधाः। अजिन्वत्। त्रिऽसधस्थः। आर्यम्। ऋतस्य। भागे। यजमानम्। आ। अभजत्॥५॥

पदार्थः-(**आ**) (**यः**) (**विवाय**) गच्छेत् (**सचथाय**) प्राप्तसम्बन्धाय (**दैव्यः**) विद्वत्सम्बन्धी (**इन्द्राय**) परमैश्वर्याय (**विष्णुः**) प्राप्तविद्यः (**सुकृते**) धर्मात्मने (**सुकृत्तरः**) अतिशयेन सुष्ठु करोति यः (**वेधाः**) मेधावी (**अजिन्वत्**) जिन्वेत् (**त्रिसधस्थः**) त्रिषु यः कर्मोपासनाज्ञानेषु स्थितः (**आर्यम्**) सकलशुभगुणकर्मस्वभावेषु वर्त्तमानम् (**ऋतस्य**) सत्यस्य (**भागे**) सेवने (**यजमानम्**) विद्यादातारम् (**आ**) (**अभजत्**) सेवेत॥५॥

अन्वयः-यो दैव्यस्त्रिसधस्थः सुकृत्तरो विष्णुर्वेधा सचथाय सुकृत इन्द्रायर्त्तस्य भाग आर्यं यजमानमाभजद्यश्च सर्वान् विद्याशिक्षादानेनाजिन्वत् स पूर्णं सुखमाविवाय॥५॥

भावार्थः-ये विद्वत्प्रियाः कृतज्ञाः सुकृतिनः सर्वविद्याविदः सत्यधर्मविद्या प्रापकत्वेन सर्वान् जनान् सुखयन्ति तेऽखिलसुखभाजो जायन्ते॥५॥

अस्मिन् सूक्ते विद्वदध्यापकाऽध्येतृगुणवर्णनोदेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्पञ्चाशदुत्तरं १५६ शततमं सूक्त षड्विंशो २६ वर्ग एकविंशोऽनुवाकश्च समाप्तः॥

पदार्थः-(**यः**) जो (**दैव्यः**) विद्वानों का सम्बन्धी (**त्रिसधस्थः**) कर्म, उपासना और ज्ञान इन तीनों में स्थित (**सुकृत्तरः**) अतीव उत्तम कर्मवाला (**विष्णुः**) विद्या को प्राप्त (**वेधाः**) मेधावी धीरबुद्धि सज्जन (**सचथाय**) धर्म सम्बन्ध को प्राप्त (**सुकृते**) धर्मात्मा (**इन्द्राय**) परमैश्वर्यवान् जन के लिये (**ऋतस्य**) सत्य के (**भागे**) सेवन के निमित्त (**आर्य्यम्**) समस्त शुभ गुण, कर्म और स्वभावों में वर्त्तमान (**यजमानम्**) विद्या देनेवाले को (**आ, अभजत्**) अच्छे प्रकार सेवे और जो सबको विद्या और शिक्षा देने से (**अजिन्वत्**) प्राण पोषण करे, वह पूरे सुख को (**आ, विवाय**) अच्छे प्रकार प्राप्त हो॥५॥

भावार्थः-जो विद्वानों के प्रिय, किये को जानने-माननेवाले, सुकृति सर्वविद्यावेत्ता जन, सत्य धर्म विद्या पहुंचाने से सब जनों को सुख देते हैं, वे अखिल सुख भोगनेवाले होते हैं॥५॥

इस सूक्त में विद्वान् अध्यापक और अध्येताओं के गुणों का वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ छप्पनवां १५६ सूक्त, छब्बीसवां २६ वर्ग और इक्कीसवां २१ अनुवाक पूरा हुआ॥

अबोधीत्यस्य षड्चस्य सप्तपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अश्विनौ देवते। १ त्रिष्टुप्। ५ निचृत् त्रिष्टुप्। ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २,४ जगती। ३ निचृज्जगती छन्दः। निषादः स्वरः॥

अथाश्विगुणानाह॥

अब छः ऋचावाले एक सौ सत्तावनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र से ही अश्वि के गुणों को कहते हैं॥

अबो॑ध्य॒ग्निर्ज्म उदे॑ति॒ सूर्यो॒ व्यु१॑षाश्च॒न्द्रा म॒ह्या॑वो अ॒र्चिषा॑।
आयु॑क्षाताम॒श्विना॒ यात॑वे॒ रथं॒ प्रासा॑वीद्दे॒वः स॑वि॒ता जग॒त् पृथ॑क्॥ १॥

अबो॑धि। अ॒ग्निः। ज्मः। उत्। ए॒ति॒। सूर्यः॑। वि। उ॒षाः। च॒न्द्रा। म॒ही। आ॒व॒रित्या॑वः। अ॒र्चि॒षा॑। अयु॑क्षाताम्। अ॒श्विना॑। यात॑वे। रथ॑म्। प्र। अ॒सा॒वी॒त्। दे॒वः। स॒वि॒ता। जग॑त्। पृथ॑क्॥ १॥

पदार्थः-(**अबोधि**) बुध्यते विज्ञायते (**अग्निः**) विद्युदादिः (**ज्मः**) पृथिव्याः (**उत्**) (**एति**) उदयं प्राप्नोति (**सूर्यः**) (**वि**) (**उषाः**) प्रभातः (**चन्द्रा**) आह्लादप्रदा (**मही**) महती (**आवः**) अवति (**अर्चिषा**) (**अयुक्षाताम्**) अयोजयताम्=युङ्क्थः (**अश्विना**) विद्वांसावाप्ताऽध्यापकोपदेशकौ (**यातवे**) यातुं गन्तुम् (**रथम्**) विमानादियानम् (**प्र**) (**असावीत्**) प्रसुवति (**देवः**) दिव्यगुणः (**सविता**) ऐश्वर्यकारकः (**जगत्**) (**पृथक्**)॥१॥

अन्वयः-यथाऽग्निरबोधि ज्मः सूर्य्य उदेति मही चन्द्रोषा व्यावः सविता देवो वार्चिषा जगत् पृथक् प्रासावीत् तथाऽश्विना यातवे रथमयुक्षाताम्॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युत्सूर्योषसः स्वप्रकाशेन स्वयं प्रकाशिता भूत्वा सर्वं जगत् प्रकाश्यैश्वर्यं प्रापयन्ति तथैवाऽध्यापकोपदेशकाः पदार्थेश्वरविद्याः प्रकाश्याऽखिलमैश्वर्य्यं जनयेयुः॥१॥

पदार्थः-जैसे (**अग्निः**) विद्युदादि अग्नि (**अबोधि**) जाना जाता है, (**ज्मः**) पृथिवी से अलग (**सूर्यः**) सूर्य (**उदेति**) उदय होता है, (**मही**) बड़ी (**चन्द्रा**) आनन्द देनेवाली (**उषाः**) प्रभात वेला (**व्यावः**) फैलती उजाला देती है वा (**सविता**) ऐश्वर्य करनेवाला (**देवः**) दिव्यगुणी सूर्यमण्डल (**अर्चिषा**) अपने किरण समूह से (**जगत्**) मनुष्यादि प्राणिमात्र जगत् को (**पृथक्**) अलग (**प्रासावीत्**) अच्छे प्रकार प्रेरणा देता है, वैसे (**अश्विना**) अध्यापक और उपदेशक विद्वान् (**यातवे**) जाने के लिये (**रथम्**) विमानादि यान को (**अयुक्षाताम्**) युक्त करते हैं॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुली, सूर्य और प्रभातवेला अपने प्रकाश से आप प्रकाशित हो समस्त जगत् को प्रकाशित कर ऐश्वर्य की प्राप्ति कराते हैं, वैसे ही अध्यापक

और उपदेशक लोग पदार्थ तथा ईश्वरसम्बन्धी विद्याओं को प्रकाशित कर समस्त ऐश्वर्य की उत्पत्ति करावें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम्।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि॥२॥

यत्। युञ्जाथे इति। वृषणम्। अश्विना। रथम्। घृतेन। नः। मधुना। क्षत्रम्। उक्षतम्। अस्माकम्। ब्रह्म। पृतनासु। जिन्वतम्। वयम्। धना। शूरऽसाता। भजेमहि॥२॥

पदार्थः-(**यत्**) यतः (**युञ्जाथे**) (**वृषणम्**) परशक्तिप्रतिबन्धकम् (**अश्विना**) सभासेनेशौ (**रथम्**) विमानादियानम् (**घृतेन**) उदकेन (**नः**) अस्माकम् (**मधुना**) मधुरादिगुणयुक्तेन रसेन (**क्षत्रम्**) क्षत्रियकुलम् (**उक्षतम्**) सिञ्चतम् (**अस्माकम्**) (**ब्रह्म**) ब्राह्मणकुलम् (**पृतनासु**) सेनासु (**जिन्वतम्**) प्रीणीतम् (**वयम्**) प्रजासेनाजनाः (**धना**) धनानि (**शूरसाता**) शूरैः संभजनीये संग्रामे (**भजेमहि**) सेवेमहि॥२॥

अन्वयः-हे अश्विना! युवां यद्वृषणं रथं युञ्जाथे ततो घृतेन मधुना नः क्षत्रमुक्षतमस्माकं पृतनासु ब्रह्म जिन्वतं वयं शूरसाता धना भजेमहि॥२॥

भावार्थः-मनुष्यै राजनीत्यङ्गै राष्ट्रं रक्षित्वा धनादिकं वर्द्धयित्वा संग्रामाञ्जित्वा सर्वेभ्यः सुखोन्नतिः कार्य्या॥२॥

पदार्थः-हे (**अश्विना**) सभा और सेना के अधीशो! तुम (**यत्**) जिससे (**वृषणम्**) शत्रुओं की शक्ति को रोकनेवाले (**रथम्**) विमान आदि यान को (**युञ्जाथे**) युक्त करते हो, इससे (**घृतेन**) जल और (**मधुना**) मधुरादि गुणयुक्त रस से (**नः**) हम लोगों के (**क्षत्रम्**) क्षत्रिय कुल को (**उक्षतम्**) सींचो, (**अस्माकम्**) हमारी (**पृतनासु**) सेनाओं में (**ब्रह्म**) ब्राह्मण कुल को (**जिन्वतम्**) प्रसन्न करो और (**वयम्**) हम प्रजा सेना जन (**शूरसाता**) शूरों के सेवने योग्य संग्राम में (**धना**) धनों को (**भजेमहि**) सेवन करें॥२॥

भावार्थः-मनुष्यों को राजनीति के अङ्गों से राज्य को रख कर, धनादि को बढ़ाय और संग्रामों को जीत कर सबके लिये सुख की उन्नति करनी चाहिये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः।
त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद् द्विपदे चतुष्पदे॥३॥

अ॒र्वाङ्। त्रिऽच॒क्रः। म॒धु॒ऽवाह॑नः। रथ॑ः। जी॒रऽअ॑श्वः। अ॒श्विनोः॑। या॒तु॒। सुऽस्तु॑तः। त्रि॒ऽव॒न्धु॒रः। म॒घऽवा॑। वि॒श्वऽसौ॑भगः। शम्। न॒ः। आ। व॒क्ष॒त्। द्वि॒ऽपदे॑। चतु॑ः॒ऽपदे॑॥ ३॥

पदार्थः-(**अर्वाङ्**) अर्वाङ्धो देशमञ्चति (**त्रिचक्रः**) त्रीणि चक्राणि यस्मिन् (**मधुवाहनः**) मधुना जलेन वाहनीयः। **मध्विति उदकनामसु पठितम्।** (निघं०१.१२) (**रथः**) (**जीराश्वः**) जीरा वेगा अश्वा यस्मिन् (**अश्विनोः**) विद्वत्क्रियाकुशलयोः सकाशात् प्राप्तः (**यातु**) प्राप्नोतु (**सुष्टुतः**) सुष्ठु प्रशंसितः (**त्रिबन्धुरः**) त्रयो बन्धुरा बन्धा यस्मिन् सः (**मघवा**) परमपूजितधनवान् (**विश्वसौभगः**) विश्वे सुभगाः शोभनैश्वर्य्या भोगा येन सः (**शम्**) सुखम् (**नः**) अस्माकम् (**आ**) (**वक्षत्**) वहेत (**द्विपदे**) मनुष्याद्याय (**चतुष्पदे**) गवाद्याय॥ ३॥

अन्वयः-योऽश्विनोः सुष्टुतो मधुवाहनस्त्रिचक्रो जीराश्वस्त्रिबन्धुरो विश्वसौभगोऽर्वाङ् मघवा रथो नो द्विपदे चतुष्पदे च शमावक्षत्सोऽस्मान् यातु प्राप्नोतु॥ ३॥

भावार्थः-मनुष्यैरित्थं प्रयतितव्यं येन पदार्थविद्यया प्रशंसितानि यानानि निर्मातुं शक्नुयुः। नैवं विनाऽखिलानि सुखानि भवितुमर्हन्ति॥ ३॥

पदार्थः-जो (**अश्विनोः**) विद्वानों की क्रिया में कुशल सज्जनों की उत्तेजना से (**सुष्टुतः**) सुन्दर प्रशंसित (**मधुवाहनः**) जल से बहाने योग्य (**त्रिचक्रः**) जिसमें तीन चक्कर (**जीराश्वः**) वेगरूप घोड़े और (**त्रिबन्धुरः**) तीन बन्धन विद्यमान वा (**विश्वसौभगः**) समस्त सुन्दर ऐश्वर्य भोग जिससे होते वह (**अर्वाङ्**) नीचले देश अर्थात् जल आदि से चलनेवाला (**मघवा**) प्रशंसित धनयुक्त (**रथः**) रथ (**नः**) हमारे (**द्विपदे**) द्विपाद मनुष्यादि वा (**चतुष्पदे**) चौपाद गौ आदि प्राणि के लिये (**शम्**) सुख का (**आ, वक्षत्**) आवाहन करावे और हम लोगों को (**यातु**) प्राप्त हो॥ ३॥

भावार्थः-मनुष्यों को इस प्रकार प्रयत्न करना चाहिये जिससे पदार्थविद्या से प्रशंसायुक्त यानों को बनाने को समर्थ हों, ऐसे करने के विना समस्त सुख होने को योग्य नहीं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ न॒ ऊर्ज॑ं वहतमश्विना यु॒वं मधु॑मत्या न॒ः कश॑या मिमिक्षतम्।
प्रायु॒स्तारि॑ष्टं॒ नी रपा॑ंसि मृक्षतं॒ सेध॑तं॒ द्वेषो॒ भव॑तं सचा॒भुवा॑॥ ४॥

आ। न॒ः। ऊर्ज॑म्। व॒ह॒त॒म्। अ॒श्वि॒ना। युवम्। मधु॑ऽमत्या। न॒ः। कश॑या। मि॒मि॒क्ष॒त॒म्। प्र। आयु॑ः। तारि॑ष्टम्। निः। रपा॑ंसि। मृ॒क्ष॒त॒म्। सेध॑तम्। द्वेषः॑। भव॑तम्। स॒चा॒ऽभुवा॑॥ ४॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मभ्यम् (**ऊर्जम्**) पराक्रमम् (**वहतम्**) प्रापयतम् (**अश्विना**) अध्यापकोपदेशकौ (**युवम्**) युवाम् (**मधुमत्या**) बहुजलवाष्पवेगयुक्तया (**नः**) अस्माकम् (**कशया**) गत्या

शिक्षया वा **(मिमिक्षतम्)** प्रापयितुमिच्छतम् **(प्र)** **(आयुः)** जीवनम् **(तारिष्टम्)** पारयतम् **(निः)** नितराम् **(रपांसि)** पापानि **(मृक्षतम्)** शोधयतम् **(सेधतम्)** दूरीकृतम् **(द्वेषः)** द्वेषयुक्तानि **(भवतम्)** **(सचाभुवा)** सहकारिणौ॥४॥

अन्वयः-हे अश्विना! युवं मधुमत्या कशया न ऊर्जमावहतं मिमिक्षतं न आयुः प्रतारिष्टं द्वेषो रपांसी निःसेधतमस्मान् मृक्षतं सचाभुवा भवतम्॥४॥

भावार्थः-अध्यापकोपदेशकावीदृशीं शिक्षां कुर्यातां यतो वयं सर्वेषां सखायो भूत्वा पक्षपातजन्यानि पापानि विहाय सिद्धाभीष्टा भवेम॥४॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक! **(युवम्)** तुम दोनों **(मधुमत्या)** बहुत जल वाष्पों के वेगों से युक्त **(कशया)** गति वा शिक्षा से **(नः)** हम लोगों के लिये **(ऊर्जम्)** पराक्रम की **(आ, वहतम्)** प्राप्ति करो, **(मिमिक्षतम्)** पराक्रम को प्राप्ति कराने की इच्छा **(नः)** हमारी **(आयुः)** उमर को **(प्र, तारिष्टम्)** अच्छे प्रकार पार पहुंचाओ, **(द्वेषः)** वैरभावयुक्त **(रपांसि)** पापों को **(निः, सेधतम्)** दूर करो, हम लोगों को **(मृक्षतम्)** शुद्ध करो और हमारे **(सचाभुवा)** सहकारी **(भवतम्)** होओ॥४॥

भावार्थः-अध्यापक और उपदेशक लोग ऐसी शिक्षा करें कि जिससे हम लोग सबके मित्र होकर पक्षपात से उत्पन्न होनेवाले पापों को छोड़ अभीष्ट सिद्धि पानेवाले हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः।
युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथाम्॥५॥

युवम्। ह। गर्भम्। जगतीषु। धत्थः। युवम्। विश्वेषु। भुवनेषु। अन्तरिति। युवम्। अग्निम्। च। वृषणौ। अपः। च। वनस्पतीन्। अश्विनौ। ऐरयेथाम्॥५॥

पदार्थः-**(युवम्)** **(ह)** किल **(गर्भम्)** गर्भमिव विद्याबोधम् **(जगतीषु)** विविधासु पृथिव्यादिषु सृष्टिषु **(धत्थः)** धरथः **(युवाम्)** युवाम् **(विश्वेषु)** सर्वेषु **(भुवनेषु)** निवासाऽधिकरणेषु **(अन्तः)** मध्ये **(युवम्)** **(अग्निम्)** **(च)** **(वृषणौ)** वर्षयितारौ **(अपः)** **(च)** **(वनस्पतीन्)** **(अश्विनौ)** सूर्य्याचन्द्रमसाविवाध्यापकोपदेशकौ **(ऐरयेथाम्)** चालयेथाम्॥५॥

अन्वयः-हे वृषणावश्विनौ! युवं जगतीषु गर्भं धत्थो युवं ह विश्वेषु भुवनेष्वन्तरग्निं चैरयेथाम्। युवमपो वनस्पतींश्चैरयेथाम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या यथेह सूर्याचन्द्रमसौ विराजमानौ पृथिव्यां वृष्ट्या गर्भं धारयित्वा सर्वान् पदार्थान् जनयतस्तथा विद्यागर्भं धारयित्वा सर्वाणि सुखानि जनयेयुः॥५॥

पदार्थः-हे **(वृषणा)** जल वर्षा करानेवाले **(अश्विनौ)** सूर्य और चन्द्रमा के समान अध्यापक और उपदेशक! **(युवम्)** तुम दोनों **(जगतीषु)** विविध पृथिवी आदि सृष्टियों में **(गर्भम्)** गर्भ के समान विद्या के बोध को **(धत्थः)** धरते हो **(युवम्, ह)** तुम्हीं **(विश्वेषु)** समस्त **(भुवनेषु)** लोक-लोकान्तरों के **(अन्तः)** बीच **(अग्निम्)** अग्नि को **(च)** भी **(ऐरयेथाम्)** चलाओ तथा **(युवम्)** तुम **(अपः)** जलों और **(वनस्पतीन्)** वनस्पति आदि वृक्षों को **(च)** डुलाओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य जैसे यहाँ सूर्य और चन्द्रमा विराजमान हुए पृथिवी में वर्षा से गर्भ धारण करा कर समस्त पदार्थों को उत्पन्न कराते हैं, वैसे विद्यारूप गर्भ को धारण करा के समस्त सुखों को उत्पन्न करावें॥५॥

पुनस्तमेव विषयमाह

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या३ राथ्येभिः।
अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश॥ ६॥ २७॥ २॥

युवम्। ह। स्थः। भिषजा। भेषजेभिः। अथो इति। ह। स्थः। रथ्या। रथ्येभिरिति रथ्येभिः। अथो इति। ह। क्षत्रम्। अधि। धत्थः। उग्रा। यः। वाम्। हविष्मान्। मनसा। ददाश॥ ६॥

पदार्थः-(**युवम्**) युवाम् **(ह)** प्रसिद्धम् **(स्थः)** **(भिषजा)** रोगनिवारकौ **(भेषजेभिः)** रोगापहन्तृभिर्वैद्यैः सह **(अथो)** अनन्तरम् **(ह)** खलु **(स्थः)** भवथः **(रथ्या)** रथे साधु **(राथ्येभिः)** रथवाहकैः। अत्र**ान्येषामपि दृश्यत** इत्याद्यचो दीर्घः। **(अथो)** **(ह)** **(क्षत्रम्)** राष्ट्रम् **(अधि)** **(धत्थः)** **(उग्रा)** उग्रौ तीव्रस्वभावौ **(यः)** **(वाम्)** युष्मभ्यम् **(हविष्मान्)** बहुदानयुक्तः **(मनसा)** विज्ञानेन **(ददाश)** दाशति॥६॥

अन्वयः-हे अश्विनौ! युवं ह भेषजेभिर्भिषजा स्थः। अथो ह राथ्येभी रथ्या स्थः। अथो हे उग्रा! यो हविष्मान् वां मनसा ददाश तस्मै ह क्षत्रमधि धत्थः॥६॥

भावार्थः-यदा मनुष्या विदुषां वैद्यानां सङ्गं कुर्वन्ति तदा वैद्यकविद्यामाप्नुवन्ति। यदा शूरा दातारो जायन्ते तदा राज्यं धृत्वा प्रशंसिता भूत्वा सततं सुखिनो भवन्तीति॥६॥

अस्मिन् सूक्तेऽश्विगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति सप्तपञ्चाशदुत्तरं शततमं १५७ सूक्तं सप्तविंशो २७ वर्गश्च समाप्तः॥
अस्मिन्नध्याये सोमादिपदार्थप्रतिपादनादेतद्दशमाध्यायोक्तार्थानां नवमाध्यायोक्तार्थैः सह सङ्गतिर्वेदितव्या॥

पदार्थः-हे विद्यादि सद्गुणों में व्याप्त सज्जनो! **(युवम्, ह)** तुम्हीं **(भेषजेभिः)** रोग दूर करनेवाले वैद्यों के साथ **(भिषजा)** रोग दूर करनेवाले **(स्थः)** हो। **(अथो)** इसके अनन्तर **(ह)** निश्चय से **(राथ्येभिः)** रथ पहुंचानेवाले अश्वादिकों के साथ **(रथ्या)** रथ में प्रवीण रथवाले **(स्थः)** हो। **(अथो)** इसके अनन्तर हे **(उग्रा)** तीव्र स्वभाववाले सज्जनो! **(यः)** जो **(हविष्मान्)** बहुदानयुक्त जन **(वाम्)** तुम दोनों के लिये

(मनसा) विज्ञान से **(ददाश)** देता है अर्थात् पदार्थों का अर्पण करता है **(ह)** उसी के लिये **(क्षत्रम्)** राज्य को **(अधि, धत्थः)** अधिकता से धारण करते हो॥६॥

भावार्थः-जब मनुष्य विद्वान् वैद्यों का सङ्ग करते हैं, तब वैद्यक विद्या को प्राप्त होते हैं। जब शूर दाता होते हैं, तब राज्य धारण कर और प्रशंसित होकर निरन्तर सुखी होते हैं॥६॥

इस सूक्त में अश्वियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ सत्तावनवां १५७ सूक्त और सत्ताईसवां २७ वर्ग समाप्त हुआ॥

इस अध्याय में सोम आदि पदार्थों के प्रतिपादन से इस दशवें अध्याय के अर्थों की नवम अध्याय में कहे हुए अर्थों के साथ सङ्गति जाननी चाहिये॥

इति श्रीपरमहंसपरिव्राजकाचार्याणां श्रीमत्परमविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण परमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाभ्यां समन्विते सुप्रमाणयुक्ते ऋग्वेदभाष्ये द्वितीयाष्टके द्वितीयोऽध्यायः समाप्तिमगमत्॥ २॥

॥ओ३म्॥

अथ द्वितीयाष्टके तृतीयाऽध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

वसू इति षड्चस्याष्टपञ्चाशदुत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः॥ अश्विनौ देवते १,४,५ निचृत् त्रिष्टुप्। २ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ६ निचृदनुष्टुप् छन्दः। गान्धारः। स्वरः॥

अथ शिक्षकशिष्यकर्माण्याह॥

अब द्वितीयाष्टक के तृतीय अध्याय का आरम्भ है। उसमें एक सौ अट्ठावनवें सूक्त के प्रथम मन्त्र में शिक्षा करनेवाले और शिष्य के कर्मों का वर्णन करते हैं॥

वसू॑ रु॒द्रा पु॑रुमन्तू॑ वृधन्ता॑ दशस्यतं॑ नो वृषणावभि॒ष्टौ॑।
दस्रा॑ ह॒ यद्रेक्ण॑ औच॒थ्यो वां॑ प्र॒ यत्स॒स्राथे॒ अक॑वाभिरू॒ती॥ १॥

वसू इति॑। रु॒द्रा। पु॒रु॒मन्तू॒ इति॑ पुरु॒ऽमन्तू॑। वृ॒ध॒न्ता॑। द॒श॒स्यत॑म्। नः॒। वृ॒ष॒णौ॒। अ॒भि॒ष्टौ॑। दस्रा॑। ह॒। यत्। रेक्ण॑ः। औ॒च॒थ्यः॑। वा॒म्। प्र। यत्। स॒स्राथे॒ इति॑। अक॑वाभिः। ऊ॒ती॥ १॥

पदार्थः-(**वसू**) वासयितारौ (**रुद्रा**) चतुश्चत्वारिंशद्वर्षप्रमितब्रह्मचर्य्येणाधीतविद्यौ (**पुरुमन्तू**) पुरुभिर्बहुभिर्मन्तव्यौ (**वृधन्ता**) वर्द्धमानौ (**दशस्यतम्**) दत्तम् (**नः**) अस्मभ्यम् (**वृषणौ**) वीर्यवन्तौ (**अभिष्टौ**) इष्टसिद्धौ (**दस्रा**) दुःखोपक्षयितारौ (**ह**) (**यत्**) यः (**रेक्णः**) धनम्। **रेक्ण इति धननामसु पठितम्।** (निघं०२.१०) (**औचथ्यः**) प्रशंसितेषु भवः (**वाम्**) युवयोः (**प्र**) (**यत्**) यौ (**सस्राथे**) प्रापयतः (**अकवाभिः**) प्रशंसिताभिः (**ऊती**) रक्षाभिः॥१॥

अन्वयः-हे सभाशालेशौ! यद्यो वामौचथ्यो रेक्णोऽस्ति तं यद्यौ युवामकवाभिरूती नोऽस्मभ्यं सस्राथे तौ ह वृधन्ता पुरुमन्तू दस्रा वृषणौ वसू रुद्राऽभिष्टौ न सुखं प्रदशस्यतम्॥१॥

भावार्थः-ये सूर्य्यवायुवत् सर्वानुपकुर्वन्ति ते श्रीमन्तो जायन्ते॥१॥

पदार्थः-हो सभा और शालाधीशो! (**यत्**) जो (**वाम्**) तुम दोनों का (**औचथ्यः**) उचित अर्थात् प्रशंसितों में हुआ (**रेक्णः**) धन है उस धन को (**यत्**) जो तुम दोनों (**अकवाभिः**) प्रशंसित (**ऊती**) रक्षाओं से हम लोगों के लिये (**सस्राथे**) प्राप्त कराते हो वे (**ह**) ही (**वृधन्ता**) बढ़ते हुए (**पुरुमन्तू**) बहुतों से मानने योग्य (**दस्रा**) दुःख के नष्ट करनेहारे (**वृषणौ**) बलवान् (**वसू**) निवास दिलानेवाले (**रुद्रा**)

चालीस वर्ष लों ब्रह्मचर्य से धर्मपूर्वक विद्या पढ़े हुए सज्जनो **(अभिष्टौ)** इष्टसिद्धि के निमित्त **(नः)** हमारे लिये सुख **(प्र, दशस्यतम्)** उत्तमता से देओ॥१॥

भावार्थः-जो सूर्य और पवन के समान सबका उपकार करते हैं, वे धनवान् होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

को वां॑ दाशत्सुम॒तये॑ चिदस्यै॒ वसू॒ यद्धेथे॒ नम॑सा प॒दे गोः।
जि॒गृ॒तम॒स्मे रे॒वती॒: पुर॑न्धीः काम॒प्रेणे॑व॒ मन॑सा॒ चर॑न्ता॥२॥

कः। वा॒म्। दा॒श॒त्। सु॒ऽम॒तये॑। चि॒त्। अ॒स्यै॒। वसू॒ इति॑। यत्। धेथे॒ इति॑। नम॑सा। प॒दे। गोः। जि॒गृ॒तम्। अ॒स्मे इति॑। रे॒वती॑ः। पुर॑म्ऽधीः। काम॒प्रेण॑ऽइव। मन॑सा। चर॑न्ता॥२॥

पदार्थः-**(कः)** **(वाम्)** युवाभ्याम् **(दाशत्)** दद्यात् **(सुमतये)** सुष्ठु प्रज्ञायै **(चित्)** अपि **(अस्यै)** प्रत्यक्षायै **(वसू)** सुखेषु वासयितारौ **(यत्)** यो **(धेथे)** धरथः **(नमसा)** अन्नाद्येन **(पदे)** प्राप्तव्ये **(गोः)** पृथिव्याः **(जिगृतम्)** जागृतौ भवतम् **(अस्मे)** अस्मभ्यम् **(रेवतीः)** प्रशस्तश्रीयुक्ता **(पुरन्धीः)** पुरन्दधति यास्ताः **(कामप्रेणेव)** यत्कामं प्रति पिपर्त्ति तेनेव **(मनसा)** विज्ञानवताऽन्तःकरणेन **(चरन्ता)** प्राप्नुवन्तौ गच्छन्तौ वा॥२॥

अन्वयः-यद्यौ वसू युवामस्यै सुमतये नमसा गोः पदे पुरन्धी रेवतीर्धेथे कामप्रेणेव मनसा चरन्ताऽस्मे जिगृतं ताभ्यां वामिमां मतिं चित्को दाशत्॥२॥

भावार्थः-ये पूर्णविद्याकामा मनुष्यान् सुधियः कर्त्तुं प्रयतन्ते ते पृथिव्यां पूजिता भवन्ति॥२॥

पदार्थः-**(यत्)** जो **(वसू)** सुखों में निवास करानेहारे सभाशालाधीशो तुम **(अस्यै)** प्रत्यक्ष **(सुमतये)** सुन्दर बुद्धि के लिये **(नमसा)** अन्न आदि से **(गोः)** पृथिवी के **(पदे)** प्राप्त होने योग्य स्थान में **(पुरन्धीः)** पुरग्राम को धारण करती हुई **(रेवतीः)** प्रशंसित धनयुक्त नगरियों को **(धेथे)** धारण करते हो और **(कामप्रेणेव)** कामना पूरण करनेवाले **(मनसा)** विज्ञानवान् अन्तःकरण से **(चरन्ता)** प्राप्त होते हुए तुम दोनों **(अस्मे)** हम लोगों के लिये **(जिगृतम्)** जागृत हो उन **(वाम्)** आपके लिये इस मति को **(चित्)** भी **(कः)** कौन **(दाशत्)** देवे॥२॥

भावार्थः-जो पूर्णविद्या और कामनावाले पुरुष मनुष्यों को सुन्दर बुद्धिवाले करने को प्रयत्न करते हैं, वे पृथिवी में सत्कारयुक्त होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यु॒क्तो ह॒ यद्वां॑ तौ॒ग्र्यायं॑ पे॒रुर्वि मध्ये॒ अर्ण॑सो॒ धायि॑ प॒ज्रः।

उप॑ वा॒मव॑: शर॒णं ग॑मेयं॒ शूरो॒ नाज्म॑ प॒तय॑द्भिरेवै॑:॥ ३॥

यु॒क्त:। ह॒। यत्। वा॒म्। तौ॒ग्र्याय॑। पे॒रु:। वि। मध्ये॑। अर्ण॑स:। धायि॑। प॒त्र:। उप॑। वा॒म्। अव॑:। श॒र॒णम्। ग॒मे॒य॒म्। शूर॑:। न। अज्म॑। प॒तय॑त्ऽभि:। एवै॑:॥ ३॥

पदार्थ:-(**युक्त:**) (**ह**) खलु (**यत्**) य: (**वाम्**) युवयो: (**तौग्र्याय**) बलेषु साधवे (**पेरु:**) पाता (**वि**) (**मध्ये**) (**अर्णस:**) उदकस्य (**धायि**) ध्रियते (**पत्र:**) बलिष्ठ: (**उप**) (**वाम्**) युवयो: (**अव:**) रक्षणादिकम् (**शरणम्**) आश्रयम् (**गमेयम्**) प्राप्नुयाम् (**शूर:**) विक्रान्त: (**न**) इव (**अज्म**) बलम् (**पतयद्भि:**) इतस्ततो धावयद्भि: (**एवै:**) प्रापकै:॥ ३॥

अन्वय:-हे सभाशालेशौ! वां यद्यस्तौग्र्याय युक्त: पेरु: पत्रोऽहमर्णसो मध्ये वि धायि। अज्म शूरो न पतयद्भिरेवै: सह वामव: शरणमुपगमेयं तं मां ह युवां वर्द्धयतम्॥ ३॥

भावार्थ:-ये जिज्ञासव: साधनोपसाधनै: सहाध्यापकानामाप्तानां विदुषामाश्रयमुपव्रजेयुस्ते विद्वांसो जायन्ते, ये च संप्रीत्या विद्या सुशिक्षा वर्द्धयन्ति तेऽत्र पूज्या भवन्ति॥ ३॥

पदार्थ:-हे सभाशालाधीशो! (**वाम्**) तुम दोनों का (**यत्**) जो (**तौग्र्याय**) बलों में उत्तम बल उसके लिये (**युक्त:**) युक्त (**पेरु:**) सबों की पालना करनेवाला (**पत्र:**) बलवान् मैं (**अर्णस:**) जल के (**मध्ये**) बीच (**वि, धायि**) विधान किया जाता हूँ अर्थात् जल सम्बन्धी काम के लिये युक्त किया जाता हूँ तथा (**अज्म**) बल को (**शूर:**) शूर जैसे (**न**) वैसे (**पतयद्भि:**) इधर-उधर दौड़ाते हुए (**एवै:**) पदार्थों की प्राप्ति करानेवालों के साथ (**वाम्**) तुम्हारे (**अव:**) रक्षा आदि काम को और (**शरणम्**) आश्रय को (**उप, गमेयम्**) निकट प्राप्त होऊं उस मुझको (**ह**) ही तुम वृद्धि देओ॥ ३॥

भावार्थ:-जो जिज्ञासु पुरुष साधन और उपसाधनों से अध्यापक आप्त विद्वानों के आश्रय को प्राप्त हों, वे विद्वान् होते हैं और जो अच्छे प्रकार प्रीति के साथ विद्या और अच्छी शिक्षा को बढ़ाते हैं, वे इस संसार में पूज्य होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप॑स्तुतिरौच॒थ्यमु॑रुष्ये॒न्मा माम॒मे प॑त॒त्रिणी॒ वि दु॑ग्धाम्।
मा मामेधो॒ दश॑तयश्चितो धा॒क् प्र यद्वां॑ ब॒द्धस्त्मनि॒ खाद॑ति॒ क्षाम्॥ ४॥

उप॑ऽस्तुति:। औ॒च॒थ्यम्। उ॒रु॒ष्ये॒त्। मा। माम्। इ॒मे इति॑। प॒त॒त्रिणी॒ इति॑। वि। दु॒ग्धा॒म्। मा। माम्। एध॑:। दश॑ऽतय:। चि॒त॒:। धा॒क्। प्र। यत्। वा॒म्। ब॒द्ध:। त्मनि॑। खाद॑ति। क्षा॒म्॥ ४॥

पदार्थ:-(**उपस्तुति:**) उपगता चासौ स्तुति: (**औचथ्यम्**) उचितेषूचितेषु कर्मसु साधुम् (**उरुष्येत्**) सेवेत (**मा**) निषेधे (**माम्**) (**इमे**) विद्याप्रशंसे (**पतत्रिणी**) पतितुं विनाशयितुं कुशिक्षे (**वि**) (**दुग्धाम्**)

प्रपिपूर्त्तम् **(मा)** **(माम्)** **(एधः)** इन्धनम् **(दशतयः)** दशगुणितः **(चितः)** संचितः **(धाक्)** दहेत्। अत्र मन्त्रे **घसे**त्यादिना लेर्लुग् **बहुलं छन्दसी**त्यडभावः। **(प्र)** **(यत्)** यः **(वाम्)** युवयोः **(बद्धः)** नियुक्तः **(त्मनि)** आत्मनि **(खादति)** खादेत् **(क्षाम्)** भूमिम्॥४॥

अन्वयः-हे सभाशालेशौ! वां यद्यो दशतय एधो बद्धश्चितोऽग्निः क्षां प्रधाक् तथा त्मनि मां मा खादति। इमे पतत्रिणी औचथ्यं मां मा विदुग्धामुपस्तुतिश्चोरुष्येत्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा इन्धनैर्निर्वातस्थाने प्रवृद्धोऽग्निः पृथिवीं काष्ठादीनि वा दहति तथा मां शोकाग्निर्मा दहतु। अज्ञानकुशीले मा प्राप्नुतां किन्तु शान्तिर्विद्या च सततं वर्द्धताम्॥४॥

पदार्थः-हे सभाशालाधीशो! **(वाम्)** तुम दोनों का **(यत्)** जो **(दशतयः)** दशगुणा **(एधः)** इन्धन **(बद्धः)** निरन्तर युक्त किया और **(चितः)** संचित किया हुआ अग्नि **(क्षाम्)** भूमि को **(प्र, धाक्)** जलावे वैसे **(त्मनि)** अपने में **(माम्)** मुझको **(मा)** मत **(खादति)** खावे **(इमे)** ये **(पतत्रिणी)** नष्ट कराने के लिये कुशिक्षा **(औचथ्यम्)** उचित-उचित कामों में उत्तम **(माम्)** मुझे **(मा)** मत **(वि, दुग्धाम्)** अपूर्ण करें, मेरी परिपूर्णता को मत नष्ट करें और **(उपस्तुतिः)** समीप प्राप्त हुई स्तुति भी **(उरुष्येत्)** सेवें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इन्धनों से निर्वात स्थान में अच्छे प्रकार बढ़ा हुआ अग्नि, पृथिवी और काष्ठ आदि पदार्थों को जलाता है, वैसे मुझे शोकरूप अग्नि मत जलावे और अज्ञानता वा कुशीलता मत प्राप्त हों, किन्तु शान्ति और विद्या निरन्तर बढ़े॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न मा॑ गरन्नद्यो॑ मातृत॑मा दा॒सा यदी॑ सुस॑मुब्धमवाधु॑ः।
शिरो॒ यद॑स्य त्रैत॒नो वि॒तक्ष॑त् स्व॒यं दा॒स उरो॒ अंसा॒वपि॑ ग्ध॥५॥

न। मा॒। ग॒रन्। न॒द्यः॑। मा॒तृऽत॑माः। दा॒साः। यत्। ई॒म्। सुऽस॑मुब्धम्। अ॒व॒ऽअधु॑ः। शिरः॑। यत्। अ॒स्य॒। त्रैत॒नः। वि॒ऽतक्ष॑त्। स्व॒यम्। दा॒सः। उरः॑। अंसौ॑। अपि॑। ग्धेति॑ ग्ध॥५॥

पदार्थः-**(न)** **(मा)** माम् **(गरन्)** निगलेयुः **(नद्यः)** सरितः **(मातृतमाः)** अतिशयेन मातर इव वर्त्तमानाः **(दासाः)** सुखप्रदाः **(यत्)** यम् **(ईम्)** सर्वतः **(सुसमुब्धम्)** सुष्ठु सम्यगृजुम् **(अवाधुः)** अधो धरन्तु **(शिरः)** **(यत्)** यः **(अस्य)** **(त्रैतनः)** यस्त्रीणि शरीरात्ममनोजानि सुखानि तनोति स एव **(वितक्षत्)** तक्षतु **(स्वयम्)** **(दासः)** सेवकः **(उरः)** वक्षःस्थलम् **(अंसौ)** भुजमूले **(अपि)** **(ग्ध)** हन्तु। हन्तेर्लुङि छान्दसमेतत्॥५॥

अन्वयः-हे विद्वांसो! दासाः सुसमुब्धं यन्मामीमवाधुस्तं मा मातृतमा नद्यो न गरन्। यद्यस्त्रैतनो दासोऽस्य मम शिरो वितक्षत् स स्वयं उरो अंसावपि ग्ध॥५॥

भावार्थः-मनुष्यैरेवं प्रयतितव्यं यतो नदीसमुद्रा न निमज्जयेयुः। दासः शूद्रादिः सेवायां नियुक्तोऽप्यतिसरलस्वभावं पुरुषमालस्येन पीडयति ततस्तं सुशिक्षेतानुचितत्वे ताडयेच्च। स्वशरीराङ्गानि सदा पोषणीयानि च॥५॥

पदार्थः-हे विद्वानो! **(दासाः)** सुख देनेवाले दास जन **(सुसमुब्धम्)** अति सूधे स्वभाववाले **(यत्)** जिस मुझे **(ईम्)** सब ओर से **(अवाधुः)** पीडित करें उस **(मा)** मुझे **(मातृतमाः)** माताओं के समान मान करने-करानेवाली **(नद्यः)** नदियां **(न)** न **(गरन्)** निगलें न गलावें, **(यत्)** जो **(त्रैतनः)** तीन अर्थात् शारीरिक, मानसिक और आत्मिक सुखों का विस्तार करनेवाला **(दासः)** सेवक **(अस्य)** इस मेरे **(शिरः)** को **(वितक्षत्)** विविध प्रकार की पीड़ा देवे, वह **(स्वयम्)** आप अपने **(उरः)** वक्षःस्थल और **(अंसौ)** स्कन्धों को **(अपि, ग्ध)** काटे॥५॥

भावार्थः-मनुष्यों को चाहिये कि ऐसा प्रयत्न करें जिससे नदी और समुद्र आदि न डुबा मारें। शूद्र आदि दास जनसेवा करने पर नियत हुआ भी आलस्यवश अति सूधे स्वभाववाले स्वामी को पीड़ा दिया करता अर्थात् उनका काम मन से नहीं करता, इससे उसको अच्छी शिक्षा देवे और अनुचित करने में ताड़ना भी दे तथा अपने-अपने शरीर के अङ्गों की सदा पुष्टि करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः॥६॥ १॥

दीर्घऽतमाः। मामतेयः। जुजुर्वान्। दशमे। युगे। अपाम्। अर्थम्। यतीनाम्। ब्रह्मा। भवति। सारथिः॥६॥

पदार्थः-**(दीर्घतमाः)** दीर्घं तमो यस्मात् सः **(मामतेयः)** ममतायां कुशलः **(जुजुर्वान्)** रोगापन्नः **(दशमे)** दशानां पूर्णे **(युगे)** वर्षे **(अपाम्)** विद्याविज्ञानयोगव्यापिनाम् **(अर्थम्)** प्रयोजनम् **(यतीनाम्)** संन्यासिनाम् **(ब्रह्मा)** सकलवेदवित् **(भवति)** **(सारथिः)** रथप्राजकः॥६॥

अन्वयः-यो दीर्घतमा मामतेयो दशमे युगे जुजुर्वान् जायते। यश्च सारथिरिवाऽपां यतीनामर्थमाप्नोति स ब्रह्मा भवति॥६॥

भावार्थः-येऽत्रात्यन्ताविद्यायुक्ता लोभातुरास्सन्ति ते सद्यो रुग्णा जायन्ते। ये पक्षपातरहितानां संन्यासिनां हर्षशोकनिन्दास्तुतिरहितं विज्ञानाऽऽनन्दमाप्नुवन्ति ते स्वयं दुःखपारगा भूत्वाऽन्यानपि दुःखसागरात् पारं नयन्ति॥६॥

अस्मिन् सूक्ते शिष्यशासककर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्विज्ञेया॥

इति अष्टपञ्चाशदुत्तरं शततमं १५८ सूक्तं प्रथमो १ वर्गश्च समाप्तः॥

पदार्थः-जो **(दीर्घतमाः)** जिससे दीर्घ अन्धकार प्रकट होता वह **(मामतेयः)** ममता में कुशल जन **(दशमे)** दशमे **(युगे)** वर्ष में **(जुजुर्वान्)** रोगी हो जाता है, जो **(सारथिः)** रथ हांकनेवाले जन के समान **(अपाम्)** विद्या, विज्ञान और योगशास्त्र में व्याप्त **(यतीनाम्)** संन्यासियों के **(अर्थम्)** प्रयोजन को प्राप्त होता वह **(ब्रह्मा)** सकल वेदविद्या का जाननेवाला **(भवति)** होता है॥६॥

भावार्थः-जो इस संसार में अत्यन्त अविद्या अज्ञानयुक्त, लोभातुर हैं वे शीघ्र रोगी होते और जो पक्षपातरहित संन्यासियों के सकाश से हर्ष-शोक तथा निन्दा-स्तुति रहित, विज्ञान और आनन्द को प्राप्त होते हैं, वे आप दुःख के पारगामी होकर औरों को भी उसके पार करते हैं॥६॥

इस सूक्त में शिष्य और शिक्षा देनेवाले के काम का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ अट्ठावनवां १५८ सूक्त और प्रथम १ वर्ग समाप्त हुआ॥

प्र द्यावेत्यस्य पञ्चर्चस्य एकोनषष्टितमस्य सूक्तस्य दीर्घतमा ऋषिः। द्यावापृथिव्यौ देवते। १ विराड् जगती। २,३,५ निचृज्जगती। ४ जगती च छन्दः। निषादः स्वरः॥

अथ विद्युद्विषयमाह॥

अब एक सौ उनसठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में बिजुली के विषय में कहा है॥

प्र द्यावा॑ य॒ज्ञैः पृ॑थि॒वी ऋ॑ता॒वृधा॑ म॒ही स्तु॑षे वि॒दथे॑षु प्रचे॑तसा।
दे॒वेभि॒र्ये दे॒वपु॑त्रे सु॒दंस॑से॒त्था धि॒या वार्या॑णि प्र॒भूष॑तः॥ १॥

प्र। द्यावा॑। य॒ज्ञैः। पृ॒थि॒वी इति॑। ऋ॒त॒ऽवृधा॑। म॒ही इति॑। स्तु॒षे॒। वि॒दथे॑षु। प्रऽचे॑तसा। दे॒वेभिः॑। ये इति॑। दे॒वऽपु॑त्रे इति॑ दे॒वऽपु॑त्रे। सु॒ऽदंस॑सा। इ॒त्था। धि॒या। वार्या॑णि। प्रऽभूष॑तः॥ १॥

पदार्थः-(**प्र**) (**द्यावा**) द्यौः (**यज्ञैः**) सङ्गतैर्व्यवहारैः (**पृथिवी**) भूमिः (**ऋतावृधा**) कारणेन वर्द्धिते (**मही**) महत्यौ (**स्तुषे**) प्रशंससि (**विदथेषु**) वेदितव्येषु पदार्थेषु (**प्रचेतसा**) प्रकृष्टतया प्रज्ञाननिमित्ते (**देवेभिः**) दिव्यैरबादिभिः पदार्थैः सह (**ये**) (**देवपुत्रे**) देवैर्दिव्यैः प्रकृत्यंशैः पुत्र इव प्रजाते (**सुदंससा**) प्रशंसितकर्मणी (**इत्था**) अनेन प्रकारेण (**धिया**) कर्मणा (**वार्याणि**) वरितुमर्हाणि वस्तूनि (**प्रभूषतः**) प्रकृष्टतयाऽलंकृतः॥ १॥

अन्वयः-हे विद्वन्! ये ऋतावृधा प्रचेतसा देवपुत्रे सुदंससा मही द्यावापृथिवी यज्ञैर्विदथेषु देवेभिर्धिया च वार्याणि प्रभूषतः। त्वं च प्रस्तुष इत्था ते वयमपि नित्यं प्रशंसेम॥ १॥

भावार्थः-ये मनुष्याः प्रयत्नेन क्षितिसूर्ययोर्गुणकर्मस्वभावान् यथावद्विजानीयुस्तेऽतुलेन सुखेनाऽलंकृताः स्युः॥ १॥

पदार्थः-हे विद्वान्! (**ये**) जो (**ऋतावृधा**) कारण से बढ़े हुए (**प्रचेतसा**) उत्तमता से प्रबल ज्ञान करानेहारे (**देवपुत्रे**) दिव्य प्रकृति के अंशों से पुत्रों के समान उत्पन्न हुए (**सुदंससा**) प्रशंसित कर्मवाले (**मही**) बड़े (**द्यावापृथिवी**) सूर्यमण्डल और भूमिमण्डल (**यज्ञैः**) मिले हुए व्यवहारों से (**विदथेषु**) जानने योग्य पदार्थों में (**देवेभिः**) दिव्य जलादि पदार्थों और (**धिया**) कर्म के साथ (**वार्य्याणि**) स्वीकार करने योग्य पदार्थों को (**प्रभूषतः**) सुभूषित करते हैं और आप उन की (**प्र, स्तुषे**) प्रशंसा करते हैं (**इत्था**) इस प्रकार उनकी हम लोग भी प्रशंसा करें॥ १॥

भावार्थः-जो मनुष्य उत्तम यत्न के साथ पृथिवी और सूर्यमण्डल के गुण, कर्म, स्वभाव को यथावत् जानें, वे अतुल सुख से भूषित हों॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒त म॑न्ये पि॒तुर॒द्रुहो॒ मनो॑ मा॒तुर्महि॒ स्वत॑व॒स्तद्ध॑वी॒मभिः॑।

सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः॥ २॥

उत। मन्ये। पितुः। अद्रुहः। मनः। मातुः। महि। स्वऽतवः। तत्। हवीमऽभिः। सुऽरेतसा। पितरा। भूम। चक्रतुः। उरु। प्रऽजायाः। अमृतम्। वरीमऽभिः॥ २॥

पदार्थः-(**उत**) (**मन्ये**) विजानीयाम् (**पितुः**) जनकस्य (**अद्रुहः**) द्रोहरहितस्य (**मनः**) मननम् (**मातुः**) जनन्याः (**महि**) महत् (**स्वतवः**) स्वं स्वकीयं तवो बलं यस्मिँस्तत् (**तत्**) (**हवीमभिः**) स्तोतुमर्हैर्गुणैः (**सुरेतसा**) शोभनवीर्य्येण (**पितरा**) मातापितृवद्वर्त्तमाने (**भूम**) (**चक्रतुः**) कुरुतः (**उरु**) बहु (**प्रजायाः**) मनुष्यादिसृष्टये। अत्र चतुर्थ्यर्थे षष्ठी। (**अमृतम्**) अमृतमिव वर्त्तमानम् (**वरीमभिः**) स्वीकर्त्तुमर्हैः॥ २॥

अन्वयः-हे मनुष्या! अहमेकाकी हवीमभिर्यदद्रुहो मातुरुत पितुः स्वतवो महि मन उरु मन्ये तत् सुरेतसा पितरेव वर्त्तमानौ भूमिसूर्य्यौ वरीमभिः प्रजाया अमृतं भूम चक्रतुः॥ २॥

भावार्थः-यथा माता पितरावपत्यानि संरक्ष्य वर्द्धयतस्तथा भूमिसूर्य्यौ प्रजाभ्यः सुखमुन्नयतः॥ २॥

पदार्थः-हे मनुष्यो! मैं अकेला (**हवीमभिः**) स्तुति करने योग्य गुणों के साथ जिस (**अद्रुहः**) द्रोहरहित (**मातुः**) माता (**उत**) और (**पितुः**) पिता के (**स्वतवः**) अपने बलवाले (**महि**) बड़े (**मनः**) मन को (**उरु**) बहुत (**मन्ये**) जानूं (**तत्**) उसको (**सुरेतसा**) सुन्दर पराक्रमवाले (**पितरा**) माता-पिता के समान वर्त्तमान भूमि और सूर्य (**वरीमभिः**) स्वीकार करने योग्य गुणों से (**प्रजायाः**) मनुष्य आदि सृष्टि के लिये (**अमृतम्**) अमृत के समान वर्त्तमान (**भूम**) बड़ा उत्साहित (**चक्रतुः**) करते हैं अर्थात् शिल्पव्यवहारों से प्रोत्साहित करते, मलीन नहीं रहने देते हैं॥ २॥

भावार्थः-जैसे माता-पिता लड़कों को अच्छे प्रकार पालन कर उनको बढ़ाते हैं, वैसे भूमि और सूर्य्य प्रजाजनों के लिये सुख की उन्नति करते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः॥ ३॥

ते। सूनवः। सुऽअपसः। सुऽदंससः। मही इति। जज्ञुः। मातरा। पूर्वऽचित्तये। स्थातुः। च। सत्यम्। जगतः। च। धर्मणि। पुत्रस्य। पाथः। पदम्। अद्वयाविनः॥ ३॥

पदार्थः-(**ते**) (**सूनवः**) (**स्वपसः**) सुष्ठु अपांसि कर्म्माणि येभ्यस्ते (**सुदंससः**) शोभनानि दंसांसि कर्माणि व्यवहारेषु येषां ते (**मही**) महत्यौ (**जज्ञुः**) जायन्ते (**मातरा**) मान्यकारिण्यौ (**पूर्वचित्तये**) पूर्वा

चासौ चित्तिश्चयनं च तस्यै **(स्थातुः)** अचरस्य **(च)** **(सत्यम्)** नाशरहितम् **(जगतः)** गच्छतः **(च)** **(धर्म्मणि)** साधर्म्ये **(पुत्रस्य)** सन्तानस्य **(पाथः)** रक्षथः **(पदम्)** प्राप्तव्यम् **(अद्वयाविनः)** न विद्यते द्वितीयो यस्मिँस्तस्य॥३॥

अन्वयः-ये स्वपसः सुदंससः पूर्वचित्तये जज्ञुस्ते मही मातरा जानीयुः। हे पितरौ! यौ युवां स्थातुश्च जगतश्च धर्मण्यद्वयाविनः पुत्रस्य सत्यं पदं पाथस्तौ सूनवः सततं सेवेरन्॥३॥

भावार्थः-किं भूमिसूर्यौ सर्वेषां पालननिमित्ते न स्तः? ये पितरश्चराचरस्य जगतो विज्ञानं पुत्रेभ्यो ग्राहयन्ति ते कृतकृत्या कुतो न स्युः?॥३॥

पदार्थः-जो **(स्वपसः)** सुन्दर कर्म और **(सुदंससः)** शोभन कर्मयुक्त व्यवहारवाले जन **(पूर्वचित्तये)** पूर्व पहिली जो चित्ति अर्थात् किन्हीं पदार्थों का इकट्ठा करना है, उसके लिये **(जज्ञुः)** प्रसिद्ध होते हैं **(ते)** वे **(मही)** बड़ी **(मातरा)** मान करनेवाली माताओं को जानें। हे माता-पिताओ! जो तुम **(स्थातुः)** स्थावर धर्मवाले **(च)** और **(जगतः)** जङ्गम जगत् के **(च)** भी **(धर्मणि)** साधर्म्य में **(अद्वयाविनः)** इकले **(पुत्रस्य)** पुत्र के **(सत्यम्)** सत्य **(पदम्)** प्राप्त होने योग्य पदार्थ की **(पाथः)** रक्षा करते हो, उनकी **(सूनवः)** पुत्र जन निरन्तर सेवा करें॥३॥

भावार्थः-क्या भूमि और सूर्य सबके पालन के निमित्त नहीं हैं? जो पिता-माता चराचर जगत् का विज्ञान पुत्रों के लिये ग्रहण कराते हैं, वे कृतकृत्य क्यों न हों?॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ते मा॒यिनो॑ ममिरे सु॒प्रचे॑तसो जा॒मी सयो॑नी मिथु॒ना समो॑कसा।
नव्य॑नव्यं॒ तन्तु॒मा त॑न्वते दि॒वि स॑मु॒द्रे अ॒न्तः क॒वय॑: सुदी॒तय॑:॥४॥

ते। मा॒यिन॑:। म॒मि॒रे। सु॒ऽप्रचे॑तसः। जा॒मी इति॑। सयो॑नी॒ इति॒ सऽयो॑नी। मिथु॒ना। सम्ऽओ॑कसा। नव्य॑म्ऽनव्यम्। तन्तु॑म्। आ। त॒न्व॒ते। दि॒वि। स॒मु॒द्रे। अ॒न्तरिति॑। क॒वय॑:। सु॒ऽदी॒तय॑:॥४॥

पदार्थः-(ते) **(मायिनः)** प्रशंसिता मायाः प्रज्ञा विद्यन्ते येषान्ते **(ममिरे)** निर्मिमते **(सुप्रचेतसः)** शोभनं प्रगतं चेतो विज्ञानं येषां ते **(जामी)** सुखभोक्तारौ **(सयोनी)** समाना योनिर्विद्या निमित्तं वा ययोस्तौ **(मिथुना)** द्वौ **(समोकसा)** समीचीनमोको निवसनं ययोस्तौ **(नव्यंनव्यम्)** नवीनंनवीनम् **(तन्तुम्)** विस्तृतं वस्तुविज्ञानं वा **(आ तन्वते)** **(दिवि)** विद्युति सूर्ये वा **(समुद्रे)** अन्तरिक्षे सागरे वा **(अन्तः)** मध्ये **(कवयः)** विद्वांसः **(सुदीतयः)** शोभना दीप्तिर्विद्यादीप्तिर्येषां ते। अत्र **छान्दसो वर्णलोपोवे**ति प्रलोपः॥४॥

अन्वयः-ये सुप्रचेतसो मायिनः सुदीतयः कवयः समोकसा मिथुना सयोनी जामी प्राप्य विदित्वा वा दिवि समुद्रेऽन्तर्नव्यंनव्यं तन्तुं ममिरे ते सर्वाणि विद्यासुखान्यातन्वते॥४॥

भावार्थः-ये मनुष्या आप्तावध्यापकोपदेशकावुपेत्य विद्याः प्राप्य भूमिविद्युतौ वा विदित्वा सर्वाणि विद्याकृत्यानि हस्तामलकवत्साक्षात्कृत्यान्यानुपदिशन्ति ते जगद्भूषका भवन्ति॥४॥

पदार्थः-जो **(सुप्रचेतसः)** सुन्दर प्रसन्नचित्त **(मायिनः)** प्रशंसित बुद्धि वा **(सुदीतयः)** सुन्दर विद्या के प्रकाशवाले **(कवयः)** विद्वान् जन **(समोकसा)** समीचीन जिनका निवास **(मिथुना)** ऐसे दो **(सयोनी)** समान विद्या वा निमित्त **(जामी)** सुख भोगनेवालों को प्राप्त हो वा जानकर **(दिवि)** बिजुली और सूर्य के तथा **(समुद्रे)** अन्तरिक्ष वा समुद्र के **(अन्तः)** बीच **(नव्यंनव्यम्)** नवीन-नवीन **(तन्तुम्)** विस्तृत वस्तुविज्ञान को **(ममिरे)** उत्पन्न करते हैं **(ते)** वे सब विद्या और सुखों का **(आ, तन्वते)** अच्छे प्रकार विस्तार करते हैं॥४॥

भावार्थः-जो मनुष्य आप्त अध्यापक और उपदेशकों को प्राप्त हो विद्याओं को प्राप्त हो वा भूमि और बिजुली को जान समस्त विद्या के कामों को हाथ में आमले के समान साक्षात् कर औरों को उपदेश देते हैं, वे संसार को शोभित करनेवाले होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तद्राधो॑ अ॒द्य स॑वि॒तुर्वरे॑ण्यं व॒यं दे॒वस्य॑ प्रस॒वे म॑नामहे।

अ॒स्मभ्यं॑ द्यावापृथिवी सुचे॒तुना॑ र॒यिं ध॑त्तं॒ वसु॑मन्तं शत॒ग्विन॑म्॥५॥२॥

तत्। राधः॑। अ॒द्य। स॒वि॒तुः। वरे॑ण्यम्। व॒यम्। दे॒वस्य॑। प्र॒ऽस॒वे। म॒नामहे। अ॒स्मभ्य॑म्। द्यावापृथिवी इति॑। सु॒ऽचे॒तुना॑। र॒यिम्। ध॒त्त॒म्। वसु॑ऽमन्तम्। श॒त॒ऽग्विन॑म्॥५॥

पदार्थः-**(तत्)** **(राधः)** द्रव्यम् **(अद्य)** इदानीम् **(सवितुः)** जगदुत्पादकस्य **(वरेण्यम्)** वर्त्तुमर्हम् **(वयम्)** **(देवस्य)** द्योतकस्य **(प्रसवे)** प्रसूतेऽस्मिञ्जगति **(मनामहे)** विजानीमः **(अस्मभ्यम्)** **(द्यावापृथिवी)** भूमिसूर्यौ **(सुचेतुना)** सुष्ठु संज्ञानेन **(रयिम्)** श्रियम् **(धत्तम्)** **(वसुमन्तम्)** बहुधनयुक्तम् **(शतग्विनम्)** शतानि गावो विद्यन्ते यस्मिँस्तम्॥५॥

अन्वयः-हे अध्यापकोपदेशकौ! वयमद्य सवितुर्देवस्य प्रसवे यद्वरेण्यं राधो मनामहे तच्छतग्विनं वसुमन्तं रयिं सुचेतुनाऽस्मभ्यं द्यावापृथिवी इव युवां धत्तम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वांसो यथा द्यावापृथिव्यौ सर्वान् प्राणिनः सुखयन्ति तथा सर्वान् विद्याधनोन्नत्या सुखयन्तु॥५॥

अस्मिन् सूक्ते विद्युद्भूमिवद्विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति एकोनषष्ट्युत्तरं शततमं १५९ सूक्तं द्वितीयो २ वर्गश्च समाप्तः॥

पदार्थः–हे अध्यापक और उपदेशको! **(वयम्)** हम लोग **(अद्य)** आज **(सवितुः)** जगत् के उत्पन्न करने **(देवस्य)** और प्रकाश करनेवाले ईश्वर के **(प्रसवे)** उत्पन्न किये हुए इस जगत् में जिस **(वरेण्यम्)** स्वीकार करने योग्य **(राधः)** द्रव्य को **(मनामहे)** जानते हैं **(तत्)** उस **(शतग्विनम्)** सैकड़ों गौओंवाले **(वसुमन्तम्)** नाना प्रकार के धनों से युक्त **(रयिम्)** धन को **(सुचेतना)** सुन्दर ज्ञान से **(अस्मभ्यम्)** हम लोगों के लिये **(द्यावापृथिवी)** भूमिमण्डल और सूर्यमण्डल के समान तुम **(धत्तम्)** धारण करो॥५॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् जन जैसे द्यावापृथिवी सब प्राणियों को सुखी करते हैं, वैसे सबको विद्या और धन की उन्नति से सुखी करें॥५॥

इस सूक्त में बिजुली और भूमि के समान विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ उनसठवाँ १५९ सूक्त और दूसरा २ वर्ग समाप्त हुआ॥

ते हीत्यस्य पञ्चर्चस्य षष्ट्युत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। द्यावापृथिव्यौ देवते। १ विराट् जगती। २-५ निचृज्जगती छन्दः। निषादः स्वरः॥

अथ द्यावापृथिव्योर्दृष्टान्तेन मनुष्याणामुपकारग्रहणमाह॥

अब पांच ऋचावाले एक सौ साठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में द्यावापृथिवी के दृष्टान्त से मनुष्यों के उपकार करने का वर्णन करते हैं॥

ते हि द्यावा॑पृथि॒वी वि॒श्वश॑म्भुव ऋ॒तावा॑री॒ रज॑सो धार॒यत्क॑वी।
सु॒जन्म॑नी धि॒षणे॑ अ॒न्तरी॑यते दे॒वो दे॒वी धर्म॑णा॒ सूर्यः॑ शुचि॑॥ १॥

ते इति॑। हि। द्यावा॑पृथि॒वी इति॑। वि॒श्वऽश॑म्भुवा। ऋ॒तावा॑री॒ इत्यृ॒तऽवा॑री। रज॑सः। धा॒र॒यत्क॑वी इति॑। सु॒जन्म॑नी॒ इति॑ सु॒ऽजन्म॑नी। धि॒षणे॒ इति॑। अ॒न्तः। ई॒य॒ते॒। दे॒वः। दे॒वी इति॑। धर्म॑णा। सूर्यः॑। शुचि॑॥ १॥

पदार्थः-(**ते**) द्वे (**हि**) खलु (**द्यावापृथिवी**) विद्युदन्तरिक्षे (**विश्वशम्भुवा**) विश्वस्मिन् शं सुखं भावुकेन (**ऋतावरी**) सत्यकारणयुक्ते (**रजसः**) लोकान् (**धारयत्कवी**) धारयन्तौ कवी विक्रान्तदर्शनौ सूर्यविद्युतौ ययोस्तौ (**सुजन्मनी**) शोभनं जन्म ययोस्ते (**धिषणे**) प्रसोढ्यौ (**अन्तः**) मध्ये (**ईयते**) प्राप्नोति (**देवः**) दिव्यगुणः (**देवी**) देदीप्यमाने (**धर्मणा**) स्वधर्मेण (**सूर्यः**) (**शुचिः**) पवित्रः॥ १॥

अन्वयः-हे विद्वांसो! ये विश्वशम्भुवा ऋतावरी धारयत्कवी सुजन्मनी धिषणे देवी द्यावापृथिवी धर्मणा रजसोऽन्तर्धरतः ययोरन्तः शुचिर्देवः सूर्य्य ईयते ते हि यूयं सम्यग्विजानीत॥ १॥

भावार्थः-यथा सर्वेषां लोकानां वायुविद्युदाकाशाऽधिकरणानि सन्ति तथेश्वरो वाय्वादीनामाधारोऽस्ति। अस्यां सृष्टावेकैकस्य ब्रह्माण्डस्य मध्य एकैकः सूर्यलोकोऽस्तीति सर्वे विद्युः॥ १॥

पदार्थः-हे विद्वानो! जो (**विश्वशम्भुवा**) संसार में सुख की भावना करनेहारे करके (**ऋतावरी**) सत्य कारण से युक्त (**धारयत्कवी**) अनेक पदार्थों की धारणा कराते और प्रबल जिनका देखना (**सुजन्मनी**) सुन्दर जन्मवाले (**धिषणे**) उत्कट सहनशील (**देवी**) निरन्तर दीपते हुए (**द्यावापृथिवी**) बिजुली और अन्तरिक्ष लोक (**धर्मणा**) अपने धर्म्म से अर्थात् अपने भाव से (**रजसः**) लोकों को (**अन्तः**) अपने बीच में धरते हैं। जिन उक्त द्यावापृथिवियों में (**शुचिः**) पवित्र (**देवः**) दिव्य गुणवाला (**सूर्य्यः**) सूर्यलोक (**ईयते**) प्राप्त होता है (**ते**) उन दोनों को (**हि**) ही तुम अच्छे प्रकार जानो॥ १॥

भावार्थः-जैसे सब लोकों के वायु, बिजुली और आकाश ठहरने के स्थान हैं, वैसे ईश्वर उन वायु आदि पदार्थों का आधार है। इस सृष्टि में एक-एक ब्रह्माण्ड के बीच एक-एक सूर्यलोक है, यह सब जानें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः।
सुधृष्टमे वपुष्ये३ न रोदसी पिता यत्सीमभि रूपैरवासयत्॥ २॥

उरुऽव्यचसा। महिनी इति। असश्चता। पिता। माता। च। भुवनानि। रक्षतः। सुधृष्टमे इति सुऽधृष्टमे। वपुष्ये३ इति। न। रोदसी इति। पिता। यत्। सीम्। अभि। रूपैः। अवासयत्॥ २॥

पदार्थः-(**उरुव्यचसा**)बहुव्यापिनौ (**महिनी**) महत्यौ (**असश्चता**) विलक्षणस्वरूपे (**पिता**) (**माता**) (**च**) (**भुवनानि**) भवन्ति भूतानि येषु तानि (**रक्षतः**) (**सुधृष्टेमे**) सुष्ठु अतिशयेन प्रसोढ्यौ (**वपुष्ये**) वपुषि रूपे भवे (**न**) इव (**रोदसी**) द्यावापृथिवी (**पिता**) पालकोऽग्निर्विद्युद्वा (**यत्**) ये (**सीम्**) सर्वतः (**अभि**) आभिमुख्ये (**रूपैः**) शुल्कादिभिः (**अवासयत्**) आच्छादयति॥ २॥

अन्वयः-हे मनुष्या! पिता यद्ये रोदसी रूपैः सीमभ्यवासयत्तेऽसश्चता महिनी उरुव्यचसा सुधृष्टमे वपुष्ये नेव माता पिता च भुवनानि रक्षतः॥ २॥

भावार्थः-यथा सर्वाणि भूतानि भूमिसूर्या रक्षतो धरतश्च तथा मातापितरौ सन्तानान् पालयतो रक्षतश्च यदप्सु पृथिव्यामेतद्विकारेषु च रूपं दृश्यते तद्व्याप्तस्याऽग्नेरेवास्तीति वेदितव्यम्॥ २॥

पदार्थः-हे मनुष्यो! (**पिता**) पालन करनेवाला विद्युदग्नि (**यत्**) जिन (**रोदसी**) सूर्य और भूमिमण्डल को (**रूपैः**) शुक्ल, कृष्ण, हरित, पीतादि रूपों से (**सीम्**) सब ओर से (**अभ्यवासयत्**) ढांपता है, उन (**असश्चता**) विलक्षण रूपवाले (**महिनी**) बड़े (**उरुव्यचसा**) बहुत व्याप्त होनेवाले (**सुधृष्टमे**) सुन्दर अत्यन्त उत्कर्षता से सहनेवाले (**वपुष्ये**) रूप में प्रसिद्ध हुए सूर्यमण्डल और भूमिमण्डलों के (**न**) समान (**माता**) मान्य करनेवाली स्त्री (**पिता, च**) और पालना करनेवाला जन (**भुवनानि**) जिनमें प्राणी होते हैं, उन लोकों की (**रक्षतः**) रक्षा करते हैं॥ २॥

भावार्थः-जैसे समस्त प्राणियों को भूमि और सूर्यमण्डल पालते और धारण करते हैं, वैसे माता-पिता सन्तानों की पालना और रक्षा करते हैं। जो जलों और पृथिवी वा इनके विकारों में रूप दिखाई देता है, वह व्याप्त अग्नि ही का है, यह समझना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत॥ ३॥

सः। वह्निः। पुत्रः। पित्रोः। पवित्रऽवान्। पुनाति। धीरः। भुवनानि। मायया। धेनुम्। च। पृश्निम्। वृषभम्। सुऽरेतसम्। विश्वाहा। शुक्रम्। पयः। अस्य। धुक्षत॥ ३॥

पदार्थः-(**सः**) (**वह्निः**) वोढा (**पुत्रः**) अपत्यमिव (**पित्रोः**) वाय्वाकाशयोः (**पवित्रवान्**) बहूनि पवित्राणि कर्माणि विद्यन्ते यस्य सः (**पुनाति**) पवित्रीकरोति (**धीरः**) ध्यानवान् (**भुवनानि**) लोकान् (**मायया**) प्रज्ञया (**धेनुम्**) गामिव वर्त्तमानां वाणीम् (**च**) (**पृश्निम्**) सूर्यम् (**वृषभम्**) सर्वलोकस्तम्भकम् (**सुरेतसम्**) सुष्ठु बलम् (**विश्वाहा**) सर्वाणि दिनानि (**शुक्रम्**) आशुकरम् (**पयः**) दुग्धम् (**अस्य**) वह्नेः (**धुक्षतः**) प्रदुहन्ति। अत्र **वाच्छन्दसी**ति भष्भावः॥ ३॥

अन्वयः-हे मनुष्या! पवित्रवान् पित्रोः पुत्र इव वर्त्तमानः स वह्निर्भुवनानि पुनाति। यो धेनुं सुरेतसं वृषभं पृश्निं शुक्रम्पयश्च विश्वाहा पुनाति। यं धीरो मायया जानात्यस्य सकाशादभीष्टसिद्धिं यूयं धुक्षत॥ ३॥

भावार्थः-यथा सूर्य्यः सर्वाँल्लोकान् धरति पवित्रयति तथा सुपुत्राः कुलं शुन्धन्ति॥ ३॥

पदार्थः-हे मनुष्यो! (**पवित्रवान्**) जिसके बहुत शुद्ध कर्म वर्त्तमान (**पित्रोः**) तथा जो वायु और आकाश के (**पुत्रः**) सन्तान के समान वर्त्तमान है (**सः**) वह (**वह्निः**) पदार्थों की प्राप्ति करानेवाला अग्नि (**भुवनानि**) लोकों को (**पुनाति**) पवित्र करता है। जो (**धेनुम्**) गौ के समान वर्त्तमान वाणी (**सुरेतसम्**) सुन्दर जिसका बल जो (**वृषभम्**) सब लोकों को रोकनेवाला (**पृश्निम्**) सूर्य है, उस (**शुक्रम्**) शीघ्रता करनेवाले को और (**पयः**) दूध को (**च**) और (**विश्वाहा**) सब दिनों को पवित्र करता है, जिसको (**धीरः**) ध्यानवान् पुरुष (**मायया**) उत्तम बुद्धि से जानता है (**अस्य**) उस अग्नि की उत्तेजना से अभीष्ट सिद्धि को तुम (**धुक्षत**) पूरी करो॥ ३॥

भावार्थः-जैसे सूर्य समस्त लोकों को धारण करता और पवित्र करता है, वैसे सुपुत्र कुल को पवित्र करते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अयं देवानामुपसामुपस्तमो यो जजान रोदसी विश्वशंभुवा।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभिः समानृचे॥ ४॥

अयम्। देवानाम्। अपसाम्। अपःऽतमः। यः। जजान। रोदसी इति। विश्वऽशंभुवा। वि। यः। ममे। रजसी इति। सुक्रतुऽयया। अजरेभिः। स्कम्भनेभिः। सम्। आनृचे॥ ४॥

पदार्थः-(**अयम्**) (**देवानाम्**) पृथिव्यादीनाम् (**अपसाम्**) कर्मणाम् (**अपस्तमः**) अतिशयेन क्रियावान् (**यः**) (**जजान**) प्रकटयति (**रोदसी**) द्यावापृथिव्यौ (**विश्वशम्भुवा**) विश्वस्मिन् शं सुखं भावुकेन

(वि) **(यः)** **(ममे)** मापयति **(रजसी)** लोकौ **(सुक्रतूयया)** सुष्ठु प्रज्ञया कर्मणा वा **(अजरेभिः)** अजरैर्हानिरहितैः प्रबन्धैः **(स्कम्भनेभिः)** स्तम्भनैः **(सम्)** **(आनृचे)** स्तौमि॥४॥

अन्वयः–योऽयं देवानामपसामपस्तमो यो विश्वशम्भुवा रोदसी जजान यः सुक्रतुयया स्कम्भनेभिरजरेभी रजसी विममे तमहं समानृचे॥४॥

भावार्थः–सृष्ट्युत्पत्तिस्थितिप्रलयकरणादीनि कर्माणि यस्य जगदीश्वरस्य भवन्ति यो हि कारणादखिलविविधं कार्यं रचयित्वाऽनन्तबलेन धरति, तमेव सर्वे सदा प्रशंसन्तु॥४॥

पदार्थः–जो **(अयम्)** यह **(देवानाम्)** पृथिवी आदि लोकों के **(अपसाम्)** कर्मों के बीच **(अपस्तमः)** अतीव क्रियावान् है वा **(यः)** जो **(विश्वशम्भुवा)** सब में सुख की भावना करानेवाले कर्म से **(रोदसी)** सूर्यलोक और भूमिलोक को **(जजान)** प्रकट करता है वा **(यः)** जो **(सुक्रतुयया)** उत्तम बुद्धि, कर्म और **(स्कम्भनेभिः)** रुकावटों से और **(अजरेभिः)** हानिरहित प्रबन्धों के साथ **(रजसी)** भूमिलोक और सूर्यलोक का **(वि, ममे)** विविध प्रकार से मान करता उसकी मैं **(समानृचे)** अच्छे प्रकार स्तुति करता हूँ॥४॥

भावार्थः–सृष्टि की उत्पत्ति, स्थिति और प्रलय करने आदि काम जिस जगदीश्वर के होते हैं, जो निश्चय के साथ कारण से समस्त नाना प्रकार के कार्य को रच कर अनन्त बल से धारण करता है, उसी को सब लोग सदैव प्रशंसित करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ते नो॑ गृणा॒ने म॑हिनी॒ महि॒ श्रवः॑ क्ष॒त्रं द्यावा॑पृथिवी धासथो बृ॒हत्।
येना॒भि कृ॒ष्टीस्त॒तना॑म वि॒श्वहा॑ प॒नाय्य॒मोजो॑ अ॒स्मे समि॑न्वतम्॥५॥३॥

ते इति॑। न॒ः। गृ॒णा॒ने इति॑। म॒हि॒नी॒ इति॑। मह॑। श्रवः॑। क्ष॒त्रम्। द्यावा॑पृथि॒वी॒ इति॑। धा॒स॒थ॒ः। बृ॒हत्। येन॑। अ॒भि। कृ॒ष्टीः। त॒तना॑म। वि॒श्वहा॑। प॒नाय्य॑म्। ओजः॑। अ॒स्मे इति॑। सम्। इ॒न्व॒त॒म्॥५॥

पदार्थः–**(ते)** उभे **(नः)** अस्मभ्यम् **(गृणाने)** स्तूयमाने। अत्र **कृतो बहुलमि**ति कर्मणि शानच्। **(महिनी)** महत्यौ **(महि)** पूज्यम् **(श्रवः)** अन्नम्। **(क्षत्रम्)** राज्यम् **(द्यावापृथिवी)** भूमिसवितारौ **(धासथः)** दध्याताम्। अत्र व्यत्ययः। **(बृहत्)** महत् **(येन)** **(अभि)** **(कृष्टीः)** मनुष्यान् **(ततनाम)** विस्तारयेम **(विश्वहा)** सर्वाणि दिनानि **(पनाय्यम्)** स्तोतुमर्हम् **(ओजः)** पराक्रमम् **(अस्मे)** अस्मासु **(सम्)** **(इन्वतम्)** वर्द्धयतम्॥५॥

अन्वयः–ये गृणाने महिनी द्यावापृथिवी स्तस्ते नो बृहन् मह श्रवः क्षत्रं धासथः येन वयं विश्वहा कृष्टीरभिततनाम तत् पनाय्यमोजश्चास्मे समिन्वतम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये भूमिगुणविद्विद्यां विदित्वा तयोपयोक्तुं जानन्ति ते महद्बलं प्राप्य सार्वभौमं राज्यं कर्त्तुं शक्नुवन्तीति॥५॥

अत्र द्यावापृथिवीदृष्टान्तेन मनुष्याणामेतदुपकारग्रहणमुक्तमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति षष्ट्युत्तरं शततमं १६० सूक्तं तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः-जो **(गृणाने)** स्तुति किये जाते हुए **(महिनी)** बड़े **(द्यावापृथिवी)** भूमि और सूर्यलोक हैं **(ते)** वे **(नः)** हम लोगों के लिये **(बृहत्)** अत्यन्त **(महि)** प्रशंसनीय **(श्रवः)** अन्न और **(क्षत्रम्)** राज्य को **(धासथः)** धारण करें **(येन)** जिससे हम लोग **(विश्वहा)** सब दिनों **(कृष्टीः)** मनुष्यों का **(अभि, ततनाम)** सब ओर से विस्तार करें और उस **(पनाय्यम्)** प्रशंसा करने योग्य **(ओजः)** पराक्रम को **(अस्मे)** हम लोगों के लिये **(समिन्वतम्)** अच्छे प्रकार बढ़ावें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जन भूमि के गुणों को जाननेवालों की विद्या को जान के उससे उपयोग करना जानते हैं, वे अत्यन्त बल को पाकर सब पृथिवी का राज्य कर सकते हैं॥५॥

इस सूक्त में द्यावापृथिवी के दृष्टान्त से मनुष्यों का यह उपकार ग्रहण करना कहा, इससे इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह समझना चाहिये॥

यह एक सौ साठवां १६० सूक्त और तीसरा ३ वर्ग समाप्त हुआ॥

किम्वित्यस्य चतुर्दशर्चस्य एकषष्ट्युत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। ऋभवो देवताः। १ विराट् जगती। २,५,६,८,१२ निचृज्जगती। ७,१० जगती च छन्दः। निषादः स्वरः। ३ निचृत् त्रिष्टुप्। ४,१३ भुरिक् त्रिष्टुप्। ९ स्वराट् त्रिष्टुप्। ११ त्रिष्टुप् छन्दः। धैवतः स्वरः। १४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मेधाविकर्म्माण्याह॥

अब चौदह ऋचावाले एक सौ इकसठवें सूक्त का प्रारम्भ है। उसके आरम्भ से मेधावि अर्थात् धीरबुद्धि के कर्मों को कहते हैं॥

किमु श्रेष्ठः किं यविष्ठो न आजगन् किमीयते दूत्यं१ कद्यदूचिम।
न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम॥ १॥

किम्। ऊम् इति। श्रेष्ठः। किम्। यविष्ठः। नः। आ। अजगन्। किम्। ईयते। दूत्यम्। कत्। यत्। ऊचिम। न। निन्दिम। चमसम्। यः। महाऽकुलः। अग्ने। भ्रातः। द्रुणः। इत्। भूतिम्। ऊदिम॥ १॥

पदार्थः-(**किम्**) (**उ**) (**श्रेष्ठः**) (**किम्**) (**यविष्ठः**) अतिशयेन युवा (**नः**) अस्मान् (**आ**) (**अजगन्**) पुनः पुनः प्राप्नोति। अत्र यङि लङि **बहुलं छन्दसी**ति शपो लुक्। (**किम्**) (**ईयते**) प्राप्नोति (**दूत्यम्**) दूतस्य भावं कर्म वा (**कत्**) कदा (**यत्**) यम् (**ऊचिम**) उच्याम (**न**) (**निन्दिम**) निन्देम। अत्र **वा छन्दसी**ति लिटि द्विर्वचनाभावः। (**चमसम्**) मेघम् (**यः**) (**महाकुलः**) महत्कुलं यस्य (**अग्ने**) विद्वन् (**भ्रातः**) बन्धो (**द्रुणः**) यो द्रवति सः (**इत्**) एव (**भूतिम्**) ऐश्वर्यम् (**ऊदिम**) वदेम॥ १॥

अन्वयः-हे भ्रातरग्ने! यो महाकुलो द्रुणश्चमसमाप्नोति तं वयं न निन्दिम नोऽस्मान् किं श्रेष्ठः किमु यविष्ठ आऽजगन् यद्यं वयमूचिम स किं दूत्यमीयते ते प्राप्येत् कद्भूतिमूदिम॥ १॥

भावार्थः-जिज्ञासवो विदुष एवं पृच्छेयुरस्मान् कथमुत्तमविद्या प्राप्नुयात् कश्चास्मिन् विषये श्रेयान् बलिष्ठो दूत इव पदार्थोऽस्ति कं प्राप्य वयं सुखिनः स्यामेति॥ १॥

पदार्थः-हे (**भ्रातः**) बन्धु (**अग्ने**) विद्वान्! (**यः**) जो (**महाकुलः**) बड़े कुलवाला (**द्रुणः**) शीघ्रगामी पुरुष (**चमसम्**) मेघ को प्राप्त होता है, उसकी हम लोग (**न**) नहीं (**निन्दिम**) निन्दा करते (**नः**) हम लोगों को (**किम्**) क्या (**श्रेष्ठः**) श्रेष्ठ (**किम्**) क्या (**उ**) तो (**यविष्ठः**) अतीव जवान पुरुष (**आजगन्**) वार-वार प्राप्त होता है (**यत्**) जिसको हम लोग (**ऊचिम**) कहें सो (**किम्**) क्या (**दूत्यम्**) दूतपन वा दूत के काम को (**ईयते**) प्राप्त होता है, उसको प्राप्त हो के (**इत्**) ही (**कत्**) कब (**भूतिम्**) ऐश्वर्य्य को (**ऊदिम**) कहें, उपदेश करें॥ १॥

भावार्थः-जिज्ञासु जन विद्वानों को ऐसा पूछें कि हमको उत्तम विद्या कैसे प्राप्त हो और कौन इस विद्या विषय में श्रेष्ठ बलवान् दूत के समान पदार्थ है, किसको पाकर हम लोग सुखी होवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एकं॑ चम॒सं च॒तुर॑: कृणोतन॒ तद्वो॑ दे॒वा अ॒ब्रुव॒न् तद्व॒ आग॑मम्।
सौध॑न्वना॒ यद्ये॒वा क॑रि॒ष्यथ॑ सा॒कं दे॒वैर्य॒ज्ञिया॑सो भविष्यथ॥ २॥

एकं॑म् च॒म॒सम्। च॒तुर॑:। कृ॒णो॒त॒न॒। तत्। व॒:। दे॒वा:। अ॒ब्रु॒व॒न्। तत्। व॒:। आ। अ॒ग॒म॒म्। सौध॑न्वना:। यदि॑। ए॒व। क॒रि॒ष्यथ॑। सा॒कम्। दे॒वै:। य॒ज्ञिया॑स:। भ॒वि॒ष्य॒थ॒॥ २॥

पदार्थ:-**(एकम्)** असहायम् **(चमसम्)** मेघम् **(चतुर:)** वाय्वग्निजलभूमी: **(कृणोतन)** कुर्यात् **(तत्)** **(व:)** युष्मान् **(देवा:)** विद्वांस: **(अब्रुवन्)** ब्रूयुरुपदिशेयु: **(तत्)** **(व:)** युष्माकं सकाशात् **(आ)** **(अगमम्)** प्राप्नुयाम् **(सौधन्वना:)** शोभनेषु धनुष्षु कुशला: **(यदि)** **(एव)** **(करिष्यथ)** **(साकम्)** **(देवै:)** विद्वद्भिस्सह **(यज्ञियास:)** यज्ञमनुष्ठातुमर्हा: **(भविष्यथ)**॥ २॥

अन्वय:-हे सौधन्वना! यदेकं चमसं देवा वोऽब्रुवँस्तद्यूयं कृणोतन यद्वोऽहमागमं तत् कृणोतन यदि देवै: साकं चतुर: पृच्छत तर्हि स्वकार्यं सिद्धमेव करिष्यथ यज्ञियासश्च भविष्यथ॥ २॥

भावार्थ:-ये विदुषां सकाशात् प्रश्नोत्तरैर्विद्या: प्राप्य तदुक्तानि कर्माणि कुर्वन्ति ते विद्वांसो जायन्ते। पूर्वोक्तप्रश्नानामत्रोत्तराणि योऽस्मासु विद्याऽधिक: स श्रेष्ठ:, यो जितेन्द्रिय: स बलिष्ठ:, योऽग्नि: स दूत:, या पुरुषार्थसिद्धि: सा विभूतिश्च॥ २॥

पदार्थ:-हे **(सौधन्वना:)** उत्तम धनुषों में कुशल! जिस **(एकम्)** इकेले **(चमसम्)** मेघ को **(देवा:)** विद्वान् जन **(व:)** तुम लोगों के प्रति **(अब्रुवन्)** कहें अर्थात् उसके गुणों का उपदेश करें **(तत्)** उसको तुम लोग **(कृणोतन)** करो और जिसको **(व:)** तुम लोगों की उत्तेजना से मैं **(आगमम्)** प्राप्त होऊं **(तत्)** उसको करो, **(यदि)** जो **(देवै:)** विद्वानों के **(साकम्)** साथ **(चतुर:)** वायु, अग्नि, जल, भूमि इन चारों को पूछो तो अपने काम को सिद्ध **(एव)** ही **(करिष्यथ)** करो और **(यज्ञियास:)** यज्ञ के अनुष्ठान के योग्य **(भविष्यथ)** होओ॥ २॥

भावार्थ:-जो विद्वानों की उत्तेजना से प्रश्नोत्तरों से विद्याओं को पाकर उस में कहे हुए कामों को करते हैं वे विद्वान् होते हैं। पिछले प्रश्नों के यहाँ ये उत्तर हैं कि जो हम लोगों में विद्या में अधिक है, वह श्रेष्ठ। जो जितेन्द्रिय है, वह अत्यन्त बलवान्। जो अग्नि है, वह दूत और जो पुरुषार्थसिद्धि है, वह विभूति है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒ग्निं दू॒तं प्रति॒ यदब्र॑वीत॒नाश्व॒: कर्त्वो॒ रथ॑ उ॒तेह कर्त्व॑:।

धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि॥ ३॥

अग्निम्। दूतम्। प्रति। यत्। अब्रवीतन। अश्वः। कर्त्वः। रथः। उत। इह। कर्त्वः। धेनुः। कर्त्वा। युवशा। कर्त्वा। द्वा। तानि। भ्रातः। अनु। वः। कृत्वी। आ। इमसि॥ ३॥

पदार्थः-(**अग्निम्**) विद्युदादिम् (**दूतम्**) यो दुनोति तम् (**प्रति**) (**यत्**) यः (**अब्रवीतन**) ब्रूयात् (**अश्वः**) आशुगामी (**कर्त्वः**) कर्त्तुमर्हः। अत्र सर्वत्र कृत्यार्थे त्वन् प्रत्ययः। (**रथः**) रमणसाधनः (**उत**) अपि (**इह**) (**कर्त्वः**) कर्त्तुं योग्यः (**धेनुः**) वाणी (**कर्त्वा**) कर्त्तुं योग्या (**युवशा**) युवैर्मिश्रिताऽमिश्रितैस्तद्वत्कृतानि विस्तृतानि (**कर्त्वा**) कर्त्तव्यानि (**द्वा**) द्वौ (**तानि**) (**भ्रातः**) बन्धो (**अनु**) (**वः**) युष्माकं सकाशात् (**कृत्वी**) कृत्वा। अत्र **स्नात्व्यादयश्च** (अष्टा०७.१.४५) इति निपातितम्। (**आ**) (**इमसि**) प्राप्नुमः॥ ३॥

अन्वयः-हे भ्रातर्विद्वन्! यद्योऽश्वः कर्त्त्व उतेह रथः कर्त्त्वोऽस्ति तमग्निं दूतं प्रति योऽब्रवीतन तदुपदेशेन या कर्त्त्वा धेनुरस्ति यानि कर्त्त्वा युवशा सन्ति येऽग्निवाचौ द्वा स्तस्तानि वः सिद्धानि कृत्वी वयमन्वेमसि॥ ३॥

भावार्थः-यो यस्मै सत्यां विद्यां ब्रूयात्, अग्न्यादिकृत्यमुपदिशेच्च स तं बन्धुवद्विजानीयात्, स कर्त्तव्यानि कार्याणि साधितुं शक्नुयात्॥ ३॥

पदार्थः-हे (**भ्रातः**) बन्धु विद्वान्! (**यत्**) जो (**अश्वः**) शीघ्रगामी (**कर्त्वः**) करने योग्य अर्थात् कलायन्त्रादि से सिद्ध होनेवाला नानाविध शिल्पक्रियाजन्य पदार्थ (**उत**) अथवा (**इह**) यहाँ (**रथः**) रमण करने का साधन (**कर्त्वः**) करने योग्य विमान आदि यान हैं, उसको (**अग्निम्**) बिजुली आदि (**दूतम्**) दूत कर्मकारी अग्नि के (**प्रति**) प्रति जो (**अब्रवीतन**) कहे, उसके उपदेश से जो (**कर्त्वा**) करने योग्य (**धेनुः**) वाणी है वा जो (**कर्त्वा**) करने योग्य (**युवशा**) मिले-अनमिले व्यवहारों से विस्तृत काम हैं वा जो अग्नि और वाणी (**द्वा**) दो हैं (**तानि**) उन सबको (**वः**) तुम्हारी उत्तेजना से सिद्ध (**कृत्वी**) कर हम लोग (**अनु, आ, इमसि**) अनुक्रम से उक्त पदार्थों को प्राप्त होते हैं॥ ३॥

भावार्थः-जो जिसके लिये सत्यविद्या को कहे और अग्नि आदि से कर्त्तव्य का उपदेश करे, वह उसको बन्धु के समान जाने और वह करने योग्य कामों को सिद्ध कर सके॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

चकृवांसं ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन्।
यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वन्तर्यानजे॥ ४॥

चक्रुऽवांसः। ऋभवः। तत्। अपृच्छत। क्व। इत्। अभूत्। यः। स्यः। दूतः। नः। आ। अजगन्। यदा। अवऽअख्यत्। चमसान्। चतुरः। कृतान्। आत्। इत्। त्वष्टा। ग्नासु। अन्तः। नि। आनजे॥ ४॥

पदार्थः-(**चक्रुवांसः**) कर्त्तारः (**ऋभवः**) मेधाविनः। **ऋभुरिति मेधाविनामसु पठितम्।** (निघं०३.१५) (**तत्**) (**अपृच्छत**) पृच्छन्तु (**क्व**) कस्मिन् (**इत्**) एव (**अभूत्**) भवति (**यः**) (**स्यः**) (**दूतः**) (**नः**) अस्मान् (**आ**) (**अजगन्**) पुनः पुनः प्राप्नोति (**यदा**) (**अवाख्यत्**) प्रख्यापयेत् (**चमसान्**) मेघान् (**चतुरः**) वाय्वग्निजलभूमीः (**कृतान्**) (**आत्**) (**इत्**) (**त्वष्टा**) तनूकर्त्ता (**ग्नासु**) गन्तुं योग्यासु भूमिषु (**अन्तः**) मध्ये (**नि**) (**आनजे**) अस्येच्चालयेत्॥ ४॥

अन्वयः-हे चकृवांस ऋभवो! यो दूतो न आजगन् स्य सः क्वाभूदिति तदित्तमेव विदुषः प्रति भवन्तोऽपृच्छत। यस्त्वष्टा यदा चमसानवाख्यत्तदा स चतुरः कृतान् विजानीयादात्स इत् ग्नास्वन्तर्यानानि न्यानजे॥ ४॥

भावार्थः-ये विद्वत्सनीडे सुशिक्षां विद्यां च प्राप्य सर्वसिद्धान्तोत्तराणि विज्ञाय कार्येषु संप्रयुञ्जते ते मेधाविनो जायन्ते॥ ४॥

पदार्थः-हे (**चक्रुवांसः**) कर्म करनेवाले (**ऋभवः**) मेधावि सज्जनो! (**यः**) जो (**दूतः**) दूत (**नः**) हमारे प्रति (**आ, अजगन्**) बार-बार प्राप्त होवे (**स्यः**) वह (**क्व**) कहाँ (**अभूत्**) उत्पन्न हुआ है (**तत्, इत्**) उस ही को विद्वानों के प्रति आप लोग (**अपृच्छत**) पूछो। जो (**त्वष्टा**) सूक्ष्मता करनेवाला (**यदा**) जब (**चमसान्**) मेघों को (**अवाख्यत्**) विख्यात करे, तब वह (**चतुरः**) चार पदार्थों को अर्थात् वायु, अग्नि जल और भूमि को (**कृतान्**) किये हुए अर्थात् पदार्थ विद्या से उपयोग में लिये हुए जाने (**आत्**) और (**इत्**) वही (**ग्नासु**) गमन करने योग्य भूमियों के (**अन्तः**) बीच यानों को (**नि, आनजे**) चलावे॥ ४॥

भावार्थः-जो विद्वानों के समीप में उत्तम शिक्षा और विद्या को पाकर समस्त सिद्धान्तों के उत्तरों को जान कार्य्यों में अत्युत्तम योग करते हैं, वे बुद्धिमान् होते हैं॥ ४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत्॥ ५॥ ४॥

हनाम। एनान्। इति। त्वष्टा। यत्। अब्रवीत्। चमसम्। ये। देवऽपानम्। अनिन्दिषुः। अन्या। नामानि। कृण्वते। सुते। सचा। अन्यैः। एनान्। कन्या। नामऽभिः। स्परत्॥ ५॥

पदार्थः-(**हनाम**) हिंसेम (**एनान्**) इष्टाचारिणः (**इति**) अनेन प्रकारेण (**त्वष्टा**) छेत्ता सूर्य इव विद्वान् (**यत्**) (**अब्रवीत्**) ब्रूते (**चमसम्**) मेघम् (**ये**) (**देवपानम्**) देवैः किरणैरिन्द्रियैर्वा पेयम् (**अनिन्दिषुः**) निन्देयुः (**अन्या**) अन्यानि (**नामानि**) (**कृण्वते**) कुर्वन्ति (**सुते**) निष्पादिते (**सचान्**) संयुक्तान् (**अन्यैः**) भिन्नैः (**एनान्**) जनान् (**कन्या**) कुमारिका (**नामभिः**) (**स्परत्**) प्रीणयेत्। अत्र लङ्यडभावः॥५॥

अन्वयः-हे मनुष्या! त्वष्टा यद्यं देवपानं चमसमब्रवीद्य एवमनिन्दिषुस्तानेनान् वयं हनाम। ये सचानन्यैर्नामभिरन्या नामानि सुते कृण्वत एनान् कन्या स्परदित्येवं तान् प्रति यूयमपि वर्त्तध्वम्॥५॥

भावार्थः-ये विदुषो निन्देयुर्विद्वत्स्वविद्वद्बुद्धिमविद्वत्सु विद्वत्प्रज्ञां च कुर्युस्त एव खलास्सर्वैस्तिरस्करणीयाः॥५॥

पदार्थः-हे मनुष्यो! (**त्वष्टा**) छिन्न-भिन्न करनेवाला सूर्य के समान विद्वान् (**यत्**) जिस (**देवपानम्**) किरण वा इन्द्रियों से पीने योग्य (**चमसम्**) मेघ जल को (**अब्रवीत्**) कहता है (**ये**) जो इसकी (**अनिन्दिषुः**) निन्दा करें उन (**एनान्**) इनको हम लोग (**हनाम**) मारें नष्ट करें। जो (**सचान्**) संयुक्त (**अन्यैः**) और (**नामभिः**) नामों से (**अन्या**) और (**नामानि**) नामों को (**सुते**) उत्पन्न किये हुए व्यवहार में (**कृण्वते**) प्रसिद्ध करते हैं (**एनान्**) इन जनों को (**कन्या**) कुमारी कन्या (**स्परत्**) प्रसन्न करे (**इति**) इस प्रकार से उनके प्रति तुम भी वर्त्तो॥५॥

भावार्थः-जो विद्वानों की निन्दा करें, विद्वानों में मूर्खबुद्धि और मूर्खों में विद्वद्बुद्धि करें, वे ही खल सबको तिरस्कार करने योग्य हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रो॒ हरी॑ युयु॒जे अ॒श्वि॒ना रथं॑ बृह॒स्पति॑र्वि॒श्वरू॑पा॒मुपा॑जत।
ऋ॒भुर्विभ्वा॒ वाजो॑ दे॒वाँ अग॑च्छत स्वप॑सो य॒ज्ञिय॑ भा॒गमै॑तन॥ ६॥

इन्द्रः॑। हरी॒ इति॑। युयु॒जे। अ॒श्वि॒ना॑। रथ॑म्। बृ॒ह॒स्पतिः॑। वि॒श्वऽरू॑पाम्। उप॑। आ॒ज॒त॒। ऋ॒भुः॑। विऽभ्वा॑। वाजः॑। दे॒वान्। अ॒ग॒च्छ॒त॒। सु॒ऽअप॑सः। य॒ज्ञिय॑म्। भा॒गम्। ऐ॒त॒न॒॥ ६॥

पदार्थः-(**इन्द्रः**) विद्युदिव परमैश्वर्यकारकः सूर्यः (**हरी**) धारणाकर्षणविद्ये (**युयुजे**) युञ्जीत (**अश्विना**) शिल्पविद्याक्रियाशिक्षकौ (**रथम्**) रमणीयं यानम् (**बृहस्पतिः**) बृहतां पतिः सूर्य इव (**विश्वरूपाम्**) विश्वानि सर्वाणि रूपाणि यस्यां पृथिव्याम् (**उप**) (**आजत**) विजानीत (**ऋभुः**) धनञ्जयो सूत्रात्मा वायुरिव मेधावी (**विभ्वा**) विभुना (**वाजः**) अन्नम् (**देवान्**) विदुषः (**अगच्छत**) प्राप्नुत (**स्वपसः**)

शोभनानि धर्म्याणि कर्माणि येषान्ते **(यज्ञियम्)** यो यज्ञमर्हति तम् **(भागम्)** भजनीयम् **(ऐतन)** विजानीत॥६॥

अन्वयः-हे मनुष्या! इन्द्रो हरी युयुजेऽश्विना रथं युञ्जीयातां बृहस्पतिरिव यूयं विश्वरूपामुपाजत। ऋभुर्विभ्वा वाज इव देवानगच्छत स्वपसो यूयं यज्ञियं भागमैतन॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्युद्वत्कार्ययोजकाः शिल्पविद्या इव सर्वकार्यप्रणेतारः सूर्यवद्राज्यभर्त्तारः प्राज्ञवद्विदुषां सङ्गन्तारो धार्मिकवत्कर्मकर्त्तारो मनुष्याः सन्ति ते सौभाग्यवन्तो जायन्ते॥६॥

पदार्थः-हे मनुष्यो! **(इन्द्रः)** बिजुली के समान परमैश्वर्यकारक सूर्य **(हरी)** धारण-आकर्षण कर्मों की विद्या को **(युयुजे)** युक्त करे, **(अश्विना)** शिल्पविद्या वा उसकी क्रिया हथोटी के सिखानेवाले विद्वान् जन **(रथम्)** रमण करने योग्य विमान आदि ज्ञान को जोड़े, **(बृहस्पतिः)** बड़े-बड़े पदार्थों की पालना करनेवाले सूर्य के समान तुम लोग **(विश्वरूपाम्)** जिसमें समस्त अर्थात् छोटे, बड़े, मोटे, पतरे, टेढे, बकुचे, कारे, पीरे, रङ्गीले, चटकीले रूप विद्यमान हैं, उस पृथिवी को **(उप, आजत)** उत्तमता से जानो। **(ऋभुः)** धनञ्जय सूत्रात्मा वायु के समान **(विभ्वा)** अपने व्याप्ति बल से **(वाजः)** अन्न को जैसे वैसे **(देवान्)** विद्वानों को **(अगच्छत)** प्राप्त होओ और **(स्वपसः)** जिन के सुन्दर धर्मसम्बन्धी काम हैं, ऐसे हुए तुम **(यज्ञियम्)** जो यज्ञ के योग्य **(भागम्)** सेवन करने योग्य भोग है, उसको **(ऐतन)** जानो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बिजुली के समान कार्य को युक्त करने, शिल्पविद्या के समान सब कार्यों को यथायोग्य व्यवहारों में लगाने, सूर्य के समान राज्य को पालने वाले, बुद्धिमानों के समान विद्वानो का सङ्ग करने और धार्मिक के समान कर्म करनेवाले मनुष्य हैं, वे सौभाग्यवान् होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ता कृणोतन।
सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन॥७॥

निः। चर्मणः। गाम्। अरिणीत। धीतिऽभिः। या। जरन्ता। युवशा। ता। अकृणोतन। सौधन्वनाः। अश्वात्। अश्वम्। अतक्षत। युक्त्वा। रथम्। उप। देवान्। अयातन॥७॥

पदार्थः-(**निः**) नितराम् **(चर्मणः)** त्वग्वदुपरिभागस्य **(गाम्)** पृथिवीम् **(अरिणीत)** प्राप्नुत **(धीतिभिः)** अङ्गुलिभिरिव धारणाभिः **(या)** यौ **(जरन्ता)** स्तुवन्तौ **(युवशा)** युवानो विद्यन्ते ययोस्तौ। अत्र **लोमादिपामादिना** मत्वर्थीयः शः। **(ता)** तौ **(अकृणोतन)** कुरुत **(सौधन्वनाः)** सुधन्वनि कुशलाः

(अश्वात्) वेगवतः पदार्थात् **(अश्वम्)** वेगवन्तं पदार्थम् **(अतक्षत)** अवस्तृणीत **(युक्त्वा)** **(रथम्)** यानम् **(उप)** **(देवान्)** दिव्यान् भोगान् गुणान् वा **(अयातन)** प्राप्नुत॥७॥

अन्वयः–हे मनुष्या! यूयं धीतिभिश्चर्मण इव गामरिणीत। या जरन्ता युवशा शिल्पिनौ स्यातां ता शिल्पकर्मसु प्रवृत्तौ निरकृणोतन। सौधन्वनाः सन्तोऽश्वादश्वमतक्षत रथं युक्त्वा देवानुपायातन॥७॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अङ्गुलीवत्कर्मकारिणः शिल्पविद्याप्रियाः पदार्थात् पदार्थगुणान् विज्ञाय यानादिषु कार्येषूपयुञ्जते ते दिव्यान् भोगान् प्राप्नुवन्ति॥७॥

पदार्थः–हे मनुष्यो! तुम **(धीतिभिः)** अङ्गुलियों के समान धारणाओं से **(चर्मणः)** शरीर की त्वचा के समान शरीर के ऊपरी भाग का सम्बन्ध रखनेवाली **(गाम्)** पृथिवी को **(अरिणीत)** प्राप्त होओ **(या)** जो **(जरन्ता)** स्तुति प्रशंसा करते हुए **(युवशा)** युवा विद्यार्थियों को समीप रखनेवाले शिल्पी होवें, **(ता)** वे कारीगरी के कामों में अच्छे प्रकार प्रवृत्त हुए **(निरकृणोतन)** निरन्तर उन शिल्प कार्यों को करें। **(सौधन्वनाः)** उत्तम धनुष् में कुशल होते हुए सज्जन **(अश्वात्)** वेगवान् पदार्थ से **(अश्वम्)** वेगवाले पदार्थ को **(अतक्षत)** छांटो और वेग देने में ठीक करो। और **(रथम्)** रथ को **(युक्त्वा)** जोड़ के **(देवान्)** दिव्य भोग वा दिव्य गुणों को **(उपायातन)** उपगत होओ, प्राप्त होओ॥७॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अङ्गुलियों के समान कर्म के करने और शिल्पविद्या में प्रीति रखनेवाले पदार्थ के गुणों को जानकर यान आदि कार्यों में उनका उपयोग करते हैं, वे दिव्य भोगों को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒दमु॑दकं पि॑बतेत्यब्रवीतने॒दं वा॑ घा पिबता मुञ्जनेज॑नम्।
सौध॑न्वना॒ यदि॒ तन्नेव॒ हर्य॑थ तृ॒तीये॑ घा॒ सव॑ने मादयाध्वै॥८॥

इ॒दम्। उ॒द॒कम्। पि॒ब॒त॒। इति॑। अ॒ब्र॒वी॒त॒न॒। इ॒दम्। वा॒। घ॒। पि॒ब॒त॒। मु॒ञ्ज॒ऽने॒ज॑नम्। सौध॑न्वनाः। यदि॑। तत्। नऽइ॑व। हर्य॑थ। तृ॒तीये॑। घ॒। सव॑ने। मा॒द॒या॒ध्वै॥८॥

पदार्थः–**(इदम्)** **(उदकम्)** **(पिबत)** **(इति)** अनेन प्रकारेण **(अब्रवीतन)** ब्रूयुः **(इदम्)** **(वा)** पक्षान्तरे **(घ)** एव **(पिबता)** **(मुञ्जनेजनम्)** मुञ्जैर्नेजनं शुद्धीकृतम् **(सौधन्वनाः)** शोभनानि धनूंषि येषान्ते सुधन्वानस्तेषु कुशलाः **(यदि)** **(तत्)** **(नेव)** यथा न कामयते तथा **(हर्यथ)** कामयध्वम् **(तृतीये)** **(घ)** एव **(सवने)** ऐश्वर्ये **(मादयाध्वै)** आनन्दत॥८॥

अन्वयः–हे सौधन्वनाः सद्वैद्याः! यूयं पथ्यार्थिभ्य इदमुदकं पिबत इदं मुञ्जनेजनं पिबत वा नेव पिबतेति घैवाब्रवीतन यदि तद्धर्यथ तर्हि तृतीये सवने घैव सततं मादयाध्वै॥८॥

भावार्थः-अत्रोपमालङ्कारः। वैद्यैर्मातापितृभिर्वा सर्वे रोगिणः सन्तानाश्च युष्माभिः शरीरात्मसुखायेदं सेव्यमिदन्न सेव्यमिदमनुष्ठेयं नेदं चेति प्रथमत उपदेष्टव्याः। यत एते पूर्णशरीरात्मसुखाः सततं भवेयुः॥८॥

पदार्थः-हे **(सौधन्वनाः)** उत्तम धनुषवालों में कुशल अच्छे वैद्यो! तुम पथ्य भोजन चाहनेवालों से **(इदम्)** इस **(उदकम्)** जल को **(पिबत)** पिओ **(इदम्)** इस **(मुञ्जनेजनम्)** मूंज के तृणों से शुद्ध किये हुए जल को पिओ **(वा)** अथवा **(नेव)** नहीं **(पिबत)** पिओ **(इति)** इस प्रकार से **(घ)** ही **(अब्रवीतन)** कहो, औरों को उपदेश देओ, **(यदि)** जो **(तत्)** उसको **(हर्यथ)** चाहो तो **(तृतीये)** तीसरे **(सवने)** ऐश्वर्य में **(घ)** ही निरन्तर **(मादयाध्वै)** आनन्दित होओ॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वैद्य वा माता-पिताओं को चाहिये कि समस्त रोगी और सन्तानों के लिये प्रथम ऐसा उपदेश करें कि तुमको शारीरिक और आत्मिक सुख के लिये यह सेवन करना चाहिये, यह न सेवन करना चाहिये, यह अनुष्ठान करना चाहिये, यह नहीं। जिस कारण ये पूर्ण आत्मिक और शारीरिक सुखयुक्त निरन्तर हों॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आपो॒ भूयि॑ष्ठा॒ इत्येको॑ अब्रवीदु॒ग्निर्भूयि॑ष्ठ॒ इत्य॒न्यो अ॑ब्रवीत्।
व॒ध॒र्यन्ती॑ं ब॒हुभ्य॒: प्रैको॑ अब्रवीदृ॒ता वद॑न्तश्चम॒सा॑ँ अ॑पिंशत॥९॥

आप॑:। भूयि॑ष्ठाः। इति॑। एक॑:। अ॒ब्र॒वी॒त्। अ॒ग्निः। भूयि॑ष्ठः। इति॑। अ॒न्यः। अ॒ब्र॒वी॒त्। व॒ध्॒र्यन्ती॑म्। ब॒हुऽभ्य॑:। प्र। एक॑:। अ॒ब्र॒वी॒त्। ऋ॒ता। वद॑न्तः। च॒म॒सान्। अ॒पि॒ंश॒त॒॥९॥

पदार्थः-**(आपः)** जलानि **(भूयिष्ठाः)** अधिकाः **(इति)** एवम् **(एकः)** **(अब्रवीत्)** ब्रूते **(अग्निः)** पावकः **(भूयिष्ठः)** अधिकः **(इति)** **(अन्यः)** **(अब्रवीत्)** ब्रूते **(वधर्यन्तीम्)** भूमिम् **(बहुभ्यः)** पदार्थेभ्यः **(प्र)** **(एकः)** **(अब्रवीत्)** वदति **(ऋता)** ऋतानि सत्यानि **(वदन्तः)** उच्चरन्तः **(चमसान्)** मेघानिव **(अपिंशत)** विभक्तान् कुरुत॥९॥

अन्वयः-हे मनुष्या! यूयं यथैकः संयुक्तेषु पृथिव्यादिषु पदार्थेष्वापो भूयिष्ठा इत्यब्रवीदन्योऽग्निर्भूयिष्ठ इति प्राब्रवीदेको बहुभ्यो वर्धयन्तीं भूमिं भूयिष्ठामब्रवीदेवमृता वदन्तः सन्तः चमसानिव पदार्थानपिंशत॥९॥

भावार्थः-अस्मिन् संसारे स्थूलेषु पदार्थेषु वा केचिदपोऽधिकाः केचिदग्निमधिकं केचिद्भूमिं पुष्कलां वदन्ति, परन्तु स्थूलेषु भूमिरेवाधिकास्तीति। सत्येन विज्ञानेन मेघाऽवयवविवेकवत् सर्वान् पदार्थान् विभक्तान् कृत्वा तत्त्वानि सर्वे सुपरीक्षेरन्नैतेन विना यथार्थां पदार्थविद्यां वेदितुं शक्नुवन्ति॥९॥

पदार्थः-हे मनुष्यो! तुम जैसे **(एकः)** एक पुरुष संयुक्त पृथिवी आदि पदार्थों में **(आपः)** जल **(भूयिष्ठा)** अधिक हैं **(इति)** ऐसा **(अब्रवीत्)** कहता है **(अन्यः)** और दूसरा **(अग्निः)** अग्नि **(भूयिष्ठः)** अधिक है **(इति)** ऐसा **(प्राब्रवीत्)** उत्तमता से कहता है तथा **(एकः)** कोई **(बहुभ्यः)** बहुत पदार्थों में **(वधर्यन्तीम्)** बढ़ती हुई भूमि को अधिक **(अब्रवीत्)** बतलाता है। इसी प्रकार **(ऋता)** सत्य बातों को **(वदन्तः)** कहते हुए सज्जन **(चमसान्)** मेघों के समान पदार्थों को **(अपिंशत)** अलग-अलग करो॥९॥

भावार्थः-इस संसार में स्थूल पदार्थों के बीच कोई जल को अधिक, कोई अग्नि को अधिक और कोई भूमि को बड़ी-बड़ी बतलाते हैं, परन्तु स्थूल पदार्थों में भूमि ही अधिक है। इस प्रकार सत्य-विज्ञान से मेघ के अवयवों का जो ज्ञान उसके समान सब पदार्थों को अलग-अलग कर सिद्धान्तों की सब परीक्षा करें, इस काम के विना यथार्थ पदार्थविद्या को नहीं जान सकते॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम्।
आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः॥१०॥५॥

श्रोणाम्। एकः। उदकम्। गाम्। अव। अजति। मांसम्। एकः। पिंशति। सूनया। आऽभृतम्। आ। निऽम्रुचः। शकृत्। एकः। अप। अभरत्। किम्। स्वित्। पुत्रेभ्यः। पितरौ। उप। आवतुः॥१०॥

पदार्थः-**(श्रोणाम्)** श्रोतव्याम् **(एकः)** विद्वान् **(उदकम्)** जलम् **(गाम्)** भूमिम् **(अव)** **(अजति)** जानाति प्रक्षिपति वा **(मांसम्)** मृतकशरीरावयवम् **(एकः)** असहायः **(पिंशति)** पृथक् करोति **(सूनया)** हिंसया **(आभृतम्)** समन्ताद् धृतम् **(आ)** **(निम्रुचः)** नित्यं प्राप्तस्य **(शकृत्)** विष्टेव **(एकः)** **(अपः)** **(अभरत्)** भरति **(किम्)** **(स्वित्)** प्रश्ने **(पुत्रेभ्यः)** **(पितरौ)** मातापितरौ **(उप)** **(आवतुः)** कामयेताम्॥१०॥

अन्वयः-यथैकः श्रोणाङ्गामुदकञ्चावाजति यथैकः सूनयाभृतं मांसं पिंशति यथैको निम्रुचः शकृदपाभरत्तथा पितरौ पुत्रेभ्यः किं स्विदुपावतुः॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये पितरो यथा धेनुर्वत्समिव व्याधो मांसमिव वैद्यो रोगिणो मलनिवारणमिव पुत्रान् दुर्गुणेभ्यो निवर्त्य शिक्षाविद्याप्तान् कुर्वन्ति ते सन्तानसुखमाप्नुवते॥१०॥

पदार्थः-जैसे **(एकः)** विद्वान् **(श्रोणाम्)** सुनने योग्य **(गाम्)** भूमि और **(उदकम्)** जल को **(अवाजति)** जानता, कलायन्त्रों से उसको प्रेरणा देता है वा जैसे **(एकः)** इकेला **(सूनया)** हिंसा से **(आभृतम्)** अच्छे प्रकार धारणा किये हुए **(मांसम्)** मरे हुए के अङ्ग के टूंकटेड़े (=टुकड़े) को **(पिंशति)** अलग करता है, वा जैसे **(एकः)** एक **(निम्रुचः)** नित्य प्राप्त प्राणी **(शकृत्)** मल के समान **(अप, आ,**

अभरत्) पदार्थ को उठाता है, वैसे (**पितरौ**) माता-पिता (**पुत्रेभ्यः**) पुत्रों के लिये (**किं, स्वित्**) क्या (**उपावतुः**) सपीप में चाहें॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पिता-माता जैसे गौएं बछड़े को सुख चाहती, दुःख से बचाती वा बहेलिया मांस को लेके अनिष्ट को छोड़े वा वैद्य रोगी के मल को दूर करे, वैसे पुत्रों को दुर्गुणों से पृथक् कर शिक्षा और विद्यायुक्त करते हैं, वे सन्तान के सुख को पाते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः।
अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ॥११॥

उद्वत्ऽसु। अस्मै। अकृणोतन। तृणम्। निवत्ऽसु। अपः। सुऽअपस्यया। नरः। अगोह्यस्य। यत्। असस्तन। गृहे। तत्। अद्य। इदम्। ऋभवः। न। अनु। गच्छथ॥११॥

पदार्थः-(**उद्वत्सु**) ऊर्ध्वेषूत्कृष्टेषु प्रदेशेषु (**अस्मै**) गवाद्याय पशवे (**अकृणोतन**) कुरुत। अत्रा**न्येषामपी**ति दीर्घः। (**तृणम्**) हिंसितव्यं घासम् (**निवत्सु**) निम्नप्रदेशेषु (**अपः**) जलानि (**स्वपस्यया**) आत्मनः सुष्ठु अपसः कर्मण इच्छया (**नरः**) नेतारः (**अगोह्यस्य**) गोहितुं रक्षितुमनर्हस्य (**यत्**) (**असस्तन**) हिंसत (**गृहे**) (**तत्**) (**अद्य**) (**इदम्**) (**ऋभवः**) मेधाविनः (**न**) (**अनु**) गच्छथ॥११॥

अन्वयः-हे नरो! यूयं स्वपस्ययाऽस्मै निवत्सूद्वत्सु तृणमपश्चाकृणोतन। हे ऋभवो! यूयं यदगोह्यस्य गृहे वस्त्वऽस्ति तन्नासस्तनाद्येदमनुगच्छथ॥११॥

भावार्थः-मनुष्यैरुच्चनीचस्थलेषु पशुरक्षणाय जलानि घासाश्च संरक्षणीयाः। अरक्षितस्य परपदार्थस्याप्यन्यायेन ग्रहणेच्छा कदाचिन्नैव कार्य्या। धर्मविद्यानां मेधाविनां च सङ्गः सदैव कर्त्तव्यः॥११॥

पदार्थः-हे (**नरः**) नेता अग्रगन्ता जनो! तुम (**स्वपस्यया**) अपने को उत्तम काम की इच्छा से (**अस्मै**) इस गवादि पशु के लिये (**निवत्सु**) नीचे और (**उद्वत्सु**) ऊंचे प्रदेशों में (**तृणम्**) काटने योग्य घास को और (**अपः**) जलों को (**अकृणोतन**) उत्पन्न करो। हे (**ऋभवः**) मेधावो जनो! तुम (**यत्**) जो (**अगोह्यस्य**) न लुकाय रखने योग्य के (**गृहे**) घर में वस्तु हैं (**तत्**) उसको (**न**) न (**असस्तन**) नष्ट करो (**अद्य**) इस उत्तम समय में (**इमम्**) इसके (**अनु, गच्छथ**) पीछे चलो॥११॥

भावार्थः-मनुष्यों को चाहिये कि ऊंचे-नीचे स्थलों में पशुओं के राखने के लिये जल और घास आदि पदार्थों को राखें और अरक्षित अर्थात् गिरे, पड़े वा प्रत्यक्ष में धरे हुए दूसरे के पदार्थ को भी अन्याय से ले लेने की इच्छा कभी न करें। धर्म, विद्या और बुद्धिमान् जनों का सङ्ग सदैव करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सꣳमील्यꣳ यद्भुवꣳना पꣳर्यसꣳर्पतꣳ क्वꣳ स्वित्तꣳात्या पꣳितराꣳ व आसतुः।
अशꣳपतꣳ यः कꣳरस्नꣳ व आदꣳदे यः प्राब्रꣳवीꣳत्प्रो तस्माꣳ अब्रवीतन॥ १२॥

सꣳम्ऽमील्यꣳ। यत्। भुवꣳना। पꣳरिऽअसꣳर्पत। क्वꣳ। स्वित्। तꣳात्या। पꣳितराꣳ। वꣳः। आसꣳतुः। अशꣳपत। यः। कꣳरस्नꣳम्। वꣳः। आऽदꣳदे। यः। प्र। अब्रꣳवीत्। प्रो इतꣳि। तस्मैꣳ। अब्रꣳवीतꣳन॥ १२॥

पदार्थः- (**संमील्य**) सम्यक् निमेषणं कृत्वा (**यत्**) यदा (**भुवना**) भुवनानि लोकान् (**पर्यसर्पत**) परितः सर्वतो विजानीत (**क्व**) कस्मिन् (**स्वित्**) प्रश्ने (**तात्या**) तस्मिन्नवसरे भवा। अत्र **वाच्छन्दसी**ति तदव्ययात् त्यप्। (**पितरा**) जननी जनकश्च (**वः**) युष्माकम् (**आसतुः**) (**अशपत**) सत्यपराधे आक्रुश्यत (**यः**) (**करस्नम्**) बाहुम्। **करस्नाविति बाहुनामसु पठितम्।** (निघं०२.४) (**वः**) युष्माकम् (**आददे**) गृह्णाति। अत्रात्मनेपदे तलोपः। (**यः**) आचार्यः (**प्र**) (**अब्रवीत्**) ब्रूयादुपदिशेत् (**प्रो**) प्रकृष्टार्थे (**तस्मै**) (**अब्रवीतन**) उपदिशेत॥ १२॥

अन्वयः-हे विद्यार्थिनो! यूयं संमील्य यद्भुवना सन्ति तानि पर्य्यसर्पत तदा वस्तात्या पितरा क्व स्विदासतुर्निवसतः। यो वः करस्नमाददे यूयं यमशपत यो युष्मान् प्राब्रवीत् तस्मै प्रो अब्रवीतन॥ १२॥

भावार्थः-यदाऽध्यापकानां समीपे विद्यार्थिन आगच्छेयुस्तदैते इदं प्रष्टव्याः। यूयं कुत्रत्या युष्माकं कुत्र निवासो मातापित्रोः किन्नाम किमध्येतुमिच्छथाखण्डितब्रह्मचर्यं करिष्यथ न वेत्यादि पृष्ट्वैतेभ्यो विद्याग्रहणाय ब्रह्मचर्यदीक्षां दद्युः शिष्या अध्यापकानां निन्दामप्रियाचरणं च कदापि नैव कुर्य्युः॥ १२॥

पदार्थः-हे विद्यार्थिजनो! तुम (**संमील्य**) आंखे मिलमिला के (**यत्**) जो (**भुवना**) भूमि आदि लोक हैं, उनको (**पर्यसर्पत**) सब ओर से जानो, तब (**वः**) तुम्हारे (**तात्या**) उस समय होनेवाले (**पितरा**) माता-पिता अर्थात् विद्याऽध्ययन समय के माता-पिता (**क्व**) (**स्वित्**) कहीं (**आसतुः**) निरन्तर वसें (**यः**) और जो (**वः**) तुम्हारी (**करस्नम्**) भुजा को (**आददे**) पकड़ता है वा जिसको (**अशपत**) अपराध हुए पर कोसो (**यः**) जो आचार्य तुमको (**प्र, अब्रवीत्**) उपदेश सुनावे (**तस्मै**) उसके लिये (**प्रो, अब्रवीतन**) प्रिय वचन बोलो॥ १२॥

भावार्थः-जब पढ़ानेवालों के समीप विद्यार्थी आवें तब उनसे यह पूछना योग्य है कि तुम कहाँ के हो? तुम्हारा निवास कहाँ है? तुम्हारे माता-पिता का क्या नाम है? क्या पढ़ना चाहते हो? अखण्डित ब्रह्मचर्य करोगे वा न करोगे? इत्यादि पूछ करके ही इनको विद्या ग्रहण करने के लिये ब्रह्मचर्य की शिक्षा देवें और शिष्यजन पढ़ानेवालों की निन्दा और उनके प्रतिकूल आचरण कभी न करें॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत्।
श्वानं बस्तो बोधयितारमब्रवीत् संवत्सर इदमद्या व्यख्यत॥ १३॥

सुसुप्वांसः। ऋभवः। तत्। अपृच्छत। अगोह्य। कः। इदम्। नः। अबूबुधत्। श्वानम्। वस्तः। बोधयितारम्। अब्रवीत्। संवत्सरे। इदम्। अद्य। वि। अख्यत॥ १३॥

पदार्थः-(**सुसुप्वांस**) ये सुप्ताः (**ऋभवः**) मेधाविनः (**तत्**) (**अपृच्छत**) (**अगोह्य**) अरक्ष्य (**कः**) (**इदम्**) कर्म (**नः**) अस्मान् (**अबूबुधत्**) बोधयेत् (**श्वानम्**) प्रेरकम् (**वस्तः**) आच्छादकः (**बोधयितारम्**) ज्ञापयितारम् (**अब्रवीत्**) ब्रूयात् (**संवत्सरे**) (**इदम्**) प्रत्यक्षम् (**अद्य**) अस्मिन् दिने (**वि**) (**अख्यत**) प्रख्यापय॥ १३॥

अन्वयः-हे सुसुप्वांस ऋभवो! यूयं यदपृच्छत यच्च व्यख्यत तदिदं नः कोऽबूबुधत्। हे अगोह्य! वस्तः श्वानं बोधयितारं यथा यदब्रीवत्तदिदं संवत्सरेऽद्य वा त्वं ब्रूहि॥ १३॥

भावार्थः-धीमन्तो यद्यद्विदुषः पृष्ट्वा निश्चिनुयुः, तत्तन्न मूर्खा निश्चेतुं शक्नुयुः। जडधीर्य्यावत् संवत्सरेऽधीते तावत् प्राज्ञ एकस्मिन् दिने ग्रहीतुं शक्नोति॥ १३॥

पदार्थः-हे (**सुसुप्वांसः**) सोनेवाले (**ऋभवः**) बुद्धिमान् जनो! तुम जिस काम को (**अपृच्छत**) पूछो और जिसको (**वि, अख्यत**) प्रसिद्ध कहो (**तत्, इदम्**) उस इस काम को (**नः**) हम लोगों को (**कः**) कौन (**अबूबुधत्**) जनावे। हे (**अगोह्य**) न गुप्त राखने योग्य (**वस्तः**) ढांपने-छिपानेवाला (**श्वानम्**) कार्य्यों में प्रेरणा देने और (**बोधयितारम्**) शुभाशुभ विषय जनानेवाले को जैसे जिस विषय को (**अब्रवीत्**) कहे, वैसे उस (**इदम्**) प्रत्यक्ष विषय को (**संवत्सरे**) एक वर्ष में वा (**अद्य**) आज तू कह॥ १३॥

भावार्थः-बुद्धिमान् जन जिस-जिस विषय को विद्वानों को पूछ कर निश्चय करें, उस-उसको मूर्ख निर्बुद्धि जन निश्चय नहीं कर सकें। जड़ मन्दमति जन जितना एक संवत्सर में पढ़ता है, उतना बुद्धिमान् एक दिन में ग्रहण कर सकता है॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः॥ १४॥ ६॥

दिवा। यान्ति। मरुतः। भूम्याः। अग्निः। अयम्। वातः। अन्तरिक्षेण। याति। अत्ऽभिः। याति। वरुणः। समुद्रैः। युष्मान्। इच्छन्तः। शवसः। नपातः।१४॥

पदार्थः-(**दिवा**) सूर्येण सह (**यान्ति**) गच्छन्ति (**मरुतः**) सूक्ष्मावायवः (**भूम्या**) पृथिव्या (**अग्निः**) विद्युत् (**अयम्**) (**वातः**) मध्यो वायुः (**अन्तरिक्षेण**) (**याति**) (**अद्भिः**) जलैः (**याति**) (**वरुणः**) उदानः (**समुद्रैः**) सागरैः (**युष्मान्**) (**इच्छन्तः**) (**शवसः**) बलवतः (**नपातः**) न विद्यते पात् पतनं येषां ते॥१४॥

अन्वयः-हे शवसो नपातो विद्वांसो! यूयं यथा मरुतो दिवा सह यान्ति। अयमग्निर्भूम्या सह वातोऽन्तरिक्षेण च सह याति वरुणोऽद्भिः समुद्रैः सह याति तथा युष्मानिच्छन्तो जना यान्तु॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यमरुतोर्भूम्यग्न्योर्वाय्वन्तरिक्षयोर्वरुणाऽपां सह वासोऽस्ति तथा मनुष्या विद्याविदुषां सह वासं कृत्वा नित्यसुखबलिष्ठा भवन्त्विति॥१४॥

अस्मिन् सूक्ते मेधाविकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति एकषष्ट्युत्तरं शततमं १६१ सूक्तं षष्ठो ६ वर्गश्च समाप्तः॥

पदार्थः-हे (**शवसः**) बलवान् के सन्तान (**नपातः**) पतन नहीं होता जिनका वे विद्वानो! तुम जैसे (**मरुतः**) पवन (**दिवा**) सूर्यमण्डल के साथ (**यान्ति**) जाते हैं (**अयम्**) यह (**अग्निः**) बिजुली रूप अग्नि (**भूम्या**) पृथिवी के साथ और (**वातः**) लोकों के बीच का वायु (**अन्तरिक्षेण**) अन्तरिक्ष के साथ (**याति**) जाता है (**वरुणः**) उदान वायु (**अद्भिः**) जल और (**समुद्रैः**) सागरों के साथ (**याति**) जाता है, वैसे (**युष्मान्**) तुमको (**इच्छन्तः**) चाहते हुए जन जावें॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य, पवन, भूमि, अग्नि, वायु, अन्तरिक्ष तथा वरुण और जलों का एक साथ निवास है, वैसे मनुष्य विद्या और विद्वानों के साथ वासकर नित्य सुखयुक्त और बली होवें॥१४॥

इस सूक्त में मेधावि के कर्मों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ इकसठवाँ १६१ सूक्त और छठा ६ वर्ग समाप्त हुआ॥

मा नो मित्र इत्यस्य द्वाविंशर्चस्य द्विषष्ट्युत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। मित्रादयो लिङ्गोक्ता देवताः। १,२,९,१०,१७,२० निचृत् त्रिष्टुप्। ४,७,८,१८ त्रिष्टुप्। ५ विराट् त्रिष्टुप्। ६,११,२१ भुरिक् त्रिष्टुप्। १२ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। १३,१४ भुरिक् पङ्क्तिः। १५,१९,२२ स्वराट् पङ्क्तिः। १६ विराट् पङक्तिश्छन्दः। पञ्चमः स्वरः। ३ निचृज्जगती छन्दः। निषादः स्वरः॥

अथाऽश्वस्य विद्युद्रूपेण व्याप्तस्याग्नेश्च विद्यामाह॥

अब एक सौ बासठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में घोड़े और बिजुली रूप से व्याप्त जो अग्नि है, उसकी विद्या का वर्णन करते हैं॥

मा नो॑ मि॒त्रो वरु॑णो अर्य॒मायुरिन्द्र॑ ऋभुक्षाः म॒रुत॒: परि॑ ख्यन्।
यद्वा॒जिनो॑ दे॒वजा॑तस्य॒ सप्ते॑: प्रव॒क्ष्यामो॑ वि॒दथे॑ वी॒र्याणि॥ १॥

मा। नः। मित्रः। वरुणः। अर्यमा। आयुः। इन्द्रः। ऋभुक्षाः। मरुतः। परि। ख्यन्। यत्। वाजिनः। देवऽजातस्य। सप्तेः। प्रऽवक्ष्यामः। विदथे। वीर्याणि॥ १॥

पदार्थः-(**मा**) (**नः**) अस्माकम् (**मित्रः**) सखा (**वरुणः**) वरः (**अर्य्यमा**) न्यायाधीशः (**आयुः**) ज्ञाता (**इन्द्रः**) ऐश्वर्यवान् (**ऋभुक्षाः**) मेधावी (**मरुतः**) ऋत्विजः (**परि**) वर्जने (**ख्यन्**) ख्यापयेयुः (**यत्**) यस्य (**वाजिनः**) वेगवतः (**देवजातस्य**) देवेभ्यो दिव्येभ्यो गुणेभ्यः प्रकटस्य (**सप्तेः**) अश्वस्य (**प्रवक्ष्यामः**) (**विदथे**) संग्रामे (**वीर्य्याणि**) पराक्रमान्॥ १॥

अन्वयः-ऋत्विजो वयं विदथे यद्वाजिनो देवजातस्य सप्तेर्वीर्य्याणि प्रवक्ष्यामस्तस्य नस्तुरङ्गस्य वीर्य्याणि मित्रो वरुणोऽर्यमायुरिन्द्र ऋभुक्षा मरुतश्च मा परिख्यन्॥ १॥

भावार्थः-मनुष्यैः प्रशंसितबलवन्तः सुशिक्षिता अश्वा ग्राह्या ये सर्वत्र विजयैश्वर्य्याणि प्राप्नुयुः॥ १॥

पदार्थः-ऋतु-ऋतु में यज्ञ करनेहारे हम लोग (**विदथे**) संग्राम में (**यत्**) जिस (**वाजिनः**) वेगवान् (**देवजातस्य**) विद्वानों के वा दिव्य गुणों से प्रकट हुए (**सप्तेः**) घोड़े के (**वीर्याणि**) पराक्रमों को (**प्रवक्ष्यामः**) कहेंगे, उस (**नः**) हमारे घोड़ों के पराक्रमों को (**मित्रः**) मित्र (**वरुणः**) श्रेष्ठ (**अर्यमा**) न्यायाधीश (**आयुः**) ज्ञाता (**इन्द्रः**) ऐश्वर्यवान् (**ऋभुक्षाः**) बुद्धिमान् और (**मरुतः**) ऋत्विज् लोग (**मा, परि, ख्यन्**) छोड़ के मत कहें और उसके अनुकूल उसकी प्रशंसा करें॥ १॥

भावार्थः-मनुष्यों को प्रशंसित बलवान् अच्छे सीखे हुए घोड़े ग्रहण करने चाहिये, जिससे सर्वत्र विजय और ऐश्वर्यों को प्राप्त हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यन्निर्णिजा॒ रेक्ण॑सा॒ प्राव्॑तस्य रा॒तिं गृ॑भी॒तां मु॑ख॒तो नय॑न्ति।
सुप्रा॑ङजो मेम्य॑द्विश्वरू॒प इन्द्रापू॒ष्णोः प्रि॒यमप्ये॑ति॒ पाथ॑ः॥ २॥

यत्। नि॒ःऽनिजा॑। रेक्ण॑सा। प्राव्॑तस्य। रा॒तिम्। गृ॒भी॒ताम्। मु॒ख॒तः। नय॑न्ति। सुऽप्रा॑ङ्। अ॒जः। मेम्य॑त्। वि॒श्व॒ऽरू॒पः। इ॒न्द्रा॒पू॒ष्णोः। प्रि॒यम्। अपि॑। ए॒ति॒। पाथ॑ः॥ २॥

पदार्थः-(**यत्**) ये (**निर्णिजा**) नित्यं शुद्धेन। **निर्णिगिति रूपनामसु पठितम्।** (निघं०३.७) (**रेक्णसा**) धनेन (**प्रावृतस्य**) आच्छादितस्य (**रातिम्**) दानम् (**गृभीताम्**) (**मुखतः**) (**नयन्ति**) (**सुप्राङ्**) यः सुष्ठु पृच्छति सः (**अजः**) न जायते यः सः (**मेम्यत्**) भृशं हिंसन् (**विश्वरूपः**) विश्वानि सर्वाणि रूपाणि यस्य सः (**इन्द्रापूष्णोः**) ऐश्वर्यवत्पुष्टिमतोः (**प्रियम्**) कमनीयम् (**अपि**) (**एति**) प्राप्नोति (**पाथः**) उदकम्॥ २॥

अन्वयः-यन्निर्णिजा रेक्णसा प्रावृतस्य गृभीतां रातिं मुखतो नयन्ति। यो मेम्यद्विश्वरूपः सुप्राङजो विद्वानिन्द्रापूष्णोः प्रियं पाथोऽप्येति ते सर्वे सुखमाप्नुवन्ति॥ २॥

भावार्थः-ये न्यायोपार्जितेन धनेन मुख्यानि धर्म्याणि कार्य्याणि कुर्वन्ति ते परोपकारिणो भवन्ति॥ २॥

पदार्थः-(**यत्**) जो (**निर्णिजा**) नित्य शुद्ध (**रेक्णसा**) धन से (**प्रावृतस्य**) ढंपे हुए (**गृभीताम्**) ग्रहण किये (**रातिम्**) देने को (**मुखतः**) मुख से (**नयन्ति**) प्राप्त करते अर्थात् मुख से कहते हैं और जो (**मेम्यत्**) अज्ञानियों में निरन्तर मारता-पीटता हुआ (**विश्वरूपः**) जिसके सब रूप विद्यमान (**सुप्राङ्**) सुन्दरता से पूछता और (**अजः**) नहीं उत्पन्न होता अर्थात् एक वार पूर्ण भाव से विद्या पढ़ वार-वार विद्वत्ता से नहीं उत्पन्न होता वह विद्वान् जन (**इन्द्रापूष्णोः**) ऐश्वर्यवान् और पुष्टिमान् प्राणियों के (**प्रियम्**) मनोहर (**पाथः**) जल को (**अप्येति**) निश्चय से प्राप्त होता है, वे सब सुख को प्राप्त होते हैं॥ २॥

भावार्थः-जो न्याय से संचित किये हुए धन से मुख्य धर्म्म सम्बन्धी काम करते हैं, वे परोपकारी होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ए॒ष छाग॑ः पु॒रो अश्वे॑न वा॒जिना॑ पू॒ष्णो भा॒गो नीय॑ते वि॒श्वदे॑व्यः।
अ॒भि॒प्रिय॑ं यत्पु॒रो॒ळाश॒मर्व॑ता॒ त्वष्टे॑दे॒नं सौश्र॑वसाय॑ जिन्वति॥ ३॥

एषः। छागः। पुरः। अश्वेन। वाजिना। पूष्णः। भागः। नीयते। विश्वऽदेव्यः। अभिऽप्रियम्। यत्। पुरोळाशम्। अर्वता। त्वष्टा। इत्। एनम्। सौश्रवसाय। जिन्वति॥ ३॥

पदार्थः-(**एषः**) प्रत्यक्षः (**छागः**) (**पुरः**) पूर्वम् (**अश्वेन**) तुरङ्गेन (**वाजिना**) वेगवता (**पूष्णः**) पुष्टेः (**भागः**) (**नीयते**) (**विश्वदेव्यः**) विश्वेषु सर्वेषु देवेषु दिव्यगुणेषु साधुः (**अभिप्रियम्**) अभितः कमनीयम् (**यत्**) यः (**पुरोडाशम्**) सुसंस्कृतमन्नम् (**अर्वता**) विज्ञानेन सह (**त्वष्टा**) सुरूपसाधकः (**इत्**) एव (**एनम्**) (**सौश्रवसाय**) शोभनेष्वन्नेषु भवाय (**जिन्वति**) प्राप्नोति॥ ३॥

अन्वयः-हे विद्वन्! येन पुरुषेण वाजिनाऽश्वेन सह एष विश्वदेव्यः पूष्णो भागः छागः पुरो नीयते यद्यस्त्वष्टा सौश्रवसायार्वतैनमभिप्रियं पुरोडाशमिज्जिन्वति स सुखी जायते॥ ३॥

भावार्थः-ये मनुष्या अश्वानां पुष्टये छागदुग्धं पाययन्ति सुसंस्कृतान्नं च भुञ्जते ते सुखिनो भवन्ति॥ ३॥

पदार्थः-हे विद्वान्! जिस पुरुष ने (**वाजिना**) वेगवान् (**अश्वेन**) घोड़ा के साथ (**एषः**) यह प्रत्यक्ष (**विश्वदेव्यः**) समस्त दिव्य गुणों में उत्तम (**पूष्णः**) पुष्टि का (**भागः**) भाग (**छागः**) छाग (**पुरः**) पहिले (**नीयते**) पहुंचाया वा (**यत्**) जो (**त्वष्टा**) उत्तम रूप सिद्ध करनेवाला जन (**सौश्रवसाय**) सुन्दर अन्नों में प्रसिद्ध अन्न के लिये (**अर्वता**) विशेष ज्ञान के साथ (**एनम्**) इस (**अभिप्रियम्**) सब ओर से प्रिय (**पुरोडाशम्**) सुन्दर बनाये हुए अन्न को (**इत्**) ही (**जिन्वति**) प्राप्त होता है, वह सुखी होता है॥ ३॥

भावार्थः-जो मनुष्य घोड़ों की पुष्टि के लिये छेरी का दूध उनको पिलाते और अच्छे बनाये हुए अन्न को खाते हैं, वे निरन्तर सुखी होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः॥ ४॥

यत्। हविष्यम्। ऋतुऽशः। देवऽयानम्। त्रिः। मानुषाः। परि। अश्वम्। नयन्ति। अत्र। पूष्णः। प्रथमः। भागः। एति। यज्ञम्। देवेभ्यः। प्रतिऽवेदयन्। अजः॥ ४॥

पदार्थः-(**यत्**) ये (**हविष्यम्**) हविष्षु ग्रहणेषु साधुम् (**ऋतुशः**) बहुषु ऋतुषु (**देवयानम्**) देवानां विदुषां यात्रासाधकम् (**त्रिः**) (**मानुषाः**) मनुष्याः (**परि**) सर्वतः (**अश्वम्**) आशुगामिनम् (**नयन्ति**) प्राप्नुवन्ति (**अत्र**) अस्मिन् जगति। अत्र **ऋचि तुनुघे**ति दीर्घः। (**पूष्णः**) पोषकस्य (**प्रथमः**) आदिमः (**भागः**) भजनीयः (**एति**) प्राप्नोति (**यज्ञम्**) संगन्तुमर्हम् (**देवेभ्यः**) दिव्यगुणेभ्यः (**प्रतिवेदयन्**) स्वगुणं प्रत्यक्षतया प्रज्ञापयन् (**अजः**) प्राप्तव्यश्छागः॥ ४॥

अन्वयः-यद्ये मानुषा ऋतुशो हविष्यं देवयानमश्वं त्रिः परिणयन्ति, योऽत्र देवेभ्यः पूष्णः प्रथमो भागः प्रतिवेदयन्नजो यज्ञमेति तानेतं च सर्वे सज्जनाः सत्कुर्वन्तु॥४॥

भावार्थः-ये सर्वर्त्तुसुखसाधकानि यानानि रचयित्वाऽश्वाऽजादीन् पशून् वर्द्धयित्वा जगद्धितं संपादयन्ति, ते शरीरात्ममनोऽनुकूलं त्रिविधं सुखमश्नुवते॥४॥

पदार्थः-(**यत्**) जो (**मानुषाः**) मनुष्य (**ऋतुशः**) बहुत ऋतुओं में (**हविष्यम्**) ग्रहण करने योग्य पदार्थों में उत्तम (**देवयानम्**) विद्वानों की यात्रा सिद्ध करनेवाले (**अश्वम्**) शीघ्रगामी रथ को (**त्रिः**) तीन बार (**परिणयन्ति**) सब ओर से प्राप्त होते अर्थात् स्वीकार करते हैं वा जो (**अत्र**) इस जगत् में (**देवेभ्यः**) दिव्य गुणों के लिये (**पूष्णः**) पुष्टि करनेवाले का (**प्रथमः**) पहिला (**भागः**) सेवने योग्य भाग (**प्रतिवेदयन्**) अपने गुण को प्रत्यक्षता से जनाता हुआ (**अजः**) पाने योग्य छाग (**यज्ञम्**) सङ्ग करने योग्य व्यवहार को (**एति**) प्राप्त होता है, उनको और इस छाग को सब सज्जन यथायोग्य सत्कारयुक्त करें॥४॥

भावार्थः-जो समस्त ऋतुओं के सुख सिद्ध करनेवाले यानों को रच घोड़े और बकरे आदि पशुओं को बड़ा कर जगत् का हित सिद्ध करते हैं, वे शारीरिक, वाचिक और मानसिक तीनों प्रकार के सुख को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम्॥५॥७॥

होता। अध्वर्युः। आऽवयाः। अग्निम्ऽइन्धः। ग्रावऽग्राभः। उत। शंस्ता। सुऽविप्रः। तेन। यज्ञेन। सुऽअरंकृतेन। सुऽइष्टेन। वक्षणाः। आ। पृणध्वम्॥५॥

पदार्थः-(**होता**) यज्ञसाधकः (**अध्वर्युः**) आत्मनोऽध्वरमहिंसनमिच्छुः (**आवयाः**) यः समन्ताद्यजति संगच्छते सः (**अग्निमिन्धः**) अग्निप्रदीपकः (**ग्रावग्राभः**) यो ग्राव्णः स्तावकान् गृह्णाति सः (**उत**) (**शंस्ता**) प्रशंसिता (**सुविप्रः**) सुष्ठु मेधावी (**तेन**) (**यज्ञेन**) (**स्वरङ्कृतेन**) सुष्ठु पूर्णेन कृतेन (**स्विष्टेन**) (**वक्षणाः**) नदीः (**आ**) (**पृणध्वम्**) पूरयध्वम्॥५॥

अन्वयः-हे मनुष्या! यो होताऽध्वर्युरावयाऽग्निमिन्धो ग्रावग्राभ उतापि शंस्ता सुविप्रो विद्वानस्ति तेन साकं स्विष्टेन स्वरङ्कृतेन यज्ञेन वक्षणा यूयमापृणध्वम्॥५॥

भावार्थः-सर्वे मनुष्या दुर्गन्धनिवारणाय सुखोन्नतये च यज्ञाऽनुष्ठानं कृत्वा सर्वत्र देशेषु सुगन्धिता अपो वर्षयित्वा नदीः पूरयेयुः॥५॥

पदार्थः-हे मनुष्यो! जो **(होता)** यज्ञ सिद्ध कराने **(अध्वर्युः)** अपने को नष्ट न होने की इच्छा करने **(आवयाः)** अच्छे प्रकार मिलने **(अग्निमिन्धः)** अग्नि को प्रकाशित करने **(ग्रावग्राभः)** प्रशंसकों को ग्रहण करने **(उत)** और **(शंस्ता)** प्रशंसा करनेवाला **(सुविप्रः)** सुन्दर बुद्धिमान् विद्वान् है **(तेन)** उसके साथ **(स्विष्टेन)** उत्तम चाहे और **(स्वरङ्कृतेन)** सुन्दर पूर्ण किये हुए **(यज्ञेन)** यज्ञकर्म से **(वक्षणाः)** नदियों को तुम **(आ, पृणध्वम्)** अच्छे प्रकार पूर्ण करो॥५॥

भावार्थः-सब मनुष्य दुर्गन्ध के निवारने और सुख की उन्नति के लिये यज्ञ का अनुष्ठान कर सर्वत्र देशों में सुगन्धित जलों को वर्षा कर नदियों को परिपूर्ण करें अर्थात् जल से भरें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति।
ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु॥६॥

यूपऽव्रस्काः। उत। ये। यूपऽवाहाः। चषालम्। ये। अश्वऽयूपाय। तक्षति। ये। च। अर्वते। पचनम्। सम्ऽभरन्ति। उतो इति। तेषाम्। अभिऽगूर्तिः। नः। इन्वतु॥६॥

पदार्थः-**(यूपव्रस्काः)** यूपाय स्तम्भाय ये वृश्चन्ति ते **(उत)** अपि **(ये)** **(यूपवाहाः)** ये यूपं वहन्ति प्रापयन्ति **(चषालम्)** वृक्षविशेषम् **(ये)** **(अश्वयूपाय)** अश्वानां बन्धनाय **(तक्षति)** छिन्दति। अत्र वचनव्यत्ययेनैकवचनम्। **(ये)** **(च)** **(अर्वते)** अश्वाय **(पचनम्)** **(संभरन्ति)** **(उतो)** अपि **(तेषाम्)** **(अभिगूर्त्तिः)** अभितः सर्वतो गूर्त्तिरुद्यमो यस्य सः **(नः)** अस्मान् **(इन्वतु)** प्राप्नोतु॥६॥

अन्वयः-ये यूपव्रस्का उत ये यूपवाहा अश्वयूपाय चषालं तक्षति। ये चार्वते पचनं संभरन्ति यस्तेषामुतो अभिगूर्त्तिरस्ति स नोऽस्मानिन्वतु॥६॥

भावार्थः-ये मनुष्या अश्वादिबन्धनाय काष्ठानां यूपान् कुर्वन्ति ये चाश्वानां पालनाय पदार्थान् स्वीकुर्वन्ति, ते उद्यमिनो भूत्वा सुखानि प्राप्नुवन्ति॥६॥

पदार्थः-**(ये)** जो **(यूपव्रस्काः)** खम्भे के लिये काष्ठ काटनेवाले **(उत)** और भी **(ये)** जो **(यूपवाहाः)** खम्भे को प्राप्त करानेवाले जन **(अश्वयूपाय)** घोड़ों के बांधने के लिये **(चषालम्)** किसी विशेष वृक्ष को **(तक्षति)** काटते हैं **(ये, च)** और जो **(अर्वते)** घोड़े के लिये **(पचनम्)** पकाने को **(संभरन्ति)** धारण करते और पुष्टि करते हैं, जो **(तेषाम्)** उनके बीच **(उतो)** निश्चय से **(अभिगूर्त्तिः)** सब ओर से उद्यमी है वह **(नः)** हम लोगों को **(इन्वतु)** प्राप्त होवे॥६॥

भावार्थः–जो मनुष्य घोड़े आदि पशुओं के बांधने के लिये काठ के खम्भे वा खूंटे करते बनाते हैं वा जो घोड़ों के राखने को पदार्थ दाना, घास, चारा, घुड़सार आदि स्वीकार करते बनाते हैं, वे उद्यमी होकर सुखों को प्राप्त होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप॒ प्रागा॑त्सु॒मन्मे॑ऽधायि॒ मन्म॑ दे॒वाना॒माशा॒ उप॒ वी॒तपृ॑ष्ठः।
अन्वे॑नं॒ विप्रा॒ ऋष॑यो मदन्ति दे॒वानां॑ पु॒ष्टे च॑कृमा सु॒बन्धु॑म्॥७॥

उप॑। प्र। अ॒गा॒त्। सु॒ऽम॒त्। मे॒। अ॒धा॒यि॒। मन्म॑। दे॒वाना॑म्। आशाः॑। उप॑। वी॒तऽपृ॑ष्ठः। अनु॑। ए॒न॒म्। विप्राः॑। ऋष॑यः। म॒द॒न्ति॒। दे॒वाना॑म्। पु॒ष्टे। च॒कृ॒म॒। सु॒ऽब॒न्धु॑म्॥७॥

पदार्थः–(**उप**) समीपे (**प्र**) (**अगात्**) गच्छतु प्राप्नोतु (**सुमत्**) यः सुष्ठु मन्यते जानाति (**मे**) मम (**अधायि**) ध्रियते (**मन्म**) विज्ञानम् (**देवानाम्**) विदुषाम् (**आशाः**) प्राप्तीच्छाः (**उप**) (**वीतपृष्ठः**) वीता व्याप्ताः पृष्ठा विद्यासिद्धान्ता येन सः (**अनु**) (**एनम्**) (**विप्राः**) मेधाविनः (**ऋषयः**) वेदार्थवेत्तारः (**मदन्ति**) आनन्दयन्ति (**देवानाम्**) आप्तानाम् (**पुष्टे**) पुष्टियुक्ते व्यवहारे (**चकृम**) कुर्याम। अत्राऽन्येषामपीति दीर्घः। (**सुबन्धुम्**) शोभना बन्धवो यस्य तम्॥७॥

अन्वयः–येन देवानां मे मम च मन्माशाश्चोपाधायि यः सुमद्वीतपृष्ठो विद्वानेतदेताश्चोपप्रागात्। ये ऋषयो विप्राः सुबन्धुमनुमदन्त्येनं तेषां देवानां पुष्टे वयं चकृम॥७॥

भावार्थः–ये विद्वत्सिद्धान्तितं विज्ञानं धृत्वा तदनुकूला भूत्वा विद्वांसो जायन्ते, ते शरीरात्मपुष्टियुक्ता भवन्ति॥७॥

पदार्थः–जिसने (**देवानाम्**) विद्वानों का और (**मे**) मेरे (**मन्म**) विज्ञान और (**आशाः**) प्राप्ति की इच्छाओं को (**उप, अधायि**) समीप होकर धारण किया वा जो (**सुमत्**) सुन्दर मानता (**वीतपृष्ठः**) सिद्धान्तों में व्याप्त हुआ विद्वान् जन उक्त ज्ञान और उक्त आशाओं को (**उप, प्र, अगात्**) समीप होकर अच्छे प्रकार प्राप्त हो वा जो (**ऋषयः**) वेदार्थज्ञानवाले (**विप्राः**) धीरबुद्धि जन (**सुबन्धुम्**) जिसके सुन्दर भाई हैं, उसको (**अनु, मदन्ति**) अनुमोदित करते हैं, (**एनम्**) इस सुबन्धु सज्जन को उक्त (**देवानाम्**) व्यास साक्षात् कृतशास्त्रसिद्धान्त विद्वान् जनों को (**पुष्टे**) पुष्टियुक्त व्यवहार में हम लोग (**चकृम**) करें अर्थात् नियत करें॥७॥

भावार्थः–जो विद्वानों के सिद्धान्त किये हुए विज्ञान का धारण कर तदनुकूल हो विद्वान् होते हैं, वे शरीर और आत्मा की पुष्टि से युक्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य।
यद्वा घास्य प्रभृतमास्ये३तृणं सर्वा ता ते अपि देवेष्वस्तु॥८॥

यत्। वाजिनः। दाम। सम्ऽदानम्। अर्वतः। या। शीर्षण्या। रशना। रज्जुः। अस्य। यत्। वा। घ। अस्य। प्रऽभृतम्। आस्ये। तृणम्। सर्वा। ता। ते। अपि। देवेषु। अस्तु॥८॥

पदार्थः-(**यत्**) (**वाजिनः**) बलवतोऽश्वस्य (**दाम**) दमनसाधनम् (**सन्दानम्**) सम्यक् दीयते यत्तत् (**अर्वतः**) शीघ्रं स्थानान्तरं प्राप्नुतः (**या**) (**शीर्षण्या**) शीर्ष्णि साधुः (**रशना**) व्यापिका (**रज्जुः**) (**अस्य**) (**यत्**) (**वा**) पक्षान्तरे (**घ**) एव (**अस्य**) (**प्रभृतम्**) प्रकृष्टतया धृतम् (**आस्ये**) (**तृणम्**) (**सर्वा**) सर्वाणि (**ता**) तानि (**ते**) तव (**अपि**) (**देवेषु**) (**अस्तु**) भवतु॥८॥

अन्वयः-हे विद्वन्! अस्यार्वतो वाजिनो यत्सन्दानं दाम या शीर्षण्या रशना रज्जुर्यद्वास्य घास्ये तृणं प्रभृतमस्तु तत्सर्वा ते देवेष्वपि सन्तु॥८॥

भावार्थः-येऽश्वान् सुशिक्षितान् सुदमनानुत्तमाभरणान् पुष्टान् कृत्वैतैः कार्य्याणि साध्नुवन्ति, ते सर्वाणि विजयादीनि साधितुं शक्नुवन्ति॥८॥

पदार्थः-हे विद्वान्! (**अस्य**) इस (**अर्वतः**) शीघ्र दूसरे स्थान को पहुंचानेवाले (**वाजिनः**) बलवान् घोड़ा की (**यत्**) जो (**संदानम्**) अच्छे प्रकार दी जाती (**दाम**) और घोड़ों को दमन करती अर्थात् उनके बल को दाबती हुई लगाम है (**या**) जो (**शीर्षण्या**) शिर में उत्तम (**रशना**) व्याप्त होनेवाली (**रज्जुः**) रस्सी है (**यत्, वा**) अथवा जो (**अस्य, घ**) इसी के (**आस्ये**) मुख में (**तृणम्**) तृणवीरुध घास (**प्रभृतम्**) अच्छे प्रकार भरी (**अस्तु**) हो (**ता**) वे (**सर्वा**) समस्त (**ते**) तुम्हारे पदार्थ (**देवेषु**) विद्वानों में (**अपि**) भी हों॥८॥

भावार्थः-जो घोड़ों को सुशिक्षित, अच्छे इन्द्रिय दमन करनेवाले, उत्तम गहनों से युक्त और पुष्ट कर इन से कार्यों को सिद्ध करते हैं, वे समस्त विजय आदि व्यवहारों को सिद्ध कर सकते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु॥९॥

यत्। अश्वस्य। क्रविषः। मक्षिका। आश। यत्। वा। स्वरौ। स्वऽधितौ। रिप्तम्। अस्ति। यत्। हस्तयोः। शमितुः। यत्। नखेषु। सर्वा। ता। ते। अपि। देवेषु। अस्तु॥९॥

पदार्थः-(**यत्**) (**अश्वस्य**) (**क्रविषः**) क्रमणशीलस्य। अत्र क्रमधातोरौणादिक इसिः प्रत्ययो वर्णव्यत्येन मस्य वः। (**मक्षिका**) मशति शब्दायते या सा (**आश**) अश्नाति (**यत्**) (**वा**) (**स्वरौ**) शब्दोपतापौ (**स्वधितौ**) स्वेन धृतौ (**रिप्तम्**) लिप्तम् (**अस्ति**) (**यत्**) (**हस्तयोः**) (**शमितुः**) यज्ञानुष्ठातुः (**यत्**) (**नखेषु**) न विद्यते खमाकाशं येषु तेषु (**सर्वा**) सर्वाणि (**ता**) तानि (**ते**) तव (**अपि**) (**देवेषु**) विद्वत्सु (**अस्तु**)॥९॥

अन्वयः-हे विद्वन्! क्रविषोऽश्वस्य यद्रिप्तम्मक्षिकाश वा यद्या स्वधितौ स्वरौ स्तः शमितुर्हस्तयोर्यदस्ति यच्च नखेष्वस्ति ता सर्वा ते सन्त्वेतद्देवेष्वप्यस्तु॥९॥

भावार्थः-भृत्यैरश्वा दुर्गन्धलेपरहिताः शुद्धा मक्षिकादंशविरहा रक्षणीयाः। स्वहस्तेन रज्ज्वादिना सुनियम्य यथेष्टङ्गमयितव्याः। एवं कृते सति तुरङ्गा दिव्यानि कार्याणि कुर्वन्ति॥९॥

पदार्थः-हे विद्वान्! (**क्रविषः**) क्रमणशील अर्थात् चाल से पैर रखनेवाले (**अश्वस्य**) घोड़ा का (**यत्**) जिस (**रिप्तम्**) लिये हुए मल को (**मक्षिका**) शब्द करती अर्थात् भिनभिनाती हुई माखी (**आश**) खाती है (**वा**) अथवा (**यत्**) जो (**स्वधितौ**) आप धारण किये हुए (**स्वरौ**) हींसना और कष्ट से चिल्लाना है (**शमितुः**) यज्ञ का अनुष्ठान करनेवाले के (**हस्तयोः**) हाथों में (**यत्**) जो है और (**यत्**) जो (**नखेषु**) जिनमें आकाश नहीं विद्यमान है, उन नखों में (**अस्ति**) है (**ता**) वे (**सर्वा**) समस्त पदार्थ (**ते**) तुम्हारे हों तथा यह सब (**देवेषु**) विद्वानों में (**अपि**) भी (**अस्तु**) हो॥९॥

भावार्थः-भृत्यों को घोड़े दुर्गन्ध लेप रहित शुद्ध, माखी और डांश से रहित रखने चाहिये। अपने हाथ तथा रज्जु आदि से उत्तम नियम कर अपने इच्छानुकूल चाल चलवाना चाहिये, ऐसे करने से घोड़े उत्तम काम करते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदू॒वध्यमु॒दर॑स्याप॒वाति॒ य आ॒मस्य॑ क्र॒विषो॑ गन्धो अस्ति।
सु॒कृता॒ तच्छ॑मि॒तार॑: कृण्वन्तू॒त मेधं॑ शृत॒पाकं॑ पचन्तु॥ १०॥ ८॥

यत्। ऊवध्यम्। उदरस्य। अपऽवाति। यः। आमस्य। क्रविषः। गन्धः। अस्ति। सुऽकृता। तत्। शमितारः। कृण्वन्तु। उत। मेधम्। शृतऽपाकम्। पचन्तु॥ १०॥

पदार्थः-(**यत्**) (**ऊवध्यम्**) वधितुं ताडितुमर्हम् (**उदरस्य**) (**अपवाति**) अपगतं वाति गच्छति (**यः**) (**आमस्य**) अपक्वस्य (**क्रविषः**) क्रमितुं योग्यस्याऽन्नस्य (**गन्धः**) (**अस्ति**) (**सुकृता**) सुष्ठु कृतानि निष्पादितानि (**तत्**) तानि (**शमितारः**) संगतान्नस्य निष्पादितारः (**कृण्वन्तु**) हिंसन्तु (**उत**) (**मेधम्**) संगतम् (**शृतपाकम्**) शृश्चासौ पाकश्च तम्। पुनरुक्तमतिसंस्कारद्योतनार्थम्। (**पचन्तु**) परिपक्वं कुर्वन्तु॥१०॥

अन्वयः-हे विद्वांसः! शमितारो भवन्तो य उदरस्योदरस्थस्यामस्य क्रविषो गन्धोऽपवाति यदूवध्यमस्ति वा तत्तानि कृण्वन्तु। उतापि मेधं शृतपाकं पचन्त्वेवं विधाय सुकृता भुञ्जताम्॥१०॥

भावार्थः-ये मनुष्या उदररोगनिवारणाय सुसंस्कृतान्यन्नान्यौषधानि च भुञ्जते ते सुखिनो जायन्ते॥१०॥

पदार्थः-हे विद्वानो! **(शमितारः)** प्राप्त हुए अन्न को सिद्ध करने बनानेवाले आप **(यः)** जो **(उदरस्य)** उदर में ठहरे हुए **(आमस्य)** कच्चे **(क्रविषः)** क्रम से निकलने योग्य अन्न का **(गन्धः)** गन्ध **(अपवाति)** अपान वायु के द्वारा जाता निकलता है वा **(यत्)** जो **(ऊवध्यम्)** ताड़ने के योग्य **(अस्ति)** है **(तत्)** उसको **(कृण्वन्तु)** काटो **(उत)** और **(मेधम्)** प्राप्त हुए **(शृतपाकम्)** परिपक्व पदार्थ को **(पचन्तु)** पकाओ, ऐसे उसे सिद्ध कर **(सुकृता)** सुन्दरता से बनाये हुए पदार्थों को खाओ॥१०॥

भावार्थः-जो मनुष्य उदररोग निवारने के लिये अच्छे बनाये अन्न और ओषधियों को खाते हैं, वे सुखी होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यत्ते॑ गात्रा॑दग्निना॑ पच्यमा॑नादभि॑ शूलं॑ निह॑तस्याव॑धाव॑ति।
मा तद्भूम्या॒मा श्रि॑षन्मा तृणे॑षु दे॒वेभ्य॒स्तदु॒शद्भ्यो॑ रा॒तम॑स्तु॥११॥

यत्। ते॒। गात्रा॑त्। अ॒ग्निना॑। प॒च्यमा॑नात्। अ॒भि। शूल॑म्। निऽह॑तस्य। अ॒व॒ऽधाव॑ति। मा। तत्। भूम्या॑म्। आ। श्रि॒ष॒त्। मा। तृणे॑षु। दे॒वेभ्यः॑। तत्। उ॒शत्ऽभ्यः॑। रा॒तम्। अ॒स्तु॒॥११॥

पदार्थः-(**यत्**) शस्त्रम् (**ते**) तव (**गात्रात्**) हस्तात् (**अग्निना**) क्रोधरूपेण (**पच्यमानात्**) (**अभि**) अभिलक्ष्य (**शूलम्**) शूलमिव पीडाकरं शत्रुम् (**निहतस्य**) नितरां चलितस्य (**अवधावति**) निपतति (**मा**) (**तत्**) (**भूम्याम्**) (**आ**) (**श्रिषत्**) श्लिष्येत्। अत्राडभावो वर्णव्यत्ययेन लस्य स्थाने रेफादेशश्च। (**मा**) (**तृणेषु**) तृणादिषु (**देवेभ्यः**) दिव्येभ्यः शत्रुभ्यः (**तत्**) (**उशद्भ्यः**) त्वत्पदार्थान् कामयमानेभ्यः (**रातम्**) दत्तम् (**अस्तु**)॥११॥

अन्वयः-हे विद्वन्निहतस्य ते तवाग्निना पच्यमानाद् गात्राद् यदभिशूलमवधावति तद्भूम्यां माऽऽश्रिषत् तत्तृणेषु माऽऽश्लिष्येत् किन्तूशद्भ्यो देवेभ्यो रातं स्याद्दत्तमस्तु॥११॥

भावार्थः-विद्वद्भिर्बलिष्ठैः संग्रामे शस्त्रचालनावसरे विचारेणैव शस्त्रं प्रक्षेपणीयं येन क्रोधान्निर्गतं शस्त्रं भूभ्यादौ न निपतेत्किन्तु शत्रुष्वेव कृतकारि स्यादिति॥११॥

पदार्थः-हे विद्वान्! **(निहतस्य)** निरन्तर चलायमान हुए **(ते)** तुम्हारे **(अग्निना)** क्रोधाग्नि से **(पच्यमानात्)** तपाये हुए **(गात्रात्)** हाथ से **(यत्)** जो शस्त्र **(अभि, शूलम्)** लखके शूल के समान

पीड़ाकारक शत्रु के सम्मुख **(अव, धावति)** चलाया जाता है **(तत्)** वह **(भूम्याम्)** भूमि में **(मा, आ, श्रिषत्)** न गिरे वा लगे और वह **(तृणेषु)** घासादि में **(मा)** मत आश्रित हो, किन्तु **(उशद्भ्यः)** आपके पदार्थों की चाहना करनेवाले **(देवेभ्यः)** दिव्य गुणी शत्रु के लिये **(रातम्)** दिया **(अस्तु)** हो॥११॥

भावार्थः-बलिष्ठ विद्वान् मनुष्यों को चाहिये कि संग्राम में शस्त्र चलाने के समय विचारपूर्वक ही शस्त्र चलावें, जिससे क्रोधपूर्वक चला शस्त्र भूमि आदि में न पड़े, किन्तु शत्रुओं को ही मारनेवाला हो॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु॥१२॥

ये। वाजिनम्। परिऽपश्यन्ति। पक्वम्। ये। ईम्। आहुः। सुरभिः। निः। हरः। इति। ये। च। अर्वतः। मांसऽभिक्षाम्। उपऽआसते। उतो इति। तेषाम्। अभिऽगूर्तिः। नः। इन्वतु॥१२॥

पदार्थः-(**ये**) (**वाजिनम्**) बहूनि वाजा अन्नादीनि यस्मिन् तमाहारम् (**परिपश्यन्ति**) सर्वतः प्रेक्षन्ते (**पक्वम्**) पाकेन सम्यक् संस्कृतम् (**ये**) (**ईम्**) जलम्। **ईमिति उदकनामसु पठितम्।** (निघं०१.१२) (**आहुः**) कथयन्ति (**सुरभिः**) सुगन्धः (**निः**) (**हरः**) (**इति**) (**ये**) (**च**) (**अर्वतः**) प्राप्तस्य (**मांसभिक्षाम्**) मांसस्य भिक्षामलाभम् (**उपासते**) (**उतो**) (**तेषाम्**) (**अभिगूर्त्तिः**) अभिगत उद्यमः (**नः**) अस्मान् (**इन्वतु**) व्याप्नोतु प्राप्नोतु॥१२॥

अन्वयः-ये वाजिनं पक्वं परिपश्यन्ति य ईं पक्वमाहुः। ये चार्वतो मांसभिक्षामुतो उपासते तेषामभिगूर्त्तिः सुरभिश्च न इन्वतु। हे विद्वँस्त्वमिति रोगान्निर्हर॥१२॥

भावार्थः-ये अन्नं जलं च शोधितुं पक्तुं भोक्तुं जानन्ति मांसं वर्जयित्वा भुञ्जते त उद्यमिनो जायन्ते॥१२॥

पदार्थः-(**ये**) जो लोग (**वाजिनम्**) जिसमें बहुत अन्नादि पदार्थ विद्यमान उस भोजन को (**पक्वम्**) पकाने से अच्छा बना हुआ (**परिपश्यन्ति**) सब ओर से देखते हैं वा (**ये**) जो (**ईम्**) जल को पका (**आहुः**) कहते हैं (**ये, च**) और जो (**अर्वतः**) प्राप्त हुए प्राणी के (**मांसभिक्षाम्**) मांस के न प्राप्त होने को (**उतो**) तर्क-वितर्क से (**उपासते**) सेवन करते हैं (**तेषाम्**) उनका (**अभिगूर्त्तिः**) उद्यम और (**सुरभिः**) सुगन्ध (**नः**) हम लोगों को (**इन्वतु**) व्याप्त वा प्राप्त हो। हे विद्वान्! तू (**इति**) इस प्रकार अर्थात् मांसादि अभक्ष्य के त्याग से रोगों को (**निर्हर**) निरन्तर दूर कर॥१२॥

भावार्थः-जो लोग अन्न और जल को शुद्ध करना, पकाना, उसका भोजन करना जानते और मांस को छोड़ कर भोजन करते, वे उद्यमी होते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यन्नीक्ष॑णं मां॒स्पच॑न्या उ॒खाया॒ या पात्रा॑णि यू॒ष्ण आ॒सेच॑नानि।
ऊ॒ष्म॒ण्या॑पि॒धाना॑ चरू॒णाम॒ङ्काः सू॒नाः परि॑ भूषन्त्यश्व॑म्॥ १३॥

यत्। नि॒ऽई॒क्ष॑णम्। मां॒स्पच॑न्याः। उ॒खायाः॑। या। पात्रा॑णि। यू॒ष्णः॑। आ॒ऽसेच॑नानि। ऊ॒ष्म॒ण्या॑। अ॒पि॒ऽधाना॑। च॒रू॒णाम्। अ॒ङ्काः॑। सू॒नाः॑। परि॑। भू॒ष॒न्ति॒। अश्व॑म्॥ १३॥

पदार्थः-(**यत्**) ये (**नीक्षणम्**) निरन्तरं च तदीक्षणं च नीक्षणाम् (**मांस्पचन्याः**) मांसानि पचन्ति यस्यां सा। अत्र मांसस्य पचयुड्घञोरित्यन्तलोपः। (**उखायाः**) पाकसाधिकायाः (**या**) यानि (**पात्राणि**) (**यूष्णः**) रसस्य (**आसेचनानि**) समन्तात् सेचनाऽधिकरणानि (**ऊष्मण्या**) ऊष्मसु साधूनि (**अपिधाना**) अपिधानानि मुखाच्छादनानि (**चरूणाम्**) अन्नादिपचनाधाराणाम् (**अङ्काः**) लक्षणानि (**सूनाः**) प्रेरिताः (**परि**) (**भूषन्ति**) (**अश्वम्**) तुरङ्गम्॥१३॥

अन्वयः-यद्ये मांस्पचन्या उखाया नीक्षणं कुर्वन्ति तत्र वैमनस्यं कृत्वा या यूष्ण आसेचनानि पात्राण्यूष्मण्याऽपिधाना चरूणामङ्काः सन्ति तान् सुष्ठु जानन्ति। अश्वं परिभूषन्ति च ते सूना जायन्ते॥१३॥

भावार्थः-ये मनुष्या मांसादिपचनदोषरहितां पाकस्थालीं धर्त्तुं जलादिमासेचितुमग्निं प्रज्वालयितुं पात्रैराच्छादितुं जानन्ति ते पाकविद्यायां कुशला भवन्ति। येऽश्वान् सुशिक्ष्य परिभूष्य चालयन्ति ते सुखेनाध्वानं यान्ति॥१३॥

पदार्थः-(**यत्**) जो (**मांस्पचन्याः**) मांसाहारी जिसमें मांस पकाते हैं, उस (**उखायाः**) पाक सिद्ध करनेवाली बटलोई का (**नीक्षणम्**) निरन्तर देखना करते, उसमें वैमनस्य कर (**या**) जो (**यूष्णः**) रस के (**आसेचनानि**) अच्छे प्रकार सेचन के आधार वा (**पात्राणि**) पात्र वा (**ऊष्मण्या**) गरमपन उत्तम पदार्थ (**अपिधाना**) बटलोइयों के मुख ढापने की ढकनियां (**चरूणाम्**) अन्न आदि के पकाने के आधार बटलोई कड़ाही आदि वर्त्तनों के (**अङ्काः**) लक्षण हैं, उनको अच्छे जानते और (**अश्वम्**) घोड़े को (**परिभूषन्ति**) सुशोभित करते हैं, वे (**सूनाः**) प्रत्येक काम में प्रेरित होते हैं॥१३॥

भावार्थः-जो मनुष्य मांसादि के पकाने के दोष से रहित बटलोई के धरने, जल आदि उस में छोड़ने, अग्नि को जलाने और उसको ढकनों से ढापने को जानते हैं, वे पाकविद्या में कुशल होते हैं। जो घोड़ा को अच्छा सिखा उनको सुशोभित कर चलाते हैं, वे सुख से मार्ग को जाते हैं॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि॒क्रम॑णं नि॒षद॑नं वि॒वर्त॑नं॒ यच्च॒ पड्वी॑श॒मर्व॑तः।

यच्च॑ प॒पौ यच्च॑ घा॒सिं ज॒घास॒ सर्वा॒ ता ते॒ अपि॑ देवेष्वस्तु॥ १४॥

नि॒ऽक्रम॑णम्। नि॒ऽषद॑नम्। वि॒ऽवर्त॑नम्। यत्। च॒। पड्वी॑शम्। अर्व॑तः। यत्। च॒। प॒पौ। यत्। च॒। घा॒सिम्। ज॒घास॑। सर्वा॑। ता। ते॒। अपि॑। दे॒वेषु॑। अ॒स्तु॒॥ १४॥

पदार्थः-(**निक्रमणम्**) निश्चितं पादविहरणम् (**निषदनम्**) निश्चितमासनम् (**विवर्त्तनम्**) विविधं वर्त्तनम् (**यत्**) (**च**) (**पड्वीशम्**) पादबन्धनमाच्छादनं वा (**अर्वतः**) शीघ्रं गन्तुरश्वस्य (**यत्**) (**च**) (**पपौ**) पिबति (**यत्**) (**च**) (**घासिम्**) अदनम् (**जघास**) अत्ति (**सर्वा**) सर्वाणि (**ता**) तानि (**ते**) तव (**अपि**) (**देवेषु**) (**अस्तु**)॥ १४॥

अन्वयः-हे अश्वशिक्षक! अर्वतो यन्निक्रमणं निषदनं विवर्त्तनं पड्वीशं चास्ति। अयं यच्च पपौ यद् घासिं च जघास ता सर्वा ते सन्तु एतत्सर्वं देवेष्वप्यस्तु॥ १४॥

भावार्थः-यथा सुशिक्षिता अश्वाः सुशीला सुगतयो भवन्ति तथा विद्वच्छिक्षिता जनाः सभ्या जायन्ते, यथाश्वा मितं पीत्वा भुक्त्वा जरयन्ति तथा विचक्षणा जना अपि स्युः॥ १४॥

पदार्थः-हे घोड़े के सिखानेवाले! (**अर्वतः**) शीघ्र जानेवाले घोड़े का (**यत्**) जो (**निक्रमणम्**) निश्चित चलना, (**निषदनम्**) निश्चित बैठना, (**विवर्त्तनम्**) नाना प्रकार से चलाना-फिराना (**पड्वीशम्, च**) और पिछाड़ी बांधना तथा उसको उढ़ाना है और यह घोड़ा (**यत्, च**) जो (**पपौ**) पीता (**यत्, घासिम्, च**) और जो घास को (**जघास**) खाता है (**ता**) वे (**सर्वा**) समस्त उक्त काम (**ते**) तुम्हारे हों और यह समस्त (**देवेषु**) विद्वानों में (**अपि**) भी (**अस्तु**) हो॥ १४॥

भावार्थः-जैसे सुन्दर सिखाये हुए घोड़े सुशील अच्छी चाल चलनेवाले होते हैं, वैसे विद्वानों की शिक्षा पाये हुए जन सभ्य होते हैं। जैसे घोड़े आहार, भर पी खा के पचाते हैं, वैसे विचक्षण बुद्धि विद्या से तीव्र पुरुष भी हों॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा त्वाऽग्निर्ध्वनयीद् धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त॒ जघ्रिः।

इ॒ष्टं वी॒तम॒भिगू॑र्तं॒ वष॑ट्कृतं॒ तं दे॒वास॒ः प्रति॑ गृभ्णन्त्यश्व॑म्॥ १५॥ ९॥

मा। त्वा॒। अ॒ग्निः। ध्व॒न॒यी॒त्। धूम॑ऽगन्धिः। मा। उ॒खा। भ्राज॑न्ती। अ॒भि। वि॒क्त॒। जघ्रिः। इ॒ष्टम्। वी॒तम्। अ॒भिऽगू॑र्तम्। वष॑ट्ऽकृतम्। तम्। दे॒वासः। प्रति॑। गृ॒भ्ण॒न्ति॒। अश्व॑म्॥ १५॥

पदार्थः-**(मा)** **(त्वा)** त्वाम् **(अग्निः)** पावकः **(ध्वनयीत्)** ध्वनयेत् शब्दयेत् **(धूमगन्धिः)** धूमे गन्धिर्गन्धो यस्य सः **(मा)** **(उखा)** पाकस्थाली **(भ्राजन्ती)** प्रकाशमाना **(अभि)** **(विक्त)** विञ्ज्यात् पृथक्कुर्यात् **(जघ्रिः)** जिघ्रन्ती **(इष्टम्)** येन इज्यते तम् **(वीतम्)** व्याप्तिशीलम् **(अभिगूर्त्तम्)** अभित उद्यमिनम् **(वृषट्कृतम्)** क्रियया निष्पादितम् **(तम्)** **(देवासः)** विद्वांसः **(प्रति)** **(गृभ्णन्ति)** ग्राहयन्ति। अत्र णिज्लोपः। **(अश्वम्)** अश्ववत् शीघ्रं गमयितारम्॥१५॥

अन्वयः-हे विद्वन्! यमिष्टं वषट्कृतं वीतमभिगूर्त्तमश्वं देवासस्त्वा प्रतिगृभ्णन्ति, तं त्वं गृहाण, स धूमगन्धिरग्निर्मा ध्वनयीत् भ्राजन्त्युखा जघ्रिर्माभिविक्त॥१५॥

भावार्थः-ये मनुष्या अग्निनाऽश्वेन वा यानानि गमयन्ति, ते श्रिया भ्राजन्ते येऽग्नौ सुगन्ध्यादिकं द्रव्यं जुह्वति ते रोगार्त्तशब्दैर्न पीडयन्ते॥१५॥

पदार्थः-हे विद्वान्! जिस **(इष्टम्)** इष्ट अर्थात् जिससे यज्ञ वा सङ्ग किया जाता **(वषट्कृतम्)** जो क्रिया से सिद्ध किये हुए **(वीतम्)** व्याप्त होनेवाले **(अभिगूर्त्तम्)** सब ओर से उद्यमी **(अश्वम्)** घोड़े के समान शीघ्र पहुँचानेवाले बिजुलीरूप अग्नि को **(देवासः)** विद्वान् जन **(त्वा)** तुम्हें **(प्रति, गृभ्णन्ति)** प्रतीति से ग्रहण कराते हैं **(तम्)** उसको तुम ग्रहण करो, सो **(धूमगन्धिः)** धूम में गन्ध रखनेवाला **(अग्निः)** अग्नि **(मा, ध्वनयीत्)** मत ध्वनि दे, मत बहुत शब्द दे और **(भ्राजन्ती)** प्रकाशमान **(उखा)** अन्न पकाने को बटलोई **(जघ्रिः)** अन्न गन्ध लेती हुई अर्थात् जिसके भीतर से भाफ उठ लौट के उसी में जाती वह **(मा, अभि, विक्त)** मत अन्न को अपने में से सब और अलग करे, उगले॥१५॥

भावार्थः-जो मनुष्य अग्नि वा घोड़े से रथों को चलाते हैं, वे लक्ष्मी से प्रकाशमान होते हैं। जो अग्नि में सुगन्धि आदि पदार्थों को होमते हैं, वे रोग और कष्ट के शब्दों से पीड्यमान नहीं होते हैं॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदश्वा॑य॒ वास॑ उपस्तृ॒णन्त्य॑धीवा॒सं या हिर॑ण्यान्यस्मै।
सं॒दान॒मर्व॑न्तं॒ पड्वी॑शं प्रि॒या दे॒वेष्वा या॑मयन्ति॥ १६॥

यत्। अश्वा॑य। वासः॑। उ॒प॒स्तृ॒णन्ति॑। अ॒धी॒वा॒सम्। या। हिर॑ण्यानि। अ॒स्मै॒। स॒म्ऽदान॑म्। अर्व॑न्तम्। पड्वी॑शम्। प्रि॒या। दे॒वेषु॑। आ। या॒म॒य॒न्ति॥ १६॥

पदार्थः-**(यत्)** **(अश्वाय)** अग्नये **(वासः)** आच्छादनम् **(उपस्तृणन्ति)** **(अधीवासम्)** अधि उपरि वास आच्छादने यस्य तम् **(या)** यानि **(हिरण्यानि)** ज्योतिर्मयानि **(अस्मै)** **(संदानम्)** समीचीनं दानं यस्मात्तम् **(अर्वन्तम्)** गमयन्तम् **(पड्वीशम्)** प्राप्तानां पदार्थानां विभाजकम् **(प्रिया)** प्रियाणि कमनीयानि **(देवेषु)** विद्वत्सु **(आ)** **(यामयन्ति)**॥१६॥

अन्वयः-ये विद्वांसोऽस्मा अश्वाय यद्वास उपस्तृणन्ति यमधीवांसं संदानमर्वन्तं पड्वीशमुपस्तृणन्ति तेन या प्रिया हिरण्यानि देवेष्वा यामयन्ति ते तानि प्राप्य श्रीमन्तो भवन्ति॥१६॥

भावार्थः-यदि मनुष्या विद्युदादिस्वरूपमग्निमुपयोक्तुं वर्द्धयितुं जानीयुस्तर्हि बहूनि सुखान्याप्नुयुः॥१६॥

पदार्थः-जो विद्वान् जन **(अस्मै)** इस **(अश्वाय)** घोड़े के लिये **(यत्)** जिस **(वासः)** ओढ़ने के वस्त्र को **(उपस्तृणन्ति)** उठाते वा जिस **(अधीवासम्)** ऐसे चारजामा आदि को कि जिस के ऊपर ढाँपने का वस्त्र पड़ता वा **(संदानम्)** समीचीन जिससे दान बनता, उस यज्ञ आदि को **(अर्वन्तम्)** प्राप्त करते हुए **(पड्वीशम्)** प्राप्त पदार्थ को बांटने छिन्न-भिन्न करनेहारे अग्नि को उठाते ढाँपते कलाघरों में लगाते हैं और उससे **(या)** जिन **(प्रिया)** प्रिय मनोहर **(हिरण्यानि)** प्रकाशमय पदार्थों को **(देवेषु)** विद्वानों में **(आ, यामयन्ति)** विस्तारते हैं, वे उन पदार्थों को पाकर श्रीमान् होते हैं॥१६॥

भावार्थः-जो मनुष्य बिजुली आदि रूपवाले अग्नि के उपयोग करने और उसको बढ़ाने को जानें तो बहुत सुखों को प्राप्त हों॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यत्ते॑ सा॒दे मह॑सा॒ शूक॑तस्य॒ पाष्ण्र्या॑ वा॒ कश॑या वा तु॒तोद॑।
स्रु॒चेव॒ ता ह॒विषो॑ अध्व॒रेषु॒ सर्वा॒ ता ते॒ ब्रह्म॑णा सूदयामि॥१७॥

यत्। ते॒। सा॒दे। मह॑सा। शूक॑तस्य। पाष्ण्र्या॑। वा॒। कश॑या। वा॒। तु॒तोद॑। स्रु॒चाऽइ॑व। ता। ह॒विषः॑। अ॒ध्व॒रेषु॑। सर्वा॑। ता। ते॒। ब्रह्म॑णा। सू॒द॒या॒मि॒॥१७॥

पदार्थः-**(यत्)** यः **(ते)** तव **(सादे)** स्थितौ **(महसा)** महता **(शूकृतस्य)** शीघ्रं निष्पादितस्य **(पाष्ण्र्या)** स्पर्शकारकेन **(वा)** **(कशया)** प्रेरकया **(वा)** **(तुतोद)** तुद्यात् प्रेरयेत् **(स्रुचेव)** **(ता)** तानि **(हविषः)** होतव्यस्य **(अध्वरेषु)** अहिंसनीयेषु यज्ञेषु **(सर्वा)** सर्वाणि **(ता)** तानि **(ते)** तव **(ब्रह्मणा)** धनेन **(सूदयामि)** क्षरयामि॥१७॥

अन्वयः-हे विद्वन्! यद्यस्ते सादे महसा बलेन शूकृतस्य पाष्ण्र्या वा कशयाऽश्वं तुतोद वाऽध्वरेषु हविषः स्रुचेव ता तानि तुतोद ता सर्वा ते ब्रह्मणाऽहं सूदयामि॥१७॥

भावार्थः-अत्रोपमालङ्कारः। यथा विद्वांसः कशया वेत्रेणाश्वं प्रतोदेन वृषभान् अंकुशेन हस्तिनं प्रताड्य सद्यो गमयन्ति, तथैव कलायन्त्रैरग्निं प्रचाल्य विमानादियानानि शीघ्रं गमयेयुः॥१७॥

पदार्थः-हे विद्वान्! **(यत्)** जो **(ते)** तेरे **(सादे)** स्थित होने में **(महसा)** अत्यन्त बल से **(शूकृतस्य)** शीघ्र उत्पन्न किये हुए पदार्थों के **(पाष्ण्र्या)** छूनेवाले पदार्थ से **(वा)** वा **(कशया)** जिससे

प्रेरणा दी जाती, उस कोड़ा से घोड़े को **(तुतोद)** प्रेरणा देवे **(वा)** वा **(अध्वरेषु)** न नष्ट करने योग्य यज्ञों में **(हविषः)** होमने योग्य वस्तु के **(स्रुचेव)** जैसे स्रुचा से काम बनें वैसे **(ता)** उन कामों को प्रेरणा देवे **(ता)** उन **(सर्वा)** सब **(ते)** तेरे कामों को **(ब्रह्मणा)** धन से मैं **(सूदयामि)** अलग-अलग करता हूँ॥१७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् जन कोड़ा वा बेंत से घोड़े को, पनेड़ी से बैलों को, अंकुश से हाथी को अच्छी ताड़ना दे उनको शीघ्र चलाते हैं, वैसे ही कलायन्त्रों से अग्नि को अच्छे प्रकार चला कर विमान आदि यानों को शीघ्र चलावें॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त॥१८॥

चतुःऽत्रिंशत्। वाजिनः। देवऽबन्धोः। वङ्क्रीः। अश्वस्य। स्वऽधितिः। सम्। एति। अच्छिद्रा। गात्रा। वयुना। कृणोत। परुःऽपरुः। अनुऽघुष्य। वि। शस्त॥१८॥

पदार्थः-**(चतुस्त्रिंशत्)** एतत्संख्याकाः **(वाजिनः)** वेगगुणवतो जलादयः **(देवबन्धोः)** प्रकाशमानानां पृथिव्यादीनां संबन्धिनः **(वङ्क्रीः)** कुटिला गतीः **(अश्वस्य)** शीघ्रगामिनोऽग्नेः **(स्वधितिः)** विद्युत् **(सम्)** **(एति)** गच्छति **(अच्छिद्रा)** द्विधाभावरहितानि **(गात्रा)** गात्राण्यङ्गानि **(वयुना)** प्रज्ञानानि कर्माणि वा **(कृणोत)** कुरुत **(परुष्परुः)** प्रति मर्म **(अनुघुष्य)** आनुकूल्येन शब्दयित्वा। अत्रा**न्येषामपी**ति दीर्घः। **(वि)** **(शस्त)** ताडयत हिंस्त॥१८॥

अन्वयः-हे विद्वांसो! यूयं देवबन्धोर्वाजिनोऽश्वस्य या स्वधितिः समेति तां चतुस्त्रिंशद्वङ्क्रीश्च विशस्त परुष्परुग्नुघुष्याऽच्छिद्रा गात्रा वयुना कृणोत॥१८॥

भावार्थः-हे मनुष्या! यस्मात्कारणाद्विद्युदुत्पद्यते तत्सर्वेषु पृथिव्यादिषु व्याप्तमस्ति अतस्तडित्ताडनादिना कस्यचिदङ्गभङ्गो न भवेत् तावतां प्रयुञ्जीध्वं यद्यग्निगुणान् विदित्वा क्रियया संप्रयुञ्जते, तर्हि किं कार्यमसाध्यं स्यात्॥१८॥

पदार्थः-हे विद्वान् जन! तुम **(देवबन्धोः)** प्रकाशमान पृथिव्यादिकों के सम्बन्धी **(वाजिनः)** वेगवाले **(अश्वस्य)** शीघ्रगामी अग्नि की जो **(स्वधितिः)** बिजुली **(समेति)** अच्छे प्रकार जाती है उसको और **(चतुस्त्रिंशत्)** चौंतीस प्रकार की **(वङ्क्रीः)** टेढ़ी-मेढ़ी गतियों को **(वि, शस्त)** तड़काओ अर्थात् कलों को ताड़ना दे, उन गतियों को निकालो। तथा **(परुष्परुः)** प्रत्येक मर्मस्थल पर **(अनुघुष्य)**

अनुकूलता से कलायन्त्रों का शब्द करा कर **(अच्छिद्रा)** दो टूंक होने छिन्न-भिन्न होने से रहित **(गात्रा)** अङ्ग और **(वयुना)** उत्तम ज्ञान कर्मों को **(कृणोत)** करो॥१८॥

भावार्थः-हे मनुष्यो! जिस कारण से बिजुली उत्पन्न होती है, वह कारण सब पृथिव्यादिकों में व्याप्त है। इससे बिजुली की ताड़ना आदि से किसी का अङ्ग-भङ्ग न हो, उतनी बिजुली काम में लाओ। जो अग्नि के गुणों को जानकर यथायोग्य क्रिया से उस अग्नि का प्रयोग किया जाय तो कौन काम न सिद्ध होने योग्य हों अर्थात् सभी यथेष्ट काम बनें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ॥१९॥

एकः। त्वष्टुः। अश्वस्य। विऽशस्ता। द्वा। यन्तारा। भवतः। तथा। ऋतुः। या। ते। गात्राणाम्। ऋतुऽथा। कृणोमि। ताऽता। पिण्डानाम्। प्र। जुहोमि। अग्नौ॥१९॥

पदार्थः-(**एकः**) (**त्वष्टुः**) विद्युतः (**अश्वस्य**) व्याप्तस्य। अत्र**ाऽन्येषामपी**ति दीर्घः। (**विशस्ता**) (**द्वा**) द्वौ (**यन्तारा**) नियन्तारौ (**भवतः**) (**तथा**) तेन प्रकारेण (**ऋतुः**) वसन्तादिः (**या**) यानि (**ते**) तव (**गात्राणाम्**) अङ्गानाम् (**ऋतुथा**) ऋतौ ऋतौ। अत्र **वाच्छन्दसी**ति थाल्। (**कृणोमि**) (**ताता**) तानि तानि (**पिण्डानाम्**) (**प्र**) (**जुहोमि**) क्षिपामि (**अग्नौ**) वह्नौ॥१९॥

अन्वयः-हे विद्वँस्ते तव विद्याक्रियाभ्यां सिद्धस्य त्वष्टुरश्वस्याग्नेरेक ऋतुर्विशस्ता द्वा यन्तारा भवतस्तथा या यानि गात्राणामृतुथा कर्माणि पिण्डानां च येऽवयवास्ताता प्रयुक्तान्यहं कृणोम्यग्नौ प्रजुहोमि॥१९॥

भावार्थः-ये सर्वपदार्थविच्छेदकस्य यथर्त्तुप्राप्तपदार्थेषु व्याप्तस्य वह्नेः कालसृष्टिक्रमौ नियन्तारौ प्रशंसितान् गुणान् विज्ञायाऽभीष्टानि कार्याणि साध्नुवन्तः स्थूलानि काष्ठादीनि पावके प्रक्षिप्य बहूनि कार्याणि साध्नुयुस्ते शिल्पविद्याविदः कुतो न स्युः ?॥१९॥

पदार्थः-हे विद्वान्! (**ते**) तेरी विद्या और क्रिया से सिद्ध किये हुए (**त्वष्टुः**) बिजुलीरूप (**अश्वस्य**) व्याप्त अग्नि का (**एकः**) एक (**ऋतुः**) वसन्तादि ऋतु (**विशस्ता**) छिन्न-भिन्न करनेवाला अर्थात् भिन्न-भिन्न पदार्थों में लगनेवाला और (**द्वा**) दो (**यन्तारा**) उसको नियम में रखनेवाले (**भवतः**) होते हैं (**तथा**) उसी प्रकार से (**या**) जो (**गात्राणाम्**) शरीरों के (**ऋतुथा**) ऋतु-ऋतु में काम उनको और (**पिण्डानाम्**) अनेक पदार्थों में सङ्घातों के जो-जो अङ्ग हैं (**ताता**) उन-उन का काम में प्रयोग मैं (**कृणोमि**) करता हूँ और (**अग्नौ**) अग्नि में (**प्र, जुहोमि**) होमता हूँ॥११॥

भावार्थः-जो सब पदार्थों के छिन्न-भिन्न करनवाले, ऋतु के अनुकूल पाये हुए पदार्थों में व्याप्त, बिजुलीरूप अग्नि के काल और सृष्टिक्रम नियम करनेवालों और प्रशंसित गुणों को जान अभीष्ट कामों को सिद्ध करते हुए मोटे-मोटे लक्कड़ आदि पदार्थों को आग में छोड़ बहुत कामों को सिद्ध करें, वे शिल्पविद्या को जाननेवाले कैसे न हों ?॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा त्वा॑ तपत्प्रिय आ॒त्मापि॒यन्तं॑ मा स्वधि॑तिस्त॒न्व१॒॑ आ ति॑ष्ठिपत्ते।
मा ते॑ गृ॒ध्नुर॑विश॒स्तात्ति॒हाय॑ छि॒द्रा गात्रा॑ण्य॒सिना॒ मिथू॑ कः॥२०॥

मा। त्वा॒। त॒प॒त्। प्रि॒यः। आ॒त्मा। अ॒पि॒ऽयन्त॑म्। मा। स्वऽधि॑तिः। त॒न्वः॑। आ। ति॒स्थि॒प॒त्। ते॒। मा। ते। गृ॒ध्नुः। अ॒वि॒ऽश॒स्ता। अ॒ति॒ऽहाय॑। छि॒द्रा। गात्रा॑णि। अ॒सिना॑। मिथू॑। क॒रि॒त॒। कः॥२०॥

पदार्थः-**(मा) (त्वा)** त्वाम् **(तपत्)** तपेत् **(प्रियः)** कमनीयः **(आत्मा) (अपियन्तम्)** म्रियमाणम् **(मा) (स्वधितिः)** वज्रवद्विद्युत् **(तन्वः)** शरीराणि **(आ) (तिष्ठिपत्)** स्थापयेत् **(ते)** तव **(मा) (ते)** तव **(गृध्नुः)** अभिकांक्षिता **(अविशस्ता)** अविहिंसितानि **(अतिहाय)** अतिशयेन त्यक्त्वा **(छिद्रा)** छिद्राणि **(गात्राणि)** अङ्गानि **(असिना)** खड्गेन **(मिथू)** परस्परम् **(कः)** कुर्यात्। अत्राडभावो **मन्त्रे घस०** (अष्टा०२.४.८०) इत्यादिना च्लेर्लुक् च॥२०॥

अन्वयः-हे विद्वँस्ते तव प्रिय आत्मा अपियन्तं त्वा मा तपत् स्वधितिस्ते तन्वो मातिष्ठिपत् गृध्नुरसिना तेऽविशस्ताच्छिद्रा गात्राण्यतिहाय मिथू मा कः॥२०॥

भावार्थः-ये मनुष्या योगाभ्यासं कुर्वन्ति ते मृत्युना न पीड्यन्ते, जीने रोगाश्च न दुःखयन्ति॥२०॥

पदार्थः-हे विद्वान्! **(ते)** तेरा **(प्रियः)** मनोहर **(आत्मा)** आत्मा **(अपियन्तम्)** मरते हुए **(त्वा)** तुझे **(मा, तपत्)** मत कष्ट देवे और **(स्वधितिः)** वज्र के समान बिजुली तेरे **(तन्वः)** शरीरों को **(मा, आ, तिष्ठिपत्)** मत ढेर करे तथा **(गृध्नुः)** अभिकाङ्क्षा करनेवाला प्राणी **(असिना)** तलवार से **(ते)** तेरे **(अविशस्ता)** न मारे हुए अर्थात् निर्घायल और **(छिद्रा)** छिद्र इन्द्रिय सहित **(गात्राणि)** अङ्गों को **(अतिहाय)** अतीव छोड़ **(मिथू)** परस्पर एकता **(मा, कः)** मत करे॥२०॥

भावार्थः-जो मनुष्य योगाभ्यास करते हैं, वे मृत्यु रोग से नहीं पीड़ित होते और उनको जीवन में रोग भी दुःखी नहीं करते हैं॥२०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न वा उ॑ ए॒तन्म्रि॑यसे॒ न रि॑ष्यसि दे॒वाँ इदे॑षि प॒थिभि॑: सु॒गेभि॑:।

हरी॑ ते युञ्जा पृष॑ती अभूतामुपा॑स्थाद्वा॒जी धु॒रि रास॑भस्य॥ २१॥

न। वै। ऊ॒म् इति॑। ए॒तत्। म्रि॒य॒से॒। न। रि॒ष्य॒सि॒। दे॒वान्। इत्। ए॒षि॒। प॒थिऽभि॑:। सु॒ऽगेभि॑:। हरी॒ इति॑। ते॒। युञ्जा॑। पृष॑ती॒ इति॑। अ॒भू॒ता॒म्। उप॑। अ॒स्था॒त्। वा॒जी। धु॒रि। रास॑भस्य॥ २१॥

पदार्थः-(**न**) (**वै**) निश्चये (**उ**) वितर्के (**एतत्**) चेतनस्वरूपम् (**म्रियसे**) (**न**) (**रिष्यसि**) हंसि (**देवान्**) विदुषो दिव्यान् पदार्थान् वा (**इत्**) एव (**एषि**) प्राप्नोषि (**पथिभिः**) मार्गैः (**सुगेभिः**) सुखेन गच्छन्ति येषु तैः (**हरी**) धारणाकर्षणगुणौ (**ते**) तव (**युञ्जा**) युञ्जानौ (**पृषती**) सेक्तारौ जलगुणौ (**अभूताम्**) भवतः (**उप**) (**अस्थात्**) तिष्ठेत् (**वाजी**) वेगः (**धुरि**) धारके (**रासभस्य**) शब्दायमानस्य॥ २१॥

अन्वयः-हे विद्वन्! यदि यौ ते मन आत्मा वा युञ्जा हरी पृषती अभूतां यस्तावुपास्थात्। रासभस्य धुरि वाजीव भवेस्तर्हि एतत्स्वरूपं प्राप्य न वै म्रियसे न उ रिष्यसि सुगेभिः पथिभिरिदेव देवानेषि॥ २१॥

भावार्थः-ये योगाभ्यासेन समाहितात्मानो दिव्यान् योगिनः सङ्गस्य धर्म्यमार्गेण गच्छन्तः परमात्मनि स्वात्मानं युञ्जते, ते प्राप्तमोक्षा जायन्ते॥ २१॥

पदार्थः-हे विद्वान्! यदि जो (**ते**) तुम्हारे मन वा आत्मा यथायोग्य करने में (**युञ्जा**) युक्त (**हरी**) धारण और आकर्षण गुणवाले (**पृषती**) वा सींचनेवाले जल का गुण रखते हुए (**अभूताम्**) होते हैं, उनका जो (**उपास्थात्**) उपस्थान करे वा (**रासभस्य**) शब्द करते हुए रथ आदि की (**धुरी**) धुरी में (**वाजी**) वेग तुल्य हो तो (**एतत्**) इस उक्त रूप को पाकर (**न, वै, म्रियसे**) नहीं मरते (**न, उ**) अथवा तो न (**रिष्यसि**) किसी को मारते हो और (**सुगेभिः**) सुखपूर्वक जिनसे जाते हैं, उन (**पथिभिः**) मार्गों से (**इत्**) ही (**देवान्**) विद्वानों वा दिव्य पदार्थों को (**एषि**) प्राप्त होते हो॥ २१॥

भावार्थः-जो योगाभ्यास से समाहित चित्त दिव्य योगी जनों को अच्छे प्रकार प्राप्त हो धर्म युक्त मार्ग से चलते हुए परमात्मा से अपने आत्मा को युक्त करते हैं, वे मोक्ष पाये हुए होते हैं॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सु॒गव्यं॑ नो वा॒जी स्वश्व्यं॑ पुं॒सः पु॒त्राँ उ॒त वि॑श्वा॒पुष॑ र॒यिम्।
अ॒ना॒गा॒स्त्वं नो॒ अदि॑तिः कृणोतु क्ष॒त्रं नो॒ अश्वो॑ वनतां ह॒विष्मा॑न्॥ २२॥ १०॥

सु॒ऽगव्य॑म्। नः॒। वा॒जी। सु॒ऽअश्व्य॑म्। पुं॒सः। पु॒त्रान्। उ॒त। वि॒श्व॒ऽपुष॑म्। र॒यिम्। अ॒ना॒गाः॒ऽत्वम्। नः॒। अदि॑तिः। कृ॒णो॒तु॒। क्ष॒त्रम्। नः॒। अश्वः॑। व॒न॒ता॒म्। ह॒विष्मा॑न्॥ २२॥

पदार्थः-(**सुगव्यम्**) सुष्ठु गोषु भवानि यस्मिंस्तत् (**नः**) अस्माकम् (**वाजी**) वेगवान् (**स्वश्व्यम्**) शोभनेष्वश्वेषु भवम् (**पुंसः**) (**पुत्रान्**) (**उत**) (**विश्वापुषम्**) सर्वपुष्टिप्रदम् (**रयिम्**) श्रियम् (**अनागास्त्वम्**)

निष्पापस्य भावम् (**नः**) अस्माकम् (**अदितिः**) अखण्डितः (**कृणोतु**) करोतु (**क्षत्रम्**) राज्यम् (**नः**) अस्मान् (**अश्वः**) व्याप्तिशीलोऽग्निः (**वनताम्**) सेवताम् (**हविष्मान्**) संबद्धानि हवींषि यस्मिन् सः॥ २२॥

अन्वयः-यथाऽयं वाजी नः सुगव्यं स्वश्व्यं पुंसः पुत्रानुतापि विश्वापुषं रयिं कृणोतु सोऽदितिर्नोऽनागास्त्वं क्षत्रं कृणोतु स हविष्मानश्वो नो वनतां तथा वयमेनं साध्नुयाम॥ २२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये पृथिव्यादिविद्यया गवामश्वानां पुसां पुत्राणां च पूर्णां पुष्टिं श्रियं च कृत्वाऽश्वाग्निविद्यया राज्यं वर्द्धयित्वा निष्पापा भूत्वा सुखिनः स्युस्तेऽन्यानप्येवं कुर्युरिति॥ २२॥

अत्राश्वाग्निविद्याप्रतिपादनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति द्विषष्ट्युत्तरं शततमं १६२ सूक्तं दशमो १० वर्गश्च समाप्तः॥

पदार्थः-जैसे यह (**वाजी**) वेगवान् अग्नि (**नः**) हमारे (**सुगव्यम्**) सुन्दर गौओं में हुए पदार्थ जिसमें हैं, उसको (**स्वश्व्यम्**) सुन्दर घोड़ों में उत्पन्न हुए को (**पुंसः**) पुरुषत्ववाले (**पुत्रान्**) पुत्रों (**उत**) और (**विश्वापुषम्**) सब की पुष्टि देनेवाले (**रयिम्**) धन को (**कृणोतु**) करे सो (**अदितिः**) अखण्डित न नाश को प्राप्त हुआ (**नः**) हमको (**अनागास्त्वम्**) पापपने से रहित (**क्षत्रम्**) राज्य को प्राप्त करे सो (**हविष्मान्**) मिले हैं होम योग्य पदार्थ जिसमें वह (**अश्वः**) व्याप्तिशील अग्नि (**नः**) हम लोगों को (**वनताम्**) सेवे, वैसे हम लोग इसको सिद्ध करें॥ २२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पृथिवी आदि की विद्या से गौ, घोड़े और पुरुष सन्तानों की पूरी पुष्टि और धन को संचित करके शीघ्रगामी अश्वरूप अग्नि की विद्या से राज्य को बढ़ा के निष्पाप हो के सुखी हों वे औरों को भी ऐसे ही करें॥ २२॥

इस सूक्त में अश्वरूप अग्नि की विद्या का प्रतिपादन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ बासठवां १६२ सूक्त और दशवां १० वर्ग समाप्त हुआ॥

यदक्रन्द इति त्रयोदशर्चस्य त्रिषष्ट्युत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अश्वोऽग्निर्देवता १,६,७,१३ त्रिष्टुप्। २ भुरिक् त्रिष्टुप्। ३,८ विराट् त्रिष्टुप्। ५,९,११ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४,१०,१२ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वदग्निगुणानाह॥

अब एक सौ तिरेसठवें सूक्त का आरम्भ है । उसके आदि से विद्वान् और बिजुली के गुणों को कहते हैं॥

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्॥ १॥

यत्। अक्रन्दः। प्रथमम्। जायमानः। उत्ऽयन्। समुद्रात्। उत। वा। पुरीषात्। श्येनस्य। पक्षा। हरिणस्य। बाहू इति। उपऽस्तुत्यम्। महि। जातम्। ते। अर्वन्॥ १॥

पदार्थः-(**यत्**) यस्मात् कारणात् (**अक्रन्दः**) शब्दायसे (**प्रथमम्**) आदिमम् (**जायमानः**) उत्पद्यमानः (**उद्यन्**) उदयं प्राप्नुवन् (**समुद्रात्**) अन्तरिक्षात् (**उत**) अपि (**वा**) पक्षान्तरे (**पुरीषात्**) पूर्णात्कारणात् (**श्येनस्य**) (**पक्षा**) पक्षौ (**हरिणस्य**) (**बाहू**) बाधकौ भुजौ (**उपस्तुत्यम्**) उपस्तोतुमर्हम् (**महि**) महत् (**जातम्**) उत्पन्नम् (**ते**) तव (**अर्वन्**) विज्ञानवन्॥ १॥

अन्वयः-हे अर्वन्! यत् त्वं समुद्रादुतापि वा पुरीषादुद्यन्निव जायमानः प्रथममक्रन्दः। यस्य ते श्येनस्य पक्षेव हरिणस्य बाहू इव उपस्तुत्यं महि जातं कर्माङ्गमग्निरस्ति स सर्वैः सत्कर्त्तव्यः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये धर्म्येण ब्रह्मचर्येण विद्या अधीयते, ते सूर्यवत् प्रकाशमानाः श्येनवद्वेगवन्तो मृगवदुत्प्लवमानाः प्रशंसिता भवन्ति॥ १॥

पदार्थः-हे (**अर्वन्**) विज्ञानवान् विद्वन्! (**यत्**) जिस कारण तू (**समुद्रात्**) अन्तरिक्ष से (**उत**) भी (**वा**) वा (**पुरीषात्**) पूर्ण कारण से (**उद्यन्**) उदय को प्राप्त होते हुए सूर्य के तुल्य (**जायमानः**) उत्पन्न होता (**प्रथमम्**) पहिले (**अक्रन्दः**) शब्द करता है, जिस (**ते**) तेरा (**श्येनस्य**) वाज के (**पक्षा**) पङ्खों के समान (**हरिणस्य**) हरिण के (**बाहू**) बाधा करनेवाली भुजा के तुल्य (**उपस्तुत्यम्**) समीप से प्रशंसा के योग्य (**महि, जातम्**) बड़ा उत्पन्न हुआ काम साधक अग्नि है, सो सबको सत्कार करने योग्य है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो धर्मयुक्त ब्रह्मचर्य से विद्याओं को पढ़ते हैं, वे सूर्य के समान प्रकाशमान, वाज के समान वेगवान् और हरिण के समान कूदते हुए प्रशंसित होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट॥ २॥

यमेन। दत्तम्। त्रितः। एनम्। अयुनक्। इन्द्रः। एनम्। प्रथमः। अधि। अतिष्ठत्। गन्धर्वः। अस्य। रशनाम्। अगृभ्णात्। सूरात्। अश्वम्। वसवः। निः। अतष्ट॥ २॥

पदार्थः-(**यमेन**) नियामकेन (**दत्तम्**) (**त्रितः**) संप्लावकः। अत्रौणादिकस्तृधातोः कितच् प्रत्ययः। (**एनम्**) पूर्वोक्तमुपस्तुत्यम् (**आयुनक्**) शिल्पकार्ये नियुञ्जीत (**इन्द्रः**) विद्युत् (**एनम्**) अत्र **वा छन्दसी**त्यप्राप्तं णत्वम्। (**प्रथमः**) प्रख्यातिमान् (**अधि**) (**अतिष्ठत्**) तिष्ठेत् (**गन्धर्वः**) यो गां पृथिवीं धरति स वायुः (**अस्य**) (**रशनाम्**) स्नेहिकां क्रियाम् (**अगृभ्णात्**) गृह्णीयात् (**सूरात्**) सूर्यात् (**अश्वम्**) आशु गमयितारम् (**वसवः**) चतुर्विंशतिवार्षिकब्रह्मचर्येण कृतविद्याः (**निः**) (**अतष्ट**) तक्षेरन्॥ २॥

अन्वयः-हे वसवो! यूयं यं यमेन दत्तमेनं त्रित इन्द्रोऽयुनक् प्रथम एनमध्यतिष्ठद् गन्धर्वोऽस्य रशनां सूराद्यमश्वं चागृभ्णात्तं निरतष्ट॥ २॥

भावार्थः-ये मनुष्या विद्वदुपदेशप्राप्तां तां विद्यां गृहीत्वा विद्युज्जनितकारणाद्विस्तृतं वायुना धृतं सूर्योद्भावितमाशुगामिनमग्निं प्रयोजयन्ति, ते दारिद्र्यच्छेत्तारो जायन्ते॥ २॥

पदार्थः-हे (**वसवः**) चौबीस वर्ष ब्रह्मचर्य के सेवन से विद्या को प्राप्त हुए सज्जनो! तुम जिस (**यमेन**) नियमकर्त्ता वायु से (**दत्तम्**) दिये हुए (**एनम्**) इस पूर्वोक्त प्रशंसित अग्नि को (**त्रितः**) अनेकों पदार्थ वा अनेकों व्यवहारों को तरनेवाला (**इन्द्रः**) बिजुलीरूप अग्नि (**आयुनक्**) शिल्प कामों में नियुक्त करे (**प्रथमः**) वा प्रख्यातिमान् पुरुष (**एनम्**) इस उक्त प्रशंसित अग्नि का (**अध्यतिष्ठत्**) अधिष्ठाता हो वा (**गन्धर्वः**) पृथिवी को धारण करनेवाला वायु (**अस्य**) इसकी (**रशनाम्**) स्नेह क्रिया को और (**सूरात्**) सूर्य से (**अश्वम्**) शीघ्रगमन करानेवाले अग्नि को (**अगृभ्णात्**) ग्रहण करे उसको (**निरतष्ट**) निरन्तर काम में लाओ॥ २॥

भावार्थः-जो मनुष्य विद्वानों के उपदेश से पाई हुई विद्या को ग्रहण कर, बिजुली से उत्पन्न हुए कारण से फैले वायु से, धारण किये सूर्य से प्रकट हुए शीघ्रगामी अग्नि को प्रयोजन में लाते हैं, वे दरिद्रपन के नाश करनेवाले होतें हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि॥ ३॥

असि॑। य॒मः। असि॑। आ॒दि॒त्यः। अ॒र्व॒न्। असि॑। त्रि॒तः। गुह्ये॑न। व्र॒तेन॑। असि॑। सोमे॑न। स॒मया॑। विऽपृ॑क्तः। आ॒हुः॒। ते॒। त्रीणि॑। दि॒वि। बन्ध॑नानि॥ ३॥

पदार्थः-(**असि**) अस्ति। अत्र सर्वत्र पुरुषव्यत्ययः। (**यमः**) नियन्ता (**असि**) अस्ति (**आदित्यः**) अदितावन्तरिक्षे भवः (**अर्वन्**) सर्वत्र प्राप्तः (**असि**) अस्ति (**त्रितः**) सन्तारकः (**गुह्येन**) गोप्येन (**व्रतेन**) शीलेन (**असि**) अस्ति (**सोमेन**) चन्द्रेणौषधिगणेन वा (**समया**) सामीप्ये (**विपृक्तः**) स्वरूपेण संपर्करहितः (**आहुः**) कथयन्ति (**ते**) तस्य (**त्रीणि**) (**दिवि**) दिव्ये पदार्थे (**बन्धनानि**) प्रयोजनानि॥ ३॥

अन्वयः-हे मनुष्या! यो यमोऽस्यादित्योऽस्यर्वन्नसि गुह्येन व्रतेन त्रितोऽसि सोमेन समया विपृक्तोऽसि, ते तस्य दिवि त्रीणि बन्धनान्याहुरेनं यूयं वित्त॥ ३॥

भावार्थः-यो गूढोऽग्निः पृथिव्यादिवाय्वोषधीषु प्राप्तोऽस्ति यस्य पृथिव्यामन्तरिक्षे सूर्ये च बन्धनानि सन्ति, तं सर्वे मनुष्या विजानन्तु॥ ३॥

पदार्थः-हे मनुष्यो! जो (**यमः**) नियम का करनेवाला (**असि**) है (**आदित्यः**) अन्तरिक्ष में प्रसिद्ध होनेवाला सूर्यरूप (**असि**) है, (**अर्वन्**) सर्वत्र प्राप्त है, (**गुह्येन**) गुप्त करने योग्य (**व्रतेन**) शील से (**त्रितः**) अच्छे प्रकार व्यवहारों का करनेवाला (**असि**) है, (**सोमेन**) चन्द्रमा वा ओषधिगण से (**समया**) समीप में (**विपृक्तः**) अपने रूप से अलग (**असि**) है (**ते**) उस अग्नि के (**दिवि**) दिव्य पदार्थ में (**त्रीणि**) तीन (**बन्धनानि**) प्रयोजन अगले लोगों ने (**आहुः**) कहे हैं, उसको तुम लोग जानो॥ ३॥

भावार्थः-जो गूढ़ अग्नि पृथिव्यादि पदार्थों में, वायु और ओषधियों में प्राप्त है, जिसके पृथिवी, अन्तरिक्ष और सूर्य में बन्धन हैं, उसको सब मनुष्य जानें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्रीणि॑ त आहुर्दि॒वि बन्ध॑नानि॒ त्रीण्य॒प्सु त्रीण्य॒न्तः स॑मु॒द्रे।
उ॒तेव॑ मे॒ वरु॑णश्छन्त्स्यर्व॒न् यत्रा॑ त आ॒हुः प॑र॒मं ज॒नित्र॑म्॥ ४॥

त्रीणि॑। ते॒। आ॒हुः॒। दि॒वि। बन्ध॑नानि। त्रीणि॑। अ॒प्ऽसु। त्रीणि॑। अ॒न्तरिति॑। स॒मु॒द्रे। उ॒तऽइ॑व। मे॒। वरु॑णः। छ॒न्त्सि॒। अ॒र्व॒न्। यत्र॑। ते॒। आ॒हुः॒। प॒र॒मम्। ज॒नित्र॑म्॥ ४॥

पदार्थः-(**त्रीणि**) (**ते**) तव (**आहुः**) वदन्ति (**दिवि**) प्रकाशमयेऽग्नौ (**बन्धनानि**) (**त्रीणि**) (**अप्सु**) (**त्रीणि**) (**अन्तः**) आभ्यन्तरे (**समुद्रे**) अन्तरिक्षे (**उतेव**) (**मे**) मम (**वरुणः**) श्रेष्ठः (**छन्त्सि**) ऊर्जयसि (**अर्वन्**) विज्ञातः (**यत्र**) अत्र **ऋचि तुनुघे**ति दीर्घः। (**ते**) तव (**आहुः**) कथयन्ति (**परमम्**) प्रकृष्टम् (**जनित्रम्**) जन्म॥ ४॥

अन्वयः-हे अर्वन्! यत्र ते परमं जनित्रमाहुस्तत्र ममाप्यस्ति वरुणस्त्वं यथा छन्त्सि तथाऽहं छन्दयामि यथा ते त्रीण्यन्तस्समुद्रे त्रीण्यप्सु त्रीणि दिवि च बन्धनान्याहुरुतेव मे सन्ति॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽग्नेः कारणसूक्ष्मस्थूलानि स्वरूपाणि सन्ति, वाय्वग्न्यपृथिवीनां च वर्त्तन्ते, तथा सर्वेषां जातानां पदार्थानां त्रीणि स्वरूपाणि सन्ति। हे विद्वन्! यथा तव विद्याजन्म प्रकृष्टमस्ति तथा ममापि स्यात्॥४॥

पदार्थः-हे **(अर्वन्)** विशेष ज्ञानवाले सज्जन! **(यत्र)** जहाँ **(ते)** तेरा **(परमम्)** उत्तम **(जनित्रम्)** जन्म **(आहुः)** कहते हैं, वहाँ मेरा भी उत्तम जन्म है, **(वरुणः)** श्रेष्ठ तू जैसे **(छन्त्सि)** बलवान् होता है, वैसे मैं बलवान् होता हूँ, जैसे **(ते)** तेरे **(त्रीणि)** तीन **(अन्तः)** भीतर **(समुद्रे)** अन्तरिक्ष में **(त्रीणि)** तीन **(अप्सु)** जलों में **(त्रीणि)** तीन **(दिवि)** प्रकाशमान अग्नि में भी **(बन्धनानि)** बन्धन **(आहुः)** अगले जनों ने कहे हैं **(उतेव)** उसी के समान **(मे)** मेरे भी हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अग्नि के कारण, सूक्ष्म और स्थूल रूप हैं- वायु, अग्नि, जल और पृथिवी के भी हैं, वैसे सब उत्पन्न हुए पदार्थों के तीन स्वरूप हैं। हे विद्वन्! जैसे तुम्हारा विद्या जन्म उत्तम है, वैसे मेरा भी हो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒मा ते॑ वाजिन्नव॒मार्ज॑नानी॒मा शफा॑नां सनि॒तुर्नि॒धाना॑।
अत्रा॑ ते भ॒द्रा र॑श॒ना अ॑पश्यमृ॒तस्य॒ या अ॑भि॒रक्ष॑न्ति गो॒पाः॥५॥११॥

इ॒मा। ते॒। वा॒जि॒न्। अ॒व॒ऽमार्ज॑नानि। इ॒मा। श॒फाना॑म्। स॒नि॒तुः। नि॒ऽधाना॑। अत्र॑। ते॒। भ॒द्राः। र॒श॒नाः। अ॒प॒श्य॒म्। ऋ॒तस्य॑। याः। अ॒भि॒ऽरक्ष॑न्ति। गो॒पाः॥५॥

पदार्थः-**(इमा)** इमानि **(ते)** तव **(वाजिन्)** विज्ञानवन् **(अवमार्जनानि)** शोधनानि **(इमा)** इमानि **(शफानाम्)** शं फणन्ति तेषाम्। अत्र**ाऽन्येभ्योऽपि दृश्यत** इति डः। **(सनितुः)** संविभाजकस्य **(निधाना)** निधानानि **(अत्र)** अत्र। **ऋचि तुनुघे**ति दीर्घः। **(ते)** तस्य **(भद्राः)** भजनीयाः **(रशनाः)** आस्वादनीयाः **(अपश्यम्)** पश्येयम् **(ऋतस्य)** सत्यस्य कारणस्य **(याः)** **(अभिरक्षन्ति)** सर्वतः पालयन्ति **(गोपाः)** रक्षकाः॥५॥

अन्वयः-हे वाजिन्! यानीमा ते शफानामवमार्जनानि यानीमा सनितुर्निधाना सन्ति यास्त ऋतस्य भद्रा रशना गोपा अभिरक्षन्ति च तान् पूर्वोक्तानत्राऽहमपश्यम्॥५॥

भावार्थः-येऽनुक्रमात् सर्वेषां पदार्थानां कारणं संयोगं च जानन्ति, ते पदार्थवेत्तारो भवन्ति॥५॥

पदार्थः-हे **(वाजिन्)** विज्ञानवान् सज्जन! जो **(इमा)** ये **(ते)** आपके **(शफानाम्)** कल्याण को देनेवाले व्यवहारों के **(अवमार्जनानि)** शोधन वा जो **(इमा)** ये **(सनितुः)** अच्छे प्रकार विभाग करते हुए आपके **(निधाना)** पदार्थों का स्थापन करते हैं और **(याः)** जो **(ते)** आप के **(ऋतस्य)** सत्य कारण के **(भद्राः)** सेवन करने और **(रशनाः)** स्वाद लेने योग्य पदार्थों को **(गोपाः)** रक्षा करनेवाले **(अभिरक्षन्ति)** सब ओर से पालते हैं, उन सब पदार्थों को **(अत्र)** यहाँ मैं **(अपश्यम्)** देखूं॥५॥

भावार्थः-जो मनुष्य अनुक्रम अर्थात् एक के पीछे एक, एक के पीछे एक ऐसे क्रम से समस्त पदार्थों के कारण और संयोग को जानते हैं, वे पदार्थवेत्ता होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम्।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ ६॥

आत्मानम्। ते। मनसा। आरात्। अजानाम्। अवः। दिवा। पतयन्तम्। पतङ्गम्। शिरः। अपश्यम्। पथिऽभिः। सुऽगेभिः। अरेणुऽभिः। जेहमानम्। पतत्रि॥ ६॥

पदार्थः-**(आत्मानम्)** सर्वाधिष्ठातारम् **(ते)** तव **(मनसा)** विज्ञानेन **(आरात्)** दूरात् समीपाद्वा **(अजानाम्)** जानीयाम् **(अवः)** रक्षणम् **(दिवा)** दिव्यन्तरिक्षे **(पतयन्तम्)** गमयन्तम् **(पतङ्गम्)** यः प्रतियातं गच्छति तम् **(शिरः)** यच्छ्रीयते तदुत्तमाङ्गम् **(अपश्यम्)** पश्येयम् **(पथिभिः)** **(सुगेभिः)** सुखेन गमनाधिकरणैः **(अरेणुभिः)** अविद्यमानरजस्पर्शैः **(जेहमानम्)** प्रयतमानम् **(पतत्रि)** पतनशीलम्॥६॥

अन्वयः-हे विद्वन्! यथाऽहं ते तवात्मानं मनसाऽऽरादपश्यं तथा त्वं मदात्मानं पश्य यथाहं तवावः पतत्रि शिरोऽपश्यं तथा त्वं ममैतत्पश्य यथाऽरेणुभिः सुगेभिः पथिभिर्जेहमानं दिवा पतयन्तं पतङ्गमग्निमश्वमजानां तथा त्वमपि पश्य॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये स्वपरात्मविदो विज्ञानेनोत्पन्नकार्यपरीक्षाद्वारा कारणगुणान् जानन्ति सुखेन विद्वांसो भवन्ति येऽनावरणे रजोयोगविरहेऽन्तरिक्षेऽग्न्यादियोगेन विमानानि चालयन्ति ते दूरमपि देशं सद्यो गन्तुमर्हन्ति॥६॥

पदार्थः-हे विद्वान्! जैसे मैं **(ते)** तेरे **(आत्मानम्)** सबके अधिष्ठाता आत्मा को **(मनसा)** विज्ञान से **(आरात्)** दूर से वा निकट से **(अपश्यम्)** देखूं वैसे तू मेरे आत्मा को देख, जैसे मैं तेरे **(अवः)** पालने को वा **(पतत्रि)** गिरने के स्वभाव को और **(शिरः)** जो सेवन किया जाता उस शिर को देखूं, वैसे तू मेरे उक्त पदार्थ को देख, जैसे **(अरेणुभिः)** धूलि से रहित **(सुगेभिः)** सुख से जिनमें जाते उन **(पथिभिः)**

मार्गों से **(जेहमानम्)** उत्तम यत्न करते **(दिवा)** अन्तरिक्ष में **(पतयन्तम्)** जाते हुए **(पतङ्गम्)** प्रत्येक स्थान में पहुँचनेवाले अग्निरूप घोड़े को **(अजानाम्)** देखूं, वैसे तू भी देख॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अपने वा पराये आत्मा के जाननेवाले विज्ञान से उत्पन्न कार्यों की परीक्षा द्वारा कारण गुणों को जानते हैं, वे सुख से विद्वान् होते हैं। जो विन ढपे, धूल के संयोग अन्तरिक्ष में अग्नि आदि पदार्थों के योग से विमानादिकों को चलाते हैं, वे दूर देश को भी शीघ्र जाने को योग्य होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अत्रा॑ ते रू॒पमु॑त्त॒मम॑पश्यं॒ जिगी॑षमाणमि॒ष आ प॒दे गोः।
य॒दा ते॒ मर्तो॒ अनु॒ भोग॒मान॒ळादिद् ग्रसि॑ष्ठ॒ ओष॑धीरजीगः॥७॥

अत्र॑। ते॒। रू॒पम्। उ॒त्ऽत॒मम्। अ॒प॒श्य॒म्। जिगी॑षमाणम्। इ॒षः। आ। प॒दे। गोः। य॒दा। ते॒। मर्तः॑। अनु॑। भोग॑म्। आन॑ट्। आत्। इत्। ग्रसि॑ष्ठः। ओष॑धीः। अ॒जी॒ग॒रि॒तिः॥७॥

पदार्थः-**(अत्र)** अस्मिन् विद्यायोगाभ्यासव्यवहारे। अत्र **ऋचि तुनुघे**ति दीर्घः। **(ते)** तव **(रूपम्)** स्वरूपम् **(उत्तमम्)** उत्कृष्टम् **(अपश्यम्)** पश्येयम् **(जिगीषमाणम्)** जेतुमिच्छन्तम् **(इषः)** अन्नानि **(आ)** **(पदे)** प्राप्तव्ये **(गोः)** पृथिव्याः **(यदा)** यस्मिन् काले **(ते)** तव **(मर्त्तः)** मनुष्यः **(अनु)** **(भोगम्)** **(आनट्)** प्राप्नोति। अत्र नक्षेतर्गतिकर्मणो लङि **छन्दस्यपि दृश्यत** (अष्टा०६.४.७३) इत्याडागमः। **नक्षतीति गतिकर्मासु पठितम्।** (निघं०२.१४) **(आत्)** अनन्तरम् **(इत्)** एव **(ग्रसिष्ठः)** अतिशयेन ग्रसिता **(ओषधीः)** यवादीन् **(अजीगः)** भृशं प्राप्नुयात्॥७॥

अन्वयः-हे विद्वन्! यदा ग्रसिष्ठो मर्त्तोऽनुभोगमानट् तदादिदोषधीरजीगः। यथाऽत्राहं ते जिगीषमाणमुत्तमं रूपमापश्यं गोः पदे त इषः प्राप्नुयाम् तथा त्वमप्येवं विधायैतत्प्राप्नुहि॥७॥

भावार्थः-उद्योगिनमेव भोगा उपलभन्ते नालसं ये प्रयत्नेन पदार्थविद्यां गृह्णन्ति, तेऽत्युत्तमां प्रतिष्ठां लभन्ते॥७॥

पदार्थः-हे विद्वान्! **(यदा)** जब **(ग्रसिष्ठः)** अतीव खानेवाला **(मर्त्तः)** मनुष्य **(अनु, भोगम्)** अनुकूल भोग को **(आनट्)** प्राप्त होता है, तब **(आत्, इत्)** उसी समय **(ओषधीः)** यवादि ओषधियों को **(अजीगः)** निरन्तर प्राप्त हो, जैसे **(अत्र)** इस विद्या और योगाभ्यास व्यवहार में मैं **(ते)** तुम्हारे **(जिगीषमाणम्)** जीतने की इच्छा करनेवाले **(उत्तमम्)** उत्तम **(रूपम्)** रूप को **(आ, अपश्यम्)** अच्छे प्रकार देखूं और **(गोः)** पृथिवी के **(पदे)** पाने योग्य स्थान में **(ते)** आपके **(इषः)** अन्नादिकों को प्राप्त होऊं, वैसे आप भी ऐसा विधान कर इस उक्त व्यवहारादि को प्राप्त होओ॥७॥

भावार्थः-उद्योगी पुरुष ही को अच्छे-अच्छे पदार्थ भोग प्राप्त होते हैं, किन्तु आलस्य करनेवाले को नहीं। जो यत्न के साथ पदार्थविद्या का ग्रहण करते हैं, वे अति उत्तम प्रतिष्ठा को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनु॑ त्वा॒ रथो॒ अनु॒ मर्यो॑ अर्व॒न्ननु॒ गावोऽनु॒ भग॑: क॒नीना॑म्।
अनु॒ व्रातास॒स्तव॑ स॒ख्यमी॑यु॒रनु॑ दे॒वा म॑मिरे वी॒र्यं॑ ते॥८॥

अनु॑। त्वा॒। रथ॑:। अनु॑। मर्य॑:। अ॒र्व॒न्। अनु॑। गाव॑:। अनु॑। भग॑:। क॒नीना॑म्। अनु॑। व्रातास॑:। तव॑। स॒ख्यम्। ई॒यु॒:। अनु॑। दे॒वा:। म॒मि॒रे॒। वी॒र्य॑म्। ते॒॥८॥

पदार्थः-(**अनु**) (**त्वा**) त्वाम् (**रथः**) विमानादियानम् (**अनु**) (**मर्यः**) मरणधर्मा मनुष्यः (**अर्वन्**) अश्ववद्वर्त्तमान (**अनु**) (**गावः**) धेनवः (**अनु**) (**भगः**) ऐश्वर्यम् (**कनीनाम्**) कामयमानानाम् (**अनु**) (**व्रातासः**) व्रतेषु सत्याचरणेषु भवाः (**तव**) (**सख्यम्**) सख्युर्भावः कर्म वा (**ईयुः**) प्राप्नुयुः (**अनु**) (**देवाः**) विद्वांसः (**ममिरे**) निर्मिमते (**वीर्यम्**) पराक्रमम् (**ते**) तव॥८॥

अन्वयः-हे अर्वन्! यं त्वाऽनु रथोऽनु मर्य्योऽनु गावः कनीनामनु भगो व्रातासो देवास्ते वीर्यमनु ममिरे, ते तस्य तव सख्यमन्वीयुः॥८॥

भावार्थः-यथाऽग्निमनुयानानि मनुष्या गच्छन्ति तथाऽध्यापकोपदेशकावनुविज्ञानं लभन्ते, ये विदुषः सखीन् कुर्वन्ति ते सत्याचारा वीर्यवन्तो जायन्ते॥८॥

पदार्थः-हे (**अर्वन्**) घोड़े के समान वर्त्तमान! जिस (**त्वा**) तेरे (**अनु**) पीछे (**रथः**) विमानादि रथ फिर (**अनु**) पीछे (**मर्य्यः**) मरणधर्म रखनेवाला मनुष्य फिर (**अनु**) पीछे (**गावः**) गौयें और (**कनीनाम्**) कामना करते हुए सज्जनों को (**अनु**) पीछे (**भगः**) ऐश्वर्य तथा (**व्रातासः**) सत्य आचरणों में प्रसिद्ध (**देवाः**) विद्वान् जन (**ते**) तेरे (**वीर्यम्**) पराक्रम को (**अनु, ममिरे**) अनुकूलता से सिद्ध करते हैं, वे उक्त विद्वान् (**तव**) तेरी (**सख्यम्**) मित्रता वा मित्र के काम को (**अनु, ईयुः**) अनुकूलता से प्राप्त होवें॥८॥

भावार्थः-जैसे अग्नि के अनुकूल विमानादि यानों को मनुष्य प्राप्त होते हैं, वैसे अध्यापक और उपदेशक के अनुकूल विज्ञान को प्राप्त होते हैं। जो विद्वानों को मित्र करते हैं, वे सत्याचरणशील और पराक्रमवान् होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हिर॑ण्यशृङ्गोऽयो॑ अस्य॒ पाद॒ा मनो॑जवा॒ अव॑र॒ इन्द्र॑ आसीत्।
दे॒वा इद॑स्य हवि॒रद्य॑मायन्यो अर्व॑न्तं प्रथ॒मो अ॒ध्यति॑ष्ठत्॥९॥

हिरण्यऽशृङ्गः। अयः। अस्य। पादाः। मनःऽजवाः। अवरः। इन्द्रः। आसीत्। देवाः। इत्। अस्य। हविःऽअद्यम्। आयन्। यः। अर्वन्तम्। प्रथमः। अधिऽअतिष्ठत्॥ ९॥

पदार्थः-(**हिरण्यशृङ्गः**) हिरण्यानि तेजांसि शृङ्गाणीव यस्य सः (**अयः**) प्राप्तिसाधकाः धातवः (**अस्य**) विद्युद्रूपस्याऽग्नेः (**पादाः**) पद्यन्ते गच्छन्ति यैस्त इव (**मनोजवाः**) मनोवद्वेगवन्तः (**अवरः**) अर्वाचीनः (**इन्द्रः**) सूर्य्यः (**आसीत्**) अस्ति (**देवाः**) विद्वांसो भूम्यादयो वा (**इत्**) एव (**अस्य**) (**हविरद्यम्**) अत्तुं योग्यम् (**आयन्**) आप्नुवन्ति (**यः**) (**अर्वन्तम्**) वेगवन्तमग्निमश्वम् (**प्रथमः**) प्रख्यातः (**अध्यतिष्ठत्**) अधिष्ठाता भवति॥ ९॥

अन्वयः-हे मनुष्या! यो हिरण्यशृङ्गो यस्याऽस्य मनोजवा अयः पादाः सन्ति सोऽवर इन्द्र आसीत्। यः प्रथमोऽर्वन्तमध्यतिष्ठद् यस्याऽस्य हविरद्यमिद्देवा आयन् स बहुव्यापी विद्युद्विधोऽग्निरस्तीति विजानीत॥ ९॥

भावार्थः-अस्मिंज्जगति त्रिधाऽग्निर्वर्त्तते एकोऽतिसूक्ष्मः कारणाख्यो द्वितीयः सूक्ष्मो मूर्त्तद्रव्यव्यापी तृतीयः स्थूलः सूर्यादिस्वरूपो य इमं गुणकर्मस्वभावतो विज्ञाय संप्रयुङ्क्ते ते सततं सुखिनो भवन्ति॥ ९॥

पदार्थः-हे मनुष्यो! जो ऐसा है कि (**हिरण्यशृङ्गः**) जिसके तेजःप्रकाश शृङ्गों के समान हैं तथा जिस (**अस्य**) इस बिजुलीरूप अग्नि के (**मनोजवाः**) मन के समान वेगवाले (**अयः**) प्राप्तिसाधक धातु (**पादाः**) जिनसे चलें उन पैरों के समान हैं, वह (**अवरः**) एक निराला (**इन्द्रः**) सूर्य (**आसीत्**) है और (**यः**) जो (**प्रथमः**) विख्यात (**अर्वन्तम्**) वेगवाले अश्वरूप अग्नि का (**अध्यतिष्ठत्**) अधिष्ठाता होता जिस (**अस्य**) इसके सम्बन्ध में (**हविरद्यम्**) खाने योग्य होमने के पदार्थ (**इत्**) ही को (**देवाः**) विद्वान् वा भूमि आदि तेंतीस देव (**आयन्**) प्राप्त हैं, वह बहुतों में व्याप्त होनेवाला बिजुली के समान अग्नि है, ऐसा जानो॥ ९॥

भावार्थः-इस जगत् में तीन प्रकार अग्नि है। एक अति सूक्ष्म जो कारण रूप कहाता, दूसरा वह जो सूक्ष्म मूर्त्तिमान् पदार्थों में व्याप्त होनेवाला और तीसरा स्थूल सूर्यादि स्वरूपवाला। जो इसको गुण, कर्म, स्वभाव से जान कर इसका अच्छे प्रकार प्रयोग करते हैं, वे निरन्तर सुखी होते हैं॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः।
हंसाइव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः॥ १०॥ १२॥

ई॒र्मऽअ॑न्तासः। सिलि॑कऽमध्यमासः। सम्। शूर॑णासः। दि॒व्यास॑ः। अत्या॑ः। हं॒साःऽइ॑व। श्रे॒णि॒ऽशः। य॒त॒न्ते॒। यत्। आक्षि॑षुः। दि॒व्यम्। अज्म॑म्। अश्वा॑ः॥ १०॥

पदार्थः-(**ईर्मान्तासः**) कम्पनान्ताः (**सिलिकमध्यमासः**) सिलिकानां मध्ये भवाः (**सम्**) (**शूरणासः**) हिंसका कलायन्त्रताडनेन प्रकाशमानाः (**दिव्यासः**) दिव्यगुणकर्मस्वभावाः (**अत्याः**) अतितुं शीलाः (**हंसाइव**) हंसपक्षिवत् (**श्रेणिशः**) पङ्क्तिवद्वर्त्तमानाः (**यतन्ते**) यातयन्ति। अन्तर्भावितण्यर्थः। (**यत्**) ये (**आक्षिषुः**) व्याप्नुवन्ति (**दिव्यम्**) दिवि भवम् (**अज्मम्**) गमनाधिकरणं मार्गम् (**अश्वाः**) आशुगन्तारः॥ १०॥

अन्वयः-हे विद्वांसो! यद्ये सिलिकमध्यमास ईर्मान्तासः शूरणासो दिव्यासोऽत्या अश्वा हंसाइव श्रेणिशः संयतन्ते दिव्यमज्ममाक्षिषुस्तान् वाय्वग्निजलादीन् कार्य्येषु संप्रयुङ्ग्ध्वम्॥ १०॥

भावार्थः-ये शिलिकादियन्त्रैस्संघर्षितेभ्यः पदार्थेभ्यो विद्युदादीनुत्पाद्य यानादिषु संप्रयोज्य कार्यसिद्धिं कुर्वन्ति, ते मनुष्या महतीं श्रियं लभन्ते॥ १०॥

पदार्थः-हे विद्वानो! (**यत्**) जो (**सिलिकमध्यमासः**) स्थान में प्रसिद्ध हुए (**ईर्मान्तासः**) कम्पन जिनका अन्त (**शूरणासः**) हिंसक अर्थात् कलायन्त्र को प्रबलता से ताड़ना देते हुए प्रकाशमान (**दिव्यासः**) दिव्य गुण, कर्म, स्वभाववाले (**अत्याः**) निरन्तर जानेवाले (**अश्वाः**) शीघ्र जानेवाले अग्न्यादि रूप घोड़े (**हंसाइव**) हंसों के समान (**श्रेणिशः**) पङ्क्ति-सी किये हुए वर्त्तमान (**सम्, यतन्ते**) अच्छा प्रयत्न कराते हैं और (**दिव्यम्**) अन्तरिक्ष में हुए (**अज्मम्**) मार्ग को (**आक्षिषुः**) व्याप्त होते हैं, उन वायु, अग्नि और जलादिकों को कार्यों में अच्छे प्रकार लगाओ॥ १०॥

भावार्थः-जो शिलिकादि यन्त्रों से अर्थात् जिनमें कोठे-दरकोठे कलाओं के होते हैं, उन यन्त्रों से बिजुली आदि उत्पन्न कर और विमान आदि यानों में उनका संप्रयोग कर कार्यसिद्धि को करते हैं, वे मनुष्य बड़ी भारी लक्ष्मी को पाते हैं॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तव॒ शरी॑रं पतयि॒ष्ण॑ववर्व॒न् तव॑ चि॒त्तं वात॑इव॒ ध्रजी॑मान्।
तव॒ शृङ्गा॑णि॒ विष्ठि॑ता पुरु॒त्रार॑ण्येषु॒ जर्भु॑राणा चरन्ति॥ ११॥

तव॑। शरी॑रम्। प॒त॒यि॒ष्णु॒। अ॒र्व॒न्। तव॑। चि॒त्तम्। वातः॑ऽइव। ध्रजी॑मान्। तव॑। शृङ्गा॑णि। विऽस्थि॑ता। पु॒रु॒ऽत्रा। अर॑ण्येषु। जर्भु॑राणा। च॒र॒न्ति॒॥ ११॥

पदार्थः-(**तव**) (**शरीरम्**) (**पतयिष्णु**) गमनशीलम् (**अर्वन्**) गन्त्रश्ववद्वर्त्तमान (**तव**) (**चित्तम्**) अन्तःकरणम् (**वातइव**) (**ध्रजीमान्**) गतिमान् (**तव**) (**शृङ्गाणि**) शृङ्ग इव उच्छ्रितानि कर्माणि (**विष्ठिता**)

विशेषेण स्थितानि **(पुरुत्रा)** पुरुषु बहुषु **(अरण्येषु)** वनेषु **(जर्भुराणा)** अत्यन्तं पुष्टानि **(चरन्ति)** गच्छन्ति॥११॥

अन्वयः-हे अर्वन्! यथा पतयिष्णु यानं तथा तव शरीरं ध्रजीमान् वात इव तव चित्तं पुरुत्राऽरण्येषु विष्ठिता जर्भुराणा शृङ्गाण्यग्नेश्चरन्ति तथा तवेन्द्रियाणि प्राणाश्च वर्त्तन्ते॥११॥

भावार्थः-यैः प्रचालिता विद्युन्मनोवद्गच्छति शैलशृङ्गवद्यानानि रच्यन्ते ये च वनाग्निवदग्न्यागारेषु पावकं प्रज्वाल्य यानानि चालयन्ति, ते सर्वत्र भूगोले विचरन्ति॥११॥

पदार्थः-हे **(अर्वन्)** गमनशील घोड़े के समान वर्त्ताव रखनेवाले! जैसे **(पतयिष्णु)** गमनशील विमान आदि यान वा **(तव)** तेरा **(शरीरम्)** शरीर वा **(ध्रजीमान)** गतिवाला **(वातइव)** पवन के समान तव तेरा **(चित्तम्)** चित्त वा **(पुरुत्रा)** बहुत **(अरण्येषु)** वनों में **(विष्ठिता)** विशेषता से ठहरे हुए **(जर्भुराणा)** अत्यन्त पुष्ट **(शृङ्गाणि)** सींगों के तुल्य ऊंचे वा उत्कृष्ट अत्युत्तम काम अग्नि से **(चरन्ति)** चलते हैं, वैसे **(तव)** तेरे इन्द्रिय और प्राण वर्त्तमान हैं॥११॥

भावार्थः-जिन्होंने चलाई हुई बिजुली मन के समान जाती वा पर्वतों के शिखरों के समान विमान आदि यान रचे हैं और जो वन की आग के समान अग्नि के घरों में अग्नि जला कर विमान आदि रथों को चलाते हैं, वे सर्वत्र भूगोल में विचरते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप॒ प्रागा॒च्छस॑नं वा॒ज्यर्वा॑ देव॒द्रीचा॒ मन॑सा॒ दीध्या॑नः।
अ॒जः पु॒रो नी॑यते॒ नाभि॑र॒स्यानु॑ प॒श्चात्क॒वयो॑ यन्ति रे॒भाः॥१२॥

उप॑। प्र। अ॒गा॒त्। शस॑नम्। वा॒जी। अर्वा॑। दे॒व॒ऽद्रीचा॑। मन॑सा। दीध्या॑नः। अ॒जः। पु॒रः। नी॒य॒ते॒। नाभि॑ः। अ॒स्य॒। अनु॑। प॒श्चात्। क॒वय॑ः। य॒न्ति॒। रे॒भाः॥१२॥

पदार्थः-**(उप)** **(प्र)** **(अगात्)** गच्छति **(शसनम्)** हिंसनं ताडनम् **(वाजी)** वेगवान् **(अर्वा)** अश्व इव **(देवद्रीचा)** देवान् विदुषोऽञ्चता **(मनसा)** **(दीध्यानः)** देदीप्यमानः **(अजः)** जन्मरहितः **(पुरः)** पुरस्तात् **(नीयते)** **(नाभिः)** बन्धनम् **(अस्य)** **(अनु)** **(पश्चात्)** **(कवयः)** मेधाविनः **(यन्ति)** प्राप्नुवन्ति **(रेभाः)** विदितशब्दविद्याः॥१२॥

अन्वयः-यो दीध्यानोऽजो वाज्यर्वा देवद्रीचा मनसाऽस्य शसनमुपप्रागाद्येनाऽस्य नाभिः पुरः पश्चाच्च नीयते यं रेभाः कवयोऽनुयन्ति तं सर्वे संसेव्यन्ताम्॥१२॥

भावार्थः-नहि कर्षणताडनशिल्पविद्याभ्यो विना अग्न्यादयः पदार्थाः कार्यसाधका जायन्ते॥१२॥

पदार्थः-जो (**दीध्यानः**) देदीप्यमान (**अजः**) कारणरूप से अजन्मा (**वाजी**) वेगवान् (**अर्वा**) घोड़े के समान अग्नि (**देवद्रीचा**) विद्वानों का सत्कार करते हुए (**मनसा**) मन से (**अस्य**) इस कलाघर के (**शसनम्**) ताड़न को (**उप, प्रागात्**) सब प्रकार से प्राप्त किया जाता है, जिससे इसका (**नाभिः**) बन्धन (**पुरः**) प्रथम से और (**पश्चात्**) पीछे (**नीयते**) प्राप्त किया जाता है, जिसको (**रेभाः**) शब्दविद्या को जाने हुए (**कवयः**) मेधावी बुद्धिमान् जन (**अनु, यन्ति**) अनुग्रह से चाहते हैं, उसको सब सेवें॥१२॥

भावार्थः-खैचना वा ताड़ना आदि शिल्पविद्याओं के विना अग्नि आदि पदार्थ कार्यों के सिद्ध करनेवाले नहीं हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप॒प्रागा॑त्पर॒मं यत्स॒धस्थ॒मर्वाँ॒ अच्छा॑ पि॒तरं॑ मा॒तरं॑ च।
अ॒द्या दे॒वाञ्जु॒ष्ट॒तमो॒ हि ग॒म्या अथा शा॑स्ते दा॒शुषे॒ वार्या॑णि॥१३॥१३॥

उप॑। प्र। अ॒गा॒त्। प॒र॒मम्। यत्। स॒धऽस्थ॑म्। अर्वा॑न्। अच्छ॑। पि॒त॒र॑म्। मा॒त॒र॑म्। च॒। अ॒द्य। दे॒वान्। जु॒ष्ट॑ऽतमः। हि। ग॒म्याः। अथ॑। आ। शा॒स्ते॒। दा॒शुषे॑। वार्या॑णि॥१३॥

पदार्थः-(**उप**) (**प्र**) (**अगात्**) गच्छन्ति (**परमम्**) प्रकृष्टम् (**यत्**) यः (**सधस्थम्**) सहस्थानम् (**अर्वान्**) अग्न्याद्यश्वान् (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**पितरम्**) जनकमध्यापकं वा (**मातरम्**) जननीं विद्यां वा (**च**) (**अद्य**) अस्मिन् दिने। अत्र **निपातस्य चे**ति दीर्घः। (**देवान्**) विदुषो दिव्यान् भोगान् गुणान् वा (**जुष्टतमः**) अतिशयेन सेवमानः (**हि**) किल (**गम्याः**) गन्तुं योग्याः (**अथ**) (**आ**) (**शास्ते**) इच्छति (**दाशुषे**) दात्रे (**वार्याणि**) वर्त्तुं योग्यानि सुखानि॥१३॥

अन्वयः-यद्यो देवान् जुष्टतमोऽर्वानद्य परमं सधस्थं मातरं पितरं चाच्छोपप्रागादथ दाशुषे वार्याणि हि गम्याः प्रियाश्चाशास्ते सोऽत्यन्तं सुखमश्नुते॥१३॥

भावार्थः-ये मातृपित्राऽऽचार्यैः प्राप्तशिक्षाः प्रशस्तस्थाननिवासिनो विद्वत्सङ्गप्रियाः सर्वेषां सुखदातारो वर्त्तन्ते तेऽत्रोत्तममानन्दं लभन्ते॥१३॥

अस्मिन् सूक्ते विद्वद्विद्युद्गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति त्रिष्ट्युत्तरं शततमं १६३ सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः-(**यत्**) जो (**देवान्**) विद्वान् वा दिव्य भोग और गुणों को (**जुष्टतमः**) अतीव सेवता हुआ (**अर्वान्**) अग्नि आदि पदार्थरूपी घोड़ों को (**अद्य**) आज के दिन (**परमम्**) उत्तम (**सधस्थम्**) एक साथ के स्थान को (**मातरम्**) उत्पन्न करनेवाली माता (**पितरम्, च**) और जन्म करानेवाले पिता वा अध्यापक को (**अच्छ, उप, प्रागात्**) अच्छे प्रकार सब ओर से प्राप्त होता (**अथ**) अथवा (**दाशुषे**) देनेवाले के लिये

(वार्य्याणि) स्वीकार करने योग्य सुख और **(हि)** निश्चय से **(गम्याः)** गमन करने योग्य प्यारी स्त्रियों वा प्राप्त होने योग्य क्रियाओं की **(आ, शास्ते)** आशा करता है, वह अत्यन्त सुख को प्राप्त होता है॥१३॥

भावार्थः-जो माता, पिता और आचार्य से शिक्षा पाये प्रशंसित स्थानों के निवासी विद्वानों के सङ्ग की प्रीति रखनेवाले सब के सुख देनेवाले वर्त्तमान हैं, वे यहाँ उत्तम आनन्द को प्राप्त होते हैं॥१३॥

इस सूक्त में विद्वान् और बिजुली के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ तिरेसठवां १६३ सूक्त और तेरहवां १३ वर्ग समाप्त हुआ॥

अस्येत्यस्य द्विपञ्चाशदृचस्य चतुष्षष्ट्युत्तरस्य शततमस्य सूक्तस्य दीर्घतमा ऋषिः। अस्येत्यारभ्य गौरीर्मिमायेत्येतदन्तानामेकचत्वारिंशतो मन्त्राणां विश्वेदेवाः। तस्याः समुद्रा इत्यस्याः पूर्वभागस्य वाक्। उत्तरार्द्धस्यापः। शकमयमित्यस्याः पुरोभागस्य शकधूमः। चरभागस्य सोमः। त्रयः केशिन इत्यस्या अग्निवायुसूर्याः। चत्वारि वागित्यस्या वाक्। इन्द्रमित्यस्याः कृष्णं नियानमित्यस्याश्च सूर्यः। द्वादशप्रधय इत्यस्याः संवत्सरात्मा कालः। यस्ते स्तन इत्यस्याः सरस्वती। यज्ञेनेत्यस्याः साध्याः। समानमेतदित्यस्याः सूर्यः पर्जन्यो वाऽग्नयो वा। दिव्यं सुपर्णमित्यस्याः सरस्वान् सूर्यो वा देवताः॥

१,९,२७,३५,४०,५० विराट् त्रिष्टुप्। ३-८ ११,१८,२६,३१,३३,३४,३७,४३, ४६, ४७,४९ निचृत् त्रिष्टुप्। २,१०,१३,१६,१७,१९,२१,२४,२८,३२,५२ त्रिष्टुप्। १४,३९, ४१,४४,४५ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। १२,१५,२३ जगती। २९,३६ निचृज्जगती छन्दः। निषादः स्वरः। २० भुरिक् पङ्क्तिः। २२,२५,४८ स्वराट् पङ्क्तिः। ३०,३८ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४२ भुरिक् बृहती छन्दः। मध्यमः स्वरः। ५१ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ त्रिविधाग्निविषयमाह॥

अब एक सौ चौसठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में तीन प्रकार के अग्नि के विषय को कहते हैं॥

अ॒स्य वा॒मस्य॑ पलि॒तस्य॒ होतु॒स्तस्य॒ भ्राता॑ मध्य॒मो अ॒स्त्यश्नः॑।
तृ॒तीयो॒ भ्राता॑ घृ॒तपृ॑ष्ठो अ॒स्यात्रा॑पश्यं वि॒श्पति॑ स॒प्तपु॑त्रम्॥ १॥

अ॒स्य। वा॒मस्य॑। प॒लि॒तस्य॑। होतुः॑। तस्य॑। भ्राता॑। म॒ध्य॒मः। अ॒स्ति॒। अश्नः॑। तृ॒तीयः॑। भ्राता॑। घृ॒तऽपृ॑ष्ठः। अ॒स्य॒। अत्र॑। अ॒प॒श्य॒म्। वि॒श्पति॑म्। स॒प्तऽपु॑त्रम्॥ १॥

पदार्थः-**(अस्य) (वामस्य)** शिल्पगुणैः प्रशस्तस्य **(पलितस्य)** प्राप्तवृद्धावस्थस्य **(होतुः)** दातुः **(तस्य) (भ्राता)** भ्रातेव **(मध्यमः)** मध्ये भवः पृथिव्यादिस्थो द्वितीयः **(अस्ति) (अश्नः)** भोक्ता **(तृतीयः) (भ्राता)** बन्धुवद्वर्त्तमानः **(घृतपृष्ठः)** घृतं जलं पृष्ठेऽस्य **(अस्य) (अत्र) (अपश्यम्) (विश्पतिम्)** प्रजायाः पालकम् **(सप्तपुत्रम्)** सप्तविधैस्तत्त्वैर्जातम्॥ १॥

अन्वयः-वामस्य पलितस्याऽस्य प्रथमो होतुस्तस्य भ्रातेवाऽश्नो मध्यमो घृतपृष्ठोऽस्य भ्रातेव तृतीयोऽस्ति। अत्र सप्तपुत्रं विश्पतिं सूर्यमपश्यम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। अस्मिञ्जगति त्रिविधोऽग्निरस्ति एको विद्युद्रूपः, द्वितीयः काष्ठादिप्रज्वलितो भूमिस्थः, तृतीयः सवितृमण्डलस्थः सन् सर्वं जगत् पालयति॥ १॥

पदार्थः-(**वामस्य**) शिल्प के गुणों से प्रशंसित (**पलितस्य**) वृद्धावस्था को प्राप्त (**अस्य**) इस सज्जन का बिजुलीरूप पहिला, (**होतुः**) देने वा हवन करनेवाले (**तस्य**) उसके (**भ्राता**) बन्धु के समान (**अश्नः**) पदार्थों का भक्षण करनेवाला (**मध्यमः**) पृथिवी आदि लोकों में प्रसिद्ध हुआ दूसरा और (**घृतपृष्ठः**) घृत वा जल जिसके पीठ पर अर्थात् ऊपर रहता वह (**अस्य**) इसके (**भ्राता**) भ्राता के समान (**तृतीयः**) तीसरा (**अस्ति**) है। (**अत्र**) यहाँ (**सप्तपुत्रम्**) सात प्रकार के तत्त्वों से उत्पन्न (**विश्पतिम्**) प्रजाजनों की पालना करनेवाले सूर्य को मैं (**अपश्यम्**) देखूं॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। इस जगत् में तीन प्रकार का अग्नि है-एक बिजुलीरूप, दूसरा काष्ठादि में जलता हुआ भूमिस्थ और तीसरा वह है जो कि सूर्यमण्डलस्थ होकर समस्त जगत् की पालना करता है॥१॥

अथोक्ताग्निप्रयोगतो विमानादियानविषयमाह॥

अब अग्नि के प्रयोग से विमान आदि यान के विषय को कहते हैं॥

स॒प्त यु॑ञ्जन्ति॒ रथ॒मेक॑चक्र॒मेको॒ अश्वो॑ वहति स॒प्तना॑मा।
त्रि॒नाभि॑ च॒क्रम॒जर॑मन॒र्वं यत्रे॒मा विश्वा॒ भुव॒नाधि॑ त॒स्थुः॥२॥

स॒प्त। यु॒ञ्ज॒न्ति॒। रथ॑म्। एक॑ऽचक्रम्। एक॑ः। अश्व॑ः। व॒ह॒ति॒। स॒प्तऽना॑मा। त्रि॒ऽनाभि॑। च॒क्रम्। अ॒जर॑म्। अ॒न॒र्वम्। यत्र॑। इ॒मा। विश्वा॑। भुव॑ना। अधि॑। त॒स्थुः॥२॥

पदार्थः-(**सप्त**) (**युञ्जन्ति**) (**रथम्**) विमानादियानम् (**एकचक्रम्**) एकं सर्वकलाभ्रमणार्थं चक्रं यस्मिन् तम् (**एकः**) असहायः (**अश्वः**) आशुगामी वायुरग्निर्वा (**वहति**) प्रापयति (**सप्तनामा**) सप्त नामानि यस्य (**त्रिनाभि**) त्रयो नाभयो बन्धनानि यस्मिन् (**चक्रम्**) चक्रम् (**अजरम्**) जरादिरोगरहितम् (**अनर्वम्**) प्राकृताश्वयोजनरहितम् (**यत्र**) (**इमा**) (**विश्वा**) अखिलानि (**भुवनानि**) लोकाः (**अधि**) (**तस्थुः**) तिष्ठन्ति॥२॥

अन्वयः-यत्र एकचक्रं रथं सप्तनामा एकोऽश्वो वहति यत्र सप्त कला युञ्जन्ति, यत्रेमा विश्वा भुवनाऽधितस्थुस्तत्राऽनर्वमजरं त्रिनाभिचक्रं शिल्पिनः स्थापयेयुः॥२॥

भावार्थः-ये विद्युदग्निजलाद्यश्वयुक्तं यानं विधाय सर्वलोकाऽधिष्ठान आकाशे गमनाऽगमने सुखेन कुर्य्युस्ते समग्रैश्वर्यं लभेरन्॥२॥

पदार्थः-(**यत्र**) यहाँ (**एकचक्रम्**) एक सब कलाओं के घूमने के लिये जिसमें चक्कर है, उस (**रथम्**) विमान आदि यान को (**सप्तनामा**) सप्तनामोंवाला (**एकः**) एक (**अश्वः**) शीघ्रगामी वायु वा अग्नि (**वहति**) पहुँचाता है वा जहाँ (**सप्त**) सात कलों के घर (**युञ्जन्ति**) युक्त होते हैं वा जहाँ (**इमा**) ये (**विश्वा**) समस्त (**भुवना**) लोक-लोकान्तर (**अधि, तस्थुः**) अधिष्ठित होते हैं, वहाँ (**अनर्वम्**) प्राकृत

प्रसिद्ध घोड़ों से रहित **(अजरम्)** और जीर्णता से रहित **(त्रिनाभि)** तीन जिसमें बन्धन उस **(चक्रम्)** एक चक्कर को शिल्पी जन स्थापन करें॥ २॥

भावार्थः-जो लोग बिजुली और जलादि रूप घोड़ों से युक्त विमानादि रथ को बनाय सब लोकों के अधिष्ठान अर्थात् जिसमें सब लोक ठहरते हैं, उस आकाश में गमनाऽगमन सुख से करें, वे समग्र ऐश्वर्य को प्राप्त हों॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒मं र॒थमधि॒ ये स॒प्त त॒स्थुः स॒प्तच॑क्रं स॒प्त व॑ह॒न्त्यश्वा॑:।
स॒प्त स्वसा॑रो अ॒भि सं न॑वन्ते॒ यत्र॒ गवा॒ं निहि॑ता स॒प्त नाम॑॥ ३॥

इ॒मम्। र॒थ॑म्। अधि॑। ये। स॒प्त। त॒स्थुः। स॒प्तऽच॑क्रम्। स॒प्त। व॒ह॒न्ति॒। अश्वा॑:। स॒प्त। स्वसा॑रः। अ॒भि। सम्। न॒व॒न्ते॒। यत्र॑। गवा॑म्। निऽहि॑ता। स॒प्त। नाम॑॥ ३॥

पदार्थः-**(इमम्)** **(रथम्)** **(अधि)** **(ये)** **(सप्त)** **(तस्थुः)** तिष्ठेयुः **(सप्तचक्रम्)** सप्त चक्राणि यस्मिँस्तम् **(सप्त)** **(वहन्ति)** चालयन्ति **(अश्वाः)** आशुगामिनोऽग्न्यादयः **(सप्त)** **(स्वसारः)** भगिन्य इव वर्त्तमानाः कलाः **(अभि)** **(सम्)** **(नवन्ते)** गच्छन्ति। **नवत इति गतिकर्मासु पठितम्।** (निघं०२.१४) **(यत्र)** यस्मिन् **(गवाम्)** किरणानाम् **(निहिता)** धृतानि **(सप्त)** **(नाम)** नामानि॥ ३॥

अन्वयः-यत्र गवां सप्त नाम निहिता सन्ति तत्र स्वसार इव सप्ताऽभि संनवन्ते सप्ताश्वाश्च वहन्ति तमिमं सप्तचक्रं रथं ये सप्त जना अधितस्थुस्तेऽत्र सुखिनो भवन्ति॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये स्वाम्यध्यापकाध्येतृनिर्मातृनियन्तृचालका अनेकचक्रतत्त्वादियुक्तानि यानानि रचयितुं जानन्ति, ते प्रशंसिता भवन्ति यस्मिञ्छेदनाकर्षणादिगुणाः किरणा वर्त्तन्ते, तत्र प्राणा अपि सन्ति॥ ३॥

पदार्थः-**(यत्र)** जिसमें **(गवाम्)** किरणों के **(सप्त)** सात **(नाम)** नाम **(निहिता)** निरन्तर धरे स्थापित किये हुए हैं और वहाँ **(स्वसारः)** बहिनों के समान वर्त्तमान **(सप्त)** सात कला **(अभि, सम्, नवन्ते)** सामने मिलती हैं **(सप्त)** सात **(अश्वाः)** शीघ्रगामी अग्नि पदार्थ **(वहन्ति)** पहुँचाते हैं, उस **(इमम्)** इस **(सप्तचक्रम्)** सात चक्कर वाले **(रथम्)** रथ को **(ये)** जो **(सप्त)** सात जन **(अधि, तस्थुः)** अधिष्ठित होते हैं, वे इस जगत् में सुखी होते हैं॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्वामी अध्यापक अध्येता रचनेवाले नियमकर्त्ता और चलानेवाले अनेक प्रकार चक्कर और तत्त्वादियुक्त विमानादि यानों को रचने को जानते हैं, वे प्रशंसित होते हैं, जिनमें छेदन वा आकर्षण गुणवाले किरण वर्त्तमान हैं, वहाँ प्राण भी हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत्॥४॥

कः। ददर्श। प्रथमम्। जायमानम्। अस्थन्ऽवन्तम्। यत्। अनस्था। बिभर्ति। भूम्याः। असुः। असृक्। आत्मा। क्व। स्वित्। कः। विद्वांसम्। उप। गात्। प्रष्टुम्। एतत्॥४॥

पदार्थः-(**कः**) (**ददर्श**) पश्यति (**प्रथमम्**) आदिमं प्रख्यातम् (**जायमानम्**) (**अस्थन्वन्तम्**) अस्थियुक्तं देहम् (**यत्**) यम् (**अनस्था**) अस्थिरहितः (**बिभर्त्ति**) धरति (**भूम्याः**) पृथिव्या मध्ये (**असुः**) प्राणः (**असृक्**) रुधिरम् (**आत्मा**) जीवः (**क्व**) कस्मिन् (**स्वित्**) अपि (**कः**) (**विद्वांसम्**) (**उप**) (**गात्**) गच्छेत्। अत्राडभावः। (**प्रष्टुम्**) (**एतत्**)॥४॥

अन्वयः-यद्यं प्रथमं सृष्टेः प्रागादिमं जायमानमस्थन्वन्तं देहम्भूम्या मध्येऽनस्थासुरसृगात्मा च बिभर्त्ति तं क्व स्वित् को ददर्श क एतत् प्रष्टुं विद्वांसमुपगात्॥४॥

भावार्थः-यदा सृष्टेः प्रागीश्वरेण सर्वेषां शरीराणि निर्मितानि तदा कोऽपि जीव एतेषां द्रष्टा नासीत्। यदा तेषु जीवात्मानः प्रवेशितास्तदा प्राणादयो वायवः रुधिरादयो धातवो जीवाश्च मिलित्वा देहं धरन्ति स्म जीवयन्ति स्म च इत्यादि प्राप्तये विद्वांसं कश्चिदेव प्रष्टुं याति न सर्वे॥४॥

पदार्थः-(**यत्**) जिस (**प्रथमम्**) प्रख्यात प्रथम अर्थात् सृष्टि के पहले (**जायमानम्**) उत्पन्न होते हुए (**अस्थन्वन्तम्**) हड्डियों से युक्त देह को (**भूम्याः**) भूमि के बीच (**अनस्था**) हड्डियों से रहित (**असुः**) प्राण (**असृक्**) रुधिर और (**आत्मा**) जीव (**बिभर्त्ति**) धारण करता, उसको (**क्व, स्वित्**) कहीं भी (**कः**) कौन (**ददर्श**) देखता है (**कः**) और कौन (**एतत्**) इस उक्त विषय के (**प्रष्टुम**) पूछने को (**विद्वांसम्**) विद्वान् के (**उप, गात्**) समीप जावे॥४॥

भावार्थः-जब सृष्टि के पहिले ईश्वर ने सबके शरीर बनाए, तब कोई जीव इनका देखनेवाला न हुआ। जब उनमें जीवात्मा प्रवेश किये तब प्राण आदि वायु, रुधिर आदि धातु और जीव भी मिल कर देह को धारण करते हुए और चेष्टा करते हुए, इत्यादि विषय की प्राप्ति के लिये विद्वान् को कोई ही पूछने को जाता है, किन्तु सब नहीं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पाकः पृच्छामि मनसाविजानन् देवानामेना निहिता पदानि।
वत्से बष्कयेऽधि सप्त तन्तून् वि तत्निरे कवय ओतवा उ॥५॥१४॥

पाकः। पृच्छामि। मनसा। अविजानन्। देवानाम्। एना। निऽहिता। पदानि। वत्से। बष्कये। अधि। सप्त। तन्तून्। वि। तत्निरे। कवयः। ओतवै। ऊम् इति॥५॥

पदार्थः-(**पाकः**) ब्रह्मचर्यादितपसा परिपचनीयोऽहम् (**पृच्छामि**) (**मनसा**) अन्तःकरणेन (**अविजानन्**) न विजानन् (**देवानाम्**) दिव्यानां विदुषाम् (**एना**) एनानि (**निहिता**) स्थितानि (**पदानि**) पत्तुं प्राप्तुं ज्ञातुं योग्यानि (**वत्से**) अपत्ये (**बष्कये**) द्रष्टव्ये (**अधि**) (**सप्त**) (**तन्तून्**) विस्तृतान् धातून् (**वि**) विविधतया (**तत्निरे**) विस्तृणन्ति (**कवयः**) मेधाविनः (**ओतवै**) विस्ताराय (**उ**) वितर्के॥५॥

अन्वयः-ये कवय ओतवै बष्कये वत्से सप्त तन्तून् व्यधि तत्निरे तेषामु देवानामेना निहिता पदान्यविजानन् पाकोऽहं मनसा पृच्छामि॥५॥

भावार्थः-मनुष्यैर्बाल्यावस्थामारभ्याविदितानि शास्त्राणि विद्वद्भ्यः पठित्वा सर्वा विद्या अध्यापनेन प्रसारणीयाः॥५॥

पदार्थः-जो (**कवयः**) बुद्धिमान् जन (**ओतवै**) विस्तार के लिये (**बष्कये**) देखने योग्य (**वत्से**) सन्तान के निमित्त (**सप्त**) सात (**तन्तून्**) विस्तृत धातुओं को (**व्यधि, तत्निरे**) अनेक प्रकार से अधिक-अधिक विस्तारते हैं (**उ**) उन्हीं (**देवानाम्**) दिव्य विद्वानों के (**एना**) इन (**निहिता**) स्थापित किये हुए (**पदानि**) प्राप्त होने वा जानने योग्य पदों को, अधिकारों को (**अविजानन्**) न जानता हुआ (**पाकः**) ब्रह्मचर्यादि तपस्या से परिपक्व होने योग्य मैं (**मनसा**) अन्तःकरण से (**पृच्छामि**) पूछता हूँ॥५॥

भावार्थः-मनुष्यों को योग्य है कि बाल्यावस्था से लेकर अविदित शास्त्रों को विद्वानों से पढ़ कर दूसरों को पढ़ाने से सब विद्याओं को फैलावें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान्।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम्॥६॥

अचिकित्वान्। चिकितुषः। चित्। अत्र। कवीन्। पृच्छामि। विद्मने। न। विद्वान्। वि। यः। तस्तम्भ। षट्। इमा। रजांसि। अजस्य। रूपे। किम्। अपि। स्वित्। एकम्॥६॥

पदार्थः-(**अचिकित्वान्**) अविद्वान् (**चिकितुषः**) (**चित्**) अपि (**अत्र**) अस्मिन् विद्याव्यवहारे (**कवीन्**) पूर्णविद्यानाप्तान् (**पृच्छामि**) (**विद्मने**) विज्ञानाय (**न**) इव (**विद्वान्**) विद्यावान् (**वि**) (**यः**) (**तस्तम्भ**) स्तभ्नाति (**षट्**) (**इमा**) इमानि (**रजांसि**) पृथिव्यादीनि स्थूलानि तत्त्वानि (**अजस्य**) प्रकृतेर्जीवस्य वा (**रूपे**) (**किम्**) (**अपि**) (**स्वित्**) (**एकम्**)॥६॥

अन्वयः-अचिकित्वानहं चिदत्र चिकितुषः कवीन् विद्वान् विद्मने न पृच्छामि। यः षडिमा रजांसि वितस्तम्भ। अजस्य रूपे किं स्विदप्येकमासीत् तद्यूयं ब्रूत॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा अविद्वांसो विदुषः पृष्ट्वा विद्वांसो भवन्ति तथा विद्वांसोऽपि परमविदुषः पृष्ट्वा विद्या वर्द्धयेयुः॥६॥

पदार्थः-**(अचिकित्वान्)** अविद्वान् मैं **(चित्)** भी **(अत्र)** इस विद्याव्यवहार में **(चिकितुषः)** अज्ञानरूपी रोग के दूर करनेवाले **(कवीन्)** पूरी विद्यायुक्त आप्तविद्वानों को **(विद्वान्)** विद्यावान् **(विद्मने)** विशेष जानने के लिये **(न)** जैसे पूछे वैसे **(पृच्छामि)** पूछता हूँ, **(यः)** जो **(षट्)** छः **(इमा)** इन **(रजांसि)** पृथिवी आदि स्थूल तत्त्वों को **(वि, तस्तम्भ)** इकट्ठा करता है **(अजस्य)** प्रकृति अर्थात् जगत् के कारण वा जीव के **(रूपे)** रूप में **(किम्)** क्या **(स्वित्, अपि)** ही **(एकम्)** एक हुआ है, इसको तुम कहो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अविद्वान् विद्वानों को पूछ के विद्वान् होते हैं, वैसे विद्वान् भी परम विद्वानों को पूछ कर विद्या की वृद्धि करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒ह ब्र॑वीतु॒ य ई॑म॒ङ्ग वेद॒ास्य वा॒मस्य॒ निहि॑तं प॒दं वेः।
शी॒र्ष्णः क्षी॒रं दु॑ह्रते॒ गावो॑ अस्य व॒व्रिं वसा॑ना उद॒कं प॒दापु॑ः॥७॥

इ॒ह। ब्र॒वी॒तु॒। यः। ई॒म्। अ॒ङ्ग। वेद॑। अ॒स्य। वा॒मस्य॑। निऽहि॑तम्। प॒दम्। वेरिति॒ वेः। शी॒र्ष्णः। क्षी॒रम्। दु॒ह्र॒ते॒। गावः॑। अ॒स्य॒। व॒व्रिम्। वसा॑नाः। उ॒द॒कम्। प॒दा। अ॒पु॒रिति॑ अपुः॥७॥

पदार्थः-**(इह)** अस्मिन् प्रश्ने **(ब्रवीत्)** वदतु **(यः)** **(ईम्)** सर्वतः **(अङ्ग)** **(वेद)** जानाति **(अस्य)** **(वामस्य)** प्रशस्तस्य जगतः **(निहितम्)** स्थापितम् **(पदम्)** **(वेः)** पक्षिणः **(शीर्ष्णः)** शिरसः **(क्षीरम्)** दुग्धम् **(दुह्रते)** दुहन्ति **(गावः)** धेनवः **(अस्य)** **(वव्रिम्)** वर्त्तुमर्हम् **(वसानाः)** आच्छादिताः **(उदकम्)** जलम् **(पदा)** पादेन **(अपुः)** पिबन्ति॥७॥

अन्वयः-हे अङ्ग! योऽस्य वामस्य वेर्निहितं पदं वेद स इहेमुत्तरं ब्रवीतु यथा वसाना गावः क्षीरं दुह्रते वृक्षाः पदोदकमपुस्तथा शीर्ष्णोऽस्य वव्रिं जानीयुः॥७॥

भावार्थः-यथा पक्षिणोऽन्तरिक्षे भ्रमन्ति तथैव सर्वे लोका अन्तरिक्षे भ्रमन्ति। यथा गावो वत्सेभ्यो दुग्धं दत्वा वर्द्धयन्ति तथा कारणानि कार्याणि वर्द्धयन्ति। यथा वा वृक्षा मूलेन जलं पीत्वा वर्द्धन्ते तथा कारणेन कार्य्यं वर्द्धते॥७॥

पदार्थः-हे **(अङ्ग)** प्यारे **(यः)** जो **(अस्य)** इस **(वामस्य)** प्रशंसित **(वेः)** पक्षी के **(निहितम्)** धरे हुए **(पदम्)** पद को **(वेद)** जानता है, वह **(इह)** इस प्रश्न में **(ईम्)** सब ओर से उत्तम **(ब्रवीतु)** कह देवे। जैसे **(वसानाः)** झूल ओढ़े हुई **(गावः)** गौयें **(क्षीरम्)** दूध को **(दुह्रते)** पूरा करतीं अर्थात् दुहाती हैं वा वृक्ष **(पदा)** पग से **(उदकम्)** जल को **(अपुः)** पीते हैं, वैसे **(शीर्ष्णः, अस्य)** इसके शिर के **(वव्रिम्)** स्वीकार करने योग्य सब व्यवहार को जानें॥७॥

भावार्थः-जैसे पक्षी अन्तरिक्ष में भ्रमते हैं, वैसे ही सब लोक अन्तरिक्ष में भ्रमते हैं। जैसे गौयें बछड़ों के लिये दूध देकर बढ़ाती हैं, वैसे कारण कार्यों को बढ़ाते हैं वा जैसे वृक्ष जड़ से जल पीकर बढ़ते हैं, वैसे कारण से कार्य बढ़ता है॥७॥

अथ सूर्यादीनां कार्य्यकारणव्यवस्थामाह॥

अब सूर्यादिकों की कार्य-कारण व्यवस्था को अगले मन्त्र में कहते हैं॥

मा॒ता पि॒तर॑मृ॒त आ ब॑भाज धी॒त्यग्रे॒ मन॑सा॒ सं हि ज॒ग्मे।
सा बी॑भ॒त्सुर्गर्भ॑रसा॒ निवि॑द्धा॒ नम॑स्वन्त॒ इ॑दुपवा॒कमी॑युः॥८॥

मा॒ता। पि॒तर॑म्। ऋ॒ते। आ। ब॒भा॒ज॒। धी॒ती। अग्रे॑। मन॑सा। सम्। हि। ज॒ग्मे॒। सा। बी॒भ॒त्सुः। गर्भ॑ऽरसा। निऽवि॑द्धा। नम॑स्वन्तः। इत्। उ॒प॒ऽवा॒कम्। ई॒युः॥८॥

पदार्थः-**(माता)** पृथिवी **(पितरम्)** सूर्यम् **(ऋते)** विना **(आ)** **(बभाज)** सर्वं सेवते **(धीती)** धीत्या धारणेन। अत्र **सुपां सुलुगि**ति पूर्वसवर्णादेशः। **(अग्रे)** सृष्टेः प्राक् **(मनसा)** विज्ञानेन **(सम्)** सम्यक् **(हि)** किल **(जग्मे)** संगच्छते **(सा)** **(बीभत्सुः)** या भयप्रदा **(गर्भरसा)** रसो गर्भे यस्याः सा **(निविद्धा)** नितरां विद्युदादिभिस्ताडिता **(नमस्वन्तः)** प्रशस्तान्नयुक्ता भूत्वा **(इत्)** एव **(उपवाकम्)** उपगता वाक् यस्मिंस्तम् **(ईयुः)** यन्ति प्राप्नुवन्ति॥८॥

अन्वयः-बीभत्सुर्गर्भरसा निविद्धा सा माता धीत्यग्रे पितरमृते आ बभाज यं हि मनसा संजग्मे तामाप्य नमस्वन्त इदुपवाकमीयुः॥८॥

भावार्थः-यदि सूर्येण विना पृथिवी स्यात् तर्हि स्वशक्त्या सर्वान् कुतो न धारयेत्। यदि पृथिवी न स्यात्तर्हि सूर्यः स्वप्रकाशवान् कथं न भवेत्। अतोऽस्यां सृष्टौ स्व स्व स्वभावे सर्वे पदार्थाः स्वतन्त्राः सन्ति, सापेक्षव्यवहारे परतन्त्राश्च॥८॥

पदार्थः-**(बीभत्सुः)** जो भयङ्कर **(गर्भरसा)** जिसके गर्भ में रसरूप विद्यमान **(निविद्धा)** निरन्तर बंधी हुई **(सा)** वह **(माता)** पृथिवी **(धीती)** धारण से **(अग्रे)** सृष्टि के पूर्व **(पितरम्)** सूर्य के **(ऋते)** विना सबका **(आ, बभाज)** अच्छे प्रकार सेवन करती है, जिसको **(हि)** निश्चय के साथ **(मनसा)** विज्ञान से

(सं, जग्मे) सङ्गत होते, प्राप्त होते, उसको प्राप्त होकर **(नमस्वन्तः)** प्रशंसित अन्नयुक्त होकर **(इत्)** ही **(उपवाकम्)** जिसमें वचन मिलता उस भाग को **(ईयुः)** प्राप्त होते हैं॥८॥

भावार्थः-यदि सूर्य के विना पृथिवी हो तो अपनी शक्ति से सबको क्यों न धारण करे? जो पृथिवी न हो तो सूर्य आप ही प्रकाशमान कैसे न हो? इस कारण इस सृष्टि में अपने-अपने स्वभाव से सब पदार्थ स्वतन्त्र हैं और सापेक्ष व्यवहार में परतन्त्र भी हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युक्ता मातासीद् धुरि दक्षिणाया अतिष्ठद् गर्भो वृजनीष्वन्तः।
अमीमेद्वत्सो अनु गामपश्यद् विश्वरूप्यं त्रिषु योजनेषु॥९॥

युक्ता। माता। आसीत्। धुरि। दक्षिणायाः। अतिष्ठत्। गर्भः। वृजनीषु। अन्तरिति। अमीमेत्। वत्सः। अनु। गाम्। अपश्यत्। विश्वऽरूप्यम्। त्रिषु। योजनेषु॥९॥

पदार्थः-**(युक्ता)** **(माता)** पृथिवी **(आसीत्)** **(धुरि)** या धरति तस्याम् **(दक्षिणायाः)** दक्षिणस्याम् **(अतिष्ठत्)** तिष्ठति **(गर्भः)** ग्रहीतव्यः **(वृजनीषु)** वर्जनीयासु कक्षासु **(अन्तः)** मध्ये **(अमीमेत्)** प्रक्षिपति **(वत्सः)** **(अनु)** **(गाम्)** **(अपश्यत्)** पश्यति **(विश्वरूप्यम्)** विश्वेषु अखिलेषु रूपेषु भवम् **(त्रिषु)** **(योजनेषु)** बन्धनेषु॥९॥

अन्वयः-यो गर्भो वृजनीष्वन्तरतिष्ठत् यस्य दक्षिणाया धुरि माता युक्ताऽऽसीत् वत्सो गामिवामीमेत् त्रिषु योजनेषु विश्वरूप्यमन्वपश्यत् स पदार्थविद्या ज्ञातुमर्हति॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा गर्भरूपो मेघो गच्छत्सु घनेषु विराजते तथा सर्वेषां मान्यप्रदा भूमिराकर्षणेषु युक्तास्ति यथा वत्सो गामनुगच्छति तथेयं सूर्यमनुभ्रमति यस्यां सर्वाणि शुक्लादीनि रूपाणि सन्ति सैव सर्वेषां पालिकास्ति॥९॥

पदार्थः-जो **(गर्भः)** ग्रहण करने के योग्य पदार्थ **(वृजनीषु)** वर्जनीय कक्षाओं में **(अन्तः)** भीतर **(अतिष्ठत्)** स्थिर होता है, जिसके **(दक्षिणायाः)** दाहिनी **(धुरि)** धारण करनेवाली धुरि में **(माता)** पृथिवी **(युक्ता)** जड़ी हुई **(आसीत्)** है। और **(वत्सः)** बछड़ा **(गाम्)** गौ को जैसे-वैसे **(अमीमेत्)** प्रक्षेप करता है तथा **(त्रिषु)** तीन **(योजनेषु)** बन्धनों में **(विश्वरूप्यम्)** समस्त पदार्थों में हुए भाव को **(अन्वपश्यत्)** अनुकूलता से देखता है, वह पदार्थविद्या के जानने को योग्य है॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे गर्भरूप मेघ चलते हुए बादलों में विराजमान है, वैसे सबको मान्य देनेवाली भूमि आकर्षणों में युक्त है। जैसे बछड़ा गौ के पीछे जाता है,

वैसे यह भूमि सूर्य का अनुभ्रमण करती है, जिसमें समस्त सुपेद, हरे, पीले, लाल आदि रूप हैं, वही सबका पालन करनेवाली है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम्॥ १०॥ १५॥

तिस्रः। मातॄः। त्रीन्। पितॄन्। बिभ्रत्। एकः। ऊर्ध्वः। तस्थौ। न। ईम्। अव। ग्लापयन्ति। मन्त्रयन्ते। दिवः। अमुष्य। पृष्ठे। विश्वऽविदम्। वाचम्। अविश्वऽमिन्वाम्॥ १०॥

पदार्थः-(**तिस्रः**) (**मातॄः**) उत्तमध्यमनिकृष्टरूपा भूमिः (**त्रीन्**) विद्युत्प्रसिद्धसूर्यस्वरूपानग्नीन् (**पितॄन्**) पालकान् (**बिभ्रत्**) धरन् सन् (**एकः**) सूत्रात्मा वायुः (**ऊर्ध्वः**) (**तस्थौ**) तिष्ठति (**न**) (**ईम्**) सर्वतः (**अव**) (**ग्लापयन्ति**) (**मन्त्रयन्ते**) गुप्तं भाषन्ते (**दिवः**) प्रकाशमानस्य (**अमुष्य**) दूरे स्थितस्य सूर्यस्य (**पृष्ठे**) परभागे (**विश्वविदम्**) विश्वे विदन्ति ताम् (**वाचम्**) वाणीम् (**अविश्वमिन्वाम्**) असर्वसेविताम्॥१०॥

अन्वयः-यस्तिस्रो मातॄस्त्रीन् पितॄनीं बिभ्रत्सन्नूर्द्ध्व एकस्तस्थौ विद्वांस ये एतमव ग्लापयन्ति। अविश्वमिन्वां विश्वमिदं वाचं मन्त्रयन्ते तेऽमुष्य दिवः पृष्ठे विराजन्ते न ते दुःखमश्नुवते॥१०॥

भावार्थः-यस्सूत्रात्मा वायुरग्निं जलं पृथिवीं च धरति तमभ्यासेन विदित्वा सत्यां वाचमन्येभ्य उपदिशेत्॥१०॥

पदार्थः-जो (**तिस्रः**) तीन (**मातॄः**) उत्तम, मध्यम, अधम, भूमियों तथा (**त्रीन्**) बिजुली और सूर्यरूप तीन (**पितॄन्**) पालक अग्नियों को (**ईम्**) सब ओर से (**बिभ्रत्**) धारण करता हुआ (**ऊर्ध्वः**) ऊपर ऊंचा (**एकः**) एक सूत्रात्मा वायु (**तस्थौ**) स्थिर होता है जो विद्वान् जन उसको (**अव, ग्लापयन्ति**) कहते-सुनते अर्थात् उसके विषय में वार्त्तालाप करते हैं तथा (**अविश्वमिन्वाम्**) जो सबसे न सेवन की गई (**विश्वमिदम्**) सब लोग उसको प्राप्त होते उस (**वाचम्**) वाणी को (**मन्त्रयन्ते**) सब ओर से विचारपूर्वक गुप्त कहते हैं, वे (**अमुष्य**) उस दूरस्थ (**दिवः**) प्रकाशमान सूर्य के (**पृष्ठे**) परभाग में विराजमान होते हैं, वे (**न**) नहीं दुःख को प्राप्त होते हैं॥१०॥

भावार्थः-जो सूत्रात्मा वायु, अग्नि, जल और पृथिवी को धारण करता है, उसको अभ्यास से जानके सत्य वाणी का औरों के लिये उपदेश करें॥१०॥

अथ विशेषतः कालव्यवस्थामाह॥

अब विशेष कर काल की व्यवस्था को कहते हैं॥

द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः॥ ११॥

द्वादशऽअरम्। नहि। तत्। जराय। वर्वर्ति। चक्रम्। परि। द्याम्। ऋतस्य। आ। पुत्राः। अग्ने। मिथुनासः। अत्र। सप्त। शतानि। विंशतिः। च। तस्थुः॥ ११॥

पदार्थः-(**द्वादशारम्**) द्वादश अरा मासा अवयवा यस्य तं संवत्सरम् (**नहि**) (**तत्**) (**जराय**) हानये (**वर्वर्त्ति**) भृशं वर्त्तते (**चक्रम्**) चक्रवद्वर्त्तमानम् (**परि**) सर्वतः (**द्याम्**) द्योतमानं सूर्य्यम् (**ऋतस्य**) सत्यस्य कारणस्य (**आ**) (**पुत्राः**) तनया इव (**अग्ने**) विद्वन् (**मिथुनासः**) संयोगेनोत्पन्नाः (**अत्र**) अस्मिन् संसारे (**सप्त**) (**शतानि**) (**विंशतिः**) (**च**) (**तस्थुः**) तिष्ठन्ति॥ ११॥

अन्वयः-हे अग्ने विद्वँस्त्वमत्र यो द्वादशारं चक्रं द्यां परिवर्वर्त्ति तज्जराय नहि भवति। येऽत्र ऋतस्य कारणस्य सकाशात् सप्तशतानि विंशतिश्च मिथुनासः पुत्रास्तत्त्वविषया आतस्थुस्तान् विजानीहि॥ ११॥

भावार्थः-कालोऽनन्तोऽपरिणामी विभुश्च वर्त्तते। नैव तस्य कदाचिदुत्पत्तिर्नाशो वाऽस्ति। एतज्जगतः कारणे विंशत्युत्तराणि यानि सप्तशतानि तत्त्वानि सन्ति तानि मिलित्वा स्थूलानीश्वरनियोगेन जातानि सन्ति। एषां कारणमजं च वर्त्तते यावद्विन्नान्येतानि प्रत्यक्षतया न जानीयात् तावद्विद्यावृद्धये मनुष्यः प्रयतेत॥ ११॥

पदार्थः-हे (**अग्ने**) विद्वान्! तू (**अत्र**) इस संसार में जो (**द्वादशारम्**) जिसके बारह अङ्ग हैं, वह (**चक्रम्**) चक्र के समान वर्त्तमान संवत्सर (**द्याम्**) प्रकाशमान सूर्य के (**परि, वर्वर्त्ति**) सब ओर से निरन्तर वर्त्तमान है (**तत्**) वह (**जराय**) हानि के लिये (**नहि**) नहीं होता है, जो इस संसार में (**ऋतस्य**) सत्य कारण से (**सप्त**) सात (**शतानि**) सौ (**विंशतिः**) बीस (**च**) भी (**मिथुनासः**) संयोग से उत्पन्न हुए (**पुत्राः**) पुत्रों के समान वर्त्तमान तत्त्व विषय (**आ, तस्थुः**) अपने-अपने विषयों में लगे हैं, उनको जान॥ ११॥

भावार्थः-काल अनन्त, अपरिणामी और विभु वर्त्तमान है, न उसकी कभी उत्पत्ति है और न नाश है। इस जगत् के कारण में सात सौ बीस जो तत्त्व हैं, वे मिल के स्थूल ईश्वर के निर्माण किए हुए योग से उत्पन्न हुए हैं। इनका कारण अज और नित्य है, जब तक अलग अलग इन तत्त्वों को प्रत्यक्ष में न जाने तब तक विद्या की वृद्धि के लिये मनुष्य यत्न किया करें॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्।

अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम्॥ १२॥

पञ्चऽपादम्। पितरम्। द्वादशऽआकृतिम्। दिवः। आहुः। परे। अर्धे। पुरीषिणम्। अथ। इमे। अन्ये। उपरे। विऽचक्षणम्। सप्तऽचक्रे। षट्ऽअरे। आहुः। अर्पितम्॥ १२॥

पदार्थः-(**पञ्चपादम्**) पञ्च क्षणमूहर्त्तप्रहरदिवसपक्षाः पादा यस्य तं संवत्सरं सूर्यं वा (**पितरम्**) पितृवत्पाननिमित्तम् (**द्वादशाकृतिम्**) द्वादश मासा आकृतिर्यस्य तम् (**दिवः**) प्रकाशमानस्य (**आहुः**) कथयन्ति (**परे**) (**अर्द्धे**) (**पुरीषिणम्**) पुराणां सहितानां पदार्थानामीषितारम् (**अथ**) (**इमे**) (**अन्ये**) अन्ये पदार्थाः (**उपरे**) मेघमण्डले (**विचक्षणम्**) वाग्विषयम् (**सप्तचक्रे**) सप्तविधानि चक्राणि भ्रमणपरिधयो यस्मिंस्तस्मिन् (**षळरे**) षट् ऋतवोऽरा यस्मिंस्तस्मिन् (**आहुः**) कथयन्ति (**अर्पितम्**) स्थापितम्॥ १२॥

अन्वयः-हे मनुष्या! यूयं पञ्चपादं पितरं द्वादशाकृतिं पुरीषिणं दिवः परेऽर्द्धे विद्वांस आहुः। अथेमेऽन्ये विद्वांसः षडरे सप्तचक्रे उपरे विचक्षणमर्पितमाहुस्तं विजानीत॥ १२॥

भावार्थः-हे मनुष्या! यूयमत्र कालस्याऽवयवा विवक्षिता यत्र विभौ नित्येऽनन्ते काले सर्वं जगदुत्पत्तिस्थितिप्रलायन्तं लभ्यते तस्य सूक्ष्मत्वात् कालस्य बोधः कठिनोऽस्ति तस्मादेतं प्रयत्नेन विजानीत॥ १२॥

पदार्थः-हे मनुष्यो! तुम (**पञ्चपादम्**) क्षण, मुहुर्त्त, प्रहर, दिवस, पक्ष, ये पांच पग जिस के (**पितरम्**) पिता के तुल्य पालना करानेवाले (**द्वादशाकृतिम्**) बारह महीने जिसका आकार (**पुरीषिणम्**) और मिले हुए पदार्थों की प्राप्ति वा हिंसा करानेवाले अर्थात् उनकी मिलावट को अलग-अलग करानेहारे संवत्सर को (**दिवः**) प्रकाशमान सूर्य के (**परे**) परले (**अर्द्धे**) आधे भाग में विद्वान् (**आहुः**) कहते हैं, बताते हैं (**अथ**) इसके अनन्तर (**इमे**) ये (**अन्ये**) और विद्वान् जन (**षडरे**) जिसमें छः ऋतु आरारूप और (**सप्तचक्रे**) सात चक्र घूमने की परिधि विद्यमान उस (**उपरे**) मेघमण्डल में (**विचक्षणम्**) वाणी के विषय को (**अर्पितम्**) स्थापित (**आहुः**) कहते हैं, उसको जानो॥ १२॥

भावार्थः-हे मनुष्यो! तुम इस मन्त्र में काल के अवयव कहने को अभीष्ट हैं। जिस विभु, एक रस, सनातन काल में समस्त जगत् उत्पत्ति, स्थिति, प्रलयान्त को लब्ध होता है, उसके सूक्ष्मत्व से उस काल का बोध कठिन है, इससे इसको प्रयत्न से जानो॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः॥ १३॥

पञ्चाऽअरे। चक्रे। परिऽवर्तमाने। तस्मिन्। आ। तस्थुः। भुवनानि। विश्वा। तस्य। न। अक्षः। तप्यते। भूरिऽभारः। सनात्। एव। न। शीर्यते। सऽनाभिः॥ १३॥

पदार्थः-(**पञ्चारे**) पञ्च तत्त्वानि अरा यस्मिँस्तस्मिन् (**चक्रे**) चक्रवद्गम्यमाने (**परिवर्त्तमाने**) (**तस्मिन्**) (**आ**) (**तस्थुः**) तिष्ठन्ति (**भुवनानि**) लोकाः (**विश्वा**) सर्वाणि (**तस्य**) (**न**) निषेधे (**अक्षः**) पुरो भागः (**तप्यते**) (**भूरिभारः**) भूरि बहुर्भारो यस्मिन् सः (**सनात्**) सनातने (**एव**) (**न**) (**शीर्यते**) हिंस्यते (**सनाभिः**) समाना नाभिर्बन्धनं यस्य सः॥ १३॥

अन्वयः-हे विद्वांसः! पञ्चारे परिवर्त्तमाने तस्मिञ्चक्रे विश्वा भुवनान्यातस्थुः। तस्याक्षो न तप्यते, सनाभिर्भूरिभारः कालः सनात् नैव शीर्यते॥ १३॥

भावार्थः-यथेदं चक्रं कारणकालाकाशदिगात्मकं जगत्परमेश्वरे व्याप्तं वर्त्तते तथैव कालाकाशदिक्षु कार्यकारणात्मकं जगद् व्याप्यमस्ति॥ १३॥

पदार्थः-हे विद्वानो! (**पञ्चारे**) जिसमें पांच तत्त्व अरारूप हैं (**परिवर्त्तमाने**) और जो सब ओर से वर्त्तमान (**तस्मिन्**) उस (**चक्रे**) पहिये के समान ढुलकते हुए पञ्चतत्त्व के पञ्चीकरण में (**विश्वा**) समस्त (**भुवनानि**) लोक (**आ, तस्थुः**) अच्छे प्रकार स्थिर होते हैं (**तस्य**) उसका (**अक्षः**) अगला भाग अर्थात् जो उससे प्रथम ईश्वर है, वह (**न**) नहीं (**तप्यते**) कष्ट को प्राप्त होता अर्थात् संसार के सुख-दुःख का अनुभव नहीं करता (**सनाभिः**) और जिसका समान बन्धन है अर्थात् क्रिया के साथ में लगा हुआ है और (**भूरिभारः**) जिनमें बहुत भार हैं, बहुत कार्य-कारण आरोपित हैं, वह काल (**सनात्**) सनातनपन से (**नैव**) नहीं (**शीर्यते**) नष्ट होता॥ १३॥

भावार्थः-जैसे यह चक्ररूप कारण, काल, आकाश और दिशात्मक जगत् परमेश्वर में व्याप्त है, वैसे ही काल, आकाश और दिशाओं में कार्यकारणात्मक जगत् व्याप्य है॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा॥ १४॥

सऽनेमि। चक्रम्। अजरम्। वि। ववृते। उत्तानायाम्। दश। युक्ताः। वहन्ति। सूर्यस्य। चक्षुः। रजसा। एति। आऽवृतम्। तस्मिन्। आर्पिता। भुवनानि। विश्वा॥ १४॥

पदार्थः-(**सनेमि**) समानो नेमिर्यस्मिँस्तत् (**चक्रम्**) चक्रवद्वर्त्तमानम् (**अजरम्**) जरादोषरहितम् (**वि**) विशेषे (**ववृते**) पुनः पुनरावर्त्तते। अत्र **तुजादीनामिति** दीर्घः। (**उत्तानायाम्**) उत्कृष्टतया विस्तृतायां जगत्याम् (**दश**) प्राणाः (**युक्ताः**) (**वहन्ति**) प्रापयन्ति (**सूर्यस्य**) (**चक्षुः**) व्यक्तिकारकम् (**रजसा**) लोकैः

सह **(एति)** गच्छन्ति **(आवृतम्)** समन्तादाच्छादितम् **(तस्मिन्)** **(आर्पिता)** स्थापितानि **(भुवनानि)** भूगोलाख्यानि **(विश्वा)** सर्वाणि॥१४॥

अन्वयः-हे मनुष्या! यत्सनेम्यजरं चक्रमुत्तानायां विववृते दश युक्ता वहन्ति यत्सूर्य्यस्य चक्षू रजसाऽऽवृतमेति तस्मिन् विश्वा भुवनान्यार्पिता सन्तीति यूयं वित्त॥१४॥

भावार्थः-यो विभुर्नित्यः सर्वलोकाधारस्समयो वर्त्तते, तस्यैव गत्या सूर्य्यादिलोकाः प्रकाशिता भवन्तीति सर्वैर्वेद्यम्॥१४॥

पदार्थः-हे मनुष्यो! जो **(सनेमि)** समान नेमि नाभिवाला **(अजरम्)** जरादोष से रहित **(चक्रम्)** चक्र के समान वर्त्तमान कालचक्र **(उत्तानायाम्)** उत्तम विथरे हुए जगत् में **(वि, ववृते)** विशेष कर बार-बार आता है और उस कालचक्र को **(दश)** दश प्राण **(युक्ताः)** युक्त **(वहन्ति)** बहाते हैं। जो **(सूर्यस्य)** सूर्य का **(चक्षुः)** व्यक्ति प्रकटता करनेवाला भाग **(रजसा)** लोकों के साथ **(आवृतम्)** सब ओर से आवरण को **(एति)** प्राप्त होता है अर्थात् ढंप जाता है **(तस्मिन्)** उसमें **(विश्वा)** समस्त **(भुवनानि)** भूगोल **(आर्पिता)** स्थापित हैं, ऐसा तुम जानो॥१४॥

भावार्थः-जो विभु, नित्य और सब लोकों का आधार समय वर्त्तमान है, उसी काल की गति से सूर्य आदि लोक प्रकाशित होते हैं, ऐसा सब लोगों को जानना चाहिये॥१४॥

अथ पृथिव्यादीनां रचनाविशेषमाह॥

अब पृथिव्यादिकों की रचना विशेष की व्याख्या करते हैं॥

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः॥१५॥१६॥

साकंऽजानाम्। सप्तथम्। आहुः। एकऽजम्। षट्। इत्। यमाः। ऋषयः। देवऽजाः। इति। तेषाम्। इष्टानि। विऽहितानि। धामऽशः। स्थात्रे। रेजन्ते। विऽकृतानि। रूपऽशः॥१५॥

पदार्थः-(**साकंजानाम्**) सहैव जातानाम् **(सप्तथम्)** सप्तमम् **(आहुः)** कथयन्ति **(एकजम्)** एकस्मात्कारणाज्जातम् **(षट्)** **(इत्)** एव **(यमाः)** नियन्तारः **(ऋषयः)** गन्तारः **(देवजाः)** देवाद्विद्युतो जाताः **(इति)** प्रकारार्थे **(तेषाम्)** **(इष्टानि)** संगतानि **(विहितानि)** ईश्वरेण रचितानि **(धामशः)** धामानि धामानि **(स्थात्रे)** स्थिरस्य कारणस्य मध्ये। अत्र षष्ठ्यर्थे चतुर्थी। **(रेजन्ते)** कम्पन्ते **(विकृतानि)** विकारमवस्थान्तरं प्राप्तानि **(रूपशः)** रूपैः सह॥१५॥

अन्वयः-हे विद्वांसो! यूयं साकंजानां मध्ये यदेकजं महत्तत्त्वं सप्तथमाहुः, यत्र षड् देवजा यमा ऋषय ऋतवो वर्त्तन्ते तेषां मध्ये यानि धामश इष्टानीश्वरेण विहितानि यानि रूपशो विकृतानि स्थात्रे रेजन्ते तानीदिति विजानीत॥१५॥

भावार्थः-येऽत्र जगति पदार्थाः सन्ति ते सर्वे ब्रह्मनियोगतो युगपज्जायन्ते नात्र रचनायां क्रमाकाङ्क्षाऽस्ति, कुतः परमेश्वरस्य सर्वव्यापकत्वाऽनन्तसामर्थ्यवत्त्वाभ्याम्। अतः स स्वयमचलितः सन् सर्वाणि भुवनानि चालयति, स ईश्वरोऽविकारः सन् सर्वान् विकारयति, यथा क्रमेण ऋतवो वर्त्तन्ते स्वानि स्वानि लिङ्गान्युत्पादयन्ति तथैव पदार्था उत्पद्यमानाः स्वान् स्वान् गुणान् प्राप्नुवन्ति॥१५॥

पदार्थः-हे विद्वानो! तुम **(साकंजानाम्)** एक साथ उत्पन्न हुए पदार्थों के बीच में जिस **(एकजम्)** एक कारण से उत्पन्न महत्तत्व को **(सप्तथम्)** सातवाँ **(आहुः)** कहते हैं, जहाँ **(षट्)** छः **(देवजाः)** देदीप्यमान बिजुली में उत्पन्न हुए **(यमाः)** नियन्ता अर्थात् सबको यथायोग्य व्यवहारों में वर्त्तानेवाले **(ऋषयः)** आप सब से मिलनेवाले ऋतु वर्त्तमान हैं **(तेषाम्)** उनके बीच जिन **(धामशः)** प्रत्येक स्थान में **(इष्टानि)** मिले हुए पदार्थों को ईश्वर ने **(विहितानि)** रचा है और जो **(रूपशः)** रूपों के साथ **(विकृतानि)** अवस्थान्तर को प्राप्त हुए **(स्थात्रे)** स्थित कारण के बीच **(रेजन्ते)** चलायमान होते, उन सबको **(इत्)** ही **(इति)** इस प्रकार से जानो॥१५॥

भावार्थः-जो इस जगत् में पदार्थ हैं, वे सब ब्रह्म के निश्चित किये हुए व्यवहार से एक साथ उत्पन्न होते हैं। यहाँ रचना में क्रम की आकाङ्क्षा नहीं है, क्योंकि परमेश्वर के सर्वव्यापक और अनन्त सामर्थ्यवाला होने से। इससे वह आप अचलित हुआ सब भुवनों को चलाता है और वह ईश्वर विकाररहित होता हुआ सब को विकारयुक्त करता है, जैसे क्रम से ऋतु वर्त्तमान हैं और अपने-अपने चिह्नों को समय-समय में उत्पन्न करते हैं, वैसे ही उत्पन्न होते हुए पदार्थ अपने-अपने गुणों को प्राप्त होते हैं॥१५॥

अथ विद्वद्विदुषीविषयमाह॥

अब विद्वान् और विदुषी स्त्रियों के विषय को कहते हैं॥

स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत्॥१६॥

स्त्रियः। सतीः। तान्। ऊम् इति। मे। पुंसः। आहुः। पश्यत्। अक्षण्वान्। न। वि। चेतत्। अन्धः। कविः। यः। पुत्रः। सः। ईम्। आ। चिकेत। यः। ता। विऽजानात्। सः। पितुः। पिता। असत्॥१६॥

पदार्थः-(**स्त्रियः**) (**सतीः**) विद्यासुशिक्षादिशुभगुणसहिताः (**तान्**) (**उ**) वितर्के (**मे**) मम (**पुंसः**) पुरुषान् (**आहुः**) कथयन्ति (**पश्यत्**) पश्येत्। अत्र लङ्यडभावः। (**अक्षण्वान्**) विज्ञानी (**न**) निषेधे (**वि**) (**चेतत्**) चेतेत् (**अन्धः**) ज्ञानशून्यः (**कविः**) विक्रान्तप्रज्ञः (**यः**) (**पुत्रः**) पवित्रोपचितः (**सः**) (**ईम्**) (**आ**) (**चिकेत**) विजानीत (**यः**) (**ता**) तानि (**विजानात्**) (**सः**) (**पितुः**) जनकस्य (**पिता**) जनकः (**असत्**) भवेत्॥१६॥

अन्वयः-हे मनुष्या! यान् अक्षण्वान् पश्यदन्धो न विचेतत् सतीः स्त्रिय आहुस्तानु मे पुंसो जनान् विजानीत। यः कविः पुत्रस्ता तानीमा विजानात् स विद्वान् स्यात् यो विद्वान् भवेत् स पितुष्पितासदिति यूयं चिकेत॥१६॥

भावार्थः-यद्विद्वांसो जानन्ति तदविद्वांसो ज्ञातुं न शक्नुवन्ति। यथा विद्वांसः पुत्रानध्याप्य विदुषः कुर्युस्तथा विदुष्यः स्त्रियः कन्या विदुषीः संपादयेयुः। ये पृथिवीमारभ्य परमेश्वरपर्यन्तानां पदार्थानां गुणकर्मस्वभावान् विज्ञाय धर्म्मार्थकाममोक्षान् साध्नुवन्ति ते युवानोऽपि वृद्धानां पितरो भवन्ति॥१६॥

पदार्थः-हे मनुष्यो! जिनको **(अक्षण्वान्)** विज्ञानवान् पुरुष **(पश्यत्)** देखे **(अन्धः)** और अन्ध अर्थात् अज्ञानी पुरुष **(न)** नहीं **(वि, चेतत्)** विविध प्रकार से जाने और जिनको **(सतीः)** विद्या तथा उत्तम शिक्षादि शुभ गुणों से युक्त **(स्त्रियः)** स्त्रियां **(आहुः)** कहती हैं **(तानु)** उन्हीं **(मे)** मेरे **(पुंसः)** पुरुषों को जानो **(यः)** जो **(कविः)** विक्रमण करने अर्थात् प्रत्येक पदार्थ में क्रम-क्रम से पहुंचानेवाली बुद्धि रखनेवाला **(पुत्रः)** पवित्र वृद्धि को प्राप्त पुरुष **(ता)** उन इष्ट पदार्थों को **(ईम्)** सब ओर से **(आ, विजानात्)** अच्छे प्रकार जाने **(सः)** वह विद्वान् हो और **(यः)** जो विद्वान् हो **(सः)** वह **(पितुः)** पिता का **(पिता)** पिता **(असत्)** हो, यह तुम **(चिकेत)** जानो॥१६॥

भावार्थः-जिसको विद्वान् जानते हैं, उसको अविद्वान् नहीं जान सकते। जैसे विद्वान् जन पुत्रों को पढ़ाकर विद्वान् करें, वैसे विदुषी स्त्रियां कन्याओं को विदुषी करें। जो पृथिवी से लेके ईश्वरपर्यन्त पदार्थों के गुण, कर्म, स्वभावों को जान धर्म्म, अर्थ, काम और मोक्ष को सिद्ध करते हैं, वे जवान भी बुड्ढों के पिता होते हैं॥१६॥

पुनः पृथिव्यादीनां कार्यकारणविषयमाह॥

फिर पृथिव्यादिकों के कार्यकारण विषय को कहा है॥

अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात्।
सा कद्रीची कं स्विदर्धं परागात् क्व स्वित्सूते नहि यूथे अन्तः॥१७॥

अवः। परेण। परः। एना। अवरेण। पदा। वत्सम्। बिभ्रती। गौः। उत्। अस्थात्। सा। कद्रीची। कम्। स्वित्। अर्धम्। परा। अगात्। क्व। स्वित्। सूते। नहि। यूथे। अन्तरिति॥१७॥

पदार्थः-**(अवः)** अधस्तात् **(परेण)** **(परः)** **(एना)** एनेन **(अवरेण)** अर्वाचीनेन **(पदा)** प्रापकेन गमनरूपेण **(वत्सम्)** प्रसूतं मनुष्यादिकं संसारम् **(बिभ्रती)** धरन्ती **(गौः)** गच्छतीतिः गौः पृथिवी **(उत्)** **(अस्थात्)** तिष्ठति **(सा)** **(कद्रीची)** अचाक्षुष्यगमना **(कम्)** **(स्वित्)** **(अर्द्धम्)** भागम् **(परा)** **(अगात्)** गच्छति **(क्व)** कस्मिन् **(स्वित्)** **(सूते)** उत्पादयति **(नहि)** निषेधे **(यूथे)** समूहे **(अन्तः)** मध्ये॥१७॥

अन्वयः-या वत्सं बिभ्रती गौर्येन परेणाऽवरेण च पदाऽव उदस्थात्। एना परः परस्ताच्चोद्गच्छति या यूथेऽन्तः कं स्विदर्द्धं सूते सा कद्रीची क्व स्विन्नहि पराऽगात्॥१७॥

भावार्थः-इयं पृथिवी सूर्यादध ऊर्ध्वं दक्षिणमुत्तरतश्च गच्छति। अस्या गतिर्विदुषोऽन्तरा न लक्ष्यते। अस्याः परेऽर्द्धे सदाऽन्धकारः पूर्वेऽर्द्धे प्रकाशश्च वर्त्तते मध्ये सर्वे पदार्था वर्त्तन्ते, सेयं पृथिवी जननीव सर्वान् पाति॥१७॥

पदार्थः-जो **(वत्सम्)** उत्पन्न हुए मनुष्यादि संसार को **(बिभ्रती)** धारण करती हुई **(गौः)** गमन करनेवाली जिस **(परेण)** परले वा **(अवरेण)** उरले **(पदा)** प्राप्त करनेवाले गमनरूप चरण से **(अवः)** नीचे से **(उदस्थात्)** उठती है **(एना)** इससे **(परः)** पीछे से उठती है, जो **(यूथे)** समूह के **(अन्तः)** बीच में **(कम्, स्वित्)** किसी को **(अर्द्धम्)** आधा **(सूते)** उत्पन्न करती है **(सा)** वह **(कद्रीची)** अप्रत्यक्ष गमन करनेवाली **(क्व, स्वित्)** किसी में **(नहि)** नहीं **(परा, अगात्)** पर को लौट जाती॥१७॥

भावार्थः-यह पृथिवी सूर्य से नीचे-ऊपर और उत्तर-दक्षिण को जाती है। इसकी गति विद्वानों के विना न देखी जाती। इसके परले आधे भाग में सदा अन्धकार और उरले आधे भाग में प्रकाश वर्त्तमान है, बीच में सब पदार्थ वर्त्तमान हैं, सो यह पृथिवी माता के तुल्य सबकी रक्षा करती है॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अवः परेण पितरं यो अस्यानुवेद पर एनावरेण।
कवीयमानः क इह प्र वोचदेवं मनः कुतो अधि प्रजातम्॥१८॥

अवः। परेण। पितरम्। यः। अस्य। अनुऽवेद। परः। एना। अवरेण। कविऽयमानः। कः। इह। प्र। वोचत्। देवम्। मनः। कुतः। अधि। प्रऽजातम्॥१८॥

पदार्थः-**(अवः)** अवस्तात् **(परेण)** परेण मार्गेण **(पितरम्)** पालकं सूर्यम् **(यः)** **(अस्य)** **(अनुवेद)** विद्यापठनानन्तरं जानाति **(परः)** परस्मात् **(एना)** एनेन **(अवरेण)** मार्गेण **(कवीयमानः)** अतीव विद्वान् **(कः)** **(इह)** अस्यां विद्यायां जगति वा **(प्र)** **(वोचत्)** प्रवदेत् **(देवम्)** दिव्यगुणसंपन्नम् **(मनः)** अन्तःकरणम् **(कुतः)** **(अधि)** **(प्रजातम्)** उत्पन्नम्॥१८॥

अन्वयः-यो विद्वानस्यावः परेण च वर्त्तमानं पितरमनुवेद। यः पर एनाऽवरेणानुवेद स कवीयमानः कुत इदं देवं मनः प्रजातमितीह कोऽधि प्रवोचत्॥१८॥

भावार्थः-ये मनुष्या विद्युतमारभ्य सूर्यपर्यन्तमग्निं पितरमिव पालकं जानीयुः। यस्य पराऽवरे कार्यकारणाख्ये स्वरूपे स्तस्तदुपदेशं दिव्यान्तःकरणा भूत्वा इह प्रवदेयुः॥१८॥

पदार्थः-जो विद्वान् **(अस्य)** इसके **(अवः)** अधोभाग से और **(परेण)** परभाग से वर्त्तमान **(पितरम्)** पालनेवाले सूर्य को **(अनुवेद)** विद्या पढ़ने के अनन्तर जानता है **(यः)** जो **(परः)** पर और **(एना)** इस उक्त **(अवरेण)** नीचे के मार्ग से जानता है, वह **(कवीयमानः)** अतीव विद्वान् है और **(कुतः)** कहाँ से यह **(देवम्)** दिव्यगुणसम्पन्न **(मनः)** अन्तःकरण **(प्रजातम्)** उत्पन्न हुआ ऐसा **(इह)** इस विद्या वा जगत् में **(कः)** कौन **(अधि, प्र, वोचत्)** अधिकतर कहे॥१८॥

भावार्थः-जो मनुष्य बिजुली को लेकर सूर्यपर्यन्त अग्नि को पिता के समान पालनेवाला जाने, जिसके पराऽवर भाग में कार्यकारण स्वरूप हैं, उसका उपदेश दिव्य अन्तःकरणवाले होकर इस संसार में कहें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये अ॒र्वाञ्च॒स्ताँ उ॒ परा॑च आहु॒र्ये परा॑ञ्च॒स्ताँ उ॑ अ॒र्वाच॑ आहुः।
इन्द्र॑श्च या च॒क्रथु॑ः सोम॒ तानि॑ धु॒रा न यु॒क्ता रज॑सो वहन्ति॥१९॥

ये। अ॒र्वाञ्चः॑। तान्। ऊ॒म् इति॑। परा॑चः। आ॒हुः॒। ये। परा॑ञ्चः। तान्। ऊ॒म् इति॑। अ॒र्वाचः॑। आ॒हुः॒। इन्द्रः॑। च॒। या। च॒क्रथु॑ः। सो॒म॒। तानि॑। धु॒रा। न। यु॒क्ताः। रज॑सः। व॒ह॒न्ति॒॥१९॥

पदार्थः-(**ये**) (**अर्वाञ्चः**) अर्वागधोऽञ्चन्ति ये (**तान्**) (**उ**) (**पराचः**) परभागप्राप्तान् (**आहुः**) कथयन्ति (**ये**) (**पराञ्चः**) परत्वेन व्यपदिष्टाः (**तान्**) (**उ**) वितर्के (**अर्वाचः**) अपरत्वेन व्यपदिष्टान् (**आहुः**) (**इन्द्रः**) सूर्यः (**च**) वायुः (**या**) यानि भुवनानि (**चक्रथुः**) कुर्यातम् (**सोम**) ऐश्वर्ययुक्त (**तानि**) (**धुरा**) धुरि युक्ता अश्वा इव (**न**) इव (**युक्ताः**) संबद्धाः (**रजसः**) लोकान् (**वहन्ति**) चालयन्ति॥१९॥

अन्वयः-हे सोम विद्वन्! येऽर्वाञ्चः पदार्थाः सन्ति तानु पराच आहुः। ये पराञ्चस्तान्वेवार्वाच आहुस्तान् विजानीहि। इन्द्रो वायुश्च या यानि धरतः तानि युक्ता धुरा न रजसो वहन्ति, तानध्यापकोपदेशकौ युवां विदितान् चक्रथुः॥१९॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! इह येऽध ऊर्ध्वपरावरस्थूलसूक्ष्मलघुत्वगुरुत्व-व्यवहाराः सन्ति ते सापेक्षा वर्त्तन्ते। एकस्यापेक्षया य इदमत ऊर्ध्वं यदुच्यते तदेव उभयमाख्यां लभते यदस्मात्परं तदेवान्यस्मादवरं यदस्मात्स्थूलं तदन्यस्मात्सूक्ष्मं यदस्माल्लघु तदन्यस्माद् गुर्विति यूयं विजानीत, नह्यत्र किंचिदपि वस्तु निरपेक्षं वर्त्तते, नैव चानाधारम्॥१९॥

पदार्थः-हे **(सोम)** ऐश्वर्ययुक्त विद्वान्! **(ये)** जो **(अर्वाञ्चः)** नीचे जानेवाले पदार्थ हैं **(तान्, उ)** उन्हीं को **(पराचः)** परे को पहुँचे हुए **(आहुः)** कहते हैं। और **(ये)** जो **(पराञ्चः)** परे से व्यवहार में लाये जाते अर्थात् परभाग में पहुँचनेवाले हैं **(तान्, उ)** उन्हें तर्क-वितर्क से **(अर्वाचः)** नीचे जानेवाले **(आहुः)**

कहते हैं उनको जानो, **(इन्द्रः)** सूर्य **(च)** और वायु **(या)** जिन भुवनों को धारण करते हैं **(तानि)** उनको **(युक्ताः)** युक्त हुए अर्थात् उनमें सम्बन्ध किये हुए पदार्थ **(धुरा)** धारण करनेवाली धुरी में जुड़े हुए घोड़ों के **(न)** समान **(रजसः)** लोकों को **(वहन्ति)** बहाते चलाते हैं, उनको हे पढ़ाने और उपदेश करनेवालो! तुम विदित **(चक्रथुः)** करो जानो॥१९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! यहाँ नीचे, ऊपर, परे, उरे, मोटे, सूक्ष्म, छुटाई-बड़ाई के व्यवहार हैं, वे सापेक्ष हैं। एक की अपेक्षा से यह इससे ऊंचा जो कहा जाता है, वही दोनों कथनों को प्राप्त होता है। जो इस से परे है वही और से नीचे है, जो इससे मोटा है वह और से सूक्ष्म। जो-जो इससे छोटा है वह और से बड़ा गुरु है, यह तुम जानो। यहाँ कोई वस्तु अपेक्षारहित नहीं है, और न निराधार ही है॥१९॥

अथेश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहा है॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति॥२०॥१७॥

द्वा। सुऽपर्णा। सऽयुजा। सखाया। समानम्। वृक्षम्। परि। सस्वजाते इति। तयोः। अन्यः। पिप्पलम्। स्वादु। अत्ति। अनश्नन्। अन्यः। अभि। चाकशीति॥२०॥

पदार्थः-(**द्वा**) द्वौ। अत्र **सर्वत्र सुपां सुलुगित्याकारादेशः**। (**सुपर्णा**) शोभनानि पर्णानि गमनागमनादीनि कर्म्माणि वा ययोस्तौ (**सयुजा**) यौ समानसम्बन्धौ व्याप्यव्यापकभावेन सहैव युक्तौ वा तौ (**सखाया**) मित्रवद्वर्त्तमानौ (**समानम्**) एकम् (**वृक्षम्**) यो वृश्च्यते छिद्यते तं कार्यकारणाख्यं वा (**परि**) सर्वतः (**सस्वजाते**) स्वजेते आश्रयतः। अत्र व्यत्ययेनात्मनेपदम्। (**तयोः**) जीवब्रह्मणोरनाद्योः (**अन्यः**) जीवः (**पिप्पलम्**) परिपक्वं फलं पापपुण्यजन्यं सुखदुःखात्मकभोगं वा (**स्वादु**) (**अत्ति**) भुङ्क्ते (**अनश्नन्**) उपभोगमकुर्वन् (**अन्यः**) परमेश्वरः (**अभि**) (**चाकशीति**) अभिपश्यति॥२०॥

अन्वयः-हे मनुष्या! यौ सुपर्णा सयुजा सखाया द्वा जीवेशौ समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्ति। अन्योऽनश्नन्नभिचाकशीतीति यूयं वित्त॥२०॥

भावार्थः-अत्र रूपकालङ्कारः। जीवेशजगत्कारणानि त्रयः पदार्था अनादयो नित्याः सन्ति। जीवेशावल्पानन्तचेतनविज्ञानिनौ सदा विलक्षणौ व्याप्यव्यापकभावेन संयुक्तौ मित्रवद्वर्त्तमानौ स्तः। तथैव यस्मादव्यक्तात्परमाणुरूपात्कारणात्कार्यं जायते तदप्यनादि नित्यं च। जीवास्सर्वे पापपुण्यात्मकानि कर्माणि कृत्वा तत्फलानि भुञ्जत ईश्वरश्चैकोऽभिव्यापी सन् न्यायेन पापपुण्यफलदानात् न्यायाधीश इव पश्यति॥२०॥

पदार्थः-हे मनुष्यो! **(सुपर्णा)** सुन्दर पंखोंवाले **(सयुजा)** समान सम्बन्ध रखनेवाले **(सखाया)** मित्रों के समान वर्त्तमान **(द्वा)** दो पखेरू **(समानम्)** एक **(वृक्षम्)** जो काटा जाता उस वृक्ष का **(परि, सस्वजाते)** आश्रय करते हैं **(तयोः)** उनमें से **(अन्यः)** एक **(पिप्पलम्)** उस वृक्ष के पके हुए फल को **(स्वादु)** स्वादुपन से **(अत्ति)** खाता है और **(अन्यः)** दूसरा **(अनश्नन्)** न खाता हुआ **(अभि, चाकशीति)** सब ओर से देखता है अर्थात् सुन्दर चलने-फिरने वा क्रियाजन्य काम को जाननेवाले व्याप्यव्यापकभाव से साथ ही सम्बन्ध रखते हुए मित्रों के समान वर्त्तमान जीव और ईश-जीवात्मा[३] समान कार्यकारणरूप ब्रह्माण्ड देह का आश्रय करते हैं। उन दोनों अनादि जीव ब्रह्म में जो जीव है, वह पाप-पुण्य से उत्पन्न सुख दुःखात्मक भोग को स्वादुपन से भोगता है और दूसरा ब्रह्मात्मा कर्मफल को न भोगता हुआ उस भोगते हुए जीव को सब ओर से देखता अर्थात् साक्षी है, यह तुम जानो॥ २०॥

भावार्थः-इस मन्त्र में रूपकालङ्कार है। जीव, परमात्मा और जगत् का कारण ये तीन पदार्थ अनादि और नित्य हैं। जीव और ईश-परमात्मा यथाक्रम से अल्प अनन्त चेतन विज्ञानवान् सदा विलक्षण व्याप्यव्यापकभाव से संयुक्त और मित्र के समान वर्त्तमान हैं। वैसे ही जिस अव्यक्त परमाणुरूप कारण से कार्य्यरूप जगत् उत्पन्न होता है, वह भी अनादि और नित्य है। समस्त जीव पाप-पुण्यात्मक कार्यों को करके उनके फलों को भोगते हैं और ईश्वर एक सब और से व्याप्त होता हुआ न्याय से पाप-पुण्य के फल को देने से न्यायाधीश के समान देखता है॥ २०॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को कहा है॥

यत्रा॑ सुप॒र्णा अ॒मृत॑स्य भा॒गमनि॑मेषं वि॒दथा॑भि॒स्वर॑न्ति।
इ॒नो विश्व॑स्य॒ भुव॑नस्य गो॒पाः स मा॒ धीरः॒ पाक॒मत्रा॑ वि॑वेश॥ २१॥

यत्र॑। सु॒ऽप॒र्णाः। अ॒मृत॑स्य। भा॒गम्। अनि॑ऽमेषम्। वि॒दथा॑। अ॒भि॒ऽस्वर॑न्ति। इ॒नः। विश्व॑स्य। भुव॑नस्य। गो॒पाः। सः। मा॒। धीरः॑। पाक॑म्। अत्र॑। आ। वि॒वे॒श॒॥ २१॥

पदार्थः-**(यत्र)** यस्मिन् परमेश्वरे। अत्र **ऋचि तुनुघे**ति दीर्घः। **(सुपर्णाः)** शोभनकर्माणो जीवाः **(अमृतस्य)** मोक्षस्य **(भागम्)** सेवनम् **(अनिमेषम्)** निरन्तरम् **(विदथा)** विदथे विज्ञानमये **(अभिस्वरन्ति)** आभिमुख्येनोच्चरन्ति **(इनः)** स्वामी सूर्यः **(विश्वस्य)** समग्रस्य **(भुवनस्य)** भूताधिकरणस्य **(गोपाः)** रक्षकः **(सः)** **(मा)** माम् **(धीरः)** ध्यानवान् **(पाकम्)** परिपक्वव्यवहारम् **(अत्र)** **(आ)** **(विवेश)** आविशाति॥ २१॥

---

३ यहां जीवात्मा के स्थान पर परमात्मा चाहिये जैसे की भावार्थ में स्पष्ट है (सम्पादक)

अन्वयः-यत्र विदथा सुपर्णा जीवा अमृतस्य भागमनिमेषमभिस्वरन्ति यत्र विश्वस्य भुवनस्य गोपा इन आ विवेश य एतं जानाति स धीरोऽत्र पाकं मा उपदिशेत्॥ २१॥

भावार्थः-यत्र सवितृप्रभृतिलोकान्तरा द्वीपद्वीपान्तराश्च सर्वे लयमाप्नुवन्ति तदुपदेशेनैव साधका मोक्षमाप्नुवन्ति नान्यथा॥ २१॥

पदार्थः-(**यत्र**) जिस (**विदथा**) विज्ञानमय परमेश्वर में (**सुपर्णाः**) शोभन कर्मवाले जीव (**अमृतस्य**) मोक्ष के (**भागम्**) सेवने योग्य अंश को (**अनिमेषम्**) निरन्तर (**अभिस्वरन्ति**) सन्मुख कहते अर्थात् प्रत्यक्ष कहते वा जिस परमेश्वर में (**विश्वस्य**) समग्र (**भुवनस्य**) लोक-लोकान्तर का (**गोपाः**) पालनेवाला (**इनः**) स्वामी सूर्यमण्डल (**आ, विवेश**) प्रवेश करता अर्थात् सूर्यादि लोक-लोकान्तर सब लय को प्राप्त होते हैं जो इसको जानता है (**सः**) वह (**धीरः**) ध्यानवान् पुरुष (**अत्र**) इस परमेश्वर में (**पाकम्**) परिपक्व व्यवहारवाले (**मा**) मुझको उपदेश देवे॥ २१॥

भावार्थः-जिस परमात्मा में सवितृमण्डल आदि लोकलोकान्तर और द्वीपद्वीपान्तर सब लय हो जाते हैं, तद्विषयक उपदेश से ही साधक जन मोक्ष पाते हैं और किसी तरह से मोक्ष को प्राप्त नहीं हो सकते॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्मि॑न्वृ॒क्षे म॒ध्व॑दः॒ सुप॒र्णा नि॑वि॒शन्ते॒ सुव॑ते॒ चाधि॒ विश्वे॑।
तस्येदा॑हुः॒ पिप्प॑लं स्वा॒द्वग्रे॒ तन्नोन्न॑श॒द्यः पि॒तर॑ं न वेद॑॥ २२॥

यस्मि॑न्। वृ॒क्षे। म॒धु॒ऽअद॑ः। सु॒ऽप॒र्णाः। नि॒ऽवि॒शन्ते॑। सुव॑ते। च॒। अधि॑। विश्वे॑। तस्य॑। इत्। आ॒हु॒ः। पिप्प॑लम्। स्वा॒दु॒। अग्रे॑। तत्। न। उत्। न॒श॒त्। यः। पि॒तर॑म्। न। वेद॑॥ २२॥

पदार्थः-(**यस्मिन्**) (**वृक्षे**) (**मध्वदः**) ये मधूनि कर्मफलानि वाऽदन्ति ते (**सुपर्णाः**) शोभनपर्णाः सुष्ठु पालनकर्माणः (**नि, विशन्ते**) निविष्टा भवन्ति (**सुवते**) जायन्ते (**च**) (**अधि**) (**विश्वे**) विश्वस्मिञ्जगति वा (**तस्य**) (**इत्**) एव (**आहुः**) कथयन्ति (**पिप्पलम्**) उदकमिव निर्मलं फलं कर्मफलं वा। **पिप्पलमित्युदकनामसु पठितम्।** (निघं०१.१२) (**स्वादु**) स्वादिष्ठम् (**अग्रे**) (**तत्**) (**न**) (**उत्**) (**नशत्**) नश्यति (**यः**) (**पितरम्**) परमात्मानम् (**न**) (**वेद**) जानाति॥ २२॥

अन्वयः-हे विद्वांसो! यस्मिन् विश्वे वृक्षे मध्वदः सुपर्णा जीवा निविशन्तेऽधि सुवते च तस्येत्पिप्पलमग्रे स्वाद्वाहुः तन्नोन्नशत् यः पितरं न वेद स तन्न प्राप्नोति॥ २२॥

भावार्थः-अत्र रूपकालङ्कारः। अनाद्यनन्तात्कालादिदं विश्वं जायते विनश्यति जीवा जायन्ते म्रियन्ते च। अत्र जीवैर्यादृशं कर्म्माचरितं तादृशमेवावश्यमीश्वरन्यायेन भोक्तव्यमस्ति। कर्मजीवयोरपि

नित्यः सम्बन्धः। ये परमात्मानं तद्गुणकर्मस्वभावानुकूलाचरणं चाविदित्वा यथेष्टमाचरन्ति ते सततं पीड्यन्ते येऽतो विपरीतास्ते सदानन्दन्ति॥ २२॥

पदार्थः-हे विद्वानो! **(यस्मिन्)** जिस **(विश्वे)** समस्त **(वृक्षे)** वृक्ष पर **(मध्वदः)** मधु को खानेवाले **(सुपर्णाः)** सुन्दर पंखों से युक्त भौंरा आदि पक्षी **(नि, विशन्ते)** स्थिर होते हैं **(अधि, सुवते, च)** और आधारभूत होकर अपने बालकों को उत्पन्न करते **(तस्य, इत्)** उसी के **(पिप्पलम्)** जल के समान निर्मल फल को **(अग्रे)** आगे **(स्वादु)** स्वादिष्ठ **(आहुः)** कहते हैं और **(तत्)** वह **(न)** न **(उत्, नशत्)** नष्ट होता है अर्थात् वृक्षरूप इस जगत् में मधुर कर्मफलों को खानेवाले उत्तम कर्मयुक्त जीव स्थिर होते और उसमें सन्तानों को उत्पन्न करते हैं, उसका जल के समान निर्मल कर्मफल संसार में होना, इसको आगे उत्तम कहते हैं। और नष्ट नहीं होता अर्थात् पीछे अशुभ कर्मों के करने से संसाररूप वृक्ष का जो फल चाहिये सो नहीं मिलता **(यः)** जो पुरुष **(पितरम्)** पालनेवाले परमात्मा को **(न, वेद)** नहीं जानता, वह इस संसार के उत्तम फल को नहीं पाता॥ २२॥

भावार्थः-इस मन्त्र में रूपकालङ्कार है। अनादि अनन्त काल से यह विश्व उत्पन्न होता और नष्ट होता है, जीव उत्पन्न होते और मरते भी जाते हैं। इस संसार में जीवों ने जैसा कर्म किया वैसा ही अवश्य ईश्वर के न्याय से भोग्य है। कर्म, जीव का भी नित्यसम्बन्ध है। जो परमात्मा और उसके गुण, कर्म, स्वभावों के अनुकूल आचरण को न जानकर मनमाने काम करते हैं, वे निरन्तर पीड़ित होते हैं और जो उससे विपरीत हैं, वे सदा आनन्द भोगते हैं॥ २२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्गा॑यत्रे अधि॑ गाय॒त्रमाहि॑तं त्रैष्टु॒भाद्वा॒ त्रैष्टु॑भं नि॒रत॑क्षत।
यद्वा॒ जग॒ज्जग॒त्याहि॑तं प॒दं य इत्तद्वि॒दुस्ते अ॑मृत॒त्वमा॑नशुः॥ २३॥

यत्। गा॒य॒त्रे। अधि॑। गा॒य॒त्रम्। आऽहि॑तम्। त्रैस्तु॑भात्। वा॒। त्रैस्तु॑भम्। नि॒ःऽअत॑क्षत। यत्। वा॒। जग॑त्। जग॑ति। आऽहि॑तम्। प॒दम्। ये। इत्। तत्। वि॒दुः। ते। अ॒मृ॒त॒ऽत्वम्। आ॒न॒शुः॥ २३॥

पदार्थः-**(यत्)** **(गायत्रे)** गायत्री छन्दोवाच्ये **(अधि)** **(गायत्रम्)** गायतां रक्षकम् **(आहितम्)** स्थितम् **(त्रैष्टुभात्)** त्रिष्टुप्छन्दोवाच्यात् **(वा)** **(त्रैष्टुभम्)** त्रिष्टुभि भवम् **(निरतक्षत)** नितरां तनू कुर्वन्ति विस्तृणन्ति **(यत्)** **(वा)** **(जगत्)** **(जगति)** **(आहितम्)** स्थितम् **(पदम्)** वेदितव्यम् **(ये)** **(इत्)** एव **(तत्)** **(विदुः)** जानन्ति **(ते)** **(अमृतत्वम्)** मोक्षस्य भावम् **(आनशुः)** अश्नुवते॥ २३॥

अन्वयः-ये यद्गायत्रे गायत्रमध्याहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत वा यज्जगति जगत्पदमाहितं तद्विदुस्ते इदमृतत्वमानशुः॥ २३॥

भावार्थः-ये सृष्टिपदार्थान् तत्र स्वामीश्वररचनां च विज्ञाय परमात्मानमभिध्याय विद्याधर्मोन्नतिं कुर्वन्ति ते मोक्षमाप्नुवन्ति॥२३॥

पदार्थः-(**ये**) जो लोग (**यत्**) जो (**गायत्रे**) गायत्री छन्दोवाच्य वृत्ति में (**गायत्रम्**) गानेवालों की रक्षा करनेवाला (**अधि, आहितम्**) स्थित है (**त्रैष्टुभात्, वा**) अथवा त्रिष्टुप् छन्दोवाच्य वृत्त से (**त्रैष्टुभम्**) त्रिष्टुप् में प्रसिद्ध हुए अर्थ को (**निरतक्षत**) निरन्तर विस्तारते हैं (**वा**) वा (**यत्**) जो (**जगति**) संसार में (**जगत्**) प्राणि आदि जगत् (**पदम्**) जानने योग्य (**आहितम्**) स्थित है (**तत्**) उसको (**विदुः**) जानते हैं (**ते**) वे (**इत्**) ही (**अमृतत्वम्**) मोक्षभाव को (**आनशुः**) प्राप्त होते हैं॥२३॥

भावार्थः-जो सृष्टि के पदार्थ और तत्रस्थ ईश्वरकृत रचना को जानकर परमात्मा का सब ओर से ध्यान कर विद्या और धर्म की उन्नति करते हैं, वे मोक्ष पाते हैं॥२३॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर विषय को अगले मन्त्र में कहा है॥

गा॒य॒त्रेण॒ प्रति॑ मिमीते अ॒र्कम॒र्केण॒ साम॒ त्रैष्टु॑भेन वा॒कम्।
वा॒केन॑ वा॒कं द्विप॑दा॒ चतु॑ष्पदा॒क्षरे॑ण मिमते स॒प्त वाणीः॥२४॥

गा॒य॒त्रेण॑। प्रति॑। मि॒मी॒ते॒। अ॒र्कम्। अ॒र्केण॑। साम॑। त्रैस्तु॑भेन। वा॒कम्। वा॒केन॑। वा॒कम्। द्विऽप॑दा। चतु॑ःऽपदा। अ॒क्षरे॑ण। मि॒म॒ते॒। स॒प्त। वाणीः॥२४॥

पदार्थः-(**गायत्रेण**) गायत्री छन्दसा (**प्रति**) (**मिमीते**) रचयति (**अर्कम्**) ऋग्वेदम् (**अर्केण**) ऋचां समूहेन (**साम**) सामवेदम् (**त्रैष्टुभेन**) त्रिवेदविद्यास्तवनेन (**वाकम्**) यजुः (**वाकेन**) यजुषा (**वाकम्**) अथर्ववेदम् (**द्विपदा**) द्वौ पादौ यस्मिंस्तेन (**चतुष्पदा**) चत्वारः पादा यस्मिंस्तेन (**अक्षरेण**) नाशरहितेन (**मिमते**) (**सप्त**) गायत्र्यादिसप्तछन्दोन्विताः (**वाणीः**) वेदवाचः॥२४॥

अन्वयः-हे विद्वांसो! यो जगदीश्वरो गायत्रेणार्कमर्केण साम त्रैष्टुभेन वाकं द्विपदा चतुष्पदाऽक्षरेण वाकेन वाकं सप्त वाणीश्च प्रति मिमीते तज्ज्ञानं ये मिमते ते कृतकृत्या जायन्ते॥२४॥

भावार्थः-येन जगदीश्वरेण वेदस्थान्यक्षरपदवाक्यछन्दोऽध्यायादीनि निर्मितानि तस्मै सर्वे मनुष्या धन्यवादं दद्युः॥२४॥

पदार्थः-हे विद्वानो! जो जगदीश्वर (**गायत्रेण**) गायत्री छन्द से (**अर्कम्**) ऋक् (**अर्केण**) ऋचाओं के समूह से (**साम**) साम (**त्रैष्टुभेन**) त्रिष्टुप् छन्द वा तीन वेदों की विद्याओं की स्तुतियों से (**वाकम्**) यजुर्वेद (**द्विपदा**) दो पद जिस में विद्यमान वा (**चतुष्पदा**) चार पदवाले (**अक्षरेण**) नाशरहित (**वाकेन**) यजुर्वेद से (**वाकम्**) अथर्ववेद और (**सप्त**) गायत्री आदि सात छन्द युक्त (**वाणीः**) वेदवाणी को (**प्रति, मिमीते**) प्रतिमान करता है और जो उसके ज्ञान को (**मिमते**) मान करते हैं, वे कृतकृत्य होते हैं॥२४॥

भावार्थः-जिस जगदीश्वर ने वेदस्थ अक्षर, पद, वाक्य, छन्द, अध्याय आदि बनाये हैं, उसको सब मनुष्य धन्यवाद देवें॥ २४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जग॑ता॒ सिन्धुं॑ दि॒व्य॑स्तभायद्रथन्त॒रे सूर्यं॑ पर्य॑पश्यत्।
गा॒य॒त्रस्य॑ स॒मिध॑स्ति॒स्र आ॑हु॒स्ततो॑ म॒ह्ना प्र रि॑रिचे महि॒त्वा॥ २५॥ १८॥

जग॑ता। सिन्धु॑म्। दि॒वि। अ॒स्त॒भा॒य॒त्। र॒थ॒म्ऽत॒रे। सूर्य॑म्। परि॑। अ॒प॒श्य॒त्। गा॒य॒त्रस्य॑। स॒म्ऽइध॑ः। ति॒स्रः। आ॒हु॒ः। ततः। म॒ह्ना। प्र। रि॒रि॒चे॒। म॒हि॒ऽत्वा॥ २५॥

पदार्थः-(**जगता**) संसारेण सह (**सिन्धुम्**) नद्यादिकम् (**दिवि**) प्रकाशे (**अस्तभायत्**) स्तभ्नाति (**रथन्तरे**) अन्तरिक्षे (**सूर्यम्**) सवितृलोकम् (**परि**) सर्वतः (**अपश्यत्**) पश्यति (**गायत्रस्य**) गायत्र्या संसाधितस्य (**समिधः**) सम्यक् प्रदीप्ताः पदार्थाः (**तिस्रः**) त्रित्वसंख्यायुक्ताः (**आहुः**) कथयन्ति (**ततः**) (**मह्ना**) महता (**प्र**) (**रिरिचे**) प्ररिणक्ति (**महित्वा**) महित्वेन पूज्येन॥ २५॥

अन्वयः-यो जगदीश्वरो जगता सिन्धुं दिवि रथन्तरे सूर्यमस्तभायत् सर्वं पर्यपश्यत् या गायत्रस्य सकाशात् तिस्रः समिध आहुस्ततो मह्ना महित्वा प्ररिरिचे स सर्वैः पूज्योऽस्ति॥ २५॥

भावार्थः-यदा ईश्वरेण जगन्निर्मितं तदैव नदीसमुद्रादीनि निर्मितानि। यथा सूर्य आकर्षणेन भूगोलान् धरति तथा सूर्यादिकं जगदीश्वरो धरति। यस्सर्वेषां जीवानां सर्वाणि पापपुण्यात्मकानि कर्माणि विज्ञाय फलानि प्रयच्छति, स सर्वेभ्यः पदार्थेभ्यो महानस्ति॥ २५॥

पदार्थः-जो जगदीश्वर (**जगता**) संसार के साथ (**सिन्धुम्**) नदी आदि को (**दिवि**) प्रकाश (**रथन्तरे**) और अन्तरिक्ष में (**सूर्यम्**) सवितृलोक को (**अस्तभायत्**) रोकता व सबको (**पर्य्यपश्यत्**) सब ओर से देखता है वा जिन (**गायत्रस्य**) गायत्री छन्द से अच्छे प्रकार से साधे हुए ऋग्वेद की उत्तेजना से (**तिस्रः, समिधः**) अच्छे प्रकार प्रज्वलित तीन पदार्थों को अर्थात् भूत, भविष्यत्, वर्त्तमान तीनों काल के सुखों को (**आहुः**) कहते हैं (**ततः**) उनसे (**मह्ना**) बड़े (**महित्वा**) प्रशंसनीय भाव से (**प्र, रिरिचे**) अलग होता है अर्थात् अलग गिना जाता है, वह सबको पूजने योग्य है॥ २५॥

भावार्थः-जब ईश्वर ने जगत् बनाया तभी नदी और समुद्र आदि बनाये। जैसे सूर्य आकर्षण से भूगोलों को धारण करता है, वैसे सूर्य आदि जगत् को ईश्वर धारण करता है। जो सब जीवों के समस्त पाप पुण्यरूपी कर्म्मों को जान के फलों को देता है, वह ईश्वर सब पदार्थों से बड़ा है॥ २५॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

उप॑ ह्वये सु॒दघा॑म् धे॒नुमे॒तां सु॒हस्तो॑ गो॒धुगु॒त दो॑हदेनाम्।
श्रेष्ठं॑ स॒वं स॑वि॒ता सा॑विषन्नो॒ऽभीद्धो॑ घ॒र्मस्तदु॒ षु प्र वो॑चम्॥ २६॥

उप॑। ह्व॒ये॒। सु॒ऽदुघा॑म्। धे॒नुम्। ए॒ताम्। सु॒ऽहस्तः॑। गो॒ऽधुक्। उ॒त। दो॒ह॒त्। ए॒ना॒म्। श्रेष्ठ॑म्। स॒वम्। स॒वि॒ता। सा॒वि॒ष॒त्। नः॒। अ॒भि॒ऽई॒द्धः॒। घ॒र्मः॒। तत्। ऊ॒म् इति॑। सु। प्र। वो॒च॒म्॥ २६॥

पदार्थः-(**उप**) (**ह्वये**) स्वीकरोमि (**सुदुघाम्**) सुष्ठु कामप्रपूरिकाम् (**धेनुम्**) दुग्धदात्री गोरूपाम् (**एताम्**) (**सुहस्तः**) शोभनौ हस्तौ यस्य सः (**गोधुक्**) यो गां दोग्धि (**उत**) अपि (**दोहत्**) दोग्धि (**एनाम्**) विद्याम् (**श्रेष्ठम्**) उत्तमम् (**सवम्**) ऐश्वर्यम् (**सविता**) ऐश्वर्यप्रदः (**साविषत्**) उत्पादयेत् (**नः**) अस्मभ्यम् (**अभीद्धः**) सर्वतः प्रदीप्तः (**घर्मः**) प्रतापः (**तत्**) पूर्वोक्तं सर्वम् (**उ**) (**सु**) (**प्र**) (**वोचम्**) उपदिशेयम्॥ २६॥

अन्वयः-यथा सुहस्तो गोधुगहमेतां सुदुघां धेनुमुपह्वये। उताप्येनां भवानपि दोहत्। यं श्रेष्ठं सवं सविता नोऽस्मभ्यं साविषद् यथाऽभीद्धो घर्मो वर्षाः करोति तदु यथाहं सु प्रवोचं तथा त्वमप्येतत्सुप्रवोचेः॥ २६॥

भावार्थः-अत्र रूपकालङ्कारः। अध्यापका विद्वांसः पूर्णविद्यां वाणीं प्रदद्युः येनोत्तममैश्वर्यं शिष्याः प्राप्नुयुः। यथा सविता सर्वं जगत् प्रकाशयति तथोपदेशकाः सर्वा विद्याः प्रकाशयेयुः॥ २६॥

पदार्थः-जैसे (**सुहस्तः**) सुन्दर जिसके हाथ और (**गोधुक्**) गौ को दुहता हुआ मैं (**एताम्**) इस (**सुदुघाम्**) अच्छे दुहाती अर्थात् कामों को पूरा करती हुई (**धेनुम्**) दूध देनेवाली गौरूप विद्या को (**उप, ह्वये**) स्वीकार करूं (**उत**) और (**एनाम्**) इस विद्या को आप भी (**दोहत्**) दुहते वा जिस (**श्रेष्ठम्**) उत्तम (**सवम्**) ऐश्वर्य को (**सविता**) ऐश्वर्य का देनेवाला (**नः**) हमारे लिये (**साविषत्**) उत्पन्न करे वा जैसे (**अभीद्धः**) सब ओर से प्रदीप्त अर्थात् अति तपता हुआ (**घर्मः**) घाम वर्षा करता है (**तदु**) उसी सबको जैसे मैं (**सु, प्र, वोचम्**) अच्छे प्रकार कहूं, वैसे तुम भी इसको अच्छे प्रकार कहो॥ २६॥

भावार्थः-इस मन्त्र में रूपकालङ्कार है। अध्यापक विद्वान् जन पूरी विद्या से भरी हुई वाणी को अच्छे प्रकार देवें, जिससे उत्तम ऐश्वर्य को शिष्य प्राप्त हों। जैसे सविता समस्त जगत् को प्रकाशित करता है, वैसे उपदेशक लोग सब विद्याओं को प्रकाशित करें॥ २६॥

अथ गोः पृथिव्याश्च विषयमाह॥

अब गौ और पृथिवी के विषय को अगले मन्त्र में कहते हैं॥

हि॒ङ्कृ॒ण्व॒ती व॑सु॒पत्नी॒ वसू॑नां व॒त्समि॒च्छन्ती॒ मन॑सा॒भ्यागा॑त्।
दु॒हाम॒श्विभ्यां॒ पयो॑ अ॒घ्न्येयं सा व॑र्धतां महते सौभ॑गाय॥ २७॥

हिङ्ऽकृण्वती। वसुऽपत्नी। वसूनाम्। वत्सम्। इच्छन्ती। मनसा। अभि। आ। अगात्। दुहाम्। अश्विऽभ्याम्। पयः। अघ्न्या। इयम्। सा। वर्धताम्। महते। सौभगाय॥ २७॥

पदार्थः-(**हिङ्कृण्वती**) हिमिति शब्दयन्ती (**वसुपत्नी**) वसूनां पालिका (**वसूनाम्**) अग्न्यादीनाम् (**वत्सम्**) (**इच्छन्ती**) (**मनसा**) (**अभि**) (**आ**) (**अगात्**) अभ्यागच्छति (**दुहाम्**) (**अश्विभ्याम्**) सूर्यवायुभ्याम् (**पयः**) जलं दुग्धं वा (**अघ्न्या**) हन्तुमयोग्या (**इयम्**) (**सा**) (**वर्द्धताम्**) (**महते**) (**सौभगाय**) शोभनानामैश्वर्याणां भावाय॥ २७॥

अन्वयः-यथा हिङ्कृण्वती मनसा वत्समिच्छन्तीयमघ्न्या गौरभ्यागात्। याऽश्विभ्यां पयो दुहां वर्त्तमानाभूरस्ति सा वसूनां वसुपत्नी महते सौभगाय वर्द्धताम्॥ २७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पृथिवी महदैश्वर्यं वर्धयति तथा गावो महत्सुखं प्रयच्छन्ति, तस्मादेताः केनापि कदाचिन्नैव हिंस्याः॥ २७॥

पदार्थः-जैसे (**हिङ्कृण्वती**) हिंकारती और (**मनसा**) मन से (**वत्सम्**) बछड़े को (**इच्छन्ती**) चाहती हुई (**इयम्**) यह (**अघ्न्या**) मारने को न योग्य गौ (**अभि, आ, अगात्**) सब ओर से आती वा जो (**अश्विभ्याम्**) सूर्य और वायु से (**पयः**) जल वा दूध को (**दुहाम्**) दुहते हुए पदार्थों में वर्त्तमान पृथिवी है (**सा**) वह (**वसूनाम्**) अग्नि आदि वसुसञ्ज्ञकों में (**वसुपत्नी**) वसुओं की पालनवाली (**महते**) अत्यन्त (**सौभगाय**) सुन्दर ऐश्वर्य के लिये (**वर्द्धताम्**) बढ़े, उन्नति को प्राप्त हो॥ २७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पृथिवी महान् ऐश्वर्य को बढ़ाती है, वैसे गौयें अत्यन्त सुख देती हैं। इससे ये गौयें कभी किसी को मारनी न चाहियें॥ २७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः॥ २८॥

गौः। अमीमेत्। अनु। वत्सम्। मिषन्तम्। मूर्धानम्। हिङ्। अकृणोत्। मातवै। ऊम् इति। सृक्वाणम्। घर्मम्। अभि। वावशाना। मिमाति। मायुम्। पयते। पयःऽभिः॥ २८॥

पदार्थः-(**गौः**) पृथिवी धेनुर्वा (**अमीमेत्**) मिनाति (**अनु**) (**वत्सम्**) (**मिषन्तम्**) शब्दयन्तम् (**मूर्द्धानम्**) मस्तकम् (**हिङ्**) हिंकारम् (**अकृणोत्**) करोति (**मातवै**) मानाय (**उ**) वितर्के (**सृक्वाणम्**) सृजन्तं दिनम् (**घर्मम्**) आतपम् (**अभि**) (**वावशाना**) भृशं कामयमाना (**मिमाति**) मिमीते। अत्र व्यत्ययेन परस्मैपदम्। (**मायुम्**) वाणीम्। **मायुरिति वाङ्नामसु पठितम्।** (निघ०१.११) (**पयते**) गच्छति (**पयोभिः**) जलैस्सह॥ २८॥

अन्वयः-हे मनुष्या! यथा वावशाना गौर्मिषन्तं वत्सं मूर्द्धानमनु हिङ्ङकृणोत् मातवा उ वत्सस्य दुःखममीमेत् तथा पयोभिस्सह वर्त्तमाना गौः पृथिवी घर्मं सृक्वाणं दिनं मायुं च कुर्वती पयते सुखमभिमिमाति॥ २८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा गा अनुवत्सा वत्साननु गावो गच्छन्ति तथा पृथिवीरनुपदार्थाः पदार्थाननु पृथिव्यो गच्छन्ति॥ २८॥

पदार्थः-हे मनुष्यो! जैसे **(वावशाना)** निरन्तर कामना करती हुई **(गौः)** गो **(मिषन्तम्)** मिमयाते हुए **(वत्सम्)** बछड़े को तथा **(मूर्द्धानम्)** मूंड़ को **(अनु, हिङ्, अकृणोत्)** लखकर हिंकारती अर्थात् मूंड़ चाटती हुई हिंकारती है और **(मातवै)** मान करने **(उ)** ही के लिये उस बछड़े के दुःख को **(अमीमेत्)** नष्ट करती, वैसे **(पयोभिः)** जलों के साथ वर्त्तमान पृथिवी **(घर्मम्)** आतप को **(सृक्वाणम्)** रचते हुए दिन को और **(मायुम्)** वाणी को प्रसिद्ध करती हुई **(पयते)** अपने भचक्र में जाती है और सुख का **(अभि, मिमाति)** सब ओर से मान करती अर्थात् तौल करती है॥ २८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे गौओं के पीछे बछड़े और बछड़ों के पीछे गौयें जातीं, वैसे पृथिवियों के पीछे पदार्थ और पदार्थों के पीछे पृथिवी जाती हैं॥ २८॥

पुनर्भूमिविषयमाह॥

फिर भूमि के विषय में कहा है॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत॥ २९॥

अयम्। सः। शिङ्क्ते। येन। गौः। अभिऽवृता। मिमाति। मायुम्। ध्वसनौ। अधि। श्रिता। सा। चित्तिऽभिः। नि। हि। चकार। मर्त्यम्। विऽद्युत्। भवन्ती। प्रति। वव्रिम्। औहत॥ २९॥

पदार्थः-**(अयम्)** **(सः)** **(शिङ्क्ते)** अव्यक्तं शब्दं करोति **(येन)** **(गौः)** पृथिवी **(अभीवृता)** सर्वतो वायुना आवृता **(मिमाति)** गच्छति **(मायुम्)** परिमितं मार्गम् **(ध्वसनौ)** अधऊर्ध्वमध्यपतनार्थे परिधौ **(अधि)** उपरि **(श्रिता)** **(सा)** **(चित्तिभिः)** चयनैः **(नि)** **(हि)** किल **(चकार)** करोति **(मर्त्यम्)** मरणधर्माणम् **(विद्युत्)** तडित् **(भवन्ती)** वर्त्तमाना **(प्रति)** **(वव्रिम्)** स्वकीयं रूपम् **(औहत)** ऊहते॥ २९॥

अन्वयः-सोऽयं वत्सो मेघो भूमिं शिङ्क्ते येन ध्वसनावधि श्रिताऽभीवृता गौर्भूमिर्मायुं प्रतिमिमाति, सा चित्तिभिर्मर्त्यं चकार। तत्र हि भवन्ती विद्युद्वव्रिं च न्यौहत॥ २९॥

भावार्थः-यथा पृथिव्याः सकाशादुत्पद्याऽन्तरिक्षे बहुलो भूत्वा मेघः पृथिव्यां वृक्षादिकं संसिच्य वर्द्धयति, तथोर्वी सर्वं वर्द्धयति, तत्रस्था विद्युद्रूपं प्रकाशयति। यथा शिल्पी क्रमेण चित्या विज्ञानेन गृहादिकं निर्मिमीते तथा परमेश्वरेणेयं सृष्टिर्निर्मिता॥ २९॥

पदार्थः-(**सः**) सो (**अयम्**) यह बछड़े के समान मेघ भूमि को लख (**शिङ्क्ते**) गर्जन का अव्यक्त शब्द करता है कौन कि (**येन**) जिससे (**ध्वसनौ**) ऊपर, नीचे और बीच में जाने को परकोटा उसमें (**अधि, श्रिता**) धरी हुई (**अभीवृता**) सब ओर पवन से आवृत (**गौः**) पृथिवी (**मायुम्**) परिमित मार्ग को (**प्रति, मिमाति**) प्रति जाती है (**सा**) वह (**चित्तिभिः**) परमाणुओं के समूहों से (**मर्त्यम्**) मरणधर्मा मनुष्य को (**चकार**) करती है, उस पृथिवी (**हि**) ही में (**भवन्ती**) वर्त्तमान (**विद्युत्**) बिजुली (**वव्रिम्**) अपने रूप को (**नि, औहत**) निरन्तर तर्क-वितर्क से प्राप्त होती है॥ २९॥

भावार्थः-जैसे पृथिवी से उत्पन्न हो उठकर अन्तरिक्ष में बढ़ फैल मेघ पृथिवी में वृक्षादि को अच्छे सींच उनको बढ़ाता है, वैसे पृथिवी सबको बढ़ाती है और पृथिवी में जो बिजुली है, वह रूप को प्रकाशित करती। जैसे शिल्पी जन क्रम से किसी पदार्थ के इकट्ठा करने और विज्ञान से घर आदि बनाता है, वैसे परमेश्वर ने यह सृष्टि बनाई है॥ २९॥

पुनरीश्वर विषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम्।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः॥ ३०॥ १९॥

अनत्। शये। तुरऽगातु। जीवम्। एजत्। ध्रुवम्। मध्ये। आ। पस्त्यानाम्। जीवः। मृतस्य। चरति। स्वधाभिः। अमर्त्यः। मर्त्येन्। सऽयोनि॥ ३०॥

पदार्थः-(**अनत्**) प्राणत् (**शये**) शेते। अत्र **लोपस्त आत्मनेपदेष्वि**ति तलोपः। (**तुरगातु**) सद्योगमनम् (**जीवम्**) (**एजत्**) कंपयन् (**ध्रुवम्**) (**मध्ये**) (**आ**) (**पस्त्यानाम्**) गृहाणां जीवशरीराणां वा (**जीवः**) (**मृतस्य**) मरणस्वभावस्य (**चरति**) गच्छति (**स्वधाभिः**) अन्नादिभिः (**अमर्त्यः**) अनादित्वान्मृत्युधर्मरहितः (**मर्त्येन**) मरणधर्मेण शरीरेण (**सयोनिः**) समानस्थानः॥ ३०॥

अन्वयः-यद्ब्रह्म तुरगात्वनज्जीवमेजत्पस्त्यानां मध्ये ध्रुवं सच्छये यत्रामर्त्यो जीवः स्वधाभिर्मर्त्येन सह सयोनिस्सन्मृतस्य जगतो मध्य आचरति तत्र सर्वं जगद्वसतीति वेद्यम्॥ ३०॥

भावार्थः-अत्र रूपकालङ्कारः। यश्चलत्स्वचलोऽनित्येषु नित्यो व्याप्येषु व्यापकः परमेश्वरोऽस्ति। नहि तद्व्याप्तया विनाऽतिसूक्ष्ममपि वस्त्वस्ति तस्मात्सर्वैर्जीवैरयमन्तर्यामिरूपेण स्थितो नित्यमुपासनीयः॥ ३०॥

पदार्थः-जो ब्रह्म (**तुरगातु**) शीघ्र गमन को (**अनत्**) पुष्ट करता हुआ (**जीवम्**) जीव को (**एजत्**) कंपाता और (**पस्त्यानाम्**) घरों के अर्थात् जीवों के शरीर के (**मध्ये**) बीच (**ध्रुवम्**) निश्चल होता हुआ (**शये**) सोता है। जहाँ (**अमर्त्यः**) अनादित्व से मृत्युधर्मरहित (**जीवः**) जीव (**स्वधाभिः**) अन्नादि और

(मर्त्येन) मरणधर्मा शरीर के साथ **(सयोनिः)** एक स्थानी होता हुआ **(मृतस्य)** मरण स्वभाववाले जगत् के बीच **(आ, चरति)** आचरण करता है, उस ब्रह्म में सब जगत् वसता है, यह जानना चाहिये॥३०॥

भावार्थः-इस मन्त्र में रूपकालङ्कार है। जो चलते हुए पदार्थों में अचल, अनित्य पदार्थों में नित्य और व्याप्य पदार्थों में व्यापक परमेश्वर है, उसकी व्याप्ति के विना सूक्ष्म से सूक्ष्म वस्तु भी नहीं है। इससे सब जीवों को जो यह अन्तर्यामिरूप से स्थित हो रहा है, वह नित्य उपासना करने योग्य है॥३०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अप॑श्यं गो॒पामनि॑पद्यमान॒मा च॒ परा॑ च प॒थिभि॒श्चर॑न्तम्।
स स॒ध्रीची॒: स विषू॑ची॒र्वसा॑न॒ आ व॑रीव॒र्ति॒ भुव॑नेष्व॒न्तः॥३१॥

अप॑श्यम्। गो॒पाम्। अनि॑ऽपद्यमानम्। आ। च॒। परा॑। च॒। प॒थिऽभि॑:। चर॑न्तम्। सः। स॒ध्रीची॑:। सः। विषू॑ची:। वसा॑नः। आ। व॒रीव॒र्ति॒। भुव॑नेषु। अ॒न्तरिति॑॥३१॥

पदार्थः-(**अपश्यम्**) पश्येयम् (**गोपाम्**) सर्वरक्षकम् (**अनिपद्यमानम्**) यो मनआदीनीन्द्रियाणि न निपद्यते प्राप्नोति तम् (**आ**) (**च**) (**परा**) (**च**) (**पथिभिः**) मार्गैः (**चरन्तम्**) (**सः**) (**सध्रीचीः**) सह गच्छन्तीः (**सः**) (**विषूचीः**) विविधा गतीः (**वसानः**) आच्छादयन् (**आ**) (**वरीवर्त्ति**) भृशमावर्त्तते (**भुवनेषु**) लोकलोकान्तरेषु (**अन्तः**) मध्ये॥३१॥

अन्वयः-अहं गोपामनिपद्यमानं पथभिरा च परा च चरन्तमपश्यं स सध्रीचीः स विषूचीर्वसानो भुवनेष्वन्तरावरीवर्त्ति॥३१॥

भावार्थः-नहि सर्वस्य द्रष्टारं परमेश्वरं द्रष्टुं जीवाः शक्नुवन्ति परमेश्वरश्च सर्वाणि याथातथ्येन पश्यति। यथा वस्त्रादिभिरावृतः पदार्थो न दृश्यते तथा जीवोऽपि सूक्ष्मत्वान्न दृश्यते। इमे जीवाः कर्मगत्या सर्वेषु लोकेषु भ्रमन्ति। एषामन्तर्बहिश्च परमात्मा स्थितस्सन् पापपुण्यफलदानरूपन्यायेन सर्वान् सर्वत्र जन्मानि ददाति॥३१॥

पदार्थः-मैं (**गोपाम्**) सबकी रक्षा करने (**अनिपद्यमानम्**) मन आदि इन्द्रियों को न प्राप्त होने और (**पथिभिः**) मार्गों से (**आ, च**) आगे और (**परा, च**) पीछे (**चरन्तम्**) प्राप्त होनेवाले परमात्मा वा विचरते हुए जीव को (**अपश्यम्**) देखता हूँ (**सः**) वह जीवात्मा (**सध्रीचीः**) साथ प्राप्त होती हुई गतियों को (**सः**) वह जीव और (**विषूचीः**) नाना प्रकार की कर्मानुसार गतियों को (**वसानः**) ढांपता हुआ (**भुवनेषु**) लोकलोकान्तरों के (**अन्तः**) बीच (**आ, वरीवर्त्ति**) निरन्तर अच्छे प्रकार वर्त्तमान है॥३१॥

भावार्थः-सब के देखनेवाले परमेश्वर के देखने को जीव समर्थ नहीं और परमेश्वर सबको यथार्थ भाव से देखता है। जैसे वस्त्रों आदि से ढंपा हुआ पदार्थ नहीं देखा जाता, वैसे जीव भी सूक्ष्म होने से

नहीं देखा जाता। ये जीव कर्मगति से सब लोकों में भ्रमते हैं। इनके भीतर-बाहर परमात्मा स्थित हुआ पापपुण्य के फल देनेरूप न्याय से सबको सर्वत्र जन्म देता है॥३१॥

पुनर्जीवविषयमात्रमाह॥

फिर जीव विषयमात्र को कहा है॥

य ईं॑ च॒कार॒ न सो अ॒स्य वे॑द॒ य ईं॑ द॒दर्श॒ हिरु॒गिन्नु तस्मा॑त्।
स मा॒तुर्योना॒ परि॑वीतो अ॒न्तर्ब॑हु॒प्रजा निर्ऋ॑ति॒मा वि॑वेश॥३२॥

यः। ईम्। चकार। नः। सः। अस्य। वेद। यः। ईम्। ददर्श। हिरुक्। इत्। नु। तस्मात्। सः। मातुः। योना। परिऽवीतः। अन्तः। बहुऽप्रजाः। निःऽऋतिम्। आ। विवेश॥३२॥

पदार्थः-(**यः**) जीव (**ईम्**) क्रियाम् (**चकार**) करोति (**न**) (**सः**) (**अस्य**) जीवस्य स्वरूपम् (**वेद**) (**यः**) (**ईम्**) सर्वां क्रियाम् (**ददर्श**) पश्यति (**हिरुक्**) पृथक् (**इत्**) एव (**नु**) सद्यः (**तस्मात्**) (**सः**) (**मातुः**) जनन्याः (**योना**) गर्भाशये (**परिवीतः**) परित आवृतः (**अन्तः**) मध्ये (**बहुप्रजाः**) बहुजन्मा (**निर्ऋतिम्**) भूमिम् (**आ**) (**विवेश**) आविशति॥३२॥

अन्वयः-यो जीव ईं चकार सोऽस्य स्वरूपं न वेद य ईं ददर्श स्वस्वरूपम् पश्यति स तस्माद्धिरुक् सन्मातुर्योनान्तः परिवीतो बहुप्रजा निर्ऋतिमिन्वाविवेश॥३२॥

भावार्थः-ये जीवाः कर्ममात्रं कुर्वन्ति नोपासनां ज्ञानं च प्राप्नुवन्ति ते स्वस्वरूपमपि न जानन्ति। ये च कर्मोपासनाज्ञानेषु निपुणास्ते स्वस्वरूपं परमात्मानश्च वेदितुमर्हन्ति। जीवानां प्राग्जन्मनामादिरुत्तरेषामन्तश्च न विद्यते। यदा शरीरं त्यजन्ति तदाऽऽकाशस्था भूत्वा गर्भे प्रविश्य जनित्वा पृथिव्यां चेष्टावन्तो भवन्ति॥३२॥

पदार्थः-(**यः**) जो जीव (**ईम्**) क्रियामात्र (**चकार**) करता है (**सः**) वह (**अस्य**) इस अपने रूप को (**न**) नहीं (**वेद**) जानता है (**यः**) जो (**ईम्**) समस्त क्रिया को (**ददर्श**) देखता और अपने रूप को जानता है (**सः**) वह (**तस्मात्**) इससे (**हिरुक्**) अलग होता हुआ (**मातुः**) माता के (**योना**) गर्भाशय के (**अन्तः**) बीच (**परिवीतः**) सब ओर से ढंपा हुआ (**बहुप्रजाः**) बहुत बार जन्म लेनेवाला (**निर्ऋतिम्**) भूमि को (**इत्**) ही (**नु**) शीघ्र (**आ, विवेश**) प्रवेश करता है॥३२॥

भावार्थः-जो जीव कर्ममात्र करते किन्तु उपासना और ज्ञान को नहीं प्राप्त होते है, वे अपने स्वरूप को भी नहीं जानते। और जो कर्म, उपासना और ज्ञान में निपुण हैं, वे अपने स्वरूप और परमात्मा के जानने को योग्य हैं। जीवों के अगले जन्मों का आदि और पीछे अन्त नहीं है। जब शरीर को छोड़ते हैं, तब आकाशस्थ हो गर्भ में प्रवेश कर और जन्म पाकर पृथिवी में चेष्टा क्रियावान् होते हैं॥३२॥

पुनः प्रकारान्तरेण तमेव विषयमाह॥

फिर प्रकारान्तर से उसी विषय को अगले मन्त्र में कहा है॥

द्यौर्मे॑ पि॒ता ज॑नि॒ता नाभि॒रत्र॒ बन्धु॑र्मे मा॒ता पृ॑थि॒वी म॒हीयम्।
उ॒त्ता॒नयो॑श्चम्वो॒३॑र्योनि॑र॒न्तरत्रा॑ पि॒ता दु॑हि॒तुर्गर्भ॒माधा॑त्॥ ३३॥

द्यौः। मे॒। पि॒ता। ज॒नि॒ता। नाभिः॑। अत्र॑। बन्धुः॑। मे॒। मा॒ता। पृ॒थि॒वी। म॒ही। इ॒यम्। उ॒त्ता॒नयोः॑। च॒म्वोः॑। योनिः॑। अ॒न्तः। अत्र॑। पि॒ता। दु॒हि॒तुः। गर्भ॑म्। आ। अ॒धा॒त्॥ ३३॥

पदार्थः-(**द्यौः**) प्रकाशमानः सूर्यो विद्युदिव (**मे**) मम (**पिता**) (**जनिता**) (**नाभिः**) बन्धनम् (**अत्र**) अस्मिन् जन्मनि (**बन्धुः**) भ्रातृवत् प्राणः (**मे**) मम (**माता**) मान्यप्रदा जननी (**पृथिवी**) भूमिरिव (**मही**) महती (**इयम्**) (**उत्तानयोः**) उपरिस्थयोरूर्ध्वं स्थापितयोः पृथिवीसूर्ययोः (**चम्वोः**) सेनयोरिव (**योनिः**) गृहम् (**अन्तः**) मध्ये (**अत्र**) अस्मिन्। अत्र **ऋचि तुनुघ०** इति दीर्घः। (**पिता**) सूर्यः (**दुहितुः**) उषसः (**गर्भम्**) किरणाख्यं वीर्यम् (**आ**) (**अधात्**) समन्ताद्दधाति॥ ३३॥

अन्वयः-हे विद्वन्! यत्र पिता दुहितुर्गर्भमाधात् तत्र चम्वोरिव स्थितयोरुत्तानयोरन्तो मम योनिरस्ति। अत्र मे जनिता पिता द्यौरिवाऽत्र मे नाभिर्बन्धुरियं मही पृथिवीव माता वर्त्तत इति वेद्यम्॥ ३३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। भूमिसूर्यौ सर्वेषां मातापितृबन्धुवद्वर्त्तेते इदमेवाऽस्माकं निवासस्थानं यथा सूर्यः स्वस्मादुत्पन्नाया उषसो मध्ये किरणाख्यं वीर्यं संस्थाप्य दिनं पुत्रं जनयति तथैव पितरौ प्रकाशमानं पुत्रमुत्पादयेताम्॥ ३३॥

पदार्थः-हे विद्वान्! जहाँ (**पिता**) पितृस्थानी सूर्य (**दुहितुः**) कन्यारूप उषा प्रभात वेला के (**गर्भम्**) किरणरूपी वीर्य को (**आ, अधात्**) स्थापित करता है, वहाँ (**चम्वोः**) दो सेनाओं के समान स्थित (**उत्तानयोः**) उपरिस्थ ऊंचे स्थापित किये हुए पृथिवी और सूर्य के (**अन्तः**) बीच मेरा (**योनिः**) घर है (**अत्र**) इस जन्म में (**मे**) मेरा (**जनिता**) उत्पन्न करनेवाला (**पिता**) पिता (**द्यौः**) प्रकाशमान सूर्य बिजुली के समान तथा (**अत्र**) यहाँ (**मे**) मेरा (**नाभिः**) बन्धनरूप (**बन्धुः**) भाई के समान प्राण और (**इयम्**) यह (**मही**) बड़ी (**पृथिवी**) भूमि के समान (**माता**) मान देनेवाली माता वर्त्तमान है, यह जानना चाहिये॥ ३३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। भूमि और सूर्य सबके माता-पिता और बन्धु के समान वर्त्तमान हैं, यही हमारा निवासस्थान है। जैसे सूर्य अपने से उत्पन्न हुई उषा के बीच किरणरूपी वीर्य को संस्थापन कर दिनरूपी पुत्र को उत्पन्न करता है, वैसे माता-पिता प्रकाशमान पुत्र को उत्पन्न करें॥ ३३॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

पृ॒च्छामि॑ त्वा॒ पर॒मन्तं॑ पृथि॒व्याः पृ॒च्छामि॒ यत्र॒ भुव॑नस्य॒ नाभि॑:।
पृ॒च्छामि॑ त्वा॒ वृष्णो॒ अश्व॑स्य॒ रेत॑: पृ॒च्छामि॑ वा॒चः पर॑मं॒ व्यो॑म॥ ३४॥

पृ॒च्छामि॑। त्वा॒। पर॑म्। अन्त॑म्। पृ॒थि॒व्याः। पृ॒च्छामि॑। यत्र॑। भुव॑नस्य। नाभि॑:। पृ॒च्छामि॑। त्वा॒। वृष्णः। अश्व॑स्य। रेत॑:। पृ॒च्छामि॑। वा॒चः। पर॑मम्। विऽओ॑म॥ ३४॥

पदार्थः-(**पृच्छामि**) (**त्वा**) त्वाम् (**परम्**) (**अन्तम्**) (**पृथिव्याः**) (**पृच्छामि**) (**यत्र**) (**भुवनस्य**) लोकसमूहस्य (**नाभिः**) बन्धनम् (**पृच्छामि**) (**त्वा**) (**वृष्णः**) वीर्यवर्षकस्य (**अश्वस्य**) अश्ववद्वीर्यवतः (**रेतः**) वीर्यम् (**पृच्छामि**) (**वाचः**) (**परमम्**) प्रकृष्टम् (**व्योम**) व्यापकमवकाशम्॥ ३४॥

अन्वयः-हे विद्वँस्त्वा पृथिव्याः परमन्तं पृच्छामि। यत्र भुवनस्य नाभिरस्ति तं पृच्छामि। वृष्णोऽश्वस्य रेतस्त्वा पृच्छामि। वाचः परमं व्योम त्वां पृच्छामि॥ ३४॥

भावार्थः-अत्र चत्वारः प्रश्नाः सन्ति तदुत्तराण्युत्तरत्र मन्त्रे वर्त्तन्ते, इत्थमेव जिज्ञासुभिर्विद्वांसो नित्यं प्रष्टव्याः॥ ३४॥

पदार्थः-हे विद्वान्! (**त्वा**) आपको (**पृथिव्याः**) पृथिवी के (**परम्**) पर (**अन्तम्**) अन्त को (**पृच्छामि**) पूछता हूँ, (**यत्र**) जहाँ (**भुवनस्य**) लोकसमूह का (**नाभिः**) बन्धन है, उसको (**पृच्छामि**) पूछता हूँ, (**वृष्णः**) वीर्यवान् वर्षानेवाले (**अश्वस्य**) घोड़ों के समान वीर्यवान् के (**रेतः**) वीर्य को (**त्वा**) आपको (**पृच्छामि**) पूछता हूँ और (**वाचः**) वाणी के (**परमम्**) परम (**व्योम**) व्यापक अवकाश अर्थात् आकाश को आपको (**पृच्छामि**) पूछता हूँ॥ ३४॥

भावार्थः-इस मन्त्र में चार प्रश्न हैं और उनके उत्तर अगले मन्त्र में वर्त्तमान हैं। ऐसे ही जिज्ञासुओं को विद्वान् जन नित्य पूछने चाहिये॥ ३४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒यं वेदि॒: परो॒ अन्त॑: पृथि॒व्या अ॒यं य॒ज्ञो भुव॑नस्य॒ नाभि॑:।
अ॒यं सोमो॒ वृष्णो॒ अश्व॑स्य॒ रेतो॑ ब्र॒ह्मायं वा॒चः पर॒मं व्यो॑म॥ ३५॥ २०॥

इ॒यम्। वेदि॑:। परः॑। अन्त॑:। पृ॒थि॒व्याः। अ॒यम्। य॒ज्ञः। भुव॑नस्य। नाभि॑:। अ॒यम्। सोम॑:। वृष्णः॑। अश्व॑स्य। रेत॑:। ब्र॒ह्मा। अ॒यम्। वा॒चः। पर॒मम्। विऽओ॑म॥ ३५॥

पदार्थः-(**इयम्**) (**वेदिः**) विदन्ति शब्दान् यस्यां साऽऽकाशवायुस्वरूपा (**परः**) परः (**अन्तः**) भागः (**पृथिव्याः**) भूमेः (**अयम्**) (**यज्ञः**) यष्टुं संगन्तुमर्हः सूर्यः (**भुवनस्य**) भूगोलसमूहस्य (**नाभिः**)

आकर्षणेन बन्धनम् **(अयम्)** **(सोमः)** सोमलतादिरसश्चन्द्रमा वा **(वृष्णः)** वर्षकस्य **(अश्वस्य)** **(रेतः)** वीर्यमिव **(ब्रह्मा)** चतुर्वेदविज्जनश्चतुर्णां वेदानां प्रकाशकः परमात्मा वा **(अयम्)** **(वाचः)** वाण्याः **(परमम्)** **(व्योम)** अवकाशः॥ ३५॥

अन्वयः-हे मनुष्या! यूयं पृथिव्याः परोऽन्तरियं वेदिरयं यज्ञो भुवनस्य नाभिरयं सोमो वृष्णोऽश्वस्य रेत इवायं ब्रह्मा वाचः परमं व्योमास्ति तानि यथावद्वित्त॥ ३५॥

भावार्थः-पूर्वमन्त्रस्थानां प्रश्नानामिह क्रमेणोत्तराणि वेदितव्यानि पृथिव्या अभित आकाशवायुरेकैकस्य ब्रह्माण्डस्य मध्ये सूर्यो वीर्योत्पादिका ओषधयो पृथिव्या मध्ये विद्यावधिः सर्ववेदाध्ययनं परमात्मविज्ञानं वास्तीति निश्चेतव्यम्॥ ३५॥

पदार्थः-हे मनुष्यो! तुम **(पृथिव्याः)** भूमि का **(परः)** पर **(अन्तः)** भाग **(इयम्)** यह **(वेदिः)** जिसमें शब्दों को जानें वह आकाश और वायु रूप वेदि **(अयम्)** यह **(यज्ञः)** यज्ञ **[**सूर्य**]** **(भुवनस्य)** भूगोल समूह का **(नाभिः)** आकर्षण से बन्धन, **(अयम्)** यह **(सोमः)** सोमलतादि रस वा चन्द्रमा **(वृष्णः)** वर्षा करने और **(अश्वस्य)** शीघ्रगामी सूर्य के **(रेतः)** वीर्य के समान और **(अयम्)** यह **(ब्रह्मा)** चारों वेदों का प्रकाश करनेवाला विद्वान् वा परमात्मा **(वाचः)** वाणी का **(परमम्)** उत्तम **(व्योम)** अवकाश है, उनको यथावत् जानो॥ ३५॥

भावार्थः-पिछले मन्त्र में कहे हुए प्रश्नों के यहाँ क्रम से उत्तर जानने चाहिये। पृथिवी के चारों और आकाशयुक्त वायु, एक-एक ब्रह्माण्ड के बीच सूर्य और बल उत्पन्न करनेवाली ओषधियाँ, तथा पृथिवी के बीच विद्या की अवधि समस्त वेदों का पढ़ना और परमात्मा का उत्तम ज्ञान है, यह निश्चय करना चाहिये॥ ३५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः॥ ३६॥

सप्त। अर्धऽगर्भाः। भुवनस्य। रेतः। विष्णोः। तिष्ठन्ति। प्रऽदिशा। विऽधर्मणि। ते। धीतिऽभिः। मनसा। ते। विपःऽचितः। परिऽभुवः। परि। भवन्ति। विश्वतः॥ ३६॥

पदार्थः-**(सप्त)** **(अर्द्धगर्भाः)** अपूर्णगर्भा महत्तत्त्वाहङ्कारपञ्चभूतसूक्ष्मावयवाः **(भुवनस्य)** संसारस्य **(रेतः)** वीर्यम् **(विष्णोः)** व्यापकस्य परमेश्वरस्य **(तिष्ठन्ति)** **(प्रदिशा)** आज्ञया **(विधर्मणि)** विरुद्धधर्मण्याकाशे **(ते)** **(धीतिभिः)** कर्मभिः **(मनसा)** **(ते)** **(विपश्चितः)** विदुषः **(परिभुवः)** परितस्सर्वतो विद्यासु भवन्ति **(परि)** **(भवन्ति)** **(विश्वतः)** सर्वतः॥ ३६॥

अन्वयः–ये सप्तार्द्धगर्भा भुवनस्य रेतो निर्माय विष्णोः प्रदिशा विधर्मणि तिष्ठन्ति, ते धीतिभिस्ते मनसा च परिभुवो विपश्चितो विश्वतः परिभवन्ति॥ ३६॥

भावार्थः–यानि महत्तत्त्वाऽहङ्कारौ पञ्चसूक्ष्माणि भूतानि च सप्त सन्ति तानि पञ्चीकृतानि सर्वस्य स्थूलस्य कारणानि सन्ति चेतनविरुद्धधर्मे जडेऽन्तरिक्षे सर्वाणि वसन्ति। ये यथावत्सृष्टिक्रमं जानन्ति ते विद्वांसः सर्वतः पूज्यन्ते, ये चैतं न जानन्ति ते सर्वतस्तिरस्कृता भवन्ति॥ ३६॥

पदार्थः–जो **(सप्त)** सात **(अर्द्धगर्भाः)** आधे गर्भरूप अर्थात् पञ्चीकरण को प्राप्त महत्तत्त्व, अहङ्कार, पृथिवी, अप्, तेज, वायु, आकाश के सूक्ष्म अवयवरूप शरीरधारी **(भुवनस्य)** संसार के **(रेतः)** बीज को उत्पन्न कर **(विष्णोः)** व्यापक परमात्मा की **(प्रदिशा)** आज्ञा से अर्थात् उसकी आज्ञारूप वेदोक्त व्यवस्था से **(विधर्मणि)** चेतन से विरुद्ध धर्मवाले आकाश में **(तिष्ठन्ति)** स्थित होते हैं **(ते)** वे **(धीतिभिः)** कर्म और **(ते)** वे **(मनसा)** विचार के साथ **(परिभुवः)** सब ओर से विद्या में कुशल **(विपश्चितः)** विद्वान् जन **(विश्वतः)** सब ओर से **(परि, भवन्ति)** तिरस्कृत करते अर्थात् उनके यथार्थ भाव के जानने को विद्वान् जन भी कष्ट पाते हैं॥ ३६॥

भावार्थः–जो महत्तत्त्व, अहङ्कार, पञ्चसूक्ष्मभूत सात पदार्थ हैं, वे पञ्चीकरण को प्राप्त हुए सब स्थूल जगत् के कारण हैं। चेतन से विरुद्ध धर्म्मवाले जड़रूप अन्तरिक्ष में सब वसते हैं। जो यथावत् सृष्टिक्रम को जानते हैं, वे विद्वान् जन सब ओर से सत्कार को प्राप्त होते हैं और जो इसको नहीं जानते, वे सब ओर से तिरस्कार को प्राप्त होते हैं॥ ३६॥

उक्तं प्रकारान्तरेणाह॥

पूर्वोक्त विषय को प्रकारान्तर से कहते हैं॥

न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः॥ ३७॥

न। वि। जानामि। यत्ऽइव। इदम्। अस्मि। निण्यः। सम्ऽनद्धः। मनसा। चरामि। यदा। मा। आ। अगन्। प्रथमऽजाः। ऋतस्य। आत्। इत्। वाचः। अश्नुवे। भागम्। अस्याः॥ ३७॥

पदार्थः–**(न)** निषेधे **(वि)** विशेषेण **(जानामि)** **(यदिव)** सङ्गतमिव **(इदम्)** जगत् **(अस्मि)** **(निण्यः)** अन्तर्हितः। अत्र वर्णव्यत्ययेन णत्वम्। **निण्य इति निर्णीतान्तर्हितनामसु पठितम्।** (निघं०३.२५) **(सन्नद्धः)** सम्यग्बद्धः **(मनसा)** अन्तःकरणेन **(चरामि)** गच्छामि **(यदा)** **(मा)** मां जीवम् **(आ)** **(अगन्)** समन्तात्प्राप्ताः **(प्रथमजाः)** प्रथमात् कारणाज्जाताः पूर्वोक्ता महत्तत्त्वादयः **(ऋतस्य)** सत्यस्य **(आत्)** अनन्तरम् **(इत्)** एव **(वाचः)** वाण्याः **(अश्नुवे)** प्राप्नोमि **(भागम्)** **(अस्याः)**॥ ३७॥

अन्वयः-यदा प्रथमजा मागन्नादिदृतस्यास्या वाचो भागमहमश्नुवे। यावदिदं प्राप्तो नास्मि तावदुक्तं यदिव न विजानामि मनसा संनद्धो निण्यश्चरामि॥ ३७॥

भावार्थः-अल्पज्ञाऽल्पशक्तिमत्त्वात् साधनैर्विना जीवः साध्यं ग्रहीतुं न शक्नोति। यदा श्रोत्रादीनि प्राप्नोति तदा वेदितुमर्हति। यावद्विद्यया सत्यं न जानाति तावदभिमानं कुर्वन् पशुरिव विचरति॥ ३७॥

पदार्थः-**(यदा)** जब **(प्रथमजाः)** उपादान कारण प्रकृति से उत्पन्न हुए पूर्वोक्त महत्तत्त्वादि **(मा)** मुझ जीव को **(आ, आगन्)** प्राप्त हुए अर्थात् स्थूल शरीरावस्था हुई **(आत्, इत्)** उसके अनन्तर ही **(ऋतस्य)** सत्य और **(अस्याः)** इस **(वाचः)** वाणी के **(भागम्)** भाग को विद्या विषय को मैं **(अश्नुवे)** प्राप्त होता हूँ। जब तक **(इदम्)** इस शरीर को प्राप्त नहीं **(अस्मि)** होता हूँ तब तक उस विषय को **(यदिव)** जैसे के वैसा **(न)** नहीं **(वि, जानामि)** विशेषता से जानता हूँ। किन्तु **(मनसा)** विचार से **(संनद्धः)** अच्छा बँधा हुआ **(निण्यः)** अन्तर्हित अर्थात् भीतर उस विचार को स्थिर किये **(चरामि)** विचरता हूँ॥

भावार्थः-अल्पज्ञता और अल्पशक्तिमत्ता के कारण साधनरूप इन्द्रियों के विना जीव सिद्ध करने योग्य वस्तु को नहीं ग्रहण कर सकता। जब श्रोत्रादि इन्द्रियों को प्राप्त होता है, तब जानने को योग्य होता है, जब तक विद्या से सत्य पदार्थ को नहीं जानता, तब तक अभिमान करता हुआ पशु के समान विचरता है॥ ३७॥

पुनः प्रकारान्तरेणोक्तविषयमाह॥

फिर प्रकारान्तर से उक्त विषय को अगले मन्त्र में कहा है॥

अपा॒ङ् प्राङे॑ति स्व॒धया॑ गृभी॒तोऽम॑र्त्यो॒ मर्त्ये॑ना॒ सयो॑निः।
ता शश्व॑न्ता विषू॒चीना॑ वि॒यन्ता॒ न्य१॑न्यं चि॒क्युर्न नि चि॑क्यु॒रन्य॑म्॥ ३८॥

अपा॑ङ्। प्राङ्। ए॒ति॒। स्व॒धया॑। गृ॒भी॒तः। अम॑र्त्यः। मर्त्ये॑न। सऽयो॑निः। ता। शश्व॑न्ता। वि॒षू॒चीना॑। वि॒ऽयन्ता॑। नि। अ॒न्यम्। चि॒क्युः। न। नि। चि॒क्यु॒रिति॑। अ॒न्यम्॥ ३८॥

पदार्थः-**(अपाङ्)** अपाञ्चतीति **(प्राङ्)** प्रकृष्टमञ्चतीति **(एति)** प्राप्नोति **(स्वधया)** जलादिना सह वर्त्तमानः। **स्वधेत्युदकनामसु पठितम्।** (निघं०१.१२) **स्वधेत्यन्ननामसु पठितम्।** (निघं०२.७) **(गृभीतः)** गृहीतः **(अमर्त्यः)** मरणधर्मरहितो जीवः **(मर्त्येन)** मरणधर्मरहितेन शरीरादिना। अत्राऽन्येषामपीति दीर्घः। **(सयोनिः)** समानस्थानः **(ता)** तौ मर्त्यामर्त्याँ जडचेतनौ **(शश्वन्ता)** सनातनौ **(विषूचीना)** विष्वगञ्चितारौ **(वियन्ता)** विविधान् प्राप्नुवन्तौ **(नि)** **(अन्यम्)** **(चिक्युः)** चिनुयुः **(न)** **(नि)** **(चिक्युः)** **(अन्यम्)**॥ ३८॥

अन्वयः-यः स्वधयापाङ् प्राडेति यो गृभीतो अमर्त्यो मर्त्येन सयोनिरस्ति ता शश्वन्ता विषूचीना वियन्ता वर्त्तेते तमन्यं विद्वांसो निचिक्युरविद्वांसश्चान्यं न निचिक्युः॥ ३८॥

भावार्थः-अस्मिञ्जगति द्वौ पदार्थौ वर्त्तेते जडश्चेतनश्च तयोर्जडोऽन्यं स्वस्वरूपञ्च न जानाति चेतनश्चाऽन्यं स्वस्वरूपञ्च जानाति द्वावनुत्पन्नावनादी अविनाशिनौ च वर्त्तेते, जडः संयोगेन स्थूलावस्थां प्राप्तश्चेतनो जीवः संयोगेन वियोगेन च स्वरूपं न जहाति, किन्तु स्थूलसूक्ष्मयोगेन स्थूलसूक्ष्म इव विभाति कूटस्थः सन् यादृशोऽस्ति तादृश एव तिष्ठति॥ ३८॥

पदार्थः-जो **(स्वधया)** जल आदि पदार्थों के साथ वर्त्तमान **(अपाङ्)** उलटा **(प्राङ्)** सीधा **(एति)** प्राप्त होता है और जो **(गृभीतः)** ग्रहण किया हुआ **(अमर्त्यः)** मरणधर्मरहित जीव **(मर्त्येन)** मरणधर्मरहित शरीरादि के साथ **(सयोनिः)** एक स्थानवाला हो रहा है **(ता)** वे दोनों **(शश्वन्ता)** सनातन **(विषूचीना)** सर्वत्र जाने और **(वियन्ता)** नाना प्रकार से प्राप्त होनेवाले वर्त्तमान हैं, उनमें से उस **(अन्यम्)** एक जीव और शरीर आदि को विद्वान् जन **(नि, चिक्युः)** निरन्तर जानते और अविद्वान् **(अन्यम्)** उस एक को **(न, नि, चिक्युः)** वैसा नहीं जानते॥ ३८॥

भावार्थः-इस जगत् में दो पदार्थ वर्त्तमान हैं- एक जड़ दूसरा चेतन। उनमें जड़ और को और अपने रूप को नहीं जानता और चेतन अपने को और दूसरे को जानता है। दोनों अनुत्पन्न अनादि और विनाशरहित वर्त्तमान हैं। जड़ अर्थात् शरीरादि परमाणुओं के संयोग से स्थूलावस्था को प्राप्त हुआ चेतन जीव संयोग वा वियोग से अपने रूप को नहीं छोड़ता, किन्तु स्थूल वा सूक्ष्म पदार्थ के संयोग से स्थूल वा सूक्ष्म सा भान होता है, परन्तु वह एकतार स्थित जैसा है, वैसा ही ठहरता है॥ ३८॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

ऋ॒चो अ॒क्षरे॑ पर॒मे व्यो॑म॒न् यस्मि॑न्दे॒वा अधि॒ विश्वे॑ निषे॒दुः।
यस्तन्न वेद॒ किमृ॒चा क॑रिष्यति॒ य इत्तद्विदुस्त इ॒मे सम॑ासते॥ ३९॥

ऋ॒चः। अ॒क्षरे॑। प॒र॒मे। विऽओ॑मन्। यस्मि॑न्। दे॒वाः। अधि॑। विश्वे॑। नि॒ऽसे॒दुः। यः। तत्। न। वेद॑। किम्। ऋ॒चा। क॒रि॒ष्य॒ति॒। ये। इत्। तत्। वि॒दुः। ते। इ॒मे। सम्। आ॒स॒ते॒॥ ३९॥

पदार्थः-(**ऋचः**) ऋग्वेदादेः **(अक्षरे)** नाशरहिते **(परमे)** प्रकृष्टे **(व्योमन्)** व्योम्नि व्यापके परमेश्वरे **(यस्मिन्)** **(देवाः)** पृथिवीसूर्यलोकादयः **(अधि)** **(विश्वे)** सर्वे **(निषेदुः)** निषीदन्ति **(यः)** **(तत्)** ब्रह्म **(न)** **(वेद)** जानाति **(किम्)** **(ऋचा)** वेदचतुष्टयेन **(करिष्यति)** **(ये)** **(इत्)** एव **(तत्)** **(विदुः)** जानन्ति **(ते)** **(इमे)** **(सम्)** **(आसते)** सम्यगासते। अयं निरुक्ते व्याख्यातः॥ (निरु०१३.१०)॥ ३९॥

अन्वयः-यस्मिन्नृचः सकाशात्प्रतिपादितेऽक्षरे परमे व्योमन्परमेश्वरे विश्वे देवा अधि निषेदुः। यस्तन्न वेद स ऋचा वेदेन किं करिष्यति ये तद्विदुस्त इमे इदेव ब्रह्माणि समासते॥ ३९॥

भावार्थः-यत्सर्वेषां वेदानां परमं प्रमेयं प्रतिपाद्यं ब्रह्मामरं च जीवाः कार्य्यकारणाख्यं जगच्चाऽस्ति। एषां मध्यात्सर्वाधारो व्योमवद्व्यापकः परमात्मा जीवाः कार्यकारणञ्च व्याप्यमस्ति। अत एव सर्वे जीवादयः पदार्थाः परमेश्वरे निवसन्ति। ये वेदानधीत्यैत्प्रमेयं न जानन्ति, ते वेदैः किमपि फलं न प्राप्नुवन्ति। ये च वेदानधीत्य जीवान् कार्यं कारणं ब्रह्म च गुणकर्मस्वभावतो विदन्ति, ते सर्वे धर्मार्थकाममोक्षेषु सिद्धेषु आनन्दन्ति॥ ३९॥

पदार्थः-(**यस्मिन्**) जिस (**ऋचः**) ऋग्वेदादि वेदमात्र से प्रतिपादित (**अक्षरे**) नाशरहित (**परमे**) उत्तम (**व्योमन्**) आकाश के बीच व्यापक परमेश्वर में (**विश्वे**) समस्त (**देवाः**) पृथिवीसूर्यलोकादि देव (**अधि, निषेदुः**) आधेयरूप से स्थित होते हैं। (**यः**) जो (**तत्**) उस परब्रह्म परमेश्वर को (**न, वेद**) नहीं जानता वह (**ऋचा**) चार वेद से (**किम्**) क्या (**करिष्यति**) कर सकता है और (**ये**) जो (**तत्**) उस परब्रह्म को (**विदुः**) जानते हैं (**ते**) (**इमे, इत्**) वे ही ये ब्रह्म में (**समासते**) अच्छे प्रकार स्थिर होते हैं॥ ३९॥

भावार्थः-जो सब वेदों का परम प्रमेय पदार्थरूप और वेदों से प्रतिपाद्य ब्रह्म अमर और जीव तथा कार्यकारणरूप जगत् है। इन सभी में से सबका आधार अर्थात् ठहरने का स्थान आकाशवत् परमात्मा व्यापक और जीव तथा कार्य कारणरूप जगत् व्याप्य है, इसी से सब जीव आदि पदार्थ परमेश्वर में निवास करते हैं। और जो वेदों को पढ़ के इस प्रमेय को नहीं जानते, वे वेदों से कुछ भी फल नहीं पाते और जो वेदों को पढ़ के जीव, कार्य, कारण और ब्रह्म को गुण, कर्म, स्वभाव से जानते हैं, वे सब धर्म, अर्थ, काम और मोक्ष के सिद्ध होने पर आनन्द को प्राप्त होते हैं॥ ३९॥

अथ विदुषीविषयमाह॥

अब विदुषी स्त्री के विषय में कहा है॥

सुयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम।
अद्धि तृणमघ्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती॥ ४०॥ २१॥

सुयवसऽअत्। भगऽवती। हि। भूयाः। अथो इति। वयम्। भगऽवन्तः। स्याम। अद्धि। तृणम्। अघ्ये। विश्वऽदानीम्। पिब। शुद्धम्। उदकम्। आऽचरन्ती॥ ४०॥

पदार्थः-(**सुयवसात्**) या शोभनानि यवसानि सुखानि अत्ति सा (**भगवती**) बह्वैश्वर्ययुक्ता विदुषी (**हि**) किल (**भूयाः**) (**अथो**) (**वयम्**) (**भगवन्तः**) बह्वैश्वर्ययुक्ताः (**स्याम**) भवेम (**अद्धि**) अशान (**तृणम्**) (**अघ्ये**) गौरिव वर्त्तमाने (**विश्वदानीम्**) विश्वं समग्रं दानं यस्यास्ताम् (**पिब**) (**शुद्धम्**) पवित्रम् (**उदकम्**) जलम् (**आचरन्ती**) सत्याचरणं कुर्वती। अयं निरुक्ते व्याख्यातः। (निरु०११.४४)॥ ४०॥

अन्वयः-हे अघ्न्ये! त्वं सुयवसाद्भगवती भूया हि यतो वयं भगवन्तस्स्याम। यथा गौस्तृणं जग्ध्वा शुद्धमुदकं पीत्वा दुग्धं दत्वा वत्सादीन् सुखयति तथा विश्वदानीमाचरन्ती सत्यथो सुखमद्धि विद्यारसं पिब॥४०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यावन्मातरो वेदविदो न स्युस्तावत्तदपत्यान्यपि विद्यावन्ति न भवन्ति। या विदुष्यो भूत्वा स्वयंवरं विवाहं कृत्वा सन्तानानुत्पाद्य सुशिक्ष्य विदुषः कुर्वन्ति, ता गाव इव सर्वं जगदाह्लादयन्ति॥४०॥

पदार्थः-हे **(अघ्न्ये)** न हनने योग्य गौ के समान वर्त्तमान विदुषी! तुम **(सुयवसात्)** सुन्दर सुखों को भोगनेवाली **(भगवती)** बहुत ऐश्वर्यवती **(भूयाः)** हो कि **(हि)** जिस कारण **(वयम्)** हम लोग **(भगवन्तः)** बहुत ऐश्वर्ययुक्त **(स्याम)** हों। जैसे गौ **(तृणम्)** तृण को खा **(शुद्धम्)** शुद्ध **(उदकम्)** जल को पी और दूध देकर बछड़े आदि को सुखी करती है, वैसे **(विश्वदानीम्)** समस्त जिसमें दान उस क्रिया का **(आचरन्ती)** सत्य आचरण करती हुई **(अथो)** इसके अनन्तर सुख को **(अद्धि)** भोग और विद्यारस को **(पिब)** पी॥४०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब तक माताजन वेदवित् न हों, तब तक उनमें सन्तान भी विद्यावान् नहीं होते हैं। जो विदुषी हो स्वयंवर विवाह कर सन्तानों को उत्पन्न कर उनको अच्छी शिक्षा देकर उन्हें विद्वान् करती हैं, वे गौओं के समान समस्त जगत् को आनन्दित करती हैं॥४०॥

पुनर्विदुषीविषयमाह॥

फिर विदुषी के विषय को अगले मन्त्र में कहा है॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥४१॥

गौरीः। मिमाय। सलिलानि। तक्षती। एकऽपदी। द्विऽपदी। सा। चतुःऽपदी। अष्टाऽपदी। नवऽपदी। बभूवुषी। सहस्रऽअक्षरा। परमे। विऽओमन्॥४१॥

पदार्थः-**(गौरीः)** गौरवर्णाः **(मिमाय)** शब्दायते **(सलिलानि)** जलानीव निर्मलानि वचनानि **(तक्षती)** **(एकपदी)** एकवेदाभ्यासिनी **(द्विपदी)** अभ्यस्तद्विवेदा **(सा)** **(चतुष्पदी)** चतुर्वेदाध्यापिका **(अष्टापदी)** वेदोपवेदविद्यायुक्ता **(नवपदी)** चतुर्वेदोपवेदव्याकरणादिशिक्षायुक्ता **(बभूवुषी)** अतिशयेन विद्यासु भवन्ती **(सहस्राक्षरा)** सहस्राणि असंख्यातान्यक्षराणि यस्याः सा **(परमे)** सर्वोत्कृष्टे **(व्योमन्)** व्योमवद् व्याप्तेऽक्षुब्धे। अयं निरुक्ते व्याख्यातः (निरु०११.४०)॥४१॥

अन्वयः-हे स्त्रीपुरुषा! यैकपदी द्विपदी चतुष्पदी अष्टापदी नवपदी बभूवुषी सहस्राक्षरा सती परमे व्योमन् प्रयतते गौरीर्विदुषीर्मिमाय सलिलानीव तक्षती सा विश्वकल्याणकारिका भवति॥४१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। या स्त्रियः सर्वान् साङ्गोपाङ्गान् वेदानधीत्याध्यापयन्ति ताः सर्वान् मनुष्यानुन्नयन्ति॥४१॥

पदार्थः-हे स्त्री-पुरुषो! जो **(एकपदी)** एक वेद का अभ्यास करनेवाली वा **(द्विपदी)** दो वेद जिसने अभ्यास किये वा **(चतुष्पदी)** चार वेदों की पढ़ानेवाली वा **(अष्टापदी)** चार वेद और चार उपवेदों की विद्या से युक्त वा **(नवपदी)** चार वेद, चार उपवेद और व्याकरणादि शिक्षायुक्त **(बभूवुषी)** अतिशय करके विद्याओं में प्रसिद्ध होती और **(सहस्राक्षरा)** असंख्यात अक्षरोंवाली होती हुई **(परमे)** सबसे उत्तम **(व्योमन्)** आकाश के समान व्याप्त निश्चल परमात्मा के निमित्त प्रयत्न करती है और **(गौरीः)** गौरवर्णयुक्त विदुषी स्त्रियों को **(मिमाय)** शब्द कराती अर्थात् **(सलिलानि)** जल के समान निर्मल वचनों को **(तक्षती)** छांटती अर्थात् अविद्यादि दोषों से अलग करती हुई **(सा)** वह संसार के लिये अत्यन्त सुख करनेवाली होती है॥४१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्री समस्त साङ्गोपाङ्ग वेदों को पढ़ के पढ़ाती हैं, वे सब मनुष्यों की उन्नति करती हैं॥४१॥

अथ वाणीविषयमाह॥

अब वाणी के विषय को अगले मन्त्र में कहा है॥

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः।

ततः क्षरत्यक्षरं तद्विश्वमुप जीवति॥४२॥

तस्याः। समुद्राः। अधि। वि। क्षरन्ति। तेन। जीवन्ति। प्रऽदिशः। चतस्रः। ततः। क्षरति। अक्षरम्। तत्। विश्वम्। उप। जीवति॥४२॥

पदार्थः-**(तस्याः)** वाण्याः **(समुद्राः)** शब्दाऽर्णवाः **(अधि)** **(वि)** **(क्षरन्ति)** अक्षराणि वर्षन्ति **(तेन)** कार्येण **(जीवन्ति)** **(प्रदिशः)** दिशोपदिशः **(चतस्रः)** चतुः संख्योपेताः **(ततः)** **(क्षरति)** **(अक्षरम्)** अक्षयस्वभावम् **(तत्)** तस्मात् **(विश्वम्)** सर्वं जगत् **(उप)** **(जीवति)**। अयं मन्त्रो निरुक्ते व्याख्यातः॥ (निरु०११.४१)॥४२॥

अन्वयः-हे मनुष्याः! तस्याः समुद्रा अधि वि क्षरन्ति तेन चतस्रः प्रदिशो जीवन्ति ततो यदक्षरं क्षरति तद्विश्वमुप जीवति॥४२॥

भावार्थः-समुद्रवदाकाशस्तत्र रत्नवच्छब्दाः प्रयोक्तारो ग्रहीतारस्तदुपदेशश्रवणेन सर्वेषामुपजीवनं भवति॥४२॥

पदार्थः-हे मनुष्यो! **(तस्याः)** उस वाणी के **(समुद्राः, अधि, वि, क्षरन्ति)** शब्दरूपी अर्णव समुद्र अक्षरों की वर्षा करते हैं **(तेन)** उस काम से **(चतस्रः)** चारों **(प्रदिशः)** दिशा और चारों उपदिशा **(जीवन्ति)** जीवती हैं और **(ततः)** उससे जो **(अक्षरम्)** न नष्ट होनेवाला अक्षरमात्र **(क्षरति)** वर्षता है **(तत्)** उससे **(विश्वम्)** समस्त जगत् **(उप, जीवति)** उपजीविका को प्राप्त होता है॥४२॥

भावार्थः-समुद्र के समान आकाश है, उसके बीच रत्नों के समान शब्द शब्दों के प्रयोग करनेवाले रत्नों का ग्रहण करनेवाले हैं, उन शब्दों के उपदेश सुनने से सबकी जीविका और सबका आश्रय होता है॥४२॥

अथ ब्रह्मचर्यविषयमाह॥

अब ब्रह्मचर्य विषय को अगले मन्त्र में कहा है॥

शकमयं धूममारादपश्यं विषूवता पर एनावरेण।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन्॥४३॥

शकऽमयम्। धूमम्। आरात्। अपश्यम्। विषुऽवता। परः। एना। अवरेण। उक्षाणम्। पृश्निम्। अपचन्त। वीराः। तानि। धर्माणि। प्रथमानि। आसन्॥४३॥

पदार्थः-**(शकमयम्)** शक्तिमयम् **(धूमम्)** ब्रह्मचर्यकर्मानुष्ठानाग्निधूमम् **(आरात्)** समीपात् **(अपश्यम्)** पश्यामि **(विषूवता)** व्याप्तिमता **(परः)** परस्तात् **(एना)** एनेन **(अवरेण)** अर्वाचीनेन **(उक्षाणम्)** सेचकम् **(पृश्निम्)** आकाशम् **(अपचन्त)** पचन्ति **(वीराः)** व्याप्तविद्याः **(तानि)** **(धर्म्माणि)** **(प्रथमानि)** आदिमानि ब्रह्मचर्याख्यानि **(आसन्)** सन्ति॥४३॥

अन्वयः-हे मनुष्या! अहमाराच्छकमयं धूममपश्यमेनाऽवरेण विषूवता धूमेन परो वीराः पृश्निमुक्षाणं चापचन्त तानि धर्माणि प्रथमान्यासन्नभवन्॥४३॥

भावार्थः-विद्वज्जना अग्निहोत्रादियज्ञैर्मेघमण्डलस्थं जलं शोधयित्वा सर्वाणि वस्तूनि शोधयन्ति। अतो ब्रह्मचर्याऽनुष्ठानेन सर्वेषां शरीराण्यात्ममनसी च शोधयन्तु। सर्वे जनाः समीपस्थं धूममग्निमन्यं पदार्थञ्च प्रत्यक्षतया पश्यन्ति परावरज्ञो विद्वाँस्तु भूमिमारभ्य परमेश्वरपर्यन्तं वस्तुसमूहं साक्षात्कर्त्तुं शक्नोति॥४३॥

पदार्थः-हे मनुष्यो! मैं **(आरात्)** समीप से **(शकमयम्)** शक्तिमय समर्थ **(धूमम्)** ब्रह्मचर्य कर्मानुष्ठान के अग्नि के धूम को **(अपश्यम्)** देखता हूँ **(एना, अवरेण)** इस नीचे इधर-उधर जाते हुए **(विषूवता)** व्याप्तिमान् धूम से **(परः)** पीछे **(वीराः)** विद्याओं में व्याप्त पूर्ण विद्वान् **(पृश्निम्)** आकाश और **(उक्षाणम्)** सींचनेवाले मेघ को **(अपचन्त)** पचाते अर्थात् ब्रह्मचर्य विषयक अग्निहोत्राग्नि तपते हैं **(तानि)** वे **(धर्माणि)** धर्म **(प्रथमानि)** प्रथम ब्रह्मचर्यसञ्ज्ञक **(आसन्)** हुए हैं॥४३॥

भावार्थः-विद्वान् जन अग्निहोत्रादि यज्ञों से मेघमण्डलस्थ जल को शुद्ध कर सब वस्तुओं को शुद्ध करते हैं, इससे ब्रह्मचर्य के अनुष्ठान से सबके शरीर, आत्मा और मन को शुद्ध करावें। सब मनुष्यमात्र समीपस्थ धूम और अग्नि वा और पदार्थ को प्रत्यक्षता से देखते हैं और अगले-पिछले भाव को जाननेवाला विद्वान् तो भूमि से लेके परमेश्वर पर्यन्त वस्तुसमूह को साक्षात् कर सकता है॥४३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम्।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम्॥४४॥

त्रयः। केशिनः। ऋतुऽथा। वि। चक्षते। संवत्सरे। वपते। एकः। एषाम्। विश्वम्। एकः। अभि। चष्टे। शचीभिः। ध्राजिः। एकस्य। ददृशे। न। रूपम्॥४४॥

पदार्थः-(**त्रयः**) वायुविद्युत्सूर्याः (**केशिनः**) प्रकाशवन्तो ज्ञापकाः (**ऋतुथा**) ऋतुप्रकारेण (**वि**) (**चक्षते**) दर्शयन्ति (**संवत्सरे**) (**वपते**) वीजानि संतनुते (**एकः**) (**एषाम्**) त्रयाणाम् (**विश्वम्**) समग्रं जगत् (**एकः**) सूर्यः (**अभि**) अभितः (**चष्टे**) प्रकाशयति (**शचीभिः**) कर्मभिः। **शचीति कर्मनामसु पठितम्।** (निघं०२.१) (**ध्राजिः**) गतिः (**एकस्य**) वायोः (**ददृशे**) दृश्यते (**न**) (**रूपम्**)। इयं निरुक्ते व्याख्याता॥ (निरु०१२.२७)॥४४॥

अन्वयः-हे अध्यापकाऽध्येतृपरीक्षका! यूयं यथा केशिनस्त्रयः सूर्यविद्युद्वायवः संवत्सरे ऋतुथा शचीभिर्विचक्षत एषामेको वपत एको विश्वमभिचष्ट एकस्य ध्राजी रूपं च न ददृशे तथा यूयमिह प्रवर्त्तध्वम्॥४४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं वायुसूर्यविद्युद्वदध्ययनाऽध्यापनादिभिर्विद्या वर्द्धयत यथात्मनो रूपं चक्षुषा न दृश्यते तथा विदुषां गतिर्न लक्ष्यते यथा ऋतवः संवत्सरमारभन्तं समयं विभजन्ति तथा कर्मारम्भं विद्याऽविद्ये धर्माऽधर्मौ च विभजन्तु॥४४॥

पदार्थः-हे पढ़ने-पढ़ानेवाले लोगों के परीक्षको! तुम जैसे (**केशिनः**) प्रकाशवान् वा अपने गुण को समय पाय जतानेवाले (**त्रयः**) तीन अर्थात् सूर्य, बिजुली और वायु (**संवत्सरे**) संवत्सर अर्थात् वर्ष में (**ऋतुथा**) वसन्तादि ऋतु के प्रकार से (**शचीभिः**) जो कर्म उनसे (**वि, चक्षते**) दिखाते अर्थात् समय-समय के व्यवहार को प्रकाशित कराते हैं (**एषाम्**) इन तीनों में (**एकः**) एक बिजुलीरूप अग्नि (**वपते**) जीवों को उत्पन्न कराता (**एकः**) सूर्य (**विश्वम्**) समग्र जगत् को (**अभि, चष्टे**) प्रकाशित करता और

(एकस्य) वायु की **(ध्राजिः)** गति और **(रूपम्)** रूप **(न)** नहीं **(ददृशे)** दीखता, वैसे तुम यहाँ प्रवर्त्तमान होओ॥४४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम वायु, सूर्य और बिजुली के समान अध्ययन-अध्यापन आदि कर्मों से विद्याओं को बढ़ाओ। जैसे अपने आत्मा का रूप नेत्र से नहीं दीखता, वैसे विद्वानों की गति नहीं जानी जाती। जैसे ऋतु संवत्सर को आरम्भ करते हुए समय को विभाग करते हैं, वैसे कर्म्मारम्भ विद्या-अविद्या और धर्म्म-अधर्म्म को पृथक्-पृथक् करें॥४४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥४५॥

चत्वारि। वाक्। परिऽमिता। पदानि। तानि। विदुः। ब्राह्मणाः। ये। मनीषिणः। गुहा। त्रीणि। निऽहिता। न। इङ्गयन्ति। तुरीयम्। वाचः। मनुष्याः। वदन्ति॥४५॥

पदार्थः-(**चत्वारि**) नामाख्यातोपसर्गनिपाताः (**वाक्**) वाचः। अत्र **सुपां सुलुगि**ति ङसो लुक्। (**परिमिता**) परिमाणयुक्तानि (**पदानि**) वेदितुं योग्यानि (**तानि**) (**विदुः**) जानन्ति (**ब्राह्मणाः**) व्याकरणवेदेश्वरवेत्तारः (**ये**) (**मनीषिणः**) मनसो दमनशीलाः (**गुहा**) गुहायां बुद्धौ (**त्रीणि**) नामाख्यातोपसर्गाः (**निहिता**) धृतानि (**न**) (**इङ्गयन्ति**) चेष्टन्ते (**तुरीयम्**) चतुर्थं निपातम् (**वाचः**) वाण्याः (**मनुष्याः**) साधारणाः (**वदन्ति**) उच्चारयन्ति। अयं मन्त्रो निरुक्ते व्याख्यातः॥ (निरु०१३.९)॥४५॥

अन्वयः-ये मनीषिणो ब्राह्मणा वाक् परिमिता यानि चत्वारि पदानि तानि विदुः। तेषां गुहा त्रीणि निहिता सन्ति नेङ्गयन्ति ये मनुष्याः सन्ति ते वाचस्तुरीयं वदन्ति॥४५॥

भावार्थः-विदुषामविदुषां चेयोनेव भेदोऽस्ति ये विद्वांसः सन्ति ते नामाख्यातोपसर्गनिपाताँश्चतुरो जानन्ति। तेषां त्रीणि ज्ञानस्थानि सन्ति चतुर्थं सिद्धं शब्दसमूहं प्रसिद्धे व्यवहारे वदन्ति। ये चाऽविद्वांसस्ते नामाख्यातोपसर्गनिपातान्न जानन्ति किन्तु निपातरूपं साधनज्ञानरहितं सिद्धं शब्दं प्रयुञ्जते॥४५॥

पदार्थः-(**ये**) जो (**मनीषिणः**) मन को रोकनेवाले (**ब्राह्मणाः**) व्याकरण, वेद और ईश्वर के जाननेवाले विद्वान् जन (**वाक्**) वाणी के (**परिमिता**) परिमाणयुक्त जो (**चत्वारि**) नाम, आख्यात, उपसर्ग और निपात चार (**पदानि**) जानने को योग्य पद हैं (**तानि**) उनको (**विदुः**) जानते हैं, उनमें से (**त्रीणि**) तीन (**गुहा**) बुद्धि में (**निहिता**) धरे हुए हैं (**न, इङ्गयन्ति**) चेष्टा नहीं करते। जो (**मनुष्याः**) साधारण मनुष्य हैं, वे (**वाचः**) वाणी के (**तुरीयम्**) चतुर्थ भाग अर्थात् निपातमात्र को (**वदन्ति**) कहते हैं॥४५॥

भावार्थः-विद्वान् और अविद्वानों में इतना ही भेद है कि जो विद्वान् हैं, वे नाम, आख्यात, उपसर्ग और निपात इन चारों को जानते हैं। उनमें से तीन ज्ञान में रहते हैं, चौथे सिद्ध शब्दसमूह को प्रसिद्ध व्यवहार में सब कहते हैं। और जो अविद्वान् हैं वे नाम, आख्यात, उपसर्ग और निपातों को नहीं जानते, किन्तु निपातरूप साधन-ज्ञान-रहित प्रसिद्ध शब्द का प्रयोग करते हैं॥४५॥

पुनर्विद्वद्विषयान्तर्गतेश्वरविषयमाह॥

फिर विद्वद्विषयान्तर्गत ईश्वर विषय को अगले मन्त्र में कहा है॥

इन्द्रं॑ मि॒त्रं वरु॑ण॒मग्नि॑मा॒हुरथो॑ दि॒व्यः स सु॑प॒र्णो ग॒रुत्मा॑न्।
एकं॒ सद्विप्रा॑ बहु॒धा व॑दन्त्य॒ग्निं य॒मं मा॑त॒रिश्वा॑नमाहुः॥४६॥२२॥

इन्द्र॑म्। मि॒त्रम्। वरु॑णम्। अ॒ग्निम्। आ॒हुः॒। अथो॒ इति॑। दि॒व्यः। सः। सु॒ऽप॒र्णः। ग॒रुत्मा॑न्। एक॑म्। सत्। विप्रा॑ः। ब॒हु॒धा। व॒द॒न्ति॒। अ॒ग्निम्। य॒मम्। मा॒त॒रिश्वा॑नम्। आ॒हुः॒॥४६॥

पदार्थः-(**इन्द्रम्**) परमैश्वर्ययुक्तम् (**मित्रम्**) मित्रमिव वर्त्तमानम् (**वरुणम्**) श्रेष्ठम् (**अग्निम्**) सर्वव्याप्तं विद्युदादिलक्षणम् (**आहुः**) कथयन्ति (**अथो**) (**दिव्यः**) दिवि भवः (**सः**) (**सुपर्णः**) शोभनानि पर्णानि पालनानि यस्य सः (**गरुत्मान्**) गुर्वात्मा (**एकम्**) असहायम् (**सत्**) विद्यमानम् (**विप्राः**) मेधाविनः (**बहुधा**) बहुप्रकारैर्नामभिः (**वदन्ति**) (**अग्निम्**) सर्वव्याप्तं परमात्मरूपम् (**यमम्**) नियन्तारम् (**मातरिश्वानम्**) मातरिश्वा वायुस्तल्लक्षणम् (**आहुः**) कथयन्ति। अयं मन्त्रो निरुक्ते व्याख्यातः॥ (निरु०७.१८)॥४६॥

अन्वयः-विप्रा इन्द्रं मित्रं वरुणमग्निमिति बहुधाऽऽहुः। अथो स दिव्यः सुपर्णो गरुत्मानस्तीति बहुधा वदन्ति एकं सद् ब्रह्म अग्निं यमं मातरिश्वानं चाहुः॥४६॥

भावार्थः-यथाऽग्न्यादेरिन्द्रादीनि नामानि सन्ति तथैकस्य परमात्मनोऽग्न्यादीनि सहस्रशो नामानि वर्त्तन्ते। यावन्तः परमेश्वरस्य गुणकर्मस्वभावाः सन्ति तावन्त एवैतस्य नामधेयानि सन्तीति वेद्यम्॥४६॥

पदार्थः-(**विप्राः**) बुद्धिमान् जन (**इन्द्रम्**) परमैश्वर्ययुक्त (**मित्रम्**) मित्रवत् वर्त्तमान (**वरुणम्**) श्रेष्ठ (**अग्निम्**) सर्वव्याप्त विद्युदादि लक्षणयुक्त अग्नि को (**बहुधा**) बहुत प्रकारों से बहुत नामों से (**आहुः**) कहते हैं। (**अथो**) इस के अनन्तर (**सः**) वह (**दिव्यः**) प्रकाश में प्रसिद्ध प्रकाशमय (**सुपर्णः**) सुन्दर जिसके पालना आदि कर्म (**गरुत्मान्**) महान् आत्मावाला है, इत्यादि बहुत प्रकारों बहुत नामों से (**वदन्ति**) कहते हैं तथा वे अन्य विद्वान् (**एकम्**) एक (**सत्**) विद्यमान परब्रह्म परमेश्वर को (**अग्निम्**) सर्वव्याप्त परमात्मारूप (**यमम्**) सर्वनियन्ता और (**मातरिश्वानम्**) वायु लक्षण लक्षित भी (**आहुः**) कहते हैं॥४६॥

भावार्थः-जैसे अग्न्यादि पदार्थों के इन्द्र आदि नाम हैं, वैसे एक परमात्मा के अग्नि आदि सहस्रों नाम वर्त्तमान हैं। जितने परमेश्वर के गुण, कर्म, स्वभाव हैं, उतने ही इस परमात्मा के नाम हैं, यह जानना चाहिये॥४६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कृ॒ष्णं नि॒यान॑ं हर॑यः सुप॒र्णा अ॒पो वसा॑ना॒ दिव॒मुत्प॑तन्ति।
त आव॑वृत्र॒न्त्सद॑नादृ॒तस्यादिद् घृ॒तेन॑ पृथि॒वी व्यु॑द्यते॥४७॥

कृ॒ष्णम्। नि॒ऽयान॑म्। हर॑यः। सु॒ऽप॒र्णाः। अ॒पः। वसा॑नाः। दिव॑म्। उत्। प॒त॒न्ति॒। ते। आ। अ॒व॒ऽवृ॒त्र॒न्। सद॑नात्। ऋ॒तस्य॑। आत्। इत्। घृ॒तेन॑। पृ॒थि॒वी। वि। उ॒द्य॒ते॥४७॥

पदार्थः-(**कृष्णम्**) कर्षितुं योग्यम् (**नियानम्**) नित्यं प्राप्त भूगोलाख्यं विमानादिकं वा (**हरयः**) हरणशीलाः (**सुपर्णाः**) रश्मयः (**अपः**) प्राणान् जलानि वा (**वसानाः**) आच्छादयन्तः (**दिवम्**) प्रकाशमयं सूर्यम् (**उत्**) (**पतन्ति**) प्राप्नुवन्ति (**ते**) (**आ**) (**अववृत्रन्**) वर्त्तन्ते। अत्र **वृतु वर्त्तने** इत्यस्माद्वर्त्तमाने लङ् व्यत्ययेन परस्मैपदं प्रथमस्य बहुवचने **बहुलं छन्दसी**ति रुडागमश्च। (**सदनात्**) स्थानात् (**ऋतस्य**) सत्यस्य कारणस्य (**आत्**) अनन्तरम् (**इत्**) एव (**घृतेन**) जलेन (**पृथिवी**) भूमिः (**वि**) (**उद्यते**) क्लिद्यते। अयं मन्त्रो निरुक्ते व्याख्यातः॥ (निरु०। ७.२४.)॥४७॥

अन्वयः-हे मनुष्या! अपो वसाना हरयः सुपर्णाः कृष्णं नियानं दिवमुत्पतन्ति, ते सूर्यमाववृत्रन्नृतस्य सदनात् प्राप्तेन घृतेन पृथिवी व्युद्यते तमादित्यथावद्विजानीत॥४७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुशिक्षिता अश्वा यानानि सद्यो नयन्ति तथाऽग्न्यादयः पदार्था विमानं यानमाकाशमुद्गमयन्ति यथा सूर्यकिरणा भूमितलाज्जलमाकृष्य वर्षित्वा सर्वान् वृक्षादीनार्द्रान् कुर्वन्ति तथा विद्वांसः सर्वान् मनुष्यानानन्दयन्ति॥४७॥

पदार्थः-हे मनुष्यो! (**अपः**) प्राण वा जलों को (**वसानाः**) ढांपती हुई (**हरयः**) हरणशील (**सुपर्णाः**) सूर्य की किरणें (**कृष्णम्**) खींचने योग्य (**नियानम्**) नित्य प्राप्त भूगोल वा विमान आदि यान को वा (**दिवम्**) प्रकाशमय सूर्य के (**उत्, पतन्ति**) ऊपर गिरती हैं और (**ते**) वे (**आववृत्रन्**) सूर्य के सब ओर से वर्त्तमान हैं (**ऋतस्य**) सत्यकारण के (**सदनात्**) स्थान से प्राप्त (**घृतेन**) जल से (**पृथिवी**) भूमि (**वि, उद्यते**) विशेषतर गीली की जाती है, उसको (**आत्, इत्**) इसके अनन्तर ही यथावत् जानो॥४७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अच्छे सीखे हुए घोड़े रथों को शीघ्र पहुंचाते हैं, वैसे अग्नि आदि पदार्थ विमान रथ को आकाश में पहुँचाते हैं। जैसे सूर्य की किरणें भूमितल

से जल को खींच और वर्षा समस्त वृक्ष आदि को आर्द्र करती हैं, वैसे विद्वान् जन सब मनुष्यों को आनन्दित करते हैं॥४७॥

अथ विद्वद्विषये शिल्पविषयमाह॥

अब विद्वद्विषय में शिल्प विषय को कहा है॥

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत।
तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः॥४८॥

द्वादश। प्रऽधयः। चक्रम्। एकम्। त्रीणि। नभ्यानि। कः। ऊम् इति। तत्। चिकेत। तस्मिन्। साकम्। त्रिऽशता। न। शङ्कवः। अर्पिताः। षष्टिः। न। चलाचलासः॥४८॥

पदार्थः-(**द्वादश**) (**प्रधयः**) धारिका धुरः (**चक्रम्**) चक्रवद्वर्त्तमानम् (**एकम्**) (**त्रीणि**) (**नभ्यानि**) नहौ नभो साधूनि। अत्र वर्णव्यत्ययेन हस्य भः। (**कः**) (**उ**) वितर्के (**तत्**) (**चिकेत**) जानीयात् (**तस्मिन्**) (**साकम्**) सह (**त्रिशता**) त्रीणि शतानि येषु (**न**) इव (**शङ्कवः**) कीलाः (**अर्पिताः**) (**षष्टिः**) (**न**) इव (**चलाचलासः**) चलाश्च अचलाश्च ताः। अयं निरुक्ते व्याख्यातः॥ (निरु०४.२७)॥४८॥

अन्वयः-हे मनुष्या! यस्मिन् याने त्रिशता शङ्कवो नेव साकमर्पिताः षष्टिर्न चलाचलासस्तस्मिन्नेकं चक्रं द्वादश प्रधयस्त्रीणि नभ्यानि च स्थापितानि स्युस्तत् क उ चिकेत॥४८॥

भावार्थः-अत्रोपमालङ्कारः। केचिदेव विद्वांसो यथा शरीररचनां जानन्ति तथा विमानादियाननिर्माणं विदन्ति। यदा जलस्थलाऽऽकाशेषु सद्यो गमनाय यानानि निर्मातुमिच्छा जायते तदा तेषु अनेकानि जलाग्निचक्राण्यनेकानि बन्धनानि अनेकानि धारणानि कीलकाश्च रचनीयाः। एवं कृतेऽभीष्टसिद्धिस्स्यात्॥४८॥

पदार्थः-हे मनुष्यो! जिस रथ में (**त्रिशता**) तीन सौ (**शंकवः**) बांधनेवाली कीलों के (**न**) समान (**साकम्**) साथ (**अर्पिताः**) लगाई हुई (**षष्टिः**) साठ कीलों (**न**) जैसी कीलें जो कि (**चलाचलासः**) चल-अचल अर्थात् चलती और न चलती और (**तस्मिन्**) उसमें (**एकम्**) एक (**चक्रम्**) पहिया जैसा गोल चक्कर (**द्वादश**) बारह (**प्रधयः**) पहिओं की हालें अर्थात् हाल लगे हुए पहिये और (**त्रीणि**) तीन (**नभ्यानि**) पहिओं की बीच की नाभियों से उत्तमता से ठहरनेवाली धुरी स्थापित की हों (**तत्**) उसको (**कः**) कौन (**उ**) तर्क-वितर्क से (**चिकेत**) जाने॥४८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। कोई ही विद्वान् जैसे शरीर-रचना को जानते हैं, वैसे विमान आदि यानों को बनाना जानते हैं। जब जल, स्थल और आकाश में शीघ्र जाने के लिये रथों को बनाने की इच्छा होती है, तब उनमें अनेक जल, अग्नि के चक्कर, अनेक बन्धन, अनेक धारण और कीलें रचनी चाहियें, ऐसा करने से चाही हुई सिद्धि होती है॥४८॥

पुनरत्र विदुषीविषयमाह॥

फिर यहाँ विदुषी स्त्री के विषय को अगले मन्त्र में कहा है॥

यस्ते॒ स्तन॑: शश॒यो यो म॑यो॒भूर्येन॒ विश्वा॒ पुष्यं॑सि॒ वार्या॑णि।
यो र॑त्न॒धा व॑सु॒विद्यः सु॒दत्र॒: सर॑स्वति॒ तमि॒ह धात॑वे कः॥४९॥

यः। ते॒। स्तन॑:। श॒श॒यः। यः। म॒यः॒ऽभूः। येन॑। विश्वा॑। पुष्यं॑सि। वार्या॑णि। यः। र॒त्न॒ऽधाः। व॒सु॒ऽवित्। यः। सु॒ऽदत्र॑:। सर॑स्वति। तम्। इ॒ह। धात॑वे। क॒रि॒ति॒ कः॥४९॥

पदार्थः-(**यः**) (**ते**) तव (**स्तनः**) स्तन इव वर्त्तमानः शुद्धो व्यवहारः (**शशयः**) शयान इव (**यः**) (**मयोभूः**) सुखं भावुकः (**येन**) (**विश्वा**) सर्वाणि (**पुष्यसि**) (**वार्याणि**) स्वीकर्त्तुमर्हाणि विद्यादीनि धनानि वा (**यः**) (**रत्नधाः**) रत्नानि रमणीयानि वस्तूनि दधाति (**वसुवित्**) वसूनि विन्दति प्राप्नोति (**यः**) (**सुदत्रः**) सुष्ठु दत्राणि दानानि यस्मात् सः (**सरस्वति**) वागिव वर्त्तमाने (**तम्**) (**इह**) (**धातवे**) धातुं पातुम् (**कः**) कुरु। अयं मन्त्रो निरुक्ते व्याख्यातः॥[४] (निरु०६.१४)॥४९॥

अन्वयः-हे सरस्वति विदुषि स्त्रि! ते यः शशयो यो मयोभूश्च स्तनो येन त्वं विश्वा वार्याणि पुष्यसि यो रत्नधा वसुविद्यश्च सुदत्रोऽस्ति तमिह धातवे कः॥४९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा माता स्तनपयसा सन्तानं पाति तथा विदुषी स्त्री सर्वं कुटुम्बं रक्षति यथा सुभोजनेन शरीरं पुष्टं जायते तथा मातुः सुशिक्षां प्राप्याऽत्मा पुष्टो जायते॥४९॥

पदार्थः-हे (**सरस्वति**) विदुषी स्त्री! (**ते**) तेरा (**यः**) जो (**शशयः**) सोतासा शान्त और (**यः**) जो (**मयोभूः**) सुख की भावना करनेहारा (**स्तनः**) स्तन के समान वर्त्तमान शुद्ध व्यवहार (**येन**) जिससे तू (**विश्वा**) समस्त (**वार्याणि**) स्वीकार करने योग्य विद्या आदि वा धनों को (**पुष्यसि**) पुष्ट करती है (**यः**) जो (**रत्नधाः**) रमणीय वस्तुओं को धारण करने और (**वसुवित्**) धनों को प्राप्त होनेवाला और (**यः**) जो (**सुदत्रः**) सुदत्र अर्थात् जिससे अच्छे-अच्छे देने हों (**तम्**) उस अपने स्तन को (**इह**) यहाँ गृहाश्रम में (**धातवे**) सन्तानों के पीने को (**कः**) कर॥४९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे माता अपने स्तन के दूध से सन्तान की रक्षा करती है, वैसे विदुषी स्त्री सब कुटुम्ब की रक्षा करती है। जैसे सुन्दर घृतान्न पदार्थों के भोजन करने से शरीर बलवान् होता है, वैसे माता की सुशिक्षा को पाकर आत्मा पुष्ट होता है॥४९॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

---

४ अत्र निरुक्तेऽस्य मन्त्रस्य व्याख्यानं न विद्यते। (सुदत्रः) इति पदस्य निर्वचनं तु दरीदृश्यते॥ सं.॥

यज्ञेन॑ यज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।
ते ह॒ नाकं॑ महि॒मान॑: सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्या: सन्ति॑ दे॒वा:॥५०॥

यज्ञेन॑। यज्ञम्। अ॒य॒ज॒न्त॒। दे॒वा:। तानि॑। धर्माणि। प्र॒थ॒मानि॑। आ॒स॒न्। ते। ह॒। नाक॑म्। म॒हि॒मान॑:। स॒च॒न्त॒। यत्र॑। पूर्वे॑। सा॒ध्या:। सन्ति॑। दे॒वा:॥५०॥

पदार्थ:-(**यज्ञेन**) अग्न्यादिदिव्यपदार्थसमूहेन (**यज्ञम्**) धर्मार्थकाममोक्षव्यवहारम् (**अयजन्त**) यजन्ति संगच्छन्ते (**देवा:**) विद्वांस: (**तानि**) (**धर्माणि**) (**प्रथमानि**) आदिमानि ब्रह्मचर्य्यादीनि (**आसन्**) सन्ति (**ते**) (**ह**) किल (**नाकम्**) दु:खविरहं सुखम् (**महिमान:**) पूज्यतां प्राप्नुवन्त: (**सचन्त**) सचन्ते लभन्ते (**यत्र**) यस्मिन् (**पूर्वे**) अधीतविद्या: (**साध्या:**) अन्यैर्विद्यार्थं संसेवितुमर्हा: (**सन्ति**) वर्त्तन्ते (**देवा:**) विद्वांस:॥५०॥

अन्वय:-ये देवा यज्ञेन यज्ञमयजन्त यानि ब्रह्मचर्यादीनि धर्माणि प्रथमान्यासन् तानि सेवन्ते सेवयन्ति च ते ह यत्र पूर्वे साध्या देवा: सन्ति तत्र महिमान: सन्तो नाकं सचन्त॥५०॥

भावार्थ:-ये प्रथमे वयसि ब्रह्मचर्यसुशिक्षादीनि सेवितव्यानि कर्माणि प्रथमं कुर्वन्ति, ते आप्तविद्वद्वद्विद्वांसो भूत्वा विद्यानन्दं प्राप्य सर्वत्र सत्कृता भवन्ति॥५०॥

पदार्थ:-जो (**देवा:**) विद्वान् जन (**यज्ञेन**) अग्नि आदि दिव्य पदार्थों के समूह से (**यज्ञम्**) धर्म, अर्थ, काम और मोक्ष के व्यवहार को (**अयजन्त**) मिलते प्राप्त होते हैं और जो ब्रह्मचर्य आदि (**धर्माणि**) धर्म (**प्रथमानि**) प्रथम (**आसन्**) हैं (**तानि**) उनका सेवन करते और कराते हैं (**ते, ह**) वे ही (**यत्र**) यहाँ (**पूर्वे**) पहिले अर्थात् जिन्होंने विद्या पढ़ ली (**साध्या:**) तथा औरों को विद्यासिद्धि के लिये सेवन करने योग्य (**देवा:**) विद्वान् जन (**सन्ति**) हैं, वहाँ (**महिमान:**) सत्कार को प्राप्त हुए (**नाकम्**) दु:खरहित सुख को (**सचन्त**) प्राप्त होते हैं॥५०॥

भावार्थ:-जो लोग प्रथमावस्था में ब्रह्मचर्य से उत्तम उत्तम शिक्षा आदि सेवन करने योग्य कामों को प्रथम करते हैं, वे आप्त अर्थात् विद्यादि गुण, धर्म्मादि कार्यों को साक्षात् किये हुए जो विद्वान् उनके समान विद्वान् होकर विद्यानन्द को प्राप्त होकर सर्वत्र सत्कार को प्राप्त होते हैं॥५०॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

स॒मा॒नमे॒तदु॑दु॒कमुच्चैत्यव॒ चाह॑भि:।
भूमिं॑ प॒र्जन्या॒ जिन्व॑न्ति॒ दिवं॑ जिन्वन्त्य॒ग्नय॑:॥५१॥

स॒मा॒नम्। ए॒तत्। उ॒दु॒कम्। उत्। च॒। ए॒ति॑। अव॑। च॒। अह॑ऽभि:। भूमि॑म्। प॒र्ज॒न्या॑:। जिन्व॑न्ति। दिव॑म्। जि॒न्व॒न्ति॒। अ॒ग्नय॑:॥५१॥

पदार्थः-(**समानम्**) (**एतत्**) पूर्वोक्तं विदुषां कर्म (**उदकम्**) जलम् (**उत्**) (**च**) (**एति**) प्राप्नोति (**अव**) (**च**) (**अहभिः**) दिनैः। अत्र **छान्दसो वर्णलोपो वे**ति रलोपः। (**भूमिम्**) (**पर्जन्याः**) मेघाः (**जिन्वन्ति**) प्रीणन्ति (**दिवम्**) अन्तरिक्षम् (**जिन्वन्ति**) तर्पयन्ति (**अग्नयः**) विद्युतः॥५१॥

अन्वयः-यदुदकमहभिरुदेति चावैति च तेनैतत्समानम्। अतः पर्जन्या भूमिं जिन्वन्ति। अग्नयो दिवं जिन्वन्ति॥५१॥

भावार्थः-ब्रह्मचर्याद्यनुष्ठानेषु कृतेन हवनादिना वायुवृष्ट्युदकशुद्धिर्जायते ततः शुद्धोदकवर्षणेन भूमिजास्तृप्यन्ति। तत एतद्विदुषां पूर्वोक्तं कर्मोदकवदस्ति॥५१॥

पदार्थः-जो (**उदकम्**) जल (**अहभिः**) बहुत दिनों से (**उत्, एति**) ऊपर को जाता अर्थात् सूर्य के ताप से कण-कण हो और पवन के बल से उठकर अन्तरिक्ष में ठहरता (**च**) और (**अव**) नीच को (**च**) भी आता अर्थात् वर्षा काल पाय भूमि पर वर्षता है, उसके (**एतत्**) यह पूर्वोक्त विद्वानों का ब्रह्मचर्य अग्निहोत्र आदि धर्मादि व्यवहार (**समानम्**) तुल्य है। इसी से (**पर्जन्याः**) मेघ (**भूमिम्**) भूमि को (**जिन्वन्ति**) तृप्त करते और (**अग्नयः**) बिजुली आदि अग्नि (**दिवम्**) अन्तरिक्ष को (**जिन्वन्ति**) तृप्त करते अर्थात् वर्षा से भूमि पर उत्पन्न जीव जीते और अग्नि से अन्तरिक्ष, वायु, मेघ आदि शुद्ध होते हैं॥५१॥

भावार्थः-ब्रह्मचर्य आदि अनुष्ठानों में किये हुए हवन आदि से पवन और वर्षा जल की शुद्धि होती है, उससे शुद्ध जल वर्षने से भूमि पर उत्पन्न हुए जीव तृप्त होते हैं। इससे विद्वानों का पूर्वोक्त ब्रह्मचर्यादि कर्म जल के समान है, जैसे ऊपर जाता और नीचे आता वैसे अग्निहोत्रादि से पदार्थ का ऊपर जाना और नीचे आना है॥५१॥

पुनः सूर्यदृष्टान्तेन विद्वद्विषयमाह॥

फिर सूर्य के दृष्टान्त से विद्वानों के विषय को अगले मन्त्र में कहा है॥

दि॒व्यं सु॑प॒र्णं वा॑य॒सं बृ॒हन्त॑मपां॒ गर्भं॑ दर्श॒तमोष॑धीनाम्।
अ॒भी॑प॒तो वृ॒ष्टिभि॑स्तर्पयन्तं॒ सर॑स्वन्तमव॒से जो॑हवीमि॥५२॥२३॥२२॥

दि॒व्यम्। सु॒ऽप॒र्णम्। वा॒य॒सम्। बृ॒हन्त॑म्। अ॒पाम्। गर्भ॑म्। दृ॒श॒तम्। ओष॑धीनाम्। अ॒भी॑प॒तः। वृ॒ष्टिऽभिः॑। त॒र्पय॑न्तम्। सर॑स्वन्तम्। अव॑से। जो॒ह॒वी॒मि॒॥५२॥

पदार्थः-(**दिव्यम्**) दिव्यगुणस्वभावम् (**सुपर्णम्**) सुपर्णा रश्मयो विद्यन्ते यस्मिँस्तम् (**वायसम्**) अतिगन्तारम्। **वा गतिगन्धनयो**रित्यतोऽसुन् युडागमश्चोणादिः। (**बृहन्तम्**) सर्वेभ्यो महान्तम् (**अपाम्**) अन्तरिक्षस्य। **आप इत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३) (**गर्भम्**) गर्भ इव मध्ये स्थितम् (**दर्शतम्**) यो दर्शयति तम् (**ओषधीनाम्**) सोमादीनाम् (**अभीपतः**) अभित उभयत आपो यस्मिँस्तस्मात् (**वृष्टिभिः**) (**तर्पयन्तम्**) (**सरस्वन्तम्**) सरांस्युदकानि बहूनि विद्यन्ते यस्मिँस्तम् (**अवसे**) रक्षणाद्याय (**जोहवीमि**) भृशमाददामि॥५२॥

अन्वयः-हे मनुष्या! यथाऽहमवसे दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भमोषधीनां दर्शतं वृष्टिभिरभीपतस्तर्पयन्तं सरस्वन्तं सूर्यमिव वर्त्तमानं विद्वांसं जोहवीमि तथैतं यूयमप्यादत्त॥५२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यलोको भूगोलानां मध्यस्थः सन् सर्वान् प्रकाशयति तथैव विद्वान् सर्वलोकमध्यस्थः सन् सर्वेषामात्मनः प्रकाशयति यथा सूर्यो वर्षाभिस्सर्वान् सुखयति तथैव विद्वान् विद्यासुशिक्षोपदेशवृष्टिभिः सर्वान् जनानानन्दयति॥५२॥

अत्राग्निकालसूर्यविमानादीश्वरविद्वत्स्त्रियादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति चतुष्षष्ट्युत्तरं शततमं १६४ सूक्तं त्रयोविंशो २३ वर्गो द्वाविंशोऽनुवाकश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे मैं **(अवसे)** रक्षा आदि के लिये **(दिव्यम्)** दिव्य गुण, स्वभावयुक्त **(सुपर्णम्)** जिसमें सुन्दर गमनशील रश्मि विद्यमान **(वायसम्)** जो अत्यन्त जानेवाले **(बृहन्तम्)** सब से बड़े **(अपाम्)** अन्तरिक्ष के **(गर्भम्)** बीच गर्भ के समान स्थित **(ओषधीनाम्)** सोमादि ओषधियों को **(दर्शतम्)** दिखानेवाले **(वृष्टिभिः)** वर्षा से **(अभीपतः)** दोनों ओर आगे-पीछे जल से युक्त जो मेघादि उससे **(तर्पयन्तम्)** तृप्ति करनेवाले **(सरस्वन्तम्)** बहुत जल जिसमें विद्यमान उस सूर्य के समान वर्त्तमान विद्वान् को **(जोहवीमि)** निरन्तर ग्रहण करते हैं, वैसे इसको तुम भी ग्रहण करो॥५२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्यलोक भूगोल के बीच स्थित हुआ सबको प्रकाशित करता है, वैसे ही विद्वान् जन सब लोकों के मध्य स्थिर होता हुआ सबके आत्माओं को प्रकाशित करता है। जैसे सूर्य वर्षा से सबको सुखी करता है, वैसे ही विद्वान् विद्या, उत्तम शिक्षा और उपदेशवृष्टियों से सब जनों को आनन्दित करता है॥५२॥

इस सूक्त में अग्नि, काल, सूर्य, विमान आदि पदार्थ तथा ईश्वर, विद्वान् और स्त्री आदि के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ चौंसठवां १६४ सूक्त और तेईसवां २३ वर्ग और बाईसवां २२ अनुवाक पूरा हुआ॥

कयेति पञ्चदशर्चस्य पञ्चषष्ट्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। इन्द्रो देवता। १, ३,४,५, ११,१२ विराट् त्रिष्टुप्। २,८,९ त्रिष्टुप्। १३ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ६,७,१०,१४ भुरिक् पङ्क्तिः। १५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्गुणानाह॥

अब पन्द्रह ऋचावाले एक सौ पैंसेठवें सूक्त का आरम्भ है। उसमें आदि से विद्वानों के गुणों को कहते हैं॥

कया॑ शु॒भा सव॑यस॒: सनी॑ळा: समा॒न्या म॒रुत॒: सं मि॑मिक्षु:।
कया॑ म॒ती कुत॒ एता॑स ए॒तेऽर्चन्ति॒ शुष्मं॒ वृष॑णो वसू॒या॥ १॥

कया॑। शु॒भा। सऽव॑यसः। सऽनी॑ळाः। स॒मा॒न्या। म॒रुत॑ः। सम्। मि॒मि॒क्षु॒रिति॑। कया॑। मती। कुत॑ः। आऽइ॑तासः। ए॒ते। अर्चन्ति। शुष्म॑म्। वृष॑णः। व॒सु॒ऽया॥ १॥

पदार्थः-(**कया**) (**शुभा**) शुभगुणकर्मणा (**सवयसः**) समानं वयो येषान्ते (**सनीळाः**) समीपस्थाः (**समान्या**) तुल्यया क्रियया (**मरुतः**) वायव इव वर्त्तमानाः (**सम्**) (**मिमिक्षुः**) सिञ्चन्ति (**कया**) (**मती**) मत्या (**कुतः**) (**एतासः**) समन्तात् प्राप्ताः (**एते**) (**अर्चन्ति**) प्राप्नुवन्ति (**शुष्मम्**) बलम् (**वृषणः**) वर्षितारः (**वसूया**) आत्मनो वसूनां धनानामिच्छया॥ १॥

अन्वयः-हे मनुष्याः! सवयसः सनीळा मरुतो विद्वांसः कया समान्या शुभा संमिमिक्षुः। एतासो वृषण एते वसूया कया मती कुतः शुष्ममर्चन्ति॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। (**प्रश्नः**) यथा वायवो वर्षाः कृत्वा सर्वान् तर्पयन्ति तथा विद्वांसो रागद्वेषरहितया धर्म्यया कया क्रियया जनानुन्नयेयुः। केन विज्ञानेन सत्क्रियया च सर्वान् सत्कुर्युः? आप्तरीया वेदोक्तयेत्युत्तरम्॥ १॥

पदार्थः-हे मनुष्यो! (**सवयसः**) समान अवस्थावाले (**सनीळाः**) समीपस्थ (**मरुतः**) पवनों के समान वर्त्तमान विद्वान् जन (**कया**) किस (**समान्या**) तुल्य क्रिया के साथ (**शुभा**) शुभ गुण, कर्म से (**संमिमिक्षुः**) अच्छे प्रकार सेचनादि कर्म करते हैं तथा (**एतासः**) अच्छे प्रकार प्राप्त हुए (**वृषणः**) वर्षनेवाले (**एते**) ये (**वसूया**) अपने को धनों की इच्छा के साथ (**कया**) किस (**मती**) मति से (**कुतः**) कहाँ से (**शुष्मम्**) बल को (**अर्चन्ति**) प्राप्त होते हैं॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। (**प्रश्न**) जैसे पवन वर्षा कर सबको तृप्त करते हैं, वैसे विद्वान् जन भी रागद्वेषरहित धर्मयुक्त किस क्रिया से जनों की उन्नति करावें और किस विज्ञान वा अच्छी क्रिया से सबका सत्कार करें? इस विषय में उत्तर यही है कि आप्त सज्जनों की रीति और वेदोक्त क्रिया से उक्त कार्य करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त।
श्येनाँइव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम॥ २॥

कस्य। ब्रह्माणि। जुजुषुः। युवानः। कः। अध्वरे। मरुतः। आ। ववर्त। श्येनान्ऽइव। ध्रजतः। अन्तरिक्षे। केन। महा। मनसा। रीरमाम॥ २॥

पदार्थः-(**कस्य**) (**ब्रह्माणि**) बृहन्ति यानि धनान्यन्नानि वा तानि। **ब्रह्मेति धननामसु पठितम्।** (निघं०२.१०) **अन्ननाम च०।** (निघं०२.७) (**जुजुषुः**) सेवन्ते। अत्र **बहुलं छन्दसी**ति शपः श्लुः। (**युवानः**) ब्रह्मचर्येण विद्यया च प्राप्तयौवनाः (**कः**) (**अध्वरे**) अहिंसनीये धर्म्ये व्यवहारे (**मरुतः**) वायव इव (**आ**) समन्तात् (**ववर्त्त**) वर्त्तते। अत्रापि शपः श्लुस्तस्य स्थाने तप् च। (**श्येनानिव**) अश्वानिव। **श्येनास इत्यश्वनामसु पठितम्।** (निघं०१.१४) (**ध्रजतः**) गच्छतः (**अन्तरिक्षे**) आकाशे (**केन**) (**महा**) महता (**मनसा**) (**रीरमाम**) सर्वान् रमयेम॥ २॥

अन्वयः-ये मरुत इव युवानो विद्वांसः कस्य ब्रह्माणि जुजुषुः। कोऽस्मिन्नध्वर आववर्त्त वयं केन महा मनसा ध्रजतो श्येनानिव कान् गृहीत्वाऽन्तरिक्षे रीरमाम॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यथा वायवो जगत्स्थान् पदार्थान् सेवन्ते तथा ब्रह्मचर्यविद्याबोधाभ्यां परमश्रियं सेवन्ताम्। यथाऽन्तरिक्षे उड्डीयमानान् श्येनादीन् पक्षिणः पश्यन्ति, तथैव सभूगोला वयमाकाशे रमेमहि सर्वान् रमयामः। एतत् ज्ञातुं विद्वांस एव शक्नुवन्ति॥ २॥

पदार्थः-जो (**मरुतः**) पवनों के समान वेगयुक्त (**युवानः**) ब्रह्मचर्य और विद्या से युवावस्था को प्राप्त विद्वान् (**कस्य**) किसके (**ब्रह्माणि**) बुद्धि को प्राप्त होते जो अन्न वा धन उनको (**जुजुषुः**) सेवते हैं और (**कः**) कौन इस (**अध्वरे**) न नष्ट करने योग्य धर्मयुक्त व्यवहार में (**आ, ववर्त्त**) अच्छे प्रकार वर्त्तमान है, हम लोग (**केन**) कौन (**महा**) बड़े (**मनसा**) मन से (**ध्रजतः**) जानेवाले (**श्येनानिव**) घोड़ों के समान किनको लेकर (**अन्तरिक्षे**) अन्तरिक्ष में (**रीरमाम**) सबको रमावें॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे वायु संसारस्थ पदार्थों का सेवन करते हैं, वैसे ब्रह्मचर्य और विद्या के बोध से परम श्री को सेवें। जैसे अन्तरिक्ष में उड़ते हुए श्येनादि पक्षियों को देखते हैं, वैसे ही भूगोल के साथ हम लोग आकाश में रमें और सबको रमावें, इसको विद्वान् ही जान सकते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे॥ ३॥

कुतः। त्वम्। इन्द्र। माहिनः। सन्। एकः। यासि। सत्ऽपते। किम्। ते। इत्था। सम्। पृच्छसे। सम्ऽअराणः। शुभानैः। वोचेः। तत्। नः। हरिऽवः। यत्। ते। अस्मे इति॥ ३॥

पदार्थः-(**कुतः**) कस्मात् (**त्वम्**) (**इन्द्र**) परमैश्वर्ययुक्त (**माहिनः**) महिमायुक्तः। अत्र **महेरिनण् चे**त्युणादौ सिद्धः। (**सन्**) (**एकः**) असहायः (**यासि**) गच्छसि (**सत्पते**) सतां पालक (**किम्**) (**ते**) (**इत्था**) अनेन (**हेतुना**) (**सम्**) (**पृच्छसे**) (**समराणः**) सम्यक् प्राप्नुवन् (**शुभानैः**) शुभैर्वचनैः (**वोचेः**) उच्याः (**तत्**) (**नः**) अस्मान् (**हरिवः**) प्रशस्ता हरयो हरणगुणा विद्यन्ते यस्मिँस्तत्सम्बुद्धौ (**यत्**) (**ते**) तव (**अस्मे**) अस्माकम्॥ ३॥

अन्वयः-हे इन्द्र सत्पते! माहिन एकः सँस्त्वं सूर्य इव कुतो यासि त इत्था किमस्ति। हे हरिवः! समराणस्त्वं यत्ते मनस्यस्मे वर्त्तते तच्छुभानैर्नोऽस्मान् वोचेर्यतस्त्वं संपृच्छसे च॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य एकाकी सर्वानाकृष्य प्रकाशते। यथाऽऽप्तो विद्वान् सर्वत्र भ्राम्यन् सर्वान् सत्यपालकान् करोति तथा त्वं क्व गच्छसि कस्मादायासि किं करोषीति पृच्छामि। वद स्वोत्तरम्। धर्म्ये मार्गे गच्छामि। गुरुकुलादायामि। अध्यापनमुपदेशञ्च करोमीति समाधानम्॥ ३॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्ययुक्त (**सत्पते**) सज्जनों के पालनेवाले! (**माहिनः**) महिमायुक्त (**एकः**) इकिले (**सन्**) होते हुए (**त्वम्**) आप सूर्य के समान (**कुतः**) कहाँ से (**यासि**) जाते हैं (**ते**) आपका (**इत्था**) इस प्रकार से (**किम्**) क्या है। हे (**हरिवः**) प्रशंसित गुणोंवाले! (**समराणः**) अच्छे प्रकार प्राप्त हुये आप (**यत्**) जो (**ते**) आपके मन में (**अस्मे**) हम लोगों के लिये वर्त्तता है (**तत्**) उसको (**शुभानैः**) उत्तम वचनों से (**नः**) हम लोगों के प्रति (**वोचेः**) कहो, जिससे आप (**सं, पृच्छसे**) सम्यक् पूछते भी हैं अर्थात् हमारी व्यवस्था आप पूछते हैं॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य एकाएकी सबको खींच के आप प्रकाशमान होता है वा जैसे आप्त विद्वान् सर्वत्र भ्रमण करता हुआ सबको सत्य पालनेवाले करता है, वैसे तू कहाँ जाता है? कहाँ से आता है? क्या करता है? यह पूछता हूँ उत्तर कह। धर्मयुक्त मार्गों को जाता हूँ। गुरुकुल से आता हूँ। पढ़ाना वा उपदेश करता हूँ, यह समाधान है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः।

आ शा॑सते॒ प्रति॑ हर्यन्त्यु॒क्थेमा हरी॑ वहत॒स्ता॒ नो॒ अच्छ॑॥४॥

ब्रह्मा॑णि॒। मे॒। म॒तय॑ः। शम्। सु॒तास॑ः। शुष्म॑ः। इ॒यर्ति॑। प्रऽभृ॑तः। मे॒। अद्रि॑ः। आ। शा॒स॒ते॒। प्रति॑। ह॒र्य॒न्ति॒। उ॒क्था। इ॒मा। हरी॒ इति॑। व॒ह॒त॒ः। ता। न॒ः। अच्छ॑॥४॥

पदार्थः-(**ब्रह्माणि**) धनान्यन्नानि वा (**मे**) मम (**मतयः**) मननशीला मनुष्याः (**शम्**) सुखम् (**सुतासः**) प्राप्ताः (**शुष्मः**) बलवान् (**इयर्त्ति**) प्राप्नोति (**प्रभृतः**) (**मे**) मम (**अद्रिः**) मेघः (**आ**) (**शासते**) इच्छन्ति (**प्रति**) (**हर्यन्ति**) कामयन्ते (**उक्था**) वक्तुं योग्यानि (**इमा**) इमानि (**हरी**) धारणाकर्षणगुणौ (**वहतः**) प्राप्नुतः (**ता**) तौ (**नः**) अस्मान् (**अच्छ**) सम्यक्॥४॥

अन्वयः-हे मनुष्या! यथा प्रभृतः शुष्मोऽद्रिर्मेघ इव मे उपदेशः सर्वानियर्त्ति। यथा सुतासो मतयो मे ब्रह्माणि शं चाशासते। इमोक्था प्रति हर्यन्ति यथा ता हरी नोऽस्मानच्छ वहतस्तथा यूयं भवत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य उदारास्ते मेघवत् सर्वेभ्यः सुखानि वर्षन्ति सर्वेभ्यो विद्यादानं कामयन्ते। यथाऽऽत्मसुखमिच्छन्ति तथा परेषां सुखानि कर्त्तुं दुःखानि विनाशयितुं सर्व इच्छन्तु॥४॥

पदार्थः-हे मनुष्यो! जैसे (**प्रभृतः**) शास्त्रविज्ञान से भरा हुआ (**शुष्मः**) बलवान् (**अद्रिः**) मेघ के समान (**मे**) मेरा उपदेश सबको (**इयर्त्ति**) प्राप्त होता, वा जैसे (**सुतासः**) प्राप्त हुए (**मतयः**) मननशील मनुष्य (**मे**) मेरे (**ब्रह्माणि**) धनों वा अन्नों को और (**शम्**) सुख को (**आशासते**) चाहते हैं, वा (**इमा**) इन (**उक्था**) कहने के योग्य पदार्थों की (**प्रति, हर्यन्ति**) प्रीति से कामना करते हैं, वा जैसे (**ता**) वे (**हरी**) धारण-आकर्षण गुण (**नः**) हम लोगों को (**अच्छ**) अच्छा (**वहतः**) प्राप्त होते हैं, वैसे तुम सब होओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो उदार हैं वे मेघ के समान सबके लिये समान सुखों को वर्षाते हैं, सबके लिये विद्यादान की कामना करते हैं। जैसे अपने को सुख की इच्छा करते हैं, वैसे औरों को सुखी करने और दुःखों का विनाश करने को सब चाहें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अतो॑ व॒यम॑न्त॒मेभि॑र्यु॒जा॒नाः स्वक्षे॑त्रेभिस्त॒न्व१॑ः शुम्भ॑माना॒ः।

महो॑भि॒रेता॒ उप॑ युज्महे॒ न्विन्द्र॑ स्व॒धाम॒नु हि नो॑ ब॒भूथ॑॥५॥२४॥

अत॑ः। व॒यम्। अ॒न्त॒मेभि॑ः। यु॒जा॒नाः। स्वऽक्षे॑त्रेभिः। त॒न्व॑ः। शुम्भ॑मानाः। मह॑ःऽभिः। एता॑न्। उप॑। यु॒ज्म॒हे॒। नु। इन्द्र॑। स्व॒धाम्। अनु॑। हि। न॒ः। ब॒भूथ॑॥५॥

पदार्थः-(**अतः**) अस्माद्धेतोः (**वयम्**) (**अन्तमेभिः**) समीपस्थैः। **अन्तमानामित्यन्तिकनामसु पठितम्।** (निघं०२.१६) (**युजानाः**) (**स्वक्षत्रेभिः**) स्वकीयै राज्यैः (**तन्वः**) तनूः (**शुम्भमानाः**) शुभगुणाढ्याः सम्पादयन्तः (**महोभिः**) महत्तमैः (**एतान्**) (**उप**) (**युज्महे**) समादधीमहि। अत्र **बहुलं छन्दसी**ति श्यनो लुक्। (**नु**) शीघ्रम् (**इन्द्र**) परमैश्वर्ययुक्त (**स्वधाम्**) अन्नमुदकं वा (**अनु**) (**हि**) किल (**नः**) अस्माकम् (**बभूथ**) भवसि॥५॥

अन्वयः-हे इन्द्र! यतस्त्वं हि नस्स्वधामनु बभूथैतानुप युङ्क्षेऽतो वयमेतांश्च युजानाः स्वक्षत्रेभिस्तन्व शुम्भमाना अन्तमेभिर्महोभिर्नूप युज्महे॥५॥

भावार्थः-ये शरीरेण बलारोग्ययुक्ता धार्मिकैर्बलिष्ठैर्विद्वद्भिः सर्वाणि कर्माणि समादधानाः सर्वेषां सुखाय वर्त्तमाना महद्राज्यन्यायायोपयुञ्जते ते सद्यो धर्मार्थकाममोक्षसिद्धिमाप्नुवन्ति॥५॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्ययुक्त पुरुष! जिस कारण आप (**हि**) ही (**नः**) हमारे (**स्वधाम्**) अन्न और जल का (**अनु, बभूथ**) अनुभव करते हैं (**अतः**) इससे (**वयम्**) हम लोग (**एतान्**) इन पदार्थों को (**युजानाः**) युक्त और (**स्वक्षत्रेभिः**) अपने राज्यों से (**तन्वः**) शरीरों को (**शुम्भमानाः**) शुभगुणयुक्त करते हुए (**अन्तमेभिः**) समीपस्थ (**महोभिः**) अत्यन्त बड़े कामों से (**नु**) शीघ्र (**उप, युज्महे**) उपयोग लेते हैं॥५॥

भावार्थः-जो शरीर से बल और आरोग्ययुक्त धार्मिक बलिष्ठ विद्वानों से सब कामों का समाधान करते हुए सबके सुख के लिये वर्त्तमान अत्यन्त राज्य के न्याय के लिये उपयोग करते हैं, वे शीघ्र धर्म, अर्थ, काम और मोक्ष की सिद्धि को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

क्व१॑ स्या वो॑ मरुतः स्व॒धासी॒द् यन्मामेकं॑ स॒मध॑त्ताहि॒हत्ये॑।
अ॒हं ह्यु१॑ग्रस्त॑वि॒षस्तु॑वि॒ष्मान् विश्व॑स्य॒ शत्रो॒रन॑मं वध॒स्नैः॥६॥

क्व॑। स्या। व॒ः। म॒रु॒तः॒। स्व॒धा। आ॒सी॒त्। यत्। माम्। एक॑म्। स॒म्ऽअध॑त्त। अ॒हि॒ऽहत्ये॑। अ॒हम्। हि। उ॒ग्रः। त॒वि॒षः। तु॒वि॒ष्मान्। विश्व॑स्य। शत्रोः॑। अन॑मम्। व॒ध॒ऽस्नैः॥६॥

पदार्थः-(**क्व**) कुत्र (**स्या**) असौ (**वः**) युष्माकम् (**मरुतः**) प्राणा इव वर्त्तमानाः (**स्वधा**) अन्नमुदकं वा (**आसीत्**) अस्ति (**यत्**) (**माम्**) (**एकम्**) (**समधत्त**) सम्यग् धरतः (**अहिहत्ये**) मेघहनने (**अहम्**) (**हि**) खलु (**उग्रः**) तीव्रस्वभावः (**तविषः**) बलवतः (**तुविष्मान्**) बलवान्। **तुविरिति बलनामसु पठितम्।** (निघं०३.१) (**विश्वस्य**) समग्रस्य (**शत्रोः**) (**अनमम्**) नमामि (**वधस्नैः**) यानि वधेन स्नापयन्ति शस्त्राणि तैः॥६॥

अन्वयः-हे मरुतो! यद्यतो मामेकमहिहत्ये समधत्त स्या वः स्वधा क्वाऽऽसीत्। यथा तुविष्मानुग्रोऽहं तविषो विश्वस्य शत्रोर्वधस्नैरनमँस्तं हि मां यूयं सुखे धरत॥६॥

भावार्थः-ये मनुष्या विद्यां धृत्वा सूर्यो मेघमिव शत्रुबलं निवारयेयुस्ते सर्वे विद्वांसं प्रति पृच्छेयुर्या सर्वधारिका शक्तिर्वर्त्तते सा क्वाऽस्तीति सर्वत्र स्थितेत्युत्तरम्॥६॥

पदार्थः-हे **(मरुतः)** प्राण के समान वर्त्तमान विद्वानो! **(यत्)** जिससे **(माम्)** मुझ **(एकम्)** एक को **(अहिहत्ये)** मेघ के वर्षण होने में **(समधत्त)** अच्छे प्रकार धारण करो **(स्या)** वह **(वः)** आपका **(स्वधा)** अन्न और जल **(क्व)** कहाँ **(आसीत्)** है, वैसे **(तुविष्मान्)** बलवान् **(उग्रः)** तीव्र स्वभाववाला **(अहम्)** मैं जो **(तविषः)** बलवान् **(विश्वस्य)** समग्र **(शत्रोः)** शत्रु के **(वधस्नैः)** वध से न्हवानेवाले शस्त्र उनके साथ **(अनमम्)** नमता हूँ **(हि)** उसी मुझको तुम सुख में धारण करो॥६॥

भावार्थः-जो मनुष्य विद्याओं को धारण कर सूर्य जैसे मेघ को वैसे शत्रु बल को निवृत्त करें, वे सब विद्वान् के प्रति पूछें कि जो सबको धारण करनेवाली शक्ति है वह कहाँ है? सर्वत्र स्थित है, यह उत्तर है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भूरि॑ चकर्थ॒ युज्ये॑भि॒रस्मे स॑मा॒नेभि॑र्वृषभ॒ पौंस्ये॑भिः।
भूरी॑णि॒ हि कृ॒णवा॑मा शविष्ठेन्द्र॒ क्रत्वा॑ मरुतो॒ यद्वशा॑म॥७॥

भूरि॑। च॒कर्थ॑। युज्ये॑भिः। अ॒स्मे इति॑। स॒मा॒नेभि॑ः। वृ॒ष॒भ॒। पौंस्ये॑भिः। भूरी॑णि। हि। कृ॒णवा॑म। श॒विष्ठ॒। इन्द्र॑। क्रत्वा॑। म॒रुत॒ः। यत्। वशा॑म॥७॥

पदार्थः-**(भूरि)** बहु **(चकर्थ)** करोषि **(युज्येभिः)** योजनीयैः कर्मभिः **(अस्मे)** अस्मभ्यम् **(समानेभिः)** तुल्यैः **(वृषभ)** उपदेशवर्षक **(पौंस्येभिः)** पुरुषार्थैः **(भूरीणि)** बहूनि **(हि)** किल **(कृणवाम)** कुर्याम। अत्रा**न्येषामपी**ति दीर्घः। **(शविष्ठ)** बलिष्ठ **(इन्द्र)** सर्वसुखप्रद **(क्रत्वा)** प्रज्ञया **(मरुतः)** विद्वांसो मनुष्याः **(यत्)** यम् **(वशाम)** कामयेमहि॥७॥

अन्वयः-हे वृषभ! यथा त्वं समानेभिर्युज्येभिः पौंस्येभिरस्मे भूरि सुखं चकर्थ। तस्मै तुभ्यं वयं भूरीणि सुखानि कृणवाम। हे शविष्ठेन्द्र! यथा त्वं क्रत्वाऽस्मान् विदुषः करोषि तथा वयं तव सेवां कुर्याम। हे मरुतो! यूयं यत् कामयिष्यध्वे तद्वयमपि वशाम हि कामयेमहि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेह विद्वांसो पुरुषार्थेन सर्वान् विद्यासुशिक्षायुक्तान् कुर्वन्ति तथैतान् सर्वे सत्कुर्युः। ये सर्वविद्याऽध्यापकाः सर्वेषां सुखं कामुकाः स्युस्तेऽध्यापनोपदेशयोः प्रधाना भवन्तु॥७॥

पदार्थः-हे **(वृषभ)** उपदेश की वर्षा करनेवाले! जैसे आप **(समानेभिः)** समान तुल्य **(युज्येभिः)** योग्य कर्मों वा **(पौंस्येभिः)** पुरुषार्थों से **(अस्मे)** हमारे लिये **(भूरि)** बहुत सुख **(चकर्थ)** करते हैं, उन आपके लिये हम लोग **(भूरीणि)** बहुत सुख **(कृणवाम)** करें। हे **(शविष्ठ)** बलवान् **(इन्द्र)** सबको सुख देनेवाले! जैसे आप **(क्रत्वा)** उत्तम बुद्धि से हम लोगों को विद्वान् करते हैं, वैसे हम लोग आपकी सेवा करें। हे **(मरुतः)** विद्वान् मनुष्यो! तुम **(यत्)** जिसकी कामना करो, उसकी हम भी **(वशाम, हि)** कामना ही करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इस संसार में विद्वान् जन पुरुषार्थ से सबको विद्या और उत्तम शिक्षा से युक्त करते हैं, वैसे इनको सब सत्कारयुक्त करें। जो सब विद्याओं के पढ़ाने और सबके सुख को चाहनेवाले हों, वे पढ़ाने और उपदेश करने में प्रधान हों॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वधीं॑ वृ॒त्रं म॑रुत इन्द्रि॒येण॒ स्वेन॒ भाम॑न तवि॒षो ब॑भू॒वान्।
अ॒हमे॒ता मन॑वे वि॒श्वश्च॑न्द्राः॒ सुगा॒ अप॑श्च॒कर॒ वज्र॑बाहुः॥८॥

वधी॑म्। वृ॒त्रम्। म॒रु॒तः॒। इ॒न्द्रि॒येण॑। स्वेन॑। भाम॑न। त॒वि॒षः॒। ब॒भू॒वान्। अ॒हम्। ए॒ताः॒। मन॑वे। वि॒श्वऽच॑न्द्राः॒। सु॒ऽगाः॒। अ॒पः॒। च॒कर॒। वज्र॑ऽबाहुः॥८॥

पदार्थः-(**वधीम्**) हन्मि **(वृत्रम्)** मेघम् **(मरुतः)** प्राणवत् प्रियाः **(इन्द्रियेण)** मनसा **(स्वेन)** स्वकीयेन **(भामेन)** क्रोधेन **(तविषः)** बलात् **(बभूवान्)** भविता **(अहम्)** **(एताः)** **(मनवे)** मननशीलाय मनुष्याय **(विश्वश्चन्द्राः)** विश्वानि चन्द्राणि सुवर्णानि याभ्यस्ताः **(सुगाः)** सुष्ठु गच्छन्ति ताः **(अपः)** जलानि **(चकर)** करोमि **(वज्रबाहुः)** वज्रो बाहौ यस्य सः॥८॥

अन्वयः-हे मरुतो! वज्रबाहुर्बभूवानहं यथा सूर्यो वृत्रं हत्वाऽपः सुगाः करोति, तथा स्वेन भामेनेन्द्रियेण तविषश्च शत्रून् वधीं मनवे विश्वश्चन्द्रा एताश्श्रियश्चकार॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यप्रेरितया वृष्ट्या सर्वं जगज्जीवति तथा शत्रुविघ्ननिवारणेन सर्वे प्राणिनो जीवन्ति॥८॥

पदार्थः-हे **(मरुतः)** प्राण के समान प्रिय विद्वानो! **(वज्रबाहुः)** जिसके हाथ में वज्र है **(बभूवान्)** ऐसा होनेवाला **(अहम्)** मैं जैसे सूर्य **(वृत्रम्)** मेघ को मार **(अपः)** जलों को **(सुगाः)** सुन्दर जानेवाले करता है, वैसे **(स्वेन)** अपने **(भामेन)** क्रोध से और **(इन्द्रियेण)** मन से **(तविषः)** बल से शत्रुओं को **(वधीम्)** मारता हूँ और **(मनवे)** विचारशील मनुष्य के लिये **(विश्वश्चन्द्राः)** समस्त सुवर्णादि धन जिनसे होते **(एताः)** उन लक्ष्मियों को **(चकर)** करता हूँ॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य से प्रेरित वर्षा से समस्त जगत् जीवता है, वैसे शत्रुओं से होते हुए विघ्नों को निवारने से सब प्राणी जीवते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनु॑त्तमा ते॑ मघवन्नकि॒र्नु न त्वावाँ॑ अस्ति दे॒वता॒ विदा॑नः।
न जाय॑मानो॒ नश॑ते॒ न जा॒तो यानि॑ करि॒ष्या कृ॑णु॒हि प्र॑वृद्ध॥९॥

अनु॑त्तम्। आ। ते॒। म॒घ॒ऽव॒न्। नकिः॑। नु। न। त्वाऽवा॑न्। अ॒स्ति॒। दे॒वता॑। विदा॑नः। न। जाय॑मानः। नश॑ते। न। जा॒तः। यानि॑। क॒रि॒ष्या। कृ॒णु॒हि। प्र॒ऽवृ॒द्ध॒॥९॥

पदार्थः-(**अनुत्तम्**) अप्रेरितम् (**आ**) समन्तात् (**ते**) तव (**मघवन्**) परमधनयुक्त (**नकिः**) निषेधे (**नु**) शीघ्रे (**न**) (**त्वावान्**) त्वया सदृशः (**अस्ति**) (**देवता**) दिव्यगुणः (**विदानः**) विद्वान् (**न**) (**जायमानः**) उत्पद्यमानः (**नशते**) नश्यति (**न**) (**जातः**) उत्पन्नः (**यानि**) (**करिष्या**) कर्त्तुं योग्यानि। अत्र **सुपां सुलुगिति** डादेशः। (**कृणुहि**) कुरु (**प्रवृद्ध**) अतिशयेन विद्यया प्रतिष्ठित॥९॥

अन्वयः-हे मघवन्! ते तवाऽनुत्तं नकिर्विद्यते त्वावानन्यो देवता विदानो नास्ति जायमानो नु न नशते जातो न नशते। हे प्रवृद्ध! त्वं यानि करिष्या सन्ति तानि न्वाकृणुहि॥९॥

भावार्थः-यथाऽन्तर्यामिण ईश्वरात्किंचिदव्याप्तं न विद्यते न कश्चित्तत्सदृशो जायते न जातो न जनिष्यते न नश्यति कर्त्तव्यानि कार्याणि करोति, तथैव विद्वद्भिर्भवितव्यं वेदितव्यं च॥९॥

पदार्थः-हे (**मघवन्**) परमधनवान् विद्वान्! (**ते**) आपका (**अनुत्तम्**) न प्रेरणा किया हुआ (**नकिः**) नहीं कोई विद्यमान है और (**त्वावान्**) तुम्हारे सदृश और (**देवता**) दिव्य गुणवाला (**विदानः**) विद्वान् (**न**) नहीं (**अस्ति**) है। तथा (**जायमानः**) उत्पन्न होनेवाला (**नु**) शीघ्र (**न**) नहीं (**नशते**) नष्ट होता (**जातः**) उत्पन्न हुआ भी (**न**) नहीं नष्ट होता। हे (**प्रवृद्ध**) अत्यन्त विद्या से प्रतिष्ठा को प्राप्त! आप (**यानि**) जो (**करिष्या**) करने योग्य काम हैं, उनको शीघ्र (**आ, कृणुहि**) अच्छे प्रकार करिये॥९॥

भावार्थः-जैसे अन्तर्यामी ईश्वर से अव्याप्त कुछ भी नहीं विद्यमान है, न कोई उसके सदृश उत्पन्न होता, न उत्पन्न हुआ और न होगा, न वह नष्ट होता है, किन्तु ईश्वरभाव से अपने कर्त्तव्य कामों को करता है, वैसे ही विद्वानों को होना और जानना चाहिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एक॑स्य चिन्मे वि॒भ्व१॑स्त्वोजो॒ या नु दधृ॒ष्वान् कृ॒णवै॑ मनी॒षा।
अ॒हं ह्यु३॑ग्रो म॑रुतो॒ विदा॑नो॒ यानि॒ च्यव॒मिन्द्र॒ इदी॑श॒ एषा॑म्॥१०॥२५॥

एकस्य। चित्। मे। विऽभु। अस्तु। ओजः। या। नु। दधृष्वान्। कृणवै। मनीषा। अहम्। हि। उग्रः। मरुतः। विदानः। यानि। च्यवम्। इन्द्रः। इत्। ईशे। एषाम्॥ १०॥

पदार्थः-(**एकस्य**) (**चित्**) अपि (**मे**) मम (**विभु**) व्यापकम् (**अस्तु**) भवतु (**ओजः**) बलम् (**या**) यानि (**नु**) सद्यः (**दधृष्वान्**) प्रसोढा (**कृणवै**) कर्त्तुं शक्नुयाम् (**मनीषा**) प्रज्ञया (**अहम्**) (**हि**) किल (**उग्रः**) तीव्रः (**मरुतः**) मरुद्वद्वर्त्तमानाः (**विदानः**) विद्वान् (**यानि**) (**च्यवम्**) प्राप्नुयाम् (**इन्द्रः**) दुःखच्छेता (**इत्**) एव (**ईशे**) (**एषाम्**) प्राणिनाम्॥ १०॥

अन्वयः-हे मरुतो! यथैकस्य चिन्मे विभ्वोजोऽस्तु या दधृष्वानहं तथा तद्धि वोऽस्तु तानि सहत यथाहं मनीषा नु विद्या कृणवै उग्रो विदान इन्द्रः सन् यानि च्यवमेषामिदीशे च तथा यूयं वर्त्तध्वम्॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा जगदीश्वरोऽनन्तपराक्रमवान् व्यापकोऽस्ति तथा विद्वांसः सर्वेषु शास्त्रेषु धर्मकृत्येषु च व्याप्नुवन्तु न्यायाधीशा भूत्वैतेषां मनुष्यादीनां सुखं संपादयन्तु॥ १०॥

पदार्थः- हे (**मरुतः**) पवनों के समान वर्त्तमान सज्जनो! जैसे (**एकस्य**) एक (**चित्**) ही (**मे**) मेरे को (**विभु**) व्यापक (**ओजः**) बल (**अस्तु**) हो और (**या**) जिनको (**दधृष्वान्**) अच्छे प्रकार सहनेवाला मैं होऊं, वैसे वह बल (**हि**) निश्चय से तुम्हारा हो और उनका सहन तुम करो। जैसे (**अहम्**) मैं (**मनीषा**) बुद्धि से (**नु**) शीघ्र (**कृणवै**) विद्या कर सकूं और (**उग्रः**) तीव्र (**विदानः**) (**इन्द्रः**) दुःख का छिन्न-भिन्न करनेवाला होता हुआ (**यानि**) जिन पदार्थों को (**च्यवम्**) प्राप्त होऊं और (**एषाम्, इत्**) इन्हीं का (**ईशे**) स्वामी होऊं, वैसे तुम वर्त्तो॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जगदीश्वर अनन्त पराक्रमी और व्यापक है, वैसे विद्वान् जन समस्त शास्त्र और धर्मकृत्यों में व्याप्त होवें और न्यायाधीश होकर इन मनुष्यादि के सुखों को संपादन करें॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अमन्दन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः॥ ११॥

अमन्दत्। मा। मरुतः। स्तोमः। अत्र। यत्। मे। नरः। श्रुत्यम्। ब्रह्म। चक्र। इन्द्राय। वृष्णे सुऽमखाय। मह्यम्। सख्ये। सखायः। तन्वे। तनूभिः॥ ११॥

पदार्थः-(**अमन्दत्**) आनन्दयतु (**मा**) माम् (**मरुतः**) विद्वांसः (**स्तोमः**) स्तुतिसमूहः (**अत्र**) (**यत्**) (**मे**) मह्यम् (**नरः**) नायकाः (**श्रुत्यम्**) श्रुतिषु साधु (**ब्रह्म**) वेदः (**चक्रः**) कुर्वन्तु (**इन्द्राय**)

विद्याप्रकाशिताय **(वृष्णे)** बलवते **(सुमखाय)** उत्तमयज्ञानुष्ठात्रे **(मह्यम्) (सख्ये)** सर्वमित्राय **(सखायः)** सुर्वसुहृदः **(तन्वे)** शरीराय **(तनूभिः)** शरीरैः॥११॥

अन्वयः-हे मरुतो! यथा मे यत् श्रुत्यं ब्रह्म स्तोमश्चाऽत्र माऽमन्दत्तथा युष्मानप्यानन्दयतु। हे नरो! यथा यूयं सुमखाय वृष्ण इन्द्राय सख्ये मह्यं सखायस्सन्तस्तनूभिर्मे तन्वे सुखं चक्र तथाऽहमपि युष्मभ्यमेतत् करोमि॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वांसो यथाऽधीताः शब्दार्थसम्बन्धतो विज्ञाता वेदाः स्वात्मनः सुखयन्ति, तथैवापरान् सुखयिष्यन्तीति मत्वा ते शिष्यमध्यापयेयुः। यथा स्वयं ब्रह्मचर्येणारोग्यवीर्यवन्तो भूत्वा दीर्घायुषस्स्युस्तथैवान्यानपि कुर्युः॥११॥

पदार्थः-हे **(मरुतः)** विद्वानो! जैसे **(मे)** मेरे लिये **(यत्)** जो **(श्रुत्यम्)** सुनने योग्य **(ब्रह्म)** वेद और **(स्तोमः)** स्तुतिसमूह है वह **(अत्र)** यहाँ **(मा)** मुझे **(अमन्दत्)** आनन्दित करे, वैसे तुमको भी आनन्दित करावे। हे **(नरः)** अग्रगामी मुखिया जनो! जैसे तुम **(समुखाय)** उत्तम यज्ञानुष्ठान करनेवाले **(वृष्णे)** बलवान् **(इन्द्राय)** विद्या से प्रकाशित **(सख्ये)** सबके मित्र **(मह्यम्)** मेरे लिये **(सखायः)** सबके सुहृद् होते हुए **(तनूभिः)** शरीरों के साथ मेरे **(तन्वे)** शरीर के लिये सुख **(चक्र)** करो, वैसे मैं भी इसको करूं॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् जन जैसे पढ़े और शब्दार्थ सम्बन्ध से जाने हुए वेद पढ़नेवाले के आत्मा को सुख देते हैं, वैसे ही औरों को भी सुखी करेंगे, ऐसा मान के वे अध्यापक शिष्य को पढ़ावें। जैसे आप ब्रह्मचर्य से रोगरहित बलवान् होकर दीर्घजीवी हों, वैसे औरों को भी करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम्॥१२॥

एव। इत्। एते। प्रति। मा। रोचमानाः। अनेद्यः। श्रवः। आ। इषः। दधानाः। सम्ऽचक्ष्य। मरुतः। चन्द्रऽवर्णाः। अच्छान्त। मे। छदयाथ। च। नूनम्॥१२॥

पदार्थः-**(एव)** निश्चये **(इत्)** एव **(एते) (प्रति) (मा)** माम् **(रोचमानाः) (अनेद्यः)** प्रशस्यम्। **अनेद्य इति प्रशस्यनामसु पठितम्।** (निघं०३.८) **(श्रवः)** शृण्वन्ति येन तच्छास्त्रम् **(आ) (इषः)** इच्छाः **(दधानाः)** धरन्तः **(संचक्ष्य)** सम्यगध्याप्योपदिश्य वा। अत्राऽन्येषामपीति दीर्घः। **(मरुतः)** प्राणवत् प्रिया

विद्वांसः **(चन्द्रवर्णाः)** चन्द्रस्य वर्ण इव वर्णो येषान्ते **(अच्छान्त)** विद्यया आच्छादयन्तः **(मे)** मम **(छदयाथ)** अविद्यां दूरीकुरुत **(च)** विद्यां दत्त **(नूनम्)** निश्चितम्॥१२॥

अन्वयः-हे मरुतो! यथेष आदधाना मेत् प्रति रोचमाना एते यूयमनेद्यः श्रवः संचक्ष्य चन्द्रवर्णास्सन्तो मामच्छान्त तथैवेदानीं च नूनं मे छदयाथ॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये स्त्रीपुरुषान् विद्यासु प्रदीप्य प्रशस्तगुणकर्मस्वभावान् कृत्वा धर्म्येषु प्रयुञ्जते ते विश्वस्याऽलङ्कर्त्तारस्स्युः॥१२॥

पदार्थः-हे **(मरुतः)** प्राणों के समान प्रिय विद्वान् जनो! जैसे **(इषः)** इच्छाओं को **(आ, दधानाः)** अच्छे प्रकार धारण किये हुए **(मा, इत्)** मेरे ही **(प्रति, रोचमानाः)** प्रति प्रकाशमान होते हुए **(एते)** ये तुम **(अनेद्यः)** प्रशंसनीय **(श्रवः)** सुनने के साधन शास्त्र को **(संचक्ष्य)** पढ़ा वा उसका उपदेशमात्र कर **(चन्द्रवर्णाः)** चन्द्रमा के समान उज्ज्वल कान्तिवाले हुए मुझे **(अच्छान्त)** विद्या से ढांपते हुए वैसे **(एव)** ही अब **(च)** भी **(नूनम्)** निश्चय से **(मे, छदयाथ)** विद्याओं से आच्छादित करो, मेरी अविद्या को दूर करो और विद्या देओ॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्री-पुरुषों को विद्याओं में प्रकाशित और उन्हें प्रशंसित गुण, कर्म, स्वभाववाले कर धर्मयुक्त व्यवहारों में लगाते हैं, वे सबके सुभूषित करनेवाले हों॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

को न्वत्रा॑ मरुतो मामहे व॒: प्र या॑तन॒ सखी॒ँरच्छा॑ सखायः।
मन्मा॑नि चित्रा अपिवा॒तय॑न्त ए॒षां भू॑त॒ नवे॑दा म ऋ॒ताना॑म्॥१३॥

कः। नु। अत्र॑। म॒रु॒तः। मा॒म॒हे॒। वः। प्र। या॒त॒न॒। सखी॑न्। अच्छ॑। स॒खा॒यः॒। मन्मा॑नि। चि॒त्राः॒। अ॒पि॒ऽवा॒तय॑न्तः। ए॒षाम्। भू॒त॒। नवे॑दाः। मे॒। ऋ॒ताना॑म्॥१३॥

पदार्थः-**(कः)** **(नु)** सद्यः **(अत्र)** **(मरुतः)** **(मामहे)** महयति। अत्र **मह पूजायाम**ित्यस्मात् लटि **बहुलं छन्दसी**ति श्लुर्विकरणो व्यत्ययेनात्मनेपदं **तुजादित्वाद्** दीर्घः। **(वः)** युष्मान् **(प्र)** **(यातन)** प्राप्नुवन्तु **(सखीन्)** सुहृदः **(अच्छ)** **(सखायः)** **(मन्मानि)** विज्ञानानि **(चित्राः)** अद्भुताः **(अपिवातयन्तः)** शीघ्रं गमयन्तः **(एषाम्)** **(भूत)** भवत **(नवेदाः)** न विद्यन्ते दुःखानि येषु **(मे)** मम **(ऋतानाम्)** सत्यानाम्॥१३॥

अन्वयः-हे मरुतो! अत्र वः को नु मामहे। हे सखायो! यूयं सखीनच्छ प्रयातन। हे चित्रा! मन्मान्यपिवातयन्तो यूयं मे ऋतानामेषां नवेदा भूत॥१३॥

भावार्थः-मनुष्याः सर्वेषु सुहृदो भूत्वा विद्यां प्राप्य्य सर्वान् धर्म्यपुरुषार्थे संयोजयन्तु। यत एते सर्वत्र सत्कृताः स्युः सत्याऽसत्ये विज्ञायान्यानुपदिशेयुः॥१३॥

पदार्थः-हे **(मरुतः)** प्राणवत् प्रिय विद्वानो! **(अत्र)** इस स्थान में **(वः)** तुम लोगों को **(कः)** कौन **(नु)** शीघ्र **(मामहे)** सत्कारयुक्त करता है। हे **(सखायः)** मित्र विद्वानो! तुम **(सखीन्)** अपने मित्रों को **(अच्छ)** अच्छे प्रकार **(प्र, यातन)** प्राप्त होओ। हे **(चित्राः)** अद्भुत कर्म करनेवाले विद्वानो! **(मन्मानि)** विज्ञानों को **(अपिवातयन्तः)** शीघ्र पहुंचाते हुए तुम **(मे)** मेरे **(एषाम्)** इन **(ऋतानाम्)** सत्य व्यवहारों के बीच **(नवेदाः)** नवेद अर्थात् जिनमें दुःख नहीं है, ऐसे **(भूत)** होओ॥१३॥

भावार्थः-मनुष्य सबमें मित्र हो और उनको विद्या पहुँचाकर सबको धर्मयुक्त पुरुषार्थ में संयुक्त करें। जिससे ये सर्वत्र सत्कारयुक्त हों और आप सत्य-असत्य जान औरों को उपदेश दें॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ यद्दुवस्याद् दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा।
ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत्॥१४॥

आ। यत्। दुवस्यात्। दुवसे। न। कारुः। अस्मान्। चक्रे। मान्यस्य। मेधा। ओ इति। सु। वर्त। मरुतः। विप्रम्। अच्छ। इमा। ब्रह्माणि। जरिता। वः। अर्चत्॥१४॥

पदार्थः-**(आ)** समन्तात् **(यत्)** यस्मात् **(दुवस्यात्)** सेवमानात् **(दुवसे)** दुवस्यते परिचरते **(न)** इव **(कारुः)** शिल्पकार्यसाधिका **(अस्मान्)** **(चक्रे)** करोति **(मान्यस्य)** माननीयस्य योग्यस्य **(मेधा)** प्रज्ञा **(ओ)** आभिमुख्ये **(सु)** **(वर्त्त)** वर्त्तते **(मरुतः)** विद्वांसः **(विप्रम्)** मेधाविनम् **(अच्छ)** **(इमा)** इमानि **(ब्रह्माणि)** वेदान् **(जरिता)** स्तोता **(वः)** युष्मान् **(अर्च्चत्)** सत्कुर्यात्॥१४॥

अन्वयः-हे मरुतो! यद्दुवस्याद् दुवसे नास्मभ्यं प्राप्ता मान्यस्य कारुर्मेधाऽस्मान् कारूनाचक्रेऽतो यूयं विप्रमो षु वर्त्त किमर्थं तत्राह जरिताऽच्छेमा ब्रह्माणि संगृह्याच्छ वोऽर्चत्॥१४॥

भावार्थः-अत्रोपमालङ्कारः। यथा शिल्पिनः शिल्पविद्यासिद्धानि वस्तूनि सेवन्ते तथा वेदार्थास्तज्ज्ञानं च सर्वैः सेवितव्यम्। नहि वेदविद्यया विना पूज्यतमो विद्वान् स्यात्॥१४॥

पदार्थः-हे **(मरुतः)** विद्वानो! **(यत्)** जिस कारण **(दुवस्यात्)** सेवन करनेवाले से **(दुवसे)** सेवन करनेवाले अर्थात् एक से अधिक दूसरे के लिये जैसे **(न)** वैसे हम लोगों के लिये प्राप्त हुई **(मान्यस्य)** मानने योग्य योग्यता को प्राप्त सज्जन की **(कारुः)** शिल्प कार्यों को सिद्ध करनेवाली **(मेधा)** बुद्धि **(अस्मान्)** हम लोगों को **(आ, चक्रे)** करती है अर्थात् शिल्पकार्यों में निपुण करती है, इससे तुम **(विप्रम्)** मेधावी धीरबुद्धिवाले पुरुष के **(ओ, षु, वर्त्त)** सम्मुख वर्त्तमान होओ, किसलिये **(जरिता)**

स्तुति करनेवाला **(इमा)** इन **(ब्रह्माणि)** वेदों को संग्रह कर **(अच्छ)** अच्छे प्रकार **(वः)** तुम लोगों को **(अर्चत्)** सेवे॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शिल्पीजन शिल्पविद्या से सिद्ध की हुई वस्तुओं का सेवन करते हैं, वैसे वेदार्थ और वेदज्ञान सबको सेवने चाहिये, जिस कारण वेदविद्या के विना अतीव सत्कार करने योग्य विद्वान् नहीं होता॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥१५॥२६॥३॥

एषः। वः। स्तोमः। मरुतः। इयम्। गीः। मान्दार्यस्य। मान्यस्य। कारोः। आ। इषा। यासीष्ट। तन्वे। वयाम्। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥१५॥

पदार्थः-**(एषः)** **(वः)** युष्मभ्यम् **(स्तोमः)** स्तुतिसमूहः **(मरुतः)** विद्वत्तमाः **(इयम्)** वेदाध्ययन- सुशिक्षायुक्ता **(गीः)** वाग् **(मान्दार्यस्य)** मान्दस्य स्तोतुमर्हस्योत्तमगुणकर्मस्वभावस्य च **(मान्यस्य)** पूजितव्यस्य **(कारोः)** पुरुषार्थिनः **(आ)** **(इषा)** इच्छया **(यासीष्ट)** प्राप्नुयात्। अत्र व्यत्ययेनात्मनेपदम्। **(तन्वे)** विस्ताराय **(वयाम्)** वयम्। अत्रा**न्येषामपी**ति दीर्घः। **(विद्याम)** लभेमहि **(इषम्)** अन्नम् **(वृजनम्)** बलम् **(जीरादानुम्)** जीवनम्॥१५॥

अन्वयः-हे मरुत! एष वः स्तोमो मान्दार्यस्य मान्यस्य कारोरियं गीर्वास्ति। अतो युष्मासु प्रत्येकस्तन्व इषाऽऽयासीष्ट वयामिषं वृजनं जीरदानुं च विद्याम॥१५॥

भावार्थः-य आप्तानां प्रयतमानानां विदुषां सकाशाद्विद्याशिक्षे लब्ध्वा धर्म्यव्यवहारमाचरन्ति तेषां जन्मसाफल्यमस्तीति वेदितव्यम्॥१५॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति पञ्चषष्ट्युत्तरं शततमं १६५ सूक्तं षड्विंशो २६ वर्गश्च समाप्तः॥

अस्मिन्नध्याये वसुरुद्राद्यर्थानां प्रतिपादनादेतदध्यायोक्तार्थानां पूर्वोऽध्यायोक्तार्थैस्सह सङ्गतिर्वर्त्तत इति विज्ञातव्यम्॥

पदार्थः-हे **(मरुतः)** उत्तम विद्वानो! **(एषः)** यह **(वः)** तुम लोगों के लिये **(स्तोमः)** स्तुतियों का समूह और **(मान्दार्यस्य)** स्तुति के योग्य वा उत्तम गुण, कर्म, स्वभाववाले **(मान्यस्य)** मानने योग्य **(कारोः)** कार **[**कार्य**]** करनेवाले पुरुषार्थी जन की **(इयम्)** यह **(गीः)** वाणी है, इससे तुममें से प्रत्येक

(तन्वे) बढ़ाने के लिये **(इषा)** इच्छा के साथ **(आ, यासीष्ट)** आओ, प्राप्त होओ **(वयाम्)** और हम लोग **(इषम्)** अन्न **(वृजनम्)** बल **(जीरदानुम्)** और जीवन को **(विद्याम)** प्राप्त होवें॥१५॥

भावार्थः-जो आप्त, शास्त्रज्ञ, धर्मात्मा, पुरुषार्थी, विद्वान् पुरुषों की उत्तेजना से विद्या और शिक्षा को प्राप्त होकर धर्मयुक्त व्यवहार का आचरण करते हैं, उनके जन्म की सफलता है, यह जानना चाहिये॥१५॥

इस सूक्त में विद्वानों के गुणों के वर्णन से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ पैंसठवां १६५ सूक्त और छब्बीसवां २६ वर्ग समाप्त हुआ॥

इस अध्याय में वसु रुद्रादिकों के अर्थों का प्रतिपादन होने से इस अध्याय में कहे हुए अर्थों की पिछले अध्याय में कहे अर्थों के साथ सङ्गति वर्त्तमान है, यह जानना चाहिये॥

इति श्रीयुत परमहंसपरिव्राजकाचार्य्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीपरमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्यभाषाभ्यां सुभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये द्वितीयाष्टके तृतीयोऽध्यायः समाप्तः॥

ओ३म्

अथ द्वितीयाष्टके चतुर्थाऽध्याय आरभ्यते॥

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

तदित्यस्य पञ्चदशर्च्चस्य षट्षष्ट्युत्तरस्य शततमस्य सूक्तस्य मैत्रावरुणाऽगस्त्य ऋषिः। मरुतो देवताः। १,२,८ जगती। ३,५,६,१२,१३ निचृज्जगती। ४ विराट् जगती छन्दः। निषादः स्वरः। ७,९,१० भुरिक् त्रिष्टुप्। ११ विराट् त्रिष्टुप्। १४ त्रिष्टुप् छन्दः। धैवतः स्वरः। १५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मरुच्छब्दार्थप्रतिपाद्यविदुषां गुणानाह॥

अब द्वितीयाष्टक के चतुर्थाध्याय और एक सौ छियासठवें सूक्त का आरम्भ है। उसके आरम्भ से ही मरुच्छब्दार्थप्रतिपाद्य विद्वानों के गुणों को कहते हैं॥

तन्नु वो॑चाम रभ॒साय॒ जन्म॑ने॒ पूर्वं॑ महि॒त्वं वृ॑ष॒भस्य॑ के॒तवे॑।
ऐ॒धेव॒ याम॑न्मरुतस्तुविष्वणो यु॒धेव॑ शक्रास्तवि॒षाणि॑ कर्तन॥ १॥

तत्। नु। वो॒चा॒म॒। र॒भ॒साय॑। जन्म॑ने। पूर्व॑म्। म॒हि॒ऽत्वम्। वृ॒ष॒भस्य॑। के॒तवे॑। ऐ॒धाऽइ॑व। याम॑न्। म॒रु॒तः॒। तु॒वि॒ऽस्व॒नः॒। यु॒धाऽइ॑व। श॒क्राः॒। त॒वि॒षाणि॑। क॒र्त॒न॒॥ १॥

पदार्थः-(**तत्**) (**नु**) सद्यः (**वोचाम**) उपदिशेम (**रभसाय**) वेगयुक्ताय (**जन्मने**) जाताय (**पूर्वम्**) (**महित्वम्**) महेर्महेतो भावम् (**वृषभस्य**) श्रेष्ठस्य (**केतवे**) विज्ञानाय (**ऐधेव**) ऐधैः काष्ठैरिव (**यामन्**) यामनि मार्गे (**मरुतः**) मनुष्याः (**तुविष्वणः**) तुविर्बहुविधः स्वनो येषान्ते। अत्र व्यत्ययेनैकवचनम्। (**युधेव**) युद्धेनेव (**शक्राः**) शक्तिमन्तः (**तविषाणि**) बलानि (**कर्त्तन**) कुरुत॥ १॥

अन्वयः-हे तुविष्वणः शक्रा मरुतो! युष्मान् प्रति वृषभस्य रभसाय केतवे जन्मने यत्पूर्वं महित्वं तद्वयं वोचाम यूयमैधेव यामन् युधेव तविषाणि निजकर्मभिर्नु कर्त्तन॥ १॥

भावार्थः-अत्रोपमालङ्कारः। विद्वांसो जिज्ञासून् प्रति वर्त्तमानजन्मनां प्राग्जन्मनाञ्च सञ्चितनिमित्तज्ञानं कार्यं दृष्ट्वोपदिशेयुः। यथा मनुष्याणां ब्रह्मचर्यजितेन्द्रियत्वादिभिः शरीरात्मबलानि पूर्णानि स्युस्तथा कुरुतेति च॥ १॥

पदार्थः-हे (**तुविष्वणः**) बहुत प्रकार के शब्दोंवाले (**शक्रः**) शक्तिमान् (**मरुतः**) मनुष्यो! तुम्हारे प्रति (**वृषभस्य**) श्रेष्ठ सज्जन का (**रभसाय**) वेगयुक्त अर्थात् प्रबल (**केतवे**) विज्ञान (**जन्मने**) जो उत्पन्न हुआ उसके लिये जो (**पूर्वम्**) पहिला (**महित्वम्**) माहात्म्य (**तत्**) उसको हम (**वोचाम**) कहें, उपदेश

करें, तुम **(ऐधेव)** काष्ठों के समान वा **(यामन्)** मार्ग में **(युधेव)** युद्ध के समान अपने कर्मों से **(तविषाणि)** बलों को **(नु)** शीघ्र **(कर्त्तन)** करो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। विद्वान् जन जिज्ञासु जनों के प्रति वर्त्तमान जन्म और पूर्व जन्मों के सञ्चित कर्मों के निमित्त ज्ञान को उनके कार्यों को देख कर उपदेश करें। और जैसे मनुष्यों के ब्रह्मचर्य और जितेन्द्रियत्वादि गुणों से शरीर और आत्मबल पूरे हों, वैसे करें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नित्यं॑ न सू॒नुं मधु॒ बिभ्र॑त॒ उप॒ क्रीळ॑न्ति क्री॒ळा वि॒दथे॑षु॒ घृष्व॑यः।
नक्ष॑न्ति रु॒द्रा अव॑सा नम॒स्विन॑ं न म॑र्धन्ति॒ स्वत॑वसो हवि॒ष्कृत॑म्॥२॥

नित्य॑म्। न। सू॒नु॑म्। मधु॑। बिभ्र॑तः। उप॑। क्रीळ॑न्ति। क्री॒ळाः। वि॒दथे॑षु। घृष्व॑यः। नक्ष॑न्ति। रु॒द्राः। अव॑सा। न॒मस्विन॑म्। न। म॒र्ध॒न्ति॒। स्वऽत॑वसः। ह॒वि॒ःऽकृ॑तम्॥२॥

पदार्थः-(**नित्यम्**) नाशरहितजीवम् (**न**) इव (**सूनुम्**) अपत्यम् (**मधु**) मधुरादिगुणयुक्तम् (**बिभ्रतः**) धरतः (**उप**) सामीप्ये (**क्रीळन्ति**) (**क्रीळाः**) क्रीडकाः (**विदथेषु**) संग्रामेषु (**घृष्वयः**) सोढारः (**नक्षन्ति**) प्राप्नुवन्ति (**रुद्राः**) प्राणा इव (**अवसा**) रक्षणाद्येन (**नमस्विनम्**) बह्वन्नयुक्तम् (**न**) निषेधे (**मर्द्धन्ति**) योधयन्ति (**स्वतवसः**) स्वं स्वकीयं तवो बलं येषान्ते (**हविष्कृतम्**) हविर्भिर्दानैर्निष्पादितम्॥२॥

अन्वयः-हे मनुष्या! यूयं ये नित्यं न मधु बिभ्रतः सूनुमुप क्रीळन्ति विदथेषु घृष्वयः क्रीळा नक्षन्ति रुद्रा इवावसा नमस्विनं न मर्द्धन्ति स्वतवसो हविष्कृतं रक्षन्ति तान्नित्यं सेवध्वम्॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये सर्वेषामुपकारे प्राणवत्तर्पणे जलान्नवदानन्दे सुलक्षणाऽपत्यवद्वर्त्तन्ते ते श्रेष्ठान् वर्द्धितुं दुष्टान्नमयितुं शक्नुवन्ति॥२॥

पदार्थः-हे मनुष्या! तुम जो लोग (**नित्यम्**) नाशरहित जीव के (**न**) समान (**मधु**) मधुरादि गुणयुक्त पदार्थ को (**बिभ्रतः**) धारण करते हुए (**सूनुम्**) पुत्र के समान (**उप, क्रीडन्ति**) समीप खेलते हैं वा (**विदथेषु**) संग्रामों में (**घृष्वयः**) शत्रु के बल को सहने और (**क्रीडाः**) खेलनेवाले (**नक्षन्ति**) प्राप्त होते हैं वा (**रुद्राः**) प्राणों के समान (**अवसा**) रक्षा आदि कर्म से (**नमस्विनम्**) बहुत अन्नयुक्त जन को (**न**) नहीं (**मर्द्धन्ति**) लड़ाते और (**स्वतवसः**) अपना बल पूर्ण रखते हुए (**हविष्कृतम्**) दानों से सिद्ध किये हुए पदार्थ को रखते हैं, उसका नित्य सेवन करो॥२॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो सबके उपकार में प्राण के समान तृप्ति करने में जल, अन्न के समान और आनन्द में सुन्दर लक्षणोंवाली विदुषी के पुत्र के समान वर्त्तमान हैं, वे श्रेष्ठों को बढ़ा और दुष्टों को नमा सकते हैं अर्थात् श्रेष्ठों को उन्नति दे सकते और दुष्टों को नम्र कर सकते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्मा॒ ऊमा॑सो अ॒मृता॒ अरा॑सत रा॒यस्पोषं॑ च ह॒विषा॑ ददा॒शुषे॑।
उ॒क्षन्त्य॑स्मै म॒रुतो॑ हि॒ताइ॑व पु॒रू रजा॑ꣳसि॒ पय॑सा मयो॒भुव॑:॥ ३॥

यस्मै॑। ऊमा॑सः। अ॒मृता॑:। अरा॑सत। रा॒यः। पोष॑म्। च॒। ह॒विषा॑। द॒दा॒शुषे॑। उ॒क्षन्ति॑। अ॒स्मै॒। म॒रुत॑:। हि॒ताःऽइ॑व। पु॒रु॒। रजा॑ꣳसि। पय॑सा। म॒यः॒ऽभुव॑:॥ ३॥

पदार्थः–(**यस्मै**) (**ऊमासः**) रक्षणादिकर्त्तारः (**अमृताः**) नाशरहिताः (**अरासत**) रासन्ते (**रायः**) धर्म्यस्य धनस्य (**पोषम्**) पुष्टिम् (**च**) (**हविषा**) विद्यादिदानेन (**ददाशुषे**) दात्रे (**उक्षन्ति**) सिञ्चन्ति (**अस्मै**) संसाराय (**मरुतः**) वायवः (**हिताइव**) यथा हितसंपादकास्तथा (**पुरु**) पुरूणि बहूनि। अत्र **संहितायामिति** दीर्घः **सुपां सुलुगिति** शसो लुक्। (**रजांसि**) (**पयसा**) जलेन (**मयोभुवः**) सुखं भावुकाः॥ ३॥

अन्वयः–हे विद्वांसोऽमृता ऊमासो भवन्तो यथा मयोभुवो हिताइव मरुतोऽस्मै पयसा पुरु रजांस्युक्षन्ति तथा यस्मै ददाशुषे हविषा रायस्पोषं विद्याञ्चारासत सोऽप्येवमेवेह वर्त्तेत॥ ३॥

भावार्थः–अत्रोपमालङ्कारः। मनुष्यैर्वायुवत्सर्वेषां सुखानि संसाध्य विद्यासत्योपदेशैर्जलेन वृक्षं सिक्त्वेव मनुष्या वर्द्धनीयाः॥ ३॥

पदार्थः–हे विद्वानो! (**अमृताः**) नाशरहित (**ऊमासः**) रक्षणादि कर्मवाले आप जैसे (**मयोभुवः**) सुख की भावना करनेवाले (**हिताइव**) हितसिद्ध करनेवालों के समान (**मरुतः**) पवन (**अस्मै**) इस प्राणी के लिये (**पयसा**) जल से (**पुरु**) बहुत (**रजांसि**) लोकों वा स्थलों को (**उक्षन्ति**) सीचते हैं, वैसे (**यस्मै**) जिस (**ददाशुषे**) देनेवाले के लिये (**हविषा**) विद्यादि देने से (**रायः**) धर्मयुक्त धन की (**पोषम्**) पुष्टि को (**च**) और विद्या को (**अरासत**) देते है, वह भी ऐसे ही वर्त्ते॥ ३॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। मनुष्यों को वायु के समान सबके सुखों को अच्छे प्रकार विद्या और सत्योपदेश से जल से वृक्षों के समान सींचकर मनुष्यों की वृद्धि करनी चाहिये॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ ये रजा॑ꣳसि त॒वि॒षीभि॒रव्य॑त॒ प्र व॒ एवा॑स॒: स्वय॑तासो अध्व॒जन्।
भय॑न्ते॒ विश्वा॒ भुव॑नानि हर्म्या चि॒त्रो वो॒ याम॒: प्रय॑तास्वृ॒ष्टिषु॑॥ ४॥

आ। ये। रजांसि। तविषीभिः। अव्यत। प्र। वः। एवासः। स्वऽयतासः। अध्रजन्। भयन्ते। विश्वा। भुवनानि। हर्म्या। चित्रः। वः। यामः। प्रऽयतासु। ऋष्टिषु॥४॥

पदार्थः-(**आ**) समन्तात् (**ये**) (**रजांसि**) लोकाः (**तविषीभिः**) बलैः (**अव्यत**) प्राप्नुवन्ति (**प्र**) (**वः**) युष्माकम् (**एवासः**) गमनशीलाः (**स्वयतासः**) स्वेन बलेन नियमं प्राप्ता नत्वन्येनाश्वादिनेति (**अध्रजन्**) धावन्ति (**भयन्ते**) कम्पन्ते (**विश्वा**) सर्वाणि (**भुवनानि**) लोकाः (**हर्म्या**) उत्तमानि गृहाणि (**चित्रः**) अद्भुतः (**वः**) युष्माकम् (**यामः**) प्रापणम् (**प्रयतासु**) नियतासु (**ऋष्टिषु**) प्राप्तिषु॥४॥

अन्वयः-हे विद्वांसो! ये व एवासः स्वयतासो रथास्तविषीभी रजांसि आ अव्यत ते प्राध्रजन्। तेषां धावने विश्वा भुवनानि हर्म्या भयन्ते तस्मात् प्रयतास्वृष्टिषु चित्रो वो यामोऽस्ति॥४॥

भावार्थः-विद्वांसो निजशास्त्रादद्भुतबलेन रथादिकं निर्माय नियतासु वृत्तिषु गत्वागत्य सत्यविद्याऽध्यापनोपदेशैः सर्वान् मनुष्यान् पालयित्वाऽसत्यविद्योपदेशान्निवर्त्तयेयुः॥४॥

पदार्थः-हे विद्वानो! (**ये**) जो (**वः**) तुम्हारे (**एवासः**) गमनशील (**स्वयतासः**) अपने बल से नियम को प्राप्त अर्थात् अश्वादि के विना आप ही गमन करने में सन्नद्ध रथ (**तविषीभिः**) बलों के साथ (**रजांसि**) लोकों को (**आ, अव्यत**) अच्छे प्रकार प्राप्त होते हैं वे (**प्र, अध्रजन्**) अत्यन्त धावते है, उनके धावन में (**विश्वा**) समस्त (**भुवनानि**) लोक (**हर्म्या**) उत्तमोत्तम घर (**भयन्ते**) कांपते हैं इस कारण (**प्रयतासु**) नियत (**ऋष्टिषु**) प्राप्तियों में (**चित्रः**) अद्भुत (**वः**) तुम्हारा (**यामः**) पहुँचना है॥४॥

भावार्थः-विद्वान् जन निज शास्त्रीय अद्भुत बल से रथादि बना के नियत वृत्तियों में जा आकर सत्य विद्या पढ़ाने और उनके उपदेशों से सब मनुष्यों को पाल के असत्य विद्या के उपदेशों को निवृत्त करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यत्त्वेषयामा नदयन्त पर्वतान् दिवो वा पृष्ठं नर्या अचुच्यवुः।
विश्वो वो अज्मन्भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधिः॥५॥ १॥

यत्। त्वेषयामाः। नदयन्त। पर्वतान्। दिवः। वा। पृष्ठम्। नर्याः। अचुच्यवुः। विश्वः। वः। अज्मन्। भयते। वनस्पतिः। रथियन्तीऽइव। प्र। जिहीते। ओषधिः॥५॥

पदार्थः-(**यत्**) यदा (**त्वेषयामाः**) त्वेषे दीप्तौ सत्यां यामो गमनं येषान्ते (**नदयन्त**) नादयन्ति (**पर्वतान्**) मेघान् (**दिवः**) अन्तरिक्षस्य (**वा**) (**पृष्ठम्**) उपरिभागम् (**नर्याः**) नृभ्यो हिताः (**अचुच्यवुः**) प्राप्नुवन्ति (**विश्वः**) (**वः**) युष्माकम् (**अज्मन्**) अज्मनि पथि (**भयते**) कम्पते (**वनस्पतिः**) वनस्पतिर्वृक्षः (**रथियन्तीव**) आत्मनो रथिन इच्छन्तीव सेना (**प्र**) (**जिहीते**) प्राप्नोति (**ओषधिः**) सोमादिः॥५॥

अन्वयः-हे विद्वांसो! यत्त्वेषयामा नर्या युष्मद्रथा दिवः पर्वतान्नदयन्त भुवः पृष्ठं वाऽचुच्यवुः तदा विश्वो वनस्पती रथियन्तीव वोऽज्मन्भयते ओषधिश्च प्रजिहीते॥५॥

भावार्थः-अत्रोपमालङ्कारः। अन्तरिक्षप्रदेशेषु विद्वद्भिः प्रयुक्ताकाशयानानां महत्तरेण वेगेन कदाचिन्मेघविपर्याससम्भवस्तथा पृथिव्याः कम्पनेन वृक्षादीनां कम्पनसम्भवश्च॥५॥

पदार्थः-हे विद्वानो! **(यत्)** जब **(त्वेषयामाः)** अग्नि का प्रकाश होने से गमन करने वाले **(नर्याः)** मनुष्यों के लिये अत्यन्त साधक तुम्हारे रथ **(दिवः)** अन्तरिक्ष के **(पर्वतान्)** मेघों को **(नदयन्त)** शब्दायमान करते अर्थात् तुम्हारे रथों के वेग से अपने स्थान से तितर-बितर हुए मेघ गर्जनादि शब्द करते हैं **(वा)** अथवा पृथिवी के **(पृष्ठम्)** पृष्ठ भाग को **(अचुच्यवुः)** प्राप्त होते तब **(विश्वः, वनस्पतिः)** समस्त वृक्ष **(रथियन्तीव)** अपने रथी को चाहती हुई सेना के समान **(वः)** तुम्हारे **(अज्मन्)** मार्ग में **(भयते)** कंपता है अर्थात् जो वृक्ष मार्ग में होता वह थरथरा उठता और **(ओषधिः)** सोमादि ओषधि **(प्र, जिहीते)** अच्छे प्रकार स्थान त्याग कर देती अर्थात् कपकपाहट में स्थान से तितर-वितर होती है॥५॥

भावार्थः-अन्तरिक्ष के मार्गों में विद्वानों के प्रयोग किए हुए आकाशगामी यानों के अत्यन्त वेग से कभी मेघों के तितर-बितर जाने का सम्भव और पृथिवी के कम्पन से वृक्ष वनस्पति के कम्पने का सम्भव होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यूयं न॑ उग्रा मरुतः सुचे॒तुनारि॑ष्टग्रामाः सुम॒तिं पि॑पर्तन।
यत्रा॑ वो दि॒द्युद्रद॑ति॒ क्रिवि॑र्दती रि॒णाति॑ प॒श्वः सुधि॑तेव ब॒र्हणा॑॥६॥

यू॒यम्। न॒ः। उ॒ग्राः। म॒रु॒तः। सु॒ऽचे॒तुना॑। अरि॑ष्टऽग्रामाः। सु॒ऽम॒तिम्। पि॒प॒र्त॒न॒। यत्र॑। व॒ः। दि॒द्युत्। रद॑ति। क्रिविः॑ऽदती। रि॒णाति॑। प॒श्वः। सुधि॑ताऽइ॑व। ब॒र्हणा॑॥६॥

पदार्थः-**(यूयम्)** **(नः)** अस्माकम् **(उग्राः)** तीव्रगुणकर्मस्वभावाः **(मरुतः)** मरुद्वत्सुचेष्टाः **(सुचेतुना)** सुष्ठु विज्ञानेन **(अरिष्टग्रामाः)** अहिंसका ग्रामा येभ्यस्ते **(सुमतिम्)** प्रशस्तां प्रज्ञाम् **(पिपर्तन)** पूरयन्तु **(यत्र)** अत्र **ऋचि तु०** इत्यनेन दीर्घः। **(वः)** युष्माकम् **(दिद्युत्)** देदीप्यमाना विद्युत् **(रदति)** विलिखति **(क्रिविर्दती)** क्रिविर्हिंसनमेव दन्ता यस्याः सा **(रिणाति)** गच्छति **(पश्वः)** पशून् **(सुधितेव)** सुष्ठु धृतेव **(बर्हणा)** वर्द्धते या सा॥६॥

अन्वयः-हे उग्रा मरुतो विद्वांसो! यूयमरिष्टग्रामाः सन्तो नः सुमतिं सुचेतुना पिपर्त्तन। यत्र क्रिविर्दती वो विद्युद्रदति तत्र सुधितेव बर्हणा सा पश्वो रिणाति॥६॥

भावार्थः-अत्रोपमालङ्कारः। शिल्पव्यवहारसंसाधिता विद्युदश्वादिपशुवत्कार्यसाधिका भवति। तस्याः क्रियावेत्तारो विद्वांसोऽन्यानपि तद्विद्याकुशलान् संपादयन्तु॥६॥

पदार्थः-हे **(उग्राः)** तीव्रगुणकर्मस्वभावयुक्त **(मरुतः)** पवनों के समान शीघ्रता करनेवाले विद्वानो! **(यूयम्)** तुम **(अरिष्टग्रामाः)** जिनसे ग्राम के ग्राम अहिंसक होते अर्थात् पशु आदि जीवों को जिन्होंने ताड़ना देना छोड़ दिया ऐसे होते हुए **(नः)** हमारी **(सुमतिम्)** प्रशस्त उत्तम बुद्धि को **(सुचेतुना)** सुन्दर विज्ञान से **(पिपर्त्तन)** पूरी करो। **(यत्र)** जहाँ **(क्रिविर्दती)** हिंसा करने रूप दांत हैं, जिसके वह **(वः)** तुम्हारे सम्बन्ध से **(दिद्युत्)** अत्यन्त प्रकाशमान बिजुली **(रदति)** पदार्थों को छिन्न-भिन्न करती है, वहाँ **सुधितेव)** अच्छे प्रकार धारण की हुई वस्तु के समान **(बर्हणा)** बढ़ती हुई **(पश्वः)** पशुओं को अर्थात् पशुभावों को **(रिणाति)** प्राप्त होती जैसे पशु, घोड़े बैल आदि रथादिकों को जोड़े हुए उनको चलाते हैं, वैसे उन रथों को अति वेग से चलाती है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। शिल्पव्यवहार से सिद्ध की बिजुलीरूप आग घोड़े आदि पशुओं के समान कार्य सिद्ध करनेवाली होती है, उसकी क्रिया को जाननेवाले विद्वान् अन्य जनों को भी उस विद्युद्विद्या से कुशल करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः।
अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या॥७॥

प्र। स्कम्भऽदेष्णाः। अनवभ्रऽराधसः। अलातृणासः। विदथेषु। सुऽस्तुताः। अर्चन्ति। अर्कम्। मदिरस्य। पीतये। विदुः। वीरस्य। प्रथमानि। पौंस्या॥७॥

पदार्थः-**(प्र)** **(स्कम्भदेष्णाः)** स्तम्भनदातारः **(अनवभ्रराधसः)** अविनष्टधनाः **(अलातृणासः)** अलं शत्रूणां हिंसकाः **(विदथेषु)** संग्रामेषु **(सुष्टुताः)** सुष्ठु प्रशंसिताः **(अर्च्चन्ति)** सत्कुर्वन्ति **(अर्कम्)** अर्चनीयं विद्वांसम् **(मदिरस्य)** आनन्दप्रदस्य रसस्य **(पीतये)** पानाय **(विदुः)** जानन्ति **(वीरस्य)** शूरत्वादिगुणयुक्तस्य योद्धुः **(प्रथमानि)** **(पौंस्या)** बलानि॥७॥

अन्वयः-ये स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासः सुष्टुता जना विदथेषु वीरस्य प्रथमानि पौंस्या विदुस्ते मदिरस्य पीतयेऽर्कं प्रार्च्चन्ति॥७॥

भावार्थः-ये युक्ताऽऽहारविहाराः शूरजनप्रियाः स्वसेनाबलानि वर्द्धयन्ते ते शत्रुभि रहिता असंख्यधना पुष्कलदातारः प्राप्तप्रशंसा भवन्ति॥७॥

पदार्थः-जो (**स्कम्भदेष्णाः**) स्तम्भन देनेवाले अर्थात् रोक देनेवाले (**अनवभ्रराधसः**) जिनका धन विनाश को नहीं प्राप्त हुआ (**अलातृणासः**) पूर्ण शत्रुओं को मारनेहारे (**सुष्टुताः**) अच्छी प्रशंसा को प्राप्त जन (**विदथेषु**) संग्रामों में (**वीरस्य**) शूरता आदि गुणयुक्त युद्ध करनेवाले के (**प्रथमानि**) प्रथम (**पौंस्या**) पुरुषार्थी बलों को (**विदुः**) जानते हैं, वे (**मदिरस्य**) आनन्दायक रस के (**पीतये**) पीने को (**अर्कम्**) सत्कार करने योग्य विद्वान् का (**प्र, अर्च्चन्ति**) अच्छा सत्कार करते हैं॥७॥

भावार्थः-जो यथायोग्य आहार-विहार करने, शूरजनों से प्रीति रखनेवाले अपनी सेना के बलों को बढ़ाते हैं, वे शत्रुरहित असङ्ख्य धनयुक्त बहुत दान देनेवाले और प्रशंसा को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शतभुजिभिस्तमभिह्रुतेरघात् पूर्भी रक्षता मरुतो यमावत।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु॥८॥

शतभुजिऽभिः। तम्। अभिऽह्रुतेः। अघात्। पूःऽभिः। रक्षत। मरुतः। यम्। आवत। जनम्। यम्। उग्राः। तवसः। विऽरप्शिनः। पाथन। शंसात्। तनयऽस्य। पुष्टिषु॥८॥

पदार्थः-(**शतभुजिभिः**) शतसङ्ख्यं सुखं भोक्तुं शीलं येषान्ते (**तम्**) (**अभिह्रुतेः**) अभितः कुटिलात् (**अघात्**) पापात् (**पूर्भिः**) पूरणपालनसुखयुक्तैर्नगरैः (**रक्षत**) अत्राऽन्येषामपीति दीर्घः। (**मरुतः**) वायव इव वर्त्तमानाः (**यम्**) (**आवत**) पालयत (**जनम्**) (**यम्**) (**उग्राः**) तेजस्विनः (**तवसः**) प्रवृद्धबलाः (**विरप्शिनः**) पूर्णविद्याशिक्षावीर्याः (**पाथन**) रक्षत। अत्रान्येषामपीति दीर्घः। (**शंसात्**) आत्मस्तुतिरूपात् दोषात् (**तनयस्य**) अपत्यस्य (**पुष्टिषु**) पुष्टिकरणेषु कर्मसु॥८॥

अन्वयः-हे तनयस्य पुष्टिषु प्रयतमाना उग्रास्तवसो विरप्शिनो मरुतो! यूयं शतभुजिभिः पूर्भिः सह यमभिह्रुतेरघाद् रक्षत यं जनमावत यं शंसात्पाथन तं वयमपि सर्वतो रक्षेम॥८॥

भावार्थः-ये मनुष्या युक्ताऽहारविहारसुशिक्षाब्रह्मचर्यविद्याभिः स्वसन्तानान् पुष्टियुक्तान् सत्यप्रशंसिनः पापात् पृथग्भूताँश्च कुर्वन्ति प्राणवत्प्रजा आनन्दयन्ति च तेऽनन्तसुखा भवन्ति॥८॥

पदार्थः-हे (**तनयस्य**) सन्तान की (**पुष्टिषु**) पुष्टि करानेवाले कामों में प्रयत्न करते हुए (**उग्राः**) तेजस्वी तीव्र प्रतापयुक्त (**तवसः**) अत्यन्त बढ़े हुए बल से युक्त (**विरप्शिनः**) पूर्ण विद्या, पूर्ण शिक्षा और पूर्ण पराक्रमवाले (**मरुतः**) पवनों के समान वर्त्तमान विद्वानो! तुम (**शतभुजिभिः**) असङ्ख्य सुख भोगने को जिनका शील (**पूर्भिः**) पूरण पालन और सुखयुक्त नगरों के साथ (**यम्**) जिसकी (**अभिह्रुतेः**) सब ओर से कुटिल (**अघात्**) पाप से (**रक्षत**) रक्षा करो बचाओ वा (**यम्**) जिस (**जनम्**) जन को

(आवत) पालो वा जिसकी **(शंसात्)** आत्मप्रशंसारूप दोष से **(पाथन)** पालना करो **(तम्)** उसकी हम लोग भी सब ओर से रक्षा करें॥८॥

भावार्थः-जो मनुष्य युक्त आहार-विहार, उत्तम शिक्षा, ब्रह्मचर्य और विद्यादि गुणों से अपने सन्तानों को पुष्टियुक्त, सत्य की प्रशंसा करनेवाले और पाप से अलग रहनेवाले करते और प्राण के समान प्रजा को आनन्दित करते हैं, वे अनन्त सुखभोक्ता होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते॥९॥

विश्वानि। भद्रा। मरुतः। रथेषु। वः। मिथस्पृध्याऽइव। तविषाणि। आऽहिता। अंसेषु। आ। वः। प्रऽपथेषु। खादयः। अक्षः। वः। चक्रा। समया। वि। ववृते॥९॥

पदार्थः-(**विश्वानि**) सर्वाणि (**भद्रा**) कल्याणकारकानि (**मरुतः**) वायुवद्बलिनः (**रथेषु**) रमणीयेषु यानेषु (**वः**) युष्माकम् (**मिथस्पृध्येव**) यथा परस्परं पृत्सु संग्रामेषु भवा सेना तद्वत् (**तविषाणि**) बलानि (**आहिता**) समन्ताद् धृतानि (**अंसेषु**) स्कन्धेषु भुजेषु (**आ**) (**वः**) युष्माकम् (**प्रपथेषु**) प्रकृष्टेषु सरलेषु मार्गेषु (**खादयः**) खाद्यानि भक्षविशेषाणि (**अक्षः**) रथ्यो भागः (**वः**) युष्माकम् (**चक्रा**) चक्राणि (**समया**) निकटे (**वि**) (**ववृते**) वर्त्तते। अत्र **तुजादीनामि**ति अभ्यासदीर्घः॥९॥

अन्वयः-हे मरुतो! वो रथेषु विश्वानि भद्रा मिथस्पृध्येव तविषाण्याहिता सन्ति वोंऽसेषु च प्रपथेषु खादयः सन्ति वोऽक्षश्चक्रा समयाऽऽवि ववृते॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये स्वयं बलिष्ठाः कल्याणाचाराः सुमार्गगामिनः परिपूर्णधनसेनादिसहिताः सन्ति तेऽजसा शत्रून् विजेतुं शक्नुवन्ति॥९॥

पदार्थः-हे (**मरुतः**) पवनों के समान बली सज्जनो! (**वः**) तुम्हारे (**रथेषु**) रमणीय यानों में (**विश्वानि**) समस्त (**भद्रा**) कल्याण करनेवाले (**मिथस्पृध्येव**) संग्रामों में जैसे परस्पर सेना है, वैसे (**तविषाणि**) बल (**आहिता**) सब ओर से धरे हुए हैं (**वः**) तुम्हारे (**अंसेषु**) स्कन्धों में उक्त बल है तथा (**प्रपथेषु**) उत्तम सीधे मार्गों में (**खादयः**) खाने योग्य विशेष भक्ष्य भोज्य पदार्थ हैं (**वः**) तुम्हारे (**अक्षः**) रथ का अक्षभाग धुरी (**चक्रा**) पहियों के (**समया**) समीप (**आ, वि, ववृते**) विविध प्रकार से प्रत्यक्ष वर्त्तमान है॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो आप बलवान्, कल्याण के आचरण करनेवाले, सुमार्गगामी, परिपूर्ण धन सेनादि सहित हैं, वे प्रत्यक्ष शत्रुओं को जीत सकते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अञ्जयः।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान् व्यनु श्रियो धिरे॥ १०॥ २॥

भूरीणि। भद्रा। नर्येषु। बाहुषु। वक्षःऽसु। रुक्माः। रभसासः। अञ्जयः। अंसेषु। एताः। पविषु। क्षुराः। अधि। वयः। न। पक्षान्। वि। अनु। श्रियः। धिरे॥ १०॥

पदार्थः-(**भूरीणि**) बहूनि (**भद्रा**) भजनीयानि धर्म्याणि कर्माणि (**नर्येषु**) नृभ्यो हितेषु (**बाहुषु**) प्रचण्डदोर्दण्डेषु (**वक्षस्सु**) उरस्सु (**रुक्माः**) सुवर्णरत्नादियुक्ता अलङ्काराः (**रभसासः**) वेगवन्तः (**अञ्जयः**) प्रसिद्धप्रशंसाः (**अंसेषु**) स्कन्धेषु (**एताः**) शिक्षायां प्राप्ताः (**पविषु**) सुशिक्षितासु वाक्षु। **पवीति वाङ्नामसु पठितम्।** (निघं०१.११) (**क्षुराः**) धर्म्यशब्दाः (**अधि**) अधिके (**वयः**) पक्षिणः (**न**) इव (**पक्षान्**) (**वि**) (**अनु**) (**श्रियः**) लक्ष्मीः (**धिरे**) दधिरे दधति। अत्र छान्दसोऽभ्यासस्य लुक्॥ १०॥

अन्वयः-येषां नर्येषु भूरीणि भद्रा बाहुषु वक्षःसु रुक्मा अंसेष्वेता रभसासोऽञ्जयः पविष्वधिक्षुरा वर्त्तन्ते वयः पक्षान् न श्रियो व्यनु धिरे॥ १०॥

भावार्थः-ये ब्रह्मचर्येण प्राप्तविद्या गृहाश्रमे धृताऽलङ्काराः पुरुषार्थयुक्ताः कृतपरोपकारा वानप्रस्थे प्राप्तवैराग्या अध्यापनरताः संन्यासेऽधिगतयाथातथ्याः परोपकाररताः सर्वत्र विचरन्तः सत्यं ग्राहयन्तोऽसत्यं त्याजयन्तोऽखिलाञ्जनान् वर्द्धयन्ति ते मोक्षमाप्नुवन्ति॥ १०॥

पदार्थः-जिनके (**नर्येषु**) मनुष्यों के लिये हितरूप पदार्थों में (**भूरीणि**) बहुत (**भद्रा**) सेवन करने योग्य धर्मयुक्त कर्म वा (**बाहुषु**) प्रचण्ड भुजदण्डों और (**वक्षःसु**) वक्षः स्थलों में (**रुक्माः**) सुवर्ण और रत्नादियुक्त अलङ्कार (**अंसेषु**) स्कन्धों में (**एताः**) विद्या की शिक्षा में प्राप्त (**रभसासः**) वेग जिनमें विद्यमान ऐसे (**अञ्जयः**) प्रसिद्ध प्रशंसायुक्त पदार्थ (**पविषु, अधि**) उत्तम शिक्षायुक्त वाणियों में (**क्षुराः**) धर्मानुकूल शब्द वर्त्तमान हैं, वे (**वयः**) पखेरू (**पक्षान्**) पंखो को (**न**) जैसे वैसे (**श्रियः**) लक्ष्मियों को (**वि, अनु, धिरे**) विशेषता से अनुकूल धारण करते हैं॥ १०॥

भावार्थः-जो ब्रह्मचर्य से विद्याओं को प्राप्त हुए, गृहाश्रम में आभूषणों को धारण किये, पुरुषार्थयुक्त, परोपकारी, वानप्रस्थाश्रम में वैराग्य को प्राप्त, पढ़ाने में रमे हुए और संन्यास आश्रम में प्राप्त हुआ यथार्थभाव जिनको और परोपकारी सर्वत्र विचरते सत्य का ग्रहण और असत्य का त्याग कराते हुए समस्त मनुष्यों को बढ़ाते हैं, वे मोक्ष को प्राप्त होते हैं॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्याइव स्तृभिः।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इन्द्रे मरुतः परिष्टुभः॥ ११॥

महान्तः। मह्ना। विऽभ्वः। विऽभूतयः। दूरेऽदृशः। ये। दिव्याःऽइव। स्तृऽभिः। मन्द्राः। सुऽजिह्वाः। स्वरितारः। आसऽभिः। सम्ऽमिश्लाः। इन्द्रे। मरुतः। परिस्तुभः॥ ११॥

पदार्थः-(**महान्तः**) परिमाणेनाधिकाः (**मह्ना**) स्वमहिम्ना (**विभ्वः**) समर्थाः (**विभूतयः**) विविधैश्वर्यप्रदाः (**दूरेदृशः**) दूरे पश्यन्ति ते (**ये**) (**दिव्याइव**) यथा सूर्यस्थाः किरणास्तथा (**स्तृभिः**) आच्छादितैर्नक्षत्रैः (**मन्द्राः**) कामयमानाः (**सुजिह्वाः**) सत्यवाचः (**स्वरितारः**) अध्यापका उपदेष्टारो वा (**आसभिः**) मुखैः (**संमिश्लाः**) सम्यक् मिश्रिताः। अत्र कपिलकादित्वाल्लत्वम्। (**इन्द्रे**) विद्युति (**मरुतः**) वायव इव (**परिष्टुभः**) सर्वतो धर्त्तारः॥ ११॥

अन्वयः-ये विद्वांसो! मह्ना महान्तो विभ्वो विभूतयो दूरेदृश इन्द्रे संमिश्ला स्तृभिः सह वर्त्तमानाः परिष्टुभो मरुतो दिव्या इव मन्द्राः सुजिह्वाः स्वरितारः सन्त आसभिरध्यापयन्त्युपदिशन्ति च ते निर्मलविद्या जायते॥ ११॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा वायवः सर्वमूर्त्तद्रव्यधर्त्तारो विद्युत्संयुक्तप्रकाशका व्याप्ताः सन्ति तथा विद्वांसो मूर्त्तद्रव्यविद्योपदेष्टारो विद्याविद्यार्थिसंयुक्तविज्ञानदातारः सकलविद्याशुभाचरणव्यापिनः सन्तो नरोत्तमा भवन्ति॥ ११॥

पदार्थः-जो विद्वान् जन (**मह्ना**) अपनी महिमा से (**महान्तः**) बड़े (**विभ्वः**) समर्थ (**विभूतयः**) नाना प्रकार के ऐश्वर्यों को देनेवाले (**दूरेदृशः**) दूरदर्शी (**इन्द्रे**) बिजुली के विषय में (**संमिश्लाः**) अच्छे मिले हुए (**स्तृभिः**) आच्छादन करने, संसार पर छाया करनेहारे तारागणों के साथ वर्त्तमान (**परिष्टुभः**) सब ओर से धारण करनेहारे (**मरुतः**) पवनों के समान तथा (**दिव्या, इव**) सूर्यस्थ किरणों के समान (**मन्द्राः**) कमनीय मनोहर (**सुजिह्वाः**) सत्य वाणी बोलनेवाले (**स्वरितारः**) पढ़ाने और उपदेश करनेवाले होते हुए (**आसभिः**) मुखों से पढ़ाते और उपदेश करते हैं, वे निर्मल विद्यावान् होते हैं॥ ११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे पवन समस्त मूर्तिमान् पदार्थों को धारण करनेवाले बिजुली के संयोग से प्रकाशक और सर्वत्र व्याप्त है, वैसे विद्वान् जन मूर्तिमान् द्रव्यों की विद्या के उपदेष्टा, विद्या और विद्यार्थियों के संयोग के विशेष ज्ञान को देनेवाले, सकल विद्या और शुभ आचरणों में व्याप्त होते हुए मनुष्यों में उत्तम होते हैं॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतम्।

इन्द्र॑श्च॒न त्यज॑सा॒ वि ह्रु॑णाति॒ तज्जना॑य॒ यस्मै॑ सु॒कृ॒ते अरा॑ध्वम्॥ १२॥

तत्। व॒रुः। सु॒ऽजा॒ता॒रुः। म॒रु॒त॒रुः। म॒हि॒ऽत्व॒नम्। दी॒र्घम्। व॒रुः। दा॒त्रम्। अदि॑तेःऽइव। व्र॒तम्। इन्द्र॑रुः। च॒न। त्यज॑सा। वि। ह्रु॒णा॒ति॒। तत्। जना॑य। यस्मै॑। सु॒ऽकृ॒ते। अरा॑ध्वम्॥ १२॥

पदार्थः-(**तत्**) (**वः**) युष्माकम् (**सुजाताः**) सुष्ठु प्रसिद्धाः (**मरुतः**) वायव इव वर्त्तमानाः (**महित्वनम्**) महिमानम् (**दीर्घम्**) विस्तीर्णम् (**वः**) युष्माकम् (**दात्रम्**) दानम् (**अदितेरिव**) अन्तरिक्षस्येव (**व्रतम्**) शीलम् (**इन्द्रः**) विद्युत् (**चन**) अपि (**त्यजसा**) त्यागेन (**वि**) (**ह्रुणाति**) कुटिलं गच्छति (**तत्**) (**जनाय**) (**यस्मै**) (**सुकृते**) सुष्ठु धर्मकारिणे (**अराध्वम्**) दत्त॥ १२॥

अन्वयः-हे सुजाता मरुतो! यद्वोऽदितेरिव महित्वनं दीर्घं दात्रं वो व्रतमस्ति। तद्यदिन्द्रश्चन त्यजसा विह्रुणाति तच्च यस्मै सुकृते जनायाराध्वं स जगदुपकाराय शक्नुयात्॥ १२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। येषां प्राणवन्महिमा विस्तृतं विद्यादानमाकाशवच्छान्तं शीलं विद्युद्वद्दुष्टाचारत्यागोऽस्ति ते सर्वेभ्यः सुखं दातुमर्हन्ति॥ १२॥

पदार्थः-हे (**सुजाताः**) सुन्दर प्रसिद्ध (**मरुतः**) पवनों के समान वर्त्तमान! जो (**वः**) तुम्हारा (**अदितेरिव**) अन्तरिक्ष को जैसे वैसे (**महित्वनम्**) महिमा (**दीर्घम्**) विस्तारयुक्त (**दात्रम्**) दान और (**वः**) तुम्हारा (**व्रतम्**) शील है (**तत्**) उसको तथा जो (**इन्द्रः**) बिजुली (**चन**) भी (**त्यजसा**) त्याग से अर्थात् एक पदार्थ छोड़ दूसरे पर गिरने से (**वि**) (**ह्रुणाति**) टेढ़ी-बेढ़ी जाती (**तत्**) उस वृत्त को भी (**यस्मै**) जिस (**सुकृते**) सुन्दर धर्म करनेवाले (**जनाय**) सज्जन के लिये (**अराध्वम**) देओ वह संसार का उपकार कर सके॥ १२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जिनकी प्राण के तुल्य महिमा, विस्तारयुक्त विद्या का दान, आकाशवत् शान्तियुक्त शील और बिजुली के समान दुष्टाचरण का त्याग है, वे सबको सुख देने को योग्य है॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तद्वो॑ जामि॒त्वं म॑रुतः॒ परे॑ यु॒गे पु॒रू यच्छंस॑ममृतासु॒ आव॑त।
अ॒या धि॒या मन॑वे श्रु॒ष्टिमाव्या॑ सा॒कं नरो॑ दंसने॒रा चि॑कित्रिरे॥ १३॥

तत्। व॒रुः। जा॒मि॒ऽत्वम्। म॒रु॒त॒रुः। परे॑। यु॒गे। पु॒रु। यत्। शंस॑म्। अ॒मृ॒ता॒सु॒रुः। आव॑त। अ॒या। धि॒या। मन॑वे। श्रु॒ष्टिम्। आव्या॑। सा॒कम्। नर॑रुः। दं॒स॒नै॑रुः। आ। चि॒कि॒त्रि॒रे॥ १३॥

पदार्थः-(**तत्**) (**वः**) युष्माकम् (**जामित्वम्**) सुखदुःखभोगम् (**मरुतः**) प्राणवत् प्रियतमाः (**परे**) (**युगे**) वर्षे परजन्मनि वा (**पुरु**) बहु (**यत्**) (**शंसम्**) प्रशंसाम् (**अमृतासः**) मृत्युरहिताः (**आवत**) (**अया**)

अनया **(धिया)** प्रज्ञया **(मनवे)** मनुष्याय **(श्रुष्टिम्)** प्राप्तव्यं वस्तु **(आव्य)** रक्षित्वा **(साकम्)** युष्मत् सत्सङ्गेन **(नरः)** धर्म्येषु जनानां नेतारः **(दंसनैः)** शुभाऽशुभसुखदुःखप्रापकैः कर्मभिः **(आ) (चिकित्रिरे)** जानत॥१३॥

अन्वयः-हे अमृतासो मरुतः! परे युगे यद्वः पुरु जामित्वं वर्त्तते तच्छंसमावत। अया धिया मनवे श्रुष्टिमाव्य नरः साकं युष्माभिः सह दंसनैः सर्वानाचिकित्रिरे॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायवोऽत्र सृष्टौ वर्त्तमाने प्रलये च वर्त्तन्ते तथा नित्या जीवास्सन्ति यथा वायवो जडमपि वस्तु अध ऊर्ध्वं नयन्ति तथा जीवा अपि कर्मभिः सह पूर्वस्मिन् मध्ये आगामिनि च समये यथाकालं यथाकर्म भ्रमन्ति॥१३॥

पदार्थः-हे **(अमृतासः)** मृत्युधर्मरहित **(मरुतः)** प्राणों के समान अत्यन्त प्रिय विद्वान् जनो! **(परे, युगे)** परले वर्ष में वा परजन्म में **(यत्)** जो **(वः)** तुम लोगों का **(पुरु)** बहुत **(जामित्वम्)** सुख-दुःख का भोग वर्त्तमान है **(तत्)** उसको **(शंसम्)** प्रशंसारूप **(आवत)** रक्खो और **(अया)** इस **(धिया)** बुद्धि से **(मनवे)** मनुष्य के लिये **(श्रुष्टिम्)** प्राप्त होने योग्य वस्तु की **(आव्य)** रक्षा कर **(नरः)** धर्मयुक्त व्यवहारों में मनुष्यों को पहुँचानेवाले मनुष्य **(साकम्)** तुम्हारे साथ **(दंसनैः)** शुभ-अशुभ सुख-दुःख फलों की प्राप्ति करानेवाले कर्मों से **(आ, चिकित्रिरे)** सब को अच्छे प्रकार जानें॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायु इस सृष्टि में और वर्त्तमान प्रलय में वर्त्तमान हैं, वैसे नित्य जीव हैं तथा जैसे वायु जड़ वस्तु को भी नीचे ऊपर पहुँचाते हैं, वैसे जीव भी कर्मों के साथ पिछले, बीच के और अगले समय में समय और अपने कर्मों के अनुसार चक्कर खाते फिरते हैं॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

येन॑ दी॒र्घं म॑रुतः शू॒शवा॑म यु॒ष्माके॑न परी॑णसा तु॒रासः॑।
आ यत्त॒तन॑न्वृ॒जने॒ जना॑स ए॒भिर्य॒ज्ञेभि॒स्तदु॒भीष्टि॑मश्याम्॥ १४॥

येन॑। दी॒र्घम्। म॒रु॒तः॒। शू॒शवा॑म। यु॒ष्माके॑न। परी॑णसा। तु॒रा॒सः॒। आ। यत्। त॒तन॑न्। वृ॒जने॑। जना॑सः। ए॒भिः॒। य॒ज्ञेभिः॑। तत्। अ॒भि। इष्टि॑म्। अ॒श्या॒म्॥ १४॥

पदार्थः-**(येन) (दीर्घम्)** प्रलम्बितं ब्रह्मचर्यम् **(मरुतः)** वायुवद्विद्याबलिष्ठाः **(शूशवाम)** वर्द्धेमहि **(युष्माकेन)** युष्माकं सम्बन्धेन। अत्र **वाच्छन्दसी**त्यनण्यपि युष्माकादेशः। **(परीणसा)** बहुना। **परीणसा इति बहुनामसु पठितम्।** (निघं०३.१) **(तुरासः)** त्वरितारः **(आ) (यत्)** याम **(ततनन्)** तन्वन्तु **(वृजने)**

बले (**जनासः**) विद्यया प्रसिद्धाः (**एभिः**) (**यज्ञेभिः**) विद्वत्सङ्गैः (**तत्**) ताम् (**अभि**) (**इष्टिम्**) (**अश्याम्**) प्राप्नुयाम्॥१४॥

अन्वयः–हे तुरासो मरुतो! वयं येन युष्माकेन परीणसोपदेशेन दीर्घं प्राप्य शूशवाम येन जनासो वृजने यद्यामाततनन्तत्तामभीष्टिमेभिर्यज्ञेभिरहमश्याम्॥१४॥

भावार्थः–येषां सहायेन मनुष्या बहुविद्याधनबलाः स्युस्तान्नित्यं वर्द्धयेयुः। विद्वांसो यादृशं धर्ममाचरेयुस्तादृशमितरेऽप्याचरन्तु॥१४॥

पदार्थः–हे (**तुरासः**) शीघ्रता करनेवाले (**मरुतः**) पवन के समान विद्याबलयुक्त विद्वानो! हम लोग (**येन**) जिस (**युष्माकेन**) आप लोगों के सम्बन्ध के (**परीणसा**) बहुत उपदेश से (**दीर्घम्**) दीर्घ अत्यन्त लम्बे ब्रह्मचर्य को प्राप्त होके (**शूशवाम**) वृद्धि को प्राप्त हों जिससे (**जनासः**) विद्या से प्रसिद्ध मनुष्य (**वृजने**) बल के निमित्त (**यत्**) जिस क्रिया को (**आ, ततनन्**) विस्तारें (**तत्**) उस (**अभीष्टिम्**) सब प्रकार से चाही हुई क्रिया को (**एभिः**) इन (**यज्ञेभिः**) विद्वानों के सङ्गरूपयज्ञों से मैं (**अश्याम्**) पाऊं॥१४॥

भावार्थः–जिनके सहाय से मनुष्य बहुत विद्या, धर्म और बलवाले हों उनकी नित्य वृद्धि करें, विद्वान् जन जैसे धर्म का आचरण करें, वैसा ही और भी जन करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥१५॥३॥

एषः। वः। स्तोमः। मरुतः। इयम्। गीः। मान्दार्यस्य। मान्यस्य। कारोः। आ। इषा। यासीष्ट। तन्वे। वयाम्। विद्याम। इषम्। वृजनम्। जीरऽदानुम॥१५॥

पदार्थः–(**एषः**) (**वः**) युष्माकम् (**स्तोमः**) स्तवनम् (**मरुतः**) विद्वांसः (**इयम्**) (**गीः**) वाणी (**मान्दार्यस्य**) आनन्दिनो धार्मिकस्य (**मान्यस्य**) सत्कर्त्तुं योग्यस्य (**कारोः**) प्रयतमानस्य (**आ**) (**इषा**) इच्छया (**यासीष्ट**) प्राप्नुयात् (**तन्वे**) शरीराय (**वयाम्**) वयम्। वर्णव्यत्ययेनाऽत्र दीर्घः। (**विद्याम**) प्राप्नुयाम (**इषम्**) अन्नम् (**वृजनम्**) बलम् (**जीरदानुम्**) जीवनम्॥१५॥

अन्वयः–हे मरुतो! वो य एष स्तोमो मान्दार्यस्य मान्यस्य कारोरियं गीर्वर्त्तते यां तन्वे इषा कश्चिदायासीष्ट तामिषं वृजनं जीरदानुञ्च वयां विद्याम॥१५॥

भावार्थः–मनुष्यैर्विदुषां स्तुतिं कृत्वा आप्तस्य वाचं श्रुत्वा शरीरात्मबलं वर्द्धयित्वा दीर्घं जीवनं प्राप्तव्यमिति॥१५॥

अत्र मरुद्विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति षट्षष्ट्युत्तरं शततमं १६६ सूक्त तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः-हे **(मरुतः)** विद्वानो! **(वः)** तुम्हारा जो **(एषः)** यह **(स्तोमः)** स्तुति और **(मान्दार्यस्य)** आनन्द करनेवाले धर्मात्मा **(मान्यस्य)** सत्कार करने योग्य **(कारोः)** अत्यन्त यत्न करते हुए जन की **(इयम्)** यह **(गीः)** वाणी और जिस क्रिया को **(तन्वे)** शरीर के लिये **(इषा)** इच्छा के साथ कोई भी **(आ, यासीष्ट)** अच्छे प्रकार प्राप्त हो उस क्रिया **(इषम्)** अन्न **(वृजनम्)** बल और **(जीरदानुम्)** जीवन को **(वयाम्)** हम लोग **(विद्याम)** प्राप्त होवें॥१५॥

भावार्थः-मनुष्यों को विद्वानों की स्तुति कर, शास्त्रज्ञ धर्मात्माओं की वाणी सुन, शरीर और आत्मा के बल को बढ़ा दीर्घजीवन प्राप्त करना चाहिये॥१५॥

इस सूक्त में मरुच्छब्दार्थ से विद्वानों के गुण का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ छियासठवां १६६ सूक्त और तीसरा ३ वर्ग समाप्त हुआ॥

सहस्रमित्यस्यैकादशर्च्चस्य सप्तषष्ट्युत्तरस्य शततमस्य सूक्तस्यागस्त्य ऋषिः। इन्द्रो मरुच्च देवता। १,४,५ भुरिक् पङ्क्तिः। ७,९ स्वराट् पङ्क्तिः। १० निचृत् पङ्क्तिः। ११ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,३,६,८ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः।

अथ सज्जनगुणानाह॥

अब एक सौ सरसठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सज्जनों के गुणों का वर्णन करते हैं॥

सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः॥ १॥

सहस्रम्। ते। इन्द्र। ऊतयः। नः। सहस्रम्। इषः। हरिऽवः। गूर्तऽतमाः। सहस्रम्। रायः। मादयध्यै। सहस्रिणः। उप। नः। यन्तु। वाजाः॥ १॥

पदार्थः-(**सहस्रम्**) असंख्या (**ते**) तव (**इन्द्र**) परमैश्वर्ययुक्त सम्राट् (**ऊतयः**) रक्षाः (**नः**) अस्माकम् (**सहस्रम्**) (**इषः**) अन्नादीनि (**हरिवः**) धारणाऽऽकर्षणादियुक्त (**गूर्त्ततमाः**) अतिशयिता उद्यमाः (**सहस्रम्**) (**रायः**) श्रियः (**मादयध्यै**) मादयितुमानन्दयितुम् (**सहस्रिणः**) सहस्रमसंख्याता बहवः पदार्थाः सन्ति येषु ते (**उप**) (**नः**) अस्मान् (**यन्तु**) प्राप्नुवन्तु (**वाजाः**) बोधाः॥ १॥

अन्वयः-हे हरिव इन्द्र! यास्ते सहस्रमूतयः सहस्रमिषः सहस्रं गूर्त्ततमा रायः सन्ति ता नः सन्तु। सहस्रिणो वाजा मादयध्यै नोऽस्मानुपयन्तु॥ १॥

भावार्थः-मनुष्यैर्यानि भाग्यशालिनां सर्वोत्तमसामग्र्या यथायोग्यक्रियया चाऽसंख्यानि सुखानि भवन्ति, तान्यस्माकं सन्त्विति मत्वा सततं प्रयतितव्यम्॥ १॥

पदार्थः-हे (**हरिवः**) धारणाकर्षणादियुक्त (**इन्द्र**) परमैश्वर्यवाले विद्वान्! जो (**ते**) आपकी (**सहस्रम्**) सहस्रों (**ऊतयः**) रक्षायें (**सहस्रम्**) सहस्रों (**इषः**) अन्न आदि पदार्थ (**सहस्रम्**) सहस्रों (**गूर्त्ततमाः**) अत्यन्त उद्यम वा (**रायः**) धन हैं, वे (**नः**) हमारे हों और (**सहस्रिणः**) सहस्रों पदार्थ जिनमें विद्यमान वे (**वाजाः**) बोध (**मादयध्यै**) आनन्दित करने के लिये (**नः**) हम लोगों को (**उप, यन्तु**) निकट प्राप्त हों॥ १॥

भावार्थः-मनुष्यों को जो भाग्यशालियों को सर्वोत्तम सामग्री से और यथायोग्य क्रिया से असंख्य सुख होते हैं, वे हमारे हों, ऐसा मानकर निरन्तर प्रयत्न करना चाहिये॥ १॥

पुनर्वायुदृष्टान्तेन सज्जनगुणानाह॥

अब पवन के दृष्टान्त से सज्जन के गुणों को कहा है॥

आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः।

अध॒ यदे॑षां नि॒युत॑: पर॒मा: स॑मु॒द्रस्य॑ चिद्ध॒नय॑न्त पा॒रे॥ २॥

आ। न॒:। अव॑:ऽभि:। म॒रुत॑:। या॒न्तु॒। अच्छ॑। ज्येष्ठे॑भि:। वा॒। बृ॒हत्ऽदि॑वै:। सु॒ऽमा॒या:। अध॑। यत्। ए॒षा॒म्। नि॒ऽयुत॑:। प॒र॒मा:। स॒मु॒द्रस्य॑। चि॒त्। ध॒नय॑न्त। पा॒रे॥ २॥

पदार्थ:-(**आ**) समन्तात् (**न:**) अस्मान् (**अवोभि:**) रक्षणादिभि: (**मरुत:**) वायव: (**यान्तु**) प्राप्नुवन्तु (**अच्छ**) (**ज्येष्ठेभि:**) विद्यावयोवृद्धै: सह (**वा**) (**बृहद्दिवै:**) बृहती दिवा विद्या येषान्तै: (**सुमाया:**) सुष्ठु माया प्रज्ञा येषान्ते (**अध**) (**यत्**) ये (**एषाम्**) प्राज्ञानाम् (**नियुत:**) वायुरिव विद्युदादयोऽश्वा: (**परमा:**) प्रकृष्टा: (**समुद्रस्य**) सागरस्य (**चित्**) अपि (**धनयन्त**) आत्मनो धनमिच्छन्ति। अत्राडभाव:। (**पारे**)॥ २॥

अन्वय:-यद्ये सुमाया बृहद्दिवैर्ज्येष्ठेभिर्वाऽवोभि: सह मरुत इव नोच्छायान्तु। अधैषां चित् समुद्रस्य पारे परमा नियुतो धनयन्त तान् वयं सत्कुर्याम॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये बृहत्तमाभिर्नौकाभिर्वायुवद्वेगेन व्यवहाराय समुद्रस्य पाराऽवारौ गत्वाऽऽगत्य श्रियमुन्नयन्ति तेऽतुलं सुखमाप्नुवन्ति॥ २॥

पदार्थ:-(**यत्**) जो (**सुमाया:**) सुन्दर बुद्धिवाले (**बृहद्दिवै:**) जिनकी अतीव विद्या प्रसिद्ध उन (**ज्येष्ठेभि:**) विद्या और अवस्था से बढे हुओं के (**वा**) अथवा (**अवोभि:**) रक्षा आदि कर्मों के साथ (**मरुत:**) पवनों के समान सज्जन (**न:**) हम लोगों को (**अच्छ**) अच्छे प्रकार (**आ, यान्तु**) प्राप्त होवें (**अध**) इसके अनन्तर (**एषाम्, चित्**) इनके भी (**समुद्रस्य**) सागर के (**पारे**) पार (**परमा:**) अत्यन्त उत्तम (**नियुत:**) पवन के समान बिजुली आदि अश्व (**धनयन्त**) अपने को धन की इच्छा करते हैं, उनका हम लोग सत्कार करें॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अतीव बड़ी नौकाओं से पवन के समान वेग से व्यवहारसिद्धि के लिये समुद्र के वार-पार जा आ के धन की उन्नति करते हैं, वे अतुल सुख को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मि॒म्यक्ष॒ येषु॒ सुधि॑ता घृ॒ताची॒ हिर॑ण्यनिर्णि॒गुप॑रा॒ न ऋ॒ष्टि:।
गुहा॒ चर॑न्ती॒ मनु॑षो॒ न योषा॑ स॒भाव॑ती वि॒दुष्ये॑व सं॒ वाक्॥ ३॥

मि॒म्यक्ष॑। येषु॑। सुऽधि॑ता। घृ॒ताची॑। हिर॑ण्यऽनिर्निक्। उप॑रा। न। ऋ॒ष्टि:। गुहा॑। चर॑न्ती। मनु॑ष:। न। योषा॑। स॒भाऽव॑ती। वि॒दुष्या॑ऽइव। सम्। वाक्॥ ३॥

पदार्थः-(**मिम्यक्ष**) प्राप्नुहि (**येषु**) (**सुधिता**) सुष्ठु धृता (**घृताची**) या घृतमुदकमञ्चति सा रात्री। **घृताचीति रात्रिनामसु पठितम्।** (निघं०१.७) (**हिरण्यनिर्णिक्**) या हिरण्येन निर्णेनेक्ति पुष्णाति सा (**उपरा**) उपरिस्था दिक्। **उपरा इति दिङ्नामसु पठितम्।** (निघं०१.६) (**न**) इव (**ऋष्टिः**) प्रापिका (**गुहा**) गुहायाम् (**चरन्ती**) गच्छन्ती (**मनुषः**) मनुषस्य (**न**) इव (**योषा**) (**सभावती**) सभासम्बन्धिनी (**विदथ्येव**) विदथेषु संग्रामेषु विज्ञानेषु भवेव (**सम्**) (**वाक्**) वाणी॥३॥

अन्वयः-हे विद्वन्! त्वं येषु घृताचीव सुधिता उपरा न ऋष्टिर्हिरण्यनिर्णिग्गुहा चरन्ती मनुषो योषा न विदथ्येव सभावती वागस्ति तां सं मिम्यक्ष॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्याः सत्याऽसत्यनिर्णयाय सर्वशुभगुणकर्मस्वभावां विद्यासुशिक्षायुक्तामाप्तवाणीं प्राप्नुवन्ति ते बह्वैश्वर्याः सन्तो दिक्षु सुकीर्त्तयो भवन्ति॥३॥

पदार्थः-हे विद्वान्! आप (**येषु**) जिनमें (**घृताची**) जल को शीतलता से छोड़नेवाली रात्रि के समान वा (**सुधिता**) अच्छे प्रकार धारण की हुई (**उपरा**) ऊपरली दिशा के (**न**) समान वा (**ऋष्टिः**) प्रत्येक पदार्थ को प्राप्त करानेवाली (**हिरण्यनिर्णिक्**) जो सुवर्ण से पुष्टि होती और (**गुहा, चरन्ती**) गुप्त स्थलों में विचरती हुई (**मनुषः**) मनुष्य की (**योषा**) स्त्री (**न**) उसके समान वा (**विदथ्येव**) संग्राम वा विज्ञानों में हुई क्रिया आदि के समान (**सभावती**) सभा सम्बन्धिनी (**वाक्**) वाणी है, उसको (**सम्, मिम्यक्ष**) अच्छे प्रकार प्राप्त होओ॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य सत्य-असत्य के निर्णय के लिये सब शुभ, गुण, कर्म स्वभाववाली विद्या सुशिक्षायुक्त शास्त्रज्ञ धर्मात्मा विद्वानों की वाणी को प्राप्त होते हैं, वे बहुत ऐश्वर्यवान् होते हुए दिशाओं में सुन्दर कीर्ति को प्राप्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

परा॑ शु॒भ्रा अ॒यासो॑ य॒व्या सा॑धार॒ण्येव॑ म॒रुतो॑ मिमिक्षुः।
न रो॑द॒सी अप॑ नुदन्त घो॒रा जु॒षन्त॒ वृध॑ं स॒ख्याय॑ दे॒वाः॥४॥

परा॑। शु॒भ्राः। अ॒यासः॑। य॒व्या। सा॒धा॒र॒ण्याऽइ॑व। म॒रुतः॑। मि॒मि॒क्षुः॑। न। रो॒द॒सी इति॑। अप॑। नु॒द॒न्त॒। घो॒राः। जु॒षन्त॑। वृध॑म्। स॒ख्याय॑। दे॒वाः॥४॥

पदार्थः-(**परा**) (**शुभ्राः**) स्वच्छाः (**अयासः**) शीघ्रगामिनः (**यव्या**) मिश्रिताऽमिश्रितगत्या (**साधारण्येव**) यथा साधारणया (**मरुतः**) वायवः (**मिमिक्षुः**) सिञ्चन्ति (**न**) निषेधे (**रोदसी**) द्यावापृथिव्यौ

(अप) (नुदन्त) दुरीकुर्वन्ति **(घोराः)** विद्युद्योगेन भयङ्कराः **(जुषन्त)** सेवन्ताम् **(वृधम्)** वर्द्धनम् **(सख्याय)** मित्राणां भावाय **(देवाः)** विद्वांसः॥४॥

अन्वयः-यथा शुभ्रा अयासो मरुतो यव्या रोदसी मिमिक्षुः। घोराः सन्तो न परापनुदन्त तथा देवा वृधं सख्याय साधारण्येव जुषन्त॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा वायुविद्युद्योगजन्या वृष्टिरनेका ओषधीरुत्पाद्य सर्वान् प्राणिनो जीवयित्वा दुःखानि दूरीकरोति यथोत्तमा पतिव्रता स्त्री पतिमाह्लादयति तथैव विद्वांसो विद्यासुशिक्षा वर्षणेन धर्मसेवया च सर्वान् मनुष्यानाह्लादयेयुः॥४॥

पदार्थः-जैसे **(शुभ्राः)** स्वच्छ **(अयासः)** शीघ्रगामी **(मरुतः)** पवन **(यव्या)** मिली न मिली हुई चाल से **(रोदसी)** आकाश और पृथिवी को **(मिमिक्षुः)** सींचते और **(घोराः)** बिजुली के योग से भयङ्कर होते हुए **(न, परा, अप, नुदन्त)** उनको परावृत्त नहीं करते, उलट नहीं देते वैसे **(देवाः)** विद्वान् जन **(वृधम्)** वृद्धि को **(सख्याय)** मित्रता के लिये **(साधारण्येव)** साधारण क्रिया से जैसे वैसे **(जुषन्त)** सेवें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे वायु और बिजुली के योग से उत्पन्न हुई वर्षा अनेक ओषधियों को उत्पन्न कर सब प्राणियों को जीवन देकर दुःखों को दूर करती है वा जैसे उत्तम पतिव्रता स्त्री पति को आनन्दित करती है, वैसे ही विद्वान् जन विद्या और उत्तम शिक्षा की वर्षा से और धर्म के सेवन से सब मनुष्यों को आह्लादित करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः।
आ सूर्येव विधतो रथं गात् त्वेषप्रतीका नभसो नेत्या॥५॥४॥

जोषत्। यत्। ईम्। असुर्या। सचध्यै। विसितऽस्तुका। रोदसी। नृऽमनाः। आ। सूर्याऽइव। विधतः। रथम्। गात्। त्वेषऽप्रतीका। नभसः। न। इत्या॥५॥

पदार्थः-**(जोषत्)** सेवेत **(यत्)** यः **(ईम्)** जलम् **(असुर्या)** असुरेषु मेघेषु भवा **(सचध्यै)** सचितुं संयोक्तुम् **(विषितस्तुका)** विविधतया सिता बद्धा स्तुका स्तुतिर्यया सा **(रोदसी)** द्यावापृथिव्यौ **(नृमणाः)** नृषु नायकेषु मनो यस्याः सा **(आ)** **(सूर्येव)** यथा सूर्यस्य दीप्तिः **(विधतः)** ताडयितॄन् **(रथम्)** रमणीयं यानं व्यवहारञ्च **(गात्)** गच्छति **(त्वेषप्रतीका)** त्वेषस्य प्रकाशस्य प्रतीतिकारिका **(नभसः)** जलस्य **(न)** इव **(इत्या)** प्राप्तुं योग्या॥५॥

अन्वयः-यद्योऽसुर्या विषितस्तुका नृमणा ईं सचध्यै सूर्येव रोदसी जोषत् त्वेषप्रतीकेत्या सती नभसो रथं न विधतश्चागात् प्रवरा स्त्री वर्त्तते॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽग्निर्विद्युद्रूपेण सर्वमभिव्याप्य प्रकाशयति तथा सर्वा विद्यासुशिक्षाः प्राप्य स्त्री समग्रं कुलं प्रशंसयति॥५॥

पदार्थः-(**यत्**) जो (**असुर्या**) मेघों में प्रसिद्ध (**विषितस्तुका**) विविध प्रकार की जिसकी स्तुति सम्बन्धी और (**नृमणाः**) जो अग्रगामी जनों में चित्त रखती हुई (**ईम्**) जल के (**सचध्यै**) संयोग के लिये (**सूर्येव**) सूर्य की दीप्ति के समान (**रोदसी**) आकाश और पृथिवी को (**जोषत्**) सेवे अर्थात् उनके गुणों में रमे वा (**त्वेषप्रतीका**) प्रकाश की प्रतीति करानेवाली और (**इत्या**) प्राप्त होने के योग्य होती हुई (**नभसः**) जल सम्बन्धी (**रथम्**) रमण करने योग्य रथ के (**न**) समान व्यवहार की और (**विधतः**) ताड़ना करनेवालों को (**आ, गात्**) प्राप्त होती वह स्त्री प्रवर है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अग्नि बिजुलीरूप से सबको सब प्रकार से व्याप्त होकर प्रकाशित करती है, वैसे सब विद्या उत्तम शिक्षाओं को पाकर स्त्री समग्र कुल को प्रशंसित करती है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम्।
अर्को यद्वो मरुतो हविष्मान् गायद् गाथं सुतसोमो दुवस्यन्॥६॥

आ। अस्थापयन्त। युवतिम्। युवानः। शुभे। निऽमिश्लाम्। विदथेषु। पज्राम। अर्कः। यत्। वः। मरुतः। हविष्मान्। गायत्। गाथम्। सुतऽसोमः। दुवस्यन्॥६॥

पदार्थः-(**आ**) समन्तात् (**अस्थापयन्त**) (**युवतिम्**) यौवनाऽवस्थां प्राप्ताम् (**युवानः**) यौवनावस्थास्थाः (**शुभे**) शुभगुणकर्मस्वभावग्रहणाय (**निमिश्लाम्**) नितरां पूर्णविद्यासुशिक्षायुक्ताम् (**विदथेषु**) धर्म्येषु व्यवहारेषु (**पज्राम्**) गन्त्रीम् (**अर्कः**) अर्चनीयमन्नम्। **अर्क इत्यन्ननामसु पठितम्।** (निघं०२.७) (**यत्**) यः (**वः**) युष्माकम् (**मरुतः**) विद्यायुक्ताः प्राणवत् प्रियाः सज्जनाः (**हविष्मान्**) आदत्तबहुविद्यः (**गायत्**) स्तुयात्। अत्राडभावः। (**गाथम्**) प्रशंसनीयमुपदेशम् (**सुतसोमः**) सुतः सोम ऐश्वर्यं येन (**दुवस्यन्**) परिचरन्॥६॥

अन्वयः-हे मरुतो! युवानो भवन्तो शुभे निमिश्लां विदथेषु पज्रां युवतिमास्थापयन्त। यद्वोऽर्कोऽन्नं तदास्थापयन्त यो हविष्मान् सुतसोमो गायत् स गाथं दुवस्यन् सततमानन्देत्॥६॥

भावार्थः-सर्वेषां राजपुरुषादीनामत्यन्तं योग्यमस्ति स्वकन्याः पुत्राँश्च दीर्घे ब्रह्मचर्ये संस्थाप्य विद्यासुशिक्षे संग्राह्य पूर्णविद्यानां परस्परं प्रसन्नानां स्वयंवरं विवाहं कारयेयुर्यतो यावज्जीवनं तावदानन्दिताः स्युः॥६॥

पदार्थः-हे **(मरुतः)** विद्यायुक्त प्राण के समान प्रिय सज्जनो! **(युवानः)** यौवनावस्था को प्राप्त आप **(शुभे)** शुभ गुण, कर्म और स्वभाव ग्रहण करने के लिये **(निमिश्लाम्)** निरन्तर पूर्ण विद्या और सुशिक्षायुक्त और **(विदथेषु)** धर्मयुक्त व्यवहारों में **(पत्नाम्)** जानेवाली **(युवतिम्)** युवती स्त्री को **(आ, अस्थापयन्त)** अच्छे प्रकार स्थापित करते और **(यत्)** जो **(वः)** तुम्हारा **(अर्कः)** सत्कार करने योग्य अन्न है, उसको अच्छे प्रकार स्थापित करते हो। तथा जो **(हविष्मान्)** बहुत विद्यावान् **(सुतसोमः)** जिसने ऐश्वर्य उत्पन्न किया और **(गायत्)** स्तुति करे वह **(गाथम्)** प्रशंसनीय उपदेश को **(दुवस्यन्)** सेवता हुआ निरन्तर आनन्द करे॥६॥

भावार्थः-सब राजपुरुषादिकों को अत्यन्त योग्य है कि अपने कन्या और पुत्रों को दीर्घ ब्रह्मचर्य में संस्थापित कर विद्या और उत्तम शिक्षा उनको ग्रहण करा, पूर्ण विद्यावाले परस्पर प्रसन्न पुत्र कन्याओं का स्वयंवर विवाह करावें, जिससे जब तक जीवन रहे तब आनन्दित रहें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः॥७॥

प्र। तम्। विवक्मि। वक्म्यः। यः। एषाम्। मरुताम्। महिमा। सत्यः। अस्ति। सचा। यत्। ईम्। वृषऽमनाः। अहम्ऽयुः। स्थिरा। चित्। जनीः। वहते। सुऽभागाः॥७॥

पदार्थः-**(प्र)** **(तम्)** **(विवक्मि)** विशेषेण वदामि। अत्र **वाच्छन्दसी**ति कुत्वम्। **(वक्म्यः)** वक्तुं योग्यः **(यः)** **(एषाम्)** **(मरुताम्)** वायूनामिव विदुषाम् **(महिमा)** महतो भावः **(सत्यः)** सत्सु साधुरव्यभिचारि **(अस्ति)** **(सचा)** सम्बन्धेन **(यत्)** यः **(ईम्)** सर्वतः **(वृषमनाः)** वृषे वीर्यसेचने मनो यस्य सः **(अहंयुः)** अहं विद्यते यस्मिन् सः **(स्थिरा)** निश्चलाः। अत्राकारादेशः। **(चित्)** खलु **(जनीः)** अपत्यानि प्रादुर्भवित्रीः **(वहते)** प्राप्नोति **(सुभागाः)** शोभनो भागो भजनं यासान्ताः॥७॥

अन्वयः-य एषां मरुतां वक्म्यः सत्यो महिमास्ति तं यद्योऽहंयुर्वृषमना ईं सचा स्थिरा चित् सुभागा जनीर्वहते तं चाहं प्रविवक्मि॥७॥

भावार्थः-मनुष्याणामिदमेव महत्वं यद्दीर्घेण ब्रह्मचर्येण कुमाराः कुमार्यश्च पूर्णायुशरीरात्मबलाय विद्यासुशिक्षे गृहीत्वा चिरञ्जीवानि दृढकायमनांसि भाग्यशालीन्यपत्यान्युत्पाद्य प्रशंसितकरणमिति॥७॥

पदार्थः-(**यः**) जो (**एषाम्**) इन (**मरुताम्**) पवनों के समान विद्वानों का (**वक्म्यः**) कहने योग्य (**सत्यः**) सत्य (**महिमा**) बड़प्पन (**अस्ति**) है (**तम्**) उसको और (**यत्**) जो (**अहंयुः**) अहङ्कारवाला अभिमानी (**वृषमनाः**) जिसका वीर्य सींचने में मन वह (**ईम्**) सब ओर से (**सचा**) सम्बन्ध के साथ (**स्थिरा, चित्**) स्थिर ही (**सुभागाः**) सुन्दर सेवने करने (**जनीः**) अपत्यों की उत्पन्न करनेवाली स्त्रियों को (**वहते**) प्राप्त होता उसको भी मैं (**प्र, विवक्मि**) अच्छे प्रकार विशेषता से कहता हूँ॥७॥

भावार्थः-मनुष्यों का यही बड़प्पन है, जो दीर्घ ब्रह्मचर्य से कुमार और कुमारी शरीर और आत्मा के पूर्ण बल के लिये विद्या और उत्तम शिक्षा को ग्रहण कर चिरञ्जीवी दृढ़ जिनके शरीर और मन ऐसे भाग्यशाली सन्तानों को उत्पन्न कर उनको प्रशंसित करना॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पान्ति॑ मि॒त्रावरु॑णावव॒द्याच्चय॑त ईमर्य॒मो अप्र॑शस्तान्।
उ॒त च्य॑व॒न्ते अच्यु॑ता ध्रु॒वाणि॑ वावृ॒ध ई॑ं मरुतो॒ दाति॑वारः॥८॥

पान्ति॑। मि॒त्रावरु॑णौ अव॒द्यात्। चय॑ते। ई॒म्। अ॒र्य॒मो इति॑। अप्र॑ऽशस्तान्। उ॒त। च्य॒व॒न्ते॒। अच्यु॑ता। ध्रु॒वाणि॑। व॒वृ॒धे। ई॒म्। म॒रु॒तः॒। दाति॑ऽवारः॥८॥

पदार्थः-(**पान्ति**) रक्षन्ति (**मित्रावरुणौ**) सखिवरावध्यापकोपदेशकौ वा (**अवद्यात्**) निन्द्यात् पापाचरणात् (**चयते**) एकत्र करोति (**ईम्**) प्रत्यक्षम् (**अर्य्यमो**) न्यायकारी। अत्रार्योपपदान्मन धातोरौणादिको बाहुलकादो प्रत्ययः। (**अप्रशस्तान्**) निन्द्यकर्माचारिणः (**उत**) अपि (**च्यवन्ते**) प्राप्नुवन्ति (**अच्युता**) विनाशरहितानि (**ध्रुवाणि**) दृढानि कर्माणि (**वावृधे**) वर्द्धते (**ईम्**) सर्वतः (**मरुतः**) विद्वांसः (**दातिवारः**) यो दातिं दानं वृणोति सः॥८॥

अन्वयः-हे मरुतो! भवन्तो मित्रावरुणौ चावद्यात् पान्ति जनान् रक्षन्ति। अर्यमो अप्रशस्तानीञ्चयते। उत तेऽच्युता ध्रुवाणि च्यवन्ते दातिवार ईं वावृधे॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विद्याधर्मसुशिक्षादानेनाज्ञानिनोऽधर्मान्निवर्त्य ध्रुवाणि शुभगुणकर्माणि प्रापयन्ति ते सुखात् पृथक् न भवन्ति॥८॥

पदार्थः-हे (**मरुतः**) विद्वानो! आप लोग और (**मित्रावरुणौ**) मित्र और श्रेष्ठ सज्जन वा अध्यापक और उपदेशक जन (**अवद्यात्**) निन्द्य पापाचरण से (**पान्ति**) मनुष्यों की रक्षा करते हैं तथा (**अर्यमो**) न्याय करनेवाला राजा (**अप्रशस्तान्**) दुराचारी जनों को (**ईम्**) प्रत्यक्ष (**चयते**) इकट्ठा करता है (**उत**) और वे (**अच्युता**) विनाशरहित (**ध्रुवाणि**) ध्रुव दृढ़ कामों को (**च्यवन्ते**) प्राप्त होते हैं और (**दातिवारः**) दान को लेनेवाला (**ईम्**) सब ओर से (**वावृधे**) बढ़ता है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्या, धर्म और उत्तम शिक्षा के देने से अज्ञानियों को अधर्म से निवृत्त कर ध्रुव और शुभ गुण, कर्मों को प्राप्त कराते हैं, वे सुख से अलग नहीं होते॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नहीं नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः।
ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परिष्टुः॥९॥

नहि। नु। वः। मरुतः। अन्ति। अस्मे इति। आरात्तात्। चित्। शवसः। अन्तम्। आपुः। ते। धृष्णुना। शवसा। शूशुऽवांसः। अर्णः। न। द्वेषः। धृषता। परि। स्थुः॥९॥

पदार्थः-(**नहि**) निषेधे। अत्र **निपातस्य चे**ति दीर्घः। (**नु**) सद्यः (**वः**) युष्माकम् (**मरुतः**) महाबलिष्ठाः (**अन्ति**) समीपे (**अस्मे**) अस्माकम् (**आरात्तात्**) दूरात् (**चित्**) अपि (**शवसः**) बलस्य (**अन्तम्**) सीमानम् (**आपुः**) प्राप्नुवन्ति (**ते**) (**धृष्णुना**) दृढेन (**शवसा**) बलेन (**शूशुवांसः**) वर्द्धमानाः (**अर्णः**) उदकम्। **अर्ण इत्युदकनामसु पठितम्।** (निघं०१.१२) (**न**) इव (**द्वेषः**) द्वेषादीन् दोषान् धर्मद्वेष्ट्रीन् मनुष्यान् वा (**धृषता**) प्रागल्भ्येन (**परि**) सर्वतस्त्यागे (**स्थुः**) तिष्ठेयुः॥९॥

अन्वयः-हे मरुतो! ये वोऽस्मे चान्ति शवसोऽन्तं नु नह्यापुर्ये चारात्ताच्चित् धृष्णुना शवसा शूशुवांसोऽर्णो न धृषता द्वेषः परिष्टुस्त आप्ता भवेयुः॥९॥

भावार्थः-यदि वयं पूर्णं शरीरात्मबलं प्राप्नुयाम तर्हि शत्रवोऽस्माकं युष्माकं च पराजयं कर्त्तुं न शक्नुयुः। ये दुष्टान् लोभादीन् दोषाँश्च त्यजेयुस्ते बलिष्ठा भूत्वा दुःखस्य पारं गच्छेयुः॥९॥

पदार्थः-हे (**मरुतः**) महाबलवान् विद्वानो! जो (**वः**) तुम्हारे और (**अस्मे**) हमारे (**अन्ति**) समीप में (**शवसः**) बल की (**अन्तम्**) सीमा को (**नु**) शीघ्र (**नहि**) नहीं (**आपुः**) प्राप्त होते और जो (**आरात्तात्**) दूर से (**चित्**) भी (**धृष्णुना**) दृढ़ (**शवसा**) बल से (**शूशुवांसः**) बढ़ते हुए (**अर्णः**) जल के (**न**) समान (**धृषता**) प्रगल्भता से ढ़िठाई से (**द्वेषः**) वैर आदि दोष वा धर्मविरोधी मनुष्यों को (**परि, स्थुः**) सब ओर से छोड़ने में स्थिर हों (**ते**) वे आप्त अर्थात् शास्त्रज्ञ धर्मात्मा हों॥९॥

भावार्थः-यदि हम लोग पूर्ण शरीर और आत्मा के बल को प्राप्त होवें तो शत्रुजन हमारा और तुम्हारा पराजय न कर सकें। जो दुष्ट और लोभादि दोषों को छोड़ें, वे अति बली होकर दुःख के पार पहुँचें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व॒यम॒द्येन्द्र॑स्य॒ प्रेष्ठा॑ व॒यं श्वो वो॑चेमहि सम॒र्ये।

व॒यं पु॒रा मह॑ि च नो॒ अनु॒ द्यून् तन्न॑ ऋभुक्षा न॒रामनु॑ ष्यात्॥ १०॥

व॒यम्। अ॒द्य। इन्द्र॑स्य। प्रेष्ठा॑:। व॒यम्। श्व:। वो॒चे॒म॒हि॒। स॒ऽम॒र्ये। व॒यम्। पु॒रा। मह॑ि। च॒। न॒:। अ॒नु॑। द्यून्। तत्। न॒:। ऋ॒भु॒क्षा॒:। न॒राम्। अनु॑। स्या॒त्॥ १०॥

पदार्थ:-(**वयम्**) (**अद्य**) अस्मिन् दिने (**इन्द्रस्य**) परमैश्वर्ययुक्तस्य धार्मिकस्य विदुष: (**प्रेष्ठा:**) अतिशयेन प्रिया: (**वयम्**) (**श्व:**) आगामिदिने (**वोचेमहि**) वदेम। अत्राडभाव:। (**समर्ये**) संग्रामे (**वयम्**) (**पुरा**) (**महि**) महत् (**च**) (**न:**) अस्माकम् (**अनु**) (**द्यून्**) दिनानि (**तत्**) (**न:**) अस्मभ्यम् (**ऋभुक्षा:**) मेधावी (**नराम्**) मनुष्याणाम् (**अनु**) आनूकूल्ये (**स्यात्**)॥ १०॥

अन्वय:-हे विद्वांसो! वयमद्य इन्द्रस्य प्रेष्ठा: स्मो वयं श्व: समर्ये वोचेमहि। पुरा यच्च नो महि तद्वयमनु द्यून् वोचेमहि नरां मनुष्याणां मध्ये न ऋभुक्षा अनुष्यात्॥ १०॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये विद्वत्प्रीतिं युद्धेषूत्साहं मनुष्यादीनां प्रियं च पुरस्तादाचरन्ति ते सर्वेषां प्रिया भवन्ति॥ १०॥

पदार्थ:-हे विद्वानो! (**वयम्**) हम लोग (**अद्य**) आज (**इन्द्रस्य**) परमविद्या और ऐश्वर्ययुक्त धार्मिक विद्वान् के (**प्रेष्ठा:**) अत्यन्त प्रिय हैं (**वयम्**) हम लोग (**श्व:**) कल के आनेवाले दिन (**समर्य्ये**) संग्राम में (**वोचेमहि**) कहें (**च**) और (**पुरा**) प्रथम जो (**न:**) हम लोगों का (**महि**) बड़प्पन है (**तत्**) उसको (**वयम्**) हम लोग (**अनु, द्यून्**) प्रतिदिन कहें और (**नराम्**) मनुष्यों के बीच (**न:**) हमारे लिये (**ऋभुक्षा:**) मेधावी बुद्धिमान् वीर पुरुष (**अनु, ष्यात्**) अनुकूल हों॥ १०॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वानों से प्रीति, युद्ध में उत्साह और मनुष्यादिकों का प्रिय काम का पहिले से आचरण करते हैं, सबके प्यारे होते हैं॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ए॒ष व॒: स्तोमो॑ मरुत इ॒यं गीर्मा॑न्दा॒र्यस्य॑ मा॒न्यस्य॑ का॒रो:।

ए॒षा या॑सीष्ट त॒न्वे॑ व॒यां वि॒द्यामे॒षं वृ॒जनं जी॒रदा॑नुम्॥ ११॥ ५॥

ए॒ष:। व:। स्तोम॑:। म॒रु॒त:। इ॒यम्। गी:। मा॒न्दा॒र्यस्य॑। मा॒न्यस्य॑। का॒रो:। आ। इ॒षा। या॒सी॒ष्ट॒। त॒न्वे॑। व॒याम्। वि॒द्याम॑। इ॒षम्। वृ॒जन॑म्। जी॒रऽदा॑नुम्॥ ११॥

पदार्थ:-(**एष:**) (**व:**) युष्माकम् (**स्तोम:**) स्तवनम् (**मरुत:**) विद्वांस: (**इयम्**) (**गी:**) वेदविद्याशिक्षायुक्ता वाणी (**मान्दार्यस्य**) आनन्दप्रदोत्तमस्य (**मान्यस्य**) सत्कर्त्तुं योग्यस्य (**कारो:**) सर्वस्य

मुखकर्त्तुः **(आ)** समन्तात् **(इषा)** इच्छया **(यासीष्ट)** प्राप्नुयात् **(तन्वे)** शरीराय **(वयाम्)** वयम् **(विद्याम)** विजानीयाम **(इषम्)** **(वृजनम्)** बलम् **(जीरदानुम्)** जीवननिमित्तम्॥११॥

अन्वयः-हे मरुतो! एष वः स्तोमो मान्दार्यस्य मान्यस्य कारोरियङ्गीरस्ति। तस्या येषाऽऽयासीष्ट वयां तन्वे तामिषं जीरदानुं वृजनं च विद्याम॥११॥

भावार्थः-ये विश्वतः श्लाघ्यान् गुणान् प्राप्याप्तानां सत्कारं कृत्वा शरीरात्मबलाय विद्यापराक्रमौ सञ्चिन्वन्ति ते सुखेन जीवन्ति॥११॥

अत्र वायुदृष्टान्तेन सज्जनगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति सप्तषष्ट्युत्तरं शततमं १६७ सूक्तं पञ्चमो ५ वर्गश्च समाप्तः॥

पदार्थः-हे **(मरुतः)** विद्वानो! **(एषः)** यह **(वः)** तुम्हारी **(स्तोमः)** स्तुति और **(मान्दार्यस्य)** आनन्द के देनेवाले उत्तम **(मान्यस्य)** मान सत्कार करने योग्य **(कारोः)** सबका सुख करनेवाले सज्जन की **(इयम्)** यह **(गीः)** वेदविद्या की उत्तम शिक्षा से युक्त वाणी है, इसकी जो **(इषा)** इच्छा के साथ **(आ, यासीष्ट)** प्राप्ति हो **(वयाम्)** हम लोग **(तन्वे)** शरीर के लिये उस **(इषम्)** इच्छा **(जीरदानुम्)** जीवन के निमित्त और **(वृजनम्)** बल को **(विद्याम)** जानें॥११॥

भावार्थः-जो सबसे प्रशंसा करने योग्य गुणों को प्राप्त होकर आप्त धर्मात्मा सज्जनों का सत्कार कर शरीर और आत्मा के बल के लिये विद्या और पराक्रम सम्पादन करते हैं, वे सुख से जीते हैं॥११॥

इस सूक्त में वायु के दृष्टान्त से सज्जन विद्वान् जनों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह समझना चाहिये॥

यह एक सौ सरसठवां सूक्त और पांचवां वर्ग समाप्त हुआ॥

यज्ञायज्ञेत्यस्य दशर्च्चस्याष्टषष्ट्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। मरुतो देवताः। १,४ निचृज्जगती छन्दः। निषादः स्वरः। २,५ विराट् त्रिष्टुप्। ३ स्वराट् त्रिष्टुप्। ६,७ भुरिक् त्रिष्टुप्। ८ त्रिष्टुप्। ९ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। १० पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ वायुदृष्टान्तेन सज्जनगुणानाह॥

अब एक सौ अरसठवें सूक्त का आरम्भ है। उसके आरम्भ में पवन के दृष्टान्त से सज्जनों के गुणों का वर्णन करते हैं॥

यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः॥ १॥

यज्ञाऽयज्ञा। वः। समना। तुतुर्वणिः। धियम्ऽधियम्। वः। देवऽयाः। ऊम् इति। दधिध्वे। आ। वः। अर्वाचः। सुविताय। रोदस्योः। महे। ववृत्याम्। अवसे। सुवृक्तिऽभिः॥ १॥

पदार्थः-(**यज्ञायज्ञा**) यज्ञेयज्ञे (**वः**) युष्माकम् (**समना**) तुल्ये (**तुतुर्वणिः**) शीघ्रगतिः (**धियंधियम्**) कर्मकर्म (**वः**) युष्माकम् (**देवयाः**) ये देवान् दिव्यान् गुणान् यान्ति ते (**उ**) (**दधिध्वे**) (**आ**) (**वः**) युष्माकम् (**अर्वाचः**) (**सुविताय**) ऐश्वर्याय (**रोदस्योः**) (**महे**) (**ववृत्याम्**) (**अवसे**) (**सुवृक्तिभिः**) सुष्ठु वर्जनैस्सह॥ १॥

अन्वयः-हे विद्वांसो! यथा देवयाः प्राणा वो धियंधियं दधति तथा उ यूयं तान् दधिध्वे। यथा तेषां यज्ञायज्ञा समना तुतुर्वणिरस्ति तथा वोऽस्तु। यथा वयं रोदस्योः सुविताय महेऽवसे वः सुवृक्तिभिरर्वाचो वायूनाववृत्यामिच्छामस्तथा यूयमिच्छथ॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायवो नियमेनाऽनेकविधगतयो भूत्वा विश्वं धरन्ति तथा विद्वांसो विद्याशिक्षायुक्ता भूत्वा विद्यार्थिनो धरन्तु, येनाऽसंख्यैश्वर्य्यं प्राप्तं स्यात्॥ १॥

पदार्थः-हे विद्वानो! जैसे (**देवयाः**) दिव्य गुणों को जो प्राप्त होते वे प्राण वायु (**वः**) तुम्हारे (**धियंधियम्**) काम-काम को धारण करते वैसे (**उ**) ही तुम उनको (**दधिध्वे**) धारण करो। जैसे उन पवनों की (**यज्ञायज्ञा**) यज्ञ-यज्ञ में और (**समना**) समान व्यवहारों में (**तुतुर्वणिः**) शीघ्र गति है, वैसे (**वः**) तुम्हारी गति हो, जैसे हम लोग (**रोदस्योः**) आकाश और पृथिवी सम्बन्धी (**सुविताय**) ऐश्वर्य के लिये और (**महे**) अत्यन्त (**अवसे**) रक्षा के लिये (**वः**) तुम्हारे (**सुवृक्तिभिः**) सुन्दर त्यागों के साथ (**अर्वाचः**) नीचे आने-जानेवाले पवनों को (**आ, ववृत्याम्**) अच्छे वर्त्ताने के लिये चाहते हैं, वैसे तुम चाहो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पवन नियम से अनेकविध गतिमान् होकर विश्व का धारण करते हैं, वैसे विद्वान् जन विद्या और उत्तम शिक्षायुक्त होकर विद्यार्थियों को धारण करें, जिससे असंख्य ऐश्वर्य प्राप्त हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व॒व्रासो॒ न ये स्व॒जाः स्वत॑वस॒ इष॑ꣳ स्व॑रभि॒जाय॑न्त॒ धूत॑यः।
स॒हस्रि॑या॒सो अ॒पां नोर्मय॑ आ॒सा गावो॒ वन्द्या॑सो॒ नोक्षण॑ः॥ २॥

व॒व्रास॑ः। न। ये। स्व॒ऽजाः। स्व॒ऽत॑वसः। इष॑म्। स्व॑ः। अ॒भि॒ऽजाय॑न्त। धूत॑यः। स॒हस्रि॑या॑सः। अ॒पाम्। न। ऊ॒र्मय॑ः। आ॒सा। गाव॑ः। वन्द्या॑सः। न। उ॒क्षण॑ः॥ २॥

पदार्थः-(**वव्रासः**) सद्यो गन्तारः। अत्र व्रजधातोर्बाहुलाकादौणादिको डः प्रत्ययः द्वित्वञ्च (**न**) इव (**ये**) (**स्वजाः**) स्वस्मात्कारणाज्जाताः (**स्वतवसः**) स्वकीयबलयुक्ताः (**इषम्**) ज्ञानम् (**स्वः**) सुखम् (**अभिजायन्त**) (**धूतयः**) गन्तारः कम्पयितारश्च (**सहस्रियासः**) सहस्राणि (**अपाम्**) जलानाम् (**न**) इव (**ऊर्म्मयः**) तरङ्गाः (**आसा**) मुखेन (**गावः**) धेनवः (**वन्द्यासः**) वन्दितुं कामयितुमर्हाः (**न**) इव (**उक्षणः**) वृषभान्॥ २॥

अन्वयः-हे विद्वांसो! ये स्वजाः स्वतवसो धूतयो वव्रासो नापां सहस्रियास ऊर्मयो नासा वन्द्यासो गाव उक्षणो नेषं स्वश्चाभिजायन्त तान् यूयं विजानीत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये वायुवद्बलिष्ठास्तरङ्गवदुत्साहिनो गोवदुपकारकाः कारणवत् सुखजनका दुष्टानां कम्पयितारो मनुष्याः स्युस्तेऽत्र धन्या भवन्ति॥ २॥

पदार्थः-हे विद्वानो! (**ये**) जो (**स्वजाः**) अपने ही कारण से उत्पन्न (**स्वतवसः**) अपने बल से बलवान् (**धूतयः**) जाने वा दूसरों को कम्पानेवाले मनुष्य (**वव्रासः**) शीघ्रगामियों के (**न**) समान वा (**अपाम्**) जलों की (**सहस्रियासः**) हजारों (**ऊर्मयः**) तरङ्गों के (**न**) समान (**आसा**) मुख से (**वन्द्यासः**) वन्दना और कामना के योग्य (**गावः**) गौयें जैसे (**उक्षणः**) बैलों को (**न**) वैसे (**इषम्**) ज्ञान और (**स्वः**) सुख को (**अभिजायन्त**) प्रकट करते हैं, उनको तुम जानो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पवन के समान बलवान्, तरङ्गों के समान उत्साही, गौओं के समान उपकार करनेवाले, कारण के तुल्य सुखजनक दुष्टों को कम्पाने भय देनेवाले मनुष्य हों, वे यहाँ धन्य होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सोमा॑सो॒ न ये सु॒तास्तृ॒प्तांश॑वो हृ॒त्सु पी॒तासो॑ दु॒वसो॑ नास॑ते।
ऐषा॒मंसे॑षु र॒म्भिणी॑व रारभे॒ हस्ते॑षु खादिश्च कृ॒तिश्च॒ सं द॑धे॥ ३॥

सोमासः। न। ये। सुताः। तृप्तऽअंशवः। हृत्ऽसु। पीतासः। दुवसः। न। आसते। आ। एषाम्। अंसेषु। रम्भिणीऽइव। ररभे। हस्तेषु। खादिः। च। कृतिः। च। सम्। दधे॥ ३॥

पदार्थः-(**सोमासः**) सोमाद्योषधिरसाः (**न**) इव (**ये**) मरुत इव विद्वांसः (**सुताः**) निस्सारिताः (**तृप्तांशवः**) तृप्ता अंशवो येभ्यस्ते (**हृत्सु**) हृदयेषु (**पीतासः**) पीताः (**दुवसः**) परिचारकाः (**न**) इव (**आसते**) (**आ**) (**एषाम्**) (**अंसेषु**) भुजस्कन्धेषु (**रम्भिणीव**) यथाऽऽरम्भिका गृहकार्येषु चतुरा स्त्री (**रारभे**) रेभे (**हस्तेषु**) करेषु (**खादिः**) भोजनम् (**च**) (**कृतिः**) क्रिया (**च**) (**सम्**) सम्यक् (**दधे**)॥ ३॥

अन्वयः-अहं ये सुतास्तृप्तांशवः सोमासो हृत्सु पीतासो न दुवसो न आसत एषामंसेषु रम्भिणीव आरारभे। यैर्हस्तेषु खादिश्च कृतिश्च ध्रियते तैस्सह सर्वाः सत्क्रियाः सन्दधे॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। ये सज्जना ओषधीवत्कुशिक्षादुष्टाचारविनाशकाः परिचारकवत् सुखप्रदाः पतिव्रतास्त्रीवत् प्रियाचारिणः क्रियाकुशलाः सन्ति तेऽत्र सृष्टौ सर्वा विद्याः संधातुमर्हन्ति॥ ३॥

पदार्थः-मैं (**ये**) जो पवनों के समान विद्वान् (**तृप्तांशवः**) जिनसे सूर्य किरण आदि पदार्थ तृप्त होते और वे (**सुताः**) कूट-पीट निकाले हुए (**सोमासः**) सोमादि ओषधि रस (**हृत्सु**) हृदयों में (**पीतासः**) पीये हुए हों उनके (**न**) समान वा (**दुवसः**) सेवन करनेवालों के (**न**) समान (**आसते**) बैठते स्थिर होते (**एषाम्**) इनके (**अंसेषु**) भुजस्कन्धों में (**रम्भिणीव**) जैसे प्रत्येक काम का आरम्भ करनेवाली स्त्री संलग्न हो, वैसे (**आ, रारभे**) संलग्न होता हूँ। और जिन्होंने (**हस्तेषु**) हाथों में (**खादिः**) भोजन (**च**) और (**कृतिः**) क्रिया (**च**) भी धारण की है, उनके साथ सब क्रियाओं को (**सम्, दधे**) अच्छे प्रकार धारण करता हूँ॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सज्जन ओषधियों के समान दुष्ट शिक्षा और दुष्टाचार के विनाश करने, सेवकों के समान सुख देने और पतिव्रता स्त्री के समान प्रिय आचरण करनेवाले क्रियाकुशल हैं, वे इस सृष्टि में सब विद्याओं के अच्छे धारण करने, यथायोग्य कामों में वर्त्ताने को योग्य होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना।
अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः॥ ४॥

अव। स्वऽयुक्ताः। दिवः। आ। वृथा। ययुः। अमर्त्याः। कशया। चोदत। त्मना। अरेणवः। तुविऽजाताः। अचुच्यवुः। दृळ्हानि। चित्। मरुतः। भ्राजत्ऽऋष्टयः॥ ४॥

पदार्थः-(**अव**) (**स्वयुक्ताः**) स्वेनैव गच्छन्तः (**दिवः**) आकाशात् (**आ**) (**वृथा**) (**ययुः**) गच्छन्ति (**अमर्त्याः**) मरणधर्म्मरहिताः (**कशया**) शासनेन गत्या वा (**चोदत**) प्रेरयत (**त्मना**) आत्मना (**अरेणवः**) न विद्यन्ते रेणवो येषु ते (**तुविजाताः**) तुविना बलेन सह प्रसिद्धाः (**अचुच्यवुः**) अत्र व्यत्ययेन परस्मैपदम्। (**दृढानि**) (**चित्**) अपि (**मरुतः**) वायवः (**भ्राजदृष्टयः**) भ्राजन्त ऋष्टयो गतयो येषान्ते॥४॥

अन्वयः-हे मनुष्या! यूयं त्मना कशया यथा स्वयुक्ता अमर्त्या अरेणवस्तुविजाता भ्राजदृष्टयो मरुतो दिव आययुर्दृढानि चिद् वृथाऽवाऽचुच्यवुस्तथैताञ्चोदत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायवो स्वयमेव गच्छन्त्यागच्छन्ति अग्न्यादीन् धृत्वा दृढत्वेन प्रकाशयन्ति तथा विद्वांसस्स्वयमेवाऽध्यापनोपदेशेषु नियुक्त्वा व्यर्थानि कर्माणि त्यक्त्वा त्याजयित्वा च विद्यासुशिक्षाभिस्सर्वाञ्जनान् द्योतयन्ति॥४॥

पदार्थः-हे मनुष्यो! तुम (**त्मना**) आत्मा से (**कशया**) शिक्षा या गति से जैसे (**स्वयुक्ताः**) अपने से गमन करनेवाले (**अमर्त्याः**) मरणधर्मरहित (**अरेणवः**) जिनमें रेणु वालू नहीं विद्यमान (**तुविजाताः**) बल के साथ प्रसिद्ध और (**भ्राजदृष्टयः**) जिनकी प्रकाशमान गति वे (**मरुतः**) पवन (**दिवः**) आकाश से (**आ, ययुः**) आते प्राप्त होते हैं और (**दृढानि**) पुष्ट (**चित्**) भी पदार्थों को (**वृथा**) वृथा निष्काम (**अव, अचुच्यवुः**) प्राप्त होते, वैसे इनको (**चोदत**) प्रेरणा देओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पवन आप ही जाते-आते हैं और अग्नि आदि पदार्थों को धारण कर दृढ़ता से प्रकाशित करते हैं, वैसे विद्वान् जन आप ही पढ़ाने और उपदेशों में नियुक्त हो व्यर्थ कामों को छोड़कर और छुड़वा के विद्या और उत्तम शिक्षा से सब जनों को प्रकाशित करते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः॥५॥६॥

कः। वः। अन्तः। मरुतः। ऋष्टिऽविद्युतः। रेजति। त्मना। हन्वाऽइव। जिह्वया। धन्वऽच्युतः। इषाम्। न। यामनि। पुरुऽप्रैषाः। अहन्यः। न। एतशः॥५॥

पदार्थः-(**कः**) (**व**) युष्माकम् (**अन्तः**) मध्ये (**मरुतः**) विद्वांसः (**ऋष्टिविद्युतः**) ऋष्टिर्विद्युदिव येषान्ते (**रेजति**) कम्पते (**त्मना**) आत्मना (**हन्वेव**) यथा हनू तथा (**जिह्वया**) वाचा (**धन्वच्युतः**) धन्वनोऽन्तरिक्षाच्च्युताः प्राप्ताः (**इषाम्**) इच्छानाम् (**न**) इव (**यामनि**) मार्गे (**पुरुप्रैषाः**) बहुभिः प्रेरिताः (**अहन्यः**) अहनि भवाः (**न**) इव (**एतशः**) अश्वः। **एतश इत्यश्वनामसु पठितम्।** (निघं १.१४)॥५॥

अन्वयः-हे पुरुप्रैषा ऋष्टिविद्युतो मरुतो! वोऽन्तः को रेजति। जिह्वया हन्वेव त्मना को वोऽन्ता रेजति। इषां धन्वच्युतो मेघा नाहन्य एतशो न यामनि युष्मान् कः संयुनक्ति॥६॥

भावार्थः-अत्रोपमालङ्कारः। यदा जिज्ञासवो विदुषः प्रति पृच्छेयुस्तदा विद्वांस एभ्यो याथातथ्यमुत्तराणि दद्युः॥५॥

पदार्थः-हे **(पुरुप्रैषाः)** बहुतों से प्रेरणा को प्राप्त **(ऋष्टिविद्युतः)** ऋष्टि-द्विधारा खड्ग को बिजुली के समान तीव्र रखनेवाले **(मरुतः)** विद्वानो! **(वः)** तुम्हारे **(अन्तः)** बीच में **(कः)** कौन **(रेजति)** कम्पता है और **(जिह्वया)** वाणी से **(हन्वेव)** कनफटी जैसे डुलाई जावें वैसे **(त्मना)** अपने से कौन तुम्हारे बीच में कम्पता है **(इषाम्)** और इच्छाओं के सम्बन्ध में **(धन्वच्युतः)** अन्तरिक्ष में प्राप्त मेघों के **(न)** समान वा **(अहन्यः)** दिन में प्रसिद्ध होनेवाले **(एतशः)** घोड़े के **(न)** समान **(यामनि)** मार्ग में तुम लोगों को कौन संयुक्त करता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जब जिज्ञासु जन विद्वानों के प्रति पूछें, तब विद्वान् जन उनके लिये यथार्थ उत्तर देवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

क्व॑ स्विदस्य रज॑सो म॒हस्परं॒ क्वाव॑रं मरुतो॒ यस्मि॑न्नाय॒य।
यच्च्या॒वय॑थ विथु॒रेव॒ संहि॑तं॒ व्यद्रि॑णा पतथ त्वे॒षमर्ण॒वम्॥६॥

क्व॑। स्वि॒त्। अ॒स्य। रज॑सः। म॒हः। पर॑म्। क्व॑। अव॑रम्। म॒रु॒तः॒। यस्मि॑न्। आ॒ऽय॒य॒। यत्। च्य॒वय॑थ। वि॒थु॒राऽइ॑व। सम्ऽहि॑तम्। वि। अद्रि॑णा। प॒त॒थ॒। त्वे॒षम्। अ॒र्ण॒वम्॥६॥

पदार्थः-**(क्व)** कस्मिन् **(स्वित्)** एव **(रजसः)** भूगोलस्य **(महः)** महत् **(परम्)** कारणम् **(क्व)** **(अवरम्)** कार्यम् **(मरुतः)** विद्वांसः **(यस्मिन्)** **(आयय)** आगच्छत। अत्र लोडर्थे लिट्। **(यत्)** **(च्यावयथ)** चालपथ **(विथुरेव)** यथा व्यथितानि **(संहितम्)** कृतसाधनम् **(वि)** **(अद्रिणा)** मेघेन सह **(पतथ)** अध आगच्छथ **(त्वेषम्)** सूर्य्यदीप्तिम् **(अर्णवम्)** समुद्रम्॥६॥

अन्वयः-हे मरुतोऽस्य रजसो महस्परं क्व स्वित् क्वावरं वर्त्तत इति पृच्छामः। यस्मिन् यूयमायय यच्च्यावयथ यस्मिन् विथुरेव संहितमिदं जगद्येनाद्रिणा सह वायवस्त्वेषमर्णवं विपतथ तदेव सर्वस्य जगतो महत् कारणं वर्त्तत इत्युत्तरम्॥६॥

भावार्थः-यस्मिन्निदं भूगोलादिकं गच्छत्यागच्छति कम्पते तदेवाकाशवत् कारणं विजानीत, यस्मिन्नेते लोका उत्पद्यन्ते विद्यन्ते भ्रमन्ति प्रलीयन्ते च तत्परं निमित्तं कारणं ब्रह्मेति॥६॥

पदार्थः-हे **(मरुत)** विद्वानो! **(अस्य)** इस **(रजसः)** भूगोल का **(महः)** बड़ा **(परम्)** कारण **(क्व, स्वित्)** निश्चय से कहाँ और **(क्व)** कहाँ **(अवरम्)** कार्य्य वर्त्तमान है, इस को हम लोग पूछते हैं **(यस्मिन्)** जिसमें तुम **(आयय)** आओ **(यत्)** जिसको **(च्यावयथ)** चलाओ जिसमें **(विथुरेव)** दबाये पदार्थों के समान **(संहितम्)** मेल किये हुए यह जगत् है, जिससे **(अद्रिणा)** मेघवृन्द के पवन **(त्वेषम्)** सूर्य के प्रकाश और **(अर्णवम्)** समुद्र को **(वि, पतथ)** नीचे प्राप्त होते हैं, वही पराब्रह्म सब जगत् का बड़ा कारण है, यही उक्त प्रश्नों का उत्तर है॥६॥

भावार्थः-जिससे यह भूगोल आदि जगत् जाता-आता, कम्पता उसी को आकाश के समान कारण जानो, जिसमें ये लोक उत्पन्न होते, भ्रमते और प्रलय हो जाते हैं, वह परम उत्कृष्ट निमित्त कारण ब्रह्म है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जज्झती॥७॥

सातिः। न। वः। अमऽवती। स्वःऽवती। त्वेषा। विऽपाका। मरुतः। पिपिष्वती। भद्रा। वः। रातिः। पृणतः। न। दक्षिणा। पृथुऽज्रयी। असुर्याऽइव। जज्झती॥७॥

पदार्थः-(**सातिः**) लोकानां विभक्तिः **(न)** इव **(वः)** युष्माकम् **(अमवती)** ज्ञानयुक्ता **(स्वर्वती)** विद्यमानसुखा **(त्वेषा)** प्रदीप्तिः **(विपाका)** विविधगुणैः परिपक्वा **(मरुतः)** विद्वांसः **(पिपिष्वती)** पिपींषि बहवोऽवयवा विद्यते यस्याः सा **(भद्रा)** कल्याणकारिणी **(वः)** युष्माकम् **(रातिः)** दानम् **(पृणतः)** पालकस्य विद्यादिभिः प्रपूरकस्य वा **(न)** इव **(दक्षिणा)** दातुं योग्या **(पृथुज्रयी)** बहुवेगा **(असुर्येव)** असुषु प्राणेषु भवा विद्युदिव **(जज्झती)** यथा युद्धे प्रवृत्ता सेना॥७॥

अन्वयः-हे मरुतो! वो या पिपिष्वत्यमवती स्वर्वती विपाका त्वेषा सातिर्नेवास्ति वो या पृणतो दक्षिणा नेव पृथुज्रय्यसुर्य्येव जज्झती भद्रा रातिरस्ति तया सर्वान् वर्द्धय॥७॥

भावार्थः-अत्रोपमालङ्कारः। येषां जीवानां पापपुण्यजन्या सुखदुःखफला गतिरस्ति, तया सर्वे जीवा विचरन्ति। ये पुरुषार्थिनः सैन्याः शत्रूनिव पापानि विजित्य निवार्य धर्ममाचरन्ति, ते सदैव सुखिनो भवन्ति॥७॥

पदार्थः-हे **(मरुतः)** विद्वानो! **(वः)** तुम्हारी जो **(पिपिष्वती)** बहुत अङ्गोंवाली **(अमवती)** ज्ञानवती **(स्वर्वती)** जिसमें सुख विद्यमान **(विपाका)** विविध प्रकार के गुणों से परिपक्व **(त्वेषा)** उत्तम दीप्ति **(सातिः)** लोकों की विभक्ति अर्थात् विशेष भाग के **(न)** समान है और **(वः)** तुम्हारी जो

(पृणतः) पालन करने वा विद्यादि गुणों से परिपूर्ण करनेवाले की **(दक्षिणा)** देने योग्य दक्षिणा के **(न)** समान **(पृथुज्रयी)** बहुत वेगवती **(असुर्येव)** प्राणों में होनेवाली बिजुली के समान वा **(जञ्जती)** युद्ध में प्रवृत्त झंझियाती हुई सेना के समान **(भद्रा)** कल्याण करनेवाली **(रातिः)** देनी है, उससे सबको बढ़ाओ॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो इन जीवों की पाप-पुण्य से उत्पन्न हुई, सुख दुःख फलवाली गति है, उससे समस्त जीव विचरते हैं। जो पुरुषार्थी सेनाजन शत्रुओं को जैसे-वैसे पापों को जीत निवारि धर्म का आचरण करते हैं, वे सदैव सुखी होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रति॑ ष्टोभन्ति सिन्ध॑वः प॒विभ्यो॒ यद॒भ्रियां वाच॑मुदी॒रय॑न्ति।
अव॑ स्मयन्त वि॒द्युत॑: पृथि॒व्यां यदी॑ घृ॒तं म॒रुतः॒ प्रुष्णु॒वन्ति॑॥८॥

प्रति॑। स्तो॒भ॒न्ति॒। सिन्ध॑वः। प॒विऽभ्य॑ः। यत्। अ॒भ्रिया॑म्। वाच॑म्। उ॒त्ऽई॒रय॑न्ति। अव॑। स्म॒य॒न्त॒। वि॒ऽद्युत॑ः। पृ॒थि॒व्याम्। यदि॑। घृ॒तम्। म॒रुत॑ः। प्रु॒ष्णु॒वन्ति॥८॥

पदार्थः-**(प्रति) (स्तोभन्ति)** स्तभ्नन्ति। अत्र व्यत्ययेन परस्मैपदम्। **(सिन्धवः)** नद्यः **(पविभ्यः)** वज्रवत् किरणेभ्यः **(यत्)** यदा **(अभ्रियाम्)** अभ्रेषु भवां गर्जनाम् **(वाचम्)** वाणीम् **(उदीरयन्ति)** प्रेरते **(अव) (स्मयन्त)** ईषद्धसन्ति **(विद्युतः)** तडितः **(पृथिव्याम्)** भूमौ **(यदि)** अत्र **निपातस्य चे**ति दीर्घः। **(घृतम्)** उदकम् **(मरुतः) (प्रुष्णुवन्ति)** स्नेहयन्ति॥८॥

अन्वयः-हे विद्वांसो! यद्यदा मरुतोऽभ्रियां वाचमुदीरयन्ति तदा सिन्धवः पविभ्यः प्रतिष्टोभन्ति यदि च मरुतो घृतं प्रुष्णुवन्ति तदा विद्युतः पृथिव्यामवस्मयन्त तद्वद्यूयं भवत॥८॥

भावार्थः-ये मनुष्या नदीवदार्द्रा तडिद्वत्तीव्रा विद्यां पठित्वाऽध्यापयन्ति, ते सूर्यवत् सत्याऽसत्यप्रकाशका जायन्ते॥८॥

पदार्थः-हे विद्वानो! **(यत्)** जब **(मरुतः)** पवन **(अभ्रियाम्)** मेघों में हुई गर्जनारूप **(वाचम्)** वाणी को **(उदीरयन्ति)** प्रेरणा देते अर्थात् बद्दलों को गर्जाते हैं, तब **(सिन्धवः)** नदियां **(पविभ्यः)** वज्र तुल्य किरणों से अर्थात् बिजुली के लपट-झपटों से **(प्रति, ष्टोभन्ति)** क्षोभित होती हैं और **(यदि)** जब पवन **(घृतम्)** मेघों के जल **(प्रुष्णुवन्ति)** वर्षाते हैं, तब **(विद्युतः)** बिजुलियां **(पृथिव्याम्)** भूमि पर **(अव, स्मयन्त)** मुसुकियाती सी जान पड़ती हैं, वैसे तुम होओ॥८॥

भावार्थः-जो मनुष्य नदी के समान आर्द्रचित्त, बिजुली के समान तीव्र स्वभाववाले विद्या को पढ़ कर पढ़ाते हैं, वे सूर्य के समान सत्य और असत्य को प्रकाश करनेवाले होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम्।
ते सप्सरासोऽजनयन्ताभ्वमादित्स्वधामिषिरां पर्यपश्यन्॥ ९॥

असूत। पृश्निः। महते। रणाय। त्वेषम्। अयासाम्। मरुताम्। अनीकम्। ते। सप्सरासः। अजनयन्त। अभ्वम्। आत्। इत्। स्वधाम्। इषिराम्। परि। अपश्यन्॥ ९॥

पदार्थः-(**असूत**) सूते (**पृश्निः**) आदित्य इव (**महते**) (**रणाय**) संग्रामाय (**त्वेषम्**) प्रदीप्तम् (**अयासाम्**) गन्तॄणाम् (**मरुताम्**) मनुष्याणाम् (**अनीकम्**) सैन्यम् (**ते**) (**सप्सरासः**) गन्तारः। अत्र सप्तेरौणादिकः सरप्रत्ययः। **सप्तीति गतिकर्मासु पठितम्।** (निघं०३.१४) (**अजनयन्त**) (**अभ्वम्**) अविद्यमानम् (**आत्**) अनन्तरम् (**इत्**) एव (**स्वधाम्**) अन्नम् (**इषिराम्**) प्राप्तव्याम् (**परि**) (**अपश्यन्**) सर्वतः पश्येयुः॥ ९॥

अन्वयः-एषामयासां मरुतां पृश्निरिव त्वेषमनीकं महते रणायासूत ते आदिदिषिरां स्वधामजनयन्त सप्सरासः सन्तोऽभ्वं पर्य्यपश्यन्॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विचक्षणा राजपुरुषा विजयाय प्रशस्तां सेनां स्वीकृत्याऽन्नाद्यैश्वर्यमुन्नयन्ति, ते तृप्तिमाप्नुवन्ति॥ ९॥

पदार्थः-(**एषाम्**) इन (**अयासाम्**) गमनशील (**मरुताम्**) मनुष्यों का (**पृश्निः**) आदित्य के समान प्रचण्ड प्रतापवान् (**त्वेषम्**) प्रदीप्त (**अनीकम्**) गण (**महते**) महान् (**रणाय**) संग्राम के लिये (**असूत**) उत्पन्न होता है (**आत्**) इसके अनन्तर (**इत्**) ही (**ते**) वे (**इषिराम्**) प्राप्त होने योग्य पदार्थों के बीच (**स्वधाम्**) अन्न को (**अजनयन्त**) उत्पन्न करते और (**सप्सरासः**) गमन करते हुए (**अभ्वम्**) अविद्यमान अर्थात् जो प्रत्यक्ष विद्यमान नहीं उसको (**पर्य्यपश्यन्**) सब ओर से देखते हैं॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विचक्षण राजपुरुष विजय के लिये प्रशंसित सेना को स्वीकार कर अन्नादि ऐश्वर्य की उन्नति करते हैं, वे तृप्ति को प्राप्त होते हैं॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥ १०॥ ७॥

एषः। वः। स्तोमः। मरुतः। इयम्। गीः। मान्दार्यस्य। मान्यस्य। कारोः। आ। इषा। यासीष्ट। तन्वे। वयाम्। विद्याम। इषम्। वृजनम्। जीरऽदानुम्। १०॥

पदार्थः-(**एषः**) (**वः**) युष्माकम् (**स्तोमः**) प्रश्नोत्तराख्य आलापः (**मरुतः**) विद्वद्वराः (**इयम्**) (**गीः**) सत्यप्रिया वाक् (**मान्दार्यस्य**) सर्वेभ्य आनन्दप्रदस्योत्तमस्य (**मान्यस्य**) ज्ञातुं योग्यस्य (**कारोः**) क्रियाकुशलस्य (**आ**) (**इषा**) इच्छया (**यासीष्ट**) प्राप्नुयात् (**तन्वे**) शरीरसुखाय (**वयाम्**) (**विद्याम**) प्राप्ता भवेम (**इषम्**) अन्नम् (**वृजनम्**) शत्रुनिकन्दनं बलम् (**जीरदानुम्**) जीवदयाम्॥१०॥

अन्वयः-हे मरुतो! य एष वस्स्तोमो मान्दार्यस्य मान्यस्य कारोर्येयङ्गीर्येषा तन्वे आयासीष्ट तया वयामिषं वृजनं जीरदानुं विद्याम॥१०॥

भावार्थः-ये सकलविद्यास्तावका आप्तवाचो जीवदयाविशिष्टाः सन्ति, ते सर्वेषां सुखजनका भवन्तीति॥१०॥

अत्र वायुदृष्टान्तेन सज्जनगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्यष्टषष्ट्युत्तरं शततमं १६८ सूक्तं सप्तमो ७ वर्गश्च समाप्तः॥

पदार्थः-हे (**मरुतः**) श्रेष्ठ विद्वानो! जो (**एषः**) यह (**वः**) तुम्हारा (**स्तोमः**) प्रश्नोत्तररूप आलाप कथन (**मान्दार्यस्य**) सबके लिये आनन्द देनेवाले उत्तम (**मान्यस्य**) जानने योग्य (**कारोः**) क्रियाकुशल सज्जन की जो (**इयम्**) यह (**गीः**) सत्यप्रिया वाणी और जो (**इषा**) इच्छा के साथ (**तन्वे**) शरीर सुख के लिये (**आ, यासीष्ट**) प्राप्त हो उससे (**वयाम्**) हम लोग (**इषम्**) अन्न (**वृजनम्**) शत्रुओं को दुःख देनेवाले बल और (**जीरदानुम्**) जीवों की दया को (**विद्याम**) प्राप्त होवें॥

भावार्थः-जो समस्त विद्या की स्तुति और प्रशंसा करने और आप्तवाक् अर्थात् धर्मात्मा विद्वानों की वाणियों में रहने तथा जीवों की दया से युक्त सज्जन पुरुष हैं, वे सभी के सुखों को उत्पन्न करानेवाले होते हैं॥१०॥

इस सूक्त में पवनों के दृष्टान्त से विद्वानों के गुणों का वर्णन होने से इसके अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ अरसठवां १६८ सूक्त और सातवां ७ वर्ग समाप्त हुआ॥

महरित्यस्याष्टर्चस्य एकोनसप्तत्युत्तरस्य शततमस्य सूक्तस्यागस्त्य ऋषिः। इन्द्रो देवता १,३ भुरिक् पङ्क्तिः। २ पङ्क्तिः। ५,६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ ब्राह्म्युष्णिक् छन्दः। ऋषभः स्वरः। ७,८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्गुणानाह॥

अब एक सौ उनहत्तरवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का वर्णन करते हैं॥

म॒हश्चि॒त्त्वमि॑न्द्र य॒त एता॒न् म॒हश्चि॑दसि॒ त्यज॑सो वरू॒ता।
स नो॑ वेधो म॒रुता॑ं चिकि॒त्वान्त्सु॒म्ना व॑नुष्व॒ तव॑ हि प्रे॒ष्ठा॑॥ १॥

म॒हः। चि॒त्। त्वम्। इ॒न्द्र॒। य॒तः। एता॒न्। म॒हः। चि॒त्। अ॒सि॒। त्यज॑सः। व॒रू॒ता। सः। नः॒। वे॒ध॒रिति॑ वेधः। म॒रुता॑म्। चि॒कि॒त्वान्। सु॒म्ना। व॒नु॒ष्व॒। तव॑। हि। प्रे॒ष्ठा॑॥ १॥

पदार्थः-(**महः**) महतः (**चित्**) अपि (**त्वम्**) (**इन्द्र**) दुःखविदारकातिविद्याबलसम्पन्न (**यतः**) यस्मात् कारणात् (**एतान्**) (**महः**) महतः (**चित्**) (**असि**) (**त्यजसः**) त्यागात् (**वरूता**) वरिता स्वीकर्त्ता। **ग्रसित०** इत्यादिषु निपातः। (**सः**) (**नः**) (**अस्मभ्यम्**) (**वेधः**) प्राज्ञ (**मरुताम्**) विदुषां मनुष्याणाम् (**चिकित्वान्**) ज्ञानवान् (**सुम्ना**) सुम्नानि सुखानि (**वनुष्व**) प्रयच्छ (**तव**) (**हि**) किल (**प्रेष्ठा**) अतिशयेन प्रियाणि॥ १॥

अन्वयः-हे इन्द्र! यतस्त्वमेतान् महश्चिन्महतोऽपि त्यजसो वरूतासि ततो महश्चिदसि। हे मरुतां वेधः! स चिकित्वाँस्त्वं यानि सुम्ना तव सन्ति तानि नो वनुष्व हि॥

भावार्थः-ये विरक्तानां संन्यासिनां सङ्गेन मेधाविनो जायन्ते तेषां कदाचिदप्रियं नोत्पद्यते॥ १॥

पदार्थः-हे (**इन्द्र**) दुःख के विदारण करनेवाले अत्यन्त विद्यागुणसम्पन्न! (**यतः**) जिस कारण (**त्वम्**) आप (**एतान्**) इन विद्वानों को (**महः**) अत्यन्त (**चित्**) भी (**त्यजसः**) त्याग से (**वरूता**) स्वीकार करनेवाले (**असि**) हैं, इस कारण (**महश्चित्**) बड़े भी हैं। हे (**मरुताम्**) विद्वान् सज्जनों के बीच (**वेधः**) अत्यन्त बुद्धिमान्! (**सः**) सो (**चिकित्वान्**) ज्ञानवान् आप जो (**सुम्ना**) सुख (**तव**) आपको (**प्रेष्ठा**) अत्यन्त प्रिय हैं, उनको (**नः**) हमारे लिये (**वनुष्व, हि**) निश्चय से देओ॥ १॥

भावार्थः-जो विरक्त संन्यासियों के सङ्ग से बुद्धिमान् होते हैं, उनको कभी अनिष्ट दुःख नहीं उत्पन्न होता॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अयु॑ज्रन्त इ॒न्द्र वि॒श्वक॑ृष्टीर्वि॒दानासो॑ नि॒ष्षिधो॑ मर्त्य॒त्रा।

मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ॥ २॥

अयुज्रन्। ते। इन्द्र। विश्वऽकृष्टीः। विदानासः। निःऽसिधः। मर्त्यऽत्रा। मरुताम्। पृत्सुतिः। हासमाना। स्वःऽमीळ्हस्य। प्रऽधनस्य। सातौ॥ २॥

पदार्थः-(**अयुज्रन्**) युञ्जन्ति (**ते**) (**इन्द्र**) सुखप्रद (**विश्वकृष्टीः**) सर्वान् मनुष्यान् (**विदानासः**) विद्वांसः सन्तः (**निष्षिधः**) अधर्मं प्रतिषेधन्तः (**मर्त्यत्रा**) मर्त्येषु (**मरुताम्**) मनुष्याणाम् (**पृत्सुतिः**) वीरसेना (**हासमाना**) आनन्दमयी (**स्वर्मीढस्य**) सुखैः सेचकस्य (**प्रधनस्य**) प्रकृष्टस्य धनस्य (**सातौ**) संग्रामे॥ २॥

अन्वयः-हे इन्द्र! ये निष्धिधो मर्त्यत्रा विदानासः स्वर्मीढस्य प्रधनस्य सातौ विश्वकृष्टिरयुज्रंस्ते या मरुतां हासमाना पृत्सुतिस्तां प्राप्नुवन्तु॥ २॥

भावार्थः-ये पूर्वं ब्रह्मचर्येण विद्यामधीत्याप्तानां सङ्गेनाखिलां शिक्षां प्राप्य धार्मिका जायन्ते, ते विश्वस्य सुखप्रदा भवन्ति॥ २॥

पदार्थः-हे (**इन्द्र**) सुख के देनेहारे विद्वान्! जो (**निष्षिधः**) अधर्म का निषेध करनेहारे (**मर्त्यत्रा**) मनुष्यों में (**विदानासः**) विद्वान् होते हुए (**स्वर्मीढस्य**) सुखों से सीचनेहारे (**प्रधनस्य**) उत्तम धन के (**सातौ**) अच्छे प्रकार भाग में (**विश्वकृष्टीः**) सब मनुष्यों को (**अयुज्रन**) युक्त करते हैं (**ते**) वे जो (**मरुताम्**) मनुष्यों की (**हासमाना**) आनन्दमयी (**पृत्सुतिः**) वीरसेना है, उसको प्राप्त होवें॥ २॥

भावार्थः-जो पहिले ब्रह्मचर्य से विद्या को पढ़कर धर्मात्मा शास्त्रज्ञ विद्वानों के सङ्ग से समस्त शिक्षा को पाकर धार्मिक होते हैं, वे संसार को सुख देनेवाले होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अम्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि॥ ३॥

अम्यक्। सा। ते। इन्द्र। ऋष्टिः। अस्मे इति। सनेमि। अभ्वम्। मरुतः। जुनन्ति। अग्निः। चित्। हि। स्म। अतसे। शुशुक्वान्। आपः। न। द्वीपम्। दधति। प्रयांसि॥ ३॥

पदार्थः-(**अम्यक्**) अमिं सरलां गतिमञ्चति गच्छति (**सा**) (**ते**) तव (**इन्द्र**) दुष्टविदारक (**ऋष्टिः**) प्राप्तिः (**अस्मे**) अस्मभ्यम् (**सनेमि**) पुराणम्। **सनेमीति पुराणनामसु पठितम्।** (निघं०३.२७) (**अभ्वम्**) अचाक्षुषत्वेनाप्रसिद्धं कारणम् (**मरुतः**) मनुष्याः (**जुनन्ति**) प्राप्नुवन्ति (**अग्निः**) पावका इव (**चित्**) इव (**हि**) खलु (**स्म**) (**अतसे**) निरन्तर आकाशे (**शुशुक्वान्**) शोचकः (**आपः**) जलानि (**न**) इव (**द्वीपम्**) द्विधापांसि यस्मिंस्तम् (**दधति**) धरन्ति (**प्रयांसि**) कमनीयानि वस्तूनि॥ ३॥

अन्वयः-हे इन्द्र! यथा मरुतः सनेम्यभ्वं जुनन्ति सा ते ऋष्टिरस्मे अम्यगस्ति। शुशुक्वानग्निश्चित्वं हि स्मापो द्वीपं न सर्वेषामनादिकारणमतसेऽतः सर्वे प्रयांसि दधति॥३॥

भावार्थः-अत्रोपमालङ्कारः। यदनादिकारणं विद्वांसो जानन्ति, तदितरे जना ज्ञातुं न शक्नुवन्ति॥३॥

पदार्थः-हे **(इन्द्र)** दुष्टों को विदारण करनेवाले! जिससे **(मरुतः)** मनुष्य **(सनेमि)** प्राचीन और **(अभ्वम्)** नेत्र से प्रत्यक्ष देखने में अप्रसिद्ध उत्तम विषय को **(जुनन्ति)** प्राप्त होते हैं **(सा)** वह **(ते)** आपकी **(ऋष्टिः)** प्राप्ति **(अस्मे)** हमारे लिए **(अम्यक्)** सीधी चाल को प्राप्त होती है अर्थात् सरलता से आप हम लोगों को प्राप्त होते हैं। और **(शुशुक्वान्)** शुद्ध करनेवाले **(अग्निः)** अग्नि के समान **(चित्)** ही आप **(हि)** निश्चय के साथ **(स्म)** जैसे आश्चर्यवत् **(आपः)** जल **(द्वीपम्)** दो प्रकार से जिसमें जल आवें-जावें उस बड़े भारी नद को प्राप्त हों **(न)** वैसे सब के अनादि कारण को **(अतसे)** निरन्तर प्राप्त होते हैं, इससे सब मनुष्य **(प्रयांसि)** सुन्दर मनोहर चाहने योग्य वस्तुओं को **(दधति)** धारण करते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस अनादि कारण को विद्वान् जानते उसको और जन नहीं जान सकते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम्।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पीपयन्त वाजैः॥४॥

त्वम्। तु। नः। इन्द्र। तम्। रयिम्। दाः। ओजिष्ठया। दक्षिणयाऽइव। रातिम्॥ स्तुतः। च। याः। ते। चकनन्त। वायोः। स्तनम्। न। मध्वः। पीपयन्त। वाजैः॥४॥

पदार्थः-**(त्वम्)** **(तु)** एव **(नः)** अस्मभ्यम् **(इन्द्र)** बहुप्रद **(तम्)** **(रयिम्)** दुग्धादिधनम् **(दाः)** देहि **(ओजिष्ठया)** अतिशयेन पराक्रमयुक्तया **(दक्षिणयेव)** यथा दक्षिणया तथा **(रातिम्)** दानम् **(स्तुतः)** स्तुतिं कुर्वत्यः। क्विबन्तः शब्दोऽयम्। **(च)** **(याः)** **(ते)** त्वाम्। कर्मणि षष्ठी। **(चकनन्त)** कामयन्ते **(वायोः)** पवनम्। अत्र कर्मणि षष्ठी। **(स्तनम्)** दुग्धस्याधारम् **(न)** इव **(मध्वः)** मधुरस्य **(पीपयन्त)** पाययन्ति **(वाजैः)** अन्नादिभिः सह॥४॥

अन्वयः-हे इन्द्र! त्वं तु न ओजिष्ठया दक्षिणयेव रातिं तं रयिं दाः यं ते वायोश्च याः स्तुतस्ता मध्वः स्तनं न चकनन्त वाजैः पीपयन्त च॥४॥

भावार्थः-यथा बहुप्रदो यजमान ऋत्विजे पुष्कलं धनं दत्वैतमलङ्करोति यथा वा पुत्रा मातुर्दुग्धं पीत्वा पुष्टा जायन्ते तथा सभाध्यक्षपरितोषेण भृत्या अलंधना भोजनादिदानेन च बलिष्ठा भवन्ति॥४॥

पदार्थः-हे **(इन्द्र)** बहुत पदार्थों के देनेवाले! **(त्वम्)** आप **(तु)** तो **(नः)** हमारे लिये **(ओजिष्ठया)** अतीव बलवती **(दक्षिणयेव)** दक्षिणा के साथ दान जैसे दिया जाय वैसे **(रातिम्)** दान को तथा **(तम्)** उस **(रयिम्)** दुग्धादि धन को **(दाः)** दीजिये कि जिससे **(ते)** आपकी और **(वायोः)** पवन की **(च)** भी **(याः)** जो **(स्तुतः)** स्तुति करनेवाली हैं वे **(मध्वः)** मधुर उत्तम **(स्तनम्)** दूध के भरे हुए स्तन के **(न)** समान **(चकनन्त)** चाहती और **(वाजैः)** अन्नादिकों के साथ **(पीपयन्त)** बछरों को पिलाती हैं॥४॥

भावार्थः-जैसे बहुत पदार्थों को देनेवाला यजमान ऋतु-ऋतु में यज्ञादि करानेवाले पुरोहित के लिये बहुत धन देकर उसको सुशोभित करता है वा जैसे पुत्र माता का दूध पी के पुष्ट हो जाते हैं, वैसे सभाध्यक्ष के परितोष से भृत्यजन पूर्ण धनी और उनके दिये भोजनादि पदार्थों से बलवान् होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातुयन्तीव देवाः॥५॥८॥

त्वे इति। रायः। इन्द्र। तोशऽतमाः। प्रऽनेतारः। कस्य। चित्। ऋतऽयोः। ते। सु। नः। मरुतः। मृळयन्तु। ये। स्म। पुरा। गातुयन्तिऽइव। देवाः॥५॥

पदार्थः-**(त्वे)** त्वयि सहायकारिणि सति **(रायः)** धनानि **(इन्द्र)** दातः **(तोशतमाः)** अतिशयेन प्रीताः सन्तः **(प्रणेतारः)** प्रसाधकाः **(कस्य) (चित्) (ऋतायोः)** आत्मन ऋतुं सत्यमिच्छुः **(ते) (सु) (नः)** अस्मान् **(मरुतः)** वायुविद्यावेत्तारः **(मृळयन्तु)** सुखयन्तु **(ये) (स्म)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(पुरा)** पूर्वम् **(गातुयन्तीव)** आत्मनो गातुं पृथिवीमिच्छन्तीव **(देवाः)** विद्वांसः॥५॥

अन्वयः-हे इन्द्र! ये कस्य चिदृतायोः प्रणेतारस्तोशतमा मरुतो देवास्त्वे सति रायः प्रापय्य नः सुमृळयन्तु पुरा गातुयन्तीव प्रयतन्ते ते स्म रक्षितारः स्युः॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये वायुविद्यादिवेत्तारः परोपकारविद्यादानप्रियाः पृथिवीवत् सर्वान् पुरुषार्थे धरन्ति, ते सर्वदा सुखिनो भवन्ति॥५॥

पदार्थः-हे **(इन्द्र)** देनेवाले! **(ये)** जो **(कस्य, चित्)** किसी **(ऋतायोः)** अपने को सत्य की चाहना करनेवाले **(प्रणेतारः)** उत्तम साधक **(तोशतमाः)** और अतीव प्रसन्नचित्त होते हुए **(मरुतः)** पवनविद्या को जाननेवाले **(देवाः)** विद्वान् जन **(त्वे)** तुम्हारे रक्षक होते **(रायः)** धनों की प्राप्ति करा **(नः)** हम लोगों को

(सु, मृळयन्तु) अच्छे प्रकार सुखी करें वा **(पुरा)** पूर्व **(गातुयन्तीव)** अपने को पृथिवी चाहते हुए प्रयत्न करते हैं **(ते, स्म)** वे ही रक्षा करनेवाले हों॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो वायुविद्या के जाननेवाले परोपकार और विद्यादान देने में प्रसन्नचित्त पृथिवी के समान सब प्राणियों को पुरुषार्थ में धारण करते हैं, वे सर्वदा सुखी होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रति॒ प्र या॑हीन्द्र मी॒ळ्हुषो॒ नॄन्म॒हः पार्थि॑वे॒ सद॑ने यतस्व।
अध॒ यदे॑षां पृथुबु॒ध्नास॒ एता॑स्ती॒र्थे नार्यः पौंस्या॑नि त॒स्थुः॥६॥

प्रति॑। प्र। या॒हि॒। इ॒न्द्र॒। मी॒ळ्हुषः॑। नॄन्। म॒हः। पार्थि॑वे। सद॑ने। य॒त॒स्व॒। अध॑। यत्। ए॒षा॒म्। पृ॒थु॒ऽबु॒ध्नासः॑। एता॑ः। ती॒र्थे। न। अ॒र्य्यः। पौंस्या॑नि। त॒स्थुः॥६॥

पदार्थः-(**प्रति**) (**प्र**) (**याहि**) गच्छ (**इन्द्र**) प्रयतमान (**मीढुषः**) सुखैः सेचकान् (**नॄन्**) नायकान् (**महः**) महति (**पार्थिवे**) पृथिव्यां विदिते (**सदने**) गृहे (**यतस्व**) यतमानो भव (**अध**) अनन्तरम् (**यत्**) ये (**एषाम्**) (**पृथुबुध्नासः**) विस्तीर्णान्तरिक्षाः (**एताः**) (**तीर्थे**) तरन्ति येन तस्मिन् (**न**) इव (**अर्यः**) वैश्यः (**पौंस्यानि**) बलानि (**तस्थुः**) तिष्ठन्ति॥६॥

अन्वयः-हे इन्द्र! त्वं यद्ये पृथुबुध्नासो जना एताः स्त्रियश्चैषां पौंस्यानि तीर्थे समुद्रादितारिकायां नाव्यर्य्यो न तस्थुः तान् मीढुषो नॄन् प्रति प्रयाह्यध महः पार्थिवे सदने यतस्व॥६॥

भावार्थः-ये पुरुषा याः स्त्रियश्च ब्रह्मचर्येण बलानि वर्द्धयित्वाऽऽप्तान् सज्जनान् सेवन्ते, ते ताश्च विद्वांसो विदुष्यश्च जायन्ते॥६॥

पदार्थः-हे (**इन्द्र**) प्रयत्न करनेवाले! आप (**यत्**) जो (**पृथुबुध्नासः**) विस्तारयुक्त अन्तरिक्षवाले जन (**एताः**) ये स्त्रीजन और (**एषाम्**) इनके (**पौंस्यानि**) बल (**तीर्थे**) जिससे समुद्ररूप जल समूहों को तरें, उस नौका में (**अर्यः**) वैश्य के (**न**) समान (**तस्थुः**) स्थिर होते हैं, उन (**मीढुषः**) सुखों से सींचनेवाले (**नॄन्**) अग्रगामी मनुष्यों को (**प्रति**) (**प्र, याहि**) प्राप्त होओ (**अध**) इसके अनन्तर (**महः**) बड़े (**पार्थिवे**) पृथिवी में विदित (**सदने**) घर में (**यतस्व**) यत्न करो॥६॥

भावार्थः-जो पुरुष और जो स्त्री ब्रह्मचर्य से बलों को बढ़ाकर आप्त धर्म्मात्मा शास्त्रवक्ता सज्जनों की सेवा करते हैं, वे पुरुष विद्वान् और वे स्त्रियां विदुषी होती हैं॥६॥

अथ प्रकृतविषये शूरवीरत्वगुणानाह॥

अब प्रकृत विषय में शूरवीर होने के गुणों को कहा है॥

प्रति॑ घो॒राणा॒मेता॑नाम॒यासा॑ म॒रुता॑ शृण्व आय॒ताम्यु॒प॒ब्दिः।

ये मर्त्यं पृतनायन्तमूमैर्ऋणावानं न पतयन्त सर्गैः॥७॥

प्रति। घोराणाम्। एतानाम्। अयासाम्। मरुताम्। शृण्वे। आऽयताम्। उपब्दिः। ये। मर्त्यम्। पृतनाऽयन्तम्। ऊमैः। ऋणऽवानम्। न। पतयन्त। सर्गैः॥७॥

पदार्थः-(**प्रति**) वीप्सायाम् (**घोराणाम्**) हन्त्रीणाम् (**एतानाम्**) पूर्वोक्तानाम् (**अयासाम्**) प्राप्तानाम् (**मरुताम्**) वायूनामिव विदुषां विदुषीजनानां वा (**शृण्वे**) (**आयताम्**) आगच्छतामागच्छन्तीनां वा (**उपब्दिः**) वाक्। **उपब्दिरिति वाङ्नामसु पठितम्।** (निघं०१.११) (**ये**) (**मर्त्यम्**) मनुष्यम् (**पृतनायन्तम्**) आत्मनः पृतनां सेनामिच्छन्तम् (**ऊमैः**) रक्षणादिभिः (**ऋणावानम्**) ऋणयुक्तम् (**न**) इव (**पतयन्त**) पतिमिवाचरन्तु। अत्राडभावः। (**सर्गैः**) संसृष्टैः॥७॥

अन्वयः-हे मनुष्या! यथाऽहं घोराणामेतानामयासामायतां मरुतां योपब्दिरस्ति तां प्रति शृण्वे ये पृतनायन्तं मर्त्यमृणावानं नोमैः सर्गैः पतयन्त तान्सेवे तथा यूयमप्याचरत॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये दुष्टानां पुरुषाणां स्त्रीणां च कठोरान् शब्दान् श्रुत्वा न शोचन्ति ते शूरवीरा भवन्ति॥७॥

पदार्थः-हे मनुष्यो! जैसे मैं (**घोराणाम्**) मारनेवाली (**एतानाम्**) इन पूर्वोक्त (**अयासाम्**) प्राप्त हुए वा (**आयताम्**) (**मरुताम्**) आते हुए पवनवत् शीघ्रकारी मनुष्य स्त्री जनों की जो (**उपब्दिः**) वाणी है, उसको (**प्रति, शृण्वे**) वार-वार सुनता हूँ और (**ये**) जो (**पृतनायन्तम्**) अपने को सेना की इच्छा करते हुए (**मर्त्यम्**) मनुष्य को (**ऋणावानम्**) ऋणयुक्त को जैसे (**न**) वैसे (**ऊमैः**) रक्षणादि (**सर्गैः**) संसर्गों से युक्त विषयों के साथ (**पतयन्त**) स्वामी के समान मानें उनका सेवन करता हूँ, वैसे तुम भी आचरण करो॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो दुष्ट पुरुषों और स्त्रियों के कठोर शब्दों को सुनकर नहीं सोच करते हैं, वे शूरवीर होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः।
स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम्॥८॥९॥

त्वम्। मानेभ्यः। इन्द्र। विश्वऽजन्या। रद। मरुत्ऽभिः। शुरुधः। गोऽअग्राः। स्तवानेभिः। स्तवसे। देव। देवैः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥८॥

पदार्थः-(**त्वम्**) (**मानेभ्यः**) सत्कारेभ्यः (**इन्द्र**) सभेश (**विश्वजन्या**) या विश्वं जनयन्ति ताः। अत्र **भव्यगेये**ति कर्त्तरिजन्यशब्दः **सुपां सुलुगि**ति जसस्स्थाने आकारादेशः। (**रद**) विलिख। अत्र

द्व्यचोऽतस्तिङ इति दीर्घः। **(मरुद्भिः)** मरुद्विद्याविद्भिः **(शुरुधः)** ये शुरून् हिंसकान् सूर्यकिरणान् दधति धरन्ति ते **(गोअग्राः)** गावः सूर्यकिरणा अग्रे यासान्ताः **(स्तवानेभिः)** सर्वविद्यास्तावकैः **(स्तवसे)** स्तुतये **(देव)** विद्वन् **(देवैः)** विद्वद्भिः **(विद्याम)** जानीयाम **(इषम्)** अन्नम् **(वृजनम्)** बलम् **(जीरदानुम्)** जीवस्वरूपम्॥८॥

अन्वयः-हे देवेन्द्र! यथा वयं मानेभ्यस्स्तवसे स्तवानेभिर्मरुद्भिर्देवैर्विश्वजन्या शुरुधो गोअग्रा अप इषं वृजनं जीरदानुं च विद्याम तथैता एतच्च त्वं रद॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विदुषां सत्कारेण विद्या अधीत्य पदार्थविद्याविज्ञानं प्राप्तव्यम्॥८॥

अस्मिन् सूक्ते विद्वदादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेदितव्या॥

इत्येकोनषष्ट्युत्तरं शततमं १६९ सूक्तं नवमो ९ वर्गश्च समाप्तः॥

पदार्थः-हे **(देव)** विद्वान् **(इन्द्र)** सभापति! जैसे हम लोग **(मानेभ्यः)** सत्कारों से **(स्तवसे)** स्तुति के लिये **(स्तवानेभिः)** समस्त विद्याओं की स्तुति प्रशंसा करनेवाले **(मरुद्भिः)** पवनों की विद्या जाननेवाले **(देवैः)** विद्वानों से **(विश्वजन्या)** विश्व को उत्पन्न करने और **(शुरुधः)** निज हिंसक किरणों के धारण करनेवाले **(गो, अग्राः)** जिनके सूर्यकिरण आगे विद्यमान उन जल और **(इषम्)** अन्न **(वृजनम्)** बल और **(जीरदानुम्)** जीवनस्वरूप को **(विद्याम)** जानें, वैसे इन जल और अन्नादि को **(त्वम्)** आप **(रद)** प्रत्यक्ष जानो अर्थात् उनका नाम धामरूप सब प्रकार जानो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि विद्वानों के सत्कार से विद्याओं को अध्ययन कर पदार्थविद्या के विज्ञान को प्राप्त होवें॥८॥

इस सूक्त में विद्वान् आदि के गुणों का वर्णन होने से इसके अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ उनहत्तरवाँ १६९ सूक्त और नवां ९ वर्ग समाप्त हुआ॥

नू नूनमिति पञ्चर्चस्य सप्तत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। इन्द्रो देवता। १ स्वराडनुष्टुप्। २ अनुष्टुप्। ३ विराडनुष्टुप्। ४ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः प्रकारान्तरेण विद्वद्गुणानाह॥

अब एक सौ सत्तरवें सूक्त का आरम्भ है। उसमें आरम्भ से प्रकारान्तर करके विद्वानों के गुणों का वर्णन करते हैं॥

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्।
अन्यस्य चित्तमभि सञ्चरेण्यमुताधीतं वि नश्यति॥ १॥

न। नूनम्। अस्ति। नो इति। श्वः। कः। तत्। वेद। यत्। अद्भुतम्। अन्यस्य। चित्तम्। अभि। सम्ऽचरेण्यम्। उत। आऽधीतम्। वि। नश्यति॥ १॥

पदार्थः-(**न**) निषेधे (**नूनम्**) निश्चितम् (**अस्ति**) विद्यते (**नो**) (**श्वः**) आगामिदिने (**कः**) (**तत्**) (**वेद**) जानाति (**यत्**) (**अद्भुतम्**) आश्चर्य्यभूतमिव वर्त्तमानम् (**अन्यस्य**) (**चित्तम्**) अन्तःकरणस्य स्मरणात्मिकां वृत्तिम् (**अभि**) (**सञ्चरेण्यम्**) सम्यक् चरितुं ज्ञातुं योग्यम् (**उत**) अपि (**आधीतम्**) समन्ताद् धृतम् (**वि**) (**नश्यति**) अदृष्टं भवति॥ १॥

अन्वयः-हे मनुष्या! यदन्यस्य सञ्चरेण्यं चित्तमुताधीतं नाभि विनश्यति नाद्य भूत्वा नूनमस्ति नो श्वश्च तदद्भुतं को वेद॥ १॥

भावार्थः-यो जीवो भूत्वा न जायते भूत्वा न विनश्यति नित्य आश्चर्यगुणकर्मस्वभावोऽनादिश्चेतनो वर्त्तते तस्य वेत्ताऽप्याश्चर्य्यभूतः॥ १॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**अन्यस्य**) औरों को (**सञ्चरेण्यम्**) अच्छे प्रकार जानने योग्य (**चित्तम्**) अन्तःकरण की स्मरणात्मिका वृत्ति (**उत**) और (**आधीतम्**) सब ओर से धारण किया हुआ विषय (**न**) न (**अभि, वि, नश्यति**) नहीं विनाश को प्राप्त होता न आज होकर (**नूनम्**) निश्चित रहता (**अस्ति**) है और (**नो**) न (**श्वः**) अगले दिन निश्चित रहता है (**तत्**) उस (**अद्भुतम्**) आश्चर्यस्वरूप के समान वर्त्तमान को (**कः**) कौन (**वेद**) जानता है॥ १॥

भावार्थः-जो जीवरूप होकर उत्पन्न नहीं होता और न उत्पन्न होकर विनाश को प्राप्त होता है, नित्य आश्चर्य गुण, कर्म, स्वभाववाला अनादि चेतन है, उसका जाननेवाला भी आश्चर्यस्वरूप होता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

किं नः इन्द्र जिघांससि भ्रातरो मरुतस्तव।

तेभिः कल्पस्व साधुया मा नः समरणे वधीः॥ २॥

किम्। नः। इन्द्र। जिघांससि। भ्रातरः। मरुतः। तव। तेभिः। कल्पस्व। साधुऽया। मा। नः। सम्ऽअरणे। वधीः॥ २॥

पदार्थः-(**किम्**) (**नः**) अस्मान् (**इन्द्र**) सभेश विद्वन् (**जिघांससि**) हन्तुमिच्छसि (**भ्रातरः**) बन्धवः (**मरुतः**) मनुष्याः (**तव**) (**तेभिः**) तैः सह (**कल्पस्व**) समर्थो भव (**साधुया**) साधुना कर्मणा (**मा**) (**नः**) अस्मान् (**समरणे**) सङ्ग्रामे। **समरण इति संग्रामनामसु पठितम्।** (निघं २.१७) (**वधीः**) हन्याः॥ २॥

अन्वयः-हे इन्द्र! ये वयं मरुतस्तव भ्रातरः स्मस्तान्नोऽस्मान् किं जिघांससि? तेभिः साधुया कल्पस्व समरणे नो मा वधीः॥ २॥

भावार्थः-ये बन्धून् पीडयितुमिच्छेयुस्ते सदा पीडिता जायन्ते ये रक्षितुमिच्छन्ति ते समर्था भवन्ति। ये सर्वोपकारकास्तेषां किञ्चिदप्यप्रियं न प्राप्तं भवति॥ २॥

पदार्थः-हे (**इन्द्र**) सभापति विद्वान्! जो हम (**मरुतः**) मनुष्य लोग (**तव**) आपके (**भ्रातरः**) भाई हैं, उन (**नः**) हम लोगों को (**किम्**) क्या (**जिघांससि**) मारने की इच्छा करते हो? (**तेभिः**) उन हम लोगों के साथ (**साधुया**) उत्तम काम से (**कल्पस्व**) समर्थ होओ और (**समरणे**) संग्राम में (**नः**) हम लोगों को (**मा, वधीः**) मत मारिये॥ २॥

भावार्थः-जो कोई बन्धुओं को पीड़ा देना चाहें वे सदा पीड़ित होते हैं और जो बन्धुओं की रक्षा किया चाहते हैं, वे समर्थ होते हैं अर्थात् सब काम उनके प्रबलता से बनते हैं। जो सबका उपकार करनेवाले हैं, उनको कुछ भी काम अप्रिय नहीं प्राप्त होता॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे।

विद्मा हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि॥ ३॥

किम्। नः। भ्रातः। अगस्त्य। सखा। सन्। अति। मन्यसे। विद्म। हि। ते। यथा। मनः। अस्मभ्यम्। इत्। न। दित्ससि॥ ३॥

पदार्थः-(**किम्**) प्रश्ने (**नः**) अस्मान् (**भ्रातः**) बन्धो (**अगस्त्य**) अगस्तौ विज्ञाने साधो (**सखा**) मित्रम् (**सन्**) (**अति**) (**मन्यसे**) (**विद्म**) जानीयाम। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हि**) किल (**ते**) तव (**यथा**) (**मनः**) अन्तःकरणम् (**अस्मभ्यम्**) (**इत्**) एव (**न**) (**दित्ससि**) दातुमिच्छसि॥३॥

अन्वयः-हे अगस्त्य भ्रातः! विद्वन् सखा संस्त्वं नः किमति मन्यसे? यथा ते मनोऽस्मभ्यं हि न दित्ससि तथेत्त्वा वयं विद्म॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये येषां सखायस्ते मनोकर्मवाग्भिस्तेषां प्रियमाचरेयुर्यावज्ज्ञानं स्वस्य भवेत्तावन्मित्राय समर्पयेत्॥३॥

पदार्थः-हे (**अगस्त्य**) विज्ञान में उत्तमता रखनेवाले (**भ्रातः**) भाई! विद्वान् (**सखा**) मित्र (**सन्**) होते हुए आप (**नः**) हम लोगों को (**किम्**) क्या (**अति, मन्यसे**) अतिमान करते हो? अर्थात् हमारे मान को छोड़कर वर्त्तते हो? (**यथा**) जैसे (**ते**) तुम्हारा अपना (**मनः**) अन्तःकरण (**अस्मभ्यम्**) हमारे लिये (**हि**) ही (**न**) न (**दित्ससि**) देना चाहते हो अर्थात् हमारे लिये अपने अन्तःकरण को उत्साहित क्या नहीं किया चाहते हो? वैसे (**इत्**) ही तुमको हम लोग (**विद्म**) जानें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो जिनके मित्र हों वे मन, वचन और कर्म से उनकी प्रसन्नता का काम करें और जितना विद्या, ज्ञान अपने को हो, उतना मित्र के समर्पण करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अरं॑ कृण्वन्तु॒ वेदिं॒ सम॒ग्निमि॑न्धतां पु॒रः।
तत्रा॒मृत॑स्य॒ चेत॑नं य॒ज्ञं ते॑ तनवावहै॥४॥

अर॑म्। कृ॒ण्व॒न्तु॒। वेदि॑म्। सम्। अ॒ग्निम्। इ॒न्ध॒ता॒म्। पु॒रः। तत्र॑। अ॒मृत॑स्य। चेत॑नम्। य॒ज्ञम्। ते॒। त॒न॒वा॒व॒है॥५॥

पदार्थः-(**अरम्**) अलम् (**कृण्वन्तु**) कुर्वन्तु (**वेदिम्**) वेत्ति यया तां प्रज्ञाम् (**सम्**) (**अग्निम्**) पावकमिव विज्ञानम् (**इन्धताम्**) दीप्यन्तु (**पुरः**) प्रथमम् (**तत्र**) वेद्याम् (**अमृतस्य**) अविनाशिनो जीवस्य (**चेतनम्**) चेतति येन तम् (**यज्ञम्**) यजति संगच्छन्ति येन तम् (**ते**) तव (**तनवावहै**) विस्तृणावहै॥४॥

अन्वयः-हे सखे! यथा विद्वांसो यत्र पुरो वेदमग्निं च समिन्धतामरं कृण्वन्तु तत्राऽमृतस्य ते चेतनं यज्ञं तथाऽऽवामध्यापकोपदेशकौ तनवावहै॥४॥

भावार्थः-यथा ऋत्विग्यजमाना वह्नौ सुगन्ध्यादिद्रव्यं हुत्वा वायुजले संशोध्य सुखेन सहितं जगत् कुर्वन्ति तथाऽध्यापकोपदेशकावन्येषामन्तःकरणेषु विद्यासुशिक्षे संस्थाप्य सर्वेषां सुखं विस्तारयताम्॥४॥

पदार्थः-हे मित्र! जैसे विद्वान् जन जहाँ **(पुरः)** प्रथम **(वेदिम्)** जिससे प्राणी विषयों को जानता है, उस प्रज्ञा और **(अग्निम्)** अग्नि के समान देदीप्यमान विज्ञान को **(समिन्धताम्)** प्रदीप्त करें वा **(अरम्, कृण्वन्तु)** सुशोभित करें **(तत्र)** वहाँ **(अमृतस्य)** विनाशरहित जीवमात्र **(ते)** आपके **(चेतनम्)** चेतन अर्थात् जिससे अच्छे प्रकार यह जीव जानता और **(यज्ञम्)** विषयों को प्राप्त होता, उसको वैसे हम पढ़ाने और उपदेश करनेवाले **(तनवावहै)** विस्तारें॥४॥

भावार्थः-जैसे ऋतु-ऋतु में यज्ञ करानेवाले और यजमान अग्नि में सुगन्धादि द्रव्य का हवन कर उससे वायु और जल को अच्छे प्रकार शोध कर जगत् को सुख से युक्त करते हैं, वैसे अध्यापक और उपदेशक औरों के अन्तःकरणों में विद्या और उत्तम शिक्षा संस्थापन कर सबके सुख का विस्तार करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः।
इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि॥५॥१०॥

त्वम्। ईशिषे। वसुऽपते। वसूनाम्। त्वम्। मित्राणाम्। मित्रऽपते। धेष्ठः। इन्द्र। त्वम्। मरुत्ऽभिः। सम्। वदस्व। अध। प्र। अशान। ऋतुऽथा। हवींषि॥५॥

पदार्थः-**(त्वम्)** **(ईशिषे)** ऐश्वर्यं करोषि **(वसुपते)** वसूनां धनानां पालक **(वसूनाम्)** कृतचतुर्विंशतिवर्षब्रह्मचर्याणां पृथिव्यादिवत् क्षमादिधर्मयुक्तानाम् **(त्वम्)** **(मित्राणाम्)** सुहृदाम् **(मित्रपते)** मित्राणां पालक **(धेष्ठः)** अतिशयेन धाता **(इन्द्र)** परमैश्वर्य्यप्रद **(त्वम्)** **(मरुद्भिः)** वायुवद्वर्त्तमानैर्विद्वद्भिः सह **(सम्)** **(वदस्व)** **(अध)** अनन्तरम् **(प्र)** **(अशान)** भुङ्क्ष्व **(ऋतुथा)** ऋत्वनुकूलानि **(हवींषि)** अत्तुं योग्यान्यन्नानि॥५॥

अन्वयः-हे वसूनां वसुपते! त्वमीशिषे। हे मित्राणां मित्रपते! त्वं धेष्ठो भवसि। हे इन्द्र! त्वं मरुद्भिः सह संवदस्वाध त्वमृतुथा हवींषि प्राशान॥५॥

भावार्थः-ये धनवन्तः सर्वेषां सुहृदो बहुभिः सह संस्कृतान्यन्नानि भुञ्जते विद्यावृद्धविद्वद्भिः सह संवदन्ते ते समर्था ऐश्वर्यवन्तो जायन्ते॥५॥

अस्मिन् सूक्ते विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति सप्तत्युत्तरं शततमं १७० सूक्तं दशमो १० वर्गश्च समाप्तः॥

पदार्थः-**(वसूनाम्)** किया है चौबीस वर्ष ब्रह्मचर्य जिन्होंने और जो पृथिव्यादिकों के समान सहनशील हैं उन **(वसुपते)** हे धनों के स्वामी! **(त्वम्)** तुम **(ईशिषे)** ऐश्वर्यवान् हो वा ऐश्वर्य्य बढ़ाते हो।

हे **(मित्राणाम्)** मित्रों में **(मित्रपते)** मित्रों के पालनेवाले श्रेष्ठ मित्र! **(त्वम्)** तुम **(धेष्ठः)** अतीव धारण करनेवाले होते हो। हे **(इन्द्र)** परमैश्वर्य्य के देनेवाले! **(त्वम्)** तुम **(मरुद्भिः)** पवनों के समान वर्त्तमान विद्वानों के साथ **(संवदस्व)** संवाद करो। **(अध)** इसके अनन्तर **(ऋतुथा)** ऋतु-ऋतु के अनुकूल **(हवींषि)** खाने योग्य अन्नों को **(प्र, अशान)** अच्छे प्रकार खाओ॥५॥

भावार्थः-जो धनवान् सब के मित्र बहुतों के साथ संस्कार किये हुए अन्नों को खाते और विद्या से परिपूर्ण विद्वानों के साथ संवाद करते हैं, वे समर्थ और ऐश्वर्यवान् होते हैं॥५॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ सत्तरवां १७० सूक्त और दशवां १० वर्ग समाप्त हुआ॥

प्रतीत्यस्य षड्चस्यैकसप्तत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। मरुतो देवताः। १,५ निचृत् त्रिष्टुप्। २ त्रिष्टुप्। ४,६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिश्छन्दः। पञ्चम स्वरः॥

पुनर्विद्वत्कृत्यमाह॥

अब एक सौ इकहत्तरवें सूक्त का आरम्भ है। उसमें फिर विद्वानों के कृत्य का वर्णन करते हैं॥

प्रति॑ व एना नम॑सा॒हमे॑मि सू॒क्ते॑न भिक्षे सुम॒तिं तु॒राणा॑म्।
र॒रा॒णता॑ मरुतो वे॒द्याभि॒र्नि हेळो॑ ध॒त्त वि मु॑चध्व॒मश्वा॑न्॥ १॥

प्रति। वः। एना। नमसा। अहम्। एमि। सुऽउक्तेन। भिक्षे। सुऽमतिम्। तुराणाम्। ररणता। मरुतः। वेद्याभिः। नि। हेळः। धत्त। वि। मुचध्वम्। अश्वान्॥ १॥

पदार्थः-(**प्रति**) (**वः**) युष्मान् (**एना**) एनेन (**नमसा**) नमस्कारेणान्नेन वा (**अहम्**) (**एमि**) प्राप्नोमि (**सूक्तेन**) सुष्ठु कथितेन (**भिक्षे**) याचे (**सुमतिम्**) शोभनां मतिम् (**तुराणाम्**) शीघ्रकारिणाम् (**ररणता**) रममाणेन मनसा (**मरुतः**) विद्वांसः (**वेद्याभिः**) वेदितुं योग्याभिः (**नि**) (**हेळः**) अनादरम् (**धत्त**) (**वि**) (**मुचध्वम्**) त्यजत (**अश्वान्**) अत्युत्कृष्टवेगवतः॥ १॥

अन्वयः-हे मरुतोऽहमेना नमसा वः प्रत्येमि। सूक्तेन तुराणां सुमतिं भिक्षे। हे मरुतो! यूयं ररणता मनसा वेद्याभिर्हेडो निधत्ताश्वान् विमुचध्वञ्च॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये शुद्धेनान्तःकरणेन नानाविज्ञानानि लभन्ते ते क्वाप्यनादरं नाप्नुवन्ति॥ १॥

पदार्थः-हे (**मरुतः**) विद्वानो! (**अहम्**) मैं (**एना**) इस (**नमसा**) नमस्कार सत्कार वा अन्न से (**वः**) तुम्हारे (**प्रति, एमि**) प्रति आता हूँ और (**सूक्तेन**) सुन्दर कहे हुए विषय से (**तुराणाम्**) शीघ्रकारी जनों की (**सुमतिम्**) उत्तम मति को (**भिक्षे**) मांगता हूँ। हे विद्वानो! तुम (**ररणता**) रमण करते हुए मन से (**वेद्याभिः**) दूसरे को बताने योग्य क्रियाओं से (**हेडः**) अनादर को (**नि, धत्त**) धारण करो अर्थात् सत्कार-असत्कार के विषयों को विचार के हर्ष-शोक न करो। और (**अश्वान्**) अतीव उत्तम वेगवान् अपने घोड़ों को (**वि, मुचध्वम्**) छोड़ो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो शुद्ध, अन्तःकरण से नाना प्रकार के विज्ञानों को प्राप्त होते हैं, वे कहीं अनादर नहीं पाते॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ए॒ष व॒ः स्तोमो॑ मरुतो॒ नम॑स्वान्हृ॒दा त॒ष्टो मन॑सा धायि देवाः।

उपेमा यातु मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः॥ २॥

एषः। वः। स्तोमः। मरुतः। नमस्वान्। हृदा। तष्टः। मनसा। धायि। देवाः। उप। ईम् आ। यात। मनसा। जुषाणाः। यूयम्। हि। स्थ। नमसः। इत्। वृधासः॥ २॥

पदार्थः-(**एषः**) (**वः**) युष्माकम् (**स्तोमः**) स्तुतिविषयः (**मरुतः**) विद्वांसः (**नमस्वान्**) सत्कारात्मकः (**हृदा**) हृदयस्थेन (**तष्टः**) विहितः (**मनसा**) अन्तःकरणेन (**धायि**) ध्रियेत (**देवाः**) कामयमानाः (**उप**) (**ईम्**) सर्वतः (**आ**) (**यात**) समन्तात्प्राप्नुत (**मनसा**) चित्तेन (**जुषाणाः**) सेवमानाः (**यूयम्**) (**हि**) किल (**स्थ**) भवथ। अत्रा**न्येषामपी**ति दीर्घः। (**नमसः**) अन्नाद्यैश्वर्यस्य (**इत्**) एव (**वृधासः**) वर्द्धमाना वर्द्धयितारो वा॥ २॥

अन्वयः-हे देवा मरुतो! येनैष वो नमस्वान् हृदा तष्टः स्तोमो मनसा धायि तं हि मनसा जुषाणाः सन्तो यूयमुपा यात नमस इदीं वृधासः स्थ॥ २॥

भावार्थः-ये धार्मिकाणां विदुषां शीलं स्वीकुर्वन्ति ते प्रशंसिता भवन्ति॥ २॥

पदार्थः-हे (**देवाः**) कामना करते हुए (**मरुतः**) विद्वानो! जिससे (**एषः**) यह (**वः**) तुम्हारा (**नमस्वान्**) सत्कारात्मक (**हृदा**) हृदयस्थ विचार से (**तष्टः**) विधान किया (**स्तोमः**) सत्कारात्मक स्तुति विषय (**मनसा**) मन से (**धायि**) धारण किया जाय (**हि**) उसी को (**मनसा**) मन से (**जुषाणाः**) सेवते हुए (**यूयम्**) तुम लोग (**उप, आ, यात**) समीप आओ और (**नमसः**) अन्नादि ऐश्वर्य की (**इत्**) ही (**ईम्**) सब ओर से (**वृधासः**) वृद्धि को प्राप्त वा उसको बढ़ानेवाले (**स्थ**) होओ॥ २॥

भावार्थः-जो धार्मिक विद्वानों के शील को स्वीकार करते हैं, वे प्रशंसित होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शम्भविष्ठः।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा॥ ३॥

स्तुतासः। नः। मरुतः। मृळयन्तु। उत। स्तुतः। मघऽवा। शम्ऽभविष्ठः। ऊर्ध्वा। नः। सन्तु। कोम्या। वनानि। अहानि। विश्वा। मरुतः। जिगीषा॥ ३॥

पदार्थः-(**स्तुतासः**) प्रशंसिताः (**नः**) अस्मान् (**मरुतः**) बलिष्ठा विद्वांसः (**मृळयन्तु**) सुखयन्तु (**उत**) अपि (**स्तुतः**) प्रशंसां प्राप्तः (**मघवा**) पूजितुं योग्यः (**शम्भविष्ठः**) सुखस्यः भावयितृतमः (**ऊर्ध्वा**) उत्कृष्टानि (**नः**) अस्माकम् (**सन्तु**) (**कोम्या**) प्रशंसनीयानि (**वनानि**) भजनीयानि (**अहानि**) दिनानि (**विश्वा**) सर्वाणि (**मरुतः**) शूरवीराः (**जिगीषा**) जेतुमिष्टानि॥ ३॥

अन्वयः-हे मरुतोऽस्माभिः स्तुतासो भवन्तो नोऽस्मान् मृळयन्तु उतापि स्तुतस्सन्मघवा शम्भविष्ठोऽस्तु। हे मरुतो! यथा नो विश्वा कोम्या जिगीषा वनान्यहान्यूर्ध्वा सन्ति तथा युष्माकमपि सन्तु॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्येषु यादृशा गुणकर्मस्वभावास्स्युः तेषां तादृश्येव प्रशंसा कार्या, त एव प्रशंसिता भवेयुर्येऽन्येषां सुखोन्नतये प्रयतेरन्, त एव सेवनीयाः स्युर्य इह पापाचरणं विहाय धार्मिका भवेयुस्ते प्रतिदिनं विद्यासुशिक्षावृद्धय उद्योगिनः स्युः॥३॥

पदार्थः-हे **(मरुतः)** बलवान् विद्वानो! हम लोगों से **(स्तुतासः)** स्तुति किए हुए आप **(नः)** हमको **(मृळयन्तु)** सुखी करो **(उत)** और **(स्तुतः)** प्रशंसा को प्राप्त होता हुआ **(मघवा)** सत्कार करने योग्य पुरुष **(शम्भविष्ठः)** अतीव सुख की भावना करनेवाला हो। हे **(मरुतः)** शूरवीर जनो! जैसे **(नः)** हमारे **(विश्वा)** समस्त **(कोम्या)** प्रशंसनीय **(जिगीषा)** जीतने और **(वनानि)** सेवने योग्य **(अहानि)** दिन **(ऊर्ध्वा)** उत्कृष्ट हैं, वैसे तुम्हारे **(सन्तु)** हों॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिए कि जिनमें जैसे गुण, कर्म, स्वभाव हों उनकी वैसी ही प्रशंसा करें और प्रशंसा योग्य वे ही हों जो औरों की सुखोन्नति के लिये प्रयत्न करें और वे ही सेवने योग्य हों जो पापाचरण को छोड़ धार्मिक हों, वे प्रतिदिन विद्या और उत्तम शिक्षा की वृद्धि के अर्थ उद्योगी हों॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्मादहं तविषादीषमाण इन्द्राद्भिया मरुतो रेजमानः।
युष्मभ्यं हव्या निशितान्यासन् तान्यारे चकृमा मृळता नः॥४॥

अस्मात्। अहम्। तविषात्। ईषमाणः। इन्द्रात्। भिया। मरुतः। रेजमानः। युष्मभ्यम्। हव्या। निऽशितानि। आसन्। तानि। आरे। चकृम। मृळत। नः॥४॥

पदार्थः-**(अस्मात्)** **(अहम्)** **(तविषात्)** बलिष्ठात् **(ईषमाणः)** ऐश्वर्यं कुर्वन्। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(इन्द्रात्)** परमैश्वर्यात् सभासेनेशात् **(भिया)** भयेन **(मरुतः)** प्राण इव प्रियाः सभासदः **(रेजमानः)** कम्पमानः **(युष्मभ्यम्)** **(हव्या)** आदातुमर्हाणि **(निशितानि)** तीव्राणि शस्त्रास्त्राणि **(आसन्)** सन्ति **(तानि)** **(आरे)** समीपे **(चकृम)** कुर्याम **(मृळत)** सुखयत। अत्रोभयत्र**ाऽन्येषामपी**ति दीर्घः। **(नः)** अस्मान्॥४॥

अन्वयः-हे मरुतोऽस्मात्तविषादीषमाण इन्द्राद्भिया रेजमानोऽहमिदं निवेदयामि। यानि युष्मभ्यं हव्या निशितान्यासंस्तानि वयमारे चकृम तैर्नोऽस्मान् यूयं यथा मृळत तथा वयमपि युष्मान् सुखयेम॥४॥

भावार्थः-यदा कस्माच्चिद्राजपुरुषादन्यायेन पीड्यमानः प्रजाजनः सभायां स्वदुःखं निवेदयेत् तदा तस्य हृच्छल्यमुत्पाटयेत्। येन राजपुरुषा न्याये वर्त्तेरन्, प्रजाजनाश्च प्रीताः स्युः। यावन्तः स्त्रीपुरुषा भवेयुस्तावन्तः सर्वे शस्त्राभ्यासं कुर्युः॥४॥

पदार्थः-हे **(मरुतः)** प्राण के समान सभासदो! **(अस्मात्)** इस **(तविषात्)** अत्यन्त बलवान् से **(ईषमाणः)** ऐश्वर्य करता और **(इन्द्रात्)** परमैश्वर्यवान् सभा सेनापति से **(भिया)** भय से **(रेजमानः)** कम्पता हुआ **(अहम्)** मैं यह निवदेन करता हूँ कि जो **(युष्मभ्यम्)** तुम्हारे लिये **(हव्या)** ग्रहण करने योग्य **(निशितानि)** शस्त्र-अस्त्र तीव्र **(आसन्)** हैं **(तानि)** उनकी हम लोग **(आरे)** समीप **(चकृम)** करें और उनसे **(नः)** हम लोगों को तुम जैसे **(मृळत)** सुखी करो, वैसे हम भी तुम लोगों को सुखी करें॥४॥

भावार्थः-जब किसी राजपुरुष से अन्यायपूर्वक पीड़ा को प्राप्त होता हुआ प्रजाजन सभा के बीच अपने दुःख निवेदन करे, तब उसके मन के कांटों को उपाड़ देवें अर्थात् उसके मन की शुद्ध भावना करा देवें, जिससे राजपुरुष न्याय में वर्त्तें और प्रजाजन भी प्रसन्न हों, जितने स्त्री पुरुष हों सब शस्त्र का अभ्यास करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

येन॒ मानाꣳसश्चि॒तय॑न्त॒ उ॒स्रा व्यु॑ष्टिषु॒ शव॑सा॒ शश्व॑तीनाम्।
स नो॑ म॒रुद्भि॑र्वृषभ॒ श्रवो॑ धा उ॒ग्र उ॒ग्रेभि॒: स्थवि॑र: सहो॒दा:॥५॥

येन॒। मानाꣳसः। चि॒तय॑न्ते। उ॒स्राः। विऽउ॑ष्टिषु। शव॑सा। शश्व॑तीनाम्। सः। नः॒। म॒रुत्ऽभिः॑। वृ॒ष॒भ॒। श्रवः॑। धाः॒। उ॒ग्रः। उ॒ग्रेभिः॑। स्थवि॑रः। स॒हो॒दाः॥५॥

पदार्थः-(**येन**) (**मानासः**) विचारवन्तः (**चितयन्ते**) संज्ञापयन्ति (**उस्राः**) मूलराज्ये परम्परया निवसन्तः (**व्युष्टिषु**) विविधासु वसतिषु (**शवसा**) बलेन (**शश्वतीनाम्**) सनातनीनाम् (**सः**) (**नः**) अस्माकम् (**मरुद्भिः**) विद्वद्भिः सह (**वृषभ**) सुखानां वर्षक (**श्रवः**) अन्नादिकम् (**धाः**) दध्याः। अत्राडभावः। (**उग्रः**) तीव्रस्वभावः (**उग्रेभिः**) तेजस्विभिः (**स्थविरः**) कृतज्ञो वृद्धः (**सहोदाः**) बलप्रदः॥५॥

अन्वयः-येन शवसा वर्त्तमाना शश्वतीनां व्युष्टिषूस्रा मानासो विद्वांसः प्रजाश्चितयन्ते। हे वृषभ सभेशोग्रेभिर्मरुद्भिस्सहोग्रः स्थविरः सहोदाः संस्त्वं श्रवो धाः स नोऽस्माकं राजा भव॥५॥

भावार्थः-यत्र सभायां मौलाः शास्त्रविदो धार्मिका सभासदः सत्यं न्यायं कुर्युर्विद्यावयोवृद्धः सभेशश्च स्यात् तत्राऽन्यायस्य प्रवेशो न भवति॥५॥

पदार्थः-(**येन**) जिस (**शवसा**) बल से वर्त्तमान (**शश्वतीनाम्**) सनातन (**व्युष्टिषु**) नाना प्रकार की वस्तियों में (**उस्राः**) मूल राज्य में परम्परा से निवास करते हुए (**मानासः**) विचारवान् विद्वान् जन प्रजाजनों को (**चितयन्ते**) चैतन्य करते हैं। हे (**वृषभ**) सुखों को वर्षा करनेवाले सभापति! (**उग्रेभिः**) तेजस्वी (**मरुद्भिः**) विद्वानों के साथ (**उग्रः**) तीव्रस्वभाव (**स्थविरः**) कृतज्ञ वृद्ध (**सहोदाः**) बल के देनेवाले होते हुए आप (**श्रवः**) अन्न आदि पदार्थ को (**धाः**) धारण कीजिये और (**सः**) सो आप (**नः**) हमारे राजा हूजिये॥५॥

भावार्थः-जहाँ सभा में मूल जड़ के अर्थात् निष्कलङ्क कुल परम्परा से उत्पन्न हुए और शास्त्रवेत्ता धार्मिक सभासद् सत्य न्याय करें और विद्या तथा अवस्था से वृद्ध सभापति भी हो, वहाँ अन्याय का प्रवेश नहीं होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं पाहीन्द्र सहीयसो नॄन् भवा मरुद्भिरवयातहेळाः।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम्॥६॥११॥

त्वम्। पाहि। इन्द्र। सहीयसः। नॄन्। भव। मरुत्ऽभिः। अवयातऽहेळाः। सुऽप्रकेतेभिः। ससहिः। दधानः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥६॥

पदार्थः-(**त्वम्**) (**पाहि**) (**इन्द्र**) सभेश (**सहीयसः**) अतिशयेन बलयुक्तान् सोढॄन् (**नॄन्**) मनुष्यान् (**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**मरुद्भिः**) प्राण इव रक्षकैर्विद्वद्भिः (**अवयातहेळाः**) अवयातं दूरीभूतं हेळो यस्मात् सः (**सुप्रकेतेभिः**) शोभनः प्रकृष्टः केतो विज्ञानं येषान्ते (**सासहिः**) अतिशयेन सोढा (**दधानः**) धरन् (**विद्याम**) जानीयाम (**इषम्**) विद्यायोगजं बोधम् (**वृजनम्**) बलम् (**जीरदानुम्**) जीवात्मानम्॥६॥

अन्वयः-हे इन्द्र! त्वं सुप्रकेतेभिर्मरुद्भिः सह सहीयसो नॄन् पाहि। अवयातहेळा भव यथेषं वृजनं जीरदानुं दधानः सन् सासहिर्भवसि तथा भूत्वैतद्वयं विद्याम॥६॥

भावार्थः-ये मनुष्याः क्रोधादिदोषरहिताः विद्याविज्ञानधर्मयुक्ताः क्षमावन्तः सज्जनैस्सह अदण्ड्यान् रक्षन्ति दण्ड्यान् दण्डयन्ति च ते राजकर्मचारिणो भवितुमर्हन्ति॥६॥

अत्र विद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति एकसप्तत्युत्तरं शततमं १७१ सूक्तमेकादशो ११ वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) सभापति! (**त्वम्**) आप (**सुप्रकेतेभिः**) सुन्दर उत्तम ज्ञानवान् (**मरुद्भिः**) प्राण के समान रक्षा करनेवाले विद्वानों के साथ (**सहीयसः**) अतीव बलयुक्त सहनेवाले (**नॄन्**) मनुष्यों की

(पाहि) रक्षा कीजिये और **(अवयातहेळाः)** दूर हुआ अनादर अपकीर्तिभाव जिससे ऐसे **(भव)** हूजिये जैसे **(इषम्)** विद्या योग से उत्पन्न हुए बोध **(वृजनम्)** बल और **(जीरदानुम्)** जीवात्मा को **(दधानः)** धारण करते हुए **(सासहिः)** अतीव सहनशील होते हो, वैसे हुए इसको हम लोग **(विद्याम)** जानें॥६॥

भावार्थः–जो मनुष्य क्रोधादि दोषरहित, विद्या विज्ञान धर्म्मयुक्त, क्षमावान् जन, सज्जनों के साथ जो दण्ड देने योग्य नहीं हैं उनकी रक्षा करते और दण्ड देने योग्यों को दण्ड देते हैं, वे राजकर्मचारी होने के योग्य हैं॥६॥

इस सूक्त में विद्वानों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिए॥

यह एक सौ इकहत्तरवां १७१ सूक्त और ग्यारहवां ११ वर्ग समाप्त हुआ॥

चित्र इत्यस्य त्र्यृचस्य द्विसप्तत्युत्तरस्य शततमस्यागस्त्य ऋषिः। मरुतो देवताः। १ विराड् गायत्री। २,३ गायत्री छन्दः। षड्जः स्वरः॥

अथ वायुदृष्टान्तेन विद्वद्गुणानाह॥

अब तीन ऋचावाले एक सौ बहत्तरवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में पवन के दृष्टान्त से विद्वानों के गुणों का वर्णन करते हैं॥

चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः।
मरुतो अहिभानवः॥ १॥

चित्रः। वः। अस्तु। यामः। चित्रः। ऊती। सुऽदानवः। मरुतः। अहिऽभानवः॥ १॥

पदार्थः-(**चित्रः**) विचित्रः (**वः**) युष्माकम् (**अस्तु**) भवतु (**यामः**) गमनम् (**चित्रः**) अद्भुतः (**ऊती**) रक्षणादिना (**सुदानवः**) सुष्ठु दातारः (**मरुतः**) प्राणवद्वर्त्तमानाः (**अहिभानवः**) अहेर्मेघस्य प्रकाशकाः॥ १॥

अन्वयः-हे ऊती सह वर्त्तमाना अहिभानवः सुदानवो मरुतो! यथा वायूनां चित्रो यामश्चित्रः स्वभावोऽस्ति तथा वोऽस्तु॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा जीवनप्रदानवर्षाकारणादीनि वायूनामद्भुतानि कर्माणि सन्ति तथा भवतामपि सन्तु॥ १॥

पदार्थः-हे (**ऊती**) रक्षा आदि के साथ वर्त्तमान (**अहिभानवः**) मेघ का प्रकाश करनेवाले (**सुदानवः**) सुन्दर दानशील और (**मरुतः**) प्राण के समान वर्त्तमान जनो! जैसे पवनों का (**चित्रः**) अद्भुत (**यामः**) गमन करना वा (**चित्रः**) चित्र-विचित्र स्वभाव है, वैसे (**वः**) तुम्हारा (**अस्तु**) हो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे जीवन का अच्छे प्रकार देना, वर्षा करना आदि पवनों के अद्भुत कर्म्म हैं, वैसे तुम्हारे भी हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आरे सा वः सुदानवो मरुत ऋञ्जती शरुः।
आरे अश्मा यमस्यथ॥ २॥

आरे। सा। वः। सुऽदानवः। मरुतः। ऋञ्जती। शरुः। आरे। अश्मा। यम्। अस्यथ॥ २॥

पदार्थः-(**आरे**) दूरे (**सा**) (**वः**) युष्माकम् (**सुदानवः**) प्रशस्तदानकर्त्तारः (**मरुतः**) वायुवद्बलिष्ठाः (**ऋञ्जती**) ऋञ्जमाना पाचयित्री (**शरुः**) दुष्टानां हिंसिका ऋष्टिः (**आरे**) समीपे (**अश्मा**) मेघ इव (**यम्**) शस्त्रविशेषम् (**अस्यथ**) प्रक्षिपत॥ २॥

अन्वयः-हे सुदानवो मरुतो! वो युष्माकं या ऋञ्जती शरुरस्ति साऽस्मत्त आरे अस्तु। यं शस्त्रविशेषमश्मा यूयमस्यथ सोऽस्मत्त आरे अस्तु॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या मेघवत् सुखप्रदा दुष्टानां त्यक्तारः श्रेष्ठानां समीपे दुष्टेभ्यो दूरे वसन्ति ते सङ्गन्तव्या भवन्ति॥२॥

पदार्थः-हे (**सुदानवः**) प्रशंसित दान करनेवाले (**मरुतः**) वायुवत् बलवान् विद्वानो! (**वः**) तुम्हारी जो (**ऋञ्जती**) पचाती-जलाती (**शरुः**) दुष्टों को विनाशती हुई द्विधारा तलवार है (**सा**) वह हमसे (**आरे**) दूर रहे और (**यम्**) जिस विशेष शस्त्र को (**अश्मा**) मेघ के समान तुम (**अस्यथ**) छोड़ते हो, वह हमारे (**आरे**) समीप रहे॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य मेघ के समान सुख देनेवाले, दुष्टों को छोड़नेवाले, श्रेष्ठों के समीप और दुष्टों से दूर वसते हैं, वे सङ्ग करने योग्य हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः।
ऊर्ध्वान्नः कर्त्त जीवसे॥३॥१२॥

तृणऽस्कन्दस्य। नु। विशः। परि। वृङ्क्त। सुऽदानवः। ऊर्ध्वान्। नः। कर्त। जीवसे॥३॥

पदार्थः-(**तृणस्कन्दस्य**) यस्तृणानि स्कन्दति गच्छति गमयति वा तस्य (**नु**) शीघ्रम् (**विशः**) प्रजाः (**परि**) सर्वतः (**वृङ्क्त**) त्यजत (**सुदानवः**) उत्तमदानाः (**ऊर्द्ध्वान्**) उत्कृष्टान् (**नः**) अस्मान् (**कर्त्त**) कुरुत (**जीवसे**) जीवितुम्॥३॥

अन्वयः-हे सुदानवो! यूयं तृणस्कन्दस्य विशो नु परि वृङ्क्त जीवसे नो ऊर्द्ध्वान् कर्त॥३॥

भावार्थः-यथा वायुः सर्वाः प्रजा रक्षति तथा सभेशो वर्त्तेत। यथा प्रजापीडा नश्येत्, मनुष्या उत्कृष्टा दीर्घजीविनो जायेरन् तथा सर्वैरनुष्ठेयम्॥३॥

अत्र वायुवद्विद्वद्गुणप्रशंसनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विसप्तत्युत्तरं शततमं १७२ सूक्तं द्वादशो १२ वर्गश्च समाप्तः॥

पदार्थः-हे (**सुदानवः**) उत्तम दान देनेवाले! तुम (**तृणस्कन्दस्य**) जो तृणों को प्राप्त अर्थात् तृणमात्र का लोभ करता वा दूसरों को उस लोभ पर पहुँचाता उसकी (**विशः**) प्रजा को (**नु**) शीघ्र (**परि, वृङ्क्त**) सब ओर से छोड़ो और (**जीवसे**) जीवने के अर्थ (**नः**) हम लोगों को (**ऊर्द्ध्वान्**) उत्कृष्ट (**कर्त्त**) करो॥३॥

भावार्थः-जैसे वायु समस्त प्रजा की रक्षा करता वैसे सभापति वर्त्ते। जैसे प्रजाजनों की पीड़ा नष्ट हो, मनुष्य उत्कृष्ट अति उत्तम बहुत जीवनेवाले उत्पन्न हों, वैसा कार्य्यारम्भ सबको करना चाहिये॥३॥

इस सूक्त में पवन के तुल्य विद्वानों के गुणों की प्रशंसा होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिए॥

यह एक सौ बहत्तरवां १७२ सूक्त और बारहवां १२ वर्ग समाप्त हुआ॥

गायदित्यस्य त्रयोदशर्चस्य त्रिसप्तत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। इन्द्रो देवता। १,५,११ पङ्क्तिः। ६,९,१०,१२ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,८ विराट् त्रिष्टुप्। ३ त्रिष्टुप्। ७,१३ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ बृहती छन्दः। मध्यमः स्वरः॥

पुनर्विद्वद्गुणानाह॥

अब तेरह ऋचावाले एक सौ तेहत्तरवें सूक्त का आरम्भ है। उसमें आरम्भ से फिर विद्वानों के गुणों का वर्णन करते हैं॥

गायत्सामं नभन्यं१ यथा वेरर्चाम तद्वावृधानं स्वर्वत्।
गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान्॥ १॥

गायत्। सामं। नभन्यम्। यथा। वेः। अर्चाम। तत्। ववृधानम्। स्वः३वत्। गावः। धेनवः। बर्हिषि। अदब्धाः। आ। यत्। सद्मानम्। दिव्यम्। विवासान्॥ १॥

पदार्थः-(**गायत्**) गायेत् (**साम**) (**नभन्यम्**) नभसि साधु। अत्र वर्णव्यत्ययेन सस्य नः। (**यथा**) (**वेः**) स्वीकुर्याः (**अर्चाम**) सत्कुर्याम (**तत्**) (**ववृधानम्**) भृशं वर्द्धकम्। **तुजादीनामि**त्यभ्यासदैर्घ्यम्। (**स्वर्वत्**) स्वः सुखं सम्बद्धं यस्मिँस्तत्। अत्र सम्बन्धे मतुप्। (**गावः**) किरणा इव (**धेनवः**) दुग्धदात्र्यः (**बर्हिषि**) अन्तरिक्षे (**अदब्धाः**) हिंसितुमयोग्याः (**आ**) (**यत्**) (**सद्मानम्**) सीदन्ति यस्मिँस्तम् (**दिव्यम्**) कमनीयम् (**विवासान्**) सेवेरन्॥ १॥

अन्वयः-यत्स्वर्वद्ववृधानं नभन्यं साम विद्वान् यथा त्वं वेस्तथा गायद् बर्हिषि गाव इव याश्चादब्धा धेनवो दिव्यं सद्मानमाविवासाँस्तत्ताश्च वयमर्चाम॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा किरणा अन्तरिक्षे विस्तीर्णा भूत्वा सर्वं प्रकाशयन्ति तथाऽस्माभिर्विद्यया सर्वेषामन्तःकरणानि प्रकाशनीयानि। यथा निराधाराः पक्षिण आकाशे गच्छन्त्यागच्छन्ति तथा विदुषां भूगोलानाञ्च गतिरस्ति॥ १॥

पदार्थः-(**यत्**) जो (**स्वर्वत्**) सुख सम्बन्धी वा सुखोत्पादक (**ववृधानम्**) अत्यन्त वृद्धि को प्राप्त (**नभन्यम्**) आकाश के बीच में साधु अर्थात् गगन मण्डल में व्याप्त (**साम**) साम गान को विद्वान् आप (**यथा**) जैसे (**वेः**) स्वीकार करें वैसे (**गायत्**) गावें और (**बर्हिषि**) अन्तरिक्ष में जो (**गावः**) किरणें उनके समान जो (**अदब्धाः**) न हिंसा करने योग्य (**धेनवः**) दूध देनेवाली गौयें (**दिव्यम्**) मनोहर (**सद्मानम्**) जिसमें स्थित होते हैं, उस घर को (**आ, विवासान्**) अच्छे प्रकार सेवन करें (**तत्**) उस सामगान और उन गौओं को हम लोग (**अर्चाम**) सराहें उनका सत्कार करें॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे किरणें अन्तरिक्ष में बिखर कर सबका प्रकाश करती है, वैसे हम लोगों को विद्या से सबके अन्तःकरण प्रकाशित करने चाहिये। जैसे निराधार पक्षी आकाश में आते-जाते हैं, वैसे विद्वानों और लोक-लोकान्तरों की चाल है॥१॥

अथ प्रकृतविषये स्त्रीपुरुषयोर्गृहकृत्यदृष्टान्तेनान्यानुपदिशति॥

अब चलते हुए प्रकरण में स्त्री-पुरुष के घर में काम के दृष्टान्त से औरों को उपदेश करते हैं॥

अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात्।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः॥२॥

अर्चत्। वृषा। वृषभिः। स्वऽइदुहव्यैः। मृगः। न। अश्नः। अति। यत्। जुगुर्यात्। प्र। मन्दयुः। मनाम्। गूर्त। होता। भरते। मर्यः। मिथुना। यजत्रः॥२॥

पदार्थः-(**अर्चत्**) अर्चेत् (**वृषा**) सत्योपदेशशब्दवर्षकः (**वृषभिः**) उपदेशकैः सह (**स्वेदुहव्यैः**) स्वेन प्रकाशितदानाऽऽदानैः (**मृगः**) (**न**) इव (**अश्नः**) व्यापकः (**अति**) (**यत्**) (**जुगुर्यात्**) उद्यच्छेत् (**प्र**) (**मन्दयुः**) आत्मनो मन्दं प्रंशसनमिच्छुः (**मनाम्**) मननशीलानाम् (**गूर्त्त**) उद्यच्छत (**होता**) दाता (**भरते**) धरते (**मर्यः**) मरणधर्मा मनुष्यः (**मिथुना**) मिथुनानि स्त्रीपुरुषद्वन्द्वानि (**यजत्रः**) सङ्गन्ता॥२॥

अन्वयः-हे मनुष्या! यथा वृषा अश्नो मन्दयुर्होता यजत्रो मर्यो स्वेदुहव्यैर्वृषभिस्सह यन्मृगो नाऽति जुगुर्याद्भरते मनां सङ्गमर्चत् यथा वा मिथुना सङ्गतं व्यवहारं कुर्युस्तथा यूयं प्रगूर्त्त॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा स्वयंवृताः स्त्रीपुरुषाः परस्परमुद्योगं कृत्वा मृगवद्वेगेन गृहकृत्यानि संसाध्य विदुषां सङ्गेन सत्यं स्वीकृत्याऽसत्यं विहाय परमेश्वरं विदुषश्च सत्कुर्वन्ति तथा सर्वे मनुष्याः सङ्गन्तारः स्युः॥२॥

पदार्थः-हे मनुष्यो! जैसे (**वृषा**) सत्योपदेश शब्दों की वर्षा करनेवाला (**अश्नः**) शुभ गुणों में व्याप्त (**मन्दयुः**) अपनी प्रशंसा चाहता हुआ (**होता**) दानशील (**यजत्रः**) सङ्ग करनेवाला (**मर्यः**) मरणधर्म्मा मनुष्य (**स्वेदुहव्यैः**) आप ही प्रकाशित किये देने-लेने के व्यवहारों और (**वृषभिः**) उपदेश करनेवालों के साथ (**यत्**) जो (**मृगः**) हरिण के (**न**) समान (**अति, जुगुर्यात्**) अतीव उद्यम करे, अति यत्न करे और (**भरते**) धारण करता (**मनाम्**) विचारशीलों का सङ्ग (**अर्चत्**) सराहे प्रशंसित करे वा जैसे (**मिथुना**) स्त्री-पुरुष दो-दो मिल के सङ्ग धर्म को करें, वैसे तुम (**प्र, गूर्त्त**) उत्तम उद्यम करो॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे स्वयंवर किये हुए स्त्री-पुरुष परस्पर उद्योग कर हरिण के समान वेग से घर के कामों को सिद्ध कर विद्वानों के सङ्ग से सत्य को स्वीकार कर असत्य को छोड़कर परमेश्वर और विद्वानों का सत्कार करते हैं, वैसे समस्त मनुष्य सङ्ग करनेवाले हों॥२॥

पुनः प्रकारान्तरेणोपदेशविषयमाह॥

फिर प्रकारान्तर से उपदेश विषय को अगले मन्त्र में कहा है॥

नक्षद्धोता परि सद्म मिता यन्भरन्नर्भमा शरदः पृथिव्याः।
क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक्॥ ३॥

नक्षत्। होता। परि। सद्म। मिता। यन्। भरत्। गर्भम्। आ। शरदः। पृथिव्याः। क्रन्दत्। अश्वः। नयमानः। रुवत्। गौः। अन्तः। दूतः। न। रोदसी इति। चरत्। वाक्॥ ३॥

पदार्थः-(**नक्षत्**) प्राप्नुयात् (**होता**) ग्रहीता (**परि**) सर्वतः (**सद्म**) सद्मानि स्थानानि (**मिता**) मितानि (**यन्**) गच्छेयुः। अत्राडभावः। (**भरत्**) भरेत् (**गर्भम्**) (**आ**) (**शरदः**) (**पृथिव्याः**) भूमेः (**क्रन्दत्**) ह्वयति (**अश्वः**) तुरङ्ग इव (**नयमानः**) (**रुवत्**) शब्दायते (**गौः**) वृषभ इव (**अन्तः**) मध्ये (**दूतः**) समाचारप्रापकः (**न**) इव (**रोदसी**) द्यावापृथिव्यौ (**चरत्**) प्राप्नोति (**वाक्**) वाणी॥ ३॥

अन्वयः-हे मनुष्या! यथा होताग्निर्मिता सद्म नक्षच्छरदः पृथिव्या गर्भमाभरत् नयमानोऽश्व इव क्रन्दत्। गौरिव रुवद् दूतो न वागिव वा रोदसी अन्तश्चरत्तथा भवन्तः परियन्॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथाऽश्वो गावश्च परिमितं मार्गं गच्छन्ति तथाऽग्निर्नियतं देशं गच्छति यथा धार्मिकाः स्वकीयं वस्तु गृह्णन्ति तथा ऋतवः स्वलिङ्गान्याप्नुवन्ति यथा द्यावापृथिव्यौ सहैव वर्त्तेते तथा विवाहितौ स्त्रीपुरुषौ वर्त्तेयाताम्॥ ३॥

पदार्थः-हे मनुष्यो! जैसे (**होता**) ग्रहण करनेवाला (**मिता**) प्रमाणयुक्त (**सद्म**) घरों को (**नक्षत्**) प्राप्त होवे वा (**शरदः**) शरद् ऋतु सम्बन्धी (**पृथिव्याः**) पृथिवी के (**गर्भम्**) गर्भ को (**आ, भरत्**) पूरा करता वा (**नयमानः**) पदार्थों को पहुँचाता हुआ (**अश्वः**) घोड़े के समान (**क्रन्दत्**) शब्द करता वा (**गौः**) वृषभः के समान (**रुवत्**) शब्द करता वा (**दूतः**) समाचार पहुँचानेवाले दूत के (**न**) समान वा (**वाक्**) वाणी के समान (**रोदसी**) आकाश और पृथिवी के (**अन्तः**) बीच (**चरत्**) विचरता वैसे आप लोग (**परि, यनु**) पर्यटन करें॥ ३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे घोड़ा और गौयें परिमित मार्ग को जाती हैं, वैसे अग्नि नियत किये हुए देशस्थान को जाता है। जैसे धार्मिक जन अपने पदार्थ लेते हैं, वैसे ऋतु अपने चिह्नों को प्राप्त होते हैं, वा जैसे द्यावापृथिवी एक साथ वर्त्तमान हैं वैसे विवाह किये हुए स्त्री-पुरुष वर्त्तें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते।

जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः॥४॥

ता। कर्म। अषऽतरा। अस्मै। प्र। च्यौत्नानि। देवऽयन्तः। भरन्ते। जुजोषत्। इन्द्रः। दस्मऽवर्चाः। नासत्याऽइव। सुग्म्यः। रथेऽस्थाः॥४॥

पदार्थः-(**ता**) तानि (**कर्म**) कर्म्म। अत्र लुङि च्लेर्लुक् **छन्दस्युभयथे**त्यार्द्धधातुकत्वेन डित्त्वाभावादुणः। (**अषतरा**) प्राप्ततराणि। अत्र ऋष धातो रेफस्य लोपः। (**अस्मै**) (**प्र**) प्रकर्षे (**च्यौत्नानि**) स्तोत्राणि (**देवयन्तः**) आत्मनो देवान् विदुष इच्छन्तः (**भरन्ते**) दधति (**जुजोषत्**) जुषेत (**इन्द्रः**) ऐश्वर्यमिच्छुः (**दस्मवर्चाः**) दस्मेषु शत्रुषु वर्चस्तेजः प्रागल्भ्यं यस्य सः (**नासत्येव**) सूर्याचन्द्रमसाविव (**सुग्म्यः**) सुगेषु सुखाधिकरणेषु साधुः (**रथेष्ठाः**) यो रथे तिष्ठति सः॥४॥

अन्वयः-हे मनुष्या! यथा देवयन्तोऽस्मै याऽषतरा च्यौत्नानि प्र भरन्ते ता दस्मवर्चाः सुग्म्यो रथेष्ठा इन्द्रो नासत्येव ता जुजोषत्तथा वयं कर्म॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये सूर्याचन्द्रवच्छुभगुणकर्मस्वभावैः प्रकाशिता आप्तवदाचरन्ति ते किं किं सुखन्नाप्नुवन्ति॥४॥

पदार्थः-हे मनुष्यो! जैसे (**देवयन्तः**) अपने को विद्वानों की इच्छा करनेवाले सज्जन (**अस्मै**) जिन (**अषतरा**) अतीव प्राप्त पदार्थों और (**च्यौत्नानि**) इस आगे कहने योग्य ऐश्वर्य चाहनेवाले सभापति आदि के लिये स्तुतियों को (**प्र, भरन्ते**) उत्तमता से धारण करते हैं (**ता**) उनको (**दस्मवर्चाः**) शत्रुओं में जिसका पराक्रम वर्त रहा है, वह (**सुग्म्यः**) सुख साधन पदार्थों में उत्तम (**रथेष्ठाः**) रथ में बैठनेवाला (**इन्द्रः**) ऐश्वर्य चाहता हुआ (**नासत्येव**) सूर्य और चन्द्रमा के समान (**जुजोषत्**) सेवे, वैसे हम लोग (**कर्म**) करें॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सूर्य-चन्द्रमा के समान शुभ गुण, कर्म, स्वभावों से प्रकाशित, आप्त शास्त्रज्ञ धर्मात्माओं के तुल्य आचरण करते हैं, वे क्या-क्या सुख नहीं पाते हैं॥४॥

अथ सदसद्विवेचनपरं विद्वद्विषयमाह॥

अब भले-बुरे के विवेक करने पर जो विद्वानों का विषय उसका अगले मन्त्र में उपदेश किया है॥

तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः।
प्रतीचश्चिद्योधीयान्वृषण्वान् ववव्रुषश्चित्तमसो विहन्ता॥५॥१३॥

तम्। ऊम् इति। स्तुहि। इन्द्रम्। यः। ह। सत्वा। यः। शूरः। मघऽवा। यः। रथेऽस्थाः। प्रतीचः। चित्। योधीयान्। वृषण्ऽवान्। ववव्रुषः। चित्। तमसः। विऽहन्ता॥५॥

पदार्थः-(**तम्**) (उ) वितर्के (**स्तुहि**) प्रशंस (**इन्द्रम्**) परमैश्वर्यवन्तं सेनेशम् (**यः**) (**ह**) किल (**सत्वा**) बलिष्ठः (**यः**) (**शूरः**) निर्भयः (**मघवा**) परमपूजितधनयुक्तः (**यः**) (**रथेष्ठाः**) रथे तिष्ठति (**प्रतीचः**) यत् प्रत्यगञ्चति तस्य (**चित्**) अपि (**योधीयान्**) अतिशयेन योद्धा (**वृषण्वान्**) बलवान् (**ववव्रुषः**) रूपवतः। अत्र **वव्रिरिति रूपनाम** धातोर्लिटः क्वसुः। (**चित्**) अपि (**तमसः**) अन्धकारस्य (**विहन्ता**) विशेषेण नाशकः॥५॥

अन्वयः-हे विद्वँस्त्वं यः सत्वा यश्चिच्छूरो मघवा यश्चिद्रथेष्ठा योधीयान् वृषण्वान् प्रतीचो ववव्रुषस्तमसो विहन्ता सूर्य इवाऽस्ति तमु हेन्द्रं स्तुहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैस्तस्यैव स्तुतिः कार्या यः प्रशंसितानि कर्माणि कुर्यात्। तस्यैव निन्दा कार्या यो निन्द्यानि कर्माण्याचरेत् सैव स्तुतिर्यत्सत्यभाषणं सैव निन्दा यन्मिथ्याप्रलपनम्॥

पदार्थः-हे विद्वान्! आप (**यः**) जो (**सत्वा**) बलवान् (**यः, चित्**) और जो (**शूरः**) शूर (**मघवा**) परमपूजित धनयुक्त (**यः, चित्**) और जो (**रथेष्ठाः**) रथ में स्थित होनेवाला (**योधीयान्**) अत्यन्त युद्धशील (**वृषण्वान्**) बलवान् (**प्रतीचः**) प्रति पदार्थ प्राप्त होनेवाले (**ववव्रुषः**) रूपयुक्त (**तमसः**) अन्धकार का (**विहन्ता**) विनाश करनेवाले सूर्य के समान है (**तम्, उ, ह**) उसी (**इन्द्रम्**) परमैश्वर्यवान् सेनापति की (**स्तुहि**) प्रशंसा करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि उसी की स्तुति करें जो प्रशंसित कर्म करे और उसी की निन्दा करें जो निन्दित कर्मों का आचरण करे। वही स्तुति है जो सत्य कहना और वही निन्दा है, जो किसी के विषय में झूठ बकना है॥५॥

अथ प्रकृतविषये लोकलोकान्तरविषयमाह॥

अब इस प्रकृत विद्वद्विषय में लोकलोकान्तर विज्ञान विषय को अगले मन्त्र में कहा है॥

प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३ नास्मै।
सं विव्य इन्द्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम्॥६॥

प्र। यत्। इत्था। महिना। नृऽभ्यः। अस्ति। अरम्। रोदसी इति। कक्ष्ये३ इति। न। अस्मै। सम्। विव्ये। इन्द्रः। वृजनम्। न। भूम। भर्ति। स्वधाऽवान्। ओपशम्ऽइव। द्याम्॥६॥

पदार्थः-(**प्र**) (**यत्**) (**इत्था**) अस्माद्धेतोः (**महिना**) महिम्ना निजमहत्त्वेन (**नृभ्यः**) नायकेभ्यः (**अस्ति**) (**अरम्**) अलम् (**रोदसी**) द्यावापृथिव्यौ (**कक्ष्ये**) कक्षासु भवे (**न**) निषेधे (**अस्मै**) (**सम्**) (**विव्ये**) संवृणोति (**इन्द्रः**) सूर्यः (**वृजनम्**) बलम् (**न**) इव (**भूम**) भूमानि वस्तूनि। अत्रा**न्येषामपी**ति

दीर्घः। **(भर्त्ति)** बिभर्ति। अत्र **बहुलं छन्दीसी**ति शपो लुक्। **(स्वधावान्)** अन्नवान् **(ओपशमिव)** अत्यन्तं सम्बद्धम् **(द्याम्)** प्रकाशम्॥६॥

अन्वयः-यद्य इन्द्रो वृजनं न भूम संविव्ये स्वधावानोपशमिव द्यां प्रभर्ति अस्मै कक्ष्ये रोदसी नारं पर्यास इत्था महिना नृभ्योऽरमस्ति॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा प्रकाशरहिताः पृथिव्यादयः पदार्थाः सर्वमावृण्वन्ति तथा सूर्यः स्वप्रकाशेन सर्वमाच्छादयति यथा भौमान् पदार्थान् पृथिवी धरतीत्थमेव सूर्यो भूगोलान् बिभर्ति॥६॥

पदार्थः-**(यत्)** जो **(इन्द्रः)** सूर्य **(वृजनम्)** बल के **(न)** समान **(भूम)** बहुत पदार्थों को **(सम्, विव्ये)** अच्छे प्रकार स्वीकार करता और **(स्वधावान्)** अन्नादि पदार्थवाला यह सूर्यमण्डल **(ओपशमिव)** अत्यन्त एक में मिले हुए पदार्थ के समान **(द्याम्)** प्रकाश को **(प्र, भर्ति)** धारण करता **(अस्मै)** इसके लिये **(कक्ष्ये)** अपनी-अपनी कक्षाओं में प्रसिद्ध हुए **(रोदसी)** द्युलोक और पृथिवी लोक **(न)** नहीं **(अरम्)** परिपूर्ण होते वह **(इत्था)** इस प्रकार **(महिना)** अपनी महिमा से **(नृभ्यः)** अग्रगामी मनुष्यों के लिए परिपूर्ण **(अरमस्ति)** समर्थ है॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे प्रकाशरहित पृथिवी आदि पदार्थ सबका आच्छादन करते हैं, वैसे सूर्य अपने प्रकाश से सबका आच्छादन करता है। जैसे भूमिज पदार्थों को पृथिवी धारण करती है, ऐसे ही सूर्य भूगोलों को धारण करता है॥६॥

अथ प्रकृतविषये राज्यप्राप्तिसाधनमाह॥

अब विद्वद्विषय में राज्यप्राप्ति का साधन विषय अगले मन्त्र में कहा है॥

स॒मत्सु॑ त्वा शूर स॒तामु॑रा॒णं प्र॑प॒थिन्त॑मं परि॒तंस॒यध्यै॑।
स॒जोष॑स॒ इन्द्रं॒ मदे॑ क्षो॒णीः सू॒रिं चि॒द्ये अ॑नु॒मद॑न्ति॒ वाजै॑:॥७॥

स॒मत्ऽसु॑। त्वा॒। शू॒र॒। स॒ताम्। उ॒रा॒णम्। प्र॒प॒थिन्ऽत॑मम्। प॒रि॒ऽतं॒स॒यध्यै॑। स॒ऽजोष॑सः। इन्द्र॑म्। मदे॑। क्षो॒णीः। सू॒रिम्। चि॒त्। ये। अ॒नु॒ऽमद॑न्ति। वाजै॑:॥७॥

पदार्थः-**(समत्सु)** सङ्ग्रामेषु **(त्वा)** त्वाम् **(शूर)** दुष्टहिंसक **(सताम्)** सत्पुरुषाणाम् **(उराणम्)** बहुबलं कुर्वन्तम् **(प्रपथिन्तमम्)** अतिशयेन प्रकृष्टपथगामिनम् **(परितंसयध्यै)** परितः सर्वतस्तंसयितुं भूषयितुम् **(सजोषसः)** समानप्रीतिसेवनाः **(इन्द्रम्)** सेनेशम् **(मदे)** हर्षाय **(क्षोणीः)** भूमीः **(सूरिम्)** विद्वांसम् **(चित्)** इव **(ये)** **(अनु मदन्ति)** **(वाजैः)** वेगादिगुणयुक्तैर्वीरैरश्वैर्वा॥७॥

अन्वयः-हे शूर! ये सजोषसः समत्सु परितंसयध्यै सतामुराणं प्रपथिन्तममिन्द्रं त्वा मदे क्षोणीः सूरिं चिदिव वाजैरनुमदन्ति ताँस्त्वमप्यनुमन्दय॥७॥

भावार्थः–त एव निर्वैरा ये स्वात्मतुल्यानन्यान् प्राणिनो जानन्ति तेषामेव राज्यं वर्द्धते ये सत्पुरुषाणामेव सङ्गं प्रतिदिनं कुर्वन्ति॥७॥

पदार्थः–हे **(शूर)** दुष्टों की हिंसा करनेवाले सेनाधीश! **(ये)** जो **(सजोषसः)** समान प्रीति सेवनेवाले **(समत्सु)** सङ्ग्रामों में **(परितंसयध्यै)** सब ओर से भूषित करने के लिए **(सताम्)** सत्पुरुषों में **(उराणम्)** अधिक बल करते हुए **(प्रपथिन्तमम्)** आवश्यकता से उत्तम पथगामी **(इन्द्रम्)** सेनापति **(त्वा)** तुमको **(मदे)** हर्ष आनन्द के लिये **(क्षोणीः)** भूमियों को **(सूरिम्)** विद्वान् के **(चित्)** समान **(वाजैः)** वेगादि गुणयुक्त वीर वा अश्वादिकों के साथ **(अनु, मदन्ति)** अनुमोद आनन्द देते हैं, उनको तू भी आनन्दित कर॥७॥

भावार्थः–वे ही निर्वैर हैं, जो अपने समान और प्राणियों को जानते हैं। उन्हीं का राज्य बढ़ता है, जो सत्पुरुषों का ही प्रतिदिन सङ्ग करते हैं॥७॥

पुनर्विद्वदुपदेशेन राजविषयमाह॥

फिर विद्वानों के उपदेश से राजविषय को अगले मन्त्र में कहा है॥

एवा हि ते शं सवना समुद्र आपो यत्ता आसु मदन्ति देवीः।
विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान्॥८॥

एव। हि। ते। शम्। सवना। समुद्रे। आपः। यत्। ते। आसु। मदन्ति। देवीः। विश्वा। ते। अनु। जोष्या। भूत्। गौः। सूरीन्। चित्। यदि। धिषा। वेषि। जनान्॥८॥

पदार्थः–**(एव)** अवधारणे। अत्र **निपातस्य चे**ति दीर्घः। **(हि)** खलु **(ते)** तव **(शम्)** सुखम् **(सवना)** ऐश्वर्य्याणि **(समुद्रे)** अन्तरिक्षे **(आपः)** जलानि **(यत्)** यदा **(ते)** तव **(आसु)** अप्सु **(मदन्ति)** **(देवीः)** दिव्यगुणसम्पन्नाः **(विश्वा)** सर्वा **(ते)** तव **(अनु)** **(जोष्या)** सेवितुं योग्या **(भूत्)** भवति। अत्राडभावः। **(गौः)** विद्यासुशिक्षिता वाणी **(सूरीन्)** विदुषः **(चित्)** **(यदि)** **(धिषा)** प्रज्ञया **(वेषि)** कामयसे **(जनान्)** उत्तमान् मनुष्यान्॥८॥

अन्वयः–हे इन्द्र सभेश! समुद्र आप इव ते हि सवनाच्छमेव कुर्वन्ति ते देवीर्यदासु मदन्ति त्वं च यदि धिषा सूरींश्चिज्जनान् वेषि तदा ते विश्वा गौरनुज्जोष्याभूत॥८॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य आकाशे मेघमुन्नीय सर्वान् सुखयति तथा सत्पुरुषस्यैश्वर्य्यं वर्द्धमानं सत्सकलानानदयति यथा पुरुषा विद्वांसो भवेयुस्तथैव स्त्रियोऽपि स्युः॥८॥

पदार्थः–हे सभापति! **(समुद्रे)** अन्तरिक्ष में **(आपः)** जलों के समान **(ते)** आपके **(हि)** ही **(सवना)** ऐश्वर्य **(शम्)** सुख **(एव)** ही करते हैं वा **(ते)** आपकी **(देवीः)** दिव्य गुण सम्पन्न विदुषी **(यत्)** जब **(आसु)** इन जलों में **(मदन्ति)** हर्षित होती हैं और आप **(यदि)** जो **(धिषा)** उत्तम बुद्धि से **(सूरीन्)**

विद्वान् (**चित्**) मात्र (**जनान्**) जनों को (**वेषि**) चाहते हो तब (**ते**) आपकी (**विश्वा**) समस्त (**गौः**) विद्या सुशिक्षायुक्त वाणी (**अनु, जोष्या**) अनुकूलता से सेवने योग्य (**भूत्**) होती है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य आकाश में मेघ की उन्नति कर सबको सुखी करता है, वैसे सज्जन पुरुष का बढ़ता हुआ ऐश्वर्य सबको आनन्दित करता है, जैसे पुरुष विद्वान् हों, वैसे स्त्री भी हों॥८॥

अथ मित्रपरत्वेन विद्वद्विषयमाह॥

अब मित्रपरत्व से विद्वानों के विषय को अगले मन्त्र में कहा है॥

असा॑म॒ यथा॑ सु॒षखाय॑ एन स्वभि॒ष्टयो॑ न॒रां न शंसै॑:।
अस॒द्यथा॑ न॒ इन्द्रो॑ वन्दने॒ष्ठास्तु॒रो न कर्म॒ नय॑मान उ॒क्था॥९॥

असा॑म। यथा॑। सु॒ऽस॒खाय॑:। एन॒। सु॒ऽअ॒भि॒ष्टय॑:। न॒राम्। न। शंसै॑:। अस॑त्। यथा॑। न॒:। इन्द्र॑:। व॒न्दु॒ने॒ऽस्था:। तु॒र:। न। कर्म॑। नय॑मान:। उ॒क्था॥९॥

पदार्थः-(**असाम**) भवेम (**यथा**) (**सुसखायः**) शोभनाः सखायो येषान्ते (**एन**) एति पुरुषार्थेन सुखानि यस्तत्सम्बुद्धौ (**स्वभिष्टयः**) शोभना अभिष्टयोऽभिप्राया येषान्ते (**नराम्**) नायकानाम् (**न**) इव (**शंसैः**) प्रशंसाभिः (**असत्**) भवेत् (**यथा**) (**नः**) अस्मान् (**इन्द्रः**) परमैश्वर्ययुक्तो मित्रः (**वन्दनेष्ठाः**) स्तवने तिष्ठति यः (**तुरः**) शीघ्रकारी (**न**) इव (**कर्म**) धर्म्यं कृत्यम् (**नयमानः**) प्राप्नुवन् प्रापयन् वा (**उक्था**) प्रशस्तानि विज्ञानानि॥९॥

अन्वयः-हे एन विद्वन्! यथा स्वभिष्टयः सुसखायो वयं नरां शंसैर्नोत्तमगुणैस्त्वां प्राप्ता असाम यथा वा वन्दनेष्ठाः तुर इन्द्रः कर्म नेव नोऽस्माकमुक्था नयमानोऽसत् तथा वयमाचरेम॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये सर्वेषु प्राणिषु सुहृद्भावेन वर्त्तन्ते ते सर्वैरभिवन्दनीयाः स्युः। ये सर्वान् सुबोधन्नयन्ति ते अत्युत्तमविद्या भवन्ति॥९॥

पदार्थः-हे (**एन**) पुरुषार्थ के सुखों को प्राप्त होते हुए विद्वान्! (**यथा**) जैसे (**स्वभिष्टयः**) सुन्दर अभिप्राय और (**सुसखायः**) उत्तम मित्र जिनके वे हम लोग (**नराम्**) अग्रगामी प्रशंसित पुरुषों की (**शंसैः**) प्रशंसाओं के (**न**) समान उत्तम गुणों से आपको प्राप्त (**असाम**) होवें वा (**यथा**) जैसे (**वन्दनेष्ठाः**) स्तुति में स्थिर होता हुआ (**तुरः**) शीघ्रकारी (**इन्द्रः**) परमैश्वर्ययुक्त मित्र (**कर्म**) धर्मयुक्त कर्म के (**न**) समान (**नः**) हमारे (**उक्था**) प्रशंसायुक्त विद्वानों को (**नयमानः**) प्राप्त करता वा कराता हुआ (**असत्**) हो, वैसा आचरण हम लोग करें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सब प्राणियों में मित्रभाव से वर्त्तमान हैं वे सबको अभिवादन करने योग्य हों, जो सबको उत्तम बोध को प्राप्त करते हैं, वे अतीव उत्तम विद्यावाले होते हैं॥९॥

अथ राजशासनपरं विद्वद्विषयमाह॥

अब राजशिक्षा पर विद्वानों के विषय को अगले मन्त्र में कहा है॥

विष्पर्धसो नरां न शंसैरस्माकासदिन्द्रो वज्रहस्तः।
मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षन्ति यज्ञैः॥ १०॥ १४॥

विऽस्पर्धसः। नराम्। न। शंसैः। अस्माक। असत्। इन्द्रः। वज्रऽहस्तः। मित्रऽयुवः। न। पूःऽपतिम्। सुऽशिष्टौ। मध्यऽयुवः। उप। शिक्षन्ति। यज्ञैः॥ १०॥

पदार्थः-(**विष्पर्द्धसः**) परस्परं विशेषतः स्पर्द्धमानाः (**नराम्**) धर्मस्य नेतॄणाम् (**न**) इव (**शंसैः**) प्रशंसायुक्तैः (**अस्माक**) अस्माकम्। अत्र **छान्दसो वर्णलोपो वे**ति मलोपः। (**असत्**) भवेत् (**इन्द्रः**) सभेशः (**वज्रहस्तः**) शस्त्रास्त्रशासनपाणिः (**मित्रायुवः**) य आत्मनो मित्राणीच्छवः (**न**) इव (**पूर्पतिम्**) पुरां पालकम् (**सुशिष्टौ**) शोभने शासने (**मध्यायुवः**) य आत्मनो मध्यं मध्यस्थमिच्छवो विद्वांसः (**उप**) (**शिक्षन्ति**) शिक्षां प्रददति (**यज्ञैः**) अध्यापनाऽध्ययनोपदेशसङ्गतिकरणैः॥१०॥

अन्वयः-वज्रहस्त इन्द्रोऽस्माकासदिति नरां शंसैर्न वादानुवादैः परस्परं विस्पर्द्धसो मित्रायुवो न मध्यायुवो जनाः सुशिष्टौ यज्ञैः पूर्पतिमुपशिक्षन्तिः॥१०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा सत्याचरणस्पर्द्धिनः सर्वेषां सुहृदः पक्षपातविरहाः सत्यमाचरन्तो जनाः सत्यमुपदिशन्ति, तथैव सभेशो राजा प्रजासु वर्त्तेत॥१०॥

पदार्थः-(**वज्रहस्तः**) शस्त्र और अस्त्रों की शिक्षा जिसके हाथ में है, वह (**इन्द्रः**) सभापति (**अस्माक**) हमारा (**असत्**) हो अर्थात् हमारा रक्षक हो ऐसी (**नराम्**) धर्म की प्राप्ति करानेवाले पुरुषों की (**शंसैः**) प्रशंसायुक्त विवादों के (**न**) समान वादानुवादों से (**विष्पर्द्धसः**) परस्पर विशेषता से स्पर्द्धा ईर्ष्या करते और (**मित्रायुवः**) अपने को मित्र चाहते हुए जनों के (**न**) समान (**मध्यायुवः**) मध्यस्थ चाहते हुए विद्वान् जन (**सुशिष्टौ**) उत्तम शिक्षा के निमित्त (**यज्ञैः**) पढ़ना-पढ़ाना, उपदेश करना और सङ्ग मेल-मिलाप करना इत्यादि कर्मों से (**पूर्पतिम्**) पुरी नगरियों के पालनेवाले सभापति राजा को (**उप, शिक्षन्ति**) उपशिक्षा देते हैं अर्थात् उसके समीप जाकर उसे अच्छे-बुरे का भेद सिखाते हैं॥१०॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे सत्याचरण में स्पर्द्धा करनेवाले सब के मित्र पक्षपातरहित सत्य का आचरण करते हुए जन सत्य का उपदेश करते हैं, वैसे ही सभापति राजा प्रजाजनों में वर्त्तें॥१०॥

पूर्वोक्तं विषयमाह॥

पूर्वोक्त विषय को विशद करते हुए अगले मन्त्र में कहा है॥

यज्ञो हि ष्मेन्द्रं कश्चिदृन्धञ्जुहुराणश्चिन्मनसा परियन्।
तीर्थे नाच्छा ततृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा॥ ११॥

यज्ञः। हि। स्म। इन्द्रम्। कः। चित्। ऋन्धन्। जुहुराणः। चित्। मनसा। परियन्। तीर्थे। न। अच्छ। ततृषाणम्। ओकः। दीर्घः। न। सिध्रम्। आ। कृणोति। अध्वा॥ ११॥

पदार्थः-(**यज्ञः**) राजधर्माख्यः (**हि**) (**स्म**) एव (**इन्द्रम्**) (**कः**) (**चित्**) अपि (**ऋन्धन्**) वर्द्धमानः सन् (**जुहुराणः**) दुष्टेषु कुटिलः (**चित्**) इव (**मनसा**) (**परियन्**) परितः सर्वतः प्राप्नुवन् (**तीर्थे**) जलाशये (**न**) इव (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**ततृषाणम्**) भृशं तृषितम् (**ओकः**) गृहम् (**दीर्घः**) बृहत् (**न**) इव (**सिध्रम्**) शीघ्रताम् (**आ**) (**कृणोति**) करोति (**अध्वा**) सन्मार्गरूपः॥ ११॥

अन्वयः-कश्चिद्यज्ञो हि ष्मेद्रमृन्धन्मनसा जुहुराणश्चित्परियँस्तीर्थे न स्थानेऽच्छ ततृषाणं दीर्घ ओको नाध्वरूपः सिध्रमा कृणोति॥ ११॥

भावार्थः-पूर्वमन्त्रे शीघ्रतररक्षाभिकाङ्क्षिणो विपश्चितः शासनादियज्ञैः पूर्पतिं राजानमुपशिक्षन्तीति यदुक्तम् तत्र यज्ञतः शीघ्रभावमुपदिशन्नाह। (**यज्ञो हीति**) अत्रोपमावाचकलुप्तोपमालङ्कारौ-यदि सुखं वर्द्धयितुमिच्छेयुस्तर्हि सर्वे धर्ममाचरन्तु यदि परोपकारं कर्त्तुमिच्छेयुस्तर्हि सत्यमुपदिशन्तु॥ ११॥

पदार्थः-(**कश्चित्**) कोई (**यज्ञः**) राजधर्म (**हि, ष्म**) निश्चय से ही (**इन्द्रम्**) सभापति को (**ऋन्धन्**) उन्नति देता वा (**मनसा**) विचार के साथ (**जुहुराणः**) दुष्टजनों में कुटिल क्रिया अर्थात् कुटिलता से वर्त्ता (**चित्**) सो (**परियन्**) सब ओर से प्राप्त होता हुआ (**तीर्थे**) जलाशय के (**न**) समान स्थान में (**अच्छा**) अच्छे (**ततृषाणम्**) निरन्तर पियासे को (**दीर्घः**) बड़ा (**ओकः**) स्थान जैसे मिले (**न**) वैसे (**अध्वा**) सन्मार्गरूप हुआ (**सिध्रम्**) शीघ्रता को (**आ, कृणोति**) अच्छे प्रकार करता है॥ ११॥

भावार्थः-पूर्व मन्त्र में अति शीघ्रता से रक्षा चाहते हुए विद्वान् बुद्धिमान् जन शिक्षा करना रूप आदि यज्ञों से अपनी पुरी नगरी के पालनेवाले राजा को समीप जाकर शिक्षा देते हैं, यह को विषय कहा था, वहाँ यज्ञ से शीघ्रता का उपदेश करते हुए (**यज्ञो हि०**) इस मन्त्र का उपदेश करते हैं। इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सुख के बढ़ाने की इच्छा करें तो सब धर्म का आचरण करें और जो परोपकार करने की इच्छा करें तो सत्य का उपदेश करें॥ ११॥

अथ साधारणजनेषु बलादिविषये विद्वद्भुपदेशमाह॥

अब साधारण जनों में बलादि विषय में विद्वानों का उपदेश किया है॥

मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः।

म॒हश्चि॒द्यस्य॑ मी॒ळ्हुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वन्द॑ते॒ गीः॥ १२॥

मो इति॑। सु। न॒:। इ॒न्द्र॒। अत्र॑। पृ॒त्ऽसु। दे॒वैः। अस्ति॑। हि। स्म॒। ते॒। शु॒ष्मि॒न्। अ॒व॒ऽया:। म॒ह:। चि॒त्। यस्य॑। मी॒ळ्हुष॑:। य॒व्या। ह॒विष्म॑त:। मरुत॑:। वन्द॑ते। गी:॥ १२॥

पदार्थः-(**मो**) निषेधे (**सु**) (**नः**) अस्माकम् (**इन्द्र**) विद्यैश्वर्यप्रापक (**अत्र**) आसु (**पृत्सु**) सङ्ग्रामेषु (**देवैः**) विद्वद्भिर्वीरैस्सह (**अस्ति**) (**हि**) यतः (**स्म**) एव (**ते**) (**शुष्मिन्**) बलिष्ठ (**अवयाः**) योऽवयजति विरुद्धं कर्म न सङ्गच्छते सः (**महः**) महतः (**चित्**) अपि (**यस्य**) (**मीढुषः**) (**यव्या**) नदीव। **यव्येति नदीनामसु पठितम्।** (निघं०१.१३) (**हविष्मतः**) बहुविद्यादानसम्बन्धिनः (**मरुतः**) विदुषः (**वन्दते**) (**गीः**) सत्यगुणाढ्या वाणीः॥१२॥

अन्वयः-हे इन्द्र! भवानत्र देवैर्नोऽस्माकं पृत्सु सहायकारी हि स्वस्ति ष्म। हे शुष्मिन्नवयाः संस्त्वं यस्य ते मीढुषो हविष्मतो महर्मरुतो यव्या गीर्वन्दते चिदिव वर्त्तते स त्वमस्मान् मो हिन्धि॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यो बलं प्राप्नुयात् स सज्जनेषु शत्रुवन्न वर्त्तेत, सदाप्तस्योपदेशमङ्गीकुर्यान्नेतरस्य॥१२॥

पदार्थः-हे (**इन्द्र**) विद्या और ऐश्वर्य की प्राप्ति करनेवाले विद्वान्! आप (**अत्र**) यहाँ (**देवैः**) विद्वान् वीरों के साथ (**नः**) हम लोगों के (**पृत्सु**) संग्रामों में (**ही**) जिस कारण (**सु, अस्ति**) अच्छे प्रकार सहायकारी हैं (**स्म**) ही और हे (**शुष्मिन्**) अत्यन्त बलवान्! (**अवयाः**) जो विरुद्ध कर्म को नहीं प्राप्त होता ऐसे होते हुए आप (**यस्य**) जिन (**मीढुषः**) सींचनेवाले (**हविष्मतः**) बहुत विद्यादान सम्बन्धी (**महः**) बड़े (**ते**) आप (**मरुतः**) विद्वान् की (**यव्या**) नदी के समान (**गीः**) सत्य गुणों से युक्त वाणी (**वन्दते**) स्तुति करती अर्थात् सब पदार्थों की प्रशंसा करती (**चित्**) सी वर्त्तमान है, वे आप हम लोगों को (**मो**) मत मारिये॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो बल को प्राप्त हो, वह सज्जनों में शत्रु के समान न वर्ते। सदा आप्त शास्त्रज्ञ धर्मात्मा जनों के उपदेश को स्वीकार करे, इतर अधर्मात्मा के उपदेश को न स्वीकार करे॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ए॒षः स्तोम॑ इन्द्र तुभ्य॑म॒स्मे ए॒तेन॑ गा॒तुं ह॑रिवो विदो नः।
आ नो॑ ववृत्याः सुवि॒ताय॑ देव वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम्॥ १३॥ १५॥

ए॒षः। स्तोम॑:। इ॒न्द्र॒। तुभ्य॑म्। अ॒स्मे इति॑। ए॒तेन॑। गा॒तुम्। ह॒रि॒ऽव॒:। वि॒द॒:। न॒:। आ। न॒:। व॒वृ॒त्या॒:। सु॒वि॒ताय॑। दे॒व॒। वि॒द्याम। इ॒षम्। वृ॒जन॑म्। जी॒रऽदा॑नुम्॥ १३॥

पदार्थः-(**एषः**) (**स्तोमः**) श्लाघा (**इन्द्र**) प्रशस्तैश्वर्य (**तुभ्यम्**) (**अस्मे**) अस्माकम् (**एतेन**) न्यायेन (**गातुम्**) भूमिम् (**हरिवः**) प्रशस्ता हरयोऽश्वा विद्यन्ते यस्य तत्सम्बुद्धौ (**विदः**) लभस्व (**नः**) अस्मान् (**आ**) (**नः**) अस्माकम् (**ववृत्याः**) वर्त्तेथाः (**सुविताय**) ऐश्वर्याय (**देव**) सुखप्रद (**विद्याम**) प्राप्नुयाम (**इषम्**) इच्छासिद्धिम् (**वृजनम्**) सन्मार्गम् (**जीरदानुम्**) दीर्घञ्जीवनम्॥१३॥

अन्वयः-हे देवेन्द्र! य एषोऽस्मे स्तोमोऽस्ति स तुभ्यमस्तु। हे हरिवो! त्वमेतेन गातुं नोऽस्माँश्च विदः नः सुविताय आ ववृत्या यतो वयमिषं वृजनं जीरदानुं च विद्याम॥१३॥

भावार्थः-केनचिद्भद्रेण जनेन स्वमुखेन स्वप्रशंसा नैव कार्य्या परोक्तां स्वप्रशंसां श्रुत्वा न प्रमुदितव्यम्। यथा स्वोन्नतिर्ऋष्येत तथा परोन्नतिः सदैष्टव्येति॥१३॥

अत्र विद्वद्विषयवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिसप्तत्युत्तरं शततमं १७३ सूक्त पञ्चदशो १५ वर्गश्च समाप्तः॥

पदार्थः-हे (**देव**) सुख देनेवाले (**इन्द्र**) प्रशंसायुक्त ऐश्वर्यवान्! जो (**एषः**) यह (**अस्मे**) हमारी (**स्तोमः**) स्तुतिपूर्वक चाहना है वह (**तुभ्यम्**) तुम्हारे लिये हो। हे (**हरिवः**) प्रशंसित घोड़ोंवाले! आप (**एतेन**) इस न्याय से (**गातुम्**) भूमि और (**नः**) हम लोगों को (**विदः**) प्राप्त हूजिये (**नः**) हमारे (**सुविताय**) ऐश्वर्य के लिये (**आ, ववृत्याः**) आ वर्त्तमान हूजिये, जिससे हम लोग (**इषम्**) इच्छा सिद्धि (**वृजनम्**) सन्मार्ग और (**जीरदानुम्**) दीर्घ जीवन को (**विद्याम**) प्राप्त होवें॥१३॥

भावार्थः-किसी भद्रजन को अपने मुख से अपनी प्रशंसा नहीं करनी चाहिए तथा और ने कही हुई अपनी प्रशंसा सुनकर न आनन्दित होना चाहिये अर्थात् न हंसना चाहिये जैसे अपने से अपनी उन्नति चाही जावे, वैसे औरों की उन्नति सदैव चाहनी चाहिये॥१३॥

इस सूक्त में विद्वानों के विषय का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिए॥

यह एक सौ तिहत्तरवाँ १७३ सूक्त और पन्द्रहवां १५ वर्ग समाप्त हुआ॥

त्वं राजेत्यस्य दशर्चस्य चतुस्सप्तत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। इन्द्रो देवता। १ निचृत्पङ्क्तिः। २,३,६,८,१० भुरिक्पङ्क्तिः। ४ स्वराट् पङ्क्तिः। ५,७,९ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजकृत्यवर्णनमाह॥

अब एक सौ चौहत्तरवें सूक्त का आरम्भ है। उसमें आरम्भ से राजकृत्य का वर्णन करते हैं॥

त्वं राजेन्द्र ये च देवा रक्षा नृन्पाह्यसुर त्वमस्मान्।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः॥ १॥

त्वम्। राजा। इन्द्र। ये। च। देवाः। रक्ष। नॄन्। पाहि। असुर। त्वम्। अस्मान्। त्वम्। सत्ऽपतिः। मघऽवा। नः। तरुत्रः। त्वम्। सत्यः। वसवानः। सहःऽदाः॥ १॥

पदार्थः-(**त्वम्**) (**राजा**) न्यायविनयाभ्यां राजमानः (**इन्द्र**) परमैश्वर्य्ययुक्त (**ये**) (**च**) (**देवाः**) सद्गुणिनो धर्मात्मानो विद्वांसः (**रक्ष**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नॄन्**) मनुष्यान् (**पाहि**) (**असुर**) मेघ इव वर्त्तमानः (**त्वम्**) (**अस्मान्**) (**त्वम्**) (**सत्पतिः**) सतां वेदानां सत्पुरुषाणां वा पालकः (**मघवा**) परमपूजितधनयुक्तः (**नः**) अस्माकम् (**तरुत्रः**) दुःखादुल्लङ्घयिता (**त्वम्**) (**सत्यः**) सत्सु साधुः (**वसवानः**) वसोर्धनस्यानः प्राप्तिर्यतः (**सहोदाः**) बलप्रदः॥ १॥

अन्वयः-हे इन्द्र! त्वं सत्पतिर्मघवा नस्तरुत्रोऽसि त्वं सत्यो वसवानः सहोदा असि त्वं राजासि। अतो हे असुर! त्वमस्मान् नॄन्पाहि ये च देवाः सन्ति तान् रक्ष॥ १॥

भावार्थः-यो राजा भवितुमिच्छेत्स धार्मिकान् सत्पुरुषान् विदुषोऽमात्यान् संरक्ष्यैतैः प्रजाः पालयेत्। यो हि सत्याचारी बलवान् सत्सङ्गी भवति स राज्यमाप्नोति॥ १॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्ययुक्त! (**त्वम्**) आप (**सत्पतिः**) वेद वा सज्जनों को पालनेवाले (**मघवा**) परमप्रशंसित धनवान् (**नः**) हम लोगों को (**तरुत्रः**) दुःखरूपी समुद्र से पार उतारनेवाले हैं (**त्वम्**) आप (**सत्यः**) सज्जनों में उत्तम (**वसवानः**) धनप्राप्ति कराने और (**सहोदाः**) बल के देनेवाले हैं तथा (**त्वम्**) आप (**राजा**) न्याय और विनय से प्रकाशमान राजा हैं, इससे हे (**असुर**) मेघ के समान! (**त्वम्**) आप (**अस्मान्**) हम (**नॄन्**) मनुष्यों को (**पाहि**) पालो (**ये, च**) और जो (**देवाः**) श्रेष्ठ गुणोंवाले धर्मात्मा विद्वान् हैं, उनकी (**रक्ष**) रक्षा करो॥ १॥

भावार्थः-जो राजा होना चाहे वह धार्मिक सत्पुरुष विद्वान् मन्त्री जनों को अच्छे प्रकार रख के उनसे प्रजाजनों की पालना करावे, जो ही सत्याचारी बलवान् सज्जनों का सङ्ग करनेवाला होता है, वह राज्य को प्राप्त होता है॥ १॥

पुनस्तमेव विषयं सूर्यदृष्टान्तेनाह॥

फिर उसी विषय को सूर्य के दृष्टान्त से कहते हैं॥

दनो॑ विश॑ इन्द्र मृ॒ध्रवा॑चः स॒प्त यत्पु॒रः शर्म॒ शार॑दी॒र्दर्त्॑।
ऋ॒णोर॒पो अ॑न॒वद्या॒र्णा यू॒ने वृ॒त्रं पु॑रु॒कुत्सा॑य रन्धीः॥ २॥

दन॑ः। विश॑ः। इ॒न्द्र॒। मृ॒ध्र॒ऽवा॑चः। स॒प्त। यत्। पु॒र॑ः। शर्म॑। शार॑दीः। दर्त्॑। ऋ॒णोः॒। अ॒पः। अ॒न॒व॒द्य॒। अर्णा॑ः। यू॒ने॑। वृ॒त्रम्। पु॒रु॒ऽकुत्सा॑य। र॒न्धीः॥ २॥

पदार्थः-(**दनः**) अनदः। अत्राद्यन्तवर्णविपर्ययोऽडभावश्च। (**विशः**) प्रजाः (**इन्द्र**) विद्युदग्निरिव वर्त्तमान (**मृध्रवाचः**) मृध्राः प्रवृद्धा वाणीः (**सप्त**) सप्तछन्दोन्विता (**यत्**) (**पुरः**) शत्रुनगर्यः (**शर्म**) गृहम् (**शारदीः**) शरदृतुसम्बन्धिनीः (**दर्त्**) विदारितवान्भवति। अत्र विकरणाभावः। (**ऋणोः**) प्राप्नुयाः (**अपः**) जलानि (**अनवद्य**) प्रशंसित (**अर्णाः**) नदी सम्बन्धिनीः। **अर्णा इति नदीनामसु पठितम्।** (निघं०१.१३) (**यूने**) (**वृत्रम्**) मेघम् (**पुरुकुत्साय**) पुरवो बहवः कुत्सा वज्राः किरणा यस्मिन् (**रन्धीः**) संराध्नुहि। अत्राडभावः॥ २॥

अन्वयः-हे इन्द्र! यद्यस्त्वं सप्तशारदीः पुरः शर्म च दर्त् मृध्रवाचो विशो दनः। स हे अनवद्य! यथा सूर्यः पुरुकुत्साय यूने वृत्रं प्राप्यार्णा अपो वर्षयति तथा त्वमृणो रन्धीश्च॥ २॥

भावार्थः-अत्रोपमालङ्कारः। राज्ञा शत्रुपराणि वीरस्थानादि च विनाश्य ते निवारणीयाः सूर्यो जलेन यथा जगद्रक्षति तथा राज्ञा प्रजा रक्षणीयाः॥ २॥

पदार्थः-हे (**इन्द्र**) विद्युत् अग्नि के समान वर्त्तमान! (**यत्**) जो आप (**सप्त**) सात (**शारदीः**) शरद् ऋतु सम्बन्धिनी (**पुरः**) शत्रुओं की नगरी और (**शर्म**) शत्रु घर को (**दर्त्**) विदारनेवाले होते हैं (**मृध्रवाचः**) अति बढ़ी हुई जिनकी वाणी उन (**विशः**) प्रजाओं को (**दनः**) शिक्षा देते राज्य के अनुकूल शासन देते हैं, सो हे (**अनवद्य**) प्रशंसा को प्राप्त राजन्! जैसे सूर्यमण्डल (**पुरुकुत्साय**) बहुत वज्ररूपी अपनी किरणें जिसमें वर्त्तमान उस (**यूने**) तरुण प्रबलतर वा सुख-दुःख से मिलते न मिलते हुए संसार के लिये (**वृत्रम्**) मेघ को प्राप्त कराके (**अर्णाः**) नदी सम्बन्धीः (**अपः**) जलों को वर्षाता वैसे आप (**ऋणोः**) प्राप्त होओ (**रन्धीः**) अच्छे प्रकार कार्य सिद्धि करनेवाले होओ॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजा को चाहिये कि शत्रुओं के पुर, नगर, शरद् आदि ऋतुओं में सुख देनेवाले स्थान आदि वस्तु नष्ट कर शत्रुजन निवारणे चाहियें और सूर्य मेघजल से जैसे जगत् की रक्षा करता है, वैसे राजा को प्रजा की रक्षा करनी चाहिये॥ २॥

अथ राजानस्सपत्नीकाः परिवर्त्तन्तां कलाकौशलसिद्धये अग्निविद्यां विदन्त्वित्याह॥

अब राजजन सपत्नीक, परिभ्रमण करें और कलाकौशल की सिद्धि के लिये अग्निविद्या को जानें,

इस विषय को अगले मन्त्र में कहा है॥

अजा॒ वृत॑ इन्द्र॒ शूर॑पत्नी॒र्द्यां च॒ येभि॑: पुरुहूत॒ नूनम्।
रक्षो॑ अ॒ग्निम॒शुषं॑ तूर्व॑याणं सिंहो॒ न दमे॒ अपां॑सि॒ वस्तो॑:॥ ३॥

अज॑। वृत॑:। इ॒न्द्र॒। शूर॑ऽपत्नी:। द्याम्। च॒। येभि॑:। पु॒रु॒ऽहू॒त॒। नू॒नम्। रक्षो॒ इति॑। अ॒ग्निम्। अ॒शुष॑म्। तूर्व॑याणम्। सिं॒ह:। न। दमे॑। अपां॑सि। वस्तो॑:॥ ३॥

पदार्थ:- **(अज)** जानीहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घ:। **(वृत:)** स्वीकृत: सन् **(इन्द्र)** शत्रुदलविदारक **(शूरपत्नी:)** शूराणां स्त्रिय: **(द्याम्)** प्रकाशम् **(च)** **(येभि:)** यै: **(पुरुहूत)** बहुभिस्सत्कृत **(नूनम्)** निश्चितम् **(रक्षो)** रक्षैव **(अग्निम्)** **(अशुषम्)** शोषरहितम् **(तूर्वयाणम्)** तूर्वाणि शीघ्रगमनानि यानानि यस्मात्तम् **(सिंह:)** **(न)** इव **(दमे)** गृहे **(अपांसि)** कर्माणि **(वस्तो:)** वासयितुम्॥ ३॥

अन्वय:-हे पुरुहूतेन्द्र! वृतस्त्वं येभिस्सह शूरपत्नीर्द्यां च नूनमज जानीहि तै: सिंहो न दमेऽपांसि वस्तो: तूर्वयाणमशुषमग्निं रक्षो॥ ३॥

भावार्थ:-अत्रोपमालङ्कार:। यथा सिंह: स्वगृहे बलात्सर्वान् निरुणद्धि तथा निजबलाद्राजा स्वगृहे लाभप्राप्तये प्रयतेत। येन संयुक्तेनाग्निना यानानि तूर्णं गच्छन्ति तेन संसाधिते याने स्थित्वा सत्पत्नीका इतस्ततो गच्छन्त्वागच्छन्तु॥ ३॥

पदार्थ:-हे **(पुरुहूत)** बहुतों ने सत्कार किये हुए **(इन्द्र)** शत्रुदल के नाशक **(वृत:)** राज्याधिकार में स्वीकार किये हुए राजन्! आप **(येभि:)** जिनके साथ **(शूरपत्नी:)** शूरों की पत्नी और **(द्याञ्च)** प्रकाश को **(नूनम्)** निश्चित **(अज)** जानो उनके साथ **(सिंह:)** सिंह के **(न)** समान **(दमे)** घर में **(अपांसि)** कर्मों के **(वस्तो:)** रोकने को **(तूर्वयाणम्)** शीघ्र गमन करानेवाले यान जिससे सिद्ध होते उस **(अशुषम्)** शोषरहित जिसमें अर्थात् लोहा, तांबा, पीतल आदि धातु पिघिला करें, गीले हुआ करें उस **(अग्निम्)** अग्नि को **(रक्षो)** अवश्य रक्खो॥ ३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे सिंह अपने भिटे में बल से सबको रोकता ले जाता है, वैसे राजा निज बल से अपने घर में लाभप्राप्ति के लिये प्रयत्न करे। जिस अच्छे प्रकार प्रयोग किये अग्नि से यान शीघ्र जाते हैं, उस अग्नि से सिद्ध किये हुए यान पर स्थिर होकर स्त्री-पुरुष इधर-उधर से आवें-जावें॥ ३॥

अथ राजधर्मे संग्रामविषयमाह॥

अब राजधर्म में संग्राम विषय को अगले मन्त्र में कहा है॥

शेष॒न्नु त॒ इ॑न्द्र॒ सस्मि॒न् योनौ॒ प्रश॑स्तये॒ पवी॑रवस्य मु॒ह्वा।
सु॒जदर्णां॑स्यव॒ यद्युधा गास्तिष्ठ॒द्धरी॑ धृष॒ता मृ॑ष्ट॒ वाजा॑न्॥ ४॥

शेषन्। नु। ते। इन्द्र। सस्मिन्। योनौ। प्रऽशस्तये। पवीरवस्य। महा। सृजत्। अर्णांसि। अव। यत्। युधा। गाः। तिष्ठत्। हरी इति। धृषता। मृष्ट। वाजान्॥४॥

पदार्थः-(**शेषन्**) शयेरन्। अत्र लेटि व्यत्ययेन परस्मैपदम्। (**नु**) सद्यः (**ते**) (**इन्द्र**) सेनेश (**सस्मिन्**) अत्र छान्दसो वर्णविपर्यासः। (**योनौ**) स्थाने (**प्रशस्तये**) उत्कृष्टतायै (**पवीरवस्य**) वज्रध्वनेः (**महा**) महिम्ना (**सृजत्**) सृजेत् (**अर्णांसि**) जलानि (**अव**) (**यत्**) यस्मिन् संग्रामे (**युधा**) युद्धेन (**गाः**) भूमीः (**तिष्ठत्**) अतितिष्ठति (**हरी**) यौ यानानि हरतस्तौ (**धृषता**) दृढेन बलेन (**मृष्ट**) शत्रुबलं सह (**वाजान्**) शत्रुवेगान्॥४॥

अन्वयः-हे इन्द्र! प्रशस्तये सस्मिन् योनौ ते पवीरवस्य महा नु शेषन् सद्यः शत्रवः शयेरन्। यद्यस्मिन् संग्रामे सूर्योऽर्णांस्यवसृजदिव युधा गा हरी तिष्ठत्। हे मृष्ट! धृषता वाजांश्च तिष्ठत्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये स्वप्रकृतिस्थाः शूरवीरास्सन्ति ते स्वस्वाधिकारे न्यायेन वर्तित्वा शत्रून्निःशेषान् कृत्वा धर्म्यं स्वमहिमानं प्रकाशयेयुः॥४॥

पदार्थः-हे (**इन्द्र**) सेनापति! (**प्रशस्तये**) तेरी उत्कर्षता के लिये (**सस्मिन्**) उस (**योनौ**) स्थान में वा संग्राम में (**ते**) तेरे (**पवीरवस्य**) वज्र की ध्वनि के (**महा**) महिमा से (**नु**) शीघ्र (**शेषन्**) शत्रुजन सोवें। (**यत्**) जिस संग्राम में सूर्य जैसे (**अर्णांसि**) जलों को (**अव, सृजत्**) उत्पन्न करे अर्थात् मेघ से वर्षावे वैसे (**युधा**) युद्ध से (**गाः**) भूमियों और जो यानों को ले जाते उन घोड़ों को (**तिष्ठत्**) अधिष्ठित होता और हे (**मृष्ट**) शत्रुबल को सहनेवाले! (**धृषता**) दृढ़ बल से (**वाजान्**) शत्रुओं के वेगों को अधिष्ठित होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अपने स्वभावानुकूल शूरवीर हों वे अपने-अपने अधिकार में न्याय से वर्त्तकर शत्रुजनों को विशेष कर धर्म के अनूकूल अपनी महिमा का प्रकाश करावें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वह कुत्समिन्द्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा।
प्र सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः॥५॥१६॥

वह। कुत्सम्। इन्द्र। यस्मिन्। चाकन्। स्यूमन्यू इति। ऋज्रा। वातस्य। अश्वा। प्र। सूरः। चक्रम्। वृहतात्। अभीके। अभि। स्पृधः। यासिषत्। वज्रऽबाहुः॥५॥

पदार्थः-(**वह**) प्रापय (**कुत्सम्**) वज्रम् (**इन्द्र**) सभेश (**यस्मिन्**) (**चाकन्**) कामयसे। अत्र **कनीदीप्तिकान्तिगतिष्वि**त्यस्माल्लङो मध्यमैकवचने **बहुलं छन्दसी**ति शपः स्थाने श्लुः, **श्लावि**ति द्वित्वं

बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः, संयोगान्तसलोपश्च। **(स्यूमन्यू)** आत्मनः स्यूमानं शीघ्रं गमनमिच्छू **(ऋज्रा)** ऋजुगामिनौ **(वातस्य)** वायोरिव **(अश्वा)** अश्वौ **(प्र)** **(सूरः)** सूर्यः **(चक्रम्)** स्वराज्यम् **(वृहतात्)** वर्द्धयन्तु **(अभीके)** समीपे **(अभि)** सन्मुखे **(स्पृधः)** स्पर्द्धमानान् शत्रून् **(यासिषत्)** यातुमिच्छतु **(वज्रबाहुः)** वज्रः शस्त्रास्त्रम्बाह्वोर्यस्य॥५॥

अन्वयः-हे इन्द्र! त्वं यस्मिन् वातस्य वायोरिव स्यूमन्यू ऋज्रा अश्वा चाकँस्तस्मिन् कुत्सं वह सूर इव वज्रबाहुर्भवाँश्चकं प्रवृहतादभीके स्पृधोऽभियासिषत्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यस्तथा प्रतापवान् राजा शस्त्रास्त्रप्रहारैः संग्रामे शत्रून् विजित्य निजराज्यं वर्द्धयेत्॥५॥

पदार्थः-हे **(इन्द्र)** सभापति! आप **(यस्मिन्)** जिस संग्राम में **(वातस्य)** पवन की सी शीघ्र और सरल गति **(स्यूमन्यू)** चाहने और **(ऋज्रा)** सरल चाल चलनेवाले **(अश्वा)** घोड़ों को **(चाकन्)** चाहते हैं, उसमें **(कुत्सम्)** वज्र को **(वह)** पहुंचाओ वज्र चलाओ अर्थात् वज्र से शत्रुओं का संहार करो **(सूरः)** सूर्य के समान प्रतापवान् **(वज्रबाहुः)** शस्त्र-अस्त्रों को भुजाओं में धारण किये हुए आपः **(चक्रम्)** अपने राज्य को **(प्र, वृहतात्)** बढ़ाओ और **(अभीके)** संग्राम में **(स्पृधः)** ईर्ष्या करते हुए शत्रुओं के **(अभि, यासिषत्)** सन्मुख जाने की इच्छा करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य प्रतापवान् है, वैसा प्रतापवान् राजा अस्त्र और शस्त्रों के प्रहारों से संग्राम में शत्रुओं को अच्छे प्रकार जीतकर अपने राज्य को बढ़ावे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जघन्वाँ इन्द्र मित्रेरूञ्चोदप्रवृद्धो हरिवो अदाशून्।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यम्॥६॥

जघन्वान्। इन्द्र। मित्रेरून्। चोदऽप्रवृद्धः। हरिऽवः। अदाशून्। प्र। ये। पश्यन्॥ अर्यमणम्। सचा। आयोः। त्वया। शूर्ताः। वहमानाः। अपत्यम्॥६॥

पदार्थः-(**जघन्वान्**) हतवान् **(इन्द्र)** सूर्य इव सभेश **(मित्रेरून्)** मित्रहिंसकान् शत्रून्। अत्र मित्रोपपदाद् रुषधातोर्बाहुलकादौणादिको डुः प्रत्ययः **(चोदप्रवृद्धः)** चोदेन प्रेरणेन प्रवृद्धः **(हरिवः)** बह्वैश्वर्ययुक्त **(अदाशून्)** अदातॄन् **(प्र)** **(ये)** **(पश्यन्)** समीक्षन्ते **(अर्य्यमणम्)** न्यायेशम् **(सचा)** संयोगेन **(आयोः)** प्रापकस्य **(त्वया)** **(शूर्त्ताः)** विमर्दिताः **(वहमानाः)** नयन्तो धूर्त्ताः **(अपत्यम्)** सन्तानम्॥६॥

अन्वयः-हे हरिव इन्द्र! चोदप्रवृद्धस्त्वमदाशून् मित्रेरून् जघन्वानसि। अतो ये आयोरपत्यं वहमानास्त्वया शूर्त्ता हतास्ते सचा तत्सम्बन्धेन त्वामर्य्यमणं प्रपश्यन्॥६॥

भावार्थः-ये मित्रवदाभाषमाणाः परिच्छिन्नाश्चतुराः शत्रवः सज्जनानुद्वेजयन्ति तान् राजा समूलघातं हन्यात्। न्यायासने स्थित्वा सुसमीक्ष्याऽन्यायं विवर्त्तयेत्॥६॥

पदार्थः-हे **(हरिवः)** बहुत घोड़ोंवाले **(इन्द्र)** सूर्य के समान सभापति! **(चोदप्रवृद्धः)** सदुपदेशों की प्रेरणा से अच्छे प्रकार बढ़े हुए आप **(अदाशून्)** दान न देने और **(मित्रेरून)** मित्रों की हिंसा करनेवाले शत्रुओं को **(जघन्वान्)** मारनेवाले हो इससे **(ये)** जो **(आयोः)** दूसरे को सुख पहुंचानेवाले सज्जन के **(अपत्यम्)** सन्तान को **(वहमानाः)** पहुंचाने अर्थात् अन्यत्र ले जानेवाले धूर्त्तजन **(त्वया)** आप ने **(शूर्त्ताः)** छिन्न-भिन्न किये वे **(सचा)** उस सम्बन्ध से तुम **(अर्य्यमणम्)** न्यायाधीश को **(प्र, पश्यन्)** देखते हैं॥६॥

भावार्थः-जो मित्र के समान बातचीत करते हुए दुष्टप्रकृति चतुर शत्रुजन सज्जनों को उद्वेग कराते उनको राजा समूल जैसे वे नष्ट हों वैसे मारे और न्यायासन पर बैठ कर अच्छे प्रकार देख विचार अन्याय को निवृत्त करे॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

रपत्कविरिन्द्रार्कसातौ क्षां दासायोपबर्हणीं कः।

करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत्॥७॥

रपत्। कविः। इन्द्र। अर्कऽसातौ। क्षाम्। दासाय। उपऽबर्हणीम्। करिति कः। करत्। तिस्रः। मघऽवा। दानुऽचित्राः। नि। दुर्योणे। कुयवाचम्। मृधि। श्रेत्॥७॥

पदार्थः-**(रपत्)** व्यक्तं वदेत् **(कविः)** सर्वशास्त्रवित् **(इन्द्र)** सूर्यवत् सभेश **(अर्कसातौ)** अन्नानां संविभागे **(क्षाम्)** भूमिम् **(दासाय)** शूद्रवर्गाय **(उपबर्हणीम्)** सुवर्द्धिकाम् **(कः)** करोति। अत्राडभावः। **(करत्)** कुर्यात् **(तिस्रः)** उत्तममध्यमनिकृष्टरूपेण त्रिविधा **(मघवा)** उत्तमधनसम्बन्धी **(दानुचित्राः)** अद्भुतदानाः **(नि) (दुर्योणे)** समराङ्गणे **(कुयवाचम्)** यः कुयवान् वक्ति प्रशंसति तम् **(मृधि)** युद्धे **(श्रेत्)** आश्रयेत्॥७॥

अन्वयः-हे इन्द्र! यः कविरर्कसातौ दासायोपबर्हणीं क्षां कः स सत्यं रपद्यो मघवा तिस्रो दानुचित्राः करत्स दुर्योणे मृधि कुयवाचं निश्रेत्॥७॥

भावार्थः-शास्त्रज्ञस्सभापतिः शूद्रवर्गाय शास्त्रशिक्षयोत्तमान्नादिवृद्धिकरीं भूमिं सम्पादयेत्। सत्यशीलदान-वैचित्र्यसम्पादनायोत्तममध्यमनिकृष्टान् दानव्यवहारान् सम्पादयेत् सर्वदा संग्रामादिभूमौ शत्रून् संहृत्य राज्यं विवर्द्धयेत्॥

पदार्थः–हे **(इन्द्र)** सूर्य के समान सभापति! जो **(कविः)** सर्वशास्त्रों का जाननेवाला **(अर्कसातौ)** अन्नों के अच्छे प्रकार विभाग में **(दासाय)** शूद्र वर्ग के लिये **(उपबर्हणीम्)** अच्छी वृद्धि देनेवाली **(क्षाम्)** भूमि को **(कः)** नियत करता वह सत्य स्पष्ट **(रपत्)** कहे जो **(मघवा)** उत्तम धन का सम्बन्ध रखनेवाला **(तिस्रः)** उत्तम, मध्यम और निकृष्ट कि **(दानुचित्राः)** अद्भुत दान जिनमें होता उन क्रियाओं को **(करत्)** नियत करे वह **(दुर्योणे)** समरभूमि विषयक **(मृधि)** युद्ध में **(कुयवाचम्)** कुत्सित यवों की प्रशंसा करनेवाले सामान्य जन का **(नि, श्रेत्)** आश्रय लेवे॥७॥

भावार्थः–शास्त्र जाननेवाले सभापति शूद्रवर्ग के लिये शास्त्र की शिक्षा के साथ उत्तमान्नादि की वृद्धि करनेवाली भूमि को संपादन करावें और सत्यशील तथा दान की विचित्रता संपादन करने के लिये उत्तम, मध्यम, निकृष्ट दानव्यवहारों को सिद्ध करे और सब काल में संग्रामादि भूमियों में शत्रुओं का संहार कर अपने राज्य को बढ़ाता रहे॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सना॒ ता त॑ इन्द्र॒ नव्या॒ आगु॒: सहो॒ नभोऽवि॑रणाय पू॒र्वीः।
भि॒नत्पुरो॒ न भिदो॒ अदे॑वीर्न॒नमो॒ वधर॑देवस्य पी॒योः॥८॥

सना॑। ता। ते॒। इ॒न्द्र॒। नव्याः॑। आ। अ॒गुः॒। सहः॑। नभः॑। अवि॑ऽरणाय। पू॒र्वीः॑। भि॒नत्। पुरः॑। न। भिदः॑। अदे॑वीः। न॒नमः॑। वधः॑। अदे॑वस्य। पी॒योः॥८॥

पदार्थः–**(सना)** सनानि प्रसिद्धानि शौर्याणि **(ता)** तानि तेजांसि **(ते)** तव **(इन्द्र)** सवितृवद्वर्त्तमान **(नव्याः)** नवा जना इव **(आ)** **(अगुः)** आगच्छेयुः **(सहः)** सहसे। लङि मध्यमैकवचनेऽडभावः। **(नभः)** हिंसकान् **(अविरणाय)** युद्धनिवृत्तये **(पूर्वीः)** प्राचीनाः **(भिनत्)** अभिनत्। अत्राऽडभावः। **(पुरः)** शत्रूणां नगरीः **(न)** इव **(भिदः)** भिन्नाः **(अदेवीः)** असुरस्य दुष्टस्य नगरीः **(ननमः)** नमयति। अत्रान्तर्भावितो ण्यर्थः। नम धातोर्लेटि मध्यमैकवचने शपः श्लुः **श्लावि**ति द्विर्वचनम्। **(वधः)** नाशः **(अदेवस्य)** असुरस्य शत्रुगणस्य **(पीयोः)** स्थूलस्य। अत्र पीव धातोर्बाहुलकादौणादिको युक् प्रत्ययः॥८॥

अन्वयः–हे इन्द्र! त्वमविरणाय नभः सहो भवान् पूर्वीः पुरो भिनत् न भिदोऽदेवीर्ननमस्तेनादेवस्य पीयोर्वधो भवतीत्येतानि यानि ते सना ता नव्या आगुः॥८॥

भावार्थः–अत्रोपमालङ्कारः। राजानः संग्रामादिष्वीदृशानि शूरताप्रदर्शकानि कर्माण्याचरेयुर्यानि दृष्ट्वैवादृष्टपूर्वकर्माणो नवीना दुष्टाः प्रजाजना बिभ्येयुः॥८॥

पदार्थः–हे **(इन्द्र)** सूर्य के समान प्रतापवान् राजन्! आप **(अविरणाय)** युद्ध की निवृत्ति के लिये **(नभः)** हिंसक शत्रुजनों को **(सहः)** सहते हो। आप जैसे **(पूर्वीः)** प्राचीन **(पुरः)** शत्रुओं की नगरियों को

(भिनत्) छिन्न-भिन्न करते हुए **(न)** वैसे **(भिदः)** भिन्न अलग-अलग **(अदेवीः)** शत्रुवर्गों की दुष्ट नगरियों को **(ननमः)** नमाते ढहाते हो उससे **(अदेवस्य, पीयोः)** राक्षसपन संचारते हुए शत्रुगण का **(वधः)** नाश होता है, यह जो **(ते)** आपके **(सना)** प्रसिद्ध शूरपने के काम हैं **(ता)** उनको **(नव्याः)** नवीन प्रजाजन **(आगुः)** प्राप्त होवें॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजजन संग्रामादि भूमियों में ऐसे शूरता दिखलानेवाले कामों का आचरण करें, जिनको देख के ही जिन्होंने पिछली शूरता के काम नहीं देखे, वे नवीन दुष्ट प्रजाजन भयभीत हों॥८॥

अथ प्रकारान्तरेण राजधर्मविषयमाह॥

अब प्रकारान्तर से राजधर्म विषय को अगले मन्त्र में कहा है॥

त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति॥९॥

त्वम्। धुनिः। इन्द्र। धुनिऽमतीः। ऋणोः। अपः। सीराः। न। स्रवन्तीः। प्र। यत्। समुद्रम्। अति। शूर। पर्षि। पारय। तुर्वशम्। यदुम्। स्वस्ति॥९॥

पदार्थः-(**त्वम्**) (**धुनिः**) कम्पकः (**इन्द्र**) सूर्य्यवद्वर्त्तमान (**धुनिमतीः**) कम्पयुक्ताः (**ऋणोः**) प्राप्नुयाः (**अपः**) जलानि (**सीराः**) नाडीः (**न**) इव (**स्रवन्तीः**) गच्छन्तीः (**प्र**) (**यत्**) यः (**समुद्रम्**) (**अति**) (**शूर**) शत्रुहिंसक (**पर्षि**) सिक्तमुदकम् (**पारय**) तीरे प्रापय। अत्रा**न्येषामपी**ति दीर्घः। (**तुर्वशम्**) यस्तूर्णकारी वशंगतस्तं मनुष्यम् (**यदुम्**) यत्नशीलम् (**स्वस्ति**) सुखम्॥९॥

अन्वयः-हे इन्द्र धुनिस्त्वं विद्वदग्निर्धुनिमतीरपः स्रवन्तीः सीरा न प्रजाः प्रार्णोः। हे शूर! यद्यस्त्वं समुद्रमति पर्षि स यदुन्तुर्वशं स्वस्ति पारय॥९॥

भावार्थः-अत्रोपमालङ्कारः। यथा शरीरस्था विद्युन्नाडीषु रुधिरं गमयति सूर्यो जलं च जगति प्रापयति तथा प्रजासु सुखं गमयेद् दुष्टान् कम्पयेत्॥९॥

पदार्थः-हे (**इन्द्र**) सूर्य के समान वर्त्तमान (**धुनिः**) शत्रुओं को कंपानेवाले! (**त्वम्**) आप बिजुलीरूप सूर्यमण्डलस्थ अग्नि जैसे (**धुनिमतीः**) कंपते हुए (**अपः**) जलों को वा बिजुलीरूप जठराग्नि जैसे (**स्रवन्तीः**) चलती हुई (**सीराः**) नाड़ियों को (**न**) वैसे प्रजाजनों को (**प्रार्णोः**) प्राप्त हूजिये। हे (**शूर**) शत्रुओं की हिंसा करनेवाले! (**यत्**) जो आप (**समुद्रम्**) समुद्र को (**अति, पर्षि**) अतिक्रमण करने उतरि के पार पहुंचते हो सो (**यदुम्**) यत्नशील और (**तुर्वशम्**) जो शीघ्र कार्यकर्त्ता अपने वश को प्राप्त हुआ उस जन को (**स्वस्ति**) कल्याण जैसे हो वैसे (**पारय**) समुद्रादि नद के एक तट से दूसरे तट को झटपट पहुंचवाइये॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शरीरस्थ बिजुलीरूप अग्नि नाड़ियों में रुधिर को पहुंचाती है और सूर्यमण्डल जल को जगत् में पहुंचाता है, वैसे प्रजाओं में सुख को प्राप्त करावें और दुष्टों को कंपावें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम्॥१०॥१७॥

त्वम्। अस्माकम्। इन्द्र। विश्वध। स्याः। अवृकऽतमः। नराम्। नृऽपाता। सः। नः। विश्वासाम्। स्पृधाम्। सहःऽदाः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥१०॥

पदार्थः-(**त्वम्**) (**अस्माकम्**) (**इन्द्र**) सुखप्रदातः (**विश्वध**) विश्वैस्सर्वैः प्रकारैरिति विश्वध। अत्र छान्दसो ह्रस्वः। (**स्याः**) भवेः (**अवृकतमः**) न सन्ति वृकाश्चौरा यस्य सम्बन्धे सोऽतिशयित इति (**नराम्**) नराणाम् (**नृपाता**) नृणां रक्षकः (**सः**) (**नः**) अस्माकम् (**विश्वासाम्**) सर्वासाम् (**स्पृधाम्**) युद्धक्रियाणाम् (**सहोदाः**) बलप्रदाः (**विद्याम**) विजानीयाम (**इषम्**) शास्त्रविज्ञानम् (**वृजनम्**) धर्म्यं मार्गम् (**जीरदानुम्**) जीवस्वरूपम्॥१०॥

अन्वयः-हे इन्द्र! त्वमस्माकं मध्ये विश्वध नरां नृपातावृकतमः स्याः स नो विश्वासां स्पृधां सहोदाः स्या यतो वयं जीरदानुं वृजनमिषं च विद्याम॥१०॥

भावार्थः-ये यमान्विता नियतेन्द्रियाः प्रजारक्षकाश्चौर्यादिकर्मत्यक्तवन्तो निवसेरँस्ते महदैश्वर्यमाप्नुवन्ति॥१०॥

अत्र राजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुस्सप्तत्युत्तरं शततमं १७४ सूक्तं सप्तदशो १७ वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) सुख देनेवाले! (**त्वम्**) आप (**अस्माकम्**) हमारे बीच (**विश्वध**) सब प्रकार से (**नराम्**) मनुष्यों में (**नृपाता**) मनुष्यों की रक्षा करनेवाले अर्थात् प्रजाजनों की पालना करनेवाले और (**अवृकतमः**) जिनके सम्बन्ध में चोरजन नहीं ऐसे (**स्याः**) हूजिये तथा (**सः**) सो आप (**नः**) हमारे (**विश्वासाम्**) समस्त (**स्पृधाम्**) युद्ध की क्रियाओं के (**सहोदाः**) बल देनेवाले हूजिये, जिससे हम लोग (**जीरदानुम्**) जीव के रूप को (**वृजनम्**) धर्मयुक्त मार्ग को और (**इषम्**) शास्त्रविज्ञान को (**विद्याम**) प्राप्त होवें॥१२॥

भावार्थः-जो यम-नियमों से युक्त नियत इन्द्रियों वाले प्रजाजनों के रक्षक चौर्यादि कर्मों को छोड़े हुए अपने राज्य में निवास करते हैं, वे अत्यन्त ऐश्वर्य को प्राप्त होते हैं॥१०॥

इस मन्त्र में राजजनों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ चौहत्तरवां १७४ सूक्त और सत्रहवां १७ वर्ग पूरा हुआ॥

मत्सीत्यस्य षड्चस्य पञ्चसप्तत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। इन्द्रो देवता। १ स्वराडनुष्टुप्। २ विराडनुष्टुप्। ५ अनुष्टुप् छन्दः। गान्धारः स्वरः। ३ निचृत् त्रिष्टुप्। ६ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ राजविषयं प्रकारान्तरेणाह॥

अब राजविषय को प्रकारान्तर से कहते हैं॥

मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः।
वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः॥ १॥

मत्सि। अपायि। ते। महः। पात्रस्यऽइव। हरिऽवः। मत्सरः। मदः। वृषा। ते। वृष्णे। इन्दुः। वाजी। सहस्रऽसातमः॥ १॥

पदार्थः–(**मत्सि**) हृष्यसि (**अपायि**) (**ते**) तव (**महः**) महतः (**पात्रस्येव**) यथा पात्रस्य मध्ये (**हरिवः**) प्रशस्ताश्च (**मत्सरः**) हर्षकरः (**मदः**) मदन्ति हर्षन्ति नैरोग्येण येनाऽसौ (**वृषा**) बलकरः (**ते**) तुभ्यम् (**वृष्णे**) सेचकाय बलवते (**इन्दुः**) ऐश्वर्यकरः (**वाजी**) वेगवान् (**सहस्रसातमः**) अतिशयेन सहस्रस्य विभाजकः॥ १॥

अन्वयः–हे हरिवो! महः पात्रस्येव यस्ते मत्सरो मदस्त्वपायि तेन त्वं मत्सि स च वाजी सहस्रसातमो वृष्णे ते वृषेन्दुर्भवति॥ १॥

भावार्थः–अत्रोपमालङ्कारः। यथाऽश्वा दुग्धादिकं पीत्वा घासं जग्ध्वा बलिष्ठा वेगवन्तो जायन्ते तथा पथ्योषधिसेविन आनन्दिता भवन्ति॥ १॥

पदार्थः–हे (**हरिवः**) प्रशंसित घोड़ोंवाले! (**महः**) बड़े (**पात्रस्येव**) पात्र के बीच जैसे रक्खा हो, वैसे जो (**ते**) आप का (**मत्सरः**) हर्ष करनेवाला (**मदः**) नीरोगता के साथ जिससे जन आनन्दित होते हैं, वह ओषधियों का सार आपने (**अपायि**) पिया है, उससे आप (**मत्सि**) आनन्दित होते हैं और वह (**वाजी**) वेगवान् (**सहस्रसातमः**) अतीव सहस्र लोगों का विभाग करनेवाला (**वृष्णे**) सींचनेवाले बलवान् जो (**ते**) आप उनके लिये (**वृषा**) बल और (**इन्दुः**) ऐश्वर्य करनेवाला होता है॥ १॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जैसे घोड़े दूध आदि पी, घास खा बलवान् और वेगवान् होते हैं, वैसे पथ्य ओषधियों के सेवन करनेवाले मनुष्य आनन्दित होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः।
सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः॥ २॥

आ। नः। ते। गन्तु। मत्सरः। वृषा। मदः। वरेण्यः। सहऽवान्। इन्द्र। सानसिः। पृतनाषाट्। अमर्त्यः॥ २॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मान् (**ते**) तव (**गन्तु**) प्राप्नोतु (**मत्सरः**) सुखकरः (**वृषा**) वीर्यकारी (**मदः**) औषधिसारः (**वरेण्यः**) वर्त्तुं स्वीकर्त्तुमर्हः (**सहावान्**) सहो बहुसहनं विद्यते यस्मिन् सः। अत्राऽन्येषामपीत्युपधादीर्घः। (**इन्द्र**) सभेश (**सानसिः**) संविभाजकः (**पृतनाषाट्**) पृतनां नृसेनां सहते येन सः (**अमर्त्यः**) मनुष्यस्वभावाद्विलक्षणः॥ २॥

अन्वयः-हे इन्द्र! ते यो मत्सरो वरेण्यो वृषा सहावान् सानसिः पृतनाषाडमर्त्यो मदोऽस्ति स नोऽस्माना गन्तु॥ २॥

भावार्थः-मनुष्यैराप्तानां धर्मात्मनामोषधिरसोऽस्मान् प्राप्नोत्विति सदैवेषितव्यम्॥ २॥

पदार्थः-हे (**इन्द्र**) सभापति! (**ते**) आपका जो (**मत्सरः**) सुख करनेवाला (**वरेण्यः**) स्वीकार करने योग्य (**वृषा**) वीर्यकारी (**सहावान्**) जिसमें बहुत सहनशीलता विद्यमान (**सानसिः**) जो अच्छे प्रकार रोगों का विभाग-करनेवाला (**पृतनाषाट्**) जिससे मनुष्यों की सेना को सहते हैं और (**अमर्त्यः**) जो मनुष्य स्वभाव से विलक्षण (**मदः**) ओषधियों का रस है, वह (**नः**) हम लोगों को (**आ, गन्तु**) प्राप्त हो॥ २॥

भावार्थः-मनुष्यों को चाहिये कि आप्त धर्मात्मा जनों का ओषधि रस हमको प्राप्त हो, ऐसी सदा चाहना करें॥ २॥

अथ राज्यविषये सेनापतिविषयमाह॥

अब राजविषय में सेनापति के विषय को अगले मन्त्र में कहा है॥

त्वं हि शूरः सनिता चोदयो मनुषो रथम्।
सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा॥ ३॥

त्वम्। हि। शूरः। सनिता। चोदयः। मनुषः। रथम्। सहऽवान्। दस्युम्। अव्रतम्। ओषः। पात्रम्। न। शोचिषा॥ ३॥

पदार्थः-(**त्वम्**) (**हि**) यतः (**शूरः**) निर्भयः (**सनिता**) संविभक्ता (**चोदयः**) प्रेरय (**मनुषः**) मनुष्यान् (**रथम्**) युद्धाय प्रवर्त्तितम् (**सहावान्**) बलवान्। अत्राऽन्येषामपीति दीर्घः। (**दस्युम्**) प्रसह्य परस्वापहर्त्तारम् (**अव्रतम्**) दुःशीलम् (**ओषः**) दहसि (**पात्रम्**) (**न**) इव (**शोचिषा**) प्रदीप्तयाऽग्निज्वालया॥ ३॥

अन्वयः-हे सेनेश! हि यतः शूरस्सनिता त्वं मनुषो रथं चोदयः। सहावाञ्छोचिषा पात्रं नाव्रतं दस्युमोषस्तस्मान्मान्यभाक् स्याः॥ ३॥

भावार्थः-ये सेनापतयो युद्धसमये रथादियानानि योधॄँश्च युद्धाय प्रचालयितुं जानन्ति, ते वह्निः काष्ठमिव दस्यून् भस्मीकर्त्तुं शक्नुवन्ति॥३॥

पदार्थः-हे सेनापति! **(हि)** जिस कारण **(शूरः)** शूरवीर निडर **(सनिता)** सेना को संविभाग करने अर्थात् पद्मादि व्यूह रचना से बांटनेवाले **(त्वम्)** आप **(मनुषः)** मनुष्यों और **(रथम्)** युद्ध के लिये प्रवृत्त किये हुए रथ को **(चोदयः)** प्रेरणा दें अर्थात् युद्ध समय में आगे को बढ़ावें और **(सहावान्)** बलवान् आप **(शोचिषा)** दीपते हुए अग्नि की लपट से जैसे **(पात्रम्)** काष्ठ आदि के पात्र को **(न)** वैसे **(अव्रतम्)** दुश्शील दुराचारी **(दस्युम्)** हठ कर पराये धन को हरनेवाले दुष्टजन को **(ओषः)** जलाओ इससे मान्यभागी होओ॥३॥

भावार्थः-जो सेनापति युद्ध समय में रथ आदि यान और योद्धाओं को ढङ्ग से चलाने को जानते हैं, वे आग जैसे काष्ठ को वैसे डाकुओं को भस्म कर सकते हैं॥३॥

अथ राजधर्मविषये सभापतिविषयमाह॥

अब राजधर्म विषय में सभापति के विषय को अगले मन्त्र में कहा है॥

मुषा॒य सूर्यं॑ कवे च॒क्रमीशा॑न॒ ओज॑सा।
वह॒ शुष्णा॑य व॒धं कुत्सं॑ वात॒स्याश्वैः॑॥४॥

मुषा॒य। सूर्य॑म्। क॒वे॒। च॒क्रम्। ईशा॑नः। ओज॑सा। वह॑। शुष्णा॑य। व॒धम्। कुत्स॑म्। वात॑स्य। अश्वैः॑॥४॥

पदार्थः-**(मुषाय)** **(सूर्यम्)** **(कवे)** क्रान्तदर्शन सकलविद्याविद्वन् **(चक्रम्)** भूगोलराज्यम् **(ईशानः)** ऐश्वर्यवान् समर्थः **(ओजसा)** बलेन **(वह)** प्रापय **(शुष्णाय)** परेषां हृदयस्य शोषकाय **(वधम्)** **(कुत्सम्)** वज्रम् **(वातस्य)** वायोः **(अश्वैः)** वेगादिभिर्गुणैः॥४॥

अन्वयः-हे कवे ईशानस्त्वं सूर्यमिवौजसा चक्रं मुषाय शुष्णाय वातस्याऽश्वैरिव स्वबलैः कुत्सं परिवर्त्य वधं वह प्रापय॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये चक्रवर्तिराज्यं कर्त्तुमिच्छेयुस्ते दस्यून् दुष्टाचारान् मनुष्यान्निवर्त्त्य न्यायं प्रवर्त्तयेयुः॥४॥

पदार्थः-हे **(कवे)** क्रम-क्रम से दृष्टि देने समस्त विद्याओं के जाननेवाले सभापति **(ईशानः)** ऐश्वर्य्यवान् समर्थ! आप **(सूर्य्यम्)** सूर्यमण्डल के समान **(ओजसा)** बल से युक्त **(चक्रम्)** भूगोल के राज्य को **(मुषाय)** हर के **(शुष्णाय)** औरों के हृदय को सुखानेवाले दुष्ट के लिये **(वातस्य)** पवन के **(अश्वैः)** वेगादि गुणों के समान अपने बलों से **(कुत्सम्)** वज्र को घुमा के **(वधम्)** वध को **(वह)** पहुंचाओ अर्थात् उक्त दुष्ट को मारो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो चक्रवर्त्ती राज्य करने की इच्छा करें, वे डाकू और दुष्टाचारी मनुष्यों को निवार के न्याय को प्रवृत्त करावें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः।
वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः॥५॥

शुष्मिन्ऽतमः। हि। ते। मदः। द्युम्निन्ऽतमः। उत। क्रतुः। वृत्रऽघ्ना। वरिवः।ऽविदा। मंसीष्ठाः। अश्वऽसातमः॥५॥

पदार्थः-(**शुष्मिन्तमः**) अतिशयेन बली (**हि**) यतः (**ते**) तव (**मदः**) हर्षः (**द्युम्निन्तमः**) अतिशयेन यशस्वी (**उत**) अपि (**क्रतुः**) कर्मपराक्रमः (**वृत्रघ्ना**) वृत्रं मेघं हन्ति यस्तेन सूर्येणेव (**वरिवोविदा**) परिचरणं विन्दति प्राप्नोति येन तेन पराक्रमेण (**मंसीष्ठाः**) मन्येथाः (**अश्वसातमः**) योऽश्वान् सनति संभजति सोऽतिशयितः॥५॥

अन्वयः-हे सर्वेश! हि ते शुष्मिन्तमो मद उतापि द्युम्निन्तमः क्रतुः पराक्रमोऽस्ति तेन वृत्रघ्ना वरिवोविदाऽश्वसातमो मंसीष्ठाः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवत्तेजस्विनो विद्युद्वत्पराक्रमिणो यशस्विनो बलिष्ठा विद्याविनयधर्मान् सेवन्ते ते सुखमश्नुवते॥५॥

पदार्थः-हे सबके ईश्वर सभापति! (**हि**) जिस कारण (**ते**) आपका (**शुष्मिन्तमः**) अतीव बलवाला (**मदः**) आनन्द (**उत**) और (**द्युम्निन्तमः**) अतीव यशयुक्त (**क्रतुः**) पराक्रमरूप कर्म है, उससे (**वृत्रघ्ना**) मेघ को छिन्न-भिन्न करनेवाले सूर्य के समान प्रकाशमान (**वरिवोविदा**) जिससे कि सेवा को प्राप्त होता, उस पराक्रम से (**अश्वसातमः**) अतीव अश्वादिकों का अच्छे विभाग करनेवाले आप दूसरे के विषय [विनय] को (**मंसीष्ठाः**) मानो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान तेजस्वी, बिजुली के समान पराक्रमी, यशस्वी, अत्यन्त बली जन विद्या, विनय और धर्म का सेवन करते हैं, वे सुख को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम्॥६॥१८॥

यथा। पूर्वेभ्यः। जरितृऽभ्यः। इन्द्र। मयःऽइव। आपः। न। तृष्यते। बभूथ। ताम्। अनु। त्वा। निऽविदम्। जोहवीमि। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥६॥

पदार्थः-**(यथा)** येन प्रकारेण **(पूर्वेभ्यः)** अधीतपूर्वविद्येभ्यः **(जरितृभ्यः)** सकलविद्यागुणस्तावकेभ्यः **(इन्द्र)** विद्यैश्वर्ययुक्त **(मयइव)** सुखमिव **(आपः)** जलानि **(न)** इव **(तृष्यते)** तृषाक्रान्ताय **(बभूथ)** भव **(ताम्)** **(अनु)** **(त्वा)** **(निविदम्)** नित्यविद्याम् **(जोहवीमि)** भृशं स्तौमि **(विद्याम)** **(इषम्)** **(वृजनम्)** बलम्। **वृजनमिति बलनामसु पठितम्।** (निघं०२.९) **(जीरदानुम्)** स्वात्मस्वरूपम्॥६॥

अन्वयः-हे इन्द्र! यथा निविदा पूर्वेभ्यो जरितृभ्यो मयइव तृष्यत आपो न त्वं बभूथ तां निविदमनु त्वाहं जोहवीमि। अतो वयमिषं वृजनं जीरादानुञ्च विद्याम॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये ब्रह्मचर्येणाप्तेभ्यो विद्याशिक्षे प्राप्याऽन्येभ्यः प्रयच्छन्ति ते सुखेन तृप्ताः सन्तो प्रशंसामाप्नुवन्ति। ये विरोधं विहाय परस्परमुपदिशन्ति ते विज्ञानबलं जीवपरमात्मस्वरूपं च जानन्ति॥६॥

अत्र राजव्यवहारवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति पञ्चसप्तत्युत्तरं शततमं १७५ सूक्तमष्टादशो १८ वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** विद्यैश्वर्ययुक्त! **(यथा)** जिस प्रकार नित्य विद्या से **(पूर्वेभ्यः)** प्रथम विद्या अध्ययन किये **(जरितृभ्यः)** समस्त विद्या गुणों की स्तुति करनेवाले जनों के लिये **(मयइव)** सुख के समान वा **(तृष्यते)** तृषा से पीड़ित जन के लिये **(आपः)** जलों के **(न)** समान आप **(बभूथ)** हूजिये, **(ताम्)** उस **(निविदम्)** नित्य विद्या के **(अनु)** अनुकूल **(त्वा)** आपकी मैं **(जोहवीमि)** निरन्तर स्तुति करता हूँ। और इसी से हम लोग **(इषम्)** इच्छासिद्धि **(वृजनम्)** बल और **(जीरदानुम्)** आत्मस्वरूप को **(विद्याम)** प्राप्त होवें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो ब्रह्मचर्य के साथ शास्त्रज्ञ धर्मात्माओं से विद्या और शिक्षा पाकर औरों को देते हैं, वे सुख से तृप्त होते हुए प्रशंसा को प्राप्त होते हैं और जो विरोध को छोड़ परस्पर उपदेश करते हैं वे विज्ञान, बल और जीवात्मा-परमात्मा के स्वरूप को जानते हैं॥६॥

इस सूक्त में राजव्यवहार के वर्णन से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ पचहत्तरवां १७५ सूक्त और अठारहवां १८ वर्ग समाप्त हुआ॥

मत्सीत्यस्य षड्चस्य षट्सप्तत्युत्तरस्य शततमस्य सूक्तस्यागस्त्य ऋषिः। इन्द्रो देवता। १,४ अनुष्टुप्। २ निचृदनुष्टुप्। ३ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ५ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ६ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजविषये विद्यापुरुषार्थयोगमाह॥

अब एक सौ छिहत्तरवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजविषय में विद्यानुकूल पुरुषार्थ योग को कहते हैं॥

मत्सि॑ नो॒ वस्य॑इष्टय॒ इन्द्र॑मिन्दो॒ वृषा॑ वि॑श।
ऋ॒घा॒यमा॑ण इन्वसि॒ शत्रु॒मन्ति॒ न वि॑न्दसि॥ १॥

मत्सि॑। नः॒। वस्य॑ःऽइष्टये। इन्द्र॑म्। इ॒न्दो॒ इति॑। वृषा॑। आ। वि॒श॒। ऋ॒घा॒यमा॑णः। इ॒न्व॒सि॒। शत्रु॑म्। अन्ति॑। न। वि॒न्द॒सि॒॥ १॥

पदार्थः-(**मत्सि**) आनन्दसि (**नः**) अस्माकम् (**वस्यइष्टये**) वसीयसोऽतिशयितस्य धनस्य सङ्गमनाय (**इन्द्रम्**) परमैश्वर्य्यम् (**इन्दो**) आर्द्रस्वभाव (**वृषा**) बलिष्ठः (**आ**) समन्तात् (**विश**) प्राप्नुहि (**ऋघायमाणः**) वर्द्धमानः। अत्र ऋधु धातोः कः प्रत्ययो वर्णव्यत्ययेन घः तत **उपमानादाचार** इति क्यङ्। (**इन्वसि**) व्याप्नोषि (**शत्रुम्**) (**अन्ति**) (**न**) निषेधे (**विन्दसि**) लभसे॥ १॥

अन्वयः-हे इन्दो! चन्द्र इव वर्त्तमानन्यायेश वृषा या ऋघायमाणस्त्वं नो वस्यइष्टये इन्द्रं प्राप्य मत्सि शत्रुमिन्वसि। अन्ति न विन्दसि स त्वं सेनामाविश॥ १॥

भावार्थः-ये प्रजानामिष्टसुखाय दुष्टान् निवर्त्तयन्ति सत्याचारं व्याप्नुवन्ति, ते महदैश्वर्य्यमाप्नुवन्ति॥ १॥

पदार्थः-हे (**इन्दो**) चन्द्रमा के समान शीतल शान्तस्वरूपवाले न्यायाधीश! जो (**वृषा**) बलवान् (**ऋघायमाणः**) वृद्धि को प्राप्त होते हुए आप (**नः**) हमारे (**वस्यइष्टये**) अत्यन्त धन की सङ्गति के लिए (**इन्द्रम्**) परमैश्वर्य को प्राप्त होकर (**मत्सि**) आनन्द को प्राप्त होते हो और (**शत्रुम्**) शत्रु को (**इन्वसि**) व्याप्त होते अर्थात् उनके किये हुए दुराचार को प्रथम ही जानते हो किन्तु (**अन्ति**) अपने समीप (**न**) नहीं (**विन्दसि**) शत्रु पाते सो आप सेना को (**आ, विश**) अच्छे प्रकार प्राप्त होओ॥ १॥

भावार्थः-जो प्रजाजनों के चाहे हुए सुख के लिये दुष्टों को निवृत्ति कराते और सत्य आचरण को व्याप्त होते, वे महान् ऐश्वर्य को प्राप्त होते हैं॥ १॥

अथ प्रकृतविषये विद्याबीजविषयमाह॥

अब प्रकृत विषय में विद्यारूप बीज के विषय को कहते हैं॥

तस्मि॒न्ना वे॑शया॒ गिरो॒ य एक॑श्चर्षणी॒नाम्।

अनु॑ स्व॒धा यमु॒प्यते॒ यव॑ं न चर्कृ॒ष॒द् वृषा॑॥ २॥

तस्मि॑न्। आ। वे॒श॒य॒। गिर॑:। य:। एक॑:। च॒र्ष॒णी॒नाम्। अनु॑। स्व॒धा। यम्। उ॒प्यते॑। यव॑म्। न। चर्कृ॑षत्। वृषा॑॥ २॥

पदार्थ:-(**तस्मिन्**) (**आ**) (**वेशय**) समन्तात् प्रापय। अत्र **संहितायामि**ति दीर्घ:। (**गिर:**) उपदेशरूपा वाणी: (**य:**) (**एक:**) असहाय: (**चर्षणीनाम्**) मनुष्याणाम् (**अनु**) (**स्वधा**) अन्नम् (**यम्**) (**उप्यते**) (**यवम्**) (**न**) इव (**चर्कृषत्**) भृशं कर्षन् भृशं भूमिं विलिखन् (**वृषा**) कृषिकर्मकुशला:॥ २॥

अन्वय:-हे विद्वंस्तस्मिन् गिर आ वेशय यश्चर्षणीनामेक एवाऽस्ति। यमनुलक्ष्य चर्कृषद् वृषा यवं न स्वधान्नमुप्यते च॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। यथा कृषिवला: क्षेत्रेषु वीजान्युप्त्वा धनानि लभन्ते तथा विद्वांसो जिज्ञासूनामात्मसु विद्यासुशिक्षे प्रवेश्य सुखानि लभन्ते॥ २॥

पदार्थ:-हे विद्वान्! (**तस्मिन्**) उसमें (**गिर:**) उपदेशरूप वाणियों को (**आ, वेशय**) अच्छे प्रकार प्रविष्ट कराइये कि (**य:**) जो (**चर्षणीनाम्**) मनुष्यों में (**एक:**) एक अकेला सहायरहित दीनजन है और (**यम्**) जिसका (**अनु**) पीछा लखिकर (**चर्कृषत्**) निरन्तर भूमि को जोतता हुआ (**वृषा**) कृषिकर्म में कुशल जन (**यवम्**) यव अन्न को (**न**) जैसे बोये वैसे (**स्वधा**) अन्न (**उप्यते**) बोया जाता अर्थात् भोजन दिया जाता है॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे कृषिवल खेती करनेवाले उन खेतों में बीजों को बोकर अन्नों वा धनों को पाते हैं, वैसे विद्वान् जन ज्ञान विद्या चाहनेवाले शिष्य जनों के आत्मा में विद्या और उत्तम शिक्षा प्रवेश करा सुखों को प्राप्त होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्य॒ विश्वा॑नि॒ हस्त॑यो॒: पञ्च॑ क्षिती॒नां वसु॑।
स्पा॒शय॑स्व॒ यो अ॑स्म॒ध्रुग्दि॒व्येवा॒शनि॑र्जहि॥ ३॥

यस्य॑। विश्वा॑नि। हस्त॑यो:। पञ्च॑। क्षि॒ती॒नाम्। वसु॑। स्पा॒शय॑स्व य:। अ॒स्म॒ऽध्रुक्। दि॒व्याऽइव। अ॒शनि॑:। ज॒हि॒॥ ३॥

पदार्थ:-(**यस्य**) (**विश्वानि**) सर्वाणि (**हस्तयो:**) (**पञ्च**) ब्राह्मणक्षत्रियवैश्यशूद्रनिषादानाम् (**क्षितीनाम्**) मनुष्याणाम् (**वसु**) विद्याधनानि (**स्पाशयस्व**) (**य:**) (**अस्मध्रुक्**) अस्मान् द्रोग्धि (**दिव्येव**) यथा दिव्या (**अशनि:**) विद्युत् (**जहि**)॥ ३॥

अन्वयः-हे विद्वन्! यस्य हस्तयोः पञ्च क्षितीनां विश्वानि वसु सन्ति स त्वं योऽस्मध्रुक्तं स्पाशयस्वाशनिर्दिव्येव जहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्याऽधिकारे समग्रा विद्याः सन्ति यो जातशत्रून् हन्ति स दिव्यैश्वर्यस्य प्रापको भवति॥३॥

पदार्थः-हे विद्वान्! **(यस्य)** जिनके आप **(हस्तयोः)** हाथों में **(पञ्च)** ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और निषाद इन जातियों के **(क्षितीनाम्)** मनुष्यों के **(विश्वानि)** समस्त **(वसु)** विद्याधन हैं सो आप **(यः)** जो **(अस्मध्रुक्)** हम लोगों को द्रोह करता है, उसको **(स्पाशयस्व)** पीड़ा देओ और **(अशनिः)** बिजुली **(दिव्येव)** जो आकाश में उत्पन्न हुई और भूमि में गिरी हुई संहार करती है, उसके समान **(जहि)** नष्ट करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिसके अधिकार में समग्र विद्या हैं, जो उत्पन्न हुए शत्रुओं को मारता है, वह दिव्य ऐश्वर्य प्राप्ति करानेवाला होता है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा ॥

असुन्वन्तं समं जहि दूणाशं यो न ते मयः।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते॥४॥

असुन्वन्तम्। समम्। जहि। दुःऽनर्शम्। यः। न। ते। मयः। अस्मभ्यम्। अस्य। वेदनम्। दद्धि। सूरिः। चित्। ओहते॥४॥

पदार्थः-**(असुन्वन्तम्)** अभिषवादिनिष्पादनपुरुषार्थरहितम् **(समम्)** सर्वम् **(जहि)** **(दूणाशम्)** दुःखेन नाशनीयम् **(यः)** **(न)** निषेधे **(ते)** तव **(मयः)** सुखम् **(अस्मभ्यम्)** **(अस्य)** **(वेदनम्)** धनम् **(दद्धि)** धर। अत्र **दध धारण** इत्यस्माद् **बहुलं छन्दसी**ति शपो लुक् व्यत्ययेन परस्मैपदञ्च। **(सूरिः)** विद्वान् **(चित्)** इव **(ओहते)** व्यवहारान् वहति। अत्र **वाच्छन्दसी**ति संप्रसारणं लघूपधगुणः॥४॥

अन्वयः-हे राजन्! त्वं तमसुन्वन्तं दूणाशं समं जहि यः सूरिश्चिदिवौहते ते मयो न प्रापयति त्वमस्य वेदनमस्मभ्यं दद्धि॥४॥

भावार्थः-येऽलसा भवेयुस्तान् राजा ताडयेत्। यथा विद्वान् सर्वेभ्यः सुखं ददाति तथा यावच्छक्यं तावत्सुखं सर्वेभ्यो दद्यात्॥४॥

पदार्थः-हे राजन्! आप उस **(असुन्वन्तम्)** पदार्थों के सार खींचने आदि पुरुषार्थ से रहित **(दूणाशम्)** और दुःख से विनाशने योग्य **(समम्)** समस्त आलसीगण को **(जहि)** मारो दण्ड देओ कि **(यः)** जो **(सूरिः)** विद्वान् के **(चित्)** समान **(ओहते)** व्यवहारों की प्राप्ति करता है और **(ते)** तुम्हारे

(मयः) सुख को **(न)** नहीं पहुंचाता तथा आप **(अस्य)** इसके **(वेदनम्)** धन को **(अस्मभ्यम्)** हमारे अर्थ **(दद्धि)** धारण करो॥४॥

भावार्थः-जो आलसी जन हों उनको राजा ताड़ना दिलावे। जैसे विद्वान् जन सबके लिये सुख देता है, वैसे जितना अपना सामर्थ्य हो उतना सुख सबके लिये देवे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आवो॒ यस्य॑ द्विबर्ह॑सो॒ऽर्केषु॑ सानु॒षगस॑त्।
आ॒जाविन्द्र॑स्येन्दो॒ प्रावो॒ वाजे॑षु वा॒जिन॑म्॥५॥

आवः॑। यस्य॑। द्विऽबर्ह॑सः। अ॒र्केषु॑। सा॒नु॒षक्। अस॑त्। आ॒जौ। इन्द्र॑स्य। इ॒न्दो॒ इति॑। प्र। आ॒वः॒। वाजे॑षु। वा॒जिन॑म्॥५॥

पदार्थः-(**आवः**) (**यस्य**) (**द्विबर्हसः**) यो द्वाभ्यां विद्यापुरुषार्थाभ्यां वर्द्धते तस्य (**अर्केषु**) सुसत्कृतेष्वन्नेषु (**सानुषक्**) सानुकूलता (**असत्**) भवेत् (**आजौ**) संग्रामे (**इन्द्रस्य**) परमैश्वर्यस्य (**इन्दो**) सुप्रजासु चन्द्रवद्वर्त्तमान (**प्र**) (**आवः**) रक्ष (**वाजेषु**) वेगेषु (**वाजिनम्**) बलवन्तम्॥५॥

अन्वयः-हे इन्दो! यस्य द्विबर्हसोऽर्केषु सानुषगसत्। यं त्वमावः स इन्द्रस्याजौ वाजेषु वाजिनं त्वां प्रावः सततं रक्षन्तु॥५॥

भावार्थः-यथा सेनेशौ सर्वान् भृत्यान् रक्षेत्तथा भृत्यास्तं सततं रक्षेयुः॥५॥

पदार्थः-हे (**इन्दो**) अपनी प्रजाओं में चन्द्रमा के समान वर्त्तमान! (**यस्य**) जिस (**द्विबर्हसः**) विद्या पुरुषार्थ से बढ़ते हुए जन के (**अर्केषु**) अच्छे सराहे हुए अन्नादि पदार्थों में (**सानुषक्**) सानुकूलता ही (**असत्**) हो, जिसकी आप (**आवः**) रक्षा करें, वह (**इन्द्रस्य**) परमैश्वर्य सम्बन्धी (**आजौ**) संग्राम में (**वाजेषु**) वेगों में वर्त्तमान (**वाजिनम्**) बलवान् आपको (**प्र, आवः**) अच्छे प्रकार रक्षायुक्त करे अर्थात् निरन्तर आपकी रक्षा करे॥५॥

भावार्थः-जैसे सेनापति सब चाकरों की रक्षा करें, वैसे वे चाकर भी उसकी निरन्तर रक्षा करें॥५॥

अथ प्रकृतविषये योगपुरुषार्थः प्रोच्यते॥

अब प्रकृत विषय में योग के पुरुषार्थ का वर्णन किया जाता है॥

यथा॑ पू॒र्वेभ्यो॑ ज॒रि॒तृभ्य॑ इन्द्र॒ मय॑ इ॒वापो॒ न तृष्य॑ते ब॒भूथ॑।
तामनु॑ त्वा नि॒विदं॑ जोहवीमि वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम्॥६॥१९॥

यथा। पूर्वेभ्यः। जरितृऽभ्यः। इन्द्र। मयःऽइव। आपः। न। तृष्यते। बभूथ। ताम्। अनु। त्वा। निऽविदम्। जोहवीमि। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥६॥

पदार्थः-(**यथा**) (**पूर्वेभ्यः**) कृतयोगाभ्यासपुरःसरेभ्यः (**जरितृभ्यः**) योगगुणसिद्धीनां वेदितृभ्यः (**इन्द्र**) योगैश्वर्यजिज्ञासो (**मयइव**) सुखमिव (**आपः**) जलानि (**न**) इव (**तृष्यते**) पिपासवे (**बभूथ**) भव (**ताम्**) (**अनु**) (**त्वा**) (**निविदम्**) निश्चितप्रतिज्ञम् (**जोहवीमि**) भृशं ह्वयामि (**विद्याम**) (**इषम्**) इच्छासिद्धिम् (**वृजनम्**) दुःखत्यागम् (**जीरदानुम्**) जीवदयाम्॥६॥

अन्वयः-हे इन्द्र! त्वं योगजिज्ञासवः यथा पूर्वेभ्यो जरितृभ्यो योगं प्राप्य साधित्वा सिद्धा भवन्ति तथा भूत्वा मयइव तृष्यत आपो न बभूथ। तां योगविद्यामनुवर्त्तमान निविदं त्वा जोहवीमि। एवं कृत्वा वयमिषं वृजनं जीरदानुं च विद्याम॥६॥

भावार्थः-ये योगारूढेभ्यो योगशिक्षां प्राप्य पुरुषार्थेन योगमभ्यस्य सिद्धा जायन्ते तेऽलं सुखं लभन्ते। ये तान् सेवन्ते तेऽपि सुखं प्राप्नुवन्ति॥६॥

अस्मिन् सूक्ते विद्यापुरुषार्थयोगवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेदितव्या॥

इति षट्सप्तत्युत्तरं शततमं १७६ सूक्तमेकोनविंशो १९ वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) योग के ऐश्वर्य का ज्ञान चाहते हुए जन! (**यथा**) जैसे योग जानने की इच्छावाले (**पूर्वेभ्यः**) किया है योगाभ्यास जिन्होंने उन प्राचीन (**जरितृभ्यः**) योग गुण सिद्धियों के जाननेवाले विद्वानों से योग को पाकर और सिद्ध कर होते अर्थात् योगसम्पन्न होते हैं, वैसे होकर (**मयइव**) सुख के समान और (**तृष्यते**) पियासे के लिये (**आपः**) जलों के (**न**) समान (**बभूथ**) हूजिये और (**ताम्**) उस योगविद्या के (**अनु**) अनुवर्त्तमान (**निविदम्**) और निश्चित प्रतिज्ञा जिन्होंने की उन (**त्वा**) आपको (**जोहवीमि**) निरन्तर कहता हूँ, ऐसे कर हम लोग (**इषम्**) इच्छासिद्धि (**वृजनम्**) दुःखत्याग और (**जीरदानुम्**) जीवदया को (**विद्याम**) प्राप्त हों॥६॥

भावार्थः-जो जिज्ञासु जन योगारूढ़ पुरुषों से योगशिक्षा को प्राप्त होकर पुरुषार्थ से योग का अभ्यास कर सिद्ध होते हैं, वे पूर्ण सुख को पाते और जो उत्तम योगियों का सेवन करते वे भी सुख को प्राप्त होते हैं॥६॥

इस सूक्त में विद्या, पुरुषार्थ और योग का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ छिहत्तरवाँ १७६ सूक्त और उन्नीसवां १९ वर्ग समाप्त हुआ॥

आ चर्षणिप्रा इत्यस्य पञ्चर्चस्य सप्तसप्तत्युत्तरस्य शततमस्य सूक्तस्यागस्त्य ऋषिः। इन्द्रो देवता। १,२ निचृत् त्रिष्टुप्। ३ त्रिष्टुप्। ४ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजविद्वद्गुणानाह॥

अब एक सौ सतहत्तरवें सूक्त का आरम्भ है। उसमें राजा और विद्वानों के गुणों को कहते हैं॥

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः।
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ्॥ १॥

आ। चर्षणिऽप्राः। वृषभः। जनानाम्। राजा। कृष्टीनाम्। पुरुऽहूतः। इन्द्रः। स्तुतः। श्रवस्यन्। अवसा। उप। मद्रिक्। युक्त्वा। हरी इति। वृषणा। आ। याहि। अर्वाङ्॥ १॥

पदार्थः-(**आ**) समन्तात् (**चर्षणिप्राः**) यश्चर्षणीन्मनुष्यान् प्रति विद्यया पिपर्त्ति सः (**वृषभः**) अतीव बलवान् (**जनानाम्**) शुभगुणेषु प्रादुर्भूतानाम् (**राजा**) प्रकाशमानः (**कृष्टीनाम्**) मनुष्याणाम् (**पुरुहूतः**) बहुभिः सत्कृतः (**इन्द्रः**) ऐश्वर्यप्रदः (**स्तुतः**) प्रशंसितः (**श्रवस्यन्**) आत्मनः श्रवोऽन्नमिच्छन् (**अवसा**) रक्षणादिना (**उप**) (**मद्रिक्**) यो मद्रं काममञ्चति सः (**युक्त्वा**) संयोज्य (**हरी**) हरणशीलौ (**वृषणा**) बलिष्ठावश्वौ (**आ**) (**याहि**) प्राप्नुहि (**अर्वाङ्**) योऽर्वागधो देशमञ्चति गच्छति तम्॥ १॥

अन्वयः-हे विद्वन्! यथा वृषभो जनानां चर्षणिप्रा राजा कृष्टीनां पुरुहूतः स्तुतः श्रवस्यन्मद्रिगिन्द्रो वृषणा हरी युक्त्वा अर्वाङ् याति तथाऽवसा त्वमस्मानुपा याहि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा शुभगुणकर्मस्वभावा सभाध्यक्षाः प्रजासु चेष्टेरँस्तथा प्रजास्थैश्चेष्टितव्यम्। यथा कश्चिद्विमानमारुह्योपरि गत्वाऽध आयाति तथा विद्वांसः पराऽवरज्ञा स्युः॥ १॥

पदार्थः-हे विद्वान्! जैसे (**वृषभः**) अतीव बलवान् (**जनानाम्**) शुद्ध गुणों में प्रसिद्ध हुए जनों में (**चर्षणिप्राः**) मनुष्यों को विद्या से पूर्ण करनेवाला (**राजा**) प्रकाशमान और (**कृष्टीनाम्**) मनुष्यों में (**पुरुहूतः**) बहुतों से सत्कार को प्राप्त हुआ (**स्तुतः**) प्रशंसित (**श्रवस्यन्**) अपने को अन्न की इच्छा करता हुआ (**मद्रिक्**) जो काम को प्राप्त होता वह (**इन्द्रः**) ऐश्वर्य का देनेवाला (**वृषणा**) अति बली (**हरी**) हरणशील घोड़ों को (**युक्त्वा**) जोड़कर (**अर्वाङ्**) नीचली भूमियों में जाता है, वैसे (**अवसा**) रक्षा आदि के साथ आप हम लोगों के (**उप, आ, याहि**) समीप आओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे शुभ गुण, कर्म, स्वभाववाले सभाध्यक्ष प्रजाजनों में चेष्टा करें, वैसे प्रजाजनों को भी चेष्टा करनी चाहिये। जैसे कोई विमान पर चढ़ि और ऊपर को जायकर नीचे आता है, वैसे विद्वान् जन अगले-पिछले विषय को जानने वाले हों॥ १॥

अथ राजविषयमाह॥

अब अगले मन्त्र में राजविषय का उपदेश किया है॥

ये ते॒ वृष॑णो वृष॒भास॑ इन्द्र ब्रह्म॒युजो॒ वृष॑रथासो॒ अत्या॑:।
ताँ आ ति॑ष्ठ॒ तेभि॒रा या॑ह्यर्वाङ् हवा॑महे त्वा सु॒त इ॑न्द्र॒ सोमे॑॥ २॥

ये। ते॒। वृष॑णः। वृ॒ष॒भास॑:। इ॒न्द्र॒। ब्र॒ह्म॒ऽयुज॑:। वृष॑ऽरथास:। अत्या॑:। तान्। आ। ति॒ष्ठ॒। तेभि॑:। आ। या॒हि॒। अ॒र्वाङ्। हवा॑महे। त्वा॒। सु॒ते। इ॒न्द्र॒। सोमे॑॥ २॥

पदार्थ:-(**ये**) (**ते**) (**वृषण:**) प्रबला युवान: (**वृषभास:**) परिशक्तिबन्धका: (**इन्द्र**) विद्युदिव सेनेश (**ब्रह्मयुज:**) ब्रह्माणं युञ्जन्ति यैस्ते (**वृषरथास:**) वृषा: शक्तिबन्धका रथा रमणसाधनानि येषान्ते (**अत्या:**) नितरां गमनशीला अश्वा: (**तान्**) (**आ**) समन्तात् (**तिष्ठ**) (**तेभि:**) तै: (**आ**) आभिमुख्ये (**याहि**) आगच्छ (**अर्वाङ्**) अभिमुखम् (**हवामहे**) स्वीकुर्महे (**त्वा**) त्वाम् (**सुते**) निष्पन्ने (**इन्द्र**) सूर्य इव वर्त्तमान (**सोमे**) ओषध्यादिगुण इवैश्वर्ये॥ २॥

अन्वय:-हे इन्द्र! ते वृषणो ये वृषभासो ब्रह्मयुजो वृषरथासोऽत्या: सन्ति तानातिष्ठ। हे इन्द्र! वयं सुते सोमे त्वा हवामहे त्वं तेभिरर्वाङायाहि॥ २॥

भावार्थ:-ये राजान: सर्वसाधनसाध्यरथान् प्रबलानश्वान् वृषभांश्च कार्येषु संयोजयन्ति, ते प्रशस्तयानादियुक्ता ऐश्वर्यं लभन्ते॥ ३॥

पदार्थ:-हे (**इन्द्र**) सूर्य के समान वर्त्तमान राजन्! (**ते**) आपके (**ये**) जो (**वृषण:**) प्रबल जवान (**वृषभास:**) वृषभ (**ब्रह्मयुज:**) उत्तम अन्न का योग करनेवाले (**वृषरथास:**) शक्तिबन्धक और रमण साधन रथ (**अत्या:**) और निरन्तर गमनशील घोड़े हैं (**तान्**) उनको (**आ, तिष्ठ**) यत्नवान् करो अर्थात् उन पर चढो, उन्हें कार्यकारी करो। हे (**इन्द्र**) सूर्य के समान वर्त्तमान राजन्! हम लोग (**सुते**) उत्पन्न हुए (**सोमे**) ओषधि आदिकों के गुण के समान ऐश्वर्य के निमित्त (**त्वा**) आपको (**हवामहे**) स्वीकार करते हैं, आप (**तेभि:**) उनके साथ (**अर्वाङ्**) सम्मुख (**आ, याहि**) आओ॥ २॥

भावार्थ:-जो राजजन समस्त साधनों में साध्य रथों, प्रबल घोड़ों और बैलों को कार्य्यों में संयुक्त कराते हैं, वे प्रशस्त यान आदि पदार्थों से युक्त हुए राजजन ऐश्वर्य को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ ति॑ष्ठ॒ रथं॑ वृष॒णं॑ वृषा॑ ते सु॒त: सोम॒: परि॑षिक्ता॒ मधू॑नि।
यु॒क्त्वा वृष॑भ्यां वृषभ क्षिती॒नां हरि॑भ्यां याहि प्र॒वतो॑प॒ मद्रि॑क्॥ ३॥

आ। तिष्ठ। रथम्। वृषणम्। वृषा। ते। सुतः। सोमः। परिऽसिक्ता। मधूनि। युक्त्वा। वृषभ्याम्। वृषभ। क्षितीनाम्। हरिऽभ्याम्। याहि। प्रऽवता। उप। मद्रिक्॥ ३॥

पदार्थः-(**आ**) समन्तात् (**तिष्ठ**) (**रथम्**) विमानादियानम् (**वृषणम्**) दृढम् (**वृषा**) रसादिपूर्णः (**ते**) तुभ्यम् (**सुतः**) निष्पादितः (**सोमः**) सोमलतादिरसः (**परिषिक्ता**) परितः सर्वतः सिक्तानि (**मधूनि**) मधुरादिद्रव्याणि (**युक्त्वा**) (**वृषभ्याम्**) बलिष्ठाभ्याम् (**वृषभ**) परशक्तिबन्धकत्वेन बलिष्ठ (**क्षितीनाम्**) मनुष्याणाम् (**हरिभ्याम्**) हरणशीलाभ्याम् (**याहि**) (**प्रवता**) निम्नेन मार्गेण (**उप**) (**मद्रिक्**) अस्मानञ्चन् प्राप्नुवन्॥ ३॥

अन्वयः-हे वृषभ राजन्! मद्रिग्वृषा सँस्त्वं यस्ते सोमः सुतस्तत्र मधूनि परिषिक्ता तं पीत्वा क्षितीनां वृषभ्यां हरिभ्यां वृषणं रथं युक्त्वा युद्धमा तिष्ठ प्रवतोप याहि॥ ३॥

भावार्थः-ये युक्ताहारविहाराः सोमाद्योषधिरससेविनो दीर्घब्रह्मचर्याः शरीरात्मबलयुक्ता राजानो विद्युदादि पदार्थवेगयुक्तानि यानानि साधयित्वा दण्डेन दुष्टान् निवार्य्य न्यायेन राज्यं रक्षयेयुस्त एव सुखिनो भवन्ति॥ ३॥

पदार्थः-हे (**वृषभः**) दूसरों के सामर्थ्य रोकने से बलिष्ठ राजन्! (**मद्रिक्**) हम लोगों को प्राप्त होते और (**वृषा**) रस आदि से परिपूर्ण होते हुए आप जो (**ते**) अपने लिये (**सोमः**) सोमलता आदि का रस (**सुतः**) उत्पन्न किया गया है, उसमें (**मधूनि**) मीठे-मीठे पदार्थ (**परिषिक्ता**) सब ओर से सीचें हुए हैं, उस रस को पी कर (**क्षितीनाम्**) मनुष्यों के (**वृषभ्याम्**) प्रबल (**हरिभ्याम्**) हरणशील घोड़ों से (**वृषणम्**) दृढ़ (**रथम्**) रथ को (**युक्त्वा**) जोड़ युद्ध का (**आ, तिष्ठ**) यत्न करो वा युद्ध की प्रतिज्ञा पूर्ण करो और (**प्रवता**) नीचे मार्ग से (**उप, याहि**) समीप आओ॥ ३॥

भावार्थः-जो आहार-विहार से युक्त सोमादि ओषधियों के रस के सेवनेवाले, दीर्घ ब्रह्मचर्य्य किये हुए, शरीर और आत्मा के बल से युक्त राजजन, बिजुली आदि पदार्थों के वेग से युक्त यानों को सिद्ध कर, दण्ड से दुष्टों को निवारण कर, न्याय से राज्य की रक्षा कराया करें, वे ही सुखी होते हैं॥ ३॥

अथ राजविद्वद्विषयमाह॥

अब राजा और विद्वान् के विषय को अगले मन्त्र में कहा है॥

अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिन्द्र सोमः।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह॥ ४॥

अयम्। यज्ञः। देवऽयाः। अयम्। मियेधः। इमा। ब्रह्माणि। अयम्। इन्द्र। सोमः। स्तीर्णम्। बर्हिः। आ। तु। शक्र। प्र। याहि। पिब। निऽसद्य। वि। मुच। हरी इति। इह॥ ४॥

पदार्थः-(**अयम्**) (**यज्ञः**) राजधर्मशिल्पकार्य्यसङ्गत्युन्नतः (**देवयाः**) देवान् दिव्यान् गुणान् विदुषो वा याति प्राप्नोति येन सः (**अयम्**) (**मियेधः**) मियेन प्रक्षेपणेनैधः प्रदीपनं यस्य सः (**इमा**) इमानि (**ब्रह्माणि**) धनानि। **ब्रह्मेति धननामसु पठितम्।** (निघं०२.१०) (**अयम्**) (**इन्द्र**) सभेश (**सोमः**) महौषधिरस ऐश्वर्य्यं वा (**स्तीर्णम्**) आच्छादितम् (**बर्हिः**) उत्तमासनम् (**आ**) (**तु**) (**शक्र**) शक्तिमान् (**प्र**) (**याहि**) प्राप्नुहि (**पिब**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**निषद्य**) उपविश्य (**वि**) (**मुच**) त्यज। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **वा छन्दसी**ति उपधा नकारलोपः। (**हरी**) विद्युतो धारणाकर्षणावश्वौ। **हरि इतीन्द्रस्येत्यादिष्टोपयोजन-नामसु पठितम्।** (निघं०१.१५)। (**इह**) अस्मिन् जगति॥४॥

अन्वयः-हे शक्रेन्द्र! अयं देवया यज्ञोऽयं मियेधोऽयं सोमस्त्विदं स्तीर्णं बर्हिर्निसद्येमा ब्रह्माणि प्रायाहि। इमं सोमं पिब इह हरी स्वीकृत्य दुःखं विमुच॥४॥

भावार्थः-सर्वैर्जनैर्व्यवहारे प्रयत्य यदा राजा स्नातको विद्यावयोवृद्धश्चागच्छेत्तदाऽऽसनादिभिः सत्कृत्य प्रष्टव्यः, स तान् प्रति यथोचितं धर्म्यं विद्याप्रापकं वचो ब्रूयाद्यतो दुःखहानिसिद्धिर्विद्युदादिपदार्थसिद्धिश्च स्यात्॥४॥

पदार्थः-हे (**शक्र**) शक्तिमान् (**इन्द्र**) सभापति! (**अयम्**) यह (**देवयाः**) जिससे दिव्य गुण वा उत्तम विद्वानों को प्राप्त होना होता वह (**यज्ञः**) राजधर्म और शिल्प की सङ्गति से उन्नति को प्राप्त हुआ यज्ञ वा (**अयम्**) यह (**मियेधः**) जिसकी पदार्थों के डारने से वृद्धि होती यह (**अयम्**) यह (**सोमः**) बड़ी-बड़ी ओषधियों का रस वा ऐश्वर्य (**तु**) और यह (**स्तीर्णम्**) ढंपा हुआ (**बर्हिः**) उत्तम आसन है (**निसद्य**) इस आसन पर बैठ (**इमा**) इन (**ब्रह्माणि**) धनों को (**प्रायाहि**) उत्तमता से प्राप्त होओ। इस उक्त ओषधि को (**पिब**) पी, (**इह**) यहाँ (**हरी**) बिजुली के धारण और आकर्षणरूपी घोड़ों को स्वीकार कर और दुःख को (**विमुच**) छोड़॥४॥

भावार्थः-सब मनुष्यों को व्यवहार में अच्छा यत्न कर जब राजा, ब्रह्मचारी तथा विद्या और अवस्था से बढ़ा हुआ सज्जन आवे, तब आसन आदि से उसका सत्कार कर पूछना चाहिए। वह उनके प्रति यथोचित धर्म के अनुकूल विद्या की प्राप्ति करनेवाले वचन को कहे, जिससे दुःख की हानि, सुख की वृद्धि और बिजुली आदि पदार्थों की भी सिद्धि हो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ओ सुष्टुत इन्द्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम्॥५॥२०॥

ओ इति। सुऽस्तुतः। इन्द्र। याहि। अर्वाङ्। उप। ब्रह्माणि। मान्यस्य। कारोः। विद्याम। वस्तोः। अवसा। गृणन्तः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥५॥

पदार्थः-**(ओ)** सम्बोधने **(सुष्टुतः)** सुष्ठु प्रशंसितः **(इन्द्र)** धनप्रद सभेश **(याहि)** प्राप्नुहि **(अर्वाङ्)** अर्वाचीनमञ्चन् **(उप)** **(ब्रह्माणि)** धनानि **(मान्यस्य)** सत्कर्त्तुं योग्यस्य **(कारोः)** कारकस्य **(विद्याम)** जानीयाम **(वस्तोः)** प्रतिदिनम् **(अवसा)** रक्षणाद्येन **(गृणन्तः)** स्तुवन्तः **(विद्याम)** विजानीयाम **(इषम्)** प्राप्तिम् **(वृजनम्)** सद्गतिम् **(जीरदानुम्)** जीवात्मानम्॥५॥

अन्वयः-ओ इन्द्र! यथा वयं मान्यस्य कारोर्ब्रह्माणि वस्तोरुपविद्याम यथा वावसा गृणन्तः सन्त इषं वृजनं जीरदानुञ्च विद्याम तथा त्वं सुष्टुतोऽर्वाङ् याहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये धनमाप्नुयुस्ते परेषां सत्कारं कुर्युः। ये क्रियाकुशलाः शिल्पिन ऐश्वर्य्यमाप्नुयुस्ते सर्वैः सत्कर्त्तव्याः स्युः। यथा यथा विद्यादिसद्गुणा अधिकाः स्युस्तथा तथा निरभिमानिनो भवन्तु॥५॥

अत्र राजादिविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्या॥

इति सप्तसप्तत्युत्तरं शततमं १७७ सूक्तं विंशो २० वर्गश्च समाप्तः॥

पदार्थः-**(ओ, इन्द्र)** हे धन देनेवाले सभापति! जैसे हम लोग **(मान्यस्य)** सत्कार करने योग्य **(कारोः)** कार करनेवाले के **(ब्रह्माणि)** धनों को **(वस्तोः)** प्रतिदिन **(उप, विद्याम)** समीप में जानें वा जैसे **(अवसा)** रक्षा आदि के साथ **(गृणन्तः)** स्तुति करते हुए हम लोग **(इषम्)** प्राप्ति **(वृजनम्)** उत्तम गति और **(जीरदानुम्)** जीवात्मा को **(विद्याम)** जानें, वैसे आप **(सुष्टुतः)** अच्छे प्रकार स्तुति को प्राप्त हुए **(अर्वाङ्)** **(याहि)** सम्मुख आओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो धन को प्राप्त हों, वे औरों का सत्कार करें। जो क्रियाकुशल शिल्पीजन ऐश्वर्य को प्राप्त हों, वे सबको सत्कार करने योग्य हों। जैसे जैसे विद्या आदि अच्छे गुण अधिक हों, वैसे-वैसे अभिमानरहित हों॥५॥

यहाँ राजा आदि विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिए॥

यह एक सौ सतहत्तरवां १७७ सूक्त और बीसवां २० वर्ग समाप्त हुआ॥

यद्धेति पञ्चर्च्चस्याऽष्टसप्तत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। इन्द्रो देवता। १,२ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३,४ निचृत् त्रिष्टुप्। ५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सेनापतिगुणानाह॥

अब एक सौ अठहत्तरवें सूक्त का आरम्भ है। उसमें आरम्भ से सेनापति के गुणों का वर्णन करते हैं॥

यद्ध॒ स्या त॑ इन्द्र श्रु॒ष्टिरस्ति॒ यया॑ ब॒भूथ॑ जरि॒तृभ्य॑ ऊ॒ती।
मा न॒ काम॑ं म॒हय॑न्त॒मा ध॒ग्विश्वा॑ ते अश्या॒ं पर्याप॑ आ॒योः॥ १॥

यत्। ह॒। स्या। ते॒। इ॒न्द्र॒। श्रु॒ष्टिः। अस्ति॑। यया॑। ब॒भूथ॑। ज॒रि॒तृऽभ्य॑ः। ऊ॒ती। मा। न॒ः। काम॑म्। म॒हय॑न्तम्। आ। धक्। विश्वा॑। ते॒। अ॒श्या॒म्। परि॑। आप॑ः। आ॒योः॥ १॥

पदार्थः-(**यत्**) या (**ह**) किल (**स्या**) असौ (**ते**) तव (**इन्द्र**) सेनेश (**श्रुष्टिः**) श्रोतव्या विद्या (**अस्ति**) (**यया**) (**बभूथ**) भवसि (**जरितृभ्यः**) सकलविद्यास्तावकेभ्यः (**ऊती**) ऊत्या रक्षणादिकर्म-युक्तया (**मा**) निषेधे (**नः**) अस्माकम् (**कामम्**) (**महयन्तम्**) सत्कर्त्तव्यम् (**आ**) समन्तात् (**धक्**) दहेः (**विश्वा**) सर्वाणि (**ते**) तव (**अश्याम्**) प्राप्नुयाम् (**परि**) सर्वतः (**आपः**) प्राणबलानि (**आयोः**) जीवनस्य॥ १॥

अन्वयः-हे इन्द्र! यद्या स्या ते श्रुष्टिरस्ति यया त्वं जरितृभ्य उपदेष्टा बभूथ तयोती नो महयन्तं कामं मा धक्। ते हायोः या आपस्ताः विश्वा पर्यश्याम्॥ १॥

भावार्थः-सेनापत्यादयो राजपुरुषाः स्वप्रयोजनाय कस्यापि कार्य्यं न विनाशयेयुः। सदाऽध्यापकाऽध्येतॄणां रक्षां कुर्युः। यतो बलिष्ठा दीर्घायुषो जनाः स्युः॥ १॥

पदार्थः-हे (**इन्द्र**) सेनापति! (**यत्**) जो (**स्या**) यह (**ते**) आपकी (**श्रुष्टिः**) सुनने योग्य विद्या (**अस्ति**) है (**यया**) जिससे आप (**जरितृभ्यः**) समस्त विद्या की स्तुति करनेवालों के लिये उपदेश करनेवाले (**बभूथ**) होते हैं, उस (**ऊती**) रक्षा आदि कर्म से युक्त विद्या से (**नः**) हमारे (**महयन्तम्**) सत्कार प्रशंसा करने योग्य (**कामम्**) काम को (**मा, आ, धक्**) मत जलाओ (**ते**) आपके (**ह**) ही (**आयोः**) जीवन के जो (**आपः**) प्राण बल हैं, उन (**विश्वा**) सभी को (**पर्यश्याम्**) सब ओर से प्राप्त होऊं॥ १॥

भावार्थः-सेनापति आदि राजपुरुष अपने प्रयोजन के लिये किसी के काम को न विनाशें, सदैव पढ़ाने और पढ़नेवालों की रक्षा करें, जिससे बहुत बलवान् आयुयुक्त जन हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न घा॒ राजेन्द्र॒ आ द॑भन्नो॒ या नु स्वसा॑रा कृ॒णव॑न्त॒ योनौ॑।
आप॑श्चिदस्मै सु॒तुका॑ अवेष॒न् गम॑न्न॒ इन्द्रः॑ स॒ख्या वय॑श्च॥ २॥

न। घ॒। राजा॑। इन्द्रः॑। आ। द॒भ॒त्। न॒ः। या। नु। स्वसा॑रा। कृ॒ण्व॑न्त। योनौ॑। आपः॑। चि॒त्। अ॒स्मै॒। सु॒ऽतुका॑ः। अ॒वे॒ष॒न्। गम॑त्। न॒ः। इन्द्रः॑। स॒ख्या। वय॑ः। च॒॥ २॥

पदार्थः-(**न**) निषेधे (**घ**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**राजा**) विद्याविनयाभ्यां राजमानः (**इन्द्रः**) परमैश्वर्ययुक्तः (**आ**) समन्तात् (**दभत्**) हिंस्यात् (**नः**) अस्मान् (**या**) ये (**नु**) सद्यः (**स्वसारा**) भगिन्याविव (**कृणवन्त**) कुरुत (**योनौ**) गृहे (**आपः**) जलानि (**चित्**) इव (**अस्मै**) (**सुतुकाः**) सुष्ठु आदात्र्यः (**अवेषन्**) व्याप्नुवन्ति (**गमत्**) प्राप्नुयात् (**नः**) अस्मान् (**इन्द्रः**) परमैश्वर्यवान् (**सख्या**) मित्रस्य कर्म्माणि (**वयः**) जीवनम् (**च**)॥ २॥

अन्वयः-हे मनुष्या! यथा इन्द्रो राजा नोऽस्मान्नादभत्तथा वयं नु तं घ मा हिंसेम। यथा या स्वसारा योनौ बन्धुं न हिंस्यात्तां तथा तद्वद्वयं कञ्चिदपि न हिंस्याम यथा विद्वांसो हिंसां न कुर्वन्ति तथा सर्वे न कृण्वन्त यथेन्द्रोऽस्मै सख्या वयश्च सुतुका आपोऽवेषंश्चिदिव नोऽस्मान् गमत्तथैतं वयमपि प्राप्नुयाम॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाप्ता दयालव[५] कञ्चन न हिंसन्ति तथा सर्व आचरन्तु॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**इन्द्रः**) परमैश्वर्ययुक्त (**राजा**) विद्या और विनय से प्रकाशमान राजा (**नः**) हम लोगों को (**न**) न (**आ, दभत्**) मारे न दण्ड देवे, वैसे हम लोग (**नु**) भी उसको (**घ**) ही मत दुःख देवें, जैसे (**या**) जो (**स्वसारा**) दो बहिनियों के समान दो स्त्री (**योनौ**) घर में बन्धु को न मारें, वैसे उनके समान हम किसी को न मारें, जैसे विद्वान् जन हिंसा नहीं करते हैं, वैसे सब लोग न (**कृण्वन्त**) करें, जैसे (**इन्द्रः**) परमैश्वर्यवान् (**अस्मै**) इस सज्जन के लिये (**सख्या**) मित्रपन के काम (**वयः**) जीवन (**च**) और (**सुतुकाः**) सुन्दर ग्रहण करनेवाली स्त्री (**आपः**) जलों को (**अवेषन्**) व्याप्त होती हैं (**चित्**) उनके समान (**नः**) हम लोगों को (**गमत्**) प्राप्त हो, वैसे उनको हम भी प्राप्त होवें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे शास्त्रज्ञ धर्मात्मा दयालु विद्वान् किसी को नहीं मारते, वैसे सब आचरण करें॥ २॥

---

५. दयालवो विद्वांसः॥ सं.॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जेता॒ नृभि॒रिन्द्र॑: पृ॒त्सु शूर॒: श्रोता॒ हव॑ं नाध॑मानस्य का॒रो:।
प्रभ॑र्ता॒ रथ॑ं दा॒शुष॑ उपा॒क उद्य॑न्ता गिरो॒ यदि॑ च त्मना॒ भूत्॥ ३॥

जेता॑। नृऽभि॑:। इन्द्र॑:। पृ॒त्ऽसु। शूर॑:। श्रोता॑। हव॑म्। नाध॑मानस्य। का॒रो:। प्रऽभ॑र्ता॒। रथ॑म्। दा॒शुष॑:। उ॒पा॒के। उत्ऽय॑न्ता॑। गिर॑:। यदि॑। च॒। त्मना॑। भूत्॥ ३॥

पदार्थ:-(**जेता**) जेतुं शील: (**नृभि:**) नायकैर्वीरैस्सह (**इन्द्र:**) सेनेश: (**पृत्सु**) सङ्ग्रामेषु (**शूर:**) शत्रूणां हिंसक: (**श्रोता**) (**हवम्**) आदातुमर्हं विद्याबोधम् (**नाधमानस्य**) याचमानस्य (**कारो:**) कर्त्तुं शीलस्य (**प्रभर्त्ता**) प्रकृष्टानां विद्यानां धर्त्ता (**रथम्**) यानम् (**दाशुष:**) दातुं शीलस्य (**उपाके**) समीपे (**उद्यन्ता**) उत्कृष्टतया नियन्ता (**गिर:**) वाणी: (**यदि**) (**च**) (**त्मना**) आत्मना (**भूत्**) भवेत्। अत्राडभाव: लिङर्थे लुङ् च॥ ३॥

अन्वय:-यदि नृभिस्सह शूरो जेता नाधमानस्य कारोर्हवं श्रोता प्रभर्ता दाशुष उपाके गिर उद्यन्तेन्द्रस्त्वं त्मना पृत्सु रथं च गृहीत्वा प्रवृत्तो भूत्तर्हि तस्य ध्रुवो विजय: स्यात्॥ ३॥

भावार्थ:-ये विद्यां याचेयुस्तेभ्यस्सततं दद्यात्। ये जितेन्द्रिया सत्यवादिनो भवन्ति तेषामेव विद्या प्राप्ता भवति। ये विद्याशरीरबलैर्युक्ता शत्रुभि: सह युद्ध्यन्ते तेषां कुत: पराजय: ?॥ ३॥

पदार्थ:-(**यदि**) जो (**नृभि:**) नायक वीरों के साथ (**शूर:**) शत्रुओं की हिंसा करनेवाला (**जेता**) विजयशील (**नाधमानस्य**) मांगते हुए (**कारो:**) कार्यकारी पुरुष के (**हवम्**) ग्रहण करने योग्य विद्याबोध को (**श्रोता**) सुननेवाला (**प्रभर्त्ता**) उत्तम विद्याओं का धारण करनेवाला (**दाशुष:**) दानशील के (**उपाके**) समीप (**गिर:**) वाणियों का (**उद्यन्ता**) उद्यम करनेवाला (**इन्द्र:**) सेनाधीश तू (**त्मना**) अपने से (**पृत्सु**) संग्रामों में (**रथम्**) रथ को (**च**) भी ग्रहण करके प्रवृत्त (**भूत्**) होवे, उसका दृढ़ विजय हो॥ ३॥

भावार्थ:-जो विद्या की याचना करें उसको निरन्तर विद्या देवें। जो जितेन्द्रिय सत्यवादी होते हैं, उन्हीं को विद्या प्राप्त होती है। जो विद्या और शरीर बलों से शत्रुओं के साथ युद्ध करते हैं, उनका कैसे पराजय हो ?॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ए॒वा नृभि॒रिन्द्र॑: सुश्रव॒स्या प्र॑खा॒द: पृ॒क्षो अ॒भि मि॒त्रिणो॑ भूत्।
स॒म॒र्य इ॒ष: स्त॑वते॒ विवा॑चि सत्रा॒करो यज॑मानस्य॒ शंस॑:॥ ४॥

एव। नृऽभिः। इन्द्रः। सुऽश्रवस्या। प्रखादः। पृक्षः। अभि। मित्रिणः। भूत्। सऽमर्ये। इषः। स्तवते। विऽवाचि। सत्राऽकरः। यजमानस्य। शंसः॥४॥

पदार्थः-(**एव**) निश्चये। अत्र **निपातस्य चे**ति दीर्घः। (**नृभिः**) वीरैः पुरुषैः सह (**इन्द्रः**) सेनेशः (**सुश्रवस्या**) शोभनान्नेच्छया (**प्रखादः**) अतिभक्षकः (**पृक्षः**) ज्ञापयितुमिष्टमन्नम् (**अभि**) आभिमुख्ये (**मित्रिणः**) मित्राणि यस्य सन्ति तस्य (**भूत्**) भवेत् (**समर्य्ये**) सम्यगर्य्ये वणिजि (**इषः**) अन्नानि (**स्तवते**) प्रशंसति (**विवाचि**) विविधविद्यासुशिक्षायुक्ते (**सत्राकरः**) सत्रा सत्यं करोतीति (**यजमानस्य**) दातुः (**शंसः**) प्रशंसकः॥४॥

अन्वयः-हे मनुष्या! नृभिः सहेन्द्रः सुश्रवस्या पृक्षः प्रखादो मित्रिणोऽभि भूत् विवाचि सत्राकरो यजमानस्य शंसः समर्य्ये इषः स्तवतयेव॥४॥

भावार्थः-ये उद्योगिनः सत्यवादिनः सत्योपदेशं कुर्वन्ति ते नायका भवन्ति॥४॥

पदार्थः-हे मनुष्यो! (**नृभिः**) वीर पुरुषों के साथ (**इन्द्रः**) सेनापति (**सुश्रवस्या**) उत्तम अन्न की इच्छा से (**पृक्षः**) दूसरों को बता देने को चाहा हुआ अन्न उसको (**प्रखादः**) अतीव खानेवाला और (**मित्रिणः**) मित्र जिसके वर्त्तमान उसके (**अभि, भूत्**) सम्मुख हो तथा (**विवाचि**) नाना प्रकार की विद्या और उत्तम शिक्षायुक्त वीर जन के निमित्त (**सत्राकरः**) सत्य व्यवहार करने और (**यजमानस्य**) देनेवाले की (**शंसः**) प्रशंसा करनेवाला (**समर्य्ये**) उत्तम वणियों के निमित्त (**इषः**) अन्नों की (**स्तवते**) स्तुति प्रशंसा करता (**एव**) ही है॥४॥

भावार्थः-जो उद्योगी और सत्यवादी जन सत्योपदेश करते हैं, वे नायक, अधिपति और अग्रगामी होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वया॑ व॒यं म॑घवन्निन्द्र शत्रू॒न॒भि ष्या॑म महृतो मन्य॑मानान्।
त्वं त्रा॒ता त्वमु॑ नो वृ॒धे भू॑र्वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम्॥५॥२१॥

त्वया॑। वयम्। म॒घऽव॒न्। इ॒न्द्र॒। शत्रू॑न्। अ॒भि। स्याम॒। म॒हृतः। मन्य॑मानान्। त्वम्। त्रा॒ता। त्वम्। ऊ॒म् इति॑। नः॒। वृ॒धे। भूः। वि॒द्याम॑। इ॒षम्। वृ॒जन॑म्। जी॒रऽदा॑नुम्॥५॥

पदार्थः-(**त्वया**) (**वयम्**) (**मघवन्**) परमपूजितधनयुक्त (**इन्द्र**) शत्रुविदारक (**शत्रून्**) (**अभि**) आभिमुख्ये (**स्याम**) भवेम (**महतः**) प्रबलान् (**मन्यमानान्**) अभिमानिनः (**त्वम्**) (**त्राता**) (**त्वम्**) (**उ**) वितर्के (**नः**) अस्माकम् (**वृधे**) (**भूः**) भवेः (**विद्याम**) (**इषम्**) प्रेरणम् (**वृजनम्**) बलम् (**जीरदानुम्**) जीवस्वभावम्॥५॥

अन्वयः-हे मघवन्निन्द्र! त्वया सह वर्त्तमाना वयं महतो मन्यमानाञ्छत्रून् विजयमाना अभि स्याम। त्वं नस्त्राता त्वमु वृधे भूर्यतो वयमिषं वृजनं जीरदानुञ्च विद्याम॥५॥

भावार्थः-ये युद्धाऽधिकारिणो भृत्यान् सर्वथा सत्कृत्योत्साह्य योधयन्ति युद्धमानानां सततं रक्षणं मृतानां पुत्रकलत्राणां च पालनं कुर्युस्ते सर्वत्र विजयितारः स्युरिति॥५॥

अत्र सेनापतिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति अष्टसप्तत्युत्तरं शततमं १७८ सूक्तमेकविंशो २१ वर्गश्च समाप्तः॥

पदार्थः-हे **(मघवन्)** परम प्रशंसित धनयुक्त **(इन्द्र)** शत्रुओं को विदीर्ण करनेवाले! **(त्वया)** आपके साथ वर्त्तमान **(वयम्)** हम लोग **(महतः)** प्रबल **(मन्यमानान्)** अभिमानी **(शत्रून्)** शत्रुओं को जीतनेवाले **(अभि, स्याम)** सब ओर से होवें **(त्वम्)** आप **(नः)** हमारे **(त्राता)** रक्षक सहायक और **(त्वम्, उ)** आप तो ही **(वृधे)** वृद्धि के लिये **(भूः)** हो, जिससे हम लोग **(इषम्)** प्रत्येक काम की प्रेरणा **(वृजनम्)** बल और **(जीरदानुम्)** जीवस्वभाव को **(विद्याम)** पावें॥५॥

भावार्थः-जो युद्ध करनेवाले भृत्यों का सर्वथा सत्कार कर और उनको उत्साह दे युद्ध करते हैं, युद्ध करते हुओं की निरन्तर रक्षा और मरे हुओं के पुत्र, कन्या और स्त्रियों की पालना करें, वे सब सर्वत्र विजय करनेवाले हों॥५॥

इस सूक्त में सेनापति के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ अठहत्तरवां १७८ सूक्त और इक्कीसवाँ २१ वर्ग समाप्त हुआ॥

पूर्वीरिति षड्चस्यैकोनाशीत्युत्तरस्य शततमस्य सूक्तस्य लोपामुद्राऽगस्त्यौ ऋषी। दम्पती देवता। १,४ त्रिष्टुप्। २,३ निचृत् त्रिष्टुप्। ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ निचृद्बृहती छन्दः। मध्यमः स्वरः॥

अथ विद्वत्स्त्रीपुरुषविषयमाह॥

तब एक सौ उनासी सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् स्त्रीपुरुष के विषय को कहते हैं॥

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः॥ १॥

पूर्वीः। अहम्। शरदः। शश्रमाणा। दोषाः। वस्तोः। उषसः। जरयन्तीः। मिनाति। श्रियम्। जरिमा। तनूनाम्। अपि। ऊम् इति। नु। पत्नीः। वृषणः। जगम्युः॥ १॥

पदार्थः-(**पूर्वीः**) पूर्वं भूताः (**अहम्**) (**शरदः**) (**शश्रमाणा**) तपोन्विता (**दोषाः**) रात्रयः (**वस्तोः**) दिनम् (**उषसः**) प्रभाताः (**जरयन्तीः**) जरां प्रापयन्तीः (**मिनाति**) हिनस्ति (**श्रियम्**) लक्ष्मीम् (**जरिमा**) अतिशयेन जरिता वयोहानिकर्त्ता (**तनूनाम्**) शरीराणाम् (**अपि**) (**उ**) वितर्के (**नु**) शीघ्रम् (**पत्नीः**) (**वृषणः**) सेक्तारः (**जगम्युः**) भृशं प्राप्नुयुः। अत्र **वाच्छन्दसी**ति नुगागमाभावः॥ १॥

अन्वयः-यथाऽहं पूर्वीः शरदो दोषा वस्तो जरयन्तीरुषसश्च शश्रमाणाऽस्मि अप्यु अपि तु यथा तनूनां जरिमा श्रियं मिनाति तथा वृषणः पत्नीर्नु जगम्युः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा बाल्यावस्थामारभ्य विदुषीभिः स्त्रीभिः प्रत्यहं प्रभातसमयात् गृहकार्य्याणि पतिसेवादीनि च कर्माणि कृतानि तथा कृतब्रह्मचर्यस्त्रीपुरुषैः सर्वाणि कार्याण्यनुष्ठेयानि॥ १॥

पदार्थः-जैसे (**अहम्**) मैं (**पूर्वीः**) पहिले हुई (**शरदः**) वर्षों तथा (**दोषाः**) रात्रि (**वस्तोः**) दिन (**जरयन्तीः**) सबकी अवस्था को जीर्ण करती हुई (**उषसः**) प्रभात वेलाओं पर (**शश्रमाणा**) श्रम करती हुई हूँ (**अपि, उ**) और तो जैसे (**तनूनाम्**) शरीरों की (**जरिमा**) अतीव अवस्था को नष्ट करनेवाला काल (**श्रियम्**) लक्ष्मी को (**मिनाति**) विनाशता है, वैसे (**वृषणः**) वीर्य्य सेचनेवाले (**पत्नीः**) अपनी अपनी स्त्रियों को (**नु**) शीघ्र (**जगम्युः**) प्राप्त होवें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बाल्यावस्था को लेकर विदुषी स्त्रियों ने प्रतिदिन प्रभात समय से घर के कार्य और पति की सेवा आदि कर्म किये हैं, वैसे किया है ब्रह्मचर्य जिन्होंने उन स्त्री-पुरुषों को समस्त कार्यों का अनुष्ठान करना चाहिए॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये चि॒द्धि पूर्व॑ ऋ॒तसा॑प॒ आस॑न्त्सा॒कं दे॒वेभि॒रव॑दन्नृ॒तानि॑।

ते चि॒दवा॑सुर्न॒ह्यन्त॑मा॒पुः सम्॒ नु पत्नी॒र्वृष॑भिर्जगम्युः॥ २॥

ये। चि॒त्। हि। पूर्वे॑। ऋ॒त॒ऽसाप॑:। आस॑न्। सा॒कम्। दे॒वेभि॑:। अवद॑न्। ऋ॒तानि। ते। चि॒त्॥ अव॑। अ॒सु॒:। न॒हि। अन्त॑म्। आ॒पु॒:। सम्। ऊ॒म् इति॑। नु। पत्नी॑:। वृष॑ऽभि:। ज॒ग॒म्यु॒:॥ २॥

पदार्थः-(**ये**) (**चित्**) (**हि**) खलु (**पूर्वे**) (**ऋतसापः**) य आप्नुवते त आपः समानाश्च ते इति सापः सन्त्यस्य मध्ये व्यापकाः व्यापयितारो वा विद्वांसः (**आसन्**) (**साकम्**) (**देवेभिः**) विद्वद्भिस्सह (**अवदन्**) (**ऋतानि**) सत्यानि (**ते**) (**चित्**) इव (**अव**) (**असुः**) दोषान् प्रक्षिपेयुः (**नहि**) (**अन्तम्**) (**आपुः**) प्राप्नुवन्ति (**सम्**) (**उ**) (**नु**) सद्यः (**पत्नीः**) स्त्रियः (**वृषभिः**) वीर्यवद्भिः पतिभिस्सह (**जगम्युः**) भृशं गच्छेयुः॥ २॥

अन्वयः-ये ऋतसापः पूर्वे विद्वांसो देवेभिः साकमृतान्यवदंस्ते चिद्धि सुखिन आसन् ये नु पत्नीर्वृषभिस्सह संजगम्युश्चिदिवाऽवासुस्त उ अन्तं नह्यापुः॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ब्रह्मचारिभिर्विद्यार्थिभिस्तेभ्य एव विद्या शिक्षे ग्राह्ये। ये पूर्वमधीतविद्याः सत्याचारिणो जितेन्द्रियाः स्युस्ताभिर्ब्रह्मचारिणीभिस्सह विवाहं कुर्युर्याः स्वतुल्यगुणकर्मस्वभावा विदुष्यः स्युः॥ २॥

पदार्थः-(**ये**) जो (**ऋतसापः**) सत्यव्यवहार में व्यापक वा दूसरों को व्याप्त करानेवाले (**पूर्वे**) पूर्व विद्वान् (**देवेभिः**) विद्वानों के (**साकम्**) साथ (**ऋतानि**) सत्यव्यवहारों को (**अवदन्**) कहते हुए (**ते, चित्, हि**) वे भी सुखी (**आसन्**) हुए और जो (**नु**) शीघ्र (**पत्नीः**) स्त्रीजन (**वृषभिः**) वीर्य्यवान् पतियों के साथ (**सम्, जगम्युः**) निरन्तर जावें (**चित्**) उनके समान (**अवासुः**) दोषों को दूर करें वे (**उ**) (**अन्तम्**) अन्त को (**नहि**) नहीं (**आपुः**) प्राप्त होते हैं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। ब्रह्मचर्य्यस्थ विद्यार्थियों को उन्हीं से विद्या और अच्छी शिक्षा लेनी चाहिये कि जो पहिले विद्या पढ़े हुए सत्याचारी जितेन्द्रिय हों और उन ब्रह्मचारियों के साथ विवाह करें जो अपने तुल्य गुण, कर्म, स्वभाववाली विदुषी हों॥ २॥

अथ गृहाश्रमे स्त्रीपुरुषयोः परस्परं संवादरूपविषयमाह॥

अब गृहाश्रम व्यवहार में स्त्री-पुरुष के व्यवहार को अगले मन्त्र में कहा है॥

न मृषा॑ श्रा॒न्तं यदव॑न्ति दे॒वा विश्वा॒ इत्स्पृधो॑ अ॒भ्य॑श्नवाव।

जया॒वेदत्र॑ श॒तनी॑थमा॒जिं यत्स॒म्यञ्चा॑ मिथु॒नाव॒भ्यजा॑व॥ ३॥

न। मृषा। श्रान्तम्। यत्। अवन्ति। देवाः। विश्वाः। इत्। स्पृधः। अभि। अश्नवाव। जयाव। इत्। अत्र। शतऽनीथम्। आजिम्। यत्। सम्यञ्चा। मिथुनौ। अभि। अजाव॥ ३॥

पदार्थः-(**न**) निषेधे (**मृषा**) मिथ्या (**श्रान्तम्**) खिद्यन्तम् (**यत्**) यतः (**अवन्ति**) रक्षन्ति (**देवाः**) विद्वांसः (**विश्वाः**) सर्वाः (**इत्**) एव (**स्पृधः**) संग्रामान् (**अभि**) आभिमुख्ये (**अश्नवाव**) व्याप्नयाव जेतुं समर्थौ स्याव (**जयाव**) (**इत्**) एव (**अत्र**) (**शतनीथम्**) शतैः प्राप्तव्यम् (**आजिम्**) सङ्ग्रामम् (**यत्**) यतः (**सम्यञ्चा**) सम्यगञ्चन्तौ (**मिथुनौ**) स्त्रीपुरुषौ (**अभि**) (**अजाव**) प्राप्नुयाव॥ ३॥

अन्वयः-देवा विद्वांसो यदत्र मृषा श्रान्तन्नावन्ति तत आवां विश्वा इत् स्पृधोऽभ्यश्नवाव यद्यतो गृहाश्रमं सम्यञ्चा सन्तौ मिथुनावभ्यजाव ततः शतनीथमाजिं जयावेत्॥ ३॥

भावार्थः-यत आप्ता विद्वांसो मिथ्याचारिणो मूढान् विद्यार्थिनो नाध्यापयन्ति किन्तु परित्यजन्ति ततः स्त्रीपुरुषा मिथ्याचारान् व्यभिचारादिदोषान् त्यजेयुः। यथा गृहाश्रमोत्कर्षः स्यात्तथा स्त्रीपुरुषौ परस्परं धर्माचारिणौ प्रयतेताम्॥ ३॥

पदार्थः-(**देवाः**) विद्वान् जन (**यत्**) जिस कारण (**अत्र**) इस जगत् में (**मृषा**) मिथ्या (**श्रान्तम्**) खेद करते हुए की (**न**) नहीं (**अवन्ति**) रक्षा करते हैं, इससे हम (**विश्वा, इत्**) सभी (**स्पृधः**) संग्रामों को (**अभि, अश्नवाव**) सम्मुख होकर (**यत्**) जिस कारण गृहाश्रम को (**सम्यञ्चा**) अच्छे प्रकार प्राप्त होते हुए (**मिथुनौ**) स्त्री-पुरुष हम दोनों (**अभ्यजाव**) सब ओर से उसके व्यवहारों को प्राप्त होवें, इससे (**शतनीथम्**) जो सैकड़ों से प्राप्त होने योग्य (**आजिम्**) संग्राम को (**जयावेत्**) जीतते ही हैं॥ ३॥

भावार्थः-जिस कारण आप विद्वान् जन मिथ्याचारी मूढ़ विद्यार्थी जनों को नहीं पढ़ाते हैं, इससे स्त्रीपुरुष मिथ्या आचार व्यभिचारादि दोषों को त्यागें। और जैसे गृहाश्रम का उत्कर्ष हो, वैसे स्त्रीपुरुष परस्पर धर्म के आचरण करनेवाले हों॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित्।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम्॥ ४॥

नदस्य। मा। रुधतः। कामः। आ। अगन्। इतः। आऽजातः। अमुतः। कुतः। चित्। लोपामुद्रा। वृषणम्। निः। रिणाति। धीरम्। अधीरा। धयति। श्वसन्तम्॥ ४॥

पदार्थः-(**नदस्य**) अव्यक्तशब्दं कुर्वतो वृषभादेः (**मा**) माम् (**रुधतः**) रेतो निरोद्धुः (**कामः**) (**आगन्**) आगच्छति प्राप्नोति (**इतः**) अस्मात् (**आजातः**) सर्वतः प्रसिद्धः (**अमुतः**) अमुष्मात् (**कुतः**) कस्मात् (**चित्**) अपि (**लोपामुद्रा**) लोप एव आमुद्रा समन्तात् प्रत्ययकारिणी यस्याः सा (**वृषणम्**)

वीर्यवन्तम् **(निः)** नितराम् **(रिणाति)** **(धीरम्)** धैर्ययुक्तम् **(अधीरा)** धैर्यरहिता **(धयति)** आधरति **(श्वसन्तम्)** प्राणयन्तम्॥४॥

अन्वयः–इतोऽमुतः कुतश्चिदाजातो रुधतो नदस्य कामो मागन्नधीरा लोपामुद्रेयं वृषणं धीरं श्वसन्तं पतिं नीरिणाति धयति च॥४॥

भावार्थः–ये विद्याधैर्य्यादिरहिता स्त्रिय उद्वहन्ति ते सुखन्नाप्नुवन्ति। योऽकामां कन्यां यमकामं कुमारीं चोद्वाहयेत् तत्र किमपि सुखं न जायते। तस्मात् परस्परं प्रीतौ सदृशौ विवाहं कुर्यातां तत्रैव मङ्गलम्॥४॥

पदार्थः–**(इतः)** इधर से वा **(अमुतः)** उधर से वा **(कुतश्चित्)** कहीं से **(आजातः)** सब ओर से प्रसिद्ध **(रुधतः)** वीर्य रोकने वा **(नदस्य)** अव्यक्त शब्द करनेवाले वृषभ आदि का **(कामः)** काम **(मा)** मुझको **(आगन्)** प्राप्त होता अर्थात् उनके सदृश कामदेव उत्पन्न होता है। और **(अधीरा)** धीरज से रहित वा **(लोपामुद्रा)** लोप होजाना लुकि जाना ही प्रतीत का चिह्न है जिसका सो यह स्त्री **(वृषणम्)** वीर्यवान् **(धीरम्)** धीरजयुक्त **(श्वसन्तम्)** श्वासें लेते हुए अर्थात् शयनादि दशा में निमग्न पुरुष को **(नीरिणति)** निरन्तर प्राप्त होती और **(धयति)** उससे गमन भी करती है॥४॥

भावार्थः–जो विद्या, धैर्य आदि रहित स्त्रियों को विवाहते हैं, वे सुख नहीं पाते हैं। जो पुरुष कामरहित कन्या को वा कामरहित पुरुष को कुमारी विवाहे, वहाँ कुछ भी सुख नहीं होता। इससे परस्पर प्रीतिवाले गुणों में समान स्त्री–पुरुष विवाह करें, वहाँ ही मङ्गल समाचार है॥४॥

अथ प्रकृतविषये महौषधिसारसङ्ग्रहविषयमाह॥

अब प्रकृत विषय में महौषधियों के सारसंग्रह को कहा है॥

इ॒मं नु सोम॒मन्ति॑तो हृ॒त्सु पी॒तमुप॑ ब्रुवे।
यत्सी॒मागॅश्च॑कृ॒मा तत्सु मृ॑ळतु पुलु॒कामो॒ हि मर्त्यः॑॥५॥

इ॒मम्। नु। सोम॑म्। अन्ति॑तः। हृ॒त्ऽसु। पी॒तम्। उप॑। ब्रु॒वे॒। यत्। सी॒म्। आग॑ः। च॒कृ॒म। तत्। सु। मृ॒ळ॒तु॒। पु॒लु॒ऽकाम॑ः। हि। मर्त्यः॑॥५॥

पदार्थः–**(इमम्)** **(नु)** **(सोमम्)** ओषधिरसम् **(अन्तितः)** समीपतः **(हृत्सु)** हृदयेषु **(पीतम्)** **(उप)** **(ब्रुवे)** उपदिशामि **(यत्)** **(सीम्)** सर्वतः **(आगः)** अपराधम् **(चकृम)** कुर्य्याम। अत्राऽन्येषामपीति दीर्घः। **(तत्)** **(सु)** **(मृळतु)** सुखयतु **(पुलुकामः)** बहुकामः **(हि)** खलु **(मर्त्यः)** मनुष्यः॥५॥

अन्वयः–अहं यदिमं हृत्सु पीतं सोममुपब्रुवे तत्पुलुकामो हि मर्त्यः सुमृळतु यदागो वयं चकृम तन्नु सीमन्तितस्सर्वे त्यजन्तु॥५॥

भावार्थः-ये महौषधिरसं पिबन्ति तेऽरोगा बलिष्ठा जायन्ते ये कुपथ्यमाचरन्ति ते रोगैः पीड्यन्ते॥५॥

पदार्थः-मैं **(यत्)** जिस **(इमम्)** इस **(हृत्सु)** हृदयों में **(पीतम्)** पिये हुए **(सोमम्)** ओषधियों के रस के **(उप, ब्रुवे)** उपदेश पूर्वक कहता हूँ, उसको **(पुलुकामः)** बहुत कामनावाला **(मर्त्यः)** पुरुष **(हि)** ही **(सुमृळतु)** सुख संयुक्त करे अर्थात् अपने सुख में उसका संयोग करे। जिस **(आगः)** अपराध को हम लोग **(चकृम)** करें **(तत्)** उसको **(नु)** शीघ्र **(सीम्)** सब ओर से **(अन्तितः)** समीप से सभी जन छोड़ें अर्थात् क्षमा करें॥५॥

भावार्थः-जो महौषधियों के रस को पीते हैं, वे रोगरहित बलिष्ठ होते हैं। जो कुपथ्याचरण करते हैं, वे रोगों से पीड्यमान होते हैं॥५॥

अथ सन्तानोत्पत्तिविषयमाह॥

अब सन्तानोत्पत्ति विषय को अगले मन्त्र में कहा है॥

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः।

उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम॥६॥२२॥२३॥

अगस्त्यः। खनमानः। खनित्रैः। प्रऽजाम्। अपत्यम्। बलम्। इच्छमानः। उभौ। वर्णौ। ऋषिः। उग्रः। पुपोष। सत्याः। देवेषु। आऽशिषः। जगाम॥६॥

पदार्थः-**(अगस्त्यः)** ये धर्मादन्यत्र न गच्छन्ति तेऽगस्तयस्तेषु साधुः **(खनमानः)** खनमानो भूमिमवदारयन् **(खनित्रैः)** खननसाधनैः **(प्रजाम्)** राज्यम् **(अपत्यम्)** सन्तानम् **(बलम्)** **(इच्छमानः)** **(उभौ)** **(वर्णौ)** परस्परेण व्रियमाणौ सुन्दरस्वरूपौ **(ऋषिः)** वेदार्थवेत्ता **(उग्रः)** तेजस्वी **(पुपोष)** पुष्णाति **(सत्याः)** सत्सु कर्मसु साधवः **(देवेषु)** विद्वत्सु कामेषु वा **(आशिषः)** सिद्धा इच्छाः **(जगाम)** गच्छति॥६॥

अन्वयः-यथा खनित्रैर्भूमिं खनमानः कृषीवलो धान्यादिकं प्राप्य सुखी जायते तथा ब्रह्मचर्येण विद्यया प्रजामपत्यं बलमिच्छमानोऽगस्त्यः ऋषिरुग्रो विद्वान् पुपोष देवेषु सत्या आशिषो जगाम तथोभौ वर्णौ स्त्रीपुरुषौ भवेताम्॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा कृषीवलाः सुक्षेत्रेषु सुवीजानि उप्त्वा फलवन्तो जायन्ते। यथा च धार्मिका विद्वांसो सत्यान् कामान् प्राप्नुवन्ति तथा ब्रह्मचर्य्येण यौवनं प्राप्य स्वेच्छया विवाहं कुर्युस्ते सुक्षेत्रोत्तमवीजसम्बन्धवत्फलवन्तो भवन्ति॥६॥

अत्र विद्वत्स्त्रीपुरुषगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकोनाशीत्युत्तरं शततमं १७९ सूक्तं द्वाविंशो २२ वर्गस्त्रयोविंशोऽनुवाकश्च समाप्तः॥

पदार्थः–जैसे (**खनित्रैः**) कुद्दाल, फाँवडा, कसी आदि खोदने के साधनों से भूमि को (**खनमानः**) खोदता हुआ खेती करनेवाला धान्य आदि अनाज पाके सुखी होता है, वैसे ब्रह्मचर्य और विद्या से (**प्रजाम्**) राज्य (**अपत्यम्**) सन्तान और (**बलम्**) बल की (**इच्छमानः**) इच्छा करता हुआ (**अगस्त्यः**) निरपराधियों में उत्तम (**ऋषिः**) वेदार्थवेत्ता (**उग्रः**) तेजस्वी विद्वान् (**पुपोष**) पुष्ट होता है (**देवेषु**) और विद्वानों में वा कामों में (**सत्याः**) अच्छे कर्मों में उत्तम सत्य और (**आशिषः**) सिद्ध इच्छाओं को (**जगाम**) प्राप्त होता है, वैसे (**उभौ**) दोनों (**वर्णौ**) परस्पर एक दूसरे का स्वीकार करते हुए स्त्री–पुरुष होवें॥६॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे कृषि करनेवाले अच्छे खेतों में उत्तम बीजों को बोय कर फलवान् होते हैं और जैसे धार्मिक विद्वान् जन सत्य कामों को प्राप्त होते हैं, वैसे ब्रह्मचर्य से युवावस्था को प्राप्त होकर अपनी इच्छा से विवाह करें, वे अच्छे खेत में उत्तम बीज सम्बन्धी के समान फलवान् होते हैं॥६॥

इस सूक्त में विदुषी स्त्री और विद्वान् पुरुषों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ उनासीवां १७९ सूक्त बाईसवां २२ वर्ग तेईसवां २३ अनुवाक समाप्त हुआ॥

युवोरित्यशीत्युत्तरस्य शततमस्य दशर्चस्य सूक्तस्य अगस्त्य ऋषिः। अश्विनौ देवते। १,४,७ निचृत् त्रिष्टुप्। ३,५,६,८ विराट् त्रिष्टुप्। १० त्रिष्टुप् छन्दः। धैवतः स्वरः। २,९ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनस्स्त्रीपुरुषगुणानाह॥

अब एक सौ अस्सी वें सूक्त का आरम्भ है। उसमें आरम्भ से स्त्री-पुरुषों के गुणों का वर्णन करते हैं॥

युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत्।
हिरण्ययां वां पवयः प्रुषायन् मध्वः पिबन्ता उषसः सचेथे॥ १॥

युवोः। रजांसि। सुऽयमासः। अश्वाः। रथः। यत्। वाम्। परि। अर्णांसि। दीयत्। हिरण्ययाः। वाम्। पवयः। प्रुषायन्। मध्वः। पिबन्तौ। उषसः। सचेथे इति॥ १॥

पदार्थः-(**युवोः**) युवयोः (**रजांसि**) लोकान् (**सुयमासः**) संयमयुक्ताः (**अश्वाः**) वेगवन्तो वह्न्यादयः (**रथः**) यानम् (**यत्**) यः (**वाम्**) युवयोः (**परि**) सर्वतः (**अर्णांसि**) जलानि (**दीयत्**) गच्छेत्। **दीयतीति गतिकर्मासु पठितम्।** (निघं०२.१४) (**हिरण्ययाः**) सुवर्णप्रचुराः (**वाम्**) युवयोः (**पवयः**) चक्राणि (**प्रुषायन्**) छिन्दन्ति (**मध्वः**) मधुरस्य रसस्य (**पिबन्तौ**) (**उषसः**) प्रभातस्य (**सचेथे**) संवेते॥ १॥

अन्वयः-हे स्त्रीपुरुषौ! यद्यदा युवोः सुयमासोऽश्वा रजांसि वां रथोऽर्णांसि परिदीयत् वां रथस्य हिरण्ययाः पवयः प्रुषायन् मध्वः पिबन्तौ भवन्तावुषसः सचेथे॥ १॥

भावार्थः-यौ स्त्रीपुरुषौ लोकविज्ञानौ पदार्थसंसाधितरथेन यायिनौ स्वलंकृतौ दुग्धादिरसं पिबन्तौ समयानुरोधेन कार्यसाधकौ स्तस्तौ प्राप्तैश्वर्यौ स्याताम्॥ १॥

पदार्थः-हे स्त्रीपुरुषो! (**यत्**) जब (**युवोः**) तुम दोनों को (**सुयमासः**) संयम चाल के नियम को पकड़े हुए (**अश्वः**) वेगवान् अग्नि आदि पदार्थ (**रजांसि**) लोक-लोकान्तरों को और (**वाम्**) तुम्हारा (**रथः**) रथ (**अर्णांसि**) जलस्थलों को (**परि, दीयत्**) सब ओर से जावे, (**वाम्**) तुम दोनों के रथ के (**हिरण्ययाः**) बहुत सुवर्णयुक्त (**पवयः**) चाक पहिये (**प्रुषायन्**) भूमि को छेदते-भेदते हैं तथा (**मध्वः**) मधुर रस को (**पिबन्तौ**) पीते हुए आप (**उषसः**) प्रभात समय का (**सचेथे**) सेवन करते हैं॥ १॥

भावार्थः-जो स्त्री-पुरुष लोक का विज्ञान राखते और पदार्थविद्या संसाधित रथ से जानेवाले, अच्छे आभूषण पहिने, दुग्धादि रस पीते हुए समय के अनुरोध से कार्य्यसिद्ध करनेवाले हैं, वे ऐश्वर्य्य को प्राप्त हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवमत्यस्यावनक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः।
स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च॥ २॥

युवम्। अत्यस्य। अव। नक्षथः। यत्। विऽपत्मनः। नर्यस्य। प्रऽयज्योः। स्वसा। यत्। वाम्। विश्वगूर्ती इति विश्वऽगूर्ती। भराति। वाजाय। ईट्टे। मधुऽपौ। इषे। च॥ २॥

पदार्थः-(**युवम्**) युवाम् (**अत्यस्य**) अत्यस्याश्वस्य (**अव**) (**नक्षथः**) प्राप्नुथः (**यत्**) यौ (**विपत्मनः**) विशेषेण गमनशीलस्य (**नर्य्यस्य**) नृषु साधोः (**प्रयज्योः**) प्रयोक्तुं योग्यस्य (**स्वसा**) भगिनी (**यत्**) या (**वाम्**) युवाम् (**विश्वगूर्त्ती**) समग्रोद्यमौ (**भराति**) भरेत् (**वाजाय**) विज्ञानाय (**ईट्टे**) स्तौति (**मधुपौ**) मधुरं पिबन्तौ (**इषे**) अन्नाय (**च**)॥ २॥

अन्वयः-हे स्त्रीपुरुषौ! यद्यौ युवं युवां प्रयज्योर्नर्य्यस्य विपत्मनोऽत्यस्यावनक्षथः। यद्यौ विश्वगूर्ती वां स्वसा भराति वाजाय चेट्टे तौ मधुपौ युवामिषे प्रयतेथाम्॥ २॥

भावार्थः-यदि स्त्रीपुरुषावग्न्याद्यश्वविद्यां जानीयातां तर्हि यथेष्टं गन्तुं शक्नुयाताम्। यस्य भगिनी विदुषी स्यात् तस्य प्रशंसा कुतो न स्यात्॥ २॥

पदार्थः-हे स्त्रीपुरुषौ! (**यत्**) जो (**युवम्**) तुम दोनों (**प्रयज्योः**) प्रयोग करने योग्य अर्थात् कार्य्य संचार में वर्त्तने योग्य (**नर्यस्य**) मनुष्यों में उत्तम (**विपत्मनः**) विशेष चलनेवाले (**अत्यस्य**) घोड़े को (**अव, नक्षथः**) प्राप्त होते हो (**यत्**) जिस (**विश्वगूर्त्ती**) समस्त उद्यम के करनेवालों (**वाम्**) तुम दोनों को (**स्वसा**) बहिन तुम्हारी (**भराति**) पाले-पोषे (**वाजाय, च**) और विज्ञान होने के लिये (**ईट्टे**) तुम दोनों की स्तुति करती अर्थात् प्रशंसा करती वे (**मधुपौ**) मधुर मीठे को पीते हुए तुम दोनों (**इषे**) अन्नादि पदार्थों के होने के लिए उत्तम यत्न करो॥ २॥

भावार्थः-जो स्त्री-पुरुष अग्नि आदि पदार्थों को शीघ्रगामी करने की विद्या को जानें तो यथेष्ट स्थान को जा सकते हैं, जिसकी बहिन पण्डिता हो, उसकी प्रशंसा क्यों न हो?॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं पय उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः।
अन्तर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान्॥ ३॥

युवम्। पयः। उस्रियायाम्। अधत्तम्। पक्वम्। आमायाम्। अव। पूर्व्यम्। गोः। अन्तः। यत्। वनिनः। वाम्। ऋतप्सू इत्यृतऽप्सू। ह्वारः। न। शुचिः। यजते। हविष्मान्॥ ३॥

पदार्थः-(**युवम्**) युवाम् (**पयः**) दुग्धम् (**उस्रियायाम्**) गवि (**अधत्तम्**) दध्यातम् (**पक्वम्**) (**आमायाम्**) अप्रौढायाम् (**अव**) (**पूर्व्यम्**) पूर्वैः कृतम् (**गोः**) (**अन्तः**) (**यत्**) (**वनिनः**) रश्मिमतः

(वाम्) युवयोः **(ऋतप्सू)** ऋतं जलं प्सातो भक्षयतस्तौ। **ऋतमित्युदकनामसु पठितम्।** (निघं१.१२) **(ह्वारः)** ह्वरस्य क्रोधस्यायं निवारकः **(न)** इव **(शुचिः)** पवित्रः **(यजते)** सङ्गच्छते **(हविष्मान्)** शुद्धसामग्रीयुक्तः॥३॥

अन्वयः-हे ऋतप्सू! युवं शुचिर्हविष्मान् ह्वारो न वामुस्रियायां यत्पयो आमायां पक्वं गोः पूर्व्यं वनिनो यद्यजतेन्तरस्ति तदवाधत्तम्॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा सूर्य्यो रसमाकर्षति चन्द्रो वर्षयति पृथिवीं पुष्णाति तथा अध्यापकोपदेशकौ वर्त्तेतां यथा क्रोधादिदोषरहिता जनाः शान्त्यादिभिः सुखानि लभन्ते तथा युवामपि भवेतम्॥३॥

पदार्थः-हे **(ऋतप्सू)** जल खानेहारे स्त्रीपुरुषो! **(युवम्)** तुम दोनों **(शुचिः)** पवित्र **(हविष्मान्)** शुद्ध सामग्रीयुक्त **(ह्वारः)** क्रोध के निवारण करनेवाले सज्जन के **(न)** समान **(वाम्)** तुम दोनों की **(उस्रियायाम्)** गौ में **(यत्)** जो **(पयः)** दुग्ध वा **(आमायाम्)** जो युवावस्था को नहीं प्राप्त हुई उस गौ में **(पक्वम्)** अवस्था से परिपक्व भाग **(गोः)** गौ का **(पूर्व्यम्)** पूर्वज लोगों ने प्रसिद्ध किया हुआ है वा **(वनिनः)** किरणोंवाले सूर्यमण्डल के **(अन्तः)** भीतर अर्थात् प्रकाश रूप **(यजते)** प्राप्त होता है, उसको **(अवाधत्तम्)** अच्छे प्रकार धारण करो॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे सूर्यमण्डल रस को खींचता है और चन्द्रमा वर्षाता, पृथिवी की पुष्टि करता, वैसे अध्यापक **[**और**]** उपदेश करनेवाले वर्त्ताव रक्खें। जैसे क्रोधादि दोषरहित जन शान्ति आदि गुणों से सुखों को प्राप्त होते हैं, वैसे तुम भी होओ॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे।
तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः॥४॥

युवम्। ह। घर्मम्। मधुऽमन्तम्। अत्रये। अपः। न। क्षोदः। अवृणीतम्। एषे। तत्। वाम्। नरौ। अश्विना। पश्वःऽइष्टिः। रथ्याऽइव। चक्रा। प्रति। यन्ति। मध्वः॥४॥

पदार्थः-**(युवम्)** युवाम् **(ह)** किल **(घर्मम्)** दिनम् **(मधुमन्तम्)** मधुरादिगुणयुक्तम् **(अत्रये)** न सन्ति त्रीणि भूतभविष्यद्वर्त्तमानकालजानि दुःखानि यस्य तस्मै सर्वदा सुखसम्पन्नाय **(अपः)** प्राणान् **(न)** इव **(क्षोदः)** उदकम् **(अवृणीतम्)** वृणीयाताम् **(एषे)** समन्तादिच्छवे **(तत्)** **(वाम्)** युवयोः **(नरौ)** नायकौ **(अश्विना)** विद्युदादिविद्याव्यापिनौ **(पश्वइष्टिः)** पशोः सङ्गतिः **(रथ्येव)** यथा रथेषु साधूनि **(चक्रा)** चक्राणि **(प्रति)** **(यन्ति)** प्राप्नुवन्ति **(मध्वः)** मधूनि॥४॥

अन्वयः-हे नरावश्विना! युवमेषेऽत्रये मधुमन्तं घर्मं क्षोदोऽपो नाऽवृणीतं यद्वां पश्वइष्टी रथ्येव चक्रा मध्वः प्रतियन्ति तद्ध युवां प्रायातम्॥४॥

भावार्थः-अत्रोपमालङ्कारः। यदि स्त्रीपुरुषौ गृहाश्रमे मधुरादिरसयुक्तानि द्रव्याणि उत्तमान् पशून् रथादीनि यानान्यप्राप्स्यतं तर्हि तयोः सर्वाणि दिनानि सुखेनागमिष्यन्॥४॥

पदार्थः-हे **(नरौ)** नायक अग्रगन्ता **(अश्विना)** बिजुली आदि की विद्या में व्याप्त स्त्री-पुरुषो! **(युवम्)** तुम दोनों **(एषे)** सब ओर से इच्छा करते हुए **(अत्रये)** और भूत, भविष्यत्, वर्त्तमान तीनों काल में जिसको दुःख नहीं, ऐसे सर्वदा सुखयुक्त रहनेवाले पुरुष के लिये **(मधुमन्तम्)** मधुरादि गुणयुक्त **(घर्मम्)** दिन और **(क्षोदः)** जल को **(अपः)** प्राणों के **(न)** समान **(अवृणीतम्)** स्वीकार करो, जिस कारण **(वाम्)** तुम दोनों की **(पश्वइष्टिः)** पशुकुल की सङ्गति **(रथ्येव)** रथों में उत्तम **(चक्रा)** पहियों के समान **(मध्वः)** मधुर फलों को **(प्रति, यन्ति)** प्रति प्राप्त होते हैं **(तत्, ह)** इस कारण प्राप्त होओ॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। यदि स्त्रीपुरुष गृहाश्रम में मधुरादि रसों से युक्त पदार्थों और उत्तम पशुओं को, रथ आदि यानों को प्राप्त होवें तो उनके सब दिन सुख से जावें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः।
अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा॥५॥२३॥

आ। वाम्। दानाय। ववृतीय। दस्रा। गोः। ओहेन। तौग्र्यः। न। जिव्रिः। अपः। क्षोणी इति। सचते। माहिना। वाम्। जूर्णः। वाम्। अक्षुः। अंहसः। यजत्रा॥५॥

पदार्थः-**(आ)** समन्तात् **(वाम्)** युवाम् **(दानाय)** **(ववृतीय)** वर्त्तयामि। अत्र **बहुलं छन्दसी**ति साभ्यासत्वम्। **(दस्रा)** दुःखोपक्षेतारौ **(गोः)** पृथिव्याः **(ओहेन)** वीजादिस्थापनेन **(तौग्र्यः)** तुग्रा बलिनस्तेषु भवः **(न)** इव **(जिव्रिः)** जीर्णो वृद्धः **(अपः)** जलानि **(क्षोणी)** भूमिः **(सचते)** सम्बध्नाति **(माहिना)** महत्वेन **(वाम्)** युवाम् **(जूर्णः)** रोगी **(वाम्)** युवाम् **(अक्षुः)** व्याप्तुं शीलः **(अंहसः)** दुष्टाचारात् **(यजत्रा)** सङ्गमयितारौ॥५॥

अन्वयः-हे दस्रा यजत्रा! जिव्रिस्तौग्र्यो नाहं गोरोहेण वां दानायाववृतीय यथा माहिना क्षोण्यपः सचते तथा जूर्णोऽहं वां सचेयमक्षुरंहसो वां पृथग्रक्षयेम्॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। विद्वांसो स्त्रीपुरुषेभ्य एवमुपदिशेयुर्यथा वयं युष्मभ्यं विद्या दद्याम दुष्टाचारात् पृथग्रक्षयेम तथा युष्माभिरप्याचरणीयम्। पृथिवीवत् क्षमोपकारादीनि कर्माणि कर्त्तव्यानि॥५॥

पदार्थः-हे **(दस्रा)** दुःख दूर करने और **(यजत्रा)** सर्वव्यवहार की सङ्गति करानेवाले स्त्री-पुरुषो! **(जिव्रिः)** जीर्ण वृद्ध **(तौग्र्यः)** बलवानों में बली जन के **(न)** समान मैं **(गोरोहेण)** पृथिवी के बीज स्थापन से **(वाम्)** तुम दोनो को **(दानाय)** देने के लिये **(आववृतीय)** अच्छे वर्त्तूं जैसे **(माहिना)** बड़ी होने से **(क्षोणी)** भूमि **(अपः)** जलों का **(सचते)** सम्बन्ध करती है, वैसे **(जूर्णः)** रोगवान् मैं **(वाम्)** तुम्हारा सम्बन्ध करूं और **(अक्षुः)** व्याप्त होने के शीलस्वभाववाला मैं **(अंहसः)** दुष्टाचार से **(वाम्)** तुम दोनों को अलग रक्खूं॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। विद्वान् जन स्त्री-पुरुषों के लिये ऐसा उपदेश करें कि जैसे हम लोग तुम्हारे लिये विद्यायें देवें, दुष्ट आचारों से अलग रक्खें, वैसा तुमको भी आचरण करना चाहिये और पृथिवी के समान क्षमा तथा परोपकारादि कर्म करने चाहिये॥५॥

अथ सन्तानशिक्षापरं गार्हस्थ्यकर्म्माह॥

अब सन्तानशिक्षापरक गार्हस्थ कर्म अगले मन्त्र में कहा है॥

नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम्।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम्॥६॥

नि। यत्। युवेथे इति। निऽयुतः। सुदानू इति सुऽदानू। उप। स्वधाभिः। सृजथः। पुरंम्ऽधिम्। प्रेषत्। वेषत्। वातः। न। सूरिः। आ। महे। ददे। सुऽव्रतः। न। वाजम्॥६॥

पदार्थः-**(नि)** **(यत्)** यदा **(युवेथे)** सङ्गमयथः **(नियुतः)** वायोर्वेगादिगुणानिव निश्चितान् पदार्थान् **(सुदानू)** सुष्ठु दानकर्त्तारौ **(उप)** **(स्वधाभिः)** अन्नादिभिः पदार्थैः **(सृजथः)** **(पुरन्धिम्)** प्राप्तव्यं विज्ञानम् **(प्रेषत्)** प्रीणीत। लेट् प्रयोगः तिपि। **(वेषत्)** अभिगच्छतु। तिपि लेट् प्रयोगः। **(वातः)** वायुः **(न)** इव **(सूरिः)** विद्वान् **(आ)** **(महे)** महते **(ददे)** **(सुव्रतः)** शोभनैर्व्रतैर्धर्म्यैर्नियमैर्युक्तः **(न)** इव **(वाजम्)** विज्ञानम्॥६॥

अन्वयः-यद्यदा हे सुदानू स्त्रीपुरुषौ! नियुतो नियुवेथे तदा स्वधाभिर्यस्य पुरन्धिमुपसृजथः स सूरिः प्रेषत् वातो न वेषत्। सुव्रतो न महे वाजमाददे॥६॥

भावार्थः-अत्रोपमालङ्कारः। पित्रादयः शिल्पक्रियाकौशलतां पुत्रेषु सम्पादयेयुः। शिक्षां प्राप्ताः पुत्रादयः सर्वपदार्थान् विजानीयुः कलायन्त्रैः चलितेन वायुवद्वेगेन यानेन यत्र कुत्राभीष्टप्रदेशं स्थाने गच्छेयुः॥६॥

पदार्थः-**(यत्)** जब हे **(सुदानू)** सुन्दर दानशील स्त्रीपुरुषो! **(नियुतः)** पवन के वेगादि गुणों के समान निश्चित पदार्थों को **(नियुवेथे)** एक-दूसरे से मिलाते हो तब **(स्वधाभिः)** अन्नादि पदार्थों से जिससे **(पुरन्धिम्)** प्राप्त होने योग्य विज्ञान को **(उप, सृजथः)** उत्पन्न करते हो वह **(सूरिः)** विद्वान् **(प्रेषत्)** प्रसन्न

हो **(वातः)** पवन के **(न)** समान **(वेषत्)** सब ओर से गमन करे और **(सुव्रतः)** सुन्दर व्रत अर्थात् धर्म के अनुकूल नियमों से युक्त सज्जन पुरुष के **(न)** समान **(महे)** महत्त्व अर्थात् बड़प्पन के लिये **(वाजम्)** विशेष ज्ञान को **(आददे)** ग्रहण करता हूँ॥६॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। पितादिकों को चाहिये कि शिल्पक्रिया की कुशलता को पुत्रादिकों में उत्पन्न करावें, शिक्षा को प्राप्त हुए पुत्रादि समस्त पदार्थों को विशेषता से जानें और कलायन्त्रों से चलाये हुए पवन के समान जिससे वेग उस यान से जहाँ–तहां चाहे हुए स्थान को जावें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान्।
अधा चिद्धि ष्मा श्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम्॥७॥

वयम्। चित्। हि। वाम्। जरितारः। सत्याः। विपन्यामहे। वि। पणिः। हितऽवान्। अध। चित्। हि। स्म। अश्विनौ। अनिन्द्या। पाथः। हि। स्म। वृषणौ। अन्तिऽदेवम्॥७॥

पदार्थः–(**वयम्**) (**चित्**) अपि (**हि**) (**वाम्**) युवाम् (**जरितारः**) स्तावकाः (**सत्याः**) सत्सु साधवः (**विपन्यामहे**) विशेषेण स्तुमहे (**वि**) (**पणिः**) व्यवहर्त्ता (**हितावान्**) हितं विद्यते यस्य सः (**अध**) अनन्तरम्। अत्र **निपातस्य चे**ति दीर्घः। (**चित्**) इव (**हि**) खलु (**स्म**) एव (**अश्विनौ**) सर्वपदार्थगुणव्यापिनौ स्त्रीपुरुषौ (**अनिन्द्या**) निन्दितुमनर्हौ (**पाथः**) उदकम् (**हि**) विस्मये (**स्म**) अतीते। अत्र **निपातस्य चे**ति दीर्घः। (**वृषणौ**) बलिष्ठौ (**अन्तिदेवम्**) अन्तिषु विद्वत्सु विद्वांसम्॥७॥

अन्वयः–हेऽनिन्द्या वृषणावश्विनौ! यथा हितावान् विपणिर्वां प्रशंसति तथा वां प्रशंसेम यथा चिद्धि जरितारः सत्या वयं युवां विपन्यामहे तथा स्म ह्यन्तिदेवं सेवेमहि यथा हि स्म पाथश्चित् तर्पयति तथाध विदुषः सत्कुर्याम॥७॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्यथा विद्वांसो प्रशंसनीयान् प्रशंसन्ति निन्द्यान्निन्दन्ति तथा वर्तितव्यम्॥७॥

पदार्थः–हे **(अनिन्द्या)** निन्दा के न योग्य **(वृषणौ)** बलवान् **(अश्विनौ)** समस्त पदार्थ गुणव्यापी स्त्रीपुरुषो! तुम जैसे **(हितावान्)** हित जिसके विद्यमान वह **(विपणिः)** विशेषतर व्यवहार करनेवाला जन **(वाम्)** तुम दोनों की प्रशंसा करता है, वैसे हम लोग प्रशंसा करें। वा जैसे **(चित्, हि)** हि **(जरितारः)** स्तुति प्रशंसा करने और **(सत्याः)** सत्य व्यवहार वर्त्तनेवाले **(वयम्)** हम लोग तुम दोनों की **(विपन्यामहे)** उत्तम स्तुति करते हैं, वैसे **(स्म, हि)** ही **(अन्तिदेवम्)** विद्वानों में विद्वान् जन की सेवा करें

वा जैसे **(हि, स्म)** ही आश्चर्यरूप **(पाथः)** जल **(चित्)** निश्चय से तृप्ति करता है, वैसे **(अध)** इसके अनन्तर विद्वानों का सत्कार करें॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि जैसे विद्वान् जन प्रशंसा करने योग्यों की प्रशंसा करते और निन्दा करने योग्यों की निन्दा करते हैं, वैसे वर्त्ताव रक्खें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवां चिद्धि ष्माश्विनावनु द्यून् विरुद्रस्य प्रस्रवणस्य सातौ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः॥८॥

युवाम्। चित्। हि। स्म। अश्विनौ। अनु। द्यून्। विऽरुद्रस्य। प्रऽस्रवणस्य। सातौ। अगस्त्यः। नराम्। नृषु। प्रऽशस्तः। काराधुनीऽइव। चितयत्। सहस्रैः॥८॥

पदार्थः-(**युवाम्**) (**चित्**) (**हि**) यतः (**स्म**) (**अश्विनौ**) सूर्य्याचन्द्रमसाविव स्त्रीपुरुषौ (**अनुद्यून्**) प्रतिदिनम् (**विरुद्रस्य**) विविधा रुद्राः प्राणा यस्मिन् तस्य (**प्रस्रवणस्य**) प्रकर्षेण गतस्य (**सातौ**) संविभक्तौ (**अगस्त्यः**) अगमपराधमस्यन्ति प्रक्षिपन्ति तेषु साधुः (**नराम्**) मनुष्याणाम् (**नृषु**) मनुष्येषु (**प्रशस्तः**) उत्तमः (**काराधुनीव**) कारान् शब्दान् धूनयतीव (**चितयत्**) संज्ञापयेत् (**सहस्रैः**)॥८॥

अन्वयः-हे अश्विनौ! यथा युवां चिद्धि स्म विरुद्रस्य प्रस्रवणस्य सातावनुद्यून्निजापत्यानुपदिशेतं तथा नरां नृषु प्रशस्तोऽगस्त्यः सहस्रैः काराधुनीव सर्वाश्चितयत्संज्ञापयेत्॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। येऽनिशं सूर्याचन्द्रवत्सन्तानान् विद्योपदेशाभ्यां प्रकाशयन्ति, ते प्रशंसिता भवन्ति॥८॥

पदार्थः-हे (**अश्विनौ**) सूर्य और चन्द्रमा के तुल्य गुणवाले स्त्री-पुरुषो! जैसे (**युवाम्, चित्**) तुम ही (**हि, स्म**) जिस कारण (**विरुद्रस्य**) विविध प्रकार से प्राण विद्यमान उस (**प्रस्रवणस्य**) उत्तमता से जानेवाले शरीर की (**सातौ**) संभक्ति में (**अनु, द्यून्**) प्रतिदिन अपने सन्तानों को उपदेश देओ, वैसे उसी कारण (**नराम्**) मनुष्यों के बीच (**नृषु**) श्रेष्ठ मनुष्यों में (**प्रशस्तः**) उत्तम (**अगस्त्यः**) अपराध को दूर करनेवाला जन (**सहस्रैः**) हजारों प्रकार से (**काराधुनीव**) शब्दो को कंपाते हुए वादित्र आदि के समान सबको (**चितयत्**) उत्तम चितावे॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो स्त्रीपुरुष निरन्तर सूर्य और चन्द्रमा के समान अपने सन्तानों को विद्या और उत्तम उपदेशों से प्रकाशित करते हैं, वे प्रशंसावान् होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र यद्वहेथे महिना रथस्य प्र स्पन्द्रा याथो मनुषो न होता।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम॥९॥

प्र। यत्। वहेथे इति। महिना। रथस्य। प्र। स्पन्द्रा। याथः। मनुषः। न। होता। धत्तम्। सूरिऽभ्यः। उत। वा। सुऽअश्व्यम्। नासत्या। रयिऽसाचः। स्याम॥९॥

पदार्थः-(**प्र**) (**यत्**) यो (**वहेथे**) प्राप्नुथः (**महिना**) महत्त्वेन सह (**रथस्य**) रमणीयस्य (**प्र**) (**स्पन्द्रा**) प्रचलितौ (**याथः**) गच्छथः (**मनुषः**) मानवान् (**न**) इव (**होता**) दाता (**धत्तम्**) (**सूरिभ्यः**) विद्वद्भ्यः (**उत**) अपि (**वा**) (**स्वश्व्यम्**) शोभना अश्वा यस्मिंस्तम् (**नासत्या**) सत्यस्वभावौ (**रयिषाचः**) ये रयिणा सह समवयन्ति ते (**स्याम**) भवेम॥९॥

अन्वयः-हे स्पन्द्रा नासत्या! यत् युवां होता मनुषो न महिना रथस्य प्र वहेथे देशान्तरं प्रयाथस्तौ सूरिभ्यो धनं धत्तं उत वा स्वश्व्यं प्राप्नुतं यतो वयं रयिषाचः स्याम॥९॥

भावार्थः-मनुष्या यथा स्वसुखाय यानि साधनानीच्छेयुस्तान्येव परेषामानन्दायेच्छेयुः। ये सुपात्रेभ्योऽध्यापकेभ्यो दानं ददति ते श्रीमन्तो भवन्ति॥९॥

पदार्थः-हे (**स्पन्द्रा**) उत्तम चाल चलने और (**नासत्या**) सत्य स्वभावयुक्त स्त्री-पुरुषो! (**यत्**) जो तुम (**होता**) दान करनेवाले (**मनुषः**) मनुष्य के (**न**) समान (**महिना**) बड़प्पन के साथ (**रथस्य**) रमण करने योग्य विमानादि रथ को (**प्रवहेथे**) प्राप्त होते और (**प्रयाथः**) एक देश से दूसरे देश पुहँचाते हो, वे आप (**सूरिभ्यः**) विद्वानों के लिए धन को (**धत्तम्**) धारण करो (**उत, वा**) अथवा (**स्वश्व्यम्**) सुन्दर घोड़ा जिसमें विराजमान उत्तम धनादि विभव को प्राप्त होओ, जिससे हम लोग (**रयिषाचः**) धन के साथ सम्बन्ध करनेवाले (**स्याम**) हों॥९॥

भावार्थः-मनुष्य जैसे अपने सुख के लिये जिन साधनों की इच्छा करें, उन्हीं को औरों के आनन्द के लिये चाहें। जो सुपात्र पढ़ानेवालों को धनदान देते हैं, वे श्रीमान् धनवान् होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम्।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम्॥१०॥२४॥

तम्। वाम्। रथम्। वयम्। अद्य। हुवेम। स्तोमैः। अश्विना। सुविताय। नव्यम्। अरिष्टऽनेमिम्। परि। द्याम्। इयानम्। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥१०॥

पदार्थः-(**तम्**) पूर्वमन्त्रप्रतिपादितम् (**वाम्**) युवयोः (**रथम्**) रमणीयं विमानादियानम् (**वयम्**) (**अद्य**) अस्मिन् दिने। अत्र **निपातस्य चे**ति दीर्घः। (**हुवेम**) स्वीकुर्याम (**स्तोमैः**) प्रशंसाभिः (**अश्विना**) हे सर्वगुणव्यापिनौ स्त्रीपुरुषौ (**सुविताय**) ऐश्वर्य्याय (**नव्यम्**) नवीनम् (**अरिष्टनेमिम्**) दुःखनिवारकम् (**परि**) सर्वतः (**द्याम्**) आकाशम् (**इयानम्**) गच्छन्तम् (**विद्याम**) विजानीयाम (**इषम्**) प्राप्तव्यं सुखम् (**वृजनम्**) गमनम् (**जीरदानुम्**) जीवम्॥१०॥

अन्वयः-हे अश्विना! वयमद्य सुविताय स्तोमैररिष्टनेमिं नव्यं द्यां परीयानं तं वां रथं हुवेमेषं वृजनं जीरदानुञ्च विद्याम॥१०॥

भावार्थः-मनुष्यैः सदैव नवीनानि नवीनानि विद्याकार्याणि साधनीयानि। येनाऽत्र प्रशंसा स्यादाकाशादिषु गमनेनेच्छासिद्धिश्च प्राप्येत्॥१०॥

अत्र स्त्रीपुरुषगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्यशीत्युत्तरं शततमं १८० सूक्तं चतुर्विंशो २४ वर्गश्च समाप्तः॥

पदार्थः-हे (**अश्विना**) सर्वगुणव्यापी पुरुषो! (**वयम्**) हम लोग (**अद्य**) आज (**सुविताय**) ऐश्वर्य के लिये (**स्तौमैः**) प्रशंसाओं से (**अरिष्टनेमिम्**) दुःखनिवारक (**नव्यम्**) नवीन (**द्याम्**) आकाश को (**परि, इयानम्**) सब ओर से जाते हुए (**तम्**) उस पूर्व मन्त्रोक्त (**वाम्**) तुम दोनों के (**रथम्**) रथ को (**हुवेम**) स्वीकार करें तथा (**इषम्**) प्राप्तव्य सुख (**वृजनम्**) गमन और (**जीरदानुम्**) जीव को (**विद्याम**) प्राप्त होवें॥१०॥

भावार्थः-मनुष्यों को सदैव नवीन-नवीन विद्या के कार्य सिद्ध करने चाहियें, जिससे इस संसार में प्रशंसा हो और आकाशादिकों में जाने से इच्छासिद्धि पाई जावे॥१०॥

इस सूक्त में स्त्री-पुरुषों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ अस्सीवां १८० सूक्त और चौबीसवां २४ वर्ग समाप्त हुआ॥

कदित्यस्य नवर्चस्यैकाशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। अश्विनौ देवते। १,३ विराट् त्रिष्टुप्। २,४,६-९ निचृत् त्रिष्टुप्। ५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाश्विदृष्टान्तेनाध्यापकोपदेशकगुणानाह॥

अब एक सौ इक्यासीवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अश्विपद वाच्यों के दृष्टान्त से अध्यापक और उपदेशक के गुणों का वर्णन करते हैं॥

कदु॒ प्रेष्ठा॑वि॒षां र॑यी॒णाम॑ध्व॒र्यन्ता॒ यदु॑न्नि॒नी॒थो अ॒पाम्।
अ॒यं वां॑ य॒ज्ञो अ॑कृत॒ प्रश॑स्तिं॒ वसु॑धिती॒ अवि॑तारा॒ जना॑नाम्॥ १॥

कत्। ऊ॒म् इति॑। प्रेष्ठौ॑। इ॒षाम्। र॒यी॒णाम्। अ॒ध्व॒र्यन्ता॑। यत्। उ॒त्ऽनि॒नी॒थः। अ॒पाम्। अय॑म्। वा॒म्। य॒ज्ञः। अ॒कृ॒त॒। प्रऽश॑स्तिम्। वसु॑धिती॒ इति॒ वसु॑ऽधिती। अवि॑तारा। ज॒ना॒ना॒म्॥ १॥

पदार्थः-(**कत्**) कदा (**उ**) (**प्रेष्ठौ**) प्रीणीत इति प्रियौ **इगुपधे**ति कः। अतिशयेन प्रियौ प्रेष्ठौ। (**इषाम्**) अन्नानाम् (**रयीणाम्**) (**अध्वर्यन्ता**) आत्मनोऽध्वरमिच्छन्तौ (**यत्**) (**उन्निनीथः**) उत्कर्षं प्राप्नुथः (**अपाम्**) जलानां प्राणानां वा (**अयम्**) (**वाम्**) युवयोः (**यज्ञः**) (**अकृत**) करोति (**प्रशस्तिम्**) प्रशंसाम् (**वसुधिती**) यौ वसूनि धरतस्तौ (**अविताराः**) रक्षितारौ (**जनानाम्**) मनुष्याणाम्॥ १॥

अन्वयः-हे इषां रयीणां प्रेष्ठौ जनानामविताराः वसुधिती अध्यापकोपदेशकौ! युवां कदु कदाचिदध्वर्यन्ता यदपामुन्निनीथः सोऽयं वां यज्ञो प्रशस्तिमकृत॥ १॥

भावार्थः-यदा विद्वांसो मनुष्यान् विद्या नयन्ति तदा ते सर्वप्रिया ऐश्वर्यवन्तो भवन्ति। यदाऽध्ययनाऽध्यापनेन सुगन्ध्यादिहोमेन च जीवात्मनो जलानि च शोधयन्ति तदा प्रशंसामाप्नुवन्ति॥ १॥

पदार्थः-हे (**इषाम्**) अन्न और (**रयीणाम्**) धनादि पदार्थों के विषय (**प्रेष्ठौ**) अत्यन्त प्रीतिवाले (**जनानाम्**) मनुष्यों की (**अविताराः**) रक्षा और (**वसुधिती**) धनादि पदार्थों को धारण करनेवाला अध्यापक और उपदेशको! तुम (**कत्, उ**) कभी (**अध्वर्यन्ता**) अपने को यज्ञ की इच्छा करते हुए (**यत्**) जो (**अपाम्**) जल वा प्राणों की (**उत्, निनीथः**) उन्नति को पहुँचाते अर्थात् अत्यन्त व्यवहार में लाते हैं सो (**अयम्**) यह (**वाम्**) तुम्हारा (**यज्ञः**) द्रव्यमय वा वाणीमय यज्ञ (**प्रशस्तिम्**) प्रशंसा को (**अकृत**) करता है॥ १॥

भावार्थः-जब विद्वान् जन मनुष्यों को विद्याओं की प्राप्ति कराते हैं, तब वे सबके पियारे ऐश्वर्यवान् होते हैं। जब पढ़ने और पढ़ाने से और सुगन्धादि पदार्थों के होम से जीवात्मा और जलों की शुद्धि कराते हैं, तब प्रशंसा को प्राप्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वा॒मश्वा॑स॒: शुच॑य: पय॒स्पा वात॑रंहसो दि॒व्यासो॒ अत्या॑:।
म॒नो॒जुवो॒ वृष॑णो वी॒तपृ॑ष्ठा॒ एह स्व॒राजो॑ अ॒श्विना॑ वहन्तु॥ २॥

आ। वा॒म्। अश्वा॑स:। शुच॑य:। प॒य॒:ऽपा॑:। वात॑ऽरंहस:। दि॒व्यास॑:। अत्या॑:। म॒न॒:ऽजुव॑:। वृष॑ण:। वी॒तऽपृ॑ष्ठा:। आ। इ॒ह। स्व॒ऽराज॑:। अ॒श्विना॑। व॒ह॒न्तु॒॥ २॥

पदार्थ:-(**आ**) समन्तात् (**वाम्**) युवयो: (**अश्वास:**) शीघ्रगामिन: (**शुचय:**) पवित्रा: (**पयस्पा:**) पयस उदकस्य पातार: (**वातरंहस:**) वातस्य रंहो गमनमिव गमनं येषान्ते (**दिव्यास:**) (**अत्या:**) सततगमना: (**मनोजुव:**) मनस इव जूर्वेगो येषान्ते (**वृषण:**) शक्तिबन्धका: (**वीतपृष्ठा:**) वीतं व्याप्तं पृष्ठं पृथिव्यादितलं यैस्ते (**आ**) अभित: (**इह**) अस्मिन् संसारे (**स्वराज:**) स्वयं राजमाना: (**अश्विना**) वायुविद्युदिव वर्त्तमानौ (**वहन्तु**) प्राप्नुवन्तु॥ २॥

अन्वय:-हे विद्वांसौ! येऽश्वास: शुचय: पयस्पा दिव्यासो वातरंहसो मनोजुवो वृषणो वीतपृष्ठा: स्वराजो अत्या आ सन्ति त इह वामश्विनाऽऽवहन्तु॥ २॥

भावार्थ:-विद्वांसो यान् विद्युदादिपदार्थान् गुणकर्मस्वभावतो विजानीयुस्तानन्येभ्योऽप्युपदिशन्तु यावन्मनुष्या सृष्टिपदार्थविद्या न जानन्ति तावदखिलं सुखन्नाप्नुवन्ति॥ २॥

पदार्थ:-हे विद्वानो! जो (**अश्वास:**) शीघ्रगामी घोड़े (**शुचय:**) पवित्र (**पयस्पा:**) जल के पीनेवाले (**दिव्यास:**) दिव्य (**वातरंहस:**) पवन के समान वेग वा (**मनोजुव:**) मनोवद्वेगवाले (**वृषण:**) परशक्ति बन्धक (**वीतपृष्ठा:**) जिन्हों से पृथिवीतल व्याप्त (**स्वराज:**) जो आप प्रकाशमान (**अत्या:**) निरन्तर जानेवाले (**आ**) अच्छे प्रकार हैं, वे (**इह**) इस स्थान में (**वाम्**) तुम (**अश्विना**) अध्यापक और उपदेशकों को (**आ, वहन्तु**) पहुंचावें॥ २॥

भावार्थ:-विद्वान् जन जिन बिजुली आदि पदार्थों को गुण, कर्म, स्वभाव से जानें, उनका औरों के लिये भी उपदेश देवें। जब तक मनुष्य सृष्टि की पदार्थविद्या को नहीं जानते, तब तक संपूर्ण सुख को नहीं प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वां॑ रथो॒ऽवनि॒र्न प्र॒वत्वा॑न्त्सु॒प्रव॑न्धुर: सुवि॒ताय॑ गम्या:।
वृष्णा॑: स्थातारा॒ मन॑सो॒ जवी॑यानहंपू॒र्वो य॑ज॒तो धि॒ष्ण्या॒ य:॥ ३॥

आ। वा॒म्। रथ॑:। अ॒वनि॑:। न। प्र॒वत्वा॑न्। सु॒प्रऽव॑न्धुर:। सु॒वि॒ताय॑। ग॒म्या॒:। वृष्णा॑:। स्था॒ता॒रा॒। मन॑स:। जवी॑यान्। अ॒हम्ऽपू॒र्व:। य॒ज॒त:। धि॒ष्ण्या॒। य:॥ ३॥

पदार्थः-(**आ**) समन्तात् (**वाम्**) युवयोः (**रथः**) यानम् (**अवनिः**) पृथिवी (**न**) इव (**प्रवत्वान्**) प्रशस्ता प्रवतो वेगादयो गुणा विद्यन्ते यस्मिन् (**सृप्रवन्धुरः**) सुप्रैः सङ्गतैर्वन्धुरैर्बन्धनैर्युक्तः (**सुविताय**) ऐश्वर्याय (**गम्याः**) गमयितुं योग्याः (**वृष्णः**) बलवतः (**स्थातारा**) स्थातारो (**मनसः**) (**जवीयान्**) अतिशयेन वेगवान् (**अहंपूर्वः**) अयमहमित्यात्मज्ञानेन पूर्णः (**यजतः**) सङ्गतः (**धिष्ण्या**) धिष्णौ प्रगल्भौ (**यः**)॥३॥

अन्वयः-हे स्थातारा धिष्ण्या! यो वामवनिर्न प्रवत्वान् सृप्रवन्धुरो मनसो जवीयान् अहंपूर्वो यजतो रथः सुविताय भवति यत्र वृष्ण आगम्याः प्रयुज्यन्ते तमहं साध्नुयाम॥३॥

भावार्थः-मनुष्यैरैश्वर्य्योन्नतये पृथिवीवन्मनोवेगवद्वेगवन्ति यानानि निर्मीयन्ते तेऽत्र दृढा स्थिरसुखा जायन्ते॥३॥

पदार्थः-हे (**स्थातारा**) स्थित होनेवाले (**धिष्ण्या**) धृष्टप्रगल्भ अध्यापक और उपदेशको! (**यः**) जो (**वाम्**) तुम्हारा (**अवनिः**) पृथिवी के (**न**) समान (**प्रवत्वान्**) जिसमें प्रशस्त वेगादि गुण विद्यमान (**सृप्रवन्धुरः**) जो मिले हुए बन्धनों से युक्त (**मनसः**) मन से भी (**जवीयान्**) अत्यन्त वेगवान् (**अहंपूर्वः**) यह मैं हूँ, इस प्रकार आत्मज्ञान से पूर्ण (**यजतः**) मिला हुआ (**रथः**) रथ (**सुविताय**) ऐश्वर्य्य के लिये होता है, जिसमें (**वृष्णः**) बलवान् (**आ, गम्याः**) चलाने को योग्य अग्न्यादि पदार्थ अच्छे प्रकार जोड़े जाते हैं, उसको मैं सिद्ध करूं॥३॥

भावार्थः-मनुष्यों से जो ऐश्वर्य्य की उन्नति के लिये पृथिवी के तुल्य वा मन के वेग तुल्य वेगवान् यान बनाये जाते हैं, वे यहाँ स्थिर सुख देनेवाले होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒हेह॑ जा॒ता सम॑वावशीताम॒रेप॑सा॑ त॒न्वा॒३॑ नाम॑भि॒: स्वै:।
जि॒ष्णुर्वा॑म॒न्य: सुम॑खस्य सू॒रिर्दि॒वो अ॒न्य: सु॒भग॑: पु॒त्र ऊ॑हे॥४॥

इ॒हऽइ॑ह। जा॒ता। सम्। अ॒वा॒व॒शी॒ता॒म्। अ॒रे॒पसा॑। त॒न्वा॑। नाम॑ऽभिः। स्वैः। जि॒ष्णुः। वा॒म्। अ॒न्यः। सु॒ऽम॑खस्य। सू॒रिः। दि॒वः। अ॒न्यः। सु॒ऽभग॑ः। पु॒त्रः। ऊ॒हे॒॥४॥

पदार्थः-(**इहेह**) अस्मिञ्जगति। अत्र वीप्सायां द्वित्वं प्रकर्षद्योतनार्थम्। (**जाता**) जातौ (**सम्**) सम्यक् (**अवावशीताम्**) भृशं कामयेथाम्। **वश कान्ता**वित्यस्य यङ्लुगन्तं लङि रूपम्। (**अरेपसा**) न विद्यते रेपः पापं ययोस्तौ (**तन्वा**) शरीरेण (**नामभिः**) आख्याभिः (**स्वैः**) स्वकीयैः (**जिष्णुः**) जेतुं शीलः (**वाम्**) युवयोर्मध्ये (**अन्यः**) द्वितीयः (**सुमखस्य**) (**सूरिः**) विद्वान् (**दिवः**) प्रकाशात् (**अन्यः**) (**सुभगः**) सुन्दरैश्वर्यः (**पुत्रः**) यः पुनाति सः (**ऊहे**) वितर्कयामि॥४॥

अन्वयः-हे अरेपसाऽश्विनौ! युवयोरिहेह जाता युवां स्वया तन्वा स्वैर्नामभिः समवावशीताम्। वां जिष्णुरन्यः सुमखस्य दिवः सूरिरन्यः सुभगः पुत्रोऽस्ति तमहमूहे॥४॥

भावार्थः-मनुष्या अस्यां सृष्टौ भूगर्भादिविद्यां विज्ञाय यो जेताध्यापको बह्वैश्वर्य्यः सर्वस्य रक्षकः पदार्थविद्यां तर्केण विजानीयात् स प्रसिद्धो जायते॥४॥

पदार्थः-हे **(अरेपसा)** निष्पाप सर्वगुणव्यापी अध्यापक और उपदेशक जन **(इहेह)** इस जगत् में **(जाता)** प्रसिद्ध हुए आप लोगो! अपने **(तन्वा)** शरीर से और **(स्वैः)** अपने **(नामभिः)** नामों के साथ **(सम्, अवावशीताम्)** निरन्तर कामना करनेवाले हूजिये **(वाम्)** तुममें से **(जिष्णुः)** जीतने के स्वभाववाला **(अन्यः)** दूसरा **(सुमखस्य)** सुख के **(दिवः)** प्रकाश से **(सूरिः)** विद्वान् **(अन्यः)** और **(सुभगः)** सुन्दर ऐश्वर्य्यवान् **(पुत्रः)** पवित्र करता है, उसको **(ऊहे)** तर्कता हूँ-तर्क से कहता हूँ॥४॥

भावार्थः-हे मनुष्यो! इस सृष्टि में भूगर्भादि विद्या को जान के जो जीतनेवाला अध्यापक बहुत ऐश्वर्यवाला सबका रक्षक पदार्थविद्या को तर्क से जाने वह प्रसिद्ध होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र वां॑ नि॒चे॒रुः क॑कु॒हो वशाँ॒ अनु॑ पि॒शङ्ग॑॑रूप॒ः सद॑॑नानि गम्याः।
हरी॑ अ॒न्यस्य॑ पी॒पय॑न्त॒ वाजै॒र्म॒थ्ना रजा॑॑स्यश्विना॒ वि घोषैः॥५॥२५॥

प्र। वा॒म्। नि॒ऽचे॒रुः। क॒कु॒हः। वशा॑न्। अनु॑। पि॒शङ्ग॑ऽरूपः। सद॑नानि। ग॒म्याः। हरी॒ इति॑। अ॒न्यस्य॑। पी॒पय॑न्त। वाजैः॑। म॒थ्ना। रजां॑सि। अ॒श्वि॒ना॒। वि। घोषैः॑॥५॥

पदार्थः-**(प्र)** **(वाम्)** युवयोः **(निचेरुः)** चरन् **(ककुहः)** सर्वा दिशः **(वशान्)** वशवर्त्तिनः **(अनु)** आनुकूल्ये **(पिशङ्गरूपः)** पिशङ्गं पीतं सुवर्णादिमिश्रितं रूपं यस्य सः **(सदनानि)** भुवनानि **(गम्याः)** गच्छेः **(हरी)** धारणाकर्षणाविव बलपराक्रमौ **(अन्यस्य)** **(पीपयन्त)** आप्याययन्ति **(वाजैः)** वेगादिभिर्गुणैः **(मथ्ना)** मन्थानि मथितानि **(रजांसि)** लोकान् **(अश्विना)** वायुसूर्यवदध्यापकोपदेशकौ **(वि)** **(घोषैः)** शब्दैः॥५॥

अन्वयः-हे अश्विना! ययोर्वा पिशङ्गरूपो ककुहो निचेरुरथो वशाननुवर्त्तते तयोः प्रत्येकस्त्वं सदनानि प्रगम्याः। यथाऽन्यस्य हरी वाजैर्घोषैश्च प्रमथ्ना रजांसि वर्द्धयतस्तथा जनास्तौ विपीपयन्त॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा वायुः सर्वान् वशयति वायुसूर्यौ लोकान् धरतः। तथा विद्याद्धर्मौ धृत्वा यूयं सुखिनो भवतः॥५॥

पदार्थः-हे **(अश्विना)** पवन और सूर्य के समान अध्यापक और उपदेशको! जिन **(वाम्)** तुम्हारा जैसे **(पिशङ्गरूपः)** पीला सुवर्ण आदि से मिला हुआ रूप है जिसका वह **(ककुहः)** सब दिशाओं को

(निचेरुः) विचरनेवाला **(वशान्)** वशवर्त्ति जनों को **(अनु)** अनुकूल वर्त्तता है, उनमें से प्रत्येक तुम **(सदनानि)** लोकों को **(प्र, गम्याः)** अच्छे प्रकार प्राप्त होओ, जैसे **(अन्यस्य)** और अर्थात् अपने से भिन्न पदार्थ की **(हरी)** धारण और आकर्षण के समान बल, पराक्रम **(वाजैः)** वेगादि गुणों और **(घोषैः)** शब्दों से **(मथ्ना)** अच्छे प्रकार मथे हुए **(रजांसि)** लोकों को बढ़ाते हैं, वैसे मनुष्य उनको **(वि, पीपयन्त)** विशेष कर परिपूर्ण करते हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पवन सबको अपने वश में करता है तथा वायु और सूर्यलोक सबको धारण करते हैं, वैसे विद्या धर्म्म को धारण कर तुम भी सुखी होओ॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन्।
एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः॥६॥

प्र। वाम्। शरत्ऽवान्। वृषभः। न। निषाट्। पूर्वीः। इषः। चरति। मध्वः। इष्णन्। एवैः। अन्यस्य। पीपयन्त। वाजैः। वेषन्तीः। ऊर्ध्वाः। नद्यः। नः। आ। अगुः॥६॥

पदार्थः-**(प्र)** प्रकर्षे **(वाम्)** युवयोः **(शरद्वान्)** शरदो या ऋतवस्ता विद्यन्ते यस्मिन् सः **(वृषभः)** वृष्टिकर्त्ता **(न)** इव **(निष्षाट्)** यो नितरां सहते **(पूर्वीः)** पूर्वं प्राप्ताः **(इषः)** ज्ञातव्याः प्रजाः **(चरति)** प्राप्नोति **(मध्वः)** मधूनि **(इष्णन्)** इच्छन् **(एवैः)** प्रापकैः **(अन्यस्य)** भिन्नस्य **(पीपयन्त)** वर्द्धयन्ति **(वाजैः)** वेगैः **(वेषन्तीः)** व्याप्नुवत्यः **(उद्ध्वाः)** ऊर्द्ध्वं गामिन्यो ज्वालाः **(नद्यः)** सरितः **(नः)** अस्मान् **(आ)** समन्तात् **(अगुः)** व्याप्नुवन्तु॥६॥

अन्वयः-हे अध्यापकोपदेशकौ! यथा वां शरद्वान् वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन्नेवैरन्यस्य पूर्वीरिषः प्राप्नोति तथा वाजैस्सह वर्त्तमाना ऊर्द्ध्वा वेषन्तीर्नद्योऽनोऽस्मान् प्रपीपयन्त आगुः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य आप्तयोरध्यापकोपदेशकयोः सकाशाद्विद्याः प्राप्याऽन्यान् ददति तेऽग्निवत्तेजस्विनः शुद्धा भूत्वा सर्वतो वर्त्तन्ते॥६॥

पदार्थः-हे अध्यापकोपदेशक जनो! जैसे **(वाम्)** तुम्हारा **(शरद्वान्)** शरद् जो ऋतुयें वे जिनमें विद्यमान वह **(वृषभः)** वर्षा करानेवाला जो सूर्य्यमण्डल उसके **(न)** समान **(निष्षाट्)** निरन्तर सहनशील जन **(पूर्वीः)** अगले समय में प्राप्त हुई प्रजा **(इषः)** और जानने योग्य प्रजा जनों को **(चरति)** प्राप्त होता है वा **(मध्वः)** मधुर पदार्थों को **(इष्णन्)** चाहता हुआ **(एवैः)** प्राप्ति करानेवाले पदार्थों से **(अन्यस्य)**

दूसरे की पिछली वा जानने योग्य अगली प्रजाओं को प्राप्त होता है, वैसे **(वाजैः)** वेगों के साथ वर्त्तमान **(उद्ध्वाः)** ऊपर को जानेवाली लपटें वा **(वेषन्तीः)** इधर-उधर व्याप्त होनेवाली **(नद्यः)** नदियां **(नः)** हम लोगों को **(प्र, पीपयन्त)** वृद्धि दिलाती हैं और **(आगुः)** प्राप्त होती हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो आप्त अध्यापक और उपदेशकों से विद्याओं को प्राप्त हो के औरों को देते हैं, वे अग्नि के तुल्य तेजस्वी शुद्ध होकर सब ओर से वर्त्तमान हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरन्ती।
उपस्तुताववतं नाधमानं यामन्नयामञ्छृणुतं हवं मे॥७॥

असर्जि। वाम्। स्थविरा। वेधसा। गीः। बाळ्हे। अश्विना। त्रेधा। क्षरन्ती। उपऽस्तुतौ। अवतम्। नाधमानम्। यामन्। अयामन्। शृणुतम्। हवम्। मे॥७॥

पदार्थः-**(असर्जि)** **(वाम्)** युवयोः **(स्थविरा)** स्थूला विस्तीर्णा **(वेधसा)** प्राज्ञौ **(गीः)** वाणी **(वाढे)** प्रापणे **(अश्विना)** सत्योपदेशव्यापिनौ **(त्रेधा)** त्रिप्रकारैः **(क्षरन्ती)** प्राप्नुवन्ती **(उपस्तुतौ)** निकटे प्रशंसितौ **(अवतम्)** प्राप्नुतम् **(नाधमानम्)** विद्यैश्वर्य्यवन्तं संपादितवन्तम् **(यामन्)** यामनि सत्ये मार्गे **(अयामन्)** अगन्तव्ये मार्गे **(शृणुतम्)** **(हवम्)** श्रोतुमर्हं शब्दम् **(मे)** मम॥७॥

अन्वयः-हे वेधसाऽश्विना! वां या स्थविरा त्रेधा क्षरन्ती गीर्वाढेऽसर्जि तामुपस्तुतौ सन्तौ युवामवतं वां नाधमानं मे मम हवं यामन्नयामञ्छृणुतम्॥७॥

भावार्थः-य आप्तवाचं शृण्वन्ति ते कुमार्गं विहाय सुमार्गं प्राप्नुवन्ति। ये मनःकर्मभ्यां मिथ्या वक्तुन्नेच्छन्ति ते माननीया भवन्ति॥७॥

पदार्थः-हे **(वेधसा)** प्राज्ञ उत्तम बुद्धिवाले **(अश्विना)** सत्योपदेशव्यापी अध्यापकोपदेशको! **(वाम्)** तुम्हारी जो **(स्थविरा)** स्थूल और विस्तार को प्राप्त **(त्रेधा)** तीन प्रकारों से **(क्षरन्ती)** प्राप्त होती हुई **(गीः)** वाणी **(वाढे)** प्राप्ति करानेवाले व्यवहार में **(असर्जि)** रच गई उसको **(उपस्तुतौ)** अपने समीप दूसरे से प्रशंसा को प्राप्त होते हुए तुम दोनों **(अवतम्)** प्राप्त होओ, तुम दोनों को **(नाधमानम्)** विद्या और ऐश्वर्य्ययुक्त संपादित करता हुआ अर्थात् तुम्हारे ऐश्वर्य्य को वर्णन करते हुए **(मे)** मेरे **(हवम्)** सुनने योग्य शब्द को **(यामन्)** सत्य मार्ग **(अयामन्)** और न जाने योग्य मार्ग में **(शृणुतम्)** सुनिये॥७॥

भावार्थः-जो श्रेष्ठ धर्मात्मा विद्वानों की वाणी को सुनते हैं, वे कुमार्ग को छोड़ सुमार्ग को प्राप्त होते हैं। जो मन और कर्म से झूठ बोलने को नहीं चाहते वे माननीय होते हैं॥७॥

पुनरध्यपकोपदेशकविषयमाह॥

फिर अध्यापकोपदेशक विषय को अगले मन्त्र में कहा है॥

उ॒त स्या वा॒ं रुश॑तो॒ वप्स॑सो॒ गीस्त्रि॑ब॒र्हिषि सद॑सि पिन्वते॒ नॄन्।
वृषा॑ वां मे॒घो वृ॑ष॒णा पी॑पाय॒ गोर्न सेके॒ मनु॑षो दश॒स्यन्॥८॥

उ॒त। स्या। वा॒म्। रुश॑तः। वप्स॑सः। गीः। त्रि॒ऽब॒र्हिषि॑। सद॑सि। पि॒न्व॒ते॒। नॄन्। वृषा॑। वा॒म्। मे॒घः। वृ॒ष॒णा॒। पी॒पा॒य॒। गोः। न। सेके॑। मनु॑षः। द॒श॒स्यन्॥८॥

पदार्थः-(**उत**) अपि (**स्या**) सा (**वाम्**) युवयोः (**रुशतः**) प्रकाशितस्य (**वप्सतः**) सुरूपस्य (**गीः**) वाक् (**त्रिबर्हिषि**) त्रयो वेदवेत्तारो वृद्धा यस्यां तस्याम् (**सदसि**) सभायाम् (**पिन्वते**) सेवते (**नॄन्**) नायकान् मनुष्यान् (**वृषा**) (**वाम्**) युवयोः (**मेघः**) मेघ इव (**वृषणा**) दुष्टसामर्थ्यबन्धकौ (**पीपाय**) आप्याययति वर्द्धयति (**गोः**) पृथिव्याः (**न**) इव (**सेके**) सिञ्चने (**मनुषः**) मनुष्यान् (**दशस्यन्**) अभिमतं प्रयच्छन्॥८॥

अन्वयः-हे वृषणा! वां रुशतो वप्ससो या गीः स्या त्रिबर्हिषि सदसि नॄन् पिन्वते तां वां वृषा मेघो दशस्यन् गोः सेके न च व्यवहारे मनुषः पीपाय तमुत वयं सेवेमहि॥८॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या यदा सत्यं वदन्ति तदा मुखाऽऽकृतिर्मलीनी न भवति यदा मिथ्या वदन्ति तदा मुखं मलीनं जायते। यथा पृथिव्यामौषधानां वर्द्धको मेघस्तथा ये सभासद उपदेश्यांश्च सत्यभाषणेन वर्द्धयन्ति ते सर्वेषां हितैषिणो भवन्ति॥८॥

पदार्थः-हे (**वृषणा**) दुष्टों की सामर्थ्य बांधनेवाले अध्यापकोपदेशको! (**वाम्**) तुम दोनों के (**रुशतः**) प्रकाशित (**वप्सतः**) रूप की जो (**गीः**) वाणी है (**स्या**) वह (**त्रिबर्हिषि**) तीन वेदवेत्ता वृद्ध जिसमें हैं, उस (**सदसि**) सभा में (**नॄन्**) अग्रगन्ता मनुष्यों को (**पिन्वते**) सेवती है और (**वाम्**) तुम दोनों का जो (**वृषा**) सेचने में समर्थ (**मेघः**) मेघ के समान वाणी विषय (**दशस्यन्**) चाहे हुए फल को देता हुआ (**गोः**) पृथिवी के (**सेके**) सेचन में (**न**) जैसे वैसे अपने व्यवहार में (**मनुषः**) मनुष्यों की (**पीपाय**) उन्नति कराता है, उसको (**उत**) भी हम सेवें॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य जब सत्य कहते हैं, तब उनके मुख की आकृति मलीन नहीं होती और जब झूंठ कहते हैं, तब उनका मुख मलीन हो जाता है। जैसे पृथिवी पर ओषधियों का बढ़ानेवाला मेघ है, वैसे जो सभासद् उपदेश करने योग्यों को सत्य भाषण से बढ़ाते हैं, वे सबके हितैषी होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान्।
हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम्॥ ९॥ २६॥

युवाम्। पूषाऽइव। अश्विना। पुरम्ऽधिः। अग्निम्। उषाम्। न। जरते। हविष्मान्। हुवे। यत्। वाम्। वरिवस्या। गृणानः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥ ९॥

पदार्थः-(**युवाम्**) (**पूषेव**) पुष्टिकर्त्ता सूर्य्य इव (**अश्विना**) सत्योपदेशक रक्षयितः (**पुरन्धिः**) यः पुरं जगद्धरति सः (**अग्निम्**) पावकम् (**उषाम्**) उषसं प्रभातवेलाम् (**न**) इव (**जरते**) स्तौति (**हविष्मान्**) प्रशस्तानि हवींषिं दानानि विद्यन्ते यस्य सः (**हुवे**) स्वीकरोमि (**यत्**) यः (**वाम्**) युवयोः (**वरिवस्या**) वरिवसि परिचर्य्यायां भवानि सेवनकर्माणि (**गृणानः**) स्तुवन् (**विद्याम**) विजानीयाम (**इषम्**) विज्ञानम् (**वृजनम्**) बलम् (**जीरदानुम्**) दीर्घं जीवनम्॥ ९॥

अन्वयः-हे अश्विनाऽग्निमुषां यत् पुरन्धिः पूषेव हविष्मान् युवां न जरते तथा वां वरिवस्या स गृणानः सन्नहं युवां हुवे, एवं कुर्वन्तो वयमिषं वृजनं जीरदानुञ्च विद्याम॥ ९॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्यः सर्वेषां पुष्टिकरोऽग्निं प्रभातकालं चाविःकरोति तथा प्रशस्तदानशीलः पुरुषो विद्वद्गुणानाख्यापयति॥ ९॥

अस्मिन् सूक्तेऽश्विदृष्टान्तेनाऽध्यापकोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाशीत्युत्तरं शततमं १८१ सूक्तं षड्विंशो २६ वर्गश्च समाप्तः॥

पदार्थः-हे (**अश्विना**) सत्योपदेशक और रक्षा करनेवाले विद्वानो! (**अग्निम्**) अग्नि और (**उषाम्**) प्रभात वेला को (**यत्**) जो (**पुरन्धिः**) जगत् को धारण करने और (**पूषेव**) पुष्टि करनेवाले सूर्य के समान (**हविष्मान्**) प्रशस्त दान जिसके विद्यमान वह जन (**युवाम्**) तुम दोनों की (**न**) जैसे (**जरते**) स्तुति करता है, वैसे (**वाम्**) तुम दोनों की (**वरिवस्या**) सेवा में हुए कर्मों की (**गृणानः**) प्रशंसा करता हुआ वह मैं तुमको (**हुवे**) स्वीकार करता हूँ, ऐसे करते हुए हम लोग (**इषम्**) विज्ञान (**वृजनम्**) बल और (**जीरदानुम्**) दीर्घजीवन को (**विद्याम**) जानें॥ ९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य सब की पुष्टि करनेवाला अग्नि और प्रभात समय को प्रकट करता, वैसे प्रशंसित दानशील पुरुष विद्वानों के गुणों को अच्छे प्रकार कहता है॥ ९॥

इस सूक्त में अश्वि के दृष्टान्त से अध्यापक और उपदेशकों के गुणों का वर्णन होने से इस सूक्त के अर्थ की सङ्गति पिछले सूक्त के साथ समझनी चाहिये॥

यह एक सौ इक्यासीवां १८१ सूक्त और छब्बीसवां २६ वर्ग समाप्त हुआ॥

अभूदित्यष्टर्चस्य द्व्यशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। अश्विनौ देवते। १,५,७ निचृज्जगती। ३ जगती। ४ विराट् जगती छन्दः। निषादः स्वरः। २ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ६,८ स्वराट् पङ्क्तिछन्दः। पञ्चमः स्वरः॥

अथ विद्वत्कृत्यमाह॥

अब एक सौ बयासीवें सूक्त का आरम्भ है। इसमें आरम्भ से विद्वानों के कार्य को कहते हैं॥

अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः।
धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता॥ १॥

अभूत्। इदम्। वयुनम्। ओ इति। सु। भूषत। रथः। वृषण्ऽवान्। मदत। मनीषिणः। धियम्ऽजिन्वा। धिष्ण्या। विश्पलावसू इति। दिवः। नपाता। सुऽकृते। शुचिऽव्रता॥ १॥

पदार्थः-(**अभूत्**) भवति (**इदम्**) (**वयुनम्**) प्रज्ञानम् (**ओ**) सम्बोधने (**सु**) (**भूषत**) अलंकुरुत। अत्रा**ऽन्येषामपी**ति दीर्घः। (**रथः**) यानम् (**वृषण्वान्**) अन्ययानानां वेगशक्तिबन्धयिता (**मदत**) आनन्दत। अत्राऽ**न्येषामपी**ति दीर्घः। (**मनीषिणः**) मेधाविनः (**धियंजिन्वा**) यौ धियं प्रज्ञां जिन्वतः प्रीणीतस्तौ (**धिष्ण्या**) दृढौ प्रगल्भौ (**विश्पलावसू**) विशां पालयितारौ च तौ वासकौ (**दिवः**) प्रकाशस्य (**नपाता**) प्रपातरहितौ (**सुकृते**) शोभने मार्गे (**शुचिव्रता**) पवित्रकर्मशीलौ॥ १॥

अन्वयः-ओ मनीषिणो! याभ्यामिदं वयुनमभूदुत्पन्नं स्यात्। वृषण्वान् रथश्चाभूत्तौ सुकृते धियंजिन्वा दिवो नपाता धिष्ण्या शुचिव्रता विश्पलावसू अध्यापकोपदेशकौ यूयं सुभूषत तत्सङ्गेन मदत॥ १॥

भावार्थः-हे मनुष्या! न तौ वराध्यापकोपदेशकौ ययोः सङ्गेन प्रजापालनसुशीलतेश्वरधर्मशिल्पव्यवहारविद्या न वर्द्धेरन्॥ १॥

पदार्थः-(**ओ**) ओ (**मनीषिणः**) धीमानो! जिनसे (**इदम्**) यह (**वयुनम्**) उत्तम ज्ञान (**अभूत्**) हुआ और (**वृषण्वान्**) यानों की वेग शक्ति को बांधनेवाला (**रथः**) रथ हुआ उन (**सुकृते**) सुकर्मरूप शोभन मार्ग में (**धियंजिन्वा**) बुद्धि को तृप्त रखते (**दिवः**) विद्यादि प्रकाश के (**नपाता**) पतन से रहित (**धिष्ण्या**) दृढ़ प्रगल्भ (**शुचिव्रता**) पवित्र कर्म करने के स्वभाव से युक्त (**विश्पलावसू**) प्रजाजनों की पालना करने और वसानेवाले अध्यापक और उपदेशकों को तुम (**सु, भूषत**) सुशोभित करो और उनके सङ्ग से (**मदत**) आनन्दित होओ॥ १॥

भावार्थः-हे मनुष्यो! वे श्रेष्ठ अध्यापक और उपदेशक नहीं है कि जिनके सङ्ग से प्रजा पालना, सुशीलता, ईश्वर, धर्म और शिल्प व्यवहार की विद्या न बढ़ें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्र॑तमा॒ हि धिष्ण्या॑ म॒रुत्त॑मा दु॒स्रा दं॑सि॒ष्ठा र॒थ्या॑ र॒थीत॑मा।
पू॒र्णं रथं॑ वहेथे॒ मध्व॒ आचि॑तं॒ तेन॑ दा॒श्वांस॒मुप॑ याथो अश्विना॥ २॥

इन्द्र॑ऽतमा। हि। धिष्ण्या॑। म॒रुत्ऽतमा। दु॒स्रा। दं॒सि॒ष्ठा। र॒थ्या॑। र॒थिऽतमा। पू॒र्णम्। रथ॑म्। व॒हेथे॒ इति॑। मध्वः॑। आऽचि॑तम्। तेन॑। दा॒श्वांस॑म्। उप॑। या॒थः॒। अ॒श्वि॒ना॒॥ २॥

पदार्थः-(**इन्द्रतमा**) अतिशयेनैश्वर्ययुक्तौ (**हि**) (**धिष्ण्या**) प्रगल्भौ (**मरुत्तमा**) अतिशयेन विद्वद्युक्तौ (**दस्रा**) दुःखोपक्षयितारौ (**दंसिष्ठा**) अतिशयेन दंसितारौ पराक्रमिणौ (**रथ्या**) रथेषु साधू (**रथीतमा**) प्रशंसितरथयुक्तौ (**पूर्णम्**) (**रथम्**) रमणीयं यानम् (**वहेथे**) प्राप्नुथः (**मध्वः**) मधुना। तृतीयार्थे षष्ठी (**आचितम्**) सहितम् (**तेन**) (**दाश्वांसम्**) विद्यादातारम् (**उप**) (**याथः**) प्राप्नुथः (**अश्विना**) विद्युत्पवनाविव सकलविद्याव्यापिनौ॥ २॥

अन्वयः-हे अश्विना! यौ युवां हीन्द्रतमा धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा स्थः। मध्व आचितं पूर्णं शस्त्रास्त्रैः परिपूर्णं यं रथं वहेथे तेन दाश्वांसमुपयाथस्तावस्माभिर्नित्यं सत्कर्त्तव्यौ॥ २॥

भावार्थः-ये विद्युदग्निजवायुभिश्चालितं रथमास्थाय देशदेशान्तरं गच्छन्ति तेऽलंधनविजया जायन्ते॥ २॥

पदार्थः-हे (**अश्विना**) अध्यापकोपदेशक जनो! (**हि**) तुम्हीं (**इन्द्रतमा**) अतीव ऐश्वर्य्ययुक्त (**धिष्ण्या**) प्रगल्भ (**मरुत्तमा**) अत्यन्त विद्वानों को साथ लिये हुए (**दस्रा**) दुःख के दूर करने वाले (**दंसिष्ठा**) अतीव पराक्रमी (**रथ्या**) रथ चलाने में श्रेष्ठ और (**रथीतमा**) प्रशंसित पराक्रमयुक्त हों और (**मध्वः**) मधु से (**आचितम्**) भरे हुए (**पूर्णम्**) शस्त्र और अस्त्रों से परिपूर्ण जिस (**रथम्**) रथ को (**वहेथे**) प्राप्त होते हो (**तेन**) और उससे (**दाश्वांसम्**) विद्या देनेवाले जन के (**उप, याथः**) समीप जाते हो, वे हम लोगों को नित्य सत्कार करने योग्य हों॥ २॥

भावार्थः-जो बिजुली, अग्नि, जल और वायु इनसे चलाये हुए रथ पर स्थित हो देशदेशान्तर को जाते हैं, वे परिपूर्ण धन जीतनेवाले होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

किम॑त्र॒ दस्रा कृ॑णुथः॒ किमा॑साथे॒ जनो॒ यः कश्चि॒दह॑विर्महीयते॑।
अति॑ क्रमिष्टं जु॒रत॑ं प॒णेरसु॑ं॒ ज्योति॒र्विप्रा॑य कृणुतं वच॒स्यवे॑॥ ३॥

किम्। अत्र। दस्रा। कृणुथः। किम्। आसाथे इति। जनः। यः। कः। चित्। अहविः। महीयते। अति। क्रमिष्टम्। जुरतम्। पणेः। असुम्। ज्योतिः। विप्राय। कृणुतम्। वचस्यवे॥ ३॥

पदार्थः-(**किम्**) (**अत्र**) अस्मिन् व्यवहारे (**दस्रा**) दुःखोपक्षयितारौ (**कृणुथः**) (**किम्**) (**आसाथे**) उपविशथः (**जनः**) मनुष्यः (**यः**) (**कः**) (**चित्**) अपि (**अहविः**) अविद्यमानं हविरादानमदनं वा यस्य सः (**महीयते**) आत्मानं त्यागबुद्ध्या बहु मनुते (**अति**) (**क्रमिष्टम्**) अतिक्रमणं (**जुरतम्**) रुजतं नाशयतम् (**पणेः**) सदसद्व्यवहर्त्तुः (**असुम्**) प्रज्ञाम् (**ज्योतिः**) प्रकाशम् (**विप्राय**) मेधाविने (**कृणुतम्**) (**वचस्यवे**) आत्मनो वच इच्छवे॥ ३॥

अन्वयः-हे दस्राऽध्यापकोपदेशकौ! युवाः यः कश्चिदहविर्जनो महीयते तस्मै वचस्यवे विप्राय ज्योतिः कृणुतम्। पणेरसुमतिक्रमिष्टं जुरतं च किमत्रासाथे किं कृणुथश्च॥ ३॥

भावार्थः-अध्यापकाऽध्येतारौ यथाऽप्तो विद्वान् सर्वेषां सुखाय प्रयतते तथा वर्त्तेयाताम्॥ ३॥

पदार्थः-हे (**दस्रा**) दुःख के नाश करनेवाले अध्यापक उपदेशको! तुम (**यः**) जो (**कः, चित्**) कोई ऐसा है कि (**अहविः**) जिसके लेना वा भोजन करना नहीं विद्यमान है, वह (**जनः**) मनुष्य (**महीयते**) अपने को त्यागबुद्धि से बहुत कुछ मानता है, उस (**वचस्यवे**) अपने को वचन की इच्छा करते हुए (**विप्राय**) मेधावी उत्तम धीरबुद्धि पुरुष के लिये (**ज्योतिः**) प्रकाश (**कृणुतम्**) करो अर्थात् विद्यादि सद्गुणों का आविर्भाव करो और (**पणेः**) सत् और असत् पदार्थों का व्यवहार करनेवाले जन की (**असुम्**) बुद्धि को (**अति, क्रमिष्टम्**) अतिक्रमण करो और (**जुरतम्**) नाश करो अर्थात् उसकी अच्छे काम में लगनेवाली बुद्धि को विवेचन करो और असत् काम में लगी हुई बुद्धि को विनाशो तथा (**किम्**) क्या (**अत्र**) इस व्यवहार में (**आसाथे**) स्थिर होते और (**किम्**) क्या (**कृणुथः**) करते हो?॥ ३॥

भावार्थः-अध्यापक और उपदेशक जैसे आप्त विद्वान् सबके सुख के लिये उत्तम यत्न करता है, वैसे अपना वर्त्ताव वर्त्ते॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जम्भयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना।
वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम॥ ४॥

जम्भयतम्। अभितः। रायतः। शुनः। हतम्। मृधः। विदथुः। तानि। अश्विना। वाचम्ऽवाचम्। जरितुः। रत्निनीम्। कृतम्। उभा। शंसम्। नासत्या। अवतम्। मम॥ ४॥

पदार्थः-(**जम्भयतम्**) विनाशयतम् (**अभितः**) सर्वतः (**रायतः**) शब्दयतः (**शुनः**) कुक्कुरान् (**हतम्**) नाशयतम् (**मृधः**) संग्रामान् (**विदथुः**) विजानीथः (**तानि**) वचांसि (**अश्विना**) विद्याबलव्यापिनौ

(वाचंवाचम्) **(जरितुः)** स्तोतुरध्यापकादुपदेशकात् **(रत्निनीम्)** रमणीयाम् **(कृतम्)** कुरुतम् **(उभा)** **(शंसम्)** स्तुतिम् **(नासत्या)** अविद्यमानसत्यौ **(अवतम्)** **(मम)**॥४॥

अन्वयः-हे नासत्याश्विना! यौ युवां शुनो रायतो दुष्टानभितो जम्भयतं मृधो हतं तानि विदथुर्जरितू रत्निनीं वाचंवाचञ्च विदथुः। शंसं कृतं तावुभा मम वाणीमवतम्॥४॥

भावार्थः-येषां दुष्टबन्धने शत्रुविजये विद्वदुपदेशस्वीकारे च सामर्थ्यमस्ति त एवास्माकं रक्षकाः सन्तु॥४॥

पदार्थः-हे **(नासत्या)** सत्य व्यवहार वर्त्तने और **(अश्विना)** विद्याबल में व्याप्त होनेवाले सज्जनो! जो तुम **(रायतः)** भौंकते हुए मनुष्यभक्षी दुष्ट **(शुनः)** कुत्तों को **(अभितः, जम्भयतम्)** सब ओर से विनाशो तथा **(मृधः)** संग्रामों को **(हतम्)** विनाशो और **(तानि)** उन सब कामों को **(विदथुः)** जानते हो तथा **(जरितुः)** स्तुति प्रशंसा करनेवाले अध्यापक और उपदेशक से **(रत्निनीम्)** रमणीय **(वाचंवाचम्)** वाणी-वाणी को जानते हो और **(शंसम्)** स्तुति **(कृतम्)** करो वे **(उभा)** दोनों तुम **(मम)** मेरी वाणी को **(अवतम्)** तृप्त करो॥४॥

भावार्थः-जिनका दुष्टों के बांधने, शत्रुओं के जीतने और विद्वानों के उपदेश के स्वीकार करने में सामर्थ्य है, वे ही हम लोगों के रक्षक होते हैं॥४॥

अथ प्रकृतविषये नौकाविमानादिनिर्माणविषयमाह॥

अब प्रकरणगत विषय में नौका और विमानादि बनाने के विषय को अगले मन्त्र में कहा है॥

युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम्।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः॥५॥२७॥

युवम्। एतम्। चक्रथुः। सिन्धुषु। प्लवम्। आत्मन्ऽवन्तम्। पक्षिणम्। तौग्र्याय। कम्। येन। देवऽत्रा। मनसा। निःऽऊहथुः। सुऽपप्तनी। पेतथुः। क्षोदसः। महः॥५॥

पदार्थः-**(युवम्)** **(एतम्)** **(चक्रथुः)** कुर्य्यातम् **(सिन्धुषु)** नदीषु समुद्रेषु वा **(प्लवम्)** प्लवन्ते पारावारौ गच्छन्ति येन तं नौकादिकम् **(आत्मन्वन्तम्)** स्वकीयजनयुक्तम् **(पक्षिणम्)** पक्षौ विद्यन्ते यस्मिंस्तम् **(तौग्र्याय)** तुग्रेषु बलिष्ठेषु भवाय **(कम्)** सुखकारिणम् **(येन)** **(देवत्रा)** देवेष्विति **(मनसा)** विज्ञानेन **(निरूहथुः)** नितरां वाहयेतम् **(सुपप्तनी)** शोभनं पतनं गमनं ययोस्तौ **(पेतथुः)** पतेतम् **(क्षोदसः)** जलस्य **(महः)** महतः॥५॥

अन्वयः-हे अश्विना! युवं युवां सिन्धुषु तौग्र्यायैतमात्मन्वन्तं पक्षिणं कं प्लवं चक्रथुः। येन देवत्रा मनसा सुपप्तनी निरूहथुर्महः क्षोदसः पेतथुः॥५॥

भावार्थः-ये विस्तीर्णा दृढा नावो रचयित्वा समुद्रस्य मध्ये गमनाऽगमने कुर्वन्ति, ते स्वयं सुखिनो भूत्वाऽन्यान् सुखयन्ति॥५॥

पदार्थः-हे उक्त गुणवाले अध्यापकोपदेशको! (**युवम्**) तुम (**सिन्धुषु**) नदी वा समुद्रों में (**तौग्र्याय**) बलवानों में प्रसिद्ध हुए जन के लिये (**एतम्**) इस (**आत्मन्वन्तम्**) अपने जनों से युक्त (**पक्षिणम्**) और पक्ष जिसमें विद्यमान ऐसे (**कम्**) सुखकारी (**प्लवम्**) उस नौकादि यान को जिससे पार-अवार अर्थात् इस पार उस पार जाते हैं (**चक्रथुः**) सिद्ध करो कि (**येन**) जिससे (**देवत्रा**) देवों में (**मनसा**) विज्ञान के साथ (**सुपप्तनी**) जिनका सुन्दर गमन है, वे आप (**निरूहथुः**) निरन्तर उस नौकादि यान को बहाइये और (**महः**) बहुत (**क्षोदसः**) जल के (**पेतथुः**) पार जावें॥५॥

भावार्थः-जो जन लम्बी, चौड़ी, ऊँची नावों को रच के समुद्र के बीच जाना-आना करते हैं, वे आप सुखी होकर औरों को सुखी करते हैं॥५॥

पुनर्नौकादियानविषयमाह॥

फिर नौकादि यान विषय को अगले मन्त्र में कहा है॥

अवविद्धं तौग्र्यमप्स्व१न्तरनारम्भणे तमसि प्रविद्धम्।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति॥६॥

अवऽविद्धम्। तौग्र्यम्। अप्ऽसु। अन्तः। अनारम्भणे। तमसि। प्रऽविद्धम्। चतस्रः। नावः। जठलस्य। जुष्टाः। उत्। अश्विऽभ्याम्। इषिताः। पारयन्ति॥६॥

पदार्थः-(**अवविद्धम्**) अवताडितम् (**तौग्र्यम्**) बलदातृषु भवम् (**अप्सु**) जलेष्वन्तरिक्षे वा (**अन्तः**) मध्ये (**अनारम्भणे**) अविद्यमानमारम्भणं यस्य तस्मिन् (**तमसि**) अन्धकारे (**प्रविद्धम्**) प्रकर्षेण व्यथितम् (**चतस्रः**) एतत्संख्याकाः (**नावः**) पार्श्वस्था नौकाः (**जठलस्य**) जठरस्य उदरस्य मध्ये (**जुष्टाः**) सेविताः (**उत्**) (**अश्विभ्याम्**) वाय्वग्निभ्याम् (**इषिताः**) प्रेरिताः (**पारयन्ति**) पारं गमयन्ति॥६॥

अन्वयः-या अश्विभ्यामिषिता एकैकस्या अभितश्चतस्रो नावो जठलस्य मध्य इव समुद्रे जुष्टा अनारम्भणे तमसि प्रविद्धमप्स्वन्तरवविद्धन्तौग्र्यमुत्पारयन्ति ता विद्वद्भिर्निर्मातव्याः॥६॥

भावार्थः-मनुष्या यदा नौकायां स्थित्वा समुद्रमार्गेण गन्तुमिच्छेयुस्तदा महत्या नावा सह ह्रस्वाः सम्बद्ध्य समुद्रमध्ये गमनागमने कुर्युः॥६॥

पदार्थः-जो (**अश्विभ्याम्**) वायु और अग्नि से (**इषिताः**) प्रेरणा दी हुई अर्थात् पवन और अग्नि के बल से चली हुई एक-एक चौतरफी (**चतस्रः**) चार-चार (**नावः**) नावें (**जठलस्य**) उदर के समान समुद्र में (**जुष्टाः**) की हुई (**अनारम्भणे**) जिसका अविद्यमान आरम्भण उस (**तमसि**) अन्धकार में (**प्रविद्धम्**) अच्छे प्रकार व्यथित (**अप्सु**) जलों के (**अन्तः**) भीतर (**अवविद्धम्**) विशेष पीड़ा पाये हुए

(तौग्र्यम्) बल को ग्रहण करनेवालों में प्रसिद्ध जन को **(उत्पारयन्ति)** उत्तमता से पार पहुँचाती हैं, वे विद्वानों को बनानी चाहियें॥६॥

भावार्थः-मनुष्य जब नौका में बैठ के समुद्र के मार्ग से जाने की इच्छा करें, तब बड़ी नाव के साथ छोटी-छोटी नावें जोड़ समुद्र में जाना-आना करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कः स्विद् वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत्।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम्॥७॥

कः। स्वित्। वृक्षः। निःऽस्थितः। मध्ये। अर्णसः। यम्। तौग्र्यः। नाधितः। परिऽअसस्वजत्। पर्णा। मृगस्य। पतरोःऽइव। आऽरभे। उत्। अश्विनौ। ऊहथुः। श्रोमताय। कम्॥७॥

पदार्थः-(**कः**) (**स्वित्**) प्रश्ने (**वृक्षः**) (**निष्ठितः**) नितरां स्थितः (**मध्ये**) (**अर्णसः**) जलस्य (**यम्**) (**तौग्र्यः**) तुग्रेषु बलवत्सु भवः (**नाधितः**) उपतप्तः (**पर्य्यषस्वजत्**) परिष्वजति (**पर्णा**) पर्णानि (**मृगस्य**) मार्जयितुं योग्यस्य (**पतरोरिव**) गन्तुरिव (**आरभे**) आरब्धुम् (**उत्**) ऊर्ध्वे (**अश्विनौ**) जलाग्नी इव निर्मातृवोढारौ (**ऊहथुः**) वहतः (**श्रोमताय**) प्रशस्तकीर्त्तियुक्ताय व्यवहाराय (**कम्**)॥७॥

अन्वयः-हे अश्विनावर्णसो मध्ये कः स्विद् वृक्षो निष्ठितो यं नाधितस्तौग्र्यः पर्य्यषस्वजन्मृगस्य पतरोरिव पर्णा श्रोमतायारभे कमुदूहथुः॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे नौयायिनोऽर्णवस्य मध्ये कश्चिद् वृक्षोऽस्ति यस्मिन् वद्धा नौकास्तिष्ठेयुरिति। न तत्र वृक्षो नाप्यन्याधारः किन्तु नाव एवाऽऽधारोऽरित्राण्येव स्तम्भनानि। एवमेव यथा पक्षिण ऊर्ध्वं गत्वाऽधः पतन्ति तथैव विमानानि सन्तीत्युत्तरम्॥७॥

पदार्थः-हे (**अश्विना**) जल और अग्नि के समान विमानादि यानों के रचने और पहुंचानेवाले विद्वानो! (**अर्णसः**) जल के (**मध्ये**) बीच में (**कः, स्वित्**) कौन (**वृक्षः**) वृक्ष (**निष्ठितः**) निरन्तर स्थिर हो रहा है (**यम्**) जिसको (**नाधितः**) कष्ट को प्राप्त (**तौग्र्यः**) बलवानों में प्रसिद्ध हुआ पुरुष (**पर्यषस्वजत्**) लगता अर्थात् जिसमें अटकता है और (**मृगस्य**) शुद्ध करने योग्य (**पतरोरिव**) जाते हुए प्राणी के (**पर्णा**) पङ्खों के समान (**श्रोमताय**) प्रशस्त कीर्तियुक्त व्यवहार के लिये (**आरभे**) आरम्भ करने को (**कम्**) कौन यान को (**उत्, ऊहथुः**) ऊपर के मार्ग से पहुंचाते हो॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। नौका पर जानेवालो! समुद्र में कोई वृक्ष है जिसमें बन्धी हुई नौका स्थित हों, वहाँ नहीं वृक्ष और न आधार है, किन्तु नौका ही आधार,

बल्ली ही खम्भे हैं, ऐसे ही जैसे पखेरू ऊपर को जाय फिर नीचे आते हैं, वैसे ही विमानादि यान हैं॥७॥

पुनः साधारणतयाऽध्यापकोपदेशकविषयमाह॥

फिर साधारण भाव से अध्यापक और उपदेशक के विषय को अगले मन्त्र में कहा है॥

तद्वां॑ नरा नासत्या॒वनु॑ ष्या॒द् यद्वां॒ मानां॑स उ॒चथ॒मवो॑चन्।
अ॒स्मादु॒द्य सद॑सः सो॒म्यादा वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम्॥८॥२८॥

तत्। वा॒म्। न॒रा॒। ना॒स॒त्यौ॒। अनु॑। स्या॒त्। यत्। वा॒म्। मानां॑सः। उ॒चथ॑म्। अवो॑चन्। अ॒स्मात्। अ॒द्य। सद॑सः। सो॒म्यात्। आ। वि॒द्याम॑। इ॒षम्। वृ॒जन॑म्। जी॒रऽदा॑नुम्॥८॥

पदार्थः-(**तत्**) (**वाम्**) युवयोः (**नरा**) नेतारौ (**नासत्यौ**) असत्याचारविरहितौ (**अनु**) (**स्यात्**) (**यत्**) (**वाम्**) युवयोः (**मानासः**) विज्ञानवन्तः (**उचथम्**) वक्तुं योग्यम् (**अवोचन्**) कथयेयुः (**अस्मात्**) (**अद्य**) (**सदसः**) सभातः (**सोम्यात्**) सोमगुणसम्पन्नात् (**आ**) (**विद्याम**) (**इषम्**) इच्छासिद्धिम् (**वृजनम्**) बलम् (**जीरदानुम्**) जीवनोपायम्॥८॥

अन्वयः-हे नरा नासत्यौ! यद्वां युवयोरिष्टमनुष्यात्तद्वां भवतु मानासो यदुचथमवोचंस्तद्युवां गृह्णीयाताम्। यथाऽद्यास्मात् सोम्यात् सदस इषं वृजनं जीरदानुं वयमाविद्याम तथैतद्युवामप्याप्नुतम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यस्येदं समुचितमस्ति यत्स्वार्थमिच्छेत्परार्थमपीच्छेत्। विद्वांसो यद्यदुपदिशेयुस्तत्तत्प्रीत्या सर्वे गृह्णीयुरिति॥८॥

अत्र विद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्व्यशीत्युत्तरं शततमं १८२ सूक्तमष्टादशो १८ वर्गश्च समाप्तः॥

पदार्थः-हे (**नरा**) नायक अग्रगामी (**नासत्यौ**) असत्य आचरण से रहित अध्यापकोपदेशको! (**यत्**) जो (**वाम्**) तुम दोनों को (**अनु, ष्यात्**) चाहते हुए के अनुकूल हो (**तत्**) वह आप लोगों को हो अर्थात् परिपूर्ण हो और (**मानासः**) विचारशील सज्जन पुरुष (**यत्**) जिस (**उचथम्**) कहने योग्य विषय को (**अवोचन्**) कहें उसको तुम दोनों ग्रहण करो, जैसे (**अद्य**) आज (**अस्मात्**) इस (**सोम्यात्**) सोमगुण सम्पन्न (**सदसः**) सभास्थान से (**इषम्**) इच्छासिद्धि (**वृजनम्**) बल (**जीरदानुम्**) जीवन के उपाय को हम लोग (**आ**) (**विद्याम**) प्राप्त होवें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य को यह अच्छे प्रकार उचित है कि अपने प्रयोजन को चाहें तथा परोपकार भी चाहें और विद्वान् जन जिस जिसका उपदेश करें, उस उसको प्रीति से सब लोग ग्रहण करें॥८॥

इस सूक्त में विद्वानों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ बयासीवां सूक्त और अट्ठाईसवां वर्ग समाप्त हुआ॥

तमित्यस्य षड्चस्य त्र्यशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। अश्विनौ देवते। १,४,६ त्रिष्टुप्। २,३ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वच्छिल्पविद्यागुणानाह॥

अब एक सौ तिरासी सूक्त का आरम्भ है। उसके आरम्भ से विद्वान् की शिल्पविद्या के गुणों का विषय कहा है॥

तं युञ्जाथां मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस्त्रिचक्रः।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः॥ १॥

तम्। युञ्जाथाम्। मनसः। यः। जवीयान्। त्रिऽवन्धुरः। वृषणा। यः। त्रिऽचक्रः। येन। उपऽयाथः। सुऽकृतः। दुरोणम्। त्रिऽधातुना। पतथः। विः। न। पर्णैः॥ १॥

पदार्थः-(**तम्**) (**युञ्जाथाम्**) (**मनसः**) (**यः**) (**जवीयान्**) अतिशयेन वेगवान् (**त्रिवन्धुरः**) त्रयो वन्धुरा यस्मिन् सः (**वृषणा**) बलिष्ठौ (**यः**) (**त्रिचक्रः**) त्रीणि चक्राणि यस्मिन् सः (**येन**) (**उपयाथः**) समीपं प्राप्नुतः (**सुकृतः**) धर्मात्मनः (**दुरोणम्**) गृहम् (**त्रिधातुना**) त्रयो धातवो यस्मिँस्तेन (**पतथः**) गच्छथः (**विः**) पक्षी (**न**) इव (**पर्णैः**) पक्षैः॥ १॥

अन्वयः-हे वृषणाऽश्विनौ विद्वांसौ! युवां यः पर्णैर्विर्न मनसो जवीयान् त्रिवन्धुरो यस्त्रिचक्रो येन त्रिधातुना सुकृतो दुरोणमुपयाथः सद्यः पतथस्तं युञ्जाथाम्॥ १॥

भावार्थः-ये शीघ्रं गमयितारं पक्षिवदाकाशे गमनसाधनं साङ्गोपाङ्गसुरचितं यानं न साध्नुवन्ति ते कथमैश्वर्य्यं लभेरन्?॥ १॥

पदार्थः-हे (**वृषणा**) बलवान् सर्वविद्यासम्पन्न शिल्पविद्या के अध्यापकोपदेशको! तुम (**यः**) जो (**पर्णैः**) पङ्खों से (**विः, न**) पखेरू के समान (**मनसः**) मन से (**जवीयान्**) अत्यन्त वेगवाला (**त्रिवन्धुरः**) और तीन बन्धन जिसमें विद्यमान (**यः**) तथा जो (**त्रिचक्रः**) तीन चक्करवाला रथ है (**येन**) जिस (**त्रिधातुना**) तीन धातुओंवाले रथ से (**सुकृतः**) धर्मात्मा पुरुष के (**दुरोणम्**) घर को (**उपयाथः**) निकट जाते हो (**तम्**) उसको (**युञ्जाथाम्**) जोड़ो जोतो॥ १॥

भावार्थः-जो शीघ्र ले जाने और पखेरू के समान आकाश में चलनेवाले साङ्गोपाङ्ग अच्छे बने हुए रथ को नहीं सिद्ध करते हैं, वे कैसे ऐश्वर्य को पावें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमन्ता पृक्षे।
वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे॥ २॥

सुऽवृत्। रथः। वर्त्तते। यन्। अभि। क्षाम्। यत्। तिष्ठथः। क्रतुऽमन्ता। अनु। पृक्षे। वपुः। वपुष्या। सचताम्। इयम्। गीः। दिवः। दुहित्रा। उषसा। सचेथे इति॥ २॥

पदार्थः-(**सुवृत्**) यस्सुवर्त्तुमर्हः (**रथः**) रन्तुं योग्यः (**वर्त्तते**) (**यन्**) गच्छन्। इण् धातोः शतृप्रत्ययो यणादेशश्च। (**अभि**) अभितः (**क्षाम्**) पृथिवीम् (**यत्**) यस्मिन् (**तिष्ठथः**) (**क्रतुमन्ता**) बहुप्रज्ञायुक्तौ (**अनु**) (**पृक्षे**) सम्पर्के (**वपुः**) रूपम् (**वपुष्या**) वपुषि भवानि (**सचताम्**) (**इयम्**) (**गीः**) सुशिक्षिता वाक् (**दिवः**) सूर्य्यस्य (**दुहित्रा**) या कन्येव वर्त्तमाना तया (**उषसा**) प्रभातवेलया (**सचेथे**) संयुङ्क्थः॥ २॥

अन्वयः-हे क्रतुमन्ता यानसाधकचालकौ! युवां सुवृद्रथः क्षां यन्नभि वर्त्तते यत्पृक्षे युवां तिष्ठथो यद्वपुरस्ति येन वपुष्यानु सचतां यथेयं गीर्वक्ता च दिवो दुहित्रोषसा सह युवां सचेथे तथा कथन्न भाग्यशालिनौ भवथः ?॥ २॥

भावार्थः-मनुष्या येन यानेन गन्तुमिच्छेयुस्तत्सुन्दरं पृथिव्यादिषु सद्योगमनयोग्यमुषा इव प्रकाशमानं यथा तथा सुविचारेण रचयन्तु॥ २॥

पदार्थः-हे (**क्रतुमन्ता**) बहुत उत्तम बुद्धियुक्त रथों के चलाने और सिद्ध करनेवाले विद्वानो! तुम (**सुवृत्**) सुन्दरता से स्वीकार करने (**रथः**) और रमण करने योग्य रथ (**क्षाम्**) पृथिवी को (**यन्**) जाता हुआ (**अभि**) सब ओर से (**वर्त्तते**) वर्त्तमान है, (**यत्**) जिसमें (**पृक्षे**) दूसरों के सम्बन्ध में तुम लोग (**तिष्ठथः**) स्थिर होते हो और जो (**वपुः**) रूप है अर्थात् चित्र सा बन रहा है, उस सबसे (**वपुष्या**) सुन्दर रूप में प्रसिद्ध हुए व्यवहारों का (**अनु, सचताम्**) अनुकूलता से सम्बन्ध करो और जैसे (**इयम्**) यह (**गीः**) सुशिक्षित वाणी और कहनेवाला पुरुष (**दिवः**) सूर्य की (**दुहित्रा**) कन्या के समान वर्त्तमान (**उषसा**) प्रभात वेला से तुम दोनों को (**सचेथे**) संयुक्त होते हैं, वैसे कैसे न तुम भाग्यशाली होते हो ?॥ २॥

भावार्थः-मनुष्य जिस यान से जाने को चाहें वह सुन्दर पृथिव्यादिकों में शीघ्र चलने योग्य प्रभात वेला के समान प्रकाशमान जैसे वैसे अच्छे विचार से बनावें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान्।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च॥ ३॥

आ। तिष्ठतम्। सुऽवृतम्। यः। रथः। वाम्। अनु। व्रतानि। वर्तते। हविष्मान्। येन। नरा। नासत्या। इषयध्यै। वर्तिः। याथः। तनयाय। त्मने। च॥ ३॥

पदार्थः-(**आ**) समन्तात् (**तिष्ठतम्**) (**सुवृतम्**) यः सुष्ठु सर्वाङ्गैः शोभनस्तम् (**यः**) (**रथः**) (**वाम्**) युवाम् (**अनु**) (**व्रतानि**) शीलानि (**वर्त्तते**) (**हविष्मान्**) बह्वद्यादिपदार्थयुक्तः (**येन**) (**नरा**) नेतारौ (**नासत्या**) सत्यविद्याक्रियौ (**इषयध्यै**) एषयितुं गमयितुम् (**वर्त्तिः**) मार्गम् (**याथः**) गच्छथः (**तनयाय**) सन्तानाय (**त्मने**) आत्मनि (**च**)॥३॥

अन्वयः-हे नरा नासत्या! यो हविष्मान् रथो वामनु वर्त्तते येनेषयध्यै व्रतानि वर्द्धयित्वा तनयाय त्मने च वर्त्तिर्याथस्तं सुवृतं रथं युवामातिष्ठतम्॥३॥

भावार्थः-मनुष्याः स्वस्य सन्तानादीनाञ्च सुखोन्नतये सुदृढेन विस्तीर्णेन साङ्गोपाङ्गसामग्र्या पूर्णेन सद्योगामिना भक्ष्यभोज्यलेह्यचूष्यैर्युक्तेन रथेन भूसमुद्राकाशमार्गेषु प्रसमाहिततया गच्छेयुरागच्छेयुश्च॥३॥

पदार्थः-हे (**नरा**) अग्रगामी नायक (**नासत्या**) सत्य विद्या क्रियायुक्त पुरुषो! (**यः**) जो (**हविष्मान्**) बहुत खाने योग्य पदार्थोंवाला (**रथः**) रथ (**वाम्**) तुम दोनों के (**अनु, वर्त्तते**) अनुकूल वर्त्तमान है (**येन**) जिससे (**इषयध्यै**) ले जाने को (**व्रतानि**) शील उत्तम भावों को बढ़ा कर (**तनयाय**) सन्तान के लिये (**च**) और (**त्मने**) अपने लिये भी (**वर्तिः**) मार्ग को (**याथः**) जाते हो (**सुवृतम्**) उस सर्वाङ्ग सुन्दर रथ को तुम दोनों (**आ, तिष्ठतम्**) अच्छे प्रकार स्थिर होओ॥३॥

भावार्थः-मनुष्य अपने [व] सन्तानों की सुखोन्नति के लिये अच्छा, दृढ़, लम्बे-चौड़े, साङ्गोपाङ्ग सामग्री से पूर्ण, शीघ्र चलनेवाले, भक्ष्य, भोज्य, लेह्य, चोष्य अर्थात् चट-पट खाने उत्तमता से धीरज में खाने, चाटने और चूषने योग्य पदार्थों से युक्त रथ से पृथिवी, समुद्र और आकाश मार्गों में अति उत्तमता से सावधानी के साथ जावें और आवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा वां॒ वृको॒ मा वृ॒कीरा द॑धर्षी॒न्मा परि॑ वर्क्तमु॒त मा॑ति॑ धक्तम्।
अ॒यं वां॑ भा॒गो निहि॑त इ॒यं गीर्दस्रा॑वि॒मे वां॑ नि॒धयो॒ मधू॑नाम्॥४॥

मा। वा॒म्। वृक॑ः। मा। वृ॒कीः। आ। दधर्षी॒त्। मा। परि॑। व॒र्क्त॒म्। उ॒त। मा। अति॑। ध॒क्त॒म्। अ॒यम्। वा॒म्। भा॒गः। निऽहि॑तः। इ॒यम्। गीः। दस्रौ॑। इ॒मे। वा॒म्। नि॒ऽधयः॑। मधू॑नाम्॥४॥

पदार्थः-(**मा**) निषेधे (**वाम्**) युवाम् (**वृकः**) स्तेनः (**मा**) (**वृकीः**) स्तेनस्य स्त्रीः। अत्र पूर्वसवर्णादेशः। (**आ**) अपि च (**दधर्षीत्**) धर्षेत् (**मा**) (**परि**) (**वर्क्तम्**) त्यजतम् (**उत**) अपि (**मा**) (**अति**) (**धक्तम्**) दहतम् (**अयम्**) (**वाम्**) युवयोः (**भागः**) भजनीयोऽधिकारः (**निहितः**) स्थापितः (**इयम्**) (**गीः**) आज्ञप्ता वाक् (**दस्रौ**) दुःखोपक्षयितारौ (**इमे**) (**वाम्**) युवयोः (**निधयः**) राशयः (**मधूनाम्**) मधुरादिगुणयुक्तानां सोमादिपदार्थानाम्॥४॥

अन्वयः-हे दस्रौ! वामिमे मधूनां निधयो वामयं भागो निहित इयं गीश्चास्ति। युवामस्मान् मा परिवर्क्तमुतापि मातिधक्तं येन वां वृको मा वृकीर्मा दधर्षीत्। तमुपायं युवां सदा नितिष्ठताम्॥४॥

भावार्थः-मनुष्या यदा गृहे निवसेयुर्यानेष्वरण्ये वा प्रतिष्ठेरँस्तदा भोगोपभोगयोग्यान् पदार्थान् शस्त्रास्त्राणि वीरसेनाञ्च संस्थाप्य निवसेयुर्गच्छेयुर्वा यतः कश्चिदपि विघ्नो न स्यात्॥४॥

पदार्थः-हे **(दस्रौ)** दुःखनाशक शिल्पविद्याऽध्यापक उपदेशको! **(वाम्)** तुम दोनों के **(इमे)** ये **(मधूनाम्)** मधुरादि गुणयुक्त पदार्थों के **(निधयः)** राशी समूह **(वाम्)** तुम दोनों का **(अयम्)** यह **(भागः)** सेवने योग्य अधिकार **(निहितः)** स्थापित और **(इयम्)** यह **(गीः)** वाणी है, तुम दोनों हमको **(मा, परि, वर्क्तम्)** मत छोड़ो **(उत)** और **(मा, अति, धक्तम्)** मत विनाशो और जिससे **(वाम्)** तुम दोनों को **(वृकः)** चोर, ठग गठकटा आदि दुष्ट जन **(मा)** मत **(वृकीः)** चोरी, ठगी, गठकटी आदि दुष्ट औरतें **(मा, आ, दधर्षीत्)** मत विनाशें, मत नष्ट करें॥४॥

भावार्थः-मनुष्य जब घर में निवास करें वा यानों में और वन में प्रतिष्ठित होवें, तब भोग करने के लिये पूर्ण भोग और उपभोग योग्य पदार्थों, शस्त्र वा अस्त्रों और वीरसेना को संस्थापन कर निवास करें वा जावें, जिससे कोई विघ्न न हो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान्।
दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातम्॥५॥

युवाम्। गोतमः। पुरुऽमीळ्हः। अत्रिः। दस्रा। हवते। अवसे। हविष्मान्। दिशम्। न। दिष्टाम्। ऋजुयाऽइव। यन्ता। आ। मे। हवम्। नासत्या। उप। यातम्॥५॥

पदार्थः-**(युवाम्)** **(गोतमः)** मेधावी **(पुरुमीढः)** पुरुभिर्बहुभिः पदार्थैः सिक्तः **(अत्रिः)** सततं गामी **(दस्रा)** दुःखदारिद्र्यनाशकौ **(हवते)** गृह्णाति **(अवसे)** रक्षणाद्याय **(हविष्मान्)** प्रशंसितादेययुक्तः **(दिशम्)** **(न)** इव **(दिष्टाम्)** निदर्शिताम् **(ऋजूयेव)** ऋजुना मार्गेणेव। अत्र टा स्थाने यादेशः। अत्राऽन्येषामपीति दीर्घः। **(यन्ता)** नियमकर्त्ता **(आ)** **(मे)** मम **(हवम्)** दानम् **(नासत्या)** सत्यप्रियौ **(उप)** **(यातम्)** प्राप्नुतम्॥५॥

अन्वयः-हे दस्रा नासत्या! युवां यो हविष्मान् पुरुमीढोऽत्रिर्गोतमोऽवसे हवते तद्वत् यन्ता ऋजूयेव दिष्टां दिशन्न च मे हवमुपयातम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा नौकादियानयायिनस्सरलेन मार्गेणोद्दिष्टां दिशं गच्छन्ति तथा जिज्ञासव आप्तानां विदुषां सामीप्यं गच्छेयुः॥५॥

पदार्थः-हे **(दस्रा)** दुःख दारिद्र्य विनाशनेहारे **(नासत्या)** सत्यप्रिय शिल्पविद्याऽध्यापकोपदेशक विद्वानो! **(युवाम्)** तुम दोनों **(यः)** जो **(हविष्मान्)** प्रशंसित ग्रहण करने योग्य **(पुरुमीढः)** बहुत पदार्थों से सींचा हुआ **(अत्रिः)** निरन्तर गमनशील **(गोतमः)** मेधावी जन **(अवसे)** रक्षा आदि के लिये **(हवते)** उत्तम पदार्थों को ग्रहण करता है, वैसे और जैसे **(यन्ता)** नियमकर्त्ता जन **(ऋजूयेव)** सरल मार्ग से जैसे तैसे **(दिष्टाम्)** निर्देश की **(दिशम्)** पूर्वापि दिशा के **(न)** समान **(मे)** मेरे **(हवम्)** दान को **(उप, आ, यातम्)** अच्छे प्रकार समीप प्राप्त होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे नौकादि यान से जानेवाले जन सरल मार्ग से बताई हुई दिशा को जाते हैं, वैसे सीखनेवाले विद्यार्थी जन आप्त विद्वानों के समीप जावें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम्॥६॥२९॥४॥

अतारिष्म। तमसः। पारम्। अस्य। प्रति। वाम्। स्तोमः। अश्विनौ। अधायि। आ। इह। यातम्। पथिऽभिः। देवऽयानैः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥६॥

पदार्थः-**(अतारिष्म)** तरेम **(तमसः)** रात्रेः प्रकाशरहितस्य समुद्रस्य वा **(पारम्)** परतटम् **(अस्य)** **(प्रति)** **(वाम्)** युवयोर्युवां वा **(स्तोमः)** श्लाघ्यो व्यवहारः **(अश्विनौ)** शिल्पाविद्याव्यापिनौ **(अधायि)** **(आ)** **(इह)** **(यातम्)** **(पथिभिः)** **(देवयानैः)** देवा यान्ति येषु तैः **(विद्याम)** **(इषम्)** **(वृजनम्)** **(जीरदानुम्)**॥६॥

अन्वयः-हे अश्विनौ! यथेह वां स्तोमोऽधायि तथा वां प्रत्यस्य तमसः पारमतारिष्म यथा वयमिषं वृजनं जीरदानुं विद्याम तथा युवां देवयानैः पथिभिरस्मानायातम्॥६॥

भावार्थः-हे शिल्पविद्यावित्तमा भवेयुस्त एव नौकादियानैर्भूसमुद्रान्तरिक्षमार्गैः पारावारौ गमयितुं शक्नुवन्ति त एव विद्वन्मार्गेष्वऽग्न्यादियानैर्गन्तुं योग्या इति॥६॥

अस्मिन् सूक्ते विद्वच्छिल्पविद्यागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्र्यशीत्युत्तरं शततमं १८३ सूक्तमेकोनत्रिंशो २९ वर्गश्चतुर्थोऽध्यायश्च समाप्तः॥

अस्मिन्नध्याये जन्ममरुदिन्द्राऽग्न्यश्विविमानादियानगुणवर्णनादेतदध्यायार्थस्य पूर्वाऽध्यायार्थेन सह सङ्गतिर्वेद्या॥

पदार्थः-हे **(अश्विनौ)** शिल्पविद्याव्यापी सज्जनो! जैसे **(इह)** यहाँ **(वाम्)** तुम दोनों का **(स्तोमः)** स्तुति योग्य व्यवहार **(अधायि)** धारण किया गया, वैसे तुम्हारे **(प्रति)** प्रति हम **(अस्य)** इस

(तमसः) अन्धकार के **(पारम्)** पार को **(अतारिष्म)** तरें पहुंचें, जैसे हम **(इषम्)** इच्छासिद्धि **(वृजनम्)** बल और **(जीरदानुम्)** जीवन को **(विद्याम)** प्राप्त होवें, वैसे तुम दोनों **(देवयानैः)** विद्वान् जिन मार्गों से जाते उन **(पथिभिः)** मार्गों से हम लोगों को **(आ, यातम्)** प्राप्त होओ॥६॥

भावार्थः-जो अतीव शिल्पविद्यावेत्ता जन हों वे ही नौकादि यानों से भू, समुद्र और अन्तरिक्ष मार्गों से पार-अवर लेजा-लेआ सकते हैं, वे ही विद्वानों के मार्गों में अग्नि आदि पदार्थों से बने हुए विमान आदि यानों से जाने को योग्य हैं॥६॥

इस सूक्त में विद्वानों की शिल्पविद्या के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिए॥

यह एक सौ तिरासीवां १८३ सूक्त और ऊनतीसवां २९ वर्ग और चतुर्थाध्याय समाप्त हुआ॥

इस अध्याय में जन्म, पवन, इन्द्र, अग्नि, अश्वि और विमानादि यानों के गुणों का वर्णन आदि होने से इस अध्याय के अर्थ की पिछले अध्याय के अर्थ के साथ सङ्गति समझनी चाहिये॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण परमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्ते ऋग्वेदभाष्ये द्वितीयाऽष्टकस्य चतुर्थोऽध्यायः समाप्तः॥

॥ओ३म्॥

अथ द्वितीयाष्टके पञ्चमाऽऽध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

ता वामिति षड्ऋचस्य चतुरशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। अश्विनौ देवते। १ पङ्क्तिः। ४ भुरिक् पङ्क्तिः। ५-६ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनरध्यापकोपदेशकविषयमाह॥

अब द्वितीयाष्टक के पञ्चम अध्याय के प्रथम सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अध्यापक और उपदेशक विषय को कहा है॥

ता वा॑म॒द्य ताव॑प॒रं हु॑वेमो॒च्छन्त्या॑मु॒षसि॒ वह्नि॑रुक्थैः।
नास॑त्या॒ कुह॑ चि॒त्सन्ता॑व॒र्यो दि॒वो नपा॑ता सु॒दास्त॑राय॥ १॥

ता। वा॒म्। अ॒द्य। तौ। अ॒प॒रम्। हु॒वे॒म॒। उ॒च्छन्त्या॑म्। उ॒षसि॑। वह्निः। उ॒क्थैः। नास॑त्या। कुह॑। चि॒त्। सन्तौ॑। अ॒र्यः। दि॒वः। नपा॑ता। सु॒दाः॒ऽत॑राय॥ १॥

पदार्थः-(**ता**) तौ (**वाम्**) युवाम् (**अद्य**) (**तौ**) (**अपरम्**) पश्चात् (**हुवेम**) (**उच्छन्त्याम्**) विविधवासदात्र्याम् (**उषसि**) प्रभातवेलायाम् (**वह्निः**) वोढा (**उक्थैः**) प्रशंसनीयैर्वचोभिः (**नासत्या**) असत्यात् पृथग्भूतौ (**कुह**) कस्मिन् (**चित्**) अपि (**सन्तौ**) (**अर्य्यः**) वणिग्जनः (**दिवः**) व्यवहारस्य (**नपाता**) न विद्यते पातो ययोस्तौ (**सुदास्तराय**) अतिशयेन सुष्ठु प्रदात्रे॥१॥

अन्वयः-हे नपाता नासत्या! वयमद्य उच्छन्त्यामुषसि ता वां हुवेम तावपरं स्वीकुर्य्याम युवां कुह चित् सन्तौ यथा वह्निरिवार्य्यः सुदास्तरायोक्थैर्दिवो मध्ये वर्त्तते तथा वयमपि वर्त्तेमहि॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसो द्यावापृथिवीभ्यामुपकारान् कुर्वन्ति तथा वयं विद्वद्भ्य उपकृता भवेम॥१॥

पदार्थः-हे (**नपाता**) जिनका पात विद्यमान नहीं वे (**नासत्या**) मिथ्या व्यवहार से अलग हुए सत्यप्रिय विद्वानो! हम लोग (**अद्य**) आज (**उच्छन्त्याम्**) नाना प्रकार का वास देनेवाली (**उषसि**) प्रभात वेला में (**ता**) उन (**वाम्**) तुम दोनों महाशयों को (**हुवेम**) स्वीकार करें (**तौ**) और उन आपको (**अपरम्**) पीछे भी स्वीकार करें तुम (**कुह, चित्**) किसी स्थान में (**सन्तौ**) हुए हो और जैसे (**वह्निः**) पदार्थों को एक स्थान को पहुंचानेवाले अग्नि के समान (**अर्य्यः**) वणियां (**सुदास्तराय**) अतीव सुन्दरता से उत्तम

देनेवाले के लिये (**उक्थैः**) प्रशंसा करने के योग्य वचनों से (**दिवः**) व्यवहार के बीच वर्त्तमान है, वैसे हम लोग वर्त्तें॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन आकाश और पृथिवी से उपकार करते हैं, वैसे हम लोग विद्वानों से उपकार को प्राप्त हुए वर्त्तें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदन्ता।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः॥२॥

अस्मे इति। ऊम् इति। सु। वृषणा। मादयेथाम्। उत्। पणीन्। हतम्। ऊर्म्या। मदन्ता। श्रुतम्। मे। अच्छोक्तिऽभिः। मतीनाम्। एष्टा। नरा। निऽचेतारा। च। कर्णैः॥२॥

पदार्थः-(**अस्मे**) अस्मान् (**उ**) वितर्के (**सु**) शोभने (**वृषणा**) बलिष्ठौ (**मादयेथाम्**) आनन्दयेथाम् (**उत्**) (**पणीन्**) प्रशस्तव्यवहारकर्त्रीन् (**हतम्**) (**ऊर्म्या**) रात्र्या सह। **ऊर्म्येति रात्रिनामसु पठितम्।** (निघं०१.७) (**मदन्ता**) आनन्दन्तौ (**श्रुतम्**) शृणुतम् (**मे**) मम (**अच्छोक्तिभिः**) शोभनैर्वचोभिः (**मतीनाम्**) मनुष्याणाम् (**एष्टा**) पर्य्यालोचकः (**नरा**) नेतारौ (**निचेतारा**) नित्यं ज्ञानवन्तौ ज्ञापकौ (**च**) (**कर्णैः**) श्रौत्रैः॥२॥

अन्वयः-हे वृषणा निचेतारा नरा! युवां पणीनस्मे सुमादयेथामूर्म्या सह मदन्ता दुष्टानुद्धतं मतीनामच्छोक्तिभिर्योऽहमेष्टा तस्य च मे सुष्ठूक्तिं कर्णैरु श्रुतम्॥२॥

भावार्थः-यथाऽध्यापकोपदेष्टारावध्येतॄनुपदेश्याँश्च वेदवचोभिः संज्ञाप्य विदुषः कुर्वन्ति तथा तद्वचः श्रुत्वा तौ सदा सर्वैरानन्दनीयौ॥२॥

पदार्थः-हे (**वृषणा**) बलवान् (**निचेतारा**) नित्य ज्ञानवान् और ज्ञान के देनेवाले (**नरा**) अग्रगामी विद्वानो! तुम (**पणीन्**) प्रशंसित व्यवहार करनेवाले (**अस्मे**) हम लोगों को (**सु, मादयेथाम्**) सुन्दरता से आनन्दित करो (**ऊर्म्या**) और रात्रि के साथ (**मदन्ता**) आनन्दित होते हुए तुम लोग दुष्टों का (**उत्, हतम्**) उद्धार करो अर्थात् उनको उस दुष्टता से बचाओ और (**मतीनाम्**) मनुष्यों की (**अच्छोक्तिभिः**) अच्छी उक्तियों अर्थात् सुन्दर वचनों से जो मैं (**एष्टा**) विवेक करनेवाला हूँ उस (**च, मे**) मेरी भी सुन्दर उक्ति को (**कर्णैः**) कानों से (**उ, श्रुतम्**) तर्क-वितर्क करने के साथ सुनो॥२॥

भावार्थः-जैसे अध्यापक और उपदेश करनेवाले जन पढ़ाने और उपदेश सुनाने योग्य पुरुषों को वेदवचनों से अच्छे प्रकार ज्ञान देकर विद्वान् करते हैं, वैसे उनके वचन को सुनके वे सब काल में सबको आनन्दित करने योग्य हैं॥२॥

अथ शिष्यशिक्षापरमध्यापकोपदेशकविषयमाह॥

अब शिष्य को सिखावट देने के ढङ्ग पर अध्यापकोपदेशक विषय को अगले मन्त्र में कहा है॥

श्रि॒ये पू॑ष॒न्निषु॑कृ॒तेव॑ दे॒वा नास॑त्या वहतुं सू॒र्याया॑:।
व॒च्यन्ते॑ वां ककु॒हा अ॒प्सु जा॒ता यु॒गा जू॒र्णेव॒ वरु॑णस्य॒ भूरे॑:॥ ३॥

श्रि॒ये। पू॒ष॒न्। इ॒षु॒कृ॒ताऽइ॑व। दे॒वा। नास॑त्या। व॒ह॒तु॒म्। सू॒र्याया॑:। व॒च्यन्ते॑। वा॒म्। क॒कु॒हा:। अ॒प्ऽसु। जा॒ता:। यु॒गा। जू॒र्णाऽइ॑व। वरु॑णस्य। भूरे॑:॥ ३॥

पदार्थ:-(**श्रिये**) लक्ष्म्यै (**पूषन्**) पोषक (**इषुकृतेव**) वाणीकृताविव (**देवा**) दातारौ (**नासत्या**) असत्यद्वेषिणौ (**वहतुम्**) प्रापकम् (**सूर्य्याया:**) सूर्यस्य कान्ते: (**वच्यन्ते**) स्तुवन्ति। व्यत्ययेन श्यँश्च। (**वाम्**) युवाम् (**ककुहा:**) दिश: (**अप्सु**) अन्तरिक्षप्रदेशेषु (**जाता:**) प्रसिद्धा: (**युगा**) युगानि वर्षाणि (**जूर्णेव**) पुरातनानीव (**वरुणस्य**) उत्तमस्य जलस्य वा (**भूरे:**) वहो:॥ ३॥

अन्वय:-हे पूषन्! त्वं देवा नासत्या सूर्याया वहतुमिषुकृतेव श्रिये प्रयतस्व। हे अध्यापकोपदेशकावप्सु जाता: ककुहा वरुणस्य भूरेर्युगा जूर्णेव वां वच्यन्ते॥ ३॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा इषुकृतासेना शत्रून् विजयते तथा धनस्य सदुपायं शीघ्रमेव कुर्यात्, कालविशेषेषु दिनेषु कार्याणि, रात्रिभागेषु नोत्पद्यन्ते सद्गुणानान्तु सर्वत्र प्रशंसा जायते॥ ३॥

पदार्थ:-हे (**पूषन्**) पुष्टि करनेवाले! तू (**देवा**) देनेवाले (**नासत्या**) मिथ्या व्यवहार के विरोधी अध्यापकर उपदेशक (**सूर्य्याया:**) सूर्य की कान्ति की (**वहतुम्**) प्राप्ति करनेवाले व्यवहार को (**इषुकृतेव**) जैसे वाणी से सिद्ध किए हुए दो पदार्थ हों वैसे (**श्रिये**) लक्ष्मी के लिये प्रयत्न कर। और हे अध्यापक उपदेशको! (**अप्सु**) अन्तरिक्षप्रदेशों में (**जाता:**) प्रसिद्ध हुई (**ककुहा:**) दिशा (**वरुणस्य**) उत्तम सज्जन वा जल के (**भूरे:**) बहुत उत्कर्ष से (**युगा**) वर्षों जो (**जूर्णेव**) पुरातन व्यतीत हुई उनके समान (**वाम्**) तुम दोनों की (**वच्यन्ते**) प्रशंसा करती हैं अर्थात् दिशा-दिशान्तरों में तुम्हारी प्रशंसा होती है॥ ३॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे बाणकृत सेना अर्थात् बाण के समान प्रेरणा दी हुई सेना शत्रुओं को जीतती है, वैसे धन के श्रेष्ठ उपाय को शीघ्र ही करे, काल के विशेष विभागों में जो दिन है, उनमें कार्य जैसे बनते हैं, वैसे रात्रि भागों में नहीं उत्पन्न होते हैं। श्रेष्ठ गुणीजनों की सब जगह प्रशंसा होती है॥ ३॥

अथ सज्जनताश्रयमध्यापकोपदेशकविषयमाह॥

अब सज्जनता का आश्रय लिये हुए अध्यापक और उपदेशक विषय को अगले मन्त्र में कहा है॥

अ॒स्मे सा वां॑ माध्वी रा॒तिरस्तु॒ स्तोमं॑ हिनोतं मा॒न्यस्य॑ का॒रो:।

अनु॒ यद्वां॑ श्रव॒स्या॑ सुदानू॒ सु॒वीर्या॑य चर्ष॒णयो॒ मद॑न्ति॥४॥

अ॒स्मे इति॑। सा। वा॒म्। मा॒ध्वी॒ इति॑। रा॒तिः। अ॒स्तु॒। स्तोम॑म्। हि॒नो॒त॒म्। मा॒न्यस्य॑। का॒रोः। अनु॑। यत्। वा॒म्। श्र॒वस्या॑। सु॒दा॒नू॒ इति॑ सुऽदानू। सु॒ऽवीर्या॑य। च॒र्ष॒णयः॑। मद॑न्ति॥४॥

पदार्थः-(**अस्मे**) अस्मभ्यम् (**सा**) श्रीः (**वाम्**) युवयोः (**माध्वी**) मधुरादिगुणयुक्ता (**रातिः**) दानम् (**अस्तु**) भवतु (**स्तोमम्**) श्लाघ्यम् (**हिनोतम्**) प्राप्नुतम् (**मान्यस्य**) प्रशंसितुं योग्यस्य (**कारोः**) कारकस्य (**अनु**) आनुकूल्ये (**यत्**) (**वाम्**) युवाम् (**श्रवस्या**) आत्मनः श्रवः श्रवणमिच्छया (**सुदानू**) सुष्ठु दातारौ (**सुवीर्य्याय**) उत्तमपराक्रमाय (**चर्षणयः**) मनुष्याः (**वदन्ति**) कामयन्ते॥४॥

अन्वयः-हे सुदानू! या वां माध्वी रातिर्वर्त्तते साऽस्मे अस्तु युवां मान्यस्य कारोः स्तोमं हिनोतं यद्यौ श्रवस्या वां सुवीर्य्याय चर्षणयोऽनु मदन्ति तौ वयमप्यनु मदेम॥४॥

भावार्थः-या आप्तानां नीतिर्विदुषां स्तुतिः कमनीया भवेत् सोत्तमपराक्रमाय प्रभवति॥४॥

पदार्थः-हे (**सूदानू**) अच्छे देनेवाले! जो (**वाम्**) तुम दोनों की (**माध्वी**) मधुरादि गुणयुक्त (**रातिः**) देनि वर्त्तमान है (**सा**) वह (**अस्मे**) हम लोगों के लिये (**अस्तु**) हो। और तुम (**मान्यस्य**) प्रशंसा के योग्य (**कारोः**) कार करनेवाले की (**स्तोमम्**) प्रशंसा को (**हिनोतम्**) प्राप्त होओ और (**श्रवस्या**) अपने को सुनने की इच्छा से (**यत्**) जिन (**वाम्**) तुमको (**सुवीर्य्याय**) उत्तम पराक्रम के लिये (**चर्षणयः**) साधारण मनुष्य (**अनु, मदन्ति**) अनुमोदन देते हैं तुम्हारी कामना करते हैं, उनको हम भी अनुमोदन देवें॥४॥

भावार्थः-जो आप्त श्रेष्ठ सद्धर्मी सज्जनों की नीति और विद्वानों की स्तुति मनोहर हो, वह उत्तम पराक्रम के लिये समर्थ होती है॥४॥

अथाध्यापकोपदेशकप्रशंसाविषयमाह॥

अब अध्यापक और उपदेशकों की प्रशंसा का विषय अगले मन्त्र में कहा है॥

ए॒ष वां॒ स्तोमो॑ अश्विनावकारि॒ मानेभि॑र्मघवाना सुवृ॒क्ति।
या॒तं व॒र्तिस्तन॑याय॒ त्मने॑ चा॒गस्त्ये॑ नासत्या॒ मद॑न्ता॥५॥

ए॒षः। वा॒म्। स्तोमः॑। अ॒श्वि॒नौ॒। अ॒का॒रि॒। मानेभिः॑। म॒घ॒ऽवा॒ना॒। सु॒ऽवृ॒क्ति॒। या॒तम्। व॒र्तिः। तन॑याय। त्मने॑। च॒। अ॒गस्त्ये॑। ना॒स॒त्या॒। मद॑न्ता॥५॥

पदार्थः-(**एषः**) (**वाम्**) युवयोः (**स्तोमः**) प्रशंसा (**अश्विनौ**) अध्यापकोपदेशकौ (**अकारि**) क्रियते (**मानेभिः**) ये मन्यन्ते तैर्विद्वद्भिः (**मघवाना**) परमपूजितधनयुक्तौ (**सुवृक्ति**) सुष्ठु वृक्तिर्वर्जनं सुवृक्ति यथा तथा (**यातम्**) प्राप्नुतम् (**वर्त्तिः**) सन्मार्गम् (**तनयाय**) सुसन्तानाय (**त्मने**) स्वात्मने (**च**) (**अगस्त्ये**) अपराधरहिते मार्गे (**नासत्या**) सत्यनिष्ठौ (**मदन्ता**) कामयमानौ॥५॥

अन्वयः-हे मघवानाध्यापकोपदेशकौ! एष वां स्तोमो मानेभिः सुवृक्त्यकारि। हे नासत्याश्विनावगस्त्ये मदन्ता युवां तनयाय त्मने च वर्त्तिर्यातं प्राप्नुतम्॥५॥

भावार्थः-सैव स्तुतिर्भवति यां विद्वांसो मन्यन्ते तथैव परोपकारः स्याद्यादृशः स्वापत्याय स्वात्मने चेष्यते स एव धर्ममार्गो भवेद्यत्राप्ता गच्छन्ति॥५॥

पदार्थः-हे **(मघवाना)** परमपूजित अध्यापकोपदेशको! **(एषः)** यह **(वाम्)** तुम दोनों की **(स्तोमः)** प्रशंसा **(मानेभिः)** जो मानते हैं उन्होंने **(सुवृक्ति)** सुन्दर त्याग जैसे हो वैसे **(अकारि)** की है अर्थात् कुछ मुखदेखी मिथ्या प्रशंसा नहीं की। और हे **(नासत्या)** सत्य में निरन्तर स्थिर रहनेवाले **(अश्विनौ)** अध्यापक उपदेशक लोगो! **(अगस्त्ये)** अपराधरहित मार्ग में **(मदन्ता)** शुभकामना करते हुए तुम **(तनयाय)** उत्तम सन्तान और **(त्मने, च)** अपने लिये **(वर्त्तिः)** अच्छे मार्ग को **(यातम्)** प्राप्त होओ॥५॥

भावार्थः-वही स्तुति होती है जिनको विद्वान् जन मानते हैं, वैसा ही परोपकार होता है जैसा अपने सन्तान और अपने लिये चाहा जाता है और वही धर्ममार्ग हो कि जिसमें श्रेष्ठ धर्मात्मा विद्वान् जन चलते हैं॥५॥

पुनरध्यापकोपदेशकविषयमाह॥

फिर अध्यापकोपदेशक विषय को अगले मन्त्र में कहा है॥

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम्॥६॥१॥

अतारिष्म। तमसः। पारम्। अस्य। प्रति। वाम्। स्तोमः। अश्विनौ। अधायि। आ। इह। यातम्। पथिऽभिः। देवऽयानैः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥६॥

पदार्थः-**(अतारिष्म)** तरेम **(तमसः)** अविद्याऽन्धकारस्य **(पारम्)** **(अस्य)** **(प्रति)** **(वाम्)** युवाम् **(स्तोमः)** प्रशंसा **(अश्विनौ)** यौ व्युपदेशकौ **(अधायि)** ध्रियते **(आ)** **(इह)** अस्मिन् विज्ञातव्ये व्यवहारे **(यातम्)** आगच्छतम् **(पथिभिः)** **(देवयानैः)** देवा यान्ति येषु तैः **(विद्याम)** **(इषम्)** इष्टं सुखम् **(वृजनम्)** शरीरात्मबलम् **(जीरदानुम्)** जीवात्मानम्॥६॥

अन्वयः-हे अश्विनाविह यः स्तोमो वां प्रत्यधायि तेनास्य तमसस्पारमतारिष्म यथा युवां देवयानैः पथिभिरिषं वृजनं जीरदानुमायातं तथैतद्वयं विद्याम॥६॥

भावार्थः-त एव विद्यायाः परंपारं जनान् गमयितुं शक्नुवन्ति ये धर्म्ममार्गेणैव गच्छन्ति यथार्थोपदेष्टारश्च भवन्ति॥६॥

अस्मिन् सूक्तेऽध्यापकोपदेशकलक्षणोक्तत्वादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुरशीत्युत्तरं शततमं १८४ सूक्तं प्रथमो १ वर्गश्च समाप्तः॥

पदार्थः–हे **(अश्विनौ)** विशेष उपदेश देनेवाले! **(इह)** इस जानने योग्य व्यवहार में जो **(स्तोमः)** प्रशंसा **(वाम्)** तुम दोनों के **(प्रति)** प्रति **(अधायि)** धारण की गई उससे **(अस्य)** इस **(तमसः)** अविद्यान्धकार के **(पारम्)** पार को **(अतारिष्म)** पहुँचें, जैसे तुम **(देवयानैः)** आप्त विद्वान् जिनमें जाते हैं, उन **(पथिभिः)** मार्गों से **(इषम्)** इष्ट सुख **(वृजनम्)** शारीरिक और आत्मिक बल तथा **(जीरदानुम्)** जीवात्मा को **(आ, यातम्)** प्राप्त होओ, वैसे इसको हम भी **(विद्याम)** प्राप्त होवें॥६॥

भावार्थः–वे ही विद्या के परमपार मनुष्यों को पहुंचा सकते हैं, जो धर्म मार्ग से ही चलते हैं और यथार्थ के उपदेशक भी हैं॥६॥

इस सूक्त में अध्यापक और उपदेशकों के लक्षणों को कहने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ चौरासीवां १८४ सूक्त और प्रथम १ वर्ग समाप्त हुआ॥

कतरेत्यस्यैकादशर्चस्य पञ्चाशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। द्यावापृथिव्यौ देवते। १,६-८,१०,११ त्रिष्टुप्। २ विराट् त्रिष्टुप्। ३-५,९ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ जन्यजनककर्माण्याह॥

अब एक सौ पचासी सूक्त का आरम्भ है। उसके प्रथम मन्त्र से उत्पन्न होने योग्य और उत्पन्न करनेवाले गुणों का वर्णन करते हैं॥

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव॥ १॥

कतरा। पूर्वा। कतरा। अपरा। अयोः। कथा। जाते इति। कवयः। कः। वि। वेद। विश्वम्। त्मना। बिभृतः। यत्। ह। नाम। वि। वर्तेते इति। अहनी इति। चक्रियाऽइव॥ १॥

पदार्थः-(**कतरा**) द्वयोर्द्वयोर्मध्ये कतरौ (**पूर्वा**) पूर्वौ (**कतरा**) कतरौ (**अपरा**) अपरौ (**अयोः**) अनयोर्द्यावापृथिव्योः कार्यकारणयोर्वा। अत्र **छान्दसो वर्णलोपः**। (**कथा**) कथम् (**जाते**) उत्पन्ने (**कवयः**) विद्वांसः (**कः**) (**वि**) (**वेद**) जानाति। (**विश्वम्**) सर्वम् (**त्मना**) आत्मना (**बिभृतः**) धरतः (**यत्**) ये (**ह**) किल (**नाम**) जलम् (**वि**) (**वर्त्तेते**) (**अहनी**) अहर्निशम् (**चक्रियेव**) यथा चक्रे भवः पदार्थः॥ १॥

अन्वयः-हे कवयोऽयोः कतरा पूर्वा कतराऽपरा इमे कथा जाते एतत् को वि वेद। त्मना यद्ध विश्वं नामाऽस्ति तद्बिभृतस्ते अहनी चक्रियेव वि वर्त्तेते तौ गुणस्वभावौ विजानीहि॥ १॥

भावार्थः-हे विद्वांसा! येऽस्मिञ्जगति द्यावापृथिव्यौ ये च पूर्वाः कारणाख्याः पराः कार्य्याख्याः पदार्थाः सन्ति। ये आधाराधेयसम्बन्धेनाहोरात्रवद्वर्त्तन्ते तान् यूयं विजानीत॥ **अयं मन्त्रः निरुक्ते व्याख्यातः॥** (निरु०३.२२॥ १॥

पदार्थः-हे (**कवयः**) विद्वान् पुरुषो! (**अयोः**) द्यावापृथिवी में वा कार्य-कारणों में (**कतरा**) कौन (**पूर्वा**) पूर्व (**कतरा**) कौन (**अपरा**) पीछे है, ये द्यावापृथिवी वा संसार के कारण और कार्यरूप पदार्थ (**कथा**) कैसे (**जाते**) उत्पन्न हुए इस विषय को (**कः**) कौन (**वि, वेद**) विविध प्रकार से जानता है, (**त्मना**) आप प्रत्येक (**यत्**) जो (**ह**) निश्चित (**विश्वम्**) समस्त जगत् (**नाम**) प्रसिद्ध है, उसको (**बिभृतः**) धारण करते वा पुष्ट करते हैं और वे (**अहनी**) दिन-रात्रि (**चक्रियेव**) चाक के समान घूमते वैसे (**वि, वर्त्तेते**) विविध प्रकार से वर्त्तमान हैं॥ १॥

भावार्थः-हे विद्वानो! जो इस जगत् में द्यावापृथिवी और जो प्रथम कारण और पर कार्य्यरूप पदार्थ हैं, तथा जो आधाराधेय सम्बन्ध से दिन-रात्रि के समान वर्त्तमान हैं, उन सबको तुम जानो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भूरि॑ द्वे अच॑रन्ती॒ चर॑न्तं प॒द्वन्तं॑ गर्भ॑म॒पदी दधाते।
नित्यं॑ न सू॒नुं पि॒त्रोरु॒पस्थे॒ द्यावा॒ रक्ष॑तं पृथिवी नो॒ अभ्वा॑त्॥ २॥

भूरि॑म्। द्वे इति॑। अच॑रन्ती॒ इति॑। चर॑न्तम्। प॒त्ऽवन्त॑म्। गर्भ॑म्। अ॒पदी॒ इति॑। द॒धा॒ते॒ इति॑। नित्य॑म्। न। सू॒नुम्। पि॒त्रोः। उ॒पऽस्थे॑। द्यावा॑। रक्ष॑तम्। पृ॒थि॒वी॒ इति॑। नः॒। अभ्वा॑त्॥ २॥

पदार्थः-(**भूरिम्**) बहुम् (**द्वे**) (**अचरन्ती**) इतस्ततः स्वकक्षां विहाय गतिरहिते (**चरन्तम्**) गच्छन्तम् (**पद्वन्तम्**) बहवः पादा विद्यन्ते यस्मिँस्तम् (**गर्भम्**) कार्य्याख्यम् (**अपदी**) अविद्यमानपादे (**दधाते**) (**नित्यम्**) (**न**) इव (**सूनुम्**) (**पित्रोः**) (**उपस्थे**) (**द्यावा**) द्यौः (**रक्षतम्**) (**पृथिवी**) भूमिः (**नः**) अस्मान् (**अभ्वात्**) असत्याचरणजन्याद् दुःखात्॥ २॥

अन्वयः-हे द्यावापृथिवी! द्यावापृथिवीव वर्त्तमानौ मातापितरौ यथाऽचरन्ती अपदी द्वे भूरिं पद्वन्तं चरन्तं गर्भं पित्रोरुपस्थे नित्यं सूनुं न दधाते तथाऽभ्वान्नो रक्षतम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा भूमिसूर्यौ दृढौ सन्तौ स्थावरजङ्गमं बहुना प्रकारेण पालयित्वा वर्द्धयतस्तथा मातापितरावतिथ्याऽऽचार्य्यौ च सन्तानाञ्छिष्याँश्च संरक्ष्य विद्यासुशिक्षाभ्यां वर्द्धयेताम्॥ २॥

पदार्थः-हे (**द्यावापृथिवी**) द्यावापृथिवी के समान वर्त्तमान मातापितरो! जैसे (**अचरन्ती**) इधर-उधर अपनी कक्षा को छोड़ कर न जानेवाले (**अपदी**) पैरों से रहित (**द्वे**) दोनों द्यावापृथिवी (**भूरिम्**) बहुत (**पद्वन्तम्**) पगवाले (**चरन्तम्**) चलते हुए (**गर्भम्**) कार्य्यरूप जगत को (**पित्रोः**) माता-पिता के (**उपस्थे**) गोद में नित्य (**सूनुम्**) पुत्र के (**न**) समान (**दधाते**) धारण करते हैं, वैसे (**अभ्वात्**) मिथ्याचरण से उत्पन्न हुए दुःख से (**नः**) हम लोगों की (**रक्षतम्**) रक्षा करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे भूमि-सूर्य दृढ़ होते हुए स्थावर, जङ्गम, चर, अचर, जगत् को बहुत प्रकार से पाल के बढ़ाते हैं, वैसे माता, पिता अतिथि, आचार्य्य, सन्तान और शिष्यों की अच्छे प्रकार रक्षा कर विद्या और उत्तम शिक्षा से बढ़ावें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒ने॒हो दा॒त्रमदि॑तेरन॒र्वं हु॒वे स्व॑र्वदव॒धं नम॑स्वत्।
तद्द्यावा॑दसी जनयतं ज॒रित्रे॒ द्यावा॒ रक्ष॑तं पृथिवी नो॒ अभ्वा॑त्॥ ३॥

अ॒ने॒हः। दा॒त्रम्। अदि॑तेः। अ॒न॒र्वम्। हु॒वे। स्व॑रिति॒ स्वः॑ऽवत्। अ॒व॒धम्। नम॑स्वत्। तत्। रो॒द॒सी॒ इति॑। ज॒न॒य॒त॒म्। ज॒रि॒त्रे। द्यावा॑। रक्ष॑तम्। पृ॒थि॒वी॒ इति॑। नः॒। अभ्वा॑त्॥ ३॥

पदार्थः-(**अनेहः**) अहन्तव्यम् (**दात्रम्**) दानम् (**अदितेः**) पृथिव्याः सूर्यस्य वा (**अनर्वम्**) अविद्यमानाश्वम् (**हुवे**) स्वीकुर्वे (**स्वर्वत्**) सुखवत् (**अवधम्**) अमरणम् (**नमस्वत्**) नमः प्रशस्तमन्नं विद्यते यस्मिँस्तत् (**तत्**) (**रोदसी**) अहोरात्राविव (**जनयतम्**) (**जरित्रे**) स्तुतिकर्त्रे (**द्यावा**) (**रक्षतम्**) (**पृथिवी**) सूर्य्यभूमी (**नः**) अस्मान् (**अभ्वात्**)॥ ३॥

अन्वयः-अहमदितेरनेहोऽनर्वं स्वर्वदवधं नमस्वद्दात्रं हुवे। हे रोदसी इव वर्त्तमानौ मातापितरौ! तद्दात्रं जरित्रे मदर्थञ्जनयतम्। हे द्यावापृथिवीव वर्त्तमानौ मातापितरौ! नोऽस्मानभ्वाद्रक्षतम्॥ ३॥

भावार्थः-ये इमे भूमिसूर्य्योऽन्ये च प्रत्यक्षाः पदार्था दृश्यन्ते तेऽविनाशिनोऽनादेः कारणाज्जाता इति वेद्यम्॥ ३॥

पदार्थः-मैं (**अदितेः**) पृथिवी वा सूर्य के (**अनेहः**) न विनाशने योग्य (**अनर्वम्**) जिसमें अश्व का सम्बन्ध नहीं ऐसे (**स्वर्वत्**) सुखयुक्त तथा (**अवधम्**) जिसका नाश नहीं (**नमस्वत्**) जिसमें प्रशंसित अन्न विद्यमान उस (**दात्रम्**) दानपात्रमात्र का (**हुवे**) स्वीकार करता हूँ। हे (**रोदसी**) दिन रात्रि के समान वर्त्तमान माता-पिताओ! (**तत्**) उस दान कर्म को (**जरित्रे**) स्तुति करते हुए मेरे लिये (**जनयतम्**) उत्पन्न करो। हे (**द्यावापृथिवी**) द्यावापृथिवी के समान वर्त्तमान माता-पिताओ! (**नः**) हम लोगों को (**अभ्वात्**) अधर्म्म से (**रक्षतम्**) बचाओ॥ ३॥

भावार्थः-जो ये भूमि-सूर्य और प्रत्यक्ष पदार्थ दीखते हैं, वे अविनाशी अनादिकारण से हुए हैं, ऐसा जानना चाहिये॥ ३॥

पुनर्दृष्टान्तगतद्यावापृथिवीविषयमाह॥

फिर दृष्टान्त प्राप्त द्यावापृथिवी विषय को अगले मन्त्र में कहा है॥

अत॑प्यमाने॒ अव॒सावं॑न्ती॒ अनु॑ ष्याम॒ रोद॑सी दे॒वपु॑त्रे।
उ॒भे दे॒वाना॑मु॒भये॑भि॒रह्ना॑ द्याव॒ा रक्ष॑तं पृथिवी नो॒ अभ्वा॑त्॥ ४॥

अत॑प्यमाने॒ इति॑। अव॑सा। अव॑न्ती॒ इति॑। अनु॑। स्या॒म॒। रोद॑सी॒ इति॑। दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे। उ॒भे इति॑। दे॒वाना॑म्। उ॒भये॑भिः। अह्ना॑म्। द्यावा॑। रक्ष॑तम्। पृ॒थि॒वी॒ इति॑। नः॒। अभ्वा॑त्॥ ४॥

पदार्थः-(**अतप्यमाने**) सन्तापरहिते (**अवसा**) रक्षणादिना (**अवन्ती**) रक्षित्र्यौ (**अनु**) (**स्याम**) भवेम (**रोदसी**) प्रकाशभूमी (**देवपुत्रे**) देवस्य परमात्मनः पुत्रवद्वर्त्तमाने (**उभे**) (**देवानाम्**) दिव्यानां जलादीनाम् (**उभयेभिः**) स्थावरजङ्गमैः सह (**अह्नाम्**) दिनानाम् (**द्यावा**) (**रक्षतम्**) (**पृथिवी**) (**नः**) (**अभ्वात्**)॥ ४॥

अन्वयः-हे मनुष्या! यथाऽतप्यमानेऽवसावन्ती देवपुत्रे उभे रोदसी अह्नां मध्य उभयेभिः सह देवानां जीवानां रक्षतस्तथा हे द्यावापृथिवीव वर्त्तमानौ मातापितरौ! युवामभ्वान्नो रक्षतं येन वयं सुखिनोऽनुष्याम॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पृथिव्यादयः पदार्थाः सर्वं स्थावरजङ्गमं पालयन्ति तथा मातापित्राऽचार्य्यराजादयः प्रजा रक्षन्तु॥४॥

पदार्थः-हे मनुष्यो! जैसे **(अतप्यमाने)** सन्तापरहित **(अवसा)** रक्षा आदि से **(अवन्ती)** रक्षा करती हुई **(देवपुत्रे)** देव जो परमात्मा उसके पुत्र के समान वर्त्तमान **(उभे)** दोनों **(रोदसी)** प्रकाशभूमि **(अह्नाम्)** दिनों के बीच **(उभयेभिः)** स्थावर और जङ्गमों के साथ **(देवानाम्)** दिव्य जलादि पदार्थों के जीवन की रक्षा करते हैं, वैसे हे **(द्यावा, पृथिवी)** आकाश और पृथिवी के समान वर्त्तमान माता-पिताओ! तुम दोनों **(अभ्वात्)** अपराध से **(नः)** हमारी **(रक्षतम्)** रक्षा कीजिये, जिससे हम लोग **(अनु, स्याम)** पीछे सुखी होवें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार हैं। जैसे पृथिवी आदि पदार्थ समस्त स्थावर-जङ्गम की पालना करते हैं, वैसे माता, पिता, आचार्य्य और राजा आदि प्रजा की रक्षा करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सं॒गच्छ॑माने युव॒ती सम॑न्ते॒ स्वसा॑रा जा॒मी पि॒त्रोरु॒पस्थे॑।
अ॒भि॒जिघ्र॑न्ती॒ भुव॑नस्य॒ नाभिं॒ द्यावा॒ रक्ष॑तं पृथिवी नो॒ अभ्वा॑त्॥५॥२॥

सं॒गच्छ॑मा॒ने॒ इति॑ स॒म्ऽगच्छ॑माने। युव॒ती इति॑। सम॑न्ते॒ इति॑ सम्ऽअ॑न्ते। स्वसा॑रा। जा॒मी इति॑। पि॒त्रोः। उ॒पऽस्थे॑। अ॒भि॒जिघ्र॑न्ती॒ इत्य॑भि॒ऽजिघ्र॑न्ती। भुव॑नस्य। नाभि॑म्। द्यावा॑। रक्ष॑तम्। पृ॒थि॒वी॒ इति॑। नः॒। अभ्वा॑त्॥५॥

पदार्थः-**(संगच्छमाने)** सहगामिन्यौ **(युवती)** युवाऽवस्थास्थे स्त्रियाविव **(समन्ते)** सम्यगन्तो ययोस्ते **(स्वसारा)** भगिन्यौ **(जामी)** कन्ये इव **(पित्रोः)** **(उपस्थे)** अङ्के **(अभिजिघ्रन्ती)** **(भुवनस्य)** लोकजातस्य **(नाभिम्)** नहनं मध्यस्थमाकर्षणाख्यं बन्धनम् **(द्यावा)** **(रक्षतम्)** **(पृथिवी)** **(नः)** **(अभ्वात्)**॥५॥

अन्वयः-पित्रोरुपस्थे संगच्छमाने जामी युवती समन्ते स्वसारेव भुवनस्य नाभिमभिजिघ्रन्ती द्यावापृथिवी इव हे मातापितरौ! युवां नोऽस्मानभ्वाद्रक्षतम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा ब्रह्मचर्य्येण कृतविद्यौ यौवनस्थौ सञ्जातप्रीती कन्यावरौ सुखिनौ स्यातां तथा द्यावापृथिव्यौ जगद्धिताय वर्त्तेते॥५॥

पदार्थः-(**पित्रोः**) माता-पिता की (**उपस्थे**) गोद में (**संगच्छमाने**) मिलाती हुई (**जामी**) दो कन्याओं के समान वा (**युवती**) तरुण दो स्त्रियों के समान वा (**समन्ते**) पूर्ण सिद्धान्त जिनका उन दो (**स्वसारा**) बहिनियों के समान (**भुवनस्य**) संसार के (**नाभिम्**) मध्यस्थ आकर्षण को (**अभि, जिघ्रन्ती**) गन्ध के समान स्वीकार करते हुये (**द्यावा, पृथिवी**) आकाश और पृथिवी के समान माता-पिताओ! तुम (**नः**) हम लोगों की (**अभ्वात्**) अपराध से (**रक्षतम्**) रक्षा करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे ब्रह्मचर्य से विद्या सिद्धि किये हुए तरुण जिनको परस्पर पूर्ण प्रीति है, वे कन्या वर सुखी हों, वैसे द्यावापृथिवी जगत् के हित के लिये वर्त्तमान हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात्॥६॥

उर्वी इति। सद्मनी इति। बृहती इति। ऋतेन। हुवे। देवानाम्। अवसा। जनित्री इति। दधाते इति। ये इति। अमृतम्। सुप्रतीके इति सुऽप्रतीके। द्यावा। रक्षतम्। पृथिवी इति। नः। अभ्वात्॥६॥

पदार्थः-(**ऊर्वी**) बहुविस्तीर्णे (**सद्मनी**) सर्वेषां निवासाऽधिकरणे (**बृहती**) महत्यौ (**ऋतेन**) जलेन (**हुवे**) प्रशंसामि (**देवानाम्**) विदुषाम् (**अवसा**) रक्षणादिना (**जनित्री**) उत्पादयित्री (**दधाते**) (**ये**) (**अमृतम्**) जलम्। **अमृतमित्युदकनामसु पठितम्।** (निघं०१।१२) (**सुप्रतीके**) सुष्ठु प्रतीतिविषये (**द्यावा**) (**रक्षतम्**) (**पृथिवी**) (**नः**) (**अभ्वात्**)॥६॥

अन्वयः-हे मातापितरौ! ये उर्वी सद्मनी बृहती ऋतेनाऽवसा देवानां जनित्री सुप्रतीके द्यावापृथिवी यथामृतं दधातेऽहं हुवे तथाऽभ्वान्नोऽस्मान् युवां रक्षतम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मातापितरः सत्योपदेशेन सूर्यवद्विद्याप्रकाशयुक्ताः पृथिवीजलेन वृक्षानिव शरीरबलेन वर्द्धयन्ति, ते सर्वेषां रक्षां कर्त्तुमर्हन्ति॥६॥

पदार्थः-हे माता-पिताओ! (**ये**) जो (**उर्वी**) बहुत विस्तारवाली (**सद्मनी**) सबकी निवासस्थान (**बृहती**) बड़ी (**ऋतेन**) जल से और (**अवसा**) रक्षा आदि के साथ (**देवानाम्**) विद्वानों की (**जनित्री**) उत्पन्न करनेवाली (**सुप्रतीके**) सुन्दर प्रतीति का विषय (**द्यावा, पृथिवी**) आकाश और पृथिवी (**अमृतम्**) जल को (**दधाते**) धारण करती हैं और मैं उनकी (**हुवे**) प्रशंसा करता हूँ, वैसे (**अभ्वात्**) अपराध से (**नः**) हम लोगों की तुम (**रक्षतम्**) रक्षा करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो माता-पिता सत्योपदेश से सूर्य के समान विद्या प्रकाश से युक्त सर्वगुण सम्भृत पृथिवी जैसे जल से वृक्षों को वैसे शारीरिक बल से बढ़ाते हैं, वे सबकी रक्षा करने को योग्य हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन्।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात्॥७॥

उर्वी इति। पृथ्वी इति। बहुले इति। दूरेअन्ते इति दूरेऽअन्ते। उप। ब्रुवे। नमसा। यज्ञे। अस्मिन्। दधाते इति। ये इति। सुभगे इति सुऽभगे। सुप्रतूर्ती इति सुऽप्रतूर्ती। द्यावा। रक्षतम्। पृथिवी इति। नः। अभ्वात्॥७॥

पदार्थः-(**उर्वी**) बहुपदार्थयुक्ते (**पृथ्वी**) विस्तीर्णे (**बहुले**) ये बहूनि वस्तूनि लातो गृह्णाती: (**दूरेअन्ते**) (**उप**) (**ब्रुवे**) उपदिशेयम् (**नमसा**) अन्नेन (**यज्ञे**) सङ्गन्तव्ये (**अस्मिन्**) संसारव्यवहारे (**दधाते**) (**ये**) (**सुभगे**) सुष्ठ्वैश्वर्य्यप्रापिके (**सुप्रतूर्त्ती**) अतितूर्णगती (**द्यावा**) (**रक्षतम्**) (**पृथिवी**) (**नः**) (**अभ्वात्**)॥७॥

अन्वयः-दूरेअन्ते बहुले उर्वी पृथ्वी सुभगे सुप्रतूर्त्ती द्यावापृथिवी अस्मिन् यज्ञे नमसाऽहमुपब्रुवे ये च सुभगे सुप्रतूर्त्ती द्यावापृथिवी दधाते ते द्यावापृथिवीव वर्त्तमानौ हे मातापितरौ! नोऽस्मानभ्वाद्रक्षतम्॥७॥

भावार्थः-यथा पृथिव्याः समीपे चन्द्रलोकभूमिस्तथा सूर्यलोकभूमिर्दूरे। एवं सर्वत्रैव प्रकाशाऽन्धकाररूपं लोकद्वन्द्वं वर्त्तते ताभ्यां यथोन्नतिः स्यात् तथा सर्वैः प्रयतितव्यम्॥७॥

पदार्थः-(**दूरेअन्ते**) दूर में और समीप में (**बहुले**) बहुत वस्तुओं को ग्रहण करनेवाली (**उर्वी**) बहुत पदार्थयुक्त (**पृथ्वी**) बड़ी आकाश और पृथिवी का (**अस्मिन्**) इस संसार के व्यवहार (**यज्ञे**) जो कि सङ्ग करने योग्य उसमें (**नमसा**) अन्न के साथ मैं (**उप, ब्रुवे**) उपदेश करता हूँ और (**ये**) जो (**सुभगे**) सुन्दर ऐश्वर्य की प्राप्ति करनेवाली (**सुप्रतूर्त्ती**) अतिशीघ्र गतियुक्त आकाश और पृथिवी (**दधाते**) समस्त पदार्थों को धारण करते हैं, उन (**द्यावापृथिवी**) आकाश और पृथिवी के समान वर्त्तमान माता-पिताओ! (**नः**) हमको (**अभ्वात्**) अपराध से (**रक्षतम्**) बचाओ॥७॥[६]

---

६. पूर्णतया अन्वय का अनुसरण नहीं किया गया है। सं०

भावार्थः-जैसे पृथिवी के समीप में चन्द्रलोक की भूमि है, वैसे सूर्य लोकस्थ भूमि दूर में हैं, ऐसे सब जगह प्रकाश और अन्धकाररूप लोकद्वय वर्त्तमान है, उन लोकों से जैसे उन्नति हो, वैसा यत्न सबको करना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात्॥८॥

देवान्। वा। यत्। चकृम। कत्। चित्। आगः। सखायम्। वा। सदम्। इत्। जाःपतिम्। वा। इयम्। धीः। भूयाः। अवऽयानम्। एषाम्। द्यावा। रक्षतम्। पृथिवी इति। नः। अभ्वात्॥८॥

पदार्थः-(**देवान्**) विदुषः (**वा**) पक्षान्तरे (**यत्**) (**चकृम**) कुर्याम। अत्रा**न्येषामपी**ति दीर्घः। (**कत्**) (**चित्**) (**आगः**) अपराधम् (**सखायम्**) मित्रम् (**वा**) (**सदम्**) सदा (**इत्**) एव (**जास्पतिम्**) जायायाः पतिम् (**वा**) (**इयम्**) (**धीः**) कर्म्म प्रज्ञा वा (**भूयाः**) (**अवयानम्**) अपगमनं निरसनम् (**एषाम्**) पदार्थानां मध्ये (**द्यावा**) (**रक्षतम्**) (**पृथिवी**) (**न**) (**अभ्वात्**)॥८॥

अन्वयः-यत् कच्चिद्देवान् वा सखायं वा सदमिज्जास्पतिं या प्रत्यागश्चकृमैषामपराधानामियं धीरवयानं भूयाः। हे द्यावापृथिवीव वर्त्तमानौ मातापितरौ! नोऽस्मानभ्वाद्रक्षतम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मातापितरः सन्तानानन्नजलवन्न पालयन्ति, ते स्वधर्मच्युताः सन्ति ये च पितॄन्न रक्षन्ति ते सन्ताना अपि विधर्माणः सन्ति॥८॥

पदार्थः-(**यत्**) जो (**कच्चित्**) कुछ (**देवान्**) विद्वानों (**वा**) वा (**सखायम्**) मित्र (**वा**) वा (**सदमित्**) सदैव (**वा**) वा (**जास्पतिम्**) स्त्री की पालना करनेवाले के भी प्रति (**आगः**) अपराध (**चकृम**) करें (**एषाम्**) इन सब अपराधों का (**इयम्**) यह (**धीः**) कर्म वा तत्त्वज्ञान (**अवयानम्**) दूर करनेवाला (**भूयाः**) हो। हे (**द्यावा, पृथिवी**) आकाश और पृथिवी के समान वर्त्तमान माता-पिताओ! (**नः**) हम लोगों को (**अभ्वात्**) अपराध से (**रक्षतम्**) बचाओ॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो माता-पिता सन्तानों को अन्न-जल के समान नहीं पालते, वे अपने धर्म्म से गिरते हैं और जो माता-पिताओं की रक्षा नहीं करते, वे सन्तान भी अधर्मी होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम्।

भूरि॑ चिदु॒र्यः सु॒दास्त॑रा॒येषा मद॑न्त इषयेम देवाः॥९॥

उ॒भा। शंसा॑। नर्या॑। माम्। अ॒वि॒ष्टा॒म्। उ॒भे इति॑। माम्। ऊ॒ती इति॑। अव॑सा। स॒चे॒ता॒म्। भूरि॑। चि॒त्। अ॒र्यः। सु॒दाः॒ऽतराय। इ॒षा। मद॑न्तः। इ॒ष॒ये॒म॒। दे॒वाः॥९॥

पदार्थः-(**उभा**) उभौ (**शंसा**) प्रशंसितौ (**नर्य्या**) नृषु साधु (**माम्**) (**अविष्टाम्**) रक्षतम् (**उभे**) (**माम्**) (**ऊती**) व्यवहारविद्यारक्षे (**अवसा**) रक्षादिना (**सचेताम्**) प्राप्नुताम् (**भूरि**) बहु (**चित्**) इव (**अर्यः**) वणिग्जनः (**सुदास्तराय**) अतिशयेन दात्रे (**इषा**) इच्छया (**मदन्तः**) सुखयन्तः (**इषयेम**) प्राप्नुयाम (**देवाः**) विद्वांसः॥९॥

अन्वयः-उभा शंसा नर्य्या द्यावापृथिवीव मातापितरौ मामविष्टां मामुभे ऊती अवसा सचेताम्। हे देवा! अर्य्यः सुदास्तराय भूरि चिन्मदन्तो वयमिषेषयेम॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्याचन्द्रमसौ सर्वं संयुज्य प्राणिनः सुखयतः। यथार्थधनाढ्यो वैश्यो बह्वन्नादिकं दत्वा भिक्षुकान् प्रीणाति तथा विद्वांसः सर्वेषां प्रीणने प्रवर्त्तेरन्॥९॥

पदार्थः-(**उभा**) दोनों (**शंसा**) प्रशंसा को प्राप्त (**नर्य्या**) मनुष्यों में उत्तम द्यावापृथिवी के समान माता-पिता (**माम्**) मेरी (**अविष्टाम्**) रक्षा करें और (**माम्**) मुझे (**उभे**) दोनों (**ऊती**) रक्षाएं (**अवसा**) औरों की रक्षा आदि के साथ (**सचेताम्**) प्राप्त होवें। हे (**देवाः**) विद्वानो! (**अर्यः**) वणिया (**सुदास्तराय**) अतीव देनेवाले के लिये (**भूरि, चित्**) बहुत जैसे देवे वैसे (**मदन्तः**) सुखी होते हुए हम लोग (**इषा**) इच्छा से (**इषयेम**) प्राप्त होवें॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य और चन्द्रमा सबका संयोग कर प्राणियों को सुखी करते हैं तथा जैसे धनाढ्य वैश्य बहुत अन्न आदि पदार्थ देकर भिखारियों को प्रसन्न करता है, वैसे विद्वान् जन सबके प्रसन्न करने में प्रवृत्त होवें॥९॥

प्रकृतविषयेऽभीष्टवक्तव्यविषयमाह॥

चलते हुए विषय में चाहे हुए कहने योग्य विषय को अगले मन्त्र में कहा है॥

ऋ॒तं दि॒वे तद॑वोचं पृथि॒व्या अभिश्रा॒वाय॑ प्रथ॒मं सु॑मे॒धाः।
पा॒ता॑मव॒द्याद् दु॑रि॒ता॒दभी॑के॒ पि॒ता मा॒ता च॑ रक्षता॒मवो॑भिः॥१०॥

ऋ॒तम्। दि॒वे। तत्। अ॒वो॒च॒म्। पृ॒थि॒व्यै। अ॒भि॒ऽश्रा॒वाय॑। प्र॒थ॒मम्। सु॒ऽमे॒धाः। पा॒ता॒म्। अ॒व॒द्यात्। दुः॒ऽइ॒तात्। अ॒भीके॑। पि॒ता। मा॒ता। च॒। र॒क्ष॒ता॒म्। अवः॑ऽभिः॥१०॥

पदार्थः-(**ऋतम्**) सत्यम् (**दिवे**) दिव्यसुखाय (**तत्**) (**अवोचम्**) उपदिशेयं वदेयं च (**पृथिव्यै**) पृथिवीव वर्त्तमानायै स्त्रियै (**अभिश्रावाय**) य अभितः शृणोति श्रावयति वा तस्मै (**प्रथमम्**) पुरः (**सुमेधाः**)

सुष्ठु प्रज्ञाः **(पाताम्)** रक्षताम् **(अवद्यात्)** निन्द्यात् **(दुरितात्)** दुष्टाचरणात् **(अभीके)** कमिते **(पिता)** पालकः **(माता)** मान्यकर्त्री **(च)** **(रक्षताम्)** **(अवोभिः)** रक्षणादिभिः॥१०॥

अन्वयः-हे मनुष्या! यथा सुमेधा अहमभिश्रावाय पृथिव्यै च यत् प्रथममृतमवोचं तद्दिवे चाऽभीके वर्त्तमानेऽवद्याद् दुरितात्तौ पातां तथा पिता माता चावोभिः रक्षताम्॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। उपदेशकेन उपदेश्यान् प्रत्येवं वाच्यं यादृशं प्रियं लोकहितं सत्यं मयोच्येत तथा युष्माभिरपि वक्तव्यं यथा पितरः स्वसन्तानान् सेवन्ते तथैतेऽपत्यैरपि सदा सेवनीयाः॥१०॥

पदार्थः-हे मनुष्यो! जैसे **(सुमेधाः)** सुन्दर बुद्धिवाला मैं **(अभिश्रावाय)** जो सब ओर से सुनता वा सुनाता उसके लिये और **(पृथिव्यै)** पृथिवी के समान वर्त्तमान क्षमाशील स्त्री के लिये जो **(प्रथमम्)** प्रथम **(ऋतम्)** सत्य **(अवोचम्)** उपदेश करूं और कहूं **(तत्)** उसको **(दिवे)** दिव्य उत्तमवाले के लिये भी उपदेश करूं कहूं जैसे **(अभीके)** कामना किये हुए व्यवहार में वर्त्तमान **(अवद्यात्)** निन्दा योग्य **(दुरितात्)** दुष्ट आचरण से उक्त दोनों **(पाताम्)** रक्षा करें, वैसे **(पिता)** पिता **(च)** और **(माता)** माता **(अवोभिः)** रक्षा आदि व्यवहारों से मेरी **(रक्षताम्)** रक्षा करें॥॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। उपदेश करनेवाले को उपदेश सुनने योग्यों के प्रति ऐसा कहना चाहिये कि जैसा प्रिय लोकहितकारी वचन मुझसे कहा जावे, वैसे आप लोगों को भी कहना चाहिये जैसे माता-पिता अपने सन्तानों की सेवा करते हैं, वैसे ये सन्तानों को भी सदा सेवने योग्य हैं॥१०॥

अथात्र सत्यमात्रोपदेशविषयमाह॥

अब चलते हुए विषय में सत्यमात्र के उपदेश विषय को अगले मन्त्र में कहा है॥

इ॒दं द्या॑वापृथिवी स॒त्यम॑स्तु पि॒तर्मा॑तर्यदि॒होप॑ब्रु॒वे वा॑म्।
भू॒तं दे॒वाना॑मव॒मे अवो॑भिर्वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम्॥ ११॥ ३॥

इ॒दम्। द्या॒वा॒पृ॒थि॒वी इति॑। स॒त्यम्। अ॒स्तु॒। पि॒तः॑। मा॒तः॑। यत्। इ॒ह। उप॑ऽब्रुवे। वा॒म्। भू॒तम्। दे॒वाना॑म्। अ॒व॒मे इति॑। अवः॑ऽभिः। वि॒द्याम॑। इ॒षम्। वृ॒जन॑म्। जी॒रऽदा॑नुम्॥११॥

पदार्थः-(**इदम्**) जगत् **(द्यावापृथिवी)** विद्युदन्तरिक्षे **(सत्यम्)** **(अस्तु)** **(पितः)** पालक **(मातः)** मान्यप्रदे **(यत्)** **(इह)** **(उपब्रुवे)** **(वाम्)** युवाम् **(भूतम्)** निष्पन्नम् **(देवानाम्)** विदुषाम् **(अवमे)** रक्षितव्ये व्यवहारे **(अवोभिः)** पालनैः **(विद्याम)** **(इषम्)** **(वृजनम्)** **(जीरदानुम्)**॥११॥

अन्वयः-हे द्यावापृथिवी इव वर्त्तमाने मातः पितो! देवानामवमे भूतं यदिह वामुपब्रुवे तदिदं सत्यमस्तु येन वयं युवयोरवोभिरिषं वृजनं जीरदानुं च विद्याम॥११॥

भावार्थः–पितरः सन्तानान् प्रत्येवमुपदिशेयुर्यान्यस्माकं धर्म्याणि कर्माणि तान्येव युष्माभिः सेवनीयानि नो इतराणि सन्तानाः पितॄन् प्रत्येवं वदन्तु यान्यस्माकं सत्याचरणानि तान्येव युष्माभिराचरतिव्यानि नातो विपरीतानि॥११॥

अत्र द्यावापृथिवीदृष्टान्तेन जन्याजनककर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चाशीत्युत्तरं शततमं १८५ सूक्त तृतीयो ३ वर्गश्च समाप्तः॥

पदार्थः–हे **(द्यावापृथिवी)** आकाश और पृथिवी के समान वर्त्तमान **(मातः, पितः)** माता पिताओ! **(देवानाम्)** विद्वानों के **(अवमे)** रक्षादि व्यवहार में **(भूतम्)** उत्पन्न हुए **(यत्)** जिस व्यवहार से **(इह)** यहाँ **(वाम्)** तुम्हारे **(उपब्रुवे)** समीप कहता हूँ **(तत्)** सो **(इदम्)** यह **(सत्यम्)** सत्य **(अस्तु)** हो, जिससे हम तुम्हारी **(अवोभिः)** पालनाओं से **(इषम्)** इच्छासिद्धि **(वृजनम्)** बल और **(जीरदानुम्)** जीवन को **(विद्याम)** प्राप्त होवें॥११॥

भावार्थः–माता-पिता जब सन्तानों के प्रति ऐसा उपदेश करें कि जो हमारे धर्मयुक्त कर्म हैं, वे ही तुमको सेवने चाहियें और नहीं तथा सन्तान पिता-माता आदि अपने पालनेवालों से ऐसे कहें कि जो हमारे सत्य आचरण हैं, वे ही तुमको आचरण करने चाहियें और उनसे विपरीत नहीं॥११॥

इस सूक्त में द्यावापृथिवी के दृष्टान्त से उत्पन्न होने योग्य और उत्पादक के कर्मों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ पचासीवाँ १८५ सूक्त और तीसरा ३ वर्ग समाप्त हुआ॥

आ न इत्येकादशर्च्चस्य षडशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। विश्वेदेवा देवताः। १,८,९ त्रिष्टुप्। २,४ निचृत् त्रिष्टुप्। ११ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३,५,७ भुरिक् पङ्क्तिः। ६ पङ्क्तिः। १० स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयः प्रोच्यते॥

अब ग्यारह ऋचावाले एक सौ छयासी सूक्त का आरम्भ है। इसके आरम्भ से विद्वानों का विषय कहा है॥

आ नू इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा॥ १॥

आ। नूः। इळाभिः। विदथे। सुऽशस्ति। विश्वानरः। सविता। देवः। एतु। अपि। यथा। युवानूः। मत्सथ। नूः। विश्वम्। जगत्। अभिऽपित्वे। मनीषा॥ १॥

पदार्थः–(**आ**) समन्तात् (**नः**) अस्मान् (**इळाभिः**) अन्नादिभिर्वाग्भिस्सह वा (**विदथे**) विज्ञानमये व्यवहारे (**सुशस्ति**) सुष्ठु प्रशंसिताभिः। अत्र **सुपां सुलुगि**ति भिसो लुक्। (**विश्वानरः**) यो विश्वानि सर्वाणि भूतानि नयति सः (**सविता**) सूर्य इव स्वप्रकाशमान ईश्वरः (**देवः**) देदीप्यमानः (**एतु**) प्राप्नोतु (**अपि**) (**यथा**) (**युवानः**) यौवनावस्थां प्राप्ताः (**मत्सथः**) आनन्दत। अत्रा**न्येषामपी**ति दीर्घः। (**नः**) अस्मान् (**विश्वम्**) सर्वम् (**जगत्**) (**अभिपित्वे**) अभितः प्राप्तव्ये (**मनीषा**) प्रज्ञया॥ १॥

अन्वयः–हे विद्वन्! भवान् यथा विश्वानरो देवः सविता सुशस्त्यभिपित्वे विदथे विश्वं जगत् प्राप्तोऽस्ति तथेळाभिर्न आ एतु। हे युवानो! यथा यूयं मनीषाऽस्मिन् सत्ये व्यवहारे मत्सथ तथा नोऽस्मानप्यानन्दयत॥ १॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा परमात्मा पक्षपातं विहाय सर्वेषां न्यायं करोति सर्वेषु तुल्यां प्रीतिं च तथा विद्वद्भिरपि भवितव्यं यथा युवानः स्वतुल्याभिर्हृद्याभिर्युवतीभिस्सह विवाहं कृत्वा सुखयन्ति तथा विद्वांसो विद्यार्थिनो विदुषः कृत्वा प्रसन्ना भवन्ति॥ १॥

पदार्थः–हे विद्वन्! आप जैसे (**विश्वानरः**) सब प्राणियों को पहुँचानेवाला अर्थात् अपने-अपने शुभाऽशुभ कर्मों के परिणाम करनेवाला (**देवः**) देदीप्यमान अर्थात् (**सविता**) सूर्य के समान आप प्रकाशमान ईश्वर (**सुशस्ति**) सुन्दर प्रशंसाओं से (**अभिपित्वे**) सब ओर से पाने योग्य (**विदथे**) विज्ञानमय व्यवहार में (**विश्वम्**) समग्र (**जगत्**) को प्राप्त है, वैसे (**इडाभिः**) अन्नादि पदार्थ वाणियों के साथ (**नः**) हम लोगों को (**आ, एतु**) प्राप्त हो आवे। हे (**युवानः**) यौवनावस्था को प्राप्त तरुण जनो! (**यथा**) जैसे तुम (**मनीषा**) उत्तम बुद्धि से इस व्यवहार में (**मत्सथ**) आनन्दित होवो वैसे (**नः**) हमको (**अपि**) भी आनन्दित कीजिये॥ १॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे परमात्मा पक्षपात को छोड़ के सबका न्याय और सभी में समान प्रीति करता है, वैसे विद्वानों को भी होना चाहिये। जैसा युवावस्थावाले पुरुष अपने समान मन को प्यारी युवती स्त्रियों के साथ विवाह कर सुखयुक्त होते हैं, वैसे विद्वान् जन विद्यार्थियों को विद्वान् कर प्रसन्न होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ नो॒ विश्व॒ आस्क्रा॑ गमन्तु दे॒वा मि॒त्रो अ॑र्य॒मा वरु॑णः स॒जोषा॑:।
भुव॒न्यथा॑ नो॒ विश्वे॑ वृ॒धास॒: कर॑न्त्सु॒षाहा॑ वि॒थुरं न शव॑:॥२॥

आ। नः। विश्वे। आस्क्राः। गमन्तु। देवाः। मित्रः। अर्यमा। वरुणः। सऽजोषाः। भुवन्। यथा। नः। विश्वे। वृधासः। करन्। सुऽसहा। विथुरम्। न। शवः॥२॥

पदार्थः–(**आ**) (**नः**) (**विश्वे**) (**आस्क्राः**) शत्रुबलस्य क्रमितारः (**गमन्तु**) समन्तात् प्राप्नुवन्तु (**देवाः**) विद्वांसः (**मित्रः**) प्राणवद्वर्त्तमानः (**अर्यमा**) न्यायकारी (**वरुणः**) अतिश्रेष्ठः (**सजोषाः**) समानप्रीतिसेवनः (**भुवन्**) भवेयुः (**यथा**) (**नः**) अस्मान् (**विश्वे**) सर्वे (**वृधासः**) सुखवर्द्धकाः (**करन्**) कुर्वन्तु (**सुषाहा**) सुष्ठु साहस्सहनं यस्य सः (**विथुरम्**) (**न**) इव (**शवः**) बलम्॥२॥

अन्वयः–हे मनुष्यास्तथा मित्रोर्यमा वरुणस्सजोषा आस्क्रा विश्वे देवा नोऽस्मानागमन्तु यथा विश्वे ते नो वृधासो भुवन्त्सुषाहा विथुरं न शवः करन्॥२॥

भावार्थः–अत्रोपमालङ्कारः। येन मार्गेण विद्वांसो गच्छेयुस्तस्मिन्नेव सर्वे गच्छन्तु, यथाप्ता स्वात्मवदन्येषां सुखदुःखानि जानन्ति तथैव सर्वैर्भवितव्यम्॥२॥

पदार्थः–हे मनुष्यो! वैसे (**मित्रः**) प्राण के समान वर्त्तमान (**अर्य्यमा**) न्यायकारी (**वरुणः**) अतिश्रेष्ठ (**सजोषाः**) समान प्रीति का सेवन रखनेवाला और (**आस्क्राः**) शत्रुबल को पादाक्रान्त करने पाद तले दबाने वाले (**विश्वे**) समस्त (**देवाः**) विद्वान् जन (**नः**) हम लोगों को (**आ, गमन्तु**) सब ओर से प्राप्त होवें कि (**यथा**) जैसे (**विश्वे**) समस्त वे विद्वान् (**नः**) हमारा (**वृधासः**) सुख बढ़ानेवाले (**भुवन्**) होवें और (**सुषाहा**) सुन्दर जिसका सहन क्षमा शान्तिपन वह जन (**विथुरम्**) व्यथा पीड़ा देते हुए पदार्थ के (**न**) समान तीव्र (**शवः**) बल (**करन्**) करें॥२॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जिस मार्ग से विद्वान् जन चलें, उसी से सर्व लोग चलें। जैसे आप्त शास्त्रज्ञ विद्वान् जन औरों के सुख-दुःखों को अपने तुल्य जानते हैं, वैसे ही सबको होना चाहिये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रेष्ठं॑ वो॒ अति॑थिं गृणीषे॒ऽग्निं श॒स्तिभि॑स्तु॒र्वणि॑: स॒जोषा॑:।
अस॒द्यथा॑ नो॒ वरु॑ण: सुकी॒र्तिरिष॑श्च॒ पर्षदरिगू॑र्त: सू॒रि:॥ ३॥

प्रेष्ठ॑म्। व॒:। अति॑थिम्। गृ॒णी॒षे॒। अ॒ग्निम्। श॒स्तिऽभि॑:। तु॒र्वणि॑:। स॒ऽजोषा॑:। अस॑त्। यथा॑। न॒:। वरु॑ण:। सु॒ऽकी॒र्ति:। इष॑:। च॒। पर्ष॑त्। अ॒रि॒ऽगू॒र्त:। सू॒रि:॥ ३॥

पदार्थ:-(**प्रेष्ठम्**) अतिशयेन प्रियम् (**व:**) युष्मान् (**अतिथिम्**) अतिथिवद्वर्त्तमानम् (**गृणीषे**) प्रशंससि (**अग्निम्**) वह्निवद्वर्त्तमानं विद्याप्रकाशितं विद्वांसम् (**शस्तिभि:**) प्रशंसाभि: (**तुर्वणि:**) सद्योगामी (**सजोषा:**) समानप्रीति: (**असत्**) भवेत् (**यथा**) (**न:**) अस्माकम् (**वरुण:**) वरो विद्वान् (**सुकीर्ति:**) पुण्यप्रशंस: (**इष:**) अन्नानि (**च**) इच्छा: (**पर्षत्**) सिञ्चेत् (**अरिगूर्त्त:**) अरिषु शत्रुषु गूर्त्त उद्यमी (**सूरि:**) अतिप्रवीणो विद्वान्॥ ३॥

अन्वय:-हे विद्वन्! यथा तुर्वणि: सजोषा: सँस्त्वं शस्तिभिरग्निं प्रेष्ठमतिथिं गृणीषे यथाऽरिगूर्त्त: सुकीर्तिर्वरुणो नोऽस्मानिषश्च पर्षत् सूरिरसत्तथा वो युष्मान् प्रति वर्त्तेत॥ ३॥

भावार्थ:-अत्रोपमालङ्कार:। ये गृहस्था: प्रीत्याऽऽप्तानतिथिं च सेवन्ते धर्म्ये व्यवहार उद्योगिनो भवन्ति, ते याथातथ्यं विज्ञानं प्राप्यं श्रीमन्तो भवन्ति॥ ३॥

पदार्थ:-हे विद्वान्! जैसे (**तुर्वणि:**) शीघ्र जाने और (**सजोषा:**) समान प्रीति रखनेवाले आप (**शस्तिभि:**) प्रशंसाओं से (**अग्निम्**) अग्नि के समान वर्त्तमान विद्या से प्रकाशित (**प्रेष्ठम्**) अतिप्रिय (**अतिथिम्**) अतिथिवद्वर्त्तमान विद्वान् की (**गृणीषे**) प्रशंसा करते हो वा (**यथा**) जैसे (**अरिगूर्त्त:**) शत्रुओं में उद्यम करने और (**सुकीर्ति:**) पुण्य प्रशंसावाला (**वरुण:**) उत्तम विद्वान् (**न:**) हम लोगों को (**इष:**) अन्नादि पदार्थ (**च**) और इच्छाओं को (**पर्षत्**) सींचे वा (**सूरि:**) अतीव प्रवीण विद्वान् (**असत्**) हो वैसे (**व:**) तुम लोगों के प्रति वर्त्तें॥ ३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो गृहस्थजन प्रीति के साथ श्रेष्ठ, उत्तम शास्त्रज्ञ विद्वानों और अतिथि की सेवा करते हैं, धर्मयुक्त व्यवहार में उद्योगवान् होते वे यथार्थ विज्ञान को पाकर श्रीमान् होते हैं॥ ३॥

अथ विद्यां प्राप्योद्योगकरणविषयमाह॥

अब विद्या का पाकर उद्योग करने के विषय को अगले मन्त्र में कहा है॥

उप॑ व॒ एषे॒ नम॑सा जिगी॒षोषास॒मानक्ता॑ सु॒दुघे॑व धे॒नु:।
स॒मा॒ने अह॑न्वि॒मिमा॑नो अ॒र्कं विषु॑रूपे॒ पय॑सि॒ सस्मि॒न्नूधन्॥ ४॥

उप॑। व॒:। आ। ई॒षे॒। नम॑सा। जि॒गी॒षा। उ॒षासा॒नक्ता॑। सु॒दुघा॑ऽइव। धे॒नु:। स॒मा॒ने। अह॑न्। वि॒ऽमिमा॑न:। अ॒र्कम्। विषु॑ऽरूपे। पय॑सि। सस्मि॑न्। ऊ॒ध॑न्॥४॥

पदार्थ:-(**उप**) (**व:**) युष्मान् (**आ**) समन्तात् (**ईषे**) (**नमसा**) अन्नादिना (**जिगीषा**) जेतुमिच्छा (**उषासानक्ता**) अहर्निशम् (**सुदुघेव**) यथा सुष्ठु कामधुक् (**धेनु:**) वाक् (**समाने**) एकस्मिन् (**अहन्**) अहनि दिने (**विमिमान:**) विशेषेण निर्माता सन् (**अर्कम्**) सत्कर्त्तव्यमन्नम् (**विषुरूपे**) विरुद्धस्वरूपे (**पयसि**) उदके (**सस्मिन्**) सर्वस्मिन्। अत्र **छान्दसो वर्णलोपो वे**ति रेफवकारलोप:। (**ऊधन्**) ऊधनि॥४॥

अन्वय:-समानेऽहन्नर्कं विमिमानोऽहं उषासानक्तेव धेनुस्सुदुघेव नमसा जिगीषा यथा स्यात्तथा वो युष्मान् विषुरूपे पयसि सस्मिन्नूधन् व उपेषे॥४॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये रात्रिदिवसवद्वर्त्तमाने विद्याऽविद्ये विदित्वा सर्वस्मिन् समय उद्योगं कृत्वा धेनुवत् प्राणिन उपकृत्य दुष्टान् विजयन्ते, ते दुग्धे घृतमिव संसारे सारभूता भवन्ति॥४॥

पदार्थ:-(**समाने**) एकसे (**अहन्**) दिन में (**अर्कम्**) सत्कार करने योग्य अन्न को (**विमिमान:**) विशेषता से बनानेवाला मैं (**उषासानक्ता**) दिन-रात्रि के समान वा (**धेनु:**) वाणी जो (**सुदुघेव**) सुन्दर कामना पूरण करनेवाली उसके समान (**नमसा**) अन्नादि पदार्थ से (**जिगीषा**) जीतने की इच्छा जैसे हो वैसे (**विषुरूपे**) नाना प्रकार के रूपवाले (**पयसि**) जल और (**सस्मिन्**) समान (**ऊधन्**) दूध के निमित (**व:**) तुम लोगों के (**उप, आ, ईषे**) समीप सब ओर से प्राप्त होता हूँ॥४॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो रात्रि-दिवस के समान वर्त्तमान विद्या अविद्या को जान कर, सब समय में उद्योग कर, धेनु के समान समान प्राणियों का उपकार कर, दुष्टों को जीतते वे दूध में घी के तुल्य संसार में सारभूत होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒त नोऽहि॑र्बु॒ध्न्यो३॑ मय॑स्क॒: शिशुं॒ न पि॒प्युषी॑व॒ वेति॒ सिन्धु॑:।
येन॒ नपा॑तम॒पां जु॒नाम॑ मनो॒जुवो॒ वृष॑णो॒ यं वह॑न्ति॥५॥४॥

उ॒त। न॒:। अहि॑:। बु॒ध्न्य॑:। मय॑:। क॒रिति॑ क:। शिशु॑म्। न। पि॒प्युषी॑ऽइव। वे॒ति॒। सिन्धु॑:। येन॑। नपा॑तम्। अ॒पाम्। जु॒नाम॑। म॒न॒:ऽजुव॑:। वृष॑ण:। यम्। वह॑न्ति॥५॥

पदार्थ:-(**उत**) अपि (**न:**) अस्मान् (**अहि:**) व्याप्तिशीलो मेघ: (**बुध्न्य:**) अन्तरिक्षस्थ: (**मय:**) सुखम् (**क:**) (**शिशुम्**) बालकम् (**न**) इव (**पिप्युषीइव**) यथा वर्द्धयन्ती (**वेति**) व्याप्नोति (**सिन्धु:**) नदी

(येन) **(नपातम्)** पातरहितम् **(अपाम्)** जलानाम् **(जुनाम)** बध्नीयाम **(मनोजुवः)** मनसो जूर्वेग इव वेगो येषान्ते विद्युदादयः **(वृषणः)** वृष्टिकर्त्तारः **(यम्)** **(वहन्ति)** प्राप्नुवन्ति॥५॥

अन्वयः-हे मनुष्या! वयं येनाऽपां नपातं जुनाम मनोजुवो वृषणो यं वहन्ति स बुध्न्योऽहिः पिप्युषीव शिशुं न नोऽस्मान् वेति। उतापि सिन्धुर्मयः कः॥५॥

भावार्थः-अत्रोपमालङ्कारः। यदि मेघो न स्यात्तर्हि मातृवत्प्राणिनः कः पालयेत्? यदि सूर्यविद्युद्वायवो न स्युस्तर्ह्येतं को धरेत्?॥५॥

पदार्थः-हे मनुष्यो! हम लोग **(येन)** जिससे **(अपाम्)** जलों के **(नपातम्)** पतन को न प्राप्त पदार्थ को **(जुनाम)** बांधे वा **(मनोजुवः)** मन के तुल्य वेग जिनका वे बिजुली आदि **(वृषणः)** वृष्टि करानेवाले **(यम्)** जिसको **(वहन्ति)** प्राप्त होते हैं, वह **(बुध्न्यः)** अन्तरिक्षस्थ **(अहिः)** व्याप्तिशील मेघ **(पिप्युषीव)** बढ़ाती हुई वृद्धि देती उन्नति करती हुई स्त्री **(शिशुम्)** बालक को **(न)** जैसे वैसे **(नः)** हम लोगों को **(वेति)** व्याप्त होता **(उत)** और **(सिन्धुः)** नदी **(मयः)** सुख को **(कः)** करती है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मेघ न हो तो माता के तुल्य प्राणियों की पालना कौन करे? जो सूर्य, बिजुली और पवन न हों तो इस मेघ को कौन धारण करे?॥५॥

अथ मेघसूर्यदृष्टान्तेनोक्तविषयमाह॥

अब मेघ और सूर्य के दृष्टान्त से उक्त विषय को अगले मन्त्र में कहा है॥

उत नऽईं त्वष्टाऽगन्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां नऽइह गम्याः॥६॥

उत। नः। ईम्। त्वष्टा। आ। गन्तु। अच्छ। स्मत्। सूरिऽभिः। अभिऽपित्वे। सऽजोषाः। आ। वृत्रऽहा। इन्द्रः। चर्षणिऽप्राः। तुविःऽतमः। नराम्। नः। इह। गम्याः॥६॥

पदार्थः-**(उत)** **(नः)** अस्मान् **(ईम्)** जलम् **(त्वष्टा)** प्रकाशमानः **(आ)** **(गन्तु)** आगच्छन्तु **(अच्छ)** सम्यक् **(स्मत्)** प्रशंसायाम् **(सूरिभिः)** विद्वद्भिः **(अभिपित्वे)** अभितः प्राप्तव्ये **(सजोषाः)** समानप्रीतिः **(आ)** **(वृत्रहा)** मेघहन्ता **(इन्द्र)** सूर्यः **(चर्षणिप्राः)** यश्चर्षणीन् मनुष्यान् सुखैः पिपर्त्ति सः **(तुविष्टमः)** अतिशयेन बली **(नराम्)** नराणाम् **(नः)** अस्मान् **(इह)** **(गम्याः)** गच्छेः॥६॥

अन्वयः-हे विद्वन्! यथेह वृत्रहा चर्षणिप्रास्तुविष्टमस्त्वष्टेन्द्र ईं वर्षयति तथा त्वं नरां न आ गम्या उत स्मदभिपित्वे सजोषा भवान्त्सूरिभिर्नोऽच्छागन्तु॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवद्विद्यां प्रकाशयन्ति स्वात्मवत् सर्वान् मत्वा सुखयन्ति, ते बलवन्तो जायन्ते॥६॥

पदार्थः–हे विद्वान्! जैसे **(इह)** यहाँ **(वृत्रहा)** मेघ का हननेवाला **(चर्षणिप्राः)** मनुष्यों को सुखों से पूर्ण करनेवाला **(तुविष्टमः)** अतीव बली **(त्वष्टा)** प्रकाशमान **(इन्द्रः)** सूर्य **(ईम्)** जल को वर्षाता है, वैसे तुम **(नराम्)** सब मनुष्यों के बीच **(नः)** हम लोगों को **(आ, गम्याः)** अच्छे प्रकार प्राप्त होओ **(उत)** और **(स्मत्)** प्रशंसायुक्त **(अभिपित्वे)** सब ओर से पाने योग्य व्यवहार में **(सजोषाः)** समान प्रीति रखनेवाले आप **(सूरिभिः)** विद्वानों के साथ **(नः)** हम लोगों के प्रति **(अच्छ, आ, गन्तु)** अच्छे प्रकार आइये॥६॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान विद्या का प्रकाश कराते हैं और अपने आत्मा के तुल्य सबको मान सुखी करते हैं, वे बलवान् होते हैं॥६॥

पुनर्दृष्टान्तरेण विद्वद्विषयमाह॥

फिर और दृष्टान्त से विद्वानों के विषय को अगले मन्त्र में कहा है॥

उत न ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त॥७॥

उत। नः। ईम्। मतयः। अश्वऽयोगाः। शिशुम्। न। गावः। तरुणम्। रिहन्ति। तम्। ईम्। गिरः। जनयः। न। पत्नीः। सुरभिःऽतमम्। नराम्। नसन्त॥७॥

पदार्थः–**(उत)** **(नः)** अस्मान् **(ईम्)** **(मतयः)** मनुष्याः **(अश्वयोगाः)** येऽश्वान् योजयन्ति ते **(शिशुम्)** वत्सम् **(न)** इव **(गावः)** **(तरुणम्)** युवावस्थास्थम् **(रिहन्ति)** प्राप्नुवन्ति **(तम्)** **(ईम्)** सर्वतः **(गिरः)** वाणीः **(जनयः)** जनयितारः **(न)** इव **(पत्नीः)** दारान् **(सुरभिष्टमम्)** अतिशयेन सुरभिः सुगन्धिस्तम् **(नराम्)** मनुष्याणाम् **(नसन्त)** प्राप्नुवन्तु। **नसत इति गतिकर्मासु पठितम्।** (निघं०२.१४)॥७॥[७]

अन्वयः–हे मनुष्या! येऽश्वयोगा मतयस्तरुणं शिशुं गावो न नोऽस्मानीं रिहन्ति यं नरां मध्ये सुरभिष्टमं जनयः पत्नीर्न नसन्त स ईं गिरः प्राप्नोति तमुतापि वयं सेवेमहि॥७॥

भावार्थः–यथाऽश्वारूढाः सद्यः स्थानान्तरं यथा वा गावो वत्सान् यथा वा स्त्रीव्रताः स्वपत्नीश्च प्राप्नुवन्ति तथा विद्वांसो विद्याप्तवाचो यान्ति॥७॥

पदार्थः–हे मनुष्यो! जो **(अश्वयोगाः)** अश्वयोग अर्थात् अश्वों का योग कराते हैं, वे **(मतयः)** मनुष्य **(तरुणम्)** तरुण **(शिशुम्)** बछड़ों को **(न)** जैसे **(गावः)** गौयें वैसे **(नः)** हम लोगों को **(ईम्)** सब ओर से **(रिहन्ति)** प्राप्त होते हैं, जिस **(नराम्)** मनुष्यों के बीच **(सुरभिष्टमम्)** अतिशय करके

---

७. नसन्त (निघं०४.१.२२) निरु०४.१५ एवं 'नसतिराप्नोतिकर्मा वा।' निरु०७.१७ सं०।

सुगन्धित सुन्दर कीर्त्तिमान को **(जनयः)** उत्पत्ति करानेवाले जन **(पत्नीः)** अपनी पत्नियों को जैसे **(न)** वैसे **(नसन्त)** प्राप्त होवें, वह **(ईम्)** सब ओर से **(गिरः)** वाणियों को प्राप्त होता है **(तम्)** उसको **(उत)** ही हम लोग सेवें॥७॥

भावार्थः-जैसे घुड़चढ़ा शीघ्र एक स्थान से दूसरे स्थान को वा जैसे गौयें बछड़ों को वा स्त्रीवत् जन अपनी-अपनी पत्नियों को प्राप्त होते हैं, वैसे विद्वान् जन विद्या और श्रेष्ठ विद्वानों की वाणियों को प्राप्त होते हैं॥७॥

अथ वाय्वादिदृष्टान्तेनोक्तविषयमाह॥

अब पवन आदि के दृष्टान्त से विद्वानों के विषय को अगले मन्त्र में कहा है॥

उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः॥८॥

उत। नः। ईम्। मरुतः। वृद्धऽसेनाः। स्मत्। रोदसी इति। सऽमनसः। सदन्तु। पृषत्ऽअश्वासः। अवनयः। न। रथाः। रिशादसः। मित्रऽयुजः। न। देवाः॥८॥

पदार्थः-**(उत)** **(नः)** अस्मान् **(ईम्)** जलम् **(मरुतः)** वायवः **(वृद्धसेनाः)** वृद्धा प्रौढा सेना येषां ते **(स्मत्)** एव **(रोदसी)** द्यावापृथिव्यौ **(समनसः)** समानं मनो येषान्ते **(सदन्तु)** प्राप्नुवन्तु **(पृषदश्वासः)** पृषतः पृष्टाः पुष्टा अश्वा येषान्ते **(अवनयः)** भूमयः **(न)** इव **(रथाः)** रमणीयाः **(रिशादसः)** ये रिशाञ्छत्रून् दसन्ति नाशयन्ति ते **(मित्रयुजः)** ये मित्रैः सह युञ्जन्ति ते **(न)** इव **(देवाः)** विद्वांसः॥८॥

अन्वयः-मरुत ईमिव वृद्धसेना नोऽस्मान् सदन्तूत समनसः स्मद्रोदसी सदन्तु पृषदश्वासोऽवनयो रथा न रिशादसो मित्रयुजो देवा न भवन्ति॥८॥

भावार्थः-ये वीरसेनाः समानमतयो बृहद्यानाः पृथिवीवत् क्षमाशीला मित्रप्रिया विद्वांसः सर्वप्रियमाचरन्ति, ते प्रसन्ना भवन्ति॥८॥

पदार्थः-**(मरुतः)** पवन **(ईम्)** जल को जैसे वैसे **(वृद्धसेनाः)** बढ़ी हुई प्रौढ़ तरुण प्रचण्ड बल वेगवाली जिनकी सेना वे **(नः)** हम लोगों को **(सदन्तु)** प्राप्त होवें **(उत)** और **(समनसः)** समान जिनका मन वे परोपकारी विद्वान् **(स्मत्)** ही **(रोदसी)** आकाश और पृथिवी को प्राप्त हों **(पृषदश्वासः)** पुष्ट जिनके घोड़ा वे विद्वान् जन वा **(अवनयः)** भूमि **(रथाः)** रमणीय यानों के **(न)** समान **(रिशादसः)** रिसहा **[**अर्थात्**]** शत्रुओं को नाश कराते और **(मित्रयुजः)** मित्रों के साथ संयोग रखते उन **(देवाः)** विद्वानों के **(न)** समान होते हैं॥८॥

भावार्थः-जिनकी वीर सेना जो समान मति रखनेवाले बड़े बड़े रथादि यान जिनके तीर **[**पास**]** पृथिवी के समान क्षमाशील मित्रप्रिय विद्वान् जन सबका प्रिय आचरण करते हैं, वे प्रसन्न होते हैं॥८॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

प्र नु यदेषां महिना चिकित्रे प्र युञ्जन्ते प्रयुजस्ते सुवृक्ति।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः॥ ९॥

प्र। नु। यत्। एषाम्। महिना। चिकित्रे। प्र। युञ्जन्ते। प्रऽयुजः। ते। सुऽवृक्ति। अध। यत्। एषाम्। सुऽदिने। न। शरुः। विश्वम्। आ। इरिणम्। प्रुषायन्त। सेनाः॥ ९॥

पदार्थः-(**प्र**) (**नु**) सद्यः (**यत्**) ये (**एषाम्**) विदुषाम् (**महिना**) महिम्ना (**चिकित्रे**) विज्ञानवते (**प्र**) (**युञ्जन्ते**) (**प्रयुजः**) प्रकर्षेण युञ्जन्ति (**ते**) (**सुवृक्ति**) सुष्ठु व्रजन्ति यस्मिंस्तम् (**अध**) अनन्तरे (**यत्**) ये (**एषाम्**) प्रयोक्तॄणाम् (**सुदिने**) शोभने समये (**न**) इव (**शरुः**) हिंसकः (**विश्वम्**) सर्वम् (**आ**) समन्तात् (**इरिणम्**) कम्पितं जगत् (**प्रुषायन्त**) सेवन्ताम् (**सेनाः**)॥ ९॥

अन्वयः-यद्य एषां महिना प्र चिकित्रे प्रयुजो नु प्रयुञ्जन्ते। अध यदेषां सुदिने विश्वमिरिणं शरुः सेना नेवा प्रुषायन्त ते सुवृक्ति प्राप्नुवन्ति॥ ९॥

भावार्थः-अत्रोपमालङ्कारः। ये राजानः पूर्णविद्यानध्यापकान् विद्याप्रचाराय प्रवर्त्तयन्ति ते महिमानमाप्नुवन्ति। ये कृतज्ञकुलीनशूरवीरसेनाः पुष्यन्ति, ते सदा विजयमाप्नुवन्ति॥ ९॥

पदार्थः-(**यत्**) जो (**एषाम्**) इन विद्वानों के लिये (**महिना**) महिमा से (**प्र, चिकित्रे**) उत्तमता से विशेष ज्ञानवान् विद्वान् के लिये (**प्रयुजः**) उत्तमता से योग करते उनको (**नु**) शीघ्र (**प्रयुञ्जन्ते**) अच्छे प्रकार युक्त करते हैं (**अध**) इसके अनन्तर (**यत्**) जो जन (**एषाम्**) इन अच्छे योग करनेवालों के (**सुदिने**) उत्तम समय में (**विश्वम्**) समस्त (**इरिणम्**) कम्पायमान जगत् को (**शरुः**) मारनेवाला वीर जन (**सेनाः**) सेनाओं को जैसे (**न**) वैसे (**आ, प्रुषायन्त**) सेवन करें (**ते**) वे (**सुवृक्ति**) सुन्दर गमन जिसमें हो, उस उत्तम सुख वा मार्ग को प्राप्त होते हैं॥ ९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजजन पूरी विद्यावाले अध्यापकों को विद्याप्रचार के लिये प्रवृत्त करते हैं, वे महिमा-बड़ाई को प्राप्त होते हैं। जो किये को जाननेवाले कुलीन शूरवीरों की सेनाओं को पुष्ट करते, वे सदा विजय को प्राप्त होते हैं॥ ९॥

अथाध्यापकोपदेशकविषयमाह॥

अब अध्यापक और उपदेशकों के विषय को अगले मन्त्र में कहा है॥

प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान्॥ १०॥

प्रो इति। अश्विनौ। अवसे। कृणुध्वम्। प्र। पूषणम्। स्वऽतवसः। हि। सन्ति। अद्वेषः। विष्णुः। वातः। ऋभुक्षाः। अच्छ। सुम्नाय। ववृतीय। देवान्॥ १०॥

पदार्थः-(**प्रो**) प्रकर्षे (**अश्विनौ**) विद्याव्याप्ताऽध्यापकोपदेशकौ (**अवसे**) रक्षणादिने (**कृणुध्वम्**) (**प्र**) (**पूषणम्**) पोषकम् (**स्वतवसः**) स्वकीयं तवो बलं येषान्ते (**हि**) निश्चये (**सन्ति**) (**अद्वेषः**) द्वेषभावरहिताः (**विष्णुः**) व्यापकः (**वातः**) वायुः (**ऋभुक्षाः**) मेधावी (**अच्छ**) अत्र **निपातस्य चे**ति दीर्घः। (**सुम्नाय**) सुखाय (**ववृतीय**) वर्त्तेयम् (**देवान्**) विदुषः॥ १०॥

अन्वयः-हे राजप्रजाजना! यूयं ये हि स्वतवसोऽद्वेषो विद्वांसस्सन्ति तान् यावश्विनावध्यापकोपदेशकौ मुख्यौ परीक्षकौ स्तस्तौ विद्याया अवसे प्रकृणुध्वम्। यथा वात इव विष्णुर्ऋभुक्षा अहं सुम्नाय देवानच्छ ववृतीय तथा यूयं पूषणं प्रो कृणुध्वम्॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये रागद्वेषरहिता विद्याप्रचारप्रियाः पूर्णशरीरात्मबला धार्मिका विद्वांसः सन्ति, तान् सर्वे विद्याप्रचाराय संस्थापयन्तु येन सुखं वर्द्धेत॥ १०॥

पदार्थः-हे राजा प्रजाजनो! तुम जो (**हि**) ही (**स्वतवसः**) अपना बल रखनेवाले (**अद्वेषः**) निर्वैर विद्वान् जन (**सन्ति**) हैं उनको जो (**अश्विनौ**) विद्याव्याप्त अध्यापक और उपदेशक मुख्य परीक्षक हैं, वे विद्या की (**अवसे**) रक्षा, पढ़ाना, विचारना, उपदेश करना इत्यादि के लिये (**प्र, कृणुध्वम्**) अच्छे प्रकार नियत करें और जैसे (**वातः**) पवन के समान (**विष्णुः**) गुण व्याप्तिशील (**ऋभुक्षाः**) मेधावी मैं (**सुम्नाय**) सुख के लिये (**देवान्**) विद्वानों को (**अच्छ, ववृतीय**) अच्छा वर्त्ताऊं, वैसे तुम (**पूषणम्**) पुष्टि करनेवाले को (**प्रो**) उत्तमता से नियत करो॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो रागद्वेषरहित, विद्याप्रचार के प्रिय, पूरे शारीरिक-आत्मिक बलवाले धार्मिक विद्वान् हैं, उनको सब लोग विद्याप्रचार के लिये संस्थापन करें, जिससे सुख बढ़े॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः।
नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीदानुम्॥ ११॥ ५॥

इयम्। सा। वः। अस्मे इति। दीधितिः। यजत्राः। अपिऽप्राणी। च। सदनी। च। भूयाः। नि। या। देवेषु। यतते। वसुऽयुः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥ ११॥

पदार्थः-(**इयम्**) वेदविद्या (**सा**) (**वः**) युष्माकम् (**अस्मे**) अस्मभ्यम् (**दीधितिः**) विद्याप्रदीप्तिः (**यजत्राः**) विदुषां पूजकाः (**अपिप्राणी**) निश्चितप्राणबलप्रदा (**च**) (**सदनी**) दुःखविनाशनेन सुखप्रदा (**च**)

(भूयाः) **(नि)** **(या)** **(देवेषु)** विद्वत्सु **(यतते)** यत्नं करोति **(वसूयुः)** वसूनि धनानीच्छुः **(विद्याम)** **(इषम्)** **(वृजनम्)** **(जीरदानुम्)**॥११॥

अन्वयः–हे यजत्रा! या वसूयुर्दीधितिर्देवेषु नि यतते सेयं वो दीधितिरस्मे अपिप्राणी च सदनी च भूयाः। यतो वयमिषं वृजनं जीरदानुञ्च विद्याम॥११॥

भावार्थः–विद्यैव मनुष्याणां सुखप्रदा येन विद्याधनं न प्राप्तं सोऽन्तः सदा दरिद्र इव वर्त्तते॥११॥

अस्मिन् सूक्ते विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षडशीत्युत्तरं शततमं १८६ सूक्तं पञ्चमो ५ वर्गश्च समाप्तः॥

पदार्थः–हे **(यजत्रा)** विद्वानों के पूजनेवालो! **(या)** जो **(वसूयुः)** धनों को चाहनेवाली अर्थात् जिससे धनादि उत्तम पदार्थ सिद्ध होते हैं, उस विद्या की उत्तम दीप्ति कान्ति **(देवेषु)** विद्वानों में **(नि, यतते)** निरन्तर यत्न करती है, कार्यकारिणी होती है, **(सा, इयम्)** सो यह **(वः)** तुम्हारी **(दीधितिः)** उक्त कान्ति **(अस्मे)** हमारे लिये **(अपिप्राणी)** निश्चित प्राण बल की देनेवाली **(च)** और **(सदनी)** दुःख विनाशने से सुख देनेवाली **(च)** भी **(भूयाः)** हो, जिससे हम लोग **(इषम्)** इच्छासिद्धि वा अन्नादि पदार्थ **(वृजनम्)** बल और **(जीरदानुम्)** जीवन को **(विद्याम)** प्राप्त होवें॥११॥

भावार्थः–विद्या ही मनुष्यों को सुख देनेवाली है, जिसने विद्या धन न पाया, वह भीतर से सदा दरिद्रसा वर्त्तमान रहता है॥११॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह एक सौ छयीसवां १८६ सूक्त और पांचवां ५ वर्ग समाप्त हुआ॥

पितुमित्यस्यैकादशर्चस्य सप्ताशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। ओषधयो देवताः। १ उष्णिक्। ६,७ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। २,८ निचृद् गायत्री। ४ विराट् गायत्री। ९,१० गायत्री च छन्द। षड्जः स्वरः। ३,५ निचृदनुष्टुप्। ११ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथान्नगुणानाह॥

अब ग्यारह ऋचावाले एक सौ सतासीवें सूक्त का आरम्भ है। उसके आरम्भ से अन्न के गुणों को कहते हैं॥

पि॒तुं नु स्तोॅषं म॒हो ध॒र्माणं॒ तवि॑षीम्।
यस्य॑ त्रि॒तो व्योॅजसा वृ॒त्रं विप॑र्व॒मर्दय॑त्॥ १॥

पि॒तुम्। नु। स्तोॅष॒म्। म॒हः। ध॒र्माण॑म्। तवि॑षीम्। यस्य॑। त्रि॒तः। वि। ओज॑सा। वृ॒त्रम्। विऽप॑र्वम्। अ॒र्दय॑त्॥ १॥

पदार्थः-(**पितुम्**) अन्नम् (**नु**) सद्यः (**स्तोषम्**) प्रशंसेयम् (**महः**) महत् (**धर्माणम्**) धर्मकारिणम् (**तविषीम्**) बलम् (**यस्य**) (**त्रितः**) मनोवाक्कर्मभ्यः (**वि**) विविधेऽर्थे (**ओजसा**) पराक्रमेण (**वृत्रम्**) वरणीयं धनम् (**विपर्वम्**) विविधैरङ्गोपाङ्गैः पूर्णम् (**अर्दयत्**) अर्दयेत् प्रापयेत्॥ १॥

अन्वयः-यस्य त्रितो व्योजसा विपर्वं वृत्रमर्दयत्तस्मै न पितुं महो धर्माणं तविषीं चाहं स्तोषम्॥ १॥

भावार्थः-ये बह्वन्नं गृहीत्वा सुसंस्कृत्यैतद्गुणान् विदित्वा यथायोग्यं द्रव्यान्तरेण संयोज्य भुञ्जते, ते धर्माचरणाः सन्तः शरीरात्मबलं प्राप्य पुरुषार्थेन श्रियमुन्नेतुं शक्नुवन्ति॥ १॥

पदार्थः-(**यस्य**) जिसका (**त्रितः**) मन, वचन, कर्म से (**वि, ओजसा**) विविध प्रकार के पराक्रम से (**विपर्वम्**) विविध प्रकार के अङ्ग और उपाङ्गों से पूर्ण (**वृत्रम्**) स्वीकार करने योग्य धन को (**अर्दयत्**) प्राप्त करे उसके लिये (**नु**) शीघ्र (**पितुम्**) अन्न (**महः**) बहुत (**धर्माणम्**) धर्म करनेवाले और (**तविषीम्**) बल की मैं (**स्तोषम्**) प्रशंसा करूं॥ १॥

भावार्थः-जो बहुत अन्न को ले अच्छा संस्कार कर और उसके गुणों का जान यथायोग्य और व्यञ्जनादि पदार्थों के साथ मिला के खाते हैं, वे धर्म के आचरण करनेवाले होते हुए शरीर और आत्मा के बल को प्राप्त होकर पुरुषार्थ से लक्ष्मी की उन्नति कर सकते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्वादोॅ पि॒तो मधोॅ पितो व॒यं त्वा॑ ववृमहे।

अस्माकमविता भव॥ २॥

स्वादो इति। पितो इति। मधो इति। पितो इति। वयम्। त्वा। ववृमहे। अस्माकम्। अविता। भव॥ २॥

पदार्थः-(**स्वादो**) स्वादु (**पितो**) पेयम् (**मधो**) मधुरम् (**पितो**) पालकमन्नम् (**वयम्**) (**त्वा**) तत्। अत्र व्यत्ययः। (**ववृमहे**) स्वीकुर्महे (**अस्माकम्**) (**अविता**) रक्षकः (**भव**)॥ २॥

अन्वयः-हे परमात्मन्! त्वन्निर्मितं स्वादो पितो मधो पितो त्वा वयं ववृमहे। अतस्त्वं तदन्नपानदानेनास्माकमविता भव॥ २॥

भावार्थः-मनुष्यैर्मधुरादिरसयोगेन स्वादिष्ठमन्नं व्यञ्जनं चायुर्वेदरीत्या निर्माय सदा भोक्तव्यम्। यद्रोगनाशकत्वेनायुर्वर्द्धनाद्रक्षकं भवेत्॥ २॥

पदार्थः-हे परमात्मन्! आप के रचे (**स्वादो**) स्वादु (**पितो**) पीने योग्य जल तथा (**मधो**) मधुर (**पितो**) पालना करनेवाले (**त्वा**) उस अन्न को (**वयम्**) हम लोग (**ववृमहे**) स्वीकार करते हैं, इससे आप उस अन्नपान के दान से (**अस्माकम्**) हमारी (**अविता**) रक्षा करनेवाले (**भव**) हूजिये॥ २॥

भावार्थः-मनुष्यों को मधुरादि रस के योग से स्वादिष्ठ अन्न और व्यञ्जन को आयुर्वेद की रीति से बनाकर सदा भोजन करना चाहिये, जो रोग को नष्ट करने से आयुर्दा बढ़ाने से रक्षा करनेवाला हो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप नः पितवा चर शिवः शिवाभिरूतिभिः।
मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः॥ ३॥

उप। नः। पितो इति। आ। चर। शिवः। शिवाभिः। ऊतिऽभिः। मयःऽभुः। अद्विषेण्यः। सखा। सुऽशेवः। अद्वयाः॥ ३॥

पदार्थः-(**उप**) (**नः**) अस्मभ्यम् (**पितो**) अन्नव्यापिन् (**आ**) समन्तात् (**चर**) प्राप्नुहि (**शिवः**) सुखकारी (**शिवाभिः**) सुखकारिणीभिः (**ऊतिभिः**) रक्षणादिक्रियाभिः (**मयोभुः**) सुखं भावुकः (**अद्विषेण्यः**) अद्वेष्टा (**सखा**) मित्रम् (**सुशेवः**) सुष्ठु सुखः (**अद्वयाः**) अविद्यमानं द्वयं यस्मिन् सः॥ ३॥

अन्वयः-हे पितो! मयोभुरद्विषेण्यः सुशेवोऽद्वयाः सखा त्वं शिवाभिरूतिभिस्सह शिवो न उपाचर॥ ३॥

भावार्थः-अन्नादिपदार्थव्यापकः परमेश्वर आरोग्यप्रदाभी रक्षणरूपाभिः क्रियाभिः सर्वान् सुहृद्भावेन संपालयन् सर्वेषां मित्रभूतो वर्त्तत एव॥ ३॥

पदार्थः-हे (**पितो**) अन्नव्यापी परमात्मन्! (**मयोभुः**) सुख की भावना करानेवाले (**अद्विषेण्यः**) निर्वैर (**सुशेवः**) सुन्दर सुखयुक्त (**अद्वयाः**) जिसमें द्वन्द्वभाव नहीं (**सखा**) जो मित्र आप (**शिवाभिः**)

सुखकारिणी **(ऊतिभिः)** रक्षा आदि क्रियाओं के साथ **(नः)** हम लोगों के लिये **(शिवः)** सुखकारी **(उप, आ, चर)** समीप अच्छे प्रकार प्राप्त हूजिये॥३॥

भावार्थः-अन्नादि पदार्थव्यापी परमेश्वर आरोग्य देनेवाली रक्षारूप क्रियाओं से सब जीवों को मित्रभाव से अच्छे प्रकार पालता हुआ सबका मित्र हुआ ही वर्त्त रहा है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तव॒ त्ये पि॑तो॒ रसा॒ रजा॑ꣳस्यनु॒ विष्ठि॑ताः।

दि॒वि वाता॑इव श्रि॒ताः॥४॥

तव॑। त्ये। पि॒तो॒ इति॑। रसा॑ः। रजा॑ꣳसि। अनु॑। विऽस्थि॑ताः। दि॒वि। वाता॑ःऽइव। श्रि॒ताः॥४॥

पदार्थः-**(तव)** तस्य **(त्ये)** ते **(पितो)** अन्नव्यापिन् परमात्मन् **(रसाः)** स्वाद्वन्नादि षड्विधाः **(रजांसि)** लोकान् **(अनु)** **(विष्ठिताः)** विशेषेण स्थिताः **(दिवि)** अन्तरिक्षे **(वाताइव)** **(श्रिताः)** आश्रिताः सेवमानाः॥४॥

अन्वयः-हे पितो! तव तस्यान्नस्य मध्ये ये रसा दिवि वाताइव श्रितास्त्ये रजांस्यनु विष्ठिता भवन्ति॥४॥

भावार्थः-अस्मिन् संसारे परमात्मव्यवस्थया लोकलोकान्तरे भूमिजलपवनानुकूला रसादयो भवन्ति, नहि सर्वे सार्वत्रिका इति भावः॥४॥

पदार्थः-हे **(पितोः)** अन्नव्यापिन् परमात्मन्! **(तव)** उस अन्न के बीच जो **(रसाः)** स्वादु खट्टा मीठा तीखा चरपरा आदि छः प्रकार के रस **(दिवि)** अन्तरिक्ष में **(वाताइव)** पवनों के समान **(श्रिताः)** आश्रय को प्राप्त हो रहे हैं **(त्ये)** वे **(रजांसि)** लोकलोकान्तरों को **(अनु, विष्ठिताः)** पीछे प्रविष्ट होते हैं॥४॥

भावार्थः-इस संसार में परमात्मा की व्यवस्था से लोकलोकान्तरों में भूमि, जल और पवन के अनुकूल रसादि पदार्थ होते हैं, किन्तु सब पदार्थ सब जगह प्राप्त नहीं हो सकते॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तव॒ त्ये पि॑तो॒ दद॒॑तस्तव॑ स्वादिष्ठ ते पि॑तो।

प्र स्वा॒द्मानो॒ रसा॑नां तुवि॒ग्रीवा॑ इवेरते॥५॥६॥

तव॑। त्ये। पि॒तो॒ इति॑। दद॑तः। तव॑। स्वा॒दि॒ष्ठ॒। ते। पि॒तो॒ इति॑। प्र। स्वा॒द्मा॑नः। रसा॑नाम्। तु॒वि॒ग्रीवा॑ःऽइव। ई॒र॒ते॒॥५॥

पदार्थः-(**तव**) (**त्ये**) ते (**पितो**) अन्नव्यापिन् पालकेश्वर (**ददतः**) (**तव**) (**स्वादिष्ठ**) अतिशयेन स्वादितः (**ते**) तस्य (**पितो**) (**प्र**) (**स्वाद्मानः**) स्वादिष्ठाः (**रसानाम्**) मधुरादीनाम् (**तुविग्रीवाइव**) तुवि बलिष्ठा ग्रीवा येषान्ते (**ईरते**) प्राप्नुयुः॥५॥

अन्वयः-हे पितो! ददतस्तव त्ये पूर्वोक्ता रसाः सन्ति। हे स्वादिष्ठ पितो! तव ते रसा रसानां मध्ये स्वाद्मानस्तुविग्रीवाइव प्रेरते जीवानां प्रीतिं जनयन्ति॥५॥

भावार्थः-सर्वपदार्थव्यापकः परमात्मैव सर्वेभ्योऽन्नादिपदार्थान् प्रयच्छत तत्कृता एव पदार्थाः स्वगुणानुकूलाः केचित् स्वादिष्ठाः केचिच्च स्वादुतरास्सन्तीति सर्वैर्वेदितव्यम्॥५॥

पदार्थः-हे (**पितो**) अन्नव्यापी पालक परमात्मन्! (**ददतः**) देते हुए (**तव**) आपके जो अन्न वा (**त्ये**) वे पूर्वोक्त रस हैं। हे (**स्वादिष्ठ**) अतीव स्वादुयुक्त (**पितो**) पालक अन्नव्यापक परमात्मन्! (**तव**) आपके उस अन्न के सहित (**ते**) वे रस (**रसानाम्**) मधुरादि रसों के बीच (**स्वाद्मानः**) अतीव स्वादु (**तुविग्रीवाइव**) जिनका प्रबल गला उन जीवों के समान (**प्रेरते**) प्रेरणा देते अर्थात् जीवों को प्रीति उत्पन्न कराते हैं॥५॥

भावार्थः-सब पदार्थों में व्याप्त परमात्मा ही सभी के लिये अन्नादि पदार्थों को अच्छे प्रकार देता है और उसके किये हुए ही पदार्थ अपने गुणों के अनुकूल कोई अतीव स्वादु और कोई अतीव स्वादुतर है, यह सबको जानना चाहिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वे पितो महानां देवानां मनो हितम्।
अकारि चारु केतुना तवाहिमवसावधीत्॥६॥

त्वे इति । पितो इति। महानाम्। देवानाम्। मनः। हितम्। अकारि। चारु। केतुना। तव। अहिम्। अवसा। अवधीत्॥६॥

पदार्थः-(**त्वे**) त्वयि (**पितो**) अन्नव्यापिन् पालकेश्वर (**महानाम्**) महतां पूज्यानाम् (**देवानाम्**) विदुषाम् (**मनः**) (**हितम्**) धृतं प्रसन्नं वा (**अकारि**) क्रियते (**चारु**) श्रेष्ठतरम् (**केतुना**) विज्ञानेन (**तव**) तस्य। अत्र व्यत्ययः। (**अहिम्**) मेघम् (**अवसा**) (**अवधीत्**) हन्ति॥६॥

अन्वयः-पितो यस्यान्नव्यापिनस्तवावसा सूर्योऽहिमवधीत् तस्य तव केतुना यच्चार्वकारि तन्महानां देवानां मनस्त्वे हितमस्ति॥६॥

भावार्थः-यद्यन्नं न भुज्येत तर्हि कस्यापि मनो न हृष्येत मनसोऽन्नमयत्वात् तस्माद्यस्योत्पत्तये मेघो निमित्तमस्ति तदन्नं सुष्ठु संस्कृत्य भोक्तव्यम्॥६॥

पदार्थः-हे **(पितो)** अन्नव्यापी पालना करनेवाले ईश्वर! **(तव)** जिस आपकी **(अवसा)** रक्षा आदि से सूर्य **(अहिम्)** मेघ को **(अवधीत्)** हन्ता है, उन आपके **(केतुना)** विज्ञान से जो **(चारु)** श्रेष्ठतर **(अकारि)** किया जाता है वह **(महानाम्)** महात्मा पूज्य **(देवानाम्)** विद्वानों का **(मनः)** मन **(त्वे)** आप में **(हितम्)** धरा है वा प्रसन्न है॥६॥

भावार्थः-यदि अन्न भोजन न किया जाय तो किसी का मन आनन्दित न हो, क्योंकि मन अन्नमय है। इस कारण जिसकी उत्पत्ति के लिये मेघ निमित्त है, उस अन्न को सुन्दरता से बनाकर भोजन करना चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदु॒दो पि॑तो॒ अज॑गन् वि॒वस्व॒ पर्व॑तानाम्।

अत्रा॑ चि॒न्नो मधो पि॒तोऽर॑ं भ॒क्षाय॑ गम्याः॥७॥

यतः। अ॒दः। पि॒तो॒ इति॑। अज॑गन्। वि॒वस्व॑। पर्व॑तानाम्। अत्र॑। चि॒त्। नः॒। म॒धो॒ इति॑। पि॒तो॒ इति॑। अर॑म्। भ॒क्षाय॑। ग॒म्याः॥७॥

पदार्थः-**(यत्)** **(अदः)** तत्। अत्र **वाच्छन्दसी**त्यप्राप्तमप्युत्वम्। **(पितो)** **(अजगन्)** गच्छन्ति **(विवस्व)** विशेषेण वस। अत्र व्यत्ययेनात्मनेपदम्। **(पर्वतानाम्)** मेघानाम् **(अत्र)** अस्मिन्। अत्र **ऋचितनुघे**ति दीर्घः। **(चित्)** अपि **(नः)** अस्माकम् **(मधो)** मधुर **(पितो)** पालकान्नदातः **(अरम्)** अलम् **(भक्षाय)** भोजनाय **(गम्याः)** प्रापयेः॥७॥

अन्वयः-हे पितो! यददो पितोऽन्नं विद्वांसोऽजगन् तत्र विवस्व। हे मधो पितो! अत्र चित् पर्वतानां मध्ये नो भक्षायाऽन्नमरं गम्याः॥७॥

भावार्थः-सर्वेषु पदार्थेषु व्याप्तं परमेश्वरं भक्षणादिसमये संस्मरेद्यस्य परमात्मनो हि कृपयान्नानि विविधानि सर्वत्र दिग्देशकालानुकूलानि वर्त्तन्ते, तं परमात्मानमेव संस्मृत्य सर्वे पदार्था गृहीतव्या इति॥७॥

पदार्थः-हे **(पितो)** अन्नव्यापिन् पालकेश्वर! **(यत्)** जिस **(अदः)** प्रत्यक्ष अन्न को विद्वान् जन **(अजगन्)** प्राप्त होते हैं, उसमें **(विवस्व)** व्याप्तिमान् हूजिये। हे **(मधो)** मधुर **(पितो)** पालकान्नदाता ईश्वर! **(अत्र, चित्)** इन **(पर्वतानाम्)** मेघों के बीच भी जो कि अन्न के निमित्त कहे हैं **(नः)** हमारे **(भक्षाय)** भक्षण करने के लिये अन्न को **(अरम्)** परिपूर्ण **(गम्याः)** प्राप्त कराइये॥७॥

भावार्थः–सब पदार्थों में व्याप्त परमेश्वर को भक्षण आदि समय में स्मरण करें, जिस कारण जिस परमात्मा की कृपा से अन्नादि पदार्थ विविध प्रकार के पूर्वादि दिशा, देश और काल के अनुकूल वर्त्तमान हैं, उस परमात्मा ही का संस्मरण कर सब पदार्थ ग्रहण करने चाहियें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदु॒पामोष॑धीनां परि॒शमा॑रि॒शामहे। वाता॑पे॒ पीव॒ इद्भ॑व॥८॥

यत्। अ॒पाम्। ओष॑धीनाम्। प॒रि॒शम्। आ॒ऽरि॒शामहे। वाता॑पे। पीव॑ः। इत्। भ॒व॒॥८॥

पदार्थः–(**यत्**) अन्नम् (**अपाम्**) जलानाम् (**ओषधीनाम्**) सोमाद्योषधीनाम् (**परिंशम्**) परितः सर्वतोंऽशं लेशम्। अत्र **छान्दसो वर्णलोपो वे**त्यलोपः। (**आरिशामहे**) समन्तात् प्राप्नुयाम। अत्र **लिश गताविति**अस्य वर्णव्यत्ययेन लस्य स्थाने रेफादेशः। (**वातापे**) वात इव सर्वान् पदार्थान् व्याप्नोति तत्सम्बुद्धौ (**पीवः**) वृद्धिकरः (**इत्**) एव (**भव**)॥८॥

अन्वयः–हे वातापे परमेश्वर! वयमपामोषधीनां यत्परिंशमन्नमारिशामहे तेन त्वं पीव इद्भव॥८॥

भावार्थः–जलान्नघृतसंस्कारेण प्रशस्तान्यन्नानि व्यञ्जनानि निर्माय भोक्तारो युक्ताहारविहारेण पुष्टा भवन्तु॥८॥

पदार्थः–हे (**वातापे**) पवन के समान सर्वपदार्थ व्यापक परमेश्वर! हम लोग (**अपाम्**) जलों और (**ओषधीनाम्**) सोमादि ओषधियों के (**यत्**) जिस (**परिंशम्**) सब ओर से प्राप्त होनेवाले अंश को (**आरिशामहे**) अच्छे प्रकार प्राप्त होते हैं, उससे आप (**पीवः**) उत्तम वृद्धि करनेवाले (**इत्**) ही (**भव**) हूजिये॥८॥

भावार्थः–जल, अन्न और घृत के संस्कार से प्रशंसित अन्न और व्यञ्जन इलायची, मिरच वा घृत, दूध पदार्थों को उत्तम बनाकर उन पदार्थों के भोजन करनेवाले जन युक्त आहार और विहार से पुष्ट होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यत्ते॑ सो॒म॒ गवा॑शिरो॒ यवा॑शिरो॒ भजा॑महे। वाता॑पे॒ पीव॒ इद्भ॑व॥९॥

यत्। ते॒। सो॒म॒। गोऽआ॑शिरः। यव॑ऽआशिरः। भजा॑महे। वाता॑पे। पीव॑ः। इत्। भ॒व॒॥९॥

पदार्थः–(**यत्**) (**ते**) तस्य (**सोम**) यवाद्योषधिरसव्यापिन् ईश्वर (**गवाशिरः**) गोरससंस्कर्त्ता च (**यवाशिरः**) यवाद्योषधिसंयोगेन संस्कृतस्य (**भजामहे**) सेवामहे (**वातापे**) वातवत्सर्वव्यापिन् (**पीवः**) प्रवृद्धिकरः (**इत्**) एव (**भव**)॥९॥

अन्वयः-हे सोम! गवाशिरो यवाशिरस्ते यत्सेव्यमंशं वयं भजामहे। तस्मात् हे वातापे! पीव इद्भव॥९॥

भावार्थः-यथा जना अन्नादिपदार्थेषु तत्तत्पाकक्रियानुकूलान् सर्वान् संस्कारान् कुर्वन्ति तथा रसानपि रसोचितसंस्कारैः संपादयन्तु॥८॥

पदार्थः-हे **(सोम)** यवादि ओषधि रसव्यापी ईश्वर! **(गवाशिरः)** गौ के रस से बनाये वा **(यवाशिरः)** यवादि ओषधियों के संयोग से बनाये हुए **(ते)** उस अन्न के **(यत्)** जिस सेवनीय अंश को हम लोग **(भजामहे)** सेवते हैं, उससे हे **(वातापे)** पवन के समान सब पदार्थों में व्यापक परमेश्वर! **(पीवः)** उत्तम वृद्धि करनेवाले **(इत्)** ही **(भव)** हूजिये॥९॥

भावार्थः-जैसे मनुष्य अन्नादि पदार्थों में उन-उन की पाकक्रिया के अनुकूल सब संस्कारों को करते हैं, वैसे रसों को भी रसोचित संस्कारों से सिद्ध करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कर॒म्भ ओ॑षधे भव॒ पीवो॑ वृ॒क्क उ॑दार॒थिः।
वाता॑पे॒ पीव॒ इद्भ॑व॥ १०॥

कर॒म्भः। ओ॒ष॒धे॒। भव॒। पीवः॑। वृ॒क्कः। उ॒दा॒र॒थिः। वाता॑पे। पीवः॑। इत्। भव॥ १०॥

पदार्थः-(**करम्भः**) कर्त्ता **(ओषधे)** ओषधिव्यापिन् **(भव)** **(पीवः)** प्रवृद्धिकरः **(वृक्कः)** रोगादिवर्जयिता **(उदारथिः)** उद्दीपकः **(वातापे)** वातइव व्यापिन् **(पीवः)** प्रवृद्धिकरः **(इत्)** **(भव)**॥१०॥

अन्वयः-हे ओषधे! त्वं करम्भ उदारथिर्वृक्कः पीवो भव। हे वातापे! त्वं पीव इद्भव॥१०॥

भावार्थः-यथा संयमी शुभाचारेण शरीरमात्मानञ्च बलयुक्तं करोति तथा संयमेन सर्वपदार्थान् सर्वे वर्त्तयन्तु॥१०॥

पदार्थः-हे **(ओषधे)** ओषधिव्यापी परमेश्वर! आप **(करम्भः)** करनेवाले **(उदारथिः)** जाठराग्नि के प्रदीपक **(वृक्कः)** रोगादिकों के वर्जन कराने और **(पीवः)** उत्तम वृद्धि करानेवाले **(भव)** हूजिये। तथा हे **(वातापे)** पवन के समान सर्वव्यापक परमात्मन्! आप **(पीवः)** उत्तम वृद्धि देनेवाले **(इत्)** ही **(भव)** हूजिये॥१०॥

भावार्थः-जैसे संयमी पुरुष शुभाचार से शरीर और आत्मा को बलयुक्त करता है, वैसे संयम से सब पदार्थों को सब वर्त्तो॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं त्वा॑ व॒यं पि॑तो॒ वचो॑भि॒र्गाव॒ो न ह॒व्या सु॑षूदिम।
दे॒वेभ्य॑स्त्वा सध॒मादं॒मस्मभ्यं॑ त्वा सध॒मादं॑म्॥ ११॥ ७॥

तम्। त्वा॒। व॒यम्। पि॒तो॒ इति॑। वचः॑ऽभिः। गावः॑। न। ह॒व्या। सु॒ऽसू॒दि॒म॒। दे॒वेभ्यः॑। त्वा॒। स॒ध॒ऽमाद॑म्। अ॒स्मभ्य॑म्। त्वा। स॒ध॒ऽमाद॑म्॥ ११॥

पदार्थः–(**तम्**) (**त्वा**) त्वाम् (**वयम्**) (**पितो**) अन्नव्यापिन् पालकेश्वर (**वचोभिः**) स्तुतिवाक्यैः (**गावः**) धेनवः (**न**) इव (**हव्या**) अत्तुं योग्यानि (**सुषूदिम**) क्षारयेम (**देवेभ्यः**) विद्वद्भ्यः (**त्वा**) त्वाम् (**सधमादम्**) सह मादयितारम् (**अस्मभ्यम्**) (**त्वा**) त्वाम् (**सधमादम्**) सह मादयितारम्॥ ११॥

अन्वयः–हे पितो! तं त्वा त्वामाश्रित्य वचोभिर्गावो न ततो वयं यथा हव्या सुषूदिम। तथा वयं देवेभ्यः सधमादं त्वाऽस्मभ्यं सधमादञ्च त्वा विद्वांस आश्रयन्ताम्॥ ११॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा गावो तृणादिकं भुक्त्वा रत्नं दुग्धं ददति तथाऽन्नादिपदार्थेभ्यः श्रेष्ठतरो भागो निष्काशनीयः। ये स्वसङ्गिनोऽन्नादिना सत्कुर्वन्ति परस्परानन्दकाङ्क्षया परमात्मानञ्चाश्रयन्ति ते प्रशंसिता जायन्ते॥ ११॥

अस्मिन् सूक्तेऽन्नगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति सप्तत्यशीत्युत्तरं शततमं १८७ सूक्तं सप्तमो ७ वर्गश्च समाप्तः॥

पदार्थः–हे (**पितो**) अन्नव्यापी पालकेश्वर! (**तम्**) उन पूर्वोक्त (**त्वा**) आपका आश्रय लेकर (**वचोभिः**) स्तुति वाक्यों प्रशंसाओं से (**गावः**) दूध देती हुई गौवें (**न**) जैसे दूध, घी, दही आदि पदार्थों को देवें, वैसे उस अन्न से (**वयम्**) हम जैसे (**हव्या**) भोजन करने योग्य पदार्थों को (**सुषूदिम**) निकाशें तथा हम (**देवेभ्यः**) विद्वानों के लिये (**सधमादम्**) साथ आनन्द देनेवाले (**त्वा**) आपका हम तथा (**अस्मभ्यम्**) हमारे लिये (**सधमादम्**) साथ आनन्द देनेवाले (**त्वा**) आपका विद्वान् जन आश्रय करें॥ ११॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे गौयें तृण, घास आदि खाकर रत्न दूध देती हैं, वैसे अन्नादि पदार्थों से श्रेष्ठतर भाग निकाशना चाहिये। जो अपने सङ्गियों का अन्नादि पदार्थों से सत्कार करते और परस्पर एक-दूसरे के आनन्द की इच्छा से परमात्मा का आश्रय लेते हैं, वे प्रशंसित होते हैं॥ ११॥

इस सूक्त में अन्न के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ सतासीवां १८७ सूक्त और सातवां ७ वर्ग समाप्त हुआ॥

समिद्ध इत्येकादशर्चस्याष्टाऽशीत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। अग्नियो देवताः १,३,५-७,१० निचृद् गायत्री। २,४,८,९,११ गायत्री छन्दः। षड्जः स्वरः॥

अथाऽग्निदृष्टान्तेन राजगुणानाह॥

अब ग्यारह ऋचावाले एक सौ अट्ठासीवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि के दृष्टान्त से राजगुणों का उपदेश करते हैं।

समि॑द्धो अ॒द्य रा॑जसि दे॒वो दे॒वैः स॑हस्रजित्।
दू॒तो ह॒व्या क॒विर्व॑ह॥ १॥

सम्ऽइ॑द्धः। अ॒द्य। रा॒ज॒सि॒। दे॒वः। दे॒वैः। स॒हस्र॒ऽजि॒त्। दू॒तः। ह॒व्या। क॒विः। व॒ह॒॥ १॥

पदार्थः–(**समिद्धः**) अग्निरिव प्रदीप्तः (**अद्य**) (**राजसि**) प्रकाशसे (**देवः**) जिगीषुः (**देवैः**) जिगीषुभिर्वीरैस्सह (**सहस्रजित्**) यः सहस्राणि शत्रून् जयति सः (**दूतः**) यो दुनोति परितापयति शत्रुस्वान्तानि सः (**हव्या**) आदातुमर्हाणि (**कविः**) विक्रान्तप्रज्ञः (**वह**) प्रापय॥ १॥

अन्वयः–हे सहस्रजित् राजन्! समिद्ध इव देवैः सह देवः सहस्रजिद्दूतः कविस्त्वमद्य राजसि, स त्वं हव्या वह॥ १॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। योऽग्निरिव दुष्टान् परितापयति सज्जनसङ्गेन शत्रून् विजयते विद्वत्सङ्गेन प्राज्ञः सन् प्राप्तुमर्हाणि वस्तूनि प्राप्नोति, स राज्यं कर्त्तुमर्हति॥ १॥

पदार्थः–हे (**सहस्रजित्**) सहस्रों शत्रुओं को जीतनेवाले राजन्! (**समिद्धः**) जलती हुई प्रकाशयुक्त अग्नि के समान प्रकाशमान (**देवैः**) विजय चाहते हुए वीरों के साथ (**देवः**) विजय चाहनेवाले और (**दूतः**) शत्रुओं के चित्तों को सन्ताप देते हुए (**कविः**) प्रबल प्रज्ञायुक्त आप (**अद्य**) आज (**राजसि**) अधिकतर शोभायमान हो रहे हैं सो आप (**हव्या**) ग्रहण करने योग्य पदार्थों को (**वह**) प्राप्त कीजिये॥ १॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि के समान दुष्टों को सब ओर से कष्ट देता, सज्जनों के सङ्ग से शत्रुओं को जीतता, विद्वानों के सङ्ग से बुद्धिमान् होता हुआ प्राप्त होने योग्य वस्तुओं को प्राप्त होता, वह राज्य करने को योग्य है॥ १॥

अथाऽध्यापकविषयमाह॥

अब अध्यापक के विषय को अगले मन्त्र में कहा है॥

तनू॑नपादृ॒तं य॒ते मध्वा॑ य॒ज्ञः सम॑ज्यते। दध॑त्सहस्रिणी॒रिष॑ः॥ २॥

तनू॑ऽनपात्। ऋ॒तम्। य॒ते। मध्वा॑। य॒ज्ञः। सम्। अ॒ज्य॒ते॒। दध॑त्। स॒हस्रि॒णीः॑। इष॑ः॥ २॥

पदार्थः-(**तनूनपात्**) यस्तनूनि शरीराणि न पातयति सः (**ऋतम्**) यज्ञं सत्यव्यवहारं जलादि च (**यते**) गच्छते (**मध्वा**) मधुरादिना (**यज्ञः**) यजनीयः (**सम्**) सम्यक् (**अज्यते**) व्यज्यते (**दधत्**) यो दधाति सः (**सहस्रिणीः**) बह्वीः (**इषः**) अन्नानि॥२॥

अन्वयः-यः सहस्रिणीरिषो दधत्तनूनपाद्यज्ञ ऋतं मध्वा यते समज्यते तं सर्वे साध्नुत॥२॥

भावार्थः-येन कर्मणाऽतुलानि धनधान्यानि प्राप्यन्ते तस्याऽनुष्ठानं मनुष्याः सततं कुर्वन्तु॥२॥

पदार्थः-जो (**सहस्रिणीः**) सहस्रों (**इषः**) अन्नादि पदार्थों को (**दधत्**) धारण करता हुआ (**तनूनपात्**) शरीरों को न गिराने न नाश करनेहारा अर्थात् पालनेवाला (**यज्ञः**) पदार्थों में संयुक्त करने योग्य अग्नि (**ऋतम्**) यज्ञ, सत्य व्यवहार और जलादि पदार्थ को (**मध्वा**) मधुरता आदि के साथ (**यते**) प्राप्त होते हुए जन के लिये (**समज्यते**) अच्छे प्रकार प्रकट होता है, उसको सब सिद्ध करें॥२॥

भावार्थः-जिस कर्म से अतुल धन-धान्य प्राप्त होते हैं, उसका अनुष्ठान आरम्भ मनुष्य निरन्तर करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ॒जुह्वा॑नो न॒ ईड्यो॑ दे॒वाँ आ व॑क्षि य॒ज्ञिया॑न्।
अग्ने॑ सहस्र॒सा अ॑सि॥३॥

आ॒ऽजुह्वा॑नः। न॒ः। ईड्यः॑। दे॒वान्। आ। व॒क्षि॒। य॒ज्ञिया॑न्। अग्ने॑। स॒हस्र॒ऽसाः॒। अ॒सि॒॥३॥

पदार्थः-(**आजुह्वानः**) कृतहोमः कृताऽऽमन्त्रणो वा (**नः**) अस्मान् (**ईड्यः**) स्तोतुमध्येषितुं योग्यः (**देवान्**) विदुषो दिव्यान् गुणान् वा (**आ**) (**वक्षि**) वहसि प्रापयसि (**यज्ञियान्**) यज्ञसाधकान् (**अग्ने**) वह्निरिव वर्त्तमान (**सहस्रसाः**) यः सहस्राणि पदार्थान् सनोति विभजति सः (**असि**)॥३॥

अन्वयः-हे अग्नेऽग्निरिव वर्त्तमान विद्वन्! यतोऽस्माभिराजुह्वान ईड्यः सहस्रसास्त्वमसि तस्मान्नो यज्ञियान् देवानावक्षि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा गुणकर्मस्वभावतः संसेवितोऽग्निर्बहूनि कार्याणि साध्नोति तथा सेवित आप्तो विद्वान् सर्वान् शुभान् गुणान् कार्यसिद्धीश्च प्रापयति॥३॥

पदार्थः-हे (**अग्ने**) अग्नि के समान वर्त्तमान विद्वान्! जिस कारण हम लोगों से जिस प्रकार (**आजुह्वानः**) होम को प्राप्त (**ईड्यः**) ढूंढने योग्य (**सहस्रसाः**) सहस्रों पदार्थों का विभाग करनेवाला अग्नि हो, वैसे आमन्त्रण बुलाये को प्राप्त स्तुति प्रशंसा के योग्य सहस्रों पदार्थों को देनेवाले आप (**असि**) हैं, इससे (**नः**) हम लोगों के (**यज्ञियान्**) यज्ञ सिद्ध करानेवाले (**देवान्**) विद्वान् वा दिव्य गुणों को (**आ, वक्षि**) अच्छे प्रकार प्राप्त कराते हैं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे गुण, कर्म, स्वभाव से अच्छे प्रकार सेवन किया हुआ अग्नि बहुत कार्यों को सिद्ध करता है, वैसे सेवा किया हुआ आप्त विद्वान् समस्त शुभ गुणों और कार्यसिद्धियों को प्राप्त कराता है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन्। यत्रादित्या विराजथ॥४॥

प्राचीनम्। बर्हिः। ओजसा। सहस्रऽवीरम्। अस्तृणन्। यत्र। आदित्याः। विऽराजथ॥४॥

पदार्थः-(**प्राचीनम्**) प्राक्तनम् (**बर्हिः**) संवर्द्धितं तेज इव विज्ञानम् (**ओजसा**) पराक्रमेण (**सहस्रवीरम्**) सहस्राणि वीरा यस्मिँस्तम् (**अस्तृणन्**) आच्छादयन्ति (**यत्र**) यस्मिन् (**आदित्याः**) सूर्य्याः (**विराजथ**) विशेषेण प्रकाशध्वम्॥४॥

अन्वयः-हे मनुष्या! यत्राऽऽदित्या ओजसा सहस्रवीरं प्राचीनं बर्हिरस्तृणन् तत्र यूयं विराजथ॥४॥

भावार्थः-यत्र सनातने कारणे सूर्यादयो लोकाः प्रकाशन्ते, तत्र यूयं वयं च प्रकाशामहे॥४॥

पदार्थः-हे मनुष्यो! (**यत्र**) जिस सनातन कारण में (**आदित्याः**) सूर्य्यादि लोक (**ओजसा**) पराक्रम वा प्रताप से (**सहस्रवीरम्**) सहस्रों जिसमें वीर उस (**प्राचीनम्**) पुरातन (**बर्हिः**) अच्छे प्रकार बढ़े हुए विज्ञान को (**अस्तृणन्**) ढांपते हैं, वहाँ तुम लोग (**विराजथ**) विशेषता से प्रकाशित होओ॥४॥

भावार्थः-जिस सनातन कारण में सूर्य्यादि लोक-लोकान्तर प्रकाशित होते हैं, वहाँ तुम हम प्रकाशित होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विराट् सम्राड् विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः। दुरो घृतान्यक्षरन्॥५॥८॥

विऽराट्। सम्ऽराट्। विऽभ्वीः। प्रऽभ्वीः। बह्वीः। च। भूयसीः। च। याः। दुरः। घृतानि। अक्षरन्॥५॥

पदार्थः-(**विराट्**) यो विविधेषु गुणेषु कर्मसु वा राजते (**सम्राट्**) यश्चक्रवर्त्तीव विद्यासु सम्यग् राजते सः (**विभ्वीः**) व्यापिकाः (**प्रभ्वीः**) समर्थाः (**बह्वीः**) अनेकाः (**च**) (**भूयसीः**) पुनः पुनरधिकाः (**च**) (**याः**) (**दुरः**) द्वाराणि (**घृतानि**) उदकानि (**अक्षरन्**) प्राप्नुवन्ति॥५॥

अन्वयः-हे विद्वन्! विराट् सम्राट् त्वं या विभ्वीः प्रभ्वीर्बह्वीर्भूयसीश्चाऽण्व्यो मात्रा दुरो घृतानि चाक्षरन् ता विजानीहि॥५॥

भावार्थः-हे मनुष्याः! याः सर्वस्य जगतो बहुतत्त्वाढ्यास्त्रिगुणात्मिका मात्रा नित्यस्वरूपेण सदा वर्त्तन्ते, ता आरम्भ पृथिवीपर्यन्तान् पदार्थान् विज्ञाय सर्वकार्य्याणि साधनीयानि॥५॥

पदार्थः-हे विद्वान्! **(विराट्)** जो विविध प्रकार के गुणों और कर्मों में प्रकाशमान वा **(सम्राट्)** जो चक्रवर्त्ती के समान विद्याओं में सुन्दरता से प्रकाशमान सो आप **(याः)** जो **(विभ्वीः)** व्याप्त होनेवाली **(प्रभ्वीः)** समर्थ **(बह्वीः)** बहुत अनेक **(भूयसीः, च)** और अधिक से अधिक सूक्ष्म मात्रा **(दुरः)** द्वारे अर्थात् सर्व कार्यसुखों को और **(घृतानि, च)** जलों को **(अक्षरन्)** प्राप्त होती हैं, उनको जानो॥५॥

भावार्थः-हे मनुष्यो! जो सब जगत् की बहुत तत्त्वयुक्त सत्व रजस्तमो गुणवाली सूक्ष्ममात्रा नित्यस्वरूप से सदा वर्त्तमान हैं, उनको लेकर पृथिवी पर्यन्त पदार्थों को जान सब कार्य सिद्ध करने चाहियें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुरुक्मे हि सुपेशसाऽधि श्रिया विराजतः। उषासावेह सीदताम्॥६॥

सुरुक्मे इति सुऽरुक्मे। हि। सुऽपेशसा। अधि। श्रिया। विऽराजतः। उषसौ। आ। इह। सीदताम्॥६॥

पदार्थः-**(सुरुक्मे)** रमणीये **(हि)** **(सुपेशसा)** प्रशंसास्वरूपे कार्यकारणे **(अधि)** **(श्रिया)** शोभया **(विराजतः)** देदीप्येते **(उषासौ)** रात्रिदिने इव **(आ)** **(इह)** कार्य्यकारणविद्यायाम् **(सीदताम्)** स्थिरौ स्याताम्॥६॥

अन्वयः-हे अध्यापकोपदेशकौ! यथेह सुरुक्मे सुपेशसा कार्य्यकारणे श्रियाधिविराजतः। ते हि विदित्वा उषासाविव भवन्तौ परोपकार आ सीदताम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽस्यां सृष्टौ विद्यासुशिक्षे प्राप्य कार्य्यज्ञानपुरःसरं कारणज्ञानं लभन्ते ते सूर्य्याचन्द्रमसाविव परोपकारे रमन्ते॥६॥

पदार्थः-हे अध्यापक और उपदेशक लोगो! जैसे **(इह)** इस कार्यकारण विद्या में **(सुरुक्मे)** सुन्दर रमणीय **(सुपेशसा)** प्रशंसित स्वरूप कार्य्यकारण **(श्रिया)** शोभा से **(अधि, विराजतः)** देदीप्यमान होते हैं **(हि)** उन्हीं को जानकर **(उषासौ)** रात्रि, दिन के ससान आप लोग परोपकार में **(आ, सीदताम्)** अच्छे प्रकार स्थिर होओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो इस सृष्टि के विद्या और अच्छी शिक्षा को पाकर कार्य्यज्ञानपूर्वक कारणज्ञान को प्राप्त होते हैं, वे सूर्य-चन्द्रमा के समान परोपकार में रमते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र॒थ॒मा हि सु॒वाच॑सा॒ होता॑रा॒ दैव्या॑ क॒वी। य॒ज्ञं नो॑ यक्षताम्इ॒मम्॥७॥

प्र॒थ॒मा। हि। सु॒ऽवाच॑सा। होता॑रा। दैव्या॑। क॒वी इति॑। य॒ज्ञम्। नः॒। य॒क्ष॒ता॒म्। इ॒मम्॥७।

पदार्थः-(**प्रथमा**) आदिमौ विद्याबलविस्तारकौ (**हि**) यतः (**सुवाचसा**) शोभनं वाचो वचनं ययोस्तौ (**होतारा**) आदातारौ (**दैव्या**) देवेषु दिव्येषु बोधेषु कुशलौ (**कवी**) सकलविद्यावेत्तारावध्यापकोपदेशकौ (**यज्ञम्**) धनादिसङ्गमकम् (**नः**) अस्माकम् (**यक्षताम्**) सङ्गमयताम् (**इमम्**) प्रत्यक्षतया वर्त्तमानम्॥७॥

अन्वयः-हे मनुष्या! हि यतो होतारा दैव्या प्रथमा सुवाचसा कवी न इमं यज्ञं यक्षताम्॥७॥

भावार्थः-अत्र ये येषामुपकारं कुर्वन्ति तैस्ते सत्कर्त्तव्या भवन्ति॥७॥

पदार्थः-हे मनुष्यो! (**हि**) जिस कारण (**होतार**) ग्रहण कर्त्ता (**दैव्या**) दिव्य बोधों में कुशल (**प्रथमा**) प्रथम विद्या बल को बढानेवाले (**सुवाचसा**) सुन्दर जिनका वचन (**कवी**) जो सकल विद्या के वेत्ता अध्यापकोपदेशक जन हैं वे (**नः**) हमारे (**इमम्**) इस प्रत्यक्षता से वर्त्तमान (**यज्ञम्**) धनादि पदार्थों के मेल कराने वा व्यवहार का (**यक्षताम्**) सङ्ग करावें॥७॥

भावार्थः-इस संसार में जो जिनका उपकार करते हैं, वे उनको सत्कार करने योग्य होते हैं॥७॥

अथ स्त्रीपुरुषविषयमाह॥

अब स्त्रीपुरुष के विषय को अगले मन्त्र में कहा है॥

भार॒तीळे॒ सर॑स्वति॒ या व॒: सर्वा॑ उपब्रु॒वे। ता न॑श्चोदयत श्रि॒ये॥८॥

भार॑ति। इळे॑। सर॑स्वति। याः। व॒ः। सर्वाः॑। उ॒प॒ऽब्रु॒वे। ताः। न॒ः। चो॒द॒य॒त॒। श्रि॒ये॥८॥

पदार्थः- (**भारति**) सकलविद्याधारिके (**इळे**) प्रशस्ते (**सरस्वति**) प्रशस्तं सरो विज्ञानं गमनं वा विद्यते यस्यां तत्सम्बुद्धौ (**याः**) (**वः**) युष्मान् प्रति (**सर्वाः**) अखिला वाचः (**उपब्रुवे**) उपयोगि वच उपदिशेयम् (**ताः**) सर्वा विदुष्यः (**नः**) अस्मान् (**चोदयत**) (**श्रिये**) लक्ष्मीप्राप्तये॥८॥

अन्वयः-हे भारतीळे सरस्वति या वः सर्वा अहमुपब्रुवे ता यूयं नोऽस्मान् श्रिये चोदयत प्रेरयत॥८॥

भावार्थः-याः प्रशंसितसौन्दर्यशुभलक्षणलक्षिता अनवद्यशास्त्रविज्ञानरममाणाः कन्या भवेयुस्ताः पाणिग्राहान् पतीन् प्राप्य धर्मेण धनादिपदार्थानुन्नयेयुः॥८॥

पदार्थः-हे (**भारति**) समस्त विद्या के धारण करनेवाली वा (**इळे**) हे प्रशंसावती वा (**सरस्वति**) हे विज्ञान और उत्तम गतिवाली! (**याः**) जो (**वः**) तुम (**सर्वाः**) सभी को समीप में (**उपब्रुवे**) उपयोग करनेवाले वचन का उपदेश करूं (**ताः**) वे तुम (**नः**) हम लोगों को (**श्रिये**) लक्ष्मी प्राप्त होने के लिये (**चोदयत**) प्रेरणा देओ॥८॥

भावार्थः-जो प्रशंसित सौन्दर्य, उत्तम लक्षणों से युक्त देखी गई, श्रेष्ठतर शास्त्रविज्ञान में रमनेवाली कन्या हों, वे अपने पाणिग्रहण करनेवाले पतियों को पाकर धर्म से धनादि पदार्थों की उन्नति करें॥८॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

त्वष्टा॑ रू॒पाणि॒ हि प्र॒भुः प॒शून्विश्वा॑न्त्समान॒जे।
तेषां॑ नः स्फा॒तिमा य॑ज॥ ९॥

त्वष्टा॑। रू॒पाणि॑। हि। प्र॒ऽभुः। प॒शून्। विश्वा॑न्। स॒म्ऽआ॒न॒जे। तेषा॑म्। नः॒। स्फा॒तिम्। आ। य॒ज॒॥ ९॥

पदार्थः- (**त्वष्टा**) सर्वस्य जगतो निर्माता (**रूपाणि**) सर्वाणि विविधस्वरूपाणि स्थूलानि वस्तूनि (**हि**) खलु (**प्रभुः**) समर्थः (**पशून्**) गवादीन् (**विश्वान्**) सर्वान् (**समानजे**) व्यक्तीकरोति (**तेषाम्**) (**नः**) अस्माकम् (**स्फातिम्**) वृद्धिम् (**आ**) समन्तात् (**यज**) गमय॥९॥

अन्वयः-हे विद्वन्! यथा त्वष्टा प्रभुरीश्वरो हि विश्वान् पशून् रूपाणि च समानजे तेषां स्फातिं च समानजे तथा नः स्फातिमायज॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा जगदीश्वरेणातीन्द्रियादतिसूक्ष्मकारणाद्विचित्राणि सूर्यचन्द्रपृथिव्योषधिमनुष्यशरीराऽवयवादीनि निर्मितानि तथाऽस्याः सृष्टेर्गुणकर्मस्वभावक्रमेणानेकानि व्यवहारसाधकानि वस्तूनि निर्मातव्यानि॥९॥

पदार्थः-हे विद्वान्! जैसे (**त्वष्टा**) सब जगत् का निर्माण करनेवाला (**प्रभुः**) समर्थ ईश्वर (**हि**) ही (**विश्वान्**) समस्त (**पशून्**) गवादि पशुओं और (**रूपाणि**) समस्त विविध प्रकार से स्थूल वस्तुओं को (**समानजे**) अच्छे प्रकार प्रकट करता और (**तेषाम्**) उनकी (**स्फातिम्**) वृद्धि को प्रकट करता है, वैसे आप (**नः**) हमारी वृद्धि को (**आ, यज**) अच्छे प्रकार प्राप्त कीजिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जगदीश्वर ने इन्द्रियों से परे जो अतिसूक्ष्म कारण है, उससे चित्र-विचित्र सूर्य, चन्द्रमा, पृथिवी, ओषधि और मनुष्य के शरीरावयवादि वस्तु बनाई हैं, वैसे इस सृष्टि के गुण, कर्म और स्वभाव, क्रम से अनेक व्यवहार सिद्ध करनेवाली वस्तुयें बनानी चाहियें॥९॥

अथ दातृविषयमाह॥

अब देनेवाले के विषय को अगले मन्त्र में कहा है॥

उप॒ त्मन्या॑ वनस्पते॒ पाथो॑ दे॒वेभ्य॑ः सृज।
अ॒ग्निर्ह॒व्यानि॑ सिष्वदत्॥ १०॥

उप॑। त्मन्या॑। व॒न॒स्प॒ते॒। पाथ॑:। दे॒वेभ्य॑। सृ॒ज॒। अ॒ग्नि:। ह॒व्यानि॑। सि॒स्व॒द॒त्॥१०॥

पदार्थ:-**(उप) (त्मन्या)** आत्मनि साध्व्या क्रियया **(वनस्पते)** वनानां पालक **(पाथ:)** अन्नम् **(देवेभ्य:)** विद्वद्भ्यो दिव्यगुणेभ्यो वा **(सृज) (अग्नि:)** पावक: **(हव्यानि)** अत्तव्यानि **(सिष्वदत्)** स्वादूकरोति॥१०॥

अन्वय:-हे वनस्पते! त्मन्या तथाऽग्निर्देवेभ्यो हव्यानि सिष्वदत्तथा त्वं देवेभ्य पाथ उपसृज॥१०॥

भावार्थ:-अत्र वाचकलुप्तोपालङ्कार:। ये वनादिरक्षणेन तृणौषधीन् वर्द्धयन्ति, ते सर्वोपकारं कर्त्तुं योग्या जायन्ते॥१०॥

पदार्थ:-हे **(वनस्पते)** वनों के पालनेवाले! **(त्मन्या)** अपने बीच उत्तम क्रिया से जैसे **(अग्नि:)** अग्नि **(देवेभ्य:)** विद्वान् वा दिव्य गुणों के लिये **(हव्यानि)** भोजन करने योग्य पदार्थों को **(सिष्वदत्)** स्वादिष्ठ करता है, वैसे आप विद्वान् वा दिव्य गुणों के लिये **(पाथ:)** अन्न को **(उप, सृज)** उनके लिये देओ॥१०॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वनादिकों की रक्षा से घास, फूस और ओषधियों को बढ़ाते हैं, वे सबका उपकार करने योग्य होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पु॒रो॒गा अ॒ग्निर्दे॒वानां॑ गाय॒त्रेण॒ सम॑ज्यते। स्वाहा॑कृतीषु रोचते॥११॥९॥

पु॒र:ऽगा:। अ॒ग्नि:। दे॒वाना॑म्। गा॒य॒त्रेण॑। सम्। अ॒ज्य॒ते॒। स्वाहा॑ऽकृतीषु। रो॒च॒ते॒।११॥

पदार्थ:-**(पुरोगा:)** अग्रगामी **(अग्नि:)** पावक: **(देवानाम्)** दिव्यगुणानां पृथिव्यादीनां मध्ये **(गायत्रेण)** गायत्रीछन्दोऽभिहितेन बोधेन **(सम्) (अज्यते) (स्वाहाकृतीषु)** स्वाहया कृतय: क्रिया येषु व्यवहारेषु तेषु **(रोचते)** दीप्यते॥११॥

अन्वय:-ये परोपकारिणस्ते यथा देवानां पुरोगा अग्निर्गायत्रेण स्वाहाकृतीषु समज्यते रोचते च तथाऽग्र्या भूत्वा सर्वत्र सत्क्रियन्ते॥११॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यदि मनुष्या अग्निप्रधानान् दिव्यान् पदार्थान् व्यवहारसिद्धये सम्प्रयुञ्जीरन् तर्हि ते ऐश्वर्य्याढ्या भूत्वा मान्या जायन्त इति वेद्यम्॥११॥

अत्राग्न्यादिदृष्टान्तेन राजाऽध्यापकोपदेशकस्त्रीपुरुषेश्वरदातृगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टाशीत्युत्तरं शततमं १८८ सूक्तं नवमो ९ वर्गश्च समाप्त:॥

पदार्थः–जो परोपकारी जन हैं, वे जैसे **(देवानाम्)** दिव्य गुण वा पृथिव्यादिकों के बीच **(पुरोगाः)** अग्रगामी **(अग्निः)** अग्नि **(गायत्रेण)** गायत्री छन्द से कहे हुए बोध से **(स्वाहाकृतीषु)** स्वाहा शब्द से जिन व्यवहारों में क्रियायें होतीं, उनमें **(समज्यते)** प्रकट किया जाता और वह **(रोचते)** प्रदीप्त होता है, वैसे अग्रगामी होकर सर्वत्र सत्कार को प्राप्त होते हैं॥११॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यदि मनुष्य अग्नि प्रधान दिव्य पदार्थों को व्यवहारसिद्धि के लिये संयुक्त करें तो वे ऐश्वर्ययुक्त होकर माननीय होते हैं, यह समझना चाहिये॥११॥

इस सूक्त में अग्नि के दृष्टान्त से राजा, अध्यापक, उपदेशक, स्त्रीपुरुष, ईश्वर और देनेवाले के गुणों का वर्णन होने से इसके अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ अठासीवां १८८ सूक्त और नवमां ९ वर्ग समाप्त हुआ॥

अग्न इत्यष्टर्चस्य एकोननवत्युत्तरशततमस्य सूक्तस्य अगस्त्य ऋषिः। अग्निर्देवता। १,४,८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ भुरिक् पङ्क्तिः। ३,५,६ स्वराट् पङ्क्तिः। ७ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेश्वरगुणानाह॥

अब एक सौ नवासीवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में ईश्वर के गुणों का उपदेश करते हैं॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान्।
यु॒यो॒ध्य१॒॑स्मज्जु॑हु॒रा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑उक्तिं विधेम॥ १॥

अग्ने॑। नय॑। सु॒ऽपथा॑। रा॒ये। अ॒स्मान्। विश्वा॑नि। दे॒व॒। व॒युना॑नि। वि॒द्वान्। यु॒यो॒धि। अ॒स्मत्। जु॒हु॒रा॒णम्। एनः॑। भूयि॑ष्ठाम्। ते॒। नमः॑ऽउक्तिम्। वि॒धे॒म॒॥ १॥

पदार्थः-(**अग्ने**) स्वप्रकाशस्वरूपेश्वर (**नय**) प्रापय (**सुपथा**) धर्म्येण सुगमेन सरलेन मार्गेण (**राये**) ऐश्वर्यानन्दप्राप्तये (**अस्मान्**) मुमुक्षून् (**विश्वानि**) सर्वाणि चराचरजगत्कर्माणि च (**देव**) कमनीयानन्दप्रद (**वयुनानि**) प्रज्ञानानि (**विद्वान्**) यो वेत्ति (**युयोधि**) वियोजय (**अस्मत्**) (**जुहुराणम्**) कुटिलगतिजन्यम् (**एनः**) पापम् (**भूयिष्ठाम्**) अधिकाम् (**ते**) तव (**नमउक्तिम्**) नमसा सत्कारेण सह स्तुतिम् (**विधेम**) कुर्याम॥ १॥

अन्वयः-हे देवाऽग्ने विद्वाँस्त्वमस्मान् राये सुपथा विश्वानि वयुनानि नय। जुहुराणमेनोऽस्मद् युयोधि यतो वयं ते भूयिष्ठां नमउक्तिं विधेम॥ १॥

भावार्थः-मनुष्यैर्धर्मविज्ञानमार्गप्राप्तये अधर्मनिवृत्तये च परमेश्वरः सम्प्रार्थनीयः सदा सुमार्गेण गन्तव्यं दुष्पथादधर्ममार्गात्पृथक् स्थातव्यं यथा विद्वांसः परमेश्वरे परानुरक्तिं कुर्वन्ति तथेतरैश्च कार्या॥ १॥

पदार्थः-हे (**देव**) मनोहर आनन्द के देनेवाले (**अग्ने**) स्वप्रकाशस्वरूपेश्वर (**विद्वान्**) सकल शास्त्रवेत्ता! आप (**अस्मान्**) हम मुमुक्षु अर्थात् मोक्ष चाहते हुए जनों को (**राये**) धनादि प्राप्ति के लिये (**सुपथा**) धर्मयुक्त सरल मार्ग से (**विश्वानि**) समस्त (**वयुनानि**) उमत्त-उत्तम ज्ञानों को (**नय**) प्राप्त कराइये, (**जुहुराणम्**) खोटी चाल से उत्पन्न हुए (**एनः**) पाप को (**अस्मत्**) हम से (**युयोधि**) अलग करिये जिसमें हम (**ते**) आपकी (**भूयिष्ठाम्**) अधिकतर (**नमउक्तिम्**) सत्कार के साथ स्तुति का (**विधेम**) विधान करें॥ १॥

भावार्थः-मनुष्यों का धर्म तथा विज्ञान मार्ग की प्राप्ति और अधर्म की निवृत्ति के लिये परमेश्वर की अच्छे प्रकार प्रार्थना करनी चाहिये और सदा सुमार्ग से चलना चाहिये, दुःखरूपी अधर्म मार्ग से

अलग रहना चाहिये, जैसे विद्वान् लोग परमेश्वर में उत्तम अनुराग करते, वैसे अन्य लोगों को भी करना चाहिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान्त्स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा॑।
पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शं योः॥२॥

अग्ने॑। त्वम्। पा॒र॒य॒। नव्यः॑। अ॒स्मान्। स्व॒स्तिऽभिः॑। अति॑। दु॒ःऽगानि॑। विश्वा॑। पूः। च॒। पृ॒थ्वी। ब॒हु॒ला। नः॒। उ॒र्वी। भव॑। तो॒काय॑। तन॑याय। शम्। योः॥२॥

पदार्थः-(**अग्ने**) परमेश्वर (**त्वम्**) (**पारय**) दुःखाचारात् पृथक्कृत्वा श्रेष्ठाचारं नय। अत्रा**ऽन्येषामपी**ति दीर्घः। (**नव्यः**) नव एव नव्यः (**अस्मान्**) (**स्वस्तिभिः**) सुखैः (**अति**) (**दुर्गाणि**) दुःखेन गन्तुं योग्यानि (**विश्वा**) सर्वाणि (**पूः**) पुररूपा (**च**) (**पृथ्वी**) भूमिः (**बहुला**) या बहून् पदार्थान् लाति सा (**नः**) अस्माकम् (**उर्वी**) विस्तीर्णा (**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**तोकाय**) अतिबालकाय (**तनयाय**) कुमाराय (**शम्**) सुखम् (**योः**) प्रापकः॥२॥

अन्वयः-हे अग्ने! त्वं स्वस्तिभिरस्मान् विश्वानि दुर्गाणि पारय यथा नव्यो पूर्बहुला उर्वी पृथ्वी चाऽस्ति तथा नोऽस्माकं तोकाय तनयाय शं योर्भव॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा परमेश्वरः पुण्यात्मनो दुष्टाचारात् पृथग् रक्षति पृथिवीवत् पालयति तथा विद्वान् सुशिक्षया सुकर्मिणो दुष्टाचारात् पृथक् कृत्वा सुव्यवहारेण रक्षति॥२॥

पदार्थः-हे (**अग्ने**) परमेश्वर! (**त्वम्**) आप (**स्वस्तिभिः**) सुखों से (**अस्मान्**) हम लोगों को (**विश्वा**) समस्त (**अति, दुर्गाणि**) अत्यन्त दुर्ग के व्यवहारों (**पारय**) पार कीजिये। जैसे (**नव्यः**) नवीन विद्वान् और (**पूः**) पुररूप (**बहुला**) बहुत पदार्थों को लेनेवाली (**उर्वी**) विस्तृत (**पृथ्वी, च**) भूमि भी है, वैसे (**नः**) हमारे (**तोकाय**) अत्यन्त छोटे और (**तनयाय**) कुछ बड़े बालक के लिये (**शं, योः**) सुख को प्राप्त करानेवाले (**भव**) हूजिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे परमेश्वर पुण्यात्मा जनों को दुष्ट आचार से अलग रखता और पृथिवी के समान पालना करता है, वैसे विद्वान् जन सुन्दर शिक्षा से उत्तम कर्म करनेवालों को दुष्ट आचरण से अलग कर सुन्दर व्यवहार से रक्षा करता है॥२॥

अथेश्वरदृष्टान्तेन विद्वद्गुणानाह॥

अब ईश्वर के दृष्टान्त से विद्वानों के गुणों को अगले मन्त्र में कहा है॥

अग्ने॒ त्वम॒स्मद्यु॑यो॒ध्यमी॑वा॒ अना॑ग्नित्रा अ॒भ्यम॑न्त कृ॒ष्टीः।

पुनर॑स्मभ्यं॑ सुवि॒ताय॑ देव॒ क्षां विश्वे॑भि॒रमृते॑भिर्यजत्र॥ ३॥

अग्ने॑। त्वम्। अ॒स्मत्। यु॒यो॒धि॒। अमी॑वाः। अन॑ग्निऽत्राः। अ॒भि। अम॑न्त। कृ॒ष्टीः। पुनः॑। अ॒स्मभ्य॑म्। सु॒वि॒ताय॑। दे॒व॒। क्षाम्। विश्वे॑भिः। अ॒मृते॑भिः। य॒ज॒त्र॒॥ ३॥

पदार्थः-(**अग्ने**) ईश्वर इव विद्वन् (**त्वम्**) (**अस्मत्**) (**युयोधि**) पृथक् कुरु (**अमीवाः**) रोगाः (**अनग्नित्राः**) अविद्यमानज्वरेण रक्षकाः (**अभ्यमन्त**) अभितो रुजन्ति (**कृष्टीः**) मनुष्यान् (**पुनः**) (**अस्मभ्यम्**) (**सुविताय**) ऐश्वर्यप्राप्तये (**देव**) कामयमान (**क्षाम्**) भूमिं भूमिराज्यमात्रं वा (**विश्वेभिः**) सर्वैः (**अमृतेभिः**) अमृतात्मकैरोषधैः (**यजत्र**) सङ्गच्छमान॥ ३॥

अन्वयः-हे यजत्र देवाग्ने वैद्यस्त्वं येऽनग्नित्रा अमीवा रोगाः कृष्टीरभ्यमन्त तानस्मद् युयोधि पुनर्विश्वेभिरमृतेभिरस्मभ्यं सुविताय क्षां भूराज्यं प्राप्नय॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरो वेदद्वाराऽविद्यारोगाज्जनान् पृथक् करोति, तथा सद्वैद्या मनुष्यान् रोगेभ्यो निवर्त्त्य अमृतात्मकैरौषधैर्वर्द्धयित्वैश्वर्यं प्रापयन्ति॥ ३॥

पदार्थः-हे (**यजत्र**) सङ्ग करते हुए (**देव**) कामना करनेवाले (**अग्ने**) ईश्वर के समान विद्वान् वैद्य जन! (**त्वम्**) आप जो (**अनग्नित्राः**) ऐसे हैं कि यदि उनके साथ ज्वर न विद्यमान हो तो अविद्यमान ज्वर से शरीर की रक्षा करनेवाले हैं, वे (**अमीवाः**) रोग (**कृष्टीः**) मनुष्यों को (**अभ्यमन्त**) सब ओर से रुग्ण करते कष्ट देते हैं, उनको (**अस्मत्**) हम लोगों से (**युयोधि**) अलग कर (**पुनः**) फिर (**विश्वेभिः**) समस्त (**अमृतेभिः**) अमृतरूप ओषधियों से (**अस्मभ्यम्**) हम लोगों के लिये (**सुविताय**) ऐश्वर्य प्राप्त होने के लिये (**क्षाम्**) भूमि के राज्य को प्राप्त कीजिये॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर वेदद्वारा अविद्यारूपी रोग से मनुष्यों को अलग करता है, वैसे अच्छे वैद्य मनुष्यों को रोगों से निवृत्त कर अमृतरूपी ओषधियों से बड़ा कर ऐश्वर्य की प्राप्ति कराते हैं॥ ३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

पा॒हि नो॑ अग्ने पा॒युभि॒रज॑स्रैरु॒त प्रि॒ये सद॑न॒ आ शु॑शु॒क्वान्।
मा ते॑ भ॒यं ज॑रि॒तारं॑ यविष्ठ नू॒नं वि॑दु॒न्मापु॑रं स॒हस्वः॥ ४॥

पा॒हि। नः॑। अ॒ग्ने॒। पा॒युभिः॑। अज॑स्रैः। उ॒त। प्रि॒ये। सद॑ने। आ। शु॒शु॒क्वान्। मा। ते॒। भ॒यम्। ज॒रि॒तार॑म्। य॒वि॒ष्ठ॒। नू॒नम्। वि॒दु॒त्। मा। अ॒पर॑म्। स॒हः॒ऽव॒॥ ४॥

पदार्थः- (**पाहि**) (**नः**) अस्मान् (**अग्ने**) अग्निवद्विद्वन् (**पायुभिः**) रक्षणोपायैः (**अजस्रैः**) निरन्तरैः (**उत**) (**प्रिये**) कमनीये (**सदने**) स्थाने (**आ**) (**शुशुक्वान्**) विद्याविनयाभ्यां प्रकाशितः (**मा**) (**ते**)

तव **(भयम्)** **(जरितारम्)** **(यविष्ठ)** अतिशयेन युवन् **(नूनम्)** निश्चितम् **(विदत्)** विद्यात् प्राप्नुयात् **(मा)** **(अपरम्)** अन्यम् **(सहस्वः)** सोढुं शील॥४॥

अन्वयः–हे अग्ने शुशुक्वाँस्त्वमजस्रैः पायुभिः प्रिये सदन उत शरीरे बहिर्वा नोऽस्माना पाहि। हे यविष्ठ सहस्वस्ते जरितारं भयं मा विदन्नूनमपरं भयं माप्नुयात्॥४॥

भावार्थः–त एव प्रशंसनीया जना ये सततं प्राणिनो रक्षन्ति, कस्मादपि भयं नैर्बल्यञ्च न कुर्वन्ति॥४॥

पदार्थः–हे **(अग्ने)** अग्नि के समान विद्वान्! **(शुशुक्वान्)** विद्या और विनय से प्रकाश को प्राप्त **(अजस्रैः)** निरन्तर **(पायुभिः)** रक्षा के उपायों से **(प्रिये)** मनोहर **(सदने)** स्थान **(उत)** वा शरीर में वा बाहर **(नः)** हम लोगों को **(आ, पाहि)** अच्छे प्रकार पालिये, जिससे हे **(यविष्ठ)** अत्यन्त युवावस्थावाले **(सहस्वः)** सहनशील विद्वन्! **(ते)** आपकी **(जरितारम्)** स्तुति करनेवाले को **(भयम्)** भय **(मा)** मत **(विदत्)** प्राप्त होवे **(नूनम्)** निश्चय कर **(अपरम्)** और को भय **(मा)** मत प्राप्त होवे॥४॥

भावार्थः–वे ही प्रशंसनीय जन हैं, जो निरन्तर प्राणियों की रक्षा करते हैं और किसी के लिये भय वा निर्बलता को नहीं प्रकाशित करते हैं॥४॥

अथ शासकविषयमाह॥

अब शिक्षा देनेवाले के विषय को अगले मन्त्र में कहा है॥

मा नो॑ अ॒ग्नेऽव॑ सृजो अ॒घाया॑वि॒ष्यवे॑ रि॒पवे॑ दु॒च्छुना॑यै।
मा द॒त्वते॒ दश॑ते॒ मादते॑ नो॒ मा रीष॑ते सहसाव॒न्परा॑ दाः॥५॥१०॥

मा। नः। अ॒ग्ने॒। अव॑। सृ॒जः॒। अ॒घाय॑। अ॒वि॒ष्यवे॑। रि॒पवे॑। दु॒च्छुना॑यै। मा। द॒त्वते॑। दश॑ते। मा। अ॒दते॑। नः॒। मा। रिष॑ते। स॒ह॒सा॒ऽव॒न्। परा॑। दाः॒॥५॥

पदार्थः–**(मा)** **(नः)** अस्मान् **(अग्ने)** विद्वन् **(अव)** **(सृजः)** संयोजयेः **(अघाय)** पापाय **(अविष्यवे)** धर्ममव्याप्नुवते **(रिपवे)** शत्रवे **(दुच्छनायै)** दुष्टं शुनं गमनं यस्यास्तस्यै। अत्र **शुनगताविति**यस्माद् **घञर्थे क** इति कः। **(मा)** **(दत्वते)** दन्तवते **(दशते)** दंशकाय **(मा)** **(अदते)** **(नः)** अस्मान् **(मा)** **(रिषते)** हिंसकाय। अत्रा**ऽन्येषामपी**त्याद्यचो दैर्घ्यम्। **(सहसावन्)** बहु सहो बलं सहनं वा विद्यते यस्य तत्सम्बुद्धौ **(पराः)** **(दाः)** दूरीकुर्याः॥५॥

अन्वयः–हे अग्ने! त्वं नोऽघायाविष्यवे रिपवे दुच्छनायै च मावसृजः। हे सहसावन्! दत्वते दशते मादते मा रिषते च नो मा परा दाः॥५॥

भावार्थः–मनुष्यैर्विद्वद्राजाऽध्यापकोपदेशकान् प्रत्येवं प्रार्थनीयमस्मान् दुर्व्यसनाय दुष्टसङ्गाय मा प्रेरयत, किन्तु सदैव श्रेष्ठाचारधर्ममार्गसत्सङ्गेषु संयोजयतेति॥५॥

पदार्थः-हे **(अग्ने)** विद्वान्! आप **(नः)** हम लोगों को **(अघाय)** पापी जन के लिये **(अविष्यवे)** वा जो धर्म को नहीं व्याप्त उस **(रिपवे)** शत्रुजन अथवा **(दुच्छुनायै)** दुष्ट चाल जिसकी उनके लिये **(मावसृजः)** मत मिलाइये। हे **(सहसावान्)** बहुत बल वा बहुत सहनशीलतायुक्त विद्वान्! **(दत्वते)** दातोंवाले और **(दशते)** दाढ़ों से विदीर्ण करनेवाले के **(मा)** मत तथा **(अदते)** विना दातोंवाले दुष्ट के लिये **(मा)** मत और **(रिषते)** हिंसा करनेवाले के लिये **(नः)** हम लोगों को **(मा, परा, दाः)** मत दूर कीजिये अर्थात् मत अलग कर उनको दीजिये॥५॥

भावार्थः-मनुष्यों को विद्वान्, राजा, अध्यापक और उपदेशकों के प्रति ऐसी प्रार्थना करनी चाहिये कि हम लोगों को दुष्ट स्वभाव और दुष्ट सङ्गवाले को मत पहुंचाओ, किन्तु सदैव श्रेष्ठाचार धर्ममार्ग और सत्सङ्गों में संयुक्त करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वि घ त्वावाँ ऋतजात यंसद् गृणानो अग्ने तन्वे३ वरुथम्।
विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट्॥६॥

वि। घ। त्वाऽवान्। ऋतऽजात। यंसत्। गृणानः। अग्ने। तन्वे। वरूथम्। विश्वात्। रिरिक्षोः। उत। वा। निनित्सोः। अभिऽह्रुताम्। असि। हि। देव। विष्पट्॥६॥

पदार्थः-(**वि**) विशेषेण **(घ)** एव **(त्वावान्)** त्वया सदृशः **(ऋतजात)** सत्याचारे प्राप्तप्रसिद्धे **(यंसत्)** यच्छेत् **(गृणानः)** स्तुवन् **(अग्ने)** विद्युदिव वर्त्तमान विद्वन् **(तन्वे)** शरीराय **(वरूथम्)** स्वीकर्त्तुमर्हम् **(विश्वात्)** समग्रात् **(रिरिक्षोः)** हिंसितुमिच्छोः **(उत)** अपि **(वा)** **(निनित्सोः)** निन्दितुमिच्छोः **(अभिह्रुताम्)** सर्वतः कुटिलाचरणानाम् **(असि)** **(हि)** **(देव)** जिगीषो **(विष्पट्)** यो विषो व्याप्नुवतः पटति प्राप्नोति सः॥६॥

अन्वयः-हे ऋतजात देवाग्ने! त्वावान् गृणानो विद्वान् तन्वे वरुथं घ वि यंसत् यो विष्पट् त्वं विश्वाद्रिरिक्षोरुत वा निनित्सोः पृथग्वि यंसत्तस्माद्धि त्वमभिह्रुतां शासिताऽसि॥६॥

भावार्थः-ये गुणदोषवेत्तारः सत्याचरणाः सर्वेभ्यो हिंसकनिन्दककुटिलेभ्यो जनेभ्यः पृथक् वसन्ति, ते सर्वं भद्रमाप्नुवन्ति॥६॥

पदार्थः-हे **(ऋतजात)** सत्य आचार में प्रसिद्धि पाये हुए **(देव)** विजय चाहनेवाले **(अग्ने)** बिजुली के तुल्य चञ्चल तापयुक्त! **(त्वावान्)** तुम्हारे सदृश **(गृणानः)** स्तुति करता हुआ विद्वान् **(तन्वे)** शरीर के लिये **(वरूथम्)** स्वीकार करने के योग्य **(घ)** ही पदार्थ को **(वियंसत्)** देवे। जो **(विष्पट्)** व्याप्तिमानों को प्राप्त होते आप **(विश्वात्)** समस्त **(रिरिक्षोः)** हिंसा करना चाहते हुए **(उत, वा)** अथवा

(**निनित्सोः**) निन्दा करना चाहते हुए से अलग देवें (**हि**) इसी से आप (**अभिह्रुताम्**) सब ओर से कुटिल आचरण करनेवालों को शिक्षा देनेवाले (**असि**) होते हैं॥६॥

भावार्थः–जो गुण दोषों के जाननेवाले सत्याचरणवान् जन समस्त हिंसक, निन्दक और कुटिल जनों से अलग रहते हैं, वे समस्त कल्याण को प्राप्त होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं ताँ अ॑ग्न उ॒भया॒न्वि वि॒द्वान् वेषि॑ प्रप्रि॒त्वे मनु॑षो यजत्र।
अ॒भिप्रि॒त्वे मन॑वे॒ शास्यो॑ भूर्मर्मृ॒जेन्य॑ उ॒शिग्भि॒र्नाक्रः॥७॥

त्वम्। तान्। अ॒ग्ने॒। उ॒भया॑न्। वि। वि॒द्वान्। वेषि॑। प्र॒ऽप्रि॒त्वे। मनु॑षः। य॒ज॒त्र॒। अ॒भि॒ऽप्रि॒त्वे। मन॑वे। शास्यः॑। भूः। म॒र्मृ॒जेन्यः॑। उ॒शिक्ऽभिः॑। न। अ॒क्रः॥७॥

पदार्थः– (**त्वम्**) (**तान्**) (**अग्ने**) दुष्टप्रशासकविद्वन् (**उभयान्**) कुटिलान् निन्दकान् हिंसकान् वा (**वि**) विद्वान् (**वेषि**) प्राप्नोषि (**प्रपित्वे**) प्रकर्षेण प्राप्ते समये (**मनुषः**) मनुष्यान् (**यजत्र**) पूजनीय (**अभिपित्वे**) अभितः प्राप्ते (**मनवे**) मननशीलाय मनुष्याय (**शास्यः**) शसितुं योग्यः (**भूः**) भवेः (**मर्मृजेन्यः**) अत्यन्तमलंकरणीयः (**उशिग्भिः**) कामयमानैर्जनैः (**न**) निषेधे (**अक्रः**) दुष्टान् क्राम्यति॥७॥

अन्वयः–हे यजत्राऽग्ने विद्वान्! यस्त्वं तानुभयान् मनुषः प्रपित्वे विवेषि सोऽभिपित्वे मनवे शास्यो भूरुशिग्भिर्मर्मृजेन्यो भवान् नाक्रः॥७॥

भावार्थः–अत्रोपमालङ्कारः। ये विद्वांसो मनुष्या यावच्छक्यं तावद्धिंसकान् क्रूरान् जुगुप्सकान् स्वबलेनाभिमर्द्य निवर्त्य सत्यं कामयमानान् हर्षयन्ति, ते शासितारो भूत्वा शुद्धा जायन्ते॥७॥

पदार्थः–हे (**यजत्र**) सत्कार करने योग्य (**अग्ने**) दुष्टों को शिक्षा देनेवाले (**विद्वान्**) विद्वान् जन! जो (**त्वम्**) आप (**तान्**) उन (**उभयान्**) दोनों प्रकार के कुटिल निन्दक वा हिंसक (**मनुषः**) मनुष्यों को (**प्रपित्वे**) उत्तमता से प्राप्त समय में (**वि, वेषि**) प्राप्त होते वह आप (**अभिपित्वे**) सब ओर से प्राप्त व्यवहार में (**मनवे**) विचारशील मनुष्य के लिये (**शास्यः**) शिक्षा करने योग्य (**भूः**) हूजिये और (**उशिग्भिः**) कामना करते हुए जनों से (**मर्मृजेन्यः**) अत्यन्त शोभा करने योग्य आप (**नाक्रः**) दुष्टों को उल्लंघते नहीं, छोड़ते नहीं अर्थात् उनकी दुष्टता को निवारण कर उन्हें शिक्षा देते हैं॥७॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन जितना हो सके उतना हिंसक, क्रूर और निन्दक जनों को अपने बल से सब ओर से मींजमांज उनका बल नष्ट कर सत्य की कामना करनेवालों को हर्ष दिलाते हैं, वे शिक्षादेनेवाले होकर शुद्ध होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अवोचाम निवचनान्यस्मिन् मानस्य सूनुः सहसाने अग्नौ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम्॥८॥११॥

अवोचाम। निऽवचनानि। अस्मिन्। मानस्य। सूनुः। सहसाने। अग्नौ। वयम्। सहस्रम्। ऋषिऽभिः। सनेम। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥८॥

पदार्थः- (**अवोचाम**) उपदिशेम (**निवचनानि**) परीक्षया निश्चितानि धर्म्यवचांसि (**अस्मिन्**) (**मानस्य**) विज्ञानवतो जनस्य (**सूनुः**) (**सहसाने**) सहमाने (**अग्नौ**) पावक इव विदुषी (**वयम्**) (**सहस्रम्**) असङ्ख्यम् (**ऋषिभिः**) वेदार्थविद्भिः सह (**सनेम**) संभजेम (**विद्याम**) (**इषम्**) (**वृजनम्**) (**जीरदानुम्**)॥८॥

अन्वयः-हे मनुष्या! यो मानस्य सूनुस्तमस्मिन् सहसानेऽग्नौ निवचनानि यथा वयमवोचाम ऋषिभिः सहस्रं सनेम इषं वृजनं जीरदानुं च विद्याम तथा यूयमप्याचरत॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाप्ताः शान्ता उपदेष्टारः श्रोतृभ्यः सत्यान्युपदिश्य सुखिनः कुर्वन्ति तैः सहान्ये विद्वांसो जायन्ते तथोपदिश्य श्रुत्वा विद्यावृद्धिं सर्वे कुर्वन्तु॥८॥

अस्मिन् सूक्ते परमेश्वरविद्वच्छासकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकोननवत्युत्तरं शततमं १८९ सूक्तमेकादशो ११ वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो (**मानस्य**) विज्ञानवान् जन का (**सूनुः**) सन्तान है, उसके प्रति (**अस्मिन्**) इस (**सहसाने**) सहन करते हुए (**अग्नौ**) अग्नि के समान विद्वान् के निमित्त (**निवचनानि**) परीक्षा से निश्चित किये वचनों को जैसे (**वयम्**) हम लोग (**अवोचाम**) उपदेश करें वा (**ऋषिभिः**) वेदार्थ के जाननेवालों से (**सहस्रम्**) असंख्य सुख का (**सनेम**) सेवन करें वा (**इषम्**) इच्छासिद्धि (**वृजनम्**) बल और (**जीरदानुम्**) जीवन को (**विद्याम**) प्राप्त होवें, वैसा तुम भी आचरण करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे आप्त, शान्त, उपदेश करनेवाले विद्वान् जन श्रोताजनों के लिये सत्य वस्तुओं का उपदेश दे सुखी करते हैं, उनके साथ और विद्वान् होते हैं, वैसे उपदेश दे दूसरे का श्रवण कर विद्यावृद्धि सब करें॥८॥

इस सूक्त में परमेश्वर, विद्वान् और शिक्षा देनेवाले के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह एक सौ नवासीवां १८९ सूक्त और ग्यारहवां ११ वर्ग समाप्त हुआ॥

अनर्वाणमित्यष्टर्चस्य नवत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। बृहस्पतिर्देवता। १-३ निचृत् त्रिष्टुप्। ४,८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५-७ स्वराट् पङ्क्तिश्छन्दः। धैवतः स्वरः॥

अथ विदुषां गुणकर्मस्वभावानाह॥

अब एक सौ नव्वे सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुण, कर्म, स्वभावों का वर्णन करते हैं॥

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः॥ १॥

अनर्वाणम्। वृषभम्। मन्द्रऽजिह्वम्। बृहस्पतिम्। वर्धय। नव्यम्। अर्कैः। गाथान्यः। सुऽरुचः। यस्य। देवाः। आऽशृण्वन्ति। नवमानस्य। मर्ताः॥ १॥

पदार्थः- (**अनर्वाणम्**) अविद्यमानाश्वं पदातिम् (**वृषभम्**) श्रेष्ठम् (**मन्द्रजिह्वम्**) मन्द्रा मोदकारिणी जिह्वा यस्य तम् (**बृहस्पतिम्**) बृहतः शास्त्रबोधस्य पालकमतिथिम् (**वर्द्धय**) उन्नय। अत्राऽन्येषामपीति दीर्घः। (**नव्यम्**) नवेषु विद्वत्सु प्रतिष्ठितम् (**अर्कैः**) अन्नादिभिः। अत्र बहुवचनं सूपाद्यूपलक्षणार्थम्। (**गाथान्यः**) यो गाथां नयति तस्य (**सुरुचः**) शोभने धर्म्ये कर्मणि रुक् प्रीतिर्यस्य (**यस्य**) (**देवाः**) दातारः (**आशृण्वन्ति**) समन्तात् प्रशंसां कुर्वन्ति (**नवमानस्य**) स्तोतुमर्हस्य (**मर्त्ताः**) मनुष्याः॥१॥

अन्वयः-हे विद्वन् गृहस्थ! देवा मर्त्ता यस्य नवमानस्य सुरुचो गाथान्यः प्रशंसामाशृण्वन्ति तमनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं नव्यमतिथिमर्कैस्त्वं वर्द्धय॥१॥

भावार्थः-ये गृहस्थाः प्रशंसिनां धार्मिकाणां विदुषामतिथीनां प्रशंसां शृणुयुस्तान् दूरादप्याहूय सम्प्रीत्या अन्नपानवस्त्रधनादिभिः सत्कृत्य सङ्गत्य विद्योन्नत्या शरीरात्मबलं वर्द्धयित्वा न्यायेन सर्वान् सुखेन सह संयोजयेयुः॥१॥

पदार्थः-हे विद्वान् गृहस्थ! (**देवाः**) देनेवाले (**मर्त्ताः**) मनुष्य (**यस्य**) जिस (**नवमानस्य**) स्तुति करने योग्य (**सुरुचः**) सुन्दर धर्मयुक्त काम में प्रीति रखनेवाले (**गाथान्यः**) धर्मोपदेशों की प्राप्ति करने अर्थात् औरों के प्रति कहनेवाले सज्जन की प्रशंसा (**आ, शृण्वन्ति**) सब ओर से करते हैं, उस (**अनर्वाणम्**) अनर्वा अर्थात् अश्व की सवारी न रखने, किन्तु पैरों से देश-देश घूमनेवाले (**वृषभम्**) श्रेष्ठ (**मन्द्रजिह्वम्**) हर्ष करनेवाली जिह्वा जिसकी उस (**बृहस्पतिम्**) अत्यन्त शास्त्रबोध की पालना करनेवाले (**नव्यम्**) नवीन विद्वानों की प्रतिष्ठा को प्राप्त अतिथि को (**अर्कैः**) अन्न, रोटी, दाल, भात आदि उत्तम उत्तम पदार्थों से उसको (**वर्द्धय**) बढ़ाओ, उन्नति देओ, उसकी सेवा करो॥१॥

भावार्थः-जो गृहस्थ प्रशंसा करनेवाले धार्मिक विद्वान् वा अतिथि संन्यासी अभ्यागत आदि सज्जनों की प्रशंसा सुनें, उन्हें दूर से भी बुलाकर अच्छी प्रीति अन्न, पान, वस्त्र और धनादिक पदार्थों से

सत्कार कर उनसे सङ्ग कर विद्या की उन्नति से शरीर आत्मा के बल को बढ़ावा न्याय से सभी को सुख के साथ संयोग करावें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि।
बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा॥ २॥

तम्। ऋत्वियाः। उप। वाचः। सचन्ते। सर्गः। न। यः। देवऽयताम्। असर्जि। बृहस्पतिः। सः। हि। अञ्जः। वरांसि। विऽभ्वा। अभवत्। सम्। ऋते। मातरिश्वा॥ २॥

पदार्थः- **(तम्)** **(ऋत्वियाः)** या ऋतुमर्हन्ति ताः **(उप)** **(वाचः)** विद्याशिक्षायुक्ता वाणीः **(सचन्ते)** समवयन्ति **(सर्गः)** सृष्टिः **(न)** इव **(यः)** **(देवयताम्)** आत्मनो देवान् विदुषः कुर्वताम् **(असर्जि)** सृज्यते **(बृहस्पतिः)** बृहत्या वेदवाचः पालयिता **(सः)** **(हि)** **(अञ्जः)** सर्वैः कमनीयः **(वरांसि)** वराणि **(विभ्वा)** विभुना व्यापकेन **(अभवत्)** भवेत् **(सम्)** **(ऋते)** सत्ये **(मातरिश्वा)** वायुरिव॥ २॥

अन्वयः-यो मातरिश्वेव ऋतेऽञ्जो बृहस्पतिर्विभ्वा सृष्टः समभवत् यो वरांसि कृतवान् स्यात्, स हि देवयतामसर्जि तमृत्विया वाचः सर्गो नोप सचन्ते॥ २॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथोदकं निम्नमार्गेण गत्वा निम्नस्थले स्थिरं भवति तथा यं विद्याशिक्षे आप्नुतस्सोऽभिमानं विहाय नम्रो भूत्वा विद्याशयोऽस्तूचितवक्ता प्रसिद्धश्च स्यात्। यथा सर्वत्र व्यापकेनेश्वरेण यथायोग्यं विविधं जगन्निर्मितं तथा विद्वत्सेवको विश्वकर्मा स्यात्॥ २॥

पदार्थः- **(यः)** जो **(मातरिश्वा)** पवन के समान **(ऋते)** सत्य व्यवहार में **(अञ्जः)** सभी को कामना करने योग्य **(बृहस्पतिः)** अनन्त वेदवाणी का पालनेवाला **(विभ्वा)** व्यापक परमात्मा ने बनाया हुआ **(समभवत्)** अच्छे प्रकार हो और जो **(वरांसि)** उत्तम कर्मों को करने वाला हो **(सः, हि)** वही **(देवयताम्)** अपने को विद्वान् करते हुओं के बीच **(असर्जि)** सिद्ध किया जाता है **(तम्)** उसका **(ऋत्वियाः)** जो ऋतु समय के योग्य होती वे **(वाचः)** विद्या सुशिक्षायुक्त वाणी **(सर्गः)** संसार के **(न)** समान ही **(उप, सचन्ते)** सम्बन्ध करती हैं॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे जल नीचे मार्ग से जाकर गढ़ेले में ठहरता, वैसे जिसको विद्या शिक्षा प्राप्त होती हैं, वह अभिमान छोड़ के नम्र हो विद्याशय और उचित कहनेवाला प्रसिद्ध हो, जैसे सर्वत्र व्याप्त ईश्वर ने यथायोग्य विविध प्रकार का जगत् बनाया, वैसे विद्वानों की सेवा करनेवाला समस्त काम करनेवाला हो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उप॑स्तुतिं॒ नम॑स॒ उद्य॑तिं च॒ श्लोकं॑ यंसत्सवि॒तेव॒ प्र बा॒हू।
अ॒स्य क्रत्वा॑ह॒न्यो३॑ यो अस्ति॑ मृ॒गो न भी॒मो अ॑र॒क्षस॒स्तुवि॑ष्मान्॥ ३॥

उप॑ऽस्तुतिम्। नम॑सः। उत्ऽय॑तिम्। च॒। श्लोक॑म्। यं॒स॒त्। स॒वि॒ताऽइ॑व। प्र। बा॒हू इति॑। अ॒स्य। क्रत्वा॑। अ॒ह॒न्यः। यः। अस्ति॑। मृ॒गः। न। भी॒मः। अ॒र॒क्षस॑ः। तुवि॑ष्मान्॥ ३॥

पदार्थः- (**उपस्तुतिम्**) उपगतां प्रशंसाम् (**नमसः**) नम्रस्य (**उद्यतिम्**) उद्यमम् (**च**) (**श्लोकम्**) सत्यां वाणीम् (**यंसत्**) प्रेरयेत् (**सवितेव**) यथा भूगोलान् सूर्यः (**प्र**) (**बाहू**) भुजौ (**अस्य**) (**क्रत्वा**) प्रज्ञया (**अहन्यः**) अहनि भवः (**यः**) (**अस्ति**) (**मृगः**) सिंहः (**न**) इव (**भीमः**) भयङ्करः (**अरक्षसः**) कुटिलस्योत्तमस्य (**तुविष्मान्**) तुविषो बहवो बलवन्तो वीरा विद्यन्ते यस्य सः॥ ३॥

अन्वयः-यो नमस उपस्तुतिमुद्यतिं श्लोकं सवितेव बाहू च प्रयंसत्। अस्यारक्षसः क्रत्वा सह योऽहन्योऽस्ति, स मृगो न भीमस्तुविष्मान् भवति॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यस्य सूर्यप्रकाशवद्विद्याकीर्त्युद्यमप्रज्ञाबलानि स्युः, स सत्यवाक् सर्वैः सेवनीयः॥ ३॥

पदार्थः- (**यः**) जो (**नमसः**) नम्रजन की (**उपस्तुतिम्**) प्राप्त हुई प्रशंसा (**उद्यतिम्**) उद्यम और (**श्लोकम्**) सत्य वाणी को तथा (**सवितेव**) सूर्य से जल जैसे भूगोलों को वैसे (**बाहू, च**) अपनी भुजाओं को भी (**प्रयंसत्**) प्रेरणा देवे, (**अस्य**) इस (**अरक्षसः**) श्रेष्ठ पुरुष की (**क्रत्वा**) उत्तम बुद्धि के साथ जो (**अहन्यः**) दिन में प्रसिद्ध (**अस्ति**) है, वह (**मृगः**) सिंह के (**नः**) समान वीर (**भीमः**) भयङ्कर (**तुविष्मान्**) बहुत जिसके बलवान् वीर पुरुष विद्यमान हों, ऐसा होता है॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिसके सूर्यप्रकाश के तुल्य विद्या, कीर्ति, उद्यम, प्रज्ञा और बल हों, वह सत्य वाणीवाला सबको सत्कार करने योग्य है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒स्य श्लोको॑ दि॒वीय॑ते पृथि॒व्यामत्यो॒ न यं॑सद्यक्ष॒भृद्विचे॑ताः।
मृ॒गाणां॑ न हे॒तयो॒ यन्ति॑ चे॒मा बृह॒स्पते॒रहि॑मायाँ अ॒भि द्यून्॥ ४॥

अ॒स्य। श्लोक॑ः। दि॒वि। ई॒य॒ते। पृ॒थि॒व्याम्। अत्यः॑। न। यं॒स॒त्। य॒क्ष॒ऽभृत्। विऽचे॑ताः। मृ॒गाणा॑म्। न। हे॒तयः॑। यन्ति॑। च॒। इ॒माः। बृह॒स्पतेः॑। अहि॑ऽमायान्। अ॒भि। द्यून्॥ ४॥

पदार्थः- **(अस्य)** विदुषः **(श्लोकः)** वाणी **(दिवि)** दिव्ये व्यवहारे **(ईयते)** गच्छति **(पृथिव्याम्)** भूमौ **(अत्यः)** अश्वः **(न)** इव **(यंसत्)** यच्छेत् **(यक्षभृत्)** यक्षान् पूज्यान् विदुषो बिभर्त्ति सः **(विचेताः)** विविधाश्चेताः प्रज्ञा यस्य। **चेत इति प्रज्ञानामसु पठितम्।** (निघं०३.९) **(मृगाणाम्)** **(न)** इव **(हेतयः)** गतयः **(यन्ति)** गच्छन्ति **(च)** **(इमाः)** **(बृहस्पतेः)** परमविदुषः **(अहिमायान्)** अहेर्मेघस्य माया इव माया प्रज्ञा येषां तान् **(अभि, द्यून्)** अभितो वर्त्तमानान् दिवसान्॥४॥

अन्वयः-हे मनुष्या! अस्याप्तस्य श्लोकः पृथिव्यामत्यो न दिवीयते, तथा यक्षभृद्विचेता विद्वान् मृगाणां हेतयो न यंसत् याश्चेमा बृहस्पतेर्वाचोऽभिद्यूनहिमायान् यन्ति तान् सर्वान् मनुष्याः सेवन्ताम्॥४॥

भावार्थः-अत्रोपमालङ्कारः। यो दिव्यविद्याप्रज्ञाशीलान् विदुषः सेवते स मेघाडम्बरयुक्तानि दिनानीव वर्त्तमानानविद्यायुक्तान् मनुष्यान् प्रकाशं सवितेव विद्यां दत्वा पवित्रयितुं शक्नोति॥४॥

पदार्थः-हे मनुष्यो! **(अस्य)** इस आप्त विद्वान् की **(श्लोकः)** वाणी और **(पृथिव्याम्)** पृथिवी पर **(अत्यः)** घोड़ा **(न)** जैसे **(दिवि)** दिव्य व्यवहार में **(ईयते)** जाता है तथा जो **(यक्षभृत्)** पूज्य विद्वानों को धारण करनेवाला **(विचेताः)** जिसकी नाना प्रकार की बुद्धि वह विद्वान् **(मृगाणाम्)** मृगों की **(हेतयः)** गतियों के **(न)** समान **(यंसत्)** उत्तम ज्ञान देवे **(च)** और जो **(इमाः)** ये **(बृहस्पतेः)** परम विद्वान् की वाणी **(अभि, द्यून्)** सब ओर से वर्त्तमान दिनों में **(अहिमायान्)** मेघ की माया के समान जिनकी बुद्धि उन सज्जनों को **(यन्ति)** प्राप्त होतीं, उन सभी का मनुष्य सेवन करें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो दिव्य विद्या और प्रज्ञाशील विद्वानों की सेवा करता है, वह मेघ के डंग-डमालयुक्त दिनों के समान वर्त्तमान अविद्यायुक्त मनुष्यों को प्रकाश को सविता जैसे वैसे विद्या देकर पवित्र कर सकता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये त्वा॑ देवोस्रि॒कं मन्य॑माना॒: पा॒पा भ॒द्रमु॑प॒जीव॑न्ति प॒ज्रा:।

न दू॒ढ्ये३॑ अनु ददासि वा॒मं बृह॑स्पते॒ चय॑स॒ इत्पिया॑रुम्॥५॥१२॥

ये। त्वा॒। दे॒व॒। उ॒स्रि॒कम्। मन्यमा॑नाः। पा॒पाः। भ॒द्रम्। उ॒प॒ऽजीव॑न्ति। प॒ज्राः। न। दुः॒ऽध्ये॑। अनु॑। द॒दा॒सि॒। वा॒मम्। बृह॑स्पते। चय॑से। इत्। पिया॑रुम्॥५॥

पदार्थः- **(ये)** **(त्वा)** त्वाम् **(देव)** विद्वन् **(उस्रिकम्)** य उस्राभिर्गोभिश्चरति तम् **(मन्यमानाः)** विजानन्तः **(पापाः)** अधर्माचरणाः **(भद्रम्)** कल्याणरूपिणम् **(उपजीवन्ति)** **(पज्राः)** प्राप्ताः। अत्र वर्णव्यत्ययेन दस्य जः। **(न)** **(दूढ्ये)** यो दुष्टं ध्यायति विचारयति तस्मै। अत्र चतुर्थ्यर्थे सप्तमी। **(अनु)**

(ददासि) (वामम्) प्रशस्यम्। **वाममिति प्रशस्यानामसु पठितम्।** (निघं०३.८) **(बृहस्पते)** बृहतां विदुषां पालक **(चयसे)** प्राप्नोषि **(इत्)** एव **(पियारुम्)** पानेच्छुकम्॥५॥

अन्वयः-हे देव विद्वन्! ये मन्यमानाः पापाः पज्रा उस्रिकं भद्रं त्वा त्वामुपजीवन्ति ते त्वया शासनीयाः। हे बृहस्पते! यस्त्वं दूढ्ये सुखं नानुददासि वामं पियारुमिच्चयसे स त्वं सर्वानुपदिश॥५॥

भावार्थः-ये विद्वांसः स्वसन्निहितानज्ञानभिमानिनः पापाचारानुपदिश्य धार्मिकान् कुर्वन्ति, ते कल्याणमाप्नुवन्ति॥५॥

पदार्थः-हे **(देव)** विद्वान्! **(ये)** जो **(मन्यमानाः)** विज्ञानवान् **(पापाः)** अधर्माचारी **(पज्राः)** प्राप्त हुए जन **(उस्रिकम्)** गौओं के साथ विचरते उन **(भद्रम्)** कल्याणरूपी **(त्वा)** आप के **(उप, जीवन्ति)** समीप जीवित हैं, वे आपकी शिक्षा पाने योग्य हैं। हे **(बृहस्पते)** बड़े विद्वानों की पालना करनेवाले! जो आप **(दूढ्ये)** दुष्ट-बुरा विचार करनेवाले को **(न, अनु, ददासि)** अनुक्रम से सुख नहीं देते **(वामम्)** प्रशंसित **(पियारुम्)** पान की इच्छा करनेवाले को **(इत्)** ही **(चयसे)** प्राप्त होते, वे आप सभी को उपदेश देओ॥५॥

भावार्थः-जो विद्वान् जन अपने निकटवर्त्ती, अज्ञ, अभिमानी, पापी जनों को उपदेश दे धार्मिक करते हैं, वे कल्याण को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः॥६॥

सुऽप्रैतुः। सुऽयवसः। न। पन्थाः। दुःऽनियन्तुः। परिऽप्रीतः। न। मित्रः। अनर्वाणः। अभि। ये। चक्षते। नः। अपिऽवृताः। अपऽऊर्णुवन्तः। अस्थुः॥६॥

पदार्थः-**(सुप्रैतुः)** सुष्ठु विद्योपेतस्य **(सुयवसः)** शोभनानि यवांसि अन्नानि यस्य तस्य। अत्राऽन्येषामपीत्याद्यचो दीर्घः। **(न)** इव **(पन्थाः)** मार्गः **(दुर्नियन्तुः)** यो दुर्दुःखेन नियन्ता तस्य **(परिप्रीतः)** सर्वतः प्रसन्नः **(न)** इव **(मित्रः)** सखा **(अनर्वाणः)** अविद्यमानमधर्मादन्यत्र गमनं येषान्ते **(अभि)** आभिमुख्ये **(ये)** **(चक्षते)** सत्यमुपदिशन्ति **(नः)** अस्मान् **(अपीवृताः)** ये निश्चये वर्त्तन्ते **(अपोर्णुवन्तः)** अविद्यादिदोषैरनावरन्तः **(अस्थुः)** तिष्ठेयुः॥६॥

अन्वयः-येऽनर्वाणोऽपीवृता नोऽस्मानपोर्णुवन्तस्सन्तः सुवयसः सुप्रैतुः पन्था न दुर्नियन्तुः परिप्रीतो मित्रो नाभिचक्षते तेऽस्माकमुपदेशका अस्थुः॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसोऽलंसाधनोपसाधनयुक्ताः, सुपथेनाविद्यायुक्तान् विद्याधर्मे प्रापयन्ति, अजितेन्द्रियस्य जितेन्द्रियत्वप्रदः, सखिवच्छिष्यान् प्रशासति, तेऽत्राध्यापका उपदेशकाश्च भवन्ति॥६॥

पदार्थः- **(ये)** जो **(अनर्वाणः)** धर्म से अन्यत्र अधर्म में अपनी चाल-चलन नहीं रखते **(अपीवृताः)** और समस्त पदार्थों के निश्चय में वर्त्तमान **(नः)** हम लोगों को **(अपोर्णुवन्तः)** अविद्यादि दोषों से न ढांपते हुए जन **(सुयवसः)** जिसके सुन्दर अन्न विद्यमान उस **(सुप्रैतुः)** उत्तम विद्यायुक्त विद्वान् का **(पन्थाः)** मार्ग **(न)** जैसे वैसे तथा **(दुर्नियन्तुः)** जो दुःख से नियम करनेवाला उसके **(परिप्रीतः)** सब ओर से प्रसन्न **(मित्रः)** मित्र के **(न)** समान **(अभि, चक्षते)** अच्छे प्रकार उपदेश करते हैं, वे हम लोगों के उपदेशक **(अस्थुः)** ठहराये जावें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन पूर्ण साधन और उपसाधनों से युक्त, उत्तम मार्ग से अविद्यायुक्तों को विद्या और धर्म की प्राप्ति कराते और जिसने इन्द्रिय नहीं जीते उसको जितेन्द्रियता देनेवाले, मित्र के समान शिष्यों को उत्तम शिक्षा देते हैं, वे इस जगत् में अध्यापक और उपदेशक होने चाहियें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः।
स विद्वाँ उभयञ्चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः॥७॥

सम्। यम्। स्तुभः। अवनयः। न। यन्ति। समुद्रम्। न। स्रवतः। रोधऽचक्राः। सः। विद्वान्। उभयम्। चष्टे। अन्तः। बृहस्पतिः। तरः। आपः। च। गृध्रः॥७॥

पदार्थः- **(सम्)** सम्यक् **(यम्)** **(स्तुभः)** स्तम्भिकाः **(अवनयः)** तटस्था भूमयः **(न)** इव **(यन्ति)** गच्छन्ति **(समुद्रम्)** सागरम् **(न)** इव **(स्रवतः)** गच्छन्त्यः **(रोधचक्राः)** रोधाश्चक्राणि च यासु ता नद्यः। **रोधचक्रा इति नदीनामसु पठितम्।** (निघं०१.१३) **(सः)** **(विद्वान्)** **(उभयम्)** व्यवहारपरमार्थसिद्धिकरं विज्ञानम् **(चष्टे)** उपदिशति **(अन्तः)** मध्ये **(बृहस्पतिः)** बृहत्या वाचः पालयिता **(तरः)** यस्तरति सः **(आपः)** **(च)** **(गृध्रः)** सर्वेषां सुखमभिकाङ्क्षकः॥७॥

अन्वयः-बुद्धिमन्तो विद्यार्थिनः स्तुभोऽवनयो न समुद्रं स्रवतो रोधचक्रा न यमध्यापकं संयन्ति स तरो गृध्रो विद्वान् बृहस्पतिस्तानुभयं चष्टे। अन्तर्बहिश्चाप इवान्तःकरणबाह्यचेष्टाः शोधयति, स सर्वेषां सुखकरो भवति॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा सर्वाधारा भूमयः सूर्य्यमभितो गच्छन्ति यथा नद्यः समुद्रं प्रविशन्ति तथा सज्जना आप्तान् विदुषो गत्वा विद्यां प्राप्य धर्ममनुप्रविश्य बहिरन्तर्व्यवहारान् शोधयेयुः॥७॥

पदार्थः-बुद्धिमान् विद्यार्थीजन **(स्तुभः)** जलादि को रोकनेवाली **(अवनयः)** किनारे की भूमियों के **(न)** समान **(समुद्रम्)** सागर को **(स्रवतः)** जाती हुई **(रोधचक्राः)** भ्रमर मेढ़ा जिनके जल में पड़ते उन नदियों के **(न)** समान **(यम्)** जिस अध्यापक को **(सम्, यन्ति)** अच्छे प्रकार प्राप्त होते हैं **(सः)** वह **(तरः)** सर्व विषयों के पार होने **(गृध्रः)** और सबके सुख को चाहनेवाला **(विद्वान्)** विद्वान् **(बृहस्पतिः)** अत्यन्त बढ़ी हुई वाणी वा वेदवाणी का पालनेवाला जन उसको **(उभयम्)** दोनों अर्थात् व्यावहारिक और पारमार्थिक विज्ञान का **(चष्टे)** उपदेश देता है तथा **(अन्तः)** भीतर **(च)** और बाहर के **(आपः)** जलों के समान अन्तःकरण की और बाहर की चेष्टाओं को शुद्ध करता है, वह सबका सुख करनेवाला होता है॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सबका आधार भूमि सूर्य्य के चारों ओर जाती है वा जैसे नदी समुद्र को प्रवेश करती है, वैसे सज्जन श्रेष्ठ विद्वानों और विद्या को प्राप्त हो, धर्म में प्रवेश कर बाहरले और भीतर के व्यवहारों को शुद्ध करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवा महस्तुविजातस्तुविष्मान् बृहस्पतिर्वृषभो धायि देवः।
स नः स्तुतो वीरवद्धातु गोमद् विद्यामेषं वृजनं जीरदानुम्॥८॥१३॥

एव। महः। तुविऽजातः। तुविष्मान्। बृहस्पतिः। वृषभः। धायि। देवः। सः। नः। स्तुतः। वीरऽवत्। धातु। गोऽमत्। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥८॥

पदार्थः-**(एव)** निश्चये। अत्र **निपातस्य च**ेति दीर्घः। **(महः)** महान् **(तुविजातः)** तुवेर्विद्यावृद्धात् प्रसिद्धविद्यः **(तुविष्मान्)** शरीरात्मबलयुक्तः **(बृहस्पतिः)** बृहतां वेदानामध्यापनोपदेशाभ्यां पालयिता **(वृषभः)** विद्वच्छिरोमणिः **(धायि)** ध्रियते **(देवः)** कमनीयतमः **(सः)** **(नः)** अस्मभ्यम् **(स्तुतः)** प्रशंसितः **(वीरवत्)** बहवो वीरा विद्यन्ते यस्मिन् विज्ञाने तत् **(धातु)** दधातु **(गोमत्)** प्रशस्ता गौर्वाग्यस्मिँस्तत् **(विद्याम)** **(इषम्)** विज्ञानम् **(वृजनम्)** **(जीरदानुम्)**॥८॥

अन्वयः-विद्वद्भिर्यो महस्तुविजातस्तुविष्मान् वृषभो देवः स्तुतो बृहस्पतिर्धायि स एव नो वीरवद्गोमद्विज्ञानं धातु यतो वयमिषं वृजनम् जीरदानुं च विद्याम॥८॥

भावार्थः-विद्वद्भिस्सकलशास्त्रविचारसारेण विद्यार्थिनः शास्त्रसम्पन्नाः कार्य्या यतस्ते शरीरात्मबलं विज्ञानं च प्राप्नुयुः॥८॥

अत्र विदुषां गुणकर्मस्वभाववर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेदितव्या॥

इति नवत्युत्तरं शततमं १९० सूक्तं त्रयोदशो १३ वर्गश्च समाप्तः॥

पदार्थः-विद्वानों से जो (**महः**) बड़ा (**तुविजातः**) विद्यावृद्ध जन से प्रसिद्ध विद्यावाला (**तुविष्मान्**) शरीर और आत्मा के बल से युक्त (**वृषभः**) विद्वानों में शिरोमणि (**देवः**) अति मनोहर (**स्तुतः**) प्रशंसायुक्त (**बृहस्पतिः**) वेदों का अध्यापन पढ़ाने और उपदेश करने से पालनेवाला विद्वान् जन (**धायि**) धारण किया जाता है (**सः, एव**) वही (**नः**) हम लोगों के लिये (**वीरवत्**) बहुत जिसमें वीर विद्यमान वा (**गोमत्**) प्रशंसित वाणी विद्यमान उस विज्ञान को (**धातु**) धारण करे, जिससे हम लोग (**इषम्**) विज्ञान (**वृजनम्**) बल और (**जीरदानुम्**) जीवन को (**विद्याम**) प्राप्त होवें॥८॥

भावार्थः-विद्वानों को चाहिये कि सकल शास्त्रों के विचार के सार से विद्यार्थी जनों को शास्त्रसम्पन्न करें जिससे वे शारीरिक और आत्मिक बल और विज्ञान को प्राप्त होवें॥८॥

इस सूक्त में विद्वानों के गुण, कर्म और स्वभावों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह एक सौ नब्बेवाँ १९० सूक्त और तेरहवां १३ वर्ग समाप्त हुआ॥

कङ्कत इति षोडशर्चस्य एकनवत्युत्तरस्य शततमस्य सूक्तस्य अगस्त्य ऋषिः। अबोषधिसूर्य्या देवताः। १ उष्णिक्। २ भुरिगुष्णिक्। ३,७ स्वराडुष्णिक्। १३ विराडुष्णिक् छन्दः। ऋषभः स्वरः। ४,९,१४ विराडनुष्टुप्। ५,८,१५ निचृदनुष्टुप्। ६ अनुष्टुप्। १०,११ निचृत् ब्राह्मयनुष्टुप्। १२ विराड् ब्राह्मयनुष्टुप्। १६ भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ विषौषधिविषवैद्यानां च विषयमाह॥

अब एक सौ एक्यानवे सूक्त का आरम्भ है। उसके प्रथम मन्त्र से विषौषधि और विषवैद्यों के विषय को कहते हैं॥

कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः।
द्वाविति प्लुषी इति न्यदृष्टा अलिप्सत॥ १॥

कङ्कतः। न। कङ्कतः। अथो इति। सतीनऽकङ्कतः। द्वौ। इति। प्लुषी। इति। नि। अदृष्टाः। अलिप्सत॥ १॥

पदार्थः- **(कङ्कतः)** विषवान् **(न)** इव **(कङ्कतः)** चञ्चलः **(अथो)** आनन्तर्ये **(सतीनकङ्कतः)** सतीनमिव चञ्चलः। **सतीनमित्युदकनामसु पठितम्॥** (निघं०१.१२) **(द्वौ) (इति)** प्रकारे **(प्लुषी इति)** दाहकौ दुःखप्रदौ **(नि) (अदृष्टाः)** ये न दृश्यन्ते ते विषधारिणो जीवाः **(अलिप्सत)** लिम्पन्ति॥ १॥

अन्वयः-यो मनुष्यः कङ्कतो न कङ्कतोऽथो सतीनकङ्कतो द्वाविति यथा प्लुषी इत्यन्येन सह सज्जेरन् तथाऽदृष्टा न्यलिप्सत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा कश्चिच्चञ्चलो जनोऽध्यापकोपदेष्टारौ प्राप्य कङ्कते तथाऽदृष्टा विषधारिणः क्षुद्रा जीवाः पुनः पुनर्निवारिता अप्युपरि पतन्ति॥ १॥

पदार्थः-जो मनुष्य **(कङ्कतः)** विषवाले प्राणी के **(न)** समान **(कङ्कतः)** चञ्चल **(अथो)** और जो **(सतीनकङ्कतः)** जल के समान चञ्चल हैं वे **(द्वाविति)** दोनों इस प्रकार के जैसे **(प्लुषी, इति)** जो जलानेवाले दुःखदायी दूसरे के सङ्ग लगें, वैसे **(अदृष्टाः)** जो नहीं दीखते विषधारी जीव वे **(नि, अलिप्सत)** निरन्तर चिपटते हैं॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कोई चञ्चल जन अध्यापक और उपदेश को पाकर चञ्चलता देता है, वैसे न देखे हुए छोटे-छोटे विषधारी मत्कुण, डांश आदि क्षुद्र जीव बार-बार निवारण करने पर भी ऊपर गिरते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अदृष्टान् हन्त्यायत्यथो हन्ति परायती।
अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती॥ २॥

अ॒दृष्टा॑न्। ह॒न्ति॒। आ॒ऽय॒ती। अथो॒ इति॑। ह॒न्ति॒। प॒रा॒ऽय॒ती। अथो॒ इति॑। अ॒व॒ऽघ्न॒ती। ह॒न्ति॒। अथो॒ इति॑। पि॒न॒ष्टि॒। पिं॒ष॒ती॥ २॥

पदार्थः- **(अदृष्टान्)** दृष्टिपथमनागतान् **(हन्ति)** नाशयति **(आयती)** समन्तात्प्राप्यमाणौषधी **(अथो)** **(हन्ति)** दूरी करोति **(परायती)** परागच्छन्ती **(अथो)** **(अवघ्नती)** अत्यन्तं दुःखयन्ती **(हन्ति)** **(अथो)** **(पिनष्टि)** सङ्घर्षति **(पिंषती)** पेषणं कुर्वन्ती॥ २॥

अन्वयः-आयत्योषधिरदृष्टान् हन्ति। अथो परायती हन्ति। अथोऽवघ्नती हन्ति। अथो पिंषत्योषधी पिनष्टि॥ २॥

भावार्थः-ये आगतानागतानागन्तुकांश्च विषधारिणः पूर्वापरौषधिदानेन निवर्तयन्ति, ते विषधारिणां विषैर्नावगाह्यन्ते॥ २॥

पदार्थः- **(आयती)** अच्छे प्रकार प्राप्त हुई औषधी **(अदृष्टान्)** अदृष्ट विषधारी जीवों को **(हन्ति)** नष्ट करती **(अथो)** इसके अनन्तर **(परायती)** पीछे प्राप्त हुई ओषधी **(हन्ति)** विषधारियों को दूर करती है **(अथो)** इसके अनन्तर **(अवघ्नती)** अत्यन्त दुःख देती हुई ओषधि **(हन्ति)** विषधारियों को नष्ट करती **(अथो)** इसके अनन्तर **(पिंषती)** पीसी जाती हुई ओषधि **(पिनष्टि)** विषधारियों को पीसती है॥ २॥

भावार्थः-जो आये, न आये वा आनेवाले विषधारियों को अगली-पिछली ओषधियों के देने से निवृत्त कराते हैं, वे विषधारियों के विषों से नहीं पीड़ित होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

श॒रास॒ः कुश॑रासो दु॒र्भास॑ः सै॒र्या उ॒त।
मौ॒ञ्जा अ॒दृष्टा॑ वैरि॒णाः सर्वे॑ सा॒कं न्य॑लिप्सत॥ ३॥

श॒रास॑ः। कुश॑रासः। दु॒र्भास॑ः। सै॒र्याः। उ॒त। मौ॒ञ्जाः। अ॒दृष्टा॑ः। वै॒रि॒णाः। सर्वे॑। सा॒कम्। नि। अ॒लि॒प्स॒त॥ ३॥

पदार्थः-**(शरासः)** वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषस्थाः **(कुशरासः)** कुत्सिताश्च ते **(दर्भासः)** कुशाः **(सैर्याः)** तडागादितटेषु भवास्तृणविशेषस्थाः **(उत)** अपि **(मौञ्जाः)** मुञ्जानामिमे **(अदृष्टाः)** **(वैरिणाः)** वीरिणेषु भवाः **(सर्वे)** **(साकम्)** सह **(नि)** **(अलिप्सत)** लिम्पन्ति॥ ३॥

अन्वयः-ये शरासः कुशरासो दर्भासः सैर्या मौञ्जा उत वैरिणा अदृष्टाः सन्ति ते सर्वे साकं न्यलिप्सत॥ ३॥

भावार्थः-ये विविधतृणेषु क्वचित् स्थानादिलोभेन क्वचिच्च तद्गन्धमाघ्रातुं पृथक् पृथक् क्षुद्रा विषधरा अदृष्टा जीवास्तिष्ठन्ति तेऽवसरं प्राप्य मनुष्यादिप्राणिनो बाधन्ते॥ ३॥

पदार्थः-जो **(शरासः)** बांस के तुल्य भीतर छिद्रवाले तृणों में ठहरनेवाले वा जो **(कुशरासः)** निन्दित उक्त तृणों में ठहरते वा **(दर्भासः)** कुशस्थ वा जो **(सैर्याः)** तालाबों के तटों में प्रायः होनेवाले तृणों में ठहरते वा **(मौञ्जाः)** मूंज में ठहरते **(उत)** और **(वैरिणाः)** गाड़र में होनेवाले छोटे-छोटे **(अदृष्टाः)** जो नहीं देखे गये जीव हैं, वे **(सर्वे)** समस्त **(साकम्)** एक साथ **(न्यलिप्सत)** निरन्तर मिलते हैं॥३॥

भावार्थः-जो नाना प्रकार के तृणों में कहीं स्थानादि के लोभ से और कहीं उन तृणों के गन्ध लेने को अलग-अलग छोटे छोटे विषधारी छिपे हुए जीव रहते हैं, वे अवसर पाकर मनुष्यादि प्राणियों को पीड़ा देते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि गावो॑ गो॒ष्ठे अस॑दन् नि मृ॒गासो॑ अविक्षत।
नि के॒तवो॒ जना॑नां॒ न्य१॑दृष्टा॑ अलिप्सत॥४॥

नि। गावः। गोऽस्थे। अस॒दन्। नि। मृ॒गासः॑। अ॒वि॒क्ष॒त॒। नि। के॒तवः॑। जना॑नाम्। नि। अ॒दृष्टाः॑। अ॒लि॒प्स॒त॒॥४॥

पदार्थः- **(नि)** नितराम् **(गावः)** धेनवः **(गोष्ठे)** गावस्तिष्ठन्ति यस्मिंस्तस्मिन् स्थाने **(असदन्)** सीदन्ति **(नि)** **(मृगासः)** श्वापदादयः **(अविक्षत)** प्रविशन्ति **(नि)** **(केतवः)** ज्ञानानि **(जनानाम्)** मनुष्याणाम् **(नि)** **(अदृष्टाः)** दृष्टिपथमनागता विषधरा विषा वा **(अलिप्सत)**॥४॥

अन्वयः-यथा गोष्ठे गावो न्यसदन् वने मृगासो न्यविक्षत जनानां केतवो न्यविक्षत तथा अदृष्टा न्यलिप्सत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा नानाप्रकारा जीवा निजनिजसुखसंभोगस्थानं प्रविशन्ति, तथा विषधरा जीवाश्च यत्र-कुत्र प्राप्तस्थानं प्रविशन्ति॥४॥

पदार्थः-जैसे **(गोष्ठे)** गोशाला वा गोहरे में **(गावः)** गौयें **(न्यसदन्)** स्थित होतीं वा वन में **(मृगासः)** भेड़िया, हरिण आदि जीव **(न्यविक्षत)** निरन्तर प्रवेश करते वा **(जनानाम्)** मनुष्यों के **(केतवः)** ज्ञान, बुद्धि, स्मृति आदि **(नि)** निवेश कर जातीं अर्थात कार्य्यों में प्रवेश कर जातीं वैसे **(अदृष्टाः)** जो दृष्टिगोचर नहीं होते वे छिपे हुए विषधारी जीव वा विषधारी जन्तुओं के विष **(नि, अलिप्सत)** प्राणियों को मिल जाते हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे नाना प्रकार के जीव निज-निज सुख-संभोग के स्थान को प्रवेश करते हैं, वैसे विषधर जीव जहाँ-तहाँ पाये हुए स्थान को प्रवेश करते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एत उ त्ये प्रत्यदृश्रन् प्रदोषं तस्कराइव।

अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन॥५॥१४॥

एते। ऊम् इति। त्ये। प्रति। अदृश्रन्। प्रऽदोषम्। तस्कराःऽइव। अदृष्टाः। विश्वऽदृष्टाः। प्रतिऽबुद्धाः। अभूतन॥५॥

पदार्थः- **(एते)** विषधरा विषा वा **(उ)** वितर्के **(त्ये)** **(प्रति)** **(अदृश्रन्)** दृश्यन्ते **(प्रदोषम्)** रात्र्यारम्भे **(तस्कराइव)** यथा चोराः **(अदृष्टाः)** ये न दृश्यन्ते **(विश्वदृष्टाः)** विश्वैः सर्वैर्दृष्टाः **(प्रतिबुद्धाः)** प्रतीतेन ज्ञानेन युक्ताः **(अभूतन)** भवन्ति॥५॥

अन्वयः-त्य एते उ प्रदोषं तस्कराइव प्रत्यदृश्रन्। हे अदृष्टा विश्वदृष्टा यूयं प्रतिबुद्धा अभूतन॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा चोरेषु दस्यवो दृष्टा इतर अदृष्टाः सन्ति, तथा जना विविधान् प्रसिद्धाऽप्रसिद्धान् विषधारिणो विषान् वा जानन्तु॥५॥

पदार्थः- **(त्ये)** वे **(एते)** **(उ)** ही पूर्वोक्त विषधर वा विष **(प्रदोषम्)** रात्रि के आरम्भ में **(तस्कराइव)** जैसे चोर वैसे **(प्रत्यदृश्रन्)** प्रतीति से दिखाई देते हैं। हे **(अदृष्टाः)** दृष्टिपथ न आनेवालो वा **(विश्वदृष्टाः)** सबके देखे हुए विषधारियो! तुम **(प्रतिबुद्धाः)** प्रतीत ज्ञान से अर्थात् ठीक समय से युक्त **(अभूतन)** होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे चोरों में डाकू देखे और न देखे होते हैं, वैसे मनुष्य नाना प्रकार के प्रसिद्ध-अप्रसिद्ध विषधारियों वा विषों को जानें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा।

अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम्॥६॥

द्यौः। वः। पिता। पृथिवी। माता। सोमः। भ्राता। अदितिः। स्वसा। अदृष्टाः। विश्वऽदृष्टाः। तिष्ठत। इलयत। सु। कम्॥६॥

पदार्थः- **(द्यौः)** सूर्य इव **(वः)** युष्माकम् **(पिता)** **(पृथिवी)** अवनिरिव **(माता)** **(सोमः)** चन्द्र इव **(भ्राता)** **(अदितिः)** **अदितिरदीना देवमाता॥** (निरु०४.२२) **(स्वसा)** भगिनि **(अदृष्टाः)** ये न दृश्यन्ते ते **(विश्वदृष्टाः)** विश्वैस्सर्वैर्दृष्टा ये ते **(तिष्ठत)** स्थिरा भवत **(इलयत)** गच्छत। अत्राऽन्येषामपीति दीर्घः। **(सु)** **(कम्)** सुखम्॥६॥

अन्वयः-हे अदृष्टा विश्वदृष्टा! येषां द्यौर्वः पिता पृथिवी माता सोमो भ्राताऽदितिः स्वसाऽस्ति, ते यूयं सु कं तिष्ठतं स्वस्थानमिलयत च॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विषधारिणो जीवास्ते संशमनाद्युपायैर्निवारणीया औषध्यादिभिर्विषास्संवारणीयाः॥६॥

पदार्थः-हे **(अदृष्टाः)** दृष्टिगोचर न होनेवाले और **(विश्वदृष्टाः)** सबके देखे हुए विषधारियो! जिनका **(द्यौः)** सूर्य के समान सन्ताप करनेवाला **(वः)** तुम्हारा **(पिता)** पिता **(पृथिवी)** पृथिवी के समान **(माता)** माता **(सोमः)** चन्द्रमा के समान **(भ्राता)** भ्राता और **(अदितिः)** विद्वानों की अदीन माता के समान **(स्वसा)** बहिन है, वे तुम **(सु, कम्)** उत्तम सुख जैसे हो **(तिष्ठत)** ठहरो और अपने स्थान को **(इलयत)** जावो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विषधारी प्राणी हैं, वे शान्त्यादि उपायों और ओषध्यादिकों से विषनिवारण करने चाहियें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये अंस्या॒ ये अङ्ग्या॑: सू॒चीका॒ ये प्र॑कङ्क॒ताः।
अदृ॑ष्टा॒: किं च॒नेह व॒: सर्वे॑ सा॒कं नि ज॑स्यत॥७॥

ये। अंस्याः। ये। अङ्ग्याः। सूचीकाः। ये। प्रऽकङ्कताः। अदृष्टाः। किम्। चन। इह। वः। सर्वे। साकम्। नि। जस्यत॥७॥

पदार्थः-**(ये)** **(अंस्याः)** अंसेषु स्कन्धेषु भवाः **(ये)** **(अङ्ग्याः)** अङ्गेषु भवाः **(सूचीकाः)** सूचीव व्यथका वृश्चिकादयः **(ये)** **(प्रकङ्कताः)** प्रकृष्टपीडाप्रदाश्चञ्चलाः **(अदृष्टाः)** अदृश्यमानाः **(किम्)** **(चन)** किमपि **(इह)** अस्मिन् संसारे **(वः)** युष्माकम् **(सर्वे)** **(साकम्)** सह **(नि)** **(जस्यत)** मुञ्चन्तु मोचयन्तु वा॥७॥

अन्वयः-हे अदृष्टा! इह ये वोंऽस्या येऽङ्ग्याः सूचीका विषधरा ये प्रकङ्कताः सन्ति यत् किञ्चन विषादिकं चैते सर्वे यूयं साकं निजस्यत॥७॥

भावार्थः-मनुष्यैः प्रयत्नेन शरीरात्मदुःखप्रदानि विषाणि दूरीकरणीयानि येनेह सततं पुरुषार्थो वर्द्धेत॥७॥

पदार्थः-हे **(अदृष्टाः)** दृष्टिगोचर न हुए विषधारी जीवो! **(इह)** इस संसार में **(ये)** जो **(वः)** तुम्हारे बीच **(अंस्याः)** स्कन्धों में प्रसिद्ध होनेवाले **(ये)** जो **(अङ्घ्याः)** अङ्गों में प्रसिद्ध होनेवाले और **(सूचीकाः)** सूची के समान व्यथा देनेवाले बीछी आदि विषधारी जीव तथा **(ये)** जो **(प्रकङ्कताः)** अति पीड़ा देनेवाले चञ्चल हैं और जो **(किञ्चन)** कुछ विष आदि हैं, ये **(सर्वे)** सब तुम **(साकम्)** एक साथ अर्थात् विष समेत **(नि, जस्यत)** हम लोगों को छोड़ देओ वा छुड़ा देओ॥७॥

भावार्थः-मनुष्यों को उत्तम यत्न के साथ शरीर और आत्मा को दुःख देनेवाले विष दूर करने चाहियें, जिससे यहाँ निरन्तर पुरुषार्थ बढ़े॥७॥

अथ सूर्यदृष्टान्तेनोक्तविषयमाह॥

अब सूर्य के दृष्टान्त से उक्त विषय को अगले मन्त्र में कहा है॥

उत्पु॒रस्ता॒त्सूर्य॑ एति॒ वि॒श्वदृ॑ष्टो॒ अदृ॑ष्टहा।
अ॒दृ॒ष्टा॒न्त्सर्वा॑ञ्जम्भय॒न्त्सर्वा॑श्च॒ यातु॑धा॒न्य॑:॥८॥

उत्। पु॒रस्ता॑त्। सूर्य॑:। एति॒। वि॒श्वऽदृ॑ष्टः। अ॒दृ॒ष्टऽहा। अ॒दृ॒ष्टा॑न्। सर्वा॑न्। ज॒म्भय॑न्। सर्वा॑:। च॒। यातु॑ऽधान्य॑:॥८॥

पदार्थः- **(उत्)** **(पुरस्तात्)** **(सूर्यः)** **(एति)** **(विश्वदृष्टः)** विश्वेन दृष्टः **(अदृष्टहा)** योऽदृष्टमन्धकारं हन्ति सः **(अदृष्टान्)** **(सर्वान्)** पदार्थान् **(जम्भयन्)** सावयवान् दर्शयन् **(सर्वाः)** **(च)** **(यातुधान्यः)** यातूनि दुराचरणशीलानि दधति ताः॥८॥

अन्वयः-हे वैद्या! युष्माभिर्यथा सर्वानदृष्टान् जम्भयन्निवर्त्तयददृष्टहा विश्वदृष्टः सूर्यः पुरस्तादुदेति तथा सर्वाश्च यातुधान्यो निवारणीयाः॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यस्तमो निवर्त्य प्रकाशं जनयति तथा वैद्यैर्विषहरणौषधिभिः सर्वाणि विषाणि निर्मूलानि कार्याणि॥८॥

पदार्थः-हे वैद्यजनो! तुमको जैसे **(सर्वान्)** सब पदार्थ **(अदृष्टान्)** जो कि न देखे गये उनको **(जम्भयन्)** अङ्ग-अङ्ग के साथ दिखलाता हुआ **(अदृष्टहा)** जो नहीं देखा गया अन्धकार उसको विनाशनेवाला **(विश्वदृष्टः)** संसार में देखा **(सूर्यः)** सूर्यमण्डल **(पुरस्तात्)** पूर्व दिशा में **(उदेति)** उदय को प्राप्त होता है, वैसे **(सर्वाः)** **(च)** **(यातुधान्यः)** सभी दुराचारियों को धारण करनेवाली दुर्व्यथा निवारण करनी चाहिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य अन्धकार को निवारण करने प्रकाश को उत्पन्न करता है, वैसे वैद्यजनों को विषहरण ओषधियों से विषों को निर्मूल करना विनाशना चाहिये॥८॥

पुनः सूर्यदृष्टान्तेनैवोक्तविषयमाह॥

फिर सूर्य के दृष्टान्त से ही उक्त विषय को अगले मन्त्र में कहा है॥

उदप्पतदसौ सूर्यः पुरु विश्वानि जूर्वन्।
आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा॥९॥

उत्। अपप्तत्। असौ। सूर्यः। पुरु। विश्वानि। जूर्वन्। आदित्यः। पर्वतेभ्यः। विश्वऽदृष्टः। अदृष्टऽहा॥९॥

पदार्थः- **(उत्)** **(अपप्तत्)** **(असौ)** **(सूर्यः)** सविता **(पुरु)** बहु **(विश्वानि)** सर्वाणि **(जूर्वन्)** विनाशयन् **(आदित्यः)** **(पर्वतेभ्यः)** मेघेभ्यः शैलेभ्यो वा **(विश्वदृष्टः)** सर्वैर्दृष्टः **(अदृष्टहा)** यो गुप्तान् विषान् हन्ति सः॥९॥

अन्वयः-हे विद्वन्! यथाऽसौ सूर्यो विश्वानि पुरु जूर्वन्नुदपप्तद् यथादित्यः पर्वतेभ्य उदपप्तत् तथाऽदृष्टहा विश्वदृष्टो भिषग्विषनिवारणे प्रयतेत॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सविता स्वप्रकाशेन सर्वान् पदार्थान् प्राप्नोति तथा विषसंपृक्तवायवादिपदार्थान् विषहरणशीला वैद्या हरन्ति प्राणिनः सुखयन्ति च॥९॥

पदार्थः-हे विद्वन्! जैसे **(असौ)** यह **(सूर्यः)** सूर्यमण्डल **(विश्वानि)** समस्त अन्धकारजन्य दुःखों को **(पुरु)** बहुत **(जूर्वन्)** विनाश करता हुआ **(उत्, अपप्तत्)** उदय होता है और जैसे **(आदित्यः)** आदित्य सूर्य **(पर्वतेभ्यः)** पर्वत वा मेघों से उदय को प्राप्त होता है, वैसे **(अदृष्टहा)** गुप्त विषों को विनाश करनेवाला **(विश्वदृष्टः)** सभी ने देखा हुआ विष हरनेवाला वैद्य विष को निवृत्त करने का प्रयत्न करे॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सविता अपने प्रकाश से सब पदार्थों को प्राप्त होता है, वैसे विषहरणशील वैद्यजन विषसंयुक्त पवन आदि पदार्थों को हरते और प्राणियों को सुखी करते हैं॥९॥

पुनः सूर्यमण्डलविषहरणविषयमाह॥

फिर सूर्य के प्रसङ्ग से विषहरण विषय को अगले मन्त्र में कहा है॥

सूर्ये विषमा सजामि दृतिं सुरावतो गृहे।
सो चिन्नु न मरात्यै नो वयं मरामारे अस्य योजनं हरिष्ठा
मधु त्वा मधुला चकार॥१०॥१५॥

सूर्ये॑। वि॒षम्। आ। स॒जा॒मि॒। दृति॑म्। सुरा॑ऽवतः। गृ॒हे। सः। चि॒त्। नु। न। म॒रा॒ति॒। नो इति॑। व॒यम्। म॒रा॒म॒। आ॒रे। अ॒स्य॒। योज॑नम्। हरि॑ऽस्थाः। मधु॑। त्वा॒। मधु॑ला। च॒का॒र॒॥ १०॥

पदार्थः- **(सूर्ये)** सवितरि **(विषम्)** **(आ)** **(सजामि)** संयुनज्मि **(दृतिम्)** चर्ममयसुरापात्रमिव **(सुरावतः)** सवं कुर्वतः **(गृहे)** **(सः)** अत्र **वाच्छन्दसी**ति सुलोपो नाप्राप्तमप्युत्वम्। **(चित्)** अपि **(नु)** **(न)** **(मराति)** म्रियते **(नो)** **(वयम्)** **(मराम)** म्रियेमहि **(आरे)** दूरे **(अस्य)** **(योजनम्)** **(हरिष्ठाः)** यो हरौ विषहरणे तिष्ठति सः **(मधु)** **(त्वा)** त्वाम् **(मधुला)** मधुविद्या मधु लात्याददाति सा **(चकार)** करोति॥ १०॥

अन्वयः-अहं सुरावतो गृहे दृतिमिव सूर्ये विषमासजामि सो चिन्नु न मराति। नो वयं मराम-अस्य योजनमारे भवति। हे विषधारिन्! हरिष्ठास्त्वा त्वां मधु चकार। एषा मधुलास्य विषहरणा मधुविद्यास्ति॥ १०॥

भावार्थः-यत्सूर्यप्रकाशस्य रोगनिवारकस्य संयोगेन विषहरा महौषधिभिर्विषं निवारयन्ति मधुरत्वं च संपादयन्ति तदेतत्सूर्यविध्वंसकरं न भवति ते च दीर्घायुषो भवन्ति॥ १०॥

पदार्थः-मैं **(सुरावतः)** सुरा खींचनेवाले शूण्डिया कलार के **(गृहे)** घर में **(दृतिम्)** चाम का सुरापात्र जैसे हो वैसे **(सूर्ये)** सूर्यमण्डल में **(विषम्)** विष का **(आ, सजामि)** आरोपण करता हूँ, **(सः, चित्, नु)** वह भी **(न, मराति)** नहीं मारा जाय और **(नो)** न **(वयम्)** हम लोग **(मराम)** मारे जावें **(अस्य)** इस विष का **(योजनम्)** योग **(आरे)** दूर होता है। हे विषधारी! **(हरिष्ठाः)** जो हरण में अर्थात् विषहरण में स्थिर है, विषहरण विद्या जानता है, वह **(त्वा)** तुझे **(मधु)** मधुरता को प्राप्त **(चकार)** करता है, यह **(मधुला)** इसकी मधुरता को ग्रहण करनेवाली विषहरण मधुविद्या है॥ १०॥

भावार्थः-जो रोगनिवारक सूर्य के प्रकाश के संयोग से विषहरी वैद्यजन बड़ी बड़ी ओषधियों से विष को दूर करते हैं और मधुरता को सिद्ध करते हैं, सो यह सूर्य का विध्वंस करनेवाला काम नहीं होता और वे विष हरनेवाले भी दीर्घायु होते हैं॥ १०॥

अथ विषहारकपक्षिनिमित्तं विषहरणविषयमाह॥

अब विष हरनेवाले पक्षी के निमित्त को ले विष हरने के विषय को कहते हैं॥

इ॒यत्ति॒का शकु॑न्ति॒का स॒का जघा॑स ते वि॒षम्।
सो चि॒न्नु न मरा॑ति॒ नो व॒यं मरा॑मा॒रे अ॒स्य॒ योज॑नं॒ हरि॒ष्ठा मधु॑ त्वा॒ मधु॑ला च॒कार॥ ११॥

इ॒य॒त्ति॒का। शकु॑न्ति॒का। स॒का। ज॒घा॒स॒। ते॒। वि॒षम्। सो इति॑। चि॒त्। नु। न। म॒रा॒ति॒। नो इति॑। व॒यम्। म॒रा॒म॒। आ॒रे। अ॒स्य॒। योज॑नम्। हरि॑ऽस्थाः। मधु॑। त्वा॒। मधु॑ला। च॒का॒र॒॥ ११॥

पदार्थः- **(इयत्तिका)** इयति प्रदेशे भवा बाला **(शकुन्तिका)** कपिञ्जली **(सका)** सा **(जघास)** अत्ति **(ते)** तव **(विषम्)** व्याप्नोत्यङ्गानि यत्तत् **(सो)** सा। अत्राज्व्यत्ययेन आकारस्थाने ओकारादेशः। **(चित्)** अपि **(नु)** **(न)** **(मराति)** **(नो)** **(वयम्)** **(मराम)** **(आरे)** **(अस्य)** **(योजनम्)** **(हरिष्ठाः)** **(मधु)** मधुरमौषधम् **(त्वा)** त्वाम् **(मधुला)** माधुर्यप्रदा मधुविद्या **(चकार)** करोति॥११॥

अन्वयः-हे विषभयभीतजन! या इयत्तिका शकुन्तिका सका ते विषं जघास सो चिन्नु न मराति वयं नो मरामास्य योजनमारे भवति। हे विषधारिन्! हरिष्ठास्त्वा मधु चकारैषास्या मधुलास्ति॥११॥

भावार्थः-मनुष्या ये विषहराः पक्षिणः सन्ति तान् संरक्ष्य तैर्विषं हारयेयुः॥११॥

पदार्थः-हे विष के भय से डरते हुए जन! जो **(इयत्तिका)** इतने विशेष देश में हुई **(शकुन्तिका)** कपिञ्जली पक्षिणी है **(सका)** वह **(ते)** तेरे **(विषम्)** विष को **(जघास)** खा लेती है **(सो, चित्, नु)** वह भी शीघ्र **(न)** नहीं **(मराति)** मरे और **(वयम्)** हम लोग **(नो)** न **(मराम)** मारे जायें और **(अस्य)** इस उक्त पक्षिणी के संयोग से विष का **(योजनम्)** योग **(आरे)** दूर होता है। हे विषधारी! **(हरिष्ठाः)** विषहरण में स्थिर विष हरनेवाले वैद्य! **(त्वा)** तुझे **(मधु)** मधुरता को **(चकार)** प्राप्त करता है यही इसकी **(मधुला)** मधुरता ग्रहण कराने और विष हरनेवाली विद्या है॥११॥

भावार्थः-मनुष्य जो विष हरनेवाली पक्षी हैं, उन्हें पालन कर उनसे विष हराया करें॥११॥

अथान्यजीवेभ्यो विषहरणविषयमाह॥

अब और जीवों से विष हरने के विषय को अगले मन्त्र में कहा है॥

त्रिः स॒प्त वि॑ष्पुलिङ्गु॒का वि॒षस्य॒ पुष्प॑मक्षन्।
ताश्चि॒न्नु न म॑रन्ति॒ नो व॒यं म॑रामा॒रे अ॑स्य॒ योज॑नं
हरि॒ष्ठा मधु॑ त्वा मधु॒ला च॑कार॥ १२॥

त्रिः। स॒प्त। वि॒ष्पु॒लि॒ङ्गु॒काः। वि॒षस्य॑। पुष्प॑म्। अ॒क्ष॒न्। ताः। चि॒त्। नु। न। म॒र॒न्ति॒। नो इति॑। व॒यम्। म॒रा॒म॒। आ॒रे। अ॒स्य॒। योज॑नम्। हरि॒ऽस्थाः। मधु॑। त्वा॒। म॒धु॒ला। च॒का॒र॒॥ १२॥

पदार्थः- **(त्रिः)** त्रिवारम् **(सप्त)** **(विष्पुलिङ्गुकाः)** ह्रस्वाः पक्षिणः **(विषस्य)** **(पुष्पम्)** पोषितुं योग्यम् **(अक्षन्)** अदन्ति **(ताः)** **(चित्)** इव **(नु)** सद्यः **(न)** **(मरन्ति)** **(नो)** **(वयम्)** **(मराम)** **(आरे)** **(अस्य)** **(योजनम्)** **(हरिष्ठाः)** **(मधु)** **(त्वा)** **(मधुला)** **(चकार)**॥१२॥

अन्वयः-यास्त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्पमक्षन्। ताश्चिन्नु न मरन्ति वयं नो मराम। यो हरिष्ठा अस्य योजनमारे करोति स हे विषधर! त्वा त्वां मधु चकार करोति सैषास्य मधुला विद्यास्ति॥१२॥

भावार्थः-यथा जलौका विषहर्यः सन्ति तथैकविंशतिर्ह्रस्वाः पक्षिण्यो विषभक्षिकाः सन्ति तैरोषधैश्च ये विषरोगान्नाशयन्ति ते चिरं जीवन्ति॥१२॥

पदार्थः-जो **(त्रिः, सप्त, विष्पुलिङ्गकाः)** इक्कीस प्रकार की छोटी-छोटी चिड़ियाँ **(विषस्य)** विष के **(पुष्पम्)** पुष्ट होने योग्य पुष्प को **(अक्षन्)** खाती हैं **(ताः, चित्, नु)** वे भी **(न)** न **(मरन्ति)** मरती हैं और **(वयम्)** हम लोग **(नो)** न **(मराम)** मरें **(हरिष्ठाः)** विष हरनेवाला वैद्यवर **(अस्य)** इस विष का **(योजनम्)** योग **(आरे)** दूर करता है, वह हे विषधारी! **(त्वा)** तुझे **(मधु)** मधुरता को **(चकार)** प्राप्त करता है, यही इसकी **(मधुला)** विषहरण मधु ग्रहण करनेवाली विद्या है॥१२॥

भावार्थः-जैसे जोंक विष हरनेवाली हैं, वैसे इक्कीस छोटी-छोटी पक्षिणी पङ्खोंवाली चिड़ियां विष खानेवाली हैं। उसमें और ओषधियों से जो विष सम्बन्धी रोगों का नाश करते हैं, वे चिरजीवी होते हैं॥१२॥

पुनर्विषहरणविषयमाह॥

फिर विषहरण विषय को अगले मन्त्र में कहा है॥

नवानां नवतीनां विषस्य रोपुषीणाम्।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार॥१३॥

नवानाम्। नवतीनाम्। विषस्य। रोपुषीणाम्। सर्वासाम्। अग्रभम्। नाम। आरे। अस्य। योजनम्। हरिऽस्थाः। मधु। त्वा। मधुला। चकार॥१३॥

पदार्थः- **(नवानाम्)** **(नवतीनाम्)** **(विषस्य)** **(रोपुषीणाम्)** विमोहयन्तीनाम् **(सर्वासाम्)** **(अग्रभम्)** गृह्णीयाम् **(नाम)** संज्ञाम् **(आरे)** समीपे **(अस्य)** नाम्नः **(योजनम्)** **(हरिष्ठाः)** **(मधु)** **(त्वा)** **(मधुला)** **(चकार)**॥१३॥

अन्वयः-हे विद्वन्! यथाऽहं विषस्य सर्वासां रोपुषीणां नवानां नवतीनां नामाग्रभमस्य योजनमारे करोति, तथा हे विषधारिन्! हरिष्ठास्त्वा मधु चकार सैवास्य मधुलास्ति॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! वयं यदत्रैकोनशतप्रकारं विषमस्ति तस्य नामगुणकर्मस्वभावान् विदित्वा तत्प्रतिषेधिका ओषधीर्विज्ञाय सेवित्वा विषरोगान् दूरीकुर्याम॥१३॥

पदार्थः-हे विद्वान्! जैसे मैं **(विषस्य)** विष की **(सर्वासाम्)** सब **(रोपुषीणाम्)** विमोहन करनेवाली **(नवानाम्)** नव **(नवतीनाम्)** नब्बे अर्थात् निन्यानवे विषसम्बन्धी पीड़ा की तरङ्गों का **(नाम)** नाम **(अग्रभम्)** लेऊं और **(अस्य)** इस विष का **(योजनम्)** योग **(आरे)** दूर करता हूँ, वैसे हे विषधारिन्! **(हरिष्ठाः)** विष हरने में स्थिर वैद्य **(त्वा)** तुझे **(मधु)** मधुरता को **(चकार)** प्राप्त करता है, वही इसकी **(मधुला)** मधुरता को ग्रहण करनेवाली विषहरण विद्या है॥१३॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! हम लोग जो यहाँ निन्यानवे प्रकार का विष है, उसके नाम, गुण, कर्म और स्वभावों को जानकर उस विष का प्रतिषेध करनेवाली ओषधियों को जान और उनका सेवन कर विषसम्बन्धी रोगों को दूर करें॥१३॥

पुनर्विषहरणं मयूरिणी प्रसङ्गेनाह॥

फिर विषहरण को मयूरिणियों के प्रसङ्ग से कहते हैं॥

त्रिः स॒प्त म॑यू॒र्यः॑ स॒प्त स्वसा॑रो अ॒ग्रुव॑ः।
तास्ते॑ वि॒षं वि ज॑भ्रिर उद॒कं कु॒म्भिनी॑रिव॥ १४॥

त्रिः। स॒प्त। म॒यू॒र्यः॑। स॒प्त। स्वसा॑रः। अ॒ग्रुव॑ः। ताः। ते॒। वि॒षम्। वि। ज॒भ्रि॒रे॒। उ॒द॒कम्। कु॒म्भिनी॑ः॑इव॥ १४॥

पदार्थः– (**त्रिः**) (**सप्त**) एकविंशतिधा (**मयूर्यः**) मयूराणां स्त्रियः (**सप्त**) (**स्वसारः**) भगिन्य इव सर्पादिनाशेन सुखप्रदाः (**अग्रुवः**) अग्रगामिन्यो नद्यः। **अग्रुव इति नदीनामसु पठितम्।** (निघं०१.१३) (**ताः**) (**ते**) तुभ्यम् (**विषम्**) प्राणहरम् (**वि**) (**जभ्रिरे**) हरतु (**उदकम्**) जलम् (**कुम्भिनीरिव**) यथा जलाधिकारिण्यः॥१४॥

अन्वयः–हे मनुष्या! याः सप्त स्वसारोऽग्रुवो नद्य इव त्रिः सप्त मयूर्यः सन्ति ता उदकं कुम्भिनीरिव ते विषं विजभ्रिरे॥१४॥

भावार्थः–अत्रोपमालङ्कारः। मनुष्यैर्या एकविंशतिर्मयूरव्यक्तयः सन्ति ता न हन्तव्याः, किन्तु सदा वर्द्धनीया या नद्यः स्थिरजलाः स्युस्ता रोगहेतुत्वान्न सेवनीयाः। यज्जलं चलति सूर्यकिरणान् वायुं च स्पृशति तदुत्तमं रोगहरं भवति॥१४॥

पदार्थः–हे मनुष्यो! जो (**सप्त**) सात (**स्वसारः**) बहनियों के समान तथा (**अग्रुवः**) आगे जानेवाली नदियों के समान (**त्रिः, सप्त**) इक्कीस (**मयूर्यः**) मोरिनी हैं (**ताः**) वे (**उदकम्**) जल को (**कुम्भिनीरिव**) जल का जिनके अधिकार है, वे घट ले जानेवाली कहारियों के समान (**ते**) तेरे (**विषम्**) विष को (**वि, जभ्रिरे**) विशेषता से हरें॥१४॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। मनुष्यों को जो इक्कीस प्रकार की मयूर की व्यक्ति हैं, वे न मारनी चाहियें, किन्तु सदैव उनकी वृद्धि करने योग्य है। जो नदी स्थिर जलवाली हो वे रोग के कारण होने से न सेवनी चाहिये। जो जल चलता है, सूर्यकिरण और वायु को छूता है, वह रोग दूर करनेवाला उत्तम होता है॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒य॒त्त॒कः कु॑षु॒म्भ॒कस्त॒कं भि॑न॒द्म्यश्म॑ना।

ततो॑ वि॒षं प्र वा॑वृते॒ परा॑ची॒रनु॑ सं॒वत॑ः॥ १५॥

इ॒य॒त्त॒कः। कु॒षु॒म्भ॒कः। त॒कम्। भि॒न॒द्मि॒। अश्म॑ना। तत॑ः। वि॒षम्। प्र। व॒वृ॒ते॒। परा॑चीः। अनु॑। स॒म्ऽव॑त॑ः॥ १५॥

पदार्थः- **(इयत्तकः)** कुत्सितस्सः **(कुषुम्भकः)** अल्पः कुषुम्भो नकुलः। अत्रोभयत्र कन् प्रत्ययः। **(तकम्)** तम्। अत्राऽकच् प्रत्ययः। **(भिनद्मि)** पृथक् करोमि **(अश्मना)** विषहरेण पाषाणेन **(ततः)** तस्मात् **(विषम्)** **(प्र)** **(वावृते)** प्रवर्त्तते **(पराचीः)** याः परागञ्चन्ति ताः **(अनु)** अनुलक्ष्य **(संवतः)** विभागवत्यः॥ १५॥

अन्वयः-य इयत्तकः कुषुम्भको विषयुक्तोऽस्ति तकमश्मनाऽहं भिनद्मि ततो विषं तत्परित्यज्य संवतः पराचीरनुलक्ष्य प्रवावृते॥ १५॥

भावार्थः-ये पुरुषा विषहरै रत्नैर्विषं निवारयन्ति ते विषजरोगान् निहत्य बलिष्ठा भूत्वा शत्रुभूतान् रोगान् विजयन्ते॥ १५॥

पदार्थः-जो **(इयत्तकः)** मैला, कुचैला, निन्द्य **(कुषुम्भकः)** छोटा सा नकुल विषयुक्त है **(तकम्)** उस दुष्ट को **(अश्मना)** विष हरनेवाले पत्थर से मैं **(भिनद्मि)** अलग करता हूँ **(ततः)** इस कारण **(विषम्)** उस विष को छोड़ **(संवतः)** विभागवाली **(पराचीः)** जो परे दूर प्राप्त होतीं उन दिशाओं को **(अनु)** पीछा लखि **(प्र, वावृते)** प्रवृत्त होता है, उनसे भी निकल जाता है॥ १५॥

भावार्थः-जो पुरुष विष हरनेवाले रत्नों से विष को निवृत्त करते हैं, वे विष से उत्पन्न हुए रोगों को मार बली होकर शत्रुभूत रोगों को जीतते हैं॥ १५॥

अथ वृश्चिकादिविषहरणविषयमाह॥

अब वीछी आदि के विष हरने के विषय को अगले मन्त्र में कहा है॥

कु॒षु॒म्भ॒कस्तदब्रवीद् गि॒रेः प्र॑वर्तमान॒कः।

वृश्चि॑कस्यार॒सं वि॒षमर॒सं वृ॑श्चिक ते वि॒षम्॥ १६॥ १६॥ २४॥ १॥

कु॒षु॒म्भ॒कः। तत्। अ॒ब्र॒वी॒त्। गि॒रेः। प्र॒ऽव॒र्त॒मा॒न॒कः। वृश्चि॑कस्य। अ॒र॒सम्। वि॒षम्। अ॒र॒सम्। वृ॒श्चि॒क॒। ते॒। वि॒षम्॥ १६॥

पदार्थः- **(कुषुम्भकः)** अल्पः कुषुम्भो नकुलः **(तत्)** **(अब्रवीत्)** ब्रूते **(गिरेः)** शैलात् **(प्रवर्त्तमानकः)** प्रकृष्टतया वर्त्तमानः **(वृश्चिकस्य)** **(अरसम्)** अविद्यमानरसम् **(विषम्)** **(अरसम्)** **(वृश्चिकः)** यो वृश्चति छिनत्त्यङ्गानि तस्य **(ते)** तस्य **(विषम्)**॥ १६॥

अन्वयः-गिरेः प्रवर्त्तमानकः कुषुम्भको वृश्चिकस्य विषमरसं यदब्रवीत्ततो हे वृश्चिक! तेऽरसं विषमस्ति॥१६॥

भावार्थः-मनुष्या वृश्चिकादिविषनिवारकं पर्वतीयनकुलसंरक्षणं कुर्युर्यतो विषरोगनिवारणक्षमा भवेयुरिति॥१६॥

अत्र विषहरौषधजीवविषवैद्यानां गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति एकनवत्युत्तरं शततमं १९१ सूक्तं षोडशो १६ वर्गश्चतुर्विंशोऽनुवाकः प्रथमं मण्डलञ्च समाप्तम्॥

पदार्थः- (**गिरेः**) पर्वत से (**प्रवर्त्तमानकः**) प्रवृत्त हुआ (**कुषुम्भकः**) छोटा नेउला (**वृश्चिकस्य**) वीछीं के (**विषम्**) विष को (**अरसम्**) नीरस जो (**अब्रवीत्**) कहता अर्थात् चेष्टा से दूसरों को जताता है, (**तत्**) इस कारण हे (**वृश्चिक**) अङ्गों को छेदन करनेवाले प्राणी! (**ते**) तेरे (**अरसम्**) (**विषम्**) विष है॥१६॥

भावार्थः-मनुष्य वीछी आदि छोटे-छोटे जीवों के विष हरनेवाले पर्वतीय निउले का संरक्षण करे, जिससे विष रोगों को निवारण करने में समर्थ होवें॥१६॥

इस सूक्त में विष हरनेवाली ओषधी, विष हरनेवाले जीव और विषहारी वैद्यों के गुण का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह समझना चाहिये॥

यह एक सौ एक्यानवां १९१ सूक्त और सोलहवां १६ वर्ग चौबीसवां २४ अनुवाक और प्रथम मण्डल समाप्त हुआ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां परमविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाभ्यां समन्विते सुप्रमाणयुक्ते सुभाषाविभूषिते ऋग्वेदभाष्ये प्रथमं मण्डलं समाप्तम्॥

॥ओ३म्॥

ऋग्वेद-भाष्यम्॥

अथ द्वितीयं मण्डलम्॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

त्वमग्न इत्यादिमस्य षोडशर्चस्य आङ्गिरसः शौनहोत्रो भार्गवो गृत्समद ऋषिः। अग्निर्देवता। १ पङ्क्तिः। ९ भुरिक् पङ्क्तिः। १३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, १५ विराड् जगती। १६ निचृज्जगती छन्दः। निषादः स्वरः। ३, ५, ८, १० निचृत्त्रिष्टुप्। ४, ६, ११, १२, १४ भुरिक् त्रिष्टुप्। ७ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाग्निदृष्टान्तेन विद्वद्विद्यार्थिकृत्यमाह॥

अब दूसरे मण्डल का और उसमें प्रथम सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि के दृष्टान्त से विद्वान् और विद्यार्थियों के कृत्य को कहते हैं॥

त्वम॑ग्ने॒ द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑।
त्वं वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑॥ १॥

त्वम्। अ॒ग्ने॒। द्युऽभिः॑। त्वम्। आ॒शु॒शु॒क्षणिः॑। त्वम्। अ॒त्ऽभ्यः। त्वम्। अश्म॑नः। परि॑। त्वम्। वने॑भ्यः। त्वम्। ओष॑धीभ्यः। त्वम्। नृ॒णाम्। नृ॒ऽपते॒। जा॒य॒से॒। शुचिः॑॥ १॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव राजमान विद्वन् (**द्युभिः**) प्रकाशैः (**त्वम्**) (**आशुशुक्षणिः**) शीघ्रकारी (**त्वम्**) (**अद्भ्यः**) जलेभ्यः (**त्वम्**) (**अश्मनः**) पाषाणात् (**परि**) सर्वतः (**त्वम्**) (**वनेभ्यः**) जङ्गलेभ्यः (**त्वम्**) (**ओषधीभ्यः**) (**त्वम्**) (**नृणाम्**) मनुष्याणाम् (**नृपते**) नृणां पालक (**जायसे**) (**शुचिः**)॥ १॥

अन्वयः-हे अग्ने! नृपते! यस्त्वं द्युभिरग्निरिव त्वमाशुशुक्षणिस्त्वमद्भ्यः पालको मेघ इव त्वमश्मनस्परि रत्नमिव त्वं वनेभ्यश्चन्द्र इव त्वमोषधीभ्यो वैद्य इव त्वं च नृणां मध्ये शुचिर्जायसे सोऽस्माभिः सत्कर्त्तव्योऽसि॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे राजन्! यथा विद्युत्स्वप्रकाशेन शीघ्रं गन्त्री जलपाषाणवनौषधिपवित्रकारकत्वेन सर्वेषां पालिकाऽस्ति तथा विद्वान् समग्रसामग्र्या पवित्राचारः सन् विद्यादिप्रकाशेन सर्वेषामुन्नतिकरो भवति। अयं (मन्त्रः) निरुक्ते व्याख्यातः। (निरु०६.१)॥१॥

पदार्थः-हे **(अग्ने)** अग्नि के समान **(नृपते)** मनुष्यों की पालना करनेवाले! जो **(त्वम्)** आप **(द्युभिः)** विद्यादि प्रकाशों से विराजमान **(त्वम्)** आप **(आशुशुक्षणिः)** शीघ्रकारी **(त्वम्)** आप **(अद्भ्यः)** जलों से पालना करनेवाले मेघ के समान **(त्वम्)** आप **(अश्मनः, परि)** पाषाण के सब ओर से निकले रत्न के समान **(त्वम्)** आप **(वनेभ्यः)** जङ्गलों में चन्द्रमा के तुल्य **(त्वम्)** आप **(ओषधीभ्यः)** ओषधियों से वैद्य के समान और **(त्वम्)** आप **(नृणाम्)** मनुष्यों के बीच **(शुचिः)** पवित्र शुद्ध **(जायसे)** होते हैं, सो आप लोग हम लोगों से सत्कार करने योग्य हैं॥१॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे राजन्! जैसे बिजुली अपने प्रकाश से शीघ्र जानेवाली जल, पाषाण, वन और ओषधियों के पवित्र करने से सबकी पालना करनेवाली है, वैसे विद्वान् जन समग्र सामग्री से पवित्र आचरणवाला होता हुआ विद्यादि के प्रकाश से सबकी उन्नति करनेवाला होता है। इस मन्त्र का निरुक्त में भी व्याख्यान है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे॥२॥

तव। अग्ने। होत्रम्। तव। पोत्रम्। ऋत्वियम्। तव। नेष्ट्रम्। त्वम्। अग्नित्। ऋतऽयतः। तव। प्रऽशास्त्रम्। त्वम्। अध्वरिऽयसि। ब्रह्मा। च। असि। गृहऽपतिः। च। नः। दमे॥२॥

पदार्थः-**(तव)** विद्याधर्मविनयै राजमानस्य **(अग्ने)** पावकवद्बलिष्ठ **(होत्रम्)** हूयते दीयते यस्मिँस्तत् **(तव)** **(पोत्रम्)** पवित्रम् **(ऋत्वियम्)** ऋत्विगर्हम् **(तव)** **(नेष्ट्रम्)** नयनम् **(त्वम्)** **(अग्नित्)** पावकप्रदीप्तकरः **(ऋतायतः)** आत्मन ऋतं सत्यमिच्छतः **(तव)** **(प्रशास्त्रम्)** प्रशासनम् **(त्वम्)** **(अध्वरीयसि)** आत्मनोऽध्वरमहिंसामिच्छसि **(ब्रह्मा)** चतुर्वेदवित् **(च)** **(असि)** **(गृहपतिः)** गृहकृत्यस्य पालकः **(च)** **(नः)** अस्माकम् **(दमे)** दाम्यन्ति जना यस्मिन् गृहे तस्मिन् गृहे। अयं मन्त्रः निरुक्ते व्याख्यातः। (निरु०१.८)॥२॥

अन्वयः-हे अग्ने! अग्निरिव वर्त्तमान तव होत्रं तव पोत्रं तव नेष्ट्रमृत्वियं त्वमग्निदृतायतस्तव प्रशास्त्रं चाऽस्ति यस्त्वमध्वरीयसि त्वं ब्रह्मा चाऽसि नो दमे गृहपतिश्चाऽसि॥२॥

भावार्थः-यस्य पुरुषस्याग्निहोत्रवदुपकार ऋत्विक्कर्मवत् पवित्रा क्रियाऽऽप्तवन्न्यायोऽग्निविद्या-विज्ञातृवदुद्यमो न्यायाधीशवन्न्यायव्यवस्था यजमानवदहिंसा वेदपारगवद्विद्या गृहपतिवदैश्वर्य्यसंग्रहश्च स्यात्, स एव प्रशंसां प्राप्तुमर्हति॥ २॥

पदार्थः-हे **(अग्ने)** अग्नि के समान बलवान् वर्त्तमान विद्वान्! **(तव)** विद्या, धर्म और नम्रता से प्रकाशमान जो आप उनका **(होत्रम्)** जिसमें पदार्थ होमा जाता वह होता का काम **(तव)** आपका **(पोत्रम्)** पवित्र काम **(तव)** आपका **(नेष्ट्रम्)** पहुँचाने का काम वह है **(ऋत्वियम्)** कि जो ऋत्विजों के योग्य है **(त्वम्)** आप **(अग्नित्)** अग्नि को प्रदीप्त करनेवाले और **(ऋतायतः)** अपने को सत्य की इच्छा करनेवाले **(तव)** आपका **(प्रशास्त्रम्)** उत्तम शिक्षा करना काम है **(त्वम्)** आप **(अध्वरीयसि)** अपने को अहिंसा कर्म की इच्छा करते **(त्वम्)** आप **(ब्रह्मा)** चारों वेदों के जाननेवाले **(च)** **(असि)** हैं और **(नः)** हम लोगों के **(दमे)** जिसमें जन इन्द्रियों का दमन करते हैं, इस घर में **(गृहपतिः)** घर के कामों की रक्षा करनेहारे **(च)** भी हैं॥ २॥

भावार्थः-जिस पुरुष का अग्निहोत्र के तुल्य उपकार, ऋत्विजों के कर्म के समान पवित्र क्रिया, आप्त विद्वानों के समान न्याय, अग्निविद्या को जाननेवाले के समान उद्यम, न्यायाधीश के समान न्यायव्यवस्था, यज्ञ करनेवाले के समान अहिंसा, वेदपारङ्गत के समान विद्या और गृहपति के समान ऐश्वर्य्य का संग्रह हो, वही प्रशंसा को प्राप्त होने योग्य होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः।
त्वं ब्रह्मा रयिविद् ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या॥ ३॥

त्वम्। अग्ने। इन्द्रः। वृषभः। सताम्। असि। त्वम्। विष्णुः। उरुऽगायः। नमस्यः। त्वम्। ब्रह्मा। रयिऽवित्। ब्रह्मणस्पते। त्वम्। विधर्तरिति विऽधर्तः। सचसे। पुरम्ऽध्या॥ ३॥

पदार्थः-**(त्वम्)** **(अग्ने)** सूर्य्यवद्वर्त्तमान **(इन्द्रः)** ऐश्वर्यवान् **(वृषभः)** दुष्टसामर्थ्यहन्ता **(सताम्)** सत्पुरुषाणां मध्ये **(असि)** **(त्वम्)** **(विष्णुः)** जगदीश्वरवत् **(उरुगायः)** बहुभिः स्तुतः **(नमस्यः)** सत्कर्त्तुमर्हः **(त्वम्)** **(ब्रह्मा)** अखिलवेदाऽध्येता **(रयिवित्)** पदार्थविद्यायुक्तः **(ब्रह्मणस्पते)** वेदविद्याप्रचारक **(त्वम्)** **(विधर्त्तः)** यो विविधान् शुभान् गुणान् धरति तत्सम्बुद्धौ **(सचसे)** सहवर्त्तसे **(पुरन्ध्या)** पुरं पूर्णां विद्यां ध्यायति या तया सह॥ ३॥

अन्वयः-हे अग्ने! इन्द्रो वृषभस्त्वं सतां नमस्योऽसि विष्णुस्त्वं सतामुरुगायोऽसि, हे ब्रह्मणस्पते! यस्त्वं रयिविद् ब्रह्माऽसि। हे विधर्त्तस्त्वं पुरन्ध्या सचसे॥३॥

भावार्थः-यो मनुष्यो ब्रह्मचर्येणाऽप्तानां विदुषां सकाशात् प्राप्तविद्याशिक्ष ईश्वरवत्सर्वोपकारतया प्राप्तप्रशंसासत्कारः प्रत्यहं प्रज्ञया सर्वान् शुभगुणकर्मस्वभावान् धरति सोऽलं विद्यो भवति॥३॥

पदार्थः-हे (**अग्ने**) सूर्य के समान वर्त्तमान! (**इन्द्रः**) ऐश्वर्यवान् (**वृषभः**) दुष्टों के सामर्थ्य को विनाशनेवाले (**त्वम्**) आप (**सताम्**) सत्पुरुषों के बीच (**नमस्यः**) सत्कार करने योग्य (**असि**) हैं, (**विष्णुः**) जगदीश्वर के समान (**त्वम्**) आप सज्जनों में (**उरुगायः**) बहुतों से कीर्त्तन किये हुए हैं। हे (**ब्रह्मणस्पते**) वेदविद्या का प्रचार करनेवाले! जो (**त्वम्**) आप (**रयिवित्**) पदार्थविद्या के जानने (**ब्रह्मा**) समस्त वेद के पढ़नेवाले हैं। हे (**विधर्त्तः**) जो नाना प्रकार के शुभ गुणों को धारण करनेवाले! (**त्वम्**) आप (**पुरन्ध्या**) पूर्ण विद्या के धारण करनेवाली स्त्री उसके साथ (**सचसे**) सम्बन्ध करते हैं॥३॥

भावार्थः-जो मनुष्य ब्रह्मचर्य से आप्त विद्वानों के समीप से विद्या शिक्षा को प्राप्त हुआ ईश्वर के समान उपकार-दृष्टि से प्रशंसा और सत्कार को प्राप्त हुआ प्रतिदिन उत्तम बुद्धि से समस्त शुभ गुण, कर्म और स्वभावों को धारण करता है, वह सम्पूर्ण विद्यावान् होता है॥३॥

अथ प्रकृतविषये राजशिष्यकृत्यमाह॥

अब चलते हुए विषय में राजशिष्य के कृत्य का वर्णन करते हैं॥

त्वमग्ने॒ राजा॒ वरु॑णो धृत॒व्र॒त॒स्त्वं मि॒त्रो भ॑वसि द॒स्म ईड्य॑ः।
त्वमर्य॒मा सत्प॑ति॒र्यस्य॑ सं॒भुज॒ं त्वमंशो॑ वि॒दथे॑ देव भाज॒युः॥४॥

त्वम्। अ॒ग्ने॒। राजा॑। वरु॑णः। धृ॒त॒ऽव्र॒तः। त्वम्। मि॒त्रः। भ॒व॒सि॒। द॒स्मः। ईड्य॑ः। त्वम्। अ॒र्य॒मा। सत्ऽप॑तिः। यस्य॑। स॒म्ऽभुज॑म्। त्वम्। अंश॑ः। वि॒दथे॑। दे॒व॒। भा॒ज॒युः॥४॥

पदार्थः-(**त्वम्**) (**अग्ने**) सूर्यवत्सर्वार्थप्रकाशक (**राजा**) शरीरात्ममनोभिस्तेजस्वी (**वरुणः**) वरः श्रेष्ठः (**धृतव्रतः**) स्वीकृतसत्यः (**त्वम्**) (**मित्रः**) प्राणवत् सुहृत् (**भवसि**) (**दस्मः**) दुःखानां दुष्टानामुपक्षेता (**ईड्यः**) स्तोतुमर्हः (**त्वम्**) (**अर्य्यमा**) न्यायकारी (**सत्पतिः**) सतां पुरुषाणामाचाराणां च पालकः (**यस्य**) (**सम्भुजम्**) संभोक्तुम् (**त्वम्**) (**अंशः**) प्रेरकः (**विदथे**) संग्रामे (**देव**) कमनीयतम (**भाजयुः**) अर्थिप्रत्यर्थिनां न्यायव्यवस्थया विभाजयिता॥४॥

अन्वयः-हे देवाग्ने! यस्त्वं धृतव्रतो वरुणइव राजा भवसि दस्म ईड्यो मित्रो भवसि यस्य राज्यस्य संभुजन्त्वमर्य्यमा सत्पतिर्भवस्यंशस्त्वं विदथे भाजयुर्भवसि तस्मादस्माकं राजाऽसि॥४॥

भावार्थः-येन सत्यं धृत्वाऽसत्यं त्यज्यते मित्रवत्सर्वस्मै सुखं दीयते स सत्यसन्धिर्दुष्टाचारात् पृथक्भूतः सत्याऽसत्ययोर्यथावद्विवेचनकारकः सर्वेषां मान्यः स्यात्॥४॥

पदार्थः-हे **(देव)** अतीव मनोहर **(अग्ने)** सूर्य के समान समस्त अर्थों का प्रकाश करनेवाले! जो **(त्वम्)** आप **(धृतव्रतः)** सत्य को धारण किये स्वीकार किये हुए **(वरुणः)** श्रेष्ठ के समान **(राजा)** शरीर, आत्मा और मन से प्रतापवान् **(भवसि)** होते हैं, **(दस्मः)** दुःख और दुष्टों के विनाश करनेवाले **(ईड्यः)** प्रशंसा के योग्य **(मित्रः)** प्राण के मित्र होते हैं, **(यस्य)** जिस राज्य के **(सम्भुजम्)** सम्भोग करने को **(त्वम्)** आप **(अर्यमा)** न्यायकारी **(सत्पतिः)** सज्जन और सदाचारों के पालनेवाले होते हैं, **(अंशः)** प्रेरणा करनेवाले **(त्वम्)** आप **(विदथे)** संग्राम में **(भाजयुः)** अर्थी-प्रत्यर्थियों की व्यवस्था से पृथक्-पृथक् करनेवाले होते हैं, इससे हम लोगों के राजा हैं॥४॥

भावार्थः-जिससे सत्य को धारण कर असत्य का त्याग किया जाता और मित्र के समान सबके लिये सुख दिया जाता है, वह सत्यसन्धि दुष्टाचार से अलग हुआ सत्य और असत्य का यथावद्विवेचन करनेवाला सबको मान करने योग्य होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम्।
त्वमाशुहेमा रिरिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः॥५॥१७॥

त्वम्। अग्ने। त्वष्टा। विधते। सुऽवीर्यम्। तव। ग्नावः। मित्रऽमहः। सऽजात्यम्। त्वम्। आशुऽहेमा। ररिषे। सुऽअश्व्यम्। त्वम्। नराम्। शर्धः। असि। पुरुऽवसुः॥५॥

पदार्थः-**(त्वम्)** **(अग्ने)** वह्निरिव वर्त्तमान **(त्वष्टा)** छेत्ता **(विधते)** सेवमानाय नराय **(सुवीर्यम्)** सुष्ठु पराक्रमम् **(तव)** **(ग्नावः)** ग्ना प्रशंसिता वाणी विद्यते यस्य तत्सम्बुद्धौ **(मित्रमहः)** यो मित्राणि महति सत्करोति तत्सम्बुद्धौ **(सजात्यम्)** समानासु जातिषु भवम् **(त्वम्)** **(आशुहेमा)** आशून् शीघ्रकारिणो जनान् हिनोति वर्द्धयति सः **(ररिषे)** प्रयच्छसि **(स्वश्व्यम्)** शोभनेष्वश्वेष्वग्न्यादिषु भवम् **(त्वम्)** **(नराम्)** मनुष्याणाम् **(शर्धः)** बलम् **(असि)** **(पुरूवसुः)** पुरूणां बहूनां वासयिता॥५॥

अन्वयः-हे अग्ने! त्वष्टा त्वं विधते सुवीर्य्यं ददासि। हे मित्रमहो ग्नावः! तव सजात्यं प्रेमाऽस्ति। आशुहेमा त्वं स्वश्व्यं ररिषे स त्वं पुरूवसुर्नरां शर्धो वर्द्धकोऽसि॥५॥

भावार्थः-यस्य पुरुषस्य सत्या वाक् परार्थः पराक्रमोऽस्ति, स राजसु प्रशंसितो भवति॥५॥

पदार्थः-हे (**अग्ने**) अग्नि के समान वर्त्तमान विद्वान् (**त्वष्टा**) अज्ञान का विनाश करने वाले! (**त्वम्**) आप (**विधते**) सेवा करते हुए मनुष्य के लिये (**सुवीर्यम्**) उत्तम पराक्रम को देते हैं। हे (**मित्रमहः**) मित्रों का सत्कार करनेवाले (**ग्नावः**) प्रशंसित वाणी से युक्त जन! (**तव**) आपका (**सजात्यम्**) समान जातियों में प्रसिद्ध हुआ प्रेम है, (**आशुहेमा**) शीघ्रकारी जनों को वृद्धि देनेवाले (**त्वम्**) आप (**स्वश्व्यम्**) सुन्दर अग्न्यादि पदार्थों में प्रसिद्ध हुए बल को (**रिरिषे**) देते हैं सो (**त्वम्**) आप (**पुरूवसुः**) बहुतों को निवास देनेवाले (**नराम्**) मनुष्यों के (**शर्धः**) बल के बढ़ानेवाले (**असि**) हैं॥५॥

भावार्थः-जिस पुरुष की सत्यवाणी और परार्थ पराक्रम है, वह राजजनों में प्रशंसायुक्त होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना॥६॥

त्वम्। अग्ने। रुद्रः। असुरः। महः। दिवः। त्वम्। शर्धः। मारुतम्। पृक्षः। ईशिषे। त्वम्। वातैः। अरुणैः। यासि। शम्ऽगयः। त्वम्। पूषा। विधतः। पासि। नु। त्मना॥६॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव दाहकृत (**रुद्रः**) दुष्टानां रोदयिता (**असुरः**) मेघ इव (**महः**) महान् (**दिवः**) प्रकाशमानस्य (**त्वम्**) (**शर्द्धः**) बलम् (**मारुतम्**) महद्विषयम् (**पृक्षः**) संपृक्तम् (**ईशिषे**) (**त्वम्**) (**वातैः**) वायुभिः (**अरुणैः**) अग्न्यादिभिः (**यासि**) प्राप्नोषि (**शङ्गयः**) शं सुखं गमयति सः (**त्वम्**) (**पूषा**) पोषकः (**विधतः**) सेवकान् (**पासि**) पालयसि (**नु**) सद्यः (**त्मना**) आत्मना॥६॥

अन्वयः-हे अग्ने! त्वं रुद्रोऽसुरो मेघ इव महो महांस्त्वं मारुतं पृक्षो दिवः शर्ध ईशिषे त्वं वातैररुणैः सह यासि पूषा शङ्गयस्त्वं त्मना विधतो नु पासि तस्मात् कस्य सत्कर्त्तव्यो न भवसि?॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये जना बलमिच्छन्ति दुष्टान् सन्ताड्य धर्माचारिणः सुखयन्ति सदैव सर्वस्योन्नतिमिच्छन्ति तेऽसंख्यैश्वर्य्यं प्राप्नुवन्ति॥६॥

पदार्थः-हे (**अग्ने**) अग्नि के समान दाह करनेवाले! (**त्वम्**) आप (**रुद्रः**) दुष्टों को रुलानेवाले (**असुरः**) मेघ के समान (**महः**) बड़े (**त्वम्**) आप (**मारुतम्**) मरुत् विषयक (**पृक्षः**)

सम्बन्ध और **(दिवः)** प्रकाशमान पदार्थ के **(शर्द्धः)** बल के **(ईशिषे)** ईश्वर हैं, उसके व्यवहार प्रकाश करने में समर्थ हैं **(त्वम्)** आप **(वातैः)** पवनों से और **(अरुणैः)** अग्नि आदि पदार्थों के साथ **(यासि)** प्राप्त होते हैं **(पूषा)** पुष्टि करने और **(शङ्गयः)** सुख प्राप्ति करानेवाले **(त्वम्)** आप **(त्मना)** अपने से **(विधतः)** सेवकों की **(नु)** शीघ्र **(पासि)** पालना करते हैं, इससे किसको सत्कार करने योग्य नहीं होते?॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जन बल की इच्छा करते, दुष्टाचारियों को अच्छे प्रकार ताड़ना देकर धर्माचारियों को सुखी करते और सदैव सबकी उन्नति को चाहते हैं, वे अतुल ऐश्वर्य को प्राप्त होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत्॥७॥

त्वम्। अग्ने। द्रविणः॑दाः। अरम्ऽकृते। त्वम्। देवः। सविता। रत्नऽधाः। असि। त्वम्। भगः। नृऽपते। वस्वः। ईशिषे। त्वम्। पायुः। दमे। यः। ते। अविधत्॥७॥

पदार्थः-**(त्वम्)** **(अग्ने)** सूर्यवत् सुखप्रदातः **(द्रविणोदाः)** धनप्रदः **(अरङ्कृते)** पूर्णपुरुषार्थिने **(त्वम्)** **(देवः)** कमनीयः **(सविता)** ऐश्वर्यं प्रति प्रेरकः **(रत्नधाः)** यो रत्नानि दधाति सः **(असि)** **(त्वम्)** **(भगः)** ऐश्वर्यवान् **(नृपते)** नृणां पालक **(वस्वः)** वसूनि **(ईशिषे)** **(त्वम्)** **(पायुः)** पालकः **(दमे)** निजगृहे **(यः)** **(ते)** तव **(अविधत्)** विदधाति॥७॥

अन्वयः-हे अग्ने! त्वमरङ्कृते द्रविणोदाः त्वं रत्नधाः सविता देवोऽसि। हे नृपते भगवँस्त्वं वस्व ईशिषे यो दमे तेऽविधत् त्वत्सेवां विदधाति तस्य त्वं पायुरसि॥७॥

भावार्थः-ये पुरुषार्थिनां मनुष्याणां सत्कर्त्तारोऽलसानां तिरस्कर्त्तारः परिचारकेभ्यः सुखस्य दातार ऐश्वर्यवन्तो भवेयुस्त इह नृपतयो भवितुमर्हेयुः॥७॥

पदार्थः-हे **(अग्ने)** सूर्य के समान सुख देनेवाले! **(त्वम्)** आप **(अरङ्कृते)** पूरे पुरुषार्थ करनेवाले के लिये **(द्रविणोदाः)** धन देनेवाले **(त्वम्)** आप **(रत्नधाः)** रत्नों को धारण और **(सविता)** ऐश्वर्य के प्रति प्रेरणा करनेवाले **(देवः)** मनोहर देव **(असि)** हैं। हे **(नृपते)** मनुष्यों की पालना करनेवाले और **(भगः)** ऐश्वर्यवान्! **(त्वम्)** आप **(वस्वः)** धनों की **(ईशिषे)** ईश्वरता रखते

हैं **(यः)** जो **(ते)** आपके **(दमे)** निज घर में **(अविधत्)** विधान करता है, उसके **(त्वम्)** आप **(पायुः)** पालनेवाले हैं॥७॥

भावार्थः-जो पुरुषार्थी मनुष्यों का सत्कार तथा आलस्य करनेवालों का तिरस्कार करनेवाले और सेवकों के लिये सुख देनेवाले ऐश्वर्यवान् हों वे इस संसार में सबके राजा होने को योग्य होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति॥८॥

त्वाम्। अग्ने। दमे। आ। विश्पतिम्। विशः। त्वाम्। राजानम्। सुऽविदत्रम्। ऋञ्जते। त्वम्। विश्वानि। सुऽअनीक। पत्यसे। त्वम्। सहस्राणि। शता। दश। प्रति॥८॥

पदार्थः-**(त्वाम्)** **(अग्ने)** अग्निरिव **(दमे)** निजगृहे **(आ)** समन्तात् **(विश्पतिम्)** प्रजापालकम् **(विशः)** प्रजाः **(त्वाम्)** **(राजानम्)** स्वस्वामिनम् **(सुविदत्रम्)** सुष्ठुदातारम् **(ऋञ्जते)** प्रसाध्नुवन्ति। अत्र व्यत्ययेनात्मनेपदमेकवचनञ्च। **ऋञ्जतिः प्रसाधनकर्मासु पठितम्।** (निरु०६.२१)। **(त्वम्)** **(विश्वानि)** सर्वाणि **(स्वनीक)** शोभनमनीकं सेना यस्य तत्सम्बुद्धौ **(पत्यसे)** पतिभावमाचरसि **(त्वम्)** **(सहस्राणि)** **(शता)** शतानि **(दश)** **(प्रति)**॥८॥

अन्वयः-हे अग्ने! विश्पतिं त्वां विशो दमे आ ऋञ्जते सुविदत्रं त्वां राजानमृञ्जते। हे स्वनीक! त्वं विश्वानि पत्यसे त्वं सहस्राणि शता दश प्रति पत्यसे॥८॥

भावार्थः-स एव राजा भवितुमर्हति यं सर्वाः प्रजाः स्वीकुर्य्युः। स एव सेनापत्यमर्हति यो दशभिः शतैः सहस्रैश्च वीरैः सह योद्धुं शक्नोति॥८॥

पदार्थः-हे **(अग्ने)** अग्नि के समान प्रतापवान् **(विश्पतिम्)** प्रजा की पालना करनेवाले! **(त्वाम्)** आपको **(विशः)** प्रजाजन **(दमे)** निज घर में **(आ, ऋञ्जते)** सब ओर से प्रसिद्ध करते हैं अर्थात् प्रजापति मानते हैं और **(सुविदत्रम्)** सुन्दर देनेवाले **(त्वाम्)** आपको **(राजानम्)** अपना स्वामी प्रसिद्ध करते हैं। हे **(स्वनीक)** सुन्दर सेना रखनेवाले! **(त्वम्)** आप **(विश्वानि)** समस्त पदार्थों को **(पत्यसे)** पतिभाव को प्राप्त होते हैं और **(त्वम्)** आप **(सहस्राणि)** सहस्रों **(शता)** सैकड़ों और **(दश)** दहाइयों के **(प्रति)** प्रति पतिभाव को प्राप्त होते हैं॥८॥

भावार्थः-वही राजा होने योग्य है जिसको समस्त प्रजाजन स्वीकार करें। वही सेनापति होने को योग्य है जो दश वा सौ वा सहस्र वीरों के साथ युद्ध कर सकता है॥८॥

पुना राजशिष्यविषयमाह॥

फिर राजशिष्य विषय को अगले मन्त्र में कहा है॥

त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम्।
त्वं पुत्रो भवसि यस्तेऽविधत् त्वं सखा सुशेवः पास्याधृषः॥९॥

त्वाम्। अग्ने। पितरम्। इष्टिऽभिः। नरः। त्वाम्। भ्रात्राय। शम्या। तनूऽरुचम। त्वम्। पुत्रः। भवसि। यः। ते। अविधत्। त्वम्। सखा। सुऽशेवः। पासि। आऽधृषः॥९॥

पदार्थः-(त्वाम्) (अग्ने) अग्निरिव वर्त्तमान राजन् **(पितरम्)** पालकम् **(इष्टिभिः)** होमैरिव सत्कारैः **(नरः)** मनुष्याः **(त्वाम्) (भ्रात्राय)** बन्धुभावाय **(शम्या)** कर्मणा **(तनूरुचम्)** तन्वो रोचन्ते यस्मै तम् **(त्वम्) (पुत्रः)** पुरु दुःखाद् रक्षकः **(भवसि) (यः) (ते)** तव **(अविधत्)** विधत्ते **(त्वम्) (सखा) (सुशेवः)** सुष्ठु सुखप्रदः **(पासि) (आधृषः)** समन्ताद्धर्षणं कुर्वतः॥९॥

अन्वयः-हे अग्ने! यस्त्वं पुत्रो भवसि यस्ते सुखमविधत्। यः सुशेवः सखा त्वमाधृषः पासि तं त्वां तनूरुचं तं त्वा पितरमिष्टिभिरग्निरिव वर्त्तमानं भ्रात्राय शम्या नरः पान्तु॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा होमादिना सुसेवितोऽग्नी रक्षको भवति तथा भ्रातरः सखायः पुत्रा भ्रातॄन्मित्राणि पितॄँश्च सेवन्ताम्॥९॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्तमान राजन्! **(यः)** जो **(त्वम्)** आप **(पुत्रः)** बहुत दुःख से रक्षा करनेवाले **(भवसि)** होते हैं जो **(ते)** आपके सुख का **(अविधत्)** विधान करता है जो **(सुशेवः)** सुन्दर सुख देनेवाले **(सखा)** मित्र **(त्वम्)** आप **(आधृषः)** सब ओर से धृष्टता करनेवाले जनों को **(पासि)** पालते हो उन **(त्वाम्)** आप **(तनूरुचम्)** तनूरुच् अर्थात् जिनके लिये शरीर प्रकाशित होते वा उन **(त्वाम्)** आप **(पितरम्)** पालनेवाले वा **(इष्टिभिः)** हवनों के समान सत्कारों से अग्नि के तुल्य वर्त्तमान को **(भ्रात्राय)** भाईपने के लिये **(शम्या)** कर्म के साथ **(नरः)** मनुष्य पालें॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे होम आदि से अच्छा सेवन किया हुआ अग्नि रक्षा करनेवाला होता है, वैसे भ्राता, मित्र, पुत्रजन अपने भ्राता, मित्र और पितरों को सेवें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमग्न ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे।

त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः॥ १०॥ १८॥

त्वम्। अग्ने। ऋभुः। आके। नमस्यः। त्वम्। वाजस्य। क्षुमतः। रायः। ईशिषे। त्वम्। वि। भासि। अनु। दक्षि। दावने। त्वम्। विऽशिक्षुः। असि। यज्ञम्। आऽततनिः॥ १०॥

पदार्थः-(त्वम्) (अग्ने) सर्वशास्त्रपारङ्गत प्रतापवन् राजन् **(ऋभुः)** मेधावी **(आके)** समीपे **(नमस्यः)** सत्कर्त्तुं योग्यः **(त्वम्) (वाजस्य)** विज्ञाननिमित्तस्य **(क्षुमतः)** बह्वन्नादि विद्यते यस्य तस्य **(रायः)** धनस्य **(ईशिषे)** ईश्वरो भवसि **(त्वम्) (वि) (भासि)** प्रकाशयसि **(अनु) (दक्षि)** दहसि। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(दावने)** दानशीलाय **(त्वम्) (विशिक्षुः)** सुशिक्षकः **(असि) (यज्ञम्) (आततनिः)** विस्तारकः॥ १०॥

अन्वयः-हे अग्ने! त्वमृभुरसि त्वमाके नमस्योऽसि त्वं वाजस्य क्षुमतो राय ईशिषे त्वं विभास्यग्निरिवाऽनुदक्षि दावने विशिक्षुस्त्वं यज्ञमाततनिरसि॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽग्निवत् प्रजापीडकान् दहन्ति पुरुषार्थेनैश्वर्यमुन्नयन्ति विद्याविनयसुशीलादि प्रकाशयन्ति ते सर्वैर्माननीया भवन्ति॥ १०॥

पदार्थः-हे **(अग्ने)** सर्वशास्त्र पारङ्गत प्रतापवान् राजन्! **(त्वम्)** आप **(ऋभुः)** बुद्धिमान् हैं और **(आके)** समीप में **(नमस्यः)** नमस्कार सत्कार करने योग्य हैं **(त्वम्)** आप **(वाजस्य)** विज्ञान निमित्तक **(क्षुमतः)** बहुत अन्नादि पदार्थ समूह जिसके सम्बन्ध में विद्यमान उस **(रायः)** धन के **(ईशिषे)** ईश्वर होते हैं **(त्वम्)** आप **(विभासि)** विशेषता से सब पदार्थों का प्रकाश करते हैं और अग्नि के समान **(अनुदक्षि)** अनुकूलता से अज्ञानजन्य दुःख को दहन करते हो **(दावने)** दानशील **(विशिक्षुः)** उत्तम शिक्षा करनेवाले **(त्वम्)** आप **(यज्ञम्)** यज्ञ का **(आततनिः)** विस्तार करनेवाले **(असि)** हैं॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि के समान प्रजाओं के पीड़ा देनेवालों को जलाते हैं, पुरुषार्थ से ऐश्वर्य की उन्नति करते हैं, विद्या, विनय और उत्तम शीलादि का प्रकाश करते हैं, वे सबको माननीय होते हैं॥ १०॥

पुनरध्यापकविषयमाह॥

फिर अध्यापक विषय को अगले मन्त्र में कहा है॥

त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती॥ ११॥

त्वम्। अग्ने। अदितिः। देव। दाशुषे। त्वम्। होत्रा। भारती। वर्धसे। गिरा। त्वम्। इळा। शतऽहिमा। असि। दक्षसे। त्वम्। वृत्रऽहा। वसुऽपते। सरस्वती॥ ११॥

पदार्थः-(त्वम्) (अग्ने) विद्याप्रद विद्वन् **(अदितिः)** द्यौरिव विद्यागुणप्रकाशकः **(देव)** प्रकाशमान **(दाशुषे)** दात्रे **(त्वम्) (होत्रा)** आदातुमर्हे **(भारती)** या विद्याधर्त्रीव **(वर्द्धसे) (गिरा)** सुशिक्षाविद्यायुक्तया वाचा **(त्वम्) (इळा)** स्तोतुमर्हा **(शतहिमा)** शतं हिमानि यस्या आयुषि सा **(असि) (दक्षसे)** बलाय विद्याबलदानाय **(त्वम्) (वृत्रहा)** मेघहन्ता सूर्यइव **(वसुपते)** धनस्य पालक **(सरस्वती)** प्रशस्तविज्ञानयुक्तेव॥ ११॥

अन्वयः-हे देवाऽग्ने! त्वं दाशुषेऽदितिरसि त्वं होत्रा भारती सन् गिरा वर्द्धसे त्वं दक्षसे शतहिमा इडाऽसि। हे वसुपते! त्वं वृत्रहा तथा सरस्वत्यसि॥ ११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सद्विद्याऽध्यापकः शास्त्रपारङ्गतो विद्वान् मातृवत् पालयति सर्वतः सद्गुणान् ददाति ततः शिष्याः शीघ्रं विद्याबलयुक्ता भवन्ति॥ ११॥

पदार्थः-हे **(देव)** प्रकाशमान **(अग्ने)** विद्या देनेवाले विद्वान्! **(त्वम्)** आप **(दाशुषे)** दानशील शिष्य के लिये **(अदितिः)** अन्तरिक्ष प्रकाश के समान विद्या गुणों का प्रकाश करनेवाले हैं **(त्वम्)** आप **(होत्रा)** ग्रहण करने योग्य **(भारती)** विद्या धारण करनेवाली बालिका के समान होते हुए **(गिरा)** सुन्दर शिक्षा और विद्यायुक्त वाणी से **(वर्द्धसे)** वृद्धि को प्राप्त होते हैं **(त्वम्)** आप **(दक्षसे)** विद्या बल के देने के लिए **(शतहिमा)** सौ वर्ष जिसकी आयु वह **(इडा)** स्तुति के योग्य अध्यापिका के समान **(असि)** हैं, हे **(वसुपते)** धन के पालनेहारे! **(त्वम्)** आप **(वृत्रहा)** मेघहन्ता सूर्य के समान तथा **(सरस्वती)** प्रज्ञान विज्ञानयुक्त वाणी के समान हैं॥ ११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। अच्छी विद्या का पढ़ानेहारा, शास्त्र का पारगन्ता विद्वान् जन माता के समान पालना करता है और सब विषयों से उत्तम गुणों को देता है, उससे शिष्यजन शीघ्र विद्याबलयुक्त होते हैं॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वमग्ने सुभृत उत्तमं वयस्तवं स्पार्हे वर्ण आ संदृशि श्रियः।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः॥ १२॥

त्वम्। अग्ने। सुऽभृतः। उत्ऽउतमम्। वयः। तव। स्पार्हे। वर्णे। आ। सम्ऽदृशि। श्रियः। त्वम्। वाजः। प्रऽतरणः। बृहन्। असि। त्वम्। रयिः। बहुलः। विश्वतः। पृथुः॥ १२॥

पदार्थः-(**त्वम्**) (**अग्ने**) विद्युदिव बलिष्ठ (**सुभृतः**) शोभनं कर्म भृतं येन सः (**उत्तमम्**) श्रेष्ठम् (**वयः**) कमनीयं जीवनम् (**तव**) (**स्पार्हे**) अभीप्सनीये (**वर्णे**) शुक्लादिगुणे (**आ**) (**संदृशि**) सम्यग्द्रष्टव्ये (**श्रियः**) लक्ष्मीः (**त्वम्**) (**वाजः**) ज्ञानवान् (**प्रतरणः**) यः प्रकृष्टतया दुःखानि तरति (**बृहन्**) वर्द्धमानः (**असि**) (**त्वम्**) (**रयिः**) द्रव्यरूपः (**बहुलः**) बहूनि सुखानि लाति (**विश्वतः**) सर्वतः (**पृथुः**) विस्तीर्णः॥१२॥

अन्वयः-हे अग्ने! यस्त्वं रयिर्बहुलो विश्वतस्पृथुः सुभृतः प्रतरणो बृहन्नसि यस्त्वं वाजोऽसि यस्य तव स्पार्हे संदृशि वर्ण उत्तमं वय आ श्रियश्च वर्त्तन्ते, स त्वमध्यापको भव॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसो गुणकर्मस्वभावतो विद्युतं विदित्वा कार्येषु संप्रयुज्य श्रीमन्तो भवन्ति ब्रह्मचर्येण दीर्घायुषश्च जायन्ते तथा सर्वैर्विद्यायुक्तैर्मनुष्यैर्भवितव्यम्॥१२॥

पदार्थः-हे (**अग्ने**) बिजुली के समान बलीजन जो (**त्वम्**) आप (**रयिः**) द्रव्यरूप (**बहुलः**) बहुत सुखों के ग्रहण करनेहारे (**विश्वतः**) सबसे (**पृथुः**) विस्तार को प्राप्त (**सुभृतः**) उत्तम कर्म जिन्होंने धारण किया (**प्रतरणः**) कठिनता से दुःखों को पार होते और (**बृहन्**) बढ़ते हुए (**असि**) हैं जो (**त्वम्**) आप (**वाजः**) ज्ञानवान् हैं जिन (**तव**) आपके (**स्पार्हे**) इच्छा करने और (**संदृशि**) अच्छे प्रकार देखने योग्य (**वर्णे**) वर्ण में (**उत्तमम्**) उत्तम (**वयः**) मनोहर जीवन (**आ, श्रियः**) और सब और से लक्ष्मी वर्त्तमान है सो (**त्वम्**) आप अध्यापक हूजिये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन गुण, कर्म, स्वभाव से बिजुली को जान और कार्य्यों में उसका अच्छे प्रकार प्रयोग कर श्रीमान् होते हैं और ब्रह्मचर्य से दीर्घायु होते हैं, वैसे सब विद्यायुक्त मनुष्यों को होना चाहिये॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वामग्न आदित्यास आस्यं१ त्वां जिह्वा शुचयश्चक्रिरे कवे।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम्॥१३॥

त्वाम्। अग्ने। आदित्यासः। आस्यम्। त्वाम्। जिह्वाम्। शुचयः। चक्रिरे। कवे। त्वाम्। रातिऽसाचः। अध्वरेषु। सश्चिरे। त्वे इति। देवाः। हविः। अदन्ति। आऽहुतम्॥१३॥

पदार्थः-(**त्वाम्**) (**अग्ने**) अग्निवद्वर्त्तमान आप्त विद्वन् (**आदित्यासः**) द्वादश मासा इव विद्यार्थिनः (**आस्यम्**) मुखमिव प्रमुखम् (**त्वाम्**) (**जिह्वाम्**) वाणीम् (**शुचयः**) पवित्राः (**चक्रिरे**) कुर्वन्ति (**कवे**) सकलसाङ्गोपाङ्गवेदवित् (**त्वाम्**) (**रातिषाचः**) दानं सेवमानाः (**अध्वरेषु**)

अहिंसनीयेषु व्यवहारेषु **(सश्चिरे)** समवयन्ति **(त्वे)** त्वयि **(देवाः)** विद्वांसः **(हविः)** अत्तुमर्हम् **(अदन्ति)** आहुतम् समन्ताद् गृहीतम्॥१३॥

अन्वयः-हे कवेऽग्ने! सूर्यमादित्यास इव यं त्वामास्यं शुचयस्त्वां जिह्वामिव चक्रिरेऽध्वरेषु रातिषाचस्त्वां सश्चिरे यस्मिन् त्वे वर्त्तमाना देवा आहुतं हविरदन्ति स त्वमस्माकमध्यापको भव॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा संवत्सरमाश्रित्य मासा मुखमाश्रित्य देहपुष्टिर्जिह्वां समाश्रित्य रसविज्ञानं यज्ञं प्राप्य विद्वत्सत्कार उत्तममन्नं प्राप्य रुचिश्च जायते तथाप्तानध्यापकानाश्रित्य मनुष्याः शुभगुणलक्षणा जायन्ते॥१३॥

पदार्थः-हे **(कवे)** समस्त साङ्गोपाङ्ग वेद के जाननेवाले **(अग्ने)** अग्नि के समान वर्त्तमान विद्वान्! **(आदित्यासः)** बारह महीना जैसे सूर्य्य को, वैसे विद्यार्थी जन जिन **(त्वाम्)** आपको **(आस्यम्)** मुख के समान अग्रगन्ता और **(शुचयः)** पवित्र शुद्धात्मा जन **(त्वाम्)** आपको **(जिह्वाम्)** वाणीरूप **(चक्रिरे)** कर रहे मान रहे हैं तथा **(अध्वरेषु)** न नष्ट करने योग्य व्यवहारों में **(रातिषाचः)** दान के सेवनेवाले जन **(त्वाम्)** आपको **(सश्चिरे)** सम्यक् प्रकार से मिलते हैं **(त्वे)** तुम्हारे होते **(देवाः)** विद्वान् जन **(आहुतम्)** सब ओर से ग्रहण किये हुए **(हविः)** भक्षण करने योग्य पदार्थ को **(अदन्ति)** खाते हैं, सो आप हमारे अध्यापक हूजिये॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे **[**संवत्सर का**]** आश्रय लेकर महीने, मुख का आश्रय लेकर शरीर की पुष्टि, जिह्वा के आश्रय से रस का विज्ञान, यज्ञ को प्राप्त हो विद्वानों के सत्कार और उत्तम अन्न को पाकर रुचि होती है, वैसे आप्त शास्त्रज्ञ धर्मात्मा विद्वानों को प्राप्त होकर मनुष्य शुभ गुण लक्षणयुक्त होते हैं॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वे अग्ने विश्वे अमृतासो अदुह आसा देवा हविरदन्त्याहुतम्।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः॥१४॥

त्वे इति। अग्ने। विश्वे। अमृतासः। अदुहः। आसा। देवाः। हविः। अदन्ति। आऽहुतम। त्वया। मर्तासः। स्वदन्ते। आऽसुतिम्। त्वम्। गर्भः। वीरुधाम्। जज्ञिषे। शुचिः॥१४॥

पदार्थः-**(त्वे)** त्वयि **(अग्ने)** अग्निवत् स्वप्रकाशक **(विश्वे)** सर्वे **(अमृतासः)** स्वस्वरूपेण जन्ममरणरहिता जीवात्मानः **(अदुहः)** त्यक्तद्रोहाः **(आसा)** मुखेन। अत्र **छान्दसो वर्णलोप** इति नलोपः। **(देवाः)** विद्वांसः **(हविः)** **(अदन्ति)** **(आहुतम्)** **(त्वया)** **(मर्त्तासः)**

शरीरयोगेनजन्ममरणसहिताः **(स्वदन्ते)** सुष्ठु भुञ्जानाः **(आसुतिम्)** समन्ताज्जन्मभावम् **(त्वम्)** **(गर्भः)** कुक्षिस्थः **(वीरुधाम्)** लतावृक्षादीनां मध्ये **(जज्ञिषे)** जायसे **(शुचि)** पवित्रः॥१४॥

अन्वयः-हे अग्ने! त्वे सत्यद्रुहो विश्वेऽमृतासो देवा आहुतमासा हविरदन्ति येन त्वयासा स्वदन्तो मर्त्तास आसुतिं भजन्ते यस्त्वं वीरुधां गर्भोऽग्निवद्गर्भो भूत्वा शुचिस्सन् जज्ञिषे तं त्वां विद्याप्राप्तय आश्रयन्ति॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सर्वे जीवा विद्यमानेऽग्नौ सति जीवितुं भोक्तुं चार्हन्ति तथाऽऽप्तेष्वध्यापकेषु सत्सु पवित्रा रागद्वेषरहिता भूत्वा ऐहिकं पारमार्थिकं सुखं प्राप्य मुक्तावानन्दिता जन्मान्तरसंस्कारे पवित्रा जायन्ते॥१४॥

पदार्थः-हे **(अग्ने)** अग्नि के समान प्रकाशमान! आप **(त्वे)** तुम्हारे होते **(अद्रुहः)** द्रोह छोड़े हुए **(विश्वे)** सब **(अमृतासः)** अपने-अपने रूप से जन्म-मरण रहित जीवात्मा जिनके वे **(देवाः)** विद्वान् जन **(आहुतम्)** प्राप्त होने योग्य पदार्थ को **(आसा)** मुख से **(हविः)** जो कि विद्वानों के खाने योग्य है **(अदन्ति)** खाते हैं तथा जिन **(त्वया)** आपकी प्रेरणा से **(स्वदन्ते)** सुन्दरता से भोजन करते हुए **(मर्त्तासः)** शरीर के योग से जन्म-मरण सहित मनुष्य **(आसुतिम्)** जन्मयोग अर्थात् विद्याजन्म का संयोग सेवते हैं, जो **(त्वम्)** आप **(वीरुधाम्)** लता वृक्षादिकों के बीच **(गर्भः)** गर्भरूप अग्नि जैसे वैसे होकर **(शुचिः)** पवित्र होते हुए **(जज्ञिषे)** प्रसिद्ध होते हैं, उन आपका विद्या की प्राप्ति के लिये लोग आश्रय करते हैं॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सब जीव विद्यमान अग्नि के होते जीने और भोजन करने को योग्य होते हैं, वैसे शास्त्रज्ञ धर्मात्मा पढ़ानेवालों के होते पवित्र रागद्वेषरहित सांसारिक और पारमार्थिक सुख को प्राप्त हुए मुक्ति के बीच आनन्द करते हुए जन्मान्तर संस्कार में पवित्र होते हैं॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे॥१५॥

त्वम्। तान्। सम्। च। प्रति। च। असि। मज्मना। अग्ने। सुऽजात। प्र। च। देव। रिच्यसे। पृक्षः। यत्। अत्र। महिना। वि। ते। भुवत्। अनु। द्यावापृथिवी इति। रोदसी इति। उभे इति॥१५॥

पदार्थः-(त्वम्) (**तान्**) निःश्रेयसाभ्युदयसाधकान् नॄन् (**सम्**) सङ्गाते (**च**) (**प्रति**) प्रतिनिधौ (**च**) (**असि**) (**मज्मना**) बलेन (**अग्ने**) विद्युद्वद्व्यतिरिक्त (**सुजात**) सुष्ठुप्रसिद्धे (**प्र**) (**च**) (**देव**) विद्यादातः (**रिच्यसे**) पृथग्भवसि (**पृक्षः**) विद्यासंपर्चनम् (**यत्**) (**अत्र**) अस्मिन् संसारे (**महिना**) महिम्ना (**वि**) (**ते**) तव (**भुवत्**) भवति (**अनु**) (**द्यावापृथिवी**) (**रोदसी**) रोदननिमित्ते (**उभे**) द्वे॥१५॥

अन्वयः-हे सुजात देवाग्ने! यस्त्वं मज्मना ताँश्च प्रति च संचासि प्ररिच्यसे च उभे रोदसी द्यावापृथिवी इव महिना यदत्र पृक्षः प्राप्तोऽसि यस्य ते तव विद्याऽनु विभुवत् स च त्वमस्माकमध्यापक उपदेशकश्च भव॥१५॥

भावार्थः-यथा पावकेऽनेके गुणाः सन्ति तथा विद्वत्सेविषु धर्म्ये प्रवर्त्तमानेष्वधर्मान्निवृत्तेष्विह बहवः शुभगुणा जायन्ते॥१५॥

पदार्थः-हे (**सुजात**) सुन्दर प्रसिद्धिवान् (**देव**) विद्या देनेवाले (**अग्ने**) बिजुली के समान सबसे अलग विद्वान्! जो (**त्वम्**) आप (**मज्मना**) बल से वा पुरुषार्थ से (**तान्**) उन मनुष्यों को कि जो मोक्ष सुख और सांसारिक सुख साधनेवाले हैं (**प्रति, च**) प्रतिनिधि और (**सम्, च**) मिले हुए भी (**असि**) हैं। (**च**) और (**प्र, रिच्यसे**) अलग होते हो और (**उभे**) दोनों (**रोदसी**) सांसारिक तुच्छ सुख के कारण रोने के निमित्त जो (**द्यावापृथिवी**) द्यावापृथिवी के समान (**महिना**) अपने महिमा से (**यत्**) जो (**अत्र**) यहाँ (**पृक्षः**) विद्या सम्बन्ध को भी प्राप्त हो जिन (**ते**) आपकी विद्या (**वि, अनु, भुवत्**) अनुकूल विशेषता से होती है, सो आप हमारे अध्यापक और उपदेशक हूजिये॥१५॥

भावार्थः-जैसे अग्नि में अनेक गुण हैं, वैसे विद्वानों की सेवा करने और धर्म में प्रवर्त्तमान होने [वाले तथा] अधर्म से निवृत्त जनों में इस संसार में बहुत शुभ गुण उत्पन्न होते हैं॥१५॥

पुना राजशिष्यविषयमाह॥

फिर राजशिष्य विषय को अगले मन्त्र में कहा है॥

ये स्तो॒तृभ्यो॒ गोअ॑ग्रा॒मश्वे॑पेशस॒मग्ने॑ रा॒तिमु॑पसृ॒जन्ति॑ सू॒रयः॑।
अ॒स्माञ्च॒ ताँश्च॒ प्र हि ने॑षि॒ वस्य॒ आ बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॥१६॥१९॥

ये। स्तो॒तृऽभ्यः॑। गोऽअ॑ग्राम्। अश्वे॑ऽपेशसम्। अग्ने॑। रा॒तिम्। उ॒प॒ऽसृ॒जन्ति॑। सू॒रयः॑। अ॒स्मान्। च॒। तान्। च॒। प्र। हि। नेषि॑। वस्यः॑। आ बृ॒हत्। व॒दे॒म॒। वि॒दथे॑। सु॒ऽवीराः॑॥१६॥

पदार्थः-(ये) धार्मिका विद्यार्थिनः **(स्तोतृभ्यः)** सकलविद्याध्यापकेभ्यो विद्वद्भ्यः **(गोअग्राम्)** गाव इन्द्रियाण्यग्रसराणि यस्यां ताम् **(अश्वपेशसम्)** शीघ्रगन्तृ पेशो रूपमिव रूपं यस्यां ताम् **(अग्ने)** विद्वन् **(रातिम्)** विद्यादानक्रियाम् **(उपसृजन्ति)** ददते **(सूरयः)** विद्याजिज्ञासवो मनुष्याः **(अस्मान्) (च) (तान्) (प्र) (हि)** खलु **(नेषि)** नयसि **(वस्यः)** अत्युत्तमं वासः स्थानम् **(आ) (बृहत्)** महत् **(वदेम) (विदथे)** विद्यासंग्रामे **(सुवीराः)** उत्तमैः शौर्यादिगुणैरुपेताः॥१६॥

अन्वयः-हे अग्ने! त्वं ये सूरयः स्तोतृभ्यो गोअग्रामश्वपेशसं रातिमुपसृजन्ति ताँश्चास्मांश्च वस्य आप्रणेषि हि सुवीरा वयं विदथे बृहद्वदेम॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्वांसः सर्वोत्तम विद्यादानं दत्वाऽस्मानन्याँश्च विदुषः कुर्वन्ति तथाऽस्माभिरपि ते सदा प्रसादनीयाः॥१६॥

अत्राग्निदृष्टान्तेन विद्वद्विद्यार्थिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति द्वितीयमण्डले प्रथमं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वान्! आप **(ये)** जो **(सूरयः)** विद्या ज्ञान चाहते हुए जन **(स्तोतृभ्यः)** समस्त विद्या के अध्यापक विद्वानों के लिए **(गोअग्राम्)** जिसमें इन्द्रिय अग्रगन्ता हों **(अश्वपेशसम्)** उस शीघ्रगामी प्राणी के समान रूपवाली **(रातिम्)** विद्यादान क्रिया को **(उप, सृजन्ति)** देते हैं **(तान्, च)** उनको और **(अस्मान्, च)** हम लोगों को भी **(वस्यः)** अत्युत्तम निवासस्थान **(आ, प्र, नेषि, हि)** अच्छे प्रकार उत्तमता से प्राप्त करते हो इसी से **(सुवीराः)** उत्तम शूरतादि गुणों से युक्त हम लोग **(विदथे)** विवाद संग्राम में **(बृहत्)** बहुत **(वदेम)** कहें॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् सर्वोत्तम विद्यादान देके हमको तथा औरों को विद्वान् करते हैं, वैसे हमको भी चाहिये कि उनको सदा प्रसन्न करें॥१६॥

इस सूक्त में अग्नि के दृष्टान्त से विद्वान् और विद्यार्थियों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह दूसरे मण्डल में प्रथम सूक्त और उन्नीसवां वर्ग समाप्त हुआ॥

यज्ञेनेति त्रयोदशर्च्चस्य द्वितीयस्य सूक्तस्य गृत्समद ऋषिः। अग्निर्देवता। १, २, ७, १२ विराट् जगती। ४ जगती। ५, ६, ९, १३ निचृज्जगती छन्दः। निषादः स्वरः। ३, ८, १०, ११ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनरग्निविषयतो विद्वद्गुणानाह॥

अब द्वितीय सूक्त का आरम्भ है। उसमें फिर अग्नि के दृष्टान्त से विद्वानों के गुणों को कहते हैं॥

यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम्॥ १॥

यज्ञेन। वर्द्धत। जातऽवेदसम्। अग्निम्। यजध्वम्। हविषा। तना। गिरा। सम्ऽइद्धानम्। सुऽप्रयसम्। स्वः।ऽनरम्। द्युक्षम्। होतारम्। वृजनेषु। धूः।ऽसदम्॥ १॥

पदार्थः-(यज्ञेन) सङ्गतिकरणेन **(वर्द्धत)** **(जातवेदसम्)** जातवित्तम् **(अग्निम्)** **(यजध्वम्)** सङ्गच्छध्वम् **(हविषा)** दानेन **(तना)** विस्तृतया **(गिरा)** वाण्या **(समिधानम्)** सम्यक् प्रदीप्तम् **(सुप्रयसम्)** सुष्ठु कमनीयम् **(स्वर्णरम्)** सुखस्य नेतारम् **(द्युक्षम्)** प्रकाशमानम् **(होतारम्)** आदातारम् **(वृजनेषु)** व्रजन्ति जना येषु मार्गेषु **(धूर्षदम्)** यानानां धुरं गमयितारम्॥ १॥

अन्वयः-हे विद्वांसो जना! यूयं तना गिरा वृजनेषु धूर्षदं होतारं समिधानं सुप्रयसं द्युक्षं स्वर्णरं जातवेदसमग्निं हविषा यजध्वमनेन यज्ञेन वर्द्धत॥ १॥

भावार्थः-ये मनुष्या शिल्पक्रियया विद्युदादिस्वरूपं यानादिषु कार्येषु संप्रयुञ्जीरंस्त ऐश्वर्यं लभेरन्॥ १॥

पदार्थः-हे विद्वान् जनो! तुम **(तना)** विस्तृत **(गिरा)** वाणी से **(वृजनेषु)** जिन मार्गों में जन जाते हैं, उनमें **(धूर्षदम्)** विमानादिकों की धुरियों को ले जाने तथा **(होतारम्)** पदार्थों को ग्रहण करनेवाले **(समिधानम्)** प्रचण्ड दीप्तियुक्त **(सुप्रयसम्)** सुन्दर मनोहर **(द्युक्षम्)** प्रकाशमान **(स्वर्णरम्)** सुख की प्राप्ति करानेहारे **(जातवेदसम्)** उत्तम होता है धन जिससे उस **(अग्निम्)** अग्नि को **(हविषा)** दान से **(यजध्वम्)** प्राप्त होओ और उस **(यज्ञेन)** यज्ञ से **(वर्द्धत)** बढ़ो॥ १॥

भावार्थः-जो मनुष्य शिल्पक्रिया से बिजुली आदि के रूप को यान-विमान आदि के कार्य्य में अच्छे प्रकार युक्त करें, वे ऐश्वर्य को प्राप्त हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः।
दिवइवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः॥ २॥

अभि। त्वा। नक्तीः। उषसः। ववाशिरे। अग्ने। वत्सम्। न। स्वसरेषु। धेनवः। दिवःऽइव। इत्। अरतिः। मानुषा। युगा। आ। क्षपः। भासि। पुरुऽवार। सम्ऽयतः॥ २॥

पदार्थः-(अभि) अभितः **(त्वा)** त्वाम् **(नक्तीः)** रात्रीः **(उषसः)** दिनानि **(ववाशिरे)** शब्दायन्ते **(अग्ने)** अग्निरिव प्रदीप्त विद्वन् **(वत्सम्)** **(न)** इव **(स्वसरेषु)** गोष्ठेषु **(धेनवः)** गावः **(दिवइव)** सूर्यप्रकाशादिव **(इत्)** एव **(अरतिः)** प्रापकः **(मानुषाः)** मनुष्याणामिमानि **(युगा)** युगानि वर्षाणि **(क्षयः)**[१] निवासहेतवः **(भासि)** **(पुरुवार)** बहुभिर्वरणीय **(संयतः)** सम्यङ् नियमितः॥ २॥

अन्वयः-हे अग्ने! स्वसरेषु वत्सं धेनवो न नक्तीरुषसस्त्वाभि ववाशिरे। हे पुरुवार! त्वं दिवइवेदरतिर्मानुषा युगा क्षयश्च संयत आ भासि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यथा गावः स्ववत्सान् प्राप्नुवन्ति तथा कालविभागा विद्वांसं परिश्रमिणं प्राप्नुवन्ति। यतस्तस्य सर्वाणि कार्याणि नियतकालेन संपद्यन्ते। अलसानां कार्याणि कदाचिदपि यथासमयं न भवन्ति। परिश्रमिणो विद्वांसो रात्रिसमयानपि कार्य्यकालमाश्रित्य यथेष्टसमयं कार्य्यं कुर्वन्ति। तथा मानुषसम्बन्धि पूर्णायुर्लभन्ते न तु परिश्रमेणायुषो हानिमाप्नुवन्ति॥ २॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य प्रदीप्त विद्वान् जन! **(स्वसरेषु)** गोष्ठों में **(वत्सम्)** बछड़े को **(धेनवः)** गौयें **(न)** जैसे रंभवाती हैं, वैसे **(नक्तीः)** रात्रि और **(उषसः)** दिन **(त्वा)** आपको **(अभि, ववाशिरे)** सब ओर से शब्दायमान करते हैं अर्थात् प्रत्येक काम के नियत समय में आप अपने शब्दादि व्यवहार को प्राप्त होते हो। हे **(पुरुवार)** बहुतों को स्वीकार करने योग्य! आप **(दिवइव)** सूर्यप्रकाश के समान अपने प्रकाश से **(इत्)** ही **(अरतिः)** सर्व व्यवहारों की प्राप्ति करानेवाले **(मानुषा)** मनुष्यसम्बन्धी **(युगा)** युग वर्षों को और **(क्षयः)** निवास हेतु रात्रि समयों को **(संयतः)** संयम किये हुए **(आ, भासि)** अच्छे प्रकार प्रकाशमान होते हैं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे गौएँ अपने बछड़ों को प्राप्त होतीं, वैसे काल-विभाग परिश्रमी विद्वान् जन को प्राप्त होते हैं। जिस कारण उसके सब कार्य नियमयुक्त काल से सिद्ध

---

१. अत्र '**क्षपो**' इति पाठः संहितायां दृश्यते॥ सं.

होते हैं। आलसी जनों के काम कभी भी नियत समय पर नहीं होते। परिश्रमी विद्वान् जन रात्रि के समय को भी अपने कार्य का समय मानकर जैसा चाहते, वैसे समय पर कार्य किया करते हैं और मनुष्य सम्बन्धी पूर्णायु को प्राप्त होते हैं, किन्तु परिश्रम से आयु की हानि को नहीं प्राप्त होते॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम्॥३॥

तम्। देवाः। बुध्ने। रजसः। सुऽदंससम्। दिवः पृथिव्योः। अरतिम्। नि। एरिरे। रथम्ऽइव। वेद्यम्। शुक्रऽशोचिषम्। अग्निम्। मित्रम्। न। क्षितिषु। प्रऽशंस्यम्॥३॥

पदार्थः-(तम्) पूर्वोक्तम् **(देवाः)** विद्वांसः **(बुध्ने)** अन्तरिक्षे **(रजसः)** लोकस्य मध्ये **(सुदंससम्)** शोभनानि दंसांसि कर्माणि यस्मात्तम् **(दिवस्पृथिव्योः)** सूर्यभूम्योर्मध्ये **(अरतिम्)** प्राप्तम् **(नि)** नितराम् **(एरिरे)** कम्पयन्ति गमयन्ति **(रथमिव)** **(वेद्यम्)** वेदितुं योग्यम् **(शुक्रशोचिषम्)** शुक्रमाशुकरं शोचिस्तेजो यस्मिंस्तम् **(अग्निम्)** विद्युदादिस्वरूपम् **(मित्रम्)** सखायम् **(न)** इव **(क्षितिषु)** पृथिवीषु **(प्रशंस्यम्)** प्रशंसितुमर्हम्॥३॥

अन्वयः-ये देवा बुध्ने रजसो दिवस्पृथिव्योर्मध्येऽरतिं सुदंससं शुक्रशोचिषं वेद्यं तमग्निं क्षितिषु प्रशंस्यं मित्रन्न रथमिव न्येरिरे ते महत्सुखं कथं न लभेरन्॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यद्यन्तरिक्षे स्थितेषु पदार्थेषु वर्त्तमानं वह्निं विदित्वा रथवत्कार्येषु चालयेयुस्तर्हि स मित्रवत् कार्याणि साधयेत्॥३॥

पदार्थः-जो **(देवाः)** विद्वान् **(बुध्ने)** अन्तरिक्ष में वा **(रजसः)** लोक के बीच में वा **(दिवस्पृथिव्योः)** सूर्य पृथिवी के बीच **(अरतिम्)** प्राप्त **(सुदंससम्)** जिससे सुन्दर काम बनते हैं **(शुक्रशोचिषम्)** और शीघ्रता करनेवाला तेज जिसमें विद्यमान **(वेद्यम्)** जानने योग्य **(तम्)** उस **(अग्निम्)** अग्नि को **(क्षितिषु)** पृथिवियों में **(प्रशंस्यम्)** प्रशंसनीय **(मित्रम्)** मित्र के **(न)** समान वा **(रथमिव)** रथ के समान **(न्येरिरे)** निरन्तर कँपाते चलाते हैं, वे अत्यन्त सुख को क्यों न प्राप्त होवें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! यदि अन्तरिक्ष में स्थित पदार्थों में वर्त्तमान अग्नि को जानकर रथ के समान कार्यों में चलावे तो वह मित्र के समान कार्यों को सिद्ध करे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु॥४॥

तम्। उक्षमाणम्। रजसि। स्वे। आ। दमे। चन्द्रम्ऽइव। सुऽरुचम्। ह्वारे। आ। दधुः। पृश्न्याः। पतरम्। चितयन्तम्। अक्षऽभिः। पाथः। न। पायुम्। जनसी इति। उभे इति। अनु॥४॥

पदार्थः-(तम्) (उक्षमाणम्) सिञ्चन्तम् **(रजसि)** ऐश्वर्य्ये **(स्वे)** स्वकीये **(आ)** समन्तात् **(दमे)** गृहे **(चन्द्रमिव)** हिरण्यमिव। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२)। **(सुरुचम्)** सुष्ठु प्रकाशमानम् **(ह्वारे)** ह्वरन्ति कुटिलां गतिं गच्छन्ति पदार्था यस्मिँस्तस्मिन् **(आ) (दधुः)** दधति **(पृश्न्याः)** अन्तरिक्षस्य मध्ये **(पतरम्)** पतन्तम् **(चितयन्तम्) (अक्षभिः)** इन्द्रियैः **(पाथः)** उदकम् **(न)** इव **(पायुम्)** यः पिबति तम् **(जनसी)** जनयित्र्यौ द्यावापृथिव्यौ **(उभे) (अनु)**॥४॥

अन्वयः-ये विद्वांसो जनसी उभे पाथः पायुन्न वर्त्तमानं रजस्युक्षमाणं स्वे दमे चन्द्रमिव सुरुचं पृश्न्या ह्वारे पतरं चितयन्तं तमग्निमक्षभिरन्वादधुस्ते पदार्थविदो जायन्ते॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथोदकं पिपासितं तर्पयति तथा कार्येषु संप्रयोजितोऽग्निरैश्वर्येण सह जनान् योजयति॥४॥

पदार्थः-जो विद्वान् जन **(जनसी)** सब पदार्थों को उत्पन्न करनेवाली द्यावापृथिवी अर्थात् सूर्य पृथिवी के सम्बन्ध से मानुषी सृष्टि के अन्नादि पदार्थ उत्पन्न होते हैं **(उभे)** दोनों वा **(पाथः)** जल **(पायुम्)** उसके पीनेवाले को **(न)** वैसे वर्त्तमान तथा **(रजसि)** ऐश्वर्य के निमित्त **(उक्षमाणम्)** सींचा हुआ **(स्वे)** अपने **(दमे)** कला घर में **(चन्द्रमिव)** सुवर्ण के समान **(आ, सुरुचम्)** अच्छे प्रकार प्रकाशमान **(पृश्न्याः)** वा अन्तरिक्ष के बीच **(ह्वारे)** जिस व्यवहार में कुटिल गति को पदार्थ प्राप्त होते हैं, उसमें **(पतरम्)** गमन को प्राप्त होता **(चितयन्तम्)** और पदार्थों को इकट्ठा कराता **(तम्)** उस अग्नि को **(अक्षभिः)** इन्द्रियों के साथ **(अन्वादधुः)** अनुकूलता से स्थापन करते हैं, वे पदार्थवेत्ता होते हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे जल प्यासे को तृप्त करता है, वैसे कार्यों में संप्रयुक्त किया हुआ अग्नि ऐश्वर्य के साथ जनों को युक्त करता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स होता॒ विश्वं॑ परि॑ भूत्वध्व॒रं तमु॑ हव्यैर्मनु॑ष ऋञ्जते गि॒रा।
हि॒रि॒शि॒प्रो वृ॑धस॒नासु॒ जर्भु॑रद् द्यौर्न स्तृभि॑श्चितय॒द्रोद॑सी॒ अनु॑॥५॥२०॥

सः। होता॑। विश्व॑म्। परि॑। भूतु॒। अ॒ध्व॒रम्। तम्। ऊ॒म् इति॑। ह॒व्यैः। मनु॑षः। ऋ॒ञ्ज॒ते॒। गि॒रा। हि॒रि॒ऽशि॒प्रः। वृ॒ध॒स॒नासु॑। जर्भु॑रत्। द्यौः। न। स्तृऽभि॑ः। चि॒त॒य॒त्। रोद॑सी॒ इति॑। अनु॑॥५॥

पदार्थः-(सः) (होता) आदाता **(विश्वम्)** सर्वम् **(परि) (भूतु) (अध्वरम्)** अहिंसनीयं शिल्पसाध्यं व्यवहारम् **(तम्) (उ)** वितर्के **(हव्यैः)** होतुं ग्रहीतुं योग्यैः पदार्थैः **(मनुषः)** मनुष्याः **(ऋञ्जते)** प्रसाधयन्ति **(गिरा)** वाण्या **(हिरिशिप्रः)** हरणशीलहनुः **(वृधसानासु)** वर्द्धमानासु प्रजासु **(जर्भुरत्)** भृशं धरेत् **(द्यौः)** सूर्यः **(न)** इव **(स्तृभिः)** नक्षत्रैः **(चितयत्) (रोदसी)** द्यावापृथिव्यौ **(अनु)**॥५॥

अन्वयः-यो हिरिशिप्रो होता तं विश्वमध्वरं परि भूतु तमु हव्यैर्गिरा मनुष ऋञ्जते योऽग्नि-र्वृधसानासु रोदसी अनु द्यौः स्तृभिर्न चितयज्जर्भुरत् सः सर्वैः कार्येषु संप्रयोक्तव्यः॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्यो नक्षत्राणि प्रकाशयति तथायमग्निः सर्वं विश्वं विभावयति। ये पठनश्रवणाभ्यामग्निविद्यां गृह्णन्ति ते सुभूषिता जायन्ते॥५॥

पदार्थः-जो **(हिरिशिप्रः)** ऐसा है कि जिसके मुख्यावयव पदार्थ को हरने और **(होता)** ग्रहण करनेवाले हैं **(तम्)** उस **(विश्वम्)** समस्त **(अध्वरम्)** न नष्ट करने योग्य शिल्पसाध्य व्यवहार को **(परि, भूतु)** विचारे और उसको **(उ)** तर्क-वितर्क के साथ **(हव्यैः)** ग्रहण करने योग्य पदार्थों और **(गिरा)** वाणी से **(मनुषः)** मनुष्य **(ऋञ्जते)** प्रसिद्ध करते हैं। जो अग्नि **(वृधसानासु)** बढ़ी हुई प्रजाओं में **(रोदसी)** द्यावापृथिवी के **(अनु)** अनुकूल **(द्यौः)** सूर्य **(स्तृभिः)** नक्षत्र अर्थात् तारागणों के साथ **(न)** जैसे वैसे पदार्थों से **(चितयत्)** चेतन करे वा **(जर्भुरत्)** निरन्तर पदार्थों को धारण करे **(सः)** वह सबको कार्यों में अच्छे प्रकार युक्त कराने योग्य है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य नक्षत्रों को प्रकाशित करता है, वैसे यह अग्नि समस्त विश्व को प्रकाशित करता है। जो पढ़ने और सुनने से अग्निविद्या का ग्रहण करते हैं, वे सुभूषित होते हैं॥५॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

स नो॑ र॒यिवत्स॑मिधा॒नः स्व॒स्तये॑ संद॒दुस्वान् र॒यिम॒स्मासु॑ दीदिहि।

आ नः कृणुष्व सुवितायꣳ रोदसीꣳ अग्नेꣳ हव्या मनुषो देव वीतयेꣳ॥ ६॥

सः। नः। रेवत्। सम्ऽइद्धानः। स्वस्तयेꣳ। सम्ऽददस्वान्। रयिम्। अस्मासु। दीदिहि। आ। नः। कृणुष्व। सुवितायꣳ। रोदसीꣳ इतिꣳ। अग्नेꣳ। हव्या मनुषः। देव। वीतयेꣳ॥ ६॥

पदार्थः-(सः) (**नः**) अस्माकम् (**रेवत्**) बहुधनयुक्तं व्यवहारम् (**समिधानः**) सम्यक् प्रकाशमानः (**स्वस्तये**) सुखाय (**संददस्वान्**) सम्यग्दाता (**रयिम्**) श्रियम् (**अस्मासु**) (**दीदिहि**) प्रकाशय (**आ**) (**नः**) अस्मान् (**कृणुष्व**) कुरु (**सुविताय**) ऐश्वर्याय (**रोदसी**) द्यावापृथिव्यौ (**अग्ने**) विद्वन् (**हव्या**) होतुमादातुमर्हाणि (**मनुषः**) मनुष्यान् (**देव**) व्यवहारविद्याविचक्षण (**वीतये**) प्राप्तये॥ ६॥

अन्वयः-हे देवाऽग्ने विद्वन्! यथा स समिधानः संददस्वानग्निर्नः स्वस्तये रेवद्दधाति तथा त्वमस्मासु रयिमा दीदिहि नः सुविताय कृणुष्व च यथा वा रोदसी हव्या मनुषः प्रापयन्त्यौ वीतये स्यातां तथा त्वं भव॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा संसाधितोऽग्निर्धनप्राप्तिनिमित्तो जायते तथा सुसङ्गता विद्वांसो मनुष्याणां विद्याप्राप्तिहेतवो भवन्ति॥ ६॥

पदार्थः-हे (**देव**) व्यवहारविद्याकुशल (**अग्ने**) विद्वान्! जैसे (**सः**) वह (**समिधानः**) सम्यक् प्रकाशमान (**संददस्वान्**) अच्छे **[**प्रकार देनेवाला**]** अग्नि (**नः**) हम लोगों के (**स्वस्तये**) सुख के लिये (**रेवत्**) बहुत धनयुक्त व्यवहार को धारण करता है, वैसे आप (**अस्मासु**) हम लोगों में (**रयिम्**) धन को (**आ, दीदिहि**) प्रकाश कीजिये और (**नः**) हम लोगों को (**सुविताय**) ऐश्वर्य के लिए (**कृणुष्व**) संनद्ध कीजिये वा जैसे (**रोदसी**) द्यावापृथिवी (**हव्या**) ग्रहण करने योग्य पदार्थ (**मनुषः**) मनुष्यों को प्राप्त कराती हुई (**वीतये**) सुख प्राप्ति के लिये होती हैं, वैसे आप हूजिये॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे संसिद्ध किया हुआ अग्नि धन प्राप्ति का निमित्त होता है, वैसे अच्छे प्रकार प्राप्त हुए विद्वान् जन मनुष्यों को विद्या प्राप्ति के हेतु होते हैं॥ ६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दा नोऽग्ने बृहतो दाः सहस्रिणोऽ दुरो न वाजꣳ श्रुत्या अपाऽ वृधि।
प्राचीऽ द्यावाऽपृथिवी ब्रह्मणा कृधि स्वऽर्ण शुक्रमुषसोऽ वि दिऽद्युतः॥ ७॥

दाः। नः। अग्ने। बृहतः। दाः। सहस्रिणः। दुरः। न। वाजम्। श्रुत्यै। अप। वृधि। प्राची इति। द्यावापृथिवी इति। ब्रह्मणा। कृधि। स्वः। न। शुक्रम्। उषसः। वि। दिद्युतः॥७॥

पदार्थः-(दाः) देहि **(नः)** अस्मभ्यम् **(अग्ने)** अग्निरिव वर्त्तमान **(बृहतः)** महतो भोगान् **(दाः)** ददाति **(सहस्रिणः)** असंख्यातसुखाङ्गयुक्तान् **(दुरः)** द्वाराणि **(न)** इव **(वाजम्)** ज्ञानम् **(श्रुत्यै)** श्रवणेन। अत्र सुब् व्यत्ययेन तृतीयार्थे चतुर्थी। **(अप)** अत्र **निपातस्य चे**ति दीर्घः। **(वृधि)** वृणु **(प्राची)** प्राग्वर्त्तमाने **(द्यावापृथिवी)** **(ब्रह्मणा)** धनेन सह **(कृधि)** कुरु **(स्वः)** **(न)** इव **(शुक्रम्)** आशुकरम् **(उषसः)** दिवसान् **(वि)** **(दिद्युतः)** द्योतमानान्॥७॥

अन्वयः-हे अग्ने! त्वं नो बृहतः पदार्थान् दाः वाजन्दुरो न श्रुत्यै सहस्रिणो दा अपा वृधि च प्राची द्यावापृथिवी ब्रह्मणा कृधि उषसः शुक्रं स्वर्ण वि दिद्युतः कृधि॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। येऽग्निवदसङ्ख्यानि सुखानि द्वारवद्विद्यामार्गं यथासमयं कार्य्यदिवसान् संयुजन्ति ते सूर्यपृथिवीवदन्नादियोगेन सुखिनो भवन्ति॥७॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्त्तमान विद्वान्! आप **(नः)** हम लोगों के लिये **(बृहतः)** बहुत भोग करने के पदार्थों को **(दाः)** दीजिये **(वाजम्)** ज्ञान **(दुरः)** द्वारों के **(न)** समान **(श्रुत्यै)** श्रवण से **(सहस्रिणः)** असंख्यात सुखरूपी अङ्गयुक्त पदार्थों को **(दाः)** दीजिये और **(अपा, वृधि)** उनको प्रकट कीजिये तथा **(प्राची)** जो पहिले से वर्त्तमान **(द्यावापृथिवी)** द्यावापृथिवी को **(ब्रह्मणा)** धन से युक्त **(कृधि)** कीजिये **(उषसः)** दिनों को **(शुक्रम्)** शीघ्रकारी **(स्वः)** सुख के **(न)** समान **(वि, दिद्युतः)** विशेष प्रकाशित कीजिये॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो अग्नि के तुल्य असंख्य सुख, द्वारों के समान विद्यामार्ग और यथा समय कार्यों से दिवसों को संयुक्त करते हैं, वे सूर्य और पृथिवी के समान अन्नादि के संयोग से सुखी होते हैं॥७॥

अथ विद्वद्विषयान्तर्गतराजवर्णनमाह॥

अब विद्वानों के विषय के अन्तर्गत राजविषय को अगले मन्त्र में कहा है॥

स इधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे॥८॥

सः। इधानः। उषसः। राम्याः। अनु। स्वः। न। दीदेत्। अरुषेण। भानुना। होत्राभिः। अग्निः। मनुषः। सुऽअध्वरः। राजा। विशाम्। अतिथिः। चारुः। आयवे॥८॥

पदार्थः-(सः) (**इधानः**) प्रकाशमानः (**उषसः**) (**राम्याः**) रात्रीः (**अनु**) (**स्वः**) सुखम् (**न**) इव (**दीदेत्**) प्रकाशयति (**अरुषेण**) सुरूपेण (**भानुना**) प्रकाशेन (**होत्राभिः**) आदत्ताभिः क्रियाभिः (**अग्निः**) पावकः (**मनुषः**) मनुष्यान् (**स्वध्वरः**) हिंसितुमनर्हः (**राजा**) प्रकाशमानः (**विशाम्**) प्रजानाम् (**अतिथिः**) पूजनीयोऽविद्यमानतिथिः (**चारुः**) सुन्दरः (**आयवे**) गमनाय॥८॥

अन्वयः-यथा इधानः सोऽग्निररुषेण भानुना होत्राभिरुषसो राम्या मनुषः स्वर्णानुदीदेत् तथा चारुरतिथिः स्वध्वरो राजाऽऽयवे विशां मध्ये वर्त्तते॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथाऽहोरात्रविभागकृत् सूर्यः स्वतेजसा सर्वमनुभाति तथा राजा सत्याऽनृतकारिणः विभागेन प्रजाः पालयेत्॥८॥

पदार्थः-जैसे (**इधानः**) प्रकाशमान (**सः**) वह (**अग्निः**) अग्नि (**अरुषेण**) उत्तम रूपयुक्त (**भानुना**) प्रकाश से (**होत्राभिः**) ग्रहण की हुई क्रियाओं से (**उषसः**) प्रतिदिन (**राम्याः**) रात्रियों में (**मनुषः**) मनुष्यों को (**स्वः**) सुख के (**न**) समान (**अनु, दीदेत्**) अनुकूलता से प्रकाशित कराता, वैसे (**चारुः**) सुन्दर (**अतिथिः**) सत्कार करने के योग्य जिसके ठहरने की अविद्यमान तिथि वह (**स्वध्वरः**) न विनाशने योग्य (**राजा**) प्रकाशमान सभापति (**आयवे**) राजकार्य्य में चलने अर्थात् प्रवृत्त होने के लिये (**विशाम्**) प्रजाजनों के बीच वर्त्ते॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे अहोरात्रों का काटनेवाला सूर्य अपने तेज से सबके अनुकूल प्रकाशित होता है, वैसे राजा सत्य और झूठ कार्य्य करनेवालों के विभाग से प्रजाजनों की पालना करे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि॥९॥

एव। नः। अग्ने। अमृतेषु। पूर्व्य। धीः। पीपाय। बृहत्ऽदिवेषु। मानुषा। दुहाना। धेनुः। वृजनेषु। कारवे। त्मना। शतिनम्। पुरुऽरूपम्। इषणि॥९॥

पदार्थः-(एव) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मभ्यम् (**अग्ने**) विद्वन् (**अमृतेषु**) नाशोत्पत्तिरहितेषु जीवेषु (**पूर्व्य**) पूर्वैर्विद्वद्भिः कृतो विद्वान् तत्सम्बुद्धौ (**धीः**) प्रज्ञाः कर्माणि वा (**पीपाय**) वर्द्धय (**बृहद्दिवेषु**) बृहती द्यौः प्रकाशो येषु तेषु (**मानुषा**) मनुष्यसम्बन्धीनि सुखानि

(दुहाना) प्रपूरयन्ती **(धेनुः)** वागेव **(वृजनेषु)** बलयुक्तेषु **(कारवे)** कर्त्रे **(त्मना)** आत्मना **(शतिनम्)** अपरिमितसङ्ख्यम् **(पुरुरूपम्)** बहूनि रूपाणि यस्य तम् **(इषणि)** एषणायाम्॥९॥

अन्वयः-हे पूर्व्याऽग्ने! त्वं त्मना या बृहद्दिवेषु वृजनेष्वमृतेषु मानुषेषणि शतिनं पुरुरूपं च दुहाना धेनुरस्ति तान् प्रापयन्नेव नोऽस्मभ्यं कारवे च धीः पीपाय॥९॥

भावार्थः-जिज्ञासुभिराप्तप्राप्तां प्रज्ञां लब्ध्वा बहुविधपदार्थविज्ञानेन मनुष्यजन्मनो धर्मार्थकाममोक्षरूपाणि फलानि प्राप्तव्यानि॥९॥

पदार्थः-हे **(पूर्व्य)** पूर्वज विद्वानों ने विद्या पढ़ाकर किये **(अग्ने)** विद्वान्! आप **(त्मना)** अपने से जो **(बृहद्दिवेषु)** बहुत प्रकाश जिनमें विद्यमान उन **(वृजनेषु)** बलयुक्त **(अमृतेषु)** विनाश और उत्पत्तिरहित जीवों में **(मानुषा)** मनुष्यसम्बन्धी सुख और **(इषणि)** इच्छा के निमित्त **(शतिनम्)** अपरिमित असंख्य **(पुरुरूपम्)** जिसमें बहुत रूप विद्यमान उस व्यवहार को **(दुहाना)** दोहती पूरा करती हुई **(धेनुः)** वाणी ही है, उन सबकी प्राप्ति कराते हुए **(एव)** ही **(नः)** हम लोगों के लिये और **(कारवे)** करने के लिये **(धीः)** बुद्धि और कर्मों की **(पीपाय)** वृद्धि कीजिये॥९॥

भावार्थः-विज्ञान चाहनेवाले जनों को शिष्ट महात्मा जनों से पाई हुई बुद्धि को प्राप्त होकर बहुत प्रकार के पदार्थविज्ञान से मनुष्य जन्म के धर्म, अर्थ, काम और मोक्षरूपी फलों को प्राप्त होना चाहिये॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व॒यम॑ग्ने॒ अव॑ता वा सु॒वीर्यं॑ ब्रह्म॑णा वा चितयेमा॒ जना॒ँ अति॑।
अ॒स्माक॑ं द्यु॒म्नमधि॒ पञ्च॑ कृ॒ष्टिषू॒च्चा स्व॑१॑र्ण शु॑शुचीत दु॒ष्टर॑म्॥ १०॥

व॒यम्। अ॒ग्ने॒। अव॑ता। वा॒। सु॒ऽवीर्य॑म्। ब्रह्म॑णा। वा॒। चि॒त॒येम॒। जना॑न्। अति॑। अ॒स्माक॑म्। द्यु॒म्नम्। अधि॑। पञ्च॑। कृ॒ष्टिषु॑। उ॒च्चा। स्वः॑। न। शु॒शु॒ची॒त॒। दु॒स्तर॑म्॥ १०॥

पदार्थः-**(वयम्)** **(अग्ने)** पावकवद्वर्त्तमान विद्वन् **(अर्वता)** अश्वादियुक्तेन सैन्येन **(वा)** **(सुवीर्यम्)** सुष्ठु पराक्रमम् **(ब्रह्मणा)** धनेन **(वा)** **(चितयेम)** ज्ञापयेम। अत्रा**न्येषामपी**ति दीर्घः। **(जनान्)** विदुषः **(अति)** अत्यन्तम् **(अस्माकम्)** **(द्युम्नम्)** यशः **(अधि)** उपरि **(पञ्च)** **(कृष्टिषु)** मनुष्येषु **(उच्चा)** उच्चानि उत्कृष्टानि **(स्वः)** आदित्यः **(न)** इव **(शुशुचीत)** शुन्धत **(दुष्टरम्)** दुःखेन तरितुमुल्लंघितुं योग्यम्॥१०॥

अन्वयः-हे अग्ने! यथा त्वमर्वता ब्रह्मणा वा दुष्टरं सुवीर्यमन्यान् जनान् ज्ञापयेस्तथा वयमति चितयेम। हे मनुष्या! यथाऽस्माकं विदुषो वा स्वर्ण द्युम्नं कृष्टिषु प्रकाशयेत्तथैतद्यूयं शुशुचीत यथाऽस्माकं पञ्चोच्चाऽधिवर्त्तन्ते तथा युष्माकमपि सन्तु॥१०॥

भावार्थः-विद्वत्सङ्गिभिर्जिज्ञासुभिराप्तेभ्यो यादृशं विज्ञानं प्राप्येत तादृशमेवाऽन्येभ्यो देयम्। यथाऽस्माकं ब्रह्मचर्यविद्याबलशीलपुरुषार्था वर्द्धन्ते, तथा सर्वेषां वर्द्धेरन्निति वयमिच्छेम॥१०॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्त्तमान विद्वान्! आप **(अर्वता)** अश्वादि युक्त सेना समूह **(वा)** अथवा **(ब्रह्मणा)** धन से **(दुष्टरम्)** दुःख के साथ उल्लंघन करने योग्य **(सुवीर्यम्)** उत्तम पराक्रम और **(जनान्)** जनों को जतलाते हो, वैसे **(वयम्)** हम लोग **(अति, चितयेम)** अत्यन्त चिन्ता से स्मरण कराते हैं। हे मनुष्यो! जैसे **(अस्माकम्)** हम लोगों के **(वा)** अथवा विद्वानों के **(स्वः)** सुख के **(नः)** समान **(द्युम्नम्)** यश को **(कृष्टिषु)** मनुष्यों में विद्वान् प्रकाशित करे, वैसे इसको तुम लोग **(शुशुचीत)** शुद्ध करो। जैसे हमारे **(पञ्च)** पांच **(उच्चा)** उत्तम **(अधि)** अधिकार ऊपर वर्त्तमान हैं, वैसे तुम्हारे भी हों॥१०॥

भावार्थः-विद्वानों के सङ्गी ज्ञान चाहनेवाले पुरुषों को चाहिये कि आप्त शिष्ट जनों से जैसा विज्ञान प्राप्त हो, वैसा ही औरों को देवें। जैसे हम लोगों के ब्रह्मचर्य, विद्या, बल, शील, पुरुषार्थ बढ़ते हैं, वैसे सबके बढ़ें, ऐसी हम लोग इच्छा करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स नो॑ बोधि सहस्य प्र॒शंस्यो॒ यस्मि॑न्त्सु॒जा॒ता इ॒षय॑न्त सू॒रयः॑।
यमग्ने य॒ज्ञमु॑प॒यन्ति॑ वा॒जिनो॒ नित्ये॑ तो॒के दी॑दि॒वांसं॒ स्वे दमे॑॥११॥

सः। नः। बो॒धि॒। स॒हस्य॒। प्र॒ऽशंस्यः। यस्मि॑न्। सु॒ऽजा॒ताः। इ॒षय॑न्त। सू॒रयः॑। यम्। अ॒ग्ने॒। य॒ज्ञम्। उ॒प॒ऽयन्ति॑। वा॒जिनः॑। नित्ये॑। तो॒के। दी॒दि॒ऽवांस॑म्। स्वे। दमे॑॥११॥

पदार्थः-**(सः)** **(नः)** अस्मान् **(बोधि)** **(सहस्य)** सहसि बले साधो **(प्रशंस्यः)** प्रशंसितुमर्हः **(यस्मिन्)** विद्वद्व्यवहारे **(सुजाताः)** सुष्ठु पुरुषार्थेन प्रसिद्धाः **(इषयन्त)** प्राप्नुयुः **(सूरयः)** विद्वांसः **(यम्)** **(अग्ने)** अग्निरिव वर्त्तमान **(यज्ञम्)** विद्याप्राप्तिव्यवहारम् **(उपयन्ति)** प्राप्नुवन्ति **(वाजिनः)** प्रकृष्टविज्ञानवन्तः **(नित्ये)** **(तोके)** अल्पे **(दीदिवांसम्)** प्रकाशयन्तम् **(स्वे)** स्वकीये **(दमे)** गृहे॥११॥

अन्वयः-हे सहस्याऽग्ने वाजिनो! नित्ये तोके स्वे दमे च दीदिवांसं यं यज्ञमुपयन्ति यस्मिन् सुजाताः सूरय आनन्दमिषयन्त स प्रशंस्यो यज्ञः नोऽस्मान् त्वं बोधि॥११॥

भावार्थः-ये विद्वन्मार्गेण सुशीलतया च नित्यानां पदार्थानां विज्ञानं प्राप्नुयुस्तेऽन्यान्नपि प्रापयेयुः॥११॥

पदार्थः-हे **(सहस्य)** बल के विषय में उत्तम **(अग्ने)** अग्नि के समान वर्त्तमान विद्वान् **(वाजिनः)** उत्तम विज्ञानवान् पुरुष! **(नित्ये)** नित्य **(तोके)** छोटे व्यवहार में और **(स्वे)** अपने **(दमे)** घर में **(दीदिवांसम्)** प्रकाशित करते हुए **(यम्)** जिस **(यज्ञम्)** विद्याप्राप्ति के व्यवहार को **(उपयन्ति)** प्राप्त होते हैं **(यस्मिन्)** जिसमें **(सुजाताः)** उत्तम पुरुषार्थ से प्रसिद्ध **(सूरयः)** विद्वान् जन आनन्द को **(इषयन्त)** प्राप्त होवें **(सः)** वह **(प्रशंस्यः)** प्रशंसा करने योग्य यज्ञ **(नः)** हम लोगों को आप **(बोधि)** बतलाइये॥११॥

भावार्थः-जो विद्वानों के मार्ग से और सुशीलता से नित्य पदार्थों को प्राप्त हों, वे औरों को भी प्राप्त करावें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः॥१२॥

उभयासः। जातऽवेदः। स्याम। ते। स्तोतारः। अग्ने। सूरयः। च। शर्मणि। वस्वः। रायः। पुरुऽचन्द्रस्य। भूयसः। प्रजाऽवतः। सुऽअपत्यस्य। शग्धि। नः॥१२॥

पदार्थः-**(उभयासः)** उभये **(जातवेदः)** जातविज्ञान **(स्याम)** **(ते)** तव **(स्तोतारः)** **(अग्ने)** परमविद्वन्नुपदेशक **(सूरयः)** विद्वांसः **(शर्मणि)** गृहे **(वस्वः)** वासहेतोः **(रायः)** धनस्य **(पुरुश्चन्द्रस्य)** पुष्कलसुवर्णादियुक्तस्य **(भूयसः)** **(प्रजावतः)** उत्तमप्रजायुक्तस्य **(स्वपत्यस्य)** शोभनापत्यसहितस्य **(शग्धि)** दातुं शक्नुहि। अत्र **वाच्छन्दसी**ति विकरणलुक्। **(नः)** अस्माकम्॥१२॥

अन्वयः-हे जातवेदोऽग्ने! यतस्त्वं नोऽस्माकं स्वपत्यस्य प्रजावतो भूयसो वस्वः पुरुश्चन्द्रस्य रायो दानं कर्त्तुं शग्धि तस्मात्ते तव शर्मणि स्तोतारः सूरयश्चोभयासो वयमुन्नताः स्याम॥१२॥

भावार्थः-ये धर्मेण धनादीन् पदार्थान् सँश्चिन्वन्ति तेषामतुलं धनमुत्तमाः प्रजाः सुशीलान्यपत्यानि च भवन्ति, ये पाण्डित्यं प्रगल्भतां च प्राप्याऽध्यापका उपदेशकाश्च जायन्ते ते दुःखं न पश्यन्ति॥१२॥

पदार्थः-हे (**जातवेदः**) विज्ञान को प्राप्त हुए (**अग्ने**) परम विद्वान् और उपदेशक जन! जिस कारण आप (**नः**) हमारे (**स्वपत्यस्य**) सुन्दर सन्तानयुक्त (**प्रजावतः**) प्रजावान् (**भूयसः**) बहुत (**वस्वः**) निवास का हेतु (**पुरुश्चन्द्रस्य**) बहुत सुवर्णादि धनयुक्त (**रायः**) धन के दान करने को (**शग्धि**) समर्थ हो इससे (**ते**) आपके (**शर्मणि**) घर में (**स्तोतारः**) प्रशंसक (**सूरयः**) और विद्वान् जन (**उभयासः**) दोनों प्रकार के हम लोग उन्नति को प्राप्त (**स्याम**) होवें॥१२॥

भावार्थः-जो धर्म से धनादि पदार्थों का सञ्चय करते हैं, उनका अतुल धन, उत्तम प्रजा और सुशील अपत्य होते हैं। जो पाण्डित्य और प्रगल्भता को प्राप्त होकर अध्यापक और उपदेशक होते हैं, वे दुःख को नहीं देखते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः।
अस्माञ्च ताँश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः॥१३॥२१॥

ये। स्तोतृऽभ्यः। गोऽअग्राम्। अश्वऽपेशसम्। अग्ने। रातिम्। उपऽसृजन्ति। सूरयः। अस्मान्। च। तान्। च। प्र। हि। नेषि। वस्यः। आ। बृहत्। वदेम। विदथे। सुऽवीराः॥१३॥

पदार्थः-(**ये**) (**स्तोतृभ्यः**) सर्वविद्याप्रशंसितृभ्यो विद्वद्भ्यः (**गोअग्राम्**) गौः पृथिवी धेनुर्वाऽग्रा मुख्या यस्यास्ताम् (**अश्वपेशसम्**) अश्वादीनां पेशो रूपं यस्यास्ताम् (**अग्ने**) विद्वन् (**रातिम्**) दानम् (**उपसृजन्ति**) प्रयच्छन्ति (**सूरयः**) विद्वांसः (**अस्मान्**) (**च**) (**तान्**) (**च**) (**प्र**) (**हि**) यतः (**नेषि**) प्रापयसि (**वस्यः**) वसीयोऽतिशयेन वासयितृ (**आ**) (**बृहत्**) महद्वस्तु ब्रह्म (**वदेम**) उपदिशेम (**विदथे**) विज्ञातव्ये व्यवहारे (**सुवीराः**) सुष्ठु सकलविद्याव्यापिनः॥१३॥

अन्वयः-हे अग्ने! त्वं ये सूरयः स्तोतृभ्यो गोअग्रामश्वपेशसं रातिमुपसृजन्ति तानन्याँश्च तत्सदृशानस्मानस्मत्सम्बन्धिनश्च हि त्वं प्रणेषि तस्माद्विदथे सुवीरा वयं वस्यो बृहदावदेम॥१३॥

भावार्थः-ये विद्वत्तमा अध्यापकेभ्यो विद्वद्भ्योऽधिकामधिकां विद्यां प्रदाय श्रीमतः कुर्वन्ति तेऽस्माकं प्रणेतारो भवन्तु॥१३॥

अत्राऽग्निविषयेण विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति द्वितीयमण्डले द्वितीयं सूक्तमेकविंशतितमो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) विद्वान्! आप (**ये**) जो (**सूरयः**) विद्वान् जन (**स्तोतृभ्यः**) सर्व विद्याओं की प्रशंसा करनेवाले विद्वानों की (**गोअग्राम्**) जिसमें पृथिवी वा धेनु मुख्य हैं और (**अश्वपेशसम्**)

अश्वादिकों के रूप विद्यमान उस **(रातिम्)** दान को **(उप, सृजन्ति)** देते हैं **(तान्)** उनको **(च)** और अन्यों को तथा उनके समान **(अस्मान्)** हम लोगों को **(च)** और हमारे सम्बन्धियों को **(हि)** ही आप **(प्रणेषि)** सब विषय प्राप्त करते हैं, इससे **(विदथे)** विशेष कर जानने योग्य व्यवहार में **(सुवीरः)** सुन्दर समस्त विद्याओं में व्याप्त हम लोग **(वस्यः)** अतिशय कर सब में वसने और अपने में औरों का निवास करानेवाले **(बृहत्)** सबसे बड़े ब्रह्म को **(आ, वदेम)** अच्छे प्रकार कहें, उसका उपदेश करें॥१३॥

भावार्थः-जो उत्तम विद्वान् जन पढ़ानेवाले विद्वानों के लिए अधिकतर विद्या को अच्छे प्रकार देकर उनको श्रीमान् करते हैं, वे हमारे प्रणेता अर्थात् सर्व विषयों को प्राप्त करानेवाले हों॥१३॥

इस सूक्त में अग्नि के विषय से विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह समझना चाहिये॥

यह दूसरे मण्डल में दूसरा सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

समिद्ध इत्येकादशर्चस्य तृतीयसूक्तस्य गृत्समद ऋषिः। अग्निर्देवता। १, २ विराट्त्रिष्टुप्। ३, ५, ६ भुरिक् त्रिष्टुप्। ४, ९, ११ निचृत् त्रिष्टुप्। ८, १० त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ जगती छन्दः। निषादः स्वरः॥

अथाऽग्निवर्णनमाह॥

अब ग्यारह ऋचावाले तीसरे सूक्त का आरम्भ है। इसके प्रथम मन्त्र में अग्नि का वर्णन किया है॥

समि॑द्धो अ॒ग्निर्नि॑हि॒तः पृ॑थि॒व्यां प्र॒त्यङ् विश्वा॑नि॒ भुव॑नान्यस्थात्।
होता॑ पाव॒कः प्र॒दिव॑ः सु॒मे॒धा दे॒वो दे॒वान्य॑जत्व॒ग्निरर्ह॑न्॥ १॥

सम्ऽइ॑द्धः। अ॒ग्निः। निऽहि॑तः। पृ॒थि॒व्याम्। प्र॒त्यङ्। विश्वा॑नि। भुव॑नानि। अ॒स्था॒त्। होता॑। पा॒व॒कः। प्र॒ऽदिव॑ः। सु॒ऽमे॒धाः। दे॒वः। दे॒वान्। य॒ज॒तु॒। अ॒ग्निः। अर्ह॑न्॥ १॥

पदार्थः-(समिद्धः) सम्यक् प्रदीप्तः **(अग्निः)** पावकः **(निहितः)** धृतः **(पृथिव्याम्)** भूमौ **(प्रत्यङ्)** प्रत्यञ्चतीति **(विश्वानि)** सर्वाणि **(भुवनानि)** भूगोलानि **(अस्थात्)** तिष्ठति **(होता)** आदाता **(पावकः)** पवित्रकरः **(प्रदिवः)** प्रकृष्टा द्यौः प्रकाशिता विद्या **(सुमेधा)** शोभना मेधा प्रज्ञा यस्य सः **(देवः)** दिव्यः **(देवान्)** विदुषः **(जयतु)** सङ्गच्छतु **(अग्निः)** वह्निः **(अर्हन्)** सत्कुर्वन्॥१॥

अन्वयः-यथा सुमेधा देवो विद्वान् देवान् यजतु तथा होता पावकोऽर्हन्नग्निरस्ति। यथा पृथिव्यां निहितः समिद्धः प्रत्यङ्ङग्निर्विश्वानि भुवनान्यस्थात् तथा प्रदिवो विद्वान् भवेत्॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यद्यत्रेश्वरोऽग्निं न रचयेत्तर्हि कोऽपि प्राणी सुखमाप्तुं न शक्नुयात् तथा विद्वान् विदुषः सत्कुर्यात्तथाऽन्येऽपि सत्कुर्युः॥१॥

पदार्थः-जैसे **(सुमेधाः)** शोभना मेधा बुद्धि जिसकी वह **(देवः)** दिव्य विद्वान् **(देवान्)** विद्वानों को **(यजतु)** प्राप्त हो, वैसे **(होता)** सर्व पदार्थों का ग्रहण करनेवाला **(पावकः)** पवित्र करनेवाला **(अर्हन्)** योग्यता को प्राप्त हुआ **(अग्निः)** अग्नि भी है, जैसे **(पृथिव्याम्)** पृथिवी में **(निहितः)** रक्खा हुआ **(समिद्धः)** अच्छे प्रकार प्रदीप्त **(प्रत्यङ्)** प्रत्येक पदार्थों को प्राप्त होनेवाला **(अग्निः)** अग्नि **(विश्वानि)** सब **(भुवनानि)** भूगोलों को **(अस्थात्)** निरन्तर स्थिर होता है, वैसा **(प्रदिवः)** जिसकी उत्तम विद्या प्रकाशित है, वह विद्वान् हो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यदि इस संसार में ईश्वर अग्नि को न रचे तो कोई प्राणी सुख को न प्राप्त हो सके। जैसे विद्वान् विद्वानों का सत्कार करें, वैसे अन्य लोग भी विद्वानों का सत्कार करें॥१॥

अथाग्निदृष्टान्तेन विद्वद्विषयमाह॥

अब अग्नि के दृष्टान्त से विद्वानों के विषय को अगले मन्त्र में कहा है॥

नरा॒शंस॒: प्रति॒ धामा॑न्य॒ञ्जन् ति॒स्रो दिव॒: प्रति॑ म॒ह्ना स्व॒र्चि:।
घृ॒त॒प्रुषा॒ मन॑सा ह॒व्यमु॒न्दन् मू॒र्धन्य॒ज्ञस्य॒ सम॑नक्तु दे॒वान्॥ २॥

नरा॒शंस॒:। प्रति॑। धामा॑नि। अ॒ञ्जन्। ति॒स्र:। दिव॑:। प्रति॑। म॒ह्ना। सु॒ऽअ॒र्चि:। घृ॒त॒ऽप्रुषा। मन॑सा। ह॒व्यम्। उ॒न्दन्। मू॒र्धन्। य॒ज्ञस्य॑। सम्। अ॒न॒क्तु॒। दे॒वान्॥ २॥

पदार्थ:-(नराशंस:) नरैराशंसनीय: **(प्रति)** स्थानानि **(अञ्जन्)** प्रकटीकुर्वन् **(तिस्र:)** गार्हपत्याहवनीयदाक्षिणात्यरूपास्त्रिविधा: **(दिव:)** दीप्ती: **(प्रति)** **(मह्ना)** महत्त्वेन **(स्वर्चि:)** प्रशंसितदीप्ति: **(घृतप्रुषा)** घृतेन तेजसा प्रुट्पूर्णस्तेन **(मनसा)** विज्ञानेन **(हव्यम्)** अत्तुमर्हम् **(उन्दन्)** आर्द्रीकुर्वन् **(मूर्द्धन्)** उत्तमाङ्गे **(यज्ञस्य)** सङ्गतस्य जगतो मध्ये **(सम्)** **(अनक्तु)** **(देवान्)** दिव्यान् गुणान् विदुषो वा॥ २॥

अन्वय:-हे विद्वन्! भवान् यथा नराशंसो धामानि प्रत्यञ्जन् स्वर्चिरग्निर्मह्ना तिस्रो दिवो हव्यं प्रत्युन्दन् यज्ञस्य मूर्द्धन् घृतप्रुषा मनसा देवान् समनक्ति तथा समनक्तु॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथाऽग्निर्विद्युत्प्रसिद्धसूर्यरूपत्रयेण सर्वान् व्यवहारान् पिपूर्ति तथा विद्वांस: विद्याधर्मसुशीलादिप्रापणेन सर्वा आशा जनानां प्रपूरयन्तु॥ २॥

पदार्थ:-हे विद्वान्! आप जैसे **(नराशंस:)** मनुष्यों को प्रशंसा करने योग्य **(धामानि)** स्थानों को **(प्रत्यञ्जन्)** प्रकट करता हुआ **(स्वर्चि:)** प्रशंसित दीप्तिवाला अग्नि **(मह्ना)** अपने बड़प्पन से **(तिस्र:)** गार्हपत्य, आहवनीय, दाक्षिणात्य से तीन **(दिव:)** दीप्तियों को तथा **(हव्यम्)** भक्षण करने योग्य पदार्थ **(प्रत्युन्दन्)** आर्द्रपन से प्रतिकूल करता हुआ **(यज्ञस्य)** यज्ञ के **(मूर्द्धन्)** उत्तम अङ्ग में **(घृतप्रुषा)** तेज से परिपूर्ण प्रचण्ड वा **(मनसा)** अपने गुणों का जो विज्ञान उससे **(देवान्)** दिव्य गुण वा विद्वानों को अच्छे प्रकार प्रकट है, वैसे **(समनक्तु)** प्रकट कीजिये॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि बिजुली प्रसिद्ध और सूर्य रूप से सब व्यवहारों को पूर्ण करता है, वैसे विद्वान् जन विद्या, धर्म और सुन्दर शील आदि की प्राप्ति से समस्त आशा जो मनुष्यों की उनको पूर्ण करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ईळितो अग्ने मनसा नो अर्हन् देवान्यक्षि मानुषात्पूर्वो अद्य।
स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम्॥ ३॥

ईळितः। अग्ने। मनसा। नः। अर्हन्। देवान्। यक्षि। मानुषात्। पूर्वः। अद्य। सः। आ। वह। मरुताम्। शर्धः। अच्युतम्। इन्द्रम्। नरः। बर्हिऽसदम्। यजध्वम्॥ ३॥

पदार्थः-(ईळितः) स्तुतः **(अग्ने)** विद्युदिव विद्वन् **(मनसा)** विज्ञानेन **(नः)** अस्मान् **(अर्हन्)** सत्कुर्वन् **(देवान्)** दिव्यगुणानिव विदुषः **(यक्षि)** यजसि **(मानुषात्)** मानवात् **(पूर्वः)** प्रथमः **(अद्य)** **(सः)** **(आ)** **(वह)** प्रापय **(मरुताम्)** वायूनाम् **(शर्द्धः)** बलम् **(अच्युतम्)** **(इन्द्रम्)** विद्युदाख्यम् **(नरः)** नायकाः **(बर्हिषदम्)** बृहत्सु पदार्थेषु सीदन्तम् **(यजध्वम्)** सङ्गच्छध्वम्॥ ३॥

अन्वयः-हे अग्ने! मानुषात्पूर्वो नोऽस्मानर्हन्नीळितो मनसा देवान् यक्षि स त्वं मरुतामच्युतमिन्द्रं बर्हिषदं शर्द्धोऽद्या वह। हे नरः! तं यूयं यजध्वम्॥ ३॥

भावार्थः-ये विदुषः सत्कृत्य विद्यां ग्राहयन्तीं वायुस्थां विद्युतं ग्रहीतुं शक्नुवन्ति। तेऽक्षयबला भूत्वा सर्वत्र सत्कृता भवन्ति॥ ३॥

पदार्थः-हे **(अग्ने)** बिजुली के समान प्रचण्ड प्रतापवाले विद्वान् जन्! **(मानुषात्)** और मनुष्य से **(पूर्वः)** प्रथम **(नः)** हम लोगों का **(अर्हन्)** सत्कार करते हुए **(ईळितः)** स्तुति को प्राप्त **(मनसा)** विज्ञान से **(देवान्)** दिव्य गुणों के समान विद्वानों का **(यक्षि)** सत्कार करते हैं **(सः)** सो आप **(मरुताम्)** पवनों के **(अच्युतम्)** न नष्ट होनेवाले **(इन्द्रम्)** बिजुलीरूप **(बर्हिषदम्)** बड़े-बड़े पदार्थों में स्थिर होने वाले **(शर्द्धः)** बल को **(अद्य)** आज **(आ, वह)** प्राप्त कीजिये। हे **(नरः)** अग्रगामी नायक जनो! उसको आप लोग **(यजध्वम्)** प्राप्त हूजिये॥ ३॥

भावार्थः-जो विद्वानों का सत्कार कर विद्या को ग्रहण कराती हुई पवनों में स्थिर होनेवाली बिजुली को ग्रहण कर सकते हैं, वे अक्षयबली होकर सर्वत्र सत्कार को प्राप्त होते हैं॥ ३॥

पुनस्तमेव विषयमाह

फिर उसी विषय को अगले मन्त्र में कहा है॥

देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम्।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः॥ ४॥

देवम्। बर्हिः। वर्धमानम्। सुऽवीरम्। स्तीर्णम्। राये। सुऽभरम्। वेदी इति। अस्याम। घृतेन। अक्तम्। वसवः। सीदत। इदम्। विश्वे। देवाः। आदित्याः। यज्ञियासः॥ ४॥

पदार्थः-(देव) अग्निरिव द्योतमान **(बर्हिः)** उदकम्। **बर्हिरित्युदकनामसु पठितम्।** (निघं०१.१२)। **(वर्द्धमानम्) (सुवीरम्)** शोभना वीरा यस्मात् **(स्तीर्णम्)** आच्छादितम् **(राये)** धनाय **(सुभरम्)** भर्त्तुं योग्यम् **(वेदी)** वेद्याम्। अत्र **सुपां सुलुगिति** ङे र्लोपः। **(अस्याम्) (घृतेन)** आज्येन **(अक्तम्)** युक्तम् **(वसवः)** पृथिव्यादयः **(सीदत)** प्राप्नुत **(इदम्) (विश्वे)** सर्वे **(देवाः)** दिव्यगुणयुक्ताः **(आदित्याः)** मासाः **(यज्ञियासः)** यज्ञमर्हाः॥४॥

अन्वयः-हे देव! त्वं राये स्तीर्णं सुवीरं वर्द्धमानं सुभरं बर्हिरस्यां वेदी घृतेनाक्तं कुरु। हे वसव इवादित्याश्चेव! यूयं यथा यज्ञियासो विश्वे देवा इदमासीदन्ति तथा सीदत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरवश्यमन्तरिक्षस्थं जलं सुगन्ध्यादिपदार्थयुक्तं कर्त्तव्यं यतः सर्वे प्राणिनोऽरोगाः स्युः॥४॥

पदार्थः-हे **(देव)** अग्नि के समान प्रकाशमान! आप **(राये)** धन के लिये **(स्तीर्णम्)** जो ढपा हुआ **(सुवीरम्)** अच्छे-अच्छे वीर होते हैं, उस **(वर्द्धमानम्)** बढ़ते हुए **(सुभरम्)** सुख के धारण करने योग्य **(बर्हिः)** जल को **(अस्याम्)** इस **(वेदी)** वेदी में **(घृतेन)** घी से **(अक्तम्)** युक्त करो। हे **(वसवः)** पृथिव्यादिकों वा **(आदित्याः)** महीनों के समान विद्वानो! तुम जैसे **(यज्ञियासः)** यज्ञ करने में समर्थ **(विश्वे)** समस्त **(देवाः)** दिव्य गुणयुक्त विद्वान् जन **(इदम्)** इस धन को प्राप्त होते हैं, वैसे उसको **(सीदत)** प्राप्त होओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि अवश्य अन्तरिक्षस्थ जल सुगन्ध्यादि पदार्थ युक्त करें, जिससे समस्त प्राणी आरोग्य **[**को प्राप्त**]** हों॥४॥

अथ स्त्रीपुरुषाचरणमाह॥

अब स्त्री-पुरुषों के आचरण को कहते हैं॥

वि श्र॑यन्तामु॒र्विया हू॒यमा॑ना॒ द्वारो॑ दे॒वीः सु॑प्राय॒णा नमो॑भिः।
व्यच॑स्वतीॄ॒र्वि प्र॑थन्तामजु॒र्या वर्णं॑ पु॒ना॒ना य॒शस॑ं सु॒वीर॑म्॥५॥२२॥

वि। श्र॒य॒न्ता॒म्। उ॒र्विया। हू॒यमा॑नाः। द्वारः॑। दे॒वीः। सु॒प्र॒ऽअ॒य॒नाः। नमः॑ऽभिः। व्यच॑स्वतीः। वि। प्र॒थ॒न्ता॒म्। अ॒जु॒र्याः। वर्ण॑म्। पु॒ना॒नाः। य॒शस॑म्। सु॒ऽवीर॑म्॥५॥

पदार्थः-(वि) (श्रयन्ताम्) सेवन्ताम् **(उर्विया)** पृथिव्या सह **(हूयमानाः)** जुह्वानाः **(द्वारः)** द्वार इव सुशोभमानाः **(देवीः)** देदीप्यमानाः **(सुप्रायणाः)** सुष्ठु प्रायणं गमनं यासां ताः **(नमोभिः)**

अन्नादिभिः **(व्यचस्वतीः)** व्याप्तिमतीः **(वि) (प्रथन्ताम्)** प्रख्यान्तु **(अजुर्याः)** ज्वररहितेषु साध्वीः **(वर्णम्)** स्वरूपम् **(पुनानाः)** पवित्रकारिकाः **(यशसम्)** कीर्त्तिम् **(सुवीरम्)** उत्तमवीरयुक्तम्॥५॥

अन्वयः-हे पुरुषा! भवन्तो नमोभिरुर्विया सह वर्त्तमाना द्वार इव सुशोभमाना हूयमानाः सुप्रायणा अजुर्या सुवीरं यशसं वर्णं पुनाना व्यचस्वतीर्देवीस्स्त्रियो विश्रयन्तां ताभिः सह शास्त्राणि सुखानि वा विप्रथन्ताम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुशिल्पिभिर्निर्मितेषु गृहेषु निर्मितानि सुशोभायुक्तानि द्वाराणि भवेयुस्तथा विदुष्यो धार्मिक्यः पतिव्रताः स्त्रियः कीर्त्तिमत्यः सुसन्तानोत्पादिका भवन्ति॥५॥

पदार्थः-हे पुरुषो! आप **(नमोभिः)** अन्नादिकों वा **(उर्विया)** पृथिवी के साथ वर्त्तमान **(द्वारः)** द्वारों के समान शोभावती हुईं और **(हूयमानाः)** ग्रहण की हुईं **(सुप्रायणाः)** जिनकी सुन्दर चाल **(अजुर्याः)** ज्वररहित मनुष्यों में उत्तमता को प्राप्त **(सुवीरम्)** उत्तम वीरों से युक्त **(यशसम्)** यश और **(वर्णम्)** अपने रूप को **(पुनानाः)** पवित्र करती हुईं **(व्यचस्वतीः)** समस्त गुणों में व्याप्ति रखनेवाली **(देवीः)** देदीप्यमान अर्थात् चमकती-दमकती हुई स्त्रियों को **(वि, श्रयन्ताम्)** विशेषता से आश्रय करो और उनके साथ शास्त्र व सुखों को **(वि, प्रथन्ताम्)** विशेषता से कहो-सुनो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे कारुकों के बनाये हुए घरों में सुन्दर शोभा युक्त बनाये हुए द्वार होवें, वैसे विदुषी धर्म्मपरायणा पतिव्रता स्त्रियाँ कीर्तिमती और उत्तम सन्तानों की उत्पन्न करनेवाली होती हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते।
तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती॥६॥

साधु। अपांसि। सनता। नः। उक्षिते इति। उषासानक्ता। वय्याऽइव। रण्विते इति। तन्तुम्। ततम्।संवयन्ती इति सम्ऽवयन्ती। समीची इति सम्ऽईची। यज्ञस्य। पेशः। सुदुघे इति सुऽदुघे। पयस्वती इति॥६॥

पदार्थः-**(साधु)** साधूनि **(अपांसि)** कर्माणि **(सनता)** नतेन सह वर्त्तमानानि **(नः)** अस्मभ्यम् **(उक्षिते)** सिञ्चिते **(उषासानक्ता)** रात्रिदिने **(वय्येव)** परसाधिका नलिकेव **(रण्विते)**

शब्दायमाने **(तन्तुम्)** सूत्रम् **(ततम्)** विस्तृतम् **(संवयन्ती)** निर्मिमाना **(समीची)** सम्यगञ्चती **(यज्ञस्य)** यष्टुं सङ्गन्तुमर्हस्य **(पेशः)** रूपम् **(सुदुघे)** सुष्ठु प्रपूरिके **(पयस्वती)** प्रशस्तजलयुक्ते॥६॥

अन्वयः-हे स्त्रीपुरुषौ! तन्तुं वय्येव रण्विते यज्ञस्य ततं पेशः संवयन्ती समीची पयस्वती सुदुघ उक्षित उषासानक्तेव युवां नोऽस्मभ्यं सनता साध्वपांसि कारयतम्॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। सन्ताना भृत्याश्च दम्पती प्रति एवं प्रार्थयेयुर्युवामस्माभिर्धर्म्याणि कर्माणि कारयतम्॥६॥

पदार्थः-हे स्त्रीपुरुषो! **(तन्तुम्)** सूत को **(वय्येव)** जैसे वस्त्र बनवानेवाली नली वा **(रण्विते)** शब्दायमान **(यज्ञस्य)** सराहने योग्य यज्ञकर्म के **(ततम्)** विस्तृत **(पेशः)** रूप को **(संवयन्ती)** उत्पन्न कराते और **(समीची)** अच्छे प्रकार अपनी-अपनी कक्षा में चलते हुए **(पयस्वती)** प्रशंसित जलयुक्त **(सुदुघे)** सुन्दरता से सब कामों को पूरा करनेहारे **(उक्षिते)** सींचे हुए **(उषासानक्ता)** रात्रि-दिन के समान तुम दोनों **(नः)** हम लोगों के लिये **(सनता)** नम्रभाव के साथ वर्त्तमान **(साधु)** उत्तम **(अपांसि)** कर्मों को कराओ॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। सन्तान और भृत्यजन अपने पालनेवाले स्त्रीपुरुषों के प्रति ऐसी प्रार्थना करें कि तुम हमसे धर्मयुक्त कार्य कराओ॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दैव्या॒ होता॑रा प्रथ॒मा वि॒दुष्ट॑र ऋ॒जु यक्ष॑तः सम्ऋ॒चा व॒पुष्ट॑रा।
दे॒वान् यज॑न्तावृतु॒था सम॑ञ्जतो॒ नाभा॑ पृथि॒व्या अधि॒ सानु॑षु त्रि॒षु॥७॥

दैव्या॑। होता॑रा। प्र॒थ॒मा। वि॒दुः॒ऽत॑रा। ऋ॒जु। यक्ष॑तः। सम्। ऋ॒चा। व॒पुः॒ऽत॑रा। दे॒वान्। यज॑न्तौ। ऋ॒तु॒ऽथा। सम्। अ॒ञ्ज॒तः॒। नाभा॑। पृ॒थि॒व्याः॒। अधि॑। सानु॑षु। त्रि॒षु॥७॥

पदार्थः-(**दैव्या**) देवेषु विद्वत्सु कुशलौ **(होतारा)** आदातारौ दातारौ वा **(प्रथमा)** प्रख्यातौ **(विदुष्टरा)** अतिशयेन विद्वांसौ **(ऋजु)** सरलं यथा स्यात्तथा **(यक्षतः)** सङ्गच्छतः **(सम्)** सम्यक् **(ऋचा)** प्रशंसितौ **(वपुष्टरा)** अतिशयेन रूपलावण्ययुक्तौ **(देवान्)** पृथिव्यादीनिव विदुषः **(यजन्तौ)** सत्कुर्वन्तौ **(ऋतुथा)** ऋतावृतौ **(सम्)** सम्यक् **(अञ्जतः)** कामयेथाम् **(नाभा)** नाभौ मध्ये **(पृथिव्याः)** **(अधि)** उपरि **(सानुषु)** शिखरेषु **(त्रिषु)** निकृष्टमध्यमोत्तमेषु॥७॥

अन्वयः-हे मनुष्या! यथा दैव्या होतारा प्रथमा विदुष्टरा वपुष्टरा ऋचा ऋतुथा देवान् यजन्तौ स्त्रीपुरुषौ पृथिव्या नाभा ऋजु संयक्षतस्त्रिषु सानुष्वधिसमञ्जतस्तथा यूयमपि प्रयतध्वम्॥७॥

भावार्थः-यथा ब्रह्मचर्येण पूर्णविद्याशिक्षौ सौन्दर्ययुक्तौ स्वयंवरविवाहेन गृहीतपाणी विद्वत्सङ्गिनावाप्तावध्यापकौ स्त्रीपुरुषौ सत्कर्मसु वर्त्तेते तथा सर्वैः प्रयतितव्यम्॥७॥

पदार्थः-हे मनुष्यो! जैसे **(दैव्या)** विद्वानों में कुशल **(होतारा)** लेने-देनेवाले **(प्रथमा)** प्रख्यात **(विदुष्टरा)** अतीव विद्वान् **(वपुष्टरा)** अतीव रूपलावण्ययुक्त **(ऋचा)** प्रशंसित **(ऋतुथा)** ऋतु-ऋतु में **(देवान्)** पृथिवी आदि लोकों के समान **(यजन्तौ)** सत्कार करते हुए स्त्रीपुरुष **(पृथिव्याः)** पृथिवी के **(नाभा)** बीच **(ऋजु)** सरलता जैसे हो, वैसे **(संयक्षतः)** सब व्यवहारों की सङ्गति करें वा **(त्रिषु)** तीन **(सानुषु)** शिखरों के **(अधि)** ऊपर **(समञ्जतः)** अच्छे प्रकार काम करें, वैसे तुम प्रयत्न करो॥७॥

भावार्थः-जैसे ब्रह्मचर्य से पूर्ण विद्या और शिक्षा को प्राप्त, सुन्दरता से युक्त, स्वयंवर विवाह विधि से पाणिग्रहण किये हुए, विद्वानों के सङ्गी, आप्त शास्त्रज्ञ धर्मात्मा विद्वान् अध्यापक स्त्रीपुरुष सत्कर्मों में वर्त्तते हैं, वैसे सबको प्रयत्न करना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य॥८॥

सरस्वती। साधयन्ती। धियम्। नः। इळा। देवी। भारती। विश्वऽतूर्तिः। तिस्रः। देवीः। स्वधया। बर्हिः। आ। इदम्। अच्छिद्रम्। पान्तु। शरणम्। निऽसद्य॥८॥

पदार्थः-**(सरस्वती)** प्रशस्तविज्ञानकारिका वागिव स्त्री **(साधयन्ती)** विद्याशिक्षाभ्यामन्यान् विदुषः कारयन्ती **(धियम्)** प्रज्ञां कर्म वा **(नः)** अस्माकम् **(इळा)** स्तोतुमर्हा **(देवी)** देदीप्यमाना **(भारती)** शुभान् गुणान् धरन्ती **(विश्वतूर्त्तिः)** या विश्वं सर्वं जगत् त्वरति **(तिस्रः)** **(देवीः)** कमनीयाः देव्यः **(स्वधया)** अन्नेन **(बर्हिः)** अन्तरिक्षम् **(आ)** समन्तात् **(इदम्)** **(अच्छिद्रम्)** छिद्रवर्जितम् **(पान्तु)** **(शरणम्)** आश्रयम् **(निषद्य)** नितरां प्राप्य॥८॥

अन्वयः-याः साधयन्ती सरस्वती देवीळा विश्वतूर्त्तिर्भारती च तिस्रो देवीरिदमच्छिद्रं बर्हिर्निषद्य स्वधया नो धियमापान्तु तासां शरणमस्माभिर्विधेयम्॥८॥

भावार्थः-एका जननी द्वितीया अध्यापिका तृतीयोपदेशिका स्त्री कन्याभिः सदोपसेवनीया यतो धीविद्ये नित्यं वर्द्धेताम्॥८॥

पदार्थः-जो **(साधयन्ती)** विद्या और उत्तम शिक्षा से औरों को विद्वान् कराती **(सरस्वती)** प्रशस्त विज्ञान करानेवाली वाणी सदृश स्त्री **(देवी)** देदीप्यमान **(इळा)** स्तुति करने योग्य **(विश्वतूर्त्तिः)** समस्त संसार को शीघ्रता करानेवाली **(भारती)** और शुभ गुणों को धारण करनेवाली **(तिस्रः)** तीन **(देवीः)** मनोहर देवी **(इदम्)** इस **(अच्छिद्रम्)** छिद्ररहित **(बर्हिः)** अन्तरिक्ष को **(निषद्य)** निरन्तर प्राप्त हो के **(स्वधया)** अन्न से **(नः)** हमारी **(धियम्)** बुद्धि वा कर्म को **(आ, पान्तु)** अच्छे प्रकार पालें, उनका **(शरणम्)** आश्रय हम लोगों को करना चाहिये॥८॥

भावार्थः-एक माता, दूसरी पढ़ानेवाली और तीसरी उपदेश करनेवाली स्त्री कन्याओं को सदा समीप में सेवनी चाहिये, जिससे बुद्धि और विद्या नित्य बढ़ें॥८॥

अथ पुरुषविषयमाह॥

अब पुरुष विषय को अगले मन्त्र में कहा है॥

पि॒शङ्गरूपः सुभरो॑ वयो॒धाः श्रु॒ष्टी वी॒रो जा॑यते दे॒वका॑मः।
प्र॒जां त्वष्टा॒ वि ष्य॑तु॒ नाभि॑म॒स्मे अथा॑ दे॒वाना॒मप्ये॑तु॒ पाथ॑ः॥९॥

पि॒शङ्ग॑ऽरूपः। सु॒ऽभर॑ः। व॒यः॒ऽधाः। श्रु॒ष्टी। वी॒रः। जा॒य॒ते॒। दे॒वऽका॑मः। प्र॒ऽजाम्। त्वष्टा॑। वि। स्य॒तु॒। नाभि॑म्। अ॒स्मे इति॑। अथ॑। दे॒वाना॑म्। अपि॑। ए॒तु॒। पाथ॑ः॥९॥

पदार्थः-**(पिशङ्गरूपः)** पिशङ्गस्य सुवर्णस्येव स्वरूपं यस्य सः **(सुभरः)** यः शोभनं भरति सः **(वयोधाः)** यो वयः प्रजननं दधाति **(श्रुष्टी)** शीघ्रम् **(वीरः)** अजति सकला विद्याः प्राप्नोति सः **(जायते)** प्रसिद्धो भवति **(देवकामः)** यो देवान् कामयते सः **(प्रजाम्)** **(त्वष्टा)** विविधरूपस्य निर्माता **(वि)** **(स्यतु)** **(नाभिम्)** **(अस्मे)** अस्माकम् **(अथ)** पुनः। अत्र **निपातस्य चे**ति दीर्घः। **(देवानाम्)** विदुषाम् **(अपि)** निश्चये **(एतु)** प्राप्नोतु **(पाथः)** रक्षकमन्नम्॥९॥

अन्वयः-यथा पिशङ्गरूपः सुभरो वयोधा देवकामः श्रुष्टी वीरो मनुष्यो जायते। यथा त्वष्टाऽस्मे प्रजां विष्यत्वथाऽस्मे देवानां नाभिं पाथोऽप्येतु॥९॥

भावार्थः-ये सुसंस्कृतं रोगहरं बुद्धिप्रदमन्नं भुक्त्वाऽपत्यं जनयन्ति, तेषां सन्ताना विद्वत्प्रिया दीर्घायुषः सुशीला जायन्ते॥९॥

पदार्थः-जैसे (**पिशङ्गरूपः**) सुवर्ण के रूप के समान जिसका रूप (**सुभरः**) भरण-पोषण करता हुआ (**वयोधाः**) गर्भ स्थापन करनेवाला (**देवकामः**) और विद्वानों की कामना करता वह (**श्रुष्टी**) शीघ्र (**वीरः**) सकल विद्याओं को प्राप्त होनेवाला पुरुष (**जायते**) उत्पन्न होता है। जैसे (**त्वष्टा**) विविध रूप रचनेवाला ईश्वर (**अस्मे**) हम लोगों को (**प्रजाम्**) सन्तान (**वि, ष्यतु**) देवे (**अथ**) इसके अनन्तर हम (**देवानाम्**) विद्वानों की (**नाभिम्**) नाभि को और (**पाथः**) रक्षा करनेहारे अन्न को (**अपि**) भी (**एतु**) प्राप्त होवें॥९॥

भावार्थः-जो अच्छा संस्कार किये रोग हरने और बुद्धि देनेवाले उत्तम अन्न का भोजन कर सन्तानोत्पत्ति करते हैं, उनके सन्तान विद्वानों के प्रिय, दीर्घ आयुवाले और सुशील होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः।
त्रिधा समक्तं नयतु प्रजानन् देवेभ्यो दैव्यः शमितोप हव्यम्॥ १०॥

वनस्पतिः। अवऽसृजन्। उप। स्थात्। अग्निः। हविः। सूदयाति। प्र। धीभिः। त्रिधा। सम्ऽअक्तम्। नयतु। प्रऽजानन्। देवेभ्यः। दैव्यः। शमिता। उप। हव्यम्॥ १०॥

पदार्थः-(**वनस्पतिः**) वटादिः (**अवसृजन्**) अवसर्गं कुर्वन् (**उप**) (**स्थात्**) उपतिष्ठते (**अग्निः**) पावकः (**हविः**) होतव्यं द्रव्यम् (**सूदयाति**) क्षरयति प्रापयति (**प्र**) (**धीभिः**) कर्मभिः (**त्रिधा**) त्रिप्रकारकम् (**समक्तम्**) संहतम् (**नयतु**) (**प्रजानन्**) (**देवेभ्यः**) दिव्यगुणेभ्यः (**दैव्यः**) देवेषु लब्धः (**शमिता**) उपशमकः (**उप**) (**हव्यम्**) आदातुमर्हम्॥१०॥

अन्वयः-हे विद्वन्! यथा धीभिस्सह वर्त्तमानो वनस्पतिरवसृजन्नुपस्थादग्निस्त्रिधा समक्तं हविः सूदयाति तथा शमिता दैव्यः प्रजानन् भवान् देवेभ्यः उपहव्यं प्रणयतु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वनस्पतयोऽग्निश्च स्वैः कर्मभिः सर्वान् प्राणिन उपकुर्वन्ति तथा विद्वांसोऽध्ययनाऽध्यापनोपदेशैः सर्वानुपकुर्वन्तु॥१०॥

पदार्थः-हे विद्वान्! जैसे (**धीभिः**) कर्मों के साथ वर्त्तमान (**वनस्पतिः**) बरगद आदि (**अवसृजन्**) फलादिकों का त्याग करता हुआ (**उप, स्थात्**) उपस्थित होता है वा (**अग्निः**) अग्नि (**त्रिधा**) तीन प्रकार के (**समक्तम्**) समूह को प्राप्त हुए (**हविः**) होमने योग्य द्रव्य को (**सूदयाति**) प्राणिमात्र के सुख के लिये कण-कण करके पहुंचाता है, वैसे (**शमिता**) शान्ति करनेवाला

(दैव्यः) विद्वानों में प्राप्त हुए **(प्रजानन्)** उत्तम ज्ञान को प्राप्त होते हुए आप **(देवेभ्यः)** दिव्य गुणों के लिये **(उप, हव्यम्)** समीप में ग्रहण करने योग्य पदार्थ को **(प्र, नयतु)** प्राप्त कीजिये॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वनस्पति और अग्नि अपने कर्मों से समस्त प्राणियों का उपकार करते हैं, वैसे विद्वान् जन अध्ययन, अध्यापन और उपदेश से सबका उपकार करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमस्य धाम।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥ ११॥ २३॥

घृतम्। मिमिक्षे। घृतम्। अस्य। योनिः। घृते। श्रितः। घृतम्। ऊम् इति। अस्य। धाम। अनुऽस्वधम्। आ। वह। मादयस्व। स्वाहाऽकृतम्। वृषभ। वक्षि। हव्यम्॥ ११॥

पदार्थः-**(घृतम्)** आज्यम् **(मिमिक्षे)** मेढुं सेक्तुमिच्छेयम् **(घृतम्)** संदीप्तं तेजः **(अस्य)** अग्नेः **(योनिः)** कारणम् **(घृते)** आज्ये **(श्रितः)** सेवितः **(घृतम्)** तेजः **(उ)** **(अस्य)** **(धाम)** अधिकरणम् **(अनुष्वधम्)** स्वधामनुगतं द्रव्यम् **(आ)** **(वह)** समन्तात् प्राप्नुहि **(मादयस्व)** आनन्दयस्व **(स्वाहाकृतम्)** सत्क्रियया निष्पादितम् **(वृषभ)** श्रेष्ठ **(वक्षि)** **(हव्यम्)** ग्रहीतुमर्हम्॥११॥

अन्वयः-हे वृषभ! यस्त्वं स्वाहाकृतं हव्यं वक्षि स त्वमनुष्वधमा वह। यथाऽहं घृतं मिमिक्षे तथा त्वं सेक्तुमिच्छ यथाऽस्याग्नेर्घृतं घृतं योनिर्घृते श्रितो **[**घृतमु**]** अस्य धामाऽस्ति तथा तेन त्वं मादयस्व॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या यज्ञेऽग्निरिवोपकारकाः परोपकारमाश्रित्य अन्यान् सुखयन्ति तथा स्वयमपि तैरुपकृता आनन्दिताश्च भवन्ति॥११॥

अस्मिन् सूक्तेऽग्निविद्वत्स्त्रीपुरुषाचरणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति द्वितीयमण्डले तृतीयं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वृषभ)** श्रेष्ठजन! जो आप **(स्वाहाकृतम्)** उत्तम क्रिया से उत्पन्न किये हुए **(हव्यम्)** ग्रहण करने के योग्य पदार्थ को **(वक्षि)** प्राप्त करते हो सो आप **(अनुष्वधम्)** अन्न के अनुकूल व्यञ्जन द्रव्य को **(आ, वह)** सब प्रकार से प्राप्त कीजिये, जैसे मैं **(घृतम्)** घी को

(मिमिक्षे) सींचने की इच्छा करता हूं, वैसे आप सींचने की इच्छा करो। जैसे **(अस्य)** इस अग्नि का **(घृतम्)** प्रदीप्त होने का घृत **(योनिः)** कारण है **(घृते)** घी में **(श्रितः)** सेवन किया जाता **(घृतम्)** तेज **(उ)** ही **(अस्य)** इस अग्नि का **(धाम)** आधार है, वैसे उससे आप **(मादयस्व)** आनन्दित हूजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य यज्ञ में अग्नि जैसे वैसे उपकार करनेवाले, परोपकार का आश्रय किये हुए, औरों को सुखी करते हैं, वैसे आप भी उनसे उपकार को प्राप्त और आनन्दित होते हैं॥११॥

इस सूक्त में अग्नि, विद्वान् और स्त्रीपुरुषों के आचरण का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह दूसरे मण्डल में तीसरा सूक्त और तेईसवां वर्ग समाप्त हुआ॥

हुव इति नवर्चस्य चतुर्थस्य सूक्तस्य सोमाहुतिर्भार्गव ऋषिः। अग्निर्देवता। १, ८ स्वराट् पङ्क्तिः। २, ३, ५-७ आर्षीपङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ ब्राह्म्युष्णिक् छन्दः। ऋषभः स्वरः। ९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह॥

अब नव ऋचावाले चतुर्थ सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम्।
मित्रइव यो दिधिषाय्यो भूद् देव आदेवे जने जातवेदाः॥ १॥

हुवे। वः। सुऽद्योत्मानम्। सुऽवृक्तिम्। विशाम्। अग्निम्। अतिथिम्। सुऽप्रयसम। मित्रःऽइव। यः। दिधिषाय्यः। भूत्। देवः। आऽदेवे। जने। जातऽवेदाः॥ १॥

पदार्थः-(हुवे) प्रशंसामि **(वः)** युष्मभ्यम् **(सुद्योत्मानम्)** सुष्ठु देदीप्यमानम् **(सुवृक्तिम्)** सुष्ठु वर्जयितारम् **(विशाम्)** प्रजानाम् **(अग्निम्)** पावकम् **(अतिथिम्)** अतिथिमिव वर्तमानम् **(सुप्रयसम्)** सुष्ठु कमनीयम् **(मित्रइव)** सखेव **(यः)** **(दिधिषाय्यः)** यथावद्धर्त्ता **(भूत्)** भवति **(देवः)** व्यवहारहेतुः **(आदेवे)** सर्वतो विद्याप्रकाशयुक्ते **(जने)** विदुषि **(जातवेदाः)** जातेषु पदार्थेषु विद्यमानः॥ १॥

अन्वयः-हे मनुष्या! यथाऽहमादेवे जने यो मित्र इव देवो दिधिषाय्यो जातवेदा भूद्भवति तं विशां सुद्योत्मानं सुप्रयसं सुवृक्तिमतिथिमग्निं वो युष्मभ्यं हुवे तथाऽस्मभ्यं यूयमेनं प्रशंसत॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्याः परस्परं विद्यां दत्वा जगतः प्रकाशकं धारकं मित्रवत्सुखप्रदं विद्वद्वेद्यं विद्युदाख्यमग्निं प्रशंसन्ति ते तद्गुणविज्ञातारो भवन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे मैं **(आदेवे)** सब ओर से विद्या प्रकाशयुक्त **(जने)** विद्वान् मनुष्य के निमित्त **(यः)** जो **(मित्र, इव)** मित्र के समान **(देवः)** व्यवहार का हेतु **(दिधिषाय्यः)** यथावत् पदार्थों का धारण करनेवाला **(जातवेदाः)** उत्पन्न हुए पदार्थों में विद्यमान अग्नि प्रसिद्ध **(भूत्)** होता है, उसको **(विशाम्)** प्रजाजनों के बीच **(सुद्योत्मानम्)** सुन्दरता से निरन्तर प्रकाशमान **(सुप्रयसम्)** अच्छे प्रकार मनोहर **(सुवृक्तिम्)** सुन्दर त्याग करनेवाले **(अतिथिम्)** अतिथि के समान वर्त्तमान **(अग्निम्)** अग्नि की **(वः)** तुम लोगों के लिये **(हुवे)** प्रशंसा करता हूं, वैसे हम लोगों के लिये तुम अग्नि की प्रशंसा करो॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य परस्पर विद्या देके जगत् के प्रकाश को धारण कर वा मित्र के समान सुख देनेवाले विद्वानों को जानने योग्य बिजुलीरूप अग्नि की प्रशंसा करते हैं, वे उसके गुणों को जाननेवाले होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒मं वि॒धन्तो॑ अ॒पां स॒धस्थे॑ द्वि॒ता द॑धु॒र्भृग॑वो वि॒क्ष्वा३॑यो॑:।
ए॒ष विश्वा॑न्य॒भ्य॑स्तु॒ भूमा॑ दे॒वाना॑म॒ग्निर॑र॒तिर्जी॒राश्व॑:॥ २॥

इ॒मम्। वि॒धन्त॑:। अ॒पाम्। स॒धऽस्थे॑। द्वि॒ता। अ॒द॒धु॒:। भृग॑व:। वि॒क्षु। आ॒यो॒:। ए॒ष:। विश्वा॑नि। अ॒भि। अ॒स्तु॒। भूम॑। दे॒वाना॑म्। अ॒ग्नि:। अ॒र॒ति:। जी॒रऽअश्व॑:॥ २॥

पदार्थः-(**इमम्**) (**विधन्तः**) परिचरन्तः (**अपाम्**) अन्तरिक्षस्य जलस्य प्राणानां वा (**सधस्थे**) समानस्थाने (**द्विता**) द्वयोर्भावः (**अदधुः**) धरन्ति (**भृगवः**) विद्वांसः (**विक्षु**) प्रजासु (**आयोः**) प्राप्तस्य (**एषः**) (**विश्वानि**) (**अभि**) अभितः (**अस्तु**) (**भूमा**) बहुत्वेन (**देवानाम्**) दिव्यगुणानां पृथिव्यादीनाम् (**अग्निः**) वह्निः (**अरतिः**) समर्थः (**जीराश्वः**) जीरा वेगवन्तोऽश्वा आशुगामिनो गुणा यस्य तम्॥ २॥

अन्वयः-य एषोऽरतिर्जीराश्वोऽग्निर्भूमा देवानां विक्ष्वायोर्विश्वान्यभि व्याप्नुवन्नस्ति यमिमं विधन्तो भृगवोऽपां सधस्थेऽदधुस्तेन सहाऽत्र द्विता अभ्यस्तु॥ २॥

भावार्थः-योऽग्निः स्वव्याप्त्या प्रजासु प्रविष्टस्तेन सर्वाणि वेगवन्ति यन्त्रकला प्रचलितानि यानानि शीघ्रगामीनि विधेयानि॥ २॥

पदार्थः-जो (**एषः**) यह (**अरतिः**) समर्थ (**जीराश्वः**) जिनके वेगवान् शीघ्रगामी गुण विद्यमान वह (**अग्निः**) अग्नि (**भूमा**) बहुताई से (**देवानाम्**) दिव्य गुणवाले पृथिवी आदि लोक-लोकान्तरों के (**विक्षु**) प्रजागणों में (**आयोः**) प्राप्त व्यवहार को (**विश्वानि**) समस्त वस्तुओं को सब ओर से व्याप्त होता हुआ विद्यमान है, जिस (**इमम्**) इस अग्नि को (**विधन्तः**) सेवते हुए (**भृगवः**) विद्वान् जन (**अपाम्**) अन्तरिक्ष के जल वा प्राणों के (**सधस्थे**) समान स्थान में (**अदधुः**) धरते स्थापन करते हैं, उसके साथ यहाँ (**द्विता**) दोनों व्यवहारों का भाव अर्थात् शराग्निभाव और पञ्चाकलाग्निभाव [अर्थात् अस्त्राग्नि और यानाग्नि] (**अभ्यस्तु**) सब ओर से हो॥ २॥

भावार्थः-जो अग्नि अपनी व्याप्ति से प्रजाजनों में प्रविष्ट है, उससे समस्त वेगवान् यन्त्रकलाओं से प्रचलित किये हुए यान शीघ्र चलनेवाले बनाने चाहियें॥ २॥

पुररग्निकार्यैर्विद्वद्विषयमाह॥

फिर अग्नि कार्यों से विद्वानों के विषय को अगले मन्त्र में कहा है॥

अ॒ग्निं दे॒वासो॒ मानु॑षीषु वि॒क्षु प्रि॒यम्धु॑: क्षे॒ष्यन्तो॒ न मि॒त्रम्।
स दी॑दयदुश॒तीरू॒र्म्या॒ आ दु॒क्षाय्यो॒ यो दास्व॑ते॒ दम॒ आ॥ ३॥

अ॒ग्निम्। दे॒वास॑:। मानु॑षीषु। वि॒क्षु। प्रि॒यम्। धु॒:। क्षे॒ष्यन्त॑:। न। मि॒त्रम्। स:। दी॒द॒य॒त्। उ॒श॒ती:। ऊ॒र्म्या॑:। आ। दु॒क्षाय्य॑:। य:। दास्व॑ते। दमे॑। आ॥ ३॥

पदार्थ:-(अग्निम्) पावकम् **(देवास:)** विद्वांसः **(मानुषीषु)** मनुष्याणामिमासु **(विक्षु)** प्रजासु **(प्रियम्)** कमनीयम् **(धु:)** दध्युः। अत्राडभावः। **(क्षेष्यन्त:)** निवसन्तः **(न)** इव **(मित्रम्)** सखायम् **(स:)** **(दीदयत्)** दीदयति प्रज्वलति। अत्राडभावः। **दीदयतीति ज्वलतिकर्मासु पठितम्।** (निघ०१.१६)। **(उशती:)** कमनीयाः **(ऊर्म्या:)** रात्रीः **(आ)** समन्तात् **(दक्षाय्य:)** हिंसकः **(य:)** **(दास्वते)** दात्रे **(दमे)** गृहे **(आ)** समन्तात्॥ ३॥

अन्वय:-यमग्निं मानुषीषु विक्षु क्षेष्यन्तो देवासः प्रियं मित्रं नाधुः। यो दक्षाय्यो दमे दास्वते उशतीरूर्म्या आदीदयत् स सर्वैः संप्रयोक्तव्यः॥ ३॥

भावार्थ:-अत्रोपमालङ्कारः। योग्निर्मित्रवत्सुखयति सर्वासु प्रजासु प्रदीपवद् द्योतयति स विद्वद्भिः कार्येष्वनुयोजनीयः॥ ३॥

पदार्थ:-जिस **(अग्निम्)** अग्नि को **(मानुषीषु)** मनुष्यसम्बन्धी **(विक्षु)** प्रजाजनों में **(क्षेष्यन्त:)** निवास करते हुए **(देवास:)** विद्वान् जन **(प्रियम्)** प्रिय मनोहर **(मित्रम्)** मित्र के **(न)** समान **(आधु:)** अच्छे प्रकार स्थापन करें, **(य:)** जो **(दक्षाय्य:)** सब पदार्थों को छिन्न-भिन्न करनेवाला अग्नि **(दमे)** कलाघर में **(दास्वते)** दानशील जन के लिये **(उशती:)** मनोहर **(ऊर्म्या:)** रात्रियों को **(आ, दीदयत्)** प्रज्वलित करता प्रकाशित करता है **(स:)** वह सबको संप्रयुक्त करना चाहिये अर्थात् वह कलाघरों में युक्त करना चाहिये॥ ३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो अग्नि मित्र के समान सुख देता और सब प्रजाजनों में प्रदीप के समान सब वस्तुओं को प्रकाशित करता है, उसका विद्वानों को अपने कामों में अनुकूल योग करना चाहिये॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः।
वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान्॥४॥

अस्य। रण्वा। स्वस्यऽइव। पुष्टिः। सम्ऽदृष्टिः। अस्य। हियानस्य। धक्षोः। वि। यः। भरिभ्रत्। ओषधीषु। जिह्वाम्। अत्यः। न। रथ्यः। दोधवीति। वारान्॥४॥

पदार्थः-(अस्य) (रण्वा) प्रशंसनीया **(स्वस्येव) (पुष्टिः)** धातुवृद्धिः **(संदृष्टिः)** सम्यक् प्रेक्षणम् **(अस्य) (हियानस्य)** वर्द्धमानस्य। अत्र व्यत्ययेनात्मनेपदम्। **(धक्षोः)** दाहकस्य **(वि) (यः) (भरिभ्रत्)** भृशं धरन् **(ओषधीषु)** सोमलतादिषु **(जिह्वाम्) (अत्यः)** सुशिक्षितस्तुरङ्गः **(न)** इव **(रथ्यः)** रथेषु साधुः **(दोधवीति)** भृशं कम्पयति **(वारान्)** वालानिव वरणीयान् लोकान्॥४॥

अन्वयः-यो रथ्योऽत्यो न वारान् जिह्वाँश्च दोधवीति। ओषधीषु विभरिभ्रदस्ति तस्यास्य स्वस्येव रण्वा पुष्टिर्हियानस्यास्य धक्षोः सदृष्टिश्च कार्य्या॥४॥

भावार्थः-अत्रोपमालङ्कारः मनुष्यैर्यथा स्वपोषणार्था अग्निविद्या प्राप्यते तथाऽन्यार्थाऽपि कार्य्या योऽग्निरिन्धनैर्वर्द्धते दहति स रथेषु योजितः सन् सद्यो गमयति यथा वक्ता जिह्वां कम्पयति तथाऽग्निः भूगोलान् कम्पयति॥४॥

पदार्थः-(यः) जो **(रथ्यः)** रथों में उत्तम प्रशंसित **(अत्यः)** सुशिक्षित तुरङ्ग उसके **(न)** समान **(वारान्)** बालकों को जैसे वैसे स्वीकार करने योग्य लोकों को और **(जिह्वाम्)** अपनी जिह्वा को **(दोधवीति)** निरन्तर कम्पाता है और **(ओषधीषु)** सोमलतादि औषधियों में **(वि, भरिभ्रत्)** विशेष कर निरन्तर गुणों को धारण करता हुआ विद्यमान है, उस **(अस्य)** इसकी हुई **(स्वस्येव)** अपनी पुष्टि के समान दूसरे की **(रण्वा)** प्रशंसनीय **(पुष्टिः)** पुष्टि अर्थात् धातुवृद्धि और **(हियानस्य)** वृद्धि को प्राप्त होते हुए **(अस्य)** इस **(धक्षोः)** दाह करनेवाले अग्नि की **(संदृष्टिः)** अच्छे प्रकार दृष्टि करनी चाहिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को जैसे अपने पोषण के लिये अग्निविद्या प्राप्त की जाती है, वैसे औरों के लिये भी करनी चाहिये। जो इन्धनों से बढ़ता है और पदार्थों को जलाता है, वह रथों में युक्त किया हुआ अग्नि शीघ्र गमन कराता है। जैसे वक्ता अपनी जिह्वा को कंपाता है, वैसे अग्नि भूगोलों को कंपाता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ यन्मे अभ्वं वनदुः पनन्तोशिग्भ्यो नामिमीत वर्णम्।

स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत्॥५॥२४॥

आ। यत्। मे। अभ्वम्। वनदः। पनन्त। उशिक्ऽभ्यः। न। अमिमीत। वर्णम्। सः। चित्रेण। चिकिते। रम्ऽसु। भासा। जुजुर्वान्। यः। मुहुः। आ। युवा। भूत्॥५॥

पदार्थः-(आ) (**यत्**) यः (**मे**) मम (**अभ्वम्**) उदकमिव (**वनदः**) प्रशंसितारः (**पनन्त**) स्तुवन्ति (**उशिग्भ्यः**) कामयमानेभ्यः (**न**) निषेधे (**अमिमीत**) मिमीते (**वर्णम्**) रूपम् (**सः**) (**चित्रेण**) अद्भुतेन (**चिकिते**) विज्ञापयति (**रंसु**) रमणीयम् (**भासा**) प्रकाशेन (**जुजुर्वान्**) जीर्णः (**यः**) (**मुहुः**) वारंवारम् (**आ**) (**युवा**) यौवनस्थ इव (**भूत्**) भवति॥५॥

अन्वयः-यश्चित्रेण भासा मे वर्णं चिकिते स रंस्वभ्वमा चिकिते यो जुजुर्वान् मुहुर्युवेवाभूद् यमुशिग्भ्यो वनदो विद्वांसः पनन्त स नामिमीत तं सर्वे सम्यक् संप्रयुञ्जताम्॥५॥

भावार्थः-योऽग्निः सर्वमविद्यमानं विद्यमानवत्करोति यथा जीवो जीर्णावस्थां मरणञ्च प्राप्य पुनर्जायमानो युवा भवति तथा पुनः पुनर्वृद्धिक्षयौ प्राप्नोति सोऽग्निर्व्यवहारेषु योजनीयः॥५॥

पदार्थः-(यत्) जो (**चित्रेण**) अद्भुत (**भासा**) प्रकाश से (**मे**) मेरे (**वर्णम्**) रूप का (**चिकिते**) विज्ञान कराता (**सः**) वह (**रंसु**) रमणीय पदार्थ को (**अभ्वम्**) जल के समान (**आ**) अच्छे प्रकार जतलाता है (**यः**) जो (**जुजुर्वान्**) जीर्ण हुआ भी (**मुहुः**) वार-वार (**युवा**) तरुण के समान (**आ, भूत्**) अच्छे प्रकार होता है, जिसकी (**उशिग्भ्यः**) कामना करते हुए जनों को (**वनदः**) प्रशंसा करनेवाला विद्वान् (**पनन्त**) प्रशंसारूप स्तुति करते हैं, वह (**न**) नहीं (**अमिमित**) मान करता अर्थात् अपनी तीक्ष्णता के कारण सबको जलाता, सब मनुष्य उसका अच्छे प्रकार प्रयोग करें॥५॥

भावार्थः-जो अग्नि समस्त अविद्यमान को विद्यमान के समान करता और जैसे जीव वृद्धपन और मरण को प्राप्त होकर फिर उत्पन्न हुआ जवान होता है, वैसे जो वार-वार वृद्धि और क्षय को प्राप्त होता है, वह अग्नि व्यवहारों में युक्त करने योग्य है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत्।
कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः॥६॥

आ। यः। वना। ततृषाणः। न। भाति। वाः। न। पथा। रथ्याऽइव। स्वानीत्। कृष्णऽअध्वा। तपुः। रण्वः। चिकेत। द्यौःऽइव। स्मयमानः। नभःऽभिः॥६॥

पदार्थः-(आ) समन्तात् **(यः)** **(वना)** वनानि **(ततृषाणः)** भृशं तृड्युक्तः। अत्र **तुजादित्वाद**भ्यासदीर्घः। **(न)** इव **(भाति)** प्रकाशते **(वाः)** उदकम् **(न)** इव **(पथा)** मार्गेण **(रथ्येव)** रथाय हितेव **(स्वानीत्)** शब्दायते **(कृष्णाध्वा)** कृष्णोऽध्वा मार्गो यस्य **(तपुः)** परितापकः **(रण्वः)** रमणीयः **(चिकेत)** उद्बुध्येत **(द्यौरिव)** सूर्यप्रकाशवत् **(स्मयमानः)** किञ्चिद्धसन्निव **(नभोभिः)**[२] अन्नादिभिः पदार्थैः॥६॥

अन्वयः-यो वना ततृषाणो नाभाति पथा वार्ण रथ्येव च स्वानीद् यः कृष्णाध्वा तपू रण्वः स्मयमानो द्यौरिव नभोभिश्चिकेत स विद्वद्भिरेव विज्ञातुं योग्यः॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा कश्चिदति तृषितो वक्ता हसन् वदेत् जलं मार्गे गच्छति तथाग्निः वनस्थो महच्छब्दायते॥६॥

पदार्थः-जो **(वना)** वन और जलों के प्रति **(ततृषाणः)** निरन्तर प्यासे के **(न)** समान **(आ भाति)** अच्छे प्रकार प्रकाशित होता है और **(पथा)** मार्ग से **(वाः)** जल के **(न)** समान तथा **(रथ्येव)** रथ आदि के लिये जो हित है, उस मार्ग अर्थात् सड़क के समान **(स्वानीत्)** शब्दायमान होता है, जो **(कृष्णाध्वा)** काले वर्णयुक्त **(तपुः)** सब ओर से तपानेवाला **(रण्वः)** रमणीय **(स्मयमानः)** कुछ मुस्कातासा हुआ **(द्यौरिव)** सूर्य के प्रकाश के समान **(नभोभिः)** अन्नादि पदार्थों से **(चिकेत)** उद्बोध को प्राप्त हो अर्थात् प्रज्वलित हो, वह विद्वानों ही को जानने योग्य है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कोई अति तृषायुक्त कहनेवाला जन हंसता हुआ कहे कि जल मार्ग में जाता है, वैसे वनस्थ अग्नि बहुत शब्दायमान होता है॥६॥

पुनरग्निपरत्वेनैव विद्वद्विषयमाह॥

फिर अग्निपरता से ही विद्वानों के विषय को अगले मन्त्र में कहा है॥

स यो व्यस्थादुभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः।
अग्निः शोचिष्माँ अतसान्युष्णन् कृष्णाव्यथिरस्वदयन्न भूम॥७॥

सः। यः। वि। अस्थात्। अभि। धक्षत्। उर्वीम्। पशुः। न। एति। स्वऽयुः। अगोपाः। अग्निः। शोचिष्मान्। अतसानि। उष्णन्। कृष्णऽव्यथिः। अस्वदयत्। न। भूम॥७॥

---

२. यहाँ दयानन्द 'नमोभिः' पाठ मान रहे प्रतीत होते हैं।

पदार्थः-(सः) (यः) (वि) (अस्थात्) वितिष्ठते **(अभि) (धक्षत्)** अभितो दहति **(उर्वीम्)** भूमिम् **(पशुः) (न)** इव **(एति)** गच्छति **(स्वयुः)** यः स्वयं याति सः **(अगोपाः)** पालकरहितः **(अग्निः)** वह्निः **(शोचिष्मान्)** बहूनि शोचींषि विद्यन्ते यस्मिन् सः **(अतसानि)** नैरन्तर्येण गन्त्रीणि त्रसरेण्वादीनि **(उष्णन्)** दहन् **(कृष्णव्यथिः)** यः कर्षकश्चासौ व्यथयिता च **(अस्वदयत्)** स्वादयति **(न)** इव **(भूम)** भूम्ना॥७॥

अन्वयः-हे मनुष्या! यो भूम भूम्ना व्यस्थात्स्वयुरगोपाः पशुर्नैवैत्युर्वीमभि धक्षत्स शोचिष्मान् कृष्णव्यथिरग्निरतसान्युष्णन्नस्वदयद् वर्त्तते तं यथावद्विजानीत॥७॥

भावार्थः-अत्रोपमालङ्कारः। यः पृथिव्यादिषु व्यवस्थितो मूर्त्तद्रव्यदाहको गोपालरहितपशुवत्स्वयं गन्ता प्रकाशमयोऽग्निः स्वतेजसा विस्तृतान् त्रसरेणूनपि परितपति सोऽग्निर्बलिष्ठोऽस्तीति वेद्यम्॥७॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(भूम)** बहुताई के साथ **(व्यस्थात्)** विविध प्रकार से स्थित होता है **(स्वयुः)** जो आप जाता अर्थात् बिना चैतन्य पदार्थ के भी चैतन्य के समान गति देता है **(अगोपाः)** पालना करनेवाला गुणों से रहित पदार्थों को अपने प्रताप से सन्ताप देनेवाला **(पशुः)** पशु के **(न)** समान **(एति)** जाता है **(उर्वीम्)** और भूमि को **(अभि, धक्षत्)** सब ओर से जलाता है **(सः)** वह **(शोचिष्मान्)** बहुत लपटोंवाला **(कृष्णव्यथिः)** पदार्थों के अंशों को खींचने और उनको व्यथित करनेवाला **(अग्निः)** अग्नि **(अतसानि)** निरन्तर जानेवाले त्रसरेणु आदि पदार्थों को **(उष्णन्)** जलाता और **(अस्वदयत्)** स्वादिष्ठ करता हुआ **(न)** सा वर्त्तमान है, **[**उसको यथावत् जानो**]**॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पृथिवी आदि पदार्थों में व्यवस्था को प्राप्त मूर्तिमान् पदार्थों का जलानेवाला, रक्षकरहित पशु के समान आप जानेवाला प्रकाशमय अग्नि अपने तेज से विथरे हुए त्रसरेणुओं को भी सब ओर से तपाता है, वह अग्नि बलिष्ठ है, यह जानना चाहिये॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

नू ते॒ पूर्व॒स्याव॑सो॒ अधी॑तौ तृ॒तीये॑ वि॒दथे॒ मन्म॑ शंसि।
अ॒स्मे अ॑ग्ने सं॒यद्वी॑रं बृ॒हन्तं॑ क्षु॒मन्तं॒ वाजं॑ स्वप॒त्यं र॒यिं दा॑:॥८॥

नु। ते॒। पूर्व॑स्य। अव॑सः। अधि॑ऽइतौ। तृ॒तीये॑। वि॒दथे॑। मन्म॑। शं॒सि॒। अ॒स्मे इति॑। अ॒ग्ने॒। सं॒यत्ऽवी॑रम्। बृ॒हन्त॑म्। क्षु॒ऽमन्त॑म्। वाज॑म्। सु॒ऽअ॒प॒त्यम्। र॒यिम्। दा॒:॥८॥

पदार्थः-(नु) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(ते)** तव **(पूर्वस्य)** **(अवसः)** रक्षणस्य **(अधीतौ)** अध्ययने **(तृतीये)** **(विदथे)** सङ्ग्रामे **(मन्म)** विज्ञानम् **(शंसि)** स्तौषि **(अस्मे)** अस्मभ्यम् **(अग्ने)** पावकवद्वर्त्तमान **(संयद्वीरम्)** संयताः संयमयुक्ता वीरा यस्मिँस्तम् **(बृहन्तम्)** वर्द्धमानम् **(क्षुमन्तम्)** प्रशस्तान्नयुक्तम् **(वाजम्)** पदार्थबोधम् **(स्वपत्यम्)** सुष्ठ्वपत्ययुक्तम् **(रयिम्)** श्रियम् **(दाः)** देहि॥८॥

अन्वयः-हे अग्ने! यस्य ते तव पूर्वस्याऽवसोऽधीतौ तृतीये विदथे मन्म शंसि स त्वमस्मे संयद्वीरं बृहन्तं क्षुमन्तं स्वपत्यं वाजं रयिं नु दाः॥८॥

भावार्थः-हे विद्वन्! यस्याऽधीतविद्यस्य त्रातुस्सकाशात् तृतीये सवने तूर्णं पूर्णे कृतेऽग्न्यादिविद्याः प्राप्योत्तमबलधनप्रजा वयं प्राप्नुयाम तं भवान् बोधयतु॥८॥

पदार्थः-हे **(अग्ने)** के समान वर्त्तमान विद्वान् जन! जिस **(ते)** आपकी **(पूर्वस्य)** पिछले **(अवसः)** रक्षा सम्बन्ध के **(अधीतौ)** अध्ययन में **(तृतीये)** तीसरे **(विदथे)** संग्राम के निमित्त आप ही **(मन्म)** विज्ञान की **(शंसि)** स्तुति अर्थात् प्रशंसा करते हैं, वे आप **(अस्मे)** हम लोगों के लिये **(संयद्वीरम्)** जिसमें संयमयुक्त वीरजन विद्यमान **(बृहन्तम्)** जो बढ़ता हुआ है **(क्षुमन्तम्)** उस प्रशंसित अन्न और **(स्वपत्यम्)** उत्तम अपत्ययुक्त **(वाजम्)** पदार्थबोध और **(रयिम्)** धन को **(नु)** शीघ्र **(दाः)** दीजिये॥८॥

भावार्थः-हे विद्वान्! जिस विद्या पढ़े हुए रक्षा करनेवाले के समीप से तृतीय सवन अर्थात् ब्रह्मचर्य के तीसरे भाग को शीघ्र पूर्ण कर लिये पीछे अग्न्यादि विद्यायें प्राप्त होकर उत्तम धन, बल और प्रजावान् हम लोग हों, उसको आप बतलाइये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वया॒ यथा॑ गृत्सम॒दासो॑ अग्ने॒ गुहा॑ व॒न्वन्त॒ उप॑राँ अ॒भि ष्युः।
सु॒वीरा॑सो अभिमाति॒षाहः॒ स्मत्सू॒रिभ्यो॑ गृण॒ते तद्वयो॑ धाः॥९॥२५॥

त्वया॑। यथा॑। गृ॒त्स॒ऽम॒दास॑। अ॒ग्ने॒। गुहा॑। व॒न्वन्तः॑। उप॑रान्। अ॒भि। स्युरिति॒ स्यु॒। सु॒ऽवीरा॑सः। अ॒भि॒मा॒ति॒ऽसह॑ः। स्मत्। सू॒रिऽभ्यः॑। गृ॒ण॒ते। तत्। वयः॑। धाः॥९॥

पदार्थः-(त्वया) **(यथा)** येन प्रकारेण **(गृत्समदासः)** गृत्सानां मेधाविनां मद आनन्द इवानन्दो येषान्ते **(अग्ने)** पावक इव वर्त्तमान **(गुहा)** गुहायाम् **(वन्वन्तः)** विभजन्तः **(उपरान्)** मेघान् **(अभि)** **(स्युः)** भवेयुः **(सुवीरासः)** सुशोभमानैर्वीरैर्युक्ताः **(अभिमातिसाहः)** येऽभिमातीन्

शत्रून् सहन्ते **(स्मत्)** एव **(सूरिभ्यः)** विद्वद्भ्यः **(गृणते)** स्तुवन्ति **(तत्)** **(वयः)** कामम् **(धाः)** दधाति॥९॥

अन्वयः-हे अग्ने विद्वन्! यथा त्वया सह वर्त्तमानाः गृत्समदासो गुहा वन्वन्तः सुवीरासः सूरिभ्यो विद्याः प्राप्य उपरान् सूर्य इवाभिमातिसाहोऽभिष्युस्तथा यस्तद्वयोधास्तं ये गृणते तैस्सह स्मद्वयमपीदृशाः स्याम॥९॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथाऽऽप्तेभ्यो विद्वद्भ्यो विद्याशिक्षे गृहीत्वा आनन्दिता विजयमाना वीरपुरुषाढ्याः प्रशंसनीया जना जायन्ते तथाऽग्निविद्यया युक्ताः पुरुषा अन्धकारं सूर्यइव दुःखं विनाशयति॥९॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति द्वितीयमण्डले चतुर्थं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के समान विद्वान्! **(यथा)** जैसे **(त्वया)** आपके साथ वर्त्तमान **(गृत्समदासः)** और जिनका बुद्धिमानों के आनन्द के समान आनन्द है, वे **(गुहा)** बुद्धि में **(वन्वन्तः)** सब प्रकार के पदार्थों का विभाग करते हुए **(सुवीरासः)** उत्तम वीरों से युक्त जन **(सूरिभ्यः)** विद्वानों से विद्याओं को प्राप्त होकर **(उपरान्)** मेघों को सूर्य के समान **(अभिमातिसाहः)** अभिमान करने और शत्रु जनों को सहनेवाले **(अभिष्युः)** सब ओर से हों, वैसे जो **(तत्)** उसे **(वयः)** काम को **(धाः)** धारण करता है उसकी जो **(गृणते)** स्तुति करते हैं, उनके साथ **(स्मत्)** ही हम लोग ऐसे हों॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे आप्त विद्वानों से विद्या और शिक्षा ग्रहण कर आनन्दित, विजयमान और वीरपुरुषों से युक्त प्रशंसनीय जन होते हैं, वैसे अग्निविद्या से युक्त पुरुष अन्धकार को जैसे सूर्य, वैसे दुःख का विनाश करते हैं॥९॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह दूसरे मण्डल में चौथा सूक्त और पच्चीसवां वर्ग समाप्त हुआ॥

होतेत्यष्टर्चस्य पञ्चमस्य सूक्तस्य सोमाहुतिर्भार्गव ऋषिः। अग्निर्देवता। १, ३, ६ निचृदनुष्टुप्। २, ४, ५ अनुष्टुप्। ८ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ७ भुरिगुष्णिक् छन्दः। निषादः स्वरः॥

अथ जीवगुणानाह॥

अब आठ ऋचावाले पांचवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में जीव के गुणों का वर्णन करते हैं॥

होताजनिष्ट चेतनः पिता पितृभ्य ऊतये।
प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम्॥ १॥

होता। अजनिष्ट। चेतनः। पिता। पितृऽभ्यः। ऊतये। प्रऽयक्षन्। जेन्यम्। वसु। शकेम। वाजिनः। यमम्॥ १॥

पदार्थः-(होता) आदाता **(अजनिष्ट)** जनयेत् **(चेतनः)** ज्ञानादिगुणयुक्तः **(पिता)** पालकः **(पितृभ्यः)** पालकेभ्यः **(ऊतये)** रक्षणाद्याय **(प्रयक्षन्)** प्रकृष्टतया यजन्ते **(जेन्यम्)** जेतुं योग्यम् **(वसु)** द्रव्यम् **(शकेम)** समर्थयेम **(वाजिनः)** विज्ञानवन्तः **(यमम्)** नियन्तारम्॥ १॥

अन्वयः-यथा होता चेतनः पितोतये पितृभ्यो जेन्यं यमं वस्वजनिष्ट विद्वांसः प्रयक्षन् तथा वाजिनो वयमेतत्प्राप्तुं शकेम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सच्चिदानन्दस्वरूपः परमेश्वर इह सर्वस्य रक्षणायानेकानि द्रव्याणि रचयति तथा विद्वांसोऽप्याचरन्तु॥ १॥

पदार्थः-जैसे **(होता)** आदाता अर्थात् गुणादि वा अन्य पदार्थों का ग्रहण कर्ता **(चेतनः)** ज्ञानादि गुणयुक्त **(पिता)** और पालन करनेवाला जीव **(ऊतये)** रक्षा आदि के लिये **(पितृभ्यः)** वा पालन करनेवालों के लिये **(जेन्यम्)** जीतने योग्य **(यमम्)** नियमकर्त्ता को और **(वसु)** धन को **(अजनिष्ट)** उत्पन्न करे और विद्वान् जन **(प्रयक्षन्)** प्रकृष्टता से सङ्ग करते हैं, वैसे **(वाजिनः)** विज्ञानवान् हम लोग उक्त विषय की प्राप्ति कर **(शकेम)** सकें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सच्चिदानन्दस्वरूप परमेश्वर इस संसार में सबकी रक्षा के लिये अनेक द्रव्यों को रचता है, वैसे विद्वान् जन भी आचरण करें॥ १॥

अथेश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि।
मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति॥ २॥

आ। यस्मिन्। सप्त। रश्मयः। ततः। यज्ञस्य। नेतरि। मनुष्वत्। दैव्यम्। अष्टमम्। पोता। विश्वम्। तत्। इन्वति॥ २॥

पदार्थः-(आ) समन्तात् **(यस्मिन्)** **(सप्त)** **(रश्मयः)** किरणाः **(ततः)** विस्तृताः **(यज्ञस्य)** सङ्गन्तुमर्हस्य जगतः **(नेतरि)** नायके **(मनुष्वत्)** मनुष्येण तुल्यम् **(दैव्यम्)** देवेषु दिव्येषु रश्मिषु भवम् **(अष्टमम्)** अष्ट सङ्ख्या पूरकम् **(पोता)** शोधकः **(विश्वम्)** सर्वं जगत् **(तत्)** **(इन्वति)** व्याप्नोति॥ २॥

अन्वयः-यस्मिन् यज्ञस्य नेतरि सवितरि सप्त रश्मय आततास्तत्र यन्मनुष्वद्दैव्यमष्टममाततं स पोता विश्वं प्रकाशयति तच्चेन्वति॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यः सप्तविधरश्मिः सूर्यः परिमाणेन विस्तीर्णः पवित्रकर्त्ताऽस्ति तत्र यच्चेतनं ब्रह्म व्याप्तं वर्त्तते तत्सर्वं सूर्यादिकं यथावद् व्यवस्थां नयति। यथा मनुष्याः शिल्पक्रिययाऽनेकानि वस्तूनि निर्मिमीते तथा जगदीश्वरोऽखिलं संसारं विधत्ते॥ २॥

पदार्थः-(यस्मिन्) जिस **(यज्ञस्य)** सङ्गम करने के योग्य जगत् के **(नेतरि)** नायक सविता सूर्यमण्डल में **(सप्त)** सात **(रश्मयः)** किरणें **(आततः)** विस्तृत हैं, उसमें जो **(मनुष्वत्)** मनुष्य के तुल्य **(दैव्यम्)** दिव्य रश्मियों में प्रसिद्ध **(अष्टमम्)** आठवां विस्तृत है, वह **(पोता)** शुद्ध करनेवाला **(विश्वम्)** समस्त जगत् को प्रकाशित करता है और **(तत्)** उस सूर्यमण्डल को भी **(इन्वति)** व्याप्त होता है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सात विध रश्मियोंवाला सूर्य परिमाण से विस्तार को प्राप्त और पवित्र करनेवाला है, उसमें जो चेतन ब्रह्म व्याप्त वर्त्तमान है, वह समस्त सूर्यादिक की व्यवस्था प्राप्त करता [=कराता] है। जैसे मनुष्य शिल्पक्रिया से अनेक वस्तुओं को बनाते हैं, वैसे जगदीश्वर अखिल संसार का विधान करता है॥ २॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

दुधन्वे वा यदीमनु वोचद् ब्रह्माणि वेरु तत्।
परि विश्वानि काव्या नेमिश्चक्रमिवाभवत्॥ ३॥

दुधन्वे। वा। यत्। ईम्। अनु। वोचत्। ब्रह्माणि। वेः। ऊम् इति। तत। परि। विश्वानि। काव्या। नेमिः। चक्रम्ऽइव। अभवत्॥ ३॥

पदार्थः-(दधन्वे) धरति **(वा)** **(यत्)** **(ईम्)** जलम् **(अनु)** **(वोचत्)** पुनरुपदिशेत् **(ब्रह्माणि)** बृहन्ति **(वेः)** जानाति **(उ)** **(तत्)** **(परि)** सर्वतः **(विश्वानि)** सर्वाणि **(काव्या)** कवेः क्रान्तप्रज्ञस्य कर्माणि **(नेमिः)** प्रापकः लयः **(चक्रमिव)** चक्रमिव **(अभवत्)** भवति॥३॥

अन्वयः-सूर्यो यदीं दधन्वे ब्रह्मविद्यां ब्रह्माण्यनुवोचत्तत्सर्वं यदीश्वरो वेरु जानाति विश्वानि काव्या परि वेरु ततो नेमिश्चक्रमिव विद्वानभवत्॥३॥

भावार्थः-अत्रोपमालङ्कारः। सूर्यो जलं धरति विद्वांसश्च ब्रह्मविषयादीन् वदन्ति तत्सर्वं व्यापकः परमेश्वरः साङ्गोपाङ्गं जानाति॥३॥

पदार्थः-सूर्य **(यत्)** जो **(ईम्)** जल को **(दधन्वे)** धारण करता है, ब्रह्मवेत्ता **(वा)** वा **(ब्रह्माणि)** बड़े-बड़े ब्रह्मविषयों का **(अनुवोचत्)** वार-वार उपदेश करता है **(तत्)** उस सबको जिस कारण ईश्वर **(वेः, उ)** जानता ही है और **(विश्वानि)** समस्त **(काव्या)** उत्तम बुद्धिमानों के कर्मों को **(परि)** सब ओर से जानता ही है, इस कारण जैसे **(नेमिः)** धुरी **(चक्रम्)** पहिये को वर्त्तानेवाली होती, वैसे इस संसार के व्यवहारों को वर्त्तानेवाला विद्वान् **(अभवत्)** होता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सूर्य जल को धारण करता है वा विद्वान् जन ब्रह्मविषयादि को कहते हैं, उस सबको व्यापक परमेश्वर साङ्गोपाङ्ग जानता है॥३॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के गुणों को कहते हैं॥

साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि।
विद्वाँ अस्य व्रता ध्रुवा वयाइवानु रोहते॥४॥

साकम्। हि। शुचिना। शुचिः। प्रऽशास्ता। क्रतुना। अजनि। विद्वान्। अस्य। व्रता। ध्रुवा। वयाःऽइव। अनु। रोहते॥४॥

पदार्थः-(साकम्) सह **(हि)** खलु **(शुचिना)** पवित्रेण **(शुचिः)** पवित्रः **(प्रशास्ता)** प्रशासनकर्त्ता **(क्रतुना)** प्रज्ञया कर्मणा वा **(अजनि)** जायते **(विद्वान्)** **(अस्य)** **(व्रता)** व्रतानि सत्याचरणानि **(ध्रुवा)** ध्रुवाणि निश्चलानि **(वयाइव)** यथा विस्तीर्णाः शाखाः **(अनु)** **(रोहते)** वर्द्धते॥४॥

अन्वयः-यो विद्वान् शुचिना क्रतुना साकं शुचिः प्रशास्ताजनि स ह्यस्य जगदीश्वरप्रकाशितस्य वेदचतुष्टयस्य ध्रुवा व्रता स्वीकृत्य वया इवानुरोहते॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये पवित्रैर्विद्वद्भिः सह सङ्गत्य प्रज्ञां जनयित्वाऽज्ञानामुपदेशका भूत्वा वेदविहितानि कर्माण्याचर्य्य स्वयं वर्द्धन्ते तेऽन्येषामुन्नतिं कुर्वन्ति॥४॥

पदार्थः-जो **(विद्वान्)** विद्वान् जन **(शुचिना)** पवित्र **(क्रतुना)** बुद्धि वा कर्म के **(साकम्)** साथ **(शुचिः)** शुद्ध **(प्रशास्ता)** उत्तम शासनकर्त्ता **(अजनि)** उत्पन्न होता है **(हि)** वही **(अस्य)** इस ईश्वर-प्रकाशित चारों वेदों के **(ध्रुवा)** निश्चल अविनाशी **(व्रता)** सत्याचरणों को स्वीकार कर **(वयाइव)** विस्तार को प्राप्त शाखाओं के समान **(अनु, रोहते)** वृद्धि को प्राप्त होता है॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पवित्र विद्वानों के साथ सङ्ग कर, उत्तम बुद्धि को उत्पन्न करके, अज्ञजनों के उपदेशक हो, वेदविहित कर्मों का आचरण कर आप बढ़ते हैं, वे औरों की उन्नति करनेवाले होते हैं॥४॥

अथ विदुषीविषयमाह॥

अब विदुषी स्त्री के विषय में कहते हैं॥

ता अ॑स्य॒ वर्णमा॒युवो॒ नेष्टुः॑ सचन्त धे॒नवः॑।
कु॒वित्ति॒सृभ्य॒ आ वर॑ं॒ स्वसा॑रो॒ या इ॒दं य॒युः॥५॥

ताः। अ॒स्य॒। वर्णम्। आ॒युवः॑। नेष्टुः॑। स॒च॒न्त॒। धे॒नवः॑। कु॒वित्। ति॒सृऽभ्यः॑। आ। वर॑म्। स्वसा॑रः। याः। इ॒दम्। य॒युः॥५॥

पदार्थः-**(ताः)** **(अस्य)** वेदस्य **(वर्णम्)** स्वीकरणीयम् **(आयुवः)** प्राप्ताः **(नेष्टुः)** नायकस्य **(सचन्त)** सङ्गमयन्ति **(धेनवः)** गावः **(कुवित्)** बहुः। **कुविदिति बहुनामसु पठितम्।** (निघं०३.१)। **(तिसृभ्यः)** कर्मोपासनाज्ञानविद्याभ्यः **(आ)** समन्तात् **(वरम्)** वरणीयं बन्धुसमुदायम् **(स्वसारः)** भगिन्यः **(याः)** **(इदम्)** जलम् **(ययुः)** प्राप्नुयुः॥५॥

अन्वयः-याः स्वसारः कन्यास्तिसृभ्यः कुविद्वरमा ययुस्ता अस्य नेष्टुर्वर्णमिदमायुवो धेनव इव सर्वान् सुखैः सचन्त॥५॥

भावार्थः-याः स्वसारः कन्याः प्रियं बन्धुं विद्याविषयञ्च प्राप्नुवन्ति ताः धेनुवदुत्तमं सुखं जनयन्ति॥५॥

पदार्थः-**(याः)** जो **(स्वसारः)** बहिन कन्या जन **(तिसृभ्यः)** कर्म, उपासना और ज्ञान विद्याओं से **(कुवित्)** **[**बहुत**]** **(वरम्)** स्वीकार करने योग्य बन्धुसमुदाय को **(आ, ययुः)** प्राप्त होवें **(ताः)** वे **(अस्य)** इस **(नेष्टुः)** नायक सर्व विद्याओं में अग्रगामी वेद के **(वर्णम्)** स्वीकार

करने योग्य विषय और **(इदम्)** जल को **(आयुवः)** प्राप्त हुई **(धेनवः)** गौओं के समान सबको सुखों से **(सचन्त)** सम्बन्ध करती हैं॥५॥

भावार्थः-जो बहिन अपने प्रियबन्धु को और कन्या विद्याविषय को प्राप्त होती हैं, वे गौओं के समान उत्तम सुख को उत्पन्न करती हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदी॑ मा॒तुरु॒प स्वसा॑ घृ॒तं भर॒न्त्यस्थि॑त।
तासा॑मध्व॒र्युरागा॑तौ॒ यवो॑ वृ॒ष्टीव॑ मोदते॥६॥

यदि॑। मा॒तुः। उप॑। स्वसा॑। घृ॒तम्। भर॑न्ती। अस्थि॑त। तासा॑म्। अ॒ध्व॒र्युः। आऽगा॑तौ। यवः॑। वृ॒ष्टीऽइ॑व। मो॒द॒ते॥६॥

पदार्थः-(**यदि**) अत्र **निपातस्य च**इति दीर्घः। (**मातुः**) जनन्याः (**उप**) (**स्वसा**) भगिनी (**घृतम्**) उदकम् (**भरन्ती**) धरन्ती (**अस्थित**) तिष्ठति (**तासाम्**) कन्यानाम् (**अध्वर्युः**) यज्ञकर्त्ता (**आगतौ**) समन्तात् प्राप्तौ (**यवः**) (**वृष्टीव**) यथा वृष्ट्या। अत्र टा स्थाने पूर्वसवर्णादेशः। (**मोदते**) हर्षति॥६॥

अन्वयः-यदि घृतमुपभरन्ती मातुः स्वसा तासामध्यापिकावास्थित तर्हि ऋत्विगध्वर्युर्यज्ञमागतावानन्दत इव यवो वृष्टीव वा मोदते॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यदि कन्या अध्यापिकां विदुषीं मातरं च प्राप्य विदुष्यो भवन्ति, तर्हि जलेनौषधय इव सर्वतो वर्द्धन्ते॥६॥

पदार्थः-(**यदि**) जो (**घृतम्**) जल को (**उप, भरन्ती**) समीप होकर भरनेवाली (**मातुः**) माता की (**स्वसा**) बहिन वा (**तासाम्**) उन पूर्वोक्त कन्याओं की अध्यापिका (**अस्थित**) स्थित होती है तो ऋत्विक् और (**अध्वर्युः**) यज्ञ का करनेवाला यज्ञ को (**आगतौ**) प्राप्त होकर आनन्दित होते हैं, वैसे **[**वा (**यवः**) (**वृष्टीव**) वृष्टि से ओषधि, वैसे**]** (**मोदते**) हर्ष को प्राप्त होती है॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। यदि कन्याजन अध्यापिका विदुषी और माता को प्राप्त होकर विदुषी होती हैं तो जल से ओषधियों के समान सब ओर से वृद्धि को प्राप्त होती हैं॥६॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

स्व: स्वाय॒ धाय॑से कृणु॒तामृ॒त्विगृ॒त्विज॑म्।
स्तोम॑ यु॒ज्ञं चादर॑ व॒नेमा॑ ररि॒मा व॒यम्॥७॥

स्व:। स्वाय॑। धाय॑से। कृ॒णु॒ताम्। ऋ॒त्विक्। ऋ॒त्विज॑म। स्तोम॑म्। यु॒ज्ञम्। च॒। आत्। अर॑म्। व॒नेम॑। र॒रि॒म। व॒यम्॥७॥

पदार्थ:-(स्व:) स्वयम् **(स्वाय)** स्वकीयाय **(धायसे)** धर्त्रे **(कृणुताम्)** कुरुताम् **(ऋत्विक्)** ऋत्वनुकूलं सङ्गच्छन् **(ऋत्विजम्) (स्तोमम्)** स्तुत्यम् **(यज्ञम्) (च) (आत्)** अनन्तरम् **(अरम्)** जलम् **(वनेम)** संभजेम। अत्रा**ऽन्येषामपी**ति दीर्घ:। **(ररिम)** रमेमहि। अत्राप्य**न्येषामपी**ति दीर्घ:। **(वयम्)** यज्ञानुष्ठातार:॥७॥

अन्वय:-यथा स्व: स्वाय धायसे कृणुतामृत्विगृत्विजं स्तोमं यज्ञञ्च कृणुतां यथा वयं ररिमादरं वनेम॥७॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा स्वयं स्वस्य हिताय प्रवर्त्तेत विद्वांसो विदुषो यज्ञानुष्ठातारो विविधक्रियं यज्ञं संपादयन्ति तथा वयमपि प्रवर्त्तेमहि॥७॥

पदार्थ:-जैसे **(स्व:)** आप **(स्वाय)** अपने **(धायसे)** धारण करने वाले स्वभाव के लिये **(कृणुताम्)** किसी काम को करें वा **(ऋत्विक्)** ऋतुओं के अनुकूल सब व्यवहारों की प्राप्ति कराता हुआ **(ऋत्विजम्)** दूसरों को अपने अनुकूल वा **(स्तोमम्)** स्तुति प्रशंसा के योग्य व्यवहार **(यज्ञम्, च)** और यज्ञ को करे, वैसे **(वयम्)** हम लोग **(ररिम)** रमें **(आत्)** और **(अरम्)** परिपूर्ण **(वनेम)** अच्छे प्रकार सब पदार्थों का सेवन करें॥७॥

भावार्थ:-जैसे आप अपने हित के लिये प्रवृत्त हों वा विद्वान् जन विद्वानों और यज्ञ करनेवाले विविध प्रकार के क्रियायज्ञ को सिद्ध करते हैं, वैसे हम लोग भी प्रवृत्त हों॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यथा॑ वि॒द्वाँ अर॒ं करद्विश्वे॑भ्यो यज॒तेभ्य॑:।
अ॒यम॑ग्ने॒ त्वे अपि॒ यं यु॒ज्ञं च॑कृ॒मा व॒यम्॥८॥२६॥

यथा॑। वि॒द्वान्। अर॑म्। कर॑त्। विश्वे॑भ्य:। यु॒ज॒तेभ्य॑:। अ॒यम्। अ॒ग्ने॒। त्वे इति॑। अपि॑। यम्। यु॒ज्ञम्। च॒कृ॒म। व॒यम्॥८॥

पदार्थः-(यथा) येन प्रकारेण **(विद्वान्)** आप्तो जनः **(अरम्)** अलम् **(करत्)** कुर्यात् **(विश्वेभ्यः)** अखिलेभ्यः **(यजतेभ्यः)** विद्वत्सेवकेभ्यः **(अयम्) (अग्ने)** विद्वन् **(त्वे)** त्वयि **(अपि) (यम्) (यज्ञम्)** कर्मोपासनाज्ञानाख्यम् **(चकृम)** कुर्याम। अत्रा**ऽन्येषामपी**ति दीर्घः। **(वयम्)**॥८॥

अन्वयः-हे अग्ने! यथाऽयं विद्वान् विश्वेभ्यो यजतेभ्यो विद्याभिररं करद्यथा त्वे यं यज्ञं वयमरञ्चकृम तथा त्वमपि कुरु॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथाप्ता विद्वांसो जगद्धिताय सत्यमुपदेशं कृत्वा सत्यबोधान् जनान् कुर्वन्ति तथा सर्वैराप्तैर्विद्वद्भिः सततमनुष्ठेयमिति॥८॥

अत्र जीवेश्वरविद्वद्विदुषीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति द्वितीयमण्डले पञ्चमं सूक्तं षड्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वान्! **(यथा)** जैसे **(अयम्)** यह **(विद्वान्)** आप्तजन **(विश्वेभ्यः)** समस्त **(यजतेभ्यः)** विद्वानों की सेवा करनेवालों से पाई हुई विद्याओं से **(अरम्)** दूसरों को परिपूर्ण **(करत्)** करता है और जैसे **(त्वे)** तेरे निमित्त **(यम्)** जिस **(यज्ञम्)** यज्ञ को **(वयम्)** हम लोग परिपूर्ण **(चकृम)** करें, वैसे तू **(अपि)** भी कर॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे आप्त विद्वान् जन जगत् के लिये सत्योपदेश कर मनुष्यों को सत्य बोध वाले करते हैं, वैसे सब आप्त विद्वानों को निरन्तर अनुष्ठान करना-कराना चाहिये॥८॥

इस सूक्त में जीव, ईश्वर, विद्वान् और विदुषियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह दूसरे मण्डल में पांचवां सूक्त और छब्बीसवां वर्ग समाप्त हुआ॥

इमामित्यस्याष्टर्चस्य षष्ठस्य सूक्तस्य सोमाहुतिर्भार्गव ऋषिः। अग्निर्देवता। १, ३, ५, ८ गायत्री। २, ४, ६ निचृद्गायत्री। ७ विराट्गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निगुणानाह॥

अब आठ ऋचावाले छठे सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि के गुणों का वर्णन करते हैं॥

इमां मे अग्ने समिधमिमामुपसदं वनेः। इमा उ षु श्रुधी गिरः॥ १॥

इमाम्। मे। अग्ने। सम्ऽइधम्। इमाम्। उपऽसदम्। वनेरिति वनेः। इमाः। ऊम् इति। सु। श्रुधि। गिरः॥ १॥

पदार्थः-(इमाम्) (**मे**) मम (**अग्ने**) अग्निरिव विद्वन् (**समिधम्**) इन्धनम् (**इमाम्**) (**उपसदम्**) उपसीदन्ति यस्यां तां वेदीम् (**वनेः**) (**इमाः**) (**उ**) (**सु**) सुष्ठु (**श्रुधि**) शृणु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**गिरः**) वाणीः॥ १॥

अन्वयः-हे अग्नेऽध्यापक! यथाऽग्निर्मे ममेमां समिधमिमामुपसदं च सेवते तथा त्वं वनेरिमा उ गिरः सु श्रुधि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वन्! यथा वह्निः समिद्भिर्वर्धते तथाऽस्मान् परीक्षयाऽस्मद्वचांसि च श्रुत्वा वर्द्धय॥ १॥

पदार्थः-हे (**अग्ने**) अग्नि के समान अध्यापक विद्वान्! जैसे अग्नि (**मे**) मेरे (**इमाम्**) इस (**समिधम्**) इन्धन को और (**इमाम्**) इस (**उपसदम्**) वेदी को कि जिसमें स्थित होते हैं, सेवन करता है, वैसे आप (**वनेः**) सेवन करनेवाले विद्यार्थी की (**इमाः**) इन (**उ**) (**गिरः**) वाणियों को (**सु, श्रुधि**) सुन्दरता से सुनो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान्! जैसे अग्नि समिधाओं में बढ़ता है, वैसे हम लोगों को परीक्षा से और हमारे वचनों को सुन कर बढ़ाइये॥॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को अगले मन्त्र में कहा है॥

अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे। एना सूक्तेन सुजात॥ २॥

अया। ते। अग्ने। विधेम। ऊर्जः। नपात्। अश्वम्ऽइष्टे। एना। सऽउक्तेन। सुऽजात॥ २॥

पदार्थः-(अया) अनया समिधा **(ते)** तव **(अग्ने)** पावक इव प्रकाशमान **(विधेम)** परिचरेम **(ऊर्जः)** पराक्रमस्य **(नपात्)** यो न पातयति तत्सम्बुद्धौ **(अश्वमिष्टे)** योऽश्वमिच्छति तत्सम्बुद्धौ। अत्र **बहुलं छन्दसी**ति मुमागमः। **(एना)** एनेन **(सूक्तेन)** सुष्ठूक्तेन **(सुजात)** शोभनेषु प्रसिद्ध॥ २॥

अन्वयः-हे सुजाताऽश्वमिष्टे ऊर्जो नपादग्ने ते तवाग्नेरया समिधैना सूक्तेन च वयं विधेम॥ २॥

भावार्थः-ये विद्यया साधनैरग्निं युक्त्या संप्रयुञ्जते ते वह्नेः पराक्रमेण स्वकार्याणि साद्धुं शक्नुवन्ति॥ २॥

पदार्थः-हे **(सुजात)** शोभन गुणों में प्रसिद्ध! **(अश्वमिष्टे)** घोड़े की इच्छा करने और **(ऊर्जः)** बल को **(नपात्)** न पतन करानेवाले **(अग्ने)** अग्नि के समान प्रकाशमान **(ते)** आपके सम्बन्ध में जो अग्नि है, उसकी **(अया)** इस समिधा से और **(एना)** इस **(सूक्तेन)** उत्तमता से कहे हुए सूक्त से हम लोग **(विधेम)** सेवन करें॥ २॥

भावार्थः-जो विद्या और साधनों से अग्नि का युक्ति के साथ अच्छे प्रकार प्रयोग करते हैं, वे अग्नि के पराक्रम से अपने कामों को सिद्ध कर सकते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं त्वा॑ गी॒र्भिर्गिर्वणसं द्रविण॒स्युं द्र॑विणोदः। स॒प॒र्येम॑ सप॒र्यवः॥ ३॥

तम्। त्वा॒। गी॒ःऽभिः। गिर्व॑णसम्। द्र॒वि॒ण॒स्युम्। द्र॒वि॒ण॒ःऽदः॒। स॒प॒र्येम॑। स॒प॒र्यवः॥ ३॥

पदार्थः-(तम्) (त्वा) (गीर्भिः) सुशिक्षिताभिर्वाग्भिः **(गिर्वणसम्)** विद्यावाक् सेवमानम् **(द्रविणस्युम्)** आत्मनो द्रविणमिच्छुम् **(द्रविणोदः)** यो द्रविणो ददाति तत्सम्बुद्धौ **(सपर्येम)** सेवेमहि **(सपर्यवः)** आत्मनः सपर्यामिच्छवः॥ ३॥

अन्वयः-हे द्रविणोदो! यथाऽग्निरिव वर्त्तमानं द्रविणस्युं गिर्वणसं तन्त्वा सपर्यवो गीर्भिस्सेवन्ते तथा वयं सपर्येम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये गुणकर्मस्वभावतोऽग्निं विज्ञाय कार्यसिद्धये संप्रयुञ्जते, ते श्रीमन्तो जायन्ते॥ ३॥

पदार्थः-हे **(द्रविणोदः)** धन को देनेवाले विद्वान् जन! अग्नि के समान वर्त्तमान **(द्रविणस्युम्)** अपने को धन की इच्छा करनेवाले **(गिर्वणसम्)** विद्या की वाणी को सेवते हुए **(तम्)** उन **(त्वा)** आपको **(सपर्यवः)** अपने को सेवने की इच्छा करनेवाले जन **(गीर्भिः)** सुन्दर शिक्षित वाणियों से सेवते हैं, वैसे हम लोग **(सपर्येम)** सेवन करें॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो गुण, कर्म, स्वभाव से अग्नि को विशेष जान कर कार्यसिद्धि के लिये उसका अच्छे प्रकार प्रयोग करते हैं, वे श्रीमान् होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स बो॑धि सू॒रिर्म॒घवा॒ वसु॑पते॒ वसु॑दावन्। यु॒यो॒ध्य१॑स्मद्द्वेषां॑सि॥४॥

सः। बो॒धि॒। सू॒रिः। म॒घऽवा॑। वसु॑ऽपते। वसु॑ऽदावन्। यु॒यो॒धि॒। अ॒स्मत्। द्वेषां॑सि॥४॥

पदार्थः-(**सः**) (**बोधि**) जानाति (**सूरिः**) विद्वान् (**मघवा**) परमपूजितधनयुक्तः (**वसुपते**) वसूनां पालक (**वसुदावन्**) यो वसूनि द्रव्याणि ददाति तत्सम्बुद्धौ (**युयोधि**) वियोजय (**अस्मत्**) अस्माकं सकाशात् (**द्वेषांसि**) द्वेषयुक्तानि कर्माणि॥४॥

अन्वयः-हे वसुपते वसुदावन्! यो मघवा सूरिर्भवान् बोधि स त्वमस्मद् द्वेषांसि युयोधि॥४॥

भावार्थः-हे रागद्वेषविरहा गुणग्राहिणो जना भवन्ति तेऽन्यानपि स्वसदृशान् कृत्वा दातारस्सन्तः श्रीमन्तो भवन्ति॥४॥

पदार्थः-हे (**वसुपते**) धनों की पालना करने और (**वसुदावन्**) धनों को देनेवाले जो (**मघवा**) परमप्रशंसित धनयुक्त (**सूरिः**) विद्वान्! आप (**बोधि**) सब व्यवहारों को जानते हैं (**सः**) सो आप (**अस्मत्**) हम लोगों के (**द्वेषांसि**) वैर भरे हुए कामों को (**युयोधि**) अलग कीजिये॥४॥

भावार्थः-जो राग-द्वेषरहित गुणग्राही जन होते हैं, वे औरों को भी अपने सदृश करके दाता होते हुए लक्ष्मीवान् होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स नो॑ वृ॒ष्टिं दि॒वस्परि॒ स नो॒ वाज॑मन॒र्वाण॑म्। स नः॑ सहस्रिणी॒रिषः॑॥५॥

सः। नः॒। वृ॒ष्टिम्। दि॒वः। परि॑। सः। नः॒। वाज॑म्। अ॒न॒र्वाण॑म्। सः। नः॒। स॒हस्रिणीः॑। इषः॑॥५॥

पदार्थः-(**सः**) अग्निः (**नः**) अस्मभ्यम् (**वृष्टिम्**) वर्षम् (**दिवः**) सूर्यप्रकाशान्मेघमण्डलात् (**परि**) सर्वतः (**सः**) (**नः**) अस्मान् (**वाजम्**) वेगयुक्तम् (**अनर्वाणम्**) अविद्यमानाऽश्वं रथम् (**सः**) (**नः**) अस्मभ्यम् (**सहस्रिणीः**) असंख्याताः (**इषः**) अन्नानि॥५॥

अन्वयः-हे विद्वन्! यथा स नो दिवो वृष्टिं करोति स नोऽनर्वाणं वाजः प्रापयति स नः सहस्रिणीरिषः परिजनयति तथा त्वं वर्त्तस्व॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैस्तथा प्रयतितव्यं यथाऽग्नेः सकाशात्पुष्कलाः उपकाराः स्युः॥५॥

पदार्थः-हे विद्वान्! जैसे **(सः)** वह अग्नि **(नः)** हम लोगों के लिये **(दिवः)** सूर्यप्रकाश और मेघमण्डल से **(वृष्टिम्)** वर्षाओं को करता है वा **(सः)** वह अग्नि **(नः)** हम लोगों को **(अनर्वाणम्)** घोड़े जिसमें नहीं विद्यमान हैं, उस **(वाजम्)** वेगवान् रथ को प्राप्त कराता है वा **(सः)** वह अग्नि **(नः)** हमारे लिये **(सहस्रिणीः)** असंख्यात प्रकार के **(इषः)** अन्नों को **(परि)** सब ओर से उत्पन्न कराता है, वैसे आप वर्त्ताव कीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को वैसा यत्न करना चाहिये जिससे अग्नि की उत्तेजना से बहुत उपकार हों॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ईळा॑नायाव॒स्यवे॒ यवि॑ष्ठ दूत नो गि॒रा। यजि॑ष्ठ होत॒रा ग॑हि॥६॥

ईळा॑नाय। अव॒स्यवे॑। यवि॑ष्ठ। दू॒त॒। नः॒। गि॒रा। यजि॑ष्ठ। होत॒रिति॑। आ। ग॒हि॒॥६॥

पदार्थः-**(ईळानाय)** स्तुवते **(अवस्यवे)** आत्मनोऽवो रक्षणमिच्छवे **(यविष्ठः)** अतिशयेन युवन् **(दूत)** यो दुनाति दुष्टाँस्तत्सम्बुद्धौ **(नः)** अस्मान् **(गिरा)** वाण्या **(यजिष्ठ)** अतिशयेन पूजितुं योग्य **(होतः)** दातः **(आ)** **(गहि)** समन्तात् प्राप्नुहि॥६॥

अन्वयः-हे यविष्ठ यजिष्ठ दूत होतस्त्वं यथाऽवस्यव ईळानाय गिरा सुखं प्रयच्छसि तथा नोऽस्मानागहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मनुष्याणां दूतोऽग्निर्भूतलादुपरि पदार्थान्नीत्वा जलं वर्षयित्वा च सर्वस्य रक्षणनिमित्तो भवति तथा विद्वान् सुवचनेन सर्वस्य हितकारी जायते॥६॥

पदार्थः-हे **(यविष्ठ)** अतीव युवावस्थावाले **(यजिष्ठ)** अत्यन्त प्रशंसा और सत्कार के योग्य **(दूत)** दुष्टों को सब ओर से कष्ट देने और **(होतः)** दानकर्म करनेवाले! आप जैसे **(अवस्यवे)** अपने को रक्षा की इच्छा करनेवाले **(ईळानाय)** स्तुति करते हुए जन के लिये **(गिरा)** वाणी से सुख देते हैं, वैसे आप **(नः)** हम लोगों को **(आगहि)** अच्छे प्रकार प्राप्त हूजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मनुष्यों को दूतरूप अग्नि पृथिवीतल से ऊपर पदार्थों को पहुँचा और जलों को वर्षा कर सबकी रक्षा का निमित्त होता है, वैसे विद्वान् जन उत्तम वचन से सबका हित करनेवाला होता है॥६॥

अथेश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहा है॥

अ॒न्त॒र्ह्य॑ग्न॒ ईय॑से वि॒द्वान् जन्मो॒भया॑ कवे। दू॒तो जन्ये॑व॒ मित्र्य॑:॥७॥

अ॒न्त:। हि। अ॒ग्ने॒। ईय॑से। वि॒द्वान्। जन्म॑। उ॒भया॑। क॒वे॒। दू॒त:। जन्या॑ऽइव। मित्र्य॑:॥७॥

पदार्थ:-(अन्त:) मध्ये **(हि)** खलु **(अग्ने)** विद्युदिव स्वप्रकाश जगदीश्वर! **(ईयसे)** प्राप्नोषि **(विद्वान्)** सकलवित् **(जन्म)** जन्मानि **(उभया)** वर्त्तमानेन सह पूर्वापराणि **(कवे)** क्रान्तप्रज्ञसर्वज्ञ **(दूत:)** सर्वत: समाचारप्रद: **(जन्येव)** जनेभ्यो हित इव **(मित्र्य:)** मित्रेषु साधु:॥७॥

अन्वय:-हे कवेऽग्ने विद्वाँस्त्वं हि मित्र्यो दूतो जन्येवान्तरीयस उभया जन्मकृत्यानि वेत्सि तस्मादस्माभिरुपास्योऽसि॥७॥

भावार्थ:-अत्रोपमालङ्कार:। यथा सत्योपदेष्टा सत्यकारी सर्वस्य प्रियं प्रेप्सु: सुहृदाप्तो बाह्यमन्तरं विज्ञानं प्रदाय धर्मे नियच्छति तथाऽन्तर्बहि:स्थ परमेश्वर: सर्वेषां सर्वाणि कर्माणि विदित्वा फलं ददाति॥७॥

पदार्थ:-हे **(कवे)** क्रम-क्रम से बुद्धि को विषयों में प्रविष्ट करनेवाले सर्वज्ञ **(अग्ने)** बिजुली के समान आप ही प्रकाशमान जगदीश्वर वा **(विद्वान्)** सब विषयों को जाननेवाले विद्वान् जन! आप **(हि)** ही **(मित्र्य:)** मित्रों में साधु **(दूत:)** सब **[**ओर**]** से समाचार के देनेहारे **(जन्येव)** जनों के लिये हितकारी जैसे हो, वैसे **(अन्त:)** हृदयाकाश के बीच **(ईयसे)** प्राप्त होते हो **(उभया)** वर्त्तमान के साथ अगले पिछले **(जन्म)** और कर्मों को जानते हो, इससे हम लोगों के उपासना करने योग्य हो॥७॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे सत्य का उपदेश और सत्य का आचरण करनेवाला पुरुष सबके प्रिय काम को चाहनेवाला, सबका मित्र, शास्त्रज्ञ, धर्मात्मा, विद्वान् बाहर-भीतर विज्ञान देकर धर्म में नियत करता है, वैसे भीतर-बाहर परमेश्वर सबके समस्त कामों को जानकर फल देता है॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स वि॒द्वाँ आ च॑ पिप्रयो॒ यक्षि॑ चिकित्व आनु॒षक्।
आ चा॒स्मिन्त्स॑त्सि ब॒र्हिषि॑॥८॥२७॥

सः। विद्वान्। आ। च। पिप्रयः। यक्षि। चिकित्वः। आनुषक्। आ। च। अस्मिन्। सत्सि। बर्हिषि॥८॥

पदार्थः-(सः) जगदीश्वरः **(विद्वान्)** सर्वविद्याधारः **(आ) (च) (पिप्रयः)** प्रीणासि **(यक्षि)** ददासि **(चिकित्वः)** विज्ञानवान् **(आनुषक्)** अनुकूलम् **(आ) (च) (अस्मिन्) (सत्सि)** आसन्नोऽसि **(बर्हिषि)** अन्तरिक्षस्थे जगति॥८॥

अन्वयः-हे चिकित्व ईश्वर स विद्वाँस्त्वमस्मिन्बर्हिष्या सत्सि स त्वमानुषक् पिप्रयश्च यक्षि॥८॥

भावार्थः-हे मनुष्या! भवन्तो योऽस्मिञ्जगति व्याप्तः प्रियस्य दाता सर्वज्ञोऽन्तर्यामीश्वरोऽस्ति तमुपासीरन्निति॥८॥

अस्मिन् सूक्ते वह्निविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति षष्ठं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(चिकित्वः)** विज्ञानवान् ईश्वर **(सः)** वह **(विद्वान्)** विद्वान्! आप **(अस्मिन्)** इस **(बर्हिषि)** अन्तरिक्ष जगत् में **(आसत्सि)** आसन्न हो रहे हो, प्राप्त हो रहे सो आप **(आनुषक्)** अनुकूल जैसे हो, वैसे **(आ, पिप्रयः)** अच्छे प्रसन्न करते **(च)** और **(यक्षि, च)** अच्छे प्रकार सब वस्तु देते हो॥८॥

भावार्थः-हे मनुष्यो! आप लोग जो इस जगत् में व्याप्त, प्रिय पदार्थ का देनेवाला और सर्वज्ञ अन्तर्यामी ईश्वर है, उसी की उपासना करें॥८॥

इस सूक्त में वह्नि और ईश्वर के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह छठा सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥

श्रेष्ठमिति षड्चस्य सप्ततमस्य सूक्तस्य सोमाहुतिर्भार्गव ऋषिः। अग्निर्देवता। १-३ निचृद् गायत्री। ४ त्रिपाद् गायत्री। ५ विराट् पिपीलिकामध्या। ६ विराट् गायत्री छन्दः। षड्जः स्वरः॥

अथ विद्वद्गुणानाह॥

अब छः ऋचावाले सातवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का वर्णन करते हैं॥

श्रेष्ठं यविष्ठ भारताऽग्ने द्युमन्तमा भर। वसो पुरुस्पृहं रयिम्॥ १॥

श्रेष्ठम्। यविष्ठ। भारत। अग्ने। द्युऽमन्तम्। आ। भर। वसो इति। पुरुऽस्पृहम्। रयिम्॥ १॥

पदार्थः-(श्रेष्ठम्) अतिशयेन श्रेयस्करम् **(यविष्ठ)** अतिशयेन युवन् **(भारत)** धारक **(अग्ने)** पावकवद्विद्वन् **(द्युमन्तम्)** बहुप्रकाशयुक्तम् **(आ)** समन्तात् **(भर)** धर **(वसो)** सुखेषु वासयितः **(पुरुस्पृहम्)** बहुभिस्स्पर्हणीयम् **(रयिम्)** श्रियम्॥ १॥

अन्वयः-हे वसो भारत यविष्ठाऽग्ने! त्वं श्रेष्ठं द्युमन्तं पुरुस्पृहं रयिमा भर॥ १॥

भावार्थः-य उत्तमधनलाभाय बहु प्रयतन्ते ते धनाढ्या जायन्ते॥ १॥

पदार्थः-हे **(वसो)** सुखों में वास कराने और **(भारत)** सब विद्या विषयों को धारण करनेवाले **(यविष्ठ)** अतीव युवावस्था युक्त **(अग्ने)** अग्नि के समान प्रकाशमान विद्वान्! आप **(श्रेष्ठम्)** अत्यन्त कल्याण करनेवाली **(द्युमन्तम्)** बहुत प्रकाशयुक्त **(पुरुस्पृहम्)** बहुतों को चाहने योग्य **(रयिम्)** लक्ष्मी को **(आ, भर)** अच्छे प्रकार धारण कीजिये॥ १॥

भावार्थः-जो उत्तम धन लाभ के लिये बहुत यत्न करते हैं, वे धनाढ्य होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा नो अरातिरीशत देवस्य मर्त्यस्य च। पर्षि तस्या उत द्विषः॥ २॥

मा। नः। अरातिः। ईशत। देवस्य। मर्त्यस्य। च। पर्षि। तस्याः। उत। द्विषः॥ २॥

पदार्थः-(मा) **(नः)** अस्मान् **(अरातिः)** शत्रुः **(ईशत)** समर्थो भवेत् **(देवस्य)** विदुषः **(मर्त्यस्य)** अविदुषः **(च)** **(पर्षि)** पिपूरय **(तस्याः)** **(उत)** अपि **(द्विषः)** अप्रीतेः॥ २॥

अन्वयः-हे विद्वन्नो देवस्य मर्त्यस्य चारातिर्मेशत उतापि तस्या द्विषो नो पर्षि पारं नय॥ २॥

भावार्थः-ये द्वेषं विहाय धार्मिकाणां विदुषामविदुषां च सङ्गेन सर्वेषु प्रीतिं जनयन्ति, ते केनापि तिरस्कृता न जायन्ते॥ २॥

पदार्थः-हे विद्वान्! **(नः)** हम **(देवस्य)** विद्वान् **(मर्त्यस्य, च)** और अविद्वान् का **(अरातिः)** शत्रु **(मा)** मत **(ईशत)** समर्थ हो **(उत)** और हम लोगों को और **(तस्याः)** उस **(द्विषः)** अप्रीतिवाले शत्रु के **(पर्षि)** पार पहुंचाइये॥२॥

भावार्थः-जो द्वेष छोड़ धार्मिक विद्वानों को तथा अविद्वानों के साथ प्रीति उत्पन्न कराते हैं, वे किसी से तिरस्कार को नहीं प्राप्त होते हैं॥२॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

विश्वा॑ उ॒त त्वया॑ व॒यं धारा॑ उद॒न्या॑इव। अति॑ गाहेमहि॒ द्विषः॑॥३॥

विश्वा॑ः। उ॒त। त्वया॑। व॒यम्। धारा॑ः। उ॒द॒न्या॑ः॒इव। अति॑। गा॒हे॒म॒हि॒। द्विषः॑॥३॥

पदार्थः-**(विश्वाः)** सर्वाः **(उत)** अपि **(त्वया)** आप्तेन विदुषा सह **(वयम्)** **(धाराः)** **(उदन्याइव)** उदकसम्बन्धिन्य इव **(अति)** उल्लङ्घने **(गाहेमहि)** **(द्विषः)** द्वेषवृत्तीः॥३॥

अन्वयः-हे विद्वन्! यथा त्वया सह वर्त्तमाना वयं धारा उदन्याइव विश्वा द्विषोऽतिगाहेमहि तथा त्वमुताप्येताः गाहेथाः॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा उदकस्य धाराः प्राप्तं स्थानं त्यक्त्वा स्थानान्तरं गच्छन्ति तथा शत्रुभावं विहाय मित्रभावं सर्वे मनुष्याः प्राप्नुवन्तु॥३॥

पदार्थः-हे विद्वान्! जैसे **(त्वया)** आप्त विद्वान् जो आप उनके साथ वर्त्तमान हम लोग **(धाराः)** **(उदन्याइव)** जल की धाराओं को जैसे वैसे **(विश्वाः)** समस्त **(द्विषः)** वैरवृत्तियों को **(अति, गाहेमहि)** अवगाहें, बिलोड़ें, मथें, वैसे आप **(उत)** भी इनको गाहो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जल की धारा प्राप्त हुए स्थान को छोड़ दूसरे स्थान को जाती है, वैसे शत्रुभाव को छोड़ मित्रभाव को सब मनुष्य प्राप्त होवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुचि॑ः पावक॒ वन्द्योऽग्ने॑ बृ॒हद्वि रो॑चसे। त्वं घृ॒तेभि॒राहु॑तः॥४॥

शुचि॑ः। पा॒व॒क॒। वन्द्यः॑। अग्ने॑। बृ॒हत्। वि। रो॒च॒से॒। त्वम्। घृ॒तेभिः॑। आऽहु॑तः॥४॥

पदार्थः-**(शुचिः)** पवित्रः **(पावक)** पवित्रकर्त्तः **(वन्द्यः)** स्तोतुमर्हः **(अग्ने)** अग्निवत्प्रकाशमान विद्वन् **(बृहत्)** महत् **(वि)** विशेषे **(रोचसे)** प्रकाशसे **(त्वम्)** **(घृतेभिः)** आज्यादिभिः **(आहुतः)** आमन्त्रितः॥४॥

अन्वयः-हे पावकाऽग्ने! घृतेभिः प्रदीप्तोऽग्निरिव शुचिर्वन्द्य आहुतस्त्वं बृहद्विरोचसे स सत्कर्त्तव्योऽसि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा घृतादिभिः प्रज्वालितः पवित्रकर्त्ताऽग्निर्बहु रोचते तथा सत्कृतो विद्वान् बहु उपकारं करोति॥४॥

पदार्थः-हे **(पावक)** पवित्र करनेवाले **(अग्ने)** अग्नि के समान प्रकाशमान! **(घृतेभिः)** घी आदि पदार्थों से **[**प्रदीप्त**]** अग्नि के समान **(शुचिः)** पवित्र **(वन्द्यः)** स्तुति के योग्य **[(आहुतः)** आमन्त्रित**]** **(त्वम्)** आप **(बृहत्)** बहुत **(विरोचसे)** प्रकाशमान होते हैं, सो सत्कार करने योग्य हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे घी आदि पदार्थों से प्रज्वलित किया हुआ पवित्र करनेवाला अग्नि बहुत प्रकाशित होता है, वैसे सत्कार पाया हुआ विद्वान् जन बहुत उपकार करता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं नो॑ असि भारताग्ने॑ व॒शाभि॑रु॒क्षभि॑:। अ॒ष्टाप॑दीभि॒राहु॑तः॥५॥

त्वम्। नः। अ॒सि॒। भा॒र॒त॒। अग्ने॑। व॒शाभि॑:। उ॒क्षऽभि॑। अ॒ष्टाऽप॑दीभिः। आऽहु॑तः॥५॥

पदार्थः-**(त्वम्)** **(नः)** अस्मभ्यम् **(असि)** भवसि **(भारत)** धारक **(अग्ने)** विद्वन् **(वशाभिः)** कमनीयाभिर्गोभिः **(उक्षभिः)** वृषभैः **(अष्टापदीभिः)** अष्टौ पादौ यासां ताभिर्वाग्भिः **(आहुतः)** आमन्त्रितः॥५॥

अन्वयः-हे भारताऽग्ने! यो वशाभिरुक्षभिरष्टापदीभिराहुतस्त्वं नोऽस्मभ्यं सुखं दत्तवानसि सोऽस्माभिरर्च्चनीयोऽसि॥५॥

भावार्थः-यो मनुष्योऽष्टस्थानोच्चारितया वाचा सत्यमुपदिशन् गवादिरक्षणेन सर्वस्य पालनं विधत्ते, स सर्वैः पालनीयो भवेत्॥५॥

पदार्थः-हे **(भारत)** सब विषयों को धारण करनेवाले **(अग्ने)** विद्वान्! जो **(वशाभिः)** मनोहर गौओं से वा **(उक्षभिः)** बैलो से वा **(अष्टापदीभिः)** जिनमें आठ सत्यासत्य के निर्णय करनेवाले चरण हैं, उन वाणियों से **(आहुतः)** बुलाये हुए आप **(नः)** हम लोगों के लिये सुख दिये हुए **(असि)** हैं, सो हम लोगों से सत्कार पाने योग्य हैं॥५॥

भावार्थः-जो मनुष्य आठ स्थानों में उच्चारण की हुई वाणी से सत्य का उपदेश करता हुआ गवादि पशुओं की रक्षा से सबकी पालना का विधान करता है, वह सबको रखने के योग्य है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्रूवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः। सहसस्पुत्रो अद्भुतः॥६॥२८॥

द्रुऽअन्नः। सर्पिःऽआसुतिः। प्रत्नः। होता। वरेण्यः। सहसः। पुत्रः। अद्भुतः॥६॥

पदार्थः-(**द्रूवन्नः**) द्रुः काष्ठमन्नं यस्य सः (**सर्पिरासुतिः**) सर्पिरासुतिर्यस्य सः (**प्रत्नः**) प्राक्तनः (**होता**) दाता (**वरेण्यः**) स्वीकर्त्तुमर्हः (**सहसः**) बलिष्ठस्य वायोः (**पुत्रः**) पुत्र इव वर्त्तमानः (**अद्भुतः**) आश्चर्यगुणकर्मस्वभावः॥६॥

अन्वयः-यैर्विद्वद्भिः प्रत्नो द्रूवन्नः सर्पिरासुतिः सहसस्पुत्रोऽद्भुतो होता वरेण्योऽग्निः कार्यसिद्धये प्रयुज्यते ते चित्रधनाढ्या जायन्त इति॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। अग्नेर्भोजनस्थानीयं काष्ठं पानार्थं सर्वौषधादिपदार्थानां सारो विद्यत इति वेदितव्यमन्यत्सर्वेष कलागृहेषु काष्ठौषधिसारं जलादिनाऽग्निप्रयोगः कार्यः॥६॥

अत्र विद्वदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति द्वितीयमण्डले सप्तमं सूक्तमष्टाविंशो वर्गश्च समाप्तः॥

पदार्थः-जिन विद्वानों से (**प्रत्नः**) पुरातन (**द्रूवन्नः**) तथा जिसका काष्ठ अन्न और (**सर्पिरासुतिः**) घी दुग्धसार पान के लिये विद्यमान है और जो (**सहसस्पुत्रः**) बलवान् वायु के समान है, वह (**अद्भुतः**) आश्चर्य गुण, कर्म स्वभावयुक्त (**होता**) सब पदार्थों को देनेवाला (**वरेण्यः**) स्वीकार करने योग्य अग्नि कार्यसिद्धि के लिये प्रयुक्त किया जाता है, वे आश्चर्यरूप धनाढ्य होते हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। अग्नि का भोजन-स्थानी काष्ठ और पीने के अर्थ सब ओषधियों का रस विद्यमान है, यह जानकर काष्ठ और ओषधिसार जल आदि के संयोग से कलाघरों में अग्नि का प्रयोग करना चाहिये॥६॥

इस सूक्त में विद्वान् और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह दूसरे मण्डल में सप्तम सूक्त और अट्ठाईसवां वर्ग समाप्त हुआ॥

वाजयन्निति षड्ऋचस्याऽष्टमस्य सूक्तस्य गृत्समद ऋषिः। अग्निर्देवता। १ गायत्री। २ निचृत् पिपीलिकामध्या गायत्री। ३, ५ निचृद्गायत्री। ४ विराड्गायत्री छन्दः। षड्जः स्वरः। ६ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथाग्निविषयमाह॥

अब छः ऋचावाले आठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि विषय का वर्णन करते हैं॥

वा॒ज॒यन्नि॑व॒ नू रथा॒न् योगाँ॑ अ॒ग्नेरुप॑ स्तुहि। य॒शस्त॑मस्य मी॒ळ्हुषः॥ १॥

वा॒ज॒यन्ऽइ॑व। नु। रथा॑न्। योगा॑न्। अ॒ग्नेः। उप॑। स्तु॒हि। य॒शःऽत॑मस्य। मी॒ळ्हुषः॥ १॥

पदार्थः-(वाजयन्निव) यथा गमयन् **(नु)** शीघ्रम् **(रथान्)** रमणीयान् विमानादीन् **(योगान्) (अग्नेः)** पावकस्य **(उप) (स्तुहि)** प्रशंस **(यशस्तमस्य)** अतिशयेन यशस्विनो बहुजलयुक्तस्य वा **(मीढुषः)** सेचकस्य॥ १॥

अन्वयः-हे विद्वन्! वाजयन्निव त्वं मीढुषो यशस्तमस्याऽग्नेर्योगान् रथाँश्च नूपस्तुहि॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे शिल्पिन् विद्वन्! यथाऽश्वादयो रथान् गमयन्ति तथैवातिशीघ्रगत्या जलयन्त्रप्रेरितोऽग्निर्विमानादियानानि शीघ्रं गमयतीति सर्वान् प्रत्युपदिश॥ १॥

पदार्थः-हे विद्वान्! **(वाजयन्निव)** पदार्थों को प्राप्त कराते हुए आप **(मीढुषः)** सींचनेवाले **(यशस्तमस्य)** अतीव यशस्वी वा बहुत जलयुक्त **(अग्नेः)** अग्नि के समान प्रतापी जल के वा अग्नि के **(योगान्)** योगों की ओर **(रथान्)** विमानादि रथों की **(नु)** शीघ्र **(उपस्तुहि)** प्रशंसा कीजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे शिल्पी विद्वान् जन! आप जैसे घोड़ों और बैल आदि से चलनेवाले रथों को चलाते हैं, वैसे ही अति शीघ्र गति से जल के कलाघरों से प्रेरणा पाया अग्नि विमानादि यानों को शीघ्र चलाता है, यह सबके प्रति उपदेश करो॥ १॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

यः सु॒नी॒थो द॑दा॒शुषे॑ऽजु॒र्यो ज॒रय॑न्नरिम्। चारु॑प्रतीक॒ आहु॑तः॥ २॥

यः। सु॒ऽनी॒थः। द॒दा॒शुषे॑। अ॒जु॒र्यः। ज॒रय॑न्। अ॒रिम। चारु॑ऽप्रतीकः। आऽहु॑तः॥ २॥

पदार्थः-(यः) (**सुनीथः**) यः सुष्ठु नयति सः (**ददाशुषे**) दात्रे (**अजुर्यः**) अजीर्णेषु भवः (**जरयन्**) नाशयन् (**अरिम्**) शत्रुम् (**चारुप्रतीकः**) सुन्दरगुणकर्मस्वभावैः प्रतीतः (**आहुतः**) आमन्त्रितः॥२॥

अन्वयः-योऽग्निरिव चारुप्रतीक आहुतोऽजुर्यः सुनीथोऽरिञ्जरयन् ददाशुषे सुखं प्रयच्छति **[**सः**]** श्रीमान् जायते॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा शिल्पकार्येषु प्रेरितोऽग्निरुत्तमानि कार्याणि साध्नोति तथा सुशिक्षिता धीमन्तो बह्वीमुन्नतिं कुर्वन्ति॥२॥

पदार्थः-(यः) जो अग्नि के समान (**चारुप्रतीकः**) सुन्दर गुण, कर्म और स्वभावों से प्रतीत (**आहुतः**) वा बुलाया हुआ (**अजुर्यः**) जो न जीर्ण होते न नष्ट होते हैं, उनमें प्रसिद्ध (**सुनीथः**) सुन्दरता से सबकी प्राप्ति करता है और (**अरिम्**) शत्रुजन का (**जरयन्**) नाश करता हुआ (**ददाशुषे**) दानशील के लिये सुख देता है, वह लक्ष्मीवान् होता है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे शिल्पकामों में प्रेरणा किया हुआ अग्नि उत्तम कामों को सिद्ध करता है, वैसे सुन्दर शिक्षा पाये हुए बुद्धिमान् जन बहुतसी उन्नति करते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते। यस्य व्रतं न मीयते॥३॥

यः। ऊम् इति। श्रिया। दमेषु। आ। दोषा। उषसि। प्रऽशस्यते। यस्य। व्रतम्। न। मीयते॥३॥

पदार्थः-(यः) (**उ**) (**श्रिया**) शोभया (**दमेषु**) गृहेषु (**आ**) (**दोषा**) रात्रौ (**उषसि**) दिने (**प्रशस्यते**) प्रशस्तो जायते (**यस्य**) (**व्रतम्**) शीलम् (**न**) (**मीयते**) हिंस्यते॥३॥

अन्वयः-हे विद्वँस्त्वं यो दमेषु दोषोषसि श्रियाऽऽप्रशस्यते यस्य व्रतमु न मीयते तद्वद्भव॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्नेः शीलं स्वरूपमनाद्यविनाशि वर्त्तते तथा सर्वेषामीश्वरजीवाकाशादीनां पदार्थानां नित्ये वर्त्तेते॥३॥

पदार्थः-हे विद्वान्! आप (**यः**) जो (**दमेषु**) घरों में (**दोषा**) वा रात्रि और (**उषसि**) दिन में (**श्रिया**) शोभा से (**आ, प्रशस्यते**) अच्छे प्रकार प्रशंसा को प्राप्त किया जाता और (**यस्य**) जिसका (**व्रतम्, उ**) शील (**न**) न (**मीयते**) नष्ट होता है, उसके समान हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि का शील और स्वरूप अनादि अविनाशी वर्त्तमान है, वैसे ईश्वर, जीव और आकाश आदि पदार्थों का शील और स्वरूप नित्य वर्त्तमान है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ यः स्व॑र्ण भा॒नुना॑ चि॒त्रो वि॒भात्य॒र्चिषा॑। अ॒ज्रो॒ अ॒जरै॑र॒भि॥४॥

आ। यः। स्वः॑। न। भा॒नुना॑। चि॒त्रः। वि॒ऽभाति॑। अ॒र्चिषा॑। अ॒ज्रो॒ऽनः। अ॒जरैः॑। अ॒भि॥४॥

पदार्थः-(**आ**) समन्तात् (**यः**) (**स्वः**) आदित्यः (**न**) इव (**भानुना**) प्रकाशेन (**चित्रः**) अद्भुतः (**विभाति**) प्रकाशते (**अर्चिषा**) पूजनीयेन (**अज्रानः**) प्रकटीकुर्वन् (**अजरैः**) वयोहानिरहितैः (**अभि**) सर्वतः॥४॥

अन्वयः-यो विद्यूदूपश्चित्रोऽजरैरभ्यज्रानोऽग्निरर्चिषा भानुना स्वर्ना विभाति स सर्वैरन्वेषणीयः॥४॥

भावार्थः-अग्निरयं सूक्ष्मपरमाणुरूपेषु पदार्थेषु सर्वदा स्वरूपेणावतिष्ठते काष्ठादिषु पदार्थ-वृद्धिह्रासादिना कदाचित् वर्द्धते कदाचिद्ध्रसते च॥४॥

पदार्थः-(**यः**) जो बिजुलीरूप (**चित्रः**) चित्र-विचित्र अद्भुत अग्नि (**अजरैः**) अविनाशी पदार्थों से (**अभि, अज्रानः**) सब ओर से सब पदार्थों को प्रकट करता हुआ अग्नि (**अर्चिषा**) प्रशंसनीय (**भानुना**) प्रकाश से (**स्वः**) आदित्य के (**न**) समान (**आ, विभाति**) अच्छे प्रकार प्रकाशित होता है॥४॥

भावार्थः-अग्नि यह सूक्ष्म परमाणुरूप पदार्थों में सर्वदा अपने रूप के साथ रहता है। काष्ठ आदि पदार्थों में वृद्धि और न्यूनता आदि से कोई समय में बढ़ता और कभी कमती होता है॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

अत्रि॑मनु॑ स्व॒राज्य॑म॒ग्निमु॒क्थानि॑ वावृधुः। विश्वा॒ अधि॒ श्रियो॑ दधे॥५॥

अत्रि॑म्। अनु॑। स्व॒ऽराज्य॑म्। अ॒ग्निम्। उ॒क्थानि॑। व॒वृ॒धुः। विश्वाः॑। अधि॑। श्रियः॑। द॒धे॒॥५॥

पदार्थः-(**अत्रिम्**) अत्तारम् (**अनु**) (**स्वराज्यम्**) स्वप्रकाशवन्तम् (**अग्निम्**) विद्युतम् (**उक्थानि**) वक्तुं योग्यानि वचनानि (**वावृधुः**) वर्द्धयन्ति (**विश्वाः**) अखिलाः (**अधि**) (**श्रियः**) लक्ष्मीः (**दधे**) उपरि दधाति॥५॥

अन्वयः-हे मनुष्या! यान्युक्थान्यत्रिं स्वराज्यमग्निं चानु वावृधुर्यथा तैर्विश्वाः श्रियोऽहमधिदधे तथा युष्माभिरप्याचरणीयम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विदुषां योग्यताऽस्ति यैरुपदेशैरग्न्यादिपदार्थविद्या राज्यश्रियश्च वर्द्धेरँस्तैः सर्वानुद्योगिनः सम्पादयन्तु॥५॥

पदार्थः-हे मनुष्यो! जो **(उक्थानि)** कहने योग्य वचन **(अत्रिम्)** सब पदार्थ भक्षण करनेवाले **(स्वराज्यम्)** अपने प्रकाश से युक्त **(अग्निम्)** बिजुली रूप अग्नि को **(अनु, वावृधुः)** अनुकूलता से बढ़ाते है और जैसे उनसे **(विश्वाः)** समस्त **(श्रियः)** धनों को **(अधि, दधे)** अधिक-अधिक मैं धारण करता हूं, वैसे तुमको भी धारण करना चाहिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों की योग्यता है कि जिन उपदेशों से अग्न्यादि पदार्थविद्या राज्यलक्ष्मी बढ़े, उनसे सबको उद्योगी करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम्।
अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः॥६॥२९॥

अग्नेः। इन्द्रस्य। सोमस्य। देवानाम्। ऊतिऽभिः। वयम्। अरिष्यन्तः। सचेमहि। अभि। स्याम। पृतन्यतः॥६॥

पदार्थः-**(अग्नेः)** पावकस्य **(इन्द्रस्य)** सूर्यस्य **(सोमस्य)** चन्द्रस्य **(देवानाम्)** विदुषां पृथिव्यादिलोकानां वा **(ऊतिभिः)** रक्षणादिभिः सह वर्त्तमानाः **(वयम्)** **(अरिष्यन्तः)** अहिंस्यमानाः **(सचेमहि)** सङ्गता भवेम **(अभि)** **(स्याम)** **(पृतन्यतः)** आत्मनः पृतनामिच्छन्तः॥६॥

अन्वयः- हे मनुष्या! यथाऽग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वर्त्तमाना अरिष्यन्तः पृतन्यतो वयं सचेमहि सख्यायाभिस्याम तथा यूयमपि भवत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसोऽग्न्यादिविद्यया रक्षिताः सर्वस्य सुहृदः प्रशस्तसेनावन्तो भूत्वा सखायस्सन्तो धर्मविद्योन्नतिं कुर्युस्तथा सर्वे मनुष्याः प्रयतन्तामिति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीयाऽष्टके एकोनत्रिंशो वर्गो द्वितीयमण्डले प्रथमानुवाकेऽष्टमं सूक्तञ्च समाप्तम्॥

पदार्थः-हे मनुष्यो! जैसे **(अग्नेः)** अग्नि **(इन्द्रस्य)** सूर्य **(सोमस्य)** चन्द्रमा और **(देवानाम्)** विद्वान् और पृथिवी आदि लोकों की **(ऊतिभिः)** रक्षा आदि व्यवहारों के साथ वर्त्तमान

(अरिष्यन्तः) न नष्ट होते और **(पृतन्यतः)** अपने को सेना की इच्छा करते हुए **(वयम्)** हम लोग **(सचेमहि)** सङ्ग करें और मित्रपन के लिये **(अभि ष्याम)** सब ओर से प्रसिद्ध होवें, वैसे तुम भी होओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन अग्न्यादि विद्या से रक्षित सबके मित्र प्रशंसित सेनावाले होकर मित्र होते हुए धर्म और विद्या की उन्नति करें, वैसे सब मनुष्य प्रयत्न करें॥६॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह दूसरे अष्टक में उनतीसवां वर्ग और आठवां सूक्त समाप्त हुआ॥

इति श्रीयुत परमहंसपरिव्राजकाचार्य्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीपरमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्यभाषाभ्यां सुभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये द्वितीयाष्टके पञ्चमोऽध्यायः समाप्तः॥

ओ३म्

अथ द्वितीयाष्टके षष्ठाऽध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

निहोतेति षड्चस्य नवमस्य सूक्तस्य गृत्समद ऋषिः। अग्निर्देवता। १, ३ त्रिष्टुप्। ४ विराट् त्रिष्टुप्। ५, ६ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निविषयकानि विद्वत्कर्माण्याह॥

अब द्वितीय अष्टक में छठे अध्याय का आरम्भ है। उसके प्रथम मन्त्र में अग्निविषयक विद्वानों के कर्मों को कहते हैं॥

नि होता॑ होतृ॒षद॑ने॒ विदा॑नस्त्वे॒षो दी॑दि॒वाँ अ॑सदत्सु॒दक्ष॑ः।
अद॑ब्धव्रतप्रमति॒र्वसि॑ष्ठः सहस्रंभ॒रः शुचि॑जिह्वो अ॒ग्निः॥ १॥

नि। होता॑। होतृ॒ऽसद॑ने। विदा॑नः। त्वे॒षः। दी॒दि॒ऽवान्। अ॒स॒दत्। सु॒ऽदक्ष॑ः। अद॑ब्धव्रतऽप्रमतिः। वसि॑ष्ठः। स॒ह॒स्र॒म्ऽभ॒रः। शुचि॑ऽजिह्वः। अ॒ग्निः॥ १॥

पदार्थः-(नि) नितराम् **(होता)** ग्रहीता **(होतृषदने)** होतॄणां सदने याने वेद्यां वा **(विदानः)** विद्यमानः **(त्वेषः)** दीप्तियुक्तः **(दीदिवान्)** देदीप्यमानः **(असदत्)** सीदति **(सुदक्षः)** सुष्ठु दक्षो बलं यस्मात् सः **(अदब्धव्रतप्रमतिः)** अदब्धेनाहिंसितेनव्रतेन शीलेन प्रमतिः प्रज्ञानं यस्य सः **(वसिष्ठः)** अतिशयेन वासयिता **(सहस्रम्भरः)** सहस्रस्य जगतो धर्त्ता पोषको वा **(शुचिजिह्वः)** शुचिः पवित्रा जिह्वा यस्मात् सः **(अग्निः)** विद्युदादिकार्यकारणस्य स्वरूपः॥ १॥

अन्वयः-विद्वद्भिर्यो होतृषदने होता विदानस्त्वेषो दीदिवान् सुदक्षोऽदब्धव्रतप्रमतिर्वसिष्ठः शुचिर्जिह्वः सहस्रम्भरोऽग्निर्न्यसदत् स सदा कार्येषु सम्प्रयोक्तव्यः॥ १॥

भावार्थः-ये मनुष्याः कार्येषु भास्वरं नित्यगुणकर्मस्वभावं पवित्रकारकं सकलधर्त्तारं वह्निं यथावत् प्रयुञ्जते तेऽनष्टसुखा भवन्ति॥ १॥

पदार्थः-विद्वानों को जो **(होतृषदने)** ग्रहीत जनों के रथ वा वेदी में **(होता)** ग्रहण करनेहारा **(विदानः)** विद्यमान **(त्वेषः)** दीप्तियुक्त **(दीदिवान्)** वार-वार प्रकाशित होता हुआ **(सुदक्षः)** सुन्दर जिससे बल प्रसिद्ध होता **(अदब्धव्रतप्रमतिः)** नहीं नष्ट हुए शील से जिसका ज्ञान होता **(वसिष्ठः)** जो अतीव निवास करानेहारा **(शुचिजिह्वः)** और जिससे जिह्वा पवित्र होती वह

(सहस्रम्भरः) सहस्रों जगत् का धारण और पोषण करनेवाला **(अग्निः)** बिजुली आदि कार्य-कारणस्वरूप अग्नि **(नि, असदत्)** निरन्तर स्थिर होता है, उसका प्रयोग सदा कार्यों में अच्छे प्रकार करने योग्य है॥१॥

भावार्थः-जो मनुष्य कार्यों में प्रदीप्त नित्य गुणकर्मस्वभावयुक्त पवित्र करनेवाले सकल पदार्थों के धारणकर्त्ता अग्नि को यथावत् प्रयुक्त करते हैं, वे अविनाशी सुखवाले होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन् दीद्यद् बोधि गोपाः॥२॥

त्वम्। दूतः। त्वम्। ऊम् इति। नः। परः।ऽपाः। त्वम्। वस्यः। आ। वृषभ। प्रऽनेता। अग्ने। तोकस्य। नः। तने। तनूनाम्। अप्रऽयुच्छन्। दीद्यत्। बोधि। गोपाः॥२॥

पदार्थः-**(त्वम्)** **(दूतः)** देशान्तरं प्रापकः **(त्वम्)** **(उ)** **(नः)** **(परस्पाः)** पारयिता रक्षकश्च **(त्वम्)** **(वस्यः)** वसीयान् **(आ)** **(वृषभ)** बलिष्ठ **(प्रणेता)** प्रकृष्टतया नेता **(अग्ने)** पावकवद्विद्वन् **(तोकस्य)** अपत्यस्य **(नः)** अस्माकम् **(तने)** विस्तारे **(तनूनाम्)** **(अप्रयुच्छन्)** **(दीद्यत्)** प्रकाशयति **(बोधि)** बुध्यसे **(गोपाः)** रक्षकः॥२॥

अन्वयः-हे वृषभाऽग्ने! त्वं नो दूतस्त्वमु परस्पास्त्वं वस्यस्तोकस्याऽऽप्रणेता नस्तनूनां तनेऽप्रयुच्छन् गोपा दीद्यद्बोधि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अग्निप्रयुक्तनौका समुद्रात् पारं गमयतीव दुःखात् पारं गमयन्ति सन्तानानां शिक्षणे शरीराणां रक्षणे च प्रवीणाः प्रमादं विहाय धर्मस्याऽनुष्ठातारः सन्ति, तेऽत्राभ्युदयिकं सुखं प्राप्नुवन्ति॥२॥

पदार्थः-हे **(वृषभ)** बलवान् **(अग्ने)** अग्नि के समान विद्वान्! **(त्वम्)** आप **(नः)** हमारे **(दूतः)** देशान्तर पहुंचानेवाले **(त्वम्)** आप **(उ)** ही **(परस्पाः)** सबसे पार और रक्षा करनेवाले **(त्वम्)** आप **(वस्यः)** निवास करने योग्य **(तोकस्य)** सन्तान को **(आ, प्रणेता)** सब ओर से अच्छे प्रकार समस्त गुणों में प्रवृत्त करानेहारे **(नः)** हम लोगों के **(तनूनाम्)** शरीरों के **(तने)** विस्तार में **(अप्रयुच्छन्)** न प्रमाद कराते हुए **(गोपाः)** शरीर की रक्षा करनेवाले **(दीद्यत्)** सब विषयों को प्रकाश कराते **(बोधि)** और जानते हो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। अग्नि प्रयोग से प्रेरणा दी हुई नौका समुद्र से पार जैसे पहुंचाती, वैसे जो मनुष्य दु:खरूपी समुद्र से पार करते हैं, सन्तानों की शिक्षा में और शरीरों की रक्षा करने में प्रवीण और प्रमाद को छोड़ धर्म के अनुष्ठान करनेवाले हैं, वे यहाँ आभ्युदयिक सुख को प्राप्त होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे।
यस्मादोनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे॥३॥

विधेम। ते। परमे। जन्मन्। अग्ने। विधेम। स्तोमैः। अवरे। सधऽस्थे। यस्मात्। योनेः। उत्ऽआरिथ। यजे। तम्। प्र। त्वे इति। हवींषि। जुहुरे। सम्ऽइद्धे॥३॥

पदार्थः-(**विधेम**) विचरेम (**ते**) तव (**परमे**) प्रकृष्टे (**जन्मन्**) जन्मनि (**अग्ने**) विद्वन् (**विधेम**) (**स्तौमैः**) स्तुतिभिः (**अवरे**) अर्वाचीने (**सधस्थे**) सहस्थाने (**यस्मात्**) (**योनेः**) कारणात् (**उदारिथ**) प्राप्नोषि। अत्रा**न्येषामपी**ति दीर्घः। (**यजे**) सङ्गच्छेय (**तम्**) (**प्र**) (**त्वे**) त्वस्मिन् (**हवींषि**) होतुं दातुमर्हाणि (**जुहुरे**) जुह्वति (**समिद्धे**) प्रदीप्ते॥३॥

अन्वयः-हे अग्ने! वयं स्तोमैस्ते परमेऽवरे च जन्मन् विधेम यस्माद् योनेस्त्वमुदारिथ तस्मिन् सधस्थे विधेम यथा त्वे समिद्धेऽग्नौ हवींषि विद्वांसो जुहुरे तथा तमहं प्रयजे॥३॥

भावार्थः-ये शुभानि कर्माणि कुर्वन्ति ते श्रेष्ठं जन्माप्नुवन्ति, येऽधर्ममाचरन्ति ते नीचं जन्माश्नुवते। यथा विद्वांसः प्रदीप्तेऽग्नौ सुगन्ध्यादिकं द्रव्यं हुत्वा जगदुपकुर्वन्ति तथा ते सर्वैरुपकृता जन्मनि जन्मान्तरे वा भवन्ति॥३॥

पदार्थः-हे (**अग्ने**) विद्वान्! हम लोग (**स्तोमैः**) स्तुतियों से (**ते**) आपके (**परमे**) उत्तम और (**अवरे**) अनुत्तम जन्म के निमित्त (**विधेम**) विचारें, (**यस्मात्**) जिस (**योनेः**) कारण से आप (**उदारिथ**) प्राप्त होते हो उस (**सधस्थे**) साथ के स्थान में हम लोग (**विधेम**) उत्तम व्यवहार का विधान करें। जैसे (**त्वे**) उस (**समिद्धे**) प्रदीप्त अग्नि में (**हवींषि**) होमने अर्थात् देने योग्य पदार्थों को विद्वान् जन (**जुहुरे**) होमते, वैसे मैं (**तम्**) उसका (**प्रयजे**) पदार्थों से सङ्ग करूं॥३॥

भावार्थः-जो शुभ कर्मों को करते हैं, वे श्रेष्ठ जन्म को प्राप्त होते हैं। जो अधर्म का आचरण करते हैं, वे नीच जन्म को प्राप्त होते हैं। जैसे विद्वान् जन जलते हुए अग्नि में सुगन्ध्यादि द्रव्य का होम

कर संसार का उपकार करते हैं, वैसे वे सबसे उपकार को वर्त्तमान जन्म में वा जन्मान्तर में प्राप्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॒ यज॑स्व ह॒विषा॒ यजी॑याञ्छ्रु॒ष्टी दे॒ष्णम॒भि गृ॑णीहि॒ राध॑:।
त्वं ह्यसि॑ रयि॒पती॑ रयी॒णां त्वं शु॒क्रस्य॒ वच॑सो म॒नोता॑॥४॥

अग्ने॑। यज॑स्व। ह॒विषा॑। यजी॑यान्। श्रु॒ष्टी। दे॒ष्णम्। अ॒भि। गृ॒णी॒हि॒। राध॑:। त्वम्। हि। असि॑। र॒यि॒ऽपति॑:। र॒यी॒णाम्। त्वम्। शु॒क्रस्य॑। वच॑स:। म॒नोता॑॥४॥

पदार्थ:-(अग्ने) पावक इव विद्वन् **(यजस्व) (हविषा)** होतव्येन वस्तुना **(यजीयान्)** अतिशयेन यष्टा **(श्रुष्टी)** सद्य: **(देष्णम्)** दातुं योग्यम् **(अभि) (गृणीहि)** सर्वत: प्रशंस **(राध:)** धनम् **(त्वम्) (हि) (असि) (रयिपति:)** श्रीस्वामी **(रयीणाम्)** धनानाम् **(त्वम्) (शुक्रस्य)** शुद्धिकरस्य **(वचस:)** वचनस्य **(मनोता)** प्रज्ञापक:। अत्र मन धातोर्बाहुलकादौणादिक ओतन् प्रत्यय:॥४॥

अन्वय:-हे अग्ने! यतस्त्वं रयीणां रयिपतिस्त्वं शुक्रस्य वचसो मनोताऽसि तस्माद्धि यजीयान्त्सन् हविषा यजस्व देष्णं राध: श्रुष्ट्यभिगृणीहि॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये धनाढ्या धनेन परोपकारं कुर्युस्ते सर्वेषां प्रिया जायन्ते॥४॥

पदार्थ:-हे **(अग्ने)** अग्नि के समान वर्त्तमान विद्वान्! जिस कारण **(त्वम्) (रयीणाम्)** धनादि पदार्थों के बीच **(रयिपति:)** धनपति और **(त्वम्)** आप **(शुक्रस्य)** शुद्ध करनेवाले **(वचस:)** वचन के **(मनोता)** उत्तमता से जतलानेवाले **(असि)** हैं **(हि)** इसी से **(यजीयान्)** अत्यन्त यज्ञकर्त्ता होते हुए **(हविषा)** होमने योग्य वस्तु से **(यजस्व)** यज्ञ कीजिये और **(देष्णम्)** देने योग्य **(राध:)** धन की **(श्रुष्टी:)** शीघ्र **(अभि, गृणीहि)** सब ओर से प्रशंसा करो॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो धनाढ्य धन से परोपकार करें, वे सबके प्यारे होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः॥५॥

उभयम्। ते। न। क्षीयते। वसव्यम्। दिवेऽदिवे। जायमानस्य। दस्म। कृधि। क्षुऽमन्तम्। जरितारम्। अग्ने। कृधि। पतिम्। सुऽअपत्यस्य। रायः॥५॥

पदार्थः-(उभयम्) दानं यजनं च **(ते)** तव **(न)** **(क्षीयते)** नश्यति **(वसव्यम्)** वसुषु भवम् **(दिवेदिवे)** प्रतिदिनम् **(जायमानस्य)** **(दस्म)** परदुःखभञ्जक **(कृधि)** कुरु **(क्षुमन्तम्)** बह्वन्नयुक्तम् **(जरितारम्)** विद्यागुणप्रशंसकम् **(अग्ने)** अग्निवद्वर्धमान **(कृधि)** **(पतिम्)** **(स्वपत्यस्य)** शोभनान्यपत्यानि यस्मात्तस्य **(रायः)** दातुं योग्यस्य धनस्य॥५॥

अन्वयः-हे दस्माग्ने! दिवेदिवे जायमानस्य यस्य ते उभयं वसव्यं न क्षीयते, स त्वं जरितारं क्षुमन्तं कृधि स्वपत्यस्य रायः पतिं कृधि॥५॥

भावार्थः-तस्यैव कुलाद्धननाशो न भवति योऽन्येभ्यः सुपात्रेभ्यो जगदुपकाराय प्रयच्छति॥५॥

पदार्थः-हे **(दस्म)** परदुःखभञ्जन करनेवाले और **(अग्ने)** अग्नि के समान बढ़नेवाले विद्वान्! **(दिवेदिवे)** प्रतिदिन **(जायमानस्य)** सिद्ध हुए जिन **(ते)** आपका **(उभयम्)** दान और यज्ञ करना दोनों **(वसव्यम्)** धनों में प्रसिद्ध हुए काम **(न)** नहीं **(क्षीयते)** नष्ट होते सो आप **(जरितारम्)** विद्यादि गुण की प्रशंसा करनेवाले **(क्षुमन्तम्)** बहुत अन्नवाले को **(कृधि)** उत्पन्न करो और **(स्वपत्यस्य)** जिससे उत्तम सन्तान होते उस **(रायः)** देने योग्य धन को **(पतिम्)** पालने रखनेवाले को **(कृधि)** कीजिये॥५॥

भावार्थः-उसी के कुल से धन नाश नहीं होता जो और सुपात्रों के लिये संसार का उपकार करने को देता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति।
अदब्धो गोपाः उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि॥६॥१॥

सः। एना। अनीकेन। सुऽविदत्रः। अस्मे इति। यष्टा। देवान्। आऽयजिष्ठः। स्वस्ति। अदब्धः। गोपाः। उत। नः। परःऽपाः। अग्ने। द्युऽमत्। उत। रेवत्। दिदीहि॥६॥

पदार्थः-(सः) दाता। अत्र **सोऽचि लोप** इति सुलोपः। **(एना)** एनेन **(अनीकेन)** सेनासमूहेन सह **(सुविदत्रः)** सुष्ठु विज्ञाता दाता वा **(अस्मे)** अस्माकम् **(यष्टा)** सङ्गता **(देवान्)** दिव्यान् गुणान् विजिगीषकान् वीरान् वा **(आयजिष्ठः)** समन्तादतिशयितो यष्टा **(स्वस्ति)** सुखम् **(अदब्धः)** अहिंसितः **(गोपाः)** गवां पाता **(उत)** अपि **(नः)** अस्माकम् **(परस्पाः)** पारयिता **(अग्ने)** विद्वन् **(द्युमत्)** विज्ञानप्रकाशयुक्तम् **(उत)** अपि **(रेवत्)** बहुधनसहितम् **(दिदीहि)** देहि॥६॥

अन्वयः-हे अग्ने! यथा सोऽस्मे एनाऽनीकेन सुविदत्रो यष्टा आयजिष्ठोऽदब्धो गोपा नः परस्पा द्युमदुत रेवत् स्वस्ति ददात्युत देवान् सेवते तथा त्वमेतद्दिदीहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोत्तमया सेनया युक्तो राजा दुष्टाञ्जित्वा विदुषः सत्कृत्य प्रजाः संरक्ष्य सर्वेषामैश्वर्यं वर्द्धयति तथा सर्वैर्भवितव्यमिति॥६॥

अस्मिन् सूक्तेऽग्निद्विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति नवमं सूक्तं प्रथमो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के समान विद्वान्! जैसे **(सः)** वह देनेवाला **(अस्मे)** हमारे **(एना)** इस **(अनीकेन)** सेना समूह के साथ **(सुविदत्रः)** सुन्दर विज्ञान देने **(यष्टा)** और सब व्यवहारों की सङ्गति करने वाला अच्छा ज्ञानी वा दाता **(आ, यजिष्ठः)** सब ओर से अतीव यज्ञकर्त्ता **(अदब्धः)** न नष्ट हुआ **(गोपाः)** गोपाल **(नः)** हमको **(परस्पाः)** दुःखों से पार करनेवाला **(द्युमत्)** विज्ञान प्रकाशयुक्त **(उत)** और **(रेवत्)** बहुत धन सहित **(स्वस्ति)** सुख को देता है **(उत)** और **(देवान्)** दिव्य गुण वा अपना विजय चाहनेवाले वीरों को सेवते हैं, वैसे आप उक्त समस्त को **(दीदिहि)** दीजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे उत्तम सेना से युक्त राजा दुष्टों को जीत विद्वानों का सत्कार कर और प्रजा को अच्छे प्रकार रक्षा कर सबका ऐश्वर्य बढ़ाता है, वैसे सभों को होना चाहिये॥६॥

इस सूक्त में अग्नि के समान विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह नववां सूक्त और पहिला वर्ग समाप्त हुआ॥

जोहूत्र इति षड्चस्य दशमस्य सूक्तस्य गृत्समद ऋषिः। अग्निर्देवता। १, २, ६ विराट् त्रिष्टुप्। ३ त्रिष्टुप्। ४ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निविषय उपदिश्यते॥

अब छः ऋचावाले दशवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि विषय का उपदेश किया है॥

जोहूत्रो॑ अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समि॑द्धः।
श्रियं॑ वसा॑नो अमृतो॒ विचे॑ता॒ मर्मृ॑जेन्यः श्रवस्यः॑ स वा॒जी॥ १॥

जोहूत्रः॑। अग्निः। प्रथमः। पिताऽइ॑व। इळः। पदे। मनु॑षा। यत्। सम्ऽइ॑द्धः। श्रिय॑म्। वसा॑नः। अमृतः॑। विऽचे॑ताः। मर्मृजेन्यः॑। श्रवस्यः॑। सः। वा॒जी॥ १॥

पदार्थः-(**जोहूत्रः**) अतिशयेन सङ्गमनीयः (**अग्निः**) (**प्रथमः**) आदिमो विस्तीर्णगुणकर्मा (**पितेव**) पितृवत् (**इळः**) पृथिव्याः। अत्र क्विप् याडभावश्च। (**पदे**) तले स्थाने (**मनुषा**) मनुष्येण (**यत्**) यः (**समिद्धः**) प्रदीप्तः (**श्रियम्**) शोभाम् (**वसानः**) आच्छादकः (**अमृतः**) नाशरहितः (**विचेताः**) विगतं चेतो विज्ञानं यस्मात्स जडः (**मर्मृजेन्यः**) भृशं शोधकः (**श्रवस्यः**) अन्नेष्वसाधुः (**सः**) (**वाजी**) बहुवेगादिगुणयुक्तः॥ १॥

अन्वयः-हे मनुष्याः! शिल्पिभिर्यद्यो मनुषा पितेव प्रथम इळस्पदे जोहूत्रः समिद्धः श्रियं वसानोऽमृतो विचेता मर्मृजेन्यः श्रवस्यो वाज्यग्निः कार्येषु संप्रयुज्यते स युष्माभिरपि संप्रयोक्तव्यः॥ १॥

भावार्थः-अत्रोपमालङ्कारः। योऽग्निः पृथिव्यां प्रसिद्धः संप्रयुक्तः सन् धनप्रदः स्वरूपेण नित्यश्चेतनगुणरहितोऽतिवेगवानस्ति स सम्यक् प्रयुक्तः सन् पितृवत्संप्रयोजकान् पालयति॥ १॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**मनुषा**) मनुष्य से (**पितेव**) पिता के समान (**प्रथमः**) पहिला विस्तृत गुण कर्मवाला (**इळस्पदे**) पृथिवी तल पर (**जोहूत्रः**) अतीव सङ्ग करने अर्थात् कलाघरों में लगाने योग्य (**समिद्धः**) प्रज्वलित (**श्रियम्**) शोभा को (**वसानः**) ढापनेवाला (**अमृतः**) नाशरहित (**विचेताः**) जिससे चैतन्यपन विगत है अर्थात् जो जड़ (**मर्मृजेन्यः**) निरन्तर शुद्धि करनेवाला (**श्रवस्यः**) अन्नादि पदार्थों में उत्तम और (**वाजी**) बहुत वेगादि गुणों से युक्त (**अग्निः**) अग्नि शिल्पकार्यों में अच्छे प्रकार प्रयुक्त किया जाता है (**सः**) वह तुमको भी संयुक्त करना चाहिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अग्नि पृथिवी में प्रसिद्ध, शिल्पकार्य्यों के प्रयोग में अच्छे प्रकार लगाया हुआ, धन का देनेवाला, स्वरूप से नित्य, चेतनगुणरहित और अति वेगवान् है, वह अच्छे प्रकार प्रयोग किया हुआ पिता के तुल्य शिल्पीजनों को पालता है॥

अथ विदुषामग्निविद्याग्रहणमुपदिश्यते॥

अब विद्वानों को अग्निविद्या ग्रहण का उपदेश किया जाता है॥

श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः
श्यावा रथं वहतो रोहिता वोतारुषाहं चक्रे बिभृतः॥ २॥

श्रूयाः। अग्निः। चित्रऽभानुः। हवम्। मे। विश्वाभिः। गीःऽभिः। अमृतः। विऽचेताः। श्यावा। रथम्। वहतः। रोहिता। वा। उत। अरुषा। अह। चक्रे। बिऽभृतः॥ २॥

पदार्थः-(**श्रूयाः**) शृणुयाः (**अग्निः**) पावकः (**चित्रभानुः**) विचित्रदीप्तिः (**हवम्**) विद्योपदेशम् (**मे**) मम (**विश्वाभिः**) समग्राभिः (**गीर्भिः**) सुशिक्षितयुक्ताभिर्वाग्भिः (**अमृतः**) मृत्युरहितः (**विचेताः**) विविधचेतो ज्ञानं यस्मात् सः (**श्यावा**) प्राप्तिसाधकौ धारणाकर्षणाख्यावश्विनौ (**रथम्**) रमणीयं जगत् (**वहतः**) प्राप्रयतः (**रोहिता**) रक्तादिगुणविशिष्टौ (**वा**) (**उत**) (**अरुषा**) मर्मसु व्यापकौ (**अह**) (**चक्रे**) करोति (**बिभृतः**) यो विविधं बिभर्ति सः॥ २॥

अन्वयः-हे विद्वँस्त्वं यश्चित्रभानुरमृतो विचेता विभृत्रोऽग्निर्यस्य रथं सवितू रोहिता उताप्यरुषा श्यावा वहतो **[**वाह**]** तं शिल्पी चक्रे तद्धवं मे विश्वाभिर्गीर्भिश्श्रूयाः॥ २॥

भावार्थः-मनुष्या यस्माद्विद्युदादय उत्पद्यन्ते सर्वस्य जीवनं च भवति तस्याग्नेर्विद्यां सर्वेरुपायैर्गृह्णीयुः॥ २॥

पदार्थः-हे विद्वन्! आप जो (**चित्रभानुः**) चित्र-विचित्र दीप्तिवाला (**अमृतः**) मृत्युधर्मरहित (**विचेताः**) विविध प्रकार का ज्ञान जिससे होता है (**विभृत्रः**) और जो नाना प्रकार पदार्थों से धारण करनेवाला (**अग्निः**) अग्नि है, जिसके सम्बन्ध के (**रथम्**) रथ को सवितृमण्डलस्थ (**रोहिता**) ललामी आदि गुण के लिये (**उत**) और (**अरुषा**) मर्मस्थलों में व्याप्त होने और (**श्यावा**) सब विषयों की प्राप्ति करानेवाले धारण और आकर्षण गुण (**वहतः**) एक देश से दूसरे देश को पहुंचाते हैं (**वा**) अथवा (**अह**) निश्चय से उसको (**चक्रे**) शिल्पीजन बनाता है, उसकी विद्या के उपदेश को (**मे**) मेरी (**विश्वाभिः**) समस्त (**गीर्भिः**) वाणियों से (**श्रूयाः**) सुनिये॥ २॥

भावार्थः-मनुष्य जिससे बिजुली आदि पदार्थ उत्पन्न होते हैं, सबका जीवन भी होता है, उस अग्नि की विद्या को सब उपायों से ग्रहण करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भीः।
शिरिणायां चिदुक्तुना महोभिरपरीवृतो वसति प्रचेताः॥३॥

उत्तानायाम्। अजनयन्। सुऽसूतम्। भुवत्। अग्निः। पुरुऽपेशासु। गर्भीः। शिरिणायाम्। चित्। अक्तुना। महःऽभिः। अपरिऽवृतः। वसति। प्रऽचेताः॥३॥

पदार्थः-(**उत्तानायाम्**) उत्तान इव शयानायां पृथिव्याम् (**अजनयन्**) (**सुसूतम्**) सुष्ठु प्रसूतम् (**भुवत्**) भवति (**अग्निः**) विद्युत् (**पुरुपेशासु**) पुरूणि पेशानि रूपाणि यासु तासु ओषधीषु (**गर्भः**) गर्भ इव स्थितः (**शिरिणायाम्**) हिंसितायाम् (**चित्**) अपि (**अक्तुना**) रात्र्या (**महोभिः**) महद्भिर्लोकैः (**अपरिवृतः**) परितः सर्वतो नावृतः (**वसति**) (**प्रचेताः**) यः शयानान् प्रचेतयति सः॥३॥

अन्वयः-हे मनुष्या! योऽक्तुना महोभिश्चापरिवृतः प्रचेताः यं पुरुपेशासु सुसूतमृत्विजोऽजनयन् यं उत्तानायां शिरिणायां च गर्भ इव स्थिताग्निर्भुवद्वसति तमग्निं चित्प्रयुङ्ग्ध्वम्॥३॥

भावार्थः-हे मनुष्या! योऽग्निर्विद्यमानायां नष्टायां च पृथिव्या गर्भरूपो विद्यते तद्विद्यां जानीत॥३॥

पदार्थः-हे मनुष्यो! जो (**अक्तुना**) रात्रि और (**महोभिः**) बड़े-बड़े लोकों के साथ (**अपरिवृतः**) सब ओर से न स्वीकार किया हुआ (**प्रचेताः**) जो सोते प्राणियों को प्रबोधित कराता, ऋतु-ऋतु में यज्ञ करनेवाले जन जिस (**पुरुपेशासु**) बहुत रूपोंवाली ओषधियों में (**सुसूतम्**) सुन्दरता से उत्पन्न हुए अग्नि को (**अजनयन्**) प्रकट करते, जो (**उत्तानायाम्**) उत्ताने के समान सोती सी और (**शिरिणायाम्**) नष्ट हुई पृथिवी में (**गर्भः**) गर्भ के समान स्थित (**अग्निः**) अग्नि बिजुलीरूप (**भुवत्**) होता और (**वसति**) निवास करता है, उस अग्नि को (**चित्**) निश्चय करके प्रयुक्त करो अर्थात् कलाघरों में लगाओ॥३॥

भावार्थः-हे मनुष्यो! जो अग्नि विद्यमान और नष्ट हुई पृथिवी में गर्भरूप विद्यमान है, उसी की विद्या को जानो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम्॥४॥

जिघर्मि। अग्निम्। हविषा। घृतेन। प्रतिऽक्षियन्तम्। भुवनानि। विश्वा। पृथुम्। तिरश्चा। वयसा। बृहन्तम्। व्यचिष्ठम्। अन्नैः। रभसम्। दृशानम्॥४॥

पदार्थः-(जिघर्मि) **(अग्निम्)** **(हविषा)** होतुमर्हेण सुगन्ध्यादियुक्तेन **(घृतेन)** आज्येन **(प्रतिक्षियन्तम्)** पदार्थं पदार्थं प्रतिवसन्तम् **(भुवनानि)** भवन्ति भूतानि येषु तानि **(विश्वा)** समग्राणि **(पृथुम्)** विस्तीर्णम् **(तिरश्चा)** तिरश्चीनेन **(वयसा)** कमनीयेन जीवनेन सह **(बृहन्तम्)** वर्द्धमानम् **(व्यचिष्ठम्)** अतिशयेन व्याप्तम् **(अन्नैः)** पृथिव्यादिभिः सह **(रभसम्)** वेगवन्तम् **(दृशानम्)** दृश्यमानं दर्शयितारं वा॥४॥

अन्वयः-हे विद्वन्! यथा विश्वा भुवनानि प्रतिक्षियन्तं तिरश्चा वयसा सह पृथुं बृहन्तं व्यचिष्ठमन्नैस्सह रभसं दृशानमग्निं हविषा घृतेन सह जिघर्मि तथैतं त्वं कुरु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या सर्वमूर्त्तद्रव्यस्थां विद्युतसाधनैः संगृह्यात्र सुगन्ध्यादिद्रव्यं जुह्वति तेऽनन्तं सुखमाप्नुवन्ति॥४॥

पदार्थः-हे विद्वन्! जैसे **(विश्वा)** समग्र **(भुवनानि)** जिनमें प्राणी उत्पन्न होते हैं, उन लोकों और **(प्रतिक्षियन्तम्)** पदार्थ-पदार्थ के प्रति वसते हुए **(तिरश्चा)** तिरछे सब पदार्थों में वांकेपन से रहनेवाले **(वयसा)** मनोहर जीवन के साथ **(पृथुम्)** बढ़े हुए **(बृहन्तम्)** वा बढ़ते हुए **(व्यचिष्ठम्)** अतीव सब पदार्थों में व्याप्त और **(अन्नैः)** पृथिव्यादिकों के साथ **(रभसम्)** वेगवान् **(दृशानम्)** देखा जाता वा अपने से अन्य पदार्थों को दिखानेवाले **(अग्निम्)** अग्नि को मैं **(हविषा)** होमने योग्य सुगन्धि आदि पदार्थ वा **(घृतेन)** घी से मैं **(जिघर्मि)** प्रदीप्त करता हूं, वैसे आप भी कीजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य समस्त मूर्त्तिमान् पदार्थों में ठहरे हुए बिजुलीरूप अग्नि को साधनों से अच्छे प्रकार ग्रहण कर इसमें सुगन्धि आदि पदार्थ का होम करते हैं, वे अनन्त सुख को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः॥५॥

आ। विश्वतः। प्रत्यञ्चम्। जिघर्मि। अरक्षसा। मनसा। तत्। जुषेत। मर्यऽश्रीः। स्पृहयत्ऽवर्णः। अग्निः। न। अभिऽमृशे। तन्वा। जर्भुराणः॥५॥

पदार्थः-(आ) समन्तात् **(विश्वतः)** सर्वतः **(प्रत्यञ्चम्)** प्रत्यञ्चन्तम् **(जिघर्मि)** **(अरक्षसा)** अदुष्टभावेन **(मनसा)** विज्ञानेन **(तत्)** तम् **(जुषेत)** सेवेत **(मर्यश्रीः)** मर्याणां श्रीः शोभा यस्मात् सः **(स्पृहयद्वर्णः)** स्पृहयन् वर्णो यस्य सः **(अग्निः)** पावकः **(न)** निषेधे **(अभिमृशे)** अभिसहे **(तन्वा)** **(जर्भुराणः)** भृशं धरन्॥५॥

अन्वयः-हे विद्वन्! भवान् यथाऽहमरक्षसा मनसा यं प्रत्यञ्चं विश्वत आजिघर्मि यो मर्यश्रीः स्पृहयद्वर्णस्तन्वा जर्भुराणोऽग्निरस्ति तत्तं नाभिमृशे तथा जुषेत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये शुद्धान्तःकरणाः सुशोभयितारं घृताद्याहुतं सर्वस्य धर्त्तारं सर्वरूपप्रकाशकमसोढव्यमग्निं साध्नुवन्ति ते श्रीमन्तो जायन्ते॥५॥

पदार्थः-हे विद्वान्! आप जैसे मैं **(अरक्षसा)** उत्तम भाव से वा **(मनसा)** विज्ञान से जिस **(प्रत्यञ्चम्)** प्रत्येक पदार्थ को प्राप्त होते हुए अग्नि को **(विश्वतः)** सब ओर से **(आ, जिघर्मि)** अच्छे प्रकार प्रदीप्त करता हूं और **(मर्यश्रीः)** जिससे मरणधर्मा प्राणियों की शोभा और जो **(स्पृहयद्वर्णः)** कांक्षा सी करता हुआ जिसका वर्ण **(तन्वा)** विस्तृत शरीर से **(जर्भुराणः)** निरन्तर पदार्थों को धारण करता हुआ **(अग्निः)** अग्नि विद्यमान है **(तत्)** उसको **(न, अभिमृशे)** आगे नहीं सह सकता हूं, वैसे इसका **(जुषेत)** सेवन करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो शुद्धान्तःकरण जन सुन्दर शोभा करनेवाले और घृतादि आहुतियों के ग्राहक, सबके धारण करनेवाले, सब रूपों के प्रकाशक और न सहने योग्य अग्नि को सिद्ध करते हैं, वे श्रीमान् होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि॥६॥२॥

ज्ञेयाः। भागम्। सहसानः। वरेण। त्वाऽदूतासः। मनुऽवत्। वदेम। अनूनम्। अग्निम्। जुह्वा। वचस्या। मधुऽपृचम्। धनऽसाः। जोहवीमि॥६॥

पदार्थः-(ज्ञेयाः) ज्ञातुं योग्याः **(भागम्)** भजनीयम् **(सहसानः)** सहमानः **(वरेण)** श्रेष्ठेन **(त्वादूतासः)** त्वं दूतो येषान्ते **(मनुवत्)** विद्वद्वत् **(वदेम)** उपदिशेम **(अनूनम्)** ऊनतारहितम् **(अग्निम्)** पावकम् **(जुह्वा)** ग्रहणसाधनया क्रियया **(वचस्या)** वचनैः सुसाध्या **(मधुपृचम्)** मधुरादिसम्बन्धिनम् **(धनसाः)** ये धनानि सनन्ति विभजन्ति ते **(जोहवीमि)** भृशं स्वीकरोमि॥६॥

अन्वयः-हे विद्वन्! वरेण भागं सहसानस्त्वं यथाऽहं वचस्या जुह्वा मधुपृचमनूनमग्निं जोहवीमि तथा त्वं गृहाण यथा त्वादूतासो ज्ञेया धनसा विद्वांसो मनुवद्वदेत्तमुपदिशेयुस्तथैतं वयमपि वदेम॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथाप्ता विद्वांसोऽग्न्यादिपदार्थविद्यां विदित्वाऽन्येषां हितायोपदिशन्ति तथा वयमप्येतद्विद्यामुपदिशेम॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति दशमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! **(वरेण)** श्रेष्ठ व्यवहार से **(भागम्)** सेवने योग्य पदार्थ को **(सहसानः)** सहते हुए आप जैसे मैं **(वचस्या)** वचनों में और **(जुह्वा)** ग्रहण करने में उत्तम क्रिया से **(मधुपृचम्)** मधुरादि पदार्थ सम्बन्धी **(अनूनम्)** बहुत **(अग्निम्)** अग्नि को **(जोहवीमि)** निरन्तर स्वीकार करता हूँ, वैसे तुम ग्रहण करो, जैसे **(त्वादूतासः)** तुम जिन महात्माओं के दूत हो **(ज्ञेयाः)** वे जानने योग्य **(धनसाः)** धनादि पदार्थों का विभाग करनेवाले विद्वान् जन **(मनुवत्)** विद्वान् के समान इसको उपदेश करें, वैसे इसको हम लोग भी **(वदेम)** कहें॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे आप्त विद्वान् जन अग्न्यादि पदार्थविद्या को जानकर औरों के हित के लिये उपदेश करते हैं, वैसे हम लोग भी विद्या का उपदेश करें॥६॥

इस सूक्त में अग्नि और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह दसवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

श्रुधीत्येकविंशर्चस्यैकादशस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, ८, १०, १३, १९, २० पङ्क्तिः। २, ९ भुरिक् पङ्क्तिः। ३, ४, ६, ११, १२, १४, १८ निचृत् पङ्क्तिः। ७ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५, १६ भुरिक् बृहती। १७ स्वराट् बृहती। १५ बृहती छन्दः। मध्यमः स्वरः। २१ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजधर्ममाह॥

अब इक्कीस ऋचावाले ग्यारहवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में राजधर्म का वर्णन करते हैं॥

श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम्।
इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः॥ १॥

श्रुधि। हवम्। इन्द्र। मा। रिषण्यः। स्याम। ते। दावने। वसूनाम्। इमाः। हि। त्वाम्। ऊर्जः। वर्धयन्ति। वसुऽयवः। सिन्धवः। न। क्षरन्तः॥ १॥

पदार्थः-(श्रुधि) शृणु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(हवम्)** शास्त्रबोधजन्यं शब्दम् **(इन्द्र)** विद्युदिव वर्त्तमान **(मा)** निषेधे **(रिषण्यः)** हिंस्याः **(स्याम)** भवेम **(ते)** तव **(दावने)** दानाय **(वसूनाम्)** प्रथमकल्पानां विदुषां पृथिव्यादीनां वा **(इमाः)** वक्ष्यमाणाः **(हि)** खलु **(त्वाम्)** **(ऊर्जः)** पराक्रमा अन्नादयो वा **(वर्द्धयन्ति)** **(वसूयवः)** आत्मनो वसूनीच्छन्तः **(सिन्धवः)** समुद्राः **(न)** इव **(क्षरन्तः)**॥ १॥

अन्वयः-हे इन्द्र! यं त्वां वसूनां हीमा ऊर्जो वसूयवश्च क्षरन्तः सिन्धवो न वर्द्धयन्ति यस्य ते दावने वयं स्याम स त्वमस्मान् मा रिषण्यो हवञ्च श्रुधि॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा समुद्रः जलेन सर्वं वर्द्धयन्ति तथा प्रधानैः पुरुषैः स्वाश्रिताः सर्वे दानेन मानेन च वर्द्धनीयाः॥ १॥

पदार्थः-हे **(इन्द्र)** बिजुली के समान प्रचण्ड प्रतापवाले राजन्! जिन **(त्वा)** आपको **(वसूनाम्)** प्रथम कक्षा के विद्वान् वा पृथिवी आदि के **(हि)** निश्चय के साथ **(इमाः)** ये **(ऊर्जः)** पराक्रम वा अन्नादि पदार्थ और **(वसूयवः)** अपने को धनों की इच्छा करनेवाले **(क्षरन्तः)** कम्पित करते और चेष्टावान् करते हुए **(सिन्धवः)** समुद्रों के **(न)** समान **(वर्द्धयन्ति)** बढ़ाते हैं, जिन **(ते)** आपके **(दावने)** दान के लिये हम **(स्याम)** हों सो आप हम लोगों को **(मा, रिषण्यः)** मत मारिये और **(हवम्)** शास्त्रबोधजन्य शब्द **(श्रुधि)** सुनिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे समुद्र जल से सबको बढ़ाता है, वैसे प्रधान पुरुषों को चाहिये कि अपने आश्रित सब जनों को दान और मान से बढ़ावें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः।
अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः॥२॥

सृजः। महीः। इन्द्र। याः। अपिन्वः। परिऽस्थिताः। अहिना। शूर। पूर्वीः। अमर्त्यम्। चित्। दासम्। मन्यमानम्। अव। अभिनत्। उक्थैः। ववृधानः॥२॥

पदार्थः-(**सृजः**) उत्पादय (**महीः**) महत्यो वाचः (**इन्द्र**) सूर्यवद्वर्त्तमान (**याः**) (**अपिन्वः**) पिन्व (**परिष्ठिताः**) परितः स्थिताः (**अहिना**) मेघेन (**शूर**) निर्भय (**पूर्वीः**) पूर्वं भूताः (**अमर्त्यम्**) आत्मना मरणधर्मरहितम् (**चित्**) अपि (**दासम्**) सेवकम् (**मन्यमानम्**) (**अव**) (**अभिनत्**) भिनत्ति (**उक्थैः**) उत्तमवचनैः (**वावृधानः**) वर्द्धमानः॥२॥

अन्वयः-हे शूर इन्द्र! यथा सूर्योऽहिना परिष्ठिताः पूर्वीरपो वाऽभिनत् तथोक्थैर्ववृधानस्त्वं या महीः सृजस्ताभिश्चिदमर्त्यं मन्यमानं दासमपिन्वः॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवत्सुवाचो वर्षन्ति सेवकान् प्रसादयन्ति ते सुप्रतिष्ठता भवन्ति॥२॥

पदार्थः-हे (**शूर**) निर्भय (**इन्द्र**) सूर्य के समान वर्त्तमान! जैसे सूर्य (**अहिना**) मेघ ने (**परिष्ठिताः**) सब ओर से स्थित किये हुए वा (**पूर्वीः**) पहिले सञ्चित हुए जलों को (**अवाभिनत्**) छिन्न-भिन्न करता है, वैसे (**उक्थैः**) उत्तम वचनों से (**ववृधानः**) बढ़े हुए आप (**याः**) जो (**महीः**) बड़ी-बड़ी वाणी हैं, उनको (**सृजः**) उत्पादन कीजिये, उनसे (**चित्**) ही (**अमर्त्यम्**) आत्मा से मरणधर्मरहित (**मन्यमानम्**) माननेवाले (**दासम्**) सेवक को (**अपिन्वः**) तृप्त कीजिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान उत्तम वाणियों को वर्षते हैं और सेवकों को प्रसन्न करते हैं, वे उत्तम प्रतिष्ठित होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उक्थेष्विन्नु शूर येषु चाकन् स्तोमेष्विन्द्र रुद्रियेषु च।

तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः॥३॥

उक्थेषु। इत्। नु। शूर। येषु। चाकन्। स्तोमेषु। इन्द्र। रुद्रियेषु। च। तुभ्य। इत्। एताः। यासु। मन्दसानः। प्र। वायवे। सिस्रते। न। शुभ्राः॥३॥

पदार्थः-(उक्थेषु) वक्तुं योग्येषु वाक्येषु **(इत्)** एव **(नु)** सद्यः **(शूर)** तमो हिंसकस्सवितेव शत्रुहिंसक **(येषु)** **(चाकन्)** कामयते **(स्तोमेषु)** स्तुवन्ति सर्वा विद्या येषु तेषु **(इन्द्र)** प्रकाशमान **(रुद्रियेषु)** रुद्राणां प्राणानां प्रतिपादकेषु **(च)** **(तुभ्य)** तुभ्यम्। छान्दसो मलोपः। **(इत्)** **(एताः)** **(यासु)** क्रियासु **(मन्दसानः)** प्रशंसितः **(प्र)** **(वायवे)** **(सिस्रते)** सरन्ति **(न)** इव **(शुभ्राः)** विद्युतः॥३॥

अन्वयः-हे शूरेन्द्र! येषु स्तोमेषु रुद्रियेषूक्थेषु स भवान्नु चाकन् यासु च मन्दसान इदसि तासु सर्वासु तुभ्येदेता वायवे शुभ्राः प्रसिस्रते न शोभयन्तु॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा वायुना सह विद्युत्प्रसरति तथा विद्यया सह पुरुषः सुखेषु विहरति॥३॥

पदार्थः-हे **(शूर)** अन्धकार को दूर करनेवाले सूर्य के समान शत्रुदल के नष्ट करनेवाले **(इन्द्र)** प्रकाशमान राजन्! **(येषु)** जिन **(स्तोमेषु)** स्तुति विभागों वा **(रुद्रियेषु)** प्राणों की प्रतिपादना करनेवालों वा **(उक्थेषु)** कहने योग्य वाक्यों में आप **(नु)** शीघ्र **(चाकन्)** कामना करते हो **(यासु, च)** और जिन क्रियाओं में **(मन्दसानः)** प्रशंसित **(इत्)** ही हैं, उन सभी में **(तुभ्य, इत्)** आप ही के लिये जैसे **(एताः)** ये **(वायवे)** पवन के अर्थ **(शुभ्राः)** सुन्दर शोभायुक्त बिजुली **(प्रसिस्रते)** पसरती फैलती हैं **(न)** वैसे सुशोभित हों॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पवन के साथ बिजुली फैलती है, वैसे विद्या के साथ पुरुष सुखों के बीच विहार करता है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः॥४॥

शुभ्रम्। नु। ते। शुष्मम्। वर्धयन्तः। शुभ्रम्। वज्रम्। बाह्वोः। दधानाः। शुभ्रः। त्वम्। इन्द्र। वावृधानः। अस्मे इति। दासीः। विशः। सूर्येण। सह्याः॥४॥

पदार्थः-(शुभ्रम्) भास्वरम् **(नु)** सद्यः **(ते)** तव **(शुष्मम्)** बलम् **(वर्द्धयन्तः)** उन्नयन्तः **(शुभ्रम्)** स्वच्छम् **(वज्रम्)** शस्त्रसमूहम् **(बाह्वोः)** करयोः **(दधानाः)** **(शुभ्रः)** शुद्धः **(त्वम्)** **(इन्द्र)** परमैश्वर्यप्रापक **(ववृधानः)** वर्द्धमानः **(अस्मे)** अस्माकम् **(दासीः)** सेविकाः **(विशः)** प्रजाः **(सूर्येण)** **(सह्याः)** सोढुं योग्याः॥४॥

अन्वयः-हे इन्द्र सभेश! ववृधानः शुभ्रस्त्वमस्मे दासीर्विशः सूर्येण सह्या दीप्तय इव सम्पादय यस्य ते शुभ्रं शुष्मन्नु वर्द्धयन्तो बाह्वोः शुभ्रं वज्रं दधाना भृत्याः सन्ति तैस्सर्वतः प्रजा वर्द्धय॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सततं राज्यं वर्द्धयितुं क्षमाः शस्त्रास्त्रप्रक्षेपकुशलाः प्रधानान् पुरुषानुन्नयन्ति ते सद्यः प्राधान्यं प्राप्नुवन्ति॥४॥

पदार्थः-हे **(इन्द्रः)** परम ऐश्वर्य की प्राप्ति करानेवाले सभापति! **(ववृधानः)** बढ़े हुए **(शुभ्रः)** शुद्ध **(त्वम्)** आप **(अस्मे)** हमारी **(दासीः)** सेवा करनेवाली **(विशः)** प्रजा **(सूर्येण)** सूर्यमण्डल के साथ **(सह्याः)** सहने योग्य दीप्तियों के समान सम्पन्न करो। जिन **(ते)** आपका **(शुभ्रम्)** दीप्तिमान् **(शुष्मम्)** बल **(नु)** शीघ्र **(वर्द्धयन्तः)** बढ़ाते हुए अर्थात् उन्नत करते हुए **(बाह्वोः)** भुजाओं में **(शुभ्रम्)** स्वच्छ निर्मल **(वज्रम्)** शस्त्रसमूह को **(दधानाः)** धारण किये हुए भृत्य हैं, उनके सब ओर से प्रजा की वृद्धि करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो निरन्तर राज्य के बढ़ाने को समर्थ और शस्त्र तथा अस्त्र चलाने में कुशल प्रधान पुरुषों को उन्नति देते हैं, वे शीघ्र प्राधान्य को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

गुहा॑ हि॒तं गुह्यं॑ गू॒ळ्हम॒प्स्वपी॑वृतं मा॒यिनं॑ क्षि॒यन्त॑म्।
उ॒तो अ॒पो द्यां त॑स्त॒भ्वांस॒महि॒न्नहिं॑ शूर वी॒र्येण॥५॥३॥

गुहा॑। हि॒तम्। गुह्य॑म्। गू॒ळ्हम्। अ॒प्ऽसु। अपि॑ऽवृतम्। मा॒यिन॑म्। क्षि॒यन्त॑म्। उ॒तो इति॑। अ॒पः। द्याम्। त॒स्त॒भ्वांस॑म्। अहन्॑। अहि॑म्। शू॒र॒। वी॒र्येण॥५॥

पदार्थः-(गुहा) गुहायाम् **(हितम्)** धृतम् **(गुह्यम्)** गोप्तुं योग्यम् **(गूढम्)** गुप्तम् **(अप्सु)** जलेषु **(अपीवृतम्)** आच्छादितम् **(मायिनम्)** मायाविनम् **(क्षियन्तम्)** निवसन्तम् **(उतो)** अपि **(अपः)** जलानि **(द्याम्)** प्रकाशम् **(तस्तभ्वांसम्)** स्तम्भितवन्तम् **(अहन्)** हन्ति **(अहिम्)** मेघम् **(शूर)** निर्भय **(वीर्येण)** पराक्रमेण॥५॥

अन्वयः-हे शूर! यथाऽप्स्वपीवृतं गूढमप उतो द्यां तस्तभ्वांसमहिं सूर्योऽहँस्तथा वीर्य्येण गुहा हितं गुह्यं क्षियन्तं मायिनं हन्याः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सर्य्योऽन्तरिक्षस्थमप्सु शयानं मेघं हत्वा सर्वाः प्रजाः पुष्णाति तथा राजा कपटे वर्त्तमानमधर्मिणं शत्रुं भित्वा प्रजाः सुखयेत्॥५॥

पदार्थः-हे (**शूर**) निर्भय राजन्! जैसे (**अप्सु**) जलों में (**अपीवृतम्**) ढपे हुए (**गूढम्**) गुप्त पदार्थ को (**अपः**) और जलों को (**उतो**) तथा (**द्याम्**) प्रकाश को (**तस्तभ्वांसम्**) रोके हुए (**अहिम्**) मेघ को सूर्यमण्डल (**अहन्**) हनता है, वैसे (**वीर्येण**) पराक्रम से (**गुहा**) गुप्त स्थान में (**हितम्**) धरे अर्थात् हित (**गुह्यम्**) गुप्त करने योग्य (**क्षियन्तम्**) निरन्तर वसते हुए (**मायिनम्**) मायावी शत्रुजन को मारो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य अन्तरिक्षस्थ जलों में सोते हुए मेघ को हन के सब प्रजा को पुष्ट करता है, वैसे राजा कपट के बीच वर्त्तमान अधर्मी शत्रुजन को छिन्न-भिन्न कर प्रजा को सुखी करे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तवा॒ नु त॑ इन्द्र पू॒र्व्या म॒हान्यु॒त स्त॑वाम॒ नूत॑ना कृ॒तानि॑।
स्तवा॒ वज्रं॑ बा॒ह्वो॒रु॒शन्तं॒ स्तवा॒ हरी॒ सूर्य॑स्य के॒तू॥६॥

स्तव॑। नु। ते॒। इ॒न्द्र॒। पू॒र्व्या। म॒हानि॑। उ॒त। स्त॒वा॒म॒। नूत॑ना। कृ॒तानि॑। स्त॑व। वज्र॑म्। बा॒ह्वो॒रि॒। उ॒शन्त॑म्। स्त॑व। हरी॒ इति॑। सूर्य॑स्य। के॒तू इति॑॥६॥

पदार्थः-(**स्तव**) स्तवाम। अत्र विकरणव्यत्ययेन शप् पुरुषवचनव्यत्ययश्च, सर्वत्र **द्व्यचोऽत-स्तिङ** इति दीर्घः। (**नु**) शीघ्रम् (**ते**) तव (**इन्द्र**) प्रशंसया युक्त (**पूर्व्या**) प्राचीनानि (**महानि**) पूजनीयानि बृहत्तमानि (**उत**) अपि (**स्तवाम**) प्रशंसेम (**नूतना**) नवीनानि (**कृतानि**) अनुष्ठितानि (**स्तव**) स्तवाम। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वज्रम्**) शस्त्रास्त्रसमूहम् (**बाह्वोः**) भुजयोः (**उशन्तम्**) कामयमानम् (**स्तव**) स्तवाम। अत्रापि दीर्घः। (**हरी**) धारणाकर्षणकर्माणौ (**सूर्यस्य**) सवितुः (**केतू**) किरणौ॥६॥

अन्वयः-हे इन्द्र! वयं ते पूर्व्या महानि नु स्तवोत नूतना कृतानि स्तवाम बाह्वोर्वज्रमुशन्तं त्वां स्तव सूर्यस्य केतू इव तव हरी स्तव॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरतीतवर्त्तमानैराप्तैर्यानि धर्म्याणि कर्माणि कृतानि वा क्रियन्ते तान्येवेतरैरनुष्ठेयानि॥६॥

पदार्थः-हे **(इन्द्र)** प्रशंसायुक्त राजन्! हम लोग **(ते)** आपके **(पूर्व्या)** प्राचीन **(महानि)** प्रशंसनीय बड़े-बड़े कामों की **(नु)** शीघ्र **(स्तव)** स्तुति अर्थात् प्रशंसा करें **(उत)** और **(नूतना)** नवीन **(कृतानि)** किये हुओं की **(स्तवाम)** प्रशंसा करें। तथा **(बाह्वोः)** भुजाओं में **(वज्रम्)** शस्त्र और अस्त्रों की **(उशन्तम्)** चाहना करते हुए आपकी **(स्तव)** स्तुति प्रशंसा करें तथा **(सूर्यस्य)** सूर्य की **(केतू)** किरणों के समान जो **(हरी)** धारणाकर्षणगुणयुक्त कर्मों की **(स्तव)** प्रशंसा करें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। व्यतीत और वर्त्तमान आप्त धर्मात्मा सज्जनों ने जो धर्मयुक्त काम किये वा करते हैं, उन्हीं का अनुष्ठान और जनों को भी करना चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हरी॒ नु त॑ इन्द्र वा॒जय॑न्ता घृत॒श्चुत॑ं स्वा॒रम॑स्वार्ष्टाम्।
वि सम॒ना भूमि॑रप्रथि॒ष्टारं॑स्त॒ पर्व॑तश्चित् स॒रिष्यन्॥७॥

हरी॒ इति॑। नु। ते॒। इ॒न्द्र॒। वा॒जय॑न्ता। घृ॒त॒ऽश्चुत॑म्। स्वा॒रम्। अ॒स्वा॒र्ष्टा॒म्। वि। स॒म॒ना। भूमि॑ः। अ॒प्र॒थि॒ष्ट॒। अरं॑स्त। पर्व॑तः। चि॒त्। स॒रि॒ष्यन्॥७॥

पदार्थः-**(हरी)** हरणशीलौ किरणौ **(नु)** सद्यः **(ते)** तव **(इन्द्र)** सूर्यवद्वर्त्तमान **(वाजयन्ता)** गमयन्तौ **(घृतश्चुतम्)** उदकात् प्राप्तम् **(स्वारम्)** उपतापं शब्दं वा **(अस्वार्ष्टाम्)** शब्दयन्तः **(वि)** **(समना)** समनानि संग्रामान् **(भूमिः)** पृथिवीव **(अप्रथिष्ट)** प्रथताम् **(अरंस्त)** रमताम् **(पर्वतः)** मेघः **(चित्)** इव **(सरिष्यन्)** गमिष्यन्॥७॥

अन्वयः-हे इन्द्र! यस्य ते तव घृतश्चुतं स्वारं वाजयन्ता सूर्यस्य हरी इव विद्याविनयावस्वार्ष्टांस्ताभ्यां सह भूमिरिव त्वं नु व्यप्रथिष्टारंस्त सरिष्यन् पर्वतश्चिदिव समना विजयस्व॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये राजपुरुषाः सूर्यवत्प्रजानामुपकारका मेघवदानन्दप्रदा विशालबलाः सन्ति त एव शत्रून् विजेतुं शक्नुवन्ति॥७॥

पदार्थः-हे **(इन्द्र)** सूर्य के समान प्रतापी राजन्! जिन **(ते)** आपके **(घृतश्चुतम्)** जल से प्राप्त हुए **(स्वारम्)** उपताप वा शब्द को **(वाजयन्ता)** चलते हुए सूर्य के **(हरी)** हरणशील किरणों

के समान विद्या और विनय को जो **(अस्वार्ष्टाम्)** शब्दायमान करते अर्थात् व्यवहार में लाते उनके साथ **(भूमिः)** भूमि के समान आप **(नु)** शीघ्र **(वि, अप्रथिष्ट)** प्रख्यात हूजिये और **(अरंस्त)** सुख में रमण कीजिये तथा **(सरिष्यन्)** गमन करनेवाले होते हुए **(पर्वतः)** मेघ के **(चित्)** समान **(समना)** संग्राम को जीतो॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजपुरुष सूर्य के समान प्रजाजनों के उपकार करने वा मेघ के समान आनन्द देने और उत्तम बलवाले हैं, वे ही शत्रुओं को जीत सकते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि पर्वतः सादयप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान्।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि॥८॥

नि। पर्वतः। सादि। अप्रऽयुच्छन्। सम्। मातृऽभिः। वावशानः। अक्रान्। दूरे। पारे। वाणीम्। वर्धयन्तः। इन्द्रऽइषिताम्। धमनिम्। पप्रथन्। नि॥८॥

पदार्थः-(**नि**) नितराम् (**पर्वतः**) मेघ इव (**सादि**) सम्पाद्यते (**अप्रयुच्छन्**) प्रमादमकुर्वन् (**सम्**) (**मातृभिः**) मान्यकर्त्रीभिः (**वावशानः**) कामयमानः (**अक्रान्**) कुर्वन्ति (**दूरे**) विप्रकृष्टदेशे (**पारे**) समुद्रभूमिपरभागे (**वाणीम्**) सुशिक्षितां वाचम् (**वर्द्धयन्तः**) (**इन्द्रेषिताम्**) इन्द्रेण परमेश्वरेण प्रेषिताम् (**धमनिम्**) वेदवाणीम्। **धमनिरिति वाङ्नामसु पठितम्।** (निघं० १.११)। (**पप्रथन्**) विस्तारयेयुः (**नि**) नित्यम्॥८॥

अन्वयः-यो मातृभिर्वावशानोऽप्रयुच्छन् पर्वतइव विद्वद्भिः संसादि तेन सह ये दोषान् दूरे कुर्वन्तो वाणीं पारे वर्द्धयन्तोऽन्यान् विदुषो न्यक्रांस्त इन्द्रेषितां धमनिं नि पप्रथन्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यान् सन्तानान् मातरः सुशिक्षया विद्यया प्रमादरहितान् कृत्वा वर्द्धयन्ति, ते सुखानि प्राप्य सर्वतो वर्द्धन्ते॥८॥

पदार्थः-जो (**मातृभिः**) मान करनेवाली माता आदि से (**वावशानः**) कामना किया जाता और (**अप्रयुच्छन्**) प्रमाद न करता हुआ (**पर्वतः**) मेघ के समान विद्वानों ने (**सम्, सादि**) अच्छे प्रकार सिद्ध किया उसके साथ जो दोषों को (**दूरे**) दूर करते हुए (**वाणीम्**) सुन्दर शिक्षायुक्त वाणी को (**पारे**) समुद्र की भूमियों के परभाग में (**वर्द्धयन्तः**) बढ़ाते हुए औरों को विद्वान् (**अक्रान्**) करते हैं, वे (**इन्द्रेषिताम्**) परमेश्वर की भेजी हुई वेदवाणी का (**नि, पप्रथन्**) निरन्तर विस्तार करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिन सन्तानों को माता उत्तम शिक्षा और विद्या से प्रमादरहित कर बढ़ाती हैं, वे सुखों को प्राप्त होकर सब ओर से बढ़ते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रो॑ म॒हां सिन्धु॑मा॒शया॑नं माया॒विनं॑ वृ॒त्रम॑स्फुर॒न्निः।
अरे॑जेतां॒ रोद॑सी भिया॒ने कनि॑क्रदतो॒ वृष्णो॑ अस्य॒ वज्रा॑त्॥९॥

इन्द्रः॑। म॒हाम्। सिन्धु॑म्। आ॒ऽशया॑नम्। मा॒या॒ऽविन॑म्। वृ॒त्रम्। अ॒स्फु॒र॒त्। निः। अरे॑जेताम्। रोद॑सी॒ इति॑। भि॒या॒ने इति॑। कनि॑क्रदतः। वृष्णः॑। अ॒स्य॒। वज्रा॑त्॥९॥

पदार्थः-(**इन्द्रः**) सूर्यः (**महाम्**) महत्तमम् (**सिन्धुम्**) समुद्रम् (**आशयानम्**) आस्थितम् (**मायाविनम्**) दुष्टप्रज्ञम् (**वृत्रम्**) मेघम् (**अस्फुरत्**) वर्द्धयति (**निः**) नितराम् (**अरेजेताम्**) कम्पेते (**रोदसी**) द्यावापृथिव्यौ (**भियाने**) भयं प्राप्ताविव (**कनिक्रदतः**) शब्दयतः (**वृष्णः**) वर्षकस्य (**अस्य**) वर्त्तमानस्य (**वज्रात्**) विद्युत्पातशब्दात्॥९॥

अन्वयः-हे सभेश राजन्! यथेन्द्रः सूर्य्यो महां सिन्धुमाशयानं वृत्रं निरस्फुरत्, यथाऽस्य वृष्णो वज्राद्भियाने इव रोदसी अरेजेतां कनिक्रदतस्तथा त्वं मायाविनं भिन्धि दुष्टान् कम्पयस्व रोदय च॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजपुरुषा! यथा सूर्यः स्वकिरणैः सिन्धुजलं मेघमण्डलं गमयित्वा वर्षयित्वा च प्रजाः सुखयति तथा भवन्तो विद्यया समुन्नताः प्रजाः सम्पाद्य सुखयेयुः विद्युच्छब्दश्रवणात् सर्वे बिभ्यति तथा न्यायाचरणोपदेशाद् दुष्टाचारात् सर्वे बिभ्यतु॥९॥

पदार्थः-हे सभापति राजन्! जैसे (**इन्द्रः**) सूर्यलोक (**महाम्**) अत्यन्त बड़े (**सिन्धुम्**) अन्तरिक्ष समुद्र को (**आशयानम्**) प्राप्त (**वृत्रम्**) मेघ को (**निः, अस्फुरत्**) निरन्तर बढ़ाता है वा जैसे (**अस्य**) इस (**वृष्णः**) वर्षनेवाले मेघ की (**वज्रात्**) गिरी हुई बिजुली के शब्द से (**भियाने**) डरपे हुए से (**रोदसी**) आकाश और पृथिवी (**अरेजेताम्**) कंपते और (**कनिक्रदतः**) शब्द करते हैं, वैसे आप (**मायाविनम्**) मायावी दुष्ट बुद्धि पुरुष को विदारो, दुष्टों को कंपाओ और रुलाओ॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजपुरुषो! जैसे सूर्य अपनी किरणों से समुद्र के जल को मेघमण्डल को पहुंचा और उसे वर्षा कर प्रजाजनों को सुखी करता है, वैसे आप विद्या से अच्छे प्रकार उन्नति-संयुक्त प्रजा कर उसे सुखी करें। जैसे बिजुली के श्रवण से सब डरते हैं, वैसे न्यायाचरण के उपदेश से दुष्टाचरण से सब डरें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अरो॑रवी॒द् वृष्णो॑ अस्य॒ वज्रोऽमा॑नुषं॒ यन्मानु॑षो नि॒जूर्वा॑त्।
नि मा॒यिनो॑ दान॒वस्य॑ मा॒या अपा॑दयत्पपि॒वान्सु॒तस्य॑॥ १०॥ ४॥

अरो॑रवीत्। वृष्ण॑:। अ॒स्य॒। वज्र॑:। अमा॑नुषम्। यत्। मानु॑ष:। नि॒ऽजूर्वा॑त्। नि। मा॒यिन॑:। दा॒न॒वस्य॑। मा॒या:। अपा॑दयत्। प॒पि॒ऽवान्। सु॒तस्य॑॥ १०॥

पदार्थ:-(अरोरवीत्) भृशं शब्दयति **(वृष्ण:)** वर्षकस्य **(अस्य)** सूर्यस्य **(वज्र:)** किरणनिपात: **(अमानुषम्)** मनुष्यसम्बन्धरहितम् **(यत्)** यम् **(मानुष:)** मनुष्य: **(निजूर्वात्)** हिंस्यात्। अत्र लुङ्यडभाव:। बहुलमेतन्निदर्शनमिति हिंसार्थस्य जुर्वधातोर्ग्रहणम् **(नि)** **(मायिन:)** कुत्सिता माया प्रज्ञा विद्यते यस्य स: **(दानवस्य)** दुष्टकर्मकर्त्तु: **(माया:)** छलयुक्ता: **(अपादयत्)** विनाशयेत् **(पपिवान्)** पाता **(सुतस्य)** महौषधिनिष्पन्नस्य रसस्य॥ १०॥

अन्वय:-यथाऽस्य वृष्णो वज्रोऽरोरवीदमानुषं मानुष इव यन्निजूर्वात्तथा यो मायिनो दानवस्य माया न्यपादयत् सुतस्य पपिवान् भवेत् स विजयतेतमाम्॥ १०॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथाऽन्तरिक्षे तडिच्छब्दा मेघं ज्ञापयन्ति तथा राजान: दुष्टाचरणैर्दुष्टान् प्रज्ञापयेयु:॥ १०॥

पदार्थ:-जैसे **(अस्य)** इस **(वृष्ण:)** वर्षा निमित्तक सूर्यमण्डल के **(वज्र:)** किरणों का जो निरन्तर गिरना **(अरोरवीत्)** वह वार-वार शब्द करता है और **(अमानुषम्)** मनुष्य सम्बन्धरहित पदार्थ को मनुष्य जैसे वैसे **(यत्)** जिसको **(निजूर्वात्)** छिन्न-भिन्न करे, वैसे जो **(मायिन:)** मायावी निन्दित बुद्धियुक्त **(दानवस्य)** दुष्ट कर्म करनेवाले की **(माया:)** छलयुक्त बुद्धियों को **(नि, अपादयत्)** निरन्तर नष्ट करें और **(सुतस्य)** बड़ी-बड़ी ओषधियों के निकले हुए रस को **(पपिवान्)** पीनेवाला हो, वह विजय को प्राप्त होता है॥ १०॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अन्तरिक्ष में बिजुली के शब्द मेघ को जतलाते हैं, वैसे राजजन दुष्टाचरणों सें दुष्टजनों को सचेत करावें अर्थात् उनके छल-कपटों को जता देवें॥ १०॥

अथ वैद्यविषयमाह॥

अब वैद्य विषय को अगले मन्त्र में कहा है॥

पिबा॑पि॒बेदि॑न्द्र शूर॒ सोमं॒ मन्द॑न्तु त्वा म॒न्दिन॑: सु॒तास॑:।

पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव॥ ११॥

पिबऽपिब। इत्। इन्द्र। शूर। सोमम्। मन्दन्तु। त्वा। मन्दिनः। सुतासः। पृणन्तः। ते। कुक्षी इति। वर्धयन्तु। इत्था। सुतः। पौरः। इन्द्रम्। आव॥ ११॥

पदार्थः-(पिबापिब) भृशं पिबति। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(इत्)** एव **(इन्द्र)** आयुर्वेदविद्यायुक्त **(शूर)** रोगाणां हिंसक **(सोमम्)** सोमलताद्योषधिसारपातारम् **(मन्दन्तु)** हर्षयन्तु **(त्वा)** त्वाम् **(मन्दिनः)** स्तोतुमर्हाः **(सुतासः)** निष्पादिता रसाः **(पृणन्तः)** सुखयन्तः **(ते)** तव **(कुक्षी)** उदरपार्श्वौ **(वर्द्धयन्तु)** **(इत्था)** अनेन हेतुना **(सुतः)** निष्पन्नः **(पौरः)** पुरि भवः **(इन्द्रम्)** ऐश्वर्यम् **(आव)** रक्ष॥ ११॥

अन्वयः-हे शूरेन्द्र! ये मन्दिनः सुतासः सोमं त्वा पृणन्तस्ते कुक्षी वर्द्धयन्तु त्वा मन्दन्तु ताँस्त्वमित्पिबेथा सुतः पौरस्त्वमिन्द्रमाव॥ ११॥

भावार्थः-मनुष्यैर्यदि पुष्टिबुद्धिप्रदा रोगविनाशिन ओषधिसाराः सेव्यन्ते, तर्हि ते पुरुषार्थिनो भूत्वैश्वर्यं वर्द्धयितुं शक्नुवन्ति॥ ११॥

पदार्थः-हे **(शूर)** रोगों को नष्ट करनेवाले **(इन्द्र)** आयुर्वेद विद्यायुक्त वैद्य! जो **(मन्दिनः)** प्रशंसा करने योग्य **(सुतासः)** ओषधियों के निकाले हुए रस **(सोमम्)** सोमलतादि ओषधियों के सार को पीनेवाले **(त्वा)** आपको **(पृणन्तः)** सुखी करते हुए **(ते)** आपके **(कुक्षी)** कोखों की **(वर्द्धयन्तु)** वृद्धि करें और आपको **(मन्दन्तु)** हर्षित करावें, उनको आप **(इत्)** ही **(पिबापिब)** पिओ पिओ **(इत्था)** इस हेतु से **(सुतः)** प्रसिद्ध **(पौरः)** पुर में उत्पन्न हुए आप **(इन्द्रम्)** ऐश्वर्य की **(आव)** रक्षा करो॥ ११॥

भावार्थः-मनुष्य लोग यदि पुष्टि और वृद्धि देनेवाले रोगविनाशक ओषधियों के सार को सेवन करते हैं तो पुरुषार्थी होकर ऐश्वर्य को बढ़ा सकते हैं॥ ११॥

अथ पुनर्वैद्यविद्वद्विषयमाह॥

अब वैद्य विद्वान् के विषय को अगले मन्त्र में कहा है॥

त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम॥ १२॥

त्वे इति। इन्द्र। अपि। अभूम। विप्राः। धियम्। वनेम। ऋतऽया। सपन्तः। अवस्यवः। धीमहि। प्रऽशस्तिम्। सद्यः। ते। रायः। दावने। स्याम॥ १२॥

पदार्थः-(**त्वे**) त्वयि (**इन्द्र**) रोगविदारक (**अपि**) (**अभूम**) भवेम (**विप्राः**) मेधाविनः (**धियम्**) प्रज्ञां कर्म वा (**वनेम**) सम्भजेम (**ऋतया**) सत्यविज्ञानयुक्तया (**सपन्तः**) दुष्टानाक्रोशन्तः (**अवस्यवः**) आत्मनोऽवो रक्षणमिच्छवः (**धीमहि**) धरेम (**प्रशस्तिम्**) प्रशंसाम् (**सद्यः**) (**ते**) तुभ्यम् (**रायः**) विद्याधनस्य (**दावने**) दात्रे (**स्याम**) भवेम॥१२॥

अन्वयः-हे इन्द्र! त्वे वयं विप्रा अप्यभूम ऋतया सपन्तो धियं च वनेमावस्यवो वयं प्रशस्तिं धीमहि ते रायो दावने सद्यः स्याम॥१२॥

भावार्थः-मनुष्यैर्ऋतंभरया प्रज्ञया ओषधिविद्यां विदित्वैता ओषधीः संसेव्य पुरुषार्थं कृत्वा श्रीर्धर्त्तव्या॥१२॥

पदार्थः-हे (**इन्द्र**) रोग विदीर्ण करनेवाले वैद्य विद्वान् जन! (**त्वे**) आपके समीप में हम लोग भी (**विप्राः**) मेधावी (**अभूम**) हों और (**ऋतया**) सत्य विज्ञानयुक्त बुद्धि क्रिया से (**सपन्तः**) दुष्टों को अच्छे प्रकार कोशते हुए (**धियम्**) बुद्धि वा कर्म को (**वनेम**) अच्छे प्रकार सेवें तथा (**अवस्यवः**) अपने को रक्षा चाहते हुए हम लोग (**प्रशस्तिम्**) प्रशंसा को (**धीमहि**) धारण करें वा पुष्ट करें और (**ते**) आप जो (**रायः**) विद्याधन के (**दावने**) देनेवाले हैं, उनके लिये (**सद्यः**) शीघ्र प्रसिद्ध होवें॥१२॥

भावार्थः-मनुष्यों को चाहिये कि सत्य विज्ञानयुक्त बुद्धि से ओषधिविद्या को जान, इन ओषधियों को सेवन कर, पुरुषार्थ बढ़ा, लक्ष्मी का सञ्चय करें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्याम॒ ते त॑ इन्द्र॒ ये त॑ ऊ॒ती अ॑व॒स्यव॒ ऊर्ज॑ व॒र्धय॑न्तः।
शु॒ष्मिन्त॑मं॒ यं चा॒कना॑म देवा॒स्मे र॒यिं रा॑सि वी॒रव॑न्तम्॥१३॥

स्याम॑। ते॒। ते॒। इ॒न्द्र॒। ये। ते॒। ऊ॒ती। अ॒व॒स्यव॑ः। ऊर्ज॑म्। व॒र्धय॑न्तः। शु॒ष्मिन्ऽत॑मम्। यम्। चा॒कना॑म। दे॒व॒। अ॒स्मे इति॑। र॒यिम्। रा॒सि॒। वी॒रऽव॑न्तम्॥१३॥

पदार्थः-(**स्याम**) भवेम (**ते**) (**ते**) तव (**इन्द्र**) ऐश्वर्यप्रद (**ये**) (**ते**) तव (**ऊती**) ऊत्या रक्षणादि-क्रियया सह (**अवस्यवः**) आत्मनोऽवो रक्षणमिच्छन्तः (**ऊर्जम्**) पराक्रमम् (**वर्द्धयन्तः**) (**शुष्मिन्तमम्**) अतिशयेन बलवन्तम् (**यम्**) (**चाकनाम**) कामयेमहि (**देव**) कमनीय (**अस्मे**) अस्मभ्यम् (**रयिम्**) श्रियम् (**रासि**) ददासि (**वीरवन्तम्**) वीरा भवन्ति यस्मात्तम्॥१३॥

अन्वयः-हे देवेन्द्र! येऽवस्यवस्त ऊती ऊर्जं वर्द्धयन्तस्त्वां रक्षन्ति तेऽतुलं सुखं प्राप्नुवन्ति, यस्य ते सम्बन्धे वयं यं शुष्मिन्तमं वीरवन्तं रयिं चाकनाम त्वमस्मे एतं रासि तं प्राप्य वयं सुखिनः स्याम॥१३॥

भावार्थः-ये मनुष्याः परस्परस्य वृद्धिं कुर्वन्ति ते सर्वतो वर्द्धन्ते केनचित्सुकामना नैव त्याज्या॥१३॥

पदार्थः-हे **(देव)** मनोहर **(इन्द्र)** ऐश्वर्य के देनेवाले! **(ये)** जो **(अवस्यवः)** अपनी रक्षा चाहते और **(ते)** आपकी **(ऊती)** रक्षा आदि क्रिया से **(ऊर्जम्)** पराक्रम को **(वर्द्धयन्तः)** बढ़ाते हुए आपकी रक्षा करते **(ते)** वे अतुल सुख को प्राप्त होते हैं, जिन **(ते)** आपके सम्बन्ध में हम लोग **(यम्)** जिस **(शुष्मिन्तमम्)** अति बलवान् **(वीरवन्तम्)** वीरों के प्रसिद्ध करानेवाले **(रयिम्)** धन को **(चाकनाम)** चाहें आप **(अस्मे)** हम लोगों के लिये इसको **(रासि)** देते हो, उसको प्राप्त हो हम लोग सुखी **(स्याम)** हों॥१३॥

भावार्थः-जो भी मनुष्य परस्पर की वृद्धि करते हैं, वे सब ओर से बढ़ते हैं, किसी को अच्छी कामना नहीं छोड़नी चाहिये॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम्॥१४॥

रासि। क्षयम्। रासि। मित्रम्। अस्मे इति। रासि। शर्धः। इन्द्र। मारुतम्। नः। सऽजोषसः। ये। च। मन्दसानाः। प्र। वायवः। पान्ति। अग्रेऽनीतिम्॥१४॥

पदार्थः-**(रासि)** ददासि **(क्षयम्)** निवासम् **(रासि)** **(मित्रम्)** सखायम् **(अस्मे)** अस्मभ्यम् **(रासि)** **(शर्द्धः)** बलम् **(इन्द्र)** बलप्रद **(मारुतम्)** मरुतां मनुष्याणामिदम् **(नः)** अस्मान् **(सजोषसः)** समानप्रीतयः **(ये)** **(च)** **(मन्दसानाः)** कामयमानाः **(प्र)** **(वायवः)** विज्ञानबलयुक्ताः **(यान्ति)** **(अग्रणीतिम्)** अग्रा श्रेष्ठा चासौ नीतिश्च ताम्॥१४॥

अन्वयः-हे इन्द्र! ये नोऽस्मान् मन्दसानाः सजोषसश्च वायवोऽग्रणीतिं प्रयान्ति तैस्समं वयं याम यतस्त्वमस्मे क्षयं रासि मित्रं रासि मारुतं शर्द्धश्च तस्मात्प्रशंसनीयोऽसि॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सखायो भूत्वा विद्याविनयौ प्राप्य सत्यं कामयन्ते ते सर्वेभ्यः सुखं दातुं शक्नुवन्ति॥१४॥

पदार्थः-हे **(इन्द्र)** बल के देनेवाले! **(ये)** जो **(नः)** हम लोगों की **(मन्दसानाः)** कामना करते हुए **(सजोषसः)** समान प्रीतिवाले **(वायवः)** विज्ञान बलयुक्त जन **(अग्रणीतिम्)** आगे होनेवाली उत्तम नीति को **(प्र, यान्ति)** प्राप्त होते हैं, उनके समान हम लोग प्राप्त होवें, जिससे आप **(अस्मे)** हम लोगों के लिये **(क्षयम्)** निवास **(रासि)** देते हैं, **(मित्रम्)** मित्र **(रासि)** देते हो और **(मारुतम्)** मनुष्यों को **(शर्द्धः)** बल **(च)** भी **(रासि)** देते हो, इससे प्रशंसनीय हो॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मित्र हो विद्या और विनय को प्राप्त होकर सत्य की कामना करते हैं, वे सबको सुख दे सकते हैं॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व्यन्त्विन्नु येषु॑ मन्दसा॒नस्तृ॒पत्सोमं॑ पाहि द्रु॒ह्यदि॑न्द्र।
अ॒स्मान्त्सु पृ॒त्स्वा त॑रु॒त्रावर्धयो॒ द्यां बृ॒हद्भि॒रर्कैः॥ १५॥ ५॥

व्यन्तु॑। इत्। नु। येषु॑। म॒न्द॒सा॒नः। तृ॒पत्। सोम॑म्। पा॒हि॒। द्रु॒ह्यत्। इ॒न्द्र॒। अ॒स्मान्। सु। पृ॒त्ऽसु। आ। त॒रु॒त्र॒। अव॑र्धयः। द्याम्। बृ॒हत्ऽभिः। अ॒र्कैः॥ १५॥

पदार्थः-**(व्यन्तु)** कामयन्ताम् **(इत्)** एव **(नु)** सद्यः **(येषु)** **(मन्दसानः)** आनन्दितः **(तृपत्)** तृप्तः सन् **(सोमम्)** ऐश्वर्यम् **(पाहि)** **(द्रह्यत्)** दृढः सन् **(इन्द्र)** ऐश्वर्यवन् **(अस्मान्)** **(सु)** **(पृत्सु)** सङ्ग्रामेषु **(आ)** **(तरुत्र)** अविद्यातारक **(अवर्द्धयः)** वर्द्धयति **(द्याम्)** प्रकाशम् **(बृहद्भिः)** महद्भिः **(अर्कैः)** किरणैः॥१५॥

अन्वयः-हे तरुत्रेन्द्र! यथा सूर्यो बृहद्भिरर्कैर्द्यां न्वावर्द्धयस्तथा त्वमस्मान् पृत्सु पाहि। येषु विद्वांसः सोमं व्यन्तु तेषु मन्दसानः तृपद्द्रह्यदिदैश्वर्यं सुपाहि॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या येषु विद्वत्सु निवसन्त ऐश्वर्यं प्राप्य तृप्ताः सन्तोऽन्याँस्तर्पयन्ति तेषु सूर्यवत्प्रकाशिता भवन्ति॥१५॥

पदार्थः-हे **(तरुत्र)** अविद्या से तारनेवाले **(इन्द्र)** ऐश्वर्यवान् विद्वान्! जैसे सूर्यमण्डल **(बृहद्भिः)** बड़ी-बड़ी **(अर्कैः)** किरणों से **(द्याम्)** प्रकाश को **(नु, आ, अवर्धयः)** शीघ्र अच्छे प्रकार बढ़ाता है, वैसे आप **(अस्मान्)** हम लोगों की **(पृत्सु)** संग्रामों में रक्षा कीजिये, **(येषु)** जिन में विद्वान् जन **(सोमम्)** ऐश्वर्य की **(व्यन्तु)** कामना करें उनमें **(मन्दसानः)** आनन्द को प्राप्त **(तृपत्)** तृप्त और **(द्रह्यत्)** दृढ़ होते हुए **(इत्)** ही आप ऐश्वर्य की **(सुपाहि)** अच्छे प्रकार रक्षा करें॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य जिन विद्वान् जनों में निवास करते और ऐश्वर्य को प्राप्त होकर तृप्त होते हुए औरों को तृप्त करते हैं, उनमें वे सूर्य के समान प्रकाशित होते हैं॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान्।
स्तृणानासो बर्हिः पस्त्यावत् त्वोता इदिन्द्र वाजमग्मन्॥ १६॥

बृहन्तः। इत्। नु। ये। ते। तरुत्र। उक्थेभिः। वा। सुम्नम्। आऽविवासान्। स्तृणानासः। बर्हिः। पस्त्यऽवत्। त्वाऽऊताः। इत्। इन्द्र। वाजम्। अग्मन्॥ १६॥

पदार्थः-(**बृहन्तः**) महान्तः (**इत्**) एव (**नु**) सद्यः (**ये**) (**ते**) तव (**तरुत्र**) दुःखात्तारक (**उक्थेभिः**) सुष्ठूपदेशैः (**वा**) (**सुम्नम्**) सुखम् (**आविवासान्**) समन्तात् सेवन्ते (**स्तृणानासः**) आच्छादयन्तः (**बर्हिः**) वृद्धम् (**पस्त्यावत्**) गृहवत् (**त्वोताः**) त्वया रक्षिताः (**इत्**) एव (**इन्द्र**) अविद्याविच्छेदक (**वाजम्**) विज्ञानम् (**अग्मन्**) प्राप्नुवन्ति॥१६॥

अन्वयः-हे तरुत्रेन्द्र! ते तवोक्थेभिर्बृहन्त इद्ये सुम्नमाविवासाँस्ते पस्त्यावद् बर्हिस्तृणानासो वा त्वोता इद्वाजं न्वग्मन्॥१६॥

भावार्थः-त एव सुखमाप्नुवन्ति ये धार्मिकेण सुशिक्षिताः रक्षिताः स्युः॥१६॥

पदार्थः-हे (**तरुत्र**) दुःख से तारनेवाले (**इन्द्र**) अविद्या विनाशक! (**ते**) आपके (**उक्थेभिः**) सुन्दर उपदेशों से (**बृहन्तः**) पूज्य प्रशंसनीय (**इत्**) ही (**सुम्नम्**) सुख को (**आ, विवासान्**) सब ओर से सेवते हैं, वे (**पस्त्यावत्**) घर के तुल्य (**बर्हिः**) बढ़े हुए को (**स्तृणानासः**) ढाँपते हुए (**वा**) अथवा (**त्वोताः**) आपके रक्षा किये हुए (**इत्**) ही (**वाजम्**) विज्ञान को (**नु**) शीघ्र (**अग्मन्**) प्राप्त होते हैं॥१६॥

भावार्थः-वे ही सुख को प्राप्त होते हैं जो धार्मिक विद्वान् सत्पुरुषों से सुन्दर शिक्षित और रक्षित हों॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र।

प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम्॥ १७॥

उग्रेषु। इत्। नु। शूर। मन्दसानः। त्रिऽकद्रुकेषु। पाहि। सोमम्। इन्द्र। प्रऽदोधुवत्। श्मश्रुषु। प्रीणानः। याहि। हरिऽभ्याम्। सुतस्य। पीतिम्॥ १७॥

पदार्थः-(उग्रेषु) तेजस्विषु **(इत्)** एव **(नु)** सद्यः **(शूर)** दुष्टानां हिंसकः **(मन्दसानः)** कामयमानः **(त्रिकद्रुकेषु)** त्रीणि कद्रुकाणि शरीरात्ममनः पीडनानि येषु तेषु व्यवहारेषु **(पाहि)** **(सोमम्)** महौषधिगणम् **(इन्द्र)** वैद्यकविद्यावित् **(प्रदोधुवत्)** प्रकृष्टतया कम्पयन् **(श्मश्रुषु)** चिबुकादिषु **(प्रीणानः)** तर्पयन् **(याहि)** गच्छ **(हरिभ्याम्)** सुशिक्षिताभ्यामश्वाभ्याम् **(सुतस्य)** निष्पन्नस्य **(पीतिम्)** पानम्॥ १७॥

अन्वयः-हे शूरेन्द्र! त्वं त्रिकद्रुकेषु सोमं पाह्युग्रेष्विन्मन्दसानः प्रदोधुवच्छ्मश्रुषु प्रीणानो हरिभ्यां सुतस्य पीतिं नु याहि॥७॥

भावार्थः-यदि मनुष्याः प्रगल्भैर्जनैस्सह संयुञ्जते तर्हि शत्रून् कम्पयन्तो महौषधिरसं पिबन्ति सुशिक्षितैरश्वैर्युक्तेन रथेनेव सद्यः सुखानि प्राप्नुवन्ति॥ १७॥

पदार्थः-हे **(शूर)** दुष्टों की हिंसा करने और **(इन्द्र)** वैद्य विद्या जाननेवाले! आप **(त्रिकद्रुकेषु)** जिन व्यवहारों में तीन अर्थात् शरीर, आत्मा और मन की पीड़ा विद्यमान उनके निमित्त **(सोमम्)** महान् ओषधियों के समूह को **(पाहि)** रक्षा करो और **(उग्रेषु)** तेजस्वी प्रबल प्रतापवालों में **(इत्)** ही **(मन्दसानः)** कामना और **(प्रदोधुवत्)** उत्तमता से कम्पन अर्थात् नाना प्रकार की चेष्टा करते और **(श्मश्रुषु)** चिबुकादिक अङ्गों में **(प्रीणानः)** तृप्ति पाते हुए **(हरिभ्याम्)** अच्छे शिक्षित घोड़ों से **(सुतस्य)** निकले हुए ओषधियों के रस के **(पीतिम्)** पीने को **(नु)** शीघ्र **(याहि)** प्राप्त होओ॥ १७॥

भावार्थः-जो मनुष्य प्रबल बुद्धिजनों के साथ अच्छे प्रकार कार्यों का प्रयोग करते हैं तो शत्रुओं को कंपाते और बड़ी-बड़ी ओषधियों के रस को पीते हुए अच्छे सिखाये हुए घोड़ों से युक्त रथ से जैसे वैसे शीघ्र सुखों को प्राप्त होते हैं॥ १७॥

अथ सेनापतिगुणानाह॥

अब सेनापति के गुणों को अगले मन्त्र में कहा है॥

धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभम्।
अपावृणोज्र्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र॥ १८॥

धि॒ष्व। शव॑:। शू॒र। येन॑। वृ॒त्र॒म्। अ॒व॒ऽअभि॑नत्। दानु॑म्। औ॒र्ण॒ऽवा॒भम्। अप॑। अ॒वृ॒णो॒:। ज्योति॑:। आर्या॑य। नि। स॒व्य॒त:। सा॒दि॒। दस्यु॑:। इ॒न्द्र॒॥ १८॥

पदार्थ:-(धिष्व) धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घ:। **(शव:)** बलम् **(शूर)** दु:खविनाशक **(येन)** **(वृत्रम्)** मेघम् **(अवाभिनत्)** विदृणाति **(दानुम्)** जलस्य दातारम् **(और्णवाभम्)** ऊर्णा नाभ्यां यस्य तदपत्यमिव **(अपावृणो:)** दूरीकरोति **(ज्योति:)** प्रकाशम् **(आर्य्याय)** उत्तमाय जनाय **(नि)** नितराम् **(सव्यत:)** दक्षिणत: **(सादि)** साध्यताम् **(दस्यु:)** परपदार्थापहारक: **(इन्द्र)** सूर्यवद्वर्त्तमानसेनेश॥ १८॥

अन्वय:-हे शूरेन्द्र! त्वं येन शवो धिष्व तेन यथा सूर्यो दानुं वृत्रमौर्णवाभमिवावाऽभिनत् सव्यतो ज्योति: कृत्वा तमो न्यपावृणोस्तथाऽऽर्याय साधुर्भव। यो दस्युरस्ति तं नाशयैवं युद्धे विजय: सादि॥ १८॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। राजपुरुषै: सूर्यवदन्यायं निवर्त्य सज्जनहृदयेषु सुखं प्रापय्य सततं बलं वर्द्धनीयम्॥ १८॥

पदार्थ:-हे **(शूर)** दु:खविनाशक **(इन्द्र)** सूर्य के समान वर्त्तमान सेनापति! आप **(येन)** जिससे **(शव:)** बल को **(धिष्व)** धारण करो उससे जैसे सूर्य **(दानुम्)** जल देनेवाले **(वृत्रम्)** मेघ को **(और्णवाभम्)** उर्णा जिसकी नाभि में होती उसके पुत्र के समान अर्थात् जैसे वह किसी की देह का विदारण करे, वैसे **(अवाभिनत्)** छिन्न-भिन्न करता है और **(सव्यत:)** दाहिनी ओर से **(ज्योति:)** प्रकाश कर अन्धकार को **(नि, अप, अवृणो:)** निरन्तर दूर करता है, वैसे **(आर्य्याय)** उत्तम के लिये साधारण होओ, जो **(दस्यु:)** दूसरे के पदार्थों को हरनेवाला है, उसका विनाश करो, ऐसे युद्ध के बीच विजय **(सादि)** साधना चाहिये॥ १८॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुषों को चाहिये कि जैसे सूर्य अन्धकार को वैसे अन्याय को निवृत्त कर सज्जनों के हृदयों में सुख की प्राप्ति करा निरन्तर बल बढ़ावें॥ १८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सने॑म॒ ये त॑ ऊ॒तिभि॒स्तर॑न्तो॒ विश्वा॒: स्पृध॒ आर्ये॑ण॒ दस्यू॑न्।
अ॒स्मभ्यं॒ तत्त्वा॒ष्ट्रं वि॒श्वरू॑प॒मर॑न्धय: सा॒ख्यस्य॑ त्रि॒ताय॑॥ १९॥

सने॑म। ये। ते॒। ऊ॒तिऽभि॑:। तर॑न्त:। विश्वा॑:। स्पृध॑:। आर्ये॑ण। दस्यू॑न्। अ॒स्मभ्य॑म्। तत्। त्वा॒ष्ट्रम्। वि॒श्वऽरू॑पम्। अर॑न्धय:। सा॒ख्यस्य॑। त्रि॒ताय॑॥ १९॥

पदार्थः-(सनेम) विभेजम **(ये)** **(ते)** तव **(ऊतिभिः)** रक्षणादिकर्त्रीभिः सेनाभिः **(तरन्तः)** उल्लङ्घमानाः **(विश्वाः)** सर्वान् **(स्पृधः)** स्पर्द्धमानान् **(आर्येण)** उत्तमविद्याधर्मसामर्थ्येन **(दस्यून्)** बलात्कारेण परस्वापहर्त्तॄन् **(अस्मभ्यम्)** **(तत्)** **(त्वाष्ट्रम्)** त्वष्ट्रानिर्मितम् **(विश्वरूपम्)** विविधस्वरूपम् **(अरन्धयः)** हिंस **(साख्यस्य)** सख्युः कर्मणो भावस्य निर्माणस्य **(त्रिताय)** त्रिविधानां शारीरिकवाचिकमानसानां सुखानां प्राप्तिर्यस्य तस्मै॥१९॥

अन्वयः-हे सेनेश! ये ते तवोतिभिर्विश्वास्स्पृधस्तरन्तो वयं त्रिताया ऽऽर्येण सह दस्यून् विजयेमहि। यत्साख्यस्य विश्वरूपं त्वाष्ट्रं सनेम तत्तत्त्वमस्मभ्यं सम्पादय दस्यूनरन्धयः॥१९॥

भावार्थः-ये मनुष्याः कृतज्ञं विद्वांसं सेनापतिमधिकृत्य श्रेष्ठैः पुरुषैः सह कर्त्तव्याऽकर्त्तव्ये सुनिश्चित्य प्रजासुखं साधयेयुस्ते सर्वाणि सुखानि लभेरन्॥१९॥

पदार्थः-हे सेनापति! **(ये)** जो **(ते)** आपकी **(ऊतिभिः)** रक्षा आदि कामों को करनेवाली सेनाओं से **(विश्वाः)** समस्त **(स्पृधः)** स्पर्द्धा करनेवालों को **(तरन्तः)** उल्लङ्घन करते हुए हम लोग **(त्रिताय)** त्रिविध अर्थात् शारीरिक, वाचिक और मानसिक सुख जिसको प्राप्त उसके लिये **(आर्येण)** उत्तम विद्या और धर्म सामर्थ्य के साथ **(दस्यून्)** डाकुओं को जीते, जो **(साख्यस्य)** मित्रपन वा मित्रकर्म करने का **(विश्वरूपम्)** विविध स्वरूप **(त्वाष्ट्रम्)** प्रकाशमान का रचा हुआ है, उसको **(सनेम)** अलग-अलग करें, **(तत्)** उसको आप **(अस्मभ्यम्)** हम लोगों के लिये सिद्ध करो और डाकुओं को **(अरन्धयः)** नष्ट करो॥१९॥

भावार्थः-जो मनुष्य किये हुए को जाननेवाले विद्वान् को सेनापति का अधिकार कर श्रेष्ठ पुरुषों के साथ कर्त्तव्य और अकर्त्तव्य कामों को अच्छे प्रकार निश्चय कर प्रजासुख की सिद्धि करें, वे सब सुखों को प्राप्त होवें॥१९॥

अथ सूर्यदृष्टान्तेन राजधर्ममाह॥

अब सूर्य के दृष्टान्त से राजधर्म को कहते हैं॥

अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः।
अवर्तयत् सूर्यो न चक्रं भिनद्बलमिन्द्रो अङ्गिरस्वान्॥२०॥

अस्य। सुवानस्य। मन्दिनः। त्रितस्य। नि। अर्बुदम्। ववृधानः। अस्तरित्यस्तः। अवर्तयत्। सूर्यः। न। चक्रम्। भिनत्। वलम्। इन्द्रः। अङ्गिरस्वान्॥२०॥

पदार्थः-(अस्य) **(सुवानस्य)** ऐश्वर्यजनकस्य **(मन्दिनः)** सर्वस्याऽऽनन्दस्य जनयितुः **(त्रितस्य)** त्रिभिरुत्तममध्यमनिकृष्टोपायैर्युक्तस्य **(नि)** नितराम् **(अर्बुदम्)** एतत्सङ्ख्याकं सैन्यम्

(वावृधानः) वर्द्धयमानः **(अस्तः)** प्रक्षिप्तः **(अवर्त्तयत्)** वर्त्तयति **(सूर्यः)** सविता **(न)** इव **(चक्रम्)** भूगोलसमूहम् **(भिनत्)** भिनत्ति **(बलम्)** मेघम्। **बलमिति मेघनामसु पठितम्।** (निघं०१.१०)। **(इन्द्रः)** विद्युत् **(अङ्गिरस्वान्)** अङ्गिरसो वायोः सम्बन्धो विद्यते यस्य सः॥२०॥

अन्वयः-हे विद्वन्नस्य सुवानस्य मन्दिनस्त्रितस्याऽर्वुदं वावृधानोऽस्तश्चक्रं सूर्यो नावर्त्तयत् स त्वं यथाऽङ्गिरस्वानिन्द्रो बलम् भिनत्तथा वर्त्तस्व॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजजना यथा सूर्योऽसङ्ख्यातांल्लोकान् तत्रस्थान् पदार्थान् व्यवस्थापयति वायुप्रेरिता विद्युन्मेघं वर्षयति तथाऽऽचरन्ति ते सर्वतो भद्रमाप्नुवन्ति॥२०॥

पदार्थः-हे विद्वान्! **(अस्य)** इस **(सुवानस्य)** ऐश्वर्य और **(मन्दिनः)** सबको आनन्द उत्पन्न करनेवाले **(त्रितस्य)** तीन उत्तम, मध्यम और निकृष्ट उपायों से युक्त जन की **(अर्वुदम्)** अर्व सेनाओं को **(वावृधानः)** बढ़ाते हुए **(अस्तः)** युद्धक्रिया में प्रेरणा को प्राप्त **(चक्रम्)** भूगोलों के समूहों को **(सूर्यः)** सूर्य **(न)** जैसे वैसे **(अवर्त्तयत्)** वर्त्तते हो सो आप जैसे **(अङ्गिरस्वान्)** पवन का सम्बन्ध जिसके विद्यमान वह **(इन्द्रः)** बिजुली **(बलम्)** मेघ को **(नि, भिनत्)** छिन्न-भिन्न करती, वैसे वर्तो॥२०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजजन जैसे सूर्य असंख्यात लोकों और उनके बीच रहनेवाले पदार्थों की व्यवस्था करता है वा पवन की प्रेरणा दी हुई बिजुली मेघ को वर्षाती है, वैसे आचरण करते हैं, वे सब से कल्याण को प्राप्त होते हैं॥२०॥

पुनर्विद्वद्विषयमाह॥

फिर उसी विद्वान् के विषय को अगले मन्त्र में कहा है॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥२१॥६॥१॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी। शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुऽवीराः॥२१॥

पदार्थः-**(नूनम्)** निश्चितम् **(सा)** वक्ष्यमाणा **(ते)** तव **(प्रति)** **(वरम्)** श्रेष्ठम् **(जरित्रे)** विद्यास्तावकाय **(दुहीयत्)** प्रतिपादयन् **(इन्द्र)** दातः **(दक्षिणा)** बलकारिणी **(मघोनी)** परमपूजितधनयुक्ता **(शिक्ष)** अनुशास्ति **(स्तोतृभ्यः)** **(मा)** निषेधे **(अति)** **(धक्)** दहति **(भगः)**

धनम् **(नः)** अस्मभ्यम् **(बृहत्)** विस्तीर्णम् **(वदेम)** **(विदथे)** सङ्ग्रामे **(सुवीराः)** शोभनाश्च ते वीराश्च ते॥ २१॥

अन्वयः-हे इन्द्र! यस्य ते दक्षिणा मघोनी नीतिर्जरित्रे वरं सुखं नूनं प्रति दुहीयत्स्तोतृभ्यः शिक्ष मातिधक् सा नो बृहद्गः प्रापयति तां प्राप्य सुवीरा वयं विदथे वदेम॥ २१॥

भावार्थः-ये सर्वेषां विद्यादात्रे सत्योपदेशकर्त्रे पुष्कलां वरां दक्षिणा ददति ते विद्वांसो भूत्वा शूरवीरा जायन्ते॥ २१॥

अस्मिन्सूक्ते राजधर्मविद्वत्सेनापतिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीयमण्डले एकादशं सूक्तं प्रथमोऽनुवाकः षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** विद्या देनेवाले! जिन **(ते)** आपकी **(दक्षिणा)** बल करनेवाली **(मघोनी)** परमपूजित धनयुक्त नीति **(जरित्रे)** विद्या की स्तुति करनेवाले के लिये **(वरम्)** श्रेष्ठ को **(नूनम्)** निश्चय से **(प्रति, दुहीयत्)** पूरा करती हुई **(स्तोतृभ्यः)** स्तुति करनेवालों के लिये **(शिक्ष)** शिक्षा देती है **(मा, अति, धक्)** नहीं अतीव किसी को दहती, नहीं कष्ट देती **(सा)** वह **(नः)** हमारे लिये **(बृहद्गः)** विस्तृत धन को प्राप्त कराती है, उस नीति को प्राप्त होकर **(सुवीराः)** सुन्दर वीरजन हम लोग **(विदथे)** संग्राम में **(वदेम)** कहें अर्थात् औरों को उपदेश दें॥ २१॥

भावार्थः-जो सबको विद्या देने और सत्योपदेश करनेवाले के लिये बहुत श्रेष्ठ दक्षिणा देते हैं, वे विद्वान् होकर शूरवीर होते हैं॥ २१॥

इस सूक्त में राजधर्म विद्वान् और सेनापति के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है यह जानना चाहिये॥

यह दूसरे मण्डल में ग्यारहवाँ सूक्त प्रथम अनुवाक और छठा वर्ग समाप्त हुआ॥

यो जात इत्यस्य पञ्चदशर्चस्य द्वादशस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १-५, १२-१५ त्रिष्टुप्। ६-८, १०, ११ निचृत् त्रिष्टुप्। ९ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्यगुणानाह॥

अब पन्द्रह ऋचावाले बारहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में सूर्य के गुणों का वर्णन करते हैं।

यो जा॒त एव प्र॑थ॒मो मन॑स्वान् दे॒वो दे॒वान् क्रतु॑ना प॒र्यभूष॑त।
यस्य॒ शुष्मा॒द्रोद॑सी॒ अभ्य॑सेतां नृ॒म्णस्य॑ म॒ह्ना स ज॑नास॒ इन्द्रः॥ १॥

यः। जा॒तः। एव। प्र॒थ॒मः। मन॑स्वान्। दे॒वः। दे॒वान्। क्रतु॑ना। प॒रि॒ऽअभू॑षत। यस्य॑। शुष्मा॑त्। रोद॑सी॒ इति॑। अभ्य॑सेताम्। नृ॒म्णस्य॑। म॒ह्ना। सः। ज॒ना॒सः॒। इन्द्रः॥ १॥

पदार्थः-(यः) (जातः) उत्पन्नः **(एव) (प्रथमः)** आदिमो विस्तीर्णो वा **(मनस्वान्)** मनो विज्ञानं विद्यते यस्य सः **(देवः)** द्योतमानः **(देवान्)** प्रकाशितव्यान् दिव्यगुणान् पृथिव्यादीन् **(क्रतुना)** प्रकाशकर्मणा **(पर्य्यभूषत्)** सर्वतो भूषत्यलङ्करोति **(यस्य) (शुष्मात्)** बलात् **(रोदसी)** द्यावापृथिव्यौ **(अभ्यसेताम्)** प्रक्षिप्ते भवतः **(नृम्णस्य)** धनस्य **(मह्ना)** महत्त्वेन **(सः) (जनासः)** विद्वांसः **(इन्द्रः)** दारयिता सूर्य्यः॥१॥

अन्वयः-हे जनासो! यः प्रथमो मनस्वान् जातो देवः क्रतुना देवान् पर्य्यभूषद् यस्य शुष्मान्नृम्णस्य मह्ना रोदसी अभ्यसेतां स इन्द्रः सूर्यलोकोऽस्तीति वेद्यम्॥१॥

भावार्थः-येनेश्वरेण सर्वप्रकाशकः सर्वस्य धर्त्ता स्वप्रकाशाकर्षणाद् व्यवस्थापकः सूर्यलोको निर्मितः स सूर्य्यस्य सूर्योऽस्तीति वेद्यम्॥१॥

पदार्थः-हे **(जनासः)** विद्वन् जनो! **(यः)** जो **(प्रथमः)** प्रथम वा विस्तारयुक्त **(मनस्वान्)** जिसमें विज्ञान वर्त्तमान **(जातः)** उत्पन्न हुआ **(देवः)** प्रकाशमान **(क्रतुना)** अपने प्रकाश कर्म से **(देवान्)** प्रकाशित करने योग्य दिव्यगुणवाले पृथिवी आदि लोकों को **(पर्य्यभूषत्)** सब ओर से विभूषित करता है, **(यस्य)** जिसके **(शुष्मात्)** बल से **(नृम्णस्य)** धन के **(मह्ना)** महत्त्व से **(रोदसी)** आकाश और पृथिवी **(अभ्यसेताम्)** अलग होते हैं **(सः)** वह **(इन्द्रः)** अपने प्रताप से सब पदार्थों को छिन्न-भिन्न करनेवाला सूर्य है, ऐसा जानना चाहिये॥१॥

भावार्थः-जिस ईश्वर ने सबका प्रकाश करने और सबका धारण करनेवाला अपने प्रकाश से युक्त आकर्षण शक्तियुक्त लोकों की व्यवस्था करनेवाला सूर्यलोक बनाया है, वह ईश्वर सूर्य का भी सूर्य है, यह जानना चाहिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात्।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात् स जनास इन्द्रः॥ २॥

यः। पृथिवीम्। व्यथमानाम्। अदृंहत्। यः। पर्वतान्। प्रऽकुपितान्। अरम्णात्। यः। अन्तरिक्षम्। विऽममे। वरीयः। यः। द्याम्। अस्तभ्नात्। सः। जनासः। इन्द्रः॥ २॥

पदार्थः-(यः) (पृथिवीम्) विस्तीर्णां भूमिम् **(व्यथमानाम्)** चलन्तीम् **(अदृंहत्)** धरति **(यः) (पर्वतान्)** मेघान् **(प्रकुपितान्)** प्रकोपयुक्तान् शत्रूनिव वर्त्तमानान् **(अरम्णात्)** वधति। **रम्णातीति वधकर्मासु पठितम्।** (निघं०२.१९)। **(यः) (अन्तरिक्षम्)** द्वयोर्लोकयोर्मध्यस्थमाकाशम् **(विममे)** विशेषेण मिमीते **(वरीयः)** अतिशयेन बहु **(यः) (द्याम्)** प्रकाशम् **(अस्तभ्नात्)** स्तभ्नाति धरति **(सः) (जनासः) (इन्द्रः)**॥ २॥

अन्वयः-हे जनासो! यो व्यथमानां पृथिवीमदृंहद् यः प्रकुपितान् पर्वतानरम्णाद् यो वरीयोऽन्तरिक्षं विममे यो द्यामस्तभ्नात् स इन्द्रो वेदितव्यः॥ २॥

भावार्थः-हे मनुष्या! यदीश्वरो विद्युतं सूर्यं वा न रचयेत् तर्हि चलतो महतो भूगोलान् को धरेत् कश्च मेघं वर्षयेत्, कोऽन्तरिक्षं स्वप्रकाशेन पूरयेच्च॥ २॥

पदार्थः-हे **(जनासः)** विद्वानो! **(यः)** जो **(व्यथमानाम्)** चलती हुई **(पृथिवीम्)** पृथिवी को **(अदृंहत्)** धारण करता है **(यः)** जो **(प्रकुपितान्)** अत्यन्त कोपयुक्त शत्रुओं के समान वर्त्तमान **(पर्वतान्)** मेघों को **(अरम्णात्)** छिन्न-भिन्न करता **(यः)** जो **(वरीयः)** अत्यन्त बहुत विस्तारवाले **(अन्तरिक्षम्)** पृथिव्यादि दो-दो लोकों के बीच भाग का **(विममे)** विशेषता से मान करता है **(यः)** जो **(द्याम्)** प्रकाश को **(अस्तभ्नात्)** धारण करता है **(सः)** वह **(इन्द्रः)** सब पदार्थों को अपने प्रताप से छिन्न-भिन्न करनेवाला सूर्य जानने योग्य है॥ २॥

भावार्थः-हे मनुष्यो! जो ईश्वर बिजुली वा सूर्य को न रचे तो चलते हुए बड़े-बड़े भूगोलों को कौन धारण करे, कौन मेघ को वर्षावे और कौन अन्तरिक्ष को अपने प्रकाश से पूरित करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा वलस्य।

यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः॥ ३॥

यः। हत्वा। अहिम्। अरिणात्। सप्त। सिन्धून्। यः। गाः। उतऽआजत्। अपऽधा। वलस्य। यः। अश्मनोः। अन्तः। अग्निम्। जजान। सम्ऽवृक्। समत्ऽसु। सः। जनासः। इन्द्रः॥ ३॥

पदार्थः-(यः) (हत्वा) (अहिम्) मेघम् **(अरिणात्)** गमयति **(सप्त)** सप्तविधान् **(सिन्धून्)** समुद्रान् नदीर्वा **(यः) (गाः)** पृथिवीः **(उदाजत्)** ऊर्ध्वं क्षिपति **(अपधा)** योऽपदधाति सः। अत्र **सुपां सुलुगि**ति विभक्तेर्डादेशः। **(बलस्य) (यः) (अश्मनोः)** पाषाणयोर्मेघयोर्वा **(अन्तः)** मध्ये **(अग्निम्)** पावकम् **(जजान)** जनयति **(संवृक्)** यः सम्यग्वर्जयति सः **(समत्सु)** संग्रामेषु **(सः) (जनासः) (इन्द्रः)**॥ ३॥

अन्वयः-हे जनासो! योऽहिं हत्वा सप्त सिन्धूनरिणाद् यो गा उदाजद् यो बलस्यापधा योऽश्मनोरन्तरग्निं जजान समत्सु संवृगस्ति स इन्द्रोऽस्तीति वेद्यम्॥ ३॥

भावार्थः-हे मनुष्या! यः सूर्यलोको मेघं वर्षयित्वा समुद्रान् भरति सर्वान् भूगोलान् स्वं प्रत्याकर्षति स्वकिरणैर्मेघस्य सन्निहितस्य पाषाणस्य मध्ये उष्णताञ्जनयति सोऽग्निरस्तीति वेद्यम्॥ ३॥

पदार्थः-हे **(जनासः)** विद्वानो! **(यः)** जो **(अहिम्)** मेघ को **(हत्वा)** मार **(सप्त)** सात प्रकार के **(सिन्धून्)** समुद्रों को वा नदियों को **(अरिणात्)** चलाता है, **(यः)** जो **(गाः)** पृथिवियों को **(उदाजत्)** ऊपर प्रेरित करता अर्थात् एक के ऊपर एक को नियम से चला रहा, **(यः)** जो **(बलस्य)** बल को **(अपधा)** धारण करनेवाला और जो **(अश्मनः)** पाषाणों वा मेघों के **(अन्तः)** बीच **(अग्निम्)** अग्नि को **(जजान)** उत्पन्न करता तथा **(समत्सु)** संग्रामों में **(संवृक्)** सब पदार्थों को अलग कराता है **(सः)** वह **(इन्द्रः)** इन्द्र नामक सूर्यलोक है, यह जानना चाहिये॥ ३॥

भावार्थः-हे मनुष्यो! जो सूर्यलोक मेघ को वर्षाकर समुद्रों को भरता है, सब भूगोलों को अपने प्रति खींचता है, अपनी किरणों से मेघ और समीपस्थ पाषाण के बीच ऊष्मा को उत्पन्न करता है, वह अग्निरूप है, यह जानना चाहिये॥ ३॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः।
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः॥ ४॥

येन। इमा। विश्वा। च्यवना। कृतानि। यः। दासम्। वर्णम्। अधरम्। गुहा। अकरित्यकः। श्वघ्नीऽइव। यः। जिगीवान्। लक्षम्। आदत्। अर्यः। पुष्टानि। सः। जनासः। इन्द्रः॥४॥

पदार्थः-(येन) ईश्वरेण **(इमा)** इमानि **(विश्वा)** सर्वाणि भुवनानि **(च्यवना)** प्राप्तानि **(कृतानि)** उत्पादितानि **(यः)** **(दासम्)** दातुं योग्यम् **(वर्णम्)** रूपम् **(अधरम्)** निम्नम् **(गुहा)** गुहायाम् **(अकः)** करोति **(श्वघ्नीव)** या शुनो हन्ति तद्वत् **(यः)** **(जिगीवान्)** जयशीलः **(लक्षम्)** लक्षितुं योग्यम् **(आदत्)** आदत्ते **(अर्य्यः)** ईश्वरः। **अर्य इति ईश्वरनामसु पठितम्।** (निघं०२.२२)। **(पुष्टानि)** दृढानि **(सः)** **(जनासः)** **(इन्द्रः)**॥४॥

अन्वयः-हे जनासो! येनेश्वरेणेमा विश्वा च्यवना पुष्टानि कृतानि यो गुहा वर्णमधरं दासमको यः श्वघ्नीव जिगीवान् लक्षमादत् स इन्द्रोऽर्यो बोध्यः॥४॥

भावार्थः-अत्रोपमालङ्कारः। य ईश्वरः कारणाद्विविधान् लोकान् पदार्थांश्च निर्मिमीते यः सर्वेषां कर्माणि लक्षीभूतानि रक्षति स सर्वैरुपासनीयः॥४॥

पदार्थः-हे **(जनासः)** मनुष्यो! **(येन)** जिस ईश्वर ने **(इमा)** ये **(विश्वा)** समस्त **(च्यवना)** प्राप्त हुए लोक **(पुष्टानि)** दृढ़ **(कृतानि)** किये **(यः)** जो **(गुहा)** हृदयाकाश में **(वर्णम्)** रूप को **(अधरम्)** उस हृदय के नीचे **(दासम्)** देने योग्य **(अकः)** करता है और **(यः)** जो **(श्वघ्नीव)** कुत्तों को दण्ड देनेवाली के समान **(जिगीवान्)** जयशील **(लक्षम्)** लक्ष को **(आदत्)** ग्रहण करता है **(सः)** वह **(इन्द्रः)** परमैश्वर्यवान् **(अर्य्यः)** ईश्वर है, यह जानना चाहिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो ईश्वर कारण से विविध प्रकार के लोकों और पदार्थों को रचता और जो सब कर्मों को लक्ष सा रखता है, वह सबको उपासना करने योग्य है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्।
सो अर्यः पुष्टीर्विजइवा मिनाति श्रदस्मै धत्त स जनासु इन्द्रः॥५॥७॥

यम्। स्म। पृच्छन्ति। कुह। सः। इति। घोरम्। उत। ईम्। आहुः। न। एषः। अस्ति। इति। एनम्। सः। अर्यः। पुष्टीः। विजः।इव। आ। मिनाति। श्रत्। अस्मै। धत्त। सः। जनासः। इन्द्रः॥५॥

पदार्थः-**(यम्)** **(स्म)** एव। अत्र **निपातस्य च**ेति दीर्घः। **(पृच्छन्ति)** **(कुह)** क्व **(सः)** **(इति)** **(घोरम्)** हननम् **(उत)** अपि **(ईम्)** सर्वतः **(आहुः)** कथयन्ति **(न)** निषेधे **(एषः)** **(अस्ति)**

(इति) **(एनम्)** **(सः)** **(अर्यः)** ईश्वरः **(पुष्टीः)** पोषणानि **(विजइव)** भयेन सञ्चलित इव **(आ)** **(मिनाति)** हिनस्ति **(श्रत्)** सत्यम् **(अस्मै)** **(धत्त)** धरत **(सः)** **(जनासः)** **(इन्द्रः)**॥५॥

अन्वयः-हे जनासो! विद्वांसो ये स्म कुह स इतीं पृच्छन्ति उतैनं घोरमाहुरपरे एषो नास्तीति सोऽर्य ईश्वरो विजइव दोषानामिनात्यस्मै जीवाय पुष्टीः श्रच्च दधाति स इन्द्रोऽस्तीति यूयं धत्त॥५॥

भावार्थः-य आश्चर्यगुणकर्मस्वभावः परमेश्वरोऽस्ति तं केचित्क्वास्तीति ब्रुवन्ति केचिदेनं भयङ्करं केचिच्छान्तं केचिदयं नास्तीति बहुधा वदन्ति, सः सर्वस्याधारभूतस्सन् सत्यं धर्मं जीवनोपायाँश्च वेदद्वारोपदिशति स सर्वैरुपासनीयः॥५॥

पदार्थः-हे **(जनासः)** मनुष्यो! विद्वान् **(यम्, स्म)** जिसको **(कुह, सः)** वह कहाँ है **(इति)** ऐसा **(ईम्)** सबसे **(पृच्छन्ति)** पूछते हैं **(उत)** और कोई **(एनम्)** इसको **(घोरम्)** हननरूप हिंसारूप अर्थात् भयङ्कर **(आहुः)** कहते हैं, अन्य कोई **(एषः)** यह **(न, अस्ति)** नहीं है **(इति)** ऐसा कहते हैं **(सः)** **(अर्यः)** ईश्वर **(विजइव)** भय से जैसे कोई सञ्चलित हो चेष्टा करे, वैसे दोषों को **(आ, मिनाति)** अच्छे प्रकार नष्ट करता है और **(अस्मै)** इस जीव के लिये **(पुष्टीः)** पुष्टियों और **(श्रत्)** सत्य को धारण करता **(सः)** वह **(इन्द्रः)** परमैश्वर्यवान् है, इसको तुम **(धत्त)** धारण करो॥५॥

भावार्थः-जो आश्चर्य गुणकर्मस्वभावयुक्त परमेश्वर है, उसको कोई वह कहाँ है, ऐसा कहते हैं, कोई उसको भयङ्कर, कोई शान्त और यह नहीं है, ऐसा बहुत प्रकार से कहते हैं। वह सबका आधारभूत हुआ सत्य धर्म और जीवन के उपायों को वेद के द्वारा उपदेश करता है, वह सबको उपासना करने के योग्य है॥५॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

यो रध्रस्य॑ चोदि॒ता यः कृ॒शस्य॒ यो ब्र॒ह्मणो॒ नाध॑मानस्य की॒रेः।
यु॒क्तग्रा॑व्णो॒ योऽवि॒ता सु॑शि॒प्रः सु॒तसो॑मस्य॒ स ज॑ना॒स॒ इन्द्रः॑॥६॥

यः। रध्रस्य॑। चोदि॒ता। यः। कृ॒शस्य॑। यः। ब्र॒ह्मणः॑। नाध॑मानस्य। की॒रेः। यु॒क्तऽग्रा॑व्णः। यः। अ॒वि॒ता। सु॒ऽशि॒प्रः। सु॒तऽसो॑मस्य। सः। ज॒ना॒सः॒। इन्द्रः॑॥६॥

पदार्थः-(**यः**) **(रध्रस्य)** हिंसकस्य **(चोदिता)** प्रेरकः **(यः)** **(कृशस्य)** दुर्बलस्य **(यः)** **(ब्रह्मणः)** **(नाधमानस्य)** सकलैश्वर्यप्रापकस्य **(कीरेः)** सकलविद्यास्तोतुः **(युक्तग्राव्णः)** युक्ता ग्रावाणो मेघाः पाषाणा वा यस्मिँस्तस्य **(यः)** **(अविता)** रक्षकः **(सुशिप्रः)** शोभनानि शिप्राणि

सेवनानि यस्मिन् सः। अत्र शेवृ धातोः पृषोदरादिनेष्टसिद्धिः। **(सुतसोमस्य)** सुता उत्पादिताः सोमाः पदार्था येन तस्य **(सः)** **(जनासः)** **(इन्द्रः)**॥६॥

अन्वयः-हे जनासो! यो रध्रस्य यो कृशस्य यो नाधमानस्य यो ब्रह्मणो युक्तग्राव्णो कीरेश्चोदिता यः सुशिप्रः सुतसोमस्याऽविता स इन्द्रः परमेश्वरोऽस्ति॥६॥

भावार्थः-हे मनुष्याः! तमेव जगदुत्पत्तिस्थितिप्रलयकर्त्तारं सकलविद्यायुक्तस्य वेदस्य प्रज्ञापकं परमेश्वरं यूयमुपाध्वम्॥६॥

पदार्थः-हे **(जनासः)** मनुष्यो! **(यः)** जो **(रध्रस्य)** हिंसा करनेवाले का **(यः)** जो **(कृशस्य)** दुर्बल का **(यः)** जो **(नाधमानस्य)** समस्त ऐश्वर्य प्राप्त करानेवाले का **(यः)** जो **(ब्रह्मणः)** वेद का **(युक्तग्राव्णः)** और जिसमें मेघ वा पत्थरयुक्त हैं, उस पदार्थ का **(कीरेः)** तथा सकल विद्याओं की स्तुति प्रशंसा करनेहारे का **(चोदिता)** प्रेरणा करनेवाला वा **(यः)** जो **(सुशिप्रः)** ऐसा है कि जिसमें सुन्दर सेवन होते और **(सुतसोमस्य)** जिसने उत्पन्न किये सोमादि अच्छे पदार्थ उसकी **(अविता)** रक्षा करनेवाला है **(सः)** वह **(इन्द्रः)** परमैश्वर्यवान् परमेश्वर है॥६॥

भावार्थः-हे मनुष्यो! उसी परमेश्वर की उपासना तुम करो कि जो जगत् की उत्पत्ति, स्थिति, प्रलयकर्त्ता तथा सकल विद्यायुक्त वेद का उत्तम ज्ञान करानेवाला है॥६॥

अथ विद्युद्रूपाऽग्निविषयमाह॥

अब बिजुलीरूप अग्नि के विषय को अगले मन्त्र में कहा है॥

यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः॥७॥

यस्य। अश्वासः। प्रऽदिशि। यस्य। गावः। यस्य। ग्रामाः। यस्य। विश्वे। रथासः। यः। सूर्यम्। यः। उषसम्। जजान। यः। अपाम्। नेता। सः। जनासः। इन्द्रः॥७॥

पदार्थः-**(यस्य)** विद्युदाख्यस्य **(अश्वासः)** व्याप्तिशीला वेगादयो गुणाः **(प्रदिशि)** उपदिशि **(यस्य)** **(गावः)** किरणाः **(यस्य)** **(ग्रामाः)** मनुष्यनिवासाः **(यस्य)** **(विश्वे)** सर्वे **(रथासः)** रमणसाधनाः **(यः)** कारणाख्यो विद्युदग्निः **(सूर्यम्)** सवितृमण्डलम् **(यः)** **(उषसम्)** प्रत्यूषकालम् **(जजान)** जनयति **(यः)** **(अपाम्)** जलानाम् **(नेता)** प्रापकः **(सः)** **(जनासः)** **(इन्द्रः)**॥७॥

अन्वयः-हे जनासो विद्वद्वरा! युष्माभिः प्रदिशि यस्य विश्वेऽश्वासो यस्य विश्वे गावो यस्य विश्वे ग्रामा यस्य विश्वे रथासः यस्सूर्यं य उषसं च जजान योऽपां नेताऽस्ति स इन्द्रो वेदितव्यः॥७॥

भावार्थः-हे मनुष्या! यदि भवन्तो वेगाद्यनेकगुणयुक्तं सर्वमूर्त्तद्रव्याधारं शीघ्रगामी विमानादियानवर्षानिमित्तं विद्युदग्निं जानीयुस्तर्हि किं किमुत्तमं कार्य्यं साधितुं न शक्नुयुः॥७॥

पदार्थः-हे **(जनासः)** विद्वद्वर मनुष्यो! तुमको **(प्रदिशि)** प्रति दिशा के समीप **(यस्य)** जिसके **(विश्वे)** समस्त **(अश्वासः)** व्याप्तिशील वेगादि गुणयुक्त **(यस्य)** जिसके समस्त **(गावः)** किरणें **(यस्य)** जिसके समस्त **(ग्रामाः)** मनुष्यों के निवास **(यस्य)** जिसके समस्त **(रथासः)** विहार करानेवाले रथ **(यः)** जो कारण बिजुली रूप अग्नि **(सूर्यम्)** सूर्यमण्डल और **(यः)** जो **(उषसम्)** प्रभातकाल को **(जजान)** प्रकट करता वा **(यः)** जो **(अपाम्)** जलों की **(नेता)** प्राप्ति करानेहारा है **(सः)** वह **(इन्द्रः)** पदार्थों का छिन्न-भिन्न करनेवाला बिजुली रूप अग्नि है, यह जानना चाहिये॥७॥

भावार्थः-हे मनुष्यो! यदि आप लोग वेगादि अनेक गुणयुक्त सर्वमूर्तिमान् पदार्थों के आधाररूप शीघ्रगामी विमान आदि यान और वर्षा निमित्त बिजुलीरूप अग्नि को जानें, तब तो कौन-कौन उत्तम कार्य सिद्ध न कर सकें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः॥८॥

यम्। क्रन्दसी इति। संयती इति सम्ऽयती। विह्वयेते इति विऽह्वयेते। परे। अवरे। उभयाः। अमित्राः। समानम्। चित्। रथम्। आतस्थिऽवांसा। नाना। हवेते इति। सः। जनासः। इन्द्रः॥८॥

पदार्थः-**(यम्)** सूर्य्यम् **(क्रन्दसी)** रोदनशब्दनिमित्ते **(संयती)** संयमेन गच्छन्त्यौ द्यावापृथिव्यौ **(विह्वयेते)** विस्पर्द्धेते इव **(परे)** प्रकृष्टाः **(अवरे)** अर्वाचीनाः **(उभयाः)** प्रकाशाऽप्रकाशोभयकोटिसम्बन्धिनः **(अमित्राः)** शत्रवः **(समानम्)** **(चित्)** इव **(रथम्)** रथादियानम् **(आतस्थिवांसा)** समन्तात्तिष्ठन्तौ **(नाना)** अनेकविधा **(हवेते)** आदत्तः **(सः)** **(जनासः)** **(इन्द्रः)**॥८॥

अन्वयः-हे जनासो विद्याप्रिया! युष्माभिः क्रन्दसी संयती द्यावापृथिव्यौ यं विह्वयेते परेऽवर उभया अमित्रा समानं रथं चिदिव आतस्थिवांसा नाना हवेते गृह्णीतः स इन्द्रो बोध्यः॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा द्वे सेने सम्मुखे स्थित्वा युध्येते तथैव प्रकाशाऽप्रकाशौ वर्त्तेते॥८॥

पदार्थः-हे **(जनासः)** विद्याप्रिय मनुष्यो! तुमको **(क्रन्दसी)** रोने का शब्द कराने **(संयती)** और संयम से जानेवाले प्रकाश और पृथिवी **(यम्)** जिस सूर्यमण्डल को जैसे कोई पदार्थ **(विह्वयेते)** स्पर्द्धा करें, वैसे वा **(परे)** उत्तम **(अवरे)** न्यून **(उभयाः)** अर्थात् प्रकाश और अप्रकाशयुक्त दोनों कोटियों का सम्बन्ध करने **(अमित्राः)** शत्रुजन जैसे **(समानम्)** समान **(रथम्)** रथ आदि यान को **(चित्)** वैसे **(आतस्थिवांसा)** सब ओर से स्थिर **(नाना)** अनेक प्रकार से **(हवेते)** ग्रहण करते हैं **(सः)** वह **(इन्द्रः)** परमैश्वर्यवान् है, यह जानना चाहिये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे दो सेना सम्मुख खड़ी होकर युद्ध करती हैं, वैसे प्रकाश और अप्रकाश वर्त्तमान हैं॥८॥

अथेश्वरविद्युद्विषयमाह॥

अब ईश्वर और बिजुली के विषय को अगले मन्त्र में कहा है॥

यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः॥९॥

यस्मात्। नः। ऋते। विऽजयन्ते। जनासः। यम्। युध्यमानाः। अवसे। हवन्ते। यः। विश्वस्य। प्रतिऽमानम्। बभूव। यः। अच्युतऽच्युत्। सः। जनासः। इन्द्रः॥९॥

पदार्थः-**(यस्मात्)** **(नः)** **(ऋते)** विना **(विजयन्ते)** **(जनासः)** योद्धारः **(यम्)** **(युध्यमानाः)** **(अवसे)** रक्षणाय **(हवन्ते)** **(यः)** परमेश्वरो विद्वान् वा **(विश्वस्य)** संसारस्य **(प्रतिमानम्)** परिमाणसाधकः **(बभूव)** भवति **(यः)** **(अच्युतच्युत्)** योऽच्युतेषु च्यवते ताँश्च्यावयति **(सः)** **(जनासः)** **(इन्द्रः)**॥९॥

अन्वयः-हे जनासो! विद्वांसो जनासो यस्मादृते न विजयन्ते यं युध्यमाना अवसे हवन्ते यो विश्वस्य प्रतिमानं योऽच्युतच्युद् बभूव स इन्द्रोऽस्तीति विजानन्तु॥९॥

भावार्थः-अत्र श्लेषालङ्कारः। ये परमेश्वरन्नोपासन्ते विद्युद्विद्यां न जानन्ति ते विजयिनो न भवन्ति, यदिदं विश्वं यच्च रूपं तत्सर्वं परमेश्वरस्य विद्युतो विज्ञापकमस्ति॥९॥

पदार्थः-हे **(जनासः)** मनुष्यो! **(जनासः)** विद्वान् जन **(यस्मात्)** जिससे **(ऋते)** विना **(न)** नहीं **(विजयन्ते)** विजय को प्राप्त होते हैं **(यम्)** जिसको **(युध्यमानाः)** युद्ध करते हुए **(अवसे)** रक्षा आदि के लिये **(हवन्ते)** ग्रहण करते हैं **(यः)** जो **(विश्वस्य)** संसार का **(प्रतिमानम्)** परिमाणसाधक **(यः)** जो **(अच्युतच्युत्)** स्थिर पदार्थों में चलायमान होता व उन स्थिर पदार्थों को चलानेवाला **(बभूव)** होता **(सः)** वह **(इन्द्रः)** परमैश्वर्यवान् परमेश्वर है, यह जानना चाहिये॥९॥

भावार्थः-इस मन्त्र में श्लेषालङ्कार है। जो परमेश्वर की उपासना नहीं करते, बिजुली की विद्या को नहीं जानते, वे विजयशील नहीं होते। जो यह विश्व और जो सब पदार्थों का रूपमात्र है, वह परमेश्वर और बिजुली का विज्ञान करानेवाला है॥९॥

अथेश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहा है॥

यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः॥१०॥८॥

यः। शश्वतः। महि। एनः। दधानान्। अमन्यमानान्। शर्वा। जघान। यः। शर्धते। न। अनुऽददाति। शृध्याम्। यः। दस्योः। हन्ता। सः। जनासः। इन्द्रः॥१०॥

पदार्थः-(**यः**) परमेश्वरः (**शश्वतः**) अनादिस्वरूपान् पदार्थान् (**महि**) महत् (**एनः**) पापम् (**दधानान्**) धरतः (**अमन्यमानान्**) अज्ञानिनः शठान् (**शर्वा**) शासनवज्रेण (**जघान**) हन्ति (**यः**) (**शर्द्धते**) यः शर्द्धं करोति तस्मै (**न**) (**अनुददाति**) (**शृध्याम्**) शब्दकुत्साम् (**यः**) (**दस्योः**) परपदार्थहर्त्तुर्दुष्टस्य (**हन्ता**) (**सः**) (**जनासः**) (**इन्द्रः**)॥१०॥

अन्वयः-हे जनासो विद्वांसो! युष्माभिर्यः शश्वतो धरति मह्येनो दधानानमन्यमानान् पापिष्ठाञ्छर्वा जघान यः शर्द्धते शृध्यां नानुददाति या दस्योर्हन्ताऽस्ति स इन्द्रः सेवनीयः॥१०॥

भावार्थः-यदि परमेश्वरो दुष्टाचारान्न ताडयेद् धार्मिकान्न सत्कुर्याद् दस्यून्न हन्यात् तर्हि न्यायव्यवस्था नश्येत्॥१०॥

पदार्थः-हे (**जनासः**) विद्वान् मनुष्यो! तुम लोगों को (**यः**) जो परमेश्वर (**शश्वतः**) अनादिस्वरूप पदार्थों को धारण करता (**महि**) अत्यन्त (**एनः**) पाप को (**दधानान्**) धारण किये हुए (**अमन्यमानान्**) अज्ञानी शठ पापियों को (**शर्वा**) शासनकारी वज्र से (**जघान**) मारता (**यः**) जो (**शर्द्धते**) कुत्सित निन्दित पापयुक्त शब्द करने अर्थात् उच्चारण करनेवाले के लिये (**शृध्याम्**) शब्द निन्दा न (**अनुददाति**) अनुकूलता से देता है और (**यः**) जो (**दस्योः**) दूसरे के पदार्थों को हरनेवाले दुष्ट का (**हन्ता**) मारनेवाला है (**सः**) वह (**इन्द्रः**) परमैश्वर्यवान् परमेश्वर सेवने योग्य है॥१०॥

भावार्थः- जो परमेश्वर दुष्टाचारियों को न ताड़ना दे, धार्मिकों का सत्कार न करे और डाकुओं को न मारे तो न्यायव्यवस्था नष्ट हो जाये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यः शम्ब॑रं॒ पर्व॑तेषु क्षि॒यन्तं॑ चत्वारिं॒श्यां श॒रद्य॒न्ववि॑न्दत्।
ओ॒जा॒यमा॑नं॒ यो अहिं॑ ज॒घान॒ दानुं॒ शया॑नं॒ स ज॑नास॒ इन्द्रः॥ ११॥

यः। शम्ब॑रम्। पर्व॑तेषु। क्षि॒यन्त॑म्। च॒त्वारिं॒श्याम्। श॒रदि॑। अ॒नु॒ऽअवि॑न्दत्। ओ॒जा॒यमा॑नम्। यः। अहि॑म्। ज॒घान॑। दानु॑म्। शया॑नम्। सः। ज॒ना॒सः॒। इन्द्रः॥ ११॥

पदार्थः-(**यः**) (**शम्बरम्**) मेघम् (**पर्वतेषु**) अभ्रेषु (**क्षियन्तम्**) निवसन्तम् (**चत्वारिंश्याम्**) चत्वारिंशतः पूर्णायाम् (**शरदि**) शरदृतौ (**अन्वविन्दत्**) अनुलभते (**ओजायमानम्**) ओजः पराक्रममिवाचरन्तम् (**यः**) (**अहिम्**) मेघम् (**जघान**) हन्ति (**दानुम्**) दातारम् (**शयानम्**) कृतशयनमिव वर्त्तमानम् (**सः**) (**जनासः**) इन्द्रः॥ ११॥

अन्वयः-हे जनासो धीमन्तो! युष्माभिर्यः पर्वतेषु चत्वारिंश्यां शरदि क्षियन्तं शम्बरमन्वविन्दद् यो दानुं शयानमोजायमानमहिं जघान स इन्द्रो बोध्यः॥ ११॥

भावार्थः-यदि चत्वारिंशद्वर्षाणि वृष्टिर्न स्यात्तर्हि कः प्राणं धर्त्तुं शक्नुयात्। यदि सूर्यो जलं नाकर्षेन्न धरेन्न वर्षयेत्तर्हि को बलं प्राप्तुमर्हेत्॥ ११॥

पदार्थः-हे (**जनासः**) बुद्धिमान् मनुष्यो! तुमको (**यः**) जो (**पर्वतेषु**) बादलों में (**चत्वारिंश्याम्**) चालीसवीं (**शरदि**) शरद ऋतु में (**क्षियन्तम्**) निवास करते हुए (**शम्बरम्**) मेघ को (**अन्वविन्दत्**) अनुकूलता से प्राप्त होता और (**यः**) जो (**दानुम्**) देनेवाले (**शयानम्**) तथा सोते हुए के समान वर्त्तमान [(**ओजायमानम्**) पराक्रम करनेवाले के समान आचरण करते हुए] (**अहिम्**) मेघ को (**जघान**) मारता है, (**सः**) वह (**इन्द्रः**) परमैश्वर्यवान् सूर्य जानना चाहिये॥ ११॥

भावार्थः-जो चालीस वर्ष पर्यन्त वर्षा न हो तो कौन प्राण धर सके। जो सूर्य जल को न खींचे, न धारण करे और न वर्षावे तो कौन बल पाने को योग्य हो॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यः स॒प्तर॑श्मिर्वृष॒भस्तु॒विष्मा॑न॒वास॑ृजत् सर्त॒वे स॒प्त सिन्धू॑न्।
यो रौ॒हि॒णमस्फु॑र॒द् वज्र॑बाहु॒र्द्यामा॒रोह॑न्तं॒ स ज॑नास॒ इन्द्रः॥ १२॥

यः। सप्तऽरश्मिः। वृषभः। तुविष्मान्। अवऽअसृजत्। सर्तवे। सप्त। सिन्धून्। यः। रौहिणम्। अस्फुरत्। वज्रऽबाहुः। द्याम्। आऽरोहन्तम्। सः। जनासः। इन्द्रः॥ १२॥

पदार्थः-(यः) (सप्तरश्मिः) सप्तविधा रश्मयो यस्य सः **(वृषभः)** मेघशक्तिनिरोधकः **(तुविष्मान्)** बहुबलाकर्षणयुक्तः **(अवासृजत्)** अवसर्जति **(सर्त्तवे)** गन्तुम् **(सप्त)** सप्तविधान् **(सिन्धून्)** नदान् **(यः) (रौहिणम्)** रोहणशीलं मेघम् **(अस्फुरत्)** स्फुरति संचालयति वा **(वज्रबाहुः)** बाहुरिव वज्रः किरणसमूहो यस्य **(द्याम्)** प्रकाशम् **(आरोहन्तम्) (सः) (जनासः) (इन्द्रः)**॥ १२॥

अन्वयः-हे जनासो! युष्माभिर्यः सप्तरश्मिर्वृषभस्तुविष्मान्त्सविता सप्त सिन्धून् सर्त्तवे वासृजत् यो वज्रबाहुर्द्यामारोहन्तं रौहिणमस्फुरत् स इन्द्रः प्रज्ञापनीयः॥ १२॥

भावार्थः-यस्मिन् रक्तादिवर्णाः सप्तप्रकाराः किरणाः सन्ति स एव सूर्य्यलोको वृष्टिद्वारा नदी नदानापूरयति पुनरूर्ध्वं जलमाकृष्य धरति पुनर्वर्षति एवमेवेश्वरनियोगेनेदं चक्रं प्रवर्त्तते॥ १२॥

पदार्थः-हे **(जनासः)** मनुष्यो! तुमको **(यः)** जो **(सप्तरश्मिः)** सात प्रकार की किरणों से युक्त **(वृषभः)** मेघ की शक्ति को रोकनेवाला **(तुविष्मान्)** बहुत बल से खींचने की शक्ति से युक्त सूर्य्यलोक **(सप्त)** सात **(सिन्धून्)** सिन्धुओं को **(सर्त्तवे)** चलने अर्थात् बहने के लिये **(अवासृजत्)** उत्पन्न करता अर्थात् जल आदि पदार्थों से परिपूर्ण करता है **(यः)** जो **(वज्रबाहुः)** भुजा के तुल्य किरण समूहवाला **(द्याम्)** प्रकाश को **(आरोहन्तम्)** चढ़ते हुए **(रौहिणम्)** चढ़ने के शीलवाले मेघ को **(अस्फुरत्)** फुरती देता वा चलाता है **(सः)** वह **(इन्द्रः)** सूर्यलोक सबको बताने के योग्य है॥ १२॥

भावार्थः-जिसमें रक्तादि वर्णयुक्त सात प्रकार के किरण विद्यमान हैं, वही सूर्यलोक वर्षा द्वारा नदी और नदों को अच्छे प्रकार परिपूर्ण करता और फिर ऊपर को जल खींच के धारण करता, फिर वर्षाता है, ऐसे ही ईश्वर के आज्ञारूप नियम से यह संसारचक्र वर्त्तमान है॥ १२॥

पुनः सूर्यविषयमाह॥

फिर सूर्य विषय को अगले मन्त्र में कहा है॥

द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः॥ १३॥

द्यावा। चित्। अस्मै। पृथिवी इति। नमेते इति। शुष्मात्। चित्। अस्य। पर्वताः। भयन्ते। यः। सोमऽपाः। निऽचितः। वज्रऽबाहुः। यः। वज्रऽहस्तः। सः। जनासः। इन्द्रः॥ १३॥

पदार्थः-(**द्यावा**) द्यौः (**चित्**) इव (**अस्मै**) सूर्याय (**पृथिवी**) भूमिः (**नमेते**) प्रभूतं शब्दयेते (**शुष्मात्**) बलात् (**चित्**) अपि (**अस्य**) सूर्य्यस्य (**पर्वताः**) मेघाः (**भयन्ते**) बिभ्यति। अत्र व्यत्ययेनात्मनेपदम्। (**यः**) (**सोमपाः**) यः सोमं रसं पिबति सः (**निचितः**) निश्चितश्चितः (**वज्रबाहुः**) बाहुवत् किरणबलः (**यः**) (**वज्रहस्तः**) वज्राः किरणा हस्ता यस्य सः (**सः**) (**जनासः**) (**इन्द्रः**)॥१३॥

अन्वयः-हे जनासो! युष्माभिरस्मै द्यावापृथिवी चिन्नमेते अस्य शुष्माच्चित्पर्वता भयन्ते यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तोऽस्ति स इन्द्रो वेदितव्यः॥१३॥

भावार्थः-हे मनुष्या! यस्याकर्षणेन प्रकाशक्षिति नम्रे इव वर्त्तते मेघा भ्रमन्ति हस्ताभ्यामिव यो रसमूर्ध्वन्नयति तं यथावत्संप्रयुञ्जत॥१३॥

पदार्थः-हे (**जनासः**) मनुष्यो! तुमको (**अस्मै**) इस सूर्यमण्डल के लिये (**द्यावापृथिवी**) आकाश और भूमि के समान बृहत् पदार्थ (**चित्**) भी (**नमेते**) अति सामर्थ्ययुक्त शब्दायमान होते हैं (**अस्य**) इस सूर्यमण्डल के (**शुष्मात्**) बल से (**चित्**) ही (**पर्वताः**) मेघ (**भयन्ते**) भयभीत होते हैं (**यः**) जो (**सोमपाः**) रस को पीता (**निचितः**) निरन्तर अनेक पदार्थों से इकट्ठा किया गया और (**यः**) जो (**वज्रबाहुः**) बाहुओं के तुल्य किरण बलयुक्त तथा (**वज्रहस्तः**) जिसकी हाथों के समान किरणें हैं, वह (**इन्द्रः**) सूर्य्यलोक जानने योग्य है॥१३॥

भावार्थः-हे मनुष्यो! जिसके आकर्षण से प्रकाश और क्षिति नमे हुए वर्त्तमान हैं, मेघ भ्रमि रहे हैं, हाथों के समान जो रस को ऊर्ध्व पहुँचाता है, उसका यथावत् अच्छे प्रकार प्रयोग करो॥१३॥

अथेश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहते हैं॥

यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनासु इन्द्रः॥१४॥

यः। सुन्वन्तम्। अवति। यः। पचन्तम्। यः। शंसन्तम्। यः। शशमानम्। ऊती। यस्य। ब्रह्म। वर्धनम्। यस्य। सोमः। यस्य। इदम्। राधः। सः। जनासुः। इन्द्रः॥१४॥

पदार्थः-(**यः**) (**सुन्वन्तम्**) सर्वस्य सुखायाभिषवं निष्पादयन्तम् (**अवति**) रक्षति (**यः**) (**पचन्तम्**) परिपक्वं कुर्वन्तम् (**यः**) (**शंसन्तम्**) प्रशंसां कुर्वन्तम् (**यः**) (**शशमानम्**) अधर्ममुल्लङ्घमानम् (**ऊती**) रक्षणाद्यया क्रियया (**यस्य**) (**ब्रह्म**) वेदः (**वर्द्धनम्**) (**यस्य**)

जगदीश्वरस्य **(सोमः)** चन्द्रौषधिगणः **(यस्य)** **(इदम्)** **(राधः)** धनम् **(सः)** **(जनासः)** **(इन्द्रः)**॥१४॥

अन्वयः-हे जनासो विद्वांसो! युष्माभिर्यो जगदीश्वरः ऊत्या सुन्वतम् यः पचन्तं कुर्वन्तं यः शंसन्तं यः शशमानं चावति यस्य ब्रह्म वर्द्धनं यस्य सोमो यस्येदं राधोऽस्ति स इन्द्रः सततमुपासनीयः॥१४॥

भावार्थः-हे मनुष्या! येन परमात्मना वेदोपदेशद्वारा मनुष्योन्नतिः कृता येन धार्मिका रक्ष्यन्ते दुष्टाचारास्ताड्यन्ते यस्येदं जगत्सर्वमैश्वर्यमस्ति तमात्मसु सततं ध्यायत॥१४॥

पदार्थः-हे **(जनासः)** विद्वान् मनुष्यो! तुम लोगों को **(यः)** जो जगदीश्वर **(ऊती)** रक्षा आदि क्रिया से **(सुन्वन्तम्)** सबके सुख के लिये उत्तम उत्तम पदार्थों के रस निकालते हुए को वा **(यः)** जो **(पचन्तम्)** पक्का करते हुए को वा **(यः)** जो **(शंसन्तम्)** प्रशंसा करते हुए को वा **(यः)** जो **(शसमानम्)** अधर्म को उल्लंघन करते हुए को **(अवति)** रखता है, पालता है **(यस्य)** जिसका **(ब्रह्म)** वेद **(वर्द्धनम्)** वृद्धिरूप **(यस्य)** जिस जगदीश्वर का **(सोमः)** चन्द्रमा और औषधियों का समूह **(यस्य)** जिसका **(इदम्)** यह **(राधः)** धन है **(सः)** वह **(इन्द्रः)** सर्वैश्वर्यवान् जगदीश्वर निरन्तर उपासना करने योग्य है॥१४॥

भावार्थः-हे मनुष्यो! जिस परमात्मा ने वेदोपदेश द्वारा मनुष्यों की उन्नति की वा जिससे धर्मात्मा जन पलते वा जिससे दुष्टाचरण करनेवाले ताड़ना पाते वा जिसका यह सब जगत् ऐश्वर्यरूप है, उसका ध्यान अपने-अपने आत्माओं में निरन्तर करो॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यः सु॑न्व॒ते पच॑ते दु॒ध्र आ चि॒द् वाज॑ं ददर्षि॒ स किला॑सि स॒त्यः।
व॒यं त॑ इन्द्र वि॒श्वह॑ प्रि॒यास॑: सु॒वीरा॑सो वि॒दथ॒मा व॑देम॥ १५॥ ९॥

यः। सु॒न्व॒ते। पच॑ते। दु॒ध्रः। आ। चि॒त्। वाज॑म्। ददर्षि। सः। किल॑। अ॒सि॒। स॒त्यः। व॒यम्। ते॒। इ॒न्द्र॒। वि॒श्वह॑। प्रि॒यास॑ः। सु॒ऽवीरा॑सः। वि॒दथ॑म्। आ। व॒दे॒म॒॥ १५॥

पदार्थः-(यः) **(सुन्वते)** अभिषवं कुर्वते **(पचते)** परिपक्वं संपादयते **(दुध्रः)** दुःखेन धर्त्तुं योग्यः। अत्र **छान्दसो वर्णलोपो वे**ति वर्णलोपो **घञर्थे कविधानमि**ति धृधातोः कः प्रत्ययः। **(आ)** समन्तात् **(चित्)** अपि **(वाजम्)** सर्वेषां वेगम् **(ददर्षि)** भृशं विदृणासि **(सः)** **(किल)** **(असि)** **(सत्यः)** त्रैकाल्याऽबाध्यः **(वयम्)** **(ते)** तव **(इन्द्र)** परमैश्वर्यप्रद **(विश्वह)** विश्वेषु अहस्सु। अत्र

छान्दसो वर्णलोपो वेत्यलोपः **सुपां सुलुगि**ति विभक्तेर्लुक्। **(प्रियासः)** प्रीताः कामयमानाः **(सुवीरासः)** शोभना वीरा येषान्ते **(विदथम्)** विज्ञानस्वरूपम् **(आ) (वदेम)** उपदिशेम॥१५॥

अन्वयः-हे इन्द्र! यो दुध्रस्त्वं सुन्वते पचते वाजमादर्दर्षि स किल त्वं सत्योऽसि तस्य ते विदथं प्रियासः सुवीरासस्सन्तो वयं विश्वह चिदावदेम॥१५॥

भावार्थः-हे मनुष्या! यः परमेश्वरो मूर्खैरधर्मात्मभिर्ज्ञातुमशक्यः सर्वस्य जगतः सन्धाता विच्छेदको विज्ञानस्वरूपोऽविनाश्यस्ति तमेव प्रशंसतोपाध्वं च॥१५॥

अत्र सूर्येश्वरविद्युद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वादशं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य के देनेवाले ईश्वर! **(यः)** जो **(दुध्रः)** दुःख से ग्रहण करने योग्य आप **(सुन्वते)** उत्तम-उत्तम पदार्थों का रस निकालते वा **(पचते)** पदार्थों को परिपक्व करते हुए के लिये **(वाजम्)** सबके वेग को **(आ, दर्दर्षि)** सब ओर से निरन्तर विदीर्ण करते हो **(सः) (किल)** वही आप **(सत्यः)** सत्य अर्थात् तीन काल में अबाध्य निरन्तर एकता रखनेवाला हैं, उन **(ते)** आपके **(विदथम्)** विज्ञानस्वरूप की **(प्रियासः)** प्रीति और कामना करते हुए **(सुवीरासः)** सुन्दर वीरोंवाले होते हुए हम लोग **(विश्वह)** सब दिनो में **(चित्)** निश्चय से **(आ, वदेम)** उपदेश करें॥१५॥

भावार्थः-हे मनुष्यो! जो परमेश्वर मूर्ख अधर्मियों से जाना नहीं जा सकता और वह सब जगत् का याथातथ्य रचनेवाला वा विनाश करनेवाला विज्ञानस्वरूप अविनाशी है, उसी की प्रशंसा और उपासना करो॥१५॥

इस सूक्त में सूर्य, ईश्वर और बिजुली के गुणों का वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बारहवां सूक्त और नवमां वर्ग समाप्त हुआ॥

ऋतुरिति त्रयोदशर्चस्य त्रयोदशस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १-३, १०-१२ भुरिक् त्रिष्टुप्। ७, ८ निचृत्त्रिष्टुप्। ९, १३ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ निचृज्जगती। ५, ६ विराड् जगती छन्दः। निषादः स्वरः॥

अथ विद्वद्गुणानाह॥

अब तेरह ऋचावाले तेरहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का उपदेश करते हैं॥

ऋ॒तुर्ज॑नि॒त्री तस्या॑ अ॒पस्परि॒ म॒क्षू जा॒त आवि॑श॒द्यासु॒ वर्ध॑ते।
तदा॑हु॒ना अ॑भवत्पि॒प्युषी॒ पयो॑ऽशोः पी॒यूष॑ं प्रथ॒मं तदु॒क्थ्य॑म्॥ १॥

ऋ॒तुः। जनि॒त्री। तस्याः॑। अ॒पः। परि॑। म॒क्षु। जा॒तः। आ। अ॒वि॒श॒त्। यासु॑। वर्ध॑ते। तत्। आ॒हु॒नाः। अ॒भ॒व॒त्। पि॒प्युषी॑। पयः॑। अं॒शोः। पी॒यूष॑म्। प्र॒थ॒मम्। तत्। उ॒क्थ्य॑म्॥ १॥

पदार्थः-(ऋतुः) वसन्तादिः **(जनित्री)** **(तस्याः)** **(अपः)** जलानि **(परि)** सर्वतः **(मक्षु)** सद्यः **(जातः)** **(आ)** समन्तात् **(अविशत्)** विशति **(यासु)** **(वर्द्धते)** **(तत्)** ताः **(आहनाः)** व्याप्ताः **(अभवत्)** भवति **(पिप्युषी)** पानकर्त्री **(पयः)** रसम् **(अंशोः)** अंशात् **(पीयूषम्)** पातुं योग्यम् **(प्रथमम्)** **(तत्)** **(उक्थ्यम्)** उक्थेषु वक्तुं योग्येषु भवम्॥१॥

अन्वयः-हे मनुष्या! य ऋतुर्जातस्सँस्तदाहना अप आविशत् यासु मक्षु परिवर्द्धते तस्य या जनित्री तस्याः पयः पिप्युष्यभवत् तदंशोर्यत् प्रथमं पीयूषं तदुक्थ्यं सर्वं यूयं प्राप्नुत॥१॥

भावार्थः-मनुष्यैर्ऋतूनामुत्पादिका विद्युद्वेद्या यस्याः प्रभावाद् मेघा अमृतात्मकं जलं वर्षयन्ति येन सर्वाः प्रजा वर्द्धन्ते सा वेद्या॥१॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(ऋतुः)** वसन्तादि ऋतुगण **(जातः)** उत्पन्न हुआ **(तत्)** उन **(आहनाः)** सब पदार्थों में व्याप्त **(अपः)** जलों को **(आ, अविशत्)** सब प्रकार से प्रवेश करता है **(यासु)** जिनमें **(मक्षु)** शीघ्र **(परिवर्द्धते)** सब ओर से बढ़ता है, उसकी जो **(जनित्री)** उत्पन्न करनेवाली समय वेला है **(तस्याः)** उसकी जो **(पयः)** रस का **(पिप्युषी)** पान करनेवाली अन्तर्वेला **(अभवत्)** होती है, उसके **(अंशोः)** अंश से जो **(प्रथमम्)** प्रथम **(पीयूषम्)** पीने योग्य उत्पन्न होता है, उस प्रशंसनीय समस्त अंश को तुम प्राप्त होओ॥१॥

भावार्थः-मनुष्यों को वसन्तादि ऋतुओं की उत्पन्न करनेवाली बिजुली जाननी चाहिये, जिस बिजुली के प्रभाव से अमृत के समान मेघ जल वर्षाते हैं, जिससे सब प्रजा बढ़ती है, वह जाननी चाहिये॥१॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्न्यायप्र भरन्त भोजनम्।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः॥ २॥

सध्री। ईम्। आ। यन्ति। परि। बिभ्रतीः। पयः। विश्वप्न्याय। प्र। भरन्त। भोजनम्। समानः। अध्वा। प्रऽवताम्। अनुऽस्यदे। यः। ता। अकृणोः। प्रथमम्। सः। असि। उक्थ्यः॥ २॥

पदार्थः-(सध्री) समानस्थानाः **(ईम्)** जलम् **(आ)** **(यन्ति)** समन्तात् प्राप्नुवन्ति **(परि)** सर्वतः **(बिभ्रतीः)** धरन्त्यः पोषयन्त्यः **(पयः)** रसम् **(विश्वप्न्याय)** विश्वस्य पालनाय **(प्र)** **(भरन्त)** भरन्ति **(भोजनम्)** पालनम् **(समानः)** तुल्यः **(अध्वा)** मार्गः **(प्रवताम्)** गच्छताम् **(अनुष्यदे)** आनुकूल्येन किञ्चित्प्रस्रवणाय **(यः)** **(ता)** तानि **(अकृणोः)** कुरु **(प्रथमम्)** **(सः)** **(असि)** **(उक्थ्यः)** प्रशंसितुं योग्यः॥ २॥

अन्वयः-या सध्री पयो बिभ्रतीराप अनुष्यदे विश्वप्न्यायेम् पर्यायन्ति भोजनं प्रभरन्त यासां प्रवतां समानोऽध्वास्ति यस्ता प्रथममकृणोः स त्वमुक्थ्योऽसि॥ २॥

भावार्थः-हे मनुष्या! यज्ञलं वायुना सह चरति येन सर्वस्य पालनं जायते तत्सदा शोधयत यतो भवन्तः प्रशंसिताः स्युः॥ २॥

पदार्थः-जो **(सध्री)** समान ठहरनेवाले **(पयः)** रस को **(बिभ्रतीः)** धारण किये हुए जल **(अनुष्यदे)** अनुकूलता से किञ्चित्-किञ्चित् झरने के लिये **(विश्वप्न्याय)** संसार की पालना के लिये **(ईम्)** सब ओर से **(परि, आ, यन्ति)** पर्याय से प्राप्त होते हैं **(भोजनम्)** पालना को **(प्र, भरन्त)** धारण करते जिन **(प्रवताम्)** जाते हुए जलों का **(समानः)** समान **(अध्वा)** मार्ग है **(यः)** जो **(ता)** उनको **(प्रथमम्)** उत्तम् नियमवान् **(अकृणो)** करते हैं **(सः)** वह आप **(उक्थ्यः)** प्रशंसा करने योग्य **(असि)** हैं॥ २॥

भावार्थः-हे मनुष्यो! जो जल पवन के साथ चलता है, जिससे सबका पालन होता है, उसको सदा शोधो, जिससे आप लोग प्रशंसित हों॥ २॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर विषय को अगले मन्त्र में कहा है॥

अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते।

विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः॥ ३॥

अनु। एकः। वदति। यत्। ददाति। तत्। रूपा। मिनन्। तत्ऽअपाः। एकः। ईयते। विश्वाः। एकस्य। विऽनुदः। तितिक्षते। यः। ता। अकृणोः। प्रथमम्। सः। असि। उक्थ्यः॥ ३॥

पदार्थः-(अनु) **(एकः)** असहायः **(वदति)** **(यत्)** यानि **(ददाति)** **(तत्)** तानि **(रूपा)** रूपाणि **(मिनन्)** हिंसन् **(तदपाः)** तदपः कर्म यस्य सः **(एकः)** असहायः **(ईयते)** प्राप्नोति **(विश्वाः)** अखिलाः **(एकस्य)** **(विनुदः)** विविधतया प्रेरकस्य **(तितिक्षते)** सहते। अत्र व्यत्ययेनात्मनेपदम्। **(यः)** **(ता)** तानि **(अकृणोः)** करोति **(प्रथमम्)** विस्तीर्णम् **(सः)** **(असि)** **(उक्थ्यः)**॥ ३॥

अन्वयः-हे जगदीश्वर! भवानेको विश्वा विद्या यदनुवदति तत्सहरूपा मिनन् तदपाः सन्नेक ईयते तितिक्षते यस्ता प्रथममकृणोर्यस्य विनुद एकस्येदं जगदस्ति स त्वमुक्थ्योऽसि॥ ३॥

भावार्थः-हे मनुष्या! योऽद्वितीयो जगदीश्वरोऽस्मत्कल्याणाय सृष्ट्यादौ वेदानुपदिशति जगत्सृष्टिस्थितिप्रलयान् करोति योऽन्तर्य्याम्यपारशक्तिः सर्वानपवादान् सहते तमेव सर्वोत्तमप्रशंसार्थं भगवन्तमुपासीरन्॥ ३॥

पदार्थः-हे जगदीश्वर! **(एकः)** एकाकी आप **(विश्वाः)** समस्त विद्याओं के **(यत्)** जिन **(अनुवदति)** अनुवादों को करते हैं **(तत्)** वह साथ **(रूपा)** नाना प्रकार के रूपों को **(मिनत्)** छिन्न-भिन्न करते और **(तदपाः)** वही कर्म जिनका ऐसे होते हुए आप **(एकः)** एकाकी **(ईयते)** प्राप्त होते **(तितिक्षते)** सबका सहन करते **(यः)** जो **(ता)** उन उक्त कर्मों का **(प्रथमम्)** विस्तार जैसे हो, वैसे **(अकृणोः)** करते हैं, जिन **(विनुदः)** प्रेरणा करनेवाले **(एकस्य)** एक आपका यह जगत् है **(सः)** वह आप **(उक्थ्यः)** कथनीय जनों में प्रसिद्ध **(असि)** हैं॥ ३॥

भावार्थः-हे मनुष्यो! जो अद्वितीय जगदीश्वर हम लोगों के कल्याण के लिये सृष्टि के आदि में वेदों का उपदेश करता, संसार की उत्पत्ति, स्थिति और प्रलय करता है, जो अन्तर्यामी अपारशक्ति सब अपवादों को सहता है, उसी सर्वोत्तम प्रशंसा योग्य की आप लोग प्रशंसा करें॥ ३॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः॥ ४॥

प्रऽजाभ्यः। पुष्टिम्। विऽभजन्तः। आसते। रयिम्ऽइव। पृष्ठम्। प्रऽभवन्तम्। आऽयते। असिन्वन्। दंष्ट्रैः। पितुः। अत्ति। भोजनम्। यः। ता। अकृणोः। प्रथमम्। सः। असि। उक्थ्यः॥४॥

पदार्थः-(प्रजाभ्यः) (पुष्टिम्) पोषणार्हान् पदार्थान् **(विभजन्तः)** विविधतया सेवमानाः **(आसते)** उपविष्टाः सन्ति **(रयिमिव)** श्रियमिव **(पृष्ठम्)** आधारम् **(प्रभवन्तम्)** उत्पद्यमानम् **(आयते)** समीपं प्राप्नुवते **(असिन्वन्)** बध्नन्ति **(दंष्ट्रैः)** दद्भिः **(पितुः)** अन्नम् **(अत्ति)** भक्षयति **(भोजनम्)** भक्षणीयं वस्तु **(यः) (ता) (अकृणोः) (प्रथमम्) (सः) (असि) (उक्थ्यः)**॥४॥

अन्वयः-ये प्रजाभ्यः पुष्टिं विभजन्त आयते प्रभवन्तं पृष्ठं रयिमिवाऽसिन्वन्नासते तैस्सह यो दंष्ट्रैः पितुर्भोजनमत्ति ता प्रथममकृणोः स त्वमुक्थ्योऽसि॥४॥

भावार्थः-ये मनुष्या मनुष्याणां विद्याधनवृद्धये बद्धपरिकराःस्युस्ते सुखिनः सन्तः प्रशंसनीया भवेयुः॥४॥

पदार्थः-जो **(प्रजाभ्यः)** प्रजाजनों के लिये **(पुष्टिम्)** पुष्टि के योग्य पदार्थों को **(विभजन्तः)** विविध प्रकार से सेवन करते हुए जन **(आयते)** समीप प्राप्त हुए जिज्ञासु जन के लिये **(प्रभवन्तम्)** उत्पद्यमान **(पृष्ठम्)** आधार को **(रयिमिव)** धन के समान **(असिन्वन्)** बांधते और **(आसते)** स्थिर होते हैं, उनके साथ **(यः)** जो **(दंष्ट्रैः)** दन्तों से **(पितुः)** अन्न **(भोजनम्)** भोजन के योग्य पदार्थ को **(अत्ति)** भक्षण करते हैं **[(ता)** उन उक्त कर्मों का **(प्रथमम्)** विस्तार जैसे हो, वैसे **(अकृणोः)** करते हैं,**](सः)** वह आप **(उक्थ्यः)** कहने योग्य जनों में प्रसिद्ध **(असि)** हैं॥४॥

भावार्थः-जो मनुष्य दूसरे मनुष्यों की विद्या और धन की वृद्धि के लिये बद्धपरिकर अर्थात् कटिबद्ध होते हैं, वे सुखी होते हुए प्रशंसनीय हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः॥५॥१०॥

अध। अकृणोः। पृथिवीम्। सम्ऽदृशे। दिवे। यः। धौतीनाम्। अहिऽहन्। अरिणक्। पथः। तम्। त्वा। स्तोमेभिः। उदऽभिः। न। वाजिनम्। देवम्। देवाः। अजनन्। सः। असि। उक्थ्यः॥५॥

पदार्थः-(अध) (अकृणोः) करोति **(पृथिवीम्)** भूमिम् **(संदृशे)** सम्यग्द्रष्टुं **(दिवे)** प्रकाशाय **(यः) (धौतीनाम्)** धावन्तीनां नदीनाम् **(अहिहन्)** अहेर्मेघस्य हन्तेव शत्रुहन् **(अरिणक्)** विरिणक्ति **(पथः)** मार्गान् **(तम्) (त्वा)** त्वाम् **(स्तोमेभिः)** स्तुतिभिः **(उदभिः)** उदकैः **(न)** इव **(वाजिनम्)**

वेगवन्तम् **(देवम्)** दिव्यगुणकर्मस्वभावम् **(देवाः)** देदीप्यमानाः **(अजनन्)** जनयन्ति **(सः)** **(असि)** **(उक्थ्यः)**॥५॥

अन्वयः-हे अहिहन्! यो भवान् धौतीनां पथोऽरिणगध दिवे पृथिवीं संदृशेऽकृणोः। यं त्वा वाजिनं देवं देवा अजनँस्तं त्वामुदभिर्न स्तोमेभिः प्रशंसेम स त्वमुक्थ्योऽसि॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सविता नदीनां मार्गान् जनयति सर्वं मूर्त्तन्द्रव्यं प्रकाशयति तथा न्यायमार्गान् संचाल्य विद्याशिक्षे यूयं प्रकाशयत॥५॥

पदार्थः-हे **(अहिहन्)** मेघहन्ता सूर्य के समान शत्रुओं को हननेवाले! **(यः)** जो आप **(धौतीनाम्)** धावन करती हुई नदियों के **(पथः)** मार्गों को **(अरिणक्)** अलग-अलग करते हैं **(अध)** इसके अनन्तर **(दिवे)** प्रकाश के लिये **(पृथिवीम्)** भूमि को **(संदृशे)** अच्छे प्रकार देखने को **(अकृणोः)** करते हैं अर्थात् मार्गों को शुद्ध कराते जिन **(त्वा)** आपको **(वाजिनम्)** वेगवान् और **(देवम्)** दिव्य गुण, कर्म, स्वभाववाले को **(देवाः)** देदीप्यमान विद्वान् जन **(अजनन्)** उत्पन्न करते हैं **(तम्)** उन आपको **(उदभिः)** जलों से **(न)** जैसे वैसे **(स्तोमेभिः)** स्तुतियों से हम लोग प्रशंसित करते हैं **(सः)** वह आप **(उक्थ्यः)** कथनीय जनों में प्रसिद्ध **(असि)** हैं॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे सविता नदियों के मार्गों को उत्पन्न करता सब मूर्त्तिमान् द्रव्य को प्रकाशित करता, वैसे न्याय मार्गों को अच्छे प्रकार चला कर विद्या और शिक्षा का प्रकाश तुम करो॥५॥

अथेश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहा है॥

यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद् दुदोहिथ।
स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः॥६॥

यः। भोजनम्। च। दयसे। च। वर्धनम्। आर्द्रात्। आ। शुष्कम्। मधुऽमत्। दुदोहिथ। सः। शेवऽधिम्। नि। दधिषे। विवस्वति। विश्वस्य। एकः। ईशिषे। सः। असि। उक्थ्यः॥६॥

पदार्थः-**(यः)** **(भोजनम्)** पालनम् **(च)** पुरुषार्थम् **(दयसे)** **(च)** धरति **(वर्द्धनम्)** **(आर्द्रात्)** **(आ)** समन्तात् **(शुष्कम्)** अस्नेहम् **(मधुमत्)** बहुमधुरगुणयुक्तम् **(दुदोहिथ)** धोक्षि **(सः)** **(शेवधिम्)** निधिम् **(नि)** नितराम् **(दधिषे)** धरसि **(विवस्वति)** सूर्ये **(विश्वस्य)** सर्वस्य जगतः **(एकः)** असहायोऽद्वितीयः **(ईशिषे)** ईश्वरोऽसि **(सः)** **(असि)** **(उक्थ्यः)**॥६॥

अन्वयः-हे जगदीश्वर! य एकस्त्वं विवस्वति विश्वस्य भोजनं च वर्द्धनं च दयसे ईशिषे शुष्कमार्द्रान्मधुमद् दुदोहिथ स त्वं शेवधिं निदधिषे अतः स त्वमुक्थ्योऽसि॥६॥

भावार्थः-हे मनुष्या! यो दयमान ईश्वरः सर्वं जगन्निर्माय संरक्ष्य रक्षणसाधनान् पदार्थान् दत्वा सर्वं विश्वं सुखैः पिपर्त्ति स एक एवोपासितुं योग्योऽस्ति॥६॥

पदार्थः-हे जगदीश्वर! **(यः)** जो **(एकः)** एक असहाय अद्वितीय आप **(विवस्वति)** सूर्य में अभिव्याप्त होते **(विश्वस्य)** समस्त जगत् के **(भोजनम्)** पालन **(च)** और पुरुषार्थ और वृद्धि की **(दयसे)** रक्षा करते **(ईशिषे)** और ईश्वरता को प्राप्त हैं वा **(शुष्कम्)** सूखे पदार्थ को **(आर्द्रात्)** गीले पदार्थ से **(मधुमत्)** मधुर गुणयुक्त **(दुदोहिथ)** परिपूर्ण करते **(सः)** वह आप **(शेवधिम्)** निधिरूप पदार्थ को **(निदधिषे)** निरन्तर धारण करते हैं, इस कारण **(सः)** वह आप **(उक्थ्यः)** प्रशंसनीयों में प्रसिद्ध **(असि)** हैं॥६॥

भावार्थः-हे मनुष्यो! जो पालना करता हुआ ईश्वर समस्त जगत् का निर्माण कर और उसी की रक्षा कर सिद्धि करनेवाले पदार्थों को देकर समस्त विश्व को सुखों से परिपूर्ण करता है, वह एक ही उपासना के योग्य है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यश्ववनीरधारयः।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः॥७॥

यः। पुष्पिणीः। च। प्रऽस्वः। च। धर्मणा। अधि। दाने। वि। अवनीः। अधारयः। यः। च। असमाः। अजनः। दिद्युतः। दिवः। उरुः। ऊर्वान्। अभितः। सः। असि। उक्थ्यः॥७॥

पदार्थः-**(यः)** **(पुष्पिणीः)** बहूनि पुष्पाणि यासु ताः **(च)** **(प्रस्वः)** प्रसावित्रीः **(च)** **(धर्मणा)** धर्मेण **(अधि)** उपरिभावे **(दाने)** दीयते येन तस्मिन् **(वि)** विशेषेण **(अवनीः)** पृथिवीः **(अधारयः)** धरति **(यः)** **(च)** **(असमाः)** असदृशीः **(अजनः)** जनयति **(दिद्युतः)** तडितः **(दिवः)** प्रकाशमयाँल्लोकान् **(उरुः)** बहुशक्तिः **(ऊर्वान्)** विनश्वरान् पदार्थान् **(अभितः)** **(सः)** **(असि)** **(उक्थ्यः)**॥७॥

अन्वयः-हे जगदीश्वर! यस्त्वं धर्मणा दाने पुष्पिणीश्च प्रस्वश्चावनीरध्यधारयः। योऽसमा दिद्युतो दिवोऽभितो व्यजनः। यश्चोरुरूर्वान् प्रकटयति सोऽस्माभिस्त्वमुक्थ्योऽसि॥७॥

भावार्थः-हे मनुष्या! येनेश्वरेण बहुपुष्पफलयुक्ता ओषधीः सर्वाधारा पृथिवी विद्युदादयः पदार्था निर्मिताः स एवाऽस्माभिरुपास्योऽस्ति॥७॥

पदार्थः-हे जगदीश्वर! (**यः**) जो आप (**धर्मणा**) धर्म से (**दाने**) देने में (**पुष्पिणीः**) फूलोंवाली (**च**) वा (**प्रस्वः**) फल उत्पन्न करनेवाली लतादिकों (**च**) वा (**अवनीः**) भूमियों को (**अधि, अधारयः**) अधिकता से धारण करते (**यः**) जो (**असमाः**) असमान (**दिद्युतः**) बिजुलियों को वा (**दिवः**) प्रकाशमय लोकों को (**अभितः**) सब ओर से (**वि, अजनः**) विशेषता से उत्पन्न करते हैं (**च**) और जो (**उरुः**) बहुशक्तिमान् आप (**ऊर्वान्**) अविनाशी पदार्थों को प्रकट करते हैं (**सः**) वह आप हम लोगों से (**उक्थ्यः**) प्रशंसनीयों में प्रसिद्ध (**असि**) हैं॥७॥

भावार्थः-हे मनुष्यो! जिस ईश्वर ने बहुत पुष्प और फलयुक्त ओषधी, सबकी आधारभूत पृथिवी और बिजुली आदि पदार्थ उत्पन्न किये हैं, वही आप हम लोगों को उपास्य है॥७॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः॥८॥

यः। नार्मरम्। सहऽवसुम्। निऽहन्तवे। पृक्षाय। च। दासऽवेशाय। च। अवहः। ऊर्जयन्त्याः। अपरिऽविष्टम्। आस्यम्। उत। एव। अद्य। पुरुऽकृत्। सः। असि। उक्थ्यः॥८॥

पदार्थः-(**यः**) (**नार्मरम्**) नृन्मारयति स वायुस्तस्याऽयं सम्बन्ध्यग्निस्तम् (**सहवसुम्**) वसुभिस्सह वर्त्तमानम् (**निहन्तवे**) नितरां हन्तुम् (**पृक्षाय**) सेचनाय (**च**) (**दासवेशाय**) दासाः सेवकाः विशन्ति यस्मिँस्तस्मै (**च**) (**अवहः**) वहति प्राप्नोति (**ऊर्जयन्त्याः**) ऊर्जयन्तीषु बलयन्तीषु साध्यः (**अपरिविष्टम्**) परिवेषरहितम् (**आस्यम्**) मुखम् (**उत**) अपि (**एव**) (**अद्य**) अस्मिन् दिने (**पुरुकृत्**) यः पुरूणि बहूनि वस्तूनि करोति सः (**सः**) (**असि**) अस्ति (**उक्थ्यः**)॥८॥

अन्वयः-हे मनुष्या! यः पुरुकृत् सेनेशः दासवेशाय पृक्षाय च सहवसुं नार्मरमवहः येनास्यमपरिविष्टमुतापि ऊर्जयन्त्या आपश्च स एवाद्योक्थ्योऽसीति यूयं विजानीत॥८॥

भावार्थः-ये राजजना भृत्यान् सेवकांश्चेष्टं भोजनादिकं दत्वा नन्दयन्ति ते स्तुतिभाजो भूत्वा बहून् भोगाँल्लभन्ते॥८॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(पुरुकृत्)** बहुत वस्तुओं को करनेवाला सेनापति विद्वान् **(दासवेशाय)** जिसमें सेवक प्रवेश करते उसके लिये और **(पृक्षाय)** सेचन करने के लिये **(च)** भी **(सहवसुम्)** धनादि पदार्थों के साथ वर्त्तमान **(नार्मरम्)** मनुष्यों को मरवा देनेवाले पवन के सम्बन्धित अग्नि को **(अवहः)** प्राप्त होता है, जिससे **(आस्यम्)** मुख **(अपरिविष्टम्)** परिवेष परसने के कर्म से रहित हुआ हो **(उत)** और **(ऊर्जयन्त्याः)** बलवती सामग्रियों में उत्तम जल **(च)** भी विद्यमान है **(सः, एव)** वही सेनापति **(अद्य)** आज **(उक्थ्यः)** कथनीय पदार्थों में **(असि)** है, यह तुम लोग जानो॥८॥

भावार्थः-जो राजजन भृत्यों को और सेवकों की श्रेष्ठ भोजनादि देकर आनन्दित करते हैं, वे स्तुति सेवनेवाले होकर बहुत भोगों को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ।
अरज्जौ दस्यून्त्समुनब्दुभीतये सुप्राव्यो अभवः सास्युक्थ्यः॥९॥

शतम्। वा। यस्य। दश। साकम्। आ। अद्यः। एकस्य। श्रुष्टौ। यत्। ह। चोदम्। आविथ। अरज्जौ। दस्यून्। सम्। उनप्। दुभीतये। सुप्रऽअव्यः। अभवः। सः। असि। उक्थ्यः॥९॥

पदार्थः-**(शतम्)** **(वा)** **(यस्य)** **(दश)** **(साकम्)** **(आ)** **(अद्यः)** अत्तुं योग्यः **(एकस्य)** असहायस्य **(श्रुष्टौ)** प्राप्तव्ये सुखे **(यत्)** यः **(ह)** किल **(चोदम्)** प्रेरणाम् **(आविथ)** अवति **(अरज्जौ)** असृष्टौ **(दस्यून्)** दुष्टाचारान् मनुष्यान् **(सम्)** सम्यक् **(उनप्)** उम्भति पूरयति **(दभीतये)** मारणाय **(सुप्राव्यः)** सुष्ठु प्रकाशेन रक्षितुं योग्यः **(अभवः)** भवसि **(सः)** **(असि)** **(उक्थ्यः)**॥९॥

अन्वयः-हे विद्वन्! यस्य ते दश शतं वा योद्धारस्साकं वर्त्तन्ते यद्वाद्य एकस्य श्रुष्टौ चोदमाविथ। अरज्ञौ दभीतये हिंसनाय दस्यून् समुनप्सुप्राव्यस्त्वमभवस्तस्मात् स त्वमुक्थ्योऽसि॥९॥

भावार्थः-येन केनचिद् दश शतं वीराः सत्कृत्य रक्षन्ते स चोरादीन्निवारयितुं शक्नोति॥९॥

पदार्थः-हे विद्वान्! **(यस्य)** जिन आपके **(दश शतं वा)** दश सौ **[**अर्थात्**]** एक सहस्र योद्धा **(साकम्)** साथ में वर्त्तमान हैं वा **(यत्, ह)** जो ही **(अद्यः)** भोजन करने योग्य आप **(एकस्य)** जो सहायरहित है, उसके **(श्रुष्टौ)** पाने योग्य सुख के निमित्त **(चोदम्)** प्रेरणा को **(आविथ)** चाहते हो **(अरज्जौ)** विना किसी रचना विशेष स्थान में **(दभीतये)** मारने के लिये **(दस्यून्)** दुष्टाचारी मनुष्यों को **(समुनप्)** अच्छे प्रकार पूरण करते हो और **(सुप्राव्यः)** सुन्दरता से

प्रकाश के साथ रखने योग्य (**अभवः**) होते हो, इस कारण (**सः**) वह आप (**उक्थ्यः**) अनेक के बीच प्रशंसनीय (**असि**) हो॥९॥

भावार्थः-जिस किसी से एक सहस्र वीर योद्धा सत्कार करके रक्खे जाते हैं, वह चोरादिकों को निवृत्त कर सकता है॥९॥

पुनः प्रकारान्तरेण विद्वद्विषयमाह॥

फिर प्रकारान्तर से विद्वान् के विषय को अगले मन्त्र में कहा है॥

विश्वेदनु॑ रोध॒ना अ॑स्य॒ पौंस्यं॑ द॒दुर॑स्मै दधि॒रे कृ॒त्नवे॒ धन॑म्।
षळ॑स्तभ्ना वि॒ष्टिर॒: पञ्च॑ सं॒दृश॒: परि॑ प॒रो अ॑भव॒: सास्यु॒क्थ्य॑:॥१०॥११॥

विश्वा॑। इत्। अनु॑। रो॒ध॒नाः। अ॒स्य॒। पौंस्य॑म्। द॒दुः। अ॒स्मै॒। दु॒धि॒रे। कृ॒त्नवे॑। धन॑म्। षट्। अ॒स्त॒भ्नाः। वि॒ऽस्तिर॑ः। पञ्च॑। स॒म्ऽदृशः। परि॑। प॒रः। अ॒भ॒व॒ः। सः। अ॒सि॒। उ॒क्थ्य॑ः॥१०॥

पदार्थः-(**विश्वा**) सर्वाणि (**इत्**) एव (**अनु**) आनुकूल्ये (**रोधनाः**) रोधनानि (**अस्य**) जनस्य (**पौंस्यम्**) पुरुषार्थम् (**ददुः**) ददति (**अस्मै**) (**दधिरे**) दधति (**कृत्नवे**) कर्त्तुम् (**धनम्**) (**षट्**) (**अस्तभ्नाः**) स्तभ्नाति (**विष्टिरः**) ये विशेषेण तरन्ति ते ऋतवः (**पञ्च**) भूतानि (**संदृशः**) ये सम्यक् पश्यन्ति ते (**परि**) सर्वतः (**परः**) प्रकृष्टः (**अभवः**) प्रसिद्धो भवसि (**सः**) (**असि**) (**उक्थ्यः**)॥१०॥

अन्वयः-मनुष्या अस्मै कृत्नवे जनाय षड् विष्टिरः पञ्च संदृशः विश्वा रोधना अनु ददुः धनमित्परि दधिरेऽस्य पौंस्यमनुदधिरे स परो धनमस्तभ्ना अभवः स उक्थ्योऽस्यस्ति॥१०॥

भावार्थः-ये मनुष्या युक्ताहारविहारा जितेन्द्रिया जायन्ते ते सर्वेष्वृतुषु पञ्चभिरिन्द्रियैः सुखानि प्राप्नुवन्ति॥१०॥

पदार्थः-मनुष्य (**अस्मै**) इस (**कृत्नवे**) कर्म करनेवाले मनुष्य के लिये (**षट्, विष्टरः**) छः जो विशेषता से अपने-अपने समय को पार होती हैं वे ऋतुयें (**पञ्च**) और पांच (**संदृशः**) अपने-अपने विषय को देखनेवाले पृथिवी, अप, तेज, वायु, आकाश ये भूत वा पांच कर्मेन्द्रियां (**विश्वा**) सब (**रोधनाः**) रुकावटों को (**अनु ददुः**) अनुकूलता से देते हैं और (**धनम्**) धन को (**इत्**) ही (**परि, दधिरे**) सब ओर से धारण करते हैं (**अस्य**) इसके (**पौंस्यम्**) पुरुषार्थ को अनुकूलता से धारण करते अर्थात् जानते हैं, वह (**परः**) उत्कृष्ट धन को (**अस्तभ्नाः**) रोकता है और (**अभवः**) प्रसिद्ध होता है (**सः**) वह (**उक्थ्यः**) अनेक में प्रशंसनीय (**असि**) है॥१०॥

भावार्थः-जो मनुष्य युक्त आहार-विहार करनेवाले जितेन्द्रिय होते हैं, वे सब ऋतुओं में पाँचों इन्द्रियों से सुखों को प्राप्त होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुप्रवाचनं तव वीर वीर्यं१ यदेकेन क्रतुना विन्दसे वसु।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः॥११॥

सुऽप्रवाचनम्। तव। वीर। वीर्यम्। यत्। एकेन। क्रतुना। विन्दसे। वसु। जातूऽस्थिरस्य। प्र। वयः। सहस्वतः। या। चकर्थ। सः। इन्द्र। विश्वा। असि। उक्थ्यः॥११॥

पदार्थः-(**सुप्रवाचनम्**) सुष्ठु प्रकृष्टमध्यापनं श्रावणम् वा (**तव**) (**वीर**) प्रशस्तबलयुक्त (**वीर्य्यम्**) पराक्रमम् (**यत्**) (**एकेन**) (**क्रतुना**) कर्मणा प्रज्ञानेन वा (**विन्दसे**) लभसे (**वसु**) द्रव्यम् (**जातूष्ठिरस्य**) कदाचिल्लब्धस्थितेः (**प्र**) (**वयः**) विज्ञानम् (**सहस्वतः**) बलवतः (**या**) यानि (**चकर्थ**) करोषि (**सः**) (**इन्द्र**) परमैश्वर्यप्रापक (**विश्वा**) सर्वाणि (**असि**) (**उक्थ्यः**) प्रशंसितुं योग्यः॥११॥

अन्वयः-हे इन्द्र! यतस्त्वमुक्थ्योऽसि हे वीर! यस्य जातूष्ठिरस्य सहस्वतस्तव सुप्रवाचनं वीर्यं यद्यस्त्वमेकेन क्रतुना वयो वसु च प्रविन्दसे या विश्वोत्तमानि कर्माणि चकर्थ स त्वमेतेभ्यो नो राजोपदेशकोऽध्यापको वा भव॥११॥

भावार्थः-येषां वेदपारगा अध्यापकाः प्रेम्णा प्रज्ञां प्रयच्छन्ति ते कदाचिदपि दुःखिता निन्दिताश्च न भवन्ति॥११॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्य की प्राप्ति करनेवाले! जिस कारण आप (**उक्थ्यः**) प्रशंसा करने योग्य (**असि**) हो, हे (**वीर**) प्रशंसित बलयुक्त! जिन (**जातूष्ठिरस्य**) कभी स्थिर पाये हुए (**सहस्वतः**) बलवान् (**तव**) आपका (**सुप्रवाचनम्**) सुन्दर अति उत्कृष्ट पढ़ाना, श्रवण कराना और (**वीर्यम्**) उत्तम पराक्रम है, (**यत्**) जो आप (**एकेन**) एक (**क्रतुना**) कर्म वा ज्ञान से (**वयः**) विज्ञान और (**वसु**) धन को (**प्रविन्दसे**) प्राप्त होते हैं, (**या**) जिन (**विश्वा**) समस्त उक्त कामों को (**चकर्थ**) करते हैं (**सः**) वह आप उन कामों के लिये हम लोगों के राजा वा उपदेशक वा अध्यापक हूजिये॥११॥

भावार्थः-जिनके वेद के पारङ्गत अध्यापक विद्वान् प्रेम से उत्तम ज्ञान को देते हैं, वे कभी दुःखी वा निन्दित नहीं होते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अरमयः सरपसस्तरायꣳ कं तुर्वीतये च वय्याय च स्तुतिम्।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः॥ १२॥

अरमयः। सरऽअपसः। तराय। कम्। तुर्वीतये। च। वय्याय। च। स्तुतिम्। नीचा। सन्तम्। उत्। अनयः। पराऽवृजम्। प्र। अन्धम्। श्रोणम्। श्रवयन्। सः। असि। उक्थ्यः॥ १२॥

पदार्थः-(अरमयः) रमयसि **(सरपसः)** सराणि सृतान्यपांसि पापानि येन तस्य **(तराय)** उल्लङ्घकाय **(कम्)** सुखम् **(तुर्वीतये)** साधनैर्व्याप्तये **(च)** **(वय्याय)** तन्तुसन्तानकाय **(च)** **(स्तुतिम्)** विविधां गतिम् **(नीचा)** नीचेन **(सन्तम्)** **(उत्)** **(अनयः)** उन्नेयः **(परावृजम्)** परागता वृजस्त्यागकारा यस्मात्तम् **(प्र)** **(अन्धम्)** चक्षुर्विहीनम् **(श्रोणम्)** बधिरम् **(श्रवयन्)** श्रवणं कारयन् **(सः)** **(असि)** **(उक्थ्यः)**॥ १२॥

अन्वयः-हे विद्वँस्त्वं सरपसस्तराय तुर्वीतये च वय्याय च कं स्तुतिं बोधाय परावृजं प्रान्धं श्रोणमिव श्रवयन् नीचा सन्तमुत्तमे व्यवहारेऽरमयः सर्वान्नुदनयोऽस्मात् स त्वमुक्थ्योऽसि॥ १२॥

भावार्थः-यथा शिल्पविदोऽन्याञ्छिल्पविद्यादानेनोत्कृष्टान् सम्पादयन्तोऽन्धं चक्षुष्मन्तमिव संप्रेक्षकान् बधिरं श्रुतिमन्तमिव बहुश्रुतान् कुर्य्युस्तेऽस्मिञ्जगति पूज्याः स्युः॥ १२॥

पदार्थः-हे विद्वान्! आप **(सरपसः)** जिससे पाप चलाये जाते हैं **(तराय)** उसके उल्लंघन और **(तुर्वीतये)** साधनों से व्याप्त होने के लिये **(च)** और **(वय्याय)** सूत के विस्तार के लिये **(च)** भी **[(कम्)** सुखपूर्वक**]** **(स्तुतिम्)** नाना प्रकार की चाल को जताइये और **(परावृजम्)** लौट गये हैं त्याग करनेवाले जिससे उस मनुष्य को **(प्रान्धम्)** अत्यन्त अन्धे वा **(श्रोणम्)** बहिरे के समान **(श्रवयन्)** सुनाते हुए **(नीचा)** नीच व्यवहार से **(सन्तम्)** विद्यमान मनुष्य को उत्तम व्यवहार में **(अरमयः)** रमाते हैं तथा सबकी **(उदनयः)** उन्नति करते हो, इस कारण **(सः)** वह आप **(उक्थ्यः)** प्रशंसनीय **(असि)** हैं॥ १२॥

भावार्थः-जैसे शिल्पवेत्ता विद्वान् जन औरों को शिल्पविद्या के दान से उत्कृष्ट करते हुए अन्धे को देखते हुए के समान वा बहिरे को श्रवण करनेवाले के समान बहुश्रुत करते हैं, वे इस संसार में पूज्य होते हैं॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम्।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून् बृहद्वदेम विदथे सुवीराः॥ १३॥ १२॥

अस्मभ्यम्। तत्। वसो। इति। दानाय। राधः। सम्। अर्थयस्व। बहु। ते। वसव्यम्। इन्द्र। यत्। चित्रम्। श्रवस्याः। अनु। द्यून्। बृहत्। वदेम। विदथे। सुऽवीराः॥ १३॥

पदार्थः-(अस्मभ्यम्) (तत्) (वसो) सुखेषु वासयिता **(दानाय) (राधः)** साध्नुवन्ति सुखानि येन तत् **(समर्थयस्व)** समर्थं कुरु **(बहु) (ते)** तव **(वसव्यम्)** वसुषु द्रव्येषु भवम् **(इन्द्र)** ऐश्वर्यप्रद **(यत्) (चित्रम्)** अद्भुतम् **(श्रवस्याः)** श्रवस्सु श्रवणेषु साधवः **(अनु) (द्यून्)** प्रकाशान् **(बृहत्)** महत् **(वदेम) (विदथे)** संग्रामे **(सुवीराः)** सुष्ठु शौर्योपेतैर्जनैर्गुणैर्वा युक्ताः॥ १३॥

अन्वयः-हे वसो इन्द्र! यत्ते वसव्यं चित्रं बृहद्बहु राधोऽस्ति तदस्मभ्यं दानाय समर्थयस्व येन श्रवस्याः सुवीरा वयमनुद्यून् विदथे बृहद्वदेम॥ १३॥

भावार्थः-त एव विद्वांसो येऽन्यञ्छरीरात्मबलयोगेन समर्थान् धनाढ्याञ्छूरवीरान् पुरुषार्थिन संपादयन्ति॥ १३॥

अस्मिन् सूक्ते विद्युद्विद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोदशं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वसो)** सुखों में वसाने और **(इन्द्र)** ऐश्वर्य देनेवाले विद्वान्! **[**जो**] (ते)** आपके **(वसव्यम्)** धनादि पदार्थों में हुए **(चित्रम्)** अद्भुत **(बृहत्)** बड़ा बढ़ता हुआ **(बहु)** बहुत **(राधः)** सुखसाधक धन है **(तत्) [**वह**] (अस्मभ्यम्)** हमारे लिये **(दानाय)** देने को **(समर्थयस्व)** समर्थ करो, जिससे **(श्रवस्याः)** सुनने के व्यवहारों में उत्तम **(सुवीराः)** सुन्दर शूरतायुक्त मनुष्य व गुणों से युक्त हम लोग **(अनुद्यून्)** प्रत्येक पराक्रमादि के प्रकाशों को **(विदथे)** संग्राम में **(बृहत्)** बहुत **(वदेम)** कहें॥ १३॥

भावार्थः-वे ही विद्वान् हैं जो औरों को शरीर, आत्मा, बल के योग से समर्थ और धनाढ्य, शूरवीर, पुरुषार्थी करते हैं॥ १३॥

इस सूक्त में बिजुली, विद्वान् और ईश्वर के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेरहवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

अवर्ध्यव इति द्वादशर्चस्य चतुर्दशसूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, ३, ४, ९, १०, १२ त्रिष्टुप्। २, ६, ८ निचृत् त्रिष्टुप्। ७ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ निचृत्पङ्क्तिः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ सोमगुणानाह॥

अब बारह ऋचावाले चौदहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सोम के गुणों को कहते हैं॥

अध्व॑र्यवो॒ भर॒तेन्द्रा॑य॒ सोम॒मामत्रे॑भिः सिञ्चता॒ मद्य॒मन्ध॑ः।
का॒मी हि वी॒रः सद॑मस्य पी॒तिं जु॒होत॒ वृष्णे॒ तदिदे॒ष व॑ष्टि॥ १॥

अध्व॑र्यवः। भर॑त। इन्द्रा॑य। सोम॑म्। आ। अम॑त्रेभिः। सि॒ञ्च॒त॒। मद्य॑म्। अन्ध॑ः। का॒मी। हि। वी॒रः। सद॑म्। अ॒स्य॒। पी॒तिम्। जु॒होत॑। वृष्णे॑। तत्। इत्। ए॒षः। व॒ष्टि॒॥ १॥

पदार्थः-(अध्वर्यवः) आत्मनोऽध्वरं कामयमानाः **(भरत)** **(इन्द्राय)** परमैश्वर्याय **(सोमम्)** ओषध्यादिरसम् **(आ)** समन्तात् **(अमत्रेभिः)** पात्रैः **(सिञ्चत)** अत्राऽन्येषामपीति दीर्घः। **(मद्यम्)** हर्षप्रदम् **(अन्धः)** अन्नम् **(कामी)** कामयितुं शीलः **(हि)** खलु **(वीरः)** **(सदम्)** प्राप्तव्यम् **(अस्य)** सोमस्य **(पीतिम्)** पानम् **(जुहोत)** गृह्णीत **(वृष्णे)** बलवर्द्धनाय **(तत्)** तम् **(इत्)** **(एषः)** **(वष्टि)** कामयते॥ १॥

अन्वयः-हे अध्वर्यवो! यूयं य एषः कामी वीरो वृष्णेऽस्य पीतिं वष्टि तदित्सदं हि यूयं जुहोतेन्द्रायामत्रेभिर्मद्यमन्धः सोमं सिञ्चत बलमाभरत॥ १॥

भावार्थः-ये मनुष्या सर्वरोगहरं बुद्धिबलप्रदं भोजनं पानं च कामयन्ते ते बलिष्ठा वीरा जायन्ते॥ १॥

पदार्थः-हे **(अध्वर्यवः)** अपने को यज्ञ कर्मों की चाहना करनेवाले मनुष्यो! तुम जो **(एषः)** यह **(कामी)** कामना करने का स्वभाववाला **(वीरः)** वीर **(वृष्णे)** बल बढ़ाने के लिये **(अस्य)** इस सोमरस के **(पीतिम्)** पान को **(वष्टि)** चाहता है **(तत्, इत्)** उसे **(सदम्)** पाने योग्य सोम **(हि)** को निश्चय से तुम **(जुहोत)** ग्रहण करो **(इन्द्राय)** और परमैश्वर्य के लिये **(अमत्रेभिः)** उत्तम पात्रों से **(मद्यम्)** हर्ष के देनेवाले **(अन्धः)** अन्न को तथा **(सोमम्)** सोम रस को **(सिञ्चत)** सींचो और बल को **(आ, भरत)** पुष्ट करो॥ १॥

भावार्थः-जो मनुष्य सर्व रोग हरने, बुद्धि और बल के देनेवाले भोजन और पान अर्थात् उत्तम वस्तु पीने की कामना करते हैं, वे बलिष्ठ वीर होते हैं॥ १॥

अथ विद्युद्विषयमाह॥

अब बिजुली के विषय को अगले मन्त्र में कहा है॥

अध्व॑र्यवो॒ यो अ॒पो व॑व्रि॒वांसं॑ वृ॒त्रं ज॒घान॒ाशन्ये॑व वृ॒क्षम्।
तस्मा॑ ए॒तं भ॑रत तद्व॒शाय॑ ए॒ष इन्द्रो॑ अ॒र्हति॑ पी॒तिम॑स्य॥ २॥

अध्व॑र्यवः। यः। अ॒पः। व॒व्रि॒ऽवांस॑म्। वृ॒त्रम्। ज॒घान॑। अ॒शन्या॑ऽइव। वृ॒क्षम्। तस्मै॑। ए॒तम्। भ॒र॒त॒। त॒त्ऽव॒शाय॑। ए॒षः। इन्द्रः॑। अ॒र्ह॒ति॒। पी॒तिम्। अ॒स्य॒॥ २॥

पदार्थः-(अध्वर्यवः) आत्मनोऽध्वरमहिंसामिच्छन्तः **(यः)** **(अपः)** जलानि **(वव्रिवांसम्)** आवरकम् **(वृत्रम्)** मेघम् **(जघान)** हन्ति **(अशन्येव)** विद्युता **(वृक्षम्)** **(तस्मै)** **(एतम्)** द्वयम् **(भरत)** **(तद्वशाय)** तत्तत् कामयमानाय **(एषः)** **(इन्द्रः)** ऐश्वर्यवान् **(अर्हति)** योग्यो भवति **(पीतिम्)** पानम् **(अस्य)** सोमलतादिरसस्य॥ २॥

अन्वयः-हे अध्वर्यवो! यस्सूर्यो वव्रिवांसं वृत्रमशन्येव वृक्षं जघानापो वर्षति य एष इन्द्रोऽस्य पीतिमर्हति तस्मा तद्वशायैतं भरत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये सूर्यवद्विद्यां मेघवत्सुखं जनयन्ति सदा पथ्यसेविनस्सन्त ओषधीः सेवन्ते ते परोपकारमपि कर्त्तुमर्हन्ति॥ २॥

पदार्थः-हे **(अध्वर्यवः)** अपने को अहिंसा की इच्छा करनेवालो! **(यः)** जो सूर्य **(वव्रिवांसम्)** आवरण करनेवाले **(वृत्रम्)** मेघ को **(अशन्येव)** बिजुली के समान **(वृक्षम्)** वृक्ष को **(जघान)** मारता है अर्थात् दाहशक्ति से भस्म कर देता है और **(अपः)** जलों को वर्षाता तथा जो **(एषः)** यह **(इन्द्रः)** ऐश्वर्यवान् जन **(अस्य)** सोमलतादि रस के **(पीतिम्)** पीने को **(अर्हति)** योग्य होता है, इस कारण **(तद्वशाय)** उन-उन पदार्थों की कामना करनेवाले के लिये **(एतम्)** उक्त पदार्थ द्वय को धारण करो अर्थात् उनके गुणों को अपने मन से निश्चित करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान विद्या और मेघ के समान सुख की उत्पत्ति करते हैं और सदा पथ्योषधि सेवी हुए ओषधियों का सेवन करते हैं, वे परोपकार करने को भी योग्य होते हैं॥ २॥

अथ राजविषयमाह॥

अब राज विषय को अगले मन्त्र में कहा है॥

अध्व॑र्यवो॒ यो दृभी॑कं ज॒घान॒ यो गा उ॒दाज॒दप॒ हि ब॒लं वः।

तस्मा॑ ए॒तम॒न्तरि॑क्षे॒ न वा॒तमिन्द्रं॒ सोमै॒रोर्णु॑त॒ जूर्न वस्त्रै॑:॥३॥

अध्व॑र्यव:। य:। दृभी॑कम्। ज॒घान॑। य:। गा:। उ॒त्ऽआज॑त्। अप॑। हि। ब॒लम्। वरि॑ति॒ व:। तस्मै॑। ए॒तम्। अ॒न्तरि॑क्षे। न। वा॑तम्। इन्द्र॑म्। सोमै॑:। आ। ऊ॒र्णु॒त॒। जू:। न। वस्त्रै॑:॥३॥

पदार्थ:-(अध्वर्यव:) यज्ञसम्पादका: **(य:)** **(दृभीकम्)** भयकरम् **(जघान)** हन्यात् **(य:)** **(गा:)** धेनू: **(उदाजत्)** विक्षिपेद्धन्यात् **(अप)** **(हि)** **(बलम्)** **(व:)** वृणोति **(तस्मै)** **(एतम्)** यज्ञम् **(अन्तरिक्षे)** **(न)** इव **(वातम्)** वायुम् **(इन्द्रम्)** मेघानां धारकम् **(सोमै:)** ओषधिरसैरैश्वर्यैर्वा **(आ)** **(ऊर्णुत)** आच्छादयत **(जू:)** जीर्णावस्थां प्राप्त: **(न)** इव **(वस्त्रै:)** वासोभि:॥३॥

अन्वय:-हे अध्वर्यवो! यो दृभीकं जघान कं यो गा उदाजद्बलमप वस्तस्मै ह्येतमन्तरिक्षे वातन्नेन्द्रं वस्त्रैर्जूर्न सोमैरोर्णुत॥३॥

भावार्थ:-अत्रोपमालङ्कार:। ये राजपुरुषा भयानकान् गोहत्याकर्त्तॄन् घ्नन्ति, उत्तमान् रक्षन्ति ते निर्भया जायन्ते॥३॥

पदार्थ:-हे **(अध्वर्यव:)** यज्ञ संपादन करनेवाले जनो! **(य:)** जो **(दृभीकम्)** भयङ्कर प्राणी को **(जघान)** मारता है किसको कि **(य:)** जो **(गा:)** गौओं को **(उदाजत्)** विविध प्रकार से फेंके अर्थात् उठा-उठाय पटक के मारे और **(बलम्)** बल को **(अप, व:)** अपवारण करे रोके **(तस्मै)** उसके लिये **(हि)** ही **(एतम्)** इस यज्ञ को **(अन्तरिक्षे)** अन्तरिक्ष में **(वातम्)** पवन के **(न)** समान वा **(इन्द्रम्)** मेघों की धारणा करनेवाले सूर्य को **(वस्त्रै:)** वस्त्रों से **(जू:)** बुड्ढे के **(न)** समान **(सौमै:)** ओषधियों वा ऐश्वर्यों से **(आ, ऊर्णुत)** आच्छादित करो अर्थात् अपने यज्ञधूम से सूर्य को ढापो॥३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो राजपुरुष भयानक गोहत्या करनेवालों को मारते हैं और उत्तमों को रक्षा करते हैं, वे निर्भय होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध्व॑र्यवो॒ य उर॑णं ज॒घान॒ नव॑ च॒ख्वांस॑ं नव॒तिं च॑ बा॒हून्।
यो अर्बु॑दमव॑ नीचा ब॑बा॒धे तमिन्द्रं॒ सोम॑स्य भृ॒थे हि॑नोत॥४॥

अध्व॑र्यव:। य:। उर॑णम्। ज॒घान॑। नव॑। च॒ख्वांस॑म्। न॒व॒तिम्। च॒। बा॒हून्। य:। अर्बु॑दम्। अव॑। नी॒चा। ब॒बा॒धे। तम्। इन्द्र॑म्। सोम॑स्य। भृ॒थे। हि॒नो॒त॒॥४॥

पदार्थः-(अध्वर्यवः) सर्वस्य प्रियाचरणाः **(यः)** जनः **(उरणम्)** आच्छादकम् **(जघान)** हन्यात् **(नव) (चख्वांसम्)** प्रतिघातम् **(नवतिम्) (च) (बाहून्)** बाहुवत्सहायिनः **(यः) (अर्बुदम्)** एतत्संख्याकम् **(अव) (नीचा)** नीचकर्मकर्त्तॄन् **(बबाधे)** बाधते **(तम्) (इन्द्रम्)** विद्युतमिव सेनेशम् **(सोमस्य)** ऐश्वर्यस्य **(भृथे)** धारणे **(हिनोत)** प्रेरयत॥४॥

अन्वयः-हे अध्वर्यवो विद्वांसो! यूयं य उरणं चख्वांसं जघान नवनवतिं बाहूँश्च जघान योऽर्बुदं नीचावबबाधे तमिन्द्रं सोमस्य भृथे हिनोत॥४॥

भावार्थः-हे सेनास्थजना! युष्माभिरनेकेषां दुष्टानां ससहायानां नीचकर्मकारिणां जनानां हन्ता राज्यैश्वर्यस्य भर्त्ता सेनेशः कर्त्तव्यः॥४॥

पदार्थः-हे **(अध्वर्यवः)** सबके प्रियाचरणों को करनेवाले विद्वानो! तुम **(यः)** जो जन **(उरणम्)** आच्छादन करनेवाले **(चख्वांसम्)** मारनेवाले के प्रति मारनेवाले को **(जघान)** मारे और **(नव, नवतिम्)** निन्यानवे **(बाहून्)** बाहुओं के समान सहाय करनेवालों को **(च)** भी मारे **(यः)** जो **(अर्बुदम्)** दशक्रोड़ **(नीचा)** नीचों को **(अव, बबाधे)** विलोता है **(तम्)** उस **(इन्द्रम्)** बिजुली के समान सेनापति को **(सोमस्य)** ऐश्वर्य के **(भृथे)** धारण करने में **(हिनोत)** प्रेरणा देओ॥४॥

भावार्थः-हे सेनास्थ मनुष्यो! तुमको जो कि अनेक सहाययुक्त दुष्ट करनेवाले दुराचारियों का मारने और राज्यैश्वर्य का पुष्ट करनेवाला हो, वह सेनापति करना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम्।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत॥५॥

अध्वर्यवः। यः। सु। अश्नम्। जघान। यः। शुष्णम्। अशुषम्। यः। विऽअंसम्। यः। पिप्रुम्। नमुचिम्। यः। रुधिऽक्राम्। तस्मै। इन्द्राय। अन्धसः। जुहोत॥५॥

पदार्थः-(अध्वर्यवः) (यः) (सु) सुष्ठु **(अश्नम्)** मेघम् **(जघान) (यः) (शुष्णम्)** शुष्कम् **(अशुषम्)** आर्द्रम् **(यः) (व्यंसम्)** विगता अंसा यस्मात्तम् **(यः) (पिप्रुम्)** पालकम् **(नमुचिम्)** योऽधर्मं न मुञ्चति **(यः) (रुधिक्राम्)** यो रुधीनावरकान् क्रामति तम् **(तस्मै) (इन्द्राय)** सूर्यायेव सेनेशाय **(अन्धसः)** अन्नस्य **(जुहोत)** दत्त॥५॥

अन्वयः-हे अध्वर्यवो! यूयं यः सूर्यः स्वश्नमिव शत्रुं जघान यः शुष्णमशुषं यो व्यंसं करोति यः नमुचिं प्रिप्रुं यो रुधिक्रान्निपातयति तस्मा इन्द्रायान्धसो यूयं जुहोत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो जनो यथा सूर्यो मेघं धृत्वा वर्षति तथा यो करं गृहीत्वा पुनर्ददाति दुष्टान्निरोध्य श्रेष्ठान्निरोधयति स सेनापतिर्भवितुं योग्यः॥५॥

पदार्थः-हे **(अध्वर्यवः)** अपने को यज्ञ कर्म की इच्छा करने वा सबके प्रियाचरण करनेवालो! तुम **(यः)** जो जन सूर्य जैसे **(स्वश्नम्)** सुन्दर मेघ को, वैसे शत्रु को **(जघान)** मारता है वा **(यः)** जो **(शुष्णम्)** सूखे पदार्थ को **(अशुषम्)** गीला वा **(यः)** जो **(व्यंसम्)** शत्रु को निर्भुज करता वा **(यः)** जो **(नमुचिम्)** अधर्मात्मा **(पिप्रुम्)** प्रजापालक अर्थात् राजा को वा **(यः)** जो **(रुधिक्राम्)** राज्य व्यवहारों के रोकनेवालों को निरन्तर गिराता है **(तस्मै)** उस **(इन्द्राय)** सूर्य के समान सेनापति के लिये **(अन्धसः)** अन्न **(जुहोत)** देओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य जैसे सूर्य मेघ को धारण कर वर्षाता है, वैसे जो कर को लेकर फिर देता है, दुष्टों को रोकवा के श्रेष्ठों को यथा समय रोकता, वह सेनापति होने योग्य है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अध्व॑र्यवो॒ यः शु॒तं शम्ब॑रस्य॒ पुरो॑ बि॒भेदाश्म॑नेव॒ पू॒र्वीः।
यो व॒र्चिनः॑ शु॒तमिन्द्रः॑ स॒हस्र॑म॒पाव॑प॒द्भर॑ता॒ सोम॑मस्मै॥६॥१३॥

अध्व॑र्यवः। यः। शु॒तम्। शम्ब॑रस्य। पुरः॑। बि॒भेद॑। अश्म॑नाऽइव। पू॒र्वीः। यः। व॒र्चिनः॑। शु॒तम्। इन्द्रः॑। स॒हस्र॑म्। अ॒प॒ऽअव॑पत्। भर॑त। सोम॑म्। अ॒स्मै॒॥६॥

पदार्थः-**(अध्वर्यवः)** युद्धयज्ञसिद्धिकराः **(यः)** **(शतम्)** **(शम्बरस्य)** शं सुखं वृणोति येन तस्य मेघस्य **(पुरः)** पुराणी **(बिभेद)** भिनत्ति **(अश्मनेव)** यथाऽश्मना घटं तथा **(पूर्वीः)** पूर्वं भूताः प्रजाः **(यः)** **(वर्चिनः)** प्रदीप्तस्य **(शतम्)** **(इन्द्रः)** **(सहस्रम्)** **(अपावपत्)** अधोवपति **(भरत)** धरत। अत्रा**न्येषामपी**ति दीर्घः। **(सोमम्)** ऐश्वर्यम् **(अस्मै)** सेनेशाय॥६॥

अन्वयः-हे अध्वर्यवो! यूयं यः शम्बरस्य शतं पुरो घटमश्मनेव बिभेद य इन्द्रो वर्चिनः शतं सहस्रं च पूर्वीरपावपत्तद्वदस्मै सोमं भरत॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्यो विद्युद्वा मेघस्यासंख्याः पुरीश्छिनत्ति पृथिव्यामपरिमितं जलं पातयति तथा यः प्रजार्थमैश्वर्यं धरति तं सततं सत्कुरुत॥६॥

पदार्थः-हे **(अध्वर्यवः)** युद्धरूप यज्ञ की सिद्धि करनेवालो! तुम लोगों में से **(यः)** जो **(शम्बरस्य)** सुख जिससे स्वीकार किया जाता उस मेघ के **(शतम्)** सौ **(पुरः)** पुरों को जैसे घड़े को **(अश्मनेव)** पत्थर से वैसे **(बिभेद)** छिन्न-भिन्न करता है, **(यः)** जो **(इन्द्रः)** ऐश्वर्यवान् **(वर्चिनः)** प्रदीप्त अपने सर्व बल से देदीप्यमान राजा के **(शतम्)** सौ और **(सहस्रम्)** हजार **(पूर्वीः)** पहिले हुई प्रजाओं को **(अपावपत्)** नीचा करता है, **(अस्मै)** इस सेनेश के लिये **(सोमम्)** ऐश्वर्य को **(भरत)** धारण करो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य वा बिजुली मेघ की असंख्य नगरियों को छिन्न-भिन्न करता है, पृथिवी पर अपरिमित जल वर्षाता है, वैसे जो प्रजा के लिये ऐश्वर्य को धारण करता है, उसका निरन्तर सत्कार करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान्।
कुत्सस्यायोरतिथिग्वस्य वीरान् न्यवृणग्भरता सोममस्मै॥७॥

अध्वर्यवः। यः। शतम्। आ। सहस्रम्। भूम्याः। उपऽस्थे। अवपत्। जघन्वान्। कुत्सस्य। आयोः। अतिथिऽग्वस्य। वीरान्। नि। अवृणक्। भरत। सोमम्। अस्मै॥७॥

पदार्थः-**(अध्वर्यवः)** **(यः)** **(शतम्)** **(आ)** **(सहस्रम्)** असंख्यम् **(भूम्याः)** **(उपस्थे)** **(अवपत्)** वपति **(जघन्वान्)** हन्ति **(कुत्सस्य)** अवक्षेप्तुः **(आयोः)** प्राप्तस्य **(अतिथिग्वस्य)** अतिथीन् गच्छतः **(वीरान्)** शत्रुबलव्यापकान् **(नि)** नितराम् **(अवृणक्)** वृणक्ति **(भरत)** पुष्णीत। अत्रापि दीर्घः। **(सोमम्)** **(अस्मै)**॥७॥

अन्वयः-हे अध्वर्यवो! यूयं यः सूर्यइव भूम्या उपस्थे शतं सहस्रमावपद् दुष्टाञ्जघन्वानतिथिग्वस्यायोः कुत्सस्य वीरान् न्यवृणगस्मै सोमं भरत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्येण हतो मेघोऽसंख्यान् बिन्दून् वर्षति तथा ये शत्रुसैन्यस्योपरि शस्त्रास्त्राणि वर्षयेयुस्ते विजयमाप्नुयुः॥७॥

पदार्थः-हे **(अध्वर्यवः)** युद्धरूप यज्ञ को सिद्धि करनेवाले जनो! तुम **(यः)** जो सूर्य के समान **(भूम्याः)** भूमि के **(उपस्थे)** ऊपर **(शतम्)** सैकड़ों वा **(सहस्रम्)** सहस्रों वीरों को **(आ, अवपत्)** बोता अर्थात् गिरा देता दुष्टों को **(जघन्वान्)** मारता वा **(अतिथिग्वस्य)** अतिथियों को प्राप्त होनेवाले **(आयोः)** और प्राप्त हुए **(कुत्सस्य)** बाण आदि फेंकनेवाले प्रजापति के **(वीरान्)**

शत्रु बलों को व्याप्त होते वीरों को **(नि, अवृणक्)** निरन्तर वर्जता है **(अस्मै)** इसके लिये **(सोमम्)** ऐश्वर्य को **(भरत)** पुष्ट करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य से छिन्न-भिन्न हुआ मेघ असंख्य बिन्दुओं को वर्षता है, वैसे जो शत्रु सेना पर शस्त्रों को वर्षावे, वह विजय को प्राप्त होवे॥७॥

अथ प्रजाविषयमाह॥

अब प्रजा विषय को अगले मन्त्र में कहा है॥

अध्वर्यवो॒ यन्नरः॑ का॒मया॑ध्वे श्रु॒ष्टी वह॑न्तो नशथा॒ तदिन्द्रे॑।
गभ॑स्तिपूतं भरत श्रु॒तायेन्द्रा॑य॒ सोम॑ यज्यवो जुहोत॥८॥

अध्वर्यवः। यत्। नरः। कामयाध्वे। श्रुष्टी। वहन्तः। नशथ। तत्। इन्द्रे। गभस्तिऽपूतम्। भरत। श्रुताय। इन्द्राय। सोमम्। यज्यवः। जुहोत॥८॥

पदार्थः-**(अध्वर्यवः)** सर्वहितं कामयमानाः **(यत्)** यद्राज्यं धनं वा **(नरः)** नायकाः **(कामयाध्वे)** कामयध्वम् **(श्रुष्टी)** सद्यः। अत्र **संहितायामिति** दीर्घः। **(वहन्तः)** **(नशथ)** अदृश्या भवथ। अत्र**ाऽन्येषामपी**ति दीर्घः। **(तत्)** **(इन्द्रे)** सभेशे **(गभस्तिपूतम्)** गभस्तिभिः किरणैर्वा बाहुभ्यां पवित्रीकृतम् **(भरत)** **(श्रुताय)** प्रशंसितश्रुतिविषयाय **(इन्द्राय)** सभेशाय **(सोमम्)** ओषधिरसमैश्वर्यं वा **(यज्यवः)** सङ्गन्तारः **(जुहोत)** गृह्णीत॥८॥

अन्वयः-हे अध्वर्यवो! नरो यूयं यच्छुष्टी वहन्तः कामयाध्वे नशथ तद्गभस्तिपूतमिन्द्रे भरत। हे यज्यवो! यूयं श्रुतायेन्द्राय सोमं जुहोत॥८॥

भावार्थः-हे विद्वांसो! यादृशीं विद्यां स्वार्थां कामयध्वं तथान्यार्थामपि कामयन्तां येन सर्वे बह्वैश्वर्य्ययुक्ताः स्युः॥८॥

पदार्थः-हे **(अध्वर्यवः)** सबका हित चाहनेवाले **(नरः)** नायक मनुष्यो! तुम **(यत्)** जिस राज्य वा धन को **(श्रुष्टी)** शीघ्र **(वहन्तः)** प्राप्त करते हुए **(कामयाध्वे)** उसकी कामना करो **(नशथ)** वा छिपाओ **(तत्)** उस **(गभस्तिपूतम्)** किरणों वा बाहुओं से पवित्र किये हुए को **(इन्द्रे)** सभापति के निमित्त **(भरत)** धारण करो। **(यज्यवः)** सङ्ग करनेवाले जनो! तुम **(श्रुताय)** जिसका प्रशंसित श्रुति विषय है, उस **(इन्द्राय)** सभापति के लिये **(सोमम्)** ओषधियों के रस को वा ऐश्वर्य को **(जुहोत)** ग्रहण करो॥८॥

भावार्थः-हे विद्वानो! जिस प्रकार की विद्या अपने अर्थ चाहो, वैसे दूसरों के लिये भी चाहो, जिससे सब बहुत ऐश्वर्यवाले हों॥८॥

अथ क्रियाकौशलविषयमाह॥

अब क्रियाकौशल विषय को अगले मन्त्र में कहा है॥

अध्व॑र्यव॒: कर्त॑ना श्रु॒ष्टिमस्मै॒ वने॒ निपू॑तं वन॒ उन्न॑यध्वम्।
जु॒षा॒णो हस्त्य॑म॒भि वा॑वशे व॒ इन्द्रा॑य॒ सोमं॑ मदि॒रं जु॑होत॥९॥

अध्व॑र्यवः। कर्त॑न। श्रु॒ष्टिम्। अ॒स्मै॒। वने॑। निऽपू॑तम्। वने॑। उत्। न॒य॒ध्व॒म्। जु॒षा॒णः। हस्त्य॑म्। अ॒भि। वा॒व॒शे॒। व॒ः। इन्द्रा॑य। सोम॑म्। म॒दि॒रम्। जु॒हो॒त॒॥९॥

पदार्थः-(**अध्वर्यवः**) पुरुषार्थिनः (**कर्त्तन**) कुरुत। अत्रा**ऽन्येषामपी**ति दीर्घः। (**श्रुष्टिम्**) शीघ्रम् (**अस्मै**) सभेशाय (**वने**) किरणेषु (**निपूतम्**) नितरां पवित्रं दुर्गन्धप्रमादत्वगुणरहितम् (**वने**) किरणेषु (**उत्**) (**नयध्वम्**) उत्कर्षत (**जुषाणः**) प्रीतः सेवमानो वा (**हस्त्यम्**) हस्तेषु साधुम् (**अभि**) आभिमुख्ये (**वावशे**) भृशं कामयते (**वः**) युष्माकम् (**इन्द्राय**) (**सोमम्**) सोमलतादि रसम् (**मदिरम्**) आनन्दप्रदम् (**जुहोत**) दत्त॥९॥

अन्वयः-हे अध्वर्यवो! यूयमस्मै वने श्रुष्टिं निपूतं कर्त्तन वन उन्नयध्वं यो हस्त्यं जुषाणो मदिरं सोममभि वावशे तस्मै वो युष्मभ्यमिन्द्राय चैतज्जुहोत॥९॥

भावार्थः-ये वैद्याः सूर्यकिरणैर्निष्पन्नमोषधिरसं क्रिययोत्कृष्टं कृत्वा स्वयं सेवन्तेऽन्येभ्यः प्रयच्छन्ति च ते सद्यः स्वकार्यं साद्धुं शक्नुवन्ति॥९॥

पदार्थः-हे (**अध्वर्यवः**) पुरुषार्थी जनो! तुम (**अस्मै**) इस सभापति के लिये (**वने**) किरणों में (**श्रुष्टिम्**) शीघ्र (**निपूतम्**) निरन्तर पवित्र और दुर्गन्ध वा प्रमादपन से रहित पदार्थ (**कर्त्तन**) करो (**वने**) और किरणों में (**उन्नयध्वम्**) उत्कर्ष देओ, जो (**हस्त्यम्**) हस्तों में उत्तम हुए पदार्थ को (**जुषाणः**) प्रीति करता वा सेवन करता हुआ (**मदिरम्**) आनन्द देनेवाले (**सोमम्**) सोमलतादि रस को (**अभि, वावशे**) प्रत्यक्ष चाहता (**तस्मै**) उस सभापति के लिये और (**वः**) तुम लोगों को (**इन्द्राय**) ऐश्वर्यवान् जन के लिये उक्त पदार्थ को (**जुहोत**) देओ॥९॥

भावार्थः-जो वैद्य जन सूर्यकिरणों से निष्पन्न हुए ओषधि रस को क्रिया से उत्कृष्ट करके आप सेवते तथा औरों के लिये देते हैं, वे शीघ्र अपने कार्य को कर सकते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध्वर्यव: पयसोधर्यथा गो: सोमेभिरीं पृणता भोजमिन्द्रम्।
वेदाहमस्य निभृतं म एतद् दित्सन्तं भूयो यजतश्चिकेत॥ १०॥

अध्वर्यवः। पयसा। ऊधः। यथा। गोः। सोमेभिः। ईम्। पृणत। भोजम्। इन्द्रम्। वेद। अहम्। अस्य। निऽभृतम्। मे। एतत्। दित्सन्तम्। भूयः। यजतः। चिकेत॥ १०॥

पदार्थः-(अध्वर्यवः) महौषधिनिष्पादकाः **(पयसा)** दुग्धेन **(ऊधः)** स्तनाधारः **(यथा)** **(गोः)** धेनोः **(सोमेभिः)** सोमाद्योषधीभिर्भक्षिताभिः **(ईम्)** जलम् **(पृणत)** तृप्यत। अत्रापि दीर्घः। **(भोजम्)** भोक्तारम् **(इन्द्रम्)** ऐश्वर्यवन्तम् **(वेद)** जानीयाम् **(अहम्)** **(अस्य)** **(निभृतम्)** निश्चितपोषणम् **(मे)** मम **(एतत्)** **(दित्सन्तम्)** दातुमिच्छन्तम् **(भूयः)** बहु **(यजतः)** सङ्गतान् **(चिकेत)** विजानीयात्॥ १०॥

अन्वयः-हे अध्वर्यवो! यूयं यथा गोः पयसोधस्तथा सोमेभिरीं पीत्वा पृणत यथा भोजमिन्द्रमहं वेदाऽस्य निभृतं जानीयां तथा यूयं विजानीत यं म एतद्दित्सन्तं यजतश्च यथाहं वेद तथैतं भूयो यश्चिकेत तं पृणत॥ १०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्या यथा गावो घासादिकं जग्ध्वा दुग्धं जनयन्ति तथा महौषधीनां संग्रहं कृत्वा श्रेष्ठान्यौषधानि निष्पादयेयुः॥ १०॥

पदार्थः-हे **(अध्वर्यवः)** बड़ी-बड़ी औषधियों के सिद्ध करनेवाले जनो! तुम **(यथा)** जैसे **(गोः)** गौ के **(पयसा)** दूध से **(ऊधः)** ऐन भरा होता है, वैसे **(सोमेभिः)** खाई हुई सोमादि ओषधियों के साथ **(ईम्)** जल को पी के **(पृणत)** तृप्त होओ, जैसे **(भोजम्)** भोजन करनेवाले **(इन्द्रम्)** ऐश्वर्यवान् को **(अहम्)** मैं **(वेद)** जानूं, **(अस्य)** इसकी **(निभृतम्)** निश्चित पुष्टि को जानूं, वैसे तुम जानो, जिस **(मे)** मेरे **(एतत्)** इस पूर्वोक्त पदार्थ के **(दित्सन्तम्)** देनेवाले का **(यजतः)** सङ्ग करते हुए जनों को जैसे मैं जानूं, वैसे इस विषय को **(भूयः)** बार-बार जो **(चिकेत)** जाने, उसको तृप्त करो॥ १०॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे गौवें घास आदि को खाकर दूध उत्पन्न करती हैं, वैसे मनुष्य महौषधियों का संग्रह कर श्रेष्ठ ओषधियों को सिद्ध करें॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा।

तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु॥ ११॥

अध्वर्यवः। यः। दिव्यस्य। वस्वः। यः। पार्थिवस्य। क्षम्यस्य। राजा। तम्। ऊर्दरम्। न। पृणत। यवेन। इन्द्रम्। सोमेभिः। तत्। अपः। वः। अस्तु॥ ११॥

पदार्थः-(अध्वर्यवः) राजसम्बन्धिनः **(यः)** **(दिव्यस्य)** दिवि भवस्य **(वस्वः)** वसोर्धनस्य **(यः)** **(पार्थिवस्य)** पृथिव्यां विदितस्य **(क्षम्यस्य)** क्षमायां साधोः **(राजा)** **(तम्)** **(ऊर्दरम्)** कुसूलम् **(न)** इव **(पृणत)** पूरयत। अत्रापि दीर्घः। **(यवेन)** **(इन्द्रम्)** ऐश्वर्यवन्तम् **(सोमेभिः)** ओषधिभिः **(तत्)** **(अपः)** **(वः)** युष्मभ्यम् **(अस्तु)** भवतु॥ ११॥

अन्वयः-हे अध्वर्यवो! यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य मध्ये वो राजाऽस्तु तमिन्द्रं यवेनोर्दरन्न सोमेभिः पृणत तदपः प्राप्नुत॥ ११॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसो धान्येन कुसूलमिव विद्यार्थिनां बुद्धीर्विद्यासुशिक्षाभ्यां पिपुरति ते राजसेव्याः स्युः॥ ११॥

पदार्थः-हे **(अध्वर्यवः)** राजसम्बन्धी विद्वान् जनो! **(यः)** जो **(दिव्यस्य)** प्रकाश में उत्पन्न हुए **(वस्वः)** धन को वा **(यः)** जो **(पार्थिवस्य)** पृथिवी में विदित **(क्षम्यस्य)** सहनशीलता में उत्तम उसके बीच **(वः)** तुम्हारे लिये **(राजा)** राजा **(अस्तु)** हो **(तम्)** उस **(इन्द्रम्)** ऐश्वर्यवान् को **(यवेन)** यव अन्न से जैसे **(ऊर्दरम्)** मटका को वा डिहरा को **(न)** वैसे **(सोमेभिः)** सोमादि ओषधियों से **(पृणत)** पूरो परिपूर्ण करो **(तत्)** उस **(अपः)** कर्म को प्राप्त होओ॥ ११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन धान्य अन्न से मटका वा डिहरा को जैसे वैसे विद्यार्थियों की बुद्धियों को विद्या और उत्तम शिक्षा से तृप्त करते हैं, वे राजा को सेवने योग्य हों॥ ११॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम्।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून् बृहद्वदेम विदथे सुवीराः॥ १२॥ १४॥

अस्मभ्यम्। तत्। वसो इति। दानाय। राधः। सम्। अर्थयस्व। बहु। ते। वसव्यम्। इन्द्र। यत्। चित्रम्। श्रवस्याः। अनु। द्यून्। बृहत्। वदेम। विदथे। सुऽवीराः॥ १२॥

पदार्थः-(अस्मभ्यम्) **(तत्)** **(वसो)** वसुप्रद **(दानाय)** अन्येषां सत्काराय **(राधः)** समृद्धिकरं धनम् **(सम्)** सम्यक् **(अर्थयस्व)** अर्थं कुरुष्व **(बहु)** **(ते)** तव **(वसव्यम्)** वसुषु

पृथिव्यादिषु भवम् **(इन्द्र)** परमैश्वर्ययुक्त **(यत्)** **(चित्रम्)** अद्भुतम् **(श्रवस्याः)** श्रवेभ्योऽन्नेभ्यो हिताय पृथिव्या मध्ये **(अनु)** **(द्यून्)** प्रतिदिनम् **(बृहत्)** महत् **(वदेम)** उपदिशेम **(विदथे)** विज्ञानसंग्राममये यज्ञे **(सुवीराः)**॥१२॥

अन्वयः-हे वसो इन्द्र! सुवीरा वयं यत्ते बहु चित्रं वसव्यं बृहद्राधः श्रवस्या अनुद्यून् विदथे वदेम तदस्मभ्यं दानाय त्वं समर्थयस्व॥१२॥

भावार्थः-सज्जनानां धनमन्येषां सुखाय दुष्टानां च दुःखाय भवति ये धनैश्वर्योन्नतये सर्वदा प्रयतन्ते ते पुष्कलं वैभवं प्राप्नुवन्तीति॥१२॥

अत्र सोमविद्युद्राजप्रजाक्रियाकौशलप्रयोजनवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्दशं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वसो)** धन देनेवाले **(इन्द्र)** परमैश्वर्ययुक्त! **(सुवीराः)** सुन्दर वीरोंवाले हम लोग जो **(ते)** तुम्हारा **(बहु)** बहुत **(चित्रम्)** अद्भुत **(वसव्यम्)** पृथिवी आदि वसुओं से सिद्ध हुए **(बृहत्)** बहुत **(राधः)** समृद्धि करनेवाले धन को **(श्रवस्याः)** अन्नों के लिये हित करनेवाली पृथिवी के बीच **(अनु द्यून्)** प्रतिदिन **(विदथे)** विज्ञानरूपी संग्राम यज्ञ में **(वदेम)** कहें उसको हमारे लिये देने को आप **(समर्थयस्व)** समर्थ करो॥१२॥

भावार्थः-सज्जनों का धन औरों के सुख के लिये और दुष्टों का धन औरों के दुःख के लिये होता है। जो धन और ऐश्वर्यों की उन्नति के लिये सर्वदा प्रयत्न करते हैं, वे पुष्कल वैभव पाते हैं॥१२॥

इस सूक्त में सोम, बिजुली, राजप्रजा और क्रियाकौशलता के प्रयोजनों के वर्णन से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह चौदहवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

प्र घेति दशर्चस्य पञ्चदशस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १ भुरिक् पङ्क्तिः। ७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४-६, ९, १० त्रिष्टुप्। ३ निचृत् त्रिष्टुप्। ८ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्युत्सूर्यपरमेश्वरविषयमाह॥

अब दश ऋचावाले पन्द्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान्, सूर्य और परमेश्वर के विषय को कहते हैं॥[३]

प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम्।
त्रिकद्रुकेष्वपिबत् सुतस्यास्य मदे अहिमिन्द्रो जघान॥ १॥

प्र। घ। नु। अस्य। महतः। महानि। सत्या। सत्यस्य। करणानि। वोचम्। त्रिऽकद्रकेषु। अपिबत्। सुतस्य। अस्य। मदे। अहिम्। इन्द्रः। जघान॥ १॥

पदार्थः-(प्र) प्रकृष्टतया **(घ)** एव। अत्र **ऋचि तुनुघे**ति दीर्घः। **(नु)** सद्यः **(अस्य)** जगदीश्वरस्य **(महतः)** पूज्यस्य व्यापकस्य वा **(महानि)** महान्ति पूज्यानि **(सत्या)** सत्यान्यविनश्वराणि **(सत्यस्य)** नाशरहितस्य **(करणानि)** साधनानि कर्माणि वा **(वोचम्)** वच्मि **(त्रिकद्रुकेषु)** त्रिभिः कद्रुकैः विकलनैर्युक्तेषु कर्मसु **(अपिबत्)** पिबति **(सुतस्य)** सम्पादितस्य **(अस्य)** सोमाद्योषधिरसस्य **(मदे)** हर्षे **(अहिम्)** मेघम् **(इन्द्रः)** सूर्यः **(जघान)** हन्ति॥ १॥

अन्वयः-हे मनुष्या! यथेन्द्रः सुतस्यास्य त्रिकद्रुकेष्वपिबन्मदेऽहिं जघान तदिदमस्य महतः सत्यस्य जगदीश्वरस्य सत्या महानि करणानि घाहं नु प्रवोचं तथा यूयमवोचत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या यथा सूर्यः किरणैः सर्वस्य रसं स्वप्रकाशेनोन्नयति शोधयति वा तथौषधिरसं रोगनिवारकत्वेनाऽऽनन्दप्रदं सेवन्ते परमेश्वरस्य सत्यगुणकर्मस्वभावसाधनानुकूलानि कर्माणि कुर्वन्ति त एव सद्यः सुखमश्नुवते॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(इन्द्रः)** सूर्य **(सुतस्य)** संपादित किये हुए **(अस्य)** सोमादि ओषधि के रस को **(त्रिकद्रुकेषु)** तीन प्रकार की विशेष गतियों से युक्त कर्मों में **(अपिबत्)** पीता है और **(मदे)** हर्ष के निमित्त **(अहिम्)** मेघ को **(जघान)** मारता है, इस कर्म को अथवा **(अस्य)** इस **(महतः)** पूज्य वा व्यापक **(सत्यस्य)** नाशरहित जगदीश्वर के **(सत्या)** सत्य अविनाशी **(महानि)**

---

३. संस्कृत में 'विद्युत्' शब्द दिया है, जबकि हिन्दी में 'विद्वान्' कर दिया है।

प्रशंसनीय **(करणानि)** साधन वा कर्मों को **(घ)** ही मैं **(नु)** शीघ्र **(प्रवोचम्)** प्रकर्षता से कहता हूं, वैसे तुम लोग भी कहो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य जैसे सूर्य किरणों से सबके रस को अपने प्रकाश से उन्नत करता वा शोधता है, वैसे ओषधियों के रस को जो कि रोगनिवारण करने से आनन्द देनेवाला है, उसको सेवते वा परमेश्वर के सत्यगुण, कर्म, स्वभाव और साधनों के अनुकूल कर्मों को करते हैं, वे ही शीघ्र सुख को प्राप्त होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अवंशे द्यामस्तभायद् बृहन्तमा रोदसी अपृणदन्तरिक्षम्।
स धारयत् पृथिवीं पप्रथच्च सोमस्य ता मदु इन्द्रश्चकार॥२॥

अवंशे। द्याम्। अस्तभायत्। बृहन्तम्। आ। रोदसी इति। अपृणत्। अन्तरिक्षम्। सः। धारयत्। पृथिवीम्। पप्रथत्। च। सोमस्य। ता। मदे। इन्द्रः। चकार॥२॥

पदार्थः-**(अवंशे)** अविद्यमाने वंश इव वर्त्तमानेऽन्तरिक्षे **(द्याम्)** प्रकाशम् **(अस्तभायत्)** स्तभ्नाति **(बृहन्तम्)** महान्तम् **(आ)** **(रोदसी)** सूर्यभूमी **(अपृणत्)** पृणाति व्याप्नोति **(अन्तरिक्षम्)** आकाशम् **(सः)** **(धारयत्)** धरति **(पृथिवीम्)** **(पप्रथत्)** विस्तारयति **(च)** **(सोमस्य)** उत्पन्नस्य जगतो मध्ये **(ता)** तानि **(मदे)** आनन्दे **(इन्द्रः)** परमेश्वरः **(चकार)** करोषि॥२॥

अन्वयः-हे मनुष्या! योऽवंशे द्यामस्तभायद् बृहन्तं ब्रह्माण्डं रोदसी अन्तरिक्षं चापृणत् पृथिवीं धारयत् सोमस्य मदे ता पप्रथदेतत्सर्वं इन्द्रः क्रमेण चकार स युष्माभिरुपासनीयः॥२॥

भावार्थः-केचिन्नास्तिक्यमाश्रित्य यद्येवं वदेयुर्य इमे लोकाः परस्पराकर्षणेन स्थिता एषां कश्चिदन्यो धारको रचयिता वा नास्तीति तान् प्रत्येवं विद्वांसः समादध्युः-यदि सूर्याद्याकर्षणेनैव सर्वे लोकाः स्थितिं लभन्ते तर्हि सृष्टेः प्रान्तेऽन्याकर्षकलोकाभावादाकर्षणं कथं संभवेत् तस्मात् सर्वव्यापकस्य परमेश्वरस्याकर्षणेनैव सूर्यादयो लोकाः स्वस्वरूपं स्वक्रियाश्च धरन्त्येतानि जगदीश्वरकर्माणि दृष्ट्वा धन्यवादैरीश्वरः सदा प्रशंसनीयः॥२॥

पदार्थः-हे मनुष्यो! जो **(अवंशे)** अविद्यमान जिसका मान उस वंश के समान वर्त्तमान अन्तरिक्ष में **(द्याम्)** प्रकाश को **(अस्तभायत्)** रोकता, **(बृहन्तम्)** बढ़ते हुए ब्रह्माण्ड को **(रोदसी)** सूर्यलोक, भूमिलोक और **(अन्तरिक्षम्)** आकाश को **(अपृणत्)** प्राप्त होता, **(पृथिवीम्)** पृथिवी को धारण करता, **(सोमस्य)** उत्पन्न हुए जगत् के बीच **(मदे)** आनन्द के निमित्त **(ता)** उक्त कर्मों को

(पप्रथत्) विस्तारता है, इस सबको **(इन्द्रः)** परमैश्वर्यवान् परमेश्वर क्रम से **(चकार)** करता है **(सः)** वह तुम लोगों को उपासना करने योग्य है॥ २॥

भावार्थः-कोई नास्तिकता को स्वीकार कर यदि ऐसे कहें कि जो ये लोक परस्पर के आकर्षण से स्थिर हैं, इनका कोई और धारण करने वा रचनेवाला नहीं है, उनके प्रति विद्वान् जन ऐसा समाधान देवें कि यदि सूर्यादि लोकों के आकर्षण से ही सब लोक स्थिति पाते हैं तो सृष्टि के अन्त में अर्थात् जहाँ कि सृष्टि के आगे कुछ नहीं है वहाँ के लोकों का और लोकों के आकर्षण के विना आकर्षण होना कैसे सम्भव है? इससे सर्वव्यापक परमेश्वर की आकर्षण शक्ति से ही सूर्यादि लोक अपने रूप और अपनी क्रियाओं को धारण करते हैं। ईश्वर के इन उक्त कर्मों को देख धन्यवादों से ईश्वर की प्रशंसा सर्वदा करना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सद्मेव॒ प्राचो॒ वि मि॑माय॒ मानै॒र्वज्रे॑ण॒ खान्यतृणन्न॒दीना॑म्।
वृथा॑सृजत् प॒थिभि॑र्दी॒र्घया॒थैः सोम॑स्य॒ ता मद॒ इन्द्र॑श्चकार॥ ३॥

सद्म॑ऽइव। प्राचः॑। वि। मि॒माय॒। मानैः॑। वज्रे॑ण। खानि। अ॒तृ॒ण॒त्। न॒दीना॑म्। वृथा॑। अ॒सृ॒ज॒त्। प॒थिऽभि॑ः। दी॒र्घ॒ऽया॒थैः॑। सोम॑स्य। ता। मदे॑। इन्द्रः॑। च॒का॒र॒॥ ३॥

पदार्थः-**(सद्मेव)** गृहमिव **(प्राचः)** प्राचीनाँल्लोकान् **(वि)** **(मिमाय)** मिमीते **(मानैः)** परिमाणैः **(वज्रेण)** विज्ञानेन **(खानि)** खातानि **(अतृणत्)** सन्तारयति। अत्र व्यत्ययेन श्ना। **(नदीनाम्)** अव्यक्तशब्दयुक्तानां सरिताम् **(वृथा)** **(असृजत्)** **(पथिभिः)** मार्गैः **(दीर्घयाथैः)** दीर्घा यथा गमनानि येषु तैः **(सोमस्य)** उत्पद्यमानस्य **(ता)** तानि **(मदे)** हर्षे **(इन्द्रः)** **(चकार)** करोति॥ ३॥

अन्वयः-हे मनुष्या! य इन्द्रो जगदीश्वरो मानैः सद्मेव प्राचो विमिमाय नदीनां खानि वज्रेणातृणद् दीर्घयाथैः पथिभिस्सह सर्वाल्लोकान् वृथासृजत् सोमस्य मदे ता चकार स जगन्निर्माता दयालुरीश्वरो वेद्यः॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! येन जगदीश्वरेण प्राक्कल्परीत्या परमाणुभिश्च लोकलोकान्तराणि निर्मीयन्ते यस्य स्वकीयं प्रयोजनं परोपकारं विहाय किञ्चिदपि नास्ति तानि जगदीश्वरस्य धन्यवादार्हाणि कर्माणि यूयं सततं स्मरत॥ ३॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** परमैश्वर्यवान् परमेश्वर **(मानैः)** परिमाणों से **(सद्मेव)** घर के समान **(प्राचः)** प्राचीन लोकों को **(वि, मिमाय)** निर्माण करता बनाता है **(नदीनाम्)** अव्यक्त शब्दयुक्त नदियों के **(खानि)** खातों को अर्थात् जल स्थानों **(वज्रेण)** विज्ञान से **(अतृणत्)** विस्तारता **(दीर्घयाथैः)** जिनमें दीर्घ बड़े-बड़े गमन चालें उन **(पथिभिः)** मार्गों के साथ सब लोकों को **(वृथा)** वृथा **(असृजत्)** रचता **(सोमस्य)** उत्पन्न हुए जगत् के **(मदे)** हर्ष के निमित्त **(ता)** उन उक्त कर्मों को **(चकार)** करता है, वह जगत् का निर्माण करनेवाला दयालु ईश्वर जानना चाहिये॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जिस ईश्वर से पूर्व कल्प की रीति से और परमाणुओं से लोक-लोकान्तरों का निर्माण किया जाता है, जिसका अपना प्रयोजन केवल परोपकार को छोड़ कर और कुछ भी नहीं है, उस जगदीश्वर के उक्त काम धन्यवाद के योग्य हैं, उनका तुम स्मरण करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स प्रवोळ्हून् परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार॥४॥

सः। प्रऽवोळ्हून्। परिऽगत्य। दभीतेः। विश्वम्। अधाक्। आयुधम्। इद्धे। अग्नौ। सम्। गोभिः। अश्वैः। असृजत्। रथेभिः। सोमस्य। ता। मदे। इन्द्रः। चकार॥४॥

पदार्थः-**(सः)** **(प्रवोढृन्)** प्रकृष्टतया वहतः **(परिगत्य)** परितः सर्वतो गत्वा। अत्र**ान्येषामपी**ति दीर्घः। **(दभीतेः)** हिंसनात् **(विश्वम्)** सर्वं जगत् **(अधाक्)** दहति **(आयुधम्)** आयुधमिव **(इद्धे)** प्रदीप्ते **(अग्नौ)** **(सम्)** **(गोभिः)** धेनुभिः **(अश्वैः)** तुरङ्गैः **(असृजत्)** सृजति **(रथेभिः)** भूरथादियानैः **(सोमस्य)** उत्पन्नस्य जगतः **(ता)** तानि **(मदे)** हर्षे **(इन्द्रः)** सर्वपदार्थविच्छेता **(चकार)** करोति॥४॥

अन्वयः-हे मनुष्या! य इन्द्रो जगदीश्वरो दभीतेः परिगत्य विश्वं प्रवोढृँश्चायुधमिव समिद्धेऽग्नावधाक् गोभिरश्वै रथेभिः सोमस्य मदे ता चकार स प्रलयकृदीश्वरोऽस्तीति ध्यातव्यः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा संप्राप्तोऽग्निः शुष्कमार्द्रञ्च भस्मीकरोति तथा संप्राप्ते प्रलयसमये जगदीश्वरो सर्वं प्रविलापयति॥४॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** जगदीश्वर **(दभीतेः)** हिंसा से **(परिगत्य)** सब ओर से प्राप्त होकर **(विश्वम्)** समस्त जगत् को **(प्रवोढॄन्)** उसको प्रकृष्टता से पहुँचानेवालों को **(आयुधम्)** शस्त्र के समान **(समिद्धे)** प्रदीप्त **(अग्नौ)** अग्नि में **(अधाक्)** भस्म करता है वा **(गोभिः)** गौओं **(अश्वैः)** तुरङ्गों और **(रथेभिः)** भूमि में चलवानेवाले रथादि यानों से **(सोमस्य)** उत्पन्न हुए जगत् के **(मदे)** हर्ष के निमित्त **(ता)** ऐश्वर्य सम्बन्धी उक्त कामों को **(चकार)** करता है **(सः)** वह प्रलय का करनेवाला ईश्वर सबको सब ओर से ध्यान करने योग्य है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे संप्राप्त अग्नि सूखे और गीले पदार्थ को भस्म करता है, वैसे अच्छे प्रकार प्राप्त हुए प्रलय समय में जगदीश्वर सबका प्रलय करता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स ईं॑ म॒हीं धु॒नि॒मेतो॑रर॒ण्णात् सो अ॑स्ना॒तॄ॑नपारयत् स्व॒स्ति।
त उ॒त्स्नाय॑ र॒यिम॒भि प्र त॑स्थुः सोम॑स्य॒ ता मद॒ इन्द्र॑श्चकार॥५॥१५॥

सः। ईम्। महीम्। धुनिम्। एतोः। अरण्णात्। सः। अस्नातॄन्। अपारयत्। स्वस्ति। ते। उत्ऽस्नाय। रयिम्। अभि। प्र। तस्थुः। सोमस्य। ता। मदे। इन्द्रः। चकार॥५॥

पदार्थः-**(सः)** सूर्य इव परमेश्वरः **(ईम्)** जलम् **(महीम्)** पृथिवीम् **(धुनिम्)** चलिताम् **(एतोः)** अयनम् **(अरण्णात्)** हन्ति। **रण्णातीति वधकर्मासु पठितम्।** (निघं०२.१९)। **(सः)** **(अस्नातॄन्)** अस्नातकान् **(अपारयत्)** पारयति **(स्वस्ति)** **(ते)** **(उत्स्नाय)** स्नानं कृत्वा **(रयिम्)** द्रव्यम् **(अभि)** **(प्र)** **(तस्थुः)** प्रतिष्ठन्ते **(सोमस्य)** उत्पन्नस्य जगतो मध्ये **(ता)** तानि **(मदे)** **(इन्द्रः)** **(चकार)**॥५॥

अन्वयः-हे मनुष्या! य इन्द्रः सोमस्येन्धुनिं महीमरण्णात् सोऽस्नातॄनेतोः स्वस्त्यभिरपारयद् यस्ता मदे चकार येऽस्मिन्नुत्स्नाय रयिं प्रतस्थुस्ते दुःखं जहति स सर्वैः सेव्यः॥५॥

भावार्थः-यो जगदीश्वरो जगतः सृष्टा पाता हन्ता मुक्तौ शुद्धाचारान् दुःखात् पारयितास्ति येऽस्मिन् शुद्धे समाधिना निमज्य पवित्रयन्ति ते सर्वत्र प्रतिष्ठाँल्लभन्ते॥५॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** परमैश्वर्यवान् परमेश्वर **(सोमस्य)** उत्पन्न जगत् के बीच **(ईम्)** जल और **(धुनिम्)** चलती हुई **(महीम्)** पृथिवी को **(अरण्णात्)** हन्ता है **(सः)** वह **(अस्नातॄन्)** अस्नातक अर्थात् जो यज्ञ स्नान नहीं किये उनके **(एतोः)** गमन को **(स्वस्ति)** कल्याण जैसे हो, वैसे **(अभि, अपारयत्)** सब ओर से पार पहुँचाता है, जो **(ता)** उक्त कामों को **(मदे)**

हर्ष के निमित्त **(चकार)** करता है और जो विद्वान् जन उक्त ईश्वर के निमित्त **(उत्स्नाय)** उत्तम समाधिस्नान कर **(रयिम्)** धन को **(प्रतस्थुः)** प्रस्थित करते-फिरते **(ते)** वे दुःख को छोड़ते, वह सबको सेवने योग्य है॥५॥

भावार्थः-जो जगदीश्वर जगत् का रचने वा पालना करने वा हननेवाला और मुक्ति में शुद्धाचरण करनेवालों को दुःख से पार करनेवाला है। जो इस शुद्ध ईश्वर में समाधि से न्हाय **[**=स्नान कर**]**के पवित्र होते हैं, वे सब जगत् में सब जगह प्रतिष्ठा को प्राप्त होते हैं॥५॥

अथ सूर्यविषयमाह॥

अब सूर्य के विषय को अगले मन्त्र में कहा है॥

सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार॥६॥

सः। उदञ्चम्। सिन्धुम्। अरिणात्। महिऽत्वा। वज्रेण। अनः। उषसः। सम्। पिपेष। अजवसः। जविनीभिः। विऽवृश्चन्। सोमस्य। ता। मदे। इन्द्रः। चकार॥६॥

पदार्थः-**(सः)** **(उदञ्चम्)** ऊर्ध्वं प्राप्नुवन्तम् **(सिन्धुम्)** समुद्रम् **(अरिणात्)** रिणाति प्राप्नोति **(महित्वा)** महत्वेन **(वज्रेण)** किरणेन वज्रेण **(अनः)** शकटम् **(उषसः)** प्रभातात् **(सम्)** **(पिपेष)** पिनष्टि **(अजवसः)** वेगरहितः **(जविनीभिः)** वेगवती क्रियाभिः **(विवृश्चन्)** विविधतया छिन्दन् **(सोमस्य)** ऐश्वर्ययुक्तस्य संसारस्य **(ता)** तानि **(मदे)** आनन्दे **(इन्द्रः)** **(चकार)** करोति॥६॥

अन्वयः-हे मनुष्या! य इन्द्रः सूर्यो महित्वा वज्रेणोदञ्चं सिन्धुमरिणादुषसो नः संपिपेषाऽजवसो जविनीभिः पदार्थान् विवृश्चन् सोमस्य मदे ता चकार स युष्माभिर्वेद्यः॥६॥

भावार्थः-यथा सूर्यो महत्त्वेन स्वप्रकाशेन जलमुपरि गमयति रात्रिं नाशयत्यतिवेगैर्गमनैरद्भुतानि कर्माणि करोति तथाऽस्माभिरप्यनुष्ठेयम्॥६॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** सब पदार्थों को अपनी किरणों से छिन्न-भिन्न करनेवाला सूर्य **(महित्वा)** महत्व से **(वज्रेण)** अपने किरणरूपी वज्र से **(उदञ्चम्)** ऊपर को प्राप्त होते हुए **(सिन्धुम्)** समुद्र को **(अरिणात्)** गमन करता वा उच्छिन्न करता **(उषसः)** प्रभात समय से लेकर **(संपिपेष)** अच्छे प्रकार पीसता अर्थात् अपने आतप से समुद्र के जल को कण-कण कर सोखता **(अजवसः)** वेगरहित भी **(जविनीभिः)** वेगवती क्रियाओं से पदार्थों को **(विवृश्चन्)** छिन्न-भिन्न

करता हुआ (**सोमस्य**) ऐश्वर्य्ययुक्त संसार के (**मदे**) आनन्द के निमित्त (**ता**) उन कामों को (**चकार**) करता है (**सः**) वह तुम लोगों को जानने योग्य है॥६॥

भावार्थः-जैसे सूर्य महत्व से अपने प्रकाश से जल को ऊपर पहुँचाता, रात्रि को विनाशता, अति वेग और अपनी चालों से अद्भुत कामों को करता है, वैसे हम लोगों को भी आरम्भ करना चाहिये॥६॥

अथ सूर्यदृष्टान्तेन विद्वद्विषयमाह॥

अब सूर्य के दृष्टान्त से विद्वान् के विषय को अगले मन्त्र में कहा है॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत् परावृक्।
प्रति श्रोणः स्थाद् व्यनगचष्ट सोमस्य ता मद इन्द्रश्चकार॥७॥

सः। विद्वान्। अपऽगोहम्। कनीनाम्। आविः। भवन्। उत्। अतिष्ठत्। पराऽवृक्। प्रति। श्रोणः। स्थात्। वि। अनक्। अचष्ट। सोमस्य। ता। मदे। इन्द्रः। चकार॥७॥

पदार्थः-(**सः**) (**विद्वान्**) सकलशास्त्रवित् (**अपगोहम्**) आच्छादकम् (**कनीनाम्**) कान्तीनाम् (**आविः**) प्रकटतया (**भवन्**) (**उत्**) उत्कृष्टे (**अतिष्ठत्**) तिष्ठति (**परावृक्**) यः परावृणक्ति (**प्रति**) (**श्रोणः**) श्रोता (**स्थात्**) तिष्ठति (**वि**) (**अनक्**) प्रकटीकरोति (**अचष्ट**) उपदिशति (**सोमस्य**) संसारस्य (**ता**) (**मदे**) (**इन्द्रः**) (**चकार**)॥७॥

अन्वयः-यः श्रोणो विद्वानिन्द्रो यथा सोमस्य मध्ये कनीनामपगोहं परावृगाविर्भवन्नुदतिष्ठत् प्रतिष्ठाद् व्यनगचष्ट तथा मदे ता चकार स सर्वैः सत्करणीयः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्यः स्वप्रकाशदानेनाऽन्धकारं निवर्त्य विचित्रं जगद्दर्शयति तथा ये विद्वांसः सत्यविद्योपदेशदानेनाऽविद्यां निवर्त्य विविधपदार्थविज्ञानं प्रकटयन्ति ते विश्वभूषका जायन्ते॥७॥

पदार्थः-जो (**श्रोणः**) सुननेवाला विद्वान् जन (**इन्द्रः**) सर्व पदार्थ अलग-अलग करनेवाला सूर्य जैसे (**सोमस्य**) संसार के बीच (**कनीनाम्**) कान्तियों के (**अपगोहम्**) अपगूहन आच्छादन करने को (**परावृक्**) खोलता (**आविर्भवन्**) प्रकट होता हुआ (**उदतिष्ठत्**) ऊपर को स्थिर होता अर्थात् उदय होकर ऊपर को बढ़ता (**प्रतिष्ठात्**) और प्रतिष्ठा पाता, (**व्यनक्**) पदार्थों को प्रकट करता, (**अचष्ट**) उपदेश करता अर्थात् अपनी गति से यथावत् समय को बतलाता, वैसे (**मदे**) हर्ष के निमित्त (**ता**) उन कामों को (**चकार**) करता है (**सः**) वह सबको सत्कार करने योग्य है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य अपने प्रकाशदान से अन्धकार को निवृत्त कर विचित्र संसार दिखलाता है, वैसे जो विद्वान् जन सत्यविद्या का उपदेश देने से

अविद्या को निवृत्त कर विविध पदार्थविज्ञान को प्रकट करते हैं, वे विश्व के भूषित करनेवाले होते हैं॥७॥

पुनः प्रकारान्तरेण विद्वद्विषयमाह॥

फिर प्रकारान्तर से विद्वानों के विषय को अगले मन्त्र में कहा है॥

भि॒नद् बलमङ्गि॑रोभिर्गृणा॒नो वि पर्व॑तस्य दृंहि॒तान्यै॑रत्।
रि॒णग्रोधां॑सि कृ॒त्रिमा॑ण्येषां॒ सोम॑स्य॒ ता मदु॒ इन्द्र॑श्चकार॥८॥

भि॒नत्। ब॒लम्। अङ्गि॑रःऽभिः। गृ॒णा॒नः। वि। पर्व॑तस्य। दृं॒हि॒तानि॑। ऐर॑त्। रि॒णक्। रोधां॑सि। कृ॒त्रिमा॑णि। ए॒षा॒म्। सोम॑स्य। ता। मदे॑। इन्द्रः॑। च॒का॒र॒॥८॥

पदार्थः-(भिनत्) भिनत्ति **(बलम्)** मेघम् **(अङ्गिरोभिः)** अङ्गसदृशैः किरणैः **(गृणानः)** **(वि)** **(पर्वतस्य)** मेघस्येव प्रजायाः **(दृंहितानि)** वर्द्धितानि **(ऐरत्)** प्राप्नोति **(रिणक्)** हिनस्ति **(रोधांसि)** आवरणानि **(कृत्रिमाणि)** क्रियमाणानि **(एषाम्)** **(सोमस्य)** विश्वस्य **(ता)** **(मदे)** **(इन्द्रः)** **(चकार)**॥८॥

अन्वयः-हे विद्वन्! गृणानस्त्वं यथेन्द्रः सूर्योऽङ्गिरोभिः पर्वतस्य बलं विभिनत्सोमस्य दृंहितानैरदेषां कृत्रिमाणि रोधांसि रिणक् ता मदे चकार तथा प्रयतस्व॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा वायुसहायेनाग्निरद्भुतानि कर्माणि करोति तथा धार्मिकविद्वत्सहायेन मनुष्या महान्त्युत्तमानि कर्माणि कर्त्तुं शक्नुवन्ति॥८॥

पदार्थः-हे विद्वान्! **(गृणानः)** प्रशंसा करते हुए आप जैसे **(इन्द्रः)** सर्व पदार्थ छिन्न-भिन्न करता सूर्य **(अङ्गिरोभिः)** अङ्गों के सदृश किरणों से **(पर्वतस्य)** मेघ के समान प्रजा के **(बलम्)** बल को **(वि, भिनत्)** विशेषता से छिन्न-भिन्न करता **(सोमस्य)** विश्व के **(दृंहितानि)** बढ़े हुए पदार्थों को **(ऐरत्)** प्राप्त होता वा **(एषाम्)** इन पदार्थों के **(कृत्रिमाणि)** कृत्रिम **(रोधांसि)** आवरणों को अर्थात् जिनसे यह उन्नति को नहीं प्राप्त होते उन पदार्थों को **(रिणक्)** मारता नष्ट करता **(ता)** उक्त कामों को **(मदे)** हर्ष के निमित्त **(चकार)** करता है, वैसा प्रयत्न करिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे वायु के सहाय से अग्नि अद्भुत कर्मों को करता है, वैसे धार्मिक विद्वान् के सहाय से मनुष्य बड़े-बड़े उत्तम काम कर सकते हैं॥८॥

अथ राजविषयमाह॥

अब राज विषय को अगले मन्त्र में कहा है॥

स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार॥९॥

स्वप्नेन। अभिऽउप्य। चुमुरिम्। धुनिम्। च। जघन्थ। दस्युम्। प्र। दभीतिम्। आवः। रम्भी। चित्। अत्र। विविदे। हिरण्यम्। सोमस्य। ता। मदे। इन्द्रः। चकार॥९॥

पदार्थः-(स्वप्नेन) शयनेन **(अभ्युप्य)** अभितो वपनं कृत्वा। अत्र दीर्घः। **(चुमुरिम्)** वक्त्रसंयुक्तम् **(धुनिम्)** कम्पन्तम् **(च)** **(जघन्थ)** हन्यात् **(दस्युम्)** बलात्कारिणं चोरम् **(प्र)** **(दभीतिम्)** हिंसकम् **(आवः)** अवेत् **(रम्भी)** आरम्भी **(चित्)** अपि **(अत्र)** राज्यप्रबन्धे **(विविदे)** विन्देत **(हिरण्यम्)** सुवर्णम् **(सोमस्य)** विश्वस्य **(ता)** **(मदे)** **(इन्द्रः)** **(चकार)**॥९॥

अन्वयः-य इन्द्रस्सेनेशः स्वप्नेन सह वर्त्तमानं चुमुरिं च धुनिं दस्युमभ्युप्य जघन्थ दभीतिं प्रावो रम्भी चिदत्र सोमस्य हिरण्यं विविदे स मदे ता तानि चकार॥९॥

भावार्थः-ये पुरुषार्थिनो जना दस्व्यादीन् दुष्टान् निवार्य्य श्रेष्ठान् रक्षणे सन्दध्युस्ते जगत्यैश्वर्यं लभन्ते॥९॥

पदार्थः-जो **(इन्द्रः)** सेनापति **(स्वप्नेन)** निद्रापन से वर्त्तमान **(चुमुरिम्)** सुखयुक्त अर्थात् चोरपन का मुख बनाये और **(धुनिम्)** कंपते हुए **(दस्युम्)** बलात्कारी अति साहसकारी डाकू, चोर का **(अभ्युप्य)** सब ओर से शिर मुंडवा कर **(जघन्थ)** मारे **(दभीतिम्)** हिंसक प्राणी को **(प्रावः)** उत्कर्षता से रक्खे **(रम्भी)** कार्यारम्भ करनेवाला **(चित्)** भी **(अत्र)** इस राज्य व्यवहार में **(सोमस्य)** विश्व का **(हिरण्यम्)** सुवर्ण **(विविदे)** पावे **(सः)** वह **(मदे)** हर्ष के निमित्त **(ता)** उक्त कामों को **(चकार)** करे॥९॥

भावार्थः-जो पुरुषार्थी जन डाकू आदि दुष्टों का निवारण कर श्रेष्ठों को रक्षा के निमित्त इकट्ठे करें वे जगत् के बीच ऐश्वर्य को पाते हैं॥९॥

अथ दातृकर्मविषयमाह॥

अब दान देने के कर्म का विषय अगले मन्त्र में कहा है॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥१०॥१६॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी। शिक्षा। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुऽवीराः॥१०॥

पदार्थः-(नूनम्) निश्चितम् **(सा)** **(ते)** तव **(प्रति)** **(वरम्)** **(जरित्रे)** सर्वविद्यास्तावकाय **(दुहीयत्)** दुह्यात्। अत्र व्यत्ययेन परस्मैपदम्, यासुटो ह्रस्वश्च। **(इन्द्र)** दातः **(दक्षिणा)** **(मघोनी)** पूजितधनयुक्ता **(शिक्षा)** विद्याग्रहणसाधिका **(स्तोतृभ्यः)** धार्मिकेभ्यो विद्वद्भ्यः **(मा)** **(अति)** **(धक्)** दह्यात् **(भगः)** ऐश्वर्यम् **(नः)** अस्माकम् **(बृहत्)** **(वदेम)** **(विदथे)** यज्ञे **(सुवीराः)** शोभनाश्च ते वीरास्तैर्युक्ताः॥१०॥

अन्वयः-हे इन्द्र! ते मघोनी दक्षिणा स्तोतृभ्यः शिक्षा च जरित्रे प्रतिवरं दुहीयत् सा नोऽस्माकं यो भगस्तं मातिधग्यतः सुवीरा वयं विदथे बृहन्नूनं वदेम॥१०॥

भावार्थः-हे मनुष्या! युष्माभिरुत्तमेभ्यो विद्वद्भ्य इष्टा दक्षिणा विद्यार्थिभ्यः शिक्षा च देया येन दातारो ग्रहीतारश्च फलयुक्ताः स्युरिति॥१०॥

अत्र विद्वत्सूर्यपरमेश्वरराज्यदातृकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चदशं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** दान करनेवाले जन! **(ते)** तेरी **(मघोनी)** प्रशंसित धनयुक्त **(दक्षिणा)** दक्षिणा और **(स्तोतृभ्यः)** धार्मिक विद्वानों के लिये **(शिक्षा)** विद्या ग्रहण की सिद्धि करानेवाली शिक्षा **(जरित्रे)** समस्त विद्याओं की प्रशंसा करनेवाले जन के लिये **(प्रतिवरम्)** श्रेष्ठ कार्य के प्रति श्रेष्ठ कार्य को **(दुहीयत्)** पूर्ण करे **(सा)** वह **(नः)** हमारा जो **(भगः)** ऐश्वर्य उसको **(मातिधक्)** मत नष्ट करे, जिससे **(सुवीराः)** सुन्दर वीरों से युक्त हम लोग **(विदथे)** यज्ञ में **(बृहत्)** बहुत **(नूनम्)** निश्चित **(वदेम)** कहें॥१०॥

भावार्थः-हे मनुष्यो! तुमको उत्तम विद्वानों के लिये अभीष्ट दक्षिणा और विद्यार्थियों के लिये शिक्षा देनी चाहिये जिससे देने और लेनेवाले फलयुक्त हों॥१०॥

इस सूक्त में विद्वान्, सूर्य, परमेश्वर, राज्य और दातृकर्म का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह पन्द्रहवां सूक्त और सोलहवाँ वर्ग समाप्त हुआ॥

प्र व इति नवर्चस्य षोडशस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, ७ जगती। ३ विराड् जगती। ४-६, ८ निचृज्जगती च च्छन्दः। निषादः स्वरः। २ भुरिक् त्रिष्टुप्। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्युद्विषयमाह॥

अब नव ऋचावाले सोलहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में बिजुली के विषय को कहते हैं॥

प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे॥ १॥

प्र। वः। सताम्। ज्येष्ठऽतमाय। सुऽस्तुतिम्। अग्नौऽइव। समऽइद्धाने। हविः। भरे। इन्द्रम्। अजुर्यम्। जरयन्तम्। उक्षितम्। सनात्। युवानम्। अवसे। हवामहे॥ १॥

पदार्थः-(प्र) (वः) युष्माकम् **(सताम्)** सज्जनानाम् **(ज्येष्ठतमाय)** अतिशयेन वृद्धाय **(सुष्टुतिम्)** शोभनां स्तुतिम् **(अग्नाविव) (समिधाने)** सम्यक् प्रदीप्ते **(हविः) (भरे)** बिभृयात् **(इन्द्रम्)** विद्युतम् **(अजुर्यम्)** अजीर्णम् **(जरयन्तम्)** अन्याञ्जरां प्रापयन्तम् **(उक्षितम्)** सेवकम् **(सनात्)** निरन्तरम् **(युवानम्)** भेदकम् **(अवसे)** रक्षणाद्याय **(हवामहे)** स्वीकुर्मः॥ १॥

अन्वयः-हे विद्वांसो! वयं सतां वो ज्येष्ठतमायावसे हविर्भरे समिधानेऽग्नाविव सुष्टुतिं हवामहे सनाद्युवानमुक्षितमजुर्यं जरयन्तमिन्द्रं प्रहवामहे॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽग्निर्विभागादि कर्मकृद्विद्यूद्रूपोऽग्निश्च युक्त्या संयोजितः बह्वैश्वर्यं जनयति तथा सत्पुरुषाणां प्रशंसा सर्वेषां श्रेष्ठत्वाय प्रकल्प्यते॥ १॥

पदार्थः-हे विद्वानो! हम लोग **(सताम्)** आप सज्जनों के **(ज्येष्ठतमाय)** अत्यन्त बढ़े हुए **(अवसे)** रक्षा आदि के लिये **(हविः)** हविष्य पदार्थ को **(भरे)** भरें, धारण करें वा पुष्ट करें उस **(समिधाने)** अच्छे प्रकार प्रदीप्त **(अग्नाविव)** अग्नि में जैसे वैसे **(सुष्टुतिम्)** सुन्दर स्तुति को **(हवामहे)** स्वीकार करें और **(सनात्)** निरन्तर **(युवानम्)** दूसरे का भेद और **(उक्षितम्)** सेचन करनेवाले तथा **(अजुर्यम्)** पुष्ट **(जरयन्तम्)** औरों को जरावस्था प्राप्त करानेवाले **(इन्द्रम्)** विद्युत् रूप अग्नि को उत्तमता से स्वीकार करें॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अग्नि और विभाग आदि कर्मों का करनेवाला बिजुली रूप अग्नि युक्ति के साथ संयुक्त किया हुआ बहुत ऐश्वर्य को उत्पन्न करता है, वैसे सत्पुरुषों की प्रशंसा सबकी श्रेष्ठता के लिये कल्पना की जाती है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्मादिन्द्राद् बृहतः किं चनेमृते विश्वान्यस्मिन्त्संभृताधि वीर्या।
जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम्॥ २॥

यस्मात्। इन्द्रात्। बृहतः। किम्। चन। ईम्। ऋते। विश्वानि। अस्मिन्। संऽभृता। अधि। वीर्या॥ जठरे। सोमम्। तन्वि। सहः। महः। हस्ते। वज्रम्। भरति। शीर्षणि। क्रतुम्॥ २॥

पदार्थः-(यस्मात्) (**इन्द्रात्**) विद्युतः (**बृहतः**) महतः (**किम्**) (**चन**) (**ईम्**) सर्वतः (**ऋते**) विना (**विश्वानि**) सर्वाणि (**अस्मिन्**) (**संभृता**) सम्यग्धृतानि (**अधि**) (**वीर्या**) वीरेषु शत्रुप्रक्षेपकेषु विद्वत्सु साधूनि (**जठरे**) उदरे (**सोमम्**) ओषध्यन्नम् (**तन्वि**) शरीरे (**सहः**) बलम् (**महः**) (**हस्ते**) करे (**वज्रम्**) शस्त्रम् (**भरति**) दधाति (**शीर्षणि**) शिरसि (**क्रतुम्**) प्रज्ञाम्॥ २॥

अन्वयः-हे मनुष्या! यस्माद् बृहत इन्द्रादृते किञ्चन नास्त्यस्मिञ्जठरे विश्वानि वीर्य्या संभृता यस्तन्वीं सोमं सहो हस्ते महो वज्रं शीर्षणि क्रतुं चाभिभरति स सर्वैर्यथावत् संप्रयोज्यः॥ २॥

भावार्थः-हे मनुष्या! यावत्स्थूलं वस्तु जगत्यस्ति तावत्सर्वं विद्युता विना न विद्यते तं प्रयत्नेन यूयं विजानीत॥ २॥

पदार्थः-हे मनुष्यो! (**यस्मात्**) जिस (**बृहतः**) बड़े (**इन्द्रात्**) विद्युत् अग्नि से (**ऋते**) विना (**किञ्चन**) कुछ भी नहीं है (**अस्मिन्**) इसके (**जठरे**) उदर में (**विश्वानि**) समस्त वे पदार्थ (**वीर्य्या**) जो वीर शत्रुओं को फेंकनेवाले विद्वानों में उपयोगी हैं (**सम्भृता**) अच्छे प्रकार धरे हुए हैं, जो (**तन्वि**) अपने शरीर में (**ईम्**) सब ओर से (**सोमम्**) ओषधि अन्न को (**सहः**) और बल को तथा (**हस्ते**) हाथ में (**महः**) बड़े (**वज्रम्**) शस्त्र को (**शीर्षणि**) और शिर के बीच (**क्रतुम्**) उत्तम बुद्धि को (**अभि, भरति**) अधिकता से धारण करता है, वह विद्युत् अग्नि सबको यथावत् अच्छे प्रकार काम में लाने योग्य है॥ २॥

भावार्थः-हे मनुष्यो! जितना स्थूल वस्तु मात्र संसार में है, उतना समस्त बिजुली के विना नहीं है, उसको प्रयत्न से तुम लोग जानो॥ २॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः।

न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु॥ ३॥

न। क्षोणीभ्याम्। परिऽभ्वे। ते। इन्द्रियम्। न। समुद्रैः। पर्वतैः। इन्द्र। ते। रथः। न। ते। वज्रम्। अनु। अश्नोति। कः। चन। यत्। आशुऽभिः। पतसि। योजना। पुरु॥ ३॥

पदार्थः-(न) (क्षोणीभ्याम्) द्यावापृथिवीभ्याम्। **क्षोणी इति द्यावापृथिवीनामसु पठितम्।** (निघं०३.३०)। **(परिभ्वे)** परिभवनीयः **(ते)** तव **(इन्द्रियम्)** धनम् **(न)** निषेधे **(समुद्रैः)** सागरैः **(पर्वतैः)** शैलैः **(इन्द्र)** विद्युदिव वर्त्तमान **(ते)** तव **(रथः)** यानम् **(न) (ते)** तव **(वज्रम्)** छेदकं शस्त्रम् **(अनु) (अश्नोति)** व्याप्नोति **(कश्चन) (यत्) (आशुभिः)** शीघ्रगमयित्रीभिर्विद्युदादिपदार्थैः **(पतसि)** गच्छसि **(योजना)** योजनानि **(पुरु)** पुरूणि बहूनि॥ ३॥

अन्वयः-हे इन्द्र! यस्य त इन्द्रियं क्षोणीभ्यां न परिभ्वे यस्य ते समुद्रैः पर्वतै रथो न परिभ्वे यस्य ते वज्रं कश्चन नान्वश्नोति यदाऽऽशुभिस्सह युक्तेन रथेन पुरु योजना पतसि स त्वं सर्वथा विजयी भवितुमर्हसि॥ ३॥

भावार्थः-ये मनुष्या वह्न्यादिपदार्थयुक्तशस्त्राऽस्त्रादीनि साध्नुवन्ति ते परिभवं नाप्नुवन्ति। ये रथानन्तरिक्षे समुद्रे पर्वतयुक्तायामपि भूमौ सङ्गमयन्ति ते सुखेनाध्वानमतियान्ति॥ ३॥

पदार्थः-हे **(इन्द्र)** बिजुली के समान वर्त्तमान! जिन **(ते)** आपको **(इन्द्रियम्)** धन **(क्षोणीभ्याम्)** आकाश और पृथिवी से **(न)** नहीं **(परिभ्वे)** तिरस्कार प्राप्त होता जिन **(ते)** आपका **(समुद्रैः)** सागरों और **(पर्वतैः)** पर्वतों से **(रथः)** रथ **(न)** नहीं तिरस्कार को प्राप्त होता जिन **(ते)** आपका **(वज्रम्)** छिन्न-भिन्न करनेवाले शस्त्र को **(कश्चन)** कोई **(न)** नहीं **(अनु, अश्नोति)** अनुकूलता से व्याप्त होता **(यत्)** जो **(आशुभिः)** शीघ्र गमन करानेवाली बिजुली के साथ रथ से **(पुरु)** बहुत **(योजना)** योजनों को **(पतसि)** जाते हैं, सो आप सर्वथा विजयी होने योग्य हैं॥ ३॥

भावार्थः-जो मनुष्य अग्नि आदि पदार्थों से युक्त शस्त्र-अस्त्र आदि पदार्थों को सिद्ध करते हैं, वे तिरस्कार को नहीं पहुंचते और जो लोग आकाश, समुद्र तथा पहाड़ी भूमि में भी रथों को चलाते हैं, वे सुख से मार्ग के पार होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना॥ ४॥

विश्वे। हि। अस्मै। यजताय। धृष्णवे। क्रतुम्। भरन्ति। वृषभाय। सश्चते। वृषा। यजस्व। हविषा। विदुःऽतरः। पिब। इन्द्र। सोमम्। वृषभेण। भानुना॥४॥

पदार्थः-(विश्वे) सर्वस्मिन् **(हि) (अस्मै) (यजताय)** सङ्गमनाय **(धृष्णवे)** दृढत्वाय **(क्रतुम्)** प्रज्ञाम् **(भरन्ति)** दधति **(वृषभाय)** श्रेष्ठत्वाय **(सश्चते)** सम्बन्धाय **(वृषा)** परशक्तिबन्धकः **(यजस्व)** सङ्गच्छस्व **(हविषा)** दातुं ग्रहीतुं योग्येन **(विदुष्टरः)** अतिशयेन विद्वान् **(पिब) (इन्द्र)** ऐश्वर्यमिच्छो **(सोमम्)** ओषध्यादिरसम् **(वृषभेण)** वर्षकेण **(भानुना)** प्रदीप्त्या॥४॥

अन्वयः-हे इन्द्र वृषा विदुष्टरस्त्वं ये हि विश्वे वृषभेण भानुना युक्तः सूर्यो रसमिवाऽस्मै यजताय धृष्णवे वृषभाय सश्चते क्रतुं भरन्ति तदनुषङ्गी सन् हविषा यजस्व सोमं पिब॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये प्रथमतः स्वप्रज्ञामुन्नीय विदुषः सत्कुर्वन्ति ते सर्वत्र सत्कृता भवन्ति॥४॥

पदार्थः-हे **(इन्द्र)** ऐश्वर्य के इच्छुक **(वृषा)** शत्रु की शक्ति बांधनेहारे **(विदुष्टरः)** अतीव विद्वान्! आप जो **(हि)** ही **(विश्वे)** सर्वत्र **(वृषभेण)** वर्षा करानेवाले **(भानुना)** ताप से युक्त सूर्य जैसे रस को, वैसे **(अस्मै)** इस **(यजताय)** सङ्गम **(धृष्णवे)** दृढ़ता **(वृषभाय)** श्रेष्ठता **(सश्चते)** और सम्बन्ध के लिये **(क्रतुम्)** प्रज्ञा को **(भरन्ति)** धारण करते हैं, उनके अनुषङ्गी होते हुए **(हविषा)** देने-लेने योग्य वस्तु से **(यजस्व)** यज्ञ करो और **(सोमम्)** ओषध्यादि पदार्थों के रस को **(पिब)** पीओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो प्रथम से अपनी बुद्धि को उन्नति देकर विद्वानों का सत्कार करते हैं, वे सब जगत् में सत्कारयुक्त होते हैं॥४॥

अथ सूर्यविषयमाह॥

अब सूर्य विषय को अगले मन्त्र में कहा है॥

वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति॥५॥१७॥

वृष्णः। कोशः। पवते। मध्वः। ऊर्मिः। वृषभऽअन्नाय। वृषभाय। पातवे। वृषणा। अध्वर्यू इति। वृषभासः। अद्रयः। वृषणम्। सोमम्। वृषभाय। सुष्वति॥५॥

पदार्थः-(वृष्णः) वर्षकात् सूर्य्यात् **(कोशः)** मेघः **(पवते)** प्राप्नोति। **पवत इति गतिकर्मासु पठितम्।** (निघं०२.१४)। **(मध्वः)** मधोः **(ऊर्मिः)** तरङ्गः **(वृषभान्नाय)** वृषभमन्नं यस्मात्तस्मै

(वृषभाय) श्रेष्ठाय **(पातवे)** पातुम् **(वृषणा)** वरौ **(अध्वर्यू)** आत्मनोऽध्वरमहिंसामिच्छू **(वृषभासः)** वर्षकाः **(अद्रयः)** मेघाः **(वृषणम्)** बलकरम् **(सोमम्)** सोमलताद्योषधिरसम् **(वृषभाय)** दुष्टशक्तिप्रतिबन्धकाय **(सुष्वति)** सुन्वति। अत्र **बहुलं छन्दसी**ति शपः श्लुर**दभ्यस्तादि**ति झोऽदादेशः॥५॥

अन्वयः-हे मनुष्या! यथा मध्व ऊर्मिर्वृष्णः कोशो वृषभान्नाय वृषभाय पवते यथा पातवे वृषभासोऽद्रयो वृषभाय वृषणं सोमं वृषणाध्वर्यू च सुष्वति तथा यूयमपि भवत॥५॥

भावार्थः-यथा मेघः सूर्यादुत्पद्य पुष्कलान्ननिमित्तो भवति सर्वान् प्राणिनः प्रीणाति तथा विद्वद्भिरपि भवितव्यम्॥५॥

पदार्थः-हे मनुष्यो! जैसे **(मध्वः)** शहद वा मधुर रस की **(ऊर्मिः)** तरङ्ग वा **(वृष्णः)** जल वर्षानेवाले सूर्य से **(कोशः)** मेघ **(वृषभान्नाय)** श्रेष्ठ जिससे अन्न हो उस **(वृषभाय)** श्रेष्ठ के लिये **(पवते)** प्राप्त होता वा जैसे **(पातवे)** पीने के लिये **(वृषभासः)** वर्षनेवाले **(अद्रयः)** मेघ **(वृषभाय)** दुष्टों की शक्ति को बांधनेवाले के लिये **(वृषणम्)** बलकारक **(सोमम्)** सोमलतादि ओषधि रस को और **(वृषणा)** श्रेष्ठ **(अध्वर्यू)** अपने को अहिंसा की इच्छा करनेवाले का **(सुष्वति)** सार निकालते हैं, वैसे तुम भी निकालनेवाले हूजिये॥५॥

भावार्थः-जैसे मेघ सूर्य से उत्पन्न होकर पुष्कल अन्न का निमित्त होता और सब प्राणियों को तृप्त करता है, वैसे विद्वानों को भी होना चाहिये॥५॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

वृषा॑ ते॒ वज्र॑ उ॒त ते॒ वृषा॒ रथो॒ वृष॑णा॒ हरी॑ वृष॒भाण्यायु॑धा।
वृष्णो॒ मद॑स्य वृषभ॒ त्वमीशि॑ष॒ इन्द्र॒ सोम॑स्य वृष॒भस्य॑ तृप्णुहि॥६॥

वृषा॑। ते॒। वज्रः॑। उ॒त। ते॒। वृषा॑। रथः॑। वृष॑णा। हरी॒ इति॑। वृ॒ष॒भाणि॑। आयु॑धा। वृष्णः॑। मद॑स्य। वृ॒ष॒भ॒। त्वम्। ईशि॑षे। इन्द्र॑। सोम॑स्य। वृ॒ष॒भस्य॑। तृ॒प्णु॒हि॥६॥

पदार्थः-(**वृषा**) परशक्तिप्रतिबन्धकः (**ते**) तव (**वज्रः**) वेगः (**उत**) अपि (**ते**) तव (**वृषा**) वेगवान् (**रथः**) यानम् (**वृषणा**) बलिष्ठौ (**हरी**) हरणशीलावश्वौ (**वृषभाणि**) शत्रुबलनिवारकाणि (**आयुधा**) शस्त्राऽस्त्राणि (**वृष्णः**) बलकरस्य (**मदस्य**) हर्षस्य (**वृषभ**) अत्युत्तम (**त्वम्**) (**ईशिषे**) (**इन्द्र**) परमैश्वर्ययुक्त (**सोमस्य**) रसस्य (**वृषभस्य**) पुष्टिकरस्य (**तृप्णुहि**) तृप्तो भव॥६॥

अन्वयः-हे वृषभेन्द्र! यस्य ते वृषा वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधानि सन्ति स यस्य वृष्णो मदस्य वृषभस्य सोमस्य त्वमीशिषे तेन तृप्णुहि॥६॥

भावार्थः-येषां सर्वकर्मसिद्धिकराणि साधनोपसाधनानि दृढानि प्रशंसितानि कर्माणि वा सन्ति ते कार्यं साधितुं न व्यथन्ते॥६॥

पदार्थः-हे **(वृषभ)** अत्युत्तम **(इन्द्र)** परमैश्वर्ययुक्त विद्वान्! जिन **(ते)** आपका **(वृषा)** दूसरे की शक्ति का प्रतिबन्धन करनेवाला **(वज्रः)** वेग **(उत)** और **(ते)** आपका **(वृषा)** वेगवान् **(रथः)** रथ **(वृषणा)** बलिष्ठ **(हरी)** हरणशील घोड़े **(वृषभाणि)** और शत्रुओं के बल को रोकनेवाले **(आयुधा)** शस्त्र-अस्त्र हैं सो जिस **(वृष्णः)** बल करनेवाले **(मदस्य)** हर्ष का और **(वृषभस्य)** पुष्टि करनेवाले **(सोमस्य)** ओषध्यादि रस के आप **(ईशिषे)** स्वामी होते हैं, उससे **(तृप्णुहि)** तृप्त होओ॥६॥

भावार्थः-जिनके सब कामों की सिद्धि करानेवाले साधनोपसाधन दृढ़ वा प्रशंसित काम हैं, वे कामों के साधन कराने को पीड़ित नहीं होते॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र ते नावं॒ न समने वचस्युवं॒ ब्रह्मणा यामि॒ सवने॑षु दाधृषिः।
कुविन्नो॑ अस्य॒ वचसो नि॒बोधि॑षदिन्द्र॒मुत्सं॒ न वसु॑नः सिचामहे॥७॥

प्र। ते॒। नाव॑म्। न। समने। व॒चस्यु॑वम्। ब्रह्म॑णा। या॒मि॒। सव॑नेषु। दाधृषिः। कु॒वित्। नः॒। अ॒स्य॒। वच॑सः। नि॒ऽबोधिषत्। इन्द्र॑म्। उत्स॑म्। न। वसु॑नः। सि॒चा॒म॒हे॒॥७॥

पदार्थः-**(प्र)** **(ते)** तव **(नावम्)** **(न)** इव **(समने)** सङ्ग्रामे **(वचस्युवम्)** आत्मनो वच इच्छन्तम् **(ब्रह्मणा)** वेदेन **(यामि)** गच्छामि **(सवनेषु)** ऐश्वर्येषु प्रेरणेषु **(दाधृषिः)** अतिशयेन प्रगल्भः **(कुवित्)** महान् **(नः)** अस्मान् **(अस्य)** **(वचसः)** **(निबोधिषत्)** निश्चितं बुध्यात् **(इन्द्रम्)** विद्युतमिवैश्वर्यम् **(उत्सम्)** कूपम् **(न)** इव **(वसुनः)** द्रव्यस्य **(सिचामहे)** सिञ्चेम॥७॥

अन्वयः-हे विद्वन्! सवनेषु दाधृषिरहन्ते तव समने नावन्न प्रयामि ब्रह्मणा वचस्युवं प्रयामि कुविद्भवानस्य वचसो नोऽस्मान्निबोधिषद् वयमुत्सं नेन्द्रं वसुनः सिचामहे॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये नौभिः समुद्रे रथैः पृथिव्यां विमानैराकाशे युध्येरँस्ते सदैश्वर्यमश्नुवते॥७॥

पदार्थः-हे विद्वान्! **(सवनेषु)** ऐश्वर्यों वा प्रेरणाओं में **(दाधृषिः)** अतीव प्रगल्भ मैं **(ते)** तुम्हारे **(समने)** संग्राम के निमित्त **(नावम्)** जल में नाव को जैसे **(न)** वैसे **(प्रयामि)** प्राप्त होता **(ब्रह्मणा)** वेद के साथ **(वचस्युवम्)** अपने को वचन की इच्छा करते अर्थात् वेद शिक्षाओं को चाहते हुए जन को प्राप्त होता **(कुवित्)** महान् आप **(अस्य)** इस **(वचसः)** वचन के सम्बन्ध करनेवाले **(नः)** हम लोगों को **(निबोधिषत्)** निश्चित जानो, हम लोग **(उत्सम्)** कूप के **(न)** समान वा **(इन्द्रम्)** बिजुली के समान ऐश्वर्य के **(वसुनः)** द्रव्य-सम्बन्धि व्यवहारों से **(सिचामहे)** सींचते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो नौकाओं से समुद्र में, रथों से पृथिवी पर और विमानों से आकाश में युद्ध करते हैं, वे सदा ऐश्वर्य को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पुरा सम्बाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि॥८॥

पुरा। सम्ऽबाधात्। अभि। आ। ववृत्स्व। नः। धेनुः। न। वत्सम्। यवसस्य। पिप्युषी। सकृत्। सु। ते। सुमतिऽभिः। शतक्रतो इति शतऽक्रतो। सम्। पत्नीभिः। न। वृषणः। नसीमहि॥८॥

पदार्थः-**(पुरा)** प्रथमतः **(सम्बाधात्)** **(अभि)** **(आ)** **(ववृत्स्व)** **(नः)** अस्माकम् **(धेनुः)** गौः **(न)** इव **(वत्सम्)** **(यवसस्य)** **(पिप्युषी)** वृद्धा **(सकृत्)** एकवारम् **(सु)** **(ते)** तव **(सुमतिभिः)** शोभना मतयो यासान्ताभिः **(शतक्रतो)** असंख्यप्रज्ञ **(सम्)** **(पत्नीभिः)** **(न)** इव **(वृष्णः)** बलिष्ठाः सेक्तारः **(नसीमहि)** गच्छेम। **नसत इति गतिकर्मासु पठितम्।** (निघं०२.१४)॥८॥

अन्वयः-हे शतक्रतो! त्वं यवसस्य वत्सं पिप्युषी धेनुर्न सुमतिभिः पत्नीभिर्वृषणो न ते तव सम्बाधात् पुरा नोऽस्मान् त्वमभ्याववृत्स्व यतो वयं सकृत्सु सन्नसीमहि॥८॥

भावार्थः-अत्रोपमालङ्कारः। येऽन्यान् प्राणिनः पीडातो निवर्त्तयन्ति ते स्वयमपि पीडातो निवर्त्तन्ते यथा क्रियमाणया पत्न्या सह पतिर्मोदते तथा सज्जनसङ्गेन सर्वे आनन्दन्ति॥८॥

पदार्थः-हे **(शतक्रतो)** असंख्य बुद्धियोंवाले जन! आप **(यवसस्य)** यवादि अन्न सम्बन्धी **(वत्सम्)** बछड़े को **(पिप्युषी)** वृद्ध **(धेनुः)** गौ **(न)** जैसे वैसे वा **(सुमतिभिः)** जिनकी सुन्दर बुद्धियां उन **(पत्नीभिः)** पत्नियों के साथ **(वृषणः)** बलवान् सेचनकर्त्ता जन जैसे **(न)** वैसे **(ते)**

आपके **(सम्बाधात्)** सम्बन्ध से **(पुरा)** प्रथम **(नः)** हम लोगों को **(अभि, आ, ववृत्स्व)** सब ओर से अच्छे प्रकार वर्त्तो, जिससे हम लोग **(सकृत्)** एक बार **(सुसन्नसीमहि)** सुन्दरता से जावें॥८॥

भावार्थः-जो और प्राणियों को पीड़ा से निवृत्त करते हैं वे आप भी पीड़ा से निवृत्त होते हैं। जैसे क्रियमाण पत्नी के साथ पति आनन्दित होता है, वैसे सज्जन के साथ सब आनन्दित होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥९॥१८॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी। शिक्ष। स्तोतृभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुऽवीराः॥९॥

पदार्थः-**(नूनम्)** निश्चितम् **(सा)** **(ते)** तव **(प्रति)** **(वरम्)** **(जरित्रे)** स्तावकाय **(दुहीयत्)** **(इन्द्र)** **(दक्षिणा)** **(मघोनी)** पूजनीया विद्या प्रतिष्ठा च **(शिक्ष)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(स्तोतृभ्यः)** स्तावकेभ्यो विद्वद्भ्यः **(मा)** निषेधे **(अति)** **(धक्)** दहेः **(भगः)** ऐश्वर्यम् **(नः)** अस्मभ्यम् **(बृहत्)** महत् **(वदेम)** **(विदथे)** यज्ञे **(सुवीराः)**॥९॥

अन्वयः-हे इन्द्र! या ते तव मघोनी दक्षिणा जरित्रे प्रतिवरं दुहीयत् सा तव नूनं निश्चितं श्रेयः सम्पादयति। भवान् स्तोतृभ्यो मातिधग्यो नो भगस्तं शिक्ष यतो वयं सुवीराः सन्तोऽपि विदथे बृहद्वदेम॥९॥

भावार्थः-ये कस्याप्युपकारं न रुन्धन्ति सत्यमुपदिशन्ति ते यशस्विनो भवन्ति॥९॥

अस्मिन् सूक्ते विद्युद्विद्वत्सूर्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति षोडशं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** विद्वान्! जो **(ते)** आपकी **(मघोनी)** प्रशंसा करने के योग्य विद्या और प्रतिष्ठा **(दक्षिणा)** और दक्षिणा **(जरित्रे)** स्तुति करनेवाले के लिये **(प्रतिवरम्)** श्रेष्ठ के प्रति श्रेष्ठ पदार्थ को **(दुहीयत्)** पूर्ण करे **(सा)** वह आपका **(नूनम्)** निश्चित श्रेय अत्यन्त कल्याण सिद्ध

करती है, आप **(स्तोतृभ्यः)** स्तुति करनेवाले विद्वानों के लिये जो पदार्थ उनको **(मा, अति, धक्)** मत भस्म कर, मत नष्ट कर, जो **(नः)** हमारे लिये **(भगः)** ऐश्वर्य है उसको **(शिक्ष)** शिक्षा देओ। जिससे हम लोग **(सुवीराः)** सुन्दर वीरोंवाले हुए **(विदथे)** यज्ञभूमि में **(बृहत्)** बहुत **(वदेम)** कहें॥९॥

भावार्थः-जो लोग किसी के उपकार को नहीं रोकते, सत्य उपदेश करते हैं, वे यशस्वी होते हैं॥९॥

इस सूक्त में बिजुली, विद्वान्, सूर्य और फिर विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह सोलहवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

तदस्माविति नवर्चस्य सप्तदशस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, ५, ६ विराट् जगती। २, ४ निचृज्जगती छन्दः। निषादः स्वरः। ३, ७ भुरिक् त्रिष्टुप्। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः। ८ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ सूर्यगुणानाह॥

अब नव ऋचावाले सत्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सूर्य के गुणों का उपदेश करते हैं॥

तदꣳस्मै नव्यꣳमङ्गिरस्वदर्चत शुष्मा यदꣳस्य प्रत्नथोदीरते।
विश्वा यद्गोत्रा सहꣳसा परीवृता मदे सोमꣳस्य दꣳहितान्यैरयत्॥ १॥

तत्। अस्मै। नव्यम्। अङ्गिरस्वत्। अर्चत। शुष्माः। यत्। अस्य। प्रत्नऽथा। उत्ऽईरते। विश्वा। यत्। गोत्रा। सहसा। परिऽवृता। मदे। सोमस्य। दꣳहितानि। ऐरयत्॥ १॥

पदार्थः-(**तत्**) (**अस्मै**) (**नव्यम्**) नवमेव स्वरूपम् (**अङ्गिरस्वत्**) अङ्गिरसा प्राणेन तुल्यम् (**अर्चत**) सत्कुरुत (**शुष्माः**) शुष्माणि शोषकाणि बलानि (**यत्**) यानि (**अस्य**) सूर्यस्य (**प्रत्नथा**) प्रत्नं पुरातनमिव (**उदीरते**) उत्कृष्टतया कम्पयन्ति (**विश्वा**) विश्वानि (**यत्**) यानि (**गोत्रा**) गोत्राणि (**सहसा**) बलेन (**परीवृता**) परितः सर्वतो वर्त्तन्ते यानि तानि (**मदे**) आनन्दाय (**सोमस्य**) ओषधिगणस्य (**दꣳहितानि**) धृतानि वर्द्धितानि वा (**ऐरयत्**) कम्पयति॥ १॥

अन्वयः-हे विद्वांसोऽस्य सोमस्य यद्यानि प्रत्नथा शुष्मा विश्वा गोत्रा परीवृता सहसा दꣳहितान्युदीरते तन्नव्यमस्मा अङ्गिरस्वद्यूयमर्चत यन्मदे प्रभवति तद्य ऐरयत्तं स्वरूपतो विजानीत॥ १॥

भावार्थः-हे मनुष्या! येन जगदीश्वरेण सर्वेषां भूगोलानां धारणाय सूर्यो निर्मितस्तं सदा ध्यायत॥ १॥

पदार्थः-हे विद्वानो! (**अस्य**) इस सूर्यमण्डल सम्बन्धी (**सोमस्य**) ओषधि गण के (**यत्**) जो (**प्रत्नथा**) पुरातन पदार्थ के समान (**शुष्माः**) दूसरों को शुष्क करनेवाले (**विश्वा**) और समस्त (**गोत्रा**) गोत्र जो कि (**परीवृता**) सब ओर से वर्त्तमान वे (**सहसा**) बल के साथ (**दꣳहितानि**) धारण किये वा बढ़े हुए (**उदीरते**) उत्कर्षता से दूसरे पदार्थों को कंपन दिलाते हैं (**तत्**) वह (**नव्यम्**) नवीन कर्म (**अस्मै**) इसके लिये (**अङ्गिरस्वत्**) प्राण के तुल्य तुम लोग (**अर्चत**) सत्कृत करो (**यत्**) जो (**मदे**) आनन्द के लिये उत्तमता से होता है, उसको जो (**ऐरयत्**) कंपाता कार्य में लाता है, उसको तुम स्वरूप से जानो॥ १॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर ने समस्त भूगोलों के धारण करने को सूर्यमण्डल बनाया है, उसका सदा ध्यान किया करो॥१॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत्।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत॥२॥

सः। भूतु। यः। ह। प्रथमाय। धायसे। ओजः। मिमानः। महिमानम्। आ। अतिरत्। शूरः। यः। युत्ऽसु। तन्वम्। परिऽव्यत। शीर्षणि। द्याम्। महिना। प्रति। अमुञ्चत॥२॥

पदार्थः-(**सः**) जगदीश्वरः (**भूतु**) भवतु। अत्र **बहुलं छन्दसी**ति शपो लुक्। **भूसुवोस्तिङी**ति गुणाभावः। (**यः**) (**ह**) किल (**प्रथमाय**) आदिमाय (**धायसे**) धारणाय (**ओजः**) बलम् (**मिमानः**) निर्माता सन् (**महिमानम्**) स्वप्रभावम् (**आ**) (**अतिरत्**) सन्तारयति (**शूरः**) निर्भयो मनुष्यः (**यः**) (**युत्सु**) संग्रामेषु (**तन्वम्**) शरीरम् (**परिव्यत**) सर्वतो व्याप्नुत (**शीर्षणि**) शिरसि (**द्याम्**) प्रकाशम् (**महिना**) महिम्ना महत्वेन (**प्रति**) (**अमुञ्चत**) मुञ्चति॥२॥

अन्वयः-हे मनुष्या! यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् सोऽस्मभ्यं सुखप्रदो भूतु यश्शूरो युत्सु तन्वं प्रक्षिपति तं परिव्यत यो जगदीश्वरो महिना शीर्षणि द्यां प्रत्यमुञ्चत तं परिव्यत॥२॥

भावार्थः-यो जगदीश्वरो धर्तॄणां धर्त्ता बलिनां बली महतां महान् पूज्यानां पूज्योऽस्ति, तं सर्व उपासीरन्॥२॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**ह**) ही (**प्रथमाय**) प्रथम (**धायसे**) धारण के लिये (**ओजः**) बल को (**मिमानः**) निर्माण करता बनाता हुआ (**महिमानम्**) अपने प्रभाव को (**आतिरत्**) सम्यक् पार पहुंचाता (**सः**) वह जगदीश्वर हम लोगों के लिये सुख देनेवाला (**भूतु**) हो, (**यः**) जो (**शूरः**) निर्भय मनुष्य (**युत्सु**) संग्रामों में (**तन्वम्**) शरीर को छोड़ता है, उसको (**परिव्यत**) सब ओर से व्याप्त होओ अर्थात् प्राप्त होओ, जो जगदीश्वर (**महिना**) अपने महत्त्व से (**शीर्षणि**) शिर पर (**द्याम्**) प्रकाश को (**प्रति अमुञ्चत**) छोड़ता है, उसको सब ओर से व्याप्त होओ अर्थात् उसमें रमो॥२॥

भावार्थः-जो जगदीश्वर धारण करनेवालों का धारणकर्त्ता, बलवानों का बलवान्, बड़ों का बड़ा और पूज्यों का पूज्य है, उसकी सब उपासना करें॥२॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

अधाकृणोः प्रथमं वीर्यं महद् यदस्याग्रे ब्रह्मणा शुष्ममैरयः।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक्॥ ४॥

अध। अकृणोः। प्रथमम्। वीर्यम्। महत्। यत्। अस्य। अग्रे। ब्रह्मणा। शुष्मम्। ऐरयः। रथेऽस्थेन। हरिऽअश्वेन। विऽच्युताः। प्र। जीरयः। सिस्रते। सध्र्यक्। पृथक्॥ ३॥

पदार्थः-(अध) आनन्तर्ये **(अकृणोः)** कुर्य्याः **(प्रथमम्)** **(वीर्य्यम्)** पराक्रमम् **(महत्)** पुष्कलम् **(यत्)** येन **(अस्य)** जगतः **(अग्रे)** आदौ **(ब्रह्मणा)** अन्नेन **(शुष्मम्)** बलम् **(ऐरयः)** ईर्ष्व **(रथेष्ठेन)** यो रथे तिष्ठति तेन **(हर्यश्वेन)** हरणशीला अश्वा यस्मिँस्तेन **(विच्युताः)** विशेषेण चलिताः **(प्र)** **(जीरयः)** वयो हर्त्तारः **(सिस्रते)** सरन्ति **(सध्र्यक्)** यः सध्रि समानं स्थानं प्राप्नोति सः **(पृथक्)**॥ ३॥

अन्वयः-हे विद्वन्! यदि त्वमस्याग्रे प्रथमं महद्वीर्य्यमकृणोः यद्येन ब्रह्मणा शुष्ममैरयः। ये विद्वांसो हर्य्यश्वेन रथेष्ठेन विच्युताः प्रजीरयः सन्तो सध्र्यक् पृथक् सिस्रतेऽध ते शत्रुभ्यो पराजयं नाप्नुवन्ति॥ ३॥

भावार्थः-य इह सर्वेषां बलपराक्रमवर्द्धकाः साधनोपसाधनयुक्ताः पृथक् मिलित्वा वा प्रयतन्ते ते अन्नाद्यैश्वर्ययुक्ता भवन्ति॥ ३॥

पदार्थः-हे विद्वान्! यदि आप **(अस्य)** इस जगत् के **(अग्रे)** प्रथम में **(महत्)** बहुत **(वीर्य्यम्)** पराक्रम **(अकृणोः)** करो कि **(यत्)** जिससे **(ब्रह्मणा)** अन्न के योग से **(शुष्मम्)** बल को **(ऐरयः)** प्रेरित करो यदि विद्वान् जन **(हर्य्यश्वेन)** हर्यश्वरथ अर्थात् हरणशील शीघ्रगामी अश्व जिसमें उस **(रथेष्ठेन)** रथ में स्थित जन के साथ **(विच्युताः)** विशेषता से चलायमान **(प्र, जीरयः)** उत्तमता से अवस्था के हरण करनेवाले होते हुए और **(सध्र्यक्)** जो समान स्थान को प्राप्त होता वह मनुष्य **(पृथक्)** अलग-अलग **(सिस्रते)** प्राप्त होते हैं **(अध)** इसके अनन्तर वह **[या]** वे पूर्वोक्त जन शत्रुओं से पराजय को नहीं प्राप्त होते॥ ३॥

भावार्थः-जो इस संसार में सबके बल पराक्रम को बढ़ानेवाले, साधनोपसाधनयुक्त, अलग-अलग वा मिलकर प्रयत्न करते हैं, वे अन्नादि ऐश्वर्य्ययुक्त होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अधा॒ यो विश्वा॒ भुव॑नाभि म॒ज्मनेशा॒नकृ॑त्प्रव॑या अ॒भ्यव॑र्धत।
आद्रोद॑सी॒ ज्योति॑षा॒ वह्नि॑रात॑नो॒त् सीव्य॒न्तमां॑सि॒ दुधि॑ता॒ सम॑व्ययत्॥४॥

अध॑। यः। विश्वा॑। भुव॑ना। अ॒भि। म॒ज्मना॑। ई॒शा॒न॒ऽकृत्। प्र॒ऽव॑याः। अ॒भि। अव॑र्धत। आत्। रोद॑सी॒ इति॑। ज्योति॑षा। वह्निः॑। अ॒त॒नो॒त्। सीव्य॑न्। तमां॑सि। दुधि॑ता। सम्। अ॒व्य॒य॒त्॥४॥

पदार्थः-(अध) आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। **(यः)** सूर्य इव जगदीश्वरः **(विश्वा)** सर्वाणि **(भुवना)** भुवनानि लोकान् **(अभि)** आभिमुख्ये **(मज्मना)** बलेन **(ईशानकृत्)** य ईशानानीशञ्छीलान् पुरुषार्थिनः करोति **(प्रवयाः)** यः प्रकर्षेण व्याप्नोति **(अभि) (अवर्द्धत)** वर्द्धते **(आत्)** समन्तात् **(रोदसी)** द्यावापृथिव्यौ **(ज्योतिषा)** प्रकाशेन **(वह्निः)** सर्वस्य वोढा **(आ, अतनोत्)** सर्वतो विस्तृणाति **(सीव्यन्)** रचयन् **(तमांसि)** रात्रीः **(दुधिता)** दुर्हितानि दूरे सन्ति सुखकारकाणि **(सम्) (अव्ययत्)** सर्वतः संवृणोति॥४॥

अन्वयः-हे मनुष्या! य ईशानकृत्प्रवया मज्मना विश्वा भुवनाभ्यवर्द्धत यथा वह्निर्ज्योतिषा तमांसि निवर्त्तयति तथा रोदसी आतनोदभिसीव्यन्दुधिता समव्ययत् सोऽध सर्वैः पूजनीयः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येन जगदीश्वरेण प्रकाशाय सूर्यो भोजनायौषधानि पानाय जलरसा निवासाय भूमिः कर्मकरणाय शरीरादीनि निर्मितानि स पितृवत्सर्वैः सत्कर्त्तव्यः॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(ईशानकृत्)** ईश्वरता का शील रखनेवाले पुरुषों को करता वा **(प्रवयाः)** उत्कर्षता से व्याप्त होता और **(मज्मना)** बल से **(विश्वा)** समस्त **(भुवना)** लोकों के **(अभि, अवर्द्धत)** अभिमुख वृद्धि को प्राप्त होता और जैसे **(वह्निः)** सबको एक स्थान से दूसरे स्थान पर पहुँचानेवाला अग्नि **(ज्योतिषा)** अपनी लपट से **(तमांसि)** रात्रिरूपी अन्धकारों को निवृत्त करता, वैसे **(रोदसी)** आकाश और पृथिवियों को **(आतनोत्)** विस्तार तथा **(अभिसीव्यन्)** सब ओर से उन लोकों को रचता हुआ **(दुधिता)** जो पदार्थ दूसरे देश में होते वा सुख करनेवाले होते हैं, उनको **(समव्ययत्)** सब ओर से आच्छादित करता है **(सः)** वह **(अध)** उक्त विषयों के अनन्तर सबको पूजनीय है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस जगदीश्वर ने प्रकाश के लिये सूर्य, भोजनों के लिये औषधी, पीने के लिये जल रसों को, निवास के लिये भूमि और कर्म करने के लिये शरीर आदि बनाये हैं, वह पिता के तुल्य सबको सत्कार करने योग्य है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स प्राचीनान् पर्वतान् दृंहदोजसाधराचीनमकृणोदपामपः।
अधारयत् पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः॥५॥१९॥

सः। प्राचीनान्। पर्वतान्। दृंहत्। ओजसा। अधराचीनम्। अकृणोत्। अपाम्। अपः। अधारयत्। पृथिवीम्। विश्वऽधायसम्। अस्तभ्नात्। मायया। द्याम्। अवऽस्रसः॥५॥

पदार्थः-(सः) (**प्राचीनान्**) पूर्वतो वर्त्तमानान् (**पर्वतान्**) पर्वतानिव मेघान् (**दृंहत्**) दृंहति धरति (**ओजसा**) बलेन (**अधराचीनम्**) योऽधोऽञ्चति तम् (**अकृणोत्**) करोति (**अपाम्**) अन्तरिक्षस्य (**अपः**) जलानि (**अधारयत्**) धारयति (**पृथिवीम्**) (**विश्वधायसम्**) विश्वस्य धारणसमर्थम् (**अस्तभ्नात्**) स्तभ्नाति (**मायया**) प्रज्ञया (**द्याम्**) प्रकाशम् (**अवस्रसः**) अवसारयति॥५॥

अन्वयः-स परमेश्वरो यथा प्राचीनान् पर्वतानोजसा दृंहदधराचीनं कृत्वा**[**पामपो**]**ऽकृणोद्विश्वधायसं पृथिवीमधारयन्मायया द्यामस्तभ्नादवस्रसस्तथा सकलं विश्वं धरति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यः सन्निहिताँल्लोकान् धरति तथा परमेश्वरः सूर्याद्यखिलं जगद्धत्ते॥५॥

पदार्थः-(सः) वह परमेश्वर जैसे (**प्राचीनान्**) प्राचीन अर्थात् पहिले से वर्त्तमान (**पर्वतान्**) पर्वतों के समान मेघों को (**ओजसा**) बल के साथ (**दृंहत्**) धारण करता (**अधराचीनम्**) और जो नीचे को प्राप्त होता उसको बना कर (**अपाम्**) अन्तरिक्ष के (**अपः**) जलों को (**अकृणोत्**) सिद्ध करता है (**विश्वधायसम्**) विश्व के धारण करने को समर्थ (**पृथिवीम्**) पृथिवी को (**अधारयत्**) धारण करता जो (**मायया**) प्रज्ञा से (**द्याम्**) प्रकाश को (**अस्तभ्नात्**) रोकता वा (**अवस्रसः**) विस्तारता है, वैसे समस्त विश्व को धारण करता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य अपने निकट के लोकों को धारण करता, वैसे परमेश्वर सूर्यादि समस्त जगत् को धारण करता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सास्मा अरं बाहुभ्यां यं पिताकृणोद् विश्वस्मादा जनुषो वेदसस्परि।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः॥६॥

सः। अस्मै। अरम्। बाहुऽभ्याम्। यम्। पिता। अकृणोत्। विश्वस्मात्। आ। जनुषः। वेदसः। परि। येन। पृथिव्याम्। नि। क्रिविम्। शयध्यै। वज्रेण। हत्वी। अवृणक्। तुविऽस्वनिः॥६॥

पदार्थः-(सः) (अस्मै) (अरम्) अलम् **(बाहुभ्याम्) (यम्) (पिता) (अकृणोत्)** करोति **(विश्वस्मात्)** सर्वस्मात् **(आ)** समन्तात् **(जनुषः)** प्रसिद्धात् **(वेदसः)** धनाद्विज्ञानाद्वा **(परि)** सर्वतः **(येन)**। अत्राऽन्येषामपीति दीर्घः। **(पृथिव्याम्) (नि)** नितराम् **(क्रिविम्)** कूपम्। **क्रिविरिति कूपनामसु पठितम्।** (निघं०३.२३)। **(शयध्यै) (वज्रेण)** शस्त्रेण **(हत्वी)** हत्वा **(अवृणक्)** छिनत्ति **(तुविष्वणिः)** परमाणूनामेकीभूतानां विभक्ता सूर्यः॥६॥

अन्वयः-हे मनुष्य! पिता विश्वस्माज्जनुषो वेदसो बाहुभ्यां यमरमकृणोत् स त्वं यथा तुविष्वणिर्येन वज्रेण पृथिव्यां शयध्यै क्रिविमिव हत्वी पर्य्यवृणक् तथाऽस्मै सुखमाकृणोत्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो मेघं भित्वा जलं जनयित्वा सर्वेषां सुखं सम्पादयति तथाऽध्यापको जनको वा सर्वाभिः सुशिक्षाभिः सन्तानान् सुभूषितान् कृत्वा सततं सुखयेत्॥६॥

पदार्थः-हे मनुष्य! **(पिता)** सबकी पालना करनेवाला ईश्वर **(विश्वस्मात्)** सब **(जनुषः)** प्रसिद्ध **(वेदसः)** धन वा विज्ञान वा **(बाहुभ्याम्)** भुजाओं से **(यम्)** जिसको **(अरम्)** पूर्ण **(अकृणोत्)** करता है **(सः)** वह तू जैसे **(तुविष्वणिः)** बहुत परमाणुओं का जो कि इकट्ठे होकर एक पदार्थ हो रहे हैं, उनका अच्छे प्रकार विभाग करनेवाला सूर्य **(येन)** जिस **(वज्रेण)** वज्र से **(पृथिव्याम्)** पृथिवी पर **(शयध्यै)** सोने के लिये अर्थात् गिरने के लिये **(क्रिविम्)** कूप के समान **(हत्वी)** छिन्न-भिन्न कर अर्थात् खोद के कूप जल को जैसे निकालें, वैसे मेघ को **(पर्य्यवृणक्)** सब ओर से छिन्न-भिन्न करता और संसार की पालना करता है, वैसे **(अस्मै)** इस बालक आदि के लिये सुख **(आ)** अच्छे प्रकार सिद्ध करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य मेघ को छिन्न-भिन्न कर जल को उत्पन्न कर सबका सुख सिद्ध करता है, वैसे अध्यापक वा पिता समस्त सुन्दर शिक्षाओं से सन्तानों को सुभूषित कर निरन्तर सुखी करें॥६॥

अथ विदुषीविषयमाह॥

अब विदुषी के विषय को अगले मन्त्र में कहा है॥

अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम्।
कृधि प्रकेतमुप मास्या भर दुद्धि भागं तन्वो३ येन मामहः॥७॥

अमाजूःऽइव। पित्रोः। सचा। सती। समानात्। आ। सदसः। त्वाम्। इये। भगम्। कृधि। प्रऽकेतम्। उप। मासि। आ। भर। दुद्धि। भागम्। तन्वः। येन। ममहः॥७॥

पदार्थः-(अमाजूरिव) योऽमा गृहे जूर्यति तद्वत् **(पित्रोः)** **(सचा)** समवायेन **(सती)** वर्त्तमाना **(समानात्)** **(आ)** समन्तात् **(सदसः)** सीदन्ति यस्मिँस्तस्माद् गृहात् **(त्वाम्)** **(इये)** प्राप्नुयाम। अत्र व्यत्ययेनात्मनेपदम्, लडर्थे लिट् च। **(भगम्)** ऐश्वर्यम् **(कृधि)** कुरु **(प्रकेतम्)** प्रकृष्टं विज्ञानम् **(उप)** **(मासि)** मासे **(आ)** **(भर)** **(दद्धि)** याचस्व। **दद्धीति याच्ञाकर्मासु पठितम्।** (निघं०३.१९)। **(भागम्)** भजनीयम् **(तन्वः)** शरीरस्य **(येन)** **(मामहः)** पूज्यान्॥७॥

अन्वयः-हे कन्ये! सती त्वं सचामाजूरिव पित्रोः समानात् सदसो यां त्वामहमिये सा त्वं प्रकेतं भगं कृधि मास्युपाभर भागं दद्धि येन मामहः प्राप्नुयास्तेन तन्वो भागं याचस्व॥७॥

भावार्थः-अत्रोपमालङ्कारः। याः कन्या विद्यामधीत्य गृहाश्रमं प्राप्नुयुस्ताः पूज्यान् सत्कृत्याऽपूज्यान् तिरस्कृत्य पुरुषार्थेनैश्वर्य्यं वर्द्धयेयुः॥७॥

पदार्थः-हे कन्ये! **(सती)** वर्त्तमान तू **(सचा)** सम्बन्ध से **(अमाजूरिव)** जो घर में बुड्ढा होता उसके समान **(पित्रोः)** माता-पिता के **(समानात्)** समान भाव से **(सदसः)** जिसमें पहुँचते हैं, उस स्थान से जिस **(त्वा)** तुझे मैं **(इये)** प्राप्त होऊं वह तू **(प्रकेतम्)** उत्कर्ष विज्ञान को और **(भागम्)** ऐश्वर्य को **(कृधि)** सिद्ध कर तथा **(मासि)** प्रति महीने में **(उपाभर)** उत्तम प्राप्त हुए आभूषणों को पहिना कर **(भागम्)** सेवन करने योग्य पदार्थ **(दद्धि)** मांगो; **(येन)** जिससे **(मामहः)** सत्कार करने योग्य पुत्रादिकों को वा प्रशंसा करने योग्य पदार्थों को प्राप्त हो उस व्यवहार से **(तन्वः)** शरीर के भाग को मांगो॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो कन्या विद्या को पढ़ कर गृहाश्रम को प्राप्त हों, वे सत्कार करने योग्यों को सत्कार कर और तिरस्कार करने योग्यों का तिरस्कार कर पुरुषार्थ से ऐश्वर्य को बढ़ावें॥७॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

भोजं त्वामिन्द्र वयं हुवेम दुदिष्टवमिन्द्रापांसि वाजान्।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्दु वस्यसो नः॥८॥

भोजम्। त्वाम्। इन्द्र। वयम्। हुवेम। दुदिः। त्वम्। इन्द्र। अपांसि। वाजान्। अविड्ढि। इन्द्र। चित्रया। नः। ऊती। कृधि। वृषन्। इन्द्र। वस्यसः। नः॥८॥

पदार्थः-(भोजम्) भोक्तारम् **(त्वाम्)** **(इन्द्र)** परमैश्वर्य्ययुक्त **(हुवेम)** स्वीकुर्याम **(ददिः)** दाता **(त्वम्)** **(इन्द्र)** दुःखविदारक **(अपांसि)** कर्माणि **(वाजान्)** बोधान् **(अविड्ढि)** रक्ष। अत्रावधातो**र्वाच्छन्दसी**ति लोट् सिप्यशादेशः। **(इन्द्र)** शत्रुविनाशक **(चित्रया)** अनेक विधया **(नः)** अस्मान् **(ऊती)** ऊत्या **(कृधि)** कुरु **(वृषन्)** सेचक **(इन्द्र)** सुखप्रद **(वस्यसः)** अतिशयेन वसीयसो वसुमतः **(नः)** अस्मान्॥८॥

अन्वयः-हे इन्द्र! यं भोजं त्वां वयं हुवेम स त्वमस्माञ्जुहुधि। हे इन्द्र! ददिष्ट्वमपांसि वाजानविड्ढि। हे इन्द्र! त्वं चित्रयोतीयुक्तान् नः कृधि। हे वृषन्निन्द्र! त्वन्नो वस्यसः कृधि॥८॥

भावार्थः-यथा सखायः सखीन् स्तुवन्ति तथाऽध्येतारौऽध्यापकान् प्रशंसन्तु एवं परस्पररक्षणेनैश्वर्यमुन्नयेयुः॥८॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त विद्वान्! जिन **(भोजम्)** भोगनेवाले **(त्वाम्)** आपको **(वयम्)** हम लोग **(हुवेम)** स्वीकार करें सो आप हम लोगों को स्वीकार कीजिये। हे **(इन्द्र)** दुःख विदीर्ण करनेवाले विद्वान्! **(ददिः)** दानशील **(त्वम्)** आप **(अपांसि)** कर्मों को **(वाजान्)** बोधों को **(अविड्ढि)** सुरक्षित करो। हे **(इन्द्र)** शत्रु विनाशनेवाले विद्वान्! आप **(चित्रया)** चित्र-विचित्र अनेकविध **(ऊती)** रक्षा से युक्त **(नः)** हम लोगों को **(कृधि)** करो। हे **(वृषन्)** सींचनेवाले **(इन्द्र)** सुख देनेवाले विद्वन्! आप **(नः)** हम लोगों को **(वस्यसः)** अत्यन्त धनवान् करो॥८॥

भावार्थः-जैसे मित्र मित्रों की स्तुति करते हैं, वैसे पढ़नेवाले पढ़ानेवालों की प्रशंसा करें, ऐसे एक-दूसरे की रक्षा से ऐश्वर्य की उन्नति करें॥८॥

पुनर्विदुषी गुणानाह॥

फिर विदुषी के गुणों को कहते हैं॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः॥९॥२०॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी। शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुऽवीराः॥९॥

पदार्थः-**(नूनम्)** निश्चये **(सा)** विदुषी **(ते)** तव **(प्रति)** **(वरम्)** श्रेष्ठं कर्म **(जरित्रे)** स्तोत्रे **(दुहीयत्)** प्रपूरयेत् **(इन्द्र)** दातः **(दक्षिणा)** प्राणप्रदा **(मघोनी)** बहुधनयुक्ता **(शिक्ष)** उपदिश **(स्तोतृभ्यः)** विद्वद्भ्यः **(मा)** निषेधे **(अति)** **(धक्)** दहेः **(भगः)** ऐश्वर्य्यम् **(नः)** अस्मभ्यम् **(बृहत्)**

महद्विद्याजं विज्ञानशास्त्रम् **(वदेम)** उपदिशेम **(विदथे)** विद्यादाने यज्ञे **(सुवीराः)** सुष्ठुविद्यासु व्यापिनो वीरा येषान्ते॥९॥

अन्वयः-हे इन्द्र राजन्! ते तव राज्ये या दक्षिणा मघोनी विदुषी जरित्रे प्रतिवरं दुहीयत् सा नूनं कल्याणकारिणी स्यात्। हे विदुषि! त्वं कन्याः शिक्ष नः स्तोतृभ्यो माति धक् येन सुवीरा वयं विदथे बृहद्भगो वदेम॥९॥

भावार्थः-हे विद्वांसो या धर्मात्मानो विदुष्यः स्त्रियः स्युस्ताभिः सर्वाः कन्याः शिक्षयन्तु यतः कार्यनाशो न स्यात् सर्वथा विद्यायुक्ता भूत्वाऽत्युत्तमानि कर्माणि कुर्य्युः॥९॥

अत्र सूर्यविद्वदीश्वरविदुषीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेदितव्या॥

इति सप्तदशं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** देनेवाले राजन्! **(ते)** आपके राज्य में जो **(दक्षिणा)** प्राण देनेवाली **(मघोनी)** बहुत धन से युक्त विदुषी **(जरित्रे)** स्तुति करनेवाले के लिये **(प्रतिवरम्)** श्रेष्ठ काम को **(दुहीयत्)** पूर्ण करे **(सा)** वह **(नूनम्)** निश्चय से कल्याण करनेवाली हो। हे विदुषि! तू कन्याओं को **(शिक्ष)** शिक्षा दे **(नः)** हम लोगों के लिये **(स्तोतृभ्यः)** स्तुति करनेवाले विद्वानों से **(मा, अति, धक्)** मत किसी काम का विनाश कर जिससे **(सुवीराः)** सुन्दर विद्या में व्याप्त होनेवाले वीरों से युक्त हम लोग **(विदथे)** विद्यादानरूपी यज्ञ में **(बृहत्)** बहुत **(भगः)** ऐश्वर्य को **(वदेम)** कहें॥९॥

भावार्थः-हे विद्वानो! जो धर्मात्मा, विदुषी वा पण्डितानी स्त्रियां हों उनसे सब कन्याओं को सुन्दर शिक्षा दिलाओ जिससे कार्य विनाश न हो॥९॥

इस सूक्त में विद्वान् और विदुषियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति समझनी चाहिये॥

यह सत्रहवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

प्रातरिति नवर्चस्याष्टादशसूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १ पङ्क्तिः। ४, ८ भुरिक् पङ्क्तिः। ५, ६ स्वराट् पङ्क्तिः। ७ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ३, ९ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ यानविषयमाह॥

अब नव ऋचावाले अठारहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में यान-विषय को कहते हैं।

प्रा॒ता रथो॒ नवो॑ योजि॒ सस्मि॒श्चतु॑र्युगस्त्रिक॒शः स॒प्तर॑श्मिः।
दशा॑रित्रो मनु॒ष्यः॑ स्व॒र्षाः स इ॒ष्टिभि॑र्म॒तिभी॒ रंह्यो॑ भूत्॥ १॥

प्रा॒तरिति॑। रथः॑। नवः॑। योजि॒। सस्मि॑ः। चतु॑ःऽयुगः। त्रि॒ऽक॒शः। स॒प्तऽर॑श्मिः। दश॑ऽअरित्रः। म॒नु॒ष्यः॑। स्व॒ःऽसाः। सः। इ॒ष्टिऽभि॑ः। म॒तिऽभि॑ः। रंह्यः॑। भूत्॥ १॥

पदार्थः-(प्रातः) प्रभाते **(रथः)** गमनसाधनं यानम् **(नवः)** नवीनः **(योजि)** अयोजि **(सस्मिः)** शेते यस्मिन् सः **(चतुर्युगः)** यश्चतुर्षु युज्यते सः **(त्रिकशः)** त्रिधा कशा गमनानि गमनसाधनानि वा यस्मिन् **(सप्तरश्मिः)** सप्तविद्या रश्मयः किरणा यस्य सः **(दशारित्रः)** दश अरित्राणि स्तम्भनसाधनानि यस्मिन् सः **(मनुष्यः)** मननशीलः **(स्वर्षाः)** स्वः सुखं सुनोति येन सः **(सः)** **(इष्टिभिः)** सङ्गताभिः **(मतिभिः)** प्रज्ञाभिः **(रंह्यः)** गमयितुं योग्यः **(भूत्)** भवति॥ १॥

अन्वयः-हे विद्वन्! शिल्पिभिर्यो दशारित्रः सस्मिश्चतुर्युगस्त्रिकशः सप्तरश्मिर्नवो रथस्स्वर्षा मनुष्यश्च प्रातर्योजि स इष्टिभिर्मतिभी रंह्यो भूत्॥ १॥

भावार्थः-ये मनुष्या ईदृग्यानेन यातुमायातुमिच्छेयुस्तेऽव्याहतगतयः स्युः॥ १॥

पदार्थः-हे विद्वान्! शिल्पियों से जो **(दशारित्रः)** दश अरित्रोंवाला अर्थात् जिसमें दश रुकावट के साधन हैं **(सस्मिः)** और जिसमें सोते हैं **(चतुर्युगः)** जो चार स्थानों में जोड़ा जाता **(त्रिकशः)** तीन प्रकार के गमन व गमन साधन जिसमें विद्यमान **(सप्तरश्मिः)** जिसकी सात प्रकार की किरणें **(नवः)** ऐसा नवीन **(रथः)** रथ और **(स्वर्षाः)** जिससे सुख उत्पन्न हो ऐसा और **(मनुष्यः)** विचारशील मनुष्य **(प्रातः)** प्रभात समय में **(योजि)** युक्त किया जाता **(सः)** वह **(इष्टिभिः)** सङ्गत हुई और प्राप्त हुई **(मतिभिः)** प्रज्ञाओं से **(रंह्यः)** चलाने योग्य **(भूत्)** होता है॥ १॥

भावार्थः-जो मनुष्य ऐसे यान से जाने-आने को चाहें, वे निर्विघ्न गतिवाले हों॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सास्मा॒ अर॑ं प्रथ॒मं स द्वि॒तीय॑मु॒तो तृ॒तीय॒ं मनु॑ष॒: स होता॑।
अ॒न्यस्या॒ गर्भ॑म॒न्य ऊ॑ जनन्त॒ सो अ॒न्येभि॑: सचते॒ जेन्यो॒ वृषा॑॥ २॥

सः। अ॒स्मै॒। अर॑म्। प्र॒थ॒मम्। सः। द्वि॒तीय॑म्। उ॒तो॑ इति॑। तृ॒तीय॑म्। मनु॑षः। सः। होता॑। सः। अ॒न्यस्याः॑। गर्भ॑म्। अ॒न्ये। ऊ॒म् इति॑। ज॒न॒न्त॒। सः। अ॒न्येभि॑ः। स॒च॒ते॒। जेन्यः॑। वृषा॑॥ २॥

पदार्थः-(**सः**) रथः (**अस्मै**) स्वामिने (**अरम्**) पर्य्याप्तम् (**प्रथमम्**) आदिमं पृथिव्यां गमनम् (**सः**) (**द्वितीयम्**) जले गमनम् (**उतो**) अपि (**तृतीयम्**) अन्तरिक्षे गमनम् (**मनुषः**) मनुष्यजातस्य पदार्थसमूहस्य (**सः**) (**होता**) सुखप्रदाता (**अन्यस्याः**) गतेः (**गर्भम्**) ग्रहणम् (**अन्ये**) अपरे विद्वांसः (**ऊम्**) वितर्के (**सः**) (**जनन्त**) (**अन्येभिः**) विद्वद्भिस्सह (**सचते**) समवैति (**जेन्यः**) जापयितुं शीलः (**वृषा**) बलिष्ठः॥ २॥

अन्वयः-हे मनुष्य! सोऽस्मै प्रथमं स द्वितीयमुतो तृतीयं सचते स मनुषो होता स जेन्यो वृषा सन्नन्यस्या गर्भमरं सचते तमू अन्येभिरन्ये जनन्त॥ २॥

भावार्थः-विद्वांसो यदि विद्युदादिरूपमग्निं यानेषु संप्रयुञ्जते तर्ह्ययं सर्वाणि यानानि सर्वा गतीर्गमयति विजयहेतुश्च भवति॥ २॥

पदार्थः-हे मनुष्य! (**सः**) वह रथयान गमन साधन (**अस्मै**) इस स्वामी के लिये कि जो बनाने वाला है (**प्रथमम्**) पहिले अर्थात् पृथिवी में गमन (**सः**) वह (**द्वितीयम्**) दूसरे जल में गमन (**उतो**) और (**तृतीयम्**) तीसरे अन्तरिक्ष में गमन को सम्बद्ध करता मिलाता है तथा (**सः**) वह (**मनुषः**) मनुष्यों से उत्पन्न हुए सर्व पदार्थ का (**होता**) सुख देनेवाला (**सः**) वह (**जेन्यः**) विजय करानेवाला और (**वृषा**) अत्यन्त बलयुक्त होता हुआ (**अन्यस्याः**) दूसरी गति का (**गर्भम्**) ग्रहण (**अरम्**) पूर्ण (**सचते**) सम्बद्ध करता है (**ऊम्**) उसी को (**अन्येभिः**) और विद्वानों के साथ (**अन्ये**) और विद्वान् (**जनन्त**) उत्पन्न करें॥ २॥

भावार्थः-विद्वान् जन यदि बिजुली रूप अग्नि को रथों में अच्छे प्रकार युक्त करें तो यह समस्त यानों को सब गतियों से चलाता और विजय का हेतु होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हरी॒ नु कं॒ रथ॒ इन्द्र॑स्य योजमा॒यै सू॒क्तेन॒ वच॑सा॒ नवे॑न।
मो षु त्वामत्र॑ ब॒हवो॒ हि विप्रा॒ नि रीर॑मन्यज॑मानासो अ॒न्ये॥ ३॥

हरी॑ इति॑। नु। क॒म्। रथे॑। इन्द्र॑स्य। यो॒ज॒म्। आ॒ऽयै। सु॒ऽउ॒क्तेन॑। वच॑सा। नवे॑न। मो इति॑। सु। त्वाम्। अत्र॑। ब॒हव॑:। हि। विप्रा॑:। नि। री॒र॒म॒न्। यज॑मानास:। अ॒न्ये॥ ३॥

पदार्थ:-(हरी) धारणाकर्षणवेगादिगुणौ वाय्वग्नी **(नु)** सद्य: **(कम्)** सुखम् **(रथे)** याने **(इन्द्रस्य)** विद्युत: **(योजम्)** युनज्मि **(आयै)** एतुं गन्तुम् **(सूक्तेन)** सुष्ठु प्रतिपादितेन **(वचसा)** भाषणेन **(नवेन)** नूतनेन **(मो)** **(सु)** **(त्वाम्)** **(अत्र)** **(बहव:)** **(हि)** **(विप्रा:)** मेधाविन: **(नि)** नितराम् **(रीरमन्)** रमयन्ति **(यजमानास:)** सम्यग् ज्ञातार: **(अन्ये)**॥ ३॥

अन्वय:-हे विद्वन्! य इन्द्रस्य रथे हरी नु कं साध्नुवन्ति यानहमत्र सूक्तेन वचसा नवेनायै योजमत्र बहवो विप्रास्त्वां हि सुनिरीरमन्। अन्ये यजमानासश्चात्र विपरीता मो रीरमन्॥ ३॥

भावार्थ:-ये विद्युद्रथं न साध्नुवन्ति ते सर्वत्र रन्तुं रमयितुं च न शक्नुवन्ति॥ ३॥

पदार्थ:-हे विद्वान्! जो **(इन्द्रस्य)** बिजुली रूप अग्नि सम्बन्धी **(रथे)** यान में **(हरी)** धारण, आकर्षण और वेग आदि गुणोंवाले वायु और अग्नि **(नु)** शीघ्र **(कम्)** सुख को सिद्ध करते हैं वा जिनको मैं **(अत्र)** इसमें **(सूक्तेन)** सुन्दर प्रतिपादन किये **(वचसा)** भाषण से **(नवेन)** नवीन प्रबन्ध से **(आयै)** गमन करने को **(योजम्)** युक्त करता हूं, इस रथ में **(बहव:)** बहुत **(विप्रा:)** मेधावी जन **(त्वाम्)** आपको **(हि)** ही **(सु, नि, रीरमन्)** अच्छे प्रकार रमा रहे हैं **(अन्ये)** और **(यजमानास:)** सम्यग् ज्ञाता भी अर्थात् उन मेधावियों से दूसरे विज्ञानवान् जन भी इस उक्त रथ में विपरीत हैं, वे **(मो)** नहीं रमाते हैं॥ ३॥

भावार्थ:-जो बिजुली-रथ को नहीं सिद्ध करते हैं, वे सर्वत्र आप न रम सकते हैं और न दूसरों को रमा सकते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ द्वाभ्यां॑ हरि॑भ्यामिन्द्र या॒ह्या च॒तुर्भि॒रा ष॒ड्भिर्हू॒यमा॑न:।
आष्टा॒भिर्द॒शभि॑: सोम॒पेय॑मयं सु॒त: सु॑मख॒ मा मृधस्क:॥ ४॥

आ। द्वाभ्याम्। हरि॑ऽभ्याम्। इ॒न्द्र॒। या॒हि॒। आ। च॒तु:ऽभि॑:। आ। ष॒ट्ऽभि:। हू॒यमा॑न:। आ। अ॒ष्टा॒भि:। द॒शऽभि॑:। सो॒म॒ऽपेय॑म्। अ॒यम्। सु॒त:। सु॒ऽम॒ख॒। मा। मृध॑:। क॒रि॒ति॑ क:॥ ४॥

पदार्थः-(आ) समन्तात् **(द्वाभ्याम्)** **(हरिभ्याम्)** हरणशीलाभ्यां पदार्थाभ्याम् **(इन्द्र)** परमैश्वर्ययुक्त **(याहि)** गच्छ **(आ)** समन्तात् **(चतुर्भिः)** **(आ)** **(षड्भिः)** **(हूयमानः)** **(आ)** **(अष्टाभिः)** **(दशभिः)** **(सोमपेयम्)** सोमानां पदार्थानां पातुं योग्यम् **(अयम्)** **(सुतः)** निष्पन्नः **(सुमख)** शोभना मखा यज्ञा यस्य तत्सम्बुद्धौ **(मा)** निषेधे **(मृधः)** अभिकाङ्क्षितान् संग्रामान् **(कः)** कुर्य्याः॥४॥

अन्वयः-हे इन्द्र! हूयमानस्त्वं द्वाभ्यां हरिभ्यां युक्तेन यानेना याहि चतुर्भिर्युक्तेनायाहि। षड्भिर्युक्तेनायाहि। अष्टाभिर्दशभिश्च युक्तेन न योऽयं सुतः सोमस्तं सोमपेयमायाहि। हे सुमख! त्वं सज्जनैस्सह मृधो मा कः॥४॥

भावार्थः-येऽनेकैर्वह्न्यादिभिः पदार्थैर्जनितैर्यन्त्रैश्चालितेषु यानेषु स्थित्वा गच्छन्त्यागच्छन्ति ते स्तुत्या जायन्ते ये धार्मिकैः सह विरोधं न कुर्वन्ति ते विजयिनो भवन्ति॥४॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त! **(हूयमानः)** बुलाये हुए आप **(द्वाभ्याम्)** दो **(हरिभ्याम्)** हरणशील पदार्थों के साथ यान से **(आ, याहि)** आइये, **(चतुर्भिः)** चार हरणशील पदार्थों से युक्त यान से आओ, **(षड्भिः)** छः पदार्थों से युक्त यान से आओ, **(अष्टाभिः)** आठ वा **(दशभिः)** दश पदार्थों से युक्त यान से आओ, जो **(अयम्)** यह **(सुतः)** उत्पन्न किया हुआ पदार्थों का पीने योग्य रस है, उस **(सोमपेयम्)** पदार्थों के रस के पीने के लिये आओ, हे **(सुमख)** सुन्दर यज्ञोंवाले! आप सज्जनों के साथ **(मृधः)** अभीष्ट संग्रामों को **(मा, कः)** मत करो॥४॥

भावार्थः-जो अनेक अग्नि आदि पदार्थों से उत्पन्न किये हुए यन्त्रों से चलाये हुए यानों में स्थित होकर जाते-आते हैं, वे स्तुति के साथ प्रकट होते हैं। जो धार्मिकों के साथ विरोध नहीं करते, वे विजयी होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ विंशत्या त्रिंशता याह्यर्वाङ चत्वारिंशता हरिभिर्युजानः।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम्॥५॥२१॥

आ। विंशत्या। त्रिंशता। याहि। अर्वाङ्। आ। चत्वारिंशता। हरिऽभिः। युजानः। आ। पञ्चाशता। सुऽरथेभिः। इन्द्र। आ। षष्ट्या। सप्तत्या। सोमऽपेयम्॥५॥

पदार्थः-(आ) समन्तात् **(विंशत्या)** एतत्संख्यया संख्यातैः **(त्रिंशता)** **(याहि)** **(अर्वाङ्)** योऽधोऽञ्चति सः **(आ)** **(चत्वारिंशता)** **(हरिभिः)** हरणशीलैः पदार्थैः **(युजानः)** युक्तः सन् **(आ)**

(पञ्चाशता) (सुरथेभिः) शोभनैर्यानैः **(इन्द्र)** असंख्यैश्वर्यप्रद **(आ) (षष्ट्या) (सप्तत्या) (सोमपेयम्)** सोमेष्वोषधीषु यः पेयो रसस्तम्॥५॥

अन्वयः-हे इन्द्र! युजानस्त्वं विंशत्या त्रिंशता च हरिभिश्चालितेन यानेनार्वाङ् सोमपेयमायाहि चत्वारिंशता युक्तेन चायाहि। पञ्चाशता हरिभिर्युक्तैः सुरथेभिः षष्ट्या सप्तत्या च हरिभिर्युक्तैः सुरथेभिरायाहि॥५॥

भावार्थः-यथा विंशतिस्त्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिः सप्ततिश्च बलिष्ठा अश्वा युगपद्युक्त्वा यानं सद्यो गमयन्ति ततोऽप्यधिकवेगेन वह्न्यादयो गमयन्ति॥५॥

पदार्थः-हे **(इन्द्र)** असंख्य ऐश्वर्य देनेवाले! **(युजानः)** युक्त होते हुए आप **(विंशत्या)** बीस **(त्रिंशता)** और तीस **(हरिभिः)** हरनेवाले पदार्थों से चलाये हुए यान से **(अर्वाङ्)** जो नीचे को जाता उस **(सोमपेयम्)** सोमादि ओषधियों में पीने योग्य रस को **(आ, याहि)** प्राप्त होओ आओ, **(चत्वारिंशता)** चालीस पदार्थों से युक्त रथ से **(आ)** आओ, **(पञ्चाशता)** पचास हरणशील पदार्थों से युक्त **(सुरथेभिः)** सुन्दर रथों से **(आ)** आओ, **(षष्ट्या)** साठ वा **(सप्तत्या)** सत्तर हरणशील पदार्थों से युक्त सुन्दर रथों से आओ॥५॥

भावार्थः-जैसे बीस, तीस, चालीस, साठ, सत्तर बलवान् घोड़े एक साथ जोड़ कर यान को शीघ्र चलाते हैं, उससे अधिक वेग से अग्नि आदि पदार्थ यान को ले जाते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आशीत्या नवत्या याह्यर्वाङ शतेन हरिभिरुह्यमानः।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय॥६॥

आ। अशीत्या। नवत्या। याहि। अर्वाङ्। आ। शतेन। हरिऽभिः। उह्यमानः। अयम्। हि। ते। शुनऽहोत्रेषु। सोमः। इन्द्र। त्वाऽया। परिऽसिक्तः। मदाय॥६॥

पदार्थः-**(आ) (अशीत्या) (नवत्या) (याहि) (अर्वाङ्) (आ) (शतेन) (हरिभिः) (उह्यमानः)** गम्यमानः **(अयम्) (हि) (ते)** तव **(शुनहोत्रेषु)** शुनं सुखं जुह्वति ददति तेषु। **शुनमिति सुखनामसु पठितम्।** (निघं०३.६) **(सोमः)** ओषधिगणः **(इन्द्र)** दुःखविदारक **(त्वाया)** त्वत्कामनया **(परिषिक्तः)** परितः सर्वतोऽन्यैरुत्तमैर्द्रव्यैः सिक्तः **(मदाय)** आनन्दाय॥६॥

अन्वयः-हे इन्द्र! ते तव त्वाया योऽयं शुनहोत्रेषु मदाय सोमः परिषिक्तोऽस्ति तं हि त्वमर्वाङ् सन्नशीत्या नवत्या हरिभिर्युक्तेन यानेनोह्यमानो याहि शतेन मदाय चायाहि॥६॥

भावार्थः-य ओषधीसेवनसुपथ्याभ्यां रोगराहित्येनानन्दिताः सन्तः शतविधानि यानानि यन्त्राणि च निर्मिमते त अध ऊर्ध्वं गन्तुं शक्नुवन्ति॥६॥

पदार्थः-हे **(इन्द्र)** दुःख विदीर्ण करनेवाले! **(ते)** आपके **(त्वाया)** आपकी कामना से जो **(अयम्)** यह **(शुनहोत्रेषु)** सुख देनेवाले कलाघरों में **[**आनन्द के लिये **(सोमः)** औषधियों का समूह**]** **(परिषिक्तः)** सब ओर से उत्तम पदार्थों से सींचा हुआ है **(हि)** उसी को आप **(अर्वाङ्)** नीचे जाते हुए **(अशीत्या)** अस्सी **(नवत्या)** नब्बे **(हरिभिः)** हरणशील पदार्थों से युक्त यान से **(उह्यमानः)** चलाये जाते हुए **(आ)** आओ, **(शतेन)** सौ पदार्थों से युक्त रथ से **(मदाय)** आनन्द के लिये **(आ, याहि)** आओ॥६॥

भावार्थः-जो ओषधियों के सेवन और सुन्दर पथ्य से नीरोगता से आनन्दित होते हुए सौ प्रकार के यानों और यन्त्रों को बनाते हैं, वे नीचे-ऊपर जा सकते हैं॥६॥

अथ पदार्थविषयमाह॥

अब पदार्थों के विषय को अगले मन्त्र में कहा है॥

मम॒ ब्रह्मे॑न्द्र या॒ह्यच्छा॒ विश्वा॒ हरी॑ धु॒रि धि॑ष्वा॒ रथ॑स्य।
पु॒रु॒त्रा हि वि॒हव्यो॑ ब॒भूथा॒स्मिञ्छू॒र सव॑ने मादयस्व॥७॥

मम॑। ब्रह्म॑। इ॒न्द्र॒। या॒हि॒। अच्छ॑। विश्वा॑। हरी॒ इति॑। धु॒रि। धि॒ष्व॒। रथ॑स्य। पु॒रु॒ऽत्रा। हि। वि॒ऽहव्यः॑। ब॒भूथ॑। अ॒स्मिन्। शू॒र॒। सव॑ने। मा॒द॒य॒स्व॒॥७॥

पदार्थः-**(मम)** **(ब्रह्म)** धनम् **(इन्द्र)** धनमिच्छुक **(याहि)** प्राप्नुहि **(अच्छ)** सम्यग् गत्या। अत्र **निपातस्य चे**ति दीर्घः। **(विश्वा)** सर्वाणि **(हरी)** धारणाकर्षणौ **(धुरि)** धारकेऽवयवे **(धिष्व)** **द्व्यचोऽतस्तिङ** इति दीर्घः। **(रथस्य)** यानसमूहस्य **(पुरुत्रा)** पुरूणि बहूनि **(हि)** खलु **(विहव्यः)** विहोतुमर्हः **(बभूथ)** भव **(अस्मिन्)** **(शूर)** निर्भय **(सवने)** ऐश्वर्ये **(मादयस्व)** आनन्दयस्व॥७॥

अन्वयः-हे इन्द्र! त्वं मम ब्रह्म याहि यो रथस्य धुरि हरी स्तस्ताभ्यां यानं धिष्व तेन पुरुत्रा विश्वा धनान्यच्छायाहि। हे शूर! अस्मिन् सवने विहव्यस्त्वं बभूथ अस्मान् हि मादयस्व॥७॥

भावार्थः-सर्वैः सज्जनैः सर्वान् प्रत्येवं वाच्यं येऽस्माकं पदार्थास्सन्ति ते युष्मत् सुखाय सन्तु यथा यूयमस्मानानन्दयध्वं तथा वयं युष्मानानन्दयेम॥७॥

पदार्थः-हे **(इन्द्र)** धन की इच्छा करनेवाले! आप **(मम)** मेरे **(ब्रह्म)** धन को **(याहि)** प्राप्त होओ, जो **(रथस्य)** यानसमूह के **(धुरि)** धारण करनेवाले अङ्ग में **[**अर्थात् धुरि में**]** **(हरी)** धारण

और आकर्षण खींचने का गुण जिनमें है, उन दोनों से यान रथादि को **(धिष्व)** धारण करो, उससे **(पुरुत्रा)** बहुत **(विश्वा)** समस्त धनों को **(अच्छ)** उत्तम गति से **(याहि)** आओ **[**अर्थात् प्राप्त होओ**]**। हे **(शूर)** निर्भय! **(अस्मिन्)** इस **(सवने)** ऐश्वर्य के निमित्त **(विहव्यः)** विविध प्रकार ग्रहण करने योग्य आप **(बभूथ)** होओ और हम लोगों को **(हि)** ही **(मादयस्व)** आनन्दित कीजिये॥७॥

भावार्थः-सब सज्जनों को सबके प्रति ऐसा कहना चाहिये कि जो हमारे पदार्थ हैं, वे आप के सुख के लिये हों। जैसे तुम लोग हम लोगों को आनन्दित करो, वैसे हम लोग तुमको आनन्दित करें॥७॥

अथ ईश्वरविद्वद्विषयमाह॥

अब ईश्वर और विद्वानों के विषय को अगले मन्त्र में कहा है॥

न मे इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम॥८॥

न। मे। इन्द्रेण। सख्यम्। वि। योषत्। अस्मभ्यम्। अस्य। दक्षिणा। दुहीत। उप। ज्येष्ठे। वरूथे। गभस्तौ। प्रायेऽप्राये। जिगीवांसः। स्याम॥८॥

पदार्थः-**(न)** निषेधे **(मे)** मम **(इन्द्रेण)** परमेश्वरेणाप्तेन विदुषा वा **(सख्यम्)** मित्रस्य भावः **(वि)** **(योषत्)** विनश्येत् **(अस्मभ्यम्)** **(अस्य)** **(दक्षिणा)** विद्यासुशिक्षा दानम् **(दुहीत)** परिपूर्णा स्यात् **(उप)** **(ज्येष्ठे)** प्रशस्ये **(वरूथे)** अत्युत्तमे **(गभस्तौ)** विज्ञानप्रकाशे **(प्रायेप्राये)** कमनीये कमनीये **(जिगीवांसः)** जेतुं शीलाः **(स्याम)** भवेम॥८॥

अन्वयः-यस्यास्य दक्षिणाऽस्मभ्यं ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये उप दुहीत तेनेन्द्रेण मम सख्यं यथा न वियोषत्तथा भवतु येन वयं जिगीवांसः स्याम॥८॥

भावार्थः-ये सत्यप्रेम्णा जगदीश्वरमाप्तान् विदुषो वा प्राप्तुं सेवितुञ्च कामयन्ते तद्विरोधं नेच्छन्ति ते विद्वांसो भूत्वा ज्येष्ठा जायन्ते॥८॥

पदार्थः-जिस **(अस्य)** इस **(दक्षिणा)** विद्या और सुन्दर शिक्षा का दान **(अस्मभ्यम्)** हम लोगों के लिये **(ज्येष्ठे)** प्रशंसा योग्य **(वरूथे)** अतीव उत्तम **(गभस्तौ)** विज्ञान प्रकाश में **(प्रायेप्राये)** और मनोहर मनोहर परमेश्वर वा आप्त विद्वान् में **(उप, दुहीत)** परिपूर्ण होती हो उस **(इन्द्रेण)** उक्त परमेश्वर वा आप्त विद्वान् से मेरी **(सख्यम्)** मित्रता जैसे **(न, वियोषत्)** न विनष्ट हो, वैसे हो, जिससे हम लोग **(जिगीवांसः)** विजयशील **(स्याम)** हों॥८॥

भावार्थः-जो सत्य प्रेम से जगदीश्वर वा आप्त विद्वानों को प्राप्त होने और सेवन करने की कामना करते हैं और उसके विरोध की इच्छा नहीं चाहते हैं, वे विद्वान् होकर ज्येष्ठ होते हैं अर्थात् अति प्रशंसित होते हैं॥८॥

अथेश्वरोपदेशकगुणानाह॥

अब ईश्वर और उपदेशकों के गुणों को कहते हैं॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥९॥२२॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी। शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुऽवीराः॥९॥

पदार्थः-(**नूनम्**) (**सा**) धारणा (**ते**) तव (**प्रति**) (**वरम्**) (**जरित्रे**) (**दुहीयत्**) (**इन्द्र**) (**दक्षिणा**) (**मघोनी**) (**शिक्षा**) (**स्तोतृभ्यः**) अध्यापकेभ्यः (**मा**) (**अति**) (**धक्**) (**भगः**) ऐश्वर्यम् (**नः**) अस्मान् (**बृहत्**) (**वदेम**) (**विदथे**) विद्याप्रचारे (**सुवीराः**)॥९॥

अन्वयः-हे इन्द्र जगदीश्वर सत्योपदेशक वा! ते तव सा जरित्रे वरं दक्षिणा मघोनी स्तोतृभ्यः प्रति दुहीयत्। त्वमस्मान्नूनं शिक्ष नो भगो मातिधग्यतः सुवीरा वयं विदथे बृहद्वदेम॥९॥

भावार्थः-या भगवत आप्तानां विदुषां शिक्षा मनुष्यान् प्राप्नोति सा शोकसागरात् पृथक् करोति महदैश्वर्यमपि नाभिमानयतीति॥९॥

अत्र यानपदार्थेश्वरविद्वदुपदेशकबोधवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टादशं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) जगदीश्वर वा सत्योपदेशक! (**ते**) आपकी (**सा**) वह धारणा (**जरित्रे**) स्तुति प्रशंसा करनेवाले के लिये और (**दक्षिणा**) विद्या सुशिक्षा रूपी दक्षिणा (**मघोनी**) जो कि बहुत ऐश्वर्ययुक्त है वह (**स्तोतृभ्यः**) अध्यापकों के लिये (**प्रति, दुहीयत्**) प्रत्येक विषय को परिपूर्ण करती है, आप हम लोगों को (**नूनम्**) निश्चय से (**शिक्ष**) शिक्षा देओ, (**नः**) हम लोगों के लिये (**भगः**) ऐश्वर्य को (**माति, धक्**) मत नष्ट करो, जिससे (**सुवीराः**) श्रेष्ठ वीरोंवाले हम लोग (**विदथे**) विद्याप्रचार में (**बृहत्**) बहुत कुछ (**वदेम**) कहें॥९॥

भावार्थः-जो ईश्वर और आप्त विद्वानों की शिक्षा मनुष्यों को प्राप्त होती है, वह शोकरूपी समुद्र से अलग करती है और बहुत ऐश्वर्य का भी अभिमान नहीं कराती है॥९॥

यहाँ यान, पदार्थ, ईश्वर, विद्वान् वा उपदेशकों के बोध का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अठारहवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

अपायीत्येकोनविंशतितमस्य नवर्चस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, २, ६, ८ विराट् त्रिष्टुप्। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ पङ्क्तिः। ४, ७ भुरिक् पङ्क्तिः। ५ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब नव ऋचावाले उन्नीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के विषय का वर्णन करते हैं॥

अपाꣳय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः॥ १॥

अपाꣳयि। अस्य। अन्धसः। मदाय। मनीषिणः। सुवानस्य। प्रयसः। यस्मिन्। इन्द्रः। प्रऽदिवि। ववृधानः। ओकः। दधे। ब्रह्मण्यन्तः। च। नरः॥ १॥

पदार्थः-(अपायि) **(अस्य)** **(अन्धसः)** अन्नस्य **(मदाय)** आनन्दाय **(मनीषिणः)** जितमनस्काः **(सुवानस्य)** उत्पद्यमानस्य **(प्रयसः)** कमनीयस्य **(यस्मिन्)** **(इन्द्रः)** सूर्यः **(प्रदिवि)** प्रकृष्टप्रकाशे **(वावृधानः)** वर्द्धमानः **(ओकः)** स्थानम् **(दधे)** दधाति **(ब्रह्मण्यन्तः)** ब्रह्म महद्धनं कामयमानाः **(च)** **(नरः)** नेतारः॥ १॥

अन्वयः-हे मनीषिणो! ब्रह्मण्यन्तो नरश्च यस्मिन् प्रदिवि वावृधान इन्द्र ओको दधे तत्र सुवानस्य प्रयसोऽस्याऽन्धसो मदाय युष्माभिरपायि तद्वयमपि गृह्णीयाम॥ १॥

भावार्थः-विद्वांसो यस्मिन् वर्द्धमाना विद्यां दधति तत्र वयमपि स्थित्वैतद्विज्ञानं स्वीकुर्य्याम॥ १॥

पदार्थः-हे **(मनीषिणः)** मनीषी=मन जीते हुए! **(ब्रह्मण्यन्तः)** बहुत धन की कामना करनेवाले **(च)** और **(नरः)** नायक अग्रगन्ता मनुष्यो! **(यस्मिन्)** जिस **(प्रदिवि)** प्रकृष्ट प्रकाश में **(वावृधानः)** बढ़ा हुआ **(इन्द्रः)** सूर्य **(ओकः)** स्थान को **(दधे)** धारण करता है, उसमें **(सुवानस्य)** उत्पद्यमान **(प्रयसः)** मनोहर **(अस्य)** इस **(अन्धसः)** अन्न को **(मदाय)** आनन्द के लिये तुम लोगों ने **(अपायि)** पान किया, उस सबको हम लोग भी ग्रहण करें॥ १॥

भावार्थः-विद्वान् जन जिसमें बढ़े हुए विद्या को धारण करते हैं, उसमें हम लोग भी बैठें, इस विज्ञान को स्वीकार करें॥ १॥

अथ सूर्यविषयमाह॥

अब सूर्य विषय को अगले मन्त्र में कहा है॥

अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत्।

प्र यद् वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त॥ २॥

अस्य। मन्दान। मध्वः। वज्रऽहस्तः। अहिम्। इन्द्रः। अर्णःऽवृतम्। वि। वृश्चत्। प्र। यत्। वयः। न। स्वसराणि। अच्छ। प्रयांसि। च। नदीनाम्। चक्रमन्त॥ २॥

पदार्थः-(अस्य) (मन्दानः) प्राप्तः **(मध्वः)** विज्ञेयस्य **(वज्रहस्तः)** किरणपाणिः **(अहिम्)** मेघम् **(इन्द्रः)** सूर्य्यः **(अर्णोवृतम्)** अर्णांसि वर्त्तन्ते यस्मिँस्तम् **(वि) (वृश्चत्)** वृश्चति **(प्र) (यत्)** यस्मात् **(वयः)** पक्षिणः **(न)** इव **(स्वसराणि)** दिनानि **(अच्छ)** सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। **(प्रयांसि)** कमनीयानि स्रोतांसि **(च) (नदीनाम्)** सरिताम् **(चक्रमन्त)** रमन्ते॥ २॥

अन्वयः-हे मनुष्या! यद्यस्माद्वयो न स्वसराणि नदीनां प्रयांसि चाऽऽच्छा प्रचक्रमन्त यो वज्रहस्तोऽस्य मध्वो जगतो मध्ये मन्दान इन्द्रोऽर्णोवृतमहिं विवृश्चत् तं यथावद्विजानीत॥ २॥

भावार्थः-यथा पक्षिणो गच्छन्त्यागच्छन्ति तथैवाहोरात्रा वर्त्तन्ते यथा सूर्योऽस्य जगत आनन्दयितास्ति तथा सज्जनैर्वर्त्तितव्यम्॥ २॥

पदार्थः-हे मनुष्यो! **(यत्)** जिससे **(वयः)** पखेरुओं के **(न)** समान **(स्वसराणि)** दिनों को **(च)** और **(नदीनाम्)** नदियों के **(प्रयांसि)** मनोहर स्रोतों को **(अच्छ)** अच्छे प्रकार **(प्रचक्रमन्त)** रमते हैं, जो **(वज्रहस्तः)** किरणरूपी हाथोंवाला **(अस्य)** इस **(मध्वः)** विशेष कर जानने योग्य जगत् के बीच **(मन्दानः)** प्राप्त हुआ **(इन्द्रः)** सूर्य **(अर्णोवृतम्)** जिसमें जल विद्यमान हैं, उस **(अहिम्)** मेघ को **(वि, वृश्चत्)** विभिन्न करता है, उसको यथावत् जानो॥ २॥

भावार्थः-जैसे पक्षी जाते-आते हैं, वैसे रात्रि-दिन वर्त्तमान हैं। जैसे सूर्य इस जगत् को आनन्द देनेवाला है, वैसे सज्जनों को वर्त्तना चाहिये॥ २॥

पुनः सूर्यविषयमाह॥

फिर सूर्य विषय को अगले मन्त्र में कहा है॥

स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम्।
अजनयत् सूर्यं विदद् गा अक्तुनाह्नां वयुनानि साधत्॥ ३॥

सः। माहिनः। इन्द्रः। अर्णः। अपाम्। प्र। ऐरयत्। अहिऽहा। अच्छ। समुद्रम्॥ अजनयत्। सूर्यम्। विदत्। गाः। अक्तुना। अह्नाम्। वयुनानि। साधत्॥ ३॥

पदार्थः-(सः) (माहिनः) महान् **(इन्द्रः)** विद्युत् **(अर्णः)** जलम् **(अपाम्)** अन्तरिक्षस्य मध्ये **(प्र) (ऐरयत्) (अहिहा)** मेघस्य हन्ता **(अच्छ)** यथाक्रमम्। अत्र **निपातस्य चे**ति दीर्घः।

(समुद्रम्) सागरम् **(अजनयत्)** जनयति **(सूर्यम्)** सवितृमण्डलम् **(विदत्)** प्राप्नोति **(गाः)** पृथिवी **(अक्तुना)** रात्र्या **(अह्नाम्)** दिनानाम् **(वयुनानि)** प्रज्ञानानि **(साधत्)** साध्नुयात्॥ ३॥

अन्वयः-हे मनुष्या! यथा स माहिनाऽहिहेन्द्रोऽपामर्णोऽच्छ प्रैरयत्। समुद्रं सूर्यमजनयदक्तुनाऽह्नां गा विदद्वयुनानि साधत्तथा यूयमप्याचरत॥ ३॥

भावार्थः-ये मनुष्या विद्युद्वद्वेगाऽऽकर्षणयुक्ताः शत्रुहन्तारो विद्यादिशुभगुणप्रचारका अन्यायाऽन्धकारनाशका जगतः सुखं साध्नुवन्ति ते सर्वत्र पूज्यन्ते॥ ३॥

पदार्थः-हे मनुष्यो! जैसे **(सः)** वह **(माहिनः)** बड़ा **(अहिहा)** मेघ का हननेवाला **(इन्द्रः)** बिजुली रूप अग्नि **(अपाम्)** अन्तरिक्ष के बीच **(अर्णः)** जल को **(अच्छ)** यथा क्रम से **(प्रैरयत्)** प्रेरणा देता है, **(समुद्रम्)** समुद्र को और **(सूर्यम्)** सूर्यमण्डल को **(अजनयत्)** उत्पन्न करता है, **(अक्तुना)** रात्रि के साथ **(अह्नाम्)** दिनों के सम्बन्ध करनेवाली **(गाः)** पृथिवियों को **(विदत्)** प्राप्त होता और **(वयुनानि)** उत्तम ज्ञानों को **(साधत्)** सिद्ध करता, वैसे तुम लोग भी आचरण करो॥ ३॥

भावार्थः-जो मनुष्य बिजुली के समान वेग और आकर्षणयुक्त शत्रुओं के हनने और विद्यादि शुभ गुणों को प्रचार करनेवाले हैं, अन्याय और अन्धकार का विनाश करनेवाले संसार का सुख सिद्ध करते हैं, वे सर्वत्र पूज्य होते हैं॥ ३॥

अथ दातृविषयमाह॥

अब दाता के विषय को अगले मन्त्र में कहा है॥

सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम्।
सद्यो यो नृभ्यो अतसाय्यो भूत् पस्पृधानेभ्यः सूर्यस्य सातौ॥ ४॥

सः। अप्रतीनि। मनवे। पुरूणि। इन्द्रः। दाशत्। दाशुषे। हन्ति। वृत्रम्। सद्यः। यः। नृऽभ्यः। अतसाय्यः। भूत्। पस्पृधानेभ्यः। सूर्यस्य। सातौ॥ ४॥

पदार्थः-**(सः)** **(अप्रतीनि)** अविद्यमाना प्रतीतिः परिमाणं येषान्तानि **(मनवे)** मननशीलाय मनुष्याय **(पुरूणि)** बहूनि **(इन्द्रः)** सूर्य इव दाता **(दाशत्)** दद्यात् **(दाशुषे)** दात्रे **(हन्ति)** **(वृत्रम्)** मेघम् **(सद्यः)** **(यः)** **(नृभ्यः)** मनुष्येभ्यः **(अतसाय्यः)** परोपकारे निरन्तरं वर्त्तमानः **(भूत्)** भवति। अत्राडभावः। **(पस्पृधानेभ्यः)** स्पर्द्धमानेभ्य ईप्स्यमानेभ्यो वा **(सूर्यस्य)** **(सातौ)** संविभागे॥ ४॥

अन्वयः-य इन्द्रो यथा सूर्यो वृत्रं हन्ति तथा शत्रून् हनन् दाशुषे मनवेऽप्रतीनि पुरूणि धनानि दाशत्सूर्यस्य सातावतसाय्यः सन् पस्पृधानेभ्यो नृभ्यः सद्यः आनन्दयिता भूत् स सर्वतः सत्कारं प्राप्नुयात्॥४॥

भावार्थः-येऽपरिमितं धनं संचिन्वन्ति जगदुपकारकेभ्यस्सुपात्रेभ्यः प्रयच्छन्ति ते सततमस्पर्द्धनीया भवन्ति॥४॥

पदार्थः-(**यः**) जो (**इन्द्रः**) सूर्य के समान देनेवाला जन जैसे सूर्य (**वृत्रम्**) मेघ को (**हन्ति**) हनता है, वैसे शत्रुओं को मारता हुआ (**दाशुषे**) दूसरे देनेवाले (**मनवे**) विचारशील मनुष्य के लिये (**अप्रतीनि**) जिनकी प्रतीति नहीं है, उन (**पुरूणि**) बहुत से धनों को (**दाशत्**) देवें वा (**सूर्यस्य**) सूर्य की (**सातौ**) साति में अर्थात् सूर्यमण्डलकृत विभाग में (**अतसाय्यः**) परोपकार में निरन्तर वर्त्तमान होता हुआ (**पस्पृधानेभ्यः**) स्पर्द्धा वा ईप्सा करनेवाले (**नृभ्यः**) मनुष्यों के लिये (**सद्यः**) शीघ्र आनन्द देनेवाला (**भूत्**) होता है (**सः**) वह सब स्थानों से सत्कार पाता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार[४] है। जो अपरिमित धन को इकट्ठा करते और जगत् के उपकारी सुपात्रों के लिये देते हैं, वे निरन्तर ईर्ष्या वा ईप्सा करने योग्य नहीं है॥४॥

अथ विद्युद्विषयमाह॥

अब बिजुली के विषय को अगले मन्त्र में कहा है॥

स सु॑न्व॒त इन्द्रः॑ सूर्य॒मा दे॒वो रि॑ण॒ङ् मर्त्या॑य स्त॒वान्।
आ यद् र॒यिं गु॒हद॑वद्यमस्मै॒ भर॒दंशं॒ नैत॑शो दश॒स्यन्॥५॥२३॥

सः। सु॒न्व॒ते। इन्द्रः॑। सूर्य॑म्। आ। दे॒वः। रि॒ण॒क्। मर्त्या॑य। स्त॒वान्। आ। यत्। र॒यिम्। गु॒हत्ऽअ॑वद्यम्। अ॒स्मै॒। भर॑त्। अंश॑म्। न। एत॑शः। द॒श॒स्यन्॥५॥

पदार्थः-(**सः**) (**सुन्वते**) अभिषवं कुर्वते (**इन्द्रः**) विद्युत् (**सूर्य्यम्**) सवितारम् (**आ**) (**देवः**) देदीप्यमानः (**रिणक्**) रिणक्ति (**मर्त्याय**) (**स्तवान्**) स्तुतिः (**आ**) (**यत्**) यः (**रयिम्**) श्रियम्

---

४. संस्कृत-भावार्थ में 'वाचकलुप्तोपमालङ्कार' नहीं दिया है। संस्कृत-भावार्थ का कथन उचित प्रतीत होता है।

(गुहदवद्यम्) आच्छादितनिन्द्यम् **(अस्मै)** **(भरत्)** भरति **(अंशम्)** प्राप्तम् **(न)** निषेधे **(एतशः)** प्राप्नुवन् **(दशस्यन्)** उपक्षयन्॥५॥

अन्वयः-हे मनुष्या! यद्यो देव इन्द्रः सुन्वते सूर्य्यं मर्त्याय स्तवान्नारिणक् गुहदवद्यं रयिमस्मा आ भरत्। अंशं दशस्यन्नेतशो न भवति स युष्माभिरुपयोक्तव्यः॥५॥

भावार्थः-ये कस्याप्युन्नतेः क्षयं नेच्छन्ति सर्वस्यैश्वर्यं वर्द्धयन्ति ते सूर्यवदुपकारका भवन्ति॥५॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(देवः)** देदीप्यमान **(इन्द्रः)** बिजुली **(सुन्वते)** पदार्थों का सार निकालनेवाले मनुष्य के लिये **(सूर्य्यम्)** सवितृमण्डल को और **(मर्त्याय)** साधारण मनुष्य के लिये **(स्तवान्)** स्तुतियों को **(न, आ, रिणक्)** नहीं छोड़ती और **(गुहदवद्यम्)** ढंपे हुए निन्द्य **(रयिम्)** धन को **(अस्मै)** इस मनुष्य के लिये **(आ, भरत्)** आभूषित कराती और **(अंशम्)** प्राप्त भाग को **(दशस्यन्)** नष्ट करती हुई **(एतशः)** प्राप्त नहीं होती **(सः)** वह बिजुली आप लोगों को उपयोग में लानी योग्य है॥५॥

भावार्थः-जो मनुष्य किसी की उन्नति के नाश की नहीं इच्छा करते, किन्तु सबके ऐश्वर्य को बढ़वाते हैं, वे सूर्य के समान उपकार करनेवाले होते हैं॥५॥

अथ सूर्यविषयमाह॥

अब सूर्य विषय को अगले मन्त्र में कहा है॥

स रन्धयत् सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य॥६॥

सः। रन्धयत्। सऽदिवः। सारथये। शुष्णम्। अशुषम्। कुयवम्। कुत्साय। दिवःऽदासाय। नवतिम्। च। नव। इन्द्रः। पुरः। वि। ऐरत्। शम्बरस्य॥६॥

पदार्थः-**(सः)** **(रन्धयत्)** संराध्नोति **(सदिवः)** द्यावा सह वर्त्तमानम् **(सारथये)** सुशिक्षिताय यानप्रचालकाय **(शुष्णम्)** बलम् **(अशुषम्)** अशुष्कमार्द्रम् **(कुयवम्)** कुत्सितसङ्गमम् **(कुत्साय)** निन्दिताय **(दिवोदासाय)** प्रकाशदात्रे **(नवतिम्)** **(च)** **(नव)** **(इन्द्रः)** सूर्यः **(पुरः)** पुराणि **(वि)** **(ऐरत्)** ऐरयति **(शम्बरस्य)** मेघस्य॥६॥

अन्वयः-यो मनुष्यो इन्द्रः कुत्साय सारथयेऽशुषं शुष्णं कुयवं सदिवो रन्धयद्दिवोदासाय नवनवतिं शम्बरस्य पुरो व्यैरत् स सततमुपयोक्तव्यः॥६॥

भावार्थः-ये मनुष्या दुष्टं बलं कुशिक्षां च निवर्त्य बलसुशिक्षाभ्यां कुसंस्कारान्निवार्य शतशो बोधाञ्जनयन्ति ते सर्वदा पूज्या भवन्ति॥६॥

पदार्थः-जो मनुष्यों को **(इन्द्रः)** सूर्य **(कुत्साय)** निन्दित **(सारथये)** अच्छे सीखे हुए यान चलानेवाले के लिये **(अशुषम्)** गीले **(शुष्णम्)** बल **(कुयवम्)** कुत्सित सङ्गम और **(सदिवः)** प्रकाश के सहित वर्त्तमान अर्थात् अन्तरिक्षस्थ पदार्थों को **(रन्धयत्)** अच्छे प्रकार सिद्ध करता है **(दिवोदासाय)** प्रकाश देनेवाले के लिये **(नव, नवतिम्, च)** निन्यानवे **(शम्बरस्य)** मेघ के **(पुरः)** पुरों को **(व्यैरत्)** प्रेरित करता है **(सः)** वह उपयोग में लाना योग्य है॥६॥

भावार्थः-जो मनुष्य दुष्ट बल को और कुशिक्षा को निवार के **[**=निवृत्त कर**]** बल और उत्तम शिक्षाओं से कुसंस्कारों को निवार के सैकड़ों बोधों को उत्पन्न करते हैं, वे सर्वदा पूज्य होते हैं॥६॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः।
अश्याम तत् साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः॥७॥

एव। ते। इन्द्र। उचथम्। अहेम। श्रवस्या। न। त्मना। वाजयन्तः। अश्याम। तत्। साप्तम्। आशुषाणाः। ननमः। वधः। अदेवस्य। पीयोः॥७॥

पदार्थः-**(एव)** निश्चये। अत्र **निपातस्य चे**ति दीर्घः। **(ते)** तव **(इन्द्र)** विद्वन् **(उचथम्)** वक्तव्यम् **(अहेम)** व्याप्नुयाम **(श्रवस्या)** श्रोतुं योग्यानि **(न)** इव **(त्मना)** आत्मना **(वाजयन्तः)** ज्ञापयन्तः **(अश्याम)** प्राप्नुयाम **(तत्)** **(साप्तम्)** सप्तविधम् **(आशुषाणाः)** सद्यः कुर्वाणाः **(ननमः)** नमेम **(वधः)** वध्यन्ते शत्रवो यस्मात्तच्छस्त्रम् **(अदेवस्य)** अविदुषः **(पीयोः)** पातुः॥७॥

अन्वयः-हे इन्द्र! ते त्मना वाजयन्तो वयं श्रवस्या नोचथमेवाहेम आशुषाणाः सन्तो वयं तत्साप्तमश्याम अदेवस्य पीयोर्वधोऽश्याम। परमेश्वरं च ननमः॥७॥

भावार्थः-ये मनुष्या वक्तव्यं वदेयुः प्राप्तव्यं प्राप्नुयुर्नमस्यं नमेयुर्हन्तव्यं हन्युर्ज्ञातव्यं जानीयुस्त एवाप्ता जायन्ते॥७॥

पदार्थः-हे **(इन्द्र)** विद्वान्! **(ते)** आपके **(त्मना)** आत्मा से **(वाजयन्तः)** ज्ञान कराते हुए हम लोग **(श्रवस्या)** श्रवण करने योग्य पदार्थ के **(न)** समान **(उचथम्)** और कहने योग्य प्रस्ताव **(एव)** ही को **(अहेम)** व्याप्त हों तथा **(आशुषाणाः)** शीघ्रता करते हुए हम लोग **(तत्)** उस **(साप्तम्)** सात प्रकार के विषय को **(अश्याम)** व्याप्त हों, **(अदेवस्य)** अविद्वान् **(पीयोः)** पालना

करनेवाले सूर्य के **(वधः)** वध करनेवाले शस्त्र को व्याप्त हों और परमेश्वर को **(ननमः)** नमस्कार करें॥७॥

भावार्थः-जो मनुष्य कहने योग्य को कहें, पाने योग्य को पावें, नमने योग्य को नमें, मारने योग्य को मारें और जानने योग्य को जानें, वे ही आप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः॥८॥

एव। ते। गृत्सऽमदाः। शूर। मन्म। अवस्यवः। न। वयुनानि। तक्षुः। ब्रह्मण्यन्तः। इन्द्र। ते। नवीयः। इषम्। ऊर्जम्। सुऽक्षितिम्। सुम्नम्। अश्युः॥८॥

पदार्थः-**(एव)** अत्रापि दीर्घः। **(ते)** तव **(गृत्समदाः)** गृत्सोऽभिकाङ्क्षितो मद आनन्दो येषान्ते **(शूर)** **(मन्म)** मन्तव्यम् **(अवस्यवः)** आत्मनो रक्षणमिच्छवः **(न)** इव **(वयुनानि)** प्रज्ञानानि **(तक्षुः)** विस्तृणीयुः **(ब्रह्मण्यन्तः)** ब्रह्म धनं कामयन्तः **(इन्द्र)** विद्वन् **(ते)** तव **(नवीयः)** नवीनम् **(इषम्)** अन्नम् **(ऊर्जम्)** पराक्रमम् **(सुक्षितिम्)** शोभनां भूमिम् **(सुम्नम्)** सुखम् **(अश्युः)** प्राप्नुयुः॥८॥

अन्वयः-हे शूरेन्द्र! ये गृत्समदा ब्रह्मण्यन्तो जनास्ते मन्मावस्यवो न वयुनानि तक्षुस्ते एव ते तव नवीय इषमूर्जं सुक्षितिं सुम्नं चाश्युः॥८॥

भावार्थः-ये विदुषां सुशिक्षया विज्ञानवन्तो भवेयुस्तेऽनेकविधं सुखमश्नुयुः॥८॥

पदार्थः-हे **(शूर)** शूर **(इन्द्र)** विद्वान्! जो **(गृत्समदाः)** अभीष्ट आनन्दवाले **(ब्रह्मण्यन्तः)** धन की कामना करते हुए जन **(ते)** आपके **(मन्म)** मन्तव्य को और **(अवस्यवः)** अपने को रक्षा चाहते हुए के **(न)** समान **(वयुनानि)** उत्तम ज्ञानों को **(तक्षुः)** विस्तारें वे **(एव)** ही **(ते)** आपके **(नवीयः)** नवीन **(इषम्)** अन्न और **(ऊर्जम्)** पराक्रम को तथा **(सुक्षितिम्)** सुन्दर भूमि को और **(सुम्नम्)** सुख को **(अश्युः)** प्राप्त हों॥८॥

भावार्थः-जो विद्वानों की उत्तम शिक्षा से विज्ञानवान् हों, वे अनेकविध सुख को प्राप्त हों॥८॥

अथ दक्षिणागुणानाह॥

अब दक्षिणा के गुणों को कहते हैं॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।

शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद् व॑देम वि॒दथे॑ सु॒वीरा॑:॥९॥२४॥

नू॒नम्। सा। ते॒। प्रति॑। वर॑म्। ज॒रि॒त्रे। दु॒हीय॒त्। इ॒न्द्र॒। दक्षि॑णा। म॒घोनी॑। शिक्ष॑। स्तो॒तृऽभ्य॑:। मा। अति॑। ध॒क्। भग॑:। न॒:। बृ॒हत्। व॒देम॒। विद॑थे। सु॒ऽवीरा॑:॥९॥

पदार्थ:-(नूनम्) निश्चितम् **(सा)** विनयाढ्या क्रिया **(ते)** **(प्रति)** **(वरम्)** **(जरित्रे)** दानस्तावकाय **(दुहीयत्)** **(इन्द्र)** **(दक्षिणा)** **(मघोनी)** **(शिक्ष)** विद्या ग्राहय **(स्तोतृभ्य:)** विद्यामिच्छुभ्य: **(मा)** **(अति)** **(धक्)** दहेत् **(भग:)** प्रभावम् **(न:)** अस्मभ्यम् **(बृहत्)** **(वदेम)** **(विदथे)** **(सुवीरा:)**॥९॥

अन्वय:-हे इन्द्र! भवान् नो भगो मातिधग्या ते मघोनी दक्षिणा जरित्रे वरं दुहीयत् सा यथा न: प्राप्नुयात् तथैतां स्तोतृभ्य: शिक्ष यत: सुवीरा वयं नूनं विदथे बृहद्वदेम॥९॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यस्याक्षया दक्षिणा शिक्षा चास्ति स वर: सर्वत्र सत्कृत: स्यादिति॥९॥

अत्र विद्वत्सूर्य्यदातृदक्षिणागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनविंशतितमं सूक्तं चतुर्विंशो वर्गश्च समाप्त:॥

पदार्थ:-हे **(इन्द्र)** विद्वान्! आप **(न:)** हमारे लिये **(भग:)** प्रभाव को **(मा, अति, धक्)** मत नष्ट करो और जो **(ते)** आपकी **(मघोनी)** ऐश्वर्यवती **(दक्षिणा)** दक्षिणा **(जरित्रे)** दान की स्तुति करनेवाले **[**के लिये**]** **(वरम्)** उत्तम पदार्थ को **(दुहीयत्)** पूर्ण करे **(सा)** वह जैसे **(न:)** हम लोगों के लिये प्राप्त हो, वैसे इसको **(स्तोतृभ्य:)** विद्या की कामना करनेवालों के **[**लिये**]** **(शिक्ष)** सिखाइये, जिससे **(सुवीरा:)** उत्तम वीरोंवाले हम लोग **(नूनम्)** निश्चय से **(विदथे)** संग्राम में **(बृहत्)** बहुत **(वदेम)** कहें॥९॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिसकी अक्षय दक्षिणा और शिक्षा है, वह श्रेष्ठ और सर्वत्र सत्कार को पावे॥९॥

इस सूक्त में विद्वान्, सूर्य, दाता और दक्षिणा के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उन्नीसवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

वयमिति नवर्चस्य विंशतितमस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, ६, ८ विराट् त्रिष्टुप्। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः। २ बृहती छन्दः। मध्यमः स्वरः। ३ पङ्क्ति। ४, ५, ७ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रशब्देन विद्वद्गुणानाह॥

अब नव ऋचावाले बीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में इन्द्र शब्द से विद्वान् के गुणों का उपदेश किया है॥

वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम्।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन्॥ १॥

वयम्। ते। वयः। इन्द्र। विद्धि। सु। नः। प्र। भरामहे। वाजऽयुः। न। रथम्। विपन्यवः। दीध्यतः। मनीषा। सुम्नम्। इयक्षन्तः। त्वाऽवतः। नॄन्॥ १॥

पदार्थः-(वयम्) (ते) तव **(वयः)** कमनीय **(इन्द्र)** विद्वन् **(विद्धि)** जानीहि **(सु)** सुष्ठु **(नः)** अस्मान् **(प्र) (भरामहे)** पुष्येम **(वाजयुः)** यो वाजं वेगं कामयते सः **(न)** इव **(रथम्)** विमानादियानम् **(विपन्यवः)** विशेषेण स्तुत्या व्यवहर्त्तारः **(दीध्यतः)** देदीप्यमानाः **(मनीषा)** प्रज्ञया **(सुम्नम्)** सुखम् **(इयक्षन्तः)** सत्कुर्वन्तः **(त्वावतः)** त्वत्सदृशान् **(नॄन्)**॥ १॥

अन्वयः-हे वय इन्द्र! ये विपन्यवस्त्वावतो नृनियक्षन्तो दीध्यतो वयं मनीषा ते रथं वाजयुर्न सुम्नं सुप्रभरामहे तान्नोऽस्माँस्त्वं विद्धि॥ १॥

भावार्थः-अत्रोपमालङ्कारः। ये सत्कर्त्तव्यान् पूजयन्ति सत्येन व्यवहरन्ति ते सर्वं सुखं धर्तुमर्हन्ति॥ १॥

पदार्थः-हे **(वयः)** मनोहर **(इन्द्र)** विद्वान्! जो **(विपन्यवः)** विशेष कर स्तुति के व्यवहारों को करनेवाले **(त्वावतः)** आपके सदृश **(नॄन्)** मनुष्यों का **(इयक्षन्तः)** सत्कार करते हुए **(दीध्यतः)** देदीप्यमान **(वयम्)** हम लोग **(मनीषा)** बुद्धि से **(ते)** आपके **(रथम्)** विमानादि यान को **(वाजयुः)** वेग की कामना करनेवाला **(न)** जैसे वैसे **(सुम्नम्)** सुख को **(सु, प्र, भरामहे)** अच्छे प्रकार पुष्ट करें। उन **(नः)** हम लोगों को आप **(विद्धि)** जानें॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सत्कार करने योग्यों को सत्कार करते और सत्य व्यवहार से वर्त्ताव वर्त्तते हैं, वे समस्त सुख के धारण करने को योग्य होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं न॑ इन्द्र त्वाभि॑रूती त्वा॑यतो अ॑भिष्टि॒पासि॑ जना॑न्।
त्वमि॒नो दा॒शुषो॑ वरू॒तेत्थाधी॑र॒भि यो नक्ष॑ति त्वा॥ २॥

त्वम्। न॒:। इ॒न्द्र॒:। त्वाभि॑:। ऊ॒ती। त्वा॒ऽय॒त:। अ॒भि॒ष्टि॒ऽपा। अ॒सि॒। जना॑न्। त्व॑म्। इ॒न:। दा॒शुष॑:। व॒रू॒ता। इ॒त्था॒ऽधी॑:। अ॒भि। य:। नक्ष॑ति। त्वा॒॥ २॥

पदार्थ:-(त्वम्) (न:) अस्मान् **(इन्द्र)** परमैश्वर्ययुक्त विद्वान् वा **(त्वाभि:)** त्वदीयाभि: **(ऊती)** रक्षाभि: **(त्वायत:)** त्वां कामयमानान् **(अभिष्टिपा)** योऽभिष्टिं पाति स:। अत्राकारादेश:। **(असि) (जनान्) (त्वम्) (इन:)** समर्थ: **(दाशुष:)** दातॄन् **(वरूता)** वारयिता **(इत्थाधी:)** इत्थाऽनेन हेतुना धीर्धारणावती बुद्धिर्यस्य **(अभि)** आभिमुख्ये **(य:) (नक्षति)** प्राप्नोति। **नक्षतीति गतिकर्मासु पठितम्।** (निघं०२.१४)। **(त्वा)** त्वाम्॥ २॥

अन्वय:-हे इन्द्र! यो वरूता इत्थाधीर्जनो त्वाभि नक्षति स इनस्त्वायतो दाशुषो जनान् नोऽस्माँश्च रक्षतु त्वं च रक्ष यतस्त्वमभिष्टिपा असि तस्मात्त्वाभिरूती सहिता वयं सुम्नं प्रभरामहे॥ २॥

भावार्थ:-पूर्वस्मान्मन्त्रात् **(सुम्नम्) (प्रभरामहे)** चेति पदद्वयमनुवर्त्तते। ये विदुष: प्राप्य प्राणिनां सुखं कामयन्ते ते दातारो जायन्ते॥ २॥

पदार्थ:-हे **(इन्द्र)** परमैश्वर्ययुक्त विद्वान्! **(य:)** जो **(वरूता)** स्वीकार करनेवाला **(इत्थाधी:)** इस हेतु से धारणावाली हुई है बुद्धि जिसकी वह जन **(त्वा)** आपको **(अभि, नक्षति)** सम्मुख प्राप्त होता, वह **(इन:)** समर्थ **(त्वायत:)** आपकी कामना करते हुए **(दाशुष:)** देनेवाले **(जनान्)** जनों को और **(न:)** हम लोगों को पाले, राखे **(त्वम्)** आप भी रक्षा करें और जिस कारण से **(त्वम्)** आप **(अभिष्टिपा)** अभिकांक्षा के पालनेवाले **(असि)** हैं, इसी कारण **(त्वाभि:)** आपकी **(ऊती)** रक्षाओं के सहित हम लोग सुख को अच्छे प्रकार धारण करते हैं॥ २॥

भावार्थ:-पिछले मन्त्र से **(सुम्नम्)** और **(प्रभरामहे)** इन दोनों पदों की अनुवृत्ति है। जो विद्वानों को प्राप्त होकर प्राणियों के सुख की कामना करते हैं, वे दाता होते हैं॥ २॥

अथ विद्वदीश्वरविषयमाह॥

अब विद्वान् और ईश्वर के विषय को अगले मन्त्र में कहा है॥

स नो॒ यु॒वेन्द्रो॑ जो॒हूत्र॒: सखा॑ शि॒वो न॒राम॑स्तु पा॒ता।
य: शंस॑न्तं॒ य: शंश॑मा॒नमू॒ती पच॑न्तं च स्तु॒वन्तं॑ प्र॒णेष॑त्॥ ३॥

सः। नः। युवा। इन्द्रः। जोहूत्रः। सखा। शिवः। नराम्। अस्तु। पाता। यः। शंसन्तम्। यः। शशमानम्। ऊती। पचन्तम्। च। स्तुवन्तम्। च। प्रऽनेषत्॥ ३॥

पदार्थः-(सः) (**नः**) अस्माकम् (**युवा**) सुखैः संयोजको दुःखैर्वियोजकश्च (**इन्द्रः**) विद्यैश्वर्यप्रदः (**जोहूत्रः**) भृशं दाता (**सखा**) सुहृत् (**शिवः**) मङ्गलकारी (**नराम्**) मनुष्याणाम् (**अस्तु**) (**पाता**) रक्षकः (**यः**) (**शंसन्तम्**) प्रशंसन्तम् (**यः**) (**शशमानम्**) अन्यायमुल्लङ्घमानम् (**ऊती**) ऊत्या रक्षया (**पचन्तम्**) पाकं कुर्वन्तम् (**च**) (**स्तुवन्तम्**) स्तुवन्तम् (**च**) (**प्रणेषत्**) प्रकृष्टं नयं प्राप्नुयात् प्रापयेद्वा॥ ३॥

अन्वयः- य ऊती शंसन्तं यः शशमानं पचन्तं स्तुवन्तं च प्रणेषत्स युवा जोहूत्रः शिवः सखेन्द्रो नो नरा च पाताऽस्तु॥ ३॥

भावार्थः-यौ परमेश्वराप्तौ सर्वेषां रक्षकौ स्तस्तौ सर्वेषां सुहृदौ मङ्गलकारिणौ स्तः॥ ३॥

पदार्थः-(यः) जो (**ऊती**) रक्षा से (**शंसन्तम्**) प्रशंसा करते हुए को (**यः**) जो (**शशमानम्**) अन्याय का उल्लङ्घन करनेवालों को (**पचन्तम्**) पाक करते हुए को (**च**) और (**स्तुवन्तम्**) स्तुति करते हुए को (**प्रणेषत्**) उत्तम न्याय को प्राप्त करावे और आप न्याय को प्राप्त होवे (**सः**) वह (**युवा**) सुखों से संयुक्त और दुःखों से वियुक्त करनेवाला (**जोहूत्रः**) निरन्तर दाता (**शिवः**) मङ्गलकारी (**सखा**) सबका मित्र (**इन्द्रः**) और विद्या वा ऐश्वर्य का देनेवाला विद्वान् वा ईश्वर (**नः**) हम लोगों को और (**नराम्**) सब मनुष्यों का (**च**) भी (**पाता**) रक्षक (**अस्तु**) हो॥ ३॥

भावार्थः-जो परमेश्वर और आप्त जन सबकी रक्षा करनेवाले हैं, वे सबके मित्र और मङ्गल करनेवाले हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तमु॑ स्तुष॒ इन्द्रं॑ तं गृ॑णीषे॒ यस्मि॑न्पु॒रा वा॑वृ॒धुः शा॑श॒दुश्च॑।
स वस्व॒ः कामं॑ पीपरदियो॒ब्रह्म॑ण्य॒तो नू॒तन॑स्या॒योः॥ ४॥

तम्। ऊम् इति॑। स्तु॒षे॒। इन्द्र॑म्। तम्। गृ॒णी॒षे॒। यस्मि॑न्। पु॒रा। व॒वृ॒धुः। शा॒श॒दुः। च॒। सः। वस्वः॑। काम॑म्। पी॒प॒र॒त्। इ॒या॒नः। ब्र॒ह्म॒ण्य॒तः। नू॒तन॑स्य। आ॒योः॥ ४॥

पदार्थः-(तम्) परमेश्वरं विद्वांसं वा (**उ**) (**स्तुषे**) प्रशंससि (**इन्द्रम्**) दुःखविच्छेत्तारम् (**तम्**) (**गृणीषे**) स्तौषि (**यस्मिन्**) (**पुरा**) (**वावृधुः**) वर्द्धेरन् (**शाशदुः**) दुष्टान् छिन्द्युः (**च**) (**सः**)

(वस्वः) धनस्य **(कामम्)** **(पीपरत्)** पूरयेत् **(इयानः)** प्राप्नुवन् **(ब्रह्मण्यतः)** धनमिच्छतः **(नूतनस्य)** **(आयोः)** प्राप्तव्यस्य॥४॥

अन्वयः-यो नूतनस्यायोर्ब्रह्मण्यतो वस्वः काममियानः पीपरत् यस्मिन् पुरा वावृधुः शाशदुश्च तमिन्द्रं त्वं स्तुषे तमु गृणीषे सोऽस्माकं पाता भवतु॥४॥

भावार्थः-ये सह सर्वे वर्द्धन्ते दुःखानि छिन्दन्ति तेन व्यवहारं सर्वे कुर्युः॥४॥

पदार्थः-जो जन **(नूतनस्य)** नवीन **(आयोः)** पाने योग्य **(ब्रह्मण्यतः)** धन की इच्छावाले और **(वस्वः)** धन की **(कामम्)** कामना को **(इयानः)** प्राप्त होता हुआ **(पीपरत्)** उसको पूरी करे वा **(यस्मिन्)** जिसमें **(पुरा)** पहिले **(वावृधुः)** शिष्ट जन बढ़ें और **(शाशदुः)** दुष्टों को नष्ट करें **(तम्)** उस परमेश्वर वा विद्वान् की आप **(स्तुषे)** प्रशंसा करते हो और **(तम्, उ)** उसी की **(गृणीषे)** स्तुति करते हो **(सः)** वह हमारी रक्षा करनेवाला हो॥४॥

भावार्थः-जिसके साथ सब बढ़ते और दुःखों को काटते, उसके साथ व्यवहार सब करें॥४॥

अथ सभेशगुणानाह॥

अब सभेश के गुणों को अगले मन्त्र में कहा है॥

सा अङ्गिरसामुचथा जुजुष्वान् ब्रह्मा तूतोदिन्द्रो गातुमिष्णन्।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि॥५॥२५॥

सः। अङ्गिरसाम्। उचथा। जुजुष्वान्। ब्रह्मा। तूतोत्। इन्द्रः। गातुम्। इष्णन्। मुष्णन्। उषसः। सूर्येण। स्तवान्। अश्नस्य। चित्। शिश्नथत्। पूर्व्याणि॥५॥

पदार्थः-**(सः)** **(अङ्गिरसाम्)** प्राणिनाम् **(उचथा)** वक्तुमर्हाणि **(जुजुष्वान्)** सेवितवान् **(ब्रह्मा)** धनानि। अत्राकारादेशः। **(तूतोत्)** वर्द्धयेत् **(इन्द्रः)** पुरुषार्थी **(गातुम्)** पृथिवीम् **(इष्णन्)** अभीक्षणमिच्छन् **(मुष्णन्)** चोरयन् **(उषसः)** प्रभातान् **(सूर्येण)** सह **(स्तवान्)** स्तुतीः **(अश्नस्य)** मेघस्य। **अश्न इति मेघनामसु पठितम्।** (निघं०१.१०)। **(चित्)** इव **(शिश्नथत्)** हिंसति। **श्नथतीति हिंसाकर्मासु पठितम्।** (निघ०२.१९)। **(पूर्व्याणि)** पूर्वैः कृतानि॥५॥

अन्वयः-योऽङ्गिरसामुचथा ब्रह्मा जुजुष्वान् गातुमिष्णन् सूर्य्येणोषसोऽश्नस्य स्तवान् शिश्नथच्चिदिव पूर्व्याणि तूतोत् स इन्द्रोऽस्माकमविता भवतु॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये सूर्य्यवद्वर्द्धकाश्छेदकाश्च भूत्वा राज्यं वर्द्धयेयुस्त उचितां पूर्वैस्सेवितां श्रियं प्राप्नुवन्ति॥५॥

पदार्थः-जो (**अङ्गिरसाम्**) प्राणियों के (**उचथा**) कहने योग्य (**ब्रह्मा**) धनों को (**जुजुष्वान्**) सेवन किये हुए (**गातुम्**) पृथिवी को (**इष्णन्**) सब ओर से देखता हुआ (**सूर्य्येण**) सूर्य्य के साथ (**उषसः**) प्रभात समयों को (**अश्नस्य**) मेघ की (**स्तवान्**) स्तुतियों को (**शिश्नथत्**) नष्ट करता है (**चित्**) उसके समान (**पूर्व्याणि**) पूर्वाचार्य्यों ने की हुई (**तूतोत्**) स्तुतियों को बढ़ावे (**सः**) वह (**इन्द्रः**) पुरुषार्थी जन हमारा रक्षक हो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सूर्य के समान बढ़ाने और छिन्न-भिन्न करनेवाले होकर राज्य को बढ़ाते हैं, वे उचित और अगले सज्जनों की सेवन की हुई लक्ष्मी को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स ह॑ श्रु॒त इन्द्रो॒ नाम॑ दे॒व ऊ॒र्ध्वो भु॑व॒न्मनु॑षे दु॒स्मत॑मः।
अव॑ प्रि॒यम॑र्शसा॒नस्य॑ सा॒ह्वाञ्छिरो॑ भरद्दा॒सस्य॑ स्व॒धावा॑न्॥६॥

सः। ह॒। श्रु॒तः। इन्द्रः॑। नाम॑। दे॒वः। ऊ॒र्ध्वः। भु॒व॒त्। मनु॑षे। दु॒स्मऽत॑मः। अव॑। प्रि॒यम्। अ॒र्श॒सा॒नस्य॑। सा॒ह्वान्। शिरः॑। भ॒र॒त्। दा॒सस्य॑। स्व॒धाऽवा॑न्॥६॥

पदार्थः-(**सः**) (**ह**) किल (**श्रुतः**) प्रख्यातः (**इन्द्रः**) सूर्य इव विपश्चित् (**नाम**) (**देवः**) देदीप्यमानः (**ऊर्ध्वः**) ऊर्ध्वं स्थित उत्कृष्टः (**भुवत्**) भवेत् (**मनुषे**) मनुष्याय (**दस्मतमः**) अतिशयेन दुःखानां क्षेता (**अव**) (**प्रियम्**) कमनीयम् (**अर्शसानस्य**) प्राप्नुवतः (**साह्वान्**) सहनशीलः (**शिरः**) शिरोवदुत्तमाङ्गम् (**भरत्**) भरेत् (**दासस्य**) सेवकस्य (**स्वधावान्**) प्रभूतान्नवान्॥६॥

अन्वयः-यश्श्रुतो देवो दस्मतमः साह्वानिन्द्रोऽर्शसानस्य दासस्य स्वधावानिव मनुषे नामोर्ध्वो भुवत्सूर्यो मेघस्य शिर इव प्रियमवभरत् सहास्माकमविता भवतु॥६॥

भावार्थः-ये सूर्यमेघवत्सर्वेषां सुखस्य साधका विद्वांसः सन्ति तेषां प्रशंसा कुतो न जायते॥६॥

पदार्थः-जो (**श्रुतः**) प्रख्यात (**देवः**) देदीप्यमान (**दस्मतमः**) अतीव दुःखों का नष्ट करनेवाला (**साह्वान्**) सहनशील (**इन्द्रः**) सूर्य के समान विद्वान् (**अर्शसानस्य**) प्राप्त हुए (**दासस्य**) सेवक के (**स्वधावान्**) समर्थ अन्नवाले के समान (**मनुषे**) मनुष्य के लिये (**नाम**) प्रसिद्ध (**ऊर्ध्वः**) उत्कृष्ट (**भुवत्**) हो और सूर्य जैसे मेघ के (**शिरः**) शिर को, वैसे (**प्रियम्**) मनोहर विषय को (**अव, भरत्**) पूरा करे (**सः, ह**) वही हमारा रक्षक हो॥६॥

भावार्थः-जो सूर्य और मेघ के समान सबका सुख सिद्ध करनेवाले विद्वान् हैं, उनकी प्रशंसा क्यों न हो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि।
अजनयन्मनवे क्षाममपश्च सत्रा शंसं यजमानस्य तूतोत्॥७॥

सः। वृत्रऽहा। इन्द्रः। कृष्णऽयोनीः। पुरम्ऽदरः। दासीः। ऐरयत्। वि। अजनयत्। मनवे। क्षाम्। अपः। च। सत्रा। शंसम्। यजमानस्य। तूतोत्॥७॥

पदार्थः-(सः) (**वृत्रहा**) मेघस्य हन्ता (**इन्द्रः**) सूर्य इव योद्धा (**कृष्णयोनीः**) कृष्णा कर्षिका योनिर्यासान्ताः (**पुरन्दरः**) यः पुरं दारयति सः (**दासीः**) सुखस्य दात्रीः (**ऐरयत्**) प्रेरयति (**वि**) (**अजनयत्**) जनयति (**मनवे**) मनुष्याय (**क्षाम्**) भूमिम् (**अपः**) जलानि वा (**च**) (**सत्रा**) सत्येन (**शंसम्**) स्तुतिम् (**यजमानस्य**) दातुः (**तूतोत्**) वर्द्धयेत्॥७॥

अन्वयः-हे विद्वन्! स भवान् यथा पुरन्दरो वृत्रहेन्द्रः सूर्यः कृष्णयोनीर्दासीर्व्यैरयन्मनवे क्षामपश्चाजनयद् यजमानस्य सत्रा शंसं तूतोत्तथा वर्त्तेत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवत्सुखवर्षका न्यायप्रकाशकाः सर्वेषां प्रशंसकानां प्रशंसकाः सन्ति तेऽत्र कथन्न वर्द्धेरन्॥७॥

पदार्थः-हे विद्वान्! (**सः**) सो आप जैसे (**पुरन्दरः**) पुर का विदीर्ण करनेवाला (**वृत्रहा**) मेघहन्ता (**इन्द्रः**) सूर्य (**कृष्णयोनीः**) खींचनेवाली जिनकी योनी उन (**दासीः**) सुख देनेवाली घटाओं को (**व्यैरयत्**) विशेषता से प्रेरणा दे, (**मनवे**) मनुष्य के लिये (**क्षाम्**) भूमि को (**च**) और (**अपः**) जलों को (**अजनयत्**) उत्पन्न करे, (**यजमानस्य**) देनेवाले के (**सत्रा**) सत्य में (**शंसम्**) स्तुति को (**तूतोत्**) बढ़ावे, वैसे वर्त्तो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के समान सुख वर्षाने वा न्याय के प्रकाश करने और सब प्रशंसकों के प्रशंसा करनेवाले हैं, वे यहाँ क्यों न बढ़ें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तस्मै तवस्य१मनु दायि सत्रेन्द्राय देवेभिरर्णसातौ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून् पुर आयसीर्नि तारीत्॥८॥

तस्मै। तवस्यम्। अनु। दायि। सत्रा। इन्द्राय। देवेभिः। अर्णऽसातौ। प्रति। यत्। अस्य। वज्रम्। बाह्वोः। धुः। हत्वी। दस्यून्। पुरः। आयसीः। नि। तारीत्॥८॥

पदार्थः-(तस्मै) स्तावकाय **(तवस्यम्)** तवसि बले भवम् **(अनु) (दायि)** दीयेत **(सत्रा)** सत्येन **(इन्द्राय)** बह्वैश्वर्यप्रदाय **(देवेभिः) (अर्णसातौ)** उदकस्य प्राप्तौ **(प्रति) (यत्)** यः **(अस्य) (वज्रम्)** शस्त्राऽस्त्रम् **(बाह्वोः) (धुः)** धरेयुः। अत्राऽडभावः। **(हत्वी)** हत्वा। अत्र **स्नात्व्यादय** इतीदं सिध्यति। **(दस्यून्)** भयङ्करान् चोरान् **(पुरः)** नगरीः **(आयसीः)** सुवर्णलोहनिर्मिताः **(नि) (तारीत्)** उल्लङ्घयेत्॥८॥

अन्वयः-यद्यो बाह्वोर्व्रज्रं धृत्वा दस्यून् हत्वी आयसीः पुरो नि तारीत् स येनाऽस्यार्णसातौ तवस्यमनुदायि तस्मा इन्द्राय ये सत्रा प्रति धुस्ते च देवेभिस्सह सुखं प्राप्नुवन्ति॥८॥

भावार्थः-ये सवलयानि नगराणि निर्माय दस्व्यादीन्निराकृत्य विद्वद्भिः सह राज्यं पालयन्ति, ते सत्यं सुखमश्नुवते॥८॥

पदार्थः-(यत्) जो **(बाह्वोः)** भुजाओं के **(वज्रम्)** शस्त्र और अस्त्र को धारण **(दस्यून्)** और भयङ्कर चोरों को **(हत्वी)** हनन कर **(आयसीः)** सुवर्ण और लोह के काम की **(पुरः)** नगरियों को **(नि, तारीत्)** उल्लङ्घता है वह और जिससे **(अस्य)** इस मेघ के **(अर्णसातौ)** जल की प्राप्ति के निमित्त **(तवस्यम्)** बल में उत्पन्न हुआ पदार्थ **(अनुदायि)** दिया जाय **(तस्मै)** उस प्रस्तुति प्रशंसा करने और **(इन्द्राय)** बहुत ऐश्वर्य के देनेवाले के लिये जो **(सत्रा)** सत्यता से **(प्रति) (धुः)** प्रतीति में धारण करें, वे सब **(देवेभिः)** विद्वानों के साथ सुख पाते हैं॥८॥

भावार्थः-जो परिधियों के सहित नगरियों को बनाय और भयङ्कर चोर आदि को निवारण कर विद्वानों के साथ राज्य की पालना करते हैं, वे सत्य सुख को प्राप्त होते हैं॥८॥

अथ दातृगुणानाह॥

अब देनेवाले के गुणों को अगले मन्त्र में कहते हैं॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः॥९॥२६॥

नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा। मघोनी। शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुवीराः॥९॥

पदार्थः-(नूनम्) वर्द्धिका **(ते)** तव **(प्रति) (वरम्)** अत्युत्तमम् **(जरित्रे)** प्रशंसकाय **(दुहीयत्)** प्रपूरयेत् **(इन्द्र) (दक्षिणा) (मघोनी)** बहुधनादियुक्ता **(शिक्ष)** विद्यां ग्राहय **(स्तोतृभ्यः)**

(मा) (अति, धक्) (भगः) (नः) अस्मान् **(बृहत्) (वदेम) (विदथे)** पदार्थविज्ञाने **(सुवीराः)** सकलविद्याव्यापिनः॥९॥

अन्वयः-हे इन्द्र! ते तव सा मघोनी दक्षिणा प्रतिवरं जरित्रे स्तोतृभ्यश्च नूनं दुहीयन्नोऽस्मान् माति धक् शिक्ष यया भगो वर्धते तया सुवीराः सन्तो वयं विदथे बृहद्वदेम॥९॥

भावार्थः-ये निरन्तरं दातारोऽप्रतिग्रहीतारः सर्वदा सत्यं शिक्षन्ते कस्यापि हृदयं वृथा न तापयन्ति, ते महान्तो भवन्तीति॥९॥

अत्रेन्द्र विद्युदीश्वरसभेशादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति विंशतितमं सूक्तं षड्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** देनेवाले! **(ते)** आपकी **(सा)** वह **(मघोनी)** बहुत धनादि पदार्थों से युक्त **(दक्षिणा)** देनी **(प्रतिवरम्)** अत्युत्तम सुख **(जरित्रे)** प्रशंसा करनेवाले के लिये **(स्तोतृभ्यः)** और स्तुति करनेवालों के लिये **(नूनम्)** निश्चय कर **(दुहीयत्)** पूरा करे और **(नः)** हम लोगों को **(माति धक्)** मत नष्ट करे और आप हम लोगों को **(शिक्ष)** विद्या ग्रहण कराइये तथा जिससे **(भगः)** ऐश्वर्य बढ़ता है, उससे **(सुवीराः)** सकल विद्याव्यापी हम लोग **(विदथे)** पदार्थविज्ञान में **(बृहत्)** बहुत **(वदेम)** कहें॥९॥

भावार्थः-जो निरन्तर देने और न लेनेवाले सर्वदा सत्य की शिक्षा देते और किसी के हृदय को वृथा नहीं सन्तापते हैं, वे बड़े होते हैं॥९॥

इस सूक्त में इन्द्र, विद्वान्, ईश्वर और सभापति आदि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बीसवां सूक्त और छब्बीसवां वर्ग समाप्त हुआ॥

विश्वजितिति षड्चस्यैकविंशतितमस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १, २ स्वराट् त्रिष्टुप्। ३, ६ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ विराट् जगती। ५ निचृज्जगती छन्दः। निषादः स्वरः॥

अथ विद्वद्गुणानाह॥

अब छः ऋचावाले इक्कीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों को कहते हैं॥

विश्वजितेधनजितेस्वर्जितेसत्राजितेनृजितउर्वराजिते।
अश्वजितेगोजितेअब्जितेभरेन्द्रायसोमंयजतायहर्यतम्॥ १॥

विश्वऽजितेधनऽजितेस्वःऽजितेसत्राऽजितेनृऽजितउर्वराऽजितेअश्वऽजितेगोऽजितेअप्ऽजितेभर। इन्द्राय। सोमम्। यजताय। हर्यतम्॥ १॥

पदार्थः-(विश्वजिते) यो विश्वं जयति तस्मै **(धनजिते)** यो धनेन जयति तस्मै **(स्वर्जिते)** यः सुखेन जयति तस्मै **(सत्राजिते)** यः सत्येनोत्कर्षति तस्मै **(नृजिते)** यो नृभिर्जयति तस्मै **(उर्वराजिते)** य उर्वरां सर्वफलपुष्पशस्यादिप्रापिकां जयति तस्मै **(अश्वजिते)** योऽश्वैर्जयति तस्मै **(गोजिते)** यो गा जयति तस्मै **(अब्जिते)** योऽप्सु जयति तस्मै **(भर)** धर **(इन्द्राय)** सभासेनेशाय **(सोमम्)** ऐश्वर्यम् **(यजताय)** सत्सङ्गन्त्रे **(हर्यतम्)** कमनीयम्॥ १॥

अन्वयः-हे प्रजाजन! त्वं विश्वजिते सत्राजिते स्वर्जिते नृजितेऽश्वजिते गोजित उर्वराजिते धनजितेऽब्जिते यजतायेन्द्राय हर्यतं सोमं भर॥ १॥

भावार्थः-राजप्रजाजनानामिदं समुचितमस्ति ये सर्वदा विजयशीला ऐश्वर्योन्नायका जना न्यायेन प्रजासु वर्त्तेरंस्तान् सदा सत्कुर्युः॥ १॥

पदार्थः-हे प्रजाजन! आप **(विश्वजिते)** जो विश्व को जीतता वा **(सत्राजिते)** जो सत्य से उत्कर्षता को प्राप्त होता वा **(स्वर्जिते)** जो सुख से जीतता वा **(नृजिते)** जो मनुष्यों से जीतता वा **(अश्वजिते)** जो घोड़ों से जीतता वा **(गोजिते)** जो गौओं को जीतता वा **(उर्वराजिते)** जो सर्व फल, पुष्प शस्यादि पदार्थों की प्राप्ति करनेवाली को जीतता वा **(धनजिते)** जो धन से जीतता **(अब्जिते)** वा जलों में जीतता उसके लिये **(यजताय)** सत्सङ्ग करनेवाले **(इन्द्राय)** सभा और सेनापति के लिये **(हर्यतम्)** मनोहर **(सोमम्)** ऐश्वर्य को **(भर)** धारण करो॥ १॥

भावार्थः-राजा प्रजाजनों को यह अच्छे प्रकार उचित है कि जो सर्वदा विजयशील, ऐश्वर्य की उन्नति करनेवाले जन न्याय से प्रजा में वर्त्तें, उनका सत्कार सर्वदा सब करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभिभुवेऽभिभङ्गाय वन्वतेऽषाळ्हाय सहमानाय वेधसे।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत॥ २॥

अभिऽभुवे। अभिऽभङ्गाय। वन्वते। अषाळ्हाय। सहमानाय। वेधसे। तुविऽग्रये। वह्नये। दुस्तरीतवे। सत्राऽसहे। नमः। इन्द्राय। वोचत॥ २॥

पदार्थः-(अभिभुवे) शत्रूणां तिरस्कर्त्रे **(अभिभङ्गाय)** दुष्टानामभितो मर्दकाय **(वन्वते)** सत्याऽसत्ययोर्विभाजकाय **(अषाळ्हाय)** शत्रुभिरसह्यमानाय **(सहमानाय)** शत्रून् सोढुं शीलाय **(वेधसे)** प्रज्ञाय **(तुविग्रये)** वृद्धिनिमित्तोपदेशकाय **(वह्नये)** राज्यभारं वोढे **(दुष्टरीतवे)** शत्रुभिर्दुःखेन तरितुमर्हाय **(सत्रासाहे)** यः सत्रा सत्येन सहते तस्मै **(नमः)** नतिम् **(इन्द्राय)** सर्वशुभलक्षणान्विताय **(वोचत)** वदत। अत्राडभावः॥ २॥

अन्वयः-हे मनुष्या! यूयमभिभुवेऽभिभङ्गायाऽषाह्वाय सहमानाय वन्वते तुविग्रये वह्नये दुष्टरीतवे सत्रासाह इन्द्राय वेधसे नमो वोचत॥ २॥

भावार्थः-येऽन्यायात् पृथग्दुष्टाचाराँस्ताडयति श्रेष्ठाचारसन्ध्यासत्पुरुषान् सत्कुर्वन्ति, ते विवेकिनः सन्ति॥ २॥

पदार्थः-हे मनुष्यो! तुम **(अभिभुवे)** शत्रुओं का तिरस्कार करने **(अभिभङ्गाय)** दुष्टों का सब ओर से मर्दन करने **(अषाह्वाय)** शत्रुओं से न सहने **(सहमानाय)** शत्रुओं को सहनशील रखने **(वन्वते)** सत्य और असत्य का विभाग करने **(तुविग्रये)** वृद्धि के निमित्तों का उपदेश देने **(वह्नये)** राज्य-भार को चलाने और जो **(दुष्टरीतवे)** शत्रुओं से **[**=के**]** दुःख से तरनेवाला उसके लिये **(सत्रासाहे)** और सत्य के सहनेवाले **(इन्द्राय)** सर्वशुभलक्षणयुक्त **(वेधसे)** उत्तम ज्ञाता के लिये **(नमः)** नमस्कार **(वोचत)** कहो॥ २॥

भावार्थः-जो अन्याय से अलग दुष्टाचारियों को ताड़ना देते हैं, श्रेष्ठाचार की सन्धि से सत्पुरुषों का सत्कार करते हैं, वे विवेकी हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः।

वृतञ्जयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या॥ ३॥

सत्राऽसहः। जनऽभक्षः। जनम्ऽसहः। च्यवनः। युध्मः। अनु। जोषम्। उक्षितः। वृतम्ऽचयः। सहुरिः। विक्षु। आरितः। इन्द्रस्य। वोचम्। प्र। कृतानि। वीर्या॥ ३॥

पदार्थः-(सत्रासाहः) यः सत्यं सहते **(जनभक्षः)** यो जनैर्भक्षः सेवनीयः **(जनंसहः)** यो जनान् सहते **(च्यवनः)** च्यावयिता **(युध्मः)** योद्धा **(अनु)** **(जोषम्)** प्रीतिम् **(उक्षितः)** सेवितः **(वृतञ्जयः)** यो वर्त्तते तं चिनोति सः **(सहुरिः)** सहनस्वभावः **(विक्षु)** प्रजासु **(आरितः)** प्राप्तः **(इन्द्रस्य)** ऐश्वर्य्यवतः **(वोचम्)** वदेयम् **(प्र)** **(कृतानि)** निष्पन्नानि **(वीर्य्या)** पराक्रमयुक्तानि कर्माणि॥ ३॥

अन्वयः-हे मनुष्या! यथा सत्रासाहो जनभक्षो जनं सहश्च्यवनो युध्मो वृतञ्जयः सहुरिरारितो जोषमुक्षितस्सन्नहं विक्षु कृतानि [इन्द्रस्य] वीर्य्या प्रवोचं तथा यूयमनुवदत॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे शमदमयमादिशुभकर्माचारिणो जनाः प्रजायां विद्या वर्द्धयन्ति ते जनैः सेव्या भवन्ति॥ ३॥

पदार्थः-हे मनुष्यो! जैसे **(सत्रासाहः)** जो सत्य को सहता **(जनभक्षः)** जनों के सेवने योग्य **(जनंसहः)** जनों को सहने **(च्यवनः)** दुष्टों को गिराने **(युध्मः)** दुष्टों से युद्ध करने **(वृतञ्जयः)** और वर्त्तमान पदार्थ को इकट्ठा करनेवाला **(सहुरिः)** सहनशील **(आरितः)** प्राप्त **(जोषम्)** प्रीति को **(उक्षितः)** सेवता हुआ मैं **(विक्षु)** प्रजाजनों में **(कृतानि)** सिद्ध हुए **(इन्द्रस्य)** ऐश्वर्यवान् **(वीर्य्या)** पराक्रमयुक्त कर्मों को **(प्र, वोचम्)** अच्छे प्रकार कहूं, वैसे तुम **(अनु)** पीछे कहो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो शम, दम और यमादि शुभ कर्मों का आचरण करनेवाले जन प्रजा में विद्या बढ़ाते हैं, वे जनों के सेवने योग्य होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः।
रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत्॥ ४॥

अननुऽदः। वृषभः। दोधतः। वधः। गम्भीरः। ऋष्वः। असमष्टऽकाव्यः। रध्रऽचोदः। श्नथनः। वीळितः। पृथुः। इन्द्रः। सुऽयज्ञः। उषसः। स्वः। जनत्॥ ४॥

पदार्थः-(अनानुदः) अप्रेरितः **(वृषभः)** सर्वोत्तमः **(दोधतः)** हिंसकस्य **(वधः)** नाशः **(गम्भीरः)** गम्भीराशयः **(ऋष्वः)** ज्ञाता **(असमष्टकाव्यः)** असमष्टं न सम्यग् व्याप्तं काव्यं कवेः कर्म यस्य सः **(रध्रचोदः)** यो रध्रान् सरोधकान् चुदति प्रेरयति सः **(श्नथनः)** दुष्टानां हिंसकः। अत्र वर्णव्यत्ययेन रस्य नः। **(वीळितः)** विविधैर्गुणैः स्तुतः **(पृथुः)** विस्तीर्णबलः **(इन्द्रः)** सूर्य इव सुशोभमानः **(सुयज्ञः)** शोभना यज्ञा विद्वत्सत्कारादयो यस्य सः **(उषसः)** प्रभातात् **(स्वः)** दिनमिव सुखम् **(जनत्)** जायेत॥४॥

अन्वयः-हे मनुष्या! यथोषसः स्वर्जनत्तथा योऽनानुदो वृषभो गम्भीर ऋष्वोऽसमष्टकाव्यो रध्रचोदः श्नथनो वीळितः पृथुः सुयज्ञ इन्द्रोऽस्ति येन दोधतो वधः क्रियते सर्वेभ्यः सुखं दातुमर्हेत्॥४॥

भावार्थः-ये मनुष्या स्वतो विविधगुणकर्माचरन्तः श्रेष्ठान् सत्कुर्वन्तो दुष्टान् हिंसन्तः सर्वशास्त्रविदो धर्मात्मानो भवेयुस्ते सूर्यवद्विद्याप्रकाशकाः स्युः॥४॥

पदार्थः-हे मनुष्यो! जैसे **(उषसः)** प्रभात से **(स्वर्जनत्)** जिनके समान सुख का प्रकाश हो, वैसे जो **(अनानुदः)** नहीं प्रेरित **(वृषभः)** सर्वोत्तम **(गम्भीरः)** गम्भीर आशयवाला **(ऋष्वः)** ज्ञाता **(असमष्टकाव्यः)** जिसको अच्छे प्रकार कविताई न व्याप्त हुई, न जिसके मन को रमी **(रध्रचोदः)** जो रुकावटी पदार्थों को प्रेरणा देने और **(श्नथनः)** दुष्टों की हिंसा करनेवाला **(वीळितः)** विविध गुणों से स्तुति किया गया **(पृथुः)** विस्तृत फलयुक्त **(सुयज्ञः)** सुन्दर-सुन्दर जिसके विद्वानों के सत्कार आदि पदार्थ **(इन्द्रः)** जो सूर्य के समान अच्छी शोभावाला विद्वान् है, जिसने **(दोधतः)** हिंसक का **(वधः)** नाश किया, वह सबको सुख देने के योग्य हो॥४॥

भावार्थः-जो मनुष्य अपने से विविध गुण और कर्मों का आचरण, श्रेष्ठों का सत्कार और दुष्टों की हिंसा करते हुए सर्वशास्त्रवेत्ता धर्मात्मा हैं, वे सूर्य के समान प्रकाश करनेवाले हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत॥५॥

यज्ञेन। गातुम्। अप्ऽतुरः। विविद्रिरे। धियः। हिन्वानाः। उशिजः। मनीषिणः। अभिऽस्वरा। निऽसदा। गाः। अवस्यवः। इन्द्रे। हिन्वानाः। द्रविणानि। आशत॥५॥

पदार्थः-(यज्ञेन) सङ्गत्याख्येन **(गातुम्)** पृथिवीम् **(अप्तुरः)** प्राप्नुवन्तः **(विविद्रिरे)** लभन्ते **(धियः)** प्रज्ञाः **(हिन्वानाः)** वर्द्धयमानाः **(उशिजः)** कमितारः **(मनीषिणः)** मनस ईषिणः **(अभिस्वरा)** अभितः सर्वतः स्वरा वाणी तया। अत्र **सुपां सुलुगिति** डादेशः। **स्वर इति वाङ्नामसु पठितम्।** (निघं०१.११) **(निषदा)** ये नित्यं सभायां सीदन्ति तैः। अत्रापि तृतीयायाडादेशः। **(गाः)** पृथिवीः **(अवस्यवः)** आत्मनो वो रक्षामिच्छन्तः **(इन्द्रे)** विद्युदादिपदार्थे **(हिन्वानाः)** **(द्रविणानि)** धनानि यशांसि वा **(आशत)** प्राप्नुवन्ति॥५॥

अन्वयः-ये गातुमप्तुरोऽभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना उशिजो धियो हिन्वाना मनीषिणो यज्ञेन विद्यासुशीले विविद्रिरे ते द्रविणान्याशत॥५॥

भावार्थः-नहि कश्चिदपि सत्सङ्गेन योगाभ्यासेन विद्यया प्रज्ञया विना पूर्णां विद्यां धनं च प्राप्तुमर्हति॥५॥

पदार्थः-जो **(गातुम्)** पृथिवी को **(अप्तुरः)** प्राप्त हुए **(अभिस्वरा)** सब ओर की वाणियों और **(निषदा)** नित्य जो सभा में स्थित होते उनसे **(गाः)** पृथिवियों को **(अवस्यवः)** अपनी रक्षारूप माननेवाले **(इन्द्रे)** बिजुली आदि पदार्थ में **(हिन्वानाः)** वृद्धि को प्राप्त होते **(उषिजः)** मनोहर **(धियः)** बुद्धियों को **(हिन्वानाः)** बढाते हुए **(मनीषिणः)** मनीषी जन **(यज्ञेन)** यज्ञ से विद्या और सुन्दर शील को **(विविद्रिरे)** प्राप्त होते हैं, वे **(द्रविणानि)** धन वा यशों को **(आशत)** प्राप्त होते हैं॥५॥

भावार्थः-कोई भी जन सत्सङ्ग, योगाभ्यास, विद्या और उत्तम बुद्धि के विना पूर्ण विद्या और धन पाने को योग्य नहीं होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्॥६॥२७॥

इन्द्र। श्रेष्ठानि। द्रविणानि। धेहि। चित्तिम्। दक्षस्य। सुभगऽत्वम्। अस्मे इति। पोषम्। रयीणाम्। अरिष्टिम्। तनूनाम्। स्वाद्मानम्। वाचः। सुदिनऽत्वम्। अह्नाम्॥६॥

पदार्थः-(इन्द्र) सर्वेश्वर इव वर्त्तमान **(श्रेष्ठानि)** धर्म्मजानि **(द्रविणानि)** धनानि **(धेहि)** **(चित्तिम्)** चिन्वन्ति विद्यां यया ताम् **(दक्षस्य)** बलस्य **(सुभगत्वम्)** अत्युत्तमैश्वर्यम् **(अस्मे)** अस्मभ्यम् **(पोषम्)** पुष्टिम् **(रयीणाम्)** धनानाम् **(अरिष्टिम्)** अहिंसाम् **(तनूनाम्)** शरीराणाम्

(स्वाद्मानम्) स्वादिष्ठं भोगम् **(वाचः)** वाण्याः बोधम् **(सुदिनत्वम्)** उत्तमदिनस्य भावम् **(अह्नाम्)** दिनानाम्॥६॥

अन्वयः-हे इन्द्र! त्वमीश्वर इवाऽस्मे दक्षस्य चित्तिं सुभगत्वं पोषं रयीणां तनूनामरिष्टिं वाचः स्वाद्मानमह्नां सुदिनत्वं श्रेष्ठानि द्रविणानि धेहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वद्भिर्यथा परमेश्वरेण सर्वाणि वस्तूनि निर्माय सर्वेभ्यो हितानि साधितानि सन्ति तथा सर्वेषां कल्याणाय नित्यं प्रयतितव्यम्॥६॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकविंशतितमं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** सभों के अधिपति के समान वर्त्तमान! **[**आप**]** **(अस्मे)** हम लोगों के लिये **(दक्षस्य)** बल की **(चित्तिम्)** उस प्रकृति को जिससे कि विद्या को इकट्ठा करते हैं और **(सुभगत्वम्)** अत्युत्तम ऐश्वर्य **(पोषम्)** पुष्टि तथा **(रयीणाम्)** धन और **(तनूनाम्)** शरीरों की **(अरिष्टिम्)** रक्षा **(वाचः)** वाणी के बोध **(स्वाद्मानम्)** स्वादिष्ठ भोग **(अह्नाम्)** दिनों के **(सुदिनत्वम्)** सुदिनपन और **(श्रेष्ठानि)** धर्मज **(द्रविणानि)** धनों को **(धेहि)** धारण कीजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों को जैसे परमेश्वर ने समस्त वस्तुओं को उत्पन्न कर सबके लिये हितरूप सिद्ध कराई हैं, वैसे सबके कल्याण के लिये नित्य प्रयत्न करना चाहिये॥६॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्कीसवां सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥

त्रिकद्रुकेष्वित्यस्य चतुर्ऋचस्य द्वाविंशतितमस्य सूक्तस्य गृत्समद ऋषिः। इन्द्रो देवता। १ अष्टिश्छन्दः। मध्यमः स्वरः। २ निचृदतिशक्वरी। ४ भुरिगतिशक्वरी छन्दः। पञ्चमः स्वरः। ३ स्वराट् शक्वरी छन्दः। धैवतः स्वरः।

अथ सूर्य्यविषयमाह॥

अब चार ऋचावाले बाईसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सूर्य्य का विषय कहते हैं॥

त्रिक॑द्रुकेषु महि॒षो यवा॑शिरं तुवि॒शुष्म॑स्तृ॒पत्सोम॑मपिब॒द्विष्णु॑ना सु॒तं यथाव॑शत्।
स ईं॑ ममाद॒ महि॒ कर्म॒ कर्त॑वे म॒हामु॒रुं सैनं॑ सश्चद्देवो दे॒वं स॒त्यमिन्द्रं॑ स॒त्य इन्दु॑ः॥ १॥

त्रिऽक॑द्रुकेषु। म॒हि॒षः। यव॑ऽआशिरम्। तु॒वि॒ऽशुष्म॑ः। तृ॒पत्। सोम॑म्। अ॒पि॒ब॒त्। विष्णु॑ना। सु॒तम्। यथा॑। अव॑शत्। सः। ईं॒। म॒माद॒। महि॑। कर्म॑। कर्त॑वे। म॒हाम्। उ॒रुम्। सः। एन॑म्। स॒श्च॒त्। दे॒वः। दे॒वम्। स॒त्यम्। इन्द्र॑म्। स॒त्यः। इन्दु॑ः॥ १॥

पदार्थः-(त्रिकद्रुकेषु) त्रीणि कद्रुकान्याह्वानानि येषु तेषु **(महिषः)** महान् **(यवाशिरम्)** यो यवानश्नाति तम् **(तुविशुष्मः)** तुवि बहु शुष्मं बलं यस्य सः **(तृपत्)** तृप्यन्। अत्र विकरणव्यत्ययेन शः। **(सोमम्)** रसम् **(अपिबत्)** पिबति **(विष्णुना)** व्यापकेन परमेश्वरेण वायुना वा **(सुतम्)** निष्पादितम् **(यथा)** येन प्रकारेण **(अवशत्)** कामयते **(सः)** **(ईम्)** जलेन **(ममाद)** हृष्येत् **(महि)** महत् **(कर्म्म)** **(कर्त्तवे)** कर्त्तुम् **(महाम्)** महताम् **(उरुम्)** बहुम् **(सः)** **(एनम्)** **(सश्चत्)** संयोजयति। अत्राडभावः। **(देवः)** सर्वतः प्रकाशमानः **(देवम्)** द्योतमानम् **(सत्यम्)** अविनाशिनम् **(इन्द्रम्)** सर्वलोकधारकं सूर्य्यम् **(सत्यः)** नाशरहितः **(इन्दुः)** चन्द्रः॥ १॥

अन्वयः-यो तुविशुष्मो महिषस्तृपत् त्रिकद्रुकेषु यवाशिरं विष्णुना सुतं सोमं यथाऽपिबदवशच्च स ईं महि कर्म कर्त्तवे ममाद यः सत्य इन्दुर्देव एनं महामुरुं सत्यं देवमिन्द्रं सश्चत्स पूज्यो भवति॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यो मनुष्यः जगदीश्वरेण निर्मितेषु लोकेषु विद्याप्रयत्नाभ्यां प्रियं कमनीयं भोगं कर्त्तुं शक्नोति सोऽविनाशिनं परमात्मानमपि वेदितुं वेदयितुं वा शक्नोति॥ १॥

पदार्थः-जो **(तुविशुष्मः)** बहुत बलवाला **(महिषः)** बड़ा **(तृपत्)** तृप्त करता हुआ **(त्रिकद्रुकेषु)** जिनमें तीन आह्वान विद्यमान उनमें **(यवाशिरम्)** यवों के भक्षण करनेवाले को और **(विष्णुना)** व्यापक परमेश्वर वा वायु से **(सुतम्)** उत्पादन किये हुए **(सोमम्)** रस को **(यथा)** जैसे **(अपिबत्)** पीता और **(अवशत्)** कामना करता है **(सः)** वह **(ईम्)** जल से **(महि)** बड़े **(कर्म)**

कर्म के **(कर्त्तवे)** करने को **(ममाद)** हर्षित हो। तथा जो **(सत्यः)** नाशरहित **(इन्दुः)** चन्द्रमा **(देवः)** सब ओर से प्रकाशमान **(एनम्)** इस **(महाम्)** महात्माओं के **(उरुम्)** बहुत **(सत्यम्)** अविनाशी **(देवम्)** प्रकाशमान **(इन्द्रम्)** सर्व लोकों के आधाररूप सूर्यलोक को **(सश्चत्)** संयुक्त करता, वह पूज्य होता है॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य जगदीश्वर ने निर्मित किये लोकों में विद्या और उत्तम यन्त्र से प्रिय मनोहर भोग कर सकता है, वह अविनाशी परमात्मा को जान वा जना सकता है॥१॥

अथ विद्युद्विषयमाह॥

अब बिजुली के विषय को अगले मन्त्र में कहा है॥

अध॒ त्विषी॑माँ अ॒भ्योज॑सा॒ क्रिवि॑ं यु॒धाभ॑व॒दा रोद॑सी अपृणदस्य म॒ज्म॒ना प्र वा॑वृधे।
अध॑त्ता॒न्यं ज॒ठरे॒ प्रेम॑रिच्य॒त सैनं॑ सश्चद्दे॒वो दे॒वं स॒त्यमिन्द्रं॑ स॒त्य इन्दु॑ः॥२॥

अध॑। त्विषि॑ऽमान्। अ॒भि। ओज॑सा। क्रिवि॑म्। यु॒धा। अ॒भ॒व॒त्। आ। रोद॑सी॒ इति॑। अ॒पृ॒ण॒त्। अ॒स्य॒। म॒ज्मना॑। प्र। व॒वृ॒धे॒। अध॑त्त। अ॒न्यम्। ज॒ठरे॑। प्र। ई॒म्। अ॒रि॒च्य॒त॒। सः। एन॑म्। स॒श्च॒त्। दे॒वः। दे॒वम्। स॒त्यम्। इन्द्र॑म्। स॒त्यः। इन्दु॑ः॥२॥

पदार्थः-**(अध)** अथ **(त्विषीमान्)** बहुदीप्तियुक्तः **(अभि)** आभिमुख्ये **(ओजसा)** बलेन **(क्रिविम्)** कूपम् **(युधा)** सम्प्रहारेण **(अभवत्)** भवति **(आ)** समन्तात् **(रोदसी)** द्यावापृथिव्यौ **(अपृणत्)** तर्पयति **(अस्य)** **(मज्मना)** बलेन **(प्र)** **(वावृधे)** वर्द्धते **(अधत्त)** दधाति **(अन्यम्)** भिन्नम् **(जठरे)** आभ्यन्तरे **(प्र)** **(ईम्)** जलम् **(अरिच्यत)** रिच्यतेऽतिरिक्तोऽस्ति **(सः)** परमेश्वरः **(एनम्)** **(सश्चत्)** सश्चति समवयति **(देवः)** **(देवम्)** सुखस्य दातारम् **(सत्यम्)** सत्सु साधुः **(इन्द्रम्)** विद्युतम् **(सत्यः)** सत्सु साधुः **(इन्दुः)** जलवदार्द्रस्वभावः॥२॥

अन्वयः-यस्त्विषीमानोजसा महानभवद्युधा रोदसी क्रिविमिवापृणदधास्य जगदीश्वरस्य मज्मना प्रवावृधे जठरेऽन्यमधत्त य ईं प्रारिच्यत एनं सत्यं देवमिन्द्रमभ्यासश्चत् स सत्य इन्दुर्देवः परमेश्वरोऽस्ति॥२॥

भावार्थः-हे मनुष्या! येनाऽयं सर्वलोकप्रकाशकः कूपवत्सेचको महान् सूर्य्यलोको रचितः स्वस्मिन् धृतो यः सर्वेभ्यः पृथक् व्याप्तश्च नित्यः परमेश्वरो देवोऽस्ति तं नित्यं ध्यायत॥२॥

पदार्थः-जो **(त्विषीमान्)** बहुत दीप्तियुक्त **(ओजसा)** बल से बड़ा **(अभवत्)** होता है **(युधा)** संप्रहार से **(रोदसी)** द्यावापृथिवी को **(क्रिविम्)** कूप के समान **(अपृणत्)** तृप्त करता है।

(अध) इसके अनन्तर इस जगदीश्वर के **(मज्मना)** बल से **(प्र, वावृधे)** अच्छे प्रकार बढ़ता है **(जठरे)** अपने भीतर **(अन्यम्)** और को **(अधत्त)** धारण करता और जो **(ईम्)** जल के साथ **(प्रारिच्यत)** औरों से अलग है **(एनम्)** इस **(सत्यम्)** सत्य **(देवम्)** सुख के देनेवाले **(इन्द्रम्)** बिजुली रूप अग्नि को **(अभि, आ सश्चत्)** जो प्रत्यक्ष सम्बन्ध करता है **(सः)** वह **(सत्यः)** सत्य **(इन्दुः)** जल के समान आर्द्र स्वभाववाला **(देवः)** प्रकाशमान परमेश्वर है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिसने यह सब लोकों का प्रकाश करने और कूप के समान सींचनेवाला बड़ा सूर्यलोक रचा और अपने में धारण किया, जो सबसे अलग व्याप्त भी है, वह नित्य परमेश्वर देव है, उसका नित्य ध्यान करो॥२॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः।

दाता राधः स्तुवते काम्यं वसु सैनꣳ सश्चद्देवो देवं सत्यमिन्द्रꣳ सत्य इन्दुः॥३॥

साकम्। जातः। क्रतुना। साकम्। ओजसा। ववक्षिथ। साकम्। वृद्धः। वीर्यैः। ससहिः। मृधः। विऽचर्षणिः। दाता। राधः। स्तुवते। काम्यम्। वसु। सः। एनम्। सश्चत्। देवः। देवम्। सत्यम्। इन्द्रम्। सत्यः। इन्दुः॥३॥

पदार्थः-**(साकम्)** सह **(जातः)** प्रसिद्धः **(क्रतुना)** कर्मणा प्रज्ञया वा **(साकम्)** **(ओजसा)** जलेन। **ओज इत्युदकनामसु पठितम्।** (निघं०१.१२)। **(ववक्षिथ)** वहति। अत्र पुरुषव्यत्ययः। **(साकम्)** **(वृद्धः)** **(वीर्यैः)** पराक्रमविज्ञानादिभिः **(सासहिः)** अतिशयेन सोढा **(मृधः)** संग्रामान् **(विचर्षणिः)** विद्याप्रकाशयुक्तो विद्वान् **(दाता)** **(राधः)** धनम् **(स्तुवते)** प्रशंसति **(काम्यम्)** प्रियम् **(वसु)** सुखेषु वासयत्री **(सः)** **(एनम्)** **(सश्चत्)** **(देवः)** सर्वत्र द्योतमानः **(देवम्)** देदीप्यमानम् **(सत्यम्)** नाशरहितम् **(इन्द्रम्)** **(सत्यः)** अविनाशी **(इन्दुः)** परमैश्वर्य्ययुक्तः॥३॥

अन्वयः-हे मनुष्या! यः क्रतुनोजसा साकं जातः वीर्यैः साकं वृद्धः सासहिर्विचर्षणिर्दाता सन्मृधो ववक्षिथ काम्यं वसु राधः स्तुवते स सत्य इन्दुर्देवो जीव एनं सत्यमिन्द्रं देवं परमेश्वरं साकं सश्चदात्मना संयुनक्ति॥३॥

भावार्थः-यस्य ज्ञानादिगुणैरुत्क्षेपणादिभिः कर्मभिः सह नित्यसम्बन्धः यो विद्यया ज्येष्ठोऽविद्यया कनिष्ठश्च सुखं कामयमानोऽनादिरनुत्पन्नोऽमृतोऽल्पोऽज्ञो जीवात्मास्ति तं यः शुभाऽशुभकर्मफलैर्युनक्ति स

परमेश्वरोऽखिलजगतो मध्ये व्याप्तस्सन् सर्वं रक्षति जीवेन सहेशस्य ईश्वरेण सह जीवस्य व्याप्यव्यापकसेव्यसेवकादिलक्षण: सम्बन्धोऽस्तीति वेद्य:॥३॥

पदार्थ:-हे मनुष्यो! जो **(क्रतुना)** कर्म वा प्रज्ञा और **(ओजसा)** जल के **(साकम्)** साथ **(जात:)** प्रसिद्ध **(वीर्यै:)** पराक्रम वा विज्ञानादि पदार्थों के **(साकम्)** साथ **(वृद्ध:)** बढ़ा **(सासहि:)** अत्यन्त सहनेवाला **(विचर्षणि:)** विद्या के प्रकाश से युक्त विद्वान् **(दाता)** दानशील होता हुआ **(मृध:)** संग्रामों को **(ववक्षिथ)** प्राप्त करता है **(काम्यम्)** प्रिय **(वसु)** सुखों को वसानेवाले **(राध:)** धन की **(स्तुवते)** प्रशंसा करता **(स:)** वह **(सत्य:)** अविनाशी **(इन्दु:)** परमैश्वर्ययुक्त **(देव:)** सर्वत्र प्रकाशमान जीव **(एनम्)** इस **(सत्यम्)** सत्य **(इन्द्रम्)** परमैश्वर्ययुक्त **(देवम्)** देदीप्यमान परमेश्वर को **(साकम्)** साथ **(सश्चत्)** सम्बन्ध करता अर्थात् अपनी आत्मा से संयुक्त करता है॥३॥

भावार्थ:-जिसके ज्ञानादि गुणों और उत्क्षेपणादि कर्मों के साथ नित्य सम्बन्ध है। जो विद्या से ज्येष्ठ और अविद्या से कनिष्ठ एवं सुख की कामना करता हुआ अनादि, अनुत्पन्न, अमृत, अल्पज्ञ, जीवात्मा है, उसको जो शुभाशुभ कर्मफलों के साथ युक्त करता वह परमेश्वर अखिल जगत् के बीच व्याप्त होता हुआ सबकी रक्षा करता। जीव के साथ ईश का ईश्वर के साथ जीव का व्याप्य-व्यापक, सेव्य-सेवकादि लक्षण सम्बन्ध है, यह जानना चाहिये॥३॥

अथ जीवविषयमाह॥

अब जीव विषय को अगले मन्त्र में कहा है॥

तव॒ त्यन्नर्यं॑ नृ॒तोऽप॑ इन्द्र प्रथ॒मं पू॒र्व्यं दि॒वि प्र॒वाच्यं॑ कृ॒तम्।
यद्देव॑स्य॒ शव॑सा॒ प्रारि॑णा॒ असु॑ं रि॒णन्नपः॑।
भुव॒द्विश्व॑म॒भ्यादे॑व॒मोज॑सा वि॒दादू॒र्जं श॒तक्र॑तुर्वि॒दादिष॑म्॥४॥२८॥२॥

तव॑। त्यत्। नर्यम्। नृ॒तो॒ इति॑। अप॑:। इ॒न्द्र॒। प्र॒थ॒मम्। पू॒र्व्यम्। दि॒वि। प्र॒ऽवाच्य॑म्। कृ॒तम्। यत्। दे॒वस्य॑। शव॑सा। प्र। अरि॑णाः। असु॑म्। रि॒णन्। अ॒पः॒। भुव॑त्। विश्व॑म्। अ॒भि। अदे॑वम्। ओज॑सा। वि॒दात्। ऊर्ज॑म्। श॒तऽक्र॑तुः। वि॒दात्। इष॑म्॥४॥

पदार्थ:-**(तव)** जीवस्य **(त्यत्)** तत् **(नर्यम्)** नृषु साधु **(नृतो)** सर्वेषां नर्त्तयित: **(अप:)** प्राणान् **(इन्द्र)** इन्द्रियाद्यैश्वर्ययुक्त भोजक **(प्रथमम्)** आदिमम् **(पूर्व्यम्)** पूर्वैः कृतम् **(दिवि)** प्रकाशमये जगदीश्वरे **(प्रवाच्यम्)** प्रवक्तुं योग्यम् **(कृतम्)** निष्पन्नम् **(यत्)** य: **(देवस्य)** सर्वस्य

प्रकाशकस्य **(शवसा)** बलेन **(प्र)** **(अरिणाः)** प्राप्नोसि **(असुम्)** प्राणम् **(रिणन्)** प्राप्नुवन् **(अपः)** **(भुवत्)** भवेत् **(विश्वम्)** सर्वम् **(अभि)** **(अदेवम्)** अविद्यमानो देवः प्रकाशो यस्मिँस्तम्। अत्रा**न्येषामपि दृश्यत** इत्यकारस्य दीर्घत्वम्। **(ओजसा)** पराक्रमेण **(विदात्)** प्राप्नुयात् **(ऊर्जम्)** पराक्रमम् **(शतक्रतुः)** असंख्यप्रज्ञः **(विदात्)** प्राप्नुयात् **(इषम्)** अन्नम्॥४॥

अन्वयः-हे नृतो इन्द्र! यद्यस्त्वं त्यत्प्रथमं पूर्व्यं प्रवाच्यं कृतं नर्य्यं दिव्यपश्च देवस्य शवसा प्रारिणा भवानसुमपो रिणन्नोजसाऽदेवं विश्वमभिविदाच्छतक्रतुर्भवानूर्जमिषं चाविदात्तस्य तव सुखं भुवत्॥४॥

भावार्थः-हे जीवा यस्य जगदीश्वरस्य निबन्धेन यूयं शरीराणीन्द्रियाणि प्राणान् प्राप्तास्त सर्वसामर्थ्येनाहर्निशं ध्यायतेति॥४॥

अत्र सूर्य्यविद्युदीश्वरजीवगुणकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशं सूक्तमष्टाविंशो वर्गो द्वितीयोऽनुवाकश्च समाप्तः॥

पदार्थः-हे **(नृतो)** सबके नचानेवाले **(इन्द्र)** इन्द्रियादि ऐश्वर्य्ययुक्त वा उसका भोक्ता! **(यत्)** जो तू **(त्यत्)** वह **(प्रथमम्)** प्रथम **(पूर्व्यम्)** पूर्वाचार्य्यों ने किया **(प्रवाच्यम्)** उत्तमता से कहने योग्य **(कृतम्)** प्रसिद्ध **(नर्य्यम्)** मनुष्यों में सिद्ध पदार्थ उसको और **(दिवि)** प्रकाशमय परमेश्वर में **(अपः)** प्राणों को **(देवस्य)** सबके प्रकाश करनेवाले के **(शवसा)** बल से **(प्रारिणाः)** प्राप्त होता और **(असुम्)** प्राण और **(अपः)** जलों को **(रिणन्)** प्राप्त होता हुआ **(ओजसा)** बल से **(अदेवम्)** जिसमें प्रकाश नहीं विद्यमान उस **(विश्वम्)** समस्त वस्तुमात्र को **(अभि, विदात्)** प्राप्त हो, **(शतक्रतुः)** असंख्य प्रज्ञायुक्त आप **(ऊर्जम्)** पराक्रम और **(इषम्)** अन्न को **(विदात्)** प्राप्त हो, उन **(तव)** आपके सुख **(भुवत्)** हो॥४॥

भावार्थः-हे जीवो! जिस जगदीश्वर के निबन्ध से तुम शरीर, इन्द्रियों और प्राणों को प्राप्त हुए उसको सर्व सामर्थ्य से दिन-रात ध्यावो॥४॥

इस सूक्त में सूर्य, विद्युत्, ईश्वर और जीवों के गुण कर्मों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह बाईसवां सूक्त और अट्ठाईसवां वर्ग और दूसरा अनुवाक समाप्त हुआ॥

गणानामित्येकोनविंशत्यृचस्य त्रयोविंशतितमस्य सूक्तस्य गृत्समद ऋषिः। १, ५, ९, ११, १७, १९ ब्रह्मणस्पतिः। २-४, ६-८, १०, १२-१६, १८ बृहस्पतिश्च देवता। १, ४, ५, १०-१२ जगती। २, ७-९, १३, १४, विराट् जगती। ३, ६, १६, १८ निचृज्जगती छन्दः। निषादः स्वरः। १५, १७ भुरिक् त्रिष्टुप्। १९ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेश्वरविषयमाह॥

अब उन्नीस मन्त्रवाले तेईसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में परमेश्वर का वर्णन करते हैं॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्॥ १॥

गणानाम्। त्वा। गणऽपतिम्। हवामहे। कविम्। कवीनाम्। उपमश्रवःऽतमम्। ज्येष्ठऽराजम्। ब्रह्मणाम्। ब्रह्मणः। पते। आ। नः। शृण्वन्। ऊतिऽभिः। सीद। सदनम्॥ १॥

पदार्थः-(गणानाम्) गणनीयानां मुख्यानाम् **(त्वा)** त्वाम् **(गणपतिम्)** मुख्यानां स्वामिनम् **(हवामहे)** स्वीकुर्महे **(कविम्)** सर्वज्ञम् **(कवीनाम्)** विपश्चिताम् **(उपमश्रवस्तमम्)** उपमीयते येन तच्छ्रवस्तदतिशयितम् **(ज्येष्ठराजम्)** यो ज्येष्ठेषु राजते तम् **(ब्रह्मणाम्)** महतां धनानाम् **(ब्रह्मणः)** धनस्य **(पते)** स्वामिन् **(आ)** **(नः)** अस्माकम् **(शृण्वन्)** **(ऊतिभिः)** रक्षाभिः **(सीद)** तिष्ठ **(सादनम्)** सीदन्ति यस्मिँस्तत्॥ १॥

अन्वयः-हे ब्रह्मणां ब्रह्मणस्पते! वयं गणानां गणपतिं कवीनां कविमुपमश्रवस्तमं ज्येष्ठराजं त्वा परमेश्वरमाहवामहे त्वमूतिभिश्शृण्वन्नः सादनं सीद॥ १॥

भावार्थः-हे मनुष्या! यथा वयं सर्वेषामधिपतिं सर्वज्ञं सर्वराजमन्तर्यामिनं परमेश्वरमुपास्महे तथा यूयमप्युपाध्वम्॥ १॥

पदार्थः-हे **(ब्रह्मणाम्)** बड़े-बड़े धनों में **(ब्रह्मणस्पते)** धन के स्वामी! हम लोग **(गणानाम्)** गणनीय मुख्य पदार्थों में **(गणपतिम्)** मुख्य पदार्थों के स्वामी **(कवीनाम्)** उत्तम बुद्धिवालों में **(कविम्)** सर्वज्ञ और **(उपमश्रवस्तमम्)** उपमा जिससे दी जाती ऐसे अत्यन्त श्रवणरूप **(ज्येष्ठराजम्)** ज्येष्ठ अर्थात् अत्यन्त प्रशंसित पदार्थों में प्रकाशमान **(त्वा)** आप परमेश्वर को **(आ, हवामहे)** अच्छे प्रकार स्वीकार करते हैं, आप **(ऊतिभिः)** रक्षाओं से **(शृण्वन्)** सुनते हुए **(नः)** हम लोगों के **(सादनम्)** उस स्थान को कि जिसमें स्थिर होते हैं **(सीद)** स्थिर हूजिये॥ १॥

भावार्थः-हे मनुष्यो! जैसे हम लोग सबके अधिपति, सर्वज्ञ, सर्वराज, अन्तर्यामि परमेश्वर की उपासना करते हैं, वैसे तुम भी उपासना करो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः।
उस्राइव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि॥२॥

देवाः। चित्। ते। असुर्य। प्रऽचेतसः। बृहस्पते। यज्ञियम्। भागम्। आनशुः। उस्राःऽइव। सूर्यः। ज्योतिषा। महः। विश्वेषाम्। इत्। जनिता। ब्रह्मणाम्। असि॥२॥

पदार्थः-(**देवाः**) विद्वांसः (**चित्**) अपि (**ते**) तव (**असुर्य**) असुरेषु प्रवासरहितेषु साधो (**प्रचेतसः**) प्रकृष्टं चेतो ज्ञानं यस्य तस्य (**बृहस्पते**) बृहत्या वाचः पालकः (**यज्ञियम्**) यज्ञसम्बन्धिनम् (**भागम्**) (**आनशुः**) प्राप्नुवन्ति (**उस्राइव**) किरणानिव (**सूर्य्यः**) सविता (**ज्योतिषा**) प्रकाशेन (**महः**) महताम् (**विश्वेषाम्**) सर्वेषां लोकानाम् (**इत्**) एव (**जनिता**) उत्पादकः (**ब्रह्मणाम्**) धनानाम् (**असि**)॥२॥

अन्वयः-हे असुर्य्य बृहस्पते! यस्य प्रचेतसस्ते यज्ञियं भागं सूर्य्यो ज्योतिषोस्राइव देवाश्चिदानशुर्यस्त्वं महो विश्वेषां ब्रह्मणां जनितेदसि सोऽस्माभिः सततं सेवनीयः॥२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यूयं प्राणस्य प्राणः सूर्य्यवत्स्वप्रकाशः महतां महान् परमेश्वरोऽस्ति तमेव भजत॥२॥

पदार्थः-हे (**असुर्य्य**) प्रवास रहितों में साधु (**बृहस्पते**) बड़ी वाणी के पति! जिस (**प्रचेतसः**) प्रकृष्ट ज्ञानवाले (**ते**) आपके (**यज्ञियम्**) यज्ञसम्बन्धि (**भागम्**) भाग को (**सूर्य्यः**) सूर्य्य (**ज्योतिषा**) प्रकाश से (**उस्राइव**) किरणों के समान (**देवाः**) विद्वान् जन (**चित्**) निश्चय से (**आनशुः**) प्राप्त होते हैं, जो आप (**महः**) महात्मा जन (**विश्वेषाम्**) समस्त लोक और (**ब्रह्मणाम्**) धनों के (**जनिता**) उत्पादन करनेवाले (**इत्**) ही (**असि**) हैं सो हम लोगों को सदा सेवन करने योग्य हैं॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम जो प्राण का प्राण, सूर्य्य के समान आप ही प्रकाशमान और महात्माओं में महात्मा परमेश्वर है, उसी को सेओ॥२॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि।
बृहस्पते भीममभिमित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम्॥ ३॥

आ। विऽबाध्य। परिऽरपः। तमांसि। च। ज्योतिष्मन्तम्। रथम्। ऋतस्य। तिष्ठसि। बृहस्पते। भीमम्। अमित्रऽदम्भनम्। रक्षःऽहनम्। गोत्रऽभिदम्। स्वःऽविदम्॥ ३॥

पदार्थः-(आ) समन्तात् **(विबाध्य)** निःसार्य्य **(परिरापः)** सर्वतः पापात्मकं कर्म्म **(तमांसि)** रात्रीः **(च)** **(ज्योतिष्मन्तम्)** बहुप्रकाशम् **(रथम्)** रमणीयस्वरूपम् **(ऋतस्य)** सत्यस्य कारणस्य मध्ये **(तिष्ठसि)** **(बृहस्पते)** महतां पालक **(भीमम्)** भयङ्करम् **(अमित्रदम्भनम्)** शत्रुहिंसनम् **(रक्षोहणम्)** रक्षसां दुष्टानां हन्तारम् **(गोत्रभिदम्)** मेघस्य भेत्तारम् **(स्वर्विदम्)** स्वरुदकं विन्दन्ति येन तम्॥ ३॥

अन्वयः-हे बृहस्पते विद्वन्! यथा सूर्य्यः परिरापस्तमांसि च विबाध्य प्रवर्त्तते तथार्त्तस्य मध्ये वर्त्तमानं भीममभिमित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदं ज्योतिष्मन्तं रथमातिष्ठसि स त्वं सुखमाप्नोसि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवद्विद्याप्रकाशेनाऽविद्याऽन्धकारं निवर्त्य कारणमारभ्य कार्य्यं जगत् यथावज्जानन्ति ते विद्वांसो भवन्ति॥ ३॥

पदार्थः-हे **(बृहस्पते)** बड़ों की रक्षा करनेवाले विद्वान्! जैसे सूर्य्य **(परिरापः)** सब ओर से पाप भरे हुए कर्म्म **(च)** और **(तमांसि)** रात्रियों को **(विबाध्य)** निकाल के प्रवृत्त होता, वैसे **(ऋतस्य)** सत्य कारण के बीच वर्त्तमान **(भीमम्)** भयङ्कर **(अमित्रदम्भनम्)** शत्रुहिंसन और **(रक्षोहणम्)** दुष्टों के मारने **(गोत्रभिदम्)** और मेघ के छिन्न-भिन्न करनेवाले **(स्वर्विदम्)** जिससे उदक को प्राप्त होते **(ज्योतिष्मन्तम्)** जो बहुत प्रकाशमान **(रथम्)** रमणीयस्वरूप उसको **(आ, तिष्ठसि)** अच्छे प्रकार स्थित होते हो, सो आप सुख को प्राप्त होते हो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य्य के समान विद्याप्रकाश से अविद्यान्धकार को निकाल कर कारण को लेकर कार्य्यजगत् को यथावत् जानते हैं, वे विद्वान् होते हैं॥ ३॥

अथ विद्वदीश्वरविषयमाह॥

अब विद्वान् और ईश्वर के विषय को अगले मन्त्र में कहा है॥

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत्।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम्॥ ४॥

सुनीतिऽभिः। नयसि। त्रायसे। जनम्। यः। तुभ्यम्। दाशात्। न। तम्। अंहः। अश्नवत्। ब्रह्मऽद्विषः। तपनः। मन्युऽमीः। असि। बृहस्पते। महि। तत्। ते। महिऽत्वनम्॥४॥

पदार्थः-(सुनीतिभिः) सुष्ठु धर्म्मैर्न्यायमार्गैः **(नयसि) (त्रायसे) (जनम्)** जिज्ञासुं मनुष्यम् **(यः) (तुभ्यम्) (दाशात्)** ददति **(न)** निषेधे **(तम्) (अंहः)** पापम् **(अश्नवत्)** प्राप्नोति **(ब्रह्मद्विषः)** वेदेश्वरविरोधिनः **(तपनः)** तापकृत् **(मन्युमीः)** यो मन्युं मिनोति सः **(असि)** भवसि **(बृहस्पते)** बृहतां पालकेश्वर विद्वन् वा **(महि)** महत् **(तत्) (ते)** तव **(महित्वनम्)** महिमा॥४॥

अन्वयः-हे बृहस्पते! त्वं सुनीतिभिर्यं जनं नयसि त्रायसे यस्तुभ्यमात्मा दाशात्तमंहो नाश्नवद् यस्त्वं ब्रह्मद्विष उपरि तपनो मन्युमीरसि तस्य ते तव तन्महित्वनं वयं प्रशंसेम॥४॥

भावार्थः-ये मनुष्या सत्यभावेन जगदीश्वरस्याप्तस्य विदुषो वा [सम्बन्धे] स्वात्मानं चालयन्ति तान् जगदीश्वरो धार्मिको विद्वान् वा पापाचरणान्निवर्त्य शुभगुणकर्मस्वभावैर्युक्तान् कृत्वा पवित्रान् जनयति। ये च वेदेश्वरद्विषः पापाचारास्तानधोगतिं नयति। अयमेवानयोरुपासनासङ्गाभ्यां लाभो जायते॥४॥

पदार्थः-हे **(बृहस्पते)** बड़ों की पालना करनेवाले ईश्वर वा विद्वान्! आप **(सुनीतिभिः)** उत्तम धर्मवाले न्याय मार्गों से जिस **(जनम्)** जन को **(नयसि)** पहुँचाते हो और **(त्रायसे)** रक्षा करते हो **(यः)** जो **(तुभ्यम्)** तुम्हारे लिये आत्मा **(दाशात्)** देता है **(तम्)** उसको **(अंहः)** पाप **(न)** नहीं **(अश्नवत्)** प्राप्त होता, जो तुम **(ब्रह्मद्विषः)** वेद और ईश्वर के विरोधियों पर **(तपनः)** ताप करनेवाली **(मन्युमीः)** क्रोध का मान करनेवाले **(असि)** हैं **(ते)** आपके **(तत्)** उस **(महित्वनम्)** बड़प्पन की हम लोग प्रशंसा करें॥४॥

भावार्थः-जो मनुष्य सत्यभाव से जगदीश्वर वा आप्त विद्वान् के सम्बन्ध में अपने आत्मा को चलाते हैं, उनको जगदीश्वर वा धार्मिक विद्वान् पापाचरण से निवृत्त कर शुभ गुण, कर्म, स्वभावों से युक्त कर पवित्र उत्पन्न करता है। और जो वेद वा ईश्वर के विरोधी पापाचारी हैं, उनको अधोगति को पहुंचाता है, यही इन दोनों की उपासना और सङ्ग से लाभ होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः।
विश्वा इदस्माद् ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते॥५॥२९॥

न। तम्। अंहः। न। दुःऽइतम्। कुतः। चन। न। अरातयः। तितिरुः। न। द्व्याविनः। विश्वाः। इत्। अस्मात्। ध्वरसः। वि। बाधसे। यम्। सुऽगोपाः। रक्षसि। ब्रह्मणः। पते॥५॥

पदार्थः-(न) (तम्) (अंहः) अपराधः **(न) (दुरितम्)** दुष्टाचरणम् **(कुतः)** कस्मात् **(चन)** अपि **(न) (अरातयः)** शत्रवः **(तितिरुः)** तरेयुः **(न) (द्व्याविनः)** उभयपक्षाश्रिताः **(विश्वाः)** सर्वाः **(इत्)** एव **(अस्मात्) (ध्वरसः)** हिंसाः **(वि) (बाधसे)** निवारयसि **(यम्) (सुगोपाः)** सुष्ठु रक्षकः **(रक्षसि) (ब्रह्मणः)** बृहतः **(पते)** पालक॥५॥

अन्वयः-हे ब्रह्मणस्पते सार्वभौम राजन् वा! सुगोपास्त्वं यं रक्षस्यस्माद्विश्वा ध्वरसो विबाधसे तमित्कुतश्चनांऽहो न दुरितं नारातयो न द्व्याविनस्तितिरुः॥५॥

भावार्थः-ये परमेश्वराऽऽज्ञामाप्तविदुषां सङ्गं स्वात्मपवित्रतामाचरन्ति ते सर्वस्मात् पापाचरणाद् वियुज्य धार्मिका भूत्वा सततं सुखमश्नुवते॥५॥

पदार्थः-हे **(ब्रह्मणस्पते)** बड़ों के पालना करनेवाले वा चक्रवर्ती सर्व भूमिपति राजन्! जो **(सुगोपाः)** सुन्दर रक्षा करनेवाले आप **(यम्)** जिसकी **(रक्षसि)** रक्षा करते **(अस्मात्)** इससे **(विश्वाः)** सब **(ध्वरसः)** हिंसाओं को **(वि, बाधसे)** निवृत्त करते हो **(इत्)** उसी को **(कुतश्चन)** कहीं से भी **(अंहः)** अपराध **(न)** न **(दुरितम्)** दुष्टाचार **(न)** न **(अरातयः)** शत्रुजन **(न)** न **(द्व्याविनः)** दोनों पक्षों में आश्रित जन **(तितिरुः)** तरें॥५॥

भावार्थः-जो परमेश्वर की आज्ञा वा आप्त विद्वानों के सङ्ग का वा अपनी आत्मा की पवित्रता का आचरण करते हैं, वे सब पाप आचरण से अलग हो और धार्मिक होकर निरन्तर सुख को व्याप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे।
बृहस्पते यो नो अभि ह्वरो दुधे स्वा तं मर्मर्तु दुच्छुना हरस्वती॥६॥

त्वम्। नः। गोपाः। पथिऽकृत्। विऽचक्षणः। तव। व्रताय। मतिऽभिः। जरामहे। बृहस्पते। यः। नः। अभि। ह्वरः। दुधे। स्वा। तम्। मर्मर्तु। दुच्छुना। हरस्वती॥६॥

पदार्थः-(त्वम्) (नः) अस्माकम् **(गोपाः)** रक्षकः **(पथिकृत्)** सकलसुकृतमार्गप्रचारकः **(विचक्षणः)** यो विविधान् सत्योपदेशान् चष्टे **(तव) (व्रताय)** शीलाय **(मतिभिः)** मेधाभिः सह

(जरामहे) स्तूमहे **(बृहस्पते)** बृहत्सत्यप्रचारक **(यः)** **(नः)** अस्माकम् **(अभि)** **(ह्वरः)** क्रोधः। **ह्वर इति क्रोधनामसु पठितम्।** (निघं०२.१३)। **(दधे)** दधाति **(स्वा)** स्वकीया **(तम्)** **(मर्मर्त्तु)** भृशं प्राप्नोतु **(दुच्छुना)** दुष्टेन शुनेव **(हरस्वती)** बहुहरणशीला सेना॥६॥

अन्वयः-हे बृहस्पते! यो नोऽस्माकमुपरि ह्वरः क्रियते स दुच्छुनेव तं मर्म्मर्त्तु या स्वा हरस्वती तमभि दधे दधातु तया यो नो गोपाः पथिकृद्विचक्षणस्त्वमसि तदस्य तव व्रताय मतिभिः सह वयं जरामहे॥६॥

भावार्थः-येषां मार्गप्रकाशक उपदेशकः परमात्मा विद्वान् भवति ये सत्पुरुषसङ्गप्रिया वर्त्तन्ते तान् क्रोधाद्या दुर्गुणा नाप्नुवन्ति॥६॥

पदार्थः-हे **(बृहस्पते)** बहुत सत्य का प्रचार करनेवाले! **(यः)** जो **(नः)** हम लोगों के ऊपर **(ह्वरः)** क्रोध किया जाता वह **(दुच्छुना)** दुष्ट कुत्ते से जैसे वैसे **(तम्)** उसको **(मर्मर्त्तु)** निरन्तर प्राप्त हो जो **(स्वा)** अपनी **(हरस्वती)** बहुतों को हरने का शील रखनेवाली सेना उस विषय को **(अभि, दधे)** सब ओर से धारण करे, उस सेना से जो **(नः)** हम लोगों के **(गोपाः)** रक्षा करने **(पथिकृत्)** सकल सुकृत मार्ग का प्रचार करने वा **(विचक्षणः)** विविध सत्योपदेश करनेवाले **(त्वम्)** आप हैं, उन **(तव)** आपके **(व्रताय)** शील के लिये **(मतिभिः)** मेधाओं के साथ हम लोग **(जरामहे)** स्तुति करते हैं॥६॥

भावार्थः-जिनका मार्ग प्रकाश करने और उपदेश करनेवाला परमात्मा विद्वान् होता है, जो सत्पुरुषों के सङ्ग प्रीति करनेवाले वर्त्तमान हैं, उनको क्रोध आदि दुर्गुण नहीं प्राप्त होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि॥७॥

उत। वा। यः। नः। मर्चयात्। अनागसः। अरातिऽवा। मर्तः। सानुकः। वृकः। बृहस्पते। अप। तम्। वर्तय। पथः। सुऽगम्। नः। अस्यै। देवऽवीतये। कृधि॥७॥

पदार्थः-(**उत**) अपि (**वा**) पक्षान्तरे (**यः**) जगदीश्वरो विद्वान् वा (**नः**) अस्मान् (**मर्चयात्**) सुमार्गे नयेत् (**अनागसः**) अनपराधिनः (**अरातीवा**) योऽरातीन् शत्रून् वनति संभजति (**मर्त्तः**) मनुष्यः (**सानुकः**) सानुगादिः (**वृकः**) स्तेनः (**बृहस्पते**) बृहतः पापाद्वियोजकः (**अप**) (**तम्**)

(वर्त्तय) दूरीकुरु। अत्रा**न्येषामपी**ति दीर्घः। **(पथः)** मार्गात् **(सुगम्)** सुष्ठु गच्छन्ति यस्मिन् मार्गे तम् **(नः)** अस्माकम् **(अस्यै)** प्रत्यक्षायै **(देववीतये)** देवेषु दिव्यगुणेषु व्याप्तये **(कृधि)** कुरु॥७॥

अन्वयः-हे बृहस्पते! यो नोऽनागसो पथो मर्चयादुत वा योऽरातीवा सानुको वृको मर्त्तो भवेत् तं पथोऽपवर्त्तय नोऽस्यै देववीतये सुगं कृधि॥७॥

भावार्थः-हे परमेश्वर! येऽस्मान् सुमार्गेण सुखं प्रापयन्ति तान् प्रापय। ये च दुष्पथं नयन्ति तान् वियोजय। कृपया शुद्धं सरलं धर्म्यं मार्गञ्च प्रापय॥७॥

पदार्थः-हे **(बृहस्पते)** बड़े पाप वियोग करनेवाले! **(यः)** जो **(नः)** हम लोगों को **(अनागसः)** अनपराधी **(पथः)** मार्ग से **(मर्चयात्)** जो सुमार्गयान उसमें प्राप्त करें **(उत वा)** अथवा जो **(अरातीवा)** शत्रुओं को अच्छे प्रकार सेवन करता **(सानुकः)** और अनुगामी के साथ वर्त्तमान **(वृकः)** चोर **(मर्त्तः)** मनुष्य हो **(तम्)** उसको उस मार्ग से **(अप, वर्त्तय)** दूर करो **(नः)** हमारी **(अस्यै)** इस **(देववीतये)** दिव्य गुणों में व्याप्ति के लिये **(सुगम्)** सुगम मार्ग **(कृधि)** करो॥७॥

भावार्थः-हे परमेश्वर! जो हम लोगों को सुमार्ग से सुख को प्राप्त कराते उनको पहुँचाइये, और जो दुष्पथ को पहुंचाते हैं, उनको अलग कीजिये, तथा कृपा से शुद्ध सरल धर्मयुक्त मार्ग को प्राप्त कीजिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्रा॒तार॑ं त्वा त॒नूना॑ं हवाम॒हेऽव॑स्पर्तरधिव॒क्तार॑मस्म॒युम्।
बृह॑स्पते देव॒निदो॒ नि ब॑र्हय॒ मा दु॒रेवा॒ उत्त॑रं सु॒म्नमु॒न्नश॑न्॥८॥

त्रा॒तार॑म्। त्वा॒। त॒नूना॑म्। ह॒वा॒म॒हे॒। अव॑ऽस्पर्तः। अ॒धि॒ऽव॒क्तार॑म्। अ॒स्म॒ऽयुम्। बृह॑स्पते। दे॒व॒ऽनिद॑ः। नि। ब॒र्ह॒य॒। मा। दुः॒ऽएवा॑। उत्ऽत॑रम्। सु॒म्नम्। उत्। न॒श॒न्॥८॥

पदार्थः-**(त्रातारम्)** रक्षितारम् **(त्वा)** त्वां जगदीश्वरं सभेशं वा **(तनूनाम्)** विस्तृतसुखसाधकानां शरीरादीनां पदार्थानां वा **(हवामहे)** स्वीकुर्महे **(अवस्पर्त्तः)** अवसा रक्षणेन दुःखात्पारकर्त्तः **(अधिवक्तारम्)** सर्वेषामुपर्युपदेशकम् **(अस्मयुम्)** अस्मान् कामयमानम् **(बृहस्पते)** बृहतां रक्षकः **(देवनिदः)** ये देवान् विदुषो दिव्यगुणान् वा निन्दन्ति तान् **(नि)** **(बर्हय)**

नितरामुत्पाटय **(मा)** **(दुरेवाः)** दुराचरणाः **(उत्तरम्)** अर्वाक्कालीनम् **(सुम्नम्)** सुखम् **(उत्)** **(नशन्)** नाशयेयुः॥८॥

अन्वयः-हे अवस्पर्त्तर्बृहस्पते! वयं यं तनूनां त्रातारमस्मयुमधिवक्तारं त्वा त्वां हवामहे स त्वं देवनिदो निबर्हय यतो दुरेवा उत्तरं सुम्नं मोन्नशन्॥८॥

भावार्थः-ये स्वेषामुपदेष्टारं रक्षितारञ्च परमात्मानमाप्तं कुर्वन्ति ते सर्वतो वर्द्धन्ते। ये विद्वदीश्वरवेदनिन्दका भविष्यदानन्दविच्छेदका भवेयुस्तान् सर्वतो निवारयेयुः॥८॥

पदार्थः-हे **(अवस्पर्त्तः)** रक्षा कर दुःख से पार करने और **(बृहस्पते)** बड़ों की रक्षा करनेवाले! हम लोग जिस **(तनूनाम्)** विस्तृत सुख साधक शरीरादिकों वा अन्य पदार्थों के **(त्रातारम्)** रक्षा करने वा **(अस्मयुम्)** हम लोगों की कामना करने वा **(अधिवक्तारम्)** सबके ऊपर उपदेश करनेवाले **(त्वा)** आप जगदीश्वर वा सभापति को **(हवामहे)** स्वीकार करते हैं, सो आप **(देवनिदः)** जो विद्वान् वा दिव्य गुणों की निन्दा करते उनको **(नि, बर्हय)** निरन्तर छिन्न-भिन्न करो। जिससे **(दुरेवाः)** दुष्टाचरण करनेवाले **(उत्तरम्)** उसके उपरान्त **(सुम्नम्)** सुख को **(मा)** मत **(उत्, नशन्)** नष्ट करावें॥८॥

भावार्थः-जो अपना उपदेश करने और रक्षा करनेवाला परमात्मा वा आप्त विद्वान् मानते हैं, वे सब ओर से बढ़ते हैं। जो विद्वान्, ईश्वर और वेद की निन्दा, भविष्यत् का आनन्द नष्ट करनेवाले हों, उनको सब ओर से निवृत्त करावें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वया॑ व॒यं सु॒वृधा॑ ब्रह्मणस्पते स्पा॒र्हा वसु॑ मनु॒ष्या द॑दीमहि।
या नो॑ दू॒रे त॒ळित॒ो या अरा॑तयो॒ऽभि सन्ति॑ ज॒म्भया॒ ता अ॑न॒प्नसः॑॥९॥

त्वया॑। व॒यम्। सु॒ऽवृधा॑। ब्र॒ह्म॒णः॒। प॒ते॒। स्पा॒र्हा। वसु॑। म॒नु॒ष्याः॑। आ। द॒दी॒म॒हि॒। याः। नः॒। दू॒रे। त॒ळितः॑। याः। अरा॑तयः। अ॒भि। सन्ति॑। ज॒म्भय॑। ताः। अ॒न॒प्नसः॑॥९॥

पदार्थः-**(त्वया)** सह **(वयम्)** **(सुवृधा)** यः सुष्ठु वर्द्धयति तेन **(ब्रह्मणः)** ब्रह्माण्डस्य राज्यस्य वा **(पते)** पालक **(स्पार्हा)** अभिकाङ्क्षितुमर्हेण **(वसु)** विज्ञानं धनं वा **(मनुष्याः)** मननशीलाः **(ददीमहि)** दद्याम **(याः)** **(नः)** अस्माकम् **(दूरे)** **(तळितः)** विद्युतः **(याः)** **(अरातयः)** अदानरीतयः **(अभि)** सर्वतः **(सन्ति)** **(जम्भय)** विनाशय। अत्राऽन्येषामपीति दीर्घः। **(ताः)** **(अनप्नसः)** अविद्यमानमप्नः कर्म्म यासान्ताः क्रियाः॥९॥

अन्वयः-हे ब्रह्मणस्पते शिक्षक! स्पार्हा सुवृधा त्वया सह वयं मनुष्या वसु ददीमहि। नो दूरे यास्तळितो याश्चानप्नसोऽरातयः सन्ति ता अभि जम्भय॥९॥

भावार्थः-यदि विदुषामुपदेशं न गृह्णीयुस्तर्हि मानवा दानशीला न भवेयुः। येऽकर्म्मठाः कृपणाः पुरुषाः स्त्रियश्च सन्ति ता विद्युद्वत् पुरुषार्थनीयाः॥९॥

पदार्थः-(ब्रह्मणः) ब्रह्माण्ड व राज्य की **(पते)** पालना करनेवाले शिक्षक! **(स्पार्हा)** अभिकांक्षा के योग्य **(सुवृधा)** जो सुन्दर बढ़ावा देते उन **(त्वया)** तुम्हारे साथ **(वयम्)** हम **(मनुष्याः)** मनुष्य **(वसु)** विज्ञान वा धन **(ददीमहि)** देवें **(नः)** हमारे **(दूरे)** दूर [वा समीप] देश में **(याः)** जो **(तळितः)** बिजुली[५] और **(याः)** जो **(अनप्नसः)** अविद्यमान कर्मवाली क्रिया **(अरातयः)** न देने की रीतियां **(सन्ति)** हैं **(ताः)** उनको **(अभि, जम्भय)** सब ओर से विनाशिये॥९॥

भावार्थः-यदि विद्वानों के उपदेश को न ग्रहण करें तो मनुष्य दानशील न हों, जो अकर्मठ अर्थात् कर्म नहीं करते कृपण पुरुष और स्त्रीजन हैं, वे बिजुली के समान पुरुषार्थयुक्त करने चाहिये॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वया॑ व॒यमु॑त्त॒मं धी॑महे॒ वयो॒ बृह॑स्पते॒ पप्रि॑णा॒ सस्मि॑ना यु॒जा।
मा नो॑ दु॒:शंसो॑ अभिदि॒प्सुरीश॑त॒ प्र सु॒शंसा॑ म॒तिभि॑स्तारिषीमहि॥१०॥३०॥

त्वया॑। व॒यम्। उ॒त्ऽत॒मम्। धी॒म॒हे॒। वयः॑। बृह॑स्पते। पप्रि॑णा। सस्मि॑ना। यु॒जा। मा। नः॒। दु॒ःऽशंसः॑। अ॒भि॒ऽदि॒प्सुः॒। ईश॑त। प्र। सु॒ऽशंसा॑ः। म॒तिऽभिः॑। ता॒रि॒षी॒म॒हि॒॥१०॥

पदार्थः-(त्वया) **(वयम्)** **(उत्तमम्)** श्रेष्ठम् **(धीमहे)** दधीमहि। अत्र **छन्दस्युभयथे**त्यार्द्धधातुकत्वं **बहुलं छन्दसी**ति शपो लोपश्च। **(वयः)** जीवनम् **(बृहस्पते)** विद्वन् **(पप्रिणा)** परिपूर्णेन **(सस्मिना)** शुचिना **(युजा)** युक्तेन **(मा)** **(नः)** अस्माकम् **(दुःशंसः)** दुष्टः शंसो यस्य स चोरः **(अभिदिप्सुः)** अभितो दम्भमिच्छुः **(ईशत)** समर्थो भवेत् **(प्र)** **(सुशंसाः)**

---

५. (= हिंसक क्रियाएँ ॥ सं.॥

शोभनाः शंसः स्तुतिर्येषान्ते **(मतिभिः)** प्रज्ञाभिः **(तारिषीमहि)** तरेम। अत्र व्यत्ययेनात्मनेपदम्॥१०॥

अन्वयः-हे बृहस्पते! पप्रिणा सस्निना युजा त्वया सह वर्त्तमाना वयमुत्तमं वयो धीमहे यतो नोऽभिदिप्सुर्दुःशंसो नोऽस्मान्मेशत मतिभिः सह वर्त्तमानाः सुशंसा वयं प्रतारिषीमहि॥१०॥

भावार्थः-ये पूर्णविद्यानां योगिनां शुद्धात्मनां सङ्गं कुर्वन्ति ते दीर्घजीविनो भवन्ति, ये विद्वत्सहचरिता भवन्ति तेभ्यो दुःखं दातुं केऽपि न शक्नुवन्ति॥१०॥

पदार्थः-हे **(बृहस्पते)** विद्वान्! **(पप्रिणा)** परिपूर्ण **(सस्निना)** शुद्ध पवित्र पदार्थ **(युजा)** युक्त **(त्वया)** तुम्हारे साथ वर्त्तमान **(वयम्)** हम लोग **(उत्तमम्)** श्रेष्ठ **(वयः)** जीवन को **(धीमहे)** धारण करें जिससे **(अभिदिप्सुः)** सब ओर से कपट की इच्छा करनेवाला **(दुशंसः)** जिसकी दुष्ट कहावत प्रसिद्ध वह चोर **(नः)** हम लोगों का **(मा, ईशत)** ईश्वर न हो और **(मतिभिः)** प्रज्ञाओं के साथ वर्त्तमान **(सुशंसा)** जिनकी सुन्दर स्तुति ऐसे हम लोग **(प्र, तारिषीमहि)** उत्तमता से तरें, सर्व विषयों के पार पहुँचें॥१०॥

भावार्थः-जो पूर्ण विद्यावाले योगी शुद्धात्मा जनों का सङ्ग करते हैं, वे दीर्घजीवी होते हैं। जो विद्वानों के सहचारी होते हैं, उनके लिये दुःख देने को कोई भी समर्थ नहीं हो सकते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः॥११॥

अननुऽदः। वृषभः। जग्मिः। आऽहवम्। निःऽतप्ता। शत्रुम्। पृतनासु। ससहिः। असि। सत्यः। ऋणऽयाः। ब्रह्मणः। पते। उग्रस्य। चित्। दमिता। वीळुऽहर्षिणः॥११॥

पदार्थः-**(अनानुदः)** येऽनुददति तेऽनुदा न विद्यन्तेऽनुदा यस्य सः **(वृषभः)** श्रेष्ठः **(जग्मिः)** गन्ता **(आहवम्)** संग्रामम् **(निष्टप्ता)** नितरां सन्तापप्रदः **(शत्रुम्)** शातयितारम् **(पृतनासु)** वीराणां सेनासु **(सासहिः)** भृशं सोढा **(असि)** **(सत्यः)** सत्सु साधुः **(ऋणयाः)** य ऋणं याति प्राप्नोति सः **(ब्रह्मणः)** वेदस्य **(पते)** पालयितः **(उग्रस्य)** तीव्रस्य **(चित्)** अपि **(दमिता)** दमनकर्त्ता **(वीळुहर्षिणः)** बलेन बहु हर्षो विद्यते यस्य तस्य॥११॥

अन्वयः-हे ब्रह्मणस्पते! त्वं यतोऽनानुदो वृषभ आहवं जग्मिः पृतनासु शत्रुं निष्टप्ता सासहिर्ऋणयाः सत्यो वीळुहर्षिण उग्रस्य चिद्दमितासि तस्मात् प्रशस्यो भवसि॥११॥

भावार्थः-ये दातव्यं तत्क्षणं ददति गन्तव्यं गच्छन्ति प्राप्तव्यं प्राप्नुवन्ति दण्डनीयं दण्डयन्ति, ते सत्यं ग्रहीतुं शक्नुवन्ति॥११॥

पदार्थः-हे **(ब्रह्मणस्पते)** वेद के पालनेवाले! आप जिससे **(अनानुदः)** अनानुद अर्थात् जो पीछे देते हैं, वे जिसके नहीं विद्यमान वह **(वृषभः)** श्रेष्ठ जन **(आहवम्)** संग्राम को **(जग्मिः)** जानेवाले **(पृतनासु)** वीरों की सेनाओं में **(शत्रुम्)** काटने, दुःख देनेवाले वैरी को **(निष्टप्ता)** निरन्तर सन्ताप देने **(सासहिः)** निरन्तर सहने **(ऋणयाः)** और ऋण को प्राप्त होनवाले **(सत्यः)** सज्जनों में साधु **(वीळुहर्षिणः)** जिसको बल से बहुत हर्ष विद्यमान **(उग्रस्य)** तीव्र को **(चित्)** ही **(दमिता)** दमन करनेवाले **(असि)** हैं, उससे प्रशंसनीय होते हैं॥११॥

भावार्थः-जो देने योग्य पदार्थ को शीघ्र देते, जाने योग्य स्थान को जाते, पाने योग्य पदार्थ को पाते और दण्ड देने योग्य को दण्ड देते हैं, वे सत्य ग्रहण कर सकते हैं॥११॥

अथ राजविषयमाह॥

अब राज विषय को अगले मन्त्र में कहा है॥

अदे॑वेन॒ मन॑सा॒ यो रि॒॑ष॒ण्यति॑ शा॒सामु॒ग्रो मन्य॑मानो॒ जिघां॑सति।
बृह॑स्पते॒ मा प्रण॑क्तस्य॑ नो व॒धो नि क॑र्म म॒न्युं दु॒रेव॑स्य॒ शर्ध॑तः॥१२॥

अदे॑वेन। मन॑सा। यः। रि॒ष॒ण्यति॑। शा॒साम्। उ॒ग्रः। मन्य॑मानः। जिघां॑सति। बृह॑स्पते। मा। प्रण॑क्। तस्य॑। नः॒। व॒धः। नि। क॒र्म॒। म॒न्युम्। दु॒ःऽएव॑स्य। शर्ध॑तः॥१२॥

पदार्थः-**(अदेवेन)** अशुद्धेन **(मनसा)** **(यः)** **(रिषण्यति)** आत्मना हिंसितुमिच्छति **(शासाम्)** शासनकर्त्रीणाम् **(उग्रः)** भयङ्करः **(मन्यमानः)** अभिमानी **(जिघांसति)** हिंसितुमिच्छति **(बृहस्पते)** बृहतो राज्यस्य पालक **(मा)** **(प्रणक्)** नष्टो भवेत् **(तस्य)** **(नः)** अस्माकम् **(वधः)** **(नि)** **(कर्म)** **(मन्युम्)** क्रोधम् **(दुरेवस्य)** दुःखेन प्राप्तुं योग्यस्य **(शर्द्धतः)** बलवतः॥१२॥

अन्वयः-हे बृहस्पते! यः शासामुग्रो मन्यमानो देवेन मनसा रिषण्यति जिघांसति तस्य मन्युं शर्द्धतो दुरेवस्य वधो मा प्रणक् नोऽस्माकं कर्म मा नि प्रणक्॥१२॥

भावार्थः-ये राज्यं शासन्ति ते दुर्बुद्धीन् हिंसकान् वशं नयेयुः। यदि वशं न गच्छेयुस्तर्ह्येतान् प्रसह्य हन्युर्येन न्यायप्रणाशो न स्यात्॥१२॥

पदार्थः-हे **(बृहस्पते)** बड़े राज्य के पालनेवाले! **(यः)** जो **(शासाम्)** शासना करनेवालियों का **(उग्रः)** भयङ्कर **(मन्यमानः)** अभिमानी **(अदेवेन)** अशुद्ध **(मनसा)** मन से **(रिषण्यति)** हिंसा

करने को अपने से चाहता है वा (**जिघांसति**) साधारण मारने की इच्छा करता है (**तस्य**) उसके (**मन्युम्**) क्रोध को (**शर्द्धतः**) बलवत्ता से सहते हुए (**दुरेवस्य**) दुःख से प्राप्त होने योग्य का (**वधः**) नाश (**मा**) मत (**प्रणक्**) नष्ट हो (**नः**) हमारा (**कर्म**) कर्म (**नि**) मत निरन्तर नष्ट हो॥१२॥

भावार्थः-जो राज्यशासन करते हैं वे निर्बुद्धि हिंसकों को वश करें। यदि वश में न आवें तो इनको बलात्कार **[**पूर्वक**]** मारें, जिससे न्याय का प्रणाश न हो॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भरेषु॒ हव्यो॒ नम॑सोप॒सद्यो॒ गन्ता॒ वाजे॑षु सनि॒ता॒ धनं॑धनम्।
विश्वा॒ इद॒र्यो अ॑भिदिप्स्वो॒३॑ मृधो॒ बृह॒स्पति॒र्वि व॑वर्हा॒ र॒थाँ॑ इव॥१३॥

भरे॑षु। हव्यः॑। नम॑सा। उ॒प॒ऽस॒द्यः॑। गन्ता॑। वाजे॑षु। सनि॑ता। धनं॑ऽधनम्। विश्वाः॑। इत्। अ॒र्यः॑। अ॒भि॒ऽदि॒प्स्वः॑। मृधः॑। बृह॒स्पतिः॑। वि। व॒व॒र्ह॒। रथा॑न्ऽइव॥१३॥

पदार्थः-(**भरेषु**) पोषणेषु (**हव्यः**) आदातुमर्हः (**नमसा**) सत्कारेण (**उपसद्यः**) प्राप्तुं योग्यः (**गन्ता**) (**वाजेषु**) संग्रामेषु (**सनिता**) विभाजकः (**धनंधनम्**) (**विश्वाः**) सर्वाः (**इत्**) एव (**अर्य्यः**) स्वामी (**अभिदिप्स्वः**) अभितो दिप्सवो दम्भितुमिच्छवो यासु ताः (**मृधः**) संग्रामान् (**बृहस्पतिः**) पूज्यपालकः (**वि**) (**ववर्ह**) वर्द्धयति (**रथानिव**)॥१३॥

अन्वयः-यो हव्यो नमसोपसद्यो गन्ता सनिता बृहस्पतिरर्य्यो भरेषु वाजेषु धनंधनं ववर्ह रथानिव विश्वा इदभिदिप्स्वो मृधो विववर्ह स इद्राज्यं कर्त्तुमर्हति॥१३॥

भावार्थः-अत्रोपमालङ्कारः। ये गुणकर्मस्वभावैर्विजयमाना विमानादियानवत् सद्य ऐश्वर्यं प्राप्य सर्वेषु सत्कर्मसु विभज्य धनादिपदार्थान् प्रददति, ते न्यायाधीशा भवितुमर्हन्ति॥१३॥

पदार्थः-जो (**हव्यः**) ग्रहण करने और (**नमसा**) सत्कार से (**उपसद्यः**) प्राप्त होने योग्य तथा (**गन्ता**) गमन करने (**सनिता**) विभाग करने (**बृहस्पतिः**) और पूज्यों की रक्षा करनेवाला (**अर्य्यः**) स्वामी (**भरेषु**) पुष्टियों और (**वाजेषु**) संग्रामों में (**धनंधनम्**) धन-धन को बढ़ाता वा (**रथानिव**) रथों के समान (**विश्वाः**) समस्त (**इत्**) उन्हीं क्रियाओं को कि (**अभिदिप्स्वः**) जिनमें दम्भ की इच्छा करनेवाले विद्यमान तथा (**मृधः**) संग्रामों को (**वि, ववर्ह**) नहीं बढ़ाता है, वह राज्य करने को योग्य होता है॥१३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो गुण, कर्म और स्वभावों से विजय को प्राप्त होते हुए विमानादि यानों के तुल्य शीघ्र ऐश्वर्य को प्राप्त होकर समस्त सत्कर्मों में विभाग कर धनादि पदार्थों को देते हैं, वे न्यायाधीश होने के योग्य हैं॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम्।
आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय॥१४॥

तेजिष्ठया। तपनी। रक्षसः। तप। ये। त्वा। निदे। दधिरे। दृष्टवीर्यम्। आविः। तत्। कृष्व। यत्। असत्। ते। उक्थ्यम्। बृहस्पते। वि। परिऽरपः। अर्दय॥१४॥

पदार्थः-**(तेजिष्ठया)** अतिशयेन तेजस्विन्या **(तपनी)** सन्तापिनी **(रक्षसः)** दुष्टान् **(तप)** सन्तापय **(ये)** **(त्वा)** त्वाम् **(निदे)** निन्दायै **(दधिरे)** **(दृष्टवीर्य्यम्)** दृष्टं सम्प्रेक्षितं वीर्य्यं यस्य तम् **(आविः)** प्राकट्ये **(तत्)** **(कृष्व)** कुरुष्व **(यत्)** **(असत्)** भवेत् **(ते)** तव **(उक्थ्यम्)** वक्तुं योग्यम् **(बृहस्पते)** बृहतां पालक **(वि)** **(परिरापः)** परितो रपः पापं यस्य तम् **(अर्दय)** नाशय॥१४॥

अन्वयः-हे बृहस्पते! ये दृष्टवीर्यं त्वा निदे दधिरे तान् रक्षसो या तपन्यस्ति तया तेजिष्ठया त्वं तप यत्ते तवोक्थ्यमसत्तदाविष्कृष्व परिरापो व्यर्दय॥१४॥

भावार्थः-मनुष्यैर्निन्दकान् सर्वथा निवार्य स्तावकान् प्रसार्य सत्यविद्याः प्रकटीकार्याः॥१४॥

पदार्थः-हे **(बृहस्पते)** बड़ों की पालना करनेवाले! **(ये)** जो **(दृष्टवीर्यम्)** देखा है पराक्रम जिसका ऐसे **(त्वा)** तुझको **(निदे)** निन्दा के लिये **(दधिरे)** धारण करते, उन **(रक्षसः)** राक्षसों को जो **(तपनी)** तपानेवाली है, उस **(तेजिष्ठया)** अतीव तेजस्विनी से आप **(तप)** प्रताप दिखाओ **(यत्)** जो **(ते)** आपका **(उक्थ्यम्)** कहने योग्य प्रस्ताव **(असत्)** हो **(तत्)** उसको **(आविष्कृष्व)** प्रकट कीजिये **(परिरापः)** और सब ओर से पाप जिसके विद्यमान उसको **(वि, अर्दय)** विशेषता से नाशिये॥१४॥

भावार्थः-मनुष्यों को चाहिये कि निन्दकों को सर्वथा निवारि और स्तुति करनेवालों को बढ़ाय सत्य विद्याओं को प्रकाश करें॥१४॥

अथ विद्वद्विषयमाह॥

अब विद्वान् विषय को अगले मन्त्र में कहा है॥

बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥ १५॥ ३१॥

बृहस्पते। अति। यत्। अर्यः। अर्हात्। द्युऽमत्। विऽभाति। क्रतुऽमत्। जनेषु। यत्। दीदयत्। शवसा। ऋतऽप्रजात। तत्। अस्मासु। द्रविणम्। धेहि। चित्रम्॥ १५॥

पदार्थः-(बृहस्पते) बृहतां पते **(अति)** **(यत्)** **(अर्य्यः)** ईश्वरः **(अर्हात्)** योग्यात् **(द्युमत्)** प्रकाशवत् **(विभाति)** प्रकाशते **(क्रतुमत्)** प्रशंसितप्रज्ञायुक्तम् **(जनेषु)** **(यत्)** **(दीदयत्)** प्रकाशकम् **(शवसा)** बलेन **(ऋतप्रजात)** ऋते सत्याचरणे प्रकट **(तत्)** **(अस्मासु)** **(द्रविणम्)** धनम् **(धेहि)** **(चित्रम्)** अद्भुतम्॥ १५॥

अन्वयः-हे ऋतप्रजात बृहस्पते विद्वन्! यदर्य ईश्वरो जनेष्वर्हाद् द्युमत्क्रतुमच्छवसा यद्दीदयदतिविभाति तच्चित्रं द्रविणमस्मासु धेहि॥ १५॥

भावार्थः-मनुष्यैर्यद्यदीश्वरेण वेदद्वारा सत्यं प्रकाश्यते तत्तत्सर्वं प्रकाशनीयम्, यद्यत्स्वार्थमेषितव्यं तत्तदन्येभ्योऽप्येष्टव्यम्॥ १५॥

पदार्थः-हे **(ऋतप्रजात)** सत्याचरण में प्रकट **(बृहस्पते)** बड़ों के पालनेवाले विद्वान्! **(यत्)** जो **(अर्यः)** ईश्वर **(जनेषु)** मनुष्यों में **(अर्हात्)** योग्य व्यवहार से **(द्युमत्)** प्रकाशवान् **(क्रतुमत्)** प्रशंसित प्रज्ञायुक्त वा **(शवसा)** बल से **(यत्)** जो **(दीदयत्)** प्रकाशकर्त्ता **(अति, विभाति)** अतीव प्रकाशित होता है **(तत्)** उस **(चित्रम्)** अद्भुत **(द्रविणम्)** धन को **(अस्मासु)** हम लोगों में **(धेहि)** स्थापन कीजिये॥ १५॥

भावार्थः-मनुष्यों को चाहिये कि जो-जो ईश्वर ने वेदद्वारा सत्य का प्रकाश किया वह-वह सब प्रकाश करें, और जो-जो स्वार्थ चाहें वह-वह सबके लिये चाहें॥ १५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः॥ १६॥

मा। नः। स्तेनेभ्यः। ये। अभि। द्रुहः। पदे। निरामिणः। रिपवः। अन्नेषु। जगृधुः। आ। देवानाम्। ओहते। वि। व्रयः। हृदि। बृहस्पते। न। परः। साम्नः। विदुः॥ १६॥

पदार्थः-(मा) (नः) अस्माकम् **(स्तेनेभ्यः)** चोरेभ्यः **(ये) (अभि) (द्रुहः)** द्रोग्धारः **(पदे)** प्राप्तव्ये **(निरामिणः)** नित्यं रन्तुं शीलाः **(रिपवः)** शत्रवः **(अन्नेषु) (जागृधुः)** अभिकाङ्क्षेयुः **(आ) (देवानाम्)** विदुषाम् **(ओहते)** वितर्कयुक्ताय **(वि) (व्रयः)** वर्जनीयाः। **अयं बहुलमेतन्निदर्शनमिति** व्रीधातुर्ग्राह्यः। **(हृदि) (बृहस्पते)** चोरादिनिवारक **(न) (परः) (साम्नः)** सन्धेः **(विदुः)** जानीयुः॥१६॥

अन्वयः-हे बृहस्पते! येऽभिद्रुहो रिपवो पदे निरामिणोऽन्नेषु जागृधुस्तेभ्यः स्तेनेभ्यो नोऽस्माकं भयम्मास्तु। ये व्रयो देवानामोहते हृदि साम्नो विविदुस्तान् परस्त्वं न प्राप्नुयाः॥१६॥

भावार्थः-ये स्तेना द्रोहेण परपदार्थानिच्छन्ति ते किमपि धर्मन्न जानन्ति॥१६॥

पदार्थः-हे **(बृहस्पते)** चोर आदि के निवारनेवाले! **(ये)** जो **(अभिद्रुहः)** सब ओर से द्रोह करनेवाले **(रिपवः)** शत्रुजन **(पदे)** पाने योग्य स्थान में **(निरामिणः)** नित्य रमण करनेवाले **(अन्नेषु)** अन्नादि पदार्थों के निमित्त **(जागृधुः)** सब ओर से कांक्षा करें उन **(स्तेनेभ्यः)** चोरों से **(नः)** हमको भय **(मा)** न हो। जो **(व्रयः)** वर्जने योग्य जन **(देवानाम्)** विद्वानों के बीच **(आ, ओहते)** वितर्कयुक्त के लिये **(हृदि)** मन में **(साम्नः)** सन्धि से **(विविदुः)** जाने, उनको **(परः)** अत्यन्त श्रेष्ठ तू **(न)** न प्राप्त हो॥१६॥

भावार्थः-जो चोर द्रोह से पराये पदार्थों की चाहना करते हैं, वे कुछ भी धर्म नहीं जानते हैं॥१६॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि॥ १७॥

विश्वेभ्यः। हि। त्वा। भुवनेभ्यः। परि। त्वष्टा। अजनत्। साम्नःऽसाम्नः। कविः। सः। ऋणऽचित्। ऋणऽयाः। ब्रह्मणः। पतिः। द्रुहः। हन्ता। महः। ऋतस्य। धर्तरि॥ १७॥

पदार्थः-(विश्वेभ्यः) सर्वेभ्यः **(हि)** खलु **(त्वा)** त्वाम् **(भुवनेभ्यः)** लोकेभ्यः **(परि)** सर्वतः **(त्वष्टा)** निर्माता **(अजनत्)** जनयति **(साम्नःसाम्नः)** सामवेदस्य सामवेदस्य मध्ये **(कविः)** सर्वज्ञः **(सः) (ऋणचित्)** य ऋणं चिनोति सः **(ऋणया)** य ऋणं याति प्राप्नोति सः **(ब्रह्मणः)** ब्रह्माण्डस्य

(पतिः) पालकः **(द्रुहः)** द्वेष्टुः **(हन्ता)** नाशकः **(महः)** महतः **(ऋतस्य)** सत्यस्य कारणस्य **(धर्त्तरि)**॥१७॥

अन्वयः-हे विद्वन्! यः साम्नःसाम्नः कविस्त्वष्टा विश्वेभ्यो हि भुवनेभ्यो यं त्वा पर्यजनत्स ब्रह्मणस्पतिरस्ति तस्य मह ऋतस्य धर्त्तरि जगदीश्वरे स्थित ऋणचिदृणयास्त्वं द्रुहो हन्ता भव॥१७॥

भावार्थः-हे जीव! यः सर्वज्ञः सृष्टिकर्त्ता सकलभुवनैकस्वामी सर्वधर्त्ता जगदीश्वरोऽस्ति, तदाऽऽज्ञायां स्थित्वा द्रोहादिकं दूरतः परिहरेत्॥१७॥

पदार्थः-हे विद्वान्! जो **(साम्नःसाम्नः)** सामवेद सामवेदमात्र के बीच **(कविः)** सर्वज्ञ **(त्वष्टा)** पदार्थों का निर्माण करनेवाला **(विश्वेभ्यः)** सभी **(भुवनेभ्यः)** लोकों से जिन **(त्वा)** आपको **(पर्यजनत्)** सब प्रकार प्रकट करता है **(सः)** वह **(ब्रह्मणस्पतिः)** ब्रह्माण्ड की पालना करनेवाला है, उस **(महः)** महान् **(ऋतस्य)** सत्य कारण के **(धर्त्तरि)** धारण करनेवाले जगदीश्वर में स्थित **(ऋणचित्)** ऋण को इकट्ठा करने और **(ऋणयाः)** ऋण को प्राप्त होनेवाले आप **(द्रुहः)** द्रोह करनेवाले के **(हन्ता)** नाशक हूजिये॥१७॥

भावार्थः-हे जीव! जो सर्वज्ञ सृष्टिकर्त्ता सकल भुवनों का एक स्वामी और सबका धारण करनेवाला जगदीश्वर है, उसकी आज्ञा में स्थित द्रोहादिकों को दूर से दूर करें॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तवं श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम्॥१८॥

तव। श्रिये। वि। अजिहीत। पर्वतः। गवाम्। गोत्रम्। उत्ऽअसृजः। यत्। अङ्गिरः। इन्द्रेण। युजा। तमसा। परिऽवृतम्। बृहस्पते। निः। अपाम्। औब्जः। अर्णवम्॥१८॥

पदार्थः-(तव) (श्रिये) (वि) (अजिहीत) प्राप्नोति (पर्वतः) मेघः (गवाम्) किरणानाम् (गोत्रम्) कुलम् (उदसृजः) उत्सृजति त्यजति (यत्) (अङ्गिरः) प्राणप्रिय (इन्द्रेण) सूर्येण (युजा) युक्तेन (तमसा) अन्धकारेण (परीवृतम्) सर्वत आवृतम् (बृहस्पते) (निः) (अपाम्) जलानाम् (औब्जः) आर्जवे भव (अर्णवम्) समुद्रम्॥१८॥

अन्वयः-हे अङ्गिरो बृहस्पते! तव श्रिये पर्वतो गवां यद्गोत्रं व्यजिहीतोदसृजः स त्वमिन्द्रेण युजा तमसा परीवृतमपामौब्जोऽर्णवं निर्जनय॥१८॥

भावार्थः-येन जगदीश्वरेण सूर्य्यादिकं जगन्निर्माय परस्परं सम्बद्धं कृतं तम्प्राणप्रियं विजानीत्॥१८॥

पदार्थः-हे **(अङ्गिरः)** प्राणप्रिय **(बृहस्पते)** बड़ों की पालना करनेवाले! **(तव)** आपकी **(श्रिये)** लक्ष्मी के लिये **(पर्वतः)** मेघ **(गवाम्)** सूर्यमण्डल की किरणों के **(यत्)** जो **(गोत्रम्)** कुल को **(वि, अजिहीत)** विशेषता से प्राप्त होता वा **(उदसृजः)** किसी पदार्थ का त्याग करता सो आप **(इन्द्रेण)** सूर्य से **(युजा)** युक्त **(तमसा)** अन्धकार से **(परीवृतम्)** सब प्रकार ढपा हुआ अग्नि जैसे हो, वैसे **(अपाम्)** जलों के बीच **(औब्जः)** कोमलपन में प्रसिद्ध हूजिये तथा **(अर्णवम्)** समुद्र को **(निः)** निरन्तर प्रकट कीजिये॥१८॥

भावार्थः-जिस ईश्वर ने सूर्यादिक जगत् का निर्माण कर परस्पर सम्बन्ध किया, उसको प्राणप्रिय जानो॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः॥१९॥३२॥६॥

ब्रह्मणः। पते। त्वम्। अस्य। यन्ता। सुऽउक्तस्य। बोधि। तनयम्। च। जिन्व। विश्वम्। तत्। भद्रम्। यत्। अवन्ति। देवाः। बृहत्। वदेम। विदथे। सुऽवीराः॥१९॥

पदार्थः-**(ब्रह्मणः)** ब्रह्माण्डस्य **(पते)** पालक **(त्वम्)** **(अस्य)** **(यन्ता)** नियन्ता **(सूक्तस्य)** यः सुष्ठूच्यते तस्य **(बोधि)** बुध्यस्व **(तनयम्)** सन्तानमिव **(च)** **(जिन्व)** प्रीणीहि **(विश्वम्)** सर्वम् **(तत्)** **(भद्रम्)** कल्याणकरम् **(यत्)** **(अवन्ति)** रक्षन्ति **(देवाः)** विद्वांसः **(बृहत्)** **(वदेम)** **(विदथे)** **(सुवीराः)**॥१९॥

अन्वयः-हे ब्रह्मणस्पते! त्वमस्य सूक्तस्य यन्ता सँस्तनयं बोधि। एतत् विश्वं च जिन्व देवा यद्भद्रमवन्ति तद्बृहद्विदथे सुवीरा वयं वदेम॥१९॥

भावार्थः-ईश्वरेण यद्रक्षितव्यमुक्तं तत्संरक्ष्य मनुष्यैर्बृहत्सुखं प्राप्तव्यम्। यथेश्वरोऽखिलं जगन्नियतं रक्षति तथा विद्वद्भिरपि सर्वं संरक्ष्यम्॥१९॥

अस्मिन् सूक्ते ईश्वरादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोर्विंशं सूक्तं द्वात्रिंशो वर्गः षष्ठाऽध्यायश्च समाप्तः॥

पदार्थः-हे **(ब्रह्मणस्पते)** ब्रह्माण्ड की पालना करनेहारे! **(त्वम्)** आप **(अस्य)** जो यह **(सूक्तस्य)** सुन्दरता से कहा जाता इसके **(यन्ता)** नियन्ता होते हुए **(तनयम्)** सन्तान के समान **(बोधि)** जानो **(च)** और इस **(विश्वम्)** सबको **(जिन्व)** प्रसन्न करो। तथा **(देवाः)** विद्वान् जन **(यत्)** जिस **(भद्रम्)** कल्याण करनेवाले की **(अवन्ति)** रक्षा करते हैं **(तत्)** उस **(बृहत्)** बहुत **(विदथे)** संग्राम में **(सुवीराः)** अच्छे वीरोंवाले हम लोग **(वदेम)** कहें॥१९॥

भावार्थः-ईश्वर ने जो रक्षितव्य कहा है, उसकी अच्छे प्रकार रक्षा कर मनुष्यों को बहुत सुख पाना चाहिये। जैसे ईश्वर समस्त जगत् की नियमपूर्वक रक्षा करता है, वैसे विद्वानों को भी सबकी रक्षा करनी चाहिये॥१९॥

इस सूक्त में ईश्वरादि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह तेईसवां सूक्त और बत्तीसवां वर्ग तथा छठा अध्याय समाप्त हुआ॥

॥ओ३म्॥

अथ द्वितीयाष्टके सप्तमाध्यायारम्भः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

सेमामिति चतुर्विंशतितमस्य षोडशर्चस्य सूक्तस्य गृत्समद ऋषिः। १-११, १३-१६ ब्रह्मणस्पतिः। १२ ब्रह्मणस्पतिरिन्द्रश्च देवते। १, ७, ९, ११ निचृज्जगती। १३ भुरिक् जगती। ४, ६, ८ जगती। १० स्वराड् जगती छन्दः। निषादः स्वरः। २, ३ त्रिष्टुप्। ४, ५ स्वराट् त्रिष्टुप्। १२, १६ निचृत् त्रिष्टुप्। १५ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वांसः किं कुर्युरित्याह॥

अब द्वितीयाष्टक के सातवें अध्याय का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् लोग क्या करें, इस विषय को कहा है॥

सेमा॑मविड्ढि॒ प्रभृ॑तिं॒ य ईशि॑षे॒ऽया वि॑धेम॒ नव॑या म॒हा गि॒रा।
यथा॑ नो मी॒ळ्ह्वान् स्तव॑ते॒ सखा॒ तव॒ बृह॑स्पते॒ सीष॑धः॒ सोत नो॑ म॒तिम्॥ १॥

सः। इ॒माम्। अ॒वि॒ड्ढि॒ । प्रऽभृ॑तिम्। यः। ईशि॑षे। अ॒या। वि॒धे॒म॒। नव॑या। म॒हा। गि॒रा। यथा॑। नः॒। मी॒ळ्ह्वान्। स्तव॑ते। सखा॑। तव॑। बृह॑स्पते। सीष॑धः। सः। उ॒त। नः॒। म॒तिम्॥ १॥

पदार्थः-(सः) (इमाम्) (अविड्ढि) प्राप्नुहि **(प्रभृतिम्)** प्रकृष्टां धारणां पोषणं वा **(यः) (ईशिषे)** ईशनं करोषि **(अया)** अनया। अत्र **छान्दसो वर्णलोप** इति न लोपः। **(विधेम)** प्राप्नुयाम **(नवया)** नवीनया **(महा)** महत्या **(गिरा)** वाण्या **(यथा) (नः)** अस्मान् **(मीढ्वान्)** विद्यायाः सेचकः **(स्तवते)** प्रशंसति **(सखा)** सुहृत् **(तव) (बृहस्पते)** बृहत्या वाचः स्वामिन् **(सीषधः)** साधय **(सः) (उत) (नः)** अस्मभ्यम् **(मतिम्)** प्रज्ञाम्॥ १॥

अन्वयः-हे बृहस्पते विद्वन्नध्यापक! यस्त्वमया नवया महा गिरेमां प्रभृतिं कर्त्तुमीशिषे स त्वमिमामविड्ढि। यथा तव मीढ्वान् सखा नः स्तवते यथा च स त्वं नो मतिमुत सीषधस्तथा च वयं विधेम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्यामुन्निनीषन्ति त आदौ वेदादिशास्त्राणि स्वयमधीत्यान्यान् प्रयत्नेनाध्यापयेयुः एवं कृत्वा पदार्थविज्ञानारूढां प्रज्ञामाप्नुयुश्च॥ १॥

पदार्थः-हे (**बृहस्पते**) अध्यापक वेदरूप वाणी के शिक्षक विद्वान्! (**यः**) जो आप (**अया**) इस (**नवया**) नवीन (**महा**) महती (**गिरा**) उपदेशरूप वाणी से (**इमाम्**) इस (**प्रभृतिम्**) धारण वा पोषण रूप क्रिया के करने को (**ईशिषे**) समर्थ हो (**सः**) सो आप इस उक्त क्रिया को (**अविड्ढि**) प्राप्त हूजिये। (**यथा**) जैसे (**तव**) आपका (**मीढ्वान्**) विद्या का प्रवर्त्तक (**सखा**) मित्र (**नः**) हमारी (**स्तवते**) प्रशंसा करता और जैसे (**सः**) वह आप (**नः**) हमारे लिये (**मतिम्**) बुद्धि को (**उत**) भी (**सीषधः**) सिद्ध करो, वैसे आपको आपके मित्र को हम लोग (**विधेम**) प्राप्त हों॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग विद्या की उन्नति करना चाहें, वे प्रथम वेदादि शास्त्रों को स्वयं पढ़ के दूसरों को प्रयत्न के साथ पढ़ावें और पढ़-पढ़ा के पदार्थविज्ञान में आरूढ़ बुद्धि को प्राप्त हों॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यो नन्त्वान्यनमन्योजसोतादर्दर्मन्युना शम्बराणि वि।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम्॥२॥

यः। नन्त्वानि। अनमत्। नि। ओजसा। उत। अदर्दरुः। मन्युना। शम्बराणि। वि प्र। अच्यवयत्। अच्युता। ब्रह्मणः। पतिः। आ। च। अविशत्। वसुऽमन्तम्। वि। पर्वतम्॥२॥

पदार्थः-(**यः**) विद्वान् (**नन्त्वानि**) नमनीयानि नमस्कारार्हाणि (**अनमत्**) नमतु (**नि**) नितराम् (**ओजसा**) बलेन (**उत**) अपि (**अदर्दरुः**) पुनः पुनर्भृशं विदारयति (**मन्युना**) क्रोधेन (**शम्बराणि**) शम्बरस्य मेघस्य सम्बन्धानि अभ्राणि (**वि**) (**प्र**) (**अच्यावयत्**) निपातयति (**अच्युता**) नाशरहितानि (**ब्रह्मणस्पतिः**) बृहत्या प्रजायाः पालकः (**आ**) (**च**) (**अविशत्**) आविशति (**वसुमन्तम्**) प्रशस्तधनप्रापकः देशम् (**वि**) (**पर्वतम्**) मेघम्॥२॥

अन्वयः-यो ब्रह्मणस्पती राजसेनाधीशो नन्त्वानि न्यनमद् यथा सूर्य्योऽच्युता शम्बराणि व्यदर्दः उतापि पर्वतं प्राच्यावयत् तथौजसा मन्युना शत्रुं प्राच्यावयेद्विदृणियाद्वा वसुमन्तं च व्याविशत्॥२॥

भावार्थः-ये विद्वांसो राजजनाः सत्कर्मिणः सत्कुर्वन्ति दुष्कर्मिणो दण्डयन्ति ते सूर्य्यवत्पृथिव्यां राजन्ते॥२॥

पदार्थः-(**यः**) जो (**ब्रह्मणस्पतिः**) बड़ी प्रजा का रक्षक राजसेना का अध्यक्ष (**नन्त्वानि**) नमने योग्य को (**नि, अनमत्**) निरन्तर नमे, जैसे सूर्य्य (**अच्युता**) नाशरहित (**शम्बराणि**) मेघ सम्बन्धी बादलों को (**व्यदर्दः**) विशेष कर बार-बार विदीर्ण करता (**उत**) और (**पर्वतम्**) मेघ को

(प्राच्यावयत्) गिराता है वह वैसे **(ओजसा)** बल से तथा **(मन्युना)** क्रोध से शत्रु को गिरावे वा विदीर्ण करे **(च)** और **(वसुमन्तम्)** उत्तम धन को पहुंचानेहारे देश को **(वि, आ, अविशत्)** अच्छे प्रकार विशेष कर प्राप्त होवे॥२॥

भावार्थः-जो राजा और राजजन विद्वान् सत्कर्मी लोगों को सत्कार करते और दुष्ट कर्मवालों को दण्ड देते हैं, वे सूर्य के तुल्य पृथिवी पर सुशोभित होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तद्देवानां देवतमाय कर्त्वमश्रथ्नन् दृळ्हाव्रदन्त वीळिता।
उद्ना आजदभिनद् ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः॥३॥

तत्। देवानाम्। देवऽतमाय। कर्त्वम्। अश्रथ्नन्। दृळ्हा। अव्रदन्त। वीळिता। उत्। गाः। आजत्। अभिनत्। ब्रह्मणा। वलम्। अगूहत्। तमः। वि। अचक्षयत्। स्वरिति स्वः॥३॥

पदार्थः-(**तत्**) (**देवानाम्**) देदीप्यमानानां लोकानाम् (**देवतमाय**) अतिशयेन प्रकाशयुक्ताय (**कर्त्त्वम्**) कर्त्तव्यम् (**अश्रथ्नन्**) विमुक्तानि भवन्ति (**दृढा**) दृढानि (**अव्रदन्त**) मृदूनि भवन्ति (**वीळिता**) प्रशंसितानि (**उत्**) (**गाः**) किरणान् (**आजत्**) अजति प्रक्षिपति (**अभिनत्**) विदृणाति (**ब्रह्मणा**) बृहता बलेन (**बलम्**) आवरकं मेघम् (**अगूहत्**) संवृणोति (**तमः**) अन्धकारम् (**वि**) (**अचक्षयत्**) दर्शयति (**स्वः**) अन्तरिक्षस्थान् पदार्थान्॥३॥

अन्वयः-हे विद्वन्! यथा देवानां देवतमाय सूर्याय तत्कर्त्त्वं कर्मास्ति यथायं सूर्य्यो गा उदाजद् ब्रह्मणा बलमभिनद् यत्तमोऽगूहत् प्रकाशमगूहत् तद्यो व्यभिनत् स्वर्व्यचक्षयद् यस्य प्रतापेनोक्तानि वस्तूनि दृढा वीळिता अव्रदन्ताश्रथ्नन् तथा त्वं वर्त्तस्व॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवद्विद्याप्रकाशकर्माणोऽविद्यान्धकारनिवारकाः प्रमादिनो दुष्टान् शिथिलीकुर्वन्तो विद्वत्तमत्वं गृह्णन्ति ते जगदुपकारकाः सन्ति॥३॥

पदार्थः-हे विद्वन्! जैसे **(देवानाम्)** प्रकाशमान लोकों में **(देवतमाय)** अत्यन्त प्रकाशयुक्त सूर्य के लिये **(तत्)** वह **(कर्त्त्वम्)** कर्त्तव्य कर्म है जैसे यह सूर्य **(गाः)** किरणों को **(उत्, आजत्)** उत्कृष्टता से फेंकता **(ब्रह्मणा)** बड़े बल से **(बलम्)** आवरणकर्त्ता मेघ को **(अभिनत्)** विदीर्ण करता और जो **(तमः)** अन्धकार **(अगूहत्)** प्रकाश का आवरण करता उसको जो विदीर्ण करता और **(स्वः)** अन्तरिक्षस्थ सब पदार्थों को **(व्यचक्षयत्)** विशेष कर दर्शाता है और जिसके प्रताप से

उक्त सब वस्तु (**दृढा**) दृढ (**वीळिता**) प्रशस्त (**अव्रदन्त**) कोमल होते तथा (**अश्रथ्नन्**) विमुक्त होते हैं, वैसे आप वर्त्ताव कीजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के तुल्य विद्याप्रकाश कर्मवाले, अविद्यारूप अन्धकार के निवारक, प्रमादी दुष्टों को शिथिल करते हुए श्रेष्ठ विद्वत्ता को ग्रहण करते हैं, वे जगत् के उपकारक होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अश्मा॑स्यमव॒तं ब्र॒ह्म॒ण॒स्प॒ति॒र्मधु॑धारम॒भि यमोज॒सातृ॑णत्।
तमे॒व विश्वे॑ पपिरे स्व॒र्दृशो॑ ब॒हु सा॒कं सि॑सिचु॒रुत्स॑मु॒द्रिण॑म्॥४॥

अश्म॑ऽआस्यम्। अ॒व॒तम्। ब्र॒ह्म॒णः॒। प॒तिः॑। मधु॑ऽधारम्। अ॒भि। यम्। ओज॑सा। अतृ॑णत। तम्। ए॒व। विश्वे॑। प॒पि॒रे॒। स्व॒रिति॑ स्वः॒ऽदृश॑ः। ब॒हु। सा॒कम्। सि॒सि॒चुः॒। उत्स॑म्। उ॒द्रिण॑म्॥४॥

पदार्थः-(**अश्मास्यम्**) अश्मनो मेघस्य मुख्यभागम् (**अवतम्**) अधोगामिनम् (**ब्रह्मणः**) बृहतः (**पतिः**) रक्षकः (**मधुधारम्**) मधुराणां रसानां धर्त्तारम् (**अभि**) (**यम्**) (**ओजसा**) बलेन (**अतृणत्**) हिनस्ति (**तम्**) (**एव**) (**विश्वे**) सर्वे (**पपिरे**) पिबन्ति (**स्वर्दृशः**) स्वः सुखं पश्यन्ति येभ्यस्ते (**बहु**) (**साकम्**) सह (**सिसिचुः**) सिञ्चन्ति (**उत्सम्**) कूपमिव (**उद्रिणम्**) उदकवन्तम्॥४॥

अन्वयः-यो विद्वान् ब्रह्मणस्पतिर्यथा सूर्य्य ओजसा यमवतं मधुधारमश्मास्यमभ्यतृणत्तमेव विश्वे स्वर्दृशः साकमुद्रिणमुत्समिव बहु पपिरे सिसिचुश्च तथाऽनुतिष्ठेत्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या मेघवत्कूपवच्च सर्वान् शुभशिक्षया प्रीणन्ति सर्वेषामैकमत्यं सम्पादयन्ति च ते मिलित्वा सर्वानुन्नेतुं शक्नुवन्ति॥४॥

पदार्थः-जो विद्वान् (**ब्रह्मणः**) बड़ों का (**पतिः**) रक्षक सज्जन जैसे सूर्य्य (**ओजसा**) बल के साथ (**यम्**) जिस (**अवतम्**) नीचे को गिरनेहारे (**मधुधारम्**) मधुर रसों के धारक (**अश्मास्यम्**) मेघ के मुख्य भाग को (**अभि, अतृणत्**) सब ओर से काटता है (**तमेव**) उसी को (**विश्वे**) सब (**स्वर्दृशः**) सुख प्राप्ति के हेतु शिक्षक लोग (**साकम्**) साथ मिल के (**उद्रिणम्**) बलयुक्त (**उत्सम्**) कूप के तुल्य (**बहु**) अधिकतर (**पपिरे**) पियें और (**सिसिचुः**) सीचें, वैसे अनुष्ठान करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य मेघ और कूप के तुल्य सबको शुभ शिक्षा से तृप्त करते और सबको एकमत करते हैं, वे मिल कर सबकी उन्नति कर सकते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सना॒ ता का चि॒त् भुव॑ना॒ भवी॑त्वा मा॒द्भिः शर॒द्भिर्दुरो॑ वरन्त वः।
अय॑तन्ता चरतो अ॒न्यद॑न्य॒दिद् या च॒कार॑ व॒युना॒ ब्रह्म॑ण॒स्पति॑:॥५॥ १॥

सना॑। ता। का। चि॒त्। भुव॑ना। भवी॑त्वा। मा॒त्ऽभिः। श॒रत्ऽभि॑:। दुर॑:। व॒र॒न्त॒। व॒:। अय॑तन्ता। च॒र॒त॒:। अ॒न्यत्ऽअ॑न्यत्। इत्। या। च॒कार॑। व॒युना॑। ब्रह्म॑ण:। पति॑:॥५॥

पदार्थः-(सना) सनातनानि **(ता)** तानि **(का)** कानि **(चित्)** अपि **(भुवना)** भुवनानि **(भवीत्वा)** भव्यानि **(माद्भिः)** मासैः **(शरद्भिः)** शरदाद्यृतुभिः **(दुरः)** द्वाराणि **(वरन्त)** वरयन्ति **(वः)** युष्मान् **(अयतन्ता)** प्रयत्नरहितौ **(चरतः)** कुरुतः **(अन्यदन्यत्)** भिन्नं भिन्नम् **(इत्)** एव **(या)** यानि **(चकार)** **(वयुना)** प्रज्ञानानि **(ब्रह्मणः)** विद्याधनस्य **(पतिः)** पालकः॥५॥

अन्वयः-हे मनुष्या! यथा सूर्य्यस्य किरणा माद्भिः शरद्भिर्या यानि सना का चिद्भुवना भवीत्वा सन्ति ता दुरो वरन्त तथा यो ब्रह्मणस्पतिर्वो वयुना चकार स युष्माभिः सेव्यः। यावयतन्ताऽध्यापकाऽध्येतारावलसावन्यदन्यदिदेव चरतः कुरुतस्तौ न सत्कर्त्तव्यौ॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो मासानृतून् विभज्य मूर्त्तानां द्रव्याणां यथावत्स्वरूपं दर्शयति तथा ये विद्वांसो पृथिवीमारभ्येश्वरपर्यन्तान् पदार्थान् यथावत् शिक्षया दर्शयेयुस्ते लोके पूजनीयाः स्युर्ये चाऽविद्यायुक्ताऽलसा कापट्यादिना दूषिता दुष्टोपदेशं कुर्वन्ति वा निष्पुरुषार्थास्तिष्ठन्ति ते केनचित्कदाचिन्नैव सेवनीयाः॥५॥

पदार्थः-हे मनुष्यो! जैसे सूर्य्य के किरण **(माद्भिः)** महीनों और **(शरद्भिः)** शरत् आदि ऋतुओं के विभाग से **(या)** जो **(सना)** सनातन **(का, चित्)** कोई **(भवीत्वा)** होनेवाले **(भुवना)** लोक हैं **(ता)** उनको और **(दुरः)** द्वारों को **(वरन्त)** विवृत करते प्रकाशित करते हैं तथा जो **(ब्रह्मणस्पतिः)** विद्या और धन का पालक पुरुष **(वः)** तुमको **(वयुना)** विज्ञानयुक्त **(चकार)** करता है, वह तुमको सेवने योग्य है। जो **(अयतन्ता)** प्रयत्नरहित आलसी पढ़ने-पढ़ानेवाले **(अन्यदन्यत्)** अन्य-अन्य विरुद्ध **(इत्)** ही **(चरतः)** करते हैं, उनका सत्कार कभी न करना चाहिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य महीनों और ऋतुओं को विभक्त कर मूर्त्त द्रव्यों का यथावत्स्वरूप दिखाता है, वैसे जो विद्वान् पृथिवी से ले के ईश्वर पर्यन्त पदार्थों को

यथावत् शिक्षा से दिखावें वे लोक में पूजनीय होवें और जो अविद्यायुक्त आलसी लोग कपट आदि से दूषित दुष्ट उपदेश करते वा निकम्में बैठे रहते हैं, वे किसी को कभी सेवने योग्य नहीं हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम्।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुरा विशम्॥ ६॥

अभिऽनक्षन्तः। अभि। ये। तम्। आनशुः। निऽधिम्। पणीनाम्। परमम्। गुहा। हितम। ते। विद्वांसः। प्रतिऽचक्ष्य। अनृता। पुनः। यतः। ऊम् इति। आयन्। तत्। उत्। ईयुः। आऽविशम्॥ ६॥

पदार्थः-(अभिनक्षन्तः) अभितो जानन्तः **(अभि)** **(ये)** **(तम्)** **(आनशुः)** अश्नुवन्ति प्राप्नुवन्ति **(निधिम्)** विद्याकोशम् **(पणीनाम्)** व्यवहारनिष्ठानां प्रशंसनीयानां नृणाम् **(परमम्)** उत्कृष्टम् **(गुहा)** बुद्धौ **(हितम्)** स्थितम् **(ते)** विद्वांसः **(प्रतिचक्ष्य)** प्रत्यक्षेण प्रत्याख्यानाय **(अनृता)** मिथ्याभाषणादिकर्माणि **(पुनः)** **(यतः)** **(उ)** वितर्के **(आयन्)** प्राप्नुवन्ति **(तत्)** **(उत्)** **(ईयुः)** प्राप्नुयुः **(आविशम्)** आविशन्ति यस्मिँस्तम्॥६॥

अन्वयः-येऽभिनक्षन्तो विद्वांसस्तं गुहा हितं परमं पणीनां निधिमभ्यानशुस्तेऽन्येषामनृता प्रतिचक्ष्य पुनरु यत आविशमायन् तदुदीयुरुपदिशन्तु॥६॥

भावार्थः-ये यथार्थं विज्ञानं प्राप्याधर्माचरणात्पृथग्वर्त्तित्वाऽन्यान् पापाचरणात् पृथक् कृत्य पुनः [पुनः] धर्मविद्याशरीरात्मपुष्टिषु प्रवेशयन्ति तेऽत्यन्तमानन्दं प्राप्याऽन्यानानन्दयितुं शक्नुवन्ति॥६॥

पदार्थः-(ये) जो **(अभिनक्षन्तः)** सब ओर से जानते हुए **(विद्वांसः)** विद्वान् लोग **(तम्)** उस **(गुहा)** बुद्धि में **(हितम्)** स्थित **(परमम्)** उत्तम **(पणीनाम्)** व्यवहारवान् प्रशंसनीय मनुष्यों के **(निधिम्)** विद्यारूप कोश को **(अभ्यानशुः)** सब ओर से प्राप्त होते हैं **(ते)** वे औरों के **(अनृता)** मिथ्याभाषणादि कर्मों को **(प्रतिचक्ष्य)** प्रत्यक्ष खण्डन कर **(पुनः)** **(यतः)** **(उ)** फिर भी **(आविशम्)** जिसमें आवेश करते उस ज्ञान को **(आयन्)** प्राप्त होते **(तत्)** उसका **(उदीयुः)** उदय करें अर्थात् उपदेश करें॥६॥

भावार्थः-जो यथार्थ विज्ञान को पाकर अधर्माचरण से पृथक् रह कर अन्यों को पापाचरण से पृथक् कर फिर-फिर धर्म, विद्या, शरीर, आत्मा की पुष्टि में प्रवेश कराते, वे अत्यन्त आनन्द को पाकर औरों को आनन्दित करने को समर्थ होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒तावा॑नः प्रति॒क्ष्यानृ॑ता पुन॒रात॒ आ त॑स्थुः क॒वयो॑ म॒हस्प॒थः।
ते बा॒हुभ्यां॑ धमि॒तमग्नि॒मश्म॑नि॒ नकिः॒ षो अ॒स्त्यर॑णो जु॒हुर्हि तम्॥७॥

ऋ॒तऽवा॑नः। प्र॒ति॒ऽचक्ष्य॑। अनृ॑ता। पुनः॑। आ। अत॑ः। आ। त॒स्थुः॒। क॒वय॑ः। म॒हः। प॒थः। ते। बा॒हुऽभ्या॑म्। ध॒मि॒तम्। अ॒ग्निम्। अश्म॑नि। न॒किः॒। सः। अ॒स्ति॒। अर॑णः। जु॒हुः। हि। तम्॥७॥

पदार्थः-(ऋतावानः) यः ऋतानि सत्याचरणानि वनन्ति संभजन्ति ते **(प्रतिचक्ष्य)** निषेध्य **(अनृता)** अधर्म्यव्यवहारान् **(पुनः)** **(आ)** **(अतः)** हेतोः **(आ)** **(तस्थुः)** समन्तात् तिष्ठन्ति **(कवयः)** प्राज्ञाः **(महः)** महतो धर्म्यान् **(पथः)** मार्गान् **(ते)** **(बाहुभ्याम्)** **(धमितम्)** प्रज्वलितम् **(अग्निम्)** **(अश्मनि)** पाषाणे **(नकिः)** निषेधे **(सः)** **(अस्ति)** **(अरणः)** विज्ञाता **(जहुः)** त्यजन्ति **(हि)** खलु **(तम्)**॥७॥

अन्वयः-य ऋतावानः कवयो महस्पथ आतस्थुस्तेऽतः पुनरनृता प्रतिचक्ष्यैतान्याजहुः। योऽरणो बाहुभ्यामश्मनि धमितमग्निं त्यजन्नकिरस्ति हि खलु तं बोधं प्राप्नोति॥७॥

भावार्थः-येऽविद्याऽधर्माचरणं प्रत्याख्याय सन्मार्गं सेवन्ते कराभ्यां धमनेन काष्ठादिस्थमग्निमुत्पाद्य कार्य्याणि साध्नुवन्ति तेऽभीष्टं प्राप्नुवन्ति॥७॥

पदार्थः-जो **(ऋतावानः)** सत्य आचरणों का सेवन करनेहारे **(कवयः)** पण्डित लोग **(महः)** बड़े धर्मयुक्त **(पथः)** मार्गों पर **(आ, तस्थुः)** अच्छे प्रकार स्थित होते **(ते)** वे **(अतः)** इस कारण से **(पुनः)** वार-वार **(अनृता)** अधर्मयुक्त व्यवहारों को **(प्रतिचक्ष्य)** खण्डित कर इनको **(आ, जहुः)** सब प्रकार छोड़ते हैं। जो **(अरणः)** विज्ञानी **(बाहुभ्याम्)** हाथों से **(अश्मनि)** पत्थर पर **(धमितम्)** प्रज्वलित किये **(अग्निम्)** अग्नि का त्याग **(नकिः)** नहीं **(अस्ति)** करता अर्थात् ग्रहण करता है **(सः, हि)** वही **(तम्)** उस बोध को प्राप्त होता है॥७॥

भावार्थः-जो अविद्या और अधर्माचरण का खण्डन कर श्रेष्ठ मार्ग का सेवन करते हैं, वे हाथों से धौंकने से काष्ठादिस्थ अग्नि को उत्पन्न कर कार्य्यों को सिद्ध करते और अभीष्ट को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒तज्ये॑न क्षि॒प्रेण॒ ब्रह्म॑ण॒स्पति॒र्यत्र॒ वष्टि॒ प्र तद॑श्नोति॒ धन्व॑ना।

तस्य॑ सा॒ध्वीरिष॑वो॒ याभि॒रस्य॑ति नृ॒चक्ष॑सो दृ॒शये॒ कर्ण॑योनयः॥८॥

ऋ॒तऽज्ये॑न। क्षि॒प्रेण॑। ब्रह्म॑णः। पतिः॑। यत्र॑। वष्टि॑। प्र। तत्। अ॒श्नो॒ति॒। धन्व॑ना। तस्य॑। सा॒ध्वीः। इष॑वः। याभिः॑। अस्य॑ति। नृ॒ऽचक्ष॑सः। दृ॒शये॑। कर्ण॑ऽयोनयः॥८॥

पदार्थः-(ऋतज्येन) ऋता सत्या ज्या यस्मिँस्तेन **(क्षिप्रेण)** क्षिप्रकारिणा **(ब्रह्मणः)** धनस्य **(पतिः)** पालकः **(यत्र)** यस्मिन् समये **(वष्टि)** कामयते **(प्र)** **(तत्)** **(अश्नोति)** प्राप्नोति **(धन्वना)** धनुषा **(तस्य)** **(साध्वीः)** श्रेष्ठाः **(इषवः)** बाणाः **(याभिः)** **(अस्यति)** शत्रून् प्रक्षिपति **(नृचक्षसः)** नृभिर्द्रष्टव्याः **(दृशये)** दर्शनाय **(कर्णयोनयः)** कर्णः श्रोत्रं योनिर्येषान्ते॥८॥

अन्वयः-यत्र ब्रह्मणस्पतिर्ऋतज्येन क्षिप्रेण धन्वना यत्प्र वष्टि तदश्नोति तस्य साध्वीरिषवः स्युः। याभिः शत्रूनस्यति ताभिर्दृशये कर्णयोनयो नृचक्षसस्सन्ति ताँस्तत्राश्नोति॥८॥

भावार्थः-यथा वीरा धनुरादिशस्त्रेणाग्नेयाद्यस्त्रेण च शत्रून् पराजयन्ते तथा धर्मात्मा दोषान् विजयते॥८॥

पदार्थः-(यत्र) जहाँ **(ब्रह्मणः)** धन का **(पतिः)** स्वामी **(ऋतज्येन)** ठीक-ठीक प्रत्यञ्चावाले **(क्षिप्रेण)** शीघ्रकारी **(धन्वना)** धनुष् से जिसको **(प्र, वष्टि)** अच्छे प्रकार चाहता **(तत्)** उनको **(अश्नोति)** प्राप्त होता **(तस्य)** उसके **(साध्वीः)** श्रेष्ठ **(इषवः)** बाण होवें **(याभिः)** जिनसे शत्रुओं को **(अस्यति)** हठावे दूर करे उनसे **(दृशये)** देखने अर्थात् जानने के लिये **(कर्णयोनयः)** कान आदि कारणवाले **(नृचक्षसः)** मनुष्यों को देखने योग्य विषय हैं, उनको वहाँ प्राप्त होता है॥८॥

भावार्थः-जैसे वीर पुरुष धनुष् आदि शस्त्र और आग्नेयादि अस्त्र से शत्रुओं को पराजित करते हैं, वैसे धर्मात्मा दोषों को जीत लेता है॥८॥

पुना राजपुरुषाः कीदृशाः स्युरित्याह॥

फिर राजपुरुष कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

स सं॑न॒यः स वि॑न॒यः पु॒रोहि॑तः॒ स सु॒ष्टु॒तः स युधि ब्रह्म॑ण॒स्पतिः॑।
चा॒क्ष्मो यद्वाजं॒ भर॑ते म॒ती धनादित्सूर्य॑स्तपति तप्य॒तुर्वृथा॑॥९॥

सः। सं॒ऽन॒यः। सः। वि॒ऽन॒यः। पु॒रःऽहि॑तः। सः। सु॒ऽस्तु॒तः। सः। युधि। ब्रह्म॑णः। पतिः॑। चा॒क्ष्मः। यत्। वाज॑म्। भर॑ते। म॒ती। धना॑। आत्। इत्। सूर्यः॑। त॒प॒ति॒। त॒प्य॒तुः। वृथा॑॥९॥

पदार्थः-(सः) **(संनयः)** सम्यग् नयो नीतिर्यस्य सः **(सः)** **(विनयः)** विविधो नयो यस्य **(सः)** **(पुरोहितः)** पुर एनं विद्वांसो दधति सः **(सः)** **(सुष्टुतः)** सुष्ठु स्तुतः प्रशंसितः **(सः)** **(युधि)**

युद्धे **(ब्रह्मणः)** धनस्य **(पतिः)** रक्षकः **(चाक्ष्मः)** व्यक्तवाक् **(यत्)** यतः **(वाजम्)** अन्नादिसामग्रीयुक्तपदार्थसमूहम् **(भरते)** धरति **(मती)** मत्या विज्ञानेन **(धना)** धनानि **(आत्)** नैरन्तर्ये **(इत्)** एव **(सूर्य्यः)** सवितेव **(तपति)** **(तप्यतुः)** दुष्टानां परितापकः **(वृथा)** मिथ्यैव परपीडने वर्त्तमानानाम्॥९॥

अन्वयः-स संनयः स विनयः स पुरोहितः स सुष्टुतश्चाक्ष्मः स ब्रह्मणस्पतिर्वृथा वर्त्तमानानां तप्यतुर्मती युधि धना यद्वाजं चाद्भरते तस्य युधि सूर्य्य इवेत्तपति प्रतापयुक्तो भवति॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विनयादियुक्ताः प्रशंसितगुणकर्मस्वभावा दुष्टतानिरोधकाः सत्यताप्रवर्त्तकाः सन्ति, ते धर्म्येण राज्यं रक्षितुं शक्नुवन्ति॥९॥

पदार्थः-**(सः)** वह **(संनयः)** सम्यक् नीतिवाला **(सः)** वह **(विनयः)** विविध प्रकार की नम्रतावाला **(सः)** वह **(पुरोहितः)** आगे जिसको विद्वान् लोग धारण करते **(सः)** वह **(सुष्टुतः)** अच्छे प्रकार प्रशंसित **(चाक्ष्मः)** स्पष्टवक्ता **(सः)** वही **(ब्रह्मणः)** धन का **(पतिः)** स्वामी **(वृथा)** निष्प्रयोजन दूसरों को पीड़ा देनेहारे दुष्टों को **(तप्यतुः)** दुःख देनेवाला विद्वान् वीर पुरुष **(मती)** विज्ञान से **(धना)** धनों और **(यत्)** जिस कारण **(वाजम्)** अन्नादि सामग्रीयुक्त पदार्थों का **(आत्)** निरन्तर **(भरते)** धारण-पोषण करता है, इससे **(युधि)** युद्ध में **(सूर्य्यः)** सूर्य के तुल्य **(इत्)** ही **(तपति)** [दुष्टों को संताप देता है, वह] प्रतापयुक्त होता है॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विनय आदि से युक्त प्रशंसित गुण-कर्म-स्वभाववाले दुष्टता के निरोधक और सत्यता के प्रवर्त्तक हैं, वे धर्मयुक्त व्यवहार से राज्य की रक्षा करने को समर्थ होते हैं॥९॥

पुना राजप्रजे किं कुर्य्यातामित्याह॥

फिर राजा और प्रजा क्या करें, इस विषय को अगले मन्त्र में कहा है॥

विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः॥१०॥२॥

विऽभु। प्रऽभु। प्रथमम्। मेहनाऽवतः। बृहस्पतेः। सुऽविदत्राणि। राध्या। इमा। सातानि। वेन्यस्य। वाजिनः। येन। जनाः। उभये। भुञ्जते। विशः॥१०॥

पदार्थः-**(विभु)** व्यापकम् **(प्रभु)** समर्थम् **(प्रथमम्)** प्रख्यातम् **(मेहनावतः)** प्रशस्तानि मेहनानि वर्षणानि यस्यास्ति तस्य **(बृहस्पतेः)** बृहतः पालकस्य सूर्य्यस्येव **(सुविदत्राणि)**

शोभनानि विदत्राणि विज्ञानानि येभ्यस्तानि **(राध्या)** सुखानि साधयितुमर्हाणि **(इमा)** इमानि **(सातानि)** विभज्य दातुमर्हाणि **(वेन्यस्य)** कमितुं योग्यस्य **(वाजिनः)** गन्तुं योग्यस्य **(येन)** **(जनाः)** प्रसिद्धाः पुरुषाः **(उभये)** विद्वांसोऽविद्वांसश्च **(भुञ्जते)** **(विशः)** धनानि॥१०॥

अन्वयः-येन उभये जना विशो भुञ्जते तत्प्रथमं विभु प्रभूपासितं सिद्धिकारि भवति तस्य मेहनावतो वाजिनो वेन्यस्य बृहस्पतेः सातानि राध्या सुविदत्राणीमा निमित्तानि सर्वैर्ग्राह्याणि॥१०॥

भावार्थः-राजप्रजाजनैः सर्वव्यापकं सर्वशक्तिमद्विस्तीर्णसुखप्रदं ब्रह्मोपास्य सर्वेषां मनुष्यादिप्राणिनां सुखसाधकानि वस्तूनि संगृह्य राजप्रजयोः सुखानि साधनीयानि॥१०॥

पदार्थः-**(येन)** जिसके आश्रय से **(उभये)** विद्वान्-अविद्वान् दोनों **(जनाः)** प्रसिद्ध पुरुष **(विशः)** धनों को **(भुञ्जते)** प्राप्त होते वह **(प्रथमम्)** विख्यात **(विभु)** व्यापक **(प्रभु)** समर्थ उपासना किया हुआ सिद्धिकारी होता है, उसके **(मेहनावतः)** प्रशस्त वर्षाओं के निमित्त **(वाजिनः)** प्राप्त होने वा **(वेन्यस्य)** चाहने **(बृहस्पतेः)** सबके रक्षक सूर्य के तुल्य प्रकाशयुक्त परमेश्वर के **(सातानि)** विभाग कर देने और **(राध्या)** सुखों को सिद्ध करने योग्य **(सुविदत्राणि)** सुन्दर विज्ञानों के **(इमा)** ये निमित्त सब लोगों को ग्रहण करने योग्य हैं॥१०॥

भावार्थः-राजजन और प्रजाजनों को योग्य है कि सर्वव्यापक शक्तिमान् विस्तीर्ण सुख देनेवाले ब्रह्म की उपासना कर सब मनुष्यादि प्राणियों के सुख साधक वस्तुओं को संग्रह करके राजप्रजा के सुखों को सिद्ध करें॥१९॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों का क्या कर्त्तव्य है, इस विषय को अगले मन्त्र में कहा है॥

योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ।
स देवो देवान् प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः॥११॥

यः। अवरे। वृजने। विश्वऽथा। विऽभुः। महाम्। ऊम् इति। रण्वः। शवसा। ववक्षिथ। सः। देवः। देवान्। प्रति। पप्रथे। पृथु। विश्वा। इत्। ऊम् इति। ता। परिऽभूः। ब्रह्मणः। पतिः॥११॥

पदार्थः-**(यः)** जगदीश्वरः **(अवरे)** अर्वाचीने **(वृजने)** अनित्ये कार्ये जगति **(विश्वथा)** विश्वस्मिन् **(विभुः)** व्यापकः **(महाम्)** महान्तं संसारम् **(उ)** वितर्के **(रण्वः)** रमयिता **(शवसा)** बलेन **(ववक्षिथ)** वोढुं प्राप्तुमिच्छथ **(सः)** **(देवः)** दिव्यस्वरूपः **(देवान्)** विदुषो वस्वादीन् वा **(प्रति)** **(पप्रथे)** प्रख्याति **(पृथु)** विस्तीर्णानि **(विश्वा)** विश्वानि जगन्ति **(इत्)** **(उ)** वितर्के **(ता)** तानि **(परिभूः)** परितः सर्वतो भवतीति **(ब्रह्मणः)** ब्रह्माण्डस्य **(पतिः)** पालकः॥११॥

अन्वयः-यो विश्वथाऽवरे वृजने रण्वो विभुः परिभूर्ब्रह्मणस्पतिरस्ति स देवो शवसा महामु देवान् प्रति पप्रथे। पृथु विश्वा ता तानि पप्रथे तमिदु यूयं ववक्षिथ॥११॥

भावार्थः-हे मनुष्या! यः परमात्मा परावरे कार्य्यकारणाख्ये जगति परिपूर्य्य सर्वं विस्तृणाति सर्वेभ्यः सर्वाणि सुखसाधकानि ददाति स एवोपासनीयो मन्तव्यश्च॥११॥

पदार्थः-(**यः**) जो (**विश्वथा**) सब (**अवरे**) कार्य्यरूप (**वृजने**) अनित्य जगत् में (**रण्वः**) रमण करानेहारा (**विभुः**) व्यापक (**परिभूः**) सब ओर प्रसिद्ध होनेवाला (**ब्रह्मणस्पतिः**) ब्रह्माण्ड का रक्षक है (**सः**) वह (**देवः**) दिव्यस्वरूप ईश्वर (**शवसा**) बल से (**उ**) वितर्क रूप (**महाम्**) महान् संसार को और (**देवान्**) विद्वानों वा वसु आदि को (**प्रति, पप्रथे**) प्रीति के साथ प्रख्यात करता और (**पृथु**) विस्तीर्ण (**ता**) उन (**विश्वा**) समस्त जङ्गम प्राणियों को विस्तृत करता (**इत्, उ**) उसी को तुम लोग (**ववक्षिथ**) प्राप्त होने की इच्छा करो॥११॥

भावार्थः-हे मनुष्यो! जो परमात्मा अगले-पिछले कार्य्य कारणरूप जगत् में परिपूर्ण होके सबका विस्तार करता, सबके लिये सब सुखों के साधनों को देता, वही सबको उपासना करने और मनने योग्य है॥११॥

पुना राजप्रजाविषयमाह॥

अब राजप्रजा विषय को अगले मन्त्र में कहा है॥

विश्वं॑ स॒त्यं म॑घवाना यु॒वोरिदाप॑श्च॒न प्र मि॑नन्ति व्र॒तं वा॑म्।
अच्छे॒न्द्राब्रह्मणस्पती ह॒विर्नोऽन्नं॒ युजे॑व वा॒जिना॑ जिगातम्॥१२॥

विश्व॑म्। स॒त्यम्। म॒घ॒ऽवा॒ना॒। यु॒वोः। इत्। आप॑ः। च॒न। प्र। मि॒न॒न्ति॒। व्र॒तम्। वा॒म। अच्छ॑। इ॒न्द्रा॒ब्र॒ह्म॒ण॒स्प॒ती॒ इति॑। ह॒विः। नः॒। अन्न॑म्। युजा॑ऽइव। वा॒जिना॑। जि॒गा॒त॒म्॥१२॥

पदार्थः-(**विश्वम्**) सर्वम् (**सत्यम्**) अविनाशिनम् (**मघवाना**) पूजितधनवन्तौ (**युवोः**) युवयोः (**इत्**) (**आपः**) प्राणान्। शसोर्जस्। (**चन**) (**प्र**) (**मिनन्ति**) हिंसन्ति (**व्रतम्**) (**वाम्**) युवयोः (**अच्छा**) (**इन्द्राब्रह्मणस्पती**) राजधनपालकौ (**हविः**) अत्तुमर्हम् (**नः**) अस्माकम् (**अन्नम्**) अत्तव्यम् (**युजेव**) यथासंयुक्तौ (**वाजिना**) वेगवन्तावश्वौ (**जिगातम्**) प्राप्नुतम्। **जिगातीति गतिकर्मासु पठितम्।** (निघं०२.१४)॥१२॥

अन्वयः-हे मघवानेन्द्राब्रह्मणस्पती! ये युवोरापः सत्यं विश्वं प्रमिनन्ति वां व्रतं प्रमिनन्ति तान् विनाश्य वाजिना युजेव नो हविरन्नं चनाच्छेज्जिगातम्॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा सुशिक्षितौ युक्तावश्वौ रथं वोढा शत्रून् पराजयतस्तथा राज्यैश्वर्य्यप्राप्तौ प्रजाराजजनौ सत्यचारविरोधिनो निवार्य्य प्राणाभयदानं युवां दद्यातम्॥१२॥

पदार्थः-हे **(मघवाना)** प्रशस्त धनवाले **(इन्द्राब्रह्मणस्पती)** राज्य और धन के रक्षक लोगो! जो **(युवोः)** तुम्हारे **(आपः)** प्राणों **(सत्यम्)** अविनाशी धर्म को **(विश्वम्)** सब जगत् को **(प्रमिनन्ति)** नष्ट-भ्रष्ट करते **(वाम्)** तुम्हारे नियम को तोड़ते हैं, उनको नष्ट कर **(वाजिना)** दो घोड़े वेगवाले **(युजेव)** जैसे संयुक्त हों, वैसे **(नः)** हमारे **(हविः)** भोजन के योग्य **(अन्नम्)** अन्न को **[(चन) (अच्छा) (इत्)] (जिगातम्)** प्राप्त होओ॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सुशिक्षित युक्त किये घोड़े रथ को पहुंचा कर शत्रुओं को पराजित कराते, वैसे राज्यैश्वर्य को प्राप्त हुए राज प्रजाजन सत्याचरण के विरोधियों को निवृत्त कर प्राण के अभयरूप दान को तुम लोग देओ॥१२॥

पुना राजजनाः किं कुर्य्युरित्याह॥

फिर राजपुरुष क्या करें, इस विषय को अगले मन्त्र में कहा है॥

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना।
वीळुद्वेषा अनु वशा ऋणमादिदिः स ह वाजी समिथे ब्रह्मणस्पतिः॥१३॥

उत। आशिष्ठाः। अनु। शृण्वन्ति। वह्नयः। सभेयः। विप्रः। भरते। मती। धना। वीळुऽद्वेषाः। अनु। वशा। ऋणम्। आऽदिदिः। सः। ह। वाजी। सम्ऽइथे। ब्रह्मणः। पतिः॥१३॥

पदार्थः-**(उत)** **(आशिष्ठाः)** अतिशयेनाशुगमिनः **(अनु)** **(शृण्वन्ति)** **(वह्नयः)** वोढारोऽश्वाः **(सभेयः)** सभायां साधुः **(विप्रः)** मेधावी **(भरते)** धरति **(मती)** मत्या प्रज्ञया **(धना)** धनानि **(वीळुद्वेषाः)** दृढद्वेषाः **(अनु)** **(वशा)** कमनीयानि **(ऋणम्)** **(आदिदिः)** आदाता **(सः)** **(ह)** किल **(वाजी)** प्रशस्तविज्ञानः **(समिथे)** संग्रामे **(ब्रह्मणः)** राज्यधनस्य **(पतिः)** पालकः॥१३॥

अन्वयः-य आशिष्ठा वह्नय इव वीळुद्वेषाः सन्ति तानुशृण्वन्ति तैः सह समिथे सभेयो विप्रो मती मत्या वशा धना हानु भरते उतापि स वाजी ब्रह्मणस्पतिर्ऋणमादिदिस्स्यात्॥१३॥

भावार्थः-वह्निरित्यश्वस्य गौणिकं नाम। यथा वह्नयो वोढारः सन्ति तथैवाश्वा भवन्ति राजपुरुषा यान् दुष्टाचारान् शृणुयुस्तान् वशीकृत्य सर्वप्रियं साध्नुयुः॥१३॥

पदार्थः-जो **(आशिष्ठाः)** अति शीघ्रगामी **(वह्नयः)** पहुंचानेवाले घोड़ों के तुल्य **(वीळुद्वेषाः)** दुर्गुणों से दृढ़ द्वेषकारी हैं, उनको **(अनु, शृण्वन्ति)** अनुक्रम से सुनते हैं, उनके साथ **(समिथे)** संग्राम में **(सभेयः)** सभा में कुशल **(विप्रः)** बुद्धिमान् जन **(मती)** बुद्धिबल से **(वशा)**

कामना करने योग्य सुन्दर **(धना)** धनों को **(ह)** ही **(अनु, भरते)** अनुकूल धारण करता **(उत)** और **(सः)** वह **(वाजी)** प्रशस्तज्ञानी **(ब्रह्मणस्पतिः)** राज्य के धन का रक्षक **(ऋणम्)** ऋण अर्थात् कर रूप धन का **(आददिः)** ग्रहण करनेवाला हो॥१३॥

भावार्थः-वह्नि यह घोड़े का गौण नाम है। जैसे अग्नि पहुँचानेवाले होते हैं, वैसे ही घोड़े भी होते हैं। राजपुरुष जिन दुष्टाचारियों को सुनें, उनको वश में करके सबका प्रिय सिद्ध किया करें॥१३॥

पुनरध्यापकाः कीदृशाः स्युरित्याह॥

फिर अध्यापक लोग कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः।
यो गा उदाजत्स दिवे वि चाभजन् महीव रीतिः शवसासरत्पृथक्॥१४॥

ब्रह्मणः। पतेः। अभवत्। यथाऽवशम्। सत्यः। मन्युः। महि। कर्म। करिष्यतः। यः। गाः। उत्ऽआजत्। सः। दिवे। वि। च। अभजत्। महीऽइव। रीतिः। शवसा। असरत्। पृथक्॥१४॥

पदार्थः-(ब्रह्मणः) धनस्य **(पतेः)** पत्युः। अत्र **षष्ठीयुक्तश्छन्दसि** वेति पतिशब्दस्य घि संज्ञा। **(अभवत्)** भवेत् **(यथावशम्)** वशमनतिक्रम्य यथास्यात्तथा **(सत्यः)** सत्सु साधुः **(मन्युः)** क्रोधः **(महि)** महत् **(कर्म)**। अत्र **संहितायामिति** दीर्घः। **(करिष्यतः)** **(यः)** **(गाः)** किरणान् **(उदाजत्)** ऊर्ध्वमधो गमयति **(सः)** **(दिवे)** **(वि)** **(च)** **(अभजत्)** भजेत् **(महीव)** यथा पूज्या महती **(रीतिः)** श्रेष्ठा नीतिः **(शवसा)** बलेन **(असरत्)** सरेत् प्राप्नुयात् **(पृथक्)**॥१४॥

अन्वयः-यो महि कर्म करिष्यतो ब्रह्मणस्पतेः सकाशाद्यथावशं सत्यो मन्युरभवत्स यथा दिवे सूर्य्यो गा उदाजत् तथा धर्मं प्रकाशयति या महीव रीतिः शवसा पृथगसरत्तां च व्यभजत्॥१४॥

भावार्थः-अत्रोपमालङ्कारः। ये पुरुषार्थिनोऽध्यापकाः सुशिक्षां प्राप्य सत्योपरि प्रीतिमसत्ये क्रोधं ददति ते महतीं सुशीलतां प्राप्य यथेष्टं कार्यं प्राप्नुवन्ति॥१४॥

पदार्थः-(यः) जो **(महि)** बड़े **(कर्म)** काम को **(करिष्यतः)** करनेवाले **(ब्रह्मणस्पतेः)** धन के स्वामी के समीप से **(यथावशम्)** वश के अनुकूल विचारपूर्वक **(सत्यः)** श्रेष्ठ, अधर्म त्यागार्थ ही **(मन्युः)** क्रोध **(अभवत्)** होवे **(सः)** वह जैसे **(दिवे)** प्रकाश के लिये सूर्य **(गाः)** किरणों को **(उत्, आजत्)** ऊपर-नीचे पहुँचाता है, वैसे धर्म के प्रकाश के लिये होता है। जो **(महीव)** जैसे श्रेष्ठ माननीय **(रीतिः)** उत्तम रीति-नीति **(शवसा)** बल के साथ **(पृथक्)** अलग-अलग **(असरत्)**

प्राप्त होवे, उसको **(च)** भी **(वि, अभजत्)** वह उक्त क्रोध का विभाग करे वा विशेष कर सेवे॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पुरुषार्थी अध्यापक लोग अच्छी शिक्षा को पाकर सत्य में प्रीति और असत्य पर क्रोध को धारण करते, वे बड़ी सुशीलता को प्राप्त होके यथेष्ट कार्य्य को प्राप्त होते हैं॥१४॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम्॥१५॥

ब्रह्मणः। पते। सुऽयमस्य। विश्वहा। रायः। स्याम। रथ्यः। वयस्वतः। वीरेषु। वीरान्। उप। पृङ्धि। नः। त्वम्। यत्। ईशानः। ब्रह्मणा। वेषि। मे। हवम्॥१५॥

पदार्थः-**(ब्रह्मणः)** धनस्य **(पते)** पालयितः **(सुयमस्य)** शोभना यमा यस्मात्तस्य **(विश्वहा)** विश्वं हन्ति जानाति प्राप्नोति वा सः **(रायः)** धनस्य **(स्याम)** भवेम **(रथ्यः)** रथेषु साधुः **(वयस्वतः)** प्रशस्तं वयो जीवनं विद्यते यस्मिँस्तस्य **(वीरेषु)** सुभटेषु **(वीरान्)** शूरान् **(उप)** **(पृङ्धि)** सम्बधान् **(नः)** अस्मान् **(त्वम्)** **(यत्)** यम् **(ईशानः)** समर्थः **(ब्रह्मणा)** वेदेन **(वेषि)** प्राप्नोषि **(मे)** मम **(हवम्)** आह्वानम्॥१५॥

अन्वयः-हे ब्रह्मणस्पते! रथ्यो विश्वहेशानस्त्वं ब्रह्मणा मे यद्धवं वेषि तेन नोऽस्मान् सुयमस्य वयस्वतो रायो वीरेषु नोऽस्मान् वीरानुपपृङ्धि यतो वयमभीष्टसिद्धाः स्याम॥१५॥

भावार्थः-ये सुसंयताः स्युस्ते चिरं जीवेयुः। ये ब्रह्मचर्यं पालयेयुस्त आत्मशरीराभ्यां सुवीरा जायन्ते॥१५॥

पदार्थः-हे **(ब्रह्मणः)** धन के **(पते)** रक्षक **(रथ्यः)** रथ क्रिया में प्रवीण **(विश्वहा)** सबको जानने वा प्राप्त होनेवाले **(त्वम्)** आप **(ब्रह्मणा)** वेद से **(मे)** मेरे **(यत्)** जिस **(हवम्)** आह्वान बुलाने को **(वेषि)** प्राप्त होते हो, उस आह्वान से **(नः)** हमको **(सुयमस्य)** सुन्दर संयम हों जिससे उस और **(वयस्वतः)** जिसके होने में अच्छा जीवन व्यतीत हो, उस **(रायः)** धन के रक्षक **(वीरेषु)** और सिपाहियों में हम **(वीरान्)** वीर लोगों से **(उप, पृङ्धि)** समीप सम्बन्ध कीजिये, जिससे हम लोग अभीष्ट कार्य सिद्ध करनेवाले **(स्याम)** हों॥१५॥

भावार्थः-जो लोग सुन्दर संयमवाले हों, वे बहुत काल जीवें। जो ब्रह्मचर्य्य का पालन करें, वे आत्मा और शरीर से अच्छे वीर होते हैं॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः॥१६॥३॥

ब्रह्मणः। पते। त्वम्। अस्य। यन्ता। सुऽउक्तस्य। बोधि। तनयम्। च। जिन्व। विश्वम्। तत्। भद्रम्। यत्। अवन्ति। देवाः। बृहत्। वदेम। विदथे। सुऽवीराः॥१६॥

पदार्थः-(**ब्रह्मणः**) (**पते**) धनस्य पालक (**त्वम्**) (**अस्य**) (**यन्ता**) नियन्ता (**सूक्तस्य**) सुष्ठूक्तस्यार्थम् (**बोधि**) जानीहि (**तनयम्**) औरसं विद्यार्थिनं वा (**च**) (**जिन्व**) सुखय (**विश्वम्**) जगत् (**तत्**) (**भद्रम्**) भन्दनीयं कल्याणयुक्तम् (**यत्**) (**अवन्ति**) रक्षन्ति (**देवाः**) विद्वांसः (**बृहत्**) महत् (**वदेम**) (**विदथे**) विज्ञातव्ये संग्रामादिव्यवहारे (**सुवीराः**)॥१६॥

अन्वयः-हे ब्रह्मणस्पते! त्वमस्य सूक्तस्यार्थं बोधि तनयं जिन्व राज्यस्य च यन्ता भव यतो देवा यद्विश्वमवन्ति तद्बृहद्भद्रं विदथे सुवीरा वयं वदेम॥१६॥

भावार्थः-सर्वैर्मनुष्यै सुनियमेन वेदार्थान् विज्ञाय पूर्णयुवावस्थायां स्वयंवरं विवाहं विधाय धर्मेणापत्यान्युत्पाद्य संपाल्य यथावत् ब्रह्मचर्य्येण सुशिक्ष्य विदुषः कृत्वा सुखं वर्द्धनीयमिति॥१६॥

अत्र विद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति चतुर्विंशतितमं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे (**ब्रह्मणस्पते**) धन के पालक विद्वान्! (**त्वम्**) तू (**अस्य**) इस (**सूक्तस्य**) सूक्त अर्थात् अच्छे प्रकार कहे वाक्य के अर्थ को (**बोधि**) जान (**तनयम्**) औरस पुत्र वा विद्यार्थी जन को (**जिन्व**) सुखी कर (**च**) और राज्य का (**यन्ता**) नियमकर्त्ता हो, जिससे (**देवाः**) विद्वान् लोग (**यत्**) जिस (**विश्वम्**) जगत् की (**अवन्ति**) रक्षा करते हैं (**तत्**) उसको (**बृहत्**) बड़ा (**भद्रम्**) कल्याणयुक्त (**विदथे**) जानने योग्य संग्रामादि व्यवहार में (**सुवीराः**) सुन्दर वीरोंवाले हम लोग (**वदेम**) उपदेश करें॥१६॥

भावार्थः-सब मनुष्यों को उचित है कि सुन्दर नियम से वेद के अर्थों को जान पूर्ण युवावस्था में स्वयवरं विवाह कर धर्म से सन्तानों की उत्पत्ति और रक्षा कर यथावत् ब्रह्मचर्य के साथ सुन्दर शिक्षा दे और विद्वान् करके सुख बढ़ावें॥१६॥

इस सूक्त में विद्वान् और ईश्वर के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है, यह जानो॥

यह चौबीसवां सूक्त और तीसरा वर्ग समाप्त हुआ॥

इन्धान इति पञ्चर्चस्य पञ्चविंशतितमस्य सूक्तस्य गृत्समद ऋषिः। ब्रह्मणस्पतिर्देवता। १, २ जगती। ३ निचृज्जगती। ४, ५ विराड् जगती छन्दः। निषादः स्वरः॥

अथ विद्युद्वर्णनमाह॥

अब पच्चीसवें सूक्त का आरम्भ है। उसके आदि में बिजुली का वर्णन करते हैं॥

इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत्।
जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः॥ १॥

इन्धानः। अग्निम्। वनवत्। वनुष्यतः। कृतऽब्रह्मा। शूशुवत्। रातऽहव्यः। इत्। जातेन। जातम्। अति। सः। प्र। ससृते। यम्ऽयम्। युजम्। कृणुते। ब्रह्मणः। पतिः॥ १॥

पदार्थः-(इन्धानः) प्रदीप्तः **(अग्निम्)** विद्युतम् **(वनवत्)** वनेन तुल्यम् **(वनुष्यतः)** हिंसन्तम्। अत्र विभक्तिव्यत्ययः। **वनुष्यतिर्हन्तिकर्मे**ति[६] (निरु०५.२) निरुक्ते। **(कृतब्रह्मा)** कृतानि ब्रह्माणि धनानि येन सः **(शूशुवत्)** विजानाति। अत्राडभावो लडर्थे लुङ् च। **(रातहव्यः)** रातानि दत्तानि हव्यानि येन सः **(इत्)** एव **(जातेन)** उत्पन्नेन जगता सह **(जातम्)** उत्पन्नं पदार्थम् **(अति)** **(सः)** **(प्र)** **(सर्सृते)** भृशं सरति गच्छति **(यंयम्)** **(युजम्)** युक्तम् **(कृणुते)** **(ब्रह्मणः)** धनस्य **(पतिः)** पालकः॥ १॥

अन्वयः-यः कृतब्रह्मेन्धानो रातहव्यो ब्रह्मणस्पतिर्जातेन जातमति सर्सृते यंयं युजं प्र कृणुते स इद्वनवद्वनुष्यतोऽग्निं प्र शूशुवत्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा किरणा वायुना सह सर्प्पन्ति तथैव विद्युदग्निः सर्वैः पदार्थैः सह सर्प्पति ता यत्र यत्र प्रयुञ्जीत तत्र तत्र महत्कार्यं साध्नोति॥ १॥

पदार्थः-जो **(कृतब्रह्मा)** धनों को उत्पन्न करनेवाला **(इन्धानः)** तेजस्वी **(रातहव्यः)** होम के योग्य पदार्थों का दाता **(ब्रह्मणः)** धन का **(पतिः)** रक्षक स्वामी **(जातेन)** उत्पन्न हुए जगत् के साथ **(जातम्)** उत्पन्न पदार्थ को **(अति, सर्सृते)** अत्यन्त शीघ्र प्राप्त होता **(यंयम्)** जिस-जिस को **(युजम्)** कार्य्यों में युक्त **(कृणुते** करता **(सः, इत्)** वही **(वनवत्)** वन को जैसे वैसे **(वनुष्यतः)** जलाते नष्ट करते हुए **(अग्निम्)** विद्युत् अग्नि को **(प्र, शूशुवत्)** अच्छे प्रकार जानता है॥ १॥

---

६. वनुष्यति ऋध्यतिकर्मा-निघण्टु २.१२॥ सं.

भावार्थः-इसमें उपमालङ्कार है। जैसे किरण वायु के साथ चलती हैं, वैसे ही विद्युत् अग्नि सब पदार्थों के साथ चलता है। उसको मनुष्य जहाँ-जहाँ प्रयुक्त करें, वहाँ-वहाँ बड़े काम को सिद्ध करता है॥१॥

को मनुष्यो विद्यां वर्द्धयितुं शक्नोति॥

कौन मनुष्य विद्या-वृद्धि कर सकता है, इस विषय को अगले मन्त्र में कहा है॥

वीरेभिर्वीरान् वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः॥२॥

वीरेभिः। वीरान्। वनवत्। वनुष्यतः। गोभिः। रयिम्। पप्रथत्। बोधति। त्मना। तोकम्। च। तस्य। तनयम्। च। वर्धते। यम्ऽयम्। युजम्। कृणुते। ब्रह्मणः। पतिः॥२॥

पदार्थः-(**वीरेभिः**) (**वीरान्**) शरीरात्मबलयुक्तान् (**वनवत्**) वनेन जङ्गलेन तुल्यम् (**वनुष्यतः**) याचमानस्य (**गोभिः**) इन्द्रियैः (**रयिम्**) श्रियम् (**पप्रथत्**) प्रख्यापयति (**बोधति**) विजानाति (**त्मना**) आत्मना अन्तःकरणेन (**तोकम्**) अल्पमपत्यम् (**च**) (**तस्य**) (**तनयम्**) पौत्रम् (**च**) (**वर्द्धते**) (**यंयम्**) (**युजम्**) युक्तम् (**कृणुते**) (**ब्रह्मणः**) अन्नस्य (**पतिः**) पालकः॥२॥

अन्वयः-यो ब्रह्मणस्पतिर्वनुष्यतो वीरेभिर्वीरान् गोभिर्वनवद्रयिं पप्रथत् त्मना पदार्थविज्ञानं बोधति तस्य तोकमैश्वर्य्यं तनयञ्च वर्द्धते स यंयं युजं कृणुते स स त्मना आत्मना प्रथते॥२॥

भावार्थः-अत्रोपमालङ्कारः। यथा धनं याचमानो मनो युङ्क्ते तथा पुत्रपौत्रादिपालने चित्तं ददाति येन पदार्थेन सह यस्य पदार्थस्य योगस्य योग्यतास्ति तं प्रत्यहं करोति स बहूनुत्तमान् मनुष्यान् प्राप्य विद्यावृद्धिं कर्त्तुं शक्नोति॥२॥

पदार्थः-जो (**ब्रह्मणस्पतिः**) अन्न का रक्षक विद्वान् जन (**वनुष्यतः**) याचक मनुष्य के (**वीरेभिः**) वीर पुरुषों के साथ (**वीरान्**) शरीरात्मबलयुक्त को और (**गोभिः**) इन्द्रियों से (**वनवत्**) वन जङ्गल से जैसे वैसे (**रयिम्**) शोभा को (**पप्रथत्**) प्रख्यात प्रसिद्ध करता है (**त्मना**) अन्तःकरण से पदार्थ विज्ञान को (**बोधति**) जानता है (**तस्य**) उसका (**तोकम्**) छोटा बालक (**च**) और ऐश्वर्य (**च**) तथा (**तनयम्**) पौत्र आदि (**वर्द्धते**) [विद्या की] वृद्धि को प्राप्त होता वह (**यंयम्**) जिस-जिस को (**युजम्**) शुभगुणयुक्त (**कृणुते**) करता है, वह-वह अपने स्वरूप से प्रख्यात होता है॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे धन की याचना करता हुआ पुरुष मन को युक्त करता, वैसे पुत्रादि के पालन में चित्त देता है। जिस पदार्थ के साथ जिसके योग की योग्यता होती,

उसको उसके साथ प्रतिदिन युक्त करता है, वह बहुत उत्तम मनुष्यों को प्राप्त हो के विद्या की वृद्धि कर सकता है॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीरभि वष्ट्योजसा।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः॥३॥

सिन्धुः। नः। क्षोदः। शिमीऽवान्। ऋघायतः। वृषाऽइव। वध्रीन्। अभि। वष्टि। ओजसा। अग्नेःऽइव। प्रऽसितिः। न। अह। वर्तवे। यम्ऽयम्। युजम्। कृणुते। ब्रह्मणः। पतिः॥३॥

पदार्थः-(सिन्धुः) समुद्रः **(न)** इव **(क्षोदः)** जलम्। **क्षोद इत्युदकनामसु पठितम्।** (निघं०१.१२)। **(शिमीवान्)** प्रशस्तकर्मयुक्तः **(ऋघायतः)** ऋतं सत्यं हिंसतः। अत्र हन् धातोश्**छान्दसो वर्णलोप** इति त लोपो बाहुलकादौणादिको डण् प्रत्ययः। **(वृषेव)** यथा बलिष्ठो वृषभः **(वध्रीन्)** वृद्धान् वृषभान् **(अभि)** आभिमुख्ये **(वष्टि)** कामयते **(ओजसा)** बलेन **(अग्नेरिव)** **(प्रसितिः)** बन्धनम् **(न)** निषेधे **(अह)** **(वर्त्तवे)** **(यंयम्)** **(युजम्)** **(कृणुते)** **(ब्रह्मणः)** **(पतिः)**॥३॥

अन्वयः-यः शिमीवान् ब्रह्मणस्पतिः क्षोदः सिन्धुर्न वध्रीनभि वृषेवौजसा ऋघायतो नाशं करोति सत्यं वष्टि। अग्नेरिव प्रसितिर्वर्त्तवे नाह भवति यंयं युजं कृणुते स तं तं सुखिनं करोति॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः पुरुषार्थिनः सन्ति समुद्रवद्गम्भीरा धनाढ्या वृषभवद्बलिष्ठा अग्निवच्छत्रुदाहकाः सत्यकामाः स्युस्ते सर्वा शिल्पविद्यां साद्धुं शक्नुवन्ति॥३॥

पदार्थः-जो **(शिमीवान्)** प्रशस्त कर्मयुक्त **(ब्रह्मणस्पतिः)** वेद का रक्षक विद्वान् पुरुष **(क्षोदः)** जल को **(सिन्धुः, न)** समुद्र जैसे अपने में लय करता **(वध्रीन्)** वा साधारण बैलों को **(अभि)** सम्मुख होके जैसे **(वृषेव)** अति बलवान् बैल मारता, वैसे **(ओजसा)** बल से **(ऋघायतः)** सत्य धर्म के नाशक शत्रुओं का नाश करता, सत्य को **(वष्टि)** चाहता और **(अग्नेरिव)** अग्नि से जैसे **(प्रसितिः)** बन्धन **(वर्त्तवे)** वर्त्तने के अर्थ **(न, अह)** नहीं रहता अर्थात् स्वाधीनता होती है, वैसे **(यंयम्)** जिस-जिस को **(युजम्)** शुभ गुणयुक्त **(कृणुते)** करता है, वह उस-उस को सुखी करता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य पुरुषार्थी, समुद्र के तुल्य गम्भीर, धनाढ्य, वृषभ के तुल्य बलवान्, अग्नि के तुल्य शत्रुओं के जलानेवाले, सत्यकामनायुक्त होते हैं, वे समस्त शिल्पविद्या को सिद्ध कर सकते हैं॥३॥

अथ के विजयिनो भवन्तीत्याह॥

अब कौन विजयी होते हैं, इस विषय को अगले मन्त्र में कहा है॥

तस्मा॑ अर्षन्ति दि॒व्या अ॑स॒श्चत॒: स सत्वं॑भि: प्रथ॒मो गोषु॑ गच्छति।
अनि॑भृष्टतविषिर्हन्त्योज॑सा॒ यंयं॒ युजं॑ कृणु॒ते ब्रह्म॑ण॒स्पति॑:॥४॥

तस्मै॑। अ॒र्ष॒न्ति॒। दि॒व्याः। अ॒स॒श्चत॑ः। सः। सत्वं॑ऽभिः। प्र॒थ॒मः। गोषु॑। ग॒च्छ॒ति॒। अनि॑ऽभृष्टऽतविषिः। ह॒न्ति॒। ओज॑सा। यम्ऽय॑म्। युज॑म्। कृ॒णु॒ते। ब्रह्म॑णः। पति॑:॥४॥

पदार्थः-(तस्मै) (अर्षन्ति) प्राप्नुवन्ति। अत्र विकरणव्यत्ययेन शप्। **(दिव्याः)** शुद्धाः **(असश्चतः)** असज्यमानाः **(सः) (सत्वभिः)** पदार्थैः सह **(प्रथमः) (गोषु)** पृथिवीषु **(गच्छति) (अनिभृष्टतविषिः)** न नितरां भृष्टा तविषी सेना यस्य सः **(हन्ति) (ओजसा)** पराक्रमेण **(यंयम्) (युजम्) (कृणुते) (ब्रह्मणः) (पतिः)**॥४॥

अन्वयः-यः प्रथमोऽनिभृष्टतविषिर्ब्रह्मणस्पतिः सत्वभिस्सह गोषु गच्छत्योजसा शत्रून् हन्ति स यंयं युजं कृणुते तस्मै दिव्या असश्चतो भद्रा वीरा अर्षन्ति प्राप्नुवन्ति॥४॥

भावार्थः-त एव विजयिनः सन्ति ये सर्वैर्बलैस्साधनोपसाधनैर्विद्यया च युक्ता भवन्ति॥४॥

पदार्थः-जो **(प्रथमः)** मुख्य **(अनिभृष्टतविषिः)** जिसकी सेना निरन्तर भ्रष्ट नहीं होती वह **(ब्रह्मणस्पतिः)** ब्राह्मणादि वर्णव्यवस्था का रक्षक **(सत्वभिः)** पदार्थों के साथ **(गोषु)** पृथिवी में **(गच्छति)** जाता है **(ओजसा)** बल-पराक्रम से शत्रुओं को **(हन्ति)** मारता **(सः)** वह **(यंयम्)** जिस-जिस को **(युजम्)** कार्य में नियुक्त **(कृणुते)** करता **(तस्मै)** उसके लिये **(दिव्याः)** शुद्ध **(असश्चतः)** जो किसी व्यसन में आसक्त नहीं ऐसे कल्याणकारी वीर पुरुष **(अर्षन्ति)** प्राप्त होते हैं॥४॥

भावार्थः-वे ही लोग विजयी होते हैं, जो सब बलों और साधन-उपसाधनों से तथा विद्या से युक्त होते हैं॥४॥

अथ के मनुष्याः कार्य्याणि साध्नुवन्तीत्याह॥

अब कौन मनुष्य कार्यों को सिद्ध करते हैं, इस विषय को अगले मन्त्र में कहा है॥

तस्मा॒ इद्विश्वे॑ धुनयन्त॒ सिन्ध॒वोऽच्छि॑द्रा॒ शर्म॑ दधिरे पु॒रूणि॑।

देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः॥५॥४॥

तस्मै। इत्। विश्वे। धुनयन्त। सिन्धवः। अच्छिद्रा। शर्म। दधिरे। पुरूणि। देवानाम्। सुम्ने। सुऽभगः। सः। एधते। यम्ऽयम्। युजम्। कृणुते। ब्रह्मणः। पतिः॥५॥

पदार्थः-(तस्मै) (इत्) एव **(विश्वे)** सर्वे **(धुनयन्त)** धुनयन्ति कम्पयन्ति। अत्राडभावः। **(सिन्धवः)** समुद्रादयः। **(अच्छिद्रा)** छिद्ररहितानि **(शर्म)** शर्माणि गृहाणि **(दधिरे)** दधति **(पुरूणि)** बहूनि **(देवानाम्) (सुम्ने)** सुखे **(सुभगः)** शोभनमैश्वर्यः **(सः) (एधते) (यंयम्) (युजम्) (कृणुते) (ब्रह्मणः) (पतिः)**॥५॥

अन्वयः-यो ब्रह्मणस्पतिर्देवानां सुम्ने सुभगः सन् यंयं युजं कृणुते स एधते तस्मा इद्विश्वे सिन्धवोऽच्छिद्रा पुरूणि शर्म दधिरे धुनयन्त॥५॥

भावार्थः-ये मनुष्या विद्वत्सङ्गप्रियाः पदार्थसम्भोगविभागकारिणो रसायनविद्यायुक्ताः स्युस्ते सर्वेभ्यः पदार्थेभ्यो बहूनि कार्याणि साधयितुं शक्नुवन्तीति॥५॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

[इति पञ्चविंशतितमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥]

पदार्थः-जो **(ब्रह्मणः)** वेदविद्या का **(पतिः)** रक्षक प्रचारक विद्वान् मनुष्य **(देवानाम्)** विद्वानों के **(सुम्ने)** सुख में **(सुभगः)** सुन्दर ऐश्वर्यवाला प्रफुल्लित होता हुआ **(यंयम्)** जिस-जिस को **(युजम्)** शुभ कर्मयुक्त **(कृणुते)** करता है **(सः)** वह **(एधते)** उन्नति को प्राप्त होता **(तस्मै, इत्)** उसी के लिये **(विश्वे)** सब **(सिन्धवः)** समुद्रादि जलाशय **(अच्छिद्रा)** छेद-भेद रहित **(पुरूणि)** बहुत **(शर्म)** सुखदायी निवासस्थानों को **(दधिरे)** धारण करते तथा **(धुनयन्त)** सर्वत्र चलाते हैं अर्थात् यानादि द्वारा सर्वत्र निवास पाता है॥५॥

भावार्थः-जो मनुष्य विद्वानों के सङ्ग में प्रीति रखने, पदार्थों का संयोग-विभाग करनेवाले रसायनविद्या में उद्योगी होवें, वे सब पदार्थों से बहुत कार्य सिद्ध कर सकते हैं॥५॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त में कहे अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह पच्चीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

ऋजुरिति चतुर्ऋचस्य षड्विंशतितमस्य सूक्तस्य गृत्समद ऋषिः। ब्रह्मणस्पतिर्देवता। १, ३ जगती २, ४ निचृज्जगती छन्दः। निषादः स्वरः॥

अथ विदुषां किं कार्यमस्तीत्याह॥

अब इस दूसरे मण्डल के छब्बीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वानों को क्या कर्त्तव्य है, इस विषय को कहते हैं॥

ऋ॒जुरि॑च्छंसो वनवद्वनु॒ष्य॒तो दे॒व॒यन्नि॑ददे॒वय॑न्तम॒भ्य॑सत्।
सुप्रा॒वीरि॒द्वन॑वत्पृ॒त्सु दु॒ष्टर॑ं यज्वे॒दय॑ज्यो॒र्वि भ॑जाति॒ भोज॑नम्॥ १॥

ऋ॒जुः। इत्। शंस॑ः। व॒न॒व॒त्। व॒नु॒ष्य॒तः। दे॒व॒ऽयन्। इत्। अदे॑वऽयन्तम्। अ॒भि। अ॒स॒त्। सु॒प्र॒ऽअ॒वीः। इत्। व॒न॒व॒त्। पृ॒त्ऽसु। दु॒स्तर॑म्। यज्वा॑। इत्। अय॑ज्योः। वि। भ॒जा॒ति॒। भोज॑नम्॥ १॥

पदार्थः-(ऋजुः) सरलः **(इत्)** एव **(शंसः)** स्तुत्यः **(वनवत्)** किरणवत् **(वनुष्यतः)** हिंसतः **(देवयन्)** आत्मानं देवमिच्छन् **(इत्) (अदेवयन्तम्)** आत्मानं देवमिच्छन्तम् **(अभि) (असत्)** स्यात् **(सुप्रावीः)** सुष्ठु रक्षकः **(इत्) (वनवत्) (पृत्सु)** संग्रामेषु **(दुष्टरम्)** दुःखेनोल्लङ्घयितुं योग्यम् **(यज्वा)** सङ्गन्ता **(इत्) (अयज्योः)** असङ्गन्तुः **(वि) (भजाति)** विभेजत् **(भोजनम्)**॥ १॥

अन्वयः-यो यज्वाऽयज्योरिद्भोजनं विभजाति स इत्सुप्रावीः सन् पृत्सु वनवदुष्टरं विभजाति यो देवयन्नदेवयन्तमिदभ्यसत्स वनवच्छंसो वनुष्यत इदृजुस्स्यात्॥ १॥

भावार्थः-ये मनुष्याः पाण्डित्यमिच्छन्तोः मौर्ख्यं जहन्तः शत्रून् विजयमाना भोग्यान् पदार्थान् विभजेयुस्ते दुःखानि वर्जयेयुः॥ १॥

पदार्थः-जो **(यज्वा)** मिलनसार जन **(अयज्योः)** विरोधी के **(इत्)** ही **(भोजनम्)** भोग्य पदार्थ को **(वि, भजाति)** पृथक् करता है, वह **(इत्)** ही **(सुप्रावीः)** सुन्दर रक्षक हुआ **(पृत्सु)** संग्रामों में **(वनवत्)** वन के तुल्य **(दुष्टरम्)** दुःख से उल्लङ्घन करने योग्य शत्रुदल को छिन्न-भिन्न करता है। जो **(देवयन्)** अपने को विद्वान् मानता हुआ **(अदेवयन्तम्)** मूर्ख का सा आचरण करते हुए को **(इत्)** ही **(अभि, असत्)** सम्मुख प्राप्त हो, वह **(वनवत्)** किरणों के तुल्य **(शंसः)** स्तुति करने योग्य **(वनुष्यतः)** हिंसा करनेवाले से **(इत्)** ही **(ऋजुः)** सरल कोमल स्वभाव होवे॥ १॥

भावार्थः-जो मनुष्य पण्डिताई को चाहते, मूर्खता को छोड़ते और शत्रुओं को जीतते हुए भोग्य पदार्थों को विशेष कर सेवन करते हैं, वे दुःखों को छोड़ देते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये।
हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे॥ २॥

यजस्व। वीर। प्र। विहि। मनायतः। भद्रम्। मनः। कृणुष्व। वृत्रऽतूर्ये। हविः। कृणुष्व। सुऽभगः। यथा। अससि। ब्रह्मणः। पतेः। अवः। आ। वृणीमहे॥ २॥

पदार्थः-(यजस्व) सङ्गच्छस्व **(वीर)** शुभगुणेषु व्यापनशील **(प्र)** **(विहि)** प्राप्नुहि। अत्र वर्णव्यत्ययेन ह्रस्वम्। **(मनायतः)** आत्मनो मन आचरतः **(भद्रम्)** कल्याणकरम् **(मनः)** **(कृणुष्व)** **(वृत्रतूर्य्ये)** शत्रुबधे **(हविः)** दानम् **(कृणुष्व)** **(सुभगः)** शोभनैश्वर्यः **(यथा)** **(अससि)** स्याः **(ब्रह्मणः)** **(पतेः)** **(अवः)** रक्षणम् **(आ)** **(वृणीमहे)**॥ २॥

अन्वयः-हे वीर! त्वं ब्रह्मणस्पतेर्मनायतो जनाद्विद्याः प्र विहि। धर्मं यजस्व भद्रं मनः कृणुष्व सुभगः सन् वृत्रतूर्ये हविः कृणुष्व यथा त्वमससि तथा वयमव आ वृणीमहे॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः स्वकीयानि मनांसि कल्याणतमे मार्गे प्रवर्त्य सर्वाणि कार्य्याणि साध्नुवन्ति ते कृतकृत्या भवन्ति॥ २॥

पदार्थः-हे **(वीर)** शुभगुणों में व्याप्त होनेवाले विद्यार्थी जन! तू **(ब्रह्मणः)** वेदादि शास्त्रों की **(पतेः)** पालना करनेवाले **(मनायतः)** अपने को मनन विचार का आचरण करनेवाले जन से विद्याओं को **(प्र, विहि)** अच्छे प्रकार प्राप्त हो। धर्म का **(यजस्व)** सङ्ग कर, **(मनः)** मन को **(भद्रम्)** कल्याणकारी **(कृणुष्व)** कर, **(सुभगः)** सुन्दर ऐश्वर्य्यवाला हुआ **(वृत्रतूर्ये)** शत्रुओं का जहाँ वध होता, उस संग्राम में **(हविः)** दान को **(कृणुष्व)** कर। **(यथा)** जैसे तू **(अससि)** हो, वैसे हम लोग **(अवः)** रक्षा को **(आ, वृणीमहे)** अच्छे प्रकार स्वीकार करें॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य अपने मनों को अति कल्याणकारी मार्ग में प्रवृत्त कर सब कार्य्यों को सिद्ध करते हैं, वे कृतकृत्य होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम्॥ ३॥

सः। इत्। जनेन। सः। विशा। सः। जन्मना। सः। पुत्रैः। वाजम्। भरते। धना। नृऽभिः। देवानाम्। यः। पितरम्। आऽविवासति। श्रद्धाऽमना। हविषा। ब्रह्मणः। पतिम्॥ ३॥

पदार्थः-(सः) (**इत्**) एव (**जनेन**) (**सः**) (**विशा**) प्रजया (**सः**) (**जन्मना**) (**सः**) (**पुत्रैः**) अपत्यैः (**वाजम्**) विज्ञानम् (**भरते**) दधाति (**धना**) (**नृभिः**) नायकैर्मनुष्यैः (**देवानाम्**) विदुषाम् (**यः**) (**पितरम्**) जनकमध्यापकं वा (**आविवासति**) समन्तात्परिचरति सेवते (**श्रद्धामनाः**) श्रद्धा मनसि यस्य सः (**हविषा**) सद्व्यवहारग्रहणेन सह (**ब्रह्मणः**) (**पतिम्**) पालकम्॥ ३॥

अन्वयः-हे विद्वन्! यथा स जनेन स विशा स जन्मना पुत्रैर्वाजं नृभिः सह धना भरते। यः श्रद्धामना हविषा देवानां विदुषां ब्रह्मणस्पतिं पितरमाविवासति स इच्छरीत्मबलेन युक्तः सन् सुखी भवति॥ ३॥

भावार्थः-ये प्रीत्या विदुषामध्यापकमुपदेशकं च विद्वांसं सेवन्ते, ते सर्वत्र सर्वैः पदार्थैर्निष्पन्नमानन्दं भुञ्जते॥ ३॥

पदार्थः-हे विद्वान् जन! जैसे (**सः**) वह (**जनेन**) साधारण मनुष्य के (**सः**) वह (**विशा**) प्रजा के (**सः**) वह (**जन्मना**) जन्म के और (**सः**) वह (**पुत्रैः**) सन्तानों के साथ (**वाजम्**) विज्ञान को तथा (**नृभिः**) अधिकारी मनुष्यों के साथ (**धना**) धनों को (**भरते**) धारण करता (**यः**) जो (**श्रद्धामनाः**) मन में श्रद्धा रखनेवाला (**हविषा**) उत्तम व्यवहार ग्रहण के साथ (**देवानाम्**) विद्वानों के सम्बन्धी (**ब्रह्मणः**) वेद के (**पतिम्**) पालक रक्षक (**पितरम्**) पिता वा अध्यापक का (**आविवासति**) अच्छे प्रकार सेवन करता (**इत्**) वही शरीर और आत्मा के बल से युक्त हुआ सुखी होता है॥ ३॥

भावार्थः-जो मनुष्य प्रीतिपूर्वक विद्वानों के अध्यापक और उपदेशक विद्वान् का सेवन करते हैं, वे सर्वत्र सब पदार्थों से निष्पन्न हुए आनन्द को भोगते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः।
उरुष्यतीमंहसो रक्षती रिषो३होश्चिदस्मा उरुचक्रिरद्भुतः॥ ४॥ ५॥

यः। अस्मै। हव्यैः। घृतवत्ऽभिः। अविधत्। प्र। तम्। प्राचा। नयति। ब्रह्मणः। पतिः। उरुष्यति। ईम्। अंहसः। रक्षति। रिषः। अंहोः। चित्। अस्मै। उरुऽचक्रिः। अद्भुतः॥ ४॥

पदार्थः-(यः) (**अस्मै**) विदुषे (**हव्यैः**) दातुमर्हैः (**घृतवद्भिः**) बहुभिर्घृतादिपदार्थैः सह वर्त्तमानैः (**अविधत्**) विदधाति (**प्र**) (**तम्**) (**प्राचा**) प्राचीनेन विज्ञानेन (**नयति**) प्राप्नोति (**ब्रह्मणः**) धननिधेः (**पतिः**) पालकः (**उरुष्यति**) रक्षति (**ईम्**) (**अंहसः**) पापाचरणात् (**रक्षति**)। अत्र **संहितायामि**ति दीर्घः। (**रिषः**) हिंसकान् (**अंहोः**) पापमाचरितुः (**चित्**) अपि (**अस्मै**) (**उरुचक्रिः**) बहुकर्त्ता (**अद्भुतः**) आश्चर्यगुणकर्मस्वभावः॥४॥

अन्वयः-य उरुचक्रिरद्भुतो ब्रह्मणस्पतिरस्मै घृतवद्भिर्हव्यैरविधत्तं प्राचा प्रणयत्यंहसो रक्षती रिषो हत्वास्मा अंहोरुरुष्यति स ईं सुखमाप्नोति॥४॥

भावार्थः-ये यथा घृतादिपुष्टसुगन्धादिद्रव्यैर्हुतैर्वायुवृष्टिजले शुद्धे भूत्वा रोगेभ्यः पृथक्कृत्य सर्वान् सुखयतः तथोपदेशका अधर्मनिषेधपुरस्सरेण धर्मग्रहणेनात्मनः शुद्धान् संपाद्याऽविद्यादिरोगात् पृथक् कुर्वन्ति ते कृतकृत्या जायन्ते॥४॥

अस्मिन् सूक्ते विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

[इति षड्विंशतितमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥]

पदार्थः-जो (**उरुचक्रिः**) बहुत कर्म करता (**अद्भुतः**) आश्चर्यरूप गुणकर्मस्वभाववाला (**ब्रह्मणस्पतिः**) धन कोष का रक्षक (**अस्मै**) इस विद्वान् के लिये (**घृतवद्भिः**) बहुत घृतादि पदार्थों से युक्त (**हव्यैः**) देने योग्य वस्तुओं से (**अविधत्**) शुभ कार्य साधक पदार्थ बनाता (**तम्**) उसको (**प्राचा**) प्राचीन विज्ञान से (**प्र, नयति**) अच्छे प्रकार प्राप्त होता (**अंहसः**) पाप से (**रक्षति**) बचाता (**रिषः**) हिंसकों को मार के (**अस्मै**) इस विद्वान् को (**अंहो**) पापाचरणों से (**उरुष्यति**) पृथक् रखता वह (**ईम्**) सब ओर से सुख को प्राप्त होता है॥४॥

भावार्थः-जैसे घृत आदि पुष्ट और सुगन्धित द्रव्यों के होम से वायु और वृष्टिजल शुद्ध होके रोगों से प्राणियों को पृथक् कर सबको सुखी करते हैं, वैसे उपदेशक लोग अधर्म के निषेधपूर्वक धर्म के ग्रहण से आत्माओं को शुद्ध कर अविद्यादि रोगों को दूर करते हैं, वे कृतकृत्य होते हैं॥४॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिए॥

यह छब्बीसवां सूक्त और पांचवां वर्ग समाप्त हुआ॥

इमा इति सप्तदशर्चस्य सप्तविंशतितमस्य सूक्तस्य कूर्मो गार्त्समदो वा ऋषिः। आदित्यो देवता। १, ३, ६, १३-१५ निचृत्त्रिष्टुप्। २, ४, ५, ८, १२, १७ त्रिष्टुप्। ११, १६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ भुरिक् पङ्क्तिः। ९, १० स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजजनाः कीदृशाः स्युरित्याह॥

अब सत्ताईसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में राजपुरुष कैसे हों, इस विषय को कहते हैं॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥ १॥

इमाः। गिरः। आदित्येभ्यः। घृतऽस्नूः। सनात्। राजऽभ्यः। जुह्वा। जुहोमि। शृणोतु। मित्रः। अर्यमा। भगः। नः। तुविऽजातः। वरुणः। दक्षः। अंशः॥ १॥

पदार्थः-(इमाः) (**गिरः**) संस्कृता वाणीः (**आदित्येभ्यः**) मासेभ्यः (**घृतस्नूः**) या घृतमुदकं स्नान्ति शोधयन्ति ताः (**सनात्**) सदा (**राजभ्यः**) (**जुह्वा**) जिह्वया साधनेन (**जुहोमि**) (**शृणोतु**) (**मित्रः**) सखा (**अर्य्यमा**) न्यायेशः (**भगः**) सेवनीयः (**नः**) अस्माकम् (**तुविजातः**) बलादिगुणैः प्रसिद्धः (**वरुणः**) श्रेष्ठः (**दक्षः**) चतुरः (**अंशः**) दुष्टानां सम्यग् घातकः॥ १॥

अन्वयः-हे विद्वन्! यथाहमादित्येभ्य इव राजभ्यो या इमा घृतस्नूर्गिरो जुह्वा जुहोमि ता नो गिरः स मित्रोऽर्य्यमा भगस्तुविजातो वरुणो दक्षोंऽशो भवान् सनात् शृणोतु॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य आदित्यवद्वर्त्तमाना राजानस्तत्सभासदश्च प्रजाजनानां सुखदुःखान्विता निवेदिता वाचः श्रुत्वा न्यायं कुर्वन्ति, ते राज्यं वर्द्धयितुं शक्नुवन्ति॥ १॥

पदार्थः-हे विद्वान्! जैसे मैं (**आदित्येभ्यः**) महीनों के तुल्य (**राजभ्यः**) राजपुरुषों के लिये जिन (**इमाः**) इन प्रत्यक्ष (**घृतस्नूः**) घृत को शुद्ध करानेवाली (**गिरः**) शुद्ध की हुई सत्यवाणियों को (**जुह्वा**) जिह्वारूप साधन से (**जुहोमि**) होम करता अर्थात् निवेदन करता हूं, उन (**नः**) हमारी वाणियों को यह (**मित्रः**) मित्र बुद्धि (**भगः**) सेवने योग्य (**तुविजातः**) बलादि गुणों से प्रसिद्ध (**वरुणः**) श्रेष्ठ (**दक्षः**) चतुर (**अंशः**) दुष्टों के सम्यक् विनाशक (**अर्यमा**) न्यायाधीश आप (**सनात्**) सदैव (**शृणोतु**) सुनिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य्य के तुल्य तेजस्वी राजा लोग और उसके सभासद् प्रजाजनों की सुख-दुःख युक्त निवेदन की वाणियों को सुन के न्याय करते, वे राज्य बढ़ाने को समर्थ होते हैं॥

अथाध्यापकाध्येतृविषयमाह॥

अब पढ़ाने-पढ़ने वालों के विषय को अगले मन्त्र में कहा है॥

इ॒मं स्तोमं॒ सक्र॑तवो मे अ॒द्य मि॒त्रो अ॑र्य॒मा वरु॑णो जुषन्त।
आ॒दि॒त्यास॒: शुच॑यो धार॑पूता॒ अवृ॑जिना अनव॒द्या अरि॑ष्टा:॥ २॥

इ॒मम्। स्तोम॑म्। सऽक्र॑तव:। मे॒। अ॒द्य। मि॒त्र:। अ॒र्य॒मा। वरु॑ण:। जु॒ष॒न्त॒। आ॒दि॒त्यास॑:। शुच॑य:। धार॑ऽपूता:। अवृ॑जिना:। अ॒न॒व॒द्या:। अरि॑ष्टा:॥ २॥

पदार्थ:-(इमम्) (स्तोमम्) स्तुतिम् **(सक्रतव:)** समाना क्रतु: प्रज्ञा येषान्ते **(मे)** मम **(अद्य) (मित्र:)** सखा **(अर्यमा)** न्यायेश: **(वरुण:)** सर्वोत्कृष्ट: **(जुषन्त)** सेवन्ताम्। अत्राडभाव:। **(आदित्यास:)** पूर्णविद्या: **(शुचय:)** सूर्य इव पवित्रकारका: **(धारपूता:)** धारा वाणी पूता पवित्रा येषान्ते। **धारेति वाङ्नामसु पठितम्।** (निघं०१.११)। **(अवृजिना:)** अविद्यमानं वृजिनं वर्जनीयं पापं येषान्ते **(अनवद्या:)** प्रशंसनीया: **(अरिष्टा:)** अहिंसनीया न कञ्चिद्धिंसितवन्त:॥ २॥

अन्वय:-सक्रतवो मित्रोऽर्य्यमा वरुणश्च शुचयो धारपूता अवृजिना अनवद्या अरिष्टा आदित्यासोऽद्य म इमं स्तोमं जुषन्त॥ २॥

भावार्थ:-सर्वैविद्याप्रियैर्मनुष्यै: पूर्णविद्यानां स्वाध्यायस्य परीक्षां दत्वा स्वविद्या निश्चिता निर्भ्रमा कार्य्या परीक्षकाश्च पक्षपातं विहाय परीक्षां कुर्युर्नैतेन विना यथावद्विद्या भवितुमर्हति॥ २॥

पदार्थ:-(सक्रतव:) समान बुद्धिवाले **(मित्र:)** मित्र **(अर्यमा)** न्यायाधीश और **(वरुण:)** सब से उत्तम **(शुचय:)** सूर्य के तुल्य पवित्रकारक **(धारपूता:)** पवित्र वाणी से युक्त **(अवृजिना:)** वर्जनीय पाप से रहित **(अनवद्या:)** प्रशंसा को प्राप्त **(अरिष्टा:)** अहिंसनीय वा किसी को दु:ख न देनेवाले **(आदित्यास:)** पूर्ण विद्यायुक्त **(अद्य)** आज **(मे)** मेरे **(इमम्)** इस **(स्तोमम्)** स्तुति को **(जुषन्त)** सेवन करें॥ २॥

भावार्थ:-सब विद्याप्रिय मनुष्यों को चाहिये कि पूर्ण विद्यावालों को अपने पढ़े की परीक्षा देके अपनी विद्या को निश्चित निर्भ्रम करें और परीक्षक लोग भी पक्षपात को छोड़ के परीक्षा करें, क्योंकि ऐसे किये विना यथावत् विद्या नहीं हो सकती है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त आ॑दि॒त्यास॑ उ॒रवो॑ गभी॒रा अद॑ब्धासो॒ दिप्स॑न्तो भूर्य॒क्षा:।

अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति॥ ३॥

ते। आदित्यासः। उरवः। गभीराः। अदब्धासः। दिप्सन्तः। भूरिऽअक्षाः। अन्तरिति। पश्यन्ति। वृजिना। उत। साधु। सर्वम्। राजऽभ्यः। परमा। चित्। अन्ति॥ ३॥

पदार्थः-(ये) पूर्वोक्ताः **(आदित्यासः)** पूर्णविद्याः कृताष्टाचत्वारिंशद्वर्षब्रह्मचर्याः **(उरवः)** बहुप्रज्ञाः **(गभीराः)** शीलवन्तः **(अदब्धासः)** अहिंसनीयाः **(दिप्सन्तः)** दम्भितुमिच्छवः **(भूर्यक्षाः)** भूरि बहून्यक्षीणि दर्शनानि येषान्ते **(अन्तः)** आभ्यन्तरे **(पश्यन्ति)** प्रेक्षन्ते **(वृजिना)** वर्जयितव्यानि पापानि **(उत)** अपि **(साधु)** श्रेष्ठम् **(सर्वम्)** **(राजभ्यः)** **(परमा)** प्रकृष्टानि कर्माणि **(चित्)** **(अन्ति)** अन्तिके। अत्र परस्य लोपः॥ ३॥

अन्वयः-ये गभीरा उरवोऽदब्धासो भूर्यक्षा आदित्यासः सन्ति ते परमा चरन्ति। उत ये वृजिना कुर्वन्तो दिप्सन्तः स्युस्ताँश्चिदन्तरन्ति पश्यन्ति। ये च राजभ्यः सर्वं साधु कुर्वन्ति ते परीक्षां कर्त्तुं शक्नुवन्ति॥ ३॥

भावार्थः-परीक्षकाः सज्जनान् दुष्टाँश्च सम्यक् परीक्ष्य सुशीलानां सत्कारं दुश्चरित्राणामसत्कारं विधाय विद्योन्नतिं सततं कुर्युः॥ ३॥

पदार्थः-जो **(गभीराः)** गम्भीर स्वभावयुक्त **(उरवः)** तीव्र बुद्धिवाले **(अदब्धासः)** अहिंसनीय **(भूर्यक्षाः)** बहुत प्रकार से देखने-जाननेवाले **(आदित्यासः)** अड़तालीस वर्ष के ब्रह्मचर्य को सेव के पूर्ण विद्यावाले विद्वान् हैं **(ते)** वे **(परमा)** उत्तम कर्मों का आचरण करते। और जो **(वृजिना)** पाप करते हुए **(दिप्सन्तः)** दम्भ की इच्छा करनेवाले हों, उनको **(चित्)** ही **(अन्तः)** अन्तःकरण में **(अन्ति)** निकट से **(पश्यन्ति)** देख लेते हैं अर्थात् उनसे मिलते नहीं और जो **(राजभ्यः)** राजपुरुषों के लिये **(सर्वम्)** सब **(साधु)** श्रेष्ठ काम करते हैं, वे परीक्षा कर सकते हैं॥ ३॥

भावार्थः-परीक्षा करनेवाले जन श्रेष्ठ और दुष्ट पुरुषों की उत्तम प्रकार परीक्षा करते उत्तम स्वभाववालों के सत्कार और कुत्सित चरित्रवालों के अनादर को करके विद्या की उन्नति निरन्तर करें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि॥ ४॥

धारयन्तः। आदित्यासः। जगत्। स्थाः। देवाः। विश्वस्य। भुवनस्य। गोपाः। दीर्घऽधियः। रक्षमाणाः। असुर्यम्। ऋतऽवानः। चयमानाः। ऋणानि॥४॥

पदार्थः-(धारयन्तः) (आदित्यासः) पूर्णविद्याः **(जगत्)** जङ्गमम् **(स्थाः)** स्थावरम् **(देवाः)** सूर्य्यादय इव विद्वांसः **(विश्वस्य) (भुवनस्य)** निवासाधिकरणस्य स्थावरस्य जगतः प्राणिसमुदायस्य च **(गोपाः)** रक्षकाः **(दीर्घाधियः)** दीर्घा बृहती धीर्येषान्ते। अत्राऽन्येषामपीति पूर्वपदस्य दीर्घः। **(रक्षमाणाः) (असुर्यम्)** असुराणामविदुषां स्वं धनम् **(ऋतावानः)** य ऋतानि सत्यानि वनन्ति सम्भजन्ति ते **(चयमानाः)** वर्द्धमानाः **(ऋणानि)** अन्येभ्यो देयानि विज्ञानानि॥४॥

अन्वयः-हे मनुष्या! ये जगत्स्था धारयन्तो विश्वस्य भुवनस्य गोपां दीर्घाधियोऽसुर्यं रक्षमाणा ऋतावान ऋणानि चयमाना आदित्यासो देवा अन्तः पश्यन्ति तेऽध्यापका भवितुमर्हन्ति॥४॥

भावार्थः-अत्र पूर्वस्मान्मन्त्रात् **(अन्तः, पश्यन्ति)** इति पदद्वयमनुवर्त्तते। यदि विद्याध्यापका जिज्ञासुभ्यो विद्या न प्रदद्युस्तर्हि ते ऋणिनः स्युरिदमेव ऋणसमापनं यदधीत्याऽन्येभ्योऽध्यापनं कार्यमिति॥४॥

पदार्थः-हे मनुष्यो! जो **(जगत्)** चर और **(स्थाः)** अचर को **(धारयन्तः)** धारण करते हुए **(विश्वस्य)** सब **(भुवनस्य)** निवास के आधार स्थावर और प्राणिमात्र जङ्गम जगत् के **(गोपाः)** रक्षक **(दीर्घाधियः)** बड़ी बुद्धिवाले **(असुर्यम्)** मूर्खों के धन की **(रक्षमाणाः)** रक्षा करते हुए **(ऋतावानः)** सत्य के सेवी **(ऋणानि)** दूसरों को देने योग्य विज्ञानों को **(चयमानाः)** पढ़ाते हुए **(आदित्यासः)** पूर्ण विद्यावाले **(देवाः)** सूर्य्यादि के तुल्य तेजस्वी विद्वान् लोग बुद्धि से भीतर देखते हैं, वे अध्यापक होने योग्य हैं॥४॥

भावार्थः-इस मन्त्र में **(अन्तः, पश्यन्ति)** इन दो पदों की अनुवृत्ति पूर्व मन्त्र से आती है। यदि विद्वान् पढ़नेवाले विद्यार्थियों को विद्या न देवें तो वे ऋणी हो जावें, यह ऋण चुकाना है जो स्वयं पढ़कर दूसरों को पढ़ाना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम्॥५॥६॥

विद्याम्। आदित्याः। अवसः। वः। अस्य। यत्। अर्यमन्। भये। आ। चित्। मयः।ऽभु। युष्माकम्। मित्रावरुणा। प्रऽनीतौ। परि। श्वभ्राऽइव। दुःऽइतानि। वृज्याम्॥५॥

पदार्थः-(विद्याम्) जानीयां लभेय वा **(आदित्याः)** सूर्यवद्विद्याप्रकाशकाः **(अवसः)** रक्षणस्य **(वः)** युष्माकम् **(अस्य)** **(यत्)** **(अर्यमन्)** योऽर्यान् श्रेष्ठान् मनुष्यान् मिमीते मन्यते तत्सम्बुद्धौ **(भये)** **(आ)** **(चित्)** **(मयोभु)** मयः सुखं भवति यस्मात्तत् **(युष्माकम्)** **(मित्रावरुणा)** प्राणाऽपानाविव सुखप्रदौ **(प्रणीतौ)** प्रकृष्टायां नीतौ **(परि)** **(श्वघ्नेव)** गर्त्तमिव **(दुरितानि)** दुःखदानि पापानि **(वृज्याम्)** त्यजेयम्॥५॥

अन्वयः-हे आदित्या! हे अर्यमन्! यद्भये सति वोऽस्यावसश्चिन्मयोभु स्यात्तदहमाविद्याम्। हे मित्रावरुणा! युष्माकं प्रणीतौ श्वघ्नेव दुरितानि परि वृज्याम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा विद्वांसोऽखिलस्य प्राणिसमुदायस्य भयं विनाश्य सुखं सम्भाव्य पापानि वर्जयन्ति तथा सततमनुष्ठेयम्॥५॥

पदार्थः-हे **(आदित्याः)** सूर्य के तुल्य विद्या के प्रकाशक लोगो तथा हे **(अर्यमन्)** श्रेष्ठ मनुष्यों का सत्कार करनेहारे सज्जन! **(यत्)** जो **(भये)** भय होने में **(वः)** आपको **(अस्य)** इस **(अवसः)** पालन के निमित्त **(चित्)** थोड़ा भी **(मयोभु)** सुखदायी वचन हो, उसको मैं **(आ, विद्याम्)** प्राप्त होऊं वा जानूं। तथा हे **(मित्रावरुणा)** प्राणापान के तुल्य सुखदायी विद्वानो! **(युष्माकम्)** तुम्हारी **(प्रणीतौ)** उत्तम नीति में **(श्वघ्नेव)** पृथिवी के गढ़े के तुल्य **(दुरितानि)** दुःख देनेवाले पापों को **(परि, वृज्याम्)** परित्याग करूं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यो को चाहिये कि जैसे विद्वान् लोग सब प्राणियों के भय का विनाश कर सुख पहुंचा के पापों को निवृत्त करते हैं, वैसा निरन्तर करें॥५॥

पुनर्विद्वत्सङ्गप्रिया जनाः किं कुर्य्युरित्याह॥

फिर विद्वानों के सङ्ग में प्रीति रखनेवाले मनुष्य लोग क्या करें,
इस विषय को अगले मन्त्र में कहा है॥

सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म॥६॥

सुऽगः। हि। वः। अर्यमन्। मित्र। पन्थाः। अनृक्षरः। वरुण। साधुः। अस्ति। तेन। आदित्याः। अधि। वोचत। नः। यच्छत। नः। दुःऽपरिहन्तु। शर्म॥६॥

पदार्थः-(सुगः) सुष्ठु गच्छन्ति यस्मिन् सः **(हि)** किल **(वः)** युष्माकम् **(अर्यमन्)** श्रेष्ठसत्कर्त्तः **(मित्र)** सखे **(पन्थाः)** **(अनृक्षरः)** निष्कण्टकः **(वरुण)** श्रेष्ठ **(साधुः)** साध्नुवन्ति धर्मं यस्मिन् सः **(अस्ति)** **(तेन)** **(आदित्याः)** विद्वांसः **(अधि)** **(वोचत)** प्रवदत। अत्र **संहितायामिति**

दीर्घः। **(नः)** अस्मभ्यम् **(यच्छत)** ददत **(नः)** **(दुष्परिहन्तु)** दुःखेन परिहननं यस्य तद्विद्याद्यभ्यासार्थम् **(शर्म)** गृहम्॥६॥

अन्वयः-हे आदित्या! हे अर्यमन्! हे मित्र! हे वरुण! यो योऽनृक्षरः सुगः साधुः पन्था अस्ति तेन हि नोऽधि वोचत यदिदं दुष्परिहन्तु शर्म तन्नो यच्छत॥६॥

भावार्थः-मनुष्यैर्धार्मिकाणां विदुषां स्वभावं गृहीत्वा वेदोक्ते सत्ये मार्गे चलनीयं येन सत्यशास्त्राध्ययनाऽध्यापनवृद्धिस्स्यात्तदेव कर्म सदा सेवनीयम्॥६॥

पदार्थः-हे **(आदित्याः)** विद्वान् लोगो! हे **(अर्यमन्)** श्रेष्ठ सत्कारयुक्त! हे **(मित्र)** मित्र! हे **(वरुण)** प्रतिष्ठित सज्जन पुरुष! जो **(वः)** तुम लोगों का **(अनृक्षरः)** कण्टकादिरहित **(सुगः)** जिसमें निर्विघ्न चल सकें **(साधुः)** जिसमें धर्म को सिद्ध करते ऐसा **(पन्थाः)** मार्ग **(अस्ति)** है **(तेन, हि)** उसी मार्ग से चलने के लिये **(नः)** हमको **(अधि, वोचत)** अधिक कर उपदेश करो। और जो यह **(दुष्परिहन्तु)** बड़ी कठिनता से टूटे-फूटे ऐसे विद्याभ्यासादि के लिये बना हुआ **(शर्म)** घर है, वह **(नः)** हमारे लिये **(यच्छत)** देओ॥६॥

भावार्थः-मनुष्यों को चाहिये कि धर्मात्मा विद्वानों के स्वभाव को ग्रहण कर वेदोक्त सत्य मार्ग में चलें। जिससे सत्यशास्त्र के पढ़ने-पढ़ाने की वृद्धि होवे, वही कर्म सदा सेवने योग्य है॥६॥

अथ न्यायाधीशविषयमाह॥

अब न्यायाधीश का विषय अगले मन्त्र में कहा है॥

पिपर्तु नो अदितीः राजपुत्राति द्वेषांस्यर्यमा सुगेभिः।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः॥७॥

पिपर्तु। नः। अदितिः। राजऽपुत्रा। अति। द्वेषांसि। अर्यमा। सुऽगेभिः। बृहत्। मित्रस्य। वरुणस्य। शर्म। उप। स्याम। पुरुऽवीराः। अरिष्टाः॥७॥

पदार्थः-**(पिपर्त्तु)** पालयन्तु **(नः)** अस्मान् **(अदितिः)** मातेव **(राजपुत्रा)** राजा पुत्रो यस्याः सा **(अति)** **(द्वेषांसि)** **(अर्यमा)** विद्वत्प्रियः **(सुगेभिः)** सुगमैर्मार्गैः **(बृहत्)** **(मित्रस्य)** सख्युः **(वरुणस्य)** प्रशस्तस्य **(शर्म)** गृहम् **(उप)** **(स्याम)** **(पुरुवीराः)** पुरुवो बहवो वीराः शरीरात्मबलाः पुरुषा येषान्ते **(अरिष्टाः)** न केनापि हिंसितुं योग्याः॥७॥

अन्वयः-या राजपुत्रादितिर्योऽर्यमा राजा च सुगेभिरति द्वेषांसि त्याजयित्वा नोऽस्मान् पिपर्त्तु मित्रस्य वरुणस्य बृहच्छर्म च पिपर्त्तु तत्सङ्गेन वयमरिष्टाः पुरुवीरा उप स्याम॥७॥

भावार्थः-यथा न्यायाधीशो न्यायगृहमधिष्ठाय पुरुषाणां दण्डविनयं कुर्य्यात्तथैव राज्ञी न्यायाधीशा च स्त्रीणां न्यायं कुर्य्यात्तत्र रागद्वेषौ प्रीत्यप्रीती च विहाय न्यायमेव कुर्य्यात्॥७॥

पदार्थः-जो **(राजपुत्रा)** जिसका पुत्र राजा हो ऐसी **(अदितिः)** माता के तुल्य सुख देनेवाली राज्ञी और जो **(अर्यमा)** विद्वानों से प्रीति रखनेवाला राजा **(सुगेभिः)** सुगम मार्गों से **(द्वेषांसि, अति)** वैर द्वेषों को अच्छे प्रकार छुड़ा के **(नः)** हमारा **(पिपर्त्तु)** पालन करे। **(मित्रस्य)** मित्र तथा **(वरुणस्य)** प्रशंसायुक्त पुरुष के **(बृहत्)** बड़े ऐश्वर्यवाले **(शर्म)** घर की रक्षा करे। उस राजा-राणी के सङ्ग सम्बन्ध से हम लोग **(अरिष्टाः)** किसी से न मारने योग्य **(पुरुवीराः)** शरीर-आत्मा के बल से युक्त बहुत पुत्र-भृत्यादि जिनके हों ऐसे **(उप, स्याम)** आपके निकट होवें॥७॥

भावार्थः-जैसे न्यायाधीश राजा न्यायघर में बैठ के पुरुषों को दण्ड देवे, वैसे न्यायाधीशा राणी स्त्रियों का न्याय करे। उस न्यायघर में राग-द्वेष और प्रीति-अप्रीति छोड़ के केवल न्याय ही किया करे, अन्य कुछ न करे॥७॥

पुनर्मनुष्याः किंवत् किं कुर्युरित्याह॥

फिर मनुष्य किस के तुल्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

तिस्रो भूमीर्धारयन् त्रींरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम्।
ऋतेनादित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु॥८॥

तिस्रः। भूमीः। धारयन्। त्रीन्। उत। द्यून्। त्रीणि। व्रता। विदथे। अन्तः। एषाम्। ऋतेन। आदित्याः। महि। वः। महिऽत्वम्। तत्। अर्यमन्। वरुण। मित्र। चारु॥८॥

पदार्थः-**(तिस्रः)** त्रिविधाः **(भूमीः)** **(धारयन्)** धरन्ति। अत्राडभावः। **(त्रीन्)** **(उत)** अपि **(द्यून्)** प्रकाशान् **(त्रीणि)** **(व्रता)** व्रतानि शरीरात्ममनोजानि धर्म्याणि कर्माणि **(विदथे)** वेदितव्ये व्यवहारे **(अन्तः)** मध्ये **(एषाम्)** लोकानाम् **(ऋतेन)** सत्यस्वरूपेण ब्रह्मणा **(आदित्याः)** सूर्य्याः **(महि)** महत् **(वः)** युष्माकम् **(महित्वम्)** महत्वम् **(तत्)** **(अर्यमन्)** **(वरुण)** **(मित्र)** **(चारु)**॥८॥

अन्वयः-हे अर्य्यमन् वरुण मित्र! यथा ऋतेन धृता आदित्यास्तिस्रो भूमीरुत त्रीन् द्यून् धारयँस्तथा त्वं विदथे त्रीणि व्रता धर धारय च। यदेषामन्तर्महित्वं चारु स्वरूपं महि कर्म वा वर्त्तते तद्वोऽस्तु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा भूमयः सूर्य्यादयो लोकाश्चेश्वरनियमेन नियन्त्रिता यथावत्स्वस्वक्रियाः कुर्वन्ति तथा मनुष्यैरपि विज्ञेयं वर्त्तितव्यं च। अस्मिन् जगत्युत्तममध्यमनिकृष्टभेदेन भूमिरग्निश्च त्रिविधोऽस्ति सूर्य्यलोकाः भूमिलोकतो महान्तः सन्तीति॥८॥

पदार्थः-हे (**अर्य्यमन्**) न्याय करनेहारे (**वरुण**) शान्तशील (**मित्र**) मित्र जन! जैसे (**ऋतेन**) सत्यस्वरूप परमेश्वर ने धारण किये (**आदित्याः**) सूर्यलोक (**तिस्रः**) तीन प्रकार की (**भूमीः**) भूमियों को (**उत**) और (**त्रीन्**) तीन प्रकार के (**द्यून्**) प्रकाशों को (**धारयन्**) धारण करते हैं, वैसे आप (**विदथे**) जानने योग्य व्यवहार में (**व्रता**) शरीर, आत्मा और मन से उत्पन्न हुए धर्मयुक्त (**त्री**) तीन प्रकार के कर्मों को धारण करो-कराओ। जो (**एषाम्**) इन सूर्य्यलोकों के (**अन्तः**) मध्य में (**महित्वम्**) महत्त्व (**चारु**) सुन्दर स्वरूप वा (**महि**) बड़ा कर्म है (**तत्**) वह (**वः**) आप लोगों का होवे॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे भूमि और सूर्य्यादि लोक ईश्वर के नियम से बन्धे हुए यथावत् अपनी-अपनी क्रिया करते हैं, वैसे मनुष्यों को भी जानना और वर्त्ताव करना चाहिये। इस जगत् में उत्तम, मध्यम और अधम तीन प्रकार की भूमि और अग्नि है तथा सूर्य्यलोक भूमिलोक से बड़े-बड़े हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय॥९॥

त्री। रोचना। दिव्या। धारयन्त। हिरण्ययाः। शुचयः। धारऽपूताः। अस्वऽप्नजः। अनिऽमिषाः। अदब्धाः। उरुऽशंसाः। ऋजवे। मर्त्याय॥९॥

पदार्थः-(**त्री**) त्रीणि (**रोचना**) प्रदीपकानि ज्ञानानि (**दिव्या**) दिव्यानि शुद्धानि (**धारयन्त**) धरन्ते। अत्राडभावः। (**हिरण्ययाः**) ज्योतिर्मयाः (**शुचयः**) पवित्राः (**धारपूताः**) येषां विद्यासुशिक्षाभ्यां वाणी पूता पवित्रा ते (**अस्वप्नजः**) विद्याव्यवहारे जागृता अविद्यानिद्रारहिताः (**अनिमिषाः**) निमेषालस्यवर्जिताः (**अदब्धाः**) अहिंसनीयाः (**उरुशंसाः**) बहुप्रशंसाः (**ऋजवे**) सरलाय (**मर्त्याय**) मनुष्याय॥९॥

अन्वयः-ये हिरण्यया धारपूताः शुचय उरुशंसा अस्वप्नजोऽनिमिषा अदब्धा ऋजवे मर्त्याय त्री दिव्या रोचना धारयन्त ते जगत्कल्याणकराः स्युः॥९॥

भावार्थः-ये जीवप्रकृतिपरमेश्वराणां त्रिविधां विद्यां धृत्वाऽन्येभ्यो ददति सर्वानविद्यानिद्रात उत्थाप्य विद्यायां जागारयन्ति ते मनुष्याणां मङ्गलकारिणो भवन्ति॥९॥

पदार्थः-जो **(हिरण्ययाः)** तेजस्वी **(धारपूताः)** विद्या और उत्तम शिक्षा से जिनकी वाणी पवित्र हुई वे **(शुचयः)** शुद्ध पवित्र **(उरुशंसाः)** बहुत प्रशंसावाले **(अस्वप्नजः)** अविद्यारूप निद्रा से रहित विद्या के व्यवहार में जागते हुए **(अनिमिषाः)** आलस्यरहित और **(अदब्धाः)** हिंसा करने के न योग्य अर्थात् रक्षणीय विद्वान् लोग **(ऋजवे)** सरल स्वभाव **(मर्त्याय)** मनुष्य के लिये **(त्री)** तीन प्रकार के **(दिव्या)** शुद्ध दिव्य **(रोचना)** रुचि योग्य ज्ञान वा पदार्थों को **(धारयन्त)** धारण करते हैं, वे जगत् के कल्याण करनेवाले हों॥९॥

भावार्थः-जो मनुष्य जीव, प्रकृति और परमेश्वर की तीन प्रकार की विद्या को धारण कर दूसरों को देते, सबको विद्यारूप निद्रा से उठा के विद्या में जगाते हैं, वे मनुष्यों के मङ्गल करानेवाले होते हैं॥९॥

अथ मनुष्याः कथं दीर्घायुषः स्युरित्याह॥

अब मनुष्य कैसे दीर्घ आयुवाले हों, इस विषय को अगले मन्त्र में कहा है॥

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा॥१०॥७॥

त्वम्। विश्वेषाम्। वरुण। असि। राजा। ये। च। देवाः। असुर। ये। च। मर्ताः। शतम्। नः। रास्व। शरदः। विऽचक्षे। अश्याम। आयूंषि। सुऽधितानि। पूर्वा॥१०॥

पदार्थः-**(त्वम्)** **(विश्वेषाम्)** सर्वेषां मनुष्यादीनाम् **(वरुण)** वरतम **(असि)** **(राजा)** **(ये)** **(च)** **(देवाः)** विद्वांसः सभासदः **(असुर)** अविद्यमाना सुरा मद्यपानं यस्य तत्सम्बुद्धौ **(ये)** **(च)** **(मर्त्ताः)** मनुष्याः **(शतम्)** **(नः)** अस्मान् **(रास्व)** राहि देहि। अत्र व्यत्ययेनात्मनेपदम्। **(शरदः)** शरदृतवः **(विचक्षे)** विविधदर्शनाय **(अश्याम)** प्राप्नुयाम **(आयूंषि)** **(सुधितानि)** सुष्ठु धृतानि **(पूर्वा)** पूर्वाणि॥१०॥

अन्वयः-हे वरुणासुर! यस्त्वं विश्वेषां राजाऽसि ये च देवाः ये च मर्त्ताः सन्ति तानस्माकं विचक्षे शतं शरदो नो रास्व यतो वयं पूर्वा सुधितान्यायूंष्यश्याम॥१०॥

भावार्थः-ये पूर्णं ब्रह्मचर्यं कृत्वातिविषयासक्तिं त्यजन्ति ते शताद्वर्षेभ्यो न्यूनमायुर्न भुञ्जते नैतेन विना चिरायुषो मनुष्या भवितुमर्हन्ति॥१०॥

पदार्थः-हे **(वरुण)** अतिश्रेष्ठ **(असुर)** मद्यपान से सर्वथा रहित विद्वान् पुरुष! जो **(त्वम्)** आप **(विश्वेषाम्)** सब मनुष्यादि जगत् के **(राजा)** राजा **(असि)** हो **(च)** और **(ये)** जो **(देवाः)** विद्वान् सभासद् **(च)** और **(ये)** जो **(मर्त्ताः)** साधारण मनुष्य हैं, उनको हमारे **(विचक्षे)** विविध

प्रकार के देखने को **(शतम्)** सौ **(शरदः)** वर्ष **(नः)** हमको **(रास्व)** दीजिये, जिससे हम लोग **(पूर्वा)** पहिली **(सुधितानि)** सुन्दर प्रकार धारण की हुई अवस्थाओं को **(अश्याम)** भोगें प्राप्त हों॥१०॥

भावार्थः-जो मनुष्य पूर्ण ब्रह्मचर्य्य का सेवन करके अतिविषयासक्ति को छोड़ देते हैं, वे सौ वर्ष से न्यून आयु को नहीं भोगते। इस ब्रह्मचर्य सेवन के विना मनुष्य कदापि दीर्घ अवस्थावाले नहीं हो सकते॥१०॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम्॥११॥

न। दक्षिणा। वि। चिकिते। न। सव्या। न। प्राचीनम्। आदित्याः। न। उत। पश्चा। पाक्या। चित्। वसवः। धीर्या। चित्। युष्माऽनीतः। अभयम्। ज्योतिः। अश्याम्॥११॥

पदार्थः-**(न)** निषेधे **(दक्षिणा)** **(वि)** विशेषेण **(चिकिते)** जानाति **(न)** **(सव्या)** उत्तरा **(न)** **(प्राचीनम्)** प्राची दिक् **(आदित्याः)** सूर्याः **(न)** **(उत)** अपि **(पश्चा)** पश्चिमा **(पाक्या)** पाकोऽस्यास्तीति पाकी। **सुपामि**ति ङ्यादेशः। **(चित्)** अपि **(वसवः)** पृथिव्यादयः **(धीर्या)** धीरेषु विद्वत्सु साधुः। अत्र **सुपामि**त्याकारः। **(चित्)** अपि **(युष्मानीतः)** युष्माभिरानीतः **(अभयम्)** भयवर्जितम् **(ज्योतिः)** प्रकाशम् **(अश्याम्)** प्राप्नुयाम्॥११॥

अन्वयः-य आदित्या न दक्षिणा न सव्या न प्राचीनं नोत पश्चा भ्रमन्ति यदाधारे चिद्वसवश्चिद्वसन्ति यान् पाक्या धीर्या विचिकिते तदाश्रित्य युष्मानीतश्चिदहमभयं ज्योतिरश्याम्॥११॥

भावार्थः-हे मनुष्या! ये सूर्य्याः सर्वासु दिक्षु न भ्रमन्ति यदाधारेण पृथिव्यादयो भ्रमन्ति तद्विज्ञानपुरःसरं परमात्मानं विज्ञायाऽभयं पदं प्राप्नुवन्तु॥११॥

पदार्थः-जो **(आदित्याः)** सूर्यलोक **(न)** नहीं **(दक्षिणा)** दक्षिण **(न)** न **(सव्या)** उत्तर **(न)** न **(प्राचीनम्)** पूर्व **(उत)** और **(न)** न **(पश्चा)** पश्चिम दिशा में भ्रमते हैं **(चित्)** और जिनके आधार में **(वसवः)** पृथिवी आदि वसु **(चित्)** भी वसते हैं, जिनको **(पाक्या)** बुद्धिमान् **(धीर्या)** धीर विद्वानों में श्रेष्ठ जन **(वि चिकिते)** विशेष कर जानता है, उनका आश्रय कर **(युष्मानीतः)** तुम

लोगों से प्राप्त हुआ मैं **(अभयम्)** भयरहित **(ज्योतिः)** प्रकाशरूप ज्ञान को **(अश्याम्)** प्राप्त होऊं॥११॥

भावार्थः-हे मनुष्यो! जो सूर्य सब दिशाओं में नहीं भ्रमते, जिनके आधार से पृथिवी आदि लोक भ्रमते हैं, उनके विज्ञानपूर्वक परमात्मा को जान के अभयरूप पद को प्राप्त होओ॥११॥

पुनः के प्रशस्ताः स्युरित्याह॥

फिर कौन प्रशस्त हों, इस विषय को अगले मन्त्र में कहा है॥

यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः।
स रेवान् याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः॥१२॥

यः। राजऽभ्यः। ऋतनिऽभ्यः। ददाश। यम्। वर्धयन्ति। पुष्टयः। च। नित्याः। सः। रेवान्। याति। प्रथमः। रथेन। वसुऽदावा। विदथेषु। प्रऽशस्तः॥१२॥

पदार्थः-(**यः**) (**राजभ्यः**) न्यायप्रकाशकेभ्यः सभासद्भ्यः (**ऋतनिभ्यः**) सत्यन्यायकर्त्रीभ्यो राज्ञीभ्यः (**ददाश**) दाशति ददाति (**यम्**) (**वर्द्धयन्ति**) (**पुष्टयः**) शरीरात्मबलानि (**च**) (**नित्याः**) शाश्वत्यो नीतयः (**सः**) (**रेवान्**) प्रशस्ता रायो विद्यन्ते यस्य सः (**याति**) प्राप्नोति (**प्रथमः**) आदिमः (**रथेन**) यानेन (**वसुदावा**) यो वसूनि ददाति सः (**विदथेषु**) विज्ञातव्येषु संग्रामादिषु व्यवहारेषु (**प्रशस्तः**) अत्युत्कृष्टः॥१२॥

अन्वयः-यो राजभ्य ऋतनिभ्यश्चोपदेशं ददाश यं नित्याः पुष्टयो वर्द्धयन्ति स रेवान् वसुदावा प्रथमः प्रशस्तो विदथेषु रथेन विजयं याति॥१२॥

भावार्थः-ये पुरुषा यास्स्त्रियश्च पूर्णविद्याः स्युस्ते ताश्च न्यायाधीशा भूत्वा पुरुषाणां स्त्रीणां चोन्नतिं कुर्वन्तु ते ताश्च प्रशंसनीया विजयप्रदा विज्ञेयाः॥१२॥

पदार्थः-(**यः**) जो राजा (**राजभ्यः**) न्यायप्रकाशक सभासद् राजपुरुषों (**च**) और (**ऋतनिभ्यः**) सत्य न्याय करनेवाली राणियों के लिये उपदेश (**ददाश**) देता है (**यम्**) जिसको (**नित्याः**) सनातन नीति तथा (**पुष्टयः**) शरीर-आत्मा के बल को (**वर्द्धयन्ति**) बढ़ाते हैं (**सः**) वह (**रेवान्**) प्रशस्त ऐश्वर्यवाला (**वसुदावा**) धनों का दाता (**प्रथमः**) मुख्य कुलीन (**प्रशस्तः**) प्रशंसा को प्राप्त (**विदथेषु**) जानने योग्य संग्रामादि व्यवहारों में (**रथेन**) रथ से विजय को (**याति**) प्राप्त होता है॥१२॥

भावार्थः-जो पुरुष और जो स्त्री पूर्ण विद्यावाले हों, वे न्यायधीश होकर पुरुष और स्त्रियों की उन्नति करें। वे सब प्रशंसा के योग्य विजय करनेवाले जानने चाहिये॥१२॥

पुनः कीदृशो राजा भवेदित्याह॥

फिर कैसा राजा हो, इस विषय को अगले मन्त्र में कहा है॥

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः।
नकिष्टं घन्त्यन्तितो न दूराद् य आदित्यानां भवति प्रणीतौ॥ १३॥

शुचिः। अपः। सुऽयवसाः। अदब्धः। उप। क्षेति। वृद्धऽवयाः। सुऽवीरः। नकिः। तम्। घन्ति। अन्तितः। न। दूरात्। यः। आदित्यानाम्। भवति। प्रऽनीतौ॥ १३॥

पदार्थः-(शुचिः) पवित्रः **(अपः)** जलानि **(सूयवसाः)** शोभनानि यवसानि याभ्यस्ताः। अत्र **संहितायामिति** दीर्घः। **(अदब्धः)** अहिंसितः **(उप) (क्षेति)** उपनिवसति **(वृद्धवयाः)** वृद्धं वयो जीवनं यस्य सः **(सुवीरः)** शोभना वीरा यस्य सः **(नकिः)** न **(तम्) (घ्नन्ति)** हन्ति **(अन्तितः)** समीपतः **(न) (दूरात्) (यः) (आदित्यानाम्)** पूर्णब्रह्मचर्यविद्यावताम् **(भवति) (प्रणीतौ)** प्रकृष्टायां नीतौ॥ १३॥

अन्वयः-यः शुचिरदब्धो राजा सूयवसा अप उप क्षेति। यो वृद्धवयाः सुवीर आदित्यानां प्रणीतौ वर्त्तमानौ भवति तं नकिरन्तितो न दूरात् केऽपि घ्नन्ति॥ १३॥

भावार्थः-यः पवित्राचरणो हिंसादिदोषरहितोऽलंसामग्रीकः चिरञ्जीवी विदुषां शासने सदा वर्त्तते तस्य समीपस्था दूरस्थाश्च शत्रवः पराजयं कर्त्तुं न शक्नुवन्ति॥ १३॥

पदार्थः-(यः) जो **(शुचिः)** पवित्र **(अदब्धः)** हिंसा अर्थात् किसी से दुःख को न प्राप्त हुआ राजा **(सूयवसाः)** जिनसे अच्छे जौ आदि अन्न उत्पन्न हों उन **(अपः)** जलों के **(उप, क्षेति)** निकट वसता है, जो **(वृद्धवयाः)** बड़े जीवनवाला **(सुवीरः)** सुन्दर वीर पुरुषों से युक्त **(आदित्यानाम्)** पूर्ण ब्रह्मचर्य और विद्यावाले पुरुषों की **(प्रणीतौ)** उत्तम नीति में वर्त्तमान **(भवति)** होता है **(तम्)** उसको **(नकिः)** नहीं कोई **(अन्तितः)** समीप से **(न)** न **(दूरात्)** दूर से कोई **(घ्नन्ति)** मार सकते हैं॥ १३॥

भावार्थः-जो पवित्र आचरणवाला, हिंसादि दोषों से रहित पूर्ण सामग्रीवाला, दीर्घजीवी, विद्वानों की रक्षा में सदा रहता, उसके समीपस्थ और दूरस्थ शत्रु लोग पराजय कदापि नहीं कर सकते॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अदितेः मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः।

उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः॥ १४॥

अदिते। मित्र। वरुण। उत। मृळ। यत्। वः। वयम्। चकृम। कत्। चित्। आगः। उरु। अश्याम्। अभयम्। ज्योतिः। इन्द्र। मा। नः। दीर्घाः। अभि। नशन्। तमिस्राः॥ १४॥

पदार्थः-(अदिते) अखण्डितस्वरूपविज्ञाने **(मित्र)** सर्वेषां सुहृत् **(वरुण)** सर्वोत्कृष्ट **(उत)** **(मृळ)** सुखय **(यत्)** **(वः)** युष्माकम् **(वयम्)** **(चकृम)** कुर्याम। अत्राऽन्येषामपीति दीर्घः। **(कत्)** **(चित्)** किंचित् **(आगः)** अपराधम् **(उरु)** बहु **(अश्याम्)** प्राप्नुयाम् **(अभयम्)** भयवर्जितम् **(ज्योतिः)** प्रकाशयुक्तं दिनम् **(इन्द्र)** परमैश्वर्ययुक्त **(मा)** निषेधे **(नः)** अस्माकम् **(दीर्घाः)** स्थूलाः **(अभि)** **(नशन्)** नश्यन्तु **(तमिस्राः)** रात्रयः॥ १४॥

अन्वयः-हे अदिते इन्द्र मित्रोत वरुण! त्वमस्मान् मृळ यद्वा कच्चिदुर्वागो वयं चकृम तत् क्षम्यतां यतोऽभयं ज्योतिरहमश्याम्। नो दीर्घास्तमिस्रा माभिनशन्॥ १४॥

भावार्थः-यत्र विदुषी स्त्री स्त्रीणां न्यायकर्त्री पुरुषाणां विद्वान् पुरुषश्च तत्राहोरात्रौ निर्भयौ भवेतां विशेषतो रात्रिश्च सुखेन गच्छति॥ १४॥

पदार्थः-हे **(अदिते)** अखण्डितस्वरूप और विज्ञानवाली न्यायकर्त्री राज्ञी तथा हे **(इन्द्र)** परमैश्वर्ययुक्त **(मित्र)** सबके सखा **(उत)** और **(वरुण)** सबसे उत्तम राजन्! आप हमको **(मृळ)** सुखी करो **(यत्)** जो **(वः)** तुम्हारा **(कच्चित्)** कुछ **(उरु)** बड़ा **(आगः)** अपराध **(वयम्)** हम **(चकृम)** करें, उसको क्षमा करो जिससे **(अभयम्)** भयरहित **(ज्योतिः)** प्रकाशयुक्त दिन को **(अश्याम्)** प्राप्त होऊँ। और **(नः)** हमारी **(दीर्घाः)** बड़ी **(तमिस्राः)** रात्रि **(मा)** न **(अभि, नशन्)** कटें अर्थात् रात्रि को सुखपूर्वक निर्भय सोवें॥ १४॥

भावार्थः-जिस देश वा नगर में विदुषी स्त्री, स्त्रियों का न्याय करनेवाली और पुरुषों का न्याय करनेवाला विद्वान् पुरुष हो, उस देश वा नगर में दिन-रात्रि निर्भय होते और विशेष कर चोर आदि के भय से रहित सुखपूर्वक रात्रि व्यतीत होती हैं॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन्।
उभा क्षयावाजयन् याति पृत्सूभावर्धौ भवतः साधू अस्मै॥ १५॥

उभे इति। अस्मै। पीपयतः। समीची इति सम्ऽईची। दिवः। वृष्टिम्। सुऽभगः। नाम। पुष्यन्। उभा। क्षयौ। आऽजयन्। याति। पृत्ऽसु। उभौ। अर्धौ। भवतः। साधू इति। अस्मै॥ १५॥

पदार्थः-(उभे) पुरुषः स्त्री च **(अस्मै)** राष्ट्राय **(पीपयतः)** वर्द्धयतः **(समीची)** या दीप्तिं सम्यगञ्चति सा **(दिवः)** दिव्यादाकाशात् **(वृष्टिम्)** **(सुभगः)** शोभनैश्वर्यः **(नाम)** जलम् **(पुष्यन्)** पुष्यन्तौ। अत्र विभक्ति लुक्। **(उभा)** उभौ **(क्षयौ)** निवसन्तौ **(आजयन्)** समन्ताद्विजयमानः **(याति)** गच्छति **(पृत्सु)** संग्रामेषु **(उभौ)** **(अर्धौ)** वर्द्धकौ **(भवतः)** **(साधू)** शुभचरित्रस्थौ **(अस्मै)**॥१५॥

अन्वयः-यथा समीची सुभगश्च दिवो वृष्टिं कुरुतो नाम पुष्यंस्तथाऽस्मानुभे पीपयतः। उभा क्षयावुभावर्द्धावस्मै साधू भवतस्तौ पृत्सु विजयमानौ स्याताम्। तत्संग्या जयन् सुखं याति॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये स्त्रीपुरुषाः सूर्यदीप्तिर्जगत्वत्सर्वं राज्यं पोषयेयुः, शुभचरित्राश्च स्युस्ते न्यायाधीशत्वमर्हन्ति॥१५॥

पदार्थः-जैसे **(समीची)** जो दीप्ति को सम्यक् प्राप्त होती वह स्त्री और **(सुभगः)** शोभन ऐश्वर्यवाला राजा **(दिवः)** दिव्य शुद्ध आकाश से **(वृष्टिम्)** यज्ञादि द्वारा वर्षा कराते **(नाम)** जल को **(पुष्यन्)** पुष्ट करते हुए वैसे **(अस्मै)** इस राज्य के लिये **(उभे)** दोनों राजा-राणी **(पीपयतः)** उन्नति करते हैं **(उभा)** दोनों **(क्षयौ** निवास करते हुए **(अर्द्धौ)** राज्य को समृद्ध करनेवाले **(अस्मै)** इस राज्य के लिये **(साधू)** शुभ चरित्र में स्थित **(भवतः)** होवें, वे **(पृत्सु)** संग्रामों में विजय करनेवाले होवें, उन दोनों का सङ्गी **(आ, जयन्)** विजय करता हुआ सुख को **(याति)** प्राप्त होता है॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्री-पुरुष सूर्यदीप्ति जगत् को जैसे वैसे सब राज्य को पुष्ट करें और सुन्दर चरित्रोंवाले हों, वे न्यायाधीशपन को प्राप्त होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

या वो॑ मा॒या अ॑भि॒द्रुहे॑ यजत्रा॒: पाशा॑ आदित्या रि॒पवे॒ विच॑र्त्ताः।
अ॒श्वीव॒ ताँ अति॑ येषं॒ रथे॒नारि॑ष्टा उ॒रावा शर्म॑न्त्स्याम॥१६॥

याः। वः। मायाः। अभिऽद्रुहे। यजत्राः। पाशाः। आदित्याः। रिपवे। विऽचर्त्ताः। अश्वीऽइव। तान्। अति। येषम्। रथेन। अरिष्टाः। उरौ। आ। शर्मन्। स्याम॥१६॥

पदार्थः-(याः) **(वः)** युष्माकम् **(मायाः)** प्रज्ञाः **(अभिद्रुहे)** योऽभिद्रुह्यति तस्मै **(यजत्राः)** सङ्गतिकरणशीलाः **(पाशाः)** बन्धनानि **(आदित्याः)** सूर्यवद्विद्याप्रकाशाः **(रिपवे)** शत्रवे **(विचृत्ताः)**

विस्तृता: **(अश्वीव)** यथा वडवा **(तान्)** **(अति)** अन्तिके **(येषम्)** प्रयतेयम् **(रथेन)** **(अरिष्टाः)** अहिंसनीया: **(उरौ)** बहूनि **(आ)** समन्तात् **(शर्मन्)** गृहे **(स्याम)** भवेम॥१६॥

अन्वयः-हे यजत्रा आदित्या या वो विचृत्ता अरिष्टा माया अभिद्रुहे रिपवे पाशा इव भवन्ति तानहमतिप्राप्तुमश्वीवा येषं रथेनोरौ शर्मन् सुखिनः स्याम॥१६॥

भावार्थः-अत्रोपमालङ्कारः। ये प्राज्ञा द्रोहं विहायाजातशत्रवः स्युस्ते दुष्टान् पाशैर्बध्नीयुस्तद्रक्षया सर्वे सुखिनः स्युः॥१६॥

पदार्थः-हे **(यजत्राः)** सत्सङ्ग करने के स्वभाववाले **(आदित्याः)** सूर्य के तुल्य विद्या से प्रकाशमान विद्वानो! **(याः)** जो **(वः)** आप लोगों की **(विचृत्ताः)** विस्तृत **(अरिष्टाः)** किसी से खण्डित न होने योग्य **(मायाः)** बुद्धियाँ **(अभिद्रुहे)** सब ओर से द्रोह करनेवाले **(रिपवे)** शत्रु के लिये **(पाशाः)** फांसी के तुल्य बांधनेवाली होती हैं **(तान्)** उन तुम लोगों के **(अति)** निकट प्राप्त होने को मैं **(अश्वीव)** घोड़ी के तुल्य **(आ, येषम्)** प्रयत्न करूं और हम लोग **(रथेन)** रमण के साधन रथ से **(उरौ)** बड़े **(शर्मन्)** घर में सुखी **(स्याम)** होवें॥१६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पण्डित लोग द्रोह को छोड़ के जिनके कोई शत्रु नहीं ऐसे हों, वे दुष्टों को पाशों से बांधे और उनकी रक्षा करके सब सुखी हों॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः॥
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥१७॥८॥

मा। अहम्। मघोनः। वरुण। प्रियस्य। भूरिऽदाव्नः। आ। विदम्। शूनम्। आपेः। मा। रायः। राजन्। सुऽयमात्। अव। स्थाम्। बृहत्। वदेम। विदथे। सुऽवीराः॥१७॥

पदार्थः-**(मा)** **(अहम्)** **(मघोनः)** प्रशस्तधनयुक्तस्य **(वरुण)** श्रेष्ठ **(प्रियस्य)** कमनीयस्य **(भूरिदाव्नः)** बहुदातुः **(आ)** **(विदम्)** प्राप्नुयाम् **(शूनम्)** वर्द्धनम् **(आपेः)** य आप्नोति तस्य **(मा)** **(रायः)** धनात् **(राजन्)** सत्यप्रकाशक **(सुयमात्)** शोभनो यमो यस्मिँस्तस्मात् **(अव)** **(स्थाम्)** तिष्ठेयम् **(बृहत्)** **(वदेम)** **(विदथे)** **(सुवीराः)**॥१७॥

अन्वयः-हे वरुण राजन्! अहमापेर्भूरिदाव्नः प्रियस्य मघोनः शूनं माविदम्। सुयमाद्रायो मावस्थामन्यथा व्ययं मा कुर्यामेवं कृत्वा विदथे सुवीरा वयं बृहद्वदेम॥१७॥

भावार्थः-धनाढ्यैश्च राजपुरुषैः सह विरोधः कदापि न करणीयः। न चाऽन्याय्ये व्यवहारे न्यायोपार्जितधनस्य व्ययः कार्यः सदैव सर्वव्यापकस्य परमात्मन आज्ञायां च ते वर्त्तेरन्निति॥१७॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति सप्तविंशतितमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे **(वरुण)** श्रेष्ठ सज्जन **(राजन्)** सत्य के प्रकाश करनेहारे राजन्! **(अहम्)** मैं **(आपेः)** प्राप्त होनेवाले **(भूरिदाव्नः)** बहुत धन देनेवाले **(प्रियस्य)** कामना के योग्य **(मघोनः)** प्रशस्त धनवाले पुरुष की **(शूनम्)** वृद्धि को **(मा)** न **(आ, विदम्)** प्राप्त होऊँ। किन्तु **(सुयमात्)** सुन्दर नियम कराने **(रायः)** धन से **(मा)** न **(अव, स्थाम्)** अवस्थित होऊं और उसकी प्राप्ति का यत्न अवश्य किया करूं और अन्यथा खर्च न करूं, ऐसा **[**करके**]** **(विदथे)** विज्ञान के व्यवहार में **(सुवीराः)** सुन्दर वीरोंवाले हुए हम लोग **(बृहत्)** बड़ा गम्भीर **(वदेम)** उपदेश करें॥१७॥

भावार्थः-धनाढ्य लोगों को चाहिये कि राजपुरुषों के साथ विरोध कदापि न करें और न अन्याययुक्त व्यवहार में न्याय से उपार्जन किये धन का कभी खर्च करें, सदैव सर्वव्यापक परमात्मा की आज्ञा में वर्त्तें॥१७॥

इस सूक्त में विद्वानों के गुणों आदि का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्ताईसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

इदमित्येकादशर्चस्याष्टाविंशतितमस्य सूक्तस्य कूर्मो गार्त्समदो वा ऋषिः। वरुणो देवता। १, ३, ४, ६ निचृत् त्रिष्टुप्। ५, ७, ११ त्रिष्टुप्। ८ विराट् त्रिष्टुप्। ९ भुरिक्त्रिष्टुप् छन्दः। धैवतः स्वरः। २, १० भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथोपदेशकः कीदृश स्यादित्याह॥

अब अट्ठाईसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में उपदेशक कैसा हो,
इस विषय को कहते हैं॥

इ॒दं क॒वेरा॑दि॒त्यस्य॑ स्व॒राजो॒ विश्वा॑नि॒ सन्त्य॒भ्य॑स्तु म॒ह्ना।
अति॒ यो म॒न्द्रो य॒जथा॑य दे॒वः सु॑की॒र्तिं भि॑क्षे॒ वरु॑ण॒स्य॒ भूरे॑ः॥ १॥

इ॒दम्। क॒वेः। आ॒दि॒त्यस्य॑। स्व॒ऽराज॑ः। विश्वा॑नि। सन्ति॑। अ॒भि। अ॒स्तु॒। म॒ह्ना। अति॑। यः। म॒न्द्रः। य॒जथा॑य। दे॒वः। सु॒की॒र्तिम्। भि॒क्षे॒। वरु॑णस्य। भूरे॑ः॥ १॥

पदार्थः-(इदम्) (कवेः) विदुषः **(आदित्यस्य)** सूर्यस्य **(स्वराजः)** यः स्वयं राजते तस्य **(विश्वानि)** सर्वाणि **(सन्ति)** वर्त्तन्ते। अत्र **संहितायामिति** दीर्घः। **(अभि) (अस्तु)** भवतु **(मह्ना)** महिम्ना महत्त्वेन **(अति) (यः) (मन्द्रः)** आनन्दप्रदः **(यजथाय)** सत्करणाय **(देवः)** विद्वान् **(सुकीर्त्तिम्) (भिक्षे) (वरुणस्य) (भूरेः)** बहुविद्यस्य॥ १॥

अन्वयः-अहं यो मन्द्रो देवो मह्नास्तु तस्य स्वराजो वरुणस्य भूरेरादित्यस्येव वर्त्तमानस्य कवेः सकाशाद्यानि सन्तीदं सर्वं सुकीर्तिं यजथायात्यभि भिक्षे॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽऽदित्यस्य किरणा घटपटादीन् प्रकाशयन्ति तथा विदुषामुपदेशाः श्रोतॄणामात्मनः प्रकाशयन्ति॥ १॥

पदार्थः-मैं **(यः)** जो **(मन्द्रः)** आनन्द देनेवाला **(देवः)** विद्वान् **(मह्ना)** महत्त्व के साथ **(अस्तु)** होवे उस **(स्वराजः)** स्वयं शोभायमान **(वरुणस्य)** श्रेष्ठ **(भूरेः)** बहुत विद्यावाले **(आदित्यस्य)** सूर्य के तुल्य वर्त्तमान उपकारी **(कवेः)** विद्वान् के सम्बन्ध से जो **(विश्वानि)** सब कर्त्तव्य **(सन्ति)** हैं **(इदम्)** इस सब और **(सुकीर्तिम्)** सुन्दर कीर्त्ति को **(यजथाय)** सत्कार के लिये **(अति, अभि, भिक्षे)** अत्यन्त सब ओर से मांगता हूँ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य की किरण घटपटादि पदार्थों को प्रकाशित करती हैं, वैसे विद्वानों के उपदेश श्रोता लोगों के आत्माओं को प्रकाशित करते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तवं व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः।
उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून्॥ २॥

तवं। व्रते। सुऽभगासः। स्याम। सुऽआध्यः। वरुण। तुस्तुऽवांसः। उपऽअयने। उषसाम्। गोऽमतीनाम्। अग्नयः। न। जरमाणाः। अनु। द्यून्॥ २॥

पदार्थः-(तव) (व्रते) सुशीले **(सुभगासः)** शोभनैश्वर्य्याः **(स्याम) (स्वाध्यः)** सुष्ठु धीर्येषान्ते **(वरुण) (तुष्टुवांसः)** स्तोतारः **(उपायने)** समीपे प्राप्ते **(उषसाम्)** प्रत्यूषकालानाम् **(गोमतीनाम्)** प्रशस्तगोयुक्तानाम् **(अग्नयः)** पावकाः **(न)** इव **(जरमाणाः)** स्तुवन्तः **(अनु) (द्यून्)** विद्याप्रकाशान्॥ २॥

अन्वयः-हे वरुण! तव व्रते स्वाध्यस्तुष्टुवांसो गोमतीनामुषसामुपायनेऽग्नयो न जरमाणा वयमनु द्यून् प्राप्य सुभगासः स्याम॥ २॥

भावार्थः-विद्यार्थ्युपदेश्यैर्मनुष्यैः सदा विदुषां सङ्गसेवे कृत्वा विद्या प्रत्यहं ग्राह्या यथोषःसमये सर्वे पदार्थाः सुशोभिता भवन्ति तथा तेऽपि स्युः॥ २॥

पदार्थः-हे **(वरुण)** श्रेष्ठ सज्जन विद्वान् पुरुष! **(तव)** आपके **(व्रते)** सुशीलतारूप नियम में **(स्वाध्यः)** सुन्दर विज्ञानवाले **(तुष्टुवांसः)** स्तुतिकर्त्ता **(गोमतीनाम्)** प्रशस्त गौओंवाली **(उषसाम्)** प्रातःकाल की वेलाओं के **(उपायने)** समीप प्राप्त होने में **(अग्नयः)** अग्नियों के **(न)** तुल्य तेजस्वी **(जरमाणाः)** स्तुति करते हुए हम लोग **(अनु, द्यून्)** अनुकूल विद्याप्रकाशों को प्राप्त हो के **(सुभगासः)** सुन्दर ऐश्वर्यवाले **(स्याम)** होवें॥ २॥

भावार्थः-विद्यार्थी और उपदेश सुननेवाले मनुष्यों को चाहिये कि सदा विद्वानों का सङ्ग और सेवा करके प्रतिदिन विद्या का ग्रहण करें, जैसे प्रातःकाल के समय में सब पदार्थ सुशोभित होते हैं, वैसे वे भी होवें॥ २॥

पुनः पुत्राः कीदृशाः स्युरित्याह॥

फिर पुत्र लोग कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

तवं स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः।
यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः॥ ३॥

तवं। स्याम। पुरुवीरस्य। शर्मन्। उरुऽशंसस्य। वरुण। प्रनेतरिति प्रऽनेतः। यूयम्। नः। पुत्राः। अदितेः। अदब्धाः। अभि। क्षमध्वम्। युज्याय। देवाः॥ ३॥

पदार्थः-(तव) (स्याम) (पुरुवीरस्य) बहुप्रवीणशूरस्य **(शर्मन्)** शर्मणि गृहे **(उरुशंसस्य)** बहुप्रशंसितस्य **(प्रणेतः)** सर्वेषां नयनकर्त्तः **(यूयम्) (नः)** अस्माकम् **(पुत्राः) (अदितेः)** अखण्डितविज्ञानस्य **(अदब्धाः)** अहिंसनीयाः **(अभि) (क्षमध्वम्) (युज्याय)** योक्तुमर्हाय व्यवहाराय **(देवाः)** विद्वांसः॥३॥

अन्वयः-हे वरुण प्रणेतः! यथाहं पुरुवीरस्योरुशंसस्य तव शर्मन् सुखिनः स्याम। हे अदब्धा देवा नः पुत्रा! यूयमदितेर्युज्याय देवा भूत्वाऽभि क्षमध्वम्॥३॥

भावार्थः-हे पुत्रा! यथा वयमुत्तमस्य विदुषः सकाशान्नीतिविद्यां प्राप्यानन्दिताः स्मस्तथा यूयमपि क्षमाशीला भूत्वाऽध्यापकप्रियाचरणेन सुशिक्षिता विद्वांसो भवत॥३॥

पदार्थः-हे **(वरुण)** श्रेष्ठ **(प्रणेतः)** सबके नायक सज्जन विद्वान्! जैसे मैं **(पुरुवीरस्य)** बहुत प्रवीण शूर **(उरुशंसस्य)** बहुतों से प्रशंसा किये हुए **(तव)** आपके **(शर्मन्)** घर में हम लोग सुखी हों। हे **(अदब्धाः)** अहिंसनीय **(नः)** हमारे **(पुत्राः)** पुत्रो! **(यूयम्)** तुम लोग **[(अदितेः)** अखण्डित विज्ञान के**] (युज्याय)** युक्त करने योग्य व्यवहार के लिये **(देवाः)** विद्वान् होकर **(अभि, क्षमध्वम्)** सब ओर से क्षमा करनेवाले होओ॥३॥

भावार्थः-हे पुत्रो! जैसे हम लोग उत्तम विद्वान् के सम्बन्ध से नीति विद्या को प्राप्त होके आनन्दित हों, वैसे तुम लोग भी क्षमाशील होके अध्यापकों के अनुकूल आचरण से सुशिक्षित विद्वान् होओ॥३॥

इदं जगत्कीदृशमित्याह॥

यह जगत् कैसा है, इस विषय को अगले मन्त्र में कहा है॥

प्र सीमादित्यो असृजद्विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन्॥४॥

प्र। सीम्। आदित्यः। असृजत्। विऽधर्ता। ऋतम्। सिन्धवः। वरुणस्य। यन्ति। न। श्राम्यन्ति। न। वि। मुचन्ति। एते। वयः। न। पप्तुः। रघुऽया। परिऽज्मन्॥४॥

पदार्थः-(प्र) (सीम्) सर्वतः **(आदित्यः)** सूर्य्यः **(असृजत्)** सृजति **(विधर्त्ता)** विविधानां लोकानां धारकः **(ऋतम्)** उदकम् **(सिन्धवः)** नद्यः **(वरुणस्य)** मेघस्य। **वरुण इति पदनामसु पठितम्।** (निघं०५.६)। **(यन्ति)** प्राप्नुवैन्ति **(न) (श्राम्यन्ति)** स्थिरा भवन्ति **(न) (वि) (मुचन्ति)** उपरमन्ति **(एते) (वयः)** पक्षिणः **(न)** इव **(पप्तुः)** पतन्ति **(रघुया)** रघवः क्षिप्रं गन्तारः। अत्र **सुपां सुलुगि**ति जसः स्थाने याजादेशः **(परिज्मन्)** परितः सर्वतो वर्त्तमानायां भूमौ॥४॥

अन्वयः-हे मनुष्या! यतो विधर्त्तादित्यः सीमृतमसृजत् तस्माद्वरुणस्य सकाशात् सिन्धवो यन्ति न श्राम्यन्ति न विमुचन्त्येते वयो न रघुया परिज्मन् प्रपप्तुस्तथा यूयमपि वर्त्तध्वम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। इदञ्जगद्वायुवज्जलवत्सर्वमस्थिरं यथा नद्यश्चलन्ति भौममुदकमुपरि गच्छति तत्र चलति पुनर्भूमावपतत्येवं जीवानां गतिरस्ति॥४॥

पदार्थः-हे मनुष्यो! जिस कारण **(विधर्त्ता)** अनेक प्रकार के लोकों का धारण करनेवाला **(आदित्यः)** सूर्य **(सीम्)** सब ओर से **(ऋतम्)** जल को **(असृजत्)** उत्पन्न करता है, इससे **(वरुणस्य)** मेघ के सम्बन्ध से **(सिन्धवः)** नदियां **(यन्ति)** चलती प्राप्त होतीं **(न)** **(श्राम्यन्ति)** स्थिर नहीं होतीं **(न, मुचन्ति)** अपने चलनरूप कार्य को नहीं छोड़तीं, किन्तु **(एते)** ये नदी आदि जलाशय **(वयः)** पक्षियों के **(न)** तुल्य **(रघुया)** शीघ्रगामी **(परिज्मन्)** सब ओर से वर्त्तमान भूमि पर **(प्र, पप्तुः)** अच्छे प्रकार गिरते चलते हैं, वैसे तुम लोग भी सब और व्यवहारसिद्ध्यर्थ चलना-फिरना आदि व्यवहार करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यह सब जगत् वायु और जल के तुल्य चलायमान है। जैसे नदियां चलतीं, पृथिवी का जल ऊपर जाता, वहाँ भी चलायमान होता, फिर भूमि पर गिरता, इस प्रकार जीवों की संसार में गति है॥४॥

पुनर्विद्यार्थिनः कीदृशाः स्युरित्याह॥

फिर विद्यार्थी लोग कैसे हों, इस विषय को अगले मन्त्र में कहा है॥

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः॥५॥९॥

वि। मत्। श्रथय। रशनाम्ऽइव। आगः। ऋध्याम। ते। वरुण। खाम्। ऋतस्य। मा। तन्तुः। छेदि। वयतः। धियम्। मे। मा। मात्रा। शारि। अपसः। पुरा। ऋतोः॥५॥

पदार्थः-**(वि)** **(मत्)** मत्तः **(श्रथय)** हिन्धि। अत्राऽन्येषामपीति दीर्घः। **(रशनामिव)** **(आगः)** अपराधम् **(ऋध्याम)** **(ते)** तव **(वरुण)** **(खाम्)** नदीम्। **खा इति नदीनामसु पठितम्।** (निघं०१.१३)। **(ऋतस्य)** जलस्य **(मा)** **(तन्तुः)** मूलम् **(छेदि)** छिन्द्याः **(वयतः)** प्राप्नुवतः **(धियम्)** **(मे)** मम **(मा)** **(मात्रा)** जनन्या **(शारि)** हिंस्याः **(अपसः)** कर्मणः **(पुरा)** **(ऋतोः)** ऋतुसमयात्॥५॥

अन्वयः-हे वरुण! त्वं रशनामिव मदागो विश्रथय येन ते तव समीपे वयमृध्याम। यथर्त्तस्य खां न छिन्दति तथा त्वया तन्तुर्मा छेदि। वयतो मे धियं मा छेदि ऋतोः पुरा अपसो मा शारि। मात्रा सह विरोधं मा कुर्य्याः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा रसनया बद्धा अश्वा नियमेन गच्छन्ति तथैव मा मात्रा पित्राऽऽचार्येण बद्धा बालका नियताः सन्तो विद्यां सुशिक्षा च गृह्णन्तु कदाचिन्मादकद्रव्यसेवनेन बुद्धिनाशं मा कुर्या विवाहं कृत्वा सदैवर्त्तुगामिनः स्युः। सन्तानसन्ततिं मा च्छिन्द्याः॥५॥

पदार्थः-हे **(वरुण)** श्रेष्ठ पुरुष! आप **(रशनामिव)** रस्सी के तुल्य **(मत्)** मुझसे **(आगः)** अपराध को **(वि, श्रथय)** विशेष कर नष्ट कीजिये जिससे **(ते)** आपके समीप हम लोग **(ऋध्याम)** उन्नत हों। जैसे **(ऋतस्य)** जल की **(खाम्)** नदी को नहीं नष्ट करते, वैसे आपसे **(तन्तुः)** मूल **(मा)** न **(छेदि)** नष्ट किया जाय, **(वयतः)** प्राप्त होते हुए **(मे)** मेरी **(धियम्)** बुद्धि को नष्ट न कीजिये, **(ऋतोः)** ऋतु समय से **(पुरा)** पहिले **(अपसः)** कर्म से मत **(शारि)** नष्ट कीजिये और **(मात्रा)** माता के साथ विरोध **(मा)** मत कर॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे रस्सी से बंधे हुए घोड़े नियम से चलते हैं, वैसे ही माता, पिता और आचार्य के नियम में बंधे हुए बालक विद्यार्थी विद्या और सुशिक्षा को ग्रहण करें। कभी मादक द्रव्य के सेवन से बुद्धि को नष्ट न करें। विवाह करके सदैव ऋतुगामी हों और सन्तानों के प्रवाह को न तोड़ें॥५॥

पुनरध्योपकोपदेशकविषयमाह॥

फिर अध्यापक और उपदेशक विषय को अगले मन्त्र में कहा है॥

अपो॒ सु म्य॑क्ष वरुण भि॒यसं॑ मत्सम्रा॒ळृता॒वोऽनु॑ मा गृभाय।
दामे॑व व॒त्साद्वि मु॑मु॒ग्ध्यंहो॑ न॒हि त्वदा॒रे नि॒मिष॑श्च॒नेशे॑॥६॥

अपो॒ इति॑। सु। म्य॒क्ष॒। व॒रु॒ण॒। भि॒यस॑म्। मत्। सम्ऽरा॑ट्। ऋ॒ता॑ऽवः। अनु॑। मा॒। गृ॒भा॒य॒। दाम॑ऽइव। व॒त्सात्। वि। मु॒मु॒ग्धि॒। अंह॑ः। न॒हि। त्वत्। आ॒रे। नि॒ऽमिष॑ः। च॒न। ईशे॑॥६॥

पदार्थः-**(अपो)** **(सु)** **(म्यक्ष)** गमय **(वरुण)** श्रेष्ठ **(भियसम्)** भयम् **(मत्)** मम सकाशात् **(सम्राट्)** यः सम्यग् राजते सः **(ऋतावः)** ऋतं सत्यं बहुविधं विद्यते यस्य तत्सम्बुद्धौ **(अनु)** **(मा)** माम् **(गृभाय)** गृह्णीयाः **(दामेव)** यथा रज्जुः **(वत्सात्)** **(वि)** **(मुमुग्धि)** मुञ्च **(अंहः)** अपराधम् **(नहि)** **(त्वत्)** तव सकाशात् **(आरे)** निकटे दूरे वा **(निमिषः)** निरन्तरम् **(चन)** **(ईशे)**॥६॥

अन्वयः-हे वरुण! त्वं मद्भियसमपो म्यक्ष। हे ऋतावः सम्राट्! त्वं मानुगृभाय वत्साद् गामिव मदंहः सु विमुमुग्धि त्वदारे निमिषश्चन कश्चिन्नहीशे॥६॥

भावार्थः-अध्यापका उपदेशका वा प्रथमतः सर्वेषां भयं निस्सार्य विद्याग्रहणं कारयेयुः कुव्यसनानि त्याजयेयुर्यतस्तेषां दूरे समीपे वा कोऽपि धर्मान्निवारयिता न स्यात्॥६॥

पदार्थः-हे **(वरुण)** श्रेष्ठ जन! आप **(मत्)** मेरे सम्बन्ध से **(भियसम्)** भय को **(अपो, म्यक्ष)** दूर कीजिये। हे **(ऋतावः)** बहुत सत्य को ग्रहण करनेवाले **(सम्राट्)** सम्यक् प्रकाशमान! आप **(मा)** मुझ पर **(अनु, गृभाय)** अनुग्रह करो **(वत्सात्)** बछड़े से गौ को जैसे वैसे मुझसे **(अंहः)** अपराध को **(सु, वि, मुमुग्धि)** सुन्दर प्रकार विशेष कर छुड़ाइये **(त्वत्)** आपके सम्बन्ध से **(आरे)** निकट वा दूर **(निमिषः)** निरन्तर **(चन)** भी कोई **(नहि)** नहीं **(ईशे)** समर्थ होता है॥६॥

भावार्थः-अध्यापक और उपदेशक पहिले से सबके भय को निकाल विद्या का ग्रहण करावें, बुरे व्यसन् छुड़ावें, जिससे उनके दूर वा समीप में कोई धर्म से रोकनेवाला न हो॥६॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

मा नो॑ व॒धैर्व॑रुण॒ ये त॑ इ॒ष्टावे॑नः कृ॒ण्वन्त॑मसुर भ्री॒णन्ति॑।
मा ज्योति॑षः प्रवस॒थानि॑ गन्म॒ वि षू मृधः॑ शिश्रथो जी॒वसे॑ नः॥७॥

मा। नः। वधैः। वरुण। ये। ते। इष्टौ। एनः। कृण्वन्तम्। असुर। भ्रीणन्ति। मा। ज्योतिषः। प्रऽवसथानि। गन्म। वि। सु। मृधः। शिश्रथः। जीवसे। नः॥७॥

पदार्थः-**(मा)** निषेधे **(नः)** अस्माकम् **(वधैः)** हननैः **(वरुण)** वायुरिव वर्त्तमान **(ते)** तव **(इष्टौ)** यजने सङ्गतिकरणे **(एनः)** पापम् **(कृण्वन्तम्)** कुर्वन्तम् **(असुर)** प्रक्षेप्तः **(भ्रीणन्ति)** भर्त्सयन्ति **(मा)** **(ज्योतिषः)** प्रकाशात् **(प्रवसथानि)** प्रवासान् **(गन्म)** प्राप्नुयाम **(वि)** **(सु)**। अत्र **निपातस्य चे**ति दीर्घः। **(मृधः)** सङ्गमान् **(शिश्रथः)** हिन्धि **(जीवसे)** जीवितुम् **(नः)** अस्माकम्॥७॥

अन्वयः-हे असुर वरुण! ये त इष्टावेनः कृण्वन्तं भ्रीणन्ति ते नो वधैर्मा वर्त्तेरन्। ज्योतिषः प्रवसथानि मा गन्म त्वं नो जीवसे मृधो विशिश्रथो यतो वयं सततं सुखं सुगन्म॥७॥

भावार्थः-ये मनुष्या धार्मिकान्न हिंसन्ति दुष्टान् ताडयन्ति कस्याऽपि प्रवासनं न निरुन्धन्ति सर्वेषां सुखाय शत्रून् विजयन्ते तेऽतुलं सुखमाप्नुवन्ति॥७॥

पदार्थः-हे (**असुर**) दुर्गुणों को दूर करनेहारे (**वरुण**) वायु के तुल्य वर्त्तमान पुरुष! (**ये**) जो लोग (**ते**) आपके (**इष्टौ**) सङ्गति करने रूप व्यवहार में (**एनः**) पाप (**कृण्वन्तम्**) करते हुए को (**भ्रीणन्ति**) धमकाते हैं वे (**नः**) हमारे (**वधैः**) मारने से (**मा**) न वर्त्तें (**ज्योतिषः**) प्रकाश से (**प्रवसथानि**) प्रवासों दूर देशों को (**मा**) न (**गन्म**) प्राप्त हों आप (**नः**) हमारे (**जीवसे**) जीवन के लिये (**मृधः**) संग्रामों को (**वि, शिश्रथः**) विशेष कर मारिये, जिससे हम लोग निरन्तर सुख को (**सु**) अच्छे प्रकार प्राप्त होवें॥७॥

भावार्थः-जो मनुष्य धर्मात्माओं को नहीं मारते, दुष्टों को ताड़ना देते, किसी के प्रवास को न रोकते और सबके सुख के लिये शत्रुओं को जीतते हैं, वे अतुल सुख को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि॥८॥

नमः। पुरा। ते। वरुण। उत। नूनम्। उत। अपरम्। तुविऽजात। ब्रवाम। त्वे इति। हि। कम्। पर्वते। न। श्रितानि। अप्रऽच्युतानि। दुःऽदभ। व्रतानि॥८॥

पदार्थः-(**नमः**) सत्कारि वचः (**पुरा**) (**ते**) तव (**वरुण**) प्रशस्त (**उत**) (**नूनम्**) निश्चितम् (**उत**) अपि (**अपरम्**) द्वितीयम् (**तुविजात**) बहुषु प्रसिद्ध (**ब्रवाम**) (**त्वे**) त्वयि। अत्र **सुपां सुलुगिति** शे आदेशः। (**हि**) खलु (**कम्**) सुखम्। **कमिति वारिमूर्द्धसुखेषु**। (**पर्वते**) मेघे (**न**) इव (**श्रितानि**) आश्रितानि (**अप्रच्युतानि**) अविनश्वराणि (**दूळभ**) दुःखेन हिंसितुं योग्य (**व्रतानि**) सत्यभाषणादीनि॥८॥

अन्वयः-हे दूळभ तुविजात वरुण! वयं ते पुरा नूनमुतापरं नमो ब्रवाम। पर्वते न त्वे कं श्रितान्यप्रच्युतानि ह्युत व्रतानि ब्रवाम॥८॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्येऽत्र जगति श्रेष्ठा विद्वांसः सन्ति तान् प्रति सदैव प्रियं वचो वक्तव्यमनुकूलमाचरणं च कर्त्तव्यं तद्गुणकर्मस्वभावाः स्वस्मिन् ग्राह्याः॥८॥

पदार्थः-हे (**दूळभ**) दुःख से मारने योग्य (**तुविजात**) बहुतों में प्रसिद्ध (**वरुण**) प्रशंसित पुरुष! हम लोग (**ते**) आपके (**पुरा**) पहिले (**नूनम्**) निश्चित (**उत**) और (**अपरम्**) दूसरे (**नमः**) सत्कार के वचन को (**ब्रवाम**) कहें (**पर्वते**) मेघ में (**न**) जैसे वैसे (**त्वे**) आप में (**कम्**) सुख का

(श्रितानि) आश्रय करते हुए **(अप्रच्युतानि)** नाशरहित **(हि)** ही **(उत)** और **(व्रतानि)** सत्य भाषण आदि व्रतों को कहें॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जो इस जगत् में श्रेष्ठ विद्वान् हैं, उनके प्रति सदैव प्रिय वचन कहें और अनुकूल आचरण करें और उनके गुण, कर्म, स्वभावों को अपने में ग्रहण करें॥८॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहा है॥

परा॑ ऋ॒णा सा॑वी॒रध॒ मत्कृ॑ता॒नि॒ माहं रा॑जन्न॒न्यकृ॑तेन भोजम्।
अव्यु॑ष्टा॒ इन्नु भूय॑सीरु॒षास॒ आ नो॑ जी॒वान् व॑रुण॒ तासु॑ शाधि॥९॥

परा॑। ऋ॒णा। सा॒वी॒रिति॑ सावीः। अध॑। मत्ऽकृ॑तानि। मा। अ॒हम्। रा॒ज॒न्। अ॒न्यऽकृ॑तेन। भो॒ज॒म्। अवि॑ऽउष्टाः। इत्। नु। भूय॑सीः। उ॒षसः॑। आ। नः॒। जी॒वान्। व॒रु॒ण॒। तासु॑। शा॒धि॒॥९॥

पदार्थः-**(परा)** पराणि **(ऋणा)** ऋणानि **(सावीः)** सुनु **(अध)** अथ **(मत्कृतानि)** मया कृतानि मत्कृतानि **(मा)** **(अहम्)** **(राजन्)** सर्वत्र प्रकाशमान **(अन्यकृतेन)** अन्येन कृतेन **(भोजम्)** भुञ्जेः। अत्र विकरणव्यत्ययेन शबडोऽभावश्च। **(अव्युष्टाः)** अविषु रक्षणादिषूष्टाः कारितनिवासाः **(इत्)** **(नु)** सद्यः **(भूयसीः)** बह्वीः **(उषासः)** उषसो दिनानि। अत्राऽन्येषामपीत्युपधा दीर्घः। **(आ)** **(नः)** अस्मान् **(जीवान्)** **(वरुण)** सर्वोत्कृष्टजगदीश्वर **(तासु)** उषःषु **(शाधि)** शिक्षस्व॥९॥

अन्वयः-हे वरुण राजन्नीश्वर! त्वं मत्कृतानि परा ऋणा सावीः। यतोऽहमन्यकृतेन मा भोजमध त्वं या भूयसीरुषासोऽव्युष्टाः सन्ति तास्विन्नु नो जीवानाशाधि॥९॥

भावार्थः-यथेश्वरो येन यादृशं कर्म क्रियते तस्मै तादृशं फलं ददाति वेदद्वारा सर्वान् शिक्षये तथैव विद्वद्भिरप्यनुष्ठेयम्॥९॥

पदार्थः-हे **(वरुण)** सर्वोत्कृष्ट **(राजन्)** सर्वत्र प्रकाशमान जगदीश्वर! आप **(मत्कृतानि)** मेरे किये **(परा)** उत्तम **(ऋणा)** ऋणों को **(सावीः)** शीघ्र चुकते कीजिये जिससे **(अहम्)** मैं **(अन्यकृतेन)** अन्य के किये से **(मा)** न **(भोजम्)** भोगूं **(अध)** और अनन्तर आप जो **(भूयसीः)** बहुत **(उषासः)** दिन **(अव्युष्टाः)** रक्षादि में निवास को प्राप्त हैं **(तासु)** उन दिनों में **(इत्)** ही **(नः)** हम **(जीवान्)** जीवों को **(आ, शाधि)** अच्छे प्रकार शिक्षित कीजिये॥९॥

भावार्थः-जैसे ईश्वर जिसने जैसा कर्म किया है, उसको वैसा फल देता है। वेद द्वारा सबको शिक्षा करता, वैसे ही विद्वानों को अनुष्ठान करना चाहिये॥९॥

पुना राजपुरुषविषयमाह॥

फिर राजपुरुष विषय को अगले मन्त्र में कहा है॥

यो मे॑ राज॒न् युज्यो॑ वा॒ सखा॑ वा॒ स्वप्ने॑ भ॒यं भी॒रवे॒ मह्य॒माह॑।
स्ते॒नो वा॒ यो दिप्स॑ति नो॒ वृको॑ वा॒ त्वं तस्मा॑द्वरुण पाह्य॒स्मान्॥१०॥

यः। मे॒। रा॒ज॒न्। युज्यः॑। वा॒। सखा॑। वा॒। स्वप्ने॑। भ॒यम्। भी॒रवे॑। मह्य॑म्। आह॑। स्ते॒नः। वा॒। यः। दिप्स॑ति। नः॒। वृक॑ः। वा॒। त्वम्। तस्मा॑त्। व॒रु॒ण॒। पा॒हि॒। अ॒स्मान्॥१०॥

पदार्थः-(**यः**) (**मे**) मम (**राजन्**) (**युज्यः**) योक्तुमर्हः (**वा**) (**सखा**) मित्रः (**वा**) (**स्वप्ने**) निद्रायाम् (**भयम्**) (**भीरवे**) भयस्वभावाय (**मह्यम्**) (**आह**) प्रतिवदेत् (**स्तेनः**) चोरः (**वा**) (**यः**) (**दिप्सति**) हिंसितुमिच्छति (**नः**) अस्मान् (**वृकः**) वृकवदुत्कोचकश्चोरः (**वा**) (**त्वम्**) (**तस्मात्**) (**वरुण**) श्रेष्ठ (**पाहि**) (**अस्मान्**)॥१०॥

अन्वयः-हे वरुण राजन्! यो मे युज्यः सखा जागृते स्वप्ने वा भयं प्राप्नोति वा भीरवे मह्यं भयं प्राप्नोतीत्याह यः स्तेनो वा दस्युर्नो दिप्सति वृको वा दिप्सति तस्मात् त्वमस्मान् पाहि॥१०॥

भावार्थः-ये राजपुरुषाः प्रजायामभयं दुष्टानां निग्रहं कृत्वा सर्वां प्रजां रक्षन्ति, ते निर्दुःखा जायन्ते॥१०॥

पदार्थः-हे (**वरुण**) श्रेष्ठ (**राजन्**) राजपुरुष! (**यः**) जो (**मे**) मेरा (**युज्यः**) मेली (**सखा**) मित्र जागने (**वा**) अथवा (**स्वप्न**) सोने में (**भयम्**) भय को प्राप्त होता (**वा**) अथवा (**भीरवे**) डरपोक (**मह्यम्**) मुझको भय प्राप्त होता है ऐसा (**आह**) कहे (**यः**) जो (**स्तेनः**) चोर (**वा**) अथवा डाकू (**नः**) हमको (**दिप्सति**) धमकाता मारना चाहता (**वा**) अथवा (**वृकः**) भेड़िया के तुल्य लुटेरा चोर हमको मारना चाहता (**तस्मात्**) उससे (**त्वम्**) आप (**अस्मान्**) हम लोगों की (**पाहि**) रक्षा कीजिये॥१०॥

भावार्थः-जो राजपुरुष प्रजा में निर्भय दुष्टों का निग्रह कर सब प्रजा की रक्षा करते हैं, वे सब दुःखों से रहित हो जाते हैं॥१०॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

माहं म॒घोनो॑ वरुण प्रि॒यस्य॑ भूरि॒दाव्न॒ आ वि॑दं॒ शून॑मा॒पेः।

मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥ ११॥ १०॥

मा। अहम्। मघोनः। वरुण। प्रियस्य। भूरिऽदाव्नः। आ। विदम्। शूनम्। आपेः। मा। रायः। राजन्। सुऽयमात्। अव। स्थाम्। बृहत्। वदेम। विदथे। सुऽवीराः॥ ११॥

पदार्थः-(मा) (अहम्) (मघोनः) बहुपूज्यधनस्य **(वरुण) (प्रियस्य) (भूरिदाव्नः)** बहुदातुः **(आ) (विदम्)** प्राप्नुयाम् **(शूनम्)** सुखम् **(आपेः)** प्राप्तधनात् **(मा) (रायः)** धनात् **(राजन्) (सुयमात्)** शोभना यमा वैरादयो व्यवहारा यस्मात्तस्मात् **(अव) (स्थाम्)** अवतिष्ठस्व **(बृहत्) (वदेम) (विदथे)** विज्ञाने **(सुवीराः)**॥ ११॥

अन्वयः-हे वरुण राजन्! यथाऽहमन्यायेन प्रियस्य मघोनो भूरिदाव्नो जनस्य विरोधमाविदम्। तेन शूनं मा प्राप्नुयामापेः सुयमाद्रायो विरोधेऽहं मावस्थां तथा त्वं भवैवं कुर्वन्तः सुवीरा वयं विदथे सततं बृहद्वदेम॥ ११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरन्यायेन विनाज्ञा परपदार्थस्य ग्रहणेच्छा कदापि न कार्य्या, किन्तु धर्म्येण व्यवहारेण धनं यावद्बलं सञ्चयनीयमिति॥ ११॥

अत्र विद्वद्राजप्रजागुणकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्यष्टाविंशतितमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे **(वरुण)** श्रेष्ठ **(राजन्)** राजपुरुष! जैसे **(अहम्)** मैं अन्याय से **(प्रियस्य)** प्यारे **(मघोनः)** बहुत अच्छे धनवाले **(भूरिदाव्नः)** बहुत पदार्थों के दाता मनुष्य के विरोध को **(आ, विदम्)** प्राप्त होऊं, उससे **(शूनम्)** सुख को न प्राप्त होऊं। **(आपेः)** प्राप्त धन से **(सुयमात्)** सुन्दर वैर आदि व्यवहार के साधक **(रायः)** धन से विरोध में मैं **(मा)** न **(अव, स्थाम्)** अवस्थित होऊं, वैसे आप हों, ऐसे करते हुए **(सुवीराः)** सुन्दर वीरोंवाले हम **(विदथे)** विज्ञान के निमित्त निरन्तर **(बृहत्)** बड़ा अच्छा **(वदेम)** कहें॥ ११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि अन्याय से विना आज्ञा परपदार्थ के ग्रहण की इच्छा कभी न करें, किन्तु धर्मयुक्त व्यवहार से यथाशक्ति धन संचय करें॥ ११॥

इस सूक्त में विद्वान् और राजा-प्रजा के गुणों का वर्णन होने से इस सूक्त में कहे अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठाईसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

धृतव्रता इति सप्तर्चस्यैकोनत्रिंशत्तमस्य सूक्तस्य कूर्मो गृत्समदो वा[७] ऋषिः। विश्वेदेवा देवताः। १, ४, ५ निचृत् त्रिष्टुप्। २, ६, ७, त्रिष्टुप्। ३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह॥

अब उनतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः॥ १॥

धृतऽव्रताः। आदित्याः। इषिराः। आरे। मत्। कर्त। रहसूःऽइव। आगः। शृण्वतः। वः। वरुणः। मित्र। देवाः। भद्रस्य। विद्वान्। अवसे। हुवे। वः॥ १॥

पदार्थः-(धृतव्रताः) धृतानि व्रतानि यैस्ते **(आदित्याः)** सूर्य्यवद्विद्या प्रकाशकाः **(इषिराः)** ज्ञानवन्तः **(आरे)** समीपे दूरे वा **(मत्)** मम। व्यत्ययेन पञ्चमी। **(कर्त्त)** कुरुत **(रहसूरिव)** या रह एकान्ते सूते सा **(आगः)** अपराधम् **(शृण्वतः)** **(वः)** युष्मान् **(वरुण)** अत्युत्कृष्ट **(मित्र)** **(देवाः)** विद्वांसः **(भद्रस्य)** कल्याणस्य **(विद्वान्)** **(अवसे)** रक्षणादिने **(हुवे)** **(वः)** युष्मान्॥ १॥

अन्वयः-हे आदित्या! इव इषिरा धृतव्रता देवा विद्वांसो यूयं मदारे सत्यं कर्त्त रहसूरिवागो मा कुरुत। विद्वानहं शृण्वतो वोऽवसो हुवे। वोऽपराधं नाशयेयम्। हे वरुण मित्र! त्वं भद्रस्याऽवसे प्रवर्त्तस्व॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये धर्माचारिणः सर्वेषामधर्मात् पृथग् रक्षणे प्रवर्त्तमानास्ते कल्याणमाप्नुवन्ति॥ १॥

पदार्थः-हे **(आदित्याः)** सूर्य्य के तुल्य विद्या के प्रकाशक **(इषिराः)** ज्ञानयुक्त **(धृतव्रताः)** नियमों को धारण किये हुए **(देवाः)** विद्वान् लोगो! तुम **(मत्)** मेरे **(आरे)** दूर वा समीप में सत्य को प्रवृत्त **(कर्त्त)** करो **(रहसूरिव)** एकान्त में जननेवाली व्यभिचारिणी के तुल्य **(आगः)** अपराध को मत करो। **(विद्वान्)** विद्वान् मैं **(शृण्वतः)** सुनते हुए **(वः)** आपको **(अवसे)** रक्षा आदि के लिये **(हुवे)** बुलाता हूँ **(वः)** तुम लोगों के अपराध को मैं नष्ट करूं। हे **(वरुण)** सर्वोत्तम **(मित्र)** मित्र! आप **(भद्रस्य)** कल्याण की रक्षा के लिये प्रवृत्त हों॥ १॥

---

७. कूर्मो गार्त्समदो गृत्समदो वा॥ सं०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो धर्माचरण करनेवाले अधर्म से पृथक् सबको रखने में प्रवर्त्तमान हैं, वे कल्याण को प्राप्त होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च॥२॥

यूयम्। देवाः। प्रऽमतिः। यूयम्। ओजः। यूयम्। द्वेषांसि। सनुतः। युयोत। अभिऽक्षत्तारः। अभि। च। क्षमध्वम्। अद्य। च। नः। मृळयत। अपरम्। च॥२॥

पदार्थः-**(यूयम्) (देवाः) (प्रमतिः)** प्रकृष्टा प्रज्ञा **(यूयम्) (ओजः)** पराक्रमम् **(यूयम्) (द्वेषांसि)** द्वेषयुक्तानि कर्माणि **(सनुतः)** नैरन्तर्ये **(युयोत)** गृह्णीत वा पृथक्कुरुत **(अभिक्षत्तारः)** आभिमुख्ये योगस्य कर्त्तारः **(अभि) (च) (क्षमध्वम्) (अद्य)** इदानीम्। अत्र **निपातस्य चे**ति दीर्घः। **(च) (नः)** अस्मान् **(मृळयत)** सुखयत **(अपरम्)** जीवसमूहम् **(च)**॥२॥

अन्वयः-हे देवा! यूयं या प्रमतिस्तां यूयमोजश्च सनुतर्युयोत यूयं द्वेषांसि सनुतर्युयोताऽद्य नोऽपरञ्च मृळयताऽभिक्षत्तारो यूयं नोऽपराधं चाभिक्षमध्वम्॥२॥

भावार्थः-ये विद्वांसो द्वेषं विहाय सततं बुद्धिमुन्नयन्त्यन्येषामपराधं क्षमन्ते सर्वान् सुखयन्ति च तेऽत्र सत्कर्त्तव्या भवन्ति॥२॥

पदार्थः-हे **(देवाः)** विद्वानो! **(यूयम्)** तुम जो **(प्रमतिः)** उत्तम बुद्धि है उसको **(च)** और **(यूयम्)** तुम **(ओजः)** पराक्रम को **(सनुतः)** निरन्तर **(युयोत)** ग्रहण करो। **(यूयम्)** तुम **(द्वेषांसि)** द्वेषयुक्त कर्मों को निरन्तर पृथक् करो **(अद्य)** इस समय **(नः)** हमको **(च)** और **(अपरम्)** जीवसमूह को **(मृळयत)** सुखी करो। **(अभिक्षत्तारः)** सम्मुख योग करनेवाले तुम लोग हमारे अपराध को **(अभि, क्षमध्वम्)** सब प्रकार क्षमा करो॥२॥

भावार्थः-जो विद्वान् लोग द्वेष को छोड़ के निरन्तर बुद्धि की उन्नति करते, दूसरे के अपराधों को क्षमा करते और सबको सुखी करते हैं, वे इस जगत् में सत्कार के योग्य होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन।

यू॒यं नो॑ मित्रावरुणादिते च स्व॒स्तिमि॑न्द्रामरुतो॑ दधात॥ ३॥

किम्। ऊ॒म् इति॑। नु। व॒:। कृ॒ण॒वा॒म॒। अप॑रेण। किम्। सने॑न। व॒स॒व॒:। आप्ये॑न। यू॒यम्। न॒:। मि॒त्रा॒व॒रु॒णा॒। अ॒दि॒ते॒। च॒। स्व॒स्तिम्। इ॒न्द्रा॒म॒रु॒त॒:। दु॒धा॒त॒॥ ३॥

पदार्थ:-(किम्) (उ) **(नु)** (व:) युष्माकम् **(कृणवाम)** कुर्याम **(अपरेण)** अन्येन **(किम्)** **(सनेन)** विभक्तेन **(वसव:)** पृथिव्यादय इव विद्यानिवासा: **(आप्येन)** व्याप्येन वस्तुना **(यूयम्)** **(न:)** अस्मभ्यम् **(मित्रावरुणा)** प्राणाऽपानाविव प्रियकारकावध्यापकोपदेशकौ **(अदिते)** विदुषि मात: **(स्वस्तिम्)** **(इन्द्रामरुत:)** इन्द्रश्च विद्यन्मरुतश्च वायवस्तान् **(दधात)** धरत॥ ३॥

अन्वय:-हे वसवो! वयं व: किमु कृणवामापरेण सनेनाप्येन किन्नु कुर्याम। हे मित्रावरुणाऽदिते च! यूयं न: स्वस्तिमिन्द्रामरुतो दधात॥ ३॥

भावार्थ:-ये प्रथमकल्पा विद्वांस: स्युस्तान् राजान: पृच्छेयुर्युष्माकं कां सेवां वयं कुर्य्याम किं किं युष्मभ्यं दद्याम येन यूयं विद्यासुशिक्षाधर्मोन्नतिं कुर्य्यात॥ ३॥

पदार्थ:-हे **(वसव:)** पृथिव्यादि के तुल्य विद्या को निवास देनेवाले विद्वानो! हम लोग **(व:)** आपके **(किम्, उ)** किस कार्य को **(कृणवाम)** करें। **(अपरेण)** अन्य **(सनेन)** विभाग को प्राप्त **(आप्येन)** व्याप्य वस्तु से **(किम्)** क्या ही करें। हे **(मित्रावरुणा)** प्राण-अपान के तुल्य प्रियकारी अध्यापक और उपदेशक **(च)** और **(अदिते)** विदुषि माता! **(यूयम्)** तुम लोग **(न:)** हमारे लिये **(स्वस्तिम्)** कल्याण को तथा **(इन्द्रामरुत:)** बिजुली और वायुओं को **(दधात)** धारण करो॥ ३॥

भावार्थ:-जो प्रथम कक्षा के विद्वान् हों उनको राजा लोग पूछें कि आपकी क्या सेवा हम करें, क्या क्या तुमको देवें, जिससे तुम लोग विद्या, सुशिक्षा और धर्म की उन्नति करो॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ह॒ये दे॑वा यू॒यमिदा॒पय॑: स्थ॒ ते मृ॑ळत॒ नाध॑मानाय॒ मह्म॑म्।
मा वो॒ रथो॑ मध्यम॒वाळृ॒ते भू॒न्मा यु॒ष्मावं॑त्स्वा॒पिषु॑ श्रमिष्म॥ ४॥

ह॒ये। दे॒वा॒:। यू॒यम्। इत्। आ॒पय॑:। स्थ॒। ते। मृ॒ळ॒त॒। नाध॑मानाय। मह्म॑म्। मा। व॒:। रथ॑:। म॒ध्य॒म॒ऽवाट्। ऋ॒ते। भू॒त्। मा। यु॒ष्मावं॑त्ऽसु। आ॒पिषु॑। श्र॒मि॒ष्म॒॥ ४॥

पदार्थः-(हये) सम्बोधने **(देवाः)** विद्वांसः **(यूयम्) (इत्)** एव **(आपयः)** सकलशुभगुणव्यापिनः **(स्थ)** भवत **(ते) (मृळत)** सुखयत **(नाधमानाय)** याचमानाय **(मह्यम्) (मा) (वः)** युष्माकम् **(रथः)** रमणीयं यानम्। **(मध्यमवाट्)** यो मध्ये पृथिव्यां भवान् पदार्थान् वहति सः **(ऋते)** उदकमये समुद्रादौ। **ऋतमित्युदकनामसु पठितम्।** (निघं०१.१२)। **(भूत्)** भवेत् **(मा) (युष्मावत्सु)** युष्मत्सदृशेषु **(आपिषु)** विद्यादिगुणैर्व्याप्तेषु **(श्रमिष्म)** श्रमं कुर्याम। अत्राडभावः॥४॥

अन्वयः-हये देवाः! ये यूयमिदापयः स्थ ते नाधमाना मह्यं मृळत यो वो मध्यमवाड् रथ ऋते जले गमयति स नष्टो मा भूदीदृशेषु युष्मावत्स्वापिषु विद्याप्राप्तये वयं श्रमिष्म अयं च श्रमो नष्टो मा भूत्॥४॥

भावार्थः-सर्वैर्मनुष्यैर्विद्याः प्राप्य सर्वे सुखयितव्याः। यथा दृढानि यानानि स्युस्तथा प्रयतितव्यं सदैव विद्वत्सु प्रीतिं विधाय विद्योन्नतिः कार्या॥४॥

पदार्थः-(हये) हे **(देवाः)** विद्वानो! जो **(यूयम्)** तुम लोग **(इत्)** ही **(आपयः)** सकलशुभगुणव्यापि **(स्थ)** होओ **(ते)** वे **(नाधमानाय)** मांगते हुए **(मह्यम्)** मेरे लिये **(मृळत)** सुखी करो, जो **(वः)** तुम्हारा **(मध्यमवाट्)** पृथिवी के पदार्थों को इधर-उधर पहुँचानेवाला **(रथः)** विमान आदि यान **(ऋते)** जलरूप समुद्रादि में चलाता है, वह नष्ट **(मा, भूत्)** न हो। ऐसे **(युष्मावत्सु)** तुम्हारे सदृश **(आपिषु)** विद्यादि गुणों से व्याप्त सज्जनों में विद्या प्राप्ति के अर्थ हम लोग **(श्रमिष्म)** परिश्रम करें। यह हमारा श्रम नष्ट **(मा)** न होवे॥४॥

भावार्थः-सब मनुष्यों को योग्य है कि विद्याओं को प्राप्त हो के सबको सुखी करें और जैसे दृढ़ पुष्ट यान बनें, वैसा प्रयत्न करें। सदा विद्वानों में प्रीति रख के विद्या की उन्नति किया करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र व एकाँ मिमय भूर्यागो यन्मा पितेव कितवं शशास।
आरे पाशा आरे अघानि देवा मा मा माधि पुत्रे विमिव ग्रभीष्ट॥५॥

प्र। वः। एकः। मिमय। भूरिः। आगः। यत्। मा। पिताऽइव। कितवम्। शशास। आरे। पाशाः। आरे। अघानि। देवाः। मा। मा। अधि। पुत्रे। विम्ऽइव। ग्रभीष्ट॥५॥

पदार्थः-(प्र) (वः) युष्माकम् **(एकः)** असहायः **(मिमय)** प्रक्षिपेयम् **(भूरि)** बहु **(आगः)** अपराधम् **(यत्) (मा)** माम् **(पितेव)** पितृवत् **(कितवम्)** द्यूतकारिणम् **(शशास)** शाधि **(आरे)** दूरे **(पाशाः)** बन्धनानि **(आरे)** दूरे **(अघानि)** पापानि **(देवाः)** विद्वांसः **(मा)** निषेधे **(मा)** माम् **(अधि)** उपरि **(पुत्रे) (विमिव)** पक्षिणमिव **(ग्रभीष्ट)** गृह्णीयाः॥५॥

अन्वयः-हे देवा विद्वांसो! वो युष्माकं सङ्गत्येकोऽहं यद्भूर्यागोऽस्ति तदारे प्र मिमय पितेव कितवं मा शशास यानि पाशा अघानि च तान्यारे विमिव मिमय। इमानि पुत्रे मा माधि ग्रभीष्ट॥५॥

भावार्थः-सर्वैराशंसितव्यं भो विद्वज्जना! युष्माकं सङ्गेन वयं पापानि त्यक्त्वा धर्माचारिणः स्याम। भवन्तो जनकवदस्मान् शिक्षध्वम्। यतो वयं दुष्टाचाराद् दूरे वसेम॥५॥

पदार्थः-हे **(देवाः)** विद्वानो! **(वः)** तुम्हारा सङ्गी **(एकः)** एक असहाय मैं **(यत्)** जो **(भूरि)** बहुत **(आगः)** अपराध है, उसको **(आरे)** दूर **(प्र, मिमय)** फेकूं और **(पितेव)** पिता के तुल्य **(कितवम्)** जुआ खेलनेवाले **(मा)** मुझको **(शशास)** शिक्षा कीजिये। जो **(पाशाः)** बन्धन और **(अघानि)** पाप हैं उनको **(आरे)** दूर **(विमिव)** पक्षी के तुल्य फेकूं। इन सबको **(पुत्रे)** पुत्र के निमित्त **(मा)** मुझको **(मा)** मत **(अधि, ग्रभीष्ट)** अधिक कर ग्रहण करो॥५॥

भावार्थः-सबको प्रशंसा करनी चाहिये कि हे विद्वान् जनो! तुम्हारे सङ्ग से हम लोग पापों को छोड़ धर्म का आचरण करनेवाले हों। आप लोग पिता के तुल्य हमको शिक्षा देओ जिससे हम दुष्ट आचरण से दूर रहें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒र्वाञ्चो॑ अ॒द्या भ॑वता यजत्रा॒ आ वो॒ हार्दि॒ भय॑मानो व्ययेयम्।
त्राध्वं॑ नो देवा नि॒जुरो॒ वृक॑स्य॒ त्राध्वं॑ कर्ता॑द॒वपदो॑ यजत्राः॥६॥

अ॒र्वाञ्चः॑। अ॒द्य। भ॒व॒त॒। य॒ज॒त्राः॒। आ। वः॒। हार्दि॑। भय॑मानः। व्य॒ये॒य॒म्। त्राध्वम्। नः॒। दे॒वाः॒। नि॒ऽजुरः॑। वृक॑स्य। त्राध्वम्। कर्तात्। अ॒व॒ऽपदः॑। य॒ज॒त्राः॒॥६॥

पदार्थः-(अर्वाञ्चः) येऽर्वागञ्चन्ति विद्यां प्राप्नुवन्ति ते **(अद्य)** अस्मिन् दिने। अत्र **निपातस्य चे**ति दीर्घः। **(भवत)**। अत्र **संहितायामि**ति दीर्घः। **(यजत्राः)** सुसङ्गतेः कर्त्तारः **(आ) (वः)** युष्माकम् **(हार्दि)** हार्दमस्मिन्नस्ति तत् **(भयमानः)** भयं प्राप्तः **(व्ययेयम्)** व्ययं कुर्य्याम् **(त्राध्वम्)** रक्षत **(नः)** अस्मान् **(देवाः)** विद्यासुशिक्षादानरक्षकाः **(निजुरः)** नितरां हिंसकात् **(वृकस्य)** वृक

इव वर्त्तमानस्य चोरस्य। **वृक इति स्तेननामसु पठितम्।** (निघं०३.२४)। **(त्राध्वम्)** पालयत **(कर्त्तात्)** छेदकात् **(अवपदः)** आपत्कालात् **(यजत्राः)** विद्वत्पूजकाः॥६॥

अन्वयः-हे अर्वाञ्चो यजत्रा देवा! यूयमद्य नस्त्राध्वम्। यद्वो हार्दि तद्वयमा गृह्णीयाम। अस्मभ्यं विद्याप्रदातारो भवत निजुरः कर्त्तादवपदस्त्राध्वम्। हे यजत्रा! वृकस्येव वर्त्तमानस्य सकाशाद् रक्षत यतो भयमानोऽहं व्यर्थमायुर्न व्ययेयम्॥६॥

भावार्थः-अत्रोपमालङ्कारः। विदुषामिदमेव कृत्यमस्ति यदज्ञानाविद्यादिदोषेभ्यः पृथग्रक्ष्य सर्वस्माद् दुःखात् पृथक्कृत्य दीर्घायुषो धर्मात्मनो जनान् कुर्युरिति॥६॥

पदार्थः-हे **(अर्वाञ्चः)** आत्मज्ञान सम्बन्धी आदि विद्या को प्राप्त होनेवाले **(यजत्राः)** अच्छी सङ्गति करनेहारे **(देवाः)** विद्या और अच्छी शिक्षा के रक्षक विद्वान् लोगो! तुम **(अद्य)** आज दिन **(नः)** हम लोगों की **(त्राध्वम्)** रक्षा करो। जो **(वः)** तुम्हारा **(हार्दि)** जिसका कार्य्य में मन लगता उसको हम लोग **(आ)** अच्छे प्रकार ग्रहण करें, हमारे लिये आप विद्या देनेवाले **(भवत)** होओ **(निजुरः)** निरन्तर हिंसक **(कर्त्तात्)** छेदक **(अवपदः)** आपत्काल से **(त्राध्वम्)** रक्षा करो। हे **(यजत्राः)** विद्वानों के पूजक लोगो! **(वृकस्य)** भेड़िया के तुल्य वर्त्तमान चोर के संसर्ग से रक्षा करो जिससे **(भयमानः)** भय को प्राप्त मैं व्यर्थ आयु को न **(व्ययेयम्)** नष्ट करूं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। विद्वानों का यही कर्त्तव्य है कि जो अज्ञान, अविद्यादि दोषों से पृथक् रख के सब दुःख से पृथक् कर मनुष्यों को बड़ी अवस्थावाले धर्मात्मा करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

माहं मघोनो वरुण प्रियस्य भूरिदात्र आ विदं शूनमापेः।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥७॥११॥

मा। अहम्। मघोनः। वरुण। प्रियस्य। भूरिऽदात्रः। आ। विदम्। शूनम्। आपेः। मा। रायः। राजन्। सुऽयमात्। अव। स्थाम्। बृहत्। वदेम। विदथे। सुऽवीराः॥७॥

पदार्थः-**(मा)** निषेधे **(अहम्)** **(मघोनः)** प्रशंसितधनवतः **(वरुण)** श्रेष्ठ **(प्रियस्य)** कमनीयस्य **(भूरिदात्रः)** बहुदातुः **(आ)** **(विदम्)** प्राप्नुयाम् **(शूनम्)** सुखम्। अत्राऽन्येषामपीति दीर्घः। **शुनमिति सुखनामसु पठितम्।** (निघं०३.६)। **(आपेः)** प्राप्नुवतः **(मा)** **(रायः)** धनात्

(राजन्) **(सुयमात्)** सुष्ठु यमसाधकात् **(अव)** **(स्थाम्)** तिष्ठेयम् **(बृहत्)** **(वदेम)** **(विदथे)** **(सुवीराः)**॥७॥

अन्वयः-हे वरुण विद्वन्! यथाऽहं प्रियस्य भूरिदाव्न आपेर्मघोनश्शूनमाविदं येन दुःखं माऽऽप्नुयाम्। हे राजन्! यथाऽहं सुयमाद्रायोऽवस्थां यस्माद् दारिद्र्यं माप्नुयाम् तथा त्वं भव। यतो मिलित्वा सुवीरा वयं विदथे बृहद्वदेमेति॥७॥

भावार्थः-विद्वद्भिः सभापत्यादिराजपुरुषैश्च तानि धर्मकार्याणि कर्त्तव्यानि यैर्दुःखदारिद्र्ये न प्राप्नुताम्। परस्परं मिलित्वा च सुवीराः प्रजाः कर्त्तव्याः॥७॥

अस्मिन् सूक्ते विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकोनत्रिंशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वरुण)** श्रेष्ठ विद्वान्! जैसे **(अहम्)** मैं **(प्रियस्य)** कामना के योग्य **(भूरिदाव्नः)** बहुत दान के दाता **(आपेः)** प्राप्त होते हुए **(मघोनः)** प्रशंसित धनवाले पुरुष के **(शूनम्)** सुख को **(आ, विदम्)** अच्छे प्रकार प्राप्त होऊं, जिससे दुःख को **(मा)** न प्राप्त हों। हे **(राजन्)** राजन् सभापते! जैसे मैं **(सुयमात्)** सुन्दर यम-नियम के साधक **(रायः)** धन से **(अव, स्थाम्)** अवस्थित होऊं, जिससे दरिद्रता को **(मा)** न प्राप्त होऊं, जिससे मिल कर **(सुवीराः)** सुन्दर वीर पुरुषोंवाले हमलोग **(विदथे)** युद्धादि में **(बृहत्)** बहुत बलपूर्वक **(वदेम)** कहें॥७॥

भावार्थः-विद्वान् और सभापति आदि राजपुरुषों को योग्य है कि उन धर्मसम्बन्धी कार्यों को करें जिनसे दुःख और दरिद्रता प्राप्त न हों और आपस में मिल के युद्धादि के लिये सुन्दर वीरोंवाली प्रजाओं को उत्पन्न करें॥७॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह उनतीसवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

ऋतमित्येकादशर्चस्य त्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। १-५, ७, ८, १० इन्द्रः। ६ इन्द्रासोमौ। ९ बृहस्पतिः। ११ मरुतो देवताः। १, ३, भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ८ निचृत् त्रिष्टुप्। ४-७, ९ त्रिष्टुप्। १० विराट् त्रिष्टुप्। ११ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ वायुसूर्यविषयमाह॥

अब तीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में वायु और सूर्य का विषय कहते हैं॥

ऋ॒तं दे॒वाय॑ कृण्व॒ते स॑वि॒त्र इन्द्रा॑याहि॒घ्ने न र॑मन्त॒ आप॑:।
अह॑रहर्या॒त्य॒क्तु॒रपां किया॒त्या प्र॑थ॒मः सर्ग॑ आसाम्॥ १॥

ऋ॒तम्। दे॒वाय॑। कृ॒ण्व॒ते। स॒वि॒त्रे। इन्द्रा॑य। अ॒हि॒ऽघ्ने। न। र॒म॒न्ते॒। आप॑:। अह॑:ऽअह॑:। या॒ति॒। अ॒क्तु॒:। अ॒पाम्। किय॑ति। आ। प्र॒थ॒म:। सर्ग॑:। आ॒सा॒म्॥ १॥

पदार्थः-(ऋतम्) उदकम् **(देवाय)** दिव्यगुणाय **(कृण्वते)** कुर्वते **(सवित्रे)** सकलरसोत्पादकाय सूर्याय **(इन्द्राय)** परमैश्वर्यहेतवे **(अहिघ्ने)** योऽहिं मेघं हन्ति तस्मै **(न)** निषेधे **(रमन्ते) (आपः)** जलानि **(अहरहः)** प्रतिदिनम् **(याति)** प्राप्नोति **(अक्तुः)** व्यक्तीकर्त्तुः **(अपाम्)** जलानाम् **(कियति)**। अत्र **संहितायामि**ति दीर्घः। **(आ) (प्रथमः) (सर्गः)** उत्पत्तिः **(आसाम्)** अपाम्॥ १॥

अन्वयः-हे मनुष्या! युष्माभिर्ऋतं कृण्वते सवित्रेऽहिघ्न इन्द्राय देवाय या अहरहरापो न रमन्त आसामपां प्रथमः सर्गोऽक्तुःकियत्यायाति तं यूयं विजानीत॥ १॥

भावार्थः-यथाऽन्तरिक्षस्थे वायौ जलमस्ति तथा सूर्ये न तिष्ठति सूर्यादेव वृष्टिद्वारा जलप्राकट्यं जायतेऽयमेवोपर्याकर्षति वर्षयति च जलस्यादिमा सृष्टिरग्नेरेव सकाशाज्जातेति वेदितव्यम्॥ १॥

पदार्थः-हे मनुष्यो! तुमको **(ऋतम्)** जल को उत्पन्न **(कृण्वते)** करते हुए **(सवित्रे)** समस्त रसों के उत्पादक **(अहिघ्ने)** मेघ को काटने सूक्ष्म कर गिरानेहारे **(इन्द्राय)** उत्तम ऐश्वर्य के हेतु **(देवाय)** उत्तम गुणयुक्त सूर्य के लिये जो **(अहरहः)** प्रतिदिन **(आपः)** जल **(न, रमन्ते)** नहीं रमण करते अर्थात् सूर्य के आश्रय नहीं ठहरते **(आसाम्)** इन **(अपाम्)** जलों की **(प्रथमः)** पहिली **(सर्गः)** उत्पत्ति **(अक्तुः)** प्रकटकर्त्ता सूर्य के सम्बन्ध से **(कियति)** कितने ही अवकाश में **(आ, याति)** अच्छे प्रकार प्राप्त होती है, उसको तुम जानो॥ १॥

भावार्थः-जैसे अन्तरिक्षस्थ वायु में जल ठहरता है, वैसे सूर्य में नहीं ठहरता। सूर्यमण्डल से ही वर्षा द्वारा जल की प्रकटता होती और यही सूर्य जल को ऊपर खींचता और वर्षाता है। जल की प्रथम सृष्टि अग्नि से ही होती है, ऐसा जानना चाहिये॥ १॥

पुनः सूर्य्यमण्डलकृत्यविषयमाह॥

फिर सूर्यमण्डल के कृत्य विषय को अगले मन्त्र में कहा है॥

यो वृत्राय॒ सिन॒मत्राभ॑रिष्य॒त् प्र तं जनि॑त्री वि॒दुष॑ उवाच।
प॒थो रद॑न्ती॒रनु॒ जोष॑मस्मै दि॒वेदि॑वे॒ धुन॑यो य॒न्त्यर्थ॑म्॥ २॥

यः। वृ॒त्राय॑। सिन॑म्। अत्र॑। अभ॑रिष्यत्। प्र। तम्। जनि॑त्री। वि॒दुष॑। उ॒वा॒च॒। प॒थः। रद॑न्तीः। अनु॑। जोष॑म्। अ॒स्मै॒। दि॒वेऽदि॑वे। धुन॑यः। य॒न्ति॒। अर्थ॑म्॥ २॥

पदार्थः-(यः) सूर्य्यः **(वृत्राय)** आवरकाय मेघाय **(सिनम्)** बन्धनम् **(अत्र)** **(अभरिष्यत्)** भरति **(प्र)** **(तम्)** **(जनित्री)** माता **(विदुषे)** विद्यावते **(उवाच)** वक्ति **(पथः)** मार्गात् **(रदन्तीः)** भूमिं विलिखन्त्यः **(अनु)** **(जोषम्)** प्रीतिम् **(अस्मै)** **(दिवेदिवे)** प्रतिदिनम् **(धुनयः)** रश्मिगतयः **(यन्ति)** **(अर्थम्)** द्रव्यम्॥ २॥

अन्वयः-यः सूर्य्योऽत्र वृत्राय सिनमभरिष्यत्तं जनित्री विदुषेऽपत्याय प्रोवाच। अत्र रदन्तीर्धुनयो दिवेदिवेऽर्थं यन्ति पथोऽनु जोषमुत्पादयन्ति तासां कृत्यं विदुषे पितापि प्रोवाच॥ २॥

भावार्थः-यथा सूर्य्यो मेघस्य बन्धनकर्त्ताऽस्ति तथा भूम्यादेर्लोकानामपि यथा प्रत्यहं सूर्य्यो रसानाकृष्य नियतसमये वर्षयति तथैवास्य किरणाः प्रति द्रव्यं प्राप्नुवन्ति॥ २॥

पदार्थः-(यः) जो सूर्य्य **(अत्र)** इस जगत् में **(वृत्राय)** घाम आदि के आवरणकर्त्ता मेघ के लिये **(सिनम्)** बन्धन को **(अभरिष्यत्)** धारण करता **(तम्)** उसको **(जनित्री)** माता **(विदुषे)** विद्यावान् सन्तान के लिये **(प्र, उवाच)** कहती उपदेश करती है, इस सूर्य्यविषयक **(रदन्तीः)** भूमियों को प्राप्त होती हुई **(धुनयः)** किरणों की चालें **(दिवेदिवे)** नित्यप्रति **(अर्थम्)** पदार्थमात्र को **(यन्ति)** प्राप्त होतीं **(पथः)** मार्ग से **(अनु, जोषम्)** अनुकूल प्रीति को उत्पन्न कराती हैं, उनके कृत्य को विद्वान् पुत्र के लिये पिता भी उपदेश करें॥ २॥

भावार्थः-जैसे सूर्य्य मेघ का बन्धनकर्त्ता है, वैसे ही पृथिवी आदि लोकों का भी है। जैसे सूर्य्यमण्डल प्रतिदिन रसों को खींच कर नियत समय पर वर्षाता है, वैसे इस सूर्य्य के किरण भी प्रत्येक द्रव्य को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऊ॒र्ध्वो ह्यस्था॒दध्य॒न्तरि॑क्षेऽधा॑ वृ॒त्राय॒ प्र व॒धं ज॑भार।

मिहं॑ वसा॑न॒ उप॒ हीमदु॑द्रो॒त्तिग्मायु॑धो अजय॒च्छत्रु॒मिन्द्रः॑॥ ३॥

ऊ॒र्ध्वः। हि। अस्था॑त्। अधि॑। अ॒न्तरि॑क्षे। अध॑। वृ॒त्राय॑। प्र। व॒धम्। ज॒भा॒र॒। मिह॑म्। वसा॑नः। उप॑। हि। ई॒म्। अदु॑द्रोत्। ति॒ग्मऽआ॑युधः। अ॒ज॒य॒त्। शत्रु॑म्। इन्द्रः॑॥ ३॥

पदार्थः-(ऊर्ध्वः) उपरि स्थितः **(हि)** किल **(अस्थात्)** तिष्ठति **(अधि)** **(अन्तरिक्षे)** आकाशे **(अध)** अथ **(वृत्राय)** वृत्रस्य। अत्र षष्ठ्यर्थे चतुर्थी। **(प्र)** **(वधम्)** ताडनम् **(जभार)** हरति **(मिहम्)** वृष्टिम् **(वसानः)** आच्छादयन् **(उप)** **(हि)** खलु **(ईम्)** सर्वतः **(अदुद्रोत्)** द्रवयति **(तिग्मायुधः)** तिग्मानि तीव्राण्यायुधानीव किरणा यस्य सः **(अजयत्)** जयति **(शत्रुम्)** वैरिणम् **(इन्द्रः)** मेघस्य छेत्ता॥ ३॥

अन्वयः-हे मनुष्याः! तिग्मायुध ऊर्ध्व इन्द्रो ह्यन्तरिक्षेऽध्यस्थात्। अध वृत्राय हि वधं प्र जभार मिहं वसान ईमुपादुद्रोच्छत्रुमजयत्तं बुध्यध्वम्॥ ३॥

भावार्थः-सूर्य्योऽतिदूरे स्थितो भूमिं धरति जलमाकर्षति यथाऽयं मेघं हत्वा भूमौ निपातयति तथैव राजपुरुषैः शत्रवो निपातनीयाः॥ ३॥

पदार्थः-हे मनुष्यो! **(तिग्मायुधः)** तीक्ष्ण आयुधों के तुल्य किरणोंवाला **(ऊर्ध्वः)** ऊपर स्थित **(इन्द्रः)** मेघ का हन्ता सूर्य्य **(हि)** ही **(अन्तरिक्षे)** आकाश में **(अध्यस्थात्)** अधिष्ठित है। **(अध)** इसके अनन्तर **(वृत्राय)** मेघ के **(हि)** ही **(वधम्)** ताड़ना को **(प्र, जभार)** प्रहार करता है। **(मिहम्)** वृष्टि को **(वसानः)** आच्छादन करता हुआ **(ईम्)** सब ओर से **(उप, अदुद्रोत्)** समीप से द्रवित करता पिघलाता है, इस प्रकार अपने **(शत्रुम्)** वैरी मेघ को **(अजयत्)** जीतता है, उसका बोध करो॥ ३॥

भावार्थः-सूर्य अति दूरस्थ हो भूमि को धारण करता, जल को खींचता है। जैसे यह मेघ को छिन्न-भिन्न कर भूमि पर गिराता है, वैसे ही राजपुरुषों को शत्रु गिराने चाहिये॥ ३॥

अथ राजपुरुषकर्त्तव्यविषयमाह॥

अब राजपुरुषों के कर्त्तव्य विषय को अगले मन्त्र में कहा है॥

बृह॑स्पते॒ तपु॑षाश्ने॒व विध्य॒ वृक॑द्वरसो॒ असु॑रस्य वी॒रान्।
यथा॑ ज॒घन्थ॑ धृष॒ता पु॒रा चि॑दे॒वा ज॑हि॒ शत्रु॑मस्मा॒कमि॑न्द्र॥ ४॥

बृह॑स्पते। तपु॑षा। अश्ना॑ऽइव। वि॒ध्य॒। वृक॑ऽद्वरसः। असु॑रस्य। वी॒रान्। यथा॑। ज॒घन्थ॑। धृ॒ष॒ता। पु॒रा। चि॒त्। एव॒। ज॒हि॒। शत्रु॑म्। अ॒स्मा॒क॑म्। इ॒न्द्र॒॥ ४॥

पदार्थः-(**बृहस्पते**) बृहतां पालक (**तपुषा**) तापेन (**अश्नेव**) योऽश्नाति भुङ्क्ते तद्वत् (**विध्य**) ताडय (**वृकद्वरसः**) वृकस्य मेघस्य द्वाराणि (**असुरस्य**) विदुषः शत्रोः (**वीरान्**) (**यथा**) (**जघन्थ**) हन्ति (**धृषता**) प्रागल्भ्येन (**पुरा**) (**चित्**) (**एव**) अत्र **निपातस्य चे**ति दीर्घः। (**जहि**) (**शत्रुम्**) (**अस्माकम्**) (**इन्द्र**) विदारयितः॥४॥

अन्वयः-हे बृहस्पत इन्द्र! यथा सूर्य्यो वृकद्वरसोऽसुरस्य वीरानश्नेव तपुषा विध्यति तथा दुष्टाँस्त्वं विध्य धृषता पुरैवास्माकं शत्रुं जहि चिदपि दोषाञ्जघन्थ॥४॥

भावार्थः-अत्रोपमालङ्कारौ। ये विद्युद्वद्बलवन्तो भूत्वा शत्रून् घ्नन्ति ते सूर्य्यवद्राज्ये प्रकाशमाना भवन्ति॥४॥

पदार्थः-हे (**बृहस्पते**) बड़ों के रक्षक (**इन्द्र**) दुष्टों को विदीर्ण करनेहारे राजपुरुष! (**यथा**) जैसे सूर्य्य (**वृकद्वरसः**) मेघ के अग्रभागों को (**असुरस्य**) विद्वान् के शत्रु के (**वीरान्**) वीरों को (**अश्नेव**) अच्छे भोजन करनेहारे वीर के तुल्य (**तपुषा**) अपने ताप से बेधता है, वैसे आप दुष्टों को (**विध्य**) ताड़ना देओ। (**धृषता**) प्रगल्भता के साथ (**पुरा**) पहिले (**एव**) ही (**अस्माकम्**) हमारे (**शत्रुम्**) शत्रु को (**जहि**) मार (**चित्**) और दोषों को (**जघन्थ**) नष्ट कर॥४॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। जो लोग बिजुली के तुल्य वेग बलयुक्त होकर शत्रुओं को मारते हैं, वे सूर्य्य के तुल्य राज्य में प्रकाशमान होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अव॑ क्षिप दि॒वो अश्मा॑नमु॒च्चा येन॒ शत्रुं॑ मन्दसा॒नो नि॒जूर्वा॑ः।
तो॒कस्य॑ सा॒तौ तन॑यस्य॒ भूरे॑र॒स्माँ अ॒र्धं कृ॑णुतादिन्द्र॒ गोना॑म्॥५॥१२॥

अव॑। क्षि॒प॒। दि॒वः॒। अश्मा॑नम्। उ॒च्चा। येन॑। शत्रु॑म्। म॒न्द॒सा॒नः॒। निऽजूर्वा॑ः। तो॒कस्य॑। सा॒तौ। तन॑यस्य। भूरे॑ः। अ॒स्मान्। अ॒र्धम्। कृ॒णु॒ता॒त्। इ॒न्द्र॒। गोना॑म्॥५॥

पदार्थः-(**अव**) (**क्षिप**) दूरे गमय (**दिवः**) दिव्यादाकाशात् (**अश्मानम्**) योऽश्नुते संहन्ति तं मेघम् (**उच्चा**) ऊर्ध्वं स्थितानि (**येन**) बलेन (**शत्रुम्**) (**मन्दसानः**) प्रशस्यमानः (**निजूर्वाः**) नितरां हिंस्याः (**तोकस्य**) ह्रस्वस्याऽपत्यस्य (**सातौ**) संसेवने (**तनयस्य**) यूनः पुत्रस्य (**भूरेः**) बहुविधस्य (**अस्मान्**) (**अर्द्धम्**) ऋद्धिम् (**कृणुतात्**) कुरु (**इन्द्र**) परमैश्वर्य्यप्रापक (**गोनाम्**) पृथिवीधेनूनाम्॥५॥

अन्वयः-हे इन्द्र सभापते राजन्! मन्दसानस्त्वं येन भूरेस्तोकस्य तनयस्य सातावस्मान् गोनामर्द्धं कृणुतात् तेन यथा सूर्य्य उच्चा घनानि दिवः प्राप्तमश्मानं भूमौ प्रक्षिपति तथा शत्रुमव क्षिप दुष्टान् निजूर्वाः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषैर्यथा स्वसन्तानानां दुःखानि दूरीकृत्य संपाल्य वर्द्धयन्ति तथैव प्रजाकण्टकान् निवार्य्य शिष्टान् संपाल्य वर्द्धनीयाः॥५॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य्य के देनेवाले सभापति राजन्! **(मन्दसानः)** प्रशंसा को प्राप्त हुए आप **(येन)** जिस बल से **(भूरेः)** बहुत प्रकार के **(तोकस्य)** छोटे सन्तान **(तनयस्य)** युवा पुत्र के **(सातौ)** सम्यक् सेवन में **(अस्मान्)** हमको **(गोनाम्)** पृथिवी और गौओं की **(अर्द्धम्)** संपन्नता समृद्धि को **(कृणुतात्)** कीजिये उस बल से जैसे सूर्य **(उच्चा)** ऊंचे स्थित बादलों और **(दिवः)** दिव्य आकाश से प्राप्त **(अश्मानम्)** मेघ को भूमि पर फेंकता है, वैसे **(शत्रुम्)** शत्रु को **(अव, क्षिप)** दूर पहुंचा और दुष्टों को **(निजूर्वाः)** निरन्तर मारिये, नष्ट कीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुषों को चाहिये कि जैसे अपने सन्तानों के दुःख दूर कर सम्यक् रक्षा कर बढ़ाते हैं, वैसे ही प्रजा के कण्टकों को निवृत्त कर शिष्टों का सम्यक् पालन कर बढ़ावें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र हि क्रतुं॑ वृ॒हथो॒ यं व॑नु॒थो र॒ध्रस्य॑ स्थो॒ यज॑मानस्य चो॒दौ।
इन्द्रा॑सोमा यु॒वम॒स्माँ अ॑विष्ट॒मस्मिन् भ॒यस्थे॑ कृणुतमु लो॒कम्॥६॥

प्र। हि। क्रतु॑म्। वृ॒हथः॑। यम्। व॒नु॒थः॑। र॒ध्रस्य॑। स्थः॑। यज॑मानस्य। चो॒दौ। इन्द्रा॑सोमा। यु॒वम्। अ॒स्मान्। अ॒वि॒ष्ट॒म्। अ॒स्मिन्। भ॒यऽस्थे॑। कृ॒णु॒त॒म्। ऊ॒म् इति॑। लो॒कम्॥६॥

पदार्थः-**(प्र)** **(हि)** खलु **(क्रतुम्)** प्रज्ञाम् **(बृहथः)** वर्द्धयेथाम् **(यम्)** **(वनुथः)** याचेथाम् **(रध्रस्य)** संराध्नुवतः **(स्थः)** भवथः **(यजमानस्य)** सुखप्रदातुः **(चोदौ)** प्रेरकौ **(इन्द्रासोमा)** सेनापत्यैश्वर्य्यवन्तौ **(युवम्)** युवाम् **(अस्मान्)** **(अविष्टम्)** व्याप्नुतम् **(अस्मिन्)** **(भयस्थे)** भये तिष्ठतीति तस्मिन् **(कृणुतम्)** **(उ)** **(लोकम्)** द्रष्टुं योग्यम्॥६॥

अन्वयः-हे इन्द्रासोमा! यौ युवं रध्रस्य यजमानस्य हि चोदौ यं प्र बृहथो यां क्रतुं वनुथस्तौ सुखिनौ स्थः। अस्मिन् भयस्थे अस्मानविष्टमुलोकं कृणुतम्॥६॥

भावार्थः-राजपुरुषा बहुबलं धनाढ्याः पुष्कलमैश्वर्य्यं च प्राप्य कस्मैचिद्भयं न दद्युः, किन्तु सदैव दरिद्रनिर्बलान् सुखे निवासयेयुः॥६॥

पदार्थः-हे **(इन्द्रासोमा)** सेनापति और ऐश्वर्य्यवान् महाशयो! **(युवम्)** जो तुम दोनों **(रध्रस्य)** सम्यक् सिद्धि करते हुए **(यजमानस्य)** सुखदाता यजमान के **(हि)** ही **(चोदौ)** प्रेरक **(यम्)** जिसको **(प्र, बृहथः)** बढ़ाओ और जिस **(क्रतुम्)** बुद्धि को **(वनुथः)** मांगो चाहो, वे तुम दोनों सुखी **(स्थः)** होओ। **(अस्मिन्)** इस **(भयस्थे)** भय में स्थित **(अस्मान्)** हमको **(अविष्टम्)** व्याप्त होओ **(उ)** और **(लोकम्)** देखने योग्य स्थान वा देश को **(कृणुतम्)** करो॥६॥

भावार्थः-राजपुरुष बहुत बल और धनाढ्य लोग यथेष्ट ऐश्वर्य्य को पाकर किसी को भय न देवें, किन्तु सदैव दरिद्र और निर्बलों को सुख में स्थापन करें, निवास करावें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम्।
यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत्॥७॥

न। मा। तमत्। न। श्रमत्। न। उत। तन्द्रत्। न। वोचाम। मा। सुनोत। इति। सोमम्। यः। मे। पृणात्। यः। ददत्। यः। निऽबोधात्। यः। मा। सुन्वन्तम्। उप। गोभिः। आ। अयत्॥७॥

पदार्थः-**(न)** निषेधे **(मा)** माम् **(तमत्)** अभिकाङ्क्षेत **(न)** **(श्रमत्)** श्राम्याच्छ्रमं प्राप्येत्। अत्र द्वाभ्यां विकरणव्यत्ययेन शप्। **(न)** **(उत)** अपि **(तन्द्रत्)** मुह्येत् **(न)** **(वोचाम)** वदेम। अत्राडभावः। **(मा)** निषेधे **(सुनोत)** अभिषवं कुरुत **(इति)** **(सोमम्)** ओषधिरसम् **(यः)** **(मे)** मह्यम् **(पृणात्)** तर्पयेत् **(यः)** **(ददत्)** सुखं दद्यात् **(यः)** **(निबोधात्)** निश्चितं बोधयेत् **(यः)** **(मा)** माम् **(सुन्वन्तम्)** यज्ञं कुर्वन्तम् **(उप)** **(गोभिः)** इन्द्रियैः सह वर्त्तमानः **(आ)** समन्तात् **(अयत्)** प्राप्नुयात्॥७॥

अन्वयः-हे मनुष्या! यो मे पृणाद्यो मा ददद्यो मा निबोधाद्यो गोभिः सुन्वन्तं मोपायत्स मया सेवनीयः। यो मा न तमन्न श्रमन्नोत तन्द्रद्वयं यमिति न वोचाम तं सोमं यूयं मा सुनोत॥७॥

भावार्थः-ये प्रजायां कञ्चिन्न क्लेशयन्ति विरुद्धं कर्म नाऽऽचरन्ति सर्वान् सुखयन्त्युपदेशे बोधयन्ति, ते सुखदानेन नित्यं तर्पणीयाः॥७॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(मे)** मुझे **(पृणात्)** तृप्त करे **(यः)** जो मुझको **(ददत्)** सुख देवे **(यः)** जो मुझको **(निबोधात्)** निश्चित बोध करावे **(यः)** जो **(गोभिः)** इन्द्रियों से **(सुन्वन्तम्)**

यज्ञ करते हुए **(मा)** मुझको **(उप, आ, अयत्)** अच्छे प्रकार समीप प्राप्त होवे, वह मुझको सेवने योग्य है। जो **(मा)** मुझको **(न)** नहीं **(तमत्)** चाहता **(न)** नहीं **(श्रमत्)** श्रम कराता **(उत)** और **(न)** नहीं **(तन्द्रत्)** मोह करता; हम लोग जिसको **(इति)** ऐसा **(न)** नहीं **(वोचाम)** कहें उस **(सोमम्)** ओषधि रस को तुम लोग **(मा)** मत **(सुनोत)** खींचो॥७॥

भावार्थः-जो राजपुरुष प्रजा में किसीको क्लेशित नहीं करते, विरुद्ध कर्म का आचरण नहीं करते, सबको सुखी करते, उपदेश से बोध कराते, वे सुख के देने से नित्य तृप्त करने योग्य हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून्।
त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम्॥८॥

सरस्वति। त्वम्। अस्मान्। अविड्ढि। मरुत्वती। धृषती। जेषि। शत्रून्। त्यम्। चित्। शर्धन्तम्। तविषीऽयमाणम्। इन्द्रः। हन्ति। वृषभम्। शण्डिकानाम्॥८॥

पदार्थः-**(सरस्वति)** विज्ञानवति **(त्वम्)** **(अस्मान्)** **(अविड्ढि)** प्रविश **(मरुत्वती)** प्रशस्तरूपयुक्ता **(धृषती)** प्रगल्भा **(जेषि)** जयसि। अत्र शबभावः। **(शत्रून्)** अस्माकं शातकान् सुखविच्छेदकान् **(त्यम्)** तम् **(चित्)** इव **(शर्द्धन्तम्)** बलवन्तम् **(तविषीयमाणम्)** सेनयेवाचरन्तम् **(इन्द्रः)** सेनेशः **(हन्ति)** **(वृषभम्)** बलिष्ठम् **(शण्डिकानाम्)** शत्रूणां तस्याऽवयवभूतानां मध्ये वर्त्तमानम्॥८॥

अन्वयः-हे सरस्वति मरुत्वती धृषती! भवती यथा इन्द्रस्त्यं शर्द्धन्तं तविषीयमाणं शण्डिकानां मध्ये वर्त्तमानं वृषभं हन्ति चिदस्माँस्त्वमविड्ढि शत्रून् जेषि तस्मात्सर्वैः सत्कर्त्तव्यासि॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा राजा शत्रून् हत्वा पुरुषाणां न्यायं करोति, तथैव राज्ञी दुष्टाः स्त्रियो निवार्य्य सर्वासां रक्षणं सदा कुर्य्यादर्थाद्यथा पुरुषा न्यायाऽधीशाः स्युस्तथा स्त्रियोऽपि भवन्तु॥८॥

पदार्थः-हे **(सरस्वति)** विज्ञानयुक्त विदुषी राणी **(मरुत्वती)** प्रशंसित रूपवाली **(धृषती)** प्रगल्भ उत्साहिनी! आप जैसे **(इन्द्रः)** सेनापति **(त्यम्)** उस **(शर्द्धन्तम्)** बलवान् **(तविषीयमाणम्)** सेना जैसे युद्ध करें वैसा आचरण करते हुए **(शण्डिकानाम्)** शत्रुओं की सेना के अवयव रूप योद्धाओं में वर्त्तमान **(वृषभम्)** अत्यन्त बली शत्रु को **(हन्ति)** मारता है **(चित्)** और वैसे

(अस्मान्) हमको **(त्वम्)** आप **(अविड्ढि)** व्याप्त वा प्राप्त हो और **(शत्रून्)** हमारे सुख को नष्ट करनेहारे शत्रुओं को **(जेषि)** जीतती हो, इससे सबको सत्कार करने योग्य हो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे राजा शत्रुओं को मार कर पुरुषों का सत्कार व न्याय करता है, वैसे ही राणी दुष्टा स्त्रियों को निवृत्त कर सब स्त्रियों की सदा रक्षा करे अर्थात् जैसे पुरुष न्यायाधीश हों वैसे स्त्रियां भी हों॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य।
बृहस्पत आयुधैर्जेषि शत्रून् द्रुहे रीषन्तं परि धेहि राजन्॥९॥

यः। नः। सनुत्यः। उत। वा। जिघत्नुः। अभिऽख्यायं। तम्। तिगितेन। विध्य। बृहस्पते। आयुधैः। जेषि। शत्रून्। द्रुहे। रिषन्तम्। परि। धेहि। राजन्॥९॥

पदार्थः-**(यः)** **(नः)** अस्माकम् **(सनुत्यः)** सनुतेषु नम्रादिगुणैः सह वर्त्तमानेषु भवः **(उत)** अपि **(वा)** **(जिघत्नुः)** हन्तुमिच्छुः **(अभिख्याय)** अभितः सर्वतः संख्याय **(तम्)** **(तिगितेन)** प्राप्तेन **(विध्य)** ताडय **(बृहस्पते)** बृहतः पालक **(आयुधैः)** शस्त्रास्त्रैः **(जेषि)** जयसि **(शत्रून्)** **(द्रुहे)** द्रोग्ध्रे **(रीषन्तम्)** हिंसन्तम्। अत्राऽन्येषामपीति दीर्घः। **(परि)** सर्वतः **(धेहि)** **(राजन्)** प्रकाशमान॥९॥

अन्वयः-हे राजन्! **[**भवान्**]** यो नः सनुत्य उत वा जिघत्नुर्वर्त्तते तमभिख्याय तिगितेन विध्य। **[**हे**]** बृहस्पते! यतस्त्वमायुधैश्शत्रून् रीषन्तं च जेषि तस्मात्तान् द्रुहे परि धेहि॥९॥

भावार्थः-प्रजास्थैर्जनैः स्वदुःखानि राजपुरुषेभ्यो निवेद्य निवारणीयानि ये प्रजारक्षायां प्रीत्या प्रवर्त्तन्ते ते सुखनीया ये हिंसकाः सन्ति ते निवेद्य दण्डनीयाः॥९॥

पदार्थः-हे **(राजन्)** प्रकाशमान राजन्! आप **(यः)** जो **(नः)** हमारा **(सनुत्यः)** नम्रादि गुणयुक्त जनों में रहनेवाला **(उत, वा)** अथवा **(जिघत्नुः)** मारने की इच्छा करनेवाला है **(तम्)** उसको **(अभिख्याय)** सब ओर से प्रकट कर **(तिगितेन)** प्राप्त हुए शस्त्र से **(विध्य)** ताड़ना दीजिये। हे **(बृहस्पते)** बड़े-बड़े विषय के रक्षक! जिस कारण आप **(आयुधैः)** शस्त्र-अस्त्रों से **(शत्रून्)** शत्रुओं को **(जेषि)** जीतते हो और **(रीषन्तम्)** मारते हुए को जीतते हो, इससे उनको **(द्रुहे)** द्रोहकर्त्ता के लिये **(परि, धेहि)** सब ओर से धारण कीजिये॥९॥

भावार्थः-प्रजापुरुषों को चाहिये कि अपने दुःखों को राजपुरुषों से निवेदन कर निवृत्त करावें। जो प्रजा की रक्षा में प्रीति से वर्त्तमान हैं, उनको सुख दिलावें और जो हिंसक हैं, उनका निवेदन कर दण्ड दिलावें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि॥१०॥

अस्माकेभिः। सत्वऽभिः। शूर। शूरैः। वीर्या। कृधि। यानि। ते। कर्त्वानि। ज्योक्। अभूवन्। अनुऽधूपितासः। हत्वी। तेषाम्। आ। भर। नः। वसूनि॥१०॥

पदार्थः-(**अस्माकेभिः**) अस्मदीयैः। अत्र **वाच्छन्दसी**त्यणि वृद्ध्यभावः। (**सत्वभिः**) (**शूर**) दुष्टानां हिंसक (**शूरैः**) निर्भयैः (**वीर्य्या**) वीरेभ्यो हितानि धनानि (**कृधि**) कुरु (**यानि**) (**ते**) तव (**कर्त्वानि**) कर्त्तुं योग्यानि (**ज्योक्**) निरन्तरम् (**अभूवन्**) भवेयुः (**अनुधूपितासः**) अनुकूलैः सुगन्धैः संस्कृताः (**हत्वी**) (**तेषाम्**) (**आ**) (**भर**) धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्माकम् (**वसूनि**) उत्तमानि द्रव्याणि॥१०॥

अन्वयः-हे शूर! यानि वीर्य्या ते ज्योक् कर्त्वानि सन्ति तान्यस्माकेभिः सत्वभिः शूरैस्त्वं कृधि येऽनुधूपितासोऽभूवन् तान् रक्षयित्वा दुष्टान् हत्वी तेषां नो वसूनि त्वमाभर॥१०॥

भावार्थः-यदा राजसु युद्धं प्रवर्त्तेत तदा प्रजास्थैर्जनैस्तान् प्रत्येवं वाच्यं नैव भेत्तव्यं यावन्तो वयं स्मस्तावन्तः सर्वे भवतां सहायाः स्मः यद्येवं यूयं वयं च न कुर्य्याम तर्हि कुतो विजयः॥१०॥

पदार्थः-हे (**शूर**) दुष्टों को मारनेहारे वीरजन! (**यानि**) जो (**वीर्य्या**) वीर पुरुषों के लिये हितकारी धन (**ते**) आपके (**ज्योक्**) निरन्तर (**कर्त्वानि**) करने योग्य हैं उनको (**अस्माकेभिः**) हमारे सम्बन्धी (**सत्वभिः**) शरीरधारी प्राणी (**शूरैः**) निर्भय पुरुषों के साथ आप (**कृधि**) कीजिये। जो (**अनुधूपितासः**) अनुकूल गन्धों से संस्कार किये हुए (**अभूवन्**) होवें उनकी रक्षा कर दुष्टों को (**हत्वी**) मार के (**तेषाम्**) उनके और (**नः**) हमारे (**वसूनि**) उत्तम द्रव्यों को आप (**आ, भर**) अच्छे प्रकार धारण कीजिये॥१०॥

भावार्थः-जब राजाओं में युद्ध प्रवृत्त हो प्रजास्थ मनुष्य उनके प्रति ऐसे कहें कि तुम डरो नहीं। जितने हम लोग हैं, वे सब तुम्हारे सहायक हैं। जो ऐसे आप-हम आपस में एक-दूसरे के सहायक न हों, तो विजय कहाँ से होवे?॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं व॒: शर्धं॑ मारु॒तं सु॒म्नयु॒र्गिरो॑प ब्रुवे॒ नम॑सा॒ दैव्यं॒ जन॑म्।
यथा॑ र॒यिं सर्व॑वीरं॒ नशा॑महा अपत्य॒साचं॒ श्रुत्यं॑ दि॒वेदि॑वे॥ ११॥ १३॥

तम्। व॒:। शर्धं॑म्। मारु॒तम्। सु॒म्न॒ऽयु॒:। गि॒रा। उप॑। ब्रु॒वे॒। नम॑सा। दैव्य॑म्। जन॑म्। यथा॑। र॒यिम्। सर्व॑ऽवीरम्। नशा॑महै। अ॒प॒त्य॒ऽसाच॑म्। श्रुत्य॑म्। दि॒वेऽदि॑वे॥ ११॥

पदार्थ:-(तम्) (व:) युष्माकम् **(शर्द्धम्)** बलम् **(मारुतम्)** मरुतामिदम् **(सुम्नयु:)** य आत्मन: सुम्नमिच्छति **(गिरा)** वाण्या **(उप) (ब्रुवे) (नमसा)** सत्कारेण **(दैव्यम्)** देवेषु विद्वत्सु भवम् **(जनम्)** प्रसिद्धम् **(यथा) (रयिम्)** धनम् **(सर्ववीरम्)** सर्वे वीरा यस्मात्तम् **(नशामहै)** अदृष्टा भवेम **(अपत्यसाचम्)** उत्तमापत्यसंयुक्तम् **(श्रुत्यम्)** श्रुतिषु श्रवणेषु भवम् **(दिवेदिवे)** प्रतिदिनम्॥ ११॥

अन्वय:-हे मनुष्या! यथा सुम्नयुरहं नमसा गिरा वस्तं मारुतं शर्द्धं दिवेदिवे दैव्यं जनं प्रत्युपब्रुवे तथा यूयमस्माकं बलं सर्वान् प्रत्युपब्रूत यथा वयं श्रुत्यमपत्यसाचं सर्ववीरं रयिं प्राप्य पूर्णमायुर्भुक्त्वा नशामहै तथा यूयमपि भवत॥ ११॥

भावार्थ:-अत्रोपमालङ्कार:। यथा राजपुरुषा: प्रजागुणान् स्वकीयान् प्रति ब्रुयुस्तथा प्रजाजना राजपुरुषगुणान् स्वकीयान् प्रत्युपदिशेयुरेवं परस्परेषां गुणज्ञानपुर:सरं प्रीतिं प्राप्य नित्यमन्योन्यमानन्दयेयुरिति॥ ११॥

अत्र स्त्रीपुरुषराजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति त्रिंशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्त:॥

पदार्थ:-हे मनुष्यो! **(यथा)** जैसे **(सुम्नयु:)** अपने को धन की इच्छा करनेवाला मैं **(नमसा)** सत्काररूप **(गिरा)** वाणी से **(व:)** तुम्हारे **(तम्)** उस **(मारुतम्)** वायुओं के सम्बन्धी **(शर्द्धम्)** बल को **(दिवेदिवे)** प्रतिदिन **(दैव्यम्)** विद्वानों में प्रसिद्ध हुए **(जनम्)** जन के प्रति **(उप, ब्रुवे)** उपदेश करूं, वैसे तुम लोग हमारे बल को सबके प्रति कहा करो। जैसे हम लोग **(श्रुत्यम्)** सुनने में प्रकट **(अपत्यसाचम्)** उत्तम सन्तानयुक्त **(सर्ववीरम्)** जिससे सब वीर पुरुष हों ऐसे

(रयिम्) धन को प्राप्त हो के पूर्ण अवस्था को भोग के **(नशामहै)** शरीर छोड़ें, वैसे तुम लोग भी होओ॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे राजपुरुष प्रजा के गुणों को अपने लोगों के प्रति कहें, वैसे प्रजापुरुष राजपुरुषों के गुणों को अपने सहयोगियों से कहें, ऐसे परस्पर गुण ज्ञानपूर्वक प्रीति को प्राप्त होके नित्य आनन्दित होवें॥११॥

इस सूक्त में स्त्री-पुरुष और राजा-प्रजा के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये।

यह तीसवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अस्माकमिति सप्तर्चस्य एकत्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। विश्वेदेवा देवताः। १, २, ४ जगती। ३ विराट् जगती। ५ निचृज्जगती छन्दः। निषादः स्वरः। ६ त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ शिल्पविषयमाह॥

अब इकतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में शिल्पविद्या का विषय कहते हैं॥

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा।
प्र यद्वयो न पप्तन् वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः॥ १॥

अस्माकम्। मित्रावरुणा। अवतम्। रथम्। आदित्यैः। रुद्रैः। वसुऽभिः। सचाऽभुवा। प्र। यत्। वयः। न। पप्तन्। वस्मनः। परि। श्रवस्यवः। हृषीवन्तः। वनऽसदः॥ १॥

पदार्थः-(अस्माकम्) (**मित्रावरुणा**) राजप्रजाजनौ (**अवतम्**) गच्छतम् (**रथम्**) यानम् (**आदित्यैः**) मासैरिव वर्त्तमानैः पूर्णविद्यैः (**रुद्रैः**) प्राणवद्बलिष्ठैः (**वसुभिः**) भूम्यादिवद्गुणाढ्यैर्जनैः (**सचाभुवा**) सचेन गुणसमवायेन सह भवन्तौ (**प्र**) (**यत्**) ये (**वयः**) पक्षिणः (**न**) इव (**पप्तन्**) पतेयुः (**वस्मनः**) निवसन्तः (**परि**) (**श्रवस्यवः**) आत्मनः श्रवोऽन्नमिच्छवः (**हृषीवन्तः**) बहुहर्षयुक्ताः (**वनर्षदः**) ये वने सीदन्ति ते। अत्र **वाच्छन्दसी**ति रेफागमः॥ १॥

अन्वयः-हे सचाभुवा मित्रावरुणा! यथा युवामादित्यै रुद्रैर्वसुभिर्निर्मितमस्माकं रथमासाद्य प्रावतं तथा यद्वस्मनः श्रवस्यवो हृषीवन्तो वनर्षदो वयो न परि पप्तन्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विदुषामनुकरणं कृत्वा विमानादीनि यानानि रचयित्वा पक्षिवदन्तरिक्षादिमार्गेषु सुखेन गमनाऽगमने कार्ये॥ १॥

पदार्थः-हे (**सचाभुवा**) गुणसम्बन्ध के साथ हुए (**मित्रावरुणा**) राजप्रजापुरुषो! जैसे तुम लोग (**आदित्यैः**) महीनों के तुल्य वर्त्तमान पूर्ण विद्वान् (**रुद्रैः**) प्राण के तुल्य बलवान् (**वसुभिः**) भूमि आदि के तुल्य गुणयुक्त जनों के बनाये (**अस्माकम्**) हमारे (**रथम्**) रथ पर चढ़ के (**प्र, अवतम्**) अच्छे प्रकार चलो तथा (**यत्**) जो (**वस्मनः**) वसते हुए (**श्रवस्यवः**) अपने को अन्न चाहनेवाले (**हृषीवन्तः**) बहुत आनन्दयुक्त (**वनर्षदः**) वन में रहनेवाले (**वयः, न**) पक्षियों के तुल्य सब ओर से (**परि, पप्तन्**) उड़ें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि विद्वानों का अनुकरण करके, विमानादि यान बना के, पक्षि के अन्तरिक्षादि मार्गों में सुख से गमनागमन किया करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अध॑ स्मा नु॒ उद॑वता सजोषसो॒ रथं॑ देवासो अ॒भि वि॒क्षु वा॑ज॒युम्।
यदा॒शव॒: पद्या॑भि॒स्तित॑र्त॒तो रज॑: पृथि॒व्या: सानौ॒ जङ्घ॑नन्त पा॒णिभि॑:॥ २॥

अध॑। स्म॒। नु॒:। उत्। अ॒वत॒। स॒ऽजो॒ष॒स॒:। रथ॑म्। दे॒वा॒स॒:। अ॒भि। वि॒क्षु। वा॒ज॒ऽयु॒म्। यत्। आ॒शव॑:। पद्या॑भि:। तित॑र्त:। रज॑:। पृ॒थि॒व्या:। सानौ॑। जङ्घ॑नन्त। पा॒णि॒ऽभि॑:॥ २॥

पदार्थ:-(अध) अथ **(स्म)** एव। अत्र **निपातस्य चे**ति दीर्घ:। **(न:)** अस्माकम् **(उत्) (अवत)** कामयध्वम्। अत्र **संहितायामि**ति दीर्घ:। **(सजोषस:)** समानप्रीतिसेवना **(रथम्) (देवास:)** विद्वांस: **(अभि)** आभिमुख्ये **(विक्षु)** प्रजासु **(वाजयुम्)** यो वाजयति वेगेन गच्छति तम् **(यत्)** ये **(आशव:)** शीघ्रगामिनोऽश्वा: **(पद्याभि:)** पत्तुं गन्तुं योग्याभिर्गतिभि: **(तित्रत:)** तरन्त:। विकरणव्यत्ययेन शसोऽभ्यासस्येत्वञ्च। **(रज:)** लोकान्। **लोका रजांस्युच्यन्त** (निरु०४.१९) इति निरुक्तात्। **(पृथिव्या:)** भूमे: **(सानौ)** उच्चप्रदेशे **(जङ्घनन्त)** भृशं: हत **(पाणिभि:)** करै:॥ २॥

अन्वय:-हे सजोषसो रजस्तित्रतो देवासो! यूयं नो वाजयुं रथं विक्ष्वभ्युदवताध यथा यदाशवो गच्छन्ति तथा पद्याभि: पृथिव्या: सानौ प्राणिभि: स्म जङ्घनन्त॥ २॥

भावार्थ:-यदि मनुष्या हस्तैर्यानेषु यन्त्राणि संस्थाप्य हत्वैतानि चालयेयुस्तेऽश्ववत्पृथिव्या उपर्य्युपरि गन्तुमागन्तुं शक्नुवन्ति॥ २॥

पदार्थ:-हे **(सजोषस:)** आपस में बराबर प्रीति के निबाहनेवाले **(रज:)** लोकों के **(तित्रत:)** पार होते हुए **(देवास:)** विद्वान् लोगो! तुम **(न:)** हमारे **(वाजयुम्)** वेग से चलनेवाले **(रथम्)** विमानादि यान को **(विक्षु)** प्रजाओं में **(अभि, उत्, अवत)** सब प्रकार चाहे **(अध)** इसके अनन्तर जैसे **(यत्)** जो **(आशव:)** शीघ्रगामी घोड़े चलते हैं, वैसे **(पद्याभि:)** चलने योग्य गतियों से **(पृथिव्या:)** भूमि के **(सानौ)** ऊंचे प्रदेश में **(पाणिभि:)** हाथों से **(स्म)** ही **(जङ्घनन्त)** शीघ्र ताड़ना देओ॥ २॥

भावार्थ:-जो मनुष्य हाथों से यानों में यन्त्रों को स्थिर कर और ताड़ना देकर इनको चलावें तो घोड़े के तुल्य पृथिवी के ऊपर ऊपर जाने-आने को समर्थ होते हैं॥ २॥

पुना राजप्रजाविषयमाह॥

फिर राज-प्रजा विषय को अगले मन्त्र में कहा है॥

उत स्य नू इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः।
अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये॥ ३॥

उत। स्यः। नूः। इन्द्रः। विश्वऽचर्षणिः। दिवः। शर्धेन। मारुतेन। सुऽक्रतुः। अनु। नु। स्थाति। अवृकाभिः। ऊतिऽभिः। रथम्। महे। सनये। वाजऽसातये॥ ३॥

पदार्थः-(उत) **(स्यः)** सः **(नः)** अस्माकम् **(इन्द्रः)** सूर्य्य इव सभेशः **(विश्वचर्षणिः)** विश्वस्य दर्शकः **(दिवः)** प्रकाशात् **(शर्द्धेन)** बलेन **(मारुतेन)** मनुष्याणामनेन **(सुक्रतुः)** श्रेष्ठप्रज्ञः **(अनु)** **(नु)** शीघ्रम् **(स्थाति)** तिष्ठति **(अवृकाभिः)** अविद्यमानस्तेनादिभिः **(ऊतिभिः)** रक्षादिभिः **(रथम्)** विमानादियानम् **(महे)** महते **(सनये)** सुखसंविभागाय **(वाजसातये)** वाजस्य सङ्ग्रामस्य सम्यक् सेवनाय॥ ३॥

अन्वयः-विश्वचर्षणिस्सुक्रतुरिन्द्रो दिवः सूर्य्य इवावृकाभिरूतिभिर्मारुतेन शर्द्धेन महे सनये वाजसातये नो रथमनुष्ठाति स्य उत न्वैश्वर्य्यमाप्नोति॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यः स्वप्रतापेन सर्वं जगत्पालयति तथा धार्मिकाः प्रजाराजपुरुषाः स्वराज्यं पालयेयुः॥ ३॥

पदार्थः-(विश्वचर्षणिः) सबको दिखाने-चितानेवाला **(सुक्रतुः)** उत्तम बुद्धियुक्त **(इन्द्रः)** सूर्य के तुल्य तेजस्वी सभापति **(दिवः)** जैसे प्रकाश से सूर्य शोभित हो, वैसे **(अवृकाभिः)** चोर आदि दुष्टों से रहित **(ऊतिभिः)** रक्षा आदि से **(मारुतेन)** मनुष्य सम्बन्धी **(शर्द्धेन)** बल के साथ **(महे)** बड़े **(सनये)** सुख के सम्यक् विभाग के लिये और **(वाजसातये)** संग्राम के सम्यक् सेवने के लिये **(नः)** हमारे **(रथम्)** विमानादि यान का **(अनु, स्थाति)** अनुष्ठान करता है **(स्यः)** वह **(उत)** तो **(नु)** शीघ्र ऐश्वर्य को प्राप्त होता है॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य अपने प्रताप से सब जगत् की पालना करता, वैसे धार्मिक प्रजा और राजपुरुष अपने राज्य की रक्षा किया करें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम्।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती॥ ४॥

उत। स्यः। देवः। भुवनस्य। सक्षणिः। त्वष्टा। ग्नाभिः। सऽजोषाः। जूजुवत्। रथम्। इळा। भगः। बृहत्ऽदिवा। उत। रोदसी इति। पूषा। पुरम्ऽधिः। अश्विनौ। अध। पती इति॥४॥

पदार्थः-(उत) अपि **(स्यः)** सः **(देवः)** द्योतनात्मकः **(भुवनस्य)** लोकसमूहस्य **(सक्षणिः)** समवेता। अत्र सच धातोरनिः प्रत्ययः। **(त्वष्टा)** छेत्ता **(ग्नाभिः)** सुशिक्षिताभिर्वाग्भिः **(सजोषाः)** समानसुखदुःखप्रीतयः **(जूजुवत्)** गमयेत् **(रथम्)** **(इळा)** वाणी **(भगः)** ऐश्वर्यभागी **(बृहत्)** **(दिवा)** प्रकाशेन **(उत)** अपि **(रोदसी)** द्यावापृथिव्यौ **(पूषा)** पोषकः **(पुरन्धिः)** पुराणां धर्त्ता **(अश्विनौ)** सूर्य्याचन्द्रमसौ **(अध)** आनन्तर्य्ये। अत्र **निपातस्य च**ेति दीर्घः। **(पती)** पालयितारौ॥४॥

अन्वयः-यः पूषा पुरन्धिः सक्षणिः सजोषा भगो देवोऽश्विना पती इवोत दिवा रोदसी भुवनस्य त्वष्टा सूर्यइव रथं जूजुवदधोताप्यस्य ग्नाभिः सहेळोत्तमा वर्त्तते स्यो बृहत्सुखमाप्नुयात्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्युद्वत्सुशिक्षिता वाणीवच्च प्रवर्त्तन्ते तेऽनेकानि शिल्पसाध्यानि निर्मायैश्वर्यवन्तः स्युः॥४॥

पदार्थः-जो **(पूषा)** पुष्टिकारक **(पुरन्धिः)** पुरों का धारण करनेवाला **(सक्षणिः)** मेली **(सजोषाः)** सुख-दुःख और प्रीति को बराबर रखनेवाला **(भगः)** ऐश्वर्यभागी **(देवः)** प्रकाशक **(पती)** पालन करनेहारे **(अश्विनौ)** सूर्य-चन्द्रमा के तुल्य **(उत)** और **(दिवा)** प्रकाश के साथ **(रोदसी)** सूर्य-भूमी **(भुवनस्य)** लोकों के **(त्वष्टा)** छेदन करनेवाले सूर्य के तुल्य **(रथम्)** विमानादि यान को **(जुजूवत्)** पहुंचावे **(अध)** इसके अनन्तर **(उत)** और इसकी **(ग्नाभिः)** वाणियों के साथ **(इळा)** उत्तम वाणी है **(स्यः)** वह **(बृहत्)** बड़े सुख को प्राप्त होवे॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बिजुली के तुल्य और सुशिक्षित वाणी के तुल्य वर्त्तते हैं, वे अनेक शिल्पविद्या से साध्य यानों को बना के ऐश्वर्यवाले होते हैं॥४॥

पुनः स्त्रीपुरुषकर्त्तव्यविषयमाह॥

फिर स्त्री-पुरुष के कर्त्तव्य विषय को अगले मन्त्र में कहा है॥

उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे॥५॥

उत्। त्ये इति। देवी इति। सुभगे इति सुऽभगे। मिथुऽदृशा। उषसानक्ता। जगताम्। अपिऽजुवा। स्तुषे। यत्। वाम्। पृथिवि। नव्यसा। वचः। स्थातुः। च। वयः। त्रिऽवयाः। उपऽस्तिरे॥५॥

पदार्थः-(उत) अपि **(त्ये)** ते **(देवी)** देदीप्यमाने **(सुभगे)** शोभनैश्वर्यनिमित्ते **(मिथूदृशा)** परस्परदर्शयितारौ। अत्र **संहितायामि**ति दीर्घः। **(उषासानक्ता)** प्रत्यूषरात्र्यौ। अत्रा**ऽन्येषामपी**ति दीर्घः। **(जगताम्)** मनुष्यादिसंसारस्थानाम् **(अपीजुवा)** प्रेरके **(स्तुषे)** **(यत्)** ये **(वाम्)** ते **(पृथिवी)** भूमिवद्वर्त्तमाने **(नव्यसा)** अतिशयेन नवीनेन **(वचः)** वचसा। **सुपां सुलुगि**ति टालोपः। **(स्थातुः)** स्थावरस्य **(च)** **(वयः)** कमनीयम् **(त्रिवयाः)** त्रीणि वयांसि यस्य सः **(उपस्तिरे)** उपस्तृणोमि। अत्र **वाच्छन्दसी**ति रेफादेशः॥५॥

अन्वयः-हे पृथिविवद्वर्त्तमाने! त्रिवयास्त्वं यथा त्ये मिथूदृशा सुभगे देवी अपीजुवोषसानक्ता जगतां स्थातुश्च पालकौ उतापि यथाऽहं नव्यसा वचो वयो यद्ये स्तुष उपस्तिरे तथैव वां ते चोपस्तुहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा रात्रिदिवसौ परस्परं संहतौ वर्त्तेते तथैव स्त्रीपुरुषौ वर्त्तेयातां यथा पुरुषा ब्रह्मचर्येण विद्यामधीत्य सर्वेषां पदार्थानां गुणकर्मस्वभावान् विज्ञाय विद्वांसो जायन्ते, तथैव स्त्रियोऽपि स्युः॥५॥

पदार्थः-हे **(पृथिवि)** पृथिवि के तुल्य वर्त्तमान सहनशील स्त्रि! **(त्रिवयाः)** तीनों अवस्था भोगनेवाली तू जैसे **(त्ये)** वे **(मिथूदृशा)** आपस में एक-दूसरे को देखनेवाले **(सुभगे)** सुन्दर ऐश्वर्य के निमित्त **(देवी)** प्रकाशमान **(अपीजुवा)** प्रेरक **(उषानसक्ता)** दिन-रात **(जगताम्)** संसारस्थ मनुष्यादि **(च)** और **(स्थातुः)** स्थावर वृक्षादि के पालक होते हैं **(उत)** और जैसे मैं **(नव्यसा)** नवीन **(वचः)** वचन से **(वयः)** अभीष्ट अवस्था को **(यत्)** जिनकी **(स्तुषे)** स्तुति करता हूं और **(उपस्तिरे)** निकट आच्छादित रक्षित करता हूं, वैसे ही **(वाम्)** उनकी स्तुति कर॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे रात-दिन परस्पर मिले हुए वर्त्तते हैं, वैसे ही स्त्री-पुरुष वर्तें। जैसे पुरुष ब्रह्मचर्य से विद्या पढ़े के सब पदार्थों के गुण, कर्म, स्वभावों को जान कर विद्वान् होते हैं, वैसे ही स्त्रियां भी हों॥५॥

पुनरस्माभिर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर हम मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

उ॒त व॒ः शंस॑मु॒शिजा॑मिव श्म॒स्यहि॑र्बुध्नो॒३॑ज एका॑दु॒त।
त्रि॒त ऋ॑भु॒क्षाः स॑वि॒ता चनो॑ दधेऽपां नपा॑दाशु॒हेमा॑ धि॒या शमि॑॥६॥

उ॒त। व॒ः। शंस॑म्। उ॒शिजा॑म्ऽइव। श्म॒सि॒। अहि॑ः। बु॒ध्न्यः॑। अ॒जः। एका॑ऽपात्। उ॒त। त्रि॒तः। ऋ॒भु॒क्षाः॑। स॒वि॒ता। च॒नः॑। द॒धे॒। अ॒पाम्। नपा॑त्। आ॒शु॒ऽहेमा॑। धि॒या। शमि॑॥६॥

पदार्थः-(**उत**) (**वः**) युष्माकम् (**शंसम्**) स्तुतिम् (**उशिजामिव**) कमनीयानां विदुषामिव (**श्मसि**) कामयेमहि (**अहिः**) व्यापनशीलो मेघः (**बुध्न्यः**) बुध्नेऽन्तरिक्षे व्याप्तः (**अजः**) न जायते कदाचित् सः (**एकपात्**) एकः पादो गमनं प्रापणं यस्य सः (**उत**) एव (**त्रितः**) ब्रह्मचर्य्याऽध्ययनविचारेभ्यः (**ऋभुक्षाः**) मेधावी (**सविता**) ऐश्वर्य्यकारकः (**चनः**) अन्नम् (**दधे**) (**अपाम्**) प्राणानाम् (**नपात्**) न पतति कदाचिद् यद्वा न सन्ति पादादयोऽवयवा यस्य सः (**आशुहेमा**) शीघ्रं वर्द्धमाना (**धिया**) प्रज्ञया कर्मणा वा (**शमि**) कर्मणि। अत्र वर्णव्यत्ययेन ह्रस्वः **सुपां सुलुगि**ति सुलोपः॥६॥

अन्वयः-हे विद्वांसो! यथा त्रित ऋभुक्षाः सविता नपादाशुहेमा उताप्यज एकपादहिर्बुध्न्य इव वर्त्तमानोऽहं धिया शमि प्रवर्त्ते अपां चनो दधे तथा हे पत्नि! त्वं प्रवर्त्तस्व यथा वयमुशिजामिव वः शंसं श्मस्युतापि युष्मान् दधीमहि तथा यूयमप्यस्मासु वर्त्तध्वम्॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथेश्वरोऽजन्मा कमनीयः सत्यगुणकर्मस्वभावः सेवनीयोऽस्ति तथा वयं सर्वे जीवाः स्मोऽतो ब्रह्मचर्यादिभिश्शुभकर्मण्यस्माभिः सदा वर्त्तितव्यम्॥६॥

पदार्थः-हे विद्वानो! जैसे (**त्रितः**) ब्रह्मचर्य, अध्ययन और विचार इन तीन कर्मों से (**ऋभुक्षाः**) मेधावी (**सविता**) ऐश्वर्य करनेहारा (**नपात्**) न गिरनेवाला वा पग आदि अवयवों से रहित (**आशुहेमा**) शीघ्र बढ़नेवाला (**उत**) और (**अजः**) कभी न उत्पन्न होनेवाला (**एकपात्**) एक प्रकार की प्राप्तियुक्त (**अहिः**) व्याप्तिशील (**बुध्न्यः**) अन्तरिक्ष में व्याप्त मेघ के तुल्य वर्तमान मैं (**धिया**) बुद्धि वा कर्म से (**शमि**) कर्म में प्रवृत्त होऊं (**अपाम्**) प्राणों के (**चनः**) अन्न को (**दधे**) धारण करता हूं, वैसे हे पत्नि! तू प्रवृत्त हो जैसे हम (**उशिजामिव**) कामना के योग्य (**वः**) तुम विद्वानों को (**शंसम्**) स्तुति को (**श्मसि**) चाहते हैं (**उत**) और तुमको धारण करें, वैसे तुम लोग भी हमारे विषय में वर्त्तो॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर अजन्मा, कामना के योग्य, सत्य गुणकर्मस्वभाववाला सेवने योग्य है, वैसे हम सब जीव लोग हैं। इससे ब्रह्मचर्यादि शुभ कर्म में हमको सदा वर्त्तना चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एता वो॑ व॒श्म्युद्य॑ता यजत्रा॒ अत॑क्षन्नायवो॒ नव्य॑से॒ सम्।
श्र॒व॒स्यवो॒ वाज॑ं चका॒नाः सप्ति॒र्न रथ्यो॒ अह॑ धी॒तिम॑श्याः॥७॥१४॥

एता। वः। वश्मि। उत्ऽयता। यजत्राः। अतक्षन्। आयवः। नव्यसे। सम्। श्रवस्यवः। वाजम्। चकानाः। सप्तिः। न। रथ्यः। अह। धीतिम्। अश्याः॥७॥

पदार्थः-(एता) एतानि **(वः)** युष्माकम् **(वश्मि)** कामये **(उद्यता)** उत्कृष्टतया यतानि गृहीतानि **(यजत्राः)** सङ्गन्तारः **(अतक्षन्)** तनू कुर्वन्ति **(आयवः)** मनुष्याः। **आयव इति मनुष्यनामसु पठितम्।** (निघं०२.३)। **(नव्यसे)** नवीयसे **(सम्)** **(श्रवस्यवः)** आत्मनः श्रवोऽन्नं श्रवणं वेच्छन्तः **(वाजम्)** विज्ञानम् **(चकानाः)** कामयमानाः **(सप्तिः)** अश्वः। **सप्तिरित्यश्वनामसु पठितम्।** (निघं०१.१४)। **(न)** इव **(रथ्यः)** यो रथं वहति सः **(अह)** विनिग्रहे **(धीतिम्)** **(अश्याः)** प्राप्नुयाः॥७॥

अन्वयः-यथा वाजं चकानाः श्रवस्यवो यजत्रा आयवो नव्यसे रथ्यः सप्तिर्न समतक्षन् तथा व एतोद्यताऽहं वश्मि। हे विद्वन्! तथा त्वमह धीतिमश्यास्तथाऽहं प्राप्नुयाम॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैर्यद्यद्विद्वांसः कामयन्ते तत्तत्सदा कामनीयं यथैव त उपदिशेयुस्तथा तच्छ्रुत्वा निश्चित्य ग्रहीतव्यं करणीयञ्चेति॥७॥

अत्र विद्वद्विदुषीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकाधिकत्रिंशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-जैसे **(वाजम्)** विज्ञान को **(चकानाः)** चाहते हुए **(श्रवस्यवः)** अपने को अन्न वा शास्त्र सुनने की इच्छा करते हुए **(यजत्राः)** मेल मिलाप रखते हुए **(आयवः)** मनुष्य **(नव्यसे)** अति नवीन जन के लिये **(रथ्यः)** रथ के चलानेवाले **(सप्तिः)** घोड़े के **(न)** तुल्य विचारणीय विषय को **(सम्, अतक्षन्)** सम्यक् सूक्ष्म करते हैं अर्थात् अच्छे प्रकार समझाते हैं, वैसे **(वः)** तुम लोगों के **(एता)** इन **(उद्यता)** उत्तम प्रकार ग्रहण किये वचनों को मैं **(वश्मि)** चाहता हूं। हे विद्वन्! जैसे आप **(अह)** नियमपूर्वक **(धीतिम्)** धैर्य को **(अश्याः)** प्राप्त होओ, वैसे मैं भी धैर्य को प्राप्त होऊं॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि जिस-जिस पदार्थ की कामना विद्वान् लोग करें, उस उसकी कामना करें। जैसे विद्वान् लोग उपदेश करें, वैसे उसको सुन, निश्चय कर, स्वीकार और अनुष्ठान किया करें॥७॥

इस सूक्त में विद्वान् और विदुषी स्त्रियों के गुणों का वर्णन होने से इस सूक्त में कहे अर्थ की पूर्व सूक्त के साथ सङ्गति है, यह जानना चाहिये॥

यह इकतीसवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अस्येत्यस्याष्टर्चस्य द्वात्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। १ द्यावापृथिव्यौ। २, ३ इन्द्रस्त्वष्टा वा। ४, ५ राका। ६, ७ सिनीवाली। ८ लिङ्गोक्ता देवताः। १ जगती। ३ निचृज्जगती। ४, ५ विराट् जगती छन्दः। निषादः स्वरः। २ त्रिष्टुप् छन्दः। धैवतः स्वरः। ६ अनुष्टुप्। ७ विराडनुष्टुप्। ८ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मनुष्याः किं कुर्य्युरित्याह॥

अब बत्तीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र से मनुष्यों को क्या कर्त्तव्य है, इस विषय को कहते हैं॥

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः।
ययोरायुः प्रतरं इदं पुर उपस्तुते वसूयुर्वां महो दधे॥ १॥

अस्य। मे। द्यावापृथिवी इति। ऋतऽयतः। भूतम्। अवित्री इति। वचसः। सिसासतः। ययोः। आयुः। प्रऽतरम्। ते इति। इदम्। पुरः। उपस्तुते इत्युपऽस्तुते। वसुऽयुः। वाम्। महः। दधे॥ १॥

पदार्थः-(अस्य) (मे) मम **(द्यावापृथिवी)** सूर्य्यभूमी **(ऋतायतः)** उदकमिवाचरतः **(भूतम्)** उत्पन्नम् **(अवित्री)** रक्षादिनिमित्ते **(वचसः)** वचनस्य **(सिषासतः)** संभक्तुमिवाचरतः **(ययोः) (आयुः)** जीवनम् **(प्रतरम्)** पुष्कलम् **(ते) (इदम्) (पुरः) (उपस्तुते)** उप समीपे प्रशंसिते **(वसूयुः)** आत्मनो वस्विच्छुः **(वाम्)** तयोः **(महः)** महत्सुखम् **(दधे)**॥ १॥

अन्वयः-येऽवित्री उपस्तुते द्यावापृथिवी मेऽस्य वचसो भूतमृतायतः सिषासतो ययोः सकाशात् प्रतरमिदमायुः वसूयुः सन्नहं पुरो दधे ते सर्वस्य जगतः सुखं साध्नुतो वां तयोः सकाशादहं महत्सुखं दधे॥ १॥

भावार्थः-मनुष्यैरग्निभूम्योः सेवनं युक्त्या क्रियते चेत्तर्हि पूर्णमायुर्धनं च प्राप्येत॥ १॥

पदार्थः-जो **(अवित्री)** रक्षा आदि के निमित्त **(उपस्तुते)** समीप में प्रशंसा को प्राप्त **(द्यावापृथिवी)** सूर्य और भूमि **(मे)** मेरे **(अस्य)** इस प्रत्यक्ष **(वचसः)** वचन के सम्बन्ध से **(भूतम्)** उत्पन्न हुए **(ऋतायतः)** जल के समान आचरण करते **(सिषासतः)** वा अच्छे प्रकार विभाग होने के समान आचरण करते जिनसे **(प्रतरम्)** पुष्कल **(इदम्)** इस **(आयुः)** जीवन को **(वसूयुः)** धन की चाहना करता हुआ मैं **(पुरः)** आगे **(दधे)** धारण करता हूँ **(ते)** वे सब जगत् का सुख सिद्ध करते हैं **(वाम्)** उनकी उत्तेजना से मैं **(महः)** बहुत सुख को धारण करता हूँ॥ १॥

भावार्थः-मनुष्यों को [=के द्वारा] भूमि और अग्नि का सेवन जो युक्ति के साथ किया जाता है तो पूर्ण आयु और धन की प्राप्त हो सकती है॥ १॥

अथ विदुषां मित्रत्वमाह॥

अब विद्वानों की मित्रता को अगले मन्त्र में कहा है॥

मा नो॒ गुह्या॒ रिप॑ आ॒योरह॑न् दभ॒न् मा न॑ आ॒भ्यो रीर॑धो दु॒च्छुना॑भ्यः।
मा नो॒ वि यौ॑: स॒ख्या वि॒द्धि तस्य॑ न॒ सुम्ना॑य॒ता मन॑सा॒ तत्त्वे॑महे॥ २॥

मा। न॒:। गुह्या॑। रिप॑:। आ॒योः। अह॑न्। द॒भ॒न्। मा। न॒:। आ॒भ्यः। रीर॑धः। दु॒च्छुना॑भ्यः। मा। न॒:। वि। यौः। स॒ख्या। वि॒द्धि। तस्य॑। न॒:। सु॒म्न॒ऽय॒ता। मन॑सा। तत्। त्वा॒। ई॒म॒हे॥ २॥

पदार्थः-(मा) निषेधे **(नः)** अस्माकम् **(गुह्या)** गुप्तानि रहस्यानि **(रिपः)** पृथिवी। **रिप इति पृथिवीनामसु पठितम्।** (निघं०१.१)। **(आयोः)** मनुष्यस्य सुखम् **(अहन्)** अहनि दिवसे **(दभन्)** दभ्नुयुः **(मा)** **(नः)** **(आभ्यः)** पृथिवीभ्यः **(रीरधः)** हिंस्यात् **(दुच्छुनाभ्यः)** दुःखकारिणीभ्यः शत्रुसेनाभ्यः **(मा)** **(नः)** अस्मान् **(वि)** **(यौः)** पृथक् कुर्याः **(सख्या)** सख्युः कर्माणि **(विद्धि)** जानीहि **(तस्य)** **(नः)** अस्माकम् **(सुम्नायता)** आत्मनः सुम्नं सुखमिच्छता **(मनसा)** अन्तःकरणेन **(तत्)** तम् **(त्वा)** त्वाम् **(ईमहे)** याचामहे॥ २॥

अन्वयः-यानि नो गुह्या सख्याऽऽयोरहन्मा दभन्। रिपश्च मा दभ्नीयाद्यथाहं कस्य चिन्मनुष्यस्य सुखं न दभ्नुयां तथा हे सेनेश! त्वमाभ्यो दुच्छुनाभ्यो नो मा रीरधो मा नो मनसा वि यौः सुम्नायता नो विद्धि तस्य सज्जनस्य सुखं मा वियौस्तस्माद्वयं तत्त्वेमहे॥ २॥

भावार्थः-सर्वैर्मनुष्यैरेवं सदैवेषितव्यं यदस्माभिः कस्यचित्सुखहानिः कदाचिन्न कर्त्तव्या, मित्रताभङ्गो नैव विधेयः, शत्रुसेनाभ्यः सर्वे सज्जनाः सदा रक्षणीयाः, सततं सत्पुरुषेभ्यः सुखं याचनीयं च॥ २॥

पदार्थः-जो **(नः)** हमारे **(गुह्या)** गुप्त एकान्त के **(सख्या)** मित्रपन के काम **(आयोः)** मनुष्य के सुख को **(अहन्)** किसी दिन में **(मा)** मत **(दभन्)** नष्ट करें **(रिपः)** और पृथिवी **(मा)** मत नष्ट करें वा जैसे मैं किसी मनुष्य के सुख को न नष्ट करूं, वैसे हे सेनापति! आप **(आभ्यः)** इन पृथिवी वा **(दुच्छुनाभ्यः)** दुःखकारिणी शत्रु की सेनाओं से **(नः)** हम लोगों को **(मा)** मत **(रीरधः)** नष्ट करें **(मा)** मत **(नः)** हम लोगों को **(मनसा)** अन्तःकरण से **(वि, यौः)** अलग करें वा **(सुम्नायता)** अपने को सुख की इच्छा करते हुए **(नः)** हम लोगों को **(विद्धि)** जानो **(तस्य)** उस सज्जन के सुख को **(मा)** मत नष्ट करो इस कारण हम लोग **(तत्)** उक्त कर्म और **(त्वा)** आपको **(ईमहे)** याचते हैं॥ २॥

भावार्थः-सब मनुष्यों को इस प्रकार सदा इच्छा करनी चाहिये कि किसी के सुख की हानि कभी न करनी चाहिये, मित्रता का भङ्ग न करना चाहिये, सब सज्जनों की सदा रक्षा करनी चाहिये, निरन्तर सज्जनों के लिये सुख मांगना चाहिये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम्।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा॥३॥

अहेळता। मनसा। श्रुष्टिम्। आ। वह। दुहानाम्। धेनुम्। पिप्युषीम्। असश्चतम्। पद्याभिः। आशुम्। वचसा। च। वाजिनम्। त्वाम्। हिनोमि। पुरुऽहूत। विश्वहा॥३॥

पदार्थः-(अहेळता) अनादृतेन **(मनसा)** विज्ञानेन **(श्रुष्टिम्)** सद्यः **(आ)** समन्तात् **(वह)** प्राप्नुहि प्रापय वा **(दुहानाम्)** सुखप्रपूरिकाम् **(धेनुम्)** गामिव वाणीम् **(पिप्युषीम्)** प्रवृद्धां वर्द्धयित्रीं वर्द्धयतीं वा **(असश्चतम्)** अप्राप्तम् **(पद्याभिः)** प्रापणीयाभिः क्रियाभिः **(आशुम्)** सद्यः **(वचसा) (च) (वाजिनम्)** प्रशस्तविज्ञानवन्तम् **(त्वाम्) (हिनोमि)** प्राप्नोमि **(पुरुहूत)** बहुभिः सत्कृत **(विश्वहा)** सर्वाणि दिनानि। अत्र **कालाध्वनोरत्यन्तसंयोगे।** (अष्टा०२.३.५) इति द्वितीया॥३॥

अन्वयः-हे पुरुहूत! त्वमहेळता मनसा पद्याभिर्वचसा चासश्चतं पिप्युषीं दुहानां धेनुं विश्वहा श्रुष्टिमावह। अहं वाजिनं त्वां हिनोमि॥३॥

भावार्थः-यो समाहितेनान्तःकरणेनान्येभ्यः सुशिक्षितां वाचं सद्यः प्रापयति तं सर्वे सत्कृत्य वर्द्धयन्तु॥३॥

पदार्थः-हे **(पुरुहूत)** बहुतों से सत्कार पाये हुए! आप **(अहेळता)** अनादर किये हुए **(मनसा)** विज्ञान से वा **(पद्याभिः)** प्राप्त करने योग्य क्रियाओं से **(च)** और **(वचसा)** वचन से **(असश्चतम्)** अप्राप्त **(पिप्युषीम्)** बढ़ी हुई बढ़ाने वा बढ़वाने **(दुहानाम्)** और सुख को अच्छे प्रकार पूरा करनेवाली **(धेनुम्)** गौ के समान वाणी को **(विश्वहा)** सब दिन **(श्रुष्टिम्)** शीघ्र **(आ, वह)** प्राप्त होओ वा प्राप्त कराओ मैं **(वाजिनम्)** प्रशंसित विज्ञानवाले **(त्वाम्)** आपको **(हिनोमि)** प्राप्त होता हूं॥३॥

भावार्थः-जो समाधानयुक्त अन्तःकरण से औरों के लिये उत्तम शिक्षायुक्त वाणी को शीघ्र प्राप्त करता है उसको सब सत्कार करके बढ़ावें॥३॥

अथ स्त्रीणां गुणानाह॥

अब स्त्रियों के गुणों को अगले मन्त्र में कहा है॥

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्॥४॥

राकाम्। अहम्। सुऽहवाम्। सुऽस्तुती। हुवे। शृणोतु। नः। सुऽभगा। बोधतु। त्मना। सीव्यतु। अपः। सूच्या। अच्छिद्यमानया। ददातु। वीरम्। शतऽदायम्। उक्थ्यम्॥४॥

पदार्थः-(राकाम्) पूर्णप्रकाशयुक्तेन चन्द्रेण युक्तां रात्रीम् **(अहम्)** **(सुहवाम्)** सुष्ठु स्पर्द्धनीयाम् **(सुष्टुती)** शोभनया स्तुत्या **(हुवे)** स्पर्द्धे **(शृणोतु)** **(नः)** अस्मान् **(सुभगा)** उत्तमैश्वर्य्यप्रापिका **(बोधतु)** जानातु **(त्मना)** आत्मना **(सीव्यतु)** सूत्राणि सन्तानयतु **(अपः)** कर्म **(सूच्या)** सीवनसाधनया **(अच्छिद्यमानया)** छेत्तुमनर्हया **(ददातु)** **(वीरम्)** उत्तमसन्तानम् **(शतदायम्)** असङ्ख्यदायभागिनम् **(उक्थ्यम्)** प्रशंसितुमर्हम्॥४॥

अन्वयः-अहं त्मना राकामिव वर्त्तमानां सुहवां यां स्त्रियं सुष्टुती हुवे सा सुभगा नोऽस्मान् शृणोतु बोधतु। अच्छिद्यमानया सूच्याऽपस्सीव्यतु शतदायं सीव्यतूक्थ्यं शतदायं वीरं ददातु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। तस्य जनस्य स्त्रिया वाऽहोभाग्यं भवति यामभीष्टः पतिः प्राप्नुयादभीष्टा स्त्री वा यं यथा गुणकर्मस्वभावपुरुषो भवेत्तथा पत्न्यपि स्याद्यदि द्वौ विद्वांसौ यथर्त्तु प्रेम्णा सन्तानमुत्पादयेतां तर्हि तदपत्यं प्रशंसितं कथं न स्याद्यथा छिन्नं वस्त्रं सूच्या सन्धीयते तथा ययोर्मनसि परस्परं प्रीतिः स्यात्तत्कुलं सर्वमान्यं भवति॥४॥

पदार्थः-मैं **(त्मना)** आत्मा से **(राकाम्)** उस रात्रि के जो पूर्ण प्रकाशित चन्द्रमा से युक्त है, **[**के**]** समान वर्त्तमान **(सुहवाम्)** सुन्दर स्पर्द्धा करने योग्य जिस स्त्री की **(सुष्टुती)** शोभनस्तुति के साथ **(हुवे)** स्पर्द्धा करता हूं वह **(सुभगा)** उत्तम ऐश्वर्य को प्राप्त करनेवाली **(नः)** हम लोगों को **(शृणोतु)** सुने और **(बोधतु)** जाने **(अच्छिद्यमानया)** न छेदन करने योग्य **(सूच्या)** सुई से **(अपः)** कर्म **(सीव्यतु)** सीने का करे **(शतदायम्)** असंख्य दायभागवाले को सीवे **(उक्थ्यम्)** और प्रशंसा के योग्य असंख्य दायभागी **(वीरम्)** उत्तम सन्तान को **(ददातु)** देवे॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। उस मनुष्य वा स्त्री का अहोभाग्य होता है जिसको अभीष्ट स्त्री वा पुरुष प्राप्त हो। जैसे गुण, कर्म, स्वभाववाला पुरुष हो, वैसी पत्नी भी हो। यदि दोनों विद्वान् स्त्री-पुरुष ऋतु समय को न उल्लङ्घन कर अर्थात् ऋतु समय के अनुकूल प्रेम से

सन्तानोत्पत्ति करें तो उनकी सन्तान प्रशंसित क्यों न हों। जैसे छिन्न-भिन्न वस्त्र सुई से सिया जाता है, वैसे जिनके मन में परस्पर प्रीति हो, उनका कुल सबका मान्य होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यास्ते॑ राके सुम॒तय॑: सु॒पेश॑सो॒ याभि॒र्ददा॑सि दा॒शुषे॒ वसू॑नि।
ताभि॑र्नो अ॒द्य सु॒मना॑ उ॒पाग॑हि सहस्रपो॒षं सु॑भगे॒ ररा॑णा॥५॥

याः। ते॒। रा॒के॒। सु॒ऽम॒तय॑:। सु॒ऽपेश॑सः। याभि॑:। ददा॑सि। दा॒शुषे॑। वसू॑नि। ताभि॑:। न॒:। अ॒द्य। सु॒ऽमना॑:। उ॒प॒ऽआग॑हि। स॒हस्र॑ऽपो॒षम्। सु॒ऽभ॒गे॒। ररा॑णा॥५॥

पदार्थ:-(याः) (ते) तव **(राके)** सुखप्रदे रात्रिरिव **(सुमतयः)** सुष्ठु प्रज्ञाः **(सुपेशसः)** सुरूपा दीप्तयः **(याभिः)** **(ददासि)** **(दाशुषे)** दात्रेऽपत्ये **(वसूनि)** द्रव्याणि **(ताभिः)** **(नः)** अस्मान् **(अद्य)** **(सुमनाः)** प्रसन्नचित्ताः **(उपागहि)** **(सहस्रपोषम्)** असंख्यपुष्टिम् **(सुभगे)** सौभाग्ययुक्ते **(रराणा)** सुष्ठु दात्री॥५॥

अन्वय:-हे राके! यास्ते सुपेशसः सुमतयः सन्ति याभिस्त्वं दाशुषे वसूनि ददासि ताभिर्नोऽद्य सुमनाः सती उपागहि। हे सुभगे! त्वं रराणा सती नोऽस्मभ्यं सहस्रपोषं देहि॥५॥

भावार्थ:-यदि सुलक्षणा विदुषी स्त्री श्रेष्ठविदुषो जनस्य पत्नी स्यात्तर्हि धनस्य सुखस्य च बहुविधा प्राप्तिः स्यात्॥५॥

पदार्थ:-हे **(राके)** रात्रि के समान सुख देनेवाली! जो **(ते)** आपकी **(सुपेशसः)** सुन्दर रूपवाली दीप्ति और **(सुमतयः)** उत्तम बुद्धि हैं, जिनसे आप **(दाशुषे)** देनेवाले पति के लिये **(वसूनि)** धनों को **(ददासि)** देती हो, उनसे **(नः)** हम लोगों को **(अद्य)** आज **(सुमनाः)** प्रसन्नचित्त हुई **(उपागहि)** समीप आओ। हे **(सुभगे)** सौभाग्ययुक्त स्त्री! **(रराणा)** उत्तम देनेवाली होती हुई हम लोगों के लिये **(सहस्रपोषम्)** असंख्य प्रकार से पुष्टि को देओ॥५॥

भावार्थ:-यदि सुलक्षणा विदुषी स्त्री श्रेष्ठ विद्वान् जन की पत्नी हो तो धन की और सुख की बहुत प्रकार प्राप्ति हो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सिनी॑वालि॒ पृथु॑ष्टुके॒ या दे॒वाना॒मसि॒ स्वसा॑।

जुषस्व॑ ह॒व्यमाहु॑तं प्र॒जां दे॑वि दिदिड्ढि नः॥६॥

सिनी॑वालि। पृथु॑ष्टुके। या। दे॒वाना॑म्। असि॑। स्वसा॑। जुषस्व॑। ह॒व्यम्। आऽहु॑तम्। प्र॒ऽजाम्। दे॒वि॒। दि॒दि॒ड्ढि॒। नः॥६॥

पदार्थः-(सिनीवालि) प्रेम्णा युक्ते **(पृथुष्टुके)** विस्तीर्णजघने **(या) (देवानाम्)** विदुषाम् **(असि) (स्वसा)** भगिनी **(जुषस्व)** सेवस्व **(हव्यम्)** दातुमर्हम् **(आहुतम्)** समन्तात् प्रक्षिप्तम् **(प्रजाम्) (देवि)** कामयमाने **(दिदिड्ढि)** उपाचिनुहि। अत्र **बहुलं छन्दसी**ति शपः श्लुः। **(नः)** अस्मान्॥६॥

अन्वयः-हे पृथुष्टुके! सिनीवालि या त्वं देवानां स्वसासि सा त्वं मयाहुतं हव्यं जुषस्व। हे देवि! त्वं नः प्रजां दिदिड्ढि॥६॥

भावार्थः-या विद्वत्कुलस्य कन्या विद्वद्बन्धुर्ब्रह्मचर्येण प्राप्तविद्या प्रकाशमाना भवेत् तां पत्नीं विधाय विधिनास्यां सन्तानानि य उत्पादयेत् स च सततं सुखिनौ स्याताम्॥६॥

पदार्थः-हे **(पृथुष्टुके)** मोटी-मोटी जङ्घाओंवाली! **(सिनीवालि)** जो अति प्रेम से युक्त तू **(देवानाम्)** विद्वानों की **(स्वसा)** बहिन **(असि)** है सो तू मैंने जो **(आहुतम्)** सब ओर से होमा है उस **(हव्यम्)** देने योग्य द्रव्य को **(जुषस्व)** प्रीति से सेवन कर। हे **(देवि)** कामना करती हुई स्त्री! तू हमारी **(प्रजाम्)** प्रजा को **(दिदिड्ढि)** देओ॥६॥

भावार्थः-जो विद्वानों के कुल की कन्या विद्वानों की बन्धु, ब्रह्मचर्य से विद्या को प्राप्त हुई प्रकाशमान हो, उसे पत्नी कर विधि से इसमें सन्तानों को जो उत्पन्न करे, वह पुरुष और वह स्त्री दोनों सुखी हों॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

या सु॑बा॒हुः स्वङ्गु॒रिः सु॒षूमा॑ बहु॒सूव॑री।
तस्यै॑ वि॒श्पत्न्यै॑ ह॒विः सि॑नीवा॒ल्यै जु॑होतन॥७॥

या। सु॒ऽबा॒हुः। सु॒ऽअङ्गु॒रिः। सु॒ऽसूमा॑। ब॒हु॒ऽसूव॑री। तस्यै॑। वि॒श्पत्न्यै॑। ह॒विः। सि॒नी॒वा॒ल्यै। जु॒हो॒त॒न॥७॥

पदार्थः-(या) (सुबाहुः) शोभनौ बाहू यस्याः सा **(स्वङ्गुरिः)** शोभनाऽङ्गुरयोऽङ्गुलयो यस्याः सा **(सुषूमा)** सुष्ठु प्रसवित्री **(बहुसूवरी)** बहूनामपत्यानां जनयित्री तस्यै **(विश्पत्न्यै)** विशः प्रजायाः पालयित्र्यै **(हविः)** दातुमर्हं वीर्यम् **(सिनीवाल्यै)** प्रेमबद्धायै **(जुहोतन)** प्रक्षिपत॥७॥

अन्वयः-हे मनुष्या! या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी स्त्री तस्यै विश्पत्न्यै सिनीवाल्यै हविर्जुहोतन॥७॥

भावार्थः-पुरुषैस्ता एव पत्न्यः सूत्तमाः सन्ति या सर्वाङ्गैः सुन्दर्यः बहुप्रजोत्पादयित्र्यः शुभगुणकर्मस्वभावा भवेयुरिति वेद्यम्। तासां मध्यादेकैकेन पुरुषेणैकैकया सह विवाहं कृत्वा प्रजोत्पत्तिर्विधेया॥७॥

पदार्थः-हे मनुष्यो! **(या)** जो **(सुबाहुः)** सुन्दर बाहु और **(स्वङ्गुरिः)** सुन्दर अंगुलियोंवाली तथा **(सुषूमा)** सुन्दर पुत्रोत्पत्ति करने और **(बहुसूवरी)** बहुत सन्तानों की उत्पन्न करनेवाली स्त्री है **(तस्यै)** उस **(विश्पत्न्यै)** प्रजाजनों की पालनेवाली **(सिनीवाल्यै)** प्रेम से सम्बद्ध हुई के लिये **(हविः)** देने योग्य वीर्य को **(जुहोतन)** छोड़ो॥७॥

भावार्थः-पुरुषों को यह जानना चाहिये कि वे ही पत्नी उत्तम होती हैं जो सर्वाङ्ग सुन्दरी, बहुत प्रजा उत्पन्न करनेवाली, शुभगुणकर्मस्वभावयुक्त हों, उनमें से एक-एक पुरुष को चाहिये कि एक-एक स्त्री के साथ विवाह करके प्रजा उत्पन्न करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

या गुङ्गूर्या सिनीवाली या राका या सरस्वती।
इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये॥८॥१५॥३॥

या। गुङ्गूः। या। सिनीवाली। या। राका। या। सरस्वती। इन्द्राणीम्। अह्वे। ऊतये। वरुणानीम्। स्वस्तये॥८॥

पदार्थः-**(या)** **(गुङ्गूः)** अव्यक्तोच्चारणा **(या)** **(सिनीवाली)** प्रेमास्पदप्रवणा **(या)** **(राका)** पौर्णमासीवद्वर्त्तमाना **(या)** **(सरस्वती)** विद्यासुशिक्षासहितया वाचा युक्ता **(इन्द्राणीम्)** परमैश्वर्ययुक्ताम् **(अह्वे)** आह्वयामि **(ऊतये)** रक्षणाद्याय **(वरुणानीम्)** श्रेष्ठस्य स्त्रियम् **(स्वस्तये)** सुखाय॥८॥

अन्वयः-हे पुरुषा! यथाऽहं या गुङ्गूर्या सिनीवाली या राका या च सरस्वती वर्त्तते तामिन्द्राणीमूतयेऽह्वे तां वरुणानीं स्वस्तयेऽह्वे तथा यूयमपि स्वकीयां स्वकीयां स्त्रियमाह्वयत॥८॥

भावार्थः-यदि काचित् स्त्री मूका काचिच्छ्रेष्ठा सर्वलक्षणसंपन्ना विदुषी भवेत् तयैश्वर्यसुखे सततं वर्द्धनीये इति॥८॥

अत्र विद्वन्मित्रस्त्रीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति द्वात्रिंशत्तमं सूक्तं पञ्चदशो वर्गस्तृतीयोऽनुवाकश्च समाप्तः॥

पदार्थः-हे पुरुषो! जैसे मैं **(या)** जो **(गुङ्गूः)** गुङ्गमुङ्ग बोले वा **(या)** जो **(सिनीवाली)** प्रेमास्पद को प्राप्त हुई **(या)** जो **(राका)** पौर्णमासी के समान वर्त्तमान अर्थात् जैसे चन्द्रमा की पूर्ण कान्ति से युक्त पौर्णमासी होती वैसी पूर्ण कान्तिमती और **(या)** जो **(सरस्वती)** विद्या तथा सुन्दर शिक्षासहित वाणी से युक्त वर्त्तमान है, उस **(इन्द्राणीम्)** परमैश्वर्य्ययुक्त को **(ऊतये)** रक्षा आदि के लिये **(अह्वे)** बुलाता हूँ, उस **(वरुणानीम्)** श्रेष्ठ की स्त्री को **(स्वस्तये)** सुख के लिये बुलाता हूँ, वैसे तुम भी अपनी-अपनी स्त्री को बुलाओ॥८॥

भावार्थः-यदि कोई स्त्री गूङ्गी और कोई उत्तम सर्वलक्षणसम्पन्न विदुषी हो, उससे ऐश्वर्य और सुख निरन्तर बढ़ाने चाहिये॥८॥

इस सूक्त में विद्वान् की मित्रता और स्त्री के गुणों का वर्णन होने से इस सूक्त के अर्थ के साथ पिछले सूक्तार्थ की सङ्गति है, यह जानना चाहिये॥

यह बत्तीसवां सूक्त, पन्द्रहवां वर्ग और तीसरा अनुवाक समाप्त हुआ॥

आ त इति पञ्चदशर्चस्य त्रयस्त्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। रुद्रो देवता १, ५, ९, १३-१५ निचृत्त्रिष्टुप्। ३, ६, १०, ११ विराट् त्रिष्टुप्। ४, ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ७ पङ्क्तिः। १२ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ चिकित्सकविषयमाह॥

अब पन्द्रह ऋचावाले तेंतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में वैद्यक विषय को कहते हैं॥

आ तॅ पितर्मरुतां सुम्नमेॅतु मा नः सूर्यॅस्य संदृशॉ युयोथाः।
अभि नॉ वीरो अर्वॅति क्षमेत प्र जाॅयेमहि रुद्र प्रजाभिॅः॥ १॥

आ। ते। पितः। मरुताम्। सुम्नम्। एतु। मा। नः। सूर्यॅस्य। सम्ऽदृशॉः। युयोथाः। अभि। नः। वीरः। अर्वॅति। क्षमेत। प्र। जाॅयेमहि। रुद्र। प्रऽजाभिॅः॥ १॥

पदार्थः-(आ) समन्तात् **(ते)** तव **(पितः)** पितृस्वरूप **(मरुताम्)** मनुष्याणाम् **(सुम्नम्)** सुखम् **(एतु)** प्राप्नोतु **(मा)** **(नः)** अस्मभ्यम् **(सूर्यस्य)** सूर्यस्येव वर्त्तमानस्य **(संदृशः)** यः सम्यक् पश्यति तस्य **(युयोथाः)** पृथक् कुर्याः **(अभि)** **(नः)** अस्माकम् **(वीरः)** शुभगुणव्यापी **(अर्वति)** उत्तमेऽश्वे स्थित्वा **(क्षमेत)** सहेत **(प्र)** **(जायेमहि)** **(रुद्र)** दुष्टानां रोदयितः **(प्रजाभिः)** सन्तानादिभिः॥ १॥

अन्वयः-हे मरुतां पिता रुद्र! सूर्यस्य संदृशस्ते सकाशान्न सुम्नमा एतु त्वं सुखादस्मान्मा युयोथा यतोऽर्वति स्थित्वा नो वीरोऽभि क्षमेत येन वयं प्रजाभिः सह प्रजायेमहि॥ १॥

भावार्थः-सर्वे मनुष्याः परमेश्वरं परमं पितरं न्यायकारिणं मत्वा सुखमभिवर्द्धयन्तु कदाचिदीश्वरं मत्वा विरुद्धा मा भवन्तु सहनशीला भूत्वा वीरत्वं संपाद्य प्रजया सह सुखयन्तु॥ १॥

पदार्थः-हे **(मरुताम्)** मनुष्यों के **(पितः)** पिता के समान **(रुद्र)** दुष्टों को रुलानेवाले! **(सूर्यस्य)** सूर्य्य के समान वर्त्तमान और **(संदृशः)** जो अच्छे प्रकार देते हैं, उन **(ते)** आपके सकाश से **(नः)** हमारे लिये **(सुम्नम्)** सुख **(आ, एतु)** आवे, आप सुख से हमें **(मा)** **(युयोथाः)** अलग न करें। जिससे **(अर्वति)** घोड़े पर चढ़ के **(नः)** हमारा **(वीरः)** शुभगुणों में व्याप्त जन **(अभि, क्षमेत)** सब ओर से सहन करे, जिससे हम लोग **(प्रजाभिः)** सन्तानादि प्रजाजनों के साथ **(प्र, जायेमहि)** प्रसिद्ध हों॥ १॥

भावार्थः-सब मनुष्य परमेश्वर को परमपिता न्यायकारी मान कर सुख बढ़ावें, कभी ईश्वर को मानकर विरुद्ध न हों, सहनशील होकर वीरता सिद्ध कर प्रजा के साथ सुखी हों॥ १॥

पुनर्वैद्यविषयमाह॥

फिर वैद्य विषय को अगले मन्त्र में कहा है॥

त्वाद॑त्तेभी रुद्र शंत॑मेभिः शं॒तं हिमा॑ अशीय भेष॒जेभि॑:।
व्य१॒॑स्मद्द्वेषो॑ वित॒रं व्यंहो॒ व्यमी॑वाश्चातयस्वा॒ विषू॑चीः॥ २॥

त्वाऽद॑त्तेभिः। रु॒द्र॒। शम्ऽत॑मेभिः। श॒तम्। हिमा॑ः। अ॒शी॒य॒। भे॒ष॒जेभि॑ः। वि। अ॒स्मत्। द्वेष॑ः। वि॒ऽत॒रम्। वि। अंह॑ः। वि। अमी॑वाः। चा॒त॒य॒स्व॒। विषू॑चीः॥ २॥

पदार्थः-(**त्वादत्तेभिः**) त्वया दत्तेभिः (**रुद्र**) सर्वरोगदोषनिवारक (**शन्तमेभिः**) अतिशयेन सुखकारकैः (**शतम्**) (**हिमाः**) संवत्सरान् (**अशीय**) प्राप्नुयाम (**भेषजेभिः**) औषधैः (**वि**) (**अस्मत्**) अस्माकं सकाशात् (**द्वेषः**) द्वेष्टॄन् ईर्ष्यादीन् दोषान् वा (**वितरम्**) विशेषण तरणीयमुल्लङ्घनीयम् (**वि**) (**अंहः**) पापात्मकं कर्म कुपथ्यादिकं वा (**वि**) (**अमीवाः**) रोगान् (**चातयस्व**) याचयस्व। अत्रा**न्येषामपी**ति दीर्घः। (**विषूचीः**) समग्रशरीरव्यापकान् रोगान्॥ २॥

अन्वयः-हे रुद्र वैद्यराज! त्वमस्मान् वि चातयस्व त्वादत्तेभिश्शंतमेभिर्भेषजेभिर्विषूचीरमीवा वियोजयेर्दूरे कुर्याः। त्वमस्मद्द्वेषो वितरमंहश्च वियोजय यतोऽहं शतं हिमा आनन्दं व्यशीय॥ २॥

भावार्थः-हे वैद्या! यूयं अत्युत्तमैरौषधैः सर्वेषां महतो रोगान्निवार्य्य रागद्वेषोन्मादादिदोषाँश्च वियोज्य शतवार्षिकान् प्रायो जनान् कुरुत॥ २॥

पदार्थः-हे (**रुद्र**) सर्व रोगदोषों के निवारनेवाले वैद्यराज! आप हम लोगों को (**वि, चातयस्व**) विशेष कर जांचे (**त्वादत्तेभिः**) आपसे दी हुई (**शंतमेभिः**) अतीव सुख करनेवाली (**भेषजेभिः**) औषधों से (**विषूचीः**) समग्र शरीर में व्याप्त (**अमीवाः**) रोगों को दूर करो और आप (**अस्मत्**) हम से हमारे (**द्वेषः**) वैरियों को वा ईर्ष्या आदि दोषों को और (**वितरम्**) विशेषता से उल्लङ्घन करने योग्य (**अंहः**) पाप भरे हुए कर्म वा कुपथ्यादि कर्म को दूर करें, जिससे मैं (**शतम्**) सौ (**हिमाः**) संवत्सर आनन्द को (**वि, अशीय**) विशेष कर प्राप्त होऊँ॥ २॥

भावार्थः-हे वैद्य लोगो! तुम अत्युत्तम ओषधियों से सबके बड़े-बड़े रोगों को निवारण करके राग-द्वेषों को और उन्माद आदि दोषों को अलग कर शतवर्ष आयु जिनकी ऐसे मनुष्यों को सिद्ध करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

श्रेष्ठो॑ जा॒तस्य॑ रुद्र श्रि॒यासि॑ त॒वस्त॑मस्त॒वसा॑ वज्रबाहो॑।

पर्षि॑ णः पा॒रमंह॑सः स्व॒स्ति विश्वा॑ अ॒भी॑ती॒ रप॑सो युयोधि॥ ३॥

श्रेष्ठ॑:। जा॒तस्य॑। रुद्र॒। श्रिया॒। अ॒सि॒। त॒वः॑ऽत॑मः। त॒वसा॑म्। व॒ज्र॒बा॒हो॒ इति॑ वज्र॑ऽबाहो। पर्षि॑। नः॒। पा॒रम्। अंह॑सः। स्व॒स्ति। विश्वा॑:। अ॒भि॑ऽई॑तीः। रप॑सः। यु॒यो॒धि॒॥ ३॥

पदार्थः-(श्रेष्ठः) अतिशयेन प्रशंसितः **(जातस्य)** प्रसिद्धस्य जगतो मध्ये **(रुद्र)** रोगाणां प्रलयकृत् **(श्रिया)** शोभया लक्ष्म्या वा **(असि) (तवस्तमः)** अतिशयेन बली **(तवसाम्)** बलिनाम् **(वज्रबाहो)** वज्रवदौषधं बाहौ यस्य तत्सम्बुद्धौ **(पर्षि)** पारयसि **(नः)** अस्मान् **(पारम्) (अंहसः)** कुपथ्यजन्याऽपराधात् **(स्वस्ति)** सुखम् **(विश्वाः)** सर्वाः **(अभीतीः)** अभितः सर्वत इत्या प्राप्त्या **(रपसः)** पापस्य **(युयोधि)** पृथक् करोषि॥ ३॥

अन्वयः-हे वज्रबाहो रुद्र! यतस्त्वं तवसां तवस्तमो जातस्य श्रेष्ठः श्रिया सह वर्त्तमानोऽसि नोऽस्मानंहसो रपसः पारं पर्षि विश्वा अभीतीः पीडा युयोधि स्वस्ति जनयसि तस्मादस्माभिः सत्कर्त्तव्योऽसि॥ ३॥

भावार्थः-ये स्वयमरोगाः शोभमाना बलिष्ठा वैद्या अन्यानरोगान् कृत्वा सततं सुखयन्ति, ते सर्वैः सर्वदा सत्कर्त्तव्याः॥ ३॥

पदार्थः-हे **(वज्रबाहो)** वज्र के तुल्य औषध बाहु में रखने और **(रुद्र)** रोगों के लोप करनेवाले! जिससे आप **(तवसाम्)** बलिष्ठों में **(तवस्तमः)** अतीव बलवान् **(जातस्य)** प्रसिद्ध जगत के बीच **(श्रेष्ठः)** अत्यन्त प्रशंसायुक्त **(श्रिया)** शोभा वा लक्ष्मी के साथ वर्त्तमान **(असि)** हो वा **(नः)** हम लोगों को **(अंहसः)** कुपथ्य से उत्पन्न हुए **(रपसः)** कर्म से **(पारम्)** पार **(पर्षि)** पहुँचाते हो वा **(विश्वाः) [(अभीतीः)]** समस्त पीड़ाओं को **(युयोधि)** अलग करते हो वा **(स्वस्ति)** सुख उत्पन्न करते हो, इससे हम लोगों से सत्कार पाने योग्य हो॥ ३॥

भावार्थः-जो आप रोगरहित शोभते हुए अतीव बलवान् हैं, औरों को रोगरहित करके निरन्तर सुखी करते हैं, वे सबको सर्वदा सत्कार करने योग्य हैं॥ ३॥

पुनर्वैद्यकविषयमाह॥

फिर वैद्यक विषय को अगले मन्त्र में कहा है॥

मा त्वा॑ रुद्र चुक्रुधामा॒ नमो॑भि॒र्मा दु॒ष्टु॑ती वृषभ॒ मा सह॑ू॒ती।
उन्नो॑ वी॒राँ अ॑र्पय भेष॒जेभि॑र्भि॒षक्त॑मं त्वा भि॒षजां॑ शृणोमि॥ ४॥

मा। त्वा। रुद्र। चुक्रुधाम। नमः।ऽभिः। मा। दुःऽस्तुती। वृषभ। मा। सऽहूती। उत्। नः। वीरान्। अर्पय। भेषजेभिः। भिषक्ऽतमम्। त्वा। भिषजाम्। शृणोमि॥४॥

पदार्थः-(मा) (**त्वा**) त्वाम् (**रुद्र**) कुपथ्यकारिणां रोदयितः (**चुक्रुधाम**) कुपिता भवेम। अत्राऽन्येषामपीति दीर्घः। (**नमोभिः**) सत्कारैः (**मा**) (**दुष्टुती**) दुष्टया स्तुत्या। अत्र **सुपामि**ति पूर्वसवर्णः। (**वृषभ**) श्रेष्ठ (**मा**) (**सहूती**) समानया स्पर्द्धया (**उत्**) (**नः**) अस्मभ्यम् (**वीरान्**) अरोगान् बलिष्ठान् पुत्रादीन् (**अर्पय**) समर्पय (**भेषजेभिः**) रोगनिवारकैरौषधैः (**भिषक्तमम्**) वैद्यशिरोमणिम् (**त्वा**) त्वाम् (**भिषजाम्**) वैद्यानां मध्ये (**शृणोमि**)॥४॥

अन्वयः-हे वृषभ रुद्र! वयं दुष्टुती त्वा प्रति मा चुक्रुधाम सहूती मा चुक्रुधाम त्वया सह विरोधं मा कुर्य्याम, किन्तु नमोभिः सततं सत्कुर्य्याम यन्त्वाहं भिषजां भिषक्तमं शृणोमि स त्वं भेषजेभिर्नो वीरानुदर्पय॥४॥

भावार्थः-केनचिद्वैद्येन सह विरोधः कदाचिन्न कर्त्तव्यो नैतेन सहेर्ष्या कार्य्या, किन्तु प्रीत्या सर्वोत्तमो वैद्यः सेवनीयो येन रोगेभ्यः पृथग् भूत्वा सुखं सततं वर्द्धेत॥४॥

पदार्थः-हे (**वृषभ**) श्रेष्ठ (**रुद्र**) कुपथ्यकारियों को रुलानेवाले! हम लोग (**दुष्टुती**) दुष्ट स्तुति से (**त्वा**) आपके (**प्रति**) प्रति (**मा**) मत (**चुक्रुधाम**) क्रोध करें। (**सहूती**) समान स्पर्द्धा से (**मा**) मत क्रोध करें, आपके साथ विरोध (**मा**) मत करें, किन्तु (**नमोभिः**) सत्कार के साथ निरन्तर सत्कार करें। जिन (**त्वा**) आपको मैं (**भिषजाम्**) वैद्यों के बीच (**भिषक्तमम्**) वैद्यों के शिरोमणि (**शृणोमि**) सुनता हूँ सो आप (**भेषजेभिः**) रोग निवारनेवाली ओषधियों से (**नः**) हम लोगों के लिये (**वीरान्**) वीर नीरोग पुत्रादिकों को (**उत्, अर्पय**) उत्तमता से सौंपें॥४॥

भावार्थः-किसी को वैद्य के साथ विरोध कभी न करना चाहिये, न इसके साथ ईर्ष्या करनी चाहिये, किन्तु प्रीति के साथ सर्वोत्तम वैद्य की सेवा करनी चाहिये, जिससे रोगों से अलग होकर सुख निरन्तर बढ़े॥४॥

पुनर्वैद्यविषयमाह॥

फिर वैद्य विषय को अगले मन्त्र में कहा है॥

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै॥५॥१६॥

हवीमऽभिः। हवते। यः। हविऽभिः। अव। स्तोमेभिः। रुद्रम्। दिषीय। ऋदूदरः। सुऽहवः। मा। नः। अस्यै। बभ्रुः। सुऽशिप्रः। रीरधत्। मनायै॥५॥

पदार्थः-(हवीमभिः) सुष्ठ्वौषधदानैः **(हवते)** स्पर्द्धते **(यः)** जनः **(हविर्भिः)** होतुं ग्रहीतुमर्हैः **(अव) (स्तोमेभिः)** श्लाघाभिः **(रुद्रम्)** वैद्यम् **(दिषीय)** खण्डयेयम् **(ऋदूदरः)** मृदूदरः। **ऋदूदरः सोमो मृदूदरो मृदुरुदरेष्विति [वा]** (निरुक्ते ६.४)। **(सुहवः)** सुष्ठुदानः **(मा) (नः)** अस्माकम् **(अस्यै) (बभ्रुः)** पालकः **(सुशिप्रः)** सुन्दराननः **(रीरधत्)** हिंस्यात् **(मनायै)** मन्यमानायै प्रज्ञायै॥५॥

अन्वयः-यो हवीमभिर्नोऽस्मान् हवते तं रुद्रमहं हविर्भिः स्तोमेभिरव दिषीय मा खण्डयेयम्। यतः सुहव ऋदूदरो बभ्रुः सुशिप्रो वैद्यो नोऽस्यै मनायै मा रीरधत्॥५॥

भावार्थः-ये वैद्या रोगानिवारणेनास्माकं प्रज्ञां वर्द्धयन्ति तैस्सह वयं कदाचिन्न विरुध्येम॥५॥

पदार्थः-(यः) जो वैद्यजन **(हवीमभिः)** सुन्दर ओषधियों के देने से हम लोगों की **(हवते)** स्पर्द्धा करता है, उस **(रुद्रम्)** वैद्य को मैं **(हविर्भिः)** ग्रहण करने योग्य **(स्तोमेभिः)** श्लाघाओं से **(अव, दिषीय)** न खण्डन करूं अर्थात् न उसे क्लेश देऊं, जिससे **(सुहवः)** सुन्दर दानशील **(ऋदूदरः)** कोमल उदरवाला **(बभ्रुः)** पालनकर्त्ता **(सुशिप्रः)** सुन्दर मुखयुक्त वैद्य **(नः)** हमारी **(अस्यै)** इस **(मनायै)** माननेवाली बुद्धि के लिये **(मा)** मत **(रीरधत्)** हिंसा करें॥५॥

भावार्थः-जो वैद्यजन रोग निवारण से हमारी बुद्धि को बढ़ाते हैं, उनके साथ हम लोग कभी न विरोध करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उन्मा ममन्द वृषभो मरुत्वान् त्वक्षीयसा वयसा नाधमानम्।
घृणीव छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम्॥६॥

उत्। मा। ममन्दु। वृषभः। मरुत्वान्। त्वक्षीयसा। वयसा। नाधमानम्। घृणिऽइव। छायाम्। अरपाः। अशीय। आ। विवासेयम्। रुद्रस्य। सुम्नम्॥६॥

पदार्थः-(उत्) (मा) माम् **(ममन्द)** मन्दते कामयते **(वृषभः)** सुखानां वर्षयिता **(मरुत्वान्)** मनुष्यादिबहुप्रजायुक्तः **(त्वक्षीयसा)** प्रदीप्तेन **(वयसा)** आयुषा **(नाधमानम्)** याचमानम् **(घृणीव)** प्रदीप्तः सूर्य्यइव **(छायाम्)** गृहम्। **छायेति गृहनामसु पठितम्।** (निघं०३.४)। **(अरपाः)** अविद्यमानं रपः पापं यस्य सः **(अशीय)** प्राप्नुयाम्। अत्र **संहितायामिति** दीर्घः। **(आ) (विवासेयम्)** परिचरेयम् **(रुद्रस्य)** वैद्यस्य सकाशात् **(सुम्नम्)** सुखम्॥६॥

अन्वयः-यो वृषभो मरुत्वानरपा वैद्यस्त्वक्षीयसा वयसा नाधमानं मा उन्ममन्द तस्य सकाशादहं घृणीव छायां विवासेयम्। सुम्नमाशीय॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये वैद्या अस्माकं रोगान्निवार्य्य दीर्घायुषो जनान् कुर्वन्ति, ते सूर्य्यइव प्रदीप्तकीर्त्तयो भवन्ति॥६॥

पदार्थः-जो **(वृषभः)** सुखों को वर्षानेवाले **(मरुत्वान्)** मनुष्य आदि बहुत प्रजाजनों से युक्त **(अरपाः)** अविद्यमान पाप-निष्पाप वैद्य **(त्वक्षीयसा)** प्रदीप्त **(वयसा)** आयु से **(नाधमानम्)** याचना किया हुआ **(मा)** मुझको **(उत्, ममन्द)** उत्तमता से चाहते हो, उनकी उत्तेजना से मैं **(घृणीव)** सूर्य्य के समान **(छायाम्)** घर का **(विवासेयम्)** सेवन करूं और **(सुम्नम्)** सुख को **(आ, अशीय)** अच्छे प्रकार प्राप्त करूं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो वैद्य हमारे रोगों का निवारण कर मनुष्यों को दीर्घ आयुवाले करते हैं, वे सूर्य्य के समान प्रकाशित कीर्तिवाले होते हैं॥६॥

पुनर्वैद्यकविषयमाह॥

फिर वैद्यक विषय को अगले मन्त्र में कहा है॥

क्व१ स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः॥७॥

क्व। स्यः। ते। रुद्र। मृळयाकुः। हस्तः। यः। अस्ति। भेषजः। जलाषः। अपऽभर्ता। रपसः। दैव्यस्य। अभि। नु। मा। वृषभ। चक्षमीथाः॥७॥

पदार्थः-**(क्व)** कुत्र **(स्यः)** सः **(ते)** तव **(रुद्र)** दुःखनिवारक **(मृळयाकुः)** सुखयिता **(हस्तः)** यो हसति सः **(यः)** **(अस्ति)** **(भेषजः)** भिषग् जनः **(जलाषः)** सुखकर्त्ता **(अपभर्त्ता)** अपबिभर्त्ति दूरीकरोतीति **(रपसः)** पापानि **(दैव्यस्य)** यो देवैः सह वर्त्तते तस्य **(अभि)** अभिमुख्ये **(नु)** सद्यः **(मा)** माम् **(वृषभ)** श्रेष्ठ **(चक्षमीथाः)** सहस्व॥७॥

अन्वयः-हे वृषभ रुद्र! त्वं दैव्यस्य मध्ये माभिचक्षमीथाः। यस्ते मृळयाकुर्हस्तो भेषजो जलाषो रपसोऽपभर्त्ताऽस्ति स्यः क्वास्ति॥७॥

भावार्थः-यदाऽध्यापको वैद्यः शिष्यानध्यापयेत्तदा सम्यगध्याप्य पुनः परीक्षयेत्। यो याथातथ्येन प्रश्नोत्तराणि कर्त्ता स्यात्तं वैद्यककार्य्ये नियुञ्जीध्वम्॥७॥

पदार्थः-हे **(वृषभ)** श्रेष्ठ **(रुद्र)** दुःखनिवारक वैद्य! आप **(दैव्यस्य)** जो देवों के साथ वर्त्तमान उसके बीच **(मा)** मुझे **(अभि, चक्षमीथाः)** सब ओर से सहन कीजिये **(यः)** जो **(ते)**

आपको **(मृळयाकुः)** सुख देनेवाला **(हस्तः)** हर्षमुख **(भेषजः)** वैद्यजन **(जलाषः)** सुखकर्त्ता और **(रपसः)** पापों को **(अपभर्त्ता)** अपभर्त्ता अर्थात् दूरकर्त्ता **(अस्ति)** है **(स्यः)** वह **(क्व)** कहाँ है॥७॥

भावार्थः-जब अध्यापक वैद्य शिष्यों को पढ़ावे तब अच्छे प्रकार पढ़ाकर फिर परीक्षा करे। जो यथार्थ प्रश्नोत्तर करनेवाला हो, उसको वैदिकी **[**=वैद्यककार्य**]** करने को आज्ञा देओ॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र बभ्रवे॑ वृषभाय॑ श्वितीचे म॒हो म॒हीं सु॑ष्टुतिमी॑रयामि।
न॒म॒स्या क॑ल्मली॒किन॑ं नमो॑भिर्गृणी॒मसि॑ त्वे॒षं रु॒द्रस्य॒ नाम॑॥८॥

प्र। बभ्रवे॑। वृ॒षभाय॑। श्वितीचे। म॒हः। म॒हीम्। सु॒ऽस्तुतिम्। ई॒र॒या॒मि॒। न॒म॒स्य। क॒ल्म॒ली॒किन॑म्। नमः॑ऽभिः। गृ॒णी॒मसि॑। त्वे॒षम्। रु॒द्रस्य॑। नाम॑॥८॥

पदार्थः-**(प्र)** **(बभ्रवे)** धारकाय **(वृषभाय)** श्रेष्ठाय **(श्वितीचे)** यः श्वितिमावरणमञ्चति तस्मै **(महः)** महते **(महीम्)** महतीम् **(सुष्टुतिम्)** शोभनां स्तुतिम् **(ईरयामि)** प्रेरयामि **(नमस्य)** नम्रो भव। अत्र **संहितायामि**ति दीर्घः। **(कल्मलीकिनम्)** देदीप्यमानम्। **कल्मलीकिनमिति ज्वलतो नाम।** (निघं०१.१७)। **(नमोभिः)** नमस्कारैः **(गृणीमसि)** प्रशंसामः **(त्वेषम्)** प्रकाशमानम् **(रुद्रस्य)** सद्वैद्यस्य **(नाम)**॥८॥

अन्वयः-हे वैद्य! यस्मै वृषभाय बभ्रवे महः श्वितीचे वैद्याय महीं सुष्टुतिं प्रेरयामि स त्वं मां नमस्य यस्य रुद्रस्य कल्मलीकिनं त्वेषं नामास्ति तं वयं नमोभिर्गृणीमसि॥८॥

भावार्थः-विद्यार्थिनां योग्यताऽस्ति यो विद्या ग्राहयेत्तं सदा सत्कुर्य्युः। यस्य वैद्यकशास्त्रे प्रसिद्धिरस्ति तस्मादेव वैद्यकविद्याऽध्येतव्या॥८॥

पदार्थः-हे वैद्य! जिस **(वृषभाय)** श्रेष्ठ **(बभ्रवे)** धारण करनेवाले **(महः)** बड़े **(श्वितीचे)** आवरण को प्राप्त होते हुए वैद्य के लिये **(महीम्)** बड़ी **(सुष्टुतिम्)** सुन्दर स्तुति की **(प्र, ईरयामि)** प्रेरणा देता हूँ। सो आप मुझे **(नमस्य)** नमिये, जिस **(रुद्रस्य)** अच्छे वैद्य का **(कल्मलीकिनम्)** देदीप्यमान **(त्वेषम्)** प्रकाशमान **(नाम)** नाम है, उसकी हम लोग **(नमोभिः)** सत्कारों से **(गृणीमसि)** प्रशंसा करते हैं॥८॥

भावार्थः-विद्यार्थियों को योग्य है कि जो विद्या ग्रहण करावे उसका सदा सत्कार करें, जिसकी वैद्यक शास्त्र में प्रसिद्धि है, उसी से वैद्य विद्या का अध्ययन करना चाहिये॥८॥

अथ राजपुरुषविषयमाह॥

अब राजपुरुष के विषय को अगले मन्त्र में कहा है॥

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम्॥९॥

स्थिरेभिः। अङ्गैः। पुरुऽरूपः। उग्रः। बभ्रुः। शुक्रेभिः। पिपिशे। हिरण्यैः। ईशानात्। अस्य। भुवनस्य। भूरेः। न। वै। ऊम् इति। योषत्। रुद्रात्। असुर्यम्॥९॥

पदार्थः-(**स्थिरेभिः**) दृढैः (**अङ्गैः**) अवयवैः (**पुरुरूपः**) बहुरूपयुक्तः (**उग्रः**) क्रूरस्वभावः (**बभ्रुः**) धर्त्ता (**शुक्रेभिः**) शुद्धैर्वीर्य्यैः (**पिपिशे**) पिंश्यात् (**हिरण्यैः**) किरणैरिव तेजोभिः (**ईशानात्**) जगदीश्वरात् (**अस्य**) (**भुवनस्य**) सर्वाधिकरणस्य लोकस्य (**भूरेः**) बहुरूपस्य (**न**) इव (**वै**) निश्चये (**उ**) वितर्के (**योषत्**) वियोजयेः (**रुद्रात्**) जगदीश्वरात् (**असुर्यम्**) असुरस्य स्वम्॥९॥

अन्वयः-हे पुरुष! पुरुरूप उग्रो बभ्रुर्भवान् स्थिरेभिरङ्गैः शुक्रेभिर्हिरण्यैरीशानादुद्रादस्य भुवनस्य भूरेर्न इव शत्रुदलं पिपिशे स उ वा असुर्य्यं योषत्॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये तीव्रमृदुस्वभावास्ते यथा जगदीश्वरनिर्मितानि भूम्यादीनि वस्तूनि दृढानि सुन्दराणि सन्ति तथा बलिष्ठैः प्रशस्यैः सेनाङ्गैः दुष्टानां विजयं कृत्वाऽसुरभावं निवारयेयुः॥९॥

पदार्थः-हे पुरुष! (**पुरुरूपः**) बहुत रूपों से युक्त (**उग्रः**) क्रूरस्वभावी (**बभ्रुः**) उत्तम व्यवहारों को धारण करनेवाले आप (**स्थिरेभिः**) दृढ़ (**अङ्गैः**) अवयवों से (**शुक्रेभिः**) शुद्ध वीर्य (**हिरण्यैः**) और किरणों के समान तेजों से (**ईशानात्**) ईश (**रुद्रात्**) पापियों को रुलानेवाले जगदीश्वर से (**अस्य**) इस (**भुवनस्य**) सर्वाधिकरण लोक के (**भूरेः**) बहुरूपियों के (**न**) जैसे वैसे शत्रुदल को (**पिपिशे**) पीसते हुए (**उ, वै**) वही आप (**असुर्यम्**) असुर के स्वत्व का (**योषत्**) वियोग कीजिये॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो तीव्र और मृदु स्वभाववाले हैं, वे जैसे जगदीश्वर के बनाये हुए भूमि आदि पदार्थ दृढ़ और सुन्दर हैं, वैसे बलिष्ठ प्रशंसनीय सेनाङ्गों से दुष्टों को विजय कर असुरभाव का निवारण करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम्।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति॥ १०॥ १७॥

अर्हन्। बिभर्षि। सायकानि। धन्व। अर्हन्। निष्कम्। यजतम्। विश्वऽरूपम्। अर्हन्। इदम्। दयसे। विश्वम्। अभ्वम्। न। वै। ओजीयः। रुद्र। त्वत्। अस्ति॥ १०॥

पदार्थः-(अर्हन्) योग्यो भवान् **(बिभर्षि)** धरसि **(सायकानि)** शस्त्रास्त्राणि **(धन्व)** धनुरादीनि **(अर्हन्)** **(निष्कम्)** सुवर्णभूषणम् **(यजतम्)** सङ्गन्तव्यम् **(विश्वरूपम्)** विचित्रस्वरूपम् **(अर्हन्)** **(इदम्)** **(दयसे)** **(विश्वम्)** सर्वं जगत् **(अभ्वम्)** महत् **(न)** निषेधे **(वै)** निश्चये **(ओजीयः)** बलिष्ठम् **(रुद्र)** दुष्टानां रोदयितः **(त्वत्)** **(अस्ति)**॥ १०॥

अन्वयः-हे रुद्र! यस्त्वमर्हन्त्सन् सायकानि धन्व बिभर्ष्यर्हन्विश्वरूपं यजतं निष्कं बिभर्ष्यर्हन्निदमभ्वं विश्वं दयसे तस्मात्त्वदन्यदोजीयो वै नास्ति॥ १०॥

भावार्थः-ये योग्यतां प्राप्यायुधानि सेना राज्यं धनञ्च धरन्ति सर्वेषां धर्मात्मनामुपरि दयां च कुर्वन्ति, ते बलिष्ठा जायन्ते॥ १०॥

पदार्थः-हे **(रुद्र)** दुष्टों को रुलानेवाले! जो आप **(अर्हन्)** योग्य होते हुए **(सायकानि)** शस्त्र और अस्त्रों को **(धन्व)** तथा धनुर्बाण आदि को **(बिभर्षि)** धारण करते हैं वा **(अर्हन्)** योग्य होते हुए **(विश्वरूपम्)** चित्र-विचित्र रूपवाले **(यजतम्)** सङ्गम करने योग्य **(निष्कम्)** सुवर्ण के आभूषण को धारण करते वा **(अर्हन्)** योग्य होते हुए **(इदम्)** इस **(अभ्वम्)** महान् **(विश्वम्)** समस्त जगत् की **(दयसे)** रक्षा करते हैं, इस कारण **(त्वत्)** आप से अन्य **(ओजीयः)** बलवाला **(न)** नहीं है॥ १०॥

भावार्थः-जो योग्यता को प्राप्त होकर आयुध सेना राज्य और धन को धारण करते तथा सब धर्मात्माओं पर दया करते हैं, वे बलिष्ठ होते हैं॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः॥ ११॥

स्तुहि। श्रुतम्। गर्तऽसदम्। युवानम्। मृगम्। न। भीमम्। उपऽहत्नुम्। उग्रम्। मृळ। जरित्रे। रुद्र। स्तवानः। अन्यम्। ते। अस्मत्। नि। वपन्तु। सेनाः॥ ११॥

पदार्थः-(स्तुहि) (श्रुतम्) यश्श्रुतवान् तम् **(गर्त्तसदम्)** यो गर्त्ते गृहे सीदति तम् **(युवानम्)** पूर्णबलम् **(मृगम्)** सिंहम् **(न)** इव **(भीमम्)** भयङ्करम् **(उपहत्नुम्)** य उपहन्ति तम् **(उग्रम्)** क्रूरम् **(मृळ)** सुखय। अत्र **द्वयचोऽतस्तिङ** इति दीर्घः। **(जरित्रे)** स्तावकाय **(रुद्र)** अन्यायकारिणां रोदयितः **(स्तवानः)** स्तुवन् **(अन्यम्)** धर्मात्मानम् **(ते)** तव **(अस्मत्)** अस्माकं सकाशात् **(नि) (वपन्तु)** विस्तारयन्तु **(सेनाः)** बलानि॥११॥

अन्वयः-हे रुद्र सेनेश! त्वं मृगं न भीमं श्रुतं गर्त्तसदमुपहत्नुमुग्रं युवानं स्तुहि जरित्रे मृळ स्तवानः सन्नन्यं प्रशंस यतो विद्वांसोऽस्मत्ते सेना नि वपन्तु॥११॥

भावार्थः-अत्रोपमालङ्कारः। ये राज्यं वर्द्धितुमिच्छेयुस्ते सिंहवच्छत्रूणां भयङ्कराञ्छ्रेष्ठानामानन्दप्रदान् राजकार्य्ये सेनायां च सत्कृत्य नियोज्य न्यायेन राज्यं सततं पालयेयुः॥११॥

पदार्थः-हे **(रुद्र)** अन्यायकारियों को रुलानेवाले सेनापति! आप **(मृगम्)** सिंह के **(न)** समान **(भीमम्)** भयङ्कर **(श्रुतम्)** जो सुने हैं उस **(गर्त्तसदम्)** घर में बैठ कर **(उपहत्नुम्)** और समीप में मारते हुए **(उग्रम्)** क्रूर **(युवानम्)** पूर्ण बलवाले पुरुष की **(स्तुहि)** स्तुति कर और **(जरित्रे)** स्तुति करनेवाले के लिये **(मृळ)** सुखी कर **(स्तवानः)** स्तुति करता हुआ **(अन्यम्)** और धर्मात्मा की प्रशंसा कर जिससे विद्वान् **(अस्मत्)** मेरी उत्तेजना से **(ते)** तेरी **(सेनाः)** सेना अर्थात् बल को **(नि, वपन्तु)** विस्तारें॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राज्य बढ़ाने की इच्छा करें, वे सिंह के समान शत्रुओं में भयङ्कर और श्रेष्ठों में आनन्द देनेवलों का राजकार्य्य और सेना में सत्कार कर और उनको आज्ञा दे न्याय से निरन्तर राज्य की पालना करें॥११॥

अथ विद्याध्ययनविषयमाह॥

अब विद्याध्ययन विषय को अगले मन्त्र में कहा है॥

कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम्।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे॥१२॥

कुमारः। चित्। पितरम्। वन्दमानम्। प्रति। ननाम। रुद्र। उपऽयन्तम्। भूरेः। दातारम्। सत्ऽपतिम्। गृणीषे। स्तुतः। त्वम्। भेषजा। रासि। अस्मे इति॥१२॥

पदार्थः-**(कुमारः)** ब्रह्मचारी **(चित्)** इव **(पितरम्)** जनकम् **(वन्दमानम्)** स्तूयमानम्। अत्र कर्मणि शानच्। **(प्रति) (ननाम)** नमति। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्॥ (अष्टा०६.१.७) **(रुद्र)**

(उपयन्तम्) समीपं प्राप्नुवन्तम् **(भूरेः)** बहोः **(दातारम्)** **(सत्पतिम्)** सतां पालकम् **(गृणीषे)** स्तौषि **(स्तुतः)** प्रशंसितः **(त्वम्)** **(भेषजा)** औषधानि **(रासि)** ददासि **(अस्मे)** अस्मभ्यम्॥१२॥

अन्वयः-हे रुद्र! स्तुतस्त्वं पितरं कुमारश्चिद्वन्दमानमुपयन्तं भूरेर्दातारं सत्पतिं प्रति ननाम गृणीषेऽस्मे भेषजा रास्यतोऽस्माभिः सत्कर्त्तव्योऽसि॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा सत्पुत्रः पितरं सत्करोति नमति स्तौति तथा सदध्येताध्यापकं प्रसादयति॥१२॥

पदार्थः-हे **(रुद्र)** दुष्टों को रुलानेवाले विद्वान्! **(स्तुतः)** प्रशंसा को प्राप्त **(त्वम्)** आप **(पितरम्)** पिता को **(कुमारः)** ब्रह्मचारी **(चित्)** जैसे वैसे **(वन्दमानम्)** स्तुति को प्राप्त और **(उपयन्तम्)** समीप आते हुए **(भूरेः)** बहुत पदार्थ के **(दातारम्)** देने वा **(सत्पतिम्)** सज्जनों के पालनेवाले विद्वान् के प्रति **(ननाम)** नमस्कार करता वा **(गृणीषे)** उसकी स्तुति करते हैं तथा **(अस्मे)** हम लोगों के लिये **(भेषजा)** औषधों को **(रासि)** देता है, इससे हम लोगों को सत्कार करने के योग्य हैं॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अच्छा पुत्र पिता का सत्कार करता वा नमता वा स्तुति करता है, वैसे अच्छा विद्यार्थी पढ़ानेवाले को प्रसन्न करता है॥१२॥

अथ पुनर्वैद्यकविषयमाह॥

अब फिर वैद्यक विषय को अगले मन्त्र में कहा है॥

या वो॑ भेष॒जा म॑रुत॒: शुची॑नि॒ या शंत॑मा वृषणो॒ या म॑यो॒भु।
यानि॒ मनु॒रवृ॑णीता पि॒ता न॒स्ता शं च॒ योश्च॑ रु॒द्रस्य॑ वश्मि॥ १३॥

या। व॒:। भे॒ष॒जा। म॒रु॒त॒:। शुची॑नि। या। शम्ऽत॑मा। वृ॒ष॒ण॒:। या। म॒य॒:ऽभु। यानि॑। मनु॑:। अवृ॑णीत। पि॒ता। न॒:। ता। शम्। च॒। यो:। च॒। रु॒द्रस्य॑। व॒श्मि॒॥ १३॥

पदार्थः-**(या)** यानि **(वः)** युष्मभ्यम् **(भेषजा)** औषधानि **(मरुतः)** मनुष्यान् **(शुचीनि)** पवित्राणि **(या)** यानि **(शन्तमा)** अतिशयेन सुखकराणि **(वृषणः)** वर्षयितारः **(या)** यानि **(मयोभु)** सुखं भावुकानि **(यानि)** **(मनुः)** वैद्यकविद्यावित् **(अवृणीत)** स्वीकरोति। अत्राऽन्येषामपीति दीर्घः। **(पिता)** जनकः **(नः)** अस्मभ्यम् **(ता)** तानि **(शम्)** सुखम् **(च)** बलम् **(योः)** त्यक्तव्यस्य **(च)** उत्पद्यमानस्य **(रुद्रस्य)** रोदयितू रोगस्य **(वश्मि)** कामये॥१३॥

अन्वयः-हे वृषणो! मरुतो यथा या शुचीनि या शन्तमा या मयोभु यानि रोगनिवारकाणि भेषजा वो मनुः पिता अवृणीत ता वो नश्च योश्च रुद्रस्य निवारणाय शञ्च भावनाय तथाऽहं वश्मि॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः पितृपितामहेभ्योऽध्यापकेभ्योऽन्येभ्यो विद्वद्भ्यश्च प्रतिरोगस्य निवारणायौषधीर्विज्ञाय स्वेषां परेषां च रोगान्निवार्य सर्वार्थसुखं कामनीयम्॥१३॥

पदार्थः-हे **(वृषणः)** वृष्टि करानेवाले विद्वानो! जैसे **(मरुतः)** मनुष्यों को और **(या)** जिन **(शुचीनि)** शुद्ध वा **(या)** जिन **(शन्तमा)** अतीव सुख करने वा **(या)** जिन **(मयोभु)** सुख की भावना देने वा **(यानि)** जिस रोग निवारनेवाली **(भेषजा)** औषधों को **(वः)** तुम्हारे लिये **(मनुः)** वैद्यविद्या जाननेवाला **(पिता)** पिता **(अवृणीत)** स्वीकार करता है, वह तुम्हारे **(च)** और **(नः)** हमारे लिये **(योः)** न्याय करने **(रुद्रस्य)** और रुलानेवाले रोग की निवृत्ति के लिये **(च)** और **(शम्)** कल्याण की भावना के लिये होती वैसी मैं **(वश्मि)** कामना करूं॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि पिता और पितामहों तथा अध्यापक वा अन्य विद्वानों से प्रतिरोग के निवारण के अर्थ औषधियों को जानकर अपने और दूसरों के रोगों को निवारण करके सबके लिये सुख की कांक्षा करें॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

परि॑ णो हे॒ती रु॒द्रस्य॑ वृज्या॒ः परि॑ त्वे॒षस्य॑ दुर्म॒तिर्म॒ही गा॑त्।
अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृ॒ळ॥१४॥

परि॑ः। न॒ः। हे॒तिः। रु॒द्रस्य॑। वृ॒ज्या॒ः। परि॑। त्वे॒षस्य॑। दुः॒ऽम॒तिः। म॒ही। गा॒त्। अव॑। स्थि॒रा। म॒घव॑त्ऽभ्यः। त॒नु॒ष्व॒। मीढ्व॑ः। तो॒काय॑। तन॑याय। मृ॒ळ॥१४॥

पदार्थः-**(परि)** सर्वतः **(नः)** अस्मान् **(हेतिः)** वज्रादिव पीडा। **हेतिरिति वज्रनामसु पठितम्।** (निघं०२.२०)। **(रुद्रस्य)** दुःखप्रदस्य रोगस्य **(वृज्याः)** वर्जनीयाः पीडाः **(परि)** अभितः **(त्वेषस्य)** प्रदीप्तस्य **(दुर्मतिः)** दुष्टा मतिः **(मही)** महती पूज्या वाक्। **महीति वाङ्नामसु पठितम्।** (निघं०१.११)। **(गात्)** प्राप्नुयात् **(अव)** **(स्थिरा)** स्थिराणि **(मघवद्भ्यः)** पूजितधनेभ्यः **(तनुष्व)** विस्तृणीहि **(मीढ्वः)** सुखसेचक **(तोकाय)** सद्यो जातायाऽपत्याय **(तनयाय)** प्राप्तकुमाराऽवस्थाय **(मृळ)** सुखय॥१४॥

अन्वयः-हे मीढ्वो वैद्य! यो रुद्रस्य हेतिर्वृज्यास्त्वेषस्य दुर्मतिश्च नोऽस्मान् पर्य्यगात्। या मघवद्भ्यो मह्यस्मान् पर्य्यगात् स्थिरा च गात् तानि तोकाय तनयाय तनुष्व तैः सर्वान् मृळ रोगानव तनुष्व दूरी कुरु॥१४॥

भावार्थः-मनुष्यैः सुशिक्षया दुष्टां मतिं वैद्यकरीत्या सर्वान् रोगान्निवार्य्य स्वं स्वं कुलं सदा सुखनीयम्॥१४॥

पदार्थः-हे **(मीढ्वः)** सुखों से सींचनेवाले वैद्य! जो **(रुद्रस्य)** दुःख देनेवाले रोग को **(हेतिः)** वज्र से पीड़ा के समान वा **(वृज्याः)** वर्जने योग्य पीड़ा और **(त्वेषस्य)** प्रदीप्त अर्थात् प्रबल की **(दुर्मतिः)** दुष्ट मति **(नः)** हम लोगों को **(परि)** सब ओर से प्राप्त होवे। तथा जो **(मघवद्भ्यः)** प्रशंसित धनवालों से **(मही)** प्रशंसनीय वाणी हम लोगों को सब ओर से प्राप्त हो और **(स्थिरा)** स्थिर पदार्थों को **(गात्)** प्राप्त हो उनको **(तोकाय)** शीघ्र उत्पन्न हुए सन्तान के लिये **(तनयाय)** जो कि कुमारावस्था को प्राप्त है, उसके लिये विस्तारो। और उनसे सबको **(मृळ)** सुखी करो और रोगों को **(अव, तनुष्व)** दूर करो॥१४॥

भावार्थः-मनुष्यों को उत्तम शिक्षा से दुष्ट मति को तथा वैद्यक रीति से सब रोगों को निवारण कर अपने कुल को सदा सुखी करना चाहिये॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः॥१५॥१८॥

एव। बभ्रो इति। वृषभ। चेकितान। यथा। देव। न। हृणीषे। न। हंसि। हवनऽश्रुत्। नः। रुद्र। इह। बोधि। बृहत्। वदेम। विदथे। सुऽवीराः॥१५॥

पदार्थः-**(एव)** निश्चये। अत्र **निपातस्य च**ेति दीर्घः। **(बभ्रो)** धर्त्तः पोषक **(वृषभ)** रोगनिवारणेन बलप्रद **(चेकितान)** विज्ञापक **(यथा)** **(देव)** कमनीय **(न)** निषेधे **(हृणीषे)** हरसि। अत्र विकरणव्यत्ययेन श्ना। **(न)** निषेधे **(हंसि)** **(हवनश्रुत्)** या हवनं दानमादानं शृणोति **(नः)** अस्माकम् **(रुद्र)** सर्वरोगनिवारक **(इह)** अस्मिन् **(बोधि)** बुध्यस्व **(बृहत्)** **(वदेम)** **(विदथे)** औषधविज्ञानव्यवहारे **(सुवीराः)** सुष्ठुप्राप्तवीर्य्याः सन्तः॥१५॥

अन्वयः-हे बभ्रो वृषभ चेकितान देव रुद्र! यतो हवनश्रुत् त्वमिह यथा नः सुखानि न हृणीषे सर्वेषां सुखं बोधि तस्माद्वयं सुवीराः सन्त एव यथा विदथे बृहद्वदेम॥१५॥

भावार्थः-अत्रोपमालङ्कारः। ये वैद्याः राज्यन्यायाधीशाः स्युस्तेऽन्यायेन कस्यचित्किञ्चिन्न हरेयुः। न कञ्चिद्धन्युः, किन्तु सदा सुपथ्यौषधव्यवहारसेवनेन बलपराक्रमान् वर्द्धयेयुरिति॥१५॥

अस्मिन् सूक्ते चिकित्सकराजपुरुषपठनव्यवहारवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्यष्टादशो वर्गस्त्रयस्त्रिंशं सूक्तं च समाप्तम्॥

पदार्थः-हे **(बभ्रो)** धारण वा पोषण करने वा **(वृषभ)** रोगनिवारण करने से बल के देने वा **(चेकितान)** विज्ञान देने वा **(देव)** मनोहर **(रुद्र)** और सर्व रोग निवारनेवाले! जिस कारण **(हवनश्रुत्)** देने-लेने को सुननेवाले आप **(इह)** इसमें **(यथा)** जैसे **(नः)** हम लोगों के सुखों को **(न)** नहीं **(हणीषे)** हरते हैं, सबके सुख को **(बोधि)** जानें, इससे हम लोग **(सुवीराः)** सुन्दर पराक्रम को प्राप्त होते हुए ही वैसे **(विदथे)** ओषधियों के विज्ञान व्यवहार में **(बृहत्)** बहुत **(वदेम)** कहें॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो वैद्यजन राज्य और न्याय के अधीश हों, वे अन्याय से किसी का कुछ भी धन न हरें न किसी को मारें, किन्तु सदा अच्छे पथ्य और ओषधों के व्यवहार सेवन से बल और पराक्रम को बढ़ावें॥१५॥

इस सूक्त में वैद्य, राजपुरुष और विद्या ग्रहण के व्यवहार वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह अठारहवां वर्ग और तेतीसवां सूक्त समाप्त हुआ॥

धारावरा इत्यस्य पञ्चदशर्चस्य चतुस्त्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। मरुतो देवताः। १, ३, ८, ९ निचृज्जगती। २, १०-१३ विराड्जगती। ४-७, १४ जगती छन्दः। निषादः स्वरः। १५ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह॥

अब पन्द्रह ऋचावाले चौंतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के विषय का वर्णन करते हैं॥

धा॒रा॒व॒रा म॒रुतो॑ धृ॒ष्णवो॑जसो मृ॒गा न भी॒मास्तवि॑षीभि॒रर्चि॑नः।
अ॒ग्नयो॒ न शु॑शुचा॒ना ऋ॑जी॒षिणो॒ भूमिं॒ धम॑न्तो॒ अप॒ गा अ॑वृण्वत॥ १॥

धा॒रा॒व॒राः। म॒रुतः॑। धृ॒ष्णुऽओ॑जसः। मृ॒गाः। न। भी॒माः। तवि॑षीभिः। अ॒र्चि॒नः॑। अ॒ग्नयः॑। न। शु॒शु॒चा॒नाः। ऋ॒जी॒षिणः॑। भूमि॑म्। धम॑न्तः। अप॑। गाः। अ॒वृ॒ण्व॒त॒॥ १॥

पदार्थः-(धारावराः) धारासु शिक्षितासु वाणीष्ववरा अर्वाचीना येषान्ते **(मरुतः)** मरणधर्मयुक्ताः **(धृष्णवोजसः)** धृष्णु धृष्टमोजो येषान्ते **(मृगाः)** मृगेन्द्राः सिंहाः **(न)** इव **(भीमाः)** दुष्टान् प्रति भयङ्कराः **(तविषीभिः)** बलयुक्ताभिः सेनाभिः **(अर्चिनः)** सत्कर्त्तारः **(अग्नयः)** पावकाः **(न)** इव **(शुशुचानाः)** शुद्धाः शोधका वा **(ऋजीषिणः)** कोमलस्वभावाः **(भूमिम्)** अनवस्थाम् **(धमन्तः)** दूरीकुर्वन्तः **(अप) (गाः)** सुशिक्षिता वाचः **(अवृण्वत)** स्वीकुर्वन्तु॥ १॥

अन्वयः-हे विद्वांसो! धारावरा मरुतो भीमा मृगा न धृष्णवोजसः शुशुचाना अग्नयो न तविषीभिरर्चिन ऋजीषिणो भूमिमपधमन्तो भवन्तो गा अवृण्वत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या पावकवत्पवित्रा जलवत्कोमलाः सिंहवत्पराक्रमिणो वायुवद्बलिष्ठा भूत्वाऽन्यायं निवर्त्तयेयुस्तेऽखिलं सुखमाप्नुयुः॥ १॥

पदार्थः-हे विद्वानो! **(धारावराः)** धाराप्रवाह शिक्षित वाणियों के बीच न्यून जिनकी वाणी **(मरुतः)** वे मरणधर्मयुक्त **(भीमाः)** दुष्टों के प्रति भयङ्कर **(मृगाः)** सिहों के **(न)** समान **(धृष्णवोजसः)** पराक्रम को धारण किये हुए **(शुशुचानाः)** शुद्ध वा शोधनेवाले **(अग्नयः)** पावक अग्नियों के **(न)** समान **(तविषीभिः)** बलयुक्त सेनाओं से **(अर्चिनः)** सत्कार करनेवाले **(ऋजीषिणः)** कोमल स्वभावी मनुष्य **(भूमिम्)** अनवस्था को **(अप, धमन्तः)** दूर करते हुए आप **(गाः)** सुशिक्षित वाणियों को **(अवृण्वत)** स्वीकार करें॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य पावक के समान पवित्र, जल के समान कोमल, सिंह के समान पराक्रम करनेवाले, वायु के समान बलिष्ठ होकर अन्याय को निवृत्त करें, वे समस्त सुख को प्राप्त हों॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्यावो॒ न स्तृभि॑श्चितयन्त खा॒दिनो॒ व्य॑भ्रिया॒ न द्यु॑तयन्त वृ॒ष्टय॑:।
रु॒द्रो यद्वो॑ मरुतो रुक्मवक्षसो॒ वृषाज॑नि॒ पृश्न्या॑: शु॒क्र ऊ॒र्धनि॥ २॥

द्याव॑:। न। स्तृ॒भि॑:। चि॒त॒य॒न्त॒। खा॒दिन॑:। वि। अ॒भ्रिया॑:। न। द्यु॒त॒य॒न्त॒। वृ॒ष्टय॑:। रु॒द्र:। यत्। व॒:। म॒रु॒त॒:। रु॒क्म॒ऽव॒क्ष॒स॒:। वृषा॑। अज॑नि। पृश्न्या॑:। शु॒क्रे। ऊ॒र्धनि॥ २॥

पदार्थः-(**द्यावः**) प्रकाशाः (**न**) इव (**स्तृभिः**) नक्षत्रे। **स्तृभिरिति नक्षत्रनामसु पठितम्।** (निरु०३.२०)। (**चितयन्त**) चितं कुर्वन्तु (**खादिनः**) भक्षकाः (**वि**) (**अभ्रियाः**) अभ्राणि (**न**) इव (**द्युतयन्त**) द्युतयन्तु (**वृष्टयः**) वर्षाः (**रुद्रः**) दुष्टानां रोदयिता (**यत्**) यः (**वः**) युष्मभ्यम् (**मरुतः**) मनुष्याः (**रुक्मवक्षसः**) रुक्मं रोचकं वक्षो हृदयं येषान्ते (**वृषा**) सुखसेचकः (**अजनि**) जनयेत् (**पृश्न्याः**) अन्तरिक्षस्य मध्ये (**शुक्रे**) वीर्य्यकरे (**ऊधनि**) रात्रौ। **ऊध इति रात्रिनामसु पठितम्।** (निघं०१.७)॥२॥

अन्वयः-हे रुक्मवक्षसो मरुतो! वो यद्यो वृषा रुद्रः पृश्न्याः शुक्र ऊधन्यजनि खादिनो भवन्तः स्तृभिर्द्यावो न चितयन्ताऽभ्रिया वृष्टयो न वि द्युतयन्त स भवन्तश्च माननीयाः स्युः॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये नक्षत्रैः सह सूर्य्यवदभ्रैः सह विद्युद्वद्विद्याव्यवहारप्रकाशे रमन्ते ते शयनाय रात्रीव सर्वेषां सुखाय भवन्ति॥२॥

पदार्थः-हे (**रुक्मवक्षसः**) दीप्ति और अभिप्रीतियुक्त हृदयवाले (**मरुतः**) विद्वान् मनुष्यो! (**वः**) तुम लोगों के लिये (**यत्**) जो (**वृषा**) सुख को सींचने और (**रुद्रः**) दुष्टों को रुलानेवाला मनुष्य (**पृश्न्याः**) अन्तरिक्ष के बीच (**शुक्रे**) वीर्य करनेवाली (**ऊधनि**) रात्रि में (**अजनि**) उत्पन्न करे। वा (**खादिनः**) भक्षण करनेवाले आप लोग (**स्तृभिः**) नक्षत्रों से (**द्यावा**) प्रकाशों के (**न**) समान (**चितयन्त**) व्यवहारों को पवित्र करें और (**अभ्रियाः**) बादलों को (**वृष्टयः**) वर्षाओं के (**न**) समान (**वि, द्युतयन्त**) विशेषता से प्रकाशित करे, वह और आप माननीय हों॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो नक्षत्रों के साथ सूर्य्य के समान, बादलों के साथ बिजुली के समान विद्या व्यवहाररूपी प्रकाश में रमते हैं, वे सोने के लिये रात्रि के समान सबके सुख के लिये होते हैं॥२॥

अथ राजविषयमाह॥

अब राज विषय को अगले मन्त्र में कहा है॥

उ॒क्षन्ते॒ अश्वाँ॒ अत्याँ॑इवा॒जिषु॑ न॒दस्य॒ कर्णै॑स्तुरयन्त आ॒शुभि॑:।
हिर॑ण्यशिप्रा मरुतो॒ दवि॑ध्वत: पृ॒क्षं या॑थ॒ पृष॑तीभि॒: समन्यव:॥३॥

उ॒क्षन्ते॑। अश्वा॑न्। अत्या॑न्ऽइव। आ॒जिषु॑। न॒दस्य॑। कर्णै॑:। तु॒र॒य॒न्ते॒। आ॒शुऽभि॑:। हिर॑ण्यऽशिप्रा:। म॒रु॒त॒:। दवि॑ध्वत:। पृ॒क्षम्। या॒थ॒। पृष॑तीऽभि:। स॒ऽम॒न्य॒व॒:॥३॥

पदार्थः-(**उक्षन्ते**) सिञ्चन्ति (**अश्वान्**) (**अत्यानिव**) यथाऽश्वाः सततं सद्यो गच्छन्ति तथा (**आजिषु**) सङ्ग्रामेषु (**नदस्य**) जलेन पूर्णस्य जलाशयस्य मध्ये (**कर्णैः**) नौचालकैः (**तुरयन्ते**) सद्यो गमयन्ति (**आशुभिः**) शीघ्रगन्तृभिरश्वैः (**हिरण्यशिप्राः**) हिरण्यमिव शिप्राणि मुखानि येषान्ते (**मरुतः**) मनुष्याः (**दविध्वतः**) दुष्टान् कम्पयन्तः। इदं पदं **दाधर्ती**त्यत्र निपातितम्। (अष्टा०७.४.६५) (**पृक्षम्**) सेचनीयम् (**याथ**) प्राप्नुथ (**पृषतीभिः**) वायुगतिसदृशगतिविष्टाभिर्धाराभिः (**समन्यवः**) मन्युना सह वर्त्तमानाः॥३॥

अन्वयः-हे समन्यवो मरुतो यथाऽश्वानत्यानिवाजिषु नदस्य कर्णैरिवाशुभिस्तुरयन्ते हिरण्यशिप्रा दविध्वतः पृषतीभिः पृक्षमुक्षन्ते तथैतद्यूयं याथ॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा शिक्षका अश्वान् कैवर्त्ता नावं सुष्ठु गमयन्ति तथा राजजनाः स्वसेना नयेयुः॥३॥

पदार्थः-हे (**समन्यवः**) क्रोध में भरे (**मरुतः**) मनुष्यो! जैसे (**अश्वान्**) घोड़ों को (**अत्यानिव**) निरन्तर चलनेवाले घोड़ों के समान वा (**आजिषु**) संग्रामों में (**नदस्य**) जल से पूर्ण बड़े जलाशय के बीच (**कर्णैः**) नौकाओं के चलानेवालों के समान (**आशुभिः**) शीघ्र चलनेवाले घोड़ों के साथ (**तुरयन्ते**) शीघ्र चलाते हैं वा (**हिरण्यशिप्राः**) सुवर्ण के सदृश मुखवाले (**दविध्वतः**) दुष्टों को कंपाते हुए (**पृषतीभिः**) पवन की गतियों के समान गतियों से युक्त धाराओं से (**पृक्षम्**) सींचने योग्य को (**उक्षन्ते**) सींचते हैं, वैसे इस व्यवहार को तुम लोग प्राप्त होओ॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शिक्षा करनेवाले जन घोड़ों को वा खेवट नाव को उत्तम रीति पर चलाते हैं, वैसे राजजन अपनी सेना को पहुंचावें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पृ॒क्षे ता विश्वा॒ भुव॑ना ववक्षिरे मि॒त्राय॑ वा॒ सद॒मा जी॒रदा॑नवः।
पृष॑दश्वासो अनव॒भ्ररा॑धस ऋजि॒प्यासो॒ न व॒युने॑षु धू॒र्षदः॥४॥

पृ॒क्षे। ता। विश्वा॑। भुव॑ना। व॒व॒क्षि॒रे॒। मि॒त्राय॑। वा॒। सद॑म्। आ। जी॒रऽदा॑नवः। पृष॑त्ऽअश्वासः। अ॒न॒व॒भ्रऽरा॑धसः। ऋ॒जि॒प्यासः॑। न। व॒युने॑षु। धू॒ःऽसदः॥४॥

पदार्थः-(पृक्षे) जलादिभिः सिक्ते **(ता)** तानि **(विश्वा)** सर्वाणि **(भुवना)** भुवनानि **(ववक्षिरे)** रुष्टाः स्युः **(मित्राय) (वा) (सदम्)** स्थानम् **(आ) (जीरदानवः)** जीवाः **(पृषदश्वासः)** पृषतस्स्थूलाः सिञ्चिता अश्वा यैस्ते **(अनवभ्रराधसः)** अनवभ्रोऽपतितं राधो येषान्ते **(ऋजिप्यासः)** ये ऋजिं कोमलत्वं वर्द्धयन्ति ते **(न)** इव **(वयुनेषु)** प्रज्ञापनेषु **(धूर्षदः)** धुरि सीदन्ति॥४॥

अन्वयः-जीरदानवः पृषदश्वासोऽनवभ्रराधसो धूर्षद ऋजिप्यासो न मित्राय वा ह्यस्मै पृक्षे यानि विश्वा भुवना सदमा ववक्षिरे ता वयुनेषु वर्द्धन्ते॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये दुष्टेभ्यः क्रुध्यन्ति श्रेष्ठानाह्लादयन्ति ते प्राज्ञा जायन्ते॥४॥

पदार्थः-(जीरदानवः) साधरण जीव वा **(पृषदश्वासः)** स्थूल अश्व जिन्होंने सींचे वा **(अनवभ्रराधसः)** जिनका धन नीचे नहीं गिरा वा **(धूर्षदः)** जो धुर पर स्थिर होनेवाले **(ऋजिप्यासः)** वा जो कोमलपन को बढ़ाते हैं **(न)** उनके समान **(मित्राय)** मित्र के लिये **(वा)** अथवा जिस कारण इसके लिये **(पृक्षे)** जलादिकों में सीचें हुए पृथ्वीमण्डल पर जो **(विश्वा)** समस्त **(भुवना)** लोकलोकान्तर **(सदम्)** वा स्थान **(आ, ववक्षिरे)** अच्छे प्रकार रोष को प्राप्त हों **(ता)** वे **(वयुनेषु)** उत्तम ज्ञानों में बढ़ते हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो दुष्टों के लिये क्रोध करते वा श्रेष्ठों को आनन्द देते हैं, वे बुद्धिमान् होते हैं॥४॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

इन्ध॑न्वभिर्धे॒नुभी॑ र॒ण्वदू॑धभिरध्व॒स्मभि॑: प॒थिभि॑र्भ्राजदृष्टयः।
आ हं॑सासो॒ न स्वसरा॑णि गन्तन॒ मधो॒र्मदा॑य मरुतः समन्यवः॥५॥१९॥

इन्धन्वऽभिः। धेनुऽभिः। रप्शदूधऽभिः। अध्वस्मऽभिः। पथिऽभिः। भ्राजत्ऽऋष्टयः। आ। हंसासः। न। स्वसराणि। गन्तन। मधोः। मदाय। मरुतः। सऽमन्यवः॥५॥

पदार्थः-(इन्धन्वभिः) प्रदीपिकाभिः। अत्र वनिपि **छान्दसो वर्णलोपो वे**त्यलोपः। **(धेनुभिः)** वाग्भिः **(रप्शदूधभिः)** व्यक्तशब्दघनैः **(अध्वस्मभिः)** अध्वस्तैः **(पथिभिः)** मार्गैः **(भ्राजदृष्टयः)** प्राप्तप्रकाशाः **(आ) (हंसासः) (न)** इव **(स्वसराणि)** दिनानि। **स्वसराणीति दिननामसु पठितम्।** (निघं०१.९)। **(गन्तन)** प्राप्नुत **(मधोः)** मधुरस्य **(मदाय)** हर्षाय **(मरुतः) (समन्यवः)** सक्रोधाः॥५॥

अन्वयः-हे भ्राजदृष्टयः समन्यवो मरुतो! यूयमिन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिः हंसासो न मधोर्मदाय स्वसराण्या गन्तन॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽऽकाशमार्गेण हंसा अभीष्टानि स्थानानि सुखेन गच्छन्ति तथा सुशिक्षितया वाचा विद्यामार्गान् धर्मपथैः सुखानि च नित्यं यूयं प्राप्नुत॥५॥

पदार्थः-हे **(भ्राजदृष्टयः)** प्रकाश को प्राप्त हुए **(समन्यवः)** क्रोधों के साथ वर्त्तमान **(मरुतः)** मरणधर्मा! तुम लोग **(इन्धन्वभिः)** प्रदीप्त करनेवाली **(धेनुभिः)** वाणियों से वा **(रप्शदूधभिः)** प्रकट शब्दरूपी घनों से **(अध्वस्मभिः)** जो कि ध्वस्त नष्ट न हुए उन **(पथिभिः)** मार्गों से **(हंसासः)** हंसो के **(न)** समान **(मधोः)** मधुर सम्बन्धी **(मदाय)** हर्ष के लिये **(स्वसराणि)** दिनों को **(आ, गन्तन)** आओ प्राप्त होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे आकाश मार्ग से हंस अभीष्ट स्थानों को सुख से जाते हैं, वैसे सुशिक्षित वाणी से विद्या मार्गों को और धर्म पथों से सुखों को नित्य तुम लोग प्राप्त होओ॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम्॥६॥

आ। नः। ब्रह्माणि। मरुतः। सऽमन्यवः। नराम्। न। शंसः। सवनानि। गन्तन। अश्वाम्ऽइव। पिप्यत। धेनुम्। ऊधनि। कर्ता। धियम्। जरित्रे। वाजऽपेशसम्॥६॥

पदार्थः-(आ) समन्तात् **(नः)** अस्मभ्यम् **(ब्रह्माणि)** धनानि **(मरुतः)** मनुष्याः **(समन्यवः)** सक्रोधाः **(नराम्)** मनुष्याणाम् **(न)** इव **(शंसः)** स्तुतिः **(सवनानि)** ऐश्वर्याणि **(गन्तन) (अश्वामिव)**

वडवामिव (**पिप्यत**) प्राप्नुत (**धेनुम्**) वाणीम् (**ऊधनि**) रात्रौ (**कर्त्त**) कुरुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**धियम्**) प्रज्ञाम् (**जरित्रे**) स्तावकाय (**वाजपेशसम्**) वाजस्य विज्ञानस्य पेशो रूपं यस्यान्ताम्॥६॥

अन्वयः-हे समन्यवो मरुतो! यूयं नो ब्रह्माणि कर्त्ताऽश्वामिवोधनि धेनुं पिप्यत नरान्न शंसः सवनान्यागन्तन जरित्रे वाजपेशसं धियं कुरुत॥६॥

भावार्थः-अत्र द्वावुपमालङ्कारौ। ये मनुष्या मनुष्यस्वभावजां प्रशंसां प्राप्य सुविद्यां वाचं प्रजां च वर्द्धयित्वा सर्वान्त्सुखैरलं कुर्वन्तु ते सुखिनो जायन्ते॥६॥

पदार्थः-हे (**समन्यवः**) क्रोध से युक्त (**मरुतः**) मनुष्यो! तुम (**नः**) हम लोगों के लिये (**ब्रह्माणि**) धनों को (**कर्त्त**) सिद्ध करो (**अश्वामिव**) घोड़ी के समान (**ऊधनि**) रात्रि में (**धेनुम्**) वाणी को (**पिप्यत**) प्राप्त होओ (**नराम्**) मनुष्यों की (**न**) जैसे (**शंसः**) स्तुति वैसे (**सवनानि**) ऐश्वर्य्यों को (**आ, गन्तन**) प्राप्त होओ (**जरित्रे**) स्तुति करनेवाले के लिये (**वाजपेशसम्**) विज्ञान का जिसमें रूप विद्यमान उस (**धियम्**) उत्तम बुद्धि को सिद्ध करो॥६॥

भावार्थः-इस मन्त्र में दो उपमालङ्कार हैं। जो मनुष्य मनुष्यस्वभाव से उत्पन्न हुई प्रशंसा को प्राप्त हो के विद्या, वाणी और उत्तम बुद्धि को बढ़ाकर, सर्व मनुष्यों को सुखों से अलंकृत करें, वे सुखी होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं नो॑ दात मरुतो वा॒जिनं॒ रथ॑ आपा॒नं ब्रह्म॑ चि॒तय॑द्दिवे॑दिवे।
इष॑ꣳ स्तो॒तृभ्यो॑ वृ॒जने॑षु का॒रवे॑ स॒निं मे॒धामरि॑ष्टं दु॒ष्टरं सह॑ः॥७॥

तम्। नः। दात। मरुतः। वाजिनम्। रथे। आपानम्। ब्रह्म। चितयत्। दिवेऽदिवे। इषम्। स्तोतृऽभ्यः। वृजनेषु। कारवे। सनिम्। मेधाम्। अरिष्टम्। दुस्तरम्। सहः॥७॥

पदार्थः-(**तम्**) सकलविद्यास्तावकम् (**नः**) अस्मभ्यम् (**दात**) दत्त। अत्र **वाच्छन्दसी**ति शपो लुक्। (**मरुतः**) प्राणवायुवत् प्रियाः (**वाजिनम्**) विज्ञानवन्तमश्वम् (**रथे**) याने युक्तम् (**आपानम्**) व्यापकम्। **आपानमिति व्याप्तिकर्मा।** (निघं०२.१८)। (**ब्रह्म**) धनमन्नं वा (**चितयत्**) यच्चितं ज्ञातारं करोति तत् (**दिवेदिवे**) प्रतिदिनम् (**इषम्**) इष्टम् (**स्तोतृभ्यः**) सकलविद्याप्रयोजनविद्भ्यः (**वृजनेषु**) बलेषु (**कारवे**) कारुकाय (**सनिम्**) विभक्ताम् (**मेधाम्**) प्रज्ञाम् (**अरिष्टम्**) अहिंसितम् (**दुष्टरम्**) दुःखेन तरितुमर्हम् (**सहः**) बलम्॥७॥

अन्वयः- हे मरुतो! यूयं नस्तं दात रथे वाजिनं दात दिवेदिवे चितयदापानं ब्रह्म वृजनेषु स्तोतृभ्य इषं कारवे सनिं मेधामरिष्टं दुष्टरं सहश्च दात॥७॥

भावार्थः-मनुष्यैः सदैव सर्वेभ्यस्सकलविद्याविदध्यापकेन धर्म्मार्जितं धनं विद्वद्भ्यो दानायान्नमुत्तमां प्रज्ञां पूर्णं बलं च याचनीयं विद्वांसः खलु याचकेभ्य एतानि सततं प्रदद्युः॥७२॥

पदार्थः-हे **(मरुतः)** प्राणवायु के समान प्रिय! तुम **(नः)** हम लोगों के लिये **(तम्)** उस समस्त विद्या की स्तुति करनेवाले को **(दात)** देओ **(रथे)** रथ के निमित्त **(वाजिनम्)** सुशिक्षित घोड़े को देओ **(दिवेदिवे)** प्रतिदिन **(चितयत्)** चिताते हुए **(आपानम्)** व्यापक **(ब्रह्म)** धन वा अन्न को **(वृजनेषु)** बलों में **(स्तोतृभ्यः)** सकल विद्याओं के प्रयोजनवेत्ताओं के लिये **(इषम्)** इष्ट प्रयोजन को **(कारवे)** करनेवाले के लिये **(सनिम्)** अलग बढ़ी हुई **(मेधाम्)** उत्तम बुद्धि को और **(अरिष्टम्)** अविनष्ट **(दुष्टरम्)** दुःख से तैरने को योग्य **(सहः)** बल को देओ॥७॥

भावार्थः-मनुष्यों को चाहिये कि सदैव सबके लिये सकल विद्या बतानेवाले से धर्म से संचित किये हुए धन विद्वानों को देने के लिये; अन्न, उत्तम प्रज्ञा और पूर्ण बल को जाँचे **[**=माँगे**]**। विद्वान् जन निश्चय से याचकों के लिये उन उक्त पदार्थों को निरन्तर देवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यद्युञ्जतेऽमरुतोऽरुक्मवक्षसोऽश्वान् रथेषु भग आ सुदानवः।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम्॥८॥

यत्। युञ्जते। मरुतः। रुक्मऽवक्षसः। अश्वान्। रथेषु। भगे। आ। सुऽदानवः। धेनुः। न। शिश्वे। स्वसरेषु। पिन्वते। जनाय। रातऽहविषे। महीम्। इषम्॥८॥

पदार्थः-(यत्) यान् **(युञ्जते)** **(मरुतः)** विद्वांसो मनुष्याः **(रुक्मवक्षसः)** रुक्ममिव वक्षो येषान्ते **(अश्वान्)** तुरङ्गानग्न्यादीन् वा **(भगे)** ऐश्वर्ये सति **(आ)** **(सुदानवः)** श्रेष्ठानां पदार्थानां दातारः **(धेनुः)** दुग्धदात्री गौः **(न)** इव **(शिश्वे)** वत्साय **(स्वसरेषु)** दिनेषु **(पिन्वते)** सिञ्चति अत्र व्यत्ययेनात्मनेपदम्। **(जनाय)** सत्पुरुषाय **(रातहविषे)** दत्तदातव्याय **(महीम्)** महतीं पूज्यां वाचम् **(इषम्)** इष्टामिच्छां वा॥८॥

अन्वयः-हे रुक्मवक्षसः सुदानवो मरुतो! भगे रथेषु यदश्वान् युञ्जते स्वसरेषु शिश्वे रातहविषे जनाय धेनुर्वत्सेनेव महीमिषमा पिन्वते तान् सर्वे संयुञ्जन्ताम्॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सुशिक्षिता विद्वांसोऽश्वादीन् पशूनग्न्यादींश्च कार्य्यसिद्धये प्रयुञ्जते तथाऽनुतिष्ठत एवं कृते सति यथा धेनुः स्ववत्सं तर्पयति तथैते प्रयोक्तॄन् धनयन्ति॥८॥

पदार्थः-हे **(रुक्मवक्षसः)** सुवर्ण के समान वक्षःस्थलवाले **(सुदानवः)** उत्तम पदार्थों के दानकर्त्ता **(मरुतः)** विद्वान् पुरुषो! **(भगे)** ऐश्वर्य्य के होते **(रथेषु)** यानों में **(यत्)** जिन **(अश्वान्)** घोड़े वा अग्न्यादि पदार्थों को **(युञ्जते)** युक्त करते वा **(स्वसरेषु)** दिनों के बीच **(शिश्वे)** बालक वा जो **(रातहविषे)** देने योग्य दे चुका उन **(जनाय)** सत्पुरुष के लिये **(धेनुः)** दुःख देनेवाली गौ बछड़े को **(न)** जैसे वैसे **(महीम्)** अत्यन्त **(इषम्)** इच्छा को **(आ, पिन्वते)** अच्छे प्रकार सींचते हैं, उन सबको सब लोग अच्छे प्रकार प्रयुक्त करें॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे अच्छी शिक्षा को प्राप्त विद्वान् जन घोड़े आदि पशुओं को और अग्नि आदि पदार्थों का प्रयोग कार्यसिद्धि के लिये करते हैं, वैसे अनुष्ठान करो। ऐसे करने से जैसे गौ अपने बछड़े को तृप्त करती है, वैसे ये प्रयोग करनेवालों को धनी करते हैं॥८॥

पुना राजपुरुषविषयमाह॥

फिर राजपुरुषों के विषय को अगले मन्त्र में कहा है॥

यो नो॑ मरुतो वृकता॑ति॒ मर्त्यो॑ रि॒पुर्दु॒धे व॑सवो॒ रक्ष॑ता रि॒षः।
व॒र्तय॑त॒ तपु॑षा च॒क्रिया॒भि तमव॑ रुद्रा अ॒शसो॑ हन्तना॒ वधः॑॥९॥

यः। नः। मरुतः। वृकऽता॑ति। मर्त्यः। रिपुः। दुधे। वसवः। रक्षत। रिषः। वर्तयत। तपुषा। चक्रिया। अभि। तम्। अव। रुद्राः। अशसः। हन्तन। वधरिति॥९॥

पदार्थः-**(यः)** **(नः)** अस्मान् **(मरुतः)** विद्वांसः **(वृकताति)** वृको वज्र एव **(मर्त्यः)** **(रिपुः)** स्तेनः। **रिपुरिति स्तेननामसु पठितम्।** (निघं०३.२४)। **(दधे)** दधाति। अत्र लडर्थे लिट्। **(वसवः)** वसुसंज्ञकाः **(रक्षत)**। अत्राऽन्येषामपीति दीर्घः। **(रिषः)** हिंसकान् **(वर्त्तयत)** **(तपुषा)** परितापेन क्रोधादिना **(चक्रिया)** चक्रेण **(अभि)** अभितः **(तम्)** **(अव)** **(रुद्राः)** मध्यमा विद्वांसो दुष्टानां रोदयितारः **(अशसः)** अहिंसकस्य **(हन्तन)** घ्नत। अत्राऽन्येषामपीति दीर्घः। **(वधः)** हननम्॥९॥

अन्वयः-हे वसवो मरुतो! यो वृकताति मर्त्यो रिपुस्तपुषा नोऽस्मान् दधे तस्माद् रिषोऽस्मात् पृथग्रक्षत। हे रुद्रा! यूयं चक्रिया अशसोऽव हन्तन योऽस्मान् रक्षति तमभिरक्षत येनान्यस्य वधः क्रियते तं कारागृहेऽभि वर्त्तयत॥९॥

भावार्थः-राजपुरुषैर्हिंसकेभ्यः प्रजाः पृथग् रक्ष्य रिपून्निवार्य्य बध्वा वा धर्मेण राज्यं शासनीयम्॥९॥

पदार्थः-हे (**वसवः**) वसु संज्ञावाले (**मरुतः**) विद्वान् मनुष्यो! (**यः**) जो (**वृकताति**) वज्र ही (**मर्त्यः**) मरणधर्मा (**रिपुः**) चोर (**तपुषा**) सब ओर से ताप देनेवाले क्रोध आदि (**नः**) हम लोगों को (**दधे**) धारण करता है, उससे (**रिषः**) हिंसको को [हमसे] अलग (**रक्षत**) रक्खो। हे (**रुद्राः**) दुष्टों को रुलानेवाले मध्यम विद्वानो! तुम (**चक्रिया**) चक्र से (**अशसः**) अहिंसक जो दूसरों का विनाश नहीं करता, उसको (**अव, हन्तन**) न मारो, जो हम लोगों की रक्षा करता है, उसकी सब ओर से रक्षा करो। जिसने और का (**वधः**) वध किया है, उसको कारागृह अर्थात् जेलखाना में (**अभि, वर्त्तयत**) सब ओर से बर्त्ताओ॥९॥

भावार्थः-राजपुरुषों को हिंसकों से प्रजाजनों को अलग रख शत्रुओं को निवारण कर वा बांध के धर्म से राज्य शिक्षा करनी चाहिये॥९॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः॥१०॥२०॥

चित्रम्। तत्। वः। मरुतः। याम। चेकिते। पृश्न्याः। यत्। ऊधः। अपि। आपयः। दुहुः। यत्। वा। निदे। नवमानस्य। रुद्रियाः। त्रितम्। जराय। जुरताम्। अदाभ्याः॥१०॥

पदार्थः-(**चित्रम्**) अद्भुतम् (**तत्**) (**वः**) युष्माकम् (**मरुतः**) (**याम**) प्राप्तव्यं कर्म (**चेकिते**) जानाति (**पृश्न्याः**) पृश्नावन्तरिक्षे भवम् (**यत्**) (**ऊधः**) पयोऽधिकरणम् (**अपि**) (**आपयः**) मित्रतां व्याप्ताः (**दुहुः**) पिप्रति। अत्र लिटि **वा च्छन्दसी**ति द्वित्वाभावः। (**यत्**) (**वा**) (**निदे**) निन्दकाय (**नवमानस्य**) स्तोतुः (**रुद्रियाः**) रुद्रस्य मध्यमस्य विदुषः सम्बन्धिनः (**त्रितम्**) हिंसकम् (**जराय**) स्तावकाय (**जुरताम्**) जीर्णानाम् (**अदाभ्याः**) अहिंसनीयाः॥१०॥

अन्वयः-हे अदाभ्या रुद्रिया मरुतो! यद्वश्चित्रं याम यत्पृश्न्या ऊध आपयो दुहुः। वा यो नवमानस्य निदे त्रितं जुरतां जरायामपि चेकिते तद्यूयं गृह्णत॥१०॥

भावार्थः-हे विद्वांसो! यूयं निन्दनीयस्य निन्दां स्तवनीयस्य प्रशंसां कृत्वाऽद्भुतानि कर्माणि कुरुत। येन पूर्णमायुर्भुक्त्वा वृद्धावस्थां प्राप्य मरणं स्यात्तदनुतिष्ठत॥१०॥

पदार्थः-हे **(अदाभ्याः)** न नष्ट करने योग्य **(रुद्रियाः)** मध्यम विद्वानों के सम्बन्धी **(मरुतः)** मनुष्यो! **(यत्)** जिस **(वः)** तुम्हारा **(चित्रम्)** अद्भुत **(याम)** योग्य कर्म वा **(यत्)** जिस **(पृश्न्याः)** अन्तरिक्ष में सिद्ध हुए **(ऊधः)** जल वा दूध के अधिकरण को **(आपयः)** मित्र भाव को प्राप्त हुए **(दुहुः)** परिपूर्ण करते हैं **(वा)** अथवा **(यः)** जो **(नवमानस्य)** स्तुति करने की **(निदे)** निन्दा करनेवाले के लिये **(त्रितम्)** हिंसा करनेवाले को **(जुरताम्)** जीर्णों की **(जराय)** स्तुति करनेवाले के लिये **(अपि)** भी **(चेकिते)** जानता है **(तत्)** उसको तुम लेओ॥१०॥

भावार्थः-हे विद्वानो! तुम निन्दा करने योग्य की निन्दा तथा स्तुति करने योग्य की प्रशंसा कर अद्भुत कर्मों को करो, जिससे पूरी आयु भोग **[**कर**]**, वृद्धावस्था पाकर मरण हो, उस अनुष्ठान को करो॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तान् वो॑ म॒हो म॒रुत॑ एव॒याव्नो॒ विष्णो॒रेष॑स्य॒ प्रभृ॑थे हवामहे।
हिर॑ण्यवर्णान् ककु॒हान् य॒तस्रु॑चो ब्रह्म॒ण्यन्त॒: शंस्यं॒ राध॑ ईमहे॥ ११॥

तान्। व॒:। म॒हः। म॒रुत॑:। एव॒ऽयाव्न॑:। विष्णो॑:। एष॑स्य। प्र॒ऽभृ॑थे। ह॒वा॒म॒हे॒। हिर॑ण्यऽवर्णान्। क॒कु॒हान्। य॒तऽस्रु॑चः। ब्र॒ह्म॒ण्यन्त॑:। शंस्य॑म्। राध॑:। ई॒म॒हे॒॥ ११॥

पदार्थः-**(तान्)** **(वः)** युष्मभ्यम् **(महः)** महतः **(मरुतः)** मनुष्याः **(एवयाव्नः)** य एवं विज्ञानं यान्ति तान् **(विष्णोः)** व्यापकस्य **(एषस्य)** ऐश्वर्यवतः **(प्रभृथे)** प्रकृष्टे पालने **(हवामहे)** स्वीकुर्वहे **(हिरण्यवर्णान्)** हिरण्यमिव वर्णो येषान्तान् **(ककुहान्)** महतः। **ककुह इति महन्नामसु पठितम्।** (निघं०३.३)। **(यतस्रुचः)** यताः स्रुचो यज्ञपात्रणि यैस्तान् ऋत्विजः। **यतस्रुच इति ऋत्विङ्नामसु पठितम्।** (निघं०३.१८)। **(ब्रह्मण्यन्तः)** आत्मनो ब्रह्मेच्छन्तः **(शंस्यम्)** प्रशंसनीयम् **(राधः)** धनम् **(ईमहे)** याचामहे॥११॥

अन्वयः-हे मरुतो मनुष्या! यथा वयं वस्तानेषस्य विष्णोः प्रभृथे मह एवयाव्नो हिरण्यवर्णान् ककुहान् यतस्रुचो हवामहे ब्रह्मण्यन्तः शंस्यं राध ईमहे तथा यूयमस्मभ्यं प्रयतध्वम्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः परस्परस्मिन् प्रीत्या दुष्टेष्वप्रेम्णा च वर्त्तित्वा विष्णोरीश्वरस्य भक्तौ प्रयतनीयम्॥११॥

पदार्थः-हे **(मरुतः)** मनुष्यो! जैसे हम लोग **(वः)** तुम्हारे लिये **(तान्)** उनको **(एषस्य)** ऐश्वर्य्यवाले **(विष्णोः)** व्यापक ईश्वर के **(प्रभृथे)** अत्युत्तम पालन में **(महः)** महान् व्यवहार के

(एवयावभ्नः) इस प्रकार विशेष ज्ञान को पाते हैं **(हिरण्यवर्णान्)** हिरण्य-सुवर्ण के समान वर्णवाले **(ककुहान्)** बड़े **(यतस्रुचः)** नियम से यज्ञपात्रों के रखनेवाले को **(हवामहे)** स्वीकार करते हैं। और **(ब्रह्मण्यन्तः)** अपने को ईश्वर वा वेद की इच्छा करते हुए विद्वानों को **[**=से**]** **(शंस्यम्)** प्रशंसनीय **(राधः)** धन की **(ईमहे)** याचना करते हैं, वैसे तुम हमारे लिये प्रयत्न करो॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि परस्पर एक-दूसरे से प्रीति के साथ और दुष्टों में अप्रीति के साथ वर्त्त कर व्यापक ईश्वर की भक्ति में प्रयत्न करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा॥ १२॥

ते। दशग्वाः। प्रथमाः। यज्ञम्। ऊहिरे। ते। नः। हिन्वन्तु। उषसः। विऽउष्टिषु। उषाः। न। रामीः। अरुणैः। अप। ऊर्णुते। महः। ज्योतिषा। शुचता। गोऽअर्णसा॥ १२॥

पदार्थः-(**ते**) **(दशग्वाः)** ये दशभिरिन्द्रियैः सिद्धिं गच्छन्ति ते **(प्रथमाः)** पृथुबुद्धयः **(यज्ञम्)** **(ऊहिरे)** प्राप्नुवन्ति **(ते)** **(नः)** अस्मान् **(हिन्वन्तु)** वर्द्धयन्तु **(उषसः)** प्रभातस्य **(व्युष्टिषु)** प्रतापेषु **(उषाः)** प्रभातः **(न)** इव **(रामीः)** आरामप्रदा रात्रीः **(अरुणैः)** रक्तवर्णैः **(अप)** **(ऊर्णुते)** आच्छादयति **(महः)** महता **(ज्योतिषा)** प्रकाशेन **(शुचता)** पवित्रेण पवित्रकारकेण **(गोअर्णसा)** गावः किरणा अर्णो जलं चास्मिँस्तेन॥१२॥

अन्वयः-ये दशग्वाः प्रथमा विद्वांसो यज्ञमूहिरे त उषसो व्युष्टिषु नोऽस्मान् हिन्वन्तु। येऽरुणैर्महो गोअर्णसा शुचता ज्योतिषा रामीरुषा नापोर्णुते तेऽस्माकं शिक्षकाः सन्तु॥१२॥

भावार्थः-ये क्रियाकाण्डकुशला जितेन्द्रिया उषर्वदविद्याऽन्धकारनिवारका मनुष्यान् विद्यासुशिक्षाभ्यां वर्द्धयन्ति ते सर्वैः सत्कर्त्तव्याः॥१२॥

पदार्थः-जो **(दशग्वाः)** दशों इन्द्रियों से सिद्धि को प्राप्त होते हैं वे **(प्रथमाः)** बहुत विस्तारयुक्त बुद्धिवाले मुख्य विद्वान् जन **(यज्ञम्)** यज्ञ को **(ऊहिरे)** प्राप्त होते हैं **(ते)** वे **(उषसः)** प्रभात काल के **(व्युष्टिषु)** प्रतापों में **(नः)** हम लोगों को **(हिन्वन्तु)** बढ़ावें। जो **(अरुणैः)** लाल वर्णों से **(महः)** बड़े **(गोअर्णसा)** जिसमें कि किरण और प्रकाश विद्यमान **(शुचता)** जो पवित्र वा पवित्रता है उस **(ज्योतिषा)** प्रकाश से **(रामीः)** आराम की देनेवाली रात्रियों को **(उषाः)** प्रभात

समय के **(न)** समान **(अप, ऊर्णुते)** न ढांपते अर्थात् प्रकट करते हैं **(ते)** वे हमारे शिक्षक हों॥१२॥

भावार्थः-जो क्रियाकाण्ड में कुशल जितेन्द्रिय जन प्रभातकाल के समान अविद्यान्धकार की निवृत्ति करनेवाले मनुष्यों को विद्या और उत्तम शिक्षा से बढ़ाते हैं, वे सबको सत्कार करने योग्य हैं॥१२॥

पुनस्तमेवविषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ते क्षोणीभिरुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम्॥१३॥

ते। क्षोणीभिः। अरुणेभिः। न। अञ्जिऽभिः। रुद्राः। ऋतस्य। सदनेषु। ववृधुः। निऽमेघमानाः। अत्येन। पाजसा। सुऽचन्द्रम्। वर्णम्। दधिरे। सुऽपेशसम्॥१३॥

पदार्थः-**(ते)** **(क्षोणीभिः)** पृथिवीभिः। **क्षोणीति पृथिवीनामसु पठितम्।** (निघं०१.१)। **(अरुणेभिः)** आरक्तैः प्रकाशादिभिः **(न)** इव **(अञ्जिभिः)** प्रकटैः **(रुद्राः)** वायवः **(ऋतस्य)** उदकस्य **(सदनेषु)** स्थानेषु **(ववृधुः)** वर्द्धन्ते **(निमेघमानाः)** निश्चितो मेघो येषान्ते **(अत्येन)** अश्वेनेव वेगेन **(पाजसा)** बलेन **(सुश्चन्द्रम्)** सुवर्णमिव। अत्र **ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे।** (अष्टा०६.१.१५१)। इति सुडागमः **(वर्णम्)** स्वरूपम् **(दधिरे)** दधति **(सुपेशसम्)** सुन्दरं रूपम्॥१३॥

अन्वयः-हे मनुष्या! युष्माभिः रुद्राः क्षोणीभिरञ्जिभिररुणेभिर्न ऋतस्य सदनेषु ववृधुः। निमेघमाना अत्येन पाजसा सुपेशसं सुश्चन्द्रं वर्णं दधिरे ते विज्ञातव्याः॥१३॥

भावार्थः-हे मनुष्या! यथा वायुभिः सहोषा वर्धित्वा दिनं जायते सर्वं विविधं रूपं प्रकटयति तथा युष्माभिः सुखरूपं धृत्वा वायुविद्याः प्रकाशनीयाः॥१३॥

पदार्थः-हे मनुष्यो! तुमको **(रुद्राः)** वायु **(क्षोणीभिः)** पृथिवियों से **(अञ्जिभिः)** प्रकट व्यवहारों से **(अरुणेभिः)** कुछ ललामी लिये प्रकाशों के समान **(ऋतस्य)** जल के **(सदनेषु)** स्थानों में **(ववृधुः)** बढ़ते हैं वा **(निमेघमानाः)** निश्चित माननेवाले जन **(अत्येन)** अश्व के समान वेग से और **(पाजसा)** बल से **(सुपेशसम्)** सुन्दर रूपयुक्त **(सुश्चन्द्रम्)** सुन्दरता से वर्त्तमान सुवर्ण के समान **(वर्णम्)** स्वरूप को **(दधिरे)** धारण करते हैं **(ते)** वे जानने योग्य हैं॥१३॥

भावार्थः-हे मनुष्यो! जैसे पवनों के साथ प्रभात वेला बढ़कर दिन होता और समस्त विविध प्रकार का रूप प्रकट करती है, वैसे तुमको अच्छा अपना रूप धारण कर वायुविद्या का प्रकाश करना चाहिये॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ताँ इ॑या॒नो महि॒ वरू॑थमू॒तय॒ उप॒ घेदे॒ना नम॑सा गृणीमसि।
त्रि॒तो न यान् पञ्च॒ होतॄ॑न॒भिष्ट॑य आव॒वर्त॒दव॑राञ्च॒क्रिया॑व॑से॥१४॥

तान्। इ॒या॒नः। महि॑। वरू॑थम्। ऊ॒तये॑। उप॑। घ॒। इत्। ए॒ना। नम॑सा। गृ॒णी॒म॒सि॒। त्रि॒तः। न। यान्। पञ्च॑। होतॄ॑न्। अ॒भिष्ट॑ये। आ॒ऽव॒वर्त॑त्। अव॑रान्। च॒क्रिया॑। अव॑से॥१४॥

पदार्थः-**(तान्)** **(इयानः)** प्राप्नुवन् **(महि)** महत् **(वरूथम्)** वरं गृहम् **(ऊतये)** रक्षणाद्याय **(उप)** **(घ)** अपि **(इत्)** एव **(एना)** एनेन **(नमसा)** नमस्कारेण **(गृणीमसि)** स्तुमः **(त्रितः)** यस्त्रीणि शरीरात्मसम्बन्धिसुखानि तनोति सः **(न)** इव **(यान्)** **(पञ्च)** प्राणाऽपानव्यानोदानसमानान् **(होतॄन्)** आदातॄन् **(अभिष्टये)** अभीष्टसुखाय **(आववर्त्तत्)** समन्ताद्वर्त्तयते **(अवरान्)** अर्वाचीनान् **(चक्रिया)** चक्राविव वर्त्तमानान् **(अवसे)** कामनायै॥१४॥

अन्वयः-वयमभिष्टय ऊतय इयानस्त्रितो न यान् पञ्चावरान् होतॄन् पञ्चावराञ्चक्रियाऽभिष्टयेऽवस आववर्त्तत् तानूतये महि वरूथं प्राप्य घेदेना नमसोपगृणीमसि॥१४॥

भावार्थः-अत्रोपमालङ्कारः। यथा कर्मोपासनाज्ञानवित्परावरान् वायून् विदित्वा स्वस्य परेषां च रक्षणाय वर्त्तते तथा वयं प्रवर्त्तेमहि। यथोत्तमं प्रासादं प्राप्य जनाः सुखिनो भवन्ति तथा वयमपि भवेम॥१४॥

पदार्थः-हम लोग **(अभिष्टये)** अभीष्ट सुख की **(ऊतये)** रक्षा आदि के अर्थ **(इयानः)** प्राप्त होता हुआ कोई जन **(त्रितः)** जो शरीर और आत्मा सम्बन्धी सुख को विस्तृत करता है उसके **(न)** समान **(यान्)** जिन **(पञ्च)** पांच **(अवरान्)** अर्वाचीन **(होतॄन्)** ग्रहण करनेवालों को और पांच अर्वाचीन **(चक्रिया)** चाक के समान वर्त्तमानों को अभीष्ट सुख वा **(अवसे)** कामना के लिये **(आववर्त्तत्)** सब ओर से वर्त्तता है **(तान्)** उनको **(ऊतये)** रक्षा आदि के लिये **(महि)** बड़े

(वरूथम्) श्रेष्ठ घर को प्राप्त हो **(घ, इत्)** ही निश्चय कर **(एना)** इस **(नमसा)** नमस्कार से **(उप, गृणीमसि)** उपस्तुत करते हैं अर्थात् उनकी अति निकटस्थ ही स्तुति करते हैं॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कर्मोपासना और ज्ञानविद्या का जाननेवाला अगले-पिछले पवनों को जानकर अपनी और दूसरी की रक्षा के लिये वर्त्तमान है, वैसे हम लोग प्रवृत्त हों॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यया॑ रध्रं पा॒रय॒थात्यंहो॒ यया॑ नि॒दो मु॒ञ्चथ॑ वन्दि॒तार॑म्।
अ॒र्वाची॒ सा म॑रुतो॒ या व॑ ऊ॒तिरो षु वा॒श्रेव॑ सु॒म॒तिर्जि॑गातु॥ १५॥ २१॥

यया॑। र॒ध्रम्। पा॒रय॑थ। अति॑। अंह॑ः। यया॑। नि॒दः॒। मु॒ञ्चथ॑ः। व॒न्दि॒तार॑म्। अ॒र्वाची॑ सा। म॒रु॒तः॒। या। व॒ः। ऊ॒तिः॒। ओ इति॑। सु। वा॒श्राऽइ॑व। सु॒ऽम॒तिः॒। जि॒गा॒तु॒॥ १५॥

पदार्थः-**(यया)** क्रियया **(रध्रम्)** संराधनम् **(पारयथ)** **(अति)** **(अंहः)** अपराधम् **(यया)** **(निदः)** निन्दकान् **(मुञ्चथ)** **(वन्दितारम्)** स्तावकम् **(अर्वाची)** याऽर्वणोऽश्वानञ्चति सा **(सा)** **(मरुतः)** **(या)** **(वः)** युष्मान् **(ऊतिः)** रक्षा **(ओ)** प्रेरणेषु **(सु)** **(वाश्रेव)** कमनीयइव **(सुमतिः)** सुष्ठुप्रज्ञा **(जिगातु)** प्रशंसतु॥१५॥

अन्वयः-हे मरुतो! योतिः सुमतिरो वो वाश्रेव सुजिगातु यया रध्रमति पारयथांहो निवारयथ यया निदो मुञ्चथ साऽर्वाची वन्दितारं प्राप्नोतु॥१५॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या यया क्रिययाऽधर्मनिन्दकत्यागो धर्मप्रशंसितग्रहणं रक्षा बुद्धिवर्द्धनं स्यात्तां क्रिया सततं कुर्वन्तु सदा निन्दावर्जनं स्तुतिस्वीकरणं कुर्युरिति॥१५॥

अत्र विद्वद्वायुगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति चतुस्त्रिंशं सूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(मरुतः)** मरणधर्मा मनुष्यो! **(या)** जो **(ऊतिः)** रक्षा **(सुमतिः)** और सुन्दर बुद्धि **(ओ)** प्रेरणाओं में **(वः)** तुम लोगों की **(वाश्रेव)** मनोहर के समान **(सुजिगातु)** प्रशंसा करें वा **(यया)** जिससे **(रध्रम्)** अच्छे प्रकार की सिद्धि को **(अति, पारयथ)** अतीव पार पहुंचाओ और

(अंहः) अपराध को निवृत्त करो वा **(यया)** जिससे **(निदः)** निन्दाओं को **(मुञ्चथ)** मोचो अर्थात् छोड़ो **(सा)** वह **(अर्वाची)** घोड़ों को प्राप्त होनेवाली कोई क्रिया **(वन्दितारम्)** वन्दना करनेवाले को प्राप्त हो॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य जिस क्रिया से अधर्म और निन्दा करनेवाले का त्याग और धर्म वा प्रशंसावाले का ग्रहण, रक्षा, बुद्धि की वृद्धि हो उस क्रिया को निरन्तर करें अर्थात् सदा निन्दा का त्याग और स्तुति का स्वीकार करें॥१५॥

इस सूक्त में विद्वान् और पवन के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह चौतीसवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

उपेमित्यस्य पञ्चदशर्चस्य पञ्चत्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। अपान्नपाद्देवता। १, ४, ६, ७, ९, १०, १२, १३, १५ निचृत्त्रिष्टुप्। ११ विराट् त्रिष्टुप्। १४ त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ३, ८ भुरिक् पङ्क्तिः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाऽग्निविषयमाह॥

अब पन्द्रह ऋचावाले पेंतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि के विषय को कहते हैं॥

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि॥ १॥

उप। ईम्। असृक्षि। वाजऽयुः। वचस्याम्। चनः। दधीत। नाद्यः। गिरः। मे। अपाम्। नपात्। आशुहेमा। कुवित्। सः। सुऽपेशसः। करति। जोषिषत्। हि॥ १॥

पदार्थः-(उप) समीपे **(ईम्)** जलम् **(असृक्षि)** सृजति **(वाजयुः)** य आत्मनो वाजमिच्छुः **(वचस्याम्)** वचसि उदके भवाम् **(चनः)** अन्नम् **(दधीत) (नाद्यः)** नदितुं योग्यः **(गिरः)** वाण्याः **(मे)** मम **(अपाम्)** जलानाम् **(नपात्)** न पतति सः **(आशुहेमा)** सद्यो वर्द्धकः **(कुवित्)** बहुः। **कुविदिति बहुनामसु पठितम्।** (निघं०३.१)। **(सः) (सुपेशसः)** सु-शोभनं पेशो रूपं येषान्तान् **(करति)** कुर्य्यात् **(जोषिषत्)** जुषेत सेवेत। व्यत्ययेन परस्मैपदम्। **(हि)** खलु॥ १॥

अन्वयः-यो वाजयुर्वचस्यामुपेमसृक्षि चनो दधीत योऽपानपान्नाद्य आशुहेमा कुविन्मे गिरस्सम्बन्ध्यस्ति स हि सुपेशसस्करति जोषिषच्च॥ १॥

भावार्थः-यः सूर्यो जलमाकृष्य वर्षयित्वा नदीर्बाहयत्यन्नान्युत्पादयति तदशनेन प्राणिनः स्वरूपवतः करोति स सर्वैर्युक्त्या सेवनीयः॥ १॥

पदार्थः-जो **(वाजयुः)** अपने को विज्ञान और अन्नादिकों की इच्छा करनेवाला **(वचस्याम्)** जल में हुई क्रिया का वा **(उप, ईम्)** समीप में जल को **(असृक्षि)** सिद्ध करता है और **(चनः)** चणकादि अन्न को **(दधीत)** धारण करे वा जो **(अपान्नपात्)** जलों के बीच न गिरनेवाला **(नाद्यः)** अव्यक्त शब्द करने योग्य तथा **(आशुहेमा)** शीघ्र बढ़नेवाली **(कुवित्)** बहु प्रकार की क्रिया और **(मे)** मेरी **(गिरः)** वाणी का सम्बन्ध करनेवाला व्यवहार है **(सः, हि)** वह **(सुपेशसः)** सुन्दर रूपवालों को **(करति)** करे और **(जोषिषत्)** उन्हें सेवे॥ १॥

भावार्थः-जो सूर्य जल को खींच और वर्षा कर नदियों को बहाता और अन्नों को उत्पन्न करता जिसके खाने से प्राणियों को स्वरूपवान् करता है, वह सबको युक्ति के साथ सेवन करने योग्य है॥ १॥

अथेश्वरस्तुतिविषयमाह॥

अब ईश्वरस्तुति का विषय अगले मन्त्र में कहा है॥

इ॒मं स्व॑स्मै हृ॒द आ सु॒तष्टुं॑ मन्त्रं॑ वोचेम कु॒विद॑स्य॒ वेद॑त्।
अ॒पां नपा॑दसु॒र्य॑स्य म॒ह्ना विश्वा॑न्य॒र्यो भुव॑ना जजान॥ २॥

इ॒मम्। सु। अ॒स्मै॒। हृ॒दः। आ। सु॒ऽत॑ष्टम्। मन्त्र॑म्। वो॒चे॒म॒। कु॒वित्। अ॒स्य॒। वेद॑त्। अ॒पाम्। नपा॑त्। अ॒सु॒र्य॑स्य। म॒ह्ना। विश्वा॑नि। अ॒र्यः। भुव॑ना। ज॒जा॒न॒॥ २॥

पदार्थः-(इमम्) (सु) (अस्मै) (हृदः) हृदयस्य समीपे स्थितम् **(आ) (सुतष्टम्)** सुष्ठु सुखस्य निर्वर्त्तकम् **(मन्त्रम्)** विचारम् **(वोचेम) (कुवित्)** बहु **(अस्य) (वेदत्)** विद्यात् **(अपाम्)** जलानां मध्ये **(नपात्)** अविनाशी **(असुर्यस्य)** मेघे भवस्य **(मह्ना)** महत्त्वेन **(विश्वानि)** सर्वाणि **(अर्य्यः)** सर्वस्वामीश्वरः **(भुवना)** लोकान् **(जजान)** प्रादुर्भावयति। अत्र व्यत्ययेन परस्मैपदम्॥ २॥

अन्वयः-यो नपादर्यो मह्ना विश्वानि भुवना जजान अपां कुविद्वेददस्यासुर्य्यस्य मेघस्य प्रबन्धं करोति तस्मै हृदोऽस्मै इमं सुतष्टं मन्त्रं वा सुवोचेम॥ २॥

भावार्थः-हे मनुष्या! येन जगदीश्वरेण समग्रं जगन्निर्मितं तस्यैव स्तुतिप्रार्थनोपासनाः कुरुत॥ २॥

पदार्थः-जो **(नपात्)** अविनाशी **(अर्यः)** सर्वस्वामी ईश्वर **(मह्ना)** अपने महत्व से **(विश्वानि)** समस्त **(भुवना)** लोक-लोकान्तरों को **(जजान)** उत्पन्न करता है वा जो **(अपाम्)** जलों के बीच **(कुवित्)** बहुत व्यवहार को **(वेदत्)** जाने वा **(अस्य)** इस **(असुर्य्यस्य)** मेघ के बीच उत्पन्न हुए व्यवहार का प्रबन्ध करता है, उस **(हृदः)** हृदय के समीप स्थित **(अस्मै)** इस ईश्वर के लिये **(इमम्)** इस **(सुतष्टम्)** सुन्दर सुख के सिद्ध करनेवाले व्यवहार वा **(मन्त्रम्)** विचार को हम लोग **(सुवोचेम)** अच्छे प्रकार कहें॥ २॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर ने समग्र जगत् बनाया उसी की स्तुति, प्रार्थना वा उपासना करो॥ २॥

अथ मेघविषयमाह॥

अब मेघ के विषय को अगले मन्त्र में कहा है॥

सम॒न्या य॑न्त्यु॒प य॑न्त्य॒न्याः स॑मा॒नमू॒र्वं न॒द्यः॑ पृणन्ति।
तमू॒ शुचि॒ शुच॑यो दी॒दि॒वांस॑म॒पां नपा॑तं॒ परि॑ तस्थु॒राप॑ः॥ ३॥

सम्। अ॒न्याः। यन्ति। उप॑। य॒न्ति॒। अ॒न्याः। स॒मा॒नम्। ऊ॒र्वम्। न॒द्यः॑। पृ॒ण॒न्ति॒। तम्। ऊ॒म् इति॑। शुचि॑म्। शु॒च॑यः। दी॒दि॒ऽवांस॑म्। अ॒पाम्। नपा॑तम्। परि॑। त॒स्थुः॒। आपः॑॥ ३॥

पदार्थः-(सम्) (अन्याः) (यन्ति) प्राप्नुवन्ति **(उप) (यन्ति) (अन्याः) (समानम्)** तुल्यम् **(ऊर्वम्)** दुःखानां हिंसकम् **(नद्यः) (पृणन्ति)** सुखयन्ति **(तम्)** (उ) वितर्के **(शुचिम्)** पवित्रम् **(शुचयः)** पवित्राः **(दीदिवांसम्)** देदीप्यमानम् **(अपाम्)** जलानां मध्ये **(नपातम्)** नाशरहितमग्निम् **(परि) (तस्थुः)** तिष्ठन्ति **(आपः)** जलानि॥ ३॥

अन्वयः-अन्या नद्यस्समानमूर्वं संयन्ति अन्या उपयन्ति तम्वपां नपातं दीदिवांसं शुचिमग्निं शुचय आपः परि तस्थुस्ताः सर्वान् पृणन्ति॥ ३॥

भावार्थः-यथा नद्यः स्वयं समुद्रं प्राप्य स्थिराः शुद्धोदका जायन्ते यथा आपो मेघमण्डलं प्राप्य दिव्या भवन्ति तथा स्त्र्यभीष्टं पतिं पतिरभीष्टां स्त्रियं च प्राप्य स्थिरमनस्कौ शुद्धभावौ भवतः॥ ३॥

पदार्थः-जो **(अन्याः)** और **(नद्यः)** नदी **(समानम्)** तुल्य **(ऊर्वम्)** दुःखों के नष्ट करनेवाले को **(संयन्ति)** अच्छे प्रकार प्राप्त होतीं वा **(अन्याः)** और **(उप, यन्ति)** उसको उसके समीप से प्राप्त होती हैं **(तम्, उ)** उसी **(अपां, नपातम्)** जलों के बीच नाशरहित **(दीदिवांसम्)** अतीव प्रकाशमान **(शुचिम्)** पवित्र अग्नि को **(शुचयः)** पवित्र **(आपः)** जल **(परि, तस्थुः)** सब ओर से प्राप्त हो स्थिर होते हैं, वे जल सबको **(पृणन्ति)** तृप्त करते हैं॥ ३॥

भावार्थः-जैसे नदी आप समुद्र को प्राप्त होकर स्थिर और शुद्ध जलवाली होती हैं, वैसे जल मेघमण्डल को प्राप्त होकर दिव्य होते हैं, वैसे स्त्री अभीष्ट पति और पति अभीष्ट स्त्री को पाकर स्थिरचित्त होते हैं॥ ३॥

अथ विवाहविषयमाह॥

अब विवाह विषय को अगले मन्त्र में कहा है॥

तमस्मे॑रा युव॒तयो॒ युवा॑नं मर्मृ॒ज्यमा॑ना॒: परि॒ य॒न्त्याप॑:।
स शु॒क्रेभि॒: शिक्व॑भी रे॒वदु॒स्मे दी॒दाया॑निध्मो घृ॒तनि॑र्णिग॒प्सु॥ ४॥

तम्। अस्मे॑राः। यु॒व॒तयः॑। युवा॑नम्। मर्मृ॒ज्यमा॑नाः। परि॑। य॒न्ति॒। आपः॑। सः। शु॒क्रेभिः॑। शिक्व॑ऽभिः। रे॒वत्। अ॒स्मे इति॑। दी॒दाय॑। अ॒नि॒ध्मः। घृ॒तऽनि॑र्निक्। अ॒प्ऽसु॥ ४॥

पदार्थः-(तम्) (अस्मेराः) या अस्मानीरयन्ति ताः। अत्र **पृषोदरादिना** त लोपः। **(युवतयः)** प्राप्तयौवनाः **(युवानम्)** सम्प्राप्तयौवनम् **(मर्मृज्यमानाः)** भृशं शुद्धाः **(परि)** सर्वतः **(यन्ति) (आपः) (सः) (शुक्रेभिः)** शुद्धैरुदकैर्वीर्यैर्वा **(शिक्वभिः)** सेचनैः। अत्र शीकृधातोः क्वनिपि

वाच्छन्दसीति आद्यचो ह्रस्वत्वम्। **(रेवत्)** श्रीमत् **(अस्मे)** अस्मान् **(दीदाय)** प्रकाशयेत् **(अनिध्मः)** अदीप्यमानः **(घृतनिर्णिक्)** यो घृतमुदकं नितरां नेनेक्ति पुष्णाति सः। यद्वा घृतस्य सुस्वरूपम्। **निर्णिक् इति रूपनामसु पठितम्।** (निघं०३.७)। **(अप्सु)** जलेषु॥४॥

अन्वयः-हे मनुष्या! यथाऽस्मेरा मर्मृज्यमाना युवतयश्शिक्वभिः शुक्रेभिस्सह आपस्समुद्रमिव तं युवानं परियन्ति तथा स त्वमनिध्मोऽस्मे रेवद् दीदायाप्सु घृतनिर्णिक् सूर्यइवास्मान् सदुपदेशेन शोधयतु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सम्प्राप्तयौवनाः स्त्रियो ब्रह्मचर्येण कृतविद्यान् हृद्यान् पूर्णविद्यान् यूनः पतीन् संपरीक्ष्य प्राप्नुवन्ति तथा पुरुषा अप्येताः प्राप्नुवन्ति यथा सूर्यो जलं संशोध्य वृष्ट्या सर्वान् सुखयति तथा संशुद्धौ परस्परप्रीतिमन्तौ विद्वांसौ कृतविवाहौ स्त्रीपुरुषौ स्वसन्तानान् शोधयितुमर्हतः॥४॥

पदार्थः-हे मनुष्यो! जैसे **(अस्मेराः)** हम लोगों को प्रेरणा देनेवाली **(मर्मृज्यमानाः)** निरन्तर शुद्ध **(युवतयः)** युवतियाँ **(शिक्वभिः)** सेचनाओं से **(शुक्रेभिः)** शुद्ध जल वा वीर्यों के साथ **(आपः)** नदियां समुद्र को जैसे वैसे **(तम्)** उस **(युवानम्)** युवा पुरुष को **(परियन्ति)** सब ओर से प्राप्त होतीं, वैसे **(सः)** वह, तू **(अनिध्मः)** अप्रकाशमान **(अस्मे)** हम लोगों को **(रेवत्)** श्रीमान् के समान **(दीदाय)** प्रकाशित करो वा और **(अप्सु)** जलों में **(घृतनिर्णिक्)** जल को पुष्टि देनेवाले सूर्य्य के समान हम लोगों को श्रेष्ठ उपदेश से शुद्ध करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे अच्छे प्रकार युवावस्था को प्राप्त युवति स्त्रियाँ ब्रह्मचर्य से की विद्या जिन्होंने ऐसे हृदय को प्रिय पूर्ण विद्यावान् युवा पतियों को अच्छे प्रकार परीक्षा कर प्राप्त होतीं, वैसे पुरुष भी इनको प्राप्त हों। जैसे सूर्य जल को संशोधन कर वृष्टि से सबको सुखी करता है, वैसे अच्छे प्रकार शुद्ध परस्पर प्रीतिमान् विद्वान् विवाह किये हुए स्त्री-पुरुष अपने सन्तानों को शुद्ध करने को योग्य हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अस्मै तिस्रो अव्यथ्यायु नारीर्देवाय देवीर्दिधिषन्त्यन्नम्।
कृताइवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम्॥५॥२२॥

अस्मै। तिस्रः। अव्यथ्याय। नारीः। देवाय। देवीः। दिधिषन्ति। अन्नम्। कृताःऽइव। उप। हि। प्रऽसर्स्रे। अप्ऽसु। सः। पीयूषम्। धयति। पूर्वऽसूनाम्॥५॥

पदार्थः-(अस्मै) **(तिस्रः)** त्रित्वसङ्ख्याकाः **(अव्यथ्याय)** व्यथितुमनर्हाय **(नारीः)** स्त्रियः **(देवाय)** कामाय विदुषे **(देवीः)** देदीप्यमानाः स्त्रियः **(दिधिषन्ति)** धरन्ति **(अन्नम्)** **(कृताइव)** यथा निष्पन्नाः **(उप)** **(हि)** किल **(प्रसर्स्रे)** प्रसर्पन्ति **(अप्सु)** अन्तरिक्षप्रदेशेषु **(सः)** **(पीयूषम्)** अमृतमिव दुग्धं **(धयति)** पिबति **(पूर्वसूनाम्)** याः पूर्वमपत्यानि सूयन्ते तासाम्॥५॥

अन्वयः-हे मनुष्या! याः कृताइव तिस्रो देवीर्नारीरस्मा अव्यथ्याय देवायान्नं दिधिषन्ति अप्सूप प्रसर्स्रे तासां पूर्वसूनां स सन्तानो हि पीयूषन्धयति पिबति॥५॥

भावार्थः-अत्रोपमालङ्कारः। त्रिविधा हि उत्तममध्यमकनिष्ठत्वभेदेन नार्यो भवन्ति याश्च समानपतयो भूत्वा यदि विधवाः स्युस्तर्हि सन्तानोत्पादनाय स्वसदृशेभ्यो वीर्यङ्गृहीत्वा धर्मेण सन्तानानुत्पादयन्तु यदि सन्तानेप्सवो न स्युस्तर्हि ब्रह्मचर्ये तिष्ठन्तु॥५॥

पदार्थः-हे मनुष्यो! जो **(कृताइव)** निष्पन्न हुई सी **(तिस्रः)** तीन **(देवीः)** निरन्तर प्रकाशमान **(नारीः)** स्त्री हम लोगों के **(अव्यथ्याय)** व्यथन अर्थात् नष्ट करने को नहीं योग्य **(देवाय)** काम के लिये **(अन्नम्)** अन्न **(दिधिषन्ति)** धारण करती हैं तथा जो **(अप्सु)** अन्तरिक्ष प्रदेशों में जल **(उप, प्रसर्स्रे)** अच्छे प्रकार पास में बहते हैं, उन **(पूर्वसूनाम्)** पहिले सन्तानों को उत्पन्न करनेवालियों का **(सः)** वह विद्वान् सन्तान **(हि)** ही **(पीयूषम्)** अमृत के समान दुग्ध को **(धयति)** पीता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। तीन प्रकार की निश्चय स्त्रियां होती हैं जो समान पतियोंवाली होकर विधवा हों तो सन्तानों की उत्पत्ति के लिये अपने समान पुरुषों के वीर्य लेकर धर्म से सन्तानों को उत्पन्न करें, जो सन्तानों की विशेष इच्छा न हो तो ब्रह्मचर्य में स्थिर हों॥५॥

अथ विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

अश्वस्यात्र जनिमास्य च स्वर्दुहो रिषः संपृचः पाहि सूरीन्।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि॥६॥

अश्वस्य। अत्र। जनिम। अस्य। च। स्वः। दुहः। रिषः। सम्ऽपृचः। पाहि। सूरीन्। आमासु। पूर्षु। परः। अप्रऽमृष्यम्। न। अरातयः। वि। नशन्। न। अनृतानि॥६॥

पदार्थः-(अश्वस्य) वीर्यप्रदातुमर्हतः। **अश्व इति महन्नामसु पठितम्।** (निघं०३.३)। **(अत्र)** अस्मिन् व्यवहारे **(जनिम)** जन्म **(अस्य)** **(च)** **(स्वः)** सुखम् **(दुहः)** द्रोग्धुरीर्ष्यकात् **(रिषः)** हिंसकात् **(संपृचः)** संयुक्तात् **(पाहि)** रक्ष **(सूरीन्)** विदुषः **(आमासु)** गृहे भवासु **(पूर्षु)** पुरीषु

(परः) प्रकृष्टः **(अप्रमृष्यम्)** सोढुमनर्हम् **(न)** **(अरातयः)** शत्रवः **(वि)** **(नशन्)** आप्नुवन्ति। **नशतीति व्याप्तिकर्मा।** (निघं०२.१८)। **(न)** **(अनृतानि)** मिथ्या कर्माणि॥६॥

अन्वयः-यतोऽत्राऽस्याऽश्वस्य जनिम भवति तस्मादत्र स्ववर्द्धते यः परस्त्वमामासु पूर्षु द्रुहो रिषः संपृचः सूरीनप्रमृष्यं च पाहि त्वामरातयो न पीडयन्ति अनृतानि न विनशन् प्राप्नुवन्ति॥६॥

भावार्थः-यस्मिन् कुले महान्तो मनुष्या जायन्ते तत्र सुखमेधते यत्र शरीरात्मबला मनुष्याः स्युस्तत्र शत्रवः पीडां कर्त्तुं न शक्नुवन्ति न वीर्य्यवन्तोऽनृतान्यधर्मयुक्तानि कर्माणि कर्त्तुमुत्सहन्ते॥६॥

पदार्थः-जिससे **(अत्र)** इस व्यवहार में **(अस्य)** इस **(अश्वस्य)** महान् वीर्य देनेवाले का **(जनिम)** जन्म होता है उससे यहाँ **(स्वः)** सुख बढ़ता है, जो **(परः)** परमोत्तम आप **(आमासु)** घर में हुई **(पूर्षु)** पुरियों में **(द्रुहः)** ईर्ष्यक **(रिषः)** हिंसा और **(संपृचः)** संयोग करनेवालों के **(सूरीन्)** सम्बन्धी विद्वानों को **(च)** और **(अप्रमृष्यम्)** सहने को न योग्य व्यवहारों को **(पाहि)** रक्षा करो और आपको **(अरातयः)** शत्रुजन **(न)** नहीं पीड़ा देने तथा **(अनृतानि)** मिथ्या कर्मों को **(न)** नहीं **(विनशन्)** विशेषता से प्राप्त होते हैं॥६॥

भावार्थः-जिस कुल के बीच बड़े महात्माजन उत्पन्न होते हैं, वहाँ सुख बढ़ता है और जहाँ शरीर और आत्मा के बलयुक्त मनुष्य हों, वहाँ शत्रुजन पीड़ा नहीं कर सकते हैं और बलवान् पुरुष झूठ अधर्मयुक्त कामों का उत्साह नहीं करते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्व आ दमे॑ सु॒दुघा॒ यस्य॑ धे॒नुः स्व॒धां पी॑पाय सुभ्व॒न्न॑मत्ति।
सो अ॒पां नपा॑दू॒र्जय॑न्न॒प्स्व॑१॑न्तर्वसु॒देया॑य विध॒ते वि भा॑ति॥७॥

स्वे। आ। दमे॑। सु॒ऽदुघा॑। यस्य॑। धे॒नुः। स्व॒धाम्। पी॒पा॒य॒। सु॒ऽभु। अन्न॑म्। अ॒त्ति॒। सः। अ॒पाम्। नपा॑त्। ऊर्जय॑न्। अ॒प्ऽसु। अ॒न्तः। व॒सु॒ऽदेया॑य। वि॒ध॒ते। वि। भा॒ति॒॥७॥

पदार्थः-**(स्वे)** स्वकीये **(आ)** **(दमे)** गृहे **(सुदुघा)** सुष्ठुप्रपूरिका **(यस्य)** **(धेनुः)** विद्यासुशिक्षायुक्ता वाक् **(स्वधाम्)** सूदकम्। **स्वधेत्युदकनामसु पठितम्।** (निघं०१.१२)। **(पीपाय)** पीयते **(सुभु)** यत्सुष्ठु संस्कारैर्भाव्यते **(अन्नम्)** अत्तुमर्हम् **(अत्ति)** भुङ्क्ते **(सः)** **(अपाम्)** प्राणानाम् **(नपात्)** अविनाशी सन् **(ऊर्जयन्)** बलं प्राप्नुवन् **(अप्सु)** प्राणेषु **(अन्तः)** आभ्यन्तरे **(वसुदेयाय)** देयं वसु यस्य तस्मै **(विधते)** सेवमानाय **(वि)** **(भाति)** प्रकाशयति॥७॥

अन्वयः-यस्य स्वे दमे सुदुघा धेनुः प्रवर्त्तते सोऽपां नपादप्स्वन्तरूर्जयन् स्वधां पीयाय सुभ्वन्नमत्ति विधते वसुदेयायाविभाति॥७॥

भावार्थः-ये मनुष्याः स्वसम्बन्धिषु कामानाम्पूर्तये सुशिक्षितां वाचं संशोधितमुदकं सुसंस्कृतान्यन्नानि सेवन्ते सुशिक्षिताय सेवकाय यथायोग्यं वस्तु ददति यथाकालं सर्वान् व्यवहारान् सेवन्ते, ते सदा सुखिनो वर्त्तन्ते॥७॥

पदार्थः-जिसके **(स्वे)** अपने **(दमे)** घर में **(सुदुघा)** सुन्दरता से पूर्ण करनेवाली **(धेनुः)** विद्या और शिक्षायुक्त वाणी प्रवृत्त है **(सः)** वह **(अपांनपात्)** प्राणों के बीच अविनाशी होता और **(अप्सु)** प्राणों के **(अन्त)** भीतर **(ऊर्जयन्)** बल को प्राप्त होता हुआ **(स्वधाम्)** सुन्दर जल को **(पीपाय)** पीता और **(सुभु)** सुन्दर संस्कारों से भावना दी जाती उस **(अन्नम्)** भोजन करने योग्य अन्न को **(अत्ति)** खाता है तथा **(विधते)** सेवा करते हुए **(वसुदेयाय)** जिसे धन देना योग्य है, उसके लिये **(आ, विभाति)** प्रकाश को प्राप्त होता है॥७॥

भावार्थः-जो मनुष्य अपने सम्बन्धियों में कामों की परिपूर्णता के लिये सुन्दर शिक्षित वाणी, सुन्दर शुधा हुआ जल, और सुन्दर संस्कार किये हुए अन्नों की सेवा करते, सुन्दर शिक्षित सेवक के लिये यथायोग्य वस्तु देते और काल पर सब व्यवहारों को सेवते हैं, वे सदा सुखी रहते हैं॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

यो अ॒प्स्वा शुचि॑ना॒ दैव्ये॑न ऋ॒तावा॑जस्र॒ उर्वि॒या वि॒भाति॑।
व॒या इद॒न्या भुव॑नान्यस्य॒ प्र जा॑यन्ते वी॒रुध॑श्च॒ प्रजा॑भिः॥८॥

यः। अ॒प्ऽसु। आ। शुचि॑ना। दैव्ये॑न। ऋ॒तऽवा॑। अज॑स्रः। उ॒र्वि॒या। वि॒ऽभाति॑। व॒याः। इत्। अ॒न्या। भुव॑नानि। अ॒स्य॒। प्र। जा॒य॒न्ते॒। वी॒रुध॑ः। च॒। प्र॒जाऽभिः॥८॥

पदार्थः-**(यः)** **(अप्सु)** व्यापकेषु पदार्थेषु **(आ)** समन्तात् **(शुचिना)** पवित्रेण **(दैव्येन)** देवैः कृतेन **(ऋतावा)** य ऋतं वनति संभजति सः **(अजस्रः)** निरन्तरम् **(उर्विया)** बहुरूपः **(विभाति)** प्रकाशते **(वयाः)** शाखाः **(इत्)** एव **(अन्या)** अन्यानि **(भुवनानि)** **(अस्य)** **(प्र)** **(जायन्ते)** **(वीरुधः)** ओषधयः **(च)** **(प्रजाभिः)**॥८॥

अन्वयः-य ऋतावाजस्रो दैव्येन शुचिनोर्विया विभाति सोऽन्या भुवनानि वया प्रजाभिरिदिवाप्सु प्रजायन्तेऽस्य संसारस्य मध्ये या वीरुधश्च आजायन्ते ता विजानीयात्॥८॥

भावार्थः-ये पवित्रबुद्धयो दिव्यकर्म्माणो निरन्तरं सृष्टिक्रमं जानन्ति ते सदानन्दिता जायन्ते॥८॥

पदार्थः-(यः) जो **(ऋतावा)** सत्य का अच्छे प्रकार सेवन करता हुआ **(अजस्रः)** निरन्तर **(दैव्येन)** विद्वानों से किये हुए **(शुचिना)** पवित्र व्यवहार से **(उर्विया)** बहुरूप **(विभाति)** प्रकाशित होता है वह **(अन्या)** और **(भुवनानि)** लोक-लोकान्तरों को **(वयाः)** शाखाओं को तथा **(प्रजाभिः)** प्रजा के समान **(इत्)** ही **(अप्सु)** व्यापक जलरूपी पदार्थों में जो **(प्रजायन्ते)** उत्पन्न होते हैं उन्हें और **(अस्य)** इस संसार के बीच जो **(वीरुधः, च)** ओषधियां **(आ)** उत्पन्न होती हैं, उन सबको जाने॥८॥

भावार्थः-जो पवित्र बुद्धि, दिव्य कर्म करनेवाले निरन्तर सृष्टिक्रम को जानते हैं, वे सदा आनन्दित होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अपां नपादाह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः॥९॥

अपाम्। नपात्। आ। हि। अस्थात्। उपऽस्थम्। जिह्मानाम्। ऊर्ध्वः। विऽद्युतम्। वसानः। तस्य। ज्येष्ठम्। महिमानम्। वहन्तीः। हिरण्यऽवर्णाः। परि। यन्ति। यह्वीः॥९॥

पदार्थः-(अपाम्) जलानां मध्ये **(नपात्)** अपतनशीलः **(आ) (हि) (अस्थात्)** तिष्ठति **(उपस्थम्)** समीपस्थम् **(जिह्मानाम्)** कुटिलानाम् **(ऊर्ध्वः)** ऊर्ध्वं स्थितः **(विद्युतम्)** स्तनयित्नुम् **(वसानः)** आच्छादयन् **(तस्य) (ज्येष्ठम्)** अतिशयेन प्रशस्यम् **(महिमानम्) (वहन्तीः)** प्रवाहं प्रापयन्त्यः **(हिरण्यवर्णाः)** हिरण्यवद्वर्णो यासां ता नद्यः **(परि) (यन्ति)** परिगच्छन्ति **(यह्वीः)** महत्यः। **यह्व इति महन्नामसु पठितम्।** (निघं०३.३)॥९॥

अन्वयः-यो जिह्मानामूर्ध्वो विद्युतं वसानोऽपां नपान्मेघ उपस्थमास्थात् यथा तस्य हि ज्येष्ठं महिमानं वहन्तीर्यह्वीर्हिरण्यवर्णाः परियन्ति तथा प्रजा राजानं प्रतिवर्त्तन्ताम्॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायोर्महिमानन्नद्यः परियन्ति तथा विद्वांसो राजानं प्रति वर्त्तन्ताम्॥९॥

पदार्थः-जो **(जिह्मानाम्)** कुटिलों के **(ऊर्ध्वः)** ऊपर स्थित **(विद्युतम्)** बिजुली को **(वसानः)** आच्छादित करता हुआ **(अपांनपात्)** जलों के बीच न गिरने का शीलवाला मेघ **(उपस्थम्)** समीपस्थ पदार्थों को प्राप्त होकर **(आ, अस्थात्)** स्थिर होता है **(तस्य, हि)** उसी की

(ज्येष्ठम्) अतीव प्रशंसनीय **(महिमानम्)** महिमा को **(वहन्तीः)** प्रवाहरूप से प्राप्त करती हुई **(यह्वीः)** बड़ी **(हिरण्यवर्णाः)** हिरण्य अर्थात् सुवर्ण के समान वर्णवाली नदियां **(परि, यन्ति)** सब ओर से जाती हैं, वैसे प्रजागण राजा से वर्त्ताव करें॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पवन की महिमा को नदियां प्राप्त होती हैं, वैसे विद्वान् जन राजा के प्रति वर्त्तें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै॥ १०॥ २३॥

हिरण्यऽरूपः। सः। हिरण्यऽसंदृक्। अपाम्। नपात्। सः। इत्। ऊम् इति। हिरण्यऽवर्णः। हिरण्ययात्। परि। योनेः। निऽसद्य। हिरण्यऽदाः। ददति। अन्नम्। अस्मै॥ १०॥

पदार्थः-**(हिरण्यरूपः)** तेजःस्वरूपः **(सः)** **(हिरण्यसंदृक्)** यो हिरण्यं तेजः सम्यक् दर्शयति **(अपाम्)** जलानाम् **(नपात्)** **(सः)** **(इत्)** एव **(उ)** वितर्के **(हिरण्यवर्णः)** हिरण्यं सुवर्णमिव वर्णो यस्य सः **(हिरण्ययात्)** तेजोमयात् **(परि)** **(योनेः)** स्वकारणात् **(निषद्य)** निषण्णो भूत्वा। अत्र **निपातस्य चे**ति दीर्घः। **(हिरण्यदाः)** ये वायवो हिरण्यं तेजो ददति ते **(ददति)** **(अन्नम्)** **(अस्मै)** प्राणिने॥१०॥

अन्वयः-ये हिरण्यदा अस्मा अन्नं ददति स हिरण्यरूपो हिरण्यसंदृक् स इदु हिरण्यवर्णोऽपांनपात् हिरण्ययाद्योनेः परि निषद्य सर्वान् पालयति॥१०॥

भावार्थः-योऽग्निर्वायुजोऽखिलवस्तुदर्शकोऽन्तर्हितो सर्वविद्यानिमित्तोऽस्ति तं विज्ञाय प्रयोजनसिद्धिः कार्य्या॥१०॥

पदार्थः-जो **(हिरण्यदाः)** वायु तेज देते हैं वे **(अस्मै)** इस प्राणी के लिये **(अन्नम्)** अन्न को **(ददति)** देते हैं **(सः)** वह **(हिरण्यरूपः)** तेजःस्वरूप **(हिरण्यसंदृक्)** तेज को दर्शाता **(सः, इत्, उ)** वही **(हिरण्यवर्णः)** सुवर्ण के समान वर्णयुक्त **(अपांनपात्)** जलों के बीच न गिरनेवाला **(हिरण्यात्)** तेजःस्वरूप **(योनेः)** निज कारण से **(परि, निषद्य)** सब ओर से निरन्तर स्थिर हुआ अग्नि सबको पालन करता है॥१०॥

भावार्थः-जो अग्नि पवन से उत्पन्न हुआ समस्त पदार्थों को दिखानेवाला सर्व पदार्थों के भीतर रहता हुआ सर्वविद्याओं का निमित्त है, उसको जान कर प्रयोजन सिद्ध करना चाहिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तदु॒स्यानी॑कमु॒त चारु॒ नामा॑पी॒च्यं॑ वर्धते॒ नप्तु॒॑रपाम्।
यमि॒न्धते॑ युव॒तय॒: समि॒त्था हिर॑ण्यवर्णं घृ॒तमन्न॑मस्य॥ ११॥

तत्। अ॒स्य॒। अनी॑कम्। उ॒त्। चारु॑। नाम॑। अ॒पी॒च्य॑म्। व॒र्ध॒ते॒। नप्तु॑:। अ॒पाम्। यम्। इ॒न्ध॒ते॑। युव॒तय॑:। सम्। इ॒त्था। हिर॑ण्यऽवर्णम्। घृ॒तम्। अन्न॑म्। अ॒स्य॒॥ ११॥

पदार्थ:-(तत्) (अस्य) (अनीकम्) सैन्यमिव तेज: **(उत)** अपि **(चारु)** सुन्दरम् **(नाम)** आख्या **(अपीच्यम्)** स्वगुणैर्निश्चितम्। **अपीच्यमिति निर्णीतान्तर्हितनामसु पठितम्।** (निघं०३.२५)। **(वर्धते) (नप्तु:)** पौत्रादिव वर्त्तमानात् **(अपाम्)** प्राणानाम् **(यम्) (इन्धते)** प्रदीपयन्ति **(युवतय:)** प्रौढयौवना: **(सम्) (इत्था)** अनेन हेतुना **(हिरण्यवर्णम्)** तेजोमयं शोभनस्वरूपम् **(घृतम्)** उदकमाज्यं वा **(अन्नम्)** सुशोधितं भोक्तुमर्हम् **(अस्य)**॥ ११॥

अन्वय:-हे मनुष्या! यदस्य चार्वनीकमुतापीच्यं नामापां नप्तुर्वर्धते यं युवतय इत्था समिन्धते यद्धिरण्यवर्णं घृतमन्नं चास्य वर्त्तते तद्यूयं विजानीत॥ ११॥

भावार्थ:-हे मनुष्या! यथा युवतिर्युवानं प्राप्य पुत्रपौत्रैर्वर्धते तथा येऽग्निविद्यां जानन्ति ते धनधान्यैर्वर्धन्ते॥ ११॥

पदार्थ:-हे मनुष्यो! जो **(अस्य)** इस अग्नि का **(चारु)** सुन्दर **(अनीकम्)** सैन्य के समान तेज **(उत)** और **(अपीच्यम्)** अपने गुणों से निश्चित **(नाम)** आख्या अर्थात् कथन **(अपाम्)** प्राणों के **(नप्तु:)** पौत्र के समान व्यवहार से **(वर्धते)** बढ़ता है वा **(यम्)** जिसको **(युवतय:)** प्रबल यौवनवती स्त्री **(इत्था)** इस हेतु से **(समिन्धते)** अच्छे प्रकार प्रदीप्त करती हैं वा जो **(हिरण्यवर्णम्)** तेजोमय शोभन शुद्धस्वरूप **(घृतम्)** जल व घी और **(अन्नम्)** अच्छा शोधा हुआ खाने योग्य अन्न **(अस्य)** इस अग्नि के सम्बन्ध में वर्त्तमान है, उसको तुम जानो॥ ११॥

भावार्थ:-हे मनुष्यो! जैसे युवतिजन युवा पुरुष को प्राप्त होकर पुत्र और पौत्रों से बढ़ती हैं, वैसे जो अग्निविद्या को जानते हैं, वे धन-धान्यों से बढ़ते हैं॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒स्मै ब॒॑हूना॑मव॒माय॒ सख्ये॑ य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भि॑:।

सं सानु॒ मार्ज्मि॒ दिधि॑षामि॒ बिल्मै॒र्दधा॒म्यन्नै॒: परि॑ वन्द ऋ॒ग्भि:॥ १२॥

अ॒स्मै। ब॒हू॒नाम्। अ॒व॒माय॑। सख्ये॑। य॒ज्ञै:। वि॒धे॒म॒। नम॑सा। ह॒वि:ऽभि। सम्। सानु॑। मार्ज्मि॑। दिधि॑षामि। बिल्मै॑:। दधा॑मि। अन्नै॑:। परि॑। व॒न्दे॒। ऋ॒क्ऽभि:॥ १२॥

पदार्थ:-(अस्मै) (बहूनाम्) पदार्थानाम्मध्ये **(अवमाय)** अवराय रक्षकाय वा **(सख्ये)** मित्राय **(यज्ञै:)** सङ्गताभि: क्रियाभि: **(विधेम)** प्राप्नुयाम सेवेमहि वा। **विधेमेति गतिकर्मा।**[८] (निघं०२.१४)। **परिचरणकर्मा च।** (निघं०३.५)। **(नमसा)** अन्नाद्येन **(हविर्भि:)** अन्नं दातुं चार्है: **(सम्) (सानु)** संसेवनीयम् **(मार्ज्मि)** शोधयामि **(दिधिषामि)** शब्दयाम्युपदिशामि **(बिल्मै:)** प्रदीप्तसाधनै: **(दधामि) (अन्नै:)** सुसँस्कृतैरन्नादिभि: **(परि) (वन्दे)** स्तौमि **(ऋग्भि:)** मन्त्रै:॥ १२॥

अन्वय:-हे मनुष्या! वयं यथाऽस्मा अवमाय बहूनां सख्ये नमसा हविर्भिर्यज्ञैर्विधेम यथाहं यस्य सानु संमार्ज्मि दिधिषामि बिल्मैरन्नैर्दधामि ऋग्भि: परिवन्दे तथा तं यूयमपि परिचरत॥ १२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा मनुष्या बहूनाम्मध्यात्सखायं प्रीणयन्ति तस्मा अन्नपानादीनि प्रयच्छन्ति परस्परं हितमुपदिशन्ति तथा स्वयमप्येता विद्या: प्राप्यान्यान् प्रत्युपदिशेयुरैश्वर्य्यमवाप्यान्येभ्य: प्रयच्छेयु:॥ १२॥

पदार्थ:-हे मनुष्यो! हम लोग जैसे **(अस्मै)** इस **(अवमाय)** न्यून वा रक्षा करनेवाले **(बहूनाम्)** बहुत पदार्थों के बीच **(सख्ये)** मित्र के लिये **(नमसा)** अन्नादि पदार्थ **(हविर्भि:)** खाने वा देने योग्य पदार्थ और **(यज्ञै:)** मिली हुई क्रियाओं से उत्तम व्यवहार को **(विधेम)** प्राप्त हों वा उसकी सेवा करें वा जैसे मैं जिसके **(सानु)** अच्छे प्रकार सेवने योग्य पदार्थ को **(सं, मार्ज्मि)** अच्छा शुद्ध करूं तथा **(दिधिषामि)** उपदेश करूं वा **(बिल्मै:)** उत्तम दीप्ति को प्राप्त साधनों से युक्त **(अन्नै:)** अच्छा संस्कार किये हुए अन्नादि पदार्थों से **(दधामि)** धारण करता हूं **(ऋग्भि:)** मन्त्रों से **(परिवन्दे)** सब ओर से स्तुति करता हूं, उसकी तुम लोग भी सेवा करो॥ १२॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मनुष्य बहुतों में से अपने मित्र को तृप्त करते हैं वा उसके लिये अन्नपानादि देते हैं, परस्पर हित का उपदेश करते हैं, वैसे स्वयं भी इतनी विद्याओं को प्राप्त होकर औरों के प्रति उपदेश करें तथा ऐश्वर्य को प्राप्त हो के औरों के लिये दें॥ १२॥

---

८. गतिकर्मासु नैव दृश्यते। सं०।

अथ केऽत्र सुखमाप्नुवन्तीत्याह॥

अब इस जगत् में कौन लोग सुख पाते हैं, इस विषय को अगले मन्त्र में कहा है॥

स ईं॑ वृषा॑जनय॒त्तासु॒ गर्भ॑ं स ईं॑ शिशु॑र्धयति॒ तं रि॑हन्ति।
सो अ॒पां नपा॒दन॑भिम्लातवर्णो॒ऽन्यस्ये॑वे॒ह त॒न्वा॑ विवेष॥ १३॥

सः। ईम्। वृषा॑। अ॒ज॒न॒य॒त्। तासु॑। गर्भ॑म्। सः। ईम्। शिशु॑ः। ध॒य॒ति॒। तम्। रि॒ह॒न्ति॒। सः। अ॒पाम्। नपा॑त्। अन॑भिम्लातवर्णः। अ॒न्यस्य॑ऽइव। इ॒ह। त॒न्वा॑। वि॒वे॒ष॥ १३॥

पदार्थः-(सः) (**ईम्**) जलम् (**वृषा**) वर्षकः (**अजनयत्**) जनयति (**तासु**) अप्सु (**गर्भम्**) (**सः**) (**ईम्**) दुग्धम् (**शिशुः**) बालकः (**धयति**) पिबति (**तम्**) पदार्थम् (**रिहन्ति**) लिहन्ति आस्वादन्ते। अत्र व्यत्ययेन रस्य लः। (**सः**) (**अपाम्**) जलानाम् (**नपात्**) अपत्यम्। **नपादित्यपत्यनामसु पठितम्।** (निघं०२.२)। (**अनभिम्लातवर्णः**) न विद्यतेऽभितो म्लातो हर्षक्षीणो वर्णो यस्य सः (**अन्यस्येव**) यथा अन्यशरीरे प्रविशति तथा (**इह**) अस्मिन् संसारे (**तन्वा**) शरीरेण (**विवेष**) व्याप्नोति॥ १३॥

अन्वयः-स वृषा तास्वीं गर्भमजनयत्स शिशुरीं धयति तमन्ये रिहन्ति सोऽपामनभिम्लातवर्णो नपादन्यस्येवेह तन्वा विवेष॥ १३॥

भावार्थः-ये पुरुषाः स्वस्यां स्त्रियां गर्भं धृत्वाऽपत्यमुत्पाद्य सम्पाल्य स्वादिष्ठमन्नमभिभोज्य प्रसन्नाकृतिं सम्पादयन्ति तेऽस्मिन् संसारे सुखान्याप्नुवन्ति॥ १३॥

पदार्थः-(सः) वह (**वृषा**) वर्षा करनेवाला अग्नि (**तासु**) उन जलों में (**ईम्**) ही (**गर्भम्**) गर्भ को (**अजनयत्**) उत्पन्न करता है और (**सः**) वह (**शिशुः**) बालक (**ईम्**) ही (**धयति**) पीता है (**तम्**) उसको और (**रिहन्ति**) चाटते हैं (**सः**) वह (**अपाम्**) जलों के बीच (**अनभिम्लातवर्णः**) जिसका वर्ण सब ओर से क्षीण न हो (**नपात्**) सन्तान (**अन्यस्येव**) जैसे और के शरीर में प्रविष्ट होता, वैसे ही (**इह**) इस संसार में (**तन्वा**) शरीर के साथ (**विवेष**) व्याप्त होता है॥ १३॥

भावार्थः-जो पुरुष अपनी स्त्री में गर्भ धारण कर सन्तान को उत्पन्न वा पालन कर और स्वादिष्ट अन्न खाय शरीर की प्रसन्नाकृति से चेष्टा करते हैं, वे इस संसार में सुखों को प्राप्त होते हैं॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒स्मिन् प॒दे प॑र॒मे त॑स्थि॒वांस॑मध्व॒स्मभि॑र्वि॒श्वहा॑ दीदि॒वांस॑म्।

आपो॒ नप्त्रे॑ घृ॒तमन्नं॑ वह॑न्तीः स्व॒यमत्कै॒: परि॑ दीयन्ति य॒ह्वीः॥ १४॥

अ॒स्मिन्। प॒दे। प॒र॒मे। त॒स्थि॒वांस॑म्। अ॒ध्व॒स्मऽभि॑:। वि॒श्वहा॑। दी॒दि॒वांस॑म्। आप॑:। नप्त्रे॑। घृ॒तम्। अन्न॑म्। वह॑न्ती:। स्व॒यम्। अत्कै॑:। परि॑। दी॒य॒न्ति॒। य॒ह्वी:॥ १४॥

पदार्थ:-(अस्मिन्) (पदे) प्राप्तव्ये **(परमे)** सर्वोत्कृष्टे **(तस्थिवांसम्)** स्थितम् **(अध्वस्मभि:)** अपतनशीलैर्गुणकर्मस्वभावै: **(विश्वहा)** विश्वानि च तान्यहानि च विश्वहानि। अत्र **छान्दसो वर्णलोप** इत्युत्तरपदादि लोप:। **(दीदिवांसम्)** देदीप्यमानम् **(आप:)** प्राणा: **(नप्त्रे)** पौत्राय **(घृतम्)** जलम् **(अन्नम्)** **(वहन्ती:)** प्रापयन्त्य: **(स्वयम्)** **(अत्कै:)** अत्तुमर्है: **(परि)** **(दीयन्ति)** क्षयन्ति। व्यत्ययेनात्र परस्मैपदम्। **(यह्वी:)** महत्य:॥ १४॥

अन्वय:-हे मनुष्या! य आपोऽत्कैरध्वस्मभिस्सहास्मिन् परमे पदे तस्थिवांसं विश्वहा दीदिवांसं वहन्ती: स्वयं यह्वी: परिदीयन्ति तद्द्वारा नप्त्रे घृतमन्नं यूयं प्राप्नुत॥ १४॥

भावार्थ:-ये मनुष्या: प्रतिदिनं सच्चिदानन्दस्वरूपं स्वस्मिन् स्थितमीशं ध्यायन्ति, ते परमं पदं ब्रह्म प्राप्यानन्दन्ति न सद्य: क्षीणलोका भवन्ति॥ १४॥

पदार्थ:-हे मनुष्यो! जो **(आप:)** प्राण **(अत्कै:)** भोगने योग्य **(अध्वस्मभि:)** न गिरनेवाले गुण, कर्म, स्वभावों के साथ **(अस्मिन्)** इस **(परमे)** सबों से अति उत्तम **(पदे)** प्राप्त होने योग्य व्यवहार में **(तस्थिवांसम्)** स्थित **(विश्वहा)** सब दिन **(दीदिवांसम्)** देदीप्यमान ईश्वर को **(वहन्ती:)** प्राप्त करती हुई **(स्वयम्)** आप **(यह्वी:)** महान् भी **(परि, दीयन्ति)** नष्ट होती हैं, उनके द्वारा **(नप्त्रे)** पौत्र के लिये **(घृतम्)** जल और **(अन्नम्)** अन्न को तुम लोग प्राप्त होओ॥ १४॥

भावार्थ:-जो मनुष्य प्रतिदिन सच्चिदानन्दस्वरूप अपने में स्थित ईश्वर का ध्यान करते हैं, वे परमपद ब्रह्म को प्राप्त होकर आनन्द को प्राप्त होते हैं [और] उत्तम सुख प्राप्ति से शीघ्र क्षीण नहीं होते॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अया॑समग्ने सुक्षि॒तिं जना॑यायां॑समु म॒घव॑द्भ्यः सुवृ॒क्तिम्।
विश्वं॒ तद्भ॒द्रं यदव॑न्ति दे॒वा बृ॒हद्वदे॑म वि॒दथे॑ सु॒वीरा॑:॥ १५॥ २४॥

अया॑सम्। अ॒ग्ने॒। सु॒ऽसु॒क्षि॒तिम्। जना॑य। अया॑सम्। ऊ॒म् इति॑। म॒घ॒व॒त्ऽभ्यः। सु॒ऽवृ॒क्तिम्। विश्व॑म्। तत्। भ॒द्रम्। यत्। अव॑न्ति। दे॒वाः। बृ॒हत्। वदे॑म। वि॒दथे॑। सु॒ऽवीरा॑:॥ १५॥

पदार्थः-(अयांसम्) अयौ प्राप्तवन्तौ दोर्दण्डौ येन तम् **(अग्ने)** विद्वन् **(सुक्षितिम्)** शोभनां भूमिम् **(जनाय)** **(अयांसम्)** **(उ)** वितर्के **(मघवद्भ्यः)** परमपूजितधनेभ्यः **(सुवृक्तिम्)** सुष्ठुवृक्तिर्दुष्टकर्मवर्जनं यस्य तम् **(विश्वम्)** समस्त जगत् **(तत्)** **(भद्रम्)** भन्दनीयं कल्याणरूपम् **(यत्)** **(अवन्ति)** रक्षन्ति **(देवाः)** विद्वांसः **(बृहत्)** महत् **(वदेम)** उपदिशेम **(विदथे)** यज्ञे **(सुवीराः)** सुष्ठु प्राप्तशरीरबलाः॥१५॥

अन्वयः-हे अग्ने! यमयांसं सुक्षितिं सुवृक्तिमु जनायायांसं मघवद्भ्यो यद्भद्रं विश्वं सुवीराः देवा अवन्ति तद्बृहद्विदथे वयं वदेम॥१५॥

भावार्थः-ये जना धर्म्याचरणान् सुरक्ष्य दुष्टान् परिदण्ड्य जगत्कल्याणाय महान्त्युत्तमानि कर्म्माणि कुर्युस्ते सदा सर्वैस्सत्कर्त्तव्यास्स्युरिति॥१५॥

अत्राग्निमेघापत्यविवाहविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति पञ्चत्रिंशत्तमं सूक्तं चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! जिस **(अयांसम्)** जिससे भुजायें प्राप्त हुईं **(सुक्षितिम्)** जो सुन्दर पृथिवीयुक्त **(सुवृक्तिम्)** जिसकी दुष्ट कर्मों का त्याग करना वृत्ति **(उ)** और **(जनाय)** मनुष्यों के लिये वा **(अयांसम्)** जिससे भुजायें प्राप्त हुईं **(मघवद्भ्यः)** परम धनवान् मनुष्यों के लिये **(यत्)** जिस **(भद्रम्)** कल्याणरूपी **(विश्वम्)** जगत् की **(सुवीराः)** सुन्दर वीर अर्थात् प्राप्त हुआ शरीर बल जिनको वे **(देवाः)** विद्वान् जन **(अवन्ति)** रक्षा करते हैं **(तत्)** उसको **(बृहत्)** बहुत **(विदथे)** यज्ञ में हम लोग **(वदेम)** कहें अर्थात् उसको उपदेश दें॥१५॥

भावार्थः-जो जन धर्म के अनुकूल आचरण करनेवालों की अच्छे प्रकार रक्षा और दुष्टों को दण्ड दे जगत् के कल्याण के लिये बड़े-बड़े उत्तम कर्मों को करें, वे सबको सर्वदा सत्कार करने योग्य हैं॥१५॥

इस सूक्त में अग्नि, मेघ, अपत्य, विवाह और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह ३५ पैंतीसवां सूक्त और २४ चौबीसवां वर्ग समाप्त हुआ॥

तुभ्यमिति षड्चस्य षट्त्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। १ इन्द्रो मधुश्च। २ मरुतो माधवश्च। ३ त्वष्टा शक्रश्च[९]। ४ अग्निः शुचिश्च। ५ इन्द्रो नभश्च। ६ मित्रावरुणौ नभस्यश्च देवताः। १, ४ स्वराट् त्रिष्टुप्। ५, ६ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ३ जगती छन्दः। निषादः स्वरः॥

अथ विद्वद्गुणानाह॥

अब छः ऋचावाले ३६ वें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का वर्णन करते हैं॥

तुभ्यं हिन्वानो वसिष्ठ गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः।
पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादासोमं प्रथमो य ईशिषे॥ १॥

तुभ्यम्। हिन्वानः। वसिष्ठ। गाः। अपः। अधुक्षन्। सीम्। अविऽभिः। अद्रिऽभिः। नरः। पिब। इन्द्र। स्वाहा। प्रऽहुतम्। वषट्ऽकृतम्। होत्रात्। आ। सोमम्। प्रथमः। यः। ईशिषे॥ १॥

पदार्थः-(तुभ्यम्) (**हिन्वानः**) वर्द्धयन् (**वसिष्ठ**) वसेत् (**गाः**) वाचः (**अपः**) प्राणान् (**अधुक्षन्**) प्रपूरयन्तु (**सीम्**) आदित्यः (**अविभिः**) रक्षकैः (**अद्रिभिः**) मेघैः (**नरः**) नायकाः (**पिब**) (**इन्द्र**) यज्ञपते (**स्वाहा**) सत्क्रियया (**प्रहुतम्**) प्रकृष्टतया गृहीतम् (**वषट्कृतम्**) क्रियया निष्पादितम् (**होत्रात्**) दानात् (**आ**) (**सोमम्**) सदोषधिरसम् (**प्रथमः**) आदिमः (**यः**) (**ईशिषे**) ऐश्वर्यवान् भवेः॥ १॥

अन्वयः-हे इन्द्र! यो हिन्वानस्तुभ्यं वसिष्ठ। हे नरो! भवन्तोऽविभिरद्रिभिः सह सीमादित्य इव गा अपोऽधुक्षन्। हे इन्द्र! प्रथमस्त्वं स्वाहा प्रहुतं होत्राद्वषट्कृतं सोममा पिब यस्त्वं सर्वानीशिषे स स्वयमपि तथा भव॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये यज्ञानुष्ठानेन जलं संशोध्य तज्जन्यमोषधिरसं पीत्वा धर्म्मानुष्ठानेनैश्वर्यं स्वार्थं परार्थं च वर्द्धयन्ति ते सर्वतो वर्द्धन्ते॥ १॥

पदार्थः-हे (**इन्द्र**) यज्ञपति जो (**हिन्वानः**) वृद्धि को प्राप्त होता हुआ (**तुभ्यम्**) तुम्हारे लिये (**वसिष्ठ**) वसे वा। हे (**नरः**) नायक सर्वोत्तम जनो! आप लोग (**अविभिः**) रक्षा करनेवाले (**अद्रिभिः**) मेघों के साथ (**सीम्**) आदित्य के समान (**गाः**) वाणी और (**अपः**) प्राणों को (**अधुक्षन्**) पूर्ण करो। हे (**इन्द्र**) यज्ञपते! (**प्रथमः**) आदिभूत आप (**स्वाहा**) उत्तम क्रिया के साथ

---

९. त्वष्टा शुक्रश्च॥ सं०॥

(प्रहुतम्) अत्युत्तमता से गृहीत **(होत्रात्)** दान के कारण **(वषट्कृतम्)** क्रिया से सिद्ध किये हुए **(सोमम्)** उत्तम ओषधियों के रस को **(आ, पिब)** अच्छे प्रकार पिओ **(यः)** जो आप सबके **(ईशिषे)** ईश्वर हो अर्थात् स्वामी अधिपति हो वह आप भी वैसे होओ॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो यज्ञानुष्ठान से जल को शुद्ध कर उससे उत्पन्न हुए ओषधियों के रस को पीकर धर्म के अनुष्ठान से ऐश्वर्य्य अपने या औरों के लिये बढ़ाते हैं, वे सब ओर से बढ़ते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यज्ञैः संमिश्ला पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः॥२॥

यज्ञैः। सम्ऽमिश्लाः। पृषतीभिः। ऋष्टिऽभिः। यामन्। शुभ्रासः। अञ्जिषु। प्रियाः। उत। आऽसद्य। बर्हिः। भरतस्य। सूनवः। पोत्रात्। आ। सोमम्। पिबत। दिवः। नरः॥२॥

पदार्थः-**(यज्ञैः)** सत्क्रियामयैः **(संमिश्लाः)** सम्यग्मिश्राः **(पृषतीभिः)** मरुद्गतिभिः **(ऋष्टिभिः)** प्रापिकाभिः **(यामन्)** यामनि प्राप्ते काले **(शुभ्रासः)** श्वेतवर्णाः **(अञ्जिषु)** कामयमानेषु **(प्रियाः)** प्रीतिविषयाः **(उत)** अपि **(आसद्य)** प्राप्य। अत्र **निपातस्य चे**ति दीर्घः। **(बर्हिः)** अन्तरिक्षे **(भरतस्य)** धारकस्य **(सूनवः)** पुत्राः **(पोत्रात्)** पवित्रात् **(आ)** **(सोमम्)** **(पिबत)**। अत्र **संहितायामि**ति दीर्घः। **(दिवः)** प्रकाशात् **(नरः)** नेतारः॥२॥

अन्वयः-हे भरतस्य सूनवो नरो! यथा सम्मिश्ला शुभ्रासः प्रिया यज्ञैः पृषतीभिर्ऋष्टिभिर्यामन्नुताञ्जिषु बर्हिरासद्य पोत्राद्दिवः सोमं पिबन्ति तथा यूयमा पिबत॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा वायवोऽन्तरिक्षे भ्रमन्तः सर्वान् प्राणिनो जीवयन्ति प्राणरूपेण प्रियाः सन्ति सर्वस्माद्रसमुपरिनीय वर्षित्वा सर्वानानन्दयन्ति तथा मनुष्यैरपि वर्त्तितव्यम्॥२॥

पदार्थः-हे **(भरतस्य)** धारण करनेवाले के **(सूनवः)** पुत्रो **(नरः)** नायक मनुष्यो! जैसे **(संमिश्लाः)** अच्छे प्रकार मिले हुए **(शुभ्रासः)** श्वेतवर्ण **(प्रियाः)** प्यारे जन **(यज्ञैः)** अच्छी क्रियाओं से युक्त **(ऋष्टिभिः)** प्राप्ति करानेवाली **(पृषतीभिः)** पवन की गतियों से **(यामन्)** प्राप्त हुए समय में **(उत)** और **(अञ्जिषु)** कामना करते हुओं में **(बर्हिः)** अन्तरिक्ष को **(आसद्य)** पहुँच

कर **(पोत्रात्)** पवित्र व्यवहार से उत्पन्न हुए **(दिवः)** प्रकाश से **(सोमम्)** ओषधियों के रस को पीते हैं, वैसे तुम **(आ, पिबत)** पिओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पवन अन्तरिक्ष में भ्रमते हुए सब प्राणियों को जिलाते हैं और प्राणस्वरूप से प्यारे हैं तथा सबसे रस ऊपर को पहुँचा और वर्षा कर सबको आनन्दित करते हैं, वैसे मनुष्यों को होना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः॥ ३॥

अमाऽइव। नः। सुऽहवाः। आ। हि। गन्तन। नि। बर्हिषि। सदतन। रणिष्टन। अथ। मन्दस्व। जुजुषाणः। अन्धसः। त्वष्टः। देवेभिः। जनिऽभिः। सुमत्ऽगणः॥ ३॥

पदार्थः-**(अमेव)** गृहं यथा **(नः)** अस्माकम् **(सुहवाः)** सुष्ठु प्रशंसिताः **(आ)** **(हि)** खलु **(गन्तन)** गच्छत **(नि)** नितराम् **(बर्हिषि)** अन्तरिक्षे **(सदतन)**। अत्र **संहितायामिति** दीर्घः। **(रणिष्टन)** शब्दयत **(अथ)** आनन्तर्य्ये। अत्र **निपातस्य चेति** दीर्घः। **(मन्दस्व)** आनन्दय **(जुजुषाणः)** भृशं सेवमानः **(अन्धसः)** अन्नस्य **(त्वष्टः)** विच्छेदकः **(देवेभिः)** दिव्यगुणैः **(जनिभिः)** जन्मभिः **(सुमद्गणः)** सुमतो गणा यस्य सः॥ ३॥

अन्वयः-हे त्वष्टः सुमद्गणो! जुजुषाणस्त्वं देवेभिर्जनिभिः सहाऽन्धसो भोगान् कुरु। अथ मन्दस्व हे सुहवा! यूयं नोऽमेव बर्हिषि निसदतनास्मान् रणिष्टन हि नोऽस्मानागन्तन॥ ३॥

भावार्थः-यथाऽन्तरिक्षे स्थिता वायवः सर्वान् प्राप्नुवन्ति त्यजन्ति च तथा विद्वांसो धार्मिका धर्मं प्राप्नुयुर्दुष्टा अधर्मं च त्यजेयुः, सत्यं चोपदिशन्तु॥ ३॥

पदार्थः-हे **(त्वष्टः)** छिन्न-भिन्न करनेवाले पुरुष! **(सुमद्गणः)** अच्छे माने हुए गण जिनके **(जुजुषाणः)** ऐसे निरन्तर सेवा करते हुए आप **(देवेभिः)** दिव्यगुणों और **(जनिभिः)** जन्मों के साथ **(अन्धसः)** अन्न के भोगों को कीजिये। **(अथ)** इसके अनन्तर **(मन्दस्व)** आनन्दित हूजिये। हे **(सुहवाः)** अच्छे प्रकार प्रशंसा को प्राप्त तुम लोग **(बर्हिषि)** अन्तरिक्ष में **(नः)** हमारी **(अमेव)** घर को जैसे वैसे **(अन्तरिक्ष)** में **(नि, सदतन)** निरन्तर जाओ पहुँचो, हमें **(रणिष्टन)** उपदेश देओ **(हि)** निश्चय से हम लोगों को **(आ, गन्तन)** आओ प्राप्त होओ॥ ३॥

भावार्थः-जैसे अन्तरिक्ष में स्थित पवन सबको प्राप्त होते और छोड़ते हैं, वैसे विद्वान् धार्मिक जन धर्म को प्राप्त हों तथा दुष्ट जन अधर्म को त्याग करें और सत्य का उपदेश दें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ व॑क्षि दे॒वाँ इ॒ह वि॑प्र॒ यक्षि॑ चो॒शन् होत॒र्नि ष॑दा॒ योनि॑षु त्रि॒षु।
प्रति॑ वीहि प्रस्थि॒तं सो॒म्यं मधु॒ पिबाग्नी॑ध्रा॒त्तव॑ भा॒गस्य॑ तृ॒ष्णुहि॥४॥

आ। व॒क्षि॒। दे॒वान्। इ॒ह। वि॒प्र॒। यक्षि॑। च॒। उ॒शन्। होतः॑। नि। स॒द॒। योनि॑षु। त्रि॒षु। प्रति॑। वी॒हि॒। प्रऽस्थि॑तम्। सो॒म्यम्। मधु॑। पिब॑। आग्नी॑ध्रात्। तव॑। भा॒गस्य॑। तृ॒ष्णु॒हि॥४॥

पदार्थः-(**आ**) (**वक्षि**) वदसि (**देवान्**) दिव्यगुणान् (**इह**) संसारे (**विप्र**) (**यक्षि**) यजसि (**च**) (**उशन्**) कामयमानः (**होतः**) सुखप्रदातः (**नि**) नितराम् (**सद**) स्थिरो भव। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**योनिषु**) निमित्तेषु (**त्रिषु**) कर्मोपासनाज्ञानेषु (**प्रति**) (**वीहि**) प्राप्नुहि (**प्रस्थितम्**) प्रकर्षेण स्थितम् (**सोम्यम्**) सोमगुणसंपन्नम् (**मधु**) मधुरमुदकम्। **मध्विति उदकनामसु पठितम्।** (निघं०१.१२)। (**पिब**) (**आग्नीध्रात्**) अग्निं धरति यस्मात् तस्मात् (**तव**) (**भागस्य**) भजनीयस्य (**तृष्णुहि**)॥४॥

अन्वयः-हे होतरुशन् विप्र! यतस्त्वमिह देवानावक्षि सङ्गतानि कर्माणि च यक्षि तस्मात्त्रिषु योनिषु निषद प्रस्थितं प्रति वीहि सोम्यं मधु पिब तव भागस्याग्नीध्रात् तृष्णुहि॥४॥

भावार्थः-ये मनुष्याः कर्मोपासनाज्ञानेषु प्रयत्य सत्यं कामयन्तो मनुष्यानध्यापनोदेशाभ्यां विदुषः कुर्वन्ति ते नित्यं सुखमश्नुवते॥४॥

पदार्थः-हे (**होतः**) सुख के देनेवाले! (**उशन्**) कामना करते हुए (**विप्र**) मेधावी जन! आप नियत अपने कर्म वा (**इह**) इस संसार में (**देवान्**) दिव्य गुणों को (**आ, वक्षि**) अच्छे प्रकार कहते (**च**) और प्राप्त हुए कर्मों को (**यक्षि**) प्राप्त होते तथा दूसरे प्राणियों को उनका उपदेश देते हैं, इसी से (**त्रिषु**) कर्म, उपासना, ज्ञान इन तीनों (**योनिषु**) निमित्तों में (**निषद**) निरन्तर स्थिर हों और (**प्रस्थितम्**) प्रकर्षता से स्थित विषय को (**प्रति, वीहि**) प्राप्त होओ (**सोम्यम्**) शीतलगुण सम्पन्न (**मधु**) मीठे जल को (**पिब**) पीओ और (**तव**) तुम्हारे (**भागस्य**) सेवने योग्य व्यवहार के (**आग्नीध्रात्**) उस भाग से जिससे अग्नि को धारण करते हैं (**तृष्णुहि**) तृप्त हूजिये॥४॥

भावार्थः-जो मनुष्य कर्मोपासना और ज्ञानों में प्रयत्न कर सत्य की कामना करते हुए मनुष्यों को अध्यापन और उपदेश से विद्वान् करते हैं, वे नित्य सुख को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः।
तुभ्यं सुतो मघवन् तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब॥५॥

एषः। स्यः। ते। तन्वः। नृम्णऽवर्धनः। सहः। ओजः। प्रऽदिवि। बाह्वोः। हितः। तुभ्यम्। सुतः। मघऽवन्। तुभ्यम्। आऽभृतः। त्वम्। अस्य। ब्राह्मणात्। आ। तृपत्। पिब॥५॥

पदार्थः-(एषः) (स्यः) सः **(ते)** तव **(तन्वः)** शरीरस्य **(नृम्णवर्धनः)** धनवर्धनः **(सहः)** बलम् **(ओजः)** पराक्रमम् **(प्रदिवि)** प्रकृष्टप्रकाशे **(बाह्वोः)** भुजयोः **(हितः)** धृतः **(तुभ्यम्) (सुतः)** पुत्रः **(मघवन्)** प्रकृष्टधनः **(तुभ्यम्) (आभृतः)** समन्तात् पोषितः **(त्वम्) (अस्य) (ब्राह्मणात्) (आ) (तृपत्)** तृप्यतु **(पिब)**॥५॥

अन्वयः-हे मघवन्! यस्ते तन्वः प्रदिवि सह ओजो बाह्वोर्हितस्तुभ्यं सुत आभृतोऽस्ति स्य एष नृम्णवर्धनो भवति त्वमस्य ब्राह्मणात् तृपत्सन्ना पिब॥५॥

भावार्थः-हे मनुष्या! ये युष्मदर्थं शारीरिकमात्मीयं च बलं वर्धयेयुस्तेन धनं तांश्चोत्तमैः पदार्थैस्सेवध्वम्॥५॥

पदार्थः-हे **(मघवन्)** अति उत्तम धन वाले! जो **(ते)** आपके **(तन्वः)** शरीर के सम्बन्धी **(प्रदिवि)** अतीव प्रकाश में **(सहः)** बल **(ओजः)** पराक्रम तथा **(बाह्वोः)** भुजाओं के बीच **(हितः)** धारण **(सुतः)** और उत्पन्न किया हुआ **(तुभ्यम्)** आपके लिये और **(आभृतः)** अच्छे प्रकार पुष्ट किया पुत्र है **(स्यः)** सो **(एषः)** यह **(नृम्णवर्धनः)** धन का बढ़ानेवाला होता है **(त्वम्)** आप **(अस्य)** इसके सम्बन्धी **(ब्राह्मणात्)** ब्राह्मण से **(तृपत्)** तृप्त होते हुए **(आ, पिब)** अच्छे प्रकार ओषधि रस को पिओ॥५॥

भावार्थः-हे मनुष्यो! जो तुम्हारे लिये शारीरिक और आत्मीय बल को बढ़ावें, उससे धन और उनकी अच्छे पदार्थों से सेवा करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु।
अच्छा राजाना नमो एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु॥६॥२५॥

जुषेथाम्। यज्ञम्। बोधतम्। हवस्य। मे। सत्तः। होता। निऽविदः। पूर्व्याः। अनु। अच्छ। राजाना। नमः। एति। आऽवृतम्। प्रऽशास्त्रात्। आ। पिबतम्। सोम्यम्। मधु॥६॥

पदार्थः-(जुषेथाम्) सेवेथाम् **(यज्ञम्)** विद्वत्सत्कारादिकम् **(बोधतम्)** विजानीतम् **(हवस्य)** दातुमादातुमर्हस्य **(मे)** मम **(सत्तः)** प्रतिष्ठितः **(होता)** दाता **(निविदः)** नितरां विदन्ति याभ्यस्ता वाचः। **निविदिति वाङ्नामसु पठितम्।** (निघं०१.११) **(पूर्व्याः)** पूर्वैर्विद्वद्भिः सेविताः **(अनु) (अच्छ)** अत्र **निपातस्य चे**ति दीर्घः। **(राजाना)** देदीप्यमानावध्यापकोपदेशकौ **(नमः)** अन्नम् **(एति)** आप्नोति **(आवृतम्)** समन्तादाच्छादितम् **(प्रशास्त्रात्) (आ) (पिबतम्) (सोम्यम्)** यत्सोममर्हति तत् **(मधु)** मधुरगुणोपेतेम्॥६॥

अन्वयः-हे राजाना! मे हवस्य यज्ञं जुषेथां पूर्व्या निविदोऽच्छानुबोधतं यथा सत्तो होता आवृतं नम एति तथा युवां प्रशास्त्रात् सोम्यं मध्वा पिबतम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽध्यापका उपदेष्टारश्च युष्मान् प्रति प्रीत्या विद्यादानसत्योपदेशाभ्यां सह वर्त्तन्ते तथा यूयमपि वर्त्तध्वमिति॥६॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति षट्त्रिंशत्तमं सूक्तं पञ्चविंशो वर्गः सप्तमोऽध्यायश्च समाप्तः॥

पदार्थः-हे **(राजना)** राजजनो! **(मे)** मेरे **(हवस्य)** देने-लेने योग्य व्यवहार सम्बन्धी **(यज्ञम्)** विद्वानों के सत्कार आदि काम को **(जुषेथाम्)** सेवो। **(पूर्व्याः)** पूर्व विद्वानों ने सेवन की हुई **(निविदः)** जिनसे निरन्तर विषयों को जानते हैं, उन वाणियों को **(अच्छ)** अच्छे प्रकार **(अनु, बोधतम्)** अनुकूलता से जानो। जैसे **(सत्तः)** प्रतिष्ठित **(होता)** देनेवाला **(आवृतम्)** अत्युत्तमता से ढपे हुए **(नमः)** अन्न को **(एति)** प्राप्त होता है, वैसे तुम दोनों **(प्रशास्त्रात्)** उत्तम शिक्षा करनेवाले से **(सोम्यम्)** शान्ति वा शीतलता के योग्य **(मधु)** मधुर गुणयुक्त रस को **(आ, पिबतम्)** अच्छे प्रकार पिओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पढ़ाने वा उपदेश करनेवाले आप लोगों के प्रति प्रीति से विद्यादान और सत्योपदेश के साथ वर्त्तमान हैं, वैसे आप भी वर्त्तें॥६॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह छत्तीसवां सूक्त पचीसवां वर्ग और सप्तमाध्याय समाप्त हुआ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां परमविदुषां श्रीविरजानन्दसरस्वतीस्वामिनां शिष्येण परमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्य्यभाषाभ्यां समन्विते सुप्रमाणयुक्ते ऋग्वेदभाष्ये द्वितीयाष्टके सप्तमोऽध्याय आदितः पञ्चदशोऽध्यायः परिपूर्णः। इति॥

ओ३म्

अथाष्टमाध्यायारम्भः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

मन्दस्वेत्यस्य षड्चस्य सप्तत्रिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। १-४ द्रविणोदाः। ५ अश्विनौ। ६ अग्निश्च देवताः। १, ५ निचृज्जगती। २ जगती। ३ विराड् जगती छन्दः। निषादः स्वरः। ४, ६ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्गुणानाह॥

अब छः ऋचावाले सैंतीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के गुणों का उपदेश करते हैं॥

मन्द॑स्व हो॒त्रादनु॒ जोष॒मन्ध॒सोऽध्व॑र्यव॒: स पूर्णां॑ व॒ष्ट्यासिच॑म्।
तस्मा॑ ए॒तं भ॑रत तद्व॒शो द॒दिर्हो॑त्रात्सोमं॑ द्रविणोदः॒ पिब॑ ऋ॒तुभि॑:॥ १॥

मन्द॑स्व। हो॒त्रात्। अनु॑। जोष॑म्। अन्ध॑सः। अध्व॑र्यवः। सः। पूर्णा॑म्। व॒ष्टि॒। आ॒ऽसिच॑म्। तस्मै॑। ए॒तम्। भ॒र॒त॒। त॒त्ऽव॒शः। द॒दिः। हो॒त्रात्। सोम॑म्। द्र॒वि॒ण॒ःऽदः। पिब॑। ऋ॒तुऽभि॑:॥ १॥

पदार्थः-(मन्दस्व) आनन्द **(होत्रात्)** आदानात् **(अनु) (जोषम्)** प्रीतिम् **(अन्धसः)** अन्नस्य **(अध्वर्यवः)** य आत्मानमध्वरमिच्छवस्ते **(सः) (पूर्णाम्) (वष्टि)** कामयते **(आसिचम्)** समन्तात्सेचकम् **(तस्मै) (एतम्) (भरत)** धरत। अत्र **बहुलं छन्दसी**ति शपः श्लुर्न। **(तद्वशः)** तदिच्छः **(ददिः)** दाता **(होत्रात्)** दातुः **(सोमम्) (द्रविणोदः)** यो द्रविणो ददाति तत्सम्बुद्धौ **(पिब) (ऋतुभिः)** वसन्तादिभिः॥ १॥

अन्वयः-हे द्रविणोदस्त्वं होत्रादन्धसो जोषमनु मन्दस्व। यथा स विद्वान् पूर्णामासिचं वष्टि तथा हे अध्वर्यवो! यूयं तस्मा एतं भरत। हे द्रविणोदस्तद्वशो ददिस्त्वमृतुभिः सह होत्रात्सोमं पिब॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः परस्परेभ्यो विद्याधनधान्यादीनि दत्वा सततमानन्दितव्यम्॥ १॥

पदार्थः-हे **(द्रविणोदः)** धन देनेवाले! आप **(होत्रात्)** लेने से **(अन्धसः)** अन्न की **(जोषम्)** प्रीति का **(अनु, मन्दस्व)** अनुमोदन करो और जैसे **(सः)** वह विद्वान् **(पूर्णाम्)** पूर्ण वृष्टि को

(आसिचम्) अच्छे प्रकार सींचनेवाले की **(वष्टि)** कामना करता है, वैसे हे **(अध्वर्यवः)** अपने को यज्ञ की इच्छा करनेवाले! तुम **(तस्मै)** उसके लिये **(एतम्)** इसको **(भरत)** धारण करो। हे धन देनेवाले पुरुष! **(तद्वशः)** उसकी इच्छावान् **(ददिः)** दाता आप **(ऋतुभिः)** वसन्तादि ऋतुओं के साथ **(होत्रात्)** देनेवाले से **(सोमम्)** ओषधियों के रस को **(पिब)** पिओ॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को परस्पर के लिये विद्या, धन और धान्य आदि पदार्थ देकर निरन्तर आनन्द करना चाहिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यमु॒ पू॒र्वमहु॑वे॒ तमि॒दं हु॑वे॒ सेदु॒ हव्यो॑ द॒दिर्यो नाम॒ पत्य॑ते।
अ॒ध्व॒र्युभि॒: प्रस्थि॑तं सो॒म्यं मधु॑ पो॒त्रात्सोमं॑ द्रविणोदः॒ पिब॑ ऋ॒तुभि॑:॥२॥

यम्। ऊ॒म् इति॑। पूर्व॑म्। अहु॑वे। तम्। इ॒दम्। हु॒वे॒। सः। इत्। ऊ॒म् इति॑। हव्यः॑। द॒दिः॑। यः। नाम॑। पत्य॑ते। अ॒ध्व॒र्युऽभि॑:। प्रऽस्थि॑तम्। सो॒म्यम्। मधु॑। पो॒त्रात्। सोम॑म्। द्र॒वि॒णः॒ऽद॒। पिब॑। ऋ॒तुऽभि॑:॥२॥

पदार्थः-**(यम्)** **(उ)** वितर्के **(पूर्वम्)** **(अहुवे)** जुहोमि। अत्र **बहुलं छन्दस्यमाङ्योगेऽपी**त्यडागमः। **(तम्)** **(इदम्)** **(हुवे)** गृह्णामि **(सः)** **(इत्)** एव **(उ)** **(हव्यः)** ग्रहीतुमर्हः **(ददिः)** दाता **(यः)** **(नाम)** **(पत्यते)** पतिं कुर्वते **(अध्वर्युभिः)** आत्मनो हिंसामनिच्छुभिः **(प्रस्थितम्)** ओषधिभ्यो निष्पादितम् **(सोम्यम्)** सोमार्हम् **(मधु)** मधुरगुणयुक्तम् **(पोत्रात्)** पवित्रकर्त्तुः **(सोमम्)** महौषधिरसम् **(द्रविणोदः)** धनप्रद **(पिब)** **(ऋतुभिः)**॥२॥

अन्वयः-हे द्रविणोदो! यथा यो ददिर्हव्योऽहं यमु पूर्वमहुवे सोऽहं तमिदं नामेदु पत्यते हुवे। अध्वर्युभिर्ऋतुभिस्सह वर्त्तमानो यथाऽहं प्रस्थितं सोम्यं मधु पिबामि तथा पोत्रात्सोमं त्वं पिब॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽविद्वांसो विद्वद्भिः सह सङ्गत्यान्नपानादिकं सुपरीक्ष्य सेवन्ते ते सुखिनो भवन्ति॥२॥

पदार्थः-हे **(द्रविणोदः)** धन देनेवाले! जैसे **(यः)** जो **(ददिः)** देनेवाला **(हव्यः)** ग्रहण करने योग्य मैं **(यम्, उ)** जिसको **(पूर्वम्)** प्रथम **(अहुवे)** होमता हूं **(सः)** सो मैं **(तम्)** उस **(इदम्)** इसको **(नाम)** प्रसिद्ध **(इत्)** ही **(उ)** तर्क-वितर्क के साथ **(पत्यते)** पति करने अर्थात् रक्षक की इच्छा करनेवाले के लिये **(हुवे)** ग्रहण करता हूं। और **(अध्वर्युभिः)** अपने को हिंसा न चाहनेवाले जनों तथा **(ऋतुभिः)** वसन्तादि ऋतुओं के साथ वर्त्तमान जैसे मैं **(प्रस्थितम्)** ओषधियों

से निकाले हुए **(सोम्यम्)** सोम के योग्य **(मधु)** मधुरगुणयुक्त रस को पीता हूं, वैसे **(पोत्रात्)** पवित्र करनेवाले से **(सोमम्)** महौषधियों के रस को तू **(पिब)** पी॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अविद्वान् पुरुष विद्वानों के साथ सङ्गति कर अन्न-पान आदि की अच्छी परीक्षा करके उसको सेवते हैं, वे सुखी होते हैं॥॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन् वीळयस्वा वनस्पते।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ ३॥

मेद्यन्तु। ते। वह्नयः। येभिः। ईयसे। अरिषण्यन्। वीळयस्व। वनस्पते। आऽयूय। धृष्णो इति। अभिऽगूर्य। त्वम्। नेष्ट्रात्। सोमम्। द्रविणः ऽदः। पिब। ऋतुऽभिः॥ ३॥

पदार्थः-**(मेद्यन्तु)** आत्मनो मेदं स्नेहमिच्छन्तु **(ते)** तव **(वह्नयः)** वोढारः। **वह्नयो वोढार** (निरु०८.३) इति यास्कः। **(येभिः)** यैः **(ईयसे)** प्राप्नोषि **(अरिषण्यन्)** **[न]** द्रविणमिच्छुः **(वीळयस्व)** स्तुहि। अत्रा**ऽन्येषामपी**ति दीर्घः। **(वनस्पते)** वनस्य किरणसमूहस्य पालक **(आयूय)** संमेल्य। अत्र **निपातस्य चे**ति दीर्घः। **(धृष्णो)** प्रगल्भ **(अभिगूर्य)** अभित उद्यमं कृत्वा। अत्रापि पूर्ववद्दीर्घः। **(त्वम्)** **(नेष्ट्रात्)** प्रापणात् **(सोमम्)** रसम् **(द्रविणोदः)** धनस्य दातः **(पिब)** **(ऋतुभिः)** वसन्तादिभिः सह॥ ३॥

अन्वयः-हे द्रविणोदो वनस्पते धृष्णो! त्वं यथा वह्नयस्ते सोमं मेद्यन्तु येभिः सहेयसे तथा तैः सहाऽरिषण्यन् वीळयस्व, अभिगूर्यायूय नेष्ट्रात् त्वमृतुभिः सह सोमं पिब॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि केनचिदनुद्यमिना स्थातव्यमृतून् प्रत्यनुकूलं व्यवहारं कृत्वा सुखं वर्द्धनीयम्॥ ३॥

पदार्थः-हे **(द्रविणोदः)** धन के देने और **(वनस्पते)** किरण समूह की रक्षा करनेवाले **(धृष्णो)** प्रगल्भ! आप जैसे **(वह्नयः)** पदार्थ पहुँचानेवाले **(ते)** आपके **(सोमम्)** ओषध्यादि रस को **(मेद्यन्तु)** सचिक्कण अपने को चाहें वा **(येभिः)** जिनके साथ आप **(ईयसे)** प्राप्त होते हो, वैसे उनके साथ **(अरिषण्यन्)** धन की न काङ्क्षा करते हुए **(वीळयस्व)** स्तुति कीजिये **(अभिगूर्य)** और सब ओर से उद्यम कर **(आयूय)** और मेल कर **(नेष्ट्रात्)** प्राप्ति से **(त्वम्)** आप **(ऋतुभिः)** वसन्तादि ऋतुओं के साथ **(सोमम्)** ओषध्यादि के रस को **(पिब)** पिओ॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। किसी को विना उद्यम के न रहना चाहिये और ऋतुओं के प्रति अनुकूल व्यवहार करके सुख बढ़ाना चाहिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अपा॑द्धो॒त्रादु॒त पो॒त्राद॑मत्तो॒त ने॒ष्ट्राद॑जुषत॒ प्रयो॑ हि॒तम्।
तु॒रीय॑ं पात्र॒ममृ॑क्त॒ममर्त्यं द्रविणो॒दाः पि॑बतु द्राविणोद॒सः॥४॥

अपा॑त्। हो॒त्रात्। उ॒त। पो॒त्रात्। अ॒मत्त॒। उ॒त। ने॒ष्ट्रात्। अ॒जु॒ष॒त॒। प्रयः॑। हि॒तम्। तु॒रीय॑म्। पात्र॑म्। अमृ॑क्तम्। अम॑र्त्यम्। द्र॒वि॒ण॒ःऽदाः। पि॒ब॒तु॒। द्रा॒वि॒ण॒ःऽद॒सः॥४॥

पदार्थः-(**अपात्**) पिबेत् (**होत्रात्**) हवनात् (**उत**) (**पोत्रात्**) पवित्रात् (**अमत्त**) हृष्यतु (**उत**) (**नेष्ट्रात्**) (**अजुषत**) (**प्रयः**) कमनीयमन्नादिकम् (**हितम्**) सुखकरम् (**तुरीयम्**) चतुर्थम् (**पात्रम्**) दातुं योग्यम् (**अमृक्तम्**) अकोमलम् (**अमर्त्यम्**) मरणधर्मरहितम् (**द्राविणोदाः**) यो द्रविणं ददाति सः (**पिबतु**) (**द्रविणोदसः**) यो द्रविणमत्ति तस्य। **ऋत्विजोऽत्र द्रविणोदस उच्यन्ते हविषो दातारस्ते चैनं जनयन्ति।** (निरु०८.२)॥४॥

अन्वयः-हे मनुष्या! यथा द्रविणोदा होत्रादुत पोत्रात्प्रयो हितमपादमत्त उत नेष्ट्रादजुषत तथा द्रविणोदसः प्रयो हितं तुरीयममर्त्यममृक्तं पात्रं पिबतु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये हवनेन पवित्रीकरणे प्रापणेन हितं साद्धुं शक्नुवन्ति ते प्रीतिमन्तो जायन्ते॥४॥

पदार्थः-हे मनुष्यो! जैसे (**द्रविणोदाः**) धन देनेवाला (**होत्रात्**) हवन से (**उत**) और (**पोत्रात्**) पवित्र व्यवहार से (**प्रयः**) मनोहर अन्नादि पदार्थ (**हितम्**) जो कि सुख करनेवाला है, उसको (**अपात्**) पीये, (**अमत्त**) हर्ष को प्राप्त हो (**उत**) और (**नेष्ट्रात्**) पदार्थ प्राप्ति से (**अजुषत**) प्रसन्न हो। वैसे (**द्रविणोदसः**) जो धन को भोगता उस ऋत्विज् का मनोहर अन्नादि पदार्थ जो सुख करनेवाला (**तुरीयम्**) चतुर्थ (**अमर्त्यम्**) नष्ट होनेपन से रहित (**अमृक्तम्**) अकोमल (**पात्रम्**) जो पीने योग्य है उसको (**पिबतु**) पिओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो हवन से अपवित्र को पवित्र करनेवाली प्राप्ति से हित साध सकते हैं, वे प्रीतिमान् होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒र्वाञ्च॑म॒द्य य॒य्यं॑ नृ॒वाह॑णं॒ रथं॑ युञ्जाथामि॒ह वां॑ वि॒मोच॑नम्।
पृ॒ङ्क्तं ह॒वीं॑षि॒ मधु॒ना हि कं॒ गत॑मथा॒ सोमं॑ पिबतं वाजिनीवसू॥५॥

अ॒र्वाञ्च॑म्। अ॒द्य। य॒य्य॑म्। नृ॒ऽवाह॑नम्। रथ॑म्। यु॒ञ्जा॒था॒म्। इ॒ह। वा॒म्। वि॒ऽमोच॑नम्। पृ॒ङ्क्तम्। ह॒वीं॑षि। मधु॑ना। हि। क॒म्। गत॑म्। अथ॑। सोम॑म्। पि॒ब॒त॒म्। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू॥५॥

पदार्थः-(अर्वाञ्चम्) अर्वाग् गामिनम् **(अद्य)** **(यय्यम्)** ययिं यातारम्। अत्र **आदृगमहने**ति किः प्रत्ययः। **अमि पूर्व** इत्यत्र **वाच्छन्दसी**त्यनुवर्त्तनात्पूर्वसवर्णाभावपक्षे यणादेशः। **(नृवाहणम्)** यो नॄन् वहति तम् **(रथम्)** **(युञ्जाथाम्)** **(इह)** अस्मिन् याने **(वाम्)** युवयोः **(विमोचनम्)** **(पृङ्क्तम्)** संयोजयतम् **(हवींषि)** दातुमादातुं योग्यानि वस्तूनि **(मधुना)** मधुरेण गुणेन सह **(हि)** किल **(कम्)** देशम् **(गतम्)** प्राप्नुतम् **(अथ)** आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। **(सोमम्)** **(पिबतम्)** **(वाजिनीवसू)** यौ वाजिनीं वेगवतीं क्रियां वासयतस्तौ॥५॥

अन्वयः-हे वाजिनीवसू शिल्पिनौ! युवामद्य यय्यमर्वाञ्चं नृवाहणं रथं युञ्जाथामिह मधुना सह वर्त्तमानानि हवींषि पृङ्क्त हि कं गतं सोमं पिबतमथ वां विमोचनमस्तु॥५॥

भावार्थः-यौ शिल्पविद्याऽध्यापकाऽध्येतारावग्निजलादिभिः काष्ठादिभिर्निर्मितानि यानानि चालयित्वा देशान्तरं गत्वा धनमुन्नयन्ति ते सततं सुखं प्राप्नुवन्ति॥५॥

पदार्थः-हे **(वाजिनीवसू)** वेगवती क्रिया को वसानेवाले शिल्पी जनो! तुम **(अद्य)** आज **(यय्यम्)** जो अच्छे प्रकार पहुँचाता हुआ **(अर्वाञ्चम्)** नीचे-नीचे चलनेवाला **(नृवाहणम्)** और मनुष्यों को पहुँचाता है उस **(रथम्)** रमणीय मनोहर यान को **(युञ्जाथाम्)** जोड़ो और **(इह)** इस यान में **(मधुना)** मधुर गुण के साथ वर्त्तमान जो **(हवींषि)** देने-लेने योग्य वस्तु हैं, उनको **(पृङ्क्तम्)** संयुक्त कराओ **(हि)** और निश्चय से **(कम्)** किस देश को **(गतम्)** प्राप्त होओ **(सोमम्)** तथा ओषध्यादि रस को **(पिबतम्)** पिओ **(अथ)** इसके अनन्तर **(वाम्)** तुम दोनों का **(विमोचनम्)** विशेषता से छूटना हो॥५॥

भावार्थः-जो शिल्पविद्या के पढ़ाने और पढ़नेवाले काष्ठादिकों से निर्माण किये यानों को अग्नि और जलादि से चला और देशान्तर में जाकर धन को अच्छे प्रकार उन्नत करते हैं, वे निरन्तर सुख पाते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जोष्य॑ग्ने स॒मिधं॒ जोष्याहु॑तिं॒ जोषि॒ ब्रह्म॒ जन्यं॒ जोषि॑ सुष्टु॒तिम्।

विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः॥ ६॥ १॥

जोषि। अग्ने। सम्ऽइध्मम्। जोषि। आऽहुतिम्। जोषि। ब्रह्म। जन्यम्। जोषि। सुऽस्तुतिम्। विश्वेभिः। विश्वान् ऋतुना। वसो इति। महः। उशन्। देवान्। उशतः। पायय। हविः॥ ६॥

पदार्थः-(जोषि) जुषसे सेवसे। अत्र **बहुलं छन्दसी**ति शविकरणस्य लुक् व्यत्ययेन परस्मैपदं च। **(अग्ने)** विद्वन् **(समिधम्)** प्रदीपिकाम् **(जोषि) (आहुतिम्)** वेद्यां प्रक्षिप्ताम् **(जोषि) (ब्रह्म)** अन्नम् **(जन्यम्)** जनितुं योग्यम् **(जोषि) (सुष्टुतिम्)** शोभनां प्रशंसाम् **(विश्वेभिः)** सर्वैः **(विश्वान्)** सर्वान् **(ऋतुना)** वसन्ताद्येन **(वसो)** वासयितः **(महः)** महतः **(उशन्)** कामयमानः **(देवान्)** विदुषः **(उशतः)** कामयमानान् **(पायय)**। अत्राऽन्येषामपीति दीर्घः। **(हविः)** दातव्यं वस्तु॥ ६॥

अन्वयः-हे अग्ने! वसोऽग्निरिव त्वं यतो समिधं जोष्याहुतिं जोषि ब्रह्म विश्वान् जोषि जन्यं सुष्टुतिं च जोषि तस्माद्विश्वेभिर्ऋतुना च सह मह उशतो देवानुशंस्त्वमेतान् हविः पायय॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युदग्निः काष्ठादीन् पदार्थान् सेवित्वाऽपि न दहति तथैव सर्वैः सह वसित्वैतेषां नाशो न कर्त्तव्य एवं सति कामसिद्धिर्जायत इति॥ ६॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्बोध्या॥

इति सप्तत्रिंशत्तमं सूक्तमेको वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वान्! **(वसो)** निवास करानेवाले अग्नि के समान आप जिस कारण **(समिधम्)** प्रदीप्त करनेवाली क्रिया को **(जोषि)** सेवते **(आहुतिम्)** वेदी में डाली हुई वस्तु **(जोषि)** सेवते **(ब्रह्म)** अन्न और **(विश्वान्)** सब पदार्थों का **(जोषि)** सेवन करते **(जन्यम्)** उत्पन्न करने योग्य पदार्थ वा **(सुष्टुतिम्)** सुन्दर प्रशंसा को **(जोषि)** सेवते इस कारण **(विश्वेभिः)** सब **(ऋतुना)** वसन्त आदि ऋतुसमूह के साथ **(महः)** बड़े-बड़े **(उशतः)** कामना करनेवाले **(देवान्)** विद्वानों की **(उशन्)** कामना करते हुए आप उनको **(हविः)** देने योग्य वस्तु **(पायय)** पियाओ॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुलीरूप अग्नि काष्ठ आदि पदार्थों का सेवन करके भी नहीं जलाता, वैसे ही सबके साथ बसकर उनका नाश न करना चाहिये, ऐसे होने पर कामसिद्धि होती है॥ ६॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सैंतीसवां सूक्त और प्रथम वर्ग समाप्त हुआ॥

उद्वित्यष्टत्रिंशत्तमस्यैकादशर्चस्य सूक्तस्य गृत्समद ऋषिः। सविता देवता। १, ५ निचृत् त्रिष्टुप्। २ त्रिष्टुप्। ३, ४, ६, १०, ११ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ७, ८ स्वराट् पङ्क्तिः। ९ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेश्वरविषयमाह॥

अब अड़तीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में ईश्वर के विषय को कहते हैं॥

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात्।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ॥ १॥

उत्। ऊम् इति। स्यः। देवः। सविता। सवाय। शश्वत्ऽतमम्। तत्ऽअपाः। वह्निः। अस्थात्। नूनम्। देवेभ्यः। वि। हि। धाति। रत्नम्। अथ। आ। अभजत्। वीतिऽहोत्रम्। स्वस्तौ॥ १॥

पदार्थः-(उत) (उ) **(स्यः)** सः **(देवः)** **(सविता)** सकलजगदुत्पादकः **(सवाय)** उत्पादनाय **(शश्वत्तमम्)** अनादिस्वरूपमनुत्पन्नं कारणम् **(तदपाः)** तदपः कर्म यस्य सः **(वह्निः)** वोढा **(अस्थात्)** तिष्ठति **(नूनम्)** निश्चितम् **(देवेभ्यः)** क्रीडमानेभ्योः जीवेभ्यः **(वि)** **(हि)** किल **(धाति)** दधाति **(रत्नम्)** रमणीयं जगत् **(अथ)** आनन्तर्ये **(आ)** **(अभजत्)** सेवते **(वीतिहोत्रम्)** गृहीतेश्वरव्याप्तिम् **(स्वस्तौ)** सुखे॥ १॥

अन्वयः-यो वह्निस्तदपाः सविता देवो जगदीश्वरः सवाय शश्वत्तमं देवेभ्यो नूनमुदस्थात्। उ स्यो हि रत्नं विधाति अथ स्वस्तौ वीतिहोत्रं जगदभजत्॥ १॥

भावार्थः-हे मनुष्या! यदनादि त्रिगुणात्मकं प्रकृतिस्वरूपं जगत्कारणमस्ति तस्मादेव सर्वं जगदुत्पाद्य यो धरति तस्मात्सर्वे जीवाः स्वंस्वं शरीरं कर्मफलं च सेवन्ते, यदीदं जगदीश्वरो नोत्पादयेत्तर्हि कोऽपि जीवः शरीरादि प्राप्तुं न शक्नुयात्॥ १॥

पदार्थः-जो **(वह्निः)** पहुँचनेवाला **(तदपाः)** जिसका पहिचानना ही कर्म है **(सविता)** सकल जगत् का उत्पादनकर्त्ता **(देवः)** देदीप्यमान जगदीश्वर **(सवाय)** उत्पन्न करने के लिये **(शश्वत्तमम्)** अनादिस्वरूप अनुत्पन्न कारण को **(देवेभ्यः)** क्रीड़ा करते हुए जीवों से **(नूनम्)** निश्चित **(उदस्थात्)** उपस्थित होता है **(उ)** और **(स्यः)** वह **(हि)** ही **(रत्नम्)** रमणीय जगत् को **(वि, धाति)** विधान करता है **(अथ)** इसके अनन्तर **(स्वस्तौ)** सुख के निमित्त **(वीतिहोत्रम्)** ग्रहण की ईश्वर की व्याप्ति में अपनी व्याप्ति जिसमें ऐसे जगत् को **(अभजत्)** सेवता है॥ १॥

भावार्थः-हे मनुष्यो! जो अनादि त्रिगुणात्मक प्रकृतिस्वरूप जगत् का कारण है, उसी से सब जगत् को उत्पन्न कर जो धारण कर रहा है, उससे सब जीव निज-निज शरीर और कर्म को सेवते हैं, जो इस जगत् को जगदीश्वर न उत्पादन करे तो कोई भी जीव शरीरादि न पा सके॥१॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहा है॥

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन्॥२॥

विश्वस्य। हि। श्रुष्टये। देवः। ऊर्ध्वः। प्र। बाहवा। पृथुऽपाणिः। सिसर्ति। आपः। चित्। अस्य। व्रते। आ। निऽमृग्राः। अयम्। चित्। वातः। रमते। परिऽज्मन्॥२॥

पदार्थः-(**विश्वस्य**) जगतो मध्ये (**हि**) खलु (**श्रुष्टये**) शीघ्रत्वाय (**देवः**) दिव्यसुखप्रदः (**ऊर्ध्वः**) ऊर्ध्वं स्थित उत्कृष्टः (**प्र**) (**बाहवा**) बाहू। अत्र **सुपां सुलगि**ति आकारादेशः। (**पृथुपाणिः**) पृथवो विस्तीर्णः पाणिरिव किरणा यस्य सः (**सिसर्त्ति**) गच्छति (**आपः**) जलानि (**चित्**) (**अस्य**) (**व्रते**) शीले (**आ**) (**निमृग्राः**) नितरां शुद्धिहेतवः (**अयम्**) (**चित्**) (**वातः**) वायुः (**रमते**) क्रीडते (**परिज्मन्**) परितः सर्वतो व्याप्तः॥२॥

अन्वयः-हे मनुष्या! योऽयं परिज्मन् वातो रमतेऽस्य व्रते निमृग्रा आपश्चिदारमन्ते यो विश्वस्य मध्य ऊर्ध्वः पृथुपाणिर्देवः सविता श्रुष्टये बाहवा चिदिव प्र सिसर्त्ति एतत्सर्वं परमेश्वरे हि वर्त्तते॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि परमेश्वरो भूमिजलाग्निपवनान् न निर्मिमीते तर्हि किञ्चिदपि स्वयमुत्पत्तुं न शक्नुयात्॥२॥

पदार्थः-हे मनुष्यो! जो (**अयम्**) यह (**परिज्मन्**) सब ओर से व्याप्त होता हुआ (**वातः**) पवन (**रमते**) क्रीड़ा को करता है (**अस्य**) इसके (**व्रते**) शीलस्वभाव के निमित्त (**निमृग्राः**) निरन्तर शुद्धि के हेतु (**आपः**) जल (**चित्**) भी (**आ**) अच्छे प्रकार रमण करते हैं, जो (**विश्वस्य**) जगत् के बीच (**ऊर्ध्वः**) ऊपर स्थित (**पृथुपाणिः**) जिसके विस्तीर्ण हाथों के समान किरण वह (**देवः**) दिव्य सुख देनेवाला (**सविता**) जगत् का उत्पन्न करनेवाला (**श्रुष्टये**) शीघ्रता के लिये (**बाहवा**) भुजाओं के (**चित्**) समान (**प्र, सिसर्त्ति**) जाता है, वह सब उक्त वृत्तान्त परमेश्वर के बीच में (**हि**) ही वर्त्तमान है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो परमेश्वर भूमि, जल, अग्नि और पवनों को न बनाता तो कुछ भी अपने-आप उत्पन्न न हो सके॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ॒शुभि॑श्चि॒द्यान्वि मु॑चाति॒ नून॑मरी॑रम॒दत॑मानं चि॒देतो॑:।
अ॒ह्यर्षू॑णां चि॒न्नय॑याँ अवि॒ष्यामनु॑ व्र॒तं स॑वि॒तुर्मोक्या॑गात्॥ ३॥

आ॒शुऽभि॑:। चि॒त्। यान्। वि। मु॒चा॒ति॒। नू॒नम्। अरी॑रमत्। अत॑मानम्। चि॒त्। एतो॑:। अ॒ह्यर्षू॑णाम्। चि॒त्। नि। अ॒या॒न्। अ॒वि॒ष्याम्। अनु॑। व्र॒तम्। स॒वि॒तुः। मोकी॑। आ। अ॒गा॒त्॥ ३॥

पदार्थः-(आशुभिः) अश्वैरिव क्षिप्रकारिभिः **(चित्)** अपि **(यान्) (वि) (मुचाति)** मुच्यात्। अत्र लेटि **छान्दसो वर्णलोप** इति न लोपः। **(नूनम्)** निश्चितम् **(अरीरमत्)** रमयति **(अतमानम्)** अततं सततं प्राप्तम्। अत्र व्यत्येनात्मनेपदम्। **(चित्)** अपि **(एतोः)** एताम् **(अह्यर्षूणाम्)** येऽहिं मेघं प्राप्नुवन्ति तेषाम् **(चित्) (नि) (अयान्)** प्राप्तान् **(अविष्याम्)** रक्षाम्। अत्राऽवधातोरौणादिकः स्यः प्रत्ययः। **(अनु) (व्रतम्)** शीलं नियमं वा **(सवितुः)** जगदीश्वरस्य **(मोकी)** रात्रि। **मोकीति रात्रिनामसु पठितम्।** (निघं०१.७) **(आ) (अगात्)** प्राप्नोति॥ ३॥

अन्वयः-या मोक्याशुभिर्यानयान् वि मुचात्येतोरतमानं चिन्नूनमरीरमदह्यर्षूणां चिदविष्यां सवितुरनुव्रतं न्यागात्। एतच्चिदीश्वरनियमाद्भवति॥ ३॥

भावार्थः-यदीश्वरो नियमेन पृथिवीं न भ्रामयेत्तर्हि सुखप्रदा रात्रिर्न निवर्त्तेत पृथिव्यां यावन्देशसूर्य्यसन्निधौ भवति तत्र दिनमपरस्मिन् रात्रिश्च सततं वर्त्तेते॥ ३॥

पदार्थः-जो **(मोकी)** रात्रि **(आशुभिः)** घोड़ों के समान शीघ्रकारी पदार्थों से **(यान्)** जिन **(अयान्)** प्राप्त वस्तुओं को **(वि, मुचाति)** छोड़े **(एतोः)** इसको **(अतमानम्)** निरन्तर प्राप्त **(चित्)** भी पदार्थ **(नूनम्)** निश्चय करके **(अरीरमत्)** रमण करता है **(अह्यर्षूणाम्)** और जो मेघ को प्राप्त होते हैं, उन पदार्थों की **(चित्)** भी **(अविष्याम्)** रक्षा को **(सवितुः)** जगदीश्वर का जैसे **(अनुव्रतम्)** अनुकूल वा नियम, वैसे **(नि, आ, अगात्)** प्राप्त होता है, यह उक्त समस्त काम **(चित्)** भी जगदीश्वर के नियम से होता है॥ ३॥

भावार्थः-यदि ईश्वर नियम से पृथिवी को न भ्रमावे तो सुख देनेवाली रात्रि न सिद्ध हो, पृथिवी में जितना देश सूर्य के निकट होता है, उसमें दिन और दूसरे में रात्रि ये दोनों निरन्तर वर्त्तमान हैं॥ ३॥

अथ सूर्यलोकविषयमाह॥

अब सूर्यलोक विषय को अगले मन्त्र में कहा है॥

पुन॒: सम॑व्यद्वित॒तं॒ वय॑न्ती म॒ध्या कर्तो॒र्न्य॑धा॒च्छक्म॒ धीर॑:।

उत्सं॒हायां॑स्था॒व्यू१॑तूँ॒र्दर्ध॒र॒र्म॑तिः सवि॒ता दे॒व आगा॑त्॥४॥

पुन॒रिति॑। सम्। अ॒व्य॒त्। विऽत॑तम्। वय॑न्ती। म॒ध्या। कर्त्तो॑:। नि। अ॒धा॒त्। शक्म॑। धीर॑:। उत्। सम्ऽहाय॑। अ॒स्था॒त्। वि। ऋ॒तून्। अ॒द॒र्ध॒:। अ॒र्म॑तिः। स॒वि॒ता। दे॒व:। आ। अ॒गा॒त्॥४॥

पदार्थः-(पुनः) (सम्) (अव्यत्) व्याप्नोति। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(विततम्)** व्याप्तम् **(वयन्ती)** गच्छन्ती **(मध्या)** आकाशस्य मध्ये भवा **(कर्त्तोः)** कर्त्तव्यं गमनाद्यगन्तव्यं कर्म **(नि) (अधात्)** दधाति **(शक्म)** शक्यं कर्म **(धीरः)** धीमान् **(उत्) (संहाय)** सम्यक् त्यक्त्वा **(अस्थात्)** तिष्ठति **(वि) (ऋतून्)** वसन्तादीन् **(अदर्धः)** भृशं विदारयति। अत्र वर्णव्यत्ययेन दस्य स्थाने धः। **(अरमतिः)** न रमती रमणं विद्यते यस्य सः **(सविता)** सूर्यलोकः **(देवः)** प्रकाशमानः **(आ) (अगात्)** आगच्छति॥४॥

अन्वयः-यो धीरो विद्वान् या मध्या वयन्ती पृथिवी विततं समव्यत् कर्त्तोः शक्म न्यधात् पुनः पूर्वं देशं संहायोत्तरं प्राप्नुवत्युदस्थात् तां जानाति योऽरमतिः सविता देव ऋतून् व्यदर्धः सन्निहितान् पदार्थानागात्तां जानाति स भूगोलखगोलविद्भवति॥४॥

भावार्थः-हे मनुष्या! इमे सर्वे लोका अन्तरिक्षस्था भ्रमणशीला ईश्वरेण नियमं प्रापिताः सन्ति तेषु सूर्यसन्निध्या भ्रमणेन च षड्ऋतवो जायन्त इति वेद्यम्॥४॥

पदार्थः-जो **(धीरः)** धीर बुद्धिमान् **(मध्या)** आकाश के बीच **(वयन्ती)** चलती हुई पृथिवी **(विततम्)** जो पदार्थ अपने में व्याप्त उसको **(सम्, अव्यत्)** सम्यक् व्याप्त होती **(कर्त्तोः)** और करने योग्य जाने-आने के काम को तथा **(शक्म)** शक्ति के अनुकूल जो कर्म है, उसको **(नि, अधात्)** निरन्तर धारण करती है **(पुनः)** फिर पूर्व देश को **(संहाय)** अच्छे प्रकार छोड़ उत्तर अर्थात् दूसरे देश को प्राप्त होती हुई **(उत्, अस्थात्)** स्थित होती उसको जानता है। जो **(अरमतिः)** विना रमण विद्यमान है, वह **(सविता)** सूर्य्यलोकः **(देवः)** प्रकाशमान होता हुआ **(ऋतून्)** ऋतुओं को **(व्यदर्धः)** निरन्तर अलग करता तथा निकट के पदार्थों को **(आ, अगात्)** प्राप्त होता उसको जो जानता है, वह भूगोल और खगोल विद्या का जाननेवाला होता है॥४॥

भावार्थः-हे मनुष्यो! ये सब लोक अन्तरिक्ष में ठहरे हुए भ्रमणशील ईश्वर ने नियम को पहुँचाये हुए हैं, उनमें सूर्य के सन्निकट और भ्रमण से छः ऋतु होते हैं, यह जानना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नानौकां॑सि॒ दुर्यो॒ विश्व॒मायु॒र्वि ति॑ष्ठते प्रभु॒वः शोको॑ अ॒ग्नेः।

ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा॥५॥२॥

नाना। ओकांसि। दुर्यः। विश्वम्। आयुः। वि। तिष्ठते। प्रऽभवः। शोकः। अग्नेः। ज्येष्ठम्। माता। सूनवे। भागम्। आ। अधात्। अनु। अस्य। केतम्। इषितम्। सवित्रा॥५॥

पदार्थः-(नाना) अनेकानि **(ओकांसि)** समवेतानि गृहाणि **(दुर्य्यः)** द्वारवन्ति **(विश्वम्)** सर्वम् **(आयुः)** जीवनम् **(वि)** **(तिष्ठते)** **(प्रभवः)** उत्पत्तिः **(शोकः)** मरणम् **(अग्नेः)** विद्युदादिरूपात् **(ज्येष्ठम्)** प्रशस्यम् **(माता)** जननी **(सूनवे)** सन्तानाय **(भागम्)** भजनीयम् **(अधात्)** **(अनु)** **(अस्य)** सन्तानस्य **(केतम्)** विज्ञानम् **(इषितम्)** इष्टम् **(सवित्रा)** सूर्येण सह॥५॥

अन्वयः-हे मनुष्या! यत्र नाना दुर्य्य ओकांसि सन्ति यत्र सवित्रा सहाग्नेर्विश्वमायुर्वितिष्ठते प्रभवः शोकश्च भवति यत्र माता सूनवे ज्येष्ठं भागमन्वस्येषितं केतमाधात् तस्मिन् वाऽस्मिन् जगति यथावद्वर्त्तितव्यम्॥५॥

भावार्थः-हे मनुष्या! यदि भवतां जन्मानि जातानि तर्हि मरणमपि भविष्यत्यत्र सर्वर्त्तुसुखानि गृहाणि विधाय विद्यावृद्धये पाठशाला निर्माय स्वकन्याः पुत्राँश्च विद्यासुशिक्षायुक्तान् कृत्वा पूर्णमायुर्भुक्त्वा यशो विस्तार्यम्॥५॥

पदार्थः-हे मनुष्यो! जहाँ **(नाना)** अनेक प्रकार के **(दुर्य्यः)** द्वारवान् **(ओकांसि)** घर हैं वा जहाँ **(सवित्रा)** सूर्य्यलोक के साथ **(अग्नेः)** बिजुली आदि रूप अग्नि से **(विश्वम्)** समस्त **(आयुः)** जीवन को **(वि, तिष्ठते)** विशेषता से स्थिर करता है तथा **(प्रभवः)** उत्पत्ति और **(शोकः)** मरण भी होता है, जहाँ **(माता)** जननी **(सूनवे)** सन्तान के लिये **(ज्येष्ठम्)** प्रशंसनीय **(भागम्)** भाग को और **(अनु)** अनुकूल **(अस्य)** इस सन्तान को **(इषितम्)** इष्ट अभीष्ट चाहे हुए **(केतम्)** विज्ञान को **(आ, अधात्)** अच्छे प्रकार धारण करती उसमें वा इस जगत् में यथावत् वर्त्ताव करना चाहिये॥५॥

भावार्थः-हे मनुष्यो! जो तुम्हारे जन्म हुए तो मरण भी होगा, इसके बीच सब ऋतुओं में सुख देनेवाले घरों को बनाकर विद्यावृद्धि के लिये पाठशालायें बनाय अपने कन्या और पुत्रों को विद्या और उत्तम शिक्षायुक्त कर पूर्ण आयु को भोग के यश का विस्तार करना चाहिये॥५॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरतामुमाभूत्।
शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य॥६॥

सम्ऽआववर्ति। विऽस्थितः। जिगीषुः। विश्वेषाम्। कामः। चरताम्। अमा। अभूत्। शश्वान्। अपः। विऽकृतम्। हित्वी। आ। अगात्। अनु। व्रतम्। सवितुः। दैव्यस्य॥६॥

पदार्थः-(समाववर्ति) सम्यगववर्त्यते **(विष्ठितः)** विशेषेण स्थितः **(जिगीषुः)** जयशीलः **(विश्वेषाम्)** सर्वेषाम् **(कामः)** कमिता **(चरताम्)** प्राणभृताम् **(अमा)** गृहम् **(अभूत्)** भवति **(शश्वान्)** शीघ्रगतिमान्। **शश प्लुतगता**विति धातोः क्विबन्तान्मतुप्। **(अपः)** कर्म **(विकृतम्)** प्राप्तविकारम् **(हित्वी)** हित्वा। अत्र **स्नात्व्यादयश्चे**ति निपातनादीत्वम्। **(आ) (अगात्) (अनु) (व्रतम्)** नियमम् **(सवितुः)** जगदुत्पादकस्य **(दैव्यस्य)** देवैर्विद्वद्भिर्लब्धस्य जगदीश्वरस्य॥६॥

अन्वयः-यो विष्ठितो विश्वेषां चरतां सुखस्य कामः शश्वान् जिगीषुरभूद्योऽमा गृहे समाववर्ति विकृतमपो हित्वी दैव्यस्य सवितुर्व्रतमन्वगात् स सुखमप्याप्नोति॥६॥

भावार्थः-ये मनुष्याः सर्वेषु प्राणिषु सुखदुःखव्यवहारे समदर्शिनः परमेश्वरस्योपदेशादविरोधिनः पापाचरणं विहाय निश्चितं धर्ममाचरन्ति ते शाश्वतं सुखं लभन्ते॥६॥

पदार्थः-जो **(विष्ठितः)** विशेषता से स्थित दृढ़ **(विश्वेषाम्)** समस्त **(चरताम्)** प्राण धारनेवालों के सुख की **(कामः)** कामना करने वा **(शश्वान्)** शीघ्र चलने और **(जिगीषुः)** जीतने का शील रखनेवाला **(अभूत्)** होता है वा जो **(अमा)** घर में **(समाववर्ति)** अच्छे प्रकार वर्त्तमान है **(विकृतम्)** विकार को प्राप्त हुए **(अपः)** कर्म को **(हित्वी)** छोड़ के **(दैव्यस्य)** विद्वानों से पाये हुए **(सवितुः)** संसार को उत्पन्न करनेवाले जगदीश्वर के **(व्रतम्)** नियम को **(अनु, आ, अगात्)** अनुकूलता से प्राप्त होता वह सुख को भी प्राप्त होता है॥६॥

भावार्थः-जो मनुष्य सब प्राणियों में सुख-दुःख के व्यवहार में समदर्शी, परमेश्वर के उपदेश से विरोध न करनेवाले और पापाचरण को छोड़ निश्चित धर्माचरण को करते हैं, वे निरन्तर सुख को प्राप्त होते हैं॥६॥

अथेश्वरविषयमाह॥

अब ईश्वर विषय को अगले मन्त्र में कहा है॥

त्वया॑ हि॒तमप्य॑म॒प्सु भा॒गं धन्वान्वा मृ॑गय॒सो॒ वि त॑स्थुः।
वना॑नि॒ विभ्यो॒ नकि॑रस्य॒ ताना॑ व्र॒ता दे॒वस्य॑ सवि॒तुर्मि॑नन्ति॥७॥

त्वया॑। हि॒तम्। अप्य॑म्। अ॒प्ऽसु। भा॒गम्। धन्व॑। अनु॑। आ। मृ॒ग॒यसः॑। वि। त॒स्थुः॒। वना॑नि। विऽभ्यः॑। नकिः॑। अ॒स्य॒। ताना॑। व्र॒ता। दे॒वस्य॑। स॒वि॒तुः॒। मि॒न॒न्ति॒॥७॥

पदार्थः-(त्वया) (हितम्) (अप्यम्) अप्सु प्राणेषु भवम् **(अप्सु)** जलेषु **(भागम्)** भजनीयम् **(धन्व)** अन्तरिक्षम्। **धन्वेत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३)। **(अनु) (आ) (मृगयसः)** मृगादयः **(वि) (तस्थुः)** तिष्ठन्ति **(वनानि) (विभ्यः)** पक्षिभ्यः **(नकिः)** न **(अस्य) (तानि) (व्रता)** व्रतानि गुणकर्मशीलानि **(देवस्य)** कमनीयस्य **(सवितुः)** सकलैश्वर्य्यं प्रापयत ईश्वरस्य **(मिनन्ति)** हिंसन्ति॥७॥

अन्वयः-हे जगदीश्वर! यत्त्वया सह वर्त्तमाना मृगयसः प्राणिनोऽप्सु हितमप्यं भागमन्वा तस्थुर्विभ्यो धन्व वनानि च त्वया निर्मितानि तानि तवाऽस्य सवितुर्देवस्य व्रता केऽपि नकिर्विमिनन्ति॥७॥

भावार्थः-यदीश्वरो भूम्यादिकं भोग्यान् पेयाञ्चूष्यान् लेह्यान् पदार्थान् न निर्मिमीत तर्हि कोऽपि शरीरं जीवनं च धर्त्तुं न शक्नुयात्। ईश्वरेण यदर्था ये नियमाः संस्थापितास्तदुल्लङ्घनं कर्त्तुं कोऽपि समर्थो न भवति॥७॥

पदार्थः-हे जगदीश्वर! जो **(त्वया)** आपके नियम के साथ वर्त्तमान **(मृगयसः)** मृग आदि वन्य प्राणी **(अप्सु)** जलों में **(हितम्)** स्थापित किये हुए वा **(अप्यम्)** प्राणों में प्रसिद्ध हुए **(भागम्)** सेवन करने योग्य अंश को **(अनु, आ, तस्थुः)** अनुकूलता से प्राप्त होते हैं तथा **(विभ्यः)** पक्षियों के लिये **(धन्व)** अन्तरिक्ष और **(वनानि)** वनों को आपने बनाया **(तानि)** उन **(अस्य)** इन आप **(सवितुः)** सकलैश्वर्य्य को प्राप्त करनेवाले **(देवस्य)** मनोहर ईश्वर के **(व्रता)** गुण, कर्म, स्वभावों को कोई भी **(नकिः)** नहीं **(विमिनन्ति)** नष्ट करते हैं॥७॥

भावार्थः-यदि ईश्वर भूमि आदि स्थान तथा भोग्य, पेय, चूष्य, लेह्य, पदार्थों को न बनाये तो कोई भी शरीर और जीवन को धारण नहीं कर सकता। ईश्वर ने जिनके अर्थ जो नियम स्थापन किये हैं, उनके उल्लङ्घन करने को कोई समर्थ नहीं होता॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

या॒द्रा॒ध्यं॑ वरु॑णो॒ योनि॒मप्य॒मनि॑शितं नि॒मिषि॒ जर्भु॑राणः।
विश्वो॑ मार्ता॒ण्डो व्र॒जमा प॒शुर्गा॑त् स्थ॒शो जन्मा॑नि सवि॒ता व्याक॑॥८॥

या॒त्ऽरा॒ध्य॑म्। वरु॑णः। योनि॑म्। अप्य॑म्। अनि॑ऽशितम्। नि॒ऽमिषि॑। जर्भु॑राणः। विश्वः॑। मा॒र्ता॒ण्डः। व्र॒जम्। आ। प॒शुः। गा॒त्। स्थ॒ऽशः। जन्मा॑नि। स॒वि॒ता। वि। आ। अ॒क॒रि॒त्य॑कः॥८॥

पदार्थः-(याद्राध्यम्) ये यान्ति ते यातस्तै राध्यं याद्राध्यं संसाधनीयम् **(वरुणः)** वरो जीवः **(योनिम्)** कारणं वह्निम् **(अप्यम्)** अप्सु भवम् **(अनिशितम्)** अतीक्ष्णम् **(निमिषि)** निमिषादि कालव्यवहारे **(जर्भुराणः)** भृशं धरन् **(विश्वः)** सर्वः **(मार्त्ताण्डः)** मार्त्तण्डे सूर्ये भवः। अत्राऽन्येषामपीति दीर्घः। **(व्रजम्)** गोष्ठानम् **(आ)** **(पशुः)** **(गात्)** प्राप्नुयात् **(स्थशः)** तिष्ठन्तीति स्थास्तानि बहूनि इति स्थशः। अत्र बह्वल्पार्थादिति शस्। **(जन्मानि)** **(सविता)** परमात्मा **(वि)** **(आ)** **(अकः)** करोति॥८॥

अन्वयः-यो विश्वो मार्त्ताण्डो निमिषि जर्भुराणो वरुणो व्रजं पशुरिव याद्राध्यमप्यमनिशितं योनिमा गात् तस्य जीवस्य स्थशो जन्मानि सविता व्यापकः॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यावन्तोऽत्र जगति जीवाः सन्ति ते स्वकीयकर्मजन्यं फलं विद्यमाने शरीरे परस्ताच्च प्राप्नुवन्ति यथा पशुः गोपालेन नियतः सन् प्राप्तव्यं स्थानं प्राप्नोति तथा जगदीश्वरो जीवैरनुष्ठितकर्मानुसारेण सुखदुःखे निकृष्टमध्यमोत्तमानि जन्मानि च ददाति॥८॥

पदार्थः-जो **(विश्वः)** समस्त **(मार्त्ताण्डः)** सूर्य्यलोक में उत्पन्न और **(निमिषि)** निमेषादि कालव्यवहार में **(जर्भुराणः)** निरन्तर धारण करता हुआ **(वरुणः)** श्रेष्ठ जीव **(व्रजम्)** गोंड़े को **(पशुः)** जैसे पशु वैसे **(याद्राध्यम्)** जानेवालों से अच्छे प्रकार सिद्ध होने योग्य **(अप्यम्)** जलों में प्रसिद्ध **(अनिशितम्)** अतीक्ष्ण **(योनिम्)** कारणरूप अग्नि को **(आ, गात्)** प्राप्त होवे, उस जीव के **(स्थशः)** बहुत ठहरनेवाले **(जन्मानि)** जन्मों को **(सविता)** परमात्मा **(व्याकः)** विविध प्रकार से करता है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जितने इस जगत् के जीव हैं, वे अपने कर्मजन्य फल को विद्यमान शरीर में और पीछे भी प्राप्त होते हैं। जैसे पशु गोपाल से नियम में रक्खा हुआ प्राप्तव्य स्थान को प्राप्त होता है, वैसे जगदीश्वर जीवों से अनुष्ठित कर्मों के अनुसार सुख-दुःख और निकृष्ट मध्यम तथा उत्तम जन्मों को देता है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न यस्येन्द्रो॑ वरु॑णो॒ न मि॒त्रो व्र॒तम॑र्य॒मा न मि॒नन्ति॑ रु॒द्रः।
नारा॑तय॒स्तमि॒दं स्व॒स्ति हु॒वे दे॒वं स॑वि॒तारं॒ नमो॑भिः॥९॥

न। यस्य॑। इन्द्रः॑। वरु॑णः। न। मि॒त्रः। व्र॒तम्। अ॒र्य॒मा। न। मि॒नन्ति॑। रु॒द्रः। न। अरा॑तयः। तम्। इ॒दम्। स्व॒स्ति। हु॒वे। दे॒वम्। स॒वि॒तार॑म्। नमः॑ऽभिः॥९॥

पदार्थः-(**न**) (**यस्य**) जगदीश्वरस्य (**इन्द्रः**) सूर्य्यो विद्युद्वा (**वरुणः**) आपः (**न**) (**मित्रः**) वायुः (**व्रतम्**) नियमम् (**अर्य्यमा**) नियन्ता धारकवायुः (**न**) (**मिनन्ति**) हिंसन्ति (**रुद्रः**) जीवः (**न**) (**अरातयः**) शत्रवः (**तम्**) (**इदम्**) (**स्वस्ति**) (**हुवे**) स्तौमि (**देवम्**) दातारम् (**सवितारम्**) सकलजगदुत्पादकम् (**नमोभिः**) सत्कर्मभिः॥९॥

अन्वयः-हे मनुष्या! यस्य व्रतं नेन्द्रो न वरुणो न मित्रो नार्यमा न रुद्रो नारातयो मिनन्ति तमिदं स्वस्ति सुखरूपं सवितारं देवं नमोभिर्यथाऽहं हुवे तथा यूयमपि प्रशंसेत॥९॥

भावार्थः-इह न कश्चित्पदार्थ ईश्वरतुल्योऽस्ति कुतोऽधिको न कोऽप्यस्य नियममुल्लङ्घयितुं शक्नोति तस्मात् सर्वैर्मनुष्यैस्तस्यैवेश्वरस्य स्तुतिप्रार्थनोपासनाः कार्य्याः॥९॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिस जगदीश्वर के (**व्रतम्**) नियम को (**न**) न (**इन्द्रः**) सूर्य्य और बिजुली (**न**) न (**वरुणः**) जल (**न**) न (**मित्रः**) वायु (**न**) न (**अर्य्यमा**) द्वितीय प्रकार का नियन्ता धारक वायु (**न**) न (**रुद्रः**) जीव (**न**) न (**अरातयः**) शत्रुजन (**मिनन्ति**) नष्ट करते हैं (**तम्**) उस (**इदम्**) इस (**स्वस्ति**) सुखरूप (**सवितारम्**) समस्त जगत् के उत्पन्न करनेवाले (**देवम्**) दाता परमात्मा को (**नमोभिः**) सत्कर्मों से जैसे मैं (**हुवे**) स्तुति करूं, वैसे तुम भी प्रशंसा करो॥९॥

भावार्थः-इस संसार में कोई पदार्थ ईश्वर के तुल्य नहीं है तो अधिक कैसे हो और कोई भी इसके नियम को उल्लङ्घन नहीं कर सकता है, इस कारण सब मनुष्यों को उसी ईश्वर की स्तुति, प्रार्थना और उपासना करनी चाहिये॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भगं॑ धिय॑ वा॒जय॑न्तः पुर॑न्धिं नरा॒शंसो॒ ग्नास्पति॑र्नो अव्याः।
आ॒ये वा॒मस्य॑ संग॒थे र॑यी॒णां प्रि॒या दे॒वस्य॑ सवि॒तुः स्या॑म॥१०॥

भग॑म्। धिय॑म्। वा॒जय॑न्तः। पुर॑म्ऽधिम्। नरा॒शंस॑ः। ग्नाः। पति॑ः। नः॒। अ॒व्या॒ः। आ॒ऽअ॒ये। वा॒मस्य॑। स॒म्ऽग॒थे। र॒यी॒णाम्। प्रि॒याः। दे॒वस्य॑। स॒वि॒तुः। स्या॒म॥१०॥

पदार्थः-(**भगम्**) सकलैश्वर्यम् (**धियम्**) चिन्तनीयम् (**वाजयन्तः**) जानन्तो ज्ञापयन्तः (**पुरन्धिम्**) सर्वस्य जगतो धर्त्तारम् (**नराशंसः**) नरैः प्रशंसितः (**ग्नाः**) वाचः (**पतिः**) पालकः (**नः**) अस्मान् (**अव्याः**) रक्षेत् (**आये**) यत्समन्तादप्यते तस्मिन् (**वामस्य**) प्रशस्यस्य (**सङ्गथे**) संग्रामे (**रयीणाम्**) धनानाम् (**प्रियाः**) प्रीतिविषयाः (**देवस्य**) भगवतः परमात्मनः (**सवितुः**) सर्वस्य जगतो निर्मातुः (**स्याम**) भवेम॥१०॥

अन्वयः-यो नराशंसः पतिरीश्वरो नो ग्नाश्चाव्यास्तं भगं धियं पुरन्धिं वाजयन्तो वयं रयीणामाये सङ्गथे वामस्य सवितुर्देवस्य परमात्मनः प्रियाः सततं स्याम॥१०॥

भावार्थः-हे मनुष्याः! सर्वस्य रक्षकं धर्त्तारं प्रशंसितं सर्वस्य स्वामिनं परमेश्वरमुपास्य तदाज्ञाचरणेन तत्प्रिया यूयं भवत॥१०॥

पदार्थः-जो **(नराशंसः)** मनुष्यों ने प्रशंसित किया हुआ **(पतिः)** पालना करनेवाला ईश्वर **(नः)** हम लोगों **(ग्नाः)** और वाणियों की **(अव्याः)** रक्षा करे और उस **(भगम्)** समस्त ऐश्वर्य को **(धियम्)** जो चिन्तन करने योग्य है वा **(पुरन्धिम्)** समस्त जगत् के धारण करनेवाले को **(वाजयन्तः)** जानते वा उसका विज्ञान कराते हुए हम लोग **(रयीणाम्)** धनों के **(आये)** इस व्यवहार में जो सब ओर से प्राप्त होता और **(सङ्गथे)** संग्राम में **(वामस्य)** प्रशंसनीय **(सवितुः)** सकल जगत् के बनानेवाले **(देवस्य)** भगवान् परमात्मा के **(प्रियाः)** प्रीति विषय निरन्तर **(स्याम)** हों॥१०॥

भावार्थः-हे मनुष्यो! सबकी रक्षा और धारण करनेवाले प्रशंसित सबके स्वामी परमेश्वर की उपासना कर उसकी आज्ञा के आचरण से उसके पियारे तुम होओ॥१०॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात्।
शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे॥११॥३॥

अस्मभ्यम्। तत्। दिवः। अत्ऽभ्यः। पृथिव्याः। त्वया। दत्तम्। काम्यम्। राधः। आ। गात्। शम्। यत्। स्तोतृऽभ्यः। आपये। भवाति। उरुऽशंसाय। सवितः। जरित्रे॥११॥

पदार्थः-**(अस्मभ्यम्)** **(तत्)** पूर्वोक्तं जलम् **(दिवः)** प्रकाशमानात् **(अद्भ्यः)** जलेभ्यः **(पृथिव्याः)** भूमेः **(त्वया)** **(दत्तम्)** **(काम्यम्)** कमनीयम् **(राधः)** धनम् **(आ)** **(गात्)** प्राप्नुयात् **(शम्)** सुखम् **(यत्)** **(स्तोतृभ्यः)** स्तावकेभ्यः **(आपये)** विद्याव्यापकाय **(भवाति)** भवेत् **(उरुशंसाय)** बहुभिः प्रशंसिताय **(सवितः)** **(जरित्रे)** अर्चिताय॥११॥

अन्वयः-हे सवितः परमात्मन्! त्वया दत्तं दिवोऽद्भ्यः पृथिव्या यत् काम्यं राधोऽस्मभ्यमा गात् तदुरुशंसाय जरित्रे आपये स्तोतृभ्यश्च शं भवाति॥११॥

भावार्थः-परमेश्वरेण प्रकृत्या महान् महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्रास्ताभ्य एकादशेन्द्रियाणि स्थूलानि पञ्चभूतानि चौषधयो निर्मिताः। यैः सर्वेषां प्राणिनां सुखं सञ्जायत इति॥११॥

अत्रेश्वरसूर्य्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति अष्टत्रिंशत्तमं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(सवितः)** परमात्मन्! **(त्वया)** आपने **(दत्तम्)** दिया हुआ **(दिवः)** प्रकाशमान लोग **(अद्भ्यः)** जलों और **(पृथिव्याः)** भूमि से **(यत्)** जो **(काम्यम्)** कामना करने योग्य **(राधः)** धन **(अस्मभ्यम्)** हम लोगों के लिये **(आ, गात्)** प्राप्त हो **(तत्)** वह **(उरुशंसाय)** बहुतों ने प्रशंसा किये हुए **(जरित्रे)** प्रशंसित **(आपये)** विद्या व्यापक के लिये और **(स्तोतृभ्यः)** स्तुति करनेवालों के लिये **(शम्)** कल्याणरूप **(भवाति)** हो॥११॥

भावार्थः-परमेश्वर ने प्रकृति से महत् तत्त्व, महत् तत्त्व से अहङ्कार, अहङ्कार से पञ्चतन्मात्रा, पञ्चतन्मात्राओं से एकादश इन्द्रियां और स्थूल पञ्चभूत और ओषधियां बनाईं। जिनसे सब प्राणियों को सुख होता है॥११॥

इस सूक्त में ईश्वर, सूर्य और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के साथ सङ्गति है, यह जानना चाहिये॥

यह अड़तीसवां सूक्त और तीसरा वर्ग समाप्त हुआ॥

ग्रावाणेवेत्यस्याऽष्टर्चस्यैकोनचत्वारिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। अश्विनौ देवते। १ निचृत्त्रिष्टुप्। ३ विराट् त्रिष्टुप्। ४, ७, ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। २ भुरिक् पङ्क्तिः। ५, ६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ वाय्वग्निगुणानाह॥

अब ऊनतालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में वायु और अग्नि के गुणों को कहते हैं॥

ग्रावा॑णेव॒ तदिदर्थं॑ जरेथे॒ गृध्रे॑व॒ वृक्षं॑ नि॑धि॒मन्त॒मच्छ॑।
ब्रह्मा॑णे॑व॒ वि॒दथ॑ उक्थ॒शासा॑ दू॒तेव॒ हव्या॒ जन्या॑ पुरु॒त्रा॥ १॥

ग्रावा॑णाऽइव। तत्। इत्। अर्थ॑म्। ज॒रे॒थे॒ इति॑। गृध्रा॑ऽइव। वृ॒क्षम्। नि॒धि॒ऽमन्त॑म्। अच्छ॑। ब्रह्मा॑णाऽइव। वि॒दथे॑। उ॒क्थ॒ऽशासा॑। दू॒ताऽइ॑व। हव्या॑। जन्या॑। पु॒रु॒ऽत्रा॥ १॥

पदार्थः-(ग्रावाणेव) मेघाविव **(तत्)** **(इत्)** एव **(अर्थम्)** द्रव्यम् **(जरेथे)** जरयतः **(गृध्रेव)** गृध्राइव **(वृक्षम्)** वृश्चनीयं जलं स्थलं वा **(निधिमन्तम्)** बहवो निधयो विद्यन्ते यस्मिंस्तम् **(अच्छ)** **(ब्रह्माणेव)** यथा समग्रवेदविदौ **(विदथे)** शिल्पाख्ययज्ञे **(उक्थशासा)** उक्ता उक्था शासा शासनानि ययोस्तौ **(दूतेव)** दूतवद्वर्त्तमानौ **(हव्या)** आदातुमर्हौ **(जन्या)** जनितारौ **(पुरुत्रा)** पुरुषु बहुषु पदार्थेषु वर्त्तमानौ॥ १॥

अन्वयः-हे विद्वांसो! यौ वाय्वग्नी ग्रावाणेव तदर्थमिदेव जरेथे विदथे गृध्रेव निधिमन्तं वृक्षमच्छ जरेथे ब्रह्माणेवोक्थशासा दूतेव हव्या जन्या पुरुत्रा वर्त्तेते तौ यूयं संप्रयोजयत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। ये वह्न्यादयः पदार्था मेघवत्पक्षिवद्विद्वद्वद्दूतवच्च कार्य्यसाधकाः सन्ति तान् विज्ञाय प्रयोजनानि साधनीयानि॥ १॥

पदार्थः-हे विद्वानो! जो वायु और अग्नि **(ग्रावाणेव)** दो मेघों के समान **(तत्)** उस **(अर्थम्)** द्रव्य को **(इत्)** ही **(जरेथे)** नष्ट करते वा **(विदथे)** शिल्प यज्ञ में **(गृध्रेव)** गृद्धों के समान **(निधिमन्तम्)** जिसमें बहुत निधि धन कोष विद्यमान उस **(वृक्षम्)** छेदन करने योग्य जलस्थल को **(अच्छ)** अच्छे प्रकार नष्ट करते **(ब्रह्माणेव)** और जैसे समस्त वेदवेत्ता जन हों, वैसे वर्त्तमान **(उक्थशासा)** वा जिनकी शिक्षायें कही हुई हैं उन **(दूतेव)** दूतों के समान वर्त्तमान **(हव्या)** तथा ग्रहण करने योग्य **(जन्या)** अनेक पदार्थों की उत्पत्ति करनेवाले **(पुरुत्रा)** और बहुत पदार्थों में वर्त्तमान हैं, उन वायु और अग्नि का अच्छे प्रकार प्रयोग तुम लोग करो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो वह्नि आदि पदार्थ मेघ वा पक्षियों तथा विद्वानों और दूत के समान कार्य्यसिद्धि करनेवाले हैं, उनको जान के प्रयोजनों को सिद्ध करना चाहिये॥१॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे।
मेनेइव तन्वा३ शुम्भमाने दम्पतीव क्रतुविदा जनेषु॥२॥

प्रातःऽयावाना। रथ्याऽइव। वीरा। अजाऽइव। यमा। वरम्। आ। सचेथे इति। मेनेइवेति मेनेऽइव। तन्वा। शुम्भमाने इति। दम्पतीइवेति दम्पतीऽइव। क्रतुऽविदा। जनेषु॥२॥

पदार्थः-(**प्रातर्यावाणा**) यौ प्रातर्यातस्तौ (**रथ्येव**) यथा रथाय हितावश्वौ (**वीरा**) विक्रान्तकर्माणौ (**अजेव**) यथाऽजौ (**यमा**) उपरतौ (**वरम्**) उत्तमम् (**आ**) (**सचेथे**) सम्बध्नीथः (**मेनेइव**) यथा मेने पक्षिण्यौ (**तन्वा**) शरीरेण (**शुम्भमाने**) सुशोभेते (**दम्पतीव**) यथा भार्य्यापती (**क्रतुविदा**) क्रतुं प्रज्ञां विन्दति याभ्याम् (**जनेषु**) मनुष्येषु॥२॥

अन्वयः-यौ द्यावापृथिव्यौ जनेषु रथ्येव प्रातर्यावाणा अजेव वीरा यमा मेनेइव तन्वा शुम्भमाने दम्पतीव क्रतुविदावर्त्तेते तौ विदित्वाऽध्यापकाध्येतारौ वरमा सचेथे॥२॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा सुशिक्षिताऽश्वे समाने याने स्थित्वाऽजवद्वीरतां प्रकाश्य पक्षिवद्दम्पतीव शोभेते सुकर्माणि च जनयतस्तथा सूर्य्यभूमी सर्वोपकारिके वर्त्तेते इति ज्ञेयम्॥२॥

पदार्थः-जो सूर्य और पृथिवी (**जनेषु**) मनुष्यों में (**रथ्येव**) रथ के हित दो घोड़ों के तुल्य (**प्रातर्यावाणा**) जो प्रातःकाल जाते उनके समान वा (**अजेव**) दो बकरों के समान (**वीरा**) वीरता कर्मयुक्त वा (**यमा**) उपराम अर्थात् उड़ते-उड़ते निवृत्त हुए (**मेनेइव**) दो मैनाओं के समान वा (**तन्वा**) शरीर से (**शुम्भमाने**) शोभते हुए (**दम्पतीव**) स्त्री-पुरुष के समान (**क्रतुविदा**) जिनसे प्रज्ञा को प्राप्त होते हैं, उनको जान के पढ़ाने और पढ़नेवाले (**वरम्**) उत्तम कर्म का (**आ, सचेथे**) सम्बन्ध करते हैं॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को जैसे सुशिक्षित घोड़ेवाले एक यान में स्थिर होके बकरों के समान वीरता का प्रकाश कर पक्षियों वा स्त्री-पुरुषों के समान शोभा को प्राप्त होते और अच्छे कर्मों को उत्पन्न कराते हैं, वैसे सूर्य्य और भूमि सबका उपकार करनेवाले वर्त्तमान हैं, यह जानना चाहिये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शृङ्गेॅव नः प्रथमा गन्तमर्वाक्छफाविॅव जर्भुराणा तरोॅभिः।
चक्रवाकेॅव प्रतिॅ वस्तोरुस्रार्वाञ्चाॅ यातं रथ्येॅव शक्रा॥ ३॥

शृङ्गाॅऽइव। नः। प्रथमा। गन्तम्। अर्वाक्। शफौऽइॅव। जर्भुराणा। तरःऽभिः। चक्रवाकाऽइॅव। प्रतिॅ। वस्तोः। उस्रा। अर्वाञ्चाॅ। यातम्। रथ्याऽइव। शक्रा॥ ३॥

पदार्थः-(**शृङ्गेॅव**) शृङ्गवत्सम्बन्धिनौ हिंसकौ (**नः**) अस्मान् (**प्रथमा**) आदिमौ (**गन्तम्**) प्राप्नुतम् (**अर्वाक्**) पश्चात् (**शफाविॅव**) यथा खुरौ परस्परेण सम्बद्धौ (**जर्भुराणा**) भृशं धर्त्तारौ (**तरोभिः**) तरन्ति यैस्तानि तरांसि नौकादीनि तैः (**चक्रवाकेॅव**) यथा चक्रवाकौ पक्षिणौ (**प्रतिॅ**) (**वस्तोः**) दिनम् (**उस्रा**) किरणवद्वर्त्तमानौ (**अर्वाञ्चा**) अर्वाग्गामिनौ (**यातम्**) प्राप्नुतम् (**रथ्येॅव**) यथा रथाय हितानि (**शक्रा**) शक्तिमन्तौ॥ ३॥

अन्वयः-हे उस्रा रथ्येव शक्रा! युवां नोऽर्वाग्गन्तं शृङ्गेव शफाविव जर्भुराणा प्रथमा तरोभिश्चक्रवाकेव प्रति वस्तोरर्वाञ्चा यातम्॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यद्यग्निवायू शिल्पकार्येषु सम्प्रयुज्येतां तर्हि बहूनि कार्याणि साधयेताम्॥ ३॥

पदार्थः-हे (**उस्रा**) किरणों के समान वर्त्तमान (**रथ्येव**) रथ के लिये हितकारी वस्तु के तुल्य (**शक्रा**) शक्तिमान्! तुम लोग (**नः**) हम लोगों के (**अर्वाक्**) पीछे (**गन्तम्**) प्राप्त हुए को (**शृङ्गेॅव**) शृङ्गों के समान सम्बन्ध करने तथा हिंसा करनेवाले (**शफाविॅव**) जैसे खुर परस्पर सम्बन्ध करे हुए हैं, वैसे (**जर्भुराणा**) निरन्तर धारण करनेवाले (**प्रथमा**) पहिले सनातन वा (**तरोभिः**) जिनसे तैरते हैं, उन नौकाओं से जैसे (**चक्रवाकेॅव**) चकई चकवा (**प्रतिॅ**) प्रति (**वस्तोः**) दिन (**अर्वाञ्चा**) पीछे जानेवाले होकर (**यातम्**) प्राप्त हूजिये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। यदि अग्नि वायु शिल्पकार्य्यों में संयुक्त किये जावें तो बहुत कार्य्यों को सिद्ध करें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नावेॅव नः पारयतं युगेॅव नभ्येॅव न उपधीॅव प्रधीॅव।

श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान्॥४॥

नावाऽइव। नः। पारयतम्। युगाऽइव। नभ्याऽइव। नः। उपधी इवेत्युपधीऽइव। प्रधीइवेति प्रधीऽइव। श्वानाऽइव। नः। अरिषण्या। तनूनाम्। खृगलाऽइव। विऽस्रसः। पातम्। अस्मान्॥४॥

पदार्थः-(नावेव) यथोत्तमे नावौ **(नः)** अस्मान् **(पारयतम्)** पारयतः **(युगेव)** अश्वादिवत्संयोजितौ **(नभ्येव)** यथा रथचक्रमध्यप्रदेशाऽवयवौ **(नः)** अस्मान् **(उपधीव)** यथोपधिर्मध्यस्थस्य रथावयवस्य धारिका **(प्रधीव)** यया सर्वस्य धर्त्री रथावयवा **(श्वानेव)** यथा चोरादिभ्यो रक्षकौ कुक्कुरौ **(नः)** अस्माकम् **(अरिषण्या)** अहिंसकौ **(तनूनाम्)** शरीराणाम् **(खृगलेव)** यौ खृ खननं गलयतस्तौ **(विस्रसः)** जीर्णावस्थायाः **(पातम्)** रक्षतः **(अस्मान्)**॥४॥

अन्वयः-हे विद्वांसो! यौ वायुविद्युतौ युगेव नावेव नः पारयतं नभ्येवोपधीव प्रधीव नः पारयतं श्वानेव नस्तनूनामरिषण्या स्तः खृगलेव विस्रसोऽस्मान् पातं तावस्मानुपदिशत॥४॥

भावार्थः-अत्रोपमालङ्कारः। नहि कश्चिदपि सृष्टिपदार्थानां गुणकर्मस्वभावानविदित्वा पूर्णविद्यो जायते तस्मात्सृष्टिविद्याः संचारणीयाः॥४॥

पदार्थः-हे विद्वानो! जो वायु और बिजुली **(युगेव)** रथादि में अश्वादिकों के समान जोड़े हुए **(नावेव)** वा जैसे उत्तमता से नावें, वैसे **(नः)** हम लोगों को **(पारयतम्)** पार पहुंचाते **(नभ्येव)** वा रथ के पहियों के बीच के अङ्ग के समान वा **(उपधीव)** रथ के बीच के भाग की धारण करनेवाली लकड़ी के समान वा **(प्रधीव)** समस्त रथ की धारण करनेवाली दो लकड़ियों के समान **(नः)** हम लोगों को पहुँचाते हैं वा **(श्वानेव)** चोरादिकों से रक्षा करनेवाले कुत्तों के समान **(नः)** हमारे **(तनूनाम्)** शरीरों को **(अरिषण्या)** न नष्ट करनेहारे हैं और **(खृगलेव)** जो खोदने को गलाते हुए के समान **(विस्रसः)** जीर्णावस्था से **(अस्मान्)** हम लोगों की **(पातम्)** रक्षा करते हैं, उनका हम लोगों को आप उपदेश देओ॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। कोई भी सृष्टि के पदार्थों के गुण, कर्म और स्वभावों को न जान के पूर्ण विद्यावाला नहीं होता है, इससे सृष्टि की विद्याओं का अच्छे प्रकार प्रचार करना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वातेवाजुर्या नद्येव रीतिरक्षीइव चक्षुषा यातमर्वाक्।
हस्ताविव तन्वे३ शम्भविष्ठा पादेव नो नयतं वस्यो अच्छ॥५॥४॥

वाताऽइव। अजुर्या। नद्याऽइव। रीतिः। अक्षी इवेत्यक्षीऽइव। चक्षुषा। आ। यातम्। अर्वाक्। हस्तौऽइव। तन्वे। शम्ऽभविष्ठा। पादाऽइव। नः। नयतम्। वस्यः। अच्छ॥५॥

पदार्थः-(वातेव) वायुवत् **(अजुर्या)** अजीर्णौ **(नद्येव)** नद्यां भवं जलं नद्यं तद्वत् सद्यो गन्तारौ **(रीतिः)** श्लेषणम् **(अक्षीइव)** यथाऽक्षिणी **(चक्षुषा)** दर्शनशक्तियुक्तौ **(आ) (यातम्)** समन्तात्प्राप्नुतः **(अर्वाक्)** अधः **(हस्ताविव) (तन्वे)** शरीराय **(शम्भविष्ठा)** अतिशयेन सुखं भावुकौ **(पादेव)** यथा पादौ **(नः)** अस्मान् **(नयतम्)** नयतः **(वस्यः)** अत्युत्तमं धनम् **(अच्छ)** सम्यक्॥५॥

अन्वयः-हे विद्वांसौ! यौ वातेवाजुर्या नद्येव रीतिर्गन्तारावक्षीइव चक्षुषाऽवार्गायातं हस्ताविव तन्वे शम्भविष्ठा पादेव नो वस्योऽच्छ नयतं तौ जलाग्नी अस्मान् बोधय॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा शरीराऽवयवा स्व-स्व कर्मणि प्रवर्त्तमानाः शरीरं रक्षन्ति तथा वाय्वादयः पदार्थाः सर्वान् रक्षन्तीति वेद्यम्॥५॥

पदार्थः-हे विद्वानो! जो **(वातेव)** पवन के समान **(अजुर्या)** अजीर्ण अर्थात् पुष्ट **(नद्येव)** नदी में उत्पन्न हुए जल के समान **(रीतिः)** मिले हुए शीघ्र जानेवाले वा **(अक्षीइव)** नेत्रों के समान **(चक्षुषा)** दिखाने की शक्तियुक्त **(अर्वाक्)** नीचे **(आ, यातम्)** सब ओर से प्राप्त होते हैं **(हस्ताविव)** हाथों के समान **(तन्वे)** शरीर के लिये **(शम्भविष्ठा)** अतीव सुख की भावना करानेवाले **(पादेव)** पैरों के समान **(नः)** हम लोगों को **(वस्यः)** अति उत्तम धन **(अच्छ)** अच्छे प्रकार **(नयतम्)** प्राप्त करते हैं, उन जल और अग्नि को हम लोगों को बतलाओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शरीर के अङ्ग अपने-अपने काम में प्रवर्त्तमान शरीर की रक्षा करते हैं, वैसे वायु आदि पदार्थ सबकी रक्षा करते हैं, यह जानना चाहिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे॥६॥

ओष्ठौऽइव। मधु। आस्ने। वदन्ता। स्तनौऽइव। पिप्यतम्। जीवसे। नः। नासाऽइव। नः। तन्वः। रक्षितारा। कर्णौऽइव। सुऽश्रुता। भूतम्। अस्मे इति॥६॥

पदार्थः-(ओष्ठाविव) (मधु) (आस्ने) आस्याय मुखाय **(वदन्ता)** ब्रुवन्तौ **(स्तनाविव) (पिप्यतम्)** प्याययतो वर्द्धयतः **(जीवसे)** जीवितुम् **(नः)** अस्मभ्यम् **(नासेव)** नासिके इव **(नः)** अस्माकम् **(तन्वः)** शरीरस्य **(रक्षितारा)** रक्षकौ **(कर्णाविव) (सुश्रुता)** शोभनं श्रुतं याभ्यान्तौ **(भूतम्)** भवतः **(अस्मे)** अस्मभ्यम्॥६॥

अन्वयः-हे विद्वांसो! यूयं यावास्ने मध्वोष्ठाविव वदन्ता जीवसे स्तनाविव नः पिप्यतं नासेव नस्तन्वो रक्षितारा अस्मे कर्णाविव सुश्रुता भूतं तावग्निवायू विदितौ कारयत॥६॥

भावार्थः-अत्रोपमालङ्कारः। येऽध्यापका जिह्वया रसमिव स्तनेन दुग्धमिव नासिकया गन्धमिव श्रोत्रेण शब्दमिव सर्वा विद्याः प्रत्यक्षीकारयन्ति ते जगत्पूज्या भवन्ति॥६॥

पदार्थः-हे विद्वानो! तुम जो **(आस्ने)** मुख के लिये **(मधु)** मधुर रस को **(ओष्ठाविव)** ओष्ठों के समान **(वदन्ता)** कहते हुए **(जीवसे)** जीवने को **(स्तनाविव)** स्तनों के समान **(नः)** हमारे लिये **(पिप्यतम्)** बढ़ाते अर्थात् जैसे स्तनों में उत्पन्न हुए दुग्ध से जीवन बढ़ता है, वैसे बढ़ाते **(नासेव)** और नासिका के समान **(नः)** हमारे **(तन्वः)** शरीर की **(रक्षितारा)** रक्षा करनेवाले वा **(अस्मे)** हम लोगों के लिये **(कर्णाविव)** कर्णों के समान **(सुश्रुता)** जिनसे सुन्दर श्रवण होता है ऐसे **(भूतम्)** होते हैं, उन वायु और अग्नि को विदित कराइये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अध्यापक जिह्वा से रस के समान, स्तनों से दुग्ध के समान, नासिका से गन्ध के तुल्य, कान से शब्द के समान, समस्त विद्याओं को प्रत्यक्ष कराते हैं, वे जगत्पूज्य होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि।
इमा गिरो अश्विना युष्मयन्तीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतम्॥७॥

हस्ताऽइव। शक्तिम्। अभि। संददी इति सम्ऽददी। नः। क्षामऽइव। नः। सम्। अजतम्। रजांसि। इमाः। गिरः। अश्विना। युष्मऽयन्तीः। क्ष्णोत्रेणऽइव। स्वऽधितिम्। सम्। शिशीतम्॥७॥

पदार्थः-(हस्तेव) (शक्तिम्) तीक्ष्णाग्राम् **(अभि) (संददी)** याभ्यां सम्यग् ददतस्तौ **(नः)** अस्मान् **(क्षामेव)** निवासाधिकरणां पृथिवीम्। **क्षामेति पृथिवीनामसु पठितम्।** (निघं०१.१) **(नः)** अस्माकम् **(सम्)** सम्यक् **(अजतम्)** प्रापयतः **(रजांसि)** ऐश्वर्याणि लोकान् वा **(इमाः) (गिरः)**

सुशिक्षिता वाणीः **(अश्विना)** वाय्वग्नी **(युष्मयन्तीः)** या युष्मानाचक्षते ताः **(क्ष्णोत्रेणेव)** तेजस्विकारकेण साधनेनेव **(स्वधितिम्)** वज्रम् **(सम्)** सम्यक् **(शिशीतम्)** तीक्ष्णीकुर्य्याताम्॥७॥

अन्वयः-हे अश्विनेव वर्त्तमानावध्यापकपरीक्षकौ! यावग्निवायू शक्तिं हस्तेव नोऽभिसंददी क्षामेव नो रजांसि समजतं क्ष्णोत्रेणेवेमा युष्मयन्तीर्गिरः स्वधितिमिव संशिशीतं तयोर्गुणकर्मस्वभावानस्मान् बोधयतम्॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! ये हस्तक्रियाकारकाः पृथिवीवदैश्वर्यप्रदाः सुशिक्षिता वाग्वज्ज्ञापकास्तीक्ष्णवज्रवद्दारिद्र्यदुःखविनाशका अग्न्यादयः पदार्थाः सन्ति तानस्मानद्य ग्राहयतः॥७॥

पदार्थः-हे **(अश्विना)** वायु और अग्नि के समान वर्त्तमान पढ़ाने और परीक्षा करनेवालो! जो अग्नि और वायु **(शक्तिम्)** तीक्ष्ण अग्रभागवाली शक्ति को **(हस्तेव)** हाथों के समान **(नः)** हम लोगों को **(अभि, संददी)** जिनसे अच्छे प्रकार देते वा **(क्षामेव)** पृथिवी के समान **(नः)** हम लोगों को **(रजांसि)** ऐश्वर्यवालों को **(समजतम्)** अच्छे प्रकार प्राप्त कराते हैं वा **(क्ष्णोत्रेणेव)** तेजस्वी करनेवाले साधन से जैसे वैसे **(इमाः)** इन **(युष्मयन्तीः)** जो तुमको कहती हैं उन **(गिरः)** सुशिक्षित वाणियों को **(स्वधितिम्)** वज्र के समान **(सम्, शिशीतम्)** तीक्ष्ण करें, उनके गुण, कर्म और स्वभावों को हम लोगों को बताओ॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! जो हाथ की क्रिया को करनेवाले, पृथिवी के समान ऐश्वर्य देने, अच्छी शिक्षित वाणी के समान पदार्थों को बताने, तीक्ष्ण वज्र के समान दारिद्र्य और दुःख का विनाश करनेवाले अग्न्यादि पदार्थ हैं, उनको आज हम लोगों को ग्रहण कराओ॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहा है॥

एतानि॑ वामश्विना॒ वर्ध॑नानि॒ ब्रह्म॒ स्तोमं॑ गृत्सम॒दासो॑ अक्रन्।
तानि॑ नरा जुजुषा॒णोप॑ यातं बृ॒हद्वदे॑म वि॒दथे॑ सु॒वीराः॑॥८॥५॥

एतानि॑। वा॒म्। अ॒श्विना॒। वर्ध॑नानि। ब्रह्म॑। स्तोम॑म्। गृ॒त्स॒ऽम॒दासः॑। अ॒क्र॒न्। तानि॑। न॒रा॒। जु॒जु॒षा॒णा। उप॑। यात॒म्। बृ॒हत्। व॒दे॒म॒। वि॒दथे॑। सु॒ऽवीराः॑॥८॥

पदार्थः-**(एतानि)** **(वाम्)** युवयोः **(अश्विना)** सकलविद्याव्यापिनौ **(वर्द्धनानि)** **(ब्रह्म)** धनम् **(स्तोमम्)** प्रशंसाम् **(गृत्समदासः)** गृत्सा अभिकाङ्क्षिता मदा हर्षा यैस्ते **(अक्रन्)** कुर्य्युः **(तानि)** **(नरा)** नेतारौ **(जुजुषाणा)** सेवमानौ **(उप)** **(यातम्)** उपाप्नुतः **(बृहत्)** महद्विज्ञानम् **(वदेम)**

अध्यापयेम उपदिशेम वा **(विदथे)** विज्ञानमये यज्ञे **(सुवीराः)** शोभनाश्च ते वीरा व्याप्तविद्यास्ते॥८॥

अन्वयः-हे अश्विना नरेव वर्त्तमानावध्यापकपरीक्षकौ! युवां वां यान्येतानि वर्द्धनानि ब्रह्म स्तोमं च गृत्समदासोऽक्रन् तानि जुजुषाणा सन्तावास्मानुपयातं यतस्सुवीराः सन्तो वयं विदथे बृहत्सततं वदेम॥८॥

भावार्थः-ये मनुष्या विद्वदनुकरणं कुर्य्युस्तर्हि ते महान्तो भवेयुरिति॥८॥

अत्र वाय्वग्न्यादिविदुषाञ्च गुणवर्णनादेतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनचत्वारिंशत्तमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(अश्विना)** सकल विद्या में व्याप्त होनेवाले **(नरा)** मनुष्यों में अग्रगन्ताओं के समान वर्त्तमान अध्यापक और परीक्षको! तुम **(वाम्)** तुम दोनों के जिन **(एतानि)** इन **(वर्द्धनानि)** वृद्धियों **(ब्रह्म)** धन और **(स्तोमम्)** प्रशंसा को **(गृत्समदासः)** जिन्होंने आनन्द चाहे हुए हैं, वे जन **(अक्रन्)** करें। **(तानि)** उनको **(जुजुषाणा)** सेवते हुए हम लोगों के **(उप, यातम्)** समीप प्राप्त होते, जिससे **(सुवीराः)** उत्तम वीरोंवाले हम सब लोग **(विदथे)** संग्राम में **(बृहत्)** बहुत विज्ञान को निरन्तर **(वदेम)** पढ़ावें वा उपदेश करें॥८॥

भावार्थः-जो मनुष्य विद्वानों का अनुकरण करें तो वे महात्मा होवें॥८॥

इस सूक्त में वायु और अग्नि आदि पदार्थ वा विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह उनतालीसवां सूक्त और पांचवां वर्ग पूरा हुआ॥

सोमापूषणेति षड्चस्य चत्वारिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। सोमा पूषणावदितिश्च देवताः। १, ३ त्रिष्टुप्। २ विराट् त्रिष्टुप्। ५, ६ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ वायुगुणानाह॥

अब चालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में पवन के गुणों का उपदेश कहते हैं॥

सोमा॑पूषणा॒ जन॑ना रयी॒णां जन॑ना दि॒वो जन॑ना पृथि॒व्याः।
जा॒तौ विश्व॑स्य॒ भुव॑नस्य गो॒पौ दे॒वा अ॑कृण्वन्नमृत॑स्य॒ नाभि॑म्॥ १॥

सोमा॑पूषणा। जन॑ना। र॒यी॒णाम्। जन॑ना। दि॒वः। जन॑ना। पृ॒थि॒व्याः। जा॒तौ। विश्व॑स्य। भुव॑नस्य। गो॒पौ। दे॒वाः। अ॒कृ॒ण्व॒न्। अ॒मृत॑स्य। नाभि॑म्॥ १॥

पदार्थः-(सोमापूषणा) प्राणाऽपानौ **(जनना)** सुखजनकौ **(रयीणाम्)** धनानाम् **(जनना)** उत्पादकौ **(दिवः)** प्रकाशस्य **(जनना)** **(पृथिव्याः)** **(जातौ)** उत्पन्नौ **(विश्वस्य)** सर्वस्य **(भुवनस्य)** संसारस्य **(गोपौ)** रक्षकौ **(देवाः)** विद्वांसः **(अकृण्वन्)** कुर्य्युः **(अमृतस्य)** नाशरहितस्य **(नाभिम्)** मध्यम्॥ १॥

अन्वयः-हे मनुष्या! देवा यौ रयीणां जनना दिवो जनना पृथिव्या जनना जातौ विश्वस्य भुवनस्य गोपौ सोमापूषणाऽमृतस्य नाभिमकृण्वन् तौ विजानीत॥ १॥

भावार्थः-मनुष्यैः प्रकाशपृथिवीधनानां निमित्ते भूत्वा सर्वस्य रक्षकौ परमात्मनो ज्ञापकौ प्राणापानौ वर्त्तेत इति वेद्यम्॥ १॥

पदार्थः-हे मनुष्यो! **(देवाः)** विद्वान् जन जिन **(रयीणाम्)** धनों को **(जनना)** सुखपूर्वक उत्पन्न करनेवाले वा **(दिवः)** प्रकाश के **(जनना)** उत्पन्न करनेवाले **(पृथिव्याः)** पृथिवी के **(जनना)** उत्पन्न करनेवाले **(जातौ)** उत्पन्न हुए **(विश्वस्य)** समस्त **(भुवनस्य)** संसार की **(गोपौ)** रक्षा करनेवाले **(सोमापूषणा)** प्राण और अपान **(अमृतस्य)** नाशरहित पदार्थ के **(नाभिम्)** मध्य भाग को **(अकृण्वन्)** प्रकट करें, उनको विशेषता से जानो॥ १॥

भावार्थः-मनुष्यों को प्रकाश पृथिवी और धनों के निमित्त होकर सब की रक्षा करनेवाले परमात्मा का विज्ञान करानेवाले प्राण और अपान वर्त्तमान हैं, यह जानना चाहिये॥ १॥

अथ वह्निविषयमाह॥

अब अग्नि के विषय को अगले मन्त्र में कहा है॥

इ॒मौ दे॒वौ जाय॑मानौ जुषन्ते॒मौ तमां॑सि गूहता॒मजु॑ष्टा।
आ॒भ्यामिन्द्र॑: प॒क्वमा॒मास्व॒न्त: सोमापू॒षभ्यां॑ जनदु॒स्रिया॑सु॥ २॥

इ॒मौ। दे॒वौ। जाय॑मानौ। जु॒ष॒न्त॒। इ॒मौ। तमां॑सि। गू॒ह॒ता॒म्। अजु॑ष्टा। आ॒भ्याम्। इन्द्र॑:। प॒क्वम्। आ॒मासु॑। अ॒न्तरिति॑। सोमा॑पू॒ष॒भ्या॑म्। ज॒न॒त्। उ॒स्रिया॑सु॥ २॥

पदार्थ:-(इमौ) प्रत्यक्षौ **(देवौ)** कमनीयौ **(जायमानौ)** **(जुषन्त)** **(इमौ)** वर्त्तमानौ **(तमांसि)** रात्री: **(गूहताम्)** समावृणुत: **(अजुष्टा)** असेवितौ **(आभ्याम्)** **(इन्द्र:)** विद्युत्सूर्य्यो वा **(पक्वम्)** **(आमासु)** अपक्वासु **(अन्त:)** मध्ये **(सोमापूषभ्याम्)** चन्द्रौषधिगणाभ्याम् **(जनत्)** जनयति। अत्राडभावो विकरणात्मनेपदव्यत्ययश्च। **(उस्रियासु)** भूमिषु॥ २॥

अन्वय:-हे मनुष्या! सर्वे पदार्था याविमौ जायमानौ देवौ जुषन्त। याविमावजुष्टा तमांसि गूहतामाभ्यां सोमापूषभ्यां सहेन्द्र आमासूस्रियास्वन्त: पक्वं जनत्तौ सम्यगुपयुञ्जत॥ २॥

भावार्थ:-योऽग्नि: प्रकाशमन्तर्हितं करोति स याभ्यां चन्द्रौषधिगणाभ्यां विना किञ्चित्करो भवति तौ विज्ञाय कार्य्यसिद्धि: कार्य्या॥ २॥

पदार्थ:-हे मनुष्यो! सब पदार्थ **(इमौ)** इन प्रत्यक्ष **(जायमानौ)** उत्पन्न होते हुए **(देवौ)** मनोहरों को **(जुषन्त)** सेवते हैं जो **(इमौ)** यह दोनों **(अजुष्टा)** न सेवन किये हुए **(तमांसि)** रात्रियों को **(गूहताम्)** अच्छे प्रकार ढांपते हैं **(आभ्याम्)** इन **(सोमापूषभ्याम्)** चन्द्र और ओषधि गणों के साथ **(इन्द्र:)** बिजुली वा सूर्य्य **(आमासु)** अपक्व **(उस्रियासु)** भूमियों के **(अन्त:)** बीच **(पक्वम्)** पके पदार्थ को **(जनत्)** उत्पन्न कराता, उनका अच्छे प्रकार उपयोग करो॥ २॥

भावार्थ:-जो अग्नि सब के भीतर स्थित प्रकाशकारक है, वह जिन चन्द्रमा और ओषधिगणों के विना अकिंचित्कर होता अर्थात् संसार का सुख करनेवाला नहीं होता, उनको जान कार्य्यसिद्धि करनी चाहिये॥ २॥

अथाग्निवायुगुणानाह॥

अब अग्नि और वायु के गुणों को कहते हैं॥

सोमा॑पूषणा॒ रज॑सो वि॒मानं॑ स॒प्तच॑क्रं॒ रथ॒मवि॑श्वमिन्वम्।
वि॒षू॒वृत॑ं॒ मन॑सा यु॒ज्यमा॑नं॒ तं जि॑न्वथो वृषणा॒ पञ्च॑रश्मिम्॥ ३॥

सोमा॑पूषणा। रज॑स:। वि॒मान॑म्। स॒प्तऽच॑क्रम्। रथ॑म्। अवि॑श्वऽमिन्वम्। वि॒षु॒ऽवृत॑म्। मन॑सा। यु॒ज्यमा॑नम्। तम्। जि॒न्व॒थ॒:। वृ॒ष॒णा॒। पञ्च॑ऽरश्मिम्॥ ३॥

पदार्थः-(सोमापूषणा) अग्निवायू **(रजसः)** लोकसमूहस्य **(विमानम्)** वियतिगमकम् **(सप्तचक्रम्)** सप्तचक्राणि यस्मिँस्तम् **(रथम्)** रमणीयं यानम् **(अविश्वमिन्वम्)** अविद्यमानानि विश्वानि मिन्वन्ति येन तम् **(विषूवृतम्)** विषुणा व्यापकेन गमनेन वृतम् **(मनसा)** अन्तःकरणेन विचारेण **(युज्यमानम्)** **(तम्)** **(जिन्वथः)** गमयतः **(वृषणा)** बलिष्ठौ **(पञ्चरश्मिम्)** पञ्चप्राणाऽपानव्यानोदानसमाना रश्मय इव यस्मिँस्तम्॥ ३॥

अन्वयः-हे वृषणा! वाय्वग्निवद्वर्त्तमानौ विद्वांसौ युवां सोमापूषणा रजसोऽविश्वमिन्वं विषूवृतं सप्तचक्रं पञ्चरश्मिं मनसा युज्यमानं विमानं रथं जिन्वथः प्रापयतस्तं विजानीत॥ ३॥

भावार्थः-मनुष्यैरन्तरिक्षे गमयितारं सप्तकलायन्त्रभ्रामणनिमित्तं सद्यो गमयितारं रथं कृत्वा सुखमाप्तव्यम्॥ ३॥

पदार्थः-हे **(वृषणा)** बलिष्ठ वायु और अग्नि के समान वर्त्तमान विद्वानो! तुम **(सोमापूषणा)** अग्नि और वायु **(रजसः)** लोकसमूह के **(अविश्वमिन्वम्)** जिससे अविद्यमान समस्त पदार्थों को अलग करते हैं जो **(विषूवृतम्)** व्यापक गमन से ढपा हुआ **(सप्तचक्रम्)** जिसमें सात चक्र **(पञ्चरश्मिम्)** तथा पांच प्राण, अपान, व्यान, उदान और समान रश्मि के तुल्य विद्यमान **(मनसा)** जो अन्तःकरणस्थ विचार से **(युज्यमानम्)** युक्त किया जाता उस **(विमानम्)** आकाश में गमन करनेवाले **(रथम्)** रमणीय यान को **(जिन्वथः)** चलाते हैं **(तम्)** उसको जानो॥ ३॥

भावार्थः-मनुष्यों को चाहिये कि अन्तरिक्ष में गमन करानेवाले सात कलायन्त्र घुमाने के जिसमें निमित्त ऐसे शीघ्र गमन करानेवाले रथ को बना कर सुख पावें॥ ३॥

अथाग्निविषयमाह॥

अब अग्नि के विषय को अगले मन्त्र में कहा है॥

दि॒व्य१॑न्यः सद॑नं च॒क्रे उ॒च्चा पृ॑थि॒व्याम॒न्यो अध्य॒न्तरि॑क्षे।
ताव॒स्मभ्यं॑ पुरु॒वारं॑ पुरु॒क्षुं॑ रा॒यस्पोषं॒ वि ष्य॑तां॒ नाभि॒मस्मे॥ ४॥

दि॒वि। अ॒न्यः। सद॑नम्। च॒क्रे। उ॒च्चा। पृ॒थि॒व्याम्। अ॒न्यः। अधि॑। अ॒न्तरि॑क्षे। तौ। अ॒स्मभ्य॑म्। पु॒रु॒ऽवार॑म्। पु॒रु॒ऽक्षुम्। रा॒यः। पोष॑म्। वि। स्य॒ता॒म्। नाभि॑म्। अ॒स्मे इति॥ ४॥

पदार्थः-**(दिवि)** आकाशे **(अन्यः)** **(सदनम्)** स्थानम् **(चक्रे)** कृतवान् **(उच्चा)** उच्चे ऊर्ध्वस्थिते **(पृथिव्याम्)** **(अन्यः)** भिन्नः **(अधि)** **(अन्तरिक्षे)** **(तौ)** **(अस्मभ्यम्)** **(पुरुवारम्)**

बहुभिर्वरणीयम् **(पुरुक्षुम्)** पुरुभिः शब्दितम् **(रायः)** धनादेः **(पोषम्)** पोषकम् **(वि) (स्यताम्)** अन्ते भवताम् **(नाभिम्)** मध्यं बन्धनम् **(अस्मे)** अस्माकम्॥४॥

अन्वयः-हे मनुष्या! अग्नेर्भागोऽन्य उच्चा दिवि सदनमधि चक्रेऽन्यः पृथिव्यामन्योऽन्तरिक्षे सदनमधिचक्रे तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषमस्मे नाभिं च विष्यतां तौ यूयं विजानीत॥४॥

भावार्थः-अग्नेस्त्रीणि स्थानानि उपर्य्याकाशे पृथिव्यां मध्ये च तत्र सूर्यरूपेणान्तरिक्षे निकटे स्थितः प्रत्यक्षः पृथिव्यां गुप्तोऽन्तरिक्षे वर्त्तते तं मनुष्या विजानन्तु॥४॥

पदार्थः-हे मनुष्यो! अग्नि का भाग **(अन्यः)** और है और वह **(उच्चा)** ऊपर जो स्थित **(दिवि)** आकाश उसमें **(सदनम्)** स्थान **(अधि, चक्रे)** किये हुए है तथा **(अन्यः)** और **(पृथिव्याम्)** पृथिवी में और **(अन्तरिक्षे)** अन्तरिक्ष में स्थान को **(अधि)** अधिकता से किये हुए हैं **(तौ)** वे दोनों **(अस्मभ्यम्)** हम लोगों के लिये **(पुरुवारम्)** बहुतों से स्वीकार करने योग्य **(पुरुक्षुम्)** बहुतों ने शब्दित किये अर्थात् कहे-सुने **(रायः)** धनादि पदार्थों के **(पोषम्)** पुष्ट करनेवाले और **(अस्मे)** हमारे **(नाभिम्)** मध्य बन्धन के **(वि, ष्यताम्)** निकट हों, उनको तुम जानो॥४॥

भावार्थः-अग्नि के तीन स्थान हैं-एक ऊपर आकाश में, दूसरा पृथिवी में और तीसरा बीच में; उन तीनों में सूर्य्यरूप से अन्तरिक्ष में, निकट स्थित प्रत्यक्ष पृथिवी में और गुप्त अन्तरिक्ष में वर्त्तमान है, उस अग्नि को मनुष्य जानें॥४॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को कहते हैं॥

विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम॥५॥

विश्वानि। अन्यः। भुवना। जजान। विश्वम्। अन्यः। अभिऽचक्षाणः। एति। सोमापूषणौ। अवतम्। धियम्। मे। युवाभ्याम्। विश्वाः। पृतनाः। जयेम॥५॥

पदार्थः-**(विश्वानि)** सर्वाणि **(अन्यः)** भिन्नो भागः **(भुवना)** भुवनानि लोकजातानि **(जजान)** जज्ञे प्रादुर्भावयति। अत्र व्यत्ययेन परस्मैपदम्। **(विश्वम्) (अन्यः) (अभिचक्षाणः)** अभिव्यक्तवाग्विषयः **(एति)** गच्छति **(सोमापूषणौ) (अवतम्)** रक्षतम् **(धियम्)** प्रज्ञाम् **(मे)** मम **(युवाभ्याम्) (विश्वाः)** सर्वान् **(पृतनाः)** मनुष्यान् **(जयेम)** उत्कर्षयेम॥५॥

अन्वयः-हे अध्यापकोपदेशकौ! योऽन्यो विश्वानि भुवना जजान योऽन्योऽभिचक्षाणो विश्वमेति तौ सोमापूषणा उपदिश्य मे धियं युवामवतं यतो युवाभ्यां सह वयं विश्वाः पृतना जयेम॥५॥

भावार्थः-यो वायुः सर्वाँल्लोकान् धरति यश्च शब्दप्रयोगश्रवणनिमित्तोऽस्ति तद्विज्ञापनेन सर्वेषां मनुष्याणामुन्नतिः कार्य्या॥५॥

पदार्थः-हे अध्यापक और उपदेशको! जो **(अन्यः)** भिन्न भाग **(विश्वानि)** समस्त **(भुवना)** लोकों में प्रसिद्ध पदार्थों को **(जजान)** उत्पन्न करता जो **(अन्यः)** और **(अभिचक्षाणः)** प्रकट वाणी का विषय **(विश्वम्)** संसार को **(एति)** प्राप्त होता, उन दोनों **(सोमापूषणौ)** शान्ति और पुष्टि गुणवाले वायु का उपदेश देकर **(मे)** मेरी **(धियम्)** बुद्धि की तुम दोनों **(अवतम्)** रक्षा करो जिससे **(युवाभ्याम्)** तुम दोनों के साथ हम लोग **(विश्वाः)** समस्त **(पृतनाः)** मनुष्यों को **(जयेम)** उत्कर्ष दें॥५॥

भावार्थः-जो वायु सब लोकों को धरता और जो शब्द प्रयोग वा श्रवण का निमित्त है, उसके विज्ञान कराने से सब मनुष्यों की उन्नति करनी चाहिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

धियं॑ पू॒षा जि॑न्वतु॒ विश्व॒मि॒न्वो र॒यिं सोमो॑ रयि॒पति॑र्दधातु।
अव॑तु दे॒व्यदि॑तिरन॒र्वा बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॥६॥६॥

धिय॑म्। पू॒षा। जि॒न्व॒तु॒। विश्व॒म्ऽइ॒न्वः। र॒यिम्। सोम॑ः। र॒यि॒ऽपति॑ः। द॒धा॒तु॒। अव॑तु। दे॒वी। अदि॑तिः। अ॒न॒र्वा। बृ॒हत्। व॒दे॒म॒। वि॒दथे॑। सु॒ऽवीरा॑ः॥६॥

पदार्थः-**(धियम्)** प्रज्ञां कर्म वा **(पूषा)** प्राणः **(जिन्वतु)** प्राप्नोतु सुखयतु वा **(विश्वमिन्वः)** विश्वं मिनोति व्याप्नोति यस्सः **(रयिम्)** श्रियम् **(सोमः)** पदार्थसमूहः **(रयिपतिः)** धनरक्षकः **(दधातु)** **(अवतु)** रक्षतु **(देवी)** दिव्यगुणा **(अदितिः)** माता **(अनर्वा)** अविद्यमाना अश्वा यस्याः सा **(बृहत्)** **(वदेम)** **(विदथे)** **(सुवीराः)**॥६॥

अन्वयः-हे विद्वांसो! येन प्रकारेण पूषा मे धियं जिन्वतु विश्वमिन्वो रयिपतिस्सोमो रयिं दधातु। अनर्वा देव्यदितिर्धियमवतु यतस्सुवीरा वयं विदथे बृहद्वदेम॥६॥

भावार्थः-हे मनुष्या! यथा सर्वे पदार्थाः श्रीप्रज्ञारोग्यायुषां वर्द्धकाः स्युस्तथा विदधतं येन सर्वे मनुष्या महत्सुखं प्राप्नुयुरिति॥६॥

अत्र प्राणापानाग्निवायुविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चत्वारिंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! जिस प्रकार से **(पूषा)** प्राण मेरी **(धियम्)** बुद्धि वा कर्म को **(जिन्वतु)** प्राप्त हो वा सुखी करे **(विश्वमिन्वः)** तथा जो विश्व को व्याप्त होता वह **(रयिपतिः)** धन की रक्षा करनेवाला **(सोमः)** पदार्थों का समूह **(रयिम्)** लक्ष्मी को **(दधातु)** धारण करे **(अनर्वा)** तथा जिसके अविद्यमान घोड़े हैं वह **(देवी)** दिव्य गुणवाली **(अदितिः)** माता बुद्धि वा कर्म की **(अवतु)** रक्षा करे जिससे **(सुवीराः)** शोभन वीरोंवाले हम लोग **(विदथे)** संग्राम में **(बृहत्)** बहुत **(वदेम)** कहें॥६॥

भावार्थः-हे मनुष्यो! जैसे सब पदार्थ धन, बुद्धि, आरोग्यता और आयु के बढ़ानेवाले हों, वैसे विधान करो जिससे सब मनुष्य बहुत सुख को प्राप्त होवें॥६॥

इस सूक्त में प्राण, अपान, अग्नि, वायु और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह चालीसवां सूक्त और छठा वर्ग समाप्त हुआ॥

वायवित्येकविंशत्यृचस्यैकचत्वारिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। १, २ वायुः। ३ इन्द्रवायू। ४-६ मित्रावरुणौ। ७-९ अश्विनौ। १०-१२ इन्द्रः। १३-१५ विश्वेदेवाः। १६-१८ सरस्वती। १९-२१ द्यावापृथिव्यौ हविर्धाने वा देवताः। १, ३, ४, ६, १०, ११, १३, १५, १९-२१ गायत्री। २, ५, ९, १२, १४ निचृत् गायत्री। ७ त्रिपाद्गायत्री। ८ विराट् गायत्री छन्दः। षडजः स्वरः। १६ अनुष्टुप् छन्दः। गान्धारः स्वरः। १७ उष्णिक् छन्दः। ऋषभः स्वरः। १८ बृहती छन्दः। मध्यमः स्वरः॥

अथाध्यापकविषयमाह॥

अब इक्कीस ऋचावाले इकतालीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में अध्यापक के विषय को कहते हैं॥

वायो॒ ये ते॑ सह॒स्रिणो॒ रथा॑स॒स्तेभि॒रा ग॑हि। नि॒युत्वा॒न्सोम॑पीतये॥ १॥

वायो॒ इति॑। ये। ते॒। स॒ह॒स्रिण॑ः। रथा॑सः। तेभि॑ः। आ। ग॒हि॒। नि॒युत्वा॑न्। सोम॑ऽपीतये॥ १॥

पदार्थः-(वायो) (ये) (ते) तव **(सहस्रिणः)** सहस्रमसंख्याता वेगादयो गुणाः सन्ति येषां ते **(रथासः)** रमणीयाः **(तेभिः)** तैः **(आ, गहि)** आगच्छ **(नियुत्वान्)** नियमनियुक्तः **(सोमपीतये)** सोमौषधिरसपानाय॥ १॥

अन्वयः-हे वायो वायुवद्वर्त्तमान विद्वन्! ये ते वायुवेगाः सहस्रिणो रथासः सन्ति तेभिस्सह नियुत्वान् सन् सोमपीतय आगहि आगच्छ॥ १॥

भावार्थः-वायोरसङ्ख्यानि यानि वेगादीनि कर्माणि सन्ति तानि विदित्वा इतस्ततो मनुष्या गच्छन्त्वागच्छन्तु॥ १॥

पदार्थः-हे **(वायो)** पवन के समान वर्त्तमान विद्वान्! **(ये)** जो **(ते)** आप के वायुवद् वेगवाले **(सहस्रिणः)** असंख्यात वेगादि गुणोंवाले **(रथासः)** रमणीय यान हैं **(तेभिः)** उनके साथ **(नियुत्वान्)** नियमयुक्त होते हुए **(सोमपीतये)** उत्तम ओषधियों के रस पीने को **(आ, गहि)** आइये॥ १॥

भावार्थः-पवन के असंख्य जो वेग आदि कर्म हैं, उनको जान के इधर-उधर मनुष्यों को जाना-आना चाहिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि॒युत्वा॑न् वायवा॑ ग॑ह्ययं शु॒क्रो अ॑यामि ते। गन्ता॑सि। सुन्व॒तो गृ॒हम्॥ २॥

नि॒युत्वा॑न्। वा॒यो॒ इति॑। आ। ग॒हि॒। अ॒यम्। शु॒क्रः। अ॒या॒मि॒। ते॒। गन्ता॑। अ॒सि॒। सु॒न्व॒तः। गृ॒हम्॥ २॥

पदार्थः-(नियुत्वान्) नियतात्मा संयतेन्द्रियः **(वायो)** वायुवद्वर्त्तमान **(आ) (गहि)** आगच्छ **(अयम्) (शुक्रः)** शोषकः **(अयामि)** प्राप्नोमि **(ते)** तव **(गन्ता) (असि) (सुन्वतः)** अभिषवकर्त्तुः **(गृहम्)**॥२॥

अन्वयः-हे वायो! यतस्त्वं शुक्रः सन् सुन्वतो गृहं गन्तासि तस्मान्नियुत्वान् सन्ना गहि। यथाऽयं वायुर्नियुत्वान् सर्वत्र गन्तास्ति तथाऽहं ते गृहमयामि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा वायवो नियमेन सर्वत्र गच्छन्ति तथा नियतानि कर्माणि कृत्वा सुखान्याप्तव्यानि॥२॥

पदार्थः-हे **(वायो)** पवन के समान वर्त्तमान विद्वान्! जिस कारण आप **(शुक्रः)** अज्ञानताओं को सुखानेवाले होते हुए **(सुन्वतः)** ओषधियों के रस निकालनेवाले के **(गृहम्)** घर **(गन्ता)** जानेवाले **(असि)** हैं, इस कारण **(नियुत्वान्)** आत्मा से नियमयुक्त जितेन्द्रिय होते हुए **(आ, गहि)** आओ जैसे **(अयम्)** यह वायु नियमयुक्त सर्वत्र जानेवाला है, वैसे मैं **(ते)** आपके घर को **(अयामि)** प्राप्त होता हूँ॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पवन नियम से सर्वत्र जाते हैं, वैसे नियमयुक्त कर्मों को कर सुखों को प्राप्त होना चाहिये॥२॥

अथाऽध्यापकाऽध्येतृविषयमाह॥

अब अध्यापक और अध्येताओं के विषय को अगले मन्त्र में कहा है॥

शु॒क्रस्या॒द्य गवा॑शिर॒ इन्द्र॑वायू नि॒युत्व॑तः। आ या॑तं पिब॑तं नरा॥३॥

शु॒क्रस्य॑। अ॒द्य। गोऽआ॑शिरः। इन्द्र॑वायू॒ इति॑। नि॒युत्व॑तः। आ। या॒त॒म्। पिब॑तम्। न॒रा॒॥३॥

पदार्थः-(शुक्रस्य) शोषकस्योदकस्य। **शुक्रमित्युदकनामसु पठितम्।** (निघं०१.१२) **(अद्य)** इदानीम् **(गवाशिरः)** गाः किरणान् अश्नुते तस्य **(इन्द्रवायू)** विद्युत्पवनौ **(नियुत्वतः)** नियमेन वर्त्तमानस्य **(आ) (यातम्)** प्राप्नुतम् **(पिबतम्) (नरा)** नायकौ॥३॥

अन्वयः-हे नरा इन्द्रवायू इव वर्त्तमानौ! युवामद्य शुक्रस्य गवाशिरो नियुत्वत आ यातं शुक्रस्योदकस्य रसं पिबतम्॥३॥

भावार्थः-यथा विद्युत्पवनौ सर्वत्राऽभिव्याप्तौ सर्वं जगद्रक्षतस्तथोत्तमानि कर्माणि कृत्वा शुद्धोदकं पीत्वाऽऽरोग्यं सर्वेषामुन्नतिश्च कार्य्या॥३॥

पदार्थः-हे **(नरा)** बिजुली और पवन के समान वर्त्तमान अग्रगन्ता मनुष्यो! तुम **(अद्य)** आज **(शुक्रस्य)** अज्ञानता सोखने और **(गवाशिरः)** किरणों को अर्थात् विद्याओं को व्याप्त

होनेवाले **(नियुत्वतः)** नियमयुक्त के समीप **(आ, यातम्)** आओ और जल रस **(पिबतम्)** पीओ॥३॥

भावार्थः-जैसे बिजुली और पवन सर्वत्र अभिव्याप्त और सब जगत् की रक्षा करते हैं, वैसे उत्तम काम कर और शुद्ध जल पीके आरोग्यपन और सबकी उन्नति करनी चाहिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतं हवम्॥४॥

अयम्। वाम्। मित्रावरुणा। सुतः। सोमः। ऋतऽवृधा। मम। इत्। इह। श्रुतम्। हवम्॥४॥

पदार्थः-**(अयम्)** **(वाम्)** युवाभ्याम् **(मित्रावरुणा)** प्राणोदानवद्वर्त्तमानौ **(सुतः)** निष्पादितः **(सोमः)** **(ऋतावृधा)** सत्येन वृद्धौ **(मम)** **(इत्)** **(इह)** **(श्रुतम्)** **(हवम्)**॥४॥

अन्वयः-हे ऋतावृधा मित्रावरुणा! योऽयं वां सोमः सुतस्तत्पीत्वेदिह मम हवं श्रुतम्॥४॥

भावार्थः-यथा वायवः सर्वस्माद्रसं गृहीत्वा वर्षयन्ति तथैव सत्या विद्याः श्रुत्वा सर्वेभ्यः सुखं देयम्॥४॥

पदार्थः-हे **(ऋतावृधा)** सत्य से बढ़े हुए **(मित्रावरुणा)** प्राण और उदान के समान वर्त्तमान अध्यापको! जो **(अयम्)** यह **(वाम्)** तुम दोनों से **(सोमः)** ओषधियों का रस **(सुतः)** उत्पन्न हुआ उसको पी के **(इत्)** ही **(इह)** यहाँ **(मम)** मेरे **(हवम्)** आह्वान को **(श्रुतम्)** सुनिये॥४॥

भावार्थः-जैसे वायु सबसे रस को ग्रहण कर वर्षाते हैं, वैसे ही सत्य विद्याओं को सुन कर सबके लिये सुख देना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते॥५॥७॥

राजानौ। अनभिऽद्रुहा। ध्रुवे। सदसि। उत्ऽतमे। सहस्रऽस्थूणे। आसाते इति॥५॥

पदार्थः-**(राजानौ)** प्रकाशमानौ **(अनभिद्रुहा)** द्रोहकर्मरहितौ **(ध्रुवे)** निश्चले **(सदसि)** सभास्थाने **(उत्तमे)** श्रेष्ठे **(सहस्रस्थूणे)** सहस्राणि स्थूणाः स्तम्भा यस्मिँस्तस्मिन् **(आसाते)** उपविशतः॥५॥

अन्वयः-हे अनभिद्रुहा राजानौ! युवां ध्रुव उत्तमे सहस्रस्थूणे सदसि यौ मित्रावरुणासाते तौ विजानीतम्॥५॥

भावार्थः-हे मनुष्यास्तावेव राजप्रधानपुरुषौ धन्यवादमर्हतः यौ गुणाढ्यायामुत्तमायां सभायां स्थित्वा कस्यचित् पक्षपातं कदाचिन्न कुर्याताम्॥५॥

पदार्थः-हे **(अनभिद्रुहा)** द्रोहकर्मरहित **(राजानौ)** प्रकाशमान जनो! तुम **(ध्रुवे)** जो कि निश्चल **(उत्तमे)** श्रेष्ठ **(सहस्रस्थूणे)** जिसमें सहस्र खम्भा विद्यमान उस **(सदसि)** सभा में जो प्राणोदानवद्वर्त्तमान अध्यापकोपदेशक **(आसाते)** बैठते हैं, उनको जानो॥५॥

भावार्थः-हे मनुष्यो! वे ही राजा और प्रधान पुरुष धन्यवाद के योग्य होते हैं, जो गुणयुक्त उत्तम सभा में बैठ के किसी का पक्षपात कभी न करें॥५॥

अथ सूर्य्याचन्द्रविषयमाह॥

अब सूर्य्य और चन्द्रमा के विषय को अगले मन्त्र में कहा है॥

ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम्॥६॥

ता। सम्ऽराजा। घृतासुती इति घृतऽआसुती। आदित्या। दानुनः। पती इति। सचेते इति। अनवऽह्वरम्॥६॥

पदार्थः-**(ता)** तौ **(सम्राजा)** सम्यग् राजमानौ चक्रवर्त्तिनृपवद्वर्त्तमानौ **(घृतासुती)** यौ घृतमुदकमासुनुतः **(आदित्या)** अखण्डितौ **(दानुनः)** दानस्य **(पती)** पालकौ **(सचेते)** सम्बध्नतीः **(अनवह्वरम्)** सरलम्॥६॥

अन्वयः-हे मनुष्या! यौ घृतासुती सम्राजा आदित्या दानुनस्पती सर्वं सचेते ता अनवह्वरं साध्नुत॥६॥

भावार्थः-हे मनुष्या! यौ सूर्य्याचन्द्रमसौ सर्वस्य प्रकाशकौ जलप्रदौ सर्वानुषङ्गिणौ सरलं मार्गं गच्छतस्तथा शुद्धे मार्गे गच्छत॥६॥

पदार्थः-हे मनुष्यो! जो **(घृतासुती)** शुद्ध तत्त्व जल को निकालनेवाले **(सम्राजा)** अच्छे प्रकार प्रकाशमान चक्रवर्त्ति राजा के समान वर्त्तमान **(आदित्या)** अखण्डित **(दानुनः)** दान के **(पती)** पालन करनेवाले सूर्य-चन्द्रमा सबका **(सचेते)** सम्बन्ध करते हैं **(ता)** उनको **(अनवह्वरम्)** सरलता जैसे हो, वैसे सिद्ध करो॥६॥

भावार्थः-हे मनुष्यो! जो सूर्य्य-चन्द्रमा सबका प्रकाश करने वा जल के देनेवाले सबके अनुषङ्गी सीधे मार्ग से जाते हैं, वैसे शुद्ध मार्ग में जाओ॥६॥

अथाग्निवायुगुणानाह॥

अब अग्नि और वायु के गुणों को कहते हैं॥

गोमद्वू षु नासत्याश्वावद्यातमश्विना। वर्ती रुद्रा नृपाय्यम्॥७॥

गोऽमत्। ऊम् इति। सु। नासत्या। अश्वऽवत्। यातम्। अश्विना। वर्तिः। रुद्रा। नृऽपाय्यम्॥७॥

पदार्थः-(गोमत्) बह्व्यो गावो विद्यते यस्मिँस्तत् **(उ)** वितर्के **(सु)** शोभने **(नासत्या)** असत्यरहितौ **(अश्वावत्)** अश्वेन तुल्यौ **(यातम्)** प्राप्नुतः **(अश्विना)** व्यापनशीलौ **(वर्त्तिः)** मार्गम् **(रुद्रा)** दुष्टानां रोदयितारौ **(नृपाय्यम्)** नृणां पाय्यं मानं नृपाय्यम्॥७॥

अन्वयः-हे मनुष्या! यथा नासत्या रुद्राश्विना अश्वावद्गोमदू नृपाय्यं वर्त्तिः सुयातं प्राप्नुतस्तथा यूयमेतौ प्राप्नुत॥७॥

भावार्थः-मनुष्या यदि वाय्वग्नियानेन यत्र तत्र गच्छेयुस्तर्हि परिमितं सुखमाप्नुयुः॥७॥

पदार्थः-हे मनुष्यो! जैसे **(नासत्या)** असत्यरहित **(रुद्रा)** दुष्टों के रुलानेवाले **(अश्विना)** व्यापनशील अध्यापकोपदेशक **(अश्वावत्)** घोड़े के तुल्य **(उ)** वा **(गोमत्)** बहुत गौयें जिसमें विद्यमान उस **(नृपाय्यम्)** मनुष्यों के माननेवाले **(वर्त्तिः)** मार्ग को **(सुयातम्)** अच्छे प्रकार प्राप्त होते हैं, वैसे तुम इनको प्राप्त होओ॥७॥

भावार्थः-मनुष्य यदि वायु और अग्नि के यान से जहाँ-तहाँ जावें तो परिमित सुख पावें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न यत्परो नान्तर आदुधर्षद् वृषण्वसू। दुःशंसो मर्त्यो रिपुः॥८॥

न। यत्। परः। न। अन्तरः। आऽउदुधर्षत्। वृषण्वसू इति। वृषण्ऽवसू। दुःऽशंसः। मर्त्यः। रिपुः॥८॥

पदार्थः-(न) (**यत्**) यौ **(परः)** **(न)** **(अन्तरः)** मध्यस्थः **(आदधर्षत्)** प्रगल्भो भवेत् **(वृषण्वसू)** वृष्णं वर्षयित्रीणां वासयितारौ **(दुःशंसः)** दुष्टः शंसस्तुतिर्यस्य सः **(मर्त्यः)** मरणधर्मा मनुष्यः **(रिपुः)** शत्रुः॥८॥

अन्वयः-हे मनुष्याः! परो दुःशंसो मर्त्यो रिपुर्यद्यौ वृषण्वसू नादधर्षदन्तरो दुःशंसो मर्त्यो रिपुर्नादधर्षत्तौ कार्येषु नियुङ्ग्ध्वम्॥८॥

भावार्थः-अत्र जगति वायुं वह्निं च कोपि धर्षयितुं न शक्नोति नैवाऽन्योः कश्चिच्छत्रुवन्नाशकोऽस्ति तथाऽजेयैर्मनुष्यैर्भवितव्यम्॥८॥

पदार्थः-हे मनुष्यो! **(परः)** उत्कृष्ट **(दुःशंसः)** जिसकी दुष्ट स्तुति विद्यमान वह **(मर्त्यः)** मरणधर्मा मनुष्य **(रिपुः)** शत्रु **(यत्)** जो **(वृषण्वसू)** वर्षानेवालों को वसाते हैं उनको **(न)** न **(आदधर्षत्)** लचावे वा **(अन्तरः)** सामान्य दुष्ट स्तुतिवाला मरणधर्मा जिनको **(न)** न लचावे, उनको कार्यों में नियुक्त करो॥८॥

भावार्थः-इस जगत् में वायु और अग्नि को कोई भी लचाय नहीं सकता और न इनका कोई शत्रु के समान नाश करनेवाला है, उस प्रकार से नहीं पराजित होने योग्य मनुष्यों को होना चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ता न आ वोळ्हमश्विना रयिं पिशङ्गसंदृशम्। धिष्ण्या वरिवोविदम्॥९॥

ता। नः। आ। वोळ्हम्। अश्विना। रयिम्। पिशङ्गऽसंदृशम्। धिष्ण्या। वरिवःऽविदम्॥९॥

पदार्थः-**(ता)** तौ **(नः)** अस्मभ्यम् **(आ)** **(वोढम्)** वहतः **(अश्विना)** **(रयिम्)** **(पिशङ्गसंदृशम्)** पिशङ्गं शोभनं वर्णं सम्यग् पश्यन्ति येन तम् **(धिष्ण्या)** यौ धेष्येते शब्द्येते स्तूयेते तौ **(वरिवोविदम्)** वरिवः सेवनं विन्दन्ति येन तम्॥९॥

अन्वयः-हे मनुष्या! यौ धिष्ण्याऽश्विना नो वरिवोविदं पिशङ्गसंदृशं रयिमा वोढं समन्तात् प्रापयतस्ता उपदिशत॥९॥

भावार्थः-मनुष्यैर्याभ्यामग्निवायुभ्यां पुष्कलां श्रियं प्राप्नुवन्ति तौ यथावद्वेद्यौ॥९॥

पदार्थः-हे मनुष्यो! जो **(धिष्ण्या)** शब्दायमान हों वा स्तुति किये जावें वे **(अश्विना)** सर्वत्र होनेवाले अग्नि और वायु **(नः)** हम लोगों के लिये **(वरिवोविदम्)** जिससे सेवा को प्राप्त होते वा **(पिशङ्गसंदृशम्)** सुन्दर वर्ण को देखते हैं उस **(रयिम्)** धन को **(आ, वोढम्)** अच्छे प्रकार प्राप्त करते हैं, **(ता)** उनका उपदेश करो॥९॥

भावार्थः-मनुष्यों को चाहिये कि जिन अग्नि और वायु से पुष्कल धन को प्राप्त होते हैं, उनको यथावत् जानें॥९॥

अथ सूर्य्यविषयमाह॥

अब सूर्य विषय को अगले मन्त्र में कहा है॥

इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः॥१०॥८॥

इन्द्रः। अङ्ग। महत्। भयम्। अभि। सत्। अप। चुच्यवत्। सः। हि। स्थिरः। विऽचर्षणिः॥१०॥

पदार्थः-(इन्द्रः) (**अङ्ग**) सम्बोधने **(महत्)** **(भयम्)** **(अभि)**। अत्र **संहितायामिति** दीर्घः। **(सत्)** **(अप)** **(चुच्यवत्)** च्यावयति **(सः)** **(हि)** किल **(स्थिरः)** स्वपरिधिस्थः **(विचर्षणिः)** दर्शकः। **विचर्षणिरिति पश्यतिकर्मा।** (निघं०३.११)॥१०॥

अन्वयः-हे अङ्ग! यः स्थिरो विचर्षणिरिन्द्रो महत्सद्भयमपाभिचुच्यवत् स हि वेदितव्यः॥१०॥

भावार्थः-यदि ब्रह्माण्डे सूर्यो न स्यात्तर्हि कस्यापि भयं न निवर्त्तेत। यदि सूर्यलोकः स्वपरिधौ स्थिरो दर्शको न भवेत्तर्हि तुल्याकर्षणं दर्शनं च न भवेत्॥१०॥

पदार्थः-हे **(अङ्ग)** विद्वान् पुरुष! जो **(स्थिरः)** स्थिर अपनी परिधि में ठहरा हुआ **(विचर्षणिः)** देखनेवाला **(इन्द्रः)** ऐश्वर्यवान् सूर्य **(महत्)** बहुत **(सत्)** होता हुआ **(भयम्)** जो भय उसको **(अप, अभि, चुच्यवत्)** अलग करता है **(सः, हि)** वही सूर्यलोक जानने योग्य है॥१०॥

भावार्थः-यदि ब्रह्माण्ड में सूर्य न हो तो किसी का भय न निवृत्त हो। यदि सूर्यलोक अपनी परिधि में स्थिर और दिखानेवाला न हो तो तुल्य आकर्षण और देखना न बने॥१०॥

पुनस्तद्विषयं परमेश्वरोपासनाविषयञ्चाह॥

फिर उसी विषय को तथा परमेश्वरोपासना विषय को अगले मन्त्र में कहा है॥

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत्। भद्रं भवाति नः पुरः॥११॥

इन्द्रः। च। मृळयाति। नः। न। नः। पश्चात्। अघम्। नशत्। भद्रम्। भवाति। नः। पुरः॥११॥

पदार्थः-(इन्द्रः) परमेश्वरः सूर्यो वा **(च)** **(मृळयाति)** सुखयेत् **(नः)** अस्मान् **(न)** निषेधे **(नः)** अस्माकम् **(पश्चात्)** **(अघम्)** पापम् **(नशत्)** प्राप्नुयात्। **नशदिति व्याप्तिकर्मा।** (निघं०२.१८) **(भद्रम्)** कल्याणम् **(भवाति)** **(नः)** अस्मभ्यम् **(पुरः)** पुरस्तात्॥११॥

अन्वयः-यदिन्द्रः परमेश्वरस्तत्कृतः सूर्यश्च नो मृळयात्यतो नः पुरः पश्चाच्चाऽघं न नशत्। किन्तु नो याथातथ्यं भद्रं भवाति॥११॥

भावार्थः-यो जगदीश्वरो घटपटादीन् सूर्यइव सर्वात्मनः प्रकाशयति ये तद्भक्तास्ते तस्मादन्यं तत्स्थाने नोपासते सर्वव्यापकं ज्ञात्वाऽस्मानीश्वरः सततं पश्यतीति मत्वाऽधर्माचरणं न कुर्वन्ति सततं धर्ममेवाऽनुतिष्ठन्ति तेषामागामि पापाचरणनिवृत्या योगजसिद्धिविज्ञानोद्भवेन मुक्तिः स्यादेवेति नाऽन्येषामिति निश्चयः॥११॥

पदार्थः-जो **(इन्द्रः)** परमेश्वर **(च)** और उसका बनाया सूर्य **(नः)** हमको **(मृळयाति)** सुखी करे, इससे **(नः)** हमारे **(पुरः)** अगले **(पश्चात्)** और पिछले **(अघम्)** पाप **(न)** न **(नशत्)** प्राप्त हो, किन्तु **(नः)** हमारे लिये यथार्थ **(भद्रम्)** कल्याण **(भवाति)** होवे॥११॥

भावार्थः-जो जगदीश्वर घटपटादिकों को जैसे सूर्य वैसे सबके आत्माओं को प्रकाशित करता है, जो उसके भक्त हैं, वे उससे भिन्न की उसके स्थान में नहीं उपासना करते हैं। वे सर्वव्यापक परमेश्वर को जान और वह हमें निरन्तर देखता है, ऐसा मानकर अधर्माचरण नहीं करते हैं, किन्तु निरन्तर धर्म ही का अनुष्ठान करते हैं, उनके आगामी पापाचरण की निवृत्ति और योगज सिद्धि विज्ञान के होने से मुक्ति होवे ही गी, औरों को नहीं यह निश्चय है॥११॥

पुनस्तमेव विषयमाह

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्। जेता शत्रून् विचर्षणिः॥१२॥

इन्द्रः। आशाभ्यः। परि। सर्वाभ्यः। अभयम्। करत्। जेता। शत्रून्। विऽचर्षणिः॥१२॥

पदार्थः-(**इन्द्रः**) परमेश्वरः (**आशाभ्यः**) दिग्भ्यः। **आशा इति दिङ्नामसु पठितम्।** (निघ०१.६) (**परि**) सर्वतः (**सर्वाभ्यः**) (**अभयम्**) (**करत्**) कुर्यात् (**जेता**) जयशीलः (**शत्रून्**) (**विचर्षणिः**) सर्वस्य द्रष्टा॥१२॥

अन्वयः-हे मनुष्या! यो विचर्षणिरिन्द्र शत्रून् जेतेव सर्वाभ्य आशाभ्यो नोऽभयं परि करत् स एवास्माभिः सततमुपासनीयः॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पक्षपातरहिता वीरपुरुषा दुष्टाचारिणोऽन्येभ्यो भयप्रदानं निवार्य्य प्रजाः सुखयुक्ताः कुर्वन्ति तथा सर्वज्ञ ईश्वर उपासितस्सन् सर्वतो दुष्टाचारान्निवार्य्य श्रेष्ठाचारे प्रवर्त्तयित्वाऽभयं मुक्तिपदं प्रापय्य सर्वान् मुक्तजीवानानन्दयत्यतोऽयमेव सर्वैर्मनुष्यैः सदोपासनीयः॥१२॥

पदार्थः-हे मनुष्यो! जो (**विचर्षणिः**) सबका देखनेवाला (**इन्द्रः**) परमेश्वर (**शत्रून्**) शत्रुओं को (**जेता**) जीतनेवाले के समान (**सर्वाभ्यः**) सब (**आशाभ्यः**) दिशाओं से हमको (**अभयम्**) अभय (**परि, करत्**) सब ओर से करता है, वही हम लोगों को निरन्तर उपासना करने योग्य है॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पक्षपातरहित वीर पुरुष दुष्टाचारी और औरों के लिये भय देनेवालों को निवार के प्रजाओं को सुखयुक्त करते हैं, वैसे उपासना किया हुआ सर्वज्ञ ईश्वर सब ओर से दुष्टाचार से निवृत्त कर श्रेष्ठाचार में प्रवृत्त कर अभय मुक्तिपद को प्राप्त करा कर सब मुक्त जीवों को आनन्दित करता है, इस कारण यही सबको उपासना करने योग्य है॥१२॥

पुनरध्यापकाऽध्येतृविषयमाह॥

फिर पढ़ाने और पढ़नेवालों के विषय को अगले मन्त्र में कहा है॥

विश्वे॑ देवास॒ आ ग॑त शृणु॒ता म॑ इ॒मं ह॒वम्। एदं ब॒र्हिर्नि षी॑दत॥ १३॥

विश्वे॑। दे॒वा॒स॒:। आ। ग॒त॒। शृ॒णु॒त। मे॒। इ॒मम्। ह॒वम्। आ। इ॒दम्। ब॒र्हि:। नि। सी॒द॒त॒॥ १३॥

पदार्थ:-(विश्वे) सर्वे **(देवास:)** विद्वांस: **(आ) (गत)** गच्छत **(शृणुत)**। अत्र **संहितायामि**ति दीर्घ:। **(मे)** मम **(इमम्) (हवम्)** आदातव्यं शब्दार्थसम्बन्धाऽध्ययनम् **(आ) (इदम्) (बर्हि:)** उत्तमासनम् **(नि)** नितराम् **(सीदत)** उपाध्वम्॥ १३॥

अन्वय:-हे विश्वे देवासो! यूयमा गतेदं बर्हिर्निषीदत म इमं हवमा शृणुत॥ १३॥

भावार्थ:-विद्यार्थिनोऽध्यापकान् प्रत्येवं ब्रुयुर्भवन्त इहागच्छन्तु सर्वोत्तमासने स्थित्वाऽस्माभिरधीतानां शास्त्राणां मध्ये परीक्षां कुरुत॥ १३॥

पदार्थ:-हे **(विश्वे)** सब **(देवास:)** विद्वानो! तुम **(आ, गत)** आओ और **(इदम्)** इस **(बर्हि:)** उत्तमासन पर **(निषीदत)** बैठो **(मे)** और मेरे **(इमम्)** इस **(हवम्)** ग्रहण करने योग्य शब्दार्थ सम्बन्ध को **(आ, शृणुत)** अच्छे प्रकार सुनो॥ १३॥

भावार्थ:-विद्यार्थी जन पढ़ानेवालों से यह कहें कि आप यहाँ आइये, सर्वोत्तम आसन पर बैठ के हमने जो शास्त्र पढ़े, उनमें परीक्षा कीजिये॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ती॒व्रो वो॒ मधु॑माँ अ॒यं शु॒नहो॑त्रेषु मत्स॒र:। ए॒तं पि॑ब॒त॒ काम्य॑म्॥ १४॥

ती॒व्र:। व॒:। मधु॑ऽमान्। अ॒यम्। शु॒नऽहो॑त्रेषु। म॒त्स॒र:। ए॒तम्। पि॒ब॒त॒। काम्य॑म्॥ १४॥

पदार्थ:-(तीव्र:) तीक्ष्ण: **(व:)** युष्माकम् **(मधुमान्)** विज्ञानसम्बन्धी **(अयम्) (शुनहोत्रेषु)** शुनानां विज्ञानवृद्धानां होत्रेषु दानेषु **(मत्सर:)** आनन्द: **(एतम्) (पिबत) (काम्यम्)** कमनीयं रसम्॥ १४॥

अन्वय:-हे विश्वेदेवा! यो वोऽयं शुनहोत्रेषु तीव्रो मधुमान् मत्सरोऽस्ति एतं काम्यं यूयं पिबत॥ १४॥

भावार्थ:-ये विज्ञानवृद्धान् सेवन्ते ते तीव्रबुद्धयस्सन्तो विद्वांसो जायन्ते॥ १४॥

पदार्थ:-हे सब विद्वानो! जो **(व:)** तुम्हारा **(अयम्)** यह **(शुनहोत्रेषु)** विद्वान् वृद्धों के दानों में **(तीव्र:)** तीक्ष्ण **(मधुमान्)** विज्ञानसम्बन्धी **(मत्सर:)** आनन्द है **(एतम्)** इस **(काम्यम्)** मनोहर रस को तुम **(पिबत)** पिओ॥ १४॥

भावार्थः-जो विज्ञानवृद्धों की सेवा करते हैं, वे तीव्रबुद्धि हुए विद्वान् होते हैं॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः। विश्वे मम श्रुता हवम्॥ १५॥ ९॥

इन्द्रऽज्येष्ठाः। मरुत्ऽगणाः। देवासः। पूषऽरातय। विश्वे। मम। श्रुत। हवम्॥ १५॥ ९॥

पदार्थः-(**इन्द्रज्येष्ठाः**) इन्द्रः परमविद्यैश्वर्यं प्रधानमेषां ते (**मरुद्गणाः**) मरुतां मनुष्याणां समूहाः (**देवासः**) विद्याभिः प्रकाशमानाः (**पूषरातयः**) पुष्टे रातिर्दानं येषान्ते (**विश्वे**) सर्वे (**मम**) (**श्रुत**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हवम्**)॥१५॥

अन्वयः-हे इन्द्रज्येष्ठा विश्वे देवासः ! पूषरातयो मरुद्गणा यूयं मम हवं श्रुत॥१५॥

भावार्थः-ये विद्यादिगुणप्रधानं पुरुषं सत्कुर्वन्ति विद्यां ददति गृह्णन्ति च ते परीक्षका भूत्वाऽन्यान् विदुषः कुर्वन्तु॥१५॥

पदार्थः-हे (**इन्द्रज्येष्ठाः**) परम विद्यारूप ऐश्वर्य्य जिनके प्रधान हैं वे (**विश्वे**) सब (**देवासः**) विद्वानो! (**पूषरातयः**) जिनका पुष्टि के निमित्त दान है वे (**मरुद्गणाः**) बहुत मनुष्य तुम लोग (**मम**) मेरे (**हवम्**) ग्रहण करने योग्य विद्यार्थ सम्बन्ध को (**श्रुत**) सुनो॥१५॥

भावार्थः-जो विद्यादि गुणों में प्रधान पुरुष का सत्कार करते, विद्या देते और दूसरों से लेते हैं, वे परीक्षक होके औरों को विद्वान् करते हैं॥१५॥

अथ विदुषीविषयमाह॥

अब विदुषी विषय को अगले मन्त्र में कहा है॥

अम्बितमे नदीतमे देवितमे सरस्वति।
अप्रशस्ताइव स्मसि प्रशस्तिमम्ब नस्कृधि॥ १६॥

अम्बिऽतमे। नदीऽतमे। देविऽतमे। सरस्वति। अप्रशस्ताःऽइव। स्मसि। प्रऽशस्तिम्। अम्ब। नः। कृधि॥ १६॥

पदार्थः-(**अम्बितमे**) याऽम्बतेऽध्यापयति साऽतिशयिता तत्सम्बुद्धौ (**नदीतमे**) अतिशयेनाव्यक्तविद्योपदेशिके (**देवितमे**) अतिशयेन विदुषि (**सरस्वति**) बहुविज्ञानवति (**अप्रशस्ताइव**) यथा न प्रशस्ता अप्रशस्तास्तथा वर्त्तमाना वयम् (**स्मसि**) (**प्रशस्तिम्**) श्रैष्ठ्यम् (**अम्ब**) मातरध्यापिके (**नः**) अस्मान् (**कृधि**) कुरु॥१६॥

अन्वयः-हे अम्बितमे देवितमे नदीतमे सरस्वत्यम्ब! त्वं येऽप्रशस्ताइव वयं स्मसि तान्नः प्रशस्तिं प्राप्तान् कृधि॥१६॥

भावार्थः-यावत्यः कुमार्य्यस्सन्ति ता विदुषीणां सकाशादधीयीरन् ता ब्रह्मचारिण्यो विदुषीरेवं प्रार्थयेयुर्भवत्योऽस्मान् विद्यासुशिक्षायुक्तान् कुरुतेति॥१६॥

पदार्थः-हे **(अम्बितमे)** अतीव पढ़ानेवाली **(देवितमे)** अतीव पण्डिता **(नदीतमे)** अतीव अप्रकट विद्या का उपदेश करने **(सरस्वति)** बहुविज्ञान रखनेवाली **(अम्ब)** माता अध्यापिका! जो **(अप्रशस्ताइव)** अप्रशस्तों के समान हम लोग **(स्मसि)** हैं, उन **(नः)** हम लोगों को **(प्रशस्तिम्)** प्रशंसा को प्राप्त **(कृधि)** करो॥१६॥

भावार्थः-जितनी कुमारी हैं वे विदुषियों से विद्या अध्ययन करें और वे कुमारी ब्रह्मचारिणी विदुषियों की ऐसी प्रार्थना करें कि आप हम सबों को विद्या और सुशिक्षा से युक्त करें॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वे विश्वा सरस्वति श्रितायूंषि देव्याम्।
शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः॥१७॥

त्वे इति। विश्वा। सरस्वति। श्रिता। आयूंषि। देव्याम्। शुनऽहोत्रेषु। मत्स्व। प्रऽजाम्। देवि। दिदिड्ढि। नः॥१७॥

पदार्थः-**(त्वे)** त्वयि **(विश्वा)** सर्वाणि **(सरस्वति)** परमविदुषि **(श्रिता)** श्रितानि **(आयूंषि)** **(देव्याम्)** विदुष्याम् **(शुनहोत्रेषु)** प्राप्तयोगजविद्याद्येषु **(मत्स्व)** आनन्द **(प्रजाम्)** सन्तानान् **(देवि)** **(दिदिड्ढि)** उपदिश। अत्र शपः श्लुः। **(नः)** अस्माकम्॥१७॥

अन्वयः-हे देवि सरस्वति! यथा विश्वाऽऽयूंषि त्वे देव्यां श्रिता सा त्वं शुनहोत्रेषु मत्स्व नः प्रजां दिदिड्ढि॥१७॥

भावार्थः-सर्वे विद्वांसः स्वस्य स्वस्य विदुषीं स्त्रियं प्रत्येवमुपदिशेयुस्त्वया सर्वेषां कन्या अध्याप्यास्सर्वाः स्त्रियश्च सुशिक्षणीयाः॥१७॥

पदार्थः-हे **(देवि)** प्रकाशमान **(सरस्वति)** परमविदुषी स्त्री! जैसे **(विश्वा)** समस्त **(आयूंषि)** आयुर्दा **(त्वे)** तुझे **(देव्याम्)** विदुषी में **(श्रिता)** आश्रित हैं, सो तू **(शुनहोत्रेषु)** पाई है

योगज विद्या जिन्होंने उनके बीच **(मत्स्व)** आनन्द कर, **(नः)** हमारे **(प्रजाम्)** सन्तानों को **(दिदिड्ढि)** उपदेश दे॥१७॥

भावार्थः-सब विद्वान् जन अपनी-अपनी विदुषी स्त्रियों के प्रति ऐसा उपदेश देवें कि तुमको सबकी कन्यायें पढ़ानी चाहिये और सबकी स्त्री अच्छे प्रकार सिखानी चाहिये॥१७॥

अथ स्त्रीपुरुषविषयमाह॥

अब स्त्रीपुरुष के विषय को अगले मन्त्र में कहा है॥

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति॥१८॥

इमा। ब्रह्म। सरस्वति। जुषस्व। वाजिनीऽवती। या। ते। मन्म। गृत्सऽमदाः। ऋतऽवरि। प्रिया। देवेषु। जुह्वति॥१८॥

पदार्थः-**(इमा)** इमानि **(ब्रह्म)** **(सरस्वति)** बहुविज्ञानयुक्ते **(जुषस्व)** सेवस्व **(वाजिनीवति)** बह्वैश्वर्य्यान्नादियुक्ते **(या)** यानि **(ते)** तव **(मन्म)** विज्ञानानि **(गृत्समदाः)** गृहीताऽऽनन्दाः **(ऋतावरि)** सत्याचरणयुक्ते **(प्रिया)** कमनीयानि विज्ञानानि **(देवेषु)** विद्याकामेषु **(जुह्वति)** स्थापयन्ति॥१८॥

अन्वयः-हे ऋतावरि वाजिनीवति सरस्वति! त्वं यथा गृत्समदा येमा ते प्रिया मन्म देवेषु जुह्वति तानि ब्रह्म त्वं जुषस्व॥१८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसः पुरुषाः कुमारान् ब्रह्मचारिणः सुशिक्षयाऽध्यापयेयुस्तथा विदुष्यस्त्रियश्च कुमारीम्ब्रह्मचारिणीं सम्यक् शिक्षयित्वाऽध्यापयेयुः॥१८॥

पदार्थः-हे **(ऋतावरि)** सत्याचरणयुक्त **(वाजिनीवति)** वा बहुत ऐश्वर्य और अन्नादि पदार्थयुक्त **(सरस्वति)** बहुत विज्ञानवाली! तू जैसे **(गृत्समदाः)** आनन्द जिन्होंने ग्रहण किया वे **(या)** जिन **(इमा)** इन **(ते)** तेरे **(प्रिया)** मनोहर विज्ञान वा **(मन्म)** साधारण विज्ञानों को **(देवेषु)** विद्या की कामना करनेवालों में **(जुह्वति)** स्थापन करते हैं, उन **(ब्रह्म)** विज्ञानों को तू **(जुषस्व)** सेवन कर॥१८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् पुरुष, कुमार ब्रह्मचारियों को अच्छी शिक्षा से पढ़ावें, वैसे विदुषी स्त्रियां कुमारी ब्रह्मचारिणी स्त्रियों को अच्छी शिक्षा से पढ़ावें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रेतां॑ य॒ज्ञस्य॑ शं॒भुवा॑ यु॒वामिदा वृ॑णीमहे। अ॒ग्निं च॑ हव्य॒वाह॑नम्॥ १९॥

प्र। इ॒ता॒म्। य॒ज्ञस्य॑। शं॒ऽभुवा॑। यु॒वाम्। इत्। आ। वृ॒णी॒म॒हे॒। अ॒ग्निम्। च॒। ह॒व्य॒ऽवाह॑नम्॥ १९॥

पदार्थः-(प्र) (इताम्) प्राप्नुतः **(यज्ञस्य)** अध्यापनाध्ययनस्य **(शंभुवा)** यौ शं सुखं सम्भावयतस्तौ **(युवाम्)** द्वौ स्त्रीपुरुषौ **(इत्)** एव **(आ) (वृणीमहे)** स्वीकुर्महे **(अग्निम्)** पावकम् **(च) (हव्यवाहनम्)** यो हव्यं वहति तम्॥ १९॥

अन्वयः-हे स्त्रीपुरुषौ! यौ शम्भुवा युवां यज्ञस्य विद्याः प्रेतां हव्यवाहनमग्निं च ताविदेव वयमा वृणीमहे॥ १९॥

भावार्थः-सर्वैर्मनुष्यैः पुत्राध्यापकान् पुरुषान् कन्याध्यापिकाः स्त्रियश्च सततमध्यापनाय नियोजनीया यतस्स्त्रीपुरुषेषु पूर्णविद्याप्रचारः स्यात्॥ १९॥

पदार्थः-हे स्त्री-पुरुषो! जो **(शम्भुवा)** सुख की सम्भावना करानेवाले **(युवाम्)** दोनों स्त्री-पुरुष **(यज्ञस्य)** यज्ञ की विद्याओं को **(प्रेताम्)** प्राप्त होते **(च)** और **(हव्यवाहनम्)** हव्य द्रव्य को पहुँचानेवाले **(अग्निम्)** अग्नि को प्राप्त होते **(इत्)** उन्हीं को हम लोग **(आ, वृणीमहे)** अच्छे प्रकार स्वीकार करते हैं॥ १९॥

भावार्थः-सब मनुष्यों को पुत्रों के अध्यापकों और पुत्री को अध्यापिकाओं को निरन्तर नियुक्त करना चाहिये, जिससे स्त्री-पुरुषों में पूर्ण विद्याओं का प्रचार हो॥ १९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्यावा॑ नः पृथि॒वी इ॒मं सि॒ध्रम॒द्य दि॑वि॒स्पृश॑म्। य॒ज्ञं दे॒वेषु॑ यच्छताम्॥ २०॥

द्यावा॑। न॒ः। पृ॒थि॒वी इति॑। इ॒मम्। सि॒ध्रम्। अ॒द्य। दि॒वि॒ऽस्पृश॑म्। य॒ज्ञम्। दे॒वेषु॑। य॒च्छ॒ता॒म्॥ २०॥

पदार्थः-(द्यावा) सूर्य्यः **(नः)** अस्माकम् **(पृथिवी)** भूमिः **(इमम्) (सिध्रम्)** शास्त्रबोधप्रकाशनिमित्तम् **(अद्य)** इदानीम् **(दिविस्पृशम्)** दिवि विज्ञानप्रकाशे स्पृशन्ति येन तम् **(यज्ञम्)** अध्ययनाध्यापनसङ्गतिमयम् **(देवेषु)** विद्वत्सु **(यच्छताम्)** संस्थापयतम्॥ २०॥

अन्वयः-हे स्त्रीपुरुषौ! भवन्तौ द्यावापृथिवी इवाद्य न इमं सिध्रं दिविस्पृशं यज्ञं देवेषु यच्छताम्॥ २०॥

भावार्थः-अध्यापकोपदेशकाभ्यां यथा सूर्य्यभूमी सर्वान् सर्वथोन्नयतस्तथा स्त्रीपुरुषेषु विद्याः सम्यक् प्रसारणीयाः॥ २०॥

पदार्थः-हे स्त्री-पुरुषो! आप **(द्यावापृथिवी)** सूर्य्य-भूमि के समान **(अद्य)** आज **(नः)** हमारे **(इमम्)** इस **(सिध्रम्)** शास्त्रबोध के प्रकाश के निमित्त **(दिविस्पृशम्)** विज्ञान प्रकाश में जिससे स्पर्श करते हैं, उस **(यज्ञम्)** पढ़ने-पढ़ाने की सङ्गतिस्वरूप यज्ञ को **(देवेषु)** विद्वानों में **(यच्छताम्)** स्थापन करो॥ २०॥

भावार्थः-अध्यापक और उपदेशकों से जैसे सूर्य्य और भूमि सबको सर्वथा उन्नति देते हैं, वैसे स्त्री-पुरुषों में विद्या अच्छे प्रकार विस्तारनी चाहिये॥ २०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः। इहाद्य सोमपीतये॥ २१॥ १०॥

आ। वाम्। उपऽस्थम्। अद्रुहा। देवाः। सीदन्तु। यज्ञियाः। इह। अद्य। सोमऽपीतये॥ २१॥

पदार्थः-**(आ)** **(वाम्)** युवयोः **(उपस्थम्)** उपतिष्ठन्ति यस्मिँस्तम् **(अद्रुहा)** द्रोहादिदोषरहिताः। अत्र **सुपामि**त्याकारादेशः। **(देवाः)** विद्वांसः **(सीदन्तु)** **(यज्ञियाः)** विद्यावृद्धिमययज्ञप्रचारार्हाः **(इह)** अस्मिन् संसारे **(अद्य)** इदानीम् **(सोमपीतये)** यया सोमं विद्यैश्वर्य्याणि जायन्ते तस्यै॥ २१॥

अन्वयः-हे अध्यापकोपदेशकौ! इहाद्य सोमपीतये अद्रुहा यज्ञिया देवा वामुपस्थमा सीदन्तु॥ २१॥

भावार्थः-अध्यापकोपदेशकयोः समीपेऽन्या निर्दोषा विदुष्यः स्त्रियः सन्तु यत उभयेषु स्त्रीपुरुषेषु विद्यासुशिक्षे तुल्ये स्यातामिति॥ २१॥

अत्राध्यापकाध्येतृसूर्याचन्द्राग्निवायुपरमेश्वरोपासनास्त्रीपुरुषक्रमवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाधिकचत्वारिंशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे अध्यापक और उपदेशको! **(इह)** इस संसार में **(अद्य)** इस समय वा आज **(सोमपीतये)** जिससे विद्या और ऐश्वर्य उत्पन्न होते हैं, उस क्रिया के लिये **(अद्रुहा)** द्रोहादि

दोषरहित **(यज्ञिया:)** विद्या वृद्धिमय यज्ञ प्रचार के योग्य **(देवा:)** विद्वान् जन **(वाम्)** तुम दोनों के **(उपस्थम्)** समीप रहनेवाले के **(आ, सीदन्तु)** समीप बैठें॥२१॥

भावार्थ:-अध्यापक और उपदेशकों के समीप और **[**=अन्य**]** निर्दोष विदुषी स्त्री हों, जिससे दोनों स्त्री-पुरुषों में विद्या और उत्तम शिक्षा तुल्य हो॥२१॥

इस सूक्त में अध्यापक और अध्ययनकर्त्ता, सूर्य, चन्द्रमा, अग्नि, वायु, परमेश्वरोपासना और स्त्री-पुरुष के क्रम वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह एकतालीसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

कनिक्रददिति त्र्यृचस्य द्विचत्वारिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। कपिञ्जल इवेन्द्रो देवता। १-३ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथोपदेशकगुणानाह॥

अब तीन ऋचावाले बयालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में उपदेशक के गुणों को कहते हैं॥

कनि॑क्रदज्जनु॒षं॑ प्रब्रु॒वा॒ण इय॑र्ति॒ वाच॑मरि॒तेव॒ नाव॑म्।
सु॒म॒ङ्ग॒ल॑श्च शकुने॒ भवा॑सि॒ मा त्वा॒ का चि॑दभि॒भा वि॑श्व्या॑ विदत्॥ १॥

कनि॑क्रदत्। ज॒नु॒ष॑म्। प्र॒ऽब्रु॒वा॒णः। इय॑र्ति। वाच॑म्। अ॒रि॒ताऽइ॑व। नाव॑म्। सु॒ऽम॒ङ्ग॒ल॑ः। च॒। श॒कु॒ने॒। भवा॑सि। मा॒। त्वा॒। का। चि॒त्। अ॒भि॒ऽभा। विश्व्या॑। वि॒द॒त्॥ १॥

पदार्थः-(कनिक्रदत्) भृशं शब्दायमानः **(जनुषम्)** प्रसिद्धाम् **(प्रब्रुवाणः)** प्रकृष्टतया वदन् **(इयर्त्ति)** प्राप्नोति **(वाचम्) (अरितेव)** यथा अरितानि **(नावम्) (सुमङ्गलः)** सुमङ्गलशब्दः **(च) (शकुने)** शकुनिवद्वर्त्तमान **(भवासि)** भवेः **(मा) (त्वा)** त्वाम् **(का) (चित्)** अपि **(अभिभा)** अभितः कान्तिः **(विश्व्या)** विश्वस्मिन् भवा **(विदत्)** प्राप्नुयात्॥ १॥

अन्वयः-हे शकुने शक्तिमन्! कनिक्रदज्जनुषं प्रब्रुवाणोऽरितेव वाचं नावं चेयर्त्ति तथा सुमङ्गलो भवासि काचिद्विश्व्या अभिभा त्वा मा विदत्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। य उपदेशको यथाऽरित्राणि नावं प्राप्नुवन्ति तथा सर्वान् मनुष्यानुपदेशाय प्राप्नोत्युपदिशन् पक्षिवद् भ्रमति तस्मै सुमङ्गलाचाराय कश्चित्प्रभाभङ्गो न स्यादेतदर्थं राज्ञोपदेशकानां रक्षा विधेया॥ १॥

पदार्थः-हे **(शकुने)** पक्षी के तुल्य वर्त्तमान शक्तिमान् पुरुष! **(कनिक्रदत्)** निरन्तर शब्दायमान उपदेशक **(जनुषम्)** प्रसिद्ध विद्या को **(प्रब्रुवाणः)** प्रकृष्टता से कहता हुआ **(अरितेव)** पहुंचे हुए पदार्थों के समान **(वाचम्)** वाणी **(च)** और **(नावम्)** नाव को **(इयर्ति)** प्राप्त होता, वैसे **(सुमङ्गलः)** सुमङ्गल शब्दयुक्त **(भवासि)** होते हो **(का, चित्)** कोई भी **(विश्व्या)** इस संसार में हुई **(अभिभा)** सब ओर से जो कान्ति है वह **(त्वा)** तुझे **(मा)** मत **(विदत्)** प्राप्त हो अर्थात् किसी दूसरे का तेज आपके आगे प्रबल न हो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो उपदेशक जैसे बल्ली नाव को पहुँचाती है, वैसे सब मनुष्यों को उपदेश के लिये प्राप्त होता वा उपदेश करता हुआ पक्षी के समान भ्रमता है, उस

सुमङ्गलाचरण करनेवाले के लिये कोई कान्ति भङ्ग न हो, इसलिये राजा को उपदेशकों की रक्षा करनी चाहिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान् वीरो अस्ता।
पित्र्यामनु प्रदिशं कनिक्रदत् सुमङ्गलो भद्रवादी वदेह॥२॥

मा। त्वा। श्येनः। उत्। वधीत्। मा। सुऽपर्णः। मा। त्वा। विदत्। इषुऽमान्। वीरः। अस्ता। पित्र्याम्। अनु। प्रऽदिशम्। कनिक्रदत्। सुऽमङ्गलः। भद्रऽवादी। वदत। इह॥२॥

पदार्थः-(मा) (त्वा) त्वाम् **(श्येनः) (उत्) (वधीत्)** हन्यात् **(मा) (सुपर्णः)** अन्यः पक्षी **(मा) (त्वा) (विदत्)** प्राप्नुयात् **(इषुमान्)** वाणवान् **(वीरः) (अस्ता)** प्रक्षेपकः **(पित्र्याम्) (अनु) (प्रदिशम्)** दिशोपदिग्युक्तं देशम् **(कनिक्रदत्)** भृशं वदन् **(सुमङ्गलः)** सुमङ्गलोपदेशकः **(भद्रवादी)** भद्रं कल्याणं वदितुं शीलं यस्य सः **(वद) (इह)** अस्मिन् संसारे॥२॥

अन्वयः-हे विद्वन्! त्वा त्वां श्येनइव कश्चिन्मोद्वधीन्मा सुपर्ण इवोद्वधीत्। त्वा इषुमानस्ता वीरो मा विदत् इह कनिक्रदद्भद्रवादी सुमङ्गलः सन् पित्र्याम्प्रदिशमनुवद॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा श्येनादयः पक्षिणोऽन्यान् पक्षिणो घ्नन्ति तथा कश्चिदपि उपदेशकं मा पीडयेद्येनायं सुखेन कुशलतया च सर्वत्रोपदेशं कर्त्तुं शक्नुयात्॥२॥

पदार्थः-हे विद्वन्! **(त्वा)** तुझे **(श्येनः)** श्येन पक्षी के समान कोई **(मा)** मत **(उत, वधीत्)** उच्चाटे **(मा)** मत **(सुपर्णः)** अच्छे पङ्खवाले अन्य पक्षी के समान उच्चाटे **(त्वा)** तुझे **(इषुमान)** वाणों को रखने वा **(अस्ता)** फेंकनेवाला **(वीरः)** वीर **(मा)** मत **(विदत्)** प्राप्त हो **(इह)** यहाँ **(कनिक्रदत्)** निरन्तर कहता हुआ **(भद्रवादी)** कल्याणरूप उपदेश करनेवाला **(सुमङ्गलः)** सुन्दर मङ्गल का उपदेशक होता हुआ **(पित्र्याम्)** पितृसम्बन्धी **(प्रदिशम्)** दिशा और उपदिशाओं से युक्त देश को **(अनु, वद)** अनुकूलता से उपदेश कर॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे श्येन पक्षी आदि पखेरू अन्य पक्षियों को मारते हैं, वैसे कोई उपदेशक को पीड़ा मत दे, जिससे वह सुख और कुशलता से सर्वत्र उपदेश कर सके॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अव॑ क्रन्द दक्षिण॒तो गृ॒हाणां॑ सुम॒ङ्गलो॑ भद्रवा॒दी श॑कुन्ते।
मा नः॑ स्ते॒न ई॑शत॒ माघशं॑सो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीरा॑:॥ ३॥ ११॥

अव॑। क्र॒न्द॒। द॒क्षि॒ण॒तः। गृ॒हाणा॑म्। सु॒ऽम॒ङ्गलः॑। भ॒द्र॒ऽवा॒दी। श॒कु॒न्ते॒। मा। नः॒। स्ते॒नः। ई॒श॒त॒। मा। अ॒घऽशं॑सः। बृ॒हत्। व॒दे॒म॒। वि॒दथे॑। सु॒ऽवीराः॑॥ ३॥

पदार्थः-(अव) (क्रन्द) शब्दं कुरु **(दक्षिणतः)** दक्षिणपार्श्वे **(गृहाणाम्)** प्रसादानाम् **(सुमङ्गलः) (भद्रवादी) (शकुन्ते)** शक्तिमन् **(मा) (नः)** अस्मान् **(स्तेनः)** चोरः **(ईशत)** समर्थो भवेत्। अत्र विकरणव्यत्ययेन शः **(मा)** निषेधे **(अघशंसः)** योऽघं पापं शंसति स दस्युः **(बृहत्) (वदेम) (विदथे) (सुवीराः)**॥ ३॥

अन्वयः-हे शकुन्ते! सुमङ्गलो भद्रवादी संस्त्वं गृहाणां दक्षिणतोऽव क्रन्द यतः स्तेनो नो मेशत अघशंसो नो मेशत यतस्सुवीरा वयं विदथे बृहद्वदेम॥ ३॥

भावार्थः-शुद्धाचारास्सत्यवादिनो महात्मानो यत्रोपदिशन्ति तत्र चोरादयो दुष्टा नष्टा भूत्वा सर्वेषाम्महत्सुखं वर्द्धते॥ ३॥

अत्रोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विचत्वारिंशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(शकुन्ते)** शक्तिमान्! **(सुमङ्गलः)** सुन्दर मङ्गलयुक्त **(भद्रवादी)** कल्याण के कहनेवाले होते हुए आप **(गृहाणाम्)** उत्तम घरों के **(दक्षिणतः)** दाहिनी ओर से **(अव, क्रन्द)** शब्द करो अर्थात् उपदेश करो जिससे **(स्तेनः)** चोर **(नः)** हम लोगों को कष्ट देने को **(मा)** मत **(ईशत)** समर्थ हो **(अघशंसः)** पाप की प्रशंसा करता वह डाकू हम लोगों को दुष्टता देने को **(मा)** मत समर्थ हो, जिससे **(सुवीराः)** सुन्दर वीरोंवाले हम लोग **(विदथे)** संग्राम में **(बृहत्)** बहुत कुछ **(वदेम)** कहें॥ ३॥

भावार्थः-शुद्धाचरणों के करनेवाले सत्यवादी महात्मा जहाँ उपदेश करते हैं, वहाँ चोर आदि दुष्ट नष्ट होकर सबको बहुत सुख बढ़ता है॥ ३॥

इस सूक्त में उपदेशक के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह बयालीसवां सूक्त और ग्यारहवां वर्ग पूर्ण हुआ॥

प्रदक्षिणिदिति ऋचस्य त्रिचत्वारिंशत्तमस्य सूक्तस्य गृत्समद ऋषिः। कपिञ्जल इवेन्द्रो देवता। १ जगती। ३ निचृज्जगती छन्दः। निषादः स्वरः। २ भुरिगतिशक्वरी छन्दः। पञ्चमः स्वरः॥

पुनरुपदेशकगुणानाह॥

अब तीन ऋचावाले ४३ वें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में
फिर उपदेशक के गुणों को कहते हैं॥

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः।
उभे वाचौ वदति सामगाइव गायत्रं च त्रैष्टुभं चानु राजति॥ १॥

प्रऽदक्षिणित्। अभि। गृणन्ति। कारवः। वयः। वदन्तः। ऋतुऽथा। शकुन्तयः। उभे इति। वाचौ। वदति। सामगाःऽइव। गायत्रम्। च। त्रैऽस्तुभम्। च। अनु। राजति॥ १॥

पदार्थः-(प्रदक्षिणित्) यः प्रदक्षिणामेति सः। अत्र व्यत्ययेनैकवचनम्। **(अभि)** आभिमुख्ये **(गृणन्ति)** उपदिशन्ति **(कारवः)** कारुकाः **(वयः)** पक्षिणः **(वदन्तः)** **(ऋतुथा)** ऋतुषु **(शकुन्तयः)** शक्तिमन्तः **(उभे)** ऐहिकपारमार्थिकसुखसाधिके **(वाचौ)** **(वदति)** **(सामगाइव)** यः सामानि गायति तद्वत् **(गायत्रम्)** गायत्रीम् **(च)** उष्णिहादीनि **(त्रैष्टुभम्)** त्रिष्टुभम् **(च)** जगत्यादीनि **(अनु)** **(राजति)** प्रकाशयति॥ १॥

अन्वयः-यथर्तुथा वदन्तो शकुन्तयो वयो वदन्ति तथा कारव उभे वाचावभि गृणन्ति यः प्रदक्षिणित् सामगाइव गायत्रं च त्रैष्टुभं च वदति स उभे वाचावनु राजति॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पक्षिण ऋतुमृतुं प्रति नाना शब्दानुच्चारयन्ति तथा शिल्पिनो भयन्त्यक्त्वाऽनेकविद्याप्रकाशकान् शब्दान् वदन्तु॥ १॥

पदार्थः-जैसे **(ऋतुथा)** ऋतुओं में **(वदन्तः)** बोलते हुए **(शकुन्तयः)** शक्तिमान् **(वयः)** पक्षी कहते हैं, वैसे **(कारवः)** कारुकजन **(उभे)** ऐहिक और पारमार्थिक सुख सिद्ध करनेवाली **(वाचौ)** वाणियों का **(अभि, गृणन्ति)** सब ओर से उपदेश करते हैं, जो **(प्रदक्षिणित्)** प्रदक्षिणा को प्राप्त होनेवाला **(सामगाइव)** सामगानेवाले के समान **(गायत्रम्)** गायत्री **(च)** और उष्णिहादि **(त्रैष्टुभम्)** त्रिष्टुभ को **(च)** और जगती आदि को भी **(वदति)** कहता है, वह ऐहिक-पारमार्थिक दोनों वाणियों को **(अनु, राजति)** अनुकूलता से प्रकाशित करता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पक्षी ऋतु-ऋतु में नाना प्रकार के शब्दों का उच्चारण करते हैं, वैसे शिल्पिजन डर को छोड़कर अनेक विद्या के प्रकाशक शब्दों को कहें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उद्गातेव शकुने साम गायसि ब्रह्मपुत्रइव सवनेषु शंससि।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद
विश्वतो नः शकुने पुण्यमा वद॥ २॥

उद्गाताऽइव। शकुने। साम। गायसि। ब्रह्मऽपुत्रःऽइव। सवनेषु। शंससि। वृषाऽइव। वाजी। शिशुऽमतीः। अपिऽइत्या। सर्वतः। नः। शुकुने। भद्रम्। आ। वद। विश्वतः। नः। शकुने। पुण्यम्। आ। वद॥ २॥

पदार्थः-(उद्गातेव) यथोद्गाता तथा **(शकुने)** पक्षिवच्छक्तिमन् **(साम) (गायसि) (ब्रह्मपुत्रइव)** ब्रह्मणश्चतुर्वेदवेत्तुः पुत्रस्तथा **(सवनेषु)** यज्ञसम्बन्धे प्रातः क्रियादिषु **(शंससि)** स्तौषि **(वृषेव)** महाबलिष्ठ-वृषभवत् **(वाजी)** बलवान् **(शिशुमतीः)** प्रशस्ताः शिशवो विद्यन्ते यासां ताः **(अपीत्य)** निश्चयेन प्राप्य। अत्र **संहितायामिति** दीर्घः। **(सर्वतः) (नः)** अस्मभ्यम् **(शकुने)** वक्तृत्वशक्तियुक्त **(भद्रम्) (आ) (वद) (विश्वतः)** सर्वतः **(नः)** अस्मभ्यम् **(शकुने) (पुण्यम्) (आ) (वद)**॥ २॥

अन्वयः-हे शकुने! यस्त्वमुद्गातेव साम गायसि ब्रह्मपुत्रइव सवनेषु शंससि स त्वं वृषेव वाजी शिशुमतीरपीत्य नः सर्वतो भद्रमावद। हे शकुने! त्वं सर्वतो विद्यामावद। हे शकुने! त्वं नो विश्वतः पुण्यमावद॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यथा वेदविदो नियमेन पाठं वेदोक्ताचारं च कुर्वन्ति तथोपदेशकाः स्त्रीपुरुषाः सर्वेषामुन्नतये सर्वदा सत्योपदेशान् कुर्वन्तु येन सर्वेषां सुखानि सर्वतो वर्द्धेरन्॥ २॥

पदार्थः-हे **(शकुने)** पखेरू के समान सामर्थ्यवाले! जो तुम **(उद्गातेव)** ऊर्ध्व स्वर से वेद गाते हुए के समान **(साम)** सामवेद का **(गायसि)** गान करते हो **(ब्रह्मपुत्रइव)** चारों वेदों के ज्ञाता का जैसे कोई पुत्र हो वैसे **(सवनेषु)** यज्ञ सम्बन्ध में प्रातःकाल की क्रिया आदि में **(शंससि)** स्तुति करते सो तुम **(वृषेव)** महाबली बैल के समान **(वाजी)** बलवान् **(शिशुमतीः)** प्रशंसित बालकोंवाली स्त्रियों को **(अपीत्य)** निश्चय से प्राप्त होकर **(नः)** हम लोगों के लिये **(सर्वतः)** सब ओर से **(भद्रम्)** कल्याण का **(आ, वद)** उपदेश कर। हे **(शकुने)** कहने की शक्ति से युक्त पुरुष! तू सब ओर से विद्या का उपदेश कर। हे **(शकुने)** सब ओर से शक्तिमान्! तू **(नः)** हम लोगों के लिये **(विश्वतः)** सब ओर से **(पुण्यम्)** पुण्य का **(आ, वद)** उपदेश कर॥ २॥

भावार्थः-[इस मन्त्र में उपमालङ्कार है।**]** जैसे वेदवक्ता विद्वान् जन नियम से पाठ और वेदोक्त आचार को करते हैं, वैसे उपदेश करनेवाले स्त्रीपुरुष सबकी उन्नति के लिये सर्वदा सत्योपदेश करें, जिससे सबके सुख सब ओर से बढ़ें॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ॒वद॒ꣳस्त्वं श॑कुने भ॒द्रमा व॑द तू॒ष्णीमासी॑नः सुम॒तिं चि॑किद्धि नः।
यदु॒त्प॒त॒न्वद॑सि कर्क॒रिर्यथा॑ बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ ३॥ १२॥ ४॥

आ॒ऽवद॑न्। त्वम्। श॒कु॒ने॒। भ॒द्रम्। आ। व॒द॒। तू॒ष्णीम्। आसी॑नः। सु॒ऽम॒तिम्। चि॒कि॒द्धि॒। नः॒। यत्। उ॒त्ऽप॒तन्। वद॑सि। क॒र्क॒रिः। यथा॑। बृ॒हत्। व॒देम॒। वि॒दथे॑। सु॒ऽवीराः॑॥ ३॥

पदार्थः-(आवदन्) समन्तादुपदिशन् **(त्वम्)** **(शकुने)** शक्तिमत्पक्षिवद्वर्त्तमाना **(भद्रम्)** भन्दनीयं वचः **(आ)** **(वद)** **(तूष्णीम्)** मौनमालम्ब्य **(आसीनः)** उपविष्टस्सन् **(सुमतिम्)** शोभनां प्रज्ञाम् **(चिकिद्धि)** ज्ञापय **(नः)** अस्मान् **(यत्)** **(उत्पतन्)** ऊर्ध्वमुड्डीयमानइव **(वदसि)** **(कर्करिः)** भृशं कुर्वन् **(यथा)** **(बृहत्)** **(वदेम)** **(विदथे)** **(सुवीराः)**॥ ३॥

अन्वयः-हे शकुने! त्वमावदन् सन् भद्रमावद तूष्णीमासीनो योगाभ्यासं कुर्वन् नः सुमतिं चिकिद्धि उत्पतन्निव यद्भद्रं यथा कर्करिस्तथा वदसि अनेनैव सुवीराः सन्तो वयं विदथे बृहद्वदेम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्याः श्रुत्वा मन्वाना अध्यापयन्तस्सन्तः सत्यं विज्ञायाऽन्यानुपदिशन्ति ते सर्वेषां कल्याणकरा भवन्तीति॥ ३॥

अत्रोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिचत्वारिंशत्तमं सूक्तं द्वादशो वर्गश्चतुर्थोऽनुवाको द्वितीयम्मण्डलं च समाप्तम्॥

पदार्थः-हे **(शकुने)** शक्तिमान् पक्षी के समान वर्त्तमान! तू **(आवदन्)** सब ओर से उपदेश करता हुआ **(भद्रम्)** कल्याण करने योग्य प्रस्ताव का **(आ, वद)** अच्छे प्रकार उपदेश कर **(तूष्णीम्)** मौन को आलम्बन कर **(आसीनः)** बैठे हुए योग का अभ्यास करता हुआ **(नः)** हम लोगों की **(सुमतिम्)** शुभ बुद्धि **(चिकिद्धि)** समझ **(उत्पतन्)** ऊपर को उड़ते के समान जिस

(भद्रम्) कल्याण करने योग्य काम को **(यथा)** जैसे **(कर्करिः)** निरन्तर करनेवाला हो वैसे **(वदसि)** कहते हो, इसीसे **(सुवीराः)** सुन्दर वीरोंवाले हम लोग **(विदथे)** संग्राम में **(बृहत्)** बहुत कुछ **(वदेम)** कहें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्याओं को सुनकर मनन करते हुए पढ़ाते और सत्य को जानकर औरों का उपदेश करते हैं, वे सबके कल्याण करनेवाले होते हैं॥३॥

इस सूक्त में उपदेशकों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह तितालीसवां सूक्त, बारहवां वर्ग और चौथा अनुवाक और दूसरा मण्डल समाप्त हुआ॥

॥ओ३म्॥

अथ तृतीयमण्डलम्

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ तृतीयमण्डले सोमस्येति त्रयोविंशत्यृचस्य प्रथमसूक्तस्य गाथिनो विश्वामित्र ऋषिः। अग्निर्देवता। १, ३-५, ९, ११, १२, १५, १७, १९, २० निचृत्त्रिष्टुप्। २, ६, ७, १३, १४ त्रिष्टुप्। १०, २१ विराट् त्रिष्टुप्। २२ ज्योतिष्मती त्रिष्टुप् छन्दः। धैवतः स्वरः। ८, १६, २३ स्वराट् पङ्क्तिः। १८ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्गुणानाह॥

अब तीसरे मण्डल का प्रारम्भ है। उसके प्रथम सूक्त के आरम्भ के प्रथम मन्त्र में विद्वानों की प्रशंसा को कहते हैं॥

सोम॑स्य मा त॒वसं॒ वक्ष्य॑ग्ने॒ वह्नि॑ं चकर्थ वि॒दथे॒ यज॑ध्यै।
दे॒वाँ अच्छा॒ दीद्य॑द्यु॒ज्ञे अद्रि॑ं शमा॒ये अ॑ग्ने त॒न्व॑ं जुषस्व॥ १॥

सोम॑स्य। मा॒। त॒वस॑म्। वक्षि॑। अ॒ग्ने॒। वह्नि॑म्। च॒क॒र्थ॒। वि॒दथे॑। यज॑ध्यै। दे॒वान्। अच्छ॑। दीद्य॑त्। यु॒ज्ञे। अद्रि॑म्। श॒म्ऽआ॒ये। अ॒ग्ने॒। त॒न्व॑म्। जु॒ष॒स्व॒॥ १॥

पदार्थः-(**सोमस्य**) ऐश्वर्यस्य सकाशात् (**मा**) माम् (**तवसम्**) बलयुक्तम् (**वक्षि**) वदसि (**अग्ने**) विद्वन् (**वह्निम्**) वाहकं पावकम् (**चकर्थ**) करोषि (**विदथे**) विद्वत्सत्काराख्ये यज्ञे (**यजध्यै**) यष्टुं सङ्गन्तुं (**देवान्**) विदुषो दिव्यगुणान् वा (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**दीद्यत्**) देदीप्यमानः (**युज्ञे**) (**अद्रिम्**) मेघम् (**शमाये**) शममिवाचरामि (**अग्ने**) अग्निवद्वर्त्तमान (**तन्वम्**) (**जुषस्व**)॥१॥

अन्वयः-हे अग्ने! यस्त्वं सोमस्य तवसं मा वह्निं वक्षि विदथे देवान् यजध्यै अच्छ चकर्थ, तेन सहाहं दीद्यत्सन् विदथे देवान् यजध्यै युज्ञे यथाऽग्निरद्रिं वहति तथाऽहं विदुषां समीपे शमाये। हे अग्ने! शिष्यो यथा विद्वच्छरीरं सेवते तथा च तन्वं जुषस्व॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या ऐश्वर्य्यं चिकीर्षेयुस्ते विद्वत्सङ्गत्या शरीरमरोगं संरक्ष्यात्मानं विद्वांसं सम्पाद्याग्न्यादिपदार्थविद्यया कार्याणि साधयेयुः॥१॥

पदार्थः-हे (**अग्ने**) विद्वान्! जो आप (**सोमस्य**) ऐश्वर्य की उत्तेजना से (**तवसम्**) बलयुक्त (**मा**) मुझको (**वह्निम्**) पदार्थ बहानेवाले अर्थात् एक देश से दूसरे देश ले जानेवाले अग्नि को (**वक्षि**) कहते हैं (**विदथे**) विद्वानों के सत्कार करनेवाले यज्ञ में (**देवान्**) विद्वान् वा दिव्य गुणों के (**यजध्यै**) सङ्गत करने को (**अच्छ**) अच्छे प्रकार (**चकर्थ**) क्रिया करते हो, उनके साथ मैं (**दीद्यत्**) देदीप्यमान हुआ विद्वानों के

सत्कार करनेवाले यज्ञ में विद्वान् वा दिव्य गुणों के सङ्गत करने को **(युञ्जे)** युक्त होता हूँ, जैसे अग्नि **(अद्रिम्)** मेघ को बहाता है, वैसे मैं विद्वानों में समीप के **(शमाये)** शान्ति के समान आचरण करता हूँ। हे **(अग्ने)** अग्निवद्वर्त्तमान! शिष्य जैसे विद्वान् के शरीर का सेवन करता है, वैसे आप **(तन्वम्)** शरीर की **(जुषस्व)** प्रीति करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य ऐश्वर्य के करने की इच्छा करें, वे विद्वानों की सङ्गति से शरीर को नीरोग रख कर, अपने को विद्वान् बना के अग्नि आदि की पदार्थविद्या से कार्य्यों को सिद्ध करें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन्।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः॥२॥

प्राञ्चम्। यज्ञम्। चकृम। वर्धताम्। गीः। समित्ऽभिः। अग्निम्। नमसा। दुवस्यन्। दिवः। शशासुः। विदथा। कवीनाम्। गृत्साय। चित्। तवसे। गातुम्। ईषुः॥२॥

पदार्थः-(**प्राञ्चम्**) यः प्रागञ्चति प्राप्नोति सः तम् (**यज्ञम्**) सत्सङ्गाख्यं व्यवहारम् (**चकृम**) कुर्याम (**वर्धताम्**) (**गीः**) सुशिक्षिता वाक् (**समिद्भिः**) इन्धनादिभिः (**अग्निम्**) (**नमसा**) सत्कारेण (**दुवस्यन्**) सेवमानः (**दिवः**) प्रकाशात् (**शशासुः**) अनुशासतु (**विदथा**) विविधानि विज्ञानानि (**कवीनाम्**) मेधाविनां विदुषाम् (**गृत्साय**) मेधाविने (**चित्**) (**तवसे**) विद्यावृद्धाय (**गातुम्**) पृथिवीम् (**ईषुः**) इच्छन्तु॥२॥

अन्वयः-वयं यं यं नमसा प्राञ्चं यज्ञं चकृम तेन समिद्भिरग्निं दुवस्यन्निवास्माकं गीर्वर्धताम्। ये कवीनां दिवो विदथा तवसे गृत्साय शशासुर्गातुमीषुस्तान् वयन्नमसा चिदानन्दितांश्चकृम॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या अवश्यं विद्यासुशिक्षितां वाचं वर्धयित्वा महाविदुषामध्यापकानां शासने सुशिक्षिता भूत्वा पृथिवीराज्यं कर्त्तुमिच्छन्तु॥२॥

पदार्थः-हम लोग **(नमसा)** सत्कार से जिस-जिस **(प्राञ्चम्)** पहिले प्राप्त होनेवाले **(यज्ञम्)** सज्जनों की सङ्गतिरूप यज्ञ को **(चकृम)** करें उससे **(समिद्भिः)** इन्धनादि पदार्थों से **(अग्निम्)** अग्नि का **(दुवस्यन्)** सेवन करते हुए के समान हम लोगों की **(गीः)** अच्छी शिक्षा पाई हुई वाणी **(वर्धताम्)** बढ़े जो **(कवीनाम्)** मेधावियों के **(दिवः)** प्रकाश से **(विदथा)** विद्वानों को **(तवसे)** विद्यावृद्ध **(गृत्साय)** मेधावी के लिये **(शशासुः)** सिखावें और **(गातुम्)** पृथिवी की **(ईषुः)** चाहना करें, उनको हम लोग सत्कार से **(चित्)** ही आनन्दित करें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य अवश्य विद्या से उत्तम शिक्षा पाई हुई वाणी को बढ़ाकर, महान् विद्वानों के समीप से अच्छे शिक्षित होकर, पृथिवी के राज्य करने की चाहना करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मयो॑ दधे॒ मेधि॑रः पू॒तद॑क्षो दि॒वः सु॒बन्धु॑र्जनु॒षा पृ॑थि॒व्याः।
अवि॑न्दन्नु॒ दर्श॑तम॒प्स्व१॑न्तर्दे॒वासो॑ अ॒ग्निम॒पसि॒ स्वस॒॑णाम्॥ ३॥

मयः॑। दु॒धे॒। मेधि॑रः। पू॒तऽद॑क्षः। दि॒वः। सु॒ऽबन्धुः॑। ज॒नु॒षा॑। पृ॒थि॒व्याः। अवि॑न्दन्। ऊ॒म् इति॑। दर्श॑तम्। अ॒प्ऽसु। अ॒न्तः। दे॒वासः॑। अ॒ग्निम्। अ॒पसि॑। स्वस॒॑णाम्॥ ३॥

पदार्थः-(**मयः**) सुखम् (**दधे**) दधाति (**मेधिरः**) सङ्गमकः (**पूतदक्षः**) पवित्रं दक्षो बलं यस्य सः (**दिवः**) प्रकाशयुक्तस्य (**सुबन्धुः**) शोभनो भ्राता (**जनुषा**) जन्मना (**पृथिव्याः**) भूमेर्मध्ये (**अविन्दन्**) लभन्ते (**उ**) (**दर्शतम्**) द्रष्टव्यम् (**अप्सु**) जलेषु प्राणेषु वा (**अन्तः**) मध्ये (**देवासः**) विद्वांसः (**अग्निम्**) विद्युतम् (**अपसि**) कर्मणि (**स्वसॄणाम्**) भगिनीनाम्॥३॥

अन्वयः-हे सज्जन! यथा देवासोऽप्स्वन्तर्दर्शतमग्निमपस्यविन्दंस्तथा यो दिवः पृथिव्या अन्तर्जनुषा स्वसॄणां सुबन्धुः पूतदक्षो मेधिरः सन् मयो दधे स उ अप्सु सर्वं सुखमाप्नोति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसो योगविद्यया स्वात्मसु ज्ञानप्रकाशं दृष्ट्वाऽन्यान् दर्शयित्वा ज्ञानेन वर्द्धयन्ति तथा मनुष्यैर्यथापुत्रा अध्यापनीयास्तथापुत्र्योऽपि यथा बन्धवो विद्याऽभ्यासं कुर्युस्तथा भगिन्योऽपीत्थमेव भद्रं प्राप्तुं शक्यम्॥३॥

पदार्थः-हे सज्जन! जैसे (**देवासः**) विद्वान् जन (**अप्सु**) जल वा प्राणों (**अन्तः**) बीच (**दर्शतम्**) देखने योग्य (**अग्निम्**) विद्युत् रूप अग्नि को (**अपसि**) कर्म के निमित्त (**अविन्दन्**) प्राप्त होते हैं, वैसे जो (**दिवः**) सूर्य और (**पृथिव्याः**) भूमि के बीच (**जनुषा**) जन्म से (**स्वसॄणाम्**) भगिनियों का (**सुबन्धुः**) सुन्दर भ्राता (**पूतदक्षः**) जिसका पवित्र बल वह (**मेधिरः**) सज्जनों का सङ्ग करनेवाला होता हुआ (**मयः**) सुख को (**दधे**) धारण करता है, वह (**उ**) ही जलों वा प्राणों में सब सुख को प्राप्त होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन योगविद्या से अपने आत्माओं में ज्ञान का प्रकाश देख औरों को दिखला कर ज्ञान से उन्हें बढ़ाते हैं, वैसे मनुष्यों को जिस प्रकार पुत्रों को विद्या पढ़ाना चाहिये, वैसे ही पुत्रियाँ भी विद्यासम्पन्न करनी चाहियें। जैसे भाई जन विद्याभ्यास करें, वैसे भगिनी भी, ऐसे ही अत्यानन्द मिल सकता है॥३॥

अथ स्त्रीपुरुषविषयमाह॥

अब स्त्री-पुरुष के विषय को अगले मन्त्र में कहा है॥

अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा।

शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन् वपुष्यन्॥ ४॥

अवर्धयन्। सुऽभगम्। सप्त। यह्वीः। श्वेतम्। जज्ञानम्। अरुषम्। महिऽत्वा। शिशुम्। न। जातम्। अभि। आरुः। अश्वाः। देवासः। अग्निम्। जनिमन्। वपुष्यन्॥ ४॥

पदार्थः-(**अवर्धयन्**) वर्धयन्तु (**सुभगम्**) शोभनैश्वर्य्यम् (**सप्त**) सप्तसङ्ख्याकाः (**यह्वीः**) महत्यः स्त्रियः (**श्वेतम्**) श्वेतवर्णम् (**जज्ञानम्**) जनकम् (**अरुषम्**) अश्वम्। **अरुष इति अश्वनामसु पठितम्।** (निघं०१.१४)। (**महित्वा**) पूजयित्वा (**शिशुम्**) बालकम् (**न**) इव (**जातम्**) उत्पन्नम् (**अभि**) (**आरुः**) प्राप्नुवन्तु (**अश्वाः**) विद्याप्राप्तिशीलाः (**देवासः**) विद्वांसः (**अग्निम्**) (**जनिमन्**) प्रशस्ता जनिर्जन्म विद्यते यस्य तत्सम्बुद्धौ (**वपुष्यन्**) आत्मनो वपु रूपमिच्छन्। **वपुरिति रूपनामसु पठितम्।** (निघं०३.७)॥ ४॥

अन्वयः-हे जनिमन् वपुष्यन् विद्वन्! यथा अश्वा देवासः श्वेतमश्वमरुषमग्निं सप्त यह्वीः सुभगं जज्ञानं महित्वा जातं शिशुं नावर्धयँस्तास्सततं सुखमभ्यारुस्तथा त्वमपि प्रयतस्व॥ ४॥

भावार्थः-अत्रोपमालङ्कारः। यथा सप्त स्त्रिय एकं पुत्रं वर्धयन्ति तथा येऽग्निविद्यां विदित्वैश्वर्य्यमुन्नयन्ते ते महिमानमाप्नुवन्ति॥ ४॥

पदार्थः-हे (**जनिमन्**) प्रशंसित जन्म वा (**वपुष्यन्**) अपने को रूप की इच्छा करनेवाले विद्वन्! जैसे (**अश्वाः**) विद्या व्याप्तिशील (**देवासः**) विद्वान् जन (**श्वेतम्**) श्वेतवर्ण (**अरुषम्**) अश्वरूप (**अग्निम्**) अग्नि को (**सप्त**) सात (**यह्वीः**) महान् स्त्री (**सुभगम्**) सुन्दर ऐश्वर्ययुक्त (**जज्ञानम्**) जन्म दिलानेवाले का (**महित्वा**) सत्कार (**जातम्**) उत्पन्न हुए (**शिशुम्**) बालक के (**न**) समान (**अवर्धयन्**) बढ़ावें, वे निरन्तर सुख को (**अभ्यारुः**) प्राप्त होती हैं, वैसे तुम भी प्रयत्न करो॥ ४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सात स्त्रियाँ एक पुत्र की वृद्धि करती हैं, वैसे जो अग्निविद्या को जानकर ऐश्वर्य्य की उन्नति करते हैं, वे महिमा को प्राप्त होते हैं॥ ४॥

पुनः पुरुषविषयमाह॥

फिर पुरुष विषय को अगले मन्त्र में कहा है॥

शुक्रेभिरङ्गैः रजं आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः।

शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः॥ ५॥ १३॥

शुक्रेभिः। अङ्गैः। रजः। आऽततन्वान्। क्रतुम्। पुनानः। कविऽभिः। पवित्रैः। शोचिः। वसानः। परि। आयुः। अपाम्। श्रियः। मिमीते। बृहतीः। अनूनाः॥ ५॥

पदार्थः-(**शुक्रेभिः**) वीर्यवद्भिः (**अङ्गैः**) अवयवैः (**रजः**) ऐश्वर्य्यम् (**आततन्वान्**) समन्ताद्विस्तारितवान् (**क्रतुम्**) प्रज्ञां कर्म वा (**पुनानः**) पवित्रीकुर्वन् (**कविभिः**) मेधाविभिः (**पवित्रैः**)

शुद्धगुणकर्मस्वभावैः **(शोचिः)** प्रकाशम् **(वसानः)** आच्छादितः **(परि)** सर्वतः **(आयुः)** जीवनम् **(अपाम्)** जलानाम् **(श्रियः)** शोभा धनानि वा **(मिमीते)** जनयति **(बृहतीः)** **(अनूनाः)** न विद्यते ऊनं ऊनता यासु ताः॥५॥

अन्वयः-यो मनुष्यः शुक्रेभिरङ्गै रज आततन्वान् पवित्रैः कविभिः क्रतुं पुनानोऽपामायुः शोचिर्वसानोर्बृहतीरनूनाः श्रियः परिमिमीते स विद्वान् श्रीमान् कुतो न जायते॥५॥

भावार्थः-हे मनुष्या! यावद्युष्माकं दृढाङ्गानि शरीराणि पवित्राः प्रज्ञाः धर्मात्मानामाप्तानां विदुषां सङ्गो जितेन्द्रियत्वेन पूर्णमायुर्न भवति तावदतुलाः श्रियो विद्याश्च न भवन्तीति वेद्यम्॥५॥

पदार्थः-जो मनुष्य **(शुक्रेभिः)** वीर्यवान् बलवान् **(अङ्गैः)** अवयवों से **(रजः)** ऐश्वर्य को **(आततन्वान्)** सब ओर से विस्तारित किये हुए **(पवित्रैः)** पवित्र **(कविभिः)** विद्वानों से **(क्रतुम्)** विद्या वा कर्म को **(पुनानः)** पवित्र करता हुआ **(अपाम्)** जलों के बीच **(आयुः)** जीवन और **(शोचिः)** प्रकाश **(वसानः)** आच्छादित ढाँपे हुए **(बृहतीः)** बड़ी-बड़ी जिनमें **(अनूनाः)** ऊनता नहीं विद्यमान उन शोभाओं वा धनों को **(परिमिमीते)** सब ओर से उत्पन्न करता है, वह विद्वान् श्रीमान् कैसे न हो?॥५॥

भावार्थः-हे मनुष्यो! जब तक तुम्हारे दृढ़ अङ्गवाले शरीर, पवित्र बुद्धियां, धर्मात्मा आप्त विद्वानों का सङ्ग, जितेन्द्रियता से पूर्ण आयु नहीं होती तब तक अतुल लक्ष्मी और विद्या भी नहीं होती, ऐसा जानना चाहिये॥५॥

अथ स्त्रीपुरुषविषयमाह॥

अब स्त्रीपुरुषों के विषय को अगले मन्त्र में कहा है॥

व॒व्राजा॑ सी॒मन॑दती॒रद॑ब्धा दि॒वो य॒ह्वीरव॑सा॒ना अन॑ग्नाः।
सना॒ अत्र॑ युव॒तय॒ः सयो॑नी॒रेक॑ं॒ गर्भं॑ दधिरे स॒प्त वाणी॑ः॥६॥

व॒व्राज॑। सी॒म्। अन॑दतीः। अद॑ब्धाः। दि॒वः। य॒ह्वीः। अव॑साना॒ः। अन॑ग्नाः। सना॑ः। अत्र॑। यु॒व॒तय॑ः। सऽयो॑नीः। एक॑म्। गर्भ॑म्। दु॒धि॒रे॒। स॒प्त। वाणी॑ः॥६॥

पदार्थः-**(वव्राज)** व्रजति प्राप्नोति। अत्र **संहितायामि**ति दीर्घः। **(सीम्)** सर्वतः **(अनदतीः)** अविद्यमाना अतीव सूक्ष्मा दन्ता यासान्ताः **(अदब्धाः)** अहिंसनीयाः सत्कर्त्तव्याः **(दिवः)** देदीप्यमानाः **(यह्वीः)** महाविद्यागुणस्वभावयुक्ताः **(अवसानाः)** अन्ते समीपे स्थिताः **(अनग्नाः)** सर्वतो वस्त्रभूषणादिभिराच्छादिताः **(सनाः)** भोक्त्र्यः **(अत्र)** **(युवतयः)** प्राप्तयौवनाः **(सयोनीः)** समाना योनिर्यासां ताः **(एकम्)** असहायम् **(गर्भम्)** **(दधिरे)** धरन्ति **(सप्त)** **(वाणीः)**॥६॥

अन्वयः-हे मनुष्या! यथा विद्वान् सप्त वाणीः सीं वव्राज तथाऽत्रानदतीरदब्धा दिवो यह्वीरवसाना अनग्नास्सनाः सयोनीर्युवतय एकं गर्भं दधिरे ताः सुखिन्यः कुतो न स्युः?॥६॥

भावार्थः–यदि समानविद्यारूपस्वभावाः समानान् पतीन् स्वेच्छया प्राप्य परस्परप्रीत्यात् सन्तानानुत्पाद्य संरक्ष्य सुशिक्षयन्ति ताः सुखयुक्ता भवन्ति यथा परा पश्यन्ती मध्यमा वैखरी कर्म्मोपासनाज्ञानप्रकाशिकास्तिस्रश्च मिलित्वा सप्त वाण्यः सर्वान् व्यवहारान् साधयन्ति तथा विद्वांसः स्त्रीपुरुषा धर्मार्थकाममोक्षान् साद्धुं शक्नुवन्ति॥६॥

पदार्थः–हे मनुष्यो! जैसे विद्वान् **(सप्त)** सात **(वाणीः)** वाणियों को **(सीम्)** सब ओर से **(वव्राज)** प्राप्त होता, वैसे **(अत्र)** यहाँ **(अनदतीः)** अविद्यमान अर्थात् अतीव सूक्ष्म जिनके दन्त **(अदब्धाः)** अहिंसनीय अर्थात् सत्कार करने योग्य **(दिवः)** देदीप्यमान **(यह्वीः)** बहुत विद्या और गुण, स्वभाव से युक्त **(अवसानाः)** समीप में ठहरी हुईं **(अनग्नाः)** सब ओर से वस्त्र वा आभूषण आदि से ढपी हुईं **(सनाः)** भोगनेवाली **(सयोनीः)** समान जिनकी योनि अर्थात् एक माता से उत्पन्न हुईं सगी वे **(युवतयः)** प्राप्तयौवना स्त्री **(एकम्)** एक अर्थात् असहायक **(गर्भम्)** गर्भ को **(दधिरे)** धारण करतीं, वे सुखी क्यों न हों?॥६॥

भावार्थः–जो समान रूपवाली स्त्रियाँ अपने-अपने समान पतियों को अपनी इच्छा से प्राप्त होकर परस्पर प्रीति के साथ सन्तानों को उत्पन्न कर और उनकी रक्षा कर उनको उत्तम शिक्षा दिलाती हैं, वे सुखयुक्त होती हैं। जैसे परा, पश्यन्ती, मध्यमा, वैखरी और कर्म्मोपासनाज्ञान प्रकाश करनेवाली तीनों मिल कर सात वाणी सब व्यवहारों को सिद्ध करती हैं, वैसे विद्वान् स्त्रीपुरुष धर्म्म, अर्थ, काम और मोक्ष को सिद्ध कर सकते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम्।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची॥७॥

स्तीर्णाः। अस्य। संऽहतः। विश्वऽरूपाः। घृतस्य। योनौ। स्रवथे। मधूनाम्। अस्थुः। अत्र। धेनवः। पिन्वमानाः। मही इति। दस्मस्य। मातरा। समीची इति सम्ऽईची॥७॥

पदार्थः–**(स्तीर्णाः)** शुभगुणैराच्छादिताः **(अस्य)** व्यवहारस्य मध्ये **(संहतः)** एकीभूताः **(विश्वरूपाः)** नानास्वरूपाः **(घृतस्य)** उदकस्य **(योनौ)** आधारे **(स्रवथे)** स्रवणे गमने **(मधूनाम्)** मधुराणाम् **(अस्थुः)** तिष्ठन्ति **(अत्र)** **(धेनवः)** गावः **(पिन्वमानाः)** सेवमानाः **(मही)** पूज्ये महत्यौ **(दस्मस्य)** दुःखोपक्षयकरस्य **(मातरा)** जनकजनन्यौ **(समीची)** सम्यगञ्चन्त्यौ॥७॥

अन्वयः–यथा स्तीर्णा विश्वरूपास्संहतः पिन्वमाना धेनवोऽत्रास्य घृतस्य योनौ मधूनां स्रवथेऽस्थुस्तथा समीची मही मातरा दस्मस्याऽपत्यस्य पालिके भवतः॥७॥

भावार्थः–यथा नदीसमुद्रौ मिलित्वा रत्नान्युत्पादयतस्तथा स्त्रीपुरुषा अपत्यान्युत्पादयन्तु॥७॥

पदार्थः-जैसे **(स्तीर्णाः)** शुभगुणों से आच्छादित **(विश्वरूपाः)** नाना स्वरूपयुक्त **(संहतः)** एक हो रहीं **(पिन्वमानाः)** सेवन करती हुईं **(धेनवः)** गौवें **(अत्र)** यहाँ **(अस्य)** इस व्यवहार के बीच **(घृतस्य)** जल के **(योनौ)** आधार में **(मधूनाम्)** मधुर पदार्थों की **(स्रवथे)** प्राप्ति के निमित्त **(अस्थुः)** स्थिर होती हैं, वैसे **(समीची)** अच्छे प्रकार प्राप्त होने **(मही)** सत्कार करने योग्य **(मातरा)** पिता-माता **(दस्मस्य)** दुःख नष्ट करनेवाले बालक के पालनेवाले होते हैं॥७॥

भावार्थः-जैसे नदी और समुद्र मिलकर रत्नों को उत्पन्न करते हैं, वैसे स्त्री-पुरुष सन्तानों को उत्पन्न करें॥७॥

अथ विद्याजन्मप्रशंसां प्राह॥

अब विद्याजन्म की प्रशंसा को अगले मन्त्र में कहा है॥

बभ्राणः सूनो सहसो व्यद्यौद् दधानः शुक्रा रभसा वपूंषि।
श्चोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन॥८॥

बभ्राणः। सूनो इति। सहसः। वि। अद्यौत्। दधानः। शुक्रा। रभसा। वपूंषि। श्चोतन्ति। धाराः। मधुनः। घृतस्य। वृषा। यत्र। ववृधे। काव्येन॥८॥

पदार्थः-**(बभ्राणः)** पुष्यन् **(सूनो)** संतान **(सहसः)** बलात् **(वि)** **(अद्यौत्)** विद्योतते **(दधानः)** धरन् **(शुक्रा)** शुक्राणि शरीरात्मवीर्य्याणि **(रभसा)** रोगरहितानि **(वपूंषि)** रूपवन्ति शरीराणि **(श्चोतन्ति)** स्रवन्ते **(धाराः)** जलस्य गतय इव वाचः **(मधुनः)** मधुरस्य **(घृतस्य)** उदकस्य **(वृषा)** बलिष्ठः **(यत्र)** यस्मिन् **(वावृधे)** वर्द्धते। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्। **(काव्येन)** विद्वद्भिर्निर्मितेन सह॥८॥

अन्वयः-हे सूनो! यथा शुक्रा रभसा वपूंषि दधानो यथा वा मधुनो घृतस्य धाराः श्चोतन्ति यत्र वृषा काव्येन वावृधे सहसो व्यद्यौत् तथैतैर्बभ्राणः संस्त्वं वर्धस्व॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुशिक्षितानां वाचो जलवत् कोमला जायन्ते यथा ब्रह्मचारी वीर्यवान् भवति तथाऽपत्यैर्विद्यासुशिक्षास्संगृह्य बलवद्भिः सुशीलैर्भवितव्यम्॥८॥

पदार्थः-हे **(सूनो)** सन्तान! जैसे **(शुक्रा)** शरीर, आत्मा और बल तथा **(रभसा)** रोगरहित **(वपूंषि)** रूपवान् शरीरों को **(दधानः)** धारण करता हुआ जो **(मधुनः)** मीठे **(घृतस्य)** जल की **(धाराः)** धाराओं के समान वाणी **(श्चोतन्ति)** झरती हैं **(यत्र)** जिस व्यवहार में **(वृषा)** बलवान् जन **(काव्येन)** विद्वानों के निर्माण किये और पढ़े हुए कविताई आदि कर्म के साथ **(वावृधे)** बढ़ता है वा **(सहसः)** बल से **(व्यद्यौत्)** प्रकाशित होता है, वैसे ही उक्त पदार्थों से **(बभ्राणः)** पुष्ट होते हुए बढ़ो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे उत्तम शिक्षा पाये हुए सज्जनों की वाणी जल के समान कोमल और सरस होती है, जैसे ब्रह्मचारी बलवान् होता है, वैसे सन्तानों को चाहिये कि

विद्या, सुशिक्षाओं को अच्छे प्रकार ग्रहण कर बलवान् और सुशील होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पि॒तुश्चि॒दूधर्ज॒नुषा॑ विवेद॒ व्य॑स्य॒ धारा॑ असृज॒द्विधे॑ना॑:।
गुहा॒ चर॑न्तं॒ सखि॑भि: शि॒वेभि॑र्दि॒वो य॒ह्वीभि॒र्न गुहा॑ बभूव॥९॥

पि॒तु:। चि॒त्। ऊध॑:। ज॒नुषा॑। वि॒वे॒द॒। वि। अ॒स्य॒। धारा॑:। अ॒सृ॒ज॒त्। वि। धेना॑:। गुहा॑। चर॑न्तम्। सखि॑ऽभि:। शि॒वेभि॑:। दि॒व:। य॒ह्वीभि॑:। न। गुहा॑। ब॒भू॒व॒॥९॥

पदार्थ:-(**पितु:**) जनकस्य सकाशात् (**चित्**) इव (**ऊध:**) रात्री (**जनुषा**) जन्मना (**विवेद**) वेत्ति (**वि**) (**अस्य**) जलस्य (**धारा:**) प्रवाहाश्च (**असृजत्**) सृजेत् (**वि**) विशेषेण (**धेना:**) प्रीयमाणान्यपत्यानि इव वाच: (**गुहा**) गुहायाम् बुद्धौ (**चरन्तम्**) प्राप्नुवन्तम् (**सखिभि:**) मित्रै: (**शिवेभि:**) मङ्गलकारिभि: (**दिव:**) विद्यादीप्ती: (**यह्वीभि:**) महतीभि: (**न**) इव (**गुहा**) कन्दरायाम् (**बभूव**) भवति॥९॥

अन्वय:-यथोधो विबभूव यथास्य धाराश्चिद् गुहा भवन्ति तथा य: पितुस्सकाशात् गर्भे स्थित्वा जनुषा प्रकटो भूत्वा शिवेभिस्सखिभिस्सह दिवो यह्वीर्न गुहा चरन्तं विवेद धेना व्यसृजत् स सुखमाप्नोति॥९॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथान्धकारे स्थितं वस्तु न दृश्यते दीपेन लभ्यते तथा पितु: शरीरे वर्त्तमानो जीवो गर्भे स्थितस्सन् न दृश्यते यदास्य जन्म भवति तदा दृश्यो जायत एवं यो मङ्गलाचारै: मित्रैस्सह विद्या गृह्णाति स आत्मानं विदित्वा महान् भवति॥९॥

पदार्थ:-जैसे (**ऊध:**) रात्री (**विबभूव**) विशेषता से होती है वा जैसे (**अस्य**) इस जल की (**धारा:**) धाराओं के (**चित्**) समान प्रवाह (**गुहा**) बुद्धि में होते हैं, वैसे जो (**पितु:**) पिता की उत्तेजना से गर्भ में स्थिर होकर (**जनुषा**) जन्म से प्रकट होकर (**शिवेभि:**) मङ्गलकारी (**सखिभि:**) मित्र वर्गों के साथ (**दिव:**) विद्या की दीप्ति जो (**यह्वी:**) बड़ी-बड़ी उनके (**न**) समान (**गुहा**) कन्दरा में (**चरन्तम्**) विचरते हुए को (**विवेद**) जानता है (**धेना:**) प्रीयमाण सन्तानों के समान (**व्यसृजत्**) विशेषता से उत्पन्न को वह सुख प्राप्त होता है॥९॥

भावार्थ:-इस मन्त्र में **[**उपमा और**]** वाचकलुप्तोपमालङ्कार हैं। जैसे अन्धकार में स्थित वस्तु नहीं दीख पड़ती, जैसे दीप से प्राप्त होती, वैसे पिता के शरीर में वर्त्तमान जीव गर्भ में स्थिर हुआ नहीं दीखता और जब इसका जन्म होता है तब दीखता है। इस प्रकार जो मङ्गलाचरणों से मित्रों के साथ विद्याओं का ग्रहण करता है, वह आत्मा को जान बड़ा होता है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरिकोऽधयत् पीप्यानाः।
वृष्णो सपत्नी शुचये सबन्धू उभे अस्मै मनुष्येऽ नि पाहि॥ १०॥ १४॥

पितुः। च। गर्भम्। जनितुः। च। बभ्रे। पूर्वीः। एकः। अधयत्। पीप्यानाः। वृष्णो। सपत्नी इति सऽपत्नी। शुचये। सबन्धू इति सऽबन्धू। उभे इति। अस्मै। मनुष्येऽ इति। नि। पाहि॥ १०॥

पदार्थः-(**पितुः**) पालकात् (**च**) धात्र्याः (**गर्भम्**) (**जनितुः**) जनकात् (**च**) सुअन्नादेः (**बभ्रे**) बिभर्त्ति (**पूर्वीः**) पूर्वभूताः (**एकः**) (**अधयत्**) धयति पिबति (**पीप्यानाः**) वर्द्धमानाः (**वृष्णे**) वीर्यसेचकाय (**सपत्नी**) समाना पत्नी यस्याः सा (**शुचये**) पवित्राय (**सबन्धू**) समानौ बन्धूरिव वर्त्तमानौ (**उभे**) द्वे पुरुषः स्त्री च (**अस्मै**) (**मनुष्ये**) मनुष्येभ्यो हिते (**नि**) नितराम् (**पाहि**) रक्ष॥१०॥

अन्वयः-यथाऽस्मै शुचये वृष्णे सपत्नी गर्भं बभ्रे स एको गर्भः पितुश्च जनितुश्च सकाशाज्जन्म प्राप्य पूर्वीः पीप्याना अधयत् तथा उभे सबन्धू मनुष्ये गर्भं पातस्तथा हे विद्वन्! एकः संस्त्वं सन्नि पाहि॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा मातापितरौ गर्भं धत्तस्तं संरक्ष्य दुग्धपानादिना वर्धयतस्तथा स्त्रीपुरुषौ प्रीतिं वर्धयित्वा गर्भान् धृत्वा संपाल्य मनुष्याणां हितायाऽपत्यानि विद्यां ग्राहयेताम्॥१०॥

पदार्थः-जैसे (**अस्मै**) इस (**शुचये**) पवित्र (**वृष्णे**) वीर्य सेचनेवाले मनुष्य के अर्थ (**सपत्नी**) समान जिसका पति वह स्त्री (**गर्भम्**) गर्भ को (**बभ्रे**) धारण करती वह (**एकः**) एक गर्भ (**पितुः**) पालन करनेवाले (**च**) और सुन्दर अन्नादि और (**जनितुः**) जन्म देनेवाले पिता की (**च**) और धाई की उत्तेजना से जन्म पाकर (**पूर्वीः**) पहिले उत्पन्न हुईं (**पीप्यानाः**) बढ़ती हुई प्रजा (**अधयत्**) दुग्ध पीती हैं, वैसे (**उभे**) दोनों स्त्री-पुरुष (**सबन्धू**) एक समान बन्धुओं के समान प्रीति रखनेवाले (**मनुष्ये**) मनुष्यों के लिये जो हित उसके निमित्त (**गर्भम्**) गर्भ की रक्षा करते हैं, वैसे हे विद्वन्! एक होते आप (**नि, पाहि**) निरन्तर पालना करो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब माता-पिता गर्भ को धारण करते हैं, और उसकी रक्षा कर दुग्धपान आदि से बढ़ाते हैं, वैसे स्त्री-पुरुष प्रीति को बढ़ाकर गर्भ को धारण कर उसे अच्छे प्रकार पाल मनुष्यों के हित के लिये अपने सन्तानों को विद्या ग्रहण करावें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणाम्॥ ११॥

उ॒रौ। म॒हान्। अ॒नि॒ऽबा॒धे। व॒व॒र्ध॒। आपः॑। अ॒ग्निम्। य॒शसः॑। सम्। हि। पू॒र्वीः। ऋ॒तस्य॑। योनौ॑। अ॒श॒य॒त्। दमू॑नाः। जा॒मी॒नाम्। अ॒ग्निः। अ॒पसि॑। स्वसॄ॑णाम्॥ ११॥

पदार्थः-(**उरौ**) बाहौ (**महान्**) (**अनिबाधे**) बाधारहिते (**ववर्ध**) वर्धते (**आपः**) जलानि (**अग्निम्**) पावकम् (**यशसः**) कीर्तेः (**सम्**) सम्यक् (**हि**) खलु (**पूर्वीः**) प्राचीनाः (**ऋतस्य**) जलस्य (**योनौ**) कारणे (**अशयत्**) शेते (**दमूनाः**) दमनशीलाः (**जामीनाम्**) भोक्तॄणाम् (**अग्निः**) पावकः (**अपसि**) कर्म्मणि (**स्वसॄणाम्**) भगिनीनाम्॥ ११॥

अन्वयः-यथा पूर्वीरापो मेघेन वर्धन्ते तथा यशसो महाननिबाध उरावग्निं प्राप्य हि सं ववर्ध। यथाग्निर्ऋतस्य योनावशयत् तथा जामीनां स्वसॄणामपसि स्थित्वा दमूना विद्यायां वर्धते॥ ११॥

भावार्थः-यदि निर्विघ्ना विद्यार्थिनो विद्याग्रहणप्रयत्नं कुर्युस्तदा दमशमादिगुणान्वितास्सन्त-स्सर्वेषां सम्बन्धिनां विद्यासंप्रयोगं कर्त्तुं शक्नुयुः॥ ११॥

पदार्थः-जैसे (**पूर्वीः**) प्राचीन (**आपः**) जल मेघ से बढ़ते हैं, वैसे (**यशसः**) कीर्ति से (**महान्**) जो बड़ा है वह (**अनिबाधे**) बाधारहित (**उरौ**) बहुत व्यवहार में (**अग्निम्**) अग्नि को प्राप्त कर (**हि**) (**सम्, ववर्ध**) अच्छे प्रकार बढ़ता है, जैसे (**अग्निः**) पावक (**ऋतस्य**) जल के (**योनौ**) कारण में (**अशयत्**) सोता है, वैसे (**जामीनाम्**) भोगनेवाली (**स्वसॄणाम्**) बहिनियों **[=बहिनों]** के (**अपसि**) कर्म में स्थिर होकर (**दमूनाः**) दमनशील जन विद्या में बढ़ता है॥ ११॥

भावार्थः-जो निर्विघ्न विद्यार्थी विद्या के ग्रहण करने में प्रयत्न करें तो दम और शमादि गुणयुक्त होते हुए सब सम्बन्धियों को विद्यायुक्त कर सकें॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒क्रो न ब॒भ्रिः स॑मि॒थे म॒हीनां॑ दिदृ॒क्षेय॑: सू॒नवे॒ भाऋ॑जीकः।
उदु॒स्रिया॒ जनि॑ता॒ यो ज॒जाना॒पां गर्भो॑ नृ॒तमो य॒ह्वो अ॒ग्निः॥ १२॥

अ॒क्रः। न। ब॒भ्रिः। स॒म्ऽइ॒थे। म॒हीना॑म्। दि॒दृ॒क्षेय॑ः। सू॒नवे॑। भाः॒ऽऋ॑जीकः। उत्। उ॒स्रिया॑ः। जनि॑ता। यः। ज॒जान॑। अ॒पाम्। गर्भ॑ः। नृ॒ऽत॑मः। यह्वः। अ॒ग्निः॥ १२॥

पदार्थः-(**अक्रः**) केनापि प्रकारेण क्रमितुमयोग्यः (**न**) इव (**बभ्रिः**) धर्ता (**समिथे**) संग्रामे (**महीनाम्**) पूजनीयानां सेनानाम् (**दिदृक्षेयः**) द्रष्टुमिच्छायां साधुर्दर्शनीयः। अत्र **वाच्छन्दसी**ति ढः। (**सूनवे**) अपत्याय (**भाऋजीकः**) भाभिर्विद्यादीप्तिभिरृजुः सरलः (**उत्**) (**उस्रियाः**) किरणैस्संयुक्तः (**जनिता**) उत्पादकः (**यः**) सूर्यः (**जजान**) जायते (**अपाम्**) जलानाम् (**गर्भः**) स्तोतुमर्हः (**नृतमः**) अतिशयेन नेता (**यह्वः**) महान् (**अग्निः**)॥ १२॥

अन्वयः-योऽपां गर्भो यह्वोऽग्निरुस्रिया अपां जनिता भवतीव दिदृक्षेयो नृतम उज्जजान स सूनवे महीनां समिथे बभ्रिरक्रो न भाऋजीको भवति॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्य्योऽपां गर्भं जनयित्वा मेघेन सह संयोध्य वृष्टिं कृत्वा सर्वान् वर्धयति तथाऽपत्यानां सुशिक्षकाः सर्वत्र विजयिनो भवन्ति॥१२॥

पदार्थः-(**यः**) जो सूर्य्य (**अपाम्**) जलों के बीच (**गर्भः**) स्तुति करने योग्य (**यह्वः**) महान् (**अग्निः**) अग्निरूप (**उस्रियाः**) किरणों से संयुक्त जलों का (**जनिता**) उत्पन्न करनेवाला होता है उसके (**दिदृक्षेयः**) देखने को चाहता मैं उत्तम (**नृतमः**) अतीव नेता सबका नायक (**उज्जजान**) उत्तमता से प्रकट होता है, वह (**सूनवे**) सन्तान के लिये (**महीनाम्**) पूजनीय सेनाओं के (**समिथे**) संग्राम के बीच (**बभ्रिः**) धारण करनेवाला (**अक्रः**) किसी प्रकार से आक्रमण करने को अयोग्य के (**न**) समान (**भाऋजीकः**) विद्यादीप्तियों से सरल होता है॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य्य जलों के गर्भ को उत्पन्न कर तथा मेघ के साथ अच्छे प्रकार युद्ध कर जल वर्षा कर सबको बढ़ाता है, वैसे सन्तानों को शिक्षा देनेवाले सब जगह विजयी होते हैं॥१२॥

पुनर्विद्याप्रशंसामाह॥

फिर विद्या की प्रशंसा को अगले मन्त्र में कहा है॥

अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम्।
देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन्॥१३॥

अपाम्। गर्भम्। दर्शतम्। ओषधीनाम्। वना। जजान। सुऽभगा। विऽरूपम्। देवासः। चित्। मनसा। सम्। हि। जग्मुः। पनिष्ठम्। जातम्। तवसम्। दुवस्यन्॥१३॥

पदार्थः-(**अपाम्**) प्राणानाम् (**गर्भम्**) मध्यव्यापिनम् (**दर्शतम्**) द्रष्टव्यम् (**ओषधीनाम्**) (**वना**) वनानि जङ्गलानि (**जजान**) जनयति (**सुभगा**) सुष्ठ्वैश्वर्य्यप्रदानि (**विरूपम्**) विविधानि रूपाणि यस्मिँस्तम् (**देवासः**) विद्वांसः (**चित्**) अपि (**मनसा**) अन्तःकरणेन (**सम्**) (**हि**) खलु (**जग्मुः**) जानीयुः प्राप्नुयुर्वा (**पनिष्ठम्**) स्तोतुमर्हम् (**जातम्**) प्रसिद्धम् (**तवसम्**) बलकारकम् (**दुवस्यन्**) परिचरेयुः॥१३॥

अन्वयः-हे मनुष्या! देवासो मनसाऽभ्यासेन चिदपामोषधीनां दर्शतं विरूपं गर्भं सं जग्मुः यो हि सुभगा वना जजान यं जातं तवसं पनिष्ठं दुवस्यन् तं सर्वव्यापकं विद्युद्रूपमग्निं यूयं यथावद्विजानीत॥१३॥

भावार्थः-मनुष्यैर्योऽग्निवाय्वप्सु पृथिव्यां शरीरौषध्यादिषु दृश्यादृश्यपदार्थेषु व्याप्तस्तं विज्ञाय तेन सर्वाणि कार्य्याणि साधनीयानि॥१३॥

पदार्थः-हे मनुष्यो! (**देवासः**) विद्वान् जन (**मनसा**) अन्तःकरण और अभ्यास से (**चित्**) भी

जिस (**अपाम्**) प्राण वा (**औषधीनाम्**) ओषधियों के बीच (**दर्शतम्**) देखने योग्य (**विरूपम्**) जिसमें विविध रूप विद्यमान उस (**गर्भम्**) मध्यव्यापी अग्नि को (**सम्, जग्मुः**) अच्छे प्रकार जानें वा प्राप्त हों तथा जो (**हि**) ही (**सुभगा**) सुन्दर ऐश्वर्य्य के देनेवाले (**वना**) वन वा जङ्गलों को (**जजान**) उत्पन्न करता है, जिस (**जातम्**) प्रसिद्ध (**तवसम्**) बल करनेवाले (**पनिष्ठम्**) स्तुति करने योग्य अग्नि को (**दुवस्यन्**) सेवन करें, उस [सर्वव्यापक] विद्युत् रूप अग्नि को तुम लोग यथावत् जानो॥१३॥

भावार्थः–मनुष्यों को उचित है कि जो अग्नि, वायु, जल और पृथिवी में तथा शरीर, ओषधि आदि प्रत्यक्ष परोक्षभूत पदार्थों में व्याप्त उसको जान, उससे सब कार्य्यों को सिद्ध करें॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

बृहन्त इद्भानवो भाऋ्जीकमग्निं सचन्त विद्युतो न शुक्राः।
गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः॥१४॥

बृहन्तः। इत्। भानवः। भाः ऽऋ्जीकम्। अग्निम्। सचन्त। विऽद्युतः। न। शुक्राः। गुहाऽइव। वृद्धम्। सदसि। स्वे। अन्तः। अपारे। ऊर्वे। अमृतम्। दुहानाः॥१४॥

पदार्थः–(**बृहन्तः**) महान्तः (**इत्**) इव (**भानवः**) किरणदीप्तयः (**भाऋ्जीकम्**) भासु दीप्तिषु सरलम् (**अग्निम्**) पावकम् (**सचन्त**) सचन्ति समवयन्ति (**विद्युतः**) स्तनयित्नवः (**न**) इव (**शुक्राः**) शुद्धाः (**गुहेव**) यथा गुहायां बुद्धौ स्थितं जीवम् (**वृद्धम्**) विद्यावयोभ्यां ज्येष्ठम् (**सदसि**) सभायाम् (**स्वे**) स्वसम्बन्धिन्यौ (**अन्तः**) मध्ये (**अपारे**) अगाधे द्यावापृथिव्यौ। **अपारे इति द्यावापृथिवीनामसु पठितम्।** (निघं०३.३०)। (**ऊर्वे**) हिंसके (**अमृतम्**) कारणरूपेण नाशरहितं जलम् (**दुहानाः**) प्रपूरयन्तः॥१४॥

अन्वयः–हे मनुष्या! ये बृहन्तोऽमृतन्दुहाना भानवो विद्युतो न शुक्राः सदसि वृद्धमिवात्मानं गुहेव भाऋ्जीकमग्निं सचन्त येऽपारे स्वे ऊर्वेऽभिव्याप्यान्तर्विराजेते तानिदेव विजानीत॥१४॥

भावार्थः–अत्रोपमालङ्कारः। योऽग्निः सर्वत्र स्थितः सन् सूर्यभौमरूपेण प्रसिद्धो विद्युद्रूपेण गुप्तो मेघादिनिमित्तोऽस्ति तं विज्ञायाभीष्टं साधनीयम्॥१४॥

पदार्थः–हे मनुष्यो! जो (**बृहन्तः**) महान् (**अमृतम्**) कारणरूप से नाशरहित जल को (**दुहानाः**) पूर्ण करते हुए (**भानवः**) किरण वा दीप्ति (**विद्युतः**) बिजुलियों के (**न**) समान (**शुक्राः**) शुद्ध (**सदसि**) सभा में (**वृद्धम्**) विद्या और अवस्था से जो अतीव प्रशंसित उसके समान आत्मा को (**गुहेव**) बुद्धिस्थ जीव के समान (**भाऋ्जीकम्**) दीप्तियों में सरल (**अग्निम्**) अग्नि को (**सचन्त**) सम्बद्ध वा मेल करते हैं, जो (**अपारे**) अगाध द्यावापृथिवी (**स्वे**) निज सम्बन्ध करनेवाले (**ऊर्वे**) लोक सङ्घर्षण करनेवाले होकर (**अन्तः**) बीच में विराजमान हैं (**इत्**) उन्हीं को जानो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अग्नि सर्वत्र स्थित सूर्य वा भौमरूप से प्रसिद्ध, बिजुली रूप से गुप्त, मेघादि पदार्थों का निमित्त है, उसको जानकर अभीष्ट सिद्ध करना चाहिये॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ईळे॑ च त्वा॒ यज॑मानो ह॒विर्भि॒रीळे॑ सखि॒त्वं सु॑म॒तिं निका॑मः।
दे॒वैरव॑ो मिमीहि॒ सं ज॑रि॒त्रे रक्षा॑ च नो॒ दम्ये॑भि॒रनी॑कैः॥१५॥१५॥

ईळे॑। च॒। त्वा॒। यज॑मानः। ह॒विः॒ऽभिः॑। ईळे॑। सु॒खि॒ऽत्वम्। सु॒ऽम॒तिम्। निऽका॑मः। दे॒वैः। अवः॑। मि॒मी॒हि॒। सम्। ज॒रि॒त्रे। रक्ष॑। च॒। नः॒। दम्ये॑भिः। अनी॑कैः॥१५॥

पदार्थः-(**ईळे**) अध्येषयामि स्तौमि वा (**च**) (**त्वा**) त्वाम् (**यजमानः**) सङ्गन्ता (**हविर्भिः**) आदातुमर्हैः साधनैः (**ईळे**) (**सखित्वम्**) सख्युर्भावम् (**सुमतिम्**) शोभनां प्रज्ञाम् (**निकामः**) निश्चितकामनः (**देवैः**) विद्वद्भिः सह (**अवः**) रक्षणादिकम् (**मिमीहि**) सम्पादय (**सम्**) (**जरित्रे**) स्तावकाय (**रक्ष**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**च**) (**नः**) अस्मान् (**दम्येभिः**) दातुं योग्यैः (**अनीकैः**) सैन्यैः॥१५॥

अन्वयः-यजमानोऽहं देवैर्हविर्भिश्च तं त्वा विद्वांसं समीळे निकामः सन् सखित्वं सुमतिमीळे स त्वं जरित्रे मह्यमवो मिमीहि दम्येभिरनीकैर्नोऽस्माँश्च रक्ष॥१५॥

भावार्थः-मनुष्यैः प्रथमः श्रेष्ठोऽध्यापकोऽन्वेष्यस्तस्मात् सर्वेषाम्पदार्थानां विद्या अन्वेष्यास्ततो विचारः पुनः साक्षात्कारोऽतः परमुपयोगः कर्त्तव्यः॥१५॥

पदार्थः-(**यजमानः**) सब विद्या गुणों का सङ्ग करनेवाला मैं (**देवैः**) विद्वानों के साथ (**च**) और (**हविर्भिः**) ग्रहण करने योग्य साधनों से जिन (**त्वा**) आप विद्वानों की (**सम्, ईळे**) सम्यक् स्तुति करता हूं वा (**निकामः**) निश्चित कामनावाला होता हुआ (**सखित्वम्**) मित्रपन वा (**सुमतिम्**) सुन्दर बुद्धि की (**ईळे**) प्रशंसा करता हूँ, वह आप (**जरित्रे**) स्तुति करनेवाले मेरे लिये (**अवः**) रक्षा आदि को (**मिमीहि**) उत्पन्न करो (**दम्येभिः**) दमन करने योग्य (**अनीकैः**) सेनाजनों के साथ (**नः**) हम लोगों की (**च**) भी (**रक्ष**) रक्षा करो॥१५॥

भावार्थः-मनुष्यों को प्रथम श्रेष्ठ अध्यापक ढूंढना चाहिये और फिर उससे समस्त विद्याओं को ढूंढना चाहिये, तदनन्तर विचार, पीछे साक्षात्कार अर्थात् प्रत्यक्ष करना, उसके परे उपयोग करना चाहिये॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒प॒क्षे॒तार॒स्तव॑ सुप्रणी॒तेऽग्ने॒ विश्वा॑नि॒ धन्या॒ दधा॑नाः।

सुरेतसा श्रवसा तुज्ममाना अभि ष्याम पृतनायूँरदेवान्॥ १६॥

उपऽक्षेतारः। तव। सुऽप्रनीते। अग्ने। विश्वानि। धन्या। दधानाः। सुऽरेतसा। श्रवसा। तुज्ममानाः। अभि। स्याम। पृतनाऽयून्। अदेवान्॥ १६॥

पदार्थः-(**उपक्षेतारः**) उपगतान् द्वैधीकुर्वाणः (**तव**) (**सुप्रणीते**) सुष्ठु प्रकृष्टा नीतिर्यस्मात् तत्सम्बुद्धौ (**अग्ने**) पूर्णविद्यायुक्त (**विश्वानि**) (**धन्या**) धनार्हाणि (**दधानाः**) (**सुरेतसा**) सुष्ठु संश्लिष्टेन वीर्य्येण (**श्रवसा**) श्रवणेन (**तुज्ममानाः**) बलायमानाः (**अभि**) (**स्याम**) भवेम (**पृतनायून्**) पृतनासु सेनासु पूर्णमायुर्येषान्तान् (**अदेवान्**) अविदुषः॥ १६॥

अन्वयः-हे सुप्रणीतेऽग्ने! तव सकाशाद्विद्वांसो भूत्वा पृतनायूनदेवानुपक्षेतारस्सुरेतसा श्रवसा विश्वानि धन्या दधानास्तुज्ममानास्सन्तो वयं सुखिनोऽभि ष्याम॥ १६॥

भावार्थः-ये मनुष्या अविदुष उपेक्ष्य विदुषः सेवन्ते ते सर्वमैश्वर्य्यमाप्नुवन्ति॥ १६॥

पदार्थः-हे (**सुप्रणीते**) अपने से सुन्दर उत्तमोत्तम नीति का प्रकाश करनेवाले (**अग्ने**) पूर्णविद्यायुक्त! (**तव**) तुम्हारी उत्तेजना से विद्वान होकर (**पृतनायून्**) सेनाओं में पूर्ण आयु जिनकी विद्यमान उन (**अदेवान्**) अविद्वान् (**उपक्षेतारः**) समीप प्राप्त हुए जनों को छिन्न-भिन्न करनेवाले (**सुरेतसा**) सुन्दर संयुक्त वीर्य्य और (**श्रवसा**) श्रवण से (**विश्वानि**) समस्त (**धन्या**) धन के योग्य पदार्थों को (**दधानाः**) धारण करते और (**तुज्ममानाः**) बल करते हुए हम लोग सुखी (**अभि, ष्याम**) सब ओर से होवें॥ १६॥

भावार्थः-जो मनुष्य अविद्वानों की उपेक्षा करके विद्वानों का सेवन करते हैं, वे सब ऐश्वर्य को प्राप्त होते हैं॥ १६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान्।
प्रति मर्ताँ अवासयो दमूना अनु देवान् रथिरो यासि साधन्॥ १७॥

आ। देवानाम्। अभवः। केतुः। अग्ने। मन्द्रः। विश्वानि। काव्यानि। विद्वान्। प्रति। मर्तान्। अवासयः। दमूनाः। अनु। देवान्। रथिरः। यासि। साधन्॥ १७॥

पदार्थः-(**आ**) समन्तात् (**देवानाम्**) विदुषां मध्ये (**अभवः**) भव (**केतुः**) ज्ञानवान् (**अग्ने**) तीव्रबुद्धे (**मन्द्रः**) आनन्दप्रदः (**विश्वानि**) (**काव्यानि**) कविभिर्निर्मितानि (**विद्वान्**) यो वेत्ति (**प्रति**) (**मर्त्तान्**) मनुष्यान् (**अवासयः**) वासय (**दमूनाः**) जितेन्द्रियः (**अनु**) (**देवान्**) विदुषः (**रथिरः**) प्रशस्ता रथा विद्यन्ते यस्य सः (**यासि**) प्राप्नोषि (**साधन्**) संसाध्नुवन्। अत्र व्यत्ययेन शप्॥ १७॥

अन्वयः-हे अग्ने! केतुर्मन्द्रो भवान् विश्वानि काव्यान्यधीत्य देवानां विद्वानाभवस्स दमूना रथिरः साधन् संस्त्वं मर्तान् देवान् प्रत्यावासयोऽनु यासि च॥१७॥

भावार्थः-यो विदुषाम्मध्ये स्थित्वा सर्वाणि शास्त्राण्यधीत्यान्यानध्यापयति स सर्वाणि सुखानि प्राप्नोति॥१७॥

पदार्थः-हे **(अग्ने)** तीव्रबुद्धिजन **(केतुः)** ज्ञानवान् **(मन्द्रः)** आनन्द के देनेवाले आप **(विश्वानि)** समस्त **(काव्यानि)** कवियों से निर्म्माण किये हुए शास्त्रों को अध्ययन कर **(देवानाम्)** देवों के बीच **(विद्वान्)** ज्ञानवान् **(आ, अभवः)** हो तथा **(दमूनाः)** जितेन्द्रिय **(रथिरः)** और प्रशंसित रथवाले **(साधन्)** साधना करते हुए आप **(मर्तान्)** मनुष्य जो **(देवान्)** विद्वान् उनके **(प्रति)** प्रति **(अवासयः)** निवास कराओ वा **(अनु, यासि)** उक्त मनुष्यों के प्रति अनुकूलता से प्राप्त होते हैं॥१७॥

भावार्थः-जो विद्वानों के बीच स्थिर हो सब शास्त्रों को अध्ययन कर औरों को अध्ययन कराता है, वह सब सुखों को प्राप्त होता है॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन्।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान्॥१८॥

नि। दुरोणे। अमृतः। मर्त्यानाम्। राजा। ससाद। विदथानि। साधन्। घृतऽप्रतीकः। उर्विया। वि। अद्यौत्। अग्निः। विश्वानि। काव्यानि। विद्वान्॥१८॥

पदार्थः-**(नि)** नितराम् **(दुरोणे)** गृहे **(अमृतः)** आत्मरूपेण मृत्युधर्मरहितः **(मर्त्यानाम्)** मनुष्याणाम् **(राजा)** न्यायाधीशः **(ससाद)** सीदेत् **(विदथानि)** विज्ञानानि **(साधन्)** साध्नुवन् **(घृतप्रतीकः)** घृतमाज्यं प्रतीकं प्रदीपकं यस्य सः **(उर्विया)** पृथिव्याम् **(वि)** **(अद्यौत्)** प्रकाशते **(अग्निः)** पावकः **(विश्वानि)** सर्वाणि **(काव्यानि)** कविभिः क्रान्तप्रज्ञैर्विद्वद्भिर्निर्मितानि **(विद्वान्)**॥१८॥

अन्वयः-योऽमृतो विद्वान् दुरोणे मर्त्यानां घृतप्रतीकोऽग्निरुर्विया व्यद्यौदिव विश्वानि विदथानि काव्यान्यधीत्य सर्वहितं साधन् मर्त्यानां राजा निषसाद सोऽस्माभिः सत्कर्त्तव्यः॥१८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निः सूर्यरूपेण सर्वं प्रकाशयति तथा पूर्णविद्यो राजा धर्मेण प्रजाः संपाल्य विद्याः प्रकाशयति स सर्वैस्सत्कर्त्तव्यः कथन्न भवेत्?॥१८॥

पदार्थः-जो **(अमृतः)** आत्मरूप से मृत्युधर्मरहित **(विद्वान्)** विद्वान् **(दुरोणे)** घर में **(मर्त्यानाम्)** मनुष्यों के बीच **(घृतप्रतीकः)** घृत जिसका प्रकाश करनेवाला **(अग्निः)** वह अग्नि **(उर्विया)** पृथिवी पर **(वि, अद्यौत्)** विशेषता से प्रकाशित होते हुए के समान **(विश्वानि)** समस्त **(विदथानि)** विज्ञानों वा

(काव्यानि) विशेष आक्रमण करती हुई बुद्धियों वाले विद्वानों के बनाए शास्त्रों का अध्ययन कर सबका हित **(साधन्)** सिद्ध करते हुए मनुष्यों के बीच **(निषसाद)** स्थिर हो **[**वह**]** हम लोगों को सत्कार करने योग्य है॥१८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि सूर्यरूप से सबको प्रकाशित करता है, वैसे पूर्ण विद्यायुक्त सभापति राजा धर्म से प्रजाजनों का अच्छे प्रकार पालन कर विद्याओं का प्रकाश करता है, वह सबको सत्कार करने योग्य कैसे न हो?॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ नो॑ गहि स॒ख्येभिः॑ शि॒वेभि॑र्म॒हान् म॒हीभि॑रू॒तिभि॑स्सर॒ण्यन्।
अ॒स्मे र॒यिं ब॑हु॒लं सन्त॑रुत्रं सु॒वाचं॑ भा॒गं य॒शसं॑ कृधी नः॥१९॥

आ। नः। गहि। सख्येभिः। शिवेभिः। महान्। महीभिः। ऊतिभिः। सरण्यन्। अस्मे इति। रयिम्। बहुलम्। सम्ऽतरुत्रम्। सुऽवाचम्। भागम्। यशसम्। कृधि। नः॥१९॥

पदार्थः-**(आ)** **(नः)** **(अस्मान्)** **(गहि)** प्राप्नुहि **(सख्येभिः)** सखिभिः कृतैः कर्म्मभिः **(शिवेभिः)** मङ्गलमयैः **(महान्)** **(महीभिः)** महतीभिः **(ऊतिभिः)** रक्षाभिः **(सरण्यन्)** प्राप्नुवन् **(अस्मे)** अस्मान् **(रयिम्)** श्रियम् **(बहुलम्)** पुष्कलम् **(सन्तरुत्रम्)** दुःखात् सम्यक् तारकम् **(सुवाचम्)** सुष्ठु वाग्निमित्तम् **(भागम्)** भजनीयम् **(यशसम्)** कीर्त्तिकारकम् **(कृधि)** कुरु। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मान्॥१९॥

अन्वयः-हे विद्वँस्त्वं शिवेभिः सख्येभिः सह नोऽस्माना गहि महीभिरूतिभिरस्मेऽस्मान् सरण्यन्महान् सन्तरुत्रं सुवाचं यशसं भागं बहुलं रयिम्प्राप्तान्नः कृधि॥१९॥

भावार्थः-यदि मनुष्यः सुमित्राणि प्राप्नुयात्तर्हि तं महती श्रीः कथं न प्राप्नुयात्॥१९॥

पदार्थः-हे विद्वान्! आप **(शिवेभिः)** मङ्गलमय **(सख्येभिः)** मित्रों के किये कर्म्मों के साथ **(नः)** हम लोगों को **(आ, गहि)** प्राप्त हूजिये **(महीभिः)** बड़ी-बड़ी **(ऊतिभिः)** रक्षाओं से **(अस्मे)** हम लोगों को **(सरण्यन्)** प्राप्त होते हुए **(महान्)** बड़े सज्जन आप **(सन्तरुत्रम्)** दुःख से अच्छे प्रकार तारनेवाले **(सुवाचम्)** सुन्दर वाणी के निमित्त **(यशसम्)** कीर्ति करनेवाले **(भागम्)** सेवन करने योग्य **(बहुलम्)** बहुत प्रकार के **(रयिम्)** पुष्कल धन को प्राप्त **(नः)** हम लोगों को **(कृधि)** कीजिये॥१९॥

भावार्थः-यदि मनुष्य सुन्दर मित्रों को प्राप्त हो तो उसको बड़ी लक्ष्मी कैसे न प्राप्त हो?॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एता॑ ते॑ अग्ने॒ जनि॑मा॒ सना॑नि॒ प्र पू॒र्व्याय॒ नूत॑नानि वोचम्।
म॒हान्ति॒ वृष्णे॒ सव॑ना कृ॒तेमा जन्म॑ञ्जन्म॒न् निहि॑तो जा॒तवे॑दाः॥ २०॥

एता॑। ते॒। अ॒ग्ने॒। जनि॑म। सना॑नि। प्र। पू॒र्व्याय॑। नूत॑नानि। वो॒च॒म्। म॒हान्ति॑। वृष्णे॑। सव॑ना। कृ॒ता। इ॒मा। जन्म॑न्ऽजन्मन्। निऽहि॑तः। जा॒तऽवे॑दाः॥ २०॥

पदार्थः-(**एता**) एतानि (**ते**) तव (**अग्ने**) विद्वन् (**जनिम**) जन्मानि। अत्र **संहितायामि**ति दीर्घः। (**सनानि**) कर्मभिः संभक्तानि (**प्र**) (**पूर्व्याय**) पूर्वैः कृताय (**नूतनानि**) नवीनानि (**वोचम्**) वदेयम् (**महान्ति**) (**वृष्णे**) बलाय (**सवना**) ऐश्वर्य्यसाधनानि (**कृता**) कृतानि (**इमा**) इमानि (**जन्मञ्जन्मन्**) जन्मनि जन्मनि (**निहितः**) संस्थितः (**जातवेदाः**) यो जातेषु पदार्थेषु विद्यते॥ २०॥

अन्वयः-हे अग्ने! त एता जनिम सनानि नूतनानि महान्ति सवना जन्मन् जन्मन् कृतेमा सवना कर्माणि पूर्व्याय वृष्णे प्रवोचं तानि निहितो जातवेदास्त्वं शृणु॥ २०॥

भावार्थः-हे मनुष्या! यानि कर्माणि जीवैरनुष्ठेयानि क्रियन्ते करिष्यन्ते च तानि सर्वाणि सुखदुःखमिश्रफलानि भोक्तव्यानि भवन्ति॥ २०॥

पदार्थः-हे (**अग्ने**) विद्वान्! (**ते**) आपके (**एता**) इन (**जनिम**) जन्मों को जो कि (**सनानि**) कर्मों से संसेवित वा (**नूतनानि**) नवीन (**महान्ति**) बड़े-बड़े (**सवना**) ऐश्वर्य्यसाधक कर्म्म (**जन्मन्जन्मन्**) जन्म-जन्म में (**कृता**) किये हुए तथा (**इमा**) इन ऐश्वर्य्यसाधक कर्म्मों को (**पूर्व्याय**) पूर्वजों से किये हुए (**वृष्णे**) बल के लिये (**प्र, वोचम्**) कहूँ, उनको (**निहितः**) अच्छे प्रकार स्थित (**जातवेदाः**) जो उत्पन्न हुए पदार्थों में विद्यमान आप सुनो॥ २०॥

भावार्थः-हे मनुष्यो! जो कर्म जीवों को करने योग्य, उनसे किये जाते और किये जायेंगे, वे सब सुख-दुःखमिश्रित फल भोगनेवाले होते हैं॥ २०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जन्म॑ञ्जन्म॒न् निहि॑तो जा॒तवे॑दा वि॒श्वामि॑त्रेभिरिध्यते॒ अज॑स्रः।
तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म॥ २१॥

जन्म॑न्ऽजन्मन्। निऽहि॑तः। जा॒तऽवे॑दाः। वि॒श्वामि॑त्रेभिः। इ॒ध्य॒ते॒। अज॑स्रः। तस्य॑। व॒यम्। सु॒ऽम॒तौ। य॒ज्ञिय॑स्य। अपि॑। भ॒द्रे। सौ॒म॒न॒से। स्या॒म॒॥ २१॥

पदार्थः-(**जन्मन्जन्मन्**) जन्मनि जन्मनि (**निहितः**) कर्म्मानुसारेण स्थापितः (**जातवेदाः**) यो जातेषु पदार्थेष्वजातः सन् विद्यते सः (**विश्वामित्रेभिः**) विश्वं सर्वं जगन्मित्रं येषान्तैः (**इध्यते**) प्रज्ञाप्यते प्रदीप्यते

वा **(अजस्रः)** निरन्तरः **(तस्य) (वयम्) (सुमतौ)** प्रशस्तप्रज्ञायाम् **(यज्ञियस्य)** यज्ञमर्हतः **(अपि) (भद्रे)** कल्याणकरे **(सौमनसे)** शोभनस्य मनसो भावे **(स्याम)** भवेम॥ २१॥

अन्वयः-हे जीव! परमेश्वरेण जन्मन्जन्मन्निहितो जातवेदा विश्वामित्रेभिरजस्र इध्यते तस्य यज्ञियस्य सुमतौ भद्रे सौमनसे अपि वयं स्याम॥ २१॥

भावार्थः-सर्वैर्मनुष्यैः प्रसिद्धे जगति सुखदुःखादीनि न्यूनाधिकानि दृष्ट्वा प्रागर्जितकर्मफलमनुमेयम्। यदि परमेश्वरः कर्मफलप्रदाता न भवेत् तर्हीयं व्यवस्थापि न सङ्गच्छेत् तदर्थं सर्वैः श्रेष्ठां प्रतिज्ञामुत्पाद्य द्वेषादीनि विहाय सर्वैः सह सत्यभावेन वर्तितव्यम्॥ २१॥

पदार्थः-हे जीव! परमेश्वर ने **(जन्मन्जन्मन्)** जन्म-जन्म में **(निहितः)** कर्मों के अनुसार संस्थापन किया **(जातवेदाः)** उत्पन्न हुए पदार्थों में न उत्पन्न हुए के समान वर्त्तमान **(विश्वामित्रेभिः)** समस्त संसार जिनका मित्र उन सज्जनों से **(अजस्रः)** निरन्तर **(इध्यते)** प्रबोधित कराया जाता **(तस्य)** उस **(यज्ञियस्य)** यज्ञ के योग्य होते हुए प्राणी की **(सुमतौ)** प्रशंसित प्रज्ञा में और **(भद्रे)** कल्याण करनेवाले व्यवहार में तथा **(सौमनसे)** सुन्दर मन के भाव में **(अपि)** भी हम लोग **(स्याम)** होवें॥ २१॥

भावार्थः-सब मनुष्यों को प्रसिद्ध जगत् में सुखदुःखादि न्यून-अधिक फलों को देख कर पहिले जन्म में सञ्चित कर्म फल का अनुमान करना चाहिये। जो परमेश्वर कर्मफल का देनेवाला न हो तो व्यवस्था भी प्राप्त न हो, इसलिये सबको श्रेष्ठ बुद्धि उत्पन्न कर वैर आदि छोड़ सबके साथ सत्यभाव से वर्त्तना चाहिये॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो रराणः।
प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यजस्व॥ २२॥

इमम्। यज्ञम्। सहसाऽवन्। त्वम्। नः। देवऽत्रा। धेहि। सुक्रतो इति सुऽक्रतो। रराणः। प्र। यंसि। होतः। बृहतीः। इषः। नः। अग्ने। महि। द्रविणम्। आ। यजस्व॥ २२॥

पदार्थः-**(इमम्)** **(यज्ञम्)** रागद्वेषरहितं न्यायदयामयम् **(सहसावन्)** प्रशस्तबलयुक्त **(त्वम्)** **(नः)** अस्माकम् **(देवत्रा)** देवेषु विद्वत्सु **(धेहि)** धर **(सुक्रतो)** श्रेष्ठप्रज्ञ **(रराणः)** दाता सन् **(प्र, यंसि)** यच्छसि **(होतः)** आदातः **(बृहतीः)** महतीः **(इषः)** अन्नादीनि **(नः)** अस्मभ्यम् **(अग्ने)** विद्वान् **(महि)** **(द्रविणम्)** धनम् **(आ)** **(यजस्व)** देहि॥ २२॥

अन्वयः-हे सहसावन् सुक्रतो अग्ने! त्वं न इमं यज्ञं देवत्रा धेहि। हे होतरग्ने! रराणः सन् बृहतीरिषो नः प्रयंसि स महि द्रविणमा यजस्व॥ २२॥

भावार्थः-ईश्वरेण विद्वानाज्ञाप्यते यावज्जीवं तावत्त्वं विद्यायज्ञं मनुष्येषु सुतनुहि तेन पुष्कलान्यन्नधनानि सर्वेभ्यो दत्वा सुखी भव॥ २२॥

पदार्थः-हे **(सहसावन्)** प्रशस्त बल और **(सुक्रतो)** श्रेष्ठप्रज्ञायुक्त **(अग्ने)** विद्वान्! **(त्वम्)** आप **(नः)** हमारे **(इमम्)** इस **(यज्ञम्)** रागद्वेषरहित न्याय-दयामय यज्ञ को **(देवत्रा)** विद्वानों में **(धेहि)** स्थापन करें। वा हे **(होतः)** ग्रहण करने वाले विद्वान्! **(रराणः)** दाता होते हुए आप **(बृहतीः)** बड़ी-बड़ी **(इषः)** अन्नादि सामग्रियों को **(नः)** हम लोगों के लिये **(प्र, यंसि)** देते हैं, वह **(महि)** बहुत **(द्रविणम्)** धन को **(आ, यजस्व)** दीजिये॥ २२॥

भावार्थः-ईश्वर ने विद्वान् को आज्ञा दी है कि जब तक जीवे तब तक तू विद्या यज्ञ को मनुष्यों में अच्छे प्रकार विस्तारे और पुष्कल अन्न और उससे धनों को सबके अर्थ दे के सुखी होवे॥ २२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळामग्ने पुरुदंसꣳ सनिं गोः शश्वत्तमं हवमानाय साध।

स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे॥ २३॥ १६॥

इळाम्। अग्ने। पुरुदंसम्। सनिम्। गोः। शश्वत्ऽतमम्। हवमानाय। साध। स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति॥ २३॥

पदार्थः-**(इळाम्)** स्तुत्यां वाचम् **(अग्ने)** विद्वन् **(पुरुदंसम्)** पुरूणि दंसांसि कर्माणि भवन्ति यस्यास्ताम् **(सनिम्)** विभक्ताम् **(गोः)** वाचः **(शश्वत्तमम्)** अनादिभूतं शब्दार्थसम्बन्धम् **(हवमानाय)** आनन्दाय **(साध)** साध्नुहि। अत्र विकरणव्यत्ययेन शप्। **(स्यात्)** **(नः)** अस्माकम् **(सूनुः)** पुत्रः **(तनयः)** विस्तीर्णबुद्धिः **(विजावा)** विशेषेण प्रादुर्भूतः **(अग्ने)** विद्वन् **(सा)** **(ते)** **(सुमतिः)** उत्तमा प्रज्ञा **(भूतु)** भवतु **(अस्मे)** अस्मभ्यम्॥ २३॥

अन्वयः-हे अग्ने! गोः शश्वत्तमं हवमानाय पुरुदंसं सनिमिळां त्वं साध। हे अग्ने! या ते सुमतिर्भवति साऽस्मे भूतु यया नो विजावा तनयः सूनुः स्यात्॥ २३॥

भावार्थः-विदुषामियमेव योग्यतास्ति सर्वान् कुमारान् कुमारीश्च विदुषीः सम्पादयेत् यतः सर्वे विद्यायाः फलं प्राप्य सुमतयः स्युरिति॥ २३॥

अत्र विद्वत्स्त्रीपुरुषविद्याजन्मप्रशंसाकरणादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयमण्डले प्रथमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वान् **(गोः)** वाणी का **(शश्वत्तमम्)** अनादि भूत शब्दार्थ सम्बन्ध **(हवमानाय)** आनन्द के लिये **(पुरुदंसम्)** जिससे बहुत कर्म बनते हैं **(सनिम्)** अलग-अलग की हुई **(इळाम्)** स्तुति करनेवाली वाणी को आप **(साध)** सिद्ध कीजिये। हे **(अग्ने)** विद्वान्! जो **(ते)** तुम्हारी

(सुमतिः) उत्तम बुद्धि होती है **(सा)** वह **(अस्मे)** हम लोगों के लिये **(भूतु)** हो, जिससे **(नः)** हमारे **(विजावा)** विशेष करके उत्पन्न भया **[**हुआ**]** हो ऐसा **(तनयः)** विस्तीर्ण बुद्धिवाला **(सूनुः)** पुत्र **(स्यात्)** हो॥२३॥

भावार्थः-विद्वानों को यही योग्यता है कि सब कुमार और कुमारियों को पण्डित-पण्डिता बनावें, जिससे सब विद्या के फल को प्राप्त होकर सुमति हों॥२३॥

इस सूक्त में विद्वान्-स्त्री-पुरुष और विद्या जन्म की प्रशंसा करने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह तीसरे मण्डल में प्रथम सूक्त और सोलहवां वर्ग समाप्त हुआ॥

वैश्वानरायेति पञ्चदशर्चस्य द्वितीयस्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्वैश्वानरो देवता। १, ३, १० जगती। २, ४, ६, ८, ९, ११ विराड् जगती। ५, ७, १२-१५ निचृज्जगती च छन्दः। निषादः स्वरः॥

अथ विद्वद्गुणानाह॥

अब पन्द्रह ऋचावाले दूसरे सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वानों के गुणों का उपदेश किया है॥

वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि।
द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति॥ १॥

वैश्वानराय। धिषणाम्। ऋतऽवृधे। घृतम्। न। पूतम्। अग्नये। जनामसि। द्विता। होतारम्। मनुषः। च। वाघतः। धिया। रथम्। न। कुलिशः। सम्। ऋण्वति॥ १॥

पदार्थः-(**वैश्वानराय**) विश्वेषु नरेषु राजमानाय (**धिषणाम्**) प्रगल्भां धियम् (**ऋतावृधे**) सत्यस्य वर्द्धकाय (**घृतम्**) आज्यम् (**न**) इव (**पूतम्**) पवित्रम् (**अग्नये**) पावकाय (**जनामसि**) जनयेम। अत्र व्यत्ययेन परस्मैपदम्। (**द्विता**) द्वयोर्भावः (**होतारम्**) दातारम् (**मनुषः**) मनुष्याः (**च**) (**वाघतः**) मेधावी। **वाघत इति मेधाविनामसु पठितम्।** (निघं०३.१५)। (**धिया**) प्रज्ञया कर्मणा वा (**रथम्**) यानम् (**न**) इव (**कुलिशः**) वज्रम्। **कुलिश इति वज्रनामसु पठितम्।** (निघं०२.२०)। (**सम्**) (**ऋण्वति**) प्राप्नोति। **ऋण्वतीति गतिकर्मासु पठितम्।** (निघं०२.१४)॥ १॥

अन्वयः-हे मनुष्या! यथा वयमृतावृधे वैश्वानरायाग्नये पूतं घृतं न धिषणां जनामसि वाघतो धिया कुलिशो रथं न समृण्वति द्विता होतारं मनुषश्च समृण्वति तथा यूयमप्याचरत॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथर्त्विजो घृतादिकं हविः संशोध्याग्नौ हवनेन पावकं वर्द्धयन्ति तथाध्यापकोपदेशकाः शिष्याणां श्रोतॄणां च प्रज्ञा वर्धयेयुर्यथा कुठारादिभिः साधनैर्यानानि रच्यन्ते तथा सुशिक्षाताडनैः शिष्या विद्यया संसृज्येरन्। यथाऽध्यापकाऽध्येतारौ प्रीत्या वर्त्तेते तथा सर्वैर्वर्त्तितव्यम्॥ १॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**ऋतावृधे**) सत्य के बढ़ानेवाले (**वैश्वानराय**) समस्त मनुष्यों में प्रकाशमान (**अग्नये**) अग्नि के लिये (**पूतम्**) पवित्र (**घृतम्**) घृत के (**न**) समान (**धिषणाम्**) प्रगल्भ बुद्धि को (**जनामसि**) उत्पन्न करें (**वाघतः**) मेधावी जन (**धिया**) प्रज्ञा वा कर्म से (**कुलिशः**) वज्र (**रथम्**) रथ को (**न**) जैसे वैसे (**समृण्वति**) अच्छे प्रकार प्राप्त होता (**द्विता**) दो के होने (**होतारम्**) होमकर्ता मनुष्य (**च**) और (**मनुषः**) मनुष्यों को सम्यक् प्राप्त होता, वैसे ही तुम भी आचरण करो॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे ऋत्विग् जन घृत आदि हवि को अच्छे प्रकार शोध कर अग्नि में हवन करने से अग्नि की वृद्धि करते हैं, वैसे अध्यापक और

उपदेशक जन शिष्यों तथा श्रोताओं की बुद्धियों को बढ़ावें, जैसे कुल्हाड़ी आदि साधनों से काष्ठ छील कर यान बनाये जाते हैं, वैसे उत्तम शिक्षा और ताड़नाओं से शिष्य लोग **[**विद्या से**]** सम्पन्न किये जावें, जैसे अध्यापक और अध्येता प्रीति से वर्त्तमान हैं, वैसे सबको वर्त्तमान करना चाहिये॥१॥

अथ वह्निगुणानाह॥

अब अग्नि के गुणों को अगले मन्त्र में कहते हैं॥

स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत् पुत्र ईड्यः।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः॥२॥

सः। रोचयत्। जनुषा। रोदसी इति। उभे इति। सः। मात्रोः। अभवत्। पुत्रः। ईड्यः। हव्यऽवाट्। अग्निः। अजरः। चनःऽहितः। दुःऽदभः। विशाम्। अतिथिः। विभाऽवसुः॥२॥

पदार्थः-(**सः**) (**रोचयत्**)। अत्राडभावः। (**जनुषा**) जन्मना (**रोदसी**) सूर्य्यभूमी (**उभे**) (**सः**) (**मात्रोः**) (**अभवत्**) भवेत् (**पुत्रः**) (**ईड्यः**) स्तोतुमर्हः (**हव्यवाट्**) यो हव्यं वहति प्राप्नोति सः (**अग्निः**) (**अजरः**) जीर्णावस्थारहितः (**चनोहितः**) चनसे अन्नाय हितः (**दूळभः**) दुःखेन दभितुं योग्यः (**विशाम्**) प्रजानाम् (**अतिथिः**) सततं गन्ता (**विभावसुः**) यो विविधा भा वासयति सः॥२॥

अन्वयः-हे मनुष्या! यथा सोऽग्निर्जनुषा उभे रोदसी रोचयत्सोऽनयोर्मात्रोरीड्यः पुत्रइवाभवत्। योऽग्निर्हव्यवाडजरश्चनोहितो दूळभो विभावसुर्विशामतिथिरभवत्तं यथावद्विजानीत॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि ब्रह्मचर्य्येण विद्यासुशिक्षाः प्राप्य सत्पुत्रो जायते स भूम्याकाशयोर्मध्ये विराजमानः सूर्य्यइव सर्वेषां हितकारी स्यात्॥२॥

पदार्थः-हे मनुष्यो! जैसे (**सः**) वह (**अग्निः**) अग्नि (**जनुषा**) जन्म से अर्थात् उत्तेजना से (**उभे**) दोनों (**रोदसी**) सूर्य्य और भूमि को (**रोचयत्**) प्रकाशित करे और (**सः**) वह अग्नि (**मात्रोः**) इन मान करनेवाली सूर्य-भूमियों में (**ईड्यः**) स्तुति करने योग्य (**पुत्रः**) पुत्र के समान हो तथा जो (**अग्निः**) अग्नि (**हव्यवाट्**) हव्य पदार्थ को पहुंचानेवाला (**अजरः**) जीर्णावस्था रहित (**चनोहितः**) अन्नादि पदार्थों का हितकारी (**दूळभः**) दुःख से प्राप्त होने योग्य (**विभावसुः**) जो विविध प्रकार की कान्तियों का वसानेवाला (**विशाम्**) प्रजाओं के समीप (**अतिथिः**) निरन्तर पहुंचनेवाला हो, उसको यथावत् जानो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो ब्रह्मचर्य से विद्या और उत्तम शिक्षाओं को प्राप्त सत्पुत्र हो, वह भूमि और आकाश के बीच विराजमान हो, सूर्य के समान सबका हितकारी हो॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे॥ ३॥

क्रत्वा। दक्षस्य। तरुषः। विऽधर्मणि। देवासः। अग्निम्। जनयन्त। चित्तिभिः। रुरुचानम्। भानुना। ज्योतिषा। महाम्। अत्यम्। न। वाजम्। सनिष्यन्। उप। ब्रुवे॥ ३॥

पदार्थः-(**क्रत्वा**) क्रतुना प्रज्ञया वा (**दक्षस्य**) बलस्य (**तरुषः**) दुःखेभ्यः सन्तारकस्य (**विधर्मणि**) विविधं च तद्धर्म च तस्मिन् (**देवासः**) विद्यां कामयमानाः (**अग्निम्**) (**जनयन्त**) जनयेयुः (**चित्तिभिः**) इन्धनादीनां चयनक्रियाभिः (**रुरुचानम्**) शुम्भमानम् (**भानुना**) दीप्तया (**ज्योतिषा**) तेजसा (**महाम्**) महान्तम्। अत्र **वाच्छन्दसी**ति नकारतकारलोपः सवर्णदीर्घत्वेनास्य सिद्धिः। (**अत्यम्**) अश्वम् (**न**) इव (**वाजम्**) वेगवन्तम् (**सनिष्यन्**) संभक्ष्यमाणः (**उप**) (**ब्रुवे**) उपदिशामि॥ ३॥

अन्वयः-यथा देवासः क्रत्वा दक्षस्य तरुषो विधर्मणि चित्तिभिर्भानुना रुरुचानं ज्योतिषा महां वाजमग्निमत्यं न जनयन्त तथैनं सनिष्यन्नहमन्यानुपब्रुवे॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि क्रियाकौशलेनाग्नेरुपकारं गृहीतुमिच्छेयुस्तर्ह्ययमत्यन्तं कार्य्यसाधको भवेत्॥ ३॥

पदार्थः-जैसे (**देवासः**) विद्या की कामना करनेवाला (**क्रत्वा**) बुद्धि वा कर्म से (**दक्षस्य**) बल (**तरुषः**) जो कि दुःखों से अच्छे प्रकार तारनेवाला उसके (**विधर्मणि**) विविध कर्म में (**चित्तिभिः**) इन्धन आदि की चयन क्रियाओं से (**भानुना**) जो प्रकाश उससे (**रुरुचानम्**) अत्यन्त दीप्तिमान् (**ज्योतिषा**) तेज से (**महाम्**) महान् (**वाजम्**) वेगवान् (**अग्निम्**) अग्नि को (**अत्यम्**) अश्व के (**न**) समान (**जनयन्त**) उत्पन्न करें, वैसे इस अग्नि को [(**सनिष्यन्**) सेवन करता हुआ] मैं औरों को (**उप, ब्रुवे**) उपदेश करता हूँ॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यदि क्रिया कौशलता के साथ अग्नि से उपकार लिया चाहें तो अत्यन्त कार्य्यसिद्धि करनेवाला हो॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम्।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा॥ ४॥

आ। मन्द्रस्य। सनिष्यन्तः। वरेण्यम्। वृणीमहे। अह्रयम्। वाजम्। ऋग्मियम्। रातिम्। भृगूणाम्। उशिजम्। कविऽक्रतुम्। अग्निम्। राजन्तम्। दिव्येन। शोचिषा॥ ४॥

पदार्थः-(**आ**) समन्तात् (**मन्द्रस्य**) आनन्दप्रदस्य (**सनिष्यन्तः**) सं विभागं करिष्यन्तः (**वरेण्यम्**) वर्त्तुं स्वीकर्तुमर्हम् (**वृणीमहे**) स्वीकुर्महे (**अह्रयम्**) लज्जारहितम् (**वाजम्**) वेगवन्तम् (**ऋग्मियम्**) य

ऋग्भिर्मीयते प्रमीयते तम् **(रातिम्)** दातारम् **(भृगूणाम्)** अविद्यादाहकानाम् **(उशिजम्)** कमनीयम् **(कविक्रतुम्)** कवीनां क्रतुर्यज्ञइव प्रज्ञा यस्य तम् **(अग्निम्)** **(राजन्तम्)** प्रकाशमानम् **(दिव्येन)** शुद्धेन **(शोचिषा)** पवित्रेण स्वरूपेण॥४॥

अन्वयः-हे मनुष्या! यथा वयं मन्द्रस्य लाभायाह्वयं वाजमृग्मियं भृगूणां रातिमुशिजं दिव्येन शोचिषा राजन्तं कविक्रतुं वरेण्यमग्निं सनिष्यन्तो वयमावृणीमहे तथा यूयमप्येतं वृणुत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि युक्त्या वह्निं सेवेरँस्तर्हि किं किं दिव्यं सुखं वस्तु वा न साधयेयुः॥४॥

पदार्थः-हे मनुष्यो! जैसे जिस **(मन्द्रस्य)** अच्छे प्रकार आनन्द देनेवाले के लाभ के लिये **(अह्वयम्)** लज्जारहित **(वाजम्)** वेगवान् **(ऋग्मियम्)** ऋचाओं से जिसका प्रक्षेप होता अर्थात् जिसमें क्रिया होती उस **(भृगूणाम्)** अविद्या जलानेवालों के **(रातिम्)** देनेवाले **(उशिजम्)** मनोहर **(दिव्येन)** शुद्ध और **(शोचिषा)** स्वरूप से **(राजन्तम्)** प्रकाशमान **(कविक्रतुम्)** कवियों के यज्ञ के समान उपकार जिसका उस **(वरेण्यम्)** स्वीकार करने योग्य **(अग्निम्)** अग्नि को **(सनिष्यन्तः)** बांटते हुए हम लोग **(आ, वृणीमहे)** अच्छे प्रकार स्वीकार करते हैं, वैसे तुम भी उसको स्वीकार करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो युक्ति से अग्नि को सेवन करें तो क्या क्या दिव्य सुख वा वस्तु न सिद्ध करें?॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम्॥५॥१७॥

अग्निम्। सुम्नाय। दधिरे। पुरः। जनाः। वाजऽश्रवसम्। इह। वृक्तऽबर्हिषः। यतऽस्रुचः। सुऽरुचम्। विश्वऽदेव्यम्। रुद्रम्। यज्ञानाम्। साधत्ऽइष्टिम्। अपसाम्॥५॥

पदार्थः-(**अग्निम्**) पावकम् **(सुम्नाय)** सुखाय **(दधिरे)** दध्युः **(पुरः)** पुरस्तात् **(जनाः)** मनुष्याः **(वाजश्रवसम्)** वाजो वेगः श्रवोऽन्नं यस्मात्तम् **(इह)** अस्मिन् वर्त्तमाने समये **(वृक्तबर्हिषः)** वृक्तं छेदितं धूमेन बर्हिरन्तरिक्षं यैस्ते ऋत्विजः **(यतस्रुचः)** यता गृहीताः स्रुचो यैस्ते **(सुरुचम्)** सुष्ठुदीप्तिम् **(विश्वदेव्यम्)** विश्वेषु देवेषु दिव्यपदार्थेषु भवम् **(रुद्रम्)** रोदयितारम् **(यज्ञानाम्)** **(साधदिष्टिम्)** साध्नुवन्तीष्टि येन तम् **(अपसाम्)** कर्मणाम्॥५॥

अन्वयः-हे मनुष्या! यथा यतस्रुचो वृक्तबर्हिषो जना इह सुम्नाय सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसां वाजश्रवसमग्निं पुरो दधिरे तथाऽस्माभिरप्यनुष्ठेयम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथर्त्विजो यज्ञेष्वग्निना वायुवृष्टिजलशोधनादीनि कर्माणि कुर्वन्ति तथा शिल्पिभिरपि पावकेन कार्य्याणि साधनीयानि॥५॥

पदार्थः-हे मनुष्यो! जैसे **(यतस्रुचः)** जिन्होंने यज्ञ करने की स्रुचा ग्रहण की और **(वृक्तबर्हिषः)** यज्ञ धूप से अन्तरिक्ष छेदन किया वे **(जनाः)** ऋत्विज् मनुष्य **(इह)** इस वर्त्तमान समय में **(सुम्नाय)** सुख के लिये **(सुरुचम्)** सुन्दर प्रकाशित **(विश्वदेव्यम्)** समस्त दिव्य पदार्थों में उत्पन्न हुए **(रुद्रम्)** किन्हीं को रुलानेवाले **(यज्ञानाम्)** यज्ञ कर्मों के **(साधदिष्टिम्)** हवन कर्म को जिससे सिद्ध करते वा अन्य **(अपसाम्)** कर्मों के बीच **(वाजश्रवसम्)** वेग और अन्न को सिद्ध करते उस **(अग्निम्)** अग्नि को **(पुरः)** प्रथम सब कर्मों से पहिले **(दधिरे)** धारण करते हैं, वैसे हम लोगों को भी अनुष्ठान करना चाहिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ऋत्विग् जन यज्ञों में अग्नि से वायु और वर्षा के जल की शुद्धि आदि काम करते हैं, वैसे शिल्पि आदि जनों को भी पावक अग्नि से कार्य सिद्ध करने चाहिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः।
अग्ने दुवं इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः॥६॥

पावकऽशोचे। तव। हि। क्षयम्। परि। होतः। यज्ञेषु। वृक्तऽबर्हिषः। नरः। अग्ने। दुवः। इच्छमानासः। आप्यम्। उप। आसते। द्रविणम्। धेहि। तेभ्यः॥६॥

पदार्थः-**(पावकशोचे)** पावकस्याग्नेः शोचिर्दीप्तिरिव द्युतिर्यस्य तत्सम्बुद्धौ **(तव)** **(हि)** **(क्षयम्)** गृहम् **(परि)** सर्वतः **(होतः)** दातः **(यज्ञेषु)** **(वृक्तबर्हिषः)** ऋत्विजः **(नरः)** नेतारः **(अग्ने)** विद्वन् **(दुवः)** परिचरणम् **(इच्छमानासः)** **(आप्यम्)** आप्तुं प्राप्तुं योग्यम् **(उप)** **(आसते)** **(द्रविणम्)** धनं यशो वा **(धेहि)** **(तेभ्यः)**॥६॥

अन्वयः-हे पावकशोचे होतरग्ने! तव हि क्षयं यज्ञेषु दुव इच्छमानासो वृक्तबर्हिषो नर इव य आप्यमग्निमुपासते तेभ्यो द्रविणं त्वं परिधेहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वन्! ये त्वत्सन्निधौ ये त्वामेव सेवमाना वह्निविद्यां याचते तान् प्रति इमामुपदिश येनैते धनाढ्याः स्युः॥६॥

पदार्थः-हे **(पावकशोचे)** अग्नि के समान कान्तिवाले **(होतः)** दानशील **(अग्ने)** विद्वान्! **(तव)** आपके **(हि)** ही **(क्षयम्)** घर को **(यज्ञेषु)** यज्ञों में **(दुवः)** सेवन **(इच्छमानासः)** चाहते हुए **(वृक्तबर्हिषः)** ऋत्विग्जन **(नरः)** नायक सर्व शिरोमणि जनों के समान **(आप्यम्)** जो प्राप्त होने योग्य

अग्नि की **(उपासते)** उपासना करते हैं **(तेभ्यः)** उनके लिये **(द्रविणम्)** धन वा यश **(धेहि)** धरिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वन्! जो तुम्हारे निकट तुम्हारे सेवा करते हुए अग्नि विद्या की याचना करते हैं, उनके प्रति इस विद्या का उपदेश कीजिये, जिससे वे धनाढ्य होवें॥६॥

अथाग्निविषयमाह॥

अब अग्नि विषय को अगले मन्त्र में कहा है॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन्।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः॥७॥

आ। रोदसी इति। अपृणत्। आ। स्वः। महत्। जातम्। यत्। एनम्। अपसः। अधारयन्। सः। अध्वराय। परि। नीयते। कविः। अत्यः। न। वाजऽसातये। चनः ऽहितः॥७॥

पदार्थः-(**आ**) (**रोदसी**) द्यावापृथिव्यौ (**अपृणत्**) पूरयति (**आ**) (**स्वः**) सुखम् (**महत्**) (**जातम्**) (**यत्**) (**एनम्**) (**अपसः**) कर्मणः (**अधारयन्**) धारयन्तु (**सः**) (**अध्वराय**) अहिंसारूपयज्ञाय (**परि**) सर्वतः (**नीयते**) प्राप्यते (**कविः**) क्रान्तदर्शनः (**अत्यः**) व्याप्तिशीलोऽश्वः (**न**) इव (**वाजसातये**) अन्नादीनां संविभागाय (**चनोहितः**) अन्नाय हितकारी॥७॥

अन्वयः-हे विद्वांसो! भवन्तो यथायं चनोहितो वाजसातयेऽत्यो न कविरग्नी रोदसी आपृणद् यन्महज्जातं स्वरापृणत् सोऽध्वराय परिणीयते तथैनमपसोऽधारयन्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो विद्युद्रूपोऽग्निं सूर्यं पृथिवीन्तत्स्थानन्तरिक्षस्थांश्च प्रकाशयति यदि स यानेषु प्रयुज्येत तर्हि सर्वेषां हितकारी स्यात्॥७॥

पदार्थः-हे विद्वानो! आप जैसे **(चनोहितः)** अन्न के लिये हित करानेवाला **(वाजसातये)** अन्नादि पदार्थों के विभाग करने को **(अत्यः)** जैसे व्याप्तिशील अर्थात् चालों में व्याप्ति रखनेवाला अश्व **(न)** वैसे **(कविः)** चञ्चल देखा जाये ऐसा अग्नि **(रोदसी)** आकाश और पृथिवी **(आ, अपृणत्)** अच्छे प्रकार पूर्ण करता है वा **(यत्)** जिस **(महत्)** बहुत **(जातम्)** उत्पन्न हुए **(स्वः)** सुख को **(आ)** अच्छे प्रकार परिपूर्ण करता है **(सः)** वह **(अध्वराय)** अहिंसारूप यज्ञ के लिये **(परिणीयते)** प्राप्त किया जाता है, वैसे **(एनम्)** उक्त अग्नि को **(अपसः)** कर्म से **(अधारयन्)** धारण करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्युत् रूप अग्नि सूर्य, पृथिवी **[**तथा**]** उनमें स्थित और अन्तरिक्षस्थ पदार्थों को प्रकाशित करता है, यदि वह यानों में प्रयुक्त किया जाये तो सबका हितकारी हो॥७॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम्।
रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत् पुरोहितः॥८॥

नमस्यत। हव्यऽदातिम्। सुऽअध्वरम्। दुवस्यत। दम्यम्। जातऽवेदसम्। रथीः। ऋतस्य। बृहतः। विऽचर्षणिः। अग्निः। देवानाम्। अभवत्। पुरःऽहितः॥८॥

पदार्थः-(**नमस्यत**) (**हव्यदातिम्**) हव्यानां दातिर्दानं येन तम् (**स्वध्वरम्**) शोभनोऽध्वरो यस्मात्तम् (**दुवस्यत**) सेवध्वम् (**दम्यम्**) दातुं शीलम् (**जातवेदसम्**) जातेषु विद्यमानम् (**रथीः**) प्रशस्तरथवान् (**ऋतस्य**) सत्यस्य (**बृहतः**) महतः कार्यस्य (**विचर्षणिः**) पश्यकः (**अग्निः**) पावकः (**देवानाम्**) विदुषाम् (**अभवत्**) भवति (**पुरोहितः**) पुर एनं दधाति सः॥८॥

अन्वयः-हे विद्वांसो! यो रथीर्ऋतस्य बृहतो विचर्षणिर्देवानां पुरोहितोऽग्निरभवत्तं हव्यदातिं स्वध्वरं दम्यं जातवेदसं नमस्यत दुवस्यत च॥८॥

भावार्थः-हे मनुष्या! यो बृहद्विद्योऽहिंसको जितेन्द्रियः प्रशंसितो विदुषां मध्ये विद्वान् भवेत् स एव युष्माभिर्नमस्करणीयः सेवनीयश्च स्यात्॥८॥

पदार्थः-हे विद्वानो! जो (**रथीः**) प्रशंसित रथवान् (**ऋतस्य**) सत्य (**बृहतः**) बड़े कार्य का (**विचर्षणिः**) देखनेवाला (**देवानाम्**) विद्वानों का (**पुरोहितः**) पहिले जिसको धारण करते [वह] (**अग्निः**) पवित्र करनेवाला (**अभवत्**) होता है, और (**हव्यदातिम्**) होमने योग्य पदार्थों का देनेवाला (**स्वध्वरम्**) जिससे कि सुन्दर यज्ञ होता उस (**दम्यम्**) दानशील (**जातवेदसम्**) और उत्पन्न हुए पदार्थों से विद्यमान विद्वान् को (**नमस्यत**) नमस्कार करो और उसकी (**दुवस्यत**) सेवा करो॥८॥

भावार्थः-हे मनुष्यो! जो बहुत विद्यावाला, अहिंसक, जितेन्द्रिय, विद्वानों के बीच विद्वान् हो, वही तुम लोगों को नमस्कार करने और सेवने योग्य भी हो॥८॥

अथाग्निविषयमाह॥

अब अग्नि के विषय को अगले मन्त्र में कहा है॥

तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः॥९॥

तिस्रः। यह्वस्य। सम्ऽइधः। परिऽज्मनः। अग्नेः। अपुनन्। उशिजः। अमृत्यवः। तासाम्। एकाम्। अदधुः। मर्त्ये। भुजम्। ऊम् इति। लोकम्। ऊम् इति। द्वे इति। उप। जामिम्। ईयतुः॥९॥

पदार्थः-(**तिस्रः**) त्रिप्रकारकाणि विद्युद्भौमसूर्यरूपेण स्थितानि ज्योतींषि (**यह्वस्य**) महतः (**समिधः**) सम्यक् प्रदीप्ताः (**परिज्मनः**) परितः सर्वतो व्याप्तस्य (**अग्नेः**) (**अपुनन्**) (**उशिजः**)

कमनीयाः **(अमृत्यवः)** मृत्युभयरहिताः **(तासाम्)** **(एकाम्)** **(अदधुः)** **(मर्त्ये)** मर्त्यलोके **(भुजम्)** पालिकाम् **(उ)** वितर्के **(लोकम्)** द्रष्टव्यम् **(उ)** **(द्वे)** **(उप)** **(जामिम्)** जायमानम् **(ईयतुः)** प्राप्नुतः॥९॥

अन्वयः-हे मनुष्या! यह्वस्य परिज्मनोऽग्नेर्या उशिजोऽमृत्यवस्तिस्रः समिधः सर्वानपुनन् तासामेकां मर्त्येऽदधुर्द्वे भुजं लोकमु जामिमुपेयतुस्ता यथावद्विजानीत॥९॥

भावार्थः-यदि मनुष्यास्त्रिविधमग्निं विदित्वोपर्यधस्थानि प्रयोजनानि साधयितुं प्रवर्त्तेरँस्तर्हि तेषां किमपि कार्यमसाध्यन्न स्यात्॥९॥

पदार्थः-हे मनुष्यो! **(यह्वस्य)** महान् **(परिज्मनः)** सर्वत्र व्याप्त **(अग्नेः)** अग्नि की जो **(उशिजः)** मनोहर **(अमृत्यवः)** मृत्यु धर्मरहित **(तिस्रः)** तीन प्रकार बिजुली, भूमिगत और सूर्यरूप से स्थित ज्योतिः **(समिधः)** सम्यक् प्रदीप्त लपटें हैं, वे सबको **(अपुनन्)** पवित्र करती हैं **(तासाम्)** उनमें से **(उ)** ही **(एकाम्)** एक को **(मर्त्ये)** मनुष्य लोक में **(अदधुः)** स्थापन करते हैं **(द्वे)** शेष दो **(भुजम्)** पालनेवाली पृथ्वी तथा **(लोकम्)** देखने योग्य लोक के समूह को **(उ)** और **(जामिम्)** जायमान वस्तुमात्र को **(उपेयतुः)** प्राप्त होती हैं, उनको अच्छे प्रकार जानो॥९॥

भावार्थः-जो मनुष्य तीन प्रकार के अग्नि को जान के ऊपर-नीचे स्थित जो प्रयोजन उन को सिद्ध करने को प्रवृत्त हों तो उनको कोई काम असाध्य न हो॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे।

स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत्॥१०॥१८॥

विशाम्। कविम्। विश्पतिम्। मानुषीः। इषः। सम्। सीम्। अकृण्वन्। स्वऽधितिम्। न। तेजसे। सः। उत्ऽवतः। निऽवतः। याति। वेविषत्। सः। गर्भम्। एषु। भुवनेषु। दीधरत्॥१०॥

पदार्थः-(**विशाम्**) प्रजानाम् **(कविम्)** क्रान्तप्रज्ञम् **(विश्पतिम्)** प्रजापालकम् **(मानुषीः)** मनुष्याणामिमाः **(इषः)** इच्छा **(सम्)** **(सीम्)** सर्वतः **(अकृण्वन्)** **(स्वधितिम्)** वज्रम् **(न)** इव **(तेजसे)** **(सः)** **(उद्वतः)** उपस्थितान् मार्गान् **(निवतः)** न्यग्भूतानधस्थान् **(याति)** गच्छति **(वेविषत्)** भृशं व्याप्नोति **(सः)** **(गर्भम्)** **(एषु)** **(भुवनेषु)** स्थित्यधिकरणेषु **(दीधरत्)** धारयति॥१०॥

अन्वयः-यं विशां कविं विश्पतिं मानुषीरिषस्तेजसे स्वधितिं न सीमकृण्वन् स उद्वतो निवतो संयाति स एषु भुवनेषु वेविषद् गर्भं दीधरत्॥१०॥

भावार्थः-यथा गर्भोऽदृश्यो भवति तथा वह्निरपि सर्वेषु पदार्थेषु वर्त्तते यदि मनुष्या इमं साधकं कुर्युस्तर्ह्येतद्युक्तेन यानैर्भूम्याकाशमार्गानध ऊर्ध्वगतींश्च कर्तुं शक्नुयुः प्रजाश्च पालयितुम्॥१०॥

पदार्थः-जिस (**विशाम्**) प्रजाओं में (**कविम्**) प्रविष्ट बुद्धिवाले (**विश्पतिम्**) प्रजापालक विद्वान् को (**मानुषीः**) मनुष्यों की (**इषः**) इच्छा (**तेजसे**) तेज के लिये (**स्वधितिम्**) वज्र के (**न**) समान (**सीम्**) सब ओर से (**अकृण्वन्**) परिपूर्ण करती है (**सः**) वह (**उद्वतः**) ऊपर से और (**निवतः**) नीचे के मार्गों को (**संयाति**) अच्छे प्रकार जाता है और (**सः**) वह (**एषु**) इन (**भुवनेषु**) स्थिति करने के आधार रूप लोकलोकान्तरों में (**वेविषत्**) निरन्तर व्याप्त होता है और (**गर्भम्**) गर्भ को (**दीधरत्**) धारण करता है॥१०॥

भावार्थः-जैसे गर्भ अदृश्य होता है, वैसे अग्नि भी सब पदार्थों में वर्त्तमान है। जो मनुष्य इसको साधक करें तो इस अग्नि से युक्त यानों से भूमि और आकाश मार्गों को और नीचे ऊपरली गतियों को कर सकें और प्रजा भी पाल सकें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स जिन्वते जठरेषु प्रजज्ञिवान् वृषा चित्रेषु नानदन्न सिंहः।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे॥११॥

सः। जिन्वते। जठरेषु। प्रजज्ञिऽवान्। वृषा। चित्रेषु। नानदत्। न। सिंहः। वैश्वानरः। पृथुऽपाजाः। अमर्त्यः। वसु। रत्ना। दयमानः। वि। दाशुषे॥११॥

पदार्थः-(**सः**) (**जिन्वते**) पृणाति (**जठरेषु**) उदरेषु (**प्रजज्ञिवान्**) प्रजातः सन् (**वृषा**) वीर्य्यकारी (**चित्रेषु**) अद्भुतेषु (**नानदत्**) भृशं शब्दयति (**न**) इव (**सिंहः**) (**वैश्वानरः**) सर्वेषां नायकः (**पृथुपाजाः**) विस्तीर्णबलः (**अमर्त्यः**) मरणधर्मरहितः (**वसु**) धनानि (**रत्ना**) रमणीयानि हीरकादीनि (**दयमानः**) ददन् सन् (**वि**) (**दाशुषे**) दात्रे॥११॥

अन्वयः-मनुष्यैर्यो जठरेषु प्रजज्ञिवान् चित्रेषु वृषा पृथुपाजा अमर्त्यो वैश्वानरो दाशुषे रत्ना वसु दयमानः सिंह इव न नानदत् स सर्वान् विजिन्वते इति विज्ञातव्यम्॥११॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्वह्वावद्भुतान् गुणकर्मस्वभावान् विदित्वा अतुलाः श्रियः संपाद्य सन्मार्गेषु दातृभ्यो देयाः। यदि जाठराग्निः शान्तः स्यात्तर्हि जीवनं कस्यापि न संभवेन्न चैतेन विना बलमपि कश्चित्प्राप्नोति॥११॥

पदार्थः-मनुष्यों को उचित है कि जो (**जठरेषु**) उदरों में (**प्रजज्ञिवान्**) प्रबलता से उत्पन्न होता हुआ (**चित्रेषु**) अद्भुत स्थानों में (**वृषा**) वीर्य करनेवाला (**पृथुपाजाः**) विस्तीर्ण बलवान् (**अमर्त्यः**) मरणधर्मरहित (**वैश्वानरः**) सबका नायक (**दाशुषे**) दान करानेवाले के लिये (**रत्ना**) रमणीय हीरा आदि मणिरूप (**वसु**) धन को (**दयमानः**) देता हुआ (**सिंहः**) सिंह के समान (**न, नानदत्**) निरन्तर शब्द नहीं करता है (**सः**) वह सबको (**वि, जिन्वते**) विशेषता से तृप्त करता है, ऐसा जानें॥११॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। मनुष्यो को अग्नि में अद्भुत गुण, कर्म, स्वभावों को जान के अतुल लक्ष्मियों को सिद्ध कर अच्छे मार्गों में देनेवालों को देनी चाहिये। जो जाठराग्नि शान्त हो तो किसी के जीवन का सम्भव न हो और न इसके बिना बल भी कोई पा सकता है॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वैश्वानरः प्रत्नथा नाकमारुहद् दिवस्पृष्ठं भन्दमानः सुमन्मभिः।
स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः॥१२॥

वैश्वानरः प्रत्नऽथा। नाकम्। आ। अरुहत्। दिवः। पृष्ठम्। भन्दमानः। सुमन्मऽभिः। सः। पूर्वऽवत्। जनयन्। जन्तवे। धनम्। समानम्। अज्मम्। परि। एति। जागृविः॥१२॥

पदार्थः–(**वैश्वानरः**) पावकः (**प्रत्नथा**) प्रत्नः प्राक्तन इव (**नाकम्**) (**आ**) (**अरुहत्**) आरोहति (**दिवः**) दिव्यस्याकाशस्य (**पृष्ठम्**) परभागम् (**भन्दमानः**) कल्याणं कुर्वाणः (**सुमन्मभिः**) सुष्ठुविचारैः (**सः**) (**पूर्ववत्**) (**जनयत्**) जनयति (**जन्तवे**) प्राणिने (**धनम्**) (**समानम्**) तुल्यम् (**अज्मम्**) अजन्ति गच्छन्ति यस्मिन्मार्गे तत् (**परि**) (**एति**) सर्वतः प्राप्नोति (**जागृविः**) सदा जाग्रदिव॥१२॥

अन्वयः–यो भन्दमानो जागृविरिव वैश्वानरः प्रत्नथा दिवः पृष्ठं नाकमारुहत् योऽज्मम्पर्य्येति जन्तवे समानं धनं पूर्ववज्जनयन् स सर्वैर्विद्वद्भिस्सुमन्मभिर्विज्ञेयः॥१२॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। नह्ययमग्निरपूर्वोऽस्ति योऽतीतेषु कल्पेषु यादृशोऽभूत्तादृश एवेदानीं वर्तते भविष्यत्काले भविष्यति च यद्ययं सर्वेषां प्रकाशक इव रवियोगेन कार्यकारी वर्त्तते तर्हि स यथावत् विज्ञातः प्रयुक्तश्च सन् मङ्गलप्रदो भवति॥१२॥

पदार्थः–जो (**भन्दमानः**) कल्याण को करता हुआ (**जागृविः**) जागता सा (**वैश्वानरः**) अग्नि (**प्रत्नथा**) पुरातनों के समान (**दिवः**) दिव्य आकाश के समान (**पृष्ठम्**) पर भाग (**नाकम्**) स्वर्ग सुख भोग विशेष को (**आरुहत्**) चढ़ता है जो (**अज्मम्**) गमन होनेवाले मार्ग में (**पर्य्येति**) सब ओर से जाता है (**जन्तवे**) वा प्राणी के लिये (**समानम्**) तुल्य (**धनम्**) धन को (**पूर्ववत्**) पूर्व के समान (**जनयन्**) उत्पन्न करता है (**सः**) वह (**सुमन्मभिः**) समस्त उत्तम विचारवाले विद्वानों को विशेषता से जानने योग्य है॥१२॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। यह अग्नि अपूर्व नहीं है, जो व्यतीत हुए कल्पों में जैसा हुआ वैसा ही अब वर्त्तमान है, भविष्यकाल में भी होगा। यदि यह सबका प्रकाशक के समान रवि के योग से कार्यकारी वर्त्तमान है तो वह यथावत् जाना और प्रयोग किया हुआ मङ्गल का अच्छे प्रकार देनेवाला होता है॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒ता॒वा॑नं य॒ज्ञिय॒ं वि॒प्रमु॒क्थ्य१॑मा यं दु॒धे मा॑त॒रिश्वा॑ दि॒वि क्षय॑म्।
तं चि॒त्रया॑मं॒ हरि॑केशमीमहे सुदी॒तिम॒ग्निं सु॑वि॒ताय॒ नव्य॑से॥ १३॥

ऋ॒तऽवा॑नम्। य॒ज्ञिय॑म्। वि॒प्र॑म्। उ॒क्थ्य॑म्। आ। यम्। दु॒धे। मा॒त॒रिश्वा॑। दि॒वि। क्षय॑म्। तम्। चि॒त्रऽया॑मम्। हरि॑ऽकेशम्। ई॒म॒हे॒। सु॒ऽदी॒तिम्। अ॒ग्निम्। सु॒वि॒ताय॑। नव्य॑से॥ १३॥

पदार्थः-(**ऋतावानम्**) सत्यकारणमयम् (**यज्ञियम्**) यज्ञसम्पादकम् (**विप्रम्**) मेधाविनम् (**उक्थ्यम्**) प्रशंसनीयम् (**आ**) (**यम्**) (**दधे**) दधाति (**मातरिश्वा**) यो मातर्य्यन्तरिक्षे श्वसिति (**दिवि**) दिव्ये आकाशे (**क्षयम्**) निवसितारम् (**तम्**) (**चित्रयामम्**) चित्रा अद्भुता यामाः प्रहरा यस्मात् यद्वा चित्रं यामं प्रापणं यस्य तम् (**हरिकेशम्**) हरयो हरणशीलाः केशा रश्मयो यस्य तम् (**ईमहे**) याचामहे (**सुदीतिम्**) सुष्ठु दीतिः क्षयो यस्मात् तम् (**अग्निम्**) पावकम् (**सुविताय**) अभिषवाय (**नव्यसे**) नूतनाय॥ १३॥

अन्वयः-यं ऋतावानं यज्ञियमुक्थ्यं दिवि क्षयं चित्रयामं सुदीतिं हरिकेशमग्निं नव्यसे सुविताय मातरिश्वाऽऽदधे तं यो जानाति तं विप्रं वयमीमहे॥ १३॥

भावार्थः-वह्नेर्निमित्तकारणं धर्ता वायुः प्रवर्त्तते यत्रान्तरिक्षे वायुरस्ति तत्रैव पावकः। यस्मात्प्रलयः प्रभवति येन च यज्ञाः सिद्धा भवन्ति तमद्भुतगुणकर्मस्वभावमग्निं नवीनताविद्या- फलाप्तये विद्वांसोऽन्विच्छन्तु॥ १३॥

पदार्थः-(**यम्**) जिस (**ऋतावानम्**) सत्यकारणमय (**यज्ञियम्**) यज्ञसम्पादक (**उक्थ्यम्**) प्रशंसा करने योग्य (**दिवि**) दिव्य आकाश में (**क्षयम्**) निवास करते हुए (**चित्रयामम्**) चित्र-विचित्र अद्भुत प्रहर जिसमें होते हैं वा चित्र-विचित्र याम प्राप्ति जिसकी वा (**सुदीतिम्**) सुन्दर दान जिससे होता उस (**हरिकेशम्**) हरणशील रश्मियों वाले (**अग्निम्**) अग्नि को (**नव्यसे**) नवीन (**सुविताय**) अभिषव के लिये (**मातरिश्वा**) अन्तरिक्ष में सोनेवाला वायु (**आ, दधे**) अच्छे प्रकार धारण करता है (**तम्**) उसे जो जानता है उस (**विप्रम्**) मेधावी पुरुष को हम लोग (**ईमहे**) याचते हैं॥ १३॥

भावार्थः-अग्नि के निमित्त कारण को धारण करनेवाला वायु वर्त्तमान है। जिस अन्तरिक्ष में वायु है वहीं अग्नि भी है। जिससे प्रलय होता है वा यज्ञ सिद्ध होते हैं, उस अद्भुत गुण, कर्म, स्वभाववाले अग्नि को नवीनता और विद्या प्राप्ति के लिये विद्वान् जन ढूंढे॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुचिं॑ न याम॑न्निषि॒रं स्व॒र्दृशं॑ के॒तुं दि॒वो रो॑चन॒स्थामु॑ष॒र्बुध॑म्।
अ॒ग्निं मू॒र्धानं॑ दि॒वो अप्र॑तिष्कुतं॒ तमी॑महे नम॑सा वा॒जिनं॑ बृ॒हत्॥ १४॥

शुचिꣳम्। न। यामꣳन्। इ॒षि॒रम्। स्व॒:ऽदृ॑शꣳम्। के॒तुम्। दि॒व:। रो॒च॒न॒ऽस्थाम्। उ॒ष॒:ऽबु॒धꣳम्। अ॒ग्निम्। मू॒र्धाꣳनम्। दि॒व:। अ॒प्र॒तिऽस्कु॑तम्। तम्। ई॒म॒हे॒। नम॑सा। वा॒जिन॑म्। बृ॒हत्॥ १४॥

पदार्थ:-(**शुचिम्**) पवित्रं शुद्धिकरम् (**न**) इव (**यामन्**) यान्ति गच्छन्ति यस्मिन् मार्गे (**इषिरम्**) एष्टव्यम् (**स्वर्दृशम्**) स्व: सुखं दृश्यते यस्मात्तम् (**केतुम्**) रूपादिप्रापकम् (**दिव:**) प्रकाशस्य (**रोचनस्थाम्**) रोचने प्रदीप्ते तिष्ठति तम् (**उषर्बुधम्**) य उषसि बोधयति तम् (**अग्निम्**) वह्निम् (**मूर्द्धानम्**) आकर्षणेन बद्धारम् (**दिव:**) दिव्याकाशस्य मध्ये (**अप्रतिष्कुतम्**) इतस्ततो लोकान्तरस्याभितो भ्रमणरहितम् (**तम्**) (**ईमहे**) (**नमसा**) सत्कारेण (**वाजिनम्**) बहुवेगवन्तम् (**बृहत्**) महान्तम्। अत्र **सुपां सुलुगि**ति अमो लुक्॥ १४॥

अन्वय:-हे मनुष्या! वयं विदुषां सकाशान्नमसा शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधं दिवो मूर्द्धानमप्रतिष्कुतं बृहद्वाजिनमग्निमीमहे तं तेभ्यो यूयमपि याचत॥ १४॥

भावार्थ:-मनुष्यैराप्तेभ्यो विद्वद्भ्योऽग्न्यादिविद्या: प्राप्तव्या:। यो यस्माद्विद्या जिघृक्षन्तं सततं सत्कुर्य्यात्। सूर्य: कस्यापि लोकस्य परिक्रमणं न करोति सर्वेभ्यो महांश्च॥ १४॥

पदार्थ:-हे मनुष्यो! हम लोग विद्वानों की उत्तेजना से (**नमसा**) सत्कार से जिस (**शुचिम्**) पवित्र और पवित्र करनेवाले के (**न**) समान (**यामन्**) जिससे गमन करते हैं, उस मार्ग में (**इषिरम्**) इच्छा करने योग्य (**स्वर्दृशम्**) जिससे कि सुख दीखता है उस (**केतुम्**) रूपादि प्रापक (**दिव:**) प्रकाश के बीच (**रोचनस्थाम्**) उजाले में स्थित होने (**उषर्बुधम्**) प्रात:काल बोध दिलाने और (**दिव:**) दिव्य आकाश के बीच (**मूर्द्धानम्**) खींचने से बांधने (**अप्रतिष्कुतम्**) इधर-उधर से लोकान्तर के चारों ओर से भ्रमण रहित (**बृहत्**) महान् (**वाजिनम्**) बहुत वेगवाले (**अग्निम्**) अग्नि को (**ईमहे**) याचते हैं (**तम्**) उस अग्नि को उन हम लोगों से तुम भी चाहो वा मांगो॥ १४॥

भावार्थ:-मनुष्यों को आप्त विद्वानों से अग्न्यादि विद्या प्राप्त करनी चाहिये। जो जिससे विद्या ग्रहण की इच्छा करे वह उसका निरन्तर सत्कार करे, सूर्य किसी लोक का परिक्रमण नहीं करता और सबसे बड़ा भी है॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

म॒न्द्रं होता॑रं शुचि॒मद्व्या॑वि॒नं दमू॑नसमु॒क्थ्यं॑ वि॒श्वच॑र्षणिम्।
रथं॒ न चि॒त्रं वपु॑षाय॒ दर्श॑तं मनु॒र्हित॑ꣳ सदमि॒द्राय॑ ईमहे॥ १५॥ १९॥

म॒न्द्रम्। होता॑रम्। शुचि॑म्। अद्व्या॑विनम्। दमू॑नसम्। उ॒क्थ्य॑म्। वि॒श्वऽच॑र्षणिम्। रथ॑म्। न। चि॒त्रम्। वपु॑षाय। दर्श॑तम्। मनु॑:ऽहितम्। सद॑म्। इत्। रा॒य:। ई॒म॒हे॒॥ १५॥

पदार्थः-(**मन्द्रम्**) आनन्दप्रदम् (**होतारम्**) आदातारम् (**शुचिम्**) पवित्रम् (**अद्वयाविनम्**) यो द्वयोर्न विद्यते तं सरलगामिनम् (**दमूनसम्**) दमनशीलम् (**उक्थ्यम्**) प्रशंसनीयम् (**विश्वचर्षणिम्**) सर्वेषां दर्शकम् (**रथम्**) दृढं रमणीयं यानम् (**न**) इव (**चित्रम्**) अद्भुतम् (**वपुषाय**) वपूंषि रूपाणि विद्यन्ते यस्मिंस्तस्मै व्यवहाराय। अत्र **अर्श आदिभ्यो**ऽजिति वेद्यम्। (**दर्शतम्**) द्रष्टुं योग्यम् (**मनुर्हितम्**) मनुष्याणां हितकारकम् (**सदम्**) अवस्थितम् (**इत्**) एव (**रायः**) धनानि (**ईमहे**) याचामहे॥१५॥

अन्वयः-हे मनुष्या! वयं यं होतारं मन्द्रं दमूनसमुक्थ्यं शुचिं विश्वचर्षणिं मनुर्हितं विद्वांसं प्राप्य रथं न चित्रं वपुषाय दर्शतं सदमद्वयाविनं वह्निमीमहे तेन राय ईमहे तमिद्यूयमपि याचत॥१५॥

भावार्थः-यदि दान्तानां विदुषां संनिधौ स्थित्वा वह्निविद्यां जानीयुस्तर्हि मनुष्याः किं किं धनं न प्राप्नुयुरिति॥१५॥

अत्र विद्वद्वह्निगुणवर्णनादेतदत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीयं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! हम लोग जिस (**होतारम्**) ग्रहण करने और (**मन्द्रम्**) आनन्द देनेवाले (**दमूनसम्**) दमनशील (**उक्थ्यम्**) प्रशंसा करने योग्य (**शुचिम्**) पवित्र (**विश्वचर्षणिम्**) सबके देखने और (**मनुर्हितम्**) मनुष्यों के हित करनेवाले विद्वान् को प्राप्त होकर (**रथम्**) दृढ़ रमणीय यान के (**न**) समान (**चित्रम्**) अद्भुत और (**वपुषाय**) जिस व्यवहार में रूप विद्यमान उस व्यवहार के लिये (**दर्शतम्**) देखने योग्य (**सदम्**) अवस्थित और (**अद्वयाविनम्**) जो दो में नहीं विद्यमान ऐसे सीधे चलनेवाले अग्नि को (**ईमहे**) जांचते [सिद्ध करते] और उससे (**रायः**) धनो को जांचते [सिद्ध करते] हैं, उस (**इत्**) ही को तुम लोग भी जांचो [सिद्ध करो]॥१५॥

भावार्थः-जो इन्द्रियों को दमन करनेवाले विद्वानों के निकट स्थित होकर अग्निविद्या को जानें तो मनुष्य किस-किस धन को न प्राप्त हों?॥१५॥

इस सूक्त में विद्वान् और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह दूसरा सूक्त और उन्नीसवां वर्ग पूर्ण हुआ॥

वैश्वानरायेत्येकादशर्चस्य तृतीयस्य सूक्तस्य विश्वामित्र ऋषिः। वैश्वानरोऽग्निर्देवता। १, ५ निचृज्जगती। २-४, ६, ८, ९ जगती। ७, १० विराट् जगती छन्दः। निषादः स्वरः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब ग्यारह ऋचावाले तीसरे सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों का विषय वर्णन करते हैं॥

वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत्॥ १॥

वैश्वानराय। पृथुऽपाजसे। विपः। रत्ना। विधन्त। धरुणेषु। गातवे। अग्निः। हि। देवान्। अमृतः। दुवस्यति। अथ। धर्माणि। सनता। न। दूदुषत्॥ १॥

पदार्थः-(**वैश्वानराय**) विश्वेषु नरेषु राजमानाय (**पृथुपाजसे**) महाबलाय (**विपः**) मेधाविनः (**रत्ना**) रत्नानि रमणीयानि धनानि (**विधन्त**) सेवन्ते (**धरुणेषु**) आधारेषु (**गातवे**) स्तावकाय (**अग्निः**) पावक इव (**हि**) खलु (**देवान्**) दिव्यान् गुणान् (**अमृतः**) मरणधर्मरहितः (**दुवस्यति**) परिचरति (**अथ**) आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। (**धर्माणि**) (**सनता**) सनतानि सनातनानि (**न**) निषेधे (**दूदुषत्**) दूषयति॥ १॥

अन्वयः-यथाऽमृतोऽग्निर्हि देवान् पृथिव्यादीन् दुवस्यत्यथ न दूदुषत् तथा विपो वैश्वानराय पृथुपाजसे गातवे सनता रत्ना धर्माणि च धरुणेषु रत्ना विधन्त॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पावकः स्वकीयान् सनातनान् गुणकर्मस्वभावान् सेवते कदाचिन्न दुष्यति तथैव विद्वांसो जिज्ञासुहिताय विद्या दत्वा स्वस्वभावान् भूषयन्ति न कदाचिदधर्माचरणेन दुष्यन्ति॥ १॥

पदार्थः-जैसे (**अमृतः**) मरणधर्मरहित (**अग्निः**) अग्निः के समान विद्वान् (**हि**) ही (**देवान्**) दिव्य गुणोंवाले पृथिव्यादिकों की (**दुवस्यति**) सेवा करता (**अथ**) अनन्तर इसके (**न**) नहीं (**दूदुषत्**) दूषित काम कराता, वैसे (**विपः**) मेधावी जन (**वैश्वानराय**) समस्त मनुष्यो में प्रकाशमान (**पृथुपाजसे**) महाबली (**गातवे**) और स्तुति करनेवाले के लिये (**सनता**) सनातन (**रत्ना**) रमणीय रत्नों (**धर्माणि**) और धर्मों को तथा (**धरुणेषु**) आधारों में रत्नरूपी रमणीय धनों को (**विधन्त**) सेवन करते हैं॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि अपने सनातन गुण, कर्म, स्वभावों को सेवता है, कभी दोषी नहीं होता, वैसे विद्वान् जन जिज्ञासुओं के हित के लिये विद्या देके अपने-अपने स्वभावों को भूषित करते हैं, कभी अधर्माचरण से दूषित नहीं होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः॥ २॥

अन्तः। दूतः। रोदसी इति। दस्मः। ईयते। होता। निऽसत्तः। मनुषः। पुरःऽहितः। क्षयम्। बृहन्तम्। परि। भूषति। द्युऽभिः। देवेभिः। अग्निः। इषितः। धियाऽवसुः॥ २॥

पदार्थः-(**अन्तः**) मध्ये (**दूतः**) दूत इव वर्त्तमानः (**रोदसी**) द्यावापृथिव्यौ (**दस्मः**) मूर्त्तद्रव्याणामुपक्षयिता (**ईयते**) प्राप्नोति (**होता**) आदाता (**निषत्तः**) निषण्णो निश्चितः स्थितः (**मनुषः**) मनुष्याणाम् (**पुरोहितः**) पुरस्ताद्धितकारी (**क्षयम्**) निवासस्थानम् (**बृहन्तम्**) महान्तम् (**परि**) सर्वतः (**भूषति**) अलं करोति (**द्युभिः**) देदीप्यमानैः (**देवेभिः**) किरणैः (**अग्निः**) पावकः (**इषितः**) अन्वेषितः (**धियावसुः**) यः प्रज्ञाः कर्माणि च वासयति सः॥ २॥

अन्वयः-हे विद्वांसो! भवन्तो यथा होता निषत्तो मनुषः पुरोहितो धियावसुरिषितो दस्मोऽन्तर्दूतोऽग्निर्द्युभिर्देवेभिः सह रोदसी ईयते बृहन्तं क्षयं परि भूषति तथा युष्माभिः सर्वे मनुष्यास्सुभूषणीयाः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्देशावयवान् प्राप्य सोत्तमैर्विद्याध्यापनोपदेशादिभिः कर्मभिः सर्वे मनुष्याः सुभूषणीयाः, अनेन सर्वेषां हितं सम्पादनीयम्॥ २॥

पदार्थः-हे विद्वानो! आप जैसे (**होता**) ग्रहण करनेवाला (**निषत्तः**) निश्चित स्थित (**मनुषः**) मनुष्यों का (**पुरोहितः**) पहिले करनेवाला (**धियावसुः**) जो प्रबल बुद्धियों और कर्मों को वास देता (**इषितः**) ढूंढा हुआ (**दस्मः**) मूर्तिमान् पदार्थों का छिन्न-भिन्न करनेहारा और (**अन्तः**) बीच में (**दूतः**) दूत के समान वर्त्तमान (**अग्निः**) अग्नि (**द्युभिः**) देदीप्यमान (**देवेभिः**) किरणों के साथ (**रोदसी**) प्रकाश और पृथिवी को (**ईयते**) प्राप्त होता और (**बृहन्तम्**) महान् (**क्षयम्**) निवासस्थान को (**परि, भूषति**) सब ओर से भूषित करता है, वैसे तुमको सब मनुष्य सुभूषित करने चाहिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को देश के अवयवों को प्राप्त होकर उत्तम विद्याध्ययन, अध्यापन और उपदेशादि कर्मों के साथ समस्त मनुष्य सुभूषित करने चाहिये और इससे सबका हित सिद्ध करना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः।

अपांसि॒ यस्मि॒न्नधि॑ संदु॒धुर्गिर॒स्तस्मि॑न्त्सु॒म्नानि॒ यज॑मान॒ आ च॑के॥ ३॥

के॒तुम्। य॒ज्ञाना॑म्। वि॒दथ॑स्य। साध॑नम्। विप्रा॑सः। अ॒ग्निम्। म॒ह॒य॒न्त॒। चित्ति॑ऽभिः। अपां॑सि। यस्मि॑न्। अधि॑। स॒म्ऽद॒धुः॒। गिरः॑। तस्मि॑न्। सु॒म्नानि॑। यज॑मानः। आ। च॒के॒॥ ३॥

पदार्थः-(**केतुम्**) प्रज्ञापकम् (**यज्ञानाम्**) सङ्गतानां व्यवहाराणाम् (**विदथस्य**) परार्थविज्ञानस्य (**साधनम्**) (**विप्रासः**) मेधाविनः (**अग्निम्**) पावकम् (**महयन्त**) पूजयेयुः (**चित्तिभिः**) काष्ठादिचयनैः (**अपांसि**) कर्माणि (**यस्मिन्**) वह्नौ (**अधि**) (**संदधुः**) सन्दध्युः (**गिरः**) वाचः (**तस्मिन्**) (**सुम्नानि**) सुखानि (**यजमानः**) विद्वत्सेवासङ्गतेः कर्ता (**आ**) समन्तात् (**चके**) कामयते। अत्र **छान्दसो वर्णलोपो वे**ति यलोपः॥ ३॥

अन्वयः-विप्रासो यस्मिन् गिरोऽपांसि च चित्तिभिरग्निमिवाधिसंदधुर्यस्मिन् यज्ञानां केतुं विदथस्य साधनं महयन्त सुम्नानि संदधुर्यस्मिन् यजमानः सुम्नान्या चके तस्मिन् सर्वे मनुष्याः सुखानि संदध्युः॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वस्याः पदार्थविद्यायाः मध्ये अग्निना तुल्यः कश्चिदन्यः पदार्थः कार्यसाधको न विद्यतेऽतोऽस्यैव परिज्ञानं सर्वैर्मनुष्यैः प्रयत्नेन कार्य्यम्॥ ३॥

पदार्थः-(**विप्रासः**) विद्वान् मेधावी जन (**यस्मिन्**) जिस अग्नि में (**गिरः**) वाणी और (**अपांसि**) कर्मों को (**चित्तिभिः**) काष्ठ आदि के इकट्ठे समूहों से (**अग्निम्**) अग्नि के समान (**अधि, संदधुः**) अच्छे प्रकार धारण करें वा जिसमें (**यज्ञानाम्**) मिले हुए व्यवहारों का (**केतुम्**) उत्तमता से ज्ञान दिलाने और (**विदथस्य**) दूसरे के लिये विज्ञान के (**साधनम्**) सिद्ध करानेवाले का (**महयन्त**) सत्कार करें वा (**सुम्नानि**) सुखों को अच्छे प्रकार धारण करें वा जिसमें (**यजमानः**) विद्वानों की सेवा और सङ्गति का करनेवाला जन (**सुम्नानि**) सुखों की (**आ, चके**) अच्छे प्रकार कामना करता है (**तस्मिन्**) उसमें सब मनुष्य सुखों को अच्छे प्रकार धारण करें॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। समस्त पदार्थविद्या के बीच अग्नि के तुल्य कोई और पदार्थ कार्यसाधक नहीं है, इससे इस अग्नि का ही परिज्ञान उत्तम यत्न के साथ सब लोगों को करना चाहिये॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पि॒ता य॒ज्ञाना॒मसु॑रो विप॒श्चितां॑ वि॒मान॑म॒ग्निर्व॒युनं॑ च वा॒घता॑म्।
आ वि॑वेश॒ रोद॑सी॒ भूरि॑वर्पसा पुरुप्रि॒यो भ॑न्दते॒ धाम॑भिः क॒विः॥ ४॥

पि॒ता। य॒ज्ञाना॑म्। असु॑रः। वि॒प॒ःऽचिता॑म्। वि॒ऽमान॑म्। अ॒ग्निः। व॒युन॑म्। च॒। वा॒घता॑म्। आ। वि॒वे॒श॒। रोद॑सी॒ इति॑। भूरि॑ऽवर्पसा। पु॒रु॒ऽप्रि॒यः। भ॒न्द॒ते॒। धाम॑ऽभिः। क॒विः॥४॥

पदार्थः-(**पिता**) पालकः (**यज्ञानाम्**) सङ्गतानां व्यवहाराणाम् (**असुरः**) सर्वेषां भूगोलादि-पदार्थानाम् यथाक्रमं प्रक्षेपकः (**विपश्चिताम्**) विदुषाम् (**विमानम्**) विमानमिव (**अग्निः**) पावक इव परमेश्वरः (**वयुनम्**) प्रज्ञाम् (**च**) (**वाघताम्**) मेधाविनाम् (**आ**) (**विवेश**) प्रविष्टवान् (**रोदसी**) द्यावापृथिव्यौ (**भूरिवर्पसा**) भूरि बहु च तद्वर्पश्च तेन सह (**पुरुप्रियः**) यः पुरून् बहून् प्रीणाति (**भन्दते**) सुखयति (**धामभिः**) स्थानैः सह (**कविः**) विक्रान्तदर्शनः॥४॥

अन्वयः-हे मनुष्या! यथेश्वरो यज्ञानां पिताऽसुरो विपश्चितां विमानं वाघतां च वयुनं भूरिवर्पसा धामभिः पुरुप्रियः कविर्भन्दते रोदसी आ विवेश तथाऽग्निरपि भवद्भिर्विज्ञेयः॥४॥

भावार्थः-यथेश्वरः सर्वत्र व्याप्य सर्वान् व्यवस्थापयति तथाग्निः पृथिव्यादीनभिव्याप्याकर्षणेन सर्वान् व्यवस्थापयति। यथाग्निः प्रयुक्तं विमानमाकाशे सद्यो गमयति तथा विद्वत्सेवापुरःसरेण योगाभ्यासविज्ञानेन सेवितो जगदीश्वरश्चिदाकाशे मुक्तान् सद्यः प्रवेश्य विहारयति॥४॥

पदार्थः-हे मनुष्यो! जैसे ईश्वर (**यज्ञानाम्**) प्राप्त हुए व्यवहारों का (**पिता**) पालनेवाला (**असुरः**) समस्त भूगोलादि पदार्थों का यथाक्रम अर्थात् यथास्थान फेंकनेवाला (**विपश्चिताम्**) विद्वानों के लिये (**विमानम्**) विमान के समान (**च**) और (**वाघताम्**) मेधावी जनों के (**वयुनम्**) उत्तम ज्ञान (**भूरिवर्पसा**) बहुत पराक्रम के (**धामभिः**) स्थानों के साथ (**पुरुप्रियः**) बहुतों को तृप्त करनेवाला (**कविः**) विशेष क्रम से जिसका दर्शन होता वह (**भन्दते**) प्रसन्न करता है और (**रोदसी**) आकाश और पृथिवी को (**आ, विवेश**) प्रविष्ट हुआ है, वैसे (**अग्निः**) अग्नि भी तुम लोगों को जानने योग्य है॥४॥

भावार्थः-जैसे ईश्वर सर्वत्र व्याप्त होकर सबकी व्यवस्था करता है, वैसे अग्नि पृथिव्यादिकों को अभिव्याप्त होकर आकर्षण से सब पदार्थों की व्यवस्था करता है। जैसे अग्नि अच्छे प्रकार युक्त किये हुए विमान को आकाश में शीघ्र चलाता है, वैसे विद्वानों की सेवापूर्वक योगाभ्यास के विज्ञान से सेवा किया हुआ जगदीश्वर चिदाकाश में मुक्त जनों को शीघ्र प्रवेश कर विहार कराता है॥४॥

अथाग्निविषयमाह॥

अब अग्नि विषय को अगले मन्त्र में कहा है॥

च॒न्द्रम॒ग्निं च॒न्द्रर॑थं॒ हरि॑व्रतं॒ वैश्वा॒न॒रम॑प्सु॒षद॑ं॒ स्व॒र्विद॑म्।
वि॒गा॒हन्तू॒र्णिं त॑वि॒षीभि॒रावृ॑तं॒ भूर्णि॑ं दे॒वास॑ं॒ इ॒ह सु॒श्रिय॑ं दधुः॥५॥२०॥

च॒न्द्रम्। अ॒ग्निम्। च॒न्द्र॒ऽर॑थम्। हरि॑ऽव्रतम्। वै॒श्वा॒न॒रम्। अ॒प्सु॒ऽसद॑म्। स्व॒रःऽविद॑म्। वि॒ऽगा॒हम्। तूर्णि॑म्। त॒वि॒षीभिः। आऽवृ॑तम्। भूर्णि॑म्। दे॒वास॑ः। इ॒ह। सु॒ऽश्रिय॑म्। द॒धुः॥५॥

पदार्थः-(**चन्द्रम्**) आनन्दकरं देदीप्यमानं सुवर्णमिव वर्त्तमानम्। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२)। (**अग्निम्**) वह्निम् (**चन्द्ररथम्**) चन्द्रमिव रथं यस्य तम् (**हरिव्रतम्**) हरयोऽश्वा व्रतं शीलं यस्य तम् (**वैश्वानरम्**) सर्वेषु नरेषु नीतेषु प्राप्तेषु पदार्थेषु व्याप्तम् (**अप्सुषदम्**) योऽप्सु प्राणेषु जलेषु वा सीदति तम् (**स्वर्विदम्**) स्वः सुखं विन्दति यस्मात्तम् (**विगाहम्**) विविधान् पदार्थान् गाहन्ते विलोडयन्ति येन तम् (**तूर्णिम्**) सद्यो गमकम् (**तविषीभिः**) बलादिभिर्गुणैः (**आवृतम्**) संयुक्तम् (**भूर्णिम्**) धर्त्तारम् (**देवासः**) विद्वांसः (**इह**) अस्मिन् जगति (**सुश्रियम्**) शोभना श्रीर्यस्मात्तम् (**दधुः**) धरन्तु॥५॥

अन्वयः-हे मनुष्या! यथा देवास इह चन्द्ररथं हरिव्रतमप्सुषदं स्वर्विदं विगाहं तूर्णिन्तविषीभिरावृतं भूर्णिं सुश्रियं वैश्वानरं चन्द्रमग्निं दधुस्तथैनं यूयमपि धरत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यावत्पदार्थविद्याष्वग्निविद्या न स्यात्तावदनलंकृता स्त्रीव न शोभते॥५॥

पदार्थः-हे मनुष्यो! जैसे (**देवासः**) विद्वान् जन (**इह**) इस संसार के बीच (**चन्द्ररथम्**) जिससे चन्द्रमा के समान रथ बनता है (**हरिव्रतम्**) वा जिसके घोड़े शीलरूप (**अप्सुषदम्**) वा प्राण और जलों में स्थिर होता (**स्वर्विदम्**) वा जिससे जीव सुख को प्राप्त होता (**विगाहम्**) वा जिसके निमित्त से विविध प्रकार के पदार्थों को विलोड़ता वा (**तूर्णिम्**) जो शीघ्र गमन करनेवाला (**तविषीभिः**) बलादि गुणों के साथ संयुक्त (**भूर्णिम्**) और पदार्थों का धारण करनेवाला (**सुश्रियम्**) जिससे उत्तम श्री लक्ष्मी (**आवृतम्**) उत्पन्न होती वा (**वैश्वानरम्**) समस्त प्राप्त पदार्थों में व्याप्त (**चन्द्रम्**) आनन्द करनेवाला निरन्तर प्रकाशमान (**अग्निम्**) अग्नि को (**दधुः**) धारण करें, वैसे इसको तुम भी धारण करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब तक पदार्थविद्या में अग्निविद्या न हो, तब तक आभूषणरहित स्त्री के समान नहीं शोभती है॥५॥

पुनरग्निविद्यामाह॥

फिर अग्निविद्या के उपदेश को कहते हैं॥

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः॥६॥

अग्निः। देवेभिः। मनुषः। च। जन्तुऽभिः। तन्वानः। यज्ञम्। पुरुऽपेशसम्। धिया। रथीः। अन्तः। ईयते। साधदिष्टिऽभिः। जीरः। दमूनाः। अभिशस्तिऽचातनः॥६॥

पदार्थः-(**अग्निः**) पावकः (**देवेभिः**) दिव्यैर्गुणैः (**मनुषः**) मनुष्यान् (**च**) अन्यान् भूतिमतः पदार्थान् (**जन्तुभिः**) मनुष्यैः। **जन्तव इति मनुष्यनामसु पठितम्।** (निघं०२.३)। (**तन्वानः**) विस्तृणानः (**यज्ञम्**) सङ्गतं संसारम् (**पुरुपेशसम्**) बहुरूपम् (**धिया**) कर्मणा (**रथीः**) बहवो रथा विद्यन्ते यस्य सः

(अन्तः) मध्ये **(ईयते)** गच्छति **(साधदिष्टिभिः)** साधाः संसिद्धा दिष्टयश्च ताभिः **(जीरः)** वेगवान् **(दमूनाः)** दमनशीलः **(अभिशस्तिचातनः)** योऽभिशस्तिं हिंसां चातयति सः॥६॥

अन्वयः-हे मनुष्या! योऽभिशस्तिचातनो दमूनाः साधदिष्टिभिः सह जीरो रथीर्जन्तुभिः सह मनुषस्तन्वानो देवेभिः सहाग्निरन्तरीयते धिया पुरुपेशसं यज्ञं साध्नोति तं विजानीत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्योऽग्निः सामान्यरूपेण सर्वान् पुष्णाति विशेषरूपेण हिनस्ति पृथिव्यादीनामन्तः प्राप्तोऽस्ति येन बहवो व्यवहाराः सिध्यन्ति सोऽग्निर्विज्ञातव्यः॥६॥

पदार्थः-हे मनुष्यो! जो **(अभिशस्तिचातनः)** सब ओर से हिंसा की याचना करता **(दमूनाः)** और दमनशील **(साधदिष्टिभिः)** अच्छे प्रकार सिद्ध की हुई इच्छाओं के साथ **(जीरः)** वेगवान् **(रथीः)** जिसके बहुत रथ विद्यमान **(जन्तुभिः)** मनुष्यों के साथ **(मनुषः)** मनुष्यों को **(तन्वानः)** विस्तार अर्थात् उनकी वृद्धि देता हुआ और **(देवेभिः)** दिव्य गुणों के साथ **(अग्निः)** अग्नि **(ईयते)** जाता है तथा **(धिया)** कर्म से **(पुरुपेशसम्)** बहुत रूपोंवाले **[(यज्ञम्)]** प्राप्त संसार को सिद्ध करता है, उसको जानो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को जो अग्नि सामान्य रूप से सब पदार्थों को पुष्ट करता वा विशेष रूप से उनको नष्ट करता वा पृथिव्यादि के भीतर व्याप्त है अर्थात् उनके प्रत्येक परमाणु के साथ है वा जिससे बहुत व्यवहार सिद्ध होते हैं, वह अग्नि विशेषता से जानने योग्य है॥६॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहा है॥

अग्ने॒ जर॑स्व स्वप॒त्य आयु॑न्यू॒र्जा पि॑न्वस्व॒ समिषो॑ दिदीहि नः।
वयां॑सि जिन्व बृह॒तश्च॑ जागृव उ॒शिग्दे॒वाना॒मसि॑ सु॒क्रतु॑र्वि॒पाम्॥७॥

अग्ने॑। जर॑स्व। सु॒ऽअ॒प॒त्ये। आयु॑नि। ऊ॒र्जा। पि॒न्व॒स्व॒। सम्। इषः॑। दि॒दी॒हि॒। नः॒। वयां॑सि। जि॒न्व॒। बृ॒ह॒तः॒। च॒। जा॒गृ॒वे॒। उ॒शिक्। दे॒वाना॑म्। असि॑। सु॒ऽक्रतुः॑। वि॒पाम्॥७॥

पदार्थः-**(अग्ने)** विद्वन् **(जरस्व)** स्तुहि। अत्र व्यत्ययेनात्मनेपदम्। **जरतीति स्तुतिकर्मासु पठितम्।** (निघं०३.१४)। **(स्वपत्ये)** स्वकीये सन्ताने **(आयुनि)** प्राप्ते **(ऊर्जा)** अन्नेन **(पिन्वस्व)** सेवस्व **(सम्)** **(इषः)** इच्छ **(दिदीहि)** प्राप्नुहि। अत्र दिवुधातोः शपः श्लुः। **(नः)** अस्मान् **(वयांसि)** कमनीयान्यन्नानि **(जिन्व)** प्रीणीहि **(बृहतः)** **(च)** अन्यान् **(जागृवे)** जागृतः **(उशिक्)** कमिता **(देवानाम्)** विदुषाम् **(असि)** **(सुक्रतुः)** सुष्ठुप्रज्ञः **(विपाम्)** मेधाविनाम्॥७॥

अन्वयः-हे जागृवेऽग्ने! त्वं स्वपत्य आयुन्यूर्जा पिन्वस्व विदुषो जरस्व न इषो वयांसि च सं दिदीहि बृहतश्च जिन्व यतस्त्वं विपां देवानामुशिक् सुक्रतुरसि तस्माद्विद्वान् जातोऽसि॥७॥

भावार्थः-ये मनुष्याः स्वसन्तानान् युक्ताहारविहारेण संपाल्य सुशिक्षाविद्यादानेन विदुषः कुर्वन्ति ते सदैव विद्वत्सङ्गकामा धर्मेच्छा भूत्वा धीमन्तो भवन्ति॥७॥

पदार्थः-हे **(जागृवे)** जागते हुए के तुल्य **(अग्ने)** जाननेवाले महाशय! आप **(स्वपत्ये)** अपने सन्तान के निमित्त **(आयुनि)** प्राप्त हुए पीछे **(ऊर्जा)** अन्न से **(पिन्वस्व)** सेवो, विद्वानों की **(जरस्व)** स्तुति करो **(नः)** हम लोगों की **(इषः)** चाहना करो और **(वयांसि)** अच्छे-अच्छे अन्नों को **(सम्, दिदीहि)** अच्छे प्रकार प्राप्त हूजिये **(च)** और **(बृहतः)** बहुतों को **(जिन्व)** तृप्त कीजिये जिससे आप **(विपाम्)** बुद्धिमान् **(देवानाम्)** विद्वानों के बीच **(उशिक्)** मनोहर **(सुक्रतुः)** सुन्दर बुद्धिमान् **(असि)** हैं, उससे विद्वान् हुए हो॥७॥

भावार्थः-जो मनुष्य अपने सन्तानों को योग्य आहार-विहार से अच्छे प्रकार पाल के उत्तम शिक्षा और विद्या के दान से विद्वान् करते हैं, वे सदैव विद्वानों के सत्सङ्ग की कामना करनेवाले धर्म के चाहनेवाले होकर बुद्धिमान् होते हैं॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम्।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे॥८॥

विश्पतिम्। यह्वम्। अतिथिम्। नरः। सदा। यन्तारम्। धीनाम्। उशिजम्। च। वाघताम्। अध्वराणाम्। चेतनम्। जातऽवेदसम्। प्र। शंसन्ति। नमसा। जूतिऽभिः। वृधे॥८॥

पदार्थः-**(विश्पतिम्)** विशः सर्वस्याः प्रजायाः पालकं स्वामिनम् **(यह्वम्)** महान्तम् **(अतिथिम्)** अतिथिवत् सत्कर्तव्यम् **(नरः)** स्वात्मेन्द्रियशरीराणि धर्मं प्रति नेतारः **(सदा)** **(यन्तारम्)** नियन्तारमुपरतम् **(धीनाम्)** सत्कर्मणां प्रज्ञानाम् च **(उशिजम्)** कामयमानम् **(च)** **(वाघताम्)** मेधाविनाम् **(अध्वराणाम्)** अहिंसनीयानाम् **(चेतनम्)** सम्यग्ज्ञानस्वरूपम् **(जातवेदसम्)** यो जातेषु सर्वेषु स्वव्याप्त्या विद्यतेऽथवा जातान् सर्वान् पदार्थान् वेत्ति तम् **(प्रशंसन्ति)** स्तुवन्ति **(नमसा)** सत्कारेण **(जूतिभिः)** वेगादिभिर्गुणैः **(वृधे)** वर्धनाय॥८॥

अन्वयः-ये नरो वृधे जूतिभिर्विश्पतिं यह्वं यन्तारमतिथिं धीनां वाघतामध्वराणां चोशिजं जातवेदसं चेतनं परमात्मानं नमसा सदा प्रशंसन्ति ते ब्रह्मविदो भवन्ति॥८॥

भावार्थः-मनुष्यैराप्तैर्विद्वद्भिः स्तुतो महान् प्रजापालको ज्ञानस्वरूपः परमेश्वरः स्तोतव्योऽस्ति नैतदुपासनेन विना कश्चित्पूर्णो लाभः प्राप्नोति॥८॥

पदार्थः-जो (**नरः**) अपने आत्मा, इन्द्रियां और शरीरों को धर्म की ओर पहुँचानेवाले जन (**वृधे**) वृद्धि के लिये (**जूतिभिः**) वेगादि गुणों से (**विश्पतिम्**) समस्त प्रजा के पालनेवाले (**यह्वम्**) बड़े (**यन्तारम्**) नियन्ता अर्थात् सब कामों को यथा नियम पहुँचानेवाले (**अतिथिम्**) अतिथि के समान सत्कार करने योग्य (**धीनाम्**) उत्तम कर्म और बुद्धियों वा (**वाघताम्**) बुद्धिमान् (**च**) और (**अध्वराणाम्**) अहिंसनीय व्यवहारों के बीच (**उशिजम्**) कामना की ओर (**जातवेदसम्**) उत्पन्न हुए सब पदार्थों में अपनी व्याप्ति से विद्यमान अथवा उत्पन्न हुए समस्त पदार्थों को जाननेवाले (**चेतनम्**) अच्छे प्रकार ज्ञानस्वरूप परमात्मा की (**नमसा**) सत्कार से (**सदा**) सदैव (**प्र, शंसन्ति**) प्रशंसा करते हैं, वे ब्रह्मवेत्ता होते हैं॥८॥

भावार्थः-मनुष्यों को आप्त विद्वानों ने [=से] स्तुति किया हुआ महान् प्रजापालक ज्ञानस्वरूप परमेश्वर स्तुति करने योग्य है, इसकी उपासना के विना किसी को पूरा लाभ प्राप्त नहीं होता॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः॥९॥

विभाऽवा। देवः। सुऽरणः। परि। क्षितीः। अग्निः। बभूव। शवसा। सुमत्ऽरथः। तस्य। व्रतानि। भूरिऽपोषिणः। वयम्। उप। भूषेम। दमे। आ। सुवृक्तिभिः॥९॥

पदार्थः-(**विभावा**) विविधदीप्तिमान् (**देवः**) कमनीयः (**सुरणः**) शोभनां रणः संग्रामो यस्मात् सः (**परि**) सर्वतः (**क्षितीः**) पृथिवीः (**अग्निः**) पावकः (**बभूव**) भवति (**शवसा**) बलेन (**सुमद्रथः**) सुमतां प्रशस्तज्ञानानां रथ इव रथो यस्मात्सः (**यस्य**) (**व्रतानि**) शीलानि (**भूरिपोषिणः**) भूरि बहुविधः पोषो पुष्टिर्विद्यते येषां ते (**वयम्**) (**उप**) समीपे (**भूषेम**) (**दमे**) गृहे (**आ**) (**सुवृक्तिभिः**) शोभनाश्च ते वृक्तयो वर्त्तनानि च ताभिः॥९॥

अन्वयः-हे विद्वन्! यथा त्वं विभावा देवः सुरणः सुमद्रथोऽग्निः सुवृक्तिभिः शवसा क्षितीः परिबभूव तस्य व्रतानि भूरिपोषिणो वयं दम उपा भूषेम॥९॥

भावार्थः-यथा विद्वांसो मनुष्याणां बहुपुष्टिप्रदा ऐश्वर्यप्रापकाः परोपकारेणालङ्कृता भवेयुस्ते राज्यैश्वर्यमाप्नुयुः॥९॥

पदार्थः-हे विद्वान्! जैसे आप (**विभावा**) विविध दीप्तिमान् (**देवः**) मनोहर (**सुरणः**) सुन्दर रण जिससे होता वा (**समुद्रथः**) जिससे प्रशंसित ज्ञानों का रथ के समान रथ होता (**अग्निः**) ऐसा अग्नि

(सुवृक्तिभिः) सुन्दर बर्तावों [सुन्दर मार्गों] से और **(शवसा)** बल से **(क्षितीः)** पृथिवियों को **(परि, बभूव)** सब ओर से व्याप्त होता अर्थात् उनका तिरस्कार करता **(तस्य)** उसके **(व्रतानि)** शीलों को **(भूरिपोषिणः)** बहुत प्रकार पोषण पुष्टि जिनके विद्यमान ये **(वयम्)** हम लोग **(दमे)** घर में **(उपाभूषेम)** अपने समीप अच्छे प्रकार भूषित करते हैं॥९॥

भावार्थः–जैसे विद्वान् जन मनुष्यों के बीच बहुत पुष्टि देने और ऐश्वर्य की प्राप्ति करानेवाले तथा परोपकार से अलङ्कृत हों, वे राज्य के ऐश्वर्य को प्राप्त हों॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना॥ १०॥

वैश्वानर। तव। धामानि। आ। चके। येभिः। स्वः।वित्। अभवः। विऽचक्षण। जातः। आ। अपृणः। भुवनानि। रोदसी इति। अग्ने। ता। विश्वा। परिऽभूः। असि। त्मना॥ १०॥

पदार्थः–**(वैश्वानर)** प्रधानपुरुष **(तव)** **(धामानि)** जन्मस्थाननामानि **(आ)** **(चके)** समन्तात् कामयेत **(येभिः)** यैः **(स्वर्वित्)** प्राप्तसुखः **(अभवः)** भवेः **(विचक्षण)** अतिचतुर **(जातः)** प्रसिद्धः **(आ)** **(अपृणः)** पुष्णीयाः **(भुवनानि)** लोकान् **(रोदसी)** द्यावापृथिव्यौ **(अग्ने)** पावकइव वर्त्तमान **(ता)** तानि **(विश्वा)** सर्वाणि **(परिभूः)** यः परितः सर्वतो भवति सः **(असि)** **(त्मना)** आत्मना॥१०॥

अन्वयः–हे विचक्षण वैश्वानराग्ने! त्वं त्मना यानि विश्वा भुवनान्यापृणो यथाऽग्निर्विश्वा भुवनानि रोदसी चाभिव्याप्नोति तथा त्वं परिभूरसि स त्वं मनुष्यस्तव येभिर्धामान्याचके ता तानि विदित्वा जातः सन् स्वर्विदभवः॥१०॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अग्निवद्धर्मविद्याप्रकाशकाः सर्वेषु प्राणिषु सुखदुःखव्यवस्थया स्वात्मवद्बुद्धयः सन्ति ते सुखिनो भवन्ति॥१०॥

पदार्थः–हे **(विचक्षणः)** अतिचतुर **(वैश्वानर)** प्रधान पुरुष **(अग्ने)** अग्नि के समान वर्तमान! आप **(त्मना)** अपने से जिन **(विश्वा)** समस्त **(भुवनानि)** लोकों को **(आ, अपृणः)** अच्छे प्रकार पुष्ट करें, जैसे अग्नि समस्त लोकों वा **(रोदसी)** आकाश और पृथिवी को अभिव्याप्त है, वैसे आप **(परिभूः)** सब ओर से होनेवाले **(असि)** हैं, वह आप मनुष्य **(तव)** आपके **(येभिः)** जिन **(धामानि)** जन्मस्थान नामों को **(आ, चके)** अच्छे प्रकार कामना करे **(ता)** उनको जानकर **(जातः)** प्रसिद्ध होते हुए **(स्वर्वित्)** प्राप्त सुख **(अभवः)** हूजिये॥१०॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अग्नि के समान धर्म और विद्याओं

के प्रकाश करनेवाले, सबके बीच प्राणियों के सुख-दु:ख की व्यवस्था से अपने समान बुद्धि रखनेवाले हैं, वे सुखी होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः।

उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा॥ ११॥ २१॥

वैश्वानरस्य। दंसनाभ्यः। बृहत्। अरिणात्। एकः। सुऽअपस्यया। कविः। उभा। पितरा। महयन्। अजायत। अग्निः। द्यावापृथिवी इति। भूरिऽरेतसा॥ ११॥

पदार्थः-(**वैश्वानरस्य**) सर्वत्र राजमानस्य (**दंसनाभ्यः**) सुखकरक्रियाभ्यः (**बृहत्**) महत् (**अरिणात्**) प्राप्नुयात् (**एकः**) असहायः (**स्वपस्यया**) आत्मनः सुष्ठु कर्मण इच्छया (**कविः**) सर्वशास्त्रवित् (**उभा**) द्वौ (**पितरा**) पालकौ (**महयन्**) सत्कुर्वन् (**अजायत**) जायते (**अग्निः**) पावकः (**द्यावापृथिवी**) सूर्यभूमि (**भूरिरेतसा**) भूरीणि बहूनि रेतांसि उदकानि यस्मिन्नन्तरिक्षे तेन॥ ११॥

अन्वयः-य एकः कविः स्वपस्यया वैश्वानरस्य दंसनाभ्यो बृहदरिणाद् यथाग्निर्भूरिरेतसा सह वर्त्तमानो द्यावापृथिवी प्रकाशयन्नजायत तथोभा पितरा महयन् वर्त्तते स सुखी कथन्न जायेत॥ ११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये जना विद्वत्क्रियाकरा जनकजननीनां सत्कर्त्तारः सन्ति ते भूमिसूर्यवद्दिव्यगुणा भवन्तीति॥ ११॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयं सूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-जो (**एकः**) एकाकी (**कविः**) सर्वशास्त्रों को जाननेवाला (**स्वपस्यया**) अपने को उत्तम की इच्छा से (**वैश्वानरस्य**) सर्वत्र प्रकाशमान अग्नि की (**दंसनाभ्यः**) सुख करनेवाली क्रियाओं से (**बृहत्**) महान् कार्य को (**अरिणात्**) प्राप्त होवे वा जैसे (**अग्निः**) अग्नि (**भूरिरेतसा**) बहुत जल जिसमें विद्यमान उस अन्तरिक्ष के साथ वर्तमान (**द्यावापृथिवी**) सूर्य और पृथिवी को प्रकाशित करता हुआ (**अजायत**) प्रसिद्ध होता है, वैसे (**उभा**) दोनों (**पितरा**) माता-पिता को (**महयन्**) सत्कार करता हुआ वर्त्तमान है, वह सुखी कैसे न होवे?॥ ११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वानों के तुल्य कर्म और माता-पिताओं का सत्कार करते, वे पृथिवी और सूर्य के समान उत्तम गुणवाले होते हैं॥ ११॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह तीसरा सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

समित्समिदित्येकादशर्चस्य चतुर्थस्य सूक्तस्य विश्वामित्र ऋषिः। आप्रियो देवता। १, ४,७, स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ३, ५ त्रिष्टुप्। ६, ८, १०, ११ निचृत् त्रिष्टुप्। ९ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह॥

अब ग्यारह ऋचावाले चौथे सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में विद्वानों के विषय को कहते हैं॥

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः।
आ देव देवान् यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने॥ १॥

समित्ऽसमित्। सुऽमनाः। बोधि। अस्मे इति। शुचाऽशुचा। सुऽमतिम्। रासि। वस्वः। आ। देव। देवान्। यजथाय। वक्षि। सखा। सखीन्। सुऽमनाः। यक्षि। अग्ने॥ १॥

पदार्थः-(**समित्समित्**) प्रतिसमिधम् (**सुमनाः**) शोभनं मनो यस्य सः (**बोधि**) बुध्यसे (**अस्मे**) अस्मभ्यम् (**शुचाशुचा**) होमसाधनेन (**सुमतिम्**) शोभनां प्रज्ञाम् (**रासि**) ददासि (**वस्वः**) वसूनि धनानि (**आ**) (**देव**) विद्वन् (**देवान्**) विदुषः (**यजथाय**) समागमाय (**वक्षि**) वहसि (**सखा**) मित्रः सन् (**सखीन्**) सुहृदः (**सुमनाः**) सुहृत्सन् (**यक्षि**) सङ्गच्छसे (**अग्ने**) अग्निरिव प्रकाशमान॥ १॥

अन्वयः-हे अग्ने! यथा समित्समिच्छुचाशुचा पावको बोधि तथाऽध्यापनोपदेशाभ्यामस्मे सुमतिं वस्वश्च रासि। हे देव! सुमना सन्नाहुतीनामग्निरिव यजथाय देवानावक्षि सुमनाः सखा सन् सखीन् यक्षि तस्मात्सत्कर्त्तव्योऽसि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा समिद्भिर्घृताद्येन हविषा अग्निर्वर्धते तथाऽध्यापनोपदेशाभ्यां मनुष्याणां प्रज्ञा वर्धनीया सदैव सुहृदो भूत्वा सर्वान् विदुषः श्रीमतश्च सम्पादयत॥ १॥

पदार्थः-हे (**अग्ने**) अग्नि के समान प्रकाशमान विद्वन्! आप जैसे (**समित्समित्**) प्रतिसमिध (**शुचाशुचा**) शुच् [चमसा] शुच् [चमसा] प्रत्येक होम के साधन से अग्नि (**बोधि**) प्रबुद्ध होता जाना जाता है, वैसे पढ़ाने और उपदेश करने से (**अस्मे**) हम लोगों के लिये (**सुमतिम्**) उत्तम बुद्धि और (**वस्वः**) धनों को (**रासि**) देते हैं। हे (**देव**) विद्वानो! (**सुमनाः**) सुन्दर मनवाले होते हुए आप आहुतियों को अग्नि के समान (**यजथाय**) समागम के लिये (**देवान्**) विद्वानों को (**आ, वक्षि**) प्राप्त करते हो (**सुमनाः**) सुन्दर हृदयवाले (**सखा**) मित्र होते हुए आप (**सखीन्**) मित्र वर्गों को (**यक्षि**) सङ्ग करते हो, उक्त कारण से सत्कार करने योग्य हो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे समिधों वा होमने योग्य घृतादि पदार्थ से अग्नि बढ़ता है, वैसे अध्यापन और उपदेश से मनुष्यों की बुद्धि बढ़ानी चाहिये और

आप लोग सदैव मित्र होकर सबको विद्वान् और श्रीमान् कीजिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

य देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद् घृतयोनिं विधन्तम्॥२॥

यम्। देवासः। त्रिः। अहन्। आऽयजन्ते। दिवेऽदिवे। वरुणः। मित्रः। अग्निः। सः। इमम्। यज्ञम्। मधुऽमन्तम्। कृधि। नः। तनूऽनपात्। घृतऽयोनिम्। विधन्तम्॥२॥

पदार्थः-(**यम्**) (**देवासः**) दिव्या विद्वांसः (**त्रिः**) त्रिवारम् (**अहन्**) अहनि (**आयजन्ते**) समन्तात् सङ्गच्छन्ते (**दिवेदिवे**) प्रतिदिनम् (**वरुणः**) चन्द्रः (**मित्रः**) वायुः (**अग्निः**) पावकः (**सः**) (**इमम्**) (**यज्ञम्**) सङ्गन्तव्यम् (**मधुमन्तम्**) बहूनि मधूनि हवींषि विद्यन्ते यस्मिँस्तम् (**कृधि**) कुरु (**नः**) अस्माकम् (**तनूनपात्**) शरीररक्षकः (**घृतयोनिम्**) घृतं दीपकं तत्त्वं योनिः कारणं यस्य तम् (**विधन्तम्**) सेवमानम्॥२॥

अन्वयः-यमिमं मधुमन्तं घृतयोनिं विधन्तं यज्ञं वरुणो मित्रोऽग्निश्चाहन् दिवेदिवे त्रिरायजन्ते यं देवासश्च स तनूनपात्त्वं न एतं यज्ञं सिद्धं कृधि॥२॥

भावार्थः-हे मनुष्या! यथा विद्वांसोऽग्न्यादि विद्याप्राप्तये यादृशीं क्रियां कुर्य्युस्तादृशीं यूयमपि कुरुत॥२॥

पदार्थः-(**यम्**) जिस (**इमम्**) इस (**मधुमन्तम्**) बहुत होमने योग्य पदार्थ वा (**घृतयोनिम्**) दीप्तिकारक कारणवाले (**विधन्तम्**) सेवते हुए और (**यज्ञम्**) सङ्ग करने योग्य व्यवहार का (**वरुणः**) चन्द्रमा (**मित्रः**) वायु और (**अग्निः**) अग्नि (**अहन्**) एक दिन में (**दिवेदिवे**) वा प्रतिदिन (**त्रिः**) तीन वार (**आयजन्ते**) अच्छे प्रकार मिलाते हैं और जिसको (**देवासः**) दिव्य विद्वान् जन मिलाते (**सः**) वह पूर्वोक्त गुणों से युक्त (**तनूनपात्**) शरीर की रक्षा करनेवाले आप (**नः**) हमारे इस यज्ञ को सिद्ध (**कृधि**) कीजिये॥२॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् जन अग्न्यादि पदार्थों की विद्या प्राप्ति के लिये जैसी क्रिया करें, वैसे ही तुम भी करो॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान् यक्षदिषितो यजीयान्॥३॥

प्र। दीधि॑तिः। वि॒श्वऽवा॑रा। जि॒गा॒ति॒। होता॑रम्। इ॒ळः। प्र॒थ॒मम्। यज॑ध्यै। अच्छ॑। नमः॑ऽभिः। वृ॒ष॒भम्। व॒न्द॒ध्यै॑। सः। दे॒वान्। य॒क्ष॒त्। इ॒षि॒तः। यजी॑यान्॥ ३॥

पदार्थः-(**प्र**) (**दीधितिः**) दीप्तिः (**विश्ववारा**) विश्वस्मिन् वारो वरणं यस्याः सा (**जिगाति**) स्तौति (**होतारम्**) आदातारम् (**इळः**) पृथिवी। **इळेति पृथिवीनामसु पठितम्।** (निघं०१.१)। (**प्रथमम्**) आदिमम् (**यजध्यै**) यष्टुं सङ्गन्तुम् (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**नमोभिः**) अन्नैः (**वृषभम्**) प्रशस्तम् (**वन्दध्यै**) वन्दितुं स्तोतुम् (**सः**) (**देवान्**) विदुषः (**यक्षत्**) यजेत् सङ्गच्छेत् (**इषितः**) इच्छाप्रयुक्तः (**यजीयान्**) अतिशयेन यष्टा॥ ३॥

अन्वयः-यस्य विश्ववारा दीधितिरिळो यजध्यै होतारं नमोभिः प्रथमं वृषभं वन्दध्यै प्र जिगाति स इषितो यजीयान् सन् देवानच्छ यक्षत्॥ ३॥

भावार्थः-यस्य प्रकाशमाना दीप्तिर्विद्युदिव विद्यादातारं प्रशंसति तं सर्वे विद्यार्थिनः सङ्गत्य दिव्यान् गुणान् प्राप्य धनधान्ययुक्ता भवेयुः॥ ३॥

पदार्थः-(**विश्ववारा**) संसार के बीच जिसका स्वीकार है, वह जिसकी (**दीधितिः**) दीप्ति (**इळः**) पृथिवियों की (**यजध्यै**) सङ्गति करने के (**होतारम्**) ग्रहण करनेवाले की तथा (**नमोभिः**) अन्नों से (**प्रथमम्**) पहिले (**वृषभम्**) प्रशंसित की (**वन्दध्यै**) वन्दना करने अर्थात् स्तुति करने को (**प्र, जिगाति**) अच्छे प्रकार स्तुति करता है (**सः**) वह (**इषितः**) इच्छा से प्रयुक्त किया हुआ (**यजीयान्**) अतीव यज्ञ करनेहारा होता हुआ (**देवान्**) विद्वानों को (**अच्छ**) अच्छे प्रकार (**यक्षत्**) सङ्ग कर मिलावे॥ ३॥

भावार्थः-जिसकी प्रकाशमान दीप्ति बिजुली के समान विद्या देनेवाले की प्रशंसा करती है, उसका सब विद्यार्थी जन सङ्ग कर दिव्य गुणों को प्राप्त होकर धनधान्य युक्त होवें॥ ३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहा है॥

ऊ॒र्ध्वो वां॑ गा॒तुर॑ध्व॒रे अ॑कार्यू॒र्ध्वा शो॒चींषि॒ प्रस्थि॑ता॒ रजां॑सि।
दि॒वो वा॒ नाभा॒ न्य॑सादि॒ होता॑ स्तृणी॒महि॑ दे॒वव्य॑चा॒ वि ब॒र्हिः॥ ४॥

ऊ॒र्ध्वः। वा॒म्। गा॒तुः। अ॒ध्व॒रे। अ॒का॒रि॒। ऊ॒र्ध्वा। शो॒चींषि॑। प्रऽस्थि॑ता। रजां॑सि। दि॒वः। वा॒। नाभा॑। नि। अ॒सा॒दि॒। होता॑। स्तृ॒णी॒महि॑। दे॒वऽव्य॑चाः। वि। ब॒र्हिः॥ ४॥

पदार्थः-(**ऊर्ध्वः**) उपरिगामी (**वाम्**) युवयोः (**गातुः**) स्तावकः (**अध्वरे**) अहिंसनीये व्यवहारे (**अकारि**) क्रियते (**ऊर्ध्वा**) ऊर्द्ध्वं गामीनि (**शोचींषि**) तेजांसि (**प्रस्थिता**) प्रस्थितानि (**रजांसि**) लोकान् प्रति (**दिवः**) किरणान् (**वा**) (**नाभा**) नाभौ मध्ये (**नि**) नितराम् (**असादि**) सद्यते (**होता**) आदाता

(स्तृणीमहि) आच्छादयेम **(देवव्यचाः)** यो देवान् पृथिव्यादीन् व्यचति व्याप्नोति सः **(वि)** **(बर्हिः)** अन्तरिक्षस्य॥४॥

अन्वयः-हे यजमान यज्ञसम्पादकौ! वामध्वरे स ऊर्ध्वो गातुरकारि देवव्यचा होता न्यसादि येन यज्ञेन वयमूर्ध्वा प्रस्थिता शोचींषि रजांसि दिवो वा बर्हिर्नाभा वि स्तृणीमहि॥४॥

भावार्थः-यदि यजमानयज्ञकर्तारौ विद्वांसौ स्यातां सुशोधितानि द्रव्याण्यग्नौ प्रक्षिपेतां तर्हि किं किं सुखं न प्राप्तं स्यात्॥४॥

पदार्थः-हे यज्ञ करने और यज्ञ सिद्ध करानेवालो! **(वाम्)** तुम्हारे **(अध्वरे)** न नष्ट करने योग्य व्यवहार में वह **(ऊर्ध्वः)** ऊपर जाने **(गातुः)** और स्तुति करनेवाला **(अकारि)** किया जाता **(देवव्यचाः)** बहुत यज्ञ पृथिव्यादिकों को व्याप्त होने वा **(होता)** पदार्थों को ग्रहण करनेवाला **(नि, असादि)** सिद्ध किया जाता है, जिस यज्ञ से हम लोग **(ऊर्ध्वा)** ऊपर जानेवाले **(प्रस्थिता)** जाने का आरम्भ किये हुए **(शोचींषि)** तेजों को और **(रजांसि)** लोकों को तथा **(दिवः)** किरणों को **(वा)** वा **(बर्हिः)** अन्तरिक्ष को **(नाभा)** नाभि के बीच **(वि, स्तृणीमहि)** विस्तारते हैं॥४॥

भावार्थः-जो यज्ञकर्त्ता और यज्ञ करानेवाले विद्वान् हों और सुन्दर शुद्ध पदार्थों को अग्नि में छोड़ें तो क्या क्या सुख प्राप्त न हों?॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन।
नृपेशसो विदथेषु प्र जाता अभी३मं यज्ञं वि चरन्त पूर्वीः॥५॥२२॥

सप्त। होत्राणि। मनसा। वृणानाः। इन्वन्तः। विश्वम्। प्रति। यन्। ऋतेन। नृऽपेशसः। विदथेषु। प्र। जाताः। अभि। इमम्। यज्ञम्। वि। चरन्त। पूर्वीः॥५॥

पदार्थः-**(सप्त)** सप्तविधानि **(होत्राणि)** हवनसम्बन्धीनि कर्माणि **(मनसा)** विज्ञानेन **(वृणानाः)** स्वीकुर्वाणाः **(इन्वन्तः)** व्याप्नुवन्तः **(विश्वम्)** सर्वं जगत् **(प्रति)** **(यन्)** प्राप्नुवन्ति **(ऋतेन)** जलेन। **ऋतमित्युदकनामसु पठितम्।** (निघं०१.१२)। **(नृपेशसः)** नृणां पेशो रूपमिव रूपं येषान्ते **(विदथेषु)** यज्ञेषु **(प्र, जाताः)** प्रादुर्भूताः **(अभि)** सर्वतः **(इमम्)** **(यज्ञम्)** **(वि)** **(चरन्त)** विचरन्तु। अत्र व्यत्ययेनात्मनेपदम्। **(पूर्वीः)** पूर्वं सम्पादिताः॥५॥

अन्वयः-ये विदथेषु प्रजाता नृपेशसो मनसा सप्त होत्राणि वृणाना विश्वमिन्वन्त ऋतेनेमं यज्ञमभि येन विश्वं प्रति यन् पूर्वीराहुतयो विचरन्त स यज्ञः सर्वैरनुष्ठेयः॥५॥

भावार्थः-यदि मनुष्याः सुगन्ध्यादियुक्तानां द्रव्याणां वह्नौ प्रक्षेपेण वायुवृष्टिजलौषध्यन्नानि संशोधयेयुस्तर्हि सर्वमारोग्यमाप्नुयुः॥५॥

पदार्थः-जो **(विदथेषु)** यज्ञों में **(प्रजाताः)** उत्पन्न हुए **(नृपेशसः)** मनुष्यों के रूप समान जिनका रूप वे पदार्थ **(मनसा)** विज्ञान से **(सप्त)** सात प्रकार के **(होत्राणि)** हवन सम्बन्धी कामों को **(वृणानाः)** स्वीकार करते और **(विश्वम्)** समस्त जगत् को **(इन्वन्तः)** व्याप्त होते हुए **(ऋतेन)** जल के साथ **(इमम्)** इस **(यज्ञम्)** यज्ञ को **(अभि)** सब ओर से **(येन)**[१] जिससे व विश्व को **(प्रति, यन्)** प्रतीति से प्राप्त होते हैं तथा **(पूर्वीः)** पूर्व सिद्ध हुई आहुतियां **(विचरन्त)** विशेषता से प्राप्त होतीं वह यज्ञ सब विद्वानों को करने योग्य है॥५॥

भावार्थः-जो मनुष्य सुगन्ध्यादि युक्त पदार्थों के अग्नि में छोड़ने से वायु, वृष्टि, जल, ओषधि और अन्नों को अच्छे प्रकार शोधें तो सब आरोग्यपन को प्राप्त हों॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः॥६॥

आ। भन्दमाने इति। उषसौ। उपाके इति। उत। स्मयेते इति। तन्वा। विरूपे इति विऽरूपे। यथा। नः। मित्रः। वरुणः। जुजोषत्। इन्द्रः। मरुत्वान्। उत। वा। महःऽभिः॥६॥

पदार्थः-**(आ)** समन्तात् **(भन्दमाने)** सुखकारके **(उषसौ)** रात्र्यहनी **(उपाके)** समीपं वर्त्तमाने। **उपाके इति अन्तिकनामसु पठितम्।** (निघं०२.१६)। **(उत)** अपि **(स्मयेते)** ईषद्धसतः **(तन्वा)** शरीरेण **(विरूपे)** प्रकाशाऽन्धकाराभ्यां विरुद्धस्वरूपे **(यथा)** **(नः)** अस्मान् **(मित्रः)** वायुः **(वरुणः)** जलम् **(जुजोषत्)** भृशं सेवते **(इन्द्रः)** विद्युदादिरूपो वह्निः **(मरुत्वान्)** प्रशस्तरूपवान् **(उत)** अपि **(वा)** **(महोभिः)** महद्भिर्गुणकर्मस्वभावैः॥६॥

अन्वयः-यथा भन्दमाने उपाके उत तन्वा विरूपे उषसौ स्त्रीपुरुषावास्मयेते इव वर्त्तमाने नोऽस्मान् सेवेते तथा महोभिः सह मित्रो वरुण उतापि मरुत्वानिन्द्रो वाऽस्मान् जुजोषत्॥६॥

भावार्थः-अत्रोपमालङ्कारः। यदीश्वरो रात्रिंदिवौ न निर्मिमीत तर्हि कस्यापि व्यवहारो यथावन्न सिध्येत यदि भगवाञ्जलसूर्य्यवायून्न रचयेत्तर्हि कस्यापि जीवनं न स्यात्॥६॥

---

१. ''येन'' मन्त्रगत पद नहीं है॥ सं०॥

पदार्थः-(**यथा**) जैसे (**भन्दमाने**) सुख करनेवाले (**उपाके**) समीप वर्त्तमान (**उत**) और (**तन्वा**) शरीर के (**विरूपे**) प्रकाश और अन्धकार से विरुद्ध स्वरूप (**उषसौ**) रात्रि और दिन स्त्री-पुरुष (**आ, स्मयेते**) अच्छे प्रकार मुसकियाते जैसे, वैसे वर्त्तमान (**नः**) हम लोगों को सेवन करते हैं, वैसे (**महोभिः**) बड़े गुण, कर्म, स्वभावों के साथ (**मित्रः**) वायु (**वरुणः**) जल (**उत**) और (**मरुत्वान्**) प्रशंसित रूपवाला (**इन्द्रः**) बिजुली आदि अग्नि (**वा**) अथवा हम लोगों को (**जुजोषत्**) निरन्तर सेवते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। यदि ईश्वर रात्रि और दिन न बनावे तो किसी का व्यवहार यथावत् सिद्ध न हो। जो भगवान् जल, सूर्य्य और वायु को न रचे तो किसी का जीवन न हो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दैव्या॒ होता॑रा प्रथ॒मा न्यृ॑ञ्जे स॒प्त पृ॒क्षास॑: स्व॒धया॑ मदन्ति।
ऋ॒तं शंस॑न्त ऋ॒तमित्त आ॑हु॒रनु॑ व्र॒तं व्र॑त॒पा दी॒ध्या॑नाः॥७॥

दैव्या॑। होता॑रा। प्र॒थ॒मा। नि। ऋ॒ञ्जे॒। स॒प्त। पृ॒क्षास॑:। स्व॒धया॑। म॒द॒न्ति॒। ऋ॒तम्। शंस॑न्तः। ऋ॒तम्। इत्। ते॒। आ॒हु॒:। अनु॑। व्र॒तम्। व्र॒त॒ऽपाः। दी॒ध्या॑नाः॥७॥

पदार्थः-(**दैव्या**) दिव्यगुणावेव (**होतारा**) दातारौ (**प्रथमा**) विस्तारकौ (**नि**) (**ऋञ्जे**) भर्जयामि (**सप्त**) (**पृक्षासः**) संपर्काः (**स्वधया**) जलेनान्नेन वा (**मदन्ति**) हृष्यन्ति (**ऋतम्**) जलम् (**शंसन्तः**) स्तुवन्तः (**ऋतम्**) सत्यम् (**इत्**) एव (**ते**) (**आहुः**) कथयन्तु (**अनु**) (**व्रतम्**) शीलम् (**व्रतपाः**) सुशीलरक्षकाः (**दीध्यानाः**) देदीप्यमानाः॥७॥

अन्वयः-यौ प्रथमा दैव्या होतारा सप्तविधानि हवींष्याधत्तो य ऋतं पृक्षास ऋतमिच्छंसन्तो दीध्याना व्रतपा अनु व्रतमाहुस्ते स्वधया मदन्ति तानहं न्यृञ्जे॥७॥

भावार्थः-ये यज्ञाहुतिभिः शुद्धानि पवनजलान्नादीनि सेवन्ते ते सुशीलाः सन्तः प्रशंसका भूत्वाऽऽनन्दन्ति॥७॥

पदार्थः-जो (**प्रथमा**) विस्तार करनेवाले (**दैव्या**) दिव्य गुणी (**होतारा**) अनेक पदार्थों के ग्रहणकर्त्ता (**सप्त**) सात प्रकार के होमने योग्य पदार्थों को अच्छे प्रकार धारण करते हैं वा जो (**ऋतम्**) जल का (**पृक्षासः**) सम्बन्ध करनेवाले (**ऋतम्**) सत्य की (**इत्**) ही (**शंसन्तः**) स्तुति करते हुए (**दीध्यानाः**) देदीप्यमान (**व्रतपाः**) उत्तमशील की रक्षा करनेवाले (**अनु, व्रतम्**) अनुकूल शील को (**आहुः**) कहें (**ते**) वे (**स्वधया**) अन्न और जल से (**मदन्ति**) हर्षित होते हैं, उन सबको मैं (**नि, ऋञ्जे**) न नष्ट करूं॥७॥

भावार्थः-जो यज्ञ की आहुतियों से शुद्ध पवन, जल और अन्नादिकों का सेवन करते हैं, वे

सुशील होते हुए प्रशंसावाले होकर आनन्द को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ भार॑ती॒ भार॑तीभिः स॒जोषा॒ इळा॑ दे॒वैर्म॑नु॒ष्ये॑भिर॒ग्निः।
सर॑स्वती सारस्व॒तेभि॑र॒र्वाक् ति॒स्रो दे॒वीर्ब॒र्हिरिदं॑ स॒दन्तु॥८॥

आ। भार॑ती। भार॑तीभिः। सऽजोषा॑ः। इळा॑। दे॒वैः। म॒नु॒ष्ये॑भिः। अ॒ग्निः। सर॑स्वती। सा॒र॒स्व॒तेभि॑ः। अ॒र्वाक्। ति॒स्रः। दे॒वीः। ब॒र्हिः। आ। इ॒दम्। स॒द॒न्तु॒॥८॥

पदार्थः-(**आ**) समन्तात् (**भारती**) विद्याशिक्षाधृतावाक् (**भारतीभिः**) सुशिक्षिताभिर्वाणीभिः (**सजोषाः**) समानसेवनप्रीतिः (**इळा**) पृथिवी (**देवैः**) दिव्यैर्गुणैः (**मनुष्येभिः**) मननशीलैः (**अग्निः**) भास्वरः (**सरस्वती**) प्रशस्तज्ञानयुक्ता (**सारस्वतेभिः**) सरस्वत्यां भवैः (**अर्वाक्**) अधस्तात् (**तिस्रः**) त्रित्वसंख्याकाः (**देवीः**) देव्यो देदीप्यमानाः (**बर्हिः**) अन्तरिक्षम् (**आ**) (**इदम्**) प्रत्यक्षे वर्त्तमानम् (**सदन्तु**) तिष्ठन्तु॥८॥

अन्वयः-या भारतीभिः सह सजोषा भारती देवैर्मनुष्येभिश्च सह सजोषा इळा अग्निश्च सारस्वतेभिस्सह सरस्वती तिस्रो देवीरर्वागिदं बर्हिरासीदन्ति ताः सर्वे मनुष्या आसदन्तु॥८॥

भावार्थः-येषां मनुष्याणां विद्वद्धारणानुकूला धारणा प्रशंसानुकूला स्तुतिर्वागनुवृता वाग्वर्त्तते तेऽन्तरिक्षस्थां शुभां वाणीं प्राप्यानन्दन्ति॥८॥

पदार्थः-जो (**भारतीभिः**) सुन्दर शिक्षित वाणियों के साथ (**सजोषाः**) एकसी सेवा और प्रीतिवाली (**भारती**) विद्या और शिक्षा से धारण की हुई वाणी वा (**देवैः**) दिव्य गुण और (**मनुष्येभिः**) विचारशील पुरुषों के साथ समान सेवा और प्रीतिवाली (**इळा**) पृथिवी और (**अग्निः**) प्रकाशमान अग्नि वा (**सारस्वतेभिः**) वाणी में उत्पन्न हुए भावों के साथ (**सरस्वती**) प्रशंसित विज्ञानयुक्त वाणी (**तिस्रः**) उक्त तीनों (**देवीः**) देदीप्यमान (**अर्वाक्**) नीचे से (**इदम्**) इस (**बर्हिः**) अन्तरिक्ष को (**आ**) अच्छे प्रकार स्थिर होती हैं, उनको सब मनुष्य (**आ, सदन्तु**) आसादन करें, उनका आश्रय लें अर्थात् उनमें अच्छे प्रकार स्थित हों॥८॥

भावार्थः-जिन मनुष्यों की विद्वानों की धारणा के अनुकूल धारणा, प्रशंसा के अनुकूल स्तुति, वाणी के अनुकूल वर्त्तावाली वाणी वर्त्तमान है, वे अन्तरिक्षस्थ शुभ वाणी को प्राप्त होकर आनन्द को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि ररा॒णः स्यस्व।
यतो॑ वी॒रः क॑र्म॒ण्यः॑ सु॒दक्षो॑ यु॒क्तग्रा॑वा॒ जाय॑ते दे॒वका॑मः॥ ९॥

तत्। नः॑। तु॒रीप॑म्। अध॑। पो॒ष॒यि॒त्नु। देव॑। त्वष्टः॑। वि। र॒रा॒णः॑। स्य॒स्वेति॑ स्यस्व। यत॑ः। वी॒रः॑। क॒र्म॒ण्यः॑। सु॒ऽदक्षः॑। यु॒क्तऽग्रा॑वा। जाय॑ते। दे॒वऽका॑मः॥ ९॥

पदार्थः-(**तत्**) (**नः**) अस्माकम् (**तुरीपम्**) तारकं शीघ्रकारी। अत्र तुर धातोर्बाहुलकादौणादिक ईय प्रत्ययः। (**अध**) अथ (**पोषयित्नु**) पोषयित्री (**देव**) दिव्यगुणप्रद (**त्वष्टः**) छेदक (**वि**) (**रराणः**) रममाणः (**स्यस्व**) अन्तःकुरु (**यतः**) यस्मात् (**वीरः**) शुभगुणव्यापनशीलः (**कर्मण्यः**) यः कर्मणा संपद्यते सः (**सुदक्षः**) उत्तमबलः (**युक्तग्रावा**) युक्तो ग्रावा मेघो यस्मिन्सः (**जायते**) (**देवकामः**) यो देवान् कामयते सः॥ ९॥

अन्वयः-हे देव त्वष्टः! रराणः संस्त्वं नो यत्तुरीपमध पोषयित्नु वर्त्तते तद्वि स्यस्व यतो नोऽस्माकं कुले सुदक्षो युक्तग्रावा कर्मण्यो देवकामो वीरो जायते॥ ९॥

भावार्थः-ये विद्वांसोऽस्मभ्यं दुःखात्तारकं पुष्टिकरमुपदेशं कुर्युस्तान् शुभगुणकर्मस्वभावकामा वयं सदा सेवेमहि येनाऽस्माकं कुलमुत्कर्षमाप्नुयात्॥ ९॥

पदार्थः-हे (**देव**) दिव्य गुणों के देनेवाले (**त्वष्टः**) छिन्न-भिन्न कर्त्ता (**रराणः**) रमण करते हुए आप (**नः**) हमारी जो (**तुरीपम्**) शीघ्र कर्त्ता यज्ञ (**अध**) इसके अनन्तर (**पोषयित्नु**) पुष्टि की करनेवाली यज्ञक्रिया है (**तत्**) उन दोनों को (**वि, स्यस्व**) बीच में करो, जिससे हम लोगों के कुल में (**सुदक्षः**) उत्तम बली (**युक्तग्रावा**) जिसमें मेघयुक्त हैं (**कर्मण्यः**) जो कर्म से सिद्ध होता है (**देवकामः**) और दिव्यगुणों वा विद्वानों की कामना करता ऐसा (**वीरः**) शुभ गुणों में व्याप्त होनेवाला वीर पुरुष (**जायते**) उत्पन्न होता है॥ ९॥

भावार्थः-जो विद्वान् हमारे लिये दुःख से तारने और पुष्टि करनेवाले उपदेश को करें, उन्हें शुभ गुण, कर्म, स्वभाव की कामना करनेवाले हम लोग सदैव सेवें, जिससे हमारा कुल उत्कर्ष उन्नति को प्राप्त हो॥ ९॥

अथाग्निविषयमाह॥

अब अग्नि के विषय को अगले मन्त्र में कहा है॥

वन॑स्पतेऽव॑ सृजोप॑ दे॒वान॒ग्निर्ह॒विः शमि॒ता सू॑दयाति।
सेदु होता॑ स॒त्यत॑रो यजाति॒ यथा॑ दे॒वाना॑ं जनि॑मानि॒ वेद॑॥ १०॥

वन॑स्पते। अव॑। सृ॒ज॒। उप॑। दे॒वान्। अ॒ग्निः। ह॒विः। श॒मि॒ता। सू॒द॒या॒ति॒। सः। इत्। ऊ॒म् इति॑। होता॑। स॒त्यऽत॑रः। य॒जा॒ति॒। यथा॑। दे॒वाना॑म्। जनि॑मानि। वेद॑॥ १०॥

पदार्थः-(**वनस्पते**) किरणानां पालक (**अव**) (**सृज**) उत्पादय (**उप**) (**देवान्**) दिव्यान् गुणान् (**अग्निः**) पावकः (**हविः**) होतुं योग्यं द्रव्यम् (**शमिता**) उपशमकः (**सूदयाति**) क्षरयेत् वर्षयेत् (**सः**) (**इत्**) एव (**उ**) वितर्के (**होता**) आदाता (**सत्यतरः**) अतिशयेन सत्यः (**यजाति**) यजेत् (**यथा**) (**देवानाम्**) विदुषां दिव्यानां पदार्थानां वा (**जनिमानि**) जन्मानि (**वेद**) जानीयात्॥१०॥

अन्वयः-हे वनस्पते! यथाग्निर्हविः सूदयाति तथा देवानुपसृज दोषानवसृज यः सत्यतरो होता यथा देवानां जनिमानि वेद स इदु शमिता यजाति॥१०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा सूर्य्यकिरणा दिव्यान् गुणान् सृजन्ति दोषान् दूरीकुर्वन्ति तथा विद्वांसो जगति गुणान् जनयित्वा दोषान् दूरीकुर्य्युः॥१०॥

पदार्थः-हे (**वनस्पते**) किरणों के पालनेवाले (**यथा**) जैसे (**अग्निः**) अग्नि (**हविः**) होमने योग्य पदार्थों को (**सूदयाति**) वर्षाता है, वैसे (**देवान्**) दिव्य गुणों को (**उप, सृज**) अपने समीप उत्पन्न कराओ, दोषों को (**अव**) न उत्पन्न करो। जो (**सत्यतरः**) अतीव सत्य (**होता**) गुणों का ग्रहण करनेवाला जैसे (**देवानाम्**) विद्वानों वा दिव्य पदार्थों के (**जनिमानि**) जन्मों को (**वेद**) जाने (**सः, इत्**) वही (**उ**) तर्क-वितर्क के साथ (**शमिता**) शान्ति करनेवाला (**यजाति**) यज्ञ करे॥१०॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे सूर्य्य की किरणें दिव्य गुणों को उत्पन्न करतीं और दोषों को दूर करती हैं, वैसे विद्वान् लोग जगत् में गुणों को उत्पन्न करके दोषों को दूर करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम्॥११॥२३॥

आ। याहि। अग्ने। समिऽइधानः। अर्वाङ्। इन्द्रेण। देवैः। सऽरथम्। तुरेभिः। बर्हिः। नः। आस्ताम्। अदितिः। सुऽपुत्रा। स्वाहा। देवाः। अमृताः। मादयन्ताम्॥११॥

पदार्थः-(**आ**) (**याहि**) आगच्छ (**अग्ने**) वह्निवत्प्रकाशमान विद्वन् (**समिधानः**) प्रदीप्तः (**अर्वाङ्**) योऽर्वागधोऽञ्चति गच्छति सः (**इन्द्रेण**) वायुना विद्युता वा (**देवैः**) दिव्यैः (**सरथम्**) रथेन सह वर्त्तमानम् (**तुरेभिः**) शीघ्रगामिभिरश्वैः (**बर्हिः**) अन्तरिक्षम् (**न**) इव (**आस्ताम्**) उपविशतु (**अदितिः**) माता (**सुपुत्रा**) शोभनाः पुत्रा यस्याः सा (**स्वाहा**) शोभनान्नेन सुशिक्षितया वाचा वा (**देवाः**) दिव्यविद्याः (**अमृताः**) आत्मस्वरूपेण नित्याः (**मादयन्ताम्**) हर्षयन्तु॥११॥

अन्वयः-हे अग्ने! यथा समिधानोऽर्वाङिन्द्रेण देवैः तुरेभिः सह सरथं बर्हिर्न व्याप्तो भवति तथा त्वमा याहि यथा सुपुत्रा अदितिः सुखिन्यास्तां तथाऽमृता देवा अस्मान् स्वाहा मादयन्ताम्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्युदादिपदार्थैश्चालितानि यानानि भूसमुद्राऽन्तरिक्षेषु सद्यो गच्छन्ति तथा विद्वच्छिक्षया विद्याः प्राप्य सद्यो गुरुकुलं गत्वा ब्रह्मचारिण आगत्य सर्वानानन्दयन्त्विति॥११॥

अत्र वह्निविद्वद्वाणीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्थं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** वह्नि के समान प्रकाशमान विद्वान्! जैसे **(समिधानः)** प्रदीप्त **(अर्वाङ्)** और नीचे जानेवाला **(इन्द्रेण)** पवन वा बिजुली और **(देवैः)** दिव्य **(तुरेभिः)** शीघ्रगामी घोड़ों के साथ **(सरथम्)** रथ के सहित वर्त्तमान **(बर्हिः)** जो अन्तरिक्ष **(न)** उसके समान व्याप्त होता है, वैसे आप **(आ, याहि)** आओ वा जैसे **(सुपुत्रा)** सुन्दर पुत्रोंवाली **(अदितिः)** माता सुखिनी **(आस्ताम्)** हो, वैसे **(अमृताः)** आत्मस्वरूप से नित्य **(देवाः)** दिव्य विद्यावाले विद्वान् जन हम लोगों को **(स्वाहा)** उत्तम अन्न वा सुशिक्षित वाणी से **(मादयन्ताम्)** हर्षित करें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे बिजुली आदि पदार्थों से चलाये हुए रथ आदि यान भू, समुद्र और अन्तरिक्ष में शीघ्र जाते हैं, वैसे विद्वानों की शिक्षा से विद्याओं को प्राप्त होकर शीघ्र गुरुकुल जाकर और ब्रह्मचारियों को प्राप्त होकर सबको[२] आनन्द करें॥११॥

इस सूक्त में वह्नि, विद्वान् और वाणी के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

यह चौथा सूक्त और तेईसवां वर्ग समाप्त हुआ॥

---

२. और ब्रह्मचारी लौटकर सबको॥सं.॥

प्रत्यग्निरुषस इत्येकादशर्चस्य पञ्चमसूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १, २, ११ भुरिक् पङ्क्तिः। ३ पङ्क्तिः। ६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ त्रिष्टुप्। ५, ७, १० निचृत्त्रिष्टुप्। ८, ९ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वत्सम्बन्धेनाग्निगुणानाह॥

अब एकादश ऋचावाले पांचवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में विद्वानों के सम्बन्ध से अग्नि के गुणों का कहते हैं॥

प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम्।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः॥ १॥

प्रति। अग्निः। उषसः। चेकितानः। अबोधि। विप्रः। पदऽवीः। कवीनाम्। पृथुऽपाजाः। देवयत्ऽभिः। सम्ऽइद्धः। अप। द्वारा। तमसः। वह्निः। आवरित्यावः॥ १॥

पदार्थः-(**प्रति**) (**अग्निः**) (**उषसः**) प्रभातान् (**चेकितानः**) ज्ञापकः (**अबोधि**) (**विप्रः**) मेधावी (**पदवीः**) यः प्राप्तव्यानि पदानि व्येति व्याप्नोति सः (**कवीनाम्**) विदुषाम् (**पृथुपाजाः**) बृहद्बलः (**देवयद्भिः**) देवान् कामयद्भिः (**समिद्धः**) प्रदीप्तः (**अप**) (**द्वारा**) द्वाराणि (**तमसः**) अन्धकारात् (**वह्निः**) वोढा (**आवः**) आवृणोति॥ १॥

अन्वयः-हे विद्वन्! यथाऽग्निरुषसः प्रत्यबोधि तथा चेकितानः कवीनां पदवीः पृथुपाजा विप्रो देवयद्भिः सह प्रत्यबोधि। यथा समिद्धो वह्निस्तमस आवृतानि द्वारापावस्तथा विद्वान्भवेत्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निरुषः काले सर्वान् प्राणिनो जागारयति अन्धकारं निवर्त्तयति तथा विद्वांसोऽविद्यायां सुप्तान् जनान् प्रतिबोध्यैतेषामात्मनोऽज्ञानावरणात् पृथक् कुर्वन्ति॥ १॥

पदार्थः-हे विद्वान्! जैसे (**अग्निः**) अग्नि (**उषसः**) प्रभात समयों के (**प्रति, अबोधि**) प्रति जाना जाता है, वैसे (**चेकितानः**) ज्ञान देनेवाला अर्थात् समझानेवाला (**कवीनाम्**) विद्वानों की (**पदवीः**) पदवियों को प्राप्त होता (**पृथुपाजाः**) महान् बलवाला (**विप्रः**) बुद्धिमान् विद्वान् जन (**देवयद्भिः**) विद्वानों की कामना करते हुओं के साथ जाना जाता है। जैसे (**समिद्धः**) प्रदीप्त (**वह्निः**) और पदार्थों की गति करानेवाला अग्नि (**तमसः**) अन्धकार से ढँपे हुए (**द्वारा**) द्वारों को (**अप, आवः**) खोलता है, वैसे विद्वान् हो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि प्रातःकाल में सब प्राणियों को जगाता और अन्धकार को निवृत्त करता है, वैसे विद्वान् जन अविद्या में सोते हुए मनुष्यों को जगाते हैं और इनके आत्माओं को अज्ञान के आवरण से अलग करते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः।
पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके॥ २॥

प्र। इत्। ऊम् इति। अग्निः। ववृधे। स्तोमेभिः। गीःऽभिः। स्तोतॄणाम्। नमस्यः। उक्थैः। पूर्वीः। ऋतस्य। सम्ऽदृशः। चकानः। सम्। दूतः। अद्यौत्। उषसः। विऽरोके॥ २॥

पदार्थः-(**प्र**) प्रकृष्टे (**इत्**) एव (**उ**) वितर्के (**अग्निः**) पावकः (**ववृधे**) वर्धते (**स्तोमेभिः**) स्तुवन्ति सकला विद्या यैस्तैः (**गीर्भिः**) सुशिक्षिताभिर्वाग्भिः (**स्तोतॄणाम्**) अखिलविद्याप्रशंसकानाम् (**नमस्यः**) पूज्यः (**उक्थैः**) उचन्ति सर्वा विद्या येषु तैः (**पूर्वीः**) पूर्णा बह्वयो विद्याः (**ऋतस्य**) सत्यस्य (**संदृशः**) सम्यग्द्रष्टुं योग्यस्य (**चकानः**) कामयमानः (**सम्**) सम्यक् (**दूतः**) यो दुनोति परितापयति सः (**अद्यौत्**) द्योतयति (**उषसः**) प्रभातान् (**विरोके**) अभिप्रीते प्रदीपने वा॥ २॥

अन्वयः-यथा दूतोऽग्निरिन्धनैः प्रववृधे तथा स्तोतॄणां स्तोमेभिर्गीर्भिरुक्थैर्नमस्यो वर्धते यथाग्निर्विरोके उषसोऽद्यौत् तथा संदृश ऋतस्य पूर्वीश्चकानो इदु विद्वान् संद्योतयति॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेन्धनघृतादिना वह्निः प्रवृध्य प्रकाशयति तथा ब्रह्मचर्य्यविद्याभ्यासादिभिर्मनुष्याणामात्मानो ज्ञानवृद्धा भूत्वा सनातनीविद्याः सर्वेभ्यो दत्वा पूज्यतमा जायन्ते॥ २॥

पदार्थः-जैसे (**दूतः**) परिताप देनेवाला (**अग्निः**) अग्नि इन्धनों से (**प्र, ववृधे**) अच्छे प्रकार बढ़ता है, वैसे (**स्तोतॄणाम्**) समस्त विद्या प्रशंसा करनेवालों के (**स्तोमेभिः**) उन व्यवहारों से जिनसे सब विद्याओं की स्तुति करते हैं (**गीर्भिः**) तथा सुशिक्षित वाणियों से (**उक्थैः**) और सब विद्याओं का सम्बन्ध जिनमें करते हैं, उन व्यवहारों से (**नमस्यः**) जो सत्कार करने योग्य है, वह बढ़ता है जैसे अग्नि (**विरोके**) सब ओर से जिनमें प्रीति है, उस व्यवहार के वा प्रकाश के निमित्त (**उषसः**) प्रभात समयों को (**अद्यौत्**) प्रकाशित करता है, वैसे (**संदृशः**) अच्छे प्रकार देखने को (**ऋतस्य**) सत्य सम्बन्धी (**पूर्वीः**) पूर्ण बहुत विद्या की (**चकानः**) कामना करता हुआ (**इत्, उ**) ही तर्क-वितर्क के साथ विद्वान् (**सम्**) अच्छे प्रकार प्रकाशित होता है॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इन्धन और घृतादिकों से अग्नि प्रवृद्ध होकर प्रकाशित होता, वैसे ब्रह्मचर्य और विद्याभ्यासादिकों से मनुष्यों का आत्मा ज्ञानवृद्ध होकर सनातन विद्या सबको देकर पूज्यतम होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अधाय्यग्निर्मानुषीषु विक्ष्वृपां गर्भो मित्र ऋतेन साधन्।

आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम्॥ ३॥

अधायि। अग्निः। मानुषीषु। विक्षु। अपाम्। गर्भः। मित्रः। ऋतेन। साधन्। आ। हर्यतः। यजतः। सानु। अस्थात्। अभूत्। ऊम् इति। विप्रः। हव्यः। मतीनाम्॥ ३॥

पदार्थः-(**अधायि**) धीयते (**अग्निः**) (**मानुषीषु**) मनुष्याणामिमासु (**विक्षु**) प्रजासु (**अपाम्**) प्राणानाम् (**गर्भः**) गर्भइव भूत्वा (**मित्रः**) सुहृत् (**ऋतेन**) सत्येन (**साधन्**) अत्र विकरणव्यत्ययः। (**आ**) (**हर्य्यतः**) कमनीयः (**यजतः**) सङ्गन्तव्यः (**सानु**) संभजनीयम् (**अस्थात्**) तिष्ठेत् (**अभूत्**) भवेत् (**उ**) (**विप्रः**) (**हव्यः**) आदातुमर्हः (**मतीनाम्**) विपश्चिताम्॥ ३॥

अन्वयः-यथा विद्वद्भिरपां गर्भोऽग्निर्मानुषीषु विक्ष्वधायि तथा मतीनां मित्रो य ऋतेन साधन् हर्यतो यजतो हव्यो विप्रो धृतः स उ सान्वस्थादभूत्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं यथेश्वरेणाग्निः सकलप्रजाप्रकाशकः स्थापितस्तथा विद्याधर्मप्रकाशकान् विदुषो विजानीत॥ ३॥

पदार्थः-जैसे विद्वानों ने (**अपाम्**) प्राणों को (**गर्भः**) गर्भ के समान होकर (**अग्निः**) अग्नि (**मानुषीषु**) मनुष्य सम्बन्धी इन (**विक्षु**) प्रजाओं में (**अधायि**) धारण किया जाता, वैसे (**मतीनाम्**) विशेष बुद्धिमानों का (**मित्रः**) मित्र जो (**ऋतेन**) सत्य से (**साधन्**) कार्य सिद्ध करता हुआ (**हर्यतः**) मनोहर (**यजतः**) सङ्गम (**हव्यः**) और ग्रहण करने योग्य (**विप्रः**) बुद्धिमान् जन धारण किया हुआ है वह (**उ**) ही (**सानु**) विभाग करने योग्य पदार्थ की (**आ, अस्थात्**) प्रतिज्ञा करता और प्रसिद्ध (**अभूत्**) होता है॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे ईश्वर ने अग्नि सकल प्रजा का प्रकाश करनेवाला स्थापित किया, वैसे विद्या और धर्म के प्रकाश करनेवाले विद्वानों को तुम जानो॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम्॥ ४॥

मित्रः। अग्निः। भवति। यत्। सम्ऽइद्धः। मित्रः। होता। वरुणः। जातऽवेदाः। मित्रः। अध्वर्युः। इषिरः। दमूनाः। मित्रः। सिन्धूनाम्। उत। पर्वतानाम्॥ ४॥

पदार्थः-(**मित्रः**) सुहृत् (**अग्निः**) पावकइव (**भवति**) (**यत्**) यः (**समिद्धः**) प्रदीप्तः (**मित्रः**) (**होता**) आदातेव (**वरुणः**) वरः (**जातवेदाः**) यथा जातानां सर्वेषां पदार्थानां वेत्ता जगदीश्वरः (**मित्रः**) (**अध्वर्युः**) आत्मनोऽध्वरमहिंसाधर्ममिच्छुः (**इषिरः**) इच्छुः (**दमूनाः**) दमनशीलः (**मित्रः**) (**सिन्धूनाम्**) नदीनाम् (**उत**) अपि (**पर्वतानाम्**) शैलानाम्॥ ४॥

अन्वयः-हे मनुष्या! यद्यस्सिन्धूनामुत पर्वतानां समिद्धोऽग्निरिव मित्रो होतेव मित्रो जातवेदा इव वरुणोऽध्वर्य्युरिव मित्र इषिरो दमूना इव मित्रो भवति तं सत्कुरुत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो नदीशैलौषध्यादीनां किरणद्वारा पोषकः शोषको वा भवति तथा सखायो धर्मे पोषका अधर्मे शोषका अर्थात् धर्मे प्रवर्त्तका अधर्मान् निवर्त्तका भवन्ति॥४॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(सिन्धूनाम्)** नदियों **(उत)** और **(पर्वतानाम्)** बड़ी शिलाओं के बीच **(समिद्धः)** प्रदीप्त **(अग्निः)** अग्नि के समान **(मित्रः)** मित्र वा **(होता)** ग्रहण करनेहारे के तुल्य **(मित्रः)** मित्र वा **(जातवेदाः)** उत्पन्न हुए पदार्थों के जाननेवाले जगदीश्वर के समान **(वरुणः)** श्रेष्ठ वा **(अध्वर्य्युः)** अपने को अहिंसा धर्म की इच्छा करनेवाले के समान **(मित्रः)** मित्र वा **(इषिरः)** इच्छा करनेवाले **(दमूनाः)** दमनशील के समान **(मित्रः)** मित्र **(भवति)** होता है, उसका सत्कार करिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य; नदी, शैल और ओषधि आदिकों को किरणों के द्वारा पुष्ट करने वा उनको सुखानेवाला होता है, वैसे मित्रजन धर्म में पुष्टिकारक और अधर्म से निवर्त्तक होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पाति॑ प्रि॒यं रि॒पो अग्रं॑ प॒दं वेः पाति॑ य॒ह्वश्च॑रं॑ण॒ं सूर्य॑स्य।

पाति॒ नाभा॑ स॒प्तशी॑र्षाणम॒ग्निः पाति॑ दे॒वाना॑मु॑प॒मादं॑मृ॒ष्वः॥५॥२४॥

पाति॑। प्रि॒यम्। रि॒पः। अग्र॑म्। प॒दम्। वेः। पाति॑। य॒ह्वः। चर॑ण॒म्। सूर्य॑स्य। पाति॑। नाभा॑। स॒प्तऽशी॑र्षाणम्। अ॒ग्निः। पाति॑। दे॒वाना॑म्। उ॒प॒ऽमाद॑म्। ऋ॒ष्वः॥५॥

पदार्थः-**(पाति)** **(प्रियम्)** **(रिपः)** पृथिव्याः **(अग्रम्)** उपरिभागम् **(पदम्)** प्राप्तव्यं स्थानम् **(वेः)** गन्त्र्याः **(पाति)** **(यह्वः)** महान् **(चरणम्)** गमनम् **(सूर्य्यस्य)** **(पाति)** **(नाभा)** मध्ये वर्तमानेऽन्तरिक्षे **(सप्तशीर्षाणम्)** सप्तविधानि शिरांसि किरणा यस्मिँस्तम् **(अग्निः)** पावकः **(पाति)** **(देवानाम्)** दिव्यानां विदुषाम् **(उपमादम्)** य उपमां ददाति तम् **(ऋष्वः)** प्रापकः॥५॥

अन्वयः-हे विद्वन्! यथाऽग्निर्वे रिपोऽग्रं प्रियं पदं पाति यह्वः सन् सूर्य्यस्य चरणं पाति नाभा सप्तशीर्षाणं पाति ऋष्वस्सन् देवानामुपमादं पाति तथा त्वं भव॥५॥

भावार्थः-हे विद्वन्! यथा वह्निर्गतिमतां पृथिव्यादीनां रक्षाप्रकाशनिमित्तेन रक्षको वर्त्तते तथा त्वं सर्वेषां रक्षको भवेः॥५॥

पदार्थः-हे विद्वान् जैसे **(अग्निः)** अग्नि **(वेः)** चलती हुई **(रिपः)** पृथिवी के **(अग्रम्)** ऊपरले

(प्रियम्) प्रिय **(पदम्)** प्राप्त होने योग्य स्थान को **(पाति)** प्राप्त होता और **(यह्वः)** बड़ा होता हुआ **(सूर्य्यस्य)** सूर्य्य के **(चरणम्)** गमन को **(पाति)** प्राप्त होता वा **(नाभा)** बीच में वर्त्तमान अन्तरिक्ष में **(सप्तशीर्षाणम्)** सात प्रकार की शिररूप किरणें जिसमें विद्यमान उस सूर्य्यमण्डल को **(पाति)** प्राप्त होता वा **(ऋष्वः)** प्राप्ति करानेवाला होता हुआ **(देवानाम्)** दिव्य विद्वानों के **(उपमादम्)** उस व्यवहार को जो उपमा दिलाता है **(पाति)** प्राप्त होता है, वैसे तुम होओ॥५॥

भावार्थः-हे विद्वान्! जैसे वह्नि, चालवाले पृथिवी आदि लोकों की रक्षा और प्रकाश के निमित्त से उनकी रक्षा करनेवाला वर्त्तमान होता है, वैसे आप सबकी रक्षा करनेवाले होओ॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒भुर्श्च॒क्र॒ ईड्य॑ं चारु॒ नाम॒ विश्वा॑नि दे॒वो व॒युना॑नि वि॒द्वान्।
स॒सस्य॒ चर्म॑ घृ॒तव॑त्प॒दं वेस्तदिद॒ग्नी र॑क्षत्यप्र॑युच्छन्॥ ६॥

ऋ॒भुः। च॒क्रे॒। ईड्य॑म्। चारु॑। नाम॑। विश्वा॑नि। दे॒वः। व॒युना॑नि। वि॒द्वान्। स॒सस्य॑। चर्म॑। घृ॒तऽव॑त्। प॒दम्। वेः। तत्। इत्। अ॒ग्निः। र॒क्ष॒ति॒। अप्र॑ऽयुच्छन्॥ ६॥

पदार्थः-(**ऋभुः**) महान् **(चक्रे)** करोति **(ईड्यम्)** स्तोतुमर्हम् **(चारु)** सुन्दरम् **(नाम)** वाचं जलं वा। **नामेति वाङ्नामसु पठितम्।** (निघं०१.११)। **उदकनामसु च।** (निघं०१.१२)। **(विश्वानि)** सर्वाणि **(देवः)** दाता **(वयुनानि)** प्रज्ञानानि **(विद्वान्)** **(ससस्य)** शयानस्य **(चर्म)** **(घृतवत्)** घृतेन तुल्यम् **(पदम्)** **(वेः)** प्राप्तस्य **(तत्)** **(इत्)** एव **(अग्निः)** पावकः **(रक्षति)** **(अप्रयुच्छन्)** अप्रमाद्यन्॥६॥

अन्वयः-य ऋभुर्देवोऽप्रयुच्छन् विद्वानीड्यं चारु नाम विश्वानि वयुनानि चक्रे तदित्प्राप्तोऽग्निरिव वेः ससस्य पदं चर्म घृतवत् रक्षति॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्राणोऽग्निः शरीरं रक्षति सुप्तं जागारयति तथा अध्यापकोपदेशकाः सुशिक्षिता वाचोऽखिलानि विज्ञानानि प्रापय्य मनुष्यान् जागृतान् कुर्वन्ति॥६॥

पदार्थः-जो **(ऋभुः)** बड़ा **(देवः)** देनेवाला **(अप्रयुच्छन्)** प्रमाद न करता हुआ **(विद्वान्)** विद्वान् **(ईड्यम्)** स्तुति के योग्य कर्म **(चारु)** सुन्दर **(नाम)** वाणी वा जल को और **(विश्वानि)** समस्त **(वयुनानि)** उत्तम ज्ञानों को **(चक्रे)** करता है, वह **(तत्, इत्)** उन्हीं को प्राप्त हुआ **(अग्निः)** अग्नि के समान **(वेः)** पाये **(ससस्य)** और सोते हुए मनुष्य के **(पदम्)** पद और **(चर्म)** त्वचा की **(घृतवत्)** घी के तुल्य **(रक्षति)** रक्षा करता है॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्राणाग्नि शरीर की रक्षा करता है, सोते हुए को जगाता है, वैसे अध्यापक और उपदेशक उत्तम शिक्षा को पाये हुए वाणी के समस्त विज्ञानों की

प्राप्ति करा कर मनुष्यों को जगाते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ योनिं॒मग्निर्घृ॒तव॑न्तमस्थात् पृ॒थुप्र॑गाणमु॒शन्त॑मु॒शा॒नः।
दीद्या॑न॒: शुचि॑र्ऋ॒ष्व: पा॑वक: पु॑न:पुनर्मा॒तरा॒ नव्य॑सी क:॥७॥

आ। योनि॑म्। अ॒ग्नि:। घृ॒तऽव॑न्तम्। अ॒स्था॒त्। पृ॒थु॒ऽप्र॑गानम्। उ॒शन्त॑म्। उ॒शा॒न:। दीद्या॑न:। शुचि॑:। ऋ॒ष्व:। पा॒व॒क:। पु॒न॑:ऽपुन:। मा॒तरा॑। नव्य॑सी इति॑। क॒रिति॑ क:॥७॥

पदार्थ:-(**आ**) समन्तात् (**योनिम्**) गृहम् (**अग्नि:**) पावक: (**घृतवन्तम्**) बहुघृतमुदकं विद्यते यस्मिन् (**अस्थात्**) आतिष्ठेत् (**पृथुप्रगाणम्**) पृथूनि प्रकृष्टानि गानानि स्तवनानि यस्मिँस्तम् (**उशन्तम्**) कामयमानम् (**उशान:**) कामयमान: (**दीद्यान:**) देदीप्यमान: (**शुचि**) पवित्र: (**ऋष्व:**) प्राप्तुं योग्य: (**पावक:**) पवित्रकर्त्ता (**पुन:पुन:**) वारंवारम् (**मातरा**) मातरौ (**नव्यसी**) अतिशयेन नवीने (**क:**) करोति॥७॥

अन्वय:-यथा पावकोऽग्नि: पुन:पुनर्नव्यसी मातरा को घृतवन्तं योनिमास्थात् तथा दीद्यान: शुचिर्ऋष्व: पृथुप्रगाणमुशन्तमुशान: सन् विद्याध्यापकौ मातापितृवन्मत्वा स्वस्वभावाख्यं गृहमातिष्ठेत्॥७॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा विद्युदग्नि: पृथिव्यादिषु स्थित्वाऽभिव्याप्य कस्माच्चिन्न विरुध्यति तथा विद्वांस: कस्माच्चिद्विरोधं नाचरेयु:। यथाऽग्नि: शुद्धशोधकोऽस्ति तथा पवित्र: सन्नन्यान् पवित्रान् कुर्य्यात्॥७॥

पदार्थ:-जैसे (**पावक:**) पवित्र करनेवाला (**अग्नि:**) अग्नि (**पुन:पुन:**) वारंवार (**नव्यसी**) अतीव नवीन (**मातरा**) माता-पिता को (**क:**) प्रसिद्ध करता है वा (**घृतवन्तम्**) घी जिसमें विद्यमान उस (**योनिम्**) घर को (**आ, अस्थात्**) आस्था करता अर्थात् सब प्रकार उसमें स्थिर होता है, वैसे (**दीद्यान:**) देदीप्यमान (**शुचि:**) पवित्र (**ऋष्व:**) और प्राप्त होने योग्य जन (**पृथुप्रगाणम्**) जिसमें विशेष गान वा स्तुति विद्यमान है वा जो (**उशन्तम्**) कामना किया जाता है उसको (**उशान:**) कामना करता हुआ विद्या और पढ़ानेवाले को माता-पिता के तुल्य मान अपने स्वभावरूपी घर को अच्छा स्थित हो॥७॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्युत्रूप अग्नि पृथिवी आदि पदार्थों में स्थिर और सब ओर से अभिव्याप्त होकर किसी से विरुद्ध नहीं होता, वैसे विद्वान् जन किसी से विरुद्ध आचरण न करें। जैसे अग्नि शुद्ध और दूसरों को शुद्ध करनेवाला है, वैसे पवित्र होता हुआ औरों को पवित्र करे॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन।
आपइव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे॥८॥

सद्यः। जातः। ओषधीभिः। ववक्षे। यदि। वर्धन्ति। प्रऽस्वः। घृतेन। आपः।ऽइव। प्रऽवता। शुम्भमानाः। उरुष्यत्। अग्निः। पित्रोः। उपस्थे॥८॥

पदार्थः-(**सद्यः**) शीघ्रम् (**जातः**) प्रकटः सन् (**ओषधीभिः**) यवादिभिः (**ववक्षे**) रुष इव विरुध्यति (**यदि**) अत्र **संहितायामिति** दीर्घः। (**वर्धन्ति**) वर्धन्ते (**प्रस्वः**) याः प्रसूयन्ते ताः (**घृतेन**) उदकेन (**आपइव**) जलानीव (**प्रवता**) निम्नमार्गेण (**शुम्भमानाः**) सुशोभायुक्ताः (**उरुष्यत्**) आत्मन उरुर्बहुरिवाचरति (**अग्निः**) पावकः (**पित्रोः**) द्यावापृथिव्योः (**उपस्थे**) उपतिष्ठन्ति यस्मिँस्तस्मिन्। अत्र **घञर्थे कविधानमिति** वार्त्तिकेनाधिकरणकारके कः प्रत्ययः॥८॥

अन्वयः-यदि प्रस्वो घृतेन शुम्भमाना आपइव वर्धन्ति तर्हि ताभिरोषधीभिः सह प्रवता घृतेन यः सद्यो जातोऽग्निर्ववक्षे यदि पित्रोरुपस्थे उरुष्यत् तं विजानीत॥८॥

भावार्थः-यदि वह्निः सूर्य्यरूपेण भूमेर्जलमाकृष्य न वर्षयेत्तर्हि काचिदप्योषधिर्न सम्भवेद् यथा कश्चिद् रुष्टः सन् कञ्चिद्धन्ति तथा प्रदीप्तः सन् वह्निः प्राप्तान् पदार्थान् हन्ति यथा तुष्टः सन् मित्रं मित्रं रक्षति तथा युक्त्या सेवितः सन्नग्निः पदार्थान् रक्षति॥८॥

पदार्थः-(**यदि**) जो (**प्रस्वः**) उत्पन्न होती हैं वे ओषधी (**घृतेन**) जल से (**शुम्भमानाः**) सुन्दर शोभित (**आपइव**) जलों के समान (**वर्धन्ति**) बढ़ती हैं तो उन (**ओषधीभिः**) ओषधियों के साथ (**प्रवता**) नीचला मार्ग है जिसका अर्थात् टपकता हुआ जो घृत उससे जो (**सद्यः**) शीघ्र (**जातः**) प्रकट होता हुआ (**अग्निः**) अग्नि (**ववक्षे**) रूठे के समान विरुद्ध होता है, जो अग्नि (**पित्रोः**) माता-पिता स्थानीय आकाश और पृथिवी के (**उपस्थे**) उस भाग में जिसमें स्थित होते हैं (**उरुष्यत्**) अपने को बहुत के समान आचरण करता है, उसको जानो॥८॥

भावार्थः-यदि अग्नि सूर्यरूप से भूमि के जल को खींच कर वर्षा न करावे तो कोई भी ओषधि न हो। जैसे कोई रूठा हुआ किसी को मारता है, वैसे जलता हुआ अग्नि पाये हुए पदार्थों को जला देता है। और जैसे प्रसन्न होता हुआ मित्र मित्र की रक्षा करता है, वैसे युक्ति से सेवन किया हुआ अग्नि पदार्थों की रक्षा करता है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उदु ष्टुतः समिधा यह्वो अद्यौद् वर्ष्मन्दिवो अधि नाभा पृथिव्याः।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद् यजथाय देवान्॥९॥

उत्। ऊम् इति। स्तुतः। समऽइधा। यह्वः। अद्यौत्। वर्ष्मन्। दिवः। अधि। नाभा। पृथिव्याः। मित्रः। अग्निः। ईड्यः। मातरिश्वा। आ। दूतः। वक्षत्। यजथाय। देवान्॥ ९॥

पदार्थः-(**उत्**) (**उ**) (**स्तुतः**) प्रशंसितः (**समिधा**) (**यह्वः**) महान् (**अद्यौत्**) द्योतते (**वर्ष्मन्**) सेचने (**दिवः**) प्रकाशस्य (**अधि**) (**नाभा**) मध्ये (**पृथिव्याः**) भूमेः अन्वेषणीयः (**मित्रः**) सखा (**अग्निः**) वह्निः (**ईड्यः**) स्तोतव्यः (**मातरिश्वा**) यो मातरि श्वसिति (**आ**) (**दूतः**) दूत इव (**वक्षत्**) वहेत् (**यजथाय**) यजनाय सङ्गमनाय (**देवान्**) दिव्यगुणान्॥ ९॥

अन्वयः-हे विद्वन्! यथेड्योऽग्निः समिधा वर्ष्मन् दिवः पृथिव्या नाभा उदद्यौत् यो मातरिश्वा दूतस्सन् यजथाय देवानधि वक्षत्तथा उ स्तुतो यह्व ईड्यो मित्रो भवेत्॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽस्मिन् ब्रह्माण्डे सूर्य्यरूपेणाग्निः सर्वान् तापयति तथा महान् सखा सखीनानन्दयति दिव्यान् गुणाँश्च प्रापयति॥ ९॥

पदार्थः-हे विद्वान्! जैसे (**ईड्यः**) स्तुति करने योग्य (**अग्निः**) अग्नि (**समिधा**) समिधा से (**वर्ष्मन्**) सेचन के विषय में (**दिवा**) प्रकाश और (**पृथिव्याः**) भूमि के (**नाभा**) बीच में (**उत्, अद्यौत्**) उदय होता है वा जो (**मातरिश्वा**) अन्तरिक्ष में सोनेवाला (**दूतः**) दूत के समान हुआ (**यजथाय**) सङ्गम करनेवाले के लिये (**देवान्**) दिव्य गुणों को (**अधि, वक्षत्**) अधिकता से प्राप्त करे, (**उ**) वैसे ही (**स्तुतः**) प्रशंसा को प्राप्त हुआ (**यह्वः**) महान् (**ईड्यः**) स्तुति करने योग्य (**मित्रः**) मित्र हो॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इस ब्रह्माण्ड में सूर्य्यरूप से अग्नि सबको तपाता है, वैसे महान् मित्र अपने मित्रों को आनन्दित करता और दिव्य गुणों की प्राप्ति कराता है॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उदस्तम्भीत् समिधा नाकमृष्वो३ऽग्निर्भवन्नुत्तमो रोचनानाम्।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे॥ १०॥

उत्। अस्तम्भीत्। समऽइधा। नाकम्। ऋष्वः। अग्निः। भवन्। उत्ऽतमः। रोचनानाम्। यदि। भृगुऽभ्यः। परि। मातरिश्वा। गुहा। सन्तम्। हव्यऽवाहम्। समऽईधे॥ १०॥

पदार्थः-(**उत्**) (**अस्तम्भीत्**) उत्तभ्नाति (**समिधा**) प्रदीपनेन (**नाकम्**) अविद्यमानदुःखम् (**ऋष्वः**) महान् (**अग्निः**) (**भवन्**) (**उत्तमः**) श्रेष्ठः (**रोचनानाम्**) प्रकाशमानानाम् (**यदि**)। अत्र **संहितायामिति** दीर्घः। (**भृगुभ्यः**) भर्जमानेभ्यः (**परि**) सर्वतः (**मातरिश्वा**) अन्तरिक्षशयानः (**गुहा**) गुहायाम् (**सन्तम्**) वर्त्तमानम् (**हव्यवाहम्**) यो हव्यं हविर्वहति तम् (**समीधे**) प्रदीपयेय॥ १०॥

अन्वयः-यदि रोचनानामुत्तमो भवन्नृष्वो मातरिश्वाऽग्निर्भृगुभ्यः समिधा नाकमुदस्तम्भीत्तर्हि तमहं गुहा सन्तं हव्यवाहं परि समीधे॥१०॥

भावार्थः-यथा वह्निर्विद्युत्सूर्य्यरूपेण सर्वं दधाति तथैव तमहं धरामि॥१०॥

पदार्थः-यदि **(रोचनानाम्)** प्रकाशमानों में **(उत्तमः)** उत्तम **(भवन्)** होता हुआ **(ऋष्वः)** महान् **(अग्निः)** अग्नि **(भृगुभ्यः)** भुंजते हुए पदार्थों से **(समिधा)** अच्छे प्रकार प्रकाश के साथ **(नाकम्)** सुख का **(उदस्तम्भीत्)** उत्थान करता है तो **[**उसको**]** मैं **(गुहा)** पदार्थों के भीतर **(सन्तम्)** वर्त्तमान **(हव्यवाहम्)** और जो होम के पदार्थों को **[(मातरिश्वा)]** अन्तरिक्ष को पहुँचाता, उस अग्नि को **(परि, समीधे)** सब ओर से प्रदीप्त करूं॥१०॥

भावार्थः-जैसे अग्नि बिजुली सूर्य्यरूप से सबको धारण करता है, वैसे उसको मैं धारण करता हूँ॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळामग्ने पुरुदंसꣳ सनिं गोः शश्वत्तमं हवमानाय साध।

स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥११॥२५॥

इळाम्। अग्ने। पुरुऽदंसम्। सनिम्। गोः। शश्वत्ऽतमम्। हवमानाय। साध। स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति॥११॥

पदार्थः-**(इळाम्)** स्तोतुमर्हाम् **(अग्ने)** विद्वन् **(पुरुदंसम्)** बहुकर्मसाधकम् **(सनिम्)** संविभाजकम् **(गोः)** वाचः **(शश्वत्तमम्)** अनादिभूतम् **(हवमानाय)** आददानाय **(साध)** साध्नुहि। अत्र विकरणव्यत्ययेन शः। **(स्यात्)** भवेत् **(नः)** अस्माकम् **(सूनुः)** अपत्यम् **(तनयः)** कामदः **(विजावा)** विशेषेण जातः **(अग्ने)** विद्वन् **(सा)** **(ते)** तव **(सुमतिः)** शोभना प्रज्ञा **(भूतु)** भवतु **(अस्मे)** अस्मासु॥११॥

अन्वयः-हे अग्ने! त्वं गोः शश्वत्तमं हवमानाय पुरुदंसं सनिमिळां साध। हे अग्ने! या ते सुमतिरस्ति साऽस्मे भूतु यतो नो विजावा सूनुस्तनयश्च स्यात्॥११॥

भावार्थः-विद्वद्भिः सर्वविद्यामन्थनसारयुक्तां स्ववाचं मतिं च विधायान्येषामपि तादृशी कार्य्या। यथाऽन्येभ्यो बुद्धिः सुशिक्षा च गृह्येत तथाऽन्येभ्योऽपि देया यतः सर्वेषां सन्ताना विद्वांसः स्युरिति॥११॥

अत्र विद्वदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चमं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! आप **(गोः)** वाणी के **(शश्वत्तमम्)** अनादि व्यवहार को **(हवमानाय)**

ग्रहण करनेवाले के लिये **(पुरुदंसम्)** बहुत कर्मों की सिद्धि करने **(सनिम्)** और अच्छे प्रकार विभाग करनेवाले तथा **(इळाम्)** प्रशंसा करने योग्य क्रिया को **(साध)** सिद्ध कीजिये। हे **(अग्ने)** विद्वान्! जो **(ते)** तुम्हारी **(सुमतिः)** उत्तम बुद्धि **(सा)** वह **(अस्मे)** हम लोगों में **(भूतु)** हो जिससे **(नः)** हम लोगों के बीच **(विजावा)** विशेषता से उत्पन्न होनेवाला **(सूनुः)** बालक और **(तनयः)** काम का देनेवाला कुमार **(स्यात्)** हो॥११॥

भावार्थः-विद्वान् जनों को सर्व विद्या मन्थन से सारयुक्त अपनी वाणी और मति का विधान कर औरों की भी वैसी ही करनी चाहिये। जैसे औरों से बुद्धि और उत्तम शिक्षा ग्रहण की जाये, वैसे औरों को भी देनी चाहिये, जिससे सबके सन्तान विद्वान् होवें॥११॥

इस सूक्त में विद्वान् और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह पञ्चम सूक्त और पच्चीसवां वर्ग समाप्त हुआ॥

प्र कारव इत्येकादशर्चस्य षष्ठस्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १, ५ विराट् त्रिष्टुप्। २, ७ त्रिष्टुप्। ३, ४, ८ निचृत्त्रिष्टुप्। १० भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। ६, ११ भुरिक् पङ्क्तिः। ९ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनरग्निसम्बन्धेन विद्वद्गुणानाह॥

अब ग्यारह ऋचावाले छठे सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में अग्नि के सम्बन्ध से विद्वानों के गुणों को कहते हैं॥

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः।
दक्षिणावाड् वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची॥ १॥

प्र। कारवः। मनना। वच्यमानाः। देवद्रीचीम्। नयत। देवऽयन्तः। दक्षिणाऽवाट्। वाजिनी। प्राची। एति। हविः। भरन्ती। अग्नये। घृताची॥ १॥

पदार्थः-(**प्र**) (**कारवः**) कारुकाः शिल्पिनः (**मनना**) मन्तुं विज्ञातुं योग्या (**वच्यमानाः**) (**देवद्रीचीम्**) यया देवानञ्चति ताम् (**नयत**) (**देवयन्तः**) देवानाचक्षाणाः (**दक्षिणावाट्**) या दक्षिणां दिशं वहति सा (**वाजिनी**) वजितुं प्राप्तुं शीलं यस्याः (**प्राची**) या प्रागञ्चति सा पूर्वा दिक् (**एति**) प्राप्नोति (**हविः**) दातुमर्हम् (**भरन्ती**) धरन्ती पोषयन्ती वा (**अग्नये**) (**घृताची**) या घृतमुदकमञ्चति प्राप्नोति सा॥ १॥

अन्वयः-हे देवद्रीचीं देवयन्तः कारवो! यूयं या मनना वच्यमाना दक्षिणावाड् वाजिनी प्राची घृताच्यग्नये हविर्भरन्त्येति ताः प्र णयत॥ १॥

भावार्थः-यथा विद्वांसो रात्रिं तत्रत्यान् व्यवहाराँश्च विदन्ति तथान्यैरपि वेद्यम्॥ १॥

पदार्थः-(**देवद्रीचीम्**) जिससे मनुष्य विद्वानों का सत्कार करता है उसकी तथा (**देवयन्तः**) विद्वानों की कामना करनेवाले हे (**कारवः**) शिल्प कामों के कर्ता विद्वानो! तुम जो (**मनना**) मानने वा जानने योग्य (**वच्यमानाः**) वा जो कही जाती वा (**दक्षिणावाट्**) जो दक्षिण दिशा को प्राप्त होती हुई (**वाजिनी**) जो प्राप्त होनेवाली वा (**प्राची**) जो पहिले प्राप्त होती पूर्व दिशा वा (**घृताची**) जो जल को प्राप्त होती हुई (**अग्नये**) अग्नि के लिये (**हविः**) देने योग्य पदार्थ को (**भरन्ती**) धारण करती वा पुष्ट करती हुई (**एति**) प्राप्त होती है, उन सबको (**प्र, णयत**) प्राप्त करो॥ १॥

भावार्थः-जैसे विद्वान् लोग रात्रि और रात्रि के व्यवहारों को जानते, वैसे औरों को भी जानना चाहिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो।

दि॒वश्चि॑दग्ने महि॒ना पृ॑थि॒व्या व॒च्यन्ता॑ ते॒ वह्न॑यः स॒प्तजि॑ह्वाः॥ २॥

आ। रोद॑सी॒ इति॑। अ॒पृ॒णाः॒। जाय॑मानः। उ॒त। प्र। रि॒क्थाः॒। अध॑। नु। प्र॒य॒ज्यो॒ इति॑ प्रऽयज्यो। दि॒वः॒। चि॒त्। अ॒ग्ने॒। म॒हि॒ना। पृ॒थि॒व्याः॒। व॒च्यन्ता॑म्। ते॒। वह्न॑यः। स॒प्तऽजि॑ह्वाः॥ २॥

पदार्थः-(**आ**) समन्तात् (**रोदसी**) द्यावापृथिव्यौ (**अपृणाः**) पिपर्ति (**जायमानः**) उत्पद्यमानः (**उत**) अपि (**प्र**) (**रिक्थाः**) अतिरिणक्षि। अत्र **वाच्छन्दसी**ति विकरणाभावः। (**अध**) अथ (**नु**) सद्यः (**प्रयज्यो**) यः प्रयजति तत्सम्बुद्धौ (**दिवः**) प्रकाशस्य (**चित्**) अपि (**अग्ने**) वह्निवद्विद्वन् (**महिना**) महिम्ना (**पृथिव्याः**) भूमेः (**वच्यन्ताम्**) उच्यन्ताम् (**ते**) तव (**वह्नयः**) वोढारः (**सप्तजिह्वाः**) काल्यादयः सप्त जिह्वा इव ज्वाला येषान्ते॥ २॥

अन्वयः-हे प्रयज्योऽग्ने! दिवः पृथिव्या महिना सप्तजिह्वा वह्नयस्त्वया वच्यन्तां स त्वं जायमानः सन् रोदसी अपृणाः। उता प्ररिक्थाः अध ते चिन्नु सुखं भवेत्॥ २॥

भावार्थः-यथा सूर्य्यपृथिव्योरग्नेश्च महिमा वर्त्तते तथा योऽग्निविद्यां भूगर्भविद्यां च जानाति स सततं सुखी भवेत्॥ २॥

पदार्थः-हे (**प्रयज्यो**) उत्तम यज्ञ करनेवाले (**अग्ने**) अग्नि के समान विद्वान्! (**दिवः**) प्रकाश और (**पृथिव्याः**) भूमि के (**महिना**) महत्त्व से (**सप्तजिह्वाः**) काली आदि सात जिह्वा ज्वालावाले (**वह्नयः**) पदार्थ को देशान्तर में पहुंचानेवाले अग्नि तुम्हें (**वच्यन्ताम्**) कहने चाहिये और सो आप (**जायमानः**) उत्पन्न होते हुए (**रोदसी**) आकाश और पृथिवी को (**अपृणाः**) परिपूर्ण कीजिये (**उत**) और (**आ, प्र, रिक्थाः**) दोषों को सब ओर से अच्छे प्रकार दूर कीजिये (**अध**) इसके अनन्तर (**ते**) आपको (**चित्**) [भी] (**नु**) शीघ्र निश्चय करके सुख हो॥ २॥

भावार्थः-जैसे सूर्य, पृथिवी और अग्नि की महिमा वर्त्तमान है, वैसे जो अग्निविद्या और भूगर्भविद्या को जानता है, वह निरन्तर सुखी हो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

द्यौश्च॑ त्वा पृथि॒वी य॒ज्ञिया॑सो॒ नि होता॑रं सादयन्ते॒ दमा॑य।
यदी॒ विशो॒ मानु॑षीर्दे॒व॒यन्ती॒: प्रय॑स्वती॒रीळ॑ते शु॒क्रम॒र्चिः॥ ३॥

द्यौः। च॒। त्वा॒। पृ॒थि॒वी। य॒ज्ञिया॑सः। नि। होता॑रम्। सा॒द॒य॒न्ते॒। दमा॑य। यदि॑। विशः॑। मानु॑षीः। दे॒व॒ऽय॒न्तीः॑। प्रय॑स्वतीः। ईळ॑ते। शु॒क्रम्। अ॒र्चिः॥ ३॥

पदार्थः-(**द्यौः**) प्रकाशः (**च**) (**त्वा**) त्वाम् (**पृथिवी**) (**यज्ञियासः**) यज्ञस्य सम्पादकाः (**नि**) (**होतारम्**) दातारम् (**सादयन्ते**) स्थापयन्ति (**दमाय**) जितेन्द्रियत्वाय (**यदि**)। अत्र **संहितायामि**ति दीर्घः।

(विशः) प्रजाः **(मानुषीः)** मनुष्याणामिमाः **(देवयन्तीः)** दिव्या गुणा विदुषो वा कामयन्तीः **(प्रयस्वतीः)** प्रयो बहुविधं तर्प्पणं विद्यते यासु ताः **(ईळते)** स्तुवन्ति **(शुक्रम्)** वीर्य्यम् **(अर्चिः)** विद्याप्रकाशम्॥३॥

अन्वयः-हे राजन्! यदि प्रयस्वतीर्देवयन्तीर्मानुषीर्विशो यं त्वा शुक्रमर्चिश्चेडते तं होतारं त्वा दमाय यज्ञियासो निषादयन्ते। द्यौः पृथिवी च प्राप्नोति॥३॥

भावार्थः-यदा राजा राजपुरुषाश्च विद्याविनयेन नीतिभिश्च प्रजाः प्रसादयन्ति जितेन्द्रिया भूत्वा दुर्व्यसनरहिता भवन्ति ते धर्मार्थकाममोक्षान् प्राप्नुवन्ति। अत्र वीर्य्यविद्योन्नतेरुत्तमं कारणं जानन्तु॥३॥

पदार्थः-हे राजन्! **(यदि)** जो **(प्रयस्वतीः)** बहुत प्रकार का जिनमें तर्प्पण तृप्ति विद्यमान वे **(देवयन्तीः)** विद्वानों की कामना करनेवाली **(मानुषीः)** मनुष्य सम्बन्धी **(विशः)** प्रजा जिन **(त्वा)** आप **(शुक्रम्)** आपके पराक्रम और **(अर्चिः)** विद्या के प्रकाश की **(ईडते)** स्तुति करती हैं उन **(होतारम्)** दानशील आपको **(दमाय)** जितेन्द्रिय**[**त्व**]** के लिये **(यज्ञियासः)** यज्ञ की सिद्धि करनेवाले **(नि, सादयन्ते)** निरन्तर स्थापन करते हैं **(द्यौः)** प्रकाश **(च)** और **(पृथिवी)** पृथिवी भी प्राप्त होती हैं॥३॥

भावार्थः-जब राजा और राजपुरुष विद्या, विनय और नीतियों से अपनी प्रजाओं को प्रसन्न करते और जितेन्द्रिय होकर दुष्ट व्यसनों से रहित होते हैं, वे धर्म, अर्थ, काम और मोक्षों को प्राप्त होते हैं। यहाँ वीर्य और विद्या की उन्नति को उत्तम कारण जानो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू॥४॥

महान्। सधऽस्थे। ध्रुवः। आ। निऽसत्तः। अन्तः। द्यावा। माहिने इति। हर्यमाणः। आस्क्रे इति। सपत्नी इति सपत्नी। अजरे इति। अमृक्ते इति। सबर्दुघे इति सबः ऽदुघे। उरुऽगायस्य। धेनू इति॥४॥

पदार्थः-**(महान्)** महत्त्वपरिमाणः **(सधस्थे)** समानस्थाने **(ध्रुवः)** निश्चलः **(आ)** समन्तात् **(निषत्तः)** निषण्णः **(अन्तः)** मध्ये **(द्यावा)** **(माहिने)** महिम्ने **(हर्यमाणः)** कमनीयः **(आस्क्रे)** आक्रमणस्वभावे **(सपत्नी)** सपत्नी इव वर्तमाने **(अजरे)** जीर्णावस्थारहिते **(अमृक्ते)** विकारावस्थयाऽशुद्धे **(सबर्दुघे)** समानस्वीकरणप्रपूरिके **(उरुगायस्य)** बहुभिः स्तुतस्य **(धेनू)** धेनुवत्पालिके॥४॥

अन्वयः-यो महान्त्सधस्थे ध्रुवो माहिने हर्यमाणो द्यावापृथिव्योऽन्तरानिषत्तोऽग्निरास्क्रे अजरे अमृक्ते सबर्दुघे उरुगायस्य सपत्नी धेनूइव वर्त्तमाने व्याप्नोति स सर्वैर्वेदितव्यः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। योऽयं सूर्यलोको दृश्यते स सर्वेभ्यो महान् स्वपरिधौ निवसन् सर्वान् भूगोलान् प्रकाशयति यस्मादहोरात्रे सम्भवतस्तं विजानीत॥४॥

पदार्थः-जो **(महान्)** बड़े परिमाणवाला **(सधस्थे)** समानस्थान में **(ध्रुवः)** निश्चल **(माहिने)** महत्त्व के लिये **(हर्यमाणः)** कामना करता हुआ **(द्यावा)** आकाश और पृथिवी के **(अन्तः)** बीच में **(आ, निषत्तः)** निरन्तर स्थिर अग्नि **(आस्क्रे)** जिनका आक्रमण करना अर्थात् अनुक्रम से चलना स्वभाव **(अजरे)** जो जीर्ण अवस्थारहित **(अमृक्ते)** विकार अवस्था से अशुद्ध **(सबर्दुघे)** एक से स्वीकार को अच्छे प्रकार पूरे करनेवाली **(उरुगायस्य)** बहुतों से जो स्तुति को प्राप्त हुआ उसकी **(सपत्नी)** सपत्नी के समान वर्त्तमान वा **(धेनू)** दो गौओं के समान पालन करनेवाली हैं, उनको व्याप्त होता है, वह सबको जानने योग्य है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वह सूर्यलोक दीख पड़ता है, वह सब से बड़ा और अपनी परिधि में निरन्तर वसता हुआ सब भूगोलों को प्रकाशित करता है, जिससे कि दिन-रात्रि होते हैं, उसको जानो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम्॥५॥२६॥

व्रता। ते। अग्ने। महतः। महानि। तव। क्रत्वा। रोदसी इति। आ। ततन्थ। त्वम्। दूतः। अभवः। जायमानः। त्वम्। नेता। वृषभ। चर्षणीनाम्॥५॥

पदार्थः-**(व्रता)** व्रतानि शीलानि **(ते)** तव **(अग्ने)** विद्वन् **(महतः)** **(महानि)** महान्ति **(तव)** **(क्रत्वा)** प्रज्ञया कर्मणा वा **(रोदसी)** द्यावापृथिव्यौ **(आ)** **(ततन्थ)** विस्तारयति **(त्वम्)** **(दूतः)** **(अभवः)** भवेः **(जायमानः)** प्रसिद्धः **(त्वम्)** **(नेता)** नायकः **(वृषभ)** वर्षक **(चर्षणीनाम्)** मनुष्याणाम्॥५॥

अन्वयः-हे वृषभाग्ने! यथा सूर्यो विद्युद्वा रोदसी आ ततन्थ दूतो भवति तथा त्वमभवो यस्य महतस्ते महानि व्रता तव क्रत्वा भवन्ति स त्वं चर्षणीनां दूतोऽभवो जायमानस्त्वं नेताऽभवः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाग्नेर्महान्तो गुणकर्मस्वभावास्सन्ति तथा यो मनुष्यो भवेत् स एव राजदूतो मनुष्याणां नायकश्च स्यात्॥५॥

पदार्थः-हे **(वृषभ)** वर्षा करानेवाले **(अग्ने)** विद्वान् जन! जैसे सूर्य्य वा बिजुली **(रोदसी)** आकाश और पृथिवी को **(आ, ततन्थ)** विस्तारता और **(दूतः)** दूत होता है, वैसे **(त्वम्)** आप **(अभवः)** हूजिये, जिन **(महतः)** महान् **(ते)** आपके **(महानि)** बड़े-बड़े **(व्रता)** शील **(तव)** आपके **(क्रत्वा)** उत्तम बुद्धि वा कर्म से प्रसिद्ध होते हैं सो **(त्वम्)** आप **(चर्षणीनाम्)** मनुष्यों के दूत हूजिये तथा **(जायमानः)** प्रसिद्ध होते हुए आप **(नेता)** अग्रगन्ता सभों में श्रेष्ठ हूजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि के महान् गुण, कर्म, स्वभाव हैं, वैसे गुण-कर्म-स्वभाववाला जो मनुष्य हो, वही राजदूत और मनुष्यों का नायक भी हो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒तस्य॑ वा के॒शिना॑ यो॒ग्याभि॑र्घृ॒तस्नु॑वा॒ रोहि॑ता धु॒रि धि॑ष्व।
अथा व॑ह दे॒वान् दे॑व॒ विश्वा॑न्त्स्वध्व॒रा कृ॑णुहि जातवेदः॥६॥

ऋ॒तस्य॑। वा॒। के॒शिना॑। यो॒ग्याऽभिः॑। घृ॒तऽस्नुवा॑। रोहि॑ता। धु॒रि। धि॒ष्व॒। अथ॑। आ। व॒ह॒। दे॒वान्। दे॒व॒। विश्वा॑न्। सु॒ऽअ॒ध्व॒रा। कृ॒णु॒हि॒। जा॒त॒ऽवे॒दः॥६॥

पदार्थः-(**ऋतस्य**) जलस्य (**वा**) (**केशिना**) बहवः केशाः किरणा विद्यन्ते ययोस्तौ (**योग्याभिः**) पृथिवीभिः (**घृतस्नुवा**) यौ घृतमुदकं स्नुतः स्रावयतस्तौ (**रोहिता**) रत्नगुणविशिष्टावश्वौ (**धुरि**) (**धिष्व**) धेहि (**अथ**) (**आ**) (**वह**) प्रापय (**देवान्**) दिव्यान् गुणान् (**देव**) दातः (**विश्वान्**) अखिलान् (**स्वध्वरा**) सुष्ठु अध्वरो यज्ञो याभ्यान्तौ (**कृणुहि**) कुरु (**जातवेदः**) यो जातान् वेत्ति तत्सम्बुद्धौ॥६॥

अन्वयः-हे जातवेदो देव! त्वं धुरि ऋतस्य योग्याभिः केशिना घृतस्नुवा रोहिता धुरि धिष्व वा स्वध्वरा तान् कृणुहि। अथ विश्वान् देवानावह॥६॥

भावार्थः-हे मनुष्या! यथेश्वरेण सूर्यविद्युतौ सर्वस्य गमकौ ब्रह्माण्डे धृतौ तथा यूयमश्वादिकं धरत, अनेनाखिलान् गुणान् स्वीकुरुत॥६॥

पदार्थः-हे (**जातवेदः**) जो उत्पन्न हुए पदार्थों को जानता है वह हे (**देव**) दान देनेवाले विद्वान्! आप (**धुरि**) धुरे पर (**ऋतस्य**) जल के (**योग्याभिः**) योग्य पृथिवियों से (**केशिना**) जिनमें बहुतसी किरणें विद्यमान वा (**घृतस्नुवा**) जो जल को चुआते (**रोहिता**) उन रत्न गुणवाले अश्वों को धुरे में (**धिष्व**) धरो लगाओ (**वा**) वा (**स्वध्वरा**) जिनसे सुन्दर यज्ञ होता उनको (**कृणुहि**) अच्छे प्रकार सिद्ध करो (**अथ**) इसके अनन्तर (**विश्वान्**) समस्त (**देवान्**) दिव्य गुणों को (**आ, वह**) प्राप्त करो॥६॥

भावार्थः-हे मनुष्यो! जैसे ईश्वर ने सूर्य और बिजुली सबके चलानेवाले ब्रह्माण्ड में धरे स्थापन किये, वैसे तुम लोग अश्वादिकों को धारण करो और इस काम से समस्त गुणों का स्वीकार करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दि॒वश्चि॒दा ते॑ रुचयन्त रो॒का उ॒षो वि॑भा॒तीरनु॑ भासि पू॒र्वीः।
अ॒पो यदग्न उ॒शध॒ग्वनी॑षु होतु॒र्मन्द्र॑स्य॒ प॒नय॑न्त दे॒वाः॥७॥

दिवः। चित्। आ। ते। रुचयन्त। रोकाः। उषः। विऽभातीः। अनु। भासि। पूर्वीः। अपः। यत्। अग्ने। उशधक्। वनेषु। होतुः। मन्द्रस्य। पनयन्त। देवाः॥७॥

पदार्थः-(**दिवः**) प्रकाशात् (**चित्**) इव (**आ**) (**ते**) तव (**रुचयन्त**) रुचिमाचक्षते (**रोकाः**) रुचिकराः प्रकाशाः (**उषः**) उषसः (**विभातीः**) विशेषेण प्रकाशयन्तीः (**अनु**) (**भासि**) प्रकाशयसि (**पूर्वीः**) प्राचीनाः (**अपः**) जलानि (**यत्**) यः (**अग्ने**) विद्वन् (**उशधक्**) उशः कमनीयान् दहति येन सः (**वनेषु**) जङ्गलेषु (**होतुः**) दातुः (**मन्द्रस्य**) आनन्दप्रदस्य (**पनयन्त**) प्रशंसत (**देवाः**) विद्वांसः॥७॥

अन्वयः-हे अग्ने विद्वन्! दिवश्चित्ते रोका आ रुचयन्त यथा सूर्यः पूर्वीर्विभातीरुषः प्रकाशयत्यपो वर्षयति तथा यद्यस्त्वं विद्यामनुभासि तस्य मन्द्रस्य तव होतुर्गुणान् यथा वनेषूशधगग्निर्वर्त्तते तथा देवाः पनयन्त॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्य्यवत् प्रकाशका दुष्टानां दग्धारः श्रेष्ठानां स्तावका भवन्ति ते विद्युद्वत्कार्यसाधका भवन्ति॥७॥

पदार्थः-हे (**अग्ने**) विद्वान्! (**दिवः**) प्रकाश से लेकर (**चित्**) ही (**ते**) आपके (**रोका**) रुचि करनेवाले प्रकाश (**आ, रुचयन्त**) अच्छे प्रकार रुचते हैं, जैसे सूर्य (**पूर्वीः**) प्राचीन (**विभातीः**) और विशेषता से प्रकाश होती हुई (**उषः**) प्रभात वेलाओं को प्रकाशित करता वा (**अपः**) जलों को वर्षाता है (**यत्**) जो आप विद्या के (**अनुभासि**) अनुकूलता से प्रकाशित होते हो उन (**मन्द्रस्य**) आनन्द देनेवाले (**होतुः**) दानशील (**तव**) आपके गुणों के जैसे (**वनेषु**) जङ्गलों में (**उशधक्**) पदार्थों को जिससे जलाता वह अग्नि वर्त्तमान हैं, वैसे (**देवाः**) विद्वान् जन (**पनयन्त**) प्रशंसित करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य के समान प्रकाश कराने, दुष्टों को जलाने और श्रेष्ठों की स्तुति प्रशंसा करनेवाले होते हैं, वे बिजुली के समान कार्य के सिद्ध करनेवाले होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः॥८॥

उरौ। वा। ये। अन्तरिक्षे। मदन्ति। दिवः। वा। ये। रोचने। सन्ति। देवाः। ऊमाः। वा। ये। सुऽहवासः। यजत्राः। आऽयेमिरे। रथ्यः। अग्ने। अश्वाः॥८॥

पदार्थः-(**उरौ**) पुष्कले (**वा**) (**ये**) (**अन्तरिक्षे**) आकाशे (**मदन्ति**) हर्षन्ति (**दिवः**) प्रकाशः (**वा**) (**ये**) (**रोचने**) प्रकाशे (**सन्ति**) (**देवाः**) दिव्याः (**ऊमाः**) कमनीयाः (**वा**) (**ये**) (**सुहवासः**) सुष्ठ्वादातारः

(यजत्राः) सङ्गताः **(आयेमिरे)** विस्तृणन्ति **(रथ्यः)** रथाय हिताः **(अग्ने)** पावकस्य[३] **(अश्वाः)** व्याप्तिशीलाः किरणाः। **अश्व इति किरणानामसु पठितम्।**[४] (निघं०१.५)॥८॥

अन्वयः–हे अग्ने! पावक इव तेजस्विन्! ये ऊमा वा ये सुहवासो वा ये यजत्रा रथ्योऽश्वाः वा ये रोचने देवा अश्वाः सन्ति त उरावन्तरिक्षे दिव आयेमिरे तान् ये विदन्ति ते सदा मदन्ति॥८॥

भावार्थः–हे मनुष्या! यूयं प्रसिद्धाऽप्रसिद्धरूपस्याग्नेर्ये किरणा गुणाश्च सर्वेषां प्रकाशका यानेभ्यो हिता आकर्षकास्सन्ति तान् विदित्वा सर्वेषां प्राणिनां रक्षका भवत॥८॥

पदार्थः–हे **(अग्ने)** अग्नि के तुल्य तेजस्वि विद्वन्! जो **(ऊमाः)** मनोहर **(वा)** वा **(ये)** जो **(सुहवासः)** सुन्दर ग्रहण करनेवाली **(वा)** वा **(ये)** जो **(यजत्राः)** सङ्गम को प्राप्त **(रथ्यः)** रथ के लिये हितरूप **(अश्वाः)** और व्याप्ति रखनेवाली किरणें **(वा)** वा **(ये)** जो **(रोचने)** प्रकाश में **(देवाः)** दिव्य किरणें **(सन्ति)** विद्यमान हैं, वे **(उरौ)** पुष्कल **(अन्तरिक्षे)** आकाश में **(दिवः)** प्रकाश से **(आयेमिरे)** विथरती हैं, उनको जो जानते हैं, वे सर्वदा **(मदन्ति)** हर्षित होते हैं॥८॥

भावार्थः–हे मनुष्यो! तुम प्रसिद्ध और अप्रसिद्ध रूप को जो कि **[**अग्नि की**]** किरणें और गुण सबके प्रकाश करनेवाले रथादिकों के लिये हितरूप और आकर्षणशक्ति युक्त हैं, उनको जान कर सब प्राणियों की रक्षा करनेवाले होओ॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व॥९॥

आ। एभिः। अग्ने। सऽरथम्। याहि। अर्वाङ्। नानाऽरथम्। वा। विऽभवः। हि। अश्वाः। पत्नीऽवतः। त्रिंशतम्। त्रीन्। च। देवान्। अनुऽस्वधम्। आ। वह। मादयस्व॥९॥

पदार्थः–**(आ)** समन्तात् **(एभिः)** **(अग्ने)** अग्निवज्ज्ञानेन प्रकाशमय **(सरथम्)** रथैः सह वर्त्तमानम् **(याहि)** **(अर्वाङ्)** योऽवस्तादञ्चत्यधो गच्छति सः **(नानारथम्)** नाना रथा यस्मिँस्तम् **(वा)** **(विभवः)** व्यापकाः **(हि)** खलु **(अश्वाः)** किरणाः **(पत्नीवतः)** प्रशस्ताः पत्न्यो विद्यन्ते येषान्तान्

---

३. पावक इव-सं.॥

४. अश्व इति पदनाम०॥ (निघं० ५.३-सं०॥)

(त्रिंशतम्) (त्रीन्) (च) (देवान्) पृथिव्यादीन् **(अनुष्वधम्)** अन्वन्नम् **(आ) (वह) (मादयस्व)** आनन्दय॥९॥

अन्वयः-हे अग्ने! येऽग्नेर्विभवोऽश्वा नानारथं वा त्रीन् त्रिंशतं च पत्नीवतो देवाननुष्वधमावहन्ति य एभिस्त्वमर्वाङ्ङूर्ध्वं सरथमा याह्यस्माना वह मादयस्व च॥९॥

भावार्थः-यथाऽग्निस्त्रयस्त्रिंशतः पृथिव्यादीन् दिव्यगुणान् पदार्थान् धरति तत्र व्यापको भूत्वा स्वसरूपान् करोति तथा विद्वांसो विज्ञानेन सर्वान् विज्ञायान्यान् प्रत्युपदिश्यानन्दन्ति॥९॥

पदार्थः-हे **(अग्ने)** अग्नि के समान ज्ञान से प्रकाशमय जो अग्नि की **(विभवः)** व्यापक **(अश्वाः)** किरणें **(नानारथम्)** जिनमें अनेक रथ विद्यमान उसे **(वा)** वा **(त्रीन्)** तीन **(त्रिंशतम्, च)** और तीस **(पत्नीवतः)** प्रशस्त पत्नियोंवाले **(देवान्)** पृथिवी आदि लोकों को **(अनुष्वधम्)** अन्न के अनुकूल पहुँचाती हैं, **(एभिः)** इससे आप **(अर्वाङ्)** जो नीचे को प्राप्त होता वा ऊपर को पहुँचता है, उस **(सरथम्)** रथों के सहित वर्त्तमान मार्ग को **(आ, याहि)** आओ प्राप्त होओ और हम लोगों को **(आ, वह)** प्राप्त कीजिये तथा **(मादयस्व)** हर्षित कीजिये॥९॥

भावार्थः-जैसे अग्नि, तैंतीस पृथिवी आदि दिव्य गुणी पदार्थों को धारण करता और वहाँ व्यापक होकर अपने रूप कर देता है, वैसे विद्वान् जन विज्ञान से सबको जानकर तथा औरों के प्रति उपदेश कर आनन्द देते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स होता॒ यस्य॒ रोद॑सी चिदु॒र्वी य॒ज्ञंय॑ज्ञम॒भि वृ॒धे गृ॑णी॒तः।
प्राची॑ अध्व॒रेव॑ तस्थतुः सु॒मेके॑ ऋ॒तावं॑री ऋ॒तजा॑तस्य स॒त्ये॥१०॥

सः। होता॑। यस्य॑। रोद॑सी॒ इति॑। चि॒त्। उ॒र्वी इति॑। यज्ञं॑ऽयज्ञम्। अ॒भि। वृ॒धे। गृ॒णी॒तः। प्राची॒ इति॑। अ॒ध्व॒राऽइ॑व। त॒स्थ॒तुः॒। सु॒मेके॒ इति॑ सु॒ऽमेके॑। ऋ॒तावं॑री॒ इत्यृ॒तऽवं॑री। ऋ॒तऽजा॑तस्य। स॒त्ये इति॑॥१०॥

पदार्थः-**(सः)** **(होता)** आदाता धर्ता **(यस्य)** **(रोदसी)** द्यावापृथिव्यौ **(चित्)** **(उर्वी)** बहुस्वरूपे **(यज्ञंयज्ञम्)** प्रतिव्यवहारम् **(अभि)** आभिमुख्ये **(वृधे)** वृद्धये **(गृणीतः)** शब्दयतः **(प्राची)** प्राक्तने **(अध्वरेव)** अहिंसनीयौ यज्ञाविव **(तस्थतुः)** तिष्ठतः **(सुमेके)** सुष्ठुप्रक्षिप्ते **(ऋतावरी)** बहूनृतादीन्युदकानि विद्यन्ते ययोस्ते **(ऋतजातस्य)** ऋतात् सत्यात् कारणाज्जातस्य जगतो मध्ये **(सत्ये)** सत्सु साध्व्यौ हिते कारणरूपेण नित्ये वा॥१०॥

अन्वयः-यस्याग्नेः सम्बन्धे उर्वी अध्वरेव प्राची सुमेके ऋतावरी ऋतजातस्य सत्ये रोदसी वृधे यज्ञंयज्ञमभि गृणीतश्चित् तस्थतुः स होताग्निः सर्वैर्वेदितव्यः॥१०॥

भावार्थः-यदि भूमिसूर्य्यौ नोदेत्स्यतां तर्हि कञ्चिदपि व्यवहारं साद्धुं कोऽपि नार्हिष्यत् नापि कस्यापि वृद्धिरभविष्यत्॥१०॥

पदार्थः-(**यस्य**) जिन अग्नि के सम्बन्ध में (**उर्वी**) बहुस्वरूपवाले (**अध्वरेव**) न नष्ट करने योग्य यज्ञों के समान (**प्राची**) प्राक्तन (**सुमेके**) अच्छे प्रकार प्रक्षेप किये हुए (**ऋतावरी**) जिनमें बहुत उदक जल विद्यमान (**ऋतजातस्य**) सत्य कारण से उत्पन्न हुए संसार के बीच (**सत्ये**) विद्यमान पदार्थों में हित या कारण रूप से नित्य (**रोदसी**) जो आकाश और पृथिवी (**वृधे**) वृद्धि के लिये (**यज्ञंयज्ञम्**) प्रति व्यवहार को (**अभि, गृणीतः**) सम्मुख कहते (**चित्**) ही (**तस्थतुः**) स्थित होते हैं (**सः**) वह (**होता**) ग्रहणकर्त्ता वा सर्व पदार्थों को धारणकर्त्ता अग्नि सबको जानने योग्य है॥१०॥

भावार्थः-यदि भूमि सूर्य्य उदय को न प्राप्त हों तो किसी व्यवहार के सिद्ध करने को कोई योग्य न हो और न किसी की वृद्धि हो॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळा॑मग्ने पुरु॒दंस॑ꣳ सु॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध।
स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे॥११॥२७॥

इळा॑म्। अ॒ग्ने॒। पु॒रु॒ऽदंस॑म्। सु॒निम्। गोः। श॒श्व॒त्ऽत॒मम्। हव॑मानाय। सा॒ध॒। स्यात्। नः॒। सू॒नुः। तन॑यः। वि॒जाऽवा॑। अग्ने॑। सा। ते॒। सु॒ऽम॒तिः। भू॒तु॒। अ॒स्मे इति॑॥११॥

पदार्थः-(**इळाम्**) स्तोतुमर्हां भूमिम् (**अग्ने**) विद्वन् (**पुरुदंसम्**) बहुकर्मयुक्तम् (**सनिम्**) विभक्तम् (**गोः**) पृथिव्याः (**शश्वत्तमम्**) अतिशयेनानादिभूतं स्वरूपम् (**हवमानाय**) स्पर्द्धमानाय (**साध**) साध्नुहि (**स्यात्**) (**नः**) अस्माकम् (**सूनुः**) (**तनयः**) (**विजावा**) (**अग्ने**) (**सा**) (**ते**) तव (**सुमतिः**) (**भूतु**) (**अस्मे**) अस्मासु॥११॥

अन्वयः-हे अग्ने! त्वं हवमानाय गोः शश्वत्तमं पुरुदंसं सनिमिळां च साध यतो नो विजावा सूनुस्तनयः स्यात्। हे अग्ने! या ते सुमतिर्वर्त्तते साऽस्मे भूतु॥११॥

भावार्थः-यदि मनुष्या अग्नेः पृथिव्यादेश्च स्वरूपं विज्ञाय कार्य्येषु संप्रयुञ्जीरंस्तर्हि तेषु पुत्रपौत्रधनधान्यविद्यैश्वर्य्यं प्रभूतं भवेदिति॥११॥

अत्र विद्वदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

पदार्थः-हे (**अग्ने**) विद्वान्! आप (**हवमानाय**) स्पर्द्धा करते हुए के लिये (**गोः**) पृथिवी के (**शश्वत्तमम्**) अतीव अनादि स्वरूप को (**पुरुदंसम्**) जो कि बहुत कर्मों से युक्त है, उस (**सनिम्**) विभागयुक्त को तथा (**इळाम्**) प्रशस्त भूमि को (**साध**) सिद्ध करो जिससे (**नः**) हमारा (**विजावा**) विशेष

गतिवाला वा विशेष ज्ञानवाला वा विशेष प्रतिज्ञावाला **(सूनुः)** उत्पन्न **(तनयः)** पुत्र हो। हे **(अग्ने)** विद्वान्! जो **(ते)** आपकी **(सुमतिः)** सुन्दर श्रेष्ठ मति है **(सा)** वह **(अस्मे)** हम लोगों में **(भूतु)** हो॥११॥

भावार्थः-यदि मनुष्य अग्नि और पृथिवी आदि के स्वरूप को जान कर अच्छे प्रकार कार्यों में प्रयुक्त करें तो उनमें पुत्र, पौत्र, धन, धान्य, विद्या और ऐश्वर्य प्रभूत हो॥११॥

इस सूक्त में विद्वान् और अग्नि का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जानना चाहिये॥

यह तृतीय मण्डल में छठवां सूक्त सत्ताईसवां वर्ग, द्वितीय अष्टक में आठवां अध्याय और द्वितीय अष्टक समाप्त हुआ॥

इति श्रीपरमहंसपरिव्राजकाचार्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीपरमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्यभाषाभ्यां सुभूषिते सुप्रमाणयुक्ते ऋग्वेदभाष्ये द्वितीयाष्टकेऽष्टमोऽध्यायो द्वितीयमष्टकं च समाप्तम्॥

॥ओ३म्॥

अथ ऋग्वेदे तृतीयाष्टकारम्भः॥

ओं विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व। ऋ० ५.८२.५॥

अथैकादशर्चस्य सप्तमस्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता॥ १, ६, ९, १० त्रिष्टुप्। २-५, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ८ स्वराट् पङ्क्तिः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्युद्गुणवर्णनमाह॥

अब तीसरे अष्टक का आरम्भ है। उसके प्रथम अध्याय के पहिले सूक्त के प्रथम मन्त्र में विद्युत् अग्नि के गुणों का वर्णन किया है॥

प्र य आ॒रुः शि॑ति॒पृ॒ष्ठस्य॑ धा॒सेरा मा॒तरा॑ विविशुः सप्त वाणीः।
प॒रि॒क्षिता॑ पि॒तरा॒ सं च॑रेते॒ प्र सस्रा॑ते दी॒र्घमायुः॒ प्रय॑क्षे॥ १॥

प्र। ये। आ॒रुः। शि॒ति॒ऽपृ॒ष्ठस्य॑। धा॒सेः। आ। मा॒तरा॑। वि॒ऽवि॒शुः। स॒प्त। वाणीः॑। प॒रि॒ऽक्षिता॑। पि॒तरा॑। सम्। च॒रे॒ते॒ इति॑। प्र। सस्रा॑ते इति॑। दी॒र्घम्। आयुः॑। प्रऽयक्षे॑॥ १॥

पदार्थः-(**प्र**) (**ये**) (**आरुः**) गच्छेयुः (**शितिपृष्ठस्य**) शितिः पृष्ठं प्रश्नो यस्य तस्य (**धासेः**) धारकस्य (**आ**) (**मातरा**) जलाग्नी (**विविशुः**) प्रविशेयुः (**सप्त**) (**वाणीः**) सप्तद्वारावकीर्णा वाचः (**परिक्षिता**) सर्वतो निवसन्तौ (**पितरा**) पालकौ (**सम्**) (**चरेते**) (**प्र**) (**सस्राते**) प्रसरतः प्राप्नुतः (**दीर्घम्**) (**आयुः**) जीवनम् (**प्रयक्षे**) प्रकर्षेण यष्टुम्॥ १॥

अन्वयः-ये शितिपृष्ठस्य धासेर्वह्नेः परिक्षिता पितरा मातरा प्रारुर्यौ सञ्चरेते प्रसस्राते ते दीर्घमायुः प्रयक्षे सप्त वाणीरा विविशुः॥ १॥

भावार्थः-यदि शरीरे विद्युद्वह्निः प्रसृतो न स्यात्तर्हि वाक् किञ्चिदपि न प्रचलेत्। तं ये ब्रह्मचर्यादिषु कर्मभिर्यथावत्सेवन्ते ते दीर्घमायुः प्राप्नुवन्ति॥ १॥

पदार्थः-(**ये**) जो लोग (**शितिपृष्ठस्य**) जिसका पूंछना सूक्ष्म है (**धासेः**) उस धारण करनेवाले विद्युत् अग्नि के सम्बन्धी (**परिक्षिता**) सब ओर से निवास करते हुए (**पितरा**) पालक (**मातरा**) जल और अग्नि को (**प्र, आरुः**) प्राप्त होवें। जो जल अग्नि दोनों को (**सम्, चरेते**) सम्यक् विचरते हैं तथा (**प्र, सस्राते**) विस्तारपूर्वक प्राप्त होते हैं, वे (**दीर्घम्**) बड़ी (**आयुः**) अवस्था को और (**प्रयक्षे**) अच्छे प्रकार यज्ञ करने के लिये (**सप्त**) सात (**वाणीः**) द्वारों में फैली वाणियों को (**आ, विविशुः**) प्रवेश करें, सब प्रकार जानें॥ १॥

भावार्थः-जो शरीर में विद्युत् रूप अग्नि फैला न हो तो वाणी कुछ भी न चले। उस विद्युत् अग्नि का जो ब्रह्मचर्यादि उत्तम कर्मों में यथावत् सेवन करते हैं, वे बड़ी अवस्था को प्राप्त होते हैं॥१॥

मनुष्यैः कीदृशी वाक् सेव्येत्याह॥

मनुष्यों को कैसी वाणी का सेवन करना चाहिए, इस विषय को अगले मन्त्र में कहा है॥

दि॒वक्ष॑सो धे॒नवो॒ वृष्णो॒ अश्वा॑ दे॒वीरा त॑स्थौ॒ मधु॑म॒द्वह॑न्तीः।
ऋ॒तस्य॑ त्वा॒ सद॑सि क्षेम॒यन्तं॒ पर्येका॑ चरति॒ वर्त॑निं॒ गौः॥२॥

दि॒वक्ष॑सः। धे॒नवः॑। वृष्णः॑। अश्वाः॑। दे॒वीः। आ। त॒स्थौ॒। मधु॑ऽमत्। वह॑न्तीः। ऋ॒तस्य॑। त्वा॒। सद॑सि। क्षे॒म॒ऽयन्त॑म्। परि॑। एका॑। च॒र॒ति॒। वर्त॑निम्। गौः॥२॥

पदार्थः-(**दिवक्षसः**) दीप्तिं प्राप्य व्याप्ताः (**धेनवः**) वाचः (**वृष्णः**) बलिष्ठस्य (**अश्वाः**) आशुगामिनस्तुरङ्गा इव (**देवीः**) दिव्यस्वरूपाः (**आ**) (**तस्थौ**) समन्तात् तिष्ठति (**मधुमत्**) मधुराणि विज्ञानानि वर्त्तन्ते यस्मिँस्तत् (**वहन्तीः**) सुखं प्रापयन्त्यः (**ऋतस्य**) सत्यस्य (**त्वा**) त्वाम् (**सदसि**) सभायाम् (**क्षेमयन्तम्**) रक्षयन्तम् (**परि**) सर्वतः (**एका**) असहाया (**चरति**) गच्छति (**वर्त्तनिम्**) वर्त्तन्ते यस्मिँस्तं मार्गम् (**गौः**) या गच्छति सा भूमिः॥२॥

अन्वयः-हे विद्वन्! या ऋतस्य सदसि दिवक्षसो वृष्णोऽश्वा देवीर्मधुमद्वहन्तीर्धेनवो वाचः क्षेमयन्तं त्वैका गौर्वर्त्तनिं परि चरती वाऽऽतस्थौ तास्त्वं यथावद्विजानीहि॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽसहाया पृथिवी स्वकक्षामार्गं नित्यं चलति, तथैव सभ्यजनानां वाचो नियमेन मिथ्याभाषणं विहाय सत्यमार्गे गच्छन्ति, य ईदृशीं वाणीं सेवन्ते न तेषां किञ्चिदकुशलं जायते॥२॥

पदार्थः-हे विद्वान् पुरुष! जो (**ऋतस्य**) सत्य की (**सदसि**) सभा में (**दिवक्षसः**) प्रकाश को प्राप्त हो व्याप्त हुई (**वृष्णः**) बलिष्ठ पुरुष के (**अश्वाः**) शीघ्रगामी घोड़ों के समान (**देवीः**) दिव्य स्वरूप (**मधुमत्**) कोमल विज्ञानवाले उस सुख को (**वहन्तीः**) प्राप्त कराती हुई (**धेनवः**) वाणी (**क्षेमयन्तम्**) रक्षा करते हुए (**त्वा**) आपको (**एका**) एक (**गौः**) अपनी कक्षा में चलनेवाली भूमि (**वर्त्तनिम्**) मार्ग को (**परि, चरति**) सब ओर से चलती हुई सी (**आ, तस्थौ**) स्थित होती, उन वाणियों को आप यथावत् जानो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे असहाय पृथिवी अपने कक्षा मार्ग में नित्य चलती है, वैसे ही सभ्य जनों की वाणी नियम से मिथ्याभाषण को छोड़ सत्य मार्ग में चलती हैं। जो ऐसी वाणी का सेवन करते हैं, उनकी कुछ भी हानि नहीं होती॥२॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहा है॥

आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान् रयिविद्रयीणाम्।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत् पुरुधप्रतीकः॥ ३॥

आ। सीम्। अरोहत्। सुऽयमाः। भवन्तीः। पतिः। चिकित्वान्। रयिऽवित्। रयीणाम्। प्र। नीलऽपृष्ठः। अतसस्य। धासेः। ताः। अवासयत्। पुरुधऽप्रतीकः॥ ३॥

पदार्थः-(**आ**) (**सीम्**) आदित्यः (**अरोहत्**) रोहति (**सुयमाः**) (**भवन्तीः**) वर्त्तमानाः (**पतिः**) स्वामी (**चिकित्वान्**) ज्ञानवान् (**रयिवित्**) द्रव्यवेत्ता (**रयीणाम्**) धनानाम् (**प्र**) (**नीलपृष्ठः**) नीलो वर्णः पृष्ठे यस्य सः (**अतसस्य**) व्याप्तस्य (**धासेः**) पोषकस्य (**ताः**) (**अवासयत्**) वासयेत् (**पुरुधप्रतीकः**) पुरून् बहून् दधाति येन तत् पुरुधं पुरुधं प्रतीतिकरं कर्म यस्य सः॥ ३॥

अन्वयः-हे विद्वन्! चिकित्वान् रयिविद्रयीणां पतिस्त्वं यथा पुरुधप्रतीको नीलपृष्ठः सीमादित्योऽतसस्य धासेर्या भवन्तीः सुयमाः प्रा वासयदरोहच्च तथा ताः सुयमाः प्रजा आवासय॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यः सर्वाः प्रजा उत्थाप्य वासयति तथैव राजा स्वकीयाः सुशिक्षिता रक्षिताः प्रजा भूगोलस्थेषु देशेषु वासयित्वा धनाढ्याः प्रकुर्यात्॥ ३॥

पदार्थः-हे विद्वन्! (**चिकित्वान्**) ज्ञानी (**रयिवित्**) द्रव्यवेत्ता (**रयीणाम्**) धनों के (**पतिः**) स्वामी! आप जैसे (**पुरुधप्रतीकः**) अनेकों के पोषण के वा धारण के हेतु प्रतीतिकारी कर्मवाला (**नीलपृष्ठः**) जिसके पिछले भाग में नीलवर्ण है ऐसा (**सीम्**) सूर्य्यमण्डल (**अतसस्य**) व्याप्त बुद्धि (**धासेः**) पोषण करनेवाले राजा की जो (**भवन्तीः**) वर्त्तमान (**सुयमाः**) सुन्दर नियमवाली प्रजाओं को (**प्र, आ, अवासयत्**) अच्छे प्रकार वास कराता और (**अरोहत्**) अपने काम में आरूढ़ होता है, वैसे (**ताः**) उन सुन्दर नियमयुक्त प्रजाओं को अच्छे प्रकार वास कराइये॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य सब प्रजाओं को उठा के अच्छे प्रकार वास कराता है, वैसे ही राजा सुशिक्षित रक्षा की हुई प्रजाओं को भूगोल के सब देशो में वसा के धनाढ्य करे॥ ३॥

पुनर्मनुष्यैः किं कार्य्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति।
व्यङ्गेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश॥ ४॥

महि। त्वाष्ट्रम्। ऊर्जयन्तीः। अजुर्यम्। स्तभुऽयमानम्। वहतः। वहन्ति। वि। अङ्गेभिः। दिद्युतानः। सधऽस्थे। एकाम्ऽइव। रोदसी इति। आ। विवेश॥ ४॥

पदार्थः-(**महि**) महत् (**त्वाष्ट्रम्**) त्वष्टुः सूर्य्यस्येदं तेजः (**ऊर्जयन्तीः**) बलयन्त्यः (**अजुर्यम्**) जीर्णावस्थारहितम् (**स्तभूयमानम्**) लोकानां धारकम् (**वहतः**) वहनशीलः (**वहन्ति**) (**वि**) (**अङ्गेभिः**) विविधाङ्गैः (**दिद्युतानः**) देदीप्यमानः (**सधस्थे**) समानस्थाने (**एकामिव**) स्वकीयां स्त्रियमिव (**रोदसी**) द्यावापृथिव्यौ (**आ**) (**विवेश**) आविशति॥४॥

अन्वयः-हे मनुष्या! यस्य सूर्यस्याजुर्य्यं महि स्तभूयमानं त्वाष्ट्रमूर्जयन्तीर्वहतो व्यङ्गेभिर्वहन्ति यो दिद्युतानः सन्नग्निः पतिः सधस्थ एकामिव रोदसी आ विवेश तं विद्युदग्निकार्य्यसिद्धये संप्रयुङ्ग्ध्वम्॥४॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैः सर्वत्राभिव्याप्तस्य विद्युत्स्वरूपस्याग्नेर्गुणकर्मस्वभावान् विज्ञाय कार्यसिद्धिः सम्पादनीया॥४॥

पदार्थः-हे मनुष्यो! जिस सूर्य के (**अजुर्यम्**) जीर्ण अवस्था से रहित (**महि**) बड़े (**स्तभूयमानम्**) लोकों के धारक (**त्वाष्ट्रम्**) तेज को (**ऊर्जयन्तीः**) बल देती हुई शक्तियों को यथा स्थान (**वहतः**) पहुँचानेवाले किरण (**व्यङ्गेभिः**) विविध प्रकार के अङ्गों से (**वहन्ति**) पहुँचाते हैं। जो (**दिद्युतानः**) देदीप्यमान हुआ अग्नि जैसे पति (**सधस्थे**) एक स्थान में (**एकामिव**) एक अपनी स्त्री का सङ्ग करता है, वैसे (**रोदसी**) आकाश-भूमि को (**आ, विवेश**) आवेश करता है, उस विद्युत् रूप अग्नि को कार्य्यसिद्धि के लिये संप्रयुक्त करो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि सर्वत्र अभिव्याप्त विद्युत्स्वरूप अग्नि के गुण, कर्म, स्वभावों को जान के कार्य्यसिद्धि करें॥४॥

अथ के महात्मानो भवन्तीत्याह॥

अब कौन महात्मा होते हैं, इस विषय को अगले मन्त्र में कहा है॥

जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः॥५॥१॥

जानन्ति। वृष्णः। अरुषस्य। शेवम्। उत। ब्रध्नस्य। शासने। रणन्ति। दिवः।ऽरुचः। सु।ऽरुचः। रोचमानाः। इळा। येषाम्। गण्या। माहिना। गीः॥५॥

पदार्थः-(**जानन्ति**) (**वृष्णः**) बलिष्ठस्य (**अरुषस्य**) अश्वस्येव (**शेवम्**) सुखम्। **शेवमिति सुखनामसु पठितम्।** (निघं०३.६)। (**उत**) अपि (**ब्रध्नस्य**) महतः (**शासने**) शिक्षायामाज्ञायां वा (**रणन्ति**) शब्दायन्ते (**दिवोरुचः**) विज्ञानप्रकाशे रुचिकरः (**सुरुचः**) सुप्रीतिसम्पादकाः (**रोचमानाः**) रुचिमन्तः (**इळा**) स्तोतव्या वाक् (**येषाम्**) (**गण्या**) संख्यातुं योग्या (**माहिना**) सत्कर्त्तव्या (**गीः**) वाणी॥५॥

अन्वयः-येषां गण्येळा माहिना गीर्वर्त्तते ते रोचमाना दिवोरुचः सुरुचो रणन्ति वृष्णोऽरुषस्य ब्रध्नस्य शासने शेवमुत विज्ञानं जानन्ति॥५॥

भावार्थः-ये मनुष्या विदुषां शिक्षायां स्थिरा भवन्ति ते प्रशंसिता विद्वांसो भूत्वा महान्तो जायन्ते॥५॥

पदार्थः-(**येषाम्**) जिनकी (**गण्या**) गणना करने योग्य (**इळा**) स्तुति और (**माहिना**) सत्कार करने योग्य (**गीः**) वाणी है वे (**रोचमानाः**) रुचिवाले हुए (**दिवोरुचः**) विज्ञानरूप प्रकाश में रुचि करनेवाले (**सुरुचः**) सुन्दर प्रीति के उत्पादक विद्वान् लोग (**रणन्ति**) शब्द करते हैं तथा (**वृष्णः**) बलिष्ठ (**अरुषस्य**) घोड़े के तुल्य वेगयुक्त (**ब्रध्नस्य**) महान् राजपुरुष की (**शासने**) शिक्षा में (**शेवम्**) सुख (**उत**) और विज्ञान को (**जानन्ति**) जानते हैं॥५॥

भावार्थः-जो मनुष्य विद्वानों की शिक्षा में स्थिर होते हैं, वे प्रशंसित विद्वान् होकर महात्मा होते हैं॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम्।
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष॥६॥

उतो इति। पितृऽभ्याम्। प्रऽविदा। अनु। घोषम्। महः। महत्ऽभ्याम्। अनयन्त। शूषम्। उक्षा। ह। यत्र। परि। धानम्। अक्तोः। अनु। स्वम्। धाम। जरितुः। ववक्ष॥६॥

पदार्थः-(**उतो**) अपि (**पितृभ्याम्**) जनकजननीभ्याम् (**प्रविदा**) प्रकृष्टविज्ञानेन (**अनु**) (**घोषम्**) विद्याशिक्षायुक्तां वाचम्। **घोष इति वाङ्नामसु पठितम्।** (निघं०१.११)। (**महः**) महत् (**महद्भ्याम्**) पूज्याभ्याम् (**अनयन्त**) प्राप्नुयुः (**शूषम्**) बलम् (**उक्षा**) सेचकः (**ह**) खलु (**यत्र**) (**परि**) (**धानम्**) धारणम् (**अक्तोः**) रात्रेः (**अनु**) (**स्वम्**) स्वकीयम् (**धाम**) (**जरितुः**) स्तावकस्य (**ववक्ष**) वहति। अत्र वर्त्तमाने लिटि **वाच्छन्दसी**ति सुडागमः॥६॥

अन्वयः-हे मनुष्या! ये ब्रह्मचारिणो महद्भ्यां मह उतो पितृभ्यां प्रविदा घोषं शूषं चान्वनयन्त यत्रोक्षाऽक्तोः परि धानं जरितुर्ह स्वं धामानु ववक्ष तान् यूयं सत्कुरुत॥६॥

भावार्थः-हे मनुष्या! यथा ब्रह्मचारिणः पित्राचार्य्यादिमहतां सेवनेन ब्रह्मवर्चसमाप्नुवन्ति तथा यूयं प्रातरीश्वरस्तुत्यादिना धर्मसुखमाप्नुत॥६॥

पदार्थः-हे मनुष्यो! जैसे ब्रह्मचारी लोग (**महद्भ्याम्**) पूज्य अध्यापक उपदेशकों से (**महः**) बड़े ब्रह्मचर्य्य को (**उतो**) और (**पितृभ्याम्**) माता-पिता के साथ (**प्रविदा**) प्रकृष्ट ज्ञान से (**घोषम्**) विद्याशिक्षायुक्त वाणी और (**शूषम्**) बल को (**अनु, अनयन्त**) अनुकूल प्राप्त हों (**यत्र**) जहाँ (**उक्षा**) सेचन करनेवाला सूर्य्य (**अक्तोः**) रात्रि के (**परि, धानम्**) सब ओर से धारण को (**जरितुः**) स्तुतिकर्त्ता के

(ह) ही **(स्वम्)** अपने **(धाम)** स्थान को अर्थात् प्राप्त अवस्था को **(अनु, ववक्ष)** पहुँचाता है, उसका सत्कार करो॥६॥

भावार्थः-हे मनुष्यो! जैसे ब्रह्मचारी लोग पिता, आचार्य्य आदि महान् पुरुषों के सेवन से विद्या तेज को पाते हैं, वैसे तुम लोग प्रातःकाल ईश्वर की स्तुति आदि से धर्म से हुए सुख को प्राप्त होओ॥६॥

अथोपदेशकाः किंवत् किं कुर्वन्तीत्याह॥

अब उपदेशक लोग किसके सदृश क्या करते हैं, इस विषय को अगले मन्त्र में कहा है॥

अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः।
प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः॥७॥

अध्वर्युऽभिः। पञ्चऽभिः। सप्त। विप्राः। प्रियम्। रक्षन्ते। निऽहितम्। पदम्। वेरिति वेः। प्राञ्चः। मदन्ति। उक्षणः। अजुर्याः। देवाः। देवानाम्। अनु। हि। व्रता। गुरिति गुः॥७॥

पदार्थः-(**अध्वर्युभिः**) अध्वरं निष्पादकैः (**पञ्चभिः**) होत्राध्वर्यूद्गातृब्रह्मसभ्यैर्ऋत्विग्भिः (**सप्त**) पत्नीयजमानाभ्यां सहिताः सप्तसङ्ख्याकाः (**विप्राः**) मेधाविनः (**प्रियम्**) (**रक्षन्ते**)। अत्र व्यत्ययेनात्मनेदम्। (**निहितम्**) स्थितम् (**पदम्**) प्रापणीयम् (**वेः**) व्यापकस्य परमेश्वरस्य (**प्राञ्चः**) प्रकृष्टविद्यायुक्ताः (**मदन्ति**) (**उक्षणः**) सुखसेचकाः (**अजुर्याः**) शरीरात्मजीर्णावस्थारहिताः (**देवाः**) विद्वांसः (**देवानाम्**) विदुषाम् (**अनु**) (**हि**) यतः (**व्रता**) सत्यभाषणादिशीलानि (**गुः**) गच्छेयुः॥७॥

अन्वयः-ये प्राञ्च उक्षणोऽजुर्या देवा हि देवानां व्रतानु गुस्तेऽध्वर्य्युभिः पञ्चभिः पत्नीयजमानाभ्यां च सह वर्त्तमानाः सप्त विप्रा वेः प्रियं निहितं पदं रक्षन्ते त एव मदन्ति॥७॥

भावार्थः-हे मनुष्या! यथा सप्तर्त्विजो यज्ञं निष्पाद्य प्रजाः सुखयन्ति तथैवोपदेशका विद्वांसः सुशीला धार्मिका भूत्वाऽध्यापनोपदेशाभ्यां सर्वान् मनुष्यानानन्दयन्ति॥७॥

पदार्थः-जो (**प्राञ्चः**) प्रकृष्ट विद्यायुक्त (**उक्षणः**) सुख फैलानेहारे (**अजुर्याः**) शरीर आत्मा की जीर्ण अवस्था से रहित (**देवाः**) विद्वान् लोग (**हि**) ही (**देवानाम्**) विद्वानों के (**व्रता**) सत्यभाषणादि उत्तम स्वभावों को (**अनु, गुः**) अनुकूलतापूर्वक प्राप्त हों, वे (**अध्वर्य्युभिः**) यज्ञ रचनेवाले (**पञ्चभिः**) होता, अध्वर्यु, उद्गाता, ब्रह्मा और सभ्य इन पाँच ऋत्विजों और पत्नी यजमानों के साथ वर्त्तमान (**सप्त**) सात (**विप्राः**) बुद्धिमान् लोग (**वेः**) व्यापक परमेश्वर के (**प्रियम्**) प्रिय (**निहितम्**) स्थित (**पदम्**) प्राप्त करने योग्य स्वरूप की (**रक्षन्ते**) रक्षा करते हैं, वे ही (**मदन्ति**) आनन्दित होते हैं॥७॥

भावार्थः-हे मनुष्यो! जैसे सात ऋत्विज् लोग यज्ञ करके प्रजाओं को सुखी करते हैं, वैसे ही उपदेशक विद्वान् लोग सुशील धार्मिक हो के अध्यापन और उपदेश से सब मनुष्यों को आनन्दित करते

हैं॥७॥

पुनरुपदेशकविषयमाह॥

फिर भी उपदेशक विषय को अगले मन्त्र में कहा है॥

दैव्या॒ होता॑रा प्रथ॒मा न्यृ॑ञ्जे॒ सप्त॒ पृक्षा॑सः॒ स्व॒धया॑ मदन्ति।
ऋ॒तं शंस॑न्त ऋ॒तमित्त आ॑हु॒रनु॑ व्र॒तं व्र॑त॒पा दी॒ध्या॑नाः॥८॥

दैव्या॑। होता॑रा। प्र॒थ॒मा। नि। ऋ॒ञ्जे॒। स॒प्त। पृ॒क्षास॑ः। स्व॒धया॑। म॒द॒न्ति॒। ऋ॒तम्। शंस॑न्तः। ऋ॒तम्। इत्। ते। आ॒हु॒रिति॑ आ॒ऽहु॒रः। अनु॑। व्र॒तम्। व्र॒त॒ऽपाः। दी॒ध्या॑नाः॥८॥

पदार्थः-(**दैव्या**) विद्वत्सु कुशलौ (**होतारा**) विद्याया दातारौ (**प्रथमा**) प्रख्यातौ (**नि**) (**ऋञ्जे**) प्रसाध्नुयाम् (**सप्त**) (**पृक्षासः**) आर्द्रीभूताः (**स्वधया**) अन्नेन (**मदन्ति**) हृष्यन्ति (**ऋतम्**) सत्यम् (**शंसन्तः**) स्तुवन्तः (**ऋतम्**) सत्यम् (**इत्**) एव (**ते**) (**आहुः**) उपदिशन्ति (**अनु**) (**व्रतम्**) सत्याचरणम् (**व्रतपाः**) सत्याचाररक्षकाः (**दीध्यानाः**) विद्यादिसद्गुणैः प्रकाशमानाः॥८॥

अन्वयः-ये सप्त पृक्षासः स्वधया मदन्ति ऋतं शंसन्त ऋतं व्रतमित्ते व्रतपा दीध्याना अन्वाहुर्दैव्या प्रथमा होतारा च तानहं न्यृञ्जे॥८॥

भावार्थः-ये विद्वांसो धर्म्येण व्यवहारेण धनधान्यानि प्राप्य सत्यमुपदिश्य तदेवाऽऽचर्य्य सर्वान् शिक्षन्ते ते सर्वेषां सत्कर्त्तव्याः स्युः॥८॥

पदार्थः-जो (**सप्त**) सात (**पृक्षासः**) कोमल स्वभाववाले जन (**स्वधया**) अन्न से (**मदन्ति**) आनन्द करते हैं (**ऋतम्**) सत्य की (**शंसन्तः**) स्तुति करते हैं (**ऋतम्**) सत्य (**व्रतम्**) आचरण को (**इत्**) ही (**ते**) वे (**व्रतपाः**) सत्याचरण के रक्षक (**दीध्यानाः**) विद्यादि सद्गुणों से प्रकाशमान पुरुष (**अनु, आहुः**) अनुकूल उपदेश करते हैं और (**दैव्या**) विद्वानों में कुशल (**प्रथमा**) प्रख्यात (**होतारा**) विद्या के देनेवाले दो विद्वान् अध्यापक उपदेशक भी अनुकूल उपदेश करते हैं, उनको मैं (**नि**) निरन्तर (**ऋञ्जे**) प्रसिद्ध करूं॥८॥

भावार्थः-जो विद्वान् लोग धर्मयुक्त व्यवहार से धन-धान्यों को प्राप्त हो सत्य का उपदेश कर उसी का आचरण करके सबको शिक्षा करते हैं, वे सबसे सत्कार करने योग्य हों॥८॥

पुनर्विद्वांसः किं कुर्वन्तीत्याह॥

फिर विद्वान् लोग क्या करते हैं, इस विषय को अगले मन्त्र में कहा है॥

वृ॒षा॒यन्ते॑ म॒हे अत्या॑य॒ पूर्वी॑र्वृ॒ष्णे चि॒त्राय॑ र॒श्मयः॑ सुया॒माः।
देव॑ होतर्म॒न्द्रत॑रश्चिकि॒त्वान् म॒हो दे॒वान् रोद॑सी॒ एह व॑क्षि॥९॥

वृ॒ष॒ऽय॒न्ते॑। म॒हे। अ॒त्या॑य। पू॒र्वीः। वृ॒ष्णे॑। चि॒त्रा॑य। र॒श्मयः॑। सु॒ऽया॒माः। दे॒व॑। हो॒तः॒। म॒न्द्र॒ऽत॑रः। चि॒कि॒त्वान्। म॒हः। दे॒वान्। रोद॑सी॒ इति॑। आ। इ॒ह। व॒क्षि॒॥ ९॥

पदार्थः-(**वृषायन्ते**) वृष इवाचरन्ति (**महे**) महते (**अत्याय**) सर्वविद्याव्यापनशीलाय (**पूर्वीः**) पूर्वं वर्त्तमानाः प्रजाः (**वृष्णे**) विद्यावर्षकाय (**चित्राय**) आश्चर्यस्वभावाय (**रश्मयः**) किरणाः (**सुयामाः**) शोभनाः यामाः प्रहरा येषु ते (**देव**) देदीप्यमान (**होतः**) सर्वेभ्यः सुखस्य दाता (**मन्द्रतरः**) अतिशयेनाह्लादकः (**चिकित्वान्**) विज्ञापकः (**महः**) महतः (**देवान्**) विदुषः (**रोदसी**) द्यावापृथिव्यौ (**आ**) (**इह**) अस्मिन् संसारे (**वक्षि**) समन्तात्प्रापय॥९॥

अन्वयः-हे होतर्देवमन्द्रतरश्चिकित्वांस्त्वं यथा सुयामा रश्मयो महेऽत्याय चित्राय वृष्णे पूर्वीर्वृषायन्ते रोदसी प्रकटयन्ति तथेहं महो देवाना वक्षि॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यकिरणाः प्रकाशेन वृष्टिद्वारा सर्वाः प्रजाः सुखयन्ति तथैव विद्वांसो विदुषः सम्पाद्य सर्वाः प्रजाः सुज्ञानाः कुर्वन्ति॥९॥

पदार्थः-हे (**देव**) प्रकाशमान (**होतः**) सबके लिये सुख देनेहारे विद्वान् (**मन्द्रतरः**) अति आनन्दकारक (**चिकित्वान्**) चितानेहारे! आप जैसे (**सुयामाः**) सुन्दर प्रहर आदि समयवाली (**रश्मयः**) किरणें (**महे**) बड़े (**अत्याय**) सब विद्याओं में व्यापनशील (**चित्राय**) आश्चर्य स्वभाववाले (**वृष्णे**) विद्या के प्रचारक विद्वान् के अर्थ (**पूर्वीः**) पहिले से वर्त्तमान प्रजाजनों को (**वृषायन्ते**) बैल के समान उत्साहित करती (**रोदसी**) सूर्य-भूमि प्रकट करती हैं, वैसे (**इह**) इस जगत् में (**महः**) महान् (**देवान्**) विद्वानों को (**आ, वक्षि**) अच्छे प्रकार प्राप्त कराइये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य की किरणें प्रकाश से वृष्टि द्वारा सब प्रजा को सुखी करती हैं, वैसे ही विद्वान् लोग सब प्रजा जनों को विद्वान् **[**बनाकर**]** सुन्दर ज्ञानयुक्त करते हैं॥९॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

पृ॒क्षप्र॑यजो द्र॒विणः॑ सु॒वाचः॑ सु॒के॒तव॑ उ॒षसो॑ रे॒वदू॑षुः।
उ॒तो चि॑दग्ने महि॒ना पृ॑थि॒व्याः कृ॒तं चि॒देनः॑ सं म॒हे द॑शस्य॥ १०॥

पृ॒क्षऽप्र॑यजः। द्र॒वि॒णः॒। सु॒ऽवाचः॑। सु॒ऽके॒तवः॑। उ॒षसः॑। रे॒वत्। ऊ॒षुः॒। उ॒तो इति॑। चि॒त्। अ॒ग्ने॒। म॒हि॒ना। पृ॒थि॒व्याः॒। कृ॒तम्। चि॒त्। एनः॑। सम्। म॒हे। द॒श॒स्य॒॥ १०॥

पदार्थः-(**पृक्षप्रयजः**) ये पृक्षेण शुभगुणैरार्द्रीभावेन प्रयजन्ति ते (**द्रविणः**) प्रशस्तानि द्रविणानि द्रव्यानि विद्यन्ते यस्य सः (**सुवाचः**) सुष्ठु सत्या वाग् येषान्ते (**सुकेतवः**) सुष्ठु केतुः प्रज्ञा येषान्ते (**उषसः**)

प्रभाता इव **(रेवत्)** द्रव्यवत् **(ऊषुः)** वसेयुः **(उतो)** अपि **(चित्)** **(अग्ने)** विद्वन् **(महिना)** महिम्ना **(पृथिव्याः)** भूमेर्मध्ये **(कृतम्)** **(चित्)** **(एनः)** पापम् **(सम्)** **(महे)** महते सौभाग्याय **(दशस्य)** क्षयं गमय॥१०॥

अन्वयः–हे अग्ने! द्रविणस्त्वं महिना महे पृक्षप्रयज उषसइव वर्त्तमानाः सुवाचः सुकेतवो रेवदूषुरुतो अन्धकारं निवर्त्तयन्ति तद्वत्पृथिव्याः कृतमेनश्चित् त्वं सन्दशस्य चिदपि शोभनं प्रापय॥१०॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यूयं प्रभातवेलावन्मनुष्यात्मनः प्रकाश्य विज्ञानं दत्वा पापाचरणं त्याजयित्वा सर्वान्मनुष्यान् सत्यवादिनो विदुषः कुरुत येन पृथिव्यां पापाचरणं न वर्धेत॥१०॥

पदार्थः–हे **(अग्ने)** विद्वान्! **(द्रविणः)** प्रशस्त द्रव्य जिसके विद्यमान ऐसे आप **(महिना)** महिमा से **(महे)** बड़े सौभाग्य के लिये **(पृक्षप्रयजः)** शुभ गुण और कोमल भाव से यज्ञ करनेहारे **(उषसः)** प्रभात वेला के तुल्य वर्त्तमान **(सुवाचः)** सुन्दर सत्य वाणी से युक्त **(सुकेतवः)** सुन्दर बुद्धिवाले **(रेवत्)** द्रव्य के समान **(ऊषुः)** वसें **(उतो)** और अन्धकार को निवृत्त करते हैं, वैसे **(पृथिव्याः)** भूमि के मध्य में **(कृतम्)** किया हुआ **(एनः)** पाप **(चित्)** शीघ्र आप **(सम्, दशस्य)** सम्यक् नष्ट करो **(चित्)** और सुन्दर कर्म को प्राप्त करो॥१०॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! तुम लोग प्रभात वेला के तुल्य मनुष्यों के आत्माओं को प्रकाशित कर विज्ञान दे और अधर्माचरण को छुड़ा के सब मनुष्यों को सत्यवादी विद्वान् करो, जिससे पृथिवी पर पापाचरण न बढ़े॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळा॑मग्ने पुरु॒दंस॑ꣳ स॒निं गोः शश्व॑त्तमं हव॒मानाय साध।
स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाग्ने॒ सा ते॑ सु॒म॒तिर्भू॑त्व॒स्मे॥११॥२॥

इळा॑म्। अ॒ग्ने॒। पु॒रु॒ऽदंस॑म्। स॒निम्। गोः। श॒श्व॒त्ऽत॒मम्। हव॑मानाय। सा॒ध॒। स्यात्। नः॒। सू॒नुः। तन॑यः। वि॒जाऽवा॑। अग्ने॑। सा। ते॒। सु॒ऽम॒तिः। भू॒तु॒। अ॒स्मे इति॑॥११॥

पदार्थः–**(इळाम्)** प्रशंसनीयां वाचम् **(अग्ने)** प्रकाशात्मन् **(पुरुदंसम्)** पुरूणि दंसांसि कर्माणि विद्यन्ते यस्य तम् **(सनिम्)** संभजमानाम् **(गोः)** पृथिव्या मध्ये **(शश्वत्तमम्)** सदैव वर्त्तमानम् **(हवमानाय)** आददानाय **(साध)** **(स्यात्)** भवेत् **(नः)** अस्माकम् **(सूनुः)** अपत्यम् **(तनयः)** विद्यासुखप्रचारकः **(विजावा)** विशेषेण प्रसिद्धः **(अग्ने)** विद्वन् **(सा)** **(ते)** तव **(सुमतिः)** शोभना चासौ मतिश्च सा सुमतिः **(भूतु)** भवतु **(अस्मे)** अस्मभ्यम्॥११॥

अन्वयः-हे अग्ने! त्वं पुरुदसं सनिमिळां साध। गोर्मध्ये हवमानाय शश्वत्तमं विज्ञानं साध येन नस्तनयो विजावा सूनुः स्यात्। हे अग्ने! ते तव सा सुमतिरस्मे भूतु॥११॥

भावार्थः-मनुष्यैः सदैव विद्यायुक्तां वाचं प्रज्ञां च प्राप्य सुशिक्षितान् सन्तानान् कृत्वाऽनादिभूतं सुखं प्राप्तव्यं सदैवाऽऽप्तानां प्रज्ञा सर्वत्र प्रसारणीयेति॥११॥

अत्राऽग्निसूर्य्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति सप्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अपने शरीरात्मा के प्रकाश से युक्त विद्वान्! आप **(पुरुदंसम्)** बहुत कर्मों वाली **(सनिम्)** सम्यक् सेवन की हुई **(इळाम्)** प्रशंसा के योग्य वाणी को **(साध)** साधो **(गोः)** पृथिवी के बीच **(हवमानाय)** ग्रहण करते हुए के अर्थ **(शश्वत्तमम्)** सदैव वर्त्तमान विज्ञान को सिद्ध करो, जिससे **(नः)** हमारा **(विजावा)** विशेष कर प्रसिद्ध **(तनयः)** विद्या और सुख का प्रचार करनेहारा **(सूनुः)** सन्तान **(स्यात्)** होवे। हे **(अग्ने)** विद्वन्! **(ते)** आपकी **(सा)** वह **(सुमतिः)** उत्तम बुद्धि **(अस्मे)** हमारे लिये **(भूतु)** हो॥११॥

भावार्थः-मनुष्यों को चाहिये कि सदैव विद्यायुक्त वाणी और बुद्धि को प्राप्त हो सन्तानों को उत्तम शिक्षा दे के अनादि रूप सुख को प्राप्त होवें और सदैव सत्यवादी विद्वानों की बुद्धि सर्वत्र फैलावें॥११॥

इस सूक्त में अग्नि, सूर्य्य और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सातवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

अथैकादशर्चस्याष्टमस्य सूक्तस्य विश्वामित्र ऋषिः। विश्वेदेवा देवताः। १, ८-१० निचृत्त्रिष्टुप्। २, ५, ६, ११ त्रिष्टुप्। ४ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ७ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मनुष्याः केषां कामनां कुर्य्युरित्याह॥

अब तीसरे मण्डल के आठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में मनुष्य लोग किसकी कामना करें, इस विषय को कहा है॥

अ॒ञ्जन्ति॒ त्वाम॑ध्व॒रे दे॑व॒यन्तो॒ वन॑स्पते॒ मधु॑ना दैव्ये॑न।
यदू॒र्ध्वस्तिष्ठा॒ द्रवि॑णे॒ह ध॑त्ता॒द् यद्वा॒ क्षयो॑ मा॒तुर॒स्या उ॒पस्थे॑॥ १॥

अ॒ञ्जन्ति॑ त्वाम्। अ॒ध्व॒रे। दे॒व॒ऽय॒न्तः॑। वन॑स्पते। मधु॑ना। दैव्ये॑न। यत्। ऊ॒र्ध्वः। तिष्ठाः॑। द्रवि॑णा। इ॒ह। ध॒त्ता॒त्। यत्। वा॒। क्षयः॑। मा॒तुः। अ॒स्याः। उ॒पस्थे॑॥ १॥

पदार्थः-(**अञ्जन्ति**) कामयन्ते (**त्वाम्**) (**अध्वरे**) अध्ययनाध्यापनराजपालनादिव्यवहारे (**देवयन्तः**) कामयमानाः (**वनस्पते**) वनस्य रश्मिसमूहस्य पालकः सूर्य्यस्तद्वद्वर्त्तमान (**मधुना**) मधुरस्वभावेन (**दैव्येन**) देवेषु विद्वत्सु भवेन (**यत्**) यम् (**ऊर्ध्वः**) सद्गुणैरुत्कृष्टः (**तिष्ठाः**) तिष्ठेः (**द्रविणा**) द्रविणानि धनानि (**इह**) अस्मिन् संसारे (**धत्तात्**) दध्याः (**यत्**) (**वा**) (**क्षयः**) निवासस्थानम् (**मातुः**) माननिमित्तायाः (**अस्याः**) भूमेः (**उपस्थे**) समीपे॥ १॥

अन्वयः-हे वनस्पते! मधुना दैव्येन सह वर्त्तमाना देवयन्तो विद्वांसो यद्यं त्वामध्वरे अञ्जन्ति स त्वं येषामूर्ध्वस्तिष्ठा इह द्रविणा वा धत्तादस्या मातुरुपस्थे यत् क्षयोऽस्ति तद्वयमपि गृह्णीयाम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सर्वे प्राणिनो दिनं कामयन्ते तथैवोत्तमान् विदुषः सर्वे कामयन्ताम्। सर्वे मिलित्वा प्रीत्योत्तमं गृहमैश्वर्य्यं च साध्नुवन्ति **[**=साध्नुवन्तु**]**॥ १॥

पदार्थः-हे (**वनस्पते**) किरणों के रक्षक सूर्य्य के समान वर्त्तमान तेजस्वी विद्वन्! (**दैव्येन**) विद्वानों में हुए (**मधुना**) कोमल स्वभाव के साथ वर्त्तमान (**देवयन्तः**) कामना करते हुए विद्वान् (**यत्**) जिन (**त्वाम्**) आपको (**अध्वरे**) पढ़ने-पढ़ाने और राज्यपालनादि व्यवहार में (**अञ्जन्ति**) चाहते हैं, सो आप जिनके बीच (**ऊर्ध्वः**) श्रेष्ठ गुणों से बढ़े हुए (**तिष्ठाः**) स्थित हूजिये (**वा**) और (**इह**) इस संसार में (**द्रविणा**) धनों को (**धत्तात्**) धारण करो (**अस्याः**) इस (**मातुः**) मान देनेवाली भूमि के (**उपस्थे**) समीप गोद में (**यत्**) जो (**क्षयः**) निवासस्थान है, उसको हम लोग ग्रहण करें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सब प्राणी दिन को चाहते हैं, वैसे ही उत्तम विद्वान् लोगों को सब मनुष्य चाहें। सब मिल के प्रीति से उत्तम घर और ऐश्वर्य्य की सिद्धि करें॥ १॥

अथ के जनाः कल्याणमाप्नुवन्तीत्याह॥

अब कौन मनुष्य कल्याण को प्राप्त होते हैं, इस विषय को अगले मन्त्र में कहा है॥

समि॑द्धस्य॒ श्रय॑माणः पु॒रस्ता॒द् ब्रह्म॑ वन्वा॒नो अ॒जर॑ꣳ सु॒वीर॑म्।
आ॒रे अ॒स्मदम॑तिं॒ बाध॑मान॒ उच्छ्र॑यस्व महते॒ सौभ॑गाय॥ २॥

सम्ऽइ॑द्धस्य। श्रय॑माणः। पु॒रस्ता॑त्। ब्रह्म॑। व॒न्वा॒नः। अ॒जर॑म्। सु॒ऽवीर॑म्। आ॒रे। अ॒स्मत्। अम॑तिम्। बाध॑मानः। उत्। श्र॒य॒स्व॒। म॒ह॒ते। सौभ॑गाय॥ २॥

पदार्थः-(**समिद्धस्य**) प्रदीप्तस्य (**श्रयमाणः**) सेवमानः (**पुरस्तात्**) (**ब्रह्म**) महद्धनम् (**वन्वानः**) संभजमानः (**अजरम्**) अक्षयम् (**सुवीरम्**) शोभना वीरा यस्मात्तत् (**आरे**) समीपे दूरे वा (**अस्मत्**) (**अमतिम्**) विरुद्धामधर्मयुक्तां प्रज्ञाम् (**बाधमानः**) (**उत्**) (**श्रयस्व**) उत्कृष्टतया सेवस्व (**महते**) (**सौभगाय**) उत्तमैश्वर्यस्य भावाय॥ २॥

अन्वयः-हे वनस्पते! त्वं पुरस्तात्समिद्धस्य विदुषः श्रयमाणोऽजरं सुवीरं ब्रह्म वन्वानोऽस्मदारेऽमतिं बाधमानः सन् महते सौभगाय सततमुच्छ्रयस्व॥ २॥

भावार्थः-अत्र पूर्वमन्त्रात् 'वनस्पते' इति पदमनुवर्त्तते। ये जनाः सुशिक्षया कुबुद्धिं निवारयन्तो धनाद्यैश्वर्येण सुशिक्षाविद्याधर्मान् प्रचारयन्तः सर्वस्य कल्याणमिच्छेयुस्ते सदैव कल्याणभाजः स्युः॥ २॥

पदार्थः-हे रश्मिरक्षक सूर्य के समान तेजस्वी विद्वन्! आप (**पुरस्तात्**) पहिले से (**समिद्धस्य**) प्रदीप्त तेजस्वी विद्वान् का (**श्रयमाणः**) सेवन करते और (**अजरम्**) अक्षय (**सुवीरम्**) जिससे उत्तम वीर पुरुष हों ऐसे (**ब्रह्म**) बड़े धन को (**वन्वानः**) सेवन करते हुए (**अस्मत्**) हमारे (**आरे**) समीप वा दूर में (**अमतिम्**) अधर्मयुक्त विरुद्ध बुद्धि को (**बाधमानः**) नष्ट करते हुए (**महते**) बड़े (**सौभगाय**) उत्तम ऐश्वर्य्य होने के लिये निरन्तर (**उत्, श्रयस्व**) अच्छे प्रकार सेवन करो॥ २॥

भावार्थः-इस मन्त्र में पूर्व मन्त्र से 'वनस्पते' इस पद की अनुवृत्ति आती है। जो मनुष्य अच्छी शिक्षा से कुबुद्धि का निवारण करते और धनादि ऐश्वर्य के साथ सुशिक्षा, विद्या और धर्म का प्रचार करते हुए सबके कल्याण की इच्छा करें, वे सदैव कल्याणभागी होवें॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

उच्छ्र॑यस्व वनस्पते॒ वर्ष्म॑न् पृथि॒व्या अधि॑।
सुमि॑ती मी॒यमा॑नो॒ वर्चो॑ धा य॒ज्ञवा॑हसे॥ ३॥

उत्। श्र॒य॒स्व॒। व॒न॒स्प॒ते॒। वर्ष्म॑न्। पृ॒थि॒व्याः। अधि॑। सुऽमि॑ती। मी॒यमा॑नः। वर्चः॑। धाः॒। य॒ज्ञऽवा॑हसे॥ ३॥

पदार्थः-(**उत्**) (**श्रयस्व**) (**वनस्पते**) वननीयस्य धनस्य रक्षक (**वर्ष्मन्**) सद्गुणानां सेचक (**पृथिव्याः**) भूमेः (**अधि**) उपरि (**सुमती**)[५] शोभनया प्रज्ञया। अत्र पूर्वसवर्णादेशः। **माङ् मान** इत्यस्मात् क्तिनि **द्यतिस्यतिमास्थे**तीत्वम्। धातूनामनेकार्थत्वाज्ज्ञानार्थत्वम् (**मीयमानः**) सत्क्रियमाणः (**वर्चः**) अध्यापनतेजः (**धाः**) धेहि (**यज्ञवाहसे**) यज्ञस्याऽध्ययनाऽध्यापनस्य प्राप्तये॥३॥

अन्वयः-हे वर्ष्मन् वनस्पते! त्वं पृथिव्या अधि स्तम्भ इवोच्छ्रयस्व मीयमानः सन्सुमतीं[६] यज्ञवाहसे वर्चो धाः॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वटादयो वनस्पतयो मूलस्कन्धशाखादिभिर्वर्द्धन्ते तथैव पुरुषार्थेन विद्याः प्रचार्य्य मनुष्यैर्वर्द्धनीयम्॥३॥

पदार्थः-हे (**वर्ष्मन्**) श्रेष्ठ गुणों के प्रचारक (**वनस्पते**) सेवने योग्य धन के रक्षक विद्वान्! आप (**पृथिव्याः**) भूमि के (**अधि**) उपर खम्भ के तुल्य (**उत्, श्रयस्व**) ऊंचे हूजिये (**मीयमानः**) सत्कार किये हुए (**सुमतीः**)[७] सुन्दर बुद्धि से (**यज्ञवाहसे**) पढ़ने-पढ़ाने आदि यज्ञ के प्राप्त करानेहारे विद्यार्थी के लिये (**वर्चः**) पढ़ाने रूप तेज को (**धाः**) धारण कीजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बड़ आदि वनस्पति जड़, स्कन्ध, डाली आदि से बढ़ते हैं, वैसे ही पुरुषार्थ के साथ विद्याओं का प्रचार कर मनुष्यों को बढ़ाना चाहिये॥३॥

पुनः कीदृशो विद्वान् भवतीत्याह॥

फिर कैसा विद्वान् हो, इस विषय को अगले मन्त्र में कहा है॥

युवा॑ सु॒वासा॒ः परि॑वीत॒ आगा॒त् स उ॒ श्रेया॑न् भवति॒ जाय॑मानः।
तं धीरास॑ः क॒वय॒ उन्न॑यन्ति स्वा॒ध्यो॒३॑ मन॑सा देव॒यन्त॑ः॥४॥

युवा॑। सु॒ऽवासा॑ः। परि॑ऽवीतः। आ। अ॒गा॒त्। सः। उ॒म् इति॑। श्रेया॑न्। भ॒व॒ति॒। जाय॑मानः। तम्। धीरा॑सः। क॒वय॑ः। उत्। न॒य॒न्ति॒। सु॒ऽआ॒ध्य॑ः। मन॑सा। दे॒व॒ऽयन्त॑ः॥४॥

पदार्थः-(**युवा**) यौवनावस्थां प्राप्तः (**सुवासाः**) शोभनानि वासांसि धृतानि येन सः (**परिवीतः**) परितः सर्वतो व्याप्तविद्यः (**आ**) समन्तात् (**अगात्**) आगच्छेत् (**सः**) (**उ**) एव (**श्रेयान्**) अतिशयेन प्रशस्तः (**भवति**) (**जायमानः**) विद्याया मातुरन्तः स्थित्वा निष्पन्नः (**तम्**) (**धीरासः**) धीमन्तः (**कवयः**)

---

५. सुमिती॥सं.

६. सुमिती॥सं.

७. सुमिती॥ सं.

अनूचाना विद्वांसः **(उत्)** ऊर्ध्वे **(नयन्ति)** उत्तमं सम्पादयन्ति **(स्वाध्यः)** सुष्ठु विद्याधानकर्त्तारः **(मनसा)** विज्ञानेनान्तःकरणेन वा **(देवयन्तः)** कामयमानाः॥४॥

अन्वयः-योऽष्टमं वर्षमारभ्य ब्रह्मचर्येण गृहीतविद्यो युवा सुवासाः परिवीतः सन् गृहमागात्स उ विद्यायां जायमानः सञ्छ्रेयान् भवति तं देवयन्तो धीरासः स्वाध्यः कवयो मनसोन्नयन्ति॥४॥

भावार्थः-नहि कश्चिदपि विद्यासुशिक्षाब्रह्मचर्यसेवनेन विना दीर्घायुः सभ्यो विद्वान् भवतुमर्हति न चैष क्वापि सत्कारं प्राप्तुं योग्यो जायते यं धार्मिका विद्वांसः प्रशंसन्ति स एव विद्वानस्ति॥४॥

पदार्थः-जो आठवें वर्ष से लेकर ब्रह्मचर्य्य के साथ विद्या को ग्रहण किये **(युवा)** युवावस्था को प्राप्त **(सुवासाः)** सुन्दर वस्त्रों को धारण किये **(परिवीतः)** और सब ओर से विद्या में व्याप्त हुए ब्रह्मचर्य से घर को **(आ, अगात्)** आवे **(सः, उ)** वही विद्या में **(जायमानः)** प्रसिद्ध हुआ **(श्रेयान्)** अति प्रशस्त **(भवति)** होता है **(तम्)** उसको **(देवयन्तः)** कामना करते हुए **(धीरासः)** बुद्धिमान् **(स्वाध्यः)** सुन्दर विद्या का आधान करनेवाले **(कवयः)** सर्वोत्तम विद्वान् लोग **(मनसा)** विज्ञान वा अन्तःकरण से **(उत्, नयन्ति)** उन्नत करते उत्तम मानते हैं॥४॥

भावार्थः-कोई भी मनुष्य विद्या की उत्तम शिक्षा और ब्रह्मचर्य्य सेवन के विना दीर्घायु और सभा के योग्य विद्वान् नहीं हो सकता और न वह मनुष्य कहीं सत्कार पाने योग्य होता है। जिस मनुष्य की धार्मिक विद्वान् प्रशंसा करते हैं, वही विद्वान् है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जा॒तो जा॑यते सुदि॒नत्वे अह्ना॑ सम॒र्य आ वि॒दथे॒ वर्ध॑मानः।
पु॒नन्ति॒ धीरा॑ अ॒पसो॑ मनी॒षा दे॑व॒या विप्र॒ उदि॑यर्ति॒ वाच॑म्॥५॥

जा॒तः। जा॒य॒ते। सु॒ऽदि॒न॒त्वे। अह्ना॑म्। स॒ऽम॒र्ये। आ। वि॒दथे॑। वर्ध॑मानः। पु॒नन्ति॑। धीरा॑ः। अ॒पस॑ः। म॒नी॒षा। दे॒व॒ऽया॑ः। विप्र॑ः। उत्। इ॒य॒र्ति॒। वाच॑म्॥५॥

पदार्थः-(**जातः**) उत्पन्नः प्रसिद्धः **(जायते)** उत्पद्यते **(सुदिनत्वे)** शोभनानां दिनानां भावे **(अह्नाम्)** दिवसानाम् **(समर्य्ये)** संग्रामे। **समर्य्य इति संग्रामनामसु पठितम्।** (निघं०२.१७)। **(आ)** समन्तात् **(विदथे)** विज्ञानमये व्यवहारे **(वर्धमानः)** **(पुनन्ति)** पवित्रीकुर्वन्ति **(धीराः)** मेधाविनो ध्यानवन्तः **(अपसः)** कर्माणि **(मनीषा)** प्रज्ञया **(देवयाः)** देवान् विदुषो यजमानः पूजयन् **(विप्रः)** सकलविद्यायुक्तो मेधावी **(उत्)** **(इयर्ति)** प्राप्नोति **(वाचम्)** शुद्धां वाणीम्॥५॥

अन्वयः-यः समर्ये शूरवीर इवाह्नां सुदिनत्वे विदथे जातो वर्द्धमानो जायते यो मनीषा अपसः कुर्वन् देवया युक्तो विप्रो वाचमुदियर्त्ति तं धीरा आ पुनन्ति॥५॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। तेषामेव सुदिनं भवति ये विद्यासुशिक्षे संगृह्य विद्वांसो जायन्ते यथा शूरवीरा दुष्टान् विजित्य धनाद्यैश्वर्येण सर्वतो वर्धन्ते तथैव विद्यया विद्वान् वर्धते॥५॥

पदार्थः–जो **(समर्ये)** युद्ध में शूरवीर पुरुष के समान **(अह्नाम्)** दिनों के **(सुदिनत्वे)** सुन्दर दिनों के होने में **(विदथे)** विज्ञान सम्बन्धी व्यवहार में **(जातः)** प्रसिद्ध **(वर्द्धमानः)** बढ़ता हुआ **(जायते)** उत्पन्न होता है। जो **(मनीषा)** बुद्धि से **(अपसः)** कर्मों को करता हुआ **(देवयाः)** विद्वानों का पूजन करनेवाला नियतात्मा **(विप्रः)** समस्त विद्याओं से युक्त बुद्धिमान् जन **(वाचम्)** शुद्ध वाणी को **(उत्, इयर्त्ति)** प्राप्त होता है, उसको **(धीराः)** बुद्धिमान् जन **(आ, पुनन्ति)** अच्छे प्रकार पवित्र करते हैं॥५॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। उन्हीं का सुदिन होता है जो विद्या और उत्तम शिक्षा का संग्रह कर विद्वान् होते हैं। जैसे शूरवीर पुरुष दुष्टों को जीत के धनादि ऐश्वर्य्य के साथ सब ओर से बढ़ते हैं, वैसे ही विद्या से विद्वान् बढ़ते हैं॥५॥

मनुष्यैः के ग्राह्यास्त्याज्या वेत्याह॥

मनुष्यों को किनका ग्रहण वा त्याग करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

यान् वो॒ नरो॑ देव॒यन्तो॑ निमि॒म्युर्वन॑स्पते॒ स्वधि॑तिर्वा त॒तक्ष॑।
ते दे॒वास॒: स्वर॑वस्तस्थि॒वांस॑: प्र॒जाव॑द॒स्मे दि॑धिषन्तु॒ रत्न॑म्॥ ६॥

यान्। व॒:। नर॑:। दे॒व॒ऽयन्त॑:। नि॒ऽमि॒म्यु॒:। वन॑स्पते। स्वऽधि॑ति:। वा॒। त॒तक्ष॑। ते। दे॒वास॑:। स्वर॑व:। त॒स्थि॒ऽवांस॑:। प्र॒जाऽव॑त्। अ॒स्मेऽ इति॑। दि॒धि॒ष॒न्तु॒। रत्न॑म्॥ ६॥

पदार्थः–**(यान्)** **(वः)** युष्मान् **(नरः)** नायकाः **(देवयन्तः)** कामयमानाः **(निमिम्युः)** नितरां मिनुयुः **(वनस्पते)** वनानां पालक **(स्वधितिः)** वज्रः **(वा)** **(ततक्ष)** तक्षति **(ते)** **(देवासः)** विद्वांसः **(स्वरवः)** स्वकीयो रवो विद्याप्रज्ञापकः शब्दो येषान्ते **(तस्थिवांसः)** स्थिरप्रज्ञाः **(प्रजावत्)** प्रजा विद्यन्ते यस्मिँस्तत् **(अस्मे)** अस्मभ्यम् **(दिधिषन्तु)** उपदिशन्तु **(रत्नम्)** धनम्। **रत्नमिति धननामसु पठितम्।** (निघं०२.१०)॥६॥

अन्वयः–हे नरो! यान् वो देवयन्तो निमिम्युस्ते स्वरवस्तस्थिवांसो देवासो भवन्तोऽस्मे प्रजावद्रत्नं दिधिषन्तु। वा हे वनस्पते! यथा स्वधितिर्मेघं ततक्ष तथा त्वं दुष्टतां तक्ष॥६॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! येषां सङ्गेनान्ये सभ्या विद्वांसः स्युस्तेषामेव सङ्गं यूयमपि कुरुत येषां समागमेन दुर्व्यसनानि वर्धेरँस्तान् सर्वे त्यजन्तु॥६॥

पदार्थः–हे **(नरः)** नायक लोगो! **(यान्)** जिन **(वः)** तुमको **(देवयन्तः)** कामना करते हुए जन **(निमिम्युः)** निरन्तर मान करें **(ते)** वे **(स्वरवः)** अपने विद्याबोधक शब्दों से युक्त **(तस्थिवांसः)** स्थिर बुद्धिवाले **(देवासः)** आप विद्वान् लोग **(अस्मे)** हमारे **(प्रजावत्)** प्रजावान् **(रत्नम्)** धन का **(दिधिषन्तु)**

उपदेश करें। **(वा)** अथवा हे **(वनस्पते)** वनों के रक्षक पुरुष! जैसे **(स्वधितिः)** वज्र मेघ को **(ततक्ष)** काटता है, वैसे आप दुष्टता को काटो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिनके सङ्ग से अन्य जन सभ्य विद्वान् हों, उन्हीं का सङ्ग तुम लोग भी करो। जिनके समागम से दुर्व्यसन बढ़ें, उनको सब लोग त्याग देवें॥६॥

अथ विद्यया किं भवतीत्याह॥

अब विद्या से क्या होता है, इस विषय को अगले मन्त्र में कहा है॥

ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः॥७॥

ये। वृक्णासः। अधि। क्षमि। निऽमितासः। यतऽस्रुचः। ते। नः। व्यन्तु। वार्यम्। देवऽत्रा। क्षेत्रऽसाधसः॥७॥

पदार्थः-(**ये**) (**वृक्णासः**) छिन्नाविद्याः (**अधि**) (**क्षमि**) पृथिव्याम् (**निमितासः**) नित्यमितज्ञानाः (**यतस्रुचः**) यता स्रुग् यज्ञसाधनं यैस्ते ऋत्विजः (**ते**) (**नः**) अस्माकम् (**व्यन्तु**) प्राप्नुवन्तु (**वार्य्यम्**) वर्त्तुमर्हं विज्ञानम् (**देवत्रा**) देवेषु विद्वत्सु (**क्षेत्रसाधसः**) ये क्षेत्राणि साध्नुवन्ति ते॥७॥

अन्वयः-ये वृक्णासो निमितासो यतस्रुचः क्षम्यधि वर्त्तन्ते ते देवत्रा क्षेत्रसाधसो नो वार्य्यं व्यन्तु॥७॥

भावार्थः-यथा कुठारेण छिन्ना वृक्षा न रोहन्ति तथैव विद्यया क्षीणा अविद्या न वर्द्धते॥७॥

पदार्थः-(**ये**) जो (**वृक्णासः**) अविद्या से पृथक् हुए (**निमितासः**) सदैव सत्य-सत्य ज्ञानवाले (**यतस्रुचः**) जिन्होंने यज्ञ साधन नियत किया और (**क्षमि**) (**अधि**) पृथिवी पर वर्त्तमान हैं (**ते**) वे (**देवत्रा**) विद्वानों में (**क्षेत्रसाधसः**) खेतों को साधनेवाले (**नः**) हमारे (**वार्य्यम्**) स्वीकार के योग्य ज्ञान को (**व्यन्तु**) प्राप्त हों॥७॥

भावार्थः-जैसे कुल्हाड़े से काटे हुए वृक्ष फिर नहीं जमते, वैसे ही विद्या से नष्ट हुई अविद्या नहीं बढ़ती॥७॥

पुनस्तमेवाहिंसाधर्मोन्नतिविषयमाह॥

फिर उसी अहिंसाधर्म की उन्नति के विषय को अगले मन्त्र में कहा है॥

आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम्।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम्॥८॥

आदित्याः। रुद्राः। वसवः। सुऽनीथाः। द्यावाक्षामा। पृथिवी। अन्तरिक्षम्। सऽजोषसः। यज्ञम्। अवन्तु। देवाः। ऊर्ध्वम्। कृण्वन्तु। अध्वरस्य। केतुम्॥८॥

पदार्थः-(**आदित्याः**) द्वादश मासाः (**रुद्राः**) प्राणाः (**वसवः**) पृथिव्यादयः (**सुनीथाः**) सुष्ठुसङ्गताः (**द्यावाक्षामा**) सूर्य्यभूमी (**पृथिवी**) विस्तीर्णे (**अन्तरिक्षम्**) आकाशम् (**सजोषसः**) समानप्रीतिसेवनाः (**यज्ञम्**) सर्वं सद्व्यवहारं (**अवन्तु**) रक्षन्तु (**देवाः**) कामयमानाः (**ऊर्ध्वम्**) उच्छ्रितमुत्कृष्टम् (**कृण्वन्तु**) (**अध्वरस्य**) अहिंसनीयस्य (**केतुम्**) प्रज्ञाम्॥८॥

अन्वयः-हे मनुष्या! यथादित्या रुद्रा वसवः पृथिवी द्यावाक्षामा अन्तरिक्षं च सजोषसः सुनीथा यज्ञं वर्द्धयन्ति तथा सजोषसो देवा यज्ञमवन्त्वध्वरस्य केतुमूर्ध्वं कृण्वन्तु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा मासाः प्राणाः पृथिव्यादयश्च पदार्थाः सहानुभूत्या वर्त्तन्ते तथैव सर्वैः सर्वैः सह प्रीतिमुत्पाद्य विज्ञानं वर्धयित्वाऽहिंसाधर्मस्योन्नतिः कार्य्याः॥८॥

पदार्थः-हे मनुष्यो! जैसे (**आदित्याः**) बारह मास (**रुद्राः**) प्राण (**वसवः**) पृथिवी आदि (**पृथिवी**) विस्तारयुक्त (**द्यावाक्षामा**) सूर्य्य और भूमि तथा (**अन्तरिक्षम्**) आकाश ये सब (**सजोषसः**) सबके साथ समान प्रीति के सेवक (**सुनीथाः**) सुन्दर सङ्गति को प्राप्त (**यज्ञम्**) यज्ञ को (**वर्द्धयन्ति**) बढ़ाते हैं, वैसे (**सजोषसः**) समान प्रीतिवाले (**देवाः**) कामना करते हुए विद्वान् यज्ञ की (**अवन्तु**) रक्षा करें (**अध्वरस्य**) रक्षा योग्य धर्म की (**केतुम्**) बुद्धि को (**ऊर्ध्वम्**) उत्तेजित (**कृण्वन्तु**) करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे महीने, प्राण और पृथिवी आदि पदार्थ अविरुद्धता के साथ वर्त्तमान रहते हैं, वैसे ही सबको सबके साथ प्रीति उत्पन्न कर, विज्ञान बढ़ा के अहिंसाधर्म की उन्नति करनी चाहिये॥८॥

पुनः के पूर्णं सुखमाप्नुवन्तीत्याह॥

फिर कौन पूर्ण सुख को प्राप्त होते हैं, इस विषय को अगले मन्त्र में कहा है॥

हंसाइव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः।
उन्नीयमानाः कविभिः पुरस्ताद् देवा देवानामपि यन्ति पाथः॥९॥

हंसाःऽइव। श्रेणिऽशः। यतानाः। शुक्रा। वसानाः। स्वरवः। नः। आ। अगुः। उत्ऽनीयमानाः। कविऽभिः। पुरस्तात्। देवाः। देवानाम्। अपि। यन्ति पाथः॥९॥

पदार्थः-(**हंसाइव**) यथा पक्षिविशेषाः (**श्रेणिशः**) कृतश्रेणयो विहितपङ्क्तयः (**यतानाः**) प्रयतमानाः (**शुक्रा**) शुक्राण्युदकानि (**वसानाः**) आच्छादयन्तः (**स्वरवः**) सुस्वरान् सेवमानाः (**नः**) अस्मान् (**आ**) समन्तात् (**अगुः**) प्राप्नुवन्ति (**उन्नीयमानाः**) उत्कृष्टान् गुणान् प्रापयन्तः (**कविभिः**)

मेधाविभिः **(पुरस्तात्)** प्रथमतः **(देवाः)** दिव्यगुणकर्मस्वभावा विपश्चितः **(देवानाम्)** विदुषाम् **(अपि) (यन्ति)** गच्छन्ति **(पाथः)** मार्गम्॥९॥

अन्वयः-ये देवाः श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो हंसाइव न उन्नीयमानाः पुरस्तात् कविभिः सह वर्त्तमानानां देवानां पाथोऽपि यन्ति तेऽप्यस्मानागुः॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये हंसाइव संहता भूत्वा प्रयत्नेन सर्वानुन्नीय स्वयमुन्नताः सन्त आप्तमार्गं गत्वा वीर्य्यं वर्धयन्ति त एव पुष्कलं सुखमश्नुवते॥९॥

पदार्थः-जो **(देवाः)** उत्तम गुण, कर्म, स्वभाववाले पण्डित लोग **(श्रेणिशः)** पङ्क्ति बांधे **(यतानाः)** यत्न करते और **(शुक्राः)** जलों को **(वसानाः)** आच्छादन करते हुए **(स्वरवः)** सुन्दर स्वरों का सेवन करनेहारे **(हंसाइव)** हंसों के तुल्य दर्शनीय **(नः)** हमको **(उन्नीयमानाः)** उत्तम गुणों को प्राप्त करते हुए **(पुरस्तात्)** पहिले से **(कविभिः)** बुद्धिमानों के साथ वर्त्तमान **(देवानाम्)** विद्वानों के **(पाथः)** मार्ग को **(अपि, यन्ति)** चलते हैं, वे भी हमको **(आ, अगुः)** अच्छे प्रकार प्राप्त होते हैं॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो हंसों के तुल्य मिल के प्रयत्न से सबकी उन्नति कर अपने आप उन्नति को प्राप्त हुए आप्त सत्यवादियों के मार्ग में चल के पराक्रम बढ़ाते हैं, वे ही पूर्ण सुख को भोगते हैं॥९॥

पुनः के विद्वांसः सत्कारमाप्नुवन्तीत्याह॥

अब कौन विद्वान् जन सत्कार पाते हैं, इस विषय को अगले मन्त्र में कहा है॥

शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम्।
वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु॥१०॥

शृङ्गाणिऽइव। इत्। शृङ्गिणाम्। सम्। ददृश्रे। चषालऽवन्तः। स्वरवः। पृथिव्याम्। वाघत्ऽभिः। वा। विऽहवे। श्रोषमाणाः। अस्मान्। अवन्तु। पृतनाज्येषु॥१०॥

पदार्थः-**(शृङ्गाणीव) (इत्)** एव **(शृङ्गिणाम्)** महिषादीनाम् **(सम्)** सम्यक् **(ददृश्रे)** दृश्यन्ते **(चषालवन्तः)** बहवश्चषाला भोगा विद्यन्ते येषान्ते **(स्वरवः)** प्रशंसकाः **(पृथिव्याम्)** भूमौ **(वाघद्भिः)** ऋत्विग्भिः **(वा)** पक्षान्तरे **(विहवे)** विशेषेण ह्वयति शब्दयति यस्मिँस्तस्मिन् **(श्रोषमाणाः)** शृण्वन्तः। अत्र **वाच्छन्दसी**ति द्वित्वाभावः। **(अस्मान्) (अवन्तु) (पृतनाज्येषु)** संग्रामेषु॥१०॥

अन्वयः-ये चषालवन्तः स्वरवो विहवे श्रोषमाणा वाघद्भिः सह वर्त्तमानाः पृथिव्यां शृङ्गिणां शृङ्गाणीव सं ददृश्रे त इत्पृतनाज्येषु वेतरेषु व्यवहारेष्वस्मानवन्तु॥१०॥

भावार्थः-अत्रोपमालङ्कारः। ये बहुश्रुता विद्वांसः स्वात्मवत्सर्वान् पालयन्ति ते सुकीर्त्योत्तमाङ्गे मस्तके संस्थितानि पशूनां शृङ्गाणीव योग्यपदवीं प्राप्य संसारे स्तूयमानाः सर्वैः सत्क्रियन्ते॥१०॥

पदार्थः–जो **(चषालवन्तः)** बहुत भोगोंवाले **(स्वरवः)** प्रशंसक लोग **(विहवे)** विशेष कर जहाँ पठन-पाठनादि का शब्द करते उस स्थान में **(श्रोषमाणाः)** सुनते हुए **(वाघद्भिः)** ऋत्विजों के साथ वर्त्तमान **(पृथिव्याम्)** पृथिवी पर **(शृङ्गिणाम्)** भैंसा आदि के **(शृङ्गाणीव)** सींगों के तुल्य **(सम्, ददृश्रे)** सम्यक् दीख पड़ते हैं, वे **(इत्)** ही **(पृतनाज्येषु)** संग्रामों **(वा)** अथवा अन्य व्यवहारों में **(अस्मान्)** हमको **(अवन्तु)** रक्षित करें॥१०॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो बहुश्रुत विद्वान् लोग अपने आत्मा के तुल्य सबकी रक्षा करते हैं, वे उत्तम कीर्त्ति से श्रेष्ठाङ्ग मस्तक में वर्त्तमान सब पशुओं के सींगों के तुल्य उत्तम पद को प्राप्त होकर संसार में स्तुति किये हुए सब के सत्कार को प्राप्त होते हैं॥१०॥

अथ ब्रह्मचर्य्यानुष्ठानेन किं भवतीत्याह॥

अब ब्रह्मचर्य्य के अनुष्ठान से क्या होता है, इस विषय को अगले मन्त्र में कहा है॥

वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय॥ ११॥ ४॥

वनस्पते। शतऽवल्शः। वि। रोह। सहस्रऽवल्शाः। वि। वयम्। रुहेम। यम्। त्वाम्। अयम्। स्वऽधितिः। तेजमानः। प्रऽनिनाय। महते। सौभगाय॥ ११॥

पदार्थः–(**वनस्पते**) वनस्पतिरिव वर्त्तमान **(शतवल्शः)** शतानि वल्शा अङ्कुरा यस्य सः **(वि)** विशेषेण **(रोह)** वर्द्धयस्व **(सहस्रवल्शाः)** सहस्राङ्कुरा वनस्पतय इवाङ्गोपाङ्गैः सह वर्त्तमानाः **(वि)** **(वयम्)** **(रुहेम)** वर्द्धेमहि **(यम्)** **(त्वाम्)** **(अयम्)** **(स्वधितिः)** वज्रः **(तेजमानः)** तीक्ष्णीकृतः **(प्रणिनाय)** प्रकर्षेण प्रापय **(महते)** **(सौभगाय)** शोभनस्य धनस्य भावाय॥११॥

अन्वयः–हे वनस्पते! यथा शतवल्शो वंशादिवृक्षविशेषो वर्द्धते तथा त्वं विरोह सुखं प्रणिनाय च यथा सहस्रवल्शा दूर्वादयो तथैव वर्द्धन्ते वयं विरुहेम यथाऽयं तेजमानः स्वधितिर्विद्युन्महते सौभगाय यन्त्वां वर्धयति तं वयमपि वर्धयेम॥११॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या ब्रह्मचर्य्यविद्यासुशिक्षाधर्मपुरुषार्थैर्युक्ताः सन्तः कार्य्यसिद्धये प्रयतन्ते ते वंशादयो वृक्षाइव सर्वतो वर्द्धन्ते यथा सुतीक्ष्णैः शस्त्रैः शत्रून् सञ्छित्याऽजातशत्रवः सन्ति तान् विद्युन्मेघमिव शत्रुदलानि दग्धुं समर्था भूत्वा महदैश्वर्यं जनयेयुरिति॥११॥

अत्र विद्वच्छ्रोत्रियब्रह्मचारिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्यष्टमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः–हे **(वनस्पते)** वनस्पति के समान वर्त्तमान परोपकारी सज्जन! जैसे **(शतवल्शः)** सैकड़ों अंकुरवाला बांस आदि वृक्ष विशेष बढ़ता है, वैसे आप **(वि, रोह)** वृद्धि को प्राप्त हूजिये और सुख को

(प्रणिनाय) उत्तम प्रकार से प्राप्त कीजिये। जैसे **(सहस्रवल्शाः)** हजारों अंकुरवाले वनस्पतियों के तुल्य साङ्गोपाङ्ग वर्त्तमान दूर्वा आदि बढ़ते हैं, वैसे ही **(वयम्)** हम लोग **(वि, रुहेम)** विशेष कर बढ़ें। जैसे **(अयम्)** यह **(तेजमानः)** तीक्ष्ण किया **(स्वधितिः)** वज्ररूप विद्युत् अग्नि **(महते)** बड़े **(सौभगाय)** सुन्दर धन होने के लिये **(यम्)** जिस **(त्वाम्)** आपको बढ़ाता है, वैसे हम लोग भी बढ़ावें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य ब्रह्मचर्य्य, विद्या, सुशिक्षा, धर्म और पुरुषार्थों से युक्त हुए कार्य्यसिद्धि के अर्थ प्रयत्न करते हैं, वे बांस आदि वृक्षों के तुल्य सब ओर से बढ़ते हैं। जैसे सुन्दर तीक्ष्ण शस्त्रों से शत्रुओं को जीत के अजातशत्रु होते हैं, उनको जैसे विद्युत् मेघ को, वैसे शत्रु दलों को जलाने को समर्थ हो के महान् ऐश्वर्य्य को उत्पन्न करें॥११॥

इस सूक्त में विद्वान् वेदपाठी और बह्मचारी के गुणों का वर्णन होने से इस सूक्त केअर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है यह जानना चाहिये॥

यह आठवां सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ नवर्चस्य नवमसूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १, ४ बृहती। २, ५-७ निचृद्बृहती। ३, ८ विराट् बृहती छन्दः। मध्यमः स्वरः। ९ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैरहिंसाधर्मो ग्राह्य इत्याह॥

अब नव ऋचावाले नवमें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में मनुष्यों को अहिंसा धर्म का ग्रहण करना चाहिये, इस विषय को कहा है॥

सखा॑यस्त्वा ववृमहे दे॒वं मर्ता॑स ऊ॒तये॑।
अ॒पां नपा॑तं सु॒भगं॑ सु॒दीदि॑तिं सु॒प्रतू॑र्तिमने॒हस॑म्॥ १॥

सखा॑यः। त्वा॒। व॒वृ॒म॒हे॒। दे॒वम्। मर्ता॑सः। ऊ॒तये॑। अ॒पाम्। नपा॑तम्। सु॒ऽभग॑म्। सु॒ऽदीदि॑तिम्। सु॒ऽप्रतू॑र्तिम्। अ॒ने॒हस॑म्॥ १॥

पदार्थः-(**सखायः**) सुहृदः सन्तः (**त्वा**) त्वाम् (**ववृमहे**) वृणुयाम (**देवम्**) विद्वांसम् (**मर्त्तासः**) मननशीला मनुष्याः (**ऊतये**) रक्षणाय (**अपाम्**) प्राणानां मध्ये (**नपातम्**) आत्मत्वेन नाशरहितम् (**सुभगम्**) उत्तमैश्वर्यम् (**सुदीदितिम्**) विद्याविनयप्रकाशयुक्तम्। **दीदयतीति ज्वलतिकर्मा।** (निघं०१.१६) (**सुप्रतूर्त्तिम्**) सुष्ठु प्रकृष्टा तूर्त्तिः शीघ्रता यस्मिँस्तम् (**अनेहसम्**) अहन्तारम्॥१॥

अन्वयः-हे उपदेशक! मर्त्तासः सखायो वयमूतये अपां नपातमनेहसं सुप्रतूर्त्तिं सुदीदितिं सुभगं देवं त्वा ववृमहे॥१॥

भावार्थः-मनुष्यैर्विद्यादिसौभाग्यजननाय सुहृद्भावमाश्रित्याप्तस्य विदुषः शरणं गत्वाऽहिंसाधर्मः संग्रहीतव्यः॥१॥

पदार्थः-हे उपदेशक सज्जन (**मर्त्तासः**) मननशील (**सखायः**) मित्र हुए हम लोग (**ऊतये**) रक्षा आदि के लिये (**अपाम्**) प्राणों के बीच (**नपातम्**) आत्मभाव से नाशरहित (**अनेहसम्**) न मारनेहारे (**सुप्रतूर्त्तिम्**) सुन्दर शीघ्रतायुक्त (**सुदीदितिम्**) विद्या और विनय के प्रकाश से युक्त (**सुभगम्**) उत्तम ऐश्वर्य्यवाले (**देवम्**) विद्वान् (**त्वा**) आपको (**ववृमहे**) स्वीकार करें॥१॥

भावार्थः-मनुष्यों को चाहिये कि विद्यादि सौभाग्य जनने के लिये मित्रभाव का आश्रय कर और आप्त सत्यवक्ता विद्वान् के शरण को प्राप्त हो के अहिंसाधर्म का संग्रह करें॥१॥

विद्यार्थी कं प्राप्य सुखी भवतीत्याह॥

विद्यार्थी किसको पाकर सुखी होता है, इस विषय को अगले मन्त्र में कहा है॥

काय॑मानो व॒ना त्वं यन्मा॒तॄर॒जग॑न्न॒पः।
न तत्ते॑ अग्ने प्रमृषे नि॒वर्त॑नं॒ यद्दू॒रे सन्नि॒हाभ॑वः॥ २॥

कायमानः। वना। त्वम्। यत्। मातृः। अजगन्। अपः। न। तत्। ते। अग्ने। प्रऽमृषे। निऽवर्तनम्। यत्। दूरे। सन्। इह। अभवः॥ २॥

पदार्थः-(**कायमानः**) अध्यापयन्नुपदिशन् वा (**वना**) वनानि याचनीयानि (**त्वम्**) (**यत्**) यतः (**मातृः**) मातर इव पालिकाः (**अजगन्**) प्राप्नुयाः (**अपः**) प्राणान् (**न**) (**तत्**) तस्मात् (**ते**) तव (**अग्ने**) शुभगुणैः प्रकाशमान (**प्रमृषे**) सुखैः संयोजयेः (**निवर्त्तनम्**) अन्यायाचरणात्पृथग्भवनम् (**यत्**) यस्मात् (**दूरे**) (**सन्**) (**इह**) (**अभवः**) भवेः॥ २॥

अन्वयः-हे अग्ने! कायमानः सँस्त्वं यन्मातृरपोऽजगन् यन्निवर्त्तनं दूरे प्रक्षिपेर्मङ्गलायेहाभवस्तत्तस्मात्ते सकाशादहं वना प्रमृषे मर्त्तस्त्वं दूरे न भवेः॥ २॥

भावार्थः-यथा तृषातुरो जलं प्राप्य तृप्यति तथैवाप्तमध्यापकमुपदेशकं वा लब्ध्वा विद्याभिलाषी सर्वतः सुखी भवति॥ २॥

पदार्थः-हे (**अग्ने**) शुभगुणों से प्रकाशमान सज्जन! (**कायमानः**) पढ़ाते वा उपदेश करते (**सन्**) हुए (**त्वम्**) आप (**यत्**) जिससे (**मातृः**) माताओं के तुल्य रक्षक वा प्रिय (**अपः**) प्राणों को (**अजगन्**) प्राप्त होवें और (**यत्**) जिससे (**निवर्त्तनम्**) अन्यायाचरण से पृथक् होने को (**दूरे**) दूर फेंकिये और मङ्गल के अर्थ (**इह**) यहाँ (**अभवः**) हूजिये (**तत्**) इससे (**ते**) आपसे मैं (**वना**) मांगने योग्य पदार्थों को (**प्रमृषे**) सुखों से संयुक्त करूं और मुझसे आप दूर न हूजिये॥ २॥

भावार्थः-जैसे प्यासा जन जल को पाके तृप्त होता, वैसे ही आप्त अध्यापक और उपदेशक को विद्यार्थी जन प्राप्त हो के सब ओर से सुखी होता है॥ २॥

अथ के जगति पूज्या भवन्तीत्याह॥

अब कौन मनुष्य जगत् में पूज्य होते हैं, इस विषय को अगले मन्त्र में कहा है॥

अति तृष्टं ववक्षिथाथैव सुमना असि।
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः॥ ३॥

अति। तृष्टम्। ववक्षिथ। अथ। एव। सुऽमनाः। असि। प्रऽप्र। अन्ये। यन्ति। परि। अन्ये। आसते। येषाम्। सख्ये। असि। श्रितः॥ ३॥

पदार्थः-(**अति**) (**तृष्टम्**) पिपासितम् (**ववक्षिथ**) वोढुमिच्छ (**अथ**) (**एव**) (**सुमनाः**) प्रसन्नचित्तः (**असि**) (**प्रप्र**) प्रकर्षेण (**अन्ये**) (**यन्ति**) गच्छन्ति (**परि**) सर्वतः (**अन्ये**) इतरे (**आसते**) उपविशन्ति (**येषाम्**) (**सख्ये**) सख्युर्भावे कर्मणि वा (**असि**) (**श्रितः**)॥ ३॥

अन्वयः-हे विद्वन्! यतस्त्वं तृष्टं ववक्षिथाऽथ सुमना एवासि येषां सख्ये त्व श्रितोऽसि तेषां मध्यादन्ये प्रप्रातियन्ति। अन्ये पर्य्यासते॥ ३॥

भावार्थः–ये मित्रभावेन तृषातुराय जलमिव विद्यामिच्छवे विद्यां दत्वा प्रसन्नात्मानं कुर्वन्ति त एव जगत्पूज्या भवन्ति॥३॥

पदार्थः–हे विद्वान् जन! जिस कारण आप **(तृष्टम्)** प्यासे को **(ववक्षिथ)** प्राप्त करना चाहते **(अथ)** अथवा **(सुमनाः)** प्रसन्नचित्त **(एव)** ही **(असि)** हैं तथा **(येषाम्)** जिनकी **(सख्ये)** मित्रता वा मित्र कर्म में आप **(श्रितः)** संयुक्त **(असि)** हैं, उनमें से **(अन्ये)** अन्य लोग **(प्रप्र, अति, यन्ति)** विशेष कर अत्यन्त प्राप्त होते तथा **(अन्ये)** अन्य लोग **(परि, आसते)** सब ओर से बैठते हैं॥३॥

भावार्थः–जो लोग मित्रभाव से प्यासे के लिये जल के तुल्य विद्या चाहनेवाले के अर्थ विद्या देकर प्रसन्न रूप करते हैं, वे ही जगत् में पूज्य होते हैं॥३॥

पुनः पाखण्डिनः कथं दूरीभवन्तीत्याह॥

फिर पाखण्डी लोग कैसे दूर होते हैं, इस विषय को अगले मन्त्र में कहा है॥

ईयिवांसमति स्रिधः शश्वतीरति सश्चतः।
अन्वीमविन्दन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितम्॥४॥

ईयिऽवांसम्। अति। स्रिधः। शश्वतीः। अति। सश्चतः। अनु। ईम्। अविन्दन्। निऽचिरासः। अद्रुहः। अप्ऽसु। सिंहम्ऽइव। श्रितम्॥४॥

पदार्थः–**(ईयिवांसम्)** प्राप्नुवन्तम् **(अति)** **(स्रिधः)** अतिसहनशीलाः **(शश्वतीः)** सनातन्यः **(अति)** **(सश्चतः)** समवेताः **(अनु)** **(ईम्)** **(अविन्दन्)** लभेरन् **(निचिरासः)** निश्चयेन चिरन्तन्यः प्रजाः **(अद्रुहः)** द्रोहरहिताः **(अप्सु)** जलेषु **(सिंहमिव)** व्याघ्रमिव **(श्रितम्)** सेवमानम्॥४॥

अन्वयः–हे मनुष्या! अति स्रिधः शश्वतीरति सश्चतो निचिरासोऽद्रुहः प्रजा ईयिवांसमप्सु श्रितं सिंहमिवेमन्वविन्दन् ताः सुखिनीर्यूयं विजानीत॥४॥

भावार्थः–यथा सिंहं दृष्ट्वा मृगादयः पलायन्ते तथैव सुशिक्षिता विदुषीः प्रजाः समीक्ष्य पाखण्डिनो विलीयन्ते॥४॥

पदार्थः–हे मनुष्यो! **(अति)** अति **(स्रिधः)** सहनशील **(शश्वतीः)** सनातन **(अति)** अत्यन्त **(सश्चतः)** आपस में मिले हुए **(निचिरासः)** निश्चय से प्राचीन **(अद्रुहः)** द्रोहरहित प्रजाजन **(ईयिवांसम्)** प्राप्त होते हुए **(अप्सु)** जलों में **(श्रितम्)** आश्रित **(सिंहमिव)** सिंह के तुल्य **(ईम्, अनु, अविन्दन्)** सब ओर से अनुकूल प्राप्त हों, उनको तुम लोग सुख भोगनेवाले जानो॥४॥

भावार्थः–जैसे सिंह को देख के हरिण आदि भाग जाते हैं, वैसे ही सुशिक्षायुक्त विद्वान् प्रजाजनों को देखकर पाखण्डी लोग नष्ट-भ्रष्ट हो जाते हैं॥४॥

पुनरात्मज्ञानविषयमाह॥

फिर आत्मज्ञान विषय को अगले मन्त्र में कहा है॥

स॒सृ॒वांस॑मिव॒ त्मना॒ऽग्निमि॒त्था ति॒रोहि॑तम्।
ऐन॑ नयन्मात॒रिश्वा॑ परा॒वतो॑ दे॒वेभ्यो॑ मथि॒तं परि॑॥५॥५॥

स॒सृ॒वांस॑म्ऽइव। त्मना॑। अ॒ग्निम्। इ॒त्था। ति॒रःऽहि॑तम्। आ। ए॒न॒म्। न॒य॒त्। मा॒त॒रिश्वा॑। प॒रा॒ऽवतः॑। दे॒वेभ्यः॑। म॒थि॒तम्। परि॑॥५॥

पदार्थः-(**ससृवांसमिव**) प्राप्नुवन्तमिव (**त्मना**) आत्मना (**अग्निम्**) पावकम् (**इत्था**) अनेन हेतुना (**तिरोहितम्**) परिच्छिन्नम् (**आ**) (**एनम्**) (**नयत्**) नयति (**मातरिश्वा**) वायुः (**परावतः**) विप्रकृष्टाद्देशात् (**देवेभ्यः**) विद्वद्भ्यः (**मथितम्**) (**परि**) सर्वतः॥५॥

अन्वयः-हे मनुष्या! यथा मातरिश्वा परावतो देवेभ्यो मथितं तिरोहितमग्निं ससृवांसमिव पर्य्यानयदित्था तमेनं त्मना यूयं विजानीत॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथा प्रयत्नेन मन्थनादिना जातमग्निं वायुर्वर्धयति दूरे च गमयति वह्निश्च प्राप्तान् पदार्थान् दहति नैव तिरोहितान्। एवं ब्रह्मचर्य्यविद्यायोगाभ्यासधर्मानुष्ठानसत्पुरुषसङ्गैः साक्षात्कृत आत्मा परमात्मा च सर्वान् दोषान् दग्ध्वा सुप्रकाशितज्ञानं जनयति॥५॥

पदार्थः-हे मनुष्यो! जैसे (**मातरिश्वा**) वायु (**परावतः**) दूर देश से (**देवेभ्यः**) विद्वानों के लिये (**मथितम्**) मन्थन किये (**तिरोहितम्**) परिच्छिन्न (**अग्निम्**) अग्नि को (**ससृवांसमिव**) प्राप्त होते हुए मनुष्य के समान (**परि, आ, नयत्**) सब ओर से सब प्रकार प्राप्त कराता है (**इत्था**) इस प्रकार उस (**एनम्**) अग्नि को (**त्मना**) आत्मा से तुम लोग विशेष कर जानो॥५॥

भावार्थः-इस मन्त्र में [उपमा और] वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे प्रयत्न के साथ मन्थन आदि से उत्पन्न हुए अग्नि को वायु बढ़ाता और दूर पहुँचाता है तथा अग्नि प्राप्त हुए पदार्थों को जलाता है और दूरस्थ पदार्थों को नहीं जलाता। इसी प्रकार ब्रह्मचर्य्य, विद्या, योगाभ्यास, धर्मानुष्ठान और सत्पुरुषों के सङ्ग से साक्षात् किया आत्मा और परमात्मा सब दोषों को जला के सुन्दर प्रकाशित ज्ञान को प्रकट करता है॥५॥

पुनरुपदेशकविषयमाह॥

फिर उपदेशक विषय को अगले मन्त्र में कहा है॥

तन्त्वा॒ मर्ता॑ अगृभ्णत दे॒वेभ्यो॑ हव्यवाहन।
विश्वा॒न्यद्यज्ञाँ अ॑भि॒पासि॑ मानुष॒ तव॒ क्रत्वा॑ यविष्ठ्य॥६॥

तम्। त्वा। मर्ताः। अगृभ्णत। देवेभ्यः। हव्यऽवाहन। विश्वान्। यत्। यज्ञान्। अभिऽपासि। मानुष। तव। क्रत्वा। यविष्ठ्य॥६॥

पदार्थः-(**तम्**) (**त्वा**) (**मर्त्ताः**) मरणधर्माणो मनुष्याः (**अगृभ्णत**) गृह्णन्तु (**देवेभ्यः**) विद्वद्भ्यः (**हव्यवाहन**) यो हव्यानि ग्रहीतव्यानि प्रापयति तत्सम्बुद्धौ (**विश्वान्**) अखिलान् (**यत्**) यः (**यज्ञान्**) विद्यादिप्रापकान् व्यवहारान् (**अभि, पासि**) सर्वतो रक्षसि (**मानुष**) मननशील (**तव**) (**क्रत्वा**) प्रज्ञया (**यविष्ठ्य**) अतिशयेन ब्रह्मचर्य्यविद्याभ्यां प्राप्तयौवन॥६॥

अन्वयः-हे मानुष हव्यवाहन यविष्ठ्य विद्वन्! यद्विश्वान् यज्ञानभिपासि तस्य तव क्रत्वा मर्त्ता देवेभ्यस्तं त्वाऽगृभ्णत॥६॥

भावार्थः-हे मनुष्या! यस्योपदेशेन प्रज्ञां प्राप्य समग्राणि सुखानि भवन्तो लभेरन् तं सर्वतः सत्कुरुत॥६॥

पदार्थः-हे (**मानुष**) मननशील (**हव्यवाहन**) ग्रहण करने योग्य शास्त्रीय युक्तियुक्त वचनों को प्राप्त करानेहारे (**यविष्ठ्य**) अत्यन्त ब्रह्मचर्य और विद्या के अभ्यास से युवावस्था को प्राप्त उपदेशक विद्वन्! (**यत्**) जो आप (**विश्वान्**) समस्त (**यज्ञान्**) विद्यादि के प्रापक व्यवहारों की (**अभि, पासि**) सब ओर से रक्षा करते हैं, उन (**तव**) आपकी (**क्रत्वा**) बुद्धि से (**मर्त्ताः**) मरण धर्मवाले मनुष्य (**देवेभ्यः**) विद्वानों के लिये (**तम्**) उन (**त्वा**) आपको (**अगृभ्णत**) ग्रहण करें॥६॥

भावार्थः-हे मनुष्यो! जिसके उपदेश से बुद्धि को प्राप्त होकर समग्र सुखों को आप लोग प्राप्त होवें, उसका सब ओर से सत्कार करो॥६॥

पुनर्मनुष्याः कथं सर्वभयाद्रहिता भवन्तीत्याह॥

फिर मनुष्य कैसे सब भय से रहित होते हैं, इस विषय को अगले मन्त्र में कहा है॥

तद्भद्रं तव दंसना पाकाय चिच्छदयति।
त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे॥७॥

तत्। भद्रम्। तव। दंसना। पाकाय। चित्। छदयति। त्वाम्। यत्। अग्ने। पशवः। सम्ऽआसते। सम्ऽइद्धम्। अपिऽशर्वरे॥७॥

पदार्थः-(**तत्**) प्रज्ञाजन्यं ज्ञानम् (**भद्रम्**) भन्दनीयम् कल्याणकारम् (**तव**) (**दंसना**) दंसनं दर्शनम्। अत्र विभक्तेराकारादेशः। (**पाकाय**) परिपक्वत्वाय (**चित्**) इव (**छदयति**) सत्करोति। **छदयतीत्यर्चतिकर्मा।** (निघं०३.१४)। (**त्वाम्**) (**यत्**) यतः (**अग्ने**) अग्निरिव प्रकाशात्मन् (**पशवः**) गवादयः (**समासते**) सम्यगुपविशन्ति (**समिद्धम्**) प्रदीप्तम् (**अपिशर्वरे**) निश्चिते रात्रावन्धकारे॥७॥

अन्वयः-हे अग्ने! यद्ये मनुष्या अपिशर्वरे समिद्धमग्निं पशवइव त्वां समासते तेषां पाकायाग्निश्चिदिव तद्भद्रं तव दंसना छदयति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽरण्येऽग्नेरभितः स्थिताः पशवः सिंहादिभ्यो रक्षिता भवन्ति तथैव विद्वज्ज्ञानाश्रयो मनुष्यान् सर्वतो भयात् रक्षति॥७॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य तेजस्वि! **(यत्)** जो मनुष्य **(अपिशर्वरे)** निश्चित अन्धकार रूप रात्रि में भी **(समिद्धम्)** प्रज्वलित अग्नि के निकट जैसे **(पशवः)** गौ आदि पशु शीत निवारणार्थ, वैसे **(त्वाम्)** आपके निकट **(समासते)** बैठते हैं, उनके **(पाकाय)** परिपक्व दृढ़ होने के लिये अग्नि के **(चित्)** तुल्य **(तत्)** उस **(भद्रम्)** कल्याणकारक बुद्धि से उत्पन्न ज्ञान को **(तव)** आपका **(दंसना)** दर्शनशास्त्र **(छदयति)** बढ़ाता है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे वन में अग्नि के चारों ओर स्थित हुए पशु सिंह आदि से रक्षित होते हैं, वैसे ही विद्वानों के ज्ञान का आश्रय मनुष्यों की सब ओर के भय से रक्षा करता है॥७॥

पुनरीश्वर एव ध्येय इत्याह॥

फिर ईश्वर का ही ध्यान करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

आ जुहोता स्वध्वरं शीरं पावकशोचिषम्।
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत॥८॥

आ। जुहोत। सुऽअध्वरम्। शीरम्। पावकऽशोचिषम्। आशुम्। दूतम्। अजिरम्। प्रत्नम्। ईड्यम्। श्रुष्टी। देवम्। सपर्यत॥८॥

पदार्थः-**(आ)** समन्तात् **(जुहोत)** गृह्णीत। अत्र **संहितायामिति** दीर्घः। **(स्वध्वरम्)** सुष्ठ्वहिंसनीयम् **(शीरम्)** विद्युद्रूपेण सर्वत्र शयानम् **(पावकशोचिषम्)** पवित्रकरदीप्तिम् **(आशुम्)** सद्यो गामिनम् **(दूतम्)** दूतवद्देशान्तरे समाचारप्रापकम् **(अजिरम्)** गन्तारं प्रक्षेप्तारम् **(प्रत्नम्)** प्राक्तनम् **(ईड्यम्)** अध्यन्वेषणीयम् **(श्रुष्टी)** सद्यः **(देवम्)** दिव्यगुणकर्मस्वभावं सर्वानन्दप्रदम् **(सपर्य्यत)** परिचरत॥८॥

अन्वयः-हे विद्वांसो! यूयं स्वध्वरं शीरं पावकशोचिषमाशुं दूतमजिरं प्रत्नमीड्यं विद्युदाख्यं वह्निमाजुहोत तथैव स्वप्रकाशं सर्वत्र व्यापकं परमात्मानं देवं श्रुष्टी सपर्य्यत॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो विद्युद्वद् व्यापकः स्वप्रकाशोऽविद्यादिदोषहन्ता सनातनोऽनादिः प्रशंसनीयः परमात्माऽस्ति तमेव ध्यायत॥८॥

पदार्थः-हे विद्वानो! तुम लोग जैसे **(स्वध्वरम्)** हिंसा न करने योग्य **(शीरम्)** विद्युत् रूप से

सब जगह भरे हुए (**पावकशोचिषम्**) शुद्ध प्रकाशवाले (**आशुम्**) शीघ्रगामी (**दूतम्**) दूत के तुल्य देशान्तर में समाचार पहुँचानेवाले (**अजिरम्**) फेंकनेहारे (**प्रत्नम्**) प्राचीन (**ईड्यम्**) खोजने योग्य विद्युत् रूप अग्नि का (**आ, जुहोत**) अच्छे प्रकार ग्रहण करो, वैसे ही स्वयं प्रकाशरूप सर्वत्र व्यापक (**देवम्**) उत्तम गुणकर्मस्वभावयुक्त सब आनन्द देनेवाले परमात्मा की (**श्रुष्टी**) शीघ्र (**सपर्य्यत**) सेवा करो॥८॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो बिजुली के तुल्य व्यापक, स्वयं प्रकाशरूप, अविद्यादि दोषों का नाश करनेवाला, सनातन, अनादि काल से प्रशंसा करने योग्य परमात्मा है, उसी का नित्य ध्यान करो॥८॥

पुनरग्निः किं करोतीत्याह॥

फिर अग्नि क्या करता है, इस विषय को अगले मन्त्र में कहा है॥

त्रीणि॑ शता त्री स॒हस्रा॑ण्य॒ग्निं त्रिं॒शच्च॑ दे॒वा नव॑ चासपर्यन्।
औक्षं॑न् घृ॒तैरस्तृ॑णन् ब॒र्हिर॑स्मा॒ आदिद्धोता॑रं॒ न्य॑सादयन्त॥ ९॥ ६॥

त्रीणि॑। शता। त्री। स॒हस्रा॑णि। अ॒ग्निम्। त्रिं॒शत्। च॒। दे॒वाः। नव॑। च॒। अ॒स॒प॒र्य॒न्। औक्षं॑न्। घृ॒तैः। अस्तृ॑णन्। ब॒र्हिः। अ॒स्मै॒। आत्। इत्। होता॑रम्। नि। अ॒सा॒द॒य॒न्त॒॥ ९॥

पदार्थः–(**त्रीणि**) (**शता**) शतानि (**त्री**) त्रीणि (**सहस्राणि**) तत्त्वानि (**अग्निम्**) पावकम् (**त्रिंशत्**) (**च**) त्रयश्च (**देवाः**) पृथिव्यादयः (**नव**) हिरण्यगर्भादयः (**च**) (**असपर्यन्**) सेवन्ते (**औक्षन्**) सिञ्चन्ति (**घृतैः**) उदकैः (**अस्तृणन्**) (**बर्हिः**) (**अस्मै**) (**आत्**) आनन्तर्ये (**इत्**) एव (**होतारम्**) आदातारम् (**नि**) (**असादयन्त**) कार्य्येषु नियोजयत॥९॥

अन्वयः–हे विद्वांसो! यमग्निं त्रीणि शता त्री सहस्राणि त्रिंशच्च नव च देवा असपर्यन् घृतैरौक्षन्नस्मै बर्हिरस्तृणन् तमाद्धोतारमिदेव यूयं न्यसादयन्त॥९॥

भावार्थः–हे मनुष्या! भवन्तो यस्याश्रये त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि द्विचत्वारिंशच्च तत्त्वानि सन्ति य एकः सर्वान् विद्युद्रूपेण व्याप्नोति तेनाग्निना सर्वाणि कार्य्याणि साध्नुवन्तु॥९॥

अत्राग्निमनुष्यादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति नवमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः–हे विद्वान् लोगो! जिस (**अग्निम्**) अग्नि को (**त्रीणि**) तीन (**शता**) सैंकड़े (**त्री**) तीन (**सहस्राणि**) हजार तत्त्व (**च**) और (**त्रिंशत्**) पृथिवी आदि तीस तथा तीन तेंतीस (**च**) और (**नव**) नौ

हिरण्यगर्भादि **(देवाः)** दिव्यगुणवाले पदार्थ **(असपर्यन्)** सेवन करते **(घृतैः)** जलों से **(औक्षन्)** सींचते **(अस्मै)** इस अग्नि के लिये **(बर्हिः)** पदार्थ वृद्धि का **(अस्तृणन्)** विस्तार करते उस **(आत्)** विद्याप्राप्ति के पश्चात् **(होतारम्)** आदर करनेवाले कार्यसाधक **(इत्)** को ही तुम लोग **(नि, असादयन्त)** कार्य्यों में निरन्तर युक्त करो॥९॥

भावार्थः-हे मनुष्यो! जिसके आश्रय में तेंतीस हजार तीन सौ बयालीस तत्त्व हैं, जो एक सबको विद्युत् रूप से व्याप्त है, उस अग्नि के आश्रय से आप लोग सब कार्य्य सिद्ध करो॥९॥

इस सूक्त में अग्नि और मनुष्यादि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह नवमां सूक्त और छठा वर्ग समाप्त हुआ॥

अथ नवर्चस्य दशमस्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १, ५, ८ विराडुष्णिक्। ३ उष्णिक्। ४, ६, ७, ९ निचृदुष्णिक् छन्दः। ऋषभः स्वरः। २ भुरिग् गायत्री छन्दः। षड्जः स्वरः॥

अथेश्वरः किं करोतीत्याह॥

अब नौ ऋचावाले दशमें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में ईश्वर क्या करता है, इस विषय को कहते हैं॥

त्वाम॑ग्ने मनी॒षिण॑: स॒म्राज॑ं चर्षणी॒नाम्। दे॒वं मर्ता॑स इन्धते॒ सम॑ध्व॒रे॥ १॥

त्वाम्। अ॒ग्ने॒। म॒नी॒षिण॑ः। स॒म्ऽराज॑म्। च॒र्ष॒णी॒नाम्। दे॒वम्। मर्तासः। इ॒न्ध॒ते॒। सम्। अ॒ध्व॒रे॥ १॥

पदार्थः-(**त्वाम्**) अग्निरिव वर्त्तमानं परमात्मानम् (**अग्ने**) स्वप्रकाशस्वरूप (**मनीषिणः**) मनस ईषिणः। अत्र **शकन्ध्वादिना** पररूपम्। (**सम्राजम्**) सम्राडिव वर्त्तमानम् (**चर्षणीनाम्**) मनुष्यादि-प्रजानाम् (**देवम्**) सर्वसुखदातारम् (**मर्त्तासः**) मनुष्याः (**इन्धते**) प्रकाशयन्ति (**सम्**) (**अध्वरे**) अहिंसनीये धर्म्ये व्यवहारे॥ १॥

अन्वयः-हे अग्ने जगदीश्वर! मनीषिणो मर्त्तासो यं चर्षणीनां सम्राजं देवं त्वामध्वरे समिन्धते तमेव वयमप्युपासीमहि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निः सूर्य्यादिरूपेण सर्वं जगत्प्रकाश्योपकृत्याऽऽनन्दयति तथैव परमात्माऽन्तर्यामिरूपेण जिज्ञासूनां योगिनामात्मनो विशेषतः सामान्यतः सर्वेषां च प्रकाश्य जगत्स्थैरसङ्ख्यै पदार्थैरुपकृत्याऽभ्युदयनिःश्रेयससुखदानेन सदैव सुखयति॥ १॥

पदार्थः-हे (**अग्ने**) स्वयं प्रकाशरूप जगदीश्वर! (**मनीषिणः**) मननशील (**मर्त्तासः**) मनुष्य जिन (**चर्षणीनाम्**) मनुष्यादि प्रजाओं के (**सम्राजम्**) सम्यक् न्यायाधीश राजा (**देवम्**) सब सुख देनेवाले (**त्वाम्**) आपको (**अध्वरे**) रक्षणीय धर्मयुक्त व्यवहार में (**सम्, इन्धते**) सम्यक् प्रकाशित करते हैं, उन्हीं आपकी हम भी उपासना करें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि सूर्य्यादि रूप से सब जगत् को प्रकाशित और उपकृत कर आनन्दित करता है, वैसे ही परमात्मा अन्तर्यामी रूप से जिज्ञासु योगी लोगों के आत्माओं को विशेष और सामान्य से सबके आत्माओं को प्रकाशित कर और जगत् के असंख्य पदार्थों से उपकृत कर इस लोक-परलोक के सुख देने से सदैव सुखी करता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वां य॒ज्ञेष्वृ॒त्विज॒मग्ने॒ होता॑रमीळते। गो॒पा ऋ॒तस्य॑ दीदिहि॒ स्वे द॑मे॥ २॥

त्वाम्। यज्ञेषु। ऋत्विजम्। अग्ने। होतारम्। ईळते। गोपाः। ऋतस्य। दीदिहि। स्वे। दमे॥ २॥

पदार्थः-(**त्वाम्**) (**यज्ञेषु**) पूजनीयेषु व्यवहारेषु वा (**ऋत्विजम्**) ऋत्विग्वत्सुखसाधकम् (**अग्ने**) अविद्यादोषप्रदाहकपरमात्मन् (**होतारम्**) सर्वस्य धर्त्तारम् (**ईळते**) स्तुवन्ति (**गोपाः**) रक्षकाः (**ऋतस्य**) सत्यस्य (**दीदिहि**) प्रकाशय (**स्वे**) स्वकीये (**दमे**) दमनशीले व्यवहारे॥ २॥

अन्वयः-हे अग्ने जगदीश्वर! य ऋतस्य गोपा यज्ञेष्वृत्विजं होतारं यं त्वामीळते स त्वं स्वे दमे तान् दीदिहि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः! हे परमेश्वर! ये सत्यभाषणादिलक्षणं धर्ममनुष्ठायाऽसत्यभाषणादिलक्षणमधर्मं विहाय त्वां भजन्ति ते भवन्तं प्राप्य सदाऽऽनन्दिता इह वसन्ति॥ २॥

पदार्थः-हे (**अग्ने**) अविद्यादि दोषों के नाशक जगदीश्वर! जो (**ऋतस्य**) सत्य के (**गोपाः**) रक्षक विद्वान् लोग (**यज्ञेषु**) अच्छे व्यवहारों वा यज्ञों में (**ऋत्विजम्**) ऋत्विज् के तुल्य सुखसाधक (**होतारम्**) सबके धारण करनेहारे (**त्वाम्**) आपकी (**ईडते**) स्तुति करते हैं सो आप (**स्वे**) अपने (**दमे**) नियमरूप व्यवहार में उन विद्वानों को (**दीदिहि**) विज्ञान दान दीजिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सत्यभाषणादि धर्म का अनुष्ठान कर और असत्य भाषणादि रूप अधर्म को छोड़ के आपका भजन करते हैं, वे आपको प्राप्त होके सदा आनन्दित हुए इस संसार में वसते हैं॥ २॥

अथ मनुष्याः कथं सुखानि लभेरन्नित्याह॥

अब मनुष्य कैसे सुखों को प्राप्त हों, इस विषय को अगले मन्त्र में कहा है॥

स घा यस्ते ददाशति समिधा जातवेदसे। सो अग्ने धत्ते सुवीर्यं स पुष्यति॥ ३॥

सः। घ। यः। ते। ददाशति। समऽइधा। जातऽवेदसे। सः। अग्ने। धत्ते। सुऽवीर्यम्। सः। पुष्यति॥ ३॥

पदार्थः-(**सः**) (**घ**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**यः**) (**ते**) तुभ्यम् (**ददाशति**) (**समिधा**) सम्यक् प्रदीपकेनेन्धनेन सुविज्ञानेन वा (**जातवेदसे**) जातेषु पदार्थेषु विद्यमानाय जातप्रज्ञानाय वा (**सः**) (**अग्ने**) सर्वस्य प्रकाशक (**धत्ते**) धरति (**सुवीर्य्यम्**) शोभनं विज्ञानादिधनं पराक्रमं वा (**सः**) (**पुष्यति**) सर्वतः पुष्टो भवति॥ ३॥

अन्वयः-हे अग्ने! यस्समिधा जातवेदसे त आत्मानं ददाशति स घ सुवीर्य्यं धत्ते स पुष्यति सोऽन्यान् पोषयति च॥ ३॥

भावार्थः-यथा प्राणिनोऽग्नौ घृतादिकं प्रक्षिप्य वाय्वादिशुद्धिद्वारा सर्वाऽऽनन्दं प्राप्नुवन्ति तथैव विद्वांसः परमात्मनि स्वात्मनः समर्प्याऽखिलानि सुखानि लभन्ते॥ ३॥

पदार्थः–हे **(अग्ने)** सबके प्रकाशक जन! **(यः)** जो **(समिधा)** सम्यक् प्रकाशक इन्धन वा सुन्दर विज्ञान से **(जातवेदसे)** उत्पन्न हुए पदार्थों में विद्यमान वा बुद्धि को प्राप्त हुए **(ते)** आपके लिये आत्मा अपने स्वरूप को **(ददाशति)** देता प्राप्त कराता है **(सः, घ)** वही **(सुवीर्य्यम्)** सुन्दर विज्ञानादि धन वा पराक्रम को **(धत्ते)** धारण करता **(सः)** वह **(पुष्यति)** सब ओर से पुष्ट होता और **(सः)** वह दूसरों को पुष्ट करता है॥३॥

भावार्थः–जैसे प्राणी अग्नि में घृतादि उत्तम द्रव्य का होम कर वायु आदि की शुद्धि होने से सब आनन्द **[**को**]** प्राप्त होते हैं, वैसे ही विद्वान् लोग परमात्मा में **[**अपने को**]** समर्पण कर समस्त सुखों को प्राप्त होते हैं॥३॥

अथोपदेशककृत्यमाह॥

अब उपदेशक का कर्त्तव्य कहते हैं॥

स केतुरध्वराणामग्निर्देवेभिरागमत्। अज्ञानः सप्त होतृभिर्हविष्मते॥४॥

सः। केतुः। अध्वराणाम्। अग्निः। देवेभिः। आ। अगमत्। अज्ञानः। सप्त। होतृऽभिः। हविष्मते॥४॥

पदार्थः–(**सः**) **(केतुः)** ध्वज इव प्रज्ञापकः **(अध्वराणाम्)** अहिंसामयानां यज्ञानाम् **(अग्निः)** पावकइव **(देवेभिः)** दिव्यगुणैः पदार्थैरिव विद्वद्भिः **(आ)** **(अगमत्)** आगच्छेत् **(अज्ञानः)** प्रसिद्धो दिव्यान् गुणान् प्रकटीकुर्वन् **(सप्त)** सप्तभिः पञ्चप्राणमनोबुद्धिभिः **(होतृभिः)** आदातृभिः **(हविष्मते)** प्रशस्तानि हवींषि दातव्यानि यस्य तस्मै॥४॥

अन्वयः–हे विद्वन्! यथा स केतुरज्ञानोऽग्निर्देवेभिः सप्त होतृभिः सहाऽध्वराणां हविष्मत आगमत् तथा त्वमागच्छ॥४॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा विज्ञाय संसेवितोऽग्निर्दिव्यान् गुणान् प्रयच्छति तथैव सेवित्वा आप्ता विद्वांसोऽहिंसादिलक्षणं धर्मं विज्ञाप्य दिव्यानि सुखानि श्रोतृभ्यो ददति॥४॥

पदार्थः–हे विद्वन् पुरुष! जैसे **(सः)** वह **(केतुः)** ध्वजा के तुल्य प्रज्ञापक **(अज्ञानः)** दिव्य गुणों को प्रकट करता हुआ प्रसिद्ध **(अग्निः)** अग्नि **(देवेभिः)** दिव्य गुणोंवाले पदार्थों के तुल्य विद्वानों और **(होतृभिः)** ग्रहण करनेहारे **(सप्त)** पाँच प्राण, मन और बुद्धि के साथ **(अध्वराणाम्)** अहिंसारूप यज्ञों के सम्बन्धी **(हविष्मते)** प्रशस्त देने योग्य पदार्थोंवाले जन के लिये **(आ, अगमत्)** आवे प्राप्त होवे अर्थात् अग्निविद्यायुक्त होवे, वैसे तू प्राप्त हो॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विज्ञान कर सम्यक् सेवन किया अग्नि दिव्य गुणों को देता है, वैसे ही सेवन किये आप्त विद्वान् जन् अहिंसादि रूप धर्म को जता कर श्रोताओं के लिये दिव्य सुखों को देते हैं॥४॥

अथाध्यापकविद्वत्कृत्यमाह॥

अब अध्यापक और विद्वान् के कर्त्तव्य को कहते हैं॥

प्र होत्रे॑ पू॒र्व्यं वचो॒ऽग्नये॑ भरता बृ॒हत्। वि॒पां ज्योतीं॑षि बिभ्रते॒ न वे॒धसे॑॥५॥७॥

प्र। होत्रे॑। पू॒र्व्यम्। वचः॑। अ॒ग्नये॑। भर॒त॒। बृ॒हत्। वि॒पाम्। ज्योतीं॑षि। बिभ्र॑ते। न। वे॒धसे॑॥५॥

पदार्थः-(**प्र**) (**होत्रे**) आदात्रे (**पूर्व्यम्**) पूर्वैर्विद्वद्भिरुपदिष्टम् (**वचः**) वचनम् (**अग्नये**) पावकाय (**भरत**) धरत। अत्र **संहितायामिति** दीर्घः। (**बृहत्**) महदर्थयुक्तम् (**विपाम्**) मेधाविनाम्। अत्र **वाच्छन्दसी**ति नुडभावः। (**ज्योतींषि**) विद्यातेजांसि (**बिभ्रते**) धर्त्रे (**न**) इव (**वेधसे**) मेधाविने॥५॥

अन्वयः-हे विद्वांसो! होत्रेऽग्नये न विपां ज्योतींषि बिभ्रते वेधसे बृहत्पूर्व्यं वचः प्र भरत॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा याजका यज्ञाय घृतादीन् पदार्थान् गृहीत्वा सुसंस्कृतान्नैरग्निं वर्द्धयन्ति तथैवाध्यापकाः साङ्गोपाङ्गाः सर्वा विद्या धृत्वा विद्यार्थिनः श्रोतॄँश्च तर्प्पयेयुः॥५॥

पदार्थः-हे विद्वज्जनो! (**होत्रे**) ग्रहण करनेवाले (**अग्नये**) अग्नि के (**न**) समान (**विपाम्**) उत्तम बुद्धिवालों के (**ज्योतींषि**) विद्यारूप तेजों को (**बिभ्रते**) धारण करते हुए (**वेधसे**) बुद्धिमान् के लिये (**बृहत्**) महत् प्रयोजनवाले (**पूर्व्यम्**) प्राचीन विद्वानों से उपदेश किये हुए (**वचः**) वचन को (**प्र, भरत**) उपदेश कीजिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे यज्ञ करनेवाले यज्ञ के लिये घृत आदि पदार्थों से उत्तम प्रकार पूर्वक पकाये हुए अन्नों से अग्नि की वृद्धि करते हैं, वैसे ही अध्यापक पुरुष अङ्ग और उपाङ्गों के सहित सम्पूर्ण विद्याओं के प्रचार से विद्यार्थी और श्रोतृजनों को तृप्त करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒ग्निं व॑र्धन्तु नो॒ गिरो॒ यतो॒ जाय॑त उ॒क्थ्यः। म॒हे वाजा॑य॒ द्रवि॑णाय दर्श॒तः॥६॥

अ॒ग्निम्। व॒र्ध॒न्तु॒। नः॒। गिरः॑। यतः॑। जाय॑ते। उ॒क्थ्यः॑। म॒हे। वाजा॑य। द्रवि॑णाय। द॒र्श॒तः॥६॥

पदार्थः-(**अग्निम्**) पावकमिव (**वर्धन्तु**) वर्द्धयन्तु। अत्र व्यत्ययेन परस्मैपदं णिजर्थोऽन्तर्गतः। (**नः**) अस्माकम् (**गिरः**) सुशिक्षिता वाचः (**यतः**) (**जायते**) (**उक्थ्यः**) प्रशंसितो योग्यो विद्वान् (**महे**) महते (**वाजाय**) विज्ञानाय (**द्रविणाय**) ऐश्वर्य्याय (**दर्शतः**) द्रष्टुं योग्यः॥६॥

अन्वयः-हे विद्वांसो! भवन्तः समिद्भिरग्निमिव नो गिरो वर्धन्तु यतो महे वाजाय द्रविणाय दर्शत उक्थ्यो जायते॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। अध्यापकोपदेशकैस्तथा प्रयत्नो विधेयो यथाऽध्येतॄणां श्रोतॄणाञ्च सुशिक्षाविद्यासभ्यता वर्धेरन् श्रीमन्तश्च स्युः॥६॥

पदार्थः-हे विद्वज्जनो! आप लोग जैसे समिधाओं से (**अग्निम्**) अग्नि बढ़ता है, वैसे (**नः**) हम

लोगों की **(गिरः)** उत्तम प्रकार से शिक्षित वाणियों को **(वर्धन्तु)** वृद्धि करें **(यतः)** जिससे **(महे)** श्रेष्ठ **(वाजाय)** विज्ञान और **(द्रविणाय)** ऐश्वर्य के लिये **(दर्शतः)** देखते और **(उक्थ्यः)** प्रशंसा करने योग्य विद्वान् पुरुष **(जायते)** प्रकट होता है॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। अध्यापक और उपदेशक पुरुषों को ऐसा प्रयत्न करना चाहिये जिससे कि पढ़ने और सुननेवाले जनों की उत्तम शिक्षा, विद्या और सभ्यता बढ़े और वे धनवान् होवें॥६॥

पुनर्विद्वत्कृत्यमाह॥

फिर विद्वान् के कृत्य को कहते हैं॥

अग्ने॒ यजि॑ष्ठो अध्व॒रे दे॒वान् दे॑वय॒ते य॑ज। होता॑ म॒न्द्रो वि रा॑ज॒स्यति॒ स्रिध॑ः॥७॥

अग्ने॑। यजि॑ष्ठः। अ॒ध्व॒रे। दे॒वान्। दे॒व॒ऽय॒ते। य॒ज॒। होता॑। म॒न्द्रः। वि। रा॒ज॒सि॒। अति॑। स्रिध॑ः॥७॥

पदार्थः-(**अग्ने**) पावकवद्वर्त्तमान **(यजिष्ठः)** अतिशयेन यष्टा **(अध्वरे)** अहिंसामये यज्ञे **(देवान्)** दिव्यान् गुणान् **(देवयते)** दिव्यान् गुणकर्मस्वभावान् कामयमानाय **(यज)** सङ्गमय **(होता)** दाता **(मन्द्रः)** आह्लादकः **(वि)** **(राजसि)** विशेषेण प्रकाशसे **(अति)** उल्लङ्घने **(स्रिधः)** विद्यादिसद्व्यवहारविरोधिनः॥७॥

अन्वयः-हे अग्ने! होता मन्द्रो यजिष्ठस्त्वमध्वरे देवयते देवान् यज यतोऽतिस्रिधो निवार्य्य विराजसि तस्मात् सत्कर्त्तव्योऽसि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निः संप्रयुक्तः शिल्पादिव्यवहारान् संसाध्य दारिद्र्यं विनाशयति तथैव सेविता विद्वांसो विद्योन्नतिं संसाध्याऽविद्यादिकुसंस्कारान् विनाशयन्ति॥७॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य वर्त्तमान **(होता)** देनेहारे **(मन्द्रः)** प्रसन्न करने तथा **(यजिष्ठः)** अतिशय यज्ञ करनेवाले! आप **(अध्वरे)** अहिंसारूप यज्ञ में **(देवयते)** दिव्य गुण, कर्म, स्वभावों की कामना करनेवाले के लिये **(देवान्)** उत्तम गुणों को **(यज)** संयुक्त कीजिये जिससे **(अति)** **(स्रिधः)** विद्या आदि उत्तम व्यवहार के विरोधी पुरुषों को उत्तम अधिकारों से पृथक् करके **(वि)** **(राजसि)** अत्यन्त प्रकाशित होते हो, इससे उत्तम सत्कार करने योग्य हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि उत्तम प्रकार से यन्त्रों में संयुक्त किया हुआ शिल्पविद्या आदि व्यवहारों की सिद्धि करके दारिद्र्य का नाश करता है, वैसे ही पूजित हुए विद्वान् पुरुष विद्या का प्रचार करके अविद्या आदि दुष्ट स्वभावों का नाश करते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स नः॑ पावक दीदिहि द्यु॒मदु॒स्मे सु॒वीर्य॑म्। भवा॑ स्तो॒तृभ्यो॒ अन्त॑मः स्व॒स्तये॑॥८॥

सः। नः। पावक। दीदिहि। द्युऽमत्। अस्मे इति। सुऽवीर्यम्। भव। स्तोतृऽभ्यः। अन्तमः। स्वस्तये॥८॥

पदार्थः-(**सः**) (**नः**) अस्मान् (**पावक**) वह्निवत्पवित्रकारक (**दीदिहि**) प्रकाशय (**द्युमत्**) प्रशस्तविज्ञानयुक्तम् (**अस्मे**) अस्मभ्यम् (**सुवीर्य्यम्**) शोभनं धनम् (**भव**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**स्तोतृभ्यः**) विद्याप्रचारकेभ्यः (**अन्तमः**) समीपस्थः (**स्वस्तये**) सुखप्राप्तये॥८॥

अन्वयः-हे पावक विद्वन्! त्वं स्तोतृभ्योऽस्मे द्युमत्सुवीर्य्यं देहि स त्वं नो दीदिहि स्वस्तयेऽन्तमो भव॥८॥

भावार्थः-विद्वद्भिः स्वयं पवित्रैरन्ये विद्यासुशिक्षाभ्यां पवित्राः सम्पादनीया यतः सर्वे सखायः सन्तः सुखाय प्रभवेयुः॥८॥

पदार्थः-हे (**पावक**) अग्नि के तुल्य पवित्रकारक विद्वान् पुरुष! आप (**स्तोतृभ्यः**) विद्याओं के प्रचार करनेवाले (**अस्मे**) हम लोगों को (**द्युमत्**) प्रशंसा करने योग्य सद्विद्या के विज्ञान से युक्त (**सुवीर्य्यम्**) श्रेष्ठ धन दीजिये (**सः**) वह आप (**नः**) हम लोगों को (**दीदिहि**) प्रकाशित करो (**स्वस्तये**) सुख प्राप्ति के लिये (**अन्तमः**) समीप में वर्त्तमान (**भव**) हूजिये॥८॥

भावार्थः-विद्वज्जन जो कि स्वयं पवित्र हैं, उनको चाहिये कि औरों को भी विद्या और उत्तम शिक्षा से पवित्र करें, जिससे सम्पूर्ण पुरुष मित्र होकर सुख करने के लिये समर्थ हों॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय कोअगले मन्त्र में कहा है॥

तन्त्वा विप्रा विपन्यवो जागृवांसः समिन्धते। हव्यवाहममर्त्यं सहोवृधम्॥९॥८॥

तम्। त्वा। विप्राः। विपन्यवः। जागृऽवांसः। सम्। इन्धते। हव्यऽवाहम्। अमर्त्यम्। सहःऽवृधम्॥९॥

पदार्थः-(**तम्**) सर्वविद्याप्रकाशकमनूचानम् (**त्वा**) त्वाम् (**विप्राः**) मेधाविनः (**विपन्यवः**) विशेषेण प्रशंसिताः (**जागृवांसः**) अविद्यानिद्रात उत्थिता विद्यायां जागरूकाः (**सम्**) (**इन्धते**) प्रदीपयन्ति (**हव्यवाहम्**) दातव्यविज्ञानप्रापकम् (**अमर्त्यम्**) मर्त्यस्य स्वभावराहित्येन देवस्वभावम् (**सहोवृधम्**) यः सहसा बलेन वर्धते बलस्य वर्धकं वा॥९॥

अन्वयः-हे आप्त विद्वन्! ये जागृवांसो विपन्यवो विप्रास्तं हव्यवाहममर्त्यं सहोवृधं त्वा समिन्धते तान् भवान् सर्वतश्शुभैर्गुणैः प्रकाशयतु॥९॥

भावार्थः-विद्वांस एव विदुषां श्रमं ज्ञातुं शक्नुवन्ति नेतरे, विद्वांसो विदुष एव सत्कुर्वन्तु न मूढानिति॥९॥

अत्राग्निपरमात्मविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति दशमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे सत्य कहनेवाले विद्वान् पुरुष! जो लोग (**जागृवांसः**) अविद्यारूप निद्रा से उठे विद्या

में जागते हुए और **(विपन्यवः)** विशेष प्रकार से प्रशंसा किये गये **(विप्राः)** बुद्धिमान् जन **(तम्)** उन सम्पूर्ण विद्याओं के प्रकाश करनेवाले वक्ता **(हव्यवाहम्)** देने के योग्य विज्ञान के दाता **(अमर्त्यम्)** मनुष्य के स्वभाव से रहित होने से देवता स्वभाववाले **(सहोवृधम्)** बल से बढ़ते वा बल के बढ़ानेवाले **(त्वा)** आपको **(सम्, इन्धते)** प्रकाशित करते हैं, उनको आप सब ओर से शुभ गुणों के साथ प्रकाशित कीजिये॥९॥

भावार्थः–विद्वान् ही लोग विद्वानों के परिश्रम को जान सकते हैं, अन्य जन नहीं। इससे विद्वज्जन विद्वान् पुरुषों ही का सत्कार करें, मूर्खों का नहीं॥९॥

इस सूक्त में अग्नि, परमात्मा और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह दशवां सूक्त और आठवां वर्ग समाप्त हुआ॥

अथ नवर्चस्यैकादशसूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १, २, ५, ७, ८ निचृद्गायत्री। ३, ९ विराड् गायत्री। ४, ६ गायत्री छन्दः। षड्जः स्वरः॥

अथाऽग्न्यादिदृष्टान्तेन विद्वांसः किं कुर्युरित्याह॥

अब ग्यारहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र से अग्न्यादि के दृष्टान्त से विद्वान् लोग क्या करें, इस विषय को कहा है॥

अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः। स वेद यज्ञमानुषक्॥ १॥

अग्निः। होता। पुरःऽहितः। अध्वरस्य। विऽचर्षणिः। सः। वेदु। यज्ञम्। आनुषक्॥ १॥

पदार्थः-(**अग्निः**) वह्निः (**होता**) दाता (**पुरोहितः**) सर्वेषां हितसाधकः (**अध्वरस्य**) अहिंसनीयस्य यज्ञस्य (**विचर्षणिः**) प्रकाशकः (**सः**) (**वेद**) (**यज्ञम्**) (**आनुषक्**) आनुकूल्येन वर्त्तमानः॥ १॥

अन्वयः-यो मनुष्योऽध्वरस्य विचर्षणिर्होता पुरोहितोऽग्निरिव भवति स आनुषक् सन् यज्ञं वेद॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये ब्रह्मचर्य्यविद्यादि सद्गुणग्रहणानुकूला भवन्ति त एवाऽग्न्यादिपदार्थान् विज्ञाय सृष्टौ प्रशंसितकर्माणः सन्ति॥ १॥

पदार्थः-जो मनुष्य (**अध्वरस्य**) जिसमें हिंसा न हो ऐसे कर्म का (**विचर्षणिः**) प्रकाशकर्ता (**होता**) दानकारक (**पुरोहितः**) सब जीवों के हित करनेवाले (**अग्निः**) अग्नि के सदृश होता है (**सः**) वह (**आनुषक्**) अनुकूलता से वर्त्तता हुआ (**यज्ञम्**) विधि यज्ञादि कर्म को (**वेद**) जानता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पुरुष ब्रह्मचर्य और विद्या आदि उत्तम गुणों के ग्रहण करने में तत्पर होते हैं, वे ही अग्नि आदि पदार्थों को जान कर अर्थात् शिल्पविद्या में निपुण होकर संसार में प्रशंसा होने योग्य कर्म करनेवाले होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धिया समृण्वति॥ २॥

सः। हव्यवाट्। अमर्त्यः। उशिक्। दूतः। चनःऽहितः। अग्निः। धिया। सम्। ऋण्वति॥ २॥

पदार्थः-(**सः**) (**हव्यवाट्**) यो हव्यान् दातुमर्हाणि वस्तूनि वहति प्राप्नोति (**अमर्त्यः**) मरणधर्मरहितः (**उशिक्**) कामयमानः (**दूतः**) अविद्यायाः पारे विद्याया गमयिता (**चनोहितः**) चनःस्वन्नादिषु हितो हितकारी (**अग्निः**) पावकइव (**धिया**) कर्मणा प्रज्ञया वा (**सम्**) (**ऋण्वति**) गच्छति जानाति वा॥ २॥

अन्वयः-योऽग्निरिव हव्यवाडमर्त्य उशिग्दूतश्चनोहितो विद्वान् धिया समृण्वति स एवास्माञ्शिक्षयितुं शक्नोति॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निः स्वकर्मणा दूतवत् कार्य्याणि साध्नोति तथैव विद्वांसो राजकार्य्यादीनि साद्धुं शक्नुवन्ति॥२॥

पदार्थः-जो पुरुष **(अग्निः)** अग्नि के तुल्य तेजस्वी **(हव्यवाट्)** ग्रहण करने योग्य हवन सामग्री को प्राप्त **(अमर्त्यः)** मरणरूप धर्म से रहित **(उशिक्)** कामना करता हुआ **(दूतः)** अविद्या आदि से पृथक् दूर विद्या को प्राप्त करानेवाला **(चनोहितः)** अन्नादिकों में वृद्धिरूप हित कर्म करनेवाला विद्वान् पुरुष **(धिया)** सुकर्म से वा उत्तम बुद्धि से **(सम्)** **(ऋण्वति)** चलता वा श्रेष्ठ बुद्धियुक्त होकर उन कर्मों को जानता है **(सः)** वही पुरुष हम लोगों को शिक्षा कर सकता है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि अपने व्यापार से दूत के सदृश कार्य्यों को सिद्ध करता है, वैसे ही विद्वान् लोग राज्य के कार्य्य आदिकों को सिद्ध कर सकते हैं॥२॥

मनुष्यैः के सेवनीया इत्याह॥

मनुष्यों को किनका सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः। अर्थं ह्यस्य तरणिः॥३॥

अग्निः। धिया। सः। चेतति। केतुः। यज्ञस्य। पूर्व्यः। अर्थम्। हि। अस्य। तरणिः॥३॥

पदार्थः-**(अग्निः)** पावकइव **(धिया)** क्रियया प्रज्ञया वा **(सः)** **(चेतति)** संजानीते संज्ञापयति वा **(केतुः)** प्रज्ञापकः **(यज्ञस्य)** विद्वत्सत्कारादेर्व्यवहारस्य **(पूर्व्यः)** पूर्वेषु विद्वत्सु कुशलः **(अर्थम्)** प्रयोजनम् **(हि)** यतः **(अस्य)** **(तरणि)** सन्तारकः। अत्र **सुपां सुलुगि**ति सुलुक्॥३॥

अन्वयः-यो विद्वानग्निरिव केतुस्तरणि पूर्व्यो धिया ह्यस्य यज्ञस्यार्थं चेतति तस्मात्स सेव्योऽस्ति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये विद्यामयं यज्ञं यथावज्जानन्ति तानेव विद्यावृद्धये सेवध्वम्॥३॥

पदार्थः-जो विद्वान् पुरुष **(अग्निः)** अग्नि के सदृश तेजस्वी **(केतुः)** उपदेश द्वारा बुद्धि का प्रकाश करने तथा **(तरणि)** सद्विद्या से दुःख का छुड़ानेवाला **(पूर्व्यः)** प्राचीन विद्वानों में चतुर **(धिया)** कर्म से वा बुद्धि से **(हि)** जिस कारण से **(अस्य)** इस **(यज्ञस्य)** विद्वानों में सत्काररूप व्यवहार को **(अर्थम्)** प्रयोजन को **(चेतति)** उत्तम प्रकार जानता वा अन्यों को जनाता है, इससे **(सः)** वह सेवा करने योग्य है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो पुरुष विद्यारूप यज्ञ को उत्तम प्रकार से जानते हैं, उन्हीं पुरुषों की विद्या की उन्नति होने के लिये सेवा करो॥३॥

अथ सन्तानशिक्षाविषयमाह॥

अब सन्तानों की शिक्षा विषय को अगले मन्त्र में कहा है॥

अग्निं सूनुं सनश्रुतं सहसो जातवेदसम्। वह्निं देवा अकृण्वत॥४॥

अग्निम्। सूनुम्। सनऽश्रुतम्। सहसः। जातऽवेदसम्। वह्निम्। देवाः। अकृण्वत॥४॥

पदार्थः-(**अग्निम्**) पावकमिव तेजस्विनम् (**सूनुम्**) अपत्यवत्सेवकम् (**सनश्रुतम्**) यः सनातनानि शास्त्राणि शृणोति तम् (**सहसः**) प्रशस्तबलयुक्तस्य (**जातवेदसम्**) प्राप्तविद्यम् (**वह्निम्**) सद्गुणानां वोढारम् (**देवाः**) विद्वांसः (**अकृण्वत**) कुर्वन्तु॥४॥

अन्वयः-हे विद्वांसः! स्वयं देवाः सन्तो भवन्तः सहसः सूनुं वह्निं सनश्रुतं जातवेदसमग्निमिवाऽकृण्वत॥४॥

भावार्थः-विद्वद्भिः स्वापत्यवदन्यापत्यानि विदित्वा प्रेम्णा विद्यायुक्तानि बहुश्रुतानि कृत्वाऽऽनन्दयितव्यानि॥४॥

पदार्थः-हे विद्वानो! स्वयं (**देवाः**) विद्वान् हुए आप लोग (**सहसः**) प्रशंसा करने योग्य विद्या बलवाले के (**सूनुम्**) पुत्र के सदृश सेवा करने (**वह्निम्**) अच्छे ही गुणों को धारण करने और (**सनश्रुतम्**) सनातन शास्त्रों को श्रवण करनेवाले (**जातवेदसम्**) विद्या से युक्त जिज्ञासु को (**अग्निम्**) अग्नि के समान तेजस्वी (**अकृण्वत**) करो॥४॥

भावार्थः-विद्वान् लोगों को चाहिये कि अपने पुत्रों के सदृश और लोगों के पुत्रों को समझ कर स्नेह से विद्यायुक्त और बहुत शास्त्रों को सुननेवाले अर्थात् जिन्होंने बहुत शास्त्र सुने हों, ऐसे करके आनन्द सहित करें॥४॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहा है॥

अदाभ्यः पुरएता विशामग्निर्मानुषीणाम्। तूर्णी रथः सदा नवः॥५॥९॥

अदाभ्यः। पुरःऽएता। विशाम्। अग्निः। मानुषीणाम्। तूर्णिः। रथः। सदा। नवः॥५॥

पदार्थः-(**अदाभ्यः**) हिंसितुमनर्हः (**पुरएता**) यः पुर एति सः (**विशाम्**) प्रजानाम् (**अग्निः**) पावक इव (**मानुषीणाम्**) मनुष्यसम्बन्धिनीनाम् (**तूर्णिः**) सद्योगामी (**रथः**) उत्तमं यानम् (**सदा**) सर्वस्मिन् काले (**नवः**) नूतनः॥५॥

अन्वयः-विद्वान् तूर्णिर्नवो रथइवाऽग्निरिव मानुषीणां विशां सदाऽदाभ्यः पुरएता भवेत्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वांसो यथा शीघ्रगामिना नवेन रथेन सद्योऽभीष्टं स्थानं गच्छन्ति तथैव निर्वैरा भूत्वा सर्वानभीष्टाः सद्विद्याः सद्यः प्रापय्य कृतकृत्यान् सम्पादयेयुः॥५॥

पदार्थः-विद्वान् पुरुष **(तूर्णिः)** शीघ्र चलनेवाला और **(नवः)** नवीन **(रथः)** उत्तम सवारी और **(अग्निः)** अग्नि के सदृश प्रकाशित **(मानुषीणाम्)** मनुष्य सम्बन्धिनी **(विशाम्)** प्रजाओं की **(सदा)** सब काल में **(अदाभ्यः)** परस्पर हिंसा का वारणकर्त्ता और **(पुरएता)** अग्रगामी होवे॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् लोग जैसे शीघ्रगामी नवीन रथ से शीघ्र अपने वांछित स्थान को कोई एक मनुष्य पहुंचता है, वैसे वैर को त्याग के सब लोगों को अपनी इच्छानुकूल सद्विद्याओं की शीघ्र शिक्षा देकर उनका जन्म सफल करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

साह्वान् विश्वा अभियुजः क्रतुर्देवानाममृक्तः। अग्निस्तुविश्रवस्तमः॥६॥

सह्वान्। विश्वाः। अभिऽयुजः। क्रतुः। देवानाम्। अमृक्तः। अग्निः। तुविश्रवःऽतमः॥६॥

पदार्थः-**(साह्वान्)** सोढा। अत्र **दाश्वान् साह्वान्मीढ्वाँश्चे**ति निपातनात् सिद्धिः। **(विश्वाः)** अखिलाः **(अभियुजः)** या आभिमुख्येन युज्यन्ते ताः प्रजाः **(क्रतुः)** प्राज्ञः **(देवानाम्)** विदुषां मध्ये **(अमृक्तः)** अन्यैरहिंस्यः **(अग्निः)** पावकइव शुद्धस्वरूपः **(तुविश्रवस्तमः)** अतिशयेन बहुश्रुतः॥६॥

अन्वयः-हे मनुष्या! योऽमृक्तः साह्वान् क्रतुरग्निरिव शुद्धस्तुविश्रवस्तमो देवानां विश्वा अभियुजः प्रजाः सर्वतो रक्षति स एव सर्वैः प्रजाजनैः सत्कर्त्तव्यः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यः कञ्चन न हिनस्ति तं कोऽपि हिंसितुं नेच्छति, यो बहूनि शास्त्राण्यध्येतुं वा श्रोतुमिच्छति स प्राज्ञतमो जायते, यो यादृशेन भावेन प्रजायां वर्त्तते तं प्रति प्रजा अपि तादृशेन भावेनाभियुङ्क्ते॥६॥

पदार्थः-हे मनुष्यो! जो **(अमृक्तः)** जो कि औरों से न मारा जा सके **(साह्वान्)** क्रोधरहित **(क्रतुः)** बुद्धिमान् और **(अग्निः)** अग्नि के सदृश शुद्धस्वभाववाला **(तुविश्रवस्तमः)** अतिशय कर बहुत शास्त्रों को जिसने सुना हो **(देवानाम्)** पण्डितों के बीच में **(विश्वाः)** सम्पूर्ण **(अभियुजः)** अपने अनुकूल व्यवहार करनेवाली प्रजाओं की सब प्रकार रक्षा करता है, वही सब प्रजाजनों से सत्कार पाने योग्य है॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो किसी को नहीं मारता उसको मारने की कोई इच्छा नहीं करता, जो पुरुष बहुत शास्त्रों को पढ़ने और सुनने की इच्छा करता है वह अति बुद्धिमान् होता है, जो जैसी भावना से प्रजा में वर्त्ताव रखता है उसके साथ प्रजा भी उसी भावना से वर्त्ताव रखती है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः। क्षयं पावकशोचिषः॥७॥

अभि। प्रयांसि। वाहसा। दाश्वान्। अश्नोति। मर्त्यः। क्षयम्। पावकऽशोचिषः॥७॥

पदार्थः-(**अभि**) आभिमुख्ये (**प्रयांसि**) कमनीयान्यन्नादीनि (**वाहसा**) प्रापणेन (**दाश्वान्**) दाता (**अश्नोति**) प्राप्नोति (**मर्त्यः**) मनुष्यः (**क्षयम्**) निवासम् (**पावकशोचिषः**) पावकस्याग्नेः शोचिर्दीप्तिरिव शोचिर्यस्य विदुषस्तस्य॥७॥

अन्वयः-यो दाश्वान् मर्त्यो पावकशोचिषः क्षयमश्नोति स वाहसा प्रयांस्यभ्यश्नोति॥७॥

भावार्थः-यदा मनुष्या विदुषां विद्यास्थानं प्राप्नुवन्ति तदैव पूर्णकामा जायन्ते॥७॥

पदार्थः-जो (**दाश्वान्**) देनेवाला (**मर्त्यः**) मनुष्य (**पावकशोचिषः**) अग्नि की दीप्ति के सदृश दीप्तियुक्त विद्वान् पुरुष के (**क्षयम्**) विद्या स्थान को (**अश्नोति**) प्राप्त होता वह (**वाहसा**) उत्तम पदवी को प्राप्त होने से (**प्रयांसि**) कामना अभिलाषा के योग्य अन्न आदि को (**अभि**) प्राप्त होता है॥७॥

भावार्थः-जब मनुष्य विद्वानों की विद्या पदवी को प्राप्त होते हैं, तब ही उनके मनोरथ पूर्ण होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

परि विश्वानि सुधिताग्नेरश्याम मन्मभिः। विप्रासो जातवेदसः॥८॥

परि। विश्वानि। सुऽधिता। अग्नेः। अश्याम। मन्मऽभिः। विप्रासः। जातऽवेदसः॥८॥

पदार्थः-(**परि**) सर्वतः (**विश्वानि**) सर्वाणि (**सुधिता**) सुष्ठु धृतानि (**अग्नेः**) पावकस्येव (**अश्याम**) प्राप्नुयाम (**मन्मभिः**) विज्ञानविशेषैः सह (**विप्रासः**) मेधाविनः (**जातवेदसः**) जातविद्या विद्वांसः सन्तः॥८॥

अन्वयः-हे मनुष्या! यथा जातवेदसो विप्रासो वयं मन्मभिरग्नेर्विश्वानि सुधिता पर्यश्याम तथैव यूयमपि प्राप्नुत॥८॥

भावार्थः-विद्वद्भिर्मनुष्यैर्यथा मेधाविनो सृष्ट्यात्मनोर्विद्याग्रहणाय प्रयतन्ते तथैव विद्योन्नतये प्रयतितव्यम्॥८॥

पदार्थः-हे मनुष्यो! जैसे (**जातवेदसः**) विद्वान् हुए (**विप्रासः**) बुद्धिमान् हम लोग (**मन्मभिः**) विज्ञान विशेषों के सहित (**अग्नेः**) अग्नि के सदृश (**विश्वानि**) सम्पूर्ण (**सुधिता**) उत्तम प्रकार धारण किये शास्त्रों को (**परि**) सब ओर से (**अश्याम**) प्राप्त हों, वैसे ही आप लोग भी प्राप्त हूजिये॥८॥

भावार्थः-विद्वान् मनुष्यों को चाहिये कि जैसे बुद्धिमान् विद्वान् सृष्टि और आत्मा की विद्या ग्रहण के लिये प्रयत्न करते हैं, वैसे ही विद्यावृद्धि के लिये प्रयत्न करें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॒ विश्वा॑नि॒ वार्या॒ वाजे॑षु सनिषामहे। त्वे दे॒वास॒ एरि॑रे॥ ९॥ १०॥

अग्ने॑। विश्वा॑नि। वार्या॑। वाजे॑षु। स॒नि॒षा॒म॒हे॒। त्वे इति॑। दे॒वास॑:। आ। ई॒रि॒रे॒॥ ९॥

पदार्थ:-(**अग्ने**) पावकवद्विद्यया प्रकाशमान विद्वन् (**विश्वानि**) अखिलानि (**वार्य्या**) वर्त्तुमर्हाणि धनादीनि वस्तूनि (**वाजेषु**) संग्रामादिषु व्यवहारेषु (**सनिषामहे**) संभज्य प्राप्नुयाम (**त्वे**) त्वयि (**देवास:**) विद्वांस: (**आ**) (**ईरिरे**) प्रेरयन्ति॥ ९॥

अन्वय:-हे अग्ने! यस्मिँस्त्वे देवासोऽस्मानेरिरे ते वयं वाजेषु विश्वानि वार्य्या सनिषामहे॥ ९॥

भावार्थ:-हे मनुष्या! यत्र धर्म्ये पुरुषार्थे विद्वांसो युष्मान् प्रेरयेयुर्यथा वयं तदाज्ञायां वर्त्तित्वा विद्यां धनं च प्राप्नुयाम तथा तत्र वर्त्तित्वा यूयमपि तादृशा भवत॥ ९॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकादशं सूक्तं दशमो वर्गश्च समाप्त:॥

पदार्थ:-हे (**अग्ने**) अग्नि के तुल्य विद्याओं से उत्तम प्रकार प्रकाशयुक्त विद्वन् पुरुष! जिन (**त्वे**) आपके विषय में (**देवास:**) विद्वान् लोग हम लोगों को (**आ**) (**ईरिरे**) प्रेरणा करते हैं, फिर प्रेरित हुए हम लोग (**वाजेषु**) संग्राम आदि व्यवहारों में (**विश्वानि**) सम्पूर्ण (**वार्य्या**) अच्छे प्रकार स्वीकार करने योग्य धनादि वस्तुओं को (**सनिषामहे**) यथाभाग प्राप्त होवें॥ ९॥

भावार्थ:-हे मनुष्यो! जिस धर्मयुक्त पुरुषार्थ में विद्वान् लोग तुम लोगों को प्रेरणा करें तो जैसे हम लोग उनकी आज्ञानुकूल वर्त्ताव करके विद्या और धन को प्राप्त होवें, वैसे ही उन पुरुषों की आज्ञानुसार वर्त्ताव करके आप लोग भी विद्या और धनयुक्त होइये॥ ९॥

इस सूक्त में अग्नि और विद्वान् पुरुष के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है यह जानना चाहिये॥

यह ग्यारहवां सूक्त और दशवां वर्ग समाप्त हुआ॥

अथ नवर्चस्य द्वादशसूक्तस्य विश्वामित्र ऋषिः। इन्द्राग्नी देवते। १, ३, ५, ८, ९ निचृद्गायत्री। २, ४, ६ गायत्री। ७ यवमध्या विराड् गायत्री च छन्दः। षड्जः स्वरः॥

अथाध्यापकोपदेशकविषयमाह॥

अब नव ऋचावाले बारहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अध्यापक और उपदेशक का विषय कहते हैं॥

इन्द्रा॑ग्नी॒ आ ग॑तं सु॒तं गी॒र्भिर्नभो॒ वरे॑ण्यम्। अ॒स्य पा॑तं धि॒येषि॒ता॥ १॥

इन्द्रा॑ग्नी॒ इति॑। आ। ग॒त॒म्। सु॒त॒म्। गी॒:ऽभिः। नभ॑:। वरे॑ण्यम्। अ॒स्य। पा॒त॒म्। धि॒या। इ॒षि॒ता॥ १॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युतौ (**आ**) (**गतम्**) आगच्छतम् (**सुतम्**) विद्याजन्यमैश्वर्य्यवन्तं पुत्रं विद्यार्थिनं वा (**गीर्भिः**) सुशिक्षिताभिर्वाग्भिः सह (**नभः**) अन्तरिक्षमवकाशम्। **नभ इति साधारणनामसु पठितम्।** (निघं०१.४)। (**वरेण्यम्**) वरितुं स्वीकर्त्तुमर्हम् (**अस्य**) संसारस्य मध्ये (**पातम्**) रक्षतम् (**धिया**) प्रज्ञया (**इषिता**) प्रज्ञापकौ सन्तौ॥ १॥

अन्वयः-हे अध्यापकोपदेशकौ! युवामिन्द्राग्नी इवास्य मध्ये वर्त्तमानाविषिता गीर्भिर्धिया नभो वरेण्यं सुतं पातम्। विद्याप्रचारायाऽऽगतम्॥ १॥

भावार्थः-हे अध्यापकोपदेशकौ! यथा वायुसूर्यौ सर्वस्य जगतो रक्षकौ स्तस्तथैव विद्यासुशिक्षाभ्यां सर्वस्य रक्षकौ भवतम्॥ १॥

पदार्थः-हे विद्या पढ़ाने और उपदेश देनेवाले पुरुषो! आप दोनों (**इन्द्राग्नी**) वायु और बिजुली के सदृश (**अस्य**) इस संसार में वर्त्तमान होकर (**इषिता**) बोध देते हुए (**गीर्भिः**) उत्तम शिक्षाओं से पूरित वाणियों के सहित (**धिया**) श्रेष्ठ बुद्धि से (**नभः**) अन्तरिक्ष नामक अवकाश की और (**वरेण्यम्**) स्वीकार करने योग्य (**सुतम्**) विद्या से उपार्जित धन से युक्त पुत्र वा शिष्य की (**पातम्**) रक्षा कीजिये और (**आ, गतम्**) विद्या के प्रचार के लिये आइये॥ १॥

भावार्थः-हे अध्यापक और उपदेशक पुरुषो! जैसे वायु और सूर्य्य सम्पूर्ण जगत् के रक्षाकारक हैं, वैसे ही विद्या और उत्तम शिक्षा से सम्पूर्ण जगत् के रक्षक हूजिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रा॑ग्नी॒ जरि॑तुः॒ सचा॑ य॒ज्ञो जि॑गाति॒ चेत॑नः। अ॒या पा॑तमि॒मं सु॒तम्॥ २॥

इन्द्रा॑ग्नी॒ इति॑। ज॒रि॒तुः॒। सचा॑। य॒ज्ञः। जि॒गा॒ति॒। चेत॑नः। अ॒या। पा॒त॒म्। इ॒मम्। सु॒तम्॥ २॥

पदार्थः-(**इन्द्राग्नी**) ऐश्वर्यविद्यायुक्तौ (**जरितुः**) स्तावकस्य (**सचा**) सम्बन्धिनौ (**यज्ञः**) यष्टुं योग्यः (**जिगाति**) गच्छति प्राप्नोति (**चेतनः**) सम्यग्ज्ञाता (**अया**) अनया विद्यासुशिक्षासहितया वाण्या। अत्र **छान्दसो वर्णलोप** इति न लोपः। (**पातम्**) रक्षतम् (**इमम्**) वर्त्तमानम् (**सुतम्**) उत्पन्नं संसारम्॥ २॥

अन्वयः–हे इन्द्राग्नी धनविद्येश्वरौ! यश्चेतनो यज्ञो युवां जिगाति तौ जरितुः सचा सन्तावयेमं सुतं पातम्॥२॥

भावार्थः–हे अध्यापकोपदेशका! ये विद्योपदेशग्रहणाय युष्मान् प्राप्नुयुस्तान् वायुसूर्य्यौ जगदिव सततं रक्षन्तु॥२॥

पदार्थः–हे **(इन्द्राग्नी)** धन और विद्यायुक्त पुरुषो! जो **(चेतनः)** उत्तम रीति से जाननेवाला **(यज्ञः)** पूजा करने योग्य पुरुष आप दोनों के **(जिगाति)** शरण को प्राप्त होवे। वे दोनों आप **(जरितुः)** स्तुतिकर्त्ता पुरुष के **(सचा)** सम्बन्धी हुए **(अया)** इस विद्या सुशिक्षा सहित वाणी से **(इमम्)** इस वर्त्तमान **(सुतम्)** उत्पन्न संसार को **(पातम्)** पालो॥२॥

भावार्थः–हे अध्यापक और विद्योपदेशक लोगो! जो पुरुष विद्या के उपदेश ग्रहण करने के लिये आप लोगों के शरण आवें, उनकी जैसे वायु-सूर्य्य जगत् की रक्षा करते हैं, वैसे निरन्तर पालना करो॥२॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

इन्द्रं॑म॒ग्निं क॑वि॒च्छदा॑ य॒ज्ञस्य॑ जू॒त्या वृ॑णे। ता सोम॑स्ये॒ह तृ॑म्पताम्॥३॥

इन्द्र॑म्। अ॒ग्निम्। क॒वि॒ऽछदा॑। य॒ज्ञस्य॑। जू॒त्या। वृ॒णे॒। ता। सोम॑स्य। इ॒ह। तृ॒म्प॒ता॒म्॥३॥

पदार्थः–**(इन्द्रम्)** विद्युदिव दुष्टदोषप्रणाशकम् **(अग्निम्)** पावकइव दुष्टानां दाहकम् **(कविच्छदा)** यौ कवीन् विदुषश्छदयत ऊर्जयतस्तौ **(यज्ञस्य)** धर्म्यस्य व्यवहारस्य **(जूत्या)** वेगेन **(वृणे)** स्वीकरोमि **(ता)** तौ **(सोमस्य)** ऐश्वर्यस्य **(इह)** अस्मिन् संसारे **(तृम्पताम्)** सुखयतम्॥३॥

अन्वयः–अहं यौ जूत्या सह वर्त्तमानौ कविच्छदा इन्द्रमग्निं च वृणे ता इह सोमस्य यज्ञस्य मध्ये तृम्पताम्॥३॥

भावार्थः–मनुष्यैर्मूर्खसङ्गं विहाय विद्वत्सङ्गं विधायोत्तमाचरणेनास्मिन् जगत्यैश्वर्य्यमुन्नीय सदैवानन्दितव्यम्॥३॥

पदार्थः–मैं जिन **(जूत्या)** वेग के सहित वर्त्तमान **(कविच्छदा)** विद्वानों का सत्सङ्ग करनेवाले **(इन्द्रम्)** दुष्टों के दोषों के नाशकर्त्ता और **(अग्निम्)** अग्नि के सदृश दुष्टों के भस्मकारक जनों को **(वृणे)** स्वीकार करता हूँ **(ता)** वे **(इह)** इस संसार में **(सोमस्य)** ऐश्वर्य्य और **(यज्ञस्य)** धर्मसम्बन्धी व्यवहार के मध्य में **(तृम्पताम्)** सुख भोगें और सबको सुखी करें॥३॥

भावार्थः–मनुष्यों को चाहिये कि मूर्ख लोगों का सङ्ग त्याग के और विद्वानों का सङ्ग करके उत्तमाचरण करने से इस संसार में ऐश्वर्य्य का संग्रह करके सदा ही आनन्दयुक्त रहें॥३॥

अथ राजधर्मविषयमाह॥

अब राजधर्म विषय को अगले मन्त्र में कहा है॥

तोशा वृत्रहणा हुवे सजित्वानापराजिता। इन्द्राग्नी वाजसातमा॥४॥

तोशा। वृत्रऽहना। हुवे। सऽजित्वाना। अपराऽजिता। इन्द्राग्नी इति। वाजऽसातमा॥४॥

पदार्थः-(**तोशा**) वर्द्धकौ विज्ञातारौ (**वृत्रहणा**) वृत्रं दुष्टमसुरप्रकृतिं हन्तारौ सभासेनेशौ (**हुवे**) प्रशंसामि (**सजित्वाना**) जयशीलैर्वीरैः सह वर्त्तमानौ (**अपराजिता**) शत्रुभिः पराजेतुमशक्यौ (**इन्द्राग्नी**) सूर्य्यविद्युतौ (**वाजसातमा**) वाजस्य विज्ञानस्य धनस्य वातिशयेन विभक्तारौ॥४॥

अन्वयः-हे सभासेनेशावहं वृत्रहणेन्द्राग्नी इव वर्त्तमानौ तोशा सजित्वानाऽपराजिता वाजसातमा युवां हुवे॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजानः शत्रूणां विजेतॄन् शत्रुभिरपराजितान् न्यायाधीशान् पुरुषान् स्वीकुर्वन्ति तेषां नित्यो विजयो भवति॥४॥

पदार्थः-हे सभासेना के अध्यक्षो! मैं (**वृत्रहणा**) असुर स्वभाववाले दुष्ट के नाशकारक (**इन्द्राग्नी**) सूर्य्य बिजुली के सदृश वर्त्तमान (**तोशा**) बढ़ानेवाले वा विज्ञानशील (**सजित्वाना**) जीतनेवाले वीरों के साथ वर्त्तमान (**अपराजिता**) शत्रुओं से नहीं हारने योग्य (**वाजसातमा**) विज्ञान वा धन का अतिशय विभाग करनेवाले आप लोगों की (**हुवे**) प्रशंसा करता हूँ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा लोग शत्रुओं के जीतने और शत्रुओं से नहीं हारनेवाले न्यायकर्त्ता पुरुषों को सम्मानपूर्वक स्वीकार करते हैं, उनका सर्वदा विजय होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे॥५॥११॥

प्र। वाम्। अर्चन्ति। उक्थिनः। नीथऽविदः। जरितारः। इन्द्राग्नी इति। इषः। आ। वृणे॥५॥

पदार्थः-(**प्र**) (**वाम्**) युवाम् (**अर्चन्ति**) सत्कुर्वन्ति (**उक्थिनः**) गुणप्रशंसकाः (**नीथाविदः**) ये नीथान् विनयान् विन्दन्ति ते (**जरितारः**) स्तावकाः (**इन्द्राग्नी**) विद्युत्सूर्याविव वर्त्तमानौ (**इषः**) अन्नादीनि (**आ**) समन्तात् (**वृणे**) प्राप्नुयाम्॥५॥

अन्वयः-हे इन्द्राग्नी इव वर्त्तमानौ सभासेनेशौ! ये नीथाविद उक्थिनो जरितारो वां प्रार्चन्ति तेभ्योऽहमिष आवृणे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये पदार्थानां गुणकर्मस्वभावान् जानन्ति त एव युद्धं न्यायं च कर्त्तुं शक्नुवन्ति॥५॥

पदार्थः-हे (**इन्द्राग्नी**) बिजुली और सूर्य्य के सदृश प्रकाश सहित विद्यमान सभापति

सेनापतियो! जो **(नीथाविदः)** नम्रतायुक्त **(उक्थिनः)** उत्तम गुणों की प्रशंसा करने तथा **(जरितारः)** ईश्वर की स्तुति करनेवाले **(वाम्)** तुम दोनों को **(प्र, अर्चन्ति)** विशेष सत्कार करते हैं, उनसे मैं **(इषः)** अन्न आदि को **(आ, वृणे)** सब ओर से प्राप्त होऊं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पुरुष पृथिवी आदि पदार्थों के गुण, कर्म, स्वभावों को जानते हैं, वे ही युद्ध और न्यायाचरण कर सकते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमेकेन कर्मणा॥६॥

इन्द्राग्नी इति। नवतिम्। पुरः। दासऽपत्नीः। अधूनुतम्। साकम्। एकेन। कर्मणा॥६॥

पदार्थः-**(इन्द्राग्नी)** वाय्वग्नी **(नवतिम्)** एतत्सङ्ख्याताः **(पुरः)** पालिकाः **(दासपत्नीः)** ये दस्यत्युपक्षिण्वन्ति शत्रून् ते दासास्तेषां पत्नीरिव वर्त्तमानाः किरणाः **(अधूनुतम्)** **(साकम्)** सह **(एकेन)** **(कर्मणा)** क्रियया॥६॥

अन्वयः-हे सभासेनेशौ! यथेन्द्राग्नी साकमेकेन कर्मणा नवतिं पुरो दासपत्नीरधूनुतं तथैव युवां सेनादिभिः शत्रून् कम्पयतम्॥६॥

भावार्थः-सभाध्यक्षादिमनुष्यैरैकमत्येन दुष्टान्निवार्य्य श्रेष्ठान् सत्कृत्य धर्म्येणाचरणेन राज्यशासनं कर्त्तव्यम्॥६॥

पदार्थः-हे सभापति सेनापतियो! जैसे **(इन्द्राग्नी)** वायु और अग्नि को **(साकम्)** एक साथ **(एकेन)** **(कर्मणा)** एक कर्म से **(नवतिम्)** नब्बे संख्यायुक्त **(पुरः)** पालन करनेवाली **(दासपत्नीः)** शत्रुओं को युद्ध में दूर फेंकनेवाले पुरुषों की स्त्रियों के तुल्य वर्त्तमान सूर्य्य की किरणें **(अधूनुतम्)** कंपाती हैं, वैसे आप दोनों सेना आदिकों से शत्रुओं को कम्पावें॥६॥

भावार्थः-सभाध्यक्षादि मनुष्यों को चाहिये कि परस्पर एक सम्मति से दुष्ट पुरुषों को उत्तम स्थानों से दूर कर और श्रेष्ठ पुरुषों का सत्कार करके धर्म्मपूर्वक व्यवहार से राज्यप्रबन्ध करें॥६॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या३ अनु॥७॥

इन्द्राग्नी इति। अपसः। परि। उप। प्र। यन्ति। धीतयः। ऋतस्य। पथ्याः। अनु॥७॥

पदार्थः-**(इन्द्राग्नी)** वायुविद्युतौ **(अपसः)** कर्मणः **(परि)** सर्वतः **(उप)** समीपे **(प्र)** **(यन्ति)** गच्छन्ति **(धीतयः)** अङ्गुलय इव गतयः। **धीतय इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५)। **(ऋतस्य)** सत्यस्य **(पथ्याः)** पथि साध्वीर्वीथीः **(अनु)**॥७॥

अन्वयः-हे मनुष्या! यथेन्द्राग्नी ऋतस्यापसः परि पथ्या अनु गच्छतोऽनयोर्गतयो धीतय इवोप प्र यन्ति तथा यूयं सन्मार्गं नियमेन गच्छत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरसृष्टौ सूर्य्यादिपदार्था नियमेन स्वं स्वं मार्गं गच्छन्ति तथैव मनुष्या धर्म्येण मार्गेण गच्छन्तु॥७॥

पदार्थः-हे मनुष्यो! जैसे **(इन्द्राग्नी)** वायु और बिजुली **(ऋतस्य)** सत्य **(अपसः)** कर्म के **(परि)** सब ओर से **(पथ्याः)** मार्ग में सुखकारक सड़कों के **(अनु)** अनुकूल जाते हुए इन वायु बिजुलियों की गति **(धीतयः)** अंगुलियों के समान **(उप)** समीप में **(प्र, यन्ति)** प्राप्त होती हैं, वैसे ही आप लोग भी श्रेष्ठ मार्ग में नियमपूर्वक चलिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर की सृष्टि में सूर्य्य आदि पदार्थ नियम के साथ अपने-अपने मार्ग पर चलते हैं, वैसे ही मनुष्य लोग भी धर्मयुक्त मार्ग में चलें॥७॥

पुना राजधर्मविषयमाह॥

फिर राजधर्म विषय को अगले मन्त्र में कहा है॥

इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम्॥८॥

इन्द्राग्नी इति। तविषाणि। वाम्। सधऽस्थानि। प्रयांसि। च। युवोः। अप्ऽतूर्यम्। हितम्॥८॥

पदार्थः-**(इन्द्राग्नी)** वायुविद्युताविव सेनासेनाध्यक्षौ **(तविषाणि)** बलानि **(वाम्)** युवयोः **(सधस्थानि)** समानस्थानानि **(प्रयांसि)** कमनीयानि **(च)** **(युवोः)** **(अप्तूर्य्यम्)** कर्मानुष्ठानाय त्वरितव्यम् **(हितम्)** सुखसाधकम्॥८॥

अन्वयः-हे इन्द्राग्नी वायुविद्युताविव वर्त्तमानौ सेनासेनाध्यक्षौ! वां सधस्थानि प्रयांसि तविषाणि च युवोरप्तूर्य्यं हितं भवतु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि वायुविद्युत्संयोगवत्सेनासेनाध्यक्षावविरुद्धौ स्यातां तर्हि सर्वे कामाः सिध्येयुः॥८॥

पदार्थः-हे **(इन्द्राग्नी)** वायु बिजुली के सदृश ऐक्यमत से वर्त्तमान सेना और सेना के मुख्य अधिष्ठाता! **(वाम्)** आप दोनों के **(सधस्थानि)** तुल्य स्थान में विद्यमान **(प्रयांसि)** कामना करने योग्य **(तविषाणि)** बल पराक्रम **(च)** और **(युवोः)** आप दोनों के **(अप्तूर्य्यम्)** कर्म करने के लिये शीघ्रता **(हितम्)** सुखसाधक हो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वायु और बिजुली के संयोग के समान

परस्पर सेना और सेना के स्वामी प्रेमभाव से विरोध छोड़ के वर्त्ताव करें तो सम्पूर्ण मनोरथ सिद्ध हों॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रा॑ग्नी रोच॒ना दि॒वः परि॒ वाजे॑षु भूषथः। तद्वां॑ चेति॒ प्र वी॒र्यं॑म्॥९॥१२॥अनु० १॥

इन्द्रा॑ग्नी॒ इति॑। रो॒च॒ना। दि॒वः। परि॑। वाजे॑षु। भू॒ष॒थः। तत्। वा॒म्। चे॒ति॒। प्र। वी॒र्यं॑म्॥९॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युतौ (**रोचना**) रोचनानि रुचिकराणि कर्माणि (**दिवः**) प्रकाशस्य मध्ये (**परि**) (**वाजेषु**) सङ्ग्रामेषु (**भूषथः**) अलङ्कुरुथः (**तत्**) (**वाम्**) युवयोः (**चेति**) संज्ञपयति (**प्र**) प्रकृष्टम् (**वीर्य्यम्**) बलं पराक्रमम्॥९॥

अन्वयः-हे सेनासेनाध्यक्षौ! यथेन्द्राग्नी दिवो रोचना परि भूषथस्तथा वाजेषु विजयेन सेनाजना युवां परिभूषन्तु तद्वां प्रवीर्य्यञ्चेति॥९॥

भावार्थः-ये राजानो सेनासेनाध्यक्षान् सर्वथोत्तमान् सम्पादयन्ति तेषां सर्वदा विजय एव भवतीति॥९॥

अत्रेन्द्राग्न्यध्यापकोपदेशकसेनासेनाध्यक्षगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति तृतीयमण्डले द्वादशं सूक्तं प्रथमोऽनुवाको द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे सेना और सेना के स्वामी! जैसे (**इन्द्राग्नी**) वायु बिजुली (**दिवः**) प्रकाश के मध्य में (**रोचना**) प्रीतिकारक कर्मों को (**परि**) सब ओर से (**भूषथः**) शोभित करते हैं, वैसे (**वाजेषु**) संग्रामों में विजय से सेना के पुरुष आप दोनों को शोभित करें और (**तत्**) वह कर्म (**वाम्**) आप दोनों के (**प्र**) उत्तम (**वीर्य्यम्**) पराक्रम को (**चेति**) सम्यक् जनाता है॥९॥

भावार्थः-जो राजा लोग राज्यकार्य्य में सब प्रकार से निपुण सेना और सेना के स्वामियों को अधिकार देते हैं, उनका सब काल में विजय होता है॥९॥

इस सूक्त में इन्द्र, अग्नि, अध्यापक, उपदेशक और सेना तथा सेना के स्वामी के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह तीसरे मण्डल में बारहवां सूक्त पहिला अनुवाक और बारहवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य त्रयोदशस्य सूक्तस्य ऋषभो वैश्वामित्र ऋषिः। अग्निर्देवता। १ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। २, ३, ५-७ निचृदनुष्टुप्। ४ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ विद्वांसः किं कुर्युरित्याह॥

अब सात ऋचावाले तेरहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् लोग क्या करें, इस विषय को कहते हैं॥

प्र वो॑ देवायाग्नये॒ बर्हि॑ष्ठमर्चास्मै।
गम॑द्देवेभि॒रा स नो॒ यजि॑ष्ठो ब॒र्हिरा स॑दत्॥ १॥

प्र। व॒रिति॑ वः। दे॒वाय॑। अ॒ग्नये॑। बर्हि॑ष्ठम्। अ॒र्च॒। अ॒स्मै॒। गम॑त्। दे॒वेभि॒रिति॑ दे॒वेभिः॑। आ। सः। नः॒। यजि॑ष्ठ। ब॒र्हिः॒। आ। स॒द॒त्॥ १॥

पदार्थः–(**प्र**) (**वः**) युष्मान् (**देवाय**) दिव्यगुणाय (**अग्नये**) अग्निवद्वर्त्तमानाय। (**बर्हिष्ठम्**) बर्हिषि यज्ञे तिष्ठतीति (**अर्च**) सत्कुरु (**अस्मै**) (**गमत्**) गच्छेत् प्राप्नुयात्। अत्राडभावः। (**देवेभिः**) दिव्यगुणैः सह (**आ**) (**सः**) (**नः**) अस्मान् (**यजिष्ठः**) अतिशयेन यष्टा (**बर्हिः**) अन्तरिक्षे (**आ**) (**सदत्**) प्राप्नुयात्॥ १॥

अन्वयः–हे मनुष्या! यो देवेभिः सहास्मै देवायाग्नये वो युष्माना गमत् तं बर्हिष्ठं प्रार्च स यजिष्ठो नो बर्हिरा सदत्॥ १॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये युष्मान् सत्कुर्वन्ति तान् यूयमपि सत्कुरुत यथा विद्वांसो विद्वद्भ्यो विद्यया युक्तान् शुभान् गुणान् गृह्णन्ति तान् यूयमर्चताऽस्मान् दिव्या गुणाः प्राप्नुवन्त्वितीच्छत॥ १॥

पदार्थः–हे मनुष्यो! जो पुरुष (**देवेभिः**) उत्तम गुणों के साथ (**अस्मै**) इस (**देवाय**) श्रेष्ठ गुणयुक्त (**अग्नये**) अग्नि के सदृश तेजधारी के लिये (**वः**) आप लोगों को (**आ**) सब प्रकार (**गमत्**) प्राप्त होवे उस (**बर्हिष्ठम्**) यज्ञ में बैठनेवाले का (**प्र**) (**अर्च**) विशेष सत्कार करो (**सः**) वह (**यजिष्ठः**) अतिशय यज्ञ करनेवाला (**नः**) हम लोगों को (**बर्हिः**) अन्तरिक्ष में (**आ**) (**सदत्**) प्राप्त होवे॥ १॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो लोग आप लोगों का सत्कार करते हैं, उनका आप लोग भी सत्कार करें। जैसे विद्वज्जन विद्वान् पुरुषों से विद्यायुक्त शुभ गुणों को ग्रहण करते हैं, उन विद्वज्जनों की आप लोग भी सेवा करें और हम लोगों को उत्तम गुण प्राप्त हों, ऐसी इच्छा करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऋ॒ता॒वा॒ यस्य॒ रोद॑सी॒ दक्षं॑ सच॑न्त ऊ॒तय॑ः।

हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे॥ २॥

ऋतऽवा। यस्य। रोदसी इति। दक्षम्। सचन्ते। ऊतयः। हविष्मन्तः। तम्। ईळते। तम्। सनिष्यन्तः। अवसे॥ २॥

पदार्थः-(**ऋतावा**) य ऋतं सत्यं वनुते याचते सः। **अन्येषामपि दृश्यत** इति दीर्घः (**यस्य**) (**रोदसी**) द्यावापृथिव्यौ (**दक्षम्**) बलं चातुर्य्यम् (**सचन्ते**) सम्बध्नन्ति (**ऊतयः**) रक्षका गुणाः (**हविष्मन्तः**) प्रशस्तानि हवींषि दानानि विद्यन्ते येषु ते (**तम्**) (**ईळते**) प्रशंसन्ति (**तम्**) (**सनिष्यन्तः**) सेवनं करिष्यमाणाः (**अवसे**) रक्षणाद्याय॥ २॥

अन्वयः-हे विद्वन् ऋतावा! भवान् यस्य दक्षमूतयश्च रोदसी सचन्ते तं हविष्मन्तः सचन्ते तमवसे सनिष्यन्तः ईळते तमेव प्रशंसतु॥ २॥

भावार्थः-हे मनुष्या! यस्य कीर्त्तिर्द्यावापृथिव्योर्व्याप्ता यस्य न्यायेन रक्षणादीनि कर्माणि प्रशंसितानि सन्ति तमेव विद्वांसं सभापतिं रक्षणाद्यायाश्रयत॥ २॥

पदार्थः-हे विद्वन् पुरुष (**ऋतावा**) सत्य की प्रार्थना करनेवाले आप! (**यस्य**) जिसके (**दक्षम्**) पराक्रम वा चतुराई और (**ऊतयः**) रक्षा करनेवाले गुण (**रोदसी**) अन्तरिक्ष और पृथिवी को (**सचन्ते**) सम्बद्ध करते अर्थात् उनमें व्याप्त होते हैं (**तम्**) उसके (**हविष्मन्तः**) प्रशंसा करने योग्य दानयुक्त जन सम्बन्धी होते हैं (**तम्**) उसकी (**अवसे**) रक्षा आदि के लिये (**सनिष्यन्तः**) सेवन करनेवाले लोग (**ईळते**) प्रशंसा करते हैं, उसी की प्रशंसा करो॥ २॥

भावार्थः-हे मनुष्यो! जिसकी कीर्त्ति आकाश और पृथिवी में व्याप्त, जिसके न्याय से प्रशस्त रक्षा आदि कर्म होते हैं, उसी विद्वान् सभापति का रक्षा आदि के लिये तुम आश्रय करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स यन्ता विप्र एषां स यज्ञानामथा हि षः।

अग्निं तं वो दुवस्यत दाता यो वनिता मघम्॥ ३॥

सः। यन्ता। विप्रः। एषाम्। सः। यज्ञानाम्। अथ। हि। सः। अग्निम्। तम्। वः। दुवस्यत। दाता। यः। वनिता। मघम्॥ ३॥

पदार्थः-(**सः**) (**यन्ता**) निग्रहीता (**विप्रः**) मेधावी (**एषाम्**) विद्यासुशिक्षान्वितानाम् (**सः**) (**यज्ञानाम्**) सङ्गन्तव्यानां व्यवहाराणाम् (**अथ**) आनन्तर्य्ये। अत्र **निपातस्य च**ेति दीर्घः। (**हि**) यतः (**सः**) (**अग्निम्**) पावकम् (**तम्**) अग्निवद्वर्त्तमानम् (**वः**) युष्माकम् (**दुवस्यत**) सेवध्वम् (**दाता**) (**यः**) (**वनिता**) याचकः (**मघम्**) परमपूजनीयं धनम्॥ ३॥

अन्वयः-हे मनुष्या! यो विप्र एषां यज्ञानां वो युष्माकं च यन्ता दाता वनिता भवेत्तमग्निमिव तस्मात्प्राप्तं मघञ्च दुवस्यत स हि स्वयं जितेन्द्रियः स स्वयं मेधावी सोऽथ स्वयं दाता यज्ञानुष्ठानात् सद्गुणयाचकः स्यात्॥३॥

भावार्थः-हे मनुष्या! यः स्वयं धर्मात्मा जितेन्द्रियः सत्योपदेष्टा सद्गुणानां दाता ग्रहीता च प्रकृतेर्नियन्ता भवेत्तं सर्वोपायैः सेवध्वम्॥३॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(विप्रः)** बुद्धिमान् पुरुष **(एषाम्)** इन विद्या और उत्तम शिक्षायुक्त **(यज्ञानाम्)** करने योग्य व्यवहारों को और **(वः)** आप लोगों का **(यन्ता)** कुमार्ग से निवारणकर्त्ता **(दाता)** दानशील **(वनिता)** मांगनेवाला होवे **(तम्)** उस **(अग्निम्)** अग्नि के सदृश प्रकाशमान जन को और उससे प्राप्त हुए **(मघम्)** अत्यन्त पूजने योग्य धन को **(दुवस्यत)** सेवो **(सः)** वह **(हि)** जिससे कि अपने आप ही जितेन्द्रिय इससे **(सः)** वह अपने आप ही बुद्धिमान् **(अथ)** इसके अनन्तर **(सः)** वह स्वयं दानशील यज्ञों के करने से उत्तम गुणों का मांगनेवाला होवे॥३॥

भावार्थः-हे मनुष्यो! जो पुरुष अपने आप धर्मात्मा, जितेन्द्रिय, सत्य का प्रचारक, श्रेष्ठ गुणों का देने और ग्रहण करनेवाला, स्वभाव का धर्म में प्रवर्त्तनकर्त्ता होवे, उसकी सम्पूर्ण उपायों से सेवा करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा।

यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा॥४॥

सः। नः। शर्माणि। वीतये। अग्निः। यच्छतु। शंऽतमा। यतः। नः। प्रुष्णवत्। वसु। दिवि। क्षितिऽभ्यः। अप्ऽसु। आ॥४॥

पदार्थः-**(सः)** **(नः)** अस्मभ्यम् **(शर्माणि)** उत्तमानि गृहाणि **(वीतये)** विज्ञानादिधनप्राप्तये **(अग्निः)** पावक इव **(यच्छतु)** ददातु **(शन्तमा)** अतिशयेन शङ्कराणि **(यतः)** **(नः)** अस्मान् **(प्रुष्णवत्)** सुष्ठ्वैश्वर्य्ययुक्तम् **(वसु)** धनम् **(दिवि)** प्रकाशे **(क्षितिभ्यः)** भूमिस्थदेशेभ्यः **(अप्सु)** प्राणेष्वन्तरिक्षे वा **(आ)** समन्तात्॥४॥

अन्वयः-स पूर्वोक्तो विद्वानग्निरिव वीतये नः शन्तमा शर्माणि क्षितिभ्यो दिव्यप्स्वा यच्छतु यतो नोऽस्मान् प्रुष्णवद्वसु प्राप्नुयात्॥४॥

भावार्थः-गृहस्थैः सर्वदा सुखकराणि गृहाणि निर्माय जले पृथिव्यामन्तरिक्षे गमनाय यानानि साधनानि निर्माय सर्वाः समृद्धयः प्राप्तव्यास्ताभिर्विज्ञानं वर्द्धनीयम्॥४॥

पदार्थः-(**सः**) वह पूर्व मन्त्र में कहा हुआ विद्वान् (**अग्निः**) अग्नि के सदृश (**वीतये**) विज्ञान आदि धन की प्राप्ति के लिये (**नः**) हम लोगों को (**शन्तमा**) अतिशय कल्याणकारक (**शर्माणि**) उत्तम गृहों को (**क्षितिभ्यः**) पृथ्वी में विराजमान देशों से (**दिवि**) प्रकाश में (**अप्सु**) प्राणों, जलों वा अन्तरिक्ष में (**आ**) चारों ओर से (**यच्छतु**) देवे (**यतः**) जिससे (**नः**) हम लोगों को (**प्रुष्णवत्**) अच्छे ऐश्वर्ययुक्त जैसा (**वसु**) धन प्राप्त होवे॥४॥

भावार्थः-गृहस्थ लोगों को चाहिये कि सर्वदा सुखोत्पादक गृहों को निर्मित करके और जल, स्थल, अन्तरिक्ष मार्ग से गमन के लिये उत्तम वाहन तथा अन्य यन्त्रादि साधनों को रच कर सम्पूर्ण समृद्धियाँ सञ्चित करें, फिर उनसे अपना विज्ञान बढ़ावें॥४॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः।
ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम्॥५॥

दीदिवांसम्। अपूर्व्यम्। वस्वीभिः। अस्य। धीतिऽभिः। ऋक्वाणः। अग्निम्। इन्धते। होतारम्। विश्पतिम्। विशाम्॥५॥

पदार्थः-(**दीदिवांसम्**) सद्गुणैर्देदीप्यमानम् (**अपूर्व्यम्**) अपूर्वेषु दिव्येषु गुणेषु कुशलम् (**वस्वीभिः**) धनप्रापिकाभिः क्रियाभिः (**अस्य**) (**धीतिभिः**) अङ्गुलीभिरिव (**ऋक्वाणः**) स्तुत्यानां गुणानां स्तावकाः (**अग्निम्**) अग्निमिव वर्त्तमानम् (**इन्धते**) प्रकाशयन्ति (**होतारम्**) सुखस्य दातारम् (**विश्पतिम्**) विशिष्टानां पालकम् (**विशाम्**) प्रजानाम्॥५॥

अन्वयः-हे मनुष्या! य ऋक्वाणो धीतिभिरिव वस्वीभिरस्य संसारस्य मध्य अग्निमिव दीदिवांसमपूर्व्यं होतारं विशां विश्पतिमिन्धते तं यूयं सदा सेवध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! युष्माभिरत्र श्रेष्ठाश्रयः कर्त्तव्यो दुष्टसङ्गो हातव्यो विद्याधनवृद्धिः कर्त्तव्या विद्याविनयसहितो राजा सेवनीयोऽस्तीति विजानीत॥५॥

पदार्थः-हे मनुष्यो! जो पुरुष (**ऋक्वाणः**) स्तुति करने योग्य गुणों के स्तुतिकर्त्ता (**धीतिभिः**) अंगुलियों के सदृश (**वस्वीभिः**) धन प्राप्त करानेवाली क्रियाओं से (**अस्य**) इस संसार के मध्य में (**अग्निम्**) अग्नि के तुल्य वर्त्तमान (**दीदिवांसम्**) उत्तम गुणों के प्रकाश से युक्त (**अपूर्व्यम्**) अपूर्व श्रेष्ठ गुणों में निपुण (**होतारम्**) सुखदायक (**विशाम्**) प्रजाओं के बीच (**विश्पतिम्**) विशिष्टों के पालनकर्त्ता जन को (**इन्धते**) प्रकाशित करता है, उसकी आप लोग सेवा करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोगों को इस संसार में श्रेष्ठ

पुरुषों का आश्रय करना, दुष्टों का सङ्ग त्यागना, विद्याधन की वृद्धि करनी और विद्याविनय से युक्त राजा का सेवन करना योग्य है, ऐसा समझो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः।
शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः॥६॥

उत। नः। ब्रह्मन्। अविषः। उक्थेषु। देवऽहूतमः। शम्। नः। शोच। मरुत्ऽवृधः। अग्ने। सहस्रऽसातमः॥६॥

पदार्थः-(**उत**) अपि (**नः**) अस्मान् (**ब्रह्मन्**) ब्रह्मणि धने (**अविषः**) व्यापयेत् (**उक्थेषु**) प्रशंसनीयपदार्थेषु (**देवहूतमः**) देवैर्विद्वद्भिरतिशयेन प्रशंसितः (**शम्**) सुखम् (**नः**) अस्माकम् (**शोच**) विचारय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**मरुद्वृधः**) मनुष्यैर्वर्धमानान् (**अग्ने**) अग्निरिव यशसा प्रकाशमान (**सहस्रसातमः**) यः सहस्रमसङ्ख्यं सनति ददाति सोऽतिशयितः॥६॥

अन्वयः-हे अग्ने! त्वं ब्रह्मन्नुक्थेषु नोऽविष उत देवहूतमः सहस्रसातमस्त्वं मरुद्वृधो नः शं शोच प्रापय॥६॥

भावार्थः-मनुष्यैर्विदुषः प्राप्य प्रथमतो ब्रह्मचर्य्यविद्यादिग्रहणं ततो धनैश्वर्य्यवर्द्धनोपायो याचनीयो धनं प्राप्य सुपात्रेषु सन्मार्गे व्ययितव्यम्॥६॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य कीर्ति से प्रकाशमान! आप (**ब्रह्मन्**) धन और (**उक्थेषु**) प्रशंसनीय पदार्थों के निमित्त (**नः**) हमको (**अविषः**) संयुक्त कीजिये (**उत**) और (**देवहूतमः**) विद्वानों से अति प्रशंसा को प्राप्त (**सहस्रसातमः**) असंख्य उपदेश वा धनों को अत्यन्त देनेवाले आप (**मरुद्वृधः**) मनुष्यों से बढ़ते हुए (**नः**) हमारे (**शम्**) सुख का (**शोच**) विचार कीजिये वा सुख प्राप्त कीजिये॥६॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों के शरण जा के प्रथम से ब्रह्मचर्य्य विद्या आदि का ग्रहण, तदनन्तर धन ऐश्वर्य की वृद्धि के उपाय की प्रार्थना करें और फिर धन को प्राप्त होके उत्तम विद्यावान् पुरुषों और श्रेष्ठ मार्ग में खर्चें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नू नो रास्व सहस्रवत् तोकवत्पुष्टिमद्वसु।
द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम्॥७॥१३॥

नु। नः। रास्व। सहस्रऽवत्। तोकऽवत्। पुष्टिऽमत्। वसु। द्युऽमत्। अग्ने। सुऽवीर्यम्। वर्षिष्ठम्। अनुपऽक्षितम्॥७॥

पदार्थः-(**नु**) सद्यः (**नः**) अस्मभ्यम् (**रास्व**) देहि (**सहस्रवत्**) सहस्रमसंख्यपरिमाणं विद्यते यस्मिँस्तत् (**तोकवत्**) प्रशंसितानि तोकान्यपत्यानि भवन्ति यस्मिँस्तत् (**पुष्टिमत्**) बहुविधा पुष्टिर्विद्यते यस्मिंस्तत् (**वसु**) विद्यासुवर्णादिधनम् (**द्युमत्**) द्यौर्ज्ञानप्रकाशो विद्यते यस्मिंस्तत् (**अग्ने**) परमेश्वर विद्वन् वा (**सुवीर्य्यम्**) शोभनं वीर्य्यं बलं यस्मात्तत् (**वर्षिष्ठम्**) अतिशयेन वृद्धम् (**अनुपक्षितम्**) यद्व्ययेनापि नोपक्षीयते तत्॥७॥

अन्वयः-हे अग्ने जगदीश्वर विद्वन् वा! त्वं नः सहस्रवत्तोकवत्पुष्टिमत्सुवीर्य्यं द्युमद्वर्षिष्ठमनुपक्षितं च वसु नु रास्व॥७॥

भावार्थः-मनुष्यैः परमेश्वरादैश्वर्य्यवतो विदुषो मनुष्याद्वा विद्यैश्वर्य्यं श्रेष्ठान्यपत्यान्युत्तमं बलं पुरुषार्थेन वर्द्धनीयं येन सर्वेषां सद्यो वृद्धिः कर्त्तुं शक्येतेति॥७॥

अत्र विद्वदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति त्रयोदशं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) जगदीश्वर वा विद्वान् पुरुष! आप (**नः**) हम लोगों के लिये (**सहस्रवत्**) असंख्यपरिमाणयुक्त (**तोकवत्**) प्रशंसा करने योग्य सन्तानों से पूरित (**पुष्टिमत्**) अनेक प्रकार की पुष्टि के दाता (**सुवीर्य्यम्**) प्रचण्ड बल को बढ़ानेवाले (**द्युमत्**) ज्ञान के प्रकाश से युक्त (**वर्षिष्ठम्**) अतिशय वृद्धि से युक्त और (**अनुपक्षितम्**) खर्च करने से नहीं न्यून होनेवाले (**वसु**) विद्या, सुवर्ण आदि धन को (**नु**) शीघ्र (**रास्व**) दीजिये॥७॥

भावार्थः-मनुष्यों को चाहिये कि परम ऐश्वर्ययुक्त ईश्वर वा किसी विद्वान् पुरुष से प्रार्थना करके प्राप्ति के योग्य विद्या ऐश्वर्य्य, उत्तम सन्तान, श्रेष्ठ बल पुरुषार्थ से बढ़ावें, जिससे सब जनों की शीघ्र वृद्धि कर सकें॥७॥

इस सूक्त में विद्वान् और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है यह जाननी चाहिये॥

यह तेरहवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य चतुर्दशस्य सूक्तस्य ऋषभो वैश्वामित्र ऋषिः। अग्निर्देवता। १, ७ निचृत् त्रिष्टुप्। २, ५ त्रिष्टुप्। ३, ४ विराट् त्रिष्टुप् छन्दः। गान्धारः स्वरः। ६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ शिल्पविद्याविषयमाह॥

अब सात ऋचावाले चौदहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र से शिल्पविद्या विषय को कहते हैं॥

आ होता॑ म॒न्द्रो वि॒दथा॑न्यस्थात् स॒त्यो यज्वा॑ क॒वित॑मः स वे॒धाः॥
वि॒द्युद्र॑थः सह॑सस्पु॒त्रो अ॒ग्निः शो॒चिष्के॑शः पृथि॒व्यां पाजो॑ अश्रेत्॥ १॥

आ। होता॑। म॒न्द्रः। वि॒दथा॑नि। अ॒स्था॒त्। स॒त्यः। यज्वा॑। क॒विऽत॑मः। सः। वे॒धाः। वि॒द्युत्ऽर॑थः। सह॑सः। पु॒त्रः। अ॒ग्निः। शो॒चिःऽके॑शः। पृ॒थि॒व्याम्। पाजः॑। अ॒श्रे॒त्॥ १॥

पदार्थः–(**आ**) समन्तात् (**होता**) सकलविद्यादाता (**मन्द्रः**) कमनीयो हर्षयिता (**विदथानि**) विज्ञानानि (**अस्थात्**) तिष्ठेत् (**सत्यः**) सत्सु साधुः (**यज्वा**) सङ्गन्ता (**कवितमः**) अतिशयेन विद्वान् (**सः**) (**वेधाः**) मेधावी। **वेधा इति मेधाविनामसु पठितम्।** (निघं०३.१५)। (**विद्युद्रथः**) विद्युता चालितो रथो विद्युद्रथः (**सहसः**) बलयुक्तस्य वायोः (**पुत्रः**) सन्तान इव (**अग्निः**) (**शोचिष्केशः**) शोचींषि तेजांसि केशा इव ज्वाला यस्य सः (**पृथिव्याम्**) (**पाजः**) बलम् (**अश्रेत्**) श्रयेत्॥ १॥

अन्वयः–हे मनुष्या! यो मन्द्रः सत्यो यज्वा होता कवितमो वेधा अस्ति स विदथान्यस्थात् विद्युद्रथः सहसस्पुत्रः शोचिष्केशोऽग्निः पृथिव्यां पाजोऽश्रेत्तस्मादेव युष्माभिः शिल्पविद्या संग्राह्या॥ १॥

भावार्थः–ये मनुष्याः पदार्थविज्ञानानि प्राप्य हस्तक्रियया यन्त्रकला निष्पाद्य विद्युदादिचाल्यानि यानानि साधयेयुस्तेऽत्यन्तं सुखमाप्नुयुः॥ १॥

पदार्थः–हे मनुष्यो! जो (**मन्द्रः**) अच्छे और प्रसन्न कराने (**सत्यः**) श्रेष्ठ पुरुषों का आदर करने (**यज्वा**) मेल करने और (**होता**) सब विद्या का देनेवाला (**कवितमः**) अत्यन्त विद्वान् (**वेधाः**) बुद्धिमान् पुरुष है (**सः**) वह (**विदथानि**) विज्ञानों को (**आ**) (**अस्थात्**) प्राप्त होकर उत्पन्न करे (**विद्युद्रथः**) बिजुली से रथ चलानेवाला (**सहसः**) बलयुक्त वायु के (**पुत्रः**) सन्तान के सदृश (**शोचिष्केशः**) केशों के सदृश तेजों को धारणकर्त्ता (**अग्निः**) अग्नि के तुल्य तेजस्वी इस (**पृथिव्याम्**) पृथिवी में (**पाजः**) बल का (**अश्रेत्**) आश्रय करे, उससे विमानरचना और शिल्पविद्या में निपुण होइये॥ १॥

भावार्थः–जो मनुष्य पदार्थविद्या में कुशल होकर हाथ की कारीगरी से यन्त्रकला सिद्ध करके बिजुली से चलाने योग्य वाहनों को रचें तो वे अत्यन्त सुख को प्राप्त होवें॥ १॥

अथाध्ययनाध्यापनविषयमाह॥

अब पढ़ने–पढ़ाने रूप विषय को अगले मन्त्र में कहा है॥

अया॑मि ते नम॑उक्तिं जुषस्व ऋता॑व॒स्तुभ्यं॒ चेत॑ते सहस्वः।

विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र॥ २॥

अयामि। ते। नमःऽउक्तिम्। जुषस्व। ऋतऽवः। तुभ्यम्। चेतते। सहस्वः। विद्वान्। आ। वक्षि। विदुषः। नि। सत्सि। मध्ये। आ। बर्हिः। ऊतये। यजत्र॥ २॥

पदार्थः-(**अयामि**) प्राप्नोमि (**ते**) तव (**नमउक्तिम्**) नमसां नमस्काराणां वचनम् (**जुषस्व**) सेवस्व (**ऋतावः**) सत्यप्रकाशक (**तुभ्यम्**) (**चेतते**) प्रज्ञापकाय (**सहस्वः**) बहुबलयुक्त सकलविद्याविद्वा (**विद्वान्**) (**आ**) समन्तात् (**वक्षि**) वदसि (**विदुषः**) विपश्चितः (**नि**) निश्चितम् (**सत्सि**) निषीदसि (**मध्ये**) (**आ**) (**बर्हिः**) अन्तरिक्षस्य (**ऊतये**) रक्षणाद्याय (**यजत्र**) सङ्गन्तः॥ २॥

अन्वयः-हे ऋतावोऽहं ते नमउक्तिमयामि तां त्वं जुषस्व। हे सहस्वो यो विद्वाँस्त्वं विदुष आ वक्षि तेन त्वया सहाऽहं विदुषोऽयामि। हे यजत्र! यस्त्वमूतये बर्हिर्मध्य आ नि षत्सि तस्मै चेतते तुभ्यं नमउक्तिं विदधामि॥ २॥

भावार्थः-यथा विद्यार्थिनो नमस्कारादिसेवयाऽध्यापकान् प्रसादयेयुस्तथाऽध्यापकाः सुशिक्षादानेन विद्यार्थिनः सन्तोषयेयुः॥ २॥

पदार्थः-हे (**ऋतावः**) सत्यप्रकाशकशील मैं (**ते**) आपके (**नमउक्तिम्**) नमस्कारों के वचन को (**अयामि**) प्राप्त होता हूँ (**जुषस्व**) उसका आप सादर सहित ग्रहण कीजिये। हे (**सहस्वः**) अतिबलयुक्त वा सम्पूर्ण विद्या जाननेवाले जो (**विद्वान्**) विद्वान्! आप (**विदुषः**) विद्वानों को (**आ**) (**वक्षि**) सब प्रकार उपदेश देते हो ऐसे आपके साथ विद्वानों को प्राप्त होता हूँ। हे (**यजत्र**) पूजन करने योग्य! जो आप (**ऊतये**) रक्षा आदि के लिये (**बर्हिः**) अन्तरिक्ष के (**मध्ये**) मध्य में (**आ**) (**नि**) अच्छे प्रकार निश्चित (**सत्सि**) विराजो उस (**चेतते**) बोध देनेवाले (**तुभ्यम्**) आपके लिये नमस्काररूप वचन करता हूँ॥ २॥

भावार्थः-जैसे विद्यार्थी लोग नमस्कार आदि सेवा से अध्यापकों को प्रसन्न करें, वैसे अध्यापक लोग उत्तमशिक्षारूप विद्यादान से विद्यार्थियों को प्रसन्न सन्तुष्ट करें॥ २॥

मनुष्यैर्नियम आश्रयितव्य इत्याह॥

मनुष्यों को नियम का आश्रय करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ।
यत्सीमञ्जन्ति पूर्व्यं हविर्भिरा बन्धुरेव तस्थतुर्दुरोणे॥ ३॥

द्रवताम्। ते। उषसा। वाजयन्ती इति। अग्ने। वातस्य। पथ्याभिः। अच्छ। यत्। सीम्। अञ्जन्ति। पूर्व्यम्। हविःऽभिः। आ। बन्धुराऽइव। तस्थतुः। दुरोणे॥ ३॥

पदार्थः-(**द्रवताम्**) गच्छेताम् (**ते**) तुभ्यम् (**उषसा**) प्रातःसायंसन्धिवेले (**वाजयन्ती**) प्रज्ञापयन्त्यौ (**अग्ने**) अग्निरिव वर्त्तमान (**वातस्य**) वायोः (**पथ्याभिः**) पथिषु साध्वीभिर्गतिभिः (**अच्छ**) सम्यक् (**यत्**)

(सीम्) सर्वत: **(अञ्जन्ति)** प्रकटयन्ति **(पूर्व्यम्)** पूर्वैर्निष्पादितं यानविशेषम् **(हविर्भि:)** आदातव्यै: साधनै: **(आ)** **(बन्धुरेव)** यथा बन्धुरे तथा **(तस्थतु:)** तिष्ठेताम् **(दुरोणे)** गृहे॥३॥

अन्वय:-हे अग्ने विद्वन्! ते यथा वाजयन्ती उषसा द्रवतां वा वातस्य पथ्याभिर्दुरोणेऽच्छ तस्थतुर्बन्धुरेव शिल्पिनो हविर्भिर्यत्पूर्व्यं यानविशेषं सीमाञ्जन्ति ते त्वं यथावत् तच्च यानं साध्नुहि॥३॥

भावार्थ:-हे मनुष्या! यथेश्वरनियते सायंप्रातर्वेले नियमेन वर्त्तेते यथा च सुशिल्पिभिर्निर्मितानि यन्त्रयुतानि यानानि यथानियमं गच्छन्त्यागच्छन्ति तथैव स्वयं नियमे वर्त्तित्वा नियतानि यानानि संसाध्याभीष्टं व्यवहारं सम्यक् साध्नुत॥३॥

पदार्थ:-हे **(अग्ने)** अग्नि के सदृश प्रकाशयुक्त विद्वान् पुरुष! **(ते)** आपके लिये जैसे **(वाजयन्ती)** बोध कराती हुई **(उषसा)** प्रात:काल सन्ध्याकाल दोनों वेला **(द्रवताम्)** प्रवाह से चलें वा **(वातस्य)** वायु के **(पथ्याभि:)** मार्ग में उत्तम गमनों से **(दुरोणे)** गृह में **(अच्छ)** उत्तम प्रकार **(तस्थतु:)** वर्त्तमान होवें **(बन्धुरेव)** बन्धनों के सदृश कारीगर लोग **(हविर्भि:)** ग्रहण करने योग्य साधनों से **(यत्)** जिस **(पूर्व्यम्)** प्राचीन लोगों से रचे गये वाहन विशेष को **(सीम्)** **(आ, अञ्जन्ति)** सब प्रकार प्रकट करते हैं, उन दोनों सायं-प्रात: वेला की आप यथायोग्य सेवा करें और उस वाहन को सिद्ध करो॥३॥

भावार्थ:-हे मनुष्यो! जैसे ईश्वर से नियत की **[**गयी**]** सन्ध्या और प्रात: समय की वेला नियम से वर्त्तमान हैं और जैसे चतुर कारीगरों से बनाये गये कलायन्त्रों से युक्त वाहन नियम सहित जाते-आते हैं, वैसे ही अपने-आप नियमपूर्वक वर्ताव करके नियत यानों को रच के अपनी इच्छानुकूल व्यवहार को उत्तम प्रकार सिद्ध करें॥३॥

पुनर्मनुष्या: किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

मित्रश्च तुभ्यं वरुण: सहस्वोऽग्ने विश्वे मरुत: सुम्नमर्चन्।
यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षिती: प्रथयन्त्सूर्यो नॄन्॥४॥

मित्र:। च। तुभ्यम्। वरुण:। सहस्व:। अग्ने। विश्वे। मरुत:। सुम्नम्। अर्चन्। यत्। शोचिषा। सहस:। पुत्र। तिष्ठा:। अभि। क्षिती:। प्रथयन्। सूर्य:। नॄन्॥४॥

पदार्थ:-(मित्र:) सखा **(च)** व्यवहारवित् **(तुभ्यम्)** **(वरुण:)** श्रेष्ठ: **(सहस्व:)** बहुबलयुक्त **(अग्ने)** अग्निरिव प्रतापवन् **(विश्वे)** सर्वे **(मरुत:)** मनुष्या: **(सुम्नम्)** **(अर्चन्)** प्राप्नुवन्तु **(यत्)** यत: **(शोचिषा)** प्रकाशेन **(सहस:)** बलाय **(पुत्र)** पुत्रवद्वर्त्तमान **(तिष्ठा:)** तिष्ठे: **(अभि)** आभिमुख्ये **(क्षिती:)** मनुष्यान् **(प्रथयन्)** प्रकटीकुर्वन् **(सूर्य्य:)** सवितेव **(नॄन्)** नायकान्॥४॥

अन्वयः-हे सहस्वोऽग्ने! तुभ्यं यौ मित्रो वरुणश्चार्चतस्तौ त्वमर्च। हे सहसस्पुत्र! यद्यतः शोचिषा सूर्य्य इव त्वं यान् क्षितीर्नॄन् प्रथयन् सन्नभितिष्ठास्तस्मात्त्वं विश्वे मरुतः सुम्नमर्चन्॥४॥

भावार्थः-यदि मनुष्या अग्न्यादिपदार्थेभ्यो विद्ययोपकारान् गृह्णीयुस्तर्ह्येते मित्रवत्सुखानि विस्तारयेयुः॥४॥

पदार्थः-हे **(सहस्वः)** अत्यन्त बलधारी **(अग्ने)** अग्नि के सदृश प्रतापयुक्त जन **(तुभ्यम्)** आपके लिये जो **(वरुणः)** श्रेष्ठ **(मित्रः)** प्रेमी **(च)** और व्यवहार ज्ञाता आदर करते हैं तो उनका आप भी आदर करें। हे **(सहसः)** बल के **(पुत्र)** पुत्र के सदृश तेज से विद्यमान! **(यत्)** जिस कारण **(शोचिषा)** प्रकाश से **(सूर्य्यः)** सूर्य के तुल्य आप जिन **(क्षितीः)** मनुष्यों वा **(नॄन्)** मुख्य पुरुषों को **(प्रथयन्)** प्रकट करते हुए **(अभि)** सम्मुख **(तिष्ठाः)** उपस्थित होइये जिससे आपको **(विश्वे)** सम्पूर्ण **(मरुतः)** मनुष्य **(सुम्नम्)** सुखपूर्वक **(अर्चन्)** स्तवन करें॥४॥

भावार्थः-जो मनुष्य अग्नि आदि पदार्थों से विद्या द्वारा उपकार ग्रहण करें तो वे परस्पर मित्रों के तुल्य सुख भोग करें॥४॥

पुनरध्यापकाध्येतृविषयमाह॥

फिर अध्यापक और अध्येता के विषय को अगले मन्त्र में कहा है॥

वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने॥५॥

वयम्। ते। अद्य। ररिम। हि। कामम्। उत्तानऽहस्ताः। नमसा। उपऽसद्य। यजिष्ठेन। मनसा। यक्षि। देवान्। अस्रेधता। मन्मना। विप्रः। अग्ने॥५॥

पदार्थः-**(वयम्)** **(ते)** **(अद्य)** इदानीम् **(ररिम)** दद्याम **(हि)** यतः **(कामम्)** **(उत्तानहस्ताः)** उत्थापितकराः **(नमसा)** सत्कारेणान्नादिना वा **(उपसद्य)** समीपं प्राप्य **(यजिष्ठेन)** अतिशयेन सङ्गतेन **(मनसा)** चित्तेन **(यक्षि)** सङ्गच्छसि **(देवान्)** विदुषः **(अस्रेधता)** अक्षीणेन **(मन्मना)** विज्ञानवता **(विप्रः)** मेधावी **(अग्ने)** विद्वन्॥५॥

अन्वयः-हे अग्ने हि विप्रस्त्वं यजिष्ठेनास्रेधता मन्मना मनसा अस्मान् देवान् यक्षि तस्मादद्य उत्तानहस्ता वयं त्वां नमसोपसद्य ते कामं ररिम॥५॥

भावार्थः-यथाऽध्यापकाः शिष्याणां विद्येच्छाः पूरयन्ति तथैव विद्यार्थिनोऽप्यध्यापकानामभीष्टानि पूरयन्तु सर्वदा सर्वे विद्यादिशुभगुणानां दातारः स्युः॥५॥

पदार्थः-हे **(अग्ने)** विद्वान् पुरुष **(हि)** जिससे **(विप्रः)** बुद्धिमान्! आप **(यजिष्ठेन)** अत्यन्त संलग्न और **(अस्रधेता)** नहीं खिन्न हुए **(मन्मना)** विज्ञान से युक्त **(मनसा)** चित्त से हम **(देवान्)** विद्वानों

का **(यक्षि)** सङ्ग कीजिये उससे **(अद्य)** इस समय **(उत्तानहस्ताः)** हाथ उठाये हुए **(वयम्)** हम लोग आपको **(नमसा)** सत्कार से वा अन्न आदि से **(उपसद्य)** समीप प्राप्त होके **(ते)** आपके **(कामम्)** मनोरथ को **(ररिम)** देवें॥५॥

भावार्थः-जैसे अध्यापक लोग शिष्यों की विद्याविषयिणी इच्छा को सन्तृप्त करते हैं, वैसे ही विद्यार्थी जन भी अध्यापकों के मनोरथों को सफल करें और सब काल में सम्पूर्ण पुरुष विद्या आदि शुभगुणों के देनेवाले होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वद्धि पुत्र सहसो वि पूर्वीर्दिवस्य यन्त्यूतयो वि वाजाः।
त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने॥६॥

त्वत्। हि। पुत्र। सहसः। वि। पूर्वीः। देवस्य। यन्ति। ऊतयः। वि। वाजाः। त्वम्। देहि। सहस्रिणम्। रयिम्। नः। अद्रोघेण। वचसा। सत्यम्। अग्ने॥६॥

पदार्थः-(**त्वत्**) तव सकाशात् **(हि)** यतः **(पुत्र)** पवित्रकारक **(सहसः)** बलस्य **(वि)** **(पूर्वीः)** सनातन्यः **(देवस्य)** जगदीश्वरस्य **(यन्ति)** प्राप्नुवन्ति **(ऊतयः)** रक्षणाद्याः **(वि)** **(वाजाः)** विज्ञानान्नयुक्ताः **(त्वम्)** **(देहि)** **(सहस्रिणम्)** सहस्रमसंख्यानि वस्तूनि विद्यन्ते यस्मिँस्तम् **(रयिम्)** श्रियम् **(नः)** अस्मभ्यम् **(अद्रोघेण)** अद्रोहेण निर्वैरेण। अत्र वर्णव्यत्ययेन हस्य घः। **(वचसा)** वचनेन **(सत्यम्)** सत्सु व्यवहारेषु साधुम् **(अग्ने)** पावकद्वर्त्तमान॥६॥

अन्वयः-हे सहसस्पुत्र! हि या देवस्य पूर्वीरूतयो वाजा अस्मान्त्वद्वि यन्ति। हे अग्ने! ततस्त्वमद्रोघेण वचसा नोऽस्मभ्यं सत्यं सहस्रिणं रयिं वि देहि॥६॥

भावार्थः-सर्वैरध्येत्रध्यापकराजपुरुषप्रजाजनैर्द्रोहादिदोषान् विहाय प्रीतिं सम्पाद्य परस्परेषामसंख्यं धनं विज्ञानं च सततमुन्नेयम्॥६॥

पदार्थः-हे **(सहसः)** बल के **(पुत्र)** पवित्रकर्त्ता! **(हि)** जिससे जो **(देवस्य)** जगदीश्वर की **(पूर्वीः)** अति [सनातन] काल से उत्पन्न **(वाजाः)** विज्ञान और अन्नयुक्त **(ऊतयः)** रक्षा आदि क्रिया हम लोगों को **(त्वत्)** आपसे **(वि, यन्ति)** प्राप्त होती हैं। हे **(अग्ने)** अग्नि के सदृश तेजस्वी! उससे **(त्वम्)** आप **(अद्रोघेण)** वैररहित **(वचसा)** वचन से **(नः)** हम लोगों के लिये **(सत्यम्)** उत्तम व्यवहारों में व्यय होने योग्य **(सहस्रिणम्)** असंख्य वस्तुओं से पूरित **(रयिम्)** धन को **(वि, देहि)** दीजिये॥६॥

भावार्थः-सकल शिष्य, अध्यापक, राजपुरुष और प्रजाजनों को चाहिये कि वैर आदि दोषों को त्याग परस्पर स्नेह उत्पन्न करके मेल कर असंख्य धन और विज्ञान परस्पर बढ़ावें॥६॥

अथ विद्वद्वदितर आचरन्त्वित्याह॥

अब विद्वानों के तुल्य अन्य लोग आचरण करें, इस विषय को अगले मन्त्र में कहा है॥

तुभ्यं॑ दक्ष कविक्रतो॒ यानी॒मा देव॒ मर्ता॑सो अध्व॒रे अक॑र्म।
त्वं विश्व॑स्य सु॒रथ॑स्य बोधि॒ सर्वं॒ तद॑ग्ने अमृत स्वदे॒ह॥७॥ १४॥

तुभ्य॑म्। दक्ष॥ क॒विक्र॒तो॒ इति॑ कविऽक्रतो। यानि॑। इ॒मा। देव॑। मर्ता॑सः। अ॒ध्व॒रे। अक॑र्म। त्वम्। विश्व॑स्य। सु॒ऽरथ॑स्य। बो॒धि॒। सर्व॑म्। तत्। अ॒ग्ने॒। अ॒मृ॒त॒। स्व॒द॒। इ॒ह॥७॥

पदार्थः–(**तुभ्यम्**) (**दक्ष**) अतिचतुर (**कविक्रतो**) कवीनां क्रतुरिव क्रतुः प्रज्ञा यस्य (**यानि**) (**इमा**) (**देव**) दिव्यगुणकर्मस्वभावप्रद (**मर्त्तासः**) मनुष्याः (**अध्वरे**) अहिंसादिलक्षणे यज्ञे (**अकर्म**) कुर्याम (**त्वम्**) (**विश्वस्य**) समग्रस्य (**सुरथस्य**) शोभनानि रथादीन्यङ्गानि यस्मिँस्तस्य विद्याबोधकव्यवहारस्य (**बोधि**) बुध्यस्व (**सर्वम्**) (**तत्**) (**अग्ने**) विद्वन् (**अमृत**) स्वस्वरूपेण नाशरहित (**स्वद**) आस्वादय (**इह**) अस्मिन् संसारे॥७॥

अन्वयः–हे दक्ष कविक्रतो देवाऽमृताऽग्ने विद्वन्! मर्त्तासो वयमध्वरे तुभ्यं यानीमा धर्म्याणि कर्माणीहाऽकर्म तत्सर्वं त्वं विश्वस्य सुरथस्य मध्ये बोधि सुसंस्कृतान्यन्नानि स्वद॥७॥

भावार्थः–सर्वे मनुष्या यथा विद्वांसो धर्मयुक्तानि कर्माणि कुर्युस्तथैव कुर्वन्तु सर्वे मिलित्वेह विद्यासुखोन्नतिं सम्पादयेयुरिति॥७॥

अत्राऽग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति चतुर्दशं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः–हे (**दक्ष**) अत्यन्त चतुर (**कविक्रतो**) पण्डितों के तुल्य बुद्धिमान् (**देव**) श्रेष्ठ गुण, कर्म, स्वभावों के देनेवाले (**अमृत**) अपने स्वरूप से नाशरहित (**अग्ने**) विद्वान् पुरुष! (**मर्त्तासः**) हम मनुष्य लोग (**अध्वरे**) अहिंसा आदि रूप धर्म में (**तुभ्यम्**) आपके लिये (**यानि**) जो (**इमा**) ये धर्मसम्बन्धी कर्म उनको (**इह**) इस संसार में (**अकर्म**) करें (**तत्**) उस (**सर्वम्**) सम्पूर्ण कर्म को (**त्वम्**) आप (**विश्वस्य**) सम्पूर्ण (**सुरथस्य**) उत्तम रथ आदि अङ्गों से युक्त विद्याप्रकाशकारक व्यवहार के बीच (**बोधि**) जानिये और उत्तम प्रकार पाक से सिद्ध किये हुए अन्नों को (**स्वद**) स्वादपूर्वक भोग करें॥७॥

भावार्थः–सम्पूर्ण मनुष्यों को चाहिये कि जैसे विद्वान् लोग धर्म योग्य कर्म करें, वैसे वे भी करें और सम्पूर्ण जन एक सम्मति करके इस संसार में विद्या और सुख की उन्नति करें॥७॥

इस सूक्त में अग्नि और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है यह समझनी चाहिये॥

यह चौदहवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य पञ्चदशस्य सूक्तस्य उत्कीलः कात्य ऋषिः। अग्निर्देवता। १, ४ त्रिष्टुप्। ५ विराट् त्रिष्टुप्। ६ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ पङ्क्तिः। ३, ७ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्विद्वद्भिः किं कार्य्यमित्याह॥

अब तृतीय मण्डल में सात ऋचावाले पन्द्रहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वानों को क्या करना चाहिये, इस विषय को कहा है॥

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ॥ १॥

वि। पाजसा। पृथुना। शोशुचानः। बाधस्व। द्विषः। रक्षसः। अमीवाः। सुऽशर्मणः। बृहतः। शर्मणि। स्याम्। अग्नेः। अहम्। सुऽहवस्य। प्रऽनीतौ॥ १॥

पदार्थः-(**वि**) (**पाजसा**) बलेन (**पृथुना**) विस्तीर्णेन (**शोशुचानः**) भृशं पवित्रः सन् (**बाधस्व**) निवारय (**द्विषः**) वैरिणः (**रक्षसः**) दुष्टस्वभावाः (**अमीवाः**) रोगइवाऽन्यान् पीडयन्तः (**सुशर्मणः**) शोभनानि शर्माणि गृहाणि यस्य तस्य (**बृहतः**) विद्यादिशुभगुणैर्वृद्धस्य (**शर्मणि**) गृहे (**स्याम्**) भवेयम् (**अग्नेः**) पावकस्येव शुभगुणप्रकाशकस्य (**अहम्**) (**सुहवस्य**) सुष्ठु स्तुतस्य विदुषः (**प्रणीतौ**) प्रकृष्टायां नीतौ॥ १॥

अन्वयः-हे विद्वन्! शोशुचानस्त्वं पृथुना पाजसा येऽमीवा इव वर्त्तमानान् रक्षसो द्विषो विबाधस्व यतोऽहं सुहवस्य सुशर्मणो बृहतोऽग्नेस्तव प्रणीतौ शर्मणि स्थिरः स्याम्॥ १॥

भावार्थः-विद्वद्भिः स्वयं निर्दोषैर्भूत्वाऽन्येषां दोषान्निवार्य्य गुणान् प्रदाय विद्यासुशिक्षायुक्ताः कार्य्या यतः सर्वे पक्षपातरहिते न्याय्ये धर्मे दृढतया प्रवर्तेरन्॥ १॥

पदार्थः-हे विद्वान् पुरुष! (**शोशुचानः**) अति पवित्र हुए आप (**पृथुना**) विस्तारयुक्त (**पाजसा**) बल से जो (**अमीवाः**) रोग के सदृश औरों को पीड़ा देते हुए (**रक्षसः**) निकृष्ट स्वभाववाले (**द्विषः**) वैरी लोग हैं उनको (**वि**) (**बाधस्व**) त्यागो, जिससे (**अहम्**) मैं (**सुहवस्य**) उत्तम प्रकार प्रशंसित (**सुशर्मणः**) उत्तम गृहों से युक्त (**बृहतः**) विद्या आदि शुभ गुणों से वृद्धभाव को प्राप्त (**अग्नेः**) अग्नि के सदृश उत्तम गुणों के प्रकाशकर्त्ता आपकी (**प्रणीतौ**) श्रेष्ठ नीतियुक्त (**शर्मणि**) गृह में (**स्याम्**) स्थिर होऊं॥ १॥

भावार्थः-विद्वान् लोगों को चाहिये कि स्वयं दोषरहित हो औरों के दोष छुड़ा और गुण देकर विद्या तथा उत्तम शिक्षा से युक्त करें जिससे कि सकल जन पक्षपातशून्य न्याययुक्त धर्म में दृढ़भाव से प्रवृत्त होवें॥ १॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

त्वं नो॑ अ॒स्या उ॒षसो॒ व्यु॑ष्टौ॒ त्वं सू॒र उदि॑ते बोधि गो॒पाः।
जन्मे॑व॒ नित्यं॒ तन॑यं जुषस्व॒ स्तोमं॑ मे अग्ने त॒न्वा॑ सुजात॥ २॥

त्वम्। नः। अ॒स्याः। उ॒षसः॑। विऽउ॑ष्टौ। त्वम्। सूरे॑। उत्ऽइ॑ते। बो॒धि॒। गो॒पाः। जन्म॑ऽइव। नित्य॑म्। तन॑यम्। जु॒ष॒स्व॒। स्तोम॑म्। मे॒। अ॒ग्ने॒। त॒न्वा॑। सु॒ऽजा॒त॒॥ २॥

पदार्थः–(**त्वम्**) (**नः**) अस्मान् (**अस्याः**) (**उषसः**) प्रभातवेलायाः (**व्युष्टौ**) विशेषेण दाहे (**त्वम्**) (**सूरे**) सूर्य्ये (**उदिते**) प्राप्तोदये (**बोधि**) बुध्यस्व (**गोपाः**) रक्षकः सन् (**जन्मेव**) यथा प्रादुर्भावि कर्म प्रकटयति तथा (**नित्यम्**) (**तनयम्**) पुत्रम् (**जुषस्व**) सेवस्व प्रीणीहि वा (**स्तोमम्**) विद्याप्रशंसाम् (**मे**) मम (**अग्ने**) पावक इव (**तन्वा**) शरीरेण (**सुजात**) सुष्ठु प्रसिद्ध॥ २॥

अन्वयः–हे सुजाताऽग्ने गोपाः विद्वँस्त्वमस्या उषसो व्युष्टौ नो बोधि। त्वं सूर उदितेऽस्मान् बोधि नित्यं तनयं जन्मेव **[मे]** तन्वा स्तोमं जुषस्व॥ २॥

भावार्थः–अत्रोपमालङ्कारः। यथा गर्भाशयस्थिता गर्भा न विज्ञायन्ते तथैव सुप्ता अविद्यायां स्थिताश्च विज्ञानरहिता भवन्ति यथा जन्मानन्तरं सशरीरो जीवः प्रसिद्धिं प्राप्नोति तथैव निद्रां विहाय प्रातरुत्थिता इवाविद्यां हित्वा विद्यायां जागृता भूत्वा प्रशंसां प्राप्नुवन्ति॥ २॥

पदार्थः–हे (**सुजात**) उत्तम प्रकार प्रसिद्ध (**अग्ने**) अग्नि के सदृश तेजस्वी (**गोपाः**) रक्षाकारक विद्वान् पुरुष! (**त्वम्**) आप (**अस्याः**) इस (**उषसः**) प्रभात समय के (**व्युष्टौ**) अतिप्रकाश होने पर (**नः**) हम लोगों को (**बोधि**) जगाइये (**त्वम्**) आप (**सूरे**) सूर्य्य के (**उदिते**) उदय को प्राप्त होने पर हमको जगाइये (**नित्यम्**) अतिकाल प्राणधारी (**तनयम्**) पुत्र को (**जन्मेव**) जैसे प्रारब्ध कर्म प्रकट करता है, वैसे (**मे**) मेरे (**तन्वा**) शरीर से (**स्तोमम्**) विद्या सम्बन्धिनी प्रशंसा को (**जुषस्व**) आदर कीजिये वा ग्रहण कीजिये॥ २॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जैसे गर्भाशय में वर्त्तमान पुरुष गर्भों के स्वरूप को नहीं जानते हैं, वैसे ही निद्रावस्थापन्न और अविद्या में लिप्त पुरुष विज्ञान से रहित होते हैं और जैसे जन्मधारण होने के अनन्तर शरीरसहित जीवात्मा प्रकट होता है, वैसे ही निद्रा को त्याग के प्रातःकाल में जागृत पुरुषों के सदृश अविद्या को त्याग के विद्या में कुशल जन प्रशंसनीय होते हैं॥ २॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

त्वं नृ॒चक्षा॑ वृष॒भानु॑ पू॒र्वीः कृ॒ष्णास्व॑ग्ने अरु॒षो वि भा॑हि।
वसो॒ नेषि॑ च॒ पर्ष॒ि चात्यंह॑ः कृ॒धी नो॑ रा॒य उ॒शिजो॑ यविष्ठ॥ ३॥

त्वम्। नृ॒ऽचक्षा॑:। वृ॒ष॒भ॒। अनु॑। पूर्वी:। कृ॒ष्णासु॑। अ॒ग्ने॒। अ॒रु॒ष:। वि। भा॒हि। वसो॒ इति॑। नेषि॑। च॒। पर्षि॑। च॒। अति॑। अंह॑:। कृधि। न॒:। रा॒ये। उ॒शिज॑:। य॒वि॒ष्ठ॒॥ ३॥

पदार्थ:-(**त्वम्**) (**नृचक्षा:**) नृणां सदसत्कर्मद्रष्टा (**वृषभ**) प्राप्तशरीरात्मबल (**अनु**) (**पूर्वी:**) पूर्वेणेश्वरेण कृता: (**कृष्णासु**) निकृष्टवर्णास्वाकर्षितासु प्रजासु (**अग्ने**) पावक इव विद्याप्रकाशयुक्त (**अरुष:**) अहिंसक: सन् (**वि**) (**भाहि**) प्रकाशय (**वसो**) सद्गुणेषु कृतनिवास (**नेषि**) नयसि (**च**) (**पर्षि:**) पालयसि। अत्रोभयत्र विकरणाभाव:। (**च**) (**अति**) (**अंह:**) अनिष्टाचरणम् (**कृधि**) कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घ:। (**न:**) अस्मान् (**राये**) धनाय (**उशिज:**) कामयमानान् (**यविष्ठ**) अतिशयेन युवन्॥ ३॥

अन्वय:-हे यविष्ठ वृषभाऽग्ने! त्वं सूर्य्य इवारुषो नृचक्षा: सन् कृष्णास्वनुपूर्वी: प्रजा वि भाहि। हे वसो! यतस्त्वं राय उशिजो नेषि च मनोरथान् पर्षि चांहोऽति नेषि तस्मात्त्वं नोऽस्मानुत्तमान् कृधि॥ ३॥

भावार्थ:-हे विद्वांसो! युष्माभी रविरिव विद्यासुशिक्षाभ्यां सर्वा: प्रजा विद्याधनाढ्या: कृत्वा पापान्निवार्य्य पुण्ये प्रवर्त्तयितव्या:॥ ३॥

पदार्थ:-हे (**यविष्ठ**) अत्यन्त युवा (**वृषभ**) वीरतायुक्त (**अग्ने**) अग्नि के सदृश विद्या से प्रकाशमान (**त्वम्**) आप सूर्य्य के सदृश (**अरुष:**) रक्षक और (**नृचक्षा:**) मनुष्यों के सत्-असत् कर्म में विवेकी होकर (**कृष्णासु**) अविद्यान्धकारकयुक्त नीच प्रजाओं में (**अनु**) (**पूर्वी:**) प्रथम ईश्वर से प्रकट की गईं प्रजाओं को (**वि**) (**भाहि**) प्रकाशमान कीजिये। हे (**वसो**) उत्तम गुणधारी! जिससे आप (**राये**) धन के लिये (**उशिज:**) कामनाविशिष्ट पुरुषों के योग्य (**नेषि**) प्राप्त कराते (**च**) मनोरथों को पूर्ण (**च**) और (**पर्षि**) दु:खों से रहित तथा (**अंह:**) बुरे आचरण को (**अति**) दूर कीजिये इससे आप (**न:**) हम लोगों को श्रेष्ठ (**कृधि**) कीजिये॥ ३॥

भावार्थ:-हे विद्वान् पुरुषो! आप लोगों को चाहिये कि जैसे सूर्य्य अपने किरणों के द्वारा सब जनों का पालन करता है, वैसे विद्या और उत्तम शिक्षा से सम्पूर्ण प्रजा को विद्या धन से युक्त तथा पाप से निवृत्त करके पुण्य कर्मों में प्रीतिपूर्वक प्रवृत्त करावें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अषा॑ळ्हो अग्ने वृ॒ष॒भो दि॑दी॒हि पुरो॒ विश्वा: सौभ॑गा संजिगी॒वान्।
य॒ज्ञस्य॑ ने॒ता प्र॑थ॒मस्य॑ पा॒योर्जात॑वेदो बृह॒त: सु॑प्रणीते॥ ४॥

अषा॑ळ्हः। अ॒ग्ने॒। वृ॒ष॒भः। दि॒दी॒हि॒। पुरः॑। विश्वाः॑। सौभ॑गा। स॒म्ऽजि॒गी॒वान्। य॒ज्ञस्य॑। ने॒ता। प्र॒थ॒मस्य॑। पा॒योः। जात॑ऽवेदः। बृ॒ह॒तः। सु॒ऽप्र॒णी॒ते॒॥ ४॥

पदार्थः-(**अषाळ्हः**) असहमानः (**अग्ने**) पावक इव वर्त्तमान (**वृषभः**) बलिष्ठः (**दिदीहि**) धर्म्याणि कर्माणि प्रकाशय (**पुरः**) नगरीः (**विश्वाः**) समग्राः (**सौभगा**) सुभगानामैश्वर्याणां सम्बन्धिनीः। अत्र **सुपामि**ति विभक्तेराकारादेशः। (**सञ्जिगीवान्**) सम्यग् विजेता सन् (**यज्ञस्य**) विद्वत्सत्कारादेः (**नेता**) प्रापकः (**प्रथमस्य**) आदिमाश्रमब्रह्मचर्य्यस्य (**पायोः**) रक्षकस्य (**जातवेदः**) जातविद्यः (**बृहतः**) महतः (**सुप्रणीते**) शोभना प्रकृष्टा नीतिर्न्यायो यस्य तत्सम्बुद्धौ॥४॥

अन्वयः-हे सुप्रणीतेऽग्नेऽषाळ्हो विद्वन् वृषभस्त्वं विश्वाः सौभगा पुरो दिदीहि। हे जातवेदो विद्वन्! प्रथमस्य पायोर्बृहतो यज्ञस्य नेता सञ्जिगीवान् भव॥४॥

भावार्थः-हे राजपुरुषा! विद्याविनयाभ्यां सर्वाः प्रजा आनन्द्य ब्रह्मचर्य्याद्याश्रमानुष्ठानेन प्रजासु विद्यासुशिक्षासभ्यतादीर्घायूंषि वर्धयित्वैश्वर्य्याण्युन्नयन्तु॥४॥

पदार्थः-हे (**सुप्रणीते**) उत्कृष्ट न्यायकारी (**अग्ने**) अग्नि के सदृश तेजस्वी (**अषाळ्हः**) दूसरे से नहीं पराजय के योग्य विद्वान् (**वृषभः**) बलवान् पुरुष! आप (**विश्वा**) सम्पूर्ण (**सौभगा**) उत्तम ऐश्वर्यवाली (**पुरः**) नगरियों में (**दिदीहि**) धर्ममिश्रित कर्मों का प्रकाश कीजिये। हे (**जातवेदः**) सकलविद्यापूरित विद्वन् पुरुष! (**प्रथमस्य**) प्रथमाश्रमब्रह्मचर्य्यरूप (**पायोः**) रक्षाकारक (**बृहतः**) श्रेष्ठ (**यज्ञस्य**) अहिंसा धर्म के (**नेता**) उत्तम रीति से निर्वाहक हुए और (**सञ्जिगीवान्**) उत्तम प्रकार जयशाली होइये॥४॥

भावार्थः-हे राजपुरुषो! विद्या और विनय से सम्पूर्ण प्रजाओं को प्रसन्न तथा ब्रह्मचर्य्य आदि आश्रमों के निर्वाह से उनमें विद्या, उत्तम शिक्षा, श्रेष्ठता अतिकाल जीवन आदि बढ़ाय के ऐश्वर्य्यों का आधिक्य कीजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अच्छि॑द्रा॒ शर्म॑ जरितः पु॒रूणि॑ दे॒वाँ अच्छा॒ दीद्या॑नः सुमे॒धाः।
रथो॒ न सस्नि॑र॒भि वक्षि॒ वाज॒मग्ने॒ त्वं रोद॑सी नः सु॒मेके॑॥५॥

अच्छि॑द्रा। शर्म॑। ज॒रि॒त॒रिति॑। पु॒रूणि॑। दे॒वान्। अच्छ॑। दीद्या॑नः। सु॒ऽमे॒धाः। रथः॑। न। सस्निः॑। अ॒भि। व॒क्षि॒। वाज॑म्। अग्ने॑। त्वम्। रोद॑सी॒ इति॑। नः॒। सु॒मेके॒ इति॑ सु॒ऽमेके॑॥५॥

पदार्थः-(**अच्छिद्रा**) अच्छिन्नानि (**शर्म**) शर्माणि गृहाणि (**जरितः**) सत्यगुणस्तावक (**पुरूणि**) बहूनि (**देवान्**) विदुषो दिव्यगुणान् वा (**अच्छ**) सुष्ठु। अत्र **निपातस्य चे**ति दीर्घः। (**दीद्यानः**) प्रकाशमानः प्रकाशयन् वा (**सुमेधाः**) उत्तमप्रज्ञः सन् (**रथः**) उत्तमयानम् (**न**) इव (**सस्निः**) शुद्धः (**अभि**) आभिमुख्ये (**वक्षि**) वदसि (**वाजम्**) विज्ञानम् (**अग्ने**) पावकवद्वर्त्तमान (**त्वम्**) (**रोदसी**) द्यावापृथिव्यौ (**नः**) अस्माकम् (**सुमेके**) सुष्ठु प्रक्षिप्ते॥५॥

अन्वयः-हे अग्ने! त्वं यथाऽग्निः सुमेके रोदसी प्रकाशयति तथैव नो दीद्यानः सुमेधाः सस्नी रथो न नोऽस्मभ्यं वाजमभि वक्षि। हे जरितर्विद्वँस्त्वमिच्छद्रा पुरूणि शर्म देवाँश्च कामयमानः सन्नच्छाभि वक्षि॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा शुद्धेन दृढेन रथेनाऽभीष्टं स्थानं सद्यो गच्छन्ति तथैव येऽनलसाः पुरुषार्थिनः शोभनानि स्थानानि कामयमानाः विद्वत्सङ्गेन दिव्यान् गुणान् प्राप्याऽन्यान् प्रत्युपदिशन्ति ते सम्यक् सिद्धसुखा जायन्ते॥५॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश प्रतापी! **(त्वम्)** आप जैसे अग्नि **(समेके)** अच्छे प्रकार फैलाये गये **(रोदसी)** अन्तरिक्ष-पृथिवी को प्रकाशित करता है, उसी प्रकार **(नः)** हम लोगों के **(दीद्यानः)** प्रकाशयुक्त वा प्रकाशक **(सुमेधाः)** श्रेष्ठ बुद्धिमान् और **(सस्निः)** सुडौल **(रथः)** उत्तम रथ के **(नः)** सदृश हम लोगों के लिये **(अभि)** सम्मुख **(वाजम्)** विज्ञान को **(वक्षि)** कहिये। हे **(जरितः)** सत्य गुणों की स्तुतिकर्त्ता विद्वान् पुरुष! आप **(अच्छिद्रा)** अति पुष्ट **(पुरूणि)** बहुत **(शर्म)** गृह और **(देवान्)** विद्वान् वा उत्तम गुणों से प्रसन्नतापूर्वक **(अच्छ)** उत्तम प्रकार संयुक्त कीजिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सुडौल बने हुए और दृढ़ रथ से अभिवाञ्छित स्थानों को शीघ्र पहुँचते हैं, वैसे ही जो पुरुष आलस्य त्याग कर पुरुषार्थी हैं, वे उत्तम स्थानों की कामना करते हुए विद्वानों के सङ्ग द्वारा श्रेष्ठ गुणों से संयुक्त होकर अन्य जनों के लिये भी उपदेश देते हैं, वे पुरुष उत्तम प्रकार सुख भोगते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात्॥६॥

प्र। पीपय। वृषभ। जिन्व। वाजान्। अग्ने। त्वम्। रोदसी इति। नः। सुदोघे इति सुऽदोघे। देवेभिः। देव। सुऽरुचा। रुचानः। मा। नः। मर्तस्य। दुःऽमतिः। परि। स्थात्॥६॥

पदार्थः-**(प्र)** **(पीपय)** वर्द्धय **(वृषभ)** शरीरात्मबलयुक्त **(जिन्व)** प्रीणीहि **(वाजान्)** विज्ञानवतः **(अग्ने)** पावकवद्वर्त्तमान **(त्वम्)** **(रोदसी)** द्यावापृथिव्यौ **(नः)** अस्मभ्यम् **(सुदोघे)** कामानां सुष्ठुप्रपूरिके। अत्र वर्णव्यत्ययेन हस्य घः। **(देवेभिः)** विद्वद्भिः सह **(देव)** दिव्यगुणप्रद **(सुरुचा)** यया सुष्ठु रोचते तया **(रुचानः)** प्रीतिमान् **(मा)** **(नः)** अस्मान् **(मर्त्तस्य)** मनुष्यस्य **(दुर्मतिः)** दुष्टा चासौ मतिश्च **(परि)** सर्वतः **(स्थात्)** तिष्ठेत्॥६॥

अन्वयः-हे वृषभाऽग्ने! त्वं सुदोघे रोदसी सूर्य्य इव वाजान्नोऽस्मभ्यं पीपय। हे देव! त्वं देवेभिः सुरुचा सह रुचानः सन्नोऽस्मान् प्र जिन्व यतो नो मर्त्तस्य दुर्मतिर्मा परि ष्ठात्॥६॥

भावार्थः-यस्मिन्देशे विद्वांसः प्रीत्या सर्वान् वर्धयितुमिच्छन्ति दुष्टां प्रज्ञां विनाशयन्ति तत्र सर्वे प्रबुद्धविज्ञानधना जायन्ते॥६॥

पदार्थः-हे **(वृषभ)** शरीर और आत्मा के बल से युक्त **(अग्ने)** अग्नि के सदृश तेजस्वी! **(त्वम्)** आप जैसे **(सुदोघे)** कामनाओं की उत्तम प्रकार पूर्तिकारक **(रोदसी)** अन्तरिक्ष-पृथिवी को सूर्य्य प्रकाशित और सुखयुक्त करता है, वैसे **(वाजान्)** विज्ञानयुक्त **(नः)** हम लोगों को **(पीपय)** सम्पत्तियुक्त कीजिये। हे **(देव)** उत्तम गुण प्रदाता! आप **(देवेभिः)** विद्वानों के साथ **(सुरुचा)** उत्तम तेज से प्रीतिसहित **(रुचानः)** प्रीतियुक्त हुए **(नः)** हम लोगों को **(प्र)** **(जिन्व)** आनन्दित कीजिये जिससे कि हम लोगों के लिये **(मर्त्तस्य)** मनुष्य सम्बन्धिनी **(दुर्मतिः)** दुष्ट बुद्धि **(मा)** नहीं **(परि)** सब ओर से **(स्थात्)** स्थित हो॥६॥

भावार्थः-जिस देश में विद्वान् लोग प्रीति से सब लोगों को बढ़ाने की इच्छा करते हैं और दुष्ट बुद्धि का नाश करते हैं, वहाँ सब लोग वृद्धि को प्राप्त विज्ञानरूप धनवाले होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळा॑मग्ने पुरू॒दंस॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध।

स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्वस्मे॥७॥१५॥

इळा॑म्। अ॒ग्ने॒। पु॒रु॒ऽदंस॑म्। स॒निम्। गोः। श॒श्व॒त्ऽत॒मम्। हव॑मानाय। सा॒ध॒। स्यात्। नः॒। सू॒नुः। तन॑यः। वि॒जाऽवा॑। अग्ने॑। सा। ते॒। सु॒ऽम॒तिः। भू॒तु॒। अ॒स्मे इति॑॥७॥

पदार्थः-**(इळाम्)** सुशिक्षितां वाचम् **(अग्ने)** पावक इव विद्याप्रकाशक **(पुरुदंसम्)** पुरूणि बहूनि दंसांसि धर्म्याणि कर्माणि यस्य तम् **(सनिम्)** न्यायेन सत्याऽसत्यविभाजकम् **(गोः)** पृथिव्या मध्ये **(शश्वत्तमम्)** अनादिभूतम् **(हवमानाय)** प्रशंसमानाय **(साध)** साध्नुहि **(स्यात्)** भवेत् **(नः)** अस्माकम् **(सूनुः)** सन्तानः **(तनयः)** धार्मिकः पुत्रः **(विजावा)** विजयशीलः। अत्र जी धातोरौणादिको वन् प्रत्ययो बाहुलकादाकारादेशश्च। **(अग्ने)** विद्वन् **(सा)** **(ते)** तव **(सुमतिः)** शोभना प्रज्ञा **(भूतु)** भवतु **(अस्मे)** अस्मासु॥७॥

अन्वयः-हे अग्ने! हवमानाय शश्वत्तमं पुरुदंसमिळां गोः सनिमैश्वर्यं साध येन नः सूनुः तनयः विजावा स्यात्। हे अग्ने! या ते सुमतिरस्ति सास्मे भूतु॥७॥

भावार्थः-विद्वद्भिर्जिज्ञासुभ्यो विद्यां सुशिक्षां धर्मानुष्ठानमैश्वर्यञ्च साधनीयं यथा सर्वेषां कुमारा कुमार्यश्चोत्तमाः स्युस्तथा प्रयत्नोऽनुविधेयः सर्वतो विद्यां गृहीत्वा सर्वेभ्यो देया इति॥७॥

अत्र विद्वदध्यापकाऽध्येत्रग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चदशं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश विद्याप्रकाशकारक विद्वन्! आप **(हवमानाय)** प्रशंसाकर्त्ता के लिये **(शश्वत्तमम्)** अनादि से उत्पन्न **(पुरुदंसम्)** अत्यन्त धर्मसहित कर्मयुक्त **(इळाम्)** उत्तम शिक्षायुक्त वाणी को **(गोः)** पृथिवी के मध्य में **(सनिम्)** न्याय से सत्य और असत्य के विभागकारक ऐश्वर्य को **(साध)** सिद्ध करिये, जिससे **(नः)** हम लोगों का **(सूनुः)** सन्तान **(तनयः)** धार्मिक पुत्र **(विजावा)** विजयशील **(स्यात्)** हो। हे **(अग्ने)** विद्वन्! जो **(ते)** आपकी **(सुमतिः)** उत्तम बुद्धि है **(सा)** वह **(अस्मे)** हम लोगों के लिये **(भूतु)** होवे॥७॥

भावार्थः-विद्वानों को चाहिये कि जिज्ञासु जनों के लिये विद्या, उत्तम शिक्षा, धर्मानुष्ठान तथा ऐश्वर्यवृद्धि सिद्ध करें और जैसे कि सम्पूर्ण मनुष्यों के लड़के-लड़कियाँ उत्तम कर्मयुक्त तथा सबके सन्तान विद्याबलयुक्त होवें, ऐसे प्रयत्न करें अर्थात् सब स्थान से विद्या ग्रहण करके सबको देवें॥७॥

इस सूक्त में विद्वान्, अध्यापक, अध्येता और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह पन्द्रहवां सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

अथ षड्चस्य षोडशस्य सूक्तस्य उत्कील: कात्य ऋषि:। अग्निर्देवता। १, ५ भुरिगनुष्टुप् छन्द:। गान्धार: स्वर:। २, ६ निचृत् पङ्क्तिश्छन्द:। पञ्चम: स्वर:। ३ निचृदबृहती। ४ भुरिग्बृहती छन्द:। मध्यम: स्वर:॥

अथाऽग्निगुणानाह॥

अब छ: ऋचावाले सोलहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में अग्नि के गुणों को कहते हैं॥

अ॒यम॒ग्नि: सु॒वीर्य॒स्येशे॑ म॒ह: सौभ॑गस्य।
रा॒य ईशे॒ स्वप॒त्यस्य॒ गोम॑त॒ ईशे॑ वृ॒त्रह॑थाना॒म्॥ १॥

अ॒यम्। अ॒ग्नि:। सु॒ऽवीर्य॑स्य। ईशे॑। म॒ह:। सौभ॑गस्य। रा॒य:। ईशे॒। सु॒ऽअ॒प॒त्यस्य॑। गोऽम॑त:। ईशे॑। वृ॒त्र॒ऽह॒था॒ना॒म्॥ १॥

पदार्थ:-(**अयम्**) (**अग्नि:**) अग्निरिव वर्त्तमानो राजा (**सुवीर्य्यस्य**) सुष्ठु बलस्य (**ईशे**) ईष्टे (**मह:**) महत: (**सौभगस्य**) श्रेष्ठैश्वर्य्यस्य (**राय:**) (**ईशे**) (**स्वपत्यस्य**) शोभनान्यपत्यानि यस्य तस्य (**गोमत:**) शोभना वाग् पृथिव्यादयो वा विद्यन्ते यस्य तस्य (**ईशे**) ईष्टे। अत्र सर्वत्रैकपक्षे **लोपस्त आत्मने[पदे]ष्वि**ति तलोपोऽन्यत्रोत्तमपुरुषस्यैकवचनम्। (**वृत्रहथानाम्**) वृत्रा मेघा इव वर्त्तमाना: शत्रवो हथा हता यैस्तेषाम्॥ १॥

अन्वय:-यथा वृत्रहथानां मध्येऽयमग्निर्मह: सुवीर्य्यस्येशे सौभगस्य राय ईशे गोमत: स्वपत्यस्येशे तथाऽहमेतेषामेनस ईशे॥ १॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। मनुष्या यथा सुसाधितेनाग्निनोत्तमं बलं महदैश्वर्य्यमुत्तमान्यपत्यानि च लब्ध्वा शत्रून् विनाशयन्ति तथैव मनुष्या: सुपुरुषार्थेनोत्तमं सैन्यमतुलमैश्वर्य्यं शरीरात्मबलयुक्तान् सन्तानान् प्राप्य शत्रुवद्दोषान् घ्नन्तु॥ १॥

पदार्थ:-जैसे (**वृत्रहथानाम्**) मेघ के सदृश वर्त्तमान शत्रुओं के हननकारियों के मध्य में (**अयम्**) यह (**अग्नि:**) अग्नि के सदृश प्रकाशमान राजा (**मह:**) श्रेष्ठ (**सुवीर्य्यस्य**) उत्तम बल का (**ईशे**) स्वामी तथा (**सौभगस्य**) श्रेष्ठ ऐश्वर्यभाव और (**राय:**) धन का (**ईशे**) स्वामी है (**गोमत:**) उत्तम वाणी तथा पृथिवी आदि युक्त पुरुष का स्वामी है (**स्वपत्यस्य**) उत्तम सन्तान युक्त पुरुष का स्वामी है, वैसे ही मैं इन पुरुषों के मध्य में दोष का (**ईशे**) स्वामी हूँ॥ १॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य लोग जैसे उत्तम प्रकार होम तथा यन्त्र आदि से सिद्ध किये हुए अग्नि से उत्तम बल, श्रेष्ठ ऐश्वर्य और उत्तम सन्तानों को प्राप्त होके शत्रु लोगों का नाश करते, वैसे ही मनुष्य लोगों को चाहिये कि उत्तम पुरुषार्थ से उत्तम सेना, अतुल ऐश्वर्य, शरीर आत्मा बल से युक्त सन्तानों को प्राप्त होकर शत्रुओं के समान क्रोध आदि दोषों को त्यागें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒मं नरो॒ मरु॑तः सश्चता॒ वृधं॒ यस्मि॒न् राय॒: शेव॑धासः।
अ॒भि ये सन्ति॒ पृत॑नासु दू॒ढ्यो॑ वि॒श्वाहा॒ शत्रु॑मादु॒भुः॥ २॥

इ॒मम्। न॒रः॒। म॒रु॒तः॒। स॒श्च॒त॒। वृध॑म्। यस्मि॑न्। राय॑ः। शेऽव॑धासः। अ॒भि। ये। सन्ति॑। पृत॑नासु। दु॒ःऽध्य॑ः। वि॒श्वाहा॑। शत्रु॑म्। आ॒ऽद॒भुः॥ २॥

पदार्थः-(**इमम्**) (**नरः**) विद्याविनयनेतारः (**मरुतः**) वायव इव मनुष्याः (**सश्चत**) प्राप्नुत। अत्र **संहितायामि**ति दीर्घः। (**वृधम्**) वर्द्धकं व्यवहारम् (**यस्मिन्**) यस्मिन् व्यवहारे (**रायः**) श्रियः (**शेवृधासः**) शेवृन् सुखानि दधति येभ्यस्ते (**अभि**) (**ये**) (**सन्ति**) (**पृतनासु**) मनुष्यसेनासु (**दूढ्यः**) दुःखेन ध्यातुं योग्यान् (**विश्वाहा**) सर्वाण्यहानि (**शत्रुम्**) (**आदभुः**) समन्ताद्धिंसन्तु॥ २॥

अन्वयः-हे मरुतो नरो! यूयं यस्मिञ्छेवृधासो रायः सन्ति तमिमं वृधं विश्वाहा सश्चत। ये पृतनासु दूढ्यः सन्ति शत्रुमादभुस्तानभि सश्चत॥ २॥

भावार्थः-राजपुरुषैर्यथा धनराजसत्ताप्रतिष्ठा वर्धेरन् यथा च सेनासूत्तमा वीरा जायेरन् तथा सत्यव्यवहारः सदाऽनुष्ठेयः॥ २॥

पदार्थः-हे (**मरुतः**) वायु के सदृश बलयुक्त मनुष्यो! (**नरः**) विद्या और नम्रता के नायक आप लोग (**यस्मिन्**) जिस व्यवहार में (**शेवृधासः**) सुखवृद्धिकारक (**रायः**) धन (**सन्ति**) होते हैं, उस (**इमम्**) इस (**वृधम्**) पुत्र आदि के वृद्धिकारक व्यवहार को (**विश्वाहा**) सर्वदा (**सश्चत**) प्राप्त करो (**ये**) जो (**पृतनासु**) मनुष्यों की सेनाओं में (**दूढ्यः**) कठिनता से पराजित होनेयोग्य पुरुष हैं ऐसे और (**शत्रुम्**) शत्रु को (**आदभुः**) सब ओर से नाश करें, उन पुरुषों को (**अभि**) सब प्रकार प्राप्त होओ॥ २॥

भावार्थः-राजपुरुषों को चाहिये कि जिस प्रकार धन, राजस्थिति और प्रतिष्ठा बढ़े और जिस प्रकार सेनाओं में उत्तम वीर पुरुष होवें, वैसा सत्य व्यवहार सदा करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स त्वं नो॑ रा॒यः शि॑शीहि॒ मीढ्वो॑ अग्ने सु॒वीर्य॑स्य।
तुवि॑द्युम्न॒ वर्षि॑ष्ठस्य प्र॒जाव॑तोऽनमी॒वस्य॑ शु॒ष्मिण॑ः॥ ३॥

सः। त्वम्। नः। रा॒यः। शि॒शी॒हि॒। मीढ्व॑ः। अ॒ग्ने॒। सु॒ऽवीर्य॑स्य। तुवि॑ऽद्युम्न। वर्षि॑ष्ठस्य। प्र॒जाऽव॑तः। अ॒न॒मी॒वस्य॑। शु॒ष्मिण॑ः॥ ३॥

पदार्थः-(**सः**) (**त्वम्**) (**नः**) अस्मभ्यम् (**रायः**) धनानि (**शिशीहि**) तीव्रान् सम्पादय (**मीढ्वः**) सुखानां सेचकः (**अग्ने**) पावकवद्वर्त्तमान (**सुवीर्यस्य**) शोभनेषु वीरेषु भवस्य (**तुविद्युम्न**) तुविर्बहुविधं धनं यशो वा यस्य (**वर्षिष्ठस्य**) अतिशयेन वृद्धस्य (**प्रजावतः**) बह्व्यः प्रजा विद्यन्ते यस्य तस्य (**अनमीवस्य**) नीरोगस्य (**शुष्मिणः**) बहुबलयुक्तस्य॥३॥

अन्वयः-हे मीढ्वस्तुविद्युम्नाग्ने! स त्वं नः सुवीर्य्यस्य वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणो रायः शिशीहि॥३॥

भावार्थः-ये मनुष्या धनेन सैन्यं श्रेष्ठतां प्रजामारोग्यं बलं च वर्धयन्ति ते सर्वदाऽग्रश्रियो भवन्ति॥३॥

पदार्थः-हे (**मीढ्वः**) सुखों के दाता (**तुविद्युम्न**) बहुत प्रकार के धन वा यश से युक्त (**अग्ने**) अग्नि के समान तेजोवान्! (**सः**) वह (**त्वम्**) आप (**नः**) हम लोगों के लिये (**सुवीर्य्यस्य**) उत्तम वीरों से उत्पन्न (**वर्षिष्ठस्य**) अति वृद्ध और (**प्रजावतः**) अत्यन्त प्रजायुक्त (**अनमीवस्य**) रोगरहित (**शुष्मिणः**) अत्यन्त बलसहित पुरुष के (**रायः**) धनों को (**शिशीहि**) अति बढ़ाइये॥३॥

भावार्थः-जो मनुष्य धन से सेना, श्रेष्ठता, प्रजा, आरोग्य और बल को बढ़ाते हैं, वे लोग सर्वदा बहुत धनवाले होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः।
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम्॥४॥

चक्रिः। यः। विश्वा। भुवना। अभि। ससहिः। चक्रिः। देवेषु। आ। दुवः। आ। देवेषु। यतते। आ। सुऽवीर्ये। आ। शंसे। उत। नृणाम्॥४॥

पदार्थः-(**चक्रिः**) यः करोति सः (**यः**) (**विश्वा**) सर्वाणि (**भुवना**) भवन्ति येषु तानि भुवनानि (**अभि**) (**सासहिः**) अतिशयेन सोढा (**चक्रिः**) कर्त्तुं शीलः (**देवेषु**) दिव्यगुणेषु (**आ**) (**दुवः**) परिचरणं सेवनम् (**आ**) (**देवेषु**) प्रशंसकेषु (**यतते**) साध्नोति (**आ**) (**सुवीर्य्ये**) शोभने बले (**आ**) (**शंसे**) स्तुतौ (**उत**) (**नृणाम्**) वीरजनानाम्॥४॥

अन्वयः-हे मनुष्या! यो विश्वा भुवनाऽभिचक्रिर्देवेषु सासहिर्दुवरा चक्रिर्देवेष्वा यतत उतापि नृणामाशंसे सुवीर्य्य आ यतते तं सदा सेवध्वम्॥४॥

भावार्थः-हे मनुष्या! येन सर्वे लोका निर्मिता मनुष्यादयः प्राणिनस्तेषां निर्वाहायान्नादयः पदार्था रचिता यो विद्वद्भिर्वेद्यस्तस्यैव परमात्मनः सेवनं सततं कर्त्तव्यम्॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(विश्वा)** सम्पूर्ण **(भुवना)** लोकों का **(अभि, चक्रिः)** अभिमुख कर्त्ता **(देवेषु)** उत्तम गुणों में **(सासहिः)** अति सहनशील और **(दुवः)** सेवन को **(आ, चक्रिः)** अच्छे प्रकार करनेवाला और जो **(देवेषु)** स्तुतिकारकों में **(आ)** **(यतते)** अच्छा यत्न करता है **(उत)** और भी **(नृणाम्)** वीर पुरुषों की **(आ)** **(शंसे)** स्तुति में **(सुवीर्य्ये)** श्रेष्ठ बल में **(आ)** सब प्रकार प्रयत्न करता है, उसकी सदा **(सेवध्वम्)** सेवा करो॥४॥

भावार्थः-**[**हे मनुष्यो!**]** जिसने सम्पूर्ण लोक तथा मनुष्य आदि प्राणी रचे और उन प्राणियों के जीवनार्थ अन्न आदि पदार्थ रचे और जो विद्वानों से जानने योग्य उस ही परमात्मा का निरन्तर सेवन करना चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मा नो॑ अ॒ग्नेऽम॑तये॒ मावी॑रतायै रीरधः।

मागोता॑यै सहसस्पुत्र॒ मा नि॒देऽप॒ द्वेषा॑ꣳस्या कृ॑धि॥५॥

मा। नः। अ॒ग्ने॒। अम॑तये। मा। अ॒वी॑रतायै॒ रीर॒धः। मा। अ॒गोता॑यै। स॒ह॒सः॒। पु॒त्र॒। मा। नि॒दे। अप॑। द्वेषा॑ꣳसि। आ। कृ॒धि॒॥५॥

पदार्थः-**(मा)** निषेधे **(नः)** अस्माकम् **(अग्ने)** विद्वन् **(अमतये)** विरुद्धप्रज्ञायै **(मा)** **(अवीरतायै)** कातरतायै **(रीरधः)** रध्याः हिंस्याः **(मा)** **(अगोतायै)** इन्द्रियविकलतायै **(सहसः)** बलस्य **(पुत्र)** पालक **(मा)** **(निदे)** निन्दकाय **(अप)** दूरीकरणे **(द्वेषांसि)** **(आ)** **(कृधि)** समन्तात् कुर्याः॥५॥

अन्वयः-हे सहसस्पुत्राऽग्ने! त्वं नोऽमतये मा रीरधोऽवीरतायै मा रीरधोऽगोतायै मा रीरधो निदे द्वेषांसि माऽपाकृधि॥५॥

भावार्थः-जिज्ञासुभिर्विदुषः प्राप्य प्रज्ञा वीरता जितेन्द्रियता विद्या सुशिक्षा धर्मो ब्रह्मज्ञानं च याचनीयम्। निन्दादिदोषान् निन्दकसङ्गं च विहाय सभ्यता संग्राह्या॥५॥

पदार्थः-हे **(सहसः)** बल के **(पुत्र)** पालक **(अग्ने)** विद्वन् पुरुष! आप **(नः)** हम लोगों की **(अमतये)** विपरीत बुद्धि के लिये **(मा)** नहीं **(रीरधः)** वश में करो तथा **(अवीरतायै)** कायरता के लिये **(मा)** नहीं वशीभूत करो **(अगोतायै)** इन्द्रिय-विकारता के लिये **(मा)** नहीं वशीभूत करो **(निदे)** निन्दक पुरुष के लिये **(द्वेषांसि)** द्वेष भावों को **(मा)** नहीं **(अप)** अलग करने में **(आ)** **(कृधि)** सब प्रकार कीजिये॥५॥

भावार्थः-ज्ञान सुख की इच्छा करनेवाले पुरुषों को चाहिये कि विद्वानों के समीप प्राप्त होकर बुद्धि, वीरता, जितेन्द्रियता, विद्या, उत्तम शिक्षा, धर्म और ब्रह्मज्ञान की प्रार्थना करें तथा निन्दा आदि दोष

और निन्दक पुरुषों का सङ्ग त्याग के सभ्यता ग्रहण करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे।

सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता॥६॥१६॥

शग्धि। वाजस्य। सुऽभग। प्रजाऽवतः। अग्ने। बृहतः। अध्वरे। सम्। राया। भूयसा। सृज। मयःऽभुना। तुविऽद्युम्न। यशस्वता॥६॥

पदार्थः-(**शग्धि**) शक्नुहि (**वाजस्य**) अन्नादेर्विज्ञानस्य वा (**सुभग**) प्राप्तोत्तमैश्वर्य्य (**प्रजावतः**) प्रशस्ताः प्रजा विद्यन्ते यस्मिंस्तस्य (**अग्ने**) विद्वन् (**बृहतः**) महतः (**अध्वरे**) अहिंसादिलक्षणे व्यवहारे (**सम्**) सम्यक् (**राया**) धनेन (**भूयसा**) बहुना (**सृज**) (**मयोभुना**) यो मयांसि सुखानि भावयति तेन (**तुविद्युम्न**) बहुधनकीर्तियुक्त (**यशस्वता**) बहुयशो विद्यते यस्मिंस्तेन॥६॥

अन्वयः-हे तुविद्युम्न सुभगाऽग्ने! त्वं प्रजावतो बृहतो वाजस्याध्वरे शग्धि तेन भूयसा मयोभुना यशस्वता राया संसृज अस्मान् संसर्जय॥६॥

भावार्थः-मनुष्यैर्विदुषां सङ्गेनेयम्प्रार्थना कार्य्या। हे विद्वांसोऽस्मान् विद्याविनयनधनसुखैः सह संयोजयतेति॥६॥

अत्राऽग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षोडशं सूक्तं षोडषो वर्गश्च समाप्तः॥

पदार्थः-हे (**तुविद्युम्न**) बहुत धन और कीर्ति से युक्त (**सुभग**) उत्तम ऐश्वर्य्यधारी (**अग्ने**) विद्वान् पुरुष! आप (**प्रजावतः**) प्रशंसा करने योग्य प्रजायुक्त (**बृहतः**) श्रेष्ठ (**वाजस्य**) अन्न आदि वा विज्ञान के (**अध्वरे**) अहिंसा आदि स्वरूप व्यवहार में (**शग्धि**) सामर्थ्य स्वरूप हो उस (**भूयसा**) बड़े (**मयोभुना**) सुखकारक (**यशस्वता**) अधिक यशसहित (**राया**) धन से हमको (**संसृज**) संयुक्त कीजिये॥६॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों के सङ्ग से यह प्रार्थना करें कि हे विद्वानो! हम लोगों को विद्या, विनय और धन सुखों से संयुक्त करो॥६॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह सोलहवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य सप्तदशस्य सूक्तस्य उत्कीलः कात्य ऋषिः। अग्निर्देवता। १, २ त्रिष्टुप्। ४ विराट् त्रिष्टुप्। ५ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निगुणानाह॥

अब पाँच ऋचावाले सत्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि के गुणों को कहते हैं॥

समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः।
शोचिष्केशो घृतनिर्णिक् पावकः सुयज्ञो अग्निर्यजथाय देवान्॥ १॥

सम्ऽइध्यमानः। प्रथमा। अनु। धर्मा। सम्। अक्तुऽभिः। अज्यते। विश्वऽवारः। शोचिःऽकेशः। घृतऽनिर्णिक्। पावकः। सुऽयज्ञः। अग्निः। यजथाय। देवान्॥ १॥

पदार्थः-(**समिध्यमानः**) सम्यक् प्रदीप्यमानः (**प्रथमा**) प्रख्यातानि (**अनु**) (**धर्म**) धर्माणि। अत्र **संहितायामि**ति दीर्घः। (**सम्, अक्तुभिः**) सम्यक् रात्रिभिः (**अज्यते**) प्रक्षिप्यते (**विश्ववारः**) यो विश्वं वृणोति (**शोचिष्केशः**) शोचींषि तेजांसि इव केशा यस्य सः (**घृतनिर्णिक्**) यो घृतेन निर्णेक्ति सः (**पावकः**) पवित्रकर्त्ता (**सुयज्ञः**) शोभना यज्ञा यस्मात् सः (**अग्निः**) पावकः (**यजथाय**) सङ्गमनाय (**देवान्**) दिव्यान् गुणान्॥१॥

अन्वयः-हे मनुष्या! यः समिध्यमानो विश्ववारः शोचिष्केशो घृतनिर्णिक् पावकः सुयज्ञोऽग्निः समक्तुभिर्यजथाय प्रथमा धर्माज्यते देवाननुगमयति तं संप्रयुङ्ग्ध्वम्॥१॥

भावार्थः-यदि पुष्कलगुणयुक्तेनाऽग्न्यादिपदार्थेन कार्य्याणि साध्नुयुस्तर्हि किं कार्य्यमसिद्धं भवेत्॥१॥

पदार्थः-हे मनुष्यो! जो (**समिध्यमानः**) उत्तम प्रकार प्रकाशमान (**विश्ववारः**) सकल जन का प्रिय (**शोचिष्केशः**) तेजरूप केशवान् (**घृतनिर्णिक्**) तेजस्वी (**पावकः**) पवित्रकर्त्ता (**सुयज्ञः**) सुन्दर यज्ञ जिससे हों, वह अग्नि (**समक्तुभिः**) उत्तम रात्रियों से (**यजथाय**) सङ्ग के लिये (**प्रथमा**) प्रसिद्ध (**धर्म**) धर्मों को (**अज्यते**) उत्तम प्रकार प्रसिद्ध करता तथा (**देवान्**) उत्तम गुणों का (**अनु**) प्रस्तार करता है, उसको अच्छे प्रकार प्रेरणा करो॥१॥

भावार्थः-जो अति गुणों से युक्त अग्नि आदि पदार्थ से कार्य्यों को सिद्ध करें तो सम्पूर्ण कार्य्य मनुष्य सिद्ध कर सकते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान्।

एवानेन हविषा यक्षि देवान् मनुष्वद्यज्ञं प्र तिरेममद्य॥ २॥

यथा। अयजः। होत्रम्। अग्ने। पृथिव्याः। यथा। दिवः। जातऽवेदः। चिकित्वान्। एव। अनेन। हविषा। यक्षि। देवान्। मनुष्वत्। यज्ञम्। प्र। तिर। इमम्। अद्य॥ २॥

पदार्थः-(**यथा**) (**अयजः**) यजेः (**होत्रम्**) हवनाभ्यासम् (**अग्ने**) पावक इव (**पृथिव्याः**) भूमेरन्तरिक्षस्य वा मध्ये (**यथा**) (**दिवः**) प्रकाशस्य (**जातवेदः**) उत्पन्नप्रज्ञ (**चिकित्वान्**) ज्ञानवान् (**एव**) (**अनेन**) (**हविषा**) (**यक्षि**) यजसि। अत्र शपो लुक्। (**देवान्**) विदुषो दिव्यान् पदार्थान् वा (**मनुष्वत्**) मनुष्येण तुल्यम् (**यज्ञम्**) सङ्गतिकरणम् (**प्र**) (**तिर**) विस्तारय (**इमम्**) (**अद्य**) इदानीम्॥ २॥

अन्वयः-हे जातवेदोऽग्ने! यथा त्वं पृथिव्या होत्रमयजो यथा दिवः [यथा] चिकित्वान् सन् अनेन हविषैव देवान् यक्ष्यद्येमं यज्ञं प्र तिर तथाहमपि मनुष्वत्कुर्य्याम्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या अस्यां सृष्टौ सर्वैः प्राणादिभिः सङ्गन्तव्यं व्यवहारं साध्नुवन्ति ते दिव्यं विज्ञानं प्राप्नुवन्ति॥ २॥

पदार्थः-हे (**जातवेदः**) उत्तम बुद्धियुक्त (**अग्ने**) अग्नि के सदृश तेजस्वी! (**यथा**) जैसे आप (**पृथिव्याः**) भूमि वा अन्तरिक्ष के मध्य में (**होत्रम्**) हवन करने के अभ्यास को (**अयजः**) करें और (**यथा**) जैसे (**दिवः**) प्रकाश के (**यथा**) [जैसे] (**चिकित्वान्**) ज्ञाता पुरुष आप (**अनेन**) इस (**हविषा**) हवन सामग्री से (**एव**) ही (**देवान्**) विद्वानों वा उत्तम पदार्थों का (**यक्षि**) आदर करो (**अद्य**) इस समय (**इमम्**) इस (**यज्ञम्**) सम्मेलन करने को (**प्र**) (**तिर**) विशेष सफल करो, वैसे मैं भी (**मनुष्वत्**) मनुष्य के तुल्य प्रसिद्ध करूं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य इस सृष्टि में सम्पूर्ण प्राण आदिकों से भी कार्य्य होने योग्य व्यवहार को सिद्ध करते, वे श्रेष्ठ विज्ञान को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्रीण्यायूंषि तवे जावेदस्तिस्र आजानीरुषसस्ते अग्ने।

ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः॥ ३॥

त्रीणि। आयूंषि। तवे। जातऽवेदः। तिस्रः। आऽजानीः। उषसः। ते। अग्ने। ताभिः। देवानाम्। अवः। यक्षि। विद्वान्। अथ। भव। यजमानाय। शम्। योः॥ ३॥

पदार्थः-(**त्रीणि**) त्रिविधानि शरीरात्ममनः सुखकराणि (**आयूंषि**) जीवनानि (**तव**) (**जातवेदः**) जातवित्त (**तिस्रः**) (**आजानीः**) समन्तात्प्रसिद्धाः (**उषसः**) प्रकाशकर्त्र्यो वेलाः (**ते**) तव (**अग्ने**) अग्निरिव वर्त्तमान (**ताभिः**) वेलाभिः (**देवानाम्**) दिव्यानां पदार्थानां विदुषां वा (**अवः**) रक्षणादिकम् (**यक्षि**)

सङ्गच्छसे **(विद्वान्)** सत्यासत्यवेत्ता **(अथ)**। अत्र **निपातस्य चे**ति दीर्घः। **(भव) (यजमानाय)** सङ्गन्त्रे **(शम्)** सुखम् **(योः)** मिश्रयिता भेदको वा॥३॥

अन्वयः-हे जातवेदोऽग्ने विद्वांस्त्वं यथा तेऽग्निर्यजमानाय शङ्करो भवति तथैव तव यानि त्रीण्यायूंषि यथाऽग्नेस्तिस्र आजानीरुषसस्तथा योः सन् यक्ष्यथ ताभिर्देवानामवो विधेहि शङ्करश्च भव॥३॥

भावार्थः-यदि मनुष्या दीर्घेण ब्रह्मचर्येण युक्ताहारविहाराभ्यां जीवनं वर्द्धितुमिच्छेयुस्तर्हि त्रिगुणं त्रीणि शतानि वर्षाणि तावद्भवितुं शक्यमिति विज्ञेयम्॥३॥

पदार्थः-हे **(जातवेदः)** सम्पूर्ण उत्पन्न पदार्थ के ज्ञाता **(अग्ने)** अग्नि के सदृश तेजस्वी और **(विद्वान्)** सत्य-असत्य के ज्ञाता पुरुष! आप जैसे **(ते)** आपका जाना अग्नि **(यजमानाय)** किसी पदार्थ में अग्नि का संयोग करनेवाले के **(शम्)** कल्याणकारक होता है, वैसे **(तव)** आपके जो **(त्रीणि)** तीन प्रकार के शरीर, आत्मा, मन के सुखकारक **(आयूंषि)** जीवन और जैसे अग्नि के सदृश तेजस्वी **(तिस्रः)** तीन **(आजानीः)** सब ओर से प्रसिद्ध **(उषसः)** प्रकाशकारक समय वैसे हो **(योः)** संयोगकारक वा भेदक आप **(यक्षि)** सम्प्राप्त होते **(ताभिः)** उन वेलाओं से **(देवानाम्)** पदार्थों की वा विद्वानों की **(अवः)** रक्षा आदि कीजिये और कल्याण करनेवाले भी **(भव)** हूजिये॥३॥

भावार्थः-जो मनुष्य बहुत काल पर्य्यन्त ब्रह्मचर्य्य, नियत भोजन तथा **[**आहार-**]**विहार से आयु बढ़ाने की इच्छा करें तो त्रिगुण अर्थात् तीन सौ वर्ष तक जीवन हो सकता है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम्॥४॥

अग्निम्। सुऽदीतिम्। सुऽदृशम्। गृणन्तः। नमस्यामः। त्वा। ईड्यम्। जातऽवेदः। त्वाम्। दूतम्। अरतिम्। हव्यऽवाहम्। देवाः। अकृण्वन्। अमृतस्य। नाभिम्॥४॥

पदार्थः-(**अग्निम्**) पावकवद्विद्वांसम् (**सुदीतिम्**) सुरक्षकम् (**सुदृशम्**) सम्यग् द्रष्टुं योग्यं दर्शकं वा (**गृणन्तः**) स्तुवन्तः (**नमस्यामः**) सेवेमहि (**त्वा**) त्वाम् (**ईड्यम्**) प्रशंसितुमर्हम् (**जातवेदः**) जातेषु पदार्थेषु कृतविद्य (**त्वाम्**) (**दूतम्**) दूतमिव परितापकम् (**अरतिम्**) प्रापकम् (**हव्यवाहम्**) हव्यानां पदार्थानां प्रापकम् (**देवाः**) विद्वांसः (**अकृण्वन्**) (**अमृतस्य**) मोक्षस्य (**नाभिम्**) नाभिरिव बन्धकम्॥४॥

अन्वयः-हे जातवेदो! यं त्वा दूतमरतिं हव्यवाहं पावकमिवामृतस्य नाभिं देवा अकृण्वन् तं सुदीतिं सुदृशमीड्यमग्निमिव त्वां गृणन्तः सन्तो वयं नमस्यामः॥४॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। ये पावकवर्चसो विज्ञानप्रदा विद्वांसो धर्मार्थकाममोक्षसाधनान्युपदिशेयुस्तान्नित्यं नमस्कृत्य सेवेयुः॥४॥

पदार्थः–हे **(जातवेदः)** सम्पूर्ण उत्पन्न पदार्थों में प्रसिद्ध विद्वान्! जिन **(त्वा)** आप **(दूतम्)** दूत के समान सन्तापकारी **(अरतिम्)** प्राप्तकारक **(हव्यवाहम्)** हवन करने योग्य पदार्थों को प्राप्त होनेवाले अग्नि के सदृश **(अमृतस्य)** मोक्ष का **(नाभिम्)** नाभि के सदृश बन्धनकर्त्ता **(देवाः)** विद्वान् लोग **(अकृण्वन्)** किया करते हैं उस **(सुदीतिम्)** उत्तम प्रकार रक्षाकारक **(सुदृशम्)** सम्यक् देखने योग्य वा दर्शक और **(ईड्यम्)** प्रशंसा करने योग्य **(अग्निम्)** अग्नि के सदृश तेजस्वी विद्वान् **(त्वाम्)** आपको **(गृणन्तः)** स्तुति करते हुए हम लोग **(नमस्यामः)** नमस्कार करते हैं॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पुरुष अग्नि के सदृश तेजस्वी, विज्ञानदाता, विद्वान् लोग धर्म, अर्थ, काम और मोक्ष के साधनों का उपदेश दें; उनकी नित्य नमस्कारपूर्वक सेवा करनी चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्त्वद्धोता॒ पूर्वो॑ अग्ने॒ यजी॑यान् द्विता च॒ सत्ता॑ स्व॒धया॑ च शं॒भुः।
तस्यानु॒ धर्म॒ प्र य॑जा चिकि॒त्वोऽथा॑ नो धा अध्व॒रं दे॒ववी॑तौ॥५॥१७॥

यः। त्वत्। होता॑। पूर्वः॑। अ॒ग्ने॒। यजी॑यान्। द्विता। च॒। सत्ता॑। स्व॒धया॑। च॒। शं॒ऽभुः। तस्य॑। अनु॑। धर्म॑। प्र। य॒ज॒। चि॒कि॒त्वः॒। अथ॑। नः॒। धाः॒। अ॒ध्व॒रम्। दे॒वऽवी॑तौ॥५॥

पदार्थः–**(यः)** **(त्वत्)** तव सकाशात् **(होता)** दाता **(पूर्वः)** पूर्वविद्यः **(अग्ने)** विद्वन् **(यजीयान्)** अतिशयेन यष्टा सङ्गन्ता **(द्विता)** द्वयोर्भावः **(च)** **(सत्ता)** दत्तः **(स्वधया)** अन्नेन **(च)** **(शम्भुः)** सुखं भावुकः **(तस्य)** **(अनु)** **(धर्म)** धर्त्तव्यम् **(प्र)** **(यज)** सङ्गच्छस्व। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(चिकित्वः)** विज्ञानयुक्त **(अथ)** आनन्तर्य्ये। अत्रापि **निपातस्य च**ेति दीर्घः। **(नः)** अस्माकम् **(धाः)** धेहि **(अध्वरम्)** अहिंसादिगुणयुक्तं व्यवहारम् **(देववीतौ)** देवानां वीतिर्व्याप्तिस्तस्याम्॥३॥

अन्वयः–हे अग्ने! यस्त्वद्धोता पूर्वो यजीयान् द्विता च सत्ता स्वधया च शम्भुर्भवेत्तस्य धर्मानु प्र यजाथ। हे चिकित्वः! संस्त्वं देववीतौ नोऽध्वरं धाः॥५॥

भावार्थः–हे मनुष्या! ये विद्वांसो युष्मत्प्राचीना अन्नादिसामग्रीभिरहिंसाख्यं व्यवहारं धरेयुस्ततस्ते सर्वदा सुखमाप्नुयुरिति॥५॥

अत्राऽग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति सप्तदशं सूक्तं सप्तदशो वर्गश्च समाप्तः॥

पदार्थः–हे **(अग्ने)** विद्वान् पुरुष! जो **(त्वत्)** आपके समीप से **(होता)** दानशील **(पूर्वः)** पूर्व

विद्यावान् (**यजीयान्**) अतिशय यज्ञकारक वा सम्मेलकारी (**द्विता**) द्वित्व स्वरूप (**च**) और (**सत्ता**) स्थित (**स्वधया**) अन्न से (**च**) भी (**शम्भुः**) सुखकारक होवे (**तस्य**) उसके (**धर्म**) धारण करने योग्य को (**अनु**) (**प्र**) (**यज**) सम्प्राप्त होइये (**अथ**) इसके अनन्तर हे (**चिकित्वः**) विज्ञानशाली! आप (**देववीतौ**) विद्वानों के समूह में (**नः**) हम लोगों के (**अध्वरम्**) अहिंसा आदि गुणयुक्त व्यवहार को (**धाः**) धारण करिये॥५॥

भावार्थः-हे मनुष्यो! जो विद्वान् लोग आप लोगों की अपेक्षा प्राचीन तथा अन्न आदि सामग्रियों से अहिंसाख्य व्यवहार को धारण किया करें, इससे वे सर्वदा सुख भोगी हों॥५॥

इस सूक्त में अग्नि और विद्वान् के गुणों का वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, ऐसा जानना चाहिये॥

यह सत्रहवां सूक्त और सत्रहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्याष्टादशस्य सूक्तस्य कतो वैश्वामित्र ऋषिः। अग्निर्देवता। १, ३, ५ त्रिष्टुप्। २, ४ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्भिः किं विधेयमित्याह॥

अब इस तृतीय मण्डल में अठारहवें सूक्त का आरम्भ है। उसके पहिले मन्त्र से विद्वानों को क्या करना योग्य है, इस विषय को कहा है॥

भवा॑ नो अग्ने सु॒मना॒ उपे॑तौ॒ सखे॑व॒ सख्ये॑ पि॒तरे॑व सा॒धुः।
पु॒रु॒द्रुहो॒ हि क्षि॒तयो॒ जना॑नां॒ प्रति॑ प्रती॒चीर्दह॒तादरा॑तीः॥ १॥

भव॑। नः॒। अ॒ग्ने॒। सु॒ऽमना॑ः। उप॑ऽइतौ। सखा॑ऽइव। सख्ये॑। पि॒तरा॑ऽइव। सा॒धुः। पु॒रु॒ऽद्रुहः। हि। क्षि॒तयः॑। जना॑नाम्। प्रति॑। प्र॒ती॒चीः। द॒ह॒ता॒त्। अरा॑तीः॥ १॥

पदार्थः-(**भव**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्मभ्यम् (**अग्ने**) कृपामय विद्वन् (**सुमनाः**) शोभनं मनो यस्य सः (**उपेतौ**) प्राप्तौ (**सखेव**) मित्रवत् (**सख्ये**) मित्रकर्मणे (**पितरेव**) जनकाविव (**साधुः**) (**पुरुद्रुहः**) ये पुरून् बहून् द्रुह्यन्ति तान् (**हि**) (**क्षितयः**) मनुष्याः (**जनानाम्**) मनुष्याणाम् (**प्रति**) (**प्रतीचीः**) प्रतिकूलं वर्त्तमानाः (**दहतात्**) भस्मीकुरु (**अरातीः**) शत्रून्॥ १॥

अन्वयः-हे अग्ने! त्वमुपेतौ पितरेव सख्ये सखेव नोऽस्मभ्यं सुमना भव साधुः सन् जनानाम्मध्ये ये क्षितयः पुरुद्रुहः स्युस्तान् प्रतीचीररातीर्हि प्रति दहतात्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! युष्माभिर्ये विद्वांसो मनुष्यादिप्राणिषु पितृवन्मित्रवद् वर्त्तेरँस्तेषां सत्कारं ये द्वेष्टारस्तेषामसत्कारं कृत्वा धर्मो वर्द्धनीयः॥ १॥

पदार्थः-हे (**अग्ने**) कृपारूप विद्वान् पुरुष! आप (**उपेतौ**) प्राप्ति में (**पितरेव**) जनकों के सदृश (**सख्ये**) मित्र कर्म के लिये (**सखेव**) मित्र के तुल्य (**नः**) हम लोगों के लिये (**सुमनाः**) उत्तम मनयुक्त (**भव**) होइये और (**साधुः**) उत्तम उपदेश से कल्याणकारी होकर (**जनानाम्**) मनुष्यों के बीच में जो (**क्षितयः**) मनुष्य (**पुरुद्रुहः**) बहुत लोगों से द्वेषकर्त्ता होवें उन (**प्रतीचीः**) प्रतिकूल वर्त्तमान (**अरातीः**) शत्रुओं को (**प्रति**) (**दहतात्**) भस्म करिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! आप लोगों को चाहिये कि जो विद्वान् लोग मनुष्य आदि प्राणियों में पिता और मित्र के तुल्य वर्त्तावकारी उनका सत्कार और जो द्वेषकारी उनका निरादर करके धर्मवृद्धि करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तपो॒ ष्वग्ने अन्तराँ॑ अ॒मित्रा॒न् तपा॒ शंस॒मर॑रुषः॒ पर॑स्य।

तपो॑ वसो चिकिता॒नो अ॒चित्ता॒न् वि ते॑ तिष्ठन्ताम॒जरा॑ अ॒यास॑:॥ २॥

तपो॒ इति॑। सु। अ॒ग्ने॒। अन्त॑रान्। अ॒मित्रा॑न्। तप॑। शंस॑म्। अर॑रुषः। पर॑स्य। तपो॒ इति॑। व॒सो॒ इति॑। चि॒कि॒ता॒नः। अ॒चित्ता॑न्। वि। ते। ति॒ष्ठ॒न्ता॒म्। अ॒जरा॑:। अ॒यास॑:॥ २॥

पदार्थ:-(**तपो**) तपस्विन् (**सु**) (**अग्ने**) दुष्टान् प्रति पावकवद्वर्त्तमान (**अन्तरान्**) भिन्नान् (**अमित्रान्**) शत्रून् (**तप**) सन्तापय (**शंसम्**) प्रशंसाम् (**अररुषः**) अहिंसकस्य (**परस्य**) श्रेष्ठस्य (**तपो**) दुष्टानां पुरुषाणां दाहक (**वसो**) यस्सद्गुणेषु वसति तत्सम्बुद्धौ (**चिकितानः**) ज्ञानवान् ज्ञापकः (**अचित्तान्**) प्राप्तदरिद्रावस्थान् (**वि**) (**ते**) तव (**तिष्ठन्ताम्**) (**अजराः**) जरारोगरहिताः (**अयासः**) विज्ञानवन्तः॥ २॥

अन्वय:-हे तपोऽग्ने! त्वमन्तरानमित्रान् सुतप। अररुषः परस्य शंसं विधेहि। हे तपो वसो चिकितानस्त्वमचित्तान् बोधय। एतेऽजरा अयासस्ते समीपे वि तिष्ठन्ताम्॥ २॥

भावार्थ:-ये मनुष्याः शत्रून्निवार्य्य धार्मिकानाप्तान् सत्कृत्य सर्वार्थं सुखं वर्द्धयन्ति तेऽपि सुखमाप्नुवन्ति॥ २॥

पदार्थ:-हे (**तपो**) तपस्वी! (**अग्ने**) दुष्ट जनों के अग्नि के सदृश दाहकर्ता! आप (**अन्तरान्**) भेद को प्राप्त (**अमित्रान्**) शत्रुओं को (**सुतप**) सन्तापयुक्त तथा (**अररुषः**) अहिंसायुक्त (**परस्य**) श्रेष्ठ जन की (**शंसम्**) प्रशंसा करो। हे (**तपो**) दुष्ट पुरुषों के दाहकारी (**वसो**) उत्तम गुणों के निवासी (**चिकितानः**) ज्ञानवान् वा बोधकारक आप (**अचित्तान्**) दरिद्र दशायुक्त पुरुषों को सचेत कीजिये और ये (**अजराः**) वृद्धावस्थारूप रोग से रहित (**अयासः**) विज्ञानयुक्त पुरुष (**ते**) आपके समीप (**वि**) (**तिष्ठन्ताम्**) वर्त्तमान हों॥ २॥

भावार्थ:-जो मनुष्य शत्रुओं को पृथक् कर धार्मिक, यथार्थवक्ता, सत्यवादी पुरुषों का सत्कार करके, सब जनों के लिये सुखवृद्धि करते हैं, वे भी सुख पाते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इ॒ध्मेना॑ग्न इ॒च्छमा॑नो घृ॒तेन॑ जु॒होमि॑ ह॒व्यं तर॑से॒ बला॑य।
याव॒दीशे॒ ब्रह्म॑णा॒ वन्द॑मान इ॒मां धिय॑ं श॒त॒सेया॑य दे॒वीम्॥ ३॥

इ॒ध्मेन॑। अ॒ग्ने॒। इ॒च्छमा॑नः। घृ॒तेन॑। जु॒होमि॑। ह॒व्यम्। तर॑से। बला॑य। याव॑त्। ईशे॑। ब्रह्म॑णा। वन्द॑मानः। इ॒माम्। धिय॑म्। श॒त॒ऽसेया॑य। दे॒वीम्॥ ३॥

पदार्थ:-(**इध्मेन**) समिधेन (**अग्ने**) अग्निरिव प्रदीप्तविद्य (**इच्छमानः**) (**घृतेन**) सुसंस्कृतेनाज्येन (**जुहोमि**) (**हव्यम्**) (**तरसे**) तारकाय (**बलाय**) (**यावत्**) (**ईशे**) इच्छामि (**ब्रह्मणा**) महता धनेन सह

(वन्दमानः) **(इमाम्)** वर्त्तमानाम् **(धियम्)** धारणावतीं प्रज्ञाम् **(शतसेयाय)** शतादिसंख्यापरिमितधनावसानाय **(देवीम्)** देदीप्यमानां विद्वद्भिः कमनीयाम्॥३॥

अन्वयः-हे अग्ने! यथेध्मेन घृतेनेच्छमानोऽहं तरसे बलाय हव्यं जुहोमि ब्रह्मणा वन्दमानः शतसेयायेमां देवीं धियं यावदीशे तथा त्वं जुहुधि तावदीशिष्व॥३॥

भावार्थः-यथेन्धनघृताभ्यामग्निर्वर्द्धते तथैव ब्रह्मचर्य्यवेदाभ्यासाभ्यां बलविद्ये वर्द्धेते यावद्योग्यं तावदेव ब्रह्मचर्य्यं सेवनीयम्॥३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश प्रकाशित विद्यायुक्त! जैसे **(इध्मेन)** समिध से तथा **(घृतेन)** उत्तम प्रकार के मन्त्रों से संस्कारयुक्त घृत से **(इच्छमानः)** इच्छाकारी मैं **(तरसे)** वेग तथा **(बलाय)** बल के लिये **(हव्यम्)** हवन सामग्री का **(जुहोमि)** होम करता हूँ **(ब्रह्मणा)** अतिशय धन के साथ **(वन्दमानः)** स्तुति से उपासनाकारक मैं **(शतसेयाय)** शत आदि संख्या से पूरित धन प्राप्ति के लिये **(इमाम्)** विद्यमान इस **(देवीम्)** प्रकाशमान **(धियम्)** धारणायोग्य बुद्धि को **(यावत्)** जितने परिणाम से **(ईशे)** इच्छाकारक हूँ, उसी प्रकार आप हवन कीजिये उतनी इच्छा करो॥३॥

भावार्थः-जैसे इन्धन और घृत से अग्नि बढ़ती है, वैसे ही ब्रह्मचर्य्य तथा वेद के अभ्यास से बल और विद्या बढ़ती है, जितना वेद से ब्रह्मचर्य्य रखना योग्य है, उतना अभ्यास करना चाहिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु धेहि।
रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वꣳ भूरि कृत्वः॥४॥

उत्। शोचिषा। सहसः। पुत्र। स्तुतः। बृहत्। वयः। शशमानेषु। धेहि। रेवत्। अग्ने। विश्वामित्रेषु। शम्। योः। मर्मृज्म। ते। तन्वम्। भूरि। कृत्वः॥४॥

पदार्थः-(उत्) **(शोचिषा)** तेजसा **(सहसः)** **(पुत्र)** बलस्योत्पादक **(स्तुतः)** प्रशंसितः **(बृहत्)** महत् **(वयः)** कमनीयमायुः **(शशमानेषु)** भोगाभ्यासोल्लङ्घनेषु **(धेहि)** **(रेवत्)** प्रशस्तधनयुक्तम् **(अग्ने)** पावकवद्वर्त्तमान वैद्यराज विद्वन् **(विश्वामित्रेषु)** विश्वं मित्रं सुहृद् येषान्तेषु **(शम्)** सुखम् **(योः)** दुःखवियोजकः सुखसंयोजकः **(मर्मृज्मा)** भृशं शुद्धः शोधयिता **(ते)** तव **(तन्वम्)** **(भूरि)** बहु **(कृत्वः)** बहवः कर्त्तारो विद्यन्ते यस्य तत्सम्बुद्धौ॥४॥

अन्वयः-हे भूरि कृत्वः सहसस्पुत्राग्ने! स्तुतस्त्वं शोचिषा शशमानेषु विश्वामित्रेषु रेवद् बृहद्वयो भूरि शं धेहि। योर्मर्मृज्मा त्वन्ते तन्वमुद्धेहि॥४॥

भावार्थः-हे पुरुषाः! युष्माभिः ब्रह्मचर्य्येण विद्यायुषी वर्द्धयित्वा सर्वैः सह मित्रतां कृत्वा सर्वे दीर्घायुषो बृहद्विद्याः सम्पादनीयाः॥४॥

पदार्थः-हे **(भूरि)** बहुत **(कृत्वः)** पुरुषों से रचित **(सहसस्पुत्र)** बल के उत्पादक **(अग्ने)** अग्नि के सदृश तेजस्वी वैद्यराज विद्वान्! **(स्तुतः)** प्रशंसायुक्त आप **(शोचिषा)** तेज से **(शशमानेषु)** भोग अभ्यास उल्लंघनों तथा **(विश्वामित्रेषु)** सम्पूर्ण जनों के मित्रों में **(रेवत्)** प्रशंसा करने योग्य धन से युक्त **(बृहत्)** अधिक **(वयः)** कामनायोग्य अवस्था और बहुत **(शम्)** सुख को दीजिये **(योः)** दुःख के नाशक और सुख से संयोग करानेवाले **(मर्मृज्मा)** अति पवित्र वा पवित्रकारक आप **(ते)** अपने **(तन्वम्)** शरीर को **(उत्)** **(धेहि)** स्थिर कीजिये॥४॥

भावार्थः-हे पुरुषो! आप लोगों को चाहिये कि ब्रह्मचर्य्य द्वारा विद्या और अवस्था बढ़ा, सब लोगों के साथ मित्रता करके, सकल जनों को अधिक अवस्थायुक्त तथा बहुत विद्यावान् करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कृधि रत्नꣳ सुसनितर्धनानां स घेदग्ने भवसि यत्समिद्धः।
स्तोतुर्दुरोणे सुभगस्य रेवत् सृप्रा करस्ना दधिषे वपूꣳषि॥५॥१८॥

कृधि। रत्नम्। सुऽसनितः। धनानाम्। सः। घ। इत्। अग्ने। भवसि। यत्। सम्ऽइद्धः। स्तोतुः। दुरोणे। सुऽभगस्य। रेवत्। सृप्रा। करस्ना। दधिषे। वपूꣳषि॥५॥

पदार्थः-(**कृधि**) कुरु **(रत्नम्)** रमणीयन्धनम् **(सुसनितः)** सुष्ठु संविभाजक **(धनानाम्)** सुवर्णादीनाम् **(सः)** **(घ)** एव **(इत्)** इव **(अग्ने)** विद्युद्वद्धनवर्द्धक **(भवसि)** **(यत्)** यः **(समिद्धः)** प्रदीप्तः **(स्तोतुः)** ऋत्विजः प्रशंसकस्य **(दुरोणे)** गृहे **(सुभगस्य)** वरैश्वर्य्यस्य **(रेवत्)** प्रशस्तधनयुक्तम् **(सृप्रा)** सर्प्पन्ति प्राप्नुवन्ति याभ्यां तौ **(करस्ना)** बाहू। **करस्नौ बाहू कर्मणाम्प्रस्नातारौ।** (निरु०६.१७)। **(दधिषे)** धरसि **(वपूंषि)** रूपवन्ति शरीराणि॥५॥

अन्वयः-हे सुसनितरग्ने! यद्यस्त्वं समिद्धोऽग्निरिव सुसमिद्धो भवसि स घ धनानां रत्नं कृधि सुभगस्य स्तोतुरिद्दुरोणे यौ सृप्रा करस्ना ते भवतस्ताभ्यां रेवद्वपूंषि च दधिषे स त्वमस्माभिः सत्कर्त्तव्योऽसि॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! मनुष्यान् सुशिक्ष्य पुरुषार्थेन संयोज्य विद्याधनयुक्तान् कृत्वा सुसभ्यान् दीर्घायुषः सम्पादयेयुरिति॥५॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टादशं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सुसनितः)** उत्तम प्रकार दानविभागकारी **(अग्ने)** बिजुली के समान शीघ्र धन

वृद्धिकर्त्ता! **(यत्)** जो आप **(समिद्धः)** प्रकाशमान अग्नि के सदृश प्रकाशमान होते **(सः, घ)** सो ही **(धनानाम्)** सुवर्ण आदि रूप धनों में **(रत्नम्)** उत्तम धन को **(कृधि)** संयुक्त कीजिये **(सुभगस्य)** उत्तम ऐश्वर्य्य और **(स्तोतुः)** हवनकर्त्ता वा प्रशंसाकर्त्ता के **(इत्)** समान **(दुरोणे)** गृह में जो **(सुप्रा)** अभीष्टस्थान की प्राप्तिकारक **(करस्ना)** कर्मों की शुद्धिकारक आपके बाहुओं और **(रेवत्)** उत्तम धनयुक्त **(वपूंषि)** रूपवत् शरीरों को **(दधिषे)** धारण करते हो, वह आप हम लोगों से आदर करने योग्य हो॥५॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। हे विद्वानो! आप लोगों को चाहिये कि मनुष्यों को उत्तम प्रकार शिक्षा तथा पुरुषार्थ से युक्त और विद्या धनयुक्त करके उत्तम सभ्य चिरञ्जीवी जन बनाइये॥५॥

इस सूक्त में विद्वान् और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह अठारहवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्यैकोनविंशस्य सूक्तस्य कुशिकपुत्रो गाथी ऋषिः। अग्निर्देवता। १ त्रिष्टुप्। २, ४, ५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्याणां धनाद्यैश्वर्यं कथं वर्धेतेत्याह॥

अब इस तृतीय मण्डल में १९ उन्नीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में मनुष्यों का धनादि ऐश्वर्य्य कैसे बढ़े, इस विषय को अगले मन्त्र में कहा है॥

अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम्।
स नो यक्षद्देवताता यजीयान् राये वाजाय वनते मघानि॥ १॥

अग्निम्। होतारम्। प्र। वृणे। मियेधे। गृत्सम्। कविम्। विश्वऽविदम्। अमूरम्। सः। नः। यक्षत्। देवऽताता। यजीयान्। राये। वाजाय। वनते। मघानि॥ १॥

पदार्थः-(**अग्निम्**) पावक इव वर्त्तमानम् (**होतारम्**) हवनकर्त्तारं दातारम् (**प्र**) (**वृणे**) स्वीकरोमि। (**मियेधे**) घृतादिप्रक्षेपणेन प्रशंसनीये यज्ञे (**गृत्सम्**) यो गृणाति तं मेधाविनम् (**कविम्**) क्रान्तप्रज्ञं बहुशास्त्राऽध्यापकम् (**विश्वविदम्**) यो विश्वानि सर्वाणि शास्त्राणि वेत्ति तम् (**अमूरम्**) मूढतादिदोषरहितम्। अत्र वर्णव्यत्ययेन ढस्य रः। (**सः**) (**नः**) अस्मान् (**यक्षत्**) सङ्गमयेत् (**देवताता**) देवान् विदुषः (**यजीयान्**) अतिशयेन यष्टा (**राये**) धनप्राप्तये (**वाजाय**) विज्ञानप्रदाय (**वनते**) संभजमानाय (**मघानि**) पूजितव्यानि धनानि॥ १॥

अन्वयः-हे विद्वन्नहं यं मियेधे होतारं विश्वविदममूरं कविं गृत्समग्निं प्रवृणे स यजीयाँस्त्वं वाजाय वनते राये मघानि देवताता नोऽस्मान् यक्षत्॥ १॥

भावार्थः-मनुष्यैर्यस्मिन्नधिकारे यस्य योग्यता भवेत् तस्मा एव सोऽधिकारो देयः। एवं सति धनधान्यैश्वर्य्यं प्रवृद्धं भवितुं शक्यम्॥ १॥

पदार्थः-हे विद्वान् पुरुष! मैं जिस (**मियेधे**) घृतादि के प्रक्षेपण से होने योग्य यज्ञ में (**होतारम्**) हवनकर्त्ता वा दाता (**विश्वविदम्**) सकल शास्त्रों के वेत्ता (**अमूरम्**) मूढ़ता आदि दोषरहित (**कविम्**) तीक्ष्ण बुद्धियुक्त वा बहुत शास्त्रों के अध्यापक (**गृत्सम्**) शिक्षा देने में चतुर बुद्धिमान् और (**अग्निम्**) अग्नि के सदृश तेजस्वी पुरुष को (**प्र**) (**वृणे**) स्वीकार करता हूँ (**सः**) वह (**यजीयान्**) अत्यन्त यज्ञकर्त्ता आप (**वाजाय**) ज्ञानदाता और (**वनते**) प्रसन्नता से दिये पदार्थों के स्वीकारकर्त्ता पुरुष के लिये तथा (**राये**) धन प्राप्ति के लिये (**मघानि**) आदर करने योग्य धन और (**देवताता**) विद्वानों को (**नः**) हम लोगों के लिये (**यक्षत्**) संयुक्त कीजिये॥ १॥

भावार्थः-मनुष्यों को चाहिये कि जिस अधिकार में जिस पुरुष की योग्यता हो उसी ही के लिये वह अधिकार देवें, क्योंकि ऐसा करने पर धनधान्यरूप ऐश्वर्य्य की वृद्धि हो सकती है॥ १॥

पुनर्मनुष्यैः किं कार्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

प्र ते॑ अग्ने ह॒विष्म॑तीमियर्म्यच्छा॑ सुद्यु॒म्नां रा॒तिनी॑ घृ॒ताची॑म्।
प्रद॒क्षिणिद् दे॒वता॑तिमु॒राण॒: सं रा॒तिभि॒र्वसु॑भि॒र्यज्ञ॑म॑श्रेत्॥ २॥

प्र। ते॒। अ॒ग्ने॒। ह॒विष्म॑तीम्। इ॒यर्मि॑। अच्छ॑। सु॒द्यु॒म्नाम्। रा॒तिनी॑म्। घृ॒ताची॑म्। प्र॒ऽद॒क्षिणित्। दे॒वऽता॑तिम्। उ॒रा॒ण॒:। सम्। रा॒तिऽभि॑:। वसु॑ऽभि:। य॒ज्ञम्। अ॒श्रे॒त्॥ २॥

पदार्थ:-(**प्र**) (**ते**) तव (**अग्ने**) पावकवद्वर्त्तमान (**हविष्मतीम्**) बहूनि हवींषि विद्यन्ते यस्यान्ताम् (**इयर्मि**) प्राप्नोमि (**अच्छ**) उत्तमरीत्या। अत्र **निपातस्य चे**ति दीर्घ:। (**सुद्युम्नाम्**) शोभनप्रकाशयुक्ताम् (**रातिनीम्**) रातानि दत्तानि विद्यन्ते यस्यां ताम् (**घृताचीम्**) या घृतमुदकमञ्चति प्राप्नोति तां रात्रीम्। **घृताचीति रात्रिनामसु पठितम्।** (निघं०१.१)। (**प्रदक्षिणित्**) प्रदक्षिणमेति गच्छति स:। अत्रेण् धातो: क्विप् **छान्दसो वर्णलोपो वे**त्यन्तस्याकारलोप:। (**देवतातिम्**) दिव्यस्वरूपाम् (**उराण:**) य उरु बह्वनिति स उराण:। अत्र वर्णव्यत्ययेनोकारस्य स्थानेऽकार:। (**सम्**) (**रातिभि:**) सुखदानादिभि: (**वसुभि:**) वासहेतुभि: सह (**यज्ञम्**) सुषुप्त्यादिसङ्गतं व्यवहारम् (**अश्रेत्**) आश्रयेत्। अत्र शपो लुक्॥ २॥

अन्वय:-हे अग्ने विद्वन्नहं ते तव शिक्षया यथोराण: प्रदक्षिणित् कश्चिज्जनो वसुभी रातिभि: सह हविष्मतीं सुद्युम्नां रातिनीं देवतातिं घृताचीं यज्ञं च समश्रेत् तथैतामच्छ प्रेयर्मि॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। मनुष्यैर्दिवा स्वापं वर्ज्जयित्वा व्यवहारसिद्धये श्रमं कृत्वा रात्रौ सम्यक् पञ्चदशघटिकामात्री निद्रा नेया दिवसे पुरुषार्थेन धनादीनि प्राप्य सुपात्रे सन्मार्गे च दानं देयम्॥ २॥

पदार्थ:-हे (**अग्ने**) अग्नि के सदृश तेजधारी विद्वान् पुरुष! मैं (**ते**) आपकी शिक्षा से जैसे (**उराण:**) विद्वानों को आदर से श्रेष्ठकर्त्ता कोई (**प्रदक्षिणित्**) दक्षिण अर्थात् सन्मार्ग गन्ता जन (**वसुभि:**) निवास के कारण (**रातिभि:**) सुखदान आदि के साथ (**हविष्मतीम्**) अतिशय हवनसामग्री-युक्त (**सुद्युम्नाम्**) श्रेष्ठ प्रकाश से युक्त (**रातिनीम्**) दिये हुए हवन के पदार्थों से युक्त (**देवतातिम्**) उत्तम स्वरूपविशिष्ट (**घृताचीम्**) जल को प्राप्त होनेवाली रात्रि और (**यज्ञम्**) शयनावस्था आदि में प्राप्त चित्त के व्यवहारों को (**सम्, अश्रेत्**) प्राप्त करे, वैसे इसको (**अच्छ**) उत्तम रीति से (**प्र**) (**इयर्मि**) प्राप्त होता हूँ॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि दिन में शयन छोड़ सांसारिक व्यवहार की सिद्धि के लिये परिश्रम कर रात्रि के समय स्वस्थतापूर्वक पञ्चदश १५ घटिका पर्यन्त निद्रालु होवें और दिन भर पुरुषार्थ से धन आदि उत्तम पदार्थों को प्राप्त होकर सुपात्र पुरुष तथा सन्मार्ग में दान देवें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः॥ ३॥

सः। तेजीयसा। मनसा। त्वाऽऊतः। उत। शिक्ष। सुऽअपत्यस्य। शिक्षोः। अग्ने। रायः। नृऽतमस्य। प्रऽभूतौ। भूयाम। ते। सुऽस्तुतयः। च। वस्वः॥ ३॥

पदार्थः-(**सः**) (**तेजीयसा**) तेजस्विना शुद्धस्वरूपेण (**मनसा**) अन्तःकरणेन (**त्वोतः**) त्वां कामयमानः (**उत**) अपि (**शिक्ष**) विद्यां ग्राहय (**स्वपत्यस्य**) शोभनान्यपत्यानि विद्यार्थिनो वा यस्य तस्य (**शिक्षोः**) शिक्षकस्य (**अग्ने**) पूर्णविद्याप्रकाशयुक्त (**रायः**) ऐश्वर्य्यस्य (**नृतमस्य**) अतिशयेन नायका यस्य तस्य (**प्रभूतौ**) बहुत्वे (**भूयाम**) (**ते**) तव (**सुष्टुतयः**) शोभनाः स्तुतयो येषां ते (**च**) (**वस्वः**) वसुना सुखेन वासहेतोर्धनस्य॥ ३॥

अन्वयः-हे अग्ने! वयं यस्य स्वपत्यस्य नृतमस्य शिक्षोस्ते शिक्षायां सुष्टुतयस्सन्तस्तेजीयसा मनसा वस्वो रायः प्रभूतौ भूयाम स त्वोत उत तमस्मांश्च त्वं शिक्ष॥ ३॥

भावार्थः-ये ब्रह्मचर्य्येण विद्यया धर्म्याणि कृत्यानि कृत्वा शुद्धेनान्तःकरणेनात्मना वा प्रयतेरंस्ते धनपतयो भवेयुः॥ ३॥

पदार्थः-हे (**अग्ने**) पूर्ण विद्या के प्रकाश से युक्त! हम लोग जिस (**स्वपत्यस्य**) उत्तम सन्तान वा विद्यार्थियों के सहित (**नृतमस्य**) अत्यन्त शूरवीरों से विशिष्ट (**शिक्षोः**) शिक्षक पुरुष (**ते**) आपकी शिक्षा में (**सुष्टुतयः**) उत्तम स्तुतिकर्त्ता श्रेष्ठ पुरुष (**तेजीयसा**) तेजस्वी पवित्र स्वरूपवान् (**मनसा**) अन्तःकरण से (**वस्वः**) सुखपूर्वक निवास का कारण धन तथा (**रायः**) ऐश्वर्य्य के (**प्रभूतौ**) बहुत्वभाव में (**भूयाम**) वर्त्तमान होवें (**सः**) वह (**त्वोतः**) आपकी कामना करता हुआ जो ऐसा पुरुष उसको (**च**) और हम लोगों को (**उत**) भी आप (**शिक्ष**) विद्योपदेश दीजिये॥ ३॥

भावार्थः-जो पुरुष ब्रह्मचर्य्य और विद्या से धर्म सम्बन्धी कामों को करके निष्कपट अन्तःकरण तथा आत्मा से प्रयत्न करें, उनको धनपति का अधिकार देना योग्य है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः।
स आ वह देवतातिं यविष्ठ शर्धो यदद्य दिव्यं यजासि॥ ४॥

भूरीणि। हि। त्वे इति। दधिरे। अनीका। अग्ने। देवस्य। यज्यवः। जनासः। सः। आ। वह। देवऽतातिम्। यविष्ठ। शर्धः। यत्। अद्य। दिव्यम्। यजासि॥ ४॥

पदार्थः-(**भूरीणि**) बहूनि (**हि**) यतः (**त्वे**) त्वयि (**दधिरे**) दधीरन् (**अनीका**) अनीकानि सैन्यानि (**अग्ने**) विद्युदिव सकलविद्यासु व्यापिन् (**देवस्य**) दिव्यगुणकर्मस्वभावस्य (**यज्यवः**) सत्कर्त्तव्याः (**जनासः**) विद्यादिगुणैः प्रादुर्भूताः (**सः**) (**आ**) (**वह**) समन्तात्प्राप्नुहि (**देवतातिम्**) दिव्यस्वभावम् (**यविष्ठ**) अतिशयेन युवन् (**शर्धः**) बलम् (**यत्**) (**अद्य**) इदानीम् (**दिव्यम्**) पवित्रम् (**यजासि**) यजेः॥४॥

अन्वयः-हे यविष्ठाग्ने! यस्य देवस्य सङ्गेन यज्यवो जनासो हि त्वे भूरीण्यनीका दधिरे यदद्य दिव्यं शर्धो यजासि स त्वं देवतातिमा वह॥४॥

भावार्थः-ये मनुष्या विद्वत्सङ्गेन बह्वीः सुशिक्षिताः सेना गृह्णीयुस्ते महद्बलं प्राप्य दिव्यान् गुणानाकर्षेयुः॥४॥

पदार्थः-हे (**यविष्ठ**) अतिशय युवावस्थासम्पन्न (**अग्ने**) बिजुली के सदृश सम्पूर्ण विद्याओं में व्यापी पुरुष! जिस (**देवस्य**) उत्तम गुण, कर्म, स्वभाववान् जन के सङ्ग से (**यज्यवः**) आदर करने योग्य (**जनासः**) विद्या आदि गुणों से प्रकट जन (**हि**) जिससे (**त्वे**) आप में (**भूरीणि**) बहुत (**अनीका**) सेनाओं को (**दधिरे**) धारण करें (**यत्**) जो (**अद्य**) इस समय (**दिव्यम्**) पवित्र (**शर्धः**) बल को (**यजासि**) धारण करो और (**सः**) वह आप (**देवतातिम्**) उत्तम स्वभाव को (**आ**) (**वह**) सब प्रकार प्राप्त होइये॥४॥

भावार्थः-जो मनुष्य विद्वानों के सङ्ग से बहुत-सी उत्तम प्रकार शिक्षित सेनाओं को ग्रहण करें, वे अति बल को प्राप्त होके उत्तम गुणों का आकर्षण करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यत्त्वा॒ होता॑रम॒नज॑न्मि॒येधे॑ निषा॒दय॑न्तो य॒जथा॑य दे॒वाः।
स त्वं नो॑ अग्नेऽवि॒तेह बो॒ध्यधि॒ श्रवां॑सि धेहि नस्त॒नूषु॑॥५॥१९॥

यत्। त्वा॒। होता॑रम्। अ॒नज॑न्। मि॒येधे॑। नि॒ऽसा॒दय॑न्तः। य॒जथा॑य। दे॒वाः। सः। त्वम्। नः॒। अ॒ग्ने॒। अ॒वि॒ता। इ॒ह। बो॒धि। अधि॑। श्रवां॑सि। धे॒हि॒। नः॒। त॒नूषु॑॥५॥

पदार्थः-(**यत्**) यः (**त्वा**) त्वाम् (**होतारम्**) विद्यादातारम् (**अनजन्**) कामयेरन् (**मियेधे**) प्रापणीये यज्ञे (**निषादयन्तः**) नितरां स्थापयन्तो वा विज्ञापयन्तः (**यजथाय**) विद्यासङ्गमनाय (**देवाः**) विद्वांसः (**सः**) (**त्वम्**) (**नः**) अस्माकमस्मान् वा (**अग्ने**) विद्वन् (**अविता**) रक्षणादिकर्त्ता (**इह**) अस्मिन् संसारे (**बोधि**) बोधय (**अधि**) उत्कृष्टे (**श्रवांसि**) प्रियाण्यन्नानीव श्रवणानि (**धेहि**) स्थापय (**नः**) अस्माकम् (**तनूषु**) शरीरेषु॥५॥

अन्वयः-हे अग्ने! निषादयन्तो देवा मियेधे यजथाय यद्धोतारं त्वानजन् स त्वमिह नोऽविता सन्नस्मान् बोधि नस्तनूषु श्रवांस्यधि धेहि॥५॥

भावार्थः-हे विद्वांसो! मनुष्या येष्वधिकारेषु युष्मान्नियोजयेयुस्तेषु यथावद्वर्त्तित्वा सर्वान् सभ्यान् भवन्तो निष्पादयेयुर्यथा शिक्षया विद्यासभ्यताऽऽरोग्यायूंषि वर्धेरंस्तथैव सततमनुतिष्ठतेति॥५॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकोनविंशं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वान् पुरुष! **(निषादयन्तः)** अत्यन्त अधिकार में स्थित कराने वा जनानेवाले **(देवाः)** विद्वान् पुरुष **(मियेधे)** प्राप्त होने योग्य यज्ञ में **(यजथाय)** विद्या में बोध कराने के लिये **(यत्)** जिन **(होतारम्)** विद्यादाता **(त्वा)** आपकी **(अनजन्)** कामना करें **(सः)** वह **(त्वम्)** आप **(इह)** इस संसार में **(नः)** हम लोगों की **(अविता)** रक्षा आदि के कर्त्ता हुए हम लोगों को **(बोधि)** बोध कराइये और **(नः)** हम लोगों के **(तनूषु)** शरीरों में **(श्रवांसि)** प्रिय अन्नों के सदृश सम्पदाओं को **(अधि)** उत्तम प्रकार **(धेहि)** स्थित करो॥५॥

भावार्थः-हे विद्वान् मनुष्यो! जिन अधिकारों में आप लोग नियुक्त किये जायें, उन अधिकारों में उत्तम प्रकार वर्त्तमान होके सर्वजनों को श्रेष्ठ बनाइये और जिस शिक्षा से विद्या, सभ्यता, आरोग्यता और अवस्था बढ़े ऐसा उपाय निरन्तर करो॥५॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह उन्नीसवां सूक्त और उन्नीसवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य विंशतितमस्य सूक्तस्य गाथी ऋषिः। विश्वेदेवा देवताः। १ विराट् त्रिष्टुप्। २ निचृत्त्रिष्टुप्। ३ भुरिक् त्रिष्टुप्। ४, ५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वांसः कथं वर्त्तेरन्नित्याह॥

अब तृतीय मण्डल के बीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वान् जन कैसे वर्त्तें, इस विषय को कहा है॥

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः॥ १॥

अग्निम्। उषसम्। अश्विना। दधिऽक्राम्। विऽउष्टिषु। हवते। वह्निः। उक्थैः। सुऽज्योतिषः। नः। शृण्वन्तु। देवाः। सऽजोषसः। अध्वरम्। वावशानाः॥ १॥

पदार्थः-(**अग्निम्**) पावकम् (**उषसम्**) प्रभातकालम् (**अश्विना**) सूर्याचन्द्रमसौ (**दधिक्राम्**) यो धारकान् क्रामति तमश्वम् (**व्युष्टिषु**) विशेषेण दहन्ति यासु क्रियासु तासु (**हवते**) आदत्ते (**वह्निः**) वोढा वायुः (**उक्थैः**) प्रशंसनीयैः कर्मभिः (**सुज्योतिषः**) शोभनानि ज्योतींषि प्रज्ञाप्रकाशा येषां ते (**नः**) अस्मान् (**शृण्वन्तु**) (**देवाः**) विद्वांसः (**सजोषसः**) समानप्रीतिसेवनाः (**अध्वरम्**) अहिंसनीयं व्यवहारम् (**वावशानाः**) भृशं कामयमानाः॥१॥

अन्वयः-हे अध्यापकोपदेशका! यथा वह्निर्व्युष्टिष्वग्निमुषसमश्विना दधिक्रां च हवते तथाऽध्वरं वावशानाः सजोषसः सुज्योतिषो देवा भवन्त उक्थैर्नः शृण्वन्तु॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायुः सर्वान् सूर्यादीन् प्रकाशकान् पदार्थान् धृत्वा सर्वानुपकरोति तथैव विद्वांसः सर्वैः सह वैरत्यागरूपस्याहिंसाधर्मस्य प्रचारायैकमत्या भूत्वा सर्वं जगदुपकुर्युः॥१॥

पदार्थः-हे अध्यापक उपदेशक जनो! जैसे (**वह्निः**) पदार्थों का धारणकर्त्ता (**व्युष्टिषु**) प्रकाशकारक क्रियाओं में (**अग्निम्**) अग्नि (**उषसम्**) प्रातःकाल (**अश्विना**) सूर्य-चन्द्रमा और (**दधिक्राम्**) संसार के धारणकारकों के उल्लङ्घनकर्ता को (**हवते**) ग्रहण करता है, वैसे (**अध्वरम्**) हिंसाभिन्न व्यवहार की (**वावशानाः**) अत्यन्त कामना करते हुए (**सजोषसः**) समान प्रीति के निर्वाहक (**सुज्योतिषः**) शोभन उत्तम बुद्धि के प्रकाशों से युक्त (**देवाः**) विद्वान् आप लोग (**उक्थैः**) प्रशंसा करने योग्य कर्मों से (**नः**) हम लोगों के प्रार्थनारूप वचन (**शृण्वन्तु**) सुनिये॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायु सम्पूर्ण प्रकाशकारी सूर्य आदि पदार्थों के धारण द्वारा सब जीवों का उपकार करता, वैसे विद्वान् पुरुष सम्पूर्ण जनों के साथ वैर छोड़नारूप अहिंसा धर्म के प्रचार के लिये एक सम्मति से सब संसार का उपकार करें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॒ त्री ते॒ वाजि॑ना॒ त्री ष॒धस्था॑ ति॒स्रस्ते॑ जि॒ह्वा ऋ॑तजात पू॒र्वीः।
ति॒स्र उ॑ ते त॒न्वो॑ देववा॑ता॒स्ताभि॑र्नः पाहि॒ गिरो॒ अप्र॑युच्छन्॥ २॥

अग्ने॑। त्री। ते। वाजि॑ना। त्री। स॒धस्था॑। ति॒स्रः। ते॒। जि॒ह्वाः। ऋ॒त॒ऽजा॒त॒। पू॒र्वीः। ति॒स्रः। उ॒म् इति॑। ते॒। त॒न्वः॑। देव॒ऽवा॑ताः। ताभिः॑। नः॒। पा॒हि॒। गिरः॑। अप्र॑ऽयुच्छन्॥ २॥

पदार्थः-(**अग्ने**) पावक इव प्रकाशात्मन् विद्वन्! (**त्री**) त्रीणि (**ते**) तव (**वाजिना**) ज्ञानगमनप्राप्तिरूपाणि (**त्री**) त्रीणि (**सधस्था**) समानस्थानानि (**तिस्रः**) त्रित्वसंख्याताः (**ते**) तव (**जिह्वाः**) विविधा वाणीः (**ऋतजात**) सत्याचरणे प्रसिद्ध (**पूर्वीः**) प्राचीनाः (**तिस्रः**) त्रिविधाः (**उ**) वितर्के (**ते**) तव (**तन्वः**) शरीरस्य (**देववाताः**) ये देवैर्विद्वद्भिः सह वान्ति ते (**ताभिः**) पूर्वोक्ताभिः (**नः**) अस्माकम् (**पाहि**) (**गिरः**) सुशिक्षिता वाचः (**अप्रयुच्छन्**) प्रमादमकुर्वन्॥ २॥

अन्वयः-हे ऋतजाताग्ने! ते तव त्री वाजिना त्री सधस्था ते तिस्रो जिह्वाः पूर्वीरु ते तिस्रस्तन्वो देववाता गिरः सन्ति ताभिरप्रयुच्छन् संस्त्वं नोऽस्मान् पाहि॥ २॥

भावार्थः-हे मनुष्या! ब्रह्मचर्य्याध्ययनमननानि त्रीणि कर्माणि कृत्वा त्रिषु जन्मस्थाननामसु कृतकृत्या भवन्तु अध्यापनोपदेशाभ्यां सर्वेषां रक्षां कुर्वन्तु स्वयं प्रमादरहिता भूत्वाऽन्यानपि तादृशान् सम्पादयन्तु॥ २॥

पदार्थः-हे (**ऋतजात**) सत्य आचरण करने में प्रसिद्ध (**अग्ने**) अग्नि के सदृश प्रकाशस्वरूप विद्वान् पुरुष! (**ते**) आपके (**त्री**) तीन (**वाजिना**) ज्ञान, गमन और प्राप्तिरूप (**त्री**) तीन (**सधस्था**) तुल्य स्थानवाले जन्मादि (**ते**) आपकी (**तिस्रः**) तीन प्रकारवाली (**जिह्वाः**) वाणियां (**पूर्वीः**) प्राचीन (**उ**) और (**ते**) आपके (**तिस्रः**) तीन (**तन्वः**) शरीर सम्बन्धी (**देववाताः**) विद्वानों के साथ संवाद करने में उपकारक (**गिरः**) वचन हैं उनसे (**अप्रयुच्छन्**) अहङ्कारत्यागी आप (**नः**) हम लोगों की (**पाहि**) रक्षा करो॥ २॥

भावार्थः-हे मनुष्यो! आप लोग ब्रह्मचर्य्य, अध्ययन और विचार से तीन कर्म करके; तीन जन्म, स्थान और नामों से कृतकृत्य अर्थात् जन्म सफल करो; पढ़ाने तथा उपदेश से सबकी रक्षा करो; और आप स्वयं प्रमादरहित होकर अन्य लोगों को वैसा ही करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॒ भूरी॑णि॒ तव॑ जातवेदो॒ देव॑ स्वधावो॒ऽमृत॑स्य॒ नाम॑।
याश्च॑ मा॒या मा॒यिना॑ विश्वमिन्व॒ त्वे पू॒र्वीः सं॑दु॒धुः पृ॑ष्टबन्धो॥ ३॥

अग्नेऽभूरीणि। तवऽजातऽवेदः। देवऽस्वधाऽवः। अमृतस्य। नामऽयाः। चऽमाया। मायिनाम्। विश्वम्ऽइन्व। त्वे इति। पूर्वीः। सम्ऽदधुः। पृष्टबन्धो इति पृष्टऽबन्धो॥३॥

पदार्थः-(**अग्ने**) प्रकाशात्मन् (**भूरीणि**) बहूनि (**तव**) (**जातवेदः**) प्रजातविज्ञान (**देव**) विद्वन् (**स्वधावः**) प्रशस्तानि स्वधा अमृतरूपाण्यन्नानि विद्यन्ते यस्य तत्सम्बुद्धौ (**अमृतस्य**) नाशरहितस्य (**नाम**) प्रसिद्धानि नामानि (**याः**) (**च**) (**माया**) प्रज्ञाः (**मायिनाम्**) कुत्सिता माया प्रज्ञा विद्यते येषां तेषाम् (**विश्वमिन्व**) विश्वं सर्वं जगन्मिन्वं व्याप्तं येन तत्सम्बुद्धौ (**त्वे**) त्वयि (**पूर्वीः**) पुरातनीः प्रजाः (**सन्दधुः**) सन्धिताः कुर्य्युः (**पृष्टबन्धो**) यः पृष्टान् जनानुत्तरेषु बध्नाति तत्सम्बुद्धौ॥३॥

अन्वयः-हे स्वधावो जातवेदो देवाऽग्ने! यानि तव भूरीण्यमृतस्य नाम नामानि सन्ति। हे पृष्टबन्धो विश्वमिन्व याश्च पूर्वीस्त्वे सन्दधुर्मायिनां माया च हन्युस्ते विज्ञानवन्तो जायन्ते॥३॥

भावार्थः-हे मनुष्या! यूयं सर्वं जगत्परमेश्वरेण व्याप्यं मन्यध्वं छलीनां छलं घ्नत परमेश्वरस्यार्थवन्ति सर्वाणि नामानि बुध्वाऽर्थानुकूलतया स्वाचरणानि कुर्वन्तु॥३॥

पदार्थः-हे (**स्वधावः**) प्रशंसनीय अमृतरूप अन्नयुक्त (**जातवेदः**) श्रेष्ठ विज्ञानयुक्त (**देव**) विद्वान् पुरुष! (**अग्ने**) विद्या द्वारा प्रकाशकारक जो (**तव**) आपके (**भूरीणि**) बहुत (**अमृतस्य**) नाशरहित के नाम हैं। हे (**पृष्टबन्धो**) मनुष्यों के कर्मानुसार फलदायक (**विश्वमिन्व**) सम्पूर्ण जगत् में व्यापक (**याः**) जो (**पूर्वीः**) प्राचीन प्रजायें (**त्वे**) आप में (**सन्दधुः**) स्थित की गई हैं (**मायिनाम्**) निकृष्ट बुद्धियुक्त पुरुषों की (**माया**) बुद्धिनाश हो तो (**च**) भी अन्य पुरुष विज्ञानयुक्त होवें॥३॥

भावार्थः-हे मनुष्यो! आप लोग **[**और**]** सम्पूर्ण संसार ईश्वर से व्याप्य अर्थात् पूरित जानो और छली पुरुषों के छल का नाश तथा परमेश्वर के अर्थसहित सम्पूर्ण नाम जान के, अर्थ के अनुकूल भाव से अपने आचरणों को शुद्ध करो॥३॥

पुनरग्निदृष्टान्तेन विद्वत्कर्त्तव्यमाह॥

फिर अग्नि के दृष्टान्त से विद्वान् का कर्त्तव्य कहते हैं॥

अग्निर्नेता भगइव क्षितीनां दैवीनां देव ऋतुपा ऋतावा।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम्॥४॥

अग्निः। नेता। भगःऽइव। क्षितीनाम्। दैवीनाम्। देवः। ऋतुऽपाः। ऋतऽवा। सः। वृत्रऽहा। सनयः। विश्वऽवेदाः। पर्षत्। विश्वा। अति। दुःऽइता। गृणन्तम्॥४॥

पदार्थः-(**अग्निः**) पावकः (**नेता**) गमकः (**भगइव**) सूर्य्य इव (**क्षितीनाम्**) भूमीनाम् (**दैवीनाम्**) देवेषु दिव्यगुणेषु भवानाम् (**देवः**) सुखप्रदाता (**ऋतुपाः**) य ऋतुं पाति रक्षति सः (**ऋतावा**) य ऋतं

संभजति **(सः)** **(वृत्रहा)** मेघस्य हन्ता सूर्य्य इव **(सनयः)** सनातनः **(विश्ववेदाः)** यो विश्वं वेत्ति सः **(पर्षत्)** पारं प्रापयतु **(विश्वा)** सर्वाणि **(अति)** उल्लंघने **(दुरिता)** दुष्टाचरणानि **(गृणन्तम्)** स्तुवन्तम्॥४॥

अन्वयः-यो भगइव दैवीनां क्षितीनां नेता ऋतुपा ऋतावा देवो वृत्रहेव सनयो विश्ववेदा अग्निर्गृणन्तं विश्वा दुरिताति पर्षत् सोऽस्माभिस्सदैव सेवनीयः॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथाग्निः सूर्यादिरूपेण पृथिव्यादीन् पदार्थान्नियमन्नयति यथा जगदीश्वरः सदा सर्वं जगद्व्यवस्थापयति तथैवोपासित ईश्वरः सेवितो विद्वान् सर्वेभ्यः पापाचरणेभ्यः पृथक् कृत्य दुःखार्णवात् पारं नयति॥४॥

पदार्थः-जो **(भगइव)** सूर्य्य के तुल्य **(दैवीनाम्)** श्रेष्ठ गुणों में उत्पन्न **(क्षितीनाम्)** भूमियों का **(नेता)** अग्रणी **(ऋतुपाः)** ऋतुओं के रक्षक **(ऋतावा)** सत्यकर्म निर्वाहक **(देवः)** सुखदायक **(वृत्रहा)** मेघों के नाशक सूर्य्य के सदृश **(सनयः)** अनादि सिद्ध **(विश्ववेदाः)** संसार के ज्ञाता **(अग्निः)** अग्नि के सदृश तेजस्वी **(गृणन्तम्)** स्तुतिकारक को **(विश्वा)** सम्पूर्ण पुरुषों के **(दुरिता)** दुष्ट आचरणों को **(अति)** उल्लङ्घन करके **(पर्षत्)** पार पहुँचावे **(सः)** वह परमात्मा हम लोगों से सेवने योग्य है॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अग्नि, सूर्य्य आदि रूप धारण करके पृथिवी आदि पदार्थों को नियमपूर्वक अपने स्थान में स्थित रखता और जैसे जगदीश्वर सर्वदा सम्पूर्ण जगत् की व्यवस्था करता है, वैसे ही उपासित हुआ ईश्वर तथा सेवित हुआ विद्वान् पुरुष सम्पूर्ण पापाचरणों से पृथक् करके दुःखरूप समुद्र के पार पहुँचाता है॥४॥

पुनर्विद्वन्मनुष्यकर्त्तव्यमाह॥

फिर विद्वान् मनुष्य के कर्त्तव्य को कहते हैं॥

दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम्।
अश्विना मित्रावरुणा भगं च वसून् रुद्राँ आदित्याँ इह हुवे॥५॥२०॥

दधिऽक्राम्। अग्निम्। उषसम्। च। देवीम्। बृहस्पतिम्। सवितारम्। च। देवम्। अश्विना। मित्रावरुणा। भगम्। च। वसून्। रुद्रान्। आदित्यान्। इह। हुवे॥५॥

पदार्थः-**(दधिक्राम्)** यो भूम्यादीन् दधीन् धर्त्रीन् पदार्थान् क्रामति तम् **(अग्निम्)** विद्युतम् **(उषसम्)** प्रभातम् **(च)** **(देवीम्)** देदीप्यमानां कमनीयाम् **(बृहस्पतिम्)** बृहतां पालकं वायुम् **(सवितारम्)** सूर्य्यम् **(च)** सकलजगदुत्पादकं परमेश्वरम् **(देवम्)** कमनीयं दातारम् **(अश्विना)** अध्यापकोपदेशकौ **(मित्रावरुणा)** प्राणोदानौ **(भगम्)** सकलैश्वर्यप्रदं व्यवहारम् **(च)** **(वसून्)** भूम्यादीन् **(रुद्रान्)** प्राणान् **(आदित्यान्)** संवत्सरस्य मासान् **(इह)** **(हुवे)** स्तुवे गृह्णामि॥५॥

अन्वयः-हे मनुष्या! यथाहमिह दधिक्रामग्निं देवीमुषसं च बृहस्पतिं सवितारं परमेश्वरं देवं चाश्विना मित्रावरुणा भगं वसून् रुद्रानादित्याँश्च हुवे तथैव यूयमप्येतान् सततमाह्वयत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वैर्मनुष्यैः यथा विद्वांसोऽस्याः सृष्टेरुपकारकैः पदार्थैः सर्वाणि कार्य्याणि साध्नुवन्ति तथैतान् विदित्वा सर्वाण्यभीष्टानि कार्य्याणि साधनीयानि सर्वैः परमेश्वरः सततमुपासनीयश्चेति॥५॥

अत्राग्न्यादिविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति विंशतितमं सूक्तं विंशतितमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे मैं **(इह)** इस संसार में **(दधिक्राम्)** भूमि आदि धारण करनेवाले पदार्थों को उल्लङ्घन करके वर्त्तमान **(अग्निम्)** बिजुली रूप अग्नि **(देवीम्)** प्रकाशमान तथा कामना करने योग्य **(उषसम्)** प्रातःकाल **(च)** और **(बृहस्पतिम्)** बड़े-बड़े पदार्थों का रक्षक वायु **(सवितारम्)** सूर्य्य और सम्पूर्ण संसार की उत्पत्ति करनेवाला **(देवम्)** कामना योग्य दानशील ईश्वर **(च)** और **(अश्विना)** अध्यापक उपदेशकर्त्ता **(मित्रावरुणा)** प्राण और उदान वायु **(भगम्)** सम्पूर्ण ऐश्वर्य्य को देनेवाला व्यवहार **(वसून्)** भूमि आदि पदार्थ **(रुद्रान्)** प्राण **(च)** और **(आदित्यान्)** संवत्सरों में मासों की **(हुवे)** स्तुति करता हूँ वा ग्रहण करता हूँ, वैसे ही तुम लोग इनकी निरन्तर स्तुति वा ग्रहण करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को चाहिये कि जैसे विद्वान् लोग इस सृष्टि के उपकारक पदार्थों से सम्पूर्ण कार्य्यों को सिद्ध करते हैं, वैसे ही उन पदार्थों के गुणों को जानकर सम्पूर्ण अभीष्ट कार्यों को सिद्ध करें और सर्व जनों से ईश्वर उपासना करने योग्य है॥५॥

इस सूक्त में अग्नि आदि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह बीसवां सूक्त और बीसवां वर्ग पूरा हुआ॥

अथ पञ्चर्चस्यैकाधिकविंशतितमस्य सूक्तस्य कौशिको गाथी ऋषिः। अग्निर्देवता। १, ४ त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ३ अनुष्टुप् छन्दः। गान्धारः स्वरः। ५ विराट् बृहती छन्दः। मध्यमः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब पाँच ऋचावाले इक्कीसवें सूक्त का प्रारम्भ है। इसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य॥ १॥

इमम्। नः। यज्ञम्। अमृतेषु। धेहि। इमा। हव्या। जातऽवेदः। जुषस्व। स्तोकानाम्। अग्ने। मेदसः। घृतस्य। होतरिति। प्र। अशान। प्रथमः। निऽसद्य॥ १॥

पदार्थः-(**इमम्**) (**नः**) अस्माकम् (**यज्ञम्**) विद्वत्सत्कारसत्सङ्गशुभगुणदानाख्यम् (**अमृतेषु**) नाशरहितेषु पदार्थेषु (**धेहि**) (**इमा**) इमानि (**हव्या**) होतुं धर्मार्थकाममोक्षान् साधयितुमर्हाणि साधनानि (**जातवेदः**) जातविज्ञान (**जुषस्व**) सेवस्व (**स्तोकानाम्**) अल्पानां पदार्थानाम् (**अग्ने**) विद्वन् (**मेदसः**) स्निग्धस्य (**घृतस्य**) (**होतः**) दातः (**प्र**) (**अशान**) भुङ्क्ष्व (**प्रथमः**) आदिमः (**निषद्य**)॥१॥

अन्वयः-हे जातवेदो! मेदसो घृतस्य स्तोकानां होतरग्ने प्रथमस्त्वं निषद्य सुखं प्राशान न इमं यज्ञं जुषस्वेमा हव्या अमृतेषु धेहि॥१॥

भावार्थः-यथान्नपानादीनां दाता अन्येषां प्रियो भवति तथैव विद्यासुशिक्षाधर्मज्ञानप्रापको जिज्ञासूनां प्रियो भवति॥१॥

पदार्थः-हे (**जातवेदः**) सम्पूर्ण उत्पन्न पदार्थों के ज्ञाता! (**मेदसः**) चिकने (**घृतस्य**) घृत और (**स्तोकानाम्**) छोटे पदार्थों के (**होतः**) दाता (**अग्ने**) विद्वान् पुरुष (**प्रथमः**) पूर्वकाल में वर्त्तमान आप (**निषद्य**) स्थित होकर (**प्र**) (**अशान**) सुख को भोगो (**नः**) हम लोगों के (**इमम्**) इस (**यज्ञम्**) विद्वानों के सत्कार, सत्सङ्ग, शुभ गुणों और दानरूप कर्म का (**जुषस्व**) सेवन कीजिये (**इमा**) इन (**हव्या**) धर्म, अर्थ, काम, मोक्ष की सिद्धि के लिये योग्य साधनों को (**अमृतेषु**) नाशरहित पदार्थों में (**धेहि**) स्थापन करो॥१॥

भावार्थः-जैसे अन्न जल आदि का दाता पुरुष अन्य पुरुषों को प्रिय होता, वैसे विद्या, उत्तम शिक्षा और धर्म सम्बन्धी ज्ञान प्राप्त करानेवाला जन इन कर्मों को जानने की इच्छायुक्त पुरुषों का प्रिय होता है॥१॥

अथ धर्मोपदेशकाः किंवत्पालयन्तीत्याह॥

अब धर्म्मोपदेशक किसके तुल्य रक्षा करते हैं, इस विषय को अगले मन्त्र में कहा है॥

घृतवन्तः पावक ते स्तोकाः श्चोतन्ति मेदसः।

स्वधर्मन् देववीतये श्रेष्ठं नो धेहि वार्यम्॥ २॥

घृतऽवन्तः। पावक। ते। स्तोकाः। श्चोतन्ति। मेदसः। स्वऽधर्मन्। देवऽवीतये। श्रेष्ठम्। नः। धेहि। वार्यम्॥ २॥

पदार्थः-(**घृतवन्तः**) प्रशस्तं बहु वा घृतमाज्यमुदकं वा विद्यते येषान्ते (**पावक**) अग्निवत्पवित्रकारक (**ते**) तव (**स्तोकाः**) अल्पाः (**श्चोतन्ति**) सिञ्चन्ति (**मेदसः**) स्निग्धाः (**स्वधर्मन्**) स्वस्य वैदिके धर्मणि (**देववीतये**) विद्वत्प्राप्तये (**श्रेष्ठम्**) अतिशयेन प्रशस्तम् (**नः**) अस्मभ्यम् (**धेहि**) देहि (**वार्य्यम्**) वर्तुमर्ह धनम्॥ २॥

अन्वयः-हे पावक! यस्य ते घृतवन्तो मेदसः स्तोकाः श्चोतन्ति स त्वं देववीतये श्रेष्ठं वार्य्यं स्वधर्मन्नो धेहि॥ २॥

भावार्थः-यथा पावकः स्वकर्मणा जलादिपदार्थान् शुद्धान् कृत्वा वर्षादिरूपेण सर्वान् सिक्त्वा सर्वान् जीवयति तथैव विद्याधर्म्मोपदेशकाः सर्वान् मनुष्यान् पालयन्ति॥ २॥

पदार्थः-हे (**पावक**) अग्नि के सदृश पवित्रकर्त्ता! जिन (**ते**) आपके (**घृतवन्तः**) उत्तम वा अधिक घृतवाले तथा जलयुक्त (**मेदसः**) चिकने (**स्तोकाः**) थोड़े पदार्थ (**श्चोतन्ति**) सिञ्चन करते हैं वह आप (**देववीतये**) विद्वानों की प्राप्ति के लिये (**श्रेष्ठम्**) अति उत्तम (**वार्य्यम्**) स्वीकार करने योग्य धन (**स्वधर्मन्**) अपने वैदिक धर्म में (**नः**) हम लोगों के लिये (**धेहि**) दीजिये॥ २॥

भावार्थः-जैसे अग्नि जल आदि पदार्थों को अपने कर्म से शुद्ध कर वर्षा आदि रूप से सम्पूर्ण पदार्थों को सींच कर सब जीवों की रक्षा करते हैं, वैसे ही विद्या और धर्म के उपदेशक लोग सम्पूर्ण मनुष्यों का पालन करते हैं॥ २॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहा है॥

तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य।

ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव॥ ३॥

तुभ्यम्। स्तोकाः। घृतऽश्चुतः। अग्ने। विप्राय। सन्त्य। ऋषिः। श्रेष्ठः। सम्। इध्यसे। यज्ञस्य। प्रऽअविता। भव॥ ३॥

पदार्थः-(**तुभ्यम्**) (**स्तोकाः**) स्तावकाः (**घृतश्चुतः**) घृतेन सिक्ताः (**अग्ने**) विद्वन् (**विप्राय**) मेधाविने (**सन्त्य**) सन्तिषु सत्याऽसत्यविभाजकेषु साधो (**ऋषिः**) मन्त्रार्थवेत्ता (**श्रेष्ठः**) श्रेयान् (**सम्**) (**इध्यसे**) प्रकाश्यसे (**यज्ञस्य**) सङ्गतस्य व्यवहारस्य (**प्राविता**) प्रकर्षेण रक्षकः (**भव**)॥ ३॥

अन्वयः-हे सन्त्याग्ने! ये घृतश्चुतः स्तोका विप्राय तुभ्यं श्चोतन्ति श्रेष्ठ ऋषिस्त्वं समिध्यसे स त्वं यज्ञस्य प्रावित भव॥३॥

भावार्थः-हे विद्वांसो! ये युष्मान् स्तुवन्ति तान् यूयं वेदार्थविदः कुरुत यतः परस्परेषां रक्षणं स्यात्॥३॥

पदार्थः-हे **(सन्त्य)** सत्य और असत्य के विभाग करनेवालों में कुशल प्रवीण **(अग्ने)** विद्वान् पुरुष! जो **(घृतश्चुतः)** घृत से सींचे गए **(स्तोकाः)** स्तुतिकर्त्ता लोग **(विप्राय)** बुद्धिमान् **(तुभ्यम्)** तुम्हारे लिये प्राप्त होते हैं और **(श्रेष्ठः)** उत्तम **(ऋषिः)** वेदमन्त्र और उनके अर्थ के ज्ञाता आप **(समिध्यसे)** प्रताप वा प्रकाशयुक्त किये जाते ऐसे आप **(यज्ञस्य)** सङ्गति के योग्य व्यवहार के **(प्रावित)** अत्यन्त रक्षाकारक **(भव)** होइये॥३॥

भावार्थः-हे विद्वान् लोगो! जो लोग आपकी स्तुति करते हैं, उन पुरुषों को आप लोग वेद के अर्थ ज्ञानवाले कीजिये, जिससे एक सम्मति से परस्पर रक्षा होवे॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

तुभ्यꣳ श्चोतन्त्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर॥४॥

तुभ्यम्। श्चोतन्ति। अध्रिगो इत्यध्रिऽगो। शचीऽवः। स्तोकासः। अग्ने। मेदसः। घृतस्य। कविऽशस्तः। बृहता। भानुना। आ। अगाः। हव्या। जुषस्व। मेधिर॥४॥

पदार्थः-**(तुभ्यम्)** **(श्चोतन्ति)** सिञ्चन्ति **(अध्रिगो)** योऽध्रीन् मन्त्रान् गच्छति जानाति तत्सम्बुद्धौ **(शचीवः)** शची प्रशस्ता प्रज्ञा विद्यते यस्य तत्सम्बुद्धौ **(स्तोकासः)** गुणानां स्तावकाः **(अग्ने)** अग्निरिव प्रकाशक **(मेदसः)** स्निग्धस्य **(घृतस्य)** आज्यस्योदकस्य वा **(कविशस्तः)** कविभिर्विद्वद्भिः प्रशंसितः **(बृहता)** महता **(भानुना)** तेजसा **(आ)** **(अगाः)** गच्छेः **(हव्या)** दातुमर्हाणि वस्तूनि **(जुषस्व)** सेवस्व **(मेधिर)** मेधाविन्॥४॥

अन्वयः-हे अध्रिगो शचीवो मेधिराऽग्ने! ये स्तोकासो मेदसो घृतस्य तुभ्यं श्चोतन्ति तैः सह कविशस्तस्त्वं बृहता भानुना सूर्य इवागाः हव्या जुषस्व॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोदकेन सिक्त्वा वृक्षान् वर्द्धयित्वा फलानि प्राप्नुवन्ति तथैव सत्सङ्गेन सत्पुरुषान् सेवयित्वा विज्ञानादिफलानि प्राप्नुयुः॥४॥

पदार्थः-हे **(अध्रिगोः)** वेदमन्त्रों के ज्ञाता **(शचीवः)** प्रशंसनीय बुद्धियुक्त **(मेधिर)** बुद्धिमान् पुरुष **(अग्ने)** अग्नि के सदृश प्रकाशकारक! जो पुरुष **(स्तोकासः)** उत्तम गुणों के स्तुतिकर्त्ता **(मेदसः)**

चिकने **(घृतस्य)** घृत का **(तुभ्यम्)** तेरे लिये **(श्चोतन्ति)** सेचन करते उनके साथ **(कविशस्तः)** विद्वानों से प्रशंसित हुआ **(बृहता)** बड़े **(भानुना)** तेज से सूर्य के सदृश **(आ) (अगाः)** प्राप्त हो और **(हव्या)** देने योग्य वस्तुओं का **(जुषस्व)** सेवन करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जल से सींच कर वृक्षों को बढ़ाय फल प्राप्त होते हैं, वैसे ही सत्सङ्ग से सत्पुरुषों का सेवन करके विज्ञान आदि फलों को प्राप्त करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि॥५॥२१॥

ओजिष्ठम्। ते। मध्यतः। मेदः। उत्ऽभृतम्। प्र। ते। वयम्। ददामहे। श्चोतन्ति। ते। वसोऽइति। स्तोकाः। अधि। त्वचि। प्रति। तान्। देवऽशः। विहि॥५॥

पदार्थः-**(ओजिष्ठम्)** अतिशयेन बलिष्ठम् **(ते)** तव **(मध्यतः) (मेदः)** स्नेहः **(उद्भृतम्)** उत्कृष्टतया धृतम् **(प्र) (ते)** तुभ्यम् **(वयम्) (ददामहे) (श्चोतन्ति)** सिञ्चन्ति **(ते)** तव **(वसो)** वासहेतो **(स्तोकाः)** स्तावकाः **(अधि)** उपरिभावे **(त्वचि) (प्रति) (तान्) (देवशः)** देवान् **(विहि)** प्राप्नुहि। अत्रा**न्येषामपि दृश्यत** इत्याद्यचो ह्रस्वः॥५॥

अन्वयः-हे वसो! ते मध्यतो यदोजिष्ठं मेद उद्भृतं तत्ते वयं प्रददामहे ये स्तोकास्तेऽधि त्वचि श्चोतन्ति तान् देवशः प्रति विहि॥५॥

भावार्थः-यो हि अतीव हृद्यं वस्तु यस्मै दद्यात्तेन तस्मै तादृशमेव देयं ये विदुषां सङ्गेन दिव्यान् गुणान् प्राप्नुवन्ति ते सर्वान् कोमलस्वभावान् कर्तुं शक्नुवन्तीति॥५॥

अत्राग्निमनुष्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकाधिकविंशतितमं सूक्तमेकाधिकविंशतितमश्च वर्गस्समाप्तः॥

पदार्थः-हे **(वसो)** निवास के कारण! **(ते)** आपके **(मध्यतः)** मध्य से जो **(ओजिष्ठम्)** अति बलयुक्त **(मेदः)** प्रीति **(उद्भृतम्)** उत्तम प्रकार धारण की गयी, उसको **(ते)** आपके लिये **(वयम्)** हम लोग **(प्र, ददामहे)** देते हैं, जो **(स्तोकाः)** स्तुतिकारक **(ते)** आपके **(अधि)** ऊपर **(त्वचि)** चर्म में **(श्चोतन्ति)** सिञ्चन करते हैं **(तान्)** उन **(देवशः)** विद्वानों के **(प्रति)** समीप **(विहि)** प्राप्त होइये॥५॥

भावार्थ:-जो पुरुष बहुत ही उत्तम वस्तु जिस पुरुष को देवे, उस पुरुष को चाहिये कि उस देनेवाले पुरुष को वैसी ही वस्तु देवे और जो लोग विद्वानों के सत्सङ्ग से श्रेष्ठ गुणों को प्राप्त होते हैं, वे सम्पूर्ण जनों को कोमल स्वभावयुक्त कर सकते हैं॥५॥

इस सूक्त में अग्नि और मनुष्यों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्कीसवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य द्वाविंशतितमस्य सूक्तस्य गाथी ऋषिः। पुरीष्या अग्नयो देवताः। १ त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ३ भुरिक् पङ्क्तिः। ५ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ विराडनुष्टुप् छन्दः। ऋषभः स्वरः॥

अथाग्निगुणमाह॥

अब बाईसवें सूक्त का प्रारम्भ है। इसके प्रथम मन्त्र से अग्नि के गुणवर्णन विषय को कहते हैं॥

अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः॥ १॥

अयम्। सः। अग्निः। यस्मिन्। सोमम्। इन्द्रः। सुतम्। दधे। जठरे। वावशानः। सहस्रिणम्। वाजम्। अत्यम्। न। सप्तिम्। ससऽवान्। सन्। स्तूयसे। जातऽवेदः॥ १॥

पदार्थः-(**अयम्**) (**सः**) (**अग्निः**) विद्युत् (**यस्मिन्**) (**सोमम्**) पदार्थसमूहम् (**इन्द्रः**) जीवः (**सुतम्**) निष्पन्नम् (**दधे**) धरति (**जठरे**) उदराग्नौ (**वावशानः**) भृशं कामयमानः (**सहस्रिणम्**) असंख्यं बलं विद्यते यस्मिँस्तम् (**वाजम्**) वेगम् (**अत्यम्**) व्यापकं शीघ्रगामिनं वायुम् (**न**) इव (**सप्तिम्**) अग्न्याख्यमश्वम् (**ससवान्**) संभाजकः (**सन्**) (**स्तूयसे**) (**जातवेदः**) जातविद्य॥ १॥

अन्वयः-हे जातवेदो! यस्मिन्नयमग्निः सहस्रिणं वाजमत्यं न सप्तिं दधे तस्मिन् वावशान इन्द्रो भवान् जठरे सुतं सोमन्दधे स त्वं ससवान् सन् स्तूयसे॥ १॥

भावार्थः-यदि मनुष्या विद्ययाग्निं चालयेयुस्तर्ह्ययं सहस्राणामश्वानां बलन्धरति॥ १॥

पदार्थः-हे (**जातवेदः**) उत्तम विद्याधारी! (**यस्मिन्**) जिसमें (**अयम्**) यह (**अग्निः**) बिजुली (**सहस्रिणम्**) असंख्य पराक्रमयुक्त (**वाजम्**) वेग और (**अत्यम्**) व्यापक शीघ्र चलनेवाले वायु के (**न**) तुल्य (**सप्तिम्**) अग्निनामक अश्व को (**दधे**) धारण करता है, उसमें (**वावशानः**) अत्यन्त कामना करनेवाला (**इन्द्रः**) जीवात्मा आप (**जठरे**) पेट की अग्नि में (**सुतम्**) उत्पन्न (**सोमम्**) पदार्थों के समूह के धारणकर्त्ता आप (**ससवान्**) विभागकारक (**सन्**) होकर (**स्तूयसे**) स्तुति करने योग्य हो॥ १॥

भावार्थः-जो मनुष्य विद्या से अग्नि को चलावें तो यह अग्नि हजारों घोड़ों के बल को धारण करता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः॥ २॥

अग्नेऽयत्। तेदिवि। वर्चः। पृथिव्याम्। यत्। ओषधीषु। अप्ऽसु। आ। यजत्र। येन। अन्तरिक्षम्। उरु। आऽततन्थ। त्वेषः। सः। भानुः। अर्णवः। नृऽचक्षाः॥ २॥

पदार्थः-(**अग्ने**) पावकवद्वर्त्तमान (**यत्**) (**ते**) तव (**दिवि**) प्रकाशे (**वर्चः**) दीप्तिः (**पृथिव्याम्**) (**यत्**) (**ओषधीषु**) सोमादिषु (**अप्सु**) जलेषु (**आ**) समन्तात् (**यजत्र**) सङ्गन्तः (**येन**) (**अन्तरिक्षम्**) (**उरु**) (**आततन्थ**) समन्तात् तनोति (**त्वेषः**) दीप्तिमान् (**सः**) (**भानुः**) दीप्तिमान् (**अर्णवः**) समुद्र इव (**नृचक्षाः**) नृणां द्रष्टा॥ २॥

अन्वयः-हे यजत्राग्ने! ते दिवि यद्वर्चो यत्पृथिव्यां यदोषधीषु यदप्स्वा वर्त्तते येनोर्वन्तरिक्षमाततन्थ स त्वं त्वेषो भानुरर्णव इव नृचक्षा भव॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यद्विद्युताख्यं तेजः सूर्य्ये वायौ भूमौ जलेऽन्यत्र चोषध्यादिषु वर्त्तते तद्विज्ञाय सुखानि विस्तारयत॥ २॥

पदार्थः-हे (**यजत्र**) प्रीति के पात्र (**अग्ने**) अग्नि के सदृश तेजस्वी! (**ते**) आपके (**दिवि**) प्रकाश में (**यत्**) जो (**वर्चः**) तेज (**यत्**) जो (**पृथिव्याम्**) पृथिवी में (**ओषधीषु**) जो ओषधियों में और जो तेज (**अप्सु**) जलों में (**आ**) अच्छा वर्त्तमान है तथा (**येन**) जिस तेज से (**अन्तरिक्षम्**) पोलरूप (**उरु**) वक्षःस्थल (**आततन्थ**) सब ओर से विस्तारकर्त्ता (**सः**) वह आप (**त्वेषः**) प्रकाशमान (**भानुः**) दीप्तियुक्त (**अर्णवः**) समुद्र के सदृश (**नृचक्षाः**) मनुष्यों के देखनेवाले होइये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो बिजुली नामक तेज सूर्य्य, वायु, भूमि और जल में तथा अन्य पदार्थों ओषधी आदि में वर्त्तमान उसको जान के सुख का विस्तार करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्नेदिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये।
या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः॥ ३॥

अग्नेदिवः। अर्णम्। अच्छ। जिगासि। अच्छ। देवान्। ऊचिषे। धिष्ण्याः। ये। याः। रोचने। परस्तात्। सूर्यस्य। याः। च। अवस्तात्। उपऽतिष्ठन्ते। आपः॥ ३॥

पदार्थः-(**अग्ने**) अग्निसदृश विद्वन् पुरुष! (**दिवः**) सूर्य्यप्रकाशात् (**अर्णम्**) उदकम् (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**जिगासि**) स्तौषि (**अच्छ**)। अत्र **निपातस्य चे**ति दीर्घः। (**देवान्**) दिव्यगुणान् मनुष्यान् (**ऊचिषे**) उच्याः (**धिष्ण्याः**) धर्षितुं योग्याः (**ये**) (**याः**) (**रोचने**) सूर्य्यप्रकाशे (**परस्तात्**) (**सूर्य्यस्य**) सवितृमण्डलस्य (**याः**) (**च**) (**अवस्तात्**) अधस्तात् (**उपतिष्ठन्ते**) (**आपः**)॥ ३॥

अन्वयः-हे अग्ने! त्वं यथाग्निर्दिवोऽर्णमच्छ गमयति तथाच्छ जिगासि देवानच्छोचिषे याः सूर्य्यस्य रोचने परस्तात् याश्च धिष्ण्या आपोऽवस्तादुपतिष्ठन्ते य एता विजानीयुस्तेऽद्भ्य उपकारं ग्रहीतुं शक्नुयुः॥३॥

भावार्थः-यथा सूर्य्योऽन्धकारं विनाश्य दिनं जनयित्वाऽऽपो वर्षयित्वा च सर्वान् सुखयति तथैव विद्वांसोऽविद्यां विनाश्य विद्यां जनयित्वा सुखानि वर्षयित्वा सर्वानानन्दयन्ति॥३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वान् पुरुष! आप जैसे अग्नि **(दिवः)** सूर्य्य के प्रकाश से **(अर्णम्)** जल को **(अच्छ)** अच्छे प्रकार प्राप्त होता है, वैसे **(अच्छ)** उत्तम प्रकार **(जिगासि)** स्तुति करो **(देवान्)** उत्तम गुणयुक्त मनुष्यों की **(ऊचिषे)** अच्छे प्रकार स्तुति करते हो **(याः)** जो **(सूर्य्यस्य)** सूर्य्यमण्डल के **(रोचने)** प्रकाश में **(परस्तात्)** ऊपर **(च)** और **(याः)** जो **(धिष्ण्याः)** धर्षण करने योग्य **(आपः)** जल **(अवस्तात्)** नीचे से **(उपतिष्ठन्ते)** प्राप्त होते हैं **(ये)** जो लोग इन जलों के गुणों को जानते, वे जलों से उपकार ले सकते हैं॥३॥

भावार्थः-जैसे सूर्य्य अन्धकार का नाश कर दिन को उत्पन्न कर और जल की वृष्टि करके सम्पूर्ण संसार का सुखकारक होता है, वैसे ही विद्वान् लोग अविद्या का नाश, विद्या की उत्पत्ति और सुख की वृष्टि करके सबको आनन्दित करते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः।
जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः॥४॥

पुरीष्यासः। अग्नयः। प्रवणेभिः। सऽजोषसः। जुषन्ताम्। यज्ञम्। अद्रुहः। अनमीवाः। इषः। महीः॥४॥

पदार्थः-(**पुरीष्यासः**) पुरीषेषु पालकेषु पृथिव्यादिषु व्यापकत्वेन भवाः **(अग्नयः)** पावका इव वर्त्तमानाः **(प्रवणेभिः)** गमनादिभिः। अत्र**ान्येषामपी**त्याद्यचो दीर्घः। **(सजोषसः)** समानप्रीति-सेवनाः **(जुषन्ताम्)** सेवन्ताम् **(यज्ञम्)** सङ्गतिमयम् **(अद्रुहः)** द्वेषरहिताः **(अनमीवाः)** नीरोगाः **(इषः)** अन्नानि **(महीः)** महतीर्वाचः। **महीति वाङ्नामसु पठितम्।** (निघं०१.११)॥४॥

अन्वयः-हे विद्वांसो! भवन्तः पुरीष्यासोऽग्नय इव सजोषसोऽद्रुहोऽनमीवाः सन्तो प्रवणेभिर्यज्ञमिषो महीश्च जुषन्ताम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्न्यादयः पदार्थाः परस्परं मिलितास्सन्तोऽनेकानि कार्य्याणि साध्नुवन्ति तथैव सखायोऽरोगास्सन्तो विद्वांसो धनधान्यैश्वर्यं विद्याश्च प्राप्नुवन्तु॥४॥

पदार्थः-हे **(विद्वानो)**! आप लोग **(पुरीष्यासः)** पालक पृथिवी आदि पदार्थों में व्यापक भाव से वर्त्तमान **(अग्नयः)** अग्नियों के सदृश तेजयुक्त **(सजोषसः)** तुल्य प्रीति के निर्वाहक **(अद्रुहः)** द्वेषरहित **(अनमीवाः)** रोग से रहित हुए **(प्रवणेभिः)** गमन आदिकों से **(यज्ञम्)** मेलरूप यज्ञ **(इषः)** अन्न और **(महीः)** श्रेष्ठ वाणियों का **(जुषन्ताम्)** सेवन करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि आदि पदार्थ परस्पर मिल कर अनेक कार्य्यों को सिद्ध करते हैं, वैसे ही मित्रभाव से वर्त्तमान रोग से रहित हुए विद्वान् लोग धनधान्य ऐश्वर्य्य और विद्या को प्राप्त होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥५॥२२॥

इळाम्। अग्ने। पुरुऽदंसम्। सनिम्। गोः। शश्वत्ऽतमम्। हवमानाय। साध। स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति॥५॥

पदार्थः-**(इळाम्)** पृथिवीम् **(अग्ने)** अग्निरिव विद्याप्रकाशक **(पुरुदंसम्)** बहुकर्माणम् **(सनिम्)** याचमानम् **(गोः)** वाचः **(शश्वत्तमम्)** अनादिनं लक्ष्यम् **(हवमानाय)** प्रशंसमानाय **(साध)** **(स्यात्)** भवेत् **(नः)** अस्माकम् **(सूनुः)** अपत्यम् **(तनयः)** विद्याविस्तारकः **(विजावा)** सत्याऽसत्ययोर्विभाजकः **(अग्ने)** **(सा)** **(ते)** तव **(सुमतिः)** सुष्ठुप्रज्ञा **(भूतु)** भवतु **(अस्मे)** अस्मभ्यम्॥५॥

अन्वयः-हे अग्ने! त्वं हवमानायेळां पुरुदंसं सनिं गोः शश्वत्तमं नोऽस्मभ्यं साध। हे अग्ने! येन नस्तनयो विजावा सूनुः स्यात्सा ते सुमतिरस्मे भूतु॥५॥

भावार्थः-विद्वान् विद्यामादित्सवे विद्यां साध्नुयात् सर्वतो गुणान् गृह्णीयादिति॥५॥

अस्मिन्सूक्तेऽग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश विद्या के प्रकाश करनेवाले विद्वान्! आप **(हवमानाय)** प्रशंसा करनेवाले के लिये **(इळाम्)** पृथिवी **(पुरुदंसम्)** बहुत कर्मकर्त्ता **(सनिम्)** याचनाकारक **(गोः)** वाणी **(शश्वत्तमम्)** अनादि से वर्त्तमान चिह्न को हम लोगों के लिये **(साध)** सिद्ध करिये। हे **(अग्ने)** तेजस्वी

पुरुष! जिससे **(नः)** हम लोगों का **(तनयः)** विद्याविस्तारकर्त्ता **(विजावा)** सत्य और असत्य का विभागकारक **(सूनुः)** पुत्र **(स्यात्)** हो तथा **(सा)** वह **(ते)** आपकी **(सुमतिः)** उत्तम बुद्धि **(अस्मे)** हम लोगों के लिये **(भूतु)** होवे॥५॥

भावार्थः–विद्वान् पुरुष विद्या ग्रहण करने की इच्छा करनेवाले पुरुष के लिये विद्या को सिद्ध करे तथा सबसे गुणों का ग्रहण करे॥५॥

इस सूक्त में अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह बाईसवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य त्रयोविंशतितमस्य सूक्तस्य देवश्रवा देवताश्च भारतावृषी। अग्निर्देवता। १ विराट् त्रिष्टुप्। २-५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाग्निद्वारा शिल्पविद्योपदिश्यते॥

अब पाँच ऋचावाले तेईसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से अग्नि के द्वारा शिल्पविद्या का उपदेश किया है॥

निर्मथितः सुधितः आ सधस्थे युवा कविरध्वरस्य प्रणेता।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः॥ १॥

निःऽमथितः। सुऽधितः। आ। सधऽस्थे। युवा। कविः। अध्वरस्य। प्रऽनेता। जूर्यत्ऽसु। अग्निः। अजरः। वनेषु। अत्र। दधे। अमृतम्। जातऽवेदाः॥ १॥

पदार्थः-(**निर्मथितः**) नितरां विलोडितः (**सुधितः**) सुष्ठु धृतः (**आ**) (**सधस्थे**) समानस्थाने (**युवा**) विभाजकः (**कविः**) क्रान्तदर्शनः (**अध्वरस्य**) अहिंसामयस्य शिल्पव्यवहारस्य (**प्रणेता**) प्रेरकः (**जूर्यत्सु**) वेगवत्सु (**अग्निः**) पावकः (**अजरः**) नित्यः (**वनेषु**) रश्मिषु (**अत्र**) अस्मिन्। अत्र **ऋचि तुनुघे**ति दीर्घः। (**दधे**) दधाति (**अमृतम्**) उदकम् (**जातवेदाः**) जातानि वेदांसि धनानि यस्मात्सः॥ १॥

अन्वयः-हे मनुष्या! यस्सधस्थे निर्मथितः सुधितो युवा कविः प्रणेताऽजरो जातवेदा अग्निर्जूर्यत्सु वनेष्वध्वरस्या दधेऽत्रामृतं च स सर्वोपायैर्वेदितव्यः॥ १॥

भावार्थः-हे मनुष्याः! कलायन्त्रादियुक्तेषु यानेषु नितरां विलोडितश्चालितोऽग्निः सर्वेभ्यो यानानि वेगेन गमयतीति वित्त॥ १॥

पदार्थः-हे मनुष्यो! जो (**सधस्थे**) तुल्य स्थान में (**निर्मथितः**) अत्यन्त मथा अर्थात् प्रदीप्त किया गया (**सुधितः**) उत्तम प्रकार धारित (**युवा**) विभागकर्त्ता (**कविः**) उत्तम दर्शन सहित (**प्रणेता**) प्रेरणाकारक (**अजरः**) नित्य (**जातवेदाः**) धनों की उत्पत्ति करनेवाला (**अग्निः**) अग्नि (**जूर्यत्सु**) वेगयुक्त (**वनेषु**) किरणों में (**अध्वरस्य**) अहिंसारूप शिल्पव्यवहार को (**आदधे**) धारण करता है (**अत्र**) इस शिल्पविद्या में (**अमृतम्**) जल को भी धारण करता, वह अग्नि सम्पूर्ण उपायों से जानने योग्य है॥ १॥

भावार्थः-हे मनुष्यो! कलायन्त्र आदिकों से युक्त वाहनों में अत्यन्त मथित होकर चलाया गया अग्नि सकल जनों के लिये वाहनों को वेगपूर्वक चलाता है, यह जानना चाहिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम्।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून्॥ २॥

अमन्थिष्टाम्। भारता। रेवत्। अग्निम्। देवऽश्रवाः। देवऽवातः। सुऽदक्षम्। अग्ने। वि। पश्य। बृहता। अभि। राया। इषाम्। नः। नेता। भवतात्। अनु। द्यून्॥ २॥

पदार्थः-(**अमन्थिष्टाम्**) मथ्नीताम् (**भारता**) धारकपोषकौ (**रेवत्**) धनवत् (**अग्निम्**) पावकम् (**देवश्रवाः**) देवान् यः शृणोति सः (**देववातः**) देवो दिव्यो वातः प्रेरको यस्य सः (**सुदक्षम्**) सुष्ठुबलम् (**अग्ने**) अग्निरिव दर्शकः (**वि**) (**पश्य**) समीक्षस्व (**बृहता**) महता (**अभि**) (**राया**) (**इषाम्**) अन्नादीनाम् (**नः**) अस्मभ्यम् (**नेता**) नयनकर्त्ता (**भवतात्**) भवेत् (**अनु**) (**द्यून्**) अनुकूलान् दिवसान्॥ २॥

अन्वयः-हे अग्ने! यथा भारता सुदक्षमग्निममन्थिष्टां तथा देवश्रवो देववातोऽनु द्यून् रेवदग्निं व्यमथ्नीयात्। यो नो नेता भवतात् स त्वं बृहता रायेषामभि विपश्य॥ २॥

भावार्थः-हे मनुष्या! यथा शिल्पविद्याध्येत्रध्यापकौ पदार्थैः क्रयविक्रयान् श्रीमन्तो भवन्ति तथैव यूयमपि भवत॥ २॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश प्रकाशयुक्त! जैसे (**भारता**) धारणकर्त्ता और पालनकर्त्ता पुरुष (**सुदक्षम्**) श्रेष्ठ बल (**अग्निम्**) अग्नि का (**अमन्थिष्टाम्**) मन्थन करते, वैसे (**देवश्रवाः**) विद्वानों के वचन श्रोता (**देववातः**) श्रेष्ठ प्रेरणाकारक से प्रेरित (**अनु, द्यून्**) अनुकूल दिवस (**रेवत्**) धन के तुल्य अग्नि का मन्थन करें। जो (**नः**) हम लोगों के लिये (**नेता**) सुमार्ग में अग्रणी (**भवतात्**) होवे वह आप (**बृहता**) बड़े (**राया**) धन से (**इषाम्**) अन्न आदिकों के मध्य में (**अभि**) (**वि**) (**पश्य**) सब प्रकार कृपादृष्टि से देखिये॥ २॥

भावार्थः-हे मनुष्यो! जैसे शिल्पविद्या के पढ़ने-पढ़ानेवाले लोग पदार्थों के क्रय-विक्रय से धनवान् होते हैं, वैसे ही आप लोग भी होइये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दश क्षिपः पूर्व्यं सीमजीजनन्त्सुजातं मातृषु प्रियम्।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी॥ ३॥

दश। क्षिपः। पूर्व्यम्। सीम्। अजीजनन्। सुऽजातम्। मातृषु। प्रियम्। अग्निम्। स्तुहि। दैवऽवातम्। देवऽश्रवः। यः। जनानाम्। असत्। वशी॥ ३॥

पदार्थः-(**दश**) दशसंख्याकाः (**क्षिपः**) प्रक्षेपिका अङ्गुलयः (**पूर्व्यम्**) पूर्वैर्निष्पादितम् (**सीम्**) सर्वतः (**अजीजनन्**) जनयन्ति (**सुजातम्**) सुष्ठुप्रसिद्धम् (**मातृषु**) नदीषु। **मातर इति नदीनामसु पठितम्।** (निघं०१.१३) (**प्रियम्**) कमनीयम् (**अग्निम्**) पावकम् (**स्तुहि**) प्रशंस (**दैववातम्**) देवैर्विज्ञातानां

सम्बन्धिनम् **(देवश्रवः)** यो देवेभ्यो विद्वद्भ्यः शृणोति तत्सम्बुद्धौ **(यः)** **(जनानाम्)** मनुष्याणाम् **(असत्)** भवेत् **(वशी)** जितेन्द्रियः॥३॥

अन्वयः-हे देवश्रवो! भवान् यथा दश क्षिपो मातृषु प्रियं सुजातं दैववातं पूर्व्यमग्निं सीमजीजनन् तथा त्वं स्तुहि। यो जनानां वश्यसत् तं च प्रशंस॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा कराङ्गुलिभिर्बहूनि कार्य्याणि सिद्ध्यन्ति तथैवाग्न्यादिभिर्बहूनि कार्य्याणि यूयं साध्नुत॥३॥

पदार्थः-हे **(देवश्रवः)** विद्वानों के लिये उपकार श्रोता! आप जैसे **(दश)** दश संख्यायुक्त **(क्षिपः)** फैलनेवाली अंगुलियां **(मातृषु)** नदियों में **(प्रियम्)** कामना करने योग्य **(सुजातम्)** उत्तम प्रकार सिद्ध **(दैववातम्)** विद्वानों से जाने हुओं का सम्बन्धी **(पूर्व्यम्)** प्राचीन जनों से उत्पन्न **(अग्निम्)** अग्नि को **(सीम्)** सब प्रकार **(अजीजनन्)** उत्पन्न करते हैं, वैसे आप **(स्तुहि)** स्तुति करो और **(यः)** जो **(जनानाम्)** मनुष्यों के मध्य में **(वशी)** इन्द्रियजित् **(असत्)** होवे, उसकी प्रशंसा करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे हाथों की अंगुलियों से बहुत कार्य्य सिद्ध होते हैं, वैसे ही अग्नि आदिकों से बहुत कार्यों को आप लोग सिद्ध करो॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

नि त्वा॑ दधे॒ वर॒ आ पृ॑थि॒व्या इळा॑यास्प॒दे सु॑दि॒नत्वे॒ अह्ना॑म्।
दृ॒षद्व॑त्यां मानु॒ष आप॒यायां॒ सर॑स्वत्यां रे॒वद॑ग्ने दिदीहि॥४॥

नि। त्वा॒। द॒धे॒। वरे॑। आ। पृ॒थि॒व्याः। इळा॑यः। प॒दे। सु॒दि॒न॒ऽत्वे। अह्ना॑म्। दृ॒षत्ऽव॑त्याम्। मानु॑षे। आ॒प॒याया॑म्। सर॑स्वत्याम्। रे॒वत्। अ॒ग्ने॒। दि॒दी॒हि॒॥४॥

पदार्थः-(**नि**) **(त्वा)** त्वाम् **(दधे)** **(वरे)** उत्तमे व्यवहारे **(आ)** समन्तात् **(पृथिव्याः)** भूमेरन्तरिक्षस्य वा **(इळायाः)** वाचः **(पदे)** प्रापणीये स्थाने **(सुदिनत्वे)** शोभनानां दिनानां भावे **(अह्नाम्)** दिवसानाम् **(दृषद्वत्याम्)** बहवो दृषदो विद्यन्ते यस्याम् **(मानुषे)** मननशीले **(आपयायाम्)** प्राणव्यापिकायाम् **(सरस्वत्याम्)** विज्ञानवत्यां वाचि **(रेवत्)** प्रशस्तधनेन तुल्यम् **(अग्ने)** पावकवद्विद्वन् **(दिदीहि)** प्रकाशय॥४॥

अन्वयः-हे अग्ने! अहं यथा त्वा पृथिव्या वर इळायास्पदेऽह्नां सुदिनत्वे दृषद्वत्यामापयायां सरस्वत्यां मानुषे रेवन्नि दधे तथा मामा दिदीहि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या सखायो भूत्वाऽन्योऽन्यस्मिन् विद्याधर्मसभ्यतासुखानि वर्द्धयेयुः॥४॥

पदार्थः–हे **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वान् पुरुष! मैं जैसे **(त्वा)** आपको **(पृथिव्याः)** भूमि वा अन्तरिक्ष **(वरे)** उत्तम व्यवहार और **(इळायाः)** वाणी के **(पदे)** प्राप्त होने योग्य स्थान में **(अह्नाम्)** दिवसों के **(सुदिनत्वे)** उत्तम दिनों में **(दृषद्वत्याम्)** प्रस्थरयुक्त **(आपयायाम्)** प्राणों में व्यापक **(सरस्वत्याम्)** विज्ञानवाली वाणी और **(मानुषे)** मननशील में **(रेवत्)** श्रेष्ठ धन के तुल्य **(नि)** **(दधे)** धारण किया, वैसे मननकर्त्ता आप मुझको **(आ)** **(दिदीहि)** प्रकाशित करो॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि परस्पर मित्रभाव से वर्त्तमान करके **[**=होकर**]** **[**एक–दूसरे के**]** विद्या, धर्म, सज्जनता और सुखों को बढ़ावें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥५॥२३॥

इळाम्। अग्ने। पुरुऽदंसम्। सनिम्। गोः। शश्वत्ऽतमम्। हवमानाय। साध। स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति॥५॥

पदार्थः–**(इळाम्)** प्रशंसनीयां वाचम् **(अग्ने)** पावकवद्विद्याप्रकाशक **(पुरुदंसम्)** बहुशुभकर्माणम् **(सनिम्)** विद्यादिशुभगुणदानम् **(गोः)** उत्तमवाचः **(शश्वत्तमम्)** अनादिभूतं विज्ञानम् **(हवमानाय)** आददानाय **(साध)** संसाध्नुहि **(स्यात्)** **(नः)** अस्माकम् **(सूनुः)** अपत्यवच्छिष्यः **(तनयः)** सुखविस्तारकः **(विजावा)** विशेषेण सर्वेषां सुखजनकः **(अग्ने)** सुपरीक्षक **(सा)** **(ते)** **(सुमतिः)** **(भूतु)** **(अस्मे)** अस्मासु॥५॥

अन्वयः–हे अग्ने! त्वं हवमानायेळां गोः शश्वत्तमं पुरुदंसं सनिं साध यतो नो विजावा सूनुस्तनयः स्यात्। हे अग्ने! या ते सुमतिर्भूतु साऽस्मे स्यात्॥५॥

भावार्थः–मनुष्यैः परस्परान् प्रति शुभगुणग्रहणादानोपदेशः कर्तव्यः स्वसन्तानानां विद्यासुशिक्षाविज्ञानानि सततं वर्द्धनीयानीति॥५॥

अत्राग्निविद्वन्मनुष्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोविंशतितमं सूक्तं त्रयोविंशतितमश्च वर्गः समाप्तः॥

पदार्थः–हे **(अग्ने)** अग्नि के सदृश विद्या के प्रकाशकारी! आप **(हवमानाय)** ग्रहण करने के लिये **(इळाम्)** प्रशंसायुक्त वाणी को और **(गोः)** उत्तम वाणी के **(शश्वत्तमम्)** अनादि विज्ञान तथा **(पुरदंसम्)** बहुत शुभ कर्मों के **(सनिम्)** विद्या आदि उत्तम गुणों के दान को **(साध)** सिद्ध करो जिससे **(नः)** हम लोगों का **(विजावा)** विशेष करके सम्पूर्ण जनों का सुखोत्पादक **(सूनुः)** पुत्र के सदृश शिष्य **(तनयः)** सुख का विस्तारकारक **(स्यात्)** होवे। हे **(अग्ने)** उत्तम प्रकार परीक्षा लेने में निपुण विद्वन्! जो

(ते) आपकी **(सुमतिः)** उत्तम बुद्धि **(भूतु)** होवे **(सा)** वह **(अस्मे)** हम लोगों में होवे॥५॥

भावार्थः-मनुष्यों को चाहिये कि परस्पर जनों के प्रति शुभ गुणों के ग्रहण और दान का उपदेश दें और अपने सन्तानों को विद्या, सुशिक्षा और विज्ञानों को निरन्तर बढ़ावें॥५॥

इस सूक्त में अग्नि और विद्वान् मनुष्यों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह तेईसवां सूक्त और तेईसवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य चतुर्विंशतितमस्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। २ निचृद्गायत्री। ३-५ गायत्री छन्दः। षड्जः स्वरः॥

अथ राजधर्मविषयमाह॥

अब पाँच ऋचावाले चौबीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से राजधर्मविषय का उपदेश करते हैं॥

अग्ने॒ सह॑स्व पृत॑ना अ॒भिमा॑ती॒रपा॑स्य। दु॒ष्टर॒स्तर॒न्नरा॑ती॒र्वर्चो॑ धा य॒ज्ञवा॑हसे॥ १॥

अग्ने॑। सह॑स्व। पृत॑नाः। अ॒भिऽमा॑तीः। अप॑। अ॒स्य॒। दु॒स्तरः॑। तर॑न्। अरा॑तीः। वर्चः॑। धाः॒। य॒ज्ञऽवा॑हसे॥ १॥

पदार्थः–(**अग्ने**) वह्निवद्दुष्टानां दाहक (**सहस्व**) अभिभव तिरस्कुरु। **सह अभिभव** इत्यस्य प्रयोगः। (**पृतनाः**) शत्रुसेनाः (**अभिमातीः**) अभिमानयुक्तान् दुष्टान् विघ्नकारिणः (**अप**) (**अस्य**) दूरीकुरु (**दुष्टरः**) दुःखेन तरितुमुल्लङ्घयितुं जेतुं योग्यः (**तरन्**) उल्लङ्घयन् (**अरातीः**) शत्रून् (**वर्चः**) अन्नम्। **वर्च इति अन्ननामसु पठितम्।** (निघं०२.७) (**धाः**) धेहि (**यज्ञवाहसे**) यज्ञस्य प्रापकाय॥१॥

अन्वयः–हे अग्ने! त्वं पृतनाः सहस्व अभिमातीरपास्य। दुष्टरस्त्वमरातीस्तरन् यज्ञवाहसे वर्चो धाः॥१॥

भावार्थः–राजपुरुषैः स्वप्रजासेना बलवतीः कृत्वा दुष्टाञ्छत्रून्निवार्य्य प्रजावर्द्धनाय धनविद्योन्नतिः सततं कर्तव्या॥१॥

पदार्थः–हे (**अग्ने**) अग्नि के तुल्य दुष्टजनों के दाहकर्त्ता वीर पुरुष! आप (**पृतना**) शत्रुओं की सेनाओं का (**सहस्व**) तिरस्कार करो (**अभिमातीः**) अभिमान युक्त विघ्नकारी दुष्टों को (**अपास्य**) दूर करो (**दुष्टरः**) कठिनता से उल्लङ्घन करने योग्य आप और (**अरातीः**) शत्रुओं को (**तरन्**) उल्लङ्घन करते हुए (**यज्ञवाहसे**) यज्ञ के प्राप्त कराने वाले के लिये (**वर्चः**) अन्न को (**धाः**) धारण कीजिये॥१॥

भावार्थः–राजपुरुषों को चाहिये कि अपनी प्रजा और सेनाओं को बलयुक्त कर और दुष्ट शत्रुओं को राज्य से पृथक् करके प्रजा की वृद्धि के लिये धन और विद्या की निरन्तर उन्नति करें॥१॥

अथ विद्वद्भिः कथमन्येषामुन्नतिः कार्येत्याह॥

अब विद्वानों को कैसे दूसरों की उन्नति करनी चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अग्न॑ इ॒ळा समि॑ध्यसे वी॒तिहो॑त्रो॒ अम॑र्त्यः। जु॒षस्व॒ सू नो॑ अध्व॒रम्॥ २॥

अग्ने॑। इ॒ळा। सम्। इ॒ध्य॒से॒। वी॒तिऽहो॑त्रः। अम॑र्त्यः। जु॒षस्व॑। सु। नः॒। अ॒ध्व॒रम्॥ २॥

पदार्थः–(**अग्ने**) अग्निवद्विद्याप्रकाशयुक्त (**इळा**) सुशिक्षिता स्तोतुमर्हा वाक् (**सम्**) सम्यक् (**इध्यसे**) प्रकाश्यसे (**वीतिहोत्रः**) वीतीनां शुभगुणव्याप्तानां विद्यानां होत्रं स्वीकरणं यस्य सः (**अमर्त्यः**)

आत्मत्वेन मरणधर्मरहितः **(जुषस्व)** सेवस्व **(सु)**। अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्माकम् **(अध्वरम्)** अहिंसादिव्यवहारयुक्तं यज्ञम्॥२॥

अन्वयः-हे अग्नेऽमर्त्यो वीतिहोत्रस्त्वं येळास्ति यथा त्वं समिध्यसे तया सह नोऽध्वरं सु जुषस्व॥२॥

भावार्थः-विद्वद्भिर्येन स्वेषां वृद्धिर्भवेत् तेनैवान्येषामपि उन्नतिः कार्य्या॥२॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य विद्या के प्रकाश से युक्त पुरुष! **(अमर्त्यः)** आत्मरूप से मरणधर्मरहित **(वीतिहोत्रः)** उत्तम गुणों से पूरित विद्याओं के स्वीकारकारी आप जो **(इळा)** उत्तम प्रकार शिक्षित स्तुति करने योग्य वाणी है और जिससे आप **(सम्)** **(इध्यसे)** उत्तम प्रकार प्रकाशित हो उसके साथ **(नः)** हम लोगों के **(अध्वरम्)** अहिंसा आदि व्यवहार से युक्त यज्ञ का **(सु, जुषस्व)** अच्छे प्रकार सेवन करो॥२॥

भावार्थः-विद्वानों को चाहिये कि जिससे अपनी वृद्धि हो, उसी से अन्य जनों की उन्नति करें॥२॥

पुनः राजधर्मविषयमाह॥

फिर राजधर्म विषय को अगले मन्त्र में कहा है॥

अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत। एदं बर्हिः सदो मम॥३॥

अग्ने। द्युम्नेन। जागृवे। सहसः। सूनो इति। आऽहुत। आ। इदम्। बर्हिः। सदः। मम॥३॥

पदार्थः-(**अग्ने**) प्रकाशयुक्त राजन् **(द्युम्नेन)** यशस्विना धनेन **(जागृवे)** जागरूक **(सहसः)** बलवतः **(सूनो)** पुत्र दुष्टानां हिंसक **(आहुत)** समन्तात्कृताह्वान **(आ)** **(इदम्)** वर्त्तमानम् **(बर्हिः)** अतीवोत्तमम् **(सदः)** स्थित्यर्हमासनम् **(मम)**॥३॥

अन्वयः-हे जागृवे सहसः सूनावाहुताऽग्ने! द्युम्नेन सह वर्त्तमानस्त्वं ममेदं बर्हिः सद आ जुषस्व॥३॥

भावार्थः-ये राजपुरुषा यशोबलयुक्ता राजधर्मे जागरूका न्यायाधीशाः स्युस्तेऽखण्डितं राज्यं पालयितुं शक्नुयुः॥३॥

पदार्थः-हे **(जागृवे)** राजधर्म के उत्तम प्रकार निर्वाहक **(सहसः)** बलवान् के **(सूनो)** पुत्र, दुष्टों के नाशकर्त्ता **(आहुत)** चारों ओर से पुकारे गये **(अग्ने)** प्रतापयुक्त राजन्! **(द्युम्नेन)** यशकारक धन के सहित विराजमान आप **(मम)** मेरे **(इदम्)** इस वर्त्तमान **(बर्हिः)** अत्यन्त श्रेष्ठ **(सदः)** बैठने योग्य आसन

का **(आ, जुषस्व)**[८] अच्छे प्रकार सेवन करो॥३॥

भावार्थः–जो राजपुरुष यश **[**और**]** बलयुक्त, राजधर्म में कुशल, न्यायाधीश हों, **[**वे**]** अखण्डित राज्य की पालना कर सकें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने विश्वेभिरग्निभिर्देवेभिर्मह्या गिरः। यज्ञेषु य उ चायवः॥४॥

अग्ने। विश्वेभिः। अग्निऽभिः। देवेऽभिः। महय। गिरः। यज्ञेषु। ये। ऊम् इति। चायवः॥४॥

पदार्थः–(**अग्ने**) विद्वन् (**विश्वेभिः**) समग्रैः (**अग्निभिः**) अग्निभिरिव वर्त्तमानैः (**देवेभिः**) दिव्यगुणकर्मस्वभावैर्विद्वद्भिः (**महय**) पूजय। अत्र **संहितायामिति** दीर्घः। (**गिरः**) सुशिक्षिता वाचः (**यज्ञेषु**) सङ्गन्तव्येषु व्यवहारेषु (**ये**) (**उ**) (**चायवः**) सत्कर्त्तारः॥४॥

अन्वयः–हे अग्ने! ये यज्ञेषु चायवस्स्युस्तानेवाग्निभिरिव विश्वेभिर्देवेभिस्सह महय उ एषां गिरः सत्कुरु॥४॥

भावार्थः–ये राजजना अत्र जगत्युत्तमानि कर्म्माणि कुर्युस्ते सर्वैः सत्कर्त्तव्या, ये च दुष्टानि तेऽपमाननीयास्स्युः॥४॥

पदार्थः–हे (**अग्ने**) विद्वन् पुरुष! (**ये**) जो पुरुष (**यज्ञेषु**) सङ्गति के योग्य व्यवहारों में (**चायवः**) सत्कार योग्य हों उनका ही (**अग्निभिः**) अग्नियों के सदृश तेजयुक्त (**विश्वेभिः**) सम्पूर्ण (**देवेभिः**) श्रेष्ठ गुण, कर्म, स्वभावयुक्त विद्वानों के साथ (**महय**) सत्कार करो (**उ**) और उन्हीं लोगों की (**गिरः**) उत्तम प्रकार शिक्षायुक्त वाणियों का प्रमाण मानो॥४॥

भावार्थः–जो राजपुरुष इस संसार में उत्तम कार्य्यों के कर्त्ता हों, उनका सब लोग सत्कार करें और जो दुष्ट कर्म करते हों, उनका अपमान करें॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहा है॥

अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम्। शिशीहि नः सूनुमतः॥५॥२४॥

अग्ने। दाः। दाशुषे। रयिम्। वीरऽवन्तम्। परीणसम्। शिशीहि। नः। सूनुऽमतः॥५॥

---

८. 'जुषस्व' पद मन्त्र में पठित नहीं है।

पदार्थः-**(अग्ने)** **(दाः)** देहि **(दाशुषे)** सर्वेषां सुखदात्रे **(रयिम्)** धनम् **(वीरवन्तम्)** बहवो वीरा यस्मिँस्तम् **(परीणसम्)** बहुविधम्। **परीणस इति बहुनामसु पठितम्।** (निघं०३.१) **(शिशीहि)** तीक्ष्णान् सम्पादय। अत्र **वाच्छन्दसी**ति विकरणस्य श्लु**रन्येषामपि दृश्यत** इति दीर्घश्च। **(नः)** अस्मान् **(सूनुमतः)** पुत्रयुक्तान्॥५॥

अन्वयः-हे अग्ने! यथा त्वं दाशुषे परीणसं वीरवन्तं रयिन्दास्तथैव सूनुमतो नोऽस्माञ्छिशीहि॥५॥

भावार्थः-ये विद्याधनदातारः स्युस्तान् प्रत्येवं वाच्यं भवन्तोऽस्मान् सर्वथा वर्द्धयन्त्विति॥५॥

अत्राग्निराजविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति चतुर्विंशतितमं सूक्तं स एव वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजयुक्त विद्वान् पुरुष! जैसे आप **(दाशुषे)** सबके सुखदाता जन के लिये **(परीणसम्)** बहुत प्रकार युक्त **(वीरवन्तम्)** बहुत वीरों से विशिष्ट **(रयिम्)** धन को **(दाः)** दीजिये और वैसे ही **(सूनुमतः)** पुत्रयुक्त **(नः)** हम लोगों को **(शिशीहि)** प्रबल कीजिये॥५॥

भावार्थः-जो विद्या और धन के दाता विद्वान् हों, उनके प्रति ऐसा कहना चाहिये कि आप लोग हम लोगों की सब प्रकार वृद्धि करो॥५॥

इस सूक्त में अग्नि, राजा और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह चौबीसवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य पञ्चविंशतितमस्य सूक्तस्य विश्वामित्र ऋषिः। १-४ अग्निर्देवता। ५ इन्द्राग्नीदेवते। १ निचृदनुष्टुप्। २ अनुष्टुप् छन्दः। ऋषभः स्वरः। ३-५ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्याग्निदृष्टान्तेन विद्वत्कृत्यमाह॥

अब पाँच ऋचावाले पच्चीसवें सूक्त का प्रारम्भ है। इसके प्रथम मन्त्र से सूर्यरूप अग्नि के दृष्टान्त से विद्वानों का कर्त्तव्य कहते हैं॥

अग्ने॑ दि॒वः सू॒नुर॑सि प्रचे॒तास्तना॑ पृथि॒व्या उ॑त वि॒श्ववे॑दाः।
ऋध॑ग्दे॒वाँ इ॒ह य॑जा चिकित्वः॥ १॥

अग्ने॑। दि॒वः। सू॒नुः। अ॒सि॒। प्रऽचे॑ताः। तना॑। पृ॒थि॒व्याः। उ॒त। वि॒श्वऽवे॑दाः। ऋध॑क्। दे॒वान्। इ॒ह। य॒ज॒। चि॒कि॒त्वः॥ १॥

पदार्थः-(**अग्ने**) विद्वन् (**दिवः**) विद्युतः (**सूनुः**) सूर्य्यः (**असि**) (**प्रचेताः**) प्रकृष्टज्ञानयुक्तो विज्ञापको वा (**तना**) विस्तारकः (**पृथिव्याः**) अन्तरिक्षस्य (**उत**) अपि (**विश्ववेदाः**) यो विश्वं धनं विन्दति सः (**ऋधक्**) स्वीकारे (**देवान्**) विदुषो दिव्यगुणान् वा (**इह**) अस्मिन्संसारे (**यज**) सङ्गमय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**चिकित्वः**) विज्ञानवान्॥ १॥

अन्वयः-हे चिकित्वोऽग्ने! यथा दिवः सूनुः सूर्य्य इव प्रचेताः पृथिव्यास्तना उत विश्ववेदा असि स त्वमिह देवानृधग्यज॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यस्सर्वेषां मूर्तिमद्द्रव्याणां प्रकाशकोऽस्ति तथा विद्वांसो विद्वत्प्रियाश्चेह सर्वेषामात्मनां प्रकाशका भवन्ति॥ १॥

पदार्थः-हे (**चिकित्वः**) विज्ञानवान् (**अग्ने**) विद्वन् पुरुष! जैसे (**दिवः**) बिजुली से (**सूनुः**) सूर्य्य के समान तेजस्वी (**प्रचेताः**) उत्तम विज्ञानयुक्त वा विज्ञानदाता (**पृथिव्याः**) अन्तरिक्ष के (**तना**) विस्तारक (**उत**) और भी (**विश्ववेदाः**) धनदाता (**असि**) हो वह आप (**इह**) इस संसार में (**देवान्**) विद्वान् वा उत्तम गुणों को (**ऋधक्**) स्वीकार करने में (**यज**) संयुक्त कीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य सम्पूर्ण स्वरूपवाले द्रव्यों का प्रकाशक है, वैसे विद्वान् और विद्वानों से प्रेमकारी पुरुष इस संसार में सर्व जनों के आत्माओं के प्रकाशक होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒ग्निस्स॑नोति वी॒र्याणि॑ वि॒द्वान्त्स॒नोति॒ वाज॑म॒मृता॑य॒ भूष॑न्।
स नो॑ दे॒वाँ एह व॑हा पुरुक्षो॥ २॥

अ॒ग्निः। स॒नो॒ति॒। वी॒र्या॑णि। वि॒द्वान्। स॒नोति॑। वाज॑म्। अ॒मृता॑य। भूष॑न्। सः। न॒ः। दे॒वान्। आ। इ॒ह। व॒ह॒। पु॒रु॒क्षो॒ इति॑ पुरुऽक्षो॥ २॥

पदार्थः-(**अग्निः**) पावक इव (**सनोति**) विभजति (**वीर्य्याणि**) बलानि (**विद्वान्**) (**सनोति**) ददाति (**वाजम्**) विज्ञानम् (**अमृताय**) मोक्षस्याऽविनाशसुखप्राप्तये (**भूषन्**) (**सः**) (**नः**) अस्मान् (**देवान्**) (**आ**) समन्तात् (**इह**) अस्मिन्संसारे (**वह**) प्रापय (**पुरुक्षो**) पुरूणि क्षुधोऽन्नादीनि यस्य तत्सम्बुद्धौ। **क्षुदित्यन्नामसु पठितम्।** (निघं०२.७)॥ २॥

अन्वयः-हे पुरुक्षो यो विद्वान्! भवान् यथाग्निर्वीर्य्याणि सनोति तथा सोऽमृताय नोऽस्मान् देवानिह भूषन् वाजं सनोति तानस्माना वह॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो मूर्तान् पदार्थान् सुभूषयति तथैव विद्वांसो विद्यासुशिक्षासभ्यताभिः सर्वान् मनुष्यान् सुभूषयेयुः॥ २॥

पदार्थः-हे (**पुरुक्षो**) अतिशय अन्न आदि से युक्त जो (**विद्वान्**) विद्यावान् पुरुष! आप जैसे (**अग्निः**) अग्नि के सदृश (**वीर्य्याणि**) पराक्रमों का (**सनोति**) धारण करनेवाले, वैसे (**सः**) वह (**अमृताय**) नाशरहित मोक्षसुख की प्राप्ति के लिये (**नः**) हम (**देवान्**) विद्वानों को (**इह**) इस संसार में (**भूषन्**) शोभित करते हुए (**वाजम्**) विज्ञान को (**सनोति**) देता है, उस प्रकाशित करनेवाले पुरुष को हम लोगों के लिये (**आ**) (**वह**) अच्छे प्रकार प्राप्त करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य आकारवाले पदार्थों को उत्तम प्रकार शोभित करता है, वैसे ही विद्वान् लोग विद्या, उत्तम शिक्षा और सभ्यता से सम्पूर्ण मनुष्यों को शोभित करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अ॒ग्निर्द्यावा॑पृथि॒वी वि॒श्वज॑न्ये॒ आ भा॑ति दे॒वी अ॒मृते॒ अमू॑रः।

क्षय॒न्वाजै॑: पुरु॒श्च॒न्द्रो नमो॑भिः॥ ३॥

अ॒ग्निः। द्यावा॑पृथि॒वी इति॑। वि॒श्वज॑न्ये॒ इति॑ वि॒श्वऽज॑न्ये। आ। भा॒ति॒। दे॒वी इति॑। अ॒मृते॒ इति॑। अमू॑रः। क्षय॑न्। वाजै॑:। पु॒रु॒ऽच॒न्द्रः। नम॑:ऽभिः॥ ३॥

पदार्थः-(**अग्निः**) सूर्य्यो विद्युद्वा (**द्यावापृथिवी**) प्रकाशभूमी (**विश्वजन्ये**) सर्वस्य जनयित्र्यौ (**आ**) समन्तात् (**भाति**) प्रकाशयति (**देवी**) दिव्यगुणकर्मस्वभावयुक्ते (**अमृते**) कारणरूपेण नाशरहिते (**अमूरः**) मूढत्वादिदोषरहितः (**क्षयन्**) निवासयन् (**वाजैः**) विज्ञानवेगादिभिः (**पुरुश्चन्द्रः**) पुरुर्बहुश्चन्द्र आह्लादो यस्य सः (**नमोभिः**) अन्नैः सह सत्कारैर्वा॥ ३॥

अन्वयः–हे विद्वन्! यथा पुरुश्चन्द्रो वाजैर्नमोभिः सह क्षयन्नग्निर्विश्वजन्ये देवी अमृते द्यावापृथिवी आ भाति तथाऽमूरः सन् सर्वान् सज्जनान् स्वविद्याविनयाभ्यां सर्वतः प्रकाशय॥३॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। ये पृथिवीवत्क्षमान्विताः सूर्यवत्सत्याऽसत्यप्रकाशका मूढान् बोधयन्तः सर्वान् मनुष्यान् धार्मिकान् कुर्वन्ति त एव सत्कर्तव्या भवन्ति॥३॥

पदार्थः–हे विद्वान् जन! जैसे **(पुरुश्चन्द्रः)** बहुत आनन्दकारक **(वाजैः)** विज्ञान वेग आदिकों से **(नमोभिः)** अन्न वा सत्कारों के साथ **(क्षयन्)** निवास करनेवाला **(अग्निः)** सूर्य्य वा विद्युत् रूप अग्नि **(विश्वजन्ये)** सबके उत्पादक **(देवी)** उत्तम गुण, कर्म, स्वभावयुक्त **(अमृते)** कारणरूप से नाशरहित **(द्यावापृथिवी)** प्रकाश और भूमि को **(आ)** सब ओर से **(भाति)** प्रकाशित करता है, वैसे **(अमूरः)** मूढ़ता आदि दोषों से रहित होकर सम्पूर्ण सज्जनों को अपनी विद्या और विनय से सब प्रकार प्रकाशित करो॥३॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग पृथिवी के सदृश क्षमाशील, सूर्य्य के सदृश सत्य-असत्य के प्रकाशकर्त्ता, मूढ़ लोगों को उपदेशदाता और सब लोगों को धार्मिक करते हैं, उन लोगों का ही सत्कार करना चाहिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॒ इन्द्र॑श्च दा॒शुषो॑ दुरो॒णे सु॒तावं॑तो य॒ज्ञमिहोप॑ यातम्।
अम॑र्धन्ता सोम॒पेया॑य देवा॥४॥

अग्ने। इन्द्रः। च। दाशुषः। दुरोणे। सुतऽवंतः। यज्ञम्। इह। उप। यातम्। अमर्धन्ता। सोमऽपेयाय। देवा॥४॥

पदार्थः–**(अग्ने)** **(इन्द्रः)** परमैश्वर्य्यकारको विद्युदग्निः **(च)** वायुः **(दाशुषः)** विद्यासुखस्य दातुः **(दुरोणे)** गृहे **(सुतावतः)** ऐश्वर्ययुक्तस्य **(यज्ञम्)** विद्वत्सत्कारादिमयं व्यवहारम् **(इह)** अस्मिन् संसारे **(उप)** **(यातम्)** प्राप्नुतम् **(अमर्धन्ता)** सर्वान् शोषयन्तौ **(सोमपेयाय)** ऐश्वर्यप्राप्तये **(देवा)** दिव्यगुणयुक्तौ॥४॥

अन्वयः–हे अग्ने! विद्वन्! यथाऽमर्धन्ता देवा इन्द्रो वायुश्च सोमपेयाय सुतावतो दाशुषो दुरोणे यज्ञमिहोपयातं तथैव त्वमुपयाहि अध्यापकोपदेशकौ चोपयातम्॥४॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यत्र वायुविद्युद्वर्त्तमानावविद्याविनाशकौ विद्याप्रकाशकौ धर्मोपदेष्टारावध्यापकोपदेशकौ स्यातां तत्र सर्वाणि सुखानि वर्धेरन्॥४॥

पदार्थः–हे **(अग्ने)** अग्नि के तुल्य विद्या से प्रकाशित विद्वान् पुरुष! जैसे **(अमर्धन्ता)** सबको

सुखाते हुए **(देवा)** श्रेष्ठ गुणों से युक्त पुरुष **(इन्द्रः)** अत्यन्त ऐश्वर्यकारक बिजुली सम्बन्धी अग्नि **(च)** और पवन तथा **(सोमपेयाय)** ऐश्वर्य की प्राप्ति के लिये **(सुतावतः)** ऐश्वर्य से युक्त **(दाशुषः)** विद्यासम्बन्धी सुख के दाता **(दुरोणे)** गृह में **(यज्ञम्)** विद्वत्सत्कार आदि स्वरूप व्यवहार को **(इह)** इस संसार में **(उप) (यातम्)** प्राप्त हों और वैसे आप भी प्राप्त होइये और अध्यापक तथा उपदेशक भी प्राप्त हों॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जहाँ वायु और बिजली के तुल्य वर्त्तमान अविद्या के विनाश और विद्या के प्रकाशकर्त्ता, धर्म के उपदेशकर्त्ता अध्यापक और उपदेशक होवें, वहाँ सम्पूर्ण सुख बढ़ें॥४॥

विद्वद्भिः परमात्मवज्जगदानन्दनीयमित्याह॥

विद्वानों को परमात्मा के तुल्य जगत् को आनन्दित करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अग्ने॑ अ॒पां स॒मि॒ध्यसे दुरो॒णे नित्य॑: सूनो सहसो जातवेदः।
स॒धस्था॑नि म॒हय॑मान ऊ॒ती॥५॥२५॥

अग्ने॑। अ॒पाम्। सम्। इ॒ध्य॒से॒। दु॒रो॒णे॒। नित्य॑ः। सू॒नो॒ इति॑। स॒हः॒स॒ः। जा॒त॒ऽवे॒दः॒। स॒धऽस्था॑नि। म॒हय॑मानः। ऊ॒ती॥५॥

पदार्थः-(**अग्ने**) वह्निरिव वर्त्तमान **(अपाम्)** प्राणानां मध्ये **(सम्) (इध्यसे)** प्रकाश्यसे **(दुरोणे)** निवासस्थाने गृहे **(नित्यः)** स्वस्वरूपेणाऽविनाशी **(सूनो)** अपत्यमिव वर्त्तमान अविद्याहिंसक वा **(सहसः)** बलवतः **(जातवेदः)** जातप्रज्ञान **(सधस्थानि)** समानस्थानानि **(महयमानः)** पूज्यमानः **(ऊती)** ऊत्या रक्षणाद्यया क्रियया॥५॥

अन्वयः-हे सहसस्सूनो जातवेदोऽग्ने! नित्यो महयमानो यस्त्वमूती अपां मध्ये सूर्य्य इव दुरोणे समिध्यसे तेन भवता सर्वेषां मनुष्याणां सधस्थान्यात्मानश्च विद्याधर्मविनयैः प्रकाशनीयाः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा नित्यशुद्धबुद्धमुक्तस्वभावः सच्चिदानन्दादिलक्षणः परमात्मा सर्वं जगदुत्पाद्य संरक्ष्यानन्दयति तथैवाप्तैर्विद्वद्भिस्सर्वमिदं जगदानन्दयितव्यमिति॥५॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चविंशतितमं सूक्तं स एव वर्गश्च समाप्तः॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** पुत्र के तुल्य वर्त्तमान वा अविद्या के नाशकारक **(जातवेदः)** सम्पूर्ण उत्पन्न पदार्थों के ज्ञाता **(अग्ने)** अग्नि के सदृश तेजस्वी! **(नित्यः)** अपने स्वरूप से नाशरहित **(महयमानः)** पूजने अर्थात् आदर करने योग्य जो आप **(ऊती)** रक्षण आदि क्रिया से **(अपाम्)** प्राणों के मध्य में सूर्य के सदृश **(दुरोणे)** रहने के स्थान गृह में **(सम्) (इध्यसे)** प्रकाशित होते, उन

आपको चाहिये कि सम्पूर्ण मनुष्यों के **(सधस्थानि)** तुल्य स्थानों और आत्माओं को विद्या, धर्म्म, विनय से प्रकाशित करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे नित्य, शुद्ध, बुद्ध, मुक्त स्वभावयुक्त और सत्-चित्-आनन्द आदि लक्षण विशिष्ट परमात्मा सम्पूर्ण जगत् को उत्पन्न और रक्षित कर आनन्दित करता है, वैसे ही सत्यवक्ता विद्वान् पुरुषों को चाहिये कि सम्पूर्ण इस संसार को आनन्दयुक्त करें॥५॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह पच्चीसवां सूक्त और पच्चीसवां वर्ग समाप्त हुआ॥

अथ नवर्चस्य षड्विंशतितमस्य सूक्तस्य। १-६, ८, ९ विश्वामित्रः। ७ आत्मा ऋषिः। १-३ वैश्वानरः। ४-६ मरुतः। ७, ८ अग्निरात्मा वा। ९ विश्वामित्रोपाध्यायो देवता। १-६ जगती छन्दः। निषादः स्वरः। ७-९ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाग्न्यादिना विद्वद्भिः किं साध्यमित्याह॥

अब नव ऋचावाले छब्बीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में अग्नि आदि से विद्वान् क्या सिद्ध करें, इस विषय को कहते हैं॥

वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम्।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे॥ १॥

वैश्वानरम्। मनसा। अग्निम्। निऽचाय्य। हविष्मन्तः। अनुऽसत्यम्। स्वःऽविदम्। सुऽदानुम्। देवम्। रथिरम्। वसुऽयवः। गीःऽभिः। रण्वम्। कुशिकासः। हवामहे॥ १॥

पदार्थः-(**वैश्वानरम्**) विश्वेषां नराणां प्रकाशकम् (**मनसा**) विज्ञानेन (**अग्निम्**) पावकम् (**निचाय्य**) निश्चयं कारयित्वा। अत्र **संहितायामि**ति दीर्घः। (**हविष्मन्तः**) बहूनि हवींषि दातव्यानि विद्यन्ते येषान्ते (**अनुषत्यम्**) सत्यस्यानुकूलम् (**स्वर्विदम्**) स्वः सुखं विन्दति येन तम् (**सुदानुम्**) शोभनान् दातारम् (**देवम्**) प्रकाशकम् (**रथिरम्**) रथा रमणीयानि यानानि भवन्ति यस्मिंस्तम् (**वसूयवः**) ये वसूनि युवन्ति मिश्रयन्ति ते। अत्र**ान्येषामपी**त्युकारदीर्घः। (**गीर्भिः**) वाग्भिः (**रण्वम्**) शब्दायमानम् (**कुशिकासः**) उपदेशकाः (**हवामहे**) गृह्णीयाम॥ १॥

अन्वयः-हे मनुष्या! यथा कुशिकासो हविष्मन्तो वसूयवो वयं मनसा निचाय्य स्वर्विदं रण्वं रथिरमनुषत्यं सुदानुं देवं वैश्वानरमग्निं हवामहे तथा यूयमप्येनं गीर्भिः स्वीकुरुत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मनुष्या अग्नेर्गुणकर्मस्वभावान्निश्चित्य कार्याणि साध्नुवन्ति तथैव पृथिव्यादीनां गुणकर्मस्वभावनिश्चयोपकाराभ्यां कार्य्याणि साध्नुवन्तु॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**कुशिकासः**) उपदेशक जन (**हविष्मन्तः**) देने योग्य वस्तुओं से युक्त (**वसूयवः**) धन इकट्ठा करने में तत्पर हम लोग (**मनसा**) विज्ञान से (**निचाय्य**) निश्चय कराकर (**स्वर्विदम्**) धन की प्राप्ति करानेवाले (**रण्वम्**) शब्द करते हुए (**रथिरम्**) सुन्दर वाहनों से युक्त (**अनुषत्यम्**) सत्य के अनुकूल (**सुदानुम्**) उत्तम पदार्थों के देनेवाले (**देवम्**) प्रकाशकारक (**वैश्वानरम्**) सम्पूर्ण मनुष्यों के प्रकाशकर्त्ता (**अग्निम्**) अग्नि को (**हवामहे**) ग्रहण करते हैं, वैसे आप लोग भी इस अग्नि को (**गीर्भिः**) वाणियों से स्वीकार करें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मनुष्य अग्नि के गुण-कर्म-स्वभावों का निश्चय करके कार्य्यों को सिद्ध करते हैं, वैसे ही पृथिवी आदि पदार्थों के गुण-कर्म-स्वभावों के निश्चय और उपकार से कार्य्यों को सिद्ध करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम्।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम्॥ २॥

तम्। शुभ्रम्। अग्निम्। अवसे। हवामहे। वैश्वानरम्। मातरिश्वानम्। उक्थ्यम्। बृहस्पतिम्। मनुषः। देवऽतातये। विप्रम्। श्रोतारम्। अतिथिम्। रघुऽस्यदम्॥ २॥

पदार्थः-(**तम्**) (**शुभ्रम्**) भास्वरम् (**अग्निम्**) विद्युदादिस्वरूपं वह्निम् (**अवसे**) रक्षणाद्याय (**हवामहे**) स्वीकुर्महे (**वैश्वानरम्**) विश्वेषु नायकेषु विराजमानम् (**मातरिश्वानम्**) यो मातरि वायौ श्वसिति तम् (**उक्थ्यम्**) प्रशंसितुं योग्यम् (**बृहस्पतिम्**) बृहतां पृथिव्यादीनां पालकम् (**मनुषः**) मननधर्माणः (**देवतातये**) दिव्यगुणप्राप्तये (**विप्रम्**) मेधाविनम् (**श्रोतारम्**) (**अतिथिम्**) पूजनीयमनित्यस्थितिं विद्वांसम् (**रघुष्यदम्**) यो रघु लघु स्यन्दति तम्॥ २॥

अन्वयः-हे मनुष्या! मनुषो देवतातये रघुष्यदं विप्रं श्रोतारमतिथिमिव यमवसे मातरिश्वानमुक्थ्यं बृहस्पतिं वैश्वानरं शुभ्रमग्निं हवामहे तं यूयमपि विजानीत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पूर्णविद्योऽतिथिः श्रोतॄन् ज्ञानसम्पन्नान् करोति तथैव वह्निः शिल्पिभ्यः पुष्कलधनानि निष्पादयति॥ २॥

पदार्थः-हे मनुष्यो! (**मनुषः**) मननकर्त्ता (**देवतातये**) उत्तम गुणों की प्राप्ति के लिये (**रघुष्यदम्**) शीघ्रगामी (**विप्रम्**) बुद्धिमान् (**श्रोतारम्**) वेदशास्त्र आदि सुननेवाले को (**अतिथिम्**) अतिथि के तुल्य जिसको (**अवसे**) रक्षण आदि के लिये (**मातरिश्वानम्**) वायु में श्वासकारी (**उक्थ्यम्**) प्रशंसा करने योग्य (**बृहस्पतिम्**) पृथिवी आदि पदार्थों के धारक (**वैश्वानरम्**) राजा आदि में विराजमान (**शुभ्रम्**) प्रकाशमान (**अग्निम्**) बिजुली आदि स्वरूप अग्नि को (**हवामहे**) स्वीकार करते हैं (**तम्**) उसको आप लोग भी जानो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पूर्ण विद्वान् अतिथिजन श्रोता जनों को ज्ञानयुक्त करता है, उसी प्रकार अग्नि शिल्पी जनों के लिये अत्यन्त धनों को उत्पन्न करता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अश्वो न क्रन्दुञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नमृतेषु जागृविः॥ ३॥

अश्वः। न। क्रन्दन्। जनिऽभिः। सम्। इध्यते। वैश्वानरः। कुशिकेभिः। युगेऽयुगे। सः। नः। अग्निः। सुऽवीर्यम्। सुऽअश्व्यम्। दधातु। रत्नम्। अमृतेषु। जागृविः॥ ३॥

पदार्थः-(**अश्वः**) तुरङ्गः (**न**) इव (**क्रन्दन्**) शब्दायमानः (**जनिभिः**) जनयित्रीभिर्वडवाभिः (**सम्**) (**इध्यते**) प्रदीप्यते (**वैश्वानरः**) विश्वेषां नराणां प्रकाशकः (**कुशिकेभिः**) शब्दायमानैः (**युगेयुगे**) वर्षेवर्षे (**सः**) (**नः**) अस्मभ्यम् (**अग्निः**) पावकः (**सुवीर्यम्**) शोभनं बलं यस्मात् तत् (**स्वश्व्यम्**) शोभनेष्वश्वेषु साधुम् (**दधातु**) (**रत्नम्**) धनम् (**अमृतेषु**) हिरण्यादिषु धनेषु। **अमृत इति हिरण्यनामसु पठितम्।** (निघं०१.२)। (**जागृविः**) जागरूकः॥ ३॥

अन्वयः-हे मनुष्यो! यो वैश्वानरो जागृविरग्निर्जनिभिः सह क्रन्दन्नश्वो न कुशिकेभिर्युगेयुगे समिध्यते स नः सुवीर्य्यं स्वश्व्यममृतेषु रत्नं दधातु तं यूयमपि संप्रयुङ्ग्ध्वम्॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यदि मनुष्यैरग्निर्यानचालनादिकार्येषु संप्रयुज्यते तर्ह्ययं किं धनादिवस्तु नोन्नयेत्॥ ३॥

पदार्थः-हे मनुष्यो! जो (**वैश्वानरः**) सम्पूर्ण मनुष्यों का प्रकाशकर्त्ता (**जागृविः**) जागरणशील (**अग्निः**) अग्नि (**जनिभिः**) उत्पन्न करनेवाली घोड़ियों के साथ (**क्रन्दन्**) शब्द करते हुए (**अश्वः**) घोड़े के (**न**) तुल्य (**कुशिकेभिः**) शब्द करनेवालों से (**युगेयुगे**) प्रत्येक वर्ष में (**सम्**) (**इध्यते**) प्रदीप्त होता है (**सः**) वह (**नः**) हम लोगों के लिये (**सुवीर्य्यम्**) उत्तम बल करनेवाले (**स्वश्व्यम्**) उत्तम घोड़ों से युक्त (**अमृतेषु**) सुवर्ण आदि धनों में (**रत्नम्**) धन को (**दधातु**) धारण करता है, उसका आप लोग भी संप्रयोग करो॥ ३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य लोग अग्नि को वाहन के चालन आदि कार्यों में संप्रयुक्त करते हैं तो यह अग्नि किस-किस धन आदि वस्तु की वृद्धि न करे अर्थात् सब वस्तुओं की वृद्धि कर सकता है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र यन्तु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत।
बृहद्दुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः॥ ४॥

प्र। यन्तु। वाजाः। तविषीभिः। अग्नयः। शुभे। सम्ऽमिश्लाः। पृषतीः। अयुक्षत। बृहत्ऽउक्षः। मरुतः। विश्वऽवेदसः। प्र। वेपयन्ति। पर्वतान्। अदाभ्याः॥ ४॥

पदार्थः-(**प्र**) (**यन्तु**) गच्छन्तु (**वाजाः**) वेगवन्तः (**तविषीभिः**) बलादिभिः सह (**अग्नयः**) पावकाः (**शुभे**) उदके। **शुभमित्युदकनामसु पठितम्।** (निघं०१.१२) (**संमिश्लाः**) संमिश्राः संयुक्ताः

(पृषतीः) सेचननिमित्ता गतीः **(अयुक्षत)** संयुङ्ग्ध्वम् **(बृहदुक्षः)** बृहदुक्षः सेचनं येभ्यस्ते **(मरुतः)** वायवः **(विश्ववेदसः)** यैर्विश्वं विन्दति ते **(प्र)** **(वेपयन्ति)** कम्पयन्ति **(पर्वतान्)** शैलानिवोच्छ्रितान् मेघान् **(अदाभ्याः)** हिंसितुमनर्हाः॥४॥

अन्वयः–हे वीरा! यूयं तविषीभिः सह यथा वाजा अग्नयः विश्ववेदसो बृहदुक्षो मरुतश्च शुभे संमिश्लाः पृषतीः प्र यन्तु अदाभ्याः पर्वतान् प्रवेपयन्ति तथा यूयमपि सखायस्सन्तोऽरीन् कम्पयत बलसैन्यादिकमयुक्षत॥४॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा जले मिलिताः पृथिव्यग्निवायवो वर्त्तन्ते तथैव ये सेनायां सखायो भूत्वा वर्त्तन्ते तेषां ध्रुवो विजयो भवति॥४॥

पदार्थः–हे वीरो! आप लोग **(तविषीभिः)** पराक्रम आदिकों के साथ जैसे **(वाजाः)** वेगवाले **(अग्नयः)** अग्नि **(विश्ववेदसः)** सम्पूर्ण धनों से युक्त **(बृहदुक्षः)** अतिशय सेचनकारक **(मरुतः)** वायु **(शुभे)** जल में **(संमिश्लाः)** अच्छे प्रकार मिली हुई वा सुन्दर प्रयुक्त **(पृषतीः)** सेचन में कारण **(प्र)** **(यन्तु)** प्राप्त होवें और **(अदाभ्याः)** नहीं मारने योग्य होकर **(पर्वतान्)** पर्वतों के सदृश ऊँचे मेघों को **(प्र)** **(वेपयन्ति)** कंपाते हैं, वैसे आप लोग भी परस्पर मित्र होकर शत्रुओं को कंपाओ और बलयुक्त सेना का सञ्चय करो॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जल में मिले हुए पृथिवी, अग्नि, वायु वर्त्तमान हैं, वैसे ही जो लोग सेना में मित्र होकर वर्त्तमान होते हैं, उनका निश्चय विजय होता है॥४॥

पुनर्वाय्वादिना किं साध्यमित्याह॥

फिर वायु आदि से क्या सिद्ध करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम्।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः॥५॥२६॥

अग्निऽश्रियः। मरुतः। विश्वऽकृष्टयः। आ। त्वेषम्। उग्रम्। अवः। ईमहे। वयम्। ते। स्वानिनः। रुद्रियाः। वर्षऽनिर्णिजः। सिंहाः। न। हेषऽक्रतवः। सुऽदानवः॥५॥

पदार्थः–**(अग्निश्रियः)** अग्निना श्रीः शोभा धनं येषां ते **(मरुतः)** वायवः **(विश्वकृष्टयः)** विश्वा कृष्टिर्येभ्यस्ते **(आ)** **(त्वेषम्)** प्रकाशम् **(उग्रम्)** कठिनम् **(अवः)** रक्षणादिकम् **(ईमहे)** याचामहे **(वयम्)** **(ते)** **(स्वानिनः)** बहवः स्वानाः शब्दा विद्यन्ते येभ्यस्ते **(रुद्रियाः)** रुद्रेऽग्नौ भवाः **(वर्षनिर्णिजः)** वर्षस्य वृष्टे शोधकाः पोषका वा **(सिंहाः)** व्याघ्राः **(न)** इव **(हेषक्रतवः)** हेषाः शब्दाः क्रतवः प्रज्ञाः क्रिया वा येषान्ते **(सुदानवः)** सुष्ठुदानं येभ्यस्ते॥५॥

अन्वयः-हे मनुष्या! यथा वयं ये विश्वकृष्टयोऽग्निश्रियः स्वानिनो **[**=स्वानिना**]** रुद्रिया वर्षनिर्णिजो मरुतः सिंहा न शब्दायन्ते यान् हेषक्रतवः सुदानवो वयमेमहे ते समन्ताद् याचनीयास्तेभ्यो वयमुग्रं त्वेषमुग्रमव ईमहे॥५॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्विद्वत्सङ्गेन धीमद्भिर्भूत्वा वाय्वादिपदार्थविद्या याचनीया सिंह इव पराक्रमश्च धारणीयः॥५॥

पदार्थः-हे मनुष्यो! जैसे **(वयम्)** हम लोग जो **(विश्वकृष्टयः)** सम्पूर्ण सृष्टि के उत्पन्नकर्त्ता **(अग्निश्रियः)** अग्नि से धनयुक्त **(स्वानिनः)** अतिशय शब्दों से विशिष्ट **(रुद्रियाः)** अग्नि में उत्पन्न होनेवाले **(वर्षनिर्णिजः)** वृष्टि के पवित्र करने वा पुष्ट करनेवाले **(मरुतः)** वायुदल **(सिंहाः)** व्याघ्रों के **(न)** सदृश शब्द करते जिनको **(हेषक्रतवः)** शब्दरूप बुद्धि वा क्रियावाले **(सुदानवः)** उत्तम दानकारक हम लोग **(आ, ईमहे)** अच्छे प्रकार याचना करते हैं **(ते)** वे सब प्रकार मांगने योग्य हैं, उनसे हम लोग **(उग्रम्)** कठिन **(त्वेषम्)** प्रकाश और कठिन **(अवः)** रक्षण आदि की याचना करते हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि विद्वान् लोगों के सङ्ग से बुद्धिमान् होकर वायु आदि की सम्बन्धिनी पदार्थविद्या की प्रार्थना करें और सिंह के समान पराक्रम को धारण करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोजऽईमहे।

पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः॥६॥

व्रातम्ऽव्रातम्। गणम्ऽगणम्। सुशस्तिऽभिः। अग्नेः। भामम्। मरुताम्। ओजः। ईमहे। पृषत्ऽअश्वासः। अनवभ्रऽराधसः। गन्तारः। यज्ञम्। विदथेषु। धीराः॥६॥

पदार्थः-**(व्रातंव्रातम्)** वर्त्तमानं वर्त्तमानम् **(गणंगणम्)** समूहं समूहम् **(सुशस्तिभिः)** शोभनाभिः स्तुतिभिः **(अग्नेः)** पावकात् **(भामम्)** तेजः **(मरुताम्)** वायूनां सकाशात् **(ओजः)** बलम् **(ईमहे)** **(पृषदश्वासः)** पृषतः सेचका अश्वा वेगादयो गुणा येषु ते **(अनवभ्रराधसः)** अनवभ्रमविनाशि राधो येषां ते **(गन्तारः)** **(यज्ञम्)** सङ्गतिकरणम् **(विदथेषु)** विज्ञानादिषु **(धीराः)** ध्यानवन्तः॥६॥

अन्वयः-हे मनुष्या! पृषदश्वासोऽनवभ्रराधसो गन्तारो वायव इव सुशस्तिभिः सह वर्तमाना धीरा विद्वांसो विदथेषु यज्ञमग्नेर्भामं मरुतां सकाशादोजोऽन्येषा पदार्थानां व्रातंव्रातं गणंगणं याचन्ते तथैव वयमेतत्सर्वमीमहे॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अग्निवाय्वादिपदार्थेभ्यः कार्य्यसमूहं साध्नुवन्ति ते विद्वांसः सन्ति॥६॥

पदार्थः-हे मनुष्यो! **(पृषदश्वासः)** सेचनकर्त्ता और वेग आदि गुणयुक्त **(अनवभ्रराधसः)** अविनाशी धनों के दाता **(गन्तारः)** प्राप्त होनेवाले पवनों के तुल्य **(सुशस्तिभिः)** सुन्दर स्तुतियों के साथ वर्त्तमान **(धीराः)** ध्यानवाले विद्वान् पुरुष **(विदथेषु)** विज्ञान आदिकों में **(यज्ञम्)** मेल करने और **(अग्नेः)** अग्नि से उत्पन्न **(भामम्)** तेज को **(मरुताम्)** पवनों के समीप से **(ओजः)** बल और अन्य पदार्थों के **(व्रातंव्रातम्)** वर्त्तमान वर्त्तमान **(गणंगणम्)** समूह-समूह की याचना करते हैं, वैसे ही हम लोग इस सबकी **(ईमहे)** याचना करते हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अग्नि, वायु आदि पदार्थों से कार्य्यों के समूह को साधते हैं, वे विद्वान् कहाते हैं॥६॥

पुनर्विद्युद्वन्मनुष्यैर्वर्त्तितव्यमित्युपदिश्यते॥

फिर मनुष्यों को विद्युत् के तुल्य वर्त्तना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम॥७॥

अग्निः। अस्मि। जन्मना। जातऽवेदाः। घृतम्। मे। चक्षुः। अमृतम्। मे। आसन्। अर्कः। त्रिऽधातुः। रजसः। विऽमानः। अजस्रः। घर्मः। हविः। अस्मि। नाम॥७॥

पदार्थः-**(अग्निः)** पावक इव **(अस्मि)** **(जन्मना)** **(जातवेदाः)** जातवित्तः **(घृतम्)** प्रदीप्तम् **(मे)** मम **(चक्षुः)** चष्टे नेनेक्ति नेत्रेन्द्रियम् **(अमृतम्)** अमृतात्मकरसम् **(मे)** मम **(आसन्)** आस्ये **(अर्कः)** वज्रो विद्युद्वा। **अर्क इति वज्रनामसु पठितम्।** (निघं०२.२०) **(त्रिधातुः)** त्रयो धातवो यस्मिन् सः **(रजसः)** लोकसमूहस्य **(विमानः)** विविधं मानं यस्य सः **(अजस्रः)** निरन्तरं गन्ता **(घर्मः)** प्रदीप्तो दिवसकरः **(हविः)** **(अस्मि)** **(नाम)** प्रसिद्धौ॥७॥

अन्वयः-हे मनुष्या! यथाग्निरिव जन्मना जातवेदा अहमस्मि मे चक्षुर्घृतं प्रदीप्तं मे आसन्नमृतं भवेत्। यथा रजसो विमानो त्रिधातुरर्कोऽजस्रो घर्मो हविरस्ति तथा नामाहमस्मि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्युद्वत्कार्य्यसिद्धिधारणं रोगविनाशकाऽऽहारकरणं शत्रुनिवारणं च कर्त्तव्यं येन विद्युत्फलमापतेत्॥७॥

पदार्थः-हे मनुष्यो! जैसे **(अग्निः)** अग्नि के सदृश **(जन्मना)** जन्म से **(जातवेदाः)** ज्ञानयुक्त मैं **(अस्मि)** वर्त्तमान हूँ **(मे)** मेरा **(चक्षुः)** नेत्र इन्द्रिय **(घृतम्)** प्रकाशमान **(मे)** मेरे **(आसन्)** मुख में **(अमृतम्)** अमृतस्वरूप रस हो, जैसे **(रजसः)** लोकसमूह का **(विमानः)** अनेक प्रकार के मानसहित

(त्रिधातुः) तीन धातुओं से युक्त **(अर्कः)** वज्र वा बिजुली **(अजस्रः)** निरन्तर चलनेवाला **(घर्मः)** प्रदीप्त सूर्य्य **(हविः)** हवन सामग्री है, वैसे ही **(नाम)** प्रसिद्ध मैं **(अस्मि)** हूँ॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि बिजुली के सदृश कार्य्यसिद्धि का धारण, रोग का नाशकारक भोजन करना और शत्रुओं का निवारण करें तो बिजुली का फल प्राप्त होवे॥७॥

अथ के शुद्धा जना इत्याह॥

अब शुद्ध मनुष्य कौन हैं, इस विषय को अगले मन्त्र में कहा है॥

त्रिभिः पवित्रैरपुपोद्ध्यर्कं हृदा मतिं ज्योतिरनु प्रजानन्।
वर्षिष्ठं रत्नमकृत स्वधाभिरादिद् द्यावापृथिवी पर्यपश्यत्॥८॥

त्रिऽभिः। पवित्रैः। अपुपोत्। हि। अर्कम्। हृदा। मतिम्। ज्योतिः। अनु। प्रऽजानन्। वर्षिष्ठम्। रत्नम्। अकृत। स्वधाभिः। आत्। इत्। द्यावापृथिवी इति। परि। अपश्यत्॥८॥

पदार्थः-(**त्रिभिः**) शरीरवाङ्मनोभिः **(पवित्रैः)** **(अपुपोत्)** पवित्रं कुर्य्यात् **(हि)** **(अर्कम्)** सुसंस्कृतमन्नम्। **अर्क इत्यन्ननामसु पठितम्।** (निघं०२.७) **(हृदा)** हृदयेन **(मतिम्)** प्रज्ञाम् **(ज्योतिः)** प्रकाशम् **(अनु)** **(प्रजानन्)** प्रकर्षेण बुद्ध्यमानः **(वर्षिष्ठम्)** अतिशयेन वृद्धम् **(रत्नम्)** रमणीयं धनम् **(अकृत)** कुर्य्यात् **(स्वधाभिः)** अन्नादिभिः **(आत्)** **(इत्)** एव **(द्यावापृथिवी)** प्रकाशान्तरिक्षे **(परि)** सर्वतः **(अपश्यत्)** पश्येत्॥८॥

अन्वयः-हे मनुष्या! यस्त्रिभिः पवित्रैर्हृदा अर्कमपुपोद्धि ज्योतिर्मतिमनु प्रजानन् स्वधाभिर्वर्षिष्ठं रत्नमकृत स आदिद् द्यावापृथिवी पर्य्यपश्यत् तमेव यूयं सेवध्वम्॥८॥

भावार्थः-त एव शुद्धा मनुष्या ये पवित्रां प्रज्ञां प्राप्यान्यान् मनुष्यान् विद्याविनयाभ्यां सन्तोष्य श्रियाद्युन्नतिं संसाध्नुयुः॥८॥

पदार्थः-हे मनुष्यो! जो **(त्रिभिः)** शरीर, वाणी और मन से **(पवित्रैः)** पवित्र करने में कारण तेजों और **(हृदा)** हृदय से **(अर्कम्)** उत्तम प्रकार संस्कार किये अन्न को **(अपुपोत्)** पवित्र करे **(हि)** जिससे **(ज्योतिः)** प्रकाश तथा **(मतिम्)** बुद्धि को **(अनु)** **(प्रजानन्)** अनुकूल जानता हुआ **(स्वधाभिः)** अन्न आदिकों से **(वर्षिष्ठम्)** अतिशय वृद्धियुक्त **(रत्नम्)** सुन्दर धन को **(अकृत)** करे वह **(आत्)** अनन्तर **(इत्)** ही **(द्यावापृथिवी)** प्रकाश और अन्तरिक्ष को **(परि)** सब प्रकार **(अपश्यत्)** देखे **[**उसी का तुम लोग सेवन करो**]**॥८॥

भावार्थः-वे ही शुद्ध मनुष्य हैं जो कि उत्तम बुद्धि को प्राप्त होकर अन्य मनुष्यों को विद्या और विनयों से सन्तुष्ट करके लक्ष्मी आदि की उन्नति सिद्ध करें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शतधा॑रमुत्स॒मक्षी॑यमाणं विप॒श्चितं॑ पि॒तरं॒ वक्त्वा॑नाम्।
मे॒ळिं मद॑न्तं पि॒त्रोरु॒पस्थे॒ तं रो॑दसी पिपृतं सत्य॒वाच॑म्॥ ९॥ २७॥

श॒तऽधा॑रम्। उत्स॑म्। अक्षी॑यमाणम्। वि॒प॒:ऽचित॑म्। पि॒तर॑म्। वक्त्वा॑नाम्। मे॒ळिम्। मद॑न्तम्। पि॒त्रो:। उ॒प॒ऽस्थे॑। तम्। रो॒द॒सी॒ इति॑। पि॒पृ॒त॒म्। स॒त्य॒ऽवा॑चम्॥ ९॥

पदार्थः-(**शतधारम्**) शतधा धारा सुशिक्षिता वाग् यस्य तम् (**उत्सम्**) कूपमिव (**अक्षीयमाणम्**) विद्याविज्ञानागाधमक्षीणविद्यम् (**विपश्चितम्**) विद्वांसम् (**पितरम्**) पितृवद्वर्त्तमानम् (**वक्त्वानाम्**) वक्तुं समुचितानां वाक्यानाम् (**मेळिम्**) सुशिक्षितां वाचम् (**मदन्तम्**) स्तुवन्तम् (**पित्रोः**) जनकजनन्योः (**उपस्थे**) समीपे (**तम्**) (**रोदसी**) भूमिसूर्य्यौ (**पिपृतम्**) पालयतः। अत्र पुरुषव्यत्ययः। (**सत्यवाचम्**) सत्या वाग् यस्य तम्॥ ९॥

अन्वयः-हे मनुष्या! उत्समिवाक्षीयमाणं शतधारं पितरं वक्त्वानां वक्तारं मेळिं मदन्तं सत्यवाचं विपश्चितं यं पित्रोरुपस्थे रोदसी पिपृतं पालयतस्तं सेवध्वम्॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। योऽपरिमितविद्यो गम्भीरप्रज्ञः पृथिवीवत् क्षमावानादित्यवच्छुद्धान्तःकरणो विद्वान् नृषु पितृवद्वर्त्तेत तमेव सर्वे स्वात्मवत्सेवन्ताम्॥ ९॥

अत्र विद्वदग्निवायुगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षड्विंशतितमं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! (**उत्सम्**) कूप के सदृश (**अक्षीयमाणम्**) विद्या के विज्ञान से थाहरहित पूर्ण विद्यायुक्त (**शतधारम्**) सैकड़ों प्रकार की उत्तम शिक्षा सहित वाणी वाले (**पितरम्**) पिता के तुल्य वर्त्तमान (**वक्त्वानाम्**) कहने को इकट्ठे किये गये वाक्यों के वक्ता (**मेळिम्**) उत्तम प्रकार शिक्षित वाणी और (**मदन्तम्**) स्तुतिकारक (**सत्यवाचम्**) सत्य वाणीयुक्त जिस (**विपश्चितम्**) विद्वान् पुरुष को (**पित्रोः**) पिता-माता के (**उपस्थे**) समीप में (**रोदसी**) भूमि-सूर्य्य (**पिपृतम्**) पालते हैं, उस ही की सब लोग अपने आत्मा के तुल्य सेवा करो॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पूर्ण विद्वान्, अति सूक्ष्म बुद्धियुक्त, पृथिवी के सदृश क्षमाशील, सूर्य्य के सदृश अन्तःकरण से शुद्ध, विद्वान्, मनुष्यो में पिता के सदृश वर्त्ताव रक्खे; उसी की सब लोग अपने आत्मा के तुल्य सेवा करें॥ ९॥

इस सूक्त में विद्वान्, अग्नि और वायु के गुणों का वर्णन होने से सूक्त में कहे अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह छब्बीसवां सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥

अथ पञ्चदशर्चस्य सप्तविंशतितमस्य सूक्तस्य विश्वामित्र ऋषिः। १ ऋतवोऽग्निर्वा। २-१५ अग्निर्देवता। १, ७-१०, १४, १५ निचृद्गायत्री। २, ३, ६, ११, १२ गायत्री। ४, ५, १३ विराड्गायत्री छन्दः। षड्जः स्वरः॥

अथ विद्वद्भिः किं कार्यमित्याह॥

अब पन्द्रह ऋचावाले सत्ताईसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

प्र वो॒ वाजा॑ अ॒भिद्य॑वो ह॒विष्म॑न्तो घृ॒ताच्या॑। दे॒वाञ्जिग॑ाति सुम्न॒युः॥ १॥

प्र। व॒ः। वाजा॑ः। अ॒भिऽद्य॑वः। ह॒विष्म॑न्तः। घृ॒ताच्या॑। दे॒वान्। जि॒गा॒ति॒। सु॒म्न॒युः॥ १॥

पदार्थः-(**प्र**) (**वः**) युष्माकम् (**वाजाः**) विज्ञानादयः पदार्थाः (**अभिद्यवः**) अभितः प्रकाशमानाः (**हविष्मन्तः**) बहूनि हवींषि देयानि वस्तूनि विद्यन्ते येषु ते (**घृताच्या**) या घृतमुदकमञ्चति प्राप्नोति तया रात्र्या (**देवान्**) (**जिगाति**) स्तौति (**सुम्नयुः**) य आत्मनः सुम्नं सुखमिच्छुः॥ १॥

अन्वयः-हे मनुष्या! ये वोऽभिद्यवो हविष्मन्तो वाजा घृताच्या सह वर्त्तन्ते तैर्युक्तो यः सुम्नयुर्देवान् प्र जिगाति तांस्तं च यूयं प्राप्नुत॥ १॥

भावार्थः-यथा दिवसे पदार्थाः शुष्का भवन्ति तथैव रात्रावार्द्रा जायन्ते तथैव ये स्वकीयाः पदार्थास्तेऽन्येषां येऽन्येषां ते स्वकीयाः सन्तीति सुखेच्छया विद्वत्सङ्गः कर्त्तव्यः॥ १॥

पदार्थः-हे मनुष्यो! जो (**वः**) आप लोगों के (**अभिद्यवः**) चारों ओर से प्रकाशमान (**हविष्मन्तः**) बहुत-सी देने योग्य वस्तुओं से युक्त (**वाजाः**) विज्ञान आदि पदार्थ (**घृताच्या**) जल को प्राप्त होनेवाली रात्रि के सहित वर्त्तमान हैं, उनसे युक्त जो (**सुम्नयुः**) अपने सुख का अभिलाषी (**देवान्**) विद्वानों की (**प्र, जिगाति**) उत्तम प्रकार स्तुति करता है, उन विद्वानों और स्तुतिकारक उस पुरुष को आप लोग प्राप्त होओ॥ १॥

भावार्थः-जैसे दिन में पदार्थ सूखते और रात्रि में गीले होते हैं उसी प्रकार जो अपने पदार्थ हैं वे औरों के और जो औरों के हैं वे अपने हैं इस प्रकार सुख की इच्छा से विद्वानों का सङ्ग करना चाहिये॥ १॥

पुनरग्निना किं सिध्यतीत्याह॥

फिर अग्नि से क्या सिद्ध होता है, इस विषय को अगले मन्त्र में कहा है॥

ईळे॑ अ॒ग्निं वि॑प॒श्चित॑ं गि॒रा य॒ज्ञस्य॒ साध॑नम्। श्रु॒ष्टी॒वान॑ं धि॒ताव॑ानम्॥ २॥

ईळे॑। अ॒ग्निम्। वि॒प॒ः॒ऽचित॑म्। गि॒रा। य॒ज्ञस्य॑। साध॑नम्। श्रु॒ष्टी॒ऽवान॑म्। धि॒तऽव॑ानम्॥ २॥

पदार्थः-(**ईळे**) स्तौमि (**अग्निम्**) पावकमिव वर्त्तमानम् (**विपश्चितम्**) पण्डितम् (**गिरा**) वाण्या (**यज्ञस्य**) (**साधनम्**) सिद्धिकरम् (**श्रुष्टीवानम्**) आशुगन्तारं गमयितारं वा (**धितावानम्**) पदार्थानां धारकम्॥ २॥

अन्वयः-हे मनुष्या! यथाऽहं गिरा यज्ञस्य साधनं श्रुष्टीवानं धितावानमग्निमिव विपश्चितमीळे तथा भवन्तः स्तुवन्तु॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सङ्गतस्य व्यवहारस्य सिद्धयेऽग्निर्मुख्योऽस्ति तथैव धर्मार्थकामविद्याप्राप्तये विद्वान् प्रधानोऽस्तीति मन्तव्यम्॥ २॥

पदार्थः-हे मनुष्यो! जैसे मैं (**गिरः**) वाणी से (**यज्ञस्य**) अहिंसारूप यज्ञ की (**साधनम्**) सिद्धि करने (**श्रुष्टीवानम्**) शीघ्र चलने वा चलानेवाले (**धितावानम्**) पदार्थों के धारणकर्त्ता (**अग्निम्**) अग्नि के सदृश तेजस्वी (**विपश्चितम्**) पण्डित विद्वान् की (**ईळे**) स्तुति करता हूँ, वैसे आप लोग भी स्तुति करें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे किसी पदार्थ के जोड़ने आदि व्यवहार की सिद्धि के लिये अग्नि मुख्योपकारी है, वैसे ही धर्म, अर्थ, काम और विद्या की प्राप्ति के लिये विद्वान् जन मुख्य है, ऐसा जानना चाहिये॥ २॥

विदुषां सङ्गः कर्त्तव्य इत्याह॥

विद्वानों का सङ्ग सबको करना चाहिये, इस विषय को अगले मन्त्र में कहा है॥

अग्ने॑ शकेम॑ ते व॒यं यमं॑ दे॒वस्य॑ वा॒जिन॑:। अति॒ द्वेषां॑सि तरेम॥ ३॥

अग्ने॑। शकेम॑। ते॒। व॒यम्। यम॑म्। दे॒वस्य॑। वा॒जिन॑:। अति॑। द्वेषां॑सि। त॒रे॒म॒॥ ३॥

पदार्थः-(**अग्ने**) पावकवत्पवित्रपुरुषार्थिन् (**शकेम**) शक्नुयाम। अत्र विकरणव्यत्ययेन शः। (**ते**) तव (**वयम्**) **[(यमम्)]** सुनियमम् (**देवस्य**) विदुषः (**वाजिनः**) विज्ञानवतः (**अति**) उल्लङ्घने (**द्वेषांसि**) द्वेषयुक्तानि कर्म्माणि (**तरेम**) पारं गच्छेम॥ ३॥

अन्वयः-हे अग्ने! त्वं यथा वयं वाजिनो देवस्य ते यमं प्राप्तुं शकेम द्वेषांस्यतितरेम तथा विधेहि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। जिज्ञासुभिर्विद्वांस एवं प्रार्थनीया यथा वयं सुनियमान् प्राप्य द्वेषादीनि दुर्व्यसनान्युल्लङ्घ्येम तथाऽस्माकमुपरि कृपा विधेया॥ ३॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश पवित्र पुरुषार्थी पुरुष! आप जैसे (**वयम्**) हम लोग (**वाजिनः**) विज्ञानयुक्त (**देवस्य**) विद्वान् (**ते**) आपके (**यमम्**) उत्तम नियम को प्राप्त होने के लिये (**शकेम**) समर्थ हों और (**द्वेषांसि**) द्वेषयुक्त कर्मों के (**अति**) (**तरेम**) पार पहुंचें, ऐसा यत्न करो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मोक्ष आदि की जिज्ञासाकारक पुरुषों को

चाहिये कि विद्वान् पुरुषों की ऐसे प्रार्थना करें कि जिस प्रकार हम लोग उत्तम नियमों को प्राप्त होकर द्वेष आदि दुष्ट व्यसनों के पार जायें, ऐसी हम लोगों के ऊपर कृपा करिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

समिध्यमानो अध्वरे३ऽग्निः पावक ईड्यः। शोचिष्केशस्तमीमहे॥४॥

समऽइध्यमानः। अध्वरे। अग्निः। पावकः। ईड्यः। शोचिःऽकेशः। तम्। ईमहे॥४॥

पदार्थः-(**समिध्यमानः**) सम्यक् प्रदीप्यमानः (**अध्वरे**) अहिंसामये यज्ञे (**अग्निः**) विद्युदिव (**पावकः**) पवित्रकर्त्ता (**ईड्यः**) स्तोतुमर्हः (**शोचिष्केशः**) शोचींषि तेजांसि केशा इव यस्य सः (**तम्**) (**ईमहे**) याचामहे॥४॥

अन्वयः-हे मनुष्या! योऽध्वरे समिध्यमानः शोचिष्केशः पावकोऽग्निरिवेड्यो भवेत् तं वयमीमहे यूयमप्येतं सेवध्वम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽस्मिन् जगत्यग्निरेव सर्वेभ्यो महानत एतद्विद्या याचनीयास्ति तथैव विद्वांसः सर्वेषु महान्तश्चैतद्विद्याप्राप्तये याचनीयाः सन्ति॥४॥

पदार्थः-हे मनुष्यो! जो (**अध्वरे**) अहिंसा रूप यज्ञ में (**समिध्यमानः**) उत्तम रीति से प्रकाशमान (**शोचिष्केशः**) केशों के सदृश तेजों से युक्त (**पावकः**) पवित्र करनेवाला (**अग्निः**) बिजुली के सदृश (**ईड्यः**) स्तुति करने योग्य होवे (**तम्**) उसकी हम लोग (**ईमहे**) याचना करते हैं, आप लोग भी इसका सेवन करिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इस संसार में अग्निरूप पदार्थ ही सम्पूर्ण पदार्थों से श्रेष्ठ है, इसलिये इस अग्नि विषयणी विद्या की प्रार्थना करनी योग्य है, वैसे ही विद्वान् लोग सम्पूर्ण मनुष्यों में श्रेष्ठ और उनकी विद्याप्राप्ति के लिये प्रार्थना करनी चाहिये॥४॥

विद्वांसोऽग्निवत्कार्याणि साध्नुवन्तीत्याह॥

विद्वान् लोग अग्नि के तुल्य कार्यसाधक होते हैं, इस विषय को अगले मन्त्र में कहा है॥

पृथुपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः। अग्निर्यज्ञस्य हव्यवाट्॥५॥२८॥

पृथुऽपाजाः। अमर्त्यः। घृतऽनिर्निक्। सुऽआहुतः। अग्निः। यज्ञस्य। हव्यऽवाट्॥५॥

पदार्थः- (**पृथुपाजाः**) पृथु विस्तीर्णं पाजो बलं यस्य सः (**अमर्त्यः**) स्वस्वरूपेण नित्यः (**घृतनिर्णिक्**) आज्योदकयोः शोधकः (**स्वाहुतः**) सुष्ठु मानेन कृताऽऽह्वानः (**अग्निः**) वह्निरिव (**यज्ञस्य**) राजपालनादिव्यवहारस्य (**हव्यवाट्**) यो हव्यानि प्राप्तव्यानि वस्तूनि वहति प्रापयति सः॥५॥

अन्वयः-हे मनुष्या! यूयं यः पृथुपाजा अमर्त्यो यज्ञस्य हव्यवाड् घृतनिर्णिगग्निरिव स्वाहुतो भवेत्तं विद्वांसं सततं सेवध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा साधनोपसाधनैरुपचरितोऽग्निः कार्य्याणि साध्नोति तथैव सेवया सन्तोषिता विद्वांसो विद्यादिसिद्धिं सम्पादयन्ति॥५॥

पदार्थः-हे मनुष्यो! आप लोग जो **(पृथुपाजाः)** विस्तारसहित बलयुक्त **(अमर्त्यः)** अपने स्वरूप से नाशरहित **(यज्ञस्य)** राज्यपालन आदि व्यवहार के **(हव्यवाट्)** प्राप्त होने योग्य वस्तुओं को धारण करनेवाले **(घृतनिर्णिक्)** जल और घी के शोधनेवाले **(अग्निः)** अग्नि के सदृश **(स्वाहुतः)** अच्छे प्रकार आदरपूर्वक पुकारे गये उस विद्वान् पुरुष की निरन्तर सेवा करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे साधन और उपसाधनों से उपकार में लाया गया अग्नि कार्य्यों को सिद्ध करता है, वैसे ही सेवा से संतुष्टता को प्राप्त किये विद्वान् लोग विद्या आदि की सिद्धि को सम्पादन करते हैं॥५॥

पुनर्मनुष्या किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः। आ चक्रुरग्निमूतये॥६॥

तम्। सऽबाधः। यतऽस्रुचः। इत्था। धिया। यज्ञऽवन्तः। आ। चक्रुः। अग्निम्। ऊतये॥६॥

पदार्थः-(**तम्**) **(सबाधः)** दुर्व्यसनानां बाधेन सह ये वर्त्तन्ते **(यतस्रुचः)** यता उद्यताः स्रुचः कर्मसाधनानि यैस्ते **(इत्था)** अनेन प्रकारेण **(धिया)** प्रज्ञया कर्मणा वा **(यज्ञवन्तः)** प्रशस्ता यज्ञाः प्रयत्ना येषान्ते **(आ)** **(चक्रुः)** कुर्युः **(अग्निम्)** पावकमिव विद्वांसम् **(ऊतये)** रक्षणाद्याय॥६॥

अन्वयः-हे मनुष्या! यथा सबाधो यतस्रुचो यज्ञवन्तो जना धियोतयेऽग्निमिव विद्वांसमा चक्रुस्तमित्था यूयं सेवध्वम्॥६॥

भावार्थः-हे मनुष्या! यथा प्रज्ञाकर्मकुशला सद्व्यवहारान् साध्नुवन्ति तथैव जिज्ञासवो विद्वांसं प्रसाद्य शुभान् गुणान् प्राप्नुवन्तु॥६॥

पदार्थः-हे मनुष्यो! जैसे **(सबाधः)** दुष्ट व्यसनों के नाशकर्त्ता **(यतस्रुचः)** उद्योगयुक्त कर्मसाधनों के सहित **(यज्ञवन्तः)** प्रशंसा करने योग्य प्रयत्न करनेवाले जन **(धिया)** बुद्धि वा कर्म से **(ऊतये)** रक्षण आदि के लिये **(अग्निम्)** अग्नि के सदृश तेजस्वी विद्वान् पुरुष का **(आ)** **(चक्रुः)** आदर करते हैं, वैसे **(तम्)** उस विद्वान् पुरुष की **(इत्था)** इसी प्रकार आप लोग भी सेवा करें॥६॥

भावार्थः-हे मनुष्यो! जैसे बुद्धि और कर्म में चतुर पुरुष उत्तम व्यवहारों को सिद्ध करते हैं, वैसे ही धर्म आदि को जानने की इच्छायुक्त पुरुष, विद्वान् जन को प्रसन्न करके उत्तम गुणों का ग्रहण करें॥६॥

पुनर्विद्यार्थिनः किं कुर्युरित्याह॥

फिर विद्यार्थी क्या करें, इस विषय को अगले मन्त्र में कहा है॥

होता॑ दे॒वो अम॑र्त्यः पु॒रस्ता॑देति मा॒यया॑। वि॒दथा॑नि प्रचो॒दय॑न्॥७॥

होता॑। दे॒वः। अम॑र्त्यः। पु॒रस्ता॑त्। एति॑। मा॒यया॑। वि॒दथा॑नि। प्र॒ऽचो॒दय॑न्॥७॥

पदार्थः-(**होता**) दाता (**देवः**) दिव्यगुणकर्मस्वभावः (**अमर्त्यः**) मरणधर्मरहितः (**पुरस्तात्**) प्रथमतः (**एति**) गच्छति (**मायया**) प्रज्ञया (**विदथानि**) विज्ञानानि (**प्रचोदयन्**) प्रज्ञापयन्॥७॥

अन्वयः-हे जिज्ञासवो! यथाऽमर्त्यो होता देवः पुरस्तान्मायया सह विदथानि प्रचोदयन् युष्मानेति तथैतं यूयमपि प्राप्नुत॥७॥

भावार्थः-हे विद्यार्थिनो योऽध्यापको युष्मभ्यं निष्कपटतया विद्यादिशुभगुणान् प्रदाय सुशिक्षयेत्तं यूयमप्यात्मवत्सेवध्वम्॥७॥

पदार्थः-हे धर्म आदि को जानने की इच्छा करनेवाले पुरुषो! जैसे (**अमर्त्यः**) मरणधर्म से रहित (**होता**) देनेवाला (**देवः**) उत्तम गुण, कर्म, स्वभावयुक्त पुरुष (**पुरस्तात्**) पहिले से (**मायया**) उत्तम बुद्धि के साथ (**विदथानि**) विज्ञानों का (**प्रचोदयन्**) प्रचार करता हुआ आप लोगों को (**एति**) प्राप्त होता है, वैसे उसको आप लोग भी प्राप्त होइये॥७॥

भावार्थः-हे विद्यार्थी जनो! जो अध्यापक पुरुष आप लोगों के लिये कपट त्याग के विद्या आदि उत्तम गुणों को देकर उत्तम शिक्षा देवे, उसकी आप लोग भी अपने आत्मा के तुल्य सेवा करो॥७॥

पुनर्विद्वदितरे किं कुर्युरित्याह॥

फिर विद्वानों से भिन्न जन क्या करें, इस विषय को अगले मन्त्र में कहा है॥

वा॒जी वाजे॑षु धीयतेऽध्व॒रेषु॒ प्र णी॑यते। विप्रो॑ य॒ज्ञस्य॒ साध॑नः॥८॥

वा॒जी। वाजे॑षु। धी॒य॒ते॒। अ॒ध्व॒रेषु॑। प्र। नी॒य॒ते॒। विप्रः॑। य॒ज्ञस्य॑। साध॑नः॥८॥

पदार्थः-(**वाजी**) वेगवान् वह्निः (**वाजेषु**) विज्ञानक्रियामयेषु (**धीयते**) ध्रियते (**अध्वरेषु**) मित्रत्वादिगुणयुक्तव्यवहारेषु विधियज्ञेषु वा (**प्र**) (**नीयते**) प्राप्यते (**विप्रः**) मेधावी (**यज्ञस्य**) सद्व्यवहारस्य (**साधनः**) यः साध्नोति सः॥८॥

अन्वयः-हे जिज्ञासवो यथर्त्विग्भिर्वाजेष्वध्वरेषु यज्ञस्य साधनो वाजी वेगयुक्तोऽग्निर्धीयते तथा विप्रः प्र णीयते॥८॥

भावार्थः-हे मनुष्या! यथाऽग्निहोत्रादिक्रियामयेषु यज्ञेषु प्राधान्येनाऽग्निराश्रीयते तथैव विद्याविनयसुशिक्षाव्यवहारेषु विद्वानाश्रयितव्यः॥८॥

पदार्थः-हे धर्म आदि की जिज्ञासा करनेवाले पुरुषो! जैसे ऋत्विजों से (**वाजेषु**) विज्ञान और

क्रियास्वरूप **(अध्वरेषु)** मित्रता आदि गुणयुक्त व्यवहारों वा यज्ञ में **(यज्ञस्य)** उत्तम व्यवहार का **(साधनः)** सिद्धिकर्त्ता **(वाजी)** वेगयुक्त अग्नि **(धीयते)** धारण किया जाता है, वैसे **(विप्रः)** बुद्धिमान् **(प्र) (नीयते)** प्राप्त किया जाता है॥८॥

भावार्थः-हे मनुष्यो! जैसे अग्निहोत्र आदि क्रियास्वरूप यज्ञों में मुख्यभाव से अग्नि का आश्रय किया जाता है, वैसे ही विद्या, विनय और उत्तम शिक्षा के व्यवहारों में विद्वान् का आश्रय करना चाहिये॥८॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहा है॥

धि॒या च॑क्रे॒ वरे॑ण्यो भू॒तानां॒ गर्भ॒मा द॑धे। दक्ष॑स्य पि॒तर॑ं तना॑॥९॥

धि॒या। च॒क्रे॒। वरे॑ण्यः। भू॒ताना॑म्। गर्भ॑म्। आ। द॒धे॒। दक्ष॑स्य। पि॒तर॑म्। तना॑॥९॥

पदार्थः-(**धिया**) श्रेष्ठया प्रज्ञया शिक्षया वा **(चक्रे)** कुर्य्यात् **(वरेण्यः)** वरितुमर्होऽतिश्रेष्ठः **(भूतानाम्)** प्राणिनाम् **(गर्भम्)** विद्यादिसद्गुणस्थापनाख्यम् **(आ)** समन्तात् **(दधे)** दधेत् **(दक्षस्य)** चतुरस्य विद्यार्थिनः **(पितरम्)** पितृवत्पालकम् **(तना)** विस्तृतया॥९॥

अन्वयः-हे मनुष्या! यो वरेण्यस्तना धिया दक्षस्य पितरं भूतानां गर्भमा दधे विद्यावृद्धिं चक्रे तमात्मवत्सेवध्वम्॥९॥

भावार्थः-यथा पतिः पत्न्यां गर्भं धारयित्वोत्तमान्यपत्यान्युत्पादयति तथैव विद्वांसो मनुष्याणां बुद्धौ विद्यागर्भं स्थापयित्वोत्तमान् व्यवहारान् जनयेयुः॥९॥

पदार्थः-हे मनुष्यो! जो **(वरेण्यः)** आदर करने योग्य अति श्रेष्ठ पुरुष **(तना)** विस्तारयुक्त **(धिया)** श्रेष्ठ बुद्धि वा शिक्षा से **(दक्षस्य)** चतुर विद्यार्थी पुरुष के **(पितरम्)** पिता के सदृश पालनकर्त्ता **(भूतानाम्)** प्राणियों के **(गर्भम्)** विद्या आदि उत्तम गुणों को स्थित करने रूप गर्भ को **(आ) (दधे)** सब प्रकार धारण करें और विद्या सम्बन्धी वृद्धि को **(चक्रे)** करें तो उसकी अपने आत्मा के सदृश सेवा करो॥९॥

भावार्थः-जैसे पति अपनी स्त्री में गर्भ को धारण करके श्रेष्ठ सन्तानों को उत्पन्न करता है, वैसे ही विद्वान् लोग मनुष्यों की बुद्धि में विद्यासम्बन्धी गर्भ की स्थिति करके उत्तम व्यवहारों को उत्पन्न करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि त्वा॑ दधे॒ वरे॑ण्यं॒ दक्ष॑स्येळा॑ स॒हस्कृत। अग्ने॑ सुदी॒तिमु॒शिज॑म्॥१०॥२९॥

नि। त्वा। दधे। वरेण्यम्। दक्षस्य। इळा। सहःऽकृत। अग्ने। सुऽदीतिम्। उशिजम्॥ १०॥

पदार्थः-(**नि**) निश्चये (**त्वा**) त्वाम् (**दधे**) दधेय (**वरेण्यम्**) स्वीकर्त्तुं योग्यम् (**दक्षस्य**) बलस्य (**इळा**) प्रशंसितेनोपदेशेन सुसंस्कृतेनाऽन्नादिना वा (**सहस्कृत**) सहो बलं कृतं येन तत्सम्बुद्धौ (**अग्ने**) पावक इव वर्त्तमान (**सुदीतिम्**) सुष्ठुविज्ञानप्रकाशयुक्तम् (**उशिजम्**) सद्गुणप्रचारं कामयमानम्॥१०॥

अन्वयः-हे सहस्कृताऽग्ने! यथाऽहमिळा दक्षस्य वरेण्यं सुदीतिमुशिजं त्वा नि दधे तथैव त्वं मां विद्यानिधिं सम्पादय॥१०॥

भावार्थः-यथा विद्यार्थिनोऽध्यापकानामिच्छानुकूलानि कर्माणि कृत्वा प्रसन्नान् रक्षन्ति तथैवाऽध्यापका विद्यार्थिनामिच्छानुकूलाञ्छुभान् गुणान् दत्वा प्रसादयन्तु॥१०॥

पदार्थः-हे (**सहस्कृत**) बलकारक (**अग्ने**) अग्नि के सदृश तेजयुक्त पुरुष! जैसे मैं (**इळा**) उत्तम उपदेश वा उत्तम प्रकार संस्कारयुक्त अन्न आदि से (**दक्षस्य**) पराक्रम के (**वरेण्यम्**) स्वीकार करने योग्य (**सुदीतिम्**) उत्तम विज्ञान के प्रकाश से युक्त (**उशिजम्**) उत्तम गुणों के प्रचार की कामना करनेवाले (**त्वा**) आपको (**नि**) निश्चय से (**दधे**) धारण करूं, वैसे ही आप मुझको विद्या का पात्र करो॥१०॥

भावार्थः-जैसे विद्यार्थी जन अध्यापक लोगों की इच्छा के अनुसार कर्म्मों को कर प्रसन्न रखते हैं, वैसे ही अध्यापक लोग विद्यार्थियों की इच्छा के अनुकूल उत्तम गुणों को देकर प्रसन्न करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्निं यन्तुरमप्तुरमृतस्य योगे वनुषः। विप्रा वाजैः समिन्धते॥ ११॥

अग्निम्। यन्तुरम्। अप्ऽतुरम्। ऋतस्य। योगे। वनुषः। विप्राः। वाजैः। सम्। इन्धते॥ ११॥

पदार्थः-(**अग्निम्**) पावकमिव वर्त्तमानम् (**यन्तुरम्**) यन्तारम्। अत्र ययधातोर्बाहुलकात्तुरः प्रत्ययः। (**अप्तुरम्**) योऽपः प्राणान् जलानि वा तोरयति प्रेरयति तम् (**ऋतस्य**) सत्यस्य (**योगे**) (**वनुषः**) याचकाः (**विप्राः**) मेधाविनः (**वाजैः**) विज्ञानादिभिः (**सम्**) (**इन्धते**) सम्यक् प्रदीपयेयुः॥११॥

अन्वयः-हे मनुष्या! यथा वनुषो विप्रा ऋतस्य योगे वाजैर्यन्तुरमप्तुरमग्निं समिन्धते तथैव सर्वैर्विद्याः प्रकाशनीयाः॥११॥

भावार्थः-यदा विदुषां सङ्गो भवेत्तदा सुविज्ञानस्यैव प्रश्नसमाधानाभ्यां याचना कार्य्या अस्मात्परो लाभोऽन्यो नैव मन्तव्यः॥११॥

पदार्थः-हे मनुष्यो! जैसे (**वनुषः**) याचना करनेवाले (**विप्राः**) बुद्धिमान् जन (**ऋतस्य**) सत्य के (**योगे**) योग में (**वाजैः**) विज्ञान आदिकों से (**यन्तुरम्**) प्राप्तिकारक (**अप्तुरम्**) प्राण वा जलों की प्रेरणाकर्त्ता (**अग्निम्**) अग्नि के सदृश तेजस्वी को (**सम्**) (**इन्धते**) उत्तम प्रकार प्रदीप्त करें, वैसे ही

सम्पूर्ण जनों से विद्या प्रकाश करने योग्य हैं॥११॥

भावार्थः-जिस समय विद्वान् पुरुषों का सङ्ग होवे उस समय उत्तम विज्ञान ही की प्रश्न-उत्तरों से याचना करनी चाहिये, इससे अधिक लाभ और न समझना चाहिये॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ऊर्जो नपा॑तमध्व॒रे दीदि॒वांस॒मुप॒ द्यवि॑। अ॒ग्निमी॑ळे क॒विक्र॑तुम्॥ १२॥

ऊर्जः। नपा॑तम्। अ॒ध्व॒रे। दीदि॒ऽवांस॑म्। उप॑। द्यवि॑। अ॒ग्निम्। ई॒ळे॒। क॒विऽक्र॑तुम्॥ १२॥

पदार्थः-(**ऊर्जः**) बलात् (**नपात्**) विनाशरहितम् (**अध्वरे**) सङ्गते संसारे (**दीदिवांसम्**) प्रदीप्यमानम् (**उप**) (**द्यवि**) प्रकाशे (**अग्निम्**) वह्निवद् वर्त्तमानम् (**ईळे**) स्तौमि (**कविक्रतुम्**) कवीनां विदुषां क्रतुः प्रज्ञा कर्म वा क्रतुवत् यस्य सः तम्॥१२॥

अन्वयः-हे मनुष्या! यं द्यव्यध्वरेऽग्निमिव वर्त्तमानमूर्जो नपातं कविक्रतुं दीदिवांसं विद्वांसमुपेळे तथैतं यूयमपि प्रशंसत॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा यज्ञेऽग्निः प्रकाशमानो विराजते तथैव विद्याप्रकाशके व्यवहारे विद्वांसः प्रकाशन्ते॥१२॥

पदार्थः-हे मनुष्यो! जिसको (**द्यवि**) प्रकाश तथा (**अध्वरे**) मेल को प्राप्त संसार में (**अग्निम्**) अग्नि के सदृश तेजयुक्त (**ऊर्जः**) बल से (**नपातम्**) विनाशरहित (**कविक्रतुम्**) विद्वानों की बुद्धि वा कर्म को यज्ञ समझनेवाला (**दीदिवांसम्**) प्रकाशमान विद्वान् पुरुष के (**उप**) समीप (**इळे**) स्तुति करता हूँ, वैसे इसकी आप लोग भी प्रशंसा करो॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यज्ञ में अग्नि प्रकाशमान होकर शोभित होता है, वैसे ही विद्या के प्रकाशकर्त्ता व्यवहार में विद्वान् जन प्रकाशित होते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ई॒ळेन्यो॑ नम॒स्यस्ति॒रस्तमां॑सि दर्श॒तः। सम॒ग्निरि॑ध्यते॒ वृषा॑॥ १३॥

ई॒ळेन्यः॑। न॒म॒स्यः॑। ति॒रः। तमां॑सि। दृ॒श॒तः। सम्। अ॒ग्निः। इ॒ध्य॒ते॒। वृषा॑॥ १३॥

पदार्थः-(**ईळेन्यः**) ईळितुं स्तोतुमर्हः (**नमस्यः**) सत्कर्त्तुं योग्यः (**तिरः**) तिरस्कुर्वन् (**तमांसि**) रात्रीः (**दर्शतः**) द्रष्टुं योग्यः (**सम्**) सम्यक् (**अग्निः**) अग्निरिव प्रकाशमानः (**इध्यते**) प्रदीप्यते (**वृषा**) वर्षकः॥१३॥

अन्वयः-हे मनुष्यास्तमांसि तिरः तिरस्कुर्वन्नग्निरिव वृषा दर्शत इळेन्यो नमस्यः समिध्यते तं यूयं सततं भजत॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यस्तमो निहत्य प्रकाशं जनयति तथैवाप्ता विद्वांसोऽविद्यां हत्वा विद्यां प्रकाशयन्ति॥१३॥

पदार्थः-हे मनुष्यो! **(तमांसि)** रात्रियों के **(तिरः)** तिरस्कार करनेवाले **(अग्निः)** अग्नि के सदृश प्रकाशमान **(वृषा)** वृष्टिकर्त्ता **(दर्शतः)** देखने **(ईडेन्यः)** स्तुति करने और **(नमस्यः)** सत्कार करने योग्य पुरुष **(सम्)** उत्तम प्रकार **(इध्यते)** प्रकाशित किया जाता है, उसका आप निरन्तर आदर करो॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य अन्धकार को दूर कर प्रकाश उत्पन्न करता है, वैसे ही यथार्थवक्ता विद्वान् लोग अविद्या का नाश और विद्या का प्रकाश करते हैं॥१३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहा है॥

वृषो॑ अ॒ग्निः समि॑ध्य॒तेऽश्वो॒ न देव॒वाह॑नः। तं ह॒विष्म॑न्त ईळते॥१४॥

वृषो॒ इति॑। अ॒ग्निः। सम्। इ॒ध्य॒ते॒। अश्वः॑। न। दे॒व॒ऽवाह॑नः। तम्। ह॒विष्म॑न्तः। ई॒ळ॒ते॒॥१४॥

पदार्थः-**(वृषः)** वर्षकः **(अग्निः)** पावकः **(सम्)** **(इध्यते)** सम्यक् प्रकाश्यते **(अश्वः)** आशुगामी तुरङ्गः **(न)** इव **(देववाहनः)** यो देवान् दिव्यान् वेगादिगुणान् वाहयति प्रापयति सः **(तम्)** **(हविष्मन्तः)** बहूनि हवींष्यादानानि येषान्ते **(ईळते)** स्तुवन्ति॥१४॥

अन्वयः-यो वृषो देववाहनोऽग्निरश्वो न समिध्यते तं हविष्मन्त ईळते॥१४॥

भावार्थः-हे मनुष्या! यथा बलिष्ठा वेगवन्तोऽश्वा यानं सद्यो गमयन्ति तथैवाऽग्निरस्तीति वेद्यम्। यथाऽस्य गुणान् विद्वांसो जानन्ति तथैव यूयमपि जानीत॥१४॥

पदार्थः-जो **(वृषः)** वृष्टिकर्त्ता **(देववाहनः)** उत्तम वेग आदि गुणों को प्राप्त करानेवाला **(अग्निः)** अग्नि **(अश्वः)** शीघ्र चलनेवाले घोड़े के **(न)** सदृश **(सम्)** **(इध्यते)** प्रकाशित किया जाता है **(तम्)** उसकी **(हविष्मन्तः)** बहुत शीघ्र ग्रहण करने योग्य वस्तुओं से युक्त पुरुष **(ईळते)** स्तुति करते हैं॥१४॥

भावार्थः-हे मनुष्यो! जैसे बल और वेग से युक्त घोड़े वाहन को शीघ्र ले चलते हैं, वैसे ही अग्नि को भी समझना चाहिये और जैसे इस अग्नि के गुणों को विद्वान् लोग जानते हैं, वैसे आप लोग भी जानिये॥१४॥

पुनरध्ययनाऽध्यापनविषयमाह॥

फिर पढ़ने-पढ़ाने के विषय को अगले मन्त्र में कहा है॥

वृषणं त्वा वयं वृषन्वृषणः समिधीमहि। अग्ने दीद्यतं बृहत्॥ १५॥ ३०॥

वृषणम्। त्वा। वयम्। वृषन्। वृषणः। सम्। इधीमहि। अग्ने। दीद्यतम्। बृहत्॥ १५॥

पदार्थः-(**वृषणम्**) सुखवर्षयितारम् (**त्वा**) त्वाम् (**वयम्**) (**वृषन्**) बलिष्ठ (**वृषणः**) बलिष्ठान् (**सम्**) सम्यक् (**इधीमहि**) प्रकाशयेम (**अग्ने**) वह्निवत्प्रकाशक (**दीद्यतम्**) प्रकाशकं विज्ञानम् (**बृहत्**) महत्॥ १५॥

अन्वयः-हे वृषन्नग्ने! यथा त्वं बृहद्दीद्यतं प्रकाशयसि तथैव वयं वृषणं त्वाऽन्याम् वृषणश्च समिधीमहि॥ १५॥

भावार्थः-हे अध्यापकाऽध्येतारो भवद्भिर्विरोधं विहाय प्रीतिं जनयित्वा परस्परेषामुन्नतिर्विधेया यतो विद्यादिसद्गुणप्रकाशेन सर्वे मनुष्या बलिष्ठा न्यायकारिणश्च स्युरिति॥ १५॥

अत्र वह्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तविंशतितमं सूक्तं त्रिंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**वृषन्**) बलयुक्त (**अग्ने**) अग्नि के सदृश प्रकाशकर्त्ता जन! जैसे आप (**बृहत्**) बड़े (**दीद्यतम्**) प्रकाशकर्त्ता विज्ञान को प्रकाशित करते हैं, वैसे ही (**वयम्**) हम लोग (**वृषणम्**) सुखवृष्टिकारक (**त्वा**) आप और अन्य जनों को (**वृषणः**) बलयुक्त (**सम्**) उत्तम प्रकार (**इधीमहि**) प्रकाशित करें॥ १५॥

भावार्थः-हे पढ़ाने और पढ़नेवाले पुरुषो! आप लोगों को चाहिये कि विरोध को त्याग और प्रीति को उत्पन्न करक परस्पर की वृद्धि करो, जिससे विद्या आदि उत्तम गुणों के प्रकाश से सम्पूर्ण मनुष्य बलयुक्त और न्यायकारी होवें॥ १५॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त में कहे अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्ताईसवां सूक्त और तीसवां वर्ग समाप्त हुआ॥

अथ षड्चस्याष्टविंशतितमस्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। १ गायत्री। २, ६ निचृद्गायत्री छन्दः। षड्जः स्वरः। ३ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ४ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ निचृज्जगती छन्दः। निषादः स्वरः॥

अथाग्निविद्वद्विषयमाह॥

अब छः ऋचावाले अट्ठाईसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से अग्नि और विद्वानों का वर्णन करते हैं॥

अग्ने॑ जुषस्व॑ नो ह॒विः पु॑रो॒ळाश॑ं जातवेदः। प्रा॒तः॒सा॒वे धि॑यावसो॥ १॥

अग्ने॑। जु॒षस्व॑। न॒ः। ह॒विः। पु॒रो॒ळाश॑म्। जा॒त॒ऽवे॒दः। प्रा॒तः॒ऽसा॒वे। धि॒या॒व॒सो॒ इति॑ धियाऽवसो॥ १॥

पदार्थः-(**अग्ने**) वह्निरिव वर्त्तमान (**जुषस्व**) सेवस्व (**नः**) अस्माकम् (**हविः**) अत्तुं योग्यम् (**पुरोळाशम्**) संस्कृतान्नविशेषम् (**जातवेदः**) जातप्रज्ञान (**प्रातःसावे**) प्रातःसवने (**धियावसो**) यो धिया प्रज्ञया सुकर्मणा वा वासयति तत्सम्बुद्धौ॥ १॥

अन्वयः-हे धियावसो जातवेदोऽग्ने! यथाऽग्निः प्रातःसावे नो हविः पुरोळाशं सेवते तथैव तत् त्वं जुषस्व॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा प्रातरग्निहोत्रादिषु वेद्यां निहितोऽग्निर्घृतादिकं संसेव्यान्तरिक्षे प्रसार्य सुखयति तथैव ब्रह्मचर्ये प्रवृत्ता विद्यार्थिनो विद्याविनयौ सङ्गृह्य जगति प्रसार्य सर्वान् सुखयेयुः॥ १॥

पदार्थः-हे (**धियावसो**) उत्तम बुद्धि वा उत्तम गुणों के प्रचारकर्त्ता (**जातवेदः**) सकल उत्पन्न पदार्थों के ज्ञाता (**अग्ने**) अग्नि के सदृश तेजस्वी पुरुष! जैसे अग्नि (**प्रातःसावे**) प्रातःकाल के अग्निहोत्र आदि कर्म में (**नः**) हमारे (**हविः**) भक्षण करने योग्य (**पुरोळाशम्**) मन्त्रों से संस्कारयुक्त अन्न विशेष का सेवन करते हैं, वैसे इसका आप (**जुषस्व**) सेवन करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे प्रातःकाल अग्निहोत्र आदि कर्मों में वेदी में स्थापित किया गया अग्नि घृत आदि का सेवन तथा उसको अन्तरिक्ष में फैलाय के जनों को सुख देता है, वैसे ही ब्रह्मचर्य्यधर्म्म में वर्त्तमान विद्यार्थी जन विद्या और विनय का ग्रहण कर संसार में उनका प्रचार करके सकल जनों को सुख देवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पु॒रो॒ळा अ॑ग्ने पच॒तस्तुभ्य॑ं वा घा॒ परि॑ष्कृतः। तं जु॑षस्व यविष्ठ्य॥ २॥

पु॒रो॒ळाः। अ॒ग्ने॒। प॒च॒तः। तुभ्य॑म्। वा॒। घ॒। परि॑ऽकृतः। तम्। जु॒ष॒स्व॒। य॒वि॒ष्ठ्य॥ २॥

पदार्थः-(**पुरोळाः**) यो विधिना संस्कृतः (**अग्ने**) पावकवद्वर्त्तमान (**पचतः**) पाकं कुर्वन्। अत्र पच धातोरौणादिकोऽतच् प्रत्ययः। (**तुभ्यम्**) (**वा**) पक्षान्तरे (**घ**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**परिष्कृतः**) सर्वतः शुद्धः सम्पादितः (**तम्**) (**जुषस्व**) (**यविष्ठ्य**) यविष्ठ्येष्वतिशयेन युवसु कुशलस्तत्सम्बुद्धौ॥ २॥

अन्वयः-हे यविष्ठ्याग्नेऽग्निरिव यस्तुभ्यं पुरोळाः पचतो वा परिष्कृतोऽस्ति तं घ जुषस्व॥ २॥

भावार्थः-यथा भोजनप्रियः स्वार्थानि सुसंस्कृतान्यन्नादीनि निष्पाद्य भुक्त्वाऽऽनन्दो जायते तथैव सुसंस्कृतानि हवींषि प्राप्याऽग्निः सर्वानानन्दयति॥ २॥

पदार्थः-हे (**यविष्ठ्य**) अतिशय युवा पुरुषों में चतुर (**अग्ने**) अग्नि के सदृश तेजस्वी जन! जो (**तुभ्यम्**) आपके लिये (**पुरोळाः**) वेदविधि से संस्कारयुक्त (**पचतः**) पाककर्त्ता हुआ (**वा**) अथवा (**परिष्कृतः**) सब प्रकार शुद्ध किया गया है (**तम्**) उसकी (**घ**) ही (**जुषस्व**) सेवा करो॥ २॥

भावार्थः-जैसे भोजन में प्रीतिकर्त्ता पुरुष अपने लिये उत्तम प्रकार संस्कारयुक्त अन्न आदि पदार्थों को सिद्ध और उनका भोजन करके आनन्दयुक्त होता है, वैसे ही उत्तम प्रकार संस्कारयुक्त हवन की सामग्री को प्राप्त होकर अग्नि सम्पूर्ण जनों को आनन्द देता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्ने॑ वी॒हि पु॑रो॒ळाश॒माहु॑तं ति॒रोअ॑ह्न्यम्। सह॑सः सू॒नुर॑स्यध्व॒रे हि॒तः॥ ३॥

अग्ने॑। वी॒हि। पु॒रो॒ळाश॑म्। आऽहु॑तम्। ति॒रःऽअ॑ह्न्यम्। सह॑सः। सू॒नुः। अ॒सि॒। अ॒ध्व॒रे। हि॒तः॥ ३॥

पदार्थः-(**अग्ने**) पावक इव वर्त्तमान (**वीहि**) प्राप्नुहि (**पुरोळाशम्**) अनेकविधसंस्कारैर्निष्पादितम् (**आहुतम्**) समन्तात्प्रदत्तम् (**तिरोअह्न्यम्**) तिरश्चीनेऽह्नि भवं साधुर्वा (**सहसः**) बलस्य बलवतो वायोर्वा (**सूनुः**) अपत्यमिव (**असि**) (**अध्वरे**) दयामये व्यवहारे (**हितः**) हितकारी॥ ३॥

अन्वयः-हे अग्ने! त्वं पावक इव तिरोअह्न्यमाहुतं पुरोळाशं वीहि यतस्त्वं सहसः सूनुरिवाऽध्वरे सर्वेषां हितोऽसि तस्मात्सत्कर्त्तव्योऽसि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निर्वायोर्जातः सन् मूर्त्तं द्रव्यं दग्ध्वा विभजति तथैव विद्यापवित्रोऽविद्याव्यवहारं दग्ध्वा सत्याऽसत्यं विभजति॥ ३॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश तेजस्वी पुरुष! आप अग्नि के तुल्य (**तिरोअह्न्यम्**) दिन के प्रथम भाग में उत्पन्न वा उत्तम (**आहुतम्**) चारों ओर से दिये गये (**पुरोळाशम्**) अनेक प्रकारों के संस्कारों से युक्त अन्न को (**वीहि**) प्राप्त होइये जिससे आप (**सहसः**) बल वा बलवान् वायु के (**सूनुः**) पुत्र के तुल्य (**अध्वरे**) दयारूप व्यवहार में सबके (**हितः**) हितकारी (**असि**) वर्त्तमान हैं, इस कारण से सत्कार करने योग्य हैं॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि वायु से उत्पन्न होकर स्वरूपवान् द्रव्य को भस्म करके विभाग करता है, वैसे ही विद्या से पवित्रात्मा पुरुष अविद्या के व्यवहार को भस्म अर्थात् दूर करके सत्य और असत्य का विभाग करता है॥३॥

अथ के सुखिनो भवन्तीत्याह॥

अब कौन मनुष्य सुखी होते हैं, इस विषय को अगले मन्त्र में कहा है॥

माध्यं॑दिने॒ सव॑ने जातवेदः पुरो॒ळाश॑मि॒ह क॑वे जुषस्व।
अग्ने॑ य॒ह्वस्य॒ तव॑ भाग॒धेय॑ं न प्र मि॑नन्ति वि॒दथे॑षु धी॒राः॥४॥

माध्यं॑दिने। सव॑ने। जा॒त॒ऽवे॒दः॒। पु॒रो॒ळाश॑म्। इ॒ह। क॑वे। जु॒ष॒स्व॒। अग्ने॑। य॒ह्वस्य॑। तव॑। भा॒ग॒ऽधेय॑म्। न। प्र। मि॒न॒न्ति॒। वि॒दथे॑षु। धी॒रा॑ः॥४॥

पदार्थः-(**माध्यन्दिने**) मध्यंदिनसम्बन्धिनि (**सवने**) होमादिकर्मणि (**जातवेदः**) उत्पन्नविज्ञान (**पुरोडाशम्**) सुसंस्कृतमन्नादिकम् (**इह**) अस्मिन् संसारे (**कवे**) प्राप्तप्रज्ञ (**जुषस्व**) (**अग्ने**) पावक इव वर्त्तमान (**यह्वस्य**) महतः। **यह्व इति महन्नामसु पठितम्।** (निघं०३.३) (**तव**) (**भागधेयम्**) भाग्यम् (**न**) निषेधे (**प्र**) (**मिनन्ति**) प्रहिंसन्ति (**विदथेषु**) विज्ञानेषु संग्रामेषु वा (**धीराः**) योगिनः॥४॥

अन्वयः-हे जातवेदः कवेऽग्ने! त्वमिह ये धीरा यह्वस्य तव विदथेषु भागधेयं न प्रमिनन्ति तच्छिक्षया सहितस्सन्माध्यन्दिने सवनेऽग्निरिव पुरोडाशं जुषस्व॥४॥

भावार्थः-ये मनुष्याः प्रातर्मध्याह्नसवने कृत्वा सुसंस्कृतान्नं मितं भुञ्जते त एव भाग्यशालिनः सन्तो महत्सुखं निश्चितं विजयं च प्राप्नुवन्ति॥४॥

पदार्थः-हे (**जातवेदः**) विज्ञान से युक्त (**कवे**) उत्तम बुद्धिमान् (**अग्ने**) अग्नि के सदृश तेजयुक्त! आप (**इह**) इस संसार में जो (**धीराः**) योगी जन (**यह्वस्य**) श्रेष्ठ (**तव**) आपके (**विदथेषु**) विज्ञान वा संग्रामों में (**भागधेयम्**) भाग्य को (**न**) नहीं (**प्र**) (**मिनन्ति**) नाश करते हैं, उस शिक्षा से सहित होकर (**माध्यन्दिने**) दिन के मध्य समय के (**सवने**) होम आदि कर्म में अग्नि के सदृश (**पुरोडाशम्**) उत्तम प्रकार संस्कारयुक्त अन्न आदि का (**जुषस्व**) सेवन करो॥४॥

भावार्थः-जो मनुष्य प्रातःकाल तथा दिन के मध्यभाग समय के होमों को करके उत्तम प्रकार छौंकने आदि से संस्कारयुक्त नित्य नियमित अन्न का भोजन करते हैं, वे ही भाग्यशाली होकर बड़े सुख और निश्चित विजय को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्नेऽतृतीयेसवनेहिकानिषःपुरोळाशंसहसःसूनवाहुतम्।
अथादेवेष्वध्वरंविपन्ययाधारत्नवन्तममृतेषुजागृविम्॥५॥

अग्नेऽ। तृतीयेऽ। सवनेऽ। हि। कानिषःऽ। पुरोळाशम्। सहसःऽ। सूनोऽ इतिऽ। आऽहुतम्। अथ। देवेषु। अध्वरम्। विपन्यया। धाः। रत्नऽवन्तम्। अमृतेषु। जागृविम्॥५॥

पदार्थः-(**अग्ने**) विद्युदिव बलिष्ठ (**तृतीये**) (**सवने**) (**हि**) यतः (**कानिषः**) कमनीयस्य (**पुरोडाशम्**) रोगनिवारकमन्नम् (**सहसः**) बलवतः (**सूनो**) अपत्य (**आहुतम्**) समन्तात्स्वीकृतम् (**अथ**)। अत्र **निपातस्य च**ेति दीर्घः। (**देवेषु**) विद्वत्सु दिव्यगुणेषु वा (**अध्वरम्**) अहिंसादिलक्षणं धर्म्यं व्यवहारम् (**विपन्यया**) विशेषेण स्तुतया प्रशंसितया प्रज्ञया क्रियया वा (**धाः**) धेहि (**रत्नवन्तम्**) बहूनि रत्नानि विद्यन्ते यस्मिँस्तम् (**अमृतेषु**) नाशरहितेषु जगदीश्वरादिषु पदार्थेषु (**जागृविम्**) जागरूकम्॥५॥

अन्वयः-हे कानिषः सहसः सूनोऽग्ने! त्वं हि विपन्यया तृतीये सवनेऽथ देवेष्वमृतेषु जागृविं रत्नवन्तमाहुतमध्वरं पुरोडाशं च धाः॥५॥

भावार्थः-ये परमेश्वरादीनां पदार्थानां विज्ञानेनाहिंसादिलक्षणे व्यवहारे वर्त्तित्वा युक्ताहारविहाराः सन्त ऐश्वर्य्यमुन्निनीषन्ति ते सर्वतः सुखिनो जायन्ते॥५॥

पदार्थः-हे (**कानिषः**) कामना करने योग्य (**सहसः**) बलयुक्त के (**सूनो**) पुत्र (**अग्ने**) बिजुली के सदृश बलयुक्त! आप (**हि**) जैसे (**विपन्यया**) विशेष करके स्तुतियुक्त प्रशंसा सहित बुद्धि वा क्रिया से (**तृतीये**) तीसरे समय के (**सवने**) होम आदि कर्म में (**अथ**) और (**देवेषु**) विद्वान् वा उत्तम गुणों में (**अमृतेषु**) नाशरहित जगदीश्वर आदि पदार्थों में (**जागृविम्**) जागनेवाले (**रत्नवन्तम्**) बहुत रत्नों से विशिष्ट (**आहुतम्**) सब प्रकार स्वीकार किये गये (**अध्वरम्**) अहिंसा आदि स्वरूप धर्मयुक्त व्यवहार और (**पुरोडाशम्**) रोग के दूर करनेवाले अन्न को (**धाः**) धारण करो॥५॥

भावार्थः-जो लोग परमेश्वर आदि पदार्थों के विज्ञान से अहिंसा आदि व्यवहार में वर्त्तमान नियमपूर्वक भोजन विहारयुक्त होकर ऐश्वर्य की वृद्धि करने की इच्छा करते हैं, वे सब प्रकार सुखी होते हैं॥५॥

पुनर्विद्वांसः कथं वर्त्तन्त इत्याह॥

फिर विद्वान् लोग कैसा वर्त्ताव करते, इस विषय को अगले मन्त्र में कहा है॥

अग्नेवृधानआहुतिंपुरोळाशंजातवेदः।जुषस्वतिरोअह्न्यम्॥६॥३१॥

अग्नेऽ। वृधानः। आऽहुतिम्। पुरोळाशम्। जातऽवेदः। जुषस्व। तिरःऽअह्न्यम्॥६॥

पदार्थः-(**अग्ने**) पावक इव वर्त्तमान (**वृधानः**) वर्धमानः (**आहुतिम्**) (**पुरोडाशम्**) सुसंस्कृतमन्नादिकम् (**जातवेदः**) जातेषु विद्यमान (**जुषस्व**) (**तिरोअह्न्यम्**) तिरःस्वहस्सु साधुम्॥६॥

अन्वय:-हे जातवेदोऽग्ने! यथा वृधानोऽग्निराहुतिं तिरोअह्नयं पुरोडाशं सेवते तथैतं त्वं जुषस्व॥६॥

भावार्थ:-यथा विद्युत्सर्वत्राऽभिव्याप्य सर्वान् मूर्तान् पदार्थान् सेवते प्रसिद्धा सती वर्धते विद्यासु व्यापका विद्वांसो धर्मं सेवमाना वर्धन्त इति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टाविंशतितमं सूक्तमेकाधिकत्रिंशो वर्गश्च समाप्त:॥

पदार्थ:-हे **(जातवेद:)** सम्पूर्ण उत्पन्न हुए पदार्थों में व्यापक **(अग्ने)** अग्नि के सदृश तेजस्वी! जैसे **(वृधान:)** बढ़ा हुआ अग्नि **(आहुतिम्)** चारों ओर अग्नि में छोड़े गये **(तिरोअह्नयम्)** प्रात:काल किये गये **(पुरोडाशम्)** उत्तम प्रकार संस्कारयुक्त अन्न आदि का सेवन करते हैं, वैसे उसकी आप **(जुषस्व)** सेवा करो॥६॥

भावार्थ:-जैसे बिजुली सब स्थानों में व्याप्त होकर सम्पूर्ण मूर्तिमान् पदार्थों का सेवन करती है वा प्रसिद्ध हुई बढ़ती है, वैसे ही विद्याओं में व्यापक विद्वान् जन धर्म की सेवा करते हुए वृद्धि को प्राप्त होते हैं॥६॥

इस सूक्त में अग्नि और विद्वानों के गुणों के वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठाईसवां सूक्त और इकत्तीसवां वर्ग समाप्त हुआ॥

अथैकोनत्रिंशत्तमस्य षोडशर्चस्य सूक्तस्य विश्वामित्र ऋषिः। १-४, ६-१६ अग्निः। ५ ऋत्विज अग्निर्वा देवता। १ निचृदनुष्टुप्। ४ विराडनुष्टुप्। १०, १२ भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः। २ भुरिक् पङ्क्तिः। १३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ५, ६ त्रिष्टुप्। ७-९, १६ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ११, १४, १५ जगती छन्दः। निषादः स्वरः॥

अथ विद्युदग्निवायुभ्यां विद्वांसः किं किं साधयन्तीत्याह॥

अब तृतीय मण्डल में सोलह ऋचावाले उनतीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से विद्युत् अग्नि और वायु से विद्वान् लोग किस-किस कार्य को सिद्ध करते हैं, इस विषय को कहा है॥

अस्तीदमधिमन्थनमस्ति प्रजननं कृतम्।
एतां विश्पत्नीमा भराग्निं मन्थाम पूर्वथा॥ १॥

अस्ति। इदम्। अधिऽमन्थनम्। अस्ति। प्रऽजननम्। कृतम्। एताम्। विश्पत्नीम्। आ। भर। अग्निम्। मन्थाम। पूर्वऽथा॥ १॥

पदार्थः-(**अस्ति**) (**इदम्**) (**अधिमन्थनम्**) उपरिस्थं मन्थनम् (**अस्ति**) (**प्रजननम्**) प्रकटनम् (**कृतम्**) (**एताम्**) (**विश्पत्नीम्**) प्रजायाः पालिकाम् (**आ**) (**भर**) समन्ताद्धर (**अग्निम्**) (**मन्थाम**) (**पूर्वथा**) पूर्वैरिव॥ १॥

अन्वयः-हे विद्वन्! यदीदमधिमन्थनमस्ति यच्च प्रजननं कृतमस्ति ताभ्यामेतां विश्पत्नीं वयं पूर्वथाऽग्निं मन्थामेवाऽऽभर॥ १॥

भावार्थः-ये मनुष्या उपर्य्यधस्थाभ्यां मन्थनाभ्यां सङ्घर्षणेन विद्युतमग्निं जनयेयुस्ते प्रजापालिकां शक्तिं लभन्ते यथा पूर्वैः शिल्पिभिः क्रिययाऽग्न्यादिविद्या सम्पादिता भवेत्तेनैव प्रकारेण सर्व इमां संगृह्णीयुः॥ १॥

पदार्थः-हे विद्वान् पुरुष! जो (**इदम्**) यह (**अधिमन्थनम्**) ऊपर के भाग में वर्त्तमान मथने का वस्तु (**अस्ति**) विद्यमान है और जो (**प्रजननम्**) प्रकट होना (**कृतम्**) किया (**अस्ति**) है, उन दोनों से (**एताम्**) इस (**विश्पत्नीम्**) प्रजाजनों के पालन करनेवाली को हम लोग (**पूर्वथा**) प्राचीन जनों के तुल्य (**अग्निम्**) विद्युत् को (**मन्थाम**) मन्थन करें और (**आ**) (**भर**) सब ओर से आप लोग ग्रहण करो॥ १॥

भावार्थः-जो मनुष्य ऊपर नीचे के भाग में स्थित मथने की वस्तुओं के द्वारा घिसने से बिजुलीरूप अग्नि को उत्पन्न करें, वे प्रजाओं के पालन करनेवाले सामर्थ्य को प्राप्त होते हैं और जैसे पूर्व काल के कारीगरों ने शिल्पक्रिया से अग्नि आदि सम्बन्धिनी विद्या की सिद्धि हो, उस ही प्रकार से सम्पूर्ण जन इस अग्निविद्या को ग्रहण करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अरण्योर्निहितो जातवेदा गर्भइव सुधितो गर्भिणीषु।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः॥ २॥

अरण्योः। निऽहितः। जातऽवेदाः। गर्भःऽइव। सुऽधितः। गर्भिणीषु। दिवेऽदिवे। ईड्यः। जागृवत्ऽभिः। हविष्मत्ऽभिः। मनुष्येभिः। अग्निः॥ २॥

पदार्थः-(**अरण्योः**) उपर्य्यधस्थयोः साधनयोः (**निहितः**) स्थितः (**जातवेदाः**) जातेषु सर्वेषु पदार्थेषु विद्यमानोऽग्निः (**गर्भइव**) यथा गर्भस्तथा (**सुधितः**) सुष्ठु धृतः (**गर्भिणीषु**) गर्भा विद्यन्ते यासु तासु (**दिवेदिवे**) प्रतिदिनम् (**ईड्यः**) अध्यन्वेषणीयः (**जागृवद्भिः**) अविद्याऽऽलस्यनिद्रां विहाय विद्यापुरुषार्थादिकं प्राप्तैः (**हविष्मद्भिः**) बहूनि हवींष्यादत्तानि साधनानि यैस्तैः (**मनुष्येभिः**) मननशीलैः (**अग्निः**) वह्निः॥ २॥

अन्वयः-यैर्हविष्मद्भिर्जागृवद्भिर्मनुष्येभिररण्योर्निहितो गर्भिणीषु गर्भ इव स्थितो दिवेदिवे ईड्यो जातवेदा अग्निः सुधितस्ते भाग्यवन्तो विज्ञेयाः॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सृष्टिक्रमेण विद्यमानाग्न्यादिपदार्थान् प्रतिदिनं परीक्षयेयुस्ते कुतो दरिद्रा भवेयुः ?॥ २॥

पदार्थः-जिन (**हविष्मद्भिः**) बहुत साधनों के ग्रहण करने तथा (**जागृवद्भिः**) अविद्या, आलस्य और निद्रा [को] त्याग विद्या और पुरुषार्थ आदि को प्राप्त होने और (**मनुष्येभिः**) मनन करनेवाले पुरुषों ने (**अरण्योः**) ऊपर और नीचे के भाग में वर्त्तमान साधनों के मध्य में (**निहितः**) स्थित (**गर्भिणीषु**) गर्भवती स्त्रियों में (**गर्भइव**) जैसे गर्भ रहता, वैसे वर्त्तमान (**दिवेदिवे**) प्रतिदिन (**ईड्यः**) खोजने योग्य (**जातवेदाः**) उत्पन्न हुए सम्पूर्ण पदार्थों में वर्त्तमान (**अग्निः**) अग्नि (**सुधितः**) उत्तम प्रकार धारण किया, उन पुरुषों को भाग्यशाली जानना चाहिये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सृष्टि के क्रम से वर्त्तमान अग्नि आदि पदार्थों की प्रतिदिन परीक्षा करें-करावें तो वे क्यों दरिद्र होवें ?॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट॥ ३॥

उ॒त्ता॒नाया॑म्। अव॑। भ॒र॒। चि॒कि॒त्वान्। स॒द्यः। प्रऽवी॑ता। वृष॑णम्। ज॒जा॒न॒। अ॒रु॒षऽस्तू॑पः। रुश॑त्। अ॒स्य॒। पाज॑ः। इळा॑यः। पु॒त्रः। व॒युने॑। अ॒ज॒नि॒ष्ट॒॥ ३॥

पदार्थः-(**उत्तानायाम्**) सरलतया शयानो मनुष्य इव वर्त्तमानायां भूमौ (**अव**) (**भर**) धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**चिकित्वान्**) प्राज्ञः (**सद्यः**) (**प्रवीता**) प्रकर्षेण व्याप्ता विद्युत् (**वृषणम्**) वर्षकं सूर्य्यम् (**जजान**) जनयति (**अरुषस्तूपः**) येऽरुष्षु मर्मसु सीदन्ति तेषु प्रशंसितः (**रुशत्**) हिंसन् (**अस्य**) जगतः (**पाजः**) बलम् (**इडायाः**) वाण्याः। **इडेति वाङ्नामसु पठितम्।** (निघं०१.११) (**पुत्रः**) पुत्रवद्वर्त्तमानः (**वयुने**) विज्ञाने (**अजनिष्ट**) जायते॥ ३॥

अन्वयः-हे विद्वन्! चिकित्वांस्त्वमुत्तानायां या प्रवीता वृषणं जजान तामवभर। योऽरुषस्तूपोऽस्य पाजो रुशदिडायास्पुत्रो वयुनेऽजनिष्ट तं सद्योऽवभर॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः पुत्रं जननीव वह्निविद्यां धरन्ति ते स्वबलं वर्धयित्वा विज्ञानं जनयन्ति। यदा अधोग्निरुपरिजलं संस्थाप्य वायुना प्रदीपन्ति तदा वह्निजलाभ्यां बहूनि कार्याणि निर्वर्त्तितुं शक्नुवन्ति॥ ३॥

पदार्थः-हे विद्वान् पुरुष (**चिकित्वान्**) बुद्धिमान्! आप (**उत्तानायाम्**) सीधेपन से सोते हुए मनुष्य के तुल्य वर्त्तमान भूमि में जो (**प्रवीता**) बहुत व्याप्त बिजुली (**वृषणम्**) वृष्टिकर्त्ता सूर्य को (**जजान**) उत्पन्न करती है, उसको (**अव**) (**भर**) धारण करो और जो (**अरुषस्तूपः**) मर्मस्थलों में क्लेशदायकों में प्रशंसायुक्त (**अस्य**) इस संसार के (**पाजः**) बल के (**रुशत्**) नाशकारक (**इडायाः**) वाणी के (**पुत्रः**) पुत्र के सदृश स्थित (**वयुने**) विज्ञान में (**अजनिष्ट**) उत्पन्न होता है, उसको (**सद्यः**) शीघ्र धारण करो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य पुत्र को माता के तुल्य अग्निविद्या को धारण करते हैं, वे अपना बल बढ़ाकर विज्ञान को उत्पन्न करते हैं और जब नीचे के भाग में अग्नि ऊपर जल स्थित करके वायु से प्रज्वलित करते हैं, तब अग्नि और जल द्वारा बहुत से कार्य सिद्ध कर सकते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इळा॑यास्त्वा प॒दे व॒यं नाभा॑ पृथि॒व्या अधि॑।
जात॑वेदो॒ नि धी॑म॒ह्यग्ने॑ ह॒व्याय॒ वोळ्ह॑वे॥ ४॥

इळा॑याः। त्वा॒। प॒दे। व॒यम्। नाभा॑। पृ॒थि॒व्याः। अधि॑। जात॑ऽवेदः। नि। धी॒म॒हि॒। अग्ने॑। ह॒व्याय॑। वोळ्ह॑वे॥ ४॥

पदार्थः-(**इळायाः**) पृथिव्याः (**त्वा**) तम् (**पदे**) प्राप्ते (**वयम्**) (**नाभा**) मध्ये (**पृथिव्याः**) अन्तरिक्षस्य (**अधि**) उपरि (**जातवेदः**) जातवित्तम् (**नि**) (**धीमहि**) नितरां धरेम (**अग्ने**) अग्निम्। अत्र सर्वत्र पुरुषव्यत्ययः। (**हव्याय**) प्रशंसनीयाय (**वोढवे**) वाहनाय॥४॥

अन्वयः-हे विद्वांसो! यथा वयमिळाया अधि पदे पृथिव्या नाभा हव्याय वोढवे त्वां तं जातवेदाऽग्ने जातवेदसमग्निं निधीमहि तथैव यूयमपि निधत्त॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य इमं वह्निं पृथिव्या उपर्य्यन्तरिक्षस्य मध्ये सुपरीक्ष्य यानादिचालनायाऽग्निं निदधति ते निधिमन्तो भवन्ति॥४॥

पदार्थः-हे विद्वान् जनो! जैसे (**वयम्**) हम लोग (**इळायाः**) पृथिवी के (**अधि**) ऊपर (**पदे**) प्राप्त होने पर (**पृथिव्याः**) अन्तरिक्ष के (**नाभा**) मध्य में (**हव्याय**) प्रशंसा करने योग्य (**वोढवे**) वाहन के लिये (**त्वा**) उस (**जातवेदः**) धनों के उत्पन्नकर्त्ता (**अग्ने**) अग्नि को (**नि**) (**धीमहि**) उत्तम प्रकार धारण करें, वैसे ही आप लोग भी धारण करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग इस अग्नि को पृथिवी के ऊपर और अन्तरिक्ष के मध्य में उत्तम प्रकार परीक्षा ले के वाहन आदि चलाने के लिये अग्नि को धारण करते हैं, वे धनयुक्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम्।
यज्ञस्य केतुं प्रथमं पुरस्ताद्विग्निं नरो जनयता सुशेवम्॥५॥३२॥

मन्थत। नरः। कविम्। अद्वयन्तम्। प्रऽचेतसम्। अमृतम्। सुऽप्रतीकम्। यज्ञस्य। केतुम्। प्रथमम्। पुरस्तात्। अग्निम्। नरः। जनयत। सुऽशेवम्॥५॥

पदार्थः-(**मन्थत**) मन्थनं कुरुत। अत्र **संहितायामिति** दीर्घः। (**नरः**) नायकाः (**कविम्**) क्रान्तदर्शनम् (**अद्वयन्तम्**) अद्वयमिवाचरन्तम् (**प्रचेतसम्**) प्रकर्षेण संज्ञापकम् (**अमृतम्**) स्वरूपेण नाशरहितम् (**सुप्रतीकम्**) सुष्ठु प्रतीतिकरम् (**यज्ञस्य**) (**केतुम्**) ध्वज इव विज्ञापकम् (**प्रथमम्**) प्रख्यातम् (**पुरस्तात्**) प्रथमतः (**अग्निम्**) पावकम् (**नरः**) नेतारः (**जनयत**)। अत्र **संहितायामिति** दीर्घः। (**सुशेवम्**) शोभनं निधिमिव वर्त्तमानम्॥५॥

अन्वयः-हे नरो! यूयं कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकमग्निं मन्थत। हे नरो! यज्ञस्य केतुं प्रथमं सुशेवमग्निं पुरस्ताज्जनयत॥५॥

भावार्थः-ये मनुष्या मथित्वाग्निं जनयित्वा कार्य्याणि साद्धुमिच्छन्ति ते सकलैश्वर्यसंपन्ना जायन्ते॥५॥

पदार्थः-हे **(नरः)** नायको! आप लोग **(कविम्)** तेजस्वी स्वरूप युक्त **(अद्वयन्तम्)** अपने केवल रूप से रहित के सदृश आचरण करते हुए **(प्रचेतसम्)** अतिशय प्रकटकर्त्ता **(अमृतम्)** अपने स्वरूप से नाशरहित **(सुप्रतीकम्)** उत्तम प्रकार विश्वासकर्त्ता **(अग्निम्)** अग्नि का **(मन्थत)** मन्थन करो। हे **(नरः)** प्रधान पुरुषो! **(यज्ञस्य)** अहिंसारूप यज्ञ के **(केतुम्)** पताका के सदृश जाननेवाले **(प्रथमम्)** प्रसिद्ध **(सुशेवम्)** सुन्दर द्रव्यपात्र के सदृश अग्नि को **(पुरस्तात्)** प्रथम से उत्पन्न करें॥५॥

भावार्थः-जो मनुष्य मथ कर अग्नि को उत्पन्न करके कार्य्यों को सिद्ध करने की इच्छा करते हैं, वे सम्पूर्ण ऐश्वर्य्ययुक्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यदी॒ मन्थ॑न्ति बा॒हुभि॒र्विं रोच॒तेऽश्वो॒ न वा॒ज्य॑रु॒षो वने॒ष्वा।
चि॒त्रो न याम॑न्न॒श्विनो॒रनि॑वृत॒: परि॑ वृणक्त्यश्म॒न॒स्तृणा॒ दह॑न्॥६॥

यदि॑। मन्थ॑न्ति। बा॒हुऽभि॑:। वि। रो॒च॒ते॒। अश्व॑:। न। वा॒जी। अ॒रु॒ष:। वने॑षु। आ। चि॒त्र:। न। याम॑न्। अ॒श्विनो॑:। अनि॑ऽवृत:। परि॑। वृ॒ण॒क्ति॒। अश्म॑न:। तृणा॑। दह॑न्॥६॥

पदार्थः-**(यदि)**। अत्र **निपातस्य चे**ति दीर्घः। **(मन्थन्ति)** विलोडयन्ति **(बाहुभिः)** **(वि)** **(रोचते)** विशेषेण प्रकाशते **(अश्वः)** उत्तमस्तुरङ्गः **(न)** इव **(वाजी)** वेगवान् **(अरुषः)** मर्मसु स्थितः **(वनेषु)** किरणेषु **(आ)** **(चित्रः)** अद्भुतः **(न)** इव **(यामन्)** यामनि **(अश्विनोः)** सूर्य्याचन्द्रमसोः **(अनिवृतः)** निरन्तरः **(परि)** सर्वतः **(वृणक्ति)** छिनत्ति **(अश्मनः)** पाषाणस्य मेघस्य वा **(तृणा)** तृणानि घासविशेषान् **(दहन्)** भस्मीकुर्वन्॥६॥

अन्वयः-ये मनुष्या बाहुभिर्यद्यग्निं मन्थन्ति तर्हि स वनेष्वरुषो वाज्यश्वो न व्यारोचतेऽश्विनोरनिवृतस्सन् यामँश्चित्रो न तृणा दहन्नश्मनः परि वृणक्ति तमित्थं सर्व उद्घाटयन्तु॥६॥

भावार्थः-अत्रोपमालङ्कारः। घर्षणेन जातबलोऽग्निः काष्ठादीनि दहन्नश्ववद्वेगवान् भवन्नद्भुतानि कार्य्याणि साध्नोतीति वेद्यम्॥६॥

पदार्थः-जो मनुष्य **(बाहुभिः)** बाहुओं से **(यदि)** यदि अग्नि को **(मन्थन्ति)** मन्थते हैं तो वह **(वनेषु)** किरणों में **(अरुषः)** मर्मस्थलों में वर्त्तमान **(वाजी)** वेगयुक्त **(अश्वः)** उत्तम घोड़े के **(न)** सदृश **(वि)** **(आ)** **(रोचते)** विशेष भाव से प्रकाशित होता है **(अश्विनोः)** सूर्य्य-चन्द्रमा के मध्य में **(अनिवृतः)** निरन्तर प्राप्त [होता हुआ] **(यामन्)** रात्रि में **(चित्रः)** अद्भुत के **(न)** तुल्य **(तृणा)** घास विशेषों को

(दहन्) भस्म करता हुआ **(अश्मनः)** पत्थर वा मेघ का **(परि)** सब प्रकार **(वृणक्ति)** छेदन करता है, उसको इस प्रकार सब लोग प्रकट करें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। घिसने से बलयुक्त हुआ अग्नि काष्ठ आदि को जलाता और घोड़े के तुल्य वेगवान् होता हुआ अद्भुत कार्य्यों को सिद्ध करता है, यह जानना चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः।
यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु॥७॥

जातः। अग्निः। रोचते। चेकितानः। वाजी। विप्रः। कविऽशस्तः। सुऽदानुः। यम्। देवासः। ईड्यम्। विश्वऽविदम्। हव्यऽवाहम्। अदधुः। अध्वरेषु॥७॥

पदार्थः-(**जातः**) प्रकटः सन् (**अग्निः**) पावकः (**रोचते**) प्रदीप्यते (**चेकितानः**) प्रज्ञापकः (**वाजी**) वेगवान् (**विप्रः**) मेधावी (**कविशस्तः**) कविभिः प्रशंसितः (**सुदानुः**) सुष्ठुदाता (**यम्**) (**देवासः**) विद्वांसः (**ईड्यम्**) स्तोतुं योग्यम् (**विश्वविदम्**) यः समग्रं विन्दति तम् (**हव्यवाहम्**) हव्यानां वोढारम् (**अदधुः**) दधीरन् (**अध्वरेषु**) सङ्गतिमयेषु व्यवहारेषु॥७॥

अन्वयः-हे मनुष्या! देवासोऽध्वरेषु यमीड्यं विश्वविदं हव्यवाहमग्निमदधुः स चेकितानः सुदानुः कविशस्तो विप्र इव जातो वाज्यग्नी रोचते॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि विद्युद्विद्यां साध्नुयुस्तर्हीयमाप्तविद्वद्वत्सत्यानि योग्यानि कार्य्याणि साध्नुयात्॥७॥

पदार्थः-हे मनुष्यो! (**देवासः**) विद्वान् लोग (**अध्वरेषु**) मेल करने रूप व्यवहारों में (**यम्**) जिस (**ईड्यम्**) स्तुति करने योग्य (**विश्वविदम्**) सम्पूर्ण वस्तुओं के ज्ञाता (**हव्यवाहम्**) हवन करने योग्य पदार्थों के धारणकर्त्ता अग्नि को (**अदधुः**) धारण करें वह (**चेकितानः**) उत्तम कार्य्यों को जताने (**सुदानुः**) उत्तम प्रकार देनेवाला और (**कविशस्तः**) उत्तम पुरुषों से प्रशंसित हुए (**विप्रः**) बुद्धिमान् के सदृश (**जातः**) प्रकटता को प्राप्त (**वाजी**) वेगयुक्त (**अग्निः**) अग्नि (**रोचते**) प्रकाशित होता है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बिजुली सम्बन्धी विद्या को सिद्ध करें तो यह विद्या यथार्थवक्ता विद्वान् पुरुष के तुल्य सत्य और योग्य कार्य्यों को सिद्ध करे॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सीद॑ होत॒: स्व उ॑ लो॒के चि॑कि॒त्वान्त्सा॒दया॑ य॒ज्ञं सु॑कृ॒तस्य॒ योनौ॑।
दे॒वा॒वीर्दे॒वान् ह॒विषा॑ यजा॒स्यग्ने॑ बृ॒हद्यज॑माने॒ वयो॑ धाः॥८॥

सीद॑। होत॒रिति॑। स्वे। उ॒म् इति॑। लो॒के। चि॒कि॒त्वान्। सा॒दय॑। य॒ज्ञम्। सु॒ऽकृ॒तस्य॑। योनौ॑। दे॒व॒ऽअ॒वीः॒। दे॒वान्। ह॒विषा॑। य॒जा॒सि॒। अग्ने॑। बृ॒हत्। यज॑माने। वयः॑। धाः॒॥८॥

पदार्थः-(**सीद**) आस्व (**होतः**) सुखप्रदातः (**स्वे**) स्वकीये (**उ**) वितर्के (**लोके**) दर्शने (**चिकित्वान्**) ज्ञानवान् (**सादय**) स्थापय। **संहितायामि**ति दीर्घः। (**यज्ञम्**) धर्म्यव्यवहारम् (**सुकृतस्य**) सुष्ठु निष्पादितस्य (**योनौ**) कारणे गृहे वा (**देवावीः**) यो देवानवति सः (**देवान्**) दिव्यान् गुणान् विदुषो वा (**हविषा**) दानेन (**यजासि**) यजेः (**अग्ने**) पावकवद्वर्त्तमान (**बृहत्**) महत् (**यजमाने**) सङ्गन्तधर्म्यव्यवहारकर्त्तरि (**वयः**) जीवनं धनादिकं वा (**धाः**) धेहि॥८॥

अन्वयः-हे होतरग्नेऽग्निरिव त्वं स्वे लोके सीद चिकित्वान् सन् सुकृतस्य योनौ यज्ञं सादय देवावीः सन् हविषा देवान् यजास्यु यजमाने बृहद्वयो धाः॥८॥

भावार्थः-यथाऽग्निहोत्रादिशिल्पादिसङ्गन्तव्ये व्यवहारे संप्रयुक्तोऽग्निर्दिव्यान् गुणान् प्रकटयति तथैव विदुषा धर्म्यैः कर्मभिः संप्रयुज्य दिव्यानि सुखानि जगति प्रसारणीयानि॥८॥

पदार्थः-हे (**होतः**) सुख देनेवाले (**अग्ने**) अग्नि के सदृश तेजस्वी पुरुष! आप (**स्वे**) अपने (**लोके**) दर्शन में (**सीद**) वर्त्तमान हो (**चिकित्वान्**) ज्ञानयुक्त होकर (**सुकृतस्य**) पुण्य कर्म के (**योनौ**) कारण वा स्थान में (**यज्ञम्**) धर्मसम्बन्धी व्यवहार को (**सादय**) स्थित करो (**देवावीः**) विद्वानों की रक्षाकर्त्ता (**हविषा**) दान से (**देवान्**) उत्तम गुण वा विद्वान् पुरुषों को (**यजासि**) यज्ञ करें वा स्वीकार करें (**उ**) यह तर्क है कि (**यजमाने**) योग्य धर्मसम्बन्धी व्यवहार के कर्त्ता पुरुष में (**बृहत्**) बड़े (**वयः**) जीवन वा धर्म आदि को (**धाः**) धारण करें॥८॥

भावार्थः-जैसे अग्निहोत्र आदि वा शिल्प आदि सङ्गति के योग्य व्यवहार में संयुक्त किया गया अग्नि उत्तम गुणों को प्रकट करता है, वैसे ही विद्वान् पुरुष को चाहिये कि धर्मसम्बन्धी कर्मों से युक्त करके उत्तम सुखों को संसार में फैलावे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

कृ॒णोत॑ धू॒मं वृष॑णं सखा॒योऽस्रे॑धन्त इत॒न वाज॒मच्छ॑।
अ॒यम॒ग्निः पृ॑तना॒षाट् सु॒वीरो॒ येन॑ दे॒वासो॒ अस॑हन्त॒ दस्यू॑न्॥९॥

कृ॒णोत॑। धू॒मम्। वृष॑णम्। स॒खा॒यः॒। अस्रे॑धन्तः। इ॒तन॒। वाज॑म्। अच्छ॑। अ॒यम्। अ॒ग्निः॒। पृ॒त॒ना॒षाट्। सु॒ऽवीरः॑। येन॑। दे॒वासः॑। अस॑हन्त। दस्यू॑न्॥९॥

पदार्थः-(**कृणोत**) कुरुत (**धूमम्**) वाष्पाख्यम् (**वृषणम्**) जलेन सुसिक्तम् (**सखायः**) सुहृदः सन्तः (**अस्तेधन्तः**) अक्षीणोत्साहाः (**इतन**) प्राप्नुत (**वाजम्**) अन्नवेगविज्ञानादिकम् (**अच्छ**) सम्यक् (**अयम्**) (**अग्निः**) विद्युदिव (**पृतनाषाट्**) यः पृतनाः सेनाः सहते (**सुवीरः**) शोभना वीरा यस्य (**येन**) सह (**देवासः**) विद्वांसः शूराः (**असहन्त**) सहन्ते (**दस्यून्**) अतिदुष्टकर्मकारिणः॥९॥

अन्वयः-हे विद्वांसो! यूयमस्तेधन्तः सखायः सन्तो वृषणं धूमं कृणोत वाजमच्छेतन योऽयमग्निरिव पृतनाषाट् सुवीरोऽस्ति येन सह देवासो दस्यूनसहन्त तमितन॥९॥

भावार्थः-हे विद्वांसः! काष्ठाग्निजलसंयोगजेन धूमेनाऽनेकानि कार्य्याणि परस्परं सुहृदो भूत्वा साध्नुत यथा धार्मिका विद्वांसः शूरा दस्यून् हत्वा राजानो भवन्ति तथैवायमग्निः संप्रयुक्तः सन् दारिद्र्यादीन् हत्वाऽसंख्यं धनं निष्पादयतीति॥९॥

पदार्थः-हे विद्वान् जनो! आप लोग (**अस्तेधन्तः**) उत्साह से पूरित (**सखायः**) मित्र हुए (**वृषणम्**) जल से अच्छे प्रकार सींचे गये (**धूमम्**) भाफ को (**कृणोत**) करो (**वाजम्**) अन्न, वेग और विज्ञान आदि को (**अच्छ**) उत्तम प्रकार (**इतन**) प्राप्त होओ तो (**अयम्**) यह (**अग्निः**) बिजुली के सदृश तेजस्वी (**पृतनाषाट्**) सेनाओं के सहित वर्त्तमान (**सुवीरः**) श्रेष्ठ वीरों से युक्त और (**येन**) जिस पुरुष के साथ (**देवासः**) विद्वान् वा शूर लोग (**दस्यून्**) अति दुष्ट कर्म करनेवाले जनों को (**असहन्त**) सहते हैं, उसको प्राप्त होइये॥९॥

भावार्थः-हे विद्वान् जनो! काष्ठ, अग्नि और जल के संयाग से उत्पन्न हुए धूम से अनेक कार्य्यों को परस्पर मित्रभाव के साथ सिद्ध करो जैसे धूर्मपूर्वक वर्त्ताव रखनेवाले विद्यायुक्त शूरवीर पुरुष दुष्टकर्मकारियों को नाश करके राजा होते हैं, वैसे ही यह अग्नि उत्तम प्रकार यन्त्र आदि से युक्त किया गया दारिद्र्य आदि को नाश करके अनगिनत धन को उत्पन्न करता है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।
तं जानन्नग्न आ सीदाथा नो वर्धया गिरः॥१०॥३३॥

अयम्। ते। योनिः। ऋत्वियः। यतः। जातः। अरोचथाः। तम्। जानन्। अग्ने। आ। सीद। अथ। नः। वर्धय। गिरः॥१०॥

पदार्थः-(**अयम्**) अग्न्यादिपदार्थविद्याविज्ञानाधिष्ठानम् (**ते**) तव (**योनिः**) सुखगृहम् (**ऋत्वियः**) य ऋतूनर्हति सः (**यतः**) (**जातः**) प्रकटः सन् (**अरोचथाः**) रोचस्व (**तम्**) (**जानन्**) (**अग्ने**) पावक इव

(आ) (सीद) स्थिरो भव **(अथ)** आनन्तर्य्ये। अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्माकम् **(वर्धय)** उन्नय। अत्र **संहितायामि**ति दीर्घः। **(गिरः)** विद्यासुशिक्षायुक्ता वाचः॥१०॥

अन्वयः–हे अग्ने विद्वन्! यस्तेऽयमृत्वियो योनिरस्ति यतो जातः सन्नरोचथास्तं जानन्नत्राऽऽसीद। अथ नो गिरो वर्धय॥१०॥

भावार्थः–मनुष्यैर्येन येन कर्मणा शरीरात्मैश्वर्य्याणां वृद्धिः स्यात्तत्तत्कर्म सदाचरणीयम्॥१०॥

पदार्थः–हे **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वान् पुरुष! जो **(ते)** आपका **(अयम्)** यह अग्नि आदि पदार्थ विद्या के ज्ञान का आधार **(ऋत्वियः)** समयों के योग्य **(योनिः)** सुख का घर है **(यतः)** जहाँ से **(जातः)** प्रकट हुआ **(अरोचथाः)** प्रकाशित हो **(तम्)** उसको **(जानन्)** जानते हुए यहाँ **(आ) (सीद)** स्थिर होइये और **(अथ)** इसके अनन्तर **(नः)** हम लोगों की **(गिरः)** विद्या और उत्तम शिक्षायुक्त वाणियों की **(वर्धय)** उन्नति कीजिये॥१०॥

भावार्थः–मनुष्यों को उचित है कि जिस-जिस कर्म से शरीर, आत्मा और ऐश्वर्य्यों की वृद्धि हो, वह-वह कर्म सब काल में करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

तनूनपादुच्यते गर्भ आसुरो नराशंसो भवति यद्विजायते।
मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि॥११॥

तनूऽनपात्। उच्यते। गर्भः। आसुरः। नराशंसः। भवति। यत्। विऽजायते। मातरिश्वा। यत्। अमिमीत। मातरि। वातस्य। सर्गः। अभवत्। सरीमणि॥११॥

पदार्थः–**(तनूनपात्)** यस्य तनूर्व्याप्तिर्न पतति **(उच्यते)** **(गर्भः)** अन्तःस्थः **(आसुरः)** असुरे प्रकाशरूपरहिते वायौ भवः **(नराशंसः)** यं नरा आशंसन्ति **(भवति)** **(यत्)** यः **(विजायते)** विशेषेणोत्पद्यते **(मातरिश्वा)** यो वायौ श्वसिति सः **(यत्)** यः **(अमिमीत)** निर्मीयते **(मातरि)** आकाशे **(वातस्य)** वायोः **(सर्गः)** उत्पत्तिः **(अभवत्)** भवेत् **(सरीमणि)** गमनाख्ये व्यवहारे॥११॥

अन्वयः–हे मनुष्या! यद्यस्तनूनपादुच्यते आसुरो गर्भो नराशंसो भवति मातरिश्वा विजायते यद्यो वातस्य मातरि सर्गोऽमिमीत सरीमण्यभवत्सोऽग्निस्सर्वैर्वेदितव्यः॥११॥

भावार्थः–ये मनुष्या वाय्वग्नीभ्यां कार्य्याणि सृजन्ति ते सुखैः संसृष्टा भवन्ति॥११॥

पदार्थः–हे मनुष्यो! **(यत्)** जो **(तनूनपात्)** सर्वत्र व्यापक **(उच्यते)** कहा जाता है **(आसुरः)** प्रकटरूप से रहित वायु से उत्पन्न **(गर्भः)** मध्य में वर्त्तमान **(नराशंसः)** मनुष्यों से प्रशंसित **(भवति)** होता है, **(मातरिश्वा)** वायु में श्वास लेनेवाला **(विजायते)** विशेषभाव से उत्पन्न होता है और **(यत्)** जो

(वातस्य) वायु सम्बन्धी **(मातरि)** आकाश में **(सर्गः)** उत्पत्ति **(अमिमीत)** रची जाती है **(सरीमणि)** गमनरूप व्यवहार में **(अभवत्)** होवे, वह अग्नि सम्पूर्ण जनों से जानने योग्य है॥११॥

भावार्थः-जो मनुष्य वायु और अग्नि से कार्य्यों को सिद्ध करते हैं, वे सुखों से संयुक्त होते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सुनिर्मथा निर्मथितः सुनिधा निहितः कविः।
अग्ने स्वध्वरा कृणु देवान् देवयते यज॥१२॥

सुनिःऽमथा। निःऽमथितः। सुऽनिधा। निऽहितः। कविः। अग्ने। सुऽअध्वरा। कृणु। देवान्। देवऽयते। यज॥१२॥

पदार्थः-(**सुनिर्मथा**) शोभनेन मन्थनेन (**निर्मथितः**) नितरां विलोडितः (**सुनिधा**) शोभने निधाने। अत्र डेराकारादेशः। (**निहितः**) धृतः (**कविः**) क्रान्तदर्शनः (**अग्ने**) पावक इव विद्वन् (**स्वध्वरा**) शोभनान्यहिंसादीनि कर्माणि येषु व्यवहारेषु (**कृणु**) (**देवान्**) दिव्यगुणान् (**देवयते**) देवान् कामयमानाय (**यज**) देहि॥१२॥

अन्वयः-हे अग्ने! यथा सुनिर्मथा निर्मथितः सुनिधा निहितः कविरग्निर्बहूनि कार्य्याणि सङ्गमयति तथैव स्वध्वरा देवान् कृणु एतान् देवयते यज॥१२॥

भावार्थः-यथा विद्यया निर्मितेषु कलायन्त्रेषु स्थापितोऽग्निर्निर्मन्थनेन घर्षणेन च वेगादिगुणान् जनयित्वा बहूनि कार्य्याणि साध्नोति तथैवोत्तमानि कर्माणि कृत्वा दिव्यान् भोगान् प्राप्नुवन्तु॥१२॥

पदार्थः-हे (**अग्ने**) अग्नि के समान तेजस्वी विद्वान् पुरुष! जैसे (**सुनिर्मथा**) सुन्दर मथने की वस्तु से (**निर्मथितः**) अत्यन्त मथा (**सुनिधा**) उत्तम आधार वस्तु में (**निहितः**) धरा गया (**कविः**) और सर्वत्र दीख पड़ने वाला अग्नि बहुत से कार्य्यों को सिद्ध करता है, वैसे ही (**स्वध्वरा**) उत्तम अहिंसा आदि कर्मों से युक्त (**देवान्**) उत्तम गुणों को (**कृणु**) धारण करो और इन (**देवयते**) उत्तम गुणों की कामना करते हुए पुरुष के लिये उन गुणों को (**यज**) दीजिए॥१२॥

भावार्थः-जैसे विद्या से रचे हुए कलायन्त्रों में रक्खा गया अग्नि अत्यन्त मथने और घिसने से वेग आदि गुणों को उत्पन्न कर बहुत से कार्य्यों को सिद्ध करता है, वैसे ही उत्तम कर्म्मों को करके श्रेष्ठ गुणों को प्राप्त होओ॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अजीजनन्नमृतं मर्त्यासोऽस्त्रेमाणं तरणिं वीळुजम्भम्।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभन्ते॥ १३॥

अजीजनन्। अमृतम्। मर्त्यासः। अस्त्रेमाणम्। तरणिम्। वीळुऽजम्भम्। दश। स्वसारः। अग्रुवः। सम्ऽईचीः। पुमांसम्। जातम्। अभि। सम्। रभन्ते॥ १३॥

पदार्थः-(**अजीजनन्**) जनयन्ति (**अमृतम्**) नाशरहितम् (**मर्त्यासः**) मनुष्याः (**अस्त्रेमाणम्**) अक्षयम् (**तरणिम्**) अध्वनां तारकम् (**वीळुजम्भम्**) वीळु बलवज्जम्भो मुखमिव ज्वाला यस्य तम् (**दश**) (**स्वसारः**) भगिन्य इव वर्त्तमाना अङ्गुलयः। **स्वसार इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५) (**अग्रुवः**) या अग्रे गच्छन्ति ताः (**समीचीः**) याः सम्यगञ्चन्ति ताः (**पुमांसम्**) पुरुषार्थयुक्तं नरम् (**जातम्**) प्रसिद्धम् (**अभि**) आभिमुख्ये (**सम्**) सम्यक् (**रभन्ते**) प्रवर्त्तयन्ति॥ १३॥

अन्वयः-यथा अग्रुवः समीचीर्दश स्वसारो जातं पुमांसमभि सं रभन्ते तथा मर्त्यासो वीळुजम्भं तरणिमस्त्रेमाणममृतमग्निमजीजनन्॥ १३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कराऽङ्गुलयः परस्परं संहिता देहधारिणं मनुष्यं कर्मसु प्रवर्त्तयन्ति तथैव विद्वांसो वह्निं क्रियासु नियोजयन्ति॥ १३॥

पदार्थः-जैसे (**अग्रुवः**) आगे चलनेवाली (**समीचीः**) उत्तम प्रकार मिली हुई (**दश**) दश संख्या परिमित (**स्वसारः**) बहिनों के समान वर्त्तमान अंगुलियाँ (**जातम्**) प्रसिद्ध (**पुमांसम्**) पुरुषार्थ से युक्त मनुष्य को (**अभि**) सम्मुख (**सम्**) उत्तम प्रकार (**रभन्ते**) प्रवृत्त करती हैं, वैसे (**मर्त्यासः**) मनुष्य (**वीळुजम्भम्**) मुख के सदृश ज्वाला से शोभित (**तरणिम्**) भागों से यत्न द्वारा इष्ट स्थान में पहुँचानेवाला (**अस्त्रेमाणम्**) नाशरहित (**अमृतम्**) नित्य अग्नि को (**अजीजनन्**) उत्पन्न करते हैं॥ १३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे हाथों की अंगुलियाँ परस्पर मिली हुई शरीरधारी मनुष्य को कार्य्यों में प्रवृत्त करती हैं, वैसे ही विद्वान् पुरुष अग्नि को क्रिया में लगाते अर्थात् उसके द्वारा कार्य्य सिद्ध करते हैं॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूर्धनि।
न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत॥ १४॥

प्र। सप्तऽहोता। सनकात्। अरोचत। मातुः। उपऽस्थे। यत्। अशोचत्। ऊर्धनि। न। नि। मिषति। सुऽरणः। दिवेऽदिवे। यत्। असुरस्य। जठरात्। अजायत॥ १४॥

पदार्थः- **(प्र)** **(सप्तहोता)** सप्त प्राणा होतार आदातारो यस्य **(सनकात्)** सनातनात्कारणात् **(अरोचत)** प्रकाशते **(मातुः)** वायोः **(उपस्थे)** समीपे **(यत्)** यः **(अशोचत्)** दीप्यते **(ऊधनि)** रात्रौ। अत्र वर्णव्यत्ययेन सस्य नः। **ऊध इति रात्रिनामसु पठितम्।** (निघं०१.७) **(न)** **(नि)** नितराम् **(मिषति)** सिञ्चति **(सुरणः)** शोभनो रणः संग्रामो यस्मात्सः **(दिवेदिवे)** प्रतिदिनम् **(यत्)** यस्मात् **(असुरस्य)** रूपरहितस्य वायोः **(जठरात्)** मध्यात् **(अजायत)** जायते॥१४॥

अन्वयः-हे मनुष्या! यः सप्तहोताग्निः सनकाज्जातो मातुरुपस्थे प्रारोचत यद्य ऊधन्यशोचद् यः सुरणो दिवेदिवे न नि मिषति यद्योऽसुरस्य जठरादजायत तं यथावद्विजानीत॥१४॥

भावार्थः-योऽग्निः शोषको वायुनिमित्तः प्रकृत्याख्यात् कारणाज्जातोऽस्ति तं विज्ञाय बहून् व्यवहारान् सर्वे प्रकाशयन्तु॥१४॥

पदार्थः-हे मनुष्या! जो **(सप्तहोता)** सात प्राणों से ग्रहण करने योग्य अग्नि **(सनकात्)** अनादि परम्परा से सिद्ध कारण से उत्पन्न हुआ **(मातुः)** वायु के **(उपस्थे)** समीप में **(प्रारोचत)** प्रकाशित होता है **(यत्)** जो **(ऊधनि)** रात्रि में **(अशोचत्)** प्रकाशित होता है और जो **(सुरणः)** श्रेष्ठ युद्ध का साधन **(दिवेदिवे)** प्रतिदिन **(न)** नहीं **(नि)** अत्यन्त **(मिषति)** सींचता है **(यत्)** जो **(असुरस्य)** रूप से रहित वायु के **(जठरात्)** मध्य से **(अजायत)** उत्पन्न होता है, उसको अच्छे प्रकार जानो॥१४॥

भावार्थः-जो अग्नि अन्न आदि को शुष्क करनेवाला वायु रूप कारण से प्रसिद्ध प्रकृति नामक कारण से उत्पन्न हुआ है, उसको जान कर बहुत से व्यवहारों को सकल जन प्रसिद्ध करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः।
द्युम्नवद् ब्रह्म कुशिकास एरिरे एकएको दमे अग्निं समीधिरे॥१५॥

अमित्रऽयुधः। मरुताम्ऽइव। प्रऽयाः। प्रथमऽजाः। ब्रह्मणः। विश्वम्। इत्। विदुः। द्युम्नऽवत्। ब्रह्म। कुशिकासः। आ। ईरिरे। एकःऽएकः। दमे। अग्निम्। सम्। ईधिरे॥१५॥

पदार्थः-**(अमित्रायुधः)** अमित्रेषु शत्रुषु प्रक्षिप्तान्यायुधानि यैस्ते **(मरुतामिव)** मनुष्याणामिव **(प्रयाः)** ये सद्यः प्रयान्ति ते **(प्रथमजाः)** प्रथमात्कारणाज्जातः **(ब्रह्मणः)** परमात्मनः **(विश्वम्)** सर्वं जगत् **(इत्)** एव **(विदुः)** **(द्युम्नवत्)** प्रशस्तकीर्तिमत् **(ब्रह्म)** बृहद्धनम् **(कुशिकासः)** उत्कर्षं प्राप्ताः **(आ)** **(ईरिरे)** प्राप्नुवन्ति **(एकएकः)** जनः **(दमे)** गृहे **(अग्निम्)** **(सम्)** **(ईधिरे)** प्रदीपयेयुः॥१५॥

अन्वयः-हे मनुष्या! ये मरुतामिवाऽमित्रायुधः प्रयाः प्रथमजाः कुशिकास एकएको दमेऽग्निं समीधिरे ये च ब्रह्मणो विश्वं विदुस्त इदेव द्युम्नवद् ब्रह्मैरिरे॥१५॥

भावार्थः-अत्रोपमालङ्कारः। यथा वायवः सर्वत्र विजयिनोऽग्न्यादिप्रदीपका विश्वव्यापिनः सर्वान् जीवयित्वाऽऽनन्दयन्ति तथैवाग्न्यादिपदार्थविद्यायुक्ताः सर्वानानन्दयन्ति॥१५॥

पदार्थः-हे मनुष्यो! जो **(मरुतामिव)** मनुष्यों के सदृश **(अमित्रायुधः)** शत्रुओं के ऊपर शस्त्र चलाने **(प्रयाः)** शीघ्र चलनेवाले **(प्रथमजाः)** प्रथम कारण से उत्पन्न **(कुशिकासः)** उच्च पदवी को प्राप्त **(एकएकः)** प्रत्येक जन **(दमे)** गृह में **(अग्निम्)** अग्नि को **(सम्)** **(ईधिरे)** प्रज्वलित करें और जो **(ब्रह्मणः)** परमात्मा के **(विश्वम्)** सम्पूर्ण जगत् को **(विदुः)** जानते हैं, वे **(इत्)** ही **(द्युम्नवत्)** उत्तम यशयुक्त **(ब्रह्म)** बहुत धन को **(आ, ईरिरे)** प्राप्त होते हैं॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पवन सम्पूर्ण स्थानों में प्रबलता से प्राप्त होने, अग्नि आदि पदार्थों को प्रज्वलित करने और संसार में व्यापक होनेवाले सम्पूर्ण जीवों के प्राणों की रक्षा करके आनन्द देते हैं, वैसे ही अग्नि आदि पदार्थों की विद्यायुक्त पुरुष सम्पूर्ण जनों के लिये आनन्द देते हैं॥१५॥

अथ केषां निश्चलमैश्वर्यं जायत इत्याह॥

अब किन पुरुषों को निश्चल ऐश्वर्य प्राप्त होता, इस विषय को अगले मन्त्र में कहा है॥

यदु॒द्य त्वा॑ प्रय॒ति य॒ज्ञे अ॒स्मिन् होत॑श्चिकि॒त्वोऽव॑ृणीमहीह।
ध्रु॒व॒मया॑ ध्रु॒वमु॒ताश॑मिष्ठाः प्रजा॒नन् वि॒द्वाँ उप॑ याहि॒ सोम॑म्॥ १६॥ ३४॥ २॥ १॥

यत्। अ॒द्य। त्वा॒। प्र॒ऽय॒ति। य॒ज्ञे। अ॒स्मिन्। होत॒रिति॑। चि॒कि॒त्वः॒। अव॑ृणीमहि। इ॒ह। ध्रु॒व॒म्। अ॒या॒ः। ध्रु॒वम्। उ॒त। अ॒श॒मि॒ष्ठाः॒। प्र॒ऽजा॒नन्। वि॒द्वान्। उप॑। या॒हि॒। सोम॑म्॥ १६॥

पदार्थः-(**यत्**) ये (**अद्य**) इदानीम् (**त्वा**) त्वाम् (**प्रयति**) प्रयत्नसाध्ये (**यज्ञे**) सङ्गन्तव्ये व्यवहारे (**अस्मिन्**) (**होतः**) साधनोपसाधनानामादातः (**चिकित्वः**) विज्ञानवन् (**अवृणीमहि**) वृणुयाम (**इह**) अस्मिन् संसारे (**ध्रुवम्**) निश्चलम् (**अयाः**) यजेः। अत्र लङ् मध्यमैकवचने शपो लुक् श्वेतवाहादित्वात्पदान्ते डस्। (**ध्रुवम्**) (**उत**) अपि (**अशमिष्ठाः**) शमयेः (**प्रजानन्**) विद्वान् (**उप**) (**याहि**) प्राप्नुहि (**सोमम्**) ऐश्वर्य्यम्॥१६॥

अन्वयः-हे चिकित्वो होतो यद्ये वयमद्यास्मिन् प्रयति यज्ञे यं त्वाऽवृणीमहि स त्वमिह ध्रुवमशमिष्ठा उताऽपि प्रजानन् ध्रुवमयाः विद्वांत्संस्त्वं सोममुपयाहि॥१६॥

भावार्थः-येऽस्मिन् संसारे प्रयत्नेन सृष्टिपदार्थविद्याक्रमं जानन्ति ते सततमुपयोगं ग्रहीतुं शक्नुवन्ति तेषां ध्रुवमैश्वर्यं भवतीति॥१६॥

अत्राग्निवायुविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयाष्टके प्रथमोध्यायश्चतुस्त्रिंशत्तमो वर्गश्च तृतीयमण्डले द्वितीयोऽनुवाक एकोनत्रिंशत्तमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(चिकित्वः)** विज्ञानयुक्त **(होतः)** साधन जो मुख्य कारण उपसाधन अर्थात् सहायि कारणों के ग्रहणकर्त्ता! **(यत्)** जो हम लोग **(अद्य)** इस समय **(अस्मिन्)** इस **(प्रयति)** प्रयत्न से सिद्ध और **(यज्ञे)** ऐकमत्य होने योग्य व्यवहार में जिन **(त्वा)** आपको **(अवृणीमहि)** स्वीकार करें वह आप **(इह)** इस संसार में **(ध्रुवम्)** दृढ़ स्थिर **(अशमिष्ठाः)** शान्ति करो **(उत)** और भी **(प्रजानन्)** विज्ञानयुक्त हुए **(ध्रुवम्)** निश्चल धर्म को **(अयाः)** सङ्गत कीजिये **(विद्वान्)** विद्वान् पुरुष [होकर] आप **(सोमम्)** ऐश्वर्य्य को **(उप) (याहि)** प्राप्त होइये॥१६॥

भावार्थः-जो लोग इस संसार में प्रयत्न से सृष्टि के पदार्थों के विद्या-क्रम को जानते हैं, वे निरन्तर उन पदार्थों से उपकार ग्रहण कर सकते हैं, उनके निश्चय से ऐश्वर्य होता है॥१६॥

इस सूक्त में अग्नि, वायु और विद्वान् के गुणों का वर्णन होने से इस सूक्त में कहे अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह उनतीसवां सूक्त द्वितीय अनुवाक और चौतीसवां वर्ग समाप्त हुआ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीपरमविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण परमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्यभाषाभ्यां विभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये तृतीयाष्टकस्य प्रथमाध्यायः समाप्तः॥

॥ओ३म्॥

अथ तृतीयाष्टके द्वितीयाऽध्यायारम्भः॥

ओं विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ० ५.८२.५॥

अथ द्वाविंशर्चस्य त्रिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, २, ९-११, १४, १७, २० निचृत्त्रिष्टुप्। ५, ६, ८, १३, १९, २१, २२ त्रिष्टुप्। १२, १५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ४, ७, १६, १८ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विदुषः कृत्यमुपदिश्यते॥

अब तृतीयाष्टक के द्वितीय अध्याय और तीसरे मण्डल में बाईस ऋचावाले तीसवें सूक्त का प्रारम्भ है, उसके पहिले मन्त्र से विद्वान् के कर्त्तव्य का उपदेश करते हैं॥

इ॒च्छन्ति॑ त्वा सो॒म्यास॒: सखा॑यः सु॒न्वन्ति॒ सोमं॒ दध॑ति॒ प्रयां॑सि।
तिति॑क्षन्ते अ॒भिश॑स्तिं॒ जना॑ना॒मिन्द्र॒ त्वदा कश्च॒न हि प्र॑के॒तः॥ १॥

इ॒च्छन्ति॑। त्वा॒। सो॒म्यास॑:। सखा॑यः। सु॒न्वन्ति॑। सोम॑म्। दध॑ति। प्रयां॑सि। तिति॑क्षन्ते। अ॒भिऽश॑स्तिम्। जना॑नाम्। इन्द्र॑। त्वत्। आ। कः। च॒न। हि। प्र॒ऽके॒तः॥ १॥

पदार्थः-(**इच्छन्ति**) (**त्वा**) त्वाम् (**सोम्यासः**) (**सखायः**) (**सुन्वन्ति**) निष्पादयन्ति (**सोमम्**) परमैश्वर्य्यम् (**दधति**) (**प्रयांसि**) कमनीयानि वस्तूनि (**तितिक्षन्ते**) सहन्ते (**अभिशस्तिम्**) अभितो हिंसाम् (**जनानाम्**) मनुष्याणाम् (**इन्द्र**) परमैश्वर्यप्रद (**त्वत्**) तव सकाशात् (**आ**) (**कः**) (**चन**) कश्चिदपि (**हि**) यतः (**प्रकेतः**) प्रकृष्टा केतः प्रज्ञा यस्य सः॥१॥

अन्वयः-हे इन्द्र! ये सोम्यासः सखायस्त्वेच्छन्ति ते सोमं सुन्वति प्रयांसि दधति जनानामभिशस्तिमा तितिक्षन्ते हि यतस्त्वदन्यः कश्चन प्रकेतो नास्ति तस्मादेतान्सर्वदा रक्ष॥१॥

भावार्थः-ये सुहृदो भूत्वा प्रयत्नेनैश्वर्य्यमिच्छन्ति ते सुखदुःखनिन्दादिकं सोढ्वा विद्वत्सङ्गं कृत्वाऽऽनन्दं वर्धयेयुः॥१॥

पदार्थः-हे (**इन्द्र**) परम ऐश्वर्य के दाता! जो (**सोम्यासः**) परस्पर स्नेह रस के वर्द्धक (**सखायः**) मित्रभाव से वर्त्तमान (**त्वा**) आपकी (**इच्छन्ति**) इच्छा करते हैं, वे (**सोमम्**) परम ऐश्वर्य को (**सुन्वन्ति**) सिद्ध करते, (**प्रयांसि**) कामना करने योग्य वस्तुओं को (**दधति**) धारण करते और (**जनानाम्**) मनुष्य लोगों को (**अभिशस्तिम्**) चारों ओर से हिंसा को (**आ**) (**तितिक्षन्ते**) सहते हैं (**हि**) जिससे (**त्वत्**) आपसे अन्य (**कः**) (**चन**) कोई भी पुरुष (**प्रकेतः**) उत्तम बुद्धिवाला नहीं है, इससे इन मनुष्यों की सर्वदा रक्षा

कीजिये॥१॥

भावार्थः-जो लोग परस्पर मित्रभाव से वर्त्ताव करते हुए प्रयत्न के साथ ऐश्वर्य की इच्छा करते हैं, वे सुख, दुःख, निन्दा आदि को सह और विद्वानों का सङ्ग करके आनन्द को बढ़ावें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्याम्।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ॥२॥

न। ते। दूरे। परमा। चित्। रजांसि। आ। तु। प्र। याहि। हरिऽवः। हरिऽभ्याम्। स्थिराय। वृष्णे। सवना। कृता। इमा। युक्ताः। ग्रावाणः। सम्ऽइधाने। अग्नौ॥२॥

पदार्थः-(**न**) निषेधे (**ते**) तव (**दूरे**) (**परमा**) परमाण्युत्कृष्टानि (**चित्**) अपि (**रजांसि**) लोकस्थानानि (**आ**) (**तु**) (**प्र**) (**याहि**) (**हरिवः**) प्रशस्ताऽश्वयानयुक्त (**हरिभ्याम्**) अश्वाभ्याम् (**स्थिराय**) (**वृष्णे**) बलाय (**सवना**) ऐश्वर्यसाधकानि कर्माणि (**कृता**) कृतानि (**इमा**) इमानि (**युक्ताः**) उद्युक्ताः (**ग्रावाणः**) मेघाः। **ग्रावाण इति मेघनामसु पठितम्।** (निघं०१.१०) (**समिधाने**) प्रदीप्यमाने (**अग्नौ**) वह्नौ॥२॥

अन्वयः-हे हरिवस्त्वं हरिभ्यां प्रयाह्येवं कृते परमा रजांसि ते दूरे न भविष्यन्ति यदि समिधानेऽग्नौ स्थिराय वृष्णे कृतेमा सवना कुर्य्यास्तदा तु युक्ता ग्रावाणश्चिद् बहवो भवेयुः॥२॥

भावार्थः-यदि मनुष्याः शीघ्रगाम्यश्वैर्देशान्तरं जिगमिषेयुस्तर्हि सर्वं सनीडेमेवास्ति। यदि नियमेन वह्निं प्रज्वाल्य तत्र हविर्जुहुयुस्तर्हि वर्षापि सुगमैवास्तीति ज्ञेयम्॥२॥

पदार्थः-हे (**हरिवः**) उत्तम घोड़ों के वाहनों से युक्त! आप (**हरिभ्याम्**) घोड़ों से (**प्र**) (**आ, याहि**) आइये, ऐसा करने से (**परमा**) उत्तम (**रजांसि**) लोकों के स्थान (**ते**) आपके (**दूरे**) दूर (**न**) नहीं होंगे, जो (**समिधाने**) हवन करने योग्य प्रदीप्त किये जाते हुए (**अग्नौ**) अग्नि में (**स्थिराय**) दृढ़ (**वृष्णे**) बलवान् के लिये (**कृता**) किये गये (**इमा**) इन (**सवना**) ऐश्वर्य-वृद्धि के साधक कर्मों को करो (**तु**) तो (**युक्ताः**) उद्यत (**ग्रावाणः**) मेघ (**चित्**) भी बहुत से होवें॥२॥

भावार्थः-मनुष्य यदि शीघ्र चलनेवाले घोड़ों से देशान्तर जाने की इच्छा करें तो सब समीप ही है। यदि नियम से अग्नि को प्रज्वलित कर उसमें होम करें तो वर्षा होना सुगम ही जानो॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिर्ऋघावान्।
यदुग्रो धा बाधितो मर्त्येषु क्व१ त्या ते वृषभ वीर्याणि॥ ३॥

इन्द्रः। सुऽशिप्रः। मघऽवा। तरुत्रः। महाऽव्रातः। तुविऽकूर्मिः। ऋघावान्। यत्। उग्रः। धाः। बाधितः। मर्त्येषु। क्व। त्या। ते। वृषभ। वीर्याणि॥ ३॥

पदार्थः-(**इन्द्रः**) परमैश्वर्य्ययुक्तः (**सुशिप्रः**) शोभनहनुनासिकः (**मघवा**) परमपूजितधनयुक्तः (**तरुत्रः**) दुःखेभ्यस्तारकः (**महाव्रातः**) महान्तो व्राताः व्रतेषु कुशला जनाः सखायो यस्य सः (**तुविकूर्मिः**) तुविर्बहुविधः कूर्मिः कर्मयोगो यस्य सः (**ऋघावान्**) य ऋन् शत्रून् घ्नन्ति ते वा बहवः शूरा विद्यन्ते यस्य। अत्र हनधातोर्वर्णव्यत्ययेन हस्य घो नलोपश्च। (**यत्**) यानि (**उग्रः**) तेजस्विस्वभावः (**धाः**) धेहि (**बाधितः**) विलोडितः (**मर्त्येषु**) (**क्व**) कस्मिन् (**त्या**) तानि (**ते**) तव (**वृषभ**) बलिष्ठ (**वीर्याणि**) वीरेषु साधूनि बलानि॥ ३॥

अन्वयः-हे वृषभ! मर्त्येषु बाधितः उग्रः सन् यद्यानि दुःखनिवारणानि धास्ते तव त्या वीर्याणि क्व सन्ति। एवं सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिर्ऋघावानिन्द्रस्त्वं भवेः॥ ३॥

भावार्थः-यदा मनुष्यस्यानेकविधा बाधाः समुत्थिताः स्युस्तदाऽनेकानुपायान् युञ्जीत। एवं पुरुषार्थेन विघ्नानि निवार्य श्रीबले सततं वर्धनीये॥ ३॥

पदार्थः-हे (**वृषभ**) बलिष्ठ! (**मर्त्येषु**) मनुष्यो में (**बाधितः**) पीड़ित (**उग्रः**) तेजस्वी स्वभाव से युक्त (**यत्**) जो दुःख दूर करनेवाले हैं, उनको (**धाः**) धारण करो (**ते**) आपके (**त्या**) वे (**वीर्याणि**) वीर पुरुषों में हुए योग्य बल (**क्व**) किसमें हैं, इस प्रकार (**सुशिप्रः**) सुन्दर ठोढ़ी और नासिकायुक्त (**मघवा**) अत्यन्त श्रेष्ठ धन से युक्त (**तरुत्रः**) दुःखों से छुड़ानेवाला (**महाव्रातः**) सत्य आदि व्रतों में श्रद्धालु पुरुषों का मित्र (**तुविकूर्मिः**) बहुत प्रकार के कर्मों के आरम्भ में उत्साही (**ऋघावान्**) शत्रुओं के नाशकर्त्ता बहुत से शूरवीरों के सहित वर्त्तमान (**इन्द्रः**) अत्यन्त ऐश्वर्य्य से युक्त आप होवें॥ ३॥

भावार्थः-जब मनुष्य के अनेक प्रकार की पीड़ायें प्रकट हों, तब बहुत से उपायों को युक्त करें, इस प्रकार पुरुषार्थ से विघ्नों को दूर करके शोभा और बल निरन्तर बढ़ाने योग्य हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः।
तव द्यावापृथिवी पर्वतासोऽनु व्रताय निमितेव तस्थुः॥ ४॥

त्वम्। हि। स्म। च्यवयन्। अच्युतानि। एकः। वृत्रा। चरसि। जिघ्नमानः। तव। द्यावापृथिवी इति। पर्वतासः। अनु। व्रताय। निमिताऽइव। तस्थुः॥ ४॥

पदार्थः-(**त्वम्**) राजन् (**हि**) (**स्म**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**च्यावयन्**) प्रचालयन् निपातयन् (**अच्युतानि**) अक्षीणानि शत्रुसैन्यानि (**एकः**) असहायः (**वृत्रा**) मेघावयवरूपाणि घनानि (**चरसि**) (**जिघ्नमानः**) हनन् सन् (**तव**) (**द्यावापृथिवी**) प्रकाशभूमी (**पर्वतासः**) पर्वताकारा मेघाः (**अनु**) (**व्रताय**) सत्यभाषणादिकर्मणे तच्छीलाय वा (**निमितेव**) नितरां मितानीव (**तस्थुः**) तिष्ठन्ति॥४॥

अन्वयः-हे राजन्! त्वमेको ह्यच्युतानि च्यावयन् स्म चरसि यथा सूर्य्यस्य सम्बन्धे द्यावापृथिवी पर्वतासो वृत्रा निमितेव तस्थुस्तथैवानुव्रताय शत्रून् जिघ्नमानो भवेत्तर्हि ते तव ध्रुवो विजयः स्यात्॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्य्यो नियमेन वर्त्तित्वा निवारणीयानि निवार्य्य रक्षणीयानि रक्षति तथैव भवान् प्रतिषेद्धव्यान् शत्रून् प्रतिषेध्य प्रजाः सततं रक्षेत्॥४॥

पदार्थः-हे राजन्! (**त्वम्**) आप (**एकः**) सहाय के विना स्वयं बलवान् (**हि**) जिससे (**अच्युतानि**) प्रबल शत्रुओं की सेनाओं को (**च्यावयन्**) भय से गिराते हुए (**स्म**) ही वर्त्तमान हैं, जैसे सूर्य के सम्बन्ध में (**द्यावापृथिवी**) प्रकाश और भूमि (**पर्वतासः**) पर्वत के सदृश बड़े-बड़े मेघ और (**वृत्रा**) मेघों के टुकड़े रूप बादल (**निमितेव**) जैसे निरन्तर प्रमाण किये हुए पदार्थ वैसे (**तस्थुः**) स्थिर होते हैं, वैसे ही (**अनु**) (**व्रताय**) सत्यभाषण आदि कर्म वा उत्तम स्वभाव के लिये शत्रुओं का (**जिघ्नमानः**) नाशकर्त्ता होओ तो (**ते**) आपका निश्चय से विजय होवे॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य नियमपूर्वक वर्त्तमान होके निवारण करने योग्य पदार्थों का निवारण करके रक्षा करने योग्य पदार्थों की रक्षा करता है, वैसे ही आप वर्जने योग्य शत्रुओं का वर्जन करके प्रजाओं की निरन्तर रक्षा कीजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उ॒ताभ॑ये पुरुहूत श्रवो॑भि॒रेको॑ दृ॒ळ्हमव॑दो वृत्र॒हा सन्।
इ॒मे चि॑दिन्द्र रोद॑सी अपा॒रे यत्सं॑गृ॒भ्णा म॑घवन्का॒शिरित्ते॑॥५॥१॥

उ॒त। अभ॑ये। पु॒रु॒ऽहू॒त॒। श्रव॑ःऽभिः। एक॑ः। दृ॒ळ्हम्। अव॑दः। वृ॒त्र॒ऽहा। सन्। इ॒मे इति॑। चि॒त्। इ॒न्द्र॒। रोद॑सी॒ इति॑। अ॒पा॒रे इति॑। यत्। स॒म्ऽगृ॒भ्णाः। म॒घ॒ऽव॒न्। का॒शिः। इत्। ते॒॥५॥

पदार्थः-(**उत**) अपि (**अभये**) भयरहिते व्यवहारे (**पुरुहूत**) बहुभिः प्रशंसित (**श्रवोभिः**) अनेकविधैः श्रवणैः (**एकः**) असहायः (**दृढम्**) (**अवदः**) वदेः (**वृत्रहा**) सूर्यवत् (**सन्**) (**इमे**) (**चित्**) अपि (**इन्द्र**) सूर्य्यवद्वर्त्तमान (**रोदसी**) द्यावापृथिवी (**अपारे**) अविद्यमानाऽवधी (**यत्**) या (**सङ्गृभ्णाः**) सङ्गृह्णीयाः (**मघवन्**) बहुधनयुक्त (**काशिः**) न्यायविनयादिशुभगुणप्रदीप्तिः (**इत्**) एव (**ते**) तव॥५॥

अन्वयः–हे पुरुहूत मघवन्निन्द्र! त्वमेकस्सन्नभये श्रवोभिः सह दृढमवद उतापि यथा वृत्रहा सूर्य्यश्चिदिमे अपारे रोदसी सङ्गृह्णाति तथाभूतः सन् यद्या ते काशिरस्ति तामित्सङ्गृभ्णाः॥५॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषैरनेकोपायैः प्रजासु निर्भयता सम्पादनीया सूर्य्यवन् न्यायविद्या प्रकाशनीया॥५॥

पदार्थः–हे **(पुरुहूत)** बहुत जनों से प्रशंसित **(मघवन्)** बहुत धन से युक्त **(इन्द्र)** सूर्य्य के तुल्य प्रकाशमान! आप **(एकः)** विना सहाय स्वयं बलवान् **(सन्)** हुए **(अभये)** भय से रहित व्यवहार में **(श्रवोभिः)** अनेक प्रकार के सुनने योग्य वचनों के सहित **(दृढम्)** निश्चय **(अवदः)** बोलें **(उत)** और भी जैसे **(वृत्रहा)** सूर्य्य **(चित्)** भी **(इमे)** इन **(अपारे)** अवधि रहित **(रोदसी)** अन्तरिक्ष और पृथिवी को प्राप्त होता है, वैसे होकर **(यत्)** जो **(ते)** आपके **(काशिः)** न्याय विनय आदि उत्तम गुणों का प्रकाश है, उसको **(इत्)** ही **(संगृभ्णाः)** ग्रहण करें॥५॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा के पुरुषों को चाहिये कि अनेक प्रकार के उपायों से प्रजाओं में उपद्रवों से भय का नाश और सूर्य के तुल्य न्यायविद्या का प्रकाश करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

प्र सू त इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून्।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु॥६॥

प्र। सु। ते। इन्द्र। प्रऽवता। हरिऽभ्याम्। प्र। ते। वज्रः। प्रऽमृणन्। एतु। शत्रून्। जहि। प्रतीचः। अनूचः। पराचः। विश्वम्। सत्यम्। कृणुहि। विष्टम्। अस्तु॥६॥

पदार्थः–**(प्र)** **(सु)** **(ते)** तव **(इन्द्र)** सूर्य्यइव वर्त्तमान **(प्रवता)** अर्वाचीनेन मार्गेण **(हरिभ्याम्)** सुशिक्षिताभ्यामश्वाभ्याम् **(प्र)** **(ते)** तव **(वज्रः)** किरण इव शस्त्रसमूहः **(प्रमृणन्)** प्रकर्षेण हिंसन् **(एतु)** प्राप्नोतु **(शत्रून्)** दुष्टकर्मकर्तॄन् **(जहि)** हिंधि **(प्रतीचः)** पश्चात् स्थितान् **(अनूचः)** कपटेनानुकूलान् **(पराचः)** परागभूतान् दूरस्थान् **(विश्वम्)** **(सत्यम्)** **(कृणुहि)** **(विष्टम्)** व्याप्तम् **(अस्तु)**॥६॥

अन्वयः–हे इन्द्र! हरिभ्यां युक्ते रथे प्रवता मार्गेण भवान् वज्र इव शत्रून् प्रमृणन् प्रैतु। एवं ते विजयो भवति त्वं प्रतीचोऽनूचः पराचः शत्रून् प्र जहि विश्वं सत्यं सु कृणुहि यतो विष्टं चास्तु एवं ते सत्कीर्त्तिः प्रवर्त्तेत॥६॥

भावार्थः–ये मनुष्या दुष्टाचारिणो मनुष्यादिप्राणिनो निरुध्य सत्यं प्रवर्त्तयेयुस्ते सुखेनानन्दमाप्नुयुः॥६॥

पदार्थः–हे **(इन्द्र)** सूर्य के सदृश प्रकाशमान! **(हरिभ्याम्)** उत्तम प्रकार शिक्षायुक्त घोड़ों से

युक्त रथ में **(प्रवता)** उत्तम मार्ग से आप जैसे **(वज्रः)** किरणों के सदृश शस्त्रों का समूह और **(शत्रून्)** दुष्ट कर्म करनेवालों को **(प्रमृणन्)** अत्यन्त नाश करते हुए **(प्र, एतु)** प्राप्त हूजिये। इस प्रकार **(ते)** आपका विजय होता है आप **(प्रतीचः)** पीछे वर्त्तमान **(अनूचः)** और कपट से अनुकूल अर्थात् [निकटस्थ और] **(पराचः)** दूर स्थल में विराजमान शत्रुओं की **(प्र)** **(जहि)** हिंसा करो तथा **(विश्वम्)** सम्पूर्ण **(सत्यम्)** सत्य को **(सु, कृणुहि)** अच्छे प्रकार बढ़ाओ जिससे वह **(विष्टम्)** व्याप्त **(अस्तु)** हो॥६॥

भावार्थः-जो मनुष्य दुष्ट आचरण करनेवाले मनुष्य आदि प्राणियों का निवारण करके सत्य का प्रचार करें, वे सुख से आनन्द भोगते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं१ सः।
भद्रा त इन्द्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः॥७॥

यस्मै। धायुः। अदधाः। मर्त्याय। अभक्तम्। चित्। भजते। गेह्यम्। सः। भद्रा। ते। इन्द्र। सुऽमतिः। घृताची। सहस्रऽदाना। पुरुऽहूत। रातिः॥७॥

पदार्थः-(**यस्मै**) (**धायुः**) यो दधाति सः (**अदधाः**) दध्याः (**मर्त्याय**) मनुष्याय (**अभक्तम्**) विभागरहितम् (**चित्**) अपि (**भजते**) सेवते (**गेह्यम्**) गृहेषु गृहेषु भवम् (**सः**) (**भद्रा**) कल्याणकारी (**ते**) तव (**इन्द्र**) सुखप्रदातः (**सुमतिः**) शोभना प्रज्ञा (**घृताची**) सुखप्रदा रात्रीव (**सहस्रदाना**) असंख्यप्रदाना (**पुरुहूत**) बहुभिः सेवित (**रातिः**) दानक्रिया॥७॥

अन्वयः-हे पुरुहूतेन्द्र! भवान् यस्मै मर्त्यायाऽभक्तं गेह्यं भजते यस्मै धायुश्चिदपि सुखमदधास्तस्य ते या घृताचीव भद्रा सुमतिः सहस्रदाना रातिरस्ति तां स कुर्य्यात्॥७॥

भावार्थः-ये मनुष्या पितृपैतामहं धनादिकभक्तं सेवेरन् अन्योऽन्यस्य दोषाँस्त्यक्त्वा गुणान् गृह्णीयुस्ते कल्याणभाजो भवेयुः॥७॥

पदार्थः-(**पुरुहूत**) (**इन्द्र**) सुख के दाता आप (**यस्मै**) जिस (**मर्त्याय**) मनुष्य के लिये (**अभक्तम्**) विभाग से रहित (**गेह्यम्**) गृह-गृह में उत्पन्न हुए धन की (**भजते**) सेवा करते हैं, जिसके लिये (**धायुः**) उत्तम पदार्थों के धारणकर्त्ता (**चित्**) भी आप सुख को (**अदधाः**) धारण करें उन (**ते**) आपकी जो (**घृताची**) सुख देनेवाली रात्रि के सदृश (**भद्रा**) कल्याण करनेवाली (**सुमतिः**) उत्तम बुद्धि और (**सहस्रदाना**) अनगिनती दान जिसमें दिये जाते हों, ऐसी (**रातिः**) दान सम्बन्धिनी क्रिया है, उसको (**सः**) वह स्वीकार करे॥७॥

भावार्थः-जो मनुष्य पिता और पितामह का धन आदि जो कि नहीं बटा हुआ उसकी रक्षा वा सेवा करें और परस्पर दोषों को त्याग के गुणों का ग्रहण करें, वे कल्याण के भागी होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम्।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ॥८॥

सहऽदानुम्। पुरुऽहूत। क्षियन्तम्। अहस्तम्। इन्द्र। सम्। पिणक्। कुणारुम्। अभि। वृत्रम्। वर्धमानम्। पियारुम्। अपादम्। इन्द्र। तवसा। जघन्थ॥८॥

पदार्थः-(**सहदानुम्**) दानेन सह वर्त्तमानम् (**पुरुहूत**) बहुभिः प्रशंसित (**क्षियन्तम्**) निवसन्तम् (**अहस्तम्**) अविद्यमानम् (**इन्द्र**) सूर्य्यवद्वर्त्तमान (**सम्**) सम्यक् (**पिणक्**) पिंष्याः (**कुणारुम्**) शब्दायमानम् (**अभि**) आभिमुख्ये (**वृत्रम्**) मेघम् (**वर्धमानम्**) (**पियारुम्**) पीयमानम् (**अपादम्**) पादरहितम् (**इन्द्र**) दुष्टानां विदारक (**तवसा**) बलेन (**जघन्थ**) जह्याः॥८॥

अन्वयः-हे पुरुहूतेन्द्र! यथा सूर्य्यः सहदानुं क्षियन्तमहस्तं कुणारुं वर्धमानं पियारुमपादं वृत्रं मेघमभिपिनष्टि तथा शत्रून् भवान् संपिणक्। हे इन्द्र! त्वं तवसा दुष्टान् जघन्थ॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो मेघाकर्षणवर्षणाभ्यां सर्वं जगत्पाति तथैव दुष्टानां घातेन श्रेष्ठानां धारणेन च सर्वा प्रजाः पालनीयाः॥८॥

पदार्थः-हे (**पुरुहूत**) बहुत जनों से प्रशंसित अर्थात् यश को प्राप्त (**इन्द्र**) सूर्य्य के सदृश तेजस्वी! जैसे [सूर्य] (**सुहदानुम्**) दान से युक्त (**क्षियन्तम्**) रहते हुए (**अहस्तम्**) अविद्यमान (**कुणारुम्**) शब्द करते और (**वर्धमानम्**) बढ़ते हुए (**पियारुम्**) पिये गये (**अपादम्**) पादों से हीन (**वृत्रम्**) मेघ को (**अभि**) सम्मुख पीसता है, वैसे शत्रुओं का आप (**सम्, पिणक्**) नाश करो और (**इन्द्र**) हे दुष्टों को विदीर्ण करनेवाले! आप (**तवसा**) बल से दुष्ट पुरुषों का (**जघन्थ**) नाश करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य मेघों के आकर्षण और वर्षाने से सम्पूर्ण जगत् को पालता है, वैसे ही दुष्टों के नाश करने और श्रेष्ठ पुरुषों के धारण करने से राजा को सम्पूर्ण प्रजाओं की पालना करनी चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ।
अस्तभ्नाद् द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः॥९॥

नि। सामनाम्। इषिराम्। इन्द्र। भूमिम्। महीम्। अपाराम्। सदने। ससत्थ। अस्तभ्नात्। द्याम्। वृषभः। अन्तरिक्षम्। अर्षन्तु। आपः। त्वया। इह। प्रऽसूताः॥९॥

पदार्थः-(**नि**) (**सामनाम्**) प्रशस्तानि सामानि विद्यन्ते यस्यां ताम् (**इषिराम्**) बहुपदार्थप्रापिकाम् (**इन्द्र**) सवितेव राजन् (**भूमिम्**) बहवः पदार्था भवन्ति यस्यां ताम् (**महीम्**) परिमाणेन महतीम् (**अपाराम्**) पाररहिताम् (**सदने**) स्थाने (**ससत्थ**) सीद (**अस्तभ्नात्**) स्तभ्नाति (**द्याम्**) (**वृषभः**) वर्षकः (**अन्तरिक्षम्**) आकाशं वा (**अर्षन्तु**) प्राप्नुवन्तु (**आपः**) जलानि (**त्वया**) (**इह**) प्रसूताः॥९॥

अन्वयः-हे इन्द्र राजँस्त्वं यथा वृषभो द्यामस्तभ्नात्तथा सामनामिषिरां महीमपारां भूमिं प्राप्येह सदने नि ससत्थ त्वया प्रसूता आपोऽन्तरिक्षमर्षन्तु॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो नियमेन प्रकाशं भूमिं च धरति तथैव न्यायेन राज्यं राजा धरेत्। सदैव प्रजासु बलानि वर्धयेत्॥९॥

पदार्थः-हे (**इन्द्र**) सूर्य्य के तुल्य प्रकाश से युक्त राजन्! आप जैसे (**वृषभः**) वृष्टिकर्त्ता सूर्य (**द्याम्**) अन्तरिक्ष को (**अस्तभ्नात्**) पुष्टता से धारण करता है, वैसे (**सामनाम्**) उत्तम उपमाओं से युक्त (**इषिराम्**) बहुत पदार्थों की प्राप्ति करानेवाली (**महीम्**) बड़े परिमाण से युक्त (**अपाराम्**) जिसका पार नहीं (**भूमिम्**) जिसमें बहुत पदार्थ होते हैं, उस भूमि को प्राप्त होकर (**इह**) इस (**सदने**) स्थान में (**नि, ससत्थ**) बैठो (**त्वया**) आपसे (**प्रसूताः**) प्रेरित हुए (**आपः**) जल (**अन्तरिक्षम्**) आकाश को (**अर्षन्तु**) प्राप्त होवें॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य नियमपूर्वक प्रकाश और भूमि को धारण करता है, वैसे ही न्याय से राजा राज्य को धारण करे और सब काल में प्रजाओं में ही बल बढ़ाया करे॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यारः।
सुगान् पथो अकृणोन्निरजे गाः प्रावन् वाणीः पुरुहूतं धमन्तीः॥१०॥२॥

अलातृणः। वलः। इन्द्र। व्रजः। गोः। पुरा। हन्तोः। भयमानः। वि। आरः। सुऽगान्। पथः। अकृणोत्। निःऽअजे। गाः। प्र। आवन्। वाणीः। पुरुहूतम्। धमन्तीः॥१०॥

पदार्थः-(**अलातृणः**) योऽलं तृणाति सः (**बलः**) बलवान् (**इन्द्र**) परमैश्वर्य्यप्रापक (**व्रजः**) यो व्रजति गच्छेत् सः (**गोः**) पृथिव्याः (**पुरा**) (**हन्तोः**) हन्तुम् (**भयमानः**) भयं प्राप्तः। अत्र व्यत्ययेन

शानच्। (**वि, आर**) विशेषेण गच्छति (**सुगान्**) सुखेन गच्छति येषु तान् (**पथः**) मार्गान् (**अकृणोत्**) कुर्य्यात् (**निरजे**) नितरां गमनाय (**गाः**) या गच्छन्ति ताः (**प्र**) (**आवन्**) प्रकर्षेण रक्षन्ति (**वाणीः**) सुशिक्षिता वाचः (**पुरुहूतम्**) बहुभिः प्रशंसितम् (**धमन्तीः**) शब्दयन्त्यः॥१०॥

अन्वयः-हे इन्द्र! अलातृणो बलो व्रजो भयमानो भवान् सुगान् पथो व्यार यः पुरा गोर्हन्तोरकृणोद्या पुरुहूतं धमन्तीर्वाणीर्गाः प्रावन् तं ताश्च निरजे व्यार॥१०॥

भावार्थः-मनुष्यैः सदैवाऽधर्माचरणाद्भीत्वा धर्म्यं प्रवर्तितव्यं दुर्व्यसनानि हत्वा धर्म्यमार्गेण गन्तव्यम्॥१०॥

पदार्थः-हे (**इन्द्र**) श्रेष्ठ ऐश्वर्य्य के दाता! (**अलातृणः**) सम्पूर्ण संसार के प्रलयकर्त्ता (**बलः**) बलयुक्त (**व्रजः**) चलनेवाले (**भयमानः**) भय को प्राप्त होते हुए आप (**सुगान्**) सुख से जिनमें मनुष्य आदि चलें ऐसे (**पथः**) मार्गों को (**वि**) (**आर**) विशेष करके प्राप्त होइये जो (**पुरा**) प्रथम (**गोः**) पृथिवी का (**हन्तोः**) नाश करने को (**अकृणोत्**) क्रिया करे वा जो (**पुरुहूतम्**) बहुतों से प्रशंसायुक्त (**धमन्तीः**) शब्द करती हुईं (**वाणीः**) उत्तम प्रकार शिक्षायुक्त (**गाः**) चलनेवाली वाणी (**प्र**) (**आवन्**) अतिशय रक्षा करती हैं, उसको और उनको (**निरजे**) अत्यन्त चलने के लिये विशेष करके प्राप्त होइये॥१०॥

भावार्थः-मनुष्यों को चाहिये कि सदा ही अधर्म के आचरण से डरके धर्म में प्रवृत्त हों और बुरे व्यसनों को त्याग के धर्मयुक्त मार्ग से चलें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

एको॒ द्वे वसु॑मती समी॒ची इन्द्र॒ आ प॑प्रौ पृथि॒वीमु॒त द्याम्।
उ॒तान्तरि॑क्षादु॒भि नः॑ समी॒क इषो॒ र॒थीः स॒युज॑ः शू॒र वाजा॑न्॥११॥

एकः॑। द्वे इति॑। वसु॑मती॒ इति॒ वसु॑ऽमती। स॒मी॒ची इति॑ स॒म्ऽई॒ची। इन्द्रः॑। आ। प॒प्रौ॒। पृ॒थि॒वीम्। उ॒त। द्याम्। उ॒त। अ॒न्तरि॑क्षात्। अ॒भि। नः॒। स॒म्ऽई॒के। इ॒षः॒। र॒थीः॒। स॒ऽयुजः॑। शू॒र॒। वाजा॑न्॥११॥

पदार्थः-(**एकः**) असहायः (**द्वे**) (**वसुमती**) बहवो वसवो विद्यन्ते ययोस्ते (**समीची**) ये सम्यगञ्चतः समानं प्राप्नुतस्ते (**इन्द्रः**) विद्युत् (**आ**) (**पप्रौ**) प्राति (**पृथिवीम्**) अन्तरिक्षं भूमिं वा (**उत**) अपि (**द्याम्**) प्रकाशम् (**उत**) अपि (**अन्तरिक्षात्**) मध्यस्थादवकाशात् (**अभि**) आभिमुख्ये (**नः**) अस्मभ्यम् (**समीके**) समीपे (**इषः**) इच्छाः (**रथीः**) प्रशस्तरथयुक्तः (**सयुजः**) ये समानं युञ्जते ते (**शूर**) दुष्टानां हिंसक (**वाजान्**) अन्नादीन्॥११॥

अन्वयः-हे शूर! यथैको रथीरिन्द्रो द्वे समीची वसुमती पृथिवीमुत द्यां चा पप्रौ समीकेऽन्तरिक्षात् सयुजो नोऽस्मभ्यमिष उत वाजानभि पप्रुः ते सर्वैः सत्कर्त्तव्याः॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये भूमिवत्प्रजाधारका विद्युद्वत्परमैश्वर्यप्रदाः प्रजाजनाः स्युस्ते सर्वं राज्यं रक्षितुं शक्नुयुः॥११॥

पदार्थः-हे (**शूर**) दुष्टजनों के नाशकारक! जैसे (**एकः**) सहायरहित अकिल्ली (**रथीः**) प्रशंसनीय रथरूप वाहन के सहित (**इन्द्रः**) बिजुली (**द्वे**) दो (**समीची**) समानता को प्राप्त (**वसुमती**) बहुत धनों से युक्त (**पृथिवीम्**) अन्तरिक्ष वा भूमि को (**उत**) और भी (**द्याम्**) प्रकाश को (**आ**) (**पप्रौ**) पूर्ण करती (**समीके**) समीप में (**अन्तरिक्षात्**) मध्य में वर्त्तमान अवकाश से (**सयुजः**) तुल्यता के साथ परस्पर मिले हुए मित्र जन (**नः**) हम लोगों के लिये (**इषः**) इच्छाओं को (**उत**) और (**वाजान्**) अन्न आदि वस्तुओं को (**अभि**) सब ओर से पूर्ण करते, वे सम्पूर्ण जनों से सत्कार करने योग्य हैं॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो भूमि के सदृश प्रजाओं के धारण करने और बिजुली के सदृश अति उत्तम ऐश्वर्य्य के देनेवाले प्रजाजन हों, वे सम्पूर्ण राज्य की रक्षा कर सकें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः।
सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते तत्त्वस्य॥१२॥

दिशः। सूर्यः। न। मिनाति। प्रऽदिष्टाः। दिवेऽदिवे। हर्यश्वऽप्रसूताः। सम्। यत्। आनट्। अध्वनः। आत्। इत्। अश्वैः। विऽमोचनम्। कृणुते। तत्। तु। अस्य॥१२॥

पदार्थः-(**दिशः**) पूर्वाद्याः (**सूर्यः**) सविता (**न**) इव (**मिनाति**) (**प्रदिष्टाः**) याः प्रदिश्यन्ते ताः (**दिवेदिवे**) प्रतिदिनम् (**हर्यश्वप्रसूताः**) हरयो हरणशीलाः अश्वाः किरणा यस्य तेन प्रसूता जनिताः (**सम्**) (**यत्**) (**आनट्**) व्याप्नोति (**अध्वनः**) मार्गान् (**आत्**) आनन्तर्य्ये (**इत्**) एव (**अश्वैः**) तुरङ्गैः (**विमोचनम्**) (**कृणुते**) करोति (**तत्**) (**तु**) (**अस्य**)॥१२॥

अन्वयः-यः सूर्यो न दिवेदिवे हर्यश्वप्रसूताः प्रदिष्टा दिशो मिनाति। आद्यद्योऽश्वैरध्वनः समानट् विमोचनं कृणुते तदित्त्वस्य भूषणमिति वेद्यम्॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यन्मनुष्या अविद्याकुसंस्कारदुःखानि विमोच्य सूर्य्योऽन्धकारमिवाऽन्यायं निवर्त्य सर्वासु दिक्षु कीर्तिं प्रसारयन्ति तदेवैषां कर्त्तव्यं कर्माऽस्ति॥१२॥

पदार्थः-जो (**सूर्यः**) सूर्य्य के (**न**) तुल्य (**दिवेदिवे**) प्रतिदिन (**हर्यश्वप्रसूताः**) हरणशील किरणों वाले से उत्पन्न (**प्रदिष्टाः**) सूचना से दिखाई गई (**दिशः**) दिशाओं को (**मिनाति**) अलग-अलग करता है (**आत्**) अनन्तर (**यत्**) जो (**अश्वैः**) घोड़ों से (**अध्वनः**) मार्गों को (**सम्**) (**आनट्**) व्याप्त होता तथा

(विमोचनम्) त्याग **(कृणुते)** करता है **(तत्, इत्)** वही **(तु)** तो **(अस्य)** इसका भूषण है, ऐसा जानना चाहिये॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पुरुष अविद्या, दुष्ट संस्कार और दुःखों को त्याग के जैसे सूर्य्य अन्धकार को दूर करता है, वैसे अन्याय को दूर करके सम्पूर्ण दिशाओं में यश को फैलाते हैं, यही इनका कर्त्तव्य कर्म है॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

दिदृ॑क्षन्त उ॒षसो॒ याम॑न्नक्तोर्वि॒वस्व॑त्या॒ महि॑ चि॒त्रमनी॑कम्।
विश्वे॑ जानन्ति महि॒ना यदाग॒दिन्द्र॑स्य॒ कर्म॑ सुकृ॒ता पु॒रूणि॑॥१३॥

दिदृ॑क्षन्ते। उ॒षस॑:। याम॑न्। अ॒क्तो:। वि॒वस्व॑त्या:। महि॑। चि॒त्रम्। अनी॑कम्। विश्वे॑। जा॒न॒न्ति॒। म॒हि॒ना। यत्। आ। अगा॑त्। इन्द्र॑स्य। कर्म॑। सु॒ऽकृ॒ता। पु॒रूणि॑॥१३॥

पदार्थः-(**दिदृक्षन्ते**) द्रष्टुमिच्छन्ति (**उषसः**) प्रभातान् (**यामन्**) यामनि मार्गे (**अक्तोः**) रात्रेः (**विवस्वत्याः**) यः विवस्वति साध्व्यः (**महि**) महत् (**चित्रम्**) अद्भुतम् (**अनीकम्**) सैन्यम् (**विश्वे**) सर्वे (**जानन्ति**) (**महिना**) महिम्ना। अत्र **छान्दसो वर्णलोपो वे**ति न लोपः। (**यत्**) ये (**आ**) समन्तात् (**अगात्**) प्राप्नुयात् (**इन्द्रस्य**) विद्युतः (**कर्म**) कर्माणि (**सुकृता**) सुष्ठुकृतानि (**पुरूणि**) बहूनि॥१३॥

अन्वयः-यद्ये विश्वे मनुष्या विवस्वत्या उषसोऽक्तोर्यामन् दिदृक्षन्ते महिना महि चित्रमनीकं जानन्तीन्द्रस्य पुरूणि सुकृता कर्म दिदृक्षन्ते तान् य आगात् स सुखी स्यात्॥१३॥

भावार्थः-ये परीक्षकाः प्रातरुत्थाय प्रयत्नेन व्यवहारान् साध्नुवन्ति तेऽत्र ज्ञानविशेषा पूज्यन्ते बलं च लभन्ते॥१३॥

पदार्थः-(**यत्**) जो (**विश्वे**) सम्पूर्ण मनुष्य (**विवस्वत्याः**) सूर्य मण्डल के निमित्त व्यवहारवाली (**उषसः**) प्रभात वेलाओं को (**अक्तोः**) रात्रि के (**यामन्**) मार्ग में (**दिदृक्षन्ते**) देखने की इच्छा करते हैं, (**महिना**) महिमा से (**महि**) बड़ी (**चित्रम्**) अद्भुत (**अनीकम्**) सेना को (**जानन्ति**) जानते हैं, (**इन्द्रस्य**) बिजुली के (**पुरूणि**) बहुत (**सुकृता**) उत्तम प्रकार किये गये (**कर्म**) कर्मों को देखने की इच्छा करते हैं, उनको जो (**आ, अगात्**) प्राप्त हो वह सुखी होवे॥१३॥

भावार्थः-जो परीक्षक लोग प्रातःकाल उठ के प्रयत्न से व्यवहारों को सिद्ध करते हैं, वे इस संसार में ज्ञानविशेष से प्रतिष्ठा को प्राप्त और बल से युक्त होते हैं॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

महि॒ ज्योति॒र्निहि॑तं व॒क्षणा॑स्वा॒मा प॒क्वं च॑रति॒ बिभ्र॑ती॒ गौः।
विश्वं॒ स्वाद्म॒ संभृ॑तमु॒स्रिया॑यां॒ यत्सी॒मिन्द्रो॒ अद॑धा॒द्भोज॑नाय॥ १४॥

महि॑। ज्योति॑:। निऽहि॑तम्। व॒क्षणा॑सु। आ॒मा। प॒क्वम्। च॒र॒ति॒। बिभ्र॑ती। गौः। विश्व॑म्। स्वाद्म॑। सम्ऽभृ॑तम्। उ॒स्रिया॑याम्। यत्। सी॒म्। इन्द्रः॑। अद॑धात्। भोज॑नाय॥ १४॥

पदार्थः-(**महि**) महत् (**ज्योतिः**) तेजः (**निहितम्**) स्थितम् (**वक्षणासु**) वहमानासु नदीषु। **वक्षणा इति नदीनामसु पठितम्।** (निघं०१.१३) (**आमा**) आमानि (**पक्वम्**) (**चरति**) गच्छति (**बिभ्रती**) धरन्ती (**गौः**) या गच्छति सा (**विश्वम्**) सर्वम् (**स्वाद्म**) अतिस्वादुमत् (**सम्भृतम्**) सम्यग्धृतं पोषितं वा (**उस्रियायाम्**) पृथिव्याम् (**यत्**) या (**सीम्**) सर्वतः (**इन्द्रः**) विद्युत् (**अदधात्**) दधाति (**भोजनाय**) पालनायाऽभ्यवहरणाय वा॥ १४॥

अन्वयः-यद्या गौर्वक्षणास्वामा पक्वं बिभ्रती चरति यदत्र महि निहितं ज्योतिरुस्रियायां विश्वं स्वाद्म सम्भृतं चरति स इन्द्रो भोजनाय सर्वं सीमदधादिति सर्वैर्वेद्यम्॥ १४॥

भावार्थः-या विद्युद्भूम्यब्वाय्वन्तरिक्षेषु तद्विकारेषु पदार्थेषु च व्याप्य सर्वं धृत्वा पालयति तस्या विद्यां सर्वे स्वीकुर्वन्तु॥ १४॥

पदार्थः-(**यत्**) जो (**गौः**) चलनेवाली (**वक्षणासु**) बहती हुई नदियों में (**आमा**) कच्चे वा (**पक्वम्**) पके हुए को (**बिभ्रती**) धारण करती हुई (**चरति**) चलती है, जो इस संसार में (**महि**) बड़ा (**निहितम्**) स्थित (**ज्योतिः**) तेज वा (**उस्रियायाम्**) पृथिवी में (**विश्वम्**) सम्पूर्ण (**स्वाद्म**) अति स्वादुवाले (**सम्भृतम्**) उत्तम प्रकार, धारण वा पोषण किये हुए पदार्थ को प्राप्त होती है, वह (**इन्द्रः**) बिजुली (**भोजनाय**) पालन वा भोजन के लिये सबको (**सीम्**) सब ओर से (**अदधात्**) धारण करती है, यह सब जनों को जानना चाहिये॥ १४॥

भावार्थः-जो बिजुली भूमि, जल, वायु और अन्तरिक्ष तथा उनके विकारों और पदार्थों में व्यापक हो और सबको धारण कर पालन करती है, उसकी विद्या को सब लोग धारण वा स्वीकार करें॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्र॒ दृह्य॑ यामको॒शा अ॑भूवन् य॒ज्ञाय॑ शिक्ष गृण॒ते सखि॑भ्यः।
दु॒र्मा॒यवो॑ दु॒रेवो॒ मर्त्या॑सो निष॒ङ्गिणो॑ रि॒पवो॒ हन्त्वा॑सः॥ १५॥ ३॥

इन्द्र। दृह्य। यामऽकोशाः। अभूवन्। यज्ञाय। शिक्ष। गृणते। सखिऽभ्यः। दुःऽमायवः। दुःऽएवाः। मर्त्यासः। निषङ्गिणः। रिपवः। हन्त्वासः॥ १५॥

पदार्थः–(**इन्द्र**) विद्यैश्वर्यप्रद (**दृह्य**) वर्द्धस्व। अत्र विकरणव्यत्ययेन श्यन्। (**यामकोशाः**) यान्ति येषु ते यामा मार्गास्तेषां कोशा यामकोशाः (**अभूवन्**) भवन्ति (**यज्ञाय**) सङ्गतिविज्ञानाय (**शिक्ष**) विद्यां धेहि (**गृणते**) स्तुवते (**सखिभ्यः**) मित्रेभ्यः (**दुर्मायवः**) दुष्टो मायुः प्रक्षेपो येषान्ते (**दुरेवाः**) ये दुष्टं यन्ति ते (**मर्त्यासः**) मनुष्याः (**निषङ्गिणः**) बहवोः निषङ्गाः शस्त्रविशेषा विद्यन्ते येषान्ते (**रिपवः**) शत्रवः (**हन्त्वासः**) हन्तुं योग्याः॥ १५॥

अन्वयः–हे इन्द्र! ये यामकोशा अभूवन् तेभ्यः सखिभ्यो यज्ञाय गृणते च त्वं शिक्ष ये दुर्मायवो दुरेवा हन्त्वासो निषङ्गिणो रिपवो मर्त्यासः स्युस्तान् हत्वा दृह्य॥ १५॥

भावार्थः–मनुष्यैः सर्वदा सर्वथा श्रेष्ठानां रक्षणं विद्यासुशिक्षादानं दुष्टाचाराणां हननं च कृत्वा सदैव वर्द्धनीयम्॥ १५॥

पदार्थः–हे (**इन्द्र**) विद्या और ऐश्वर्य के दाता! जो (**यामकोशाः**) मार्गों के रोकनेवाले (**अभूवन्**) होते हैं, उन (**सखिभ्यः**) मित्रों तथा (**यज्ञाय**) सङ्गतिजन्य विशेष ज्ञान और (**गृणते**) स्तुति करनेवाले के अर्थ आप (**शिक्ष**) विद्या दान कीजिये, जो (**दुर्मायवः**) बुरे प्रकार फेंकने वा (**दुरेवाः**) दुष्ट कर्म को पहुँचानेवाले (**हन्त्वासः**) मारने के योग्य (**निषङ्गिणः**) बहुत विशेष शस्त्रोंवाले (**रिपवः**) शत्रु (**मर्त्यासः**) मनुष्य हों, उनका नाश करके (**दृह्य**) बढ़िये॥ १५॥

भावार्थः–मनुष्यों को चाहिये कि सर्वदा सब प्रकार श्रेष्ठ पुरुषों की रक्षा, विद्या और शिक्षा का दान और दुष्ट आचरणवालों का नाश करके सदैव बढ़ें॥ १५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

सं घोषः शृण्वेऽवमैरमित्रैर्जहि न्येष्वशनिं तपिष्ठाम्।
वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन् रन्धयस्व॥ १६॥

सम्। घोषः। शृण्वे। अवमैः। अमित्रैः। जहि। नि। एषु। अशनिम्। तपिष्ठाम्। वृश्च। ईम्। अधस्तात्। वि। रुज। सहस्व। जहि। रक्षः। मघऽवन्। रन्धयस्व॥ १६॥

पदार्थः–(**सम्**) सम्यक् (**घोषः**) वाणीः। **घोष इति वाङ्नामसु पठितम्।** (निघं०१.११) (**शृण्वे**) (**अवमैः**) अधमैः (**अमित्रैः**) शत्रुभिः (**जहि**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नि**) (**एषु**) (**अशनिम्**) वज्रम् (**तपिष्ठाम्**) अतिशयेन तप्ताम् (**वृश्च**) छिन्धि (**ईम्**) सततम् (**अधस्तात्**) अधो निपात्य (**वि**) (**रुज**)

रुग्णान् कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(सहस्व)** **(जहि)** **(रक्षः)** दुष्टस्वभावं प्राणिनम् **(मघवन्)** बहुधनयुक्त **(रन्धयस्व)** ताडयस्व॥१६॥

अन्वयः-हे मघवन्नहमवमैरमित्रः यः घोषस्तं सं शृण्वे ताँस्त्वं जहि। एषु तपिष्ठामशनिं प्रक्षिप्यैतान् निवृश्च। एतानधस्तात्कृत्वें वि रुज दुःखं सहस्व रक्षो जहि पापिनो रन्धयस्व॥१६॥

भावार्थः-हे वीरा! या वाणी शत्रुभिः क्रियेत तां श्रुत्वाऽभीत्वैतेषामुपरि शस्त्राणि प्रक्षिप्य विच्छिन्नान् कुरुत अनेनैश्वर्यवन्तो भवत॥१६॥

पदार्थः-हे **(मघवन्)** बहुत धनों से युक्त मैं **(अवमैः)** नीच **(अमित्रैः)** शत्रुओं के साथ जो **(घोषः)** घोर वाणी उसको **(सम्)** बहुत **(शृण्वे)** सुनता हूँ, इससे इनको आप **(जहि)** मारिये और **(एषु)** इन शत्रुओं में **(तपिष्ठाम्)** अतिशय तपते हुए **(अशनिम्)** वज्र को फेंक के इनको **(नि, वृश्च)** उत्तम प्रकार विनाश कीजिये और इनको **(अधस्तात्)** नीचे गिराय के **(ईम्)** निरन्तर **(वि)** **(रुज)** रोगग्रस्त कीजिये और दुःख को **(सहस्व)** सहिये **(रक्षः)** दुष्ट स्वभाववाले प्राणी का **(जहि)** नाश कीजिये और पापी लोगों को **(रन्धयस्व)** ताड़िये॥१६॥

भावार्थः-हे वीर पुरुषो! जो वाणी शत्रुओं से उच्चारण की जाये, उसको सुन उनके सम्मुख जा और उनके ऊपर शस्त्रों का प्रहार करके उन्हें छिन्न-भिन्न करो, इससे ऐश्वर्यवाले होओ॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

उद्वृ॒ह रक्षः॑ स॒हमू॑लमिन्द्र वृ॒श्चा मध्यं॒ प्रत्यग्रं॑ शृणीहि।
आ कीव॑तः सल॒लूकं॑ चकर्थ ब्रह्मद्विषे तपु॑षिं हे॒तिम॑स्य॥१७॥

उत्। वृ॒ह॒। रक्षः॑। स॒हऽमू॑लम्। इ॒न्द्र॒। वृ॒श्च॒। मध्य॑म्। प्रति॑। अग्र॑म्। शृ॒णी॒हि॒। आ। कीव॑तः। स॒ल॒लूक॑म्। च॒क॒र्थ॒। ब्र॒ह्मऽद्विषे॑। तपु॑षिम्। हे॒तिम्। अ॒स्य॒॥१७॥

पदार्थः-**(उत्)** उत्कृष्टे **(वृह)** वर्धस्व **(रक्षः)** दुष्टाचारम् **(सहमूलम्)** मूलेन सह वर्तमानम् **(इन्द्र)** दुष्टानां विदारक **(वृश्च)** छिन्धि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मध्यम्)** मध्ये भवम् **(प्रति)** **(अग्रम्)** अग्रभागम् **(शृणीहि)** हिन्धि **(आ)** **(कीवतः)** कियतः। अत्र वर्णव्यत्ययेन यस्य स्थाने वः। **(सललूकम्)** सम्यक् लुब्धम् **(चकर्थ)** कृन्त **(ब्रह्मद्विषे)** यो ब्रह्म परमात्मानं वेदं वा द्वेष्टि तस्मै **(तपुषिम्)** प्रतापयुक्तम् **(हेतिम्)** वज्रम् **(अस्य)** एतस्योपरि॥१७॥

अन्वयः-हे इन्द्र! त्वमुद्वृह सहमूलं रक्षो वृश्चास्योपरि तपुषिं हेतिं प्रक्षिप्यास्य मध्यमग्रं च प्रति शृणीहि ब्रह्मद्विषे वर्त्तमानं सललूकं कीवतश्चाऽऽचकर्थ॥१७॥

भावार्थः–मनुष्यैः कदाचिदपि धार्मिकाणामुपरि शस्त्रप्रहारो नैव कार्यो न च शस्त्रैर्हननेन विना दुष्टास्त्यक्तव्याः। एवं कृते सति सर्वतो सुखस्य वृद्धिः स्यात्॥१७॥

पदार्थः–हे **(इन्द्र)** दुष्ट पुरुषों के नाशकर्त्ता! आप **(उत्)** उत्तमता के साथ **(वृह)** सुख वृद्धि करो **(सहमूलम्)** जड़सहित **(रक्षः)** बुरे आचार को **(वृश्च)** तोड़ो **(अस्य)** इसके ऊपर **(तपुषिम्)** प्रतापयुक्त **(हेतिम्)** वज्र को फेंक के इसके **(मध्यम्)** मध्य में उत्पन्न हुए और **(अग्रम्)** अग्रभाग के **(प्रति)** प्रति **(शृणीहि)** नाश करो तथा **(ब्रह्मद्विषे)** ब्रह्म परमात्मा वा वेद के निन्दक के लिये वर्त्तमान **(सललूकम्)** अच्छी तरह लोभी **(कीवतः)** कितनों को **(आ)** **(चकर्थ)** सब प्रकार काटो॥१७॥

भावार्थः–मनुष्यों को चाहिये कि कभी भी धार्मिक पुरुषों के ऊपर शस्त्रों का प्रहार न करें और दुष्ट पुरुषों को शस्त्रों से मारे विना न छोड़ें, ऐसा करने से सब प्रकार सुख की वृद्धि होवे॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स्वस्तये वाजिभिश्च प्रणेतः संयन्महीरिष आसत्सि पूर्वीः।
रायो वन्तारो बृहतः स्यामाऽस्मे अस्तु भग इन्द्र प्रजावान्॥१८॥

स्वस्तये। वाजिऽभिः। च। प्रनेतरिति प्रऽनेतः। सम्। यत्। महीः। इषः। आऽसत्सि। पूर्वीः। रायः। वन्तारः। बृहतः। स्याम। अस्मे इति। अस्तु। भगः। इन्द्र। प्रजाऽवान्॥१८॥

पदार्थः–(**स्वस्तये**) सुखाय **(वाजिभिः)** तुरङ्गैरिव वेगवद्भिरग्न्यादिभिः **(च)** **(प्रणेतः)** यः सत्याऽसत्ये प्रणयति तत्सम्बुद्धौ **(सम्)** **(यत्)** यः **(महीः)** महतीः **(इषः)** इच्छाः **(आसत्सि)** समन्तात्सीदसि। अत्र **बहुलं छन्दसी**ति शपो लुक्। **(पूर्वीः)** पूर्वैः प्राप्ताः **(रायः)** धनानि **(वन्तारः)** विभाजकाः **(बृहतः)** महतः **(स्याम)** भवेम **(अस्मे)** अस्माकम् **(अस्तु)** भवतु **(भगः)** ऐश्वर्य्यम् **(इन्द्र)** परमैश्वर्य्ययुक्त **(प्रजावान्)** बह्व्यः प्रजा विद्यन्ते यस्मिन् सः॥१८॥

अन्वयः–हे प्रणेतरिन्द्र! यद्यस्त्वं वाजिभिरन्यैः साधनैश्च पूर्वीर्महीरिष समासत्सि ये बृहतो वन्तारो रायः सन्ति तेऽस्मे स्वस्तये सन्तु। प्रजावान् भगश्च तानि प्राप्य वयं सुखिनः स्याम॥१८॥

भावार्थः–ये मनुष्याः सुखाय बहूनि साधनानि समादधति ते ऐश्वर्यं प्राप्य मोदन्ते॥१८॥

पदार्थः–हे **(प्रणेतः)** सत्य और असत्य के निश्चयकारक **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त! **(यत्)** जो आप **(वाजिभिः)** घोड़ों के सदृश वेगयुक्त अग्नि आदि पदार्थों तथा और साधनों से **(पूर्वीः)** पूर्व जनों से प्राप्त **(महीः)** बड़ी **(इषः)** इच्छाओं से **(सम्)** **(आसत्सि)** सब प्रकार वर्त्तमान हैं **[**जो**]** **(बृहतः)** बड़े **(वन्तारः)** विभाग करनेवाले **(रायः)** धन हैं वे **(अस्मे)** हम लोगों के **(स्वस्तये)** सुख के लिये **(अस्तु)** होवें **(प्रजावान्)** बहुत प्रजाओं से युक्त **(भगः)** ऐश्वर्य और उनको प्राप्त होकर हम लोग सुखी

(स्याम) होवें॥१८॥

भावार्थः-जो मनुष्य लोग सुख के लिये बहुत से साधनों को एकत्र करते, वे ऐश्वर्य को प्राप्त होके आनन्द को प्राप्त होते हैं॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके।
ऊर्वइव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम्॥१९॥

आ। नः। भर। भगम्। इन्द्र। द्युऽमन्तम्। नि। ते। देष्णस्य। धीमहि। प्रऽरेके। ऊर्वःऽइव। पप्रथे। कामः। अस्मे इति। तम्। आ। पृण। वसुऽपते। वसूनाम्॥१९॥

पदार्थः-**(आ)** समन्तात् **(नः)** अस्मभ्यम् **(भर)** धर **(भगम्)** सेवनीयमैश्वर्य्यम् **(इन्द्र)** सुखप्रदातः **(द्युमन्तम्)** प्रशस्ता द्यौः प्रकाशो विद्यते यस्मिँस्तम् **(नि)** **(ते)** तव **(देष्णस्य)** दातुः **(धीमहि)** धरेम **(प्ररेके)** प्रकृष्टा रेका शङ्का यस्मिँस्तस्मिन् व्यवहारे **(ऊर्वइव)** प्राप्तेन्धनोऽग्निरिव **(पप्रथे)** प्रथताम् **(कामः)** इच्छा **(अस्मे)** अस्मभ्यम् **(तम्)** **(आ)** **(पृण)** पूर्ण कुरु **(वसुपते)** धनानां पालक **(वसूनाम्)** धनानाम्॥१९॥

अन्वयः-हे वसूनां वसुपत इन्द्र! यस्य देष्णस्य ते प्ररेके वयं निधीमहि स त्वं नो द्युमन्तं भगमाभर। योऽस्मे काम ऊर्वइव पप्रथे तमापृण॥१९॥

भावार्थः-स एव मनुष्य आप्तोऽस्ति यस्य सर्वस्वं परोपकाराय भवति नात्र शङ्कास्ति॥१९॥

पदार्थः-हे **(वसूनाम्)** जनों के **(वसुपते)** धनपालक **(इन्द्र)** सुख के दाता! जिस **(देष्णस्य)** देनेवाले **(ते)** आपके **(प्ररेके)** उत्तम शङ्कायुक्त व्यवहार में हम लोग **(नि)** **(धीमहि)** धारण करें वह आप **(नः)** हम लोगों के लिये **(द्युमन्तम्)** उत्तम प्रकाशयुक्त **(भगम्)** सेवन करने योग्य ऐश्वर्य्य को **(आ)** सब प्रकार **(भर)** धारण करो और जो **(अस्मे)** हम लोगों के लिये **(कामः)** इच्छा **(ऊर्वइव)** इन्धन युक्त अग्नि के सदृश **(पप्रथे)** वृद्धि को प्राप्त होवे **(तम्)** उसको **(आ)** **(पृण)** पूर्ण करो॥१९॥

भावार्थः-वही मनुष्य यथार्थवक्ता है जिसका सर्वस्व दूसरे पुरुषादि के उपकार के लिये होता है, इस विषय में कोई शङ्का नहीं है॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च।

स्व॒र्यवो॑ म॒तिभि॒स्तुभ्यं॒ विप्रा॒ इन्द्रा॑य॒ वाह॑: कुशि॒कासो॑ अक्रन्॥ २०॥

इ॒मम्। काम॑म्। म॒न्द॒य॒। गोभि॑:। अश्वै॑:। च॒न्द्र॒ऽव॑ता। राध॑सा। प॒प्रथ॑:। च॒। स्व॒:ऽयव॑:। म॒तिऽभि॑:। तुभ्य॑म्। विप्रा॑:। इन्द्रा॑य। वाह॑:। कु॒शि॒कास॑:। अ॒क्र॒न्॥ २०॥

पदार्थ:-(**इमम्**) प्रत्यक्षतया वर्त्तमानम् (**कामम्**) अभिलाषाम् (**मन्दय**) हर्षय। अत्र **संहितायामि**ति दीर्घः। (**गोभि:**) धेनुभि: (**अश्वै:**) तुरङ्गै: (**चन्द्रवता**) बहूनि चन्द्राणि सुवर्णादीनि धनानि विद्यन्ते यस्मिंस्तेन (**राधसा**) धनेन (**पप्रथ:**) प्रख्यापय (**च**) (**स्वर्य्यव:**) य आत्मन: स्व: सुखं कामयन्ते ते (**मतिभि:**) मननशीलैर्मनुष्यै: सह (**तुभ्यम्**) (**विप्रा:**) मेधाविन: (**इन्द्राय**) ऐश्वर्य्याय (**वाह:**) ये वहन्ति ते (**कुशिकास:**) शब्दायमाना: (**अक्रन्**) कुर्युः॥ २०॥

अन्वय:-हे विद्वन्स्त्वं गोभिरश्वैश्चन्द्रवता राधसा च पप्रथः। इमं कामं पूरय यथा स्वर्यवो वाहः कुशिकासो विप्रा मतिभिः सह तुभ्यमिन्द्रायैनं काममक्रंस्तांस्त्वं मन्दय॥ २०॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये युष्मानभिलाषापूरकत्वेनानन्दयेयुस्तान् भवन्तोऽप्यानन्दयन्तु॥ २०॥

पदार्थ:-हे विद्वान् पुरुष! आप (**गोभि:**) गौओं (**अश्वै:**) घोड़ों (**च**) और (**चन्द्रवता**) बहुत सुवर्ण आदि धन जिसमें हैं ऐसे (**राधसा**) धन से (**पप्रथ:**) प्रसिद्ध करो (**इमम्**) प्रत्यक्ष भाव से वर्त्तमान इस (**कामम्**) अभिलाषा को पूर्ण करो, जैसे (**स्वर्य्यव:**) अपने सुख की कामना करनेवाले (**वाह:**) स्तुतियों के धारणकर्त्ता (**कुशिकास:**) शब्द करते हुए (**विप्रा:**) बुद्धिमान् लोग (**मतिभि:**) विचारशील मनुष्यों के साथ (**तुभ्यम्**) आपके तथा (**इन्द्राय**) ऐश्वर्य्य के लिये उक्त अभिलाषा को (**अक्रन्**) करें उनको आप (**मन्दय**) आनन्दित कीजिये॥ २०॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो लोग आप लोगों को अभिलाषा पूर्ण करने में आनन्द देवें, उनको आप लोग भी आनन्द देवें॥ २०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

आ नो॑ गो॒त्रा द॑र्दृहि गोपते॒ गा: सम॒स्मभ्यं॑ स॒नयो॑ यन्तु॒ वाजा॑:।
दि॒वक्षा॑ असि वृषभ स॒त्यशु॑ष्मो॒ऽस्मभ्यं॒ सु म॑घवन् बोधि गो॒दा:॥ २१॥

आ। न॒:। गो॒त्रा। द॒र्दृ॒हि॒। गो॒ऽप॒ते॒। गा:। सम्। अ॒स्मभ्य॑म्। स॒नय॑:। य॒न्तु॒। वाजा॑:। दि॒वक्षा॑:। अ॒सि॒। वृ॒ष॒भ॒। स॒त्यऽशु॑ष्म:। अ॒स्मभ्य॑म्। सु। म॒घ॒ऽव॒न्। बो॒धि॒। गो॒ऽदा:॥ २१॥

पदार्थ:-(**आ**) समन्तात् (**न:**) अस्माकम् (**गोत्रा**) गोत्राणि कुलानि (**दर्दृहि**) अत्यन्तं वर्धय (**गोपते**) भूपते (**गा:**) पृथिवी: (**सम्**) (**अस्मभ्यम्**) (**सनय:**) सम्भक्तय: (**यन्तु**) प्राप्नुवन्तु (**वाजा:**)

विज्ञानान्नादिप्रदा व्यवहाराः **(दिवक्षाः)** ये दिवं विज्ञानप्रकाशादिकमक्षन्ति व्याप्नुवन्ति **(असि)** **(वृषभ)** बलिष्ठ **(सत्यशुष्मः)** सत्यबलः **(अस्मभ्यम्)** **(सु)** **(मघवन्)** बहुपूजितधनयुक्त **(बोधि)** **(गोदाः)** यो गा वाण्यादीन् ददाति सः॥ २१॥

अन्वयः-हे वृषभ मघवन्! यतस्त्वं गोदाः सत्यशुष्मोऽसि तस्मादस्मभ्यं सुबोधि। हे गोपते! यथाऽस्मभ्यं सनयो दिवक्षा वाजाः संयन्तु तथैव त्वं नो गोत्रा गाश्चा दर्दृहि॥ २१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि सत्याचारसुशीला विद्वांसो मनुष्याणामुपदेष्टारः स्युस्तर्हि तेषां किमपि सुखमप्राप्तमरक्षणीयं न स्यात्॥ २१॥

पदार्थः-हे **(वृषभ)** बलवान् **(मघवन्)** बहुत श्रेष्ठ धन से युक्त! जिससे आप **(गोदाः)** वाणी आदि के दाता **(सत्यशुष्मः)** सत्य बलवाले **(असि)** हैं इससे **(अस्मभ्यम्)** हम लोगों के लिये **(सु)** **(बोधि)** आनन्ददायक हूजिये, हे **(गोपते)** भूमि के स्वामी! जैसे **(अस्मभ्यम्)** हम लोगों के लिये **(सनयः)** संविभाग करने के योग्य **(दिवक्षाः)** विज्ञानरूप प्रकाश आदि से पूरित **(वाजाः)** विज्ञान और अन्न आदि के प्राप्त करानेवाले व्यवहार **(सम्)** **(यन्तु)** प्राप्त होवें, वैसे ही आप **(नः)** हम लोगों के **(गोत्रा)** कुलों और **(गाः)** पृथिवियों को **(आ)** सब प्रकार **(दर्दृहि)** अत्यन्त वृद्धि कीजिये॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सत्य आचरण करनेवाले विद्वान् लोग मनुष्यों के उपदेशकारक होवें तो उन जनों का कुछ भी सुख अप्राप्त और अरक्ष्य न होवे॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ २२॥ ४॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥ २२॥

पदार्थः-(**शुनम्**) ज्ञानवृद्धम् (**हुवेम**) प्रशंसेम (**मघवानम्**) बहुधनवन्तम् (**इन्द्रम्**) दातारम् (**अस्मिन्**) (**भरे**) बिभ्रति धनानि यस्मिंस्तस्मिन् (**नृतमम्**) अतिशयेन नृषूत्तमम् (**वाजसातौ**) वाजान् धनाद्यान् पदार्थान् सनन्ति विभजन्ति यस्मिंस्तस्मिन् संग्रामे। **वाजसाताविति संग्रामनामसु पठितम्।** (निघं०२.१७) (**शृण्वन्तम्**) न्यायप्रदानार्थमर्थिप्रत्यर्थिवचनश्रोतारम् (**उग्रम्**) तेजस्विस्वभावम् (**ऊतये**) रक्षणाद्याय (**समत्सु**) संग्रामेषु (**घ्नन्तम्**) हिंसन्तम् (**वृत्राणि**) आवरका घना इव शत्रुसैन्यानि (**संजितम्**) सम्यग्जयशीलम् (**धनानाम्**) श्रियाम्॥ २२॥

अन्वयः-हे मनुष्या! यमस्मिन् भरे वाजसातौ शुनं मघवानं नृतमं शृण्वन्तमुग्रं समत्सु वृत्राणि घ्नन्तं धनानां संजितमिन्द्रं वयं हुवेम तं यूयमूतय आह्वयत॥ २२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं शरीरात्मबलाभ्यां प्रवृद्धमसंख्यधनप्रदं नरोत्तमं शत्रूणां विजेतारं धर्मिष्ठे साधुं दुष्टेष्वत्युग्रं पालकं स्वामिनं स्वोपरि मत्वा सततं सुखयतेति॥ २२॥

अत्रेन्द्रविद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिंशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जिसको (**अस्मिन्**) इस (**भरे**) संग्राम में कि जिसमें धनों को धारण करते और (**वाजसातौ**) धन आदि पदार्थों का विभाग करते हैं (**शुनम्**) ज्ञान से वृद्ध (**मघवानम्**) बहुत धन से युक्त (**नृतमम्**) अत्यन्त ही मनुष्यों में उत्तम (**शृण्वन्तम्**) सम्पूर्ण अर्थी अर्थात् मुद्दई और प्रत्यर्थी अर्थात् मुद्दाले के न्याय करने के लिये वचनों के श्रोता (**उग्रम्**) तेजःस्वभाववाले पुरुष को (**समत्सु**) संग्रामों में (**वृत्राणि**) घेरनेवाली मेघों के सदृश शत्रुओं की सेनाओं के (**घ्नन्तम्**) नाशकर्त्ता और (**धनानाम्**) लक्ष्मियों के (**संजितम्**) उत्तम प्रकार जीतने वा (**इन्द्रम्**) देनेवाले की हम लोग (**हुवेम**) प्रशंसा करें, उसका आप लोग भी (**ऊतये**) रक्षा आदि के लिये आह्वान करें॥ २२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग शरीर और आत्मबल से बड़े असंख्य धन के देने और मनुष्यों में उत्तम शत्रुओं के जीतनेवाले धर्मिष्ठ पुरुष में नम्र स्वभाव और दुष्ट पुरुषों में तीव्र स्वभावयुक्त पालनकर्त्ता स्वामी को अपने ऊपर नियत करके निरन्तर सुख को प्राप्त हूजिये॥ २२॥

इस सूक्त में इन्द्र और विद्वान् के कृत्य का वर्णन होने से इस सूक्त में कहे अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह तीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ द्वाविंशत्यृचस्यैकाऽधिकत्रिंशत्तमस्य सूक्तस्य विश्वामित्रः कुशिको वा ऋषिः। इन्द्रो देवता। १, १४, १६ विराट् पङ्क्तिः। ३, ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ५, ९, १५, १७-२० निचृत्त्रिष्टुप्। ४, ७, ८, १०, १२, २१, २२ त्रिष्टुप्। ११, १३ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ वह्निविषयमाह॥

अब तृतीय मण्डल में बाईस ऋचावाले ३१ वें सूक्त का प्रारम्भ है। उसके पहिले मन्त्र में अग्नि के गुणों का विषय कहा है॥

शासद्वह्निर्दुहितुर्नप्त्यं॑ गाद् विद्वाँ ऋतस्य दीधितिं सपर्यन्।
पिता यत्र॑ दुहितुः सेक॑मृञ्जन्त्सं शग्म्ये॑न मन॑सा दध॒न्वे॥ १॥

शासत्। वह्निः। दुहितुः। नप्त्यम्। गात्। विद्वान्। ऋतस्य। दीधितिम्। सपर्यन्। पिता। यत्र। दुहितुः। सेकम्। ऋञ्जन्। सम्। शग्म्येन। मनसा। दधन्वे॥ १॥

पदार्थः-(**शासत्**) शिष्यात् (**वह्निः**) वोढा (**दुहितुः**) कन्यायाः (**नप्त्यम्**) नप्तरि भवम्। अत्र **छान्दसो वर्णलोपो वे**ति रलोपः। (**गात्**) प्राप्नुयात् (**विद्वान्**) यो वेदितव्यं वेत्ति (**ऋतस्य**) सत्यस्य (**दीधितिम्**) धर्तारम् (**सपर्यन्**) सेवमानः (**पिता**) जनकः (**यत्र**) यस्मिन् व्यवहारे (**दुहितुः**) दूरे हितायाः कन्यायाः (**सेकम्**) सेचनम् (**ऋञ्जन्**) संसाध्नुवन् (**सम्**) (**शग्म्येन**) शग्मेषु सुखेषु भवेन। **शग्ममिति सुखनामसु पठितम्।** (निघं०३.६) (**मनसा**) अन्तःकरणेन (**दधन्वे**) प्रीणाति॥१॥

अन्वयः-हे विद्वन्! यत्र पिता वह्निर्दुहितुः सेकमृञ्जन् गात्तत्र विद्वानृतस्य दीधितिं सपर्यन् दुहितुर्नप्त्यं शासदतः शग्म्येन मनसा सं दधन्वे॥१॥

भावार्थः-हे मनुष्या! यथा पितुः सकाशात् कन्योत्पद्यते तथैव सूर्य्यादुषा उत्पद्यते यथा पतिर्भार्यायां गर्भं दधाति तथैव कन्यावद्वर्त्तमानायामुषसि सूर्यः किरणाख्यं वीर्य्यं दधाति तेन दिवसरूपमपत्यमुत्पद्यते॥१॥

पदार्थः-हे विद्वान् पुरुष! (**यत्र**) जिस व्यवहार में (**पिता**) उत्पन्नकर्त्ता (**वह्निः**) वाहन करने अर्थात् व्यवहार में चलानेवाला (**दुहितुः**) कन्या के (**सेकम्**) सेचन को (**ऋञ्जन्**) सिद्ध करता हुआ (**गात्**) प्राप्त होवे, उस व्यवहार में (**विद्वान्**) जानने योग्य व्यवहार का ज्ञाता (**ऋतस्य**) सत्य के (**दीधितिम्**) धारणकर्त्ता की (**सपर्यन्**) सेवा करता हुआ (**दुहितुः**) दूर में हितकारिणी कन्या के (**नप्त्यम्**) नाती में उत्पन्न हुए को (**शासत्**) शिक्षा देवे, इससे (**शग्म्येन**) सुखों में वर्त्तमान (**मनसा**) अन्तःकरण से (**सम्, दधन्वे**) सम्यक् प्रसन्न होता है॥१॥

भावार्थः-हे मनुष्यो! जैसे पिता के समीप से कन्या उत्पन्न होती है, वैसे ही सूर्य्य से प्रातःकाल की वेला प्रकट होती है। जैसे पति अपनी स्त्री में गर्भ को धारण करता है, वैसे कन्या के सदृश वर्त्तमान

प्रात:काल की वेला में सूर्य्य किरणरूप वीर्य्य को धारण करता है, उससे दिवसरूप पुत्र उत्पन्न होता है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानम्।
यदी मातरो जनयन्त वह्निमन्य: कर्ता सुकृतोरन्य ऋन्धन्॥२॥

न। जामये। तान्वः। रिक्थम्। अरैक्। चकार। गर्भम्। सनितुः। निऽधानम्। यदि। मातरः। जनयन्त। वह्निम्। अन्यः। कर्ता। सुऽकृतोः। अन्यः। ऋन्धन्॥२॥

पदार्थः-(**न**) (**जामये**) जामात्रे (**तान्वः**) तन्वः। अत्रा**न्येषामपी**त्याद्यचो दीर्घः। (**रिक्थम्**) धनम्। **रिक्थमिति धननामसु पठितम्।** (निघं०२.१०) (**आरैक्**) ऋणक्ति (**चकार**) (**गर्भम्**) (**सनितुः**) विभाजकस्य (**निधानम्**) नितरां दधाति यस्मिँस्तम् (**यदि**)। अत्र **निपातस्य चे**ति दीर्घः। (**मातरः**) मान्यस्य कर्त्र्यः (**जनयन्त**) जनयन्ति (**वह्निम्**) प्रापकम् (**अन्यः**) (**कर्त्ता**) (**सुकृतोः**) यौ शोभनं कुरुतस्तयोः (**अन्यः**) (**ऋन्धन्**) साध्नुवन्॥२॥

अन्वयः-हे मनुष्या! यो जामये तान्वो रिक्थं नारैक् सनितुर्निधानं गर्भं चकार अन्यो वह्निमिव यद्यन्य ऋन्धन्त्सुकृतोः कर्त्ता भवेत्तं मातरो जनयन्त॥२॥

भावार्थः-यथा माताऽपत्यानि जनयित्वा वर्धयति तथैव वह्निं जनयित्वा वर्धयेत् तथैव जायापत्यानि वर्धयेत्॥२॥

पदार्थः-हे मनुष्यो! जो (**जामये**) जामाता के लिये (**तान्वः**) सूक्ष्म (**रिक्थम्**) धन को (**न**) नहीं (**आरैक्**) देता जिसने (**सनितुः**) विभागकर्त्ता के (**निधानम्**) निरन्तर धारण करता है, उस (**गर्भम्**) गर्भ को (**चकार**) किया (**अन्यः**) अन्य जन (**वह्निम्**) पहुँचानेवाले को जैसे वैसे (**यदि**) जो (**अन्यः**) अन्य (**ऋन्धन्**) सिद्ध करता हुआ (**सुकृतोः**) उत्तम कर्मकारियों का (**कर्त्ता**) कर्त्ता पुरुष है, उसको (**मातरः**) आदर की करनेवाली (**जनयन्त**) उत्पन्न करती है॥२॥

भावार्थः-जैसे माता सन्तानों को उत्पन्न कर उनकी वृद्धि करती है, वैसे ही अग्नि को उत्पन्न करके उसकी वृद्धि करे और वैसे ही प्रत्येक स्त्री सन्तानों की वृद्धि करे॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अग्निर्जज्ञे जुह्वा३रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे।
महान् गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः॥३॥

अग्निः। जज्ञे। जुह्वा। रेजमानः। महः। पुत्रान्। अरुषस्य। प्रऽयक्षे। महान्। गर्भः। महि। आ। जातम्। एषाम्। मही। प्रऽवृत्। हरिऽअश्वस्य। यज्ञैः॥३॥

पदार्थः-(**अग्निः**) (**जज्ञे**) जायते (**जुह्वा**) साधनोपसाधनयुक्तया क्रियया (**रेजमानः**) कम्पमानः (**महः**) महतः (**पुत्रान्**) सन्तानान् (**अरुषस्य**) अहिंसकस्य (**प्रयक्षे**) प्रकर्षेण यष्टुं सङ्गन्तुम् (**महान्**) महागुणविशिष्टः (**गर्भः**) स्तोतुमर्हः (**महि**) महान्तम् (**आ**) समन्तात् (**जातम्**) (**एषाम्**) (**मही**) महती वाक् (**प्रवृत्**) यः प्रवर्त्तते सः (**हर्यश्वस्य**) हरयो हरणशीला अश्वा यस्य (**यज्ञैः**) सङ्गतैः कर्मभिः॥३॥

अन्वयः-हे मनुष्या! यथेन्धनेन जुह्वाऽग्निर्जज्ञे तथा रेजमानो महान् गर्भो जायते। अरुषस्य महः पुत्रान् प्रयक्षे जज्ञे प्रवृत्सन् हर्यश्वस्य यज्ञैर्महीर्जज्ञ एषां मह्या जातं यूयं विजानीत॥३॥

भावार्थः-यथा शमीगर्भाद्वह्निः प्रादुर्भवन् महान्ति कार्य्याणि करोति तथैव सत्पुत्राः सर्वाण्युत्तमानि कर्माणि कुर्वन्ति तस्माद् ब्रह्मचर्यादिसंस्कारेणैव सन्तानाः सत्कर्त्तव्याः॥३॥

पदार्थः-हे मनुष्यो! जैसे इन्धन और (**जुह्वा**) साधन और उपसाधनों से युक्त क्रिया से (**अग्निः**) अग्नि (**जज्ञे**) उत्पन्न होता है, वैसे (**रेजमानः**) कंपता हुआ (**महान्**) बड़े उत्तम गुणों से युक्त (**गर्भः**) स्तुति करने योग्य पदार्थ उत्पन्न होता है और (**अरुषस्य**) नहीं हिंसा करनेवाले के (**महः**) श्रेष्ठ (**पुत्रान्**) सन्तानों के (**प्रयक्षे**) अत्यन्त यजन अर्थात् सङ्गम करने को उत्पन्न होता है (**प्रवृत्**) प्रवृत्त होनेवाला (**हर्यश्वस्य**) जिसके हरणशील घोड़े उसके (**यज्ञैः**) योग्य कर्मों से (**मही**) श्रेष्ठ वाणी उत्पन्न होती है (**एषाम्**) इन सबों के (**महि**) बड़े (**आ, जातम्**) अच्छे प्रकार उत्पन्न कर्म को तुम जानो॥३॥

भावार्थः-जैसे शमी नामक काष्ठ के मध्य से अग्नि प्रकट होकर बड़े-बड़े कार्य्यों को सिद्ध करता है, वैसे ही सुपात्र पुत्र सम्पूर्ण उत्तम कर्मों को करते हैं, इससे ब्रह्मचर्य्य आदि संस्कारों के ही द्वारा सन्तानों को श्रेष्ठ बनाना चाहिये॥३॥

पुनः सूर्यरूपोऽग्निः कीदृश इत्याह॥

फिर सूर्यरूप अग्नि कैसा है, इस विषय को अगले मन्त्र में कहा है॥

अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन्।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः॥४॥

अभि। जैत्रीः। असचन्त। स्पृधानम्। महि। ज्योतिः। तमसः। निः। अजानन्। तम्। जानतीः। प्रति। उत्। आयन्। उषसः। पतिः। गवाम्। अभवत्। एकः। इन्द्रः॥४॥

पदार्थः-(**अभि**) आभिमुख्ये (**जैत्रीः**) जयशीलाः (**असचन्त**) समवयन्ति (**स्पृधानम्**) स्पर्द्धमानम् (**महि**) महत् (**ज्योतिः**) प्रकाशः (**तमसः**) अन्धकारस्य (**निः**) नितराम् (**अजानन्**) जानीयुः (**तम्**)

(जानतीः) ज्ञानवत्यः **(प्रति)** **(उत्)** **(आयन्)** आयान्त्युद्यन्ति प्रति यन्ति वा **(उषासः)** प्रभातान् **(पतिः)** स्वामी **(गवाम्)** किरणानाम् **(अभवत्)** भवेत् **(एकः)** असहायः **(इन्द्रः)**॥४॥

अन्वयः–ये जैत्रीरभ्यसचन्त तमसो महि ज्योतिः स्पृधानं निरजानन् तं जानतीरुषास इव प्रत्युदायन् य एक इन्द्रो गवां पतिरभवत्तमभ्यसचन्त॥४॥

भावार्थः–यथाऽन्धकाराज्ज्योतिः पृथग्भूत्वाऽन्धकारं निवर्त्तयति तथा विद्याऽविद्यां हन्ति यथैकः सूर्य्यः सर्वेषां किरणानां समत्वेन पालकोऽस्ति तथैव समभावमाश्रित्य राजा प्रजाः पालयेत्॥४॥

पदार्थः–जो **(जैत्रीः)** जोंतनेवाले **(अभि)** सम्मुख **(असचन्त)** अनुसार चलते हैं **(तमसः)** अन्धकार के **(महि)** बड़े **(ज्योतिः)** प्रकाशरूप **(स्पृधानम्)** पदार्थों के साथ किरणों के सङ्घर्ष करनेवाले सूर्य को **(निः)** निरन्तर **(अजानन्)** जानें **(तम्)** उसको **(जानतीः)** जाननेवाली **(उषासः)** प्रातःकाल की वेलाओं के तुल्य **(प्रति)** **(उत्)** **(आयन्)** उद्योग करें वा प्राप्त हों जो **(एकः)** सहायरहित **(इन्द्रः)** सूर्य्य **(गवाम्)** किरणों का **(पतिः)** स्वामी **(अभवत्)** होवे, उसके अनुसार चलते हैं॥४॥

भावार्थः–जैसे अन्धकार से ज्योति पृथक् होकर अन्धकार को दूर करती है, वैसे ही अविद्या से पृथक् हुई विद्या अविद्या का नाश करती है; और जैसे एक सूर्य्य सम्पूर्ण किरणों का एक साथ ही पालन करता है, वैसे ही समभाव का आश्रय करके राजा प्रजाओं का पालन करे॥४॥

अथ विद्वत्सङ्गेन किं जायत इत्याह॥

अब विद्वान् के सङ्ग से क्या होता है, इस विषय को अगले मन्त्र में कहा है॥

वी॒ळौ स॒तीर॒भि धीरा॑ अतृन्दन् प्रा॒चाहि॑न्वन् मन॑सा स॒प्त विप्रा॑:।
विश्वा॑मविन्दन् प॒थ्या॑मृ॒तस्य॑ प्रजा॒नन्नित्ता नम॒सा वि॑वेश॥५॥५॥

वी॒ळौ। स॒तीः। अ॒भि। धीरा॑ः। अ॒तृ॒न्दु॒न्। प्रा॒चा। अ॒हि॒न्व॒न्। मन॑सा। स॒प्त। विप्रा॑ः। विश्वा॑म्। अवि॒न्दु॒न्। प॒थ्या॑म्। ऋ॒तस्य॑। प्र॒ऽजा॒नन्। इत्। ता। नम॑सा। आ। वि॒वे॒श॒॥५॥

पदार्थः–**(वीळौ)** प्रशंसनीये बले **(सतीः)** विद्यमानाः प्रकृतीः **(अभि)** **(धीराः)** ध्यानवन्तः **(अतृन्दन्)** हिंस्युः **(प्राचा)** प्राक्तनेन **(अहिन्वन्)** वर्धयन्ति **(मनसा)** अन्तःकरणेन **(सप्त)** पञ्च प्राणा बुद्धिर्मनश्च **(विप्राः)** मेधाविनः **(विश्वाम्)** सर्वाम् **(अविन्दन्)** लभन्ते **(पथ्याम्)** पथि साध्वीं क्रियाम् **(ऋतस्य)** सत्यस्य **(प्रजानन्)** **(इत्)** एव **(तानि)** **(नमसा)** **(आ)** **(विवेश)** आविश॥५॥

अन्वयः–हे मनुष्या! यथा धीरा विप्राः प्राचा मनसा सप्त सतीरभ्यहिन्वननृतमतृन्दन्नृतस्य वीळौ विश्वां पथ्यामविन्दन् तथा त्वं ता नमसा प्रजानन्निदा विवेश॥५॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा युक्त्या सेवितानि प्राणान्तःकरणानि दुःखत्यागाय सुखलाभाय च प्रभवन्ति तथैव विद्वत्सङ्गादीनि कर्म्माणि दुःखानि निर्वार्य सुखानि जनयन्ति॥५॥

पदार्थः-हे मनुष्यो! जैसे **(धीराः)** उत्तम विचारयुक्त **(विप्राः)** बुद्धिमान् लोग **(प्राचा)** प्राचीन **(मनसा)** अन्तःकरण से **(सप्त)** पाँच प्राण, बुद्धि और मन तथा **(सतीः)** वर्त्तमान प्रकृतियों को **(अभि) (अहिन्वन्)** बढ़ाते हैं और मिथ्या का **(अतृन्दन्)** नाश करें तथा **(ऋतस्य)** सत्य के **(वीळौ)** प्रशंसनीय बल में **(विश्वाम्)** सम्पूर्ण **(पथ्याम्)** मर्य्यादा के योग्य क्रिया को **(अविन्दन्)** प्राप्त होते हैं, वैसे आप **(ताः)** उनको **(नमसा)** स्तुति से **(प्रजानन्)** जानते हुए **(इत्)** ही **(आ) (विवेश)** शुभ कर्म में प्रवेश कीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे युक्ति से सेवन किये हुए प्राण और अन्तःकरण दुःख के त्याग और सुख के लाभ के लिये समर्थ होते हैं, वैसे ही विद्वानों के सङ्ग आदि कर्म दुःखों को निवृत्त करा के सुखों को उत्पन्न कराते हैं॥५॥

का स्त्री सुखदात्री भवतीत्याह॥

कौन स्त्री सुख देनेवाली होती है, इस विषय को अगले मन्त्र में कहा है॥

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात्॥६॥

विदत्। यदि। सरमा। रुग्णम्। अद्रेः। महि। पाथः। पूर्व्यम्। सध्र्यक्। करिति कः। अग्रम्। नयत्। सुऽपदी। अक्षराणाम्। अच्छ। रवम्। प्रथमा। जानती। गात्॥६॥

पदार्थः-(**विदत्**) लभेत (**यदि**)। अत्र **निपातस्य चे**ति दीर्घः। (**सरमा**) या सरान् गतिमतः पदार्थान् मिनोति सा (**रुग्णम्**) रोगाविष्टम् (**अद्रेः**) मेघस्य (**महि**) महत् (**पाथः**) अन्नमुदकं वा (**पूर्व्यम्**) पूर्वैः कृतं निष्पादितम् (**सध्र्यक्**) यत्सहाञ्चति (**कः**) करोति (**अग्रम्**) (**नयत्**) नयति (**सुपदी**) शोभनाः पादा यस्याः सा सुपदी (**अक्षराणाम्**) वर्णानाम् (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**रवम्**) शब्दम् (**प्रथमा**) आदिमा (**जानती**) (**गात्**) प्राप्नुयात्॥६॥

अन्वयः-हे विदुषि स्त्रि! यदि सुपदी भवती सरमा सत्यद्रेः सध्र्यक् पूर्व्यं महि पाथो विददुग्णमौषधेन रोगं कोऽक्षराणामग्रं रवमच्छ नयत्प्रथमा जानती गात्तर्हि सर्वं सुखं प्राप्नुयात्॥६॥

भावार्थः-या स्त्री विद्युद्वद्व्याप्तविद्या संस्कारोपस्करादिकर्मसु विचक्षणा सुभाषिणी सरलस्वभावा स्यात् सा वृष्टिरिव सुखप्रदा भवति॥६॥

पदार्थः-हे बुद्धिमती स्त्री! **(यदि)** जो **(सुपदी)** उत्तम पादोंवाली आप **(सरमा)** चलनेवाले पदार्थों के नापनेवाली हुई **(अद्रेः)** मेघ के **(सध्र्यक्)** एक साथ प्रकट **(पूर्व्यम्)** प्राचीन जनों से किये गये **(महि)** बड़े **(पाथः)** अन्न वा जल को **(विदत्)** प्राप्त होवें **(रुग्णम्)** रोगों से घिरे हुए को औषध से

रोगरहित **(कः)** करती **(अक्षराणाम्)** अक्षरों के **(अग्रम्)** श्रेष्ठ **(रवम्)** शब्द को **(अच्छ)** उत्तम प्रकार **(नयत्)** प्राप्त करती है **(प्रथमा)** पहिली **(जानती)** जानती हुई **(गात्)** प्राप्त होवे तो सम्पूर्ण सुख को प्राप्त होवे॥६॥

भावार्थः-जो स्त्री बिजुली के सदृश विद्याओं में व्याप्त संस्कार और उपस्कार अर्थात् उद्योग आदि कर्म्मों में चतुर, उत्तम रीति से बोलने तथा नम्र स्वभाव रखनेवाली होवे, वह वृष्टि के सदृश सुख देनेवाली होती है॥६॥

पुनः कः पुमान् सुखदो भवतीत्याह॥

फिर कौन पुरुष सुख देनेवाला होता है, इस विषय को अगले मन्त्र में कहा है॥

अग॑च्छदु॒ विप्र॑तमः सखी॒यन्नसू॑दयत्सु॒कृ॒ते गर्भ॒मद्रिः॑।
स॒सान॒ मर्यो॑ युव॑भिर्मख॒स्यन्नथा॑भव॒दङ्गि॑राः स॒द्यो अर्च॑न्॥७॥

अग॑च्छत्। ऊ॒म् इति॑। विप्र॑ऽतमः। स॒खि॒ऽयन्। असू॑दयत्। सु॒ऽकृ॒ते॑। गर्भ॑म्। अद्रिः॑। स॒सान॑। मर्यः॑। युव॑ऽभिः। म॒ख॒स्यन्। अथ॑। अ॒भ॒व॒त्। अङ्गि॑राः। स॒द्यः। अर्च॑न्॥७॥

पदार्थः-(**अगच्छत्**) प्राप्नुयात् (**उ**) वितर्के (**विप्रतमः**) अतिशयेन मेधावी (**सखीयन्**) आत्मनः सखायमिच्छन् (**असूदयत्**) सूदयत् क्षरयेत् (**सुकृते**) सुष्ठु कृतेऽनुष्ठिते (**गर्भम्**) गर्भमिव वर्त्तमानं जलसमुदायम् (**अद्रिः**) मेघः (**ससान**) सनति विभजति (**मर्यः**) मनुष्यः (**युवभिः**) प्राप्तयुवाऽवस्थैः (**मखस्यन्**) आत्मनो मखं यज्ञमिच्छन् (**अथ**) आनन्तर्ये (**अभवत्**) भवेत् (**अङ्गिराः**) अङ्गेषु रसवद्वर्त्तमानः (**सद्यः**) शीघ्रम् (**अर्चन्**) सत्कुर्वन्॥७॥

अन्वयः-यो मर्यो युवभिः सह वर्त्तमानो सखीयन् मखस्यन्नथाङ्गिराः सद्योऽर्चन् विप्रतमस्तां भार्य्यामगच्छत् सोऽद्रिर्गर्भमिव सुकृतेऽभवत् सत्याऽसत्ये ससान उ दुष्कृतमसूदयत्॥७॥

भावार्थः-यो ब्रह्मचर्येण विद्यासुशिक्षे सङ्गृह्य युवा सन् स्वतुल्यया कन्यया सह सुहृद्भावं प्रीतिं प्राप्य तां सत्कुर्वन्नुपयच्छेत् स मेघाज्जगदिव सर्वाणि सुखानि प्राप्नुयात्॥७॥

पदार्थः-जो (**मर्यः**) मनुष्य (**युवभिः**) युवावस्थापन्न पुरुषों के सहित वर्त्तमान (**सखीयन्**) मित्र को चाहता वा (**मखस्यन्**) आत्मसम्बन्धी यज्ञ करने की इच्छा करता हुआ (**अथ**) उसके अनन्तर (**अङ्गिराः**) शरीरों में रस के सदृश वर्त्तमान (**सद्यः**) शीघ्र (**अर्चन्**) सत्कार करता हुआ (**विप्रतमः**) अत्यन्त बुद्धिमान् पुरुष उस स्त्री के समीप (**अगच्छत्**) प्राप्त होवे, वह पुरुष (**अद्रिः**) मेघ जैसे (**गर्भम्**) गर्भ को वैसे (**सुकृते**) उत्तम कर्म के करने में उद्यत (**अभवत्**) होवे तथा सत्यासत्य का (**ससान**) विभाग करता है (**उ**) और भी निकृष्ट कर्म को (**असूदयत्**) नाश करे॥७॥

भावार्थः-जो ब्रह्मचर्य्य से विद्या और उत्तम शिक्षा को ग्रहण करके युवा पुरुष अपने तुल्य कन्या

के साथ सुहृद्भाव और प्रीति को प्राप्त होके उसको सत्कार करता हुआ विवाहे, वह पुरुष जैसे मेघ से संसार सुख को प्राप्त होता है, वैसे सुख को प्राप्त होवे॥७॥

पुनः के सुखिनो भवन्तीत्याह॥

फिर कौन सुखी होते हैं, विषय को अगले मन्त्र में कहा है॥

सतःसतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हन्ति शुष्णम्।
प्र णो दिवः पदवीर्गव्युरर्चन्त्सखा सखीरमुञ्चन्निरवद्यात्॥८॥

सतःऽसतः। प्रतिऽमानम्। पुरः।ऽभूः। विश्वा। वेद। जनिम। हन्ति। शुष्णम्। प्र। नः। दिवः। पदऽवीः। गव्युः। अर्चन्। सखा। सखीन्। अमुञ्चत्। निः। अवद्यात्॥८॥

पदार्थः-(**सतःसतः**) विद्यमानस्य विद्यमानस्य (**प्रतिमानम्**) परिमाणसाधकम् (**पुरोभूः**) यः पुरस्ताद्भावयति सः (**विश्वा**) सर्वाणि (**वेद**) जानाति (**जनिमा**) जन्मानि (**हन्ति**) (**शुष्णम्**) शोककरं दुःखम् (**प्र**) (**नः**) अस्माकम् (**दिवः**) प्रकाशस्य (**पदवीः**) प्रतिष्ठाः (**गव्युः**) आत्मनो गां वाणीमिच्छुः (**अर्चन्**) सत्कुर्वन् (**सखा**) सुहृत्सन् (**सखीन्**) सुहृदः (**अमुञ्चत्**) मुच्यात् (**निः**) (**अवद्यात्**) निन्द्यादधर्म्यादाचरणात्॥८॥

अन्वयः-हे मनुष्या! यः पुरोभूः सतःसतः प्रतिमानं विश्वा जनिमा वेद शुष्णं हन्ति स गव्युर्नो दिवः पदवीः प्र यच्छेत् सखीनर्चन् सखा सन्नवद्यान्निरमुञ्चत् सोऽतुलं सुखमाप्नुयात्॥८॥

भावार्थः-त एव मनुष्या सुखिनो भवन्ति ये कार्य्यकारणरूपां सृष्टिं विदित्वा सर्वेषां सखायो भूत्वा सर्वान् पापाचरणात् पृथक्कृत्य धर्माचरणे प्रवर्त्तयेयुः। त एव सत्यसुहृदः सन्तीति॥८॥

पदार्थः-हे मनुष्यो! जो पुरुष (**पुरोभूः**) पहिले से चिताता (**सतःसतः**) विद्यमान विद्यमान के (**प्रतिमानम्**) परिमाण के साधक को वा (**विश्वा**) सम्पूर्ण (**जनिमा**) उत्पन्न हुए पदार्थों को (**वेद**) जानता और (**शुष्णम्**) शोककारक दुःख को (**हन्ति**) नाश करता है वह (**गव्युः**) अपने को विद्या चाहनेवाला (**नः**) हम लोगों के (**दिवः**) प्रकाश की (**पदवीः**) प्रतिष्ठाओं को (**प्र**) प्राप्त करे (**सखीन्**) मित्रों का (**अर्चन्**) सत्कार करता हुआ (**सखा**) मित्र होकर (**अवद्यात्**) धर्मरहित आचरण से (**निः**) निरन्तर (**अमुञ्चत्**) पृथक् करे, वह अत्यन्त सुख को प्राप्त हो॥८॥

भावार्थः-वे ही मनुष्य सुखी होते हैं जो कार्य्यकारणरूप सृष्टि को जान और सम्पूर्ण जनों के मित्र हो सम्पूर्ण जनों को पाप के आचरण से पृथक् करके धर्म के आचरण में प्रवृत्त करें, वे ही सत्य मित्र हैं॥८॥

अथ मोक्षमिच्छुभिः किं कार्यमित्याह॥

अब मोक्ष की इच्छा करनेवालों को क्या करना चाहिये, इस विषय को
अगले मन्त्र में कहा है॥

नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम्।
इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन॥ ९॥

नि। गव्यता। मनसा। सेदुः। अर्कैः। कृण्वानासः। अमृतऽत्वाय। गातुम्। इदम्। चित्। नु। सदनम्। भूरि। एषाम्। येन। मासान्। असिसासन्। ऋतेन॥ ९॥

पदार्थः–(**नि**) नित्यम् (**गव्यता**) आत्मनो गौरिवाचरता (**मनसा**) अन्तःकरणेन (**सेदुः**) प्राप्नुयुः (**अर्कैः**) अर्चनीयैर्विद्वद्भिः सह (**कृण्वानासः**) कुर्वन्तः (**अमृतत्वाय**) अमृतस्य मोक्षस्य भावाय (**गातुम्**) प्रशंसितां भूमिम्। **गातुरिति पृथिवीनामसु पठितम्।** (निघं०१.१) (**इदम्**) (**चित्**) अपि (**नु**) सद्यः (**सदनम्**) सीदन्ति यत्र तत् (**भूरि**) बहु (**एषाम्**) वर्त्तमानानाम् (**येन**) (**मासान्**) चैत्रादीन् (**असिषासन्**) विभक्तुमिच्छन्तु (**ऋतेन**) सत्याचरणेन॥ ९॥

अन्वयः–हे मनुष्या! यथा कृण्वानासो गव्यता मनसार्कैः सहाऽमृतत्वाय गातुं नि सेदुरिदं चिद्भूरि सदनं सेदुर्येनर्त्तेन मासानसिषासँस्तेनैषां कल्याणं नु जायते॥ ९॥

भावार्थः–यदि मनुष्या मोक्षमिच्छेयुस्तर्हि तैर्विद्वत्सङ्गधर्माऽनुष्ठानं कृत्वाऽधर्मत्यागं विधाय सद्योऽन्तःकरणात्मशुद्धिः सम्पादनीया॥ ९॥

पदार्थः–हे मनुष्यो! जैसे (**कृण्वानासः**) करते हुए जन (**गव्यता**) अपनी वाणी के सदृश (**मनसा**) अन्तःकरण से (**अर्कैः**) सत्कार करने योग्य विद्वानों के साथ (**अमृतत्वाय**) मोक्ष के होने के लिये (**गातुम्**) प्रशंसायुक्त भूमि को (**नि, सेदुः**) प्राप्त होवें तथा (**इदम्**) इस (**चित्**) भी (**भूरि**) बहुत (**सदनम्**) प्राप्त होने योग्य स्थान को प्राप्त होवें (**येन**) जिस (**ऋतेन**) सत्य आचरण से (**मासान्**) चैत्र आदि महीनों के (**असिषासन्**) विभाग करने की इच्छा करें, उससे (**एषाम्**) इन पुरुषों का कल्याण (**नु**) शीघ्र होता है॥ ९॥

भावार्थः–जो मनुष्य लोग मोक्ष की इच्छा करें तो विद्वानों का सङ्ग, धर्म का अनुष्ठान और अधर्म का त्याग करके शीघ्र ही अन्तःकरण और आत्मा की शुद्धि करें॥ ९॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहा है॥

सपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः।
वि रोदसी अतपद्घोष एषां जाते निःष्टामदधुर्गोषु वीरान्॥ १०॥ ६॥

सम्ऽपश्यमानाः। अमदन्। अभि। स्वम्। पयः। प्रत्नस्य। रेतसः। दुघानाः। वि। रोदसी इति। अतपत्। घोषः। एषाम्। जाते। निःऽस्थाम्। अदधुः। गोषु। वीरान्॥ १०॥

पदार्थः-(**संपश्यमानाः**) सम्यक् प्रेक्षमाणाः (**अमदन्**) आनन्दन्ति (**अभि**) आभिमुख्ये (**स्वम्**) स्वकीयम् (**पयः**) दुग्धम् (**प्रत्नस्य**) प्राक्तनस्य (**रेतसः**) वीर्यस्य (**दुघानाः**) प्रपूरयन्तः (**वि**) (**रोदसी**) द्यावापृथिव्यौ (**अतपत्**) तपति (**घोषः**) वाणी (**एषाम्**) विदुषाम् (**जाते**) (**निःष्ठाम्**) नितरां स्थितानाम् (**अदधुः**) दधीरन् (**गोषु**) पृथिव्यादिषु (**वीरान्**) प्राप्तशुभगुणान्॥ १०॥

अन्वयः-ये स्वं संपश्यमानाः प्रत्नस्य रेतसः पयो दुघाना अभ्यमदन्नेषां निःष्ठां घोषः सूर्यो रोदसी इव दुष्टान् व्यतपत् ते जातेऽस्मिञ्जगति गोषु वीरानदधुः॥ १०॥

भावार्थः-ये विचारशीला धार्मिका विद्वांसः स्वकीयं सनातनमात्मसामर्थ्यं वर्धयेयुः सर्वेभ्यः सत्याऽसत्ये उपदिश्य दुष्टतां निवार्य्य श्रेष्ठतां धारयेयुस्त एव शूरवीराः सन्तीति वेद्यम्॥ १०॥

पदार्थः-जो लोग (**स्वम्**) अपने को (**संपश्यमानाः**) उत्तम प्रकार देखते और (**प्रत्नस्य**) प्राचीन (**रेतसः**) वीर्य के (**पयः**) दुग्ध को (**दुघानाः**) पूर्ण करते हुए (**अभि**) सम्मुख (**अमदन्**) आनन्द करते हैं (**एषाम्**) इन (**निःष्ठाम्**) उत्तम प्रकार स्थित विद्वानों की (**घोषः**) वाणी सूर्य्य जैसे (**रोदसी**) अन्तरिक्ष-पृथिवी को वैसे दुष्ट पुरुषों को (**वि**) (**अतपत्**) तपाती हैं, वे पुरुष (**जाते**) उत्पन्न हुए इस संसार में (**गोषु**) पृथिवी आदिकों में (**वीरान्**) उत्तम गुणों से युक्त पुरुषों को (**अदधुः**) धारण किया करें॥ १०॥

भावार्थः-जो उत्तम विचार करनेवाले धार्मिक विद्वान् पुरुष अपने अनादि काल सिद्ध सामर्थ्य को बढ़ावें, सब लोगों के लिये सत्य और असत्य का उपदेश कर दुष्टता को दूर कर और श्रेष्ठता का धारण करें, वे ही शूरवीर होते हैं, यह जानना चाहिये॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिन्द्रो अर्कैः।
उरूच्यस्मै घृतवद्धरन्ती मधु स्वाद्म दुदुहे जेन्या गौः॥ ११॥

सः। जातेभिः। वृत्रऽहा। सः। इत्। ऊम् इति। हव्यैः। उत्। उस्रियाः। असृजत्। इन्द्रः। अर्कैः। उरूची। अस्मै। घृतऽवत्। भरन्ती। मधु। स्वाद्म। दुदुहे। जेन्या। गौः॥ ११॥

पदार्थः-(**सः**) (**जातेभिः**) उत्पन्नैः सह (**वृत्रहा**) मेघस्य हन्ता सूर्य्य इव (**सः**) (**इत्**) एव (**उ**) (**हव्यैः**) आदातुमर्हैः (**उत्**) (**उस्रियाः**) गावः किरणाः (**असृजत्**) सृजति (**इन्द्रः**) परमैश्वर्य्यहेतुः (**अर्कैः**) अर्चनीयैर्मनुष्यैः सह (**उरूची**) योरूणि बहून्यञ्चति सा (**अस्मै**) (**घृतवत्**) घृतमाज्यमुदकं वा प्रशस्तं

विद्यते यस्मिँस्तत् **(भरन्ती)** धरन्ती **(मधु)** मधुरगुणोपेतम् **(स्वाद्म)** स्वादिष्ठम् **(दुदुहे)** दुह्यते **(जेन्या)** जेतुं योग्या **(गौः)** पृथिवी॥११॥

अन्वयः-यो वृत्रहेन्द्र उस्रिया उदसृजदिवार्कैर्हव्यैर्जातेभिः सह पदार्थानसृजत् स इत्सुखमाप्नोति। या उरूची घृतवत्स्वाद्म मधु भरन्ती जेन्या गौरस्मै दुदुहे तां स उ विद्यात्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यः स्वप्रकाशेन सर्वानुत्पन्नान् सृष्टिपदार्थान् प्रकाशयति तथैव विद्वान् विज्ञानेन सर्वान् विदित्वा सर्वत्र प्रकाशयेत्॥११॥

पदार्थः-जो **(वृत्रहा)** मेघ के नाशकर्त्ता सूर्य्य के सदृश **(इन्द्रः)** अति श्रेष्ठ ऐश्वर्य्य का कारण **(उस्रियाः)** वाणियों को किरणों के सदृश **(उत्, असृजत्)** उत्पन्न करता है, **(अर्कैः)** आदर करने योग्य मनुष्यों **(हव्यैः)** ग्रहण करने के योग्य पदार्थों और **(जातेभिः)** उत्पन्न हुए व्यवहारों के साथ पदार्थों को **(असृजत्)** उत्पन्न करता है **(स, इत्)** वही सुख को प्राप्त होता है, जो **(उरूची)** बहुतों का सत्कार करती **(घृतवत्)** घृत वा जल उत्तमतायुक्त **(स्वाद्म)** स्वादिष्ठ **(मधु)** मीठे गुण से युक्त पदार्थ को **(भरन्ती)** धारण करती हुई **(जेन्या)** जीतने योग्य **(गौः)** पृथिवी **(अस्मै)** उस ऐश्वर्य्य के लिये **(दुदुहे)** दुही जाती है, उसको वह पुरुष **(उ)** ही जानें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य अपने प्रकाश से सम्पूर्ण उत्पन्न हुए सृष्टि के पदार्थों को प्रकाश करता है, वैसे ही विद्वान् पुरुष विज्ञान से सम्पूर्ण पदार्थों को जान कर उसका सर्वत्र प्रकाश करे॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पि॒त्रे चि॑च्चक्रुः सद॑नं सम॑स्मै॒ महि॒ त्विषी॑मत्सु॒कृतो॒ वि हि ख्यन्।
वि॒ष्क॒भ्नन्तः॒ स्कम्भ॑नेना॒ जनि॑त्री॒ आसी॑ना ऊ॒र्ध्वं र॑भ॒सं वि मि॑न्वन्॥१२॥

पि॒त्रे। चि॒त्। च॒क्रुः। सद॑नम्। सम्। अ॒स्मै॒। महि॑। त्विषि॑ऽमत्। सु॒ऽकृत॑ः। वि। हि। ख्यन्। वि॒ऽस्क॒भ्नन्तः॑। स्कम्भ॑नेन। जनि॑त्री॒ इति॑। आसी॑नाः। ऊ॒र्ध्वम्। र॒भ॒सम्। वि। मि॒न्व॒न्॥१२॥

पदार्थः-(**पित्रे**) पालकाय (**चित्**) अपि (**चक्रुः**) कुर्य्युः (**सदनम्**) स्थानम् (**सम्**) (**अस्मै**) (**महि**) महत् (**त्विषीमत्**) बह्व्यस्त्विषयो दीप्तयो विद्यन्ते यस्मिँस्तत्। अत्राऽन्येषामपीति दीर्घः। (**सुकृतः**) ये शोभनानि धर्म्याणि कर्माणि कुर्वन्ति ते (**वि**) (**हि**) यतः (**ख्यन्**) प्रकाशयन्ति (**विष्कभ्नन्तः**) ये विशेषेण स्कभ्नन्ति धरन्ति ते (**स्कम्भनेन**) धारणेन। अत्र **संहितायामिति** दीर्घः। (**जनित्री**) मातृवत्सर्वेषां महत्तत्त्वादीनामुत्पादिका (**आसीनाः**) स्थिराः (**ऊर्ध्वम्**) (**रभसम्**) वेगम् (**वि**) (**मिन्वन्**) विशेषेण प्रक्षिपन्ति॥१२॥

अन्वयः-हे सुकृतो विष्कभ्नन्तो महत्तत्वादीनां जनित्री प्रकृतिरिवासीनाः स्कम्भनेनोर्ध्वं रभसं वि मिन्वन् विद्यां विख्यन् हि चिदप्यस्मै पित्रे त्विषीमन्महि सदनं संश्चक्रुस्ते कृतकृत्या विद्वांसः स्युः॥१२॥

भावार्थः-यथा विभ्व्याः प्रकृतेः सकाशान्महत्तत्त्वादीनि निर्म्माय जगत्सर्वं जगदीश्वरो विदधाति तथैव विद्वांसः पितृवद्वर्त्तमानाः सन्तः सर्वार्थं सुखं विदधति पदार्थविद्यां साक्षात् कृत्योपदिशन्ति च॥१२॥

पदार्थः-जो (**सुकृतः**) उत्तम धर्म सम्बन्धी कर्म करने और (**विष्कभ्नन्तः**) विशेष करके धारण करनेवाले महत्तत्त्व अर्थात् बुद्धि आदि की (**जनित्री**) उत्पन्न करनेवाली प्रकृति के सदृश (**आसीनाः**) स्थिर (**स्कम्भनेन**) धारण करने से (**ऊर्ध्वम्**) ऊँचे (**रभसम्**) वेग को (**वि**) (**मिन्वन्**) विशेष करके फेंकते और विद्या को (**वि**) (**ख्यन्**) प्रकाश करते वा (**हि**) जिस कारण (**चित्**) ही (**अस्मै**) इस (**पित्रे**) पालन करनेवाले के लिये (**त्विषीमत्**) बहुत कान्तियों से युक्त (**महि**) बड़े (**सदनम्**) स्थान को (**सम्**) (**चक्रुः**) सम्पन्न करें, वे कृतकृत्य विद्वान् होवें॥१२॥

भावार्थः-जैसे व्यापक प्रकृति के द्वारा महत्तत्त्व आदि को रचकर सम्पूर्ण जगत् को ईश्वर रचता है, वैसे ही विद्वान् जन पिता के सदृश वर्त्तमान होकर सम्पूर्ण जनों के लिये सुख धारण करते और पदार्थविद्या का प्रत्यक्ष अभ्यास करके शिक्षा देते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मही यदिधिषणा शिश्नथे धात् सद्योवृधं विभ्वं१ रोदस्योः।
गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इन्द्राय तविषीरनुत्ताः॥१३॥

मही। यदि। धिषणा। शिश्नथे। धात्। सद्यः।ऽवृधम्। विऽभ्वम्। रोदस्योः। गिरः। यस्मिन्। अनवद्याः। सम्।ऽईचीः। विश्वाः। इन्द्राय। तविषीः। अनुत्ताः॥१३॥

पदार्थः-(**मही**) अतीव सत्कर्त्तव्या (**यदि**) (**धिषणा**) प्रगल्भा वाक् (**शिश्नथे**) श्नथति हिनस्ति। अत्र व्यत्ययेनात्मनेपदम्। (**धात्**) दधाति (**सद्योवृधम्**) यः सद्यो वर्धयति तम् (**विभ्वम्**) व्यापकम् (**रोदस्योः**) द्यावापृथिव्योः (**गिरः**) वाण्यः (**यस्मिन्**) (**अनवद्याः**) अनिन्द्याः (**समीचीः**) याः समानं सत्यमञ्चन्ति ताः (**विश्वाः**) अखिलाः (**इन्द्राय**) परमैश्वर्य्याय (**तविषीः**) बलयुक्ताः (**अनुत्ताः**) आनुकूल्येन धृताः॥१३॥

अन्वयः-हे विद्वांसो! भवद्भिर्यदि मही धिषणा वाग्रोदस्योर्मध्ये सद्योवृधं विभ्वं धात्तर्हीयमविद्यां शिश्नथे सा संग्राह्या यस्मिन्ननवद्याः समीचीस्तविषीरनुत्ता विश्वा गिर इन्द्राय प्रभवेयुस्स व्यवहारः सदा सेवनीयः॥१३॥

भावार्थः–हे विद्वांसो! विविधविद्यायुक्ता वाचो धृत्वा विभुं परमात्मान ज्ञातुमिच्छेयुस्ते परमैश्वर्य्यं लभेरन्॥१३॥

पदार्थः–हे विद्वान जनो! आप लोगों से **(यदि)** जो **(मही)** अत्यन्त सत्कार करने योग्य **(धिषणा)** प्रगल्भ अर्थात् नहीं रुकनेवाली वाणी **(रोदस्योः)** अन्तरिक्ष और पृथिवी के मध्य में **(सद्योवृधम्)** शीघ्र वृद्धिकारक **(विभ्वम्)** व्यापक को **(धात्)** धारण करती है तो इस अविद्या का **(शिश्नथे)** नाश करती है [वह ग्रहण करने योग्य है।] **(यस्मिन्)** जिसमें **(अनवद्याः)** निन्दारहित **(समीचीः)** सत्य को धारण करनेवाली **(तविषीः)** बलयुक्त **(अनुत्ताः)** अनुकूलता से धारण की गई **(विश्वाः)** सम्पूर्ण **(गिरः)** वाणियाँ **(इन्द्राय)** परम ऐश्वर्य के लिये समर्थ होवें, वह व्यवहार सदा सेवन करने योग्य है॥१३॥

भावार्थः–जो विद्वान् लोग अनेक प्रकार की विद्याओं से युक्त वाणियों को धारण करके व्यापक परमात्मा के जानने की इच्छा करें, वे बड़े ऐश्वर्य को प्राप्त होवें॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मह्या ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः।
महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः॥१४॥

महि। आ। ते। सख्यम्। वश्मि। शक्तीः। आ। वृत्रऽघ्ने। निऽयुतः। यन्ति। पूर्वीः। महि। स्तोत्रम्। अवः। आ। अगन्म। सूरेः। अस्माकम्। सु। मघऽवन्। बोधि। गोपाः॥१४॥

पदार्थः–**(महि)** महत्पूजनीयम् **(आ)** **(ते)** तव **(सख्यम्)** मित्रस्य भावम् **(वश्मि)** कामये **(शक्तीः)** सामर्थ्यानि **(आ)** **(वृत्रघ्ने)** यः सूर्य्यो मेघं वृत्रं हन्ति तद्वद्वर्त्तमानाय **(नियुतः)** निश्चिताः **(यन्ति)** प्राप्नुवन्ति **(पूर्वीः)** प्राचीनाः सनातन्यः **(महि)** महत् **(स्तोत्रम्)** स्तोतुमर्हम् **(अवः)** रक्षणादिकम् **(आ)** **(अगन्म)** प्राप्नुयाम **(सूरेः)** परमविदुषः **(अस्माकम्)** [अस्माकं] मध्ये वर्त्तमानस्य **(सु)** शोभने **(मघवन्)** परमपूजितधनयुक्त **(बोधि)** बुध्यस्व **(गोपाः)** रक्षकः॥१४॥

अन्वयः–हे मघवन्नहं ते महि सख्यमा वश्मि विद्वांसो यस्मै वृत्रघ्न इव वर्त्तमानाय तुभ्यं पूर्वीर्नियुतः शक्तीरा यन्ति तस्यास्माकं मध्ये वर्त्तमानस्य सूरेस्तव सकाशान्महि स्तोत्रमवो वयमागन्म त्वमस्माकं गोपाः सन् सु बोधि॥१४॥

भावार्थः–मनुष्यैर्विद्वद्भिः सह मैत्रीं विधाय सामर्थ्यं पूर्णं कृत्वा न्यायेन सर्वान् संरक्ष्य सूर्य्यस्य प्रकाश इव जगति विद्याबोधः प्रकाशनीयः॥१४॥

पदार्थः–हे **(मघवन्)** अत्यन्त श्रेष्ठ धनयुक्त पुरुष! मैं **(ते)** आपके **(महि)** अति आदर करने योग्य **(सख्यम्)** मित्रभाव की **(आ, वश्मि)** अच्छी कामना करता हूँ, विद्वान् जन जिस **(वृत्रघ्ने)** मेघ के

नाशकर्त्ता सूर्य्य के तुल्य वर्त्तमान आपके लिये **(पूर्वीः)** अनादि काल से सिद्ध **(नियुतः)** निश्चित **(शक्तीः)** सामर्थ्यों को **(आ)** **(यन्ति)** प्राप्त होते हैं उस **(अस्माकम्)** हम लोगों के मध्य में वर्त्तमान **(सूरेः)** परमोत्तम विद्वान् आपके समीप से **(महि)** बड़े **(स्तोत्रम्)** स्तुति करने योग्य **(अवः)** रक्षा आदि को हम लोग **(आ, अगन्म)** प्राप्त होवें। आप हम लोगों की **(गोपाः)** रक्षा करते हुए **(सु)** **(बोधि)** जानिये॥१४॥

भावार्थः-मनुष्य लोगों को चाहिये कि विद्वान् जनों के साथ मित्रता कर, सामर्थ्य पूर्ण कर और न्याय से सम्पूर्ण जनों की रक्षा करके सूर्य्य के प्रकाश के सदृश संसार में विद्या के बोध का प्रकाश करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

महि क्षेत्रं पुरु श्चन्द्रं विविद्वानादित् सखिभ्यश्चरथं समैरत्।
इन्द्रो नृभिरजनद् दीद्यानः साकं सूर्यमुषसं गातुमग्निम्॥१५॥७॥

महि। क्षेत्रम्। पुरु। चन्द्रम्। विविद्वान्। आत्। इत्। सखिऽभ्यः। चरथम्। सम्। ऐरत्। इन्द्रः। नृऽभिः। अजनत्। दीद्यानः। साकम्। सूर्यम्। उषसम्। गातुम्। अग्निम्॥१५॥

पदार्थः-(**महि**) महत् **(क्षेत्रम्)** क्षियन्ति निवसन्ति पदार्था यस्मिंस्तत् **(पुरु)** बहु **(चन्द्रम्)** सुवर्णम्। अत्र **ह्रस्वाच्चन्द्रोत्तरपदे मन्त्र** इति सुडागमः। **(विविद्वान्)** वेत्ता **(आत्)** **(इत्)** एव **(सखिभ्यः)** मित्रेभ्यः **(चरथम्)** अगमनं[९] विज्ञानं वा **(सम्)** सम्यक् **(ऐरत्)** प्रेरयेत्। अत्र व्यत्ययेन परस्मैपदं **बहुलं छन्दसी**ति शपो लुङ् न। **(इन्द्रः)** विद्युदिव सुखप्रदो दुःखविदारकः **(नृभिः)** नायकैः **(अजनत्)** जनयेत् **(दीद्यानः)** देदीप्यमानः **(साकम्)** सह **(सूर्य्यम्)** सवितारम् **(उषसम्)** प्रभातम् **(गातुम्)** वाणीं भूमिं वा **(अग्निम्)** भौमं पावकम्॥१५॥

अन्वयः-हे मनुष्या! यो विविद्वान् दीद्यान इन्द्र इव सखिभ्य इन्महि पुरुश्चन्द्रं क्षेत्रं चरथं च समैरदान्नृभिः साकं सूर्य्यमुषसं गातुमग्निमजनत्तं सदा सत्कुरुत॥१५॥

भावार्थः-यथा विद्यया सुसंप्रयुक्ता विद्युत्सूर्य्यभूमिपावकाः प्रातरादिसमय ऐश्वर्य्यं जनयित्वा सखीन् सुखयन्ति तथैव विद्वांसो मनुष्यादीन् प्राणिनः सुखयन्तु॥१५॥

---

९. गमनं॥ सं०॥

पदार्थः–हे मनुष्यो! जो **(विविद्वान्)** ज्ञाता और **(दीद्यानः)** प्रकाशमान **(इन्द्रः)** बिजुली के सदृश सुख का वर्द्धक और दुःख का नाशक **(सखिभ्यः)** मित्रों के लिये **(इत्)** ही **(महि)** बड़ा **(पुरु)** बहुत **(चन्द्रम्)** सुवर्ण **(क्षेत्रम्)** पदार्थों का आधार **(चरथम्)** गमन वा विज्ञान की **(सम्)** **(ऐरत्)** प्रेरणा करे **(आत्)** उसके अनन्तर **(नृभिः)** प्रधान जनों के **(साकम्)** साथ **(सूर्य्यम्)** सूर्य्य **(उषसम्)** प्रातःकाल **(गातुम्)** वाणी वा भूमि और **(अग्निम्)** अग्नि को **(अजनत्)** उत्पन्न करे, उसका सदा सत्कार करो॥१५॥

भावार्थः–जैसे विद्या से युक्त बिजुली, सूर्य्य, भूमि और अग्नि प्रातःकालादि समय में ऐश्वर्य को उत्पन्न कर मित्रों को सुख देते हैं, वैसे ही विद्वान् लोग मनुष्य आदि प्राणियों को सुख देवें॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चन्द्राः।
मध्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः॥१६॥

अपः। चित्। एषः। विऽभ्वः। दमूनाः। प्र। सध्रीचीः। असृजत्। विश्वऽचन्द्राः। मध्वः। पुनानाः। कविऽभिः। पवित्रैः। द्युऽभिः। हिन्वन्ति। अक्तुऽभिः। धनुत्रीः॥१६॥

पदार्थः–(**अपः**) जलानीव व्याप्तविद्याः **(चित्)** अपि **(एषः)** **(विभ्वः)** विभूः **(दमूनाः)** जितेन्द्रियमनस्काः **(प्र)** **(सध्रीचीः)** सहैवाञ्चन्तीः **(असृजत्)** सृजति **(विश्वश्चन्द्राः)** विश्वानि समग्राणि चन्द्राणि सुवर्णादीनि येषान्ते। अत्रापि **ह्रस्वाच्चन्द्रोत्तरपदे मन्त्र** इति सुडागमः। **(मध्वः)** मधुरस्वभावान् जनान् **(पुनानाः)** पवित्रयन्तः **(कविभिः)** विद्वद्भिः **(पवित्रैः)** शुद्धैर्व्यवहारैः **(द्युभिः)** दिनैः **(हिन्वन्ति)** वर्धयन्ति वर्धन्ते वा। अत्र पक्षेऽन्तर्भावितो ण्यर्थः। **(अक्तुभिः)** रात्रिभिः **(धनुत्रीः)** धनधान्यादियुक्ताः॥१६॥

अन्वयः–हे मनुष्या! ये कविभिः सहिताः पवित्रैर्द्युभिरक्तुभिर्मध्वः पुनाना जना धनुत्रीर्हिन्वन्ति यश्चिदेष विभ्वो दमूनाः सध्रीचीर्विश्वश्चन्द्रा अपः प्रासृजत्ताँस्तं च सर्वे सङ्गच्छन्ताम्॥१६॥

भावार्थः–ये विद्वांसो बह्वैश्वर्य्यजनकान् पदार्थान् कार्यसिद्धये प्रयुञ्जते विद्वद्भिः सह पवित्राचरणं कृत्वा सुखैश्वर्य्यमहर्निशं वर्धयन्ति ते भाग्यशालिनः सन्ति॥१६॥

पदार्थः–हे मनुष्यो! जो लोग **(कविभिः)** विद्वान् जनों के सहित **(पवित्रैः)** उत्तम व्यवहारों तथा **(द्युभिः)** दिनों और **(अक्तुभिः)** रात्रियों से **(मध्वः)** कोमल स्वभाववाले मनुष्यों को **(पुनानाः)** पवित्र करते हुए जन **(धनुत्रीः)** धन और धान्य आदिकों से युक्त **(हिन्वन्ति)** बढ़ाते वा बढ़ते हैं जो **(चित्)** भी **(एषः)** यह **(विभ्वः)** व्यापक **(दमूनाः)** जितेन्द्रिय मनयुक्त **(सध्रीचीः)** एक साथ मिले हुए **(विश्वश्चन्द्राः)** सम्पूर्ण सुवर्ण आदिकों से युक्त **(अपः)** जलों के सदृश व्याप्त विद्याओं को **(प्र)**

(असृजत्) उत्पन्न करता है, उन और उसका सर्व जन सङ्गम करें॥१६॥

भावार्थः-जो विद्वान् लोग बहुत ऐश्वर्य्यों के जनक पदार्थों को कार्यसिद्धि के लिये उपयोग में लाते तथा विद्वान् जनों के साथ शुद्ध आचरणों को करके सुख और ऐश्वर्य दिन-रात्रि बढ़ाते, वे भाग्यशाली हैं॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अनु॑ कृ॒ष्णे वसु॑धिती जिहाते उ॒भे सूर्य॑स्य मं॒हना॒ यज॑त्रे।
परि॒ यत्ते॑ महि॒मान॑ वृ॒जध्यै॒ सखा॑य इन्द्र॒ काम्या॑ ऋ॒जि॒प्याः॥ १७॥

अनु॑। कृ॒ष्णे इति॑। वसुधिती॒ इति॒ वसु॑ऽधिती। जि॒हा॒ते इति॑। उ॒भे इति॑। सूर्य॑स्य। मं॒हना॑। यज॑त्रे॒ इति॑। परि॑। यत्। ते॒। म॒हि॒मान॑म्। वृ॒जध्यै॑। सखा॑यः। इ॒न्द्र॒। काम्याः॑। ऋ॒जि॒प्याः॥ १७॥

पदार्थः-(**अनु**) (**कृष्णे**) कर्षिते (**वसुधिती**) वसूनां पदार्थानां धर्त्र्यौ द्यावापृथिव्यौ (**जिहाते**) गच्छतः (**उभे**) (**सूर्य्यस्य**) (**मंहना**) महत्त्वेन (**यजत्रे**) सङ्गते (**परि**) (**यत्**) ये (**ते**) तव (**महिमानम्**) (**वृजध्यै**) वर्जितुम् (**सखायः**) सुहृदः सन्तः (**इन्द्र**) परमैश्वर्य्ययुक्त राजन् (**काम्याः**) कमनीयाः (**ऋजिप्याः**) ऋजून् सरलान् व्यवहारान् प्यायन्ते वर्धयन्ति ते॥१७॥

अन्वयः-हे इन्द्र! यद्ये ते काम्या ऋजिप्याः सखायो महिमानमनुकृष्णे उभे यजत्रे वसुधिती सूर्यस्य मंहना वृजध्यै परि जिहाते इव स्तस्ते वर्धयन्ति ते त्वया सत्कर्त्तव्याः॥१७॥

भावार्थः-यथा सूर्यः स्वमहिम्ना भूमिप्रकाशावनुकृष्य धरति यथा भूमिप्रकाशौ सर्वान् धरतस्तथोत्तमपुरुषेण स्वमहिमानं धृत्वा दुर्व्यसनानि वर्जित्वा सखायः सत्कर्त्तव्याः॥१७॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त राजन्! (**यत्**) जो (**ते**) आपके (**काम्याः**) कामना करने योग्य (**ऋजिप्याः**) सरल व्यवहारों के वर्द्धक (**सखायः**) मित्र हुए (**महिमानम्**) महिमा को (**अनु**) (**कृष्णे**) खींची गयीं (**उभे**) दोनों (**यजत्रे**) परस्पर मिली हुई (**वसुधिती**) अन्तरिक्ष और पृथिवी (**सूर्यस्य**) सूर्य के (**मंहना**) महत्त्व से (**वृजध्यै**) रोकने को (**परि**) (**जिहाते**) प्राप्त होते हैं, उनको बढ़ाते हैं, वे आप से सत्कार पाने योग्य हैं॥१७॥

भावार्थः-जैसे सूर्य अपने प्रताप से भूमि और प्रकाश का आकर्षण करके धारण करता है और जैसे भूमि तथा प्रकाश सम्पूर्ण पदार्थों को धारण करते हैं, वैसे उत्तम पुरुष को चाहिये कि महिमा को धारण और दुर्व्यसनों को त्याग करके मित्रों का सत्कार करें॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

पतिर्भव वृत्रहन्त्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः।
आ नो गहि सख्येभिः शिवेभिर्महान् महीभिरूतीभिः सरण्यन्॥ १८॥

पतिः। भव। वृत्रऽहन्। सूनृतानाम्। गिराम्। विश्वऽआयुः। वृषभः। वयःऽधाः। आ। नः। गहि। सख्येभिः। शिवेभिः। महान्। महीभिः। ऊतिऽभिः। सरण्यन्॥ १८॥

पदार्थः-(**पतिः**) पालकः स्वामी (**भव**) (**वृत्रहन्**) मेघहन्ता सूर्य इव वर्तमान (**सूनृतानाम्**) सुष्ठु ऋतानि सत्यानि यासु तासाम् (**गिराम्**) वाचाम् (**विश्वायुः**) पूर्णायुः (**वृषभः**) सुखवर्षकः (**वयोधाः**) यो वयो जीवनं दधाति सः (**आ**) (**नः**) अस्मान् (**गहि**) आगच्छ प्राप्नुहि (**सख्येभिः**) सखीनां कर्मभिः (**शिवेभिः**) मङ्गलकारिभिः (**महान्**) पूज्यतमः (**महीभिः**) महतीभिः (**ऊतिभिः**) रक्षणादिभिः (**सरण्यन्**) आत्मनः सरणं गमनं विज्ञानं वेच्छन्॥ १८॥

अन्वयः-हे वृत्रहन्निन्द्र राजँस्त्वं महान् विश्वायुर्वृषभो वयोधाः शिवेभिः सख्येभिर्महीभिरूतिभिः सह सरण्यन् सन् सूनृतानां गिरां पतिर्भव नोऽस्मानागहि॥ १८॥

भावार्थः-ये मनुष्याः सत्यवाचोऽजातशत्रवः स्वात्मवत्सर्वेषां पालकाः सूर्य्यवद्विद्याधर्मविनयप्रकाशका विद्वांसः स्वामिनस्स्युस्ते महान्तो भवेयुः॥ १८॥

पदार्थः-हे (**वृत्रहन्**) मेघ के नाशकारक सूर्य्य के सदृश तेजधारी राजन्! आप (**महान्**) प्रतिष्ठित (**विश्वायुः**) पूर्ण आयु से युक्त (**वृषभः**) सुखों की वृष्टि और (**वयोधाः**) जीवन के धारण करनेवाले (**शिवेभिः**) मङ्गलकारक (**सख्येभिः**) मित्रों के कर्मों से (**महीभिः**) बड़ी (**ऊतिभिः**) रक्षाओं आदि से युक्त (**सरण्यन्**) अपने चलन वा विज्ञान की इच्छा करते हुए (**सूनृतानाम्**) उत्तम सत्य से युक्त (**गिराम्**) वाणियों के (**पतिः**) पालनकर्त्ता (**भव**) हूजिये और (**नः**) हम लोगों को (**आ, गहि**) प्राप्त हूजिये॥ १८॥

भावार्थः-जो मनुष्य सत्य बोलने, शत्रुता को त्यागने, अपने प्राण के तुल्य सम्पूर्ण जनों के पालन करने और सूर्य्य के सदृश विद्या, धर्म और नम्रता के प्रकाश करनेवाले विद्वान् स्वामी हों, वे श्रेष्ठ होवें॥ १८॥

पुना राजप्रजाविषयमाह॥

फिर राजा और प्रजा के विषय को कहते हैं॥

तमङ्गिरस्वन्नमसा सपर्यन् नव्यं कृणोमि सन्यसे पुराजाम्।
दुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्त्सातये धाः॥ १९॥

तम्। अङ्गिरस्वत्। नमसा। सपर्यन्। नव्यम्। कृणोमि। सन्यसे। पुराऽजाम्। दुहः। वि। याहि। बहुलाः। अदेवीः। स्वरिति स्वः। च। नः। मघऽवन्। सातये। धाः॥ १९॥

पदार्थः-(**तम्**) पूर्वोक्तं राजानम् (**अङ्गिरस्वत्**) अङ्गिरसो विद्वांसो विद्यन्ते यस्य तत्सम्बुद्धौ (**नमसा**) सत्कारेणान्नेन वा (**सपर्यन्**) सेवमानः (**नव्यम्**) नवमिव वर्त्तमानम् (**कृणोमि**) (**सन्यसे**) सनां विभजतां मध्ये प्रयत्नाय (**पुराजाम्**) पुराजातम् (**द्रुहः**) द्रोग्धीः (**वि**) (**याहि**) प्राप्नुहि (**बहुलाः**) (**अदेवीः**) अविदुषीः स्त्रियः (**स्वः**) सुखम् (**च**) (**नः**) अस्माकम् (**मघवन्**) पूजनीयवित्त (**सातये**) संविभागाय (**धाः**) धेहि॥१९॥

अन्वयः-हे अङ्गिरस्वन्मघवन् राजन्! पुराजां नव्यं तं त्वामहं सन्यसे नमसा सपर्यन् कृणोमि त्वं बहुला द्रुहोऽदेवीर्वियाहि दूरीकुरु नः सातये स्वश्च धाः॥१९॥

भावार्थः-प्रजास्थैर्जनैन्यायविनयादिशुभगुणान्विता राजादयो जनाः सदैव सत्कर्त्तव्या राजादिपुरुषैश्च प्रजाः सदा पितृवत्पालनीयाः स्त्रियश्च विदुष्यः सम्पादनीया अनेन बहुविधं सुखमुन्नेयम्॥१९॥

पदार्थः-हे (**अङ्गिरस्वत्**) विद्वानों के सहित विराजमान (**मघवन्**) श्रेष्ठ धनयुक्त राजन्! (**पुराजाम्**) पहिले उत्पन्न और (**नव्यम्**) नवीन के सदृश वर्त्तमान (**तम्**) प्रथम कहे हुए आपकी मैं (**सन्यसे**) अलग-अलग बँटे हुए पदार्थों में प्रयत्न करते हुए के लिये (**नमसा**) सत्कारपूर्वक (**सपर्यन्**) सेवा करता हुआ (**कृणोमि**) प्रसिद्ध करता हूँ आप (**बहुलाः**) बहुत (**द्रुहः**) शत्रुतायुक्त (**अदेवीः**) विद्यारहित स्त्रियों को (**वि, याहि**) दूर कीजिये (**नः**) हम लोगों के (**सातये**) संविभाग के लिये (**स्वः**) सुख को (**च**) भी (**धाः**) धारण कीजिये॥१९॥

भावार्थः-प्रजारूप जनों को चाहिये कि न्याय, विनय आदि शुभ गुणों से युक्त राजा आदि जनों का सदा ही सत्कार करें और राजा आदि पुरुषों को चाहिये कि प्रजाजनों का सदा पिता के तुल्य पालन करें और स्त्रियों को विद्यायुक्त करें, इससे अनेक प्रकार **[**की सुख**]** की वृद्धि करें॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

मिह॑ पाव॒काः प्रत॑ताः अभूवन्स्व॒स्ति नः॑ पिपृहि पा॒रमा॑साम्।
इन्द्र॒ त्वं र॑थि॒रः पा॑हि नो रि॒षो म॒क्षूम॑क्षू कृणुहि गो॒जितो॑ नः॥२०॥

मिह॑ः। पा॒व॒काः। प्रऽत॑ताः। अ॒भू॒व॒न्। स्व॒स्ति। नः॒। पि॒पृ॒हि॒। पा॒रम्। आ॒सा॒म्। इन्द्र॑। त्वम्। र॒थि॒रः। पा॒हि॒। नः॒। रि॒षः। म॒क्षुऽम॑क्षु। कृ॒णु॒हि॒। गो॒ऽजितः॑। नः॒॥२०॥

पदार्थः-(**मिहः**) सेचकाः (**पावकाः**) पवित्राः पवित्रकराः (**प्रतताः**) विस्तीर्णाः स्वरूपगुणाः (**अभूवन्**) भवन्ति (**स्वस्ति**) सुखम् (**नः**) अस्मभ्यम् (**पिपृहि**) पूर्णं कुरु (**पारम्**) (**आसाम्**) (**इन्द्र**) सूर्य्य

इव राजन् **(त्वम्)** **(रथिरः)** रथादियुक्तः **(पाहि)** **(नः)** अस्मान् **(रिषः)** हिंसकात् **(मक्षूमक्षू)** शीघ्रम् शीघ्रम्। अत्र **निपातस्य चे**ति दीर्घः। **मक्ष्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) **(कृणुहि)** **(गोजितः)** गौर्भूमिर्जिता यैस्तान् **(नः)** अस्माकम्॥२०॥

अन्वयः–हे इन्द्र रथिरस्त्वं नो रिषः पाहि नोऽस्मान् गोजितो मक्षूमक्षू कृणुहि। आसां शत्रुसेनानां पारं नय या मिहः प्रतताः पावका अभूवन् तैर्नः स्वस्ति पिपृहि॥२०॥

भावार्थः–प्रजासेनापुरुषैः स्वेऽध्यक्षा एवं याचनीया यूयमस्माभिः शत्रून् विजयित्वा सुखं जनयत यथा विद्युदादयो वृष्टिद्वारा क्षुधादिदोषात् पृथक्कृत्यानन्दयन्ति तथैव हिंसकेभ्यः प्राणिभ्यः सद्यः पृथक्कृत्य रक्षित्वा सततमानन्दयत॥२०॥

पदार्थः–हे **(इन्द्र)** सूर्य्य के सदृश तेजस्वी राजन्! **(रथिरः)** रथ आदि वस्तुओं से युक्त **(त्वम्)** आप **(नः)** हम लोगों की **(रिषः)** हिंसाकारक जन से **(पाहि)** रक्षा कीजिये **(नः)** हम लोगों को **(गोजितः)** पृथिवी के जीतनेवाले **(मक्षूमक्षू)** शीघ्र शीघ्र **(कृणुहि)** करिये **(आसाम्)** इन शत्रुओं की सेनाओं के **(पारम्)** पार पहुँचाइये जो **(मिहः)** सींचनेवाले **(प्रतताः)** विस्तारस्वरूप और गुणों से युक्त **(पावकाः)** पवित्र और दूसरों को पवित्र करनेवाले **(अभूवन्)** होते हैं, उन लोगों से **(नः)** हम लोगों के **(स्वस्ति)** सुख को **(पिपृहि)** पूरा कीजिये॥२०॥

भावार्थः–प्रजा और सेना के पुरुषों को चाहिये कि अपने प्रधान पुरुषों से इस प्रकार की याचना करें कि आप लोग हम लोगों से शत्रुओं को जीत कर सुख उत्पन्न करो। जैसे बिजुली आदि पदार्थ वृष्टि के द्वारा क्षुधा आदि दोष से दूर करके आनन्द देते हैं, वैसे ही हिंसा करनेवाले प्राणियों से शीघ्र दूर कर और रक्षा करके निरन्तर आनन्द दीजिये॥२०॥

अथ के गुरवो भवितुमर्हन्तीत्याह॥

अब कौन गुरु होने के योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

अदे॑दिष्ट वृत्र॒हा गोप॑ति॒र्गा अ॒न्तः कृ॒ष्णाँ अ॑रु॒षैर्धाम॑भि॒र्गात्।
प्र सू॒नृता॑ दि॒शमा॑न ऋ॒तेन॒ दुर॑श्च॒ विश्वा॑ अवृणो॒दप॒ स्वाः॥२१॥

अदे॑दिष्ट। वृ॒त्र॒ऽहा। गोऽप॑तिः। गाः। अ॒न्तरिति॑। कृ॒ष्णान्। अ॒रु॒षैः। धाम॑ऽभिः। गा॒त्। प्र। सू॒नृता॑ः। दि॒शमा॑नः। ऋ॒तेन॑। दुरः॑। च॒। विश्वा॑ः। अ॒वृ॒णो॒त्। अप॑। स्वाः॥२१॥

पदार्थः–**(अदेदिष्ट)** भृशमुपदिशत **(वृत्रहा)** मेघहा सूर्य्य इव **(गोपतिः)** गवां पालकः **(गाः)** धेनुः **(अन्तः)** मध्ये **(कृष्णान्)** कृष्णवर्णान् **(अरुषैः)** रक्तगुणविशिष्टैरश्वैः। **अरुष इत्यश्वनामसु पठितम्।** (निघं०१.१४) **(धामभिः)** स्थानविशेषैः **(गात्)** प्राप्नुयात् **(प्र)** **(सूनृताः)** सत्यादिलक्षणान्विता वाचः **(दिशमानः)** उपदिशन्। अत्र व्यत्ययेनात्मनेपदम्। **(ऋतेन)** सत्येनेव जलेन **(दुरः)** द्वाराणि **(च)** **(विश्वाः)** समग्राः **(अवृणोत्)** वृणुयात् **(अप)** दूरीकरणे **(स्वाः)** स्वकीयाः॥२१॥

अन्वयः-हे विद्वन्! यथा वृत्रहा सूर्य्यः किरणैर्जगत्पाति यथा गोपतिर्गा रक्षत्यरुषैर्धामभिः सह कृष्णानन्तर्गाद् दुरश्चाऽपावृणोत् तथर्त्तेन सहिता विश्वाः स्वाः सूनृता वाचः प्र दिशमानोऽदेदिष्ट॥ २१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवद्गोपतिवत् पितृवत्सर्वान् रक्षन्ति त एव गुरवो भवितुमर्हन्ति॥ २१॥

पदार्थः-हे विद्वान् पुरुष! जैसे **(वृत्रहा)** मेघ का नाशक सूर्य्य अपनी किरणों से संसार की रक्षा करता है और जैसे **(गोपतिः)** गौओं का पालनकर्त्ता **(गाः)** गौओं की रक्षा करता तथा **(अरुषैः)** लाल गुण विशिष्ट घोड़ों और **(धामभिः)** स्थान विशेषों के साथ **(कृष्णान्)** काले वर्णों को **(अन्तः)** मध्य में **(गात्)** प्राप्त होवे **(दुरः, च)** और द्वारों को **(अप, अवृणोत्)** खोले, वैसे **(ऋतेन)** सत्य के सदृश जल के सहित **(विश्वाः)** सम्पूर्ण **(स्वाः)** अपनी **(सूनृताः)** सत्य आदि लक्षणों से युक्त वाणियों के **(प्र, दिशमानः)** अच्छे प्रकार उपदेशक **(अदेदिष्ट)** आप अत्यन्त उपदेश कीजिये॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सूर्य्य, गौओं के पालक और पिता के सदृश सबकी रक्षा करते हैं, वे ही गुरुजन होने योग्य हैं॥ २१॥

अथ के विजयिनो भवन्तीत्याह॥

अब कौन विजयी होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ २२॥ ८॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्सु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥ २२॥

पदार्थः-**(शुनम्)** वर्धकम् **(हुवेम)** स्वीकुर्याम प्रशंसेम **(मघवानम्)** परमधनयुक्तम् **(इन्द्रम्)** शत्रूणां विदारितारम् **(अस्मिन्)** वर्त्तमाने **(भरे)** भरणीये **(नृतमम्)** अतिशयेन नायकम् **(वाजसातौ)** अन्नादिविभाजके संग्रामे **(शृण्वन्तम्)** **(उग्रम्)** तेजस्विनम् **(ऊतये)** रक्षणाद्याय **(समत्सु)** संग्रामेषु **(घ्नन्तम्)** नाशयन्तम् **(वृत्राणि)** मेघावयवानिव **(सञ्जितम्)** सम्यग्जयशीलम् **(धनानाम्)**॥ २२॥

अन्वयः-हे वीरा! यथा वयमूतये सूर्य्यो वृत्राणीवाऽस्मिन् भरे वाजसातौ धनानां सञ्जितं नृतमं समत्सु घ्नन्तं शृण्वन्तमुग्रं शुनं मघवानमिन्द्रं हुवेम तथैतं यूयमप्याह्वयत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। तेषामेव ध्रुवो विजयो येषां पुष्कलधनबलाः सर्वेषां कथनश्रोतारो नरोत्तमा युद्धेषु शत्रूणां हन्तारो विजयमानाः स्युरिति॥ २२॥

अत्र वह्निविद्वद्राजसेनावागुपदेशकप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाधिकत्रिंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः–हे वीर पुरुषो! जैसे हम लोग **(ऊतये)** रक्षा आदि के लिये **(वृत्राणि)** मेघों के अवयवों को सूर्य्य के समान **(अस्मिन्)** इस वर्त्तमान **(भरे)** पुष्ट करने योग्य **(वाजसातौ)** अन्न आदि के विभागकारक संग्राम में **(धनानाम्)** धनों के **(सञ्जितम्)** उत्तम प्रकार जीतनेवाले **(नृतमम्)** अति प्रधान **(समत्सु)** संग्रामों में **(घ्नन्तम्)** नाश करते और **(शृण्वन्तम्)** सुनते हुए **(उग्रम्)** तेजस्वी **(शुनम्)** वृद्धिकर्त्ता **(मघवानम्)** अत्यन्त धन से युक्त **(इन्द्रम्)** शत्रुओं के विदारनेवाले का **(हुवेम)** स्वीकार वा प्रशंसा करें, वैसे इस पुरुष का आप लोग भी आह्वान करें॥ २२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। उन्हीं लोगों की निश्चय विजय होती है कि जिनके अत्यन्त धन, बलयुक्त और सब वचनों के सुननेवाले श्रेष्ठ पुरुष जो कि संग्रामों में शत्रुओं के मारने, जीतनेवाले हों॥ २२॥

इस मन्त्र **[**=सूक्त**]** में अग्नि, विद्वान्, राजा की सेना, मित्र,[१०] वाणी, उपदेशकर्त्ता और प्रजा के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकत्तीसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

---

१०. संस्कृत में 'मित्र' पद नहीं दिया गया है, हिन्दी में यह अधिक है।

अथ सप्तदशर्चस्य द्वात्रिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १-३। ७-९, १७ त्रिष्टुप्। ११-१५ निचृत्त्रिष्टुप्। १६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४, १० भुरिक् पङ्क्तिः। ५ निचृत्पङ्क्तिः। ६ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ नित्यकर्मविधिरुच्यते॥

अब सत्रह ऋचावाले बत्तीसवें सूक्त का प्रारम्भ है। उसके पहिले मन्त्र में नित्यकर्म का विधान कहते हैं॥

इन्द्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते।
प्रप्रुथ्या शिप्रे मघवन्नृजीषिन् विमुच्या हरी इह मादयस्व॥ १॥

इन्द्र। सोमम्। सोमऽपते। पिब। इमम्। माध्यंदिनम्। सवनम्। चारु। यत्। ते। प्रऽप्रुथ्य। शिप्रे इति। मघऽवन्। ऋजीषिन्। विऽमुच्य। हरी इति। इह। मादयस्व॥ १॥

पदार्थः-(**इन्द्र**) ऐश्वर्योत्पादक (**सोमम्**) ऐश्वर्यकारकं सोमाद्योषधिमयम् (**सोमपते**) ऐश्वर्यस्य पालक (**पिब**) (**इमम्**) (**माध्यन्दिनम्**) मध्ये भवम्। अत्र **मध्योमध्यं दिनण् च**ास्मादिति वार्तिकेन मध्यशब्दो मध्यमिति मान्तत्वमापद्यते भवेऽर्थे दिनण् च प्रत्ययः। (**सवनम्**) भोजनं होमादिकं वा (**चारु**) सुन्दरं भोक्तव्यम् (**यत्**) ये (**ते**) तव (**प्रप्रुथ्या**) प्रपूर्य्य (**शिप्रे**) मुखावयवाविव (**मघवन्**) परमपूजितधनयुक्त (**ऋजीषिन्**) शोधक (**विमुच्य**) त्यक्त्वा। अत्र **निपातस्य चे**ति दीर्घः। (**हरी**) अश्वाविव धारणाऽकर्षणे (**इह**) (**मादयस्व**) आनन्दय॥ १॥

अन्वयः-हे मघवन्त्सोमपत इन्द्र! त्वमिमं सोमं पिब चारु माध्यन्दिनं सवनं कुरु। हे ऋजीषिंस्ते यच्छिप्रे स्तस्ते प्रप्रुथ्या दुर्व्यसनानि विमुच्य हरी प्रयोज्य त्वमिह मादयस्व॥ १॥

भावार्थः-मनुष्यैः प्रथमं भोजनं मध्यन्दिनस्य निकटे कर्त्तव्यमग्निहोत्रादिव्यवहारेषु भोजनसमये बलिवैश्वदेवं विधाय दूषितं वायुं निःसार्य्याऽऽनन्दितव्यम्॥ १॥

पदार्थः-हे (**मघवन्**) अत्यन्त श्रेष्ठ धनयुक्त (**सोमपते**) ऐश्वर्य्य के पालने और (**इन्द्र**) ऐश्वर्य्य की उत्पत्ति करनेवाले! आप (**इमम्**) इस (**सोमम्**) ऐश्वर्यकारक सोम आदि ओषधि स्वरूप को (**पिब**) पीओ, (**चारु**) सुन्दर भोजन करने योग्य (**माध्यन्दिनम्**) बीच में होनेवाले (**सवनम्**) भोजन वा होम आदि को सिद्ध करो। हे (**ऋजीषिन्**) शुद्धिकर्त्ता! (**ते**) आपके (**यत्**) जो (**शिप्रे**) मुख के अवयवों के सदृश ऐहिक और पारलौकिक व्यवहार हैं, उनको (**प्रप्रुथ्या**) पूर्ण कर और दुर्व्यसनों को (**विमुच्य**) त्याग के (**हरी**) घोड़ों के सदृश धारण और खींचने का प्रयोग करके आप (**इह**) इस संसार में (**मादयस्व**) आनन्द दीजिये॥ १॥

भावार्थः-मनुष्यों को चाहिये प्रथम भोजन मध्य दिन के समीप में करें और अग्निहोत्र आदि व्यवहारों में भोजन के समय बलिवैश्वदेव को कर और दूषित वायु को निकाल के आनन्दित हों॥ १॥

के श्रीमन्तो भवन्तीत्याह॥

कौन लोग श्रीमान् होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व॥ २॥

गोऽआशिरम्। मन्थिनम्। इन्द्र। शुक्रम्। पिब। सोमम्। ररिम। ते। मदाय। ब्रह्मऽकृता। मारुतेन। गणेन। सऽजोषाः। रुद्रैः। तृपत्। आ। वृषस्व॥ २॥

पदार्थः-(**गवाशिरम्**) गावः किरणा इन्द्रियाणि वाऽश्नन्ति यस्मिँस्तम् (**मन्थिनम्**) मन्थितुं शीलं यस्य तम् (**इन्द्र**) दुःखविदारक (**शुक्रम्**) आशु सुखकरं शुद्धम् (**पिब**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सोमम्**) ऐश्वर्यकारकं पेयम् (**ररिम**) दद्याम। अत्र **संहितायामि**ति दीर्घः। (**ते**) तव (**मदाय**) आनन्दाय (**ब्रह्मकृता**) ब्रह्म धनमन्नं वा करोति यस्तेन (**मारुतेन**) मारुतेन हिरण्यादिसम्बन्धेन। अत्र **संहितायामि**ति दीर्घः। **मरुदिति हिरण्यनामसु पठितम्।** (निघं०१.२) (**गणेन**) गणनीयेन सङ्ख्यातेन समूहेन (**सजोषाः**) आत्मसमानप्रीतिं सेवमानः सन् (**रुद्रैः**) प्राणैरिव मध्यमैर्विद्वद्भिः सह (**तृपत्**) तृप्तः सन् (**आ**) समन्तात् (**वृषस्व**) वृष इव बलिष्ठो भव॥ २॥

अन्वयः-हे इन्द्र! वयं ते मदाय यं गवाशिरं शुक्रं मन्थिनं सोमं ररिम तं त्वं पिब ब्रह्मकृता मारुतेन गणेन रुद्रैः सह सजोषास्तृपत्सन्ना वृषस्व॥ २॥

भावार्थः-ये मनुष्या अन्येषु स्वात्मवद्वर्त्तित्वा तैः सह सुखादानं कृत्वा सुवर्णादिधनमुन्नीय तृप्ताः सन्तो बलिष्ठा जायन्ते, त एव श्रीमन्तो भवन्ति॥ २॥

पदार्थः-हे (**इन्द्र**) दुःख के नाश करनेवाले! हम लोग (**ते**) आपके (**मदाय**) आनन्द के अर्थ जिस (**गवाशिरम्**) किरणों वा इन्द्रियों से मिले हुए (**शुक्रम्**) शीघ्र सुख पवित्र करने वा (**मन्थिनम्**) मथने का स्वभाव रखने और (**सोमम्**) ऐश्वर्य के करनेवाले पान करने योग्य वस्तु को (**ररिम**) देवें उसको आप (**पिब**) पान करिये और (**ब्रह्मकृता**) धन वा अन्न को करनेवाले (**मारुतेन**) सुवर्ण आदि के सम्बन्धी (**गणेन**) गणना करने योग्य गिने हुए समूह से (**रुद्रैः**) प्राणों के सदृश मध्यम विद्वानों के साथ (**सजोषाः**) अपने तुल्य प्रीति का सेवन करनेवाले (**तृपत्**) तृप्त होते हुए (**आ**) सब प्रकार (**वृषस्व**) वृषभ के तुल्य बलिष्ठ हूजिये॥ २॥

भावार्थः-जो मनुष्य अन्य जनों में अपने तुल्य वर्त्तमान होकर उन लोगों के साथ सुख का ग्रहण और सुवर्ण आदि धन की वृद्धि करके तृप्त हुए बलिष्ठ होते, वे ही श्रीमान् होते हैं॥ २॥

पुना राजधर्ममाह॥

फिर राजधर्म विषय को अगले मन्त्र में कहा है॥

ये ते शुष्मं ये तविषीमवर्धन्नर्चन्त इन्द्र मरुतस्त ओजः।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र॥ ३॥

ये। ते। शुष्मम्। ये। तविषीम्। अवर्धन्। अर्चन्तः। इन्द्र। मरुतः। ते। ओजः। माध्यंदिने। सवने। वज्रऽहस्त। पिब। रुद्रेऽभिः। सऽगणः। सुऽशिप्र॥ ३॥

पदार्थः-(**ये**) (**ते**) तव सकाशात् (**शुष्मम्**) बलम् (**ये**) (**तविषीम्**) बलवतीं सेनाम् (**अवर्धन्**) वर्धयेयुः (**अर्चन्तः**) सत्कुर्वन्तः (**इन्द्र**) दुष्टबलविदारक (**मरुतः**) वायव इव वीराः (**ते**) तव (**ओजः**) पराक्रमः (**माध्यन्दिने**) मध्यदिने भवे (**सवने**) प्रेरणे (**वज्रहस्त**) वज्रादीनि शस्त्राणि हस्ते यस्य तत्सम्बुद्धौ (**पिब**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**रुद्रेभिः**) दुष्टान् रोदयद्भिर्वीरैः (**सगणः**) गणेन सह वर्त्तमानः (**सुशिप्र**) शोभने शिप्रे हनुनासिके यस्य॥ ३॥

अन्वयः-हे सुशिप्र वज्रहस्तेन्द्र! ये त्वामर्चन्तो मरुतस्ते तव शुष्ममवर्धन् ये ते तविषीं चावर्धंस्तविषीमोजश्चावर्धंस्तै रुद्रेभिः सह सगणः सन्माध्यन्दिने सवने सूर्य्य इव सोमं पिब॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये ते सचिवाः सेनां विजयं धनं राज्यं सुशिक्षां विद्यां धर्मं च वर्धयेयुस्ताँस्त्वं सततं सत्कुर्य्यास्तैः सह राज्यसुखं सदा भुङ्क्ष्व॥ ३॥

पदार्थः-(**सुशिप्र**) सुन्दर ठोढ़ी और नासिका जिनकी (**वज्रहस्त**) वा वज्र आदि शस्त्र हाथों में जिनके वह हे (**इन्द्र**) दुष्ट पुरुषों के समूहनाशक! (**ये**) जो आपका (**अर्चन्तः**) सत्कार करनेवाले (**मरुतः**) वायु के सदृश वीर पुरुष (**ते**) आपके समीप से (**शुष्मम्**) बल को (**अवर्धन्**) बढ़ावें (**ये**) वा जो लोग (**ते**) आपकी (**तविषीम्**) सेना और (**ओजः**) पराक्रम को बढ़ावें उन (**रुद्रेभिः**) दुष्टों के रुलानेवाले वीर पुरुषों के साथ (**सगणः**) समूह के सहित वर्त्तमान आप (**माध्यन्दिने**) मध्य दिन में होनेवाले (**सवने**) प्रेरणा करने में सूर्य्य के सदृश सोमलतादि ओषधि का पान करो॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो आपके मन्त्री लोग सेना, विजय, धन, राज्य, उत्तम शिक्षा, विद्या और धर्म को बढ़ावें, उनका आप निरन्तर सत्कार कर उनके साथ राज्य के सुख का सदा भोग करो॥ ३॥

पुनः के विद्वांसो भवन्तीत्याह॥

फिर कौन लोग विद्वान् होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

त इन्वस्य मधुमद्विविप्र इन्द्रस्य शर्धो मरुतो य आसन्।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म॥ ४॥

ते। इत्। नु। अस्य। मधुऽमत्। विविप्रे। इन्द्रस्य। शर्धः। मरुतः। ये। आसन्। येभिः। वृत्रस्य। इषितः। विवेद। अमर्मणः। मन्यमानस्य। मर्म॥४॥

पदार्थः-(**ते**) पूर्वोक्ताः (**इत्**) एव (**नु**) सद्यः (**अस्य**) वर्त्तमानस्य (**मधुमत्**) बहूनि मधुरादि गुणयुक्तानि वस्तूनि विद्यन्ते यस्मिंस्तत् (**विविप्रे**) क्षिपन्ति (**इन्द्रस्य**) परमैश्वर्य्ययुक्तस्य (**शर्धः**) बलम् (**मरुतः**) वायव इव वेगबलयुक्ताः (**ये**) (**आसन्**) आस्ये (**येभिः**) यैः (**वृत्रस्य**) मेघस्येव शत्रोः (**इषितः**) प्रेरितः (**विवेद**) विजानीयात् (**अमर्मणः**) अविद्यमानं मर्म यस्मिंस्तस्य (**मन्यमानस्य**) विज्ञातुः (**मर्म**) यस्मिन् प्रहते म्रियते तत्॥४॥

अन्वयः-ये मरुतोऽस्येन्द्रस्य शर्धो विविप्रे आसन्मधुमदिद्विविप्रे यो येभिरिषितो वृत्रस्येवाऽमर्मणो मर्म मन्यमानस्य विवेद ते स च नु स्वाभीष्टं प्राप्नुवन्ति॥४॥

भावार्थः-ये धनादिनैश्वर्य्येण सर्वस्य सुखं वर्धयित्वा दुःखानि निवार्य सर्वान् प्रसादयन्ति त एव धार्मिका विद्वांसो मन्तव्याः॥४॥

पदार्थः-(**ये**) जो (**मरुतः**) पवनों से सदृश वेग और बल से युक्त पुरुष (**अस्य**) इस वर्त्तमान (**इन्द्रस्य**) अत्यन्त ऐश्वर्य्य से युक्त पुरुष के (**शर्धः**) बल को (**विविप्रे**) फेंकते हैं (**आसन्**) मुख में (**मधुमत्**) बहुत मधुर आदि गुणों से युक्त वस्तुओं से पूर्ण पदार्थ को (**इत्**) ही रखते हैं जो (**येभिः**) जिन्हों से (**इषितः**) प्रेरित हुआ (**वृत्रस्य**) मेघ के सदृश शत्रु वा (**अमर्मणः**) मर्म से रहित (**मर्म**) प्रहार करने से नाश होनेवाले स्थान को (**मन्यमानस्य**) जाननेवाले को (**विवेद**) जाने (**ते**) वे पूर्व कहे हुए और वह पुरुष (**नु**) निश्चय अपने वाञ्छित बल को प्राप्त होते हैं॥४॥

भावार्थः-जो लोग धन आदि ऐश्वर्य्य से सबके सुख की वृद्धि और दुःखों का निवारण करके सब लोगों को प्रसन्न करते हैं, उनको ही धार्मिक विद्वान् मानना चाहिये॥४॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

मनुष्वदिन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि॥५॥९॥

मनुष्वत्। इन्द्र। सवनम्। जुषाणः। पिब। सोमम्। शश्वते। वीर्याय। सः। आ। ववृत्स्व। हरिऽअश्व। यज्ञैः। सरण्युऽभिः। अपः। अर्णा। सिसर्षि॥५॥

पदार्थः-(**मनुष्वत्**) मननशीलेन विदुषा तुल्यः (**इन्द्र**) परमैश्वर्यप्रद (**सवनम्**) ऐश्वर्यम् (**जुषाणः**) सेवमानः (**पिब**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सोमम्**) शरीरात्मबलविज्ञानवर्धकं महौषध्यादिरसम् (**शश्वते**) निरन्तरायाऽनादिभूताय (**वीर्याय**) बलाय (**सः**) (**आ**) (**ववृत्स्व**) वर्त्तते (**हर्यश्व**) हरणशीला

हरिता वा अश्वा व्यापनस्वभावा यस्य तत्सम्बुद्धौ अश्वाइव अग्न्यादयो विदिता येन तत्सम्बुद्धौ वा **(यज्ञैः)** विद्वत्सत्कारशिल्पक्रियाविद्यादिदानाख्यैर्व्यवहारैः **(सरण्युभिः)** आत्मनः सरणं गमनमिच्छुभिः **(अपः)** अन्तरिक्षं प्रति **(अर्णा)** अर्णांसि जलानि। अत्र **सुपां सुलुगिति** विभक्तेराकारादेशः **छान्दसो वर्णलोप** इति सलोपः। **(सिसर्षि)** गमयसि। अत्र **बहुलं छन्दसी**त्यभ्यासस्येत्वम्॥५॥

अन्वयः-हे हर्य्यश्वेन्द्र! यतस्त्वं सरण्युभिर्यज्ञैरर्णा अपः सिसर्षि तस्मात्स त्वं सवनं जुषाणः शश्वते वीर्याय सोमं पिब। मनुष्वत्सवनं जुषाणः सन्त्सोमं पिब आ ववृत्स्व॥५॥

भावार्थः-ये मनुष्या ब्रह्मचर्यविद्यासुशिक्षायुक्ताहारविहारसत्पुरुषसङ्गधर्मसेवनेन सनातनं परमात्मात्मयोगजं बलं वर्धयन्ति ते सर्वत उन्नता भवन्ति यथा सूर्यो जलमन्तरिक्षं प्रति वायुना सह क्षिपति तथैव विद्वांसः सर्वानुन्नतिं प्रति नयन्ति॥५॥

पदार्थः-**(हर्य्यश्व)** हरणकर्त्ता वा हरे रङ्ग और व्यापन स्वभाववाले घोड़ों के समान अग्नि आदि पदार्थ जिन्होंने जाने वह हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य के दाता! जिससे आप **(सरण्युभिः)** अपने शरण प्राप्त होने की इच्छायुक्त पुरुषों और **(यज्ञैः)** विद्वानों का सत्कार शिल्पक्रिया और विद्या आदि के दानरूप व्यवहारों से **(अर्णा)** जलों को **(अपः)** अन्तरिक्ष के प्रति **(सिसर्षि)** पहुंचाते हैं इससे **(सः)** वह आप **(सवनम्)** ऐश्वर्य्य के **(जुषाणः)** सेवनेवाले **(शश्वते)** निरन्तर अनादि सिद्ध **(वीर्याय)** बल के लिये **(सोमम्)** शरीर और आत्मा के बल तथा विज्ञान के बढ़ानेवाले महौषधि आदि के रस को **(पिब)** पीवो और **(मनुष्वत्)** विचार करनेवाले विद्वान् पुरुष के तुल्य ऐश्वर्य्य का सेवनेवाले शरीर और आत्मा के बल और विज्ञान के बढ़ानेवाले महौषधि आदि के रस को पीजिये तथा **(आ)** **(ववृत्स्व)** अच्छे प्रकार वर्त्ताव कीजिये॥५॥

भावार्थः-जो मनुष्य ब्रह्मचर्य, विद्या उत्तम शिक्षायुक्त, भोजन, विहार, सत्पुरुष का सङ्ग और धर्म के सेवन करने में उत्तम आत्मा और परमात्मा के योग से उत्पन्न हुए बल को बढ़ाते हैं, वे लोग सब प्रकार उन्नत होते हैं। जैसे सूर्य जल को अन्तरिक्ष के प्रति वायु के साथ ऊपर ले जाता है, वैसे ही विद्वान् लोग सम्पूर्ण जनों को प्रतिष्ठा के साथ उन्नति पर पहुँचाते हैं॥५॥

पुना राजजनाः किं कुर्य्युरित्याह॥

फिर राजपुरुष क्या करें, इस विषय को अगले मन्त्र में कहा है॥

त्वम॒पो यद्व॑ वृ॒त्रं ज॑घ॒न्वाँ अत्याँ॑इव॒ प्रास॑ृज॒ः सर्त॒वाजौ।
शया॑नमिन्द्र॒ चर॑ता व॒धेन॑ ववृ॒वांसं॒ परि॑ दे॒वीरदे॑वम्॥६॥

त्वम्। अ॒पः। यत्। ह। वृ॒त्रम्। ज॒घ॒न्वान्। अत्या॑न्ऽइव। प्र। असृ॑जः। सर्त॑वै। आ॒जौ। शया॑नम्। इ॒न्द्र॒। चर॑ता। व॒धेन॑। व॒व्रि॒ऽवांस॑म्। परि॑। दे॒वीः। अदे॑वम्॥६॥

पदार्थः-(**त्वम्**) (**अपः**) जलानि (**यत्**) यः (**ह**) किल (**वृत्रम्**) (**जघन्वान्**) हतवान् (**अत्यानिव**) अश्वानिव (**प्र, असृजः**) प्रासृज (**सर्तवै**) सर्तव्ये गन्तव्ये (**आजौ**) युद्धे। **आजाविति संग्रामनामसु पठितम्।** (निघं०२.१७) (**शयानम्**) शयानमिव वर्त्तमानम् (**इन्द्र**) शत्रुविदारक (**चरता**) प्राप्तेन (**वधेन**) (**वव्रिवांसम्**) व्रियमाणम् (**परि**) सर्वतः (**देवीः**) दिव्याः किरणाः (**अदेवम्**) प्रकाशरहितमविद्वांसं दुष्टं वा॥६॥

अन्वयः-हे इन्द्र! यद्यस्त्वं यथा सूर्य्योऽत्यानिवाऽदेवं वृत्रं जघन्वांश्चरता वधेन शयानं वव्रिवांसं देवीरपो ह प्रसृजति तथैव सर्त्तवा आजौ परि प्राऽसृजः सोऽस्माभिः सत्कर्त्तव्योऽसि॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये राजादयो वीराः सूर्य्यो मेघमिव संग्रामे प्रसृष्टैः शस्त्रास्त्रैः शत्रून् विजयन्ते त एव प्रतापवन्तो जायन्ते॥६॥

पदार्थः-हे (**इन्द्र**) शत्रुओं के नाशक! (**यत्**) जो (**त्वम्**) आपने जैसे (**अत्यानिव**) घोड़ों को सूर्य के समान (**अदेवम्**) विद्या प्रकाश से रहित अविद्वान् वा (**वृत्रम्**) दुष्ट को (**जघन्वान्**) नाश किया वा सूर्य (**चरता**) प्राप्त (**वधेन**) नाश से (**शयानम्**) सोते हुए से वर्त्तमान (**वव्रिवांसम्**) ढपे हुए को (**देवीः**) उत्तम किरणों और (**अपः**) जलों को (**ह**) निश्चय से उत्पन्न करता है, उसी प्रकार से (**सर्त्तवै**) जानने योग्य (**आजौ**) युद्ध में (**परि**) चारों ओर से (**प्र, असृजः**) उत्पन्न करते हो, वे आप हम लोगों से सत्कार पाने योग्य हैं॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो राजा आदि वीर पुरुष जैसे सूर्य मेघ को वैसे संग्राम में चलाये शस्त्र और अस्त्रों से शत्रुओं को जीतते हैं, वे ही प्रतापयुक्त होते हैं॥८॥

पुनः किं भूतस्येश्वरस्योपासना कार्येत्युच्यते॥

फिर कैसे ईश्वर की उपासना करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

यजा॑म॒ इन्नम॑सा वृ॒द्धमिन्द्र॑ बृ॒हन्त॑मृ॒ष्वम॒जरं॒ युवा॑नम्।
यस्य॑ प्रि॒ये म॒मतु॑र्य॒ज्ञिय॑स्य॒ न रोद॑सी महि॒मान॑ं म॒माते॑॥७॥

यजा॑मः। इत्। नम॑सा। वृ॒द्धम्। इन्द्र॑म्। बृ॒हन्त॑म्। ऋ॒ष्वम्। अ॒जर॑म्। युवा॑नम्। यस्य॑। प्रि॒ये इति॑। म॒मतुः॑। य॒ज्ञिय॑स्य। न। रोद॑सी॒ इति॑। म॒हि॒मान॑म्। म॒माते॒ इति॑॥७॥

पदार्थः-(**यजामः**) पूजयामः (**इत्**) एव (**नमसा**) सत्कारेण (**वृद्धम्**) भुक्ताऽऽयुष्कं विद्यया महान्तं वा (**इन्द्रम्**) परमैश्वर्यकारकम् (**बृहन्तम्**) (**ऋष्वम्**) महान्तम्। **ऋष्व इति महन्नामसु पठितम्।** (निघं०३.३) (**अजरम्**) जरारहितम् (**युवानम्**) सर्वस्य जगतः संयोजकं विभाजकं च (**यस्य**) (**प्रिये**)

कमनीये प्रीतिकारके **(ममतुः)** परिमीयेते **(यज्ञियस्य)** पूजनाऽर्हस्य **(न)** निषेधे **(रोदसी)** द्यावापृथिव्यौ **(महिमानम्)** महत्त्वम् **(ममाते)** मिमाते परिच्छिन्तः। अत्र **बहुलं छन्दसी**त्यभ्यासेत्त्वप्रतिषेधः॥७॥

अन्वयः-हे मनुष्या! वयं यस्य यज्ञियस्य परमेश्वरस्य महिमानं रोदसी न ममाते प्रिये ऐहिकपारलौकिकसुखे च न ममतुस्तमिद्युवानमजरमृष्वं बृहन्तं वृद्धमिन्द्रं नमसा यजामस्तं यूयमपि पूजयत॥७॥

भावार्थः-यस्य परमेश्वरस्य कश्चित्पदार्थस्तुल्योऽधिको वा न विद्यते यः सर्वेषां गुरुर्व्यापकोऽविनाशी पूज्यो वर्त्तते तमेव परमात्मनं वयं सततमुपासीमहि॥७॥

पदार्थः-हे मनुष्यो! हम लोग **(यस्य)** जिस **(यज्ञियस्य)** पूजा अर्थात् प्रीति करने योग्य परमेश्वर के **(महिमानम्)** महत्तत्त्व को **(रोदसी)** अन्तरिक्ष और पृथिवी **(न)** नहीं **(ममाते)** नाप सकते और **(प्रिये)** प्रीति करानेवाले इस लोक और परलोक के सुखों ने नहीं **(ममतुः)** नापे हैं **(इत्)** उसी **(युवानम्)** सम्पूर्ण संसार के संयोग और विभाग के करनेवाले **(अजरम्)** बुढ़ापे से रहित **(ऋष्वम्)** श्रेष्ठ **(बृहन्तम्)** बड़े **(वृद्धम्)** आयु को भोगे हुए वा विद्या से श्रेष्ठ **(इन्द्रम्)** परम ऐश्वर्य्य करनेवाले परमेश्वर की **(नमसा)** सत्कार से **(यजामः)** पूजा करते हैं, उसकी तुम लोग भी पूजा करो॥७॥

भावार्थः-जिस परमेश्वर की अपेक्षा कोई पदार्थ तुल्य वा अधिक नहीं, जो सबसे श्रेष्ठ, व्यापक, विनाशरहित और पूज्य है, उसी परमात्मा की हम लोग निरन्तर उपासना करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्र॑स्य॒ कर्म॑ सु॒कृ॑ता पु॒रूणि॑ व्र॒तानि॑ दे॒वा न मि॑न॒न्ति॒ विश्वे॑।
दा॒धार॒ यः पृ॑थि॒वीं द्याmu॒तेमां ज॒जान॒ सूर्यं॑मु॒षस॑ꣳ सु॒दंसाः॥८॥

इन्द्र॑स्य। कर्म॑। सुऽकृ॑ता। पु॒रूणि॑। व्र॒तानि॑। दे॒वाः। न। मि॒न॒न्ति॒। विश्वे॑। दा॒धार॑। यः। पृ॒थि॒वीम्। द्याम्। उ॒त। इ॒माम्। ज॒जान॑। सूर्य॑म्। उ॒षस॑म्। सु॒ऽदंसाः॥८॥

पदार्थः-**(इन्द्रस्य)** परमात्मनः **(कर्म)** कर्माणि **(सुकृता)** सुकृतानि **(पुरूणि)** **(व्रतानि)** सत्याचरणानि **(देवाः)** पृथिव्यादयो विद्वांसो वा **(न)** निषेधे **(मिनन्ति)** हिंसन्ति **(विश्वे)** सर्वे **(दाधार)** धरति पुष्णाति वा **(यः)** **(पृथिवीम्)** भूमिम् **(द्याम्)** प्रकाशात्मकलोकादिकम् **(उत)** अपि **(इमाम्)** प्रत्यक्षाम् **(जजान)** जनयति **(सूर्य्यम्)** सवितारम् **(उषसम्)** दिनम् **(सुदंसाः)** शोभनानि धर्म्याणि दंसांसि कर्माणि यस्य सः॥८॥

अन्वयः-हे मनुष्या! यः सुदंसाः परमेश्वर इमां पृथिवीं द्यां सूर्य्यमुतोषसं जजान दाधार यस्येन्द्रस्य विश्वे देवा व्रतानि सुकृता पुरूणि कर्म न मिनन्ति तमेव यूयं वयं चोपासीमहि॥८॥

भावार्थः-परमेश्वरस्य पवित्रत्वात् सर्वशक्तिमतः सर्वस्य जनकस्य धातुः स्वरूपपरिमितं सामर्थ्यं कर्म वा कोऽपि हिंसितुं न शक्नोति य त्वं सत्यभावेनोपासते तेऽपि पवित्राः सन्तः समर्था जायन्ते॥८॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(सुदंसाः)** सुन्दर धर्म सम्बन्धी कर्मों से युक्त परमेश्वर **(इमाम्)** इस **(पृथिवीम्)** भूमि और **(द्याम्)** प्रकाशस्वरूप आदि लोक को तथा **(सूर्यम्)** सूर्य लोक को **(उत)** और भी **(उषसम्)** दिन को **(जजान)** उत्पन्न करता **(दाधार)** धारण करता वा पुष्ट करता है, जिस **(इन्द्रस्य)** परमात्मा के **(विश्वे)** सम्पूर्ण **(देवाः)** पृथिवी आदि वा विद्वान् लोग **(व्रतानि)** सत्य विचारों को **(सुकृता)** उत्तम **(पुरूणि)** बहुत **(कर्म)** कामों को **(न)** नहीं **(मिनन्ति)** नाश करते हैं, उसकी आप और हम लोग उपासना करें॥८॥

भावार्थः-परमेश्वर के पवित्र होने से सम्पूर्ण सामर्थ्ययुक्त सबके उत्पन्न वा धारणकर्त्ता परमेश्वर के स्वरूपपरिमित सामर्थ्य वा कर्म को कोई भी नाश नहीं कर सकता है और जो लोग इस परमेश्वर की सत्यभावना से उपासना करते हैं, वे भी पवित्र होकर सामर्थ्ययुक्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

अद्रो॑घ स॒त्यं तव॒ तन्म॑हि॒त्वं स॒द्यो य॒ज्जा॒तो अपि॑बो ह॒ सोम॑म्।
न द्याव॑ इन्द्र त॒वस॑स्त॒ ओजो॒ नाहा॒ न मासा॑: शर॒दो॑ वरन्त॥९॥

अद्रो॑घ। स॒त्यम्। तव॑। तत्। म॒हि॒ऽत्वम्। स॒द्यः। यत्। जा॒तः। अपि॑बः। ह॒। सोम॑म्। न। द्याव॑ः। इ॒न्द्र॒। त॒वस॑ः। ते॒। ओज॑ः। न। अहा॑। न। मासा॑ः। श॒रद॑ः। व॒र॒न्त॒॥९॥

पदार्थः-**(अद्रोघ)** द्रोहरहित **(सत्यम्)** सत्यभाषणादिक्रियोज्ज्वलम् **(तव)** **(तत्)** सः **(महित्वम्)** महिमानम् **(सद्यः)** **(यत्)** यः **(जातः)** प्रकटः **(अपिबः)** पिबति **(ह)** किल **(सोमम्)** सर्वस्माज्जगतो रसम् **(न)** **(द्यावः)** प्रकाशमया लोकाः **(इन्द्र)** परमैश्वर्य्यप्रद **(तवसः)** बलस्य **(ते)** तव **(ओजः)** पराक्रमम् **(न)** **(अहा)** अहानि दिनानि **(न)** निषेधे **(मासाः)** चैत्रादयः **(शरदः)** वसन्तादयः **(वरन्त)** वारयन्ति॥९॥

अन्वयः-हे अद्रोघेन्द्र जगदीश्वर! यद्यः सद्यो जातः सूर्यः सोममपिबस्तद्यस्य तव सत्यं महित्वं नोल्लङ्घयति ते तवस ओजो न द्यावो नाहा न मासाः शरदश्च वरन्त तं ह भवन्तं वयं निरन्तरं सेवेमहि॥९॥

भावार्थः-हे मनुष्या! यथा परमेश्वरः कञ्चिन्न दुह्यति तथा यूयमपि भवत यस्य सृष्टौ सूर्य्यादयो महान्तः पदार्था विद्यन्ते यस्य स्वरूपस्य प्रभावस्य वान्तं कोऽपि न गच्छति स एवाऽस्माकमिष्ट-देवोऽस्ति॥९॥

पदार्थः-हे **(अद्रोघ)** द्रोह से रहित **(इन्द्र)** अत्यन्त ऐश्वर्य के दाता जगदीश्वर! **(यत्)** जो **(सद्यः)** तत्काल **(जातः)** प्रकट हुआ सूर्य **(सोमम्)** सब जगत् से रस को **(अपिबः)** पीता-खींचता है **(तत्)** वह जिन **(तव)** आपके **(सत्यम्)** सत्य **(महित्वम्)** महिमा को **(न)** नहीं उल्लङ्घन कर सकता है **(ते)** आपके **(तवसः)** बल के **(ओजः)** प्रभाव को न **(द्यावः)** प्रकाशस्वरूप लोक **(न)** न **(अहा)** दिन **(न)** न **(मासाः)** चैत्र आदि महीने और न **(शरदः)** वसन्त आदि ऋतुएँ **(वरन्त)** वारण करती हैं **(ह)** उन्हीं आपकी हम लोग निरन्तर सेवा करें॥९॥

भावार्थः-हे मनुष्यो! जैसे परमेश्वर किसी से द्रोह नहीं करता है, वैसे आप लोग भी हूजिये। जिस परमेश्वर की सृष्टि में सूर्य्य आदि बड़े-बड़े पदार्थ विद्यमान हैं और जिसके स्वरूप वा प्रभाव के अन्त को कोई भी नहीं प्राप्त होता है, वही हम लोगों का इष्टदेव है॥९॥

कथं जन्मनः साफल्यं स्यादित्याह॥

किस प्रकार जन्म की सफलता हो, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं सद्यो अपिबो जात इन्द्र मदाय सोमं परमे व्योमन्।
यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः॥१०॥१०॥

त्वम्। सद्यः। अपिबः। जातः। इन्द्र। मदाय। सोमम्। परमे। विऽओमन्। यत्। ह। द्यावापृथिवी इति। आ। अविवेशीः। अथ। अभवः। पूर्व्यः। कारुऽधायाः॥१०॥

पदार्थः-(**त्वम्**) (**सद्यः**) शीघ्रम् (**अपिबः**) पिबसि (**जातः**) उत्पन्नः सन् (**इन्द्र**) इन्द्रियाऽधिष्ठातर्जीव (**मदाय**) आनन्दाय (**सोमम्**) बलबुद्धिवर्धकं रसम् (**परमे**) सर्वोत्कृष्टे (**व्योमन्**) व्यापके (**यत्**) यः (**ह**) किल (**द्यावापृथिवी**) प्रकाशभूमी (**आ**) समन्तात् (**अविवेशीः**) पुनः पुनराविश (**अथ**) आनन्तर्ये (**अभवः**) भवेः (**पूर्व्यः**) पूर्वैः कृतः (**कारुधायाः**) यः कारून् शिल्पीन् दधाति सः॥१०॥

अन्वयः-हे इन्द्र! त्वं परमे व्योमन् सद्यो जातः सन् मदाय सोममपिबोऽथ यद्यः पूर्व्यः कारुधाया अभवः स त्वं ह द्यावापृथिवी आविवेशीः॥१०॥

भावार्थः-हे मनुष्या! ब्रह्मचर्येण शीघ्रं विद्वांसो भूत्वा युक्ताऽऽहारविहारणोऽरोगाः सन्तः परमात्मन्यासीनाः सृष्टिपदार्थविद्यासु सर्वे प्रविशन्तु येन जन्मसाफल्यं स्यात्॥१०॥

पदार्थः-हे **(इन्द्र)** इन्द्रियों के अधिष्ठाता जीव! **(त्वम्)** आप **(परमे)** उत्तम **(व्योमन्)** आकाशवत् व्यापक आत्मज्ञान में **(सद्यः)** शीघ्र **(जातः)** प्रकट वा प्रसिद्ध हुए **(मदाय)** आनन्द के लिये **(सोमम्)** बल और बुद्धि को बढ़ानेवाले रस को **(अपिबः)** पीते हैं **(अथ)** इसके अनन्तर **(यत्)** जो **(पूर्व्यः)** पूर्व लोगों में श्रेष्ठ **(कारुधायाः)** शिल्पी जनों का धारणकर्त्ता **(अभवः)** हो वह आप **(ह)** निश्चय से **(द्यावापृथिवी)** प्रकाश और भूमि में **(आ)** सब ओर से **(आविवेशीः)** बारम्बार प्रवेश कीजिये॥१०॥

भावार्थः-हे मनुष्यो! ब्रह्मचर्य्य से शीघ्र विद्वान् और नियमित आहार-विहार से रोगरहित होके परमात्मा की आराधना करते हुए सृष्टि और पदार्थ विद्याओं में आप सब प्रवेश करें, जिससे जन्म की सफलता हो॥१०॥

पुना राजपुरुषाः किं कुर्य्युरित्याह॥

फिर राजपुरुष क्या करें, इस विषय को अगले मन्त्र में कहा है॥

अहन्नहिं परिशयानमर्णो ओजायमानं तुविजात तव्यान्।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः॥११॥

अहन्। अहिम्। परिऽशयानम्। अर्णः। ओजायमानम्। तुविऽजात। तव्यान्। न। ते। महिऽत्वम्। अनु। भूत्। अध। द्यौः। यत्। अन्यया। स्फिग्या। क्षाम्। अवस्थाः॥११॥

पदार्थः-(**अहन्**) हन्ति **(अहिम्)** मेघम् **(परिशयानम्)** सर्वत आकाशे शयानमिव वर्त्तमानम् **(अर्णः)** उदकम् **(ओजायमानम्)** बलयन्तम् **(तुविजात)** बहुषु प्रसिद्ध **(तव्यान्)** अतिशयेन बलवान्। अत्रेयसुन् ईकारलोपः। **(न)** **(ते)** तव **(महित्वम्)** महत्त्वम् **(अनु)** **(भूत्)** भवेत् **(अध)** अथ **(द्यौः)** प्रकाशः **(यत्)** यः **(अन्यया)** **(स्फिग्या)** मध्यस्थावयवरूपया **(क्षाम्)** पृथिवीम् **(अवस्थाः)** वस्ते॥११॥

अन्वयः-हे तुविजात! तव्यान् यद्यस्त्वं यथा द्यौरोजायमानं परिशयानमहिमहन्नर्णो निपातयति यथा सूर्य्यस्य महित्वमनुभूद्यथाऽयं मेघोऽधान्यया स्फिग्या क्षामाच्छादयति तथा त्वं शत्रूनवस्था यतस्ते महित्वं न छिन्द्युः॥११॥

भावार्थः-हे राजपुरुषा! यथा सूर्योऽन्तरिक्षगतं बलायमानं हत्वा भूमौ निपात्य तज्जलेन प्राणिनः पोषयति तथैवाऽधर्मिष्ठं शत्रुं हत्वा तद्वैभवेन राज्यं पालयत॥११॥

पदार्थः-हे **(तुविजात)** बहुत लोगों में प्रसिद्ध **(तव्यान्)** अत्यन्त बलयुक्त! **(यत्)** जो आप जैसे **(द्यौः)** सूर्यप्रकाश **(ओजायमानम्)** बल को प्राप्त होते हुए **(परिशयानम्)** सब ओर से आकाश में सोते जैसे वर्त्तमान **(अहिम्)** मेघ को **(अहन्)** नाश करता है **(अर्णः)** जल को गिराता है और जैसे सूर्य्य का **(महित्वम्)** बड़ापन **(अनु)** **(भूत्)** हो वा जैसे यह मेघ **(अध)** तदनन्तर **(अन्यया)** दूसरी **(स्फिग्या)** मध्य के अवयवरूप से **(क्षाम्)** पृथिवी को ढांपता है, वैसे आप शत्रुओं को **(अवस्थाः)** घेर के वर्त्तमान हूजिये जिससे **(ते)** वे आपकी महिमा को **(न)** नहीं काटें॥११॥

भावार्थः-हे राजपुरुषो! जैसे सूर्य्य अन्तरिक्ष में वर्त्तमान बलवान् मेघ का नाश और भूमि में गिरा कर उसके जल से प्राणियों का पोषण करता है, वैसे ही अधर्म में वर्त्तमान शत्रु का नाश करके उसके ऐश्वर्य्य से राज्य का पालन करो॥११॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

यज्ञो हि त इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः।
यज्ञेन यज्ञमव यज्ञियः सन् यज्ञस्ते वज्रमहिहत्य आवत्॥१२॥

यज्ञः। हि। ते। इन्द्र। वर्धनः। भूत्। उत। प्रियः। सुतऽसोमः। मियेधः। यज्ञेन। यज्ञम्। अव। यज्ञियः। सन्। यज्ञः। ते। वज्रम्। अहिऽहत्ये। आवत्॥१२॥

पदार्थः-(**यज्ञः**) सङ्गन्तव्यो व्यवहारः (**हि**) यतः (**ते**) तव (**इन्द्र**) परमैश्वर्य्यप्रापक (**वर्धनः**) उन्नेता (**भूत्**) भवति (**उत**) अपि (**प्रियः**) प्रीतिसम्पादकः (**सुतसोमः**) सुतं निष्पन्नं सोम ऐश्वर्य्यं यस्मात्सः (**मियेधः**) येन मिनोति दुःखं प्रक्षिपति सः। अत्र बहुलकादौणादिक एध प्रत्ययः। (**यज्ञेन**) सङ्गतेन कर्मणा (**यज्ञम्**) सङ्गन्तव्यं व्यवहारम् (**अव**) रक्ष (**यज्ञियः**) यज्ञेषु कुशलः (**सन्**) (**यज्ञः**) सङ्गतो व्यवहारः (**ते**) तव (**वज्रम्**) शस्त्रविशेषम् (**अहिहत्ये**) अहेर्मेघस्य हत्या हननं पतनं येन तस्मिन्। निमित्तार्थेऽत्र सप्तमी। (**आवत्**) रक्षेत्॥१२॥

अन्वयः-हे इन्द्र! हि यतस्तेऽहिहत्ये वर्षकर्मनिमित्तो यज्ञो वर्धनः सुतसोमो मियेध उत प्रियो भूत्। यस्य ते यज्ञो वज्रमावत् स यज्ञियः संस्त्वं यज्ञेन यज्ञमव॥१२॥

भावार्थः-हे मनुष्या! यूयं यदि सत्क्रियया सत्क्रिया वर्धयेत् तर्हि यूयं रक्षिताः सन्तोऽन्यानपि रक्षितुमर्हत॥१२॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के प्राप्त करानेवाले (**हि**) जिससे कि (**ते**) आपका (**अहिहत्ये**) वर्षा का निमित्त (**यज्ञः**) पदार्थों का संयोग करना रूप व्यवहार (**वर्धनः**) उन्नतिकर्त्ता (**सुतसोमः**) ऐश्वर्य्य की उत्पत्तिकर्त्ता (**मियेधः**) दुःख का नाशकर्त्ता (**उत**) और भी (**प्रियः**) प्रीति का उत्पत्ति करनेवाला (**भूत्**) होता है जिन (**ते**) आपका (**यज्ञः**) पदार्थों का मेल करना रूप व्यवहार (**वज्रम्**) शस्त्र विशेष की (**आवत्**) रक्षा करे वह (**यज्ञियः**) यज्ञों में चतुर (**सन्**) हुए आप (**यज्ञेन**) सङ्गत कर्म से (**यज्ञम्**) सङ्गत व्यवहार की (**अव**) रक्षा करो॥१२॥

भावार्थः-हे मनुष्यो! आप लोग जो उत्तम क्रिया से उत्तम क्रियाओं को बढ़ावें तो आप लोग रक्षित हुए अन्य जनों की भी रक्षा करने के योग्य होवें॥१२॥

अथ कीदृशा जनाः सुखमाप्तुमर्हन्तीत्याह॥

अब कैसे मनुष्य सुख को प्राप्त हो सकते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

यज्ञेनेन्द्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्याम्।
यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः॥ १३॥

यज्ञेन। इन्द्रम्। अवसा। आ। चक्रे। अर्वाक्। आ। एनम्। सुम्नाय। नव्यसे। ववृत्याम्। यः। स्तोमेभिः। ववृधे। पूर्व्येभिः। यः। मध्यमेभिः। उत। नूतनेभिः॥ १३॥

पदार्थः-(**यज्ञेन**) युक्तेन व्यवहारेण (**इन्द्रम्**) परमैश्वर्य्यम् (**अवसा**) रक्षणाद्येन (**आ**) (**चक्रे**) समन्तात् करोति (**अर्वाक्**) पश्चात् (**आ**) (**एनम्**) (**सुम्नाय**) सुखाय (**नव्यसे**) अतिशयेन नवीनाय (**ववृत्याम्**) वर्त्तयेयम्। अत्र व्यत्ययेन परस्मैपदं **बहुलं छन्दसी**ति शपः श्लुः। (**यः**) (**स्तोमेभिः**) प्रशंसितैः कर्मभिः (**वावृधे**) वर्धते। अत्र**ान्येषामपी**त्यभ्यासदीर्घः। (**पूर्व्येभिः**) पूर्वेषु साधुभिः (**यः**) (**मध्यमेभिः**) मध्ये भवैः (**उत**) (**नूतनेभिः**) नवीनैः॥ १३॥

अन्वयः-हे मनुष्या! यथाऽहं यः पूर्व्येभिर्मध्यमेभिरुत नूतनेभिः स्तोमेभिर्वावृधे यो नव्यसे सुम्नाय यज्ञेनावसेन्द्रमा चक्रे। अर्वागेनं रक्षति तमाववृत्यां तथा भवन्तोऽप्येतत्कर्माऽनुतिष्ठन्तु॥ १३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! अतीतव्यवहारशेषज्ञतया मध्यमानां रक्षणेन नूतनेन प्रयत्नेन वर्धन्ते तेऽग्रे नवीनं नवीनं सुखं सम्पत्तुमर्हन्ति नेतरेऽलसा मूढाः॥ १३॥

पदार्थः-हे मनुष्यो! जैसे मैं (**यः**) जो (**पूर्व्येभिः**) प्राचीनों में कुशल और (**मध्यमेभिः**) बीच में हुए (**उत**) और भी (**नूतनेभिः**) नवीन (**स्तोमेभिः**) प्रशंसायुक्त कर्मों से (**वावृधे**) बढ़ता है (**यः**) जो (**नव्यसे**) नवीन (**सुम्नाय**) सुख के लिये (**यज्ञेन**) युक्त व्यवहार (**अवसा**) रक्षा आदि से (**इन्द्रम्**) अत्यन्त ऐश्वर्य्य को (**आ चक्रे**) अच्छा करता है (**अर्वाक्**) पीछे (**एनम्**) इसकी रक्षा करता है, उसके समीप (**आ**) (**ववृत्याम्**) प्राप्त होऊं, वैसे आप लोग भी इस कर्म को करें॥ १२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य व्यतीत हुए व्यवहार के शेष मर्म को जानने, मध्यम पुरुषों की रक्षा करने और नवीन प्रयत्न से वृद्धि को प्राप्त होते हैं, वे लोग उससे अनन्तर नवीन-नवीन सुख को प्राप्त होने योग्य होते हैं, न कि अन्य आलस्ययुक्त और मूर्ख पुरुष॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः।
अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते॥ १४॥

विवेष। यत्। मा। धिषणा। जजान। स्तवै। पुरा। पार्यात्। इन्द्रम्। अह्नः। अंहसः। यत्र। पीपरत्। यथा। नः। नावाऽइव। यान्तम्। उभये। हवन्ते॥ १४॥

पदार्थः-(**विवेष**) व्याप्नोति (**यत्**) या (**मा**) माम् (**धिषणा**) वाणी (**जजान**) जनयति (**स्तवै**) प्रशंसानि (**पुरा**) (**पार्यात्**) पारं गमयेत् (**इन्द्रम्**) ऐश्वर्य्यम् (**अह्नः**) दिवसात् (**अंहसः**) अपराधात् (**यत्र**) यस्मिन् व्यवहारे (**पीपरत्**) पारयेत् (**यथा**) येन प्रकारेण (**नः**) अस्मभ्यम् (**नावेव**) नौवत् (**यान्तम्**) गच्छन्तम् (**उभये**) दूरसमीपस्था जनाः (**हवन्ते**) आह्वयन्ते॥ १४॥

अन्वयः-हे मनुष्या! यद्या धिषणा मा विवेष जजान तामहं स्तवै याह्न इन्द्रं पुरा पार्याद् यत्रांऽहसो मां पीपरद्यथा नो यान्तमुभये नावेव हवन्ते तथा नोऽस्मान् सर्व आह्वयन्तु॥ १४॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैः सा वाणी प्रज्ञा च संग्राह्या या सर्वदा दुष्टाचारात् पृथग्रक्ष्य दुःखान्नौवत् पारं नयेत्॥ १४॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**धिषणा**) वाणी (**मा**) मुझको (**विवेष**) व्याप्त होती और (**जजान**) उत्पन्न करती है, उसकी मैं (**स्तवै**) प्रशंसा करूं जो (**अह्नः**) दिन से (**इन्द्रम्**) ऐश्वर्य को (**पुरा**) प्रथम (**पार्यात्**) पार पहुँचावे वा (**यत्र**) जिस व्यवहार में (**अंहसः**) अपराध से मुझको (**पीपरत्**) पार लगावे वा (**यथा**) जिस प्रकार से (**नः**) हम लोगों के अर्थ (**यान्तम्**) जाते हुए को (**उभये**) दूर और समीप में वर्त्तमान लोग (**नावेव**) नौका के सदृश (**हवन्ते**) पुकारते हैं, वैसे हम लोगों को सब लोग पुकारें॥ १४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि उस वाणी और बुद्धि को ग्रहण करें जो सब समय में दुष्ट आचारण से पृथक् रख के दुःख से नौका के सदृश पार उतारे॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै।
सम् प्रिया आववृत्रन् मदाय प्रदक्षिणिदभि सोमास इन्द्रम्॥ १५॥

आऽपूर्णः। अस्य। कलशः। स्वाहा। सेक्ताऽइव। कोशम्। सिसिचे। पिबध्यै। सम्। ऊम् इति। प्रियाः। आ। अववृत्रन्। मदाय। प्रऽदक्षिणित्। अभि। सोमासः। इन्द्रम्॥ १५॥

पदार्थः-(**आपूर्णः**) समन्तात् पूरितः (**अस्य**) (**कलशः**) कुम्भः (**स्वाहा**) सत्यया क्रियया (**सेक्तेव**) पूरकवत् (**कोशम्**) मेघम्। **कोश इति मेघनामसु पठितम्।** (निघं०१.१०) (**सिसिचे**) सिञ्चति (**पिबध्यै**) पातुम् (**सम्**) (उ) (**प्रियाः**) कमनीयाः (**आ**) समन्तात् (**अववृत्रन्**) आवृण्वन्ति (**मदाय**)

आनन्दाय (**प्रदक्षिणित्**) यः प्रदक्षिणमेति सः। अत्र **शकन्ध्वादे**राकृतिगणत्वात् पररूप-मेकादेशः। (**अभि**) आभिमुख्ये (**सोमासः**) ऐश्वर्य्ययुक्ताः (**इन्द्रम्**) सूर्य्यम्॥१५॥

अन्वयः-ये सोमासः प्रिया मदायेन्द्रमभ्याववृत्रन् त उ अस्य जगतो मध्ये पिबध्यै सेक्तेव कोशं सं सिसिचे स्वाहा आपूर्णः कलशः प्रदक्षिणिदापूर्णः कलश इव सुखकरो जायते॥१५॥

भावार्थः-ये धनादिकं प्राप्यान्येभ्यो यथा सुपात्रं सद्व्यवहारं च विज्ञाय ददति ते सेक्ता कुम्भमिव सर्वान् पूर्णसुखान् कुर्वन्ति॥१५॥

पदार्थः-जो (**सोमासः**) ऐश्वर्य्य से युक्त (**प्रियाः**) कामना करने योग्य (**मदाय**) आनन्द के लिये (**इन्द्रम्**) सूर्य्य को (**अभि**) सम्मुख (**आ**) चारों ओर से (**अववृत्रन्**) घेरते हैं वे (**उ**) (**अस्य**) इस संसार के मध्य में (**पिबध्यै**) पान करने के लिये (**सेक्तेव**) पूर्ण करनेवाले के तुल्य (**कोशम्**) मेघ को (**सम्**) (**सिसिचे**) सींचते हैं (**स्वाहा**) सत्य क्रिया से (**आपूर्णः**) चारों ओर से भरा हुआ (**कलशः**) घड़ा (**प्रदक्षिणित्**) दाहिनी ओर चलनेवाला पूर्ण घड़े के तुल्य सुखकारक होता है॥१५॥

भावार्थः-जो लोग धन आदि को प्राप्त होके औरों के लिये सुपात्र और उत्तम व्यवहार करनेवाले को जान के देते हैं, वे लोग सींचनेवाला घड़े को जैसे वैसे सम्पूर्ण जनों को पूर्ण सुखयुक्त करते हैं॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

न त्वा॑ गभी॒रः पु॑रुहूत सिन्धु॒र्नाद्र॑यः॒ परि॒ षन्तो॑ वरन्त।
इ॒त्था सखि॑भ्यः इषि॒तो यदि॒न्द्रा दृ॒ळ्हं चि॒दरु॑जो॒ गव्य॑मू॒र्वम्॥१६॥

न। त्वा॒। ग॒भी॒रः। पु॒रु॒ऽहू॒त॒। सिन्धुः॑। न। अद्र॑यः। परि॑। सन्तः॑। व॒र॒न्त॒। इ॒त्था। सखि॑ऽभ्यः। इ॒षि॒तः। यत्। इ॒न्द्र॒। आ। दृ॒ळ्हम्। चि॒त्। अरु॑जः। गव्य॑म्। ऊ॒र्वम्॥१६॥

पदार्थः-(**न**) निषेधे (**त्वा**) त्वाम् (**गभीरः**) गाम्भीर्यगुणोपेतः (**पुरुहूत**) बहुभिः प्रशंसित (**सिन्धुः**) समुद्रः (**न**) (**अद्रयः**) मेघाः पर्वता वा (**परि**) सर्वतः (**सन्तः**) (**वरन्त**) वारयन्ति (**इत्था**) अनेन प्रकारेण (**सखिभ्यः**) मित्रेभ्यः (**इषितः**) प्रेरितः (**यत्**) यः (**इन्द्र**) परमैश्वर्यप्रद (**आ**) समन्तात् (**दृढम्**) स्थिरम् (**चित्**) (**अरुजः**) रुजति (**गव्यम्**) गवामिदम् (**ऊर्वम्**) निरोधस्थानम्॥१६॥

अन्वयः-हे पुरुहूतेन्द्र राजन्! यं त्वा गभीरः सिन्धुर्न परि वरन्ताऽद्रयः सन्तो न परि वरन्त यद्यश्चिद् दृढं गव्यमूर्वमारुजः स सखिभ्य इषितस्त्वमित्था केनासत्कर्त्तव्यो भवेः॥१६॥

भावार्थः-हे विद्वांसो! यथा समुद्राः पर्वताश्च सूर्य्यं निवारयितुं न शक्नुवन्ति तथैव बहुमित्राः शत्रुभिर्निरोद्धुमशक्या जायन्ते॥१६॥

पदार्थः-हे **(पुरुहूत)** बहुतों से प्रशंसा किये गये **(इन्द्र)** अत्यन्त ऐश्वर्य्य के दाता राजन्! जिन **(त्वा)** आपको **(गभीरः)** गाम्भीर्य गुणों से युक्त **(सिन्धुः)** समुद्र **(न)** नहीं **(परि)** सब ओर से **(वरन्त)** वारण करते हैं, **(अद्रयः)** मेघ वा पर्वत **(सन्तः)** वर्त्तमान होते हुए **(न)** नहीं सब ओर से वारण करते हैं, **(यत्)** जो **(दृढम्)** स्थिर **(चित्)** भी **(गव्यम्)** गौओं का **(ऊर्वम्)** निरोधस्थान का **(आ, अरुजः)** भङ्ग करते हो, वह **(सखिभ्यः)** मित्रों के लिये **(इषितः)** प्रेरित हुए आप **(इत्था)** इस प्रकार किस जन से सत्कार नहीं करने योग्य होवें॥१६॥

भावार्थः-हे विद्वान् लोगो! जैसे समुद्र और पर्वत सूर्य्य को निवारण नहीं कर सकते, वैसे ही बहुत मित्रोंवाले जन शत्रुओं से निवारण करने के शक्य नहीं होते हैं॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।

शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ १७॥ ११॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥ १७॥

पदार्थः-**(शुनम्)** सुखम्। **शुनमिति सुखनामसु पठितम्।** (निघं०३.६) **(हुवेम)** आह्वयेम **(मघवानम्)** परमधनवन्तम् **(इन्द्रम्)** दुष्टविदारकम् **(अस्मिन्)** **(भरे)** संग्रामे **(नृतमम्)** शुभैर्गुणैः सर्वोत्कृष्टम् **(वाजसातौ)** धनान्नादिविभाजके **(शृण्वन्तम्)** **(उग्रम्)** तेजस्वभावम् **(ऊतये)** रक्षणाद्याय **(समत्सु)** संग्रामेषु **(घ्नन्तम्)** हन्तारम् **(वृत्राणि)** सुवर्णादीनि धनानि। **वृत्रमिति धननामसु पठितम्।** (निघं०२.१०) **(सञ्जितम्)** सम्यग्जिताः शत्रवो येन तम् **(धनानाम्)** द्रव्याणाम्॥१७॥

अन्वयः-हे मनुष्या! यथा वयमूतये समत्सु घ्नन्तमुग्रं धनानां सञ्जितं वृत्राणि शृण्वन्तमस्मिन् वाजसातौ भरे नृतमं मघवानमिन्द्रं हुवेम तत्सङ्गेन शुनं प्राप्नुयाम तथैतं स्तुत्वा यूयमप्येतत्प्राप्नुत॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि राजादयोऽध्यक्षा राजविद्याकुशलान् योद्धॄन् न्यायाधीशान् प्राड्विवाकान् सेवकाँश्च सत्कृत्य संगृह्णीयुस्तर्हि तेषां सदैव विजयः कीर्तिरैश्वर्य्यं च जायत इति॥१७॥

अत्र सोममनुष्येश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वात्रिंशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(ऊतये)** रक्षा आदि के लिये **(समत्सु)** संग्रामों में **(घ्नन्तम्)**

नाश करनेवाले **(उग्रम्)** तेजस्वभावयुक्त **(धनानाम्)** द्रव्यों के **(सञ्जितम्)** और उत्तम प्रकार शत्रुओ को जीतनेवाले **(वृत्राणि)** सुवर्ण आदि धनों को **(शृण्वन्तम्)** सुनते हुए को **(अस्मिन्)** इस **(वाजसातौ)** धन और अन्न आदि के विभाग करनेवाले **(भरे)** संग्राम में **(नृतमम्)** उत्तम गुणों से सर्वोत्तम **(मघवानम्)** परम धनवान् और **(इन्द्रम्)** दुष्ट जनों के नाशकर्त्ता को **(हुवेम)** पुकारें और उसके सङ्ग से **(शुनम्)** सुख को प्राप्त होवें, वैसे इसकी स्तुति करके आप लोग भी इसको प्राप्त हों॥१७॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा आदि प्रधान पुरुष, राजविद्या में चतुर, योद्धा, न्यायाधीश पुरुषों, प्राड्विवाकों (वकीलों) और सेवक पुरुषों का सत्कार करके ग्रहण करें तो उन राजाओं का सदैव विजय, यश, कीर्त्ति और ऐश्वर्य्य होता है॥१७॥

इस मन्त्र **[**=सूक्त**]** में सोम, मनुष्य, ईश्वर और बिजुली के गुण वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बत्तीसवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

अथ त्रयोदशर्चस्य त्रयस्त्रिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। नद्यो देवताः। १ भुरिक् पङ्क्तिः। ५ स्वराट् पङ्क्तिः। ७ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, १० विराट् त्रिष्टुप्। ३, ८, ११, १२ त्रिष्टुप्। ४, ६, ९ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। १३ उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ नदीदृष्टान्तेन स्त्रीवर्णनमाह॥

अब तेरह ऋचावाले तैंतीसवे सूक्त का आरम्भ है। उसके पहिले मन्त्र में नदी के दृष्टान्त से स्त्री का वर्णन करते हैं॥

प्र पर्व॑तानामुश॒ती उ॒पस्था॒दश्वे॑इव॒ विषि॑ते॒ हास॑माने।
गावे॑व शु॒भ्रे मा॒तरा॑ रिहा॒णे विपा॑ट्छुतु॒द्री पय॑सा जवेते॥ १॥

प्र। पर्व॑तानाम्। उ॒श॒ती इति॑। उ॒प॒ऽस्था॑त्। अश्वे॑ इ॒वेत्यश्वे॑ऽइव। विसि॑ते॒ इति॒ विऽसि॑ते। हास॑माने॒ इति॑। गावा॑ऽइव। शु॒भ्रे इति॑। मा॒तरा॑। रि॒हा॒णे इति॑। विऽपा॑ट्। शु॒तु॒द्री। पय॑सा। ज॒वे॒ते॒ इति॑॥ १॥

पदार्थः-(**प्र**) (**पर्वतानाम्**) मेघानाम् (**उशती**) कामयमाने (**उपस्थात्**) समीपात् (**अश्वेइव**) अश्ववडवाविव (**विषिते**) विद्याशुभगुणकर्मव्याप्ते (**हासमाने**) (**गावेव**) यथा धेनुवृषभौ (**शुभ्रे**) श्वेते शुभगुणयुक्ते (**मातरा**) मान्यप्रदे (**रिहाणे**) आस्वदित्र्यौ। अत्र वर्णव्यत्ययेन लस्य स्थाने रः। (**विपाट्**) या विविधं पटति गच्छति विपाटयति वा सा (**शुतुद्री**) शु शीघ्रं तुदति व्यथयति सा (**पयसा**) जलेन। **पय इत्युदकनामसु पठितम्।** (निघं०१.१२) (**जवेते**) गच्छतः॥१॥

अन्वयः-हे मनुष्या! ये अध्यापिकोपदेशिके मातरेव कन्यानां शिक्षामुशती पर्वतानामुपस्थादश्वेइव विषिते अश्वेइव हासमाने रिहाणे शुभ्रे गावेव पयसा विपाट्छुतुद्री प्रजवेते इव वर्त्तमाने भवेतां ते कन्यास्त्रीणामध्ययनोपदेशव्यवहारे नियोजयत॥१॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा पर्वतानां मध्ये वर्त्तमाना नद्योऽश्वा इव धावन्ति गाव इव शब्दायन्ते तथैव प्रसन्नाः शुभगुणकर्मस्वभावाः विद्योन्नतिं कामयमानाः स्त्रियः कन्याः स्त्रियश्च सततं सुशिक्षरेन्॥१॥

पदार्थः-हे मनुष्यो! जो पढ़ाने और उपदेश देनेवाली (**मातरा**) मान्य देनेवालियों सी कन्याओं की शिक्षा को (**उशती**) कामना करनेवाली (**पर्वतानाम्**) मेघों के (**उपस्थात्**) समीप से (**अश्वेइव**) घोड़े और घोड़ी के सदृश (**विषिते**) विद्या और शुभ गुणयुक्त कर्मों से व्याप्त वा घोड़े और घोड़ी के सदृश (**हासमाने**) परस्पर प्रेम करती (**रिहाणे**) प्रीति से एक-दूसरे को सूंघती हुई (**शुभ्रे**) उत्तम गुणों से युक्त (**गावेव**) गौ और बैल के सदृश (**पयसा**) जल से (**विपाट्**) कई प्रकार चलने वा ढांपनेवाली (**शुतुद्री**) शीघ्र दुःखदायक (**प्र**) (**जवेते**) चलती हैं, वैसे वर्त्तमान होवें, उन अध्यापिका और उपदेशिका को कन्या और स्त्रियों के पढ़ाने और उपदेश करने में नियुक्त करो॥१॥

भावार्थः–इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे पर्वतों के मध्य में वर्त्तमान नदियां घोड़ों के सदृश दौड़ती और गौओं के सदृश शब्द करती हैं, वैसे ही प्रसन्न और उत्तम गुण, कर्म, स्वभावयुक्त विद्या की उन्नति की कामना करनेवाली स्त्रियाँ कन्याओं और स्त्रियों को निरन्तर शिक्षा देवें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रे॑षिते प्रस॒वं भिक्ष॑माणे अच्छा॑ समु॒द्रं र॒थ्ये॑व याथः।
स॒मा॒रा॒णे ऊ॒र्मिभि॒: पिन्व॑माने अ॒न्या वा॑म॒न्यामप्ये॑ति शु॒भ्रे॥ २॥

इन्द्रे॑षिते॒ इतीन्द्र॑ऽइषिते। प्र॒ऽस॒वम्। भिक्ष॑माणे॒ इति॑। अच्छ॑। स॒मु॒द्रम्। र॒थ्या॑ऽइव। या॒थ॒:। स॒मा॒रा॒णे इति॑ स॒म्ऽआ॒रा॒णे। ऊ॒र्मिऽभि॑:। पिन्व॑माने॒ इति॑। अ॒न्या। वा॒म्। अ॒न्याम्। अपि॑। ए॒ति॒। शु॒भ्रे॒ इति॑॥ २॥

पदार्थः–(**इन्द्रेषिते**) इन्द्रेण सूर्य्येण वर्षाद्वारा प्रेरिते (**प्रसवम्**) प्रकृष्टमैश्वर्य्यम् (**भिक्षमाणे**) (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**समुद्रम्**) समुद्द्रवन्त्यापो यस्मिँस्तं मेघं सागरं वा। **समुद्र इति मेघनामसु पठितम्।** (निघं०१.१०)[११] (**रथ्येव**) रथेषु साधू अश्वा इव (**याथः**) गच्छथः (**समाराणे**) सम्यक् समन्ताद्राणं दानं ययोस्ते (**ऊर्मिभिः**) तरङ्गैः (**पिन्वमाने**) सेक्त्र्यौ (**अन्या**) भिन्ना (**वाम्**) युवयोः (**अन्याम्**) (**अपि**) (**एति**) (**शुभ्रे**) शोभायमाने॥२॥

अन्वयः–हे मनुष्या! ये इन्द्रेषिते पिन्वमाने ऊर्मिभिः समुद्रं रथ्येव नद्याविव प्रसवं भिक्षमाणे समाराणे शुभ्रे अध्यापिकोपदेशिके अच्छ याथः। अन्या अन्यामप्येतीव हे अध्यापिकोपदेशिके! वामध्येतुं श्रोतुं वा प्राप्नुयुस्ता युवाभ्यां विद्याव्यवहारे नियोजनीया अध्यापनीयाश्च॥२॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा युवतयो यूनः पतीन् प्राप्य प्रसवमिच्छन्ति नद्यः समुद्रं गच्छन्त्यश्वा मार्गे रथं नयन्ति तथैवाऽध्यापिकोपदेशिकाभिर्विद्यासुशिक्षादानेन सर्वाः स्त्रियः शुभगुणकर्मस्वभावाः सम्पादनीयाः॥२॥

पदार्थः–हे मनुष्यो! जो (**इन्द्रेषिते**) सूर्य्य से वृष्टि के द्वारा प्रेरित की गईं (**पिन्वमाने**) सींचनेवाली (**उर्मिभिः**) तरङ्गों से (**समुद्रम्**) बहनेवाले जलों से युक्त मेघ वा सागर को (**रथ्येव**) रथों में चलने योग्य घोड़ों वा नदियों के सदृश (**प्रसवम्**) उत्तम ऐश्वर्य्य की (**भिक्षमाणे**) याचना करती हुई (**समाराणे**) उत्तम प्रकार सब तरह दान देनेवाली (**शुभ्रे**) शोभायुक्त होकर पढ़ाने और उपदेश करनेवाली स्त्रियाँ (**अच्छ**)

---

११. मेघवाचकनामसु समुद्रः पदं न दृश्यते, परन्तु अन्तरिक्षनामसु उपलभ्यते। सं०

अच्छे प्रकार **(याथः)** जावें **(अन्या)** कोई एक स्त्री **(अन्याम्)** दूसरी स्त्री को **(अपि) (एति)** प्रीति से मिलाती है वा हे पढ़ाने और उपदेश देनेवालियो! **(वाम्)** तुम दोनों के सम्बन्ध से जो स्त्रियाँ पढ़ने वा सुनने को प्राप्त हों, वे स्त्रियाँ तुमको विद्यासम्बन्धी व्यवहार में नियुक्त करनी तथा पढ़ानी चाहियें॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे जवान स्त्रियाँ जवान पतियों को प्राप्त होके गर्भोत्पत्ति की इच्छा करती हैं और नदियां समुद्र के प्रति जाती हैं और घोड़े मार्ग में रथ को ले चलते हैं, वैसे ही पढ़ने और उपदेश देनेवालियों को चाहिये कि विद्या और उत्तम शिक्षा के दान से सम्पूर्ण स्त्रियों को उत्तम गुण, कर्म, स्वभावयुक्त करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अच्छा॒ सिन्धुं॑ मा॒तृत॑मामयासं॒ विपा॑शमु॒र्वीं सु॒भगा॑मगन्म।
व॒त्सम॑इव मा॒तरा॑ संरिहा॒णे स॑मा॒नं योनि॒मनु॑ स॒ञ्चर॑न्ती॥ ३॥

अच्छ॑। सिन्धु॑म्। मा॒तृऽत॑माम्। अ॒या॒स॒म्। विऽपा॑शम्। उ॒र्वीम्। सु॒ऽभगा॑म्। अ॒ग॒न्म॒। व॒त्सम्ऽइ॑व। मा॒तरा॑। सं॒रि॒हा॒णे इति॑ स॒म्ऽरि॒हा॒णे। स॒मा॒नम्। योनि॑म्। अनु॑। स॒ञ्चर॑न्ती इति॑ स॒म्ऽचर॑न्ती॥ ३॥

पदार्थः-**(अच्छ)** उत्तमरीत्या। अत्र **निपातस्य च**ेति दीर्घः। **(सिन्धुम्)** समुद्रम् **(मातृतमाम्)** अतिशयेन मातरो मातृवत्पालिका नद्यः। **मातर इति नदीनामसु पठितम्।** (निघं०१.१३) अत्र सुपां व्यत्ययः। **(अयासम्)** अयासिषं प्राप्नुयाम। अत्र **वाच्छन्दसी**तीडभावः। **(विपाशम्)** विगता पाट् बन्धनं यस्यान्ताम् **(उर्वीम्)** महतीम् **(सुभगाम्)** सौभाग्ययुक्ताम् **(अगन्म)** प्राप्नुयाम **(वत्समिव)** यथा गौर्वत्सम् **(मातरा)** मातृवद्वर्त्तमाने **(संरिहाणे)** सम्यगास्वादकर्त्र्यौ **(समानम्) (योनिम्)** गृहम् **(अनु) (सञ्चरन्ती)** सम्यग्गच्छन्त्यौ जानन्त्यौ॥ ३॥

अन्वयः-यथा मातृतमां सिन्धुं प्राप्नुवन्ति तथैव वयं विपाशमुर्वीं सुभगामध्यापिकामुपदेशिकामगन्म। यथा संरिहाणे समानं योनिमनुसञ्चरन्ती मातरा वत्समिव मामध्यापनशिक्षार्थं प्राप्नुयातस्ते अहमच्छायासम्॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा समुद्रं नद्यो वत्सान् गावो दम्पती समानं गृहं च प्राप्नुतस्तथैवाध्यापिकोपदेशिका अस्मान् प्राप्नुवन्तु वयं च याः कन्याः सौभाग्यवत्यश्च ताः प्राप्नुयाम॥ ३॥

पदार्थः-जैसे **(मातृतमाम्)** अत्यन्त माता के सदृश पालने करनेवाली नदियां **(सिन्धुम्)** समुद्र के प्रति प्राप्त होती हैं, वैसे ही हम **(विपाशम्)** बन्धनरहित **(उर्वीम्)** बड़ी **(सुभगाम्)** सौभाग्य से युक्त पढ़ाने और उपदेश देनेवाली स्त्री को **(अगन्म)** प्राप्त हों और जैसे **(संरिहाणे)** उत्तम प्रकार आस्वाद

करनेवाली स्त्रियाँ **(समानम्)** तुल्य **(योनिम्)** गृह को **(अनु)** **(सञ्चरन्ती)** अनुकूलता से उत्तम प्रकार चलतीं और जानती हुईं **(मातरा)** माता के सदृश वर्त्तमान **(वत्समिव)** जैसे गौ बछड़े को वैसे मुझको पढ़ाने और शिक्षा देने के लिये प्राप्त होवें, उनको मैं **(अच्छ)** अच्छे प्रकार **(अयासम्)** प्राप्त होऊं॥३॥

भावार्थः-इस मन्त्र में उपमा **[**और**]** वाचकलुप्तोपमालङ्कार हैं। जैसे समुद्र को नदियां और बछड़ों को गौवें और स्त्री-पुरुष एक गृह को प्राप्त होते हैं, वैसे ही पढ़ाने और उपदेश देनेवाली स्त्रियाँ हम लोगों को प्राप्त हों और हम लोग जो कन्या और सौभाग्यवाली स्त्रियाँ हों, उनको प्राप्त हों॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति॥४॥

एना। वयम्। पयसा। पिन्वमानाः। अनु। योनिम्। देवऽकृतम्। चरन्तीः। न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किम्ऽयुः। विप्रः। नद्यः। जोहवीति॥४॥

पदार्थः-**(एना)** एनेन **(वयम्)** **(पयसा)** उदकेन **(पिन्वमानाः)** सिञ्चमानाः **(अनु)** **(योनिम्)** उदकम्। **योनिरित्युदकनामसु पठितम्।** (निघं०१.१२) **(देवकृतम्)** देवैर्विद्वद्भिः कृतं निष्पादितं शास्त्रम् **(चरन्तीः)** प्राप्नुवन्त्यः **(न)** **(वर्त्तवे)** वरितुं स्वीकर्त्तुम् **(प्रसवः)** सन्तानः **(सर्गतक्तः)** यः सर्ग उत्पत्तौ तक्तो हसितः। अत्र **वाच्छन्दसी**तीडभावः। **(किंयुः)** आत्मनः किमिच्छुः। अत्र **वाच्छन्दसी**ति क्यच् प्रतिषेधो न। **(विप्रः)** मेधावी **(नद्यः)** सरितः **(जोहवीति)** भृशं शब्दयति॥४॥

अन्वयः-या एना पयसा पिन्वमाना देवकृतं योनिमनु सञ्चरन्तीर्नद्यो वर्त्तवे न भवन्ति न निवर्त्तन्ते ता वयं प्राप्नुयाम। यः सर्गतक्तः प्रसवः किंयुर्विप्रो जोहवीति सोऽस्मान् प्राप्नुयात्॥४॥

भावार्थः-यथा सोदका नद्यः सर्वोपकारका भवन्ति कदाचिज्जलहीनां न भवन्ति तथैव यः कृतब्रह्मचर्य्ययोः स्त्रीपुरुषयोः सन्तानो भूत्वा धर्म्येण ब्रह्मचर्य्येणाऽखिला विद्याः प्राप्य विद्वान् जायते स एव सर्वानुपकर्त्तुं शक्नोति॥४॥

पदार्थः-जो **(एना)** इस **(पयसा)** जल से **(पिन्वमानाः)** सींचती हुई **(देवकृतम्)** विद्वानों ने किये शास्त्र और **(योनिम्)** जल को **(अनु, चरन्तीः)** अनुकूल प्राप्त होनेवाली **(नद्यः)** नदियां **(वर्त्तवे)** स्वीकार करने को **(न)** नहीं निवृत्त होती हैं, उनको **(वयम्)** हम लोग प्राप्त होवें जो **(सर्गतक्तः)** उत्पत्ति में प्रसन्न **(प्रसवः)** सन्तान **(किंयुः)** अपने को क्या इच्छा करनेवाला **(विप्रः)** बुद्धिमान् पुरुष **(जोहवीति)** बारम्बार शब्द करता है, वह हम लोगों को प्राप्त होवे॥४॥

भावार्थः-जैसे जल सहित नदियां सबकी उपकार करनेवाली होतीं और कभी जल से हीन नहीं

होती हैं, वैसे जो ब्रह्मचर्य से युक्त स्त्री और पुरुष का सन्तान उत्पन्न हो और धर्मसम्बन्धी ब्रह्मचर्य्य से सम्पूर्ण विद्याओं को प्राप्त होकर विद्वान् होता है, वही सबका उपकार कर सकता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः।
प्र सिन्धुमच्छा बृहती मनीषाऽवस्युरह्वे कुशिकस्य सूनुः॥५॥१२॥

रमध्वम्। मे। वचसे। सोम्याय। ऋतऽवरीः। उप। मुहूर्तम्। एवैः। प्र। सिन्धुम्। अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः॥५॥

पदार्थः-(**रमध्वम्**) क्रीडध्वम् (**मे**) मम (**वचसे**) वचनाय (**सोम्याय**) सोम इव शान्तिगुणयुक्ताय (**ऋतावरीः**) ऋतं पुष्कलमुदकं विद्यते यासु ताः (**उप**) (**मुहूर्त्तम्**) कालावयवम् (**एवैः**) प्रापकैर्गुणैः (**प्र**) (**सिन्धुम्**) समुद्रम् (**अच्छ**) सम्यक्। अत्र **निपातस्य च**ेति दीर्घः। (**बृहती**) महती (**मनीषा**) प्रज्ञा (**अवस्युः**) आत्मनोऽव इच्छुः (**अह्वे**) प्रशंसामि (**कुशिकस्य**) विद्यानिष्कर्षप्राप्तस्य। अत्र वर्णव्यत्ययेन मूर्द्धन्यस्य तालव्यः। (**सूनुः**) अपत्यमिव वर्त्तमानः॥५॥

अन्वयः-हे मनुष्या! यूयं यथा ऋतावरीः सिन्धुमुपगच्छन्ति स्थिरा भवन्ति तथैवैवैर्मुहूर्त्तं मे सोम्याय वचसे रमध्वं तथैव कुशिकस्य सूनुरवस्युरहं यो बृहती मनीषा तामच्छ प्राह्वे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा नद्यः समुद्राऽभिमुखं गच्छन्ति तथैव मनुष्या विद्याधर्म्यव्यवहारं प्रत्यभिगच्छन्तु येन सुखेन समयो गच्छेत्॥५॥

पदार्थः-हे मनुष्यो! आप लोग जैसे (**ऋतावरीः**) बहुत जलों से युक्त नदी (**सिन्धुम्**) समुद्र को (**उप**) प्राप्त और स्थिर होती हैं, वैसे ही (**एवैः**) प्राप्त करानेवाले गुणों से (**मुहूर्त्तम्**) दो-दो घड़ी (**मे**) मेरे (**सोम्याय**) चन्द्रमा के तुल्य शान्तिगुणयुक्त (**वचसे**) वचन के लिये (**रमध्वम्**) क्रीड़ा करो, वैसे ही (**कुशिकस्य**) विद्या के निचोड़ को प्राप्त हुए सज्जन के (**सूनुः**) पुत्र के सदृश वर्त्तमान (**अवस्युः**) अपने को रक्षा चाहनेवाला मैं जो (**बृहती**) बड़ी (**मनीषाः**) बुद्धि उसकी (**अच्छ**) उत्तम प्रकार (**प्र**) (**अह्वे**) प्रशंसा करता हूं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे नदियां समुद्र के सम्मुख जाती हैं, वैसे ही मनुष्य लोग विद्या और धर्मसम्बन्धी व्यवहार को प्राप्त हों, जिससे सुखपूर्वक समय व्यतीत होवे॥५॥

अथ सूर्यदृष्टान्तेन मनुष्यकर्त्तव्यमाह॥

अब सूर्य के दृष्टान्त से मनुष्य के कर्त्तव्य को कहते हैं॥

इन्द्रो॑ अ॒स्माँ अ॑रद॒द् वज्र॑बाहु॒रप॑ह॒न् वृत्रं॑ प॒रि॒धिं न॒दीना॑म्।
दे॒वोऽन॑यत् सवि॒ता सु॑पा॒णिस्तस्य॑ व॒यं प्र॑स॒वे या॑म उ॒र्वीः॥६॥

इन्द्रः॑। अ॒स्मान्। अ॒र॒द॒त्। वज्र॑ऽबाहुः। अप॑। अ॒ह॒न्। वृ॒त्रम्। प॒रि॒ऽधिम्। न॒दीना॑म्। दे॒वः। अ॒न॒य॒त्। स॒वि॒ता। सु॒ऽपा॒णिः। तस्य॑। व॒यम्। प्र॒ऽस॒वे। या॒मः। उ॒र्वीः॥६॥

पदार्थः-(**इन्द्रः**) परमैश्वर्य्यवान् राजा (**अस्मान्**) (**अरदत्**) विलिखेत् (**वज्रबाहुः**) शस्त्रभुजः (**अप**) (**अहन्**) हन्ति (**वृत्रम्**) आवरकं मेघम् (**परिधिम्**) सर्वतो धीयन्ते नद्यो यस्मिँस्तम् (**नदीनाम्**) (**देवः**) दिव्यगुणस्वभावः (**अनयत्**) नयति (**सविता**) सूर्यः (**सुपाणिः**) शोभनहस्तः (**तस्य**) (**वयम्**) (**प्रसवे**) ऐश्वर्य्ये (**यामः**) प्राप्नुयामः (**उर्वीः**) बहुसुखप्रदाः प्रजाः॥६॥

अन्वयः-हे राजन्निन्द्रस्त्वं यथा सविता देवो नदीनां परिधिं वृत्रमपाहन् तदवयवानरदज्जलं भूमिं चानयत्तथा वज्रबाहुः सन्नस्मान् संरक्ष्य ससेवकांश्छत्रून् हन्यात् यः सुपाणिर्देवस्त्वमुर्वी रक्षेस्तस्य प्रसवे वयमानन्दं यामः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो भूम्यादीनाकर्षणेन व्यवस्थाप्य वर्षाः कृत्वैश्वर्य्यं जनयति तथैव वयं सद्गुणानाकृष्याऽरीन् विजित्य राज्यश्रियं जनयेम॥

पदार्थः-हे राजन् (**इन्द्रः**) अत्यन्त ऐश्वर्य्यवान्! आप जैसे (**सविता**) सूर्य (**देवः**) उत्तम गुण, कर्म और स्वभावयुक्त (**नदीनाम्**) नदियों के (**परिधिम्**) चारों ओर वर्त्तमान (**वृत्रम्**) ढांपनेवाले मेघ को (**अप**) (**अहन्**) नाश करता है, उसके अवयवों को (**अरदत्**) खोदे और जल, भूमि को (**अनयत्**) प्राप्त करता, वैसे (**वज्रबाहुः**) शस्त्रधारी हो (**अस्मान्**) हम लोगों की रक्षा करके सेवकों के सहित शत्रुओं का नाश करें, जो (**सुपाणिः**) उत्तम हाथों से और उत्तम गुण, कर्म, स्वभाव से युक्त आप (**उर्वीः**) बहुत सुख की देनेवाली प्रजाओं की रक्षा करें (**तस्य**) उसके (**प्रसवे**) ऐश्वर्य्य में (**वयम्**) हम लोग आनन्द को (**यामः**) प्राप्त होवें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य, भूमि आदि पदार्थों को आकर्षण से यथास्थान ठहरा और वृष्टि करके ऐश्वर्य को उत्पन्न करता है, वैसे ही हम लोग उत्तम गुणों का आकर्षण और शत्रुओं को जीत करके राज्य की शोभा को प्राप्त करें॥६॥

पुनर्मनुष्यः किं कुर्यादित्याह॥

फिर मनुष्य क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

प्र॒वाच्यं॑ शश्व॒धा वी॒र्यं॑१ तदिन्द्र॑स्य॒ कर्म॒ यदहिं॑ विवृ॒श्चत्।
वि वज्रे॑ण परि॒षदो॑ जघा॒नायन्नापो॒ऽय॑नमि॒च्छमा॑नाः॥७॥

प्र॒ऽवाच्य॑म्। श॒श्व॒धा। वी॒र्य॑म्। तत्। इन्द्र॑स्य। कर्म॑। यत्। अहि॑म्। वि॒ऽवृ॒श्च॒त्। वि। वज्रे॑ण। परि॒ऽसद॑ः। ज॒घा॒न॒। आय॑न्। आप॑ः। अय॑नम्। इ॒च्छमा॑नाः॥७॥

पदार्थः-(**प्रवाच्यम्**) प्रवक्तुं योग्यम् (**शश्वधा**) शश्वदेव (**वीर्य्यम्**) बलम् (**तत्**) (**इन्द्रस्य**) सूर्य्यस्य (**कर्म**) (**यत्**) (**अहिम्**) (**विवृश्चत्**) छिनत्ति (**वि**) (**वज्रेण**) किरणेन (**परिषदः**) परिषीदन्ति यासु ताः सभाः (**जघान**) हन्ति (**आयन्**) प्राप्नुयुः (**आपः**) (**अयनम्**) भूमिस्थानम् (**इच्छमानः**) अभिलषन्तः॥७॥

अन्वयः-हे मनुष्या! यः सूर्य्योऽहिं विवृश्चद्यदिन्द्रस्य वीर्य्यं कर्मास्ति तच्छश्वधा प्रवाच्यं यथा वज्रेण हता मेघस्याऽऽपोऽयनमायन् मेघं विजघान तथैवेच्छमानाः परिषदः कुर्य्युः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो धर्म्यं कर्म कृत्वा दुष्टनिवारणाय स्वबलं दर्शयेत् तस्य तत्कर्मप्रशंसनं सदैव कार्य्यं ये परिषदि सभ्याः स्युस्ते न्यायेन सर्वोन्नतिं चिकीर्षेयुः॥७॥

पदार्थः-हे मनुष्यो! जो सूर्य्य (**अहिम्**) मेघ को (**विवृश्चत्**) काटता है (**यत्**) जो (**इन्द्रस्य**) सूर्य्य का (**वीर्य्यम्**) बलरूप (**कर्म**) कर्म है (**तत्**) वह (**शश्वधा**) निरन्तर हो (**प्रवाच्यम्**) कहने योग्य, और जैसे (**वज्रेण**) किरण से विदीर्ण किये गये मेघ के (**आपः**) जल (**अयनम्**) भूमि स्थान को (**आयन्**) प्राप्त होवें मेघ को (**विजघान**) नाश करता है, वैसे ही (**इच्छमानाः**) इच्छा करते हुए जन (**परिषदः**) जिनमें बैठें, उन सभा को करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो धर्मसम्बन्धी काम करके दुष्ट पुरुषों के निवारण के लिये अपना पराक्रम दिखावे उसके उस कर्म की प्रशंसा सब काल में करनी चाहिये। जो लोग सभा में श्रेष्ठ होवें, वे न्याय से सब लोगों की उन्नति करने की इच्छा करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एत॒द्वचो॑ जरि॒तर्मापि॑ मृष्ठा॒ आ यत्ते॒ घोषा॒नुत्त॑रा यु॒गानि॑।
उ॒क्थेषु॑ कारो॒ प्रति॑ नो जुषस्व॒ मा नो॒ नि क॑ः पुरुष॒त्रा नम॑स्ते॥८॥

एत॒त्। वचः॑। ज॒रि॒तः॑। मा। अपि॑। मृ॒ष्ठाः॑। आ। यत्। ते॒। घोषा॑न्। उत्ऽत॑रा। यु॒गानि॑। उ॒क्थेषु॑। का॒रो॒ इति॑। प्रति॑। नः॑। जु॒ष॒स्व॒। मा। नः॑। नि। क॒रिति॑ कः। पु॒रु॒ष॒ऽत्रा। नम॑ः। ते॒॥८॥

पदार्थः-(**एतत्**) (**वचः**) (**जरितः**) प्रशंसक (**मा**) निषेधे (**अपि**) (**मृष्ठाः**) सहेः। अत्र व्यत्ययेनात्मनेपदम्। (**आ**) (**यत्**) यानि (**ते**) तव (**घोषान्**) वाक्प्रयोगान् (**उत्तरा**) उत्तराणि युगानि वर्षाणि

(उक्थेषु) प्रशंसनीयेषु व्यवहारेषु **(कारो)** यः करोति तत्सम्बुद्धौ **(प्रति)** **(नः)** अस्मान् **(जुषस्व)** सेवस्व **(मा)** **(नः)** अस्मान् **(नि)** **(कः)** निकुर्य्याः **(पुरुषत्रा)** पुरुषान् **(नमः)** **(ते)** तुभ्यम्॥८॥

अन्वयः-हे जरितस्त्वमेतद्वचो माऽपि मृष्ठास्ते यद्यान्युत्तरा युगानि घोषान् प्राप्नुयुस्तान्युक्थेषु नोऽस्मान् प्राप्नुवन्तु। हे कारो! तैर्नोऽस्मान् प्रत्याजुषस्व पुरुषत्रा नो मा नि कोऽतस्ते नमोऽस्तु॥८॥

भावार्थः-हे मनुष्या! यावान् भूतकालो गतस्तत्रत्यानां कर्मणां शिष्टं कार्य्यं कर्त्तव्यं विज्ञाय वर्त्तमाने भविष्यति च यथोन्नतिर्भूत्वा विघ्नानि निवर्त्तेरँस्तथैवाऽनुतिष्ठत॥८॥

पदार्थः-हे **(जरितः)** प्रशंसा करनेवाले! आप **(एतत्)** इस **(वचः)** वचन को **(मा)** नहीं **(अपि मृष्ठाः)** सहो **(ते)** आपके **(यत्)** जो **(उत्तरा)** आगे के **(युगानि)** वर्ष **(घोषान्)** वाणी के प्रयोगों को प्राप्त होवे, वह **(उक्थेषु)** प्रशंसा करने योग्य व्यवहारों में **(नः)** हम लोगों को प्राप्त होवें। हे **(कारो)** हे कर्त्ता पुरुष! उनसे **(नः)** हम लोगों की **(प्रति, आ, जुषस्व)** सेवा करो हम **(पुरुषत्रा)** पुरुषों का **(मा, नि, कः)** अपकार मत करो इससे **(ते)** आपके लिये **(नमः)** नमस्कार हो॥८॥

भावार्थः-हे मनुष्यो! जितना भूतकाल गया उसमें व्यतीत हुए कर्मों के शेष करने योग्य कार्य्य को जान के वर्त्तमान और भविष्यत् काल में जिस प्रकार उन्नति हो के विघ्न निवृत्त होवें, वैसे ही करो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः॥९॥

ओ इति। सु। स्वसारः। कारवे। शृणोत। ययौ। वः। दूरात्। अनसा। रथेन। नि। सु। नमध्वम्। भवत। सुऽपारा। अधःऽअक्षाः। सिन्धवः। स्रोत्याभिः॥९॥

पदार्थः-**(ओ)** सम्बोधने **(सु)** **(स्वसारः)** भगिनीवद्वर्त्तमानाः अङ्गुलयः **(कारवे)** शिल्पिने **(शृणोत)** **(ययौ)** प्राप्नोति **(वः)** युष्मान् **(दूरात्)** **(अनसा)** शकटेन **(रथेन)** **(नि)** नितराम् **(सु)** **(नमध्वम्)** **(भवत)**। अत्र **संहितायामिति** दीर्घः। **(सुपाराः)** शोभनः पारः पालनादिकर्म येषान्ते **(अधोअक्षाः)** अधोऽर्वाचीना अक्षाः इन्द्रियाणि येषान्ते। **अक्षा इति पदनामसु पठितम्।** (निघं०५.३) **(सिन्धवः)** नद्यः **(स्रोत्याभिः)** स्रोतःसु भवाभिर्गतिभिः॥९॥

अन्वयः-ओ विद्वांसो यूयं कारवे स्वसार इव स्रोत्याभिः सिन्धव इव अधोअक्षाः सुपाराः सुभवत योऽनसा रथेन दूराद्वो ययौ तं सुशृणोत तत्र निनमध्वम्॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये परस्मिन् परस्मिन् प्रीता बहुश्रुता अन्यरचितानि शीघ्रगामीनि यानानि दृष्ट्वा तादृशानि निर्माय पाराऽवारौ गच्छन्तो नम्राः स्युस्तान् स्रोतांसि नदीरिवैश्वर्य्यगुणाः प्राप्नुवन्ति॥९॥

पदार्थः-**(ओ)** हे विद्वान् पुरुषो! आप लोग **(कारवे)** शिल्पीजन के लिये **(स्वसारः)** भगिनी के तुल्य वर्त्तमान अङ्गुलियों **(स्रोत्याभिः)** वा स्रोतों में होनेवाली गतियों से **(सिन्धवः)** नदियों के समान **(अधोअक्षाः)** नीचे को प्राप्त होती हुईं इन्द्रियों से युक्त **(सुपाराः)** सुन्दर पालन आदि कर्म करनेवाले **(सु)** **(भवत)** उत्तम प्रकार से हूजिये जो **(अनसा)** शकट और **(रथेन)** रथ से **(दूरात्)** दूर **(वः)** आप लोगों को **(ययौ)** प्राप्त होता है, उसको **(सु, शृणोत)** उत्तम प्रकार सुनिये उसमें **(नि)** अत्यन्त **(नमध्वम्)** नम्र हूजिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग दूसरे-दूसरे में प्रसन्न, बहुत बातों को सुने हुए पुरुष, औरों से बनाए हुए शीघ्र चलनेवाले वाहनों को देख और वैसे ही बनाय के जलाशयों के आर-पार जाते हुए नम्र होवें, उनको जैसे स्रोता नदियों को वैसे ऐश्वर्य्य गुण प्राप्त होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ ते॑ कारो शृणवाम॒ वचां॑सि य॒याथ॑ दू॒रादन॑सा॒ रथे॑न।
नि ते॑ नंसै पीप्या॒नेव॒ योषा॒ मर्या॑येव क॒न्या॑ शश्व॒चै ते॑॥१०॥१३॥

आ। ते॒। का॒रो॒ इति॑। शृ॒ण॒वा॒म॒। वचां॑सि। य॒याथ॑। दू॒रात्। अन॑सा। रथे॑न। नि। ते॒। नं॒सै॒। पी॒प्या॒नाऽइ॑व। योषा॑। मर्या॑यऽइव। क॒न्या॑। श॒श्व॒चै। त॒ इति॑ ते॥१०॥

पदार्थः-**(आ)** समन्तात् **(ते)** तव **(कारो)** शिल्पविद्यासु कुशल **(शृणवाम)**। अत्र **संहितायामिति** दीर्घः। **(वचांसि)** विद्याप्रज्ञापकानि वचनानि **(ययाथ)** प्राप्नुयाः **(दूरात्)** **(अनसा)** **(रथेन)** **(नि)** **(ते)** तव **(नंसै)** नमेः **(पीप्यानेव)** विद्यावृद्धाविव **(योषा)** **(मर्यायेव)** यथा पुरुषाय **(कन्या)** **(शश्वचै)** परिष्वङ्गाय **(ते)** तुभ्यम्॥१०॥

अन्वयः-हे कारो! ते तव वचांस्यानसा रथेन दूरादागत्य वयमाशृणवाम यथा त्वमस्मान् ययाथ तथा वयं त्वां प्राप्नुयाम। यस्त्वं पीप्यानेव नि नंसै ते तुभ्यं वयमपि नमाम योषा मर्यायेव कन्या शश्वचै इव ते तुभ्यं वयमभिलषेम॥१०॥

भावार्थः–अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये दूरादागत्य विदुषां सकाशाद्विविधा विद्याः प्राप्य नम्रा भवन्ति ते विद्यावृद्धाः सन्तः पतिव्रता स्त्री पतिमिव कन्याऽभीष्टं वरमिव विद्यां प्राप्याऽऽनन्दन्ति॥१०॥

पदार्थः–हे **(कारो)** शिल्पविद्याओं में चतुर! **(ते)** आपके **(वचांसि)** विद्या के प्राप्त करानेवाले वचनों को **(अनसा)** शकट और **(रथेन)** रथ से **(दूरात्)** दूर से आय के हम लोग **(आ)** सब प्रकार **(शृणवाम)** सुनें और जैसे आप हम लोगों को **(ययाथ)** प्राप्त होवें, वैसे हम लोग आपको प्राप्त होवें। जो आप **(पीप्यानेव)** विद्या के वृद्ध दो पुरुषों के सदृश **(नि, नंसै)** नमस्कार करें **(ते)** आपके लिये हम लोग भी नम्र होवें **(योषा)** स्त्री **(मर्यायेव)** जैसे पुरुष के लिये और **(कन्या)** कन्या **(शश्वचै)** प्रीति से मिलने के लिये वैसे **(ते)** आपके लिये हम लोग अभिलाषा करें॥१०॥

भावार्थः–इस मन्त्र में **[**उपमा और**]** वाचकलुप्तोपमालङ्कार हैं। जो लोग दूर से आय के विद्वानों के समीप से अनेक प्रकार की विद्याओं को प्राप्त करके नम्र होते हैं, वे विद्यावृद्ध होकर जैसे पतिव्रता स्त्री पति और कन्या अभीष्ट वर को वैसे विद्या को प्राप्त होके आनन्दित होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यदङ्ग त्वा भरताः संतरेयुर्गव्यन् ग्रामं इषित इन्द्रजूतः।
अर्षादह प्रसवः सर्गतक्तः आ वो वृणे सुमतिं यज्ञियानाम्॥११॥

यत्। अङ्ग। त्वा। भरताः। सम्ऽतरेयुः। गव्यन्। ग्रामः। इषितः। इन्द्रऽजूतः। अर्षात्। अह। प्रऽसवः। सर्गऽतक्तः। आ। वः। वृणे। सुऽमतिम्। यज्ञियानाम्॥११॥

पदार्थः–**(यत्)** यम् **(अङ्ग)** मित्र **(त्वा)** त्वाम् **(भरताः)** सर्वेषां धर्त्तारः पोषकाः **(सन्तरेयुः)** **(गव्यन्)** गौरिवाचरन् **(ग्रामः)** मनुष्यसमूह इव **(इषितः)** प्रेरितः **(इन्द्रजूतः)** इन्द्रो विद्युदिव प्रतापयुक्तः **(अर्षात्)** प्राप्नुयात् **(अह)** विनिग्रहे **(प्रसवः)** प्रकृष्टैश्वर्य्यः **(सर्गतक्तः)** जलस्य संकोचकः। अत्र **सर्ग इत्युदकनामसु पठितम्।** (निघं०१.१२) **(आ)** समन्तात् **(वः)** युष्माकम् **(वृणे)** स्वीकुर्वे **(सुमतिम्)** शोभनां प्रज्ञाम् **(यज्ञियानाम्)** यज्ञस्य साधकानाम्॥११॥

अन्वयः–हे अङ्ग! यद्यं त्वा भरताः सन्तरेयुः स ग्राम इषित इन्द्रजूतः प्रसवः सर्गतक्तो गव्यन् भवानहार्षात्। हे विद्वांसो! यथाहं यज्ञियानां वः सुमतिमावृणे तथा यूयं मम प्रज्ञां स्वीकुरुत॥११॥

भावार्थः–यथा विद्वांसो विद्यापारं गत्वा प्राज्ञा जायन्ते तथेतरे मनुष्या अपि भवन्तु एवं कृते सर्वे दुःखान्तं गत्वा सुखिनः स्युः॥११॥

पदार्थः–हे **(अङ्ग)** मित्र! **(यत्)** जिस **(त्वा)** आपको **(भरताः)** सबके धारण वा पोषण

करनेवाले (**सन्तरेयुः**) संतरे अर्थात् आपके स्वभाव से पार हो वह (**ग्रामः**) मनुष्यों के समूह के समान (**इषितः**) प्रेरणा को प्राप्त (**इन्दजूतः**) बिजुली के सदृश प्रताप और (**प्रसवः**) अत्यन्त ऐश्वर्य्ययुक्त (**सर्गतक्तः**) जल के संकोच करनेवाले (**गव्यन्**) गौ के तुल्य आचरण करते हुए आप (**अह**) ग्रहण करने में (**अर्षात्**) प्राप्त होवें वा हे विद्वानो! जैसे मैं (**यज्ञियानाम्**) यज्ञ के सिद्ध करनेवाले (**वः**) आप लोगों की (**सुमतिम्**) उत्तम बुद्धि को (**आ**) सब प्रकार (**वृणे**) स्वीकार करता हूँ, वैसे आप लोग मेरी बुद्धि को स्वीकार करिये॥११॥

भावार्थः-जैसे विद्वान् लोग विद्या के पार जाय अर्थात् सम्पूर्ण विद्याओं को पढ़ के बुद्धिमान् होते हैं, वैसे और लोग भी हों। ऐसा करने से सम्पूर्ण जन दुःख के पार जाय अर्थात् दुःख को उल्लङ्घन करके सुखी होवें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम्।
प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम्॥१२॥

अतारिषुः। भरता। गव्यवः। सम्। अभक्त। विप्रः। सुऽमतिम्। नदीनाम्। प्र। पिन्वध्वम्। इषयन्तीः। सुऽराधाः। आ। वक्षणाः। पृणध्वम्। यात्। शीभम्॥१२॥

पदार्थः-(**अतारिषुः**) तरन्तु (**भरताः**) धारकपोषकाः (**गव्यवः**) आत्मनो गां सुशिक्षितां वाचमिच्छवः (**सम्**) (**अभक्त**) सम्यग्भजेत (**विप्रः**) मेधावी (**सुमतिम्**) श्रेष्ठां बुद्धिम् (**नदीनाम्**) सरितामिव वर्त्तमानानां विदुषीणाम् (**प्र**) (**पिन्वध्वम्**) सेवध्वम् (**इषयन्तीः**) इषमन्नं कुर्वन्त्यः (**सुराधः**) शोभनं राधो यस्य सः (**आ**) (**वक्षणाः**) वहमाना नद्यः (**पृणध्वम्**) पालयध्वम् (**यात**) प्राप्नुत (**शीभम्**) क्षिप्रम्। **शीभमिति क्षिप्रनामसु पठितम्।** (निघं०२.१५)॥१२॥

अन्वयः-हे मनुष्या! यथा गव्यवो भरता नौकादिना नदीनां प्रवाहानतारिषुर्यथा सुराधा विप्रः सुमतिं समभक्त यथा वक्षणा वहन्ति तथेषयन्तीः प्र पिन्वध्वं सर्वानापृणध्वं शुभगुणान् शीभं यात॥१२॥

भावार्थः-मनुष्या नदीसमुद्रादीन् जलाशयान् विद्वद्वत्प्रतीर्य्य सुखं सद्यः सेवन्ताम्॥१२॥

पदार्थः-हे मनुष्यो! जैसे (**गव्यवः**) अपनी उत्तम शिक्षायुक्त वाणी की इच्छा करने तथा (**भरताः**) धारण और पोषण करनेवाले नौका आदि से (**नदीनाम्**) नदियों के सदृश वर्त्तमान पढ़ी हुई स्त्रियों के ज्ञानप्रवाहों को (**अतरिषुः**) तरें, जैसे (**सुराधाः**) उत्तम धनयुक्त (**विप्रः**) बुद्धिमान् पुरुष (**सुमतिम्**) उत्तम बुद्धि को (**सम्, अभक्त**) अच्छे प्रकार सेवन करे और जैसे (**वक्षणाः**) बहती हुई

नदियां और बहती हैं, वैसे **(इषयन्तीः)** अन्न को सिद्ध करनेवाली स्त्रियों को **(प्र, पिन्वध्वम्)** सेवन करो, सबका **(आ) (पृणध्वम्)** पालन करो और उत्तम गुणों को **(शीभम्)** शीघ्र **(यात)** प्राप्त होओ॥१२॥

भावार्थः–मनुष्यों को चाहिये कि नदी और समुद्र आदि जलाशयों को विद्वानों के सदृश पार होके सुख का शीघ्र सेवन करें॥१२॥

पुनस्तमेव विषयमाह॥

फि उसी विषय को अगले मन्त्र में कहते हैं॥

उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।
मादुष्कृतौ व्येनसाऽघ्न्यौ शूनमारताम्॥ १३॥ १४॥

उत्। वः। ऊर्मिः। शम्याः। हन्तु। आपः। योक्त्राणि। मुञ्चत। मा। अदुः।ऽकृतौ। विऽएनसा। अघ्न्यौ। शूनम्। आ। अरताम्॥ १३॥

पदार्थः–**(उत्)** उत्कृष्टे **(वः)** युष्मान् **(ऊर्मिः)** तरङ्ग इवोत्साहः **(शम्याः)** शम्यां कर्मणि भवाः **(हन्तु)** दूरीकुर्वन्तु **(आपः)** जलानीव **(योक्त्राणि)** योजनानि **(मुञ्चत)** त्यजत **(मा)** निषेधे **(अदुष्कृतौ)** अदुष्टाचारिणौ **(व्येनसा)** विनष्टपापाचरणेन **(अघ्न्यौ)** हन्तुमनर्हे **(शूनम्)** सुखम्। अत्रा**न्येषामपी**ति दीर्घः। **(आ) (अरताम्)** प्राप्नुताम्॥१३॥

अन्वयः–हे स्त्रियो! भवन्त्यः शम्या आप इव दुःखं हन्तु यो व ऊर्मिरिवोत्साहेन योक्त्राणि यूयं मुञ्चत। हे स्त्रीपुरुषौ! युवामदुष्कृतौ दुष्टं मारतां व्येनसाघ्न्यौ सत्यौ पतिः पत्नी च द्वौ शूनं सुखमुदारतां प्राप्नुताम्॥१३॥

भावार्थः–यौ स्त्रीपुरुषौ दुःखबन्धनानि च्छित्वा दुष्टाचारं विहाय विद्योन्नतिं कुर्य्यातां तौ सततं सुखमाप्नुयातामिति॥१३॥

अत्र मेघनदीविद्वत्सखिशिल्पनौकादिस्त्रीपुरुषकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयस्त्रिंशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः–हे स्त्रियो! आप **(शम्याः)** कर्म में उत्पन्न **(आपः)** जलों के सदृश दुःख को **(हन्तु)** दूर करें और **(वः)** आपका जो **(ऊर्मिः)** तरङ्ग के सदृश उत्साह उससे **(योक्त्राणि)** जोड़नों को तुम **(मुञ्चत)** त्याग करो। हे स्त्री और पुरुष! तुम दोनों **(अदुष्कृतौ)** दुष्टाचरण से रहित हुए दुष्ट कर्म को **(मा)** नहीं

प्राप्त होओ **(व्येनसा)** पाप का आचरण नष्ट होने से **(अघ्न्यौ)** नहीं मारने योग्य होते हुए पति और स्त्री दोनों **(शूनम्)** सुख को **(उत्)** उत्तम प्रकार **(आ) (अरताम्)** प्राप्त होवें॥१३॥

भावार्थः-जो स्त्री और पुरुष दुःख के बन्धनों को काट और दुष्ट आचरण को त्याग के विद्या की उन्नति करें तो वे निरन्तर सुख को प्राप्त होवें॥१३॥

इस सूक्त में मेघ, नदी, विद्वान्, मित्र, शिल्पी, नौका आदि और स्त्री-पुरुष का कृत्य वर्णन करने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेंतीसवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य चतुस्त्रिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, २, ११ त्रिष्टुप्। ४, ५, ७, १० निचृत्त्रिष्टुप्। ९ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ६, ८ भुरिक्पङ्क्तश्छन्दः। पञ्चमः स्वरः॥

अथ सूर्यगुणा उपदिश्यन्ते॥

अब ग्यारह ऋचावाले ३४ चौतीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से सूर्य के गुणों का उपदेश करते हैं॥

इन्द्रः पूर्भिदातिरद् दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून्।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे॥ १॥

इन्द्र। पूः।ऽभित्। आ। अतिरत्। दासम्। अर्कैः। विदत्।ऽवसुः। दयमानः। वि। शत्रून्। ब्रह्म।ऽजूतः। तन्वा। ववृधानः। भूरि।ऽदात्रः। आ। अपृणत्। रोदसी इति। उभे इति॥ १॥

पदार्थः-(**इन्द्रः**) परमैश्वर्यवान् (**पूर्भित्**) पुरां भेत्ता (**आ**) (**अतिरत्**) उल्लङ्घयतु (**दासम्**) दातुं योग्यम् (**अर्कैः**) अर्चनीयैर्मन्त्रैर्विचारैः (**विदद्वसुः**) विदन्ति वसूनि येन सः (**दयमानः**) कृपालुः सन् (**वि**) (**शत्रून्**) (**ब्रह्मजूतः**) धनानि प्राप्तः (**तन्वा**) शरीरेण (**वावृधानः**) वर्धमानः (**भूरिदात्रः**) भूरि बहुविधं दात्रं दानं यस्य सः (**आ**) (**अपृणत्**) प्रपूरयेत् (**रोदसी**) द्यावापृथिव्याविव विद्याविनयौ (**उभे**)॥ १॥

अन्वयः-हे राजपुरुष! यथा सूर्य उभे रोदसी आपृणत्तथा विदद्वसुर्ब्रह्मजूतो दासं दयमानस्तन्वा वावृधानो भूरिदात्रः पूर्भिदिन्द्रो भवानर्कैः शत्रून् व्यातिरत्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यः स्वकीयैः किरणैर्भूम्यन्तरिक्षे पूर्त्वाऽन्धकारं जयति तथैवाप्तैः सह कृतैर्विचारैः शत्रून् जयेत्सर्वदा शरीरात्मबलं वर्धयित्वा श्रेष्ठान् सत्कृत्य दुष्टान् पराभवेत्॥ १॥

पदार्थः-हे राजपुरुष! जैसे सूर्य्य (**उभे**) दोनों (**रोदसी**) अन्तरिक्ष और पृथिवी के तुल्य विद्या और विनय को (**आ**) (**अपृणत्**) पूर्ण करे, वैसे (**विदद्वसुः**) धनों से संपन्न (**ब्रह्मजूतः**) धनों को प्राप्त (**दासम्**) देने योग्य पर (**दयमानः**) कृपालु (**तन्वा**) शरीर से (**वावृधानः**) वृद्धि को प्राप्त होते हुए (**भूरिदात्रः**) अनेक प्रकार के दान देने (**पूर्भित्**) शत्रुओं के नगरों को तोड़ने और (**इन्द्रः**) अत्यन्त ऐश्वर्य के रखनेवाले आप (**अर्कैः**) आदर करने योग्य विचारों से (**शत्रून्**) शत्रुओं का (**वि, आ, अतिरत्**) उल्लङ्घन करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य अपने किरणों से भूमि और अन्तरिक्ष को पूर्ण करके अन्धकार को जीतता है, वैसे ही श्रेष्ठ और ऐक्यमतयुक्त विचारों से शत्रुओं को जीते तथा सब काल में शरीर और आत्मा के बल को बढ़ाये और श्रेष्ठ पुरुषों को सत्कार करके दुष्ट जनों का अपमान करे॥ १॥

अथ राजप्रजाविषयमाह॥

अब राजा-प्रजा सम्बन्धी विषय को अगले मन्त्र में कहते हैं॥

म॒खस्य॑ ते तवि॒षस्य॒ प्र जू॒तिमिय॑र्मि॒ वाच॑म॒मृता॑य॒ भूष॑न्।
इन्द्र॑ क्षिती॒नाम॑सि॒ मानु॑षीणां वि॒शां दैवी॑नामु॒त पू॒र्व॒यावा॑॥ २॥

म॒खस्य॑। ते॑। त॒वि॒षस्य॑। प्र। जू॒तिम्। इय॑र्मि। वाच॑म्। अ॒मृता॑य। भूष॑न्। इन्द्र॑। क्षि॒ती॒नाम्। अ॒सि॒। मानु॑षीणाम्। वि॒शाम्। दैवी॑नाम्। उ॒त। पू॒र्व॒ऽयावा॑॥ २॥

पदार्थः-(**मखस्य**) प्राप्तस्य सङ्गतस्य व्यवहारस्य (**ते**) तव (**तविषस्य**) बलस्य (**प्र**) (**जूतिम्**) वेगम् (**इयर्मि**) प्राप्नोमि (**वाचम्**) सत्यामादिष्टां वाणीम् (**अमृताय**) अविनाशिसुखाय (**भूषन्**) अलङ्कुर्वन् (**इन्द्र**) परमैश्वर्य्यप्रद (**क्षितीनाम्**) स्वराज्ये निवसन्तीनाम् (**असि**) (**मानुषीणाम्**) मनुषसम्बन्धिनीम् (**विशाम्**) प्रजानाम् (**दैवीनाम्**) दिव्यगुणयुक्तानाम् (**उत**) (**पूर्वयावा**) प्राचीनराजनीतिं प्राप्तः॥ २॥

अन्वयः-हे इन्द्र! ते मखस्य तविषस्य जूतिममृताय वाचं भूषन् सन् प्रेयर्मि यतस्त्वं दैवीनां क्षितीनां मानुषीणां विशां पूर्वयावा असि उत वा स्वयं विद्याविनययुक्तोऽसि तस्माच्छ्रेष्ठैः सत्कर्त्तव्योऽसि॥ २॥

भावार्थः-सर्वैः प्रजाराजजनैः सर्वाधीशस्याऽऽज्ञा नैवोल्लङ्घनीया सर्वाधीशेन धर्म्येण कर्मणा सततं प्रजाः पालनीयाः॥ २॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य के देनेवाले! (**ते**) आपके (**मखस्य**) मेल करने रूप व्यवहार और (**तविषस्य**) बल के (**जूतिम्**) वेग और (**अमृताय**) अविनाशि सुख के लिये (**वाचम्**) कही हुई सत्य वाणी को (**भूषन्**) शोभित करता हुआ मैं (**प्र, इयर्मि**) प्राप्त होता हूँ, जिससे आप (**दैवीनाम्**) उत्तम गुणों से युक्त (**क्षितीनाम्**) अपने राज्य में बसनेवाली (**मानुषीणाम्**) मनुष्यरूप (**विशाम्**) प्रजाओं की (**पूर्वयावा**) प्राचीन राजनीति को प्राप्त (**उत**) अथवा अपने ही से विद्या और विनय से युक्त हो, इससे श्रेष्ठ पुरुषों से सत्कार करने योग्य (**असि**) हो॥ २॥

भावार्थः-सम्पूर्ण प्रजा और राजजनों को चाहिये कि सब लोगों के स्वामी की आज्ञा का उल्लङ्घन न करें और सब लोगों के स्वामी को चाहिये कि धर्मयुक्त कर्मों से निरन्तर प्रजाओं का पालन करें॥ २॥

अथ सूर्यदृष्टान्तेन राजधर्मविषयमाह॥

फिर सूर्य के दृष्टान्त से राजधर्म विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॑ वृ॒त्रम॑वृणो॒च्छर्ध॑नीति॒: प्र मा॒यिना॑ममिना॒द्वर्प॑णीतिः।

अहन् व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्ग्राम्याणाम्॥ ३॥

इन्द्रः। वृत्रम्। अवृणोत्। शर्धऽनीतिः। प्र। मायिनाम्। अमिनात्। वर्पऽनीतिः। अहन्। विऽअंसम्। उशधक्। वनेषु। आविः। धेनाः। अकृणोत्। राम्याणाम्॥ ३॥

पदार्थः-(**इन्द्रः**) सूर्य्य इव प्रतापवान् राजा (**वृत्रम्**) मेघमिव शत्रुम् (**अवृणोत्**) वृणुयात् (**शर्धनीतिः**) बलस्य सैन्यस्य नीतिर्नायकः (**प्र**) (**मायिनाम्**) कुत्सिता माया प्रज्ञा विद्यते येषां तेषाम् (**अमिनात्**) हिंसेत् (**वर्पणीतिः**) वर्पस्य रूपस्य नीतिर्नायकः। अत्रोभयत्र नीतौ कर्त्तरि क्तिच्। (**अहन्**) हन्ति (**व्यंसम्**) विगता अंसा यस्य तम् (**उशधक्**) य उशान् युद्धं कामयमानान् दहति सः (**वनेषु**) जङ्गलेषु (**आविः**) प्राकट्ये (**धेनाः**) वाचः। **धेनेति वाङ्नामसु पठितम्।** (निघं०१.११) (**अकृणोत्**) कुर्यात् (**राम्याणाम्**) रमणीयानाम्॥ ३॥

अन्वयः-हे राजन्! यथा सूर्य्यो वृत्रं व्यंसमहन् तथा शर्धनीतिर्वर्पणीतिरिन्द्रो भवान् मायिनां मायां प्रमिनात्। उशधक् वनेषु धेना अवृणोद् राम्याणां धेना आविरकृणोत्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो मेघं हन्ति तथैव दुष्टाचारान् हत्वा विद्यावाचः प्रचार्य सर्वैः सेना शिक्षा च वर्धनीया॥ ३॥

पदार्थः-हे राजन्! जैसे सूर्य्य (**वृत्रम्**) मेघ को (**व्यंसम्**) कटे बाहु जिसके उस पुरुष के समान (**अहन्**) नाश करता है, वैसे (**शर्धनीतिः**) सेना का नायक (**वर्पणीतिः**) रूप को प्राप्त करानेवाले (**इन्द्रः**) सूर्यवत् प्रतापी राजा आप (**मायिनाम्**) बुरी बुद्धि से युक्त पुरुषों की माया का (**प्र, अमिनात्**) नाश करें (**उशधक्**) और युद्ध करनेवालों का नाशकर्त्ता पुरुष (**वनेषु**) जङ्गलों में (**धेनाः**) वाणियों को (**अवृणोत्**) घेरे (**राम्याणाम्**) सुन्दरों की वाणियों को (**आविः**) प्रकट (**अकृणोत्**) करे॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य मेघ का नाश करता है, वैसे ही दुष्ट आचरणवाले जनों का नाश और विद्या सम्बन्धी वाणियों का प्रचार करके सब लोगों को सेना और शिक्षा की वृद्धि करनी चाहिये॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः।
प्रारोचयन् मनवे केतुमह्नामविन्दुज्ज्योतिर्बृहते रणाय॥ ४॥

इन्द्रः। स्वऽसाः। जनयन्। अहानि। जिगाय। उशिक्ऽभिः। पृतनाः। अभिष्टिः। प्र। अरोचयत्। मनवे। केतुम्। अह्नाम्। अविन्दत्। ज्योतिः। बृहते। रणाय॥ ४॥

पदार्थः-(**इन्द्रः**) सूर्य इव तेजस्वी (**स्वर्षाः**) यः स्वः सुखं सनति विभजति सः (**जनयन्**) प्रकटयन् (**अहानि**) दिनानि (**जिगाय**) जयेत् (**उशिग्भिः**) कामयमानैर्वीरैः (**पृतनाः**) वीरसेनाः (**अभिष्टिः**) अभिमुखा इष्टिः सङ्गतिर्यस्य सः (**प्र, अरोचयत्**) रोचयेत् (**मनवे**) मननशीलाय मनुष्याय (**केतुम्**) प्रज्ञाम् (**अह्नाम्**) दिनानाम् (**अविन्दत्**) विन्देत् प्राप्नुयात् (**ज्योतिः**) युद्धविद्याप्रकाशम् (**बृहते**) महते (**रणाय**) संग्रामाय॥४॥

अन्वयः-यः स्वर्षा अभिष्टिरिन्द्रः पृतना अहानि सूर्य्य इव जनयन्नुशिग्भिः शत्रून् जिगाय बृहते रणायाऽह्नां ज्योतिरिव मनवे केतुमविन्दत् संग्रामं प्रारोचयत् स एव विजयविभूषितः स्यात्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजानः सर्वेभ्योऽधिकं प्रयत्नं युद्धविद्यायां कुर्युस्ते सुहर्षितैर्युद्धाय रुचिं प्रदर्शितैर्वीरैः सह शत्रून् जित्वा सूर्य्यस्येव विजयप्रकाशं प्रथयेरन्॥४॥

पदार्थः-जो (**स्वर्षाः**) सुख के विभाग करने (**अभिष्टिः**) सम्मुख मेल करनेवाले (**इन्द्रः**) सूर्य्य के सदृश तेजस्वी (**पृतनाः**) वीर पुरुषों को सेनाओं और (**अहानि**) दिनों को सूर्य्य के सदृश (**जनयन्**) प्रकट करनेवाला पुरुष (**उशिग्भिः**) युद्ध की इच्छा रखते हुए वीरों के साथ शत्रुओं को (**जिगाय**) जीते (**बृहते**) बड़े (**रणाय**) संग्राम के लिये (**अह्नाम्**) दिनों के (**ज्योतिः**) युद्ध की विद्या के प्रकाश को (**मनवे**) और मनन करनेवाले मनुष्य के लिये (**केतुम्**) बुद्धि को (**अविन्दत्**) प्राप्त होवे और संग्राम का (**प्र**) (**अरोचयत्**) उत्तम प्रकार प्रकाश करे, वही पुरुष विजयरूप आभूषण से शोभित होवे॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा लोग सम्पूर्ण जनों से अधिक प्रयत्न युद्धविद्या में करें, वे उत्तम प्रकार प्रसन्नतायुक्त, जो कि युद्ध के लिये पारितोषिक आदि से रुचि दिखाये गये वीर लोग, उनके साथ शत्रुओं को जीत कर सूर्य्य के सदृश विजय के प्रकाश को प्रकट करें॥४॥

कीदृशो जनो राज्येऽधिकृतः स्यादित्याह॥

कैसा मनुष्य राज्य में अधिकारी हो, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि।
अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम्॥५॥१५॥

इन्द्रः। तुजः। बर्हणाः। आ। विवेश। नृऽवत्। दधानः। नर्या। पुरूणि। अचेतयत्। धियः। इमाः। जरित्रे। प्र। इमम्। वर्णम्। अतिरत्। शुक्रम्। आसाम्॥५॥

पदार्थः-(**इन्द्रः**) राजा (**तुजः**) शत्रुहिंसकबलादियुक्ताः सेनाः (**बर्हणाः**) वर्धमानाः (**आ, विवेश**) आविशेत् (**नृवत्**) नायकवत् (**दधानः**) (**नर्या**) नृभ्यो हितानि सैन्यानि (**पुरूणि**) बहूनि

(अचेतयत्) चेतयेत् सञ्ज्ञापयेत् **(धियः)** प्रज्ञा **(इमाः)** वर्त्तमाने प्राप्ताः **(जरित्रे)** स्तावकाय **(प्र)** **(इमम्)** **(वर्णम्)** स्वीकारम् **(अतिरत्)** सन्तरेत् **(शुक्रम्)** क्षिप्रं कार्यकरम् **(आसाम्)** प्रजानाम्॥५॥

अन्वयः-य इन्द्रो आसां प्रजानां पुरूणि नर्या नृवद्दधानो बर्हणास्तुज आविवेश जरित्रे इमा धियः प्राचेतयत् स इमं शुक्रं वर्णमतिरत्॥५॥

भावार्थः-स एव राज्ये प्रवेष्टुं शक्नोति यो बुद्धिमतो धार्मिकान् जनान् सर्वेष्वधिकारेषु नियोज्य सेनोन्नतिं विधाय पितृवत्प्रजाः पालयितुमर्हेत्॥५॥

पदार्थः-जो **(इन्द्रः)** राजा **(आसाम्)** इन प्रजाओं की **(पुरूणि)** बहुत **(नर्या)** मनुष्यों के लिये हितकारिणी सेनाओं को **(नृवत्)** प्रधान पुरुष के सदृश **(दधानः)** धारण करनेवाला **(बर्हणाः)** वृद्धि को प्राप्त **(तुजः)** शत्रुओं के नाश करनेवाले बल आदि से युक्त सेनाओं को **(आ)** **(विवेश)** प्राप्त होवें **(जरित्रे)** स्तुति करनेवाले के लिये **(इमाः)** इन वर्त्तमान में पाई हुई **(धियः)** बुद्धियों को **(प्र)** **(अचेतयत्)** बोध सहित करे, वह पुरुष **(इमम्)** इस **(शुक्रम्)** शीघ्र कार्य्य करनेवाले **(वर्णम्)** स्वीकार के **(अतिरत्)** पार उतरे॥५॥

भावार्थः-वही पुरुष राज्य में प्रविष्ट हो सकता है कि जो बुद्धियुक्त धार्मिक पुरुषों को सब अधिकारों में नियुक्त कर और सेना की उन्नति करके पिता के सदृश प्रजाओं का पालन कर सके॥५॥

पुना राजप्रजापुरुषैरनुष्ठेयमाह॥

फिर राजा तथा प्रजाजनों के कर्त्तव्य विषय को अगले मन्त्र में कहते हैं॥

म॒हो म॒हानि पनयन्त्य॒स्येन्द्र॑स्य॒ कर्म॑ सुकृ॒ता पु॑रू॒णि॑।
वृ॒जने॑न वृजि॒नान्त्सं पि॑पेष मा॒याभि॒र्दस्यूँ॒रभि॑भू॒त्योजाः॥६॥

म॒हः। म॒हानि॑। पन॒य॒न्ति॒। अ॒स्य॒। इन्द्र॑स्य। कर्म॑। सुऽकृ॑ता। पु॒रू॒णि॑। वृ॒जने॑न। वृ॒जि॒नान्। सम्। पि॒पे॒ष॒। मा॒याभि॑ः। दस्यू॑न्। अ॒भिभू॑तिऽओजाः॥६॥

पदार्थः-**(महः)** महतः **(महानि)** महान्ति **(पनयन्ति)** पनायन्ति प्रशंसन्ति। अत्र **वाच्छन्दसी**ति ह्रस्वः। **(अस्य)** वर्त्तमानस्य **(इन्द्रस्य)** सकलैश्वर्ययुक्तस्य **(कर्म)** कर्माणि **(सुकृता)** शोभनेन धर्मयोगेन कृतानि **(पुरूणि)** बहूनि **(वृजनेन)** बलेन **(वृजिनान्)** पापान् **(सम्)** **(पिपेष)** पिष्यात् **(मायाभिः)** प्रज्ञाभिः **(दस्यून्)** साहसेन उत्कोचकान् चोरान् **(अभिभूत्योजाः)** अभिभूतिः पराजयकरमोजो बलं यस्य सः॥६॥

अन्वयः-योऽभिभूत्योजा वृजनेन मायाभिर्वृजिनान् दस्यून् संपिपेष यान्यस्य मह इन्द्रस्य पुरूणि महानि सुकृता कर्म पनयन्ति तानि सङ्गृह्णीयात् स एव राजाऽमात्यतामर्हेत्॥६॥

भावार्थः-यथा राजप्रजाजनैः सर्वाधीशस्य धर्म्याणि कर्माणि स्वीकर्त्तव्यानि सन्ति तथैव सर्वाऽधिष्ठात्रा राज्ञा सर्वेषामुत्तमान्याचरणानि स्वीकर्त्तव्यानि नेतराणि केनचित्॥६॥

पदार्थः-जो **(अभिभूत्योजाः)** शत्रुपराजय करनेवाले बल से युक्त राजपुरुष **(वृजनेन)** बल और **(मायाभिः)** बुद्धियों से **(वृजिनान्)** पापी **(दस्यून्)** साहसी चोरों को **(सम्)** **(पिपेष)** पीसे और जो **(अस्य)** इस **(महः)** श्रेष्ठ **(इन्द्रस्य)** सम्पूर्ण ऐश्वर्ययुक्त पुरुष के **(पुरूणि)** बहुत **(महानि)** बड़े **(सुकृता)** उत्तम धर्म के योग से किये गये **(कर्म)** काय्यों की **(पनयन्ति)** प्रशंसा करते हैं, उनका ग्रहण करे, वही पुरुष राजा का मन्त्री होने योग्य होवे॥६॥

भावार्थः-जैसे राजा और प्रजाजनों को सब लोगों के स्वामी के धर्मयुक्त कर्म स्वीकार करने योग्य हैं, वैसे ही सबके स्वामी राजा को चाहिये कि सब लोगों के उत्तम आचरणों को स्वीकार करे और अनिष्ट आचरणों का स्वीकार कोई न करे॥६॥

पुनर्विद्वद्राजपुरुषविषयमाह॥

फिर विद्वान् तथा राजपुरुष के विषय को अगले मन्त्र में कहते हैं॥

युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः।

विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति॥७॥

युधा। इन्द्रः। मह्ना। वरिवः। चकार। देवेभ्यः। सत्ऽपतिः। चर्षणिऽप्राः। विवस्वतः। सदने। अस्य। तानि। विप्राः। उक्थेभिः। कवयः। गृणन्ति॥७॥

पदार्थः-(**युधा**) संग्रामेण **(इन्द्रः)** ऐश्वर्ययुक्तः **(मह्ना)** महता **(वरिवः)** सेवनम् **(चकार)** कुर्यात् **(देवेभ्यः)** विद्वद्भ्यः **(सत्पतिः)** सतां पालकः **(चर्षणिप्राः)** यः चर्षणीन् मनुष्यान् सत्यविद्याशिक्षासुशीलैः प्राति प्रपूर्ति सः **(विवस्वतः)** सवितुः **(सदने)** मण्डले **(अस्य)** **(तानि)** **(विप्राः)** मेधाविनः **(उक्थेभिः)** प्रशंसावचनैः **(कवयः)** विद्वांसः **(गृणन्ति)** स्तुवन्ति॥७॥

अन्वयः-यो देवेभ्यः शिक्षां प्राप्य सत्पतिश्चर्षणिप्रा इन्द्रो मह्ना युधा येषां कर्मणां वरिवश्चकार तस्याऽस्य तानि विवस्वतः सदने कवयो विप्रा उक्थेभिर्गृणन्ति॥७॥

भावार्थः-त एव विद्वांसो धार्मिका विज्ञेया ये राजादीनां मिथ्यास्तुतिं विहाय धर्म्याणि कर्माणि प्रशंसन्ति त एव राजानो भवितुमर्हन्ति ये धर्म्याणि कर्माण्याचरन्ति॥७॥

पदार्थः-जो **(देवेभ्यः)** विद्वानों से शिक्षा पाके **(सत्पतिः)** श्रेष्ठ पुरुषों का पालन करने **(चर्षणिप्राः)** मनुष्यों को सत्य विद्या, शिक्षा और उत्तम स्वभाव से पूर्ण करनेवाला **(इन्द्रः)** राज्य के ऐश्वर्य से युक्त **(मह्ना)** बड़े **(युधा)** संग्राम से जिन कर्मों का **(वरिवः)** सेवन **(चकार)** करे उस **(अस्य)**

इस राजपुरुष के **(तानि)** उन कर्मों की **(विवस्वतः)** सूर्य्य के **(सदने)** मण्डल में **(कवयः)** विद्यायुक्त **(विप्राः)** बुद्धिमान् लोग **(उक्थेभिः)** प्रशंसा के वचनों से **(गृणन्ति)** स्तुति करते हैं॥७॥

भावार्थः–उन्हीं लोगों को विद्वान् और धार्मिक जानना चाहिये कि जो राजा आदिकों की झूठी स्तुति को त्याग के धर्मसम्बन्धी कर्मों की प्रशंसा करते हैं और वे ही राजा होने के योग्य हैं कि जो धर्मयुक्त आचरणों को करते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः।
ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः॥८॥

सत्राऽसहम्। वरेण्यम्। सहःऽदाम्। ससऽवांसम्। स्वः। अपः। च। देवीः। ससान। यः। पृथिवीम्। द्याम्। उत। इमाम्। इन्द्रम्। मदन्ति। अनु। धीऽरणासः॥८॥

पदार्थः–(**सत्रासाहम्**) यः सत्रा सत्यानि सहते स तम् (**वरेण्यम्**) स्वीकर्तुं योग्यम् (**सहोदाम्**) बलप्रदम् (**ससवांसम्**) पापपुण्ययोर्विभक्तारम् (**स्वः**) सुखम् (**अपः**) प्राणान् (**च**) (**देवीः**) दिव्याः (**ससान**) विभजेत् (**यः**) (**पृथिवीम्**) अन्तरिक्षं भूमिं वा (**द्याम्**) विद्युतम् (**उत**) (**इमाम्**) वर्त्तमानम् (**इन्द्रम्**) (**मदन्ति**) आनन्दन्ति (**अनु**) (**धीरणासः**) धीः प्रशस्ता प्रज्ञा रणः संग्रामो येषान्ते॥८॥

अन्वयः–यः सत्रासाहं वरेण्यं सहोदां ससवांसं स्वर्देवीरपश्चेमां पृथिवीमुतेमां द्यां ससान तमिन्द्रं धीरणासो मदन्ति स तानानुमदेदानन्देत्॥८॥

भावार्थः–योऽसत्यत्यागी सत्यग्राही बलवर्धकः प्रजासुखेच्छुर्विद्युत्पृथिव्यादिगुणान् विद्यया विभाजकः स्यात् तमेव परीक्षकं धीमन्तो वीराः प्राप्याऽऽनन्दन्ति तेऽपीदृशादेवानन्दं प्राप्तुमर्हन्ति॥८॥

पदार्थः–(**यः**) जो (**सत्रासाहम्**) सत्यों के सहनेवाले (**वरेण्यम्**) स्वीकार करने योग्य (**सहोदाम्**) बल के देने तथा (**ससवांसम्**) पाप और पुण्य का विभाग करनेवाले (**स्वः**) सुख (**च**) और (**देवीः**) उत्तम (**अपः**) प्राणों को (**इमाम्**) प्रत्यक्ष वर्त्तमान इस (**पृथिवीम्**) अन्तरिक्ष वा पृथिवी (**उत**) और इस (**द्याम्**) बिजुली को (**ससान**) अलग-अलग करे, उस (**इन्द्रम्**) तेजस्वी पुरुष को (**धीरणासः**) उत्तम बुद्धि और संग्राम से युक्त लोग (**मदन्ति**) आनन्दित करते हैं, वह उनके (**अनु**) पीछे आनन्द को प्राप्त होवे॥८॥

भावार्थः–जो असत्य का त्याग और सत्य का ग्रहण करने, बल को बढ़ाने और प्रजा के सुख की इच्छा करनेवाला पुरुष बिजुली और पृथिवी आदि के गुणों का विद्या से विभागकर्त्ता हो, उसी परीक्षा करनेवाले जन को बुद्धिमान् वीर लोग प्राप्त होके आनन्द करते हैं और वे भी ऐसे ही पुरुष से आनन्द

को प्राप्त हो सकते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स॒सानात्याँ उ॒त सूर्यं॑ सस॒ानेन्द्रः॑ ससान पुरु॒भोज॑सं॒ गाम्।
हि॒र॒ण्यय॑मु॒त भोग॑ं ससान ह॒त्वी दस्यू॒न् प्रार्यं॑ वर्ण॑मावत्॥९॥

स॒सान॑। अत्या॑न्। उ॒त। सूर्य॑म्। स॒सा॒न॒। इन्द्रः॑। स॒सा॒न॒। पु॒रु॒ऽभोज॑सम्। गाम्। हि॒र॒ण्यय॑म्। उ॒त। भोग॑म्। स॒सा॒न॒। ह॒त्वी। दस्यू॑न्। प्र। आर्य॑म्। वर्ण॑म्। आ॒व॒त्॥९॥

पदार्थः-(**ससान**) विभजेत् (**अत्यान्**) सुशिक्षयाऽश्वान् (**उत**) (**सूर्य्यम्**) सूर्य्यमिव वर्त्तमानं प्राज्ञम् (**ससान**) (**इन्द्रः**) सकलैश्वर्ययुक्तः सर्वाधिपतिः (**ससान**) (**पुरुभोजसम्**) बहूनां पालकं बह्वन्नभोक्तारं वा (**गाम्**) वाणीं भूमिं वा (**हिरण्ययम्**) सुवर्णादिप्रचुरं धनम् (**उत**) (**भोगम्**) (**ससान**) (**हत्वी**) (**दस्यून्**) (**प्र**) (**आर्यम्**) उत्तमगुणकर्मस्वभावं धार्मिकम् (**वर्णम्**) स्वीकर्त्तव्यम् (**आवत्**) रक्षेत्॥९॥

अन्वयः-स इन्द्रो राजा अमात्यसमूहो वाऽत्यान् ससान सूर्य्यं ससान पुरुभोजसं गामुत हिरण्ययं ससानोत भोगं ससान दस्यून् हत्व्यार्यं वर्णं प्रावत्॥९॥

भावार्थः-ये सुपरीक्ष्य श्रेष्ठाश्रेष्ठानश्वान् वीरान् न्यायाधीशान् श्रियं भोगं च विभक्तुं शक्नुयुस्त एव दुष्टान् हत्वा श्रेष्ठान् रक्षितुं शक्नुयुः॥९॥

पदार्थः-वह (**इन्द्रः**) सम्पूर्ण ऐश्वर्य से युक्त राजा वा मन्त्रियों का समूह (**अत्यान्**) उत्तम शिक्षा से घोड़ों के (**ससान**) विभाग को और (**सूर्यम्**) सूर्य के सदृश प्रतापयुक्त वीर पुरुष को (**ससान**) अलग करे, (**पुरुभोजसम्**) बहुतों का पालन वा बहुतों को नहीं भोजन देनेवाले पुरुष की (**गाम्**) वाणी वा भूमि का (**उत**) और (**हिरण्ययम्**) सुवर्ण आदि पदार्थों का (**ससान**) विभाग करे (**उत**) और (**भोगम्**) उत्तम भोजन आदि के पदार्थों का (**ससान**) विभाग करे, वह पुरुष (**दस्यून्**) साहस कर्म करनेवाले चोर आदि का (**हत्वी**) नाश करके (**आर्यम्**) उत्तम गुण, कर्म, स्वभावयुक्त धार्मिक (**वर्णम्**) स्वीकार करने योग्य पुरुष की (**प्र**) (**आवत्**) रक्षा करे॥९॥

भावार्थः-जो लोग उत्तम प्रकार परीक्षा करके भले और बुरे घोड़े, वीर पुरुष, न्यायाधीश, लक्ष्मी और उत्तम भोग का विभाग कर सकें, वे ही पुरुष दुष्ट पुरुषों का नाश कर श्रेष्ठ पुरुषों की रक्षा कर सकें॥९॥

पुना राजादिजनैः किं कर्त्तव्यमित्याह॥

फिर राजादि जनों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्र ओषधीरसनोदहानि वनस्पँतीरसनोदुन्तरिक्षम्।
बिभेद बलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनाम्॥ १०॥

इन्द्रः। ओषधीः। असनोत्। अहानि। वनस्पतीन्। असनोत्। अन्तरिक्षम्। बिभेद। बलम्। नुनुदे। विऽवाचः। अथ। अभवत्। दमिता। अभिऽक्रतूनाम्॥ १०॥

पदार्थः-(**इन्द्रः**) ऐश्वर्य्यप्रदः (**ओषधीः**) सोमाद्याः (**असनोत्**) सुनुयात् (**अहानि**) दिनानि (**वनस्पतीन्**) अश्वत्थादीन् (**असनोत्**) सुनुयात् (**अन्तरिक्षम्**) उदकम्। **अन्तरिक्षमित्युदकनामसु पठितम्।** (निघं०१.१२)[१२] (**बिभेद**) भिन्द्यात् (**बलम्**) (**नुनुदे**) प्रेरयेत् (**विवाचः**) विविधा वाणीः (**अथ**) (**अभवत्**) भवेत् (**दमिता**) नियन्ता (**अभिक्रतूनाम्**) आभिमुख्येन क्रतुः कर्म येषां तेषां बलीयसां शत्रूणाम्॥१०॥

अन्वयः-स राजेन्द्रोऽहानि नित्यमोषधीरसनोद् वनस्पतीनसनोदन्तरिक्षं बलं च बिभेद विवाचो नुनुदेऽथाभिक्रतूनां दमिताऽभवत्॥१०॥

भावार्थः-राजादिजनैः प्रत्यहमोषधिरसं निर्माय तद्रसपानं विद्यावाक्प्रचारणं सर्वेषां प्रज्ञानां स्वप्रज्ञाधिक्येन दमनं च कर्त्तव्यं यत आरोग्यं विद्याप्रभावाश्च प्रतिदिनं वर्धेरन्॥१०॥

पदार्थः-वह (**इन्द्रः**) ऐश्वर्य देनेवाला राजा (**अहानि**) दिनों दिन (**ओषधीः**) सोम आदि ओषधियों को (**असनोत्**) देवे, (**वनस्पतीन्**) पीपल आदि वनस्पतियों को (**असनोत्**) देवे, (**अन्तरिक्षम्**) जल और (**बलम्**) बल का (**बिभेद**) भेदन करे, (**विवाचः**) अनेक प्रकार की वाणियों की (**नुनुदे**) प्रेरणा करे (**अथ**) और भी (**अभिक्रतूनाम्**) सहसा शीघ्र कर्म करनेवाले शत्रुओं को (**दमिता**) दमन करनेवाला (**अभवत्**) होवे॥१०॥

भावार्थः-राजा आदि श्रेष्ठ जनों को चाहिये कि प्रतिदिन ओषधियों के रसादि उत्पन्न कर उनके रस का पान, विद्या सम्बन्धी वाणी का प्रचार और सब जनों की बुद्धियों का अपनी बुद्धि से भी अधिकता के सहित दमन अर्थात् विषयों से निवृत्ति करें, जिससे आरोग्य और विद्याओं के प्रभाव प्रतिदिन बढ़ें॥१०॥

मनुष्यैः कीदृशो राजा सेव्य इत्याह॥

मनुष्यों को कैसे राजा का सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।

---

१२. अन्तरिक्षपदमुदकनामसु नोपलभ्यते। तत्र त्वेतत्पदम् अन्तरिक्षनामसु (निघ०१.३.६) दृश्यते। सं०

शृ॒णव॑न्त॒मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नन्तं॑ वृ॒त्राणि॑ सं॒जित॑ं॒ धना॑नाम्॥ ११॥ १६॥

शु॒नम्। हु॒वे॒म॒। म॒घऽवा॑नम्। इन्द्र॑म्। अ॒स्मिन्। भरे॑। नृऽत॑मम्। वाज॑ऽसातौ। शृ॒ण्वन्त॑म्। उ॒ग्रम्। ऊ॒तये॑। स॒मत्ऽसु॑। घ्नन्त॑म्। वृ॒त्राणि॑। स॒म्ऽजित॑म्। धना॑नाम्॥ ११॥

पदार्थः-(**शुनम्**) सुखप्रदम् (**हुवेम**) प्रशंसेम (**मघवानम्**) पुष्कलधनम् (**इन्द्रम्**) दुष्टानां विदारकम् (**अस्मिन्**) वर्त्तमाने (**भरे**) मूर्खविद्वदज्ञानज्ञानविषयविरोधरूपे युद्धे (**नृतमम्**) अतिशयेन सत्याऽसत्ययोर्नेतारम् (**वाजसातौ**) विज्ञानाऽविज्ञानसत्यासत्यविभाजके (**शृण्वन्तम्**) अर्थिप्रत्यर्थिनोः श्रवणाऽनन्तरं न्यायस्य कर्त्तारम् (**उग्रम्**) दुष्टानामुपरि कठिनस्वभावं श्रेष्ठेषु शान्तम् (**ऊतये**) रक्षणाद्याय (**समत्सु**) संग्रामेषु (**घ्नन्तम्**) (**वृत्राणि**) मेघावयवानिव शत्रुसैन्यानि (**सञ्जितम्**) सम्यगुत्कर्षप्राप्तम् (**धनानाम्**) विज्ञानादिपदार्थानां मध्ये॥ ११॥

अन्वयः-हे मनुष्या! यं शुनं मघवानमस्मिन् वाजसातौ भरे नृतममिन्द्रमूतये शृण्वन्तमुग्रं समत्सु वृत्राणि घ्नन्तं धनानां सञ्जितं राजानं हुवेम तं यूयमप्याह्वयत॥ ११॥

भावार्थः-मनुष्या दुष्टश्रेष्ठानां परीक्षितारं वादिप्रतिवादिनोर्वचांसि श्रुत्वा न्यायकर्त्तारं पण्डितमूर्खसत्काराऽसत्कारविधातारं पक्षपातरहितं सर्वेषां सुहृदं राजानं स्वीकृत्याऽऽनन्दन्त्विति॥ ११॥

अत्र सूर्यविद्युद्वीरराज्यराजसेनाप्रजागुणवर्णानादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुस्त्रिंशत्तमं सूक्तं षोडशो वर्गश्च समाप्त॥

पदार्थः-हे मनुष्यो! जिस (**शुनम्**) सुख देनेवाले (**मघवानम्**) बहुत धन से युक्त (**अस्मिन्**) इस वर्त्तमान (**वाजसातौ**) विज्ञान-अविज्ञान, सत्य और असत्य के विभागकारक (**भरे**) मूर्ख और विद्वान् के अज्ञान और ज्ञान के विषय के विरोध रूप युद्ध में (**नृतमम्**) अत्यन्त सत्य और असत्य के निर्णय करने (**इन्द्रम्**) और दुष्ट जनों के नाश करनेवाले पुरुष की (**ऊतये**) रक्षा आदि के लिये (**शृण्वन्तम्**) अर्थी-प्रत्यर्थी अर्थात् मुद्दई-मुद्दाले के वचन सुनने के पीछे न्याय करने, (**उग्रम्**) दुष्ट पुरुषों पर कठोर स्वभाव और श्रेष्ठ पुरुषों में शान्त स्वभाव रखने, (**समत्सु**) संग्रामों में (**वृत्राणि**) मेघों के अवयवों के सदृश शत्रुओं की सेनाओं के (**घ्नन्तम्**) नाश करने और (**धनानाम्**) विज्ञान आदि पदार्थों के मध्य में (**सञ्जितम्**) उत्तम प्रकार श्रेष्ठता को प्राप्त होनेवाले राजा की (**हुवेम**) प्रशंसा करें, उसकी आप लोग भी प्रशंसा

करो॥११॥

भावार्थः–मनुष्य लोग दुष्ट और श्रेष्ठ पुरुषों की परीक्षा करने, वादी और प्रतिवादी के वचनों को सुनके न्याय करने, पण्डित और मूर्ख जन का आदर और निरादर करने, पक्षपात से अलग रहने और सम्पूर्ण जनों के सुख देनेवाले पुरुष को राजा मान के आनन्द करें॥११॥

इस सूक्त में सूर्य्य, बिजुली, वीर, राज्य, राजा की सेना और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौतीसवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य पञ्चत्रिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ७, १०, ११ त्रिष्टुप्। २, ३, ६, ८ निचृत्त्रिष्टुप्। ९ विराट् त्रिष्टुप्छन्दः। धैवतः स्वरः। ४ भुरिक् पङ्क्तिः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब ग्यारह ऋचावाले पैंतीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र से मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तिष्ठा॒ हरी॒ रथ॒ आ यु॒ज्यमा॑ना या॒हि वा॒युर्न नि॒युतो॑ नो॒ अच्छ॑।
पिबा॒स्यन्धो॑ अ॒भिसृ॑ष्टो अ॒स्मे इन्द्र॒ स्वाहा॑ ररि॒मा ते॒ मदा॑य॥ १॥

तिष्ठ॑। हरी॒ इति॑। रथे॑। आ। यु॒ज्यमा॑ना। या॒हि। वा॒युः। न। नि॒ऽयुतः॑। न॒ः। अच्छ॑। पिबा॑सि। अन्धः॑। अ॒भिऽसृ॑ष्टः। अ॒स्मे इति॑। इन्द्र॑। स्वाहा॑। र॒रि॒म। ते॒। मदा॑य॥ १॥

पदार्थः-(**तिष्ठ**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हरी**) अश्वौ (**रथे**) (**आ**) समन्तात् (**युज्यमाना**) संयुक्तौ (**याहि**) गच्छ (**वायुः**) पवनः (**न**) इव (**नियुतः**) श्रेष्ठैर्मिश्रितान् दुष्टैर्वियुक्तान् (**नः**) अस्मान् (**अच्छ**) सम्यक् (**पिबासि**) पिबेः (**अन्धः**) सुसंस्कृतमन्नम् (**अभिसृष्टः**) आभिमुख्येन प्रेरितः (**अस्मे**) अस्मासु (**इन्द्र**) परमैश्वर्य्ययुक्त (**स्वाहा**) सत्यया वाचा (**ररिम**) दद्याम। अत्र **संहितायामि**ति दीर्घः। (**ते**) तुभ्यम् (**मदाय**) आनन्दाय॥ १॥

अन्वयः-हे इन्द्र राजँस्त्वं यस्मिन् रथे युज्यमाना हरी इव जलाग्नी वर्त्तेते तस्मिन्नातिष्ठ तेन वायुर्न नियुतो नोऽस्मानच्छ याहि। अभिसृष्टः सँस्तेऽस्मे यदन्धो मदाय ररिम तत्स्वाहा पिबासि॥ १॥

भावार्थः-ये मनुष्या अग्न्यादिपदार्थचालिरथे स्थित्वा देशान्तरं वायुवद् गच्छन्ति ते पुष्कलानि भक्ष्यभोज्यपेयचूष्यानि प्राप्नुवन्ति॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य से युक्त राजन्! आप जिस (**रथे**) रथ में (**युज्यमाना**) जुड़े हुए (**हरी**) घोड़ों के सदृश जल और अग्नि वर्त्तमान हैं, उस रथ में (**आ**) सब प्रकार (**तिष्ठ**) वर्त्तमान हूजिये, इससे (**वायुः**) पवन के (**न**) तुल्य (**नियुतः**) श्रेष्ठ पुरुषों के साथ मिले और दुष्ट पुरुषों से अनमिले (**नः**) हम लोगों को (**अच्छ**) अच्छे प्रकार (**याहि**) प्राप्त हूजिये और (**अभिसृष्टः**) सम्मुख प्रेरित हुआ जन (**ते**) आपके लिये (**अस्मे**) हमारे निकट से (**अन्धः**) उत्तम प्रकार संस्कार किये हुए अन्न को (**मदाय**) आनन्द के अर्थ (**ररिम**) देवें, उसका (**स्वाहा**) सत्य वाणी से (**पिबासि**) पान कीजिये॥ १॥

भावार्थः-जो मनुष्य अग्नि आदि पदार्थों से चलनेवाले रथ पर चढ़ के अन्य अन्य देशों को वायु के सदृश जाते हैं, वे बहुत भक्षण, भोजन करने, पीने और चूषने योग्य पदार्थों को प्राप्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि।

द्रवद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा वहात इन्द्रम्॥ २॥

उप। अजिरा। पुरुऽहूताय। सप्ती इति। हरी इति। रथस्य। धूःऽसु। आ। युनज्मि। द्रवत्। यथा। सम्ऽभृतम्। विश्वतः। चित्। उप। इमम्। यज्ञम्। आ। वहातः। इन्द्रम्॥ २॥

पदार्थः-(**उप**) सामीप्ये (**अजिरा**) यानानां प्रक्षेप्तारौ (**पुरुहूताय**) बहुभिराहूताय (**सप्ती**) सद्यः सर्पन्तौ। अत्र **वाच्छन्दसी**ति गुण कृते रेफलोपः। (**हरी**) हरणशीलौ (**रथस्य**) यानस्य (**धूर्षु**) रथाधारावयवेषु (**आ**) समन्तात् (**युनज्मि**) (**द्रवत्**) द्रवं प्राप्नुवत् (**यथा**) (**सम्भृतम्**) सम्यग्धृतम् (**विश्वतः**) सर्वतः (**चित्**) अपि (**उप**) (**इमम्**) प्रत्यक्षम् (**यज्ञम्**) शिल्पविद्यासाध्यम् (**आ**) (**वहातः**) वहेताम् (**इन्द्रम्**) परमैश्वर्य्यम्॥ २॥

अन्वयः-हे मनुष्या! यथाऽहं याविमं यज्ञमिन्द्रमावहातो विश्वतो द्रवत् सम्भृतं चिदप्युपावहातस्तौ पुरुहूताय वर्त्तमानावजिरा सप्ती हरी रथस्य धूर्षु युनज्मि तौ यूयमपि युङ्ग्ध्वम्॥ २॥

भावार्थः-ये यानेषु विद्युदादिपदार्थान् संयोज्य चालयन्ति ते कं कं देशं न गच्छेयु? तेषां किमैश्वर्य्यमप्राप्तं स्यात्?॥ २॥

पदार्थः-हे मनुष्यो! (**यथा**) जैसे मैं जो (**इमम्**) इस प्रत्यक्ष (**यज्ञम्**) शिल्प विद्या से होने योग्य (**इन्द्रम्**) अत्यन्त ऐश्वर्य्यवान् काम को सब प्रकार चलाते (**विश्वतः**) वा सब ओर से (**द्रवत्**) पिघलने को प्राप्त होते हुए (**सम्भृतम्**) उत्तम प्रकार धारण किये गये पदार्थ को (**चित्**) भी (**उप**) समीप में (**आ, वहातः**) वहाते उन (**पुरुहूताय**) बहुतों ने बुलाये गये के लिये वर्त्तमान (**अजिरा**) वाहनों के फेंकने (**सप्ती**) शीघ्र चलने (**हरी**) और यान को ले जानेवाले का (**रथस्य**) वाहन की (**धूर्षु**) धुरियों में जिनको (**उप, आ, युनज्मि**) जोड़ता हूँ, उनको आप लोग भी जोड़िये॥ २॥

भावार्थः-जो लोग वाहनों में बिजुली आदि पदार्थों को संयुक्त करके चलाते हैं, वे किस-किस देश को न जा सकें? और उनको कौन सा ऐश्वर्य्य है, जो न प्राप्त होवे?॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ स्वधावः।

ग्रसेतामश्वा वि मुचेह शोणा दिवेऽदिवे सदृशीरद्धि धानाः॥ ३॥

उपो इति। नयस्व। वृषणा। तपुःऽपा। उत। ईम्। अव। त्वम्। वृषभ। स्वधाऽवः। ग्रसेताम्। अश्वा। वि। मुच। इह। शोणा। दिवेऽदिवे। सऽदृशीः। अद्धि। धानाः॥ ३॥

पदार्थः-(**उपो**) सामीप्ये (**नयस्व**) (**वृषणा**) बलिष्ठौ (**तपुष्पा**) यौ तपूंषि पातो रक्षतस्तौ (**उत**) (**ईम्**) उदकम्। **ईमित्युदकनामसु पठितम्।** (निघं०१.१२) (**अव**) प्रवेशय (**त्वम्**) (**वृषभ**) बलिष्ठ (**स्वधावः**) पुष्कलान्नयुक्त (**ग्रसेताम्**) (**अश्वा**) सद्योगामिनौ (**वि**) (**मुच**) त्यज (**इह**) अस्मिन् याने (**शोणा**) रक्तगुणविशिष्टौ (**दिवेदिवे**) नित्यम् (**सदृशीः**) समाना गतीः (**अद्धि**) भुङ्क्ष्व (**धानाः**) अग्निसंस्कृतान्नविशेषान्॥३॥

अन्वयः-हे वृषभ स्वधावस्त्वमिह यौ तपुष्पा वृषणा शोणाऽश्वेन्धनानि ग्रसेतां तत्र कला विमुचेमुपो नयस्व। उत दिवेदिवे सदृशीर्धाना अद्धि तत्र सम्भारानव॥३॥

भावार्थः-ये शिल्पिनो मनुष्या अग्निजलादीन् पदार्थान् सुकलायुक्तेषु यानेषु संयुज्य चालयन्ति ते दारिद्र्यं विमुच्य धनधान्यमाप्नुवन्ति॥३॥

पदार्थः-हे (**वृषभ**) बलवान् (**स्वधावः**) अत्यन्त अन्नयुक्त! (**त्वम्**) आप (**इह**) इस वाहन में जो (**तपुष्पा**) तपते हुए पदार्थों को रखनेवाले (**वृषणा**) बल और (**शोणा**) लाल रङ्गयुक्त (**अश्वा**) शीघ्रगामी अग्नि आदि इन्धनों को (**ग्रसेताम्**) भक्षण करे, उनमें कलाओं को (**वि, मुच**) छोड़ो (**ईम्**) जल को (**उपो**) उनके समीप में (**नयस्व**) पहुँचाओ (**उत**) और (**दिवेदिवे**) नित्य (**सदृशीः**) तुल्य परिणामवाले (**धानाः**) अग्नि से संस्कार किये अन्नविशेषों को (**अद्धि**) भक्षण करो, उनमें बोझों को (**अव**) पेश करो॥३॥

भावार्थः-जो शिल्पी जन अग्नि, जल आदि पदार्थों को उत्तम कलाओं से युक्त वाहनों में संयुक्त करके चलाते हैं, वे दारिद्र्य को छोड़ के धन और धान्य को प्राप्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमादे आशू।
स्थिरं रथं सुखमिन्द्राधितिष्ठन् प्रजानन् विद्वाँ उप याहि सोमम्॥४॥

ब्रह्मणा। ते। ब्रह्मऽयुजा। युनज्मि। हरी इति। सखाया। सधऽमादे। आशू इति। स्थिरम्। रथम्। सुऽखम्। इन्द्र। अधिऽतिष्ठन्। प्रऽजानन्। विद्वान्। उप। याहि। सोमम्॥४॥

पदार्थः-(**ब्रह्मणा**) अन्नादिना (**ते**) तव (**ब्रह्मयुजा**) यौ ब्रह्म धनं योजयतस्तौ (**युनज्मि**) (**हरी**) जलाग्नी (**सखाया**) सुहृदाविव (**सधमादे**) समानस्थाने (**आशू**) शीघ्रं गमयितारौ (**स्थिरम्**) ध्रुवम् (**रथम्**) यानम् (**सुखम्**) सुहितं खेभ्यस्तम् (**इन्द्र**) शिल्पविद्यैश्वर्य्ययुक्त (**अधितिष्ठन्**) उपरि स्थितः सन् (**प्रजानन्**) प्रकृष्टतया बुद्ध्यमानः (**विद्वान्**) साङ्गोपाङ्गामेतद्विद्यां विदन् (**उप**) (**याहि**) (**सोमम्**) ऐश्वर्य्यम्॥४॥

अन्वयः-हे इन्द्र! अहं ते तव यस्मिन् याने ब्रह्मणा सह वर्त्तमानौ ब्रह्मयुजा आशू हरी सखाया इव सधमादे युनज्मि तं सुखं स्थिरं रथमधितिष्ठन् विद्वान् सन्नेतद्विद्यां प्रजानन् सोममुपयाहि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽग्निजलादिप्रयुक्ते याने स्थित्वा यथावद्विद्यया प्रचालयन्तो देशान्तरं गत्वागत्यैश्वर्य्यं प्राप्य सखीन् सत्कुर्युस्त एव विद्याधर्मावुन्नेतुं शक्नुयुः॥४॥

पदार्थः-हे **(इन्द्र)** शिल्पविद्यारूप ऐश्वर्य्य से युक्त पुरुष! मैं **(ते)** आपके जिस वाहन में **(ब्रह्मणा)** अन्न आदि के सहित विद्यमान **(ब्रह्मयुजा)** धन के संग्रह कराने और **(आशू)** शीघ्र ले चलनेवाले **(हरी)** जल और अग्नि को **(सखाया)** मित्रों के तुल्य **(सधमादे)** बरोबर के स्थान में **(युनज्मि)** संयुक्त करता हूँ, उस **(सुखम्)** आकाश मार्गियों के लिये हित करनेवाले **(स्थिरम्)** दृढ़ **(रथम्)** वाहन **(अधि, तिष्ठन्)** पर स्थिर हों तो **(विद्वान्)** इस विद्या को अङ्ग और उपाङ्गों के सहित जानते और **(प्रजानन्)** उत्तम प्रकार ज्ञान को प्राप्त होते हुए आप **(सोमम्)** ऐश्वर्य्य को **(उप, याहि)** प्राप्त हूजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग अग्नि और जल आदि पदार्थों से चलाये गये वाहन पर बैठ अच्छे प्रकार विद्या द्वारा उसको चलाते हुए देशदेशान्तरों में जाय-आय और ऐश्वर्य को पाय मित्रों का सत्कार करें, वे ही विद्या और धर्म की वृद्धि कर सकें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मा ते हरी वृषणा वीतपृष्ठा नि रीरमन् यजमानासो अन्ये।
अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः॥५॥१७॥

मा। ते। हरी इति। वृषणा। वीतऽपृष्ठा। नि। रीरमन्। यजमानासः। अन्ये। अति।ऽआयाहि। शश्वतः। वयम्। ते। अरम्। सुतेभिः। कृणवाम। सोमैः॥५॥

पदार्थः-**(मा)** निषेधे **(ते)** तव **(हरी)** यानहारकौ **(वृषणा)** बलिष्ठौ **(वीतपृष्ठा)** वीते व्याप्तिशीले पृष्ठे ययोस्तौ **(नि)** **(रीरमन्)** रमयेयुः **(यजमानासः)** विद्यासङ्गतिविदः **(अन्ये)** एतद्भिन्नाः **(अत्यायाहि)** अतिवेगेनागच्छोल्लङ्घ्य वा **(शश्वतः)** सनातनाः **(वयम्)** **(ते)** तव **(अरम्)** अलम् **(सुतेभिः)** निष्पन्नैः **(कृणवाम)** कुर्य्याम **(सोमैः)** ऐश्वर्य्यैः॥५॥

अन्वयः-हे इन्द्र! येऽन्ये यजमानासस्ते तव वीतपृष्ठा वृषणा हरी मा नि रीरमन् ताँस्त्वमत्यायाहि। शश्वत आगच्छ यस्य ते सुतेभिः सोमैररं कामं वयं कृणवाम स त्वमस्माकमलं कामं कुरु॥५॥

भावार्थः-येऽग्न्यादिपदार्थविद्यामविदित्वैतद्विद्याविदो जनान्नोत्साहयन्ति तानुल्लङ्घ्यानादि-विद्याविदां विदुषां शरणं गत्वा शिल्पविद्यानिष्पन्नैः कार्य्यैः पूर्णकामा वयं भवेमेषित्वा नित्यं प्रयतेरन्॥५॥

पदार्थः-हे प्रतापयुक्त पुरुष! जो **(अन्ये)** इससे और **(यजमानासः)** विद्या की सङ्गति के जाननेवाले **(ते)** आपके **(वीतपृष्ठा)** चौड़ी पीठों से युक्त **(वृषणा)** बलिष्ठ **(हरी)** वाहनों के ले चलनेवालों को **(मा)** नहीं **(नि, रीरमन्)** रमावें उनको आप **(अत्यायाहि)** बड़े वेग से प्राप्त हूजिये वा छोड़िये और **(शश्वतः)** अनादि काल से सिद्ध विद्यायुक्त पुरुषों को प्राप्त हूजिये जिस **(ते)** आपके **(सुतेभिः)** उत्पन्न **(सोमैः)** ऐश्वर्य्यों से **(अरम्)** पूरे काम को **(वयम्)** हम लोग **(कृणवाम)** करें, वह आप हमारे पूरे काम को करो॥५॥

भावार्थः-जो लोग अग्नि आदि पदार्थों की विद्या को जाने विना इस विद्या के जाननेवाले जनों का उत्साह नहीं बढ़ाते, उनका उल्लङ्घन कर अनादि काल से सिद्ध विद्या के जाननेवाले विद्वानों की शरण जाके शिल्पविद्या से उत्पन्न कार्यों से पूर्ण मनोरथवाले हम लोग होवें, इस प्रकार इच्छा करके नित्य प्रयत्न करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि।
अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र॥६॥

तव। अयम्। सोमः। त्वम्। आ। इहि। अर्वाङ्। शश्वत्ऽतमम्। सुऽमनाः। अस्य। पाहि। अस्मिन्। यज्ञे। बर्हिषि। आ। निऽसद्य। दधिष्व। इमम्। जठरे। इन्दुम्। इन्द्र॥६॥

पदार्थः-(**तव**) (**अयम्**) (**सोमः**) ऐश्वर्य्ययोगः (**त्वम्**) (**आ**) (**इहि**) प्राप्नुहि (**अर्वाङ्**) अधस्ताद्वर्त्तमानः (**शश्वत्तमम्**) अतिशयेनाऽनादिभूतम् (**सुमनाः**) प्रसन्नचित्तः (**अस्य**) बोधस्य (**पाहि**) (**अस्मिन्**) (**यज्ञे**) शिल्पसम्पाद्ये व्यवहारे (**बर्हिषि**) अत्युत्तमे (**आ**) समन्तात् (**निषद्य**) नितरां स्थित्वा। अत्र **संहितायामि**ति दीर्घः। (**दधिष्व**) धेहि (**इमम्**) (**जठरे**) उदरे (**इन्दुम्**) सार्द्रपदार्थम् (**इन्द्र**) परमैश्वर्य्यमिच्छुक॥६॥

अन्वयः-हे इन्द्र! तव वोऽयमर्वाङ् सोमस्तं शश्वत्तमं त्वमेहि। अस्मिन् बर्हिषि यज्ञे निषद्य सुमनाः सन्निमं पाहि। अस्य सकाशात् प्राप्तमिन्दुं जठर आ दधिष्व॥६॥

भावार्थः-हे मनुष्या! अस्मिन्त्सर्वोत्तमे शिल्पसाध्ये व्यवहारे निपुणा भूत्वाऽनादिभूतं पूर्वैर्विद्वद्भिः प्राप्तमैश्वर्य्यं विधाय सर्वस्यास्य जगतो रक्षणे निधाय युक्ताहारविहारेणाऽनन्दं भुङ्क्त॥६॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य की इच्छा करनेवाले! **(तव)** आपका जो **(अयम्)** यह **(अर्वाङ्)** अधोभाग में विद्यमान **(सोमः)** ऐश्वर्य्य का संयोग उस **(शश्वत्तमम्)** अत्यन्त अनादि काल से

सिद्ध ऐश्वर्य्य संयोग को **(त्वम्)** आप **(आ)** **(इहि)** प्राप्त हूजिये **(अस्मिन्)** इस **(बर्हिषि)** अति उत्तम **(यज्ञे)** शिल्पविद्या से होने योग्य व्यवहार में **(निषद्य)** निरन्तर स्थिर होकर **(सुमनाः)** प्रसन्नचित्त हुए **(इमम्)** इसकी **(पाहि)** रक्षा करो और **(अस्य)** इस ज्ञान की उत्तेजना से प्राप्त **(इन्दुम्)** गीले पदार्थ को **(जठरे)** उदर में **(आ)** सब प्रकार **(दधिष्व)** धारण कीजिये॥६॥

भावार्थः-हे मनुष्यो! इस सबसे उत्तम शिल्पविद्या से साध्य व्यवहार में चतुर होके अनादि काल से उत्पन्न और प्राचीन विद्वानों से प्राप्त ऐश्वर्य्य को सिद्ध कर इस संसार की रक्षा के लिये स्थित करके योग्य आहार और विहार से आनन्द भोगो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम्।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि॥७॥

स्तीर्णम्। ते। बर्हिः। सुतः। इन्द्र। सोमः। कृताः। धानाः। अत्तवे। ते। हरिऽभ्याम्। तत्ऽओकसे। पुरुऽशाकाय । वृष्णे। मरुत्वते। तुभ्यम्। राता। हवींषि॥७॥

पदार्थः-(**स्तीर्णम्**) आच्छादितम् (**ते**) तव (**बर्हिः**) वृद्धमुदकम्। **बर्हिरित्युदकनामसु पठितम्।** (निघं०१.१२) (**सुतः**) निष्पादितः (**इन्द्र**) दारिद्र्यविदारक (**सोमः**) ऐश्वर्य्ययोगः (**कृताः**) निष्पन्नाः (**धानाः**) पक्वान्नविशेषाः (**अत्तवे**) अत्तुम् (**ते**) (**हरिभ्याम्**) (**तदोकसे**) तद्यानमोकः स्थानं यस्य तस्मै (**पुरुशाकाय**) बहुशक्तये (**वृष्णे**) वर्षणशीलाय (**मरुत्वते**) मरुतो बहवो मनुष्याः कार्य्यसाधका विद्यन्ते यस्य तस्मै (**तुभ्यम्**) (**राता**) दत्तानि (**हवींषि**) अत्तुमर्हाण्यन्नादीनि॥७॥

अन्वयः-हे इन्द्र! ते स्तीर्णं बर्हिस्सुतस्सोमः कृता धाना हरिभ्यां युक्ते याने स्थिता यत्ते तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यमत्तवे यानि हवींषि राता सन्ति तानि भुङ्क्ष्व॥७॥

भावार्थः-सर्वे मनुष्या निमृष्टपदार्थभोक्तारस्स्युर्नैवाऽन्यायेनोपार्जितं किञ्चिदपि भुञ्जीरन्नेवं वर्त्तमाने कृते धनशक्तिविद्याऽऽयूंषि वर्धन्ते॥७॥

पदार्थः-हे (**इन्द्र**) दरिद्रता के नाश करनेवाले! (**ते**) आपका (**स्तीर्णम्**) ढंपा और (**बर्हिः**) बढ़ा हुआ जल वा (**सुतः**) उत्पन्न किया गया (**सोमः**) ऐश्वर्य्य का संयोग वा (**कृताः**) सिद्ध किये गये (**धानाः**) पके हुए अन्न विशेष वा (**हरिभ्याम्**) घोड़ों से संयुक्त वाहन पर बैठे हुए जो (**ते**) आपके जन और (**तदोकसे**) वाहनरूप स्थानवाले (**पुरुशाकाय**) अनेक प्रकार की शक्ति से (**वृष्णे**) वृष्टि करानेवाले (**मरुत्वते**) कार्य्य करानेवाले बहुत मनुष्यों के सहित विराजमान (**तुभ्यम्**) आपके लिये (**अत्तवे**) भोजन करने को जो (**हवींषि**) भोजन करने के योग्य अन्न आदि (**राता**) वर्त्तमान उनको भोगो॥७॥

भावार्थः-सम्पूर्ण जन उत्तम पदार्थों के भोजन करनेवाले हों और अन्याय से इकट्ठे किये हुए किसी भी पदार्थ का भोग न करें। इस प्रकार वर्त्ताव करने पर धन, सामर्थ्य, विद्या और आयु बढ़ते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन्।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन् विद्वान् पथ्या३ अनु स्वाः॥८॥

इमम्। नरः। पर्वताः। तुभ्यम्। आपः। सम्। इन्द्र। गोभिः। मधुऽमन्तम्। अक्रन्। तस्य। आऽगत्य। सुऽमनाः। ऋष्व। पाहि। प्रऽजानन्। विद्वान्। पथ्याः। अनु। स्वाः॥८॥

पदार्थः-(**इमम्**) (**नरः**) नायकाः (**पर्वताः**) मेघाः (**तुभ्यम्**) (**आपः**) जलानि (**सम्**) (**इन्द्र**) परमैश्वर्य्यप्रापक (**गोभिः**) पृथिव्यादिभिस्सह (**मधुमन्तम्**) मधुरादिबहुरसयुक्तम् (**अक्रन्**) कुर्युः (**तस्य**) (**आगत्य**)। अत्र **संहितायामिति** दीर्घः। (**सुमनाः**) शोभनं निरीर्ष्यकं मनो यस्य सः (**ऋष्व**) प्राप्तविद्य (**पाहि**) (**प्रजानन्**) (**विद्वान्**) (**पथ्याः**) पथोऽपेताः (**अनु**) (**स्वाः**) स्वकीया गतीः॥८॥

अन्वयः-हे ऋष्वेन्द्र! ये नरस्तुभ्यं पर्वता आपश्चैव गोभिरिमं मधुमन्तं समक्रंस्तान् पाहि। सुमनाः प्रजानन् विद्वान्सँस्तस्य स्वाः पथ्या आगत्य सर्वाननुपाहि॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वर्षाभिः सर्वेषां पालनं जायते तथैव विमानादेर्यानस्य निर्मातारो जगत्यां सर्वेषां रक्षका भवन्ति॥८॥

पदार्थः-हे (**ऋष्व**) विद्या से पूर्ण (**इन्द्र**) अत्यन्त ऐश्वर्य की प्राप्ति करानेवाले! जो (**नरः**) प्रधान पुरुष (**तुभ्यम्**) आपके लिये (**पर्वताः**) मेघ और (**आपः**) जल के समान (**गोभिः**) पृथिवी आदि पदार्थों के सहित (**इमम्**) इस वर्त्तमान (**मधुमन्तम्**) मधुर आदि बहुत रसों से युक्त पदार्थ को (**सम्, अक्रन्**) अच्छे प्रकार करें उनका (**पाहि**) पालन करो (**सुमनाः**) और ईर्ष्यारहित मनवाले आप (**प्रजानन्**) जानते और (**विद्वान्**) विद्वान् होते हुए (**तस्य**) उस काम की (**स्वाः, पथ्याः**) मार्ग से निज चालियों को (**आगत्य**) प्राप्त होकर सबका (**अनु**) पालन करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वृष्टियों से सबका पालन होता है, वैसे ही विमान आदि वाहन बनानेवाले जन संसार में सबके रक्षा करनेवाले होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन् गणस्ते।
तेभिरेतं सजोषा वावशानोऽग्नेः पिब जिह्वया सोममिन्द्र॥९॥

यान्। आ। अभजः। मरुतः। इन्द्र। सोमे। ये। त्वाम्। अवर्धन्। अभवन्। गणः। ते। तेभिः। एतम्। सऽजोषाः। वावशानः। अग्नेः। पिब। जिह्वया। सोमम्। इन्द्र॥९॥

पदार्थः-(**यान्**) विदुषः (**आ**) (**अभजः**) सेवेथाः (**मरुतः**) प्राणानिव प्रियानाप्तान् (**इन्द्र**) सकलैश्वर्यप्रद (**सोमे**) ऐश्वर्य्ये (**ये**) (**त्वाम्**) (**अवर्धन्**) वर्धयेयुः (**अभवन्**) भवेयुः (**गणः**) समूहः (**ते**) तव (**तेभिः**) तैस्सह (**एतम्**) (**सजोषाः**) समानप्रीतिसेवी (**वावशानः**) भृशं कामयमानः (**अग्नेः**) पावकस्य (**पिब**) (**जिह्वया**) ज्वालेव वर्त्तमानया (**सोमम्**) रसम् (**इन्द्र**) दुःखविदारक॥९॥

अन्वयः-हे इन्द्र! त्वं सोमे यान् विदुषो मरुता इवाभजो ये सोमे त्वामवर्धन् यस्ते गणस्तं प्राप्याऽऽनन्दिता अभवँस्तेभिः सह हे इन्द्र! सजोषा वावशानः सन्नग्नेर्जिह्वयैतं सोमं पिब॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि प्राणानिव प्रियानाप्तान् विदुषो मनुष्याः सेवेरन् तर्ह्येतांस्ते सर्वतो वर्धयेयुर्यथाऽग्निर्ज्वालया सर्वान् रसान् पिबति तथैव तीव्रक्षुधा सह वर्त्तमानोऽन्नं भुञ्जीत पेयं पिबेच्च॥९॥

पदार्थः-हे (**इन्द्र**) सम्पूर्ण ऐश्वर्य्य के देनेवाले! आप ऐश्वर्य्य में (**यान्**) जिन विद्वानों को (**मरुतः**) प्राणों के सदृश प्रिय और श्रेष्ठ जान के (**आ, अभजः**) सेवन करो (**ये**) जो लोग (**सोमे**) ऐश्वर्य में (**त्वाम्**) आपकी (**अवर्धन्**) वृद्धि करें जो (**ते**) आपका (**गणः**) समूह उसको प्राप्त होके आनन्दित (**अभवन्**) होवें (**तेभिः**) उन लोगों के साथ (**इन्द्र**) हे दुःख के नाश करनेवाले! (**सजोषाः**) तुल्य प्रीति के सेवनकर्त्ता (**वावशानः**) अत्यन्त कामना करते हुए आप (**अग्नेः**) अग्नि की (**जिह्वया**) ज्वाला के सदृश वर्त्तमान गुण से (**एतम्**) इस (**सोमम्**) सोम रस का (**पिब**) पान करो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो प्राण के सदृश प्रिय और श्रेष्ठ विद्वान् जनों की मनुष्य लोग सेवा करें तो इन मनुष्यों की वे विद्वान् लोग सब प्रकार वृद्धि करें और जैसे अग्नि ज्वाला से सम्पूर्ण रसों का पान करता है, वैसे ही तीक्ष्ण क्षुधा के सहित वर्त्तमान पुरुष अन्न का भोजन करे और पान करने योग्य वस्तु का पान करे॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र।
अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व॥१०॥

इन्द्र॑। पिब॑। स्व॒धया॑। चि॒त्। सु॒तस्य॑। अ॒ग्ने॒:। वा॒। पा॒हि॒। जि॒ह्वया॑। य॒ज॒त्र॒। अ॒ध्व॒र्यो॒:। वा॒। प्र॒ऽय॑तम्। शु॒क्र॒। हस्ता॑त्। होतु॑:। वा॒। य॒ज्ञम्। ह॒विष॑:। जु॒ष॒स्व॒॥ १०॥

पदार्थः-(**इन्द्र**) ऐश्वर्य्यवन् (**पिब**) (**स्वधया**) अन्नेन (**चित्**) अपि (**सुतस्य**) निष्पन्नस्य (**अग्नेः**) पावकस्य (**वा**) (**पाहि**) (**जिह्वया**) ज्वालेव वर्त्तमानया (**यजत्र**) पूजनीय (**अध्वर्योः**) य आत्मनोऽध्वरमिच्छति तस्य (**वा**) (**प्रयतम्**) प्रयत्नेन सिद्धम् (**शक्र**) शक्तिमन् (**हस्तात्**) (**होतुः**) दातुः (**वा**) (**यज्ञम्**) (**हविषः**) साकल्यात् (**जुषस्व**) सेवस्व॥ १०॥

अन्वयः-हे यजत्र शक्रेन्द्र! त्वमग्नेर्ज्वालेव जिह्वया स्वधया वा चित्सुतस्य रसं पिब अध्वर्योर्वा प्रयतं यज्ञं पाहि। होतुर्हस्ताद्धविषो वा यज्ञं जुषस्व॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यैर्मनुष्यैः सुसाधितस्याऽन्नस्य भोजनं रसस्य पानं कृत्वाऽरोगा भूत्वा विद्वद्भिः सह सङ्गत्य यज्ञः सेव्येत ते सदा सुखिनः स्युः॥ १०॥

पदार्थः-हे (**यजत्र**) आदर करने योग्य (**शक्र**) शक्तिमान् (**इन्द्र**) ऐश्वर्यवाले! आप (**अग्नेः**) अग्नि की (**जिह्वया**) ज्वाला के सदृश वर्त्तमान लपट से (**वा**) वा (**स्वधया**) अन्न से (**चित्**) भी (**सुतस्य**) सिद्ध हुए रस का (**पिब**) पान करिये (**अध्वर्योः**) आत्मसम्बन्धी यज्ञ की इच्छा करते हुए पुरुष के (**वा**) अथवा (**प्रयतम्**) प्रयत्न से सिद्ध (**यज्ञम्**) यज्ञ का (**पाहि**) पालन करो (**होतुः**) देनेवाले के (**हस्तात्**) हाथ और (**हविषः**) हवन की सामग्री से (**वा**) अथवा यज्ञ का (**जुषस्व**) सेवन करो॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिन मनुष्यों से उत्तम प्रकार सिद्ध किये हुए अन्न का भोजन और रस का पान कर रोगरहित हो और विद्वानों के साथ मेल करके यज्ञ का सेवन किया जाये, वे सदा सुखी होवें॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

शु॒नं हु॑वेम म॒घवा॑न॒मिन्द्र॑म॒स्मिन् भरे॒ नृत॑मं वाज॒सातौ॑।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नन्तं॑ वृ॒त्राणि॑ सं॒जित॑ं॒ धना॑नाम्॥ ११॥ १८॥

शु॒नम्। हु॒वे॒म॒। म॒घऽवा॑नम्। इन्द्र॑म्। अ॒स्मिन्। भरे॑। नृऽत॑मम्। वाज॑ऽसातौ। शृ॒ण्वन्त॑म्। उ॒ग्रम्। ऊ॒तये॑। स॒मत्ऽसु॑। घ्नन्त॑म्। वृ॒त्राणि॑। स॒म्ऽजित॑म्। धना॑नाम्॥ ११॥

पदार्थः-(**शुनम्**) सुखकरम् (**हुवेम**) (**मघवानम्**) बहुधनयुक्तम् (**इन्द्रम्**) परमैश्वर्यम् (**अस्मिन्**) शिल्पव्यवहारे (**भरे**) संग्रामे (**नृतमम्**) पुरुषोत्तमम् (**वाजसातौ**) अन्नानां विभागे (**शृण्वन्तम्**)

सत्पुरुषवचनानां श्रोतारम् **(उग्रम्)** तेजस्विनम् **(ऊतये)** रक्षणाद्याय **(समत्सु)** संग्रामेषु **(घ्नन्तम्)** नाशयन्तम् **(वृत्राणि)** अस्मद्बलाऽऽवरकाणि शत्रुसैन्यानि **(सञ्जितम्) (धनानाम्)** विद्यासुवर्णादीनाम्॥११॥

अन्वयः-हे मनुष्या! यथा वयमूतये समत्सु वृत्राणि सूर्य इव शत्रून् घ्नन्तमुग्रं शृण्वन्तं धनानां सञ्जितमस्मिन् भरे वाजसातौ नृतमं शुनं मघवानमिन्द्रं हुवेम तथाऽप्येतं यूयमपि प्रशंसत॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! येषां निष्फलं कर्म नास्ति तान् सर्वस्य रक्षणाय यूयं वृणुतेति॥११॥

अत्राग्न्यादीनां पदार्थानां तुरङ्गदृष्टान्तेनोपदेशादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चत्रिंशत्तमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(ऊतये)** रक्षा आदि के लिये **(समत्सु)** संग्रामों में **(वृत्राणि)** हम लोगों के बल को घेरनेवाली शत्रु की सेनाओं को सूर्य्य के सदृश शत्रुओं के **(घ्नन्तम्)** नाशकारक **(उग्रम्)** तेजस्वी **(शृण्वन्तम्)** सत्पुरुष के वचनों के सुनने **(धनानाम्)** विद्या और सुवर्ण आदिकों के **(सञ्जितम्)** उत्तम प्रकार जीतनेवाले **(अस्मिन्)** इस शिल्प व्यवहार, **(वाजसातौ)** अन्नों के विभाग और **(भरे)** युद्ध में **(नृतमम्)** पुरुषोत्तम **(शुनम्)** सुखकारक **(मघवानम्)** बहुत धनयुक्त **(इन्द्रम्)** परम ऐश्वर्यवाले जन को **(हुवेम)** प्रशंसा से पुकारें, वैसे इसकी आप लोग भी प्रशंसा करें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिन लोगों का निष्फल कर्म नहीं है, उनको सबकी रक्षा के लिये आप लोग स्वीकार करें॥११॥

इस सूक्त में अग्नि आदि पदार्थों और घोड़े के दृष्टान्त से उपदेश करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैंतीसवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य षट्त्रिंशत्तमस्य सूक्तस्य १-९, ११ विश्वामित्रः। १० घोर आङ्गिरस ऋषिः। इन्द्रो देवता। १, ७, १०, ११ त्रिष्टुप्। २, ३, ६, ८ निचृत्त्रिष्टुप्। ९ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक् पङ्क्तिः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्याः केनाचरणेन सुखमाप्नुयुरित्याह॥

अब ग्यारह ऋचावाले छत्तीसवें सूक्त का प्रारम्भ है। उसके पहिले मन्त्र से मनुष्य किस प्रकार के आचरण से सुख को प्राप्त हों, इस विषय को कहते हैं॥

इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः।
सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत्॥ १॥

इमाम्। ऊम् इति। सु। प्रऽभृतिम्। सातये। धाः। शश्वत्ऽशश्वत्। ऊतिऽभिः। यादमानः। सुतेऽसुते। ववृधे। वर्धनेऽभिः। यः। कर्मऽभिः। महत्ऽभिः। सुऽश्रुतः। भूत्॥ १॥

पदार्थः-(**इमाम्**) (उ) वितर्के (**सु**) शोभने (**प्रभृतिम्**) प्रकृष्टां धारणाम् (**सातये**) संविभागाय (**धाः**) दध्याः (**शश्वच्छश्वत्**) व्यापकं व्यापकं वस्तु (**ऊतिभिः**) रक्षणादिभिः (**यादमानः**) याचमानः। अत्र वर्णव्यत्ययेन चस्य दः। (**सुतेसुते**) निष्पन्ने निष्पन्ने पदार्थे (**वावृधे**) वर्धेत (**वर्धनेभिः**) वर्धकैः साधनैः (**यः**) (**कर्मभिः**) कर्त्तुरीप्सिततमैः (**महद्भिः**) (**सुश्रुतः**) शोभनं श्रुतं यस्य सः (**भूत्**) भवेत्। अत्राडभावः॥ १॥

अन्वयः-हे विद्वन्! यो विद्यां यादमानस्त्वमूतिभिः सातय इमां प्रभृतिं शश्वच्छश्वद्वस्तु च सु धा वर्धनेभिर्महद्भिः कर्मभिः सुतेसुते वावृधे स उ सुश्रुतो भूत्॥ १॥

भावार्थः-ये मनुष्या कार्य्यविज्ञानमारभ्य परस्परं सूक्ष्मकारणपर्य्यन्तं विभुं पदार्थं विज्ञाय उपयुञ्जीरन् तेऽत्र जगति वर्धेरन्। ये विद्वद्भ्यो विद्यामेव याचन्ते ते बहुश्रुतो जायन्ते॥ १॥

पदार्थः-हे विद्वान् पुरुष! (**यः**) जो विद्या की (**यादमानः**) याचना करते हुए आप (**ऊतिभिः**) रक्षण आदिकों से (**सातये**) संविभाग के लिये (**इमाम्**) इस (**प्रभृतिम्**) उत्तम धारणा और (**शश्वच्छश्वत्**) व्यापक व्यापक वस्तु को (**सु**) उत्तम प्रकार (**धाः**) धारण करें, (**वर्धनेभिः**) वृद्धि के साधनों और (**महद्भिः**) बड़े (**कर्मभिः**) करनेवाले के अतीव चाहे हुए व्यवहारों से (**सुतेसुते**) उत्पन्न उत्पन्न हुए पदार्थ में (**वावृधे**) बढ़े (**उ**) वही (**सुश्रतः**) उत्तम प्रकार श्रोता (**भूत्**) होवे॥ १॥

भावार्थः-जो मनुष्य कार्य्य के विज्ञान का प्रारम्भ करके पर पर अर्थात् बड़े से छोटे, उससे और छोटे, उससे भी छोटे इत्यादि सूक्ष्म कारण पर्य्यन्त व्यापक परमाणुरूप पदार्थ को जान कर उपयोग करें, कार्य में लावें, वे इस संसार में अत्यन्त वृद्धि को प्राप्त होवें और जो लोग विद्वान् जनों से केवल विद्या की ही याचना करते हैं, वे बहुश्रुत होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

इन्द्रा॑य॒ सोमा॑: प्र॒दिवो॒ विदा॑ना ऋ॒भुर्येभि॒र्वृष॑पर्वा॒ विहा॑याः।
प्र॒य॒म्य॑मा॑नान् प्रति॒ षू गृ॑भा॒येन्द्र॒ पिब॒ वृष॑धूतस्य॒ वृष्ण॑:॥ २॥

इन्द्रा॑य। सोमा॑:। प्र॒दिव॑:। विदा॑ना:। ऋ॒भु:। येभि॑:। वृष॑ऽपर्वा। विऽहा॑याः। प्र॒ऽय॒म्य॑मा॑नान्। प्रति॑। सु। गृ॒भा॒य॒। इन्द्र॑। पिब॑। वृष॑ऽधूतस्य। वृष्ण॑:॥ २॥

पदार्थः-(**इन्द्राय**) परमैश्वर्याय (**सोमाः**) ये सुन्वन्ति सूयन्ते वा ते पदार्थाः (**प्रदिवः**) प्रकृष्टा द्यौः प्रकाशमाना विद्या येषान्ते (**विदानाः**) लभमानाः (**ऋभुः**) मेधावी। **ऋभुरिति मेधाविनामसु पठितम्।** (निघं०३.१५) (**येभिः**) यैः (**वृषपर्वा**) वृषाणि समर्थानि पर्वाणि पालनानि यस्य सः। (**विहायाः**) योऽनर्थान् विजहाति सः (**प्रयम्यमानान्**) प्रकर्षेण प्रापितनियमान् (**प्रति**) (**सु**) (**गृभाय**) गृहाण (**इन्द्र**) ऐश्वर्य्ययुक्त (**पिब**) (**वृषधूतस्य**) वृषैः सेचनैर्यो धूतो विलोडितस्तस्य (**वृष्णः**) वर्धकस्य॥ २॥

अन्वयः-हे मनुष्या! यथा वृषपर्वा विहाया ऋभुर्येभिः प्रयम्यमानान् जानाति तथेन्द्राय सोमाः प्रदिवो विदानाः सन्त्यैतान् यूयं विजानीत। हे इन्द्र! त्वमेतान् प्रति सुगृभाय वृषधूतस्य वृष्णो रसं पिब॥ २॥

भावार्थः-हे मनुष्या! इह संसारे यथाऽऽप्ता दुष्टं व्यवहारं त्यक्त्वा श्रेष्ठमाचर्य्य युक्ताहारविहारेणारोगा दीर्घायुषो भवन्ति तथैव यूयमपि भवत॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**वृषपर्वा**) समर्थ पालनोंवाला (**विहायाः**) अनर्थों का नाशकारी (**ऋभुः**) बुद्धिमान् जन (**येभिः**) जिन लोगों से (**प्रयम्यमानान्**) अत्यन्त नियमयुक्तों को जानता है, वैसे (**इन्द्राय**) अत्यन्त ऐश्वर्य्य के लिये (**सोमाः**) उत्पन्न करनेवाले वा उत्पन्न किये गये पदार्थ (**प्रदिवः**) प्रकाशित विद्यायुक्त (**विदानाः**) प्राप्त हुए हों, इनको आप लोग जानिये (**इन्द्र**) हे ऐश्वर्य्य से युक्त पुरुष! आप इन लोगों को (**प्रति, सु, गृभाय**) अच्छे प्रकार ग्रहण कीजिये और (**वृषधूतस्य**) सेचनों से मथे हुए (**वृष्णः**) बढ़ानेवाले रस का (**पिब**) पान कीजिये॥ २॥

भावार्थः-हे मनुष्यो! इस संसार में जैसे श्रेष्ठ यथार्थवक्ता पुरुष दुष्ट व्यवहार का त्याग और श्रेष्ठ आचरण का ग्रहण करके नियमित आहार-विहार से रोगरहित और अधिक अवस्थावाले होते हैं, वैसे ही आप लोग भी हूजिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पिबा॒ वर्ध॑स्व॒ तव॑ घा सु॒तास॒ इन्द्र॒ सोमा॑सः प्रथ॒मा उ॒तेमे।
यथापि॑बः पू॒र्व्यॉ इ॑न्द्र॒ सोमॉ॑ ए॒वा पा॑हि॒ पन्यो॒ अ॒द्या नवी॑यान्॥ ३॥

पिब॑। वर्धस्व। तव॑। घ॒। सु॒तास॑:। इन्द्र॑। सोमा॑स:। प्र॒थ॒मा:। उ॒त। इ॒मे। यथा॑। अपि॑ब:। पू॒र्व्यान्। इ॒न्द्र॒। सोमा॑न्। ए॒व। पा॒हि॒। पन्य॑:। अ॒द्य। नवी॑यान्॥ ३॥

पदार्थ:-(**पिब**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घ:। (**वर्धस्व**) (**तव**) (**घा**) एव। अत्र **निपातस्य चे**ति दीर्घ:। (**सुतास:**) निष्पन्ना: (**इन्द्र**) ऐश्वर्य्यमिच्छो (**सोमास:**) ऐश्वर्य्यकरा: पदार्था: (**प्रथमा:**) आदिमा: (**उत**) (**इमे**) (**यथा**) (**अपिब:**) पिबति (**पूर्व्यान्**) पूर्वैर्निष्पादितान् (**इन्द्र**) (**सोमान्**) उत्तमान् सोमरसैश्वर्य्यादियुक्तान् (**एव**) निश्चये (**पाहि**) (**पन्य:**) स्तुत्य: (**अद्य**) इदानीम्। अत्र **संहितायामि**ति दीर्घ:। (**नवीयान्**) नूतन:॥ ३॥

अन्वय:-हे इन्द्र! यथा पन्यो नवीयाँस्त्वमद्य पूर्व्यान् सोमानपिबस्तथैतान् पाहि। हे इन्द्र! तव य इमे प्रथमा: सुतास: सोमासो घ सन्ति तान् पाहि उतोत्तमान् रसान् पिब तैरेव वर्धस्व॥ ३॥

भावार्थ:-अत्रोपमालङ्कार:। ये मनुष्या: सुसंस्कृतान् रसान् पिबेयुस्ते वर्धेरन्। ये वृद्धा भूत्वा धर्ममाचरेयुस्ते सर्वैश्वर्य्यमाप्नुयु:॥ ३॥

पदार्थ:-हे (**इन्द्र**) ऐश्वर्य की इच्छा करनेवाले! (**यथा**) जैसे (**पन्य:**) स्तुति करने योग्य (**नवीयान्**) नवीन आप (**अद्य**) इस समय (**पूर्व्यान्**) पूर्व हुए जनों से उत्पन्न (**सोमान्**) श्रेष्ठ सोमलता रसरूप ऐश्वर्य आदि से युक्त पदार्थों का (**अपिब:**) पान करते हैं, वैसे ही उनका (**पाहि**) पालन करो। (**इन्द्र**) हे तेजस्वी उन (**तव**) आपके जो (**इमे**) ये (**प्रथमा:**) पहिले (**सुतास:**) उत्पन्न हुए (**सोमास:**) ऐश्वर्य करनेवाले पदार्थ (**घ**) ही हैं, उनका पालन करो (**उत**) और उत्तम रसों का (**पिब**) पान करो उनसे (**एव**) ही (**वर्धस्व**) वृद्धि को प्राप्त होओ॥ ३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो मनुष्य उत्तम प्रकार संस्कारयुक्त रसों का पान करें, उनकी वृद्धि होवे और जो वृद्धि को प्राप्त होकर धर्म का आचरण करें, वे सम्पूर्ण ऐश्वर्य को प्राप्त होवें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

म॒हाँ अम॑त्रो वृ॒जने॑ वि॒र॒प्श्यु१॒॑ग्रं शव॑: पत्यते धृ॒ष्णवोज॑:।
नाह॑ विव्याच पृथि॒वी च॒नैनं॑ यत्सोमा॑सो॒ हर्य॑श्वमम॒न्दन्॥ ४॥

म॒हान्। अम॑त्र:। वृ॒जने॑। वि॒ऽर॒प्शी। उ॒ग्रम्। शव॑:। प॒त्य॒ते॒। धृ॒ष्णु। ओज॑:। न। अह॑। वि॒व्या॒च॒। पृ॒थि॒वी। च॒न। ए॒न॒म्। यत्। सोमा॑स:। हरि॑ऽअश्वम्। अम॑न्दन्॥ ४॥

पदार्थः-(**महान्**) (**अमत्रः**) ज्ञानवान् (**वृजने**) बले (**विरप्शी**) विविधा विरप्शा प्रसिद्धा उपदेशा विद्यन्ते यस्य सः (**उग्रम्**) कठिनं दृढम् (**शवः**) बलम् (**पत्यते**) प्राप्नोति (**धृष्णु**) प्रगल्भम् (**ओजः**) पराक्रमः (**न**) निषेधे (**अह**) विनिग्रहे (**विव्याच**) छलयति (**पृथिवी**) भूमिः (**चन**) (**एनम्**) (**यत्**) ये (**सोमासः**) ऐश्वर्ययुक्ताः (**हर्यश्वम्**) हरयो हरणशीला अश्वा यस्य तम् (**अमन्दन्**) आनन्दयेयुः॥४॥

अन्वयः-योऽमत्रो विरप्शी महान् वृजने उग्रं शवो धृष्णवोजः पत्यते। एनं कश्चन न विव्याचाह एनं पृथिवी प्राप्नुयात् यद्यं हर्यश्वं सोमासोऽमन्दन्त्स तान् सततं हर्षयेत्॥४॥

भावार्थः-मनुष्येषु स एव महान् भवति यः शरीरात्मसेनामित्रबलाऽरोग्यधर्मविद्या वर्धयति स छलादिदोषांस्त्यक्त्वा सर्वोपकारं करोति॥४॥

पदार्थः-जो (**अमत्रः**) ज्ञानी (**विरप्शी**) अनेक प्रकार के प्रसिद्ध उपदेशों से पूर्ण (**महान्**) श्रेष्ठ (**वृजने**) बल में (**उग्रम्**) कठिन दृढ़ (**शवः**) बल और (**धृष्णु**) प्रचण्ड (**ओजः**) पराक्रम (**पत्यते**) प्राप्त होता है (**एनम्**) इसको कोई पुरुष (**चन**) कुछ (**न**) नहीं (**विव्याच**) छलता है, (**अह**) हा! इसको (**पृथिवी**) भूमि प्राप्त होवे (**यत्**) जिस (**हर्यश्वम्**) ले चलनेवाले घोड़ोंयुक्त जन को (**सोमासः**) ऐश्वर्य से युक्त पुरुष (**अमन्दन्**) पसन्द करें, वह उनको निरन्तर प्रसन्न करे॥४॥

भावार्थः-मनुष्यों में वही पुरुष श्रेष्ठ होता है जो शरीर, आत्मा, सेना, मित्र, बल, आरोग्य, धर्म और विद्या की वृद्धि करता है, वह छल आदि दोषों का त्याग करके सबका उपकार करता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहा है॥

म॒हाँ उ॒ग्रो वा॑वृधे वी॒र्या॑य स॒माच॑क्रे वृष॒भः काव्ये॑न।
इन्द्रो॒ भगो॑ वाज॒दा अ॑स्य॒ गाव॒: प्र जा॑यन्ते॒ दक्षि॑णा अस्य॒ पूर्वी॑:॥५॥१९॥

म॒हान्। उ॒ग्रः। व॒वृ॒धे॒। वी॒र्या॑य। स॒म्ऽआच॑क्रे। वृ॒ष॒भः। काव्ये॑न। इन्द्रः॑। भगः॑। वा॒ज॒ऽदाः। अ॒स्य॒। गावः॑। प्र। जा॒य॒न्ते॒। दक्षि॑णाः। अ॒स्य॒। पूर्वीः॥५॥

पदार्थः-(**महान्**) पूज्यतमो महाशयः (**उग्रः**) तीव्रभाग्योदयः (**वावृधे**) वर्धते (**वीर्याय**) बलाय (**समाचक्रे**) समाकरोति (**वृषभः**) बलिष्ठः (**काव्येन**) कविना मेधाविना निर्मितेन शास्त्रेण (**इन्द्रः**) ऐश्वर्यवान् (**भगः**) भजनीयः (**वाजदाः**) यो वाजमन्नादिकं ददाति सः (**अस्य**) (**गावः**) धेनवः (**प्र**) (**जायन्ते**) उत्पद्यन्ते (**दक्षिणाः**) दानानि (**अस्य**) (**पूर्वीः**) पूर्णाः॥५॥

अन्वयः-यो वाजदा भगो वृषभ उग्रो महानिन्द्रः काव्येन वीर्याय वावृधे समाचक्रेऽस्य गावोऽस्य दक्षिणाः पूर्वीः प्रजायन्ते॥५॥

भावार्थः-यो विद्वान् सुपात्रकुपात्रौ सुपरीक्ष्य सत्काराऽपकारौ करोति तस्यैव सर्वे पशव आनन्दाश्चोपकृता भवन्ति॥५॥

पदार्थः-जो **(वाजदाः)** अन्न आदि का देनेवाला **(भगः)** सेवा करने योग्य **(वृषभः)** बलयुक्त **(उग्रः)** उत्तम भाग्योदय विशिष्ट **(महान्)** अति आदर करने योग्य महाशय **(इन्द्रः)** ऐश्वर्य्यवाला **(काव्येन)** बुद्धिमान पुरुष ने बनाये हुए शास्त्र से **(वीर्याय)** बल के लिये **(वावृधे)** बढ़ता और **(समाचक्रे)** संयुक्त करता है **(अस्य)** इस पुरुष की **(गावः)** गौवें और **(अस्य)** इसकी **(दक्षिणाः)** दान कर्म **(पूर्वीः)** पूर्ण रूप से सिद्ध **(प्र, जायन्ते)** होते हैं॥५॥

भावार्थः-जो विद्यावान् पुरुष श्रेष्ठ और अश्रेष्ठ सुपात्र-कुपात्रों की उत्तम प्रकार परीक्षा करके सत्कार और अपकार यथायोग्य करता है, उसी पुरुष के सम्पूर्ण पशु और आनन्द उपकारयुक्त होते हैं॥५॥

अथ विद्वद्गुणानाह॥

अब विद्वान् के गुणों को अगले मन्त्र में कहते हैं॥

प्र यत्सिन्धवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः।
अतश्चिदिन्द्रः सदसो वरीयान् यदीं सोमः पृणति दुग्धो अंशुः॥६॥

प्र। यत्। सिन्धवः। प्रऽसवम्। यथा। आयन्। आपः। समुद्रम्। रथ्याऽइव। जग्मुः। अतः। चित्। इन्द्रः। सदसः। वरीयान्। यत्। ईम्। सोमः। पृणति। दुग्धः। अंशुः॥६॥

पदार्थः-**(प्र)** **(यत्)** ये **(सिन्धवः)** नद्यः **(प्रसवम्)** प्रसूयन्ते यस्मात्तं मेघम् **(यथा)** **(आयन्)** गच्छन्ति **(आपः)** जलानि **(समुद्रम्)** अन्तरिक्षम् **(रथ्येव)** रथेषु साध्वी गतिरिव **(जग्मुः)** **(अतः)** **(चित्)** अपि **(इन्द्रः)** राजा **(सदसः)** सभाः **(वरीयान्)** **(यत्)** यः **(ईम्)** जलम् **(सोमः)** ओषधिगणः **(पृणति)** सुखयति **(दुग्धः)** प्रपूर्णः **(अंशुः)** ओषधिसारः॥६॥

अन्वयः-यथा सिन्धवः प्रसवमापः समुद्रमायँस्तथा यद्ये शुभान् गुणानीयू रथ्येव सर्वत्र प्रजग्मुस्तैः सह चिद्यदिन्द्रो वरीयान् सन् सदसो गच्छदतः स दुग्धोंऽशुः सोम ईं प्राप्त इव सर्वान् पृणति॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्या निर्वैरा भूत्वा सर्वेषामुपकारं कर्त्तुमिच्छेयुस्तान् प्रति नद्यः समुद्रमिव जलान्यन्तरिक्षमिवाऽऽभिमुख्यं गच्छन्ति तेभ्यः सुशिक्षां प्राप्य सुषिक्त ओषधिगण इव सर्वान् सुखयितुं प्रभवन्ति॥६॥

पदार्थः-**(यथा)** जैसे **(सिन्धवः)** नदियां **(प्रसवम्)** मेघ को वा **(आपः)** जल **(समुद्रम्)** अन्तरिक्ष

को **(आयन्)** प्राप्त होते हैं, जैसे **(यत्)** जो उत्तम गुणों को प्राप्त होवें वा **(रथ्येव)** रथों में जो उत्तम चाल उसके सदृश सब स्थानों में **(प्र, जग्मुः)** प्राप्त हुए उनके साथ **(चित्)** भी **(यत्)** जो **(इन्द्रः)** राजा **(वरीयान्)** श्रेष्ठ पुरुष होता हुआ **(सदसः)** सभाओं को प्राप्त होवे **(अतः)** इससे वह **(दुग्धः)** गुणों से पूर्ण **(अंशुः)** ओषधियों का सार भाग और **(सोमः)** ओषधियों का समूह **(ईम्)** जल को जैसे प्राप्त हो, वैसे सम्पूर्ण प्राणियों को **(पृणति)** सुख देता है॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य वैर को त्याग के सम्पूर्ण प्राणियों के उपकार करने की इच्छा करें उनके प्रति जैसे नदियां समुद्र को और जल अन्तरिक्ष के सम्मुख को प्राप्त होते हैं, वैसे सम्मुख जाते हैं, उनसे उत्तम शिक्षा को प्राप्त उत्तम प्रकार से सींचे गये औषधियों के समूह के सदृश सम्पूर्ण प्राणियों के सुख देने को समर्थ होते हैं॥६॥

अथ राजप्रजागुणानाह॥

अब राजा और प्रजा के गुणों को अगले मन्त्र में कहते हैं॥

समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः।
अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः॥७॥

समुद्रेण। सिन्धवः। यादमानाः। इन्द्राय। सोमम्। सुऽसुतम्। भरन्तः। अंशुम्। दुहन्ति। हस्तिनः। भरित्रैः। मध्वः। पुनन्ति। धारया। पवित्रैः॥७॥

पदार्थः-(**समुद्रेण**) सागरेण सह (**सिन्धवः**) नद्य इव (**यादमानाः**) याचमानाः (**इन्द्राय**) ऐश्वर्य्याय (**सोमम्**) पदार्थसमूहम् (**सुषुतम्**) सुष्ठु निष्पादितम् (**भरन्तः**) धरन्तः पुष्णन्तः (**अंशुम्**) सारम् (**दुहन्ति**) पिपुरति (**हस्तिनः**) प्रशस्ता हस्ता विद्यन्ते येषान्ते (**भरित्रैः**) धृतैः पोषितैः साधनैः (**मध्वः**) मधुरस्य (**पुनन्ति**) (**धारया**) (**पवित्रैः**) शुद्धैः॥७॥

अन्वयः-ये समुद्रेण सिन्धव इव विदुषः सङ्गत्येन्द्राय विद्यां यादमानाः सुषुतमंशुं सोमं भरन्तो हस्तिनो मध्वः पवित्रैर्भरित्रैर्धारया पुनन्ति ते कामं दुहन्ति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सर्वतो जलादिकं हत्वा नद्यो वेगेन गत्वा समुद्रं प्राप्य रत्नवत्यः सत्यः शुद्धजला भवन्ति तथैव ब्रह्मचर्य्येण विद्या धृत्वा तीव्रसंवेगेनालंज्ञाना भूत्वा पवित्रोपचिताः परमेश्वरं प्राप्य सिद्धिमन्तो भूत्वा शुद्धाऽऽनन्दा मनुष्या जायन्ते॥७॥

पदार्थः-जो (**समुद्रेण**) सागर के साथ (**सिन्धवः**) नदियां जैसे वैसे विद्वानों के साथ मेल करके (**इन्द्राय**) ऐश्वर्य्य के लिये विद्या की (**यादमानाः**) याचना करते हुए (**सुषुतम्**) उत्तम प्रकार उत्पन्न (**अंशुम्**) सारभाग और (**सोमम्**) पदार्थों के समूह को (**भरन्तः**) धारण और पुष्ट करते हुए (**हस्तिनः**) उत्तम हाथों से युक्त पुरुष (**मध्वः**) मधुरगुण सम्बन्धी (**पवित्रैः**) उत्तम शुद्ध (**भरित्रैः**) धारण और पोषण किये गये धनों के साथ (**धारया**) तीक्ष्ण धार से (**पुनन्ति**) पवित्र करते हैं, वे काम को (**दुहन्ति**) पूर्ण

करते हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सब ओर से जल आदि का ग्रहण कर नदियां वेग से समुद्र का प्राप्त हो रत्नवाली और शुद्ध जलयुक्त होती हैं, वैसे ही ब्रह्मचर्य्य से विद्याओं को धारण करके तीक्ष्ण बुद्धि से पूर्ण ज्ञानवाले हो पवित्र हुए और परमेश्वर को प्राप्त होकर सिद्धियों से परिपूर्ण शुद्ध आनन्दी मनुष्य होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ह्रदाइ॑व कु॒क्षय॑: सोम॒धाना॒: समी॑ विव्याच॒ सव॑ना पु॒रूणि॑।
अन्ना॒ यदिन्द्र॑: प्रथ॒मा व्याश॑ वृ॒त्रं ज॑घ॒न्वाँ अ॑वृणीत॒ सोम॑म्॥८॥

ह्रदाःऽइ॑व। कु॒क्षय॑:। सो॒म॒ऽधाना॑:। सम्। ई॒मिति॑। वि॒व्या॒च॒। सव॑ना। पु॒रूणि॑। अन्ना। यत्। इन्द्र॑:। प्र॒थ॒मा। वि। आश॑। वृ॒त्रम्। ज॒घ॒न्वान्। अ॒वृ॒णी॒त॒। सोम॑म्॥८॥

पदार्थः-(**ह्रदाइव**) यथा गम्भीरा जलाशयास्तथा (**कुक्षयः**) उभयत उदरावयवाः (**सोमधानाः**) सोमानां धानाः येषु ते (**सम्**) (**ईम्**) जलम् (**विव्याच**) छलयति (**सवना**) सुन्वन्ति येषु तानि (**पुरूणि**) बहूनि (**अन्ना**) अन्नानि (**यत्**) यः (**इन्द्रः**) सूर्य्य इव महाप्रकाशः (**प्रथमा**) प्रख्यातानि (**वि**) (**आश**) अश्नाति (**वृत्रम्**) मेघम् (**जघन्वान्**) हतवान् (**अवृणीत**) स्वीकरोति (**सोमम्**) ओषधिगणम्॥८॥

अन्वयः-यस्य कुक्षयः सोमधाना ह्रदाइव सन्ति यद्यः पुरूणि सवना प्रथमा अन्ना ईं संविव्याच स इन्द्रो वृत्रं जघन्वान् सूर्य्य इव सोममवृणीत स्वादिष्ठान् भोगान् व्याश॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये गम्भीराशयाः सूर्य्यवत्प्रतापवन्तो धृतैश्वर्य्याः स्वपरदोषान् हत्वा गुणैरैश्वर्य्यं स्वीकुर्वन्ति त एव प्रसन्नात्मानो भवन्ति॥८॥

पदार्थः-जिस पुरुष के (**कुक्षयः**) दोनों ओर के उदर के अवयव (**सोमधानाः**) सोमरूप ओषधियों के बीजों से युक्त (**ह्रदाइव**) गम्भीर जलाशयों के सदृश वर्त्तमान हैं (**यत्**) तथा जो (**पुरूणि**) बहुत (**सवना**) ओषधियों के उत्पन्न रसों से युक्त (**प्रथमा**) प्रसिद्ध (**अन्ना**) अन्न और (**ईम्**) जल को (**सम्, विव्याच**) छलता है वह (**इन्द्रः**) सूर्य्य के समान महाप्रकाशमान (**वृत्रम्**) मेघ के (**जघन्वान्**) नाश करनेवाले सूर्य्य के समान (**सोमम्**) ओषधियों के समूह को (**अवृणीत**) स्वीकार करता तथा स्वादुयुक्त पदार्थों का (**वि, आश**) स्वीकार करता है॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पुरुष गम्भीर अभिप्राय से युक्त, सूर्य्य के सदृश प्रतापी, ऐश्वर्य्य के धारण करनेवाले, अपने और दूसरों के दोषों को नाश करके ऐश्वर्य्य को स्वीकार करते

हैं, वे ही प्रसन्नात्मा होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ तू भर माकिरेतत्परिष्ठाद् विद्मा हि त्वा वसुपतिं वसूनाम्।
इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि॥९॥

आ। तु। भर। माकिः। एतत्। परि। स्थात्। विद्म। हि। त्वा। वसुऽपतिम्। वसूनाम्। इन्द्र। यत्। ते। माहिनम्। दत्रम्। अस्ति। अस्मभ्यम्। तत्। हरिऽअश्व। प्र। यन्धि॥९॥

पदार्थः-(**आ**) समन्तात् (**तु**) पुनः। अत्र **ऋचि**त्यादिना दीर्घः। (**भर**) धर (**माकिः**) निषेधे (**एतत्**) (**परि**) सर्वतः (**स्थात्**) तिष्ठेत् (**विद्म**) जानीयाम्। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हि**) यतः (**त्वा**) त्वाम् (**वसुपतिम्**) धनस्वामिनम् (**वसूनाम्**) धनानाम् (**इन्द्र**) ऐश्वर्यप्रद (**यत्**) (**ते**) तव (**माहिनम्**) महत्तमम् (**दत्रम्**) दानम् (**अस्ति**) (**अस्मभ्यम्**) (**तत्**) (**हर्य्यश्व**) हरयो वेगवन्तोऽश्वा यस्य तत्सम्बुद्धौ (**प्र**) (**यन्धि**) प्रयच्छ॥९॥

अन्वयः-हे इन्द्र! यत्ते माहिनं दत्रमस्ति तदस्मभ्यं त्वं प्रयन्धि। हे हर्य्यश्व! भवानेतन्माकिः परिष्ठाद्धि वसूनां वसुपतिं त्वा वयं विद्म तु त्वमेतत्सर्वमाभर॥९॥

भावार्थः-विद्वद्भिः सर्वान् प्रत्येवमुपदेष्टव्यं भवन्तो दोषान् विहाय गुणान् धृत्वा धनैश्वर्य्यं प्राप्यान्येभ्यः सुपात्रेभ्यो देयम्॥९॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्य के देनेवाले (**यत्**) जो (**ते**) आपका (**माहिनम्**) अति श्रेष्ठ (**दत्रम्**) दान (**अस्ति**) है (**तत्**) उसे (**अस्मभ्यम्**) हम लोगों के लिये आप (**प्र, यन्धि**) अच्छे प्रकार दीजिये और (**हर्यश्व**) हे वेगयुक्त घोड़ोंवाले! आप (**एतत्**) इसको (**माकिः**) न (**परि, ष्ठात्**) सब ओर से रोकिये (**हि**) जिससे (**वसूनाम्**) धनों के (**वसुपतिम्**) स्वामी (**त्वा**) आपको हम लोग (**विद्म**) जानें, इससे (**तु**) शीघ्र फिर आप इस सबको (**आ**) सब ओर से (**भर**) धारण करो॥९॥

भावार्थः-विद्वान् जनों को चाहिये कि सम्पूर्ण जनों के प्रति ऐसा उपदेश देवें कि आप लोग दोषों को त्याग, गुणों को धारण और धन तथा ऐश्वर्य्य को प्राप्त होके अन्य सुपात्र पुरुषों के लिये देवें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन्॥१०॥

अस्मे इति। प्र। यन्धि। मघऽवन्। ऋजीषिन्। इन्द्र। रायः। विश्वऽवारस्य। भूरेः। अस्मे इति। शतम्। शरदः। जीवसे। धाः। अस्मे इति। वीरान्। शश्वतः। इन्द्र। शिप्रिन्॥ १०॥

पदार्थः-(**अस्मे**) अस्मभ्यम् (**प्र**) (**यन्धि**) प्रयच्छ (**मघवन्**) बहुसत्कृतधनयुक्त (**ऋजीषिन्**) सरलस्वभाव (**इन्द्र**) सुखदातः (**रायः**) धनस्य (**विश्ववारस्य**) समग्रं सुखं स्वीकृतं यस्मात्तस्य (**भूरेः**) बहुविधस्य (**अस्मे**) अस्मान् (**शतम्**) (**शरदः**) शतं वर्षाणि (**जीवसे**) जीवितुम् (**धाः**) धेहि (**अस्मे**) अस्माकम् (**वीरान्**) विक्रान्तान् जनान् (**शश्वतः**) निरन्तरान् (**इन्द्र**) सूर्य इव प्रभावयुक्त (**शिप्रिन्**) शोभनहनुनासिक॥ १०॥

अन्वयः-हे शिप्रिन्निन्द्र! त्वमस्मे शश्वतो वीरान् धाः। हे मघवन्नृजीषिन्निन्द्र! त्वमस्मे विश्ववारस्य भूरे रायो भागं प्रयन्धि। अस्मे जीवसे शतं शरदो धाः॥ १०॥

भावार्थः-त एव सरलस्वभावा आप्ता विद्वांसः सन्ति ये श्रियं विभज्य भुञ्जते ब्रह्मचर्य्योपदेशेन शतायुषः कृत्वा सर्वेषु कर्म्मसूत्साहितान्निर्भयान् पुरुषार्थिनः कुर्वन्ति॥ १०॥

पदार्थः-हे (**शिप्रिन्**) सुन्दर नासिका और ठोढ़ीवाले (**इन्द्र**) सुख के दाता! आप (**अस्मे**) हम लोगों के लिये (**शश्वतः**) निरन्तर वर्त्तमान (**वीरान्**) पराक्रमी मनुष्यों को धारण करो, (**मघवन्**) हे बहुत सत्कारयुक्त धन से परिपूर्ण (**ऋजीषिन्**) सरल स्वभाववाले (**इन्द्र**) सूर्य के सदृश प्रतापी! आप (**अस्मे**) हम लोगों का (**विश्ववारस्य**) सम्पूर्ण सुख स्वीकार किया जाता है जिससे उस (**भूरेः**) अनेक प्रकार (**रायः**) धन के भाग को (**प्र, यन्धि**) दीजिये, (**अस्मे**) हम लोगों को (**जीवसे**) जीवन के लिये (**शतम्**) सौ (**शरदः**) वर्षों को (**धाः**) धारण कीजिये॥ १०॥

भावार्थः-वे ही उत्तम स्वभाववाले यथार्थवक्ता विद्वान् लोग हैं कि जो लक्ष्मी का विभाग करके अर्थात् अन्य जनों को बाँट के फिर आप भोजन करते हैं और मनुष्यों को ब्रह्मचर्य्य के उपदेश से सौ वर्ष की अवस्थावाले करके सम्पूर्ण कर्मों में उत्साही, भयरहित और पुरुषार्थी करते हैं॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ ११॥ २०॥

शुनम्। हुवेम। मघवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥ ११॥

पदार्थः-(**शुनम्**) सर्वेषां सुखकरम् (**हुवेम**) स्वीकुर्याम (**मघवानम्**) बहुविद्याधनम् (**इन्द्रम्**) दुष्टविदारकं राजानम् (**अस्मिन्**) (**भरे**) पोषणे (**नृतमम्**) अतिशयेन नायकम् (**वाजसातौ**) वाजानामन्नादीनां विभागो यस्मिंस्तस्मिन् (**शृण्वन्तम्**) सकलशास्त्रश्रोतारम् (**उग्रम्**) तेजस्विनम् (**ऊतये**) रक्षणाद्याय (**समत्सु**) संग्रामेषु (**घ्नन्तम्**) (**वृत्राणि**) मेघावयवान् सूर्य इव शत्रून् (**सञ्जितम्**) सम्यग् जयशीलम् (**धनानाम्**)॥११॥

अन्वयः-हे मनुष्या! यथा वयमस्मिन् वाजसातौ भरे शुनं मघवानं नृतममूतये शृण्वन्तमुग्रं समत्सु वृत्राणि घ्नन्तं धनानां सञ्जितमिद्रं हुवेम तथैतं यूयमपि स्वीकुरुत॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः योऽखिलविद्याशुभगुणः सर्वेषां सुखप्रदः प्रजापालनतत्परः शत्रुविनाशने रतो धार्मिको नरोत्तमो भवेत्तं राज्येऽधिकृत्य तच्छासने वर्त्तित्वा सर्वेऽतुलं सुखं भुञ्जतामिति॥११॥

अत्रेन्द्रविद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्त्रिंशत्तमं सूक्तं विंशतितमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**अस्मिन्**) इस (**वाजसातौ**) अन्न आदि का विभाग जिसमें ऐसे (**भरे**) पालन में (**शुनम्**) सब प्राणियों के सुखकारक (**मघवानम्**) बहुत विद्या और धनयुक्त (**नृतमम्**) अतिशय पुरुषों में अग्रणी (**ऊतये**) रक्षा आदि के लिये (**शृण्वन्तम्**) सकल शास्त्र सुननेवाले (**उग्रम्**) तेजधारी (**समत्सु**) संग्रामों में (**वृत्राणि**) मेघों के अवयवों को जैसे सूर्य वैसे शत्रुओं को (**सञ्जितम्**) उत्तम प्रकार जीतनेवाले (**इन्द्रम्**) दुष्ट जनों के नाशकर्त्ता राजा को (**हुवेम**) स्वीकार करें, वैसे इसको आप लोग भी स्वीकार करें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सम्पूर्ण विद्याविशिष्ट, शुभ गुणी, सबको सुख देनेवाला, प्रजाओं के पालन में तत्पर, शत्रुओं के नाश करने में उद्यत, धर्मी और पुरुषों में श्रेष्ठ पुरुष हो, उसके लिये राज्य में अधिकार दे और उसकी आज्ञा में वर्त्तमान होकर सब लोग अत्यन्त सुख भोग करो॥११॥

इस सूक्त में इन्द्र, विद्वान्, राजा और प्रजा के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छत्तीसवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य सप्तत्रिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ३, ७ निचृद्गायत्री। २, ४-६, ८-१० गायत्री छन्दः। षड्जः स्वरः। ११ निचृदनुष्टुप् छन्दः। ऋषभः स्वरः॥

अथ राजगुणानाह॥

अब ग्यारह ऋचावाले सैंतीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में राजा के गुणों को कहते हैं॥

वार्त्रहत्याय शवसे पृतनाषाह्याय च। इन्द्र त्वा वर्तयामसि॥ १॥

वार्त्रऽहत्याय। शवसे। पृतनाऽसह्याय। च। इन्द्र। त्वा। आ। वर्तयामसि॥ १॥

पदार्थः-(**वार्त्रहत्याय**) वृत्रहत्याया इदं तस्मै (**शवसे**) बलाय (**पृतनाषाह्याय**) पृतना सह्या येन तस्मै (**च**) (**इन्द्र**) सेनाधीश (**त्वा**) त्वाम् (**आ**) (**वर्त्तयामसि**) वर्त्तयामः॥ १॥

अन्वयः-हे इन्द्र! यथा वयं वार्त्रहत्याय सूर्यमिव पृतनाषाह्याय शवसे त्वा वर्त्तयामसि तथा त्वं चास्मानेतस्मै वर्त्तय॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। युद्धविद्याशिक्षकैः सेनाध्यक्षाभृत्याश्च सम्यक् शिक्षणीया यतो ध्रुवो विजयः स्यात्॥ १॥

पदार्थः-हे (**इन्द्र**) सेना के अधीश! जैसे हम लोग (**वार्त्रहत्याय**) मेघ के नाश करने के लिये जो बल उसके लिये सूर्य के समान (**पृतनाषाह्याय**) संग्राम के सहनेवाले (**शवसे**) बल के लिये (**त्वा**) आपका (**वर्त्तयामसि**) आश्रय करते हैं, वैसे आप (**च**) भी हम लोगों को इस बल के लिये वर्त्तो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। युद्ध करने की विद्या के शिक्षकों को चाहिये कि सेनाओं के अध्यक्ष और नौकरों को उत्तम प्रकार शिक्षा देवें, जिससे निश्चय विजय होवे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो। इन्द्र कृण्वन्तु वाघतः॥ २॥

अर्वाचीनम्। सु। ते। मनः। उत। चक्षुः। शतक्रतो इति शतऽक्रतो। इन्द्र। कृण्वन्तु। वाघतः॥ २॥

पदार्थः-(**अर्वाचीनम्**) इदानीं सुशिक्षितम् (**सु**) (**ते**) तव (**मनः**) अन्तःकरणम् (**उत**) (**चक्षुः**) चक्षुरादीन्द्रियम् (**शतक्रतो**) शतमसङ्ख्यः क्रतुः प्रज्ञा यस्य तत्सम्बुद्धौ (**इन्द्र**) दुष्टानां विदारक (**कृण्वन्तु**) निष्पादयन्तु (**वाघतः**) ये वाचा दोषान् घ्नन्ति ते मेधाविनः। **वाघत इति मेधाविनामसु पठितम्।** (निघं०३.१५)॥ २॥

अन्वयः-हे शतक्रतो इन्द्र! यथा वाघतस्तेऽर्वाचीनं मन उत चक्षुश्च शुभगुणान्वितं सुकृण्वन्तु तथैव भवानाचरतु॥ २॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। राजादयो जनाः सदाऽऽप्तशिक्षायां वर्त्तित्वा धर्मार्थकाममोक्षान् साध्नुवन्तु॥२॥

पदार्थः–हे **(शतक्रतो)** असंख्य बुद्धियुक्त **(इन्द्र)** दुष्ट पुरुषों के नाश करनेवाले! जैसे **(वाघतः)** वाणी से दोषों के नाश करनेवाले बुद्धिमान् लोग **(ते)** आपके **(अर्वाचीनम्)** इस समय उत्तम शिक्षायुक्त **(मनः)** अन्तःकरण **(उत)** और **(चक्षुः)** नेत्र आदि इन्द्रिय को उत्तम गुणों से युक्त **(सु, कृण्वन्तु)** सिद्ध करें, वैसे ही आप आचरण करें॥२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा आदि जन सदा यथार्थवक्ता पुरुष की शिक्षा में वर्त्तमान होके धर्म, अर्थ, काम और मोक्ष को सिद्ध करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे। इन्द्राभिमातिषाह्ये॥३॥

नामानि। ते। शतक्रतो इति शतऽक्रतो। विश्वाभिः। गीःऽभिः। ईमहे। इन्द्र। अभिमातिऽसह्ये॥३॥

पदार्थः–**(नामानि)** संज्ञाः **(ते)** तव **(शतक्रतो)** बहुप्रज्ञान **(विश्वाभिः)** सर्वाभिः **(गीर्भिः)** विद्यासुशिक्षाधर्मयुक्ताभिर्वाग्भिः **(ईमहे)** याचामहे **(इन्द्र)** परमैश्वर्य्यहेतो राजन् **(अभिमातिषाह्ये)** अभिमातयोऽभिमानयुक्ताः शत्रुवत्सह्या यस्मिन् संग्रामे तस्मिन्॥३॥

अन्वयः–हे शतक्रतो इन्द्र! यथा वयं विश्वाभिर्गीभिर्यस्य ते नामानि सार्थकानीमहे स त्वमस्मभ्यमभिमातिषाह्ये साहाय्यं देहि॥३॥

भावार्थः–राजते विद्याविनयाभ्यां प्रकाशते स राजा, यो नॄन् पाति स नृपो यो भुवं पाति स भूमिप इत्यादीनि सर्वाणि राज्ञो नामानि सार्थकानि सन्तु। यदा शत्रुभिः सह संग्रामो भवेत्तदा सर्वप्रकारेण रक्षको राजा भवेत्। एवं सति ध्रुवो विजयोऽन्यथा विपर्य्ययः॥३॥

पदार्थः–हे **(शतक्रतो)** बहुत बुद्धिमान् **(इन्द्र)** अत्यन्त ऐश्वर्य्य के कारण से राजन्! जैसे हम लोग **(विश्वाभिः)** सम्पूर्ण **(गीर्भिः)** विद्या, उत्तम शिक्षा और धर्म से युक्त वाणियों से जिन **(ते)** आपके **(नामानि)** संज्ञाओं को अर्थयुक्त होने की **(ईमहे)** याचना करते हैं, वह आप हम लोगों के लिये **(अभिमातिषाह्ये)** अभिमानयुक्त शत्रु लोग सहने योग्य हैं, जिनमें ऐसे संग्राम में सहायता दीजिये॥३॥

भावार्थः–राजमान, विद्या और विनयों से प्रकाशमान वह राजा; मनुष्यों की पालना करता वह नृप; और भूमि का पालन करता है, वह भूमिप इत्यादि सब राजा के नाम सार्थक हों और जब शत्रुओं के साथ संग्राम होवे तो सब प्रकार से रक्षा करनेवाला राजा होवे। ऐसा होने से निश्चित विजय होता, नहीं तो नहीं होता है॥३॥

अथ प्रजागुणानाह॥

अब प्रजा के गुणों को अगले मन्त्र में कहते हैं॥

पुरुष्टुतस्य धामभिः शतेन महयामसि। इन्द्रस्य चर्षणीधृतः॥४॥

पुरुऽस्तुतस्य। धामऽभिः। शतेन। महयामसि। इन्द्रस्य। चर्षणिऽधृतः॥४॥

पदार्थः-(**पुरुष्टुतस्य**) बहुभिः प्रशंसितस्य (**धामभिः**) जन्मस्थाननामभिः (**शतेन**) असंख्येन (**महयामसि**) पूजयाम (**इन्द्रस्य**) परमैश्वर्ययुक्तस्य राज्ञः (**चर्षणीधृतः**) यश्चर्षणीन् मनुष्यान्धरति तस्य॥४॥

अन्वयः-हे मनुष्या! यथा वयं पुरुष्टुतस्य चर्षणीधृत इन्द्रस्य शतेन धामभिर्महयामसि। तथैतस्य सत्कारं यूयमपि कुरुत॥४॥

भावार्थः-मनुष्यै राजादिन्यायकारिणां सर्वथा सत्कारः कर्त्तव्यो राजादयोऽपि प्रजास्थान् सदा सत्कुर्युरेवंकृते सत्युभयेषां मङ्गलोन्नतिर्भवति॥४॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**पुरुष्टुतस्य**) बहुतों से प्रशंसा पाये हुए और (**चर्षणीधृतः**) मनुष्यों को धारण करनेवाले (**इन्द्रस्य**) अत्यन्त ऐश्वर्य्य से युक्त राजा का (**शतेन**) असंख्य (**धामभिः**) जन्म, स्थान और नामों से (**महयामसि**) पूजन करें, वैसे उस प्रशंसित का सत्कार आप लोग भी करो॥४॥

भावार्थः-मनुष्यों को चाहिये कि राजा आदि न्यायकारी जनों का सब प्रकार सत्कार करें और राजा आदि भी प्रजाजनों का सदा सत्कार करें। ऐसा करने पर राजा और प्रजा इन दोनों के मङ्गल की उन्नति होती है॥४॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

इन्द्रं वृत्राय हन्तवे पुरुहूतमुप ब्रुवे। भरेषु वाजसातये॥५॥२१॥

इन्द्रम्। वृत्राय। हन्तवे। पुरुहूतम्। उप। ब्रुवे। भरेषु। वाजऽसातये॥५॥

पदार्थः-(**इन्द्रम्**) परमैश्वर्य्यप्रदम् (**वृत्राय**) मेघ इव न्यायावरकाय शत्रवे (**हन्तवे**) हन्तुम् (**पुरुहूतम्**) बहुभिराहूतं प्रशंसितं वा (**उप**) समीपे (**ब्रुवे**) कथयामि (**भरेषु**) संग्रामेषु (**वाजसातये**) धनादिसंविभागाय॥५॥

अन्वयः-हे सेनास्थवीरा! यथा सेनाधीशोऽहं वृत्राय हन्तवे भरेषु वाजसातये पुरुहूतमिन्द्रमुपब्रुवे तथा यूयमप्येतमुपब्रुवन्तु॥५॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यदा संग्रामः प्रवर्त्तेत तदा योद्धॄन् प्रत्यध्यक्षैर्यथा विजयः स्यात्तथोपदेष्टव्यम्। योद्धारश्चाधिष्ठातॄणामाज्ञायां सर्वथा वर्त्तेरन्नेवं सति कुतः पराजयः ?॥५॥

पदार्थः–हे सेना में वर्त्तमान वीर पुरुषो! जिस प्रकार सेना का अधीश मैं **(वृत्राय)** न्याय के आवरण करनेवाले शत्रु के **(हन्तवे)** नाश के लिये तथा **(भरेषु)** संग्रामों में **(वाजसातये)** धन आदि को बांटने के लिये **(पुरुहूतम्)** बहुतों से पुकारे वा प्रशंसा किये गये **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य के देनेवाले राजा को **(उप)** समीप में **(ब्रुवे)** कहता हूँ, वैसे आप लोग भी इसके समीप कहो॥५॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब संग्राम में प्रवृत्त होवे तो योद्धाओं के प्रति अध्यक्ष पुरुषों को चाहिये कि जिस प्रकार विजय हो वैसा उपदेश दें और योद्धा लोग अधिष्ठाता पुरुषों की आज्ञा में सब प्रकार वर्त्तमान होवें, ऐसा करने से कैसे पराजय हो ?॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वाजेषु सासहिर्भव त्वामीमहे शतक्रतो। इन्द्र वृत्राय हन्तवे॥६॥

वाजेषु। ससहिः। भव। त्वाम्। ईमहे। शतक्रतो इति शतऽक्रतो। इन्द्र। वृत्राय। हन्तवे॥६॥

पदार्थः–**(वाजेषु)** बह्वन्नविज्ञानादिसामग्र्यपेक्षेषु संग्रामेषु **(सासहिः)** भृशं सोढा **(भव)** **(त्वम्)** **(ईमहे)** युद्धोपकरणैर्याचामहे **(शतक्रतो)** अमितप्रज्ञ **(इन्द्र)** दुष्टदलविदारक **(वृत्राय)** मेघमिव शत्रुम् **(हन्तवे)** हन्तुम्॥६॥

अन्वयः–हे शतक्रतो इन्द्र! वयं यं त्वां वृत्राय हन्तव ईमहे स त्वं वाजेषु सासहिर्भव॥६॥

भावार्थः–यस्मिन् कर्मणि यस्य स्थापनं सभा कुर्यात् स तमधिकारं यथावदुन्नयेत् यस्याऽधिकारे यस्य नियोजनं स्यात्तदाज्ञां स कदाचिन्नोल्लङ्घयेत्॥६॥

पदार्थः–हे **(शतक्रतो)** अति सूक्ष्म बुद्धियुक्त **(इन्द्र)** दुष्ट पुरुषों के दल के नाश करनेवाले! हम लोग जिन **(त्वाम्)** आपको **(वृत्राय)** मेघ के सदृश शत्रु के **(हन्तवे)** नाश करने को **(ईमहे)** युद्ध के उपकारक वस्तुओं के साथ याचना करते हैं, वह आप **(वाजेषु)** जिनमें बहुत अन्न और विज्ञान आदि सामग्री अपेक्षित हैं, ऐसे संग्रामों में **(सासहिः)** अत्यन्त सहनेवाले **(भव)** हूजिये॥६॥

भावार्थः–जिस कर्म में जिसका स्थापन सभा करे, वह पुरुष उस अधिकार की यथायोग्य उन्नति करे और जिस अधिकार में जिसका नियोग होवे, वहाँ जो आज्ञा उसका वह कदाचित् उल्लङ्घन न करे॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

द्युम्नेषु॑ पृत॒नाज्ये॑ पृत्सु॒तूर्षु॒ श्रव॑:सु च। इन्द्र॒ साक्ष्वा॒भिमा॑तिषु॥७॥

द्युम्नेषु॑। पृ॒त॒नाज्ये॑। पृ॒त्सु॒तूर्षु॑। श्रव॑:ऽसु। च॒। इन्द्र॑। साक्ष्व॑। अ॒भिऽमा॑तिषु॥७॥

पदार्थः-(**द्युम्नेषु**) यशस्विषु धनप्रापकेषु वा (**पृतनाज्ये**) पृतनायाः सेनायाः संग्रामे (**पृत्सुतूर्षु**) पृत्नासु सेनासु त्वरमाणेषु हिंसकेषु (**श्रवःसु**) श्रवणेष्वन्नादिषु वा (**च**) (**इन्द्र**) (**साक्ष्व**) सहस्व (**अभिमातिषु**) अभिमानयुक्तेषु योद्धृषु॥७॥

अन्वयः-हे इन्द्र! त्वं पृत्सुतूर्षु श्रवःसु द्युम्नेष्वभिमातिषु च सत्सु पृतनाज्ये साक्ष्व॥७॥

भावार्थः-ये विद्यमानेषु धनादिषु वीरसेनासु व्याख्यातृषु युद्धाऽभिमानिषु स्वप्रियेषु हृष्टपुष्टेषु सत्सु च शत्रुभिः सह संग्रामं कुर्वन्ति त एव ध्रुवं विजयं लभन्ते॥७॥

पदार्थः-हे (**इन्द्र**) तेजस्वी पुरुष! आप (**पृत्सुतूर्षु**) सेनाओं में शीघ्रता के नाश करनेवाले जनों वा (**श्रवःसु**) श्रवण वा अन्न आदि पदार्थों (**द्युम्नेषु**) वा यशस्वी वा धन की प्राप्ति करानेवाले विषयों में वा (**पृतनाज्ये**) सेना सम्बन्धी संग्राम में (**साक्ष्व**) सहन करो॥७॥

भावार्थः-जो विद्यमान धन आदि पदार्थ वीर सेनाओं में व्याख्यान देनेवाले और युद्ध के अभिमानी अपने प्रिय आनन्दित और पुष्ट पुरुषों के होने पर शत्रुओं के साथ संग्राम करते हैं, वे ही पुरुष निश्चित विजय को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शु॒ष्मिन्त॑मं न ऊ॒तये॑ द्यु॒म्निनं॑ पाहि॒ जागृ॑विम्। इन्द्र॒ सोमं॑ शतक्रतो॥८॥

शु॒ष्मिन्ऽत॑मम्। न॒:। ऊ॒तये॑। द्यु॒म्निन॑म्। पा॒हि॒। जागृ॑विम्। इन्द्र॑। सोम॑म्। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो॥८॥

पदार्थः-(**शुष्मिन्तमम्**) प्रशंसितं बहुविधं वा बलं विद्यते यस्य तमतिशयितम् (**नः**) अस्माकम् (**ऊतये**) रक्षणाद्याय (**द्युम्निनम्**) यशस्विनं श्रीमन्तम् (**पाहि**) (**जागृविम्**) जागरूकम् (**इन्द्र**) सर्वाभिरक्षक राजन् (**सोमम्**) ऐश्वर्यम् (**शतक्रतो**) बहुप्रज्ञ बहुकर्मन् वा॥८॥

अन्वयः-हे शतक्रतो इन्द्र! त्वं न ऊतये शुष्मिन्तमं द्युम्निनं जागृविं सोमं च पाहि॥८॥

भावार्थः-सर्वैः प्रजाराजजनैः सर्वाधीशं राजानमन्यानध्यक्षान् प्रति चैवं वाच्यं भवन्तोऽस्माकं रक्षकाणामैश्वर्य्यस्य च रक्षायामनलसा उद्यता भवन्तु॥८॥

पदार्थः-हे (**शतक्रतो**) बहुत बुद्धि वा बहुत कर्मयुक्त (**इन्द्र**) सबके रक्षक राजन्! आप (**नः**) हम लोगों की (**ऊतये**) रक्षा आदि के लिये (**शुष्मिन्तमम्**) प्रशंसित वा बहुत प्रकार का बल जिसके उस अतीव (**द्युम्निनम्**) यशस्वी लक्ष्मीवान् और (**जागृविम्**) जागनेवाले जन और (**सोमम्**) ऐश्वर्य्य की

(पाहि) रक्षा करो॥८॥

भावार्थः-सब प्रजा और राजजनों को चाहिये कि सबके अधीश राजा और अन्य अध्यक्षों के प्रति ऐसा कहें कि आप लोग हम लोगों के रक्षक पुरुषों की और ऐश्वर्य्य की रक्षा में निरालस और उद्यत होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रियाणि॑ शतक्रतो॒ या ते॒ जने॑षु प॒ञ्चसु॑। इन्द्र॒ तानि॑ त॒ आ वृ॑णे॥९॥

इन्द्रियाणि॑। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो। या। ते॒। जने॑षु। प॒ञ्चऽसु॑। इन्द्र॑। तानि॑। ते॒। आ। वृ॒णे॒॥९॥

पदार्थः-(**इन्द्रियाणि**) इन्द्रस्य जीवस्य लिङ्गानि (**शतक्रतो**) अमितबुद्धे (**या**) यानि (**ते**) तव (**जनेषु**) प्रसिद्धेष्वध्यक्षेषु (**पञ्चसु**) राज्यसेनाकोशदूतत्वप्राड्विवाकत्वसंपन्नेष्वधिकारिषु (**इन्द्र**) ऐश्वर्ययोजक (**तानि**) (**ते**) तव (**आ**) (**वृणे**) शुभगुणैराच्छादयामि॥९॥

अन्वयः-हे शतक्रतो इन्द्र! पञ्चसु जनेषु या त इन्द्रियाणि सन्ति तानि तेऽहमावृणे॥९॥

भावार्थः-स एव राज्यं कर्त्तुमर्हति योऽमात्यानां चरित्राणि चक्षुषा रूपमिव प्रत्यक्षीकरोति तथा शरीरेन्द्रियगोलकसम्बन्धेन जीवस्य सर्वाणि कार्याणि सिध्यन्ति तथैव राजाऽमात्यसेनायोगेन राजकार्याणि साद्धुं शक्नोति॥९॥

पदार्थः-हे (**शतक्रतो**) अपार बुद्धियुक्त (**इन्द्र**) ऐश्वर्य्य को योग करनेवाले! (**पञ्चसु**) पाँच राज्य, सेना, कोश, दूतत्व, प्राड्विवाकत्व आदि पदवियों से युक्त अधिकारी और (**जनेषु**) प्रत्यक्ष अध्यक्षों में (**या**) जो (**ते**) आपके (**इन्द्रियाणि**) जीने के चिह्न हैं (**तानि**) उन (**ते**) आपके चिह्नों को मैं (**आ**) (**वृणे**) उत्तम गुणों से आच्छादन करता हूँ॥९॥

भावार्थः-वही पुरुष राज्य करने के योग्य है **[**कि**]** जो मन्त्रियों के चरित्रों को नेत्र से रूप के सदृश प्रत्यक्ष करता है। जैसे शरीर के इन्द्रिय के गोलक अर्थात् काले तारेवाले नेत्र के सम्बन्ध से जीव के सम्पूर्ण कार्य्य सिद्ध होते हैं, वैसे राजा मन्त्री और सेना के योग से राजकार्यों को सिद्ध कर सकता है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अग॑न्निन्द्र॒ श्रवो॑ बृ॒हद् द्यु॒म्नं द॑धिष्व दु॒ष्टर॑म्। उत्ते॒ शुष्मं॑ तिरामसि॥१०॥

अग॑न्। इ॒न्द्र॒। श्रव॑ः। बृ॒हत्। द्यु॒म्नम्। द॒धि॒ष्व॒। दु॒स्तर॑म्। उत्। ते॒। शुष्म॑म्। ति॒रा॒म॒सि॒॥१०॥

पदार्थः-(**अगन्**) प्राप्नुवन्ति (**इन्द्र**) परमैश्वर्ययुक्त (**श्रवः**) अन्नं श्रवणं वा (**बृहत्**) महत् (**द्युम्नम्**) यशो धनं वा (**दधिष्व**) धर (**दुष्टरम्**) शत्रुभिर्दुःखेन तरितुमुल्लङ्घयितुं योग्यम् (**उत्**) उत्कृष्टे (**ते**) तव (**शुष्मम्**) बलम् (**तिरामसि**) तराम॥१०॥

अन्वयः-हे इन्द्र! यद् बृहद् दुष्टरं श्रवो द्युम्नं शुष्मं विद्वांसोऽगन् यत्ते वयमुत्तिरामसि तत्सर्वं त्वं दधिष्व॥१०॥

भावार्थः-तावदैश्वर्य्यं राजा धर्त्तव्यं यावत्सेनायै प्रजापालनायाऽमात्यरक्षणायाऽलं स्यादेवं जाते सति महद्यशो वर्धेत॥१०॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त! जिस (**बृहत्**) बड़े (**दुष्टरम्**) शत्रुओं से दुःख से उल्लङ्घन करने योग्य (**श्रवः**) अन्न वा श्रवण (**द्युम्नम्**) यश वा धन और (**शुष्मम्**) बल को विद्वान् लोग (**अगन्**) प्राप्त होते हैं वा जिस (**ते**) आपके पूर्वोक्त अन्न, श्रवण, यश, धन और बल को हम लोग (**उत्**) उत्तम प्रकार (**तिरामसि**) तरें उल्लङ्घें अर्थात् उससे अधिक सम्पादन करें, उस सबको आप (**दधिष्व**) धारण करो॥१०॥

भावार्थः-उतना ही ऐश्वर्य राजा को धारण करना चाहिये कि जितना सेना और प्रजा के पालन के और मन्त्रियों की रक्षा के लिये पूरा होवे, ऐसा करने से बड़ा यश बढ़े॥१०॥

अथ राजप्रजाजनविषयं परस्परेणाह॥

अब राजा और प्रजा विषय को परस्पर सम्बन्ध से कहते हैं॥

अर्वावतो न आ गह्यथो शक्र परावतः।
उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि॥११॥२२॥

अर्वाऽवतः। नः। आ। गहि। अथो इति। शक्र। पराऽवतः। ऊम् इति। लोकः। यः। ते। अद्रिऽवः। इन्द्र। इह। ततः। आ। गहि॥११॥

पदार्थः-(**अर्वावतः**) अर्वाचीनात् (**नः**) अस्मान् (**आ**) (**गहि**) आगच्छ प्राप्नुहि (**अथो**) आनन्तर्ये (**शक्र**) शक्तिमन् (**परावतः**) दूरात् (**उ**) (**लोकः**) निवासस्थानम् (**यः**) (**ते**) तव (**अद्रिवः**) अद्रयो बहवो मेघा विद्यन्ते यस्य सूर्यस्य तद्वद्वर्त्तमान (**इन्द्र**) ऐश्वर्येण सुखप्रद (**इह**) अस्मिन् संसारे (**ततः**) तस्मात् (**आ**) (**गहि**)॥११॥

अन्वयः-हे अद्रिवः शक्रेन्द्र! इह यस्ते लोकोऽस्ति तस्मादर्वावतो न आ गह्यथो परावतो न आ गहि तत उ अन्यत्र गच्छ॥११॥

भावार्थः–यथा मनुष्याः प्रीत्या राजानमाह्वयेयुस्तत्सामीप्यं स स्वदेशादागच्छेत् तस्मादन्यत्र गच्छेदेवं राजप्रजाजनाः परस्परेषु स्नेहवर्धनाय कर्माणि सततं कुर्युरिति॥ ११॥

अत्र राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तत्रिंशत्तमं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः–हे **(अद्रिवः)** बहुत मेघों से युक्त सूर्य के सदृश वर्त्तमान **(शक्र)** सामर्थ्यवान् **(इन्द्र)** ऐश्वर्य से सुख के दाता! **(इह)** इस संसार में **(यः)** जो **(ते)** आपका **(लोकः)** निवासस्थान है, **[(अर्वावतः)]** इस स्थान से **(नः)** हम लोगों को **(आ, गहि)** प्राप्त हूजिये **(अथो)** इसके अनन्तर **(परावतः)** दूर से भी हम लोगों को प्राप्त हूजिये **(ततः)** और इससे **(आगहि)** उत्तम प्रकार अन्य स्थान में जाइये॥ ११॥

भावार्थः–जैसे मनुष्य लोग प्रीति से राजा को बुलावे और वह राजा उन प्रजाजनों के समीप अपने देश को प्राप्त हो और उस देश से अन्य देश में भी जाये, इस प्रकार राजा और प्रजा जन परस्पर स्नेह की वृद्धि के लिये कर्मों को निरन्तर करें॥ ११॥

इस सूक्त में राजा और प्रजा के कामों का वर्णन करने से इस सूक्त के अर्थ की इस सूक्त से पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सैंतीसवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

अथ दशर्चस्याष्टत्रिंशत्तमस्य सूक्तस्य प्रजापतिर्ऋषिः। इन्द्रो देवता। १, ६, १० त्रिष्टुप्। २-५, ८, ९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब दश ऋचावाले अड़तीसवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः।
अभि प्रियाणि मर्मृशत्पराणि कवीँरिच्छामि संदृशे सुमेधाः॥ १॥

अभि। तष्टाऽइव। दीधय। मनीषाम्। अत्यः। न। वाजी। सुऽधुरः। जिहानः। अभि। प्रियाणि। मर्मृशत्। पराणि। कवीन्। इच्छामि। सम्ऽदृशे। सुऽमेधाः॥ १॥

पदार्थः-(**अभि**) आभिमुख्ये (**तष्टेव**) यथा काष्ठानां सूक्ष्मत्वस्य कर्त्ता (**दीधय**) प्रकाशय। अत्र **संहितायामि**ति दीर्घः। (**मनीषाम्**) प्रज्ञाम् (**अत्यः**) सततं गन्ता (**न**) इव (**वाजी**) वेगवान् (**सुधुरः**) शोभना धूर्यस्य सः (**जिहानः**) प्राप्नुवन् (**अभि**) (**प्रियाणि**) कमनीयानि सेवनानि सुखानि (**मर्मृशत्**) भृशं विचारयन् (**पराणि**) उत्कृष्टानि (**कवीन्**) धार्मिकान् विदुषः (**इच्छामि**) (**संदृशे**) सम्यग्दर्शनाय (**सुमेधाः**) शोभनप्रज्ञः॥ १॥

अन्वयः-हे विद्वन्! यथाऽहं संदृशे कवीनभीच्छामि तथा सुमेधा जिहानः पराणि प्रियाण्यभिमर्मृशत् सन् सुधुरोऽत्यो वाजी न मनीषां तष्टेवाऽभि दीधय॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा धुरन्धरा सुशिक्षितास्तुरङ्गा अभीष्टानि कार्य्याणि साध्नुवन्ति तथैव साधारणा जना विदुषः प्रज्ञां प्राप्य तक्षेव व्यसनानि छिन्द्युः॥ १॥

पदार्थः-हे विद्वान् पुरुष! जैसे मैं (**संदृशे**) उत्तम प्रकार दर्शन के लिये (**कवीन्**) धार्मिक विद्वानों की (**इच्छामि**) इच्छा करता हूँ, वैसे (**सुमेधाः**) उत्तम बुद्धिवाले (**जिहानः**) प्राप्त होते और (**पराणि**) परम उत्तम (**प्रियाणि**) कामना और आदर करने योग्य सुखों को (**अभि, मर्मृशत्**) अत्यन्त विचारते हुए (**सुधुरः**) सुन्दर धुरा को धारण किये हुए (**अत्यः**) निरन्तर चलनेवाले (**वाजी**) वेगयुक्त घोड़े के (**न**) समान (**मनीषाम्**) बुद्धि को (**तष्टेव**) काष्ठों के सूक्ष्मत्व अर्थात् छीलने से पतले करनेवाले बढ़ई के सदृश आप (**अभि**) सम्मुख (**दीधय**) प्रकाश करो॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे धुरियों के धारण करनेवाले उत्तम प्रकार शिक्षित घोड़े वाञ्छित कर्मों को सिद्ध करते हैं, वैसे ही साधरण जन विद्वानों की उत्तम बुद्धि को ग्रहण करके बढ़ई के सदृश व्यसनों का छेदन करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒नोत पृ॑च्छ॒ जनि॑मा क॒वीनां॑ मनो॒धृत॑: सु॒कृत॑स्तक्षत॒ द्याम्।

इ॒मा उ॑ ते प्र॒ण्यो३॑ वर्ध॑माना॒ मनो॑वाता॒ अध॒ नु धर्म॑णि ग्मन्॥ २॥

इ॒ना। उ॒त। पृ॒च्छ॒। जनि॑म। क॒वी॒नाम्। म॒न॒:ऽधृ॑त:। सु॒ऽकृ॑त:। त॒क्ष॒त॒। द्याम्। इ॒मा:। ऊ॒म् इति॑। ते॒। प्र॒ऽण्य॑:। वर्ध॑माना:। मन॑:ऽवाता:। अध॑। नु। धर्म॑णि। ग्मन्॥ २॥

पदार्थ:-(**इना**) इनान् प्रभून् समर्थान् (**उत**) अपि (**पृच्छ**) (**जनिमा**) जन्मानि (**कवीनाम्**) मेधाविनाम् (**मनोधृत:**) मनो विज्ञानं धृतं यैस्ते (**सुकृत:**) ये शोभनं कर्म कुर्वन्ति ते (**तक्षत**) सूक्ष्मान् कुरुत (**द्याम्**) विद्युतम् (**इमा:**) वर्त्तमाना: (**उ**) (**ते**) तव (**प्रण्य:**) प्रकृष्टा नीतिर्यासां ता: (**वर्धमाना:**) वृद्धिशीला: (**मनोवाता:**) मन इव वातो वेगो यासां ता: (**अध**) अथ (**नु**) सद्य: (**धर्मणि**) (**ग्मन्**) प्राप्नुयु:॥ २॥

अन्वय:-हे मनुष्या! या कवीनां मनोधृत: सुकृत उ इमा प्रण्यो वर्धमाना मनोवाता धर्मणि नु ग्मन् अध या द्यां प्राप्नुयुर्ये ते जनिमा ग्मन् ता उत तानिना त्वं पृच्छ, यूयमविद्यां तक्षत॥ २॥

भावार्थ:-ये पुरुषा: स्त्रियश्च धर्मानुष्ठानपुर:सरं मेधाविलक्षणानि धृत्वा प्रश्नोत्तराणि विधायान्त:करणं संशोध्य समर्था जायन्ते ते ताश्चैव सर्वतोऽधिवर्धन्ते॥ २॥

पदार्थ:-हे विद्वान् वा साधारण मनुष्यो! जो (**कवीनाम्**) बुद्धिमान् लोगों के (**मनोधृत:**) विज्ञान के धारण करने और (**सुकृत:**) उत्तम कर्म करनेवाले पुरुष (**उ**) और (**इमा:**) ये वर्त्तमान (**प्रण्य:**) उत्तम नीतियुक्त (**वर्धमाना:**) बढ़ती हुई (**मनोवाता:**) मन के सदृश वेगवाली स्त्रियाँ (**धर्मणि**) धर्मव्यवहार में (**नु**) शीघ्र (**ग्मन्**) प्राप्त हों, (**अध**) इसके अनन्तर जो (**द्याम्**) बिजुली को प्राप्त हों और जो लोग (**ते**) तुम्हारे (**जनिमा**) जन्मों को प्राप्त हों, उन स्त्रियों (**उत**) वा उन (**इना**) समर्थ पुरुषों को आप (**पृच्छ**) पूछिये और आप लोग भी अविद्या को (**तक्षत**) काटिये॥ २॥

भावार्थ:-जो पुरुष और स्त्रियाँ धर्म के अनुष्ठानपूर्वक बुद्धिमान् लोगों के लक्षणों को धारण कर प्रश्नोत्तर और अन्त:करण को शुद्ध करके समर्थ होते हैं, वे पुरुष और वैसी स्त्रियाँ सब प्रकार वृद्धि को प्राप्त होती हैं॥ २॥

अथ भूमिविषयमाह॥

अब भूमि विषय को अगले मन्त्र में कहते हैं॥

नि षी॒मिद॑त्र॒ गुह्या॒ दधा॑ना॒ उ॒त क्ष॒त्राय॒ रोद॑सी॒ सम॑ञ्जन्।

सं मात्रा॑भिर्मि॒रे ये॒मुरु॒र्वी अ॒न्तर्म॒ही समृ॑ते॒ धाय॑से धु:॥ ३॥

नि। सी॒म्। इत्। अत्र॑। गुह्या॑। दधा॑ना:। उ॒त। क्ष॒त्राय॑। रोद॑सी॒ इति॑। सम्। अ॒ञ्ज॒न्। सम्। मात्रा॑भि:। म॒मि॒रे। ये॒मु:। उ॒र्वी इति॑। अ॒न्त:। म॒ही इति॑। समृ॑ते॒ इति॑ सम्ऽऋ॑ते। धाय॑से। धु॒रिति॑ धु:॥ ३॥

पदार्थः-(**नि**) नितराम् (**सीम्**) सर्वतः (**इत्**) एव (**अत्र**) अस्मिन् संसारे (**गुह्या**) गूढानि विज्ञानानि (**दधानाः**) (**उत**) अपि (**क्षत्राय**) राज्याय (**रोदसी**) भूमिविद्याप्रकाशौ (**सम्**) (**अञ्जन्**) प्रकटीकुर्य्युः (**सम्**) (**मात्राभिः**) सूक्ष्माऽवयवैः (**ममिरे**) निर्मिमीरन् (**येमुः**) यच्छेयुः (**ऊर्वी**) महती (**अन्तः**) मध्ये (**मही**) (**समृते**) सम्यक् सत्ये व्यवहारे (**धायसे**) धातुम् (**धुः**) धरेयुः॥३॥

अन्वयः-हे मनुष्या! याः स्त्रियोऽत्र गुह्या दधानाः सत्यः क्षत्राय रोदसी सीं समञ्जन्नुत मात्राभिर्निर्ममिरे उर्वी मही समृते धायसेऽन्तः सं येमुस्ता इदेव सुखं धुः॥३॥

भावार्थः-या स्त्रियो ब्रह्मचर्य्येण विद्याविज्ञानानि प्राप्य पृथिव्यादिपदार्थानां सकाशादुपकारं ग्रहीतुं शक्नुयुस्ता राज्ञ्यो भवितुमर्हन्ति॥३॥

पदार्थः-हे मनुष्यो! जो स्त्रियाँ (**अत्र**) इस संसार में (**गुह्या**) गूढ़ विज्ञानों को (**दधानाः**) धारण किये हुईं (**क्षत्राय**) राज्य के लिये (**रोदसी**) भूमि और विद्या के प्रकाश को (**सीम्**) सब प्रकार (**सम्, अञ्जन्**) प्रकट करें (**उत**) और (**मात्राभिः**) सूक्ष्म अवयवों से (**नि**) निरन्तर पदार्थों को (**ममिरे**) मापें और (**उर्वी**) बड़ी (**मही**) पृथ्वी को (**समृते**) अच्छे प्रकार सत्य व्यवहार में (**धायसे**) धारण करने को अपने अन्तःकरण के (**अन्तः**) मध्य में (**सम्, येमुः**) संयुक्त करें वे (**इत्**) ही सुख को (**धुः**) धारण करें॥३॥

भावार्थः-जो स्त्रियाँ ब्रह्मचर्य्य से विद्या के विज्ञानों को प्राप्त होकर पृथिवी आदि पदार्थों से उपकार का ग्रहण कर सकें, वे रानी होने के योग्य होती हैं॥३॥

अथ सूर्यविषयमाह॥

अब सूर्य्य के विषय को अगले मन्त्र में कहते हैं॥

आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ॥४॥

आऽतिष्ठन्तम्। परि। विश्वे। अभूषन्। श्रियः। वसानः। चरति। स्वऽरोचिः। महत्। तत्। वृष्णः। असुरस्य। नाम। आ। विश्वऽरूपः। अमृतानि। तस्थौ॥४॥

पदार्थः-(**आतिष्ठन्तम्**) समन्तात् स्थितम् (**परि**) सर्वतः (**विश्वे**) सर्वे (**अभूषन्**) अलंकुर्वन् (**श्रियः**) लक्ष्मीः (**वसानः**) आच्छादयन् गृह्णन् (**चरति**) गच्छति (**स्वरोचिः**) स्वकीयं रोचिर्दीपनं यस्य सः (**महत्**) (**तत्**) (**वृष्णः**) वर्षकस्य (**असुरस्य**) योऽस्यति दोषान् प्राणेषु रममाणो वा तस्य (**नामा**) उदकानि। **नामेत्युदकनामसु पठितम्।** (निघं०१.१२) (**विश्वरूपः**) विश्वानि रूपाणि यस्मात् सः (**अमृतानि**) अमृतात्मकानि (**तस्थौ**) तिष्ठति॥४॥

अन्वयः-हे मनुष्या! विश्वरूपः श्रियो वसानः स्वरोचिः सूर्यो वृष्णोऽसुरस्य वायोरमृतानि नामा तस्थाविव यन्महत्तच्चरति तमातिष्ठन्तं विश्वे विद्वांसो पर्य्यभूषन्॥४॥

भावार्थः-हे मनुष्या! वाय्वाधारे स्थिताः सूर्य्यादयो लोका जलवर्षणादिद्वारा सर्वानानन्दयन्ति तथैव श्रीकरः पुरुषः सर्वान् विभूषयति॥४॥

पदार्थः-हे मनुष्यो! **(विश्वरूपः)** सम्पूर्ण रूप हैं जिससे वा जो **(श्रियः)** धनों वा पदार्थों की शोभाओं को **(वसानः)** ढांपता वा ग्रहण करता हुआ और **(स्वरोचिः)** अपना प्रकाश जिसमें विद्यमान वह सूर्य्य **(वृष्णः)** वृष्टिकारक **(असुरस्य)** दोषों को दूर करने वा प्राणों में रमनवाले वायु सम्बन्धी **(अमृतानि)** अमृतस्वरूप **(नामा)** जलों को व्याप्त होकर **(आ, तस्थौ)** स्थित होता वा उसके समान जो **(महत्)** बड़ा है **(तत्)** उसको **(चरति)** प्राप्त होता है, उस **(आतिष्ठन्तम्)** चारों ओर से स्थिर हुए को **(विश्वे)** सम्पूर्ण विद्वान् लोग **(परि)** सब प्रकार **(अभूषन्)** शोभित करें॥४॥

भावार्थः-हे मनुष्यो! वायुरूप आधार में वर्त्तमान सूर्य्य आदि लोक जल वृष्टि आदि के द्वारा सब लोगों को आनन्द देते हैं, वैसे ही लक्ष्मी उत्पादन करनेवाला पुरुष सबको शोभित करता है॥४॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

असूत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः सन्ति पूर्वीः।
दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे॥५॥२३॥

असूत। पूर्वः। वृषभः। ज्यायान्। इमाः। अस्य। शुरुधः। सन्ति। पूर्वीः। दिवः। नपाता। विदथस्य। धीभिः। क्षत्रम्। राजाना। प्रऽदिवः। दधाथे इति॥५॥२३॥

पदार्थः-**(असूत)** सूते **(पूर्वः)** पालकः प्रथमः **(वृषभः)** वर्षकः **(ज्यायान्)** महान् वृद्धः **(इमाः)** **(अस्य)** **(शुरुधः)** याः शु शीघ्रं रुध्नन्ति ताः **(सन्ति)** **(पूर्वीः)** प्राचीनाः **(दिवः)** अन्तरिक्षात् **(नपाता)** यौ न पततो विनश्यतस्तत्सम्बुद्धौ **(विदथस्य)** विज्ञानकरस्य **(धीभिः)** प्रज्ञाभिः कर्मभिर्वा **(क्षत्रम्)** रक्षितव्यं राज्यम् **(राजाना)** सूर्यविद्युताविव प्रकाशमानौ राजन्यायेशौ **(प्रदिवः)** प्रकृष्टान् विद्याविनयप्रकाशान् **(दधाते)** धरथः॥५॥

अन्वयः-हे नपाता राजाना! युवां यथा पूर्वो वृषभो ज्यायानिमाः पूर्वीः शुरुधोऽसूताऽस्य सकाशाद् वृष्टिकाः सन्ति तथैव दिवो विदथस्य प्रदिवो धीभिः क्षत्रं दधाथे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽनुक्रमेण सूर्यो जलधारणवर्षणाभ्यामस्य जगतो हितं करोति तथैव शुभगुणन्यायैः सह वर्त्तमानाः सन्तो राजादयः सुरक्षितं राज्यं पान्तु॥५॥

पदार्थः-हे **(नपाता)** नाशरहित **(राजाना)** सूर्य्य और बिजुली के सदृश प्रकाशयुक्त राजा और

न्यायधीश! आप दोनों जैसे **(पूर्वः)** पालन करनेवाला प्रथम **(वृषभः)** वृष्टिकर्त्ता **(ज्यायान्)** बड़ा वृद्ध **(इमाः)** इन **(पूर्वीः)** प्राचीन **(शुरुधः)** शीघ्र रुचिकारकों को **(असूत)** उत्पन्न करता है और **(अस्य)** इसके समीप से वृष्टिका वर्षायें हैं, वैसे ही **(दिवः)** अन्तरिक्ष से **(विदथस्य)** विज्ञान करनेवाले के **(प्रदिवः)** विद्या और विनय के प्रकाशों को तथा **(धीभिः)** बुद्धि वा कर्मों से **(क्षत्रम्)** रक्षा करने योग्य राज्य को **(दधाथे)** धारण करते हो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे क्रम से सूर्य जल के धारण और वृष्टि से इस संसार का हित करता है, वैसे ही उत्तम गुण और न्यायों के सहित वर्त्तमान हुए राजा आदि लोग उत्तम प्रकार रक्षित राज्य का पालन करें॥५॥

अथ सभाकार्य्यमुपदिश्यते॥

अब सभा के कार्य्य का उपदेश अगले मन्त्र में किया है॥

त्रीणि॑ राजाना वि॒दथे॑ पु॒रूणि॒ परि॒ विश्वा॑नि भूषथ॒ः सदां॑सि।
अप॑श्य॒मत्र॒ मन॑सा जग॒न्वान् व्र॒ते ग॑न्ध॒र्वाँ अपि॑ वा॒युके॑शान्॥६॥

त्रीणि॑। रा॒जा॒ना॒। वि॒दथे॑। पु॒रूणि॑। परि॑। विश्वा॑नि। भू॒ष॒थ॒ः। सदां॑सि। अप॑श्यम्। अत्र॑। मन॑सा। ज॒ग॒न्वान्। व्र॒ते। ग॒न्ध॒र्वान्। अपि॑। वा॒युऽके॑शान्॥६॥

पदार्थः-**(त्रीणि)** **(राजाना)** विद्यादिशुभगुणैः प्रकाशमानौ राजप्रजाजनौ **(विदथे)** विज्ञानप्रापके व्यवहारे **(पुरूणि)** बहूनि **(परि)** सर्वतः **(विश्वानि)** अखिलानि **(भूषथः)** अलंकुरुथः **(सदांसि)** सभाः **(अपश्यम्)** पश्यामि **(अत्र)** अस्मिन् राजव्यवहारे **(मनसा)** विज्ञानेन **(जगन्वान्)** गन्ता **(व्रते)** सत्यभाषणादिव्यवहारे **(गन्धर्वान्)** ये गां सुशिक्षितां वाचं पृथिवीं वा धरन्ति तान् **(अपि)** **(वायुकेशान्)** वायुरिव केशाः प्रकाशा येषां तान्॥६॥

अन्वयः-हे राजानाऽहमत्र स्थितान् यान् व्रते गन्धर्वान् वायुकेशानन्यानपि शिष्टान् मनसा जगन्वान् सन्नपश्यं तैस्त्रीणि सदांसि निर्माय विदथे पुरूणि विश्वानि यतः परिभूषथस्तस्मात् सकलकार्य्यसिद्धिकरौ भवथः॥६॥

भावार्थः-हे मनुष्या! युष्माभिरुत्तमगुणकर्मस्वभावानामाप्तानां विदुषां राजविद्याधर्मसभाः संस्थाप्य सर्वाणि राजकार्याणि यथावत्संसाध्य सर्वाः प्रजाः सततं सुखयेत॥६॥

पदार्थः-हे **(राजाना)** राजा और प्रजाजनो! मैं इस संसार में वर्त्तमान जिन **(व्रते)** सत्यभाषणादि व्यवहार में **(गन्धर्वान्)** उत्तम प्रकार शिक्षित वाणी वा पृथिवी को धारण करने और **(वायुकेशान्)** वायु के सदृश प्रकाशवाले तथा अन्य भी शिष्ट अर्थात् उत्तम पुरुषों को **(मनसा)** विज्ञान से **(जगन्वान्)** प्राप्त

हुआ (**अपश्यम्**) देखता हूँ, उन लोगों से (**त्रीणि**) तीन (**सदांसि**) सभायें नियत कराके (**विदथे**) विज्ञान को प्राप्त करानेवाले व्यवहार में (**पुरूणि**) बहुत (**विश्वानि**) सम्पूर्ण व्यवहारों को (**परि**) सब प्रकार (**भूषथः**) शोभित करते हो, इससे सम्पूर्ण कार्यों के सिद्ध करनेवाले होते हो॥६॥

भावार्थः-हे मनुष्यो! आप लोग उत्तम गुण, कर्म और स्वभाववाले यथार्थवक्ता विद्वान् पुरुषों की राजसभा, विद्यासभा और धर्मसभा नियत कर और सम्पूर्ण राज्यसम्बन्धी कर्मों को यथायोग्य सिद्ध कर सकल प्रजा को निरन्तर सुख दीजिये॥६॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

तदिन्वस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः।
अन्यदन्यदसुर्यꣳ वसाना नि मायिनो ममिरे रूपमस्मिन्॥७॥

तत्। इत्। नु। अस्य। वृषभस्य। धेनोः। आ। नामऽभिः। ममिरे। सक्म्यम्। गोः। अन्यत्ऽअन्यत्। असुर्यम्। वसानाः। नि। मायिनः। ममिरे। रूपम्। अस्मिन्॥७॥

पदार्थः-(**तत्**) (**इत्**) एव (**नु**) सद्यः (**अस्य**) (**वृषभस्य**) बलिष्ठस्य (**धेनोः**) वाण्याः (**आ**) समन्तात् (**नामभिः**) संज्ञाभिः (**ममिरे**) (**सक्म्यम्**) सचति संयुनक्ति यस्मिँस्तत्र भवम् (**गोः**) वाण्याः (**अन्यदन्यत्**) पृथक्पृथग्वर्त्तमानम् (**असुर्यम्**) असुरस्य मेघस्य स्वम् (**वसानाः**) आच्छादयन्तः (**नि**) (**मायिनः**) प्रशस्ता माया प्रज्ञा विद्यते येषान्ते (**ममिरे**) सृजन्ति (**रूपम्**) (**अस्मिन्**) राज्ये॥७॥

अन्वयः-ये मनुष्या अस्य वृषभस्य धेनोर्नामभिर्नु यदा ममिरे तत्सक्म्यं गोरन्यदन्यदसुर्यं वसाना मायिनोऽस्मिन् रूपं नि ममिरे त इदेव राज्यं कर्त्तुं शक्नुयुः॥७॥

भावार्थः-ये मनुष्या अस्य राज्यस्य कोमलवचनैः पालनं विदधति ते मेघाज्जलमिव बहुविधमैश्वर्य्यं लभन्ते॥७॥

पदार्थः-जो मनुष्य (**अस्य**) इस (**वृषभस्य**) बलिष्ठ की (**धेनोः**) वाणी के (**नामभिः**) नामों से (**नु**) शीघ्र जिसको (**आ, ममिरे**) सब ओर से नापते हैं (**तत्**) उस (**सक्म्यम्**) संयोग जिस पदार्थ में करता है, उसमें उत्पन्न (**गोः**) वाणी से (**अन्यदन्यत्**) पृथक्-पृथक् वर्त्तमान (**असुर्यम्**) मेघपन को (**वसानाः**) ढांपते हुए (**मायिनः**) उत्तम बुद्धिवाले (**अस्मिन्**) इस राज्य में (**रूपम्**) रूप को (**नि, ममिरे**) उत्पन्न करते हैं वे (**इत्**) ही राज्य कर सकते हैं॥७॥

भावार्थः-जो मनुष्य इस राज्य का कोमल वचनों से पालन करते हैं, वे मेघ से जल के सदृश अनेक प्रकार के ऐश्वर्य को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तदिन्वस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत्।

आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे॥८॥

तत्। इत्। नु। अस्य। सवितुः। नकिः। मे। हिरण्ययीम्। अमतिम्। याम्। अशिश्रेत्। आ। सुऽस्तुती। रोदसी इति। विश्वमिन्वे इति विश्वम्ऽइन्वे। अपिऽइव। योषा। जनिमानि। वव्रे॥८॥

पदार्थः-(**तत्**) (**इत्**) (**नु**) (**अस्य**) (**सवितुः**) सूर्य्यस्येव (**नकिः**) निषेधे (**मे**) मम (**हिरण्ययीम्**) हिरण्यादिबहुधनयुक्ताम् (**अमतिम्**) सुरूपां लक्ष्मीम् (**याम्**) (**अशिश्रेत्**) आश्रयेत् (**आ**) (**सुष्टुती**) सुष्ठु प्रशंसया (**रोदसी**) द्यावापृथिव्याविव राजप्रजाव्यवहारौ (**विश्वमिन्वे**) विश्वव्यापिके (**अपीव**) समुच्चिता इव (**योषा**) भार्या (**जनिमानि**) जन्मानि (**वव्रे**) वृणोति॥८॥

अन्वयः-योऽस्य सवितुः सकाशाद्दीप्तिमिव यां हिरण्ययीममतिं योषापीव जनिमानि वव्रे सुष्टुती विश्वमिन्वे रोदसी न्वाशिश्रेत्तदिन्मे नकिर्मा भूत्॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा चन्द्रादयो लोकाः सूर्य्यप्रकाशमाश्रित्य सुशोभिता दृश्यन्ते यथा स्त्री हृद्यं स्वप्रियं शुभलक्षणान्वितं पतिं प्राप्य सन्तानान् जनयित्वाऽनन्दति तथैव पृथिवीराज्यं प्राप्य नष्टदुःखाः सन्तो राजानः सततमानन्देयुः॥८॥

पदार्थः-जो (**अस्य**) इस (**सवितुः**) सूर्य्य की प्रकटता से उत्पन्न हुए प्रकाश के सदृश (**याम्**) जिस (**हिरण्ययीम्**) सुवर्ण आदि बहुत रत्नों से युक्त (**अमतिम्**) उत्तम शोभायुक्त लक्ष्मी को (**योषा**) स्त्री (**अपीव**) इकट्ठा की गई सी (**जनिमानि**) जन्मों को (**वव्रे**) स्वीकार करती और (**सुष्टुती**) उत्तम प्रशंसा से (**विश्वमिन्वे**) सर्वत्र व्यापक (**रोदसी**) प्रकाश और पृथिवी के सदृश राजा और प्रजा के व्यवहारों का (**नु**) निश्चय (**आ, अशिश्रेत्**) आश्रय करें (**तत्**) वह (**इत्**) ही (**मे**) मेरे (**नकिः**) नहीं हुई॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे चन्द्र आदि लोक सूर्य के प्रकाश का आश्रय करके उत्तम शोभित देख पड़ते हैं और जैसे स्त्री स्नेहपात्र अपने प्रिय और उत्तम लक्षणों से युक्त पति को प्राप्त होकर सन्तानों को उत्पन्न करके आनन्द करती है, वैसे ही पृथिवी के राज्य को प्राप्त होकर दुःखों से रहित हुए राजजन निरन्तर आनन्द करें॥८॥

अथ परस्परेण राजप्रजाविषयमाह॥

अथ परस्परभाव से राजा-प्रजा विषय को अगले मन्त्र में कहते हैं॥

युवं प्रत्नस्य साधथो महो यद् दैवी स्वस्तिः परि णः स्यातम्।

गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यन्ति मायिनः कृतानि॥ ९॥

युवम्। प्रत्नस्य। साधथुः। महः। यत्। दैवी। स्वस्तिः। परि। नः। स्यातम्। गोपाजिह्वस्य। तस्थुषः। विऽरूपा। विश्वे। पश्यन्ति। मायिनः। कृतानि॥ ९॥

पदार्थः-(**युवम्**) युवाम् (**प्रत्नस्य**) पुरातनस्य (**साधथः**) (**महः**) महती (**यत्**) या (**दैवी**) देवानामियम् (**स्वस्तिः**) स्वास्थ्यम् (**परि**) (**नः**) अस्मभ्यम् (**स्यातम्**) (**गोपाजिह्वस्य**) गोरक्षका जिह्वा यस्य तस्य (**तस्थुषः**) स्थिरस्य (**विरूपा**) विविधानि रूपाणि येषु तानि (**विश्वे**) सर्वे (**पश्यन्ति**) (**मायिनः**) प्रशस्तप्रज्ञाः (**कृतानि**) निष्पन्नानि॥ ९॥

अन्वयः-हे राजप्रजाजनौ! युवं यथा विश्वे मायिनस्तस्थुषः कृतानि विरूपा पश्यन्ति तथा प्रत्नस्य गोपाजिह्वस्य यन्महो दैवी स्वस्तिरस्ति ता नः परिसाधथः **[**तथा**]** सर्वेषां सुखकरौ स्यातम्॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विपश्चितः शिल्पिनो विविधरूपाणि वस्तूनि निर्माय सर्वान् सुभूषयन्ति तथैव राजादयो जनाः प्रजायां स्वास्थ्यं संस्थाप्य सर्वेषां कार्याणि साध्नुवन्तु॥ ९॥

पदार्थः-हे राजा और प्रजा जनो! (**युवम्**) आप दोनों जैसे (**विश्वे**) सम्पूर्ण (**मायिनः**) उत्तम बुद्धिवाले (**तस्थुषः**) स्थिर पुरुष के (**कृतानि**) उत्पन्न किये हुए (**विरूपा**) अनेक प्रकार के रूपों से युक्त पदार्थों को (**पश्यन्ति**) देखते हैं, वैसे (**प्रत्नस्य**) प्राचीन (**गोपाजिह्वस्य**) रक्षा करनेवाली जिह्वावाले पुरुष का (**यत्**) जो (**महः**) बड़ी (**दैवी**) देवताओं की (**स्वस्तिः**) स्वस्थता अर्थात् शान्ति है उसको (**नः**) हम लोगों के लिये (**परि, साधथः**) सब प्रकार सिद्ध करते हैं, वैसे सबके सुखकारक हूजिये॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बुद्धिमान् शिल्पीजन अनेक प्रकार की वस्तुओं को रच के सबको शोभित करते हैं, वैसे ही राजा आदि जन प्रजा में स्वस्थता को स्थिर करके सबके कार्यों को सिद्ध करें॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥ १०॥ २४॥ ३॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। संऽजितम्। धनानाम्॥ १०॥

पदार्थः-(**शुनम्**) राजप्रजाजनितं सुखम् (**हुवेम**) गृह्णीयाम (**मघवानम्**) बहुधनवन्तं वैश्यम् (**इन्द्रम्**) परमैश्वर्य्यं राजानम् (**अस्मिन्**) (**भरे**) पालनीये राज्ये (**नृतमम्**) प्रशस्तनायकम् (**वाजसातौ**) सत्यासत्यविभागे (**शृण्वन्तम्**) (**उग्रम्**) पापनाशाय तेजस्विनम् (**ऊतये**) रक्षणाद्याय (**समत्सु**) संग्रामेषु

(घ्नन्तम्) **(वृत्राणि)** धनानि। **वृत्रमिति धननामसु पठितम्।** (निघं०२.१०) **(सञ्जितम्)** सम्यग्जयशीलं शूरवीरम् **(धनानाम्)**॥१०॥

अन्वयः-हे मनुष्या! यथा वयमूतयेऽस्मिन् वाजसातौ भरे शुनं मघवानं शृण्वन्तं नृतममुग्रं समत्सु घ्नन्तं वृत्राणि ददतं धनानां सञ्जितमिन्द्रं हुवेम तथैतं यूयमप्याह्वयत॥१०॥

भावार्थः-ये राजप्रजाजनाः परस्परं प्रीता अन्योऽन्यस्य सुखदुःखवार्त्ताः शृण्वन्तो दुष्टान् ताडयन्तः सत्पुरुषान् सत्कुर्वन्तोऽन्योऽन्येषां सत्कर्माणि प्रशंसेयुस्ते परमैश्वर्य्यं लब्ध्वा सुखिनः स्युरिति॥१०॥

अस्मिन्सूक्ते विद्वच्छिल्पिसभाराजप्रजासूर्य्यभूम्यादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति ३८ सूक्तं २४ वर्गः ३ मण्डले ३ अनुवाकश्च समाप्तः॥

[इत्यष्टात्रिंशत्तमं सूक्तं चतुर्विंशो वर्गस्तृतीये मण्डले द्वितीयोऽनुवाकश्च समाप्तः॥]

पदार्थः-हे मनुष्यो! जैसे हम लोग **(ऊतये)** रक्षा आदि के लिये **(अस्मिन्)** इस **(वाजसातौ)** सत्य और असत्य के विभाग और **(भरे)** पालन करने योग्य राज्य में **(शुनम्)** राजप्रजाजनित अर्थात् राजा प्रजा से उत्पन्न हुए सुख **(मघवानम्)** बहुत धन से युक्त वैश्य **(शृण्वन्तम्)** सुनते हुए **(नृतमम्)** उत्तम नायक **(उग्रम्)** पाप के नाश के लिये प्रतापी **(समत्सु)** संग्रामों में **(घ्नन्तम्)** शत्रुओं के नाश करने **(वृत्राणि)** धनों को देने और **(धनानाम्)** धनों को **(सञ्जितम्)** उत्तम प्रकार जीतनेवाले **(इन्द्रम्)** परमैश्वर्यवान् राजा को **(हुवेम)** ग्रहण करें, वैसे इसको आप लोग भी ग्रहण करो॥१०॥

भावार्थः-जो राजा और प्रजाजन परस्पर प्रसन्न, परस्पर के सुख और दुःख की वार्त्ताओं को सुनते, दुष्ट पुरुषों को ताड़न करते और सत्पुरुषों का सत्कार करते हुए परस्पर के उत्तम कर्मों की प्रशंसा करें, वे अत्यन्त ऐश्वर्य को प्राप्त होकर सुखी होवें॥१०॥

इस सूक्त में विद्वान्, शिल्पी, सभा, राजा, प्रजा, सूर्य और भूमि आदि के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह [अड़तीसवाँ] ३८वाँ सूक्त [चौबीसवाँ] २४वाँ वर्ग और [तीसरे] ३ मण्डल में [तीसरा] ३ अनुवाक समाप्त हुआ॥

अथ नवर्चस्यैकोनचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ९ विराट् त्रिष्टुप्। ३-७ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ८ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब नव ऋचावाले तीसरे मण्डल में उनतालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

इन्द्रं॑ म॒तिर्हृ॒द आ व॒च्यमा॒नाच्छा॒ पतिं॒ स्तोम॑तष्टा जिगाति।
या जागृ॑विर्वि॒दथे॑ शस्यमा॒नेन्द्र॒ यत्ते॒ जाय॑ते वि॒द्धि तस्य॑॥ १॥

इन्द्र॑म्। म॒तिः। हृ॒दः। आ। व॒च्यमा॑ना। अच्छ॑। पति॑म्। स्तोम॑ऽतष्टा। जि॒गा॒ति॒। या। जागृ॑विः। वि॒दथे॑। शस्यमा॑ना। इन्द्र॑। यत्। ते॒। जाय॑ते। वि॒द्धि। तस्य॑॥ १॥

पदार्थः–(**इन्द्रम्**) परमसुखप्रदम् (**मतिः**) प्रज्ञा (**हृदः**) हृदयात् (**आ**) समन्तात् (**वच्यमाना**) उच्यमाना। अत्र **वाच्छन्दसी**ति सम्प्रसारणाऽभावः। (**अच्छ**) सम्यक्। अत्र **निपातस्य चे**ति दीर्घः। (**पतिम्**) पालकं स्वामिनम् (**स्तोमतष्टा**) स्तोमैः स्तुतिभिस्तष्टा विस्तृता (**जिगाति**) स्तौति (**या**) (**जागृविः**) जागरूकाः (**विदथे**) विज्ञाने (**शस्यमाना**) स्तूयमाना (**इन्द्र**) परमैश्वर्य्ययुक्त (**यत्**) या (**ते**) तव (**जायते**) (**विद्धि**) (**तस्य**)॥ १॥

अन्वयः–हे इन्द्र विद्वन्! या वच्यमाना विदथे जागृविः शस्यमाना स्तोमतष्टा मतिर्हृद इन्द्रं पतिमच्छा जिगाति यद्या प्रज्ञा ते जायते तथा तस्य शुभगुणकर्मस्वभावान् विद्धि॥ १॥

भावार्थः–येषां हृदये प्रमोत्पद्यते सर्वेषां ते गुणदोषान् विज्ञाय गुणान् गृहीत्वा दोषांश्च त्यक्त्वा गुणप्रशंसां दोषनिन्दां कृत्वोत्तमानि कर्माणि कुर्य्युस्सत्येवं तेऽत्र प्रशंसिताः स्युः॥ १॥

पदार्थः–हे (**इन्द्र**) अत्यन्त ऐश्वर्य्ययुक्त विद्वान् पुरुष! (**या**) जो (**वच्यमाना**) कही गई (**विदथे**) विज्ञाने में (**जागृविः**) जागनेवाली और विज्ञान में (**शस्यमाना**) स्तुति से युक्त हुई (**स्तोमतष्टा**) स्तुतियों से विस्तारयुक्त (**मतिः**) बुद्धि (**हृदः**) हृदय से (**इन्द्रम्**) अत्यन्त सुख देने (**पतिम्**) और पालनेवाले स्वामी की (**अच्छ**) उत्तम प्रकार (**आ**) सब ओर से (**जिगाति**) स्तुति करती है (**यत्**) जो बुद्धि (**ते**) आपकी (**जायते**) उत्पन्न होती है, उस बुद्धि से (**तस्य**) उस पालनेवाले के उत्तम गुण, कर्म और स्वभावों को (**विद्धि**) जानो॥ १॥

भावार्थः–जिनके हृदय में यथार्थ ज्ञान उत्पन्न होता है, वे सब लोगों के गुण और दोषों को जान, गुणों का ग्रहण, दोषों का त्याग, गुणों की प्रशंसा और दोषों की निन्दा करके उत्तम कर्मों को करें, ऐसा होने से वे इस संसार में प्रशंसायुक्त होवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दि॒वश्चि॒दा पू॒र्व्या जाय॑माना॒ वि जागृ॑विर्वि॒दथे॑ शस्यमा॑ना।
भ॒द्रा वस्त्रा॒ण्यर्जु॑ना॒ वसा॑ना॒ सेय॒मस्मे स॑न॒जा पित्र्या॒ धीः॥ २॥

दि॒वः। चि॒त्। आ। पू॒र्व्या। जाय॑माना। वि। जागृ॑विः। वि॒दथे॑। शस्यमा॑ना। भ॒द्रा। वस्त्रा॑णि। अर्जु॑ना। वसा॑ना। सा। इय॒म्। अ॒स्मे इति॑। स॒न॒ऽजा। पित्र्या॑। धीः॥ २॥

पदार्थः-(**दिवः**) विज्ञानप्रकाशात् (**चित्**) अपि (**आ**) (**पूर्व्या**) पूर्वैर्विद्वद्भिर्निष्पादिता (**जायमाना**) (**वि**) (**जागृविः**) जागरूकाः (**विदथे**) विज्ञानवर्द्धके व्यवहारे (**शस्यमाना**) स्तूयमाना (**भद्रा**) सेवनीयानि कल्याणकराणि (**वस्त्राणि**) (**अर्जुना**) सुरूपाणि। **अर्जुनमिति रूपनामसु पठितम्।** (निघं०३.७) (**वसाना**) धारयन्ती (**सा**) (**इयम्**) (**अस्मे**) अस्मासु (**सनजा**) सनेन विभागेन जाता (**पित्र्या**) पितृषु भवा (**धीः**) प्रज्ञा॥२॥

अन्वयः-हे मनुष्या! याऽस्मे दिवो जायमाना पूर्व्या विदथे जागृविः शस्यमाना भद्राऽर्जुना वस्त्राणि वसाना सुन्दरी स्त्रीव सनजा पित्र्या धीर्विजायते सेयं यष्मासु चिदा जायताम्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एवाप्ताः पुरुषा ये स्वात्मवत्सर्वेषु बुद्ध्यादिपदार्थान् जनयितुमुद्यताः स्युः॥२॥

पदार्थः-हे मनुष्यो! जो (**अस्मे**) हम लोगों में (**दिवः**) विज्ञान के प्रकाश से (**जायमाना**) उत्पन्न हुई (**पूर्व्या**) प्राचीन विद्वानों से सिद्ध की गई (**विदथे**) विज्ञान के बढ़ानेवाले व्यवहार में (**जागृविः**) जागनेवाली (**शस्यमाना**) स्तुति की जाती और (**भद्रा**) धारण करने योग्य और कल्याणकारक (**अर्जुना**) सुन्दररूपयुक्त (**वस्त्राणि**) वस्त्रों को (**वसाना**) ओढ़ती हुई सुन्दर स्त्री के तुल्य (**सनजा**) विभाग से प्रसिद्ध (**पित्र्या**) वा पितरों में प्रकट हुई (**धीः**) उत्तम बुद्धि (**वि**) विशेषता से उत्पन्न होती (**सा, इयम्**) सो यह आप लोगों में (**चित्, आ**) भी सब ओर से उत्पन्न होवे॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही श्रेष्ठ पुरुष हैं जो कि अपने आत्मा के तुल्य सम्पूर्ण जनों में बुद्धि आदि पदार्थों को उत्पन्न कराने को उद्यत होवें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

य॒मा चि॒दत्र॑ यम॒सूर॑सूत जि॒ह्वाया॒ अग्रं॑ पत॒दा ह्यस्था॑त्।
वपूं॑षि जा॒ता मि॑थु॒ना स॑चेते तमो॒हना॒ तपु॑षो बु॒ध्न एता॑॥ ३॥

य॒मा। चि॒त्। अत्र॑। य॒म॒ऽसूः। अ॒सू॒त॒। जि॒ह्वायाः॑। अग्र॑म्। पत॑त्। आ। हि। अस्था॑त्। वपूं॑षि। जा॒ता। मि॒थु॒ना। स॒चे॒ते॒ इति॑। त॒मः॒ऽहना॑। तपु॑षः। बु॒ध्ने। आऽइ॑ता॥ ३॥

पदार्थः-(**यमा**) यमावुपरतौ (**चित्**) अपि (**अत्र**) (**यमसूः**) या यमं सूर्य्यं सूते सा विद्युत् (**असूत**) सूते जनयति (**जिह्वायाः**) (**अग्रम्**) (**पतत्**) पतति गच्छति प्राप्नोति वा (**आ**) समन्तात् (**हि**) यतः (**अस्थात्**) तिष्ठति (**वपूंषि**) रूपाणि (**जाता**) उत्पन्नानि (**मिथुना**) मिथुनौ परस्परसङ्गतौ (**सचेते**) सम्बध्नीतः (**तमोहना**) यौ तमोहतस्तौ (**तपुषः**) तपत्यस्मिन् सूर्य्यस्तस्य दिनस्य मध्ये (**बुध्ने**) बध्नन्त्यापो यस्मिँस्तस्मिन्नन्तरिक्षे (**एता**) एतौ वर्त्तमानौ॥३॥

अन्वयः-हे मनुष्या! यो यमसूश्चिदत्र यमा मिथुना तमोहना तपुषो बुध्न एता सूर्य्याचन्द्रमसावसूत जिह्वाया अग्रं हि पतज्जाता वपूंष्यास्थाद्यौ तमोहना मिथुनैता सूर्य्याचन्द्रमसौ तपुषो बुध्ने सचेते ताँस्तौ विद्धि विजानीत॥३॥

भावार्थः-हे मनुष्या! यथा विद्युत्सूर्यं सूर्यश्चन्द्रादिकं प्रकाशयति तमो हन्ति तथैव परस्परस्यानुकूला भूत्वा सद्व्यवहारे सचन्ताम्॥३॥

पदार्थः-हे मनुष्यो! जो (**यमसूः**) सूर्य्य को उत्पन्न करानेवाली बिजुली (**चित्**) अथवा (**अत्र**) इस संसार में (**यमा**) सहचारी (**मिथुना**) परस्पर मिले हुए (**तमोहना**) अन्धकार का नाश करनेवाले (**तपुषः**) जिसमें सूर्य्य तपता है, उस दिन के बीच वा (**बुध्ने**) बंधते अर्थात् इकट्ठे होते जल जिसमें उस अन्तरिक्ष में (**एता**) वर्त्तमान इन सूर्य्य और चन्द्रमा को (**असूत**) उत्पन्न करती है (**जिह्वायाः**) तथा जिह्वा के (**अग्रम्**) अग्रभाग को (**हि**) जिस कारण (**पतत्**) जाती वा प्राप्त होती है और (**जाता**) उत्पन्न हुए (**वपूंषि**) रूपों को प्राप्त हो (**आ, अस्थात्**) स्थिर होती है, जो अन्धकार के नाश करनेवाले परस्पर मिले हुए सूर्य्य और चन्द्रमा सूर्य्यमण्डल जिसमें तपता है, उस दिन के बीच और जल जिसमें इकट्ठें हों उस अन्तरिक्ष में (**सचेते**) सम्बन्ध करते हैं, उनको (**विद्धि**) जानिये॥३॥

भावार्थः-हे मनुष्यो! आप जैसे बिजुली सूर्य का और सूर्य चन्द्रादिक का प्रकाश और अन्धकार का नाश करता है, वैसे ही परस्पर अनुकूल होकर उत्तम व्यवहार में तत्पर होओ॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नकि॑रेषां निन्दि॒ता मर्त्ये॑षु॒ ये अ॒स्माक॑ं पि॒तरो॒ गोषु॑ यो॒धाः।
इन्द्र॑ एषां दृंहि॒ता माहि॑नाव॒ानुद्गो॒त्राणि॑ ससृजे दुं॒सना॑वान्॥४॥

नकि॑ः। ए॒षा॒म्। नि॒न्दि॒ता। मर्त्ये॑षु। ये। अ॒स्माक॑म्। पि॒तर॑ः। गोषु॑। यो॒धाः। इन्द्र॑ः। ए॒षा॒म्। दृं॒हि॒ता। माहि॑नऽवान्। उत्। गो॒त्राणि॑। स॒सृ॒जे॒। दुं॒सना॑ऽवान्॥४॥

पदार्थः-(**नकिः**) (**एषाम्**) (**निन्दिता**) गुणेषु दोषारोपको दोषेषु गुणारोपकश्च (**मर्त्येषु**) मनुष्येषु (**ये**) (**अस्माकम्**) (**पितरः**) पालकाः (**गोषु**) पृथिवीषु (**योधाः**) योद्धारः (**इन्द्रः**) सूर्य इव वर्त्तमानः

(एषाम्) **(दृंहिता)** वर्द्धकः **(माहिनावान्)** प्रशस्तानि माहिनानि पूजनानि विद्यन्ते यस्य **(उत्)** **(गोत्राणि)** वंशान् **(ससृजे)** **(दंसनावान्)** प्रशस्तकर्मयुक्तः॥४॥

अन्वयः-हे मनुष्या! य इन्द्रो येऽस्माकं गोषु मर्त्येषु च योधाः पितरः सन्त्येषां दृंहिता माहिनावान् दंसनावान् गोत्राण्युत्ससृजे तं भजत यत एषां निन्दिता नकिर्भवेत्॥४॥

भावार्थः-मनुष्यैस्तथा प्रयतितव्यं यथा मनुष्येषु निन्दितारो न स्युः प्रशंसका भवेयुर्यथा सूर्य्यः सर्वं जगत् पाति तथा रक्षकाः पितरः संसेवनीयाः॥४॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** सूर्य्य के सदृश वर्त्तमान **(ये)** वा जो **(अस्माकम्)** हम लोगों के **(गोषु)** पृथिवियों और **(मर्त्येषु)** मनुष्यों में **(योधाः)** योद्धा लोग और **(पितरः)** पालन करनेवाले हैं **(एषाम्)** इन लोगों का **(दृंहिता)** बढ़ानेवाला **(माहिनावान्)** प्रशंसित पूजन हैं जिसके वह और **(दंसनावान्)** जो उत्तम कर्मों से युक्त है वह **(गोत्राणि)** वंशों को **(उत्, ससृजे)** उत्पन्न करता है, उसकी सेवा करो, जिससे **(एषाम्)** इन लोगों का **(निन्दिता)** गुणों में दोषों का आरोपक और दोषों में गुणों का आरोपक **(नकिः)** नहीं होवे॥४॥

भावार्थः-मनुष्यों को चाहिये कि ऐसा प्रयत्न करें कि जिससे निन्दित न हों और आप दूसरों की स्तुति करनेवाले हों और जैसे सूर्य्य सम्पूर्ण जगत् का पालन करता है, वैसे रक्षा करनेवाले पितरों की सेवा करनी चाहिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सखा॑ ह॒ यत्र॒ सखि॑भि॒र्नव॑ग्वैरभि॒ज्ञ्वा सत्व॑भि॒र्गा अ॑नु॒ग्मन्।
स॒त्यं तदिन्द्रो॑ द॒शभि॒र्दशग्वैः॒ सूर्यं॑ विवेद॒ तम॑सि क्षि॒यन्त॑म्॥५॥२५॥

सखा॑। ह॒। यत्र॑। सखि॑ऽभिः। नव॑ऽग्वैः। अ॒भि॒ऽज्ञु। आ। सत्व॑ऽभिः। गाः। अ॒नु॒ऽग्मन्। स॒त्यम्। तत्। इन्द्रः॑। द॒शऽभि॑ः। दश॑ऽग्वैः। सूर्य॑म्। वि॒वे॒द॒। तम॑सि। क्षि॒यन्त॑म्॥५॥

पदार्थः-**(सखा)** **(ह)** खलु **(यत्र)** **(सखिभिः)** **(नवग्वैः)** नवीनगतिभिः **(अभिज्ञु)** आभिमुख्ये जानुनी यस्य सः **(आ)** समन्तात् **(सत्त्वभिः)** पदार्थैः सह **(गाः)** सुशिक्षिता वाचो भूमिर्वा **(अनुग्मन्)** अनुकूलं गच्छन् **(सत्यम्)** सत्सु साधु **(तत्)** तम् **(इन्द्रः)** विद्युत् **(दशभिः)** दशविधैर्वायुभिः **(दशग्वैः)** दशविधा गतयो येषान्तैः **(सूर्य्यम्)** **(विवेद)** विन्दति **(तमसि)** अन्धकारे रात्रौ **(क्षियन्तम्)** निवसन्तम्॥५॥

अन्वयः-हे मनुष्या! यत्र नवग्वैः सखिभिः सहाऽभिज्ञु सखा सत्त्वभिर्ह गा आनुग्मन् यत्सत्यं दशग्वैर्दशभिः सहेन्द्रो तमसि क्षियन्तं सूर्य्यं विवेद तद्विवेद तदनुकरणं सर्वे कुर्वन्तु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सखिवद्वर्त्तमानेन वायुना विद्युदाख्योऽग्निरन्धकारे सूर्य्यपरिणामं प्राप्य सर्वान् प्रकाश्याऽऽनन्दति तथैव धार्मिकैर्मित्रैः सहितो सुहृद्विद्वान् शुद्धान्तःकरणतया विद्यया च प्रकटीभूत्वा सर्वेषामात्मनः प्रकाश्याऽऽनन्दति॥५॥

पदार्थः-हे मनुष्यो! **(यत्र)** जिस स्थल में **(नवग्वैः)** नवीन गतियों और **(सखिभिः)** मित्रों के साथ **(अभिज्ञु)** सम्मुख जाङ्घों से युक्त **(सखा)** मित्र **(सत्त्वभिः)** पदार्थों के साथ **(ह)** निश्चय **(गाः)** उत्तम प्रकार शिक्षित वाणी वा भूमियों के **(आ, अनुग्मन्)** अनुकूल प्राप्त होता हुआ जो **(सत्यम्)** श्रेष्ठ व्यवहारों में उत्तम अर्थात् सच्चापन जैसे हो, वैसे **(दशग्वैः)** दश प्रकार की गतियों से युक्त **(दशभिः)** दश प्रकार के पवनों के साथ **(इन्द्रः)** बिजुली **(तमसि)** रात्रि में **(क्षियन्तम्)** निवास करते अर्थात् अपना काम प्रकाश न करते हुए **(सूर्य्यम्)** सूर्य को **(विवेद)** प्राप्त होती है **(तत्)** उसको जो जानता है, उसका अनुकरण सब लोग करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मित्र के तुल्य वर्त्तमान वायु से बिजुली नामक अग्नि अन्धकार में सूर्य के परिणाम को प्राप्त हो और सबको प्रकाशित कर आनन्द देती है, वैसे ही धार्मिक मित्रों के सहित मित्र विद्वान् शुद्धान्तकरणता तथा विद्या से प्रकट होकर सबके आत्माओं का प्रकाश करके आनन्द देता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॒ मधु॒ संभृ॑तमु॒स्रिया॑यां प॒द्वद्वि॑वेद श॒फव॒न्नमे॒ गोः।
गुहा॑ हि॒तं गुह्यं॑ गू॒ळ्हम॒प्सु हस्ते॑ दधे॒ दक्षि॑णे॒ दक्षि॑णावान्॥ ६॥

इन्द्रः॑। मधु॑। सम्ऽभृ॑तम्। उ॒स्रिया॑याम्। प॒त्ऽवत्। वि॒वे॒द॒। श॒फऽव॑त्। नमे॑। गोः॑। गुहा॑। हि॒तम्। गुह्य॑म्। गू॒ळ्हम्। अ॒प्ऽसु। हस्ते॑। द॒धे॒। दक्षि॑णे। दक्षि॑णाऽवान्॥ ६॥

पदार्थः-**(इन्द्रः)** विद्युदिव नरः **(मधु)** मधुरादिकं रसम् **(सम्भृतम्)** सम्यग्धृतम् **(उस्रियायाम्)** भूमौ **(पद्वत्)** पद्भ्यां तुल्यम् **(विवेद)** **(शफवत्)** शफा विद्यन्ते यस्मिन् पदे तत् **(नमे)** नमेत् **(गोः)** वाचः **(गुहा)** गुहायां बुद्धौ **(हितम्)** स्थितम् **(गुह्यम्)** गुप्तम् **(गूढम्)** **(अप्सु)** प्राणेषु जलेषु वा **(हस्ते)** **(दधे)** दध्यात् **(दक्षिणे)** **(दक्षिणावान्)** दक्षिणा विद्यते यस्य स इव॥६॥

अन्वयः-य इन्द्रो उस्रियायां पद्वच्छफवन्न मधु सम्भृतं नमे विवेद गोर्गुहा हितमप्सु गुह्यं गूढं दक्षिणावानिव दक्षिणे हस्ते दधे तं सर्वे जानन्तु॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा मनुष्याः पद्भ्यां पशवः शफैर्गमनं कृत्वा देशान्तरं साक्षात्कुर्वन्ति तथैव बाह्याभ्यन्तरस्थां विद्युतं विद्वानेव हस्तगतदक्षिणावद्विदित्वाऽऽभ्यन्तरं स्वात्मानं परमात्मानं च बाह्यं सूर्यादिकं विजानात्येतत्सहायेन धर्मार्थकाममोक्षान् सर्वे साध्नुवन्तु॥६॥

पदार्थः-जो **(इन्द्रः)** बिजुली के समान मनुष्य **(उस्रियायाम्)** भूमि में **(पद्वत्)** पैरों के और **(शफवत्)** खुरों के सदृश **(मधु)** मधुर आदि रस **(सम्भृतम्)** जो कि उत्तम धारण किया गया उसे **(नमे)** नमें स्वीकार करे **(विवेद)** जाने **(गोः)** वाणी और **(गुहा)** बुद्धि में **(हितम्)** स्थित **(अप्सु)** प्राणों वा जलों में **(गुह्यम्)** गुप्त और **(गूढम्)** ढपे हुए व्यवहार को **(दक्षिणावान्)** दक्षिणा को धारण किये हुए के समान **(दक्षिणे)** दाहिने **(हस्ते)** हाथ में **(दधे)** धारण करे, उसको सब लोग जानो॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे मनुष्य पैरों और पशु खुरों से गमन करके दूसरे स्थान को प्रत्यक्ष करते हैं, वैसे ही बाहर-भीतर वर्त्तमान बिजुली को विद्वान् पुरुष हस्तप्राप्त दक्षिणा के सदृश जानकर और हृदय में वर्त्तमान अपने आत्मा और परमात्मा तथा बाह्य सूर्य आदि को जानता है, इसके सहाय से धर्म, अर्थ, काम और मोक्षों को सब सिद्ध करें॥६॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

ज्योति॑र्वृणीत॒ तम॑सो विजा॒नन्नारे स्या॑म दुरि॒ताद॒भीके॑।
इ॒मा गिर॑: सोमपाः सोमवृद्ध जु॒षस्वे॑न्द्र पुरु॒तम॑स्य का॒रोः॥७॥

ज्योति॑:। वृ॒णी॒त॒। तम॑सः। वि॒ऽजा॒नन्। आ॒रे। स्या॒म॒। दुः॒ऽइ॒तात्। अ॒भीके॑। इ॒माः। गिर॑:। सो॒म॒ऽपाः॒। सो॒म॒ऽवृ॒द्ध॒। जु॒षस्व॑। इ॒न्द्र॒। पु॒रु॒ऽत॒म॑स्य। का॒रोः॥७॥

पदार्थः-(**ज्योतिः**) प्रकाशमिव विद्याम् **(वृणीत)** स्वीकुर्य्यात् **(तमसः)** अन्धकारादविद्याया इव **(विजानन्)** विशेषेण विदन् **(आरे)** दूरे **(स्याम)** **(दुरितात्)** दुष्टाचाराच्छ्रेष्ठाचारात् **(अभीके)** समीपे **(इमाः)** **(गिरः)** वाचः **(सोमपाः)** सोममैश्वर्यं पाति। अत्र कर्त्तरि क्विप्। **(सोमवृद्ध)** सोमेन विश्वैश्वर्येण वृद्धस्तत्सम्बुद्धौ **(जुषस्व)** सेवस्व **(इन्द्र)** परमैश्वर्ययुक्त **(पुरुतमस्य)** अतिशयेन बहुविद्यायुक्तस्य **(कारोः)** कारकस्य शिल्पिनः॥७॥

अन्वयः-हे सोमवृद्धेन्द्र सोमपा! त्वं पुरुतमस्य कारो इमाः गिर जुषस्व यथा विजानञ्ज्योतिरस्माकमारेऽभीके दुरितात् पृथग् भूत्वा तमसो ज्योतिर्वृणीत तथैतस्यैताः सेवित्वा वयं विद्वांसः स्याम॥७॥

भावार्थः-हे मनुष्या! यथा वयं पापाचरणात् पृथग् भूत्वा धर्माचरणमविद्यायाः पृथग् भूत्वा विद्या वरित्वाऽऽत्मबोधं शिल्पक्रियाकौशलं च जुषामहे तथैव यूयमपि भवत सर्वे वयं दूरे समीपे च स्थिता अपि मैत्रीं न जह्याम॥७॥

पदार्थः-हे **(सोमवृद्ध)** विद्यारूपी ऐश्वर्य से वृद्ध और **(इन्द्र)** अत्यन्त ऐश्वर्ययुक्त **(सोमपाः)** ऐश्वर्य्य की रक्षा करनेवाले! आप **(पुरुतमस्य)** अत्यन्त बहुत विद्या से युक्त **(कारोः)** शिल्पीजन की जो **(इमाः)** उन **(गिरः)** वाणियों का **(जुषस्व)** सेवन करो और जैसे **(विजानन्)** विशेष प्रकार से जानते हुए आप हम लोगों से **(आरे)** दूरस्थल और **(अभीके)** समीप स्थल में **(दुरितात्)** दुष्ट आचरण से पृथक् होकर श्रेष्ठ आचरण और **(तमसः)** अविद्या से पृथक् होकर विद्या और **(ज्योतिः)** प्रकाश के समान विद्या का **(वृणीत)** स्वीकार करें, वैसे इन आपकी उन वाणियों का सेवन करके हम लोग विद्वान् होवें॥७॥

भावार्थः-हे मनुष्यो! जैसे हम लोग पाप के आचरण से पृथक् होकर धर्म के आचरण, और अविद्या से पृथक् होकर विद्या का ग्रहण करके आत्मसम्बन्धी ज्ञान और शिल्प-क्रिया-कौशल का सेवन करते हैं, वैसे ही आप लोग भी सेवन करनेवाले हूजिये और हम सब लोग दूर और समीप में वर्त्तमान हुए भी मित्रता का त्याग नहीं करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत्॥८॥

ज्योतिः। यज्ञाय। रोदसी इति। अनु। स्यात्। आरे। स्याम। दुःऽइतस्य। भूरेः। भूरि। चित्। हि। तुजतः। मर्त्यस्य। सुऽपारासः। वसवः। बर्हणाऽवत्॥८॥

पदार्थः-**(ज्योतिः)** सूर्य्यप्रकाश इव विज्ञानदीप्तिः **(यज्ञाय)** विद्वत्सत्काराद्यनुष्ठानाय **(रोदसी)** भूमिप्रकाशाविव विद्यानयौ **(अनु)** पश्चात् **(स्यात्)** भवेत् **(आरे)** दूरे समीपे वा **(स्याम)** **(दुरितस्य)** दुःखेनेतस्य प्राप्तस्य **(भूरेः)** बहोः **(भूरि)** बहु **(चित्)** अपि **(हि)** यतः **(तुजतः)** बलवतः **(मर्त्यस्य)** मनुष्यस्य **(सुपारासः)** शोभनो विद्यायाः पारो येषान्ते **(वसवः)** ये विद्यासु वसन्त्यन्यान् वासयन्ति ते **(बर्हणावत्)** बर्हणं वृद्धिकारकं विज्ञानं धनं वा विद्यते यस्मिंस्तत्॥८॥

अन्वयः-हे मनुष्या! यथा सुपारासो वसवो वयं यज्ञाय रोदसी इवारे दुरितस्य भूरेर्भूरि चित्तुजतो मर्त्यस्य बर्हणावज्ज्योतिः स्यादिति कामयमाना अनु ष्याम तथाहि भवन्तो भवन्तु॥८॥

भावार्थः-त एवाप्ता ये दूरस्थेषु समीपस्थेषु च कृपामनुसंधाय विद्योपदेशौ प्रचार्य्यातिकठिनस्य बोधस्य सुगमतां सम्पादयेयुस्त एव सर्वैः सत्कर्त्तव्या भवन्तु॥८॥

पदार्थः-हे मनुष्यो! जैसे **(सुपारासः)** सुन्दर विद्या का पार है जिनका और **(वसवः)** विद्याओं में स्वयं वसते वा अन्य जनों को वसाते वह हम लोग **(यज्ञाय)** विद्वानों के सत्कार आदि अनुष्ठान के लिये **(रोदसी)** भूमि और प्रकाश के सदृश विद्या और नीति को **(आरे)** दूर वा समीप में **(दुरितस्य)** दुःख से प्राप्त हुए **(भूरेः)** बहुत का **(भूरि)** बहुत **(चित्)** भी **(तुजतः)** बलवान् **(मर्त्यस्य)** मनुष्य का **(बर्हणावत्)** वृद्धिकारक विज्ञान वा धन जिसमें विद्यमान ऐसा **(ज्योतिः)** सूर्य के प्रकाश के सदृश विज्ञान का प्रकाश **(स्यात्)** होवे, ऐसी कामना करते हुए **(अनु)** पीछे **(स्याम)** होवें, वैसे **(हि)** ही आप हूजिये॥८॥

भावार्थः-वे ही श्रेष्ठ पुरुष हैं जो लोग दूर और समीप में वर्त्तमान पुरुषों में कृपा का अनुसन्धान विद्या और उपदेश का प्रचार करके कड़े कठिन बोध की सरलता को उत्पन्न करें, वे ही सब लोगों का सत्कार करने योग्य होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शु॒नं हु॑वेम म॒घवा॑न॒मिन्द्र॑म॒स्मिन् भ॒रे नृत॑मं॒ वाज॑सातौ।

शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नन्तं॑ वृ॒त्राणि॑ सं॒जित॒ं धना॑नाम्॥९॥२६॥२॥

शु॒नम्। हु॒वे॒म॒। म॒घऽवा॑नम्। इन्द्र॑म्। अ॒स्मिन्। भरे॑। नृ॒ऽत॑मम्। वाज॑ऽसातौ। शृ॒ण्वन्त॑म्। उ॒ग्रम्। ऊ॒तये॑। स॒मत्ऽसु॑। घ्नन्त॑म्। वृ॒त्राणि॑। स॒म्ऽजित॑म्। धना॑नाम्॥९॥

पदार्थः-(**शुनम्**) सुखकारकं विज्ञानम् (**हुवेम**) स्वीकुर्याम (**मघवानम्**) बहुधनप्रदानकरम् (**इन्द्रम्**) विद्युतम् (**अस्मिन्**) (**भरे**) भरणीये संसारे (**नृतमम्**) अतिशयेन नायकम् (**वाजसातौ**) पदार्थानां विभागविद्यायाम् (**शृण्वन्तम्**) श्रोतारं न्यायाधीशं दण्डप्रदमिव (**उग्रम्**) तेजस्विस्वभावम् (**ऊतये**) व्यवहारसिद्धिप्रवेशाय (**समत्सु**) संग्रामेषु (**घ्नन्तम्**) विद्यावन्तं शूरवीरमिव (**वृत्राणि**) धनानि (**सञ्जितम्**) सम्यक् जयति येन (**धनानाम्**) श्रियाम्॥९॥

अन्वयः-हे मनुष्या! यं वयमूतयेऽस्मिन् भरे नृतमं मघवानं वाजसातौ शृण्वन्तमिवोग्रं समत्सु घ्नन्तमिव धनानां सञ्जितमिन्द्र विज्ञाय वृत्राणि शुनं च हुवेम तथैतं विज्ञाय सर्वमेतद्यूयं प्राप्नुत॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। आप्ता विद्वांसो भूगर्भविद्युद्भूगोलखगोलसृष्टिस्थानां पदार्थानां विद्योपदेशेन पदार्थविद्याः प्रापय्य सर्वान्त्सततमुन्नयेयुरिति॥९॥

अत्र विद्वद्गुणवर्णनं निन्दितजननिवारणं मैत्रीभावनमज्ञानं विज्ञाय विद्याप्राप्तीच्छाकरणमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग् संहितायां तृतीयाष्टके द्वितीयोऽध्यायः षड्विंशो वर्गस्तृतीये मण्डल एकोनचत्वारिंशत्तमं सूक्तञ्च समाप्तम्॥

पदार्थः-हे मनुष्यो! जिसको हम लोग **(ऊतये)** व्यवहार-सिद्धिप्रवेश के लिये **(अस्मिन्)** इस **(भरे)** पालन करने योग्य संसार में **(नृतमम्)** अत्यन्त नायक **(मघवानम्)** बहुत धन के दान करने और **(वाजसातौ)** पदार्थों की विभाग विद्या में **(शृण्वन्तम्)** सुननेवाले न्यायाधीश दण्ड देनेवाले के सदृश **(उग्रम्)** तेजस्वीरूप और **(समत्सु)** संग्रामों **(घ्नन्तम्)** विद्यावान् शूरवीर के सदृश **(धनानाम्)** लक्ष्मियों को **(सञ्जितम्)** शीघ्र जीतता है जिससे उस **(इन्द्रम्)** बिजुली रूप अग्नि को जान कर **(वृत्राणि)** धनों को और **(शुनम्)** सुखकारक विज्ञान को **(हुवेम)** स्वीकार करें, वैसे इसको जानकर आप लोग प्राप्त हूजिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यथार्थवक्ता विद्वान् लोग भूगर्भ, बिजुली, भूगोल, खगोल और सृष्टिस्थ पदार्थों की विद्या के उपदेश से पदार्थ-विद्याओं को प्राप्त करा के सबकी निरन्तर वृद्धि करें॥९॥

इस सूक्त में विद्वानों के गुणों का वर्णन, निन्दित जनों का निवारण, मित्रता करना, अज्ञान का त्याग कर, विद्या की प्राप्ति की इच्छा करना इत्यादि विषय वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह समझना चाहिये॥

यह ऋग्वेद संहिता में तृतीय अष्टक में दूसरा अध्याय छब्बीसवां वर्ग और तृतीय मण्डल में उन्तालीसवां सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथ ऋक्संहितायां तृतीयाष्टके तृतीयाऽध्यायारम्भः॥

ओं विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ नवर्चस्य चत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १-४। ६-९ गायत्री। ५ निचृद्गायत्री छन्दः। षड्जः स्वरः॥

अथ राजप्रजाविषयमाह॥

अथ तृतीयाष्टक के तृतीयाध्याय का आरम्भ तथा तृतीय मण्डल में नव ऋचावाले चालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा-प्रजा के विषय को कहते हैं॥

इन्द्रं॑ त्वा वृष॒भं व॒यं सु॒ते सोमे॑ हवामहे। स पा॑हि॒ मध्वो॒ अन्ध॑सः॥ १॥

इन्द्र॑। त्वा॒। वृ॒ष॒भम्। व॒यम्। सु॒ते। सोमे॑। ह॒वा॒म॒हे॒। सः। पा॒हि॒। मध्वः॑। अन्ध॑सः॥ १॥

पदार्थः- (**इन्द्र**) परमैश्वर्य्यप्रद! (**त्वा**) त्वाम् (**वृषभम्**) बलिष्ठम् (**वयम्**) (**सुते**) निष्पन्ने (**सोमे**) ऐश्वर्य्य ओषधिगणे वा (**हवामहे**) (**सः**) (**पाहि**) रक्ष (**मध्वः**) मधुरादिगुणयुक्तस्य (**अन्धसः**) अन्नादेः॥ १॥

अन्वयः-हे इन्द्र! वयं मध्वोऽन्धसः सुते सोमे यं वृषभं त्वा हवामहे स त्वमस्मान् पाहि॥ १॥

भावार्थः-ये प्रजाजना राजानं हृदयेन सत्कृत्याऽस्मा ऐश्वर्य्यं प्रयच्छेयुस्तान् राजा स्वात्मवद्वैद्य ओषधै रोगिणमिव रक्षेत्॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के देनेवाले! (**वयम्**) हम लोग (**मध्वः**) मधुर आदि गुणों से युक्त (**अन्धसः**) अन्न आदि के (**सुते**) उत्पन्न (**सोमे**) ऐश्वर्य्य वा ओषधियों के समूह में जिस (**वृषभम्**) बलिष्ठ (**त्वा**) आपको (**हवामहे**) पुकारें (**सः**) वह आप हम लोगों की (**पाहि**) रक्षा कीजिये॥ १॥

भावार्थः-जो प्रजाजन राजा का हृदय से सत्कार करके इस राजा के लिये ऐश्वर्य्य देवें, उनकी राजा अपने आत्मा के सदृश वा जैसे वैद्यजन ओषधियों से रोगी की रक्षा करता है, वैसे रक्षा करे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रं॑ क्रतु॒विदं॑ सु॒तं सोमं॑ हर्य पुरुष्टुत। पिबा वृ॑षस्व॒ तातृ॑पिम्॥ २॥

इन्द्र॑। क्र॒तु॒ऽविद॑म्। सु॒तम्। सोम॑म्। ह॒र्य॒। पु॒रु॒ऽस्तु॒त॒। पिब॑। आ। वृ॒ष॒स्व॒। ततृ॑पिम्॥ २॥

पदार्थः-(**इन्द्र**) विद्यैश्वर्य्यमिच्छुक! (**क्रतुविदम्**) क्रतुः प्रज्ञा तां विन्दति येन तम् (**सुतम्**) सुसंस्कारैर्निष्पादितम् (**सोमम्**) ओषधिगणम् (**हर्य्य**) कामयस्व (**पुरुष्टुत**) बहुभिः प्रशंसित (**पिब**) (**आ**) (**वृषस्व**) वृष इव बलिष्ठो भव (**तातृपिम्**) अतिशयेन तृप्तिकरम्॥२॥

अन्वयः-हे पुरुष्टुतेन्द्र! त्वं तातृपिं क्रतुविदं सुतं सोमं हर्य्य पिब तेनाऽऽवृषस्व॥२॥

भावार्थः-हे राजन्! भवान् प्रज्ञावर्द्धकं भोजनं पानं च कृत्वा तृप्तो भूत्वा बलारोग्यबुद्धिविनयान् वर्द्धय॥२॥

पदार्थः-(**पुरुष्टुत**) बहुतों से प्रशंसित (**इन्द्र**) विद्या और ऐश्वर्य की इच्छा करनेवाले! आप (**तातृपिम्**) अत्यन्त तृप्ति करने और (**क्रतुविदम्**) यज्ञ के सिद्ध करनेवाले और (**सुतम्**) उत्तम संस्कारों से उत्पन्न (**सोमम्**) ओषधियों के समूह की (**हर्य्य**) कामना और (**पिब**) पान करो, उनसे (**आ, वृषस्व**) बल के सदृश बलिष्ठ होओ॥२॥

भावार्थः-हे राजन्! आप बुद्धि के बढ़ानेवाले खाने तथा पीने योग्य वस्तु का भोजन और पान कर तृप्त होकर बल, आरोग्य, बुद्धि और नम्रता को बढ़ाइये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॒ प्र णो॑ धि॒तावा॑नं य॒ज्ञं विश्वे॑भि॒र्देवे॑भिः। ति॒र स्त॑वान विश्पते॥३॥

इन्द्र॑। प्र। नः॒। धि॒तऽवा॑नम्। य॒ज्ञम्। विश्वे॑भिः। दे॒वेभिः॑। ति॒र। स्त॒वा॒न॒। वि॒श्प॒ते॒॥३॥

पदार्थः-(**इन्द्र**) दुष्टानां विदारक (**प्र**) (**नः**) अस्माकम् (**धितावानम्**) धितो धृतो वानः संविभागो येन तम् (**यज्ञम्**) विद्याविनयाभ्यां सङ्गतं पालनाख्यम् (**विश्वेभिः**) सर्वैः (**देवेभिः**) धार्मिकैः सभ्यैर्विद्वद्भिः सह (**तिर**) प्लवदुःखात्पारं गच्छ (**स्तवान**) यः सत्यं स्तौति तत्सम्बुद्धौ (**विश्पते**) प्रजापालक॥३॥

अन्वयः-हे विश्पते स्तवानेन्द्र! त्वं विश्वेभिर्देवेभिः सह नो धितावानं यज्ञं प्र तिर॥३॥

भावार्थः-प्रजाजनै राजैवमुपदेष्टव्यो भवान् नोऽस्माकं रक्षको भवैवमाज्ञापय भवतः सर्वे श्रेष्ठमध्यमकनिष्ठा भृत्याधर्मेणाऽस्मान् सततं रक्षन्त्विति॥३॥

पदार्थः-हे (**विश्पते**) प्रजा का पालन (**स्तवान**) सत्य की स्तुति और (**इन्द्र**) दुष्टों का नाश करनेवाले! आप (**विश्वेभिः**) सम्पूर्ण (**देवेभिः**) धार्मिक श्रेष्ठ विद्वानों के साथ (**नः**) हम लोगों के (**धितावानम्**) धारण किया है विभाग जिससे उस (**यज्ञम्**) विद्या और विनय से सङ्गत पालन करने रूप कर्म को (**प्र, तिर**) पार हो समाप्त करो अर्थात् उक्त कर्म से दुःख से पार पहुँचो॥३॥

भावार्थः-प्रजाजनों को चाहिये कि राजा को इस प्रकार का उपदेश देवें कि आप हम लोगों के रक्षक हूजिये और ऐसी आज्ञा दीजिये कि आपके सब श्रेष्ठ, मध्यम, कनिष्ठ कर्मचारी लोग धर्मपूर्वक हम लोगों की निरन्तर रक्षा करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते। क्षयं चन्द्रास इन्दवः॥४॥

इन्द्रः। सोमाः। सुताः। इमे। तव। प्र। यन्ति। सत्ऽपते। क्षयम्। चन्द्रासः। इन्दवः॥४॥

पदार्थः-(**इन्द्र**) सकलौषधिविद्यावित् (**सोमाः**) ओषध्यादयः पदार्थाः (**सुताः**) सुविचारेणाऽभिसंस्कृताः (**इमे**) (**तव**) (**प्र**) (**यन्ति**) प्राप्नुवन्ति (**सत्पते**) सतां रक्षक (**क्षयम्**) निवासस्थानम् (**चन्द्रासः**) आह्लादकराः (**इन्दवः**) सार्द्राः॥४॥

अन्वयः-हे सत्पते इन्द्र राजन्! य इमे चन्द्रास इन्दवः सुताः सोमास्तव क्षयं प्र यन्ति ताँस्त्वं सेवस्व॥४॥

भावार्थः-हे राजन्! यावान् राज्यादंशो भवता गृहीतव्यस्तावन्तं गृहीत्वा भुङ्क्ष्व नाऽधिकं न न्यूनमेवं कृतेन न कदाचिद्भवतः क्षतिर्भविष्यति॥४॥

पदार्थः-हे (**सत्पते**) सत्पुरुषों के रक्षा करने और (**इन्द्र**) सम्पूर्ण ओषधियों की विद्या के जाननेवाले राजन्! जो (**इमे**) ये (**चन्द्रासः**) आनन्दकारक (**इन्दवः**) गीले (**सुताः**) उत्तम प्रकार से पाक आदि संस्कार से युक्त (**सोमाः**) ओषधी आदि पदार्थ (**तव**) आपके (**क्षयम्**) रहने के स्थान को (**प्र, यन्ति**) प्राप्त होते हैं, उनका आप सेवन करो॥४॥

भावार्थः-हे राजन्! जितना आपको राज्य का भाग लेना चाहिये उतना ही ग्रहण कर भोग करिये, न अधिक न न्यून, ऐसा करने से कभी नहीं आपकी हानि होगी॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम्। तव द्युक्षास इन्दवः॥५॥१॥

दधिष्व। जठरे। सुतम्। सोमम्। इन्द्र। वरेण्यम्। तव। द्युक्षासः। इन्दवः॥५॥

पदार्थः-(**दधिष्व**) धरस्व। अत्र **संहितायामिति** दीर्घः। (**जठरे**) जायते सुखं यस्मात्तस्मिन्नुदरे (**सुतम्**) सुसंस्कृतम् (**सोमम्**) महौषधिविशिष्टमन्नम् (**इन्द्र**) पूर्णायुःकामुक (**वरेण्यम्**) स्वीकर्त्तुं भोक्तुमर्हम् (**तव**) (**द्युक्षासः**) दिवि प्रकाशे क्षियन्ति निवासयन्ति ते (**इन्दवः**) सस्नेहाः॥५॥

अन्वयः-हे इन्द्र! ये तव द्युक्षासः इन्दवः स्युस्तेषां सकाशाद्वरेण्यं सुतं सोमं जठरे त्वं दधिष्व॥५॥

भावार्थः–राजादिभिर्मनुष्यैः सर्वेषां पदार्थानां मध्यात्त एव पदार्था भोक्तव्याः पेयाश्च ये प्रज्ञायुर्बलानि वर्धयेयुः॥५॥

पदार्थः–हे **(इन्द्र)** पूर्ण अवस्था की कामना करनेवाले! जो **(तव)** आपके **(द्युक्षासः)** प्रकाश में रहने **(इन्दवः)** और स्नेह करनेवाले होवें उनके समीप से **(वरेण्यम्)** भोग करने योग्य **(सुतम्)** उत्तम प्रकार बनाया **(सोमम्)** श्रेष्ठ औषधियों से युक्त अन्न को **(जठरे)** उत्पन्न हो सुख जिसमें उस पेट में आप **(दधिष्व)** धरो॥५॥

भावार्थः–राजा आदि मनुष्यों को सम्पूर्ण पदार्थों के मध्य से उन्हीं पदार्थों का खान और पान करना चाहिये कि जो बुद्धि, अवस्था और बल को निरन्तर बढ़ावें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे। इन्द्र त्वादातमिद्यशः॥६॥

गिर्वणः। पाहि। नः। सुतम्। मधोः। धाराभिः। अज्यसे। इन्द्र। त्वाऽदातम्। इत्। यशः॥६॥

पदार्थः–(**गिर्वणः**) यो गीर्भिर्वन्यते याच्यते तत्सम्बुद्धौ **(पाहि)** **(नः)** अस्मान् **(सुतम्)** **(मधोः)** मधुरादिगुणयुक्तस्य **(धाराभिः)** प्रवाहैः **(अज्यसे)** प्राप्यसे **(इन्द्र)** **(त्वादातम्)** त्वया गृहीतम् **(इत्)** एव **(यशः)** आरोग्यप्रदमुदकमन्नं धनं वा। **यश इति उदकनामसु पठितम्।** (निघं०१.१२) **अन्ननामसु च।** २.७॥**धननामसु च।** (निघं०२.१०)॥६॥

अन्वयः–हे गिर्वण इन्द्र! यत्त्वादातं यशोऽस्ति तेन मधोर्धाराभिश्च सह सुतं सोमं प्राप्तोऽस्माभिरज्यसे स त्वमस्मान् पाहि॥६॥

भावार्थः–हे राजन्! यावत्पेयमन्नं धनं चास्मद्भवता स्वीकृतं तेन स्वस्याऽस्माकं च रक्षा विधेहि॥६॥

पदार्थः–हे **(गिर्वणः)** वाणियों से याचना किये जाते **(इन्द्र)** तेजस्विन्! जो **(त्वादातम्)** आपसे ग्रहण किया हुआ **(इत्)** ही **(यशः)** रोगनाशक जल, अन्न वा धन है, उससे और **(मधोः)** मधुर आदि गुणों से युक्त वस्तु के **(धाराभिः)** प्रवाहों के साथ **(सुतम्)** उत्पन्न हुए **(सोमम्)** ओषधि आदि पदार्थों को पाये हुए हम लोगों से जाने जाते हो वह आप **(नः)** हमारी **(पाहि)** रक्षा कीजिये॥६॥

भावार्थः–हे राजन्! जितना पीने योग्य वस्तु अन्न और धन हम लोगों का आपने स्वीकार किया है, उससे अपनी और हम लोगों की रक्षा कीजिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒भि द्यु॒म्नानि॑ व॒निन॒ इन्द्रं॑ सचन्ते॒ अक्षि॑ता। पी॒त्वी सोम॑स्य वावृधे॥७॥

अ॒भि। द्यु॒म्नानि॑। व॒निनः॑। इन्द्र॑म्। स॒च॒न्ते॒। अक्षि॑ता। पी॒त्वी। सोम॑स्य। व॒वृ॒धे॒॥७॥

पदार्थः-(**अभि**) आभिमुख्ये (**द्युम्नानि**) यशांसि जलान्यन्नानि धनानि वा (**वनिनः**) याच्ञावन्तः (**इन्द्रम्**) ऐश्वर्य्यकरम् (**सचन्ते**) सम्बध्नन्ति (**अक्षिता**) क्षयरहितानि (**पीत्वी**) (**सोमस्य**) ओषध्यैश्वर्य्यस्य योगेन (**वावृधे**) वर्धते॥७॥

अन्वयः-ये राजन्! यथा वनिनोऽक्षिता द्युम्नान्यभीन्द्रं सचन्ते यथाऽहं सोमस्य पीत्वी वावृधे तथा त्वमाचर॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वैर्मनुष्यैर्धर्मयुक्तेन परमपुरुषार्थेनाऽक्षयमैश्वर्यं प्राप्य युक्ताऽऽहारविहारेणाऽऽरोग्यं सम्पाद्य च जगति सुकीर्त्तिर्विस्तारणीया॥७॥

पदार्थः-हे राजन्! जैसे (**वनिनः**) मांगनेवाले जन (**अक्षिता**) नाश से रहित (**द्युम्नानि**) यशों के (**अभि**) सम्मुख (**इन्द्रम्**) ऐश्वर्य करनेवाले का (**सचन्ते**) सम्बन्ध होते हैं और जैसे मैं (**सोमस्य**) ओषधिरूप ऐश्वर्य्य के योग से (**पीत्वी**) पान करके (**वावृधे**) वृद्धि करूं, वैसे आप करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को चाहिये कि धर्म्मयुक्त अत्यन्त पुरुषार्थ से नहीं नाश होने योग्य ऐश्वर्य्य को प्राप्त होकर नियमित भोजन और विहार से आरोग्य को उत्पन्न करके संसार में उत्तम कीर्ति का विस्तार करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒र्वा॒वतो॑ न॒ आ ग॑हि परा॒वत॑श्च वृत्रहन्। इ॒मा जु॑षस्व नो॒ गिरः॑॥८॥

अ॒र्वा॒ऽवतः॑। न॒ः। आ। ग॒हि॒। प॒रा॒ऽवतः॑। च॒। वृ॒त्र॒ऽह॒न्। इ॒माः। जु॒ष॒स्व॒। न॒ः। गिरः॑॥८॥

पदार्थः-(**अर्वावतः**) प्रशस्ता अश्वा विद्यन्ते येषाम् (**नः**) अस्मान् (**आ**) समन्तात् (**गहि**) प्राप्नुहि (**परावतः**) दूरदेशात् (**च**) समीपात् (**वृत्रहन्**) यो वृत्रं धनं हन्ति प्राप्नोति तत्सम्बुद्धौ (**इमाः**) (**जुषस्व**) (**नः**) अस्माकम् (**गिरः**) वाचः॥८॥

अन्वयः-हे वृत्रहँस्त्वमर्वावतो नोऽस्मान् परावतश्चागहि न इमा गिरो जुषस्व॥८॥

भावार्थः-हे राजन्! दूरे समीपे वा स्थिता सेनाङ्गयुक्ता वीरा वयं यदा भवन्तमाह्वयेम तदैव श्रीमताऽऽगन्तव्यमस्माकं वचनानि श्रोतव्यानि च यथार्थो न्यायश्च कर्त्तव्यः॥८॥

पदार्थः-हे (**वृत्रहन्**) धन को प्राप्त होनेवाले! आप (**अर्वावतः**) प्रशंसा करने योग्य घोड़ों से युक्त (**नः**) हम लोगों को (**परावतः**) दूर देश से (**च**) और समीप से (**आ**) सब ओर से (**गहि**) प्राप्त

हूजिये और (**नः**) हम लोगों की (**इमाः**) इन (**गिरः**) वाणियों का (**जुषस्व**) सेवन करो॥८॥

भावार्थः–हे राजन्! दूर वा समीप में स्थित सेना के अङ्ग शस्त्र आदि से युक्त वीर हम लोग जब आपको पुकारें, उसी समय आपको आना चाहिये तथा हम लोगों के वचना सुनना और यथार्थ न्याय करना चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यद॑न्त॒रा प॑रा॒वत॑मर्वा॒वतं॑ च हू॒यसे॑। इन्द्रे॒ह तत॒ आ ग॑हि॥९॥२॥

यत्। अ॒न्त॒रा। प॒रा॒ऽव॒त॑म्। अ॒र्वा॒ऽव॒तम्। च॒। हू॒यसे॑। इन्द्र॑। इ॒ह। ततः॑। आ। ग॒हि॒॥९॥

पदार्थः–(**यत्**) यः (**अन्तरा**) व्यवधाने (**परावतम्**) दूरदेशस्थम् (**अर्वावतम्**) प्राप्तसामीप्यम् (**च**) (**हूयसे**) स्तूयसे (**इन्द्र**) परमैश्वर्य्यप्रद (**इह**) अस्मिन् राज्ये (**ततः**) (**आ**) (**गहि**) आगच्छ॥९॥

अन्वयः–हे इन्द्र! त्वमिह यद्यमन्तरा परावतमर्वावतं चाह्वयति तैश्च हूयसे ततोऽस्मानागहि॥९॥

भावार्थः–राजा दूरदेशे प्रजासेनाऽमात्यजनोऽन्यत्रापि वर्त्तेत तथापि भृत्यद्वारा सर्वैः सह समीपस्थो भवेदिति॥९॥

अत्र राजाप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चत्वारिंशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः–हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के दाता! आप (**इह**) इस राज्य में (**यत्**) जो (**अन्तरा**) व्यवधान अर्थात् मध्य में (**परावतम्**) दूर देश और (**अर्वावतम्**) समीप में वर्त्तमान को (**च**) और पुकारते हैं, उन लोगों से (**हूयसे**) पुकारे जाते हो (**ततः**) इससे हम लोगों को (**आ, गहि**) प्राप्त हूजिये॥९॥

भावार्थः–राजा दूर देश में हो और प्रजा, सेना और मन्त्री जन अन्यत्र भी वर्त्तमान हों, तथापि दूतों के द्वारा सब लोगों के साथ में समीप वर्त्तमान हो सके॥९॥

इस सूक्त में राजा और प्रजा के गुण वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चालीसवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

अथ नवर्चस्यैकाधिकचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १ यवमध्या गायत्री। २, ३, ५, ९ गायत्री। ४, ७, ८ निचृत् गायत्री। ६ विराट् गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निविषयमाह॥

अब नव ऋचावाले एकतालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्नि के विषय को कहते हैं॥

आ तू न इन्द्र मद्र्यग्घुवानः सोमपीतये। हरिभ्यां याह्यद्रिवः॥ १॥

आ। तु। नः। इन्द्र। मद्र्यक्। हुवानः। सोमऽपीतये। हरिऽभ्याम्। याहि। अद्रिऽवः॥ १॥

पदार्थः-(**आ**) समन्तात् (**तु**)। अत्र **ऋचि तुनुघे**ति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) ऐश्वर्य्यकारक (**मद्र्यक्**) मामञ्चतीति मद्र्यक् (**हुवानः**) आहूतः (**सोमपीतये**) सोमः पीतो यस्मिंस्तस्मै (**हरिभ्याम्**) अश्वाभ्याम् (**याहि**) (**अद्रिवः**) मेघवान् सूर्य्य इव वर्त्तमान॥ १॥

अन्वयः-हे अद्रिव इन्द्र! त्वं सोमपीतये मद्र्यग्घुवानो हरिभ्यां नोऽस्मानायाहि वयन्तु भवन्तमायाम॥ १॥

भावार्थः-मनुष्यैरुत्सवेषु परस्परेषामाह्वानं कृत्वाऽन्नपानादिभिः सत्कारः कर्त्तव्यः॥ १॥

पदार्थः-हे (**अद्रिवः**) मेघों से युक्त सूर्य्य के तुल्य वर्त्तमान (**इन्द्र**) ऐश्वर्य्य के करनेवाले! आप (**सोमपीतये**) सोमलतारूप औषध का रस पीया जाये जिस कर्म में उसके लिये (**मद्र्यक्**) मेरी पूजा अर्थात् उपासना करनेवाला (**हुवानः**) पुकारा गया जन (**हरिभ्याम्**) घोड़ों से (**नः**) हम लोगों को (**आ**) सब प्रकार (**याहि**) प्राप्त हो और हम लोग (**तु**) शीघ्र आपको प्राप्त होवें॥ १॥

भावार्थः-मनुष्यों को चाहिये कि शुभ कार्य्य आदि के उत्सवों में परस्पर एक-दूसरे का आह्वान करके अन्न और जल आदिकों से सत्कार करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक्। अयुज्रन् प्रातरद्रयः॥ २॥

सत्तः। होता। नः। ऋत्वियः। तिस्तिरे। बर्हिः। आनुषक्। अयुज्रन्। प्रातः। अद्रयः॥ २॥

पदार्थः-(**सत्तः**) निषण्णः (**होता**) आदाता (**नः**) अस्मान् (**ऋत्वियः**) य ऋतुमर्हति सः (**तिस्तिरे**) स्तृणात्याच्छादयति (**बर्हिः**) उत्तममासनं वस्तु वा (**आनुषक्**) य आनुकूल्यं सचति समवैति सः (**अयुज्रन्**) युञ्जन्ति (**प्रातः**) (**अद्रयः**) मेघाः॥ २॥

अन्वयः-यः सत्तो होतर्त्विय आनुषक सन्नोऽस्मान् बर्हिरद्रयः प्रातरयुज्रन्निव तिस्तिरे ते क्रियायज्ञं कर्त्तुमर्हन्ति॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रभातकालीना मेघाः सूर्य्यप्रकाशमाच्छाद्य छायां जनयन्ति तथैव क्रियाविदो जना वस्त्रादिपदार्थैः शरीराण्याच्छाद्याऽऽनुकूल्येन सुखं जनयन्ति॥ २॥

पदार्थः-जो **(सत्तः)** बैठा हुआ **(होता)** ग्रहण करनेवाला और **(ऋत्वियः)** जो ऋतु को योग्य होता वा **(आनुषक्)** अनुकूलता के साथ मिलता ये **(नः)** हम लोगों के लिये **(बर्हिः)** उत्तम आसन वा वस्तु को **(अद्रयः)** मेघों के सदृश **(प्रातः)** प्रातःकाल में **(अयुज्रन्)** युक्त करते हैं और **(तिस्तिरे)** वस्त्रों से आच्छादन करते हैं, वे क्रियारूप यज्ञ करने को योग्य हैं॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभातकाल के मेघ सूर्य्य के प्रकाश का आच्छादन करके छाया को उत्पन्न करते हैं, वैसे ही क्रियाओं को जाननेवाले लोग वस्त्र आदि पदार्थों से शरीरों को ढाँप के अनुकूलता से सुख को उत्पन्न करते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद। वीहि शूर पुरोळाशम्॥ ३॥

इमा। ब्रह्म। ब्रह्मऽवाहः। क्रियन्ते। आ। बर्हिः। सीद। वीहि। शूर। पुरोळाशम्॥ ३॥

पदार्थः-**(इमा)** **(ब्रह्म)** धनम् **(ब्रह्मवाहः)** धनप्रापिकाः **(क्रियन्ते)** **(आ)** **(बर्हिः)** अन्तरिक्षम् **(सीद)** **(वीहि)** प्राप्नुहि **(शूर)** दुष्टानां हिंसक **(पुरोडाशम्)** विशेषसंस्कृतमन्नम्॥ ३॥

अन्वयः-हे शूर! या इमा ब्रह्मवाहः क्रियाः क्रियन्ते ताभिर्ब्रह्म वीहि बर्हिरासीद पुरोडाशं वीहि॥ ३॥

भावार्थः-मनुष्यैर्निष्फलाः क्रियाः कदाचिन्नैव कर्त्तव्याः। यया यया धर्मार्थकाममोक्षसिद्धिः स्यात्तां तां प्रयत्नेनानुतिष्ठन्तु॥ ३॥

पदार्थः-हे **(शूर)** दुष्टों के नाश करनेवाले! जो **(इमा)** ये **(ब्रह्मवाहः)** धनों को प्राप्त करानेवाली क्रियायें **(क्रियन्ते)** की जाती हैं उनसे **(ब्रह्म)** धन को **(वीहि)** प्राप्त **(बर्हिः)** अन्तरिक्ष में **(आ, सीद)** वर्त्तमान और **(पुरोडाशम्)** उत्तम प्रकार संस्कारयुक्त अन्न को प्राप्त हो॥ ३॥

भावार्थः-मनुष्यों को चाहिये कि निष्फल क्रियाओं को कभी न करें। जिस-जिस क्रिया से धर्म, अर्थ, काम और मोक्ष की सिद्धि हो, उस उसको प्रयत्न से करो॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ररन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन्। उक्थेष्विन्द्र गिर्वणः॥ ४॥

ररन्धि। सवनेषु। नः। एषु। स्तोमेषु। वृत्रऽहन्। उक्थेषु। इन्द्र। गिर्वणः॥ ४॥

पदार्थः-(**रारन्धि**) रमस्व रमय वा (**सवनेषु**) ऐश्वर्येषु (**नः**) अस्मान् (**एषु**) (**स्तोमेषु**) प्रशंसनीयेषु (**वृत्रहन्**) प्राप्तधन (**उक्थेषु**) वक्तुमर्हेषु (**इन्द्र**) परमैश्वर्य्यप्रद (**गिर्वणः**) यो गीर्भिर्वन्यते याच्यते तत्सम्बुद्धौ॥४॥

अन्वयः-हे गिर्वणो वृत्रहन्निन्द्र! त्वं स्तोमेषूक्थेषु सवनेषु नोऽस्मान् रारन्धि॥४॥

भावार्थः-दरिद्रैर्धनाढयाः सदैव याचनीया यतस्ते सुखमाप्नुयुः॥४॥

पदार्थः-हे (**गिर्वणः**) वाणियों से जिससे याचना करें वह (**वृत्रहन्**) धनों से युक्त (**इन्द्र**) अत्यन्त ऐश्वर्य के देनेवाले! आप (**स्तोमेषु**) प्रशंसा करने और (**उक्थेषु**) कहने के योग्य (**सवनेषु**) ऐश्वर्य्यों में (**नः**) हम लोगों को (**रारन्धि**) रमाओ॥४॥

भावार्थः-दरिद्र लोगों को चाहिये कि धनयुक्त पुरुषों से सदा याचना करें, जिससे कि वे दरिद्र लोग सुख को प्राप्त होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मतयः सोमपामुरुं रिहन्ति शवसस्पतिम्। इन्द्रं वत्सं न मातरः॥५॥३॥

मतयः। सोमऽपाम्। उरुम्। रिहन्ति। शवसः। पतिम्। इन्द्रम्। वत्सम्। न। मातरः॥५॥३।

पदार्थः-(**मतयः**) प्रज्ञायुक्ता मनुष्याः (**सोमपाम्**) ऐश्वर्य्यरक्षकम् (**उरुम्**) बह्वैश्वर्य्यम् (**रिहन्ति**) लिहन्ति (**शवसः**) बलस्य (**पतिम्**) पालकम् (**इन्द्रम्**) ऐश्वर्य्ययुक्तम् (**वत्सम्**) (**न**) इव (**मातरः**) गावः॥५॥

अन्वयः-ये मतयः शवसस्पतिमुरुं सोमपामिन्द्रं मातरो वत्सं न रिहन्ति ते सुखं लभन्ते॥५॥

भावार्थः-यथा गावो वात्सल्यभावमाश्रित्य वत्सेषूत्तमं प्रेम दधति तथैव राजादयोऽध्यक्षाः सेनाः वात्सल्यभावेन रक्षन्तु॥५॥

पदार्थः-जो (**मतयः**) उत्तम बुद्धि से युक्त मनुष्य लोग (**शवसः**) बल के (**पतिम्**) पालन करनेवाले (**उरुम्**) बहुत ऐश्वर्य से पूर्ण (**सोमपाम्**) ऐश्वर्य्य के रक्षक (**इन्द्रम्**) ऐश्वर्य्य से युक्त पुरुष (**मातरः**) गौवें (**वत्सम्**) बछड़े को (**न**) जैसे (**रिहन्ति**) चाटती वैसे मिलते हैं, वे सुख को प्राप्त होते हैं॥५॥

भावार्थः-जैसे गौवें प्रेमभाव का आश्रयण करके बछड़ों में प्रेम धारण करती हैं, वैसे ही राजा आदि अध्यक्ष पुरुष सेनाओं की प्रजाओं के प्रेमभाव से रक्षा करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः॥६॥

सः। मन्दस्व। हि। अन्धसः। राधसे। तन्वा। महे। न। स्तोतारम्। निदे। करः॥६॥

पदार्थः-(**सः**) (**मन्दस्व**) आनन्द। अत्र **संहितायामिति** दीर्घः। (**हि**) यतः (**अन्धसः**) अन्नादेः (**राधसे**) संसिद्धिकराय धनाय (**तन्वा**) शरीरेण (**महे**) महते (**न**) निषेधे (**स्तोतारम्**) विद्वांसम् (**निदे**) निन्दनाय (**करः**) कुर्यात्॥६॥

अन्वयः-हे विद्वन्! हि यतस्त्वं स्तोतारं निदे न करस्तस्मात् स त्वं तन्वाऽन्धसो महे राधस मन्दस्व॥६॥

भावार्थः-ये मनुष्या स्तुत्यर्हान् निन्दितान् न कुर्वन्ति ते महदैश्वर्य्यं प्राप्य शरीरेणात्मना च सदैव सुखयन्ति॥६॥

पदार्थः-हे विद्वान् पुरुष! (**हि**) जिससे आप (**स्तोतारम्**) विद्वान् पुरुष की (**निदे**) निन्दा करने के लिये (**न**) नहीं (**करः**) करें इससे (**सः**) वह आप (**तन्वा**) शरीर से (**अन्धसः**) अन्न आदि की (**महे**) बड़ी (**राधसे**) सिद्धि करनेवाले धन के लिये (**मन्दस्व**) आनन्द करो॥६॥

भावार्थः-जो मनुष्य स्तुति करने योग्य पुरुषों की निन्दा नहीं करते, वे बड़े ऐश्वर्य को प्राप्त होकर शरीर और आत्मा से सदा ही सुखी होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वयमिन्द्र त्वायवो हविष्मन्तो जरामहे। उत त्वमस्मयुर्वसो॥७॥

वयम्। इन्द्र। त्वाऽयवः। हविष्मन्तः। जरामहे। उत। त्वम्। अस्मऽयुः। वसो इति॥७॥

पदार्थः-(**वयम्**) (**इन्द्र**) ऐश्वर्य्ययुक्त (**त्वायवः**) त्वत्कामयमानाः (**हविष्मन्तः**) बहूनि हवींषि दातव्यानि वस्तूनि विद्यन्ते येषान्ते (**जरामहे**) प्रशंसेम (**उत**) अपि (**त्वम्**) (**अस्मयुः**) अस्मान् कामयमानः (**वसो**) वासहेतो॥७॥

अन्वयः-हे वसो इन्द्र! हविष्मन्तो त्वायवो वयं त्वां जरामहे उतापि त्वमस्मयुः सन्नस्मान् स्तुहि॥

भावार्थः-ये मनुष्याः सर्वेषां गुणानां प्रशंसां दोषाणां निन्दां कुर्य्युस्ते विवेकिनो भूत्वा गुणान् ग्रहीतुं दोषांस्त्यक्तुं समर्था भवन्ति॥७॥

पदार्थः-हे (**वसो**) निवास के कारण (**इन्द्र**) ऐश्वर्य से और (**हविष्मन्तः**) बहुत देने योग्य वस्तुओं से युक्त! (**त्वायवः**) आपकी कामना करते हुए (**वयम्**) हम लोग आपकी (**जरामहे**) प्रशंसा करें (**उत**) और भी (**त्वम्**) आप (**अस्मयुः**) हम लोगों की कामना करते हुए हम लोगों की प्रशंसा करो॥७॥

भावार्थः-जो मनुष्य सब लोगों के गुणों की प्रशंसा और दोषों की निन्दा करें, वे विवेकी अर्थात् विचारशील होके गुणों के ग्रहण करने और दोषों के त्याग करने को समर्थ होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ् याहि। इन्द्र स्वधावो मत्स्वेह॥८॥

मा। आरे। अस्मत्। वि। मुमुचः। हरिऽप्रिय। अर्वाङ्। याहि। इन्द्र। स्वधाऽवः। मत्स्व। इह॥८॥

पदार्थः-(**मा**) निषेधे (**आरे**) समीपे दूरे वा (**अस्मत्**) (**वि**) (**मुमुचः**) मोचयेः (**हरिप्रिय**) यो हरीन् हरणशीलान् प्रीणाति तत्सम्बुद्धौ (**अर्वाङ्**) अर्वाचीनं देशं गच्छन् (**याहि**) गच्छ (**इन्द्र**) ऐश्वर्य्ययुक्त (**स्वधावः**) बह्वन्नादिप्राप्त (**मत्स्व**) आनन्द (**इह**) अस्मिञ्जगति॥८॥

अन्वयः-हे हरिप्रियेन्द्र स्वधावस्त्वमस्मदारे मा वि मुमुचोऽर्वाङ् याहीह मत्स्व॥८॥

भावार्थः-हे मित्रजना! यूयमस्मद्दूरे समीपे वा स्थिताः सन्तोऽस्माकं प्रियमाचरत प्रीतिं मा त्यजत वयमपि युष्मासु तथा वर्त्तेम ह्येवं परस्परं वर्त्तमानं कृत्वेह सुखिनो भवेम॥८॥

पदार्थः-हे (**हरिप्रिय**) हरनेवालों को प्रसन्न करनेवाले (**इन्द्र**) ऐश्वर्य्य से युक्त (**स्वधावः**) बहुत अन्नादि वस्तुओं से पूर्ण! आप (**अस्मत्**) हम लोगों से (**आरे**) समीप वा दूर देश में (**मा**) मत (**वि, मुमुचः**) त्याग करिये (**अर्वाङ्**) नीचे के स्थान को जाते हुए (**याहि**) जाइये और (**इह**) इस संसार में (**मत्स्व**) आनन्द करिये॥८॥

भावार्थः-हे मित्र जनो! आप लोग हम लोगों से दूर वा समीप स्थान में वर्त्तमान हुए हम लोगों का कल्याण करो और प्रीति का त्याग मत करो और हम लोग भी आप लोगों में ऐसे ही वर्त्ताव करें, इस प्रकार परस्पर वर्त्ताव करके इस संसार में सुखी होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अर्वाञ्चं त्वा सुखे रथे वहतामिन्द्र केशिना। घृतस्नू बर्हिरासदे॥९॥४॥

अर्वाञ्चम्। त्वा। सुऽखे। रथे। वहताम्। इन्द्र। केशिना। घृतस्नू इति घृतऽस्नू। बर्हिः। आऽसदे॥९॥४॥

पदार्थः-(**अर्वाञ्चम्**) योऽर्वागधोऽञ्चति गच्छति तम् (**त्वा**) त्वाम् (**सुखे**) सुखकारके (**रथे**) रमणीये याने (**वहताम्**) (**इन्द्र**) ऐश्वर्य्ययुक्त (**केशिना**) बहवः केशा विद्यन्ते ययोस्तौ (**घृतस्नू**) यौ घृतमुदकं स्नातः शोधयतस्तौ (**बर्हिः**) अन्तरिक्षे (**आसदे**) आसादनीयाय॥९॥

अन्वयः-हे इन्द्र! यौ घृतस्नू केशिनाऽर्वाञ्चं त्वा सुखे रथे बर्हिरासदे वहतां तौ त्वं जानीहि॥९॥

भावार्थः–हे मनुष्या! द्वाभ्यामग्निभ्यां चालितेषु यानेषु स्थित्वाऽध ऊर्ध्वं तिर्य्यग्देशं च गत्वाऽऽगच्छत॥९॥

अत्र विद्वन्मनुष्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकाधिकचत्वारिंशत्तमं सूक्तं [चतुर्थो] ४ वर्गश्च समाप्तः॥

पदार्थः–हे **(इन्द्र)** ऐश्वर्य्य से युक्त! जो **(घृतस्नू)** घृत अर्थात् जल को पवित्र करनेवाले **(केशिना)** बहुत केशों से युक्त **(अर्वाञ्चम्)** नीचे जानेवाले **(त्वा)** आपको **(सुखे)** सुख करानेवाले **(रथे)** सुन्दर वाहन और **(बर्हिः)** अन्तरिक्ष में **(आसदे)** वर्त्तमान होने के लिये **(वहताम्)** पहुँचावें, उनको आप जानिये॥९॥

भावार्थः–हे मनुष्यो! दो अग्नियों से चलाये हुए वाहनों पर स्थित होकर नीचे, ऊपर और तिरछे देश में जाकर आइये॥९॥

इस सूक्त में विद्वान्–मनुष्यों के गुण वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, ऐसा जानना चाहिये॥

यह इकतालीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ उप नः सुतमित्यस्य नवर्चस्य द्विचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ४-७ गायत्री। २, ३, ८, ९ निचृद्गायत्रीच्छन्दः। षड्जः स्वरः॥

अथ विद्वद्विषयमाह॥

अब नव ऋचावाले बयालीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्वान् के गुणों को कहते हैं॥

उप॑ नः सु॒तमा ग॑हि॒ सोम॑मिन्द्र॒ गवा॑शिरम्। हरि॑भ्यां॒ यस्ते॑ अस्म॒युः॥ १॥

उप॑। न॒ः। सु॒तम्। आ। ग॒हि॒। सोम॑म्। इ॒न्द्र॒। गोऽआ॑शिरम्। हरि॑ऽभ्याम्। यः। ते॒। अ॒स्म॒ऽयुः॥ १॥

पदार्थः-(**उप**) (**नः**) अस्माकम् (**सुतम्**) सुसाधितम् (**आ**) (**गहि**) समन्तात् प्राप्नुहि (**सोमम्**) ओषधिगणमिवैश्वर्य्यम् (**इन्द्र**) बह्वैश्वर्य्ययुक्त (**गवाशिरम्**) गावोऽश्नन्ति यं तम् (**हरिभ्याम्**) अश्वाभ्यां युक्तेन रथेन (**यः**) (**ते**) तव (**अस्मयुः**) आत्मनोऽस्मानिच्छुरिव॥ १॥

अन्वयः-हे इन्द्र! त्वं हरिभ्यां युक्तेन रथेन यस्ते रथोऽस्मयुर्वर्त्तते तेन हरिभ्यां युक्तेन नः सुतं [गवाशिरम्] सोममुपागहि॥ १॥

भावार्थः-त एव सर्वेषां सुहृदः सन्ति ये स्वैश्वर्येण सर्वानामन्त्र्य सत्कुर्वन्ति॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्ययुक्त! आप (**हरिभ्याम्**) घोड़ों से युक्त रथ से (**यः**) जो (**ते**) आपका वाहन (**अस्मयुः**) अपने को हम लोगों की इच्छा करता हुआ सा वर्त्तमान है, घोड़ों से युक्त उस रथ से (**नः**) हम लोगों के (**सुतम्**) उत्तम प्रकार सिद्ध (**गवाशिरम्**) किरणों से सेवन करने योग्य (**सोमम्**) ओषधिगणों के सदृश ऐश्वर्य्य को (**उप, आ, गहि**) समीप में सब प्रकार प्राप्त हूजिये॥ १॥

भावार्थः-वे लोग ही सब लोगों के मित्र हैं कि जो लोग अपने ऐश्वर्य्य से सब लोगों को बुला कर सत्कार करते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तमि॑न्द्र॒ मदु॒मा ग॑हि॒ बर्हि॑ष्ठां ग्रा॒वभि॑: सु॒तम्। कु॒वि॒न्व॒स्य तृ॒ण्व॑:॥ २॥

तम्। इ॒न्द्र॒। मद॑म्। आ। ग॒हि॒। ब॒र्हि॑ःऽस्थाम्। ग्रा॒व॑ऽभिः। सु॒तम्। कु॒वित्। नु। अ॒स्य॒। तृ॒ण्व॑ः॥ २॥

पदार्थः-(**तम्**) पूर्वोक्तम् (**इन्द्र**) ऐश्वर्य्यमिच्छो (**मदम्**) आनन्दकरम् (**आ**) (**गहि**) सर्वतः प्राप्नुहि (**बर्हिष्ठाम्**) यो बर्हिष्यन्तरिक्षे तिष्ठति तम् (**ग्रावभिः**) मेघैः (**सुतम्**) निष्पन्नम् (**कुवित्**) महान् सन् (**नु**) सद्यः (**अस्य**) सोमस्य (**तृण्वः**) ये तृप्यन्ति ते॥ २॥

अन्वयः-हे इन्द्र! येऽस्य तृण्वः सन्ति तैः कुवित्सन् तं ग्रावभिः सुतं मदं बर्हिष्ठां सोमं न्वागहि॥ २॥

भावार्थः–ये सोमलतादयो वर्षाभिरुत्पद्यन्ते रोगविनाशकत्वेन तृप्तिकरा भवन्ति सूक्ष्मांशैरन्तरिक्षं प्राप्य सर्वत्र प्रसरन्ति तान् युक्त्या संसेव्य सदाऽऽनन्दो भोक्तव्यः॥२॥

पदार्थः–हे **(इन्द्र)** ऐश्वर्य्य की इच्छा करनेवाले! जो **(अस्य)** इस सोमलता की **(तृष्णवः)** तृप्ति करनेवाले हैं, उनसे **(कुवित्)** श्रेष्ठ होकर **(तम्)** उस पूर्वोक्त को **(ग्रावभिः)** मेघों से **(सुतम्)** उत्पन्न **(मदम्)** आनन्दकारक **(बर्हिष्ठाम्)** अन्तरिक्ष में वर्त्तमान होनेवाले ओषधिगणों के सदृश वर्त्तमान ऐश्वर्य को **(नु)** शीघ्र **(आ, गहि)** सब प्रकार प्राप्त हूजिये॥२॥

भावार्थः–जो सोमलता आदि ओषधियां वृष्टियों से उत्पन्न होतीं, रोगविनाशक होने से तृप्तिकारक होती और सूक्ष्म अवयवों के द्वारा अन्तरिक्ष को प्राप्त होके सब स्थानों में फैलती हैं, उनका युक्ति से सेवन करके सदा आनन्द का भोग करना चाहिये॥२॥

अथ विद्वत्सत्कारविषयमाह॥

अब विद्वानों के सत्कार विषय को अगले मन्त्र में कहते हैं॥

इन्द्रꣳमित्था गिरो ममाच्छागुरिषिता इतः। आवृते सोमपीतये॥३॥

इन्द्रम्। इत्था। गिरः। मम। अच्छ। अगुः। इषिताः। इतः। आऽवृते। सोमऽपीतये॥३॥

पदार्थः–**(इन्द्रम्)** परमैश्वर्य्यवन्तम् **(इत्था)** अनेन प्रकारेण **(गिरः)** सुशिक्षिता वाचः **(मम)** **(अच्छ)** **(अगुः)** प्राप्नुवन्तु **(इषिताः)** प्रेरिताः **(इतः)** अस्मात् **(आवृते)** सर्वत आच्छादिते स्थानविशेषे **(सोमपीतये)** सोमस्य पानाय॥३॥

अन्वयः–हे मनुष्या! यथाऽऽवृते सोमपीतये ममेषिता गिर इत इन्द्रमच्छागुरित्था युष्माकमप्येनं प्राप्नुवन्तु॥३॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। विद्वांसोऽन्यान् प्रत्येवमुपदिशेयुर्वयं यानाहूय सत्कुर्य्याम यूयमपि तानेव सत्कुरुत॥३॥

पदार्थः–हे मनुष्यो! जैसे **(आवृते)** सब ओर से ढांपे हुए स्थान विशेष में **(सोमपीतये)** सोमलता के रस के पान करने के लिये **(मम)** मेरी **(इषिताः)** प्रेरणा की गई **(गिरः)** उत्तम प्रकार शिक्षित वाणियां **(इतः)** इससे **(इन्द्रम्)** अत्यन्त ऐश्वर्यवाले को **(अच्छ)** अच्छे प्रकार **(अगुः)** प्राप्त हों **(इत्था)** इस प्रकार से आप लोगों की भी वाणियां इसको प्राप्त हों॥३॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् लोग अन्य जनों के प्रति इस प्रकार से उपदेश देवें कि हम लोग जिनको बुला कर सत्कार करें, आप लोग भी उन्हीं का सत्कार करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रं॑ सोम॑स्य पी॒तये॒ स्तोमै॒रि॒ह ह॑वामहे। उ॒क्थेभि॑: कु॒विदा॒गम॑त्॥४॥

इन्द्र॑म्। सोम॑स्य। पी॒तये॑। स्तोमै॑:। इ॒ह। ह॒वा॒म॒हे॒। उ॒क्थेभि॑:। कु॒वित्। आ॒ऽगम॑त्॥४॥

पदार्थ:-(**इन्द्रम्**) परमविद्यैश्वर्य्यम् (**सोमस्य**) सुसाधितमहौषधिरसस्य (**पीतये**) पानाय (**स्तोमै:**) प्रशंसावचनै: (**इह**) अस्मिन् संसारे (**हवामहे**) आह्वयामहे (**उक्थेभि:**) वक्तुमर्है: (**कुवित्**) बहुवारम्। **कुविदिति बहुनामसु पठितम्।** (निघं०३.१) (**आगमत्**) आगच्छतु॥४॥

अन्वय:-हे विद्वन्! वयं स्तोमैरुक्थेभि: सोमस्य पीतये यमिन्द्रमिह हवामहे सोऽस्माकं समीपं कुविदागमत्॥४॥

भावार्थ:-यद्यविद्वांस: प्रीत्या विदुष आह्वयेयुस्तदा ते तत्सन्निधिं बहुवारं गच्छन्तु॥४॥

पदार्थ:-हे विद्वज्जन! हम लोग (**स्तोमै:**) प्रशंसा के वचन जो (**उक्थेभि:**) कहने के योग्य उनसे (**सोमस्य**) उत्तम प्रकार निकाले हुए बड़ी ओषधि के रस के (**पीतये**) पान करने के लिये जिस (**इन्द्रम्**) अत्यन्त विद्या और ऐश्वर्य्यवाले को (**इह**) इस संसार में (**हवामहे**) पुकारें, वह हम लोगों के समीप (**कुवित्**) बहुत वार (**आगमत्**) आवे॥४॥

भावार्थ:-जो अविद्वान् लोग प्रीति से विद्वान् लोगों को बुलावें तो वे उनके समीप बहुत वार जावें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॒ सोमा॑: सु॒ता इ॒मे तान् द॑धिष्व शतक्रतो। ज॒ठरे॑ वाजिनीवसो॥५॥५॥

इन्द्र॑। सोमा॑:। सु॒ता:। इ॒मे। तान्। द॒धि॒ष्व॒। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो। ज॒ठरे॑। वा॒जि॒नी॒व॒सो॒ इति॑ वाजिनीऽवसो॥५॥

पदार्थ:-(**इन्द्र**) परमैश्वर्यभोक्त: (**सोमा:**) पदार्था: (**सुता:**) निष्पन्ना: (**इमे**) (**तान्**) (**दधिष्व**) (**शतक्रतो**) बहुकर्मप्रज्ञ (**जठरे**) जातेऽस्मिन् जगति (**वाजिनीवसो**) यो वाजिनीमुषसं वासयति तत्सम्बुद्धौ। **वाजिनीत्युषसो नामसु पठितम्।** (निघं०१.८)॥५॥

अन्वय:-हे वाजिनीवसो शतक्रतो इन्द्र! य इमे जठरे सोमा: सुतास्तान् दधिष्व॥५॥

भावार्थ:-तदैव मनुष्या: पूर्णविद्यैश्वर्य्या: स्युर्यदा सृष्टिस्थपदार्थविद्यां विजानन्तु॥५॥

पदार्थ:-हे (**वाजिनीवसो**) रात्रि को वसानेवाले (**शतक्रतो**) बहुत कर्मों में कुशल (**इन्द्र**) अत्यन्त ऐश्वर्य के भोक्ता! जो (**इमे**) ये (**जठरे**) प्रसिद्ध हुए इस संसार में (**सोमा:**) पदार्थ (**सुता:**) उत्पन्न हुए हैं, उनको (**दधिष्व**) धारण करो॥५॥

भावार्थः–तभी मनुष्य पूर्ण विद्या और ऐश्वर्यवाले होवें कि जब सृष्टि में वर्त्तमान पदार्थों की विद्या को जानें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे। अधा ते सुम्नमीमहे॥६॥

विद्म। हि। त्वा। धनम्ऽजयम्। वाजेषु। दधृषम्। कवे। अध। ते। सुम्नम्। ईमहे॥६॥

पदार्थः–(**विद्म**) विजानीयाम। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हि**) यतः (**त्वा**) त्वाम् (**धनञ्जयम्**) यो धनं जयति तम् (**वाजेषु**) संग्रामेषु (**दधृषम्**) प्रगल्भम् (**कवे**) विद्वन्! (**अध**) अथ। अत्र **निपातस्य च**ेति दीर्घः। (**ते**) तव सकाशात् (**सुम्नम्**) सुखम् (**ईमहे**) याञ्चामहे॥६॥

अन्वयः–हे कवे! वयं वाजेषु दधृषं धनञ्जयं त्वा विद्म। अध हि ते सुम्नमीमहे॥६॥

भावार्थः–मनुष्या यं सुखप्रदानेषु योग्यं शूरवीरं न्यायाधीशं विजानीयुस्तस्मादेव सुखाऽलङ्कृतिः कार्य्या॥६॥

पदार्थः–हे (**कवे**) विद्वान् पुरुष! हम लोग (**वाजेषु**) संग्रामों में (**दधृषम्**) प्रचण्ड (**धनञ्जयम्**) धनों के जीतनेवाले (**त्वा**) आपको (**विद्म**) जानें (**अध**) इसके अनन्तर (**हि**) जिससे (**ते**) आपके समीप से (**सुम्नम्**) सुख की (**ईमहे**) याचना करते हैं॥६॥

भावार्थः–मनुष्य जिसको सुखों के प्रदानों में योग्य, शूरवीर, न्यायाधीश जानें, उसी से सुखों की पूर्ति करनी चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इममिन्द्र गवाशिरं यवाशिरं च नः पिब। आगत्या वृषभिः सुतम्॥७॥

इमम्। इन्द्र। गोऽआशिरम्। यवऽआशिरम्। च। नः। पिब। आऽगत्य। वृषऽभिः। सुतम्॥७॥

पदार्थः–(**इमम्**) (**इन्द्र**) ऐश्वर्य्यप्रद (**गवाशिरम्**) गावः किरणा अश्नन्ति यं तम् (**यवाशिरम्**) यवा अस्यन्ते यस्मिँस्तम् (**च**) (**नः**) अस्माकम् (**पिब**) (**आगत्य**)। अत्र **संहितायामि**ति दीर्घः। (**वृषभिः**) वर्षकैर्मेघैः (**सुतम्**) उत्पादितम्॥७॥

अन्वयः–हे इन्द्र! त्वमागत्य नो वृषभिः सुतं गवाशिरं यवाशिरं चेमं सोमं पिब॥७॥

भावार्थः–हे मनुष्या! यं किरणा वायवश्च पिबन्ति तमेव रसं यूयं पीत्वा बलिष्ठा भवत॥७॥

पदार्थः–हे (**इन्द्र**) ऐश्वर्य्य के देनेवाले! आप (**आगत्य**) आय के (**नः**) हम लोगों के (**वृषभिः**) वृष्टिकर्त्ता मेघों से (**सुतम्**) उत्पन्न किये गये (**गवाशिरम्**) किरणें जिसको पीती हैं उस और (**यवाशिरम्**)

यव अन्न का भोजन किया जाये जिसमें उस **(च)** और **(इमम्)** इस पदार्थ को **(पिब)** पान करो॥७॥

भावार्थः-हे मनुष्यो! जिसको सूर्य की किरणें और पवनें पीती हैं, उसी रस का आप लोग पान करके बलिष्ठ होइये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तुभ्येदिन्द्र स्व ओक्ये३ सोमं चोदामि पीतये। एष रारन्तु ते हृदि॥८॥

तुभ्य। इत्। इन्द्र। स्वे। ओक्ये। सोमम्। चोदामि। पीतये। एषः। ररन्तु। ते। हृदि॥८॥

पदार्थः-(**तुभ्य**) तुभ्यम्। अत्र **सुपां सुलुगिति** विभक्तेर्लुक्। **(इत्)** एव **(इन्द्र)** ऐश्वर्ययुक्त **(स्वे)** स्वकीये **(ओक्ये)** गृहे **(सोमम्)** रसम् **(चोदामि)** प्रेरयामि **(पीतये)** **(एषः)** **(रारन्तु)** भृशं रमताम् **(ते)** तव **(हृदि)** हृदये॥८॥

अन्वयः-हे इन्द्र! य एष ते हृदि रारन्तु तं सोमं स्व ओक्ये पीतये तुभ्येच्चोदामि॥८॥

भावार्थः-प्राणिभिर्यद्भुज्यते पीयते च तत्सर्वं रुधिरादिकं भूत्वा हृदि संसृत्य मस्तकद्वारा सर्वत्र प्रसरति॥८॥

पदार्थः-हे **(इन्द्र)** ऐश्वर्ययुक्त जन! जो **(एषः)** यह **(ते)** आपके **(हृदि)** हृदय में **(रारन्तु)** अत्यन्त रमे उस **(सोमम्)** रस को **(स्वे)** अपने **(ओक्ये)** गृह में **(पीतये)** पीने को **(तुभ्य)** आपके लिये **(इत्)** ही **(चोदामि)** प्रेरणा करता हूँ॥८॥

भावार्थः-प्राणी लोग जो खाते और पीते हैं, वह सब पदार्थ रुधिर आदि हो और हृदय में फैल कर मस्तक के द्वारा सर्वत्र फैलता है॥८॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे। कुशिकासो अवस्यवः॥९॥६॥

त्वाम्। सुतस्य। पीतये। प्रत्नम्। इन्द्र। हवामहे। कुशिकासः। अवस्यवः॥९॥

पदार्थः-(**त्वाम्**) **(सुतस्य)** सुसंस्कृतस्य रसस्य **(पीतये)** **(प्रत्नम्)** प्राक्तनम् **(इन्द्र)** सुखप्रद **(हवामहे)** दद्याम **(कुशिकासः)** विद्याविनयादिभिराप्ता निष्पन्नाः **(अवस्यवः)** य आत्मनो रक्षणादिकमिच्छवः॥९॥

अन्वयः-हे इन्द्र! कुशिकासोऽवस्यवो वयं **[**सुतस्य**]** पीतये यं प्रत्नं त्वां हवामहे स त्वमस्मानाह्वयः॥९॥

भावार्थः–नूतनेभ्यो विद्वद्भ्यः प्राक्तना विद्वांसः श्रेष्ठाः सन्तीति निश्चेतव्यमिति॥९॥

अत्रेन्द्रविद्वत्सोमगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विचत्वारिंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः–हे **(इन्द्र)** सुख के दाता! **(कुशिकासः)** विद्या और विनय आदिकों से श्रेष्ठ हुए **(अवस्यवः)** आप लोगों के आत्माओं की रक्षा की इच्छा करनेवाले हम लोग **(सुतस्य)** उत्तम प्रकार संस्कारयुक्त रस के **(पीतये)** पान करने के लिये जिस **(प्रत्नम्)** प्राचीन काल से सिद्ध **(त्वाम्)** आपको **(हवामहे)** देवें, वह आप हम लोगों को बुलाइये॥९॥

भावार्थः–नवीन विद्वानों से प्राचीन विद्वान् श्रेष्ठ हैं, ऐसा निश्चय करना चाहिये॥९॥

इस मन्त्र में इन्द्र, विद्वान् और सोम के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह वैयालीसवां सूक्त और छठा वर्ग समाप्त हुआ॥

अथाष्टर्चस्य त्रिचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ३ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४, ६ निचृत् त्रिष्टुप्। ५ भुरिक् त्रिष्टुप्। ७, ८ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्विषयमाह॥

अब आठ ऋचावाले तैंतालीसवे सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वानों के विषय को कहते हैं॥

आ या॑ह्यर्वाङुप॑ वन्धुरे॒ष्ठास्तवेद॑नु॒ प्र॒दिव॑: सोम॒पेय॑म्।
प्रि॒या सखा॑या॒ वि मु॒चोप॑ ब॒र्हिस्त्वामि॒मे ह॑व्य॒वाह॑ो हवन्ते॥ १॥

आ। या॒हि॒। अ॒र्वाङ्। उप॑। व॒न्धु॒रे॒ऽस्थाः। तव॑। इत्। अनु॑। प्र॒ऽदिव॑ः। सो॒म॒ऽपेय॑म्। प्रि॒या। सखा॑या। वि। मु॒च॒। उप॑। ब॒र्हिः। त्वाम्। इ॒मे। ह॒व्य॒ऽवाह॑ः। ह॒व॒न्ते॒॥ १॥

पदार्थः- (**आ**) (**याहि**) आगच्छ (**अर्वाङ्**) अर्वाचीनः (**उप**) (**वन्धुरेष्ठाः**) यो वन्धुरे बन्धने तिष्ठति सः (**तव**) (**इत्**) एव (**अनु**) पश्चात् (**प्रदिवः**) प्रकृष्टो द्यौः प्रकाशो येषान्ते (**सोमपेयम्**) सोमश्चासौ पेयश्च तम् (**प्रिया**) प्रसन्नताकरौ (**सखाया**) सखायौ अध्यापकोपदेशकौ (**वि**) (**मुच**) त्यज (**उप**) समीपे (**बर्हिः**) अन्तरिक्षे (**त्वाम्**) (**इमे**) (**हव्यवाहः**) ये हव्यं वहन्ति ते (**हवन्ते**) गृह्णन्ति॥ १॥

अन्वयः-हे विद्वंस्त्वमर्वाङ् सन् यस्तव वन्धुरेष्ठाः रथोऽस्ति तेन प्रदिवः सोमपेयमुपा याहि यौ प्रिया सखायाऽध्यापकोपदेशकौ तावुपायाहि। यद्बर्हिस्त्वामन्विमे तद्विमुच यान् हव्यवाह उप हवन्ते तैस्सहेद् दुःखं विमुच॥ १॥

भावार्थः-ये विद्याप्रकाशं प्राप्य विमानादीनि यानानि निर्माय तत्राऽग्न्यादिकं प्रयुज्यान्तरिक्षे गच्छन्ति ते प्रियाचारान् सखीन् प्राप्येव दारिद्र्यमुच्छिन्दन्ति॥ १॥

पदार्थः-हे विद्वज्जन! आप (**अर्वाङ्**) नीचे के स्थल में वर्त्तमान होकर जो (**तव**) आपके (**वन्धुरेष्ठाः**) बन्धन में वर्त्तमान रथ है उससे (**प्रदिवः**) उत्तम प्रकाशवाले (**सोमपेयम्**) पीने योग्य सोमलता के रस के (**उप, आ, याहि**) समीप आइये और जो (**प्रिया**) प्रसन्नता के करनेवाले (**सखाया**) मित्र, अध्यापक और उपदेशक हैं, उनके समीप प्राप्त हूजिये। जो (**बर्हिः**) अन्तरिक्ष में (**त्वाम्**) आपके (**अनु**) पीछे (**इमे**) ये हैं उनका (**वि, मुच**) त्याग कीजिये, जिनको (**हव्यवाहः**) हवनसामग्री धारण करनेवाले (**उप, हवन्ते**) ग्रहण करते हैं, उनके साथ (**इत्**) ही दुःख का त्याग कीजिये॥ १॥

भावार्थः-जो लोग विद्या के प्रकाश को प्राप्त हो विमानादि वाहनों के निर्माण और उसमें अग्नि आदि का प्रयोग करके अन्तरिक्ष में जाते हैं, वे प्रिय आचरण करनेवाले मित्रों को प्राप्त होकर दारिद्र्य का नाश करते हैं॥ १॥

अथ मित्रतागुणविषयमाह॥

अब मित्रता के गुण के विषय को अगले मन्त्र में कहते हैं॥

आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्याम्।
इमा हि त्वा मतयः स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः॥ २॥

आ। याहि। पूर्वीः। अति। चर्षणीः। आ। अर्यः। आऽशिषः। उप। नः। हरिऽभ्याम्। इमाः। हि। त्वा। मतयः। स्तोमऽतष्टाः। इन्द्र। हवन्ते। सख्यम्। जुषाणाः॥ २॥

पदार्थः–(**आ**) समन्तात् (**याहि**) गच्छ (**पूर्वीः**) पूर्वं भूताः (**अति**) (**चर्षणीः**) मनुष्यादिप्रजाः (**आ**) (**अर्य्यः**) स्वामी (**आशिषः**) आशीर्वादान् (**उप**) (**नः**) अस्मान् (**हरिभ्याम्**) वाय्वग्निभ्याम् (**इमाः**) वर्त्तमानाः (**हि**) यतः (**त्वा**) त्वाम् (**मतयः**) प्रज्ञाः (**स्तोमतष्टाः**) विस्तृतस्तुतयः (**इन्द्र**) बह्वैश्वर्यप्रद (**हवन्ते**) आददति (**सख्यम्**) मित्रत्वम् (**जुषाणाः**) सेवमानाः॥ २॥

अन्वयः–हे इन्द्र! या इमाः स्तोमतष्टाः सख्यं जुषाणा मतयस्त्वाऽऽहवन्ते ताभिः सह नोऽस्माना याहि। यथार्य्यश्चर्षणीः प्राप्याऽऽशिष उपलभते तथा ताः पूर्वीर्हि हरिभ्यामत्यायाहि॥ २॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा प्रज्ञया सर्वैः सह मित्रता स्यात्तमा युक्ताः सन्तः सर्वाशिषः प्राप्य सुखं सततं प्राप्नुत॥ २॥

पदार्थः–हे (**इन्द्र**) बहुत ऐश्वर्य्यों के देनेवाले! जो (**इमाः**) इन वर्त्तमान (**स्तोमतष्टाः**) विस्तारयुक्त स्तुतियों से विशिष्ट और (**सख्यम्**) मित्रता का (**जुषाणाः**) सेवन करती हुई (**मतयः**) बुद्धियां (**त्वा**) आपको (**आ, हवन्ते**) ग्रहण करती हैं, उनके साथ (**नः**) हम लोगों को (**आ**) सब प्रकार (**याहि**) प्राप्त हूजिये, जिस प्रकार (**अर्य्यः**) स्वामी (**चर्षणीः**) मनुष्य आदि प्रजाओं को प्राप्त होकर (**आशिषः**) आशीर्वादों को प्राप्त होता है, वैसे उन (**पूर्वीः**) प्राचीन काल में उत्पन्न हुई आशिषों को (**हि**) ही (**हरिभ्याम्**) वायु और अग्नि से (**अति, आ**) सब ओर से अत्यन्त प्राप्त हूजिये॥ २॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिस बुद्धि से सब लोगों के साथ मित्रता हो, उससे युक्त हुए सबके आशीर्वादों को प्राप्त होकर सुख को निरन्तर प्राप्त होइये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम्।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनाम्॥ ३॥

आ। नः। यज्ञम्। नमःऽवृधम्। सऽजोषाः। इन्द्र। देव। हरिऽभिः। याहि। तूयम्। अहम्। हि। त्वा। मतिऽभिः। जोहवीमि। घृतऽप्रयाः। सधऽमादे। मधूनाम्॥ ३॥

पदार्थः-**(आ)** समन्तात् **(नः)** अस्माकम् **(यज्ञम्)** प्रयत्नसाध्यम् **(नमोवृधम्)** अन्नाद्यैश्वर्य्यवर्धकम् **(सजोषाः)** समानप्रीतिसेवनाः **(इन्द्र)** ऐश्वर्य्ययोजक **(देव)** विद्वन्! **(हरिभिः)** अश्वैरिव वह्न्यादिभिः **(याहि)** गच्छ **(तूयम्)** तूर्णम् **(अहम्)** **(हि)** **(त्वा)** त्वाम् **(मतिभिः)** प्रज्ञाभिः **(जोहवीमि)** भृशं प्रशंसाम्याह्वयामि वा **(घृतप्रयाः)** यो घृतेन प्रीणाति सः **(सधमादे)** समानस्थाने **(मधूनाम्)** मधुरादिगुणयुक्तानां पदार्थानाम्॥३॥

अन्वयः-हे देवेन्द्र! घृतप्रया अहं मतिभिर्मधूनां सधमादे हि त्वा जोहवीमि तस्मात् सजोषास्त्वं हरिभिर्नो नमोवृधं यज्ञं तूयमायाहि॥३॥

भावार्थः-मनुष्यैस्तेषामेव प्रशंसा कार्य्या ये सर्वेषां सुखं वर्द्धयेयुः॥३॥

पदार्थः-हे **(देव)** विद्वन् **(इन्द्र)** ऐश्वर्य से युक्त करनेवाले! **(घृतप्रयाः)** घृत से प्रसन्न होनेवाला **(अहम्)** मैं **(मतिभिः)** बुद्धियों से **(मधूनाम्)** और मधुर आदि गुणों से युक्त पदार्थों के **(सधमादे)** तुल्य स्थान में **(हि)** जिससे कि **(त्वा)** आपकी **(जोहवीमि)** प्रशंसा करता वा बुलाता हूँ इससे **(सजोषाः)** तुल्य प्रीति के सेवनेवाले आप **(हरिभिः)** घोड़ों के सदृश अग्नि आदिकों से **(नः)** हम लोगों के **(नमोवृधम्)** अन्न आदि ऐश्वर्य्य के बढ़ानेवाले **(यज्ञम्)** प्रयत्न से सिद्ध होने योग्य सङ्गत व्यवहार के प्रति **(तूयम्)** शीघ्र **(आ)** सब प्रकार **(याहि)** प्राप्त हूजिये॥३॥

भावार्थः-मनुष्यों को उन लोगों की ही प्रशंसा करनी चाहिये कि जो सबके सुखों की वृद्धि करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ च॒ त्वाम्ए॒ता वृष॑णा॒ वहा॑तो॒ हरी॒ सखा॑या सु॒धुरा॒ स्वङ्गा॑।
धा॒नाव॒दिन्द्रः॒ सव॑नं जुषा॒णः सखा॒ सख्युः॑ शृणव॒द्वन्द॑नानि॥४॥

आ। च॒। त्वाम्। ए॒ता। वृष॑णा। वहा॑तः। हरी॒ इति॑। सखा॑या। सु॒ऽधुरा॑। सु॒ऽअङ्गा॑। धा॒नाऽव॑त्। इन्द्रः॑। सव॑नम्। जु॒षा॒णः। सखा॑। सख्युः॑। शृ॒ण॒व॒त्। वन्द॑नानि॥४॥

पदार्थः-**(आ)** **(च)** **(त्वाम्)** **(एता)** प्राप्तौ **(वृषणा)** वृष्टिकरौ वायुविद्युतौ **(वहातः)** प्राप्नुतः **(हरी)** हरणशीलावश्वाविव **(सखाया)** सुहृदाविव वर्त्तमानौ **(सुधुरा)** शोभना धुरो ययोस्तौ **(स्वङ्गा)** शोभनान्यङ्गानि ययोस्तौ **(धानावत्)** परिपक्वा धाना विद्यन्ते यस्मिँस्तत् **(इन्द्रः)** परमैश्वर्यप्रदः **(सवनम्)** ऐश्वर्यम् **(जुषाणः)** सेवमानः **(सखा)** सुहृत् **(सख्युः)** मित्रस्य **(शृणवत्)** शृणुयात् **(वन्दनानि)** अभिवादनानि स्तवनानि वा॥४॥

अन्वयः-हे विद्वन्! यथा धानावत्सवनं जुषाण इन्द्रस्सखा सख्युर्वन्दनानि शृणवत्स्वङ्गा सखाया इव सुधुरा वृषणा त्वामेता हरी सर्वानावहातश्च तथा त्वं सर्वेषां वचांसि शृणु प्रियाणि कार्य्याणि साध्नुहि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव सखायो भवितुमर्हन्ति ये महद्दुःखमपि प्राप्य सखीन् न जहति यथा द्वावनेका वाऽश्वाः सङ्गता भूत्वाऽभीष्टानि स्थानानि गमयन्ति तथैव स्वात्मवत्प्रिया जना इच्छासिद्धिं प्राप्नुवन्ति॥४॥

पदार्थः-हे विद्वन्! पुरुष! जैसे **(धानावत्)** पकाये हुए यवों से युक्त **(सवनम्)** ऐश्वर्य्य का **(जुषाणः)** सेवन करता हुआ **(इन्द्रः)** अत्यन्त ऐश्वर्य्य का देनेवाला **(सखा)** मित्र पुरुष **(सख्युः)** मित्र के अभिवादन आदि वा स्तुतियों को **(शृणवत्)** सुने और **(स्वङ्गा)** सुन्दर अङ्गों से विशिष्ट **(सखाया)** मित्रों के तुल्य वर्त्तमान तथा **(सुधुरा)** उत्तम धुरों से युक्त **(वृषणा)** वृष्टि करनेवाले वायु और बिजुली **(त्वाम्)** आपको **(एता)** प्राप्त हुए **(हरी)** ले चलनेवाले घोड़ों के सदृश सबको **(आ, वहातः)** प्राप्त होते हैं, वैसे आप लोगों के वचनों को सुनिये और प्रिय कार्य्यों को सिद्ध कीजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे लोग ही मित्र होने योग्य हैं कि जो बड़े दुःख को प्राप्त होकर भी मित्रों का त्याग नहीं करते और जैसे दो वा बहुत घोड़े इकट्ठे होकर यथेष्ट स्थानों में पहुँचाते हैं, वैसे अपने आत्मा के सदृश प्रिय जन इच्छा की सिद्धि को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन्।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः॥५॥

कुवित्। मा। गोपाम्। करसे। जनस्य। कुवित्। राजानम्। मघऽवन्। ऋजीषिन्। कुवित्। मा। ऋषिम्। पपिऽवांसम्। सुतस्य। कुवित्। मे। वस्वः। अमृतस्य। शिक्षाः॥५॥

पदार्थः-(**कुवित्**) महान्तम् (**मा**) माम् (**गोपाम्**) धार्मिकाणां रक्षकम् (**करसे**) कुर्य्याः (**जनस्य**) (**कुवित्**) महान्तम् (**राजानम्**) (**मघवन्**) परमपूजितधनयुक्त (**ऋजीषिन्**) ऋजुभावमिच्छन् (**कुवित्**) महान्तम् (**मा**) माम्। अत्र **ऋत्यक** इति ह्रस्वो भूत्वा प्रकृतिभावः। (**ऋषिम्**) सकलवेदमन्त्रार्थवेत्तारम् (**पपिवांसम्**) पीतवन्तम् (**सुतस्य**) निष्पादितस्य सोमस्य रसम् (**कुवित्**) महतः (**मे**) मम (**वस्वः**) धनस्य (**अमृतस्य**) नाशरहितस्य (**शिक्षाः**) शिक्षस्व। अत्र व्यत्ययेन परस्मैपदम्॥५॥

अन्वयः-हे विद्वन्! यस्त्वं जनस्य कुविद् गोपां मा करसे। हे मघवन्नृजीषिन्! यस्त्वं जनस्य कुविद्राजानं करसे सुतस्य पपिवांसं कुविदृषिं मा शिक्षाः कुविदमृतस्य मे वस्वः करसे तं त्वां वयं भजामहे॥५॥

भावार्थः-हे मनुष्या! ये युष्मान् विद्याविनयसुशिक्षादानेन महतो राज्ञः कुर्वन्ति वेदार्थं विज्ञाप्य मोक्षं साधयन्ति तान् यूयं स्वात्मवत्प्रीणीत॥५॥

पदार्थः-हे विद्वज्जन! जो आप **(जनस्य)** सब लोगों के **(कुवित्)** श्रेष्ठ **(गोपाम्)** धार्मिक पुरुषों के रक्षा करनेवाले **(मा)** मुझको **(करसे)** करें। हे **(मघवन्)** परम प्रशंसनीय धनयुक्त **(ऋजीषिन्)** कोमलपन को चाहनेवाले! जो आप जनसमूह का **[(कुवित्)** श्रेष्ठ**]** **(राजानम्)** राजा करें, वह **(सुतस्य)** उत्पन्न किये हुए सोम के रस को **(पपिवांसम्)** पीते हुए **(कुवित्)** श्रेष्ठ **(ऋषिम्)** सम्पूर्ण वेदों के अर्थ के जाननेवाले होने की **(मा)** मुझ को **(शिक्षाः)** शिक्षा दीजिये और आप **(कुवित्)** श्रेष्ठ **(अमृतस्य)** नाश से रहित **(मे)** मेरे **(वस्वः)** धन को करें, उन आपकी हम लोग सेवा करें॥५॥

भावार्थः-हे मनुष्यो! जो लोग आप लोगों को विद्या, विनय और उत्तम शिक्षादान से बड़े राजा करते और वेद के अर्थों को समझा के मोक्ष सिद्ध करते हैं, उनको आप अपने आत्मा के सदृश प्रसन्न करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूराः॥६॥

आ। त्वा। बृहन्तः। हरयः। युजानाः। अर्वाक्। इन्द्र। सधऽमादः। वहन्तु। प्र। ये। द्विता। दिवः। ऋञ्जन्ति। आताः। सुऽसंमृष्टासः। वृषभस्य। मूराः॥६॥

पदार्थः-**(आ)** समन्तात् **(त्वा)** त्वाम् **(बृहन्तः)** महान्तः **(हरयः)** सुशिक्षतास्तुरङ्गा इवाऽग्न्यादयः **(युजानाः)** समादधानाः **(अर्वाक्)** योऽर्वागञ्चति **(इन्द्र)** परमपूजनीय **(सधमादः)** समानस्थानाः **(वहन्तु)** प्राप्नुवन्तु **(प्र)** **(ये)** **(द्विता)** द्वयोर्भावः **(दिवः)** विद्याप्रकाशमानान् **(ऋञ्जन्ति)** साध्नुवन्ति **(आताः)** व्याप्ता दिशः। **आता इति दिङ्नामसु पठितम्।** (निघं १.६) **(सुसंमृष्टासः)** श्रेष्ठरीत्या सम्यक् शुद्धः **(वृषभस्य)** बलिष्ठस्य **(मूराः)** मूढाः॥६॥

अन्वयः-हे इन्द्र! ये बृहन्तो युजाना सधमादो हरय इव त्वाऽऽवहन्तु द्विता दिव ऋञ्जन्ति सुसंमृष्टास आता इव वृषभस्य वेगं प्र वहन्तु तैर्ये मूरा मूढाः स्युस्तानर्वाक् त्वमावह॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसोऽश्वा इवाऽभीष्टस्थाने मूढान् प्रापयन्ति ते समग्रमृद्धिं साद्धुं शक्नुवन्ति॥६॥

पदार्थः-हे **(इन्द्र)** अत्यन्त सेवा करने योग्य विद्वान्! **(ये)** जो **(बृहन्तः)** बड़े **(युजानाः)**

समाधान देते हुए (**सधमादः**) समान स्थानवाले (**हरयः**) उत्तम प्रकार शिक्षित घोड़ों के सदृश अग्नि आदि पदार्थ (**त्वा**) आपको (**आ**) सब प्रकार (**वहन्तु**) एक स्थान से दूसरे स्थान को पहुँचावे और वे तथा (**द्विता**) दो-दो पदार्थों का होना जैसे वैसे विद्वान् (**दिवः**) विद्याओं से प्रकाशमानों को (**ऋञ्जन्ति**) सिद्ध करते हैं (**सुसंमृष्टासः**) वा श्रेष्ठ रीति से उत्तम प्रकार शुद्ध किये हुए (**आताः**) व्याप्त हुईं दिशाओं के सदृश (**वृषभस्य**) बलवान् पदार्थ के वेग को (**प्र, वहन्तु**) प्राप्त हों उनसे जो (**मूराः**) मूढ़ होवें, उन पुरुषों को (**अर्वाक्**) नीचे के स्थल में आप पहुँचाइये॥६॥

भावार्थः-इस मन्त्र में वाचकलप्तोपमालङ्कार है। जो विद्वान् लोग घोड़ों के सदृश अभीष्ट स्थान में मूढ़ों को पहुँचाते हैं, वे सम्पूर्ण समृद्धि सिद्ध कर सकते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार।
यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ॥७॥

इन्द्र। पिब। वृषऽधूतस्य। वृष्णः। आ। यम्। ते। श्येनः। उशते। जभार। यस्य। मदे। च्यवयसि। प्र। कृष्टीः। यस्य। मदे। अप। गोत्रा। ववर्थ॥७॥

पदार्थः-(**इन्द्र**) विशेषैश्वर्य्यप्रद! (**पिब**) (**वृषधूतस्य**) वृषा बलिष्ठाः पदार्था धूताः कम्पिता येन तस्य (**वृष्णः**) बलिष्ठस्य (**आ**) (**यम्**) (**ते**) तुभ्यम् (**श्येनः**) एतत् पक्षीव (**उशते**) कामयमानाय (**जभार**) धरति (**यस्य**) (**मदे**) आनन्दे (**च्यावयसि**) प्रापयसि (**प्र**) (**कृष्टीः**) मनुष्यान् (**यस्य**) (**मदे**) आनन्दे (**अप**) (**गोत्रा**) पृथिवी (**ववर्थ**) वर्त्तते॥७॥

अन्वयः-हे इन्द्र! त्वं वृषधूतस्य वृष्णो रसं पिब श्येन इव यमुशते [ते] तुभ्यं यमा जभार यस्य मदे त्वं कृष्टीः प्र च्यावयसि। यस्य मदे गोत्रा अप ववर्थ तं स्वात्मवत्सेवस्व॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये श्येनवत्सद्योगामिनः सर्वस्य सुखं कामयमाना मनुष्यान् सुखयन्ति तेषां सन्निधौ स्थित्वा विद्याव्यवहाराऽऽनन्दं प्राप्नुत॥७॥

पदार्थः-हे (**इन्द्रः**) विशेष ऐश्वर्य के देनेवाले! आप (**वृषधूतस्य**) बलिष्ठ पदार्थों के कंपानेवाले (**वृष्णः**) बलिष्ठ पदार्थ के रस का (**पिब**) पान करो (**श्येनः**) वाज पक्षी के सदृश (**यम्**) जिसकी (**उशते**) कामना करनेवाले (**ते**) आपके लिये जिसको (**आ, जभार**) धारण करता है (**यस्य**) जिसके (**मदे**) आनन्द में आप (**कृष्टीः**) मनुष्यों को (**प्र, च्यावयसि**) प्राप्त कराते हैं और (**यस्य**) जिसके (**मदे**) आनन्द के निमित्त (**गोत्रा**) पृथिवी (**अप, ववर्थ**) वर्त्तमान है, उसकी अपने तुल्य सेवा करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो श्येन पक्षी के सदृश शीघ्र

चलने और सबके सुख की कामना करनेवाले पुरुष मनुष्यों को सुख देते हैं, उन लोगों के समीप वर्त्तमान होकर विद्यासम्बन्धी व्यवहार के आनन्द को प्राप्त होओ॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।

शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥८॥७॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥८॥

पदार्थः-(**शुनम्**) महौषधिसेवनजन्यं सुखम् (**हुवेम**) आदद्याम (**मघवानम्**) सकलविद्या-जनितारम् (**इन्द्रम्**) अविद्यादिक्लेशविदर्त्तारम् (**अस्मिन्**) (**भरे**) देवासुरविद्वदविद्वत्संग्रामे (**नृतमम्**) अतिशयेन विद्याया: प्रापकम् (**वाजसातौ**) ज्ञानाऽज्ञानयोर्विभागे (**शृण्वन्तम्**) सम्यक् परीक्षां कुर्वन्तम् (**उग्रम्**) उत्कृष्टस्वभावम् (**ऊतये**) विद्यादिशुभगुणप्रवेशाय (**समत्सु**) धार्मिकाऽधार्मिकविरोधाख्येषु युद्धेषु (**घ्नन्तम्**) विरोधं विनाशयन्तम् (**वृत्राणि**) धनानि (**सञ्जितम्**) जयशीलम् (**धनानाम्**) ऐश्वर्य्याणाम्॥८॥

अन्वयः-हे मनुष्या! यथाऽस्मिन् वाजसातौ भर ऊतये समत्सु घ्नन्तं धनानां सञ्जितं वृत्राणि शृण्वन्तमुग्रं मघवानं नृतममिन्द्रं प्राप्य शुनं हुवेम तथैतं प्राप्याऽऽनन्दं लभध्वम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्वच्छरणं प्राप्याऽविद्यादारिद्र्ये हत्वा विद्याश्रियौ जनयित्वा सततमानन्दो वर्द्धनीय इति॥८॥

अथेन्द्रविद्वत्सखिसोमपानादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिचत्वारिंशत्तमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे (**अस्मिन्**) इस (**वाजसातौ**) ज्ञान और अज्ञान के विभाग और (**भरे**) विद्वान् और अविद्वान् के संग्राम में (**ऊतये**) विद्या आदि उत्तम गुणों में प्रवेश होने के लिये (**समत्सु**) धार्मिक और अधार्मिकों के विरोधनामक युद्धों में (**घ्नन्तम्**) विरोध का नाश करते हुए (**धनानाम्**) ऐश्वर्य्यों के (**सञ्जितम्**) जीतने का स्वभाव रखनेवाले (**वृत्राणि**) धनों की (**शृण्वन्तम्**) उत्तम प्रकार परीक्षा करते हुए (**उग्रम्**) उत्तम स्वभावयुक्त (**मघवानम्**) सम्पूर्ण विद्याओं के उत्पन्न करने (**नृतमम्**) अतिशय करके विद्या के प्राप्त कराने और (**इन्द्रम्**) अविद्या आदि क्लेशों के नाश करनेवाले को प्राप्त होकर (**शुनम्**) महौषधियों के सेवन से उत्पन्न हुए सुख को (**हुवेम**) ग्रहण करें, वैसे इसको प्राप्त होकर आनन्द को प्राप्त हूजिये॥८॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि विद्वानों के शरण को पहुँच कर अविद्या और दारिद्र्य का नाश तथा विद्या और लक्ष्मी को उत्पन्न कर निरन्तर आनन्द बढ़ावें॥८॥

इस सूक्त में विद्वान्, सखि और सोमपानादिकों के गुणवर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेंतालीसवां सूक्त और सातवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य चतुश्चत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, २ निचृद्बृहती। ३, ५ बृहती छन्दः। मध्यमः स्वरः। ४ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ सूर्य्यविषयमाह॥

अब पाँच ऋचावाले चवालीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में सूर्य्य के विषय को कहते हैं॥

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम्॥ १॥

अयम्। ते। अस्तु। हर्यतः। सोमः। आ। हरिऽभिः। सुतः। जुषाणः। इन्द्र। हरिऽभिः। नः। आ। गहि। आ। तिष्ठ। हरितम्। रथम्॥ १॥

पदार्थः-(**अयम्**) (**ते**) तव (**अस्तु**) (**हर्यतः**) कामयमानस्य (**सोमः**) ऐश्वर्य्यवृन्दः (**आ**) (**हरिभिः**) अश्वैरिव साधनैः (**सुतः**) प्राप्तः (**जुषाणः**) सेवमानः (**इन्द्र**) परमैश्वर्य्यमिच्छो (**हरिभिः**) हरणशीलैरश्वैः (**नः**) अस्मान् (**आ**) (**गहि**) आगच्छ (**आ**) (**तिष्ठ**) (**हरितम्**) अग्न्यादिभिर्वाहितम् (**रथम्**) रमणीयं यानम्॥ १॥

अन्वयः-हे इन्द्र! हर्यतस्ते हरिभिर्योऽयं सोमः सुतोऽस्तु तं जुषाणः सन् हरिभिर्हरितं रथमातिष्ठानेन नोऽस्मानागहि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव दयालवः सन्ति येऽन्येषामैश्वर्यवृद्धिमिच्छेयुरैश्वर्यवत आगतान् दृष्ट्वा प्रसन्ना भवेयुः॥ १॥

पदार्थः-हे (**इन्द्र**) परम ऐश्वर्य की इच्छा करनेवाले! (**हर्यतः**) कामना करते हुए (**ते**) आपके (**हरिभिः**) घोड़ों के सदृश साधनों से जो (**अयम्**) यह (**सोमः**) ऐश्वर्यों का समूह (**सुतः**) प्राप्त हुआ (**अस्तु**) हो उसका (**जुषाणः**) सेवन करता हुआ (**हरिभिः**) ले चलनेवाले घोड़ों से (**हरितम्**) अग्नि आदिको से चलाये गये (**रथम्**) मनोहर यान पर (**आ, तिष्ठ**) स्थिर हूजिये इससे (**नः**) हम लोगों को (**आ, गहि**) प्राप्त हूजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही लोग दयालु हैं कि जो अन्य जनों के ऐश्वर्य की वृद्धि की इच्छा करें और ऐश्वर्यवालों को आते हुए देख के प्रसन्न होवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः।
विद्वाँश्चिकित्वान् हर्यश्व वर्द्धस इन्द्र विश्वा अभि श्रियः॥ २॥

हर्यन्। उषसम्। अर्चयः। सूर्यम्। हर्यन्। अरोचयः। विद्वान्। चिकित्वान्। हरिऽअश्व। वर्धसे। इन्द्र। विश्वाः। अभि। श्रियः॥ २॥

पदार्थः-(**हर्यन्**) कामयमानः (**उषसम्**) प्रत्यूषकालमिव सत्पुरुषान् (**अर्चयः**) सत्कुरु (**सूर्यम्**) सवितारमिव न्यायम् (**हर्यन्**) प्राप्नुवन् प्रापयन् (**अरोचयः**) रोचय (**विद्वान्**) (**चिकित्वान्**) ज्ञानवान् (**हर्य्यश्व**) हर्याः कामयमाना अश्वा आशुगामिनोऽग्न्यादयस्तुरङ्गा वा यस्य तत्सम्बुद्धौ (**वर्धसे**) (**इन्द्र**) धनमिच्छुक (**विश्वाः**) सर्वाः (**अभि**) आभिमुख्ये (**श्रियः**) शोभाः सम्पत्तयः॥ २॥

अन्वयः-हे हर्यन्नुषसं सूर्य्य इव सत्पुरुषांस्त्वमर्चयः। हे हर्यन्! सूर्य्यं विद्युदिव न्यायमरोचयः। हे हर्य्यश्वेन्द्र! यतश्चिकित्वान् [विद्वान्]त्सन् विश्वा अभिश्रियः प्राप्तुमिच्छसि तस्माद्वर्धसे॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या उषर्वद्विद्याप्रकाशाभिमुखाः सूर्यवद्धर्माचरणं कामयमानाः सन्तः प्रयत्नेनैश्वर्य्यमिच्छेयुस्ते सर्वथा श्रीमन्तो भूत्वा सततं वर्धन्ते॥ २॥

पदार्थः-हे (**हर्यन्**) कामना करनेवाले! (**उषसम्**) प्रातःकाल को सूर्य के सदृश सत्पुरुषों का आप (**अर्चयः**) सत्कार करिये और हे (**हर्यन्**) अनेक पदार्थों को प्राप्त होने वा प्राप्त करानेवाले! (**सूर्यम्**) सूर्य को बिजुली जैसे वैसे न्याय का (**अरोचयः**) प्रकाश करो और हे (**हर्यश्व**) कामना करते हुए शीघ्र चलनेवाले अश्व वा अग्नि आदि पदार्थों से युक्त (**इन्द्र**) धन की इच्छा करनेवाले! जिससे (**चिकित्वान्**) ज्ञानवान् (**विद्वान्**) विद्वान् होते हुए (**विश्वाः**) सम्पूर्ण (**अभि**) सम्मुख वर्त्तमान (**श्रियः**) सुन्दर सम्पत्तियों को प्राप्त होने की इच्छा करते हो इससे (**वर्धसे**) वृद्धि को प्राप्त होते हो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य प्रातःकाल के सदृश विद्याओं के प्रकाश में तत्पर और सूर्य के सदृश धर्माचरण की कामना करते हुए प्रयत्न से ऐश्वर्य्य की इच्छा करें, वे सब प्रकार लक्ष्मीयुक्त होकर निरन्तर वृद्धि को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम्।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत्॥ ३॥

द्याम्। इन्द्रः। हरिऽधायसम्। पृथिवीम्। हरिऽवर्पसम्। अधारयत्। हरितोः। भूरि। भोजनम्। ययोः। अन्तः। हरिः। चरत्॥ ३॥

पदार्थः-(**द्याम्**) प्रकाशम् (**इन्द्रः**) विद्युत् सूर्य्यो वा (**हरिधायसम्**) या हरीन् किरणान् दधाति ताम् (**पृथिवीम्**) भूमिम् (**हरिवर्पसम्**) हरयः किरणा वर्पसो रूपस्य प्रकाशका यस्यास्ताम् (**अधारयत्**)

धारयति (**हरितोः**) हरणशीलयोर्गुणयोः (**भूरि**) बहु (**भोजनम्**) पालनं भक्षणं वा (**ययोः**) (**अन्तः**) मध्ये (**हरिः**) हरणशीलो वायुः (**चरत्**) चरति॥३॥

अन्वयः-हे विद्वन्! यथेन्द्रो हरिधायसं द्यां हरिवर्पसं पृथिवीमधारयद् यथा हरिर्वायुर्ययो-र्हरितोरन्तर्वर्त्तमानः सन् भूरि भोजनं चरत्तथा त्वं भव॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवन्नियमेन धर्म्यकार्याणि साध्नुवन्ति वायुरिव सततं प्रयत्नं कुर्वन्ति ते बह्वैश्वर्यं लब्ध्वाऽऽनन्दन्ति॥३॥

पदार्थः-हे विद्वन् पुरुष! जैसे (**इन्द्रः**) बिजुली वा सूर्य (**हरिधायसम्**) किरणों को धारण करने वा (**द्याम्**) प्रकाश लोक और (**हरिवर्पसम्**) जिसके रूप का प्रकाश करनेवाली किरणें विद्यमान उस (**पृथिवीम्**) पृथिवी को (**अधारयत्**) धारण करता है और जैसे (**हरिः**) हरनेवाला वायु (**ययोः**) जिन (**हरितोः**) हरनेवाले गुणों के (**अन्तः**) मध्य में वर्त्तमान हुआ (**भूरि**) बहुत (**भोजनम्**) पालन वा भक्षण का (**चरत्**) आचरण करता है, वैसे आप हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सूर्य के सदृश नियमपूर्वक धर्मयुक्त कर्मों को सिद्ध करते और वायु के सदृश निरन्तर प्रयत्न करते हैं, वे बहुत ऐश्वर्य को प्राप्त होकर आनन्दित होते हैं॥३॥

अथविद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

ज॒ज्ञा॒नो हरि॑तो॒ वृषा॒ विश्व॒मा भा॑ति रोच॒नम्।
हर्य॑श्वो॒ हरि॑तं॒ धत्त॒ आयु॑धमा॒ वज्रं॑ बा॒ह्वोर्हरि॑म्॥४॥

ज॒ज्ञा॒नः। हरि॑तः। वृषा॑। विश्व॑म्। आ। भा॒ति॒। रो॒च॒नम्। हरि॑ऽअश्वः। हरि॑तम्। ध॒त्ते॒। आयु॑धम्। आ। वज्र॑म्। बा॒ह्वोः। हरि॑म्॥४॥

पदार्थः-(**जज्ञानः**) जायमानः (**हरितः**) हरितादिवर्णः (**वृषा**) वृष्टिकरः (**विश्वम्**) (**आ**) (**भाति**) (**रोचनम्**) रोचन्ते यस्मिँस्तत् (**हर्यश्वः**) हर्याः कामयमाना आशुगामिनो गुणा यस्य विद्युद्रूपस्य सः (**हरितम्**) कमनीयम् (**धत्ते**) धरति (**आयुधम्**) समन्तात् युध्यन्ति येन तत् (**आ**) (**वज्रम्**) शस्त्रमिव किरणसमूहम् (**बाह्वोः**) भुजयोः (**हरिम्**) हरणशीलम्॥४॥

अन्वयः-हे विद्वांसो! यो जज्ञानो हरितो हर्यश्वो वृषा हरितं रोचनं विश्वं बाह्वोर्हरितं वज्रमायुधमिवाऽऽधत्त आ भाति तं विज्ञायोपयुञ्जत॥४॥

भावार्थः-विद्वांसो यथा प्रसिद्धः सूर्यः सर्वं जगत् प्रकाश्य रोचयति तथैव सद्विद्योपदेशेन धर्मं रोचयन्तु॥४॥

पदार्थः-हे विद्वान् लोगो! जो **(जज्ञानः)** उत्पन्न होता हुआ **(हरितः)** हरित आदि वर्णों से युक्त **(हर्यश्वः)** कामना करते हुए शीघ्र चलनेवाले गुण हैं जिस बिजुली रूप के वह **(वृषा)** वृष्टिकारक **(हरितम्)** कामना करने योग्य **(रोचनम्)** और सब ओर से जिसमें प्रीति करते हैं ऐसे **(विश्वम्)** सम्पूर्ण लोक को **(बाह्वोः)** भुजाओं के **(हरितम्)** हरनेवाले **(वज्रम्)** शस्त्रों के सदृश किरणों के समूह को **(आ, धत्ते)** धारण करता और **(आ, भाति)** प्रकाशित होता है, उसको जान कर उपयोग करो॥४॥

भावार्थः-विद्वान् लोग जैसे प्रसिद्ध सूर्य्य सम्पूर्ण जगत् को प्रकाशित करके आप प्रकाशित होता है, वैसे ही सद्विद्या के उपदेश से धर्म का प्रकाश करावें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॑ हर्यन्तमर्जुनं॑ वज्रं॑ शुक्रै॒रभीवृ॑तम्।
अपा॑वृणो॒द्धरि॑भि॒रद्रि॑भिः सु॒तमुद्गा हरि॑भिराजत॥५॥८॥

इन्द्रः॑। ह॒र्यन्त॑म्। अर्जु॑नम्। वज्र॑म्। शु॒क्रैः॑। अ॒भिऽवृ॑तम्। अप॑। अ॒वृ॒णो॒त्। हरि॑ऽभिः। अद्रि॑ऽभिः। सु॒तम्। उत्। गाः॑। हरि॑ऽभिः। आ॒ज॒त॒॥५॥

पदार्थः-**(इन्द्रः)** सूर्य्यः **(हर्यन्तम्)** कामयन्तम् **(अर्जुनम्)** रूपम्। **अर्जुनमिति रूपनामसु पठितम्।** (निघं०३.७) **(वज्रम्)** किरणसमूहम् **(शुक्रैः)** आशुकरैर्गुणैः **(अभीवृतम्)** अभितो वृतं युक्तम् **(अप) (अवृणोत्)** दूरीकरोति **(हरिभिः)** हरणशीलैः किरणैः **(अद्रिभिः)** मेघैः **(सुतम्)** सिद्धम् **(उत्) (गाः)** पृथिवी **(हरिभिः)** मनुष्यैः सह राजा। **हरय इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(आजत)** प्रक्षिपति॥५॥

अन्वयः-हे विद्वांसो! यथेन्द्रः शुक्रैरभीवृतमर्जुनं वज्रं हर्यन्तं हरिभिरद्रिभिः सुतमपावृणोत् तथा हरिभिः सह राजा गा इवोदाजत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवद्विद्याविनयसेनाधनादिकं प्रकाश्याऽविद्यादि निवर्त्य सुसहायेन राज्ञा सहाऽऽमन्त्र्य राज्यं पालयन्ति ते पूर्णकामा भवन्तीति॥५॥

अत्र सूर्य्यविद्युद्वायुविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुश्चत्वारिंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् लोगो! जैसे **(इन्द्रः)** सूर्य्य **(शुक्रैः)** शीघ्रता करनेवाले गुणों से **(अभीवृतम्)** सब ओर से युक्त **(अर्जुनम्)** रूप और **(वज्रम्)** किरणों के समूह की **(हर्यन्तम्)** कामना करते हुए **(हरिभिः)** हरनेवाली किरणों और **(अद्रिभिः)** मेघों से **(सुतम्)** सिद्ध हुए पदार्थ को **(अप, अवृणोत्)** दूर

करता है, वैसे **(हरिभिः)** मनुष्यों के साथ राजा **(गाः)** पृथिवियों के तुल्य और पदार्थों को **(उत् आजत)** फेंकता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सूर्य्य के सदृश विद्या, नम्रता, सेना और धन आदि का प्रकाश और अविद्या आदि की निवृत्ति कर जिसका उत्तम सहाय उस राजा के साथ सलाह करके राज्य का पालन करते हैं, वे पूर्ण मनोरथवाले होते हैं॥५॥

इस सूक्त में सूर्य्य, बिजुली, वायु और विद्वान् के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चवालीसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य पञ्चचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, २ निचृद्बृहती। ३, ५ बृहती छन्दः। मध्यमः स्वरः। ४ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ विद्वद्विषयमाह॥

अब पाँच ऋचावाले पैंतीलीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः।
मा त्वा केचिन्नि यमन् विं न पाशिनोऽति धन्वेव ताँ इहि॥ १॥

आ। मन्द्रैः। इन्द्र। हरिऽभिः। याहि। मयूररोमऽभिः। मा। त्वा। के। चित्। नि। यमन्। विम्। न। पाशिनः। अति। धन्वऽइव। तान्। इहि॥ १॥

पदार्थः-(**आ**) (**मन्द्रैः**) आनन्दप्रदैः (**इन्द्र**) परमैश्वर्य्ययुक्त (**हरिभिः**) प्रयत्नवद्भिर्मनुष्यैरिवाऽश्वैः किरणैर्वा (**याहि**) आगच्छ (**मयूररोमभिः**) मयूराणां लोमानीव लोमानि येषान्तैः (**मा**) निषेधे (**त्वा**) त्वाम् (**के**) (**चित्**) अपि (**नि**) नितराम् (**यमन्**) यच्छन्तु (**विम्**) पक्षिणम् (**न**) इव (**पाशिनः**) पाशवन्तो बन्धनाय प्रवृत्ताः (**अति**) (**धन्वेव**) यथा शस्त्रविशेषः (**तान्**) (**इहि**) गच्छ॥ १॥

अन्वयः-हे इन्द्र! त्वं मयूररोमभिर्मन्द्रैर्हरिभिरायाहि यतः केचित्वा पाशिनो विं न मा नि यमन् धन्वेव तानतीहि॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। राजपुरुषैस्तादृश्या सेनया तादृशैर्यानैर्युद्धादि-व्यवहारसिद्धये गन्तुमतिचातुर्य्येण संग्रामं कृत्वा विजयो लब्धव्यो येन केचित्तान्न निगृह्णीयुस्तथाऽनुष्ठातव्यम्॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त! आप (**मयूररोमभिः**) मयूरों के रोमों के सदृश रोम हैं जिनके उन (**मन्द्रैः**) आनन्द को देनेवाले (**हरिभिः**) प्रयत्नवान् मनुष्यों के सदृश घोड़ों वा किरणों से (**आ, याहि**) आओ जिससे (**के, चित्**) कोई लोग (**त्वा**) आपको (**पाशिनः**) बन्धन के लिये प्रवृत्त हुए (**विम्**) पक्षी को (**न**) तुल्य (**मा**) नहीं (**नि**) अत्यन्त (**यमन्**) निग्रह क्लेश देवें, किन्तु (**धन्वेव**) शस्त्र विशेष धनुष् के तुल्य (**तान्**) उनको (**अति, इहि**) अतिक्रमण कर प्राप्त हूजिये॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। राजपुरुषों को चाहिये कि ऐसी सेना, ऐसे रथ आदि कि जिनसे युद्धादि व्यवहारसिद्धि के लिये जाने को अति चतुराई के साथ संग्राम करके विजय पावें और जिससे और जन उनको ग्रहण न करें, ऐसा उपाय करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वृत्रखादो वलंरुजः पुरां दर्मो अपामजः।

स्थाता॒ रथ॑स्य॒ हर्यो॑रभिस्व॒र इन्द्रो॑ दृ॒ळ्हा चि॑दारु॒जः॥ २॥

वृ॒त्र॒ऽख॒ा॒दः। व॒ल॒म्ऽरु॒जः। पु॒रा॒म्। दर्मः। अ॒पा॒म्। अ॒जः। स्थाता॑। रथ॑स्य। हर्यो॑:। अ॒भि॒ऽस्व॒रे। इन्द्रः॑। दृ॒ळ्हा। चि॒त्। आ॒ऽरु॒जः॥ २॥

पदार्थः-(**वृत्रखादः**) यो वृत्रं मेघं खादति किरणो वायुर्वा (**वलंरुजः**) यो वलं मेघं रुजति (**पुराम्**) शत्रूणां नगराणाम् (**दर्मः**) दृणुयास्म (**अपाम्**) जलानाम् (**अजः**) प्रेरकः (**स्थाता**) (**रथस्य**) [रथस्य] मध्ये (**हर्योः**) अश्वयोः (**अभिस्वरे**) योऽभितः स्वरति शब्दयति तस्मिन् (**इन्द्रः**) सूर्यः (**दृढा**) दृढानि (**चित्**) अपि (**आरुजः**) यः समन्ताद्रुजति भनक्ति॥ २॥

अन्वयः-हे मनुष्या! यथा वृत्रखादो वलंरुजोऽपामज आरुज इन्द्रो दृढा दृणाति तथैव वयं चिच्छत्रूणां पुरा मध्ये स्थितान् वीरान् दर्मः। यथा हर्योरभिस्वरे स्थितस्य रथस्य मध्ये स्थाता वीरान् जयति तथैव वयं जयेम॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युत्सूर्यवायवो मेघाऽवयवाञ्छिन्दन्ति तथैव धार्मिका राजादयश्शत्रून् विछिन्द्युः॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**वृत्रखादः**) मेघों को भक्षण करनेवाला किरण वा वायु (**वलंरुजः**) मेघ का नाश करने और (**अपाम्**) जलों को (**अजः**) प्रेरणा करने तथा (**आरुजः**) चारों ओर से तोड़नेवाला (**इन्द्रः**) सूर्य्य (**दृढा**) दृढ़ भङ्ग करता है, वैसे हम लोग (**चित्**) भी (**पुराम्**) शत्रुओं के नगरों के मध्य में वर्त्तमान वीरों को (**दर्मः**) नाश करें और जैसे (**हर्योः**) दो घोड़ों के (**अभिस्वरे**) चारों ओर शब्द करनेवाले में वर्त्तमान (**रथस्य**) रथ के मध्य में (**स्थाता**) वर्त्तमान होनेवाला पुरुष वीर पुरुषों को जीतता है, वैसे ही हम लोग भी जीतें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुली, सूर्य और पवन मेघों के अवयवों का काटते हैं, वैसे ही धार्मिक राजा आदि लोग शत्रुओं को काटें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ग॒म्भी॒राँ उ॑दु॒धीँरि॑व क्र॒तुं पु॒ष्य॑सि॒ गा इ॑व।

प्र सु॑गो॒पा यव॑सं धे॒नवो॑ यथा ह्र॒दं कु॒ल्या इ॑वाशत॥ ३॥

ग॒म्भी॒रान्। उ॒द॒धीन्ऽइ॑व। क्र॒तु॒म्। पु॒ष्य॒सि॒। गाःऽइ॑व। प्र। सु॒ऽगो॒पाः। यव॑सम्। धे॒नवः॑। य॒था॒। ह्र॒दम्। कु॒ल्याःऽइ॑व। आ॒श॒त॒॥ ३॥

पदार्थः-(**गम्भीरान्**) अगाधान् (**उदधीनिव**) उदकानि धीयन्ते येषु तानिव (**क्रतुम्**) प्रज्ञाम् (**पुष्यसि**) (**गाइव**) पृथिव्य इव (**प्र**) (**सुगोपाः**) यः सुष्ठु रक्षति सः (**यवसम्**) धान्यपलादिकम् (**धेनवः**) गावः (**यथा**) (**ह्रदम्**) जलाशयम् (**कुल्याइव**) वाटिकादिषु जलचालनमार्गा इव (**आशत**) व्याप्नुत॥३॥

अन्वयः-हे विद्वन्! यतस्त्वं गम्भीरानुदधीनिव गाइव क्रतुं सुगोपाः सन् पुष्यसि यथा धेनवो यवसं ह्रदं कुल्याइव ये प्राशत तस्मात्तथा च त्वमेते सर्वाणि सुखानि लभन्ते॥३॥

भावार्थः-अत्रोपमालङ्कारः। येषां समुद्रवदक्षोभ्या प्रज्ञा पृथिवीवत् क्षमा पालनशक्तिर्धेनुवद्दानं कुल्यावद्वर्धनं वर्त्तते त एव सर्वसुखा जायन्ते॥३॥

पदार्थः-हे विद्वन् पुरुष! जिससे आप (**गम्भीरान्**) अथाह (**उदधीनिव**) जल जिसमें रहें, उन समुद्रों के सदृश और (**गाइव**) पृथिवियों के सदृश (**क्रतुम्**) बुद्धि को (**पुष्यसि**) पूर्ण करते हो, (**सुगोपाः**) उत्तम प्रकार रक्षा करनेवाले होकर (**यथा**) जैसे (**धेनवः**) गौयें (**यवसम्**) धान्य तृण आदि (**ह्रदम्**) और जल के स्थान को (**कुल्याइव**) वाटिका आदि में जल चलाने के मार्गों के तुल्य जो (**प्र, आशत**) प्राप्त हों, इससे और वैसे आप और ये लोग सम्पूर्ण सुखों को प्राप्त होते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिन लोगों की समुद्र के सदृश अचल गम्भीर बुद्धि, पृथिवी के सदृश क्षमा और पालने का सामर्थ्य, गौ के सदृश दान और नदी के सदृश वृद्धि है, वे ही सम्पूर्ण सुखों से युक्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ नस्तुजं रयिं भरांशं न प्रतिजानते।

वृक्षं पक्वं फलमङ्कीव धूनुहीन्द्र संपारणं वसु॥४॥

आ। नः। तुजम्। रयिम्। भर। अंशम्। न। प्रतिऽजानते। वृक्षम्। पक्वम्। फलम्। अङ्कीऽइव। धूनुहि। इन्द्र। सम्ऽपारणम्। वसु॥४॥

पदार्थः-(**आ**) (**नः**) अस्मभ्यम् (**तुजम्**) आदातव्यम् (**रयिम्**) धनम् (**भर**) धेहि (**अंशम्**) भागम् (**न**) इव (**प्रतिजानते**) प्रतिज्ञया व्यवहारस्य साधकाय (**वृक्षम्**) (**पक्वम्**) (**फलम्**) (**अङ्कीव**) यथाऽङ्कुशो तथा (**धूनुहि**) कम्पय (**इन्द्र**) धनप्रद (**संपारणम्**) सम्यग् दुःखस्य पारं गच्छति येन तत् (**वसु**) धनम्॥४॥

अन्वयः-हे इन्द्र! त्वमंशं न नोऽस्मभ्यं प्रतिजानते च तुजं रयिमाभर। वृक्षं पक्वं फलमङ्कीव संपारणं वसु धूनुहि॥४॥

भावार्थः-अत्रोपमालङ्कारः। त एव धार्मिका ये परसुखाय श्रियं धृत्वा परदुःखभञ्जनाः स्युः॥४॥

पदार्थः-हे **(इन्द्र)** धन के दाता! आप **(अंशम्)** भाग के **(न)** तुल्य **(नः)** हम लोगों के लिये **(प्रतिजानते)** प्रतिज्ञा से व्यवहार के सिद्ध करनेवाले के लिये और **(तुजम्)** ग्रहण करने के योग्य **(रयिम्)** धन को **(आ)** सब ओर से **(भर)** दीजिये **(वृक्षम्)** वृक्ष को और **(पक्वम्)** पाकयुक्त **(फलम्)** फल को **(अङ्कीव)** अंकुश धारण किये हुए के सदृश **(संपारणम्)** उत्तम प्रकार दुःख के पार जाता है जिससे ऐसे **(वसु)** धन को **(धूनुहि)** कंपाइये अर्थात् भेजिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वे ही धार्मिक पुरुष हैं जो अन्य लोगों के सुख के लिये लक्ष्मी धारण करके औरों के दुःख नाश करनेवाले होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः।

स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः॥५॥९॥

स्वऽयुः। इन्द्र। स्वऽराट्। असि। स्मत्ऽदिष्टिः। स्वयशःऽतरः। सः। ववृधानः। ओजसा। पुरुऽस्तुत। भव। नः। सुश्रवःऽतमः॥५॥९।

पदार्थः-(**स्वयुः**) यः स्वं धनं याति सः **(इन्द्र)** परमैश्वर्यवन् **(स्वराट्)** यः स्वेनैव राजते **(असि)** **(स्मद्दिष्टिः)** कल्याणोपदेष्टा **(स्वयशस्तरः)** स्वकीयं यशो धनं प्रशंसनं वा यस्य सोऽतिशयितः **(सः)** **(वावृधानः)** वर्द्धमानः **(ओजसा)** पराक्रमेण **(पुरुष्टुत)** बहुभिः प्रशंसित **(भव)**। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मभ्यम् **(सुश्रवस्तमः)** सुष्ठु धनः श्रवणयुक्तः सोऽतिशयितः॥५॥

अन्वयः-हे पुरुष्टुतेन्द्र! यस्त्वं स्वयुः स्वराट् स्मद्दिष्टिः स्वयशस्तरोऽसि स त्वमोजसा वावृधानः सुश्रवस्तमो नोऽस्मभ्यं भव॥५॥

भावार्थः-स एव सम्राट् भवितुं योग्यो जायते योऽतिशयेन प्रशंसितगुणकर्मस्वभावो भवति स एव सम्राट् सर्वेषां वर्द्धको भवतीति॥५॥

अत्र सूर्य्यविद्वद्राजगुणवर्णनादेतर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चचत्वारिंशत्तमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे **(पुरुष्टुत)** बहुतों से प्रशंसित **(इन्द्र)** अत्यन्त ऐश्वर्यवाले! जो आप **(स्वयुः)** धन को प्राप्त **(स्वराट्)** स्वतन्त्र राज्यकर्त्ता **(स्मद्दिष्टिः)** कल्याण कर्म का उपदेश देनेवाले और **(स्वयशस्तरः)** अपने यश, धन और प्रशंसा से गम्भीर **(असि)** हैं **(सः)** वह **(ओजसा)** पराक्रम से **(वावृधानः)** वृद्धि को प्राप्त **(सुश्रवस्तमः)** श्रेष्ठ धन से युक्त बातचीत के अत्यन्त सुननेवाले **(नः)** हम लोगों के लिये

(भव) होइये॥५॥

भावार्थः–वही चक्रवर्ती राजा होने के योग्य होता है कि जो अत्यन्त प्रशंसायुक्त गुण, कर्म और स्वभाववाला है और वही राजा सबका वृद्धिकारक होता है॥५॥

इस सूक्त में सूर्य, विद्वान् और राजा के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैंतालीसवां सूक्त और नववां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य षट्चत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। २, ५ निचृत् त्रिष्टुप्। ३, ४ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा कीदृशो भवेदित्याह॥

अब पाँच ऋचावाले छियालीसवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजा कैसा हो, इस विषय को कहते हैं॥

युध्मस्य॑ ते वृषभस्य॑ स्वरा॑ज उग्रस्य॒ यून॒: स्थवि॑रस्य॒ घृष्वे॑:।
अजू॑र्यतो व॒ज्रिणो॑ वी॒र्या॒३॑णीन्द्र॑ श्रु॒तस्य॑ महतो म॒हानि॑॥ १॥

युध्मस्य॑। ते॒। वृ॒षभस्य॑। स्व॒ऽराज॑:। उ॒ग्रस्य॑। यून॑:। स्थवि॑रस्य। घृष्वे॑:। अजू॑र्यत:। व॒ज्रिण॑:। वी॒र्या॑णि। इन्द्र॑। श्रु॒तस्य॑। म॒हत॒:। म॒हानि॑॥ १॥

पदार्थः-(**युध्मस्य**) योद्धुं शीलस्य (**ते**) तव (**वृषभस्य**) बलिष्ठस्य (**स्वराजः**) यः स्वेन राजते तस्य (**उग्रस्य**) तेजस्विस्वभावस्य (**यूनः**) यौवनावस्थां प्राप्तस्य (**स्थविरस्य**) वृद्धस्य (**घृष्वेः**) शत्रूणां घर्षकस्य (**अजूर्यतः**) अजीर्णस्य (**वज्रिणः**) वज्रं बहुविधं शस्त्रं विद्यते यस्य तस्य (**वीर्य्याणि**) वीरस्य कर्माणि (**इन्द्र**) परमैश्वर्य्ययोजक (**श्रुतस्य**) प्रसिद्धस्य (**महतः**) पूज्यस्य (**महानि**)॥ १॥

अन्वयः-हे इन्द्र! यस्य युध्मस्य स्वराजो वृषभस्योग्रस्य यूनः स्थविरस्य घृष्वेरजूर्यतो वज्रिणो महतः श्रुतस्य ते तव यानि महानि वीर्य्याणि सन्ति, तैर्युक्तस्त्वमस्माभिः सत्कर्त्तव्योऽसि॥ १॥

भावार्थः-यदि सर्वलक्षणसम्पन्नो युवा वा वृद्धोऽपि राजा स्यात्तथैव प्रयत्नेन स्वसामर्थ्यवर्द्धको भवेत्॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के दाता! जिस (**युध्मस्य**) युद्ध करने और (**स्वराजः**) अपने से प्रकाशित (**वृषभस्य**) बलवाले (**उग्रस्य**) तेजस्वी स्वभाव और (**यूनः**) यौवन अवस्था को प्राप्त पुरुष तथा (**स्थविरस्य**) वृद्धावस्थायुक्त पुरुष के और (**घृष्वेः**) शत्रुओं को घसीटनेवाले (**अजूर्यतः**) शरीर की शिथिलता से रहित और (**वज्रिणः**) बहुत प्रकार के शस्त्रों से युक्त (**महतः**) सेवा करने योग्य (**श्रुतस्य**) प्रसिद्ध (**ते**) आपके जो (**महानि**) श्रेष्ठ (**वीर्य्याणि**) वीर पुरुषों के कर्म हैं, उनसे युक्त आप हम लोगों से सत्कार पाने योग्य हैं॥ १॥

भावार्थः-जो सम्पूर्ण लक्षणों से युक्त युवा वा वृद्ध भी राजा हो, वैसे ही अपने प्रयत्न से अपने सामर्थ्य का बढ़ानेवाला होवे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

म॒हाँ अ॑सि महिष॒ वृष्ण्ये॑भिर्धन॒स्पृदु॑ग्र॒ सह॑मानो अ॒न्यान्।

एको॒ विश्व॑स्य॒ भुव॑नस्य॒ राजा॒ स योध॑या॑ च क्षय॑या॑ च॒ जना॑न्॥ २॥

म॒हान्। अ॒सि॒। म॒हि॒ष॒। वृ॒ष्ण्ये॑भिः। ध॒न॒ऽस्पृत्। उ॒ग्र॒। सह॑मानः। अ॒न्यान्। एक॑ः। विश्व॑स्य। भुव॑नस्य। राजा॑। सः। योध॑य। च॒। क्षय॑य। च॒। जना॑न्॥ २॥

पदार्थः-(**महान्**) महागुणविशिष्टः (**असि**) (**महिष**) पूजनीयतम (**वृष्ण्येभिः**) वृषेषु बलिष्ठेषु भवैर्गुणैः (**धनस्पृत्**) यो धनं स्पृणोति सेवते सः (**उग्र**) बलादियुक्त (**सहमानः**) (**अन्यान्**) शत्रून् (**एकः**) असहायः (**विश्वस्य**) समग्रस्य (**भुवनस्य**) भूताधिकरणस्य (**राजा**) प्रकाशमानः (**सः**) (**योधय**)। अत्र **संहितायामि**ति दीर्घः। (**च**) (**क्षयय**) क्षाययं निवासय पराजयं प्रापय वा। अत्रापि **संहितायामि**ति दीर्घः। (**च**) (**जनान्**) प्रसिद्धान् वीरान्॥ २॥

अन्वयः-हे महिषोग्र राजन्! यतस्त्वं वृष्ण्येभिः सह महान् धनस्पृदेकोऽन्यान् सहमानो विश्वस्य भुवनस्य महान् राजासि स त्वं जनान् योधय च क्षयय शत्रून् पराजयं प्रापय सज्जनान् निवासय॥ २॥

भावार्थः-ये शरीरात्मनोः पूर्णं बलं कृत्वा शत्रून् निवारयन्ति सज्जनान् सत्कृत्याऽऽनन्दन्ति ते महान्तो भवन्ति॥ २॥

पदार्थः-हे (**महिष**) अत्यन्त आदर करने योग्य! (**उग्र**) बल आदिकों से युक्त और (**राजन्**) प्रकाशित जिससे आप (**वृष्ण्येभिः**) बलवान् पुरुषों में उत्पन्न गुणों के साथ (**महान्**) श्रेष्ठ गुणों से युक्त और (**धनस्पृत्**) धन के सेवक (**एकः**) सहायरहित (**अन्यान्**) शत्रुओं को (**सहमानः**) सहते हुए (**विश्वस्य**) सम्पूर्ण (**भुवनस्य**) प्राणियों के निवास के स्थान के श्रेष्ठ गुणों से युक्त (**राजा**) [प्रकाशमान] (**असि**) हैं (**सः**) वह आप (**जनान्**) प्रसिद्ध वीरों को (**योधय**) लड़ाइये, शत्रुओं को (**क्षयय**) पराजय को पहुँचाइये (**च**) और सज्जनों को अपने देश में बसाइये॥ २॥

भावार्थः-जो लोग शरीर और आत्मा का पूर्ण बल करके शत्रुओं को निवारण करते और सज्जनों का सत्कार करके आनन्द देते हैं, वे श्रेष्ठ होते हैं॥ २॥

अथ विद्युद्विषयमाह॥

अब बिजुली के विषय को अगले मन्त्र में कहते हैं॥

प्र मात्रा॑भी रिरिचे॒ रोच॑मान॒ः प्र दे॒वेभि॑र्वि॒श्वतो॒ अप्र॑तीतः।

प्र म॒ज्मना॑ दि॒व इन्द्र॑ः पृथि॒व्याः प्रोरो॑र्म॒हो अ॒न्तरि॑क्षादृजी॒षी॥ ३॥

प्र। मात्रा॑भिः। रि॒रि॒चे॒। रोच॑मानः। प्र। दे॒वेभि॑ः। वि॒श्व॑तः। अप्र॑तिऽइतः। प्र। म॒ज्मना॑। दि॒वः। इन्द्र॑ः। पृ॒थि॒व्याः। प्र। उ॒रोः। म॒हः। अ॒न्तरि॑क्षात्। ऋ॒जी॒षी॥ ३॥

पदार्थः-(**प्र**) (**मात्राभिः**) शब्दादिभिः सूक्ष्मैर्व्यवहाराऽवयवैर्वा (**रिरिचे**) अतिरिच्यते (**रोचमानः**) रुचिं कुर्वन् (**प्र**) (**देवेभिः**) विद्वद्भिः सह (**विश्वतः**) सर्वतः (**अप्रतीतः**) प्रसिद्धिमप्राप्तः (**प्र**) (**मज्मना**)

बलेन (**दिवः**) प्रकाशात् (**इन्द्रः**) पराक्रमवान् सूर्य्य इव तेजस्वी (**पृथिव्याः**) भूमेः (**प्र**) (**उरोः**) बहुविधगुणयुक्तात् (**महः**) महतः (**अन्तरिक्षात्**) आकाशात् (**ऋजीषी**) सरलस्वभावः॥३॥

अन्वयः-हे मनुष्या! यथा रोचमानो विश्वतोऽप्रतीत ऋजीषी इन्द्रो विद्युद्रूपोऽग्निर्मात्राभिः प्र रिरिचे देवेभिः सह प्र रिरिचे मज्मना दिवः पृथिव्या उरोर्महोऽन्तरिक्षात् प्ररिरिचे तथाऽऽचरन्तो यूयं प्रतिष्ठां प्रलभध्वम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽविकृता विद्युद्गन्धकादिष्वपि स्थिता न विरुणद्धि तथैव सर्वैः सह मैत्रीं कृत्वा विरोधं विजहत॥३॥

पदार्थः-हे मनुष्यो! जैसे (**रोचमानः**) प्रीति करता हुआ (**विश्वतः**) सर्वत्र (**अप्रतीतः**) प्रसिद्धि को नहीं प्राप्त (**ऋजीषी**) सीधे स्वभाववाला (**इन्द्रः**) और पराक्रम से युक्त सूर्य्य के सदृश तेजस्वी बिजुलीरूप अग्नि (**मात्राभिः**) शब्द आदि वा सूक्ष्म व्यवहारों के अवयवों से (**प्र, रिरिचे**) अधिक होता है और (**देवेभिः**) विद्वानों के साथ (**प्र**) वृद्धि को प्राप्त होता है (**मज्मना**) बल से (**दिवः**) प्रकाश से (**पृथिव्याः**) भूमि (**उरोः**) अनेक प्रकार गुणों के समूह से युक्त (**महः**) बड़े (**अन्तरिक्षात्**) आकाश से (**प्र**) अधिक होता है, वैसा आचरण करते हुए आप लोग प्रतिष्ठा को (**प्र**) अच्छे प्रकार प्राप्त हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विकार को नहीं प्राप्त हुई बिजुली गन्धक आदिकों में वर्त्तमान हुई भी कुछ हानि नहीं करती, वैसे ही सब लोगों के साथ मित्रता करके विरोध का त्याग करो॥३॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

उ॒रुं ग॑भी॒रं ज॒नुषा॒भ्यु१॑ग्रं वि॒श्वव्य॑चसमव॒तं म॑ती॒नाम्।
इन्द्रं॒ सोमा॑सः॒ प्र॒दिवि॑ सु॒तास॑: समु॒द्रं न स्र॒वत॒ आ वि॑शन्ति॥४॥

उ॒रुम्। ग॒भी॒रम्। ज॒नुषा॑। अ॒भि। उ॒ग्रम्। वि॒श्वऽव्य॑चसम्। अ॒व॒तम्। म॒ती॒नाम्। इन्द्र॑म्। सोमा॑सः। प्र॒ऽदिवि॑। सु॒तास॑:। स॒मु॒द्रम्। न। स्र॒वत॑:। आ। वि॒श॒न्ति॒॥४॥

पदार्थः-(**उरुम्**) बहुविधगुणम् (**गभीरम्**) गूढाशयम् (**जनुषा**) जन्मना (**अभि**) आभिमुख्ये (**उग्रम्**) सर्वैः सह समवेतम् (**विश्वव्यचसम्**) विश्वव्यापकम् (**अवतम्**) रक्षकम् (**मतीनाम्**) मनुष्याणाम् (**इन्द्रम्**) विद्युतम् (**सोमासः**) ऐश्वर्य्यवन्तः (**प्रदिवि**) प्रकृष्टप्रकाशे (**सुतासः**) विद्याविनयाभ्यां निष्पन्नाः (**समुद्रम्**) (**न**) इव (**स्रवतः**) चलन्त्यः सरितः। अत्र **वाच्छन्दसी**ति वर्णलोपो वेतीकाराऽभावे नुमोऽप्यभावः। (**आ**) (**विशन्ति**) प्रविशन्ति॥४॥

अन्वयः-ये प्रदिवि सुतासः सोमासो विद्वांसो जनुषोरुं गभीरमुग्रं विश्वव्यचसं मतीनामवतमिन्द्रं स्रवतः समुद्रं नाभ्याविशन्ति तथैव ये सर्वत्र प्रविशन्ति तेऽक्षयैश्वर्या भवन्ति॥४॥

भावार्थः-ये विद्युद्विद्यां विज्ञायोपकारं ग्रहीतुं शक्नुवन्ति ते समग्राः श्रिय उपलभन्ते॥४॥

पदार्थः-जो लोग **(प्रदिवि)** उत्तम प्रकाश में **(सुतासः)** विद्या और विनय से प्रसिद्ध **(सोमासः)** ऐश्वर्य्यवाले विद्वान् लोग **(जनुषा)** जन्म से **(उरुम्)** अनेक प्रकार के गुणों से युक्त **(गभीरम्)** गूढ़ अभिप्रायवाले **(उग्रम्)** सबके साथ मिले हुए **(विश्वव्यचसम्)** सर्वत्र व्यापक **(मतीनाम्)** मनुष्यों के **(अवतम्)** रक्षा करनेवाले **(इन्द्रम्)** बिजुली रूप अग्नि को **(स्रवतः)** बहती हुई नदियां **(समुद्रम्)** समुद्र को **(न)** जैसे **(अभि, आ, विशन्ति)** सब ओर से प्रविष्ट होती हैं, वैसे जो सब ओर से प्रवेश करते अर्थात् उसमें चित्त देते हैं, वे उस ऐश्वर्यवाले होते हैं, जो ऐश्वर्य कभी नष्ट नहीं होता है॥४॥

भावार्थः-जो लोग बिजुली सम्बन्धी विद्या को जान कर उसके द्वारा उपकार ग्रहण कर सकते हैं, वे अनेक प्रकार की लक्ष्मियों को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर भी उसी विषय को अगले मन्त्र में कहते हैं॥

यं सोमꣳमिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया।
तं तेँ हिन्वन्ति तमु ते मृजन्त्यध्वर्यवो वृषभ पातवा उ॥५॥१०॥

यम्। सोमꣳम्। इन्द्र। पृथिवीद्यावाँ। गर्भम्। न। माता। बिभृतः। त्वाऽया। तम्। ते। हिन्वन्ति। तम्। ऊम् इति। ते। मृजन्ति। अध्वर्यवः। वृषभ। पातवै। ऊम् इति॥५॥

पदार्थः-**(यम्)** **(सोमम्)** ऐश्वर्यम् **(इन्द्र)** ऐश्वर्ययोजक **(पृथिवीद्यावा)** भूमिविद्युतौ **(गर्भम्)** **(न)** इव **(माता)** **(बिभृतः)** धरतः **(त्वाया)** त्वां प्राप्ते **(तम्)** **(ते)** तुभ्यम् **(हिन्वन्ति)** वर्द्धयन्ति **(तम्)** **(उ)** **(ते)** तुभ्यम् **(मृजन्ति)** शुन्धन्ति **(अध्वर्यवः)** आत्मनोऽध्वरमहिसां कामयमानाः **(वृषभ)** बलिष्ठ **(पातवै)** पातुं रक्षितुम् **(उ)**॥५॥

अन्वयः-हे वृषभेन्द्र! ये त्वाया पृथिवीद्यावा माता गर्भं न यं सोमं बिभृतस्तं ते ये हिन्वन्ति तमु ते येऽध्वर्यवो हिन्वन्त्यु ते ये मृजन्ति तानु पातवै त्वमुद्युक्तो भव॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसो पृथिवीवत्सूर्यवत् सर्वान् विद्याबलाभ्यां वर्धयन्ति सुशिक्षया शुन्धन्ति ते मातृवत्पालकाः सन्तीति मत्वा सर्वैः सत्कर्त्तव्या इति॥५॥

यत्र राजविद्युत्पृथिव्यादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्चत्वारिंशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे **(वृषभ)** बलिष्ठ **(इन्द्र)** ऐश्वर्य से युक्त करनेवाले! जो **(त्वाया)** आपको प्राप्त हुई

(पृथिवीद्यावा) भूमि और बिजुली **(माता)** माता **(गर्भम्)** गर्भ को **(न)** जैसे वैसे **(यम्)** जिस **(सोमम्)** ऐश्वर्य को **(बिभृतः)** धारण करते हैं **(तम्)** उसको **(ते)** तुम्हारे लिये जो **(हिन्वन्ति)** वृद्धि करते हैं **(तम्, उ)** उसी को **(ते)** आपके लिये जो **(अध्वर्यवः)** अपनी हिंसा नहीं चाहते हुए बढ़ाते हैं वा तुम्हारे लिये उसी को जो लोग **(मृजन्ति)** शुद्ध करते हैं उनकी **(उ)** ही **(पातवै)** रक्षा के लिये आप उद्युक्त होइये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् लोग पृथिवी और सूर्य्य के सदृश सबको विद्या और बल से बढ़ाते और उत्तम शिक्षा से पवित्र करते वे माता के सदृश पालन करनेवाले हैं। ऐसा जान कर वे सब लोगों से सत्कार करने योग्य हैं॥५॥

इस सूक्त में राजा, बिजुली और पृथिवी आदिकों के गुणवर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छयालीसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य सप्तचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १-३ निचृत् त्रिष्टुप्। ४ त्रिष्टुप्। ५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजविषयमाह॥

अब पाँच ऋचावाले सैंतालीसवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में राजा के विषय को कहते हैं॥

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम्॥ १॥

मरुत्वान्। इन्द्र। वृषभः। रणाय। पिब। सोमम्। अनुऽस्वधम्। मदाय। आ। सिञ्चस्व। जठरे। मध्वः। ऊर्मिम्। त्वम्। राजा। असि। प्रऽदिवः। सुतानाम्॥ १॥

पदार्थः-(**मरुत्वान्**) मरुतः प्रशस्ता मनुष्या विद्यन्ते यस्य सः (**इन्द्र**) परमैश्वर्ययुक्त! (**वृषभः**) बलिष्ठः (**रणाय**) संग्रामाय (**पिब**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सोमम्**) महौषधिरसम् (**अनुष्वधम्**) अनुकूलं स्वधान्नं विद्यते यस्मिँस्तम् (**मदाय**) आनन्दाय (**आ**) (**सिञ्चस्व**) (**जठरे**) उदरे (**मध्वः**) मधुरस्य (**ऊर्मिम्**) तरङ्गम् (**त्वम्**) (**राजा**) प्रकाशमानः (**असि**) (**प्रदिवः**) प्रकर्षेण विद्याविनयप्रकाशस्य (**सुतानाम्**) उत्पन्नानामैश्वर्यादीनाम्॥ १॥

अन्वयः-हे इन्द्र मरुत्वान् वृषभस्त्वं रणाय मदायानुष्वधं सोमं पिब। जठरे मध्व ऊर्मिमासिञ्चस्व **[**येन त्वं**]** प्रदिवः सुतानां राजाऽसि तस्मादेतदाचर॥ १॥

भावार्थः-हे राजन्! भवान् यदि विजयमारोग्यं बलं दीर्घमायुश्चेच्छेत्तर्हि ब्रह्मचर्य्यं धनुर्वेदविद्यां जितेन्द्रियत्वं युक्ताऽऽहारविहारञ्च करोतु॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त (**मरुत्वान्**) श्रेष्ठ मनुष्यों से युक्त (**वृषभः**) बलवान्! आप (**रणाय**) संग्राम के और (**मदाय**) आनन्द के लिये (**अनुष्वधम्**) अनुकूल स्वधा अन्न वर्त्तमान जिसमें ऐसे (**सोमम्**) श्रेष्ठ ओषधी के रस का (**पिब**) पान करो और (**जठरे**) पेट में (**मध्वः**) मधुर की (**ऊर्मिम्**) लहर को (**आ, सिञ्चस्व**) सेचन करो जिससे (**त्वम्**) आप (**प्रदिवः**) अत्यन्त विद्या और विनय से प्रकाशित के (**सुतानाम्**) उत्पन्न हुए ऐश्वर्य आदिकों के (**राजा**) प्रकाशकर्त्ता (**असि**) हैं, इससे ऐसा आचरण करो॥ १॥

भावार्थः-हे राजन्! आप जो विजय, आरोग्य, बल और अधिक अवस्था की इच्छा करें तो ब्रह्मचर्य, धनुर्वेदविद्या, जितेन्द्रियत्व और नियमित आहार-विहार को करिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्।

जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः॥ २॥

सऽजोषाः। इन्द्र। सऽगणः। मरुत्ऽभिः। सोमम्। पिब। वृत्रऽहा। शूर। विद्वान्। जहि। शत्रून्। अप। मृधः। नुदस्व। अथ। अभयम्। कृणुहि। विश्वतः। नः॥ २॥

पदार्थः-(**सजोषाः**) समानप्रीतिसेवनः (**इन्द्र**) ऐश्वर्य्यप्रयोजक (**सगणः**) गणैः सह वर्त्तमानः (**मरुद्भिः**) वायुभिरिव वीरैः सह (**सोमम्**) (**पिब**) (**वृत्रहा**) मेघस्य हन्ता सूर्य्य इव (**शूर**) शत्रूणां हिंसक (**विद्वान्**) सकलविद्यावित् (**जहि**) नाशय (**शत्रून्**) (**अप**) दूरीकरणे (**मृधः**) संग्रामान् (**नुदस्व**) प्रेरस्व (**अथ**) (**अभयम्**) (**कृणुहि**) (**विश्वतः**) सर्वतः (**नः**) अस्मान्॥ २॥

अन्वयः-हे शूरेन्द्र राजन्! मरुद्भिः सगणो वृत्रहा सूर्य्य इव सजोषाः सगणो मरुद्भिः सह विद्वान् सोमं पिब शत्रूनपजहि मृधो नुदस्वाथ विश्वतो नोऽभयं कृणुहि॥ २॥

भावार्थः-ये राजादयो मनुष्याः परस्परेषु सुहृदो भूत्वा युक्ताहारविहारब्रह्मचर्यजितेन्द्रियत्वादिभिः पूर्णशरीरात्मबलाः सन्तः शत्रून् हत्वा संग्रामान् जित्वा प्रजासु सर्वथाऽभयं स्थापयन्ति त एव सर्वत्राऽभयं सुखं प्राप्नुवन्ति॥ २॥

पदार्थः-हे (**शूर**) शत्रुओं के नाशकर्त्ता (**इन्द्र**) ऐश्वर्य्य से युक्त करनेवाले! (**मरुद्भिः**) पवनों के सदृश वीर पुरुषों के और (**सगणः**) गणों के सहित वर्त्तमान (**वृत्रहा**) मेघ का नाशकर्त्ता सूर्य्य जैसे वैसे (**सजोषाः**) तुल्य प्रीति का सेवन करनेवाला गणों के सहित वर्त्तमान होकर और पवनों के सदृश वीर पुरुषों के सहित (**विद्वान्**) सकल विद्याओं का जाननेवाला पुरुष (**सोमम्**) सोमलता के रस को (**पिब**) पीजिये और (**शत्रून्**) शत्रुओं को (**अप, जहि**) देश से बाहर करके नष्ट करिये, (**मृधः**) संग्रामों की (**नुदस्व**) प्रेरणा अर्थात् प्रवृत्ति का उत्साह दीजिये, (**अथ**) उसके अनन्तर (**विश्वतः**) सब ओर से (**नः**) हम लोगों को (**अभयम्**) भयरहित (**कृणुहि**) कीजिये॥ २॥

भावार्थः-जो राजा आदि मनुष्य परस्पर मित्र होकर नियमित भोजन, विहार, ब्रह्मचर्य्य, जितेन्द्रिय होने आदि से पूर्ण शरीर आत्मा के बलवाले हो शत्रुओं को नाश कर और संग्रामों को जीत कर प्रजाओं में सब प्रकार भयरहित करते हैं, वे ही सर्वत्र भयरहित सुख को प्राप्त होते हैं॥ २॥

अथ सूर्य्यविषयमाह॥

अब सूर्य्य के विषय को अगले मन्त्र में कहते हैं॥

उत ऋतुभिर्ऋतुपाः पाहि सोममिन्द्र देवेभिः सखिभिः सुतं नः।
याँ आभजो मरुतो ये त्वान्वहन् वृत्रमदधुस्तुभ्यमोजः॥ ३॥

उत। ऋतुऽभिः। ऋतुऽपाः। पाहि। सोमम्। इन्द्र। देवेभिः। सखिऽभिः। सुतम्। नः। यान्। आ। अभजः। मरुतः। ये। त्वा। अनु। अहन्। वृत्रम्। अदधुः। तुभ्यम्। ओजः॥ ३॥

पदार्थः-(**उत**) अपि (**ऋतुभिः**) वसन्तादिभिः (**ऋतुपाः**) य ऋतून् पाति रक्षति स सूर्य्यः (**पाहि**) रक्ष (**सोमम्**) सूयन्ते यस्मिँस्तं संसारम् (**इन्द्र**) दुःखविदारक (**देवेभिः**) विद्वद्भिः (**सखिभिः**) सुहृद्भिः (**सुतम्**) निष्पन्नम् (**नः**) अस्मान् (**यान्**) (**आ**) समन्तात् (**अभजः**) सेवस्व (**मरुतः**) मरणधर्ममनुष्यान् (**ये**) (**त्वा**) त्वाम् (**अनु**) (**अहन्**) हन्ति (**वृत्रम्**) सर्वसुखकरं धनम् (**अदधुः**) दध्युः (**तुभ्यम्**) (**ओजः**) बलम्॥ ३॥

अन्वयः-हे इन्द्र! त्वमृतुभिस्सहर्त्तुपाः सूर्य इव देवेभिः सखिभिः सह सुतं सोमं पाहि यान् मरुतो नोऽस्माँस्त्वमाभजो ये तुभ्यमोजो वृत्रं त्वा त्वां चान्वदधुस्तांस्त्वं पाहि उतापि यथा सूर्यो वृत्रमहँस्तथा शत्रून् हिन्धि॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजादयो मनुष्या यथा सूर्य्यो वसन्तादिभिः सर्वं जगद्रक्षति जलादिकमाकृष्य वर्षित्वा पाति तथैव विद्वद्भिर्मित्रैः सह विचार्य विजयपुरुषार्थाभ्यां सर्वान् रक्षन्तु॥ ३॥

पदार्थः-हे (**इन्द्र**) दुःख के नाशकर्त्ता पुरुष! आप (**ऋतुभिः**) वसन्त आदि ऋतुओं के साथ (**ऋतुपाः**) ऋतुओं की रक्षा करनेवाले सूर्य के सदृश (**देवेभिः**) विद्वान् (**सखिभिः**) मित्रों के साथ (**सुतम्**) उत्पन्न (**सोमम्**) संसार की (**पाहि**) रक्षा करो और (**यान्**) जिन (**मरुतः**) मरणधर्मवाले मनुष्य (**नः**) हम लोगों का आप (**आ**) सब प्रकार (**अभजः**) सेवन करें (**ये**) जो लोग (**तुभ्यम्**) आपके लिये (**ओजः**) पराक्रम और (**वृत्रम्**) सब सुखों के कर्त्ता धन को (**त्वा**) और आपको (**अनु, अदधुः**) अनूकूलता से धारण करें, उनकी आप रक्षा कीजिये (**उत**) और भी जैसे सूर्य मेघ का (**अहन्**) नाश करता है, वैसे शत्रुओं का नाश करिये॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा आदि मनुष्यो! जैसे सूर्य्य वसन्त आदि ऋतुओं से सम्पूर्ण जगत् की रक्षा करता, जलादि रसों का आकर्षण और पुनः वृष्टि करके पालन करता है, वैसे ही विद्वान् मित्रों के साथ विचार करके विजय और पुरुषार्थ से सबकी रक्षा कीजिये॥ ३॥

पुनाराजविषयमाह॥

फिर राजा के विषय को अगले मन्त्र में कहते हैं॥

ये त्वाहिहत्ये मघवन्नवर्धन् ये शाम्बरे हरिवो ये गविष्टौ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः॥ ४॥

ये। त्वा। अहिऽहत्ये। मघऽवन्। अवर्धन्। ये। शाम्बरे। हरिऽवः। ये। गोऽइष्टौ। ये। त्वा। नूनम्। अनुऽमदन्ति। विप्राः। पिब। इन्द्र। सोमम्। सऽगणः। मरुत्ऽभिः॥४॥

पदार्थः-(**ये**) (**त्वा**) त्वाम् (**अहिहत्ये**) अहेर्मेघस्य हत्या हननं यस्मिँस्तस्मिन् (**मघवन्**) पूजितपुष्कलधनयुक्त (**अवर्धन्**) वर्धयेयुः (**ये**) (**शाम्बरे**) शम्बरस्याऽयं संग्रामस्तस्मिन् (**हरिवः**) प्रशस्ता हरयो विद्यन्ते यस्य तत्सम्बुद्धौ (**ये**) (**गविष्टौ**) गवां किरणानां सङ्गमने (**ये**) (**त्वा**) त्वाम् (**नूनम्**) निश्चितम् (**अनुमदन्ति**) आनुकूल्येनाऽऽनन्दयन्ति (**विप्राः**) मेधाविनः (**पिब**) (**इन्द्र**) ऐश्वर्यकारक (**सोमम्**) ओषधिजन्यं घृतदुग्धादिकं रसम् (**सगणः**) गणेन वीरसमूहेन सहितः (**मरुद्भिः**) वायुभिरिव स्वमित्रैः सह॥४॥

अन्वयः-हे हरिवो मघवन्निन्द्र! ये विप्रास्त्वा त्वां मरुद्भिः सह सूर्योऽहिहत्ये शाम्बर इवाऽवर्द्धन् ये गविष्टौ त्वा त्वामवर्धन् ये युद्धे नूनमनुमदन्ति ये च सर्वान् रक्षन्त्यानन्दयन्ति तैः सह सगणः सन् सोमं पिब॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽनुन्मदं मेघं सूर्यो वर्द्धयित्वोन्मदं हन्ति तथैव धार्मिका राजादयो धार्मिकाञ्छान्तान् रक्षित्वा दुष्टान् हत्वा स्वयं प्रसन्ना भूत्वा प्रजा अनुमदन्तु॥४॥

पदार्थः-हे (**हरिवः**) उत्तम घोड़ों से युक्त (**मघवन्**) श्रेष्ठ बहुत धनोंवाले (**इन्द्र**) ऐश्वर्य के कर्त्ता! (**ये**) जो (**विप्राः**) बुद्धिमान् लोग (**त्वाम्**) आपको (**मरुद्भिः**) पवनों के सदृश अपने मित्रों के साथ सूर्य (**अहिहत्ये**) मेघ का नाश हो जिसमें ऐसे (**शाम्बरे**) मेघसम्बन्धी संग्राम में जैसे वैसे (**अवर्धन्**) वृद्धि करें और (**ये**) जो (**गविष्टौ**) किरणों के समूह में आपकी वृद्धि करें (**ये**) जो युद्ध में (**नूनम्**) निश्चित (**अनु, मदन्ति**) अनुकूलता से आनन्द देते हैं, उन पवनों के सदृश मित्रों के[१३] और (**सगणः**) वीर पुरुषों के सहित (**सोमम्**) ओषधियों से उत्पन्न हुए घृत, दुग्ध आदि रसों का (**पिब**) पान कीजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे नहीं बढ़े हुए मेघ को सूर्य बढ़ाय के और बढ़े हुए का नाश करता है, वैसे ही धार्मिक राजा आदि पुरुष धार्मिक शान्त पुरुषों की रक्षा और दुष्ट पुरुषों का नाश कर स्वयं प्रसन्न होकर प्रजाओं को प्रसन्न करें॥४॥

पुनस्तमेव विषयमाह॥

---

१३. अन्वय के अनुसार 'उन पवनों के सदृश मित्रों के' इस वाक्य के स्थान पर 'जो सबकी रक्षा करते हैं, आनन्द देते हैं, उन' यह वाक्यांश होना चाहिये। सं०

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥५॥११॥

मरुत्वन्तम्। वृषभम्। ववृधानम्। अकवऽअरिम्। दिव्यम्। शासम्। इन्द्रम्। विश्वऽसहम्। अवसे। नूतनाय। उग्रम्। सहःऽदाम्। इह। तम्। हुवेम॥५॥

पदार्थः-(**मरुत्वन्तम्**) प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्य तम् (**वृषभम्**) बलिष्ठम् (**वावृधानम्**) वर्द्धमानं वर्द्धयितारं वा (**अकवारिम्**) अविद्यमानशत्रुम् (**दिव्यम्**) शुद्धगुणकर्मस्वभावम् (**शासम्**) प्रशासितारम् (**इन्द्रम्**) परमैश्वर्य्यवन्तम् (**विश्वासाहम्**) सर्वसहम् (**अवसे**) रक्षणाद्याय (**नूतनाय**) नवीनाय (**उग्रम्**) दुष्टानां दमयितारम् (**सहोदाम्**) बलप्रदम् (**इह**) अस्मिन् राज्यव्यवहारे (**तम्**) (**हुवेम**) प्रशंसेम॥५॥

अन्वयः-हे विद्वांसो! यूयमिह नूतनायावसे यं मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं विश्वासाहमुग्रं सहोदामिन्द्रं शासन्नूतनायावसे प्रशंसत तं वयं हुवेम॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः स एव स्वकीयो राजा कर्त्तव्यो यस्मिन् सर्वे राजधर्माः साङ्गोपाङ्गा वर्त्तन्ते॥५॥

अत्र राजसूर्य्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति सप्तचत्वारिंशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् पुरुषो! आप लोग (**इह**) इस राज्यव्यवहार में (**नूतनाय**) नवीन (**अवसे**) रक्षण आदि के लिये जिस (**मरुत्वन्तम्**) प्रशंसा करने योग्य मनुष्य हों जिसके उस और (**वृषभम्**) बलवाले और (**वावृधानम्**) बढ़ने वा बढ़ानेवाले (**अकवारिम्**) शत्रुओं से रहित (**दिव्यम्**) शुद्ध गुण, कर्म और स्वभाव से युक्त (**विश्वासाहम्**) सबको सहने और (**उग्रम्**) दुष्टों के नाश करने (**सहोदाम्**) बल के देने और (**इन्द्रम्**) अत्यन्त ऐश्वर्य्यवाले (**शासम्**) शासन करनेवाले की [नवीन रक्षण आदि के लिये] प्रशंसा करो (**तम्**) उसकी हम लोग (**हुवेम**) प्रशंसा करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि उसी को अपना राजा करें कि जिसमें सम्पूर्ण राजा के धर्म अङ्ग और उपाङ्ग सहित वर्त्तमान हैं॥५॥

इस सूक्त में राजा और सूर्य्य के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह सैंतालीसवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्याष्टचत्वारिंशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, २ निचृत् त्रिष्टुप्। ३, ४ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राज्ञो विषयमाह॥

अब पाँच ऋचावाले अड़तालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा के विषय को कहते हैं॥

सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदन्धसः सुतस्य।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य॥ १॥

सद्यः। ह। जातः। वृषभः। कनीनः। प्रऽभर्तुम्। आवत्। अन्धसः। सुतस्य। साधोः। पिब। प्रतिऽकामम्। यथा। ते। रसऽआशिरः। प्रथमम्। सोम्यस्य॥ १॥

पदार्थः-(**सद्यः**) (**ह**) खलु (**जातः**) उत्पन्नः (**वृषभः**) वर्षकः (**कनीनः**) दीप्तिमान् (**प्रभर्त्तुम्**) प्रकर्षेण धर्त्तुम् (**आवत्**) रक्षेत् (**अन्धसः**) अन्नस्य (**सुतस्य**) सुसंस्कृतस्य (**साधोः**) सन्मार्गे स्थितस्य (**पिब**) (**प्रतिकामम्**) कामं कामं प्रति (**यथा**) (**ते**) तव (**रसाशिरः**) यो रसानश्नाति सः (**प्रथमम्**) (**सोम्यस्य**) सोम ऐश्वर्ये भवस्य॥ १॥

अन्वयः-हे राजन्! यथा सद्यो जातो वृषभः कनीनो रसाशिरः सूर्योऽन्धसः सुतस्य सोम्यस्य प्रथममावत् तथाभूतस्त्वं प्रतिकामं सोमं पिबैवं भूतस्य साधोस्ते ह प्रजाः प्रभर्त्तुं शक्तिर्जायेत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे राजादयो मनुष्या! यथा सूर्यादयः पदार्थाः स्वप्रभावैरीश्वरनियोगेन सर्वान् पदार्थान् रक्षित्वा दोषान् घ्नन्ति तथैव साधून् रक्षित्वा दुष्टान् हन्युः॥ १॥

पदार्थः-हे राजन्! (**यथा**) जैसे (**सद्यः**) शीघ्र (**जातः**) उत्पन्न हुआ (**वृषभः**) वृष्टि करनेवाला (**कनीनः**) प्रकाशवान् (**रसाशिरः**) रसों का भोजन करनेवाला सूर्य्य (**अन्धसः**) अन्न के (**सुतस्य**) उत्तम प्रकार संस्कारयुक्त (**सोम्यस्य**) ऐश्वर्य में उत्पन्न का (**प्रथमम्**) प्रथम (**आवत्**) रक्षा करे, उस प्रकार के आप (**प्रतिकामम्**) कामना-कामना के प्रति ओषधियों के रस को (**पिब**) पान करो और इस प्रकार के (**साधोः**) उत्तम मार्गों में वर्त्तमान (**ते**) आपका (**ह**) निश्चय से प्रजाओं को (**प्रभर्त्तुम्**) प्रकर्षता से धारण करने का सामर्थ्य होवे॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजा आदि मनुष्यो! जैसे सूर्य्य आदि पदार्थ अपने प्रतापों और ईश्वर के नियोग से सब पदार्थों की रक्षा करके दोषों का नाश करते हैं, वैसे ही साधु पुरुषों की रक्षा करके दुष्ट पुरुषों का नाश करें॥ १॥

अथ सन्तानोत्पत्तिविषयमाह॥

अब सन्तान की उत्पत्ति के विषय को अगले मन्त्र में कहते हैं॥

यज्जायथास्तदहरस्य कामेंऽशोः पीयूषमपिबो गिरिष्ठाम्।

तं ते॑ मा॒ता परि॒ योषा॒ जनि॑त्री म॒हः पि॒तुर्द॑म॒ आसि॑ञ्चदग्रे॑॥ २॥

यत्। जाय॑थाः। तत्। अहः॑। अ॒स्य॒। कामे॑। अं॒शोः॒। पी॒यू॒ष॑म्। अ॒पि॒ब॒ः। गि॒रि॒ऽस्थाम्। तम्। ते॒। मा॒ता। परि॑। योषा॑। जनि॑त्री। म॒हः। पि॒तुः॒। दमे॑। आ। अ॒सि॒ञ्च॒त्। अग्रे॑॥ २॥

पदार्थः-(**यत्**) (**जायथाः**) (**तत्**) (**अहः**) दिने (**अस्य**) (**कामे**) (**अंशोः**) प्राप्तस्य (**पीयूषम्**) अमृतात्मकं रसम् (**अपिबः**) पिब (**गिरिष्ठाम्**) यो गिरौ मेघे तिष्ठति (**तम्**) (**ते**) तव (**माता**) (**परि**) सर्वतः (**योषा**) (**जनित्री**) (**महः**) महत् (**पितुः**) पालकस्य जनकस्य (**दमे**) गृहे। **दम इति गृहनामसु पठितम्।** (निघं०३.४) (**आ**) (**असिञ्चत्**) समन्तात् सिञ्चति (**अग्रे**) प्रथमतः॥ २॥

अन्वयः-हे राजँस्त्वं यदहर्जायथास्तदहः कामेऽस्यांशोर्गिरिष्ठां पीयूषं ते तव पिताऽपिबस्तं तव पितुर्योषा तव जनित्री माताऽग्रे दमे महः पर्य्यासिञ्चत्॥ २॥

भावार्थः-यदा स्त्रीपुरुषौ गर्भमादधेयातां तदा दुष्टान्नपानादिसेवनं विहाय श्रेष्ठान्नपानं कृत्वा गर्भमाधाय सन्तानमुत्पाद्य पुनस्तस्याप्येवमेव पालनं वर्धनं कुर्य्याद्यो राजा भवितुमर्हेत्॥ २॥

पदार्थः-हे राजन्! आप (**यत्**) जिस (**अहः**) दिन (**जायथाः**) उत्पन्न हुए (**तत्**) उस दिन की (**कामे**) कामना में (**अस्य**) इस (**अंशोः**) प्राप्त हुए भाग के (**गिरिष्ठाम्**) मेघ में विद्यमान (**पीयूषम्**) अमृतरूप रस को (**ते**) आपके पिता (**अपिबः**) पान करें (**तम्**) उसको आपके (**पितुः**) पालक और उत्पादक पिता की (**योषा**) स्त्री आपकी (**जनित्री**) उत्पन्न करनेवाली (**माता**) माता (**अग्रे**) पहिले (**दमे**) घर में (**महः**) बड़े को (**परि, आ, असिञ्चत्**) चारों ओर से सींचता है॥ २॥

भावार्थः-जब स्त्री और पुरुष गर्भ को धारण करें तब दुष्ट अन्न-पान आदि के सेवन **[**का**]** त्याग, श्रेष्ठ अन्न-पान, गर्भधारण और सन्तान उत्पन्न करके फिर उसको भी इसी प्रकार पालन और वृद्धि करे, जो कि राजा होने को योग्य हो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒प॒स्थाय॑ मा॒त॒र॒मन्न॑मैट्ट॒ ति॒ग्मम॑पश्यद॒भि सोम॒मूध॑ः।

प्र॒या॒वय॑न्नचर॒द् गृत्सो॑ अ॒न्यान् म॒हानि॑ चक्रे॒ पु॒रु॒धप्र॑तीकः॥ ३॥

उ॒प॒ऽस्थाय॑। मा॒तर॑म्। अन्न॑म्। ऐट्ट॒। ति॒ग्मम्। अ॒प॒श्य॒त्। अ॒भि। सोम॑म्। ऊध॑ः। प्र॒ऽय॒वय॑न्। अ॒च॒र॒त्। गृत्स॑ः। अ॒न्यान्। म॒हानि॑। च॒क्रे॒। पु॒रु॒धऽप्र॑तीकः॥ ३॥

पदार्थः-(**उपस्थाय**) सामीप्यं प्राप्य (**मातरम्**) जननीम् (**अन्नम्**) अत्तुं योग्यम् (**ऐट्ट**) प्रशंसेत (**तिग्मम्**) तीव्रम् (**अपश्यत्**) पश्येत् (**अभि**) आभिमुख्ये (**सोमम्**) ऐश्वर्य्यम् (**ऊधः**) यथोषाः (**प्रयावयन्**)

संयोजयन् विभाजयन् वा **(अचरत्)** आचरेत् **(गृत्सः)** मेधावी **(अन्यान्)** **(महानि)** महान्त्यपत्यानि **(चक्रे)** कुर्य्यात् **(पुरुधप्रतीकः)** पुरुन् बहून् दधति ते पुरुधा यः पुरुधान् प्रत्यायेति सः॥३॥

अन्वयः-यो गृत्सः पुरुधप्रतीकः सूर्य्य ऊधइव मातरमुपस्थायान्नमैट्ट प्रयावयन् सन् तिग्मं सोममभ्यपश्यदन्यानचरन्महानि चक्रे स एव राजा भवितुमर्हेत्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्य उषसं प्राप्य दिनं जनयति तथैवाऽपत्यमातरं सन्तानपितोपस्थाय गर्भमादधेत तथैव संस्कारान्मातापितरौ विदधेयातां यथाऽपत्यानि शुभगुणकर्मलक्षणस्वभावानि राजकर्माणि कर्त्तुमर्हेयुः॥३॥

पदार्थः-जो **(गृत्सः)** बुद्धिमान् **(पुरुधप्रतीकः)** बहुतों को धारण करनेवालों के प्रति प्राप्त होनेवाला सूर्य्य **(ऊधः)** प्रातःकाल की रात्रि को जैसे वैसे **(मातरम्)** पुत्र की माता को **(उपस्थाय)** समीप प्राप्त होकर **(अन्नम्)** खाने योग्य पदार्थ की **(ऐट्ट)** प्रशंसा करे और **(प्रयावयन्)** संयोग वा विभाग करता हुआ **[(तिग्मम्)** तीव्र**]** **(सोमम्)** ऐश्वर्य को **(अभि)** चारों ओर से **(अपश्यत्)** देखे और **(अन्यान्)** औरों को **(अचरत्)** आचरण करे, **(महानि)** बड़े सन्तानों को **(चक्रे)** उत्पन्न करे, वही राजा होने योग्य है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य प्रातःकाल की रात्रि को प्राप्त होकर दिन को उत्पन्न करता है, वैसे ही सन्तान की माता को सन्तान का पिता प्राप्त होकर गर्भस्थिति करे और वैसे ही संस्कारों को माता और पिता करें कि जैसे सन्तान उत्तम गुण, कर्म, लक्षण, स्वभावों से युक्त राजकर्मों को करने योग्य होवें॥३॥

अथ प्रजापालनविषयमाह॥

अब प्रजा के पालन का विषय अगले मन्त्र में कहते हैं॥

उ॒ग्रस्तु॑रा॒षाळ॒भिभू॑त्योजा॒ यथाव॒शं त॒न्वं॑ चक्र ए॒षः।
त्वष्टा॑र॒मिन्द्रो॑ ज॒नुषा॑भि॒भूया॒मुष्या॒ सोम॑मपिबच्च॒मूषु॑॥४॥

उ॒ग्रः। तु॒रा॒षाट्। अ॒भिभू॑तिऽओजाः। य॒थाऽव॒शम्। त॒न्व॑म्। च॒क्रे॒। ए॒षः। त्वष्टा॑रम्। इन्द्रः॑। ज॒नुषा॑। अ॒भि॒ऽभूय॑। आ॒ऽमुष्य॑। सोम॑म्। अ॒पि॒ब॒त्। च॒मूषु॑॥४॥

पदार्थः-**(उग्रः)** तेजस्वी **(तुराषाट्)** यस्तुरा त्वरिताञ्छीघ्रकारिणः सहते सः **(अभिभूत्योजाः)** शत्रूणामभिभवकरः पराक्रमो यस्य सः **(यथावशम्)** वशमनतिक्रम्य वर्त्तते तत् **(तन्वम्)** शरीरम् **(चक्रे)** करोति **(एषः)** **(त्वष्टारम्)** तेजस्विनम् **(इन्द्रः)** परमैश्वर्यवान् **(जनुषा)** जन्मना **(अभिभूय)** शत्रून् तिरस्कृत्य **(आमुष्य)** चोरयित्वा। अत्र **संहितायामिति** दीर्घः। **(सोमम्)** ओषधिरसम् **(अपिबत्)** पिबेत् **(चमूषु)** भक्षयित्रीषु सेनासु॥४॥

अन्वयः-य एषश्चमूषु सोममामुष्याऽपिबत् तं त्वष्टारमभिभूय जनुषोग्रस्तुराषाडभिभूत्योजा इन्द्रो यथावशं तन्वं चक्रे स राज्यं कर्त्तुमर्हेत्॥४॥

भावार्थः-ये विद्वांसो धार्मिका राजजनास्ते स्तेनादीन् दुष्टाँस्तिरस्कृत्य मादकद्रव्यसेविनो दण्डयित्वा स्वयमव्यसनिनो भूत्वा प्रजाः पालयितुं क्षमाः स्युस्त एव राज्यमुन्नेतुमर्हेयुः॥४॥

पदार्थः-जो **(एषः)** यह **(चमूषु)** भक्षण करनेवाली सेनाओं में **(सोमम्)** ओषधियों के रस की **(आमुष्य)** चोरी करके **(अपिबत्)** पीवे उस **(त्वष्टारम्)** तेजस्वी और शत्रुओं का **(अभिभूय)** तिरस्कार करके **(जनुषा)** जन्म से **(उग्रः)** तेजस्वी **(तुराषाट्)** शीघ्रकारियों को सहनेवाला **(अभिभूत्योजाः)** शत्रुओं के तिरस्कार करनेवाले पराक्रम से युक्त **(इन्द्रः)** अत्यन्त ऐश्वर्यवाला पुरुष **(यथावशम्)** यथासामर्थ्य **(तन्वम्)** शरीर को **(चक्रे)** करता है, वह राज्य करने के योग्य होवे॥४॥

भावार्थः-जो विद्वान् धार्मिक राजा जन हैं, वे चोर आदि दुष्ट जनों का तिरस्कार और मादक द्रव्य अर्थात् उन्मत्तता करनेवाले द्रव्यों के सेवनकर्त्ताओं का दण्ड करके और अपने आप अव्यसनी होकर प्रजाओं के पालन करने को समर्थ होवें, वे ही राज्य की वृद्धि करने के योग्य होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥५॥१२॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। संऽजितम्। धनानाम्॥५॥

पदार्थः-(**शुनम्**) राजधर्मजं सुखम् (**हुवेम**) आह्वयेम (**मघवानम्**) न्यायोपार्जितबहुधन- सत्कृतम् (**इन्द्रम्**) राजानम् (**अस्मिन्**) (**भरे**) भर्त्तव्ये राज्ये (**नृतमम्**) नरोत्तमम् (**वाजसातौ**) सत्यासत्यव्यवहारविभाजके (**शृण्वन्तम्**) सत्याऽसत्ये निश्चित्याज्ञापयन्तम् (**उग्रम्**) दुष्टेषु कठिनस्वभावं श्रेष्ठेषु सरलम् (**ऊतये**) रक्षणाद्याय (**समत्सु**) धर्म्यसंग्रामेषु (**घ्नन्तम्**) दुष्टान् विनाशयन्तम् (**वृत्राणि**) धनानि (**सञ्जितम्**) पालकं दातारं वा (**धनानाम्**)॥५॥

अन्वयः-हे मनुष्या! वयमस्मिन् वाजसातौ भर ऊतये मघवानं नृतमं शृण्वन्तमुग्रं समत्सु घ्नन्तं धनानां सञ्जितं वृत्राणि प्राप्तमिन्द्रं प्राप्य शुनं हुवेम तथैव तादृशं राजानं प्राप्य यूयमप्येतदाह्वयत॥५॥

भावार्थः-सर्वैः सभ्यैर्विद्वज्जनैरवश्यं सकलशास्त्रविशारदं शुभगुणकर्मस्वभावं राजधर्मकोविदं कुलीनं परमैश्वर्य्यवन्तं सर्वाधीशं कृत्वा राष्ट्रस्य सततं रक्षाञ्च विधाय दस्यवः परिहन्तव्या इति॥५॥

अत्र राजधर्मसन्तानोत्पत्तिराज्यपालनादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टचत्वारिंशत्तमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! हम लोग **(अस्मिन्)** इस **(वाजसातौ)** सत्य और असत्य व्यवहार के विभाग करनेवाले **(भरे)** पोषण करने योग्य राज्य में **(ऊतये)** रक्षण आदि के लिये **(मघवानम्)** न्याय से इकट्ठे किये गये बहुत धन से सत्कृत **(नृतमम्)** मनुष्यो में उत्तम मनुष्य **(शृण्वन्तम्)** सत्य और असत्य का निश्चय करके आज्ञा देते हुए **(उग्रम्)** दुष्ट जनों में कठिन और श्रेष्ठ पुरुषों में सरल स्वभाववाले **(समत्सु)** धर्मयुक्त संग्रामों में **(घ्नन्तम्)** दुष्ट पुरुषों के नाशकर्त्ता **(धनानाम्)** धनों के **(सञ्जितम्)** पालन करने वा देनेवाले **(वृत्राणि)** धनों को प्राप्त **(इन्द्रम्)** राजा को प्राप्त होकर **(शुनम्)** राजाओं के धर्म से उत्पन्न हुए सुख को **(हुवेम)** ग्रहण करें, वैसे ही ऐसे राजा को प्राप्त होकर आप लोग भी इसका ग्रहण करो॥५॥

भावार्थः-सम्पूर्ण श्रेष्ठ सभासद् विद्वज्जनों को चाहिये कि अवश्य सम्पूर्ण शास्त्रों में निपुण, उत्तम गुण, कर्म और स्वभाववाले राजधर्म में चतुर व उत्तम कुलयुक्त, अत्यन्त ऐश्वर्य्यवान् पुरुष को सबका अधीश करके और राज्य की निरन्तर रक्षा करके चौरादिकों का नाश करें॥५॥

इस सूक्त में राजधर्म, सन्तानोत्पत्ति और राज्यपालन आदि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अड़तालीसवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्यैकोनपञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ४ निचृत्त्रिष्टुप्। २, ५ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिः छन्दः। पञ्चमः स्वरः॥

अथ प्रजाविषयमाह॥

अब पाँच ऋचावाले उञ्चासवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में प्रजा के विषय को कहते हैं॥

शंसा॑ म॒हामिन्द्रं॑ यस्मि॒न् विश्वा॒ आ कृ॒ष्टय॑: सोम॒पा: काम॒मव्य॑न्।
यं सु॒क्रतुं॑ धि॒षणे॑ विभ्व॒तष्टं॒ घ॒नं वृ॒त्राणा॑ं ज॒नय॑न्त दे॒वा:॥ १॥

शंस। म॒हाम्। इन्द्र॑म्। यस्मि॑न्। विश्वा॑:। आ। कृ॒ष्टय॑:। सो॒म॒ऽपा:। काम॑म्। अव्य॑न्। यम्। सु॒ऽक्रतु॑म्। धि॒षणे॒ इति॑। वि॒भ्व॒ऽत॒ष्टम्। घ॒नम्। वृ॒त्राणा॑म्। ज॒नय॑न्त। दे॒वा:॥ १॥

पदार्थः-(**शंस**) स्तुहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**महाम्**) महान्तं पूजनीयम् (**इन्द्रम्**) राजानम् (**यस्मिन्**) (**विश्वाः**) समग्राः (**आ**) समन्तात् (**कृष्टयः**) मनुष्याः (**सोमपाः**) ऐश्वर्य्यपालकाः (**कामम्**) अभिलाषम् (**अव्यन्**) कामयन्ताम् (**यम्**) (**सुक्रतुम्**) शोभनकर्मकर्त्तृप्रज्ञम् (**धिषणे**) द्यावापृथिव्याविव विद्यानीती (**विभ्वतष्टम्**) विभुना जगदीश्वरेण निर्मितम् (**घनम्**) घनीभूतम् (**वृत्राणाम्**) मेघानाम् (**जनयन्त**) जनयन्ति (**देवाः**) विद्वांसः॥ १॥

अन्वयः-हे विद्वन्! यस्मिन् विश्वाः सोमपाः कृष्टयः काममाव्यन् वृत्राणां घनं विभ्वतष्टं महामिन्द्रं धिषणे प्रकाशवन्तं सूर्य्यमिव विद्यानीती प्रकाश्य यं सुक्रतुं देवा जनयन्त तं राजानं त्वं शंस॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा महानेकः सूर्य्यः प्रत्येकभूगोले स्थितान् मेघान् हन्ति प्राणिनां सुखं जनयति तथैव राजा दुष्टान् हत्वा श्रेष्ठानामिच्छां प्रपूर्य्याऽऽनन्दयति॥ १॥

पदार्थः-हे विद्वन्! (**यस्मिन्**) जिसमें (**विश्वाः**) सम्पूर्ण (**सोमपाः**) ऐश्वर्य्य के पालन करनेवाले (**कृष्टयः**) मनुष्य (**काममम्**) अभिलाषा की (**आ**) सब प्रकार (**अव्यन्**) इच्छा करें, (**वृत्राणाम्**) मेघों के (**घनम्**) समूह को (**विभ्वतष्टम्**) व्यापक परमेश्वर ने रचा, (**महाम्**) श्रेष्ठ और सेवा करने योग्य (**इन्द्रम्**) राजा को (**धिषणे**) अन्तरिक्ष और पृथिवी को प्रकाशित करते हुए सूर्य्य के सदृश विद्या और नीति को प्रकाशित करते हुए (**यम्**) जिस (**सुक्रतुम्**) उत्तम कर्म करनेवाली बुद्धि से युक्त पुरुष को (**देवाः**) विद्वान् लोग (**जनयन्त**) उत्पन्न करते हैं, उस राजा की आप (**शंस**) स्तुति करिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् लोगो! जैसे बड़ा एक सूर्य्य प्रत्येक भूगोल में वर्त्तमान मेघों को नाश करता और प्राणियों के सुख को उत्पन्न करता है, वैसे ही राजा जन दुष्ट पुरुषों का नाश और श्रेष्ठ पुरुषों की इच्छा पूर्ण करके आनन्द देता है॥ १॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम्।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रयाः अमिनादायुर्दस्योः॥ २॥

यम्। नु। नकिः। पृतनासु। स्वऽराजम्। द्विता। तरति। नृऽतमम्। हरिऽस्थाम्। इनऽतमः। सत्वऽभिः। यः। ह। शूषैः। पृथुऽज्रयाः। अमिनात्। आयुः। दस्योः॥ २॥

पदार्थः-(**यम्**) (**नु**) सद्यः (**नकिः**) निषेधे (**पृतनासु**) वीरसेनासु (**स्वराजम्**) यः स्वेन सूर्य्य इव राजते तम् (**द्विता**) द्वयोर्भावः (**तरति**) उल्लङ्घने (**नृतमम्**) अतिशयेन नायकम् (**हरिष्ठाम्**) हरयो मनुष्यास्तिष्ठन्ति यस्मिन् स तम् (**इनतमः**) अतिशयेनेश्वरः समर्थः (**सत्वभिः**) शत्रून् सीदयद्भिर्वीरैः सह (**यः**) (**ह**) किल (**शूषैः**) बलयुक्तैः (**पृथुज्रयाः**) पृथुस्तीव्रो ज्रयो वेगो यस्य सः (**अमिनात्**) हिंस्यात् (**आयुः**) (**दस्योः**) दुष्टस्य॥ २॥

अन्वयः-हे विद्वांसो! यं हरिष्ठां नृतमं स्वराजं पृतनासु द्विता नकिस्तरति यः पृथुज्रया इनतमो ह शूषैः सत्वभिः सह दस्योरायुर्न्वमिनात् तं सर्वाऽधीशं कुरुत॥ २॥

भावार्थः-हे मनुष्या! यं शत्रोर्द्विगुणमपि बलं जेतुं न शक्नोति य उत्कृष्टसामर्थ्यो दुष्टान् सततं हन्ति तमेव सर्वबलाध्यक्षं कृत्वा सदैव विजयः कर्त्तव्यः॥ २॥

पदार्थः-हे विद्वान् लोगो! (**यम्**) जिस (**हरिष्ठाम्**) मनुष्य वर्त्तमान हों जिसमें उस (**नृतमम्**) अतिशय करके नायक (**स्वराजम्**) अपने से सूर्य्य के सदृश प्रकाशमान (**पृतनासु**) वीरों की सेनाओं में (**द्विता**) दोपन का (**नकिः**) नहीं (**तरति**) उल्लङ्घन करता है और (**यः**) जो (**पृथुज्रयाः**) तीव्र वेग से युक्त (**इनतमः**) अत्यन्त समर्थ (**ह**) निश्चय से (**शूषैः**) बलयुक्त (**सत्वभिः**) शत्रुओं को दुःख देनेवाले वीरों के साथ (**दस्योः**) दुष्ट पुरुष के (**आयुः**) अवस्था का (**नु**) शीघ्र (**अमिनात्**) नाश करे, उसको सबका स्वामी करो॥ २॥

भावार्थः-हे मनुष्यो! जिस पुरुष को शत्रु का द्विगुना भी बल जीत नहीं सकता और जो अधिक सामर्थ्ययुक्त पुरुष दुष्ट पुरुषों का निरन्तर नाश करता है, उसी को सब सेना का अध्यक्ष करके सदैव विजय करना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान्।
भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः॥ ३॥

सहऽवा। पृत्ऽसु। तरणिः। न। अर्वा। विऽआनशिः। रोदसी इति। मेहनाऽवान्। भगः। न। कारे। हव्यः। मतीनाम्। पिताऽइव। चारुः। सुऽहवः। वयःऽधाः॥ ३॥

पदार्थः-(**सहावा**) सोढा। अत्राऽन्येषामपीति दीर्घः। (**पृत्सु**) स्पर्द्धमानेषु संग्रामेषु (**तरणिः**) सद्यो गन्ता (**न**) इव (**अर्वा**) अश्वः (**व्यानशिः**) व्याप्तः (**रोदसी**) द्यावाभूमी (**मेहनावान्**) मेहनानि सेचनानि बहूनि विद्यन्ते यस्य सः (**भगः**) ऐश्वर्य्ययोगः (**न**) इव (**कारे**) कर्त्तव्ये व्यवहारे (**हव्यः**) आदातुमर्हः (**मतीनाम्**) मननशीलानां मनुष्याणाम् (**पितेव**) यथा जनकः (**चारुः**) सुन्दरः (**सुहवः**) शोभनाऽऽह्वानस्तुतिः (**वयोधाः**) यो वयो जीवनं दधाति सः॥ ३॥

अन्वयः-हे मनुष्या! यः पृत्सु तरणिरर्वा न सहावा रोदसी इव मेहनावान् कारे व्यानशिर्हव्यो भगो न मतीनां वयोधाः सुहवश्चारुः पितेव वर्त्तते तमेव यूयं भूपतिं कुरुत॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। योऽश्ववद्वेगवान् बलिष्ठो योद्धा सूर्य्यभूमीवत् सर्वेषां सुखद ऐश्वर्य्यवत्कार्य्यसिद्धिकरः पितृवत्सर्वेषां पालको भवेत् स एव राज्याऽभिषेकमर्हेत्॥ ३॥

पदार्थः-हे मनुष्यो! जो (**पृत्सु**) स्पर्द्धा करते हुए संग्रामों में (**तरणिः**) शीघ्र चलनेवाले (**अर्वा**) घोड़े के (**न**) तुल्य (**सहावा**) सहनेवाला (**रोदसी**) अन्तरिक्ष और भूमि के सदृश (**मेहनावान्**) सेचन बहुत विद्यमान हैं, जिसके वह (**कारे**) करने योग्य व्यवहार में (**व्यानशिः**) व्याप्त (**हव्यः**) ग्रहण करने के योग्य (**भगः**) ऐश्वर्य्य के योग के (**न**) तुल्य (**मतीनाम्**) मनन करनेवाले मनुष्यों के (**वयोधाः**) जीवन को धारण करनेवाला (**सुहवः**) उत्तम पुकारने की स्तुतियुक्त (**चारुः**) सुन्दर (**पितेव**) पिता के सदृश वर्त्तमान है, उसी को आप लोग राजा करिये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो घोड़े के सदृश वेग और बलयुक्त, योद्धा, सूर्य्य और भूमि के सदृश सबको सुख देने और ऐश्वर्य्य सदृश कार्य्य की सिद्धि करनेवाला पिता के सदृश सबका पालनकर्त्ता होवे, वही राज्याऽभिषेक करने के योग्य होवे॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान्।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम्॥ ४॥

धर्ता। दिवः। रजसः। पृष्टः। ऊर्ध्वः। रथः। न। वायुः। वसुऽभिः। नियुत्वान्। क्षपाम्। वस्ता। जनिता। सूर्यस्य। विऽभक्ता। भागम्। धिष्णाऽइव। वाजम्॥ ४॥

पदार्थः-(**धर्त्ता**) धाता (**दिवः**) प्रकाशमयस्य (**रजसः**) लोकसमूहस्य (**पृष्टः**) पृष्टुं योग्यः (**ऊर्ध्वः**) उत्कृष्टः (**रथः**) रमणीयं यानम् (**न**) इव (**वायुः**) पवन इव बलवान् (**वसुभिः**) सर्वैर्लोकैः सह

(नियुत्वान्) नियमकर्त्ता। **नियुत्वानितीश्वरनामसु पठितम्।** (निघं०२.२१) **(क्षपाम्)** रात्रिम् **(वस्ता)** आच्छादयिता **(जनिता)** उत्पादकः **(सूर्यस्य)** सवितृमण्डलस्य **(विभक्ता)** विभागकर्त्ता **(भागम्)** अंशम् **(धिषणेव)** द्यावापृथिव्याविव **(वाजम्)** अन्नादिकम्॥४॥

अन्वयः-हे विद्वांसो! यो दिवः सूर्यस्य रजसश्च जनिता धर्त्ता पृष्ट ऊर्ध्वो रथो न वसुभिर्वायुरिव क्षपां वस्ता धिषणेव वाजं भागं विभक्ता नियुत्वानस्ति तं परमात्मानमिव राजानं मन्यध्वम्॥४॥

भावार्थः-हे मनुष्या! यो राजा परमेश्वरवत्प्रजासु वर्त्तते तमेव सततं सेवध्वम्॥४॥

पदार्थः-हे विद्वान् जनो! जो **(दिवः)** प्रकाशस्वरूप **(सूर्यस्य)** सूर्य **(रजसः)** लोकों के समूह का **(जनिता)** उत्पन्न करने **(धर्त्ता)** धारण करनेवाला **(पृष्टः)** पूछने योग्य **(ऊर्ध्वः)** उत्तम **(रथः)** सुन्दर वाहन के **(न)** तुल्य **(वसुभिः)** सम्पूर्ण लोकों से **(वायुः)** पवन के सदृश बलवान् **(क्षपाम्)** रात्रि को **(वस्ता)** आच्छादन करनेवाला और **(धिषणेव)** अन्तरिक्ष और भूमि के सदृश **(वाजम्)** घोड़े आदि **(भागम्)** अंश का **(विभक्ता)** विभाग करने और **(नियुत्वान्)** नियम करनेवाला है, उसको परमात्मा के सदृश राजा मानो॥४॥

भावार्थः-हे मनुष्यो! जो राजा परमेश्वर के सदृश प्रजाओं में वर्त्तमान है, उसी की निरन्तर सेवा करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥५॥१३॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥५॥

पदार्थः-(**शुनम्**) सुखम् (**हुवेम**) स्वीकुर्याम (**मघवानम्**) बह्वैश्वर्यम् (**इन्द्रम्**) परमेश्वरवद्वर्त्तमानं राजानम् (**अस्मिन्**) (**भरे**) पालनीये जगति (**नृतमम्**) अतिशयेन न्यायकारिणम् (**वाजसातौ**) स्वस्य स्वस्यांशस्य दानमये व्यवहारे (**शृण्वन्तम्**) यथावच्छ्रोतारम् (**उग्रम्**) दुष्टानां दुःखप्रदम् (**ऊतये**) रक्षणाद्याय (**समत्सु**) संग्रामेषु (**घ्नन्तम्**) हन्तारम् (**वृत्राणि**) धनानि (**सञ्जितम्**) जयशीलम् (**धनानाम्**) ऐश्वर्य्याणाम्॥५॥

अन्वयः-हे मनुष्या! वयं यमिन्द्रमिव वर्त्तमानं राजानं धनानामूतयेऽस्मिन् भरे वाजसातौ नृतमं मघवानं समत्सु शत्रून् घ्नन्तं वृत्राणि शृण्वन्तमुग्रं सञ्जितं राजानं समागत्य शुनं हुवेम तं यूयमपि स्वीकुरुत॥५॥

भावार्थः-राजभिः प्रजासु पितृवदीश्वरवद्वर्त्तित्वा सर्वस्याः प्रजायाः पालनं कर्त्तव्यमित्युपदिशन्तु॥५॥

अत्र प्रजाराजधर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनपञ्चाशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! हम लोग जिस **(इन्द्रम्)** परमेश्वर के सदृश वर्त्तमान राजा को **(धनानाम्)** ऐश्वर्य्यों के **(ऊतये)** रक्षण आदि के लिये **(अस्मिन्)** इस **(भरे)** पालन करने योग्य संसार और **(वाजसातौ)** अपने-अपने अंश के दानस्वरूप व्यवहार में **(नृतमम्)** अत्यन्त न्यायकारी **(मघवानम्)** बहुत ऐश्वर्य्यवाले **(समत्सु)** संग्रामों में शत्रुओं के **(घ्नन्तम्)** नाशकर्त्ता **(वृत्राणि)** धनों को **(शृण्वन्तम्)** यथावत् सुनते हुए **(उग्रम्)** दुष्टों के दुःख देने और **(सञ्जितम्)** जीतनेवाले राजा को प्राप्त होकर **(शुनम्)** सुख का **(हुवेम)** स्वीकार करे, उसको आप लोग भी स्वीकार करो॥५॥

भावार्थः-राजाओं को चाहिये कि प्रजाओं में पिता के और ईश्वर के तुल्य वर्त्तमान होकर सम्पूर्ण प्रजाओं का पालन करें, ऐसा उपदेश दीजिये॥५॥

इस सूक्त में प्रजा और राजा के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनचासवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य पञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, २, ४ निचृत् त्रिष्टुप्। ३, ५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजविषयमाह॥

अब पाँच ऋचावाले पचासवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजा के विषय को कहते हैं॥

इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान्।
ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्वः काममृध्या॥ १॥

इन्द्रः। स्वाहा। पिबतु। यस्य। सोमः। आऽगत्य। तुम्रः। वृषभः। मरुत्वान्। आ। उरुऽव्यचाः। पृणताम्। एभिः। अन्नैः। आ। अस्य। हविः। तन्वः। कामम्। ऋध्याः॥ १॥

पदार्थः-(**इन्द्रः**) ऐश्वर्य्यकर्त्ता (**स्वाहा**) सत्यया क्रियया (**पिबतु**) (**यस्य**) (**सोमः**) ऐश्वर्य्यसमूहः (**आगत्य**)। अत्र **संहितायामिति** दीर्घः। (**तुम्रः**) आहन्ता (**वृषभः**) बलिष्ठः (**मरुत्वान्**) प्रशस्तपुरुषयुक्तः (**आ**) (**उरुव्यचाः**) बहुशुभगुणव्याप्तः (**पृणताम्**) सुखयतु (**एभिः**) वर्त्तमानैः (**अन्नैः**) यवादिभिः (**आ**) (**अस्य**) (**हविः**) आदातव्यम् (**तन्वः**) शरीरस्य (**कामम्**) (**ऋध्याः**) साध्नुयाः॥ १॥

अन्वयः-हे विद्वन्! यस[सोमस]तुम्रो वृषभो मरुत्वानुरुव्यचा इन्द्रः स्वाहा यस्य सोमस्तस्यास्यैभिरन्नैरागत्य हविः पिबतु तन्वः काममापृणतां तं त्वमार्ध्याः॥ १॥

भावार्थः-हे मनुष्या! यः सत्यन्यायेन स्वांऽशं भुक्त्वा प्रजायाः सुखवर्द्धनायाऽन्यायं दुष्टांश्च हन्ति स समृद्धो भवति॥ १॥

पदार्थः-हे विद्वान्! जो (**सोमः**) ऐश्वर्यों का समूह (**तुम्रः**) विघ्नकारियों का हिंसक (**वृषभः**) बलिष्ठ (**मरुत्वान्**) उत्तम पुरुषों से युक्त (**उरुव्यचाः**) बहुत श्रेष्ठ गुणों से व्याप्त (**इन्द्रः**) ऐश्वर्य्यों का कर्त्ता (**स्वाहा**) सत्यक्रिया से (**यस्य**) जिसका (**सोमः**) ऐश्वर्य्यों का समूह उस (**अस्य**) इसके (**एभिः**) इन वर्तमान (**अन्नैः**) यव आदि अन्नों से (**आगत्य**) प्राप्त होकर (**हविः**) ग्रहण करने योग्य वस्तु का (**पिबतु**) पान कीजिये और (**तन्वः**) शरीर के (**कामम्**) मनोरथ को (**आ**) (**पृणताम्**) सब प्रकार पूर्ण करके सुख दीजिये और उसको आप (**आ, ऋध्याः**) सिद्ध कीजिये॥ १॥

भावार्थः-हे मनुष्यो! जो सत्य न्याय से अपने अंश का भोग करके प्रजा के सुख बढ़ाने के लिये अन्याय और दुष्ट पुरुषों का नाश करता है, वह पुरुष समृद्धियुक्त होता है॥ १॥

अथ प्रीतिविषयमाह॥

अब प्रीति के विषय को अगले मन्त्र में कहते हैं॥

आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः।

इ॒ह त्वा॑ धेयु॒र्हर॑यः सुशिप्र॒ पिबा॒ त्व१॑स्य सु॒षु॒त॒स्य॒ चारो॑:॥ २॥

आ। ते॒। स॒प॒र्यू॒ इति॑। ज॒वसे॑। यु॒न॒ज्मि॒। ययो॑:। अनु॑। प्र॒ऽदिवः। श्रु॒ष्टिम्। आव॑:। इ॒ह। त्वा॒। धे॒यु॒:। हर॑यः। सु॒ऽशि॒प्र॒। पिब॑। तु। अ॒स्य॒। सु॒ऽसु॒तस्य। चारो॑:॥ २॥

पदार्थः-(**आ**) समन्तात् (**ते**) तव (**सपर्य्यू**) सेवकौ (**जवसे**) वेगाय (**युनज्मि**) (**ययोः**) (**अनु**) (**प्रदिवः**) प्रकृष्टप्रकाशान् (**श्रुष्टिम्**) शीघ्रम् (**आवः**) रक्षेः (**इह**) (**त्वा**) त्वाम् (**धेयुः**) दध्युः। अत्र **छन्दस्युभयथे**ति सार्वधातुकमाश्रित्य सलोपः। (**हरयः**) पुरुषार्थिनो मनुष्याः (**सुशिप्र**) सुवदन (**पिब**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**तु**) (**अस्य**) (**सुषुतस्य**) सुष्ठु संस्कृतस्य (**चारोः**) अत्युत्तमस्य॥ २॥

अन्वयः-हे सुशिप्र! त्वं ययोरनु प्रदिवः श्रुष्टिमावस्ताविह सपर्य्यू ते जवस आ युनज्मि। ये हरयस्त्वा धेयुस्तैः सह त्वस्य सुषुतस्य चारोः सोमस्यांशं पिब॥ २॥

भावार्थः-अस्मिन् संसारे ये येषां सेवकास्तैस्ते पोषणीयाः सर्वैः परस्परं प्रीत्या सुखोन्नतिः कार्य्या॥ २॥

पदार्थः-हे (**सुशिप्र**) सुन्दर मुखवाले! आप (**ययोः**) जिनके (**अनु, प्रदिवः**) उत्तम प्रकाशों को (**श्रुष्टिम्**) शीघ्र (**आवः**) रक्षा करें वे (**इह**) इस संसार में (**सपर्य्यू**) सेवा करनेवाले (**ते**) आपके (**जवसे**) वेग के लिये (**आ, युनज्मि**) संयुक्त करता हूँ। और जो (**हरयः**) पुरुषार्थी मनुष्य (**त्वा**) आपको (**धेयुः**) धारण करें, उनके साथ (**तु**) शीघ्र (**अस्य**) इस (**सुषुतस्य**) उत्तम प्रकार संस्कारयुक्त (**चारोः**) अतिश्रेष्ठ इस सोमलतारूप ओषधियों के अंश का (**पिब**) पान कीजिये॥ २॥

भावार्थः-इस संसार में जो लोग जिनके सेवक उन स्वामियों को चाहिये कि उन सेवकों का पोषण करें और सब लोग परस्पर प्रीति से सुख की उन्नति करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

गोभि॑र्मिमि॒क्षुं द॑धिरे सु॒पा॒रमिन्द्रं॒ ज्यैष्ठ्या॑य॒ धाय॑से गृणा॒नाः।

म॒न्दा॒नः सोम॑ं पपि॒वाँ ऋ॒जीषि॒न्त्सम॒स्मभ्यं॑ पुरु॒धा गा इ॑षण्य॥ ३॥

गोभि॑:। मि॒मि॒क्षुम्। दु॒धि॒रे। सु॒ऽपा॒रम्। इन्द्र॑म्। ज्यैष्ठ्या॑य। धाय॑से। गृ॒णा॒नाः। म॒न्दा॒नः। सोम॑म्। प॒पि॒ऽवान्। ऋ॒जी॒षि॒न्। सम्। अ॒स्मभ्य॑म्। पु॒रु॒धा। गाः। इ॒ष॒ण्य॥ ३॥

पदार्थः-(**गोभिः**) किरणैः (**मिमिक्षुम्**) सेक्तुमिच्छुम् (**दधिरे**) धरन्तु (**सुपारम्**) सुखेन पारं गन्तुं योग्यम् (**इन्द्रम्**) विद्यैश्वर्य्यवन्तम् (**ज्यैष्ठ्याय**) वृद्धस्य भावाय (**धायसे**) धातुम् (**गृणानाः**) स्तुवन्तः (**मन्दानः**) आनन्दन् (**सोमम्**) (**पपिवान्**) पीतवान् (**ऋजीषिन्**) सरलस्वभावः (**सम्**) (**अस्मभ्यम्**) (**पुरुधा**) बहुभिः प्रकारैः (**गाः**) पृथिव्याद्याः (**इषण्य**) प्रेरय॥ ३॥

अन्वयः-हे ऋजीषिन्! ये गृणाना गोभिर्धायसे ज्यैष्ठ्याय मिमिक्षुं सुपारमिन्द्रं त्वा दधिरे यश्च सोमं पपिवान् मन्दानः सन्नस्मभ्यमिषण्य प्रेरय सोमं पुरुधा गाश्च संदधति ताँस्त्वं ते त्वां च सत्कुर्वन्तु॥३॥

भावार्थः-यथा सूर्य्यः किरणैर्वृष्टिं कृत्वा सर्वान् पुष्णाति तथैव विद्वांसोऽध्यापनोपदेशाभ्यां विद्यासत्ये वर्षित्वा सर्वान् मनुष्यान् पुष्णन्तु॥३॥

पदार्थः-हे **(ऋजीषिन्)** नम्र स्वभाव और **(गृणानाः)** स्तुति करते हुए! **(गोभिः)** किरणों से **(धायसे)** धारण करने को **(ज्यैष्ठ्याय)** वृद्ध होने के लिये **(मिमिक्षुम्)** सेचन करने की इच्छा करनेवाले को **(सुपारम्)** सुख से पार जाने के योग्य **(इन्द्रम्)** विद्या और ऐश्वर्यवान् आपको **(दधिरे)** धारण करो और जिसने **(सोमम्)** सोमलता के रस को **(पपिवान्)** पीया **(मन्दानः)** आनन्द करते हुए **(अस्मभ्यम्)** हम लोगों के **(इषण्य)** प्रेरणा करिये **(सोमम्)** सोम ओषधि के रस को और **(पुरुधा)** अनेक प्रकारों से **(गाः)** पृथिवी आदि को धारण करता है, उनका आप और वे आपका सत्कार करें॥३॥

भावार्थः-जैसे सूर्य अपने किरणों से वृष्टि करके सबकी पुष्टि करता है, वैसे ही विद्वान् लोग पढ़ाने और उपदेश से विद्या और सत्य की वृष्टि करके सब मनुष्यों की पुष्टि करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒मं काम॑ं मन्दया॒ गोभि॒रश्वै॑श्चन्द्रव॑ता॒ राध॑सा प॒प्रथ॑श्च।
स्व॒र्यवो॑ म॒तिभि॒स्तुभ्यं॒ विप्रा॒ इन्द्रा॑य॒ वाह॑ः कु॒शि॒कासो॑ अक्रन्॥४॥

इ॒मम्। काम॑म्। म॒न्द॒य॒। गोभि॑ः। अश्वै॑ः। च॒न्द्र॒ऽव॑ता। राध॑सा। प॒प्रथ॑ः। च॒। स्व॒ःऽयव॑ः। म॒तिऽभि॑ः। तुभ्य॑म्। विप्रा॑ः। इन्द्रा॑य। वाह॑ः। कु॒शि॒कास॑ः। अ॒क्र॒न्॥४॥

पदार्थः-**(इमम्)** प्रत्यक्षम् **(कामम्)** **(मन्दय)** प्रापय। अत्र **संहितायामिति** दीर्घः। **(गोभिः)** धेन्वादिभिः **(अश्वैः)** तुरङ्गादिभिः **(चन्द्रवता)** पुष्कलं चन्द्रं सुवर्णं विद्यते यस्मिँस्तेन। **चन्द्र इति हिरण्यनामसु पठितम्।** (निघं०१.२) **(राधसा)** धनेन **(पप्रथः)** प्रख्यातो भव **(च)** अन्यान् प्रख्यापय **(स्वर्य्यवः)** ये सुखं यावयन्ति मिश्रयन्ति ते **(मतिभिः)** मनुष्यैः **(तुभ्यम्)** **(विप्राः)** पूर्णविद्या मेधाविनः **(इन्द्राय)** परमैश्वर्याय **(वाहः)** प्रापकाः **(कुशिकासः)** सर्वशास्त्रसिद्धान्तवेत्तारः **(अक्रन्)** कुर्युः॥४॥

अन्वयः-हे राजन्! ये स्वर्य्यवः कुशिकासो वाहो विप्रा मतिभिरिन्द्राय तुभ्यमिमं काममक्रँस्तेषामिमं कामं गोभिरश्वैश्चन्द्रवता राधसा त्वं पप्रथश्चैतान् मन्दय॥४॥

भावार्थः-यदि सत्पुरुषैः सहाऽनुकूल्येन वर्त्तित्वा परस्पराऽनुभूत्या पशुधनादिभिरिच्छामलं-कुर्य्युस्ते सदा सुखिनः स्युः॥४॥

पदार्थः-हे राजन्! जो **(स्वर्यवः)** सुख को प्राप्त कराने **(कुशिकासः)** सम्पूर्ण शास्त्रों के सिद्धान्त जानने और **(वाहः)** प्राप्त करानेवाले **(विप्राः)** पूर्ण विद्या से युक्त बुद्धिमान् लोग **(मतिभिः)** मनुष्यों से **(इन्द्राय)** अत्यन्त धन से युक्त **(तुभ्यम्)** आपके लिये **(इमम्)** इस प्रत्यक्ष **(कामम्)** मनोरथ को **(अक्रन्)** करें, उन लोगों के इस मनोरथ को **(गोभिः)** गौ आदि और **(अश्वैः)** घोड़े आदि और **(चन्द्रवता)** प्रसिद्ध बहुत सुवर्ण विद्यमान है जिसमें उस **(राधसा)** धन से आप **(पप्रथः)** प्रसिद्ध होइये **(च)** और इनको **(मन्दय)** पहुँचाइये॥४॥

भावार्थः-जो श्रेष्ठ पुरुषों के साथ अनुकूलता से वर्त्तमान होकर परस्पर ऐश्वर्य्य से और पशु आदि धन आदिकों से इच्छा को पूर्ण करें, वे सदा सुखी होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम्॥५॥१४॥

शुनम्। हुवेम। मघऽवानम्। इन्द्रम्। अस्मिन्। भरे। नृऽतमम्। वाजऽसातौ। शृण्वन्तम्। उग्रम्। ऊतये। समत्ऽसु। घ्नन्तम्। वृत्राणि। सम्ऽजितम्। धनानाम्॥५॥

पदार्थः-(**शुनम्**) परस्परमेलजन्यं सुखम् **(हुवेम)** **(मघवानम्)** पूजितधनवन्तम् **(इन्द्रम्)** विरोधविदारकम् **(अस्मिन्)** **(भरे)** प्रेम्णा पालनीये व्यवहारे **(नृतमम्)** अतिशयेन प्रीतेर्नेतारं प्रापकम् **(वाजसातौ)** विज्ञानसेवने **(शृण्वन्तम्)** **(उग्रम्)** द्वेषविनाशकम् **(ऊतये)** ऐक्यभावप्रवेशाय **(समत्सु)** विरोधव्यवहारेषु **(घ्नन्तम्)** विनाशयन्तम् **(वृत्राणि)** प्रेमास्पदवस्तूनि **(सञ्जितम्)** सम्यग् जयशीलम् **(धनानाम्)** द्रव्याणाम्॥५॥

अन्वयः-हे मनुष्या! वयमस्मिन् वाजसातौ भरे ऊतये मघवानं नृतमं वृत्राणि शृण्वन्तं समत्सु वर्त्तमानानि निमित्तानि घ्नन्तमुग्रं धनानां सञ्जितमिन्द्रं शुनमिव हुवेम तं यूयमपि सेवध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव धन्या मनुष्या ये विरोधं परिहाय सहाऽनुभूतिं जनयन्तीति॥५॥

अत्र परस्परेषां प्रीतिवर्णनादेतर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चाशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! हम लोग **(अस्मिन्)** इस **(वाजसातौ)** विज्ञान के सेवन करने और **(भरे)** प्रेम से पालन करने योग्य व्यवहार में **(ऊतये)** ऐक्यभाव में प्रवेश होने के लिये **(मघवानम्)** श्रेष्ठ धनवाले और **(नृतमम्)** अत्यन्त प्रीति के प्राप्त करानेवाले और **(वृत्राणि)** प्रेम के स्थानभूत वस्तुओं को **(शृण्वन्तम्)** सुननेवाले **(समत्सु)** विरोध के व्यवहारों में वर्त्तमान कारणों को **(घ्नन्तम्)** नाश करते हुए

(उग्रम्) द्वेष के विनाशकर्त्ता **(धनानाम्)** द्रव्यों को **(सञ्जितम्)** उत्तम प्रकार जीतने और **(इन्द्रम्)** विरोध के नाश करनेवाले को **(शुनम्)** परस्पर मेल से उत्पन्न सुख को जैसे वैसे **(हुवेम)** ग्रहण करें, उसका आप लोग भी सेवन करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही धन्य मनुष्य कि जो विरोध का त्याग करके एक साथ ऐश्वर्य उत्पन्न करते हैं॥५॥

इस सूक्त में परस्पर की प्रीति वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पचासवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथ द्वादशर्चस्यैकाधिकपञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। ४, ७-९ त्रिष्टुप्। ५, ६ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। १-३ निचृज्जगती छन्दः। निषादः स्वरः। १०, ११ यवमध्या गायत्री। १२ विराट् गायत्री छन्दः। षड्जः स्वरः॥

अथ राजविषयमाह॥

अब बारह ऋचावाले इक्कावनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजा के विषय को कहते हैं॥

चर्षणीधृतं मघवानमुक्थ्यꣳ इन्द्रं गिरो बृहतीरभ्यनूषत।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे॥ १॥

चर्षणिऽधृतम्। मघऽवानम्। उक्थ्यम्। इन्द्रम्। गिरः। बृहतीः। अभि। अनूषत। ववृधानम्। पुरुऽहूतम्। सुवृक्तिऽभिः। अमर्त्यम्। जरमाणम्। दिवेऽदिवे॥ १॥

पदार्थः-(**चर्षणीधृतम्**) मनुष्याणां धर्त्तारम् (**मघवानम्**) बहुधनयुक्तम् (**उक्थ्यम्**) प्रशंसनीयम् (**इन्द्रम्**) राजानम् (**गिरः**) विदुषां वाचः (**बृहतीः**) बृहद्विषयाः (**अभि, अनूषत**) प्रशंसेयुः (**वावृधानम्**) वर्द्धमानम् (**पुरुहूतम्**) बहुभिः सत्कृतम् (**सुवृक्तिभिः**) सुष्ठु संविभागैः (**अमर्त्यम्**) मरणधर्मरहितम् (**जरमाणम्**) स्तुवन्तम् (**दिवेदिवे**) प्रतिदिनम्॥ १॥

अन्वयः-हे मनुष्या! बृहतीर्गिरो दिवेदिवे सुवृक्तिभिर्यं चर्षणीधृतं मघवानमुक्थ्यं वावृधानं पुरुहूतममर्त्यं जरमाणमिन्द्रमभ्यनूषत तं यूयमाश्रयत॥ १॥

भावार्थः-हे राजपुरुषा! बहुभिः सत्कृतं प्रजाधारणक्षमं राजानं विद्वांसः प्रशंसेयुस्तस्यैव यूयं शरणं गच्छत॥ १॥

पदार्थः-हे मनुष्यो! (**बृहतीः**) बड़े विषय अर्थात् तात्पर्यवाली (**गिरः**) विद्वानों की वाणियों को (**दिवेदिवे**) प्रतिदिन (**सुवृक्तिभिः**) उत्तम संविभागों से जिस (**चर्षणीधृतम्**) मनुष्यों के धारण करनेवाले (**मघवानम्**) बढ़े हुए धन से युक्त (**उक्थ्यम्**) प्रशंसा करने योग्य (**वावृधानम्**) बढ़े हुए (**पुरुहूतम्**) बहुतों से सत्कार किये गये (**अमर्त्यम्**) मरणधर्म से रहित (**जरमाणम्**) स्तुति करते हुए (**इन्द्रम्**) राजा की (**अभ्यनूषत**) प्रशंसा करें, उसका आप लोग भी आश्रयण करो॥ १॥

भावार्थः-हे राजपुरुषो! बहुत जनों से सत्कृत प्रजाओं के धारण करने में समर्थ जिस राजा की विद्वान् लोग प्रशंसा करें, उसी के आप लोग शरण जाओ॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः।

वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम्॥ २॥

शतऽक्रतुम्। अर्णवम्। शाकिनम्। नरम्। गिरः। मे। इन्द्रम्। उप। यन्ति। विश्वतः। वाजऽसनिम्। पूःऽभिदम्। तूर्णिम्। अप्ऽतुरम्। धामऽसाचम्। अभिऽसाचम्। स्वःऽविदम्॥ २॥

पदार्थः-(**शतक्रतुम्**) अमितप्रज्ञम् (**अर्णवम्**) समुद्रमिव गम्भीरम् (**शाकिनम्**) शक्तिमन्तम् (**नरम्**) नायकम् (**गिरः**) वाण्याः (**मे**) मम (**इन्द्रम्**) परमैश्वर्य्यप्रदम् (**उप**) (**यन्ति**) प्राप्नुवन्ति (**विश्वतः**) सर्वतः (**वाजसनिम्**) अन्नविज्ञानविभाजकम् (**पूर्भिदम्**) शत्रूणां नगराभिदारकम् (**तूर्णिम्**) शीघ्रकारिणम् (**अप्तुरम्**) प्राणप्रेरकम् (**धामसाचम्**) समवयन्तम् (**अभिषाचम्**) आभिमुख्ये सचन्तम् (**स्वर्विदम्**) सुखप्राप्तम्॥ २॥

अन्वयः-हे मनुष्या! मे गिरोऽर्णवमिव शतक्रतुं शाकिनं नरं वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदमिन्द्रं विश्वत उ यन्ति तस्यैव शरणमुपगच्छत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि मनुष्या अखिलविद्यासु निपुणं शक्तिमन्तं सत्यसन्धिं दुष्टताडकं राजानमुपगच्छेयुस्तर्हि तेषां कुतश्चिदपि भयं न जायते॥ २॥

पदार्थः-हे मनुष्यो! (**मे**) मेरी (**गिरः**) वाणियों को (**अर्णवम्**) समुद्र के सदृश गम्भीर (**शतक्रतुम्**) नापरहित बुद्धि और (**शाकिनम्**) शक्तियुक्त (**नरम्**) नायक (**वाजसनिम्**) अन्न और विज्ञान के विभागकर्त्ता (**पूर्भिदम्**) शत्रुओं के नगर के भेदन करने और (**तूर्णिम्**) शीघ्रता करनेवाले (**अप्तुरम्**) प्राणों के प्रेरणकर्त्ता (**धामसाचम्**) रक्षा करते हुए (**अभिषाचम्**) सम्मुख भाव और (**स्वर्विदम्**) सुख को प्राप्त (**इन्द्रम्**) अत्यन्त ऐश्वर्य्य के देनेवाले को (**विश्वतः**) सब प्रकार (**उप, यन्ति**) प्राप्त होते हैं, उस ही के शरण जाओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य लोग सम्पूर्ण विद्याओं में कुशल सामर्थ्ययुक्त सत्यधारणकर्त्ता दुष्ट पुरुषों के ताड़न करनेवाले राजा के समीप जावें तो उसका किसी से भी भय नहीं होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आक्रे वसोर्जरिता पनस्यतेऽनेहसः स्तुभ इन्द्रो दुवस्यति।
विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि॥ ३॥

आऽक्रे। वसोः। जरिता। पनस्यते। अनेहसः। स्तुभः। इन्द्रः। दुवस्यति। विवस्वतः। सदने। आ। हि। पिप्रिये। सत्राऽसहम्। अभिमातिऽहनम्। स्तुहि॥ ३॥

पदार्थः-(**आकरे**) समूहे (**वसोः**) धनस्य (**जरिता**) स्तोता (**पनस्यते**) व्यवहरति (**अनेहसः**) अहन्तव्यस्य (**स्तुभः**) यः स्तोभते सः (**इन्द्रः**) विद्युदिव सर्वाधीशो राजा (**दुवस्यति**) परिचरति (**विवस्वतः**) सूर्यस्य (**सदने**) स्थाने (**आ**) समन्तात् (**हि**) खलु (**पिप्रिये**) प्रीणाति (**सत्रासाहम्**) सत्यसहम् (**अभिमातिहनम्**) योऽभिमानयुक्तं शत्रुं हन्ति तम् (**स्तुहि**)॥३॥

अन्वयः-हे मनुष्या! यः स्तुभो जरिता अनेहसो वसोराकरे विवस्वतः सदन इन्द्र इव पनस्यते विदुषो धर्मं च दुवस्यति सत्रासाहमभिमातिहनमा पिप्रिये तं हि स्तुहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरेण विद्युत उत्पादितः सूर्य एकत्र वर्त्तमानः सन् सर्वत्र सन्निहितं सर्वं प्रकाशते तथैवैकस्मिन् देशे स्थितो राजा अमात्यदूतचारसेनादिप्रबन्धेन सर्वं राज्यं विद्याविनयाभ्यामुज्ज्वल्यैश्वर्यसमूहेन धर्मोन्नतये व्यवहरेत्॥३॥

पदार्थः-हे मनुष्यो! जो (**स्तुभः**) फलों को प्राप्त होने (**जरिता**) स्तुति करनेवाला (**अनेहसः**) नहीं नाश करने योग्य (**वसोः**) धन के (**आकरे**) समूह में (**विवस्वतः**) सूर्य के (**सदने**) स्थान में (**इन्द्रः**) बिजुली के सदृश सबका स्वामी राजा (**पनस्यते**) व्यवहार करता है और विद्वान् के धर्म का (**दुवस्यति**) सेवन करता और (**सत्रासाहम्**) सत्य के सहनेवाले (**अभिमातिहनम्**) अभिमानयुक्त शत्रु के नाश करनेवाले को (**आ, पिप्रिये**) प्रसन्न करता है, उसकी (**हि**) निश्चय (**स्तुहि**) स्तुति करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर से बिजुली द्वारा उत्पन्न किया गया सूर्य एकत्र वर्त्तमान हुआ सर्वत्र विद्यमान सब वस्तुओं को प्रकाशित करता है, वैसे ही एक स्थान में वर्त्तमान राजा, मन्त्री, दूत, पियादे और सेनादि के प्रबन्ध से सम्पूर्ण राज्य को विद्या और विनय से प्रकाशित करके ऐश्वर्य के समूह से धर्म की उन्नति के लिये व्यवहार करे॥३॥

अथ प्रजाप्रशंसाविषयमाह॥

अब प्रजा के प्रशंसा के विषय को अगले मन्त्र में कहते हैं॥

नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे॥४॥

नृणाम्। ऊम् इति। त्वा। नृऽतमम्। गीःऽभिः। उक्थैः। अभि। प्र। वीरम्। अर्चत। सऽबाधः। सम्। सहसे। पुरुऽमायो। जिहीते। नमः। अस्य। प्रऽदिवः। एकः। ईशे॥४॥

पदार्थः-(**नृणाम्**) नायकानां मनुष्याणाम् (**ऊ**) (**त्वा**) त्वाम् (**नृतमम्**) अतिशयेन नायकम् (**गीर्भिः**) वाग्भिः (**उक्थैः**) प्रशंसावचनैः (**अभि**) (**प्र**) (**वीरम्**) व्याप्तराजविद्याबलम् (**अर्चत**) सत्कुरुत। अत्र **संहितायामिति** दीर्घः। (**सबाधः**) बाधेन सह वर्त्तमानः (**सम्**) (**सहसे**) बलाय (**पुरुमायः**) यः पुरून् बहून् मिनोति (**जिहीते**) प्राप्नोति (**नमः**) अन्नं संस्कारं वा (**यस्य**) (**प्रदिवः**) प्रकृष्टप्रकाशस्य (**एकः**) असहायः (**ईशे**) ईष्टे। **आत्मनेपदेष्विति** तलोपः॥४॥

अन्वयः-हे विद्वांसो! यूयं यः सबाधः पुरुमाय एकः सेनेशोऽस्य प्रदिव ईशे सहसे नमः सं जिहीते तं वीरं प्रार्चत। हे राजन्! ये गीर्भिरुक्थैर्नृणां नृतमं त्वा सत्कुर्युस्तानु त्वमभ्यर्च॥४॥

भावार्थः-विद्वद्भिस्तस्यैव प्रशंसा कार्या यः प्रशंसाऽर्हाणि कर्माणि कुर्यात्॥४॥

पदार्थः-हे विद्वान् जनो! आप लोग जो **(सबाधः)** बाध के सहित वर्त्तमान **(पुरुमायः)** बहुत कार्यों का कर्त्ता **(एकः)** सहायरहित सेनाधिपति पुरुष **(अस्य)** इस **(प्रदिवः)** उत्तम प्रकाश का **(ईशे)** स्वामी है **(सहसे)** बल के लिये **(नमः)** अन्न वा सत्कार को **(सम्, जिहीते)** प्राप्त होता है, उस **(वीरम्)** राजविद्या और बल से व्याप्त पुरुष का **(प्र, अर्चत)** सत्कार करिये। और हे राजन्! जो **(गीर्भिः)** वाणियों और **(उक्थैः)** प्रशंसा के वचनों से **(नृणाम्)** अग्रणी मनुष्यों के **(नृतमम्)** अत्यन्त नायक **(त्वा)** आपका सत्कार करें उनका **(उ)** ही आप सत्कार करिये॥४॥

भावार्थः-विद्वानों को चाहिये कि उस ही की प्रशंसा करें कि जो प्रशंसा योग्य कर्मों को करे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति।
इन्द्राय द्याव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि॥५॥१५॥

पूर्वीः। अस्य। निः।ऽसिधः। मर्त्येषु। पुरु। वसूनि। पृथिवी। बिभर्ति। इन्द्राय। द्यावः। ओषधीः। उत। आपः। रयिम्। रक्षन्ति। जीरयः। वनानि॥५॥

पदार्थः-(**पूर्वीः**) सनातनीः (**अस्य**) राज्ञः (**निष्षिधः**) नितरां साधिकाः (**मर्त्येषु**) मनुष्येषु (**पुरू**) पुरूणि बहूनि (**वसूनि**) द्रव्याणि (**पृथिवी**) (**बिभर्त्ति**) (**इन्द्राय**) ऐश्वर्याय (**द्यावः**) सूर्यादिप्रकाशः (**ओषधीः**) सोमाद्याः (**उत**) अपि (**आपः**) प्राणा जलानि (**रयिम्**) श्रियम् (**रक्षन्ति**) (**जीरयः**) ये जीर्यन्ते ते मनुष्याः (**वनानि**) वनन्ति सम्भजन्ति सुखानि यैस्तानि॥५॥

अन्वयः-हे मनुष्या! ये जीरयोऽस्य मर्त्येषु पूर्वीर्निष्षधो रक्षन्ति पुरू वसूनि पृथिवीव यो बिभर्त्ति द्याव इन्द्राय रयिं वनानि च उताप्यापः ओषधी रक्षन्तीव राज्यं बिभर्त्ति स एव राजा भवितुमर्हति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मर्त्येषु धनानि विज्ञानं भैषज्यं धरन्ति त एव राजकर्मचारिणो भवितुमर्हन्ति॥५॥

पदार्थः-हे मनुष्यो! जो **(जीरयः)** वृद्ध होनेवाले मनुष्य **(अस्य)** इस राजा के **(मर्त्येषु)** मनुष्यों में **(पूर्वीः)** अनादि काल से सिद्ध **(निष्षिधः)** अत्यन्त सिद्ध करनेवालियों की **(रक्षन्ति)** रक्षा करते हैं और

(**पुरू**) बहुत (**वसूनि**) द्रव्यों को (**पृथिवी**) भूमि के सदृश जो पुरुष (**बिभर्त्ति**) धारण करता है (**द्यावः**) सूर्य्य आदि के प्रकाश (**इन्द्राय**) ऐश्वर्य्य के लिये (**रयिम्**) लक्ष्मी और (**वनानि**) सम्मुख हों सुख जिनसे उनको (**उत**) भी (**आपः**) प्राण वा जल जैसे (**ओषधीः**) सोमलता और ओषधियों की रक्षा करते हैं, वैसे राज्य का (**बिभर्त्ति**) पोषण करता है, वही राजा होने के योग्य हो॥५॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्यों में धन, विज्ञान और ओषधि धारण करते, वे ही राजाओं के कर्मचारी होने के योग्य हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व।
बोध्या३पिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः॥६॥

तुभ्यम्। ब्रह्माणि। गिरः। इन्द्र। तुभ्यम्। सत्रा। दधिरे। हरिऽवः। जुषस्व। बोधि। आपिः। अवसः। नूतनस्य। सखे। वसो इति। जरितृऽभ्यः। वयः। धाः॥६॥

पदार्थः–(**तुभ्यम्**) (**ब्रह्माणि**) धनानि (**गिरः**) वाचः (**इन्द्र**) ऐश्वर्य्यधारक (**तुभ्यम्**) (**सत्रा**) सत्यम् (**दधिरे**) धरेयुः (**हरिवः**) प्रशस्ताऽश्वादियुक्त (**जुषस्व**) सेवस्व (**बोधि**) बुध्यस्व (**आपिः**) व्याप्तः सन् (**अवसः**) रक्षणादेः (**नूतनस्य**) नवीनस्य (**सखे**) मित्र (**वसो**) प्राप्तधन (**जरितृभ्यः**) स्तावकेभ्यो विद्वद्भ्यः (**वयः**) जीवनम् (**धाः**) धेहि॥६॥

अन्वयः–हे इन्द्र! या गिरस्तुभ्यं ब्रह्माणि, हे हरिवो! या वाचस्तुभ्यं सत्रा दधिरे तास्त्वं जुषस्व। हे सखे! नूतनस्याऽवस आपिस्सँस्ता बोधि। हे वसो! त्वं जरितृभ्यो वयो धाः॥६॥

भावार्थः–मनुष्यैस्तादृशी वाग् ग्राह्या श्राव्या यादृश्या धनं जायते सत्यं रक्ष्यते जीवनं वर्द्धयते॥६॥

पदार्थः–हे (**इन्द्र**) ऐश्वर्य्य के धारणकर्त्ता! जो (**गिरः**) वाणियां (**तुभ्यम्**) आपके लिये (**ब्रह्माणि**) धनों को और हे (**हरिवः**) उत्तम घोड़े आदि से युक्त! जो वाणियां (**तुभ्यम्**) आपके लिये (**सत्रा**) सत्य को (**दधिरे**) धारण करें, उनका आप (**जुषस्व**) सेवन करो। हे (**सखे**) मित्र! (**नूतनस्य**) नवीन (**अवसः**) रक्षणादि के (**आपिः**) व्याप्त हुए आप उनको (**बोधि**) जानिये, हे (**वसो**) धन को प्राप्त! आप (**जरितृभ्यः**) स्तुतिकर्त्ता विद्वानों के लिये (**वयः**) जीवन को (**धाः**) धारण कीजिये॥६॥

भावार्थः–मनुष्यों को चाहिये कि ऐसी वाणी ग्रहण करें और सुनें कि जिससे धनसंग्रह होता है, सत्य की रक्षा की जाती और जीवन बढ़ता है॥६॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॑ मरुत्व इ॒ह पा॑हि॒ सोम॒ं यथा॑ शार्या॒ते अपि॑बः सु॒तस्य॑।
तव॒ प्रणी॑ती॒ तव॑ शूर॒ शर्म॒न्ना वि॑वासन्ति क॒वय॑ः सुय॒ज्ञाः॥७॥

इन्द्र॑। म॒रु॒त्व॒ः। इ॒ह। पा॒हि॒। सोम॑म्। यथा॑। शा॒र्या॒ते। अपि॑बः। सु॒तस्य॑। तव॑। प्रऽनी॑ती। तव॑। शू॒र॒। शर्म॑न्। आ। वि॒वा॒स॒न्ति॒। क॒वय॑ः। सु॒ऽय॒ज्ञाः॥७॥

पदार्थः-(**इन्द्र**) ऐश्वर्य्यधारक (**मरुत्वः**) प्रशंसितधनयुक्त (**इह**) अस्मिन् संसारे (**पाहि**) रक्ष (**सोमम्**) ऐश्वर्य्यकारकम् (**यथा**) (**शार्याते**) यः शरीरे हिंसकान् याति प्राप्नोति तस्यास्मिन् व्यवहारे (**अपिबः**) पिब (**सुतस्य**) निष्पन्नस्य (**तव**) (**प्रणीती**) प्रकृष्टया नीत्या (**तव**) (**शूर**) दुष्टानां हिंसक (**शर्मन्**) सुखकारके गृहे (**आ**) (**विवासन्ति**) परिचरन्ति (**कवयः**) विद्वांसः (**सुयज्ञाः**) शोभना यज्ञाः सङ्गताः क्रिया येषान्ते॥७॥

अन्वयः-हे इन्द्र! त्वमिह सोमं पाहि। हे मरुत्वो! यथा शार्याते सुतस्य त्वमपिबः। हे शूर! ये सुयज्ञाः कवयस्तव प्रणीती तव शर्मन्त्सोममाविवासन्ति ताँस्त्वं पाहि॥७॥

भावार्थः-हे राजन्! यथा भवान् स्वं राष्ट्रमैश्वर्य्यं न्यायं धर्मं च रक्षति तथा येऽमात्यभृत्याः स्युस्तेषां सत्कारस्त्वया सदैव कर्त्तव्यः॥७॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्य्य के धारण करनेवाले! आप (**इह**) इस संसार में (**सोमम्**) ऐश्वर्य्य करनेवाले की (**पाहि**) रक्षा कीजिये। और हे (**मरुत्वः**) उत्तम धनों से युक्त! (**यथा**) जिस प्रकार (**शार्याते**) हिंसा करनेवालों को प्राप्त होनेवालों के इस व्यवहार में (**सुतस्य**) उत्पन्न को आप (**अपिबः**) पान कीजिये। हे (**शूर**) दुष्टों के नाशकर्त्ता! जो (**सुयज्ञाः**) श्रेष्ठ संयुक्त क्रियायें जिनकी वे (**कवयः**) विद्वान् लोग (**तव**) आपकी (**प्रणीती**) उत्तम नीति से और (**तव**) आपके (**शर्मन्**) सुखकारक गृह में ऐश्वर्य्यकर्त्ता को (**आ, विवासन्ति**) प्राप्त होते हैं, उनकी आप रक्षा कीजिये॥७॥

भावार्थः-हे राजन्! जैसे आप अपने राज्य, ऐश्वर्य्य, न्याय और धर्म की रक्षा करते हैं, उसी प्रकार के आपके मन्त्री और नौकर आदि होवें, उनका सत्कार आपको सदा ही करना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स वा॑वशा॒न इ॒ह पा॑हि॒ सोम॑ं म॒रुद्भि॑रिन्द्र॒ सखि॑भिः सु॒तं न॑ः।
जा॒तं यत्त्वा॒ परि॑ दे॒वा अभू॑षन् म॒हे भरा॑य पुरुहूत॒ विश्वे॑॥८॥

सः। वावशानः। इह। पाहि। सोमम्। मरुत्ऽभिः। इन्द्र। सखिऽभिः। सुतम्। नः। जातम्। यत्। त्वा। परि। देवाः। अभूषन्। महे। भराय। पुरुऽहूत। विश्वे॥८॥

पदार्थः-(**सः**) (**वावशानः**) कामयमानः (**इह**) अस्मिन् राज्यव्यवहारे (**पाहि**) (**सोमम्**) ऐश्वर्यम् (**मरुद्भिः**) वायुभिः सूर्य इव (**इन्द्र**) सकलैश्वर्यसम्पन्न (**सखिभिः**) सुहृद्भिः (**सुतम्**) उत्पन्नम् (**नः**) अस्माकम् (**जातम्**) प्रकटम् (**यत्**) येन (**त्वा**) त्वाम् (**परि**) सर्वतः (**देवाः**) विद्वांसः (**अभूषन्**) अलङ्कुर्युः (**महे**) महते (**भराय**) भरणीयाय संग्रामाय (**पुरुहूत**) बहुभिः प्रशंसित (**विश्वे**) सर्वे॥८॥

अन्वयः-हे इन्द्र! इह स वावशानस्त्वं मरुद्भिः सूर्यइव सखिभिः सह नो जातं सुतं सोमं पाहि। हे पुरुहूत! विश्वे देवा यद्येन महे भराय त्वा पर्यभूषंस्तेन त्वमस्मान्त्सर्वतोऽलङ्कुरु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो वायुसहायेन सर्वं रक्षति तथैवाप्तैर्मित्रैः सह राजा सर्वं राष्ट्रं रक्षेद्येऽमात्यभृत्या राज्यहितकारिणः स्युस्तान् सर्वदा सत्कुर्यात्॥८॥

पदार्थः-हे (**इन्द्र**) सम्पूर्ण ऐश्वर्यों से युक्त! (**इह**) इस राज्य के व्यवहार में (**सः**) वह (**वावशानः**) कामना करते हुए आप (**मरुद्भिः**) पवनों से सूर्य के सदृश (**सखिभिः**) मित्रों के साथ (**नः**) हम लोगों के (**जातम्**) प्रकट और (**सुतम्**) उत्पन्न (**सोमम्**) ऐश्वर्य की (**पाहि**) रक्षा कीजिये और हे (**पुरुहूत**) बहुतों से प्रशंसित! (**विश्वे**) सम्पूर्ण (**देवाः**) विद्वान् लोग (**यत्**) जिससे (**महे**) बड़े (**भराय**) पोषण करने योग्य संग्राम के लिये (**त्वा**) आपको (**परि**) सब प्रकार (**अभूषन्**) शोभित करें, जिससे आप हम लोगों को सब प्रकार शोभित करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य वायुरूप सहाय से सबकी रक्षा करता है, वैसे ही यथार्थवक्ता मित्रों के साथ राजा सम्पूर्ण राज्य की रक्षा करे और जो मन्त्री और नौकर राज्य के हितकारी होवें, उनका सब काल में सत्कार करें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अप्तूर्ये मरुत आपिरेषोऽमन्दन्निन्द्रमनु दातिवाराः।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे॥९॥

अप्ऽतूर्ये। मरुतः। आपिः। एषः। अमन्दन्। इन्द्रम्। अनु। दातिऽवाराः। तेभिः। साकम्। पिबतु। वृत्रऽखादः। सुतम्। सोमम्। दाशुषः। स्वे। सधऽस्थे॥९॥

पदार्थः-(**अप्तूर्ये**) अपोभिः कर्मभिः प्रेरयितव्ये (**मरुतः**) मनुष्याः (**आपिः**) यः समन्तात् पिबति शुभगुणव्याप्तो वा (**एषः**) (**अमन्दन्**) आनन्दयेयुः (**इन्द्रम्**) राजानम् (**अनु**) (**दातिवाराः**) ये दातिं लवनं

छेदनं वृण्वन्ति **(तेभिः)** **(साकम्)** सह **(पिबतु)** **(वृत्रखादः)** यो वृत्रं खादति स्थिरीकरोति सः **(सुतम्)** सिद्धम् **(सोमम्)** ऐश्वर्यम् **(दाशुषः)** दातुः **(स्वे)** स्वकीये **(सधस्थे)** समानस्थाने॥९॥

अन्वयः-ये दातिवारा मरुतोऽप्तूर्य्ये इन्द्रममन्दँस्तेभिस्साकमेष आपिर्वृत्रखादो दाशुषस्स्वे सधस्थे सुतं सोममनु पिबतु ताँस्तञ्च राजा सततं हर्षयेत्॥९॥

भावार्थः-ये नराः सत्याचारं प्रति प्रेरित्वा दुष्टाचारान् निषेध्य सर्वान् धार्मिकान् कृत्वाऽऽनन्देयुस्तैः सह राजाऽन्वानन्देत्॥९॥

पदार्थः-जो **(दातिवाराः)** छेदन करनेवाले **(मरुतः)** मनुष्य **(अप्तूर्य्ये)** कर्मों से प्रेरणा करने योग्य **(इन्द्रम्)** राजा को **(अमन्दन्)** आनन्द देवें **(तेभिः)** उनके **(साकम्)** साथ **(एषः)** यह **(आपिः)** सब प्रकार पीनेवाला वा शुभ गुणों से व्याप्त **(वृत्रखादः)** मेघ को स्थिर करनेवाला **(दाशुषः)** दान करनेवाले के **(स्वे)** अपने **(सधस्थे)** तुल्य स्थान में **(सुतम्)** सिद्ध **(सोमम्)** ऐश्वर्य्य को **(अनु, पिबतु)** पीछे पान करे, उसको आप राजा निरन्तर प्रसन्न करें॥९॥

भावार्थः-जो मनुष्य सत्य आचरण की प्रेरणा और दुष्ट आचरणों का निषेध और सबको धार्मिक करके आनन्द देवें, उनके साथ राजा आनन्द करे॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्वस्य गिर्वणः॥१०॥

इदम्। हि। अनु। ओजसा। सुतम्। राधानाम्। पते। पिब। तु। अस्य। गिर्वणः॥१०॥

पदार्थः-**(इदम्)** **(हि)** खलु **(अनु)** **(ओजसा)** बलेन **(सुतम्)** साधितम् **(राधानाम्)** धनानाम् **(पते)** पालक **(पिब)**। अत्र **द्व्यचोतस्तिङ** इति दीर्घः। **(तु)** **(अस्य)** **(गिर्वणः)** यौ गीर्यते याच्यते तत्सम्बुद्धौ॥१०॥

अन्वयः-हे गिर्वणो राधानां पते! त्वमोजसाऽस्येदं सुतं तु पिब हि अनु पिपासयेदं पिब॥१०॥

भावार्थः-हे राजँस्त्वं हि सदैव धनैश्वर्य्यं रक्षित्वा प्राप्तं राज्यमन्वेक्षणेन वर्द्धयित्वा सुखी भव॥१०॥

पदार्थः-हे **(गिर्वणः)** प्रार्थित हुए **(राधानाम्)** धनों के **(पते)** पालन करनेवाले! आप **(ओजसा)** बल से **(अस्य)** इसके **(इदम्)** इस **(सुतम्)** सिद्ध किये गये सोमलतारूप रस का **(पिब)** पान कीजिये **(हि)** निश्चय से और पान करने की इच्छा से इस सोमलता का पान करो॥१०॥

भावार्थः-हे राजन्! आप निश्चय सब काल में धन और ऐश्वर्य्य की रक्षा करके और जो प्राप्त

राज्य उसकी देख-भाल से वृद्धि करके सुखी होइये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्ते अनु स्वधामसत् सुते नि यच्छ तन्वम्। स त्वा ममत्तु सोम्यम्॥११॥

यः। ते। अनु। स्वधाम्। असत्। सुते। नि। यच्छ। तन्वम्। सः। त्वा। ममत्तु। सोम्यम्॥११॥

पदार्थः-(**यः**) विद्वान् (**ते**) तव (**अनु**) (**स्वधाम्**) अन्नम् (**असत्**) भवेत् (**सुते**) (**नि**) (**यच्छ**) निगृह्णीहि (**तन्वम्**) शरीरम् (**सः**) (**त्वा**) त्वाम् (**ममत्तु**) आनन्दतु (**सोम्यम्**) सोमे भवम्॥११॥

अन्वयः-हे राजन्! यस्ते सुते स्वधामन्वसत् स त्वा ममत्तु त्वं तन्वं नियच्छ सोम्यमाचर॥११॥

भावार्थः-हे राजन्! यो भवदनुकूलो भूत्वा धर्मात्मा सन् प्रजा आनन्दयेत् स श्रीमत ऐश्वर्यं प्राप्नुयात् त्वं जितेन्द्रियो भूत्वा प्रजाः साधिः॥११॥

पदार्थः-हे राजन्! (**यः**) जो (**ते**) आपके (**सुते**) उत्पन्न सोमलता के रस में (**स्वधाम्**) अन्न (**अनु, असत्**) पीछे होवे (**सः**) वह (**त्वा**) आपको (**ममत्तु**) आनन्द देवे और आप (**तन्वम्**) शरीर को (**नियच्छ**) ग्रहण कीजिये (**सोम्यम्**) सोमलता में उत्पन्न का पान आदि आचरण कीजिये॥११॥

भावार्थः-हे राजन्! जो आपके अनुकूल और धर्मात्मा होकर प्रजाजनों को आनन्दित करे, वह लक्ष्मीवान् से ऐश्वर्य को प्राप्त होवे और आप इन्द्रियजित् होकर प्रजाओं को सिद्ध कीजिये॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र तेऽश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः। प्र बाहू शूर राधसे॥१२॥१६॥

प्र। ते। अश्नोतु। कुक्ष्योः। प्र। इन्द्र। ब्रह्मणाः। शिरः। प्र। बाहू इति। शूर। राधसे॥१२॥

पदार्थः-(**प्र**) (**ते**) तव (**अश्नोतु**) प्राप्नोतु। अत्र व्यत्ययेन परस्मैपदम्। (**कुक्ष्योः**) उदरपार्श्वयोः (**प्र**) (**इन्द्र**) राजवर (**ब्रह्मणा**) धनेन (**शिरः**) उत्तमाङ्गम् (**प्र**) (**बाहू**) भुजौ (**शूर**) (**राधसे**) धनाय॥१२॥

अन्वयः-हे इन्द्र! यस्ते कुक्ष्योर्ब्रह्मणा सह रसः प्राश्नोतु। हे शूर! तव शिरो बाहू राधसे प्राश्नोतु तं त्वं पालय॥१२॥

भावार्थः-हे राजँस्तदेव त्वयाऽऽशितव्यं पातव्यं च यदुदरं प्राप्य विकृतं सद्रोगानुत्पाद्य बुद्धिं न हिंस्याद् येन सततं त्वयि प्रज्ञा वर्द्धित्वा राज्यमैश्वर्यं च वर्धेतेति॥१२॥

अत्र राजप्रजाधर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाऽधिकपञ्चाशत्तमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) राजाओं में श्रेष्ठ जो (**ते**) आपके (**कुक्ष्योः**) पेट के आस-पास के भागों में

(ब्रह्मणा) धन के साथ रस को **(प्र)** **(अश्नोतु)** प्राप्त होवे और हे **(शूर)** वीर पुरुष! **(ते)** आपके **(शिरः)** श्रेष्ठ अङ्ग मस्तक को **(बाहू)** भुजाओं को **(राधसे)** धन के लिये प्राप्त होवे, उसका आप पालन करिये॥१२॥

भावार्थः-हे राजन्! वही वस्तु आपको खाना तथा पीना चाहिये कि जो पेट में प्राप्त हो तथा विकृत हो रोगों को उत्पन्न करके बुद्धि का न नाश करे और जिससे आप में बुद्धि बढ़ कर राज्य और ऐश्वर्य बढ़े॥१२॥

इस सूक्त में राजा और प्रजा के धर्म **[**का**]** वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्यावनवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथाऽष्टर्चस्य द्विपञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। इन्द्रो देवता। १, ३, ४ गायत्री। २ निचृद्गायत्री छन्दः। षड्जः स्वरः। ६ जगती छन्दः। निषादः स्वरः। ५, ७ निचृत् त्रिष्टुप्। ८ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजविषयमाह॥

अब आठ ऋचावाले बावनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजा के विषय को कहते हैं॥

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः॥ १॥

धानाऽवन्तम्। करम्भिणम्। अपूपऽवन्तम्। उक्थिनम्। इन्द्र। प्रातः। जुषस्व। नः॥ १॥

पदार्थः-(**धानावन्तम्**) बह्व्यो धाना विद्यन्ते यस्य तम् (**करम्भिणम्**) बहवः करम्भा पुरुषार्थेन संशोधिता दध्यादयः पदार्था विद्यन्ते यस्य तम् (**अपूपवन्तम्**) प्रशस्ता अपूपा विद्यन्ते यस्य तम् (**उक्थिनम्**) बहून्युक्थानि वक्तुं योग्यानि वेदस्तोत्राणि विद्यन्ते यस्य तम् (**इन्द्र**) ऐश्वर्यधारक (**प्रातः**) प्रातःकाले (**जुषस्व**) सेवस्व (**नः**) अस्मान्॥ १॥

अन्वयः-हे इन्द्र! त्वं यथा प्रातर्धानावन्तं करम्भिणमपूपवन्तमुक्थिनं प्रातर्जुषस्व तथा नोऽस्मान् जुषस्व॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽर्थ्यैश्वर्यवन्तं याचते तथैव राजा राजधर्मबोधायाऽऽप्तान् विदुषो याचेत॥ १॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्य के धारण करनेवाले! आप जैसे (**प्रातः**) प्रातःकाल में (**धानावन्तम्**) बहुत भूंजे हुए यव विद्यमान जिसके उस (**करम्भिणम्**) बहुत पुरुषार्थ अर्थात् परिश्रम से शुद्ध किये गये दधि आदि पदार्थों से युक्त (**अपूपवन्तम्**) उत्तम पूवा विद्यमान जिसके उस (**उक्थिनम्**) बहुत कहने योग्य वेद के स्तोत्र विद्यमान जिसके उसका (**प्रातः**) प्रातःकाल सेवन करते हो, वैसे (**नः**) हम लोगों का (**जुषस्व**) सेवन करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अर्थी जन ऐश्वर्यवाले से याचना करता है, वैसे ही राजा जन राजधर्म जानने के लिये श्रेष्ठ यथार्थवक्ता विद्वानों से याचना करे॥ १॥

पुनः राजधर्मविषयमाह॥

फिर राजधर्म विषय को अगले मन्त्र में कहते हैं॥

पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च। तुभ्यं हव्यानि सिस्रते॥ १॥

पुरोळाशम्। पचत्यम्। जुषस्व। इन्द्र। आ। गुरस्व। च। तुभ्यम्। हव्यानि। सिस्रते॥ २॥

पदार्थः-(**पुरोळाशम्**) सुसंस्कारैर्निष्पादितमन्नविशेषम् (**पचत्यम्**) पचने साधुम् (**जुषस्व**) सेवस्व (**इन्द्र**) भोक्तः (**आ**) (**गुरस्व**) उद्यमं कुरुष्व। अत्र व्यत्ययेनात्मनेपदम्। (**च**) (**तुभ्यम्**) (**हव्यानि**) (**सिस्रते**) प्राप्नुवन्तु॥२॥

अन्वयः-हे इन्द्र! त्वं पचत्यं पुरोळाशं जुषस्व तदा गुरस्व च यतस्तुभ्यं हव्यानि सिस्रते॥२॥

भावार्थः-हे राजँस्त्वं रोगनाशकं बुद्धिवर्द्धकमन्नपानं भुक्त्वाऽरोगो भूत्वा सततमुद्यमं कुरु येन भवन्तं सर्वाणि सुखानि प्राप्नुयुः॥२॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्य्यों के भोगनेवाले! आप (**पचत्यम्**) उत्तम प्रकार पाकयुक्त (**पुरोळाशम्**) उत्तम संस्कारों से उत्पन्न किये गये अन्न विशेष का (**जुषस्व**) सेवन करिये तब (**गुरस्व**) उद्यम करो और जिससे (**तुभ्यम्**) आपके लिये (**हव्यानि**) हवन करने योग्य पदार्थों को (**सिस्रते**) प्राप्त हों॥२॥

भावार्थः-हे राजन्! आप रोगनाशक और बुद्धि के बढ़ानेवाले अन्नपान का भोग कर तथा रोगरहित होकर निरन्तर उद्यम को करो, जिससे आपको सम्पूर्ण सुख प्राप्त होवें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः। वधूयुरिव योषणाम्॥३॥

पुरोळाशम्। च। नः। घसः। जोषयासे। गिरः। च। नः। वधूयुःऽइव। योषणाम्॥३॥

पदार्थः-(**पुरोळाशम्**) पुरस्ताद्दातुं योग्यम् (**च**) (**नः**) अस्माकम् (**घसः**) भक्षय (**जोषयासे**) सेवयस्व (**गिरः**) वाचः (**च**) (**नः**) अस्माकम् (**वधूयुरिव**) यथाऽऽत्मनो वधूमिच्छुः (**योषणाम्**) स्वस्त्रियम्॥३॥

अन्वयः-हे इन्द्र! राजँस्त्वं नः पुरोळाशं घसोऽस्मान् भोजय च। योषणां वधूयुरिव नो जोषयासे वयं तव च गिरो जोषयेम॥३॥

भावार्थः-अत्रोपमालङ्कारः। राजप्रजाजनाः परस्परैश्वर्य्यं स्वकीयमेव मन्येरन्। यथा स्त्रीकामः प्रियां भार्य्यां प्राप्याऽऽनन्दति तथैव राजा धार्मिकीः प्रजा लब्ध्वा सततं हर्षेत्॥३॥

पदार्थः-हे राजन्! आप (**नः**) हम लोगों के (**पुरोडाशम्**) प्रथम देने के योग्य को (**घसः**) भक्षण करो और हम लोगों के लिये भक्षण कराओ (**च**) और (**योषणाम्**) अपनी स्त्री को (**वधूयुरिव**) अपनी स्त्रीविषयिणी इच्छा करनेवाले के सदृश (**नः**) हम लोगों की (**जोषयासे**) सेवा करो (**च**) और हम लोग आपकी (**गिरः**) वाणियों का (**जोषयेम**) सेवन करें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजा और प्रजाजन आपस के ऐश्वर्य्य को अपना ही

समझें और जैसे स्त्री की कामना करनेवाला पुरुष प्रिया स्त्री को प्राप्त होकर आनन्दित होता है, वैसे ही राजा धर्म करनेवाली प्रजाओं को प्राप्त कर निरन्तर प्रसन्न होवे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः। इन्द्र क्रतुर्हि ते बृहन्॥४॥

पुरोळाशम्। सनऽश्रुत। प्रातःऽसावे। जुषस्व। नः। इन्द्र। क्रतुः। हि। ते। बृहन्॥४॥

पदार्थः-(**पुरोळाशम्**) सुसंस्कृतमन्नविशेषम् (**सनश्रुत**) सत्याऽसत्यविवेकिनां सकाशाच्छ्रुतं येन यद्वा सनं सत्यासत्यविभाजकं वचनं श्रुतं येन तत्सम्बुद्धौ (**प्रातःसावे**) यः प्रातः सूयते निष्पद्यते तस्मिन् (**जुषस्व**) सेवस्व (**नः**) अस्माकम् (**इन्द्र**) विद्यैश्वर्ययुक्त (**क्रतुः**) प्रज्ञा कर्म वा (**हि**) यतः (**ते**) तव (**बृहन्**) महान्॥४॥

अन्वयः-हे सनश्रुतेन्द्र! हि यतस्ते क्रतुर्बृहन्नस्ति तस्मात्त्वं प्रातःसावे नः पुरोळाशं जुषस्व॥४॥

भावार्थः-मनुष्यैर्येषु यादृशी विद्या शीलता भवेत् तादृश्येव तेषु सत्कृपा कार्या॥४॥

पदार्थः-हे (**सनश्रुत**) सत्य और असत्य के विचारकर्त्ताओं से उत्तम कृत्य सुना जिसने ऐसे (**इन्द्र**) विद्या और ऐश्वर्य से युक्त (**हि**) जिससे (**ते**) आपकी (**क्रतुः**) बुद्धि वा कर्म्म (**बृहन्**) बड़ा है तिससे आप (**प्रातःसावे**) जो प्रातःकाल में किया जाय उसमें (**नः**) हम लोगों के (**पुरोळाशम्**) उत्तम प्रकार संस्कारयुक्त अन्न विशेष का (**जुषस्व**) सेवन करो॥४॥

भावार्थः-मनुष्यों को चाहिये कि जिन पुरुषों में जैसी विद्या और शीलता होवे, वैसी ही उन पर उत्तम कृपा करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

माध्यंदिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम्।
प्र यत् स्तोता जरिता तूर्णर्थो वृषायमाण उप गीर्भिरीट्टे॥५॥१७॥

माध्यंदिनस्य। सवनस्य। धानाः। पुरोळाशम्। इन्द्र। कृष्व। इह। चारुम्। प्र। यत्। स्तोता। जरिता। तूर्णिऽअर्थः। वृषऽयमाणः। उप। गीःऽभिः। ईट्टे॥५॥

पदार्थः-(**माध्यन्दिनस्य**) मध्यन्दिने भवस्य (**सवनस्य**) कर्मविशेषस्य (**धानाः**) भृष्टान्नानि (**पुरोळाशम्**) (**इन्द्र**) (**कृष्व**) कुरुष्व (**इह**) (**चारुम्**) भक्षणीयं सुन्दरम् (**प्र**) (**यत्**) यः (**स्तोता**) प्रशंसकः (**जरिता**) भवतः सेवकः (**तूर्णर्थः**) तूर्णिः सद्योऽर्थो यस्य सः (**वृषायमाणः**) वृषं बलं कुर्वाणः (**उप**) (**गीर्भिः**) (**ईट्टे**) ऐश्वर्यवान् भवेत्॥५॥

अन्वयः-हे इन्द्र! त्वं माध्यन्दिनस्य सवनस्य मध्ये या धानाश्चारुं पुरोळाशं त्वमिह कृष्व। यद्यो वृषायमाणस्तूर्ण्यर्थो जरिता स्तोता गीर्भिः प्रोपेट्टे स तव सत्कर्त्तव्यो भवेत्॥५॥

भावार्थः-ये राजजना ऋत्विग्वद्राज्यं वर्धयेयुस्तान् राजा सत्कारेण हर्षयेत्॥५॥

पदार्थः-हे **(इन्द्र)** प्रतापयुक्त! आप **(माध्यन्दिनस्य)** मध्य दिन में होनेवाले **(सवनस्य)** कर्म विशेष के मध्य में जो **(धानाः)** भूंजे हुए अन्न और **(चारुम्)** भक्षण करने योग्य सुन्दर **(पुरोळाशम्)** अन्न विशेष का आप **(इह)** इस उत्तम कर्म में **(कृष्व)** संग्रह कीजिये और **(यत्)** जो **(वृषायमाणः)** जल को करनेवाला **(तूर्ण्यर्थः)** शीघ्र है प्रयोजन जिसका वह **(जरिता)** आपका सेवाकारी और **(स्तोता)** प्रशंसा करनेवाला **(प्र, उप)** समीप में **(गीर्भिः)** वाणियों से **(ईट्टे)** ऐश्वर्य्यवान् हो, वह आपके सत्कार करने योग्य होवे॥५॥

भावार्थः-जो राजा के जन ऋत्विजों के सदृश राज्य की वृद्धि करें, उनको राजा सत्कार से प्रसन्न करे॥५॥

अथाऽध्यापकविषयमाह॥

अब अध्यापक के विषय को अगले मन्त्र में कहते हैं॥

तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः।

ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः॥६॥

तृतीये। धानाः। सवने। पुरुऽस्तुत। पुरोळाशम्। आऽहुतम्। ममहस्व। नः। ऋभुऽमन्तम्। वाजऽवन्तम्। त्वा। कवे। प्रयस्वन्तः। उप। शिक्षेम। धीतिऽभिः॥६॥

पदार्थः-**(तृतीये)** त्रयाणां पूरके **(धानाः)** अग्निना भृष्टाऽन्नविशेषाः **(सवने)** सायंकाले कर्त्तव्ये कर्मणि **(पुरुष्टुत)** बहुभिः प्रशंसित **(पुरोळाशम्)** सुसंस्कृतान्नविशेषम् **(आहुतम्)** कृताऽऽह्वानम् **(मामहस्व)** भृशं सत्कुरु **(नः)** अस्मान् **(ऋभुमन्तम्)** प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्य तम् **(वाजवन्तम्)** वाजाः शुष्कान्नविशेषा विद्यन्ते यस्य तम् **(त्वा)** त्वाम् **(कवे)** विद्वन्! **(प्रयस्वन्तः)** प्रयतमानाः **(उप)** **(शिक्षेम)** **(धीतिभिः)** अङ्गुलीभिर्निर्दिष्टैर्वचनार्थैः॥६॥

अन्वयः-हे पुरुष्टुत कवे! प्रयस्वन्तो वयं धीतिभिस्तृतीये सवने पुरोळाशं धाना ऋभुमन्तं वाजवन्तमाहुतं त्वोपशिक्षेम स त्वं नो मामहस्व॥६॥

भावार्थः-यथा विद्वांस ऋत्विजो यजमानादिभ्यो यज्ञकृत्यं शिक्षन्ति तथैव सर्वा विद्या हस्तादिक्रियया प्रत्यक्षीकृत्याऽन्यान् प्रत्यध्यापकाः साक्षात्कारयन्तु॥६॥

पदार्थः-हे **(पुरुष्टुत)** बहुतों से प्रशंसित **(कवे)** विद्वान् पुरुष! **(प्रयस्वन्तः)** प्रयत्न करते हुए हम

लोग (**धीतिभिः**) अंगुलियों से दिखाये गये वचनार्थों से (**तृतीये**) तीन की पूर्त्ति करनेवाले (**सवने**) सायंकाल में करने योग्य कर्म में (**पुरोळाशम्**) उत्तम संस्कारयुक्त अन्नविशेष और (**धानाः**) अग्नि से भूंजे गये अन्न विशेषों के तुल्य (**ऋभुमन्तम्**) श्रेष्ठ बुद्धिमानों से युक्त (**वाजवन्तम्**) शुष्क अन्नविशेष विद्यमान जिसके उस (**आहुतम्**) पुकारे गये (**त्वा**) आपको (**उप, शिक्षेम**) शिक्षा देवें वह आप (**नः**) हम लोगों का (**मामहस्व**) अत्यन्त सत्कार करिये॥६॥

भावार्थः-जैसे विद्वान् यज्ञ करनेवाले यजमानों के लिये यज्ञकृत्य की शिक्षा देते हैं, वैसे ही सम्पूर्ण विद्याओं का हस्त आदि क्रियाओं से प्रत्यक्ष अर्थात् अभ्यास करके अन्य जनों के लिये अध्यापक लोग प्रत्यक्ष करावें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पूषण्वते॑ ते चकृमा करम्भं हरिवते॑ हर्य॑श्वाय धानाः।
अपूपम॑द्धि सग॑णो मरुद्भिः सोम॑ पिब वृत्रहा शू॑र विद्वान्॥७॥

पूषण्ऽवते। ते। चकृम। करम्भम्। हरिऽवते। हरिऽअश्वाय। धानाः। अपूपम्। अद्धि। सऽग॑णः। मरुत्ऽभिः। सोम॑म्। पिब। वृत्रऽहा। शूर। विद्वान्॥७॥

पदार्थः-(**पूषण्वते**) बहवः पूषणः पुष्टिकरा विद्यन्ते यस्य तस्मै (**ते**) तुभ्यम् (**चकृम**) कुर्य्याम। अत्र **संहितायामिति** दीर्घः। (**करम्भम्**) दध्यादियुक्तं भक्ष्यविशेषम् (**हरिवते**) प्रशस्ताऽश्वादियुक्ताय (**हर्य्यश्वाय**) हरणशीला आशुगमिनोऽश्वास्तुरङ्गा अग्न्यादयो वा विद्यन्ते यस्य तस्मै (**धानाः**) (**अपूपम्**) (**अद्धि**) भक्ष (**सगणः**) गणेन सह वर्त्तमानः (**मरुद्भिः**) उत्तमैर्मनुष्यैः सह (**सोमम्**) उत्तमौषधिरसम् (**पिब**) (**वृत्रहा**) प्राप्तधनः (**शूरः**) दुष्टानां हिंसक (**विद्वान्**)॥७॥

अन्वयः-हे शूर! यथा वृत्रहा विद्वान् पूषण्वते हरिवते हर्य्यश्वाय ते करम्भं धाना अपूपं दद्यात् तं सगणस्त्वं मरुद्भिः सहाऽद्धि सोमं पिब। तथैव वयं त्वदर्थं चकृम॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्याविनयसंपन्नास्तेऽर्हाय राज्ञ उत्तमान् पदार्थान् दत्वैनं सततं सत्कुर्य्युस्ते राज्ञाऽपि सर्वदा सत्कर्त्तव्याः॥७॥

पदार्थः-हे (**शूर**) दुष्ट पुरुष के नाशकर्त्ता! जैसे (**वृत्रहा**) धन से युक्त विद्वान् पुरुष (**पूषण्वते**) पुष्टि करनेवाले विद्यमान हैं जिसके उस (**हरिवते**) उत्तम घोड़े आदि से युक्त के तथा (**हर्य्यश्वाय**) हरणशील और शीघ्र चालवाले घोड़े वा अग्नि आदि विद्यमान हैं जिसके उस (**ते**) आपके लिये (**करम्भम्**) दधि आदि से युक्त भोजन करने के पदार्थविशेष और (**धानाः**) भूंजे हुए अन्न तथा (**अपूपम्**) पुआ को देवे उसको (**सगणः**) समूह के सहित वर्त्तमान आप (**मरुद्भिः**) उत्तम मनुष्यों के पास (**अद्धि**) भक्षण कीजिये और (**सोमम्**) उत्तम ओषधि के रस को (**पिब**) पान कीजिये और वैसे ही हम लोग

आपके लिये **(चक्रम)** करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्या और नम्रता से युक्त हैं, वे श्रेष्ठ राजा के लिये उत्तम पदार्थों को देकर इसका निरन्तर सत्कार करें और वे राजा से भी सर्वदा सत्कार के योग्य हैं॥७॥

अथ यज्ञान्नसञ्चयनविषयमाह॥

अब यज्ञ के अन्न के इकट्ठे करने के विषय को अगले मन्त्र में कहते हैं॥

प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम्।
दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो॥८॥१८॥

प्रति। धानाः। भरत। तूयम्। अस्मै। पुरोळाशम्। वीरऽतमाय। नृणाम्। दिवेऽदिवे। सऽदृशीः। इन्द्र। तुभ्यम्। वर्धन्तु। त्वा। सोमऽपेयाय। धृष्णो इति॥८॥

पदार्थः-**(प्रति)** **(धानाः)** **(भरत)** **(तूयम्)** तूर्ण सुखकरम् **(अस्मै)** **(पुरोळाशम्)** **(वीरतमाय)** अत्युत्तमाय वीराय **(नृणाम्)** नायकानां मध्ये **(दिवेदिवे)** प्रतिदिनम् **(सदृशीः)** समानस्वरूपाः सेनाः **(इन्द्र)** दुष्टदलविदारक **(तुभ्यम्)** **(वर्द्धन्तु)** वर्धन्ताम्। अत्र व्यत्ययेन परस्मैपदम्। **(त्वा)** त्वाम् **(सोमपेयाय)** पेयः सोमो येन तस्मै **(धृष्णो)** प्रगल्भ॥८॥

अन्वयः-हे धृष्णो इन्द्र! याः सदृशीः सेना दिवेदिवे नृणां वीरतमाय सोमपेयाय तुभ्यं वर्द्धन्तु। ये विद्वांसस्त्वा वर्द्धयन्तु ताँस्त्वं वर्धयस्व। हे विद्वांसो! यूयमस्मै धानाः पुरोळाशं च तूयं प्रति भरत॥८॥

भावार्थः-सर्वे राजजनाः प्रजाजना राज्योन्नतये सर्वान् सम्भारान् सञ्चिन्वतु तैः सुपरीक्षिता वीरसेनाः सम्पाद्य दुष्टानां पराजयं श्रेष्ठानां विजयं कृत्वा प्रतिदिनमानन्दयितव्यमिति॥८॥

अत्र राजप्रजायज्ञाऽन्नसंस्कारादिवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति द्विपञ्चाशत्तमं सूक्तं अष्टादशो वर्गश्च समाप्तः॥

(अस्मै) इसके लिये **(धानाः)** भूंजे हुए अन्न और **(पुरोळाशम्)** उत्तम प्रकार संस्कारयुक्त अन्न विशेष और जो कि **(तूयम्)** शीघ्र सुखकारक उसको **(प्रति भरत)** पूर्ण कीजिये॥८॥

भावार्थः–सम्पूर्ण राजजन और प्रजा के जन राज्य की वृद्धि के लिये सम्पूर्ण पदार्थों को इकट्ठे करें, उनसे उत्तम प्रकार परीक्षित वीर सेनाओं को करके और दुष्ट पुरुषों का पराजय और श्रेष्ठ पुरुषों का विजय करके प्रतिदिन आनन्द करना चाहिये॥८॥

इस सूक्त में राजा, प्रजा और यज्ञान्नसंस्कारादि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह बावनवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

अथ चतुर्विंशत्यृचस्य त्रिपञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। १ इन्द्रापर्वतौ। २-१४, २१-२४ इन्द्रः। १५, १६ वाक्। १७-२० रथाङ्गानि देवताः। १, ५, ९, २१ निचृत् त्रिष्टुप्। २, ६, ७, १४, १७, १९, २३, २४ त्रिष्टुप्। ३, ४, ८, १५ स्वराट् त्रिष्टुप्। ११ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। १२, २२ अनुष्टुप्। २० भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः। १०, १६ निचृज्जगती छन्दः। निषादः स्वरः। १३ निचृद्गायत्री छन्दः। षड्जः स्वरः। १८ निचृद्बृहती छन्दः। मध्यमः स्वरः॥

अथ राजसेनाविषयमाह॥

अब चौबीस ऋचावाले तिरेपनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजा की सेना के विषय को कहते हैं॥

इन्द्रा॑पर्वता बृह॒ता रथे॑न वा॒मीरि॒ष आ व॑हतं सु॒वीरा॑:।
वी॒तं ह॒व्यान्य॑ध्व॒रेषु॑ देवा॒ वर्धे॑थां गी॒र्भिरिळ॑या॒ मद॑न्ता॥ १॥

इन्द्रा॑पर्वता बृह॒ता। रथे॑न। वा॒मीः। इ॒षः॑। आ। व॒ह॒त॒म्। सु॒ऽवीरा॑:। वी॒तम्। ह॒व्यानि॑। अ॒ध्व॒रेषु॑। दे॒वा॒। वर्धे॑थाम्। गी॒:ऽभिः। इळ॑या। मद॑न्ता॥ १॥

पदार्थः-(**इन्द्रापर्वता**) विद्युन्मेघामिव राज्यसेनाधीशौ (**बृहता**) महता (**रथेन**) (**वामीः**) प्रशस्ताः (**इषः**) अन्नाद्याः (**आ**) (**वहतम्**) प्राप्नुतम् (**सुवीराः**) शोभना वीरा याभ्यस्ताः (**वीतम्**) व्याप्नुतम् (**हव्यानि**) दातुमादातुमर्हाणि (**अध्वरेषु**) अहिंसनीयेषु यज्ञेषु (**देवा**) दिव्यसुखप्रदौ (**वर्धेथाम्**) (**गीर्भिः**) सुशिक्षिताभिर्वाग्भिः (**इळया**) सर्वशास्त्रप्रकाशिकया वाचा। **इळेति वाङ्नामसु पठितम्।** (निघं०१.११) (**मदन्ता**) का**[**म**]**यमानौ विद्वांसौ॥१॥

अन्वयः-हे सभासेनेशौ! युवामिन्द्रापर्वतेव बृहता रथेन सुवीरा वामीरिष आ वहतमध्वरेषु हव्यानि वीतमिळया मदन्ता देवा सन्तौ गीर्भिर्वर्धेथाम्॥१॥

भावार्थः-हे राजसेनाजना! यथा मेघः सर्वान् जलाशयानोषधीश्च पाति तथैव सेनापालका पुष्कलाभिः सामग्रीभिः सर्वाः सेना अलंभोगाः कुर्य्युः सेनाश्च विद्युद्वच्छत्रून् दहन्तु सर्वेषु सर्वे युद्धराजविद्यावृद्धा भूत्वा सर्वान् कामान् प्राप्नुवन्तु॥१॥

पदार्थः-हे सभा और सेना के ईश! आप दोनों (**इन्द्रापर्वता**) बिजुली और मेघ के सदृश राज्य सेना के अधीश (**बृहता**) बड़े (**रथेन**) वाहन से (**सुवीराः**) सुन्दर वीर जिनसे उन (**वामीः**) श्रेष्ठ (**इषः**) अन्न आदि को (**आ, वहतम्**) प्राप्त होइये और (**अध्वरेषु**) नहीं हिंसा करने योग्य यज्ञों में (**हव्यानि**) देने और ग्रहण करने योग्यों को (**वीतम्**) प्राप्त होइये और (**इळया**) सम्पूर्ण शास्त्रों को प्रकाश करनेवाली वाणी से (**मदन्ता**) कामना करते हुए विद्वान् लोग (**देवा**) उत्तम सुख देनेवाले होकर (**गीर्भिः**) उत्तम प्रकार शिक्षायुक्त वाणियों से (**वर्धेथाम्**) बढ़ें॥१॥

भावार्थः–हे राजसेनाओं के जन! जैसे मेघ सम्पूर्ण जलाशय और ओषधियों की रक्षा करता है, वैसे ही सेना के पालन करनेवाले पुरुष बहुतसी सामग्रियों से सम्पूर्ण सेनाओं को भोग से परिपूर्ण करिये और सेना बिजुलियों के सदृश शत्रुओं का नाश करें और सबमें सब युद्ध और राजविद्या में परिपूर्ण होकर सम्पूर्ण मनोरथों को प्राप्त हों॥१॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि।
पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः॥२॥

तिष्ठ। सु। कम्। मघऽवन्। मा। परा। गाः। सोमस्य। नु। त्वा। सुऽसुतस्य। यक्षि। पितुः। न। पुत्रः। सिचम्। आ। रभे। ते। इन्द्र। स्वादिष्ठया। गिरा। शचीऽवः॥२॥

पदार्थः–(**तिष्ठ**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सु**) (**कम्**) सुखम् (**मघवन्**) पुष्कलधनवन् (**मा**) निषेधे (**परा**) (**गाः**) दूरं गच्छेः (**सोमस्य**) महौषधिगणस्यैश्वर्यस्य (**नु**) सद्यः (**त्वा**) त्वाम् (**सुषुतस्य**) यथावत्सिद्धस्य (**यक्षि**) सङ्गच्छस्व (**पितुः**) जनकस्य (**न**) इव (**पुत्रः**) (**सिचम्**) (**आ**) (**रभे**) (**ते**) तव (**इन्द्र**) ऐश्वर्यकारक (**स्वादिष्ठया**) अतिशयेन मधुरादिरसयुक्तया (**गिरा**) वाण्या (**शचीवः**) प्रशस्ताः शचीः प्रजा विद्यन्ते यस्य तत्सम्बुद्धौ॥२॥

अन्वयः–हे मघवन्निन्द्र! त्वं सुषुतस्य सोमस्य सकाशात् कं सुतिष्ठ। हे शचीवो! यथा ते स्वादिष्ठया गिरा सिचमा रभे त्वा नु पुत्रः पितुर्नाऽऽरभे स त्वमस्मान् यक्ष्यस्मन्मा परा गाः॥२॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा पुत्रः पितरं सेवते तथैव वृद्धान् विदुषः सेवस्व। कदाचिद्धर्मात्पृथग् न भवेरन्यान् सुखिनः कृत्वा सुखी भव॥२॥

पदार्थः–हे (**मघवन्**) बहुत धनयुक्त (**इन्द्र**) ऐश्वर्य के करनेवाले! आप (**सुषुतस्य**) उत्तम प्रकार सिद्ध (**सोमस्य**) बड़ी ओषधियों के समूहरूप ऐश्वर्य्य के समीप के (**कम्**) सुख को (**सु, तिष्ठ**) करिये। और हे (**शचीवः**) उत्तम प्रजाओं से युक्त! जैसे (**ते**) आपकी (**स्वादिष्ठया**) अत्यन्त मधुर आदि रस से युक्त (**गिरा**) वाणी से (**सिचम्**) सिंचन का (**आ, रभे**) प्रारम्भ करें (**त्वा**) आपको (**नु**) शीघ्र (**पुत्रः**) पुत्र (**पितुः**) पिता से (**न**) नहीं (**आ, रभे**) प्रारम्भ करते हैं, वह आप हम लोगों को (**यक्षि**) प्राप्त होइये और हम लोगों से (**मा**) नहीं (**परा, गाः**) दूर जाइये॥२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे पुत्र पिता की सेवा करता है, वैसे ही विद्वानों की सेवा करो और कभी धर्म से पृथक् न होओ, अन्य जनों को सुखी करके सुखी होओ॥२॥

अथ प्रजाविषयमाह॥

अब प्रजा के विषय को अगले मन्त्र में कहते हैं॥

शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम्।
एदं बर्हिर्यजमानस्य सीदाऽथा च भूदुक्थमिन्द्राय शस्तम्॥ ३॥

शंसाव। अध्वर्यो इति। प्रति। मे। गृणीहि। इन्द्राय। वाहः। कृणवाव। जुष्टम्। आ। इदम्। बर्हिः। यजमानस्य। सीद। अथ। च। भूत्। उक्थम्। इन्द्राय। शस्तम्॥ ३॥

पदार्थः-(**शंसाव**) प्रशंसेव (**अध्वर्यो**) अहिंसक (**प्रति**) (**मे**) मह्यम् (**गृणीहि**) स्तुहि (**इन्द्राय**) परमैश्वर्य्ययुक्ताय (**वाहः**) प्राप्तान् (**कृणवाव**) (**जुष्टम्**) सेवितम् (**आ**) (**इदम्**) (**बर्हिः**) उत्तमं स्थानम् (**यजमानस्य**) सङ्गन्तुः (**सीद**) (**अथ**) आनन्तर्ये (**च**) (**भूत्**) भवेत् (**उक्थम्**) वक्तुमर्हम् (**इन्द्राय**) ऐश्वर्य्याय (**शस्तम्**) प्रशंसितम्॥ ३॥

अन्वयः-हे अध्वर्यो! त्वमिन्द्राय यदुक्थं शस्तं जुष्टमिदं बर्हिर्यजमानस्य भूत्तदासीद। अथ चाऽन्यानासीदावाप्नोमि इन्द्राय या वाहः शंसाव सिद्धीः कृणवाव तांस्त्वं मे प्रति गृणीहि॥ ३॥

भावार्थः-सर्वैः राजप्रजाजनैर्यैः कर्मभिरैश्वर्य्यवृद्धिः स्यात्तानि सेवनीयानि राजाज्ञायां वर्त्तित्वा प्रशंसा च प्रापणीया॥ ३॥

पदार्थः-हे (**अध्वर्यो**) नहीं हिंसा करनेवाले! आप (**इन्द्राय**) अत्यन्त ऐश्वर्य्य से युक्त पुरुष के लिये जो (**उक्थम्**) कहने योग्य (**शस्तम्**) प्रशंसा किये गये और (**जुष्टम्**) सेवित (**इदम्**) इस (**बर्हिः**) उत्तम स्थान को (**यजमानस्य**) प्राप्त हुए आपको (**भूत्**) प्रशंसित होवे, उसके ऊपर (**आ, सीद**) विराजो। (**अथ**) अनन्तर (**च**) और अन्यों को प्राप्त होइये और मैं भी प्राप्त होऊं, ऐश्वर्य्य से युक्त पुरुष के लिये जो (**वाहः**) प्राप्त हुओं की (**शंसाव**) प्रशंसा करें और सिद्धि (**कृणवाव**) करें उनकी आप (**मे**) मेरे लिये (**प्रति, गृणीहि**) स्तुति करिये॥ ३॥

भावार्थः-सब राजा और प्रजा के जनों को चाहिये कि जिन कर्मों से ऐश्वर्य की वृद्धि हो, उन कर्मों का सेवन करें। और राजा की आज्ञा में वर्त्तमान होकर प्रशंसा को प्राप्त होवें॥ ३॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ॥ ४॥

जाया। इत्। अस्तम्। मघऽवन्। सा। इत्। ऊम् इति। योनिः। तत्। इत्। त्वा। युक्ताः। हरयः। वहन्तु। यदा। कदा। च। सुनवाम। सोमम्। अग्निः। त्वा। दूतः। धन्वाति। अच्छ॥ ४॥

पदार्थः-(**जाया**) पत्नी (**इत्**) एव (**अस्तम्**) गृहम् (**मघवन्**) ऐश्वर्ययुक्त (**सा**) (**इत्**) (**उ**) (**योनिः**) सन्ताननिमित्ता (**तत्**) ताम् (**इत्**) एव (**त्वा**) त्वाम् (**युक्ताः**) योजिताः (**हरयः**) अश्वाः (**वहन्तु**) (**यदा**) (**कदा**) (**च**) (**सुनवाम**) निष्पादयेम (**सोमम्**) (**अग्निः**) विद्युदिव (**त्वा**) (**दूतः**) यो दुनोति परितापयति शत्रून् सः (**धन्वाति**) प्राप्नुयात् (**अच्छ**)॥४॥

अन्वयः-हे मघवन्! या ते जायाऽस्तं प्राप्नुयात् सेत् उ सन्तानस्य योनिर्भूयात् तत्तां त्वा चिदेव युक्ता हरयो सोमं वहन्तु। यदा कदा च वयं सोमं सुनवाम तं त्वं दूतोऽग्निश्च धन्वातीव त्वेदच्छाऽऽप्नोतु॥४॥

भावार्थः-यथोत्तमौ द्वावश्वौ वोढेन रथेन सुखेन रथस्य स्वामिनं स्थानान्तरं प्रापयतस्तथैव परस्परस्मिन् प्रीतौ योग्यौ विद्वांसौ गृहाश्रममलङ्कर्त्तुं शक्नुयाताम्॥४॥

पदार्थः-हे (**मघवन्**) ऐश्वर्य से युक्त! जो (**ते**) आपकी (**जाया**) स्त्री (**अस्तम्**) गृह को प्राप्त होवे (**सा**) वह (**इत्**) ही (**उ**) भी सन्तान का (**योनिः**) कारण होवे (**तत्**) उसको और (**त्वा**) आपको (**च, इत्**) ही (**युक्ताः**) संयुक्त (**हरयः**) घोड़े (**सोमम्**) सोमलता के रस को (**वहन्तु**) धारण करें। और (**यदा**) जब (**कदा**) कब हम लोग सोमलता के रस को (**सुनवाम**) सञ्चित करें, उसको आप (**दूतः**) शत्रुओं के सन्ताप देनेवाले (**अग्निः**) बिजुली के समान (**धन्वाति**) प्राप्त होवें (**त्वा**) आपको ही (**अच्छ**) उत्तम प्रकार प्राप्त हो॥४॥

भावार्थः-जैसे श्रेष्ठ दो घोड़े ले चलनेवाले वाहन से सुखपूर्वक रथ के स्वामी को एक स्थान से दूसरे स्थान को प्राप्त कराते हैं, वैसे ही परस्पर में प्रसन्न और योग्य दो विद्वान् गृहाश्रम को शोभित करने को समर्थ हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

परा॑ याहि मघव॒न्ना च॑ या॒हीन्द्र॑ भ्रातरु॒भय॒त्रा॑ ते॒ अर्थ॑म्।
यत्रा॒ रथ॑स्य बृह॒तो नि॒धान॑ं वि॒मोच॑नं वा॒जिनो॒ रास॑भस्य॥५॥१९॥

परा॑। या॒हि॒। म॒घ॒ऽव॒न्। आ। च॒। या॒हि॒। इन्द्र॑। भ्रा॒तः॒। उ॒भय॒त्रा॑। ते॒। अर्थ॑म्। यत्र॑। रथ॑स्य। बृ॒ह॒तः॒। नि॒ऽधान॑म्। वि॒ऽमोच॑नम्। वा॒जिन॑ः। रास॑भस्य॥५॥

पदार्थः-(**परा**) (**याहि**) दूरं गच्छ (**मघवन्**) (**आ**) (**च**) (**याहि**) आगच्छ (**इन्द्र**) मृदूग्रस्वभाव (**भ्रातः**) बन्धो (**उभयत्र**) गमनाऽऽगमनयोः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**ते**) तव (**अर्थम्**) (**यत्र**)। अत्रापि **ऋचि तुनुघे**ति दीर्घः। (**रथस्य**) रमणीययानस्य (**बृहतः**) महतः (**निधानम्**) स्थापनम् (**विमोचनम्**) पृथक्करणम् (**वाजिनः**) वेगवतः (**रासभस्य**) विद्युदादिसम्बन्धिन इव॥५॥

अन्वयः-हे मघवन्निन्द्र! त्वमितः परा याहि। हे भ्रातस्त्वं तस्मादायाहि यत्र बृहतो रथस्य रासभस्येव वाजिनो निधानं च विमोचनं स्यात्तत्रोभयत्र तेऽर्थं वयं प्राप्नुयाम॥५॥

भावार्थः-मनुष्यैः सर्वत्र भ्रमणं कार्य्यसिद्धये कर्त्तव्यं न सदा भ्रमणमेव, किन्तु गृहेऽपि स्थित्वा सर्वैर्बन्धुभिः सह सङ्गत्य पुनरप्यैश्वर्य्यप्राप्तये देशान्तरे गन्तव्यमागन्तव्यञ्च॥५॥

पदार्थः-हे **(मघवन्)** धनयुक्त और **(इन्द्र)** सज्जनों के प्रति कोमल और दुष्टों के प्रति उग्र स्वभाववाले! आप यहाँ से **(परा)** **(याहि)** दूर जाइये। हे **(भ्रातः)** बन्धु जन! आप उससे प्राप्त होइये **(यत्र)** जहाँ **(बृहतः)** बड़े **(रथस्य)** सुन्दर वाहन के **(रासभस्य)** बिजुली आदि के सम्बन्धी के सदृश **(वाजिनः)** वेगयुक्त के **(निधानम्)** स्थापन **(च)** और **(विमोचनम्)** पृथक् करना होवे **(यत्र)** जहाँ **(उभयत्र)** गमन और आगमन में **(ते)** आपके **(अर्थम्)** प्रयोजन को हम लोग प्राप्त होवें॥५॥

भावार्थः-मनुष्यों को चाहिये कि सर्वत्र भ्रमण, कार्य्यसिद्धि के लिये करें। और नहीं सदा भ्रमण ही करना, किन्तु गृह में स्थित हो सम्पूर्ण बन्धुओं के साथ मेल करके फिर भी ऐश्वर्य्य की प्राप्ति के लिये एक देश से दूसरे देश में जावें और आवें॥५॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥६॥

अपाः। सोमम्। अस्तम्। इन्द्र। प्र। याहि। कल्याणीः। जाया। सुऽरणम्। गृहे। ते। यत्र। रथस्य। बृहतः। निऽधानम्। विऽमोचनम्। वाजिनः। दक्षिणाऽवत्॥६॥

पदार्थः-**(अपाः)** पिब **(सोमम्)** सर्वरोगनाशकं महौषधिरसम् **(अस्तम्)** गृहम् **(इन्द्र)** ऐश्वर्ययुक्त स्वामिन् **(प्र)** **(याहि)** गच्छ **(कल्याणीः)**। अत्र **सुपां सुलुगिति** सुरादेशः। **(जाया)** जायन्ते यस्या अपत्यानि सा **(सुरणम्)** सुष्ठु रणः संग्रामो यस्मात्तत् **(गृहे)** **(ते)** तव **(यत्र)** यस्मिन् **(रथस्य)** विमानादेर्यानस्य **(बृहतः)** महतः **(निधानम्)** स्थापनम् **(विमोचनम्)** पृथक्करणम् **(वाजिनः)** अग्न्यादेः पदार्थस्य **(दक्षिणावत्)** दक्षिणाभिस्तुल्यम्॥६॥

अन्वयः-हे इन्द्र! यत्र बृहतो रथस्य वाजिनो निधानं विमोचनं दक्षिणावत् कार्यं तत्र स्थित्वा या ते गृहे कल्याणीर्जाया वर्त्तते तया सह तत्र रथे स्थित्वाऽस्तं प्र याहि सोममपाः पीत्वा च सुरणं गच्छ॥६॥

भावार्थः–राजादयो विमानादीनि यानानि निर्माय यत्र कलायन्त्राणि रचयित्वाग्न्यादीन् संस्थाप्य विमोच्य सपत्नीका गृहमागच्छेयुर्देशान्तरं च गच्छेयुः यदि पत्नी शूरवीरा स्यात्तर्हि तया सह संग्रामविजयाय गच्छेयुः॥६॥

पदार्थः–हे **(इन्द्र)** ऐश्वर्य से युक्त स्वामिन्! **(यत्र)** जिसमें **(बृहतः)** बड़े **(रथस्य)** विमान आदि वाहन के **(वाजिनः)** अग्नि आदि पदार्थ के **(निधानम्)** स्थापन और **(विमोचनम्)** अलग करने को **(दक्षिणावत्)** दक्षिणाओं के तुल्य करें और वहाँ स्थित होकर जो आपके **(गृहे)** गृह में **(जाया)** स्त्री वर्त्तमान है, उसके साथ उस वाहन के ऊपर विराज कर **(अस्तम्)** गृह को **(प्र, याहि)** आइये **(सोमम्)** सम्पूर्ण रोगों के नाश करनेवाले महौषधि के रस का **(अपाः)** पान करिये और पीकर **(सुरणम्)** श्रेष्ठ संग्राम जिससे उसको प्राप्त होइये॥६॥

भावार्थः–राजा आदि विमान आदि वाहनों का निर्माण कर और उसमें कलायन्त्रों को रच के तथा अग्नि आदि पदार्थों को स्थित तथा अलग करके अपनी स्त्रियों के सहित गृह में आवें और देशान्तर को जावें, जो स्त्री शूरवीरा हो तो उसके साथ संग्राम के विजय के लिये जावें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒मे भो॒जा अङ्गि॑रसो॒ विरू॑पा दि॒वस्पु॒त्रासो॒ असु॑रस्य वी॒राः।
वि॒श्वामि॑त्राय॒ ददतो॒ मघा॑नि॒ सह॑स्रसावे॒ प्र ति॑रन्त॒ आयु॑ः॥७॥

इ॒मे। भो॒जाः। अङ्गि॑रसः। विऽरू॑पाः। दि॒वः। पु॒त्रासः॑। असु॑रस्य। वी॒राः। वि॒श्वामि॑त्राय। ददतः॑। म॒घानि॑। सह॑स्रऽसावे। प्र। ति॒र॒न्ते॒। आयु॑ः॥७॥

पदार्थः–**(इमे)** **(भोजाः)** भोक्तारः प्रजापालकाः **(अङ्गिरसः)** प्राणा इव बलिष्ठाः **(विरूपाः)** विविधरूपा विकृतरूपा वा **(दिवः)** प्रकाशस्वरूपस्य **(पुत्रासः)** वायुरिव बलिष्ठाः **(असुरस्य)** शत्रूणां प्रक्षेपकस्य **(वीराः)** व्याप्तयुद्धविद्याः **(विश्वामित्राय)** विश्वं सर्वं जगन्मित्रं यस्य तस्मै **(ददतः)** **(मघानि)** अत्युत्तमानि धनानि **(सहस्रसावे)** सहस्रस्याऽसंख्यस्य धनस्य सावः प्रसवो यस्मिन् संग्रामे **(प्र)** **(तिरन्ते)** उल्लङ्घन्ते **(आयुः)** जीवनम्॥७॥

अन्वयः–हे राजन्! य इमेऽङ्गिरस इव भोजा विरूपा दिवोऽसुरस्य पुत्रासो वीराः सहस्रसावे विश्वामित्राय मघानि ददतः सन्त आयुः प्र तिरन्ते त एव भवता सत्कृत्य रक्षणीयाः॥७॥

भावार्थः–हे राजन्! भवानीदृशैर्वीरैः सहितां हृष्टां पुष्टां युद्धविद्यायां कुशलां सेनामुन्नीय सर्वदा विजयस्व॥७॥

पदार्थः–हे राजन्! जो **(इमे)** ये **(अङ्गिरसः)** प्राणों के सदृश बलयुक्त **(भोजाः)** भोजन करने

तथा प्रजा के पालन करनेवाले **(विरूपाः)** अनेक प्रकार के रूप वा विकारयुक्त रूपवाले और **(दिवः)** प्रकाशस्वरूप **(असुरस्य)** शत्रुओं के फेंकनेवाले के **(पुत्रासः)** वायु के समान बलिष्ठ **(वीराः)** युद्धविद्या में परिपूर्ण **(सहस्रसावे)** संख्यारहित धन की उत्पत्ति जिसमें उस संग्राम में **(विश्वामित्राय)** सम्पूर्ण संसार मित्र है जिसका उसके लिये **(मघानि)** अतिश्रेष्ठ धनों को **(ददतः)** देते हुए जन **(आयुः)** जीवन का **(प्र, तिरन्ते)** उल्लङ्घन करते हैं, वे ही लोग आपसे सत्कारपूर्वक रक्षा करने योग्य हैं॥७॥

भावार्थः-हे राजन्! आप ऐसे वीरों के सहित प्रसन्न, पुष्ट और युद्धविद्या से कुशल सेना की वृद्धि करके सर्वदा विजय को प्राप्त होइये॥७॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम्।
त्रिर्यद्दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा॥८॥

रूपम्ऽरूपम्। मघऽवा। बोभवीति। मायाः। कृण्वानः। तन्वम्। परि। स्वाम्। त्रिः। यत्। दिवः। परि। मुहूर्तम्। आ। अगात्। स्वैः। मन्त्रैः। अनृतुऽपाः। ऋतऽवा॥८॥

पदार्थः-**(रूपंरूपम्)** प्रतिरूपम् **(मघवा)** बहुधनवान् **(बोभवीति)** भृशं भवति **(मायाः)** प्रज्ञाः **(कृण्वानः)** **(तन्वम्)** शरीरम् **(परि)** सर्वतः **(स्वाम्)** स्वकीयाम् **(त्रिः)** त्रिवारम् **(यत्)** यः **(दिवः)** प्रकाशान् **(परि)** **(मुहूर्त्तम्)** घटिकाद्वयम् **(आ)** **(अगात्)** प्राप्नुयात् **(स्वैः)** स्वकीयैः **(मन्त्रैः)** विचारैः **(अनृतुपाः)** य ऋतून् पाति स ऋतुपा न ऋतुपा अनृतुपाः **(ऋतावा)** सत्यवान्॥८॥

अन्वयः-यद्य ऋतावा मघवा सूर्य्यो दिवो मुहूर्त्तमिव स्वैर्मन्त्रैरनृतुपाः सन् स्वां तन्वं त्रिः पर्यागाद् रूपंरूपं प्रति मायाः कृण्वानः सन् परि बोभवीति तमध्यापकमुपदेष्टारञ्च कुर्य्युः॥८॥

भावार्थः-ये परमेश्वरमारभ्य पृथिवीपर्य्यन्तानां पदार्थानां स्वरूपविदः सद्योऽन्येभ्यो विज्ञानप्रदाः सूर्य्य इव सुशिक्षासभ्यताविनयप्रकाशकाः स्युस्ते विद्याधर्मराजमन्त्रवर्द्धने नियोजनीयाः॥८॥

पदार्थः-**(यत्)** जो **(ऋतावा)** सत्य से युक्त **(मघवा)** बहुत धन से युक्त **(सूर्य्यः)** सूर्य्य **(दिवः)** प्रकाशों को **(मुहूर्त्तम्)** दो घड़ी **(स्वैः)** अपने **(मन्त्रैः)** विचारों से **(अनृतुपाः)** नहीं ऋतुओं का पालन करनेवाला होकर **(स्वाम्)** अपने **(तन्वम्)** शरीर को **(त्रिः)** तीन वार **(परि, आ)** सब प्रकार **(अगात्)** प्राप्त होवें और **(रूपंरूपम्)** रूप-रूप के प्रति **(मायाः)** बुद्धियों को **(कृण्वानः)** करते हुए **(परि, बोभवीति)** अत्यन्त होता है, उसको अध्यापक और उपदेश देनेवाला करें॥८॥

भावार्थः-जो परमेश्वर को ले के पृथिवी पर्यन्त पदार्थों के स्वरूप जानने और शीघ्र अन्य जनों के

लिये विज्ञान देने और सूर्य्य के सदृश उत्तम शिक्षा, सभ्यता और विनय के प्रकाश करनेवाले होवें, वे विद्या, धर्म और राजधर्म के मन्त्र बढ़ाने में नियत करने के योग्य हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

म॒हाँ ऋषि॑र्देव॒जा दे॒वजू॑तोऽस्त॑भ्ना॒त्सिन्धु॑मर्ण॒वं नृ॒चक्षा॑:।
वि॒श्वामि॑त्रो यदव॑हत्सु॒दास॒मप्रि॑यायत कुशि॒केभि॒रिन्द्र॑:॥९॥

म॒हान्। ऋ॒षिः। दे॒व॒ऽजाः। दे॒वऽजू॑तः। अस्त॑भ्नात्। सिन्धु॑म्। अ॒र्ण॒वम्। नृ॒ऽचक्षा॑:। वि॒श्वामि॑त्रः। यत्। अव॑हत्। सु॒ऽदास॑म्। अप्रि॑यायत। कु॒शि॒केभि॑:। इन्द्र॑:॥९॥

पदार्थः-(**महान्**) महत्वपरिमाणतः सर्वेभ्योऽधिकः (**ऋषिः**) मन्त्रार्थवेत्ता (**देवजाः**) यो देवेषु विद्वत्सु जातः (**देवजूतः**) देवैः प्रेरितः (**अस्तभ्नात्**) स्तभ्नाति धरति (**सिन्धुम्**) नदीम् (**अर्णवम्**) समुद्रम् (**नृचक्षाः**) नृणां द्रष्टा (**विश्वामित्रः**) सर्वेषां सुहृत् (**यत्**) यः (**अवहत्**) प्राप्नोति (**सुदासम्**) शोभनदानम् (**अप्रियायत**) प्रिय इवाचरति (**कुशिकेभिः**) कार्यसिद्धान्तविद्भिः (**इन्द्रः**) परमैश्वर्यकरः॥९॥

अन्वयः-हे मनुष्या! यद्यो महानृषिर्देवजा देवजूतो नृचक्षा विश्वामित्र इन्द्रः कुशिकेभिः यथा सूर्यो भूमिं सिन्धुमर्णवं चास्तभ्नात् यथा दिव राज्यं धरेच्छ्रियमवहत् सुदासमप्रियायत तं सर्वे सत्कुरुत॥९॥

भावार्थः-यथा सूर्यः सर्वेभ्यो लोकेभ्यो महान्तसर्वस्य धर्त्ता प्रकाशकोऽस्ति तथैव वेदविद आप्ता वर्त्तन्त इति वेद्यम्॥९॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**महान्**) बड़प्पन रूप परिमाण से सब पदार्थों से बड़ा (**ऋषिः**) मन्त्रों के अर्थों का जाननेवाला (**देवजाः**) विद्वानों में उत्पन्न (**देवजूतः**) विद्वानों से प्रेरित (**नृचक्षाः**) मनुष्यों का देखनेवाला (**विश्वामित्रः**) सबका मित्र (**इन्द्रः**) अत्यन्त ऐश्वर्य का करनेवाला (**कुशिकेभिः**) कार्यों के सिद्धान्तों को जाननेवालों से जैसे सूर्य, पृथिवी (**सिन्धुम्**) नदी और (**अर्णवम्**) समुद्र को (**अस्तभ्नात्**) धारण करता है, जैसे [द्युलोक के] राज्य को धारण करे तो लक्ष्मी को (**अवहत्**) प्राप्त होता है (**सुदासम्**) उत्तम दान को (**अप्रियायत**) प्रिय के सदृश करता है, उसका सब लोग सत्कार करें॥९॥

भावार्थः-जैसे सूर्य सब लोकों से बड़ा और सबका धारणकर्त्ता तथा प्रकाश करनेवाला है, वैसे ही सबके जाननेवाले यथार्थवक्ता पुरुष हैं, ऐसा जानना चाहिये॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हं॒साइ॑व कृणुथ श्लोक॒मद्रि॑भि॒र्मद॑न्तो गी॒र्भिर॑ध्व॒रे सु॒ते सचा॑।
दे॒वेभि॑र्विप्रा ऋषयो नृचक्षसो॒ वि पि॑बध्वं कुशिकाः सो॒म्यं मधु॑॥१०॥२०॥

हंसाःऽइव। कृणुथ। श्लोकम्। अद्रिऽभिः। मदन्तः। गीःऽभिः। अध्वरे। सुते। सचा। देवेभिः। विप्राः। ऋषयः। नृऽचक्षसः। वि। पिबध्वम्। कुशिकाः। सोम्यम्। मधु॥ १०॥

पदार्थः-(**हंसाइव**) (**कृणुथ**) (**श्लोकम्**) सुलक्षणां वाचम्। **श्लोक इति वाङ्नामसु पठितम्।** (निघं०१.११) (**अद्रिभिः**) मेघैः (**मदन्तः**) प्राप्तानन्दाः (**गीर्भिः**) सुशिक्षिताभिर्वाग्भिः (**अध्वरे**) अहिंसनीयेऽध्ययनाऽध्यापनीये व्यवहारे (**सुते**) निष्पन्ने (**सचा**) समूहे (**देवेभिः**) विद्वद्भिः (**विप्राः**) मेधाविनः (**ऋषयः**) मन्त्रार्थवेत्तारः (**नृचक्षसः**) मनुष्याणां विद्यादृष्ट्या परीक्षकाः (**वि**) (**पिबध्वम्**) (**कुशिकाः**) विद्यासिद्धान्तनिष्कर्षकाः (**सोम्यम्**) सोम ऐश्वर्ये साधु (**मधु**) मधुरादिगुणं द्रव्यम्॥१०॥

अन्वयः-हे कुशिका नृचक्षस ऋषयो विप्रा! यूयं सुतेऽध्वरेऽद्रिभिर्मदन्तः सन्तो देवेभिः सह श्लोकं हंसाइव कृणुथ सत्यस्य सचा वर्त्तध्वं सोम्यं मधु वि पिबध्वम्॥१०॥

भावार्थः-परमविद्वांसो विदुषः प्रति जितेन्द्रियतां धर्मात्मतां सुशीलतां सभ्यतां च ग्राहयेयुर्यतस्तेऽप्याप्ता भूत्वा जगत्कल्याणं कुर्युः॥१०॥

पदार्थः-हे (**कुशिकाः**) विद्याओं के सिद्धान्तों के जानने (**नृचक्षसः**) मनुष्यों की विद्यादृष्टि से परीक्षा करने और (**ऋषयः**) मन्त्रों के अर्थों को जाननेवाले (**विप्राः**) बुद्धिमान्! आप लोग (**सुते**) उत्पन्न (**अध्वरे**) नहीं हिंसा करने योग्य पढ़ने और पढ़ाने रूप व्यवहार में (**अद्रिभिः**) मेघों से (**मदन्तः**) आनन्द को प्राप्त होते हुए (**देवेभिः**) विद्वानों के साथ (**श्लोकम्**) उत्तम स्वरूप वाणी को (**कृणुथ**) करो और सत्य के (**सचा**) समूह में वर्त्तमान (**सोम्यम्**) ऐश्वर्य्य में श्रेष्ठ (**मधु**) मधुर आदि गुणयुक्त द्रव्य का (**वि, पिबध्वम्**) पान कीजिये॥१०॥

भावार्थः-अत्यन्त विद्वान् जन विद्वानों के प्रति जितेन्द्रियता, धर्मात्मता, सुशीलता और सभ्यता को ग्रहण करावें कि जिससे वे भी श्रेष्ठ होकर संसार के कल्याण को करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुञ्चता सुदासः।
राजा वृत्रं जङ्घनत् प्रागपागुदगथा यजाते वर आ पृथिव्याः॥ ११॥

उप। प्र। इत। कुशिकाः। चेतयध्वम्। अश्वम्। राये। प्र। मुञ्चत। सुऽदासः। राजा। वृत्रम्। जङ्घनत्। प्राक्। अपाक्। उदक्। अथ। यजाते। वरे। आ। पृथिव्याः॥ ११॥

पदार्थः-(**उप**) (**प्र**) (**इत**) प्राप्नुत (**कुशिकाः**) ये कुर्वन्त्युपदिशन्ति ते कुशाः प्रशस्ताः कुशा विद्यन्ते येषु ते कुशिकाः (**चेतयध्वम्**) ज्ञापयध्वम् (**अश्वम्**) तुरङ्गमिवाऽऽशुगामिनीं विद्युतम् (**राये**) श्रिये

(प्र) **(मुञ्चत)** त्यजत। अत्र **संहितायामि**ति दीर्घः। **(सुदासः)** शोभनदानः **(राजा)** प्रकाशमानः **(वृत्रम्)** मेघमिव शत्रुम् **(जङ्घनत्)** भृशं हन्यात् **(प्राक्)** पूर्वम् **(अपाक्)** पश्चिमतः **(उदक्)** उत्तरतः **(अथ)**। अत्र **निपातस्य चे**ति दीर्घः। **(यजाते)** यजेत **(वरे)** उत्तमे देशे **(आ)** **(पृथिव्याः)**॥११॥

अन्वयः-हे कुशिका! यः सुदासो राजा प्रागपागुदग्वृत्रं जङ्घनदथ पृथिव्या वरे आ यजाते तस्य राये प्र मुञ्चताश्वञ्च चेतयध्वमुप प्रेत॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! ये वीराः शत्रून् हन्युस्तेभ्यः पुष्कलं धनं प्रतिष्ठां च दद्युः। येन सर्वासु दिक्षु विजयः प्रकाशेत॥११॥

पदार्थः-हे **(कुशिकाः)** जो करते और उपदेश देते वे कुश वे श्रेष्ठ विद्यमान हैं जिनमें वे कुशिक और जो **(सुदासः)** उत्तम दान देनेवाला **(राजा)** प्रकाशमान **(प्राक्)** प्रथम **(अपाक्)** पश्चिम और **(उदक्)** उत्तर से **(वृत्रम्)** मेघ के सदृश शत्रु का **(जङ्घनत्)** अत्यन्त नाश करे **(अथ)** इसके अनन्तर **(पृथिव्याः)** पृथिवी के **(वरे)** उत्तम स्थान में **(आ, यजाते)** यज्ञ करे उसका **(राये)** लक्ष्मी के लिये **(प्र)** **(मुञ्चत)** त्याग करो और उस **(अश्वम्)** घोड़े के सदृश शीघ्र चलनेवाली बिजुली को **(चेतयध्वम्)** जनाओ और **(उप, प्र इत)** प्राप्त होओ॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जो वीर लोग शत्रुओं का नाश करें उनके लिये बहुत धन और प्रतिष्ठा को देवें। जिससे सम्पूर्ण दिशाओं में विजय प्रकाशित होवे॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

य इ॒मे रोद॑सी उ॒भे अ॒हमिन्द्र॒मतु॑ष्टवम्।
वि॒श्वामि॑त्रस्य रक्षति॒ ब्रह्मे॒दं भार॑तं॒ जन॑म्॥ १२॥

यः। इ॒मे इति॑। रोद॑सी॒ इति॑। उ॒भे इति॑। अ॒हम्। इन्द्र॑म्। अतु॑ष्टवम्। वि॒श्वामि॑त्रस्य। र॒क्ष॒ति॒। ब्रह्म॑। इ॒दम्। भार॑तम्। जन॑म्॥ १२॥

पदार्थः-(**यः**) **(इमे)** **(रोदसी)** द्यावापृथिव्यौ **(उभे)** **(अहम्)** **(इन्द्रम्)** परमात्मानम् **(अतुष्टवम्)** प्रशंसेयम् **(विश्वामित्रस्य)** सर्वस्य सुहृदः **(रक्षति)** **(ब्रह्म)** धनं ब्रह्माण्डं वा **(इदम्)** वर्त्तमानम् **(भारतम्)** भारत्या वाचोऽयं वेत्ता धर्त्ता वा तम् **(जनम्)** प्रसिद्धं मनुष्यादिकं प्राणिमयम्॥१२॥

अन्वयः-हे मनुष्या! य इमे उभे रोदसी ब्रह्मेदं भारतं जनं रक्षति यमिन्द्रमहमतुष्टवं तस्य विश्वामित्रस्यैवोपासनां यूयं कुरुत॥१२॥

भावार्थः-हे मनुष्या! येनेश्वरेण सर्वं जगत्सृष्ट्वा रक्ष्यते तस्यैव स्तुतिप्रार्थनोपासनाः सततं कुरुत॥१२॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(इमे)** ये **(उभे)** दोनों **(रोदसी)** अन्तरिक्ष और पृथिवी **(ब्रह्म)** धन वा ब्रह्माण्ड **(इदम्)** इस वर्त्तमान **(भारतम्)** वाणी के जानने वा धारण करनेवाले उस **(जनम्)** प्रसिद्ध मनुष्य आदि प्राणिस्वरूप की **(रक्षति)** रक्षा करता है, जिस **(इन्द्रम्)** परमात्मा की हम **(अतुष्टवम्)** प्रशंसा करें, उस **(विश्वामित्रस्य)** सबके मित्र की ही उपासना आप लोग करें॥१२॥

भावार्थः-हे मनुष्यो! जिस परमेश्वर से सम्पूर्ण संसार रच कर रक्षित है, उसकी ही स्तुति, प्रार्थना और उपासना निरन्तर करो॥१२॥

अथ प्रजाविषयमाह॥

अब प्रजा के विषय को अगले मन्त्र में कहते हैं॥

विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे। करदिन्नः सुराधसः॥१३॥

विश्वामित्राः। अरासत। ब्रह्म। इन्द्राय। वज्रिणे। करत्। इत्। नः। सुऽराधसः॥१३॥

पदार्थः-(**विश्वामित्राः**) सर्वस्य सुहृदः **(अरासत)** रासन्ताम् **(ब्रह्म)** धनम् **(इन्द्राय)** राज्ञे **(वज्रिणे)** धनुर्वेदविदे **(करत्)** कुर्य्यात् **(इत्)** एव **(नः)** अस्मान् **(सुराधसः)** उत्तमधनयुक्तान्॥१३॥

अन्वयः-हे विश्वामित्रा! भवन्तो यो नः सुराधसः करत्तस्मै इद्वज्रिण इन्द्राय ब्रह्मारासत॥१३॥

भावार्थः-यो राजा सर्वाः प्रजाः सुखसम्पन्नाः कुर्य्यात्तमेव प्रजाः परमैश्वर्य्ययुक्तं कुर्य्युः॥१३॥

पदार्थः-हे **(विश्वामित्राः)** सबके मित्रो! आप लोग जो **(नः)** हम लोगों को **(सुराधसः)** उत्तम धन से युक्त **(करत्)** करे उस **(इत्)** ही **(वज्रिणे)** धनुर्वेद के जाननेवाले **(इन्द्राय)** राजा के लिये **(ब्रह्म)** धन की **(अरासत)** वृद्धि करें॥१३॥

भावार्थः-जो राजा सम्पूर्ण प्रजाओं को सुखयुक्त करे, उस ही को प्रजा अत्यन्त ऐश्वर्य्य से युक्त करें॥१३॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम्।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन् रन्धया नः॥१४॥

किम्। ते। कृण्वन्ति। कीकटेषु। गावः। न। आऽशिरम्। दुह्रे। न। तपन्ति। घर्मम्। आ। नः। भर। प्रऽमगन्दस्य। वेदः। नैचाऽशाखम्। मघऽवन्। रन्धय। नः॥१४॥

पदार्थः-(**किम्**) **(ते)** तव **(कृण्वन्ति)** **(कीकटेषु)** अनार्य्यदेशनिवासिषु म्लेच्छेषु **(गावः)** धेनूः **(न)** **(आशिरम्)** यदस्य ते तत् क्षीरादिकम् **(दुह्रे)** दुहन्ति **(न)** **(तपन्ति)** **(घर्मम्)** दिनम्। **घर्म**

इत्यहर्नामसु पठितम्। (निघं०१.९) **(आ)** समन्तात् **(नः)** अस्मभ्यम् **(भर)** धर **(प्रमगन्दस्य)** यः कुलीनो मां गच्छति स तस्य **(वेदः)** धनम् **(नैचाशाखम्)** नीचा शाखा शक्तिर्यस्मिँस्तम् **(मघवन्)** पूजितधनयुक्त **(रन्धय)** निवारय **(नः)** अस्माकम्॥१४॥

अन्वयः-हे विद्वन्! ते कीकटेषु गावो नाऽऽशिरं दुह्रे घर्मं न तपन्ति ते किं कृण्वन्ति त्वं नः प्रमगन्दस्य वेद आ भर। हे मघवँस्त्वं नो नैचाशाखं रन्धय॥१४॥

भावार्थः-अत्रोपमालङ्कारः। यथा म्लेच्छेषु गावो न वर्द्धन्ते नास्तिकेषु धर्मादयो गुणाश्च, तथैव विद्वत्स्वनीश्वरवादिनः प्रबला न जायन्ते तस्माद्विद्वद्भिर्मनुष्येषु नास्तिकत्वं सर्वथा निवारणीयम्॥१४॥

पदार्थः-हे विद्वान्! **(ते)** आपके **(कीकटेषु)** अनार्य देशों में वसनेवालो में **(गावः)** गावों से **(न)** नहीं **(आशिरम्)** दुग्ध आदि को **(दुह्रे)** दुहते हैं **(घर्मम्)** दिन को **(न)** नहीं **(तपन्ति)** तपाते हैं, वे **(किम्)** क्या **(कृण्वन्ति)** करते वा करेंगे और आप **(नः)** हम लोगों के लिये **(प्रमगन्दस्य)** जो कुलीन मुझको प्राप्त होता है, उसके **(वेदः)** धन को **(आ)** सब प्रकार से **(भर)** धारण करिये और हे **(मघवन्)** श्रेष्ठ धन से युक्त! आप **(नः)** हम लोगों के **(नैचाशाखम्)** नीची शक्ति जिसमें उसकी **(रन्धय)** निवृत्ति करो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे म्लेच्छ जनों में गौओं की, नास्तिक पुरुषों में धर्म आदि गुणों की वृद्धि नहीं होती और वैसे ही विद्वानों में ईश्वर को नहीं माननेवाले प्रबल न होवें, इससे चाहिये कि [विद्वज्जन] मनुष्यों में नास्तिकत्व का सर्वथा निवारण करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सस॒र्प॒रीरमि॑तिं॒ बाध॑माना बृ॒हन्मि॑माय जु॒मद॑ग्निदत्ता।
आ सूर्य॑स्य दुहि॒ता त॑तान॒ श्रवो॑ दे॒वेष्व॒मृत॑मजु॒र्यम्॥ १५॥ २१॥

स॒स॒र्प॒रीः। अम॑तिम्। बाध॑माना। बृ॒हत्। मि॒मा॒य॒। जु॒मद॑ग्निऽदत्ता। आ। सूर्य॑स्य। दु॒हि॒ता। त॒ता॒न॒। श्रवः॑। दे॒वेषु॑। अ॒मृत॑म्। अ॒जु॒र्यम्॥ १५॥

पदार्थः-**(ससर्परीः)** भृशं सर्पणशीला **(अमतिम्)** रूपम् **(बाधमाना)** निवारयन्ती **(बृहत्)** **(मिमाय)** मिमीते **(जमदग्निदत्ता)** चक्षुषा प्रत्यक्षेण दत्ता। **चक्षुर्वै जमदग्निर्ऋषिः**। [शत०८.१.२.३] **(आ)** **(सूर्य्यस्य)** **(दुहिता)** दुहितेव वर्त्तमानोषा **(ततान)** तनुते विस्तृणोति **(श्रवः)** श्रवणम् **(देवेषु)** विद्वत्सु **(अमृतम्)** अमृतात्मकम् **(अजुर्य्यम्)** हानिरहितम्॥१५॥

अन्वयः-हे मनुष्या! या जमदग्निदत्ता ससर्परीर्वागजुर्य्यं सूर्य्यस्य दुहिता तमो बाधमानोषा इव बृहदमतिं मिमाय देवेष्वजुर्य्यममृतं श्रव आ ततान तां वाचं सर्वथोन्नयत॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि ब्रह्मचर्य्यधर्मानुष्ठानपुरुषार्थैराप्तानां सकाशाद् विद्यासुशिक्षे मनुष्या गृह्णीयुस्तर्हि तेषां किमपि सुखमप्राप्तं न स्यात्॥१५॥

पदार्थः-हे मनुष्यो! जो **(जमदग्निदत्ता)** नेत्र से प्रत्यक्ष दी गई **(ससर्परीः)** अत्यन्त चलनेवाली वाणी **(अजुर्य्यम्)** हानि से रहित **(सूर्य्यस्य)** सूर्य्य की **(दुहिता)** कन्या सदृश वर्त्तमान अन्धकार को नाश करते हुए प्रातःकाल के सदृश **(बृहत्)** बड़े **(अमतिम्)** रूप को **(मिमाय)** नापती है और **(देवेषु)** विद्वानों में हानिरहित **(अमृतम्)** अमृतस्वरूप **(श्रवः)** सुनने का **(आ, ततान)** विस्तार करती है, उस वाणी की सब प्रकार वृद्धि करो॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो ब्रह्मचर्य धर्म का अनुष्ठान और पुरुषार्थों से श्रेष्ठ पुरुषों के समीप से विद्या और उत्तम शिक्षा को मनुष्य ग्रहण करें तो उनको कुछ भी सुख अप्राप्त न होवे॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सस॒र्प॒रीर॑भर॒त् तूय॑मे॒भ्योऽधि॒ श्रव॒: पाञ्च॑जन्यासु कृ॒ष्टिषु॑।
सा प॒क्ष्या॒३॑ नव्य॒मायु॒र्दधा॑ना॒ यां मे॑ पलस्तिजमद॒ग्नयो॑ ददु॒:॥१६॥

स॒स॒र्प॒रीः। अ॒भ॒र॒त्। तूय॑म्। ए॒भ्य॒ः। अधि॑। श्रव॑ः। पाञ्च॑ऽजन्यासु। कृ॒ष्टिषु॑। सा। प॒क्ष्या॑। नव्य॑म्। आयु॑ः। दधा॑ना। याम्। मे॒। प॒ल॒स्ति॒ऽज॒म॒द॒ग्नय॑ः। द॒दु॒ः॥१६॥

पदार्थः-**(ससर्परीः)** सुखस्य प्रापिका **(अभरत्)** **(तूयम्)** शीघ्रम् **(एभ्यः)** जिज्ञासुभ्यः **(अधि)** उपरिभावे **(श्रवः)** अन्नम् **(पाञ्चजन्यासु)** पञ्चसु दिनेषु प्राणेषु भवासु **(कृष्टिषु)** मनुष्यादिप्रजासु **(सा)** **(पक्ष्या)** पक्षेषु साध्वी **(नव्यम्)** नवीनमेव **(आयुः)** अन्नं जीवनं वा। **आयुरित्यन्ननामसु पठितम्।** (निघं०२.७) **(दधाना)** **(याम्)** **(मे)** मम **(पलस्तिजमदग्नयः)** प्रजमिता विदिता अग्नयः पलस्तयो वयोज्ञानवृद्धाश्च जमदग्नयो यैस्ते **(ददुः)** दद्युः॥१६॥

अन्वयः-हे मनुष्या! पलस्तिजमदग्नयो मे यां ददुः सा पक्ष्या पाञ्चजन्यासु कृष्टिषु नव्यमायुर्दधाना एभ्य श्रवोऽधि तूयं ददुः ससर्परीरभरत्॥१६॥

भावार्थः-हे मनुष्या! या कार्यसिद्ध्यैश्वर्योत्पादिका आयुर्वर्धिका सत्यादिलक्षणोज्ज्वला वाणी नवीनं विज्ञानं जीवनं च दधाति तां नित्यं बिभृत॥१६॥

पदार्थः-हे मनुष्यो! **(पलस्तिजमदग्नयः)** जाना है प्राजापत्य आदि अग्नियों को जिन्होंने वे और अवस्था और ज्ञान में वृद्ध पुरुष **[मेरे लिये]** **(याम्)** जिसको **(ददुः)** देवें **(सा)** वह **(पक्ष्या)** पक्षों में

साध्वी (**पाञ्चजन्यासु**) पाँच दिनों तथा प्राणों में उत्पन्न (**कृष्टिषु**) मनुष्य आदि प्रजाओं में (**नव्यम्**) नवीन ही (**आयुः**) अन्न वा जीवन को (**दधाना**) धारण करती हुई (**एभ्यः**) इन जानने की इच्छा करनेवालों के लिये (**श्रवः**) अन्न को (**अधि**) उपरि भाग में (**तूयम्**) शीघ्र (**ददुः**) देवें (**ससर्परीः**) सुख की बढ़ानेवाली (**अभरत्**) प्राप्त कराइये॥१६॥

भावार्थः–हे मनुष्यो! जो कार्य की सिद्धि और ऐश्वर्य की उत्पन्न करने और अवस्था की बढ़ानेवाली सत्य लक्षणों से स्पष्ट वाणी नवीन–नवीन विज्ञान और जीवन धारण करती है, उसको नित्य धारण करो॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि।
इन्द्रः पातल्ये ददतां शरीतोररिष्टनेमे अभि नः सचस्व॥ १७॥

स्थिरौ। गावौ। भवताम्। वीळुः। अक्षः। मा। ईषा। वि। वर्हि। मा। युगम्। वि। शारि। इन्द्रः। पातल्ये३। इति। ददताम्। शरीतोः। अरिष्टऽनेमे। अभि। नः। सचस्व॥ १७॥

पदार्थः–(**स्थिरौ**) निश्चलौ (**गावौ**) वृषभौ (**भवताम्**) (**वीळुः**) प्रशंसितः (**अक्षः**) इन्द्रियछिद्रम् (**मा**) निषेधे (**ईषा**) हिंसकः (**वि**) (**वर्हि**) उत्सन्नाभूत् (**मा**) (**युगम्**) वर्षम् (**वि**) (**शारि**) हिंस्यात् (**इन्द्रः**) ऐश्वर्य्यवान् (**पातल्ये**) पतनशीले (**ददताम्**) (**शरीतोः**) शरीतुं दुष्टस्वभावं हिंसितुं शक्नोति (**अरिष्टनेमे**) योऽरिष्टान्यहिंसितानि कर्माणि नयति तत्सम्बुद्धौ (**अभि**) (**नः**) अस्मान् (**सचस्व**)॥१७॥

अन्वयः–हे अरिष्टनेमे! भवानिन्द्रः शरीतोः सन् पातल्ये ददतां वीळुरक्ष ईषा सन् स्थिरौ गावौ मा वि शारि युगं मा वि वर्हि यतः स्थिरौ गावौ भवतां तस्मात्त्वं नोऽभि सचस्व॥१७॥

भावार्थः–मनुष्यैर्महोपकारका गवादयः पशवः कदाचिन्नो हिंसनीयाः। व्यर्थः समयश्च न गमनीयः सद्भिः सह सदैव सन्धी रक्षणीयः॥१७॥

पदार्थः–हे (**अरिष्टनेमे**) नहीं नाश होनेवाले कर्मों को प्राप्त करानेवाले! आप (**इन्द्रः**) ऐश्वर्यवाले (**शरीतोः**) दुष्ट स्वभाव से युक्त के नाश करने में समर्थ हुए (**पातल्ये**) गिरनेवाले में (**ददताम्**) दीजिये और (**वीळुः**) प्रशंसायुक्त (**अक्षः**) इन्द्रिय के छिद्र को (**ईषा**) नाश करनेवाला हुआ (**स्थिरौ**) निश्चल (**गावौ**) बैलों का (**मा**) नहीं (**वि, शारि**) नाश करे (**युगम्**) वर्ष को (**मा**) नहीं (**वि, वर्हि**) वन्ध्या हो जिससे कि निश्चल बैल (**भवताम्**) होवें, तिससे आप (**नः**) हम लोगों से (**अभि, सचस्व**) सब प्रकार मिलो॥१७॥

भावार्थः–मनुष्यों को चाहिये कि बड़े उपकार करनेवाले गौ आदि पशुओं का कभी नाश नहीं

करें और व्यर्थ समय न बितावें, श्रेष्ठ पुरुषों के साथ सदा ही मेल **[**=सम्बन्ध**]** की रक्षा करें॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

बलं॑ धेहि त॒नूषु॑ नो॒ बल॑मिन्द्रान॒ळुत्सु॑ नः।

बलं॑ तो॒काय॒ तन॑याय जी॒वसे॒ त्वं हि ब॑ल॒दा असि॑॥१८॥

बल॑म्। धे॒हि॒। त॒नूषु॑। नः॒। बल॑म्। इ॒न्द्र॒। अ॒न॒ळुत्ऽसु॑। नः॒। बल॑म्। तो॒काय॑। तन॑याय। जी॒वसे॑। त्वम्। हि। ब॒ल॒ऽदाः। असि॑॥१८॥

पदार्थः-(**बलम्**) पराक्रमम् (**धेहि**) (**तनूषु**) शरीरेषु (**नः**) अस्मान् (**बलम्**) (**इन्द्र**) परमैश्वर्यप्रद (**अनळुत्सु**) गवादिषु (**नः**) अस्माकम् (**बलम्**) (**तोकाय**) ह्रस्वाय बालकाय (**तनयाय**) प्राप्तकौमारयौवनाऽवस्थाय (**जीवसे**) जीवितुम् (**त्वम्**) (**हि**) यतः (**बलदाः**) (**असि**)॥१८॥

अन्वयः-हे इन्द्र! हि यतस्त्वं बलदा असि तस्मान्नस्तनूषु बलं धेहि। नोऽनळुत्सु बलं धेहि नो जीवसे तोकाय तनयाय बलं धेहि॥१८॥

भावार्थः-हे आचार्य! भवान् यस्माच्छरीरात्मबलवानस्ति तस्मादस्मासु पूर्णं शरीरात्मबलं निधेहि॥१८॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के देनेवाले! (**हि**) जिससे आप (**बलदाः**) बल के देनेवाले (**असि**) हैं, इससे (**नः**) हम लोगों के (**तनूषु**) शरीरों में (**बलम्**) बल को (**धेहि**) धारण करो और (**नः**) हम लोगों के (**अनळुत्सु**) गौ आदिकों में (**बलम्**) बल को धारण करो, हम लोगों के (**जीवसे**) जीवन और (**तोकाय**) छोटे बालक तथा (**तनयाय**) कौमार अवस्था को प्राप्त पुरुष के लिये (**बलम्**) पराक्रम को धारण करो॥१८॥

भावार्थः-हे आचार्य्य! आप जिससे कि शरीर और आत्मा के बल से युक्त हो, इससे हम लोगों में पूर्ण शरीर और आत्मा के बल को धारण करो॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒भि व्य॑यस्व खदि॒रस्य॒ सार॒मोजो॑ धेहि स्पन्दु॒ने शि॑ंशपा॑याम्।

अक्ष॑ वीळो वीळित वी॒ळय॑स्व॒ मा यामा॑दु॒स्मादव॑ जीहिपो नः॥१९॥

अ॒भि। व्य॒य॒स्व॒। ख॒दि॒रस्य। सार॑म्। ओजः॑। धे॒हि॒। स्प॒न्दु॒ने॒। शि॒ंश॒पा॑याम्। अक्ष॑। वी॒ळो॒ इति॑। वी॒ळि॒त॒। वी॒ळय॑स्व। मा। यामा॑त्। अ॒स्मात्। अव॑। जी॒हि॒पः॒। नः॒॥१९॥

पदार्थः-(**अभि**) सर्वतः (**व्ययस्व**) व्ययं कुरु (**खदिरस्य**) एतत्काष्ठस्य (**सारम्**) दृढभागमिव (**ओजः**) बलम् (**धेहि**) (**स्पन्दने**) किञ्चिच्चलने (**शिंशपायाम्**) एतत्काष्ठे वृक्षविशेषे (**अक्ष**) व्याप्तविद्य (**वीळो**) बलवन् प्रशंसितस्वभाव (**वीळित**) बहुभिः प्रशंसित (**वीळयस्व**) प्रेरयस्व (**मा**) निषेधे (**यामात्**) प्रहरात् (**अस्मात्**) (**अव**) (**जीहिपः**) त्याजयेः (**नः**) अस्मान्॥१९॥

अन्वयः-हे अक्ष! त्वमस्मासु खदिरस्य सारमिवोजो धेहि शिंशपायां स्पन्दन इवाऽभिव्ययस्व। हे वीळो वीळित! नोऽस्मान् वीळयस्वाऽस्माद् यामादस्मान्माव जीहिपः॥१९॥

भावार्थः-हे आचार्य्य! अस्मासु दृढं बलं धेहि सत्कर्मेष्वस्मान् प्रेरय कदाचिन्मा त्यजेः॥१९॥

पदार्थः-हे (**अक्ष**) विद्याओं से व्याप्त! आप हम लोगों में (**खदिरस्य**) इस काष्ठ के (**सारम्**) दृढ भाग के सदृश (**ओजः**) बल को (**धेहि**) धारण कीजिये (**शिंशपायाम्**) इस काष्ठ को वृक्षविशेष (**स्पन्दने**) कुछ चलने में (**अभि**) सब प्रकार (**व्ययस्व**) खर्च करो। और हे (**वीळो**) बलयुक्त और (**वीळित**) बहुतों में प्रशंसित पुरुष! (**नः**) हम लोगों को (**वीळयस्व**) प्रेरणा करो (**अस्मात्**) इस (**यामात्**) प्रहर से [हम लोगों को] (**मा**) नहीं (**अव, जीहिपः**) त्यागिये॥१९॥

भावार्थः-हे आचार्य्य! हम लोगों में दृढ़ बल को धारण करो, श्रेष्ठ कर्मों में हम लोगों को प्रेरणा करो और कभी मत त्याग करो॥१९॥

अथ राजपुरुषविषयमाह॥

अब राजा के पुरुष के विषय को कहते हैं॥

अ॒यम॒स्मान्व॒नस्पति॒र्मा च॒ हा मा च॑ रीरिषत्।

स्व॒स्त्या गृ॒हेभ्य॒ आव॒सा आ वि॒मोच॑नात्॥२०॥२२॥

अ॒यम्। अ॒स्मान्। व॒नस्पतिः॑। मा। च॒। हाः॑। मा। च॒। रि॒रि॒ष॒त्। स्व॒स्ति। आ। गृ॒हेभ्यः॑। आ। अ॒व॒ऽसै। आ। वि॒ऽमोच॑नात्॥२०॥

पदार्थः-(**अयम्**) (**अस्मान्**) (**वनस्पतिः**) वनस्य पालकः (**मा**) (**च**) (**हाः**) त्यजेः (**मा**) (**च**) (**रीरिषत्**) हिंस्यात् (**स्वस्ति**) सुखम् (**आ**) (**गृहेभ्यः**) (**आ**) (**अवसै**) निश्चयाय। अत्र षो धातोः क्विप् **वाच्छन्दसी**त्याकारलोपाभावः। (**आ**) (**विमोचनात्**) विमोचनामारभ्य॥२०॥

अन्वयः-हे राजन्! यथाऽयं वनस्पतिरस्मान्न त्यजति तथाऽस्मान्मा हा यथा सूर्य्यश्चाऽस्मान्न हिनस्ति तथैव भवान् मा च रीरिषत्। आवसै आ गृहेभ्यः स्वस्त्या विमोचनात् सुखमागच्छतु॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽन्नादीनि वस्तूनि सर्वेषां रक्षकाणि स्युस्तथा राजपुरुषाश्च सर्वेषां पालकाः सन्तु न्यायं विहायाऽन्यायं कदाचिन्मा कुर्युः॥२०॥

पदार्थः-हे राजन्! जैसे (**अयम्**) यह (**वनस्पतिः**) वन का पालन करनेवाला (**अस्मान्**) हम

लोगों का त्याग नहीं करता है, वैसे हम लोगों का **(मा)** मत **(हाः)** त्याग करिये **(च)** और जैसे सूर्य्य हम लोगों की हिंसा नहीं करता है, वैसे ही आप **(मा, च)** नहीं **(रीरिषत्)** नाश कीजिये। और **(आ, अवसै)** अच्छे निश्चय के लिये **(आ, गृहेभ्यः)** सब प्रकार गृहों से **(स्वस्ति)** सुख हो **(आ, विमोचनात्)** त्याग तक सुख प्राप्त होवे॥२०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अन्न आदि वस्तु सबके रक्षक होवें, वैसे राजा के पुरुष सबके पालनकर्त्ता हों और न्याय का त्याग करके अन्याय कभी न करें॥२०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व।
यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु॥२१॥

इन्द्र। ऊतिऽभिः। बहुलाभिः। नः। अद्य। यात्ऽश्रेष्ठाभिः। मघऽवन्। शूर। जिन्व। यः। नः। द्वेष्टि। अधरः। सः। पदीष्ट। यम्। ऊम् इति। द्विष्मः। तम्। ऊम् इति। प्राणः। जहातु॥२१॥

पदार्थः-(**इन्द्र**) परमैश्वर्य्ययुक्त (**ऊतिभिः**) रक्षादिभिः (**बहुलाभिः**) (**नः**) अस्मान् (**अद्य**) (**याच्छ्रेष्ठाभिः**) शत्रुवधकर्म्मण्युत्तमाभिः (**मघवन्**) बहुपूजितधनयुक्त (**शूर**) दुष्टानां हिंसक (**जिन्व**) प्रसादय (**यः**) (**नः**) अस्मान् (**द्वेष्टि**) वैरयति (**अधरः**) नीचः (**सः**) (**पदीष्ट**) प्राप्नुयात् (**यम्**) (**उ**) (**द्विष्मः**) (**तम्**) (**उ**) (**प्राणः**) (**जहातु**) त्यजतु॥२१॥

अन्वयः-हे इन्द्र! योऽधरो नो द्वेष्टि स दुःखं पदीष्ट यमु वयं द्विष्मस्तमु प्राणो जहातु। हे मघवन्त्शूर! भवान् बहुलाभिः याच्छ्रेऽष्ठाभिर्नोऽस्मान् अद्य जिन्व॥२१॥

भावार्थः-विदुषां दुष्टकर्मेव द्वेष्यो धर्मात्मा सत्कर्त्तव्यो भवति यावन्ति प्रजारक्षायां दुष्टनिवारणे च साधनान्यपेक्षितानि स्युस्तावन्त्यादाय श्रेष्ठपालनं दुष्टनिवारणं राजादयः सततं कुर्युः॥२१॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त! (**यः**) जो (**अधरः**) नीच (**नः**) हम लोगों से (**द्वेष्टि**) वैर करता है (**सः**) वह दुःख को (**पदीष्ट**) प्राप्त होवे (**यम्**) जिसको (**उ**) और हम लोग (**द्विष्मः**) द्वेष करें (**तम्**) उसका (**उ**) भी (**प्राणः**) हृदयस्थ वायु (**जहातु**) त्याग करे। और हे (**मघवन्**) श्रेष्ठ धन से

युक्त **(शूर)** दुष्टों के नाशकर्त्ता! आप **(बहुलाभिः)** बहुत **(श्रेष्ठाभिः)**[१४] उत्तम **(ऊतिभिः)** रक्षा आदिकों से **(नः)** हम लोगों को **(यात्)** प्राप्त होवे **(अप, जिन्व)** प्रसन्न कीजिये॥ २१॥

भावार्थः-विद्वान् लोगों को दुष्ट कर्म करनेवाला पुरुष द्वेष करने योग्य और धर्मात्मा सत्कार करने योग्य है। जितने प्रजा की रक्षा करने और दुष्ट पुरुषों के निवारण करने में साधन अपेक्षित होवें, उनको ग्रहण करके श्रेष्ठ पुरुषों का पालन और दुष्टों का निवारण राजा आदि निरन्तर करें॥ २१॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

परशुं चिद्वि तपति शिम्बलं चिद्वि वृश्चति।
उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति॥ २२॥

परशुम्। चित्। वि। तपति। शिम्बलम्। चित्। वि। वृश्चति। उखा। चित्। इन्द्र। येषन्ती। प्रऽयस्ता। फेनम्। अस्यति॥ २२॥

पदार्थः-(**परशुम्**) कुठारम् (**चित्**) इव (**वि**) (**तपति**) विशेषेण सन्तापयति (**शिम्बलम्**) शल्मलीपुष्पं पत्रं वा (**चित्**) इव (**वि**) विशेषेण (**वृश्चति**) छिनत्ति (**उखा**) पाकस्थाली (**चित्**) इव (**इन्द्र**) परमैश्वर्ययुक्त (**येषन्ती**) स्रवन्ती (**प्रयस्ता**) प्रेरिता (**फेनम्**) (**अस्यति**) प्रक्षिपति॥ २२॥

अन्वयः-हे इन्द्र! या ते सेना अयस्कारः परशुं चिच्छत्रून् वि तपति शिम्बलं चिद्वि वृश्चति प्रयस्ता येषन्त्युखा चित् फेनमिव शत्रूनस्यति सा त्वया सदैव सत्कर्त्तव्या॥ २२॥

भावार्थः-अत्रोपमालङ्कारः। ये राजानः प्रशस्तां वीरसेनां रक्षन्ति त एव विजयं प्राप्य विराजन्ते॥ २२॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त! जो आपकी सेना लोहार **(परशुम्)** परशारूप शस्त्र को **(चित्)** जैसे वैसे शत्रुओं को **(वि, तपति)** विशेष करके सन्ताप देती है **(शिम्बलम्)** शेमर [सेमल] वृक्ष के पुष्प वा पत्र को **(चित्)** जैसे **(वि, वृश्चति)** विशेष करके काटता है **(प्रयस्ता)** प्रेरित हुई **(येषन्ती)** वहता तथा प्राप्त हुआ **(उखा)** पाक करने का पात्र **(चित्)** जैसे **(फेनम्)** फेने को वैसे शत्रुओं को **(अस्यति)** फेंकती है, उसका [=वह] आपसे सदा सत्कार करने योग्य है॥ २२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा लोग श्रेष्ठ वीरों की सेना की रक्षा करते हैं, वे ही

---

१४. **(याच्छेष्ठाभिः)** शत्रु का वध करने में उत्तम **(ऊतिभिः)** रक्षा आदिकों से **(नः)** हम लोगों को **(अप, जिन्व)** प्रसन्न कीजिये॥ सं०

विजय को प्राप्त होकर शोभित होते हैं॥२२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः।
नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति॥२३॥

न। सायकस्य। चिकिते। जनासः। लोधम्। नयन्ति। पशु। मन्यमानाः। न। अवाजिनम्। वाजिना। हासयन्ति। न। गर्दभम्। पुरः। अश्वात्। नयन्ति॥२३॥

पदार्थः-(**न**) निषेधे (**सायकस्य**) शस्त्रसमूहस्य (**चिकिते**) जानातु (**जनासः**) वीराः (**लोधम्**) लोब्धारम्। अत्र वर्णव्यत्ययेन भस्य धः। (**नयन्ति**) प्राप्नुवन्ति (**पशु**) पशुमिव। अत्र **सुपां सुलुगिति** विभक्तेर्लुक्। (**मन्यमानाः**) विजानन्तः (**न**) निषेधे (**अवाजिनम्**) अविद्यमाना वाजिनो यत्र संग्रामे तम् (**वाजिना**) अश्वेन (**हासयन्ति**) (**न**) (**गर्दभम्**) लम्बकर्णं खरम् (**पुरः**) (**अश्वात्**) (**नयन्ति**)॥२३॥

अन्वयः-हे राजन्! ये ते जनासो लोधं न नयन्ति पशु मन्यमाना वाजिना अवाजिनं न हासयन्ति। अश्वात्पुरो गर्दभं न नयन्ति ता सायकस्य दानेन युक्तान् कर्त्तुं भवान् चिकिते॥२३॥

भावार्थः-त एव राज्ञो वीरा वराः स्युर्ये युद्धविद्यां विज्ञाय सेनाङ्गानि यथावद्रक्षितुं संस्थापयितुं योधयितुं जानन्ति॥२३॥

पदार्थः-हे राजन्! जो वे (**जनासः**) वीरपुरुष (**लोधम्**) प्राप्त होनेवाले को (**न**) नहीं (**नयन्ति**) प्राप्त होते हैं (**पशु**) पशु के सदृश (**मन्यमानाः**) जानते हुए (**वाजिना**) घोड़े से (**अवाजिनम्**) घोड़े जिसमें नहीं ऐसे संग्राम को (**न**) नहीं (**हासयन्ति**) हराते हैं और (**अश्वात्**) घोड़े से (**पुरः**) प्रथम (**गर्दभम्**) लम्बे कानवाले गदहे को (**न**) नहीं (**नयन्ति**) प्राप्त कराते हैं, उनको (**सायकस्य**) शस्त्रसमूह के दान से युक्त करने को आप (**चिकिते**) जानिये॥२३॥

भावार्थः-वे ही राजा के वीर श्रेष्ठ होवें कि जो युद्धविद्या को जान के सेनाओं के अङ्गों की यथावत् रक्षा, स्थिर करने और युद्ध कराने को जानते हैं॥२३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इमे इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वम्।
हिन्वन्त्यश्वमरणं न नित्यं ज्यावाजं परि णयन्त्याजौ॥२४॥२३॥४॥

इ॒मे। इ॒न्द्र॒। भ॒र॒तस्य॑। पुत्राः। अ॒प॒ऽअ॒पि॒त्वम्। चि॒कि॒तुः। न। प्र॒ऽअ॒पि॒त्वम्। हि॒न्व॒न्ति॑। अश्व॑म्। अर॑णम्। न। नित्य॑म्। ज्या॑ऽवाजम्। परि॑। न॒य॒न्ति॒। आ॒जौ॥ २४॥

पदार्थः-(**इमे**) (**इन्द्र**) परमैश्वर्ययोजक (**भरतस्य**) सेनाया धर्त्तू रक्षकस्य (**पुत्राः**) सुशिक्षितास्तनया इव भृत्याः (**अपपित्वम्**) अपचयम् (**चिकितुः**) विज्ञातुः (**न**) इव (**प्रपित्वम्**) प्रकृष्टं प्रापणम् (**हिन्वन्ति**) वर्धयन्ति (**अश्वम्**) तुरङ्गम् (**अरणम्**) प्रेरितम् (**न**) इव (**नित्यम्**) (**ज्यावाजम्**) ज्यायाः शब्दम् (**परि**) सर्वतः (**नयन्ति**) (**आजौ**) संग्रामे॥ २४॥

अन्वयः-हे इन्द्र! तव सेनाया भरतस्य चिकितुर्न य इमे पुत्रा इवाऽपपित्वं प्रपित्वमश्वमरणं न हिन्वन्त्याजौ ज्यावाजं नित्यं परि णयन्ति ताँश्च त्वं स्वात्मवद्रक्ष॥ २४॥

भावार्थः-अत्रोपमालङ्कारः। ये राजादयः स्वह्रासवृद्धी जानन्ति सेनास्थान् साध्यक्षान् भृत्यान् युद्धकर्मणि कुशलाननुरक्तान् पुत्रवत्पालयन्ति तेषां सदैव वृद्धिर्भवति पराजयः कुतो भवेदिति॥ २४॥

अत्र विद्युन्मेघविद्वद्राजप्रजासेनाकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिपञ्चाशत्तमं सूक्तं त्रयोविंशो वर्गस्तृतीये मण्डले चतुर्थोऽनुवाकश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य से युक्त करनेवाले! आपकी सेना के (**भरतस्य**) रक्षा करने और (**चिकितुः**) जाननेवाले के (**न**) तुल्य [जो] (**इमे**) ये मेरे (**पुत्राः**) उत्तम प्रकार शिक्षा को प्राप्त सन्तानों के सदृश सेवक लोग (**अपपित्वम्**) नाश और (**प्रपित्वम्**) उत्तम प्रकार प्राप्त कराने को (**अश्वम्**) घोड़े को (**अरणम्**) प्रेरणा किये हुए के (**न**) तुल्य (**हिन्वन्ति**) बढ़ाते हैं और (**आजौ**) संग्राम में (**ज्यावाजम्**) धनुष् की तांत के शब्द को (**नित्यम्**) नित्य (**परि**) सब प्रकार (**नयन्ति**) प्राप्त करते हैं, उसकी और उनकी आप अपने आत्मा के सदृश रक्षा करो॥ २४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा आदि अपने नाश और वृद्धि को जानते हैं, सेना में वर्त्तमान साध्यक्ष सेवकों को युद्ध कर्म में चतुर और अनुरक्तों का पुत्र के सदृश पालन करते हैं, उनकी सदा ही वृद्धि होती है, पराजय कहां से होवे॥ २४॥

इस सूक्त में बिजुली, मेघ, विद्वान्, राजा, प्रजा और सेना के कर्मों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तिरेपनवां सूक्त और तेईसवां वर्ग तीसरे मण्डल में चौथा अनुवाक् समाप्त हुआ॥

अथ द्वाविंशत्यृचस्य चतु:पञ्चाशत्तमस्य सूक्तस्य प्रजापतिर्वैश्वामित्रो वाच्यो वा ऋषि:। विश्वेदेवा देवता:। १ निचृत्पङक्ति:। ९ भुरिक् पङ्क्ति:। १२ स्वराट् पङ्क्तिश्छन्द:। पञ्चम: स्वर:। २, ३, ६, ८, १०, ११, १३, १४ त्रिष्टुप्। ४, ७, १५, १६, १८, २०, २१ निचृत् त्रिष्टुप्। ५ स्वराट् त्रिष्टुप्। १७ भुरिक् त्रिष्टुप्। १९, २२ विराट् त्रिष्टुप् छन्द:। धैवत: स्वर:॥

अथ राजविषयमाह॥

अब बाईस ऋचावाले चौवनवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में राजा के विषय को कहते हैं॥

इ॒मं म॒हे वि॑द॒थ्या॑य शू॒षं शश्व॒त्कृत्व॒ ईड्या॑य॒ प्र ज॑भ्रु:।
शृ॒णोतु॑ नो॒ दम्ये॑भि॒रनी॑कै॒: शृणोत्व॒ग्निर्दि॒व्यैरज॑स्र:॥ १॥

इ॒मम्। म॒हे। वि॒द॒थ्या॑य। शू॒षम्। शश्व॑त्। कृत्व॑:। ईड्या॑य। प्र। ज॒भ्रु॒:। शृ॒णोतु॑। न॒:। दम्ये॑भि॒:। अनी॑कै॒:। शृ॒णोतु॑। अ॒ग्नि:। दि॒व्यै:। अज॑स्र:॥ १॥

पदार्थ:-(**इमम्**) (**महे**) महते (**विदथ्याय**) विदथेषु संग्रामेषु भवाय (**शूषम्**) बलम् (**शश्वत्**) निरन्तरम् (**कृत्व:**) बहव: कर्त्तारो विद्यन्ते यस्य तत्सम्बुद्धौ (**ईड्याय**) स्तोतुमर्हाय (**प्र**) (**जभ्रु:**) धरन्तु (**शृणोतु**) (**न:**) अस्माकम् (**दम्येभि:**) दातुं योग्यै: (**अनीकै:**) सैन्यै: (**शृणोतु**) (**अग्नि:**) विद्वान् (**दिव्यै:**) (**अजस्र:**) निरन्तर:॥१॥

अन्वय:-हे कृत्वो! भवान्महे ईड्याय विदथ्यायेमं शश्वच्छूषं प्र जभ्रु: तान्नोऽस्मान् भवान् दम्येभिरनीकै: सह शृणोतु। अजस्रोऽग्निर्भवान् दिव्यै: कर्मभि: सहाऽस्माञ्छृणोतु॥१॥

भावार्थ:-ये युद्धाय पूर्णां विद्यां महद्बलं धरेयुस्तान् राजान: श्रुत्वा सततं सत्कुर्युस्तत्कृत्यं सततमुन्नयेयुर्यतो हृष्टा: सन्तस्ते विजयेन राजानं सदाऽलङ्कुर्यु:॥१॥

पदार्थ:-हे (**कृत्व:**) बहुत कार्य करनेवाले! जिसके वह आप (**महे**) बड़े (**ईड्याय**) स्तुति करने के योग्य (**विदथ्याय**) संग्राम में उत्पन्न हुए के लिये (**इमम्**) इस (**शश्वत्**) निरन्तर (**शूषम्**) बल को (**प्र, जभ्रु:**) अच्छे प्रकार धारण करते हैं, उन (**न:**) हम लोगों को आप (**दम्येभि:**) देने के योग्य (**अनीकै:**) सेना में वर्त्तमान जनों के साथ (**शृणोतु**) सुनिये (**अजस्र:**) निरन्तर वर्त्तमान (**अग्नि:**) विद्वान् आप (**दिव्यै:**) श्रेष्ठ कर्मों के साथ हम लोगों का (**शृणोतु**) श्रवण करो॥१॥

भावार्थ:-जो लोग युद्ध के लिये पूर्ण विद्या और बड़े बल को धारण करें, उनको राजजन सुनके निरन्तर सत्कार करें और उनके कृत्य की निरन्तर उन्नति करें, जिससे कि प्रसन्न हुए वे विजय से राजा को सदा शोभित करें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

महि॑ म॒हे दि॒वे अ॑र्चा पृथि॒व्यै कामो॑ म इ॒च्छञ्च॑रति प्रजा॒नन्।
ययो॑र्ह॒ स्तोमे॑ वि॒दथे॑षु दे॒वाः स॑प॒र्यवो॑ मा॒दय॑न्ते॒ सचा॒योः॥ २॥

महि॑। म॒हे। दि॒वे। अ॒र्च॒। पृ॒थि॒व्यै। काम॑ः। मे॒। इ॒च्छन्। च॒र॒ति॒। प्र॒ऽजा॒नन्। ययो॑ः। ह॒। स्तोमे॑। वि॒दथे॑षु। दे॒वाः। स॒प॒र्यव॑ः। मा॒दय॑न्ते। सचा॑। आ॒योः॥ २॥

पदार्थः-(**महि**) महान् (**महे**) महते (**दिवे**) प्रकाशमानाय (**अर्च**) सत्कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**पृथिव्यै**) भूमिराज्यप्राप्तये (**कामः**) अभिलाषा (**मे**) मम (**इच्छन्**) (**चरति**) गच्छति (**प्रजानन्**) विदन् सन् (**ययोः**) विद्याराज्ययोः (**ह**) (**स्तोमे**) प्रशंसिते विजये (**विदथेषु**) संग्रामेषु (**देवाः**) विद्वांसः (**सपर्यवः**) सेवकाः (**मादयन्ते**) हर्षयन्ति (**सचा**) सम्बन्धेन (**आयोः**) जीवस्य॥ २॥

अन्वयः-यो युद्धविद्यां प्रजानन् विजयन् राज्यमिच्छन्महे दिवे पृथिव्यै चरति तं यो मे महि कामोऽस्ति तमलङ्कर्त्तुमिच्छन् विजयते तमर्च। ययोः स्तोमे विदथेषु सपर्यवो देवा हाऽऽयोः सचा मादयन्ते तौ युवां तानानन्दयेतम्॥ २॥

भावार्थः-ये विद्याराज्यवृद्धिकामा दीर्घायुषो युद्धविद्याकुशला राजामात्याञ्छ्रीविजयाभ्यां सत्कुर्य्युस्तान् राजाऽमात्या अपि सदैव सुखयन्तु॥ २॥

पदार्थः-जो युद्धविद्या को (**प्रजानन्**) जानता और विजय करता और राज्य की (**इच्छन्**) इच्छा करता हुआ (**महे**) बड़े (**दिवे**) प्रकाशमान के और (**पृथिव्यै**) भूमि के राज्य की प्राप्ति के लिये (**चरति**) चलता है, उसको जो (**मे**) मेरी (**महि**) बड़ी (**कामः**) अभिलाषा है, उसको शोभित करने की इच्छा करता हुआ विजय को प्राप्त होता है, उसका (**अर्च**) सत्कार करो। और (**ययोः**) जिन विद्या और राज्य के (**स्तोमे**) प्रशंसा करने योग्य विजय और (**विदथेषु**) संग्रामों में (**सपर्यवः**) सेवक (**देवाः**) विद्वान् लोग (**ह**) निश्चय (**आयोः**) जीव के (**सचा**) सम्बन्ध से (**मादयन्ते**) प्रसन्न करते हैं, वे दोनों आप उन लोगों को आनन्द दीजिये॥ २॥

भावार्थः-जो विद्या और राज्य की वृद्धि की कामना करने और अधिक अवस्थावाले युद्धविद्या में निपुण जन, राजा और मन्त्रियों का लक्ष्मी और विजय से सत्कार करें, उन जनों को राजा और मन्त्री भी सदा ही सुखित करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

युवोर्ऋ॒तं रो॑दसी स॒त्यम॑स्तु म॒हे षु ण॑ः सुवि॒ताय॒ प्र भू॑तम्।
इ॒दं दि॒वे नमो॑ अग्ने पृथि॒व्यै स॑प॒र्यामि॒ प्रय॑सा यामि॒ रत्न॑म्॥ ३॥

युवोः। ऋतम्। रोदसी इति। सत्यम्। अस्तु। महे। सु। नः। सुविताय। प्र। भूतम्॥ इदम्। दिवे। नमः। अग्ने। पृथिव्यै। सपर्यामि। प्रयसा। यामि। रत्नम्॥ ३॥

पदार्थः-(**युवोः**) स्वामिसेवकयोः (**ऋतम्**) प्राप्तुं योग्यं कारणम् (**रोदसी**) द्यावापृथिव्यौ (**सत्यम्**) अव्यभिचारि (**अस्तु**) (**महे**) महते (**सु**) (**नः**) (**सुविताय**) ऐश्वर्याय (**प्र**) (**भूतम्**) पुष्कलम् (**इदम्**) (**दिवे**) प्रकाशमानाय (**नमः**) अन्नादिकम् (**अग्ने**) विद्वन्! (**पृथिव्यै**) भूम्यै (**सपर्यामि**) सेवामि (**प्रयसा**) प्रयत्नेन (**यामि**) प्राप्नोमि (**रत्नम्**) सुवर्णहीरकादिकम्॥ ३॥

अन्वयः-हे अग्ने राजन्! युवोर्युवयोः स्वामिसेवकयोः रोदसी इव महे सुवितायेदं प्र भूतमृतं सत्यं रत्नं नः स्वस्तु। यथाऽहं पृथिव्यै दिवे नमः सपर्यामि प्रयसा विजयं यामि तथा युवां वर्त्तेयाथाम्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा भूमिसूर्यौ सर्वं जगद्व्यवहारयित्वा श्रीमदन्नवच्च करोति तथैव राजादिभिः पुरुषैः प्रयत्नेन सुकर्माणि सेवित्वा पुष्कलमैश्वर्यं प्राप्तव्यम्॥ ३॥

पदार्थः-हे (**अग्ने**) विद्वन् पुरुष राजन्! (**युवोः**) आप दोनों स्वामी-सेवक के (**रोदसी**) अन्तरिक्ष और पृथिवी के सदृश (**महे**) बड़े (**सुविताय**) ऐश्वर्य के लिये (**इदम्**) यह (**प्र, भूतम्**) अत्यन्त (**ऋतम्**) प्राप्त होने योग्य कारण (**सत्यम्**) व्यभिचाररहित अर्थात् नहीं विपरीत होनेवाला (**रत्नम्**) सुवर्ण और हीरा आदि (**नः**) हम लोगों का (**सु, अस्तु**) श्रेष्ठ हो और जैसे मैं (**पृथिव्यै**) भूमि और (**दिवे**) प्रकाशमान के लिये (**नमः**) अन्न आदि का (**सपर्यामि**) सेवन करता और (**प्रयसा**) प्रयत्न से विजय को (**यामि**) प्राप्त होता हूँ, वैसे आप दोनों वर्त्ताव कीजिये॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे भूमि और सूर्य सम्पूर्ण संसार का व्यवहार चलाय के लक्ष्मी और अन्न से युक्त करता है, वैसे ही राजा आदि पुरुषों को चाहिये कि प्रयत्न से उत्तम कर्मों का सेवन करके अत्यन्त ऐश्वर्य को प्राप्त होवें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः।
नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः॥ ४॥

उतो इति। हि। वाम्। पूर्व्याः। आऽविविद्रे। ऋतवरी इत्यृतऽवरी। रोदसी इति। सत्यऽवाचः। नरः। चित्। वाम्। समिऽइथे। शूरऽसातौ। ववन्दिरे। पृथिवि। वेविदानाः॥ ४॥

पदार्थः-(**उतो**) अपि (**हि**) (**वाम्**) युवाम् (**पूर्व्याः**) पूर्वेषु कुशलाः (**आविविद्रे**) समन्ताल्लभन्ते (**ऋतावरी**) सत्यप्रापिकोषा (**रोदसी**) द्यावापृथिव्याविव (**सत्यवाचः**) सत्या यथार्था वाग्येषान्ते (**नरः**) नायकाः (**चित्**) इव (**वाम्**) युवाम् (**समिथे**) संग्रामे (**शूरसातौ**) शूराणां विभागे (**ववन्दिरे**) आनन्दन्तु (**पृथिवि**) भूमिवत्क्षमाशीले (**वेविदानाः**) भृशं प्रतिजानन्तः॥४॥

अन्वयः-हे पृथिविवद्वर्त्तमाने राज्ञि! ये सत्यवाचो वेविदानास्त्वां ववन्दिरे त्वा तव पतिं च वां शूरसातौ समिथे नरश्चिदिव ववन्दिरे उतो ऋतावरी रोदसीव पूर्व्या वां ह्या विविद्रे सा त्वं तांस्तञ्च सत्कुरु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव राज्यं कर्त्तुमर्हन्ति ये सत्यमानाः सत्याचाराः सत्यवाचो जितेन्द्रिया विद्वांसः स्युस्ता एव राज्ञो भवितुमर्हन्ति याः पतिसदृश्यः स्युः॥४॥

पदार्थः-हे (**पृथिवी**) भूमि के सदृश क्षमायुक्त राज्ञि! जो (**सत्यवाचः**) यथार्थ वाणी वाले (**वेविदानाः**) अत्यन्त जानते हुए आपको (**ववन्दिरे**) प्रणाम करें और आप आपके स्वामी को (**वाम्**) आप दोनों (**शूरसातौ**) शूरवीर पुरुषों के विभाग और (**समिथे**) संग्राम में (**नरः**) अग्रणी पुरुषों के (**चित्**) सदृश प्रणाम करो और (**उतो**) भी (**ऋतावरी**) सत्य को प्राप्त करानेवाली स्त्री (**रोदसी**) अन्तरिक्ष और पृथिवी के सदृश (**पूर्व्याः**) प्राचीन जनों में चतुर पुरुष आप दोनों को (**हि**) और (**आ, विविद्रे**) सब प्रकार प्राप्त होते हैं, वह स्त्री और आप उनका और उसका सत्कार करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही लोग राज्य करने के योग्य हैं कि जो सत्य मानने, सत्य आचरण करने, सत्य वाणी बोलने और इन्द्रियों के जीतनेवाले विद्वान् जन होवें और वे ही रानी योग्य स्त्रियाँ हैं कि जो उक्त प्रकार के पति के सदृश होवें॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

को अ॒द्धा वे॑द॒ क इ॒ह प्र वो॑चद् दे॒वाँ अच्छा॑ प॒थ्या॒३॑ का स॑मे॑ति।
दद॑॑श्र एषामव॒मा सदां॑सि॒ परे॑षु॒ या गुह्ये॑षु व्र॒तेषु॑॥५॥२४॥

कः। अ॒द्धा। वे॒द॒। कः। इ॒ह। प्र। वो॒च॒त्। दे॒वान्। अच्छ॑। प॒थ्या॑। का। सम्। ए॒ति॒। दद॑॑श्रे। ए॒षा॒म्। अ॒व॒मा। सदां॑सि। परे॑षु। या। गुह्ये॑षु। व्र॒तेषु॑॥५॥

पदार्थः-(**कः**) (**अद्धा**) साक्षात् (**वेद**) जानीयात् (**कः**) (**इह**) अस्मिन् विज्ञाने (**प्र**) (**वोचत्**) उपदिशेत् (**देवान्**) विदुषः (**अच्छ**) सम्यक्। अत्र **संहितायामिति** दीर्घः। (**पथ्या**) पथोनपेता (**का**) (**सम्**) (**एति**) प्राप्नोति (**ददृश्रे**) पश्येयुः (**एषाम्**) (**अवमा**) अर्वाचीनानि (**सदांसि**) वस्तूनि (**परेषु**) सूक्ष्मेषु (**या**) यानि (**गुह्येषु**) गुप्तेषु रक्षितव्येषु (**व्रतेषु**) सत्यभाषणादिनियमेषु॥५॥

अन्वयः-हे मनुष्या! इह परमात्मानं धर्मज्ञाद्धा को वेद को देवानच्छ प्र वोचत् का पथ्या देवान्त्समेति य एषां परेष्ववमा सदांसि गुह्येषु व्रतेषु या ज्ञानसत्यभाषणादीनि ददृश्रे ते पूर्वोक्तं सर्वं विजानीयुः॥५॥

भावार्थः-अस्मिञ्जगति विरल एव मनुष्यो भवति यः परमात्मानं विदित्वा तदाज्ञानुकूलमाचरणं स्वीकृत्य सत्यमुपदिशति कश्चिदेव विद्वान् योऽत्र पराऽवरज्ञः स्यात्॥५॥

पदार्थः-हे मनुष्यो! **(इह)** इस विज्ञान में परमात्मा और धर्म को **(अद्धा)** साक्षात् **(कः)** कौन **(वेद)** जाने और **(कः)** कौन पुरुष **(देवान्)** विद्वानों को **(अच्छ)** उत्तम प्रकार **(प्र, वोचत्)** उपदेश देवे **(का)** कौन **(पथ्या)** उत्तम मार्ग से युक्त **(देवान्)** विद्वानों को **(सम्, एति)** प्राप्त होती है और **(एषाम्)** इन विद्वानों के **(परेषु)** सूक्ष्मों को **(अवमा)** नीचे भाग में वर्त्तमान **(सदांसि)** वस्तुएँ **(गुह्येषु)** गुप्त अर्थात् रक्षा करने योग्य **(व्रतेषु)** सत्यभाषण आदि नियमों में **(या)** जो ज्ञान और सत्यभाषण आदिकों को **(ददृश्रे)** देखें, वे पूर्वोक्त सम्पूर्ण को जानें॥५॥

भावार्थः-इस संसार में विरला ही ऐसा मनुष्य होता है कि जो परमात्मा को जान और उसकी आज्ञा के अनुकूल आचरण स्वीकार करके सत्य का उपदेश देता है, ऐसा कोई विद्वान् जो इस संसार में इस लोक और परलोक का ज्ञाता होवे॥५॥

अथ ईश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहते हैं॥

कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने॥६॥

कविः। नृऽचक्षाः। अभि। सीम्। अचष्ट। ऋतस्य। योना। विघृते इति विऽघृते। मदन्ती इति। नाना। चक्राते इति। सदनम्। यथा। वेः। समानेन। क्रतुना। संविदाने इति सम्ऽविदाने॥६॥

पदार्थः-**(कविः)** सर्वज्ञः **(नृचक्षाः)** नृणां द्रष्टा **(अभि)** **(सीम्)** सर्वतः **(अचष्ट)** प्रकाशितवान् **(ऋतस्य)** सत्यस्य कारणस्य **(योना)** योनौ गृहे **(विघृते)** विशेषेण प्रकाशिते **(मदन्ती)** आनन्दन्त्यौ **(नाना)** अनेकविधम् **(चक्राते)** कुरुतः **(सदनम्)** स्थानम् **(यथा)** **(वेः)** पक्षिणः **(समानेन)** तुल्येन **(क्रतुना)** कर्मणा **(संविदाने)** कृतप्रतिज्ञ इव॥६॥

अन्वयः-हे स्त्रीपुरुषौ! यथा कविर्नृचक्षाः परमेश्वर ऋतस्य योना विघृते नाना सदनं चक्राते मदन्ती वेः समानेन क्रतुना संविदाने स्त्रियाविव वर्त्तमाने द्यावापृथिव्यौ सीमभ्यचष्ट तं सर्व उपासीरन्॥६॥

भावार्थः-हे मनुष्या! येन परमेश्वरेणाऽनेकविधाः प्रकाशाऽप्रकाशयुक्ता लोका निर्मिताः स एव सर्वज्ञः सर्वद्रष्टा परमात्मा सततमुपासनीयः॥६॥

पदार्थः-हे स्त्री और पुरुष! **(यथा)** जैसे **(कविः)** सम्पूर्ण विषयों के जानने **(नृचक्षाः)** मनुष्यों के देखनेवाले परमेश्वर **(ऋतस्य)** सत्य कारण के **(योना)** गृह में **(विघृते)** विशेष करके प्रकाशित में **(नाना)** अनेक प्रकार के **(सदनम्)** स्थान को **(चक्राते)** करते हैं **(मदन्ती)** आनन्द करती हुई **(वेः)** पक्षी के **(समानेन)** तुल्य **(क्रतुना)** कर्म से **(संविदाने)** की है प्रतिज्ञा जिन्होंने उन स्त्रियों के सदृश वर्त्तमान अन्तरिक्ष और पृथिवी को **(सीम्)** सब ओर **(अभि, अचष्ट)** प्रकाशित किया, उसकी सब लोग उपासना करें॥६॥

भावार्थः-हे मनुष्यो! जिस परमेश्वर ने अनेक प्रकार के प्रकाश और अप्रकाश से युक्त लोक रचे, वही सबको जानने और सबको देखनेवाला परमात्मा निरन्तर उपासना करने योग्य है॥६॥

अथ शिष्यविषयमाह॥

अब शिष्य के विषय को अगले मन्त्र में कहते हैं॥

समान्या वियुते दूरे अन्ते ध्रुवे पदे तस्थतुर्जागरूके।
उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम॥७॥

समान्या। वियुते इति विऽयुते। दूरेअन्ते इति दूरेऽअन्ते। ध्रुवे। पदे। तस्थतुः। जागरूके इति॥ उत। स्वसारा। युवती इति। भवन्ती इति। आत्। ऊम् इति। ब्रुवाते इति। मिथुनानि। नाम॥७॥

पदार्थः-**(समान्या)** समानस्वभावे **(वियुते)** मिश्रिताऽमिश्रिते **(दूरेअन्ते)** विप्रकृष्टे समीपे च **(ध्रुवे)** दृढे **(पदे)** प्रापणीये **(तस्थतुः)** तिष्ठतः **(जागरूके)** प्रसिद्धे **(उत)** अपि **(स्वसारा)** भगिन्यौ **(युवती)** प्राप्तयौवनावस्थे **(भवन्ती)** वर्त्तमाने **(आत्)** आनन्तर्ये **(उ)** **(ब्रुवाते)** वदतः **(मिथुनानि)** युग्मानि **(नाम)** सञ्ज्ञा॥७॥

अन्वयः-हे मनुष्या! ये युवती स्वसारा भवन्ती मिथुनानि नाम ब्रुवाते इव समान्या वियुते दूरेअन्ते ध्रुवे पदे उतापि जागरूके द्यावापृथिव्यौ तस्थतुस्ते उ विदित्वादैश्वर्य्यं लब्धव्यम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रेमयुक्ता स्वसारोऽभीष्टानि वचनानि ब्रुवन्ते मिथुनानि वर्त्तन्ते तथैव दूरसमीपस्थाः प्रकाशाऽप्रकाशयुक्ता लोका अस्मिन् जगति वर्त्तन्ते॥७॥

पदार्थः-हे मनुष्यो! जो **(युवती)** यौवन अवस्था को प्राप्त हुई **(स्वसारा)** भगिनी **(भवन्ती)** वर्त्तमान **(मिथुनानि)** जोड़ों को **(नाम)** सञ्ज्ञा को **(ब्रुवाते)** कहती हैं **(समान्या)** तुल्य स्वभाववाली **(वियुते)** मिली और नहीं मिली हुई **(दूरेअन्ते)** दूर और समीप में **(ध्रुवे)** दृढ़ **(पदे)** प्राप्त होने योग्य **(उत)** भी **(जागरूके)** प्रसिद्ध अन्तरिक्ष और पृथिवी **(तस्थतुः)** स्थित हैं, उनको **(उ)** और जानने के

(आत्) अनन्तर ऐश्वर्य को प्राप्त होना चाहिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रेम से युक्त भगिनीजन मनोवाञ्छित वचनों को कहती हैं और जोड़े वर्त्तमान हैं, वैसे ही दूर और समीप में वर्त्तमान प्रकाश और अप्रकाश से युक्त लोक इस संसार में वर्त्तमान हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विश्वेदेते जनिमा सं विविक्तो महो देवान् बिभ्रती न व्यथेते।
एजद् ध्रुवं पत्यते विश्वमेकं चरत् पतत्रि विषुणं वि जातम्॥८॥

विश्वा। इत्। एते इति। जनिम। सम्। विविक्तः। महः। देवान्। बिभ्रती इति। न। व्यथेते इति। एजत्। ध्रुवम्। पत्यते। विश्वम्। एकम्। चरत्। पतत्रि। विषुणम्। वि। जातम्॥८॥

पदार्थः-(**विश्वा**) सर्वाणि (**इत्**) एव (**एते**) द्यावापृथिव्यौ (**जनिमा**) जन्मानि (**सम्**) (**विविक्तः**) पृथक् कुर्वतः (**महः**) महतः (**देवान्**) दिव्यान् पदार्थान् (**बिभ्रती**) (**न**) निषेधे (**व्यथेते**) स्वस्वपरिधेरितस्ततो न चलतः (**एजत्**) चलत् (**ध्रुवम्**) अन्तरिक्षम् (**पत्यते**) पतिरिवाचरति (**विश्वम्**) सर्वं जगत् (**एकम्**) असहायम् (**चरत्**) प्राप्नुवत् (**पतत्रि**) पतनशीलम् (**विषुणम्**) विष्वग्गच्छति (**वि**) (**जातम्**) निष्पन्नम्॥८॥

अन्वयः-हे विद्वांस! य एते महो देवान् बिभ्रती विश्वा जनिमा सं विविक्तो न व्यथेते यत्रेदेव ध्रुवमेजदेकं विषुणं जातं पतत्रि चरद्विश्वं वि पत्यते ते यूयं विजानीत॥८॥

भावार्थः-हे मनुष्या! इह पृथिवीसूर्यादिरूपाऽधिकरणेऽन्तरिक्षे च सर्वे पदार्था जीवाश्च वसन्ति जायन्ते म्रियन्ते नश्यन्तीति विदन्तु॥८॥

पदार्थः-हे विद्वानो! जो **(एते)** ये अन्तरिक्ष और पृथिवी **(महः)** बड़े अर्थात् श्रेष्ठ **(देवान्)** उत्तम पदार्थों को **(बिभ्रती)** धारण करती हुईं **(विश्वा)** सब **(जनिमा)** जन्मों को **(सम्, विविक्तः)** पृथक् करती हैं और **(न)** नहीं **(व्यथेते)** अपने परिधि अर्थात् मण्डल में इधर-उधर नहीं हिलते हैं और **(यत्र)** जिसमें **(इत्)** ही **(ध्रुवम्)** अन्तरिक्ष **(एजत्)** चलता हुआ **(एकम्)** सहायरहित अकेला **(विषुणम्)** नीचे को प्राप्त है **(जातम्)** उत्पन्न **(पतत्रि)** गिरनेवाला **(चरत्)** प्राप्त होता हुआ **(विश्वम्)** सम्पूर्ण संसार के **(वि, पत्यते)** स्वामी के सदृश वर्त्तमान उसको आप लोग जानें॥८॥

भावार्थः-हे मनुष्यो! इन पृथिवी, सूर्य्यरूप अधिकरण और अन्तरिक्ष में सम्पूर्ण पदार्थ वसते और उत्पन्न होते, मरते और नाश को प्राप्त होते हैं, ऐसा जानो॥८॥

अथ ईश्वरविषयमाह॥

अब ईश्वर के विषय को अगले मन्त्र में कहते हैं॥

सना॑ पु॒रा॒णमध्ये॑म्या॒रान्म॒हः पि॒तुर्ज॑नि॒तुर्जा॒मि तन्नः॑।
दे॒वासो॒ यत्र॑ पनि॒तार॒ एवै॑रु॒रौ प॒थि व्यु॑ते त॒स्थुर॒न्तः॥ ९॥

सना॑। पु॒रा॒णम्। अधि॑। ए॒मि॒। आ॒रात्। म॒हः। पि॒तुः। ज॒नि॒तुः। जा॒मि। तत्। नः॒। दे॒वासः॑। यत्र॑। प॒नि॒तारः॑। एवैः॑। उ॒रौ। प॒थि। वि॒ऽउ॑ते। त॒स्थुः। अ॒न्तरिति॑॥ ९॥

पदार्थः-(**सना**) सनातनम् (**पुराणम्**) पुरानवम् (**अधि**) (**एमि**) सर्वतः स्मरामि (**आरात्**) दूरात् समीपाद्वा (**महः**) महतः पूजनीयस्य (**पितुः**) पालकस्य (**जनितुः**) जनकस्य (**जामि**) जातम् (**तत्**) (**नः**) अस्मानस्माकं वा (**देवासः**) विद्वांसः (**यत्र**) (**पनितारः**) व्यवहर्त्तारः स्तावकाः (**एवैः**) प्रापकैः (**उरौ**) महति (**पथि**) मार्गे (**व्युते**) विगतावरणे प्रसिद्धे (**तस्थुः**) तिष्ठन्ति (**अन्तः**) मध्ये॥ ९॥

अन्वयः-हे मनुष्या! यत्र पनितारो देवास एवैरुरौ व्युते पथि अन्तस्तस्थुस्तत्पितुर्जनितुर्महो जामि आरादनुविदितं भवतु तन्न आरात् सना पुराणमध्येमि तस्यान्तो भवन्तोऽपि सन्ति॥ ९॥

भावार्थः-हे मनुष्या! यत्र सर्वं जगत्तिष्ठति येन प्रोक्तेन मार्गेण गच्छन्ति तत्सर्वस्य पालकं जनितृ सर्वेभ्यो महदनादिभूतं ब्रह्मोपासनीयं यदि तज्जानीयात् तर्हि समीपस्थं न जानीयाच्चेदतिदूरस्थं भवति॥ ९॥

पदार्थः-हे मनुष्यो! (**यत्र**) जिसमें (**पनितारः**) व्यवहार करने अर्थात् स्तुति करनेवाले (**देवासः**) विद्वान् लोग (**एवैः**) प्राप्त करनेवालों से (**उरौ**) बड़े (**व्युते**) आवरण अर्थात् दूसरे करके ढांपने से रहित इस प्रकार प्रसिद्ध (**पथि**) मार्ग में (**अन्तः**) मध्य में (**तस्थुः**) वर्त्तमान हैं (**तत्**) वह (**पितुः**) पालन करने और (**जनितुः**) उत्पन्न करनेवाले (**महः**) श्रेष्ठ पूजा करने योग्य से (**जामि**) उत्पन्न हुआ (**आरात्**) दूर वा समीप से जाना जाय और वह (**नः**) हम लोगों के दूर वा समीप से (**सना**) प्राचीन काल से सिद्ध और (**पुराणम्**) प्रथम नवीन को (**अधि, एमि**) स्मरण करता हूँ, उसके मध्य में आप लोग भी हैं॥ ९॥

भावार्थः-हे मनुष्यो! जिसमें सम्पूर्ण संसार स्थित है और जिसकी कही हुई मर्य्यादा से चलते हैं, वह सबका पालक, उत्पन्न करनेवाला, सब पदार्थों से बड़ा, अनादि से सिद्ध ब्रह्म उपासना करने योग्य है, जो उसको जाने तो समीप में वर्त्तमान और न जाने तो अत्यन्त दूर वर्त्तमान होता है॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒मं स्तोमं॑ रोदसी॒ प्र ब्र॑वीम्यृदू॒दरा॑: शृणवन्नग्निजि॒ह्वाः।
मि॒त्रः स॒म्राजो वरु॑णो॒ युवा॑न आदि॒त्यास॑: क॒वय॑: पप्रथा॒नाः॥ १०॥ २५॥

इ॒मम्। स्तोम॑म्। रो॒द॒सी॒ इति॑। प्र। ब्र॒वी॒मि॒। ऋ॒दू॒दरा॑:। शृ॒ण॒व॒न्। अ॒ग्नि॒ऽजि॒ह्वा॒:। मि॒त्र:। स॒म्ऽराज॑:। वरु॑ण:। युवा॑न:। आ॒दि॒त्यास॑:। क॒वय॑:। पप्र॑थाना:॥ १०॥

पदार्थ:-(**इमम्**) परमात्मानम् (**स्तोमम्**) प्रशंसनीयम् (**रोदसी**) द्यावापृथिव्याविव सकलविद्यावेद्यं प्रकाशकं सर्वस्य धर्त्तारम् (**प्र**) (**ब्रवीमि**) उपदिशामि (**ऋदूदरा:**) ऋत्सत्यमुदरे येषान्ते (**शृणवन्**) शृण्वन्तु (**अग्निजिह्वा:**) अग्निरिव प्रकाशमाना सत्योपदेशा जिह्वा येषान्ते (**मित्र:**) सर्वस्य सखा (**सम्राज:**) सम्यग्राजमाना: (**वरुण:**) श्रेष्ठ: (**युवान:**) प्राप्तयुवावस्था: (**आदित्यास:**) सूर्य इव पूर्णविद्याप्रकाशा: (**कवय:**) विक्रान्तप्रज्ञा मेधाविन: (**पप्रथाना:**) प्रख्याता:॥ १०॥

अन्वय:-यमिमं स्तोमं रोदसी इव मित्रो वरुणोऽहं प्रब्रवीमि तमृदूदरा सम्राजोऽग्निजिह्वा युवान आदित्यास: कवय: पप्रथाना: शृणवन्॥ १०॥

भावार्थ:-यथा चक्रवर्त्ती राजा स्वाज्ञया सर्वन्यायं प्रकाशितं करोति तथैवाऽऽप्ता विद्वांसोऽध्यापनोपदेशाभ्यां परमात्मानं तस्याज्ञां च प्रसिद्धां कुर्वन्ति। येऽष्टाचत्वारिंषद्वर्षपर्यन्तं ब्रह्मचर्यं कृत्वाऽखिलविद्या जायन्ते त एवैतद्वक्तुं श्रोतुं निश्चेतुमभ्यसितुं साक्षात् कर्त्तुं च शक्नुवन्ति॥ १०॥

पदार्थ:-जिस (**इमम्**) इस परमेश्वर (**स्तोमम्**) प्रशंसा करने योग्य और (**रोदसी**) अन्तरिक्ष और पृथिवी के सदृश सम्पूर्ण विद्याओं से जानने योग्य प्रकाश और धारण करनेवाले का (**मित्र:**) सबका मित्र (**वरुण:**) श्रेष्ठ हम (**प्र, ब्रवीमि**) उपदेश देते हैं उसको (**ऋदूदरा:**) सत्य है हृदय में जिनके वे (**सम्राज:**) अच्छे प्रकार प्रकाशमान (**अग्निजिह्वा:**) अग्नि के सदृश प्रकाशमान सत्य के उपदेश देनेवाली जिह्वा हैं जिनकी वे (**युवान:**) युवा अवस्था को प्राप्त (**आदित्यास:**) सूर्य के सदृश पूर्ण विद्या से प्रकाशित (**कवय:**) तीव्र बुद्धि से युक्त (**पप्रथाना:**) प्रख्यात बुद्धिमान् लोग (**शृणवन्**) सुनो॥ १०॥

भावार्थ:-जैसे चक्रवर्ती राजा अपनी आज्ञा से सम्पूर्ण न्याय को प्रकाशित करता है, वैसे ही यथार्थवक्ता विद्वान् लोग अध्यापन और उपदेश से परमेश्वर और उसकी आज्ञा को प्रसिद्ध करते हैं, और जो लोग अड़तालीस वर्ष पर्यन्त ब्रह्मचर्य करके पूर्णविद्या युक्त हैं वे ही इसके कहने, सुनने, निश्चय और अभ्यास करने और प्रत्यक्ष करने को समर्थ होते हैं॥ १०॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

हिर॑ण्यपाणि: सवि॒ता सु॑जि॒ह्वस्त्विरा दि॒वो वि॒दथे॒ पत्य॑मान:।
दे॒वेषु॑ च सवित॒: श्लोक॒मश्रे॑रादस्मभ्य॒मा सु॑व स॒र्वता॑तिम्॥ ११॥

हिरण्यऽपाणिः। सविता। सुऽजिह्वः। त्रिः। आ। दिवः। विदथे। पत्यमानः। देवेषु। च। सवितरिति। श्लोकम्। अश्रेः। आत्। अस्मभ्यम्। आ। सुव। सर्वऽतातिम्॥ ११॥

पदार्थः-(**हिरण्यपाणिः**) पाणिरिव हिरण्यं तेजो यस्य सः (**सविता**) सूर्य्यः (**सुजिह्वः**) शोभना जिह्वा यस्य सः (**त्रिः**) त्रिवारम् (**आ**) समन्तात् (**दिवः**) विद्युतादेः (**विदथे**) विज्ञाने (**पत्यमानः**) पतिरिवाचरन् (**देवेषु**) पृथिव्यादिषु (**च**) विद्वत्सु (**सवितः**) परमैश्वर्यप्रद (**श्लोकम्**) वाचम् (**अश्रेः**) आश्रय (**आत्**) आनन्तर्ये (**अस्मभ्यम्**) (**आ**) (**सुव**) जनय (**सर्वतातिम्**) सर्वमेव॥ ११॥

अन्वयः-हे सवितस्सुजिह्वः पत्यमानस्त्वं दिवो विदथे देवेषु हिरण्यपाणिः सवितेवाऽस्मभ्यं यं सर्वतातिं श्लोकमश्रेस्तं चादा त्रिरा सुव॥ ११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो लोकानामधिष्ठाता वर्त्तते तथैव विद्वान् सर्वेषामध्यक्षो भवेत्॥ ११॥

पदार्थः-हे (**सवितः**) अत्यन्त ऐश्वर्य्य के दाता (**सुजिह्वः**) सुन्दर जिह्वायुक्त (**पत्यमानः**) पति के सदृश आचरण करते हुए! आप (**दिवः**) बिजुली आदि के (**विदथे**) विज्ञान और (**देवेषु**) पृथिवी आदिकों में (**हिरण्यपाणिः**) हस्त के सदृश तेज से युक्त (**सविता**) सूर्य्य के सदृश (**अस्मभ्यम्**) हम लोगों के लिये जिस (**सर्वतातिम्**) सम्पूर्ण ही (**श्लोकम्**) वाणी का (**अश्रेः**) आश्रय करिये उसको (**च**) और (**आत्**) अनन्तर (**आ**) सब ओर से (**त्रिः**) तीन वार (**आ, सुव**) उत्पन्न करो॥ ११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य लोकों का अधिष्ठाता है, वैसे ही विद्वान् सबका अध्यक्ष होवे॥ ११॥

अथ शिष्यविषयमाह॥

अब शिष्य के विषय को अगले मन्त्र में कहते हैं॥

सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात्।
पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट॥ १२॥

सुऽकृत्। सुऽपाणिः। स्वऽवान्। ऋतऽवा। देवः। त्वष्टा। अवसे। तानि। नः। धात्। पूषण्ऽवन्तः। ऋभवः। मादयध्वम्। ऊर्ध्वऽग्रावाणः। अध्वरम्। अतष्ट॥ १२॥

पदार्थः-(**सुकृत्**) यः शोभनं धर्म्यं कर्म करोति (**सुपाणिः**) शोभनौ पाणी हस्तौ यस्य सः (**स्ववान्**) बहवः स्वे विद्यन्ते यस्य सः (**ऋतावा**) सत्यप्रकाशकः (**देवः**) विद्वान् (**त्वष्टा**) प्रकाशकः (**अवसे**) रक्षणाद्याय (**तानि**) (**नः**) अस्मभ्यम् (**धात्**) दधातु (**पूषण्वन्तः**) बहवः पूषणो विद्यन्ते येषान्ते (**ऋभवः**) मेधाविनः (**मादयध्वम्**) आनन्दयत (**ऊर्ध्वग्रावाणः**) मेघाः (**अध्वरम्**) पालकं व्यवहारम् (**अतष्ट**) तनूकुरुत॥ १२॥

अन्वयः-हे पूषण्वन्त ऋभवो! यूयं यथा सुकृत् सुपाणिः स्ववानृतावा त्वष्टा देवो नोऽवसे तानि धादूर्ध्वग्रावाण इवाऽध्वरमतष्ट तथाऽस्मान् मादयध्वम्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा धार्मिका विद्वांसो मेघा इव सर्वानानन्दयन्ति तथैव सर्वे विदुष आनन्दयन्तु॥१२॥

पदार्थः-हे **(पूषण्वन्तः)** बहुत पुष्टिकर्त्ता विद्यमान हैं जिनके वे **(ऋभवः)** बुद्धिमान्! आप लोग जैसे **(सुकृत्)** सुन्दर धर्मयुक्त कर्मकर्त्ता **(सुपाणिः)** सुन्दर हस्तयुक्त **(स्ववान्)** बहुत आत्मजन हैं जिसके वह **(ऋतावा)** सत्य का प्रकाश करनेवाला **(त्वष्टा)** प्रकाशकर्त्ता **(देवः)** विद्वान् **(नः)** हम लोगों को **(अवसे)** रक्षण आदि के लिए **(तानि)** उन अपेक्षित पदार्थों को **(धात्)** धारण करे और **([ऊर्ध्व]ग्रावाणः)** मेघों के सदृश **(अध्वरम्)** पालन करनेवाले व्यवहार को **(अतष्ट)** सूक्ष्म करता है, वैसे ही हम लोगों के लिए **(मादयध्वम्)** आनन्द दीजिए॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे धार्मिक विद्वान् लोग मेघों के सदृश सबको आनन्द देते हैं, वैसे ही सब लोग विद्वानों को आनन्द देवें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः।
सरस्वती शृणवन् यज्ञियासो धाता रयिं सहवीरं तुरासः॥१३॥

विद्युत्ऽरथाः। मरुतः। ऋष्टिऽमन्तः। दिवः। मर्याः। ऋतऽजाताः। अयासः। सरस्वती। शृणवन्। यज्ञियासः। धात। रयिम्। सहऽवीरम्। तुरासः॥१३॥

पदार्थः-(**विद्युद्रथाः**) विद्युद्युक्ता रथा यानानि येषान्ते **(मरुतः)** मरणधर्माणः **(ऋष्टिमन्तः)** बह्व्य ऋष्टयो गतयो विद्यन्ते येषान्ते **(दिवः)** कामयमानस्य **(मर्याः)** मनुष्याः **(ऋतजाताः)** ऋतेन सत्येन प्रसिद्धाः **(अयासः)** प्राप्तविद्याः **(सरस्वती)** सकलविद्यायुक्ता वाणी **(शृणवन्)** शृण्वन्तु **(यज्ञियासः)** शिल्पव्यवहारकर्त्तारः **(धात)**। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(रयिम्)** धनम् **(सहवीरम्)** वीरैः सह वर्त्तमानम् **(तुरासः)** सद्यः कर्त्तारः॥१३॥

अन्वयः-सरस्वती विदुषी स्त्री यं सहवीरं रयिं विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्य्या ऋतजाता अयासो यज्ञियासस्तुरासो विद्वांसः शृणवन् धात तथैतं शृणुयाद्ध्याच्च॥१३॥

भावार्थः-यथा पुरुषा विद्याभ्यासं कुर्य्युस्तथैव स्त्रियोऽपि कृत्वा श्रीमत्यो भवन्तु। उभये आलस्यं विहाय शिल्पविषयाणि सर्वाणि कर्माणि साध्नुवन्तु॥१३॥

पदार्थः-(**सरस्वती**) विद्यायुक्त स्त्री जिस (**सहवीरम्**) वीर पुरुषों के सहित वर्त्तमान (**रयिम्**) धन को (**विद्युद्रथाः**) बिजुली से युक्त हैं वाहन जिनके वे (**मरुतः**) मरण धर्मवाले (**ऋष्टिमन्तः**) बहुत गतियों से युक्त (**दिवः**) कामना करते हुए के सम्बन्धी (**मर्य्याः**) मनुष्य (**ऋतजाताः**) सत्य से प्रसिद्ध (**अयासः**) विद्याओं को प्राप्त (**यज्ञियासः**) शिल्प-व्यवहार के करनेवाले (**तुरासः**) शीघ्रकर्त्ता विद्वान् लोग (**शृणवन्**) सुनो और (**धात**) धारण करो, वैसे इसको सुने और धारण करे॥१३॥

भावार्थः-जैसे पुरुष लोग विद्या का अभ्यास करें, वैसे ही स्त्रियाँ भी करके लक्ष्मीयुक्त हों। दोनों स्त्री और पुरुष आलस्य का त्याग करके शिल्पविषयक सम्पूर्ण कर्मों को सिद्ध करो॥१३॥

अथ वक्तृविषयमाह॥

अब वक्ता के विषय को अगले मन्त्र में कहते हैं॥

विष्णुं॑ स्तोमा॑सः पुरुदु॒स्मम॒र्का भग॑स्येव का॒रिणो॒ याम॑नि ग्मन्।
उ॒रु॒क्र॒मः क॑कु॒हो यस्य॑ पू॒र्वीर्न म॑र्धन्ति युव॒तयो॒ जनि॑त्रीः॥१४॥

विष्णु॑म्। स्तोमा॑सः। पु॒रु॒ऽदु॒स्मम्। अ॒र्काः। भग॑स्यऽइव। का॒रिण॑ः। याम॑नि। ग्मन्। उ॒रु॒ऽक्र॒मः। क॒कु॒हः। यस्य॑। पू॒र्वीः। न। म॒र्ध॒न्ति॒। यु॒व॒तय॑ः। जनि॑त्रीः॥१४॥

पदार्थः-(**विष्णुम्**) व्यापकम् (**स्तोमासः**) स्तावकाः (**पुरुदस्मम्**) पुरूणि बहूनि दुःखानि दस्मान्युपक्षीणानि यस्मात्तम् (**अर्काः**) पूजनीयाः (**भगस्येव**) ऐश्वर्यस्येव (**कारिणः**) कर्त्तुं शीलाः (**यामनि**) प्रापणीये मार्गे (**ग्मन्**) गच्छन्ति (**उरुक्रमः**) बहुपुरुषार्थः (**ककुहः**) महतीः। **ककुह इति महन्नामसु पठितम्।** (निघं०३.३) (**यस्य**) (**पूर्वीः**) (**न**) निषेधे (**मर्धन्ति**) हिंसन्ति (**युवतयः**) प्राप्तयौवनाः (**जनित्रीः**) मातः॥१४॥

अन्वयः-हे विद्वन्नुरुक्रमस्त्वं यथास्तोमासोऽर्का भगस्येव कारिणो विद्वांसो यामनि पुरुदस्मं विष्णुं ग्मन्। यस्य युवतयो ककुहः पूर्वीर्जनित्रीर्न मर्धन्ति तथा त्वं वर्त्तस्व॥१४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये भगवदुपासका ईश्वराज्ञानुकूलवर्त्तमाना भगवन्तो भूत्वाऽहिंसामहतीर्भगवतीः प्राप्य दुःखान्तं गत्वा महत्सुखं प्राप्नुवन्ति॥१४॥

पदार्थः-हे विद्वन्! (**उरुक्रमः**) बहुत पुरुषार्थवाले! आप जैसे (**स्तोमासः**) स्तुति करनेवाले (**अर्काः**) पूजा करने योग्य (**भगस्येव**) ऐश्वर्य्य के तुल्य (**कारिणः**) करनेवाले विद्वान् लोग (**यामनि**) प्राप्त होने योग्य मार्ग में (**पुरुदस्मम्**) बहुत दुःख नाश हुए जिससे उस (**विष्णुम्**) व्यापक को (**ग्मन्**) प्राप्त होते हैं और (**यस्य**) जिसकी (**युवतयः**) युवावस्था को प्राप्त (**ककुहः**) बड़ी (**पूर्वीः**) प्राचीन काल में वर्त्तमान (**जनित्रीः**) माताओं का (**न**) नहीं (**मर्धन्ति**) नाश करते हैं, वैसे आप वर्त्ताव करो॥१४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो लोग भगवान् की उपासना

करनेवाले ईश्वर की आज्ञा के अनुकूल वर्त्तमान ऐश्वर्ययुक्त होकर, नहीं नाश होनेवाली बड़ी लक्ष्मियों को प्राप्त हो दु:ख के पार जाकर बड़े सुख को प्राप्त होते हैं॥१४॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॒ विश्वै॑र्वी॒र्यै॑:३॑ पत्य॑मान उ॒भे आ प॑प्रौ॒ रोद॑सी महि॒त्वा।
पु॒रं॒द॒रो वृ॑त्र॒हा धृ॒ष्णुषे॑ण: सं॒गृभ्या॑ न॒ आ भ॑रा॒ भूरि॑ प॒श्व:॥१५॥२६॥

इन्द्र॑:। विश्वै॑:। वी॒र्यै॑:। पत्य॑मान:। उ॒भे इति॑। आ। प॒प्रौ॒। रोद॑सी॒ इति॑। म॒हि॒ऽत्वा। पु॒र॒म्ऽद॒र:। वृ॒त्र॒ऽहा। धृ॒ष्णु॒ऽसे॑न:। स॒म्ऽगृभ्य॑। न॒:। आ। भ॒र॒। भूरि॑। प॒श्व:॥१५॥

पदार्थ:-(**इन्द्र:**) परमैश्वर्यो राजा (**विश्वै:**) अखिलै: (**वीर्यै:**) पराक्रमै: (**पत्यमान:**) पति: स्वामीवाचरन् (**उभे**) (**आ**) (**पप्रौ**) व्याप्नोति (**रोदसी**) न्यायभूमिराज्ये (**महित्वा**) महिम्ना (**पुरन्दर:**) शत्रूणां नगराणां हन्ता (**वृत्रहा**) मेघहन्ता सूर्येव (**धृष्णुसेन:**) धृष्णु: प्रगल्भा दृढा सेना यस्य स: (**सङ्गृभ्य**) सम्यग् गृहीत्वा। अत्र **संहितायामि**ति दीर्घ:। (**न:**) अस्मान् (**आ**) (**भर**) धर। अत्र **ह्यचोऽतस्तिङ** इति दीर्घ:। (**भूरि**) बहु (**पश्व:**) पशून्॥१५॥

अन्वय:-हे राजन्! यो वृत्रहेव पुरन्दर: पत्यमानो धृष्णुसेन इन्द्रो भवान् विश्वैर्वीर्यैर्महित्वोभे रोदसी आ पप्रौ स त्वं भूरि नोऽस्मान् पश्वश्च सङ्गृभ्या भर॥१५॥

भावार्थ:-यथा भूमिसूर्यौ सर्वान् धृत्वा संपोष्य वर्द्धयतस्तथैव राजादयोऽध्यक्षा: सर्वाञ्छुभगुणान् धृत्वा प्रजां पोषयित्वा सेनामुन्नीय शत्रून् हत्वा प्रजामुन्नयन्तु॥१५॥

पदार्थ:-हे राजन्! जो (**वृत्रहा**) मेघ का नाश करनेवाले सूर्य के सदृश (**पुरन्दर:**) शत्रुओं के नगरों का नाश करनेवाला (**पत्यमान:**) स्वामी के सदृश आचरण करता हुआ (**धृष्णुसेन:**) दृढ़ सेना और (**इन्द्र:**) अत्यन्त ऐश्वर्ययुक्त राजा आप (**विश्वै:**) सम्पूर्ण (**वीर्यै:**) पराक्रमों से (**महित्वा**) महिमा से (**उभे**) दोनों (**रोदसी**) न्याय और भूमि के राज्य को (**आ, पप्रौ**) व्याप्त करते हैं, वह आप (**भूरि**) बहुत (**न:**) हम लोगों और (**पश्व:**) पशुओं को (**संगृभ्य**) उत्तम प्रकार ग्रहण करके (**आ, भर**) सब प्रकार पोषण कीजिये॥१५॥

भावार्थ:-जैसे भूमि और सूर्य सब पदार्थों को धारण और उत्तम प्रकार पोषण करके बढ़ाते हैं, वैसे ही राजा आदि अध्यक्ष सब उत्तम गुणों को धारण, प्रजा का पोषण, सेना की वृद्धि और शत्रुओं का नाश करके प्रजा की वृद्धि करें॥१५॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

नास॑त्या मे पि॒तरा॑ बन्धुपृच्छा॑ सजा॒त्यं॑म॒श्विनो॒श्चारु॒ नाम॑।
यु॒वं हि स्थो र॑यि॒दौ नो॑ रयी॒णां दा॒त्रं र॑क्षेथे॒ अक॑वै॒रद॑ब्धा॥ १६॥

नास॑त्या। मे॒। पि॒तरा॑। ब॒न्धु॒ऽपृच्छा॑। स॒ऽजा॒त्यम्। अ॒श्विनोः॑। चारु॑। नाम॑। यु॒वम्। हि। स्थः॑। र॒यि॒दौ। नः॒। र॒यी॒णाम्। दा॒त्रम्। र॒क्षे॒थे॒ इति॑। अक॑वैः। अद॑ब्धा॥ १६॥

पदार्थः-(**नासत्या**) न विद्यतेऽसत्यं ययोस्तौ (**मे**) मम (**पितरा**) पालकौ (**बन्धुपृच्छा**) यौ बन्धून् पृच्छतस्तौ (**सजात्यम्**) समानजातौ भवम् (**अश्विनोः**) सूर्य्याचन्द्रमसोरिव (**चारु**) सुन्दरम् (**नाम**) (**युवम्**) (**हि**) यतः (**स्थः**) भवथः (**रयिदौ**) श्रीप्रदौ (**नः**) अस्माकम् (**रयीणाम्**) धनानाम् (**दात्रम्**) दानम् (**रक्षेथे**) (**अकवैः**) अकुत्सितैः कर्मभिः (**अदब्धा**) अहिंसितौ॥ १६॥

अन्वयः-हे सभासेनेशौ! युवं हि नो रयिदौ रयीणां दात्रं रक्षेथे अकवैरदब्धा स्थो ययोरश्विनोरिव चारु नामास्ति तौ बन्धुपृच्छा नासत्या मे पितरेव सजात्यं चारु नाम रक्षतम्॥ १६॥

भावार्थः-ये विद्वांसो मातापितृवत्सर्वेभ्यो विद्याधनप्रदा धर्माचारिणः सन्तः सजात्यानन्याँश्च रक्षन्ति ते सर्वेषां पूज्या भवन्ति॥ १६॥

पदार्थः-हे सभा और सेना के स्वामी! (**युवम्**) आप दोनों (**हि**) जिससे कि (**नः**) हम लोगों के लिये (**रयिदौ**) लक्ष्मी देनेवाले (**रयीणाम्**) धनों के (**दात्रम्**) दान की (**रक्षेथे**) रक्षा करते हैं (**अकवैः**) कुत्सित भिन्न अर्थात् उत्तम कर्मों से (**अदब्धा**) नहीं हिंसित हुए (**स्थः**) होते हैं और जिनकी (**अश्विनोः**) सूर्य-चन्द्रमा के तुल्य (**चारु**) सुन्दर (**नाम**) सञ्ज्ञा है उन (**बन्धुपृच्छा**) बन्धुओं का कुशलादि पूछनेवाले (**नासत्या**) असत्य के त्यागी (**मे**) मेरे (**पितरा**) पालन करनेवालों के सदृश (**सजात्यम्**) समान जातिवाले सुन्दर नाम की रक्षा करो॥ १६॥

भावार्थः-जो विद्वान् लोग माता और पिता के सदृश सबके लिये विद्या और धन देनेवाले, धर्मपूर्वक आचरण करते हुए अपने समान जातिवाले तथा अन्य जनों की रक्षा करते हैं, वे सबके पूजा करने योग्य होते हैं॥ १६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

म॒हत्तद्वः॑ कवय॒श्चारु॒ नाम॒ यद्ध॑ देवा॒ भव॑थ॒ विश्व॒ इन्द्रे॑।
सख॑ ऋ॒भुभि॑: पुरुहूत प्रि॒येभि॑रि॒मां धिय॑ं सा॒तये॑ तक्षता नः॥ १७॥

म॒हत्। तत्। व॒रुः। क॒व॒य॒ः। चारु॑। नाम॑। यत्। ह॒। दे॒वा॒ः। भव॑थ। विश्वे॑। इन्द्रे॑। सखा॑। ऋ॒भु॒ऽभिः। पु॒रु॒ऽहू॒त॒। प्रि॒येभि॑ः। इ॒माम्। धिय॑म्। सा॒तये॑। त॒क्ष॒त॒। नः॒॥ १७॥

पदार्थः-(**महत्**) महान् (**तत्**) (**वः**) युष्माकम् (**कवयः**) विपश्चितः (**चारु**) सुन्दरम् (**नाम**) (**यत्**) (**ह**) किल (**देवाः**) विद्वांसः (**भवथ**) (**विश्वे**) (**इन्द्रे**) परमैश्वर्ये राज्ञि वा (**सखा**) सुहृत् (**ऋभुभिः**) मेधाविभिः सह (**पुरुहूत**) बहुभिः प्रशंसित (**प्रियेभिः**) स्वात्मवत् प्रियैः (**इमाम्**) प्रत्यक्षाम् (**धियम्**) प्रज्ञाम् (**सातये**) सत्याऽसत्ययोर्विवेकाय (**तक्षत**) रक्षत। अत्र **संहितायामिति** दीर्घः। (**नः**) अस्माकम्॥१७॥

अन्वयः-हे कवयो! वो यन्महच्चारु नाम नामास्ति तत्तेन युक्ता विश्वे देवा ह यूयं भवथ। प्रियेभिर्ऋभुभिः सहेन्द्रे सातये न इमां धियं तक्षत। हे पुरुहूत राजेन्द्र! त्वेमतैः सह सखा सन्नेतां प्रज्ञां प्राप्नुहि॥१७॥

भावार्थः-तेषामेव नामानि प्रशंसितानि प्रसिद्धानि स्युर्ये विद्वत्स्वविद्वत्सु मैत्रीमासाद्य धर्माऽधर्मविवेकाय शुद्धां प्रज्ञां सर्वेभ्यः प्रयच्छन्ति॥१७॥

पदार्थः-हे (**कवयः**) विद्वानो! (**वः**) आप लोगों का (**यत्**) जो (**महत्**) बड़ा (**चारु**) सुन्दर (**नाम**) नाम है (**तत्**) वह और उससे युक्त (**विश्वे**) सम्पूर्ण (**देवाः**) विद्वान् और (**ह**) निश्चय आप लोग (**भवथ**) होओ (**प्रियेभिः**) अपने सदृश प्रिय (**ऋभुभिः**) बुद्धिमानों के साथ (**इन्द्रे**) अत्यन्त ऐश्वर्य्य वा राजा में (**सातये**) सत्य और असत्य के विचार के लिये (**नः**) हम लोगों की (**इमाम्**) इस (**धियम्**) बुद्धि की (**तक्षत**) रक्षा करो। और हे (**पुरुहूत**) बहुतों से प्रशंसित हुए राजेन्द्र! आप इनके साथ (**सखा**) मित्र हुए इस बुद्धि को प्राप्त होओ॥१७॥

भावार्थः-उन लोगों के ही नाम प्रशंसा करने योग्य और प्रसिद्ध होवें कि जो विद्वान् और अविद्वानों में मित्रता को प्राप्त होकर धर्म और अधर्म के विचार के लिये उत्तम बुद्धि सबके लिये देते हैं॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि।
युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः॥१८॥

अर्यमा। नः। अदितिः। यज्ञियासः। अदब्धानि। वरुणस्य। व्रतानि। युयोत। नः। अनपत्यानि। गन्तोः। प्रजाऽवान्। नः। पशुऽमान्। अस्तु। गातुः॥१८॥

पदार्थः-(**अर्य्यमा**) न्यायाधीशः (**नः**) अस्माकम् (**अदितिः**) मातेव (**यज्ञियासः**) अहिंसायज्ञस्याऽनुष्ठातारः (**अदब्धानि**) अहिंसितानि (**वरुणस्य**) श्रेष्ठस्य (**व्रतानि**) सत्यभाषणादीनि

(युयोत) प्रापयत त्याजयत **(नः)** अस्माकम् **(अनपत्यानि)** अविद्यमानान्यपत्यानि येषु तानि **(गन्तोः)** गन्तव्यानि **(प्रजावान्)** सन्तानवान् **(नः)** अस्मान् **(पशुमान्)** बहुपशुयुक्तः **(अस्तु)** **(गातुः)** भूमिः। **गातुरिति पृथिवीनामसु पठितम्।** (निघं०१.१)॥१८॥

अन्वयः-हे विद्वांसोऽदितिरिवार्य्यमा यज्ञियासो यूयं! नो वरुणस्याऽदब्धानि व्रतानि युयोत। नो गन्तोरनपत्यानि युयोत येन नो गातुः प्रजावान् पशुमानस्तु॥१८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! भवन्तोऽस्मान् न्यायाधीशवन्मातृवद-न्यायाचरणात् पृथक्कृत्य सत्यानि धर्म्याणि कर्माणि प्रापय्य भूगोलं बहुप्रजासमसंख्यधनं कुरुत॥१८॥

पदार्थः-हे विद्वानो! **(अदितिः)** माता के सदृश **(अर्य्यमा)** न्यायाधीश **(यज्ञियासः)** जिसमें हिंसा न हो ऐसे यज्ञ के करनेवाले आप लोगो! **(नः)** हम लोगों के **(वरुणस्य)** श्रेष्ठ के **(अदब्धानि)** हिंसाभिन्न **(व्रतानि)** सत्य बोलने आदि व्रतों को **(युयोत)** प्राप्त कराइये **(नः)** हम लोगों के **(गन्तोः)** प्राप्त होने योग्य व्यवहार से **(अनपत्यानि)** नहीं विद्यमान हैं सन्तान जिनमें उनको प्राप्त कराइये जिससे **(नः)** हम लोगों की **(गातुः)** पृथिवी **(प्रजावान्)** सन्तानयुक्त और **(पशुमान्)** बहुत पशुयुक्त **(अस्तु)** हो॥१८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! आप लोग हम लोगों को न्यायाधीश और माता के सदृश अन्यायाचरण से अलग करके और सत्य धर्मयुक्त कर्मों को प्राप्त कराके सम्पूर्ण पृथिवी को बहुत प्रजा और असंख्य धनयुक्त करो॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता।
शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्वन्तरिक्षम्॥१९॥

देवानाम्। दूतः। पुरुध। प्रऽसूतः। अनागान्। नः। वोचतु। सर्वऽताता। शृणोतु। नः। पृथिवी। द्यौः। उत। आपः। सूर्यः। नक्षत्रैः। उरु। अन्तरिक्षम्॥१९॥

पदार्थः-(**देवानाम्**) विदुषाम् **(दूतः)** सत्याऽसत्यसमाचारदाता **(पुरुध)** यः पुरून् दधाति तत्सम्बुद्धौ **(प्रसूतः)** उत्पन्नः **(अनागान्)** अनपराधिनः **(नः)** अस्मान् **(वोचतु)** उपदिशतु **(सर्वताता)** सर्वानेव **(शृणोतु)** **(नः)** अस्मान् **(पृथिवी)** भूमिरिव क्षमा **(द्यौः)** विद्युदिव विद्या **(उत)** **(आपः)** जलानीव शान्तिः **(सूर्य्यः)** सवितेव विद्याप्रकाशः **(नक्षत्रैः)** कारणरूपेणाविनश्वरैः **(उरु)** व्यापकम् **(अन्तरिक्षम्)** आकाशमिवाऽक्षोभता॥१९॥

अन्वयः-हे पुरुध! देवानां दूतः प्रसूतो भवान्त्सर्वतातानागान्नः पृथिव्यादिविद्या वोचतु। नक्षत्रैस्सहोर्वन्तरिक्षं सूर्य्यः पृथिवी द्यौरुतापो नः प्राप्नोतु अस्माकं वचांसि शृणोतु॥१९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये धर्मसभाऽधिकृतानां प्रेष्या उपदेशका सर्वान्त्सत्याऽसत्ये उपदिश्य धर्मात्मनः सम्पादयन्तु तेषां प्रश्नाञ्छ्रुत्वा समादधतु पृथिव्यादीनां सकाशात् क्षमादिगुणान् गृहीत्वाऽन्यान् ग्राहयित्वा पाखण्डं विनाश्य धर्मं प्रापय्य सर्वाञ्छिष्टान् कुर्वन्तु॥१९॥

पदार्थः-हे **(पुरुध)** बहुतों को धारण करनेवाले! **(देवानाम्)** विद्वानों के **(दूतः)** सत्य और असत्य समाचार के देनेवाले **(प्रसूतः)** उत्पन्न आप **(सर्वताता)** सबको ही **(अनागान्)** अपराध से रहित **(नः)** हम लोगों को भूमि आदि की विद्याओं का **(वोचतु)** उपदेश दीजिये। और **(नक्षत्रैः)** कारण रूप से नहीं नाश होनेवालों के साथ **(उरु)** व्यापक **(अन्तरिक्षम्)** आकाश के सदृश नहीं हिलना **(सूर्य्यः)** सूर्य्य के समान विद्या का प्रकाश **(पृथिवी)** भूमि के सदृश क्षमा और **(द्यौः)** बिजुली के सदृश विद्या **(उत)** और **(आपः)** जलों के सदृश शान्ति **(नः)** हम लोगों को प्राप्त हो और हम लोगों के वचनों को **(शृणोतु)** सुनो॥१९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। धर्म्मसभा के अधिकृत लोगों के आधीन में वर्त्तमान उपदेश देनेवाले सबको सत्य और असत्य का उपदेश देकर धर्मात्मा करें और उनके प्रश्नों को सुन के समाधान करें और पृथिवी आदिकों के समीप से क्षमा आदि गुणों का ग्रहण करके अन्यों को ग्रहण करा पाखण्ड का नाश और धर्म को प्राप्त कराके सबको श्रेष्ठ करें॥१९॥

शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः।
आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम्॥२०॥

शृण्वन्तु। नः। वृषणः। पर्वतासः। ध्रुवऽक्षेमासः। इळया। मदन्तः। आदित्यैः। नः। अदितिः। शृणोतु। यच्छन्तु। नः। मरुतः। शर्म। भद्रम्॥२०॥

पदार्थः-**(शृण्वन्तु)** **(नः)** अस्मान् कीर्त्तिमतः **(वृषणः)** वृष्टिकराः **(पर्वतासः)** मेघा इव **(ध्रुवक्षेमासः)** ध्रुवं निश्चितं क्षेमं रक्षणं येभ्यस्ते **(इळया)** प्रशंसितया वाचा **(मदन्तः)** हर्षन्तः **(आदित्यैः)** पूर्णविद्यैस्सह **(नः)** अस्मान् **(अदितिः)** माता **(शृणोतु)** **(यच्छन्तु)** ददतु **(नः)** अस्मभ्यम् **(मरुतः)** मानवाः **(शर्म)** उत्तमं गृहमिव सुखम् **(भद्रम्)** कल्याणकरम्॥२०॥

अन्वयः-हे विद्वांसो! भवन्त इळया सह वर्त्तमानान्नोऽस्माञ्छृण्वन्तु वृषणो ध्रुवक्षेमासः पर्वतास इवाऽस्मान् मदन्त उन्नयन्तु। आदित्यैः सहादितिर्नः शृणोतु मरुतो नो भद्रं शर्म यच्छन्तु॥२०॥

भावार्थः-मनुष्यैः सर्वाभ्यः प्राप्तिभ्य आदौ सुशिक्षा ततो विद्या पुनः सत्सङ्गकल्याणाऽऽचरणं श्रवणमुपदेशनञ्च कृत्वा सर्वेषां योगक्षेमौ संसाधनीयौ॥२०॥

पदार्थः-हे विद्वानो! आप लोग **(इळया)** प्रशंसित वाणी के सहित वर्त्तमान **(नः)** हम लोगों

कीर्त्तिमानों को (**शृण्वन्तु**) सुनो (**वृषणः**) वृष्टि करनेवाले (**ध्रुवक्षेमासः**) निश्चित रक्षा है जिनसे वे (**पर्वतासः**) मेघ जैसे वैसे हम लोगों की (**मदन्तः**) प्रसन्न हुए वृद्धि करो। और (**आदित्यैः**) पूर्ण विद्वानों के साथ (**अदितिः**) माता (**नः**) हम लोगों को (**शृणोतु**) सुने (**मरुतः**) मनुष्य लोग (**नः**) हम लोगों के लिये (**भद्रम्**) कल्याण करनेवाले (**शर्म**) श्रेष्ठ गृह के सदृश सुख को (**यच्छन्तु**) देवें॥२०॥

भावार्थः–मनुष्यों को चाहिये कि सब प्राप्तियों से प्रथम उत्तम शिक्षा, तदनन्तर विद्या, पुनः सत्सङ्ग से कल्याणकारक आचरण, उत्तम बातों का श्रवण और उपदेश करके सबके योग[क्षेम] अर्थात् भोजन–आच्छादन के निर्वाह और कल्याण को सिद्ध करें॥२०॥

सदा॑ सु॒गः पि॑तु॒माँ अ॑स्तु॒ पन्था॒ मध्वा॑ देवा॒ ओष॑धीः सं पि॑पृक्त।
भगो॑ मे अग्ने स॒ख्ये न मृ॑ध्या॒ उद्रा॒यो अ॑श्यां॒ सद॑नं पुरु॒क्षोः॥२१॥

सदा॑। सु॒ऽगः। पि॒तु॒मान्। अ॒स्तु॒। पन्थाः॑। मध्वा॑। दे॒वा॒ः। ओष॑धीः। सम्। पि॒पृ॒क्त॒। भगः॑। मे॒। अ॒ग्ने॒। स॒ख्ये। न। मृ॒ध्या॒ः। उत्। रा॒यः। अ॒श्या॒म्। सद॑नम्। पु॒रु॒ऽक्षोः॥२१॥

पदार्थः–(**सदा**) सर्वदा (**सुगः**) सुखेन गच्छन्ति यस्मिन् (**पितुमान्**) बहूनि पितवोऽन्नादीनि विद्यन्ते यस्मिन् (**अस्तु**) (**पन्थाः**) मार्गः (**मध्वा**) मधुरादिगुणयुक्ताः (**देवाः**) विद्वांसः (**ओषधीः**) सोमलताद्याः (**सम्**) (**पिपृक्त**) सम्यक् प्राप्नुतः (**भगः**) ऐश्वर्य्यम् (**मे**) मम (**अग्ने**) विद्वन्! (**सख्ये**) सख्युर्भावे कर्मणि वा (**न**) (**मृध्याः**) हिंस्याः (**उत्**) (**रायः**) धनानि (**अश्याम्**) प्राप्नुयाम् (**सदनम्**) गृहम् (**पुरुक्षोः**) बह्वन्नस्य॥२१॥

अन्वयः–हे देवा विद्वांसो! यूयं मध्वोषधीः सम्पिपृक्त येनाऽस्माकं सुगः पितुमान् पन्थाः सहास्तु। हे अग्ने! मे सख्ये त्वं न मृध्या मे भगो तेऽस्तु यथाऽहं पुरुक्षोः सदनं रायश्चोदश्यां तथा भवानप्येतत्प्राप्नोतु॥२१॥

भावार्थः–ये विद्वांसो वैद्या भूत्वा सदोषधीभी रोगान्निवार्य्य सर्वानरोगान् कुर्य्युस्सदैव मैत्रीं भावयित्वा राज्ञा निष्कण्टका निर्भयाः सरलाः पन्थानो निर्मातव्याः येषु गत्वाऽऽगत्य प्रजाः पुष्कलधना भवेयुः॥२१॥

पदार्थः–हे (**देवाः**) विद्वानो! आप लोग (**मध्वा**) मधुर आदि गुणों से युक्त (**ओषधीः**) सोमलता आदि ओषधियों को (**सम्**) (**पिपृक्त**) उत्तम प्रकार प्राप्त हों जिससे हम लोगों का (**सुगः**) सुखपूर्वक चलते हैं जिसमें और (**पितुमान्**) बहुत अन्न आदि विद्यमान हैं जिसमें ऐसा (**पन्थाः**) मार्ग सदा सब काल में (**अस्तु**) हो और हे (**अग्ने**) विद्वन्! (**मे**) मेरे (**सख्ये**) मित्र के भाव अर्थात् मित्रपन वा धर्म में आप (**न**) नहीं (**मृध्याः**) नाश करो, मेरा (**भगः**) ऐश्वर्य्य आपका हो और जैसे मैं (**पुरुक्षोः**) बहुत अन्नवाले के (**सदनम्**) गृह और (**रायः**) धनों को (**उत्, अश्याम्**) प्राप्त होऊँ, वैसे आप भी इन गृह, धनादि वस्तुओं को प्राप्त होइये॥२१॥

भावार्थः-जो विद्वान् लोग वैद्य होकर सर्वदा ओषधियों से रोगों का निवारण करके सबको रोगरहित करें और सदैव मित्रता करके राजा को चाहिये कि दुष्ट डाकू रूप कण्टकों से तथा सबसे रहित सरल मार्ग बनावें कि जिन मार्गों में जाकर तथा आकर प्रजायें बहुत धनवाली होवें॥ २१॥

स्वद॑स्व ह॒व्या समिषो॑ दिदीह्यस्म॒द्र्य१॑क् सं मि॑मीहि श्रवां॑सि।
विश्वाँ॑ अग्ने पृ॒त्सु ताञ्जे॑षि॒ शत्रू॒नहा॒ विश्वा॑ सु॒मना॑ दीदिही नः॥ २२॥ २७॥

स्वद॑स्व। ह॒व्या। सम्। इष॑ः। दि॒दी॒हि॒। अ॒स्म॒द्र्य॑क्। सम्। मि॒मी॒हि॒। श्रवां॑सि। विश्वा॑न्। अ॒ग्ने॒। पृ॒त्ऽसु। तान्। जे॒षि॒। शत्रू॑न्। अहा॑। विश्वा॑। सु॒ऽमना॑ः। दी॒दि॒हि॒। न॒ः॥ २२॥

पदार्थः-(**स्वदस्व**) भुङ्क्ष्व (**हव्या**) अत्तुमर्हाणि (**सम्**) (**इषः**) विज्ञानानि (**दिदीहि**) प्रकाशय (**अस्मद्र्यक्**) योऽस्मानञ्चति सः (**सम्**) (**मिमीहि**) संमिमीष्व (**श्रवांसि**) अन्नानि श्रवणानि वा (**विश्वान्**) सर्वान् (**अग्ने**) पावक इव वर्त्तमान (**पृत्सु**) संग्रामेषु (**तान्**) (**जेषि**) जयसि (**शत्रून्**) (**अहा**) दिनानि (**विश्वा**) सर्वाणि (**सुमनाः**) प्रसन्नचित्तः (**दीदिहि**) प्रकाशस्व प्रकाशय वा। अत्र **संहितायामि**ति दीर्घः। (**नः**) अस्मान्॥ २२॥

अन्वयः-हे अग्ने! त्वमस्मद्र्यक् सन् हव्या श्रवांसि स्वदस्वेषः सं दिदीहि। श्रवांसि सं मिमीहि यतस्त्वं पृत्सु तान् विश्वाञ्छत्रूञ्जेषि तस्माद्विश्वाहा सुमनाः सन् दीदिहि। नोऽस्माँश्च दीदिहि॥ २२॥

भावार्थः-राजादिपुरुषैर्बुद्धिविनाशकान्नादित्यागमुक्त्वा विज्ञानं वर्द्धयित्वा लोकतो वार्त्ताः श्रुत्वा सेना उन्नीय शत्रूञ्जित्वा सर्वदा हर्षशोकरहितैर्भवितव्यं धर्म्येण प्रजाः संपाल्य विषयासक्तिं विहायाऽऽनन्दितव्यमिति॥ २२॥

अत्र राजविद्वत्प्रजाऽध्यापकशिष्येश्वरश्रोतृवक्तृशूरवीरकर्मगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुःपञ्चाशत्तमं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश वर्त्तमान! आप (**अस्मद्र्यक्**) जो हम लोगों को ज्ञान, गमन, प्राप्ति और सत्कार देता है वह (**हव्या**) भोजन करने योग्य (**श्रवांसि**) अन्न वा श्रवणों को (**स्वदस्व**) भोग करें (**इषः**) विज्ञानों को (**सम्, दिदीहि**) प्रकाश करो। और अन्न वा श्रवणों को (**सम्, मिमीहि**) तोलो और सुनो जिससे कि आप (**पृत्सु**) संग्रामों में (**तान्**) उनको (**विश्वान्**) सम्पूर्ण (**शत्रून्**) शत्रुओं को (**जेषि**) जीतते हो तिससे (**विश्वा**) सब (**अहा**) दिनों को (**सुमनाः**) प्रसन्नचित्त होते हुए (**दीदिहि**) प्रकाशित होइये और (**नः**) हम लोगों को प्रकाशित कीजिये॥ २२॥

भावार्थः-राजा आदि पुरुषों को चाहिये कि बुद्धि के नाश करनेवाले अन्न आदि का त्याग करना

कहके, विज्ञान बढ़ाय के, लोक से वार्त्ताओं को सुन के, सेनाओं की वृद्धि करके और शत्रुओं को जीत कर सब काल में आनन्द और शोक का त्याग करें और धर्म से प्रजाओं का पालन करके विषयों में आसक्ति का त्याग करके आनन्द करना चाहिये॥ २२॥

इस सूक्त में राजा, विद्वान्, प्रजा, अध्यापक, शिष्य, ईश्वर, श्रोता, वक्ता और शूरवीर के कर्म्म और गुणवर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौवनवाँ सूक्त और सत्ताईसवाँ वर्ग समाप्त हुआ॥

अथ द्वाविंशत्यृचस्य पञ्चपञ्चाशत्तमस्य सूक्तस्य प्रजापतिर्वैश्वामित्रो वाच्यो वा ऋषयः। विश्वेदेवाः। १ उषाः। २-१० अग्निः। ११ अहोरात्रौ। १२-१४ रोदसी। १५ रोदसी द्युनिशौ वा। १६ दिशः। १७-२२ इन्द्रः पर्जन्यात्मा त्वष्टा वाग्निश्च देवताः। १, २, ६, ७, ९-१२, १९, २२ निचृत्त्रिष्टुप्। ४, ८, १३, १६, २१ त्रिष्टुप्। १४, १५, १८ विराट् त्रिष्टुप्। १७ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिः। ५, २० स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अब बाईस ऋचा वाले पचपनवें सूक्त का आरम्भ है॥

उ॒षस॒: पूर्वा॒ अध॒ यद्व्यू॑षु॒र्महद्वि ज॑ज्ञे अ॒क्षरं॑ प॒दे गोः।
व्र॒ता दे॒वना॒मुप॒ नु प्र॒भूष॑न् म॒हद्दे॒वाना॑मसुर॒त्वमेक॑म्॥ १॥

उ॒षस॑: पूर्वा॑: अध॑ यत् वि॒ऽऊ॒षुः। म॒हत्। वि। ज॒ज्ञे॒। अ॒क्षर॑म्। प॒दे। गोः। व्र॒ता। दे॒वाना॑म्। उप॑। नु। प्र॒ऽभूष॑न्। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥ १॥

पदार्थः-(**उषसः**) प्रभातात् (**पूर्वाः**) (**अध**) अथ (**यत्**) (**व्यूषुः**) विवसन्ति (**महत्**) (**वि**) (**जज्ञे**) जातम् (**अक्षरम्**) (**पदे**) स्थाने (**गोः**) पृथिव्याः (**व्रता**) नियमाः (**देवानाम्**) विदुषाम् (**उप**) समीपे (**नु**) सद्यः (**प्रभूषन्**) अलङ्कुर्वन् (**महत्**) (**देवानाम्**) पृथिव्यादीनाम् (**असुरत्वम्**) यदसुषु प्राणेषु रमते तत् (**एकम्**) अद्वितीयमसहायम्॥ १॥

अन्वयः-यदुषसः पूर्वा व्यूषुस्तन्महदक्षरं महत्तत्वाख्यं गोः पदे वि जज्ञे यदेकं देवानां महदसुरत्वं प्रभूषन्नध देवानां व्रतोप नु जज्ञे तद्यूयं विजानीत॥ १॥

भावार्थः-यद्विद्युदाख्यमुषसः सेवन्ते तद्वर्त्तमानमेकमद्वितीयं ब्रह्म प्रकृत्यादिषु व्याप्तं तत्सर्वं धरति तदेव सर्वैरुपास्यमस्ति॥ १॥

पदार्थः-(**यत्**) जो (**उषसः**) प्रातःकाल से (**पूर्वाः**) प्रथम हुए (**व्यूषुः**) विशेष करके वसते हैं वह (**महत्**) बड़ा (**अक्षरम्**) नहीं नाश होनेवाला (**महत्**) बड़ा तत्त्वनामक (**गोः**) पृथिवी के (**पदे**) स्थान में (**वि, जज्ञे**) उत्पन्न हुआ जो (**एकम्**) अद्वितीय और सहायरहित (**देवानाम्**) पृथिवी आदिकों में बड़े (**असुरत्वम्**) प्राणों में रमनेवाले को (**प्र, भूषन्**) शोभित करता हुआ (**अध**) उसके अनन्तर (**देवानाम्**) विद्वानों के (**व्रता**) नियम (**उप**) समीप में (**नु**) शीघ्र उत्पन्न हुए उसको आप लोग जानिये॥ १॥

भावार्थः-जो बिजुली नामक वस्तु को प्रातःकालः से सेवन करते हैं, उनके सदृश वर्त्तमान एक द्वितीयरहित ब्रह्म प्रकृति आदि पदार्थों में व्याप्त हुआ वह सबको धारण करता है, वही सब करके **[**=से**]** उपासना करने योग्य है॥ १॥

मो षू ण॒ो अत्र॑ जुहुरन्त दे॒वा मा पूर्वे॑ अग्ने पि॒तर॑: पद॒ज्ञाः।

पुरा॒ण्योः सद्मनोः केतुरन्तर्महद्देवानामसुरत्वमेकम्॥ २॥

मो इति। सु। नः। अत्र। जुहुरन्त। देवाः। मा। पूर्वे। अग्ने। पितरः। पदज्ञाः। पुराण्योः। सद्मनोः। केतुः। अन्तः। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ २॥

पदार्थः-(**मो**) निषेधे (**सु**) (**नः**) अस्मान् (**अत्र**) अस्मिन् ब्रह्मणि विज्ञानव्यवहारे वा (**जुहुरन्त**) प्रसहन्ताम् (**देवाः**) विद्वांसः (**मा**) निषेधे (**पूर्वे**) प्रथमजाः (**अग्ने**) विद्वन्! (**पितरः**) विज्ञानवन्तः (**पदज्ञाः**) ये पदं प्राप्तव्यं जानन्ति ते (**पुराण्योः**) सनातन्योर्विद्युदाकाशरूपयोः प्रकृत्योः (**सद्मनोः**) सर्वेषां निवासस्थानयोः (**केतुः**) ज्ञानस्वरूपम् (**अन्तः**) मध्ये व्याप्तम् (**महत्**) (**देवानाम्**) पृथिव्यादीनां जीवानां वा (**असुरत्वम्**) प्राणेषु क्रीडमानम् (**एकम्**) अद्वितीयं ब्रह्म॥ २॥

अन्वयः-हे अग्ने! यत्पुराण्योः सद्मनोर्देवानामन्तः केतुर्महदेकमसुरत्वमस्त्यत्र नो अस्मान् पदज्ञाः पूर्वे पितरो मो जुहुरन्त देवा अत्रास्मान् मा सु जुहुरन्तैवं त्वमप्येतद्विज्ञाय त्वामेते मा जुहुरन्त॥ २॥

भावार्थः-त एवाऽस्मिञ्जगति विद्वांसो जनका इव भवेयुर्ये प्रकृत्यादिषु व्याप्तं सर्वान्तर्य्यामि ब्रह्म सम्यग् विज्ञाय विज्ञापयेयुः॥ २॥

पदार्थः-हे (**अग्ने**) विद्वन्! जो (**पुराण्योः**) अनादि काल से सिद्ध बिजुली और आकाश रूप प्रकृतियों (**सद्मनोः**) सबके रहने के स्थानों और (**देवानाम्**) पृथिवी आदि वा जीवों के (**अन्तः**) मध्य में (**केतुः**) ज्ञानस्वरूप (**महत्**) बड़ा (**एकम्**) अपने सदृश द्वितीय पदार्थरहित ब्रह्म (**असुरत्वम्**) प्राणों में क्रीड़ा करता हुआ है (**अत्र**) इस ब्रह्म वा विज्ञान के व्यवहार में (**नः**) हम लोगों को (**पदज्ञाः**) प्राप्त होने योग्य के जाननेवाले (**पूर्वे**) प्रथम उत्पन्न हुए (**पितरः**) विज्ञानवाले (**मो**) नहीं (**जुहुरन्त**) प्रसहन करें और (**देवाः**) विद्वान् लोग इस विज्ञानरूप व्यवहार में हम लोगों को (**मा**) नहीं (**सु**) उत्तम प्रकार सहें, इस प्रकार आप भी यह जान के आपको ये लोग न सहें॥ २॥

भावार्थः-वे ही इस संसार में विद्वान् जन पिता के सदृश होवें कि जो प्रकृति आदि पदार्थों में व्याप्त सर्वान्तर्य्यामी ब्रह्म को उत्तम प्रकार जान के अन्यों को जनावें॥ २॥

वि मे॑ पुरु॒त्रा प॑तयन्ति॒ कामाः॒ शम्यच्छा॑ दीद्ये पू॒र्व्याणि॑।
समि॑द्धे अ॒ग्नावृ॒तमिद्व॑देम म॒हद्दे॒वानामसु॒रत्वमेक॑म्॥ ३॥

वि। मे। पुरुऽत्रा। पतयन्ति। कामाः। शमि। अच्छ। दीद्ये। पूर्व्याणि। सम्ऽइद्धे। अग्नौ। ऋतम्। इत्। वदेम। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ ३॥

पदार्थः-(**वि**) विशेषे (**मे**) मम (**पुरुत्रा**) बहूनि (**पतयन्ति**) पतिमाचक्षन्ते (**कामाः**) अभिलाषाः (**शमि**) कर्माणि। **शमीति कर्मनामसु पठितम्।** (निघं०२.१) (**अच्छ**)। अत्र **संहितायामिति** दीर्घः। (**दीद्ये**) प्रकाशयेयम्। **दीदयतीति ज्वलतिकर्मा।** (निघं०१.१६) (**पूर्व्याणि**) पूर्वैः साधितानि (**समिद्धे**) प्रदीप्ते

(अग्नौ) **(ऋतम्)** सत्यम् **(इत्)** एव **(वदेम)** **(महत्)** **(देवानाम्)** दिव्यानां पदार्थानां मध्ये **(असुरत्वम्)** प्राणाधारम् **(एकम्)** असहायम्॥३॥

अन्वयः-यैर्मे पुरुत्रा कामाः पतयन्ति तानि पूर्व्याणि शम्यहमच्छ वि दीद्ये समिद्धेऽग्नाविव देवानां महदेकमसुरत्वमृतं वदेम तदिदेव सर्वे वदन्तु॥३॥

भावार्थः-मनुष्या आलस्यं विहाय पूर्वैराप्तैराचरितानि कर्माणि सेवित्वा देवानां देवं सर्वाधारं सत्यस्वरूपं दीपेन घटादिकमिवान्तर्व्याप्तं परमात्मानं साक्षाद् दृष्ट्वाऽन्यान् प्रत्युपदिशन्तु॥३॥

पदार्थः-जिनसे **(मे)** मेरी **(पुरुत्रा)** बहुत **(कामाः)** अभिलाषायें **(पतयन्ति)** स्वामी को स्पष्ट कहने की इच्छा करती हैं, उन **(पूर्व्याणि)** पूर्व जनों से सिद्ध किये गये **(शमि)** कर्मों को मैं **(अच्छा)** उत्तम प्रकार **(वि)** विशेष करके **(दीद्ये)** प्रकाश करूं, **(समिद्धे)** प्रदीप्त **(अग्नौ)** अग्नि में जैसे **(देवानाम्)** उत्तम पदार्थों के मध्य में **(महत्)** बड़े **(एकम्)** सहायरहित **(असुरत्वम्)** प्राणों के आधार **(ऋतम्)** सत्य को **(वदेम)** कहे, उसको **(इत्)** ही सब लोग कहें॥३॥

भावार्थः-मनुष्य लोग आलस्य को त्याग के पूर्व पुरुषों करके **[**=द्वारा**]** किये हुये कर्मों का सेवन करके देवों के देव सबके आधार सत्यस्वरूप और दीपक से घट आदि के सदृश भीतर व्याप्त परमात्मा को साक्षात् देख के अन्य जनों के प्रति उपदेश देवें॥३॥

समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु।
अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकम्॥४॥

समानः। राजा। विऽभृतः। पुरुऽत्रा। शये। शयासु। प्रऽयुतः। वना। अनु। अन्या। वत्सम्। भरति। क्षेति। माता। महत्। देवानाम्। असुरऽत्वम्। एकम्॥४॥

पदार्थः-(**समानः**) एकः (**राजा**) प्रकाशमानः (**विभृतः**) विशेषेण धृतः (**पुरुत्रा**) पूर्वासु (**शये**) (**शयासु**) शेरते यासु विद्युदादयः पदार्थाः तासु (**प्रयुतः**) विभक्तः सन् मिलितः (**वना**) किरणान् (**अनु**) सद्यः (**अन्या**) भिन्ना त्रिगुणात्मिका प्रकृतिः (**वत्सम्**) महत्तत्त्वादिकम् (**भरति**) धरति (**क्षेति**) निवासयति (**माता**) जननीव (**महत्**) पूजनीयम् (**देवानाम्**) सूर्य्यादीनां विदुषां वा मध्ये (**असुरत्वम्**) अस्यति प्रक्षिपति दूरीकरोति सर्वाणि दुःखानि तस्य भावम् (**एकम्**) अद्वितीयम्॥४॥

अन्वयः-हे मनुष्या! यत्र पुरुत्रा शयासु प्रयुतो विभृतस्समानो राजा सूर्य्यः शये शेते वना सेवतेऽन्या माता वत्सं भरति सर्वं क्षेति तद्देवानां महदेकमसुरत्वं यूयमनु विजानीत॥४॥

भावार्थः-हे मनुष्या! येन प्रकाशिताः सूर्य्यादयः प्रकाशन्ते योऽव्यक्ते सर्वमुत्पाद्य धृत्वा मातृवद्रक्षति यदाप्तानां विदुषां सत्कर्त्तव्यमस्ति तद्ब्रह्म यूयमुपाध्वम्॥४॥

पदार्थः–हे मनुष्यो! जिन **(पुरुत्रा)** प्राचीन काल से प्रसिद्ध **(शयासु)** शयन करें जिनमें बिजुली आदि पदार्थ उनमें **(प्रयुतः)** विभक्त हुआ फिर मिल गया **(विभृतः)** विशेष करके धारण किया गया **(समानः)** एक **(राजा)** प्रकाशमान सूर्य्य **(शये)** शयन करता है **(वना)** किरणों को सेवन करता है **(अन्या)** भिन्न त्रिगुण स्वरूप प्रकृति **(माता)** माता **(वत्सम्)** पुत्र को **[(भरति)]**धारण करती है और सबको **(क्षेति)** वसाती है वह **(देवानाम्)** सूर्य्यादिक वा विद्वानों के मध्य में **(महत्)** सत्कार करने योग्य **(एकम्)** द्वितीयरहित **(असुरत्वम्)** दूर करता है दुःखों को जो उसका होना उसको आप लोग **(अनु)** शीघ्र जानिये॥४॥

भावार्थः–हे मनुष्यो! जिस करके **[**=के द्वारा**]** प्रकाशित हुए सूर्य्य आदि प्रकाशित होते हैं, जो अव्यक्त अर्थात् प्रकृति में सबको उत्पन्न करके तथा धारण करके माता के सदृश रक्षा करता है और जो यथार्थवक्ता विद्वानों करके **[**=के द्वारा**]** सत्कार करने योग्य है, उस ब्रह्म की आप लोग उपासना करो॥४॥

आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः।
अन्तर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकम्॥५॥२८॥

आऽक्षित्। पूर्वासु। अपराः। अनूरुत्। सद्यः। जातासु। तरुणीषु। अन्तरिति। अन्तःऽवतीः। सुवते। अप्रऽवीताः। महत्। देवानाम्। असुरऽत्वम्। एकम्॥५॥

पदार्थः–**(आक्षित्)** यः समन्तात् क्षियति सर्वत्र वसति सः **(पूर्वासु)** प्राचीनासु सनातनीषु प्रजासु **(अपराः)** या जनिष्यन्ते **(अनुरुत्)** योऽनुरौत्युपदिशति **(सद्यः)** समानेऽहनि **(जातासु)** उत्पन्नासु प्रजासु **(तरुणीषु)** युवतय इव वर्त्तमानासु **(अन्तः)** **(मध्ये)** **(अन्तर्वतीः)** अन्तर्मध्ये कारणं विद्यते यासु ताः **(सुवते)** उत्पद्यन्ते **(अप्रवीताः)** अव्याप्ताः परिच्छिन्नाः **(महत्)** सर्वेभ्यो बृहत् **(देवानाम्)** दिव्यगुणानां सूर्यादीनां सकाशात् **(असुरत्वम्)** सर्वेषां प्रक्षेप्तारम् **(एकम्)** चेतनमात्रस्वरूपम्॥५॥

अन्वयः–हे मनुष्या! यः पूर्वासु सद्यो जातासु च तरुणीषु प्रजास्वन्तराक्षिदनूरुद्वर्त्तते यस्योत्पादनेनाऽपरा अन्तर्वतीरप्रवीताः प्रजाः सुवते तदेव देवानाम्महदसुरत्वमेकं परमात्मानं यूयं भजत॥५॥

भावार्थः–हे मनुष्या! य उत्पन्नासूत्पद्यमानासूत्पस्त्यमानासु प्रजासु व्याप्तो धर्ताऽन्तर्यामी वर्त्तते तं परमात्मानं सेवन्ताम्॥५॥

पदार्थः–हे मनुष्यो! जो **(पूर्वासु)** प्राचीन काल में विद्यमान और **(सद्यः)** समान दिन में **(जातासु)** उत्पन्न और **(तरुणीषु)** युवावस्थावालियों के सदृश वर्त्तमान प्रजाओं के **(अन्तः)** मध्य में **(आक्षित्)** जो चारों ओर सर्वत्र वसता है वह **(अनूरुत्)** उपदेश देनेवाला वर्त्तमान है और जिसके उत्पन्न करने से **(अपराः)** उत्पन्न की जातीं **(अन्तर्वतीः)** मध्य में कारण विद्यमान है जिनमें उन **(अप्रवीताः)**

नहीं व्याप्त अर्थात् गणना से नाप सकने योग्य प्रजा (**सुवते**) उत्पन्न होती हैं, वही (**देवानाम्**) उत्तम गुणवाले सूर्य्य आदिकों के मध्य में (**महत्**) सबसे बड़े (**असुरत्वम्**) सबसे फेंकनेवाले और (**एकम्**) चेतनमात्र स्वरूप परमात्मा की आप लोग सेवा करो॥५॥

भावार्थः-हे मनुष्यो! जो उत्पन्न, उत्पन्न हो गई और उत्पन्न होनेवाली प्रजाओं में व्याप्त धारण करनेवाला अन्तर्यामी वर्त्तमान है, उस परमात्मा की सेवा करो॥५॥

शयुः परस्तादध नु द्विमाताऽबन्धनश्चरति वत्स एकः।
मित्रस्य ता वरुणस्य व्रतानि महद्देवानामसुरत्वमेकम्॥६॥

शयुः। परस्तात्। अध। नु। द्विऽमाता। अबन्धनः। चरति। वत्सः। एकः। मित्रस्य। ता। वरुणस्य। व्रतानि। महत्। देवानाम्। असुरऽत्वम्। एकम्॥६॥

पदार्थः-(**शयुः**) योऽभिव्याप्य शेते (**परस्तात्**) परस्मिन् देशे (**अध**) अथ (**नु**) (**द्विमाता**) द्वे वाय्वाकाशौ मातरौ यस्याऽग्नेः सः (**अबन्धनः**) यो बध्नाति तद्भिन्नः (**चरति**) गच्छति (**वत्सः**) पुत्रइव वर्त्तमानः (**एकः**) असहायः (**मित्रस्य**) सुहृदः (**ता**) तानि (**वरुणस्य**) सर्वोत्तमस्य जगत्प्रबन्धकस्य (**व्रतानि**) सत्यभाषणादीनि कर्माणि। **व्रतमिति कर्मनामसु पठितम्।** (निघं०२.१) (**महत्**) (**देवानाम्**) विदुषाम् (**असुरत्वम्**) प्रक्षेप्तृत्वम् (**एकम्**) असहायं तेजः॥६॥

अन्वयः-हे मनुष्या! यः परस्ताच्छयुर्द्विमाताऽबन्धनो वत्स इवैको नु चरत्यध यद्देवानान्महदेकमसुरत्वं चरति ता व्रतानि मित्रस्य वरुणस्य परमात्मनः सन्तीति वेद्यम्॥६॥

भावार्थः-हे मनुष्या! यत्किञ्चिदत्र जगति सूर्य्यादिवस्तु, या अत्र विविधा रचनाः सन्ति, यच्च विचित्ररूपं स्वादादिकं वर्त्तते सर्वे स्वस्वपरिधौ भ्रमन्ति प्रलयात् प्राक् न विनश्यन्ति तानीमानि परमात्मनः कर्माणि सन्तीति वेदितव्यम्॥६॥

पदार्थः-हे मनुष्यो! जो (**परस्तात्**) दूसरे देश में (**शयुः**) व्याप्त होकर शयन करनेवाला (**द्विमाता**) दो वायु और आकाश माता हैं जिस अग्नि के वह (**अबन्धनः**) जो बन्धनरहित वह (**वत्सः**) पुत्र के सदृश वर्त्तमान (**एकः**) सहायरहित (**नु**) शीघ्र (**चरति**) चलता है (**अध**) इसके अनन्तर जो (**देवानाम्**) विद्वानों का (**महत्**) बड़ा (**एकम्**) सहायरहित तेज (**असुरत्वम्**) फेंकनापन (**ता**) वे (**व्रतानि**) सत्यभाषण आदि कर्म (**मित्रस्य**) मित्र और (**वरुणस्य**) सब में उत्तम और संसार के प्रबन्ध करनेवाले परमात्मा के हैं, ऐसा जानना चाहिये॥६॥

भावार्थः-हे मनुष्यो! जो कुछ इस संसार में सूर्य्य आदि वस्तु और जो इस संसार में अनेक प्रकार की रचना हैं और जो विचित्ररूप स्वाद आदि वर्त्तमान हैं और सब अपने-अपने मण्डल में घूमते

हैं, प्रलय से प्रथम नहीं नष्ट होते हैं, वे ये परमात्मा के कर्म हैं, यह जानना चाहिये॥६॥

द्विमा॒ता होता॑ वि॒दथे॑षु स॒म्राळ॒ग्निं च॑र॒ति क्षेति॑ बु॒ध्नः।
प्र रण्या॑नि रण्य॒वाचो॑ भरन्ते म॒हद्दे॒वाना॑मसु॒रत्वमेक॑म्॥७॥

द्वि॒ऽमा॒ता। होता॑। वि॒दथे॑षु। स॒म्ऽरा॒ट्। अनु॑। अ॒ग्नि॑म्। च॒र॑ति। क्षेति॑। बु॒ध्नः। प्र। रण्या॑नि। र॒ण्य॒ऽवाचः॑। भ॒र॒न्ते॒। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥७॥

पदार्थः–(**द्विमाता**) द्वे वाय्वाकाशौ मातरौ यस्य सूर्य्यस्य सः (**होता**) आदाता दाता च (**विदथेषु**) विज्ञातव्येषु पृथिव्यादिषु (**सम्राट्**) यः सम्यग् राजते (**अनु**) (**अग्नम्**) सर्वेषां मध्यं केन्द्रं स्थानमुपरिस्थम् (**चरति**) गच्छति (**क्षेति**) निवसति निवासयति वा (**बुध्नः**) बुध्नमन्तरिक्षं निवासस्थानं विद्यते यस्य सः। अत्रार्शादित्वादच्। (**प्र**) (**रण्यानि**) रमणीयानि लोकजातानि (**रण्यवाचः**) रमणीयभाषाः (**भरन्ते**) धरन्ति पुष्णन्ति वा (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥७॥

अन्वयः–हे मनुष्या! येन निर्मितो द्विमाता होता बुध्नो विदथेषु सम्राडग्रमनुचरति क्षेति रण्यानि प्र क्षेति यद्देवानां महदेकमसुरत्वं रण्यवाचो भरन्ते तदेव ब्रह्म यूयं सेवध्वम्॥७॥

भावार्थः–हे मनुष्या! यो जगदीश्वरस्सूर्य्यादि जगन्निर्माय धृत्वा प्रकाश्य पालयति। यः सर्वत्र वसन्त्सन्त्सर्वान्त्स्वस्मिन् वासयति यमेकमेवाप्ता विद्वांसः सेवन्ते तमेव सर्व उपासन्ताम्॥७॥

पदार्थः–हे मनुष्यो! जिस करके निर्माण किया गया (**द्विमाता**) दो वायु और आकाश हैं, माता जिस सूर्य्य के वह (**होता**) लेने और देनेवाला (**बुध्नः**) अन्तरिक्ष निवास का स्थान विद्यमान है जिसका वह (**विदथेषु**) जानने योग्य पृथिवी आदिकों में (**सम्राट्**) जो उत्तम प्रकार प्रकाशमान है (**अग्नम्**) सबके मध्य केन्द्र स्थान जो कि ऊपर वर्त्तमान उसको (**अनु, चरति**) प्राप्त होता है, वसता वा वसाता (**रण्यानि**) सुन्दर और लोकों में उत्पन्न हुओं को (**प्र, क्षेति**) वसता वा वसाता और जो (**देवानाम्**) विद्वानों में (**महत्**) बड़े (**एकम्**) सहायरहित (**असुरत्वम्**) प्राणों में रमनेवाले को (**रण्यवाचः**) रमणीय भाषाएँ (**भरन्ते**) धारण वा पोषण करती हैं, उस ही ब्रह्म की आप लोग सेवा करो॥७॥

भावार्थः–हे मनुष्यो! जो जगदीश्वर सूर्य्य आदि जगत् को निर्माण, धारण और प्रकाश करके पालन करता है और जो सर्वत्र वसता हुआ सबको अपने में वसाता है, जिस एक ही को यथार्थ बोलनेवाले विद्वान् लोग सेवते हैं, उस ही की सब लोग उपासना करो॥७॥

शूर॑स्येव॒ युध्य॑तो अन्त॒मस्य॑ प्रती॒चीनं॑ ददृशे॒ विश्व॑मा॒यत्।
अ॒न्तर्म॒तिश्च॑रति नि॒ष्षिधं॑ गोर्म॒हद्दे॒वाना॑मसु॒रत्वमेक॑म्॥८॥

शूर॑स्यऽइव। युध्य॑तः। अ॒न्त॒मस्य॑। प्र॒ती॒चीन॑म्। द॒दृ॒शे॒। विश्व॑म्। आ॒ऽय॒त्। अ॒न्तः। म॒तिः। च॒र॒ति। नि॒ःऽसिध॑म्। गोः। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥८॥

पदार्थः-(**शूरस्येव**) यथा शत्रून् हिंसतः (**युध्यतः**) प्रहरतः। अत्र व्यत्ययेन परस्मैपदम्। (**अन्तमस्य**) समीपस्थस्य (**प्रतीचीनम्**) पश्चाद्भूतम् (**ददृशे**) दृश्यते (**विश्वम्**) सर्वञ्जगत् (**आयत्**) प्राप्नुवत् (**अन्तः**) मध्ये (**मतिः**) मेधावी। **मतय इति मेधाविनामसु पठितम्।** (निघं०३.१५) (**चरति**) गच्छति (**निष्षिधम्**) यन्नितरां सेधति शास्ति तत् (**गोः**) वाण्याः (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥८॥

अन्वयः-हे मनुष्या! अन्तमस्य युध्यतः शूरस्येव यत्र प्रतीचीनमायद्विश्वमन्तर्ददृशे गोर्महन्निष्षिधं देवानामेकमसुरत्वं मतिश्चरति तदेव ब्रह्म यूयं विजानीत॥८॥

भावार्थः-हे मनुष्या! यथा युध्यमानस्य समीपस्थस्य शूरस्य समीपे कातरो जनस्तिरस्कृतवद् दृश्यते तथैव सर्वशक्तिमतोऽनन्तस्य परमात्मनस्सन्निधौ सूर्य्यादिकं जगत् क्षुद्रं तिरस्कृतं वर्त्तते यो जगदीश्वरो विद्याकोशं वेदचतुष्टयं वाण्याऽऽभूषणं शास्ति तदेवेष्टं यूयं मन्यध्वम्॥८॥

पदार्थः-हे मनुष्यो! (**अन्तमस्य**) समीप के वर्त्तमान (**युध्यतः**) प्रहार करते हुए (**शूरस्येव**) शत्रुओं के मारनेवाले के सदृश जहाँ (**प्रतीचीनम्**) पीछे से हुए (**आयत्**) प्राप्त होते हुए (**विश्वम्**) सम्पूर्ण संसार (**अन्तः**) मध्य में (**ददृशे**) देख पड़ता है और (**गोः**) वाणी का (**महत्**) बड़ा (**निष्षिधम्**) अत्यन्त शासन करनेवाला (**देवानाम्**) विद्वानों में (**एकम्**) सहायरहित (**असुरत्वम्**) प्राणों में रमनेवाला (**मतिः**) बुद्धिमान् (**चरति**) प्राप्त होता है, उस ही को ब्रह्म आप लोग जानें॥८॥

भावार्थः-हे मनुष्यो! जैसे युद्ध करते हुए समीप में वर्त्तमान और शत्रु के नाशक वीर पुरुष के समीप में कायर मनुष्य तिरस्कृत हुए पुरुष के सदृश देखा जाता है, वैसे ही सम्पूर्ण शक्तिवाले अनन्त परमात्मा के समीप में सूर्य्य आदिक जगत् क्षुद्र और तिरस्कृत है और जो जगदीश्वर विद्या के खजाने रूप चारों वेदों वाणी के आभूषण हुओं का शासन करता है, उस ही को इष्ट आप लोग मानो॥८॥

नि वेवेति पलितो दूत आस्वन्तर्महांश्चरति रोचनेन।
वपूंषि बिभ्रदभि नो वि चष्टे महद्देवानामसुरत्वमेकम्॥९॥

नि। वेवेति। पलितः। दूतः। आसु। अन्तः। महान्। चरति। रोचनेन। वपूंषि। बिभ्रत्। अभि। नः। वि। चष्टे। महत्। देवानाम्। असुरऽत्वम्। एकम्॥९॥

पदार्थः-(**नि**) (**वेवेति**) भृशं व्याप्नोति। अत्र **वाच्छन्दसी**तीडभावः। (**पलितः**) श्वेतकेशः (**दूतः**) समाचारदातेव (**आसु**) प्रजासु (**अन्तः**) आभ्यन्तरे (**महान्**) व्याप्तः सन् (**चरति**) प्राप्तोऽस्ति (**रोचनेन**) स्वप्रकाशेन (**वपूंषि**) रूपाणि (**बिभ्रत्**) धरत् सन् (**अभि**) आभिमुख्ये (**नः**) अस्मान् (**वि**) (**चष्टे**) विशेषेणोपदिशति (**महत्**) (**देवानाम्**) विदुषामस्माकम् (**असुरत्वम्**) दोषाणां प्रक्षेप्तृत्वम् (**एकम्**) अद्वितीयम्॥९॥

अन्वयः-हे मनुष्या! य आस्वन्तर्नि वेवेति पलितो दूत इव महान् रोचनेन चरति वपूंषि बिभ्रन्नोऽस्मानभि विचष्टे तदेव देवानामस्माकमेकमसुरत्वं महत्पूज्यमस्तीति यूयमप्येतं पूजयत॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो जगदीश्वरो योगिनो वायुद्वारा वृद्धो दूत इव दूरस्थं समाचारं पदार्थं वा ज्ञापयति। अन्तर्यामी सन्त्स्वप्रकाशेन सर्वं प्रकाश्य जीवानां कर्माणि विदित्वा फलानि प्रयच्छति आत्मस्थस्सन्न्याय्यमन्याय्यं कर्त्तुमकर्त्तुं चेतयति तदेवास्माकं पूज्यतमं ब्रह्म वस्त्वस्तीति भवन्तोऽप्येवं विजानन्तु॥९॥

पदार्थः-हे मनुष्यो! जो **(आसु)** इन प्रजाओं में **(अन्तः)** भीतर **(नि, वेवेति)** अत्यन्त व्याप्त है **(पलितः)** श्वेत केशों से युक्त **(दूतः)** समाचार देनेवाले के सदृश **(महान्)** व्याप्त हुआ **(रोचनेन)** अपने प्रकाश से **(चरति)** प्राप्त है **(वपूंषि)** रूपों को **(बिभ्रत्)** धारण करता हुआ **(नः)** हम लोगों को **(अभि)** सम्मुख **(वि, चष्टे)** विशेष करके उपदेश देता है, वही **(देवानाम्)** विद्वान् हम लोगों का **(एकम्)** द्वितीय से रहित **(असुरत्वम्)** दोषों का फेंकना **(महत्)** बड़ा पूज्य है, आप लोग भी इनकी पूजा करो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो जगदीश्वर योगियों को वायु के द्वारा वृद्ध दूत के सदृश दूर देश में वर्त्तमान समाचार वा पदार्थ को जनाता है और अन्तर्यामी हुआ अपने प्रकाश से सबको प्रकाशित और जीवों के कर्मों को जान कर फलों को देता है, अन्तःकरण में वर्त्तमान हुआ न्याय्य और अन्याय्य करने और न करने को चिताता है, वही हम लोगों को अतिशय पूजा करने योग्य ब्रह्म वस्तु है, आप लोग भी ऐसा जानो॥९॥

विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः।
अग्निष्टा विश्वा भुवनानि वेद महद्देवानामसुरत्वमेकम्॥१०॥२९॥

विष्णुः। गोपाः। परमम्। पाति। पाथः। प्रिया। धामानि। अमृता। दधानः। अग्निः। ता। विश्वा। भुवनानि। वेद। महत्। देवानाम्। असुरऽत्वम्। एकम्॥१०॥

पदार्थः-(**विष्णुः**) वेवेष्टि व्याप्नोति चराचरं जगत् स परमात्मा **(गोपाः)** सर्वस्य रक्षकः **(परमम्)** प्रकृष्टम् **(पाति)** रक्षति **(पाथः)** पृथिव्याद्यन्नम् **(प्रिया)** प्रियाणि कमनीयानि सेवितुमर्हाणि **(धामानि)** जन्मस्थाननामानि **(अमृता)** नाशरहितानि प्रकृत्यादीनि **(दधानः)** धरन् पुष्यन्त्सन् **(अग्निः)** पावको विद्युदिव स्वप्रकाशः **(ता)** तानि **(विश्वा)** सर्वाणि **(भुवनानि)** निवासस्थानानि **(वेद)** जानाति **(महत्)** व्यापकं सत् **(देवानाम्)** पृथिव्यादीनां मध्ये **(असुरत्वम्)** सर्वेषां प्रक्षेप्तारम् **(एकम्)** अद्वितीयं ब्रह्म॥१०॥

अन्वयः-हे मनुष्या! योऽग्निरिव विष्णुर्गोपा यानि परमं पाथः प्रिया अमृता धामानि दधानः पाति ता तानि विश्वा भुवनानि वेद तद्देवानां महदेकमसुरत्वं यूयं वित्त॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! योऽस्य जगत उत्पादको धाता पालको विनाशकोऽस्ति सर्वेषां जीवानां हिताय विविधान् पदार्थान्निर्मिमीते तमेव यूयं सेवध्वम्॥१०॥

पदार्थः-हे मनुष्यो! जो **(अग्निः)** अग्निरूप बिजुली के सदृश स्वयं प्रकाशित **(विष्णुः)** चर और अचर संसार में व्यापक परमात्मा **(गोपाः)** सबकी रक्षा करनेवाला परमेश्वर जिन **(परमम्)** उत्तम **(पाथः)** पृथिवी आदि अन्न और **(प्रिया)** कामना करने और सेवा करने योग्य **(अमृता)** नाश से रहित प्रकृति आदि और **(धामानि)** जन्म, स्थान और नाम को **(दधानः)** धारण और पुष्ट करता हुआ **(पाति)** रक्षा करता है, **(ता)** उन **(विश्वा)** सम्पूर्ण **(भुवनानि)** निवासस्थानों को **(वेद)** जानता है, उस **(देवानाम्)** पृथिवी आदिकों के मध्य में **(महत्)** व्यापक हुए **(एकम्)** द्वितीयरहित ब्रह्म **(असुरत्वम्)** सबके फेंकनेवाले को आप लोग जानो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो इस संसार का उत्पन्न, धारण, पालन और नाश करनेवाला है और सब जीवों के हित के लिये अनेक प्रकार के पदार्थों का निर्माण करता है, उस ही की आप लोग सेवा करो॥१०॥

नाना॑ चक्राते य॒म्या॒३॑ वपूं॑षि॒ तयो॑र॒न्यद्रोच॑ते कृ॒ष्णम॒न्यत्।
श्यावी॑ च॒ यदरु॑षी च॒ स्वसा॑रौ म॒हद्दे॒वाना॑मसुर॒त्वमेक॑म्॥११॥

नाना॑। च॒क्रा॒ते॒ इति॑। य॒म्या॑। वपूं॑षि। तयोः॑। अ॒न्यत्। रोच॑ते। कृ॒ष्णम्। अ॒न्यत्। श्यावी॑। च॒। यत्। अरु॑षी। च॒। स्वसा॑रौ। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥११॥

पदार्थः-**(नाना)** अनेकानि **(चक्राते)** कुरुतः **(यम्या)** या सर्वान् प्राणिनो निद्रया नियच्छति सा रात्रिः। **यम्येति रात्रिनामसु पठितम्।** (निघं०१.७) **(वपूंषि)** रूपाणि। **वपुरिति रूपनामसु पठितम्।** (निघं०३.७) **(तयोः)** **(अन्यत्)** **(रोचते)** प्रकाशते **(कृष्णम्)** निकृष्टवर्णं तमः **(अन्यत्)** द्वितीयमावृणोति **(श्यावी)** अन्धकाररूपा **(च)** **(यत्)** या **(अरुषी)** प्रकाशरूपोषा **(च)** **(स्वसारौ)** भगिन्याविव वर्त्तमाने **(महत्)** बृहत् **(देवानाम्)** पृथिव्यादीनां सकाशात् **(असुरत्वम्)** **(एकम्)**॥११॥

अन्वयः-हे मनुष्या! यद्देवानां महदेकमसुरत्वमस्ति तेन व्यवस्थापिते यत् या श्यावी यम्या चाऽरुषी स्वसाराविव वर्त्तमाने सत्यौ नाना वपूंषि चक्राते तयोरन्यदुषोरूपं रोचते च कृष्णमन्यद्रात्रिरूपमावृणोति तद् ब्रह्म विजानीत॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि परमेश्वरो भूमेः सूर्य्यस्य च भ्रमणस्य व्यवस्थां न कुर्य्यात्तर्हि रात्रिदिने कथं सम्भवेतां येन जगदीश्वरेण पुरुषार्थाय दिनं शयनाय शर्वरी निर्मिता तमीश्वरं हृदि सर्वे ध्यायन्तु॥११॥

पदार्थः–हे मनुष्यो! जो **(देवानाम्)** पृथिवी आदिकों के समीप से **(महत्)** बड़ा **(एकम्)** द्वितीयरहित **(असुरत्वम्)** दोषों को फेंकनेवाला है, उससे व्यवस्थापित **(यत्)** जो **(श्यावी)** अन्धकाररूप **(यम्या)** जो सम्पूर्ण प्राणियों को निद्रा से युक्त करती है, वह रात्रि **(च)** और **(अरुषी)** प्रकाशरूप प्रातःकाल **(स्वसारौ)** भगिनी के सदृश वर्त्तमान हुए **(नाना)** अनेक प्रकार के **(वपूंषि)** रूपों को **(चक्राते)** करते हैं **(तयोः)** उनका **(अन्यत्)** अन्य प्रातःकाल रूप **(रोचते)** प्रकाशित होता है **(च)** और **(कृष्णम्)** काला बे काम **(अन्यत्)** दूसरा वर्ण रात्रिरूप जो आवरण करता है, वह जिससे प्रसिद्ध उसको ब्रह्म जानो॥११॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो परमेश्वर पृथिवी और सूर्य्य के घूमने की व्यवस्था को न करे तो रात्रि और दिन कैसे होवें और जिस जगदीश्वर ने पुरुषार्थ के लिये दिन और शयन करने के लिये रात्रि रची उस ईश्वर का हृदय में सब ध्यान करो॥११॥

माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची।
ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम्॥१२॥

माता। च। यत्र। दुहिता। च। धेनू इति। सबर्दुघे इति सबः३दुघे। धापयेते इति। समीची इति सम्३ईची। ऋतस्य। ते इति। सदसि। ईळे। अन्तः। महत्। देवानाम्। असुरऽत्वम्। एकम्॥१२॥

पदार्थः–(**माता**) मान्यप्रदा जननीव रात्रिः (**च**) (**यत्र**) यस्मिन्त्समये (**दुहिता**) दुहितेवोषा (**च**) (**धेनू**) धेनुवद्रसप्रदे (**सबर्दुघे**) सबः पालकस्य दुग्धादेरिव रसस्य प्रपूरिके (**धापयेते**) पाययतः (**समीची**) सम्यक् प्राप्नुवत्यौ (**ऋतस्य**) जलस्येव सत्यस्य (**ते**) तव (**सदसि**) सभायाम् (**ईळे**) स्तौमि (**अन्तः**) मध्ये (**महत्**) (**देवानाम्**) सभ्यानां विदुषाम् (**असुरत्वम्**) (**एकम्**)॥१२॥

अन्वयः–हे राजन्नहं ते सदसि यथा यत्र माता च दुहिता च समीची सबर्दुघे धेनू ऋतस्य सम्बन्धेन धापयेते तथैव ते सदस्यन्तः स्थितस्सन्नृतस्य देवानाम्महदेकमसुरत्वमीळे॥१२॥

भावार्थः–ये सभ्या जना परमेश्वराद्धीत्वा तदाज्ञाऽनुसारेण यथा रात्रिदिवसौ सर्वस्य जगतो नियमेन पालकौ भवतस्तथैव सभायां धर्मस्य विजयेनाऽधर्मस्य पराजयेन प्रजा आनन्दयन्तु॥१२॥

पदार्थः–हे राजन्! मैं **(ते)** आपकी **(सदसि)** सभा में जैसे **(यत्र)** जिस समय **(माता)** मान को देनेवाली माता के सदृश रात्रि **(च)** और **(दुहिता)** कन्या के सदृश प्रातःकाल **(च)** और **(समीची)** उत्तम प्रकार प्राप्त होती हुई **(सबर्दुघे)** पालन करनेवाले दुग्ध आदि के सदृश रस की पूर्ति करने और **(धेनू)** धेनु के सदृश रस को देनेवाली **(ऋतस्य)** जल के सदृश सत्य के सम्बन्ध से **(धापयेते)** पिलाती हैं, वैसे ही सभा के **(अन्तः)** मध्य में वर्त्तमान हुआ **(ऋतस्य)** जल के सदृश सत्य का **(देवानाम्)** श्रेष्ठ विद्वानों में **(महत्)** बड़े **(एकम्)** द्वितीयरहित **(असुरत्वम्)** दोषों को दूर करनेवाले की **(ईळे)** स्तुति करता हूँ॥१२॥

भावार्थः-जो सभ्य जन परमेश्वर से डरके उसकी आज्ञा के अनुसार जैसे रात्रि और दिन सम्पूर्ण संसार के नियमपूर्वक पालनकर्त्ता होते हैं, वैसे ही सभा में धर्म के विजय और अधर्म के पराजय से प्रजाओं को आनन्दित करें॥१२॥

अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः।
ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकम्॥१३॥

अन्यस्याः। वत्सम्। रिहती। मिमाय। कया। भुवा। नि। दधे। धेनुः। ऊधः। ऋतस्य। सा। पयसा। अपिन्वत। इळा। महत्। देवानाम्। असुरऽत्वम्। एकम्॥१३॥

पदार्थः-(**अन्यस्याः**) द्वयोर्मध्य एकतरस्याः (**वत्सम्**) वत्सवत्पालनीयम् (**रिहती**) घ्नन्ती (**मिमाय**) मिमीते (**कया**) (**भुवा**) पृथिव्या (**नि**) (**दधे**) निदधाति (**धेनुः**) गोवद्वर्त्तमाना (**ऊधः**) उषा (**ऋतस्य**) सत्यस्य (**सा**) (**पयसा**) दुग्धेनेव जलेन (**अपिन्वत**) सिञ्चति सेवते वा (**इळा**) पृथिवी। **इळेति पृथिवीनामसु पठितम्।** (निघं०१.१) (**महत्**) (**देवानाम्**) दिव्यानां पृथिव्यादीनाम् (**असुरत्वम्**) (**एकम्**)॥१३॥

अन्वयः-हे मनुष्या! देवानां मध्ये यन्महदेकमसुरत्वं वर्त्तते तेन नियुक्ता धेनुरिव रात्रिरूधश्चाऽन्यस्या वत्सं रिहती कया भुवा सह मिमाय या निदधे सर्त्तस्य पयसा सहेळापिन्वत॥१३॥

भावार्थः-हे मनुष्या! यः परमात्मा रात्रिदिनाभ्यां पृथिवीस्थान् पदार्थाञ्शयनजागरणार्थाभ्यां प्रकाशाऽन्धकाराभ्यां वृष्ट्या च धेनुवद्रक्षति तमेवार्चत॥१३॥

पदार्थः-हे मनुष्यो! (**देवानाम्**) उत्तम पृथिवी आदिकों के मध्य में जो (**महत्**) बड़ा (**एकम्**) द्वितीयरहित (**असुरत्वम्**) दोषों को दूर करनेवाला वर्त्तमान है, उससे युक्त (**धेनुः**) गौ के सदृश वर्त्तमान रात्रि और (**ऊधः**) प्रातःकाल (**अन्यस्याः**) दोनों के मध्य में किसी के (**वत्सम्**) बछड़े के सदृश पालन करने योग्य को (**रिहती**) नाश करती हुई (**कया**) किस (**भुवा**) पृथिवी के साथ (**मिमाय**) नापती है जो (**नि, दधे**) धारण करती है (**सा**) वह (**ऋतस्य**) सत्य के (**पयसा**) दुग्ध के सदृश जल के साथ (**इळा**) पृथिवी (**अपिन्वत**) सींचती वा सेवन करती है॥१३॥

भावार्थः-हे मनुष्यो! जो परमात्मा रात्रि और दिन से पृथिवी में वर्त्तमान पदार्थों को शयन और जागरण प्रयोजन जिनका उन प्रकाश और अन्धकार तथा वृष्टि से गौ के सदृश रक्षा करता है, उस ही की पूजा करो॥१३॥

पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा।
ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकम्॥१४॥

पद्या॑। व॒स्ते॒। पु॒रु॒ऽरू॒पा॑। व॒पूं॑षि। ऊ॒र्ध्वा। त॒स्थौ॒। त्रि॒ऽअवि॑म्। रेरि॑हाणा। ऋ॒तस्य॑। सद्म॑। वि। च॒रा॒मि॒। वि॒द्वान्। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥ १४॥

पदार्थः-(**पद्या**) पादेष्वंशेषु भवा (**वस्ते**) आच्छादयति (**पुरुरूपा**) बहुरूपा (**वपूंषि**) रूपाणि (**ऊर्ध्वा**) उत्कृष्टा (**तस्थौ**) तिष्ठति (**त्र्यविम्**) कार्य्यकारणजीवाख्यानि त्रीणि वस्तूनि यो रक्षति तम् (**रेरिहाणा**) भृशं लिहन्ती (**ऋतस्य**) सत्यस्य (**सद्म**) गृहम् (**वि**) (**चरामि**) (**विद्वान्**) (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥ १४॥

अन्वयः-हे मनुष्या! विद्वानहं यदृतस्य देवानां च महदेकं सद्मासुरत्वं वि चरामि तेन नियामिता पद्या रात्रिः सर्वान् वस्ते। अन्या त्र्यविं वपूंषि रेरिहाणोर्ध्वा पुरुरूपोषा तस्थौ तं ते यूयञ्च विजानीत॥ १४॥

भावार्थः-हे मनुष्या! यथा दिनं विचित्राणि दर्शयति तथैव रात्रिः सर्वाण्याच्छादयति इम एव सत्यकारणादुत्पद्यमानजन्ये विदित्वा सर्वस्य निर्मातारमीशं च सुखेन विचरन्तु [=विजानन्तु]॥ १४॥

पदार्थः-हे मनुष्यो! (**विद्वान्**) विद्यायुक्त मैं जो (**ऋतस्य**) सत्य और (**देवानाम्**) विद्वानों में (**महत्**) बड़े (**एकम्**) द्वितीयरहित (**सद्म**) स्थान और (**असुरत्वम्**) दोषों के दूर करनेवाले को (**वि, चरामि**) प्राप्त होता हूँ, उससे नियमित (**पद्या**) अंशों में होनेवाली रात्रि सब को (**वस्ते**) आच्छादित करती घेरती है (**अन्या**) (**त्र्यविम्**) कार्य्य, कारण और जीवनामात्मक तीन वस्तुओं की रक्षा करनेवाले और (**वपूंषि**) रूपों को (**रेरिहाणा**) अत्यन्त चाटती हुई (**ऊर्ध्वा**) उत्तम (**पुरुरूपा**) बहुत रूपयुक्त प्रातःकाल (**तस्थौ**) स्थित है, उसको वे और आप लोग जानें॥ १४॥

भावार्थः-हे मनुष्यो! जैसे दिन अनेक रूपों को दिखाता है, वैसे ही रात्रि सबको घेरती है, ये ही सत्य के कारण से उत्पन्न हुए और उत्पन्न होनेवाले को जानकर सबके बनानेवाले परमेश्वर को सुखपूर्वक जानो॥ १४॥

प॒दे इ॑व॒ निहि॑ते दु॒स्मे अ॒न्तस्तयो॑र॒न्यद् गुह्यं॑मा॒वि॒र॒न्यत्।
स॒ध्री॒ची॒ना प॒थ्या॒३॑ सा विषू॑ची म॒हद्दे॒वानां॑मसु॒र॒त्वमेक॑म्॥ १५॥ ३०॥

प॒देऽइ॒वेति॑ प॒देऽइ॑व। निहि॑ते॒ इति॒ निऽहि॑ते। दु॒स्मे। अ॒न्तरिति॑। तयो॑ः। अ॒न्यत्। गुह्य॑म्। आ॒विः। अ॒न्यत्। स॒ध्री॒ची॒ना। प॒थ्या॑। सा। विषू॑ची। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥ १५॥

पदार्थः-(**पदेइव**) यथा पादौ तथा (**निहिते**) धृते (**दस्मे**) उपक्षयित्र्यौ (**अन्तः**) मध्ये (**तयोः**) (**अन्यत्**) (**गुह्यम्**) गुप्तम् (**आविः**) रक्षकम् (**अन्यत्**) (**सध्रीचीना**) सहाञ्चन्ती (**पथ्या**) पथोऽनपेता स्वकक्षां विहायाऽन्यत्रागन्त्री (**सा**) (**विषूची**) या विषून् व्याप्तानञ्चति सा (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥ १५॥

अन्वयः-हे मनुष्या! देवानां यन्महदेकमसुरत्वमस्ति येन दस्मे पदेइव निहिते रात्रिदिने वर्त्तेते यान्या सध्रीचीना पथ्या सा विषूची वर्त्तेते तयोरन्तरन्यद्गुह्यमन्यच्चाविरस्ति तत्सर्वं विजानीत॥१५॥

भावार्थः-अत्रोपमालङ्कारः। यथा मनुष्या द्वाभ्यां पादाभ्यां गच्छन्ति तथैव रात्रिदिने गच्छतः। यथा दिनं पथ्यमस्ति तथा रात्रिः पथ्या न भवति। एवं सर्वान्तर्य्यामि ब्रह्म विहायान्यदुपासितं पथ्यं न जायते॥१५॥

पदार्थः-हे मनुष्यो! **(देवानाम्)** विद्वानों का जो **(महत्)** बड़ा **(एकम्)** द्वितीयरहित **(असुरत्वम्)** दोषों को दूर करनेवाला है और जिससे **(दस्मे)** नाश होनेवाले **(पदेइव)** पैरों के सदृश **(निहिते)** धारण किये गये रात्रि और दिन वर्त्तमान हैं, जो अन्य **(सध्रीचीना)** एक साथ सेवन करती हुई **(पथ्या)** अपनी कक्षा को त्याग के अन्यत्र नहीं जानेवाली **(सा)** वह **(विषूची)** व्याप्त पदार्थों का सेवन करती है **(तयोः)** उनके **(अन्तः)** मध्य में **(अन्यत्)** दूसरा **(गुह्यम्)** गुप्त **(अन्यत्)** अन्य **(आविः)** रक्षा करनेवाला है, उस सबको जानो॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मनुष्य लोग दो पैरों से चलते हैं, वैसे ही रात्रि और दिन चलते हैं और जैसे दिन पथ्य है, वैसे रात्रि पथ्य नहीं होती है। इसी प्रकार सर्वान्तर्यामी ब्रह्म को त्याग करके अन्य उपासित हुआ पथ्य नहीं होता है॥१५॥

आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः।
नव्यानव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम्॥१६॥

आ। धेनवः। धुनयन्ताम्। अशिश्वीः। सबः३दुघाः। शशयाः। अप्र३दुग्धाः। नव्याः३नव्याः। युवतयः। भवन्तीः। महत्। देवानाम्। असुर३त्वम्। एकम्॥१६॥

पदार्थः-**(आ)** समन्तात् **(धेनवः)** वाचः **(धुनयन्ताम्)** कम्पन्ताम् **(अशिश्वीः)** अबालाः **(सबर्दुघाः)** सर्वान् कामान् प्रपूरिकाः **(शशयाः)** शयाना इव **(अप्रदुग्धाः)** न केनापि प्रकर्षतया दुग्धाः **(नव्यानव्याः)** नवीनानवीनाः **(युवतयः)** प्राप्तयौवनावस्था ब्रह्मचारिण्यः **(भवन्तीः)** भवन्त्यः **(महत्) (देवानाम्) (असुरत्वम्) (एकम्)**॥१६॥

अन्वयः-हे मनुष्या! युष्माकं सबर्दुघाः शशया अप्रदुग्धा धेनवो अशिश्वीर्नव्यानव्या भवन्ती-र्युवतय इव देवानां महदेकमसुरत्वमाधुनयन्ताम्॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रथमे वयसि वर्त्तमाना अधीतविद्या अबाला ब्रह्मचारिण्यः स्वसदृशान् पतीनुपनीया३नन्दन्ति तथैव सर्वविद्यायुक्ता वाचो प्राप्य विद्वांसः सुखयन्ति॥१६॥

पदार्थः-हे मनुष्यो! आप लोगों के (**सबर्दुघाः**) सब मनोरथों को पूर्ण करनेवाली (**शशयाः**) शयन करती सी हुईं (**अप्रदुग्धाः**) नहीं किसी करके भी बहुत दुही गईं (**धेनवः**) वाणियां (**अशिश्वीः**) बालाओं से भिन्न (**नव्यानव्याः**) नवीन-नवीन (**भवन्तीः**) होती हुईं (**युवतयः**) यौवनावस्था को प्राप्त ब्रह्मचारिणी स्त्रियाँ जैसे वैसे (**देवानाम्**) विद्वानों में (**महत्**) बड़े (**एकम्**) द्वितीयरहित (**असुरत्वम्**) दोषों के दूर करनेवाले को (**आ, धुनयन्ताम्**) अच्छे प्रकार कंपाइये॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रथम अवस्था में वर्त्तमान विद्या पढ़ी हुई बालाभिन्न ब्रह्मचारिणी स्त्रियाँ अपने सदृश पतियों को प्राप्त होकर आनन्दित होती हैं, वैसे ही सर्व विद्याओं से युक्त वाणियों को प्राप्त होकर विद्वान् लोग सुखी होते हैं॥१६॥

यदु॒न्यासु॑ वृष॒भो रोर॑वीति॒ सो अ॒न्यस्मि॑न् यू॒थे नि द॑धाति॒ रेत॑ः।
स हि क्षपा॑वा॒न्त्स भग॒ः स राजा॑ म॒हद्दे॒वाना॑मसुर॒त्वमेक॑म्॥ १७॥

यत्। अ॒न्यासु॑। वृ॒ष॒भ॒ः। रोर॑वीति। सः। अ॒न्यस्मि॑न्। यू॒थे। नि। द॒धा॒ति॒। रेत॑ः। सः। हि। क्षपा॑ऽवान्। सः। भग॑ः। सः। राजा॑। म॒हत्। दे॒वाना॑म्। अ॒सु॒र॒ऽत्वम्। एक॑म्॥ १७॥

पदार्थः-(**यत्**) यः (**अन्यासु**) रात्रिषूषःसु च (**वृषभः**) बलिष्ठः (**रोरवीति**) भृशं शब्दयति (**सः**) (**अन्यस्मिन्**) (**यूथे**) समूहे (**नि**) (**दधाति**) (**रेतः**) वीर्य्यम् (**सः**) (**हि**) यतः (**क्षपावान्**) क्षपा रात्रिः सम्बन्धिनी यस्य सः चन्द्रः (**सः**) (**भगः**) ऐश्वर्य्यप्रदः सूर्य्यः (**सः**) (**राजा**) प्रकाशमानः (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥१७॥

अन्वयः-यद्यो वृषभः सूर्य्योऽन्यासु रात्रिषूषःसु च रोरवीति सोऽन्यस्मिन् यूथे चन्द्रादिषु रेतो निदधाति हि यतस्स क्षपावान्तस्सभगस्स राजा देवानां महदेकमसुरत्वं प्राप्यं भवति॥१७॥

भावार्थः-हे मनुष्या! यः सूर्य्यो रात्र्यन्ते दिनादौ सर्वान् प्राणिनो जजागरित्वा संशब्द्य व्यवहार्य्य श्रीः प्रापयति रात्रौ च चन्द्रादिषु किरणान् प्रक्षिप्य प्रकाशयति सोऽयं प्रकाशमानो जगदीश्वरेणोत्पादित इति वेद्यम्॥१७॥

पदार्थः-(**यत्**) जो (**वृषभः**) बलयुक्त सूर्य्य (**अन्यासु**) रात्रि और प्रातःकालों में (**रोरवीति**) अत्यन्त शब्द करता है (**सः**) वह (**अन्यस्मिन्**) अन्य (**यूथे**) समूह में चन्द्र आदिकों में (**रेतः**) पराक्रम का (**निदधाति**) स्थापना करता है। (**हि**) जिससे कि (**सः**) वह (**क्षपावान्**) रात्रिवान् अर्थात् रात्रि जिसकी सम्बन्धिनी होती और (**सः**) वह (**भगः**) ऐश्वर्य्यों का दाता सूर्य्य तथा (**सः**) वह (**राजा**) प्रकाशमान होता (**देवानाम्**) विद्वानों में (**महत्**) बड़ा (**एकम्**) एक यह (**असुरत्वम्**) दोषों को दूर करनेवाला प्राप्त होने योग्य गुण होता है॥१७॥

भावार्थः-हे मनुष्यो! जो सूर्य्य रात्रि के अन्त और दिन के आदि में सब प्राणियों को निरन्तर

जगाय के शब्द कराय और व्यवहार कराय के लक्ष्मियों को प्राप्त कराता है और रात्रि में चन्द्र आदिकों में किरणों को रख के प्रकाश कराता सो यह प्रकाशमान जगदीश्वर से उत्पन्न किया गया, ऐसा जानना चाहिये॥१७॥

अथेश्वरगुणानाह॥

अब ईश्वर के गुणों का वर्णन अगले मन्त्र में करते हैं॥

वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः।
षोळ्हा युक्ताः पञ्चपञ्चा वहन्ति महद्देवानामसुरत्वमेकम्॥१८॥

वीरस्य। नु। सुऽअश्व्यम्। जनासः। प्र। नु। वोचाम। विदुः। अस्य। देवाः। षोळ्हा। युक्ताः। पञ्चऽपञ्च। आ। वहन्ति। महत्। देवानाम्। असुरऽत्वम्। एकम्॥१८॥

पदार्थः-(**वीरस्य**) प्राप्तशौर्य्यादिगुणस्य (**नु**) सद्यः (**स्वश्व्यम्**) शोभनेष्वश्वेषु साधु वचः (**जनासः**) विद्यासु प्रादुर्भूताः (**प्र**) (**नु**) (**वोचाम**) उपदिशाम (**विदुः**) जानन्ति (**अस्य**) (**देवाः**) विद्वांसः (**षोढा**) षट् प्रकाराः (**युक्ताः**) (**पञ्चपञ्च**) (**आ**) (**वहन्ति**) प्राप्नुवन्ति (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥१८॥

अन्वयः-हे जनासो वयमस्य वीरस्य स्वश्व्यं नु प्रवोचाम ये युक्ताः देवा देवानां महदेकमसुरत्वं विदुर्ये षोढा युक्ताः पञ्चपञ्च यदा वहन्ति तद्विदुस्तान् प्रति वयमेतद् ब्रह्म नु वोचाम॥१८॥

भावार्थः-हे मनुष्या! यस्य प्राप्तौ पञ्च प्राणा निमित्तं यं सर्वे योगिनः समाधिना जानन्ति तस्यैवोपासनं भृत्यानां वीरत्वजनकमस्तीति वयमुपदिशेम॥१८॥

पदार्थः-हे (**जनासः**) विद्याओं में प्रकट हुए मनुष्यो! हम (**अस्य**) इस (**वीरस्य**) शौर्य्य आदि गुणों को प्राप्त हुए शूर को (**स्वश्व्यम्**) अति उत्तम अश्वविषयक अच्छे वचन का (**नु**) शीघ्र (**प्र, वोचाम**) उपदेश देवें जो (**युक्ता!**) संयुक्त हुए (**देवाः**) विद्वान् जन (**देवानाम्**) विद्वानों में (**महत्**) बड़े (**एकम्**) एक (**असुरत्वम्**) दोषों को दूर करने को (**विदुः**) जानते और जो (**षोढा**) छः प्रकार की संयुक्त इन्द्रियां और (**पञ्चपञ्च**) पाँच-पाँच प्राण जिस विषय को (**आ, वहन्ति**) प्राप्त होते हैं, उसको जानते हैं, उनके प्रति हम लोग इस ब्रह्म का (**नु**) शीघ्र उपदेश देवें॥१८॥

भावार्थः-हे मनुष्यो! जिसकी प्राप्ति में पाँच प्राण निमित्त और जिसको सब योगी लोग समाधि से जानते हैं, उसी की उपासना भृत्यों के वीरपन को उत्पन्न करनेवाली है, ऐसा हम लोग उपदेश देवें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवस्त्वष्टा सविता विश्वरूपः पुपोषा प्रजाः पुरुधा जजान।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम्॥ १९॥

देवः। त्वष्टा। सविता। विश्वऽरूपः। पुपोष। प्रऽजाः। पुरुधा। जजान। इमा। च। विश्वा। भुवनानि। अस्य। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ १९॥

पदार्थः-(**देवः**) देदीप्यमानः (**त्वष्टा**) प्रकाशकः (**सविता**) प्रेरकः (**विश्वरूपः**) विश्वानि रूपाणि यस्मात् सः (**पुपोष**) पुष्यति (**प्रजाः**) प्रजाताः (**पुरुधा**) बहुधा (**जजान**) जनयति (**इमा**) इमानि (**च**) (**विश्वा**) सर्वाणि (**भुवनानि**) लोकजातानि (**अस्य**) परमेश्वरस्य (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥ १९॥

अन्वयः-हे मनुष्या! यस्त्वष्टा परमेश्वरो देवो विश्वरूपः सवितेव प्रजाः पुपोष इमा विश्वा भुवनानि च पुरुधा जजानास्येदमेव देवानां महदेकमसुरत्वमस्तीति वेद्यम्॥ १९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यः सर्वं जगत्पालयति तथैव जगदीश्वरः सूर्य्यादिकं बहुविधं जगन्निर्माय रक्षति। इदमेव परमात्मनो महदाश्चर्य्यं कर्माऽस्तीति बोध्यम्॥ १९॥

पदार्थः-हे मनुष्यो! जो (**त्वष्टा**) प्रकाश करनेवाला परमेश्वर (**देवः**) प्रकाशमान (**विश्वरूपः**) जिससे सम्पूर्ण रूप हैं ऐसे (**सविता**) प्रेरणा करनेवाले सूर्यमण्डल के सदृश (**प्रजाः**) उत्पन्न हुए प्राणी-अप्राणी को (**पुपोष**) पुष्ट करता है और (**इमा**) इन (**विश्वा**) सम्पूर्ण (**भुवनानि**) लोकों को (**च**) भी (**पुरुधा**) बहुत प्रकार से (**जजान**) उत्पन्न करता है (**अस्य**) इस परमेश्वर का यही (**देवानाम्**) विद्वानों के बीच (**महत्**) बड़ा (**एकम्**) एक (**असुरत्वम्**) दोषों को दूर करनेवाला गुण है, ऐसा जानना चाहिये॥ १९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य जगत् का पालन करता है, वैसे ही जगदीश्वर सूर्य्य आदि अनेक प्रकार संसार को बनाय करके रक्षा करता है। यही परमात्मा का बड़ा आश्चर्य्य कर्म है, ऐसा जानना चाहिये॥ १९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

महीं समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे।
शृण्वे वीरो विन्दमानो वसूनि महद्देवानामसुरत्वमेकम्॥ २०॥

महीं इति। सम्। ऐरत्। चम्वा। समीची इति सम्ऽईची। उभे इति। ते इति। अस्य। वसुना। न्यृष्टे इति निऽऋष्टे। शृण्वे। वीरः। विन्दमानः। वसूनि। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ २०॥

पदार्थः-(**मही**) महत्यौ (**सम्**) (**ऐरत्**) प्रेरयति (**चम्वा**) सनयेव (**समीची**) सम्यक् प्राप्ते (**उभे**) (**ते**) (**अस्य**) (**वसुना**) द्रव्यैस्सह (**न्यृष्टे**) निश्चितं स्वरूपं प्राप्ते (**शृण्वे**) (**वीरः**) विद्यमानबलः (**विन्दमानः**) प्राप्नुवन् (**वसूनि**) धनानि (**महत्**) (**देवानाम्**) (**असुरत्वम्**) (**एकम्**)॥२०॥

अन्वयः-हे मनुष्या! यो जगदीश्वरस्त उभे मही समीची द्यावापृथिव्यौ चम्वेव समैरदस्य वसुना सह न्यृष्टे स्तस्तद्देवानां महदेकमसुरत्वं वसूनि च विन्दमानो वीरोऽहं ब्रह्म नित्यं शृण्वे तद्यूयमपि सततं श्रुत्वैतानि प्राप्नुत॥२०॥

भावार्थः-नहि कश्चिदपि परमेश्वराज्ञापालनेन विना महदैश्वर्यं लभते न चाप्तेभ्यः श्रवणादिना विना परमात्मनो बोधः कञ्चिदाप्नोति तत्सर्वैः परमेश्वराज्ञां पालयित्वैश्वर्य्यवद्भिर्भवितव्यम्॥२०॥

पदार्थः-हे मनुष्यो! जो जगदीश्वर (**ते**) उन (**उभे**) दोनों (**मही**) बड़ी (**समीची**) उत्तम प्रकार प्राप्त अन्तरिक्ष और पृथिवी को (**चम्वा**) सेना से जैसे वैसे (**सम्, ऐरत्**) प्रेरणा करता है, वह दोनों (**अस्य**) इसके (**वसुना**) द्रव्यों के साथ (**न्यृष्टे**) निश्चित स्वरूप को प्राप्त हुई हैं (**देवानाम्**) विद्वानों के उस (**महत्**) बड़े (**एकम्**) एक (**असुरत्वम्**) दोषों के दूर करनेवाले को और (**वसूनि**) धनों को (**विन्दमानः**) प्राप्त होता हुआ (**वीरः**) बल से युक्त मैं ब्रह्म का नित्य (**शृण्वे**) श्रवण करूं, उसको आप लोग भी निरन्तर सुनके उन सबों को प्राप्त हूजिये॥२०॥

भावार्थः-कोई भी पुरुष परमेश्वर की आज्ञापालन के विना बड़े ऐश्वर्य्य को नहीं प्राप्त होता है और यथार्थवक्ता पुरुषों से सुने विना परमात्मा का बोध किसी को भी नहीं प्राप्त होता है, तिससे सब लोगों को चाहिये कि परमेश्वर की आज्ञा का पालन करके ऐश्वर्य्यवान् होवें॥२०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒मां च॑ नः पृथि॒वीं वि॒श्वधा॑या॒ उप॑ क्षेति हि॒तमि॑त्रो॒ न राजा॑।

पु॒रः सद॑ः शर्म॒सदो॒ न वी॒रा म॒हद्दे॒वाना॑मसु॒रत्वमेक॑म्॥२१॥

इ॒माम्। च॒। नः॒। पृ॒थि॒वीम्। वि॒श्वऽधा॑याः। उप॑। क्षे॒ति॒। हि॒तऽमि॑त्रः। न। राजा॑। पु॒रः॒ऽसद॑ः। श॒र्म॒ऽसद॑ः। न। वी॒राः। म॒हत्। दे॒वाना॑म्। अ॒सु॒रऽत्वम्। एक॑म्॥२१॥

पदार्थः-(**इमाम्**) (**च**) (**नः**) अस्मान् (**पृथिवीम्**) (**विश्वधायाः**) या विश्वं दधाति तस्याः (**उप**) (**क्षेति**) उपवसति (**हितमित्रः**) हितानि धृतानि मित्राणि येन सः (**न**) इव (**राजा**) विद्याविनयाभ्यां प्रकाशमानः (**पुरःसदः**) ये पुरः सीदन्ति ते (**शर्मसदः**) ये शर्मणि गृहे सीदन्ति ते (**न**) इव (**वीराः**)

क्षात्रधर्मयुक्ताः **(महत्)** **(देवानाम्)** देदीप्यमानानां राज्ञाम् **(असुरत्वम्)** शत्रूणां प्रक्षेप्तृत्वम् **(एकम्)** असहायम्॥ २१॥

अन्वयः–हे मनुष्या! यो न इमां द्यां पृथिवीं च विश्वधाया हितमित्रो राजा न उप क्षेति पुरःसदः शर्मसदो वीरा न विजयं ददाति तदेव देवानां महदेकमसुरत्वमस्माभिरुपासनीयमस्ति॥ २१॥

भावार्थः–अत्रोपमालङ्कारः। हे मनुष्या! यो धर्मात्मराजवज्जगति निवासयति धनुर्वेदविद्वीरवद्विजयं दापयति तदेव ब्रह्माऽस्माकमुपास्यमस्तीति॥ २१॥

पदार्थः–हे मनुष्यो! जो **(नः)** हम लोगों के **(इमाम्)** इस अन्तरिक्ष **(च)** और **(पृथिवीम्)** भूमि को समीप **(विश्वधायाः)** सम्पूर्ण को धारण करनेवाली पृथिवी उसके **(हितमित्रः)** मित्रों को धारण करनेवाले **(राजा)** विद्या और विनय से प्रकाशमान अधिपति से **(न)** सदृश **(उप, क्षेति)** वसता है और **(पुरःसद)** आगे चलने और **(शर्मसदः)** गृह में ठहरनेवाले **(वीराः)** क्षात्रधर्म से युक्त शूरों के **(न)** तुल्य विजय देता है, वही **(देवानाम्)** प्रकाशमान राजा लोगों में **(महत्)** बड़ा **(एकम्)** सहायरहित **(असुरत्वम्)** शत्रुओं को दूर करनेवाला हम लोगों से उपासना करने योग्य है॥ २१॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो धर्मात्मा राजा के सदृश संसार में निवास कराता और धनुर्वेद के जाननेवाले वीर के सदृश विजय दिलाता है, वही ब्रह्म हम लोगों को उपासना करने योग्य है॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

निष्षिध्वरीस्त ओषधीरुतापो रयिं त इन्द्र पृथिवी बिभर्ति।
सखायस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकम्॥ २२॥ ३१॥ ३॥

निःऽसिध्वरीः। ते। ओषधीः। उत। आपः। रयिम्। ते। इन्द्र। पृथिवी। बिभर्ति। सखायः। ते। वामऽभाजः। स्याम। महत्। देवानाम्। असुरऽत्वम्। एकम्॥ २२॥

पदार्थः–**(निष्षिध्वरीः)** नितरां मङ्गलकारिणीः **(ते)** तव **(ओषधीः)** सोमाद्याः **(उत)** अपि **(आपः)** जलानि **(रयिम्)** श्रियम् **(ते)** तव **(इन्द्र)** परमैश्वर्य्यप्रदेश्वर **(पृथिवी)** **(बिभर्ति)** धरति पुष्यति वा **(सखायः)** सुहृदः सन्तः **(ते)** तव **(वामभाजः)** प्रशस्तकर्मसेविनश्श्रेष्ठभोगा वा **(स्याम)** **(महत्)** सर्वेभ्यो बृहत् **(देवानाम्)** सूर्य्यादीनाम् **(असुरत्वम्)** **(एकम्)** अद्वितीयम्॥ २२॥

अन्वयः–हे इन्द्र! यथा ते सृष्टौ पृथिवी निष्षिध्वरी ओषधीर्बिभर्ति। उतापि त आपो रयिं बिभर्ति तदेव देवानाम्महदेकमसुरत्वं प्राप्य ते वामभाजः सखायो वयं स्याम॥ २२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे जगदीश्वर! येन भवताऽस्माकं सुखाय सृष्ट्यां विविधा ओषधय आपो निर्मितास्तस्य ते वयमुपासका भवेम। भवन्तं विहायाऽन्यस्योपासनं कदाचिन्न कुर्य्यामेति॥ २२॥

अत्राऽहर्निशविद्वद्द्यावापृथिवीराजधर्मेश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृक् संहितायां तृतीयाष्टके तृतीयोऽध्याय एकत्रिंशो वर्गस्तृतीये मण्डले पञ्चपञ्चाशत्तमं सूक्तञ्च समाप्तम्॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देनेवाले ईश्वर! जैसे **(ते)** आपकी सृष्टि में **(पृथिवी)** भूमि **(निष्षिध्वरीः)** अत्यन्त मङ्गल करनेवाली **(ओषधीः)** सोमलता आदि ओषधियों को **(बिभर्ति)** धारण वा पोषण करती है **(उत)** और **(ते)** आपके **(आपः)** जल **(रयिम्)** लक्ष्मी को धारण करते हैं उसी **(देवानाम्)** सूर्य्य आदिकों में **(महत्)** सबसे बड़े **(एकम्)** द्वितीयरहित **(असुरत्वम्)** शत्रुओं के नाश करनेवाले को प्राप्त होकर **(ते)** आपके **(वामभाजः)** उत्तम कर्मों के सेवन करने वा श्रेष्ठ भोग भोगनेवाले **(सखायः)** मित्र हम लोग **(स्याम)** होवें॥ २२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे जगदीश्वर! जिन आपने हम लोगों के सुख के लिये सृष्टि में अनेक प्रकार की ओषधियां और जल रचे उन आपके हम लोग उपासना करनेवाले होवें और आपको छोड़ के दूसरे की उपासना कभी न करें॥ २२॥

इस सूक्त में दिन, रात्रि, विद्वान्, अन्तरिक्ष, पृथिवी, राजधर्म और ईश्वर के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ऋग्वेद की संहिता के तीसरे अष्टक में तीसरा अध्याय इकतीसवां वर्ग और तीसरे मण्डल में पचपनवां सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथ तृतीयाऽष्टके चतुर्थाऽध्यायाऽऽरम्भः॥

अब तृतीयाष्टक में चौथे अध्याय का आरम्भ है॥

ओं विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथाऽष्टर्चस्य षट्पञ्चाशत्तमस्य सूक्तस्य प्रजापतिर्वैश्वामित्रो वाच्यो वा ऋषयः। विश्वे देवा देवताः। १, ६, ८ निचृत्त्रिष्टुप्। ३,४ विराट् त्रिष्टुप्। ५, ७ त्रिष्टुप् छन्दः। धैवतः स्वरः। २ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेश्वरगुणानाह॥

अब छप्पनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में ईश्वर के गुणों को कहते हैं॥

न ता मि॑नन्ति मा॒यिनो॒ न धीरा॑ व्र॒ता दे॒वानां॑ प्रथ॒मा ध्रु॒वाणि॑।
न रोद॑सी अ॒द्रुहा॑ वे॒द्याभि॒र्न पर्व॑ता॒ नि॒नमे॑ तस्थि॒वांस॑:॥ १॥

न। ता। मि॒न॒न्ति॒। मा॒यिन॑:। न। धीरा॑:। व्र॒ता। दे॒वाना॑म्। प्र॒थ॒मा। ध्रु॒वाणि॑। न। रोद॑सी॒ इति॑। अ॒द्रुहा॑। वे॒द्याभि॑:। न। पर्व॑ता:। नि॒ऽनमे॑। त॒स्थि॒ऽवांस॑:॥ १॥

पदार्थः-(**न**) (**ता**) तानि (**मिनन्ति**) हिंसन्ति (**मायिनः**) निन्दिता माया प्रज्ञा येषान्ते (**न**) (**धीराः**) ध्यानवन्तः श्रेष्ठाः (**व्रता**) उत्तमानि कर्माणि (**देवानाम्**) आप्तानां विदुषाम् (**प्रथमा**) आदिमानि (**ध्रुवाणि**) अखण्डितानि (**न**) (**रोदसी**) द्यावापृथिव्यौ (**अद्रुहा**) द्रोहरहितावध्यापकोपदेशकौ (**वेद्याभिः**) वेत्तुं योग्याभिः प्रजाभिः (**न**) निषेधे (**पर्वताः**) शैलाः (**निनमे**) नमनीये स्थाने (**तस्थिवांसः**) तिष्ठन्तः॥ १॥

अन्वयः-हे मनुष्या! ईश्वरेण देवानां यानि प्रथमा ध्रुवाणि व्रतोपदिष्टानि निर्मितानि वा ता मायिनो न मिनन्ति धीरा न मिनन्ति रोदसी न मिनुतोऽद्रुहा न मिनुतो वेद्याभिस्सह निनमे वर्त्तमानास्तस्थिवांसः पर्वताश्च न मिनन्ति तानि यूयं विदित्वाचरत॥ १॥

भावार्थः-नहि कस्यापि शक्तिरस्ति य ईश्वरकृतान्नियमानुल्लङ्घेत यस्य निर्भ्रमानि शन्तमाणि कर्माणि सन्ति तमेव दयानिधिं परमेश्वरं सर्व उपासीरन्॥ १॥

पदार्थः-हे मनुष्यो! ईश्वर ने (**देवानाम्**) यथार्थवादी विद्वानों के जो (**प्रथमा**) आदि में वर्त्तमान (**ध्रुवाणि**) अखण्डित (**व्रता**) उत्तम कर्म उपदेश किये गये वा रचे गये (**ता**) उनका (**मायिनः**) निन्दित बुद्धिवाले (**न**) नहीं (**मिनन्ति**) नाश करते हैं (**धीराः**) ध्यान करनेवाले श्रेष्ठ पुरुष नहीं नाश करते हैं (**रोदसी**) अन्तरिक्ष और पृथिवी (**न**) नहीं नाश करते हैं (**अद्रुहा**) द्रोह से रहित अध्यापक और उपदेशक (**न**) नहीं नाश करते हैं (**वेद्याभिः**) जानने के योग्य प्रजाओं के साथ (**निनमे**) नवने के योग्य स्थान में

(तस्थिवांसः) स्थित होते हुए **(पर्वताः)** पर्वत **(न)** नहीं नाश करते हैं, उनको आप जानके आचरण करो॥१॥

भावार्थः-किसी का भी सामर्थ्य नहीं है कि जो ईश्वर के किये हुए नियमों का उल्लङ्घन करे और जिस परमेश्वर के भ्रमरहित सुखरूप कर्म हैं, उसी दयानिधि परमेश्वर की सब लोग उपासना करो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

षड्भा॒राँ एको॒ अच॑रन् बिभर्त्यृ॒तं वर्षि॑ष्ठमुप॒ गाव॒ आगु॑:।
ति॒स्रो म॒हीरुप॑रास्तस्थु॒रत्या॒ गुहा॒ द्वे निहि॑ते॒ दर्श्येका॑॥२॥

षट्। भा॒रान्। एक॑:। अच॑रन्। बि॒भ॒र्ति॒। ऋ॒तम्। वर्षि॑ष्ठम्। उप॑। गाव॑:। आ। अ॒गु॒:। ति॒स्र:। म॒ही:। उप॑रा:। त॒स्थु॒:। अत्या॑:। गुहा॑। द्वे इति॑। निहि॑ते॒ इति॒ निऽहि॑ते। दर्शि॑। एका॑॥२॥

पदार्थः-**(षट्)** **(भारान्)** पञ्चतत्त्वानि महत्तत्वञ्च **(एकः)** स्थिरः **(अचरन्)** **(बिभर्ति)** धरति पुष्यति वा **(ऋतम्)** सत्यं कारणम् **(वर्षिष्ठम्)** अतिशयेन वृद्धम् **(उप)** **(गावः)** किरणाः **(आ)** **(अगुः)** आगच्छन्ति **(तिस्रः)** स्थूला मध्या सूक्ष्मा च **(महीः)** भूमीः **(उपराः)** मेघाः **(तस्थुः)** तिष्ठन्ति **(अत्याः)** अतन्ति सर्वत्र व्याप्नुवन्ति त आकाशादयः **(गुहा)** गुहायां महत्तत्त्वाख्यायां समष्टिबुद्धौ **(द्वे)** कार्य्यकारणे **(निहिते)** संधृते **(दर्शि)** दृश्यते **(एका)** कार्याख्या॥२॥

अन्वयः-हे मनुष्या! येन जगदीश्वरेण संसारे द्वे निहिते तयोरेका दर्श्यत्या गुहा उपराश्च तस्थुरुपराश्च तिस्रो महीर्गाव उपागुस्तान् षड् भारानचरन्त्सन्नेक असहाय ईश्वर वर्षिष्ठमृतं च बिभर्ति तमेव सततं ध्यायत॥२॥

भावार्थः-हे मनुष्या! येन परमेश्वरेण प्रकृत्यादिभूम्यन्तं जगन्निर्माय धृत्वा संपाल्य व्यवस्थाप्यते स एव पूज्योऽस्तीति मन्यध्वम्॥२॥

पदार्थः-हे मनुष्यो! जिस जगदीश्वर ने इस संसार में **(द्वे)** दो कार्य और कारण **(निहिते)** धारण किये, उन दोनों के मध्य में **(एका)** एक कार्य नामक **(दर्शि)** देख पड़ता है **(अत्याः)** सर्वत्र व्यापक होने वाले आकाशादि वा **(गुहा)** महत्तत्त्वनामक सम्पूर्ण बुद्धि में **(उपराः)** मेघ **(तस्थुः)** स्थित होते और मेघ **(तिस्रः)** स्थूल, मध्य और सूक्ष्म **(महीः)** भूमियों को और **(गावः)** किरणें **(उप, आ, अगुः)** प्राप्त होते हैं, उन **(षट्)** छः **(भारान्)** पञ्चतत्त्व और महत्तत्त्व अर्थात् बुद्धि को **(अचरन्)** न कंपाता हुआ **(एकः)** सहायरहित ईश्वर **(वर्षिष्ठम्)** अतीव बढ़े हुए **(ऋतम्)** सत्य कारण का **(बिभर्ति)** धारण वा पोषण करता है, उसी का निरन्तर ध्यान करो॥२॥

भावार्थः-हे मनुष्यो! जिस परमेश्वर ने प्रकृति आदि भूमि पर्य्यन्त संसार रच, धारण कर और उत्तम प्रकार पालन करके व्यवस्थापित अर्थात् ढंग पर चलाया जाता है, वही पूज्य है, ऐसा मानो॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्रिपा॑जस्यो वृ॒ष॒भो वि॒श्वरू॑प उ॒त त्र्यु॒धा पु॑रुध प्र॒जावा॑न्।
त्र्य॒नी॒कः प॑त्यते माहि॒नावान्त्स रे॑तो॒धा वृ॑ष॒भः श॑श्व॒तीना॑म्॥३॥

त्रिऽपा॑जस्यः। वृ॒ष॒भः। वि॒श्वऽरू॑पः। उ॒त। त्रिऽउ॒धा। पु॒रु॒ध॒। प्र॒जाऽवा॑न्। त्रिऽअ॒नी॒कः। प॒त्य॒ते॒। माहि॑नऽवान्। सः। रे॒त॒ःऽधाः। वृ॒ष॒भः। श॒श्व॒तीना॑म्॥३॥

पदार्थः-(**त्रिपाजस्यः**) त्रिषु शरीरात्मसम्बन्धिबलेषु साधुः (**वृषभः**) वर्षकः (**विश्वरूपः**) विश्वमखिलं रूपं यस्मिन् यस्माद्वा सः (**उत**) अपि (**त्र्युधा**) त्रीणि कारणसूक्ष्मस्थूलान्यूधांसि यस्मिन् सः। अत्र वर्णव्यत्ययेन ह्रस्वः। (**पुरुध**) यः पुरून् बहून् दधाति तत्सम्बुद्धौ (**प्रजावान्**) बह्व्यः प्रजा विद्यन्ते यस्य सः (**त्र्यनीकः**) त्रीणि त्रिगुणान्यनीकानि सैन्यानि यस्य सः (**पत्यते**) पतिरिवाचरति (**माहिनावान्**) बहूनि माहिनानि सत्करणानि विद्यन्ते यस्य सः (**सः**) (**रेतोधाः**) यो रेत उदकमिव वीर्यं दधाति सः (**वृषभः**) अनन्तबलः (**शश्वतीनाम्**) अनादिभूतानां प्रकृतिजीवाख्यानां प्रजानाम्॥३॥

अन्वयः-हे पुरुध विद्वन्! यस्त्रिपाजस्यो वृषभस्त्र्युधा विश्वरूपो विद्युदिव उतापि प्रजावाँस्त्र्यनीक इव माहिनावान् पत्यते स वृषभश्शश्वतीनां रेतोधाः सूर्यइव वीर्यप्रदोऽस्तीति विजानीहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो जगदीश्वरो विद्युद्वत्सर्वत्राऽभिव्याप्य प्रकाशको धर्त्ता उतापि न्यायाधीशस्स्वाम्यनन्तमहिमयुक्तोऽनादिभूतानां न्यायाधीशो वर्त्तते तस्माद् भीत्वा पापानि त्यक्त्वा प्रीत्या धर्ममाचर्य तमेव स्वान्ते सर्वे समादधीरन्॥३॥

पदार्थः-हे (**पुरुध**) बहुतों को धारण करनेवाले विद्वान् पुरुध! जो (**त्रिपाजस्यः**) तीन- शरीर आत्मा और सम्बन्धियों के बलों में निपुण (**वृषभः**) वृष्टिकर्त्ता (**त्र्युधा**) जिसमें तीन अर्थात् कारण, सूक्ष्म और स्थूल बढ़े हुए जीव शरीर और (**विश्वरूपः**) अन्य सम्पूर्ण रूप जिसमें विद्यमान जो बिजुली के सदृश (**उत**) और (**प्रजावान्**) बहुत प्रजाजन (**त्र्यनीकः**) तथा त्रिगुणित सेनायुक्त के समान (**माहिनावान्**) बहुत सत्कारवान् है वा (**पत्यते**) जो स्वामी के सदृश आचरण करता (**सः**) वह (**वृषभः**) अत्यन्त बलयुक्त (**शश्वतीनाम्**) अनादिकाल से हुई प्रकृति और जीव नामक प्रजाओं का (**रेतोधाः**) जल के सदृश वीर्य को धारण करनेवाले सूर्य के सदृश वीर्य को देनेवाला जगदीश्वर है, ऐसा जानो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जगदीश्वर बिजुली के सदृश सब जगह व्यापक होके प्रकाशकर्त्ता, धारणकर्त्ता फिर भी न्यायाधीश, स्वामी, अनन्त महिमा से युक्त और अनादि

जीवों का न्यायाधीश वर्त्तमान है, उससे डर के और पापों का त्याग करके प्रीति से धर्म का आचरण कर अपने अन्त:करण में सब लोग उसी का ध्यान करें॥३॥

पुनरीश्वरगुणानाह॥

फिर भी ईश्वर के गुणों का उपदेश अगले मन्त्र में कहते हैं॥

अभीकं आसां पदवीरबोध्यादित्यानामह्वे चारु नाम।

आपश्चिदस्मा अरमन्त देवी: पृथग्व्रजन्ती: परि षीमवृञ्जन्॥४॥

अभीके। आसाम्। पदऽवी:। अबोधि। आदित्यनाम्। अह्वे। चारु। नाम। आप:। चित्। अस्मै। अरमन्त। देवी:। पृथक्। व्रजन्ती:। परि। सीम्। अवृञ्जन्॥४॥

पदार्थ:-(**अभीके**) कमितरि (**आसाम्**) सनातनीनां प्रजानाम् (**पदवी:**) य: पदानि वेत्ति व्याप्नोति (**अबोधि**) बुध्यताम् (**आदित्यानाम्**) सूर्यादीनां मासानां वा (**अह्वे**) आह्वयेयम् (**चारु**) श्रेष्ठम् (**नाम**) संज्ञा (**आप:**) प्राणा: (**चित्**) अपि (**अस्मै**) (**अरमन्त**) रमन्ते (**देवी:**) देदीप्यमाना: (**पृथक्**) (**व्रजन्ती:**) गच्छन्ती: (**परि**) (**सीम्**) परिग्रहे (**अवृञ्जन्**) वृञ्जन्ति॥४॥

अन्वय:-हे मनुष्या! येन जगदीश्वरेणासामादित्यानां च पदवीरबोधि यस्य चारु नाम यस्मिँश्चिद् व्रजन्तीर्देवीराप: सीम् पृथगरमन्त पर्यवृञ्जन्नस्मा अभीके स्थितोऽहमिममह्वे तमेव यूयमप्याह्वयत॥४॥

भावार्थ:-हे मनुष्या! य: सर्वेषां सुखं कामयते यस्मिन्त्सर्वे जीवा लोकादयश्च पदार्था: पृथक् पृथक् क्रीडन्ति गृह्णन्ति त्यजन्ति च तं विहायाऽन्यं कञ्चिदपि मोपाध्वम्॥४॥

पदार्थ:-हे मनुष्यो! जिस जगदीश्वर ने (**आसाम्**) इन अनादि काल से सिद्ध प्रजाओं और (**आदित्यानाम्**) सूर्य्यादिकों वा मास आदि समयविभागों के (**पदवी:**) पदों को जो व्याप्त होता वह (**अबोधि**) जाना हुआ है और जिसका (**चारु**) अत्यन्त श्रेष्ठ (**नाम**) नाम जिसमें (**चित्**) निश्चित (**व्रजन्ती:**) जाते हुए (**देवी:**) प्रकाशमान (**आप:**) प्राण (**सीम्**) परिग्रह करने में (**पृथक्**) अलग-अलग (**परि, अरमन्त**) सब ओर से रमते और (**अवृञ्जन्**) त्याग करते हैं (**अस्मै**) इसके लिये (**अभीके**) कामना करनेवाले में वर्त्तमान मैं इस ईश्वर को (**अह्वे**) बुलाता हूँ, उसी को आप लोग भी बुलाओ॥४॥

भावार्थ:-हे मनुष्यो! जो सबके सुख की कामना करता है, जिसमें सब जीव और लोकादि पदार्थ पृथक्-पृथक् क्रीड़ा करते, ग्रहण करते और त्याग करते हैं, उसको छोड़ के अन्य किसी की भी मत उपासना करो॥४॥

अथेश्वरेण सर्वेषां निवासाय जगद्रचितमित्याह॥

अब सबके निवास के लिये ईश्वर ने जगत् बनाया, इस विषय को अगले मन्त्र में कहते हैं॥

त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट्।
ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः॥५॥

त्री। सधऽस्था। सिन्धवः। त्रिः। कवीनाम्। उत। त्रिऽमाता। विदथेषु। सम्ऽराट्। ऋतऽवरीः। योषणाः। तिस्रः। अप्याः। त्रिः। आ। दिवः। विदथे। पत्यमानाः॥५॥

पदार्थः-(त्री) त्रीणि **(सधस्था)** सहस्थानानि **(सिन्धवः)** नद्यः **(त्रिः)** **(कवीनाम्)** विदुषाम् **(उत)** **(त्रिमाता)** त्रयाणां जन्मस्थाननाम्नां माता जनकः **(विदथेषु)** संग्रामादिषु विज्ञातव्येषु व्यवहारेषु **(सम्राट्)** यः सम्यग्राजते भूमौ **(ऋतावरीः)** ऋतं सत्यं विद्यते यासु ताः **(योषणाः)** योषाइव वर्त्तमानाः **(तिस्रः)** स्थूलसूक्ष्मकारणाख्याः **(अप्याः)** अप्स्वन्तरिक्षे भवाः **(त्रिः)** त्रिवारम् **(आ)** **(दिवः)** ज्योतींषि **(विदथे)** संग्रामे **(पत्यमानाः)** पतिरिवाचरन्तीः॥५॥

अन्वयः-हे मनुष्या! यो जगदीश्वरस्त्री सधस्था सिन्धव उतापि कवीनां त्रिस्त्रिमाता विदथेषु सम्राडिवर्त्तावरीर्योषणा इव तिस्रोऽप्या विदथे पत्यमानास्त्रिदिवो निर्मिमीते स एव सर्वाऽधीशोऽस्ति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! येन परमात्मना सर्वेषां प्राण्यप्राणिनां निवासाय जलस्थलान्तरिक्षाणि निर्मितानि तं पतिं पतिव्रतेव सततं सेवध्वम्॥५॥

पदार्थः-हे मनुष्यो! जो जगदीश्वर **(त्री)** तीन **(सधस्था)** साथ के स्थान **(सिन्धवः)** नदियां **(उत)** और **(कवीनाम्)** विद्वानों के **(त्रिः)** तीन वार **(त्रिमाता)** जन्म, स्थान और नाम इन तीनों को उत्पन्न करनेवाला **(विदथेषु)** वा जो संग्रामों और जानने योग्य व्यवहारों में **(सम्राट्)** उत्तम प्रकार भूमि में प्रकाशित है, ऐसे पुरुष के सदृश **(ऋतावरीः)** जिनमें सत्य विद्यमान **(योषणाः)** जो स्त्रियों के सदृश वर्त्तमान **(तिस्रः)** स्थूल, सूक्ष्म और कारण नामक **(अप्याः)** अन्तरिक्ष में होनेवाली सृष्टियां **(विदथे)** संग्राम में **(पत्यमानाः)** पति के सदृश आचरण करती हुई हैं, उनको **(त्रिः)** तीन वार और **(दिवः)** तारागणों को रचता है, वही सबका स्वामी है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिस परमात्मा ने सब प्राणी और प्राणीभिन्नों के निवास के लिये जल, स्थल और अन्तरिक्ष रचे, उस स्वामी की पतिव्रता स्त्री के सदृश निरन्तर सेवा करो॥५॥

अथेश्वरप्रार्थनया जगद्विषयमाह॥

अब ईश्वर की प्रार्थना के साथ जगद्विषय को अगले मन्त्र में कहते हैं॥

त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः।
त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः॥६॥

त्रिः। आ। दिवः। सवितः। वार्याणि। दिवेऽदिवे। आ। सुव। त्रिः। नः। अह्नः। त्रिऽधातु। रायः। आ। सुव। वसूनि। भग। त्रातः। धिषणे। सातये। धाः॥६॥

पदार्थः-(**त्रिः**) त्रिवारम् (**आ**) समन्तात् (**दिवः**) कमनीयाः (**सवितः**) ऐश्वर्यप्रद (**वार्याणि**) वरितुं योग्यान्यैश्वर्याणि (**दिवेदिवे**) प्रतिदिनम् (**आ**) (**सुव**) जनय (**त्रिः**) त्रिवारम् (**नः**) अस्मभ्यम् (**अह्नः**) दिवसस्य मध्ये (**त्रिधातु**) त्रीणि सुवर्णरजताऽयसादयो धातवो येषु तानि (**रायः**) (**आ**) (**सुवा**)। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वसूनि**) धनानि (**भग**) भजनीयतम (**त्रातः**) रक्षक (**धिषणे**) द्यावापृथिव्यौ (**सातये**) संविभागाय (**धाः**) धेहि॥६॥

अन्वयः-हे सवितस्त्वं दिवेदिवे नोऽस्मभ्यं दिवो वार्याणि त्रिरासुव। हे भग! अह्नो मध्ये रायस्त्रिरा सुव। हे त्रातस्सातये त्रिधातु वसूनि धिषणे आ धाः॥६॥

भावार्थः-हे जगदीश्वर! भवान् कृपयाऽस्मान् धर्मेण पुरुषार्थयित्वा प्रतिदिनमैश्वर्य्यं प्रापय सततं रक्षित्वा सर्वेषां सुखाय विभागान् कारय॥६॥

पदार्थः-हे (**सवितः**) ऐश्वर्य के देनेवाले! आप (**दिवेदिवे**) प्रतिदिन (**नः**) हम लोगों के लिये (**दिवः**) कामना करने योग्य क्रियाओं को (**वार्याणि**) ग्रहण करने योग्य ऐश्वर्यों को (**त्रिः**) तीन वार (**आसुव**) उत्पन्न करो। हे (**भग**) अत्यन्त भजने योग्य! (**अह्नः**) दिन के मध्य में (**रायः**) धनों को (**त्रिः**) तीन वार (**आ सुव**) उत्पन्न करो और (**त्रातः**) हे रक्षा करनेवाले! (**सातये**) उत्तम प्रकार विभाग के लिये (**त्रिधातु**) सुवर्ण, चांदी और लोहा आदि धातु जिनमें ऐसे (**वसूनि**) धनों और (**धिषणे**) अन्तरिक्ष और पृथिवी को (**आ, धाः**) सब प्रकार धारण करो॥६॥

भावार्थः-हे जगदीश्वर! आप कृपा से हम लोगों को धर्म से पुरुषार्थयुक्त करके प्रतिदिन ऐश्वर्य प्राप्त कराओ और निरन्तर रक्षा करके सबके सुख के लिये विभागों को कराओ॥६॥

अथ राजप्रस्तावेन विद्वद्विषयमाह॥

अब राजप्रस्ताव से विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणी।
आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षन्त सवितुः सवाय॥७॥

त्रिः। आ। दिवः। सविता। सोसवीति। राजाना। मित्रावरुणा। सुपाणी इति सुऽपाणी। आपः। चित्। अस्य। रोदसी इति। चित्। उर्वी इति। रत्नम्। भिक्षन्त। सवितुः। सवाय॥७॥

पदार्थः-(**त्रिः**) (**आ**) अभिविधौ (**दिवः**) प्रकाशात् (**सविता**) प्रेरकोऽन्तर्य्यामी (**सोषवीति**) भृशं सुवति (**राजाना**) विद्याविनयाभ्यां प्रकाशमानः (**मित्रावरुणा**) प्राणोदानवत्सर्वेषां सुहृदौ (**सुपाणी**) शोभनौ

पाणी ययोस्तौ (**आपः**) प्राणा इव (**चित्**) इव (**अस्य**) जगदीश्वरस्य (**रोदसी**) प्रकाशाप्रकाशे जगती (**चित्**) अपि (**उर्वी**) बहुले (**रत्नम्**) रमणीयं धनम् (**भिक्षन्त**) याचन्ते (**सवितुः**) सकलैश्वर्य्यसम्पन्नस्य सकाशात् (**सवाय**) ऐश्वर्य्याय॥७॥

अन्वयः–हे मनुष्या! यस्सविता मित्रावरुणा सुपाणी राजानेव दिवस्त्रिरा सोषवीत्यस्य सवितुः सकाशात् सवायाऽऽपश्चिदुर्वी रोदसी रत्नं चित् सर्वे भिक्षन्त॥७॥

भावार्थः–अत्रोपमालङ्कारः। ये राजानः परमेश्वरवद्गुणकर्मस्वभावास्सन्तः प्रजासु वर्त्तन्ते त एव साम्राज्यमसंख्यं धनञ्च लभन्ते॥७॥

पदार्थः–हे मनुष्यो! जो (**सविता**) प्रेरणा करनेवाला अन्तर्य्यामी (**मित्रावरुणा**) प्राण और उदान वायु के सदृश सबके मित्र (**सुपाणी**) और सुन्दर जिनके हाथ ऐसे (**राजाना**) विद्या और विनय से प्रकाशमान नरों के समान (**दिवः**) प्रकाश से (**त्रिः**) तीन वार (**आ, सोषवीति**) सब ओर से निरन्तर प्रेरणा देता है (**अस्य**) इस (**सवितुः**) सम्पूर्ण ऐश्वर्य्ययुक्त जगदीश्वर के समीप से (**सवाय**) ऐश्वर्य्य के लिये (**आपः**) प्राणों के (**चित्**) सदृश (**उर्वी**) बहुत (**रोदसी**) प्रकाशित और अप्रकाशित जगत् और (**रत्नम्**) सुन्दर धन को (**चित्**) भी सब लोग (**भिक्षन्त**) याचना करते हैं॥७॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो राजा लोग परमेश्वर के सदृश गुण, कर्म और स्वभावयुक्त हुए प्रजाओं में वर्त्तमान हैं, वे ही चक्रवर्त्ति राज्य और असंख्य धन को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्रिरु॑त्त॒मा दू॒णशा॑ रोच॒नानि॒ त्रयो॑ राज॒न्त्यसु॑रस्य वी॒राः।
ऋ॒तावा॑न इषि॒रा दू॒ळभा॑स॒स्त्रिरा दि॒वो वि॒दथे॑ सन्तु दे॒वाः॥८॥१॥

त्रिः। उ॒त्ऽत॒मा। दु॒ःऽनशा॑। रो॒च॒नानि॑। त्रयः॑। रा॒ज॒न्ति॒। असु॑रस्य। वी॒राः। ऋ॒तऽवा॑नः। इ॒षि॒राः। दु॒ःऽदभा॑सः। त्रिः। आ। दि॒वः। वि॒दथे॑। स॒न्तु॒। दे॒वाः॥८॥

पदार्थः–(**त्रिः**) त्रिवारम् (**उत्तमा**) उत्तमानि (**दूणशा**) दुःखेन नशो नाशो येषान्तानि (**रोचनानि**) प्रकाशमानानि (**त्रयः**) विद्युत्प्रसिद्धसूर्य्याः (**राजन्ति**) (**असुरस्य**) दुष्टान् दोषान् प्रक्षेप्तुः (**वीराः**) व्याप्तविद्याशौर्यबलाः (**ऋतावानः**) प्रशंसितमृतं सत्यं विद्यते येषु ते (**इषिराः**) गन्तारः (**दूळभासः**) दुर्गतो दभो हिंसा येभ्यस्ते (**त्रिः**) (**आ**) (**दिवः**) कामयमानाः (**विदथे**) संग्रामादिव्यवहारे (**सन्तु**) (**देवाः**) विद्वांसः॥८॥

अन्वयः–ये ब्रह्मभक्तास्त्रय इवाऽसुरस्येषिरा ऋतावानो वीरा दूळभास आ दिवो देवा विदथे त्रिस्सन्तु ते दूणशोत्तमा रोचनानि त्री राजन्ति॥८॥

भावार्थः-ये जगदीश्वरं प्राणवत्प्रियं राजवदादेष्टारं न्यायाधीशवन्नेतारं सूर्य्यवत्स्वप्रकाशं सर्वप्रकाशकं सततं भजन्ते त एव शत्रुभिर्दुर्जयाः सत्याचारा अन्येषां सुखं कामयमानाश्चक्रवर्त्तिराज्यं प्राप्य सूर्य्यवद्विराजन्ते त एवात्र रक्षाधिकृता भवन्त्विति॥८॥

अत्रेश्वरजगद्विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्पञ्चाशत्तमं सूक्तं प्रथमो वर्गश्च समाप्तः॥

पदार्थः-जो ब्रह्म के भक्त **(त्रयः)** बिजुली, प्रसिद्ध अग्नि और सूर्य्याग्नि के सदृश **(असुरस्य)** दुष्ट और दोषों के दूर करनेवाले के सम्बन्ध में **(इषिराः)** जानेवाले **(ऋतावानः)** प्रशंसित सत्य जिनमें विद्यमान तथा **(वीराः)** विद्या, शूरता और बल से परिपूरित वे **(दूळभासः)** हिंसा से रहित **(आ)** सब प्रकार **(दिवः)** कामना करते हुए **(देवाः)** विद्वान् लोग **(विदथे)** संग्राम आदि व्यवहार में **(त्रिः)** तीन वार **(सन्तु)** प्रसिद्ध हों और **(दूणशा)** दुःख से जिनका नाश होता है वे **(उत्तमा)** श्रेष्ठ **(रोचनानि)** प्रकाशमान **(त्रिः)** तीन वार **(राजन्ति)** शोभित होते हैं॥८॥

भावार्थः-जो लोग जगदीश्वर को प्राणों के सदृश प्रिय, राजा के सदृश उपदेशदाता, न्यायाधीश के सदृश नायक, सूर्य के सदृश अपने से प्रकाशमान और सबका प्रकाशकर्त्ता मान निरन्तर भजते हैं, वे ही शत्रुओं के दुःख से जीतने योग्य, सत्य के आचरण करने और अन्यों के सुख चाहनेवाले हैं। वे चक्रवर्ती राज्य को प्राप्त होकर सूर्य्य के सदृश शोभित होते हैं, और वे ही इसी संसार में रक्षा के अधिकारी हों॥८॥

इस सूक्त में ईश्वर, जगत् और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति समझनी चाहिये॥

[यह छप्पनवाँ सूक्त और प्रथम वर्ग समाप्त हुआ॥]

अथ षड्चस्य सप्तपञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। विश्वेदेवा देवताः। १, ३, ४ त्रिष्टुप्। २, ५, ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ वाणीविषयमाह॥

अब छः ऋचावाले सत्तावनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में वाणी के विषय को कहते हैं॥

प्र मे॑ विविक्वाँ अ॑विदन्मनी॒षां धे॒नुं चर॑न्तीं॒ प्रयु॑तामगो॑पाम्।
स॒द्यश्चि॒द्या दु॑दु॒हे भूरि॑ धा॒सेरिन्द्र॒स्तद॒ग्निः प॑नि॒तारो॑ अस्याः॥ १॥

प्र। मे॒। वि॒वि॒क्वान्। अ॒वि॒दत्। म॒नी॒षाम्। धे॒नुम्। चर॑न्तीम्। प्र॒ऽयु॑ताम्। अगो॑पाम्। स॒द्यः। चि॒त्। या। दु॒दु॒हे। भूरि॑। धा॒सेः। इन्द्रः॑। तत्। अ॒ग्निः। प॒नि॒तारः॑। अ॒स्याः॥ १॥

पदार्थः-(**प्र**) (**मे**) मम (**विविक्वान्**) विविक्तः (**अविदत्**) प्राप्नुयात् (**मनीषाम्**) प्रज्ञाम् (**धेनुम्**) वत्सस्य पालिकां गामिव वाचम् (**चरन्तीम्**) प्राप्नुवन्तीम् (**प्रयुताम्**) असंख्यबोधाम् (**अगोपाम्**) अरक्षिताम् (**सद्यः**) (**चित्**) (**या**) (**दुदुहे**) प्राति (**भूरि**) बहु (**धासेः**) प्राणधारकस्यान्नस्य। **धासिरित्यन्ननाम।** (निघं०२.७) (**इन्द्रः**) विद्युत् (**तत्**) अन्नम् (**अग्निः**) पावक इव वर्त्तमान (**पनितारः**) स्तोतारो व्यवहर्त्तारो वा (**अस्याः**) वाचः॥१॥

अन्वयः-यो विविक्वान् मनुष्यो मे मनीषां चरन्तीं प्रयुतां धेनुं प्राविदत् या धासेरिन्द्र इवाऽगोपां भूरि सद्यश्चिद् दुदुहे तदग्निरिव पुरुषः प्राप्नुयादस्याः पनितार उपदिशेयुस्तां वाचं सर्वे प्राप्नुवन्तु॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽधर्माचरणाद्विरहितां विद्यां जिघृक्षवः सुवाचं प्रयुञ्जानास्सत्यं धर्ममाचरन्तः सर्वेषामिच्छां दुहन्ति ते भूरि सत्कर्त्तव्यास्स्युः॥१॥

पदार्थः-जो (**विविक्वान्**) प्रकट मनुष्य (**मे**) मेरी (**मनीषाम्**) बुद्धि को (**चरन्तीम्**) प्राप्त होती हुई (**प्रयुताम्**) संख्यारहित बोधों से युक्त (**धेनुम्**) बछड़े को पालन करनेवाली गौ के सदृश वाणी को (**प्र, अविदत्**) प्राप्त हो और (**या**) जो (**धासेः**) प्राणों को धारण करनेवाले अन्न की (**इन्द्रः**) बिजुली के सदृश (**अगोपाम्**) अरक्षित को (**भूरि**) बहुत (**सद्यः**) शीघ्र (**चित्**) ही (**दुदुहे**) पूर्ण करता है (**तत्**) उस अन्न को (**अग्निः**) अग्नि के सदृश वर्त्तमान पुरुष प्राप्त होवे (**अस्याः**) इस वाणी का (**पनितारः**) स्तुति वा व्यवहार करनेवाले उपदेश देवें, उस वाणी को सब लोग प्राप्त हों॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग अधर्म के आचरण से रहित, विद्या को ग्रहण करने की इच्छा पूरी करनेवाले, उत्तम वाणी का प्रयोग करने और सत्य धर्म का आचरण करते हुए सबकी इच्छा को पूरी करते हैं, वे अत्यन्त सत्कार करने योग्य होवें॥१॥

अथ बुद्धिविषयमाह॥

अब बुद्धि विषय को अगले मन्त्र में कहते हैं॥

इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीता शशयं दुदुह्रे।
विश्वे यदस्यां रणयन्त देवाः प्र वोऽत्र वसवः सुम्नमश्याम्॥ २॥

इन्द्रः। सु। पूषा। वृषणा। सुऽहस्ता। दिवः। न। प्रीताः। शशयम्। दुदुह्रे। विश्वे। यत्। अस्याम्। रणयन्त। देवाः। प्र। वः। अत्र। वसवः। सुम्नम्। अश्याम्॥ २॥

पदार्थः-(**इन्द्रः**) विद्युत् (**सु**) (**पूषा**) पोषकः प्राणः (**वृषणा**) बलकरौ (**सुहस्ता**) शोभनौ हस्तौ ययोस्तद्वत् (**दिवः**) प्रकाशाः किरणाः कमनीयाः (**न**) इव (**प्रीताः**) प्रसन्नाः (**शशयम्**) खशयं मेघम्। अत्र वर्णव्यत्ययेन खस्य शः। (**दुदुह्रे**) दुहन्ति (**विश्वे**) सर्वे (**यत्**) ये (**अस्याम्**) प्रज्ञायुक्तायां वाचि (**रणयन्त**) रणः संग्राम इवाचरन्ति (**देवाः**) विद्वांसः (**प्र**) (**वः**) युष्माकम् (**अत्र**) अस्मिन् व्यवहारे (**वसवः**) विद्यां जिज्ञासवः (**सुम्नम्**) सुखम् (**अश्याम्**) प्राप्नुयाम्॥ २॥

अन्वयः-हे वसवो! यदत्र विश्वे देवा अस्यां शशयमिव सुम्नं प्र दुदुह्रे रणयन्त ते दिवो न प्रीता जायन्ते ये सुहस्तैवं याविन्द्रः पूषा वृषणा दुदुह्रे ते सु प्रीता भवन्ति यथा सत्सङ्गेन वस्सकाशात् सुम्नमहमश्यां तथा यूयं प्रयतत॥ २॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये शरीरात्मबलं कामयन्ते त एव विद्वांसो भूत्वा शास्त्रेश्वरबोधान्वितायां वाचि रममाणाः सन्तो विद्युदादिविद्यां प्रसिद्धीकृत्य विजयमानाभूत्वाऽतुलमानन्दं प्राप्याऽन्यान् पूर्णाऽऽनन्दाञ्ननयन्ति त एव जगत्पूज्याः सर्वगुरवो भवन्ति॥ २॥

पदार्थः-हे (**वसवः**) विद्या की जिज्ञासा करनेवाले! (**यत्**) जो (**अत्र**) इस व्यवहार में (**विश्वे**) सम्पूर्ण (**देवाः**) विद्वान् लोग (**अस्याम्**) बुद्धि से युक्त वाणी में (**शशयम्**) मेघ के सदृश (**सुम्नम्**) सुख को (**प्र, दुदुह्रे**) दुहते हैं और (**रणयन्त**) संग्राम के सदृश आचरण करते हैं वे (**दिवः**) कामना करने योग्य प्रकाशकिरणों के (**न**) सदृश (**प्रीताः**) प्रसन्न होते हैं और जो (**सुहस्ता**) सुन्दर हाथोंवाले दो पुरुषों के समान जो (**इन्द्रः**) बिजुली और (**पूषा**) पुष्टिकर्त्ता प्राण (**वृषणा**) बल करनेवाले हैं, उनको पूरा करते हैं वे (**सु, प्रीताः**) उत्तम प्रकार प्रसन्न होते हैं और जैसे सत्सङ्ग से (**वः**) तुम लोगों के समीप से (**सुम्नम्**) सुख को मैं (**अश्याम्**) प्राप्त होऊं, वैसे आप लोग प्रयत्न करिये॥ २॥

भावार्थः-इस मन्त्र में उपमा [और] वाचकलुप्तोपमालङ्कार हैं। जो शरीर और आत्मा के बल की कामना करते हैं, वे ही विद्वान् हो शास्त्र और ईश्वर के बोध से युक्त वाणी में रमते हुए बिजुली आदि की विद्या को प्रसिद्ध कर और विजयमान हो अतुल आनन्द को पाय अन्य जनों को पूर्ण आनन्द उत्पन्न करते, वे ही जगत् के पूज्य सबके गुरु होते हैं॥ २॥

अथ गृहाश्रमकृत्यमाह॥

अब गृहाश्रम के कृत्य को अगले मन्त्र में कहते हैं॥

या जा॒मयो॒ वृष्णं॑ इ॒च्छन्ति॑ श॒क्तिं न॑म॒स्यन्ती॑र्जानते॒ गर्भ॑मस्मिन्।
अच्छा॑ पु॒त्रं धे॒नवो॑ वावशा॒ना म॒हश्च॑रन्ति॒ बिभ्र॑तं॒ वपूं॑षि॥ ३॥

याः। जा॒मयः॑। वृष्णे॑। इ॒च्छन्ति॑। श॒क्तिम्। न॒म॒स्यन्तीः॑। जा॒न॒ते॒। गर्भ॑म्। अ॒स्मि॒न्। अच्छ॑। पु॒त्रम्। धे॒नवः॑। वा॒व॒शा॒नाः। म॒हः। च॒र॒न्ति॒। बिभ्र॑तम्। वपूं॑षि॥ ३॥

पदार्थः-(**याः**) (**जामयः**) प्राप्तचतुर्विंशतिवर्षा युवतयः (**वृष्णे**) वीर्यसेचनसमर्थाय प्राप्तचत्वारिंशद्वर्षाय ब्रह्मचारिणे (**इच्छन्ति**) (**शक्तिम्**) सामर्थ्यम् (**नमस्यन्तीः**) सत्कारं कुर्वन्त्यः (**जानते**) जानन्ति (**गर्भम्**) (**अस्मिन्**) संसारे (**अच्छ**) श्रैष्ठ्ये। अत्र **संहितायामि**ति दीर्घः। (**पुत्रम्**) (**धेनवः**) विद्यासुशिक्षायुक्ता वाच इव वर्त्तमानाः (**वावशानाः**) पतीन् कामयमानाः (**महः**) महान्ति पूज्यानि (**चरन्ति**) प्राप्नुवन्ति (**बिभ्रतम्**) धारकं पोषकम् (**वपूंषि**) रूपवन्ति शरीराणि॥ ३॥

अन्वयः-या नमस्यन्तीर्ब्रह्मचारिण्यो जामयो वृष्णे शक्तिमिच्छन्त्यस्मिन् गर्भं धर्तुं जानते ताः पतीन् वावशानाः धेनवो वृषभानिव महर्वपूंषि बिभ्रतमच्छ पुत्रं चरन्ति॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ता एव कन्याः सुखं प्राप्नुवन्ति याः स्वाभ्यो द्विगुणविद्याशरीरबलान् पतीनभिरूपान् हृद्यान् सुपरीक्ष्य स्वीकुर्वन्ति तथैव पुरुषा अपि हृद्या भार्या उपयच्छन्ति त एव परस्परेण प्रीत्यानुकूलव्यवहारेण वीर्य्यस्थापनाऽऽकर्षणविद्यां बुध्वा गर्भं धृत्वा सुपाल्य सर्वान् संस्कारान् कृत्वा महाभाग्यान्यपत्यानि जनयित्वाऽतुलमानन्दं विजयञ्च प्राप्नुवन्ति नातोऽन्यथा व्यवहारेण॥ ३॥

पदार्थः-(याः) जो (**नमस्यन्तीः**) सत्कार करती हुईं (**जामयः**) चौबीस वर्ष की अवस्था को प्राप्त युवती ब्रह्मचारिणी (**वृष्णे**) वीर्यसेचन में समर्थ चालीस वर्ष की आयु को प्राप्त ब्रह्मचारी के लिये (**शक्तिम्**) सामर्थ्य की (**इच्छन्ति**) इच्छा करती और (**अस्मिन्**) इस संसार में (**गर्भम्**) गर्भ के धारण करने को (**जानते**) जानती हैं, वे पतियों की (**वावशानाः**) कामना करती हुईं (**धेनवः**) विद्या और उत्तम शिक्षायुक्त वाणियों के सदृश वर्त्तमान गौवें जैसे वृषभों को वैसे (**महः**) बड़े पूज्य (**वपूंषि**) रूप वाले शरीरों को (**बिभ्रतम्**) धारण और पोषण करनेवाले (**अच्छ**) श्रेष्ठ (**पुत्रम्**) पुत्र को (**चरन्ति**) ग्रहण करती हैं॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही कन्यायें सुख को प्राप्त होती हैं कि जो अपने से दुगने विद्या और शरीर बलवाले अपने सदृश प्रेमी पतियों की उत्तम प्रकार परीक्षा करके स्वीकार करती हैं, वैसे ही पुरुष लोग भी प्रेमपात्र स्त्रियों को ग्रहण करते हैं, वे ही परस्पर प्रीतिपूर्वक अनुकूल व्यवहार से वीर्यस्थापन और आकर्षण विद्या को जान गर्भ को धारण, उसका उत्तम प्रकार पालन, सब संस्कारों को करके बड़े भाग्यवाले पुत्रों को उत्पन्न कर, अतुल आनन्द और विजय को प्राप्त

होते हैं, इससे विपरीत व्यवहार से नहीं॥३॥

अथ स्त्रीपुरुषयोः कृत्यमाह॥

अब स्त्रीपुरुषों के कृत्य का अगले मन्त्र में उपदेश करते हैं॥

अच्छा॑ विवक्मि॒ रोद॑सी सु॒मेके॒ ग्राव्णो॑ युजा॒नो अ॑ध्व॒रे म॑नी॒षा।
इ॒मा उ॑ ते॒ मन॑वे॒ भूरि॑वारा ऊ॒र्ध्वा भ॑वन्ति दर्श॒ता यज॑त्राः॥४॥

अच्छ॑। वि॒व॒क्मि॒। रोद॑सी॒ इति॑। सु॒मेके॒ इति॑ सु॒ऽमेके॑। ग्राव्ण॑ः। यु॒जा॒नः। अ॒ध्व॒रे। म॒नी॒षा। इ॒माः। ऊ॒म् इति॑। ते॒। मन॑वे। भूरि॑ऽवाराः। ऊ॒र्ध्वाः। भ॒व॒न्ति॒। द॒र्श॒ताः। यज॑त्राः॥४॥

पदार्थः-(अच्छ)। अत्र **संहितायामि**ति दीर्घः। **(विवक्मि)** विशेषेणोपदिशामि **(रोदसी)** द्यावापृथिव्याविव **(सुमेके)** सुष्ठ्वेकीभूते **(ग्राव्णः)** मेघात् **(युजानः)** **(अध्वरे)** सङ्गन्तव्ये व्यवहारे **(मनीषा)** प्रज्ञया **(इमाः)** प्रजाः **(उ)** आश्चर्य्यम् **(ते)** तुभ्यम् **(मनवे)** मनुष्याय **(भूरिवाराः)** भूरि बहुविधं सुखं वृण्वन्ति **(ऊर्ध्वाः)** उत्कृष्टाः **(भवन्ति)** **(दर्शताः)** द्रष्टुं योग्याः **(यजत्राः)** सङ्गन्तुं पूजितुमर्हाः॥४॥

अन्वयः-हे विद्वांसोऽस्मिन्नध्वरे या इमा मनीषा सह वर्त्तमाना भूरिवारा दर्शता यजत्रा ऊर्ध्वा भवन्ति ता युजानो भवन्तो ग्राव्ण इव संयोगात् सुखिनो भवन्ति यौ स्त्रीपुरुषौ सुमेके रोदसी इव ते मनवे वर्त्तेते तौ तान् प्रत्यु अहमच्छ विवक्मि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यौ स्त्रीपुरुषौ भूमिसूर्य्याविव संयुक्तौ वर्त्तते तौ भाग्यशालिनौ भवतः ये स्त्रीपुरुषाः सम्यक् परीक्ष्य स्वयंवरं विवाहं कुर्युस्ते मेघवदुत्तमान्यपत्यान्युत्पाद्य सर्वदा सुखिनो जायन्ते॥४॥

पदार्थः-हे विद्वानो! इस **(अध्वरे)** मेल करने योग्य व्यवहार में जो **(इमाः)** ये प्रजायें **(मनीषा)** बुद्धि के सहित वर्त्तमान **(भूरिवाराः)** अनेक प्रकार के सुख को प्राप्त होनेवाली **(दर्शताः)** देखने तथा **(यजत्राः)** मेल और सत्कार करने योग्य **(ऊर्ध्वाः)** उत्तम **(भवन्ति)** होती हैं, उनको **(युजानः)** प्राप्त होते हुए आप लोग **(ग्राव्णः)** मेघ के सदृश संयोग से सुखी होते हैं और जो स्त्री-पुरुष **(सुमेके)** उत्तम प्रकार एक हुए **(रोदसी)** अन्तरिक्ष और पृथिवी के तुल्य **(ते)** आप **(मनवे)** मनुष्य के लिये वर्त्तमान हैं, उन दोनों और उन आप लोगों के प्रति **(उ)** आश्चर्य के साथ मैं **(अच्छ)** उत्तम प्रकार **(विवक्मि)** विशेष करके उपदेश देता हूँ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्री और पुरुष पृथिवी और सूर्य के सदृश संयुक्त हुए वर्त्तमान हैं, वे भाग्यशाली होते हैं। जो स्त्री और पुरुष उत्तम प्रकार परीक्षा करके स्वयंवर विवाह को करें, वे मेघ के सदृश उत्तम सन्तानों को उत्पन्न करके सब काल में सुखी होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची।
तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि॥५॥

या। ते। जिह्वा। मधुऽमती। सुऽमेधाः। अग्ने। देवेषु। उच्यते। उरूची। तया। इह। विश्वान्। अवसे। यजत्रान्। आ। सादय। पायय। च। मधूनि॥५॥

पदार्थः- **(या)** **(ते)** तव **(जिह्वा)** वाणी। **जिह्वेति वाङ्नामसु पठितम्।** (निघं०१.११) **(मधुमती)** बहूनि मधूनि सत्यभाषणानि विद्यन्ते यस्यां सा **(सुमेधाः)** शोभना मेधा यस्यां सा **(अग्ने)** विद्वन् विदुषि वा **(देवेषु)** विद्वत्सु **(उच्यते)** कथ्यते **(उरूची)** या उर्वीर्बह्वीर्विद्या अञ्चति प्राप्नोति सा **(तया)** **(इह)** अस्मिन् गृहाश्रमे **(विश्वान्)** समग्रान् **(अवसे)** रक्षणाद्याय **(यजत्रान्)** सङ्गतान् पूज्यान् तनयान् **(आ)** **(सादय)** प्रापय **(पायय)**। अत्र **संहितायामिति** दीर्घः। **(च)**। अत्र **निपातस्य चेति** दीर्घः। **(मधूनि)** मधुयुक्तानि रसविशेषाणि पेयानि॥५॥

अन्वयः-हे अग्ने स्त्रि पुरुष वा! ते तव या देवेषु मधुमती सुमेधा उरूची जिह्वोच्यते तयेह विश्वान् यजत्राना सादयैषामवसे च मधूनि पायय॥५॥

भावार्थः-यदि स्त्रीपुरुषौ प्रसन्नतया कृतविवाहौ विद्याप्रज्ञासुवाणीयुक्तौ भूत्वेह गृहाश्रमे स्थित्वा प्रेमजान्यपत्यान्युत्पाद्य पालयित्वा सुशिक्षायुक्तानि कृत्वा स्वयंवरं विवाहं कारयित्वा निवासयन्ति त एवाऽत्र गृहाश्रमे मोक्षमिव सुखमनुभवन्ति॥५॥

पदार्थः-हे **(अग्ने)** विद्वान् पुरुष वा विदुषि स्त्री! **(ते)** तुम्हारी **(या)** जो **(देवेषु)** विद्वानों में **(मधुमती)** बहुत सत्यभाषणोंवाली **(सुमेधाः)** जिसमें उत्तम बुद्धि विद्यमान वह **(उरूची)** बहुत विद्याओं को प्राप्त होती हुई **(जिह्वा)** वाणी **(उच्यते)** कही जाती है **(तया)** उस से **(इह)** इस गृहाश्रम में **(विश्वान्)** सम्पूर्ण **(यजत्रान्)** मिले हुए श्रेष्ठ पुत्रों को **(आ, सादय)** प्राप्त कराओ **(च)** और इनकी **(अवसे)** रक्षा आदि के लिये **(मधूनि)** मधुरता से युक्त पीने के योग्य विशेष रसों का **(पायय)** पान कराओ॥५॥

भावार्थः-जो स्त्री और पुरुष प्रसन्नता से विवाह किये हुए विद्या, बुद्धि और उत्तम वाणी से युक्त इस संसार में गृहाश्रम में वर्त्तमान होकर प्रेम से उत्पन्न होनेवाले पुत्रों को उत्पन्न, पालन और उत्तम शिक्षायुक्त करके तथा स्वयंवर विवाह कराके निवास कराते हैं वे ही गृहाश्रम में मोक्ष के सदृश सुख का अनुभव करते हैं॥५॥

पुनः स्त्रीपुरुषयोः कृत्यमाह॥

फिर स्त्री-पुरुष के कृत्य को अगले मन्त्र में कहते हैं॥

या ते॑ अग्ने॒ पर्व॑तस्येव॒ धारास॑श्चन्ती पी॒पय॑द्देव चि॒त्रा।

ताम॒स्मभ्यं॒ प्रम॑तिं जातवेदो॒ वसो॒ रास्व॑ सुम॒तिं वि॒श्वज॑न्याम्॥ ६॥ २॥

या। ते॒। अ॒ग्ने॒। पर्व॑तस्यऽइव। धारा॑। असश्चन्ती। पी॒पय॑त्। दे॒व॒। चि॒त्रा। ताम्। अ॒स्मभ्य॑म्। प्रऽम॑तिम्। जा॒त॒ऽवे॒दः॒। वसो॒ इति॑। रास्व॑। सु॒ऽम॒तिम्। वि॒श्वऽज॑न्याम्॥ ६॥

पदार्थः-(या) (ते) तव **(अग्ने)** स्त्रि पुरुष वा **(पर्वतस्येव)** मेघस्येव **(धारा)** प्रवाहवद्वाणी। **धारेति वाङ्नामसु पठितम्।** (निघं०१.११) **(असश्चन्ती)** असमवयन्ती **(पीपयत्)** पिबति **(देव)** दिव्यगुणसम्पन्न **(चित्रा)** अद्भुता **(ताम्) (अस्मभ्यम्) (प्रमतिम्)** प्रकृष्टां प्रज्ञाम् **(जातवेदः)** जातेषु विद्यमानेश्वर **(वसो)** सर्वत्र वसन् **(रास्व)** देहि। अत्र व्यत्ययेनात्मनेपदम्। **(सुमतिम्)** शोभनप्रज्ञां स्त्रियमुत्तमप्रज्ञं पुरुषं वा **(विश्वजन्याम्)** विश्वं समग्रमपत्यं जायते यस्यास्ताम्॥६॥

अन्वयः-हे अग्ने! ते यासश्चन्ती चित्रा पर्वतस्येव धारा पीपयत्तां प्रमतिं विश्वजन्यां सुमतिं त्वं रास्व। हे देव वसो जातवेदो भगवँस्त्वं दम्पतीभ्योऽस्मभ्यमेतां विद्यां प्रज्ञां वाचमीदृशीं स्त्रियमीदृशं पतिं च कृपया देहि यतो वयं सर्वदा सुखिनो भवेम॥६॥

भावार्थः-स्त्रीपुरुषैर्ब्रह्मचर्य्येण विद्यासुशिक्षाः प्राप्य युवावस्थायां तुल्यगुणकर्म-स्वभावान्त्सुपरीक्ष्य द्विगुणबलायुष्कं पतिं हृद्यां च प्राप्य गृहाश्रमे सुखेन निवसनीयमिति॥६॥

अत्र वाक्प्रज्ञागृहाश्रमस्त्रीपुरुषविवाहकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तपञ्चाशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** स्त्रि या पुरुष! **(ते)** आपकी **(या)** जो **(असश्चन्ती)** असम्बन्ध रखती हुई **(चित्रा)** अद्भुत **(पर्वतस्येव)** मेघ के **(धारा)** प्रवाह के सदृश वाणी बुद्धि को **(पीपयत्)** पीती है **(ताम्)** उस **(प्रमतिम्)** उत्तम बुद्धि को और **(विश्वजन्याम्)** जिससे सम्पूर्ण सन्तान उत्पन्न होता है, उस **(सुमतिम्)** उत्तम बुद्धिवाली स्त्री वा उत्तम बुद्धिवाले पुरुष को आप **(रास्व)** दीजिये। हे **(देव)** उत्तम गुणों से युक्त **(वसो)** सर्वत्र वसते हुए **(जातवेदः)** उत्पन्न हुए पदार्थों में विद्यमान भगवन्! ईश्वर आप **(अस्मभ्यम्)** हम लोगों के लिये ऐसी विद्या, बुद्धि, वाणी और ऐसी स्त्री तथा ऐसे पति को कृपा से दीजिये, जिससे कि हम लोग सदा सुखी होवें॥६॥

भावार्थः-स्त्री और पुरुषों को चाहिये कि ब्रह्मचर्य से विद्या और उत्तम शिक्षाओं को प्राप्त होकर युवावस्था में तुल्य गुण, कर्म और स्वभावों की परीक्षा करके द्विगुण बल और अवस्थावाले पति और प्रेमपात्र स्त्री को प्राप्त होकर गृहाश्रम में सुख से रहें॥६॥

इस सूक्त में वाणी, बुद्धि, गृहाश्रम और स्त्री-पुरुषों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्तावनवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

अथ नवर्चस्याष्टपञ्चाशत्तमस्य सूक्तस्य विश्वामित्र ऋषिः। अश्विनौ देवते। १, ८, ९ त्रिष्टुप्। २-५, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ शिल्पिजनकृत्यमाह॥

अब नव ऋचावाले अट्ठावनवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में शिल्पिजन के काम को कहते हैं॥

धेनुः प्रत्नस्य काम्यं दुहाना न्तः पुत्रश्चरति दक्षिणायाः।
आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः॥ १॥

धेनुः। प्रत्नस्य। काम्यम्। दुहाना। अन्तरिति। पुत्रः। चरति। दक्षिणायाः। आ। द्योतनिम्। वहति। शुभ्रऽयामा। उषसः। स्तोमः। अश्विनौ। अजीगरिति॥ १॥

पदार्थः-(धेनुः) गौरिव वाक् **(प्रत्नस्य)** पुरातनस्य **(काम्यम्)** कमनीयं बोधम् **(दुहाना)** प्रपूरयन्ती **(अन्तः)** आभ्यन्तरे **(पुत्रः)** तस्या जातो बोधः **(चरति)** विलसति **(दक्षिणायाः)** ज्ञानप्रापिकायाः **(आ) (द्योतनिम्)** प्रकाशरूपां विद्याम् **(वहति)** प्राप्नोति प्रापयति वा **(शुभ्रयामा)** शुभ्राश्शुद्धा यामा दिवसा यया सा **(उषसः)** प्रभातान् **(स्तोमः)** श्लाघनीयः **(अश्विनौ)** आप्तावध्यापकोपदेशकौ **(अजीगः)** प्राप्नोति॥ १॥

अन्वयः-हे मनुष्या! शुभ्रयामा या प्रत्नस्य काम्यं दुहाना धेनुरस्ति तस्या दक्षिणायाः पुत्रोऽन्तश्चरति द्योतनिमश्विनौ उषस इवाऽऽवहति यया स्तोमोऽश्विनावजीगस्तां यूयं प्राप्नुत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य उषसो जनयति तथैवात्मनि जातो बोधः पूर्णं कामं जनयित्वा सत्याऽऽसत्ये प्रकाशयति। या विद्याधर्मयुक्ता श्लक्ष्णा वा वाग् यमाप्नोति तं सनातनस्य ब्रह्मणो बोधोऽप्याप्नोति॥ १॥

पदार्थः-हे मनुष्यो! **(शुभ्रयामा)** शुद्ध दिन जिससे होते वा जो **(प्रत्नस्य)** प्राचीन के **(काम्यम्)** कामना योग्य बोध को **(दुहाना)** पूर्ण करती हुई **(धेनुः)** गौ के सदृश वाणी है, उस **(दक्षिणायाः)** ज्ञान को प्राप्त करानेवाली वाणी का **(पुत्रः)** पुत्र अर्थात् उससे उत्पन्न बोध **(अन्तः)** मध्य में **(चरति)** विलसता अर्थात् रहता है **(द्योतनिम्)** और प्रकाशरूप विद्या को **(अश्विनौ)** तथा यथार्थवक्ता अध्यापक और उपदेशक को **(उषसः)** प्रातःकालों के सदृश **(आ, वहति)** प्राप्त होता वा प्राप्त कराता है और जिससे **(स्तोमः)** प्रशंसा करने योग्य यथार्थवक्ता अध्यापक और उपदेशक **(अजीगः)** प्राप्त होता है, उसको आप लोग भी प्राप्त होओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य प्रातःकालों को उत्पन्न करता है, वैसे ही आत्मा में उत्पन्न हुआ बोध पूर्ण मनोरथ को उत्पन्न कर सत्य और असत्य का प्रकाश करता है। जो विद्याधर्म से युक्त वा श्रेष्ठ वाणी जिसको प्राप्त होती है उसको सनातन ब्रह्म का बोध भी प्राप्त होता है॥ १॥

अथोर्ध्वाध:स्थानविषयकं शिल्पिजनकृत्यमाह॥

अब ऊर्ध्व और अध:स्थानविषयक शिल्पिजनों के कृत्य को कहते हैं॥

सुयुग्वहन्ति प्रति वामृतेनोर्ध्वा भवन्ति पितरेव मेधा:।
जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक्॥ २॥

सुऽयुक्। वहन्ति। प्रति। वाम्। ऋतेन। ऊर्ध्वा:। भवन्ति। पितराऽइव। मेधा:। जरेथाम्। अस्मत्। वि। पणे:। मनीषाम्। युवो:। अव:। चकृम। आ। यातम्। अर्वाक्॥ २॥

पदार्थ:-(सुयुक्) ये सुष्ठु युञ्जन्ति ते **(वहन्ति)** प्राप्नुवन्ति **(प्रति)** **(वाम्)** युवाम् **(ऋतेन)** सत्येन **(ऊर्ध्वा:)** ऊर्ध्वगमयित्र्य: **(भवन्ति)** **(पितरेव)** जननीजनकाविव **(मेधा:)** प्रज्ञा: **(जरेथाम्)** स्तुयातम् **(अस्मत्)** **(वि)** **(पणे:)** व्यवहारस्य **(मनीषाम्)** मनस ईषिणीम् **(युवो:)** युवयो: **(अव:)** रक्षणम् **(चकृम)** कुर्य्याम **(आ)** समन्तात् **(यातम्)** प्राप्नुतम् **(अर्वाक्)** अध:॥ २॥

अन्वय:-हे अश्विनावध्यापकोपदेशकौ! सुयुग् या ऊर्ध्वा मेधा ऋतेन वां वहन्ति ता अस्मान् प्रति वाहय या: पितरेव पालिका भवन्ति ता युवां जरेथाम्। अस्मद्विपणेर्मनीषामा यातमर्वाग् युवोरवो वयं चकृम॥ २॥

भावार्थ:-यथा वायुकिरणा: सूर्य्यादिकं वहन्ति तथैवोत्तमप्रज्ञावद्वर्त्तमाना: स्त्रियो सुखं प्रतिवहन्ति। ये विद्वांसो नृषु पितृवद्वर्त्तन्ते तान् प्रति सर्वै: पुत्रवद्वर्त्तित्वा सर्वं व्यवहारं विज्ञाय यथावदनुष्ठातव्यम्॥ २॥

पदार्थ:-हे अध्यापक और उपदेशक! **(सुयुक्)** उत्तम कृत्य के योगकर्त्ताजन जिन **(ऊर्ध्वा:)** ऊपर को पहुंचानेवाली **(मेधा:)** बुद्धियों और **(ऋतेन)** सत्य से **(वाम्)** आप दोनों को **(वहन्ति)** प्राप्त होते हैं, उनको हम लोगों के **(प्रति)** प्रति पहुंचाओ, जो **(पितरेव)** माता और पिता के सदृश पालन करनेवाली **(भवन्ति)** होती हैं, **[**उनको**]** आप दोनों **(जरेथाम्)** उनकी स्तुति करो। **(अस्मत्)** हमारे लिये **(वि, पणे:)** व्यवहार की **(मनीषाम्)** बुद्धि को **(आ)** सब प्रकार **(यातम्)** प्राप्त होओ **(अर्वाक्)** नीचे स्थानों में **(युवो:)** आप दोनों की **(अव:)** रक्षा हम लोग **(चकृम)** करें॥ २॥

भावार्थ:-जैसे वायु और किरणें सूर्य्य आदि को पहुँचाती हैं, वैसे ही उत्तम बुद्धि के सदृश वर्त्तमान स्त्रियाँ सुख को पहुँचाती हैं। और जो विद्वान् लोग मनुष्यों में पिता के सदृश वर्त्तमान हैं, उनके प्रति सबको चाहिये कि पुत्र के सदृश वर्त्ताव कर और सब व्यवहार को जान के यथावत् करें॥ २॥

अथाग्न्यादिपदार्थचालितयानविषयकं शिल्पिकृत्यमाह॥

अब अग्नि आदि पदार्थ चालितयान विषयक शिल्पिकृत्य को कहते हैं॥

सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः।

किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः॥ ३॥

सुयुक्ऽभिः। अश्वैः। सुऽवृता। रथेन। दस्रौ। इमम्। शृणुतम्। श्लोकम्। अद्रेः। किम्। अङ्ग। वाम्। प्रति। अवर्तिम्। गमिष्ठा। आहुः। विप्रासः। अश्विना। पुराऽजाः॥ ३॥

पदार्थः-(सुयुग्भिः) सुष्ठु योजितैः **(अश्वैः)** अग्न्यादिभिः पदार्थैः **(सुवृता)** यः सुष्ठु वर्त्तते तेन **(रथेन)** विमानादियानेन **(दस्रौ)** दुःखानामुपक्षेतारौ **(इमम्)** **(शृणुतम्)** **(श्लोकम्)** वाचम् **(अद्रेः)** मेघस्येव **(किम्)** **(अङ्ग)** **(वाम्)** **(प्रति)** **(अवर्त्तिम्)** अवर्त्तमानाम् **(गमिष्ठा)** अतिशयेन गन्तारौ **(आहुः)** कथयन्ति **(विप्रासः)** मेधाविनो विपश्चितः **(अश्विना)** सूर्य्याचन्द्रमसाविव वर्त्तमानावध्यापकोपदेशकौ **(पुराजाः)** पूर्वं जाताः॥ ३॥

अन्वयः-हे दस्रावश्विना! युवां सुयुग्भिरश्वैर्युक्तेन सुवृता रथेनागत्याऽद्रेरिवास्माकमिमं श्लोकं शृणुतम्। अङ्ग! यौ वां गमिष्ठा पुराजा विप्रास आहुस्तौ युवां प्रत्यवर्त्तिं किं न गच्छेतम्, किन्तु प्राप्नुयातमेव॥ ३॥

भावार्थः-ये विद्वांसोऽन्यादिविद्यया चालितैर्यानैर्व्यवहरेयुस्ते किं किमैश्वर्य्यं न लभेरन्॥ ३॥

पदार्थः-हे **(दस्रौ)** दुःखों को नाश करनेवाले **(अश्विना)** सूर्य्य और चन्द्रमा के सदृश वर्त्तमान अध्यापक और उपदेशक! आप दोनों **(सुयुग्भिः)** उत्तम प्रकार जोड़े गये **(अश्वैः)** अग्नि आदि पदार्थों से युक्त **(सुवृता)** उत्तम **(रथेन)** विमान आदि वाहन से [आकर] **(अद्रेः)** मेघ के सदृश हम लोगों की **(इमम्)** इस **(श्लोकम्)** वाणी को **(शृणुतम्)** सुनो और **(अङ्ग)** हे पूर्वोक्त अध्यापक उपदेशको! जो **(वाम्)** तुम दोनों को **(गमिष्ठा)** अत्यन्त चलनेवाले **(पुराजाः)** प्रथम उत्पन्न हुए **(विप्रासः)** बुद्धिमान् विद्वान् लोग **(आहुः)** कहते हैं, वे आप दोनों **(प्रति, अवर्त्तिम्)** अवर्त्तमान अर्थात् अलभ्य पदार्थ को **(किम्)** क्यों नहीं प्राप्त हों, किन्तु प्राप्त ही होवें॥ ३॥

भावार्थः-जो विद्वान् लोग अग्नि आदि विद्या से चलाये वाहनों से व्यवहार करें, वे किस-किस ऐश्वर्य्य को न प्राप्त होवें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवन्ते।

इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे॥ ४॥

आ। मन्येथाम्। आ। गतम्। कत्। चित्। एवैः। विश्वे। जनासः। अश्विना। हवन्ते। इमा। हि। वाम्। गोऽऋजीका। मधूनि। प्र। मित्रासः। न। ददुः। उस्रः। अग्रे॥ ४॥

पदार्थः-(आ) समन्तात् **(मन्येथाम्)** विजानीतम् **(आ) (गतम्)** आगच्छतम् **(कत्)** कदा **(चित्)** अपि **(एवैः)** सद्यः प्रापकैर्विद्युदादिचालितैर्यानैः **(विश्वे)** सर्वे **(जनासः)** प्रसिद्धा मनुष्याः **(अश्विना)** वायुविद्युतौ **(हवन्ते)** आददति **(इमा)** इमानि **(हि)** यतः **(वाम्) (गोऋजीका)** गवां दुग्धादिना मिश्रितानि **(मधूनि) (प्र) (मित्रासः)** सखायः **(न)** इव **(ददुः)** ददुः **(उस्रः)** गाः। **उस्रेति गोनामसु पठितम्।** (निघं०२.११)। **(अग्रे)** पूर्वम्॥४॥

अन्वयः- हे अश्विनावध्यापकोपदेशकौ यौ युवां विश्वे जनासो हवन्तेऽग्रे हीमा गोऋजीका मधूनि मित्रासो न प्रददुस्तानुस्रो वामेवैः कदाऽऽगतं चिदपि तानामन्येथाम्॥४॥

भावार्थः-विदुषां योग्यतास्ति ये प्रीत्या धार्मिकाः सुसेवका विद्यार्थिनश्श्रोतारो वा समीपमागच्छेयुस्तेभ्यः प्रशस्तानि विज्ञानादीनि ददुः। हि यतो सर्वे मनुष्याः सर्वैः सह मित्रवद्वर्त्तेरन्॥४॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक जन! **[**जो**]** आप दोनों को **(विश्वे)** सम्पूर्ण **(जनासः)** प्रसिद्ध मनुष्य **(हवन्ते)** ग्रहण करते हैं **(अग्रे)** और प्रथम **(हि)** कि जिससे **(इमा)** इन **(गोऋजीका)** गौवों के दुग्ध आदि से मिले हुए **(मधूनि)** सोमलतारूप औषधियों के रसों को **(मित्रासः)** मित्र लोगों के **(न)** सदृश **(प्र, ददुः)** देवें, उनका तथा **(उस्रः)** गौओं को **(वाम्)** आप दोनों **(एवैः)** शीघ्र पहुँचानेवाले बिजुली आदि से चलाये गये वाहनों से **(कत्)** कब **(आ, गतम्)** प्राप्त हुए **(चित्)** भी **[**उनको**]** **(आ)** सब प्रकार **(मन्येथाम्)** जानिये॥४॥

भावार्थः-विद्वानों की योग्यता है कि जो प्रीति से धार्मिक उत्तम सेवक विद्यार्थी वा श्रोताजन समीप आवें, उनको उत्तम विज्ञान आदि देवें। जिससे सब मनुष्य सबके साथ मित्रों के सदृश वर्त्ताव करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तिरः पुरू चिदश्विना रजांस्याङ्गूषो वां मघवाना जनेषु।
एह यातं पथिभिर्देवयानैर्दस्रावि मे वां निधयो मधूनाम्॥५॥३॥

तिरः। पुरु। चित्। अश्विना। रजांसि। आङ्गूषः। वाम्। मघऽवाना। जनेषु। आ। इह। यातम्। पथिऽभिः। देवऽयानैः। दस्रौ। इमे। वाम्। निऽधयः। मधूनाम्॥५॥

पदार्थः-(तिरः) तिर्यक् **(पुरू)** बहूनि **(चित्)** अपि **(अश्विना)** शिल्पविद्याविदा-वध्यापकोपदेशकौ **(रजांसि)** लोकान् **(आङ्गूषः)** विद्वान् **(वाम्)** युवाम् **(मघवाना)** परमोत्तमधनयुक्तौ

(जनेषु) मनुष्येषु **(आ)** **(इह)** **(यातम्)** **(पथिभिः)** मार्गैः **(देवयानैः)** देवा विद्वांसो यान्ति यैस्तैः **(दस्रौ)** क्लेशविनाशकौ **(इमे)** **(वाम्)** **(निधयः)** धनसमूहाः **(मधूनाम्)** माधुर्य्यगुणयुक्तानां पदार्थानाम्॥५॥

अन्वयः-हे दस्रौ मघवाना अश्विना! यदि वां देवयानैः पथिभिः पुरू रजांसि तिर आ यातं तर्हीह वां जनेष्विमे मधूनां निधयः प्राप्नुयुः। आङ्गुषश्चिदपि प्राप्नुयात्॥५॥

भावार्थः-ये विद्वद्गतैर्मार्गैः पदार्थविद्या अन्विच्छेयुस्ते सकलविद्याः प्राप्य जलस्थलान्तरिक्षेषु गत्वागत्य श्रीमन्तो भूत्वा दारिद्र्यं तिरस्कृत्य निधिमन्तः सन्तोऽन्यानप्येवं कुर्य्युः॥५॥

पदार्थः-हे **(दस्रौ)** क्लेश के नाशकर्त्ता **(मघवाना)** अत्यन्त उत्तम धनयुक्त **(अश्विना)** शिल्पविद्या के जाननेवाले अध्यापक और उपदेशको! जो **(वाम्)** आप दोनों **(देवयानैः)** विद्वान् लोग जिनसे चलते उन **(पथिभिः)** मार्गों से **(पुरू)** बहुत **(रजांसि)** लोकों को **(तिरः)** तिर्छे मार्ग से **(आ, यातम्)** प्राप्त होवें तो **(इह)** यहाँ **(वाम्)** तुम दोनों को **(जनेषु)** मनुष्यों में **(इमे)** ये **(मधूनाम्)** माधुर्य गुणों से युक्त पदार्थसम्बन्धी **(निधयः)** धनों के समूह प्राप्त होवें और **(आङ्गूषः)** विद्वान् **(चित्)** भी प्राप्त होवें॥५॥

भावार्थः-जो लोग विद्वानों के मार्गों से पदार्थविद्याओं का खोज करें, वे सम्पूर्ण विद्याओं को प्राप्त हों तथा जल, स्थल और अन्तरिक्षों में जा-आ और लक्ष्मीवान् हो दारिद्र्य का तिरस्कार करके धनवान् होते हुए अन्य जनों को भी ऐसे ही करें॥५॥

यदि शिल्पिविद्वद्भिरन्ये परस्परं मैत्रीं कुर्य्युस्तर्हि किं प्राप्नुयुरित्याह॥

जो शिल्पी विद्वानों के साथ और लोग परस्पर मित्रता करें तो क्या पावें, इस विषय को अगले मन्त्र में कहते हैं॥

पुरा॒णमोकः॑ स॒ख्यं शि॒वं वां॑ यु॒वोर्नरा॒ द्रवि॑णं जु॒ह्वाव्या॑म्।
पुनः॑ कृण्वा॒नाः स॒ख्या शि॒वानि॒ मध्वा॑ मदेम स॒ह नू स॑मा॒नाः॥६॥

पु॒रा॒णम्। ओकः॑। स॒ख्यम्। शि॒वम्। वा॒म्। यु॒वोः॒। न॒रा॒। द्रवि॑णम्। जु॒ह्वाव्या॑म्। पुनरिति॑। कृ॒ण्वा॒नाः॒। स॒ख्या। शि॒वानि॑। मध्वा॑। म॒दे॒म॒। स॒ह। नु। स॒मा॒नाः॥६॥

पदार्थः-(पुराणम्) पुरातनम् **(ओकः)** सर्वर्त्तुसुखप्रदं स्थानमिव **(सख्यम्)** सख्युः कर्म मित्रत्वम् **(शिवम्)** कल्याणकरम् **(वाम्)** **(युवोः)** **(नरा)** नायकौ **(द्रविणम्)** धनम् **(जह्वाव्याम्)** जह्वोस्त्यक्तुरियं नीतिस्तस्याम्। अत्राकाराऽकारयोर्व्यत्ययः। **(पुनः)** **(कृण्वानाः)** कुर्वन्तः **(सख्या)** सुहृदः कर्माणि **(शिवानि)** सुखकराणि **(मध्वा)** मधुरभावेन **(मदेम)** आनन्देम **(सह)** **(नु)** सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(समानाः)** तुल्योत्तमगुणकर्मस्वभावाः॥३॥

अन्वयः-हे नरा नायकौ सभासेनेशौ! वां पुराणमोक इव शिवं सख्यमाप्नोतु। जह्नाव्यां युवोर्द्रविणं मिलतु पुनः शिवानि सख्या कृण्वानाः समाना वयं मध्वा सह नु मदेम॥३॥

भावार्थः-यदि विद्वांसोऽविद्वांसश्च परस्परं मैत्रीं कुर्युस्ते सनातनं शिवं ब्रह्मैश्वर्यं विज्ञानञ्च प्राप्य धार्मिकास्सन्तो दुष्टानि व्यसनानि विहाय सदैव सुखिनः स्युः॥६॥

पदार्थः-हे **(नरा)** नायक सभा और सेना के ईशो! **(वाम्)** आप दोनों **(पुराणम्)** प्राचीन काल से सिद्ध **(ओकः)** सब ऋतुओं में सुख देनेवाले स्थान के तुल्य **(शिवम्)** कल्याण करनेवाले **(सख्यम्)** मित्र के कर्म को प्राप्त हूजिये। और **(जह्नाव्याम्)** त्याग करनेवाले की नीति में **(युवोः)** तुम दोनों को **(द्रविणम्)** धन प्राप्त हो **(पुनः)** फिर **(शिवानि)** सुख करनेवाले **(सख्या)** मित्र के कर्मों को **(कृण्वानाः)** करते हुए **(समानाः)** तुल्य गुण और उत्तम कर्म, स्वभाववाले हम लोग **(मध्वा)** मधुरभाव के **(सह)** साथ **(नु)** शीघ्र **(मदेम)** आनन्द करें॥६॥

भावार्थः-जो विद्वान् और अविद्वान् लोग परस्पर मैत्री करें; वे अनादिसिद्ध, कल्याणकारक ब्रह्म, ऐश्वर्य और विज्ञान को प्राप्त होकर धार्मिक होते हुए दुष्ट व्यसनों का त्याग करके सदा ही सुखी होवें॥६॥

अथ शिल्पविद्योपदेशार्थाज्ञाविषयमाह॥

अब शिल्पविद्या उपदेशार्थ आज्ञा विषय को अगले मन्त्र में कहते हैं॥

अश्विना वायुना युवं सुदक्षा नियुद्भिश्च सजोषसा युवाना।
नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू॥७॥

अश्विना। वायुना। युवम्। सुऽदक्षा। नियुत्ऽभिः। च। सऽजोषसा। युवाना। नासत्या। तिरःऽअह्न्यम्। जुषाणा। सोमम्। पिबतम्। अस्रिधा। सुदानू इति सुऽदानू॥७॥

पदार्थः-(अश्विना) शिल्पविद्याध्यापकाऽध्येतारौ स्वामिसेवकौ वा **(वायुना)** पवनेन **(युवम्)** युवाम् **(सुदक्षा)** सुष्ठु चतुरौ **(नियुद्भिः)** नियुक्तैः **(च)** **(सजोषसा)** समानप्रीतिसेविनौ **(युवाना)** प्राप्तयौवनौ **(नासत्या)** अविद्यमानाऽसत्याचारौ **(तिरोअह्न्यम्)** तिरश्चीनेष्वहस्सु साधुम् **(जुषाणा)** सेवमानौ **(सोमम्)** महौषधिरसम् **(पिबतम्)** **(अस्रिधा)** अहिंसकौ **(सुदानू)** उत्तमपदार्थदातारौ॥७॥

अन्वयः-हे युवाना नासत्या सुदक्षा सजोषसा तिरोअह्न्यं जुषाणा अस्रिधा सुदानू अश्विना! युवं वायुना नियुद्भिश्च युक्ते याने स्थित्वाऽऽगत्य सोमं पिबतम्॥७॥

भावार्थः-हे मनुष्या! भवन्तो हिंसाद्यधर्मव्यवहारं विहाय वायुविद्युदादिपदार्थविद्या विज्ञायाऽन्येभ्यो विद्यादि दत्वा पूर्णं ब्रह्मचर्य्य सेवित्वा चिरञ्जीवन्तु॥७॥

पदार्थः-हे **(युवाना)** यौवनावस्था को प्राप्त **(नासत्या)** असत्य आचार से रहित **(सुदक्षा)** उत्तम प्रकार चतुर **(सजोषसा)** तुल्य प्रीति के सेवनेवाले **(तिरोअह्न्यम्)** तिर्च्छे दिनों में उत्तम की **(जुषाणा)** सेवा करते हुए **(अस्रिधा)** अहिंसक **(सुदानू)** उत्तम पदार्थ के देने **(अश्विना)** शिल्पविद्या के पढ़ाने और पढ़नेवाले स्वामी और सेवको! **(युवम्)** आप दोनों **(वायुना)** पवन से **(नियुद्भिः)** नियत किये हुए भी वाहनों में स्थित हो **(च)** और आकर **(सोमम्)** बड़ी औषधि के रस का **(पिबतम्)** पान कीजिये॥७॥

भावार्थः-हे मनुष्यो! आप हिंसा आदि अधर्म व्यवहार को त्याग के वायु, बिजुली आदि पदार्थविद्याओं को जान अन्य जनों के लिये विद्या आदि दे और पूर्ण ब्रह्मचर्य का सेवन करके अतिकाल जीओ॥७॥

अथ शिल्पविद्यासिद्धयानेन गमनागमनविषयमाह॥

अब शिल्पविद्यासिद्ध यान से जाने-आने के विषय को अगले मन्त्र में कहते हैं॥

अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः।
रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः॥८॥

अश्विना। परि। वाम्। इषः। पुरूचीः। ईयुः। गीःऽभिः। यतमानाः। अमृध्राः। रथः। ह। वाम्। ऋतऽजाः। अद्रिऽजूतः। परि। द्यावापृथिवी इति। याति। सद्यः॥८॥

पदार्थः-(अश्विना) सकलविद्याव्याप्तौ **(परि)** सर्वतः **(वाम्)** युवाम् **(इषः)** इच्छासिद्धीः **(पुरूचीः)** पुरूणि सुखान्यञ्चन्तीः **(ईयुः)** प्राप्नुयुः **(गीर्भिः)** वाग्भिः **(यतमानाः)** **(अमृध्राः)** अध्यापकोपदेशकाः **(रथः)** **(ह)** किल **(वाम्)** युवयोः **(ऋतजाः)** ऋतात् सत्याज्जातः **(अद्रिजूतः)** योऽद्रौ मेघे जवति सद्यो गच्छति **(परि)** सर्वतः **(द्यावापृथिवी)** भूमिप्रकाशौ **(याति)** गच्छति **(सद्यः)** शीघ्रम्॥८॥

अन्वयः-हे अश्विना यदि वामृतजा अद्रिजूतो रथो द्यावापृथिवी सद्यः परि याति तर्हि तेन वां ह गीर्भिरमृध्रा यतमाना अध्यापकोपदेशका इव पुरूचीरिष परीयुः॥८॥

भावार्थः-ये विमानादियानाद्यग्न्यादिभिर्निर्मिते तेऽभीष्टानि सुखानि प्राप्य यत्रेच्छा तत्र सद्यो गन्तुं शक्नुवन्ति॥८॥

पदार्थः-हे **(अश्विना)** सम्पूर्ण विद्याओं में व्याप्त रमते हुए यदि **(वाम्)** आप दोनों को **(ऋतजाः)** सत्य से उत्पन्न **(अद्रिजूतः)** मेघ में शीघ्र जानेवाला **(रथः)** वाहन **(द्यावापृथिवी)** भूमि और प्रकाश को **(सद्यः)** शीघ्र **(परि, याति)** सब ओर पहुँचाता है तो उससे **(वाम्)** आप दोनों को **(ह)** निश्चय कर **(गीर्भिः)** वाणियों से जैसे **(अमृध्राः)** अध्यापक और उपदेशक **(यतमानाः)** प्रयत्न करते प्राप्त हों, वैसे **(पुरूचीः)** सुखों को पहुंचानेवाली **(इषः)** इच्छासिद्धियों को **(परि, ईयुः)** सब ओर प्राप्त होवें॥९॥

भावार्थः-जो लोग विमान आदि यानों को अग्नि आदि से रचते हैं, वे अभीष्ट सुखों को प्राप्त होकर जहाँ इच्छा हो शीघ्र जा सकते हैं॥८॥

अथ शिल्पविद्याफलमाह॥

अब शिल्पविद्या के फल को अगले मन्त्र में कहते हैं॥

अश्विना मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे।
रथो ह वां भूरि वर्पः करिक्रत् सुतावतो निष्कृतमागमिष्ठः॥९॥४॥

अश्विना। मधुसुत्ऽतमः। युवाकुः। सोमः। तम्। पातम्। आ। गतम्। दुरोणे। रथः। ह। वाम्। भूरि। वर्पः। करिक्रत्। सुतऽवतः। निःऽकृतम्। आऽगमिष्ठः॥९॥

पदार्थः-(अश्विना) सर्वाधीशसेनाधीशौ **(मधुषुत्तमः)** यो मधूनि सुनोति सोऽतिशयितः **(युवाकुः)** मिश्रिताऽमिश्रितः **(सोमः)** ऐश्वर्यलाभः **(तम्) (पातम्)** रक्षतम् **(आ) (गतम्)** आगच्छतम् **(दुरोणे)** गृहे **(रथः) (ह)** किल **(वाम्)** युवयोः **(भूरि)** बहु **(वर्पः)** रूपयुक्तः **(करिक्रत्)** भृशं करोति **(सुतावतः)** निष्पन्नैश्वर्यकोशस्य **(निष्कृतम्)** निष्पन्नम् **(आगमिष्ठः)** अतिशयेनाऽऽगन्ता॥९॥

अन्वयः-हे अश्विना! यो ह वां रथो भूरि वर्पः सुतावतो निष्कृतमागमिष्ठः करिक्रदस्ति तेन यो मधुषुत्तमो युवाकुस्सोमोऽस्ति तं दुरोणे पातं परदेशात् स्वदेशमागतम्॥९॥

भावार्थः-ये मनुष्या शिल्पविद्ययाऽनेकानि कलायन्त्राणि निर्माय यानादीनि निर्मिमते ते स्वगृहकुलदेशे पूर्णमैश्वर्यं कर्त्तुं शक्नुवन्ति॥९॥

अत्राश्विशिल्पकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टपञ्चाशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(अश्विना)** सबके अधीश और सेना के अधीश! जो **(ह)** निश्चय **(वाम्)** आप दोनों का **(रथः)** [वाहन] **(भूरि)** बड़े **(वर्पः)** रूप से युक्त **(सुतावतः)** उत्पन्न ऐश्वर्य कोश के **(निष्कृतम्)** सिद्ध हुए विषय को **(आगमिष्ठः)** अतिशय करके प्राप्त होनेवाला **(करिक्रत्)** निरन्तरकारी है, उससे जो **(मधुषुत्तमः)** मीठे रसों को निचोड़नेवाला **(युवाकुः)** मिला और अनमिला **(सोमः)** ऐश्वर्य का लाभ है **(तम्)** इसकी **(दुरोणे)** गृह में **(पातम्)** रक्षा कीजिये और अन्य देश से अपने देश में **(आ, गतम्)**

आइए॥९॥

भावार्थः–जो मनुष्य शिल्पविद्या से अनेक कलायन्त्रों का निर्माण कर के वाहन आदि को रचते हैं, वे अपने गृह, कुल और देश में पूर्ण ऐश्वर्य कर सकते हैं॥७॥

इस सूक्त में अश्वि शब्द से शिल्पीजनों का कृत्य वर्णन करने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठावनवां सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ नवर्चस्यैकोनषष्टितमस्य सूक्तस्य विश्वामित्र ऋषिः। मित्रो देवता। १, २, ५ त्रिष्टुप्। ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ६, ९ निचृद्गायत्री। ७, ८ गायत्री छन्दः। षड्जः स्वरः॥

अथ मित्रगुणानाह॥

अब नव ऋचावाले उनसठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मित्रगुणों का उपदेश करते हैं॥

मित्रो जनान् यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत॥ १॥

मित्रः। जनान्। यातयति। ब्रुवाणः। मित्रः। दाधार। पृथिवीम्। उत। द्याम्। मित्रः। कृष्टीः। अनिऽमिषा। अभि। चष्टे। मित्राय। हव्यम्। घृतऽवत्। जुहोत॥ १॥

पदार्थः-(मित्रः) सखा **(जनान्)** **(यातयति)** पुरुषार्थयति **(ब्रुवाणः)** उपदेशेन प्रेरयन् **(मित्रः)** सूर्य इव परमात्मा **(दाधार)** धरति **(पृथिवीम्)** भूमिम् **(उत)** अपि **(द्याम्)** सूर्यलोकम् **(मित्रः)** सर्वस्य सुहृद्राजा **(कृष्टीः)** कर्षिका मनुष्यप्रजाः **(अनिमिषा)** अहर्निशजन्यया क्रियया **(अभि)** **(चष्टे)** अभितः ख्याति **(मित्राय)** वह्नये **(हव्यम्)** होतुमर्हम् **(घृतवत्)** बहुघृतादियुक्तं हविः **(जुहोत)** दत्त॥ १॥

अन्वयः-हे मनुष्या! यो ब्रुवाणो मित्रो जनाननिमिषा यातयति यो मित्रः पृथिवीमुत द्यामनिमिषा दाधार। यो मित्रः कृष्टीरनिमिषाऽभि चष्टे तस्मै मित्राय घृतवद्धव्यं जुहोत॥ १॥

भावार्थः-ये मनुष्या सत्योपदेशकं सत्यविद्याप्रदं सखायं सर्वाधारकं परमात्मानं सर्वव्यवस्थापकं राजानं सत्कुर्वन्ति त एव सर्वस्य सुहृदः सन्ति॥ १॥

पदार्थः-हे मनुष्यो! जो **(ब्रुवाणः)** उपदेश से प्रेरणा करता हुआ **(मित्रः)** सबका मित्रजन **(जनान्)** मनुष्यों को **(अनिमिषा)** दिन और रात्रि में होनेवाली क्रिया से **(यातयति)** पुरुषार्थ कराता जो **(मित्रः)** सूर्य के समान परमात्मा मित्र **(पृथिवीम्)** भूमि **(उत)** और **(द्याम्)** सूर्यलोक को दिन और रात्रि में होनेवाली क्रिया से **(दाधार)** धारण करता और जो **(मित्रः)** सबका मित्र **(कृष्टीः)** खींचने व जोतनेवाली मनुष्य रूप प्रजाओं को दिन और रात्रि में होनेवाली क्रिया से **(अभि, चष्टे)** सब प्रकार उपदेश देता है उस **(मित्राय)** उक्त सर्व व्यवहार को चलानेवाले मित्र के लिये **(घृतवत्)** बहुत घृत आदि से युक्त **(हव्यम्)** हविष्यान्न **(जुहोत)** दीजिये॥ १॥

भावार्थः-जो मनुष्य लोग सत्य का उपदेश करने, सत्य विद्या देने, मित्रता रखने, सबको धारण करनेवाले परमात्मा और सबके व्यवस्थापक राजा का सत्कार करते हैं, वे ही सबके मित्र हैं॥ १॥

अथेश्वराप्तमित्रतामाह॥

अब ईश्वर और आप्त विद्वान् के मित्रपन को अगले मन्त्र में कहते हैं॥

प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्॥ २॥

प्र। सः। मित्र। मर्तः। अस्तु। प्रयस्वान्। यः। ते। आदित्य। शिक्षति। व्रतेन। न। हन्यते। न। जीयते। त्वाऽऊतः। न। एनम्। अंहः। अश्नोति। अन्तितः। न। दूरात्॥ २॥

पदार्थः-(प्र) (सः) (मित्र) सखे **(मर्त्तः)** मनुष्यः **(अस्तु)** भवतु **(प्रयस्वान्)** प्रयत्नवान् **(यः) (ते)** तव **(आदित्य)** अविनाशिस्वरूप **(शिक्षति)** विद्यां गृह्णाति ग्राहयति वा। अत्र व्यत्ययेन परस्मैपदम्। **(व्रतेन)** कर्मणेव **(न) (हन्यते) (न) (जीयते)** जेतुं शक्यते **(त्वोतः)** त्वया रक्षितः **(न) (एनम्) (अंहः)** पापम् **(अश्नोति)** प्राप्नोति **(अन्तितः)** समीपात् **(न) (दूरात्)**॥ २॥

अन्वयः-हे मित्र आप्त विद्वज्जगदीश्वर वा! यो मर्त्तः प्रयस्वानस्तु हे आदित्य! यो मनुष्यस्ते व्रतेनेवाऽन्यान् प्रशिक्षति स त्वोतोऽन्यैर्न हन्यते न जीयते। एनमन्तितोंऽहो नाऽश्नोति नैनं दूरादंहोऽश्नोति॥ २॥

भावार्थः-ये मनुष्या आप्तेश्वरयोर्गुणकर्मस्वभाववत्स्वगुणकर्मस्वभावान् कृत्वा सत्यन्यायेन सर्वाञ्छिक्षन्ते ते निष्पापा धर्मात्मानो भूत्वाऽऽप्तेश्वराभ्यां रक्षिताः सन्तो दुष्टैर्हन्तुं पराजेतुं च न शक्यन्ते। नैव ते दूरात् समीपाद्वा पक्षपातेन पापं भजन्ते॥ २॥

पदार्थः-हे **(मित्र)** मित्र यथार्थवक्ता विद्वान् वा जगदीश्वर! **(यः)** जो **(मर्त्तः)** मनुष्य **(प्रयस्वान्)** प्रयत्नवाला **(अस्तु)** हो। और हे **(आदित्य)** अविनाशिस्वरूप! जो मनुष्य **(ते)** आपके **(व्रतेन)** कर्म से जैसे वैसे अन्य जनों को **(प्र, शिक्षति)** विद्या ग्रहण कराता वा आप ग्रहण करता है **(सः)** वह **(त्वोतः)** आपसे रक्षित अन्य जनों से **(न)** न **(हन्यते)** मारा जाता **(न)** और न **(जीयते)** जीता जाता है। **(एनम्)** इसको **(अन्तितः)** समीप से **(अंहः)** पाप **(न)** नहीं **(अश्नोति)** प्राप्त होता और **(न)** न इसको **(दूरात्)** दूर से पाप प्राप्त होता है॥ २॥

भावार्थः-जो मनुष्य यथार्थवक्ता और स्वामी के गुण, कर्म और स्वभाव के सदृश अपने गुण, कर्म और स्वभावों को करके सत्य न्याय से सबको शिक्षा करते हैं, वे पापरहित धर्मात्मा होकर यथार्थवक्ता और स्वामी से रक्षित हुए दुष्टों से नाश तथा पराजय को प्राप्त नहीं हो सकते और न वे दूर वा समीप से पक्षपात से पाप का सेवन करते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः।
आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम॥ ३॥

अ॒न॒मी॒वास:। इळ॑या। मद॑न्त:। मि॒तज्ञ॑व:। वरि॑मन्। आ। पृ॒थि॒व्या:। आ॒दि॒त्यस्य॑। व्र॒तम्। उ॒प॒ऽक्षि॒यन्त॑:। व॒यम्। मि॒त्रस्य॑। सु॒ऽम॒तौ। स्या॒म॒॥ ३॥

पदार्थ:-(अनमीवास:) शरीरात्मरोगरहिता: **(इळया)** सुशिक्षितया वाचा पृथिवीराज्येन वा **(मदन्त:)** आनन्दन्त: **(मितज्ञव:)** मितानि जानूनि येषान्ते **(वरिमन्)** बहुशीलसत्ययुक्तम् **(आ) (पृथिव्या:)** भूमे: **(आदित्यस्य)** सूर्य्यस्य **(व्रतम्)** क्षमां न्यायप्रकाशं वा कर्म **(उपक्षियन्त:)** उपनिवसन्त: **(वयम्) (मित्रस्य)** सर्वस्य सुहृद ईश्वरस्याऽऽप्तस्य वा **(सुमतौ)** उत्तमाज्ञायां प्रज्ञायां वा **(स्याम)** भवेम॥ ३॥

अन्वय:-हे मनुष्या! यथा ब्रह्मचर्य्येणऽनमीवास इळया मदन्तो मितज्ञव: पृथिव्या आदित्यस्य वरिमन् व्रतमोपक्षियन्तो वयं मित्रस्य सुमतौ स्याम तथा भवन्तोऽपि भवन्तु॥ ३॥

भावार्थ:-ये परमेश्वरेणाऽऽप्तैस्सह सौहार्दं कृत्वा क्षमादिविद्यान्यायप्रकाशादिगुणान् स्वीकृत्य धर्म्ये पथि वर्तन्ते त एव परमेश्वरस्याप्तानां च प्रिया जायन्ते॥ ३॥

पदार्थ:-हे मनुष्यो! जैसे ब्रह्मचर्य्य से **(अनमीवास:)** शरीर और आत्मा के रोग से रहित **(इळया)** उत्तम प्रकार शिक्षित वाणी वा पृथिवी के राज्य से **(मदन्त:)** आनन्दित होते **(मितज्ञव:)** और नपी जङ्घाओंवाले **(पृथिव्या:)** भूमि और **(आदित्यस्य)** सूर्य्य के **(वरिमन्)** बहुत शील और सत्य से युक्त **(व्रतम्)** क्षमा वा न्यायप्रकाश करनेवाले कर्म को **(आ, उपक्षियन्त:)** प्राप्त होते हुए **(वयम्)** हम लोग **(मित्रस्य)** सबके मित्र ईश्वर वा यथार्थवक्ता पुरुष की **(सुमतौ)** श्रेष्ठ आज्ञा वा बुद्धि में **(स्याम)** होवें, वैसे आप भी होओ॥ ३॥

भावार्थ:-जो लोग परमेश्वर और यथार्थवक्ता पुरुषों के साथ मित्रता कर और क्षमा आदि, विद्या, न्याय के प्रकाश आदि गुणों को स्वीकार करके धर्मयुक्त मार्ग में वर्तमान हैं, वे ही परमेश्वर और यथार्थवक्ता पुरुषों के प्रिय होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒यं मि॒त्रो न॑म॒स्य॑: सु॒शेवो॒ राजा॑ सुक्ष॒त्रो अ॑जनिष्ट॒ वे॒धा:।
तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म॥ ४॥

अ॒यम्। मि॒त्र:। न॒म॒स्य॑:। सु॒ऽशेव॑:। राजा॑। सु॒ऽक्ष॒त्र:। अ॒ज॒नि॒ष्ट॒। वे॒धा:। तस्य॑। व॒यम्। सु॒ऽम॒तौ। य॒ज्ञिय॑स्य। अपि॑। भ॒द्रे। सौ॒म॒न॒से। स्या॒म॒॥ ४॥

पदार्थः-(अयम्) परमात्माऽऽप्तो राजा वा **(मित्रः)** सखा **(नमस्यः)** परिचरितुं सत्कर्तुं योग्यः **(सुशेवः)** सुष्ठु सुखप्रदः **(राजा)** भूमिपः **(सुक्षत्रः)** सुष्ठु सुखि क्षत्रं राष्ट्रं यस्य सः **(अजनिष्ट)** जायते **(वेधाः)** मेधावी **(तस्य) (वयम्) (सुमतौ)** आज्ञायां प्रज्ञायां वा **(यज्ञियस्य)** न्यायव्यवहारसम्पादकस्य **(अपि) (भद्रे)** कल्याणकरे **(सौमनसे)** सुमनसि भवे व्यवहारे **(स्याम)**॥४॥

अन्वयः-सर्वैर्योऽयं मित्रो सुशेवः सुक्षत्रो राजा वेधा नमस्योऽस्ति यस्य राष्ट्रं सुख्यजनिष्ट तस्य यज्ञियस्य सुमतौ सौमनसे भद्रेऽपि वयं स्याम तथैव सर्वे भवन्तु॥४॥

भावार्थः-यथेश्वर आप्ताश्च धर्मे वर्त्तमाना नमस्या भवन्ति तथैव न्यायविनयाभ्यां राष्ट्रपालका राजानः सत्कर्त्तव्याः स्युः। यथा शिष्टाः परमेश्वरस्याऽऽप्तानां च कर्मसु वर्त्तन्ते तथैवाऽस्माभिस्सदैव वर्त्तितव्यम्॥४॥

पदार्थः-सबको जो **(अयम्)** यह परमात्मा वा यथार्थवक्ता राजा **(मित्रः)** मित्र **(सुशेवः)** उत्तम सुख का दाता **(सुक्षत्रः)** वा जिसका राज्य देश उत्तम प्रकार सुखी **(राजा)** जो पृथिवी का पालनकर्त्ता **(वेधाः)** बुद्धिमान् **(नमस्यः)** और सत्कार करने योग्य है तथा जिसका राज्य देश सुखी **(अजनिष्ट)** होता है **(तस्य)** उस **(यज्ञियस्य)** सत्य व्यवहार के उत्पन्न करनेवाले की **(सुमतौ)** आज्ञा वा बुद्धि में तथा **(सौमनसे)** श्रेष्ठ मानस व्यवहार और **(भद्रे)** कल्याण करनेवाले व्यवहार में **(अपि)** भी **(वयम्)** हम लोग **(स्याम)** प्रसिद्ध होवें, वैसे ही सब लोग हों॥४॥

भावार्थः-जैसे ईश्वर और यथार्थवक्ता पुरुष धर्म में वर्त्तमान हुए नमस्कार करने के योग्य होते हैं, वैसे ही न्याय और विनय से राज्य के पालनकर्त्ता राजा लोग सत्कार करने योग्य होवें और सज्जन लोग परमेश्वर और यथार्थवक्ताओं के कर्मों में वर्त्तमान हैं, वैसे ही हम लोगों को चाहिये कि वर्ताव करें॥४॥

अथ मित्राय प्रियपदार्थान् दातुमाह॥

अब मित्र के लिये प्रिय पदार्थ देने को अगले मन्त्र में कहते हैं॥

महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः।
तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत॥५॥५॥

महान्। आदित्यः। नमसा। उपऽसद्यः। यातयत्ऽजनः। गृणते। सुऽशेवः। तस्मै। एतत्। पन्यऽतमाय। जुष्टम्। अग्नौ। मित्राय। हविः। आ। जुहोत॥५॥

पदार्थः-(महान्) महागुणविशिष्टः **(आदित्यः)** सूर्य्यइव शुभगुणप्रकाशकः **(नमसा)** सत्कारेण **(उपसद्यः)** प्राप्तुं योग्यः **(यातज्जनः)** प्रेरयन् **(गृणते)** स्तुवन्ति **(सुशेवः)** सुसुखः **(तस्मै) (एतत्) (पन्यतमाय)** अतिशयेन प्रशंसिताय **(जुष्टम्)** प्रीतम् **(अग्नौ) (मित्राय)** प्राणवद्वर्त्तमानाय **(हविः)** होतव्यमत्तव्यम् **(आ) (जुहोत)** दद्युः॥५॥

अन्वयः-हे मनुष्या! य आदित्य इव महान् सुशेवो यातयज्जनो नमसोपसद्यो भवेद्यं सर्वे गृणते तस्मै पन्यतमाय मित्रायाऽग्नौ हविरिवैतज्जुष्टं हविरा जुहोत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव पूज्यास्सूर्य्यवद्विद्याधर्मप्रकाशका आप्ता विद्वांसो ये शुभगुणकर्मसु सर्वान् प्रेरयेयुर्यथर्त्विजोऽग्नौ सुसंस्कृतं हविर्हुत्वा जगत्प्रसादयन्ति तथैव शुभगुणयुक्तेषु विद्यार्थिषु विद्याधर्मौ संस्थाप्य सर्वान् मनुष्यादीन् सुखिनः कुर्वन्ति॥५॥

पदार्थः-हे मनुष्यो! जो **(आदित्यः)** सूर्य्य के सदृश अच्छे गुणों का प्रकाश करनेवाला **(महान्)** बड़े-बड़े गुणों से युक्त **(सुशेवः)** जिसका उत्तम सुख **(यातयज्जनः)** जो प्रेरणा करता हुआ जन **(नमसा)** सत्कार से **(उपसद्यः)** प्राप्त होने योग्य हो और जिसकी सब लोग **(गृणते)** स्तुति करते हैं। **(तस्मै)** उस **(पन्यतमाय)** अत्यन्त प्रशंसायुक्त **(मित्राय)** प्राणों के सदृश वर्त्तमान पुरुष के लिये **(अग्नौ)** अग्नि में **(हविः)** हवन करने तथा खाने योग्य पदार्थ के सदृश **(एतत्)** इस **(जुष्टम्)** प्रिय पदार्थ को **(आ, जुहोत)** देओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही पूज्य सूर्य्य के सदृश विद्या और धर्म के प्रकाश करनेवाले यथार्थवक्ता विद्वान् लोग हैं कि जो उत्तम गुण और कर्मों में सब को प्रेरणा करें जैसे ऋत्विक् अर्थात् ऋतु-ऋतु में हवन करनेवाले लोग अग्नि में अच्छे बनाए हुए हवि अर्थात् होम करने योग्य पदार्थ को होम के संसार को प्रसन्न करते हैं, वैसे ही उत्तम गुणों से युक्त विद्यार्थी जनों में विद्या और धर्म को अच्छे प्रकार स्थापन करके सब मनुष्य आदि प्राणियों को सुखी करते हैं॥५॥

अथ प्रजामित्रराजगुणानाह॥

अब प्रजा मित्र राजा के गुणों को अगले मन्त्र में कहते हैं॥

मित्रस्य॑ चर्षणी॒धृतोऽवो॑ दे॒वस्य॑ सान॒सि। द्यु॒म्नं चि॒त्रश्र॑वस्तमम्॥६॥

मि॒त्रस्य॑। च॒र्ष॒णि॒ऽधृत॑ः। अवः॑। दे॒वस्य॑। सा॒न॒सि। द्यु॒म्नम्। चि॒त्रऽश्र॑वः॒ऽतम॑म्॥६॥

पदार्थः-(मित्रस्य) सर्वस्य सुहृदः **(चर्षणीधृतः)** मनुष्याणां धर्तुः **(अवः)** रक्षणादिकम् **(देवस्य)** विदुषो राज्ञः **(सानसि)** पुरातनम् **(द्युम्नम्)** यशःकरं धनं विज्ञानं वा **(चित्रश्रवस्तमम्)** चित्राण्यद्भुतानि श्रवांसि श्रवणान्यन्नानि वा येन तदतिशायितम्॥६॥

अन्वयः-हे मनुष्या! यस्य चर्षणीधृतो मित्रस्य देवस्य सानस्यवश्चित्रश्रवस्तमं द्युम्नं चास्ति स एव प्रजा रक्षितुं शक्नोति॥६॥

भावार्थः-ये सनातनं विद्याधनं गृहीत्वा सर्वाः प्रजा रक्षन्ति तेऽत्राऽमुत्र च सुखं लभन्ते॥६॥

पदार्थः-हे मनुष्यो! जिस **(चर्षणीधृतः)** मनुष्यों के धारण करनेवाले **(मित्रस्य)** सबके मित्र

(देवस्य) विद्वान् राजा का **(सानसि)** प्राचीन **(अवः)** रक्षा आदि **(चित्रश्रवस्तमम्)** जिसके अत्यन्त होने से अद्भुत श्रवण वा अन्न सिद्ध होते **(द्युम्नम्)** और जो यश करनेवाला धन वा विज्ञान है, वही प्रजाओं की रक्षा कर सकता है॥६॥

भावार्थः-जो लोग अनादि काल से सिद्ध विद्याधन का ग्रहण करके सम्पूर्ण प्रजाओं की रक्षा करते हैं, वे इस लोक और परलोक में सुख को प्राप्त होते हैं॥६॥

अथ मित्रत्वेनेश्वरस्य पदार्थरचनं तत्सेवनं चाह॥

अब मित्रपन से ईश्वर के पदार्थरचन और ईश्वरसेवन को अगले मन्त्र में कहते हैं॥

अभि यो महिना दिवं मित्रो बभूव सप्रथाः। अभि श्रवोभिः पृथिवीम्॥७॥

अभि। यः। महिना। दिवम्। मित्रः। बभूव। सऽप्रथाः। अभि। श्रवःऽभिः। पृथिवीम्॥७॥

पदार्थः-(अभि) आभिमुख्ये **(यः)** **(महिना)** महिम्ना **(दिवम्)** प्रकाशमयं सूर्य्यम् **(मित्रः)** सखेव वर्त्तमानः **(बभूव)** भवति **(सप्रथाः)** प्रथसा विस्तृतेन जगता सह वर्त्तमानः **(अभि)** **(श्रवोभिः)** अन्नादिभिस्सह **(पृथिवीम्)** भूमिम्॥७॥

अन्वयः-हे मनुष्या! यस्सप्रथा मित्रो जगदीश्वरः स्वस्य महिना दिवं निर्मायाऽभि बभूव श्रवोभिः पृथिवीं रचयित्वाऽभि बभूव तं नित्यं सेवध्वम्॥७॥

भावार्थः-हे मनुष्या! यो महासामर्थ्येन सूर्य्यपृथिव्यादिकं सविस्तरं जगन्निर्मायान्तर्यामिरूपेण सर्वं विज्ञाय धृत्वा नियमयति स एवोपासितुं योग्यः॥७॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(सप्रथाः)** विस्तारयुक्त जगत् के साथ वर्त्तमान वा **(मित्रः)** मित्र के सदृश वर्त्तमान जगदीश्वर अपनी **(महिना)** महिमा से **(दिवम्)** प्रकाशमय सूर्य को रच के **(अभि)** सम्मुख **(बभूव)** होता वा **(श्रवोभिः)** अन्न आदि पदार्थों के साथ **(पृथिवीम्)** भूमि को रच के **(अभि)** सम्मुख होता है, उसकी नित्य सेवा करो॥७॥

भावार्थः- हे मनुष्यो! जो बड़े सामर्थ्य से सूर्य्य और पृथिवी आदि विस्तार सहित संसार को रच और अन्तर्य्यामिरूप से सबको जान और धारण करके नियम में लाता है, वही उपासना करने के योग्य है॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मित्राय पञ्च येमिरे जनाः अभिष्टिशवसे। स देवान् विश्वान् बिभर्ति॥८॥

मित्राय। पञ्च। येमिरे। जनाः। अभिष्टिऽशवसे। सः। देवान्। विश्वान्। बिभर्ति॥८॥

पदार्थः-(मित्राय) सखेव सर्वेषां सुखप्रदाय **(पञ्च)** प्राणादयः **(येमिरे)** यच्छन्ति **(जनाः)** विद्वांसः **(अभिष्टिशवसे)** अभीष्टबलाय **(सः) (देवान्)** सूर्य्यादीन् **(विश्वान्)** सर्वान् **(बिभर्ति)** धरति पुष्णाति॥८॥

अन्वयः-हे मनुष्या! इमे पञ्च प्राणा इव जना यस्मा अभिष्टिशवसे मित्राय येमिरे स विश्वान् देवान् बिभर्तीति विजानीत॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा निगृहीताः प्राणा इन्द्रियाणि निगृह्णन्ति तथैव योगिनो जना समाधिना परमात्मानं प्राप्नुवन्ति॥८॥

पदार्थः-हे मनुष्यो! ये **(पञ्च)** पाँच प्राण आदि के सदृश **(जनाः)** विद्वान् लोग जिस **(अभिष्टिशवसे)** अपेक्षित बलयुक्त **(मित्राय)** मित्र के सदृश सबको सुख देनेवाले परमात्मा के लिये **(येमिरे)** यमादि साधन साधते हैं। **(सः)** वह **(विश्वान्)** समस्त **(देवान्)** सूर्य्य आदिकों को **(बिभर्ति)** धारण तथा पोषण करता है, ऐसा जानो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे रोके गये प्राणवायु इन्द्रियों को रोकते हैं, वैसे ही योगीजन समाधि से परमात्मा को प्राप्त होते हैं॥८॥

अथ मित्रत्वेनेश्वरोपासनविषयमाह॥

अब मित्रत्व से ईश्वरोपासना विषय को अगले मन्त्र में कहते हैं॥

मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे। इषꣳ इष्टव्रता अकः॥९॥६॥

मित्रः। देवेषु। आयुषु। जनाय। वृक्तऽबर्हिषे। इषः। इष्टऽव्रताः। अकरित्यकः॥९॥

पदार्थः-(मित्रः) सखा **(देवेषु)** दिव्येषु **(आयुषु)** जीवनेषु **(जनाय)** मनुष्याद्याय **(वृक्तबर्हिषे)** वृक्तं बर्हिरुदकं येन तस्मै **(इषः)** इच्छाः **(इष्टव्रताः)** इष्टकर्माणः **(अकः)** करोति॥९॥

अन्वयः-हे मनुष्या! यो मित्र ईश्वरो वृक्तबर्हिषे जनाय देवेष्वायुष्विष्टव्रता इषोऽकस्तं सर्वे भजध्वम्॥९॥

भावार्थः-यः परमात्माऽन्यायवर्जितान् भक्तान् मनुष्यान्त्सद्धेच्छान् करोति स एव सर्वैर्ध्यातव्य इति॥९॥

अत्र मित्रादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनषष्टितमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः–हे मनुष्यो! जो **(मित्रः)** ईश्वर **(वृक्तबर्हिषे)** छोड़ा है जल जिसने उस **(जनाय)** मनुष्य आदि के लिये **(देवेषु)** उत्तम **(आयुषु)** जीवनों में **(इष्टव्रताः)** चाहे हुए काम जिनसे होते उनकी **(इषः)** इच्छाओं को **(अकः)** पूर्ण करता है, उसकी सब लोग सेवा करो॥९॥

भावार्थः–जो परमात्मा अन्याय से रहित भक्त मनुष्यों को सिद्ध इच्छावाले करता है, वही सब लोगों को ध्यान करने योग्य है॥९॥

[यह उनसठवां सूक्त और छठा वर्ग समाप्त हुआ॥]

अथ सप्तर्चस्य षष्टितमस्य सूक्तस्य विश्वामित्र ऋषिः। ऋभवो देवताः। १-३ जगती। ४, ५ निचृज्जगती। ६ विराड्जगती। ७ भुरिग्जगती छन्दः। निषादः स्वरः॥

अथ राजविषयमाह॥

अब सात ऋचावाले साठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजविषय का उपदेश करते हैं॥

इ॒हेह॑ वो॒ मन॑सा ब॒न्धुता॑ नर उ॒शिजो॑ जग्मुर॒भि तानि॒ वेद॑सा।
याभि॑र्मा॒याभि॒: प्रति॑जूतिवर्पस॒: सौध॑न्वना य॒ज्ञिय॑ भा॒गमा॑न॒श॥ १॥

इ॒हऽइ॑ह। व॒:। मन॑सा। ब॒न्धुता॑। न॒र॒:। उ॒शिज॑:। ज॒ग्मु॒:। अ॒भि। तानि॑। वेद॑सा। याभि॑:। मा॒याभि॑:। प्रति॑जूतिऽवर्पसः। सौध॑न्वनाः। य॒ज्ञिय॑म्। भा॒गम्। आ॒न॒श॥ १॥

पदार्थः-(इहेह) अस्मिन्नस्मिन् व्यवहारे **(वः)** युष्माकम् **(मनसा)** चित्तेन **(बन्धुता)** बन्धूनां भावः **(नरः)** नायकाः **(उशिजः)** कामयमानाः **(जग्मुः) (अभि) (तानि)** मित्रत्वयुक्तानि कर्माणि **(वेदसा)** वित्तेन **(याभिः) (मायाभिः)** प्रज्ञाभिः **(प्रतिजूतिवर्पसः)** प्रतीतं जूतिर्वेगवद्वर्पो रूपं येषान्ते **(सौधन्वनाः)** शोभनं धन्वमन्तरिक्षं यस्य तदपत्यानि तस्य पुत्राः **(यज्ञियम्)** यज्ञाऽर्हम् **(भागम्) (आनश)** आनशिरे व्याप्नुवन्ति। अत्र व्यत्ययेन परस्मैपदम् पुरुषव्यत्ययश्च॥ १॥

अन्वयः-हे नरो! या उशिजो मनसेहेह वो या बन्धुता तया तान्यभिजग्मुर्याभिर्मायाभिः प्रतिजूतिवर्पसो वेदसा सौधन्वनाः सन्तो यज्ञियं भागमानश ते भाग्यशालिनो भवन्ति॥ १॥

भावार्थः-ये मनुष्या इह जगति सर्वैस्सह भ्रातृत्वं कृत्वा बुद्ध्या धनेन च सुखं वर्द्धयन्ति तेऽलङ्कामा जायन्ते॥ १॥

पदार्थः-हे **(नरः)** नायक लोगो! जो **(उशिजः)** कामना करते हुए **(मनसा)** चित्त से **(इहेह)** इस-इस व्यवहार में **(वः)** आप लोगों का जो **(बन्धुता)** बन्धुपन उससे **(तानि)** उन मित्रपने से युक्त कामों को **(अभि, जग्मुः)** प्राप्त होते हैं और **(याभिः)** जिन **(मायाभिः)** बुद्धियों से **(प्रतिजूतिवर्पसः)** प्रतीत हुआ वेगयुक्त रूप जिनका वे **(वेदसा)** धन से **(सौधन्वनाः)** उत्तम अन्तरिक्ष जिसका उसके पुत्र होते हुए **(यज्ञियम्)** यज्ञ के योग्य **(भागम्)** अंश को **(आनश)** व्याप्त होते, और **[वे]** भाग्यशाली होते हैं॥ १॥

भावार्थः-जो मनुष्य इस संसार में सबके साथ भाईपन करके बुद्धि और धन से सुख बढ़ाते, वे पूर्ण मनोरथवाले होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी राजशिक्षा विषय को अगले मन्त्र में कहते हैं॥

याभि॒: शचीभि॑श्चम॒सॉं अपि॑शत॒ यया॑ धि॒या गामरि॑णीत॒ चर्म॑ण:।

येन॒ हरी॒ मन॑सा नि॒रत॑क्षत॒ तेन॑ देव॒त्वमृ॒भव॒: समा॑नश॥ २॥

याभि॑:। शची॑भि:। च॒म॒सान्। अपि॑शत। यया॑। धि॒या। गाम्। अरि॑णीत। चर्म॑ण:। येन॑। हरी॒ इति॑। मन॑सा। नि॒:ऽअत॑क्षत। तेन॑। दे॒व॒ऽत्वम्। ऋ॒भव॒:। सम्। आ॒न॒श॒॥ २॥

पदार्थ:-(याभि:) (**शचीभि:**) प्रज्ञाभि: कर्मभिर्वा **(चमसान्)** मेघान् **(अपिंशत)** अवयवयन्ति। अत्र **बहुलं छन्दसी**ति शब्विकरणोऽपि। **(यया)** (**धिया**) प्रज्ञया **(गाम्)** धेनुम् **(अरिणीत)** प्राप्नुवन्ति **(चर्मण:)** चर्मप्राप्ते: **(येन)** (**हरी**) धारणाकर्षणौ **(मनसा)** विज्ञानेन **(निरतक्षत)** नितरां विस्तृणन्ति **(तेन)** (**देवत्वम्**) विद्वत्वम् **(ऋभव:)** मेधाविन: **(सम्)** (**आनश**) सम्यग्व्याप्नुत॥ २॥

अन्वय:-हे मनुष्या! ऋभवो याभि: शचीभिश्चमसानपिंशत यया धिया चर्मणो गामरिणीत येन मनसा हरी निरतक्षत तेन यूयं देवत्वं समानश॥ २॥

भावार्थ:-हे मनुष्या! यथा मेधाविनोऽत्र वर्त्तेयुस्तथैव वर्त्तित्वा विद्वांसो भवत॥ २॥

पदार्थ:-हे मनुष्यो! **(ऋभव:)** बुद्धिमान् लोग **(याभि:)** जिन **(शचीभि:)** बुद्धियों वा कर्मों से **(चमसान्)** मेघों को **(अपिंशत)** अवयवोंवाले करते हैं **(यया)** जिस **(धिया)** बुद्धि के साथ **(चर्मण:)** चर्म की प्राप्ति से **(गाम्)** धेनु को **(अरिणीत)** प्राप्त होते हैं **(येन)** जिस **(मनसा)** विज्ञान से **(हरी)** साथ धारण और आकर्षण का **(निरतक्षत)** निरन्तर विस्तार करते हैं **(तेन)** उससे आप लोग **(देवत्वम्)** विद्वान् पने को **(सम्, आनश)** उत्तम प्रकार व्याप्त होओ॥ २॥

भावार्थ:-हे मनुष्यो! जैसे बुद्धिमान् लोग यहाँ वर्त्ताव करें, वैसे ही वर्त्ताव करके विद्वान् होओ॥ २॥

अथ सर्वाधीशस्य परमात्मन: सखित्वफलमाह॥

अब सर्वाधीश परमात्मा की मित्रता का फल अगले मन्त्र में कहते हैं॥

इन्द्र॑स्य स॒ख्यमृ॒भव॒: समा॑नशु॒र्मनो॒र्नपा॑तो अ॒पसो॑ दधन्विरे।
सौ॒ध॒न्व॒नासो॑ अमृत॒त्वमेरि॑रे वि॒ष्ट्वी शमी॑भि: सु॒कृ॑त: सुकृ॒त्यया॑॥ ३॥

इन्द्र॑स्य। स॒ख्यम्। ऋ॒भव॑:। सम्। आ॒न॒शु॒:। मनो॑:। नपा॑त:। अ॒पस॑:। दु॒ध॒न्वि॒रे॒। सौ॒ध॒न्व॒नास॑:। अ॒मृ॒त॒ऽत्वम्। आ। ई॒रि॒रे॒। वि॒ष्ट्वी। शमी॑भि:। सु॒ऽकृ॑त:। सु॒ऽकृ॒त्यया॑॥ ३॥

पदार्थ:-(इन्द्रस्य) परमैश्वर्ययुक्तस्य परमात्मन: **(सख्यम्)** मित्रत्वम् **(ऋभव:)** मेधाविन: **(सम्)** **(आनशु:)** सम्यक् प्राप्नुयु:। अत्राऽपि व्यत्ययेन परस्मैपदम्। **(मनो:)** मननशीलस्य **(नपात:)** न विद्यते पातो यस्य **(अपस:)** कर्माणि **(दधन्विरे)** दधति **(सौधन्वनास:)** शोभनज्ञानस्य पुत्रा: **(अमृतत्वम्)** **(आ)** **(ईरिरे)** प्राप्नुवन्ति **(विष्ट्वी)** कर्म **(शमीभि:)** कर्मभि: **(सुकृत:)** ये सुष्ठु कुर्वन्ति ते **(सुकृत्यया)** धर्मक्रियया॥ ३॥

अन्वयः-य ऋभव इन्द्रस्य सख्यं समानशुर्यस्य मनोर्नपातोऽस्मा अपसो दधन्विरे ते सौधन्वनासः शमीभिर्विष्ट्वी कृत्वा सुकृत्यया सुकृतः सन्तोऽमृतत्वमेरिरे॥३॥

भावार्थः-ये परमेश्वरे प्रीतिं तदाज्ञाभङ्गाद्भयं धर्म्यकर्माचरणं कुर्वन्ति त एव मोक्षमाऽऽप्नुवन्ति॥३॥

पदार्थः-जो **(ऋभवः)** बुद्धिमान् लोग **(इन्द्रस्य)** अत्यन्त ऐश्वर्य से युक्त परमात्मा की **(सख्यम्)** मित्रता को **(सम्, आनशुः)** उत्तम प्रकार प्राप्त होवें तथा जिस **(मनोः)** मनन करनेवाले का **(नपातः)** नहीं गिरना होता उसके लिये **(अपसः)** कर्मों को **(दधन्विरे)** धारण करते हैं वे **(सौधन्वनासः)** उत्तम ज्ञान से युक्त करनेवाले **(शमीभिः)** कर्मों के साथ **(विष्ट्वी)** कर्म को करके **(सुकृत्यया)** धर्म की क्रिया से **(सुकृतः)** उत्तम कर्म करनेवाले होते हुए **(अमृतत्वम्)** मोक्षपदवी को **(आ, ईरिरे)** प्राप्त होते हैं॥३॥

भावार्थः-जो लोग परमेश्वर में प्रीति और उसकी आज्ञा के भङ्ग होने से भय तथा धर्म का आचरण करते हैं, वे ही मोक्षपदवी को प्राप्त होते हैं॥३॥

पुना राज्यविषयमाह॥

फिर राज्य विषय को अगले मन्त्र में कहते हैं॥

इन्द्रे॑ण याथ स॒रथं॑ सु॒ते सचाँ॒ अथो वशा॑नां भवथा स॒ह श्रि॒या।

न वः॑ प्रति॒मै सु॑कृ॒तानि॑ वाघतः॒ सौध॑न्वना ऋभवो वी॒र्या॑णि च॥४॥

इन्द्रे॑ण। या॒थ॒। स॒ऽरथ॑म्। सु॒ते। सचा॑। अथो॒ इति॑। वशा॑नाम्। भ॒व॒थ॒। स॒ह। श्रि॒या। न। वः॒। प्र॒ति॒ऽमै। सु॒ऽकृ॒तानि॑। वा॒घ॒तः॒। सौध॑न्वनाः। ऋ॒भ॒वः॒। वी॒र्या॑णि। च॒॥४॥

पदार्थः-(इन्द्रेण) परमैश्वर्येण **(याथ)** गच्छथ **(सरथम्)** रथेन सह वर्त्तमानं सैन्यम् **(सुते)** निष्पन्ने राज्ये **(सचा)** विज्ञानेन **(अथो)** आनन्तर्ये **(वशानाम्)** कमनीयानाम् **(भवथ)**। अत्र **संहितायामिति** दीर्घः। **(सह)** **(श्रिया)** **(न)** **(वः)** **(प्रतिमै)** प्रतिमातुम् **(सुकृतानि)** धर्म्याणि कर्माणि **(वाघतः)** विपश्चितः **(सौधन्वनाः)** आप्तस्य पुत्राः **(ऋभवः)** मेधाविनः **(वीर्याणि)** बलानि **(च)**॥४॥

अन्वयः-हे सौधन्वना! वाघत ऋभवो यूयं सुते सचेन्द्रेण स सरथं याथ। अथो वशानां श्रिया सह भवथ। येन वः सुकृतानि वीर्याणि च प्रतिमै न भवेयुः॥४॥

भावार्थः-ये विद्वांसो भूत्वा धर्म्येण प्रयतन्ते ते श्रीमन्तो भूत्वाऽतुलानि धनानि प्राप्य वीर्याणि वर्धयन्ति॥४॥

पदार्थः-हे **(सौधन्वनाः)** यथार्थवक्ता पुरुष के पुत्रो! **(वाघतः)** विद्वान् **(ऋभवः)** बुद्धिमान् आप लोग **(सुते)** उत्पन्न हुए राज्य में **(सचा)** विज्ञान और **(इन्द्रेण)** अत्यन्त ऐश्वर्य्य से **(सरथम्)** रथ के साथ

वर्त्तमान सेना को **(याथ)** प्राप्त हूजिये, **(अथो)** इसके अनन्तर **(वशानाम्)** कामना करने योग्यों की **(श्रिया)** लक्ष्मी के **(सह)** साथ **(भवथ)** हूजिये जिससे **(वः)** आप लोगों के **(सुकृतानि)** धर्मयुक्त कर्म्म **(वीर्याणि, च)** और पराक्रम **(प्रतिमै)** समान **(न)** नहीं होवें॥४॥

भावार्थः-जो विद्वान् होकर धर्मयुक्त आचरण से प्रयत्न करते हैं, वे लक्ष्मीवान् और अतुल धनों को प्राप्त होकर पराक्रमों को बढ़ाते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः।
धियेषितो मघवन् दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः॥५॥

इन्द्र। ऋभुऽभिः। वाजवत्ऽभिः। सम्ऽउक्षितम्। सुतम्। सोमम्। आ। वृषस्व। गभस्त्योः। धिया। इषितः। मघऽवन्। दाशुषः। गृहे। सौधन्वनेभिः। सह। मत्स्व। नृऽभिः॥५॥

पदार्थः-(इन्द्र) परमैश्वर्यवन् राजन्! **(ऋभुभिः)** मेधाविभिः **(वाजवद्भिः)** प्रशस्तान्नाद्यैश्वर्य-युक्तैः सह **(समुक्षितम्)** सम्यक्सिक्तम् **(सुतम्)** निष्पादितम् **(सोमम्)** ऐश्वर्यम् **(आ) (वृषस्व)** बलिष्ठो भव। अत्र **संहितायामिति** दीर्घः। **(गभस्त्योः)** हस्तयोः **(धिया)** प्रज्ञया **(इषितः)** प्रेरितः **(मघवन्)** प्रशंसितधनयुक्त **(दाशुषः)** दातुः। **(गृहे) (सौधन्वनेभिः)** मेधाविपुत्रैः **(सह) (मत्स्व)** आनन्द। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नृभिः)** विद्यादिव्यवहारेषु नायकैः॥५॥

अन्वयः-हे मघवन्निन्द्र! धियेषितस्त्वं वाजवद्भिर्ऋभुभिस्सह समुक्षितं सुतं सोमं गभस्त्योर्बलेना वृषस्व। सौधन्वनेभिर्नृभिस्सह दाशुषो गृहे मत्स्व॥५॥

भावार्थः-राजा प्राज्ञैर्जनैस्सहितेन प्रजाः संरक्ष्य न्यायेनैश्वर्यमुन्नीय राजकरदातॄनानन्द्य नायकैः सह प्रजाः सदैव रञ्जनीयाः॥५॥

पदार्थः-हे **(मघवन्)** प्रशंसितधनयुक्त **(इन्द्र)** अत्यन्त ऐश्वर्यवाले **(धिया)** बुद्धि से **(इषितः)** प्रेरित आप **(वाजवद्भिः)** प्रशंसनीय अन्न आदि ऐश्वर्यों से युक्त **(ऋभुभिः)** बुद्धिमानों के साथ **(समुक्षितम्)** उत्तम प्रकार सींचे **(सुतम्)** उत्पन्न किये गये **(सोमम्)** ऐश्वर्य को **(गभस्त्योः)** हाथों के बल से **(आ, वृषस्व)** सब प्रकार पुष्टि कीजिये, **(सौधन्वनेभिः)** बुद्धिमानों के पुत्रों और **(नृभिः)** विद्या आदि व्यवहारों में अग्रगन्ता जनों के **(सह)** साथ **(दाशुषः)** देनेवाले के **(गृह)** घर में **(मत्स्व)** आनन्दित हूजिये॥५॥

भावार्थः-राजा को चाहिये कि बुद्धिमान् जनों के सहित प्रजाओं की रक्षा और न्याय से ऐश्वर्य की वृद्धि करके तथा राज्य के कर देनेवालों को आनन्दित करके नायकों के साथ प्रजाओं को सदैव

आनन्दित करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॑ ऋभु॒मान् वाज॑वान् मत्स्वे॒ह नो॒ऽस्मिन्त्सव॑ने॒ शच्या॑ पुरुष्टुत।
इ॒मानि॒ तुभ्यं॒ स्वस॑राणि येमिरे व्र॒ता दे॒वानां॒ मनु॑षश्च॒ धर्म॑भिः॥६॥

इन्द्र॑। ऋ॒भु॒ऽमान्। वाज॑ऽवान्। म॒त्स्व॒। इ॒ह। नः॒। अ॒स्मिन्। सव॑ने। शच्या॑। पु॒रु॒ऽस्तु॒त॒। इ॒मानि॑। तुभ्य॑म्। स्वस॑राणि। ये॒मि॒रे॒। व्र॒ता। दे॒वाना॑म्। मनु॑षः। च॒। धर्म॑ऽभिः॥६॥

पदार्थः-(इन्द्र) परमैश्वर्यवन् राजन् **(ऋभुमान्)** बहव ऋभवो मेधाविनो विद्यन्ते यस्य सः **(वाजवान्)** बहवो वाजा अन्नाद्यैश्वर्ययोगा विद्यन्ते यस्य सः **(मत्स्व)** आनन्द **(इह)** अस्मिन् राज्ये **(नः)** अस्माकम् **(अस्मिन्)** **(सवने)** ऐश्वर्ययुक्ते राज्ये **(शच्या)** प्रज्ञया वाण्या वा **(पुरुष्टुत)** बहुभिः प्रशंसित **(इमानि)** वर्त्तमानानि **(तुभ्यम्)** **(स्वसराणि)** दिनानि **(येमिरे)** यच्छन्तु **(व्रता)** सुशीलानि कर्माणि **(देवानाम्)** विदुषाम् **(मनुषः)** मनुष्यान् **(च)** **(धर्मभिः)** धर्मैः॥६॥

अन्वयः-हे शच्या पुरुष्टुतेन्द्र! त्वमिह ऋभुमान् वाजवान् सन्नोऽस्मिन् सवने मत्स्व यस्मै तुभ्यमिमानि स्वसराणि येमिरे स त्वं देवानां धर्मभिस्सहितानि व्रता गृहीत्वा मनुषश्चानन्दय॥६॥

भावार्थः-हे राजंस्त्वं सदा धर्मात्मप्रज्ञसङ्गी मूर्खासङ्गी भूत्वैकं क्षणमपि व्यर्थं मा नय। यथाप्ताः पक्षपातं विहाय सर्वैस्सह निष्कपटत्वेन वर्त्तन्ते तथैव वर्त्तस्व॥६॥

पदार्थः-हे **(शच्या)** बुद्धि वा वाणी से **(पुरुष्टुत)** बहुतों से प्रशंसा किये गये **(इन्द्र)** अत्यन्त ऐश्वर्यवान् राजन्! आप **(इह)** इस राज्य में **(ऋभुमान्)** बहुत बुद्धिमान् और **(वाजवान्)** बहुत अन्न आदि ऐश्वर्ययुक्त होते हुए **(नः)** हम लोगों के **(अस्मिन्)** इस **(सुवने)** ऐश्वर्ययुक्त राज्य में **(मत्स्व)** आनन्दित होओ जिन **(तुभ्यम्)** आपके लिये **(इमानि)** यह वर्त्तमान **(स्वसराणि)** दिन **(येमिरे)** नियत होते हैं, वह आप **(देवानाम्)** विद्वानों के **(धर्मभिः)** धर्मों के सहित **(व्रता)** सुशील कर्मों को ग्रहण करके **(मनुषः)** मनुष्यों को **(च)** भी आनन्दित करो॥६॥

भावार्थः-हे राजन्! आप सदा धर्मात्मा और बुद्धिमानों के सङ्गी और मूर्खों के सङ्ग के त्यागी होकर एक क्षण भी व्यर्थ न व्यतीत करो और जैसे यथार्थवक्ता पुरुष पक्षपात का त्याग करके सबके साथ कपटरहित वर्त्ताव करते हैं, वैसा ही वर्त्ताव करो॥६॥

अथ राजप्रसंगेनामात्यप्रजाकर्माण्याह॥

अब राजप्रसङ्ग से अमात्य और प्रजाकृत्य को अगले मन्त्र में कहते हैं॥

इन्द्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम्।
शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि॥७॥७॥

इन्द्र। ऋभुऽभिः। वाजिऽभिः। वाजयन्। इह। स्तोमम्। जरितुः। उप। याहि। यज्ञियम्। शतम्। केतेभिः। इषिरेभिः। आयवे। सहस्रऽनीथः। अध्वरस्य। होमनि॥७॥

पदार्थः-(इन्द्र) परमैश्वर्यप्रद नरेश **(ऋभुभिः)** प्राज्ञैः **(वाजिभिः)** वेगादिगुणयुक्तैः **(वाजयन्)** प्रापयन् **(इह)** अस्मिन् संसारे **(स्तोमम्)** स्तुतिम् **(जरितुः)** स्तावकस्य विदुषः **(उप)** **(याहि)** उपाऽऽगच्छ **(यज्ञियम्)** राज्यव्यवहारनिष्पादकम् **(शतम्)** असंख्यम् **(केतेभिः)** प्रज्ञाभिः **(इषिरेभिः)** इष्टैः **(आयवे)** मनुष्याय **(सहस्रणीथः)** सहस्रैरसंख्यैधार्मिकैर्नीथः प्राप्तः **(अध्वरस्य)** न्यायव्यवहारस्य **(होमनि)** आदातव्ये व्यवहारे॥७॥

अन्वयः-हे इन्द्र! त्वमिह वाजिभिर्ऋभुभिस्सह वाजयन्त्सन् जरितुः स्तोममुपयाह्यायव इषिरेभिः केतेभिः सहस्रणीथः सन्नध्वरस्य होमनि शतं यज्ञियमुपयाहि॥७॥

भावार्थः-हे राजँस्त्वमत्र राष्ट्रे मनुष्याणां हितायाऽसंख्यानि शुभानि कर्माणि कृत्वा धार्मिकैरमात्यैरध्यापकोपदेशकैः सहाऽऽप्तैः कृतां प्रशंसां प्राप्य परजन्मन्यपि मोक्षं प्राप्नुहीति॥७॥

अत्र राजामात्यप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्टितमं सूक्तं सप्तमो वर्गश्च समाप्तः

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य के देनेवाले मनुष्यों के स्वामिन्! आप **(इह)** इस संसार में **(वाजिभिः)** वेग आदि गुणों से युक्त **(ऋभुभिः)** बुद्धिमानों के साथ **(वाजयन्)** प्राप्त कराये हुए **(जरितुः)** स्तुति करनेवाले विद्वान् की **(स्तोमम्)** स्तुति को **(उप, याहि)** प्राप्त हूजिये। और **(आयवे)** मनुष्य के लिये **(इषिरेभिः)** इष्ट **(केतेभिः)** बुद्धियों से **(सहस्रणीथः)** असंख्य धार्मिकों से प्राप्त होते हुए **(अध्वरस्य)** न्यायव्यवहार के **(होमनि)** ग्रहण करने योग्य व्यवहार में **(शतम्)** असंख्य **(यज्ञियम्)** राज्यव्यवहार के उत्पन्न करनेवाले के समीप प्राप्त हूजिये॥७॥

भावार्थः-हे राजन्! आप इस राज्य में मनुष्यों के हित के लिये असंख्य उत्तम कर्मों को करके धार्मिक मन्त्री जन और उपदेशकों के साथ यथार्थवक्ता पुरुषों से की हुई प्रशंसा को प्राप्त होकर अगले जन्म में भी मोक्ष को प्राप्त हूजिये॥७॥

इस सूक्त में राजा, मन्त्री और प्रजा के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह साठवां सूक्त और सातवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्यैकाधिकषष्टितमस्य सूक्तस्य विश्वामित्र ऋषिः। उषा देवता। १, ५, ७ त्रिष्टुप्। २ विराट् त्रिष्टुप्। ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ४ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ प्रातर्वेलोपमया स्त्रीगुणानाह॥

अब सात ऋचावाले एकसठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में प्रातःकाल की वेला की उपमा से स्त्री के गुणों को कहते हैं॥

उषो॒ वाजे॑न वाजिनि॒ प्रचे॑ताः॒ स्तोमं॑ जुषस्व गृण॒तो म॑घोनि।
पु॒रा॒णी दे॑वि युव॒तिः पुर॑ंधि॒रनु॑ व्र॒तं च॑रसि विश्ववारे॥ १॥

उषः॑। वाजे॑न। वा॒जि॒नि॒। प्रऽचे॑ताः। स्तोम॑म्। जु॒ष॒स्व॒। गृ॒ण॒तः। म॒घो॒नि॒। पु॒रा॒णी। दे॒वि॒। यु॒व॒तिः। पुर॑म्ऽधिः। अनु॑। व्र॒तम्। च॒र॒सि॒। वि॒श्व॒ऽवा॒रे॒॥ १॥

पदार्थः-(उष) उषर्वद्वर्त्तमाने **(वाजेन)** विज्ञानेन **(वाजिनि)** विज्ञानवती **(प्रचेताः)** प्रकृष्टतया सदर्थज्ञापिका **(स्तोमम्)** श्लाघाम् **(जुषस्व) (गृणतः)** स्तोतुः **(मघोनि)** परमधनयुक्ते **(पुराणी)** पुरा नवीना **(देवि)** कमनीये **(युवतिः)** पूर्णचतुर्विंशतिवर्षा **(पुरन्धिः)** या बहून्छुभगुणान् धरति **(अनु)** आनुकूल्ये **(व्रतम्)** कर्म **(चरसि) (विश्ववारे)** सर्वतो वरणीये॥१॥

अन्वयः-हे वाजिनि मघोनि देवि विश्ववारे स्त्रि! त्वमुष इव वाजेन प्रचेताः सती गृणतो मम स्तोमं जुषस्व यतः पुराणी पुरन्धिर्युवतिस्सती व्रतमनु चरसि तस्माद्धृद्यासि॥१॥

भावार्थः-हे स्त्रियो! यथोषसः सर्वान् प्राणिनः प्रबोध्य कार्येषु प्रवर्त्तयन्ति तथैव पतिव्रता भूत्वा पतिभिस्सहाऽऽनुकूल्येन वर्त्तित्वा प्रशंसिता भवत॥१॥

पदार्थः-हे **(वाजिनि)** विज्ञानवाली **(मघोनि)** अत्यन्त धन से युक्त **(देवि)** सुन्दर **(विश्ववारे)** सब प्रकार वरने योग्य स्त्री! तुम **(उषः)** प्रातर्वेला के सदृश वर्त्तमान **(वाजेन)** विज्ञान के साथ **(प्रचेताः)** उत्तमता से सत्य अर्थ की जनानेवाली होती हुई **(गृणतः)** मुझ स्तुति करनेवाले की **(स्तोमम्)** प्रशंसा का **(जुषस्व)** सेवन करो, जिससे कि **(पुराणी)** प्रथम नवीन **(पुरन्धिः)** बहुत उत्तम गुणों को धारण करनेवाली **(युवतिः)** पूर्ण चौबीस वर्षवाली हुई **(व्रतम्)** कर्म को **(अनु)** अनुकूलता में **(चरसि)** करती हो, इससे हृदयप्रिय हो॥१॥

भावार्थः-हे स्त्रियो! जैसे प्रातर्वेला सम्पूर्ण प्राणियों को जगाय कार्य्यों में प्रवृत्त करती है, वैसे ही पतिव्रता होकर पतियों के साथ अनुकूलता से वर्ति **[**कर**]** प्रशंसित होओ॥१॥

पुनस्तमेव विषयं प्रकारान्तरेणाह॥

फिर उसी विषय को प्रकारान्तर से अगले मन्त्र में कहते हैं॥

उषो॑ दे॒व्यम॑र्त्या॒ वि भा॑हि च॒न्द्ररथा॑ सू॒नृता॑ ई॒रय॑न्ती।

आ त्वा॑ वहन्तु सु॒यमा॑सो॒ अश्वा॒ हिर॑ण्यवर्णां पृथु॒पाज॑सो॒ ये॥ २॥

उष॑:। दे॒वि॒। अम॑र्त्या। वि। भा॒हि॒। च॒न्द्र॒ऽर॑था। सू॒नृता॑:। ई॒रय॑न्ती। आ। त्वा॒। व॒ह॒न्तु॒। सु॒ऽयमा॑स:। अश्वा॑:। हिर॑ण्यऽवर्णाम्। पृ॒थु॒ऽपाज॑स:। ये॥ २॥

पदार्थ:-(उष:) उषर्वद्वर्त्तमाने **(देवि)** सुशोभिते **(अमर्त्या)** मरणधर्मरहिता **(वि)** **(भाहि)** **(चन्द्ररथा)** चन्द्र इव रथो यस्या: **(सूनृता)** सुष्ठु सत्या: क्रिया: **(ईरयन्ती)** प्रेरयन्ती **(आ)** **(त्वा)** त्वाम् **(वहन्तु)** **(सुयमास:)** सुष्ठुनियामका: **(अश्वा:)** व्याप्ता: किरणा: **(हिरण्यवर्णाम्)** तेजोमयीम् **(पृथुपाजस:)** बहुबला: **(ये)**॥ २॥

अन्वय:-हे देव्युषर्वत्सूनृता: प्रेरयन्ती चन्द्ररथा अमर्त्या सती विभाहि। ये पृथुपाजस: सुयमासो हिरण्यवर्णामश्वा इव त्वाऽऽवहन्तु तान् सुखेन त्वं विभाहि॥ २॥

भावार्थ:-यथा चन्द्रयानोषास्तेजोमयी भूत्वा सर्वाञ्जागरयति तथैवोत्तमा विदुष्यस्त्रिय: स्वकीयं पतिं सेवाविनयाभ्यां सुशीलं सम्पादयन्ति॥ २॥

पदार्थ:-हे **(देवि)** उत्तम प्रकार शोभित! **(उष:)** प्रातवेला के सदृश वर्त्तमान **(सूनृता:)** उत्तम प्रकार सत्य क्रियाओं की **(ईरयन्ती)** प्रेरणा करती हुई **(चन्द्ररथा)** चन्द्रमा के सदृश रथ जिसका ऐसी **(अमर्त्या)** मरण धर्म से रहित हुई **(वि भाहि)** शोभित होओ। और **(ये)** जो **(पृथुपाजस:)** बहुत बलयुक्त **(सुयमास:)** उत्तम प्रकार नियम करनेवाले **(हिरण्यवर्णाम्)** तेजोमयी कान्ति को **(अश्वा:)** व्याप्त किरणों के सदृश **(त्वा)** आपको **(आ, वहन्तु)** प्राप्त हों, उनको सुखपूर्वक आप शोभित करिये॥ २॥

भावार्थ:-जैसे चन्द्रमारूप रथवाली प्रात:काल की वेला तेजस्वरूप होकर सबको जगाती है, वैसे ही उत्तम पण्डिता स्त्रियाँ अपने-अपने पति को सेवा और विनय से सुशील करती हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उष॑: प्रती॒ची भुव॑नानि॒ विश्वो॒र्ध्वा ति॑ष्ठस्यमृत॑स्य के॒तु:।
स॒मा॒नमर्थं॑ चरणी॒यमा॑ना च॒क्रमि॑व नव्य॒स्या व॑वृत्स्व॥ ३॥

उष॑:। प्र॒ती॒ची। भुव॑नानि। विश्वा॑। ऊ॒र्ध्वा। ति॒ष्ठ॒सि॒। अमृ॑त॑स्य। के॒तु:। स॒मा॒नम्। अर्थ॑म्। च॒र॒णी॒यमा॑ना। च॒क्रम्ऽइ॑व। न॒व्य॒सि॒। आ। व॒वृ॒त्स्व॒॥ ३॥

पदार्थ:-(उष:) उषा: **(प्रतीची)** प्रत्यञ्चति प्राप्नोति सा **(भुवनानि)** लोकजातानि **(विश्वा)** सर्वाणि **(ऊर्ध्वा)** ऊर्ध्वं स्थिता **(तिष्ठसि)** तिष्ठति। अत्र पुरुषव्यत्यय:। **(अमृतस्य)** अमृतात्मकस्य रसस्य **(केतु:)** प्रज्ञापिका **(समानम्)** **(अर्थम्)** वस्तु **(चरणीयमाना)** प्राप्नुवती **(चक्रमिव)** यथा चक्रं गच्छति तथा **(नव्यसि)** अतिशयेन नवीना **(आ)** **(ववृत्स्व)** आवर्त्तस्व॥ ३॥

अन्वयः-हे स्त्रि! यथा विश्वा भुवनानि प्रतीच्यमृतस्य केतुरूर्ध्वा चक्रमिव समानमर्थं चरणीयमाना नव्यस्युष आ वर्त्तते तिष्ठसि तथैव त्वमाववृत्स्व॥३॥

भावार्थः-हे सत्स्त्रियो यथोषसः सर्वाणि भुवनानि प्रकाशयन्ति तथैव सद्व्यवहारान् प्रकाशयत॥३॥

पदार्थः-हे स्त्रि! जैसे **(विश्वा)** सम्पूर्ण **(भुवनानि)** उत्पन्न हुए लोकों को **(प्रतीची)** प्राप्त होने और **(अमृतस्य)** अमृतस्वरूप रस की **(केतुः)** जनानेवाली **(ऊर्ध्वा)** ऊपर को वर्त्तमान **(चक्रमिव)** पहिये के सदृश चलनेवाले **(समानम्)** तुल्य **(अर्थम्)** वस्तु को **(चरणीयमाना)** प्राप्त होती हुई **(नव्यसि)** अत्यन्त नवीन **(उषः)** प्रातःकाल की वेला वर्त्तमान और **(तिष्ठसि)** स्थिर होती है, वैसे ही आप **(आ, ववृत्स्व)** वर्त्ताव करिये॥३॥

भावार्थः-हे उत्तम स्त्रियो! जैसे प्रातःकाल सम्पूर्ण भुवनों के खण्डों को प्रकाशित करते हैं, वैसे ही उत्तम व्यवहारों को प्रकाशित करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अव॒ स्यूमे॑व चिन्व॒ती म॒घोन्यु॒षा या॑ति॒ स्वस॑रस्य॒ पत्नी॑।
स्व॑र्जनन्ती सु॒भगा॑ सु॒दंसा॒ आन्ता॑द्दि॒वः प॑प्रथ॒ आ पृ॑थि॒व्याः॥४॥

अव॑। स्यूम॑ऽइव। चि॒न्व॒ती। म॒घोनी॑। उ॒षाः। या॒ति॒। स्वस॑रस्य। पत्नी॑। स्वः॑। जन॑न्ती। सु॒ऽभगा॑। सु॒ऽदंसाः॑। आ। अन्ता॑त्। दि॒वः। प॒प्र॒थे॒। आ। पृ॒थि॒व्याः॥४॥

पदार्थः-(अव) (स्यूमेव) तन्तुवद्व्याप्ता **(चिन्वती)** चयनं कुर्वती **(मघोनी)** परमधनयुक्ता **(उषाः)** प्रभातवेला **(याति)** गच्छति **(स्वसरस्य)** दिनस्य **(पत्नी)** पत्नीवद्वर्त्तमाना **(स्वः)** सूर्य्यं सुखं वा **(जनन्ती)** जनयन्ती **(सुभगा)** सौभाग्यकारिणी **(सुदंसाः)** शोभनानि दंसांसि यस्यां सा **(आ) (अन्तात्)** समीपात् **(दिवः)** प्रकाशमानात् सूर्य्यात् **(पप्रथे)** प्रथते **(आ) (पृथिव्याः)**॥४॥

अन्वयः-हे स्त्रियो! या स्यूमेव चिन्वती मघोनी स्वसरस्य पत्नीव स्वर्जनन्ती सुभगा सुदंसा उषा आ अन्ताद्दिव आ अन्तात्पृथिव्या पप्रथेऽव याति प्राप्नोति तथैव यूयं वर्त्तध्वम्॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे स्त्रियो! यथा दिनस्य सम्बन्धिन्युषा अस्ति तथैव छायावत्स्वस्वपत्या सहाऽनुकूलाः सत्यो वर्त्तन्ताम्। यथायं प्रकाशः पृथिव्या योगेन जायते तथा पतिपत्निसम्बन्धादपत्यानि जायन्ते॥४॥

पदार्थः-हे स्त्रियो! जो **(स्यूमेव)** डोरों के सदृश व्याप्त **(चिन्वती)** बटोरती हुई **(मघोनी)**

अत्यन्त धन से युक्त **(स्वसरस्य)** दिन की **(पत्नी)** स्त्री के सदृश वर्त्तमान **(स्वः)** सूर्य्य वा सुख को **(जनन्ती)** उत्पन्न करती हुई **(सुभगा)** सौभाग्य की करनेवाली **(सुदंसाः)** उत्तम कर्म जिस में विद्यमान ऐसी **(उषाः)** प्रातःकाल की वेला **(आ, अन्तात्)** सब प्रकार समीप से **(दिवः)** प्रकाशमान सूर्य्य और **(आ)** सब प्रकार समीप **(पृथिव्याः)** पृथिवी के योग से **(पप्रथे)** प्रख्यात होती है **(अव, याति)** और प्राप्त होती है, वैसे ही आप लोग भी वर्त्ताव करो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे स्त्रियो! जैसे दिन का सम्बन्धी प्रातःकाल है, वैसे ही छाया के सदृश अपने-अपने पति के साथ अनुकूल होकर वर्त्ताव करो और जैसे यह प्रकाश पृथिवी के योग से होता है, वैसे पति और पत्नी के सम्बन्ध से सन्तान होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अच्छा॑ वो दे॒वीमु॒षसं॑ विभा॒तीं प्र वो॑ भरध्वं॒ नम॑सा सुवृ॒क्तिम्।
ऊ॒र्ध्वं म॑धु॒धा दि॒वि पाजो॑ अश्रे॒त् प्र रो॑च॒ना रु॑रुचे र॒ण्वसं॑दृक्॥५॥

अच्छ॑। व॒रः। दे॒वीम्। उ॒षस॑म्। वि॒ऽभा॒तीम्। प्र। व॒रः। भ॒र॒ध्व॒म्। नम॑सा। सु॒ऽवृ॒क्तिम्। ऊ॒र्ध्वम्। म॒धु॒धा। दि॒वि। पाज॑रः। अ॒श्रे॒त्। प्र। रो॒च॒ना। रु॒रु॒चे॒। र॒ण्वऽसं॑दृक्॥५॥

पदार्थः-(अच्छ)। अत्र **संहितायामिति** दीर्घः। **(वः)** युष्मान् **(देवीम्)** देदीप्यमानाम् **(उषसम्)** प्रातर्वेलाम् **(विभातीम्)** विविधान् पदार्थान् प्रकाशयन्तीम् **(प्र)** **(वः)** युष्माकम् **(भरध्वम्)** **(नमसा)** वज्रेण विद्युता सह **(सुवृक्तिम्)** सुष्ठु वर्त्तमानाम् **(ऊर्ध्वम्)** उत्कृष्टम् **(मधुधा)** या मधूनि दधाति **(दिवि)** प्रकाशे **(पाजः)** बलम् **(अश्रेत्)** श्रयति **(प्र)** **(रोचना)** रुचिकरी **(रुरुचे)** रोचते **(रण्वसंदृक्)** या रण्वान् रमणीयान् पदार्थान् सन्दर्शयति सा॥५॥

अन्वयः-हे मनुष्या! या रण्वसन्दृग्रोचना मधुधा दिवि वो युष्मान् प्र रुरुचे। यया वो युष्माकमूर्ध्वं पाजोऽश्रेत् तां देवीं युष्मान् विभातीं सुवृक्तिमुषसं नमसा यूयमच्छ प्र भरध्वम्॥५॥

भावार्थः-यथा प्रातर्वेलां सेवमाना जना उत्कृष्टं बलं प्राप्नुवन्ति तथैव हृद्यां पतिव्रतां भार्यां प्राप्य पुरुषः शरीरात्मबलाऽऽरोग्यानि प्राप्नोति यतो द्वयोः सदृशयोः सत्योरुरुचिर्वर्धेत॥५॥

पदार्थः-हे मनुष्यो! जो **(रण्वसन्दृक्)** सुन्दर पदार्थों के दिखाने **(रोचना)** रुचि करने और **(मधुधा)** मधुर पदार्थों को धारण करनेवाली **(दिवि)** प्रकाश में **(वः)** आप लोगों को **(प्र, रुरुचे)** अच्छी लगती है। और जिससे **(वः)** आप लोगों के **(ऊर्ध्वम्)** उत्तम **(पाजः)** बल का **(अश्रेत्)** श्रयण करती है उस **(देवीम्)** प्रकाशमान और आप लोगों और **(विभातीम्)** अनेक पदार्थों को प्रकाशित करती हुई **(सुवृक्तिम्)** उत्तम प्रकार वर्त्तमान **(उषसम्)** प्रभात वेला को **(नमसा)** वज्र अर्थात् बिजुली के साथ आप लोग **(अच्छ)** उत्तम प्रकार **(प्र, भरध्वम्)** पुष्ट कीजिये॥५॥

भावार्थः-जैसे प्रातःकाल को सेवन करते हुए लोग उत्तम बल को प्राप्त होते हैं, वैसे ही स्नेहपात्र पतिव्रता स्त्री को प्राप्त होकर पुरुष शरीर, आत्मबल और आरोग्यपन को प्राप्त होते हैं, जिससे दोनों के सदृश होने पर प्रेम बढ़े॥५॥

अथ प्रातर्वेलाया एव गुणानाह।

अब प्रातर्वेला ही के गुणों को कहते हैं॥

ऋ॒ता॒व॑री दि॒वो अ॒र्कैर॑बो॒ध्या रे॒वती रोद॑सी चि॒त्रम॑स्थात्।
आ॒य॒तीम॑ग्न उ॒षस॑ं॒ विभा॒तीं वा॒मम॑ेषि॒ द्रवि॑ण॒ं भिक्ष॑माणः॥६॥

ऋ॒तऽव॑री। दि॒वः। अ॒र्कैः। अ॒बो॒धि॒। आ। रे॒वती॑। रोद॑सी॒ इति॑। चि॒त्रम्। अ॒स्था॒त्। आ॒ऽय॒तीम्। अ॒ग्ने॒। उ॒षस॑म्। वि॒ऽभा॒तीम्। वा॒मम्। ए॒षि॒। द्रवि॑णम्। भिक्ष॑माणः॥६॥

पदार्थः-(ऋतावरी) ऋतं सत्यं विद्यते यस्यां सा **(दिवः)** प्रकाशात् **(अर्कैः)** सूर्यैः **(अबोधि)** बुध्यते **(आ) (रेवती)** प्रशस्तधनकारिणी **(रोदसी)** द्यावापृथिव्यौ **(चित्रम्)** अद्भुतम् **(अस्थात्)** तिष्ठति **(आयतीम्)** आगच्छन्तीम् **(अग्ने)** विद्वन् **(उषसम्) (विभातीम्)** प्रकाशयन्तीम् **(वामम्)** प्रशस्तम् **(एषि)** प्राप्नोति **(द्रविणम्)** धनम् **(भिक्षमाणः)** याचमानः॥६॥

अन्वयः-हे अग्ने विद्वन्! या रेवती ऋतावरी दिवो जातोषा अर्कैरबोधि रोदसी आस्थात् तामायतीं विभातीमुषसं प्राप्य समाधिना जगदीश्वरं भिक्षमाणस्त्वं चित्रं वामं द्रविणमेषि॥४॥

भावार्थः-ये जना! रात्रेश्चतुर्थे यामे प्रबुध्येश्वरस्य स्तुतिप्रार्थनोपासनाः कृत्वा शुभान् गुणानैश्वर्य्यं च याचन्ते ते पुरुषार्थेनाऽवश्यमेतत्प्राप्नुवन्ति॥६॥

पदार्थः-हे **(अग्ने)** विद्वान् जन! जो **(रेवती)** उत्तम धन करनेवाली **(ऋतावरी)** जिसमें सत्य विद्यमान ऐसी **(दिवः)** प्रकाश से उत्पन्न हुई वेला **(अर्कैः)** सूर्य्यों से **(अबोधि)** जानी जाती है, **(रोदसी)** अन्तरिक्ष और पृथिवी को **(आ, अस्थात्)** अच्छे प्रकार स्थित करती है, उस **(आयतीम्)** आती और **(विभातीम्)** प्रकाशित करती हुई **(उषसम्)** प्रभात वेला को प्राप्त होकर समाधि से जगदीश्वर की **(भिक्षमाणः)** याचना करते हुए आप **(चित्रम्)** अद्भुत **(वामम्)** उत्तम प्रशंसा योग्य **(द्रविणम्)** धन को **(एषि)** प्राप्त होते हो॥६॥

भावार्थः-जो लोग रात्रि के चौथे प्रहर में जाग के ईश्वर की स्तुति, प्रार्थना और उपासना करके उत्तम गुणों और ऐश्वर्य्य को मांगते हैं, वे पुरुषार्थ से अवश्य इसको प्राप्त होते हैं॥६॥

अथ विद्वच्छिल्पिगुणानाह॥

अब बिजुली और शिल्पियों के गुणों को अगले मन्त्र में कहते हैं॥

ऋ॒तस्य॑ बु॒ध्न उ॒षसा॑मिष॒ण्यन् वृषा॑ म॒ही रोद॑सी॒ आ वि॑वेश।
म॒ही मि॒त्रस्य॒ वरु॑णस्य मा॒या च॒न्द्रेव॑ भा॒नुं वि द॑धे पुरु॒त्रा॥७॥८॥

ऋ॒तस्य॑। बु॒ध्ने। उ॒षसा॑म्। इ॒ष॒ण्यन्। वृषा॑। म॒ही इति॑। रोद॑सी॒ इति॑। आ। वि॒वे॒श॒। म॒ही। मि॒त्रस्य॑। वरु॑णस्य। मा॒या। च॒न्द्रा३इ॑व। भा॒नुम्। वि। द॒धे॒। पु॒रु३त्रा॥७॥

पदार्थः-(ऋतस्य) सत्यस्य **(बुध्ने)** अन्तरिक्षे **(उषसाम्)** प्रभातवेलानाम् **(इषण्यन्)** आत्मन इषणं प्रेरणमिच्छन्निव **(वृषा)** वृष्टिहेतुः **(मही)** महत्यौ **(रोदसी)** द्यावापृथिव्यौ **(आ) (विवेश)** आविशति **(मही)** महती पूज्या **(मित्रस्य)** सुहृदः **(वरुणस्य)** श्रेष्ठस्य **(माया)** प्रज्ञा **(चन्द्रेव)** सुवर्णानीव। **चन्द्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२) **(भानुम्)** सूर्य्यम् **(विदधे)** विदधाति **(पुरुत्रा)** पुरुरूपम्॥७॥

अन्वयः-हे मनुष्या! यो विद्युद्रूपोऽग्निः बुध्न उषसामृतस्येषण्यन्निव वृषा मही रोदसी आ विवेश मित्रस्य वरुणस्य मही माया चन्द्रेव पुरुत्रा भानुं विदधे अतस्तं विज्ञाय कार्य्याणि साध्नुत॥७॥

भावार्थः-यथा विदुषां वाणी प्रज्ञा चैश्वर्य्यप्रदा भूत्वा विद्यासु प्रविश्य सुखानि प्रयच्छति तथैव सर्वत्र प्रविष्टा विद्युद् विज्ञाता कार्य्येषु प्रयुक्ता सत्यैश्वर्य्यं जनयतीति॥७॥

अत्रोषःस्त्रीविद्युच्छिल्पिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाधिकषष्टितमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो बिजुलीरूप अग्नि **(बुध्ने)** अन्तरिक्ष में **(उषसाम्)** प्रातःकालों और **(ऋतस्य)** सत्य के सम्बन्ध में **(इषण्यन्)** अपनी प्रेरणा की इच्छा करता हुआ सा **(वृषा)** वृष्टि का हेतु **(मही)** बड़ी **(रोदसी)** अन्तरिक्ष और पृथिवी को **(आ, विवेश)** प्रविष्ट होता है और **(मित्रस्य)** मित्र **(वरुणस्य)** श्रेष्ठ पुरुष की **(मही)** बड़ी पूज्य **(माया)** बुद्धि **(चन्द्रेव)** सुवर्णों के सदृश **(पुरुत्रा)** बहुत रूपयुक्त **(भानुम्)** सूर्य्य को **(विदधे)** धारण करता है, इससे उस को जान के कार्यों को सिद्ध करो॥७॥

भावार्थः-जैसे विद्वानों की वाणी और बुद्धि ऐश्वर्य्य को देनेवाली हो और विद्याओं में प्रवेश करके सुखों को देती है, वैसे ही सर्वत्र प्रविष्ट हुई बिजुली जानी हुई कार्यों में प्रयुक्त होकर ऐश्वर्य्य को उत्पन्न करती है॥७॥

इस सूक्त में प्रातःकाल, स्त्री, बिजुली और शिल्पीजनों के गुणों का वर्णन करने से इसके अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकसठवां सूक्त और अष्टम वर्ग समाप्त हुआ॥

अथाष्टादशर्चस्य द्विषष्टितमस्य सूक्तस्य विश्वामित्र ऋषिः। १६-१८ विश्वामित्रो जमदग्निर्वा। १-३ इन्द्रावरुणौ। ४-६ बृहस्पतिः। ७-९ पूषा। १०-१२ सविता। १३-१५ सोमः। १६-१८ मित्रावरुणौ देवताः। १ विराट्त्रिष्टुप्। २ त्रिष्टुप्। ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४, ५, १०, ११, १६ निचृद्गायत्री। ६ त्रिपाद्गायत्री। ७-९, १२-१५, १७, १८ गायत्री छन्दः। षड्जः स्वरः॥

अथ मित्राध्यापकोपदेशकविषयमाह॥

अब अठारह ऋचावाले बासठवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में मित्र, अध्यापक और उपदेशकों के विषय को कहते हैं॥

इ॒मा उ॑ वां भृ॒मयो॒ मन्य॑माना यु॒वाव॑ते॒ न तुज्या॑ अभूवन्।
क्व॑ ऽ॒त्यदि॑न्द्रावरुणा॒ यशो॑ वां॒ येन॑ स्मा॒ सिनं॒ भर॑थ॒ः सखि॑भ्यः॥ १॥

इ॒माः। ऊ॒म् इति॑। वा॒म्। भृ॒मयः॑। मन्य॑मानाः। यु॒वाऽव॑ते। न। तुज्या॑ः। अ॒भू॒व॒न्। क्व॑। त्यत्। इ॒न्द्रा॒व॒रु॒णा॒। यशः॑। वा॒म्। येन॑। स्म॒। सिन॑म्। भर॑थः। सखि॑ऽभ्यः॥ १॥

पदार्थः-(इमाः) (उ) **(वाम्)** युवयोः **(भृमयः)** भ्रमणानि **(मन्यमानाः)** **(युवावते)** त्वां रक्षते **(न)** निषेधे **(तुज्याः)** हिंसनीयाः **(अभूवन्)** भवेयुः **(क्व)** कस्मिन् **(त्यत्)** तत् **(इन्द्रावरुणा)** विद्युद्वायू इव वर्त्तमानौ **(यशः)** कीर्त्तिः **(वाम्)** युवयोः **(येन)** **(स्म)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(सिनम्)** अन्नादिकम्। **सिनमित्यन्ननामसु पठितम्।** (निघं०२.७) **(भरथः)** **(सखिभ्यः)** मित्रेभ्यः॥१॥

अन्वयः-हे अध्यापकोपदेशकौ! या वामिमा मन्यमाना भृमयो युवावते तुज्या नाभूवन् तथा कुरुतम्। हे इन्द्रावरुणा! येन वां सखिभ्यः सिनं स्म भरथस्त्यद्यशो वामु क्वास्ति॥१॥

भावार्थः-येऽध्यापकोपदेशका वायुविद्युद्वदुपकारकाः कीर्त्तिमन्तः प्रियाचरणाः स्युस्तेभ्यः स्नेहेनाऽन्नादिकं देयम्। तैस्सह सर्वैर्मित्रता च रक्षणीया॥१॥

पदार्थः-हे अध्यापक और उपदेशक! जो **(वाम्)** आप दोनों के **(इमाः)** ये वर्त्तमान **(मन्यमानाः)** आदर किये गये **(भृमयः)** घूमने आदि **(युवावते)** आप की रक्षा करनेवाले के लिये **(तुज्याः)** हिंसा करने के योग्य **(न)** नहीं **(अभूवन्)** होवें, वैसे करिये और हे **(इन्द्रावरुणा)** बिजुली और वायु के सदृश वर्त्तमान! **(येन)** जिस यश से **(वाम्)** आप दोनों के **(सखिभ्यः)** मित्रों के लिये **(सिनम्)** अन्न आदि को **(स्म)** ही **(भरथः)** धारण करते हो **(त्यत्)** वह **(यशः)** यश (उ) ही **(क्व)** कहां है॥१॥

भावार्थः-जो अध्यापक और उपदेशक लोग वायु और बिजुली के सदृश उपकार करनेवाले, कीर्त्ति से युक्त और प्रिय आचरण करनेवाले होवें, उनके लिये स्नेह से अन्न आदि देना और उनके साथ सदा ही मित्रता की रक्षा करनी चाहिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒यमु॑ वां पुरु॒तमो॑ रयी॒यञ्छ॑श्व॒त्तम॑मव॑से जोहवीति।

स॒जोषा॑विन्द्रावरुणा म॒रुद्भि॑र्दि॒वा पृ॑थि॒व्या शृ॑णुतं॒ हव॑ं मे॥ २॥

अ॒यम्। ऊ॒म् इति॑। वा॒म्। पु॒रु॒ऽत॒मः॑। र॒यि॒ऽय॒न्। श॒श्व॒त्ऽत॒मम्। अव॑से। जो॒ह॒वी॒ति॒। स॒ऽजोषौ॑। इ॒न्द्रा॒व॒रु॒णा॒। म॒रुत्ऽभिः॑। दि॒वा। पृ॒थि॒व्या। शृ॒णु॒त॒म्। हव॑म्। मे॒॥ २॥

पदार्थः-(अयम्) राजा **(उ)** वितर्के **(वाम्)** युवयोः **(पुरुतमः)** अतिशयेन बहुः **(रयीयन्)** आत्मनो रयिमिच्छन् **(शश्वत्तमम्)** अनादिभूतम् **(अवसे)** रक्षणाद्याय **(जोहवीति)** भृशं ददाति **(सजोषौ)** समानप्रीतिसेवनौ **(इन्द्रावरुणा)** विद्युज्जले इव वर्त्तमानौ **(मरुद्भिः)** वायुभिरिव श्रोत्रिभिः **(दिवा)** सूर्य्येण **(पृथिव्या)** भूम्या **(शृणुतम्)** **(हवम्)** स्तवनम् **(मे)** मम॥ २॥

अन्वयः-हे इन्द्रावरुणा! यथा विद्युज्जले मरुद्भिर्दिवा पृथिव्या सह वर्त्तित्वा सुखं प्रयच्छतो यथाऽयमु पुरुतमो रयीयन् वामवसे शश्वत्तमं जोहवीति तथा सजोषौ युवां मे हवं शृणुतम्॥ २॥

भावार्थः-यथा राजाऽध्यापकोपदेशकाश्च सर्वेषां रक्षावृद्धिविद्याप्रवेशाय शिक्षां कुर्वन्ति तथैव परस्परेषां प्रशंसया पृथिव्यादिष्वैश्वर्य्याणि प्रयत्नेन प्राप्य परस्परेषु प्रीतिमन्तः सर्वे मनुष्यास्सन्तु॥ २॥

पदार्थः-हे **(इन्द्रावरुणा)** बिजुली और जल के सदृश वर्त्तमान! **(मरुद्भिः)** पवनों के सदृश सुननेवाले जनों से **(दिवा)** सूर्य और **(पृथिव्या)** भूमि के साथ वर्त्तमान होकर आप सुख देते हैं और जैसे **(अयम्)** यह राजा **(उ)** क्या **(पुरुतमः)** अतिशय करके बहुत **(रयीयन्)** अपने धन की इच्छा करता हुआ **(वाम्)** आप दोनों की **(अवसे)** रक्षा आदि के लिये **(शश्वत्तमम्)** अनादि काल से सिद्ध पदार्थ को **(जोहवीति)** वारंवार देता है, वैसे **(सजोषौ)** तुल्य प्रीति के सेवन करनेवाले आप दोनों **(मे)** मेरी **(हवम्)** स्तुति को **(शृणुतम्)** सुनिये॥६॥

भावार्थः-जैसे राजा, अध्यापक और उपदेशक लोग सबके रक्षा, वृद्धि और विद्या में प्रवेश होने के लिये शिक्षा करते हैं, वैसे ही परस्पर की प्रशंसा से पृथिवी आदिकों में ऐश्वर्यों को प्रयत्न से प्राप्त करके परस्पर में प्रीतिवाले सब मनुष्य होओ॥ २॥

अध्यापकविषयमाह॥

अब अगले मन्त्र में अध्यापक के विषय को कहते हैं॥

अ॒स्मे तदि॑न्द्रावरुणा॒ वसु॑ ष्या॒दु॒स्मे र॒यिर्म॑रुतः॒ सर्व॑वीरः।

अ॒स्मान् वरू॑त्रीः शर॒णैर॑वन्त्व॒स्मान् होत्रा॒ भार॑ती॒ दक्षि॑णाभिः॥ ३॥

अ॒स्मे इति॑। तत्। इ॒न्द्रा॒व॒रु॒णा॒। वसु॑। स्या॒त्। अ॒स्मे इति॑। र॒यिः। म॒रु॒तः॒। सर्व॑ऽवीरः। अ॒स्मान्। वरू॑त्रीः। श॒र॒णैः। अ॒व॒न्तु॒। अ॒स्मान्। होत्रा॑। भार॑ती। दक्षि॑णाभिः॥ ३॥

पदार्थः-(अस्मे) अस्मासु **(तत्)** **(इन्द्रावरुणा)** वायुविद्युद्वर्त्तमानौ **(वसु)** **(स्यात्)** **(अस्मे)** अस्मासु **(रयिः)** श्रीः **(मरुतः)** मनुष्याः **(सर्ववीरः)** सर्वे वीरा यस्मात् **(अस्मान्)** **(वरूत्रीः)** अत्यन्तं वराः **(शरणैः)** दुःखादीनां हिंसनैः **(अवन्तु)** **(अस्मान्)** **(होत्रा)** आदातुं योग्या **(भारती)** सकलविद्यां भरन्ती वाणी **(दक्षिणाभिः)** दानैः॥३॥

अन्वयः-हे इन्द्रावरुणा! यथाऽस्मे तद्वसु स्यादस्मे सर्ववीरो रयिः स्यात्। हे मरुतो! यथाऽस्मान् वरूत्रीर्होत्रा भारती च शरणैर्दक्षिणाभिश्चाऽस्मानवन्तु तथैव प्रयतध्वम्॥३॥

भावार्थः-हे अध्यापकोपदेशका राजानश्च! यथा वयं वसुमन्तः श्रीमन्तो विद्वांसो भवेम तथैवाऽस्मान् प्रेर्ध्वम्॥३॥

पदार्थः-हे **(इन्द्रावरुणा)** पवन और बिजुली के सदृश वर्त्तमान! जैसे **(अस्मे)** हम लोगों में **(तत्)** वह **(वसु)** धन **(स्यात्)** होवे और **(अस्मे)** हम लोगों में **(सर्ववीरः)** सब वीर जिस से ऐसी **(रयिः)** लक्ष्मी होवे और हे **(मरुतः)** मनुष्यो! जैसे **(अस्मान्)** हम लोगों को **(वरूत्रीः)** अत्यन्त श्रेष्ठ विद्या **(होत्रा)** ग्रहण करने योग्य क्रिया और **(भारती)** सम्पूर्ण विद्याओं को पूर्ण करती हुई वाणी **(शरणैः)** दुःख आदिकों के नाश करनेवाले **(दक्षिणाभिः)** दानों से **(अस्मान्)** हम लोगों की **(अवन्तु)** रक्षा करें वैसा ही प्रयत्न करो॥३॥

भावार्थः-हे अध्यापक, उपदेशक और राजा लोगो! जैसे हम लोग धनी, लक्ष्मीवान् और विद्वान् होवें, वैसे ही हम लोगों को प्रेरणा करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उस ही विषय को अगले मन्त्र में कहते हैं॥

बृहꣳस्पते जुषस्वꣳ नो हव्यानिꣳ विश्वदेव्य। रास्वꣳ रत्नानि दाशुषेꣳ॥४॥

बृहꣳस्पते। जुषस्वꣳ नः। हव्यानिꣳ। विश्वऽदेव्य। रास्वꣳ रत्नानि। दाशुषेꣳ॥४॥

पदार्थः-(बृहस्पते) बृहत्या वाचः पालक **(जुषस्व)** सेवस्व **(नः)** अस्मभ्यम् **(हव्यानि)** दातुमर्हाणि **(विश्वदेव्य)** विश्वेषु देवेषु साधो **(रास्व)** देहि **(रत्नानि)** रमणीयानि धनानि **(दाशुषे)** दात्रे॥४॥

अन्वयः-हे विश्वदेव्य बृहस्पते विद्वंस्त्वं नो हव्यानि जुषस्व दाशुषे रत्नानि रास्व॥४॥

भावार्थः-हे अध्यापक! त्वमस्मदर्थं विद्याः सेवस्व हि राजंस्त्वं विद्यादात्रे उत्तमं धनं देहि॥४॥

पदार्थः-हे **(विश्वदेव्य)** सम्पूर्ण विद्वानों में उत्तम **(बृहस्पते)** बड़ी वाणी के पालनकर्त्ता विद्वान् पुरुष! आप **(नः)** हम लोगों के लिये **(हव्यानि)** देने के योग्य पदार्थों का **(जुषस्व)** सेवन करो और

(दाशुषे) देनेवाले के लिये **(रत्नानि)** सुन्दर धनों को **(रास्व)** दीजिये॥४॥

भावार्थः-हे अध्यापक! आप हम लोगों के लिये विद्याओं का सेवन करो। और हे राजन्! आप विद्या देनेवाले के लिये उत्तम धन दीजिये॥४॥

अथ मित्रविषयमाह॥

अब इस अगले मन्त्र में मित्र के विषय को कहते हैं॥

शुचिꣳमर्केर्बृहस्पतिमध्वरेषु नमस्यत। अनाम्योज आ चके॥५॥९॥

शुचिम्। अर्कैः। बृहस्पतिम्। अध्वरेषु। नमस्यत। अनामि। ओजः। आ। चके॥५॥

पदार्थः-(शुचिम्) पवित्रम् **(अर्कैः)** सत्कर्त्तव्यैर्मन्त्रैर्विचारैः **(बृहस्पतिम्)** वाग्विद्यारक्षकम् **(अध्वरेषु)** अहिंसनीयेषु विद्याप्राप्तिकर्मसु **(नमस्यत)** सत्कुरुत **(अनामि)** नम्यते **(ओजः)** पराक्रमः **(आ) (चके)** कामये॥५॥

अन्वयः-हे विद्याप्रिया जना! यूयमध्वरेष्वर्कैर्वर्त्तमानं शुचिं बृहस्पतिं नमस्यत यदोजोऽनामि यदहमा चके तद्यूयं कामयध्वम्॥५॥

भावार्थः-ये मनुष्या वेदार्थविदोऽध्यापकानुपदेशकांश्च नमस्यन्ति सत्कुर्वन्ति ते पवित्रा विद्वांसः सन्तो बलमाप्नुवन्ति॥५॥

पदार्थः-हे विद्या के प्रेमी जनो! आप लोग **(अध्वरेषु)** जिन में हिंसा नहीं होती ऐसे विद्या की प्राप्ति के कर्मों में **(अर्कैः)** सत्कार करने योग्य विचारों से वर्त्तमान **(शुचिम्)** पवित्र **(बृहस्पतिम्)** वाणीरूप विद्या की रक्षा करनेवाले का **(नमस्यत)** सत्कार करो। और जो **(ओजः)** पराक्रम **(अनामि)** नहीं नम्र होनेवाला और जिसकी मैं **(आ, चके)** कामना करता हूँ, उसकी आप लोग कामना करो॥५॥

भावार्थः-जो मनुष्य वेदार्थ के जाननेवाले अध्यापक और उपदेशकों का नमस्कार और सत्कार करते हैं, वे पवित्र विद्वान् हुए बल को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वृषभं चर्षणीनां विश्वरूपमदाभ्यम्। बृहस्पतिं वरेण्यम्॥६॥

वृषभम्। चर्षणीनाम्। विश्वऽरूपम्। अदाभ्यम्। बृहस्पतिम्। वरेण्यम्॥६॥

पदार्थः-(वृषभम्) अत्युत्तमम् **(चर्षणीनाम्)** विद्याप्रकाशवतां मनुष्याणां मध्ये **(विश्वरूपम्)** विश्वानि कर्माणि वस्तूनि वा रूपयन्तम् **(अदाभ्यम्)** अहिंसनीयं सत्कर्त्तव्यम् **(बृहस्पतिम्)** बृहतां पालकं राजानम् **(वरेण्यम्)** अतिश्रेष्ठम्॥६॥

अन्वय:-हे मनुष्याश्चर्षणीनां मध्ये वृषभं विश्वरूपमदाभ्यं वरेण्यं बृहस्पतिं यूयं नमस्यताऽत: पराक्रमं कामयध्वम्॥६॥

भावार्थ:-यथा राजानं सत्कृत्य प्रजाजना ऐश्वर्यवन्तो जायन्ते तथैव राजान: प्रजा: सत्कृत्य कीर्त्तिमन्तो भवन्ति॥६॥

पदार्थ:-हे मनुष्यो! **(चर्षणीनाम्)** विद्याप्रकाश से युक्त मनुष्यों के मध्य में **(वृषभम्)** अत्यन्त उत्तम **(विश्वरूपम्)** कर्मों वा वस्तुओं को रूपित करते हुए अर्थात् उनको यथार्थभाव से प्रकट करते हुए **(अदाभ्यम्)** नहीं हिंसा करने और सत्कार करने योग्य **(वरेण्यम्)** अत्यन्त श्रेष्ठ **(बृहस्पतिम्)** बड़ों के पालन करनेवाले राजा का आप लोग आदर करो इससे पराक्रम की कामना करो॥६॥

भावार्थ:-जैसे राजा का सत्कार करके प्रजाजन ऐश्वर्यवान् होते हैं, वैसे ही राजा लोग प्रजाओं का सत्कार करके कीर्त्तियुक्त होते हैं॥६॥

विद्वद्विषयमाह॥

अब अगले मन्त्र में विद्वान् के विषय को कहते हैं॥

इ॒यं ते॑ पूषन्नाघृणे सुष्टु॒तिर्दे॑व॒ नव्य॑सी। अ॒स्माभि॒स्तुभ्यं॑ शस्यते॥७॥

इ॒यम्। ते॒। पू॒ष॒न्। आ॒घृ॒णे॒। सु॒ऽस्तु॒तिः। दे॒व॒। नव्य॑सी। अ॒स्माभिः॑। तुभ्य॑म्। श॒स्य॒ते॒॥७॥

पदार्थ:-(इयम्) (ते) तव **(पूषन्)** पुष्टिकर्त्त: **(आघृणे)** समन्तात् प्रकाशित: **(सुष्टुति:)** शोभना प्रशंसा **(देव)** दिव्यगुणसम्पन्न **(नव्यसी)** अतिशयेन नवीना **(अस्माभि:) (तुभ्यम्) (शस्यते)**॥७॥

अन्वय:-हे पूषन्नाघृणे देव विद्वन् राजन् वा! ते येयं नव्यसी सुष्टुतिर्वर्त्तते सा तुभ्यमस्माभि: शस्यते॥७॥

भावार्थ:-ये मनुष्या धर्म्यकर्माऽनुष्ठानेन कीर्त्तिमन्तो भवेयुस्ताञ्छुत्वा दृष्ट्वा सर्वे प्रसन्ना भवन्तु॥८॥

पदार्थ:-हे **(पूषन्)** पुष्टि करनेवाले **(आघृणे)** सब प्रकार प्रकाशित **(देव)** उत्तम गुणों से युक्त विद्वान् पुरुष वा राजन्! **(ते)** आपकी जो **(इयम्)** यह **(नव्यसी)** अत्यन्त नवीन **(सुष्टुति:)** उत्तम प्रशंसा वर्त्तमान है, वह **(तुभ्यम्)** आपके लिये **(अस्माभि:)** हम लोगों से **(शस्यते)** उच्चारण की जाती है॥७॥

भावार्थ:-जो मनुष्य धर्मसम्बन्धी कर्मों के करने से यशस्वी हैं, उनको सुन और देखके सब लोग प्रसन्न होओ॥७॥

अथाध्ययनविषयमाह॥

अब अगले मन्त्र में पठन विषय को कहते हैं॥

तां जुषस्व गिरं मम वाजयन्तीमवा धियम्। वधूयुरिव योषणाम्॥८॥

ताम्। जुषस्व। गिरम्। मम। वाजऽयन्तीम्। अव। धियम्। वधूयुःऽइव। योषणाम्॥८॥

पदार्थः-(ताम्) (**जुषस्व**) सेवस्व (**गिरम्**) सत्यभाषणशास्त्रविज्ञानयुक्तां वाचम् (**मम**) (**वाजयन्तीम्**) सत्याऽसत्यविज्ञापयन्तीम् (**अव**) रक्ष। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**धियम्**) प्रज्ञाम् (**वधूयुरिव**) आत्मनो वधूमिच्छन्निव (**योषणाम्**) स्वपत्नीम्॥८॥

अन्वयः-हे देव विद्वन् राजन् वा! त्वं तां वाजयन्तीं मम गिरं योषणां वधूयुरिव जुषस्व धियञ्चाव॥८॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या यथा स्त्रीकामाः स्वां स्वां हृद्यां प्रियां पत्नीं रक्षन्ति सेवन्ते च तथैव शास्त्रान्वितां वाचं सेवित्वा प्रज्ञां सततं रक्षन्तु॥८॥

पदार्थः-हे देव विद्वन् वा राजन्! आप (**ताम्**) उस (**वाजयन्तीम्**) सत्य और असत्य के जाननेवाली (**मम**) मेरी (**गिरम्**) सत्यभाषण और शास्त्र के विज्ञान से युक्त वाणी का जैसे (**योषणाम्**) निज स्त्री को (**वधूयुरिव**) अपनी स्त्री की इच्छा करनेवाला वैसे (**जुषस्व**) सेवन और (**धियम्**) बुद्धि की (**अव**) रक्षा करो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य लोग, जैसे स्त्री की कामना करनेवाले अपनी अपनी प्रेमपात्र पत्नी की रक्षा और सेवा करते हैं, वैसे ही शास्त्र से युक्त वाणी का सेवन करके बुद्धि की निरन्तर सेवा करें॥८॥

अथ परमात्मविषयमाह॥

अब इस अगले मन्त्र में परमात्मा के विषय को कहते हैं॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पूषाविता भुवत्॥९॥

यः। विश्वा। अभि। विऽपश्यति। भुवना। सम्। च। पश्यति। सः। नः। पूषा। अविता। भुवत्॥९॥

पदार्थः-(यः) परमात्मा (**विश्वा**) सर्वाणि (**अभि**) आभिमुख्ये (**विपश्यति**) विविधतया प्रेक्षते (**भुवना**) सर्वाणि भूतानि लोकान् वस्तूनि वा (**सम्**) (**च**) (**पश्यति**) (**सः**) (**नः**) अस्माकम् (**पूषा**) पुष्टिकरः (**अविता**) रक्षिता (**भुवत्**) भूयात्॥९॥

अन्वयः-हे मनुष्या! यो जगदीश्वरो विश्वा भुवनानि विपश्यति सं पश्यति स नः पूषाऽविता भुवत्। येन च वयं सततं वर्धेमहि॥९॥

भावार्थः-यः सर्वस्य विधाता द्रष्टा कर्मणां फलप्रदाता न्यायाधीश ईश्वरोऽस्ति स एवाऽस्माकं रक्षको भूयादिति सर्वे वयमभिलषेम॥९॥

पदार्थः-हे मनुष्यो! (**यः**) जो जगदीश्वर (**विश्वा**) सम्पूर्ण (**भुवना**) जीव, लोक वा वस्तुओं को

(अभि) सम्मुख **(विपश्यति)** अनेक प्रकार से देखता है **(सम्, पश्यति)** मिले हुए देखता है **(सः)** वह **(नः)** हम लोगों का **(पूषा)** पुष्टिकर्त्ता **(अविता)** रक्षक **(भुवत्)** होवे **(च)** और जिससे हम लोग निरन्तर वृद्धि को प्राप्त होवें॥९॥

भावार्थः-जो सबका रचने, देखने और कर्मों के फल देनेवाला न्यायाधीश ईश्वर है, वही हम लोगों की रक्षा करने और वृद्धि करनेवाला होवे, ऐसी हम सब लोग अभिलाषा करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि। धि॒यो यो नः॑ प्रचो॒दया॑त्॥ १०॥ १०॥

तत्। स॒वि॒तुः। वरे॑ण्यम्। भर्गः॑। दे॒वस्य॑। धी॒म॒हि॒। धि॒यः। यः। नः॒। प्र॒ऽचो॒दया॑त्॥ १०॥

पदार्थः-(तत्) (सवितुः) सकलजगदुत्पादकस्य समग्रैश्वर्य्ययुक्तस्येश्वरस्य **(वरेण्यम्)** सर्वेभ्य उत्कृष्टं प्राप्तुं योग्यम् **(भर्गः)** भृज्जन्ति पापानि दुःखमूलानि येन तत् **(देवस्य)** सकलैश्वर्यप्रदातुः प्रकाशमानस्य सर्वप्रकाशकस्य सर्वत्र व्याप्तस्याऽन्तर्यामिणः **(धीमहि)** दधीमहि **(धियः)** प्रज्ञाः **(यः)** **(नः)** अस्माकम् **(प्रचोदयात्)** सद्गुणकर्मस्वभावेषु प्रेरयतु॥१०॥

अन्वयः-हे मनुष्याः! सर्वे वयं यो नो धियः प्रचोदयात् तस्य सवितुर्देवस्य तद्वरेण्यं भर्गो धीमहि॥१०॥

भावार्थः-ये मनुष्याः सर्वसाक्षिणं पितृवद्वर्त्तमानं न्यायेशं दयालुं शुद्धं सनातनं सर्वात्मसाक्षिकं परमात्मानमेव स्तुत्वा प्रार्थयित्वोपासते तान् कृपानिधिः परमगुरुर्दुष्टाचारान्निवर्त्य श्रेष्ठाचारे प्रवर्त्तयित्वा शुद्धान् सम्पाद्य पुरुषार्थयित्वा धर्मार्थकाममोक्षान् प्रापयति॥१०॥

पदार्थः-हे मनुष्यो! सब हम लोग **(यः)** जो **(नः)** हम लोगों की **(धियः)** बुद्धियों को **(प्रचोदयात्)** उत्तम गुण, कर्म और स्वभावों में प्रेरित करे, उस **(सवितुः)** सम्पूर्ण संसार से **[**=के**]** उत्पन्न करनेवाले और सम्पूर्ण ऐश्वर्य से युक्त स्वामी और **(देवस्य)** सम्पूर्ण ऐश्वर्य के दाता प्रकाशमान सबके प्रकाश करनेवाले सर्वत्र व्यापक अन्तर्यामी के **(तत्)** उस **(वरेण्यम्)** सबसे उत्तम प्राप्त होने योग्य **(भर्गः)** पापरूप दुःखों के मूल को नष्ट करनेवाले प्रभाव को **(धीमहि)** धारण करें॥१०॥

भावार्थः-जो मनुष्य सबके साक्षी, पिता के सदृश वर्त्तमान, न्यायेश, दयालु, शुद्ध, सनातन, सबके आत्माओं के साक्षी परमात्मा की ही स्तुति और प्रार्थना करके उपासना करते हैं; उनको कृपा का समुद्र, सबसे श्रेष्ठ परमेश्वर, दुष्ट आचरण से पृथक् करके, श्रेष्ठ आचरण में प्रवृत्त करा और पवित्र तथा पुरुषार्थयुक्त करके धर्म, अर्थ, काम और मोक्ष को प्राप्त कराता है॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवस्य सवितुर्वयं वाजयन्तः पुरंध्या। भगस्य रातिमीमहे॥ ११॥

देवस्य। सवितुः। वयम्। वाजऽयन्तः। पुरम्ऽध्या। भगस्य। रातिम्। ईमहे॥ ११॥

पदार्थः-(देवस्य) कमनीयस्य **(सवितुः)** प्रेरकस्याऽन्तर्यामिणः **(वयम्) (वाजयन्तः)** विज्ञापयन्तः **(पुरन्ध्या)** यया प्रज्ञया बहून् बोधान् दधाति तया **(भगस्य)** ऐश्वर्य्यप्रदस्य **(रातिम्)** दानम् **(ईमहे)** याचामहे॥ ११॥

अन्वयः-हे मनुष्या! यथा पुरन्ध्या वाजयन्तो वयं सवितुर्देवस्य भगस्य रातिमीमहे तथा यूयमप्येतां याचध्वम्॥ ११॥

भावार्थः-मनुष्यैर्य्यदि प्रज्ञां वर्धयित्वा पुरुषार्थेन धर्ममनुष्ठाय परमेश्वराऽऽज्ञाऽऽनुकूल्येन वर्त्तित्वा स्वात्मशुद्धये प्रार्थना क्रियेत तर्हीश्वरस्तान्त्सद्यः पवित्राञ्छुद्धाचारान् करोति॥ ११॥

पदार्थः-हे मनुष्यो! जैसे **(पुरन्ध्या)** जिस बुद्धि से बहुत बोधों को धारण करता उससे **(वाजयन्तः)** जनाते हुए **(वयम्)** हम लोग **(सवितुः)** प्रेरणा करनेवाले अन्तर्य्यामी **(देवस्य)** कामना करने के योग्य **(भगस्य)** ऐश्वर्य देनेवाले के **(रातिम्)** दान की **(ईमहे)** याचना करते हैं, वैसे आप लोग भी उस बुद्धि की याचना करो॥ ११॥

भावार्थः-मनुष्य लोग जो बुद्धि को बढ़ाय, पुरुषार्थ से धर्म का अनुष्ठान कर और परमेश्वर की आज्ञा के अनुकूल वर्त्ताव करके अपनी बुद्धि के लिये प्रार्थना करें तो ईश्वर उनको शीघ्र पवित्र और शुद्ध आचरणयुक्त करता है॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः। नमस्यन्ति धियेषिताः॥ १२॥

देवम्। नरः। सवितारम्। विप्राः। यज्ञैः। सुवृक्तिऽभिः। नमस्यन्ति। धिया। इषिताः॥ १२॥

पदार्थः-(देवम्) सुखस्य दातारम् **(नरः)** योगेनेन्द्रियान्तःकरणस्य नेतारः **(सवितारम्)** सकलजगदुत्पादकम् **(विप्राः)** मेधाविनः **(यज्ञैः)** शास्त्राऽभ्याससत्सङ्गयोगाभ्यासैः **(सुवृक्तिभिः)** सुष्ठु वृक्तिर्दोषाणां छेदनं येषु तैः **(नमस्यन्ति) (धिया)** प्रज्ञया कर्मणा वा **(इषिताः)** प्रेरिताः॥ १२॥

अन्वयः-ये धियेषिता नरो विप्राः सुवृक्तिभिर्यज्ञैः सवितारं देवं नमस्यन्ति तेऽभीष्टसिद्धसुखा जायन्ते॥ ११॥

भावार्थः-ये संयमिनो विद्वांसः प्रेम्णा सत्यभाषणादिलक्षणेन धर्म्येण परमेश्वरमुपासते ते सुखाढ्या जायन्ते॥ ११॥

पदार्थः-जो **(धिया)** बुद्धि वा कर्म से **(इषिताः)** प्रेरणा किये गये **(नरः)** योग से इन्द्रिय और अन्तःकरण के प्राप्त करानेवाले **(विप्राः)** बुद्धिमान् लोग **(सुवृक्तिभिः)** उत्तम प्रकार दोषों का काटना जिनमें उन **(यज्ञैः)** शास्त्र का अभ्यास, सत्सङ्ग और योगाभ्यासों से **(सवितारम्)** सम्पूर्ण संसार के उत्पन्न करने और **(देवम्)** सुख देनेवाले को **(नमस्यन्ति)** नमस्कार करते हैं, वे अभीष्ट सुखों से सम्पन्न होते हैं॥१२॥

भावार्थः-जो इन्द्रियों को वश में करनेवाले विद्वान् लोग प्रेम और सत्यभाषणादिस्वरूप धर्म से परमेश्वर की उपासना करते हैं, वे सुख से युक्त होते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सोमो॑ जिगाति गातु॒विद्दे॒वानां॑मेति निष्कृ॒तम्। ऋ॒तस्य॒ योनि॑मा॒सद॑म्॥ १३॥

सोमः॑। जि॒गा॒ति॒। गा॒तु॒ऽवित्। दे॒वाना॑म्। ए॒ति॒। निः॒ऽकृ॒तम्। ऋ॒तस्य॑। योनि॑म्। आ॒ऽसद॑म्॥ १३॥

पदार्थः-(सोमः) ऐश्वर्ययुक्तः **(जिगाति)** स्तौति **(गातुवित्)** प्रशंसावित् **(देवानाम्)** विदुषाम् **(एति)** प्राप्नोति **(निष्कृतम्)** नितरां विज्ञातम् **(ऋतस्य)** सत्यस्य **(योनिम्)** कारणम् **(आसदम्)** आसीदन्ति सर्वे यस्मिंस्तम्॥१३॥

अन्वयः-यो गातुवित्सोमो देवानामृतस्य निष्कृतमासदं योनिं जिगाति सोऽभीष्टसुखमेति॥१३॥

भावार्थः-यो विद्वानस्य विविधाकृतेर्विश्वस्य कारणमव्यक्तं जानाति। एतन्निर्मातारं परमात्मानं प्रशंसति स एवैश्वर्यसम्पन्नो भवति॥१३॥

पदार्थः-जो **(गातुवित्)** प्रशंसा जाननेवाले **(सोमः)** ऐश्वर्य्य से युक्त **(देवानाम्)** विद्वानों और **(ऋतस्य)** सत्य के **(निष्कृतम्)** निरन्तर जाने गये **(आसदम्)** और जिसमें सब वर्त्तमान होते हैं, उस **(योनिम्)** कारण की **(जिगाति)** स्तुति करता है, वह अपेक्षित सुख को **(एति)** प्राप्त होता है॥१३॥

भावार्थः-जो विद्वान् इस अनेक प्रकार के स्वरूपवाले संसार के कारण अव्यक्त को जानता है और इस संसार के रचनेवाले परमात्मा की प्रशंसा करता है, वही ऐश्वर्य से युक्त होता है॥१३॥

अथ विद्वद्विषयमाह॥

अब इस अगले मन्त्र में विद्वान् के विषय को कहते हैं॥

सोमो॑ अ॒स्मभ्यं॑ द्वि॒पदे॒ चतु॑ष्पदे च प॒शवे॑। अ॒न॒मी॒वा इष॑स्करत्॥ १४॥

सोमः॑। अ॒स्मभ्य॑म्। द्वि॒ऽपदे॑। चतुः॑ऽपदे। च॒। प॒शवे॑। अ॒न॒मी॒वाः॑। इषः॑। क॒र॒त्॥ १४॥

पदार्थः-(सोमः) चन्द्रः **(अस्मभ्यम्)** **(द्विपदे)** मनुष्याद्याय **(चतुष्पदे)** गवाद्याय **(च)** **(पशवे)** **(अनमीवाः)** नीरोगाः **(इषः)** अन्नाद्योषधिगणान् **(करत्)** कुर्य्यात्॥१४॥

अन्वयः-हे मनुष्या! यस्सोमो द्विपदेऽस्मभ्यं चतुष्पदे गवे च पशवेऽनमीवा इषस्करत्तं सर्वदा सत्कुरुत॥१४॥

भावार्थः-ये वैद्याः सर्वान् द्विपदश्चतुष्पदोऽरोगान् कुर्य्युस्ते सर्वैर्माननीयाः स्युः॥१४॥

पदार्थः-हे मनुष्यो! जो **(सोमः)** चन्द्रमा **(द्विपदे)** मनुष्य आदि **(अस्मभ्यम्)** हम लोगों के **(चतुष्पदे)** गौ आदि के **(च)** और **[**गौ आदि**]** **(पशवे)** अन्य पशु के लिए **(अनमीवाः)** रोग निवर्त्तक **(इषः)** अन्न आदि ओषधिसमूहों को **(करत्)** करे, उसका सब काल में सत्कार करो॥१४॥

भावार्थः-जो वैद्य लोग सब दो पैरवाले अर्थात् मनुष्य आदि और चौपाये गौ आदिकों को रोगरहित करें, वे सब लोगों को मान करने योग्य होवें॥१४॥

अथ मित्रताविषयमाह॥

अब इस अगले मन्त्र में मित्रता के विषय को कहते हैं॥

अस्माकमायुर्वर्धयन्नभिमातीः सहमानः। सोमः सधस्थमासदत्॥ १५॥

अस्माकम्। आयुः। वर्धयन्। अभिऽमातीः। सहमानः। सोमः। सधऽस्थम्। आ। असदत्॥ १५॥

पदार्थः-(अस्माकम्) **(आयुः)** जीवनम् **(वर्धयन्)** उन्नयन् **(अभिमातीः)** शत्रूनिव रोगान् **(सहमानः)** **(सोमः)** सुपथ्ये युक्ते व्यवहारे प्रेरयन् **(सधस्थम्)** सहस्थानम् **(आ)** **(असदत्)** आसीदतु॥१५॥

अन्वयः-हे मनुष्या! यः सोमोऽभिमातीः सहमान इवाऽस्माकमायुर्वर्धयन् सधस्थमासदत् सोऽस्माकं सखा वयं च तस्य सखायः स्याम॥१५॥

भावार्थः-ये धार्मिकाः शूरवीराश्शत्रून् विनाश्य सखीन् रक्षित्वा सर्वान्त्सज्जनानायुर्विजयाभ्यां वर्धयन्ति तैः सह सदैव मैत्री सर्वैः रक्षणीया॥१५॥

पदार्थः-हे मनुष्यो! जो **(सोमः)** सुन्दर पथ्य और व्यवहार में प्रेरणा करता हुआ **(अभिमातीः)** शत्रुओं के सदृश रोगों को **(सहमानः)** सहन करता हुआ सा **(अस्माकम्)** हम लोगों के **(आयुः)** जीवन को **(वर्धयन्)** बढ़ाता हुआ **(सधस्थम्)** साथ स्थान को **(आ, असदत्)** स्थित हो, वह हम लोगों का मित्र और हम लोग उसके मित्र होवें॥१५॥

भावार्थः-जो धार्मिक, शूरवीर पुरुष शत्रुओं का नाश और मित्रों की रक्षा करके सब सज्जनों को जीवन और विजय से वृद्धि करते हैं, उनके साथ सदैव मैत्री की सब लोगों को रक्षा करनी चाहिये॥१५॥

अध्यापकोपदेशकविषयमाह॥

अब अगले मन्त्र में अध्यापक और उपदेशक के विषय को कहते हैं॥

आ नो॑ मित्रावरुणा घृ॒तैर्गव्यू॑तिमुक्षतम्। मध्वा॒ रजां॑सि सुक्रतू॥ १६॥

आ। न॒:। मि॒त्रा॒व॒रु॒णा॒। घृ॒तै:। गव्यू॑तिम्। उ॒क्ष॒त॒म्। मध्वा॑। रजां॑सि। सु॒क्र॒तू॒ इति॑ सु॒ऽक्र॒तू॒॥ १६॥

पदार्थ:-(आ) (न:) अस्मभ्यम् **(मित्रावरुणा)** प्राणोदानवदध्यापकोपदेशकौ **(घृतै:)** उदकादिभि: **(गव्यूतिम्)** क्रोशद्वयम् **(उक्षतम्)** सिञ्चतम् **(मध्वा)** माधुर्येण **(रजांसि)** लोकान् **(सुक्रतू)** उत्तमप्रज्ञौ सत्कर्माणौ वा॥ १६॥

अन्वय:-यौ सुक्रतू मित्रावरुणा! घृतैर्गव्यूतिं रजांसि सिञ्चत इव मध्वा नोऽस्मानोक्षतं तौ वयं प्राणवत्प्रियौ मन्यामहे॥ १६॥

भावार्थ:-यावध्यापकोपदेशकोपदिष्टप्राणविद्यां विज्ञाय लोकलोकान्तरव्यवहारेण सर्वदेशेषु गमनागमनौ संसाधयतस्तौ जलवन्निर्मलान्त:करणौ विज्ञातव्यौ॥ १६॥

पदार्थ:-जो **(सुक्रतू)** उत्तम बुद्धि वा श्रेष्ठ कर्मवाले **(मित्रावरुणा)** प्राण और उदान वायु के सदृश अध्यापक और उपदेशक! **(घृतै:)** जल आदिकों से **(गव्यूतिम्)** दो कोस **(रजांसि)** लोकों को सिंचनेवाले के सदृश **(मध्वा)** मधुरता से **(न:)** हम लोगों के लिए **(आ, उक्षतम्)** सींचनेवाले हैं, उन दोनों को हम लोग प्राणों के सदृश प्रिय मानते हैं॥ १६॥

भावार्थ:-जो पढ़ाने और उपदेश देनेवालें से उपदेश की गई प्राण अर्थात् पवनसम्बन्धी विद्या को जानकर लोकलोकान्तर अर्थात् एक देश से दूसरे देश के व्यवहार से सम्पूर्ण देशों में जाना-आना सिद्ध करते हैं, वे जल के सदृश शुद्ध अन्त:करणवाले जानने योग्य हैं॥ १६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒रु॒शंसा॑ नमो॒वृधा॑ म॒ह्ना दक्ष॑स्य राजथ:। द्राघि॑ष्ठाभि: शुचिव्रता॥ १७॥

उ॒रु॒ऽशंसा॑। न॒म॒:ऽवृधा॑। म॒ह्ना। दक्ष॑स्य। रा॒ज॒थ॒:। द्राघि॑ष्ठाभि:। शु॒चि॒ऽव्र॒ता॒॥ १७॥

पदार्थ:-(उरुशंसा) बहुप्रस्तुती **(नमोवृधा)** नमसोऽन्नादेर्वर्धकौ **(मह्ना)** महत्त्वेन **(दक्षस्य)** बलस्य **(राजथ:) (द्राघिष्ठाभि:)** अत्यन्तं दीर्घाभि: पुरुषार्थयुक्ताभि: क्रियाभि: **(शुचिव्रता)** पवित्रकर्माणौ॥ १७॥

अन्वय:-हे शुचिव्रतोरुशंसा नमोवृधा मित्रावरुणा! यतो युवां प्राणोदानाविव दक्षस्य मह्ना द्राघिष्ठाभी राजथस्तस्मात् सत्कर्त्तव्यौ भवथ:॥ १७॥

भावार्थ:-हे मनुष्या! ये पवित्रोपचिता यशस्विनो बलैश्वर्य्यान्नादीनां वृद्ध्या महतीभि: सत्क्रियाभिर्लोकेषु प्रकाशन्ते तानेव सेवध्वं सत्कुरुत॥ १७॥

पदार्थः-हे **(शुचिव्रता)** उत्तम कर्म करनेवाले **(उरुशंसा)** बहुत स्तुतियों से युक्त **(नमोवृधा)** अन्न आदि के बढ़ानेवाले अध्यापक और उपदेशक लोगो! जिससे कि आप दोनों प्राण और उदान वायु के सदृश **(दक्षस्य)** बल के **(मह्ना)** महत्त्व से **(द्राघिष्ठाभिः)** बहुत बड़ी और पुरुषार्थ से युक्त क्रियाओं से **(राजथः)** प्रकाशित होते हैं, इस कारण सत्कार करने योग्य हैं॥१७॥

भावार्थः-हे मनुष्यो! जो पवित्रता से युक्त यशस्वी जन बल, ऐश्वर्य और अन्न आदि की वृद्धि और बड़े श्रेष्ठ कर्म्मों से लोकों में प्रकाशित होते हैं, उनकी ही सेवा और सत्कार करो॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

गृणाना जमदग्निना योनावृतस्य सीदतम्। पातं सोममृतावृधा॥१८॥११॥५॥३॥

गृणाना। जमत्ऽअग्निना। यौनौ। ऋतस्य। सीदतम्। पातम्। सोमम्। ऋतऽवृधा॥१८॥

पदार्थः-(गृणाना) स्तुवन्तौ **(जमदग्निना)** चक्षुषा प्रत्यक्षेण **(योनौ)** गृहे **(ऋतस्य)** सत्याचारस्य **(सीदतम्)** वसतम् **(पातम्)** रक्षतम् **(सोमम्)** ऐश्वर्यम् **(ऋतावृधा)** सत्यवर्द्धकौ॥१८॥

अन्वयः-हे ऋतावृधा गृणाना मित्रावरुणौ! युवां जमदग्निना ऋतस्य योनौ सततं सीदतं सोमं पातम्॥१८॥

भावार्थः-त एवाऽध्यापकोपदेशका भवितुमर्हन्ति ये प्रत्यक्षादिभिः प्रमाणैः पृथिवीमारभ्य परमेश्वरपर्य्यन्तान् पदार्थान्त्साक्षात्कृत्वा सत्यविद्याचरणवृद्धिप्रिया धर्म्येण पथा गच्छेयुस्ते सत्कर्त्तुमर्हाः स्युरिति॥१८॥

अत्र मित्राऽध्यापकाऽध्येतृश्रोत्रुपदेशकपरमात्मविद्वत्प्राणोदानादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति तृतीये मण्डले द्विषष्टितमं सूक्तं पञ्चमोऽनुवाकस्तृतीयाष्टक एकादशो वर्गस्तृतीयश्च मण्डलं समाप्तम्॥

पदार्थः-हे **(ऋतावृधा)** सत्य के बढ़ानेवाले **(गृणाना)** स्तुति करते हुए अध्यापक और उपदेशक! आप दोनों **(जमदग्निना)** नेत्र अर्थात् प्रत्यक्ष से **(ऋतस्य)** सत्य आचरण के **(योनौ)** स्थान में निरन्तर **(सीदतम्)** वसो और **(सोमम्)** ऐश्वर्य्य की **(पातम्)** रक्षा करो॥१८॥

भावार्थः-वे ही अध्यापक और उपदेशक होने के योग्य हैं कि जो प्रत्यक्ष आदि प्रमाणों से पृथिवी को **[**=से**]** लेकर परमेश्वरपर्य्यन्त पदार्थों का साक्षात्कार करके, सत्यविद्या के आचरण की वृद्धि जिनको प्रिय, जो धर्मयुक्त मार्ग में जावें, वे सत्कार करने के योग्य होवें॥१८॥

इस सूक्त में मित्र, अध्यापक, पढ़नेवाले, श्रोता, उपदेशक, परमात्मा, विद्वान्, प्राण और उदान आदि के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति है, ऐसा जानना चाहिये॥

यह तीसरे मण्डल में बासठवां सूक्त पांचवां अनुवाक, तीसरे अष्टक में ग्यारहवां वर्ग और तृतीय मण्डल समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्थमण्डलारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ चतुर्थमण्डले विंशत्यृचस्य प्रथमस्य सूक्तस्य वामदेव ऋषिः। १, ५, २० अग्निः। २-४ अग्निर्वा वरुणश्च देवता। १ स्वराडतिशक्वरी छन्दः। पञ्चमः स्वरः। २ अतिजगती छन्दः। निषादः स्वरः। ३ अष्टिश्छन्दः। मध्यमः स्वरः। ४, ६ भुरिक्पङ्क्तिः। पञ्चमः स्वरः। ५, १८, २० स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७, ९, १५, १७, १९ विराट् त्रिष्टुप्। ८, १०, ११, १२, १६ निचृत्त्रिष्टुप्। १३, १४ त्रिष्टुप्छन्दः। धैवतः स्वरः॥

अथ वाणीविषयमाह॥

अब चतुर्थ मण्डल में बीस ऋचा वाले प्रथम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में वाणी विषय को कहते हैं॥

त्वां ह्य॑ग्ने॒ सद॒मित्स॑म॒न्यवो॑ दे॒वासो॑ दे॒वम॑र॒तिं न्ये॑रि॒र इति॒ क्रत्वा॑ न्येरि॒रे।

अम॑र्त्यं यजत॒ मर्त्ये॒ष्वा दे॒वमादे॑वं जनत॒ प्रचे॑तस॒ं विश्व॒मादे॑वं जनत॒ प्रचे॑तसम्॥ १॥

त्वाम्। हि। अ॒ग्ने॒। सद॑म्। इत्। स॒ऽम॒न्यव॑ः। दे॒वास॑ः। दे॒वम्। अ॒र॒तिम्। नि॒ऽए॒रि॒रे। इति॑। क्रत्वा॑। नि॒ऽए॒रि॒रे। अम॑र्त्यम्। य॒ज॒त॒। मर्त्ये॑षु। आ। दे॒वम्। आऽदे॑वम्। ज॒न॒त॒। प्रऽचे॑तसम्। विश्व॑म्। आऽदे॑वम्। ज॒न॒त॒। प्रऽचे॑तसम्॥ १॥

पदार्थः-(**त्वाम्**) (**हि**) यतः (**अग्ने**) विद्वन् (**सदम्**) गृहमिव स्थितिपदम् (**इत्**) एव (**समन्यवः**) मन्युना क्रोधेन सह वर्त्तमानाः (**देवासः**) विद्वांसः (**देवम्**) दिव्यगुणप्रदम् (**अरतिम्**) प्रापणीयम् (**न्येरिरे**) निश्चयेन प्राप्नुयुः (**इति**) अनेन प्रकारेण (**क्रत्वा**) (**न्येरिरे**) प्रेरयन्ति (**अमर्त्यम्**) मरणधर्मरहितम् (**यजत**) पूजयत (**मर्त्येषु**) मरणधर्मेषु (**आ**) समन्तात् (**देवम्**) देदीप्यमानम् (**आदेवम्**) समन्तात् प्रकाशकम् (**जनत**) प्रसिद्ध्या प्रकाशयत (**प्रचेतसम्**) प्रकृष्टप्रज्ञायुक्तम् (**विश्वम्**) सर्वम् (**आदेवम्**) समन्ताद्विद्याप्रकाशयुक्तम् (**जनत**) उत्पादयत (**प्रचेतसम्**) विविधप्रज्ञानयुक्तम्॥ १॥

अन्वयः-हे अग्ने! ये समन्यवो देवासो ह्यरतिं देवं सदं त्वामिन्न्येरिरे तस्मादिति क्रत्वा माञ्च न्येरिरे तम्मर्त्येष्वमर्त्यं यजत। आदेवमादेवं प्रचेतसं जनत इति क्रत्वा विश्वमा देवं प्रचेतसमाजनत॥ १॥

भावार्थः–यद्यदध्यापको राजा च भ्रकुटीं कुटिलां कृत्वा विद्यार्थिनोऽमात्यप्रजाजनाँश्च प्रेरयेत्तर्हि ते सुसभ्या विद्वांसो धार्मिकाश्च जायन्ते। ये मरणधर्म्येष्वमरणधर्माणं स्वप्रकाशरूपं परमात्मानमुपास्य सर्वान् मनुष्यान् प्राज्ञान् विदुषो जनयन्ति त एव सर्वदा सत्कर्त्तव्याः सुखिनश्च भवन्ति॥१॥

पदार्थः–हे (**अग्ने**) विद्वान् पुरुष! जो (**समन्यवः**) क्रोध के सहित वर्त्तमान (**देवासः**) विद्वान् लोग (**हि**) जिससे कि (**अरतिम्**) पहुंचाने योग्य (**देवम्**) उत्तम गुणों के और (**सदम्**) गृह के तुल्य स्थिति के देनेवाले (**त्वाम्**) आपकी (**इत्**) ही (**न्येरिरे**) प्रेरणा करते हैं, इससे (**इति**) इस प्रकार (**क्रत्वा**) करके (**न्येरिरे**) मुझे भी निश्चयकर प्राप्त होवें और उस (**मर्त्येषु**) मरणधर्मवालों में (**अमर्त्यम्**) मरणधर्म से रहित परमात्मा की (**यजत**) पूजा करो और (**आदेवम्**) सब प्रकार विद्या आदि के प्रकाश से युक्त (**आदेवम्**) सब प्रकार देदीप्यमान (**प्रचेतसम्**) उत्तम ज्ञान से युक्त (**जनत**) उत्पन्न करो, ऐसा करके (**विश्वम्**) सब के (**आदेवम्**) सब प्रकार प्रकाश और (**प्रचेतसम्**) उत्तम ज्ञानयुक्त (**जनत**) उत्पन्न करो॥१॥

भावार्थः–जो अध्यापक और राजा भौंहें टेढ़ी करके विद्यार्थी मन्त्री और प्रजाजनों को प्रेरणा करें तो उत्तम श्रेष्ठ विद्वान् और धार्मिक होते हैं। जो मरणधर्म वालों में मरणधर्मरहित अपने प्रकाशस्वरूप परमात्मा की उपासना करके सब मनुष्यों को बुद्धिमान् विद्वान् करते हैं, वे ही सब काल में सत्कार करने योग्य और सुखी होते हैं॥१॥

वाणीविषयमाह

अब इस अगले मन्त्र में वाणी के विषय को कहते हैं॥

स भ्रातरं॑ वरुणमग्न॒ आ व॑वृत्स्व दे॒वाँ अच्छा॑ सुम॒ती य॒ज्ञव॑नसं॒ ज्येष्ठं॑ य॒ज्ञव॑नसम्।
ऋ॒तावा॑नमादि॒त्यं च॑र्षणी॒धृतं॒ राजा॑नं चर्षणी॒धृत॑म्॥२॥

सः। भ्रातरम्। वरुणम्। अग्ने। आ। ववृत्स्व। देवान्। अच्छ। सुऽमती। यज्ञऽवनसम्। ज्येष्ठम्। यज्ञऽवनसम्। ऋतऽवानम्। आदित्यम्। चर्षणिऽधृतम्। राजानम्। चर्षणिऽधृतम्॥२॥

पदार्थः–(**सः**) (**भ्रातरम्**) प्रियं बन्धुमिव (**वरुणम्**) श्रेष्ठं जनम् (**अग्ने**) (**आ**) (**ववृत्स्व**) समन्तात् वर्त्तस्व (**देवान्**) धार्मिकान् विदुषः (**अच्छ**) सम्यक् (**सुमती**) शोभनया प्रज्ञया (**यज्ञवनसम्**) यज्ञस्य विद्याव्यवहारस्य विभाजकम् (**ज्येष्ठम्**) विद्यावृद्धम् (**यज्ञवनसम्**) राज्यव्यवहारस्य विभक्तारम् (**ऋतावानम्**) सत्यस्य सम्भक्तारम् (**आदित्यम्**) सूर्यमिव वर्त्तमानम् (**चर्षणीधृतम्**) मनुष्याणां धर्त्तारं विद्वद्भिर्धृतं वा (**राजानम्**) प्रकाशमानं नरेशम् (**चर्षणीधृतम्**) चर्षणीनां सत्याऽसत्यविवेचकानां धर्त्तारम्॥२॥

अन्वयः-हे अग्ने! स त्वं भ्रातरमिव वरुणं सुमती यज्ञवनसं ज्येष्ठमध्यापकं यज्ञवनसं राजानं यज्ञवनसं चर्षणीधृतमादित्यमिव ऋतावानं राजानं चर्षणीधृतमध्यापकमुपदेशकं वा देवानच्छा ववृत्स्व॥२॥

भावार्थः-हे अध्यापक राजन् वा! त्वं श्रेष्ठाञ्छ्रोत्रीनमात्यान् वा सुमत्या सत्याचरणेन संयोज्य सङ्गतानि कर्माणि जोषय सूर्य्यवद्विद्यान्यायप्रकाशं च सततं कुरु॥२॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(सः)** वह आप **(भ्रातरम्)** प्रियबन्धु के सदृश **(वरुणम्)** श्रेष्ठजन को **(सुमती)** श्रेष्ठ बुद्धि से **(यज्ञवनसम्)** विद्याव्यवहार के विभाग करनेवाले **(ज्येष्ठम्)** विद्या से वृद्ध अध्यापक **(यज्ञवनसम्)** राज्यव्यवहार के विभाग करनेवाले **(राजानम्)** प्रकाशमान नरेश विद्याव्यवहार के विभाग करने वाले **(चर्षणीधृतम्)** मनुष्यों के धारणकर्त्ता वा विद्वानों से धारण किये गए **(आदित्यम्)** सूर्य के सदृश वर्त्तमान **(ऋतावानम्)** सत्य के विभागकर्त्ता प्रकाशमान **[**राजा**]** **(चर्षणीधृतम्)** सत्यासत्य की विवेचना करनेवालों के धारण करने वाले अध्यापक वा उपदेशक **(देवान्)** और धार्मिक विद्वानों को **(अच्छ)** अच्छे प्रकार **(आ, ववृत्स्व)** सब ओर से वर्त्तिये अर्थात् उनके अनुकूल वर्त्तमान कीजिये॥२॥

भावार्थः-हे अध्यापक वा राजन्! आप श्रेष्ठ श्रोतृजन वा मन्त्रियों को उत्तम मति और सत्य आचरण से संयुक्त करके संगत कर्मों का सेवन कराओ और सूर्य्य के सदृश विद्या न्याय का प्रकाश निरन्तर करो॥२॥

पुनस्तमेव विषयमाह॥

फिर उस ही विषय को अगले मन्त्र में कहते हैं॥

सखे॒ सखा॑यम॒भ्या व॑वृत्स्वा॒शुं न च॒क्रं रथ्ये॑व॒ रंह्या॒स्मभ्यं॑ दस्म॒ रंह्या॑।

अग्ने॑ मृ॒ळीकं॑ वरु॑णे॒ सचा॑ विदो म॒रुत्सु॑ वि॒श्वभा॑नुषु।

तो॒काय॑ तु॒जे शु॑शुचान॒ शं कृ॑ध्य॒स्मभ्यं॑ दस्म॒ शं कृ॑धि॥३॥

सखे॑। सखा॑यम्। अ॒भि। आ। व॒वृ॒त्स्व॒। आ॒शुम्। न। च॒क्रम्। रथ्या॑ऽइव। रंह्या॑। अ॒स्मभ्य॑म्। दु॒स्म॒। रंह्या॑। अग्ने॑। मृ॒ळी॒कम्। वरु॑णे। सचा॑। वि॒दः॒। म॒रुत्ऽसु॑। वि॒श्वऽभा॑नुषु। तो॒काय॑। तु॒जे। शु॒शु॒चा॒न॒। शम्। कृ॒धि॒। अ॒स्मभ्य॑म्। दु॒स्म॒। शम्। कृ॒धि॒॥३॥

पदार्थः-**(सखे)** मित्र **(सखायम्)** सुहृदम् **(अभि)** **(आ)** **(ववृत्स्व)** आवर्त्तय **(आशुम्)** शीघ्रगामिनमश्वम् **(न)** इव **(चक्रम्)** **(रथ्येव)** रथेषु साधूनीव **(रंह्या)** गमनीयानि **(अस्मभ्यम्)** **(दस्म)** दुःखोपनाशक **(रंह्या)** गमनीयानि **(अग्ने)** वह्निरिव प्रकाशमान **(मृळीकम्)** सुखकरम् **(वरुणे)** **(सचा)** सत्यसंयोगेन **(विदः)** प्राप्नुयाः **(मरुत्सु)** मनुष्येषु **(विश्वभानुषु)** विश्वस्मिन् भानुषु भानुषु सूर्य्येष्विव

प्रकाशकेषु **(तोकाय)** अपत्याय **(तुजे)** विद्याबलमिच्छुकाय **(शुशुचान)** पवित्रकारक **(शम्)** सुखम् **(कृधि)** **(अस्मभ्यम्)** **(दस्म)** अविद्यानाशक **(शम्)** सुखम् **(कृधि)** कुरु॥३॥

अन्वयः-हे सखे! चक्रमाशुं न सखायमभ्याववृत्स्व। हे दस्म! रंह्या रथ्येवाऽस्मभ्यं रंह्याभ्याववृत्स्व। हे अग्ने! त्वं सचा वरुणे मृळीकं विदः। हे शुशुचान! विश्व भानुषु मरुत्सु तुजे तोकाय शं कृधि। हे दस्म! त्वमस्मभ्यं शं कृधि॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यूयं सर्वैः सह सखायो भूत्वाश्वा रथमिव सखीन्त्सत्कर्मसु सद्यः प्रवर्त्तयत। श्रेष्ठमार्ग इवाऽस्मान्त्सरले व्यवहारे गमय। येऽत्र जगति सूर्य्यवच्छुभगुणान्विताः सर्वात्मनः प्रकाश्य सुखं जनयेयुस्तेऽस्माभिः सत्कर्तव्याः स्युः॥३॥

पदार्थः-हे **(सखे)** मित्र! **(चक्रम्)** पहिये के और **(आशुम्)** शीघ्र चलने वाले घोड़े के **(न)** सदृश **(सखायम्)** स्नेहीजन को **(अभि, आ, ववृत्स्व)** समीप वर्त्ताइये और **(दस्म)** हे दुःख के नाशकर्त्ता! **(रंह्या)** प्राप्त होने योग्य **(रथ्येव)** वाहनों के निमित्त उत्तम स्थानों को जैसे, वैसे **(अस्मभ्यम्)** हम लोगों के लिये **(रंह्या)** प्राप्त होने योग्यों के सब प्रकार समीप प्राप्त होइये और **(अग्ने)** हे अग्नि के सदृश प्रकाशमान! आप **(सचा)** सत्य के संयोग से **(वरुणे)** उपदेश देनेवाले के विषय में **(मृळीकम्)** सुखकर्त्ता को **(विदः)** प्राप्त होवें और **(शुशुचान)** हे पवित्र करनेवाले! **(विश्वभानुषु)** सब में सूर्य के सदृश प्रकाश करने वाले **(मरुत्सु)** मनुष्यों में **(तुजे)** विद्या और बल की इच्छा करने वाले **(तोकाय)** पुत्रादि के लिये **(शम्)** सुख को **(कृधि)** करो और **(दस्म)** हे अविद्या के नाश करने वाले! आप **(अस्मभ्यम्)** हम लोगों के लिये **(शम्)** सुख **(कृधि)** करिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! आप लोग सब लोगों के साथ मित्र होकर जैसे घोड़े रथ को ले चलते हैं, वैसे मित्रों को उत्तम कर्म्मों में प्रवृत्त करो। और श्रेष्ठमार्ग के सदृश हम लोगों को सरल मर्य्यादा में पहुँचाइये। जो लोग इस संसार में सूर्य्य के सदृश उत्तम गुणों से युक्त हुए सब के आत्माओं को प्रकाशित करके सुख को उत्पन्न करें, वे हम लोगों से सत्कार करने योग्य होवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेळो॑ऽव॑ यासिसीष्ठाः।

यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑चानो॒ विश्वा॒ द्वेषा॑सि॒ प्र मु॑मुग्ध्य॒स्मत्॥४॥

त्वम्। नः। अग्ने। वरुणस्य। विद्वान्। देवस्य। हेळः। अव। यासिसीष्ठाः। यजिष्ठः। वह्निऽतमः। शोशुचानः। विश्वा। द्वेषांसि। प्र। मुमुग्धि। अस्मत्॥४॥

पदार्थः-(**त्वम्**) (**नः**) अस्मान् (**अग्ने**) अग्निरिव विद्वन् (**वरुणस्य**) श्रेष्ठस्य (**विद्वान्**) (**देवस्य**) विद्याप्रकाशकस्य (**हेळः**) हेळन्तेऽनादृता भवन्ति यस्मिन् सः (**अव**) निवारणे (**यासिसीष्ठाः**) प्रेरयेथाः। अत्र **वा च्छन्दसी**ति मूर्द्धन्यादेशाभावः (**यजिष्ठः**) अतिशयेनेष्टा (**वह्नितमः**) अतिशयेन वोढा (**शोशुचानः**) भृशं प्रकाशमानः (**विश्वा**) विश्वानि सर्वाणि (**द्वेषांसि**) द्वेषयुक्तानि कर्माणि (**प्र**) (**मुमुग्धि**) मुञ्च पृथक्कुरु (**अस्मत्**) अस्माकं सकाशात्॥४॥

अन्वयः-हे अग्ने विद्वांस्त्वं वरुणस्य देवस्य हेळः सन्नव यासिसीष्ठा यजिष्ठो वह्नितमो नोऽस्माञ्च्छोशुचानः सन् विश्वा द्वेषांस्यस्मत्प्र मुमुग्धि॥४॥

भावार्थः-त एव विद्वांसः सन्ति ये श्रेष्ठस्य विदुषोऽनादरं न कुर्वन्ति त एवाध्यापकोपदेशकाः श्रेयांसो योऽस्माकं दोषान् दूरीकृत्य पवित्रयन्ति त एवाऽस्माभिः सत्कर्त्तव्यास्सन्ति॥४॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश विद्वान् पुरुष (**विद्वान्**) विद्यायुक्त (**त्वम्**) आप (**वरुणस्य**) श्रेष्ठ (**देवस्य**) विद्या के प्रकाश करनेवाले के (**हेळः**) आदररहित होते हैं जिसमें उसके (**अव**) निवारण में (**यासिसीष्ठाः**) प्रेरणा करो और (**यजिष्ठः**) अत्यन्त यज्ञ करने और (**वह्नितमः**) अत्यन्त पहुंचाने वाले (**नः**) हम लोगों के प्रति (**शोशुचानः**) अत्यन्त प्रकाशमान हुए आप (**विश्वा**) सब (**द्वेषांसि**) द्वेषयुक्त कर्म्मों को (**अस्मत्**) हम लोगों के समीप से (**प्र,मुमुग्धि**) अलग कीजिये॥४॥

भावार्थः-वे ही विद्वान् जन हैं कि जो श्रेष्ठ विद्वान् पुरुष का अनादर नहीं करते हैं और वे ही अध्यापक और उपदेशक कल्याणकारी होते हैं, जो हम लोगों के दोषों को दूर करके पवित्र करते हैं, वे ही हम लोगों से सत्कार करने योग्य हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स त्वं नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ।

अव॑ यक्ष्व नो॒ वरु॑णं॒ रराणो वी॒हि मृ॑ळी॒कं सु॒हवो॑ न एधि॥५॥१२॥

सः। त्वम्। नः। अग्ने। अवमः। भव। ऊती। नेदिष्ठः। अस्याः। उषसः। विऽउष्टौ। अव। यक्ष्व। नः। वरुणम्। रराणः। वीहि। मृळीकम्। सुऽहवः। नः। एधि॥५॥

पदार्थः-(**सः**) (**त्वम्**) (**नः**) अस्माकम् (**अग्ने**) पावक इव विद्वन् (**अवमः**) रक्षकः (**भव**) (**ऊती**) ऊत्या रक्षणाद्यया क्रियया (**नेदिष्ठः**) अतिशयेन समीपस्थः (**अस्याः**) (**उषसः**) प्रातःकालस्य (**व्युष्टौ**) विशेषेण दाहे (**अव**) (**यक्ष्व**) सङ्गच्छस्व (**नः**) अस्मभ्यम् (**वरुणम्**) श्रेष्ठमध्यापकमुपदेशकं वा (**रराणः**) ददन् (**वीहि**) व्याप्नुहि (**मृळीकम्**) सुखकरम् (**सुहवः**) शोभनाऽऽह्वानः (**नः**) अस्मान् (**एधि**) प्राप्तो भव॥५॥

अन्वयः-हे अग्ने! स त्वमस्या उषसो व्युष्टौ नेदिष्ठः सन्नूती नोऽवमो भव। वरुणं रराणः सन्नोऽव यक्ष्व सुहवः सन्नो मृळीकं वीहि न एधि॥५॥

भावार्थः-स एवाऽध्यापको राजा श्रेष्ठोऽस्ति यः सुशिक्षयाऽस्मानुषाइव रक्षेद् दुष्टाचारात् पृथक्कृत्य श्रेष्ठाचारं कारयेत्॥५॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वन् पुरुष **(सः)** वह **(त्वम्)** आप **(अस्याः)** इस **(उषसः)** प्रातःकाल के **(व्युष्टौ)** विशेष दाह में **(नेदिष्ठः)** अत्यन्त समीप स्थित **(ऊती)** रक्षण आदि कर्म से **(नः)** हम लोगों के **(अवमः)** रक्षा करनेवाले **(भव)** हूजिये **(वरुणम्)** श्रेष्ठ अध्यापक वा उपदेशक को **(रराणः)** देते हुए **(नः)** हम लोगों को **(अव, यक्ष्व)** प्राप्त हूजिये और **(सुहवः)** उत्तम प्रकार बुलाने वाले हुए **(नः)** हम लोगों के लिये **(मृळीकम्)** सुख करने वाले कार्य्य को **(वीहि)** व्याप्त हूजिये और हम लोगों को **(एधि)** प्राप्त हूजिये॥५॥

भावार्थः-वह ही अध्यापक वा राजा श्रेष्ठ है कि जो उत्तम शिक्षा से हम लोगों की प्रातःकाल के सदृश रक्षा करे। दुष्ट आचरण से अलग करके श्रेष्ठ आचरण करावे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः॥६॥

अस्य। श्रेष्ठा। सुऽभगस्य। सम्ऽदृक्। देवस्य। चित्रऽतमा। मर्त्येषु। शुचि। घृतम्। न। तप्तम्। अघ्न्यायाः। स्पार्हा। देवस्य। मंहना।ऽइव। धेनोः॥६॥

पदार्थः-**(अस्य)** सर्वपालकस्य राज्ञः **(श्रेष्ठा)** श्रेष्ठानि कर्माणि **(सुभगस्य)** प्रशंसितैश्वर्य्यस्य **(संदृक्)** यः सम्यक् पश्यति **(देवस्य)** दिव्यगुणकर्मस्वभावस्य **(चित्रतमा)** अतिशयाद्भुतगुणकर्मस्वभावोत्पादकानि **(मर्त्येषु)** मनुष्येषु **(शुचि)** पवित्रम् **(घृतम्)** आज्यम् **(न)** इव **(तप्तम्)** **(अघ्न्यायाः)** हन्तुमयोग्यायाः **(स्पार्हा)** स्पर्हणीयानि **(देवस्य)** परमात्मनः **(मंहनेव)** महान्ति पूजनीयानीव **(धेनोः)** वाण्या गोर्वा॥६॥

अन्वयः-हे विद्वन्! मर्त्येष्वस्य सुभगस्य देवस्य चित्रतमा श्रेष्ठा तप्तं शुचि घृतं न वर्त्तन्तेऽघ्न्याया धेनोस्तप्तं शुचि घृतं न देवस्य स्पार्हा मंहनेव वर्त्तन्ते तेषां संदृक् सन् राज्यं वर्द्धय॥६॥

भावार्थः-अत्रोपमालङ्कारः।[१] येषां राजादीनामग्निना तप्तं शुद्धघृतमिव विदुषः सुशिक्षिताया वाचो मधुराणि भाषणानीव भाषणानि परमेश्वरस्य गुणकर्मस्वभावा इव गुणकर्मस्वभावास्सन्ति तेऽत्याश्चर्य्यमैश्वर्यं राज्यमद्भुतां कीर्तिं च लभन्ते॥६॥

पदार्थः-हे विद्वन्! **(मर्त्येषु)** मनुष्यों में **(अस्य)** इस सब के पालन करनेवाले **(सुभगस्य)** प्रशंसित ऐश्वर्य्य और **(देवस्य)** दिव्य गुण कर्म और स्वभावयुक्त राजा के **(चित्रतमा)** अत्यन्त अद्भुत और **(श्रेष्ठा)** उत्तम कर्म **(तप्तम्)** तपाये गये **(शुचि)** पवित्र **(घृतम्)** घी के **(न)** समान वर्त्तमान हैं तथा **(अघ्न्यायाः)** न नष्ट करने योग्य **(धेनोः)** वाणी के वा गौ के तपाये गये पवित्र घी के सदृश **(देवस्य)** परमात्मा के **(स्पार्हा)** चाहने योग्य **(मंहनेव)** अतीव पूजनीय सदृश कर्म वर्त्तमान हैं, उनके **(संदृक्)** उत्तम प्रकार देखने वाले होते हुए राज्य की वृद्धि करो॥६॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। जिन राजादिकों के अग्नि से तपाये गये स्वच्छ घृत के समान विद्वान् की उत्तम शिक्षित वाणी के मधुर वचनों के समान वचन और परमेश्वर के गुण, कर्म, स्वभावों के समान गुण, कर्म, स्वभाव हैं, वे अति आश्चर्य्यरूप ऐश्वर्य्य राज्य और अद्भुत कीर्ति को प्राप्त होते हैं॥६॥

अथाग्निदृष्टान्तेन विद्वद्गुणानाह।

अब अग्नि के दृष्टान्त से विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः।

अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः॥७॥

त्रिः। अस्य। ता। परमा। सन्ति। सत्या। स्पार्हा। देवस्य। जनिमानि। अग्नेः। अनन्ते। अन्तरिति। परिऽवीतः। आ। अगात्। शुचिः। शुक्रः। अर्यः। रोरुचानः॥७॥

पदार्थः-(**त्रिः**) त्रिवारम् (**अस्य**) राज्ञः (**ता**) तानि (**परमा**) उत्कृष्टानि (**सन्ति**) (**सत्या**) सत्सु व्यवहारेषु साधूनि (**स्पार्हा**) अभिकाङ्क्षितुं योग्यानि (**देवस्य**) दिव्यगुणकर्मस्वभावस्य (**जनिमानि**) जन्मानि (**अग्नेः**) विद्युदादेरिव (**अनन्ते**) परमात्मन्याकाशे वा (**अन्तः**) मध्ये (**परिवीतः**) परितः सर्वतो व्याप्तशुभगुणकर्मस्वभावः (**आ, अगात्**) आगच्छन्ति (**शुचिः**) पवित्रः (**शुक्रः**) आशुकारी (**अर्य्यः**) सर्वस्य स्वामी (**रोरुचानः**) भृशं देदीप्यमानः॥७॥

अन्वयः-हे मनुष्या! अग्नेरिव यस्याऽस्य देवस्य यानि सत्या स्पार्हा परमा जनिमानि सन्ति यो रोरुचानोऽर्य्यः शुक्रः शुचिः परिवीतोऽनन्तेऽन्तस्ता तानि त्रिरागात् स एव सर्वाधीशत्वमर्हति॥७॥

---

१. हिन्दीभाषायाम्- 'उपमावाचकलुप्तोपमालङ्कार है' लिखितमस्ति।

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। स एवोत्तमे कुले जायते यस्योत्तमानि कर्माणि स्युः। यथा विद्युदाद्यग्निर्निस्सीमेऽन्तरिक्षे विराजते तथैव योऽनन्तं जगदीश्वरमन्तर्ध्यात्वा सर्वज्ञानवाञ्छुद्धियुक्तो भूत्वा सर्वाण्युत्तमानि प्रशंस्यानि कर्माणि कर्तुं प्रभवति॥७॥

पदार्थः-हे मनुष्यो! **(अग्नेः)** अग्नि के सदृश जिस **(अस्य, देवस्य)** उत्तम गुण कर्म और स्वभाव वाले इस राजा के जो **(सत्या)** उत्तम व्यवहारो में श्रेष्ठ **(स्पार्हा)** अभिकांक्षा करने के योग्य **(परमा)** उत्तम **(जनिमानि)** जन्म **(सन्ति)** हैं और जो **(रोरुचानः)** अत्यन्त प्रकाशमान **(अर्य्यः)** सब का स्वामी **(शुक्रः)** शीघ्र करने वाला **(शुचिः)** पवित्र **(परिवीतः)** जिसके सब और उत्तम गुण, कर्म और स्वभाव व्याप्त वह **(अनन्ते)** परमात्मा वा आकाशविषयक **(अन्तः)** मध्य में **(ता)** उनको **(त्रिः)** तीन वार **(आ, अगात्)** प्राप्त होता है, वही सब का अधीश होने योग्य है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वही उत्तम कुल उत्पन्न होता है कि जिसके उत्तम कर्म हों। और जैसे बिजुली आदि अग्नि सीमारहित अन्तरिक्ष में शोभित होता है, वैसे ही जो अनन्त जगदीश्वर का ध्यान करके सब ज्ञान वाला शुद्धियुक्त होकर सम्पूर्ण उत्तम प्रशंसा करने योग्य कर्मों के करने को समर्थ होता है॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स दू॒तो विश्वेदु॒भि व॑ष्टि॒ सद्मा॒ होता॒ हिर॑ण्यरथो॒ रंसु॑जिह्वः।
रो॒हिद॑श्वो वपु॒ष्यो॑ वि॒भावा॒ सदा॑ र॒ण्वः पि॑तु॒मतीव॑ सं॒सत्॥८॥

सः। दू॒तः। विश्वा॑। इत्। अ॒भि। व॒ष्टि॒। सद्म॑। होता॑। हिर॑ण्यऽरथः। रम्ऽसु॑जिह्वः। रो॒हित्ऽअ॑श्वः। व॒पु॒ष्यः॑। वि॒भाऽवा॑। सदा॑। र॒ण्वः। पि॒तु॒मतीऽइ॑व। स॒म्ऽसत्॥८॥

पदार्थः-**(सः)** **(दूतः)** यो दुनोति दुष्टान् परितापयति सः **(विश्वा)** सर्वाणि **(इत्)** एव **(अभि)** **(वष्टि)** कामयते **(सद्म)** सद्मान्युत्तमानि कर्माणि स्थानानि वा **(होता)** दाता आदाता वा **(हिरण्यरथः)** तेजोमयरमणीयस्वरूपस्सूर्य इव रथो व्यवहारो यस्य सः **(रंसुजिह्वः)** रमणीयवाक् **(रोहिदश्वः)** रोहिता रक्तादिगुणविशिष्टा अग्न्यादयोऽश्वा आशुगामिनो यस्य सः **(वपुष्यः)** वपुष्षु रूपेषु भवः **(विभावा)** विभववान् **(सदा)** **(रण्वः)** रमणीयस्वरूपः **(पितुमतीव)** प्रशंसितबह्वन्नाद्यैश्वर्य्ययुक्तेव **(संसत्)** सम्राट्सभा॥८॥

अन्वयः-यो हिरण्यरथो रंसुजिह्वो रोहिदश्वो वपुष्यो विभावा रण्वो होता सन् राजा दूत इव विश्वा सद्माऽभि वष्टि स इत् संसत् पितुमतीव सदोन्नतिशीलो भवति॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा दूता राज्ञां हितं चिकीर्षन्ति तथैव ये राजानः प्रजाहितं सततं कुर्वन्ति ते नृपाः सभासदश्च पुण्यभाजो भवन्ति॥८॥

पदार्थः-(**हिरण्यरथः**) तेजोमय सुन्दर स्वरूपयुक्त सूर्य्य के सदृश जिसका व्यवहार (**रंसुजिह्वः**) सुन्दर जिसकी वाणी (**रोहिदश्वः**) जिसके रक्त आदि गुणों से विशिष्ट अग्नि आदिक घोड़े शीघ्र चलने वाले वह (**वपुष्यः**) रूपों में प्रसिद्ध (**विभावा**) ऐश्वर्य्यवान् (**रण्वः**) सुन्दर स्वरूपयुक्त (**होता**) देने वा लेने वाला होता हुआ राजा (**दूतः**) दुष्टों को सन्ताप देते हुए के सदृश (**विश्वा**) सब (**सद्म**) उत्तम कर्म वा स्थानों की (**अभि, वष्टि**) कामना करता है (**सः**) वह (**इत्**) ही (**संसत्**) चक्रवर्तियों की सभा (**पितुमतीव**) जो कि प्रशंसित बहुत अन्न आदि ऐश्वर्य्य से युक्त उसके सदृश (**सदा**) सब काल में उन्नतिशील होता है॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमा अलङ्कार हैं। जैसे दूतजन राजाओं के हित करने की इच्छा करते हैं, वैसे ही जो राजाजन प्रजा का हित निरन्तर करते हैं, वे राजा और सभासद् पुण्य के भजने वाले होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स चेतयन्मनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति।
स क्षेत्यस्य दुर्यासु साधन् देवो मर्तस्य सधनित्वमाप॥९॥

सः। चेतयत्। मनुषः। यज्ञऽबन्धुः। प्र। तम्। मह्या। रशनया। नयन्ति। सः। क्षेति। अस्य। दुर्यासु। साधन्। देवः। मर्तस्य। सधनिऽत्वम्। आप॥९॥

पदार्थः-(**सः**) (**चेतयत्**) ज्ञापयेत् (**मनुषः**) अमात्यप्रजाजनान् (**यज्ञबन्धुः**) यज्ञस्य न्यायव्यवहारस्य भ्रातेव वर्त्तमानः (**प्र**) (**तम्**) (**मह्या**) महत्या (**रशनया**) (**नयन्ति**) (**सः**) (**क्षेति**) निवसति (**अस्य**) (**दुर्य्यासु**) (**साधन्**) (**देवः**) दाता (**मर्त्तस्य**) मनुष्यस्य (**सधनित्वम्**) धनिनां भावेन सह वर्त्तमानं राज्यम् (**आप**) आप्नोति॥९॥

अन्वयः-यदि स यज्ञबन्धू राजा मनुषश्चेतयत्तं ये सभासदो मह्या रशनयाऽश्वा इव नीत्या प्र नयन्ति सोऽस्य राज्यस्य दुर्यासु न्यायगृहेषु राजव्यवहारं साधन् क्षेति स देवो मर्त्तस्य सधनित्वमाप॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽऽप्ता अध्यापकोपदेशका सुशिक्षया विद्यार्थिनो धर्म्ये मार्गं नयन्ति तथैव राजनीतिशिक्षया राजानं राजधर्मपथं नयन्तु यः सामात्यः सप्रजो राजा निर्व्यसनो भूत्वा प्रीत्या राजधर्मं करोति स ऐश्वर्य्यवज्जनं राज्यं प्राप्य सुखेन निवसति॥९॥

पदार्थः-जो (**सः**) वह (**यज्ञबन्धुः**) न्याय व्यवहार के भ्राता के सदृश वर्त्तमान राजा (**मनुषः**) मन्त्री और प्रजाजनों को (**चेतयत्**) जनावे (**तम्**) उसको जो सभासद् लोग (**मह्या**) बड़ी (**रशनया**) रस्सी से घोड़े के सदृश नीति से (**प्र**) (**नयन्ति**) अच्छे प्रकार प्राप्त करते हैं (**सः**) वह (**अस्य**) इस राज्य के (**दुर्य्यासु**) न्याय के स्थानों में राजव्यवहार को (**साधन्**) साधता हुआ (**क्षेति**) निवास करता है, वह

(देवः) देनेवाला **(मर्त्तस्य)** मनुष्यसम्बन्धी **(सधनित्वम्)** धनीपन के साथ वर्त्तमान राज्य को **(आप)** प्राप्त होता है॥९॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यथार्थवादी अध्यापक और उपदेशक लोग उत्तम शिक्षा से विद्यार्थियों के लिये धर्मयुक्त मर्य्यादा को प्राप्त कराते हैं, वैसे ही राजनीति की शिक्षा से राजा के लिये राजधर्म के मार्ग को प्राप्त करो। और जो मन्त्री और प्रजा के सहित राजा व्यसनरहित होकर प्रीति से राजधर्म को करता है, वह ऐश्वर्य्ययुक्त जन और राज्य को प्राप्त होकर सुख से निवास करता है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स तू नो॑ अ॒ग्निर्न॑यतु प्रजा॒नन्नच्छा॒ रत्नं॑ दे॒वभ॑क्तं॒ यदस्य॑।

धि॒या यद्विश्वे॑ अ॒मृता॒ अकृ॑ण्व॒न्द्यौष्पि॒ता ज॑नि॒ता स॒त्यमु॑क्षन्॥ १०॥ १३॥

सः। तु। नः। अ॒ग्निः। न॒य॒तु॒। प्र॒जा॒नन्। अच्छ॑। रत्न॑म्। दे॒वऽभक्तम्। यत्। अ॒स्य॒। धि॒या। यत्। विश्वे॑। अ॒मृता॑ः। अकृ॑ण्वन्। द्यौः। पि॒ता। ज॒नि॒ता। स॒त्यम्। उ॒क्ष॒न्॥ १०॥

पदार्थः–(**सः**) (**तु**) पुनः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**नः**) अस्मान् (**अग्निः**) स्वप्रकाशः परमात्मेव राजा (**नयतु**) प्रापयतु (**प्रजानन्**) (**अच्छ**) अत्र **संहितायामि**ति दीर्घः। (**रत्नम्**) रमणीयं धनम् (**देवभक्तम्**) देवैः सेवितम् (**यत्**) (**अस्य**) जगतः (**धिया**) प्रज्ञया (**यत्**) यस्मिन् (**विश्वे**) (**अमृताः**) जन्ममृत्युरहिता जीवाः (**अकृण्वन्**) कुर्वन्ति (**द्यौः**) प्रकाशमानः (**पिता**) पालकः (**जनिता**) जनकः (**सत्यम्**) (**उक्षन्**) सेवन्ते॥१०॥

अन्वयः-हे राजन्! यथा सोऽस्य पिता जनिता द्यौरग्निः परमात्मा धिया सर्वं प्रजानन् नोऽस्मान् यद्देवभक्तं रत्नमच्छ नयति तथा भवान्नयतु। यद्यस्मिँस्तु विश्वेऽमृताः सत्यमुक्षँस्तु मोक्षमकृण्वन् तत्रैव स्थित्वा सत्यं सेवित्वा धर्म्मेण राज्यं सम्पाल्य मोक्षमाप्नुहि॥१०॥

भावार्थः–हे राजादयो मनुष्या! यथा सर्वस्य जगतः पिता जनः परमात्मा दयया सर्वेषां जीवानां सुखाय विविधान् पदार्थान् रचयित्वा दत्वाऽभिमानं न करोति तथैव यूयं भवत। ईश्वरस्य सद्गुणकर्म्मस्वभावैस्तुल्यान्त्स्वगुणकर्म्मस्वभावान् कृत्वा राज्यादिकं पालयित्वाऽन्ते मोक्षमाप्नुत॥१०॥

पदार्थः–हे राजन्! जैसे **(सः)** वह **(अस्य)** इस संसार का **(पिता)** पालन करने और **(जनिता)** उत्पन्न करनेवाला **(द्यौः)** प्रकाशमान **(अग्निः)** अपने से प्रकाशरूप परमात्मा के सदृश राजा **(धिया)** बुद्धि से सब को **(प्रजानन्)** जानता हुआ **(नः)** हम लोगों को **(यत्)** जो **(देवभक्तम्)** देवों से सेवित **(रत्नम्)** सुन्दर धन को **(अच्छ)** उत्तम प्रकार प्राप्त कराता है, वैसे आप **(नयतु)** प्राप्त कराइये **(यत्)** जिसमें **(तु)** फिर **(विश्वे)** सब **(अमृताः)** जन्म और मृत्यु से रहित जीव **(सत्यम्)** सत्य का **(उक्षन्)**

सेवन करते हुए मोक्ष को (**अकृण्वन्**) करते हैं, वहाँ ही स्थित हो और सत्य का सेवन और धर्म से राज्य का पालन करके मोक्ष को प्राप्त होइये॥१०॥

भावार्थः-हे राजा आदि मनुष्यों जैसे सब जगत् का पालन और उत्पन्न करनेवाला परमात्मा दया से सब जीवों के सुख के लिये अनेक प्रकार के पदार्थों को रच और दे के अभिमान नहीं करता है, वैसे ही आप लोग होइये। और ईश्वर के उत्तम गुण, कर्म्म और स्वभावों के तुल्य अपने गुण, कर्म्म और स्वभावों को करके राज्य आदि का पालन करके अन्त में मोक्ष को प्राप्त होओ॥१०॥

अथाग्निपदेन परमात्मविषयमाह॥

अब इस अगले मन्त्र में अग्निपद से परमात्मा के विषय को कहते हैं॥

स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ।
अपादशीर्षा गुहमानो अन्तायोयुवानो वृषभस्य नीळे॥ ११॥

सः। जायत। प्रथमः। पस्त्यासु। महः। बुध्ने। रजसः। अस्य। योनौ। अपात्। अशीर्षा। गुहमानः। अन्ता। आऽयोयुवानः। वृषभस्य। नीळे॥ ११॥

पदार्थः-(**सः**) विद्युद्रूपोऽग्निः (**जायत**) जायते। अत्राडभावः (**प्रथमः**) आदिमः (**पस्त्यासु**) गृहेषु (**महः**) महति (**बुध्ने**) अन्तरिक्षे (**रजसः**) लोकसमूहस्य (**अस्य**) (**योनौ**) कारणे (**अपात्**) पादरहितः (**अशीर्षा**) शिरआद्यवयवरहितः (**गुहमानः**) संवृतः सन् (**अन्ता**) अन्ते समीपे (**आयोयुवानः**) समन्ताद् भृशं मिश्रयिता विभाजको वा (**वृषभस्य**) वर्षकस्य सूर्य्यस्य (**नीळे**) गृहे॥११॥

अन्वयः-हे मनुष्या! यथा स प्रथमः सूर्य्यो महो बुध्नेऽस्य रजसो योनौ जायत यथा गुहमानोऽपादशीर्षा आयोयुवानो वृषभस्य नीळेऽन्ता जायत तथैव यूयमपि पस्त्यासु जायध्वम्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽनन्त आकाशे प्रकृतेर्महदादि क्रमेणेदं जगज्जातमत्र निरवयवा जीवाः संवृताः सन्तः परमात्मनः समीपे वर्त्तमाना गृहेषु जायन्ते शरीरं धरन्ति त्यजन्ति च तं सर्वेश्वरमन्तर्ध्यात्वा सुखिनो भवत॥११॥

पदार्थः-हे मनुष्यो! जैसे (**सः**) बिजुलीरूप अग्नि (**प्रथमः**) प्रथम सूर्य्य (**महः**) बड़े (**बुध्ने**) अन्तरिक्ष में (**अस्य**) इस (**रजसः**) लोकों के समूह के (**योनौ**) कारण में (**जायत**) उत्पन्न होता है और जैसे (**गुहमानः**) ढंपा हुआ (**अपात्**) पैरों और (**अशीर्षा**) शिर आदि (**आयोयुवानः**) सब प्रकार अत्यन्त मिलाने वा अलग करने वाला (**वृषभस्य**) वृष्टि करने वाले सूर्य्य के (**नीळे**) स्थान में (**अन्ता**) समीप में उत्पन्न होता है, वैसे ही आप लोग भी (**पस्त्यासु**) घरों में उत्पन्न अर्थात् प्रकट हूजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे अन्तरहित आकाश में प्रकृति से महत् तत्त्व अर्थात् बुद्धि आदि के क्रम से यह संसार उत्पन्न हुआ इस संसार में अवयवों से रहित मिलते हुए जीव परमात्मा के समीप में वर्त्तमान हो, गृहों में उत्पन्न होते शरीर को धारण करते और

त्यागते हैं, उस सब के स्वामी का हृदय में ध्यान कर सुखी हूजिये॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र शर्धा आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे॥१२॥

प्र। शर्धाः। आर्त। प्रथमम्। विपन्या। ऋतस्य। योना। वृषभस्य। नीळे। स्पार्हः। युवा। वपुष्यः। विभाऽवा। सप्त। प्रियासः। अजनयन्त। वृष्णे॥१२॥

पदार्थः-(**प्र**) (**शर्धः**) बलम् (**आर्त**) प्राप्नुयाः (**प्रथमम्**) आदिमम् (**विपन्या**) विपने विविधव्यवहारे साध्व्या (**ऋतस्य**) सत्यस्य कारणस्य (**योना**) गृहे (**वृषभस्य**) वर्षकस्याऽग्नेः (**नीळे**) स्थाने (**स्पार्हः**) स्पृहणीयः (**युवा**) प्राप्तयुवावस्था (**वपुष्यः**) वपुष्षु साधुः (**विभावा**) विविधविद्याप्रकाशयुक्तः (**सप्त**) पञ्च प्राणमनोबुद्धिश्च (**प्रियासः**) कमनीयाः सेवनीयाः (**अजनयन्त**) जनयन्ति (**वृष्णे**) वर्षकाय जीवाय॥१२॥

अन्वयः-हे विद्वन्! यथा वृष्णे सप्त प्रियासोऽजनयन्त तथर्त्तस्य योना वृषभस्य नीळे स्पार्हो युवा वपुष्यो विभावा सन् भवान् विपन्या प्रथमं शर्द्धः प्रार्त्त प्राप्नुयाः॥१२॥

भावार्थः-हे मनुष्या! यथा प्राणान्तःकरणानि कार्य्यसाधकानि प्रियाणि भवन्ति तथैव पुरुषार्थेन कार्य्यकारणे विदित्वा परमेश्वरं विज्ञाय प्रथमे वयसि शरीरात्मबलं प्राप्य सुखानि जनयत॥१२॥

पदार्थः-हे विद्वन् पुरुष! जैसे (**वृष्णे**) वृष्टि करने वाले जीव के लिये (**सप्त**) पांच प्राण मन और बुद्धि ये सात (**प्रियासः**) सुन्दर और सेवन करने योग्य (**अजनयन्त**) उत्पन्न करते हैं, वैसे (**ऋतस्य**) सत्यकारण के (**योना**) स्थान में (**वृषभस्य**) वृष्टि करने वाले अग्नि के (**नीळे**) स्थान में (**स्पार्हः**) अभिलाषा करने योग्य (**युवा**) युवावस्था को प्राप्त (**वपुष्यः**) रूपों में श्रेष्ठ और (**विभावा**) अनेक प्रकार की विद्याओं के प्रकाशयुक्त हुए आप (**विपन्या**) अनेक प्रकार के व्यवहार में श्रेष्ठ प्रशंसा से (**प्रथमम्**) पहिले (**शर्धः**) बल को (**प्र, आर्त्त**) प्राप्त हूजिये॥१२॥

भावार्थः-हे मनुष्यो! जैसे प्राण और अन्तःकरण कार्य के साधक और प्रिय होते हैं, वैसे ही पुरुषार्थ से कार्य्य और कारण जानकर और परमेश्वर का ज्ञान करके प्रथम अवस्था में शरीर और आत्मा के बल को प्राप्त होकर सुखों को उत्पन्न करो॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः।

अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः॥ १३॥

अस्माकम्। अत्र। पितरः। मनुष्याः। अभि। प्र। सेदुः। ऋतम्। आशुषाणाः। अश्मऽव्रजाः। सुऽदुघाः। वव्रे। अन्तः। उत्। उस्राः। आजन्। उषसः। हुवानाः॥ १३॥

पदार्थः-(**अस्माकम्**) (**अत्र**) अस्मिञ्जगति व्यवहारे वा (**पितरः**) पालकाः (**मनुष्याः**) मननशीलाः समन्तात् (**अभि**) आभिमुख्ये (**प्र**) (**सेदुः**) प्रसीदन्ति (**ऋतम्**) सत्यम् (**आशुषाणाः**) प्राप्नुवन्तो ब्रह्मचर्येण शुष्कशरीरा वा (**अश्मव्रजाः**) येऽश्मसु मेघेषु व्रजन्ति (**सुदुघाः**) सुष्ठु कामानामलङ्कर्त्तारः (**वव्रे**) वृणोति (**अन्तः**) मध्ये (**उत्**) (**उस्राः**) किरणाः (**आजन्**) प्राप्नुवन्ति (**उषसः**) प्रभातान् (**हुवानाः**) कृताह्वानाः॥ १३॥

अन्वयः-हे मनुष्या! येऽत्राऽस्माकं मनुष्याः पितर ऋतमाशुषाणा अश्मव्रजाः सुदुघा उषस उस्रा इव हुवानाः सन्त उदाजन्नन्तरभि प्र सेदुस्तान् योऽभि वव्रे सभाग्यशाली जायते॥ ३॥

भावार्थः-हे मनुष्या! ये युष्माकं पालका ब्रह्मचारिणो यथा सूर्यकिरणा मेघान् वर्षयन्ति तथैव कृताह्वानाः सन्तः सत्यं विज्ञापयन्ति तेषां यः सत्कारं करोति स भाग्यशाली भवति॥ १३॥

पदार्थः-हे मनुष्यो! जो (**अत्र**) इस संसार वा व्यवहार में (**अस्माकम्**) हम लोगों के (**मनुष्याः**) मनन करने और (**पितरः**) पालन करने वाले (**ऋतम्**) सत्य को (**आशुषाणाः**) सब प्रकार प्राप्त हुए वा ब्रह्मचर्य से शुष्क शरीरवाले (**अश्मव्रजाः**) मेघों में चलनेवाले (**सुदुघाः**) उत्तम प्रकार कामनाओं के पूर्ण करने वाले (**उषसः**) प्रातःकालों को (**उस्राः**) किरणों के सदृश (**हुवानाः**) पुकारने वाले हुए (**उत्, आजन्**) प्राप्त होते हैं (**अन्तः**) मध्य में (**अभि**) सम्मुख (**प्र, सेदुः**) जाते हैं, उनको जो (**वव्रे**) ढांपता है, वह भाग्यशाली होता है॥ १३॥

भावार्थः-हे मनुष्यो! जो लोग आप लोगों के पालन करने वाले ब्रह्मचर्य्य को धारण करके जैसे सूर्य की किरणें मेघों को वर्षाती हैं, वैसे ही बुलाये हुए सत्य का प्रकाश करते हैं, उनका जो सत्कार करता है, वह भाग्यशाली होता है॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन्।

पश्चयन्त्रासो अभि कारमर्चन्विदन्त ज्योतिश्चकृपन्त धीभिः॥ १४॥

ते। मर्मृजत। ददृऽवांसः। अद्रिम्। तत्। एषाम्। अन्ये। अभितः। वि। वोचन्। पश्चऽयन्त्रासः। अभि। कारम्। अर्चन्। विदन्त। ज्योतिः। चकृपन्त। धीभिः॥ १४॥

पदार्थः-(ते) (**मर्मृजत**) शुद्धा भूत्वा शोधयन्ति (**ददृवांसः**) विदारकाः (**अद्रिम्**) मेघम् (**तत्**) तस्मात् (**एषाम्**) मध्ये (**अन्ये**) भिन्नाः (**अभितः**) सर्वतोऽभिमुखाः (**वि**) (**वोचन्**) उपदिशन्ति (**पश्चयन्त्रासः**) पश्चानि दृष्टानि यन्त्राणि यैस्ते (**अभि**) (**कारम्**) शिल्पकृत्यम् (**अर्चन्**) सत्कुर्वन्ति (**विदन्त**) जानन्ति (**ज्योतिः**) प्रकाशम् (**चकृपन्त**) कृपालवो भवन्ति (**धीभिः**) प्रज्ञाभिः कर्मभिर्वा॥१४॥

अन्वयः-हे मनुष्या! येऽस्माकं मनुष्या पितरोऽद्रिं ददृवांसः किरणा इवास्मान् मर्मृजतैषामन्ये तदभितो विवोचन् पश्चयन्त्रासः सन्तः कारमभ्यर्चन् धीभिर्ज्योतिर्विदन्त सर्वेषु चकृपन्त ते सर्वैः पूज्यास्स्युः॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये वेदोपवेदाङ्गोपाङ्गपारगाश्शिल्पविद्याविदो विद्वांसः कृपया सर्वान् सुशिक्षामुपदिश्य विदुषः संपादयेयुस्ते सर्वैः सत्कर्त्तव्याः स्युः॥१४॥

पदार्थः-हे मनुष्यो! जो हम लोगों के मनन करने और पालन करने वाले (**अद्रिम्**) मेघ के (**ददृवांस**) तोड़ने वाले किरणों के सदृश हम लोगों को (**मर्मृजत**) शुद्ध होकर शुद्ध करते हैं (**एषाम्**) इसके मध्य में (**अन्ये**) दूसरे लोग (**तत्**) इस कारण (**अभितः**) चारों ओर से सम्मुख (**वि, वोचन्**) उपदेश देते (**पश्चयन्त्रासः**) देखे हैं, यन्त्र जिन्होंने ऐसे होते हुए (**कारम्**) शिल्पकृत्य का (**अभि, अर्चन्**) सत्कार करते (**धीभिः**) बुद्धियों वा कर्मों से (**ज्योतिः**) प्रकाश को (**विदन्त**) जानने और सबों में (**चकृपन्त**) कृपालु होते हैं (**ते**) वे सब लोगों से सत्कार पाने योग्य होवें॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो वेद, उपवेद, अङ्ग और उपांगों के पार जाने और शिल्पविद्या के जानने वाले विद्वान् लोग कृपा से सब को उत्तम प्रकार शिक्षा का उपदेश करके विद्यायुक्त करें, वे सब लोगों से सत्कार करने योग्य होवें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षन्तमद्रिम्।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः॥१५॥१४॥

ते। गव्यता। मनसा। दृध्रम्। उब्धम्। गाः। येमानम्। परि। सन्तम्। अद्रिम्। दृळ्हम्। नरः। वचसा। दैव्येन। व्रजम्। गोऽमन्तम्। उशिजः। वि। वव्रुरिति वव्रुः॥१५॥

पदार्थः-(**ते**) (**गव्यता**) गोः प्रचुरो गव्यं तदाचरतीव तेन (**मनसा**) (**दृध्रम्**) वर्धकम् (**उब्धम्**) उन्दकम् (**गाः**) किरणान् (**येमानम्**) नियन्तारम् (**परि**) सर्वतः (**सन्तम्**) वर्त्तमानम् (**अद्रिम्**) मेघमिव (**दृळ्हम्**) सुखवर्धकम् (**नरः**) (**वचसा**) वचनेन (**दैव्येन**) दिव्येन (**व्रजम्**) यो व्रजति तम् (**गोमन्तम्**) गावः किरणा विद्यन्ते यस्मिंस्तम् (**उशिजः**) कामयमानाः (**वि**) (**वव्रुः**) विवृण्वति॥१५॥

अन्वयः-ये नरो मनसा गव्यता दैव्येन वचसा गा दृध्रमुब्धं येमानं सन्तं दृळ्हं सूर्यो व्रजं गोमन्तमद्रिमिवोशिजः सन्तः परि वि वव्रुस्ते कामनां प्राप्नुवन्ति॥१५॥

भावार्थः-यथा किरणा मेघमुन्नयन्ति वर्षयन्ति तथैव विद्वांसो विचारेण दृढज्ञानं जनयन्ति॥१५॥

पदार्थः-जो (**नरः**) वीरपुरुष (**मनसः**) मन से (**गव्यता**) गौओं के समूह के सदृश आचरण करनेवाले (**दैव्येन**) सुन्दर (**वचसा**) वचन से (**गाः**) किरणों को (**दृध्रम्**) बढ़ाने वाले (**उब्धम्**) सब ओर से मिले हुए (**येमानम्**) नियन्ता अर्थात् नायक (**सन्तम्**) वर्त्तमान (**दृळ्हम्**) सुख के बढ़ाने वाले को सूर्य (**व्रजम्**) चलनेवाले (**गोमन्तम्**) किरणें विद्यमान जिसमें ऐसे को (**अद्रिम्**) मेघ के सदृश (**उशिजः**) कामना करते हुए (**परि, वि, वव्रुः**) प्रकट करते हैं (**ते**) वे कामना को प्राप्त होते हैं॥१५॥

भावार्थः-जैसे किरणें मेघ को ऊपर को प्राप्त करती और वर्षाती हैं, वैसे ही विद्वान् जन विचार से दृढ़ ज्ञान को उत्पन्न करते हैं॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विन्दन्।

तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः॥१६॥

ते। मन्वत। प्रथमम्। नाम। धेनोः। त्रिः। सप्त। मातुः। परमाणि। विन्दन्। तत्। जानतीः। अभिः। अनूषत। व्राः। आविः। भुवत्। अरुणीः। यशसा। गोः॥१६॥

पदार्थः-(**ते**) (**मन्वत**) मन्यन्ते (**प्रथमम्**) प्रख्यातम् (**नाम**) (**धेनोः**) वाण्याः (**त्रिः**) त्रिवारम् (**सप्त**) (**मातुः**) जनन्या इव (**परमाणि**) उत्कृष्टानि (**विन्दन्**) जानन्ति (**तत्**) (**जानतीः**) विज्ञानवतीः (**अभि**) सर्वतः (**अनूषत**) स्तुवन्ति (**व्राः**) या व्रियन्ते ताः (**आविः**) प्राकट्ये (**भुवत्**) भवेत् (**अरुणीः**) रक्तगुणविशिष्टाः (**यशसा**) कीर्त्या (**गोः**) विद्यासुशिक्षायुक्ताया वाचः॥१६॥

अन्वयः-ये मातुरिव धेनोः सप्त परमाणि विन्दन् तेऽस्य प्रथमं नाम त्रिर्मन्वत। यो यशसा सह वर्त्तमान आविर्भुवत् स तद्गोर्विज्ञानं जानीयात्। ये यशसा प्रकटाः स्युस्तेऽरुणीर्जानतीर्व्रा अभ्यनूषत॥१६॥

भावार्थः-यथा कामधेनुर्दुग्धादिनेच्छां पिपर्त्ति तथैव विद्यासुशिक्षायुक्ता वाणी विदुषः पिपर्त्ति। ये धर्माचरणं कुर्वन्ति ते यशस्विनो भूत्वा सर्वत्र प्रसिद्धा जायन्ते॥१६॥

पदार्थः-जो (**मातुः**) माता के सदृश (**धेनोः**) वाणी के (**सप्त**) सात अर्थात् सात गायत्र्यादि छन्दों में विभक्त (**परमाणि**) उत्तम व्यवहारों को (**विन्दन्**) जानते हैं (**ते**) वे इसके (**प्रथमम्**) प्रसिद्ध (**नाम**) स्तुतिसाधक शब्दमात्र को (**त्रिः**) तीन वार (**मन्वत**) मानते हैं और जो (**यशसा**) कीर्ति के साथ

वर्त्तमान (**आविः**) प्रकट (**भुवत्**) होवे वह (**तत्**) उस (**गोः**) वाणी के विज्ञान को जाने और जो कीर्ति से प्रकट होवें वे (**अरुणीः**) रक्तगुण से विशिष्ट (**जानतीः**) विज्ञानवाली (**व्राः**) प्रकट होने वालियों की (**अभि**) सब प्रकार (**अनूषत**) स्तुति करते हैं॥१६॥

भावार्थः-जैसे कामधेनु दुग्ध आदि से इच्छा को पूर्ण करती है, वैसी ही विद्या और उत्तम शिक्षा से युक्त वाणी विद्वानों को प्रसन्न करती है। जो लोग धर्म का आचरण करते हैं, वे यशस्वी होकर सर्वत्र प्रसिद्ध होते हैं॥१६॥

अथ सूर्य्यदृष्टान्तेनात्मबलसंरक्षणमाह॥

अब सूर्य्य के दृष्टान्त से आत्मा के बल की रक्षा को कहते हैं॥

नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त।

आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन्॥ १७॥

नेशत्। तमः। दुधितम्। रोचत। द्यौः। उत्। देव्याः। उषसः। भानुः। अर्त। आ। सूर्यः। बृहतः। तिष्ठत्। अज्रान्। ऋजु। मर्तेषु। वृजिना। च। पश्यन्॥ १७॥

पदार्थः-(**नेशत्**) नाशयति (**तमः**) अन्धकारम् (**दुधितम्**) पूर्णम् (**रोचत**) प्रकाशते (**द्यौः**) आकाशस्थः (**उत्**) (**देव्याः**) दिव्यसुखप्रापिकायाः (**उषसः**) प्रभातवेलायाः (**भानुः**) प्रकाशमानः (**अर्त्त**) प्रापय (**आ**) समन्तात् (**सूर्य्यः**) (**बृहतः**) महतः (**तिष्ठत्**) तिष्ठति (**अज्रान्**) जगति प्रक्षिप्तान् (**ऋजु**) सरलम् (**मर्त्तेषु**) मनुष्येषु (**वृजिना**) बलानि (**च**) (**पश्यन्**)॥१७॥

अन्वयः-हे विद्वन्! यथा द्यौर्भानुः सूर्य्यो देव्या उषसो दुधितं तम उन्नेशद्रोचत तिष्ठत्तथा बृहतोऽज्रान् पश्यन् सँस्त्वं मर्त्तेषु वृजिना चर्ज्वार्त्त॥१७॥

भावार्थः-यथा सूर्य्य उषसा रात्रिं निवार्य प्रकाशं जनयति तथैवाऽध्यापक उपदेशकश्च व्याप्तानपि पदार्थान् दृष्ट्वाऽऽर्जानं मनुष्येषु शरीरात्मबलं जनयतु॥१७॥

पदार्थः-हे विद्वन् पुरुष! जैसे (**द्यौः**) आकाशस्थ (**भानुः**) प्रकाशमान (**सूर्य्यः**) सूर्य्य (**देव्याः**) उत्तम सुख को प्राप्त करानेवाली (**उषसः**) प्रभातवेला से (**दुधितम्**) पूर्ण (**तमः**) अन्धकार को (**उत्, नेशत्**) नाश करता और (**रोचत**) प्रकाशित होता (**तिष्ठत्**) और स्थित रहता है, वैसे (**बृहतः**) बड़े (**अज्रान्**) संसार में जिनका प्रक्षेप हुआ उन पदार्थों को (**पश्यन्**) देखते हुए आप (**मर्त्तेषु**) मनुष्यों में (**वृजिना**) बलों को (**च**) और (**ऋजु**) सरलभाव को (**आ**) (**अर्त्त**) प्राप्त कराओ॥१७॥

भावार्थः-जैसे सूर्य्य प्रातर्वेला से रात्रि का निवारण करके प्रकाश को उत्पन्न करता है, वैसे ही अध्यापक और उपदेशक व्याप्त भी पदार्थों को देख के नम्रता से मनुष्यों में शरीर [और] आत्मा के बल को बढ़ावे॥१७॥

अथ वाणीविषयमाह॥

अब वाणी के विषय को इस अगले मन्त्र में कहते हैं॥

आदित् पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयन्त द्युभक्तम्।

विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु॥ १८॥

आत्। इत्। पश्चा। बुबुधानाः। वि। अख्यन्। आत्। इत्। रत्नम्। धारयन्त। द्युऽभक्तम्। विश्वे। विश्वासु। दुर्यासु। देवाः। मित्र। धिये। वरुण। सत्यम्। अस्तु॥ १८॥

पदार्थः-(**आत्**) आनन्तर्ये (**इत्**) एव (**पश्चा**) पश्चात् (**बुबुधानाः**) विजानन्तः (**वि**) विशेषेण (**अख्यन्**) उपदिशन्तु (**आत्**) (**इत्**) (**रत्नम्**) धनम् (**धारयन्त**) धारयन्ति (**द्युभक्तम्**) विद्युदादिभिस्सेवितम् (**विश्वे**) सर्वे (**विश्वासु**) (**दुर्यासु**) गृहेषु (**देवाः**) (**मित्र**) सखे (**धिये**) प्रज्ञायै कर्मणे वा (**वरुण**) दुष्टानां बन्धक (**सत्यम्**) त्रैकाल्याऽबाध्यम् (**अस्तु**) भवतु॥ १८॥

अन्वयः-हे वरुण मित्र! यथा बुबुधाना विश्वे देवा विश्वासु दुर्य्यासु द्युभक्तं रत्नं धारयन्ताऽऽदित् पश्चैतद् व्यख्यन्नाऽऽदित्तत्सत्यं धियेऽस्तु॥ १८॥

भावार्थः-ये ब्रह्मचर्य्येण विद्यासुशिक्षासत्यधर्माचरणान् धृत्वाऽन्यान् प्रत्युपदिशन्ति ते प्रज्ञां वर्धयित्वा सर्वत्र प्रसिद्धा भूत्वाऽऽनन्देन गृहेषु वसन्ति॥ १८॥

पदार्थः-हे (**वरुण**) दुष्ट पुरुषों के बांधने वाले (**मित्र**) मित्र! जैसे (**बुबुधानाः**) विशेष करके जानते हुए (**विश्वे**) सम्पूर्ण (**देवाः**) विद्वान् जन (**विश्वासु**) सब (**दुर्य्यासु**) स्थानों [घरों] में (**द्युभक्तम्**) बिजुली आदि पदार्थों से सेवित (**रत्नम्**) धन को (**धारयन्त**) धारण करते हैं। और (**आत्**) अनन्तर (**इत्**) ही (**पश्चा**) पीछे से इसका (**वि, अख्यन्**) विशेष करके उपदेश दें (**आत्**) अनन्तर (**इत्**) ही वह (**सत्यम्**) सत्य (**धिये**) बुद्धि वा उत्तम कर्म के लिये (**अस्तु**) हो॥ १८॥

भावार्थः-जो लोग ब्रह्मचर्य्य से विद्या, उत्तम शिक्षा, सत्य और धर्माचरणों को धारण करके अन्य जनों के प्रति उपदेश देते हैं, वे बुद्धि को बढ़ा के सर्वत्र प्रसिद्ध हो के आनन्द से घरों में रहते हैं॥ १८॥

अथ विद्युद्विषयमाह॥

अब बिजुली के विषय को अगले मन्त्र में कहते हैं॥

अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम्।

शुच्यूधो अतृणन्न गवामन्धो न पूतं परिषिक्तमंशोः॥ १९॥

अच्छ। वोचेय। शुशुचानम्। अग्निम्। होतारम्। विश्वऽभरसम्। यजिष्ठम्। शुचि। ऊधः। अतृणत्। न। गवाम्। अन्धः। न। पूतम्। परिऽसिक्तम्। अंशोः॥ १९॥

पदार्थः-(**अच्छ**) सम्यक्। अत्र **संहितायामि**ति दीर्घः। (**वोचेय**) उपदिशेय (**शुशुचानम्**) शुद्धगुणकर्मस्वभावम् (**अग्निम्**) विद्युद्रूपम् (**होतारम्**) दातारम् (**विश्वभरसम्**) संसारस्य धारकम् (**यजिष्ठम्**) अतिशयेन सङ्गन्तारम् (**शुचि**) पवित्रं कर्म (**ऊधः**) प्रभातवेलेव (**अतृणत्**) हिनस्ति (**न**) निषेधे (**गवाम्**) (**अन्धः**) अन्नम् (**न**) इव (**पूतम्**) पवित्रम् (**परिषिक्तम्**) सर्वत आर्द्रीभूतं कृतम् (**अंशोः**) सूर्य्यस्य प्राप्तस्य॥१९॥

अन्वयः-हे मनुष्या! योंऽशोः परिषिक्तं पूतं शुच्यन्धो न गवामूधो नाऽतृणत्तं यजिष्ठं विश्वभरसं होतारं शुशुचानमग्निं युष्मान् प्रत्यहमच्छ वोचेय॥१९॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यथा विद्युत् समानरूपा सती सर्वान् रक्षति विकृता सती हन्ति, सा किरणान्न हिनस्ति। अन्नवत्पालिका भूत्वा सर्वाञ्जवयतीति वेद्यम्॥१९॥

पदार्थः-हे मनुष्यो! जो (**अंशोः**) प्राप्त सूर्य्य के (**परिषिक्तम्**) सब ओर से गीले किये हुए (**पूतम्**) पवित्र वस्तु (**शुचि**) और पवित्र कर्म को (**अन्धः**) अन्न के (**न**) तुल्य वा (**गवाम्**) गौओं के (**ऊधः**) प्रभात समय के सदृश (**न**) नहीं (**अतृणत्**) हिंसा करता है, उस (**यजिष्ठम्**) अत्यन्त मिलाने (**विश्वभरसम्**) संसार के धारण करने और (**होतारम्**) देने और (**शुशुचानम्**) शुद्ध गुण, कर्म और स्वभाव कराने वाले (**अग्निम्**) बिजुलीरूप अग्नि का आप लोगों के प्रति मैं (**अच्छ**) उत्तम प्रकार (**वोचेय**) उपदेश दूं॥१९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जैसे बिजुली समान रूप हुई सब की रक्षा करती है और विरूप होनेपर नाश करती, वह किरणों का नाश नहीं करती। और अन्न के सदृश पालन करनेवाली होकर सब को चलाती है, ऐसा जानें॥१९॥

पुनरुक्तं सूर्य्यसम्बन्धेनाप्याह॥

फिर उक्त विषय को सूर्य के सम्बन्ध से भी कहते हैं॥

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम्।

अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः॥२०॥१५॥

विश्वेषाम्। अदितिः। यज्ञियानाम्। विश्वेषाम्। अतिथिः। मानुषाणाम्। अग्निः। देवानाम्। अवः। आऽवृणानः। सुऽमृळीकः। भवतु। जातऽवेदाः॥२०॥

पदार्थः-(**विश्वेषाम्**) सर्वेषाम् (**अदितिः**) अखण्डितमन्तरिक्षम् (**यज्ञियानाम्**) यज्ञानुष्ठानकर्त्तृणाम् (**विश्वेषाम्**) (**अतिथिः**) अभ्यागत इव वर्त्तमानः (**मानुषाणाम्**) मानवानाम् (**अग्निः**) (**देवानाम्**) (**अवः**) रक्षणम् (**आवृणानः**) समन्तात् स्वीकुर्वन् (**सुमृळीकः**) सुष्ठु सुखकारकः (**भवतु**) (**जातवेदाः**) जातेषु पदार्थेषु विद्यमानः॥२०॥

अन्वयः-हे विद्वन्! भवान् विश्वेषां यज्ञियानामदितिरिव विश्वेषां मानुषाणामतिथिरिव देवानामग्निरिवाऽव आवृणानो जातवेदाः सुमृळीको भवतु॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सुगन्धधूमेन शोधितमन्तरिक्षं पूर्णविद्य आप्तोपदेष्टा सूर्य्यश्च सुखदा भवन्ति तथैव यूयं सर्वेभ्यः सुखप्रदा भवतेति॥२०॥

अत्र विद्वद्वेद्याऽग्निवाणीसूर्य्यविद्युदादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेनसह सङ्गतिर्वेद्या॥२०॥

इति प्रथमं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! आप **(विश्वेषाम्)** सम्पूर्ण **(यज्ञियानाम्)** यज्ञों के अनुष्ठान करनेवालों के **(अदितिः)** अखण्डित अन्तरिक्ष के तुल्य **(विश्वेषाम्)** सम्पूर्ण **(मानुषाणाम्)** मनुष्यों में **(अतिथिः)** अभ्यागत के सदृश वर्त्तमान **(देवानाम्)** विद्वानों के **(अग्निम्)** अग्नि के सदृश **(अवः)** रक्षण को **(आवृणानः)** सब प्रकार स्वीकार करते हुए **(जातवेदाः)** उत्पन्न पदार्थों में विद्यमान हुए **(सुमृळीकः)** उत्तम प्रकार सुख करनेवाले **(भवतु)** हूजिये॥२०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे यज्ञ के सुगन्धित धूम से शुद्ध हुआ अन्तरिक्ष पूर्णविद्यायुक्त, यथार्थवक्ता उपदेश देनेवाला पुरुष और सूर्य्य सुखदेने वाले होते हैं, वैसे ही आप लोग सबों के लिये सुख देनेवाले हूजिये॥२०॥

इस सूक्त में विद्वानों से जानने योग्य अग्नि, वाणी, सूर्य्य, बिजुली आदिकों के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्वसूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह प्रथम सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

अथ विंशत्यृचस्य द्वितीयस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १, १९ पङ्क्तिः। १२ निचृत् पङ्क्तिः।१४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २,४-७, ९, १२, १३, १५, १७, १८, २० निचृत्त्रिष्टुप्। ३, १६ त्रिष्टुप्। ८, १०, ११ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाप्तजनकृत्यमाह॥

अब बीस ऋचा वाले दूसरे सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में यथार्थ मानने वाले पुरुषों के कृत्य को कहते हैं॥

यो मर्त्येष्वमृतऽ ऋतावा देवो देवेष्वरतिर्निधायि।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै॥ १॥

यः। मर्त्येषु। अमृतः। ऋतऽवा। देवः। देवेषु। अरतिः। निऽधायि। होता। यजिष्ठः। मह्ना। शुचध्यै। हव्यैः। अग्निः। मनुषः। ईरयध्यै॥ १॥

पदार्थः-(**यः**) (**मर्त्येषु**) मरणधर्मेषु (**अमृतः**) मृत्युधर्मरहितः (**ऋतावा**) सत्यस्वरूपः (**देवः**) दिव्यगुणकर्मस्वभावः कमनीयः (**देवेषु**) दिव्येषु पदार्थेषु विद्वत्सु वा (**अरतिः**) सर्वत्र प्राप्तः (**निधायि**) निधीयते (**होता**) दाता (**यजिष्ठः**) पूजितुमर्हः (**मह्ना**) महत्त्वेन (**शुचध्यै**) शोचितुं पवित्रीकर्त्तुम् (**हव्यैः**) होतुं दातुमर्हैः (**अग्निः**) पावक इव (**मनुषः**) मानवान् (**ईरयध्यै**) प्रेरितुम्॥१॥

अन्वयः-हे मनुष्या! योऽग्निर्विद्युदिव मर्त्येष्वमृतः ऋतावा देवेषु देवोऽरतिर्होता मह्ना यजिष्ठो हव्यैस्सहितो मनुष ईरयध्यै शुचध्यै स हृदि निधायि॥१॥

भावार्थः-हे मनुष्या! यो जगदीश्वर उत्पत्तिनाशादिगुणरहितत्वेन दिव्यस्वरूपः शुद्धः पवित्रोऽस्ति तं प्रेरणपवित्रताभ्यां भजत॥१॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**अग्निः**) ईश्वर पावक अग्नि वा, बिजुली के सदृश (**मर्त्येषु**) मरणधर्म वालों में (**अमृतः**) मृत्युधर्म से रहित (**ऋतावा**) सत्यस्वरूप (**देवेषु**) उत्तम पदार्थों वा विद्वानों में (**देवः**) उत्तम गुण, कर्म और स्वभाववाला सुन्दर (**अरतिः**) सर्वस्थान में प्राप्त (**होता**) देनेवाला (**मह्ना**) महत्त्व से (**यजिष्ठः**) पूजा करने योग्य (**हव्यैः**) देने के योग्यों के सहित (**मनुषः**) मनुष्यों को (**ईरयध्यै**) प्रेरणा करने को (**शुचध्यै**) पवित्र करने को विद्यमान वह हृदय में (**निधायि**) धारण किया जाता है॥१॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर उत्पत्ति और नाश आदि गुणरहित होने से दिव्यस्वरूप शुद्ध और पवित्र है, उसका प्रेरणा और पवित्रता से भजन करो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

इ॒ह त्वं सू॑नो सहसो नो अ॒द्य जा॒तो जा॒ताँ उ॒भया॑ँ अ॒न्तर॑ग्ने।

दू॒त ई॑यसे युयुजा॒न ऋ॑ष्व ऋजुमु॒ष्कान् वृष॑णः शु॒क्रांश्च॑॥ २॥

इ॒ह। त्वम्। सू॒नो॒ इति॑। स॒ह॒स॒:। न॒:। अ॒द्य। जा॒त:। जा॒तान्। उ॒भया॑न्। अ॒न्त:। अ॒ग्ने॒। दू॒त:। ई॒य॒से॒। युयुजा॒न:। ऋ॒ष्व॒। ऋ॒जु॒ऽमु॒ष्कान्। वृष॑ण:। शु॒क्रान्। च॒॥ २॥

पदार्थः-(**इह**) अस्मिन् संसारे (**त्वम्**) (**सूनो**) पवित्रपुत्र (**सहसः**) बलात् (**नः**) अस्माकम् (**अद्य**) (**जातः**) विद्याजन्मनि प्रादुर्भूतः (**जातान्**) विदुषः (**उभयान्**) अध्यापकान् अध्येतॄंश्च (**अन्तः**) मध्ये (**अग्ने**) अग्निरिव वर्त्तमान (**दूतः**) दुष्टानां परितापकः (**ईयसे**) प्राप्नोषि (**युयुजानः**) समादधन् (**ऋष्व**) प्राप्तविज्ञान (**ऋजुमुष्कान्**) य ऋजुना मुष्णन्ति तान् (**वृषणः**) बलिष्ठान् (**शुक्रान्**) शुद्धिकरान् (**च**)॥ २॥

अन्वयः-हे अग्ने! ऋष्व नः सूनो त्वमिहाद्य सहसो जात ऋजुमुष्कान् वृषणः शुक्रांश्च युयुजानो दूत इव जातानुभयानन्तरीयसे तस्माच्छ्रेयस्करोषि॥ २॥

भावार्थः-हे मनुष्या! यथान्तरग्निः सर्वेषां पालको विनाशकश्चास्ति तथैवेह विद्वान् पुत्रः पालको मूर्खश्च विनाशको भवति तस्माद्दीर्घेण ब्रह्मचर्येण स्वसन्तानानुत्तमान् कृत्वा कृतकृत्यतां विजानीत॥ २॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश वर्त्तमान (**ऋष्व**) विज्ञान को प्राप्त (**नः**) हम लोगों के (**सूनो**) पवित्रपुत्र (**त्वम्**) आप (**इह**) इस संसार में (**अद्य**) आज (**सहसः**) बल से (**जातः**) विद्या के जन्म में प्रकट हुए (**ऋजुमुष्कान्**) सरलता से चुराने वाले (**वृषणः**) बलयुक्त जनों और (**शुक्रान्**) शुद्धि करनेवालों का (**च**) भी (**युयुजानः**) समाधान करते हुए (**दूतः**) दुष्टों के सन्ताप देनेवाले के तुल्य (**जातान्**) विद्वान् और (**उभयान्**) पढ़ाने और पढ़ने वालों को (**अन्तः**) मध्य में (**ईयसे**) प्राप्त होते हो, इससे कल्याण करने वाले हो॥ २॥

भावार्थः-हे मनुष्यो! जैसे मध्य में अग्नि सब का पालन और नाश करने वाला है, वैसे ही इस संसार में विद्वान् पुत्र तो पालन करनेवाला और मूर्ख विनाश करनेवाला होता है। तिससे दीर्घ ब्रह्मचर्य से अपनी सन्तानों को उत्तम करके कृतकृत्यता अर्थात् जन्मसाफल्य जानो॥ २॥

अथ प्रजाकृत्यमाह॥

अब इस अगले मन्त्र में प्रजा के कृत्य का वर्णन करते हैं॥

अत्या॑ वृध॒स्नू रोहि॑ता घृ॒तस्नू॑ ऋ॒तस्य॑ मन्ये॒ मन॑सा॒ जवि॑ष्ठा।

अ॒न्तरी॑यसे अरु॒षा यु॑जा॒नो यु॒ष्मांश्च॑ दे॒वान् विश॒ आ च॒ मर्ता॑न्॥ ३॥

अत्या॑। वृ॒ध॒स्नू इति॑ वृ॒ध॒ऽस्नू। रोहि॑ता। घृ॒तस्नू॒ इति॑ घृ॒तऽस्नू॑। ऋ॒तस्य॑। म॒न्ये॒। मन॑सा। जवि॑ष्ठा। अ॒न्त:। ई॒य॒से॒। अ॒रु॒षा। यु॒जा॒न:। यु॒ष्मान्। च॒। दे॒वान्। विश॑:। आ। च॒। मर्ता॑न्॥ ३॥

पदार्थः-(**अत्या**) यावततोऽध्वानं व्याप्नुतस्तौ (**वृधस्नू**) यौ वृधान् प्रस्रवतस्तौ (**रोहिता**) रोहितेन वह्निगुणेन सहितौ (**घृतस्नू**) यौ घृतमुदकं स्नुतः प्रस्रावयतस्तौ (**ऋतस्य**) जलस्य (**मन्ये**) (**मनसा**) (**जविष्ठा**) अतिशयेन वेगवन्तौ (**अन्तः**) मध्ये (**ईयसे**) गच्छसि (**अरुषा**) रक्तगुणविशिष्टौ (**युजानः**) (**युष्मान्**) (**च**) (**देवान्**) (**विशः**) प्रजाः (**आ**) (**च**) (**मर्त्तान्**) मनुष्यान्॥३॥

अन्वयः-हे विद्वन्! यस्त्वमृतस्य यौ वृधस्नू रोहिता घृतस्नू अरुषा मनसा जविष्ठात्या युजानो देवान् युष्मान् मर्त्तांश्च विशश्चान्तरेयसे तानहं मन्ये॥३॥

भावार्थः-यदि मनुष्या वाय्वग्नी अद्भिः सह यानयन्त्रेषु संयोज्य चालयतस्तर्हि वेगप्रहरणाख्यौ जलवाष्पगुणौ मन इव यानादीनि चालयतः॥३॥

पदार्थः-हे विद्वन्! पुरुष जो आप (**ऋतस्य**) जल की (**वृधस्नू**) समृद्धि का विस्तार करते हुए (**रोहिता**) और अग्नि गुण के सहित (**घृतस्नू**) जल को बहाते हुए (**अरुषा**) रक्तगुण विशिष्ट (**मनसा**) मन से भी (**जविष्ठा**) अत्यन्त वेग वाले (**अत्या**) मार्ग को व्याप्त होते हुए वायु और अग्नि को (**युजानः**) संयुक्त करते हुए (**देवान्**) विद्वान् (**युष्मान्**) आप लोगों (**च**) और (**मर्त्तान्**) साधारण मनुष्यों को (**च**) और (**विशः**) प्रजाओं को (**अन्तः**) मध्य में (**आ**) सब प्रकार (**ईयसे**) प्राप्त होते हो, उनको मैं (**मन्ये**) मानता हूँ॥३॥

भावार्थः-जो मनुष्य लोग वायु और अग्नि को जलों के साथ वाहन के यन्त्रों में संयुक्त करके चलाते हैं तो वेग और प्रहरण नामक जल और भाफ के गुण, मन के सदृश वाहन आदिकों को चलाते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अर्य॒मणं॒ वरुणं मि॒त्रमे॑षा॒मिन्द्रा॒विष्णू॑ म॒रुतो॑ अ॒श्विनो॒त।
स्वश्वो॑ अग्ने सु॒रथः॑ सु॒राधा॒ एदु॑ वह सु॒हवि॑षे॒ जना॑य॥४॥

अ॒र्य॒मण॑म्। वरु॑णम्। मि॒त्रम्। ए॒षा॒म्। इन्द्रा॒विष्णू॒ इति॑। म॒रुत॑ः। अ॒श्विना॑। उ॒त। सु॒ऽअश्वः॑। अ॒ग्ने॒। सु॒ऽरथः॑। सु॒ऽराधाः॑। आ। इत्। ऊ॒म् इति॑। व॒ह॒। सु॒ऽहवि॑षे। जना॑य॥४॥

पदार्थः-(**अर्यमणम्**) न्यायाधीशम् (**वरुणम्**) श्रेष्ठगुणम् (**मित्रम्**) सखायम् (**एषाम्**) (**इन्द्राविष्णू**) विद्युत्सूत्रात्मानौ (**मरुतः**) वायून् (**अश्विना**) सूर्य्याचन्द्रमसौ (**उत**) (**स्वश्वः**) सुष्ठु अश्वा यस्य सः (**अग्ने**) विद्वन् (**सुरथः**) प्रशस्तयानः (**सुराधाः**) शोभनं राधो धनं यस्य सः (**आ**) (**इत्**) (**उ**) (**वह**) (**सुहविषे**) सुसामग्रीकाय (**जनाय**) मनुष्याय॥४॥

अन्वयः-हे अग्ने! सुराधाः स्वश्वः सुरथस्संस्त्वं सुहविषे जनायाऽर्यमणं वरुणमेषां मित्रमिन्द्राविष्णू मरुत उताऽश्विना आ वह उ सर्वानिदेव सुखय॥४॥

भावार्थः-हे विद्वन्! भवानग्निजलादिपदार्थान् यथावद्विदित्वा कार्येषु सम्प्रयुज्य प्रत्यक्षीकृत्याऽन्यानुपदिश। येन सर्वे धनधान्यसुखयुक्ताः स्युः॥४॥

पदार्थः-हे **(अग्ने)** विद्वन् पुरुष **(सुराधाः)** उत्तम धन से **(स्वश्वः)** उत्तम घोड़ों और **(सुरथः)** उत्तम वाहनों से युक्त आप **(सुहविषे)** उत्तम सामग्री वाले **(जनाय)** मनुष्य के लिये **(अर्यमणम्)** न्याय के अधीश **(वरुणम्)** श्रेष्ठ गुण वाले **(एषाम्)** इनके **(मित्रम्)** मित्र **(इन्द्राविष्णू)** तथा बिजुली और सूत्रात्मा **(मरुतः)** पवन **(उत)** और **(अश्विना)** सूर्य्य और चन्द्रमा की **(आ, वह)** प्राप्ति कराइये **(उ, इत्)** और सभी सुख दीजिये॥४॥

भावार्थः-हे विद्वन्! आप अग्नि और जलादि पदार्थों को उत्तम प्रकार जान के और कार्य्यों में संयुक्त कर प्रत्यक्ष करके अन्य जनों के लिये उपदेश दीजिये, जिससे कि सब लोग धन धान्य और सुखों से युक्त होवें॥४॥

अथ राजविषयमाह॥

अब राजा के विषय को अगले मन्त्र में कहते हैं॥

गोमाँ॑ अग्नेऽविमाँ॑ अश्वी यज्ञो नृवत्सखा॒ सदमिदप्रमृष्यः।

इळावाँ॑ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान्॥५॥१६॥

गोऽमान्। अग्ने। अविऽमान्। अश्वी। यज्ञः। नृवत्ऽसखा। सदम्। इत्। अप्रमृष्यः। इळाऽवान्। एषः। असुर। प्रजाऽवान्। दीर्घः। रयिः। पृथुऽबुध्नः। सभाऽवान्॥५॥

पदार्थः-(**गोमान्**) बह्व्यो गावो विद्यन्ते यस्मिन् सः **(अग्ने)** विद्वन् **(अविमान्)** बह्व्योऽवयो विद्यन्ते यस्मिन् सः **(अश्वी)** बह्वश्वः **(यज्ञः)** सङ्गन्तव्यः **(नृवत्सखा)** नृवत्सु नायकयुक्तेषु सुहृत् **(सदम्)** स्थानम् **(इत्)** एव **(अप्रमृष्यः)** परैर्न प्रमर्षणीयः **(इळावान्)** बह्वन्नयुक्तः **(एषः)** **(असुर)** दुष्टानां प्रक्षेप्तः **(प्रजावान्)** बह्व्यः प्रजा विद्यन्ते यस्मिन् **(दीर्घः)** विस्तीर्णः **(रयिः)** धनम् **(पृथुबुध्नः)** विस्तीर्णः प्रबन्धः **(सभावान्)** प्रशस्ता सभा विद्यते यस्य॥५॥

अन्वयः-हे असुराग्ने! त्वं गोमानविमानश्वी यज्ञो नृवत्सखेळावान् प्रजावान् पृथुबुध्नः सभावानप्रमृष्योऽस्येष रयिर्दीर्घोऽस्ति स त्वमित्सदमावह॥५॥

भावार्थः-मनुष्यैस्स एव सभाध्यक्षः कर्त्तव्यो यो गोमानविमानश्ववानप्रधर्षितुं योग्यो दुष्टानां दृढप्रबन्धः प्रजावान् भवेत्॥५॥

पदार्थः-हे **(असुर)** दुष्ट पुरुषों के दूर करने वाले **(अग्ने)** विद्वन् पुरुष! आप **(गोमान्)** बहुत गौओं और **(अविमान्)** बहुत भेड़ों से युक्त **(अश्वी)** बहुत घोड़ों वाला **(यज्ञः)** प्राप्त होने योग्य **(नृवत्सखा)** नायकों से युक्त मनुष्यों में मित्र **(इळावान्)** बहुत अन्नयुक्त **(प्रजावान्)** जिसमें बहुत प्रजा विद्यमान ऐसे **(पृथुबुध्नः)** विस्तारसहित प्रबन्ध वाला **(सभावान्)** उत्तम सभा विद्यमान जिनको ऐसे

(अप्रमृष्यः) दूसरों से नहीं दबाने योग्य हैं तथा **(एषः)** यह **(रयिः)** धन **(दीर्घः)** बड़ा हुआ है, वह आप **(इत्)** ही **(सदम्)** स्थान को प्राप्त हूजिये॥५॥

भावार्थः–मनुष्यों को वही सभाध्यक्ष करना चाहिये कि जो गौओं, भेड़ों और घोड़ों का पालक और दूसरों से नहीं भय करने और दुष्ट जनों को दूर करने वाला, अच्छे प्रबन्ध से युक्त तथा प्रजावाला हो॥५॥

अथ राजविषयमाह॥

अब अगले मन्त्र में राजविषय को कहते हैं॥

यस्ते इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया।
भुवस्तस्य स्वतवाँ पायुरग्ने विश्वस्मात्सीमघायत उरुष्य॥ ६॥

यः। ते। इध्मम्। जभरत्। सिस्विदानः। मूर्धानम्। वा। ततपते। त्वाऽया। भुवः। तस्य। स्वऽतवान्। पायुः। अग्ने। विश्वस्मात्। सीम्। अघऽयतः। उरुष्य॥ ६॥

पदार्थः–(**यः**) (**ते**) तव (**इध्मम्**) प्रदीप्तम् (**जभरत्**) बिभर्त्ति (**सिष्विदानः**) स्नेहयुक्तः (**मूर्धानम्**) (**वा**) (**ततपते**) तितानां विस्तृतानां पालक (**त्वाया**) यस्त्वामयते (**भुवः**) पृथिव्याः (**तस्य**) (**स्वतवान्**) स्वेन प्रवृद्धः (**पायुः**) रक्षकः (**अग्ने**) पावक (**विश्वस्मात्**) सर्वस्मात् (**सीम्**) सर्वतः (**अघायतः**) आत्मनोऽघमिच्छतः (**उरुष्य**) रक्ष॥६॥

अन्वयः-हे ततपतेऽग्ने! यः सिष्विदानः स्वतवान् पायुस्त्वाया ते भुव इध्मं मूर्धानं जभरत्तं त्वमुरुष्य वा तस्य मूर्धानं सीमुरुष्य। अघायतस्तस्य विश्वस्मान्मूर्धानं छिन्धि॥६॥

भावार्थः–हे मनुष्या! ये युष्माकं प्रतापं शरीराणि राज्यं रक्षित्वा दुष्टान् सर्वतो घ्नन्ति तान् सततं रक्षत॥६॥

पदार्थः–हे (**ततपते**) लम्बे चौड़े बिथरे हुए चराचर पदार्थों की पालना करने और (**अग्ने**) अग्नि पवित्र करनेवाले! (**यः**) जो (**सिष्विदानः**) स्नेहयुक्त (**स्वतवान्**) अपने से बढ़ा (**पायुः**) रक्षा करनेवाला (**त्वाया**) आपको प्राप्त होता (**ते**) आपकी (**भुवः**) पृथिवी के (**इध्मम्**) तपे हुए (**मूर्धानम्**) मस्तक को (**जभरत्**) पोषण करता है, उसकी आप (**उरुष्य**) रक्षा करो (**वा**) अथवा (**तस्य**) उसके मस्तक की (**सीम्**) सब प्रकार रक्षा करो (**अघायतः**) अपने को पाप की इच्छा करते हुए का (**विश्वस्मात्**) सब प्रकार से मस्तक काटो॥६॥

भावार्थः–हे मनुष्यो! जो लोग आप लोगों के प्रताप शरीर और राज्य की रक्षा करके दुष्टों का सब प्रकार नाश करते हैं, उनकी निरन्तर रक्षा करो॥६॥

आप्तजनकृत्यविषयमाह॥

श्रेष्ठजन के कर्त्तव्य के विषय को कहते हैं॥

यस्ते भरादन्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत्।

आ देवयुरिनधते दुरोणे तस्मिन् रयिर्ध्रुवो अस्तु दास्वान्॥७॥

यः। ते। भरात्। अन्नियते। चित्। अन्नम्। निऽशिषत्। मन्द्रम्। अतिथिम्। उत्ऽईरत्। आ। देवऽयुः। इनधते। दुरोणे। तस्मिन्। रयिः। ध्रुवः। अस्तु। दास्वान्॥७॥

पदार्थः-(**यः**) (**ते**) तुभ्यम् (**भरात्**) धरेत् (**अन्नियते**) अदतां नियते निश्चिते समये (**चित्**) (**अन्नम्**) (**निशिषत्**) नितरां विशेषयन् (**मन्द्रम्**) आनन्दप्रदम् (**अतिथिम्**) सत्योपदेशकम् (**उदीरत्**) सन्नुदन् (**आ**) (**देवयुः**) देवान् कामयमानः (**इनधते**) इनमीश्वरं दधाति यस्मिंस्तस्मिन् (**दुरोणे**) गृहे (**तस्मिन्**) (**रयिः**) धनम् (**ध्रुवः**) निश्चलः (**अस्तु**) (**दास्वान्**) दाता॥७॥

अन्वयः-हे विद्वन्! यो दास्वांस्तेऽन्नियतेऽन्नं निशिषन्मन्द्रमतिथिमुदीरद् देवयुस्सन्निनधते दुरोणेऽन्नमाभराच्चिदपि तस्मिन् ध्रुवो रयिरस्तु तं त्वं भर॥७॥

भावार्थः-ये मनुष्या येषां यादृशमुपकारं कुर्य्युस्तैस्तेषां तादृश उपकारः कर्त्तव्यः॥७॥

पदार्थः-हे विद्वान् पुरुष! (**यः**) जो (**दास्वान्**) देनेवाला (**ते**) आपके लिये (**अन्नियते**) भोजन करने वालों के निश्चित समय में (**अन्नम्**) भोजन के पदार्थ को (**निशिषत्**) अत्यन्त विशेष करता हुआ (**मन्द्रम्**) आनन्द देनेवाले (**अतिथिम्**) सत्योपदेशक को (**उदीरत्**) अच्छे प्रकार प्रेरणा देता और (**देवयुः**) विद्वानों की कामना करता हुआ (**इनधते**) ईश्वर को धारण करता है, जिसमें उस (**दुरोणे**) गृह में अन्न को (**आ, भरात्**) धारण करे (**चित्**) भी (**तस्मिन्**) उसमें (**ध्रुवः**) निश्चल (**रयिः**) धन (**अस्तु**) हो उसको आप पोषण करो॥७॥

भावार्थः-जो मनुष्य जिन मनुष्यों का जैसा उपकार करें, उन मनुष्यों को चाहिये कि उनका वैसा उपकार करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान्।

अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसम्॥८॥

यः। त्वा। दोषा। यः। उषसि। प्रऽशंसात्। प्रियम्। वा। त्वा। कृणवते। हविष्मान्। अश्वः। न। स्वे। दमे। आ। हेम्याऽवान्। तम्। अंहसः। पीपरः। दाश्वांसम्॥८॥

पदार्थः-(**यः**) (**त्वा**) त्वाम् (**दोषा**) रात्रौ (**यः**) (**उषसि**) दिने (**प्रशंसात्**) प्रशंसेत् (**प्रियम्**) (**वा**) (**त्वा**) त्वाम् (**कृणवते**) कुर्वते (**हविष्मान्**) प्रशस्तदानसामग्रीयुक्तः (**अश्वः**) तुरङ्गः (**न**) इव (**स्वे**)

स्वकीये **(दमे)** गृहे **(आ)** **(हेम्यावान्)** हेम्न्युदके भवा रात्रिर्विद्यते यस्य। **हेमेत्युदकनामसु पठितम्।** (निघं०१.१२) **(तम्)** **(अंहसः)** अपराधात् **(पीपरः)** पालय **(दाश्वांसम्)** दातारम्॥८॥

अन्वयः-हे विद्वन्! यस्त्वा दोषोषसि प्रियं त्वाऽऽप्रशंसाद्वा यो हविष्मान् हेम्यावांस्तं दाश्वांसं त्वा त्वां स्वे दमेऽहंसोऽश्वो न पीपरस्तस्मै प्रियं सुखं कृणवते त्वं सुखं देहि॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! येऽहर्निशं युष्मांस्तूत्साहयेयुस्तान् यूयं घासादिनाऽश्वानिवाऽऽनन्दयत॥८॥

पदार्थः-हे विद्वन्! पुरुष **(यः)** जो **(त्वा)** आपकी **(दोषा)** रात्रि में और **(उषसि)** दिन में **(त्वा)** आपकी **(आ, प्रशंसात्)** सब प्रकार प्रशंसा करे **(वा)** अथवा **(यः)** जो **(हविष्मान्)** उत्तम दान की सामग्री से युक्त **(हेम्यावान्)** जिसके जल में प्रकट हुई रात्रि विद्यमान **(तम्)** उस **(दाश्वांसम्)** देनेवाले आपको **(स्वे)** अपने **(दमे)** घर में **(अंहसः)** अपराध से **(अश्वः)** घोड़े के **(न)** सदृश **(पीपरः)** पाले उस **(प्रियम्)** प्रिय सुख **(कृणवते)** करते हुए के लिये आप सुख दीजिये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो लोग दिन और रात्रि आप का उत्साह बढ़ावें, उनको आप लोग घास आदि से घोड़ों को जैसे वैसे आनन्द देओ॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्तुभ्यमग्ने अमृताय दाशद्दुवस्त्वे कृणवते यतस्रुक्।

न स राया शशमानो वि योषन्नेनमंहः परि वरदघायोः॥९॥

यः। तुभ्यम्। अग्ने। अमृताय। दाशत्। दुवः। त्वे इति। कृणवते। यतऽस्रुक्। न। सः। राया। शशमानः। वि। योषत्। न। एनम्। अंहः। परि। वरत्। अघऽयोः॥९॥

पदार्थः-**(यः)** **(तुभ्यम्)** **(अग्ने)** विद्वन् **(अमृताय)** मोक्षाय **(दाशत्)** दद्यात् **(दुवः)** परिचरणम् **(त्वे)** त्वयि **(कृणवते)** कुर्वते **(यतस्रुक्)** उद्यतक्रियासाधनः **(न)** **(सः)** **(राया)** धनेन **(शशमानः)** प्लवमानः **(वि, योषत्)** वियुज्येत **(न)** **(एनम्)** **(अंहः)** **(परि)** **(वरत्)** वृणुयात् **(अघायोः)** पापिनः॥९॥

अन्वयः-हे अग्ने! यस्तुभ्यममृताय दाशत् त्वे दुवः कृणवते तस्मै त्वमपि विज्ञानं देहि। यो राया शशमानो यतस्रुक् सन्नेनमंहो न वियोषत् सोऽघायोरंहो न परि वरत्॥९॥

भावार्थः-हे मनुष्या! युष्मासु ये यथा प्रीतिं कुर्वन्ति तथैव तेषु भवन्तः स्नेहं कुर्वन्तु॥९॥

पदार्थः-हे **(अग्ने)** विद्वान् पुरुष! **(यः)** जो **(तुभ्यम्)** आपके लिये **(अमृताय)** मोक्ष के अर्थ **(दाशत्)** देवे **(त्वे)** वा आप में **(दुवः)** सेवा को **(कृणवते)** करता है, उसके लिये आप भी विज्ञान

दीजिये। जो पुरुष **(राया)** धन से **(शशमानः)** उछलता और **(यतस्रुक्)** उद्यत है क्रिया के साधन जिसके ऐसा होता हुआ **(एनम्)** इसको **(अंहः)** दुःख देनेवाले को **(न)** नहीं **(वि, योषत्)** त्याग करे **(सः)** वह **(अघायोः)** पापी की हिंसा को **(न)** नहीं **(परि, वरत्)** सब ओर से स्वीकार करे॥९॥

भावार्थः-हे मनुष्यो! आप लोगों में जैसे जो लोग प्रीति करते हैं, वैसे ही उनमें आप लोग स्नेह करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्य॒ त्वम॑ग्ने अध्व॒रं जुजो॑षो दे॒वो मर्त॑स्य॒ सुधि॑तं रराण॑ः।
प्रीते॑दस॒द्धोत्रा॒ सा य॑विष्ठासा॒म॒ यस्य॑ विध॒तो वृ॒धास॑ः॥१०॥१७॥

यस्य॑। त्वम्। अ॒ग्ने॒। अ॒ध्व॒रम्। जुजो॑षः। दे॒वः। मर्त॑स्य। सुऽधि॑तम्। रराण॑ः। प्री॒ता। इत्। अ॒स॒त्। होत्रा॑। सा। य॒वि॒ष्ठ॒। असा॑म। यस्य॑। वि॒ध॒तः। वृ॒धास॑ः॥१०॥

पदार्थः-(**यस्य**) (**त्वम्**) (**अग्ने**) पावकवद्वर्त्तमान विद्वन् (**अध्वरम्**) अहिंसनीयव्यवहारम् (**जुजोषः**) भृशं सेवसे (**देवः**) दिव्यसुखदाता (**मर्त्तस्य**) मनुष्यस्य (**सुधितम्**) सुहितम्। अत्र वर्णव्यत्ययेन हस्य धः। (**रराणः**) भृशं दाता (**प्रीता**) प्रसन्ना (**इत्**) (**असत्**) भवेत् (**होत्रा**) ग्राह्या (**सा**) (**यविष्ठ**) अतिशयेन युवन् (**असाम**) भवेम (**यस्य**) (**विधतः**) विधानं कुर्वतः (**वृधासः**) वर्धकास्सन्तः॥१०॥

अन्वयः-हे यविष्ठाऽग्ने! यस्याऽध्वरं त्वं जुजोषो देवस्सन् यस्य विधतो मर्त्तस्य सुधितं रराणः सा होत्रा प्रीतेद् मय्यसद् वृधासः सन्तो वयमसाम सोऽस्मांस्तथैव सुखयेत्॥१०॥

भावार्थः-यो यस्य सुखं साध्नुयात्तेनापि स सुखेनाऽलङ्कर्त्तव्यः॥१०॥

पदार्थः-हे (**यविष्ठ**) अति जवान (**अग्ने**) अग्नि के सदृश वर्त्तमान विद्वान् पुरुष! (**यस्य**) जिसके (**अध्वरम्**) हिंसारहित व्यवहार का (**त्वम्**) आप (**जुजोषः**) अत्यन्त सेवन करते हैं (**देवः**) उत्तम सुख के देनेवाले हुए (**यस्य**) जिस (**विधतः**) विधान करने वाले (**मर्त्तस्य**) मनुष्य के (**सुधितम्**) उत्तम हित के (**रराणः**) अत्यन्त देनेवाले हों उसकी (**सा**) वह (**होत्रा**) ग्रहण करने योग्य क्रिया (**प्रीता**) प्रसन्न (**इत्**) ही अर्थात् सफल ही मेरे में (**असत्**) होवे (**वृधासः**) वृद्धि करने वाले होते हुए हम लोग (**असाम**) प्रसिद्ध होवें और वह हम लोगों को वैसे ही सुख देवे॥१०॥

भावार्थः-जो जिसके सुख को साधे उस पुरुष को चाहिये कि उस उपकार करने वाले पुरुष को भी सुख देवें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

चित्तिमचित्तिं चिनवद्वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान्।

राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य॥ ११॥

चित्तिम्। अचित्तिम्। चिनवत्। वि। विद्वान्। पृष्ठाऽइव। वीता। वृजिना। च। मर्तान्। राये। च। नः। सुऽअपत्याय। देव। दितिम्। च। रास्व। अदितिम्। उरुष्य॥ ११॥

पदार्थः-(**चित्तिम्**) कृतचयनां क्रियाम् (**अचित्तिम्**) अकृतचयनाम् (**चिनवत्**) चिनुयात् (**वि**) (**विद्वान्**) (**पृष्ठेव**) पृष्ठानीव (**वीता**) वीतानि प्राप्तानि (**वृजिना**) वृजिनानि बलानि (**च**) (**मर्त्तान्**) मनुष्यान् (**राये**) धनाय (**च**) (**नः**) अस्माकम् (**स्वपत्याय**) शोभनान्यपत्यानि यस्मात्तस्मै (**देव**) विद्वन् (**दितिम्**) खण्डितां क्रियाम् (**च**) (**रास्व**) देहि (**अदितिम्**) नाशरहिताम् (**उरुष्य**) सेवस्व॥ ११॥

अन्वयः-हे देव! यो वि विद्वान् पृष्ठेव वीता वृजिना मर्त्तांश्च नः स्वपत्याय राये च चित्तिमचित्तिं चिनवत्तस्मै दितिं रास्व चाऽदितिमुरुष्य॥ ११॥

भावार्थः-अत्रोपमालङ्कारः। यथोष्ट्रादयः पृष्ठैर्भारं वहन्ति तथैव बलिष्ठा जनाः सर्वं व्यवहारभारं वहन्ति व्यवहारे यस्य खण्डनं यस्य च मण्डनं कर्त्तव्यं स्यात्तत्तस्य तथैव कार्य्यम्॥ ११॥

पदार्थः-हे (**देव**) विद्वान् पुरुष! जो (**वि**) विशेष करके (**विद्वान्**) विद्यायुक्त पुरुष (**पृष्ठेव**) पीठों के सदृश (**वीता**) प्राप्त (**वृजिना**) पराक्रमों को (**मर्त्तान्**) मनुष्यों को (**च**) भी (**नः**) हम लोगों के (**स्वपत्याय**) उत्तम सन्तान जिससे उस (**राये**) धन के लिये (**च**) और (**चित्तिम्**) किया संग्रह जिसमें उस क्रिया और (**अचित्तिम्**) जिसमें संग्रह नहीं किया उसका (**चिनवत्**) संग्रह करे, उसके लिये (**दितिम्**) खण्डित क्रिया को (**रास्व**) दीजिये (**च**) और (**अदितिम्**) अखण्डित क्रिया का (**उरुष्य**) सेवन कीजिये॥ ११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे ऊंट आदि पीठों से भार को ले चलते हैं, वैसे ही बलवान् पुरुष सब व्यवहार के भार को धारण करते हैं। और व्यवहार में जिसका खण्डन और जिसका मण्डन करने योग्य होवे, वह उसका वैसा ही करना चाहिये॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः।

अतस्त्वं दृश्याँ अग्न एतान् पड्भिः पश्येरद्धुताँ अर्य एवैः॥ १२॥

कविम्। शशासुः। कवयः। अदब्धाः। निऽधारयन्तः। दुर्यासु। आयोः। अतः। त्वम्। दृश्यान्। अग्ने। एतान्। पट्ऽभिः। पश्येः। अद्धुतान्। अर्यः। एवैः॥ १२॥

पदार्थः-(**कविम्**) कान्तप्रज्ञं मेधाविनम् (**शशासुः**) शासति (**कवयः**) प्राज्ञा विपश्चितः (**अदब्धाः**) अहिंसनीयाः (**निधारयन्तः**) (**दुर्यासु**) गृहेषु (**आयोः**) जीवनस्य (**अतः**) (**त्वम्**) (**दृश्यान्**) द्रष्टव्यान् (**अग्ने**) अग्निरिव प्रकाशमानविद्य (**एतान्**) प्रत्यक्षान् (**पड्भिः**) विज्ञानादिभिः (**पश्येः**) (**अद्भुतान्**) आश्चर्यगुणकर्मस्वभावान् (**अर्यः**) (**एवैः**) प्राप्तैः॥१२॥

अन्वयः-हे अग्ने! यथा अदब्धाः कवयः कविं दुर्यास्वदब्धा निधारयन्तः शशासुरायोर्वर्धनं शशासुरतस्त्वमेवैः पड्भिरेतानद्भुतान् दृश्यान् कवीनर्य इव पश्येः॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! येऽध्यापकोपदेशका बुद्धिमतोऽध्यापयन्त्युपदिशन्ति तान्त्सदैव सत्कुरु यतो मनुष्या आश्चर्यगुणकर्मस्वभावाः स्युः॥१२॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश प्रकाशमान विद्वन् पुरुष! जैसे (**अदब्धाः**) अहिंसनीय (**कवयः**) बुद्धिमान् पण्डित लोग (**कविम्**) उत्तम बुद्धिवाले को (**दुर्यासु**) गृहों में [अहिंसनीय] (**निधारयन्तः**) धारण करते हुए (**शशासुः**) शासन करते हैं (**आयोः**) जीवन की वृद्धि का शासन करते हैं (**अतः**) इस कारण से (**त्वम्**) आप (**एवैः**) प्राप्त (**पड्भिः**) विज्ञान आदिकों से (**एतान्**) इन प्रत्यक्ष (**अद्भुतान्**) आश्चर्ययुक्त गुण, कर्म और स्वभाव वाले (**दृश्यान्**) देखने योग्य श्रेष्ठ बुद्धि वाले जनों को (**अर्यः**) स्वामी के समान (**पश्येः**) देखिये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो अध्यापक और उपदेशक लोग बुद्धिमान् पुरुषों को पढ़ाते और उपदेश देते हैं, उनका सदा ही सत्कार करो, जिससे कि मनुष्य लोग आश्चर्ययुक्त गुण, कर्म और स्वभाव वाले होवें॥१२॥

अथ राजविषयमाह॥

अब अगले मन्त्र में राजा के विषय को कहते हैं॥

त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ।

रत्नं भर शशमानाय घृष्वे पृथुश्चन्द्रमवसे चर्षणिप्राः॥१३॥

त्वम्। अग्ने। वाघते। सुऽप्रनीतिः। सुतऽसोमाय। विधते। यविष्ठ। रत्नम्। भर। शशमानाय। घृष्वे। पृथु। चन्द्रम्। अवसे। चर्षणिऽप्राः॥१३॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव पूर्णविद्यया प्रकाशमान (**वाघते**) मेधाविने (**सुप्रणीतिः**) सुष्ठु प्रगता नीतिर्येन सः (**सुतसोमाय**) सुतः सोम ऐश्वर्यमोषधिरसो वा येन तस्मै (**विधते**) विविधव्यवहारं यथावत्कुर्वते (**यविष्ठ**) अतिशयेन युवन् (**रत्नम्**) रमणीयं धनम् (**भर**) धर (**शशमानाय**) सर्वेषां दुःखानामुल्लङ्घकाय (**घृष्वे**) पदार्थानां सङ्घर्षक (**पृथु**) विस्तीर्णपुरुषार्थः (**चन्द्रम्**) आह्लादकरं सुवर्णम् (**अवसे**) रक्षणाद्याय (**चर्षणिप्राः**) यश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति सः॥१३॥

अन्वयः-हे घृष्वे यविष्ठाग्ने! सुप्रणीतिः पृथु चर्षणिप्राः संस्त्वं सुतसोमाय शशमानाय विधते वाघतेऽवसे चन्द्रं रत्नं भर॥१३॥

भावार्थः-हे राजन्! ये धार्मिकाः शूरा विद्वांसः शत्रुबलस्योल्लङ्घकाः परस्परं पदार्थघर्षणेन विद्युदादिविद्याप्रकाशका मनुष्यरक्षका अमात्यादयो भृत्याः स्युस्तदर्थमैश्वर्य्यं सततं धर॥१३॥

पदार्थः-हे **(घृष्वे)** पदार्थों के घिसने वाले **(यविष्ठ)** अत्यन्त युवन् **(अग्ने)** अग्नि के सदृश पूर्णविद्या से प्रकाशमान! **(सुप्रणीतिः)** उत्तम प्रकार चली हुई नीति जिनके विद्यमान **(पृथु)** जिनका पुरुषार्थ विस्तृत हो रहा है **(चर्षणिप्राः)** जो मनुष्यों को व्याप्त होने वाले **(त्वम्)** आप **(सुतसोमाय)** उत्पन्न किया गया ऐश्वर्य वा ओषधियों का रस जिससे उस **(शशमानाय)** सब के दुःखों के उल्लङ्घन करनेवाले **(विधते)** अनेक प्रकार के व्यवहार को यथावत् करते हुए **(वाघते)** बुद्धिमान् के लिये **(अवसे)** रक्षण आदि के अर्थ **(चन्द्रम्)** प्रसन्न करने वाले सुवर्ण और **(रत्नम्)** रमणीय मनोहर धन का **(भर)** धारण करो॥१३॥

भावार्थः-हे राजन्! जो धार्मिक शूरवीर विद्वान् लोग शत्रु के बल के उल्लङ्घन करने, परस्पर पदार्थों के घिसने से बिजुली आदि की विद्या के प्रकाश करने और मनुष्यों की रक्षा करने वाले मन्त्री आदि नौकर होवें, उनके लिये ऐश्वर्य निरन्तर धारण करो॥१३॥

अथ प्रजाजनकृत्यमाह॥

अब प्रजाजन के कृत्य को कहते हैं॥

अधा॑ ह॒ यद्व॒यमग्ने॒ त्वाया॒ पड्भि॑र्हस्ते॒भिश्च॑कृ॒मा त॒नूभिः॑।
रथं॒ न क्रन्तो॒ अप॑सा भु॒रिजो॑र्ऋ॒तं ये॑मुः सु॒ध्य॑ आशुषा॒णाः॥१४॥

अध॑। ह॒। यत्। व॒यम्। अ॒ग्ने॒। त्वा॒ऽया। पड्ऽभिः। हस्ते॑भिः। च॒कृ॒म। त॒नूभिः॑। रथ॑म्। न। क्रन्तः॑। अप॑सा। भु॒रिजोः॑। ऋ॒तम्। ये॒मुः॑। सु॒ऽध्यः॑। आ॒शु॒षा॒णाः॥१४॥

पदार्थः-**(अध)** अथ। अत्र **निपातस्य चे**ति दीर्घः। **(ह)** किल **(यत्)** यम् **(वयम्)** **(अग्ने)** पावकवद्वर्त्तमान राजन् **(त्वाया)** त्वां प्राप्ता। अत्र विभक्तेराकारादेशः **(पड्भिः)** पादैः। अत्र वर्णव्यत्ययेन दस्य डः। **(हस्तेभिः)** **(चकृम)** कुर्याम। अत्र **संहितायामि**ति दीर्घः। **(तनूभिः)** शरीरैः **(रथम्)** विमानादियानम् **(न)** इव **(क्रन्तः)** क्रमकः **(अपसा)** कर्मणा **(भुरिजोः)** धारकपोषकयोः **(ऋतम्)** सत्यम् **(येमुः)** यच्छेयुः **(सुध्यः)** शोभना धीर्येषान्ते **(आशुषाणाः)** सद्यो विभाजकाः॥१४॥

अन्वयः-हे अग्ने! त्वाया सुध्य आशुषाणा वयं हस्तेभिः पड्भिस्तनूभिर्यद्यं रथं न चकृम। अध ह येऽपसा भुरिजोर्ऋत येमुस्तं रथं न त्वं क्रन्तो भव॥१४॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरालस्यं विहाय शरीरादिभिः पुरुषार्थं सदैवाऽनुष्ठाय प्रजाराज्ययोर्धर्म्येण नियमः कर्त्तव्यो येन सर्व आढ्याः स्युः॥१४॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान राजन्! **(त्वाया)** आपको प्राप्त **(सुध्यः)** उत्तम बुद्धि वाले **(आशुषाणाः)** शीघ्र विभाग करनेवाले **(वयम्)** हम लोग **(हस्तेभिः)** हाथों **(पड्भिः)** पैरों और **(तनूभिः)** शरीरों से **(यत्)** जिस **(रथम्)** विमान आदि वाहन के **(न)** सदृश **(चक्रम)** करें **(अध)** इसके अनन्तर **(ह)** निश्चय जो **(अपसा)** कर्म से **(भुरिजोः)** धारण और पोषण करनेवालों के **(ऋतम्)** सत्य को **(येमुः)** प्राप्त होवें उस विमान आदि वाहन के सदृश **(क्रन्तः)** क्रम से चलने वाले हूजिये॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि आलस्य त्याग के शरीरादिकों से पुरुषार्थ को सदा ही करके प्रजा और राज्य का धर्म से नियम करें, जिससे सब लोग धनयुक्त होवें॥१४॥

अथ राजविषयमाह॥

अब इस अगले मन्त्र में राजा के विषय को कहते हैं॥

अधा॑ मा॒तुरु॒षस॑: स॒प्त विप्रा॒ जाये॑महि प्रथ॒मा वे॒धसो॒ नॄन्।
दि॒वस्पु॒त्रा अङ्गि॑रसो भवे॒माद्रिं॑ रुजेम ध॒निनं॑ शु॒चन्त॑:॥ १५॥ १८॥

अध॑। मा॒तुः। उ॒षस॑:। स॒प्त। विप्रा॑:। जाये॑महि। प्र॒थ॒मा:। वे॒धस॑:। नॄन्। दि॒वः। पु॒त्रा:। अङ्गि॑रसः। भ॒वे॒म॒। अद्रि॑म्। रु॒जे॒म॒। ध॒निन॑म्। शु॒चन्त॑:॥ १५॥

पदार्थः-**(अध)** आनन्तर्य्ये **(मातुः)** मातृवद्वर्त्तमानाया विद्यायाः **(उषसः)** प्रभातवेलाया दिनमिव **(सप्त)** राजप्रधानाऽमात्यसेनासेनाध्यक्षप्रजाचाराः **(विप्राः)** धीमन्तः **(जायेमहि) (प्रथमाः)** प्रख्याता आदिमाः **(वेधसः)** प्राज्ञान् **(नॄन्)** नायकान् **(दिवः)** प्रकाशस्य **(पुत्राः)** तनयाः **(अङ्गिरसः)** प्राणा इव **(भवेम) (अद्रिम्)** मेघमिव शत्रुम् **(रुजेम)** प्रभग्नान् कुर्य्याम **(धनिनम्)** बहुधनवन्तं प्रजास्थम् **(शुचन्तः)** विद्याविनयाभ्यां पवित्राः॥१५॥

अन्वयः-हे मनुष्या! यथोषसः सप्तविधाः किरणा जायन्ते तथैव मातुर्विद्याया वयं प्रथमा विप्राः सप्त जायेमहि। वेधसो नॄन् प्राप्नुयाम दिवस्पुत्रा अङ्गिरसोऽद्रिमिव शत्रून् रुजेमाऽध धनिनं शुचन्तः प्रशंसिता भवेम॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजानो बुद्धिमतोऽमात्यान् सत्कृत्य रक्षन्ति ते सूर्य इव प्रकाशितकीर्त्तयो भवन्ति सर्वदैव व्यवसायिनो रक्षित्वा दुष्टान् सततं ताडयेयुर्येन सर्वे पवित्राचाराः स्युः॥१५॥

पदार्थः-हे मनुष्यो! जैसे **(उषसः)** प्रभातवेला के दिन के समान सात प्रकार के किरणें होते हैं, वैसे ही **(मातुः)** माता के सदृश वर्त्तमान विद्या से हम लोग **(प्रथमाः)** प्रथम प्रसिद्ध **(विप्राः)** बुद्धिमान् **(सप्त)** सात प्रकार के अर्थात् राजा, प्रधान, मन्त्री, सेना, सेना के अध्यक्ष, प्रजा और चारादि **(जायेमहि)** होवें और **(वेधसः)** बुद्धिमान् **(नॄन्)** नायक पुरुषों को प्राप्त हों और **(दिवः)** प्रकाश के **(पुत्राः)**

विस्तारने वाले **(अङ्गिरसः)** जैसे प्राणवायु **(अद्रिम्)** मेघ को वैसे शत्रु को **(रुजेम)** छिन्न-भिन्न करें **(अध)** इसके अनन्तर **(धनिनम्)** बहुत धनयुक्त प्रजा में विद्यमान को **(शुचन्तः)** विद्या और विनय से पवित्र करते हुए **(भवेम)** प्रसिद्ध होवें॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा लोग बुद्धिमान् मन्त्रियों का सत्कार करके रक्षा करते हैं, वे सूर्य्य के सदृश प्रकाशित यशवाले होते हैं और सभी काल में उद्योगियों की रक्षा और दुष्टों का निरन्तर ताड़न करें, जिससे कि सब शुद्ध आचरण वाले होवें॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अधा॒ यथा॑ नः पि॒तरः॒ परा॑सः प्र॒त्नासो॑ अग्न ऋ॒तमा॑शुषा॒णाः।
शुचीद॑यन्दीधि॒तिमु॒क्थ॒शास॒ः क्षामा॑ भि॒न्दन्तो॑ अरु॒णीरप॑ व्रन्॥ १६॥

अध॑। यथा॑। नः। पि॒तर॑ः। परा॑सः। प्रत्नास॑ः। अ॒ग्ने॒। ऋ॒तम्। आ॒शु॒षा॒णाः। शुचि॑। इत्। अ॒य॒न्। दीधि॑तिम्। उ॒क्थ॒ऽशस॑ः। क्षाम॑। भि॒न्दन्त॑ः। अ॒रु॒णीः। अप॑। व्र॒न्॥ १६॥

पदार्थः-(**अध**) आनन्तर्य्ये। अत्र **निपातस्य चे**ति दीर्घः। (**यथा**) येन प्रकारेण (**नः**) अस्माकम् (**पितरः**) जनकाः (**परासः**) भविष्यन्तः (**प्रत्नासः**) भूताः (**अग्ने**) पावकवद्वर्त्तमान राजन् (**ऋतम्**) सत्यं न्याय्यम् (**आशुषाणाः**) समन्ताद्विभजन्तः (**शुचि**) पवित्रं शुद्धिकरम् (**इत्**) एव (**अयन्**) प्राप्नुवन्ति (**दीधितिम्**) नीतिप्रकाशम् (**उक्थशासः**) प्रशंसितशासनाः (**क्षाम**) पृथिवीम्। **क्षामेति पृथिवीनामसु पठितम्।** (निघं०१.१) अत्र **संहितायामि**ति दीर्घः। (**भिन्दन्तः**) विदृणन्तः (**अरुणीः**) प्राप्ताः प्रजाः (**अप**) (**व्रन्**) वृणुयुः॥१६॥

अन्वयः-हे अग्ने! यथा नः परासः प्रत्नासः पितरः शुच्यृतमाशुषाणा उक्थशासः क्षाम भिन्दन्तो दीधितिमयन्। अधाऽरुणीरपव्रँस्तथेदेव त्वमस्मासु वर्त्तस्व॥१६॥

भावार्थः-अत्रोपमालङ्कारः। यो राजा राजपुरुषाश्च प्रजासु पितृवद्वर्त्तित्वा सत्यं न्यायं प्रकाश्याऽविद्यां निवार्य्य प्रजाः शिक्षन्ते ते पवित्रा गण्यन्ते॥१६॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश वर्त्तमान राजन्! (**यथा**) जिस प्रकार से (**नः**) हम लोगों के (**परासः**) होने वाले (**प्रत्नासः**) हुए (**पितरः**) उत्पन्न करने वाले पितृ लोग (**शुचि**) पवित्र, शुद्धि करने वाले (**ऋतम्**) सत्य न्याययुक्त व्यवहार को (**आशुषाणाः**) सब प्रकार बांटते और (**उक्थशासः**) प्रशंसित शासनों वाले (**क्षाम**) पृथिवी को (**भिन्दन्तः**) विदारते हुए (**दीधितिम्**) नीति के प्रकाश को (**अयन्**) प्राप्त होते हैं (**अध**) इसके अनन्तर (**अरुणीः**) प्राप्त प्रजाओं को (**अप**) (**व्रन्**) स्वीकार करें, वैसे (**इत्**) ही आप हम लोगों में वर्त्ताव करो॥१६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा और राजपुरुष प्रजाओं में पिता के सदृश वर्त्ताव

करके सत्य, न्याय का प्रकाश कर और अविद्या को दूर करके प्रजाओं को शिक्षा देते हैं, वे पवित्र गिने जाते हैं॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सुकर्माणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः।
शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन्॥१७॥

सुऽकर्माणः। सुऽरुचः। देवऽयन्तः। अयः। न। देवाः। जनिम। धमन्तः। शुचन्तः। अग्निम्। ववृधन्तः। इन्द्रम्। ऊर्वम्। गव्यम्। परिऽसदन्तः। अग्मन्॥१७॥

पदार्थः-(**सुकर्माणः**) शोभनानि कर्माणि येषान्ते (**सुरुचः**) सुष्ठु रुचः प्रीतयो येषान्ते (**देवयन्तः**) कामयमानाः (**अयः**) सुवर्णम् (**न**) इव (**देवाः**) विद्वांसः (**जनिम**) जन्म। अत्र **संहितायामि**ति दीर्घः। (**धमन्तः**) कम्पयन्तः (**शुचन्तः**) पवित्राचरणं कुर्वन्तः कारयन्तः (**अग्निम्**) प्रसिद्धपावकम् (**ववृधन्तः**) वर्धयन्ति (**इन्द्रम्**) विद्युतम् (**ऊर्वम्**) हिंसकम् (**गव्यम्**) गोमयं वाङ्मयम् (**परिषदन्तः**) परिषदमाचरन्तः (**अग्मन्**) गच्छन्ति॥१७॥

अन्वयः-हे राजप्रजाजना! भवन्तोऽयो धमन्तो न देवा जनिम देवयन्तः सुकर्माणः सुरुचः शुचन्तोऽग्निं ववृधन्तः परिषदन्त ऊर्वमिन्द्रं गव्यमग्मंस्तथैव यूयमाचरत॥१७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। सर्वैर्मनुष्यैर्धर्म्याणि कर्माणि कृत्वा विद्यायां सभायां च रुचिं जनयित्वा पवित्रता कामयमाना विद्याजन्मना वर्धमाना विद्युदादिविद्यामुन्नयन्तस्साम्राज्यं कृत्वानन्दः सततं भोक्तव्यः॥१७॥

पदार्थः-हे राजा और प्रजाजन! आप लोगों (**अयः**) सुवर्ण को (**धमन्तः**) कंपाते हुओं के (**न**) सदृश (**देवाः**) विद्वान् लोग (**जनिम**) जन्म की (**देवयन्तः**) कामना करते हुए (**सुकर्माणः**) जिनके उत्तम कर्म (**सुरुचः**) वा श्रेष्ठ प्रीति वह (**शुचन्तः**) पवित्र आचरण को करते और कराते हुए (**अग्निम्**) प्रसिद्ध अग्नि को (**ववृधन्तः**) बढ़ाते हैं (**परिषदन्तः**) और सभा का आचरण करते हुए (**ऊर्वम्**) हिंसा करने वाली (**इन्द्रम्**) बिजुली को (**गव्यम्**) वाणीमय शास्त्र को (**अग्मन्**) प्राप्त होते हैं, वैसा ही आप लोग आचरण करो॥१७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। सब मनुष्यों को चाहिये कि धर्मयुक्त कर्मों को करके विद्या और सभा में प्रीति उत्पन्न करके पवित्रता की कामना करते हुए विद्या और जन्म से बढ़ने वाले बिजुली आदि की विद्या को बढ़ाते हुए चक्रवर्त्ती राज्य करके आनन्द का निरन्तर भोग करें॥१७॥

अथ राज्ञो विषयमाह॥

अब राजा के विषय को कहते हैं॥

आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमान्त्युग्र।
मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः॥ १८॥

आ। यूथाऽइव। क्षुऽमति। पश्वः। अख्यत्। देवानाम्। यत्। जनिम। अन्ति। उग्र। मर्तानाम्। चित्। उर्वशीः। अकृप्रन्। वृधे। चित्। अर्यः। उपरस्य। आयोः॥ १८॥

पदार्थः-(**आ**) समन्तात् (**यूथेव**) सैन्यानीव (**क्षुमति**) बहु क्ष्वन्नं विद्यते यस्मिंस्तस्मिन् (**पश्वः**) पशोः (**अख्यत्**) प्रख्याति (**देवानाम्**) विदुषाम् (**यत्**) यानि (**जनिम**) जन्मानि (**अन्ति**) समीपे (**उग्र**) तेजस्विन् (**मर्त्तानाम्**) मनुष्याणाम् (**चित्**) अपि (**उर्वशीः**) बहुव्यापिकाः। **उर्वशीति पदनामसु पठितम्।** (निघं०४.२) (**अकृप्रन्**) कल्पन्ते (**वृधे**) वर्द्धनाय (**चित्**) इव (**अर्य्यः**) स्वामी (**उपरस्य**) मेघस्य (**आयोः**) जीवनस्य प्रापकस्य॥१८॥

अन्वयः-हे उग्र राजन्! भवान् देवानां मर्त्तानां चान्ति यज्जनिमाऽऽख्यत् क्षुमति यूथेवाऽऽख्यत्। अर्य्यश्चिदिवोपरस्यायोः पश्वश्चिद् वृध उर्वशीर्देवा अकृप्रन्॥१८॥

भावार्थः-अत्रोपमालङ्कारः। यन्मनुष्याणां मध्ये राजजन्म तन्महापुण्यजमिति वेद्यम्। यदि राजा न स्यात्तर्हि कोऽपि स्वास्थ्यं न प्राप्नुयाद् यथा मेघस्य सकाशात् सर्वेषां जीवनवर्धने भवतस्तथैव राज्ञः सर्वस्याः प्रजायाः वृद्धिजीवने भवतः॥१८॥

पदार्थः-हे (**उग्र**) तेजस्वी राजन्! आप (**देवानाम्**) विद्वान् (**मर्त्तानाम्**) मनुष्यों के (**अन्ति**) समीप में (**यत्**) जिन (**जनिम**) जन्मों को (**आ, अख्यत्**) सब ओर से प्रसिद्ध करते वा (**क्षुमति**) बहुत अन्न जिसमें विद्यमान उसमें (**यूथेव**) सेनाजनों के सदृश प्रसिद्ध करते हैं (**अर्य्यः**) और जैसे स्वामी (**चित्**) वैसे (**उपरस्य**) मेघ और (**आयोः**) जीवन प्राप्त कराने वाले (**पश्वः**) पशु की (**चित्**) भी (**वृधे**) वृद्धि के लिये (**उर्वशीः**) बहुत व्याप्त होनेवाली क्रियाओं की विद्वान् लोग (**अकृप्रन्**) कल्पना करते हैं॥१८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्यों के मध्य में राजा का जन्म वह बड़े पुण्य से उत्पन्न हुआ ऐसा जानना चाहिये। जो राजा विद्यमान न हो तो कोई भी स्वस्थता को नहीं प्राप्त हो और जैसे मेघ के समीप से सब का जीवन और वृद्धि होती है, वैसे ही राजा के समीप से सब प्रजा की वृद्धि और जीवन होता है॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अकर्म ते स्वपसो अभूम ऋतमवस्त्रुषसो विभातीः।

अनू॑नमग्निं पु॑रुधा सु॑श्चन्द्रं दे॒वस्य॒ मर्मृ॑जत॒श्चारु॒ चक्षु॑:॥ १९॥

अक॑र्म। ते॒। सु॒ऽअप॑सः। अ॒भू॒म॒। ऋ॒तम्। अ॒व॒स्र॒न्। उ॒षस॑:। वि॒भा॒ती:। अनू॑नम्। अ॒ग्निम्। पु॒रु॒धा। सु॒ऽच॒न्द्रम्। दे॒वस्य॑। मर्मृ॑जतः। चारु॑। चक्षु॑:॥ १९॥

पदार्थ:-(**अकर्म**) कुर्याम (**ते**) तव (**स्वपस:**) सुष्ठ्वपो धर्म्यं कर्म कुर्वाणा: (**अभूम**) भवेम (**ऋतम्**) सत्यम् (**अवस्रन्**) वसन्ति (**उषस:**) प्रभातवेला: (**विभाती:**) प्रकाशयन्त्य: (**अनूनम्**) पुष्कलम् (**अग्निम्**) (**पुरुधा**) बहुप्रकारै: (**सुश्चन्द्रम्**) शोभनं चन्द्रं हिरण्यं यस्मात्तम् (**देवस्य**) कामयमानस्य (**मर्मृजत:**) भृशं शोधयत: (**चारु**) सुन्दरम् (**चक्षु:**) नेत्रम्॥ १९॥

अन्वय:-हे राजन्! यथा विभातीरुषसोऽनूनं सुश्चन्द्रम्मर्मृजतो देवस्य चारु चक्षुरग्निं पुरुधावस्रन् तथैवर्त्तं सेवमाना स्वपसो वयं ते मर्मृजतो देवस्य हितमकर्म ते सखायोऽभूम॥ १९॥

भावार्थ:-हे राजन्! यथा सूर्य्यादुत्पन्नोषा सर्वान् सुशोभितान् करोति तथैव ब्रह्मचर्य्येण जाता विद्वांसो वयं तवाऽऽज्ञायां यथा वर्त्तेमहि तथैव भवानस्माकं हितं सततं करोतु सर्वे वयं मिलित्वाऽन्यायं निवर्त्य धर्म्याणि कर्माणि प्रवर्त्तयेम॥ १९॥

पदार्थ:-हे राजन्! जैसे (**विभाती:**) प्रकाश करती हुई (**उषस:**) प्रभातवेलाओं को (**अनूनम्**) और बहुत (**सुश्चन्द्रम्**) सुन्दर सुवर्ण जिससे होता उसको (**मर्मृजत:**) अत्यन्त शोधते हुए (**देवस्य**) कामना करने वाले के (**चारु**) सुन्दर (**चक्षु:**) नेत्र (**अग्निम्**) और अग्नि को (**पुरुधा**) बहुत प्रकारों से (**अवस्रन्**) वसते हैं, वैसे ही (**ऋतम्**) सत्य की सेवा करते और (**स्वपस:**) उत्तम धर्म-सम्बन्धी कर्म करते हुए हम लोग अत्यन्त शुद्धता तथा कामना करते हुए के हित को (**अकर्म**) करें और (**ते**) आपके मित्र (**अभूम**) होवें॥ १९॥

भावार्थ:-हे राजन्! जैसे सूर्य्य से उत्पन्न प्रात:काल सब को शोभित करता है, वैसे ही ब्रह्मचर्य्य से हुए विद्वान् हम लोग आपकी आज्ञानुकूल जैसे वर्ते, वैसे ही आप हम लोगों का हित निरन्तर करो और सब हम लोग परस्पर मेल करके और अन्याय दूर करके धर्मसम्बन्धी कर्मों को प्रवृत्त करें॥ १९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एता॑ ते॑ अग्न उ॒चथा॑नि वे॒धोऽवो॑चाम क॒वये॒ ता जु॑षस्व।

उच्छो॑चस्व कृणु॒हि वस्य॑सो नो म॒हो रा॒य: पुरु॑वार॒ प्र य॑न्धि॥ २०॥ १९॥

एता॑। ते॒। अ॒ग्ने॒। उ॒चथा॑नि। वे॒ध॒:। अवो॑चाम। क॒वये॑। ता। जु॒ष॒स्व॒। उत्। शो॒च॒स्व॒। कृ॒णु॒हि। वस्य॑सः। नः॒। म॒हः। रा॒यः। पुरु॑ऽवार। प्र। य॒न्धि॒॥ २०॥

पदार्थः-(**एता**) एतानि (**ते**) तुभ्यम् (**अग्ने**) विद्वन्धार्मिकराजन् (**उचथानि**) उचितानि वचनानि (**वेधः**) मेधाविन् (**अवोचाम**) वदेम (**कवये**) सर्वविद्यायुक्ताय (**ता**) तानि (**जुषस्व**) सेवस्व (**उत्**) (**शोचस्व**) विचारय (**कृणुहि**) अनुतिष्ठ (**वस्यसः**) वसीयसः (**नः**) अस्मभ्यम् (**महः**) महतः (**रायः**) धनानि (**पुरुवार**) यः पुरून् बहूनाप्तान् वृणोति तत्सम्बुद्धौ (**प्र**) (**यन्धि**) प्रयच्छ॥२०॥

अन्वयः-हे वेधोऽग्ने! वयं कवये ते यान्येता उचथान्यवोचाम ता त्वं जुषस्वोच्छोचस्व कृणुहि, हे पुरुवार! नो महो वस्यसो रायः प्र यन्धि॥२०॥

भावार्थः-राज्ञा आप्तानामेव वचांसि श्रुत्वा सुविचार्य्य सेवनीयानि तेभ्य आप्तेभ्यः प्रियाणि वस्तूनि दत्वैते सततं सन्तोषणीया एवं राजाप्तसभे मिलित्वा सर्वाणि कर्माणि समापयेतामिति॥२०॥

अथ राजप्रजाऽप्तजनकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीयं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**वेधः**) बुद्धिमान् (**अग्ने**) विद्वान् धार्मिक राजन्! हम लोग (**कवये**) सब विद्या से युक्त (**ते**) आपके लिये जिन (**एता**) इन (**उचथानि**) उचित वचनों को (**अवोचाम**) कहें (**ता**) उनको आप (**जुषस्व**) सेवो और (**उत्, शोचस्व**) अत्यन्त विचारो (**कृणुहि**) करो (**पुरुवार**) हे बहुत आप्त अर्थात् सत्यवादी पुरुषों का स्वीकार करने वाले! (**नः**) हम लोगों के लिये (**महः**) बड़े (**वस्यसः**) अतिशयित निवसे धरे हुए (**रायः**) धनों को (**प्र, यन्धि**) उत्तमता से देओ॥२०॥

भावार्थः-राजा को चाहिये कि यथार्थवक्ता ही पुरुषों के वचनों को सुन और उत्तम प्रकार विचार कर सेवन करें, उन यथार्थवक्ता पुरुषों के लिये प्रिय वस्तुओं को देकर वे निरन्तर सन्तुष्ट करने योग्य हैं, इस प्रकार राजा और यथार्थवक्ता पुरुषों की सभा सब मिल कर सब कर्म्मों को सिद्ध करें॥२०॥

इस सूक्त में राजा, प्रजा और यथार्थवक्ता पुरुष के कृत्यवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह द्वितीय सूक्त और उन्नीसवां वर्ग समाप्त हुआ॥

अथ षोडशर्चस्य तृतीयस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १,५,८,१०,१२,१५ निचृत्त्रिष्टुप्। २,१३,१४ विराट् त्रिष्टुप्। ३,७,९ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ स्वराड् बृहतीच्छन्दः। मध्यमः स्वरः। ६,११,१६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ सूर्य्यरूपाग्निदृष्टान्तेन राजप्रजाजनकृत्यमाह॥

अब सोलह ऋचा वाले तीसरे सूक्त का वर्णन है उसके प्रथम मन्त्र में सूर्य्यरूप अग्नि के दृष्टान्त से राज प्रजाजनों के कृत्य का वर्णन करते हैं॥

आ वो॒ राजा॑नमध्व॒रस्य॑ रु॒द्रं होता॑रं सत्य॒यजं॒ रोद॑स्योः।
अ॒ग्निं पु॒रा त॑नयि॒त्नोर॒चित्ता॒द्धिर॑ण्यरूपमव॒से कृ॑णुध्वम्॥ १॥

आ। व॒रिति॑ वः। राजा॑नम्। अ॒ध्व॒रस्य॑। रु॒द्रम्। होता॑रम्। स॒त्य॒ऽयज॑म्। रोद॑स्योः। अ॒ग्निम्। पु॒रा। त॒न॒यि॒त्नोः। अ॒चित्ता॑त्। हिर॑ण्यऽरूपम्। अव॑से। कृ॒णु॒ध्व॒म्॥ १॥

पदार्थः-(**आ**) (**वः**) युष्माकम् (**राजानम्**) प्रकाशमानम् (**अध्वरस्य**) अहिंसनीयस्य राज्यस्य (**रुद्रम्**) दुष्टानां रोदयितारम् (**होतारम्**) दातारम् (**सत्ययजम्**) यः सत्यमेव यजति सङ्गच्छते तम् (**रोदस्योः**) द्यावापृथिव्योर्मध्ये (**अग्निम्**) सूर्य्यमिव वर्त्तमानम् (**पुरा**) पुरस्तात् (**तनयित्नोः**) विद्युतः (**अचित्तात्**) अविद्यमानं चित्तं यत्र तस्मात् (**हिरण्यरूपम्**) हिरण्यस्य तेजसो रूपमिव रूपं यस्य तम् (**अवसे**) धर्मात्मनां रक्षणाय दुष्टानां हिंसनाय (**कृणुध्वम्**)॥१॥

अन्वयः-हे आप्ता विद्वांसो! यथा वयं वोऽध्वरस्यावसे होतारं सत्ययजं रुद्रमचित्तात् तनयित्नोर्हिरण्यरूपं रोदस्योरग्निमिव राजानं पुरा कुर्याम तथाभूतमस्माकं नृपं यूयमाकृणुध्वम्॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! राजप्रजाजनैरेकसम्मतिं कृत्वा यथेश्वरेण ब्रह्माण्डस्य मध्ये सूर्य्यं स्थापयित्वा सर्वस्य प्रियं साधितं तथाभूतं राजानमस्माकं मध्ये शुभगुणकर्मस्वभावाऽन्वितं नृपं कृत्वाऽस्माकं हितं यूयं साधयत यतो युष्माकमपि प्रियं सिध्येत्॥१॥

पदार्थः-हे यथार्थवक्ता विद्वानो! जैसे हम लोग (**वः**) आपके (**अध्वरस्य**) न नष्ट करने योग्य राज्य के (**अवसे**) धर्मात्माओं की रक्षा और दुष्टों के नाश करने के लिये (**होतारम्**) देने (**सत्ययजम्**) सत्य ही को प्राप्त होने और (**रुद्रम्**) दुष्टों के रुलाने वाले (**अचित्तात्**) जिसमें चित्त नहीं स्थिर होता, ऐसी (**तनयित्नोः**) बिजुली के (**हिरण्यरूपम्**) तेजरूप के समान रूपवाले वा (**रोदस्योः**) अन्तरिक्ष और पृथिवी के मध्य में (**अग्निम्**) सूर्य्य के सदृश (**राजानम्**) प्रकाशमान न्याय (**पुरा**) प्रथम करें, वैसा हम लोगों के बीच राजा आप लोग (**आ, कृणुध्वम्**) सब प्रकार करें॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् लोगो! राजा और प्रजाजनों के साथ एक सम्मति करके जैसे ईश्वर ने ब्रह्माण्ड के मध्य में सूर्य्य को स्थित करके सब का प्रियसुख साधन किया, वैसे ही हम लोगों के मध्य में उत्तम गुण, कर्म और स्वभावयुक्त को राजा करके हम लोगों के

हित को आप लोग सिद्ध करो, जिससे आप लोगों का भी प्रिय सिद्ध होवे॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒यं योनि॑श्चकृ॒मा यं व॒यं ते॑ जा॒येव॒ पत्य॑ उश॒ती सुवासा॑:।
अ॒र्वा॒ची॒न: परि॑वीतो॒ नि षी॑दे॒मा उ॑ ते स्वपाक प्रती॒ची:॥ २॥

अ॒यम्। योनि॑:। च॒कृ॒म। यम्। व॒यम्। ते॒। जा॒याऽइ॑व। पत्ये॑। उ॒श॒ती। सु॒ऽवासा॑:। अ॒र्वा॒ची॒न:। परि॑ऽवीत:। नि। सी॒द॒। इ॒मा:। ऊ॒म् इति॑। ते॒। सु॒ऽअ॒पा॒क॒। प्र॒ती॒ची:॥ २॥

पदार्थ:-(**अयम्**) (**योनि:**) गृहम् (**चकृम**) कुर्य्याम। अत्र **संहितायामि**ति दीर्घः। (**यम्**) प्रासादम् (**वयम्**) (**ते**) तव (**जायेव**) हृद्या स्त्रीव (**पत्ये**) स्वामिने (**उशती**) कामयमाना (**सुवासा:**) शोभनवस्त्रालङ्कृता (**अर्वाचीन:**) इदानीन्तनः (**परिवीत:**) सर्वतो व्याप्तशुभगुणः (**नि**) (**सीद**) निवस (**इमा:**) वर्त्तमानाः प्रजाः (**उ**) (**ते**) तव (**स्वपाक**) सुष्ठ्वपरिपक्वज्ञान (**प्रतीची:**) प्रतीतमञ्चन्त्यः॥२॥

अन्वय:-हे राजन्! वयं ते यं चकृम सोऽयं योनिः पत्य उशती सुवासा जायेवार्वाचीन परिवीतोऽस्तु, तत्र त्वं निषीद। हे स्वपाक! प्रतीचीरिमा उ ते भक्ता भवन्तु॥२॥

भावार्थ:-अत्रोपमालङ्कारः। राज्ञेदृशं गृहं निर्मातव्यं यत्पतिव्रता सुन्दरी हृद्या जायावत्सर्वेष्वृतुषु सुखं दद्यात्। तत्राऽऽसीन ईदृशानि कर्माणि कुर्य्या यैस्स्वप्रजा अनुरक्तास्स्युः॥२॥

पदार्थ:-हे राजन्! (**वयम्**) हम लोग (**ते**) आपके (**यम्**) जिस गृह को (**चकृम**) बनावें सो (**अयम्**) यह (**योनि:**) गृह (**पत्ये**) स्वामी के लिये (**उशती**) कामना करती हुई (**सुवासा:**) सुन्दर वस्त्रों से शोभित (**जायेव**) मन की प्यारी स्त्री के सदृश (**अर्वाचीन:**) इस वर्त्तमानकाल में हुआ (**परिवीत:**) सब प्रकार व्याप्त उत्तम गुण जिसमें ऐसा हो, उसमें आप (**नि, सीद**) निवास करो और (**स्वपाक**) हे उत्तम प्रकार परिपक्व ज्ञान वाले! (**प्रतीची:**) प्रतीति को प्राप्त होती हुई (**इमा:**) यह वर्त्तमान प्रजा (**उ**) और (**ते**) आपके भक्त हों॥२॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। राजा को चाहिये कि ऐसा गृह बनावे कि जो पतिव्रता सुन्दरी मन की प्यारी स्त्री के सदृश सब ऋतुओं में सुख देवे। और वहाँ स्थित हुआ ऐसे कर्म करे कि जिन कर्मों से अपनी प्रजा अनुरक्त होवें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ॒शृ॒ण्व॒ते अ॑दृ॒पिताय॒ मन्म॑ नृ॒चक्ष॑से सुमृ॒ळी॒काय॑ वेधः।
दे॒वाय॑ शस्ति॒म॒मृता॑य शंस॒ ग्रावे॑व॒ सोता॑ मधु॒षुद्यमी॑ळे॥ ३॥

आऽशृण्वते। अदृपिताय। मन्म। नृऽचक्षसे। सुऽमृळीकाय। वेधः। देवाय। शस्तिम्। अमृताय। शंस। ग्रावाऽइव। सोता। मधुऽसुत्। यम्। ईळे॥ ३॥

पदार्थः-(**आशृण्वते**) समन्ताच्छ्रवणं कुर्वते (**अदृपिताय**) अमोहिताय (**मन्म**) विज्ञानम् (**नृचक्षसे**) सत्याऽसत्यकर्तृणां जनानां साक्षाद्द्रष्ट्रे (**सुमृळीकाय**) सुसुखप्रदाय सुखस्वरूपाय (**वेधः**) मेधाविन् राजन् (**देवाय**) दिव्यगुणसम्पन्नाय (**शस्तिम्**) प्रशंसाम् (**अमृताय**) जलवच्छान्तस्वरूपाय (**शंस**) स्तुहि (**ग्रावेव**) मेघ इव (**सोता**) अभिषवस्य कर्त्ता (**मधुषुत्**) यो मधूनि मधुराणि सुनोति सः (**यम्**) (**ईळे**) स्तौमि॥ ३॥

अन्वयः-हे वेधो राजन्! यमहमीळ आशृण्वतेऽदृपिताय नृचक्षसे सुमृळीकायाऽमृताय देवाय ते मन्माहमुपदिशेय तथा त्वं ग्रावेव मधुषुत्सोता सञ्छस्तिं शंस॥ ३॥

भावार्थः-स एव राजोत्तमो भवति यो मोहादिदोषरहितः सर्वेषां वचनानां श्रोता सत्याऽसत्ययोर्द्रष्टा मेघवत्प्रजायां विविधभोगप्रापको न्यायेशः स्यात्॥ ३॥

पदार्थः-हे (**वेधः**) बुद्धिमान् राजन्! (**यम्**) जिसकी मैं (**ईळे**) स्तुति करता हूँ (**आशृण्वते**) सब प्रकार सुनते हुए (**अदृपिताय**) मोहरहित (**नृचक्षसे**) सत्य और असत्य व्यवहारों को करते हुए जनों के साक्षात् देखने और (**सुमृळीकाय**) उत्तम प्रकार सुख देने वाले, सुख और (**अमृताय**) जल के सदृश शान्तस्वरूप (**देवाय**) उत्तम गुणों से युक्त आपके लिये (**मन्म**) विज्ञान का मैं उपदेश देता हूँ, वैसे आप (**ग्रावेव**) मेघ के सदृश (**मधुषुत्**) मधुरताओं के उत्पन्न करने वाले (**सोता**) अभिषेक करनेवाले हुए (**शस्तिम्**) प्रशंसा की (**शंस**) स्तुति कीजिये अर्थात् प्रबन्ध से कहिये॥ ३॥

भावार्थः-वह ही राजा उत्तम होता है कि जो मोह आदि दोषों से रहित होकर सब वचनों का सुनने, सत्य और असत्य का देखने और मेघ के सदृश प्रजा में अनेक प्रकार का भोग प्राप्त करानेवाला न्यायाधीश होवे॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः।

कदा ते उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते॥ ४॥

त्वम्। चित्। नः। शम्यै। अग्ने। अस्याः। ऋतस्य। बोधि। ऋतऽचित्। सुऽआधीः। कदा। ते। उक्था। सधऽमाद्यानि। कदा। भवन्ति। सख्या। गृहे। ते॥ ४॥

पदार्थः-(**त्वम्**) (**चित्**) अपि (**नः**) अस्माकम् (**शम्यै**) कर्मणे (**अग्ने**) पावकवद्वर्त्तमान (**अस्याः**) प्रजायाः (**ऋतस्य**) सत्यस्य (**बोधि**) बुध्यस्व (**ऋतचित्**) य ऋतं सत्यं चिनोति सः (**स्वाधीः**)

यः सुष्ठु समन्ताच्चिन्तयति **(कदा)** **(ते)** तव **(उक्था)** उचितानि **(सधमाद्यानि)** सहस्थानेषु साधूनि **(कदा)** **(भवन्ति)** **(सख्या)** सखीनां कर्माणि भावा वा **(गृहे)** **(ते)**॥४॥

अन्वयः-हे अग्ने राजंस्त्वं नोऽअस्या ऋतस्य शम्यै स्वाधीर्ऋतचित्सन्कदा बोधि चिदपि ते गृहे सधमाद्यान्युक्था चिदपि ते सख्या कदा भवन्ति॥४॥

भावार्थः-हे राजंस्त्वं यदा प्रजायाः सत्यं न्यायं करिष्यसि तदैव तवाऽऽज्ञायां वर्त्तित्वा प्रजा एकमत्या भविष्यन्ति॥४॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान राजन् **(त्वम्)** आप **(नः)** हम लोगों की **(अस्याः)** इस प्रजा के **(ऋतस्य)** सत्य के **(शम्यै)** कर्म्म के लिये **(स्वाधीः)** उत्तम प्रकार सब प्रकार विचार करने और **(ऋतचित्)** सत्य का संग्रह करने वाला [होते हुए] **(कदा)** कब **(बोधि)** जानो और **(चित्)** भी **(ते)** आपके **(गृहे)** गृह में **(सधमाद्यानि)** मेल के स्थानों में श्रेष्ठ और **(उक्था)** उचित भी **(ते)** तुम्हारे **(सख्या)** मित्रों के कर्म्म वा अभिप्राय **(कदा)** कब **(भवन्ति)** होते हैं॥४॥

भावार्थः-हे राजन्! आप जब प्रजा के सत्य न्याय को करेंगे, तब ही आपकी आज्ञा के अनुकूल वर्त्ताव करके प्रजा एकसम्मति से होंगी॥४॥

अथोपदेशकविषयमाह॥

अब उपदेशक विषय को अगले मन्त्र में कहते हैं॥

कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः।

कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय॥५॥२०॥

कथा। ह। तत्। वरुणाय। त्वम्। अग्ने। कथा। दिवे। गर्हसे। कत्। नः। आगः। कथा। मित्राय। मीळ्हुषे। पृथिव्यै। ब्रवः। कत्। अर्यम्णे। कत्। भगाय॥५॥

पदार्थः-(**कथा**) केन प्रकारेण (**ह**) किल (**तत्**) (**वरुणाय**) श्रेष्ठाय (**त्वम्**) (**अग्ने**) पावकवद्वर्त्तमान (**कथा**) (**दिवे**) प्रकाशमानाय (**गर्हसे**) निन्दसि (**कत्**) कदा (**नः**) अस्माकम् (**आगः**) अपराधम् (**कथा**) (**मित्राय**) सख्ये (**मीळ्हुषे**) सुखवर्धकाय (**पृथिव्यै**) पृथिवीवद्वर्त्तमानायै स्त्रियै (**ब्रवः**) ब्रूयाः (**कत्**) कदा (**अर्यम्णे**) न्यायाधीशाय (**कत्**) कदा (**भगाय**) ऐश्वर्य्याय॥५॥

अन्वयः-हे अग्ने! त्वं ह कथा वरुणाय गर्हसे कथा दिवे गर्हसे न आगः कद् गर्हसे मीळ्हुषे मित्राय कथा गर्हसे पृथिव्यै तद्वचः कद् ब्रवोऽर्य्यम्णे भगाय च कद् ब्रवः॥५॥

भावार्थः-हे विद्वांसो! यदि राजा श्रेष्ठस्य विदुषां वा निन्दां कुर्य्यात् तदैव भवद्भिर्निरोद्धव्यः सर्वेषां राजकर्म्मणां सिद्धये समयव्यवस्था कार्य्या यदा यदा यत् यत्कर्म कर्त्तव्यं भवेत्तदा तदा तत्तत्कर्म्म

कर्त्तव्यमिति राजोपदेष्टव्यो यदा मित्रद्रोहमाचरेत् तदैव शिक्षणीय एवं कृते राजप्रजयोः सततमुन्नतिर्भवेत्॥५॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान! **(त्वम्)** आप **(ह)** ही **(कथा)** किस प्रकार **(वरुणाय)** श्रेष्ठ की **(गर्हसे)** निन्दा करते हो **(कथा)** किस प्रकार **(दिवे)** प्रकाशमान के लिये निन्दा करते हो **(नः)** हम लोगों के **(आगः)** अपराध की **(कत्)** कब निन्दा करते हो **(मीळ्हुषे)** सुख बढ़ाने वाले **(मित्राय)** मित्र के लिये **(कथा)** किस प्रकार निन्दा करते हो **(पृथिव्यै)** पृथिवी के सदृश वर्त्तमान स्त्री के लिये **(तत्)** उस वचन को **(कत्)** कब **(ब्रवः)** कहो **(अर्य्यम्णे)** न्यायाधीश के लिये और **(भगाय)** ऐश्वर्य्य के लिये **(कत्)** कब कहो॥५॥

भावार्थः-हे विद्वानो! जो राजा श्रेष्ठ वा विद्वानों की निन्दा करे, वह आप लोगों से रोकने योग्य है और सब राजकर्मों की सिद्धि के लिये समयव्यवस्था करनी चाहिये और जब-जब जो-जो कर्म करना हो तब-तब वह-वह कर्म करना चाहिये। इस प्रकार राजा को उपदेश करना चाहिये जब मित्रद्रोह का आचरण करे तभी उसको शिक्षा देनी चाहिये ऐसा करने पर राजा और प्रजा दोनों की निरन्तर उन्नति होवे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कद्धिष्ण्यासु वृधसानो अग्ने कद्वातायु प्रतवसे शुभंये।

परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने॥६॥

कत्। धिष्ण्यासु। वृधसानः। अग्ने। कत्। वाताय। प्रऽतवसे। शुभम्ऽये। परिऽज्मने। नासत्याय। क्षे। ब्रवः। कत्। अग्ने। रुद्राय। नृऽघ्ने॥६॥

पदार्थः-(**कत्**) कदा **(धिष्ण्यासु)** धिष्णायां बुद्धौ भवासु क्रियासु **(वृधसानः)** यो वृधान् वर्धकान् विभजति **(अग्ने)** विद्वन् राजन् **(कत्)** कदा **(वाताय)** विज्ञानाय **(प्रतवसे)** प्रकृष्टबलाय **(शुभंये)** यः शुभं याति प्राप्नोति तस्मै **(परिज्मने)** परितः सर्वतो ज्मा भूमिर्यस्य तस्मै **(नासत्याय)** अविद्यमानासत्याचाराय **(क्षे)** भूमी राज्याय विद्यते यस्मिंस्तस्मिन्। अत्रार्शादिभ्योऽच् **(ब्रवः)** ब्रूयाः **(कत्)** **(अग्ने)** पावकवद्देदीप्यमान **(रुद्राय)** दुष्टानां रोदयित्रे **(नृघ्ने)** यः शत्रूणां नायकान् हन्ति तस्मै॥६॥

अन्वयः-हे अग्ने! त्वं धिष्ण्यासु वृधसानः सन् प्रतवसे वाताय कद् ब्रवः। हे अग्ने! परिज्मने शुभंये नासत्याय कद् ब्रवः क्षे नृघ्ने रुद्राय कद् ब्रवः॥६॥

भावार्थः-राजादीनध्यक्षान् प्रत्यध्यापकोपदेशकमन्त्रिणः एवमुपदिशेयुर्भवन्तो प्रज्ञाकर्म्मसु वृद्धा बलिष्ठाश्शुभाचरणाः सत्यभाषिणो दुष्टान् घातुकाः कदा भविष्यन्ति शुभाचरणे दुष्टाचारत्यागे विलम्बं मा कुर्वन्तु॥६॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश प्रकाशमान आप! **(धिष्ण्यासु)** बुद्धि में उत्पन्न क्रियाओं में **(वृधसानः)** बढ़ने वालों का विभाग करते हुए **(प्रतवसे)** श्रेष्ठ बल और **(वाताय)** विज्ञान के लिये **(कत्)** कब **(ब्रवः)** कहो **(अग्ने)** हे विद्वन् राजन्! **(परिज्मने)** सब ओर भूमि जिसके उस **(शुभंये)** कल्याण को प्राप्त होने वाले **(नासत्याय)** असत्य आचरण से रहित के लिये **(कत्)** कब कहो **(क्षे)** पृथिवी राज्य के लिये विद्यमान जिसमें उसमें **(नृघ्ने)** शत्रुओं के नायकों के नाश करने और **(रुद्राय)** दुष्ट पुरुषों को रुलाने वाले के लिये **(कत्)** कब कहो॥६॥

भावार्थः-राजा आदि अध्यक्षों के प्रति अध्यापक, उपदेशक और मन्त्रीजन ऐसा उपदेश देवें कि आप लोग बुद्धि के कामों में वृद्ध, बलिष्ठ, उत्तम आचरण वाले, सत्यवादी और दुष्ट पुरुषों के नाश करने वाले कब होओगे और उत्तम आचरण करने और दुष्ट आचरण के त्याग में विलम्ब न करो॥६॥

अथ शिष्यपरीक्षाविषयमाह॥

अब विद्यार्थियों की परीक्षा विषय को अगले मन्त्र में कहते हैं॥

कथा महे पुष्टिम्भरायं पूष्णे कद्रुद्रायु सुमखाय हविर्दे।
कद्विष्णव उरुगायायु रेतो ब्रवः कदग्ने शरवे बृहत्यै॥७॥

कथा। महे। पुष्टिम्ऽभरायं। पूष्णे। कत्। रुद्रायं। सुऽमखाय। हविःऽदे। कत्। विष्णवे। उरुऽगायायं। रेतः। ब्रवः। कत्। अग्ने। शरवे। बृहत्यै॥७॥

पदार्थः-(**कथा**) केन प्रकारेण **(महे)** महते **(पुष्टिम्भराय)** **(पूष्णे)** पोषकाय **(कत्)** कदा **(रुद्राय)** शत्रुषूग्राय **(सुमखाय)** सुष्ठु यज्ञसम्पादकाय **(हविर्दे)** यो हवींषि दातव्यानि ददाति तस्मै **(कत्)** कदा **(विष्णवे)** व्यापकाय परमेश्वराय **(उरुगायाय)** बहुप्रशंसाय **(रेतः)** उदकमिव शान्तो मृदुर्भूत्वा **(ब्रवः)** **(कत्)** **(अग्ने)** विद्वन् **(शरवे)** दुष्टानां हिंसकाय **(बृहत्यै)** महत्यै सेनायै॥७॥

अन्वयः-हे अग्ने! त्वं रेत इव सन् महे पुष्टिम्भराय पूष्णे कथा ब्रवः सुमखाय हविर्दे रुद्राय कद् ब्रवः। उरुगायाय विष्णवे कद् ब्रवः शरवे बृहत्यै कद् ब्रवः॥७॥

भावार्थः-अध्यापकैर्विद्यार्थिनोऽध्याप्य प्रत्यष्टाऽहं प्रतिपक्षं प्रतिमासं प्रत्ययनं प्रतिवर्षञ्च तेषां परीक्षा यथार्हा कर्त्तव्या येन राजकुमारादयः सर्वे निर्भ्रमज्ञानाः सन्तः सुशीलाः शरीरात्मबलयुक्ताः धर्मिष्ठाः शतायुषो न्यायेन राज्यपालकाः स्युः॥७॥

पदार्थः-हे **(अग्ने)** विद्वन् पुरुष! आप **(रेतः)** जल के सदृश शान्त अर्थात् कोमलचित्त होके **(महे)** बड़े **(पुष्टिम्भराय)** पुष्टि धारण कराने **(पूष्णे)** पोषण करने वाले के लिये **(कथा)** किस प्रकार **(ब्रवः)** कहो **(सुमखाय)** उत्तम प्रकार यज्ञसम्पादन करने और **(हविर्दे)** देने योग्य वस्तुओं को देने वाले के लिये तथा **(रुद्राय)** शत्रुओं में प्रबल के लिये **(कत्)** कब कहो **(उरुगायाय)** बहुत प्रशंसा करने योग्य **(विष्णवे)** व्यापक परमेश्वर के लिये **(कत्)** कब कहो **(शरवे)** दुष्टों के नाश करने वाली **(बृहत्यै)** बड़ी

सेना के लिये **(कत्)** कब कहो॥७॥

भावार्थः-अध्यापक लोगों को विद्यार्थियों को पढ़ा के प्रत्येक अठवाड़े, प्रत्येक पक्ष, प्रतिमास, प्रतिछमाही और प्रतिवर्ष परीक्षा यथायोग्य करनी चाहिये, जिससे कि राजकुमारादि सब भ्रमरहित, ज्ञानविशिष्ट, उत्तमस्वभावयुक्त शरीर और आत्मा के बल सहित धर्मिष्ठ सौ वर्ष जीने और न्याय से राज्य के पालन करने वाले होवें॥७॥

अथ राजविषयमाह॥

अब अगले मन्त्र में राजविषय को कहते हैं॥

कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः।
प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान्॥८॥

कथा। शर्धाय। मरुताम्। ऋताय। कथा। सूरे। बृहते। पृच्छ्यमानः। प्रति। ब्रवः। अदितये। तुराय। साध। दिवः। जातऽवेदः। चिकित्वान्॥८॥

पदार्थः-**(कथा)** **(शर्धाय)** बलाय **(मरुताम्)** वायूनामिव **(ऋताय)** सत्याय **(कथा)** **(सूरे)** सूर्य्य इव वर्त्तमाने सैन्ये **(बृहते)** वर्द्धमानाय **(पृच्छ्यमानः)** **(प्रति)** **(ब्रवः)** ब्रूयाः **(अदितये)** अविनष्टायाऽन्तरिक्षाय **(तुराय)** त्वरमाणाय **(साध)**। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(दिवः)** प्रकाशान् **(जातवेदः)** प्रसिद्धप्रज्ञान **(चिकित्वान्)** ज्ञानवान् भूत्वा॥८॥

अन्वयः-हे जातवेदः! सूरे पृच्छ्यमानस्त्वं मरुतामिवर्ताय बृहते शर्धाय कथा ब्रवः तुरायाऽदितये कथा प्रति ब्रवश्चिकित्वान्सन् दिवः साध॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजानो वायुवत्स्वबलं वर्धयन्ति योद्धृणां शिक्षकान् परीक्षकान् सत्कुर्वन्ति प्रश्नोत्तराभ्यां सर्वान् विज्ञाय तैः कार्य्याणि साध्नुवन्ति ते सूर्य्य इवैश्वर्य्यप्रकाशका भवन्ति॥८॥

पदार्थः-हे **(जातवेदः)** प्रसिद्ध उत्तम ज्ञानयुक्त **(सूरे)** सूर्य्य के सदृश वर्त्तमान सेना में **(पृच्छ्यमानः)** पूंछे गए आप **(मरुताम्)** पवनों का जैसे वैसे **(ऋताय)** सत्य के और **(बृहते)** बढ़ते हुए **(शर्धाय)** बल के लिये **(कथा)** किस प्रकार से **(ब्रवः)** कहो **(तुराय)** शीघ्रता करते हुए **(अदितये)** नहीं नाश होने वाले अन्तरिक्ष के लिये **(कथा)** किस प्रकार से **(प्रति)** निश्चित कहो **(चिकित्वान्)** ज्ञानवान् होकर **(दिवः)** प्रकाशों को **(साध)** सिद्ध करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा लोग वायु के सदृश अपने बल को बढ़ाते, योधा लोगों के शिक्षक और परीक्षकों का सत्कार करते और प्रश्नोत्तर से सब को जान उनके द्वारा कार्य सिद्ध करते हैं, वे सूर्य्य के सदृश ऐश्वर्य के प्रकाशक होते हैं॥८॥

अथ मनुष्यैर्ब्रह्मचर्य्यादिना पुरुषार्थः संसेव्य इत्याह॥

अब मनुष्य को ब्रह्मचर्य्य आदि से पुरुषार्थ सेवना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तेन॑ ऋ॒तं नियं॑तमीळ॒ आ गोरा॒मा सचा॒ मधु॑मत्प॒क्वमग्ने॑।

कृ॒ष्णा स॒ती रुश॑ता धा॒सिने॒षा जामि॑र्येण॒ पय॑सा पीपाय॥ ९॥

ऋ॒तेन॑। ऋ॒तम्। निऽय॑तम्। ई॒ळे॒। आ। गोः। आ॒मा। सचा॑। मधु॑ऽमत्। प॒क्वम्। अ॒ग्ने॒। कृ॒ष्णा। स॒ती। रुश॑ता। धा॒सिना॑। ए॒षा। जामि॑र्येण। पय॑सा। पी॒पा॒य॒॥ ९॥

पदार्थः-(**ऋतेन**) सत्येन (**ऋतम्**) सत्यम् (**नियतम्**) निश्चितम् (**ईळे**) स्तौम्यध्यन्विच्छामि (**आ**) (**गोः**) पृथिव्या वाण्या वा (**आमा**) अपरिपक्वम्। अत्र विभक्तेराकारादेशः (**सचा**) प्रसङ्गेन (**मधुमत्**) प्रशस्तमधुरादिगुणयुक्तम् (**पक्वम्**) (**अग्ने**) (**कृष्णा**) श्यामा (**सती**) (**रुशता**) सुस्वरूपेण (**धासिना**) अन्नेन (**एषा**) (**जामिर्येण**) जामस्येदं जामं तदृच्छति येन तेन (**पयसा**) दुग्धेन (**पीपाय**) वर्द्धस्व॥ ९॥

अन्वयः-हे अग्ने! विद्वन् यथाऽहं गोर्ऋतेन नियतमृतमीळे तथाऽऽचरँस्त्वं पृथिव्या मध्ये सचा मधुमदामा पक्वं चापीपाय। यथैषा कृष्णा सती विदुषी पतिव्रता रुशता जामिर्येण पयसा धासिना वर्धते तथा त्वं वर्धस्व॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या ब्रह्मचर्य्येण विद्यासुशिक्षे प्राप्य धर्म्येण व्यवहारेण धर्ममन्विष्य जितेन्द्रियत्वेन मिताऽऽहारा भूत्वा पुरुषार्थयन्ति ते द्यावा दम्पती इवाऽऽनन्दिता भूत्वा सर्वतो वर्धन्ते॥ ९॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश प्रकाशमान विद्वान् पुरुष! जिस प्रकार से मैं (**गोः**) पृथिवी वा वाणी के (**ऋतेन**) सत्य से (**नियतम्**) नियमयुक्त (**ऋतम्**) सत्य की (**ईळे**) स्तुति वा ढूंढ करता हूं, वैसे आचरण करते हुए आप पृथिवी के मध्य में (**सचा**) प्रसङ्ग से (**मधुमत्**) श्रेष्ठ मधुर आदि गुणों से युक्त (**आमा**) कच्चे और (**पक्वम्**) पक्के पदार्थों की (**आ, पीपाय**) अच्छे प्रकार वृद्धि करो और जैसे (**एषा**) यह (**कृष्णा**) श्याम वर्ण (**सती**) सज्जन पण्डिता पतिव्रता स्त्री (**रुशता**) उत्तम स्वरूप से (**जामिर्येण**) जीवन में निमित्त (**पयसा**) दुग्ध और (**धासिना**) अन्न से बढ़ती है, वैसे आप वृद्धि को प्राप्त होओ॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य ब्रह्मचर्य से विद्या और उत्तम शिक्षा को प्राप्त होके और धर्मयुक्त व्यवहार से धर्म का अन्वेषण और इन्द्रियजित् होने से नियम से भोजन करने वाले होकर पुरुषार्थ करते हैं, वे स्नेही स्त्री और पुरुष के सदृश आनन्दित होकर सब प्रकार वृद्धि को प्राप्त होते हैं॥ ९॥

पुनः पुरुषार्थकर्त्तव्यतामाह॥

फिर भी पुरुषार्थ कर्त्तव्यता को अगले मन्त्र में कहते हैं॥

ऋ॒तेन॒ हि ष्मा॑ वृष॒भश्चि॑दु॒क्तः पुमाँ॑ अ॒ग्निः पय॑सा पृ॒ष्ठ्येन॑।
अस्प॑न्दमानो अचरद्व॒योधा॑ वृषा॑ शु॒क्रं दु॑दु॒हे पृ॒श्नि॒रूध॑॥ १०॥ २१॥

ऋ॒तेन॑। हि। स्म॒। वृ॒ष॒भः। चि॒त्। अ॒क्तः। पुमा॑न्। अ॒ग्निः। पय॑सा। पृ॒ष्ठ्येन॑। अस्प॑न्दमानः। अ॒च॒र॒त्। व॒यो॒ऽधाः। वृषा॑। शु॒क्रम्। दु॒दु॒हे॒। पृ॒श्निः॑। ऊ॒धः॑॥ १०॥

पदार्थः-(**ऋतेन**) सत्येन व्यवहारेण (**हि**) यतः (**स्म**) एव (**वृषभः**) बलिष्ठः (**चित्**) अपि (**अक्तः**) शुभगुणैर्युक्तः (**पुमान्**) पुरुषार्थी (**अग्निः**) विद्युदिव (**पयसा**) रात्र्या (**पृष्ठ्येन**) पृष्ठे भवेन दिनेन (**अस्पन्दमानः**) किञ्चिच्चलितस्सन् (**अचरत्**) चरति (**वयोधाः**) यः कमनीयानि वयांसि जीवनधनादीनि दधाति सः (**वृषा**) सुखानां वर्षकः (**शुक्रम्**) वीर्य्यम् (**दुदुहे**) पिपर्त्ति (**पृश्निः**) अन्तरिक्षम् (**ऊधः**) रात्रिरिव॥ १०॥

अन्वयः-हे राजन्! हि यतो भवान् ऋतेन वृषभोऽक्तः पयसाऽग्निरिव पृष्ठ्येन पुमानस्पन्दमानो वयोधा वृषा सन्नचरत् पृश्निरूधरिव स चिच्छुक्रं स्म दुदुहे॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा पृथिव्या अर्द्धे भागे विद्युत् सूर्य्यरूपेण विराजतेऽपरे भागे रात्रावप्यन्तर्हिता चरति तथैव शयनजागरणे नियमेन विधाय पुरुषार्थे कृत्वा वीर्य्यं वर्धयित्वा शतायुषस्सन्तः सर्वानानन्दयत॥ १०॥

पदार्थः-हे राजन्! (**हि**) जिससे कि आप (**ऋतेन**) सत्य व्यवहार से (**वृषभः**) बलिष्ठ (**अक्तः**) उत्तम गुणों से युक्त (**पयसा**) रात्रि के साथ (**अग्निः**) अग्नि के समान (**पृष्ठ्येन**) पृष्ठ भाग में होने वाले दिन में (**पुमान्**) पुरुषार्थी (**अस्पन्दमानः**) किञ्चित् चले हुए (**वयोधाः**) सुन्दर अवस्था जीवन और धनादिकों के धारण करने (**वृषा**) सुखों की वृष्टि करने वाले होते हुए (**अचरत्**) विचरते हैं (**पृश्निः**) अन्तरिक्ष (**ऊधः**) और रात्रि के सदृश (**चित्**) सो भी (**शुक्रम्**) वीर्य्य को (**स्म**) ही (**दुदुहे**) पूरा करते हैं॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पृथिवी के अर्द्धभाग में बिजुली सूर्य रूप से शोभित होती है और दूसरे भाग में रात्रि के समय छिपी हुई चलती है, वैसे ही शयन और जागरण नियम से कर और पुरुषार्थ करके वीर्य बढ़ाय के सौ वर्ष की अवस्थायुक्त हुए सब को आनन्द दीजिये॥ १०॥

अथ राजादिक्षत्रियेभ्य उपदेशमाह॥

अब राजा आदि क्षत्रियों के लिये उपदेश अगले मन्त्र में करते हैं।

ऋ॒तेनाद्रिं॒ व्यसन् भि॒दन्त॑:समङ्गि॒रसो॒ नव॑न्त॒ गोभि॑:।
शु॒नं न॒र॒:परि॑ षदन्नु॒षास॑मा॒वि: स्व॑रभवज्जा॒ते अ॒ग्नौ॥ ११॥

ऋ॒तेन॑। अद्रि॑म्। वि। अ॒स॒न्। भि॒दन्त॑:। सम्। अङ्गि॑रस:। न॒व॒न्त॒। गोभि॑:। शु॒नम्। नर॑:। परि॑। स॒द॒न्। उ॒षस॑म्। आ॒वि:। स्व॑:। अ॒भ॒व॒त्। जा॒ते। अ॒ग्नौ॥ ११॥

पदार्थ:-(**ऋतेन**) जलेन सह वर्त्तमानम् (**अद्रिम्**) मेघम् (**वि**) (**असन्**) प्रक्षिपन्ति (**भिदन्त:**) विदारयन्त: (**सम्**) (**अङ्गिरस:**) वायव: (**नवन्त**) प्रशंसत (**गोभि:**) किरणैरिव वाग्भि: (**शुनम्**) सुखम् (**नर:**) नेतार: सन्त: (**परि**) (**सदन्**) परिषीदन्ति (**उषसम्**) प्रभातम् (**आवि:**) प्राकट्ये (**स्व:**) सूर्य्य: (**अभवत्**) भवति (**जाते**) उत्पन्ने (**अग्नौ**)॥ ११॥

अन्वय:-हे नरो विद्वांसो! यथा गोभिरङ्गिरस ऋतेन सहितमद्रिं सम्भिदन्तो व्यसन्नुषसं परिषदज्ञातेऽग्नौ स्वराविरभवत् तथा शुनं नवन्त॥ ११॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये राजादयो वीरा क्षत्रिया यथा वायुयुक्ता विद्युतो मेघं व्यस्तं कृत्वा विदीर्य्य भूमौ निपात्य सर्वान् सुखयन्ति विद्युतं विलोड्य सूर्य्यं जनयन्ति तथैव दुष्टान् विनाश्य न्यायं प्रकाश्य प्रज्ञां विलोड्य विद्याञ्जनयित्वा भानुरिव प्रकाशमाना: सन्तोऽतुलं सुखमाप्नुवन्तु॥ ११॥

पदार्थ:-हे (**नर:**) नायक होते हुए विद्वान् लोगो! जैसे (**गोभि:**) किरणों के सदृश वाणियों से (**अङ्गिरस:**) पवन (**ऋतेन**) जल के सहित वर्त्तमान (**अद्रिम्**) मेघ के (**सम्, भिदन्त:**) अच्छे प्रकार टुकड़े करते हुए (**वि, असन्**) विविध प्रकार से फेंकते हैं। (**उषसम्**) और प्रात:काल को (**परि, सदन्**) प्राप्त होते हैं वा (**जाते**) उत्पन्न हुए (**अग्नौ**) अग्नि में (**स्व:**) सूर्य्य (**आवि:**) प्रकट (**अभवत्**) होता है, वैसे (**शुनम्**) सुख की (**नवन्त**) प्रशंसा करो॥ ११॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा आदि वीर क्षत्रिय जैसे पवन से युक्त बिजुलियाँ मेघ को इधर-उधर चलाय और तोड़ पृथिवी पर गिरा के सब को सुख देती हैं और दूसरी बिजुली का विलोडन करके सूर्य्य को उत्पन्न करती हैं, वैसे ही दुष्ट पुरुषों का नाश और न्याय का प्रकाश, बुद्धि का विलोडन और विद्या को उत्पन्न करके सूर्य्य के सदृश प्रकाशमान हुए अतुल सुख को प्राप्त होओ॥ ११॥

अथ सङ्गदोषादोषौ रक्षणविषयञ्चाह॥

अब सङ्गदोष, अदोष और रक्षा विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तेन॑ दे॒वीर॒मृता॒ अमृ॑क्ता॒ अर्णो॑भि॒रापो॒ मधु॑मद्भिरग्ने।

वा॒जी न सर्गे॑षु॒ प्रस्तु॑भा॒न: प्र सदमित्स्रवि॑तवे दधन्यु:॥ १२॥

ऋ॒तेन॑। दे॒वी:। अ॒मृता॑:। अमृ॑क्ता:। अर्ण॑:ऽभि:। आप॑:। मधु॑मत्ऽभि:। अ॒ग्ने॒। वा॒जी। न। सर्गे॑षु। प्रऽस्तु॑भा॒न:। प्र। सद॑म्। इत्। स्रवि॑तवे। द॒ध॒न्यु॒:॥ १२॥

पदार्थः-(**ऋतेन**) सत्येन (**देवीः**) दिव्याः (**अमृताः**) कारणरूपेण नाशरहिताः (**अमृक्ताः**) अशोधिताः (**अर्णोभिः**) जलैः (**आपः**) प्राणाः (**मधुमद्भिः**) बहुभिर्मधुरादिगुणयुक्तैः (**अग्ने**) विद्वन् (**वाजी**) बह्वन्नवान् (**न**) इव (**सर्गेषु**) सृष्टेषु कार्येषु (**प्रस्तुभानः**) प्रकर्षेण धरन् (**प्र**) (**सदम्**) प्राप्तं वस्तु (**इत्**) एव (**स्रवितवे**) स्रोतुं गन्तुम् (**दधन्युः**) धरन्त। अत्र **वाच्छन्दसी**ति नुडागमो यासुडभावः॥१२॥

अन्वयः-हे अग्ने! यथर्त्तेन मधुमद्भिरर्णोभिस्सहाऽमृक्ता देवीरमृता आपो स्रवितवे सदं प्रदधन्युस्तथेदेव सर्गेषु वाजी न प्रस्तुभानः सँस्त्वं भव॥१२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथा शुद्धा आपः सुखकारिण्योऽशुद्धा दुःखप्रदा भवन्ति तथैव शुभगुणसङ्ग आनन्दप्रदो दोषसङ्गो दुःखप्रदश्च भवति। यथैश्वर्यवान् धार्मिको जनः कृपया बुभुक्षितादीन् पालयति तथैव सज्जनाः सर्वान् रक्षन्ति॥१२॥

पदार्थः-हे (**अग्ने**) विद्वान् पुरुष जैसे (**ऋतेन**) सत्य से (**मधुमद्भिः**) बहुत मधुर आदि गुणों से युक्त (**अर्णोभिः**) जलों के साथ (**अमृक्ताः**) नहीं शुद्ध किये गए (**देवीः**) उत्तम श्रेष्ठ (**अमृताः**) कारणरूप से नाशरहित (**आपः**) प्राणरूप पवन (**स्रवितवे**) जाने को (**सदम्**) प्राप्त वस्तु (**प्र, दधन्युः**) धारण करते हैं, वैसे (**इत्**) ही (**सर्गेषु**) किये हुए कार्य्यों में (**वाजी**) बहुत अन्न वाले के (**न**) सदृश (**प्रस्तुभानः**) अत्यन्त धारण करते हुए आप प्रकट हूजिये॥१२॥

भावार्थः-इस मन्त्र में उपमा [और] वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे शुद्ध जल सुखकारी और अशुद्ध दुःख देने वाले होते हैं, वैसे ही उत्तम गुणों का सङ्ग आनन्ददायक और दोषों का सङ्ग दुःख देने वाला होता है। और जैसे ऐश्वर्य्ययुक्त धार्मिकजन कृपा से बुभुक्षित आदि का पालन करता है, वैसे ही सज्जन लोग सब की रक्षा करते हैं॥१२॥

बुद्धिमत्ताविषयमाह॥

अब बुद्धिमानों के बुद्धिमत्ता विषय को कहते हैं॥

मा कस्य॑ य॒क्षं सद॒मिद्धु॒रो गा॒ मा वे॒शस्य॑ प्रमि॒नतो मापेः।

मा भ्रात॑ु॒रग्ने॒ अनृ॑जोर्ऋ॒णं वे॒र्मा सख्यु॒र्दक्षं॑ रि॒पोर्भु॑जेम॥ १३॥

मा। कस्य॑। य॒क्षम्। सद॑म्। इत्। हु॒रः। गा॒ः। मा। वे॒शस्य॑। प्र॒ऽमि॒न॒तः। मा। आ॒पेः। मा। भ्रात॑ुः। अ॒ग्ने॒। अनृ॑जोः। ऋ॒णम्। वे॒ः। मा। सख्यु॑ः। दक्ष॑म्। रि॒पोः। भु॒जे॒म॒॥ १३॥

पदार्थः-(**मा**) (**कस्य**) (**यक्षम्**) सङ्गन्तव्यम् (**सदम्**) वस्तु (**इत्**) एव (**हुरः**) कुटिलस्य (**गाः**) प्राप्नुयाः (**मा**) (**वेशस्य**) प्रवेशस्य (**प्रमिनतः**) प्रकर्षेण हिंसतः (**मा**) (**आपेः**) प्राप्तस्य (**मा**) (**भ्रातुः**) बन्धोः (**अग्ने**) अग्निरिव प्रकाशमान (**अनृजोः**) कुटिलस्य (**ऋणम्**) (**वेः**) प्राप्नुयाः (**मा**) (**सख्युः**) मित्रस्य (**दक्षम्**) बलम् (**रिपोः**) शत्रोः (**भुजेम**) अभ्यवहरेम॥१३॥

अन्वयः-हे अग्ने! त्वमनृजोः कस्यचित्प्रमिनतो वेशस्य हुरस्सदं मा गाः। अनृजोरापेर्य्यक्षं सदं मा गा अनृजोर्भ्रातुर्यक्षं सदं मा गाः। अनृजोः सख्युर्दक्षं मा वेरवृजो रिपोर्ऋणं मा वेः। येन वयं सुखमिद्भुजेम॥१३॥

भावार्थः-त एव धीमन्तो विज्ञेया येऽन्यायेन कस्यचिद्वस्तु दुष्टवेशं हिंसकसङ्गं न्यायेन प्राप्तस्य धनस्याऽन्यथा व्ययं दुष्टबन्धोः सङ्गं शत्रुविश्वासमकृत्वाऽऽनन्दं भुञ्जीरन्॥१३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश प्रकाशमान! आप **(अनृजोः)** कुटिल **(कस्य)** किसी **(प्रमिनतः)** अत्यन्त हिंसा करने वाले **(वेशस्य)** प्रवेश के **(हुरः)** कुटिल कार्यसम्बन्धी **(सदम्)** वस्तु को **(मा)** मत **(गाः)** प्राप्त होओ और कुटिल **(आपेः)** प्राप्त हुए के **(यक्षम्)** प्राप्त होने योग्य वस्तु को **(मा)** मत प्राप्त होओ, कुटिल **(भ्रातुः)** बन्धु के प्राप्त होने योग्य वस्तु को **(मा)** मत प्राप्त होओ, कुटिल **(सख्युः)** मित्र के **(दक्षम्)** बल को **(मा)** मत **(वेः)** प्राप्त होओ, कुटिल **(रिपोः)** शत्रु के **(ऋणम्)** ऋण को **(मा)** मत प्राप्त होओ, जिससे हम लोग सुख का **(इत्)** ही **(भुजेम)** व्यवहार करें॥१३॥

भावार्थः-उन्हीं लोगों को बुद्धिमान् समझना चाहिये कि जो अन्याय से किसी का वस्तु, दुष्टवेश, हिंसा करनेवाले का संग, न्याय से प्राप्त हुए धन का व्यर्थ खर्च, दुष्ट बन्धु का संग और शत्रु का विश्वास नहीं करके आनन्द का भोग करें॥१३॥

अथ राज्यपालनविषयमाह॥

अब राज्यपालन विषय को अगले मन्त्र में कहते हैं॥

रक्षा॑ णो अग्ने॒ तव॒ रक्ष॑णेभी रारक्षा॒णः सु॑मख प्रीणा॒नः।

प्रति॑ ष्फुर॒ वि रु॑ज वी॒ड्वंहो॑ ज॒हि रक्षो॒ महि॑ चिद्वावृधा॒नम्॥१४॥

रक्ष॑। नः। अ॒ग्ने॒। तव॑। रक्ष॑णेभिः। र॒र॒क्षा॒णः। सु॒ऽम॒ख॒। प्री॒णा॒नः। प्रति॑। स्फु॒र॒। वि रु॒ज॒। वी॒ळु। अंह॑ः। ज॒हि। रक्षः॑। महि॑। चि॒त्। व॒वृ॒धा॒नम्॥१४॥

पदार्थः-**(रक्ष)** पालय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मान् **(अग्ने)** राजन् **(तव)** **(रक्षणेभिः)** अनेकविधैरुपायैः **(रारक्षाणः)** भृशं रक्षन्त्सन् **(सुमख)** सुष्ठुन्यायव्यवहारपालकः **(प्रीणानः)** प्रसन्नः प्रसादयन् **(प्रति)** **(स्फुर)** पुरुषार्थय **(वि)** **(रुज)** प्रभग्नं कुरु **(वीळु)** दृढम् **(अंहः)** पापम् **(जहि)** **(रक्षः)** दुष्टं शत्रुम् **(महि)** महान्तम् **(चित्)** अपि **(वावृधानम्)** भृशं वर्धमानम्॥१४॥

अन्वयः-हे सुमखाऽग्ने! त्वं नो रक्ष महि वावृधानं रारक्षाणः प्रीणानः सन् प्रति स्फुर। शत्रुं वीळु विरुज अंहो जहि रक्षो विरुज यतस्तव चिद्रक्षणेभिर्वयं सुखिनः स्याम॥१४॥

भावार्थः-त एव राजानः कीर्त्तिभाजो ये दुष्टानां दुष्टतां निवार्य्य श्रेष्ठानां श्रेष्ठतां वर्धयित्वा राज्यं सततं पितृवत्पालयेयुः॥१४॥

पदार्थः-हे **(सुमख)** उत्तम न्याय व्यवहार के पालन करने वाले **(अग्ने)** राजन्! आप **(नः)** हम लोगों की **(रक्ष)** रक्षा करो और **(महि)** बड़े **(वावृधानम्)** अत्यन्त वृद्धि को प्राप्त हुए की **(रारक्षाणः)** रक्षा करते **(प्रीणानः)** प्रसन्न होते वा प्रसन्न करते हुए, **(प्रति, स्फुर)** पुरुषार्थ करो और शत्रु को **(वीळु)** दृढ़ **(वि, रुज)** विशेषता से अच्छे प्रकार भग्न करो और **(अंहः)** पाप का **(जहि)** नाश करो **(रक्षः)** दुष्ट शत्रु का भंग करो और जिससे **(तव)** आपके **(चित्)** भी **(रक्षणेभिः)** अनेक प्रकार के उपायों से हम लोग सुखी होवें॥१४॥

भावार्थः-वे ही राजा लोग यश के भागी हैं कि जो दुष्ट पुरुषों की दुष्टता को दूर कर और श्रेष्ठ पुरुषों की श्रेष्ठता बढ़ा के राज्य का निरन्तर पिता के समान अर्थात् पिता अपने पुत्र की पालना करता, वैसे पालन करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एभिर्भव सुमना अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान्।
उत ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत॥ १५॥

एभिः। भव। सुऽमनाः। अग्ने। अर्कैः। इमान्। स्पृश। मन्मऽभिः। शूरः। वाजान्। उत। ब्रह्माणि। अङ्गिरः। जुषस्व। सम्। ते। शस्तिः। देवऽवाता। जरेत॥ १५॥

पदार्थः-(**एभिः**) धार्मिकै रक्षकैर्विद्वद्भिः सह **(भव)** **(सुमनाः)** शोभनं मनो यस्य सः **(अग्ने)** विद्वन् **(अर्कैः)** सत्कर्त्तव्यैः **(इमान्)** **(स्पृश)** गृहाण **(मन्मभिः)** विद्वद्भिः **(शूरः)** **(वाजान्)** प्राप्तव्याञ्छुभगुणकर्मस्वभावान् **(उत)** **(ब्रह्माणि)** महान्ति धनानि **(अङ्गिरः)** प्राण इव वर्त्तमान **(जुषस्व)** सेवस्व **(सम्)** **(ते)** तव **(शस्तिः)** प्रशंसा **(देववाता)** देवैर्विद्वद्भिः कृता **(जरेत)** प्रशंसिता भवेत्॥१५॥

अन्वयः-हे अङ्गिरः शूराग्ने राजंस्त्वमेभिरर्कैर्मन्मभिस्सह सुमना भवेमान् वाजान् स्पृश उत ब्रह्माणि सञ्जुषस्व यतस्ते देववाता शस्तिर्जरेत॥१५॥

भावार्थः-हे राजन्! भवानाप्तानां विदुषां सङ्गं सततं कुरु तदुपदेशेन न्यायेन राज्यं पालयित्वा प्रशंसितो भवतु॥१५॥

पदार्थः-हे **(अङ्गिरः)** प्राण के सदृश वर्त्तमान **(शूर)** वीर **(अग्ने)** विद्वन् राजन्! आप **(एभिः)** इन धार्मिक रक्षक और विद्यावान् **(अर्कैः)** सत्कार करने योग्य **(मन्मभिः)** विद्वानों के साथ **(सुमनाः)** उत्तम मन युक्त **(भव)** हूजिये और **(इमान्)** इन **(वाजान्)** प्राप्त होने योग्य उत्तम गुण, कर्म और स्वभाव वालों को **(स्पृश)** ग्रहण करिये **(उत)** और **(ब्रह्माणि)** बड़े-बड़े धनों का **(सम् जुषस्व)** अच्छे प्रकार सेवन करिये जिससे कि **(ते)** आपकी **(देववाता)** विद्वानों से की गई **(शस्तिः)** प्रशंसा **(जरेत)** प्रशंसित हो अर्थात् अधिक विख्यात हो॥१५॥

भावार्थः–हे राजन्! आप यथार्थवक्ता विद्वानों का संग निरन्तर करिये और उनके उपदेश से न्यायपूर्वक राज्य का पालन करके प्रशंसित हूजिये॥१५॥

अथ प्रजाविषयमाह॥

अब प्रजा विषय को अगले मन्त्र में कहते हैं॥

एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः॥ १६॥ २२॥

एता। विश्वा। विदुषे। तुभ्यम्। वेधः। नीथानि। अग्ने। निण्या। वचांसि। निऽवचना। कवये। काव्यानि। अशंसिषम्। मतिऽभिः। विप्रः। उक्थैः॥ १६॥

पदार्थः–(**एता**) एतानि (**विश्वा**) सर्वाणि (**विदुषे**) (**तुभ्यम्**) (**वेधः**) मेधाविन् (**नीथानि**) प्रापितानि (**अग्ने**) राजन् (**निण्या**) निर्णीतानि (**वचांसि**) वचनानि (**निवचना**) नितरामुच्यन्तेऽर्था यैस्तानि (**कवये**) विक्रान्तप्रज्ञाय (**काव्यानि**) कविभिर्निर्मितानि (**अशंसिषम्**) प्रशंसेयम् (**मतिभिः**) विद्वद्भिस्सह (**विप्रः**) मेधावी (**उक्थैः**) प्रशंसितुमर्हैः॥१६॥

अन्वयः-हे वेधोऽग्ने! विप्रोऽहमुक्थैर्मतिभिः सह यानि काव्यान्यशंसिषं तानि विश्वैता निण्या निवचना वचांसि विदुषे कवये तुभ्यं नीथानि प्रशंसेयम्॥१६॥

भावार्थः–सैव निश्चिता प्रशंसा वेदितव्या या धार्मिकैर्विद्वद्भिः क्रियेत, अध्यापकोपदेशकैरध्येतार उपदेश्याश्च सदैव सत्यवादिनो विद्वांसो विधातव्या इति॥१६॥

अत्राग्निराजप्रजादिकृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः–हे (**वेधः**) बुद्धिमान् (**अग्ने**) राजन्! (**विप्रः**) मेधावी जन मैं (**उक्थैः**) प्रशंसा करने योग्य (**मतिभिः**) विद्वानों के साथ जो (**काव्यानि**) कवियों ने रचे शास्त्र उनकी (**अशंसिषम्**) प्रशंसा करता हूँ और उन (**विश्वा**) सम्पूर्ण (**एता**) इन (**निण्या**) निर्णय किये गये (**निवचना**) अत्यन्त अर्थों को कहने वाले (**वचांसि**) वचनों को (**विदुषे**) विद्वान् (**कवये**) उत्तम बुद्धि वाले (**तुभ्यम्**) आपके लिये (**नीथानि**) प्राप्त किये गये प्रशंसूं अर्थात् वह आपको प्राप्त हुए ऐसी प्रशंसा करूं॥१६॥

भावार्थः–वही निश्चित प्रशंसा जानने योग्य है कि जो धार्मिक विद्वानों से की जाय। अध्यापक और उपदेशक जनों को चाहिये कि पढ़ने और उपदेश देनेवालों को सदा ही सत्यवादी और विद्वान् करें॥१६॥

इस सूक्त में अग्नि, राजा और प्रजादिकों के कृत्य और गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

॥यह तीसरा सूक्त और बाईसवां वर्ग समाप्त हुआ॥

अथ पञ्चदशर्चस्य चतुर्थस्य सूक्तस्य वामदेव ऋषिः। अग्नीरक्षोहा देवता। १,२,४,५,८ भुरिक् पङ्क्तिः। ९ स्वराट् पङ्क्तिः। १२ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, १०, ११, १५ निचृत्त्रिष्टुप्। ६ विराट् त्रिष्टुप्। ७, १३ त्रिष्टुप् छन्दः। धैवतः स्वरः। १४ स्वराड्बृहती छन्दः। मध्यमः स्वरः॥

अथ राजविषये सेनापतिकृत्यमाह॥

अब पन्द्रह ऋचा वाले चौथे सूक्त का आरम्भ है। उसके प्रथम मन्त्र में राजविषय में सेनापति के काम को कहते हैं॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥ १॥

कृणुष्व। पाजः। प्रऽसितिम्। न। पृथ्वीम्। याहि। राजाऽइव। अमऽवान्। इभेन। तृष्वीम्। अनु। प्रऽसितिम्। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः॥ १॥

पदार्थः-(**कृणुष्व**) (**पाजः**) बलम् (**प्रसितिम्**) प्रबद्धाम् (**न**) इव (**पृथ्वीम्**) भूमिम् (**याहि**) (**राजेव**) (**अमवान्**) बलवान् (**इभेन**) हस्तिना (**तृष्वीम्**) पिपासिताम् (**अनु**) (**प्रसितिम्**) बन्धनम् (**द्रूणानः**) शीघ्रकारी (**अस्ता**) प्रक्षेप्ता (**असि**) (**विध्य**) (**रक्षसः**) दुष्टान् (**तपिष्ठैः**) अतिशयेन सन्तापकैः शस्त्रादिभिः॥ १॥

अन्वयः-हे सेनेश! त्वं राजेवाऽमवानिभेन याहि प्रसितिं पृथ्वीं न पाजः कुणुष्व यतः प्रसितिं तृष्वीमनु द्रूणानोऽस्तासि तस्मात्तपिष्ठै रक्षसो विध्य॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे राजजना! यूयं पृथ्वीव दृढं बलं कृत्वा राजवन्न्यायाधीशा भूत्वा तृषिताम्मृगीमनुधावन् वृक इव दुष्टान् दस्यूननुधावन्तस्तान् घ्नत॥ १॥

पदार्थः-हे सेना के ईश! [आप] (**राजेव**) राजा के सदृश (**अमवान्**) बलवान् (**इभेन**) हाथी से (**याहि**) जाइये प्राप्त हूजिये (**प्रसितिम्**) दृढ़ बंधी हुई (**पृथ्वीम्**) भूमि के (**न**) सदृश (**पाजः**) बल (**कृणुष्व**) करिये जिससे (**प्रसितिम्**) बन्धन और (**तृष्वीम्**) पियासी के प्रति (**अनु, द्रूणानः**) अनुकूल शीघ्रता करने वाले और (**अस्ता**) फेंकने वाला (**असि**) हो इससे (**तपिष्ठैः**) अतिशय सन्ताप देने वाले शस्त्र आदिकों से (**रक्षसः**) दुष्टों को (**विध्य**) पीड़ा देओ॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजसम्बन्धी जनो! आप लोग पृथिवी के सदृश दृढ़ बल करके, राजा के सदृश न्यायाधीश होकर, पिपासित मृगी के पीछे दौड़ते हुए भेड़िये के सदृश दुष्ट डाकू जो कि अनुधावन करते अर्थात् जो कि पथिकादिकों के पीछे दौड़ते हुए, उनका नाश करो॥ १॥

अथ राजविषये सामान्यतो राजजनविषयमाह॥

अब राज विषय में सामान्य से राजजनों के विषय को अगले मन्त्र में कहते हैं॥

तवं भ्रमासं आशुया पतन्त्यनु स्पृश धृषता शोशुचानः।

तपूंष्यग्ने जुह्वा पतङ्गानसंन्दितो वि सृज विष्वगुल्काः॥ २॥

तवं। भ्रमासंः। आशुऽया। पतन्ति। अनु। स्पृश। धृषता। शोशुचानः। तपूंषि। अग्ने। जुह्वा। पतङ्गान्। असंम्ऽदितः। वि। सृज। विष्वक्। उल्काः॥ २॥

पदार्थः-(**तव**) (**भ्रमासः**) भ्रमणानि (**आशुया**) क्षिप्राणि (**पतन्ति**) (**अनु**) (**स्पृश**) (**धृषता**) प्रगल्भेन सैन्येन (**शोशुचानः**) भृशं पवित्रः सन् (**तपूंषि**) प्रतप्तानि (**अग्ने**) पावकवद्वर्त्तमान (**जुह्वा**) होमसाधनेन (**पतङ्गान्**) अग्निकणा इव वर्त्तमानानश्वान् (**असन्दितः**) अखण्डितः (**वि**) (**सृज**) (**विष्वक्**) सर्वशः (**उल्काः**) विद्युतः॥ २॥

अन्वयः-हे अग्ने! ये तवाऽऽशुया भ्रमासः पतन्ति तान् धृषता शोशुचानोऽनुस्पृश जुह्वाग्निस्तपूंषीव पतङ्गाननु स्पृश। असन्दितः सन्नुल्का विष्वग्विसृज॥ २॥

भावार्थः-ये राजजना स्फूर्त्तिमन्तः सन्त आशुकारिणः स्युस्तेऽखण्डितवीर्यो भूत्वा विद्युत्प्रयोगान् ब्रह्मास्त्राद्याञ्छत्रूणामुपरि कृत्वा विजयं प्राप्नुवन्तु॥ २॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश वर्त्तमान! जो (**तव**) आपके (**आशुया**) शीघ्र (**भ्रमासः**) भ्रमण (**पतन्ति**) गिरते हैं, उनको (**धृषता**) प्रगल्भ सेना के साथ (**शोशुचानः**) अत्यन्त पवित्र हुए (**अनु, स्पृश**) स्पर्श करो और (**जुह्वा**) होम के साधन से अग्नि (**तपूंषि**) तपाये गये पदार्थों को जैसे वैसे (**पतङ्गान्**) अग्निकणों के सदृश वर्त्तमान घोड़ों को अनुकूलता से स्पर्श करो (**असन्दितः**) खण्डरहित हुए (**उल्काः**) बिजुलियों को (**विष्वक्**) सर्व प्रकार (**वि, सृज**) छोड़िये॥ २॥

भावार्थः-जो राजजन फुरती वाले होते हुए शीघ्र कार्य्यकारी हों, वे अखण्डितवीर्य्य अर्थात् पूर्णबल वाले होकर बिजुली के प्रयोगों और ब्रह्मास्त्र आदि अस्त्रों को शत्रुओं के ऊपर कर विजय को प्राप्त हों॥ २॥

पुना राजविषयमाह॥

फिर राज विषय को अगले मन्त्र में कहते हैं॥

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः।

यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत्॥ ३॥

प्रतिं। स्पशंः। वि। सृज। तूर्णिंऽतमः। भव। पायुः। विशः। अस्याः। अदब्धः। यः। नः। दूरे। अघऽशंसः। यः। अन्ति। अग्ने। माकिंः। ते। व्यथिंः। आ। दधर्षीत्॥ ३॥

पदार्थः-(**प्रति**) (**स्पशः**) स्पर्शकान् (**वि**) (**सृज**) (**तूर्णितमः**) अतिशीघ्रकारी (**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**पायुः**) पालकः (**विशः**) प्रजायाः (**अस्याः**) (**अदब्धः**) अहिंसकः (**यः**)

(नः) अस्माकम् **(दूरे)** **(अघशंसः)** पापप्रशंसकस्तेनः **(यः)** **(अन्ति)** समीपे **(अग्ने)** विद्वन् राजन् **(माकिः)** **(ते)** तव **(व्यथिः)** पीडा **(आ)** **(दधर्षीत्)** धृष्णुयात्॥३॥

अन्वयः-हे अग्ने! त्वं तूर्णितमस्सन् स्पशो विसृज। अस्या विशोऽदब्धः पायुः प्रति भव योऽघशंसो नो दूरे योऽन्ति वर्त्तेत स ते व्यथिर्माकिरादधर्षीत्॥३॥

भावार्थः-हे राजंस्त्वं शुभान् गुणान् गृहीत्वा प्रजाः सम्पाल्य ये दूरसमीपस्था दस्यवस्तान् हिन्धि यतस्सर्वेषां सुखं स्यात्॥३॥

पदार्थः-हे **(अग्ने)** विद्वन् राजन्! आप **(तूर्णितमः)** अत्यन्त शीघ्रकारी होते हुए **(स्पशः)** अत्यन्त स्पर्श करने अर्थात् मुंह लगने वालों का **(वि, सृज)** त्याग करो, और **(अस्याः)** इस **(विशः)** प्रजा के **(अदब्धः)** नहीं मारने और **(पायुः)** पालन करने वाले **(प्रति, भव)** होओ **(यः)** जो **(अघशंसः)** पाप की प्रशंसा करनेवाला चोर **(नः)** हम लोगों के **(दूरे)** दूर देश में वा **(यः)** जो **(अन्ति)** समीप में वर्त्तमान हो वह **(ते)** आपको **(व्यथिः)** पीड़ारूप **(माकिः)** मत **(आ, दधर्षीत्)** ढीठ हो॥३॥

भावार्थः-हे राजन्! आप उत्तम गुणों को ग्रहण करके और प्रजा का पालन करके जो दूर और समीप में वर्त्तमान डाकू आदि दुष्ट पुरुष उनका नाश करो, जिससे सब को सुख हो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उदग्ने तिष्ठ प्रत्या तनुष्व न्य१मित्राँ ओषतात् तिग्महेते।

यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्॥४॥

उत्। अग्ने। तिष्ठ। प्रति। आ। तनुष्व। नि। अमित्रान्। ओषतात्। तिग्मऽहेते। यः। नः। अरातिम्। समऽइधान। चक्रे। नीचा। तम्। धक्षि। अतसम्। न। शुष्कम्॥४॥

पदार्थः-(**उत्**) **(अग्ने)** अग्निरिव वर्त्तमान **(तिष्ठ)** उद्युक्तो भव **(प्रति)** **(आ)** **(तनुष्व)** विस्तृणीहि **(नि)** **(अमित्रान्)** शत्रून् **(ओषतात्)** दह **(तिग्महेते)** तिग्मा तीव्रा हेतिर्वृद्धिर्यस्य तत्सम्बुद्धौ **(यः)** **(नः)** **(अरातिम्)** शत्रुम् **(समिधान)** सम्यक् प्रकाशमान **(चक्रे)** **(नीचा)** नीचान् **(तम्)** **(धक्षि)** दहसि **(अतसम्)** कूपम् **(न)** इव **(शुष्कम्)** जलार्द्रभावरहितम्॥४॥

अन्वयः-हे समिधानाऽग्ने! त्वमुत्तिष्ठाऽऽतनुष्वाऽमित्रान् प्रति न्योषतात्। हे तिग्महेते! यो नोऽरातिममित्रान्नीचा चक्रे तं शुष्कमतसं न यतस्त्वं धक्षि तस्माद्राज्यमर्हसि॥४॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरालस्यं विहाय पुरुषार्थं विसृत्य शत्रवो दग्धव्या अन्धकूप इव कारागृहे बन्धनीयाः। नीचतां प्रापणीयाः। य एवं विदधति तान् राजा गुरुवत्सेवेत॥४॥

पदार्थः-हे **(समिधान)** उत्तम प्रकार प्रकाशमान और **(अग्ने)** अग्नि के सदृश वर्त्तमान आप

(उत्, तिष्ठ) उद्युक्त हूजिये **(आ, तनुष्व)** अच्छे प्रकार विस्तृत हूजिये **(अमित्रान्)** शत्रुओं के **(प्रति)** प्रति **(नि, ओषतात्)** निरन्तर दाह देओ **(तिग्महेते)** हे अत्यन्त तीव्र वृद्धि वाले! **(यः)** जो **(नः)** हम लोगों के **(अरातिम्)** एक शत्रु और अनेक शत्रुओं को **(नीचा)** नीच **(चक्रे)** कर चुका अर्थात् सब से बढ़ गया **(तम्)** उसको **(शुष्कम्)** गीलेपन से रहित **(अतसम्)** कूप के **(न)** सदृश जिससे आप **(धक्षि)** जलाते हो, इससे वह आप राज्य के योग्य हो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि आलस्य त्याग के पुरुषार्थ का विस्तार करके शत्रुओं को जलावें और अन्धकूप के सदृश कारागृह में उनका बन्धन करें और नीचता को प्राप्त करे [=करायें]। जो लोग ऐसा करते हैं, उनकी राजा गुरु के सदृश सेवा करे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऊ॒र्ध्वो भ॑व॒ प्रति॑ वि॒ध्याध्य॒स्मदा॒विष्कृ॑णुष्व॒ दैव्या॑न्यग्ने।
अव॑ स्थि॒रा त॑नुहि यातु॒जूना॑ जा॒मिमजा॑मिं॒ प्र मृ॑णीहि॒ शत्रू॑न्॥५॥२३॥

ऊ॒र्ध्वः। भ॒व॒। प्रति॑। वि॒ध्य॒। अधि॑। अ॒स्मत्। आ॒विः। कृ॒णु॒ष्व॒। दैव्या॑नि। अ॒ग्ने॒। अव॑। स्थि॒रा। त॒नु॒हि॒। या॒तु॒ऽजूना॑म्। जा॒मिम्। अजा॑मिम्। प्र। मृ॒णी॒हि॒। शत्रू॑न्॥५॥

पदार्थः-(**ऊर्ध्वः**) उन्नतः **(भव)** **(प्रति)** **(विध्य)** **(अधि)** उपरिभावे **(अस्मत्)** **(आविः)** प्राकट्ये **(कृणुष्व)** **(दैव्यानि)** देवैर्विद्वद्भिः कृतानि कर्माणि **(अग्ने)** पावक इव तेजस्विन् **(अव)** **(स्थिरा)** स्थिराणि सैन्यानि **(तनुहि)** विस्तृणीहि **(यातुजूनाम्)** प्राप्तवेगानाम् **(जामिम्)** भोगम् **(अजामिम्)** अभोगम् **(प्र)** **(मृणीहि)** हिन्धि **(शत्रून्)** अरीन्॥५॥

अन्वयः-हे अग्ने! त्वमस्मदूर्ध्वोऽधि भव स्थिरा दैव्यानि तनुहि यातुजूनां जामिमजामि-माविष्कृणुष्व शत्रून् प्राऽव मृणीहि प्रति विध्य॥५॥

भावार्थः-ये मनुष्याः स्वस्मादुत्कृष्टान् दृष्ट्वा हर्षन्ति, अनुत्कृष्टान् दृष्ट्वा शोचन्ति भोगयुक्तान् दृष्ट्वा प्रमोदन्तेऽभोगान् दृष्ट्वाऽप्रसन्नयन्ति त एव राजकर्म्मसु स्थिरा भवन्तु॥५॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्विन्! आप **(अस्मत्)** हम लोगों से **(ऊर्ध्वः)** उन्नत **(अधि)** उपरिभाव में अर्थात् ऊपर में रहने वाले **(भव)** हूजिये **(स्थिरा)** स्थिर सेना और **(दैव्यानि)** विद्वानों के किये कर्म्मों का **(तनुहि)** विस्तार करिये **(यातुजूनाम्)** वेग को प्राप्त हुए प्राणियों के **(जामिम्)** भोग और **(अजामिम्)** अभोग को **(आविः)** प्रकट **(कृणुष्व)** करिये **(शत्रून्)** शत्रुओं का **(प्र, अव, मृणीहि)** अच्छे प्रकार नाश करिये और **(प्रति, विध्य)** वार-वार पीड़ा दीजिये॥५॥

भावार्थः-जो मनुष्य अपने से उत्कृष्ट अर्थात् श्रेष्ठों को देख के प्रसन्न होते, अनुत्कृष्ट अर्थात् दुःखियों को देख के शोक करते, भोगयुक्तों को देख के आनन्दित होते और भोगरहितों को देख के

अप्रसन्न होते, वे ही राजकर्मों में स्थिर होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स ते॑ जानाति सुम॒तिं य॑विष्ठ॒ य ईव॑ते॒ ब्रह्म॑णे गा॒तुमैर॑त्॥

विश्वा॑न्यस्मै सु॒दिना॑नि रा॒यो द्यु॒म्नान्य॒र्यो वि दुरो॑ अ॒भि द्यौत्॥६॥

सः। ते॒। जा॒ना॒ति। सु॒ऽम॒तिम्। य॒वि॒ष्ठ॒। यः। ईव॑ते। ब्रह्म॑णे। गा॒तुम्। ऐर॑त्। विश्वा॑नि। अ॒स्मै॒। सु॒ऽदिना॑नि। रा॒यः। द्यु॒म्नानि॑। अ॒र्यः। वि। दुरः॑। अ॒भि। द्यौत्॥६॥

पदार्थः-(**सः**) विद्वान् (**ते**) तव (**जानाति**) (**सुमतिम्**) श्रेष्ठां प्रज्ञाम् (**यविष्ठ**) (**यः**) (**ईवते**) विद्याव्याप्ताय (**ब्रह्मणे**) वेदविदे (**गातुम्**) प्रशंसितां वाणीम् (**ऐरत्**) प्रापयेत् (**विश्वानि**) सर्वाणि (**अस्मै**) (**सुदिनानि**) सुखकराणि (**रायः**) धनानि (**द्युम्नानि**) यशांसि (**अर्यः**) स्वामी (**वि**) (**दुरः**) द्वाराणि (**अभि**) (**द्यौत्**) द्योतयेत्॥६॥

अन्वयः-हे यविष्ठ! योऽर्य ईवते ब्रह्मणे गातुमरैदस्मै विश्वानि सुदिनानि रायो द्युम्नानि दुरोऽभि वि द्यौत् स ते सुमतिं जानाति॥६॥

भावार्थः-हे राजन्! ये नित्यमङ्गलाचारिणो यशस्विनोऽनुरक्ताश्शूरा राजव्यवहारविदस्त्वां बोधयेयुस्ताँस्त्वं सुहृदो जानीहि॥६॥

पदार्थः-हे (**यविष्ठ**) अत्यन्त युवावस्थायुक्त! (**यः**) जो (**अर्यः**) स्वामी (**ईवते**) विद्या से व्याप्त (**ब्रह्मणे**) वेद जानने वाले के लिये (**गातुम्**) प्रशंसित वाणी को (**ऐरत्**) प्राप्त कराये (**अस्मै**) इसके लिये (**विश्वानि**) सम्पूर्ण (**सुदिनानि**) सुख करने वाले दिनों (**रायः**) धनों (**द्युम्नानि**) प्रकाशित यशों (**दुरः**) और यश के द्वारों को (**अभि, वि, द्यौत्**) प्रकाशित करे (**सः**) वह विद्वान् (**ते**) आपकी (**सुमतिम्**) श्रेष्ठ बुद्धि को (**जानाति**) जानता है॥६॥

भावार्थः-हे राजन्! जो लोग नित्य मङ्गल आचरण करने वाले यशयुक्त अनुरक्त अर्थात् स्नेही शूरवीर और राज्यव्यवहार के जानने वाले आपको चितावें, उनको आप मित्र जानिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सेद॑ग्ने अस्तु सु॒भगः॑ सु॒दानु॒र्यस्त्वा॒ नित्ये॑न ह॒विषा॒ य उ॒क्थैः॥

पिप्री॑षति॒ स्व आयु॑षि दुरो॒णे विश्वेद॑स्मै सु॒दिना॒ सास॑दि॒ष्टिः॥७॥

सः। इत्। अ॒ग्ने॒। अ॒स्तु॒। सु॒ऽभगः॑। सु॒ऽदानुः॑। यः। त्वा॒। नित्ये॑न। ह॒विषा॑। यः। उ॒क्थैः। पिप्री॑षति। स्वे। आयु॑षि। दु॒रो॒णे। विश्वा॑। इत्। अ॒स्मै॒। सु॒ऽदिना॑। सा। अ॒स॒त्। इ॒ष्टिः॥७॥

पदार्थः-(**सः**) राजा (**इत्**) एव (**अग्ने**) विद्याप्रकाशितसभ्यजन (**अस्तु**) (**सुभगः**) प्रशस्तैश्वर्य्यः (**सुदानुः**) उत्तमदानः (**यः**) (**त्वा**) त्वाम् (**नित्येन**) अविनाशिना (**हविषा**) होतव्येन (**यः**) (**उक्थैः**) प्रशंसनैः (**पिप्रीषति**) कमितुमिच्छति (**स्वे**) स्वकीये (**आयुषि**) जीवने (**दुरोणे**) (**विश्वा**) अखिलानि (**इत्**) एव (**अस्मै**) (**सुदिना**) शोभनानि दिनानि (**सा**) (**असत्**) भवेत् (**इष्टिः**) यजनक्रिया॥७॥

अन्वयः-हे अग्ने! यस्सुभगः सुदानुर्भवेत् स इदेव तव सभ्योऽस्तु य उक्थैर्नित्येन हविषा त्वा पिप्रीषति। अस्मै स्व आयुषि दुरोणे विश्वा सुदिना सन्तु सेष्टिरुभयत्र कल्याणकारिणीदसत्॥७॥

भावार्थः-हे राजन्! येऽविनाशिना प्रेम्णा न्यायविनयाभ्यां राज्योन्नतिं विदधति राजप्रजयोर्निरुपद्रवेण मङ्गलसमयं सदैव प्रापयन्ति ते राजगृहेऽध्यक्षाः स्युः॥७॥

पदार्थः-हे (**अग्ने**) विद्या से प्रकाशित सभ्यजन! (**यः**) जो (**सुभगः**) प्रशंसनीय ऐश्वर्य्ययुक्त (**सुदानुः**) उत्तम दान देने वाला हो (**सः, इत्**) वही आपका सभासद् (**अस्तु**) हो (**यः**) जो (**उक्थैः**) प्रशंसाओं और (**नित्येन**) नहीं नाश होने वाले (**हविषा**) हवन करने योग्य पदार्थ से (**त्वा**) आपको (**पिप्रीषति**) सुशोभित करने की इच्छा करता है (**अस्मै**) इसके लिये (**स्वे**) अपने (**आयुषि**) जीवन और (**दुरोणे**) गृह में (**विश्वा**) सम्पूर्ण (**सुदिना**) सुन्दर दिन हों (**सा**) वह (**इष्टिः**) यज्ञ करने की क्रिया दोनों लोकों में सुख देने वाली (**इत्**) ही (**असत्**) होवे॥७॥

भावार्थः-हे राजन्! जो लोग नित्य प्रेम से न्याय और विनय के द्वारा राज्य की उन्नति करते और राजा और प्रजा के उपद्रव के विना मङ्गल समय सदा ही प्राप्त कराते हैं, वे राजगृह में अध्यक्ष हों॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अर्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता जरतामियं गीः।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून्॥८॥

अर्चामि। ते। सुऽमतिम्। घोषि। अर्वाक्। सम्। ते। ववाता। जरताम्। इयम्। गीः। सुऽअश्वाः। त्वा। सुऽरथाः। मर्जयेम। अस्मे इति। क्षत्राणि। धारयेः। अनु। द्यून्॥८॥

पदार्थः-(**अर्चामि**) सत्करोमि (**ते**) तव (**सुमतिम्**) शोभना मतिर्यस्य सभ्यस्य तम् (**घोषि**) शब्दयुक्तं वचः (**अर्वाक्**) पश्चात् (**सम्**) (**ते**) तव (**वावाता**) दोषहन्त्री विद्याजनयित्री (**जरताम्**) स्तुयात् (**इयम्**) (**गीः**) सुशिक्षिता वाणी (**स्वश्वाः**) शोभना अश्वाः (**त्वा**) त्वाम् (**सुरथाः**) श्रेष्ठरथाः (**मर्जयेम**) शोधयेम (**अस्मे**) अस्माकम् (**क्षत्राणि**) राज्योद्भवानि धनानि। **क्षत्रमिति धननामसु पठितम्।** (निघं०२.१०) (**धारयेः**) (**अनु**) (**द्यून्**) दिवसान्॥८॥

अन्वयः-हे राजन्नहं ते सुमतिमर्चामि यं त्वा वावातेयं गीर्घोषि सञ्जरतां तं त्वां स्वश्वाः सुरथा वयम्मर्जयेम। यथा ते धनान्यनुद्यून् वयं धारयेम तथार्वाक् त्वमस्मे क्षत्राण्यनुद्यन् धारयेः॥८॥

भावार्थः-यदा राजा सभ्यान् पृच्छेदस्मिन्नधिकारे कः पुरुषो रक्षणीय इति तदा सर्वे धार्मिकस्य योग्यस्य रक्षणे सम्मतिं दद्युः। राज्ञा च योग्या एव पुरुषा राजकर्मणि रक्षणीया यतो नित्यं प्रशंसा वर्धेत॥८॥

पदार्थः-हे राजन्! मैं **(ते)** आपके **(सुमतिम्)** श्रेष्ठ बुद्धिवाले सभासद् का **(अर्चामि)** सत्कार करता हूँ जिन **(त्वा)** आपकी **(वावाता)** दोषों को नाश करने और विद्या को उत्पन्न करने वाली **(इयम्)** यह **(गीः)** उत्तम प्रकार शिक्षित वाणी **(घोषि)** शब्दयुक्त वचन जैसे हों, वैसे **(सम्, जरताम्)** स्तुति करे उन आपको **(स्वश्वाः)** उत्तम घोड़े **(सुरथाः)** श्रेष्ठ रथ और हम लोग **(मर्जयेम)** शुद्ध करावें। जैसे **(ते)** आपके धनों को **(अनु, द्यून्)** अनुदिन प्रतिदिन हम लोग धारण करें, वैसे आप **(अर्वाक्)** पीछे **(अस्मे)** हम लोगों के लिये **(क्षत्राणि)** राज्य में उत्पन्न हुए धनों को **(धारयेः)** धारण करिये॥८॥

भावार्थः-जब राजा सभास्थ जनों को पूंछै कि इस अधिकार में कौन पुरुष रखने योग्य है, तब सम्पूर्ण जन धार्मिक योग्य पुरुष के नियत करने में सम्मति देवें। और राजा को भी चाहिये कि योग्य ही पुरुषों को राजकर्म में नियत करे, जिससे कि नित्य प्रशंसा बढ़े॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इह त्वा भूर्या चरेदुप त्मन् दोषावस्तर्दीदिवांसमनु द्यून्।

क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम्॥९॥

इह। त्वा। भूरि। आ। चरेत्। उप। त्मन्। दोषाऽवस्तः। दीदिऽवांसम्। अनु। द्यून्। क्रीळन्तः। त्वा। सुऽमनसः। सपेम। अभि। द्युम्ना। तस्थिवांसः। जनानाम्॥९॥

पदार्थः-**(इह)** अस्मिन् राजकर्मणि **(त्वा)** त्वाम् **(भूरि)** बहु **(आ)** **(चरेत्)** **(उप)** **(त्मन्)** आत्मनि **(दोषावस्तः)** अहर्निशम् **(दीदिवांसम्)** प्रकाशमानं प्रकाशयन्तं वा **(अनु)** **(द्यून्)** दिवसान् **(क्रीळन्तः)** धनुर्वेदविद्याशिक्षणाय युद्धाय शस्त्राऽभ्यासं कुर्वन्तः **(त्वा)** **(सुमनसः)** शोभनं मनो येषान्ते **(सपेम)** आक्रुश्याम निंद्येम **(अभि)** **(द्युम्ना)** यशसा धनेन वा **(तस्थिवांसः)** स्थिरास्सन्तः **(जनानाम्)** राजप्रजापुरुषाणाम्॥९॥

अन्वयः-हे राजन्निह भवान् त्मन् भूरि शुभमुपाचरेत् सुमनसस्तस्थिवांसोऽनुद्यून् क्रीळन्तो वयं जनानां दीदिवांसं द्युम्ना यशसा सह वर्त्तमानं राजानं त्वा दोषावस्तः प्रशंसेम यद्यशुभाचारं कुर्यात्तर्हि त्वाऽभि सपेम॥९॥

भावार्थः-हे राजन्! यदि भवान् दुर्व्यसनानि त्यक्त्वा धर्म्याणि कर्म्माणि कुर्य्यात्तर्हि वयं तव भक्ता निरन्तरं स्याम यद्यन्यायं कुर्य्यात्तर्हि भवन्तं सद्यस्त्यजेम॥९॥

पदार्थः-हे राजन्! **(इह)** इस राजकर्म में आप **(त्मन्)** आत्मा में **(भूरि)** बहुत शुभकर्म **(उप,**

आ, चरेत्) करें (**सुमनसः**) श्रेष्ठ मनयुक्त जन (**तस्थिवांसः**) स्थिर और (**अनु, द्यून्,**) प्रतिदिन (**क्रीळन्तः**) धनुर्वेदविद्या की शिक्षा के लिये और युद्ध के लिये शस्त्रों का अभ्यास करते हुए हम लोग (**जनानाम्**) राजा और प्रजा के पुरुषों के मध्य में (**दीदिवांसम्**) प्रकाशमान वा प्रकाश करते हुए और (**द्युम्ना**) यश वा धन के सहित वर्त्तमान राजमान (**त्वा**) आपकी (**दोषावस्तः**) दिन-रात्रि प्रशंसा करें, जो अश्रेष्ठ कर्म्म करो तो (**त्वा**) आपकी (**अभि, सपेम**) निन्दा करें॥९॥

भावार्थः-हे राजन्! जो आप दुर्व्यसनों का त्याग करके धर्म्मसम्बन्धी कर्म्मों को करें तो हम लोग आपके भक्त निरन्तर होवें, जो अन्याय करो तो आप का शीघ्र त्याग करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्त्वा॒ स्वश्वः॑ सुहिर॒ण्यो अ॑ग्न उप॒याति॒ वसु॑मता॒ रथे॑न।

तस्य॑ त्रा॒ता भ॑वसि॒ तस्य॒ सखा॒ यस्ते॑ आति॒थ्यमा॑नु॒षग्जुजो॑षत्॥ १०॥ २४॥

यः। त्वा॒। सु॒ऽअश्वः॑। सु॒ऽहिर॒ण्यः। अ॒ग्ने॒। उ॒प॒ऽयाति॑। वसु॑ऽमता। रथे॑न। तस्य॑। त्रा॒ता। भ॒व॒सि॒। तस्य॑। सखा॑। यः। ते॒। आ॒ति॒थ्यम्। आ॒नु॒षक्। जुजो॑षत्॥ १०॥

पदार्थः-(**यः**) (**त्वा**) त्वाम् (**स्वश्वः**) शोभनाश्वः (**सुहिरण्यः**) उत्तमसुवर्णादिधनः (**अग्ने**) राजन् (**उपयाति**) (**वसुमता**) बहुधनयुक्तेन (**रथेन**) रमणीयेन यानेन (**तस्य**) (**त्राता**) (**भवसि**) भवेः (**तस्य**) (**सखा**) सुहृत् (**यः**) (**ते**) तव (**आतिथ्यम्**) अतिथिवत्सत्कारम् (**आनुषक्**) आनुकूल्येन (**जुजोषत्**) भृशं सेवेत॥१०॥

अन्वयः-हे अग्ने! यस्त आनुषगातिथ्यं जुजोषद्यः सुहिरण्यः स्वश्वो वसुमता रथेन त्वोपयाति तस्य त्वं त्राता भवसि तस्य सखा भवसि॥१०॥

भावार्थः-हे राजन्! ये तव राष्ट्रस्य चोपकारकाः स्युः सत्कर्त्तारश्च तेषामेव सखा रक्षकः सञ्चक्रवर्त्ती भवेः॥१०॥

पदार्थः-हे (**अग्ने**) राजन् (**यः**) जो (**ते**) आपकी (**आनुषक्**) अनुकूलता से वर्त्तमान (**आतिथ्यम्**) अतिथि के सदृश सत्कार की (**जुजोषत्**) निरन्तर सेवा करे (**यः**) जो (**सुहिरण्यः**) उत्तम सुवर्ण आदि धनयुक्त और (**स्वश्वः**) सुन्दर घोड़ों से युक्त पुरुष (**वसुमता**) बहुत धन से युक्त (**रथेन**) रमणीय वाहन से (**त्वा**) आपके (**उपयाति**) समीप प्राप्त होता है (**तस्य**) उसके आप (**त्राता**) रक्षा करने वाले (**भवसि**) हूजिये और (**तस्य**) उसके (**सखा**) मित्र हूजिये॥१०॥

भावार्थः-हे राजन्! जो आपके राज्य के उपकार करने और सत्कार करने वालो हों, उनके ही मित्र और रक्षा करने वाले हुए चकवर्त्ती हूजिये॥१०॥

अथ कुमारकुमारीणां शिक्षाविषयमाह॥

अब कुमार और कुमारियों के शिक्षा विषय को अगले मन्त्र में कहते हैं॥

म॒हो रु॑जामि ब॒न्धुता॒ वचो॑भि॒स्तन्मा॑ पि॒तुर्गोत॑मा॒दन्वि॑याय।

त्वं नो॑ अ॒स्य वच॑सश्चिकिद्धि॒ होत॑र्यविष्ठ सुक्रतो॒ दमू॑नाः॥ ११॥

म॒हः। रु॒जा॒मि॒। ब॒न्धु॒ता। वचः॑ऽभिः। तत्। मा॒। पि॒तुः। गोत॑मात्। अनु॑। इ॒या॒य॒। त्वम्। नः॒। अ॒स्य। वच॑सः। चि॒कि॒द्धि॒। होतः॑। य॒वि॒ष्ठ॒। सु॒ऽक्र॒तो॒ इति॑ सुऽक्रतो। दमू॑नाः॥ ११॥

पदार्थः-(**महः**) महत् (**रुजामि**) प्रभग्नान् करोमि (**बन्धुता**) बन्धूनां भावः (**वचोभिः**) वचनैः (**तत्**) (**मा**) माम् (**पितुः**) जनकात् (**गोतमात्**) अतिशयेन गौः सकलविद्यास्तोता तस्मात्। **गौरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) (**अनु**) (**इयाय**) प्राप्नोतु (**त्वम्**) (**नः**) अस्मान् (**अस्य**) (**वचसः**) (**चिकिद्धि**) ज्ञापय (**होतः**) दातः (**यविष्ठ**) अतिशयेन युवन् (**सुक्रतो**) सुष्ठुप्राप्तप्रज्ञ (**दमूनाः**) दमनशीलो जितेन्द्रियः॥ ११॥

अन्वयः-हे राजन्! यथाऽहं गोतमात् पितुर्विद्यां प्राप्य दोषाञ्छत्रूंश्च रुजामि तन्महो वचोभिर्बन्धुता मान्वियाय तथेयं त्वामियात् हे होतर्यविष्ठ सुक्रतो दमूनास्त्वमस्य वचसः सकाशान्नोऽस्माञ्चिकिद्धि॥ ११॥

भावार्थः-हे कुमारा कुमार्यश्च! यथा वयं मातुः पितुराचार्याच्च सुशिक्षां विद्यां प्राप्याऽऽनन्दिता भवेम तथैव यूयमपि भवत॥ ११॥

पदार्थः-हे राजन्! जैसे मैं (**गोतमात्**) अत्यन्त सम्पूर्ण विद्याओं के स्तुति करने वाले (**पितुः**) पिता से विद्या को प्राप्त होकर अविद्यादि दोष और शत्रुओं को (**रुजामि**) प्रभग्न करता हूँ (**तत्**) (**महः**) बड़ा कार्य और (**वचोभिः**) वचनों से (**बन्धुता**) बन्धुपन (**मा**) मुझे (**अनु, इयाय**) प्राप्त हो, वैसे यह बन्धुपन आपको प्राप्त हो और हे (**होतः**) देनेवाले (**यविष्ठ**) अत्यन्त युवा (**सुक्रतो**) उत्तम बुद्धियुक्त पुरुष (**दमूनाः**) दमनशील जितेन्द्रिय! (**त्वम्**) आप (**अस्य**) इस (**वचसः**) वचन की उत्तेजना से (**नः**) हम लोगों को (**चिकिद्धि**) जनाइये॥ ११॥

भावार्थः-हे कुमार और कुमारियो! जैसे हम लोग माता-पिता और आचार्य्य से उत्तम शिक्षा और विद्या [को] प्राप्त होकर आनन्दित होवें, वैसे आप लोग भी हूजिये॥ ११॥

अथ प्रजाजनरक्षाविषयमाह॥

अब प्रजाजनों के रक्षा विषय को अगले मन्त्र में कहते हैं॥

अस्व॑प्नजस्तरण॒यः सु॒शेवा॒ अत॑न्द्रासोऽवृ॒का अश्र॑मिष्ठाः।

ते पा॒यव॑: सध्र्य॒ञ्चो नि॒षद्याग्ने॒ तव॑ नः पान्त्वमूर॥ १२॥

अस्व॑प्नऽजः। त॒र॒ण॒यः। सु॒ऽशेवाः॑। अत॑न्द्रासः। अ॒वृ॒काः। अश्र॑मिष्ठाः। ते। पा॒यवः॑। स॒ध्र्य॒ञ्चः॑। नि॒ऽसद्य॑। अग्ने॑। तव॑। नः॒। पा॒न्तु॒। अ॒मूर॥ १२॥

पदार्थः-(**अस्वप्नजः**) जागरूकाः (**तरणयः**) तरुणावस्थां प्राप्ताः (**सुशेवाः**) सुसुखाः (**अतन्द्रासः**) अनलसाः (**अवृकाः**) अस्तेनाः (**अश्रमिष्ठाः**) अतिशयेनाऽश्रान्ताः श्रमरहिताः (**ते**) (**पायवः**) पालकाः (**सध्र्यञ्चः**) ये सहाञ्चन्ति ते (**निषद्य**) नितरां स्थित्वा (**अग्ने**) (**तव**) (**नः**) अस्मान् (**पान्तु**) रक्षन्तु (**अमूर**) मूढतादिदोषरहित॥१२॥

अन्वयः-हे अमूराऽग्ने राजन्! ये तवाऽस्वप्नजस्तरणयोऽतन्द्रासोऽवृका अश्रमिष्ठाः सुशेवाः सध्र्यञ्चः पायवो भृत्याः सन्ति ते निषद्य नः पान्तु॥१२॥

भावार्थः-प्रजाजनैः सदैव राजोपदेष्टव्यो हे राजन्! भवतः सकाशादस्माकं रक्षणे धार्मिका अनलसा पुरुषार्थिनो बलवन्तो जना नियताः सन्त्विति॥१२॥

पदार्थः-हे (**अमूर**) मूर्खतादि दोषों से रहित (**अग्ने**) अग्नि सदृश तेजस्विन् राजन्! जो जन (**तव**) आपके (**अस्वप्नजः**) जागने वाले (**तरणयः**) युवावस्था को प्राप्त (**अतन्द्रासः**) आलस्य (**अवृकाः**) चोरीपन (**अश्रमिष्ठाः**) और अत्यन्त थकावट से रहित (**सुशेवाः**) उत्तम सुखयुक्त (**सध्र्यञ्चः**) साथ जाने वा सत्कार करने और (**पायवः**) पालन करने वाले नौकर हैं (**ते**) वे (**निषद्य**) निरन्तर स्थित होकर (**नः**) हम लोगों की (**पान्तु**) रक्षा करें॥१२॥

भावार्थः-प्रजाजनों को चाहिये कि सदा ही राजा को उपदेश देवें कि हे राजन्! आपकी ओर से हम लोगों की रक्षा में धार्मिक आलस्यरहित पुरुषार्थी और बलवान् जन नियत हों॥१२॥

पुना राजविषयमाह

फिर राजविषय को अगले मन्त्र में कहते हैं॥

ये पा॒यवो॑ मामते॒यं ते॑ अग्ने॒ पश्य॑न्तो अ॒न्धं दुरि॒तादर॑क्षन्॥

र॒रक्ष॒ तान्सु॒कृतो॑ वि॒श्ववे॑दा॒ दिप्स॑न्त॒ इद्रि॒पवो॒ नाह॑ देभुः॥१३॥

ये। पा॒यव॑ः। मा॒म॒ते॒यम्। ते। अ॒ग्ने॒। पश्य॑न्तः। अ॒न्धम्। दु॒ःऽइ॒तात्। अर॑क्षन्। र॒रक्ष॑। तान्। सु॒ऽकृ॑तः। वि॒श्वऽवे॑दाः। दिप्स॑न्तः। इत्। रि॒पव॑ः। न। अह॑। दे॒भुः॥१३॥

पदार्थः-(**ये**) (**पायवः**) रक्षकाः (**मामतेयम्**) मम भावो ममता तस्या इदम् (**ते**) तव (**अग्ने**) पावकवद्राजन् (**पश्यन्तः**) प्रेक्षमाणाः (**अन्धम्**) नेत्ररहितमिव (**दुरितात्**) दुष्टाचाराद् दुःखाद्वा (**अरक्षन्**) रक्षन्ति (**ररक्ष**) पालय (**तान्**) (**सुकृतः**) उत्तमकर्मकारिणः (**विश्ववेदाः**) समग्रवित् (**दिप्सन्तः**) दम्भमिच्छन्तः (**इत्**) एव (**रिपवः**) शत्रवः (**न**) (**अह**) विनिग्रहे (**देभुः**) दभ्नुयुः॥१३॥

अन्वयः-हे अग्ने! ये पायवस्ते मामतेयं पश्यन्तो दुरितादन्धमिवाऽस्मानरक्षंस्तान् सुकृतो विश्ववेदाः संस्त्वं ररक्ष येनेदेव दिप्सन्तो रिपवोऽस्मान्नाऽह देभुः॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये स्वकीयमिवाऽन्येषाम्भवतश्च पदार्थं जानन्ति। आत्मानमिवान्यान् रक्षन्ति त एवाऽऽप्ता तव भृत्याः सन्तु येन शत्रूणां बलं विनश्येत्॥१३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश राजन्! **(ये)** जो **(पायवः)** रक्षा करने वाले **(ते)** आपके **(मामतेयम्)** ममता सम्बन्धी कार्य को **(पश्यन्तः)** देखते हुए **(दुरितात्)** दुष्ट आचरण वा दुःख से **(अन्धम्)** नेत्ररहित को जैसे वैसे हम लोगों की **(अरक्षन्)** रक्षा करते हैं **(तान्)** उन **(सुकृतः)** उत्तम कर्म करने वालों का **(विश्ववेदाः)** सम्पूर्ण विषय जानने वाले **[**होते हुए**]** आप **(ररक्ष)** पालन करो, जिससे **(इत्)** ही **(दिप्सन्तः)** पाखण्ड की इच्छा करते हुए **(रिपवः)** शत्रु लोग हम लोगों के **(न, अह)** निग्रह करने में न **(देभुः)** दम्भ करें॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो लोग अपने के सदृश अन्य जनों और आपके पदार्थ को जानते हैं और अपने आत्मा के सदृश अन्यों की रक्षा करते हैं, वे ही यथार्थवक्ता आपके सेवक हों, जिससे कि शत्रुओं का बल नष्ट होवे॥१३॥

पुनः प्रकारान्तरेण राजविषयमाह॥

फिर प्रकारान्तर से राजविषय को अगले मन्त्र में कहते हैं॥

त्वया॑ व॒यं स॑धन्य१॑स्त्वोता॒स्तव॒ प्रणी॑त्यश्याम॒ वाजा॑न्।

उ॒भा शंसा॑ सूदय सत्यतातेऽनुष्ठु॒या कृ॑णुह्यह्रयाण॥१४॥

त्वया॑। व॒यम्। स॒ऽध॒न्यः॑। त्वाऽऊ॑ताः। तव॑। प्रऽनी॑ती। अ॒श्या॒म॒। वाजा॑न्। उ॒भा। शंसा॑। सू॒द॒य॒। स॒त्य॒ऽता॒ते॒। अ॒नु॒ष्ठु॒या। कृ॒णु॒हि॒। अ॒ह्र॒या॒ण॒॥१४॥

पदार्थः-**(त्वया)** स्वामिना राज्ञा **(वयम्)** **(सधन्यः)** समानं धनं विद्यते येषान्ते। अत्र मत्वर्थीय ईप्। **(त्वोताः)** त्वया पालिताः **(तव)** **(प्रणीती)** प्रकृष्ट नीत्या **(अश्याम)** प्राप्नुयाम **(वाजान्)** विज्ञानधनादिपदार्थान् **(उभा)** उभौ **(शंसा)** प्रशंसे **(सूदय)** क्षरय **(सत्यताते)** सत्याचरक **(अनुष्ठुया)** आनुकूल्येन **(कृणुहि)** **(अह्रयाण)** लज्जारहित॥१४॥

अन्वयः-हे अह्रयाण सत्यताते राजंस्त्वमनुष्ठुया उभा शंसा कृणुहि दोषान्त्सूदय यतस्स्वया सह त्वोताः सधन्यः सन्तो वयं तव प्रणीती वाजानश्याम॥१४॥

भावार्थः-सर्वैर्भृत्यै राज्ञा सह मित्रता राज्ञा च सर्वैस्सह पितृवद्भावो रक्षणीयोऽन्येषां प्रशंसां कृत्वा दोषान् विनाश्य सत्यनीतिं प्रचार्य्य यत्र यत्र कर्मणि लज्जा स्यात्तत्तद्विहाय साम्राज्यं भोक्तव्यम्॥१४॥

पदार्थः-हे **(अह्रयाण)** लज्जारहित **(सत्यताते)** सत्य आचरण करने वाले राजन्! आप **(अनुष्ठुया)** अनुकूलता से **(उभा)** दोनों **(शंसा)** प्रशंसाओं को **(कृणुहि)** करिये और दोषों का **(सूदय)** नाश करिये जिससे **(त्वया)** आपके साथ **(त्वोताः)** आपने पालन किये और **(सधन्यः)** तुल्य धनवाले हुए **(वयम्)** हम लोग **(तव)** आपकी **(प्रणीती)** उत्तम नीति से **(वाजान्)** विज्ञान और धन आदि पदार्थों

को **(अश्याम)** प्राप्त होवें॥१४॥

भावार्थः-सब नौकरों को चाहिये कि राजा के साथ मित्रता और राजा को चाहिये कि सब लोगों के साथ पिता के सदृश वर्त्ताव रखे और परस्पर एक-दूसरे की प्रशंसा कर दोषों का नाश और सत्यनीति का प्रचार करके जिस-जिस कर्म्म में लज्जा हो, उस उसका त्यागकर चक्रवर्त्ती राज्य का भोग करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्॥१५॥२५॥४॥

अया। ते। अग्ने। सम्ऽइधा। विधेम। प्रति। स्तोमम्। शस्यमानम्। गृभाय। दह। अशसः। रक्षसः। पाहि। अस्मान्। द्रुहः। निदः। मित्रऽमहः। अवद्यात्॥१५॥

पदार्थः-(**अया**) अनया प्राप्तया (**ते**) तव (**अग्ने**) राजन् (**समिधा**) सम्यक् प्रदीप्तया नीत्या सह (**विधेम**) कुर्य्याम (**प्रति**) (**स्तोमम्**) प्रशंसनीयम् (**शस्यमानम्**) प्रशंसितव्यम् (**गृभाय**) गृहाण (**दह**) (**अशसः**) अस्तवकान् (**रक्षसः**) दुष्टाचारान् (**पाहि**) (**अस्मान्**) (**द्रुहः**) द्रोहयुक्ताः (**निदः**) निन्दकात् (**मित्रमहः**) ये मित्राणि महन्ति सत्कुर्वन्ति (**अवद्यात्**) अधर्माचरणात्॥१५॥

अन्वयः-हे अग्ने! वयं तेऽया समिधा यं शस्यमानं स्तोमं विधेम तं त्वं प्रति गृभाय। अशसो रक्षसो दह द्रुहो निदोऽवद्याच्च मित्रमहोऽस्माञ्च पाहि॥१५॥

भावार्थः-यदि राजाऽमात्याः सम्मतः सन्तो विनयेन राज्यं शासति तर्हि द्रोहनिन्दाऽधर्माचरणात् पृथग्भूत्वा शिष्टाचाराः सन्तो दशसु दिक्षु कीर्तिं प्रसारयन्तीति॥१५॥

अत्र राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्थे मण्डले चतुर्थं सूक्तं तृतीयाष्टके पञ्चविंशो वर्गश्चतुर्थोऽध्यायश्च समाप्तः॥

(मित्रमहः) मित्रों का सत्कार करने वाले **(अस्मान्)** हम लोगों का **(पाहि)** पालन कीजिये॥१५॥

भावार्थः-जो राजा और मन्त्री जन परस्पर सम्मत हुए नम्रता से राज्य की शिक्षा करते हैं तो द्वेष निन्दा और अधर्माचरण से अलग होकर उत्तम शिष्टाचार करते हुए दशों दिशाओं में यश को फैलाते हैं॥१५॥

इस सूक्त में राजा और प्रजा के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चतुर्थ मण्डल में चतुर्थ सूक्त और तीसरे अष्टक में पच्चीसवां वर्ग और चौथा अध्याय समाप्त हुआ॥

ओ३म्॥

अथ तृतीयाष्टके पञ्चमोऽध्यायः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ पञ्चदशर्चस्य पञ्चमस्य सूक्तस्य वामदेव ऋषिः। वैश्वानरो देवता। १ विराट् त्रिष्टुप्। २,५-८, ११ निचृत् त्रिष्टुप्। ३, ४, ९, १२, १३, १५ त्रिष्टुप् छन्दः। धैवतः स्वरः। १०, १४ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निदृष्टान्तेन राजविषयमाह॥

अब तृतीयाष्टक में पांचवें अध्याय और चतुर्थ मण्डल में [पन्द्रह ऋचा वाले] पञ्चम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्नि के दृष्टान्त से राजविषय को कहते हैं॥

वै॒श्वा॒न॒राय॑ मी॒ळ्हुषे॑ स॒जोषा॑: क॒था दा॑शेमा॒ग्नये॑ बृ॒हद्भा:।

अनू॑नेन बृह॒ता व॒क्षथे॒नोप॑ स्तभायदुप॒मिन्न रोध॑:॥ १॥

वै॒श्वा॒न॒राय॑। मी॒ळ्हुषे॑। स॒ऽजोषा॑:। क॒था। दा॒शे॒म॒। अ॒ग्नये॑। बृ॒हत्। भा:। अनू॑नेन। बृ॒ह॒ता। व॒क्षथे॑न। उप॑। स्त॒भा॒य॒त्। उ॒प॒ऽमित्। न। रोध॑:॥ १॥

पदार्थः-(**वैश्वानराय**) विश्वेषु नायकाय (**मीळ्हुषे**) सेचकाय (**सजोषाः**) समानप्रीतिसेवनाः। अत्र वचनव्यत्ययेनैकवचनम्। (**कथा**) केन प्रकारेण (**दाशेम**) दद्याम (**अग्नये**) वह्निवद्वर्त्तमानाय विदुषे राज्ञे (**बृहत्**) महत् (**भाः**) यो भाति सः (**अनूनेन**) न्यूनतारहितेन (**बृहता**) महता (**वक्षथेन**) रोषेण (**उप**) (**स्तभायत्**) स्तभ्नीयात् (**उपमित्**) य उपमिनोति सः (**न**) इव (**रोधः**) रोधनम्॥१॥

अन्वयः-हे राजन्! यस्त्वं बृहद्भा उपमिद्रोधो नानूनेन बृहता वक्षथेन राज्यमुप स्तभायत्तस्मै वैश्वानराय मीळ्हुषेऽग्नये सजोषा वयं सुखं कथा दाशेम॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यविद्युद्वत्सद्गुणप्रकाशका जलावरणमिव दुष्टानां निरोधकाः स्वात्मवत्सुखदुःखहानिलाभाञ्जानन्तो राज्यं कुर्वन्ति ते दण्डन्यायं प्रचालयितुं शक्नुवन्ति॥१॥

पदार्थः-हे राजन्! जो आप (**बृहत्**) बड़े (**भाः**) शोभित नापने वाले और (**रोधः**) रोकने को (**उपमित्**) अलग करता है उसके (**न**) समान (**अनूनेन**) न्यूनता से रहित (**बृहता**) बड़े (**वक्षथेन**) क्रोध से राज्य को (**उप, स्तभायत्**) रोके उस (**वैश्वानराय**) सब में नायक (**मीळ्हुषे**) सेचन करने वाले (**अग्नये**) अग्नि के सदृश वर्त्तमान विद्वान् राजा के लिये (**सजोषाः**) तुल्य प्रीति के सेवन करने वाले हम लोग सुख को (**कथा**) किस प्रकार से (**दाशेम**) देवें॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सूर्य और बिजुली के सदृश उत्तम

गुणों के प्रकाश करने और जल के रोकने वाले पदार्थ के सदृश दुष्टों के रोकने वाले और अपने सदृश सुख, दु:ख, हानि और लाभ को जानते हुए राज्य करते हैं, वे दण्ड और न्याय को चला सकते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मा निन्दत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान्।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः॥२॥

मा। निन्दत। यः। इमाम्। मह्यम्। रातिम्। देवः। ददौ। मर्त्याय। स्वधाऽवान्। पाकाय। गृत्सः। अमृतः। विऽचेताः। वैश्वानरः। नृऽतमः। यह्वः। अग्निः॥२॥

पदार्थः-(**मा**) (**निन्दत**) (**यः**) (**इमाम्**) (**मह्यम्**) (**रातिम्**) दानम् (**देवः**) दाता (**ददौ**) ददाति (**मर्त्याय**) मनुष्याय (**स्वधावान्**) बह्वन्नाद्यैश्वर्य्यः (**पाकाय**) परिपक्वव्यवहाराय (**गृत्सः**) यो गृणाति स मेधावी (**अमृतः**) मृत्युरहितः (**विचेताः**) विविधानि चेतांसि संज्ञानानि ज्ञापनानि वा यस्य सः (**वैश्वानरः**) विश्वेषु नरेषु प्रकाशमानः (**नृतमः**) अतिशयेन नायको नरोत्तमः (**यह्वः**) महान् (**अग्निः**) सूर्य इव॥२॥

अन्वयः-हे मनुष्या! यः स्वधावानमृतो विचेता वैश्वानरो नृतमो यह्वो गृत्सोऽग्निर्देवः पाकाय मर्त्याय मह्यमिमां रातिं ददौ तं मा निन्दत॥२॥

भावार्थः-हे राजप्रजाजना! योऽग्न्यादिगुणयुक्तः सर्वेभ्यः सुखदाता राजा शुभगुणः स्यात्तस्य निन्दां दुष्टस्य प्रशंसां कदाचिन्मा कुरुत॥२॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**स्वधावान्**) बहुत अन्न आदि ऐश्वर्य्य से युक्त (**अमृतः**) मृत्यु से रहित (**विचेताः**) अनेक प्रकार के अच्छे प्रकार ज्ञान होना वा ज्ञान कराने के प्रकार जिसके ऐसे (**वैश्वानरः**) सम्पूर्ण मनुष्यों में प्रकाशमान (**नृतमः**) अत्यन्त नायक वा मनुष्यों में श्रेष्ठ (**यह्वः**) बड़ा (**गृत्सः**) उपदेशदाता बुद्धिमान् (**अग्निः**) सूर्य्य के समान (**देवः**) देनेवाला पुरुष (**पाकाय**) परिपक्व व्यवहार वाले (**मह्यम्**) मुझ (**मर्त्याय**) मनुष्य के लिये (**इमाम्**) इस (**रातिम्**) दान को (**ददौ**) देता है, उसकी (**मा**) मत (**निन्दत**) निन्दा करो॥२॥

भावार्थः-हे राजा और प्रजाजनो! जो अग्नि आदि के गुणों से युक्त और सब के लिये सुख देनेवाला राजा उत्तम गुणवाला होवे, उसकी निन्दा और दुष्ट की प्रशंसा कभी मत करो॥२॥

अथ मेधाविना किं कर्त्तव्यमित्याह॥

अब मेधावि पुरुष को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

सामं द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तुविष्मान्।
पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषाम्॥३॥

साम॑। द्वि॒ऽबर्हा॑:। मह्रि॑। ति॒ग्मऽभृ॑ष्टि:। स॒हस्र॑ऽरेता:। वृ॒ष॒भ:। तु॒वि॒ष्मान्। प॒दम्। न। गो:। अप॑ऽगूळ्हम्। वि॒वि॒द्वान्। अ॒ग्नि:। मह्या॑म्। प्र। इत्। ऊ॒म् इति॑। वो॒च॒त्। म॒नी॒षाम्॥ ३॥

पदार्थ:-(**साम**) सिद्धान्तितं कर्म (**द्विबर्हा:**) द्वाभ्यां विद्याविनयाभ्यां वृद्ध: (**महि**) महत् (**तिग्मभृष्टि:**) तिग्मा तीव्रा भृष्टि: परिपाको यस्य स: (**सहस्ररेता:**) अतुलवीर्य: (**वृषभ:**) वृषभ इव श्रेष्ठ: (**तुविष्मान्**) बहुबल: (**पदम्**) पादचिह्नम् (**न**) (**इव**) (**गो:**) धेनो: (**अपगूळ्हम्**) गुप्तम् (**विविद्वान्**) विशेषेण विपश्चित् (**अग्नि:**) पावक इव तेजस्वी (**मह्याम्**) जिज्ञासवे (**प्र**) (**इत्**) एव (**उ**) (**वोचत्**) प्रोच्यात् (**मनीषाम्**) प्रज्ञाम्॥ ३॥

अन्वय:-यो द्विबर्हा: तिग्मभृष्टि: सहस्ररेता वृषभ इव तुविष्मानग्निरिव विविद्वान् गोरपगूळ्हं पदं न मह्यं मनीषां महि साम च प्र वोचत् स इदु अस्माभि: सत्कर्त्तव्य:॥ ३॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। स एव श्रेष्ठो विद्वान् य: सर्वान् प्रमां प्रापयेत्। यथा गो: पदमन्विष्य गां प्राप्नोति तथैव पदार्थविद्या प्राप्तव्या॥ ३॥

पदार्थ:-जो (**द्विबर्हा:**) दो अर्थात् विद्या और विनय से वृद्ध (**तिग्मभृष्टि:**) तीव्र परिपाक जिसका ऐसा (**सहस्ररेता:**) परिमाण रहित पराक्रमयुक्त (**वृषभ:**) बैल के सदृश श्रेष्ठ (**तुविष्मान्**) बहुत बलयुक्त (**अग्नि:**) अग्नि के सदृश तेजस्वी और (**विविद्वान्**) विशेष करके पण्डित (**गो:**) गौ के (**अपगूळ्हम्**) गुप्त (**पदम्**) पैरों के चिह्न के (**न**) सदृश (**मह्याम्**) मुझ जानने की इच्छा करने वाले के लिये (**मनीषाम्**) बुद्धि और (**महि**) बड़े (**साम**) सिद्धान्तित कर्म को (**प्र, वोचत्**) कहे (**इत्, उ**) फिर वही हम लोगों से सत्कार करने योग्य है॥ ३॥

भावार्थ:-इस मन्त्र में उपमा [और] वाचकलुप्तोपमालङ्कार हैं। वही श्रेष्ठ विद्वान् है कि जो सब के लिये यथार्थज्ञान करावे। जैसे गौ के पैरों के चिह्न को खोज के गौ को प्राप्त होता है, वैसे ही पदार्थविद्या प्राप्त करने योग्य है॥ ३॥

अथ सर्वसुखकरराजविषयमाह॥

अब सुख को सुख करनेवाले राजविषय को अगले मन्त्र में कहते हैं॥

प्र ताँ अ॒ग्निर्ब॑भसत् ति॒ग्मज॑म्भ॒स्तपि॑ष्ठेन शो॒चिषा॒ य: सु॒राधा॑:।
प्र ये मि॒नन्ति॒ वरु॑णस्य॒ धाम॑ प्रि॒या मि॒त्रस्य॒ चेत॑तो ध्रु॒वाणि॑॥ ४॥

प्र। तान्। अ॒ग्नि:। ब॒भ॒स॒त्। ति॒ग्मऽज॑म्भ:। तपि॑ष्ठेन। शो॒चिषा॑। य:। सु॒ऽराधा॑:। प्र। ये। मि॒नन्ति॑। वरु॑णस्य। धाम॑। प्रि॒या। मि॒त्रस्य॑। चेत॑त:। ध्रु॒वाणि॑॥ ४॥

पदार्थ:-(**प्र**) (**तान्**) (**अग्नि:**) पावक इव (**बभसत्**) दीप्येद्भर्त्सेत् (**तिग्मजम्भ:**) तिग्मानि गात्रविनमनानि यस्य स: (**तपिष्ठेन**) अतिशयेन तापयुक्तेन (**शोचिषा**) तेजसा (**य:**) (**सुराधा:**)

शोभनधनः **(प्र)** **(ये)** **(मिनन्ति)** हिंसन्ति **(वरुणस्य)** श्रेष्ठस्य **(धाम)** जन्मस्थाननामानि **(प्रिया)** कमनीयानि **(मित्रस्य)** सख्युः **(चेततः)** संज्ञापकस्य **(ध्रुवाणि)** निश्चलानि दृढानि॥४॥

अन्वयः-योऽग्निरिव तिग्मजम्भस्तपिष्ठेन शोचिषा सुराधाः सन् ये चेततो वरुणस्य मित्रस्य प्रिया ध्रुवाणि धाम प्रमिणन्ति तान् प्र बभसत् स एव सर्वस्य सुखकरो जायते॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रदीप्तोऽग्निः प्राप्तशुष्कमार्द्रं च दहति तथैव यः स्वार्थिनः परस्य सुखविनाशकान् हन्ति स प्रशंसितो भवति॥४॥

पदार्थः-**(यः)** जो **(अग्निः)** अग्नि के सदृश **(तिग्मजम्भः)** तीक्ष्ण शरीर शिथिल करने वाली जम्भवाई वाला **(तपिष्ठेन)** अत्यन्त ताप अर्थात् दीप्तियुक्त **(शोचिषा)** तेज से **(सुराधाः)** उत्तम धन वाले होते हुए **(ये)** जो लोग **(चेततः)** चैतन्य कराने वाले **(वरुणस्य)** श्रेष्ठ **(मित्रस्य)** मित्र के **(प्रिया)** सुन्दर और **(ध्रुवाणि)** निश्चल अर्थात् दृढ़ **(धाम)** जन्म, स्थान नामों का **(प्र, मिनन्ति)** नाश करते हैं, **(तान्)** उनको **(प्र, बभसत्)** तिरस्कार करे, वही सब को सुख करने वाला होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रदीप्त अग्नि प्राप्त हुए शुष्क और गीले पदार्थ को जलाता है, वैसे ही जो पुरुष अपने प्रयोजनसाधक स्वार्थी और अन्य पुरुष के सुखनाश करने वालों को नाश करता है, वह प्रशंसित होता है॥४॥

अथ राजविषये दण्डविचारमाह॥

अब राजविषय में दण्ड विचार को अगले मन्त्र में कहते हैं॥

अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः।

पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम्॥५॥१॥

अभ्रातरः। न। योषणः। व्यन्तः। पतिऽरिपः। न। जनयः। दुःऽएवाः। पापासः। सन्तः। अनृताः। असत्याः। इदम्। पदम्। अजनत। गभीरम्॥५॥

पदार्थः-**(अभ्रातरः)** अबन्धुरिव वर्त्तमानाः **(न)** इव **(योषणः)** भार्य्याः **(व्यन्तः)** प्राप्नुवन्त्यः **(पतिरिपः)** पत्युर्भूमीः। **रिप इति पृथ्वीनामसु पठितम्।** (निघं०१.१) **(न)** इव **(जनयः)** जायाः **(दुरेवाः)** दुर्व्यसनाः **(पापासः)** अधर्माचाराः **(सन्तः)** **(अनृताः)** असत्यवादिनः **(असत्याः)** असत्याचरणाः **(इदम्)** **(पदम्)** **(अजनत)** जनयन्ति। अत्र **संहितायामिति** दीर्घः। **(गभीरम्)** गहनम्॥५॥

अन्वयः-येऽनृता असत्या दुरेवाः पापासस्सन्तो दुष्टा अभ्रातरो न योषणः पतिरिपो न व्यन्तो जनय इदं गभीरं पदं दुःखमजनत ते सदैव ताडनीयाः॥५॥

भावार्थः-अत्रोपमालङ्कारः। **[हे]** मनुष्या! या स्त्री भ्रातृवदनुकूला नानुकूला शत्रुवद्विरोधिनी ये घोरपापिनः सर्वेषां पीडकाः स्युस्तान् दूरतस्त्यजत॥५॥

पदार्थः-जो (**अनृताः**) मिथ्या बोलने और (**असत्याः**) मिथ्या आचरण करने वाले (**दुरेवाः**) दुष्ट व्यसनों से युक्त (**पापासः**) अधर्माचरण करते (**सन्तः**) हुए दुष्ट (**अभ्रातरः**) जैसे बन्धुभिन्न जन (**नः**) वैसे और जैसे (**योषणः**) स्त्रियाँ (**पतिरिपः**) पति की भूमि को (**न**) वैसे (**व्यन्तः**) प्राप्त हुईं (**जनयः**) स्त्रियाँ (**इदम्**) इस (**गभीरम्**) गम्भीर (**पदम्**) स्थान [दुःख] को (**अजनत**) उत्पन्न करती हैं, वे सदा ही ताड़न करने योग्य हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो स्त्री भाई के सदृश अनुकूल नहीं और जो अनुकूल हो तो शत्रु के सदृश विरोध करने वाली हो और जो घोर पापीजन सब के पीड़ा देने वाले हों, उनका दूर से त्याग करो॥५॥

अथाध्यापकविषयमाह॥

अब अध्यापक विषय को अगले मन्त्र में कहते हैं॥

इ॒दं मे॑ अग्ने॒ किय॑ते पाव॒कामि॑नते गु॒रुं भा॒रं न मन्म॑।
बृ॒हद्द॑धाथ धृष॒ता ग॑भी॒रं य॒ह्वं पृ॒ष्ठं प्रय॑सा स॒प्तधा॑तु॥६॥

इ॒दम्। मे॒। अ॒ग्ने॒। किय॑ते। पा॒व॒क॒। अमि॑नते। गु॒रुम्। भा॒रम्। न। मन्म॑। बृ॒हत्। द॒धा॒थ॒। धृ॒ष॒ता। ग॒भी॒रम्। य॒ह्वम्। पृ॒ष्ठम्। प्रय॑सा। स॒प्तऽधा॑तु॥६॥

पदार्थः-(इदम्) (मे) मह्यम् **(अग्ने)** पावकवद्वर्त्तमान **(कियते)** अल्पसामर्थ्याय **(पावक)** पवित्रकर **(अमिनते)** अहिंसकाय **(गुरुम्)** महान्तम् **(भारम्) (न)** इव **(मन्म)** विज्ञानम् **(बृहत्)** वर्धकम् **(दधाथ)** धेहि। अत्र वचनव्यत्ययेन बहुवचनम् **(धृषता)** प्रगल्भेन सह **(गभीरम्) (यह्वम्)** महत् **(पृष्ठम्)** प्रच्छनीयम् **(प्रयसा)** प्रीतेन **(सप्तधातु)** सुवर्णादयस्सप्तधातवो यस्मिन्॥६॥

अन्वयः-हे पावकाग्ने! त्वं कियतेऽमिनते मे गुरुं भारं न मन्म धृषता प्रयसेदं बृहद्गभीरं पृष्ठं यह्वं सप्तधातु धनं दधाथ॥६॥

भावार्थः-अत्रोपमालङ्कारः। येऽल्पज्ञा विद्यार्थिनश्च ज्ञानिनो विदुषः सकाशाद्विज्ञानं धनसाधनं च याचन्ते ते विद्वांसो जायन्ते॥६॥

पदार्थः-हे **(पावक)** पवित्र करने वाले **(अग्ने)** अग्ने के सदृश वर्त्तमान! आप **(कियते)** थोड़े सामर्थ्य से युक्त **(अमिनते)** नहीं हिंसा करने वाले **(मे)** मेरे लिये **(गुरुम्)** बड़े **(भारम्)** भार के **(न)** सदृश **(मन्म)** विज्ञान को तथा **(धृषता)** ढीठ और **(प्रयसा)** प्रसन्न[ता] के साथ **(इदम्)** इस **(बृहत्)** बढ़ाने वाले **(गम्भीरम्)** गम्भीर **(पृष्ठम्)** पूछने योग्य **(यह्वम्)** बड़े **(सप्तधातु)** सुवर्ण आदि सातों धातु जिसमें ऐसे धन को **(दधाथ)** धारण कीजिये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अल्पज्ञ और विद्यार्थीजन ज्ञानी विद्वान् के समीप से विज्ञान और धन के साधन की याचना करते हैं, वे विद्वान् होते हैं॥६॥

अथ विवाहपरत्वेनोपदेशविषयमाह॥

अब विवाहपरता से उपदेशविषय को अगले मन्त्र में कहते हैं॥

तमिन्वे३ेव समना समानमभि क्रत्वा पुनती धीतिरश्याः।

ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारू॥७॥

तम्। इत्। नु। एव। समना। समानम्। अभि। क्रत्वा। पुनती। धीतिः। अश्याः। ससस्य। चर्मन्। अधि। चारु। पृश्नेः। अग्रे। रुपः। आरुपितम्। जबारु॥७॥

पदार्थः-(**तम्**) (**इत्**) अपि (**नु**) (**एव**) (**समना**) सदृशी (**समानम्**) तुल्यं पतिम् (**अभि**) (**क्रत्वा**) प्रज्ञया (**पुनती**) पित्रा पवित्रयन्ती (**धीतिः**) शुभगुणधारिका (**अश्याः**) प्राप्नुयाः (**ससस्य**) स्वपतः (**चर्मन्**) चर्मणि (**अधि**) उपरि (**चारु**) सुन्दरम् (**पृश्नेः**) अन्तरिक्षस्य (**अग्रे**) पुरस्तात् (**रुपः**) आरोपणकर्तुः। अत्र कर्त्तरि क्विप्। (**आरुपितम्**) (**जबारु**) जवमानमारूढम्॥७॥

अन्वयः-हे कन्ये! यस्य ससस्य चर्मन् चारु जबार्वारुपितं पृश्नेरभ्यस्ति तदग्रेऽधिरुपः क्रत्वा पुनती धीतिः समना सती तमिदेव समानं पतिं न्वेवाश्याः॥७॥

भावार्थः-यदि कन्या स्वसदृशं वरं ब्रह्मचारी स्वतुल्यां कन्याञ्चोपयच्छेत् तर्ह्यन्तरिक्षस्य मध्य ईश्वरेण स्थापितः सविता चन्द्रो नक्षत्राणीव सुशोभेते॥७॥

पदार्थः-हे कन्ये! जिस (**ससस्य**) शयन करते हुए के (**चर्मन्**) चमड़े में (**चारु**) सुन्दर (**जबारु**) वेग करता हुआ वा आरूढ़ (**आरुपितम्**) आरोपण किया गया वा जो (**पृश्नेः**) अन्तरिक्ष के (**अभि**) सब ओर है उसके (**अग्रे**) आगे (**अधि, रुपः**) अधिरोपण करनेवाले की (**क्रत्वा**) उत्तम बुद्धि से (**पुनती**) पिता के सम्बन्ध से पवित्र करती हुई (**धीतिः**) उत्तम गुणों के धारण करने वाली (**समना**) तुल्य हुई (**तम्**) (**इत्**) उसी (**समानम्**) समान पति को (**नु, एव**) शीघ्र ही (**अश्याः**) प्राप्त हो॥७॥

भावार्थः-जो कन्या अपने समान वर और ब्रह्मचारी अपने तुल्य कन्या के साथ विवाह करे तो अन्तरिक्ष के मध्य में ईश्वर से स्थापित सूर्य्य चन्द्रमा और नक्षत्रों के तुल्य शोभित होते हैं॥७॥

अथ प्रच्छकविषयमाह॥

अब प्रच्छक विषय को अगले मन्त्र में कहते हैं॥

प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदन्ति।

यदुस्रियाणामप वारिव व्रन् पाति प्रियं रुपो अग्रं पदं वेः॥८॥

प्रऽवाच्यम्। वचसः। किम्। मे। अस्य। गुहा। हितम्। उप। निणिक्। वदन्ति। यत्। उस्रियाणाम्। अप। वाऽइव। व्रन्। पाति। प्रियम्। रुपः। अग्रम्। पदम्। वेरिति वेः॥८॥

पदार्थः-(**प्रवाच्यम्**) प्रकर्षेण वक्तुं योग्यम् (**वचसः**) वचनस्य (**किम्**) (**मे**) मम (**अस्य**) जनस्य (**गुहा**) बुद्धौ (**हितम्**) स्थितम् (**उप**) (**निणिक्**) नितरां शुन्धति (**वदन्ति**) (**यत्**) (**उस्रियाणाम्**) गवाम् (**अप**) (**वारिव**) जलमिव (**व्रन्**) अपवृणोति (**पाति**) (**प्रियम्**) कमनीयम् (**रुपः**) पृथिव्याः। **रुप इति पृथिवीनामसु पठितम्।** (निघं०१.१) (**अग्रम्**) (**पदम्**) (**वेः**) पक्षिणः॥८॥

अन्वयः-ये मेऽस्य च वचसो गुहा हितं प्रवाच्यं निणिक् किमुपवदन्ति यदुस्रियाणां वारिव वेरग्रं पदमिव रुपः प्रियमप व्रन् कश्चैतत् पाति॥८॥

भावार्थः-हे विद्वांसो! ममास्य च जनस्य बुद्धौ स्थितं चेतनं किमस्ति कीदृगस्ति यत्पशूनां पालकं जलमिव रक्षति सर्वेभ्यः प्रियं दृश्यते। यदाऽऽकाशे पक्षिणः पदमिव गुप्तमस्ति तद्विज्ञानायाऽस्मान् प्रति भवन्तः किं ब्रुवन्तु॥८॥

पदार्थः-जो (**मे**) मेरे और (**अस्य**) इस जन के (**वचसः**) वचन के सम्बन्ध में (**गुहा**) बुद्धि में (**हितम्**) स्थित (**प्रवाच्यम्**) प्रकर्षता से कहने योग्य (**निणिक्**) अत्यन्त शुद्ध करने वाले को (**किम्**) क्या (**उप, वदन्ति**) समीप में कहते हैं (**यत्**) जो (**उस्रियाणाम्**) गौओं के (**वारिव**) जल के सदृश वा (**वेः**) पक्षी के (**अग्रम्**) ऊँचे (**पदम्**) स्थान के सदृश (**रुपः**) पृथिवी के (**प्रियम्**) सुन्दर भाग को (**अप, व्रन्**) घेरता है, कौन इन दोनों का (**पाति**) पालन करता है॥८॥

भावार्थः-हे विद्वानो! मेरी और इस जन की बुद्धि में वर्त्तमान चेतन क्या और कैसा है? जो पशुओं के पालन करने वाला जल के सदृश रक्षा करता और सब से प्रिय देख पड़ता है। और जो आकाश में पक्षी के पैर के सदृश गुप्त है, उसके विज्ञान के लिये हम लोगों के प्रति आप लोग क्या कहते हो॥८॥

अथ समाधातृविषयमाह॥

अब समाधाता के विषय को अगले मन्त्र में कहते हैं॥

इ॒दमु॒ त्यन्महि॑ म॒हामनी॑कं॒ यदु॒स्रिया॒ सच॑त पू॒र्व्यं गौः।
ऋ॒तस्य॑ प॒दे अधि॒ दीद्या॑नं॒ गुहा॑ रघु॒ष्यद् र॑घु॒यद् वि॑वेद॥९॥

इ॒दम्। ऊ॒म् इति॑। त्यत्। महि॑। म॒हाम्। अनी॑कम्। यत्। उ॒स्रिया॑। सच॑त। पू॒र्व्यम्। गौः। ऋ॒तस्य॑। प॒दे। अधि॑। दीद्या॑नम्। गुहा॑। र॒घु॒ऽस्यत्। र॒घु॒ऽयत्। वि॒ऽवे॒द॒॥९॥

पदार्थः-(**इदम्**) (उ) (**त्यत्**) तत् (**महि**) महत् (**महाम्**) महताम्। अत्र **छान्दसो वर्णलोपो वे**ति तलोपः। (**अनीकम्**) सैन्यमिव (**यत्**) (**उस्रिया**) क्षीरादिप्रदा (**सचत**) प्राप्नुत (**पूर्व्यम्**) पूर्वैर्निष्पादितम् (**गौः**) (**ऋतस्य**) सत्यस्य (**पदे**) स्थाने (**अधि**) (**दीद्यानम्**) (**गुहा**) बुद्धौ (**रघुष्यत्**) सद्यः स्यन्दमानम् (**रघुयत्**) सद्यो गन्त्री (**विवेद**) वेत्ति॥९॥

अन्वयः-हे जिज्ञासवो! यन्महामनीकं महि ऋतस्य पदे यद्दीद्यानं गुहा रघुष्यत् पूर्व्यं रघुयद् विवेद त्यदिदमु उस्रिया गौरिवाधि यूयं सचत॥९॥

भावार्थः-हे श्रोतारो जना! यद्बुद्धिप्रेरकं मन्दशीघ्रगामि सत्यस्य परमेश्वरस्य मध्ये प्रकाशमानं बलिष्ठं सैन्यमिव वीर्यवद्वत्सं सुखयन्ती गौरिव सुखप्रदं वस्त्वस्ति तदेव युष्माकं स्वरूपमस्ति॥९॥

पदार्थः-हे जिज्ञासुजनो! **(यत्)** जो **(महाम्)** बड़ों की **(अनीकम्)** सेना के सदृश **(महि)** बड़ा वा **(ऋतस्य)** सत्य के **(पदे)** स्थान में जो **(दीद्यानम्)** प्रकाशित होता हुआ विद्यमान है, उसको **(गुहा)** बुद्धि में **(रघुष्यत्)** शीघ्र हिलते हुए के समान **(पूर्व्यम्)** पूर्वजनों से उत्पन्न किये गए के समान **(रघुयत्)** शीघ्र जाने वाली **(विवेद)** जानती है **(त्यत्, इदम्, उ)** उस ही **(उस्रिया)** दुग्ध आदि की देने वाली **(गौः)** गौ के सदृश **(अधि)** अधिक आप लोग **(सचत)** प्राप्त हूजिये॥९॥

भावार्थः-हे श्रोताजनो! जो बुद्धि की प्रेरणा करने, मन्द और शीघ्र चलने वाला सत्य परमेश्वर के मध्य में प्रकाशमान बलिष्ठ वाज पक्षी [सेना] के सदृश पराक्रम वाले बछड़े को सुख देती हुई, गौ के सदृश सुख देने वाला वस्तु है, वही आप लोगों का स्वरूप है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अध॑ द्यु॒तान॒: पि॒त्रोः सचा॒साम॑नुत॒ गुह्यं॒ चारु॒ पृश्ने॑:।

मा॒तुष्प॒दे प॑र॒मे अन्ति॒ षन्नो॑र्वृष्ण॑: शो॒चिष॒: प्रय॑तस्य जि॒ह्वा॥१०॥२॥

अध॑। द्यु॒ता॒नः। पि॒त्रोः। सचा॑। आ॒सा। अम॑नुत। गुह्य॑म्। चारु॑। पृश्ने॑:। मा॒तुः। प॒दे। प॒र॒मे। अन्ति॑। सत्। गोः। वृष्ण॑:। शो॒चिषः॑। प्रऽय॑तस्य। जि॒ह्वा॥१०॥

पदार्थः-**(अध)** अथ **(द्युतानः)** प्रकाशमानः **(पित्रोः)** जनकयोः **(सचा)** सत्येन **(आसा)** आस्येन **(अमनुत)** विजानीत **(गुह्यम्)** गुप्तम् **(चारु)** सुन्दरम् **(पृश्नेः)** अन्तरिक्षस्य मध्ये **(मातुः)** मातृवद्वर्त्तमानस्य **(पदे)** प्रापणीये **(परमे)** उत्कृष्टे **(अन्ति)** समीपे **(सत्)** वर्त्तमानम् **(गोः)** **(वृष्णः)** वर्षकस्य **(शोचिषः)** प्रकाशमानस्य **(प्रयतस्य)** प्रयत्नं कुर्वतः **(जिह्वा)** वाणी॥१०॥

अन्वयः-हे जिज्ञासवोऽध यः पित्रोर्द्युतानः सचासा परमे मातुष्पदेऽन्ति सद्गोर्वृष्ण इव शोचिषः प्रयतस्य जिह्वेव यत्पृश्नेश्चारु गुह्यमस्ति तज्जीवस्वरूपममनुत॥१०॥

भावार्थः-यथा द्यावापृथिव्योर्मध्ये वर्त्तमानस्सूर्य्यः सुशोभितोऽस्ति यथा विदुषो वाणी विद्याप्रकाशिका वर्तते यथाऽन्तरिक्षं कस्मादपि दूरे न भवति तथैव स्वात्मवस्तु परमात्मा च सन्निकटे वर्त्तत इति वेदनीयम्॥१०॥

पदार्थः-हे जिज्ञासुजनो! **(अध)** इसके अनन्तर जो **(पित्रोः)** माता और पिता की उत्तेजना से

(**द्युतानः**) प्रकाशमान (**सचा**) सत्य (**आसा**) मुख से (**परमे**) उत्तम (**मातुः**) माता के सदृश वर्त्तमान के (**पदे**) प्राप्त होने योग्य स्थान में (**अन्ति**) समीप (**सत्**) वर्त्तमान (**गोः**) गौ और (**वृष्णः**) वृष्टि करने वाले के सदृश (**शोचिषः**) प्रकाशमान (**प्रयतस्य**) प्रयत्न करते हए की (**जिह्वा**) वाणी के सदृश जो (**पृश्नेः**) अन्तरिक्ष के मध्य में (**चारु**) सुन्दर (**गुह्यम्**) गुप्त है, उस जीवस्वरूप को (**अमनुत**) जानिये॥१०॥

भावार्थः–जैसे अन्तरिक्ष और पृथिवी के मध्य में वर्त्तमान सूर्य्य उत्तम प्रकार शोभित है और जैसे विद्वान् की वाणी विद्या का प्रकाश करने वाली है और जैसे अन्तरिक्ष किसी से भी दूर नहीं है, वैसे ही उत्तम अपना आत्मारूप वस्तु और परमात्मा समीप में वर्त्तमान है, ऐसा जानना चाहिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तं वो॑चे॒ नम॑सा पृ॒च्छ्यमा॑न॒स्तवा॒शसा॑ जातवेदो॒ यदी॒दम्।
त्वम॒स्य क्षय॑सि॒ यद्ध॒ विश्वं॑ दि॒वि यदु॒ द्रवि॑ण॒ं यत्पृ॑थि॒व्याम्॥ ११॥

ऋ॒तम्। वो॒चे॒। नम॑सा। पृ॒च्छ्यमा॑नः। तव॑। आ॒ऽशसा॑। जा॒त॒ऽवे॒दः॒। यदि॑। इ॒दम्। त्वम्। अ॒स्य। क्षय॑सि। यत्। ह॒। विश्व॑म्। दि॒वि। यत्। ऊ॒म् इति॑। द्रवि॑णम्। यत्। पृ॒थि॒व्याम्॥ ११॥

पदार्थः–(**ऋतम्**) सत्यम् (**वोचे**) वदेयमुपदिशेयं वा (**नमसा**) सत्कारेण (**पृच्छ्यमानः**) (**तव**) (**आशसा**) समन्तात् प्रशंसितेन (**जातवेदः**) जातप्रज्ञान (**यदि**) चेत् (**इदम्**) (**त्वम्**) (**अस्य**) (**क्षयसि**) निवससि (**यत्**) (**ह**) किल (**विश्वम्**) सर्वम् (**दिवि**) प्रकाशमाने परमात्मनि सूर्य्ये वा (**यत्**) (**उ**) (**द्रविणम्**) द्रव्यम् (**यत्**) (**पृथिव्याम्**)॥११॥

अन्वयः-हे जातवेदो! यदि त्वं यद्ध दिवि विश्वं द्रविणं यत्पृथिव्यां यदु वाय्वादिषु वर्त्तते यत्र त्वं क्षयसि तस्यास्य तवाऽऽशसा नमसा पृच्छ्यमानोऽहं तर्हीदमृतं त्वां प्रतिवोचे॥११॥

भावार्थः–हे मनुष्या! यद् ब्रह्म सर्वत्र व्याप्तमस्ति यत्र सर्वं वसति तत्सत्यस्वरूपं युष्मान् प्रत्यहमुपदिशामि तदेवोपाध्वम्॥११॥

पदार्थः–हे (**जातवेदः**) ज्ञान से विशिष्ट (**यदि**) यदि आप (**यत्**) जो (**ह**) निश्चयकर (**दिवि**) प्रकाशमान परमात्मा वा सूर्य्य में (**विश्वम्**) सम्पूर्ण (**द्रविणम्**) द्रव्य और (**यत्**) जो (**पृथिव्याम्**) पृथिवी में (**यत्**) जो (**उ**) और वायु आदि में वर्त्तमान है और जिसमें (**त्वम्**) आप (**क्षयसि**) रहते हो उस (**अस्य**) इन (**तव**) आपके (**आशसा**) सब प्रकार प्रशंसित (**नमसा**) सत्कार से (**पृच्छ्यमानः**) पूंछा गया मैं तो (**इदम्**) इस (**ऋतम्**) सत्य को आपके प्रति (**वोचे**) कहूं वा उपदेश करूं॥११॥

भावार्थः–हे मनुष्यो! जो ब्रह्म सब स्थान में व्याप्त है और जिसमें सम्पूर्ण पदार्थ वसते हैं, उस सत्यस्वरूप का आप लोगों के प्रति मैं उपदेश करता हूँ, उसी की उपासना करो॥११॥

पुनः प्रच्छकविषयमाह॥

फिर प्रच्छक विषय को अगले मन्त्र में कहते हैं॥

किं नो॑ अ॒स्य द्र॒वि॑णं॒ कद्ध रत्नं॒ वि नो॑ वोचो जातवेदश्चिकि॒त्वान्।

गुहाध्व॑नः पर॒मं यन्नो॑ अ॒स्य रेकु॑ प॒दं न नि॑दा॒ना अग॑न्म॥ १२॥

किम्। नः। अस्य। द्रविणम्। कत्। ह। रत्नम्। वि। नः। वोचः। जातऽवेदः। चिकित्वान्। गुहा। अध्वनः। परमम्। यत्। नः। अस्य। रेकु। पदम्। न। निदानाः। अगन्म॥ १२॥

पदार्थः-(**किम्**) प्रश्ने (**नः**) अस्माकम् (**अस्य**) संसारस्य मध्ये (**द्रविणम्**) यशः (**कत्**) कदा (**ह**) किल (**रत्नम्**) धनम् (**वि**) (**नः**) अस्मान् (**वोचः**) उपदिशेः (**जातवेदः**) जातविद्य (**चिकित्वान्**) विवेकी (**गुहा**) बुद्धेः (**अध्वनः**) मार्गस्य (**परमम्**) प्रकृष्टं प्रापणीयम् (**यत्**) (**नः**) अस्माकम् (**अस्य**) (**रेकु**) शङ्कितम् (**पदम्**) प्रापणीयम् (**न**) इव (**निदानाः**) निन्दां कुर्वाणाः (**अगन्म**)॥ १२॥

अन्वयः-हे जातवेदश्चिकित्वाँस्त्वमस्य नः किं द्रविणं किं रत्नमस्तीति न कद्ध विवोचः यद् गुहाऽध्वनः परमं प्राप्तान्नोऽस्मान् रेकु पदं न नोऽस्मान्निदाना अस्य संसारस्य मध्ये स्युस्तान् विहायाऽगन्म तत्किमिति॥ १२॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसोऽस्मासु किं यशः किं रमणीयं वस्तु के चाऽस्माकं निन्दकाः किं च शङ्कनीयं वस्तु किं च प्रापणीयं पदमस्तीत्युत्तराणि ब्रूत॥ १२॥

पदार्थः-हे (**जातवेदः**) विद्यायुक्त (**चिकित्वान्**) विचारशील! आप (**अस्य**) इस संसार में (**नः**) हम लोगों का (**किम्**) क्या (**द्रविणम्**) यश और (**किम्**) क्या (**रत्नम्**) धन है ऐसा (**नः**) हम लोगों को (**कत्, ह**) कभी (**वि, वोचः**) उपदेश कीजिये (**यत्**) जो (**गुहा**) बुद्धि के (**अध्वनः**) मार्ग के (**परमम्**) उत्तम प्राप्त होने योग्य को प्राप्त हुए (**नः**) हम लोगों को (**रेकु**) शङ्कायुक्त (**पदम्**) प्राप्त होने योग्य स्थान के (**न**) तुल्य (**नः**) हम लोगों के (**निदानाः**) निन्दा करते हुए (**अस्य**) इस संसार के मध्य में हों, उनको त्याग के (**अगन्म**) प्राप्त हुए वह क्या है॥ १२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! हम लोगों में क्या यश? क्या सुन्दर वस्तु? और कौन लोग हम लोगों की निन्दा करने वाले? और क्या शङ्का करने योग्य वस्तु? और क्या प्राप्त होने योग्य स्थान है? इनके उत्तर कहो॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

का मु॑र्यादा॑ व॒युना॒ कद्ध॑ वा॒ममच्छा॑ गमेम र॒घवो॒ न वाज॑म्।

क॒दा नो॑ दे॒वीर॒मृत॑स्य॒ पत्नीः॑ सूरो॒ वर्णे॑न ततनन्नु॒षास॑ः॥ १३॥

का। मर्य्यादा। वयुना। कत्। ह। वामम्। अच्छ। गमेम। रघवः। न। वाजम्। कदा। नः। देवीः। अमृतस्य। पत्नीः। सूरः। वर्णेन। ततनन्। उषसः॥ १३॥

पदार्थः-(**का**) (**मर्य्यादा**) (**वयुना**) कर्माणि (**कत्**) कदा (**ह**) खलु (**वामम्**) प्रशस्तवस्तु (**अच्छ**) सम्यक्। अत्र **संहितायामि**ति दीर्घः। (**गमेम**) प्राप्नुयाम (**रघवः**) सद्यः कारिणः (**न**) इव (**वाजम्**) विज्ञानम् (**कदा**) (**नः**) अस्मान् (**देवीः**) देदीप्यमानाः (**अमृतस्य**) नाशरहितस्य (**पत्नीः**) स्त्रीवद्वर्त्तमानाः (**सूरः**) सूर्य्यः (**वर्णेन**) (**ततनन्**) तनिष्यन्ति (**उषासः**) प्रभातान्॥ १३॥

अन्वयः-हे विद्वांसो! नोऽस्माकं का मर्य्यादा कानि वयुना रघवो वाजं वामं कद्धाच्छ गमेम कदा सूरोऽमृतस्य देवीः पत्नीरुषासो न इव वर्णेन ततनन्॥ १३॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या आप्तविद्वांसं मनुष्येण कर्त्तव्यानि कर्माणि प्रापणीयं पदं पृच्छेयुर्भवान् सूर्य्ये प्रातर्वेलामिवाऽस्मान् कदा विदुषः सम्पादयिष्यतीति पृच्छेयुः॥ १३॥

पदार्थः-हे विद्वानो! (**नः**) हम लोगों की (**का**) कौन (**मर्य्यादा**) प्रतिष्ठा और कौन (**वयुना**) कर्म्म हम लोग (**रघवः**) शीघ्र करने वालों के (**वाजम्**) विज्ञान और (**वामम्**) उत्तम वस्तु को (**कत् ह**) कभी (**अच्छ**) उत्तम प्रकार (**गमेम**) प्राप्त होवें और (**कदा**) कब (**सूरः**) सूर्य्य (**अमृतस्य**) नाशरहित काल की (**देवीः**) प्रकाशमान (**पत्नीः**) स्त्रियों के सदृश वर्त्तमान (**उषासः**) प्रातर्वेलाओं के (**न**) सदृश आप (**वर्णेन**) तेज से (**ततनन्**) विस्तृत करेंगे॥ १३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य लोग यथार्थवादी विद्वान् से मनुष्य के करने योग्य कर्म्मों और प्राप्त होने योग्य स्थान को पूछें कि आप सूर्य्य में प्रातःकाल के सदृश हम लोगों को कब विद्वान् करोगे? ऐसा पूछें॥ १३॥

अथ समाधातृविषयमाह॥

अब समाधाता के विषय को अगले मन्त्र में कहते हैं॥

अनिरेण वचसा फल्गवेन प्रतीत्येन कृधुनातृपासः।

अधा ते अग्ने किमिहा वदन्त्यनायुधास आसता सचन्ताम्॥ १४॥

अनिरेण। वचसा। फल्गवेन। प्रतीत्येन। कृधुना। अतृपासः। अध। ते। अग्ने। किम्। इह। वदन्ति। अनायुधासः। असता। सचन्ताम्॥ १४॥

पदार्थः-(**अनिरेण**) अरमणीयेन (**वचसा**) वचनेन (**फल्गवेन**) महता (**प्रतीत्येन**) प्रतीतौ भवेन (**कृधुना**) ह्रस्वेनाऽल्पेन। (**अतृपासः**) अतृप्ताः सन्तः (**अध**) अथ। अत्र **निपातस्य चे**ति दीर्घः। (**ते**) (**अग्ने**) विद्वन् (**किम्**) (**इह**) अस्मिन् संसारे जन्मनि वा। अत्र **निपातस्य चे**ति दीर्घः। (**वदन्ति**)

(अनायुधासः) अविद्यमानायुधाः **(आसता)** अवर्त्तमानेन। अत्रा**न्येषामपी**त्याद्यचो दीर्घः। **(सचन्ताम्)** प्राप्नुवन्तु॥१४॥

अन्वयः-हे अग्ने विद्वन्! येऽनिरेण प्रतीत्येन फल्गवेन कृधुना वचसाऽतृपास आसताऽनायुधास इवेह किं वदन्त्यध ते किं सचन्तामित्यस्योत्तरं ब्रूत॥१४॥

भावार्थः-यदि श्रोतार उपदेशेन प्राप्तोत्तराः सन्तुष्टा न स्युस्ते तावत्पृच्छन्तु यदा प्राप्तसमाधानाः स्युस्तदा तत्कर्म्मारभन्ताम्॥१४॥

पदार्थः-हे **(अग्ने)** विद्वान् पुरुष! जो **(अनिरेण)** नहीं रमने योग्य **(प्रतीत्येन)** प्रतीति में प्रसिद्ध हुए **(फल्गवेन)** बड़े **(कृधुना)** छोटे **(वचसा)** वचन से **(अतृपासः)** अतृप्त होते हुए **(आसता)** नहीं वर्त्तमान बल आदि से **(अनायुधासः)** विना शस्त्र-अस्त्र वालों के सदृश **(इह)** इस संसार वा इस जन्म में **(किम्)** क्या **(वदन्ति)** कहते हैं **(अध)** इसके अनन्तर **(ते)** आपके लिये किसे **(सचन्ताम्)** प्राप्त होवें, इसका उत्तर कहिये॥१४॥

भावार्थः-जो श्रोता लोग उपदेश से उत्तर को प्राप्त हुए सन्तुष्ट न होवें, वे तब तक पूछें, जब कि समाधान को प्राप्त होवें, तब उस कर्म का आरम्भ करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच।

रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत्॥१५॥३॥

अस्य। श्रिये। सम्ऽइधानस्य। वृष्णः। वसोः। अनीकम्। दमे। आ। रुरोच। रुशत्। वसानः। सुदृशीकऽरूपः। क्षितिः। न। राया। पुरुऽवारः। अद्यौत्॥१५॥

पदार्थः-**(अस्य)** वर्त्तमानस्य **(श्रिये)** शोभनायै लक्ष्म्यै वा **(समिधानस्य)** देदीप्यमानस्य **(वृष्णः)** बलिष्ठस्य **(वसोः)** वासयितुः **(अनीकम्)** सैन्यम् **(दमे)** गृहे **(आ)** समन्तात् **(रुरोच)** रोचते **(रुशत्)** सुन्दरं रूपम् **(वसानः)** प्राप्तः **(सुदृशीकरूपः)** सुष्ठु दर्शनीयस्वरूपः **(क्षितिः)** पृथिवी **(न)** इव **(राया)** धनेन **(पुरुवारः)** बहुभिर्वरणीयस्वरूपः **(अद्यौत्)** प्रकाशते॥१५॥

अन्वयः-यो रुशद्वसानः सुदृशीकरूपः पुरुवारो राया क्षितिर्नाद्यौत् यस्य समिधानस्य वृष्णो वसो राज्ञो दमे श्रियेऽनीकमारुरोच। तस्या अस्य सर्वाणि समाधानानि सुखानि च भवन्ति॥१५॥

भावार्थः-अत्रोपमालङ्कारः। ये सुरूपवन्तः पृथिवीवत् क्षमादिगुणा बहु प्रतिष्ठिताश्चक्रवर्त्ति-राज्यश्रिया सुशोभिताः सन्तः सुशिक्षितां महाबलवतीं महतीं सेनामुन्नयन्ति तेषामेव चक्रवर्त्तिराज्यं संभाव्यते नेतरेषामिति॥१५॥

अत्राऽग्निमेधाविराजाऽध्यापकोपदेशकप्रच्छकसमाधातृगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चमं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः–जो (**रुशत्**) सुन्दर रूप को (**वसानः**) प्राप्त (**सुदृशीकरूपः**) उत्तम प्रकार देखने योग्य स्वरूप से युक्त (**पुरुवारः**) सब से स्वीकार करने योग्य स्वरूप से शोभित तथा (**राया**) धन से (**क्षितिः**) पृथिवी के (**न**) समान (**अद्यौत्**) प्रकाशित होता है, जिस (**समिधानस्य**) प्रकाशमान (**वृष्णः**) बलिष्ठ (**वसोः**) वसाने वाले राजा के (**दमे**) गृह में (**श्रिये**) शोभा वा लक्ष्मी के लिये (**अनीकम्**) सेना (**आ**) सब प्रकार (**रुरोच**) सुन्दर है, उस सेना के और (**अस्य**) इस वर्त्तमान राजा के सम्पूर्ण समाधान और सुख होते हैं॥१५॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो अच्छे रूपवान् पृथिवी के सदृश क्षमा आदि गुण वाले और प्रतिष्ठित चक्रवर्त्ती राजाओं की लक्ष्मी से शोभित हुए उत्तम प्रकार शिक्षित बड़ी बलवती बड़ी सेना को बढ़ाते हैं, उनका ही चक्रवर्त्ती राज्य संभावित होता है औरों का नहीं॥१५॥

इस सूक्त में बुद्धिमान् राजा, अध्यापक, उपदेशक, प्रश्नकर्त्ता और समाधानकर्त्ता के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पांचवां सूक्त और तीसरा वर्ग समाप्त हुआ॥

अथैकादशर्चस्य षष्ठस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १, ३, ५, ८, ११ विराट् त्रिष्टुप्। ७ निचृत्त्रिष्टुप्। १० त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ४, ९ भुरिक् पङ्क्तिः। ६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब ग्यारह ऋचा वाले छठे सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वानों के विषय को कहते हैं॥

ऊ॒र्ध्व ऊ॒ षु णो॑ अध्वरस्य होत॒रग्ने॒ तिष्ठ॑ दे॒वता॑ता॒ यजी॑यान्।
त्वं हि विश्व॑म॒भ्यसि॒ मन्म॒ प्र वे॒धस॑श्चि॒त्तिर॑सि मनी॒षाम्॥ १॥

ऊ॒र्ध्वः। ऊ॒म् इति॑। सु। नः॒। अ॒ध्व॒र॒स्य॒। होत॒रिति॑। अग्ने॑। तिष्ठ॑। दे॒वऽता॑ता। यजी॑यान्। त्वम्। हि। विश्व॑म्। अ॒भि। असि॑। मन्म॑। प्र। वे॒धसः॑। चि॒त्। ति॒र॒सि॒। म॒नी॒षाम्॥ १॥

पदार्थः-(**ऊद्ध्वः**) उपर्य्यधिष्ठाता (**उ**) वितर्के (**सु**) शोभने (**नः**) अस्माकम् (**अध्वरस्य**) अहिंसनीयस्य धर्म्यस्य व्यवहारस्य (**होतः**) दातः (**अग्ने**) पावक इव विद्वन् (**तिष्ठ**) (**देवताता**) देवतातौ (**यजीयान्**) अतिशयेन यष्टा (**त्वम्**) (**हि**) यतः (**विश्वम्**) सर्वं जगत् (**अभि**) आभिमुख्ये (**असि**) भवसि (**मन्म**) विज्ञानम् (**प्र**) (**वेधसः**) मेधाविनो विपश्चितः (**चित्**) एव (**तिरसि**) तरसि (**मनीषाम्**) प्रज्ञाम्॥ १॥

अन्वयः-हे होतरग्ने! त्वं हि देवताता यजीयान्नोऽध्वरस्योद्ध्वो वेधसो विश्वं मन्माऽभ्यसि मनीषां चित् तिरसि स उ सु प्र तिष्ठ॥ १॥

भावार्थः-हे मनुष्या! ये विदुषां सकाशाद्विद्याः प्राप्य सर्वस्य रक्षकाः प्रज्ञाप्रदातारः स्युस्तेषामेव प्रतिष्ठां कुरुत॥ १॥

पदार्थः-हे (**होतः**) दानकर्त्ता (**अग्ने**) अग्नि के सदृश विद्वान्! (**हि**) जिससे (**त्वम्**) आप (**देवताता**) विद्वानों की पङ्क्ति में (**यजीयान्**) अत्यन्त यजन करने वाले (**नः**) हम लोगों के (**अध्वरस्य**) नहीं हिंसा करने योग्य धर्मयुक्त व्यवहार के (**ऊद्ध्वः**) ऊपर अधिष्ठाताजन (**वेधसः**) बुद्धिमान् विद्वान् के सम्बन्ध में (**विश्वम्**) सम्पूर्ण जगत् और (**मन्म**) विज्ञान के (**अभि**) सम्मुख (**असि**) होते और (**मनीषाम्, चित्**) उत्तम बुद्धि ही के (**तिरसि**) पार होते हो (**उ, सु, प्र, तिष्ठ**) सो ही स्थित हूजिये॥ १॥

भावार्थः-हे मनुष्यो! जो लोग विद्वानों के समीप से विद्याओं को प्राप्त होकर सब के रक्षा करने और बुद्धि देने वाले होवें, उन्हीं लोगों की प्रतिष्ठा करो॥ १॥

अथ विदुषां कर्त्तव्यमाह॥

अब विद्वानों के कर्त्तव्य को अगले मन्त्र में कहते हैं॥

अमू॑रो॒ होता॒ न्य॑सादि वि॒क्ष्व॑ग्निर्म॒न्द्रो वि॒दथे॑षु॒ प्रचे॑ताः।

ऊ॒र्ध्वं भा॒नुं स॑वि॒तेवा॑श्रे॒न्मेते॑व धू॒मं स्त॑भाय॒दुप॒ द्याम्॥ २॥

अमू॑रः। होता॑। नि। अ॒सा॒दि॒। वि॒क्षु। अ॒ग्निः। म॒न्द्रः। वि॒दथे॑षु। प्रऽचे॑ताः। ऊ॒र्ध्वम्। भा॒नुम्। स॒वि॒ताऽइ॑व। अ॒श्रे॒त्। मेता॑ऽइव। धू॒मम्। स्त॒भा॒य॒त्। उप॑। द्याम्॥ २॥

पदार्थः-(**अमूरः**) अमूढो विद्वान् सन्। अत्र वर्णव्यत्ययेन ढस्य रः। (**होता**) आदाता (**नि**) (**असादि**) (**विक्षु**) प्रजासु (**अग्निः**) पावक इव (**मन्द्रः**) आनन्दप्रदः (**विदथेषु**) सङ्ग्रामेषु (**प्रचेताः**) प्राज्ञः प्रज्ञापकः (**ऊर्द्ध्वम्**) उपरिस्थम् (**भानुम्**) किरणम् (**सवितेव**) सूर्य्य इव (**अश्रेत्**) आश्रयेत् (**मेतेव**) प्रमातेव (**धूमम्**) (**स्तभायत्**) स्तभ्नाति (**उप**) (**द्याम्**) प्रकाशम्॥ २॥

अन्वयः-मनुष्यैर्योऽमूरो होता विक्षु विदथेष्वग्निरिव मन्द्रः प्रचेता द्यामूर्द्ध्वं भानुं सवितेव धूमं मेतेव स्तभायन् न्यायमश्रेत् स एव राज्यकर्म्मण्युप न्यसादि निषाद्येत तर्हि पुष्कलं सुखं प्राप्येत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यदि मनुष्याः सूर्य्यवत्प्रतापिनमग्निवद् दुष्टप्रदाहकं न्यायविनयाभ्यां प्रजासु चन्द्र इव संग्रामे विजेतारं राजानं संस्थापयेयुस्तर्हि कदाचिद्दुःखं न प्राप्नुयुः॥ २॥

पदार्थः-मनुष्यों को चाहिये कि जो (**अमूरः**) मूर्खपन से रहित विद्वान् जन होता हुआ (**होता**) ग्रहण करने वाला (**विक्षु**) प्रजाओं और (**विदथेषु**) संग्रामों में (**अग्निः**) अग्नि के सदृश (**मन्द्रः**) आनन्द देने वाला (**प्रचेताः**) बुद्धिमान् वा बुद्धिदाता (**द्याम्**) प्रकाश और (**उद्ध्वम्**) ऊपर वर्त्तमान (**भानुम्**) किरण को (**सवितेव**) सूर्य्य के सदृश (**धूमम्**) धुएं को (**मेतेव**) यथार्थ ज्ञान वाले के सदृश (**स्तभायत्**) रोकता है, न्याय का (**अश्रेत्**) आश्रय करे, वही राज्य कर्म्म में (**उप, नि, असादि**) स्थित होवे तो बहुत सुख को प्राप्त होवे॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सूर्य्य के सदृश प्रतापी अग्नि के सदृश दुष्टों के दाहक और न्याय और नम्रता से प्रजाओं में चन्द्रमा के सदृश संग्राम में जीतने वाले राजा को संस्थापित करें तो कभी दुःख को न प्राप्त होवें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

य॒ता सु॑जू॒र्णी रा॒तिनी॑ घृ॒ताची॑ प्रदक्षि॒णिद्दे॒वता॑तिमुरा॒णः।

उदु॒ स्वरु॑र्नव॒जा नाक्रः प॒श्वो अ॑नक्ति॒ सुधि॑तः सु॒मेक॑॥ ३॥

य॒ता। सु॒ऽजू॒र्णिः। रा॒तिनी॑। घृ॒ताची॑। प्र॒ऽद॒क्षि॒णित्। दे॒वऽता॑तिम्। उ॒रा॒णः। उत्। उ॒म् इति॑। स्वरुः॑। न॒व॒ऽजाः। न। अ॒क्रः। प॒श्वः। अ॒न॒क्ति॒। सुऽधि॑तः। सु॒ऽमेक॑ः॥ ३॥

पदार्थः-(**यता**) प्राप्ता (**सुजूर्णिः**) सुष्ठु शीघ्रकारिणी (**रातिनी**) बहवो राता दातारो विद्यन्ते यस्याः सा (**घृताची**) रात्रिः। **घृताचीति रात्रिनामसु पठितम्।** (निघं०१.७) (**प्रदक्षिणित्**) या प्रदक्षिणमेति सा। अत्र **वाच्छन्दसी**त्यलोपः। (**देवतातिम्**) दिव्यगुणान्विताम् (**उराणः**) य उरून् बहूननिति प्राणयति सः (**उत्**) (**उ**) (**स्वरुः**) उपदेष्टा (**नवजाः**) नवेषु सुनवीनेषु जातः (**न**) इव (**अक्रः**) अक्रमिता (**पश्वः**) पशून् (**अनक्ति**) कामयते (**सुधितः**) सुहितः (**सुमेकः**) सुष्ठु प्रकाशमानः॥३॥

अन्वयः-हे मनुष्या! यथा सुजूर्णिर्यता रातिनी प्रदक्षिणिद् घृताची देवतातिमुदनक्ति यथा तामुराणस्सुधितस्सुमेकोऽक्रो नवजाः सूर्यः स्वरुर्न उदनक्ति तथा विद्वान् वर्त्तेत स उ पश्वो न हिंस्यात्॥३॥

भावार्थः-अत्रोपमालङ्कारः। उपदेशका रात्रौ दिने सर्वैः कर्त्तव्यां परिचर्य्यामुपदिशेयुर्येन शयनजागरणादियुक्ताहारविहारान् कृत्वा सिद्धहिता भवेयुः॥३॥

पदार्थः-हे मनुष्यो! जैसे (**सुजूर्णिः**) उत्तम प्रकार शीघ्रता करने वाली (**यता**) प्राप्त (**रातिनी**) बहुत देने वाले जिसके ऐसी (**प्रदक्षिणित्**) दहिनी ओर प्राप्त होने वाली (**घृताची**) रात्रि (**देवतातिम्**) श्रेष्ठ गुणों से युक्त वेला को (**उत्, अनक्ति**) शोभा करती है और जैसे उसको (**उराणः**) बहुतों को जिलाने वाला (**सुधितः**) उत्तम प्रकार धारण किये हुए (**सुमेकः**) सुन्दर प्रकाशमान (**अक्रः**) नहीं किञ्चित् चलने वाला, किन्तु वेग से जाने वाला (**नवजाः**) नवीनों में उत्पन्न सूर्य्य (**स्वरुः**) उपदेश देनेवाले के (**न**) समान शोभा करता है, वैसे विद्वान् वर्त्ताव करें (**उ**) और वह (**पश्वः**) पशुओं की न हिंसा करे॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। उपदेशक लोग रात्रि और दिन में सभों के करने योग्य सेवा का उपदेश देवें, जिससे कि शयन जागरण आदि से युक्त आहार और विहारों को करके अपने हितों को सिद्ध करने वाले होवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात्।

पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः॥४॥

स्तीर्णे। बर्हिषि। सम्ऽइधाने। अग्नौ। ऊर्ध्वः। अध्वर्युः। जुजुषाणः। अस्थात्। परि। अग्निः। पशुऽपाः। न। होता। त्रिऽविष्टि। एति। प्रऽदिवः। उराणः॥४॥

पदार्थः-(**स्तीर्णे**) आच्छादिते (**बर्हिषि**) अन्तरिक्षे (**समिधाने**) प्रदीप्ते (**अग्नौ**) सूर्य्यरूपे (**ऊर्ध्वः**) उत्कृष्टः (**अध्वर्युः**) य आत्मनोऽध्वरमहिंसनीयं व्यवहारं कर्त्तुमिच्छुः (**जुजुषाणः**) सेवमानः (**अस्थात्**) तिष्ठेत् (**परि**) (**अग्निः**) (**पशुपाः**) यः पशून् पाति (**न**) इव (**होता**) यज्ञानुष्ठाता (**त्रिविष्टि**) आकाशे (**एति**) गच्छति (**प्रदिवः**) सुप्रकाशान् (**उराणः**) बहु कुर्वन्॥४॥

अन्वयः-हे मनुष्या! यथा समिधाने बर्हिषि स्तीर्णे अग्नावुराण ऊर्ध्वोऽग्निः सूर्य्यः पर्य्यस्थात् त्रिविष्टि प्र दिव एति पशुपा न होताऽस्ति तथैव जुजुषाणोऽध्वर्युर्वर्त्तेत॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये अहिंसादिकर्माणि कृत्वा विद्वांसो भूत्वा परोपकारिणः स्युस्तेऽन्तरिक्षे सूर्य्य इव सुप्रकाशिता भवेयुः॥४॥

पदार्थः-हे मनुष्यो! जैसे **(समिधाने)** प्रदीप्त **(बर्हिषि)** अन्तरिक्ष में वा **(स्तीर्णे)** आच्छादित **(अग्नौ)** सूर्य्यरूप अग्नि में **(उराणः)** बहुत कार्य्य करता हुआ **(ऊर्ध्वः)** उत्तम **(अग्निः)** सूर्य्याग्नि **(परि, अस्थात्)** सब ओर से स्थित हो वा **(त्रिविष्टि)** आकाश में **(प्रदिवः)** उत्तम प्रकाशों को **(एति)** प्राप्त होता है **(पशुपाः)** पशुओं की रक्षा करने वाले के **(न)** सदृश **(होता)** यज्ञ कराने वाला है, वैसे ही **(जुजुषाणः)** सेवा करते हुए **(अध्वर्युः)** अपने को अहिंसनीय व्यवहार की इच्छा करने वाले वर्त्ताव करो॥४॥

भावार्थः-इस मन्त्र में उपमा वाचकलुप्तोपमालङ्कार हैं। जो लोग अहिंसा आदि कर्म्मों को कर और विद्वान् होकर परोपकारी हों, वे अन्तरिक्ष में सूर्य्य के सदृश उत्तम प्रकार प्रकाशित होवें॥४॥

अथेश्वरविषयमाह॥

अब ईश्वरविषय को अगले मन्त्र में कहते हैं॥

परि॒ त्मना॑ मि॒तद्रु॑रेति॒ होता॒ग्निर्म॒न्द्रो मधु॑वचा ऋ॒तावा॑।

द्रव॑न्त्यस्य वा॒जिनो॒ न शोका॒ भय॑न्ते॒ विश्वा॒ भुव॑ना॒ यदभ्रा॑ट्॥५॥४॥

परि॑। त्मना॑। मि॒तऽद्रु॑। ए॒ति॒। होता॑। अ॒ग्निः। म॒न्द्रः। मधु॑ऽवचाः। ऋ॒तऽवा॑। द्रव॑न्ति। अ॒स्य॒। वा॒जिनः॑। न। शोकाः॑। भय॑न्ते। विश्वा॑। भुव॑ना। यत्। अभ्रा॑ट्॥५॥

पदार्थः-**(परि)** **(त्मना)** आत्मना **(मितद्रुः)** यो मितं द्रवति गच्छति सः **(एति)** प्राप्नोति **(होता)** यज्ञकर्त्ता **(अग्निः)** पावक इव **(मन्द्रः)** आनन्दप्रद आनन्दितः **(मधुवचाः)** मधुरवाक् **(ऋतावा)** सत्यस्य विभाजकः **(द्रवन्ति)** धावन्ति **(अस्य)** **(वाजिनः)** अश्वाः **(न)** इव **(शोकाः)** प्रकाशाः **(भयन्ते)** बिभ्यति। अत्र व्यत्ययेनात्मनेपदं शपो लुक् न। **(विश्वा)** सर्वाणि **(भुवना)** भूताधिकरणानि **(यत्)** यस्मात् **(अभ्राट्)** भ्राजते॥५॥

अन्वयः-यथास्य सूर्य्यस्य वाजिनो न शोका द्रवन्ति योऽभ्राड् यद्विश्वा भुवना भयन्ते तद्वद्वर्त्तमान ऋतावा मधुवचा अग्निरिव होता मन्द्रो मितद्रुस्त्मना पर्य्येति सः सर्वं सुखं प्राप्नोति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यस्य परमात्मनः सर्वत्र प्रकाशो यस्मात्सर्वे बिभ्यति तस्य विज्ञानाय सत्याचारो योगाभ्यासश्च सर्वैः कर्त्तव्यः॥५॥

पदार्थः-जैसे **(अस्य)** इस सूर्य के **(वाजिनः)** घोड़े के **(न)** तुल्य **(शोकाः)** प्रकाश **(द्रवन्ति)**

दौड़ते हैं जो **(अभ्राट्)** दीप्त होता है **(यत्)** जिससे **(विश्वा)** सम्पूर्ण **(भुवना)** जीवों के ठहरने के अधिकरण लोकलोकान्तर **(भयन्ते)** कंपते हैं, उस प्रकार वर्त्तमान जो पुरुष **(ऋतावा)** सत्य का विभाग करने वाला **(मधुवचाः)** मधुरवाणी युक्त **(अग्निः)** अग्नि के सदृश **(होता)** यज्ञ करने वाला **(मन्द्रः)** आनन्ददाता वा आनन्दित **(मितद्रुः)** परिमाणपूर्वक चलने वाला **(त्मना)** अपने से **(परि, एति)** प्राप्त होता है, वह सुख को प्राप्त होता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिस परमात्मा का सब जगह प्रकाश और जिससे सब डरते हैं, उसके विज्ञान के लिये सत्य का आचरण और योगाभ्यास सब को करना चाहिये॥५॥

अथेश्वरतया राजगुणानाह॥

अब ईश्वरता लेकर राजगुणों को अगले मन्त्र में कहते हैं॥

भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः।
न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तन्वी३ रेप आ धुः॥६॥

भद्रा। ते। अग्ने। सुऽअनीक। सम्ऽदृक्। घोरस्य। सतः। विषुणस्य। चारुः। न। यत्। ते। शोचिः। तमसा। वरन्त। न। ध्वस्मानः। तन्वि। रेपः। आ। धुरिति धुः॥६॥

पदार्थः-(**भद्रा**) कल्याणकारिणी (**ते**) तव (**अग्ने**) विद्युदिव वर्त्तमान (**स्वनीक**) उत्तमसैन्य (**संदृक्**) समानदृष्टिः (**घोरस्य**) दुष्टस्य (**सतः**) सत्पुरुषस्य (**विषुणस्य**) विषमस्य (**चारुः**) (**न**) (**यत्**) (**ते**) (**शोचिः**) दीप्तिः (**तमसा**) रात्र्या (**वरन्त**) निवारयन्ति (**न**) (**ध्वस्मानः**) ध्वंसकाः शत्रवः (**तन्वि**) विस्तीर्णा (**रेपः**) अपराधम् (**आ**) (**धुः**) समन्ताद् दध्युः॥६॥

अन्वयः-हे स्वनीकाग्ने! या ते घोरस्य सतो विषुणस्य चारुर्भद्रा संदृगस्ति यत्ते शोचिस्तमसा ध्वस्मानो न वरन्त या ते तन्वि नीतिस्तया रेपो न आ धुः स त्वमस्माकं राजा भव॥६॥

भावार्थः-यस्य राज्ञः पक्षपातरहिता प्रवृत्तिर्यस्य विस्तीर्णा नीतिरविहता वर्त्तते तस्य राज्ये कोऽप्यपराधं कर्त्तुं नेच्छेत्॥६॥

पदार्थः-हे (**स्वनीक**) उत्तम सेनायुक्त (**अग्ने**) बिजुली के समान वर्त्तमान! जो (**ते**) आपकी (**घोरस्य**) दुष्ट (**सतः**) श्रेष्ठ पुरुष की तथा (**विषुणस्य**) विषम की (**चारुः**) सुन्दर (**भद्रा**) कल्याण करने वाली (**संदृक्**) समान दृष्टि है (**यत्**) जो (**ते**) आपका (**शोचिः**) प्रकाश (**तमसा**) रात्रि से (**ध्वस्मानः**) नाश करने वाले शत्रु (**न**) नहीं (**वरन्त**) निवारण करते हैं, जो आपकी (**तन्वि**) विस्तीर्ण नीति उससे (**रेपः**) अपराध (**न**) नहीं (**आ, धुः**) सब प्रकार धारण करे, वह आप हम लोगों के राजा हूजिये॥६॥

भावार्थः-जिस राजा की पक्षपातरहित प्रवृत्ति और जिसकी विस्तीर्ण नीति अविच्छिन्न वर्त्तमान है, उसके राज्य में कोई भी अपराध करने की इच्छा न करे॥६॥

अथेश्वरभावे मातापित्रोः सेवाधर्ममाह॥

अब ईश्वरभाव में माता पिता के सेवाधर्म को अगले मन्त्र में कहते हैं॥

न यस्य॒ सातु॒र्जनि॑तो॒रव॑।रि॒ न मा॒तरा॑पि॒तरा॒ नू चि॑दि॒ष्टौ।

अधा॑ मि॒त्रो न सुधि॑तः पाव॒को३॑ऽग्निर्दी॑दाय॒ मानु॑षीषु वि॒क्षु॥७॥

न। यस्य॑। सातु॑ः। जनि॑तोः। अव॑ारि। न। मा॒तरा॑पि॒तरा॑। नु। चि॒त्। इ॒ष्टौ। अध॑। मि॒त्रः। न। सुऽधि॑तः। पा॒व॒कः। अ॒ग्निः। दी॒दा॒य॒। मानु॑षीषु। वि॒क्षु॥७॥

पदार्थः-(**न**) (**यस्य**) (**सातुः**) सत्याऽसत्ययोर्विभाजकस्य (**जनितोः**) जनकयोः (**अवारि**) व्रियेत (**न**) (**मातरापितरा**) जनकजनन्यौ (**नु**) सद्यः (**चित्**) अपि (**इष्टौ**) पूजनीयौ (**अधा**) अथ। अत्र **निपातस्य चे**ति दीर्घः। (**मित्रः**) सखा (**न**) इव (**सुधितः**) सुष्ठु हितो हितकारी (**पावकः**) पवित्रः (**अग्निः**) वह्निरिव (**दीदाय**) दीप्यते (**मानुषीषु**) मनुष्यसम्बन्धिनीषु (**विक्षु**) प्रजासु॥७॥

अन्वयः-हे मनुष्या! यस्य सातुर्जनितोः प्रियं नावारि यस्य चिन्मातरापितरेष्टौ नावारि। स दुःख्यधा यस्य सत्कृतौ भवेतां सुधितो मित्रो नाग्निरिव पावको मानुषीषु विक्षु नु दीदाय॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यस्मिन्विद्यमाने पुत्रे मातापित्रोर्दुःखं जायते सत्कारो न भवति स भाग्यहीनः सततं पीडितो भवति यस्य च सुसेवया प्रीतौ भवतस्तस्य प्रजासु प्रशंसा सततं सुखञ्च जायते॥७॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिस (**सातुः**) सत्य और असत्य के विभाग करने वाले के (**जनितोः**) माता और पिता का प्रिय (**न**) नहीं (**अवारि**) स्वीकार किया जाता है और (**चित्**) जिसके (**मातारापितरा**) माता और पिता (**इष्टौ**) पूजा करने योग्य (**न**) नहीं स्वीकार किये जाते हैं, वह दुःखी होता (**अधा**) इसके अनन्तर जिसके माता और पिता सत्कृत होवें (**सुधितः**) वह उत्तम प्रकार हितकारी (**मित्रः**) मित्र के (**न**) और (**अग्निः**) अग्नि के सदृश (**पावकः**) पवित्र (**मानुषीषु**) मनुष्य संबन्धिनी (**विक्षु**) प्रजाओं में (**नु**) शीघ्र (**दीदाय**) प्रकाशित होता है॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिस पुत्र के विद्यमान रहने पर माता और पिता को दुःख होता और सत्कार नहीं होता है, वह भाग्यहीन निरन्तर पीड़ित होता है और जिस पुत्र की उत्तम सेवा से माता पिता प्रसन्न होते हैं, उसकी प्रजाओं में प्रशंसा और उसको सुख होता है॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

द्विर्यं पञ्च॒ जीज॑नन्त्सं॒वसा॑ना॒ः स्वसा॑रो अ॒ग्निं मानु॑षीषु वि॒क्षु।

उ॒ष॒र्बुध॑मथ॒र्यो३॑ न दन्तं॑ शु॒क्रं स्वास॑ं प॒रशुं॑ न ति॒ग्मम्॥८॥

द्विः। यम्। पञ्च। जीजनन्। सम्ऽवसानाः। स्वसारः। अग्निम्। मानुषीषु। विक्षु। उषःऽबुधम्। अथर्यः। न। दन्तम्। शुक्रम्। सुऽआसम्। परशुम्। न। तिग्मम्॥८॥

पदार्थः-(**द्विः**) द्विवारम् (**यम्**) (**पञ्च**) (**जीजनन्**) जनयन्ति (**संवसानाः**) सम्यगाच्छादकाः (**स्वसारः**) अङ्गुलयः (**अग्निम्**) (**मानुषीषु**) मनुष्याणामिमासु (**विक्षु**) (**उषर्बुधम्**) य उषसि बुध्यते तम् (**अथर्यः**) अहिंसिताः स्त्रियः (**न**) इव (**दन्तम्**) (**शुक्रम्**) शुद्धम् (**स्वासम्**) शोभनं मुखम् (**परशुम्**) कुठारम् (**न**) इव (**तिग्मम्**) तीव्रम्॥८॥

अन्वयः-ये विद्वांसो मानुषीषु विक्ष्वग्निं संवसानाः पञ्च स्वसारोऽथर्यः शुक्रं दन्तं स्वासं न तिग्मं परशुं न यमुषर्बुधं द्विर्जीजनंस्ते सर्वाणि कार्य्याणि साद्धुं शक्नुयुः॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथाऽङ्गुलिभिस्सर्वाणि कर्म्माणि सिध्यन्ति तथैव रात्रेः पश्चिमे याम उत्थाय प्रजानां हितानि साध्नुवन्तु। तीक्ष्णः कुठार इव दुःखानि छित्वा युवतयः शुद्धं मुखं दन्तं कुर्वन्तीव प्रजाः शोधयित्वा सुखं दत्वा द्विजान् विद्याजन्मयुक्तान् सम्पादयन्तु॥८॥

पदार्थः-जो विद्वान् लोग (**मानुषीषु**) मनुष्यसम्बन्धिनी (**विक्षु**) प्रजाओं में (**अग्निम्**) अग्नि को (**संवसानाः**) उत्तम प्रकार आच्छादन करने वाले जैसे (**पञ्च**) पांच (**स्वसारः**) अंगुलियाँ वा (**अथर्यः**) नहीं हिंसित स्त्रियाँ (**शुक्रम्**) शुद्ध (**दन्तम्**) दांत और (**स्वासम्**) सुन्दर मुख को (**न**) वैसे और जैसे (**तिग्मम्**) तीव्र (**परशुम्**) कुठार को (**न**) वैसे (**यम्**) जिस (**उषर्बुधम्**) प्रातःकाल में जानने वाले को (**द्विः**) दो बार (**जीजनन्**) उत्पन्न करते हैं, वे सम्पूर्ण कार्य्य को सिद्ध कर सकें॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे अंगुलियों से सम्पूर्ण कार्य्य सिद्ध होते हैं, वैसे ही रात्रि के पिछले प्रहर में उठ के प्रजाओं के हित को सिद्ध करो। तीक्ष्ण कुठार के सदृश दुःखों को काट के युवावस्था विशिष्ट स्त्रियाँ शुद्ध मुख और दांत को करतीं, उनके सदृश प्रजाओं को शुद्ध कर और सुख देकर द्विजों को विद्या के जन्म से युक्त करो॥८॥

अथ प्रजाया ईश्वरत्वमाह॥

अब प्रजा के ईश्वर विषय को अगले मन्त्र में कहते हैं॥

तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वञ्चः स्वञ्चः।
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वन्त दस्माः॥९॥

तव। त्ये। अग्ने। हरितः। घृतऽस्नाः। रोहितासः। ऋजुऽअञ्चः। सुऽअञ्चः। अरुषासः। वृषणः। ऋजुऽमुष्काः। आ। देवऽतातिम्। अह्वन्त। दस्माः॥९॥

पदार्थः-(**तव**) (**त्ये**) ते (**अग्ने**) राजन् (**हरितः**) अङ्गुलयः। **हरित इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५) (**घृतस्नाः**) याभिर्घृतमाज्यमुदकं वा स्नान्ति ताः (**रोहितासः**) वर्द्धिकाः (**ऋज्वञ्चः**)

याभिर्ऋजुमञ्चन्ति **(स्वञ्चः)** याभिस्सुष्ठ्वञ्चन्ति गच्छन्ति प्राप्नुवन्ति वा **(अरुषासः)** सुशिक्षितास्तुरङ्गाः **(वृषणः)** बलिष्ठाः **(ऋजुमुष्काः)** य ऋजुं मार्गमुष्णन्ति ते **(आ) (देवतातिम्)** देवान् **(अह्वन्त)** आह्वयन्ते **(दस्माः)** दुःखोपक्षयितारः॥९॥

अन्वयः-हे अग्ने! यास्तव रोहितासो घृतस्ना ऋज्वञ्चः स्वञ्चो हरितो वृषण ऋजुमुष्का दस्मा अरुषास इव देवतातिमाह्वन्त। य एताभिः कर्म्माणि कर्तुं जानन्ति तास्त्ये च त्वया सम्प्रयोजनीयाः॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽश्वैरिव स्वाङ्गुलिभिः कर्म्माणि कृत्वैश्वर्यमुन्नयन्ति ते क्षीणदुःखा जायन्ते॥९॥

पदार्थः-हे **(अग्ने)** राजन्! जो **(तव)** आपकी **(रोहितासः)** बढ़ाने वाली **(घृतस्नाः)** जिनसे घृत वा जल शुद्ध और **(ऋज्वञ्चः)** सीधा सत्कार करते तथा **(स्वञ्चः)** उत्तम प्रकार चलते वा प्राप्त होते हैं वह **(हरितः)** अंगुली **(वृषणः)** बलिष्ठ **(ऋजुमुष्काः)** सरल मार्ग को चलने वाले **(दस्माः)** दुःख के नाशकर्त्ता **(अरुषासः)** उत्तम प्रकार शिक्षित घोड़ों के सदृश **(देवतातिम्)** विद्वानों को **(आ, अह्वन्त)** बुलाते और जो इन से कर्म्मों को करना जानते हैं, वह अङ्गुली और **(त्ये)** वे मनुष्य आपको संप्रयुक्त करने योग्य हैं॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग घोड़ों के सदृश अपनी अङ्गुलियों से कर्म्मों को करके ऐश्वर्य्य की वृद्धि करते हैं, वे दुःखों से रहित होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ये ह॒ त्ये ते॒ सह॑माना अ॒यास॑स्त्वे॒षासो॑ अ॒ग्ने अ॒र्चय॒श्चर॑न्ति।

श्ये॒नासो॒ न दु॑व॒सनासो॒ अर्थं॑ तुविष्व॒णसो॒ मारु॑तं॒ न शर्धः॑॥ १०॥

ये। ह॒। त्ये। ते॒। सह॑मानाः। अ॒यासः॑। त्वे॒षासः॑। अ॒ग्ने॒। अ॒र्चयः॑। चर॑न्ति। श्ये॒नासः॑। न। दु॒व॒सनासः॑। अर्थ॑म्। तु॒वि॒ऽस्व॒नसः॑। मारु॑तम्। न। शर्धः॑॥ १०॥

पदार्थः-**(ये)** **(ह)** खलु **(त्ये)** अन्ये **(ते)** तव **(सहमानाः)** सुखदुःखादीनां सोढारः **(अयासः)** प्राप्तविज्ञानासः **(त्वेषासः)** प्रकाशमानाः **(अग्ने)** पावकवद्वर्त्तमान **(अर्चयः)** सत्क्रियाः **(चरन्ति)** प्राप्नुवन्ति गच्छन्ति वा **(श्येनासः)** श्येनः पक्षीव सद्यो गन्तारोऽश्वाः **(न)** इव **(दुवसनासः)** परिचारकाः **(अर्थम्)** द्रव्यम् **(तुविष्वणसः)** ये तुवींषि बलानि वन्वते याचन्ते ते **(मारुतम्)** मरुतामिदम् **(न)** इव **(शर्धः)** बलम्॥१०॥

अन्वयः-हे अग्ने! ये ते सहमाना अयासस्त्वेषासः श्येनासो न दुवसनासस्तुविष्वणसो मारुतं शर्धो नाऽर्चयोऽर्थञ्चरन्ति त्ये ह त्वया सत्कर्त्तव्या भवन्ति॥१०॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये क्षमान्विता धर्म्यकर्माचरणेन प्रकाशमानाः सत्कीर्त्तयोऽश्ववत्कार्य्यकरा बलवन्तः स्युस्ते सत्कर्त्तव्या भवेयुः॥१०॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान! **(ये)** जो लोग **(ते)** आपके **(सहमानाः)** सुख दुःख आदि व्यवहारों के सहनेवाले **(अयासः)** विज्ञान को प्राप्त **(त्वेषासः)** प्रकाशमान **(श्येनासः)** और बाजपक्षी के सदृश शीघ्र चलनेवाले घोड़ों के **(न)** सदृश **(दुवसनासः)** लेचलने और **(तुविष्वणसः)** बलों के मांगने वाले **(मारुतम्)** पवनसम्बन्धी **(शर्धः)** बल को **(न)** जैसे **(अर्चयः)** उत्तम क्रिया वैसे **(अर्थम्)** द्रव्य को **(चरन्ति)** प्राप्त होते हैं **(त्ये)** वे **(ह)** ही अन्य जन आपको सत्कार करने योग्य होते हैं॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो लोग क्षमा से युक्त, धर्म्म सम्बन्धी कर्म्म के आचरण से प्रकाशमान, उत्तम यशवाले, घोड़े के सदृश कार्य्यकर्ता और बलवान् हों, वे सत्कार करने योग्य होवें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः।

होतारमग्निं मनुषो नि षेदुर्नमस्यन्त उशिजः शंसमायोः॥११॥५॥

अकारि। ब्रह्म। सम्ऽइधान। तुभ्यम्। शंसाति। उक्थम्। यजते। वि। ऊम् इति। धाः। होतारम्। अग्निम्। मनुषः। नि। सेदुः। नमस्यन्तः। उशिजः। शंसम्। आयोः॥११॥

पदार्थः-(**अकारि**) क्रियते **(ब्रह्म)** महद्धनम् **(समिधान)** देदीप्यमान **(तुभ्यम्)** **(शंसाति)** प्रशंसेत् **(उक्थम्)** स्तोतुमर्हम् **(यजते)** सङ्गच्छते **(वि)** **(उ)** वितर्के **(धाः)** धेहि **(होतारम्)** दातारम् **(अग्निम्)** पावकमिव **(मनुषः)** मनुष्याः **(नि)** **(सेदुः)** निषीदन्ति **(नमस्यन्तः)** नम्रतां कुर्वन्तः **(उशिजः)** कामयमानाः **(शंसम्)** प्रशंसाम् **(आयोः)** जीवनस्य॥११॥

अन्वयः-हे समिधान विद्वन्! ये नमस्यन्त उशिजो मनुष आयोः शंसं होतारमग्निं निषेदुर्य्यस्तुभ्यमुक्थं ब्रह्म शंसाति यजते यैस्त्वमैश्वर्य्यमकारि तान् व्युधाः॥११॥

भावार्थः-हे विद्वन् राजन् वा! ये त्वदर्थमैश्वर्य्यं कामयमानाः परमेश्वरं विदुषश्च नमस्यन्ति ते सततं प्रशंसिता जायन्त इति॥११॥

अत्र विद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्ठं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(समिधान)** प्रकाशमान विद्वन्! जो **(नमस्यन्तः)** नम्रता और **(उशिजः)** कामना करते हुए **(मनुषः)** मनुष्य **(आयोः)** जीवन की **(शंसम्)** प्रशंसा को और **(होतारम्)** देने वाले को **(अग्निम्)**

अग्नि के सदृश (**नि, सेदुः**) प्राप्त होते हैं और [जो] (**तुभ्यम्**) आपके लिये (**उक्थम्**) स्तुति करने योग्य (**ब्रह्म**) बड़े धन की (**शंसाति**) प्रशंसा करे (**यजते**) तथा विशेषता ही से मिलते हुए के लिये जिनसे आप ने ऐश्वर्य्य (**अकारि**) किया उनको (**वि, उ, धाः**) धारण कीजिये॥११॥

भावार्थः–हे विद्वन्! वा राजन्! जो आपके लिये ऐश्वर्य की कामना करते हुए परमेश्वर और विद्वानों को नमस्कार करते हैं, वे निरन्तर प्रशंसित होते हैं॥११॥

इस सूक्त में विद्वान् और ईश्वर के गुणवर्णन करने से इसके अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छठवां सूक्त और पांचवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य सप्तमस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १ भुरिक् त्रिष्टुप्। ७, १०, ११ त्रिष्टुप्। ८, ९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ३ निचृदनुष्टुप्। ४ अनुष्टुप् छन्दः। ५ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ सर्वगतस्याग्निशब्दार्थवाच्यव्यापकस्येश्वरस्य विषयमाह॥

अब एकादश ऋचा वाले सप्तम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में सर्वगत अग्निशब्दार्थवाच्य व्यापक परमेश्वर के विषय को कहते हैं॥

अ॒यमि॒ह प्र॑थ॒मो धा॑यि धा॒तृभि॒र्होता॒ यजि॑ष्ठो अध्व॒रेष्वीड्य॑ः।
यमप्न॑वानो॒ भृग॑वो विरुरु॒चुर्वने॑षु चि॒त्रं वि॒भ्वं॑ वि॒शेवि॑शे॥ १॥

अ॒यम्। इ॒ह। प्र॒थ॒मः। धा॒यि॒। धा॒तृऽभिः॑। होता॑। यजि॑ष्ठः। अ॒ध्व॒रेषु॑। ईड्यः॑। यम्। अप्न॑वानः। भृग॑वः। वि॒ऽरु॒रु॒चुः॒। वने॑षु। चि॒त्रम्। वि॒ऽभ्वं॑म्। वि॒शेऽवि॑शे॥ १॥

पदार्थः-(**अयम्**) (**इह**) अस्मिन्संसारे (**प्रथमः**) आदिमः (**धायि**) धीयते (**धातृभिः**) धारकैः (**होता**) दाता (**यजिष्ठः**) अतिशयेन यष्टा सङ्गन्ता (**अध्वरेषु**) अहिंसनीयेषु यज्ञेषु (**ईड्यः**) स्तोतुमर्हः (**यम्**) (**अप्नवानः**) पुत्रपौत्रादियुक्ताः (**भृगवः**) परिपक्वविज्ञानाः (**विरुरुचुः**) विशेषेण प्रकाशन्ते (**वनेषु**) वननीयेषु जङ्गलेषु (**चित्रम्**) अद्भुतम् (**विभ्वम्**) परमात्मानम् (**विशेविशे**) प्रजायै प्रजायै॥ १॥

अन्वयः-हे मनुष्या! इह धातृभिर्य्योऽयं प्रथमो होता यजिष्ठोऽध्वरेष्वीड्यो धायि विशेविशे यं चित्रं विभ्वमप्नवानो भृगवो वनेषु विरुरुचुस्तं परमात्मानं यूयं ध्यायत॥ १॥

भावार्थः-हे मनुष्या! अस्मिन् संसारे परमेश्वर एव युष्माभिर्ध्येयो ज्ञेयोऽस्ति यमुपास्य सांसारिकं पारमार्थिकं सुखं प्राप्स्यन्ति स एवेश्वरोऽत्र पूजनीयो मन्तव्यः॥ १॥

पदार्थः-हे मनुष्यो! (**इह**) इस संसार में (**धातृभिः**) धारण करने वालों से जो (**अयम्**) यह (**प्रथमः**) पहिला (**होता**) देने और (**यजिष्ठः**) अत्यन्त मेल करने वाला (**अध्वरेषु**) नहीं हिंसा करने योग्य यज्ञों में (**ईड्यः**) स्तुति करने योग्य (**धायि**) धारण किया गया जिसको (**विशेविशे**) प्रजा-प्रजा के लिये (**यम्**) जिस (**चित्रम्**) अद्भुत (**विभ्वम्**) व्यापक परमात्मा को (**अप्नवानः**) पुत्र और पौत्रादिकों से युक्त (**भृगवः**) परिपक्व विज्ञान वाले लोग (**वनेषु**) याचना करने योग्य जङ्गलों में (**विरुरुचुः**) विशेष करके प्रकाशित करते अर्थात् अपने चित्त में रमाते हैं, उस परमात्मा का आप लोग ध्यान करो॥ १॥

भावार्थः-हे मनुष्यो! इस संसार में परमेश्वर ही का आप लोगों को ध्यान करना योग्य है और जिसकी उपासना करके सांसारिक और पारमार्थिक सुख को प्राप्त होओगे, वही ईश्वर इस संसार में पूजा करने योग्य जानना चाहिये॥ १॥

पुनरग्निपदवाच्येश्वरविषयमाह॥

फिर अग्निपदवाच्य ईश्वर विषय को अगले मन्त्र में कहते हैं॥

अग्ने॑ कदा त आनुषग्भुवद्देवस्य चेतनम्।

अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यम्॥ २॥

अग्ने॑। कदा। ते॒। आनु॒षक्। भुव॑त्। दे॒वस्य॑। चेत॑नम्। अध॑। हि। त्वा॒। ज॒गृ॒भ्रि॒रे॒। मर्ता॑सः। वि॒क्षु। ईड्य॑म्॥ २॥

पदार्थः-(**अग्ने**) परमात्मन्! (**कदा**) कस्मिन् काले (**ते**) तव (**आनुषक्**) अनुकूलः (**भुवत्**) भवेत् (**देवस्य**) सुखदातुः सर्वत्र प्रकाशमानस्य (**चेतनम्**) अनन्तविज्ञानादियुक्तम् (**अधा**) अथ। अत्र **निपातस्य चे**ति दीर्घः। (**हि**) खलु (**त्वा**) त्वाम् (**जगृभ्रिरे**) गृह्णीयुः (**मर्त्तासः**) मनुष्याः (**विक्षु**) मनुष्यप्रजासु (**ईड्यम्**) प्रशंसितुं योग्यम्॥ २॥

अन्वयः-हे अग्ने! देवस्य ते मनुष्यः कदाऽऽनुषग्भुवदधा मर्त्तासो हि विक्ष्वीड्यं चेतनं त्वा कदा जगृभ्रिर इति वयमिच्छेम॥ २॥

भावार्थः-हे परमेश्वर! वयं त्वां सततं प्रार्थयेम भवतः कृपया इमे सर्वे मनुष्या भवद्भक्ता भवदाज्ञानुकूला भवदुपासकाः कदा भविष्यन्ति। हे कृपालोऽन्तर्यामिन् करुणां विधाय सर्वान्त्स्वस्मिन् प्रीतिमतः सद्यः कुर्विति॥ २॥

पदार्थः-हे (**अग्ने**) परमात्मन्! (**देवस्य**) सुख देनेवाले और सर्वत्र प्रकाशमान (**ते**) आपके मनुष्य (**कदा**) किस काल में (**आनुषक्**) अनुकूल (**भुवत्**) हो (**अधा**) इसके अनन्तर (**मर्त्तासः**) मनुष्य लोग (**हि**) निश्चय से (**विक्षु**) मनुष्यरूप प्रजाओं में (**ईड्यम्**) स्तुति करने योग्य (**चेतनम्**) अनन्त विज्ञान आदि से युक्त (**त्वा**) आपको कब (**जगृभ्रिरे**) ग्रहण करें, ऐसी हम लोग इच्छा करें॥ २॥

भावार्थः-हे परमेश्वर! हम लोग आपकी निरन्तर प्रार्थना करें और आपकी कृपा से ये सब मनुष्य आपके भक्त, आपकी आज्ञा के अनुकूल और आपके उपासक कब होंगे। हे कृपालो अन्तर्यामिन्! दया करके सब को अपने में प्रीतिमान् शीघ्र करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तावा॑नं॒ विचे॑तसं॒ पश्य॑न्तो॒ द्यामि॑व॒ स्तृभिः॑।

विश्वे॑षामध्व॒राणां हस्क॒र्तार॒ं दमे॑दमे॥ ३॥

ऋ॒तऽवा॑नम्। विऽचे॑तसम्। पश्य॑न्तः। द्याम॑ऽइव। स्तृऽभिः॑। विश्वे॑षाम्। अ॒ध्व॒राणा॑म्। ह॒स्क॒र्तार॑म्। दमे॑ऽदमे॥ ३॥

पदार्थः-(**ऋतावानम्**) ऋतं सत्यं विद्यते यस्मिँस्तम् (**विचेतसम्**) विगतं चेतो यस्मात्तम् (**पश्यन्तः**) (**द्यामिव**) सूर्यमिव (**स्तृभिः**) नक्षत्रैः (**विश्वेषाम्**) सर्वेषाम् (**अध्वराणाम्**) अहिंसनीयानां यज्ञानाम् (**हस्कर्त्तारम्**) प्रकाशकर्त्तारम् (**दमेदमे**) गृहे गृहे॥३॥

अन्वयः-ये मनुष्या विश्वेषामध्वराणां स्तृभिर्द्यामिव दमेदमे हस्कर्त्तारं विचेतसमृतावानं पश्यन्तो जगृभिरे ते सुशोभन्ते॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये चेतनारहितं कारणयुक्तं प्रतिगृहं प्रकाशयन्तं जानन्ति ते सूर्य्यप्रकाशे चन्द्रादीनीव जगति प्रकाशन्ते॥३॥

पदार्थः-जो मनुष्य लोग (**विश्वेषाम्**) सम्पूर्ण (**अध्वराणाम्**) नहीं हिंसा करने योग्य यज्ञों के (**स्तृभिः**) नक्षत्रों से (**द्यामिव**) सूर्य्य के सदृश (**दमेदमे**) घर-घर में (**हस्कर्त्तारम्**) प्रकाश करने वाले (**विचेतसम्**) जिससे विगतचित्त होता (**ऋतावानम्**) जिसमें सत्य विद्यमान उसको (**पश्यन्तः**) देखते हुए ग्रहण करे हुए हैं, वे उत्तम प्रकार शोभित होते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो लोग चेतनारहित कारण से युक्त प्रत्येक गृह के प्रवेश करने वाले को जानते हैं, वे सूर्य के प्रकाश में चन्द्र आदिकों के सदृश संसार में प्रकाशित होते हैं॥३॥

अथाग्निविषयमाह॥

अब अग्निविषय को अगले मन्त्र में कहते हैं॥

आ॒शुं दू॒तं वि॒वस्व॑तो॒ विश्वा॒ यश्चर्ष॑णीर॒भि।

आ जभ्रुः के॒तुमा॒यवो॒ भृग॑वाणं वि॒शेवि॑शे॥४॥

आ॒शुम्। दू॒तम्। वि॒वस्व॑तः। विश्वाः। यः। चर्ष॑णीः। अ॒भि। आ। ज॒भ्रुः। के॒तुम्। आ॒यवः॑। भृग॑वाणम्। वि॒शेऽवि॑शे॥४॥

पदार्थः-(**आशुम्**) सद्योगामिनम् (**दूतम्**) दूतमिव (**विवस्वतः**) सूर्य्यात् (**विश्वाः**) समग्राः (**यः**) (**चर्षणीः**) प्रकाशान् (**अभि**) (**आ**) (**जभ्रुः**) धरन्ति (**केतुम्**) प्रज्ञानम् (**आयवः**) ज्ञानवन्तो मनुष्याः (**भृगवाणम्**) परिपाककर्त्तारम् (**विशेविशे**) प्रजायै॥४॥

अन्वयः-यो विद्वान् विवस्वतो दूतमिवाशुं विशेविशे भृगवाणमायवो विश्वा यश्चर्षणीः केतुं चाऽभ्याजभ्रुरिव धरति स सर्वानन्दी जायते॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्य्यादेर्विद्युतादीन् गृह्णन्ति ते प्रजायै सुखप्रदा भवन्ति॥४॥

पदार्थः-(**यः**) जो विद्वान् (**विवस्वतः**) सूर्य से (**दूतम्**) दूत के सदृश (**आशुम्**) शीघ्र चलने

और **(विशेविशे)** प्रजा के निमित्त **(भृगवाणम्)** परिपाक के करने वाले को जैसे **(आयवः)** ज्ञानवान् मनुष्य **(विश्वाः)** सम्पूर्ण **(चर्षणीः)** प्रकाशों और **(केतुम्)** प्रज्ञान को **(अभि, आ, जभ्रुः)** धारण करते हैं, वैसे धारण करता है, वह सम्पूर्ण आनन्दों से युक्त होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य आदि से बिजुली आदि पदार्थ को ग्रहण करते हैं, वे प्रजा के लिये सुख देने वाले होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तमीं होतारमानुषक् चिकित्वांसं नि षेदिरे।

रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः॥५॥६॥

तम्। ईम्। होतारम्। आनुषक्। चिकित्वांसम्। नि। सेदिरे। रण्वम्। पावकऽशोचिषम्। यजिष्ठम्। सप्त। धामऽभिः॥५॥

पदार्थः-(**तम्**) (**ईम्**) सर्वतः (**होतारम्**) ग्रहीतारम् (**आनुषक्**) आनुकूल्येन (**चिकित्वांसम्**) विद्वांसम् (**नि**) (**सेदिरे**) सीदन्ति (**रण्वम्**) रमणीयम् (**पावकशोचिषम्**) पावकस्य शोचिरिव शोचिर्दीप्तिर्यस्य तम् (**यजिष्ठम्**) अतिशयेन सङ्गन्तारम् (**सप्त**) सप्तभिः प्राणादिभिः (**धामभिः**) स्थानैः॥५॥

अन्वयः-ये तमग्निमिवानुषग्घोतारं चिकित्वांसं रण्वं सप्त धामभिः पावकशोचिषं यजिष्ठमीं निषेदिरे ते राज्यैश्वर्य्या भवन्ति॥५॥

भावार्थः-ये विपुलं वह्निं सर्वेभ्यः पदार्थेभ्यो निःसारितुं जानन्ति तेऽतिसुखा भवन्ति॥५॥

पदार्थः-जो लोग (**तम्**) उसको अग्नि के सदृश (**आनुषक्**) अनुकूलता से (**होतारम्**) ग्रहण करनेवाले (**चिकित्वांसम्**) विद्वान् (**रण्वम्**) सुन्दर (**सप्त**) सात प्राण आदि (**धामभिः**) स्थानों से (**पावकशोचिषम्**) अग्नि के तेज के सदृश तेज से युक्त (**यजिष्ठम्**) अत्यन्त मेल करनेवाले को (**ईम्**) सब प्रकार से (**नि, सेदिरे**) प्राप्त होते हैं, वे राज्य और ऐश्वर्य से युक्त होते हैं॥५॥

भावार्थः-जो लोग बिजुलीरूप अग्नि को सब पदार्थों से निकालना जानते हैं, वे अत्यन्त सुखी होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तं शश्वतीषु मातृषु वन आ वीतमश्रितम्।

चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम्॥६॥

तम्। शश्वतीषु। मातृषु। वने। आ। वीतम्। अश्रितम्। चित्रम्। सन्तम्। गुहा। हितम्। सुऽवेदम्। कूचित्ऽअर्थिनम्॥ ६॥

पदार्थः-(**तम्**) पावकम् (**शश्वतीषु**) अनादिभूतासु (**मातृषु**) आकाशादिषु (**वने**) किरणे (**आ**) (**वीतम्**) व्याप्तम् (**अश्रितम्**) असेवितम् (**चित्रम्**) अद्भुतगुणकर्मस्वभावम् (**सन्तम्**) विद्यमानम् (**गुहा**) बुद्धौ (**हितम्**) स्थितम् (**सुवेदम्**) शोभनो वेदो विज्ञानं यस्य तम् (**कूचिदर्थिनम्**) क्वचिद् बहवोऽर्था विद्यन्ते यस्मिंस्तम्॥६॥

अन्वयः-हे विद्वांसो! यूयं शश्वतीषु मातृषु वने सन्तं गुहा हितं सुवेदं कूचिदर्थिनमश्रितमावीतं तं चित्रं विद्युदाख्यमग्निं विदित्वा कार्याणि साध्नुत॥६॥

भावार्थः-ये मनुष्याः सर्वपदार्थेषु पृथक् पृथगेव वर्त्तमानमग्निं तत्त्वतो विजानन्ति ते सर्वाणि कार्याणि साद्धुं शक्नुवन्ति॥६॥

पदार्थः-हे विद्वानो! आप लोग (**शश्वतीषु**) अनादिकाल से वर्त्तमान (**मातृषु**) आकाश आदि पदार्थों में और (**वने**) किरण में (**सन्तम्**) विद्यमान (**गुहा**) बुद्धि में (**हितम्**) स्थित (**सुवेदम्**) उत्तम विज्ञान जिसका (**कूचिदर्थिनम्**) जो कहीं बहुत अर्थों से युक्त (**अश्रितम्**) और नहीं सेवन किया गया (**आ, वीतम्**) व्याप्त (**तम्**) उस (**चित्रम्**) अद्भुत गुण, कर्म, स्वभाव वाले बिजुली नामक अग्नि को जान के कार्यों को सिद्ध करो॥६॥

भावार्थः-जो मनुष्य सर्व पदार्थों में अलग ही अलग वर्त्तमान अग्नि को तत्त्व से जानते हैं, वे सब काम साध सकते हैं॥६॥

पुनरग्निविषयमाह॥

फिर अग्निविषय को अगले मन्त्र में कहते हैं॥

ससस्य यद्वियुता सस्मिन्नूधन्नृतस्य धामन् रणयन्त देवाः।
महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा॥ ७॥

ससस्य। यत्। विऽयुता। सस्मिन्। ऊधन्। ऋतस्य। धामन्। रणयन्त। देवाः। महान्। अग्निः। नमसा। रातऽहव्यः। वेः। अध्वराय। सदम्। इत्। ऋतऽवा॥ ७॥

पदार्थः-(**ससस्य**) स्वप्नस्य (**यत्**) यस्मिन् (**वियुता**) वियुक्तानि (**सस्मिन्**) सर्वस्मिन्। अत्र **छान्दसो वर्णलोपो वे**ति लोपः। (**ऊधन्**) ऊधन्यवयवे (**ऋतस्य**) सत्यस्य (**धामन्**) धामनि (**रणयन्त**) शब्दयन्ति (**देवाः**) विद्वांसः (**महान्**) अतिविस्तीर्णः (**अग्निः**) विद्युत् (**नमसा**) अन्नाख्येन पृथिव्यादिना सह (**रातहव्यः**) रातं ग्रहीतुं योग्यं हव्यं दत्तं येन सः (**वेः**) पक्षिणः (**अध्वराय**) अहिंसनीयाय व्यवहाराय (**सदम्**) प्राप्तव्यम् (**इत्**) एव (**ऋतावा**) ऋतस्य जलस्य विभाजकः॥७॥

अन्वयः-ये देवा विद्वांसो नमसा सह वर्त्तमानो रातहव्य ऋतावा महानग्निर्वेरिव सदं प्रापयति यद्यो सस्मिन्नूधन्नृतस्य धामन्त्ससस्य वियुता रणयन्त तमध्वराय विदन्तीत्ते सत्यविदो जायन्ते॥७॥

भावार्थः-हे विपश्चितो! योऽग्निः शरीरादौ निद्रायां च प्रसिद्धो भवति स महत्त्वात् सर्वत्र व्याप्तोऽस्ति॥७॥

पदार्थः-जो **(देवाः)** विद्वान् लोग **(नमसा)** पृथिवी आदि अन्न के साथ वर्त्तमान **(रातहव्यः)** जिसने ग्रहण करने योग्य पदार्थ दिया **(ऋतावा)** जो जल का विभाग करने वाला **(महान्)** महान् **(अग्निः)** बिजुली रूप अग्नि **(वेः)** पक्षी के सदृश **(सदम्)** प्राप्त होने योग्य स्थान को प्राप्त कराता है **(यत्)** जिस अग्नि में **(सस्मिन्)** सब **(ऊधन्)** अवयव में और **(ऋतस्य)** सत्य के **(धामन्)** स्थान में **(ससस्य)** स्वप्नसम्बन्ध से **(वियुता)** वियुक्त अर्थात् विना स्वप्न वस्तुएं **(रणयन्त)** शब्द करती हैं, उसको **(अध्वराय)** अहिंसनीय व्यवहार के लिये **(इत्)** जानते ही हैं, वे सत्य के जानने वाले होते हैं॥७॥

भावार्थः-हे बुद्धिमान् पुरुषो! जो अग्नि शरीर आदि में और निद्रा में प्रसिद्ध होता है, वह बड़ा होने से सर्वत्र व्यापक है॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वेरध्वरस्य दूत्यानि विद्वानुभे अन्ता रोदसी संचिकित्वान्।

दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि॥८॥

वेः। अध्वरस्य। दूत्यानि। विद्वान्। उभे इति। अन्तरिति। रोदसी इति। सम्ऽचिकित्वान्। दूतः। ईयसे। प्रऽदिवः। उराणः। विदुःऽतरः। दिवः। आऽरोधनानि॥८॥

पदार्थः-(**वेः**) व्याप्तस्य **(अध्वरस्य)** अहिंसनीयस्य **(दूत्यानि)** दूतवत् कर्माणि **(विद्वान्)** **(उभे)** **(अन्तः)** मध्ये **(रोदसी)** द्यावापृथिव्यौ **(संचिकित्वान्)** सम्यक् चिकीर्षकः **(दूतः)** **(ईयसे)** प्राप्नोषि **(प्रदिवः)** प्राचीनः **(उराणः)** बहुकुर्वाणः **(विदुष्टरः)** अतिशयेन वेत्ता **(दिवः)** प्रकाशस्य **(आरोधनानि)** समन्तान्निग्रहणानि॥८॥

अन्वयः-हे विद्वन्! संचिकित्वान् विद्वान् विदुष्टरस्संस्त्वं यो वेरध्वरस्य दूत्यान्यन्तरुभे रोदसी दूतः प्रदिव उराणो गच्छति तं विज्ञाय दिव आरोधनानीयसे तस्मात् सुखं प्राप्नोषि॥८॥

भावार्थः-हे मनुष्या! या विद्युत्सर्वस्य शिल्पजनस्य दूतवत्प्रेरिका सनातना सर्वेषु पदार्थेषु व्याप्तास्ति तस्या उत्पत्तिनिरोधाभ्यां बहूनि कार्य्याणि साद्ध्वैश्वर्य्यं प्राप्नुत॥८॥

पदार्थः-हे विद्वन् **(सञ्चिकित्वान्)** उत्तम प्रकार कार्य करने की इच्छा करनेवाले **(विद्वान्)**

विद्यावान् पुरुष! **(विदुष्टरः)** अत्यन्त ज्ञाता हुए आप जो **(वेः)** व्याप्त **(अध्वरस्य)** न नष्ट करने योग्य व्यवहार के **(दूत्यानि)** संदेश पहुंचाने वाले के सदृश कर्म्मों को और **(अन्तः)** मध्य में **(उभे)** दोनों **(रोदसी)** अन्तरिक्ष और पृथिवी को **(दूतः)** संदेश पहुंचाने वाला **(प्रदिवः)** प्राचीन **(उराणः)** बहुत कार्य करता हुआ जाता है, उसको जानके **(दिवः)** प्रकाश के **(आरोधनानि)** सब प्रकार के ग्रहण करने को **(ईयसे)** प्राप्त होते हो, इससे सुख को प्राप्त होते हो॥८॥

भावार्थः-हे मनुष्यो! जो बिजुली रूप अग्नि सम्पूर्ण शिल्पिजन का दूत के सदृश प्रेरणा करनेवाला, अनादि काल से सिद्ध और सम्पूर्ण पदार्थों में व्याप्त है, उसकी उत्पत्ति और निरोध से बहुत कार्य्यों को सिद्ध करके ऐश्वर्य्य को प्राप्त होओ॥८॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

कृष्णं त एम रुशतः पुरो भाश्चरिष्यव१र्चिर्वपुषामिदेकम्।
यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः॥९॥

कृष्णम्। ते। एम। रुशतः। पुरः। भाः। चरिष्णु। अर्चिः। वपुषाम्। इत्। एकम्। यत्। अप्रऽवीता। दधते। ह। गर्भम्। सद्यः। चित्। जातः। भवसि। इत्। ऊम् इति। दूतः॥९॥

पदार्थः-(**कृष्णम्**) कर्षकम् (**ते**) तव (**एम**) प्राप्नुयाम (**रुशतः**) सुरूपस्य रुचिकरस्य (**पुरः**) पूर्वम् (**भाः**) प्रकाशमानः (**चरिष्णु**) यच्चरति गच्छति (**अर्चिः**) तेजः (**वपुषाम्**) रूपवतां शरीराणाम् (**इत्**) एव (**एकम्**) असहायम् (**यत्**) (**अप्रवीता**) अगच्छन्ती (**दधते**) धरति (**ह**) खलु (**गर्भम्**) अन्तःस्वरूपम् (**सद्यः**) शीघ्रम् (**चित्**) अपि (**जातः**) प्रकटः (**भवसि**) (**इत्**) (**उ**) (**दूतः**) दूत इव वर्त्तमानः॥९॥

अन्वयः-हे विद्वन्! यस्य रुशतस्ते यत्कृष्णं पुरो भाश्चरिष्णु वपुषामेकमर्चिरिदस्ति तद्वयमेम। हे विद्वन्! यथाऽप्रवीता गर्भं दधते तथा ह सद्यश्चिज्जातो दूत इवेदु भवसि तस्मात्सत्कर्त्तव्योऽसि॥९॥

भावार्थः-हे अध्यापक कृपालो! त्वं विद्युत्तेजसो विद्यामस्मान् बोधय येन तेजसा दूतवत्कर्म्माणि वयं कारयेम॥९॥

पदार्थः-हे विद्वन्! जिस **(रुशतः)** उत्तम रूपयुक्त प्रीतिकारक **(ते)** आपका **(यत्)** जो **(कृष्णम्)** खींचने वाला **(पुरः)** प्रथम **(भाः)** प्रकाशमान **(चरिष्णु)** चलनेवाला **(वपुषाम्)** रूपवाले शरीरों के **(एकम्)** सहायरहित **(अर्चिः)** तेज **(इत्)** ही है, उसको हम लोग **(एम)** प्राप्त होवें और हे विद्वन्! जैसे **(अप्रवीता)** नहीं जाती हुई स्त्री **(गर्भम्)** अन्तः स्वरूप को **(दधते)** धारण करती है, वैसे **(ह)** निश्चय से **(सद्यः)** शीघ्र **(चित्)** भी **(जातः)** प्रकट **(दूतः)** दूत के **(इत्)** सदृश वर्त्तमान **(उ)** ही **(भवसि)** होते हो, उससे सत्कार करने योग्य हो॥९॥

भावार्थः–हे अध्यापक कृपालो! आप बिजुली के तेज की विद्या का हम लोगों के लिये बोध कराइये कि जिस तेज से दूत के सदृश कार्य्यों को हम लोग करावें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः।
वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः॥१०॥

सद्यः। जातस्य। ददृशानम्। ओजः। यत्। अस्य। वातः। अनुऽवाति। शोचिः। वृणक्ति। तिग्माम्। अतसेषु। जिह्वाम्। स्थिरा। चित्। अन्ना। दयते। वि। जम्भैः॥१०॥

पदार्थः–(**सद्यः**) क्षिप्रम् (**जातस्य**) उत्पन्नस्य (**ददृशानम्**) द्रष्टव्यम् (**ओजः**) वेगवद्बलम् (**यत्**) (**अस्य**) (**वातः**) वायुः (**अनुवाति**) (**शोचिः**) प्रदीप्तम् (**वृणक्ति**) सम्भजति (**तिग्माम्**) तीव्रां गतिम् (**अतसेषु**) वृक्षादिषु (**जिह्वाम्**) वाचम् (**स्थिरा**) स्थिराणि (**चित्**) अपि (**अन्ना**) अत्तव्यानि (**दयते**) ददाति (**वि**) (**जम्भैः**) गत्याक्षेपैः॥१०॥

अन्वयः-हे विद्वांसो! अस्य सद्यो जातस्य यद्ददृशानमोजो वातोऽनुवाति यदस्य शोचिरतसेषु तिग्मां जिह्वां वृणक्ति यो विजम्भैश्चित्स्थिरा अन्ना दयते तं विद्युतमग्निं विज्ञाय संप्रयुङ्ध्वम्॥१०॥

भावार्थः–यदि शिल्पिनः पदार्थेभ्यो विद्युतं जनयेयुस्तर्हि सा दर्शनीयं पराक्रमं वेगं च दर्शयित्वा विविधान्यैश्वर्य्याणि ददाति॥१०॥

पदार्थः–हे विद्वान् जनो! (**अस्य**) इस (**सद्यः**) शीघ्र (**जातस्य**) उत्पन्न हुए विद्युत् रूप अग्निप्रताप के (**यत्**) जिस (**ददृशानम्**) देखने योग्य (**ओजः**) वेगयुक्त बल के (**वातः**) वायु (**अनुवाति**) पीछे चलता है, जो इस साधारण अग्नि को (**शोचिः**) प्रज्वलित लपट को (**अतसेषु**) वृक्ष आदिकों में (**तिग्माम्**) तीव्र गति को और (**जिह्वाम्**) वाणी को (**वृणक्ति**) सेवन करता है और जो (**वि, जम्भैः**) गमनों के आक्षेपों से (**चित्**) भी (**स्थिरा**) दृढ़ (**अन्ना**) भोजन करने योग्य पदार्थों को (**दयते**) देता है, उस बिजुली रूप अग्नि को जान के कार्यों में प्रयुक्त करो॥१०॥

भावार्थः–जो शिल्पीजन पदार्थों से बिजुली को उत्पन्न करें तो वह बिजुली देखने योग्य पराक्रम और वेग को दिखा के अनेक प्रकार के ऐश्वर्य्यों को देती है॥१०॥

पुन शिल्पिविद्वद्विषयमाह॥

फिर शिल्पि विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः।
वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा॥११॥७॥

तृषु। यत्। अन्ना। तृषुणा। ववक्ष। तृषुम्। दूतम्। कृणुते। यह्वः। अग्निः। वातस्य। मेळिम्। सचते। निऽजूर्वन्। आशुम्। न। वाजयते। हिन्वे। अर्वा॥ ११॥

पदार्थः-(**तृषु**) क्षिप्रम्। **तृष्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) (**यत्**) यः (**अन्ना**) अन्नादीनि (**तृषुणा**) क्षिप्रेण (**ववक्ष**) वहति (**तृषुम्**) क्षिप्रकारिणम् (**दूतम्**) दूतमिव (**कृणुते**) करोति (**यह्वः**) महान् (**अग्निः**) विद्युत् (**वातस्य**) (**मेळिम्**) सङ्गमम् (**सचते**) समवैति (**निजूर्वन्**) नितरां सद्यो गच्छन् (**आशुम्**) शीघ्रगामिनमश्वम् (**न**) इव (**वाजयते**) गमयति (**हिन्वे**) गमयेय (**अर्वा**) वाजीव॥ ११॥

अन्वयः-हे मनुष्या! यद्यो यह्वोऽर्वेव निजूर्वन्नग्निस्तृषुणाऽन्ना तृषु ववक्ष तृषु दूतमिव कृणुते वातस्य मेळिं सचते यं विद्वानाशुं न वाजयतेऽहं हिन्वे तं यूयं विजानीत॥ ११॥

भावार्थः-यदि मनुष्याः विद्युद्व्याव्यादियोगविद्यां जानीयुस्तर्हि ते दूतवदश्ववद्दूरं यानं समाचारं च गमयितुं शक्नुयुः॥ ११॥

अत्राग्निविद्युद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**यह्वः**) बड़े (**अर्वा**) घोड़े के सदृश (**निजूर्वन्**) निरन्तर शीघ्र चलती हुई (**अग्निः**) बिजुली (**तृषुणा**) शीघ्रता से युक्त (**अन्ना**) अन्न आदिक पदार्थों को (**तृषु**) शीघ्र (**ववक्ष**) प्राप्त कराती है (**तृषुम्**) शीघ्र कार्य्यकारी (**दूतम्**) समाचार पहुंचाने वाले जन के सदृश अपने प्रताप को (**कृणुते**) करती है और (**वातस्य**) पवन के (**मेळिम्**) सङ्गम का (**सचते**) सम्बन्ध करती है जिसको विद्वान् जन (**आशुम्**) शीघ्र चलने वाले घोड़े के (**न**) सदृश (**वाजयते**) चलाता है, मैं (**हिन्वे**) चलाऊं, उसको आप लोग जानिये॥ ११॥

भावार्थः-जो मनुष्य बिजुली और वायु आदि के योग की विद्या को जानें तो वे दूत और घोड़े के सदृश दूर वाहन और समाचार को पहुंचा सकें॥ ११॥

इस सूक्त में अग्नि और विद्वान् के गुण वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सातवां सूक्त और सातवां वर्ग समाप्त हुआ॥

अथाष्टर्चस्याष्टमस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १, ४, ५, ६ निचृद्गायत्री। २, ३, ७ गायत्री। ८ भुरिग्गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निविषयमाह॥

अब आठ ऋचा वाले आठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निविषय को कहते हैं॥

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्। यजिष्ठमृञ्जसे गिरा॥ १॥

दूतम्। वः। विश्वऽवेदसम्। हव्यऽवाहम्। अमर्त्यम्। यजिष्ठम्। ऋञ्जसे। गिरा॥ १॥

पदार्थः-(**दूतम्**) उत्तमं दूतमिवं वर्त्तमानं वह्निम् (**वः**) युष्माकम् (**विश्ववेदसम्**) विश्वस्मिन् विद्यमानम् (**हव्यवाहम्**) यो हव्यान्यादातुमर्हाणि वहति गमयति प्रापयति वा तम् (**अमर्त्यम्**) नाशरहितम् (**यजिष्ठम्**) अतिशयेन सङ्गमयितारम् (**ऋञ्जसे**) प्रसाध्नोसि (**गिरा**) वाण्या॥ १॥

अन्वयः-हे मनुष्याः! वो यं दूतमिव वर्तमानममर्त्यं विश्ववेदसं यजिष्ठं हव्यवाहं गिरा वयं विजानीमः। हे विद्वन्! येन त्वं कार्य्याण्यृञ्जसे तं यूयं विज्ञाय सम्प्रयुङ्ध्वम्॥ १॥

भावार्थः-हे मनुष्याः! अयमेव विद्युदग्निर्दूतवत्कार्यसाधकोऽस्तीति यूयं वित्त॥ १॥

पदार्थः-हे मनुष्यो! (**वः**) तुम्हारे बीच जिस (**दूतम्**) उत्तम दूत के सदृश वर्त्तमान (**अमर्त्यम्**) नाश से रहित (**विश्ववेदसम्**) सब में विद्यमान (**यजिष्ठम्**) अत्यन्त मिलाने वाले (**हव्यवाहम्**) ग्रहण करने योग्य पदार्थों को पहुंचाने वा प्राप्त कराने वाले को (**गिरा**) वाणी से हम लोग जानते हैं। हे विद्वन्! जिससे आप कार्य्यों को (**ऋञ्जसे**) सिद्ध करते हो, उसको आप लोग जान के कार्य्य में लगाइये॥ १॥

भावार्थः-हे मनुष्यो! यही बिजुलीरूप अग्नि दूत के सदृश कार्यों को सिद्ध करने वाला है, ऐसा आप लोग जानो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स हि वेदा वसुधितिं महाँ आरोधनं दिवः। स देवाँ एह वक्षति॥ २॥

सः। हि। वेद। वसुऽधितिम्। महान्। आऽरोधनम्। दिवः। सः। देवान्। आ। इह। वक्षति॥ २॥

पदार्थः-(**सः**) (**हि**) यतः (**वेद**) वेत्ति। **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वसुधितिम्**) वसूनां द्रव्याणां धारकम् (**महान्**) (**आरोधनम्**) रोधनम् (**दिवः**) प्रकाशस्य (**सः**) (**देवान्**) दिव्यान् गुणान् भोगान् (**आ**) (**इह**) (**वक्षति**) वहति प्रापयति॥ २॥

अन्वयः-हे मनुष्या! यं दिव आरोधनं वसुधितिं विद्वान् वेद स हि महान् वर्त्तत स इह देवानावक्षतीति विजानीत॥ २॥

भावार्थः-हे मनुष्याः! यो विद्युदग्निर्दिव्यभोगगुणप्रदः सूर्यस्याऽपि सूर्यः सर्वधर्त्ता व्याप्तोऽस्ति तं विदित्वा कार्य्याणि साध्नुत॥२॥

पदार्थः-हे मनुष्यो! जिसको **(दिवः)** प्रकाश के **(आरोधनम्)** रोकने और **(वसुधितिम्)** द्रव्यों के धारण करने वाले को विद्वान् **(वेद)** जानता है **(सः)** वह **(हि)** जिससे **(महान्)** बड़ा है और **(सः)** वह **(इह)** इस संसार में **(देवान्)** श्रेष्ठ गुण और भोगों को **(आ, वक्षति)** प्राप्त कराता है, ऐसा जानो॥२॥

भावार्थः-हे मनुष्यो! जो बिजुलीरूप अग्नि श्रेष्ठ भोग और गुणों का दाता सूर्य्य का भी सूर्य्य और सब का धारण करने वाला व्याप्त है, उसको जानके कार्य्यों को सिद्ध करो॥२॥

पुनरग्निविषयमाह॥

फिर अग्नि के विषय को अगले मन्त्र में कहते हैं॥

स वेद देव आनमं देवाँ ऋतायते दमे। दाति प्रियाणि चिद्वसु॥३॥

सः। वेद। देवः। आऽनमम्। देवान्। ऋतऽयते। दमे। दाति। प्रियाणि। चित्। वसु॥३॥

पदार्थः-**(सः)** विद्युदग्निः **(वेद)** जानाति **(देवः)** कामयमानः **(आनमम्)** समन्तात् सत्कृतिं कर्त्तुम् **(देवान्)** पृथिव्यादीन् विदुषो वा **(ऋतायते)** ऋतमिव करोति **(दमे)** गृहे **(दाति)** ददाति। अत्राऽभ्यासलोपः। **(प्रियाणि)** कमनीयानि **(चित्)** अपि **(वसु)** वसूनि द्रव्याणि॥३॥

अन्वयः-हे मनुष्या! यमाप्तो देवो वेद स देवानानममृतायते दमे चित्प्रियाणि वसु दातीति यूयं विजानीत॥३॥

भावार्थः-हे मनुष्याः! सर्वेषां पृथिव्यादीनां दिव्यानां पदार्थानां योऽग्निर्देवोऽस्ति तस्मादिमं सर्वैश्वर्यप्रदं महादेवं बुध्यध्वम्॥३॥

पदार्थः-हे मनुष्यो! जिसको यथार्थवक्ता **(देवः)** कामना करता हुआ विद्वान् जन **(वेद)** जानता है **(सः)** वह **(देवान्)** पृथिवी आदि पदार्थ वा विद्वानों के **(आनमम्)** सब प्रकार सत्कार करने को **(ऋतायते)** सत्य के सदृश आचरण और **(दमे)** गृह में **(चित्)** भी **(प्रियाणि)** सुन्दर **(वसु)** द्रव्यों को **(दाति)** देता है ऐसा जानो॥३॥

भावार्थः-हे मनुष्यो! सम्पूर्ण पृथिवी आदि श्रेष्ठ पदार्थों के बीच जो अग्निदेव है, उससे इस सब ऐश्वर्य का देनेवाला बड़ा देव जानो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते। विद्वाँ आरोधनं दिवः॥४॥

सः। होता। सः। इत्। ऊम् इति। दूत्यम्। चिकित्वान्। अन्तः। ईयते। विद्वान्। आऽरोधनम्। दिवः॥४॥

पदार्थः-(**सः**) (**होता**) अत्ता (**सः**) (**इत्**) (**उ**) (**दूत्यम्**) दूतस्य भावं कर्म वा (**चिकित्वान्**) विज्ञानवान् (**अन्तः**) मध्ये (**ईयते**) गच्छति (**विद्वान्**) (**आरोधनम्**) समन्तान्निरोधकम् (**दिवः**) प्रकाशस्य॥४॥

अन्वयः-हे मनुष्या विद्वांसः! सोऽग्निर्होता स उ अन्तर्दूत्यमीयते स एव दिव आरोधनमस्तीति जानन्ति यं चिकित्वान् विद्वान् सम्प्रयुङ्क्ते तमिद्यूयमपि विज्ञाय प्रयुङ्ध्वम्॥४॥

भावार्थः-हे मनुष्या! यः सर्वेषां पदार्थानां मध्ये वर्तमानो दूतवत्कार्य्याणि साध्नोति सूर्यादिकं प्रद्योतयति सोऽवश्यं युष्माभिर्वेदितव्यः॥४॥

पदार्थः-हे विद्वान् मनुष्यो! (**सः**) वह अग्नि (**होता**) पदार्थों का भक्षण करने वाला (**सः, उ**) वही (**अन्तः**) मध्य में वर्त्तमान (**दूत्यम्**) दूतपने वा दूत के कर्म को (**ईयते**) प्राप्त होता है, वही (**दिवः**) प्रकाश का (**आरोधनम्**) सब प्रकार रोकने वाला है ऐसा मानते हैं, जिसका (**चिकित्वान्**) विशेष ज्ञानवान् (**विद्वान्**) विद्वान् उत्तम प्रकार प्रयोग करता है (**इत्**) उसी को जान के तुम भी प्रयोग करो॥४॥

भावार्थः-हे मनुष्यो! जो सम्पूर्ण पदार्थों के मध्य में वर्त्तमान और दूत के सदृश कार्य्यों को सिद्ध करता है और सूर्य आदि को प्रकाशित करता है, वह अवश्य आप लोगों को जानने योग्य है॥४॥

अथाग्निविद्याविद्विषयमाह॥

अब अग्नि विद्या के जानने वाले विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः। य ईं पुष्यन्त इन्धते॥५॥

ते। स्याम। ये। अग्नये। ददाशुः। हव्यदातिऽभिः। ये। ईम्। पुष्यन्तः। इन्धते॥५॥

पदार्थः-(**ते**) (**स्याम**) भवेम (**ये**) (**अग्नये**) अग्निविद्याप्राप्तये (**ददाशुः**) द्रव्यादिकं ददति (**हव्यदातिभिः**) दातव्यदानैः (**ये**) (**ईम्**) उदकम् (**पुष्यन्तः**) (**इन्धते**) प्रदीप्यन्ते॥५॥

अन्वयः-ये हव्यदातिभिरग्नये ददाशुर्य ईं पुष्यन्त इन्धते ते सुखिनः सन्ति तैस्सह वयं सुखिनस्स्याम॥५॥

भावार्थः-ये मनुष्या अग्न्यादिपदार्थविद्याप्राप्तये पुष्कलं धनं वियन्ति ते सर्वतः सर्वथा सर्वैः सुखैः पुष्टाः सन्त आनन्दन्ति॥५॥

पदार्थः-(**ये**) जो (**हव्यदातिभिः**) देने योग्य वस्तुओं के दानों से (**अग्नये**) अग्निविद्या की प्राप्ति के लिये (**ददाशुः**) द्रव्य आदि पदार्थ देते हैं और (**ये**) जो लोग (**ईम्**) जल को (**पुष्यन्तः**) पुष्ट करते हुए (**इन्धते**) प्रकाशित होते हैं (**ते**) वे सुखी हैं, उनके साथ हम लोग सुखी (**स्याम**) होवें॥५॥

भावार्थः-जो मनुष्य अग्नि आदि पदार्थों की विद्या की प्राप्ति के लिये बहुत खर्चते हैं, वे सब से सब प्रकार सब सुखों से पुष्ट हुए आनन्दित होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ते रा॒या ते सु॒वीर्यै॑: सस॒वांसो॒ वि शृ॑ण्विरे। ये अ॒ग्ना द॑धि॒रे दु॒व॑:॥६॥

ते। रा॒या। ते। सु॒ऽवीर्यै॑:। स॒स॒ऽवांस॑:। वि। शृ॑ण्वि॒रे॒। ये। अ॒ग्ना। द॒धि॒रे। दु॒व॑:॥६॥

पदार्थ:-(**ते**) (**राया**) धनेन (**ते**) (**सुवीर्यै:**) सुष्ठुपराक्रमबलै: (**ससवांस:**) शेरते (**वि**) (**शृण्विरे**) शृण्वन्ति (**ये**) (**अग्ना**) अग्नौ विद्युति (**दधिरे**) धरन्ति (**दुव:**) परिचरणम्॥६॥

अन्वय:-ये विद्वांसोऽग्ना दुवो दधिरे गुणान् वि शृण्विरे ते राया सह ते सुवीर्यैस्सह ससवांस इवानन्दन्ति॥६॥

भावार्थ:-मनुष्या यावदग्न्यादिविद्याश्रवणसेवने न कुर्वन्ति तावद्धनाढ्या पूर्णबला भवितुं न शक्नुवन्ति यथा सुखेन शयाना आनन्दं भुञ्जते तथैवाग्न्यादिविद्यां प्राप्ता दारिद्र्यं विनाश्य धनबलाभ्यां सदैव सुखिनो भवन्ति॥६॥

पदार्थ:-(**ये**) जो विद्वान् लोग (**अग्ना**) बिजुलीरूप अग्नि में (**दुव:**) अभ्यास सेवन को (**दधिरे**) धारण करते और गुणों को (**वि, शृण्विरे**) सुनते हैं (**ते**) वे (**राया**) धन के साथ (**ते**) वे (**सुवीर्यै:**) उत्तम पराक्रम और बल वालों के साथ (**ससवांस:**) शयन करते हुए से आनन्दित होते हैं॥६॥

भावार्थ:-मनुष्य जब तक अग्नि आदि पदार्थों की विद्या का श्रवण और सेवन नहीं करते हैं, तब तक धनाढ्य और पूर्ण बलवाले हो नहीं सकते हैं और जैसे सुख से सोते हुए आनन्द को प्राप्त होते हैं, उसी प्रकार अग्नि आदि विद्या को प्राप्त हुए दारिद्र्य का नाश करके धन और बल से सदा ही सुखी होते हैं॥६॥

अथ विद्वत्पुरुषार्थफलमाह॥

अब विद्वानों के पुरुषार्थ का फल कहते हैं॥

अ॒स्मे रायो॑ दि॒वेदि॑वे॒ सं च॑रन्तु पु॒रु॒स्पृह॑:। अ॒स्मे वाजा॑स ईरताम्॥७॥

अ॒स्मे इति॑। राय॑:। दि॒वेऽदि॑वे। सम्। च॒र॒न्तु॒। पु॒रु॒स्पृह॑:। अ॒स्मे इति॑। वाजा॑स:। ई॒र॒ता॒म्॥७॥

पदार्थ:-(**अस्मे**) अस्मासु (**राय:**) शुभा: श्रिय: (**दिवेदिवे**) प्रतिदिनम् (**सम्**) (**चरन्तु**) विलसन्तु (**पुरुस्पृह:**) बहुभि: स्पृहणीया: (**अस्मे**) अस्मान् (**वाजास:**) अन्नाद्यैश्वर्य्ययोगा: (**ईरताम्**) प्राप्नुवन्तु॥७॥

अन्वय:-मनुष्या दिवेदिवेऽस्मे पुरुस्पृहो राय: सञ्चरन्तु वाजासोऽस्मे ईरतामित्यभिलषन्तु॥७॥

भावार्थ:-मनुष्यै: सदैव पुरुषार्थेन धनान्नराज्यप्रतिष्ठाविद्यादय: शुभगुणा उन्नता भवन्त्विति सततमेष्टव्या:॥७॥

पदार्थ:-मनुष्य लोग (**दिवेदिवे**) प्रतिदिन (**अस्मे**) हम लोगों में (**पुरुस्पृह:**) बहुतों से चाहने

योग्य **(रायः)** श्रेष्ठ लक्ष्मियाँ **(सम्, चरन्तु)** विलसें और **(वाजासः)** अन्न आदि ऐश्वर्य्यों के योग **(अस्मे)** हम लोगों को **(ईरताम्)** प्राप्त हों, ऐसी अभिलाषा करो॥७॥

भावार्थः-मनुष्यो को चाहिये कि सदा ही पुरुषार्थ से धन, अन्न, राज्य, प्रतिष्ठा और विद्या आदि उत्तम गुणों की उन्नति होती है, इस प्रकार निरन्तर इच्छा करनी चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स विप्रश्चर्षणीनां शवसा मानुषाणाम्। अति क्षिप्रेव विध्यति॥८॥८॥

सः। विप्रः। चर्षणीनाम्। शवसा। मानुषाणाम्। अति। क्षिप्राऽइव। विध्यति॥८॥

पदार्थः-**(सः)** **(विप्रः)** मेधावी **(चर्षणीनाम्)** ऐश्वर्य्येण प्रकाशमानानाम् **(शवसा)** बलेन **(मानुषाणाम्)** मानवानां मध्ये **(अति)** अतिशये **(क्षिप्रेव)** क्षिप्राणि प्रेरितानीव **(विध्यति)** ताडयति॥८॥

अन्वयः-यो विप्रः शवसा चर्षणीनां मानुषाणां क्षिप्रेव दुःखान्यतिविध्यति स एव प्रशंसितो भवति॥८॥

भावार्थः-ये विपश्चितोऽग्न्यादिविद्याप्रयोगैर्मनुष्याणां दारिद्र्यं विनाश्यैश्वर्य्ययोगं जनयन्ति त एव सर्वैः सत्कर्त्तव्याः सर्वेषु भाग्यशालिनः सन्तीति॥८॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-जो **(विप्रः)** बुद्धिमान् पुरुष **(शवसा)** बल से **(चर्षणीनाम्)** ऐश्वर्य्य से प्रकाशमान **(मानुषाणाम्)** मनुष्यों के मध्य में **(क्षिप्रेव)** प्रेरणा किये गयों के सदृश दुःखों को **(अति)** अत्यन्त **(विध्यति)** ताड़ता है **(सः)** वही प्रशंसित होता है॥८॥

भावार्थः-जो विद्वान् लोग अग्नि आदि विद्या के प्रयोगों से मनुष्यों के दारिद्र्य का नाश करके ऐश्वर्य्य के योग को उत्पन्न करते हैं, वे ही सब लोगों को सत्कार करने योग्य और सभों में भाग्यशाली होते हैं॥८॥

इस सूक्त में अग्नि और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अष्टम सूक्त और अष्टम वर्ग समाप्त हुआ॥

अथाष्टर्चस्य नवमस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १, ३, ४ गायत्री। २, ६ विराड्गायत्री। ५ त्रिपादगायत्री। ७, ८ निचृद्गायत्री छन्दः। षड्जः स्वरः।

अथाग्निसादृश्येन विद्वत्सत्कारमाह॥

अब आठ ऋचावाले नवमें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्नि के सदृश होने से विद्वान् का सत्कार कहते हैं॥

अग्ने॑ मृ॒ळ म॒हाँ अ॑सि॒ य ई॒मा॒ दे॑व॒युं जन॑म्। इ॒येथ॑ ब॒र्हिरा॒सद॑म्॥ १॥

अग्ने॑। मृ॒ळ। म॒हान्। अ॒सि॒। यः। ई॒म्। आ। दे॒व॒ऽयुम्। जन॑म्। इ॒येथ॑। ब॒र्हिः। आ॒ऽसद॑म्॥ १॥

पदार्थः-(**अग्ने**) अग्निरिव प्रकाशमान (**मृळ**) सुखय (**महान्**) महत्त्वयुक्तः (**असि**) (**यः**) (**ईम्**) सर्वतः (**आ**) (**देवयुम्**) य आत्मनो देवान् कामयते तम् (**जनम्**) प्रसिद्धं विद्वांसम् (**इयेथ**) एषि (**बर्हिः**) उत्तममासनम् (**आसदम्**) य आसीदति तम्॥ १॥

अन्वयः-हे अग्ने! यस्त्वं बर्हिरासदं देवयुं जनमीमा इयेथ तस्मान्महानस्यस्मान् मृळ॥ १॥

भावार्थः-यः पुरुषो विदुषां सङ्गेन विद्यां कामयते विद्यां प्राप्य मनुष्यादीन् सुखयति स एवाऽऽसनादिना प्रतिष्ठापनीयो भवति॥ १॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश प्रकाशमान! (**यः**) जो आप (**बर्हिः**) उत्तम आसन को (**आसदम्**) बैठनेवाला (**देवयुम्**) अपने को विद्वानों की कामना कर (**जनम्**) प्रसिद्ध विद्वान् को (**ईम्**) सब प्रकार (**आ, इयेथ**) प्राप्त होते हो, इससे (**महान्**) महत्त्व से युक्त (**असि**) हो इससे [हमें] (**मृळ**) सुखी कीजिये॥ १॥

भावार्थः-जो पुरुष विद्वानों के संग से विद्या की कामना करता और विद्या को प्राप्त होकर मनुष्य आदिकों को सुख देता है, वही आसन आदि से प्रतिष्ठा देने योग्य होता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स मानु॑षीषु दू॒ळभो॑ वि॒क्षु प्रा॒वीर॑मर्त्यः। दू॒तो विश्वे॑षां भुवत्॥ २॥

सः। मानु॑षीषु। दु॒ःऽदभ॑ः। वि॒क्षु। प्र॒ऽअ॒वीः। अम॑र्त्यः। दू॒तः। विश्वे॑षाम्। भु॒व॒त्॥ २॥

पदार्थः-(**सः**) विद्वान् (**मानुषीषु**) मनुष्याणामिमासु (**दूळभः**) दुःखेन लब्धुं योग्यः (**विक्षु**) प्रजासु (**प्रावीः**) प्रकृष्टविद्याव्यापी (**अमर्त्यः**) मर्त्यस्वभावरहितः (**दूतः**) उपक्षेता सर्वविद्याप्रापकः (**विश्वेषाम्**) सर्वेषाम् (**भुवत्**)॥ २॥

अन्वयः-हे मनुष्या! यो मानुषीषु विक्षु विश्वेषां प्रावीरमर्त्यो दूतो भुवत्स इह दूळभोऽस्तीति वेद्यम्॥ २॥

भावार्थः–ये विद्वांसस्सर्वेषां सुखसाधका विद्याप्रदा मनुष्याणां धर्म्माऽऽचरणे प्रवेशकाः स्वयं धार्मिकाः स्युस्ते जगति दुर्ल्लभाः सन्ति॥२॥

पदार्थः–हे मनुष्यो! जो **(मानुषीषु)** मनुष्यसंबन्धी **(विक्षु)** प्रजाओं में **(विश्वेषाम्)** सब की **(प्रावीः)** उत्तम विद्या में व्याप्त **(अमर्त्यः)** मर्त्य के स्वभाव से रहित **(दूतः)** सम्पूर्ण विद्याओं का प्राप्त कराने वाला **(भुवत्)** होता है **(सः)** वह इस संसार में **(दूळभः)** दुर्लभ है, ऐसा जानना चाहिये॥२॥

भावार्थः–जो विद्वान् लोग सब लोगों के सुखसाधक विद्या के देने वाले और मनुष्यों को धर्म के आचरण में प्रवेश करानेवाले स्वयं धार्मिक होवें, वे संसार में दुर्लभ हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स सद्म परि णीयते होता मन्द्रो दिविष्टिषु। उत पोता नि षीदति॥३॥

सः। सद्म। परि। नीयते। होता। मन्द्रः। दिविष्टिषु। उत। पोता। नि। सीदति॥३॥

पदार्थः–**(सः)** विद्वान् **(सद्म)** सीदन्ति यस्मिँस्तत् **(परि)** सर्वतः **(नीयते)** **(होता)** दाता **(मन्द्रः)** आनन्दप्रदः **(दिविष्टिषु)** पक्षेष्ट्यादिसद्व्यवहारेषु **(उत)** अपि **(पोता)** पवित्रकर्त्ता **(नि)** **(सीदति)**॥३॥

अन्वयः-हे मनुष्याः! यो मन्द्रो होता उतापि पोता दिविष्टिषु सद्म निषीदति स विद्वद्भिः परिणीयते॥३॥

भावार्थः–यत्र पवित्रा आनन्दिता विद्यादिदातारो जनास्सन्ति तत्रैव समग्रो विनयो भवति॥३॥

पदार्थः–हे मनुष्यो! जो **(मन्द्रः)** आनन्द का दाता **(होता)** दानकर्त्ता और **(उत)** भी **(पोता)** पवित्र करने वाला **(दिविष्टिषु)** पक्षेष्टि आदि उत्तम व्यवहारों के निमित्त **(सद्म)** बैठते हैं जिसमें उस गृह में **(नि, सीदति)** बैठता है **(सः)** वह विद्वान् विद्वानों को **(परि)** सब प्रकार **(नीयते)** प्राप्त होता है॥३॥

भावार्थः–जहाँ पवित्र आनन्दयुक्त और विद्या आदि के देनेवाले लोग हैं, वहीं सम्पूर्ण विनय होता है॥३॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे। उत ब्रह्मा नि षीदति॥४॥

उत। ग्नाः। अग्निः। अध्वरे। उतो इति। गृहऽपतिः। दमे। उत। ब्रह्मा। नि। सीदति॥४॥

पदार्थः–**(उत)** अपि **(ग्नाः)** सुशिक्षिता वाचः **(अग्निः)** पावक इव **(अध्वरे)** अहिंसनीये **(उतो)** अपि **(गृहपतिः)** **(दमे)** दान्ते गृहे **(उत)** **(ब्रह्मा)** **(नि)** **(सीदति)**॥४॥

अन्वयः-हे मनुष्याः! यो गृहपतिरग्निरिव ग्ना निषीदति उत ब्रह्मा सन्नध्वरे दमे निषीदति उतो कर्म्म करोति उतापि सर्वान् बोधयति स एव सत्कर्त्तव्यो भवतीति विजानीत॥४॥

भावार्थः-ये मनुष्या पावकवत्पवित्रविद्या उतापि चतुर्वेदविदः प्रशस्तकर्म्मकर्त्तारो गृहस्वामिनस्स्युस्त एवोत्तमाऽधिकारेषु निषीदन्तु॥४॥

पदार्थः-हे मनुष्यो! जो **(गृहपतिः)** गृह का स्वामी **(अग्निः)** अग्नि के सदृश **(ग्नाः)** उत्तम प्रकार शिक्षित वाणियों को **(नि, सीदति)** प्राप्त होता **(उत)** और **(ब्रह्मा)** चार वेद का पढ़ने वाला होता हुआ **(अध्वरे)** नहीं हिंसा करने योग्य दमनयुक्त **(दमे)** गृह में स्थित होता है **(उतो)** और कर्म्म करता और **(उत)** भी सब को बोध कराता है, वही सत्कार करने योग्य होता है, ऐसा जानो॥४॥

भावार्थः-जो मनुष्य अग्नि के सदृश पवित्र विद्या वाले और चारों वेदों के ज्ञाता और भी उत्तम कर्म्मों के करने वाले गृह के स्वामी होवें, वे ही श्रेष्ठ अधिकारों में वर्त्तमान होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वेषि॒ ह्य॑ध्वरीय॒तामु॑पव॒क्ता जना॑नाम्। ह॒व्या च॒ मानु॑षाणाम्॥५॥

वेषि॑। हि। अ॒ध्व॒रि॒ऽय॒ताम्। उ॒प॒ऽव॒क्ता। जना॑नाम्। ह॒व्या। च॒। मानु॑षाणाम्॥५॥

पदार्थः-**(वेषि)** व्याप्नोषि **(हि)** **(अध्वरीयताम्)** य आत्मनोऽध्वरमहिंसायज्ञं कर्त्तुमिच्छन्ति तेषाम् **(उपवक्ता)** उपदेशकानामुपदेशकः **(जनानाम्)** प्रसिद्धानाम् **(हव्या)** दातुमर्हाणि **(च)** **(मानुषाणाम्)** मानुषेषु भवानाम्॥५॥

अन्वयः-हे विद्वन्! यतस्त्वमध्वरीयतां मानुषाणां जनानामुपवक्ता सन् हि हव्या च वेषि तस्मादुपदेशं कर्तुमर्हसि॥५॥

भावार्थः-य उपदेष्टारो धर्मोपदेशकाञ्जनयन्ति सुशिक्षितान् कृत्वोपदेशाय प्रेष्य मनुष्यान् बोधयन्ति ते हि जगत्कल्याणकारका भवन्ति॥५॥

पदार्थः-हे विद्वन्! जिससे आप **(अध्वरीयताम्)** अपने को अहिंसारूप यज्ञ करने वाले **(मानुषाणाम्)** मनुष्यों में उत्पन्न **(जनानाम्)** प्रसिद्ध पुरुषों को **(उपवक्ता)** उपदेश देनेवालों के भी उपदेशक हुए **(हि)** ही **(हव्या)** देने योग्य वस्तुओं को **(च)** भी **(वेषि)** प्राप्त होते हो, इससे उपदेश करने के योग्य हो॥५॥

भावार्थः-जो उपदेश देनेवाले लोग धर्म्म के उपदेश देने वालों को उत्पन्न करते और उत्तम प्रकार शिक्षित और उपदेश देने के लिये प्रवृत्त करके मनुष्यों को बोध कराते हैं, वे ही संसार के कल्याण करनेवाले होते हैं॥५॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

वेषीद॑स्य दू॒त्य१॑ यस्य जुजो॑षो अध्व॒रम्। ह॒व्यं मर्त॑स्य॒ वोळ्ह॑वे॥६॥

वेषि॑। इत्। ऊ॒म् इति॑। अ॒स्य॒। दू॒त्य॑म्। यस्य॑। जुजो॑षः। अ॒ध्व॒रम्। ह॒व्यम्। मर्त॑स्य। वोळ्ह॑वे॥६॥

पदार्थः-(**वेषि**) व्याप्नोषि (**इत्**) (उ) (**अस्य**) (**दूत्यम्**) दूतस्य कर्म (**यस्य**) (**जुजोषः**) सेवस्व (**अध्वरम्**) अहिंसनीयं व्यवहारम् (**हव्यम्**) आदातुमर्हम् (**मर्त्तस्य**) मनुष्यस्य (**वोळ्हवे**) वोढुम्॥६॥

अन्वयः-हे विद्वन्! यस्त्वं यस्य मर्त्तस्य दूत्यं वेषि यस्य वोळ्हवे हव्यमध्वरमु जुजोषः स इद्भवानस्य दूतो भवितुमर्हति॥६॥

भावार्थः-हे राजानो! ये पूर्णविद्याः प्रगल्भा अनुरक्ता धार्मिका जनाः सन्ति ये राज्यस्य व्यवहारं वोढुं शक्नुवन्ति ताञ्छूरवीरान् सुहृदो दूतान् सम्पाद्य राज्यसमाचारान् विज्ञाय व्यवस्थां कुरुत॥६॥

पदार्थः-हे विद्वन्! जो आप (**यस्य**) जिस (**मर्तस्य**) मनुष्य के (**दूत्यम्**) दूतसम्बन्धी कर्म्म को (**वेषि**) प्राप्त होते हो और जिसके (**वोळ्हवे**) प्राप्त होने के लिये (**हव्यम्**) ग्रहण करने योग्य (**अध्वरम्**) हिंसारहित व्यवहार का (उ) ही (**जुजोषः**) सेवन करो (**इत्**) वही आप (**अस्य**) इसके दूत होने के योग्य हैं॥६॥

भावार्थः-हे राजा लोगो! जो पूर्ण विद्यायुक्त बहुत बोलने वाले स्नेही और धार्मिक जन हैं और जो लोग राज्य के व्यवहार को धारण कर सकते हैं, उन शूरवीर मित्रों को समाचारप्रापक बना और राज्य के समाचारों को जान के विशेष प्रबन्ध करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒स्माकं॑ जोष्यध्व॒रम॒स्माकं॑ य॒ज्ञम॑ङ्गिरः। अ॒स्माकं॑ शृणुधी॒ हव॑म्॥७॥

अ॒स्माक॑म्। जो॒षि॒। अ॒ध्व॒रम्। अ॒स्माक॑म्। य॒ज्ञम्। अ॒ङ्गि॒रः। अ॒स्माक॑म्। शृ॒णु॒धि॒। हव॑म्॥७॥

पदार्थः-(**अस्माकम्**) (**जोषि**) सेवसे (**अध्वरम्**) न्यायव्यवहारम् (**अस्माकम्**) (**यज्ञम्**) विद्वत्सत्कारादिक्रियामयम् (**अङ्गिरः**) प्राण इव प्रिय (**अस्माकम्**) (**शृणुधि**) अत्र **संहितायामिति** दीर्घः। (**हवम्**) शब्दार्थसम्बन्धविषयम्॥७॥

अन्वयः-हे अङ्गिरो राजन्! यतस्त्वमस्माकमध्वरमस्माकं यज्ञं जोषि तस्मादस्माकं हवं शृणुधि॥७॥

भावार्थः-हे राजन्! यतो भवानस्माकं रक्षकः प्रियोऽसि तस्मादर्थिप्रत्यर्थिनां वचांसि श्रुत्वा सततं न्यायं विधेहि॥७॥

पदार्थः-हे (**अङ्गिरः**) प्राण के सदृश प्रिय राजन्! जिससे आप (**अस्माकम्**) हम लोगों के

(अध्वरम्) न्यायव्यवहार और **(अस्माकम्)** हम लोगों के **(यज्ञम्)** विद्वानों के सत्कार आदि क्रियामय व्यवहार को **(जोषि)** सेवन करते हो इससे **(अस्माकम्)** हम लोगों के **(हवम्)** शब्द अर्थ सम्बन्धरूप विषय को **(शृणुधि)** सुनिये॥७॥

भावार्थः-हे राजन्! जिससे कि आप हम लोगों की रक्षा करनेवाले प्रिय हैं, इससे अर्थी अर्थात् मुद्दई और प्रत्यर्थी अर्थात् मुद्दायले के वचनों को सुन के निरन्तर न्याय विधान करो॥७॥

अथ प्रजाविषयमाह॥

अब प्रजा विषय को अगले मन्त्र में कहते हैं॥

परि॑ ते दू॒ळभो॒ रथो॑ऽस्माँ अ॑श्नोतु वि॒श्वत॑:। येन॒ रक्ष॑सि दा॒शुष॑:॥८॥९॥

परि॑। ते॒। दु॒:ऽदभ॑:। रथ॑:। अ॒स्मान्। अ॒श्नो॒तु॒। वि॒श्वत॑:। येन॒। रक्ष॑सि। दा॒शुष॑:॥८॥

पदार्थः-(**परि**) सर्वतः (**ते**) तव (**दूळभः**) दुःखेन हिंसितुं योग्यः (**रथः**) रमणीयं यानम् (**अस्मान्**) (**अश्नोतु**) प्राप्नोतु (**विश्वतः**) सर्वतः (**येन**) (**रक्षसि**) (**दाशुषः**) विद्यादिदानकर्तॄन्॥८॥

अन्वयः-हे राजंस्त्वं येन दाशुषः परिरक्षसि स ते दूळभो रथोऽस्मान् विश्वतोऽश्नोतु॥८॥

भावार्थः-हे राजन्! यैस्साधनै राजसेनाङ्गैर्दृढैः प्रजायाः सर्वतो रक्षणं भवेत् तान्येवास्माभिरपि प्रापणीयानीति॥८॥

अथाग्निराजप्रजाविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति नवमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे राजन्! आप (**येन**) जिससे (**दाशुषः**) विद्या आदि के दान करने वालो की (**परि**) सब प्रकार (**रक्षसि**) रक्षा करते हो वह (**ते**) आप का (**दूळभः**) दुःख से नाश करने योग्य (**रथः**) सुन्दर वाहन (**अस्मान्**) हम लोगों को (**विश्वतः**) सब प्रकार (**अश्नोतु**) प्राप्त हो॥८॥

भावार्थः-हे राजन्! जिन साधनों और दृढ़ राजसेना के अङ्गों से प्रजा का सब प्रकार रक्षण होवे, वे ही हम लोगों से भी प्राप्त करने योग्य हैं॥८॥

इस सूक्त में अग्नि, राजा, प्रजा और विद्वानों के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह नवम सूक्त और नवमा वर्ग समाप्त हुआ॥

अथाष्टर्चस्य दशमस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १ गायत्री। २, ३, ४, ७ भुरिग्गायत्री छन्दः। षड्जः स्वरः। ५, ८ स्वराडुष्णिक् छन्दः। ६ विराडुष्णिक्छन्दः। ऋषभः स्वरः॥

अथाग्निशब्दार्थविषयकं विद्वद्विषयमाह॥

अब आठ ऋचावाले दशवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निशब्दार्थविषयक विद्वद्विषय को अगले मन्त्र में कहते हैं॥

अग्ने॒ तम॒द्याश्वं॒ न स्तोमै॒: क्रतुं॒ न भ॒द्रं हृ॑दि॒स्पृश॑म्। ऋ॒ध्यामा॑ त॒ ओहै॑:॥ १॥

अग्ने॑। तम्। अ॒द्य। अश्व॑म्। न। स्तोमै॑:। क्रतु॑म्। न। भ॒द्रम्। हृ॒दि॒ऽस्पृश॑म्। ऋ॒ध्याम॑। ते॒। ओहै॑:॥ १॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(तम्)** **(अद्य)** **(अश्वम्)** **(न)** इव **(स्तोमैः)** प्रशंसनैः **(क्रतुम्)** प्रज्ञाम् **(न)** इव **(भद्रम्)** कल्याणकरम् **(हृदिस्पृशम्)** हृदयस्य प्रियम् **(ऋध्याम)** समृध्याम **(ते)** तव **(ओहैः)** अर्दकैः कर्मभिः॥१॥

अन्वयः-हे अग्ने! वयमोहैः स्तोमैस्तेऽद्याश्वं न क्रतुं न यं हृदिस्पृशं भद्रमृध्याम तं त्वमस्मदर्थमृध्नुहि॥१॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या यथाऽश्वेन मार्गं गन्तुं सद्यः शक्नुवन्ति तथा भद्रां धियं प्राप्य मोक्षमार्गं शीघ्रं प्राप्तुमर्हन्ति॥१॥

पदार्थः-हे **(अग्ने)** विद्वन्! हम लोग **(ओहैः)** नम्रतायुक्त कर्मों और **(स्तोमैः)** प्रशंसाओं से **(ते)** आपके **(अद्य)** आज **(अश्वम्)** घोड़े के **(न)** सदृश और **(क्रतुम्)** बुद्धि के **(न)** सदृश जिस **(हृदिस्पृशम्)** हृदय को प्रिय और **(भद्रम्)** कल्याण करने वालों की **(ऋध्याम)** समृद्धि करें **(तम्)** उसकी आप हम लोगों के लिये समृद्धि करो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य जैसे घोड़े से मार्ग को शीघ्र जा सकते हैं, वैसे श्रेष्ठ बुद्धि को प्राप्त होकर मोक्षमार्ग को शीघ्र पाने के योग्य हैं॥१॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

अधा॒ ह्य॑ग्ने॒ क्रतो॑र्भ॒द्रस्य॒ दक्ष॑स्य सा॒धोः। र॒थीर्ऋ॒तस्य॑ बृह॒तो ब॒भूथ॑॥ २॥

अध॑। हि। अ॒ग्ने॒। क्रतो॑:। भ॒द्रस्य॑। दक्ष॑स्य। सा॒धोः। र॒थीः। ऋ॒तस्य॑। बृ॒ह॒तः। ब॒भूथ॑॥ २॥

पदार्थः-**(अध)** आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। **(हि)** यतः **(अग्ने)** पावकवत्प्रकाशमान राजन् **(क्रतोः)** प्रज्ञायाः **(भद्रस्य)** कल्याणकरस्य **(दक्षस्य)** बलस्य **(साधोः)** सन्मार्गस्थस्य **(रथीः)** बहवो रथा विद्यन्ते यस्य सः **(ऋतस्य)** सत्यस्य न्यायस्य **(बृहतः)** महतः **(बभूथ)** भव॥२॥

अन्वयः-हे अग्ने! हि त्वं रथीः सन् भद्रस्य दक्षस्य क्रतोः साधोर्ऋतस्य बृहतो रक्षको बभूथाऽधाऽस्माकं राजा भव॥२॥

भावार्थः-राज्ञा सर्वेण बलेन विज्ञानेन साधूनां रक्षणं दुष्टानां ताडनं कृत्वा सत्यस्य न्यायस्योन्नतिः सततं विधेया॥२॥

पदार्थः-हे **(अग्ने)** राजन्! **(हि)** जिस कारण अग्नि के सदृश प्रकाशमान आप हैं, इससे **(रथीः)** बहुत वाहनों से युक्त होते हुए **(भद्रस्य)** कल्याणकर्त्ता तथा **(दक्षस्य)** बल **(क्रतोः)** बुद्धि और **(साधोः)** उत्तम मार्ग में वर्त्तमान **(ऋतस्य)** सत्य, न्याय और **(बृहतः)** बड़े व्यवहार के रक्षक **(बभूथ)** हूजिये **(अध)** इसके अनन्तर हम लोगों के राजा हूजिये॥२॥

भावार्थः-राजा को चाहिये कि सम्पूर्ण बल और विज्ञान से सज्जनों का रक्षण और दुष्ट पुरुषों का ताड़न करके सत्यन्याय की उन्नति निरन्तर करे॥२॥

अथ प्रजाविषयमाह॥

अब प्रजाविषय को अगले मन्त्र में कहते हैं॥

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः।

अग्ने विश्वेभिः सुमना अनीकैः॥३॥

एभिः। नः। अर्कैः। भव। नः। अर्वाङ्। स्वः। न। ज्योतिः। अग्ने। विश्वेभिः। सुऽमनाः। अनीकैः॥३॥

पदार्थः-(**एभिः**) प्रज्ञाबलसाधुभिस्सहितः **(नः)** अस्माकमुपरि **(अर्कैः)** सत्कर्त्तव्यैः **(भव)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मभ्यम् **(अर्वाङ्)** इतरस्मिन् व्यवहारे वर्त्तमानः **(स्वः)** सूर्य इव सुखकारी **(न)** इव **(ज्योतिः)** प्रकाशकः **(अग्ने)** **(विश्वेभिः)** समग्रैः **(सुमनाः)** कल्याणमनाः **(अनीकैः)** शत्रुभिर्दुष्टैर्दस्युभिर्नेतुमशक्यैः सैन्यैः॥३॥

अन्वयः-हे अग्ने! त्वमर्कैरेभिर्नो रक्षको भवाऽर्वाङ् स्वर्ण नो ज्योतिर्भव सुमनाः सन् विश्वेभिरनीकैः पालको भव॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये राजानो बलबुद्धिसज्जनान् सङ्गत्य संरक्ष्य वर्द्धयित्वा प्रजापालनं विदधति ते सूर्य्य इव प्रकाशितयशसः सदानन्दिता भवन्ति॥३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्विन्! आप **(अर्कैः)** सत्कार और **(एभिः)** बुद्धि, बल और साधुओं के सहित **(नः)** हम लोगों के लिये रक्षक **(भव)** हूजिये और **(अर्वाङ्)** अन्य व्यवहार में वर्त्तमान **(स्वः)** जैसे सूर्य्य के सदृश सुखकारी **(न)** वैसे **(नः)** हम लोगों के ऊपर **(ज्योतिः)** प्रकाशक हूजिये और **(सुमनाः)** कल्याणकारक मनयुक्त होते हुए **(विश्वेभिः)** सम्पूर्ण **(अनीकैः)** शत्रु और दुष्ट डाकुओं से ग्रहण करने को अशक्य सेनाओं से पालनकर्त्ता हूजिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा लोग बल, बुद्धि और सज्जनों से संग उत्तम रक्षा कर और वृद्धि कराके प्रजा का पालन करते हैं, वे सूर्य्य के सदृश प्रकाशित यशयुक्त सदा आनन्दित होते हैं॥३॥

अथामात्यविषयमाह॥

अब अमात्यविषय को अगले मन्त्र में कहते हैं॥

आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम। प्र ते दिवो न स्तनयन्ति शुष्माः॥४॥

आभिः। ते। अद्य। गीःऽभिः। गृणन्तः। अग्ने। दाशेम। प्र। ते। दिवः। न। स्तनयन्ति। शुष्माः॥४॥

पदार्थः-(**आभिः**) (**ते**) तुभ्यम् (**अद्य**) (**गीर्भिः**) प्रज्ञादिवर्धिकाभिर्वाग्भिः (**गृणन्तः**) स्तुवन्तः (**अग्ने**) विद्युदिव वर्त्तमान (**दाशेम**) दद्याम (**प्र**) (**ते**) तुभ्यम् (**दिवः**) विद्युतः (**न**) इव (**स्तनयन्ति**) ध्वनयन्ति (**शुष्माः**) बलपराक्रमयुक्ताः॥४॥

अन्वयः-हे अग्ने राजन्! वयमद्याभिर्गीर्भिस्ते गृणन्तः करं दाशेम यस्य ते दिवो न शुष्माः प्र स्तनयन्ति तस्मै तुभ्यं राज्यं दाशेम॥४॥

भावार्थः-हे राजन्! यदि भवान् विद्युत्तुल्यानमात्यान् रक्षित्वाऽस्मान् पालयेत् तर्हि वयं तव प्रजाः सन्तस्त्वामद्यारभ्य सततं प्रशंसेम पुष्कलमैश्वर्यं दद्याम॥४॥

पदार्थः-हे (**अग्ने**) बिजुली के सदृश वर्त्तमान राजन्! हम लोग (**अद्य**) आज शीघ्र (**आभिः**) इन (**गीर्भिः**) बुद्धि आदि की बढ़ाने वाली वाणियों से (**ते**) आपके लिये (**गृणन्तः**) स्तुति करते हुए कर धन (**दाशेम**) देवें जिन (**ते**) आपके लिये (**दिवः**) बिजुली के (**न**) सदृश (**शुष्माः**) बलपराक्रमयुक्त जन (**प्र, स्तनयन्ति**) शब्द करते हैं, उन आपके लिये राज्य देवें॥४॥

भावार्थः-हे राजन्! जो आप बिजुली के तुल्य मन्त्रियों की रक्षा करके हम लोगों की पालना करें तो हम लोग आपकी प्रजा हुए आज से लेकर आपकी निरन्तर प्रशंसा करें और बहुत धनादि सम्पत्ति देवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिदुक्तोः।

श्रिये रुक्मो न रोचत उपाके॥५॥

तव। स्वादिष्ठा। अग्ने। सम्ऽदृष्टिः। इदा। चित्। अह्नः। इदा। चित्। अक्तोः। श्रिये। रुक्मः। न। रोचते। उपाके॥५॥

पदार्थः-(**तव**) (**स्वादिष्ठा**) अतिशयेन स्वादिता (**अग्ने**) सूर्य्य इव प्रकाशमान (**संदृष्टिः**) सम्यग्दृष्टिः प्रेक्षणं (**इदा**) एव (**चित्**) (**अह्नः**) दिवसस्य (**इदा**) एव (**चित्**) (**अक्तोः**) रात्रेर्मध्ये (**श्रिये**) लक्ष्मीप्राप्तये (**रुक्मः**) रोचमानः सूर्य्यः (**न**) इव (**रोचते**) प्रकाशते (**उपाके**) समीपे॥५॥

अन्वयः-हे अग्ने राजन्! या स्वादिष्ठा संदृष्टिस्तवोपाक अह्नश्चिदक्तो रुक्मो न श्रिये रोचते सेदा भवता रक्षणीया यश्चित्सर्वगुणसम्पन्नो राज्यं रक्षितुं शत्रुं निरोद्धुं शक्नुयात् स इदा भवता गुरुवदासेवनीयः॥५॥

भावार्थः-हे राजन्! योऽहर्निशं सम्प्रेक्षकोऽन्यायविरोधको न्यायप्रवर्त्तको दूतोऽमात्यो वा भवेत् स एव तावत् सत्कृत्य रक्षणीयः॥५॥

पदार्थः-हे (**अग्ने**) सूर्य के सदृश प्रकाशमान राजन्! जो (**स्वादिष्ठा**) अत्यन्त स्वादुयुक्त मधुर (**संदृष्टिः**) अच्छी दृष्टि (**तव**) आपके (**उपाके**) समीप में (**अह्नः**) दिन (**चित्**) और (**अक्तोः**) रात्रि के मध्य में (**रुक्मः**) प्रकाशमान सूर्य्य के (**न**) सदृश (**श्रिये**) लक्ष्मी की प्राप्ति के लिये (**रोचते**) प्रकाशित होती है (**इदा**) वही आपको रक्षा करने योग्य है (**चित्**) और जो सम्पूर्ण गुणों से युक्त पुरुष राज्य की रक्षा कर सके और शत्रु को रोक सके (**इदा**) वही आपको गुरु के सदृश सेवा करने योग्य है॥५॥

भावार्थः-हे राजन्! जो दिन रात्रि के प्रबन्ध देखने अन्याय का विरोध करने और न्याय की प्रवृत्ति करने वाला दूत वा मन्त्री होवे वही पहिले सत्कार करके रक्षा करने योग्य है॥५॥

पुनः प्रजाविषयमाह॥

फिर प्रजाविषय को अगले मन्त्र में कहते हैं॥

घृतं न पूतं तनूररेपाः शुचि हिरण्यम्। तत्ते रुक्मो न रोचत स्वधावः॥६॥

घृतम्। न। पूतम्। तनूः। अरेपाः। शुचि। हिरण्यम्। तत्। ते। रुक्मः। न। रोचत। स्वधाऽवः॥६॥

पदार्थः-(**घृतम्**) घृतमाज्यमुदकं वा (**न**) इव (**पूतम्**) पवित्रम् (**तनूः**) शरीरम् (**अरेपाः**) पापाचरणरहिताः (**शुचि**) पवित्रम् (**हिरण्यम्**) ज्योतिरिव सुवर्णम् (**तत्**) (**ते**) तव (**रुक्मः**) देदीप्यमानः (**न**) इव (**रोचत**) रोचन्ते (**स्वधावः**) स्वधा बह्वन्नं विद्यते यस्य तत्सम्बुद्धौ॥६॥

अन्वयः-हे स्वधावो राजन्! येऽरेपास्ते राज्ये रुक्मो न रोचत यच्छुचि हिरण्यं प्रापयन्ति तत्प्राप्यैतैः सह तव तनूः पूतं घृतं न चिरजीविनी भवतु॥६॥

भावार्थः-हे राजन्! ये सूर्य्य इव तेजस्विनो धनाढ्याः कुलीनाः पवित्राः प्रशंसिता निरपराधिनो वपुष्मन्तो विद्यावयोवृद्धाः स्युस्ते तव भवतो राज्यस्य च रक्षकाः सन्तु भवानेतेषां सम्मत्या वर्त्तित्वा दीर्घायुर्भवतु॥६॥

पदार्थः-हे (**स्वधावः**) बहुत अन्न से युक्त राजन्! जो (**अरेपाः**) पाप के आचरण से रहित (**ते**) आपके राज्य में (**रुक्मः**) अत्यन्त दिपते हुए के (**न**) सदृश (**रोचत**) शोभित होते हैं और जो (**शुचि**)

पवित्र **(हिरण्यम्)** ज्योति के सदृश सुवर्ण को प्राप्त कराते हैं **(तत्)** उसको प्राप्त होकर उनके साथ आपका **(तनूः)** देह **(पूतम्)** पवित्र **(घृतम्)** घृत वा जल के **(न)** सदृश और चिरञ्जीव हो॥६॥

भावार्थः-हे राजन्! जो सूर्य्य के सदृश तेजस्वी, धनयुक्त, कुलीन, पवित्र, प्रशंसित, अपराधरहित, श्रेष्ठ शरीरयुक्त, विद्या और अवस्था में वृद्ध होवें, वे आपके और आपके राज्य के रक्षक हों और आप इन लोगों की सम्मति से वर्त्तमान होकर अधिक अवस्था युक्त हूजिये॥६॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

कृतं चिद्धि ष्मा सनेमि द्वेषोऽग्ने दुनोषि मर्तात्। दुत्था यजमानादृतावः॥७॥

कृतम्। चित्। हि। स्म। सनेमि। द्वेषः। अग्ने। दुनोषि। मर्तात्। दुत्था। यजमानात्। ऋतऽवः॥७॥

पदार्थः-(**कृतम्**) निष्पादितम् (**चित्**) अपि (**हि**) (**स्म**) एव (**सनेमि**) सनातनम् (**द्वेषः**) द्वेष्टुः (**अग्ने**) (**इनोषि**) व्याप्नोषि (**मर्तात्**) मनुष्यात् (**इत्था**) अनेन प्रकारेण (**यजमानात्**) धर्म्येण सङ्गतात् (**ऋतावः**) ऋतं सत्यं विद्यते यस्मिंस्तत्सम्बुद्धौ॥७॥

अन्वयः-हे ऋतावोऽग्ने! यस्त्वं हि चिद् द्वेषो मर्त्तादित्था यजमानाद्वा सनेमि कृतमिनोषि स स्म एव राज्यं कर्त्तुमर्हसि॥७॥

भावार्थः-हे राजादयो मनुष्या भवन्तः शत्रुभ्यो मित्रेभ्यश्च शुभान् गुणान् गृहीत्वा सुखानि प्राप्नुवन्तु॥७॥

पदार्थः-हे (**ऋतावः**) सत्य से युक्त (**अग्ने**) अग्नि के सदृश वर्त्तमान! जो आप (**हि**) ही (**चित्**)[२] निश्चित (**द्वेषः**) द्वेष करनेवाले (**मर्त्तात्**) मनुष्य से वा (**इत्था**) इस प्रकार (**यजमानात्**) धर्म से सङ्ग किये हुए जन से (**सनेमि**) अनादि सिद्ध और (**कृतम्**) उत्पन्न किये गये को (**इनोषि**) विशेषता से प्राप्त होते हैं (**स्म**) वही राज्य करने योग्य हैं॥७॥

भावार्थः-हे राजा आदि मनुष्यो! आप लोग शत्रु और मित्रों से उत्तम गुणों को ग्रहण करके सुखों को प्राप्त होइये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शिवा नः सख्या सन्तु भ्रात्राग्ने देवेषु युष्मे।

सा नो नाभिः सदने सस्मिन्नूधन्॥८॥१०॥अनु०१॥

---

२. संस्कृत में 'चित्' का अर्थ 'अपि' दिया है, जबकि हिन्दी में 'निश्चित' किया है।

शि॒वा। न॒:। स॒ख्या। सन्तु॑। भ्रा॒त्रा। अग्ने॑। दे॒वेषु॑। यु॒ष्मे इति॑। सा। न॒:। नाभि॑:। सद॑ने। सस्मि॑न्। ऊ॒ध॑न्॥८॥

पदार्थ:-(**शिवा**) मङ्गलकारिणी (**न:**) अस्माकम् (**सख्या**) मित्रेण (**सन्तु**) (**भ्रात्रा**) बन्धुनेव वर्त्तमानेन (**अग्ने**) पावकवत्पवित्राचरण (**देवेषु**) विद्वत्सु दिव्यगुणेषु वा (**युष्मे**) युष्मान् (**सा**) (**न:**) अस्माकम् (**नाभि:**) मध्याङ्गम् (**सदने**) सीदन्ति यस्मिँस्तस्मिन् राज्ये (**सस्मिन्**) सर्वस्मिन्। अत्र **छान्दसो वर्णलोपो वे**तिर्वलोप: (**ऊधन्**) आढ्ये धनाढ्ये॥८॥

अन्वय:-हे अग्ने! या ते नाभिरिव शिवा नीति: सस्मिन्नूधन् सदने वर्त्तते सा न: देवेषु युष्मे प्रवर्त्तयतु। ये सख्या भ्रात्रा सह वर्त्तमाना इव नो रक्षका: सन्तु तेषु त्वं विश्वसिहि॥८॥

भावार्थ:-ये राजपुरुषा परस्मिन् मैत्रीं कृत्वा प्रजासु पितृवद्वर्त्तन्ते तै: सह यो राजनीतिं प्रचारयति स एव सर्वदा राज्यं भोक्तुमर्हतीति॥८॥

अत्राऽग्निराजाऽमात्यप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्थमण्डले दशमं सूक्तं प्रथमोऽनुवाकऽस्तृतीयेऽष्टके पञ्चमेऽध्याये दशमो वर्गश्च समाप्त:॥

पदार्थ:-हे (**अग्ने**) अग्नि के सदृश पवित्र आचरण युक्त जो आपके (**नाभि:**) मध्य अङ्ग के सदृश (**शिवा**) मङ्गलकारिणी नीति (**सस्मिन्**) समस्त (**ऊधन्**) श्रेष्ठ धनाढ्य में और (**सदने**) विराजें जिसमें उस राज्य में वर्त्तमान है (**सा**) वह (**न:**) हम लोगों के (**देवेषु**) विद्वानों वा उत्तम गुणों में (**युष्मे**) आप लोगों को प्रवृत्त करे। जो लोग (**सख्या**) मित्र और (**भ्रात्रा**) बन्धु के सदृश वर्त्तमान पुरुष के साथ वर्त्तमानों के तुल्य (**न:**) हम लोगों की रक्षा करनेवाले (**सन्तु**) हों, उनमें आप विश्वास करो॥८॥

भावार्थ:-जो राजपुरुष परस्पर मित्रता करके प्रजाओं में पिता के सदृश वर्त्तमान हैं, उन लोगों के साथ जो राजनीति का प्रचार करता है, वही सर्वदा राज्य भोगने के योग्य है॥८॥

इस सूक्त में अग्नि, राजा, मन्त्री और प्रजा के कृत्यवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चतुर्थ मण्डल में दशवां सूक्त प्रथम अनुवाक तृतीय अष्टक के पांचवें अध्याय में दशवां वर्ग समाप्त हुआ॥

अथ षड्चस्यैकादशस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १, २, ५, ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ स्वराड्बृहती छन्दः। ऋषभः स्वरः। ४ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निसादृश्येन राजगुणानाह॥

अब अग्नि की सदृशता से राजगुणों को कहते हैं॥

भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य।
रुशद् दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम्॥ १॥

भद्रम्। ते। अग्ने। सहसिन्। अनीकम्। उपाके। आ। रोचते। सूर्यस्य। रुशत्। दृशे। ददृशे। नक्तऽया। चित्। अरूक्षितम्। दृशे। आ। रूपे। अन्नम्॥ १॥

पदार्थः-(**भद्रम्**) कल्याणकरम् (**ते**) तव (**अग्ने**) पावकवद्वर्त्तमान (**सहसिन्**) बहुबलयुक्त (**अनीकम्**) सैन्यम् (**उपाके**) समीपे (**आ**) (**रोचते**) प्रकाशते (**सूर्य्यस्य**) (**रुशत्**) सुरूपम् (**दृशे**) द्रष्टुम् (**ददृशे**) दृश्यते (**नक्तया**) रात्र्या (**चित्**) अपि (**अरूक्षितम्**) रूक्षतारहितम् (**दृशे**) द्रष्टव्ये (**आ**) (**रूपे**) (**अन्नम्**) अत्तव्यम्॥१॥

अन्वयः-हे सहसिन्नग्ने! यस्य त उपाके भद्रं रुशदनीकं सूर्य्यस्य किरणा इवारोचते नक्तया रात्र्या सहितश्चन्द्र इव ददृशे चिदपि सुखं दृशेऽरूक्षितमन्नं दृशे रूप आ रोचते तस्य तव सर्वत्र विजय इति निश्चयः॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सुशिक्षितया सेनया शुभैर्गुणैरैश्वर्य्येण च सहितः प्रजाः पालयति दुष्टान् दण्डयति स चन्द्रवत्सूर्य्य इव सर्वत्र प्रकाशितो भवति॥१॥

पदार्थः-हे (**सहसिन्**) बहुत बल से युक्त (**अग्ने**) अग्नि के सदृश वर्त्तमान! जिन (**ते**) आपके (**उपाके**) समीप में (**भद्रम्**) कल्याणकारक (**रुशत्**) उत्तम स्वरूपयुक्त (**अनीकम्**) सेना (**सूर्यस्य**) सूर्य के किरणों के सदृश (**आ, रोचते**) प्रकाशित होती है और (**नक्तया**) रात्रि के सहित चन्द्रमा के सदृश (**ददृशे**) दीखती (**चित्**) और सुख (**दृशे**) देखने के (**अरूक्षितम्**) रुखेपन से रहित (**अन्नम्**) भोजन करने योग्य पदार्थ (**दृशे**) देखने के योग्य (**रूपे**) रूप में (**आ**) प्रकाशित होता है, उन आप का सर्वत्र विजय हो यह निश्चय है॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा उत्तम प्रकार शिक्षित सेना [तथा] उत्तम गुणों और ऐश्वर्य के सहित प्रजाओं का पालन करता और दुष्टों को पीड़ा देता है, वह चन्द्र और सूर्य के सदृश सर्वत्र प्रकाशित होता है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः।

विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म॥ २॥

वि। साहि। अग्ने। गृणते। मनीषाम्। खम्। वेपसा। तुविऽजात। स्तवानः। विश्वेभिः। यत्। ववनः। शुक्र। देवैः। तत्। नः। रास्व। सुऽमहः। भूरि। मन्म॥ २॥

पदार्थः-(**वि**) विशेषेण (**साहि**) कर्मसमाप्तिं कुरु (**अग्ने**) पावकवद्विद्यया प्रकाशिते (**गृणते**) स्तुवते (**मनीषाम्**) मनस ईषिणीं प्रज्ञाम् (**खम्**) आकाशम् (**वेपसा**) राज्यपालनादिकर्मणा। **वेपस इति कर्मनामसु पठितम्।** (निघं०२.१) (**तुविजात**) बहुषु प्रसिद्ध (**स्तवानः**) स्तावकः सन् (**विश्वेभिः**) सर्वैः (**यत्**) (**वावनः**) सम्भज (**शुक्र**) आशुकर (**देवैः**) विद्वद्भिः (**तत्**) (**नः**) अस्मभ्यम् (**रास्व**) देहि (**सुमहः**) अतिमहत् (**भूरि**) बहु (**मन्म**) विज्ञानम्॥ २॥

अन्वयः-हे तुविजातागने! स्तवानस्त्वं वेपसा मनीषां खं गृणते वि साहि। हे शुक्र! विश्वेभिर्देवैस्सह त्वं यद्वावनस्तत्सुमहो भूरि मन्म नो रास्व॥ २॥

भावार्थः-हे राजँस्त्वं जितेन्द्रियो भूत्वा प्रज्ञां प्राप्य कर्मणारब्धकार्य्यं समाप्तं कुरु। सर्वैर्विद्वद्भिस्सहितः पूर्णविज्ञानं प्रजाभ्यः सुखं प्रयच्छ॥ २॥

पदार्थः-हे (**तुविजात**) बहुतों में प्रसिद्ध (**अग्ने**) अग्नि के सदृश विद्या से प्रकाशित! (**स्तवानः**) स्तुति करनेवाले हुए आप (**वेपसा**) राज्य के पालन आदि कर्म से (**मनीषाम्**) मन की नियामक बुद्धि और (**खम्**) आकाश की (**गृणते**) स्तुति करने वाले के लिये (**वि**) विशेष करके (**साहि**) कर्मों की समाप्ति करो। हे (**शुक्र**) शीघ्रता करनेवाले! (**विश्वेभिः**) सम्पूर्ण (**देवैः**) विद्वानों के साथ आप (**यत्**) जिसे (**वावनः**) उत्तम प्रकार भजो सेवो (**तत्**) उस (**सुमहः**) बहुत बड़े और (**भूरि**) बहुत (**मन्म**) विज्ञान को (**नः**) हम लोगों के लिये (**रास्व**) दीजिये॥ २॥

भावार्थः-हे राजन्! आप जितेन्द्रिय हो और बुद्धि को प्राप्त होकर कर्म से प्रारम्भ किये हुए कार्य्य को समाप्त करो और सम्पूर्ण विद्वानों के सहित पूर्ण विज्ञान और प्रजाओं के लिये सुख दीजिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि।

त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय॥ ३॥

त्वत्। अग्ने। काव्या। त्वत्। मनीषाः। त्वत्। उक्था। जायन्ते। राध्यानि। त्वत्। एति। द्रविणम्। वीरऽपेशाः। इत्थाऽधिये। दाशुषे। मर्त्याय॥ ३॥

पदार्थः-(**त्वत्**) तव सकाशात् (**अग्ने**) विद्वन् (**काव्या**) कविभिर्विद्वद्भिर्निर्मितानि (**त्वत्**) (**मनीषाः**) प्रमाः (**त्वत्**) (**उक्था**) प्रशंसनीयानि (**जायन्ते**) (**राध्यानि**) संसाधनीयानि (**त्वत्**) (**एति**) प्राप्नोति (**द्रविणम्**) (**वीरपेशाः**) वीराणां पेशो रूपमिव रूपं येषान्ते (**इत्थाधिये**) अनेकप्रकारेण धीर्यस्य तस्मै (**दाशुषे**) दात्रे (**मर्त्याय**) मनुष्याय॥३॥

अन्वयः-हे अग्ने! वीरपेशा वयमित्थाधिये दाशुषे मर्त्याय त्वत् काव्या त्वन्मनीषास्त्वदुक्था राध्यानि जायन्ते त्वद् द्रविणमेति तस्मात् त्वां वयं भजेम॥३॥

भावार्थः-हे राजन्! यदि त्वं विद्वाञ्जितेन्द्रियो न्यायकारी भवेस्तर्हि त्वदनुकरणेन सर्वे मनुष्याः सत्याचारे प्रवर्त्यैश्वर्य्यं प्राप्य सर्वस्याः प्रजाया हितं साद्धुं शक्नुयुः॥३॥

पदार्थः-हे (**अग्ने**) विद्वन्! आप (**वीरपेशाः**) वीर पुरुषों के रूप के सदृश रूपवाले हम लोग (**इत्थाधिये**) इस प्रकार (**त्वत्**) आपके समीप से बुद्धि युक्त (**दाशुषे**) देनेवाले (**मर्त्याय**) मनुष्य के लिये (**काव्या**) कवि विद्वानों के निर्मित किये काव्य (**त्वत्**) आपके समीप से (**मनीषाः**) यथार्थज्ञान (**त्वत्**) आपके समीप से (**उक्था**) प्रशंसा करने (**राध्यानि**) और सिद्ध करने योग्य द्रव्य (**जायन्ते**) प्रसिद्ध होते हैं (**त्वत्**) आपके समीप से (**द्रविणम्**) धन (**एति**) प्राप्त होता है, इससे हम लोग आपकी सेवा करें॥३॥

भावार्थः-हे राजन्! जो आप विद्वान्, जितेन्द्रिय और न्यायकारी होवें तो आपके अनुकरण से सम्पूर्ण मनुष्य सत्य आचरण में प्रवृत्त हो और ऐश्वर्य्य को प्राप्त होकर सम्पूर्ण प्रजा का हित साध सकें॥३॥

अथाग्निसम्बन्धेन विद्वद्गुणानाह॥

अब अग्निसम्बन्ध से विद्वानों के गुणों को कहते हैं॥

त्वद्वाजी वाजंभरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः।

त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा॥४॥

त्वत्। वाजी। वाजम्ऽभरः। विऽहायाः। अभिष्टिऽकृत्। जायते। सत्यऽशुष्मः। त्वत्। रयिः। देवऽजूतः। मयःऽभुः। त्वत्। आशुः। जूजुऽवान्। अग्ने। अर्वा॥४॥

पदार्थः-(**त्वत्**) तव सकाशात् (**वाजी**) वेगवान् (**वाजंभरः**) प्राप्तं बहुभारं धरति सः (**विहायाः**) विजिहीते सद्यो गच्छति येन सः (**अभिष्टिकृत्**) योऽभिष्टिं करोति सः (**जायते**) (**सत्यशुष्मः**) सत्यं शुष्मं बलं यस्मिन्त्सः (**त्वत्**) (**रयिः**) धनम् (**देवजूतः**) देवैर्विदितश्चलितः (**मयोभुः**) सुखम्भावुकः (**त्वत्**) (**आशुः**) शीघ्रं गन्ता (**जूजुवान्**) भृशं गमयिता (**अग्ने**) विद्वन् (**अर्वा**) यः सद्य ऋच्छति गच्छति सः॥४॥

अन्वयः-हे अग्ने! यस्त्वत्प्रेरितो विहाया वाजंभरः सत्यशुष्मोऽभिष्टिकृद् वाजी जायते यस्त्वद्रयिर्देवजूतो मयोभुर्यस्त्वज्जूजुवानर्वाऽऽशुर्जायते सोऽस्माभिरप्युत्पादनीयः॥४॥

भावार्थः-हे मनुष्या! यदि युष्माकं पुरुषार्थाद्विद्युदादिस्वरूपोऽग्निर्विद्यया प्रसिद्धो भवेत्तर्हि बहुभारयानहर्त्ता सुखहेतुर्धनजनकः सद्यो गमयिता जायेत॥४॥

पदार्थः-हे **(अग्ने)** विद्वन्! जो **(त्वत्)** आपके समीप से प्रेरणा किया गया **(विहायाः)** जिससे वह बड़ा और शीघ्र जाता है इससे **(वाजंभरः)** प्राप्त हुए बहुत भार को धारण करने वाला **(सत्यशुष्मः)** सत्यबलयुक्त **(अभिष्टिकृत्)** अपेक्षितकर्म का कर्त्ता **(वाजी)** वेगवान् और **(जायते)** होता है वा जो **(त्वत्)** आपके समीप से **(रयिः)** धन **(देवजूतः)** विद्वानों ने जाना और चलाया हुआ **(मयोभुः)** सुख की भावना कराने वाला वा जो **(त्वत्)** आपके समीप से **(जूजुवान्)** शीघ्र प्राप्त कराने और **(अर्वा)** शीघ्र जानेवाला **(आशुः)** शीघ्रगामी **(जायते)** होता है, वह हम लोगों को भी उत्पन्न करने योग्य है॥४॥

भावार्थः-हे मनुष्यो! जो आप लोगों के पुरुषार्थ से बिजुली आदि स्वरूप अग्निविद्या से प्रसिद्ध होवे तो बहुत भारवाले वाहन का पहुंचानेवाला सुख का हेतु और धन उत्पन्न कराने वा शीघ्र ले चलने वाला होवे॥४॥

पुनरग्निविषयमाह॥

फिर अग्नि के विषय को अगले मन्त्र में कहते हैं॥

त्वामग्ने प्रथमं देवयन्तो देवं मर्ता अमृत मन्द्रजिह्वम्।
द्वेषोयुतमा विवासन्ति धीभिर्दमूनसं गृहपतिममूरम्॥५॥

त्वाम्। अग्ने। प्रथमम्। देवऽयन्तः। देवम्। मर्ताः। अमृत। मन्द्रऽजिह्वम्। द्वेषःयुतम्। आ। विवासन्ति। धीभिः। दमूऽनसम्। गृहऽपतिम्। अमूरम्॥५॥

पदार्थः-(**त्वाम्**) (**अग्ने**) परमविद्वन् (**प्रथमम्**) आदिमम् (**देवयन्तः**) कामयमानाः (**देवम्**) कमनीयम् (**मर्त्ताः**) मनुष्याः (**अमृत**) स्वात्मस्वरूपेण नाशरहित (**मन्द्रजिह्वम्**) मन्द्रा आनन्दजनिका जिह्वा वाणी यस्य (**द्वेषोयुतम्**) द्वेषादिभी रहितम् (**आ**) (**विवासन्ति**) परिचरन्ति (**धीभिः**) कर्मभिः प्रज्ञाभिर्वा (**दमूनसम्**) दमनशीलम् (**गृहपतिम्**) गृहस्वामिनम् (**अमूरम्**) मूढतादिदोषरहितं विद्वांसम्॥५॥

अन्वयः-हे अमृताग्ने! ये धीभिर्मन्द्रजिह्वं द्वेषोयुतं दमूनसममूरं प्रथमं देवं गृहपतिं त्वां देवयन्तो मर्त्ता आविवासन्ति तांस्त्वमपि सेवस्व॥५॥

भावार्थः-ये विद्वांसो भूत्वा गृहस्थान् बोधयित्वा सर्वेषां सन्तानान् ब्रह्मचर्येण सुशिक्षां विद्यां ग्राहयित्वाऽविद्यादिदोषान् निवार्य्य शमादिशुभगुणान्वितान् कुर्वन्ति त एवात्र कमनीया भवन्ति॥५॥

पदार्थः-हे **(अमृत)** अपने आत्मस्वरूप से नाशरहित **(अग्ने)** अत्यन्त विद्वान्! जो लोग **(धीभिः)** कर्मों वा बुद्धियों से **(मन्द्रजिह्वम्)** आनन्द उत्पन्न करने वाली वाणीयुक्त **(द्वेषोयुतम्)** द्वेष आदि कर्मवियुक्त **(दमनूसम्)** इन्द्रियों को रोकने वाले **(अमूरम्)** मूर्खता आदि दोषरहित विद्वान् **(प्रथमम्)** आदिम **(देवम्)** सुन्दर **(गृहपतिम्)** गृह के स्वामी **(त्वाम्)** आपकी **(देवयन्तः)** कामना करते हुए

(मर्त्ताः) मनुष्य **(आ, विवासन्ति)** सेवा करते हैं, उनकी आप भी सेवा करो॥५॥

भावार्थः-जो लोग विद्वान् होकर गृहस्थों को बोध [करा के], सब के सन्तानों को ब्रह्मचर्य्य से उत्तम शिक्षा और विद्या ग्रहण करा के तथा अविद्या आदि दोषों को दूर करके शम, दम आदि उत्तम गुणों से युक्त करते हैं, वे ही इस संसार में सुन्दर होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ॒रे अ॒स्मद॑मति॒मा॒रे अंह॑ आ॒रे विश्वां॑ दुर्म॒तिं यन्नि॒पासि॑।

दो॒षा शि॒वः स॑हसः सूनो अग्ने॒ यं दे॒व आ चि॒त्सच॑से स्व॒स्ति॥६॥११॥

आ॒रे। अ॒स्मत्। अम॑तिम्। आ॒रे। अंह॑ः। आ॒रे। विश्वा॑म्। दुः॒ऽम॒तिम्। यत्। नि॒ऽपासि॑। दो॒षा। शि॒वः। स॒ह॒सः॒। सू॒नो॒ इति॑। अ॒ग्ने॒। यम्। दे॒वः। आ। चि॒त्। सच॑से। स्व॒स्ति॥६॥

पदार्थः-**(आरे)** दूरे **(अस्मत्)** **(अमतिम्)** **(आरे)** **(अंहः)** पापात्मकं कर्म **(आरे)** **(विश्वाम्)** समग्राम् **(दुर्म्मतिम्)** दुष्टां प्रज्ञाम् **(यत्)** यतः **(निपासि)** नितरां रक्षसि **(दोषा)** रात्रौ **(शिवः)** मङ्गलकारी **(सहसः)** बलवतः **(सूनो)** अपत्य **(अग्ने)** परमविद्वन् **(यम्)** **(देवः)** जगदीश्वर इव **(आ)** **(चित्)** अपि **(सचसे)** सम्बध्नासि **(स्वस्ति)** सुखम्॥६॥

अन्वयः-हे सहसः सूनोऽग्ने! यत्त्वं देव इवाऽस्मदारे अमतिमारे अंह आरे विश्वां दुर्मतिं निक्षिप्य यं निपासि तं शिवः सन् दोषा दिवसे चित्स्वस्ति आ सचसे तस्मादस्माभिः पूज्योऽसि॥६॥

भावार्थः-इदं वयं निश्चिनुमो येऽस्मान् दुष्टाचारादधर्मसङ्गाद् दुर्बुद्धेर्दूरेकुर्वन्ति त एवाऽहर्निशमस्माभिः सत्कर्त्तव्याः सन्तीति॥६॥

अत्राग्निराजविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या।

इत्येकादशं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** सन्तान और **(अग्ने)** अत्यन्त विद्वान् **(यत्)** जिससे आप **(देवः)** ईश्वर के सदृश **(अस्मत्)** हम लोगों से **(आरे)** दूर **(अमतिम्)** मूर्खपन को **(आरे)** दूर **(अंहः)** पापकर्म को और **(आरे)** दूर **(विश्वाम्)** समग्र **(दुर्मतिम्)** दुष्ट बुद्धि को निरन्तर अलग करा **(यम्)** जिसकी **(निपासि)** अत्यन्त रक्षा करते हो उसको **(शिवः)** मङ्गलकारी हुए **(दोषा)** रात्रि और दिन में **(चित्)** भी **(स्वस्ति)** सुख को **(आ, सचसे)** सम्बन्ध कराते हो, इससे हम लोगों से पूजा करने योग्य

हो॥६॥

भावार्थः-यह हम लोग निश्चय करते हैं कि जो लोग हम लोगों को अधर्मी और दुष्ट बुद्धिवाले पुरुष से दूर करते हैं, वे ही दिन-रात्रि हम लोगों से सत्कार करने योग्य हैं॥६॥

इस सूक्त में अग्नि, राजा, विद्वान् पुरुष के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ग्यारहवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

अथ षड्चस्य द्वादशस्य [सूक्तस्य] वामदेव ऋषिः। अग्निर्देवता। १, ५ निचृत्त्रिष्टुप्। २ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ४ भुरिक् पङ्क्तिः। ६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनरग्निसादृश्येन विद्वद्गुणानाह॥

अब छः ऋचावाले बारहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर अग्निसादृश्य होने से विद्वानों के विषय को कहते हैं॥

यस्त्वाऽमग्न इन्धते यतस्रुक् त्रिस्ते अन्नं कृणवत्सस्मिन्नहन्।

स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान्॥ १॥

यः। त्वाम्। अग्ने। इन्धते। यतऽस्रुक्। त्रिः। ते। अन्नम्। कृणवत्। सस्मिन्। अहन्। सः। सु। द्युम्नैः। अभि। अस्तु। प्रऽसक्षत्। तव। क्रत्वा। जातऽवेदः। चिकित्वान्॥ १॥

पदार्थः-(**यः**) (**त्वाम्**) (**अग्ने**) विद्वन्! (**इनधते**) ईश्वरेण सङ्गमयेत् (**यतस्रुक्**) यता उद्यता स्रुचो येन सः (**त्रिः**) त्रिवारम् (**ते**) तुभ्यम् (**अन्नम्**) (**कृणवत्**) कुर्य्यात् (**सस्मिन्**) सर्वस्मिन् (**अहन्**) अहनि दिवसे (**सः**) (**सु**) (**द्युम्नैः**) यशोभिर्धनैर्वा (**अभि**) (**अस्तु**) (**प्रसक्षत्**) प्रसङ्गं कुर्य्यात् (**तव**) (**क्रत्वा**) प्रज्ञया कर्मणा वा (**जातवेदः**) जातप्रज्ञान (**चिकित्वान्**) सत्यार्थविज्ञापकः॥१॥

अन्वयः-हे अग्ने! यतःस्रुक् सस्मिन्नहँस्त्वामिनधते तेऽन्नं कृणवत्। हे जातवेदो! यस्तव क्रत्वा चिकित्वान्त्सन्नभि प्रसक्षत् स सुद्युम्नैस्त्रिर्युक्तोऽस्तु॥१॥

भावार्थः-हे विद्वांसो! ये तुभ्यमीश्वरज्ञानमहाविहारविद्यां शोभनां मतिं सर्वदा प्रयच्छन्ति ते कीर्त्तिधनयुक्ताः कर्त्तव्याः॥१॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**यतःस्रुक्**) उद्यत किये हैं हवन करने के पात्र विशेषरूप स्रुवा जिसने ऐसा पुरुष (**सस्मिन्**) सब में (**अहन्**) दिन में (**त्वाम्**) आपको (**इनधते**) ईश्वर से मिलावे और (**ते**) आपके लिये (**अन्नम्**) भोजन के पदार्थ को (**कृणवत्**) सिद्ध करे और हे (**जातवेदः**) श्रेष्ठ ज्ञानयुक्त (**यः**) जो (**तव**) आपकी (**क्रत्वा**) बुद्धि वा कर्म से (**चिकित्वान्**) सत्य अर्थ का जानने वाला होता हुआ (**अभि, प्रसक्षत्**) प्रसङ्ग को करे (**सः**) वह (**सु, द्युम्नैः**) उत्तम यशों वा धनों से (**त्रिः**) तीन वार युक्त (**अस्तु**) हो॥१॥

भावार्थः-हे विद्वानो! जो लोग आपके लिये ईश्वरज्ञान, बड़े विहार की विद्या और उत्तमबुद्धि को सब काल में देते हैं, वे यश और धन से युक्त करने चाहिये॥१॥

पुनरग्निसादृश्येन राजगुणानाह॥

फिर अग्नि के सादृश्य से राजगुणों को अगले मन्त्र में कहते हैं॥

इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन्।

स इ॑धा॒नः प्रति॑ दो॒षामु॒षासं॑ पुष्य॑न् र॒यिं स॑चते घ॒न्नमित्रा॑न्॥ २॥

इ॒ध्मम्। यः। ते॒। ज॒भर॑त्। श॒श्र॒मा॒णः। म॒हः। अ॒ग्ने॒। अनी॑कम्। आ। स॒प॒र्यन्। सः। इ॒धा॒नः। प्रति॑। दो॒षाम्। उ॒षस॑म्। पुष्य॑न्। र॒यिम्। स॒च॒ते॒। घ्नन्। अ॒मित्रा॑न्॥ २॥

पदार्थः-(**इध्मम्**) देदीप्यमानम् (**यः**) (**ते**) तव (**जभरत्**) यथावद्धरेत् पोषयेत्पुष्येत् (**शश्रमाणः**) भृशं श्रमं कुर्वन् (**महः**) महत् (**अग्ने**) राजन् (**अनीकम्**) विजयमानं सैन्यम् (**आ**) समन्तात् (**सपर्य्यन्**) सेवमानः (**सः**) (**इधानः**) प्रकाशमानः (**प्रति**) (**दोषाम्**) रात्रिम् (**उषासम्**) दिनम् (**पुष्यन्**) (**रयिम्**) राज्यश्रियम् (**सचते**) प्राप्नोति (**घ्नन्**) विनाशयन् (**अमित्रान्**) धर्मद्वेषिणः शत्रून्॥ २॥

अन्वयः-हे अग्ने! यः शश्रमाणो बलाध्यक्षस्ते मह इध्ममनीकमासपर्य्यञ्जभरत् स इधानः प्रतिदोषामुषासं प्रति पुष्यन्नमित्रान् घ्नन् रयिं सचते॥ २॥

भावार्थः-हे राजन्! ये तव बलाध्यक्षा न्यायाधीशा विद्याविनयधर्मादिभिः प्रकाशमानाः स्वप्रजाः पालयन्तो दुष्टाञ्छत्रून् घ्नन्तो विजयन्ते तेभ्यो भवता पुष्कलां प्रतिष्ठां बहुधनं च दत्वाहर्निशं धर्मार्थकाममोक्षोन्नतिर्विधेया॥ २॥

पदार्थः-हे (**अग्ने**) राजन्! (**यः**) जो (**शश्रमाणः**) अत्यन्त परिश्रम करता हुआ सेना का स्वामी (**ते**) आपकी (**महः**) बड़ी (**इध्मम्**) प्रकाशयुक्त (**अनीकम्**) विजय को प्राप्त होती हुई सेना की (**आ**) सब प्रकार (**सपर्य्यन्**) सेवा करता हुआ (**जभरत्**) यथावत् हरे पोषे पुष्ट हो अर्थात् शत्रु बल हरे और आप पुष्ट हो (**सः**) वह (**इधानः**) प्रकाशमान होता (**प्रति, दोषाम्**) प्रत्येक रात्रि और (**उषासम्**) प्रत्येक दिन (**पुष्यन्**) पुष्टि पाता (**अमित्रान्**) और धर्म से द्वेष करने वाले शत्रुओं का (**घ्नन्**) नाश करता हुआ (**रयिम्**) राज्यलक्ष्मी को (**सचते**) प्राप्त होता है॥ २॥

भावार्थः-हे राजन्! जो आपके सेनाध्यक्ष और न्यायाधीश विद्या विनय और धर्म आदि से प्रकाशमान हुए अपनी प्रजाओं का पालन करते और दुष्ट शत्रुओं का नाश करते हुए विजय को प्राप्त होते हैं, उनके लिये आपको चाहिये कि बहुत प्रतिष्ठा और बहुत धन देकर दिन-रात्रि धर्म, अर्थ, काम, मोक्ष की उन्नति करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒ग्निरीशे॒ बृह॒तः क्ष॒त्रिय॑स्याग्निर्वा॒जस्य॑ पर॒मस्य॑ रा॒यः।

दधा॑ति॒ रत्नं॑ वि॒धते॒ यवि॑ष्ठो॒ व्या॑नु॒षङ् मर्त्या॑य स्व॒धावा॑न्॥ ३॥

अ॒ग्निः। ईशे॒। बृ॒ह॒तः। क्ष॒त्रिय॑स्य। अ॒ग्निः। वा॒ज॒स्य॒। प॒र॒मस्य॑। रा॒यः। दधा॑ति। रत्न॑म्। वि॒ध॒ते॒। यवि॑ष्ठः। वि। आ॒नु॒षक्। मर्त्या॑य। स्व॒धाऽवान्॥ ३॥

पदार्थः-(**अग्निः**) पावक इव (**ईशे**) ईष्टे ऐश्वर्य्यं करोति (**बृहतः**) महतः (**क्षत्रियस्य**) क्षात्रधर्मयुक्तस्य (**अग्निः**) विद्युदिव वर्त्तमानः (**वाजस्य**) वेगस्य विज्ञानस्य वा (**परमस्य**) अत्युत्तमस्य (**रायः**) धनादेर्मध्ये (**दधाति**) (**रत्नम्**) रमणीयं धनम् (**विधते**) विधानं कुर्वते (**यविष्ठः**) अतिशयेन युवा शरीरात्मबलयुक्तः (**वि**) (**आनुषक्**) अनुकूलः (**मर्त्याय**) मरणधर्माय (**स्वधावान्**) बह्वन्नादियुक्तः॥३॥

अन्वयः-हे राजप्रजाजना! योऽग्निरिव क्षत्रियस्य बृहतो वाजस्य परमस्य राय ईशे यविष्ठः स्वधावानानुषग् विधते मर्त्यायाग्निरिव रत्नं विदधाति स सर्वैः सत्कर्त्तव्यः॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्य्यवद्विद्युदिव राज्यैश्वर्य्यस्योन्नतिं कुर्वाणाः कीर्तिं प्रसारयन्ति ते सर्वतः सर्वथा सत्कारमाप्नुवन्ति॥३॥

पदार्थः-हे राजा और प्रजाजनो! जो (**अग्निः**) अग्नि के सदृश जन (**क्षत्रियस्य**) क्षात्रधर्मयुक्त (**बृहतः**) बड़े (**वाजस्य**) वेग विज्ञान और (**परमस्य**) अत्यन्त श्रेष्ठ (**रायः**) धन आदि के मध्य में (**ईशे**) ऐश्वर्य्य करता है तथा (**यविष्ठः**) अत्यन्त युवा अर्थात् शरीर और आत्मा के बल से और (**स्वधावान्**) बहुत अन्न आदि से युक्त (**आनुषक्**) अनुकूल हुआ (**विधते**) विधान करते हुए (**मर्त्याय**) मरण धर्मवाले मनुष्य के लिये (**अग्निः**) बिजुली के समान वर्त्तमान (**रत्नम्**) रमण करने योग्य धन को (**वि, दधाति**) विधान करता है, वह सब लोगों से सत्कार करने योग्य है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य्य और बिजुली के सदृश राज्य और ऐश्वर्य्य की उन्नति करते हुए यश को विस्तारते हैं, वे सब से सब प्रकार सत्कार को प्राप्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः।
कृधी ष्व१स्माँ अदितेरनागान् व्येनांसि शिश्रथो विष्वगग्ने॥४॥

यत्। चित्। हि। ते। पुरुषऽत्रा। यविष्ठ। अचित्तिऽभिः। चकृम। कत्। चित्। आगः। कृधि। सु। अस्मान्। अदितेः। अनागान्। वि। एनांसि। शिश्रथः। विष्वक्। अग्ने॥४॥

पदार्थः-(**यत्**) (**चित्**) अपि (**हि**) खलु (**ते**) तव (**पुरुषत्रा**) पुरुषेषु (**यविष्ठ**) अतिशयेन प्राप्तयौवन (**अचित्तिभिः**) अचेतनाभिः (**चकृम**) कुर्य्याम। अत्र **संहितायामिति** दीर्घः। (**कत्**) कदा (**चित्**) (**आगः**) अपराधम् (**कृधि**) कुरु (**सु**) (**अस्मान्**) (**अदितेः**) पृथिव्याः (**अनागान्**) अनपराधान् (**वि**) (**एनांसि**) पापानि (**शिश्रथः**) शिथिलीकुरु वियोजय (**विष्वक्**) सर्वतः (**अग्ने**) विद्याविनयप्रकाशित राजन्॥४॥

अन्वयः-हे यविष्ठाग्ने! यद् ये वयमचित्तिभिस्ते पुरुषत्रा चिदागश्चकृम तानस्मान् कच्चिदनागान् कृधि। यानि यान्यस्मदेनांसि जायेरँस्तानि तानि चिद्धि विष्वग्विशिश्रथोऽदितेः सु राष्ट्रं कृधि॥४॥

भावार्थः-हे राजन्! यदि कदाचिदज्ञानेन प्रमादेन वा वयमपराधं कुर्य्याम तानपि दण्डेन विना मा क्षमस्व। अस्मान् सुशिक्षया धार्मिकान् कृत्वा पृथिव्या राज्याधिकारिणः कुर्य्याः॥४॥

पदार्थः-हे **(यविष्ठ)** अत्यन्त यौवनावस्था को प्राप्त **(अग्ने)** विद्या और विनय से प्रकाशित राजन्! **(यत्)** जो हम लोग **(अचित्तिभिः)** चेतनाभिन्नों से **(ते)** आपके **(पुरुषत्रा)** पुरुषों में **(चित्)** कुछ **(आगः)** अपराध को **(चकृम)** करें उन **(अस्मान्)** हम लोगों को **(कत्, चित्)** कभी **(अनागान्)** अपराध से रहित **(कृधि)** कीजिये जो-जो हम लोगों से **(एनांसि)** पाप होवें, उन-उन को भी **(हि)** निश्चय से **(विष्वक्)** सब प्रकार **(वि, शिश्रथः)** शिथिल वा उनका वियोग करो और **(अदितेः)** पृथिवी के **(सु)** उत्तम राज्य को करो॥४॥

भावार्थः-हे राजन्! जो कदाचित् अज्ञान वा प्रमाद से हम लोग अपराध करें, उनको भी दण्ड के विना क्षमा न कीजिये और हम लोगों को उत्तम शिक्षा से धार्मिक करके पृथिवी के राज्य के अधिकारी करिये॥४॥

पुनर्विद्वद्गुणानाह॥

फिर विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

मॅहश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानाम्।

मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः॥५॥

महः। चित्। अग्ने। एनसः। अभीके। ऊर्वात्। देवानाम्। उत। मर्त्यानाम्। मा। ते। सखायः। सदम्। इत्। रिषाम। यच्छ। तोकाय। तनयाय। शम्। योः॥५॥

पदार्थः-(**महः**) महतः **(चित्)** **(अग्ने)** विद्वन् **(एनसः)** अपराधस्य **(अभीके)** समीपे **(ऊर्वात्)** विस्तीर्णात् **(देवानाम्)** विदुषाम् **(उत)** अपि **(मर्त्यानाम्)** अविदुषाम् **(मा)** **(ते)** तव **(सखायः)** सुहृदः **(सदम्)** स्थानम् **(इत्)** **(रिषाम)** हिंस्याम **(यच्छ)** देहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(तोकाय)** सद्यो जाताय पञ्चवार्षिकाय **(तनयाय)** दशवार्षिकाय षोडशवार्षिकाय वा **(शम्)** सुखम् **(योः)** सुकृताज्जनितम्॥५॥

अन्वयः-हे अग्ने! देवानामुत मर्त्यानामभीके महश्चिदेनस ऊर्वाद्वयं विनाशयेम। ते सखायः सन्तस्तव सदं मा रिषाम। त्वं तोकाय तनयाय शं योरिद्यच्छ॥५॥

भावार्थः-हे मनुष्या! यथा वयं देवानां समीपे स्थित्वा शिक्षाः प्राप्य पापात्मकं कर्म्म त्यक्त्वाऽन्यान् त्याजयेम सर्वेषां सुहृदो भूत्वा कुमारान् कुमारींश्च सुशिक्ष्य सकला विद्याः प्रापय्य सुखयुक्ताः सम्पादयेम तथा यूयमप्याचरत॥५॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(देवानाम्)** विद्वानों के **(उत)** और **(मर्त्यानाम्)** अविद्वानों के **(अभीके)** समीप में **(महः)** बड़े **(चित्)** भी **(एनसः)** अपराध के **(ऊर्वात्)** विस्तीर्णभाव से हम लोग विनाश करें अर्थात् उन कर्मों का नाश करें जो अपराध के मूल हैं और **(ते)** आपके **(सखायः)** मित्र हुए आपके **(सदम्)** स्थान को **(मा)** मत **(रिषाम)** नष्ट करें और आप **(तोकाय)** शीघ्र उत्पन्न हुए पांच वर्ष की अवस्थावाले **(तनयाय)** पुत्र के लिये **(शम्)** सुख **(योः)** उत्तम कर्म से उत्पन्न हुआ **(इत्)** ही **(यच्छ)** दीजिये॥५॥

भावार्थः-हे मनुष्यो! जैसे हम लोग विद्वानों के समीप स्थित हों और शिक्षा को प्राप्त होकर पापस्वरूप कर्म्म का त्याग कर अन्यों का भी त्याग करें **[**=करावैं,**]** सब के मित्र होकर कुमार और कुमारियों को उत्तम शिक्षा देकर और सम्पूर्ण विद्या प्राप्त करा के सुखयुक्त करें, वैसा आप लोग भी आचरण करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यथा॑ ह॒ त्यद्व॑सवो गौ॒र्यं॑ चित्प॒दि षि॒ताममु॑ञ्चता यजत्राः।

ए॒वो ष्व१॑स्मन्मु॑ञ्चता॒ व्यं॑ह॒ः प्र तार्यग्ने प्र॒त॒रं न आयु॑ः॥६॥१२॥

यथा॑। ह॒। त्यत्। व॒स॒वः॒। गौ॒र्यम्। चि॒त्। प॒दि। सि॒ताम्। अमु॑ञ्चत। य॒ज॒त्राः॒। ए॒वो इति॑। सु। अ॒स्मत्। मु॒ञ्च॒त॒। वि। अं॑हः। प्र। ता॒रि॒। अ॒ग्ने॒। प्र॒ऽत॒रम्। नः॒। आयु॑ः॥६॥

पदार्थः-**(यथा)** **(ह)** खलु **(त्यत्)** तत् **(वसवः)** निवसन्तः **(गौर्यम्)** गौरीं वाचम्। **गौरीति वाङ्नामसु पठितम्।** (निघं०१.११) **(चित्)** **(पदि)** प्राप्तव्ये विज्ञाने **(सिताम्)** शब्दार्थविज्ञानसम्बन्धिनीम् **(अमुञ्चता)** त्यजत। अत्र **संहितायामिति** दीर्घः। **(यजत्राः)** विदुषां सत्कर्तारः **(एवो)** एव **(सु)** **(अस्मत्)** **(मुञ्चता)** त्यजत। अत्र **संहितायामिति** दीर्घः। **(वि)** **(अंहः)** **(प्र)** **(तारि)** प्लूयते **(अग्ने)** विद्वन् **(प्रतरम्)** प्रतरन्ति येन तत् **(नः)** अस्माकम् **(आयुः)** जीवनम्॥६॥

अन्वयः-हे अग्ने! यथा त्वया नः प्रतरमायुः प्रतार्यंहः प्रतारि तथा वयं तव प्रतरमायुरपराधं च प्रतारयेम। हे यजत्रा वसवो! यथा यूयं त्यदंहो हामुञ्चत पदि चित्सितां गौर्यं प्राप्नुत तथाऽस्मदंहः सुविमुञ्चत तथैवो वयमति पापं त्यक्त्वा सुशिक्षितां वाचं प्राप्नुयाम॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा धार्मिका आप्ता विद्वांसः पापाचरणं विहाय सत्यमाचरन्त्यन्यान् स्वसदृशान् कर्त्तुमिच्छन्ति तथैव भवन्तोऽप्याचरन्तु॥६॥

अत्राग्निराजविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वादशं सूक्त द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(यथा)** जैसे आप से **(नः)** हम लोगों के **(प्रतरम्)** जिससे संसार में

पार होते वह **(आयुः)** जीवन **(प्र, तारि)** पार किया जाता है **(अंहः)** पाप पार किया जाता, वैसा हम लोग आपके पार कराने वाले जीवन और अपराध को पार करें। हे **(यजत्राः)** विद्वानों के सत्कार करने वाले **(वसवः)** निवास करते हुए जनो! जैसे आप लोग **(त्यत्)** उस पाप का **(ह)** निश्चय करि **(अमुञ्चत)** त्याग करें **(पदि)** प्राप्त होने योग्य विज्ञान में **(चित्)** भी **(सिताम्)** शब्दार्थविज्ञानसम्बन्धिनी **(गौर्यम्)** स्वच्छ वाणी को प्राप्त हूजिये, वैसे **(एवो)** ही **(अस्मत्)** हम से आपको **(सु, वि, मुञ्चत)** अच्छे प्रकार विशेषता से दूर कीजिये, उसी प्रकार हम लोग भी पाप का त्याग करके उत्तम प्रकार शिक्षित वाणी को प्राप्त होवें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे धार्मिक यथार्थवक्ता विद्वान् लोग पाप के आचरण का त्याग करके सत्य आचरण में अन्यों को अपने सदृश करने की इच्छा करते हैं, वैसा ही आप लोग भी आचरण करो॥६॥

इस सूक्त में अग्नि, राजा और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बारहवां सूक्त बारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य त्रयोदशस्य सूक्तस्य वामदेव ऋषिः। अग्निर्देवता। १, २, ४, ५ विराट्त्रिष्टुप्।
३ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्य्यसादृश्येन राजगुणानाह॥

अब पांच ऋचा वाले तेरहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में सूर्य के सादृश्य से राजगुणों को कहते हैं॥

प्रत्यग्निरुषसामग्रमख्यद्विभातीनां सुमना रत्नधेयम्।
यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति॥ १॥

प्रति। अग्निः। उषसाम्। अग्रम्। अख्यत्। विऽभातीनाम्। सुऽमनाः। रत्नऽधेयम्। यातम्। अश्विना। सुऽकृतः। दुरोणम्। उत्। सूर्यः। ज्योतिषा। देवः। एति॥ १॥

पदार्थः-(**प्रति**) (**अग्निः**) अग्निरिव (**उषसाम्**) प्रभातानाम् (**अग्रम्**) उपरिभावम् (**अख्यत्**) प्रकाशयति (**विभातीनाम्**) प्रकाशयन्तीनाम् (**सुमनाः**) प्रसन्नचित्तः (**रत्नधेयम्**) रत्नानि धेयानि यस्मिंस्तत् (**यातम्**) प्राप्नुतम् (**अश्विना**) वायुविद्युताविव (**सुकृतः**) सुकृतस्य धर्मात्मनः (**दुरोणम्**) गृहम् (**उत्**) (**सूर्यः**) सविता (**ज्योतिषा**) प्रकाशेन (**देवः**) सुखप्रदाता (**एति**) प्राप्नोति॥ १॥

अन्वयः-यो विभातीनामुषसामग्रमग्निरिव यशः प्रत्यख्यत्सुमनाः सन्नश्विना यातमिव ज्योतिषा देवः सूर्य उदेतीव सुकृतो रत्नधेयं दुरोणमेति स सुखं लभते॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये वायुविद्युत्सूर्यगुणाः प्रजाः प्रालयन्ति ते तेन सत्येन न्यायेन बहुरत्नकोषं लभन्ते॥ १॥

पदार्थः-जो (**विभातीनाम्**) प्रकाश करते हुए (**उषसाम्**) प्रातःकालों के (**अग्रम्**) ऊपर होना जैसे हो वैसे (**अग्निः**) अग्नि के सदृश यश को (**प्रति, अख्यत्**) प्रकट करता और (**सुमनाः**) प्रसन्नचित्त होता हुआ (**अश्विना**) वायु और बिजुली के जैसे (**यातम्**) प्राप्त हों, वैसे (**ज्योतिषा**) प्रकाश के साथ (**देवः**) सुख का देनेवाला (**सूर्यः**) सूर्य जैसे (**उत्**) (**एति**) उदय होता, वैसे (**सुकृतः**) उत्तम कृत्य करने वाले धर्मात्मा के (**रत्नधेयम्**) रत्न जिसमें धरे जायें, उस (**दुरोणम्**) गृह को प्राप्त होता, वह सुख को प्राप्त होता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वायु, बिजुली और सूर्य के गुणयुक्त पुरुष प्रजाओं का पालन करते हैं, वे उस सत्य न्याय से बहुत रत्नों के कोष को प्राप्त हैं॥ १॥

अथ सूर्यलोकादीनां निमित्तकारणमाह॥

अब सूर्यलोकादिकों के निमित्तकारण को अगले मन्त्र में कहते हैं॥

ऊर्ध्वं भानुं सविता देवो अश्रेद् द्रप्सं दविध्वद्गविषो न सत्वा।

अनु॑ व्र॒तं वरु॑णो यन्ति मि॒त्रो यत्सूर्यं॑ दि॒व्यारो॒हय॑न्ति॥ २॥

ऊ॒र्ध्वम्। भा॒नुम्। स॒वि॒ता। दे॒वः। अ॒श्रे॒त्। द्रप्स॑म्। दवि॑ध्वत्। गो॒ऽइ॒षः। न। सत्वा॑। अनु॑। व्र॒तम्। वरु॑णः। य॒न्ति॒। मि॒त्रः। यत्। सूर्य॑म्। दि॒वि। आ॒ऽरो॒हय॑न्ति॥ २॥

पदार्थः-(**ऊर्ध्वम्**) उपरिस्थम् (**भानुम्**) किरणम् (**सविता**) सूर्य्यमण्डलम् (**देवः**) प्रकाशमानः (**अश्रेत्**) आश्रयति (**द्रप्सम्**) पार्थिवं भूगोलम् (**दविध्वत्**) भृशं धुन्वन् (**गविषः**) गाः प्राप्तुमिच्छन् (**न**) इव (**सत्वा**) गन्ता (**अनु**) (**व्रतम्**) कर्म (**वरुणः**) जलम् (**यन्ति**) (**मित्रः**) वायुः (**यत्**) यम् (**सूर्य्यम्**) सवितृलोकम् (**दिवि**) (**आरोहयन्ति**)॥ २॥

अन्वयः-हे मनुष्या! यः सविता देवः सत्वा गविषो नाऽनुव्रतं वरुणो मित्रोऽनुव्रतं यन्ति यत्सूर्यं दिव्यारोहयन्ति सविता देवो द्रप्सं दविध्वत् सन्नूर्ध्वं भानुमश्रेदिति विजानीत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। इह सृष्टौ परमात्मना यथा सूर्य्योत्पत्तेर्जलाग्निवायवो निर्मितास्तथैव पृथिव्यादीनामपि निमित्तानि विहितानीति वेदितव्यम्॥ २॥

पदार्थः-हे मनुष्यो! जो (**सविता**) सूर्य्यमण्डल (**देवः**) प्रकाशमान (**सत्वा**) चलने वाला (**गविषः**) गौओं को प्राप्त होने कि इच्छा करते हुए के (**न**) सदृश (**अनु, व्रतम्**) अनुकूल कर्म को और (**वरुणः**) जल और (**मित्रः**) वायु अनुकूल कर्म को (**यन्ति**) प्राप्त होते वा (**यत्**) जिस (**सूर्य्यम्**) सूर्य्यलोक को (**दिवि**) अन्तरिक्ष में (**आरोहयन्ति**) चढ़ाते हैं वा सूर्य्यमण्डल (**द्रप्सम्**) पृथिवीसंबन्धी भूलोक को (**दविध्वत्**) अत्यन्त कंपाता हुआ (**ऊर्ध्वम्**) ऊपर वर्त्तमान (**भानुम्**) किरण का (**अश्रेत्**) आश्रय करता है, यह सब जानो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। इस सृष्टि में परमात्मा ने जैसे सूर्य्य की उत्पत्ति से जल, अग्नि और पवन रचे, वैसे ही पृथिवी आदिकों के भी निमित्तकारण रचे, यह जानना चाहिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यं सी॒मकृ॑ण्व॒न् तम॑से वि॒पृचे॑ ध्रु॒वक्षे॑मा॒ अन॑वस्यन्तो॒ अर्थ॑म्।

तं सूर्यं॑ ह॒रित॑: स॒प्त य॒ह्वी: स्पशं॒ विश्व॑स्य॒ जग॑तो वहन्ति॥ ३॥

यम्। सी॒म्। अकृ॑ण्वन्। तम॑से। वि॒ऽपृचे॑। ध्रु॒वऽक्षे॑माः। अन॑वऽस्यन्तः। अर्थ॑म्। तम्। सूर्य॑म्। ह॒रित॑ः। स॒प्त। य॒ह्वीः। स्पश॑म्। विश्व॑स्य। जग॑तः। व॒ह॒न्ति॒॥ ३॥

पदार्थः-(**यम्**) (**सीम्**) सर्वतः (**अकृण्वन्**) कुर्वन्ति (**तमसे**) अन्धकाराय (**विपृचे**) वियोजनाय (**ध्रुवक्षेमाः**) ध्रुवं क्षेमं रक्षणं येषान्ते (**अनवस्यन्तः**) अपरिचरन्तः कुर्वन्तः (**अर्थम्**) द्रव्यम् (**तम्**)

(सूर्य्यम्) **(हरितः)** दिश इव व्याप्ताः किरणाः। **हरित इति दिङ्नाममसु पठितम्।** (निघं०१.६) **(सप्त)** **(यह्वीः)** महत्यः **(स्पशम्)** बन्धकम् **(विश्वस्य)** सर्वस्य **(जगतः)** **(वहन्ति)** प्रापयन्ति॥३॥

अन्वयः-हे मनुष्या! यमर्थमनवस्यन्तो ध्रुवक्षेमास्तमसे विपृचे सीमकृण्वँस्तं विश्वस्य जगतः स्पशं सूर्य्यं सप्त यह्वीर्हरितो वहन्तीव शुभगुणान् वहन्तु प्रापयन्तु॥३॥

भावार्थः-हे मनुष्या! यथा किरणाः सूर्यं तमोनिवारणाय वहन्ति तथैव सर्वस्य जगतोऽविद्यानिवारणाय विद्यारक्षणाय च सर्वथा सत्योपदेशान् कुर्वन्तु॥३॥

पदार्थः-हे मनुष्यो! **(यम्)** जिस **(अर्थम्)** पदार्थरूप सूर्य को **(अनवस्यन्तः)** न सेवते और क्रिया करते हुए **(ध्रुवक्षेमाः)** निश्चित रक्षण करने वाले जन **(तमसे)** अन्धकार के अर्थ **(विपृचे)** वियोग करने के लिये **(सीम्)** सब ओर से **(अकृण्वन्)** निश्चित करते हैं **(तम्)** उस **(विश्वस्य)** सम्पूर्ण **(जगतः)** संसार के **(स्पशम्)** बांधनेवाले **(सूर्य्यम्)** सूर्य्य को **(सप्त)** सात **(यह्वीः)** बड़ी **(हरितः)** दिशाओं को **(वहन्ति)** प्राप्त कराते हैं, वैसे ही उत्तम गुणों को प्राप्त कराओ॥३॥

भावार्थः-हे मनुष्यो! जैसे किरणें सूर्य्य को अन्धकार के दूर करने के लिये धारण करती हैं, वैसे ही सम्पूर्ण जगत् की अविद्या दूर करने के लिये और विद्या की रक्षा के लिये सब प्रकार सत्य के उपदेश करो॥३॥

अथ सूर्य्यदृष्टान्तेन विद्वद्गुणानाह॥

अब सूर्य्यदृष्टान्त से विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

वहिष्ठेभिर्विहरन् यासि तन्तुमव्ययन्नसितं देव वस्म।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वन्तः॥४॥

वहिष्ठेभिः। विऽहरन्। यासि। तन्तुम्। अवऽव्ययन्। असितम्। देव। वस्म। दविध्वतः। रश्मयः। सूर्यस्य। चर्मऽइव। अव। अधुः। तमः। अप्ऽसु। अन्तरिति॥४॥

पदार्थः-(**वहिष्ठेभिः**) अतिशयेन वोढृभिः **(विहरन्)** विचरन् **(यासि)** याति। अत्र पुरुषव्यत्ययः। **(तन्तुम्)** कारणम् **(अवव्ययन्)** दूरीकुर्वन् **(असितम्)** कृष्णं तमः **(देवः)** प्रकाशमान **(वस्म)** निवासस्थानम् **(दविध्वतः)** कम्पयतः **(रश्मयः)** **(सूर्यस्य)** **(चर्मेव)** यथा चर्म देहमावृणोति तथा **(अव)** **(अधुः)** आच्छादयन्ति **(तमः)** अन्धकारम् **(अप्सु)** अन्तरिक्षे **(अन्तः)** मध्ये॥४॥

अन्वयः-हे देव विद्वन्! यतस्त्वं वहिष्ठेभिः सविता तन्तुं विहरन्नसितमवव्ययन् याति तथा वस्मावयासि यथा दविध्वतस्सूर्यस्य रश्मयोऽप्स्वन्तस्तमश्चर्मेवाधुस्तद्वत्त्वं भव॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे उपदेशक! यथा सूर्यो वोढृभिः किरणाकर्षणादिभिः स्वप्रकाशं विस्तारयन् चर्मणा देहमिव तम आच्छादयन्नन्तरिक्षस्य मध्ये विहरति तथैवाऽविद्यां विच्छिद्य विद्यां विस्तार्याऽस्मिञ्जगति विचर॥४॥

पदार्थः-हे **(देव)** प्रकाशमान विद्वन्! जिससे आप **(वहिष्ठेभिः)** अत्यन्त प्राप्त कराने वालों से सूर्य **(तन्तुम्)** कारण को **(विहरन्)** प्राप्त होता हुआ और **(असितम्)** कृष्णवर्ण अन्धकार को **(अवव्ययन्)** दूर करता हुआ चलता है, वैसे **(वस्म)** निवासस्थान को **(अव, यासि)** प्राप्त होते हो और जैसे **(दविध्वतः)** कंपाते हुए **(सूर्यस्य)** सूर्य की **(रश्मयः)** किरणें **(अप्सु)** अन्तरिक्ष के **(अन्तः)** मध्य में **(तमः)** अन्धकार को **(चर्मेव)** जैसे चर्म शरीर को ढांपता है, वैसे **(अधुः)** ढांपते हैं, वैसे आप हूजिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे उपदेशक! जैसे सूर्य प्राप्त कराने वाले किरणों के आकर्षणादिकों से अपने प्रकाश का विस्तार करता हुआ, चर्म से देह के सदृश [अन्धकार को] ढांपता हुआ, अन्तरिक्ष के मध्य में विहार करता है, वैसे ही अविद्या का नाश और विद्या का प्रकाश [=विस्तार] करके इस संसार में विचरिये॥४॥

अथ सूर्यमण्डलप्रश्नोत्तरपूर्वकविद्वद्गुणानाह॥

अब सूर्य्यमण्डल प्रश्नोत्तर पूर्वक विद्वानों के गुणों को कहते हैं॥

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम्॥५॥१३॥

अनायतः। अनिऽबद्धः। कथा। अयम्। न्यङ्। उत्तानः। अव। पद्यते। न। कया। याति। स्वधया। कः। ददर्श। दिवः। स्कम्भः। सम्ऽऋतः। पाति। नाकम्॥५॥१३॥

पदार्थः-(**अनायतः**) इतस्ततोऽगच्छन्त्सन्निहितः (**अनिबद्धः**) न कस्याप्याकर्षेण निबद्धः (**कथा**) केन प्रकारेण (**अयम्**) (**न्यङ्**) यो न्यग्भूतस्सन् (**उत्तानः**) ऊर्ध्वं स्थितः (**अव**) (**पद्यते**) अवगच्छति (**न**) निषेधे (**कया**) (**याति**) गच्छति (**स्वधया**) अन्नादिपदार्थयुक्त्या पृथिव्या सह (**कः**) (**ददर्श**) पश्यति (**दिवः**) प्रकाशस्य (**स्कम्भः**) स्तम्भ इव धारकः [(**समृतः**)] सम्यक्सत्यस्वरूपः (**पाति**) (**नाकम्**) अविद्यमानदुःखं व्यवहारम्॥५॥

अन्वयः-हे विद्वन्नयमनायतोऽनिबद्धो न्यङ्ङुत्तानः कथा नाऽवपद्यते कया स्वधया याति। यो दिवस्स्कम्भः समृतो नाकं पाति तं को ददर्श॥५॥

भावार्थः-हे विद्वन्नयं सूर्योऽन्तरिक्षमध्ये स्थितः कथमधो न पतति। केन गच्छति कथं प्रकाशस्य धर्त्ता सुखकारको भवतीति प्रश्नस्योत्तरं, परमेश्वरेण स्थापितो धृतो नाऽधः पतति स्वसन्निहितैर्भूगोलैः सह

स्वकक्षायां गच्छन् वर्त्तते सर्वेषां सन्निहितानामाकर्षणेन धर्त्ता परमेश्वरस्य व्यवस्थया सुखकरो वर्त्तत इति वेदितव्यम्॥५॥

अथ सूर्य्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति त्रयोदशं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! **(अयम्)** यह **(अनायतः)** इधर-उधर [न] जाता और समीप वर्त्तमान **(अनिबद्धः)** किसी के आकर्षण से नहीं बंधा **(न्यङ्)** जो नीचे को होता हुआ **(उत्तानः)** ऊपर स्थित **(कथा)** किस प्रकार से **(न)** नहीं **(अव, पद्यते)** नीचे आता और **(कया)** किस **(स्वधया)** अन्न आदि पदार्थों से युक्त पृथिवी के साथ **(याति)** चलता है, जो **(दिवः)** प्रकाश का **(स्कम्भः)** खम्भे के सदृश धारण करने वाला **(समृतः)** उत्तम प्रकार सत्यस्वरूप **(नाकम्)** दुःखरहित व्यवहार की **(पाति)** रक्षा करता है, उसको **(कः)** कौन **(ददर्श)** देखता है॥५॥

भावार्थः-हे विद्वन्! यह सूर्य्य अन्तरिक्ष के मध्य में स्थित हुआ क्यों नीचे नहीं गिरता है? किससे चलता है? और कैसे प्रकाश का धारण करने वाला और सुखकारक होता है? इस प्रश्न का उत्तर- परमेश्वर ने स्थापित और धारण किया इससे नीचे नहीं गिरता है और अपने समीप वर्त्तमान भूगोलों के साथ अपनी कक्षा में चलता हुआ वर्त्तमान है और सम्पूर्ण समीप में वर्त्तमान पदार्थों के आकर्षण से धारणकर्त्ता और परमेश्वर की व्यवस्था से सुखकारक वर्त्तमान है, यह जानना चाहिये॥५॥

इस सूक्त में सूर्य्य और विद्वानों के गुणों का वर्णन करने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेरहवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य चतुर्दशस्य सूक्तस्य वामदेव ऋषिः। अग्निर्लिङ्गोक्ता देवता वा। १ भुरिक्पङ्क्तिः। ३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४ निचृत्त्रिष्टुप्। ५ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाग्निसादृश्येन विद्वद्गुणानाह॥

अब पांच ऋचावाले चौदहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्निसादृश्य से विद्वानों के गुणों का उपदेश करते हैं॥

प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः।
आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ॥ १॥

प्रति। अग्निः। उषसः। जातऽवेदाः। अख्यत्। देवः। रोचमानाः। महःऽभिः। आ। नासत्या। उरुऽगाया। रथेन। इमम्। यज्ञम्। उप। नः। यातम्। अच्छ॥ १॥

पदार्थः-(**प्रति**) (**अग्निः**) विद्युदिव (**उषसः**) दिवसमुखस्य (**जातवेदाः**) उत्पन्नेषु विद्यमानः (**अख्यत्**) प्रकाशते (**देवः**) देदीप्यमानः (**रोचमानाः**) प्रकाशमानाः (**महोभिः**) महद्भिः (**आ**) (**नासत्या**) अविद्यमानसत्याचरणौ (**उरुगाया**) बहुप्रशंसौ (**रथेन**) यानेन (**इमम्**) वर्त्तमानं (**यज्ञम्**) (**उप**) (**नः**) अस्माकम् [(**यज्ञम्**)] प्रकाश्यप्रकाशकमयं व्यवहारम् (**यातम्**) प्राप्नुतम् (**अच्छ**)॥ १॥

अन्वयः-हे नासत्योरुगायाध्यापकोपदेशकौ! युवां महोभी रथेन न इमं यज्ञं जातवेदा देवोऽग्नी रोचमाना उषसः प्रत्यख्यद् दिवाऽच्छोपायातम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये यथा सूर्य्य उषसो विभाति तथैव सत्येनोपदेशेन रथेन मार्गमिव विद्यां सुखं प्रापयन्ति तेऽत्र जगति कल्याणकरा भवन्ति॥ १॥

पदार्थः-हे (**नासत्या**) असत्य आचरण से रहित (**उरुगाया**) बहुत प्रशंसावाले अध्यापक और उपदेशक जनो! आप दोनों (**महोभिः**) बड़ों के साथ (**रथेन**) वाहन से (**नः**) हम लोगों के प्रकाश्य और प्रकाशस्वरूप व्यवहार और (**इमम्**) इस वर्त्तमान (**यज्ञम्**) यज्ञ को (**जातवेदाः**) उत्पन्न हुए पदार्थों में विद्यमान (**देवः**) प्रकाशमान (**अग्निः**) बिजुली के सदृश अग्नि (**रोचमानाः**) प्रकाशमान (**उषसः**) दिन के मुख अर्थात् प्रारम्भ के (**प्रति**) प्रति (**अख्यत्**) प्रकाशित होता है, वैसे (**अच्छ**) उत्तम प्रकार (**उप**) समीप (**आ, यातम्**) आओ प्राप्त होओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो जैसे सूर्य्य प्रातःकाल से शोभित होता है, वैसे ही सत्य के उपदेश से रथ से मार्ग के सदृश विद्या के सुख को प्राप्त कराते हैं, वे इस संसार में कल्याणकारक होते हैं॥ १॥

अथ विद्वद्गुणानाह॥

अब विद्वान् के गुणों को अगले मन्त्र में कहते हैं॥

ऊ॒र्ध्वं के॒तुं स॑वि॒ता दे॒वो अ॑श्रेज्ज्यो॒ति॒र्विश्व॑स्मै॒ भुव॑नाय कृ॒ण्वन्।
आप्रा॒ द्यावा॑पृथि॒वी अ॒न्तरि॑क्षं॒ वि सूर्यो॑ र॒श्मिभि॒श्चेकि॑तानः॥ २॥

ऊ॒र्ध्वम्। के॒तुम्। स॒वि॒ता। दे॒वः। अ॒श्रे॒त्। ज्योति॑ः। विश्व॑स्मै। भुव॑नाय। कृ॒ण्वन्। आ। अ॒प्राः॒। द्यावा॑पृथि॒वी इति॑। अ॒न्तरि॑क्षम्। वि। सूर्यः॑। र॒श्मिऽभि॑ः। चेकि॑तानः॥ २॥

पदार्थः-(**ऊर्ध्वम्**) उत्कृष्टम् (**केतुम्**) प्रज्ञाम् (**सविता**) सूर्य्य इव (**देवः**) विद्वान् (**अश्रेत्**) (**ज्योतिः**) प्रकाशम् (**विश्वस्मै**) सर्वस्मै (**भुवनाय**) संसाराय (**कृण्वन्**) कुर्वन् (**आ**) (**अप्राः**) व्याप्नोति (**द्यावापृथिवी**) प्रकाशभूमी (**अन्तरिक्षम्**) आकाशम् (**वि**) (**सूर्य्यः**) प्रकाशमयः (**रश्मिभिः**) (**चेकितानः**) प्रज्ञापयन्॥ २॥

अन्वयः-यो देवो विद्वान् यथा सविता रश्मिभिश्चेकितानः सूर्य्यो विश्वस्मै भुवनाय ज्योतिः कृण्वन् द्यावापृथिवी अन्तरिक्षं व्याप्रास्तथोर्ध्वं केतुमश्रेत् स एवालं सुखी जायते॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसोऽखिला विद्या अधीत्य ब्रह्मचर्य्य-योगाभ्यासाभ्यां प्रमां प्राप्य रश्मिभिस्सूर्य्य इव जनान्तःकरणाण्युपदेशेनोज्ज्वलयन्ति त एव सर्वेषां पूज्या भवन्ति॥ २॥

पदार्थः-जो (**देवः**) विद्वान् जैसे (**सविता**) सूर्य्य (**रश्मिभिः**) किरणों से (**चेकितानः**) जनाता हुआ (**सूर्य्यः**) प्रकाशमान (**विश्वस्मै**) सब (**भुवनाय**) संसार के लिये (**ज्योतिः**) प्रकाश को (**कृण्वन्**) करता हुआ (**द्यावापृथिवी**) प्रकाश-भूमि (**अन्तरिक्षम्**) आकाश को (**वि, आ, अप्राः**) व्याप्त होता है, वैसे (**ऊर्ध्वम्**) उत्तम (**केतुम्**)) बुद्धि का (**अश्रेत्**) आश्रय करे, वही पूर्ण सुखवाला होवे॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् लोग सम्पूर्ण विद्याओं को पढ़कर, ब्रह्मचर्य और योगाभ्यास से ज्ञान को प्राप्त होकर, किरणों से सूर्य्य के सदृश जनों के अन्तःकरणों को उपदेश से उज्ज्वल करते हैं, वे ही सब को सत्कार करने योग्य होते हैं॥ २॥

अथ विदुषीगुणानाह॥

अब विदुषी के गुणों को अगले मन्त्र में कहते हैं॥

आ॒वह॑न्त्यरु॒णीर्ज्योति॒षागा॒न्म॒ही चि॒त्रा र॒श्मिभि॒श्चेकि॑ताना।
प्र॒बो॒धय॑न्ती सुवि॒ताय॑ दे॒व्यु॒१॒॑षा ई॑यते सु॒युजा॒ रथे॑न॥ ३॥

आ॒ऽव॒ह॑न्ती। अ॒रु॒णीः। ज्योति॑षा। आ। अ॒गा॒त्। म॒ही। चि॒त्रा। र॒श्मिऽभि॑ः। चेकि॑ताना। प्र॒ऽबो॒धय॑न्ती। सु॒वि॒ताय॑। दे॒वी। उ॒षाः। ई॒य॒ते। सु॒ऽयुजा॑। रथे॑न॥ ३॥

पदार्थः-(**आवहन्ती**) समन्तात् प्रापयन्ती (**अरुणीः**) किञ्चिदारक्ताभाः (**ज्योतिषा**) प्रकाशेन (**आ**) (**अगात्**) आगच्छति (**मही**) महती (**चित्रा**) अद्भुतस्वरूपा (**रश्मिभिः**) स्वकिरणैः (**चेकिताना**)

प्राणिनः प्रज्ञापयन्ती **(प्रबोधयन्ती)** जागरयन्ती **(सुविताय)** ऐश्वर्याय **(देवी)** देदीप्यमाना **(उषाः)** प्रभातवेला **(ईयते)** गच्छति **(सुयुजा)** सष्ठु युञ्जन्त्यश्वान् यस्मिंस्तेन **(रथेन)** यानेनेव॥३॥

अन्वयः-हे विदुषि शुभगुणे पत्नि! त्वं यथा सुयुजा रथेनेव रश्मिभिश्चेकिताना सुविताय प्रबोधयन्ती ज्योतिषा चित्राऽरुणीरावहन्ती मही देव्युषा ईयत आगात्तथा त्वं भव॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि हृद्या प्रिया सुलक्षणाऽद्भुतरूपा पतिव्रता स्त्री पुरुषं प्राप्नुयात् सा उषा इव कुलं प्रकाशयन्त्वपत्यानि सुशिक्षमाणा सर्वानानन्दयति॥३॥

पदार्थः-हे विद्यायुक्त और उत्तम गुण वाली स्त्रि! तू जैसे **(सुयुजा)** उत्तम प्रकार जोड़ते हैं घोड़ों को जिसमें उस **(रथेन)** वाहन के सदृश **(रश्मिभिः)** अपने किरणों से **(चेकिताना)** प्राणियों को जनाती हुई और **(सुविताय)** ऐश्वर्य के लिये **(प्रबोधयन्ती)** जगाती हुई **(ज्योतिषा)** प्रकाश से **(चित्रा)** अद्भुतस्वरूप वाली **(अरुणीः)** किञ्चित् लाल आभायुक्त कान्तियों को **(आवहन्ती)** सब प्रकार प्राप्त कराती हुई **(मही)** बड़ी **(देवी)** अत्यन्त प्रकाशमान **(उषाः)** प्रातःकाल की वेला **(ईयते)** जाती और **(आ, आगात्)** आती है, वैसे आप हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सुन्दर प्रिया उत्तम लक्षणों से युक्त, अद्भुत रूपवाली, पतिव्रता स्त्री पुरुष को प्राप्त होवे, वह प्रातःकाल के सदृश कुल का प्रकाश करती हुई और सन्तानों को उत्तम शिक्षा देती हुई सब को आनन्द देती है॥३॥

अथ स्त्रीपुरुषगुणानाह॥

अब स्त्री-पुरुष के गुणों को अगले मन्त्र में कहते हैं॥

आ वां॑ वहि॑ष्ठा इ॒ह ते व॑हन्तु॒ रथा॒ अश्वा॑स उ॒षसो॒ व्यु॑ष्टौ।

इ॒मे हि वां॑ मधु॒पेया॑य॒ सोमा॑ अ॒स्मिन्य॒ज्ञे वृ॑षणा मादयेथाम्॥४॥

आ। वा॒म्। वहि॑ष्ठाः। इ॒ह। ते। व॒ह॒न्तु॒। रथा॑ः। अश्वा॑सः। उ॒षस॑ः। विऽउ॑ष्टौ। इ॒मे। हि। वा॒म्। म॒धु॒ऽउ॒पेया॑य। सोमा॑ः। अ॒स्मिन्। य॒ज्ञे। वृ॒ष॒णा॒। मा॒द॒येथा॒म्॥४॥

पदार्थः-**(आ)** **(वाम्)** युवयोः **(वहिष्ठाः)** अतिशयेन वोढारः **(इह)** अस्मिन् संसारे **(ते)** **(वहन्तु)** **(रथाः)** यानानि **(अश्वासः)** सद्यो गामिनः **(उषसः)** प्रातर्वेलायाः **(व्युष्टौ)** विशिष्टप्रतापे **(इमे)** **(हि)** यतः **(वाम्)** युवयोः **(मधुपेयाय)** मधुरैर्गुणैः पातुं योग्याय **(सोमाः)** सैश्वर्याः पदार्थाः **(अस्मिन्)** **(यज्ञे)** सङ्गन्तव्ये गृहाश्रमे **(वृषणा)** वीर्यवन्तौ **(मादयेथाम्)** आनन्दयतम्॥४॥

अन्वयः-हे स्त्रीपुरुषौ! वां ये वहिष्ठा रथा अश्वास उषसो व्युष्टौ सन्ति ते युवामिहाऽऽवहन्तु। य इमे हि वां सोमा अस्मिन् यज्ञे मधुपेयाय भवन्ति तानिह सेवित्वा वृषणा सन्तौ युवां मादयेथाम्॥४॥

भावार्थः-हे स्त्रीपुरुषा! यूयं यदि रजन्याश्चतुर्थे प्रहर उत्थाय कृताऽवश्यका यानैः पद्भ्यां च सूर्योदयात् प्राक्छुद्धवायुदेशे भ्रमणं कुर्युस्तर्हि युष्मान् रोगा कदाचिन्नागच्छेयुर्येन बलिष्ठा भूत्वा दीर्घायुषस्सन्तोऽस्मिन् गृहाश्रमे पुष्कलमानन्दं भुङ्ध्वम्॥४॥

पदार्थः-हे स्त्री-पुरुषो! **(वाम्)** आप दोनों जो लोग **(वहिष्ठाः)** अत्यन्त धारण करने वाले **(रथाः)** वाहन **(अश्वासः)** शीघ्र चलने वाले **(उषसः)** प्रातःकाल के **(व्युष्टौ)** विशिष्ट प्रताप में हैं **(ते)** वे आप दोनों को **(इह)** इस संसार में **(आ, वहन्तु)** अभीष्ट स्थान को पहुंचावें और जो **(इमे)** ये **(हि)** जिस कारण **(वाम्)** आप दोनों के **(सोमाः)** ऐश्वर्य के सहित पदार्थ **(अस्मिन्)** इस **(यज्ञे)** मेल करने योग्य गृहाश्रम में **(मधुपेयाय)** मधुर गुणों से पीने योग्य के लिये होते हैं, इस कारण उनका इस संसार में सेवन करके **(वृषणा)** पराक्रम वाले होते हुए आप दोनों **(मादयेथाम्)** आनन्दित होवें॥४॥

भावार्थः-हे स्त्री पुरुषो! आप लोग यदि रात्रि के चौथे प्रहर में उठ और आवश्यक कृत्य करके वाहन वा पैरों से सूर्योदय से पहिले शुद्ध वायु देश में भ्रमण करें तो आप लोगों को रोग कभी न प्राप्त होवें, जिससे कि बलिष्ठ और अधिक अवस्था वाले हुए इस गृहाश्रम में बड़े आनन्द को भोगो॥४॥

पुनर्विद्वद्गुणानाह॥

फिर विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न।

कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम्॥५॥१४॥

अनायतः। अनिऽबद्धः। कथा। अयम्। न्यङ्। उत्तानः। अव। पद्यते। न। कया। याति। स्वधया। कः। ददर्श। दिवः। स्कम्भः। सम्ऽऋतः। पाति। नाकम्॥५॥

पदार्थः-(**अनायतः**) अदूरभवः (**अनिबद्धः**) परवदेकत्र न स्थितः (**कथा**) कथम् (**अयम्**) (**न्यङ्**) यो नित्यमञ्चति (**उत्तानः**) ऊर्ध्वं तनित इव स्थितः (**अव**) (**पद्यते**) (**न**) (**कया**) (**याति**) गच्छति (**स्वधया**) स्वकीयया गत्या (**कः**) (**ददर्श**) पश्यति (**दिवः**) कमनीयस्य सुखस्य (**स्कम्भः**) गृहाधारको मध्ये स्थितस्तम्भ इव (**समृतः**) सम्यक्सत्यस्वरूपः (**पाति**) (**नाकम्**) सुखम्॥५॥

अन्वयः-यो विद्वाननायतोऽनिबद्धोऽयं न्यङ्ङुत्तानः कथा नावपद्यते कया स्वधया याति समृतो दिवः स्कम्भ इव नाकं पातीमं को ददर्श॥५॥

भावार्थः-हे विद्वन्! जीवोऽयमधोगतिं कथं नाप्नुयाद् यद्यविद्यादिबन्धनं त्यजेत् केन कर्मणा सुखं याति यदि धर्ममनुतिष्ठेत् कः पूर्णकामो भवति यः परमात्मानं पश्येदिति॥५॥

अत्राग्निविद्वत्स्त्रीपुरुषकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्दशं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-जो विद्वान् **(अनायतः)** दूर नहीं अर्थात् समीप वर्त्तमान **(अनिबद्धः)** शत्रुवान् पुरुष के

समान एकत्र न ठहरने वाला **(अयम्)** यह **(न्यङ्)** नित्य आदर करता वा प्राप्त होता **(उत्तानः)** ऊपर को विस्तरित-सा स्थित **(कथा)** किस प्रकार **(न)** नहीं **(अव, पद्यते)** नीची दशा को प्राप्त होता है और **(कया)** किस **(स्वधया)** अपनी गति से **(याति)** चलता है **(समृतः)** उत्तम प्रकार सत्यस्वरूप **(दिवः)** मनोहर सुख के **(स्कम्भः)** घर का आधार खम्भा जैसे बीच में ठहरे वैसे **(नाकम्)** सुख की **(पाति)** रक्षा करता है, इसको **(कः)** कौन **(ददर्श)** देखता है॥५॥

भावार्थः-हे विद्वन्! जीव यह नीचे की दशा को किस रीति से न प्राप्त होवें जो अविद्या आदि बन्धन का त्याग करे तो, किस कर्म से सुख को प्राप्त होता है जो धर्म का अनुष्ठान करे, कौन कामनाओं से पूर्ण होता है, जो परमात्मा को देखे॥५॥

इस सूक्त में अग्नि, विद्वान्, स्त्री और पुरुष के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौदहवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथ दशर्चस्य पञ्चदशस्य सूक्तस्य वामदेव ऋषिः। १-६ अग्निः। ७, ८ सोमकः साहदेव्यः। ९, १० अश्विनौ देवते। १, ४ गायत्री। २, ५, ६ विराड् गायत्री। ३, ७-१० निचृद् गायत्रीच्छन्दः। षड्जः स्वरः॥

अथाग्निविषयमाह॥

अब दश ऋचावाले पन्द्रहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्निविषय को कहते हैं॥

अ॒ग्निर्होता॑ नो अध्व॒रे वा॒जी सन् परि॑ णीयते। दे॒वो दे॒वेषु॑ य॒ज्ञिय॑ः॥ १॥

अ॒ग्निः। होता॑। न॒ः। अ॒ध्व॒रे। वा॒जी। सन्। परि॑। नी॒य॒ते॒। दे॒वः। दे॒वेषु॑। य॒ज्ञिय॑ः॥ १॥

पदार्थः-(**अग्निः**) अग्निरिव शुभगुणप्रकाशितः (**होता**) धर्त्ता (**नः**) अस्माकम् (**अध्वरे**) व्यवहारे (**वाजी**) बलवानश्व इव (**सन्**) (**परि**) (**नीयते**) प्राप्यते (**देवः**) द्योतमानः (**देवेषु**) द्योतमानेषु (**यज्ञियः**) यो यज्ञमर्हति सः॥१॥

अन्वयः-हे मनुष्या! यो नोऽध्वरेऽग्निरिव होता देवेषु देवो यज्ञियो वाजी सन् परिणीयते स युष्माभिरपि प्रापणीयः॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निस्सूर्यरूपेण सर्वान् व्यवहारान् प्रापयति तथैव विद्वान्त्सर्वान् कामान् प्रापयति॥१॥

पदार्थः-हे मनुष्यो! जो (**नः**) हम लोगों के (**अध्वरे**) व्यवहार में (**अग्निः**) अग्नि के सदृश उत्तम गुणों से प्रकाशित (**होता**) धारण करनेवाला (**देवेषु**) प्रकाशमानों में (**देवः**) प्रकाशमान (**यज्ञियः**) यज्ञ के योग्य (**वाजी**) बलवान् अश्व के समान (**सन्**) होता हुआ अग्नि (**परि, नीयते**) प्राप्त किया जाता है, वह आप लोगों से भी प्राप्त होने योग्य है॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि सूर्य्यरूप से सब व्यवहारों को प्राप्त कराता है, वैसे ही विद्वान् सम्पूर्ण मनोरथों को प्राप्त कराता है॥१॥

पुनरग्निविद्याविषयमाह॥

फिर अग्निविद्याविषय को अगले मन्त्र में कहते हैं॥

परि॑ त्रिवि॒ष्ट्य॑ध्व॒रं यात्य॒ग्नी र॒थीरि॑व। आ दे॒वेषु॒ प्रयो॒ दध॑त्॥ २॥

परि॑। त्रि॒ऽवि॒ष्टि। अ॒ध्व॒रम्। याति॑। अ॒ग्निः। र॒थीःऽइ॑व। आ। दे॒वेषु॑। प्रय॑ः। दध॑त्॥ २॥

पदार्थः-(**परि**) (**त्रिविष्टि**) विविधे सुखप्रवेशे (**अध्वरम्**) सत्कर्त्तव्यं व्यवहारम् (**याति**) (**अग्निः**) पावकः (**रथीरिव**) प्रशस्तरथादियुक्तः सेनेश इव (**आ**) (**देवेषु**) (**प्रयः**) कमनीयं धनम् (**दधत्**) धरन्त्सन्॥२॥

अन्वयः-हे विद्वांसो! योऽग्नी रथीरिव देवेषु प्रयो दधत् त्रिविष्ट्यध्वरं पर्यायाति स युष्माभिः कार्येषु योजनीयः॥२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथोत्तमसेनः सेनाध्यक्षस्त्रिविधं सुखमाप्नोति तथैवऽग्निविद्याविच्छरीरात्मेन्द्रियाऽऽनन्दं लभते॥२॥

पदार्थः-हे विद्वानो! जो **(अग्निः)** अग्नि **(रथीरिव)** श्रेष्ठ रथ आदि से युक्त सेना के स्वामी के सदृश **(देवेषु)** प्रकाशमान विद्वानों में **(प्रयः)** कामना करने योग्य धन को **(दधत्)** धारण करता हुआ **(त्रिविष्टि)** तीन प्रकार के सुख के प्रवेश में **(अध्वरम्)** सत्कार करने योग्य व्यवहार को **(परि, आ, याति)** सब ओर से प्राप्त होता है, वह आप लोगों से कार्य्यों में युक्त करने योग्य है॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे उत्तम सेना से युक्त सेनाध्यक्ष पुरुष तीन प्रकार के सुख को प्राप्त होता है, वैसे ही अग्निविद्या का जानने वाला शरीर, आत्मा और इन्द्रियों के आनन्द को प्राप्त होता है॥२॥

पुनरग्निविषयमाह॥

फिर अग्निविषय का वर्णन अगले मन्त्र में करते हैं॥

परि॒ वाज॑पतिः क॒विर॒ग्निर्ह॒व्यान्य॑क्रमीत्। दध॒त् रत्ना॑नि दा॒शुषे॑॥३॥

परि॑। वाज॑ऽपतिः। क॒विः। अ॒ग्निः। ह॒व्यानि॑। अ॒क्र॒मी॒त्। दध॑त्। रत्ना॑नि। दा॒शुषे॑॥३॥

पदार्थः-**(परि)** **(वाजपतिः)** अन्नादीनां स्वामी **(कविः)** सकलविद्यावित् **(अग्निः)** विद्युद्वद्वर्त्तमानः **(हव्यानि)** दातुं योग्यानि **(अक्रमीत्)** क्राम्यति **(दधत्)** धरन् **(रत्नानि)** रमणीयानि धनानि **(दाशुषे)** दात्रे॥३॥

अन्वयः-यो वाजपतिः कविरग्निरिव दाशुषे रत्नानि दधत् सन् हव्यानि पर्य्यक्रमीत् स एव सततं सुखी जायते॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा दातारोऽन्यार्थान्युत्तमानि वस्तूनि ददति तथैवाऽग्निः यतः परसुखायाग्नेर्गुणा भवन्तीति॥३॥

पदार्थः-जो **(वाजपतिः)** अन्न आदिकों का स्वामी **(कविः)** सम्पूर्ण विद्याओं का जानने वाला **(अग्निः)** बिजुली के सदृश वर्त्तमान **(दाशुषे)** देनेवाले के लिये **(रत्नानि)** रमण करने योग्य धनों को **(दधत्)** धारण करता हुआ **(हव्यानि)** देने योग्य पदार्थों का **(परि, अक्रमीत्)** परिक्रमण करता अर्थात् समीप होता, वही निरन्तर सुखी होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे देनेवाले अन्यों के लिये उत्तम वस्तुओं को देते हैं, वैसे ही अग्नि; क्योंकि दूसरे को सुख देने के लिये अग्नि के गुण होते हैं॥३॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

अयं यः सृञ्जये पुरो दैववाते समिध्यते। द्युमाँ अमित्रदम्भनः॥४॥

अयम्। यः। सृञ्जये। पुरः। दैवऽवाते। सम्ऽइध्यते। द्युऽमान्। आमित्रऽदम्भनः॥४॥

पदार्थः-(**अयम्**) (**यः**) (**सृञ्जये**) यः प्राप्ताञ्छत्रून् जयति तस्मिन् (**पुरः**) पुरस्तात् (**दैववाते**) देवानां प्राप्ते भवे (**समिध्यते**) प्रदीप्यते (**द्युमान्**) बहुविद्याप्रकाशयुक्तः (**अमित्रदम्भनः**) शत्रूणां हिंसकः॥४॥

अन्वयः-हे राजन्! योऽयं द्युमानमित्रदम्भनः पुरो दैववाते सृञ्जये समिध्यते स एव त्वया सत्कर्त्तव्यः॥४॥

भावार्थः-हे नृप! ये महति सङ्ग्रामे तेजस्विनो निर्भयाः पुरोगामिनः शत्रुविदारका भृत्याः स्युस्तानेव भवान् पुत्रवत् पालयतु॥४॥

पदार्थः-हे राजन्! (**यः**) जो (**अयम्**) यह (**द्युमान्**) बहुत विद्या के प्रकाश से युक्त (**अमित्रदम्भनः**) शत्रुओं का नाशकर्त्ता (**पुरः**) प्रथम (**दैववाते**) विद्वान् जनों के प्राप्तसुख में (**सृञ्जये**) पाये हुए शत्रुओं को जिसमें जीतता है, उस संग्राम में (**समिध्यते**) प्रकाशित होता है, वही आपके सत्कार करने योग्य है॥४॥

भावार्थः-हे राजन्! जो लोग बड़े संग्राम में तेजस्वी, भयरहित, आगे चलने वाले और शत्रुओं के नाशकर्त्ता नौकर हों, उनका ही आप पुत्र के सदृश पालन करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः। तिग्मजम्भस्य मीळ्हुषः॥५॥१५॥

अस्य। घ। वीरः। ईवतः। अग्नेः। ईशीत। मर्त्यः। तिग्मऽजम्भस्य। मीळ्हुषः॥५॥

पदार्थः-(**अस्य**) (**घ**) एव। अत्र **ऋचि तु नु घे**ति दीर्घः। (**वीरः**) (**ईवतः**) प्रशस्तगमनकर्त्तुः (**अग्नेः**) पावकस्येव (**ईशीत**) समर्थो भवेत् (**मर्त्यः**) मनुष्यः (**तिग्मजम्भस्य**) तिग्मं तीव्रं तेजस्वि जम्भो मुखं यस्य तस्य (**मीळ्हुषः**) वीर्य्यवतः॥५॥

अन्वयः-हे राजन्! यो वीरो मर्त्योऽग्नेरिवाऽस्येवतस्तिग्मजम्भस्य मीळ्हुषः सेनापतेः शत्रूणां मध्य ईशीत स घैव विजयं कर्त्तुमर्हेत॥५॥

भावार्थः-सेनापतिना त एव पुरुषाः सेनायां भर्त्तव्या ये शत्रून् विजेतुं शक्नुयुः॥५॥

पदार्थः-हे राजन्! जो (**वीरः**) वीर (**मर्त्यः**) मनुष्य (**अग्नेः**) अग्नि के सदृश (**अस्य**) इस (**ईवतः**) श्रेष्ठ गमन करनेवाले (**तिग्मजम्भस्य**) तीक्ष्ण तेजस्वि मुख जिसका उस (**मीळ्हुषः**) पराक्रमी

सेनापति के शत्रुओं के मध्य में **(ईशीत)** समर्थ हो **(घ)** वही विजय करने योग्य होवे॥५॥

भावार्थः-सेनापति को चाहिये कि उन्हीं पुरुषों को सेना में भर्ती करें कि जो लोग शत्रुओं को जीत सकें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तमर्वन्तं न सानसिमरुषं न दिवः शिशुम्। मर्मृज्यन्ते दिवेदिवे॥६॥

तम्। अर्वन्तम्। न। सानसिम्। अरुषम्। न। दिवः। शिशुम्। मर्मृज्यन्ते। दिवेऽदिवे॥६॥

पदार्थः-**(तम्)** वीरम् **(अर्वन्तम्)** शीघ्रगामिनमश्वम् **(न)** इव **(सानसिम्)** विभक्तव्यम् **(अरुषम्)** रक्तगुणविशिष्टम् **(न)** **(दिवः)** प्रकाशात् **(शिशुम्)** पुत्रम् **(मर्मृज्यन्ते)** शोधयन्ति **(दिवेदिवे)** प्रतिदिनम्॥६॥

अन्वयः-हे अग्ने! दिवः शिशुमर्वन्तं नारुषं न सानसिं दिवेदिवे विद्वांसो मर्मृज्यन्ते तं त्वं पवित्रय॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या अश्ववत्सन्तानाञ्छिक्षन्ते ते नित्यं सुखं वर्द्धयन्ते॥६॥

पदार्थः-हे अग्ने राजन्! जिस **(दिवः)** प्रकाश से **(शिशुम्)** पुत्र को **(अर्वन्तम्)** शीघ्र चलने वाले घोड़े के **(न)** सदृश वा **(अरुषम्)** रक्तगुणों से विशिष्ट के **(न)** सदृश **(सानसिम्)** और विभाग करने योग्य पदार्थ को **(दिवेदिवे)** प्रतिदिन विद्वान् लोग **(मर्मृज्यन्ते)** शुद्ध करते हैं **(तम्)** उसको आप पवित्र करो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य घोड़े के सदृश सन्तानों को शिक्षा देते हैं, वे नित्य सुख को बढ़ाते हैं॥६॥

अथाध्यापकविषयमाह॥

अब अध्यापक विषय को अगले मन्त्र में कहते हैं॥

बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः। अच्छा न हूत उदरम्॥७॥

बोधत्। यत्। मा। हरिऽभ्याम्। कुमारः। साहऽदेव्यः। अच्छ। न। हूतः। उत्। अरम्॥७॥

पदार्थः-**(बोधत्)** बोधय **(यत्)** यः **(मा)** माम् **(हरिभ्याम्)** अश्वाभ्यामिव पठनाभ्यासाभ्याम् **(कुमारः)** ब्रह्मचारी **(साहदेव्यः)** ये देवैः सह वर्त्तन्ते तत्र भवेषु साधुः **(अच्छ)** अत्र **संहितायामिति** दीर्घः। **(न)** **(हूतः)** प्रशंसितः **(उत्)** **(अरम्)** अलम्॥७॥

अन्वयः-हे अध्यापक! यत्साहदेव्यः कुमारोऽहं हूतस्सन्नरं न विजानीयां तं मा हरिभ्यामिवाच्छोद्बोधत्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा कुमाराः कुमार्य्यश्च मातापितृभ्यां शिक्षां प्राप्ता आचार्य्यकुलं गच्छेयुस्तदाऽऽचार्य्यस्य प्रियाचरणेन विनयेन तं प्रार्थ्य विद्या याचनीया य एवं कुर्यात् स उत्तमाभ्यां हरिभ्यां युक्तेन रथेनेव विद्यापारं गच्छेत्॥७॥

पदार्थः-हे अध्यापक! **(यत्)** जो **(साहदेव्यः)** जो विद्वानों के साथ वर्त्तमान उनमें श्रेष्ठ **(कुमारः)** ब्रह्मचारी मैं **(हूतः)** प्रशंसित होता हुआ **(अरम्)** पूर्ण **(न)** न जानूं उस **(मा)** मुझको **(हरिभ्याम्)** घोड़ों के सदृश **(अच्छ)** अच्छे प्रकार **(उत्, बोधत्)** उत्तम बोध दीजिये॥७॥

भावार्थः-जब कुमार और कुमारियाँ माता और पिता से शिक्षा को प्राप्त हुए आचार्य के कुल को जावें, तब आचार्य के प्रिय आचरण और विनय से उसकी प्रार्थना करके विद्या की याचना करें, जो ऐसा करे, वह श्रेष्ठ घोड़ों से युक्त रथ से जैसे वैसे विद्या के पार को जावे॥७॥

अथाध्येतृविषयमाह॥

अब अध्येतृविषय को अगले मन्त्र में कहते हैं॥

उ॒त त्या य॑ज॒ता हरी॑ कु॒मा॒रात् सा॑हदे॒व्यात्। प्रय॑ता स॒द्य आ द॑दे॥८॥

उ॒त। त्या। य॒ज॒ता। हरी॒ इति॑। कु॒मा॒रात्। सा॒ह॒ऽदे॒व्यात्। प्रऽय॑ता। स॒द्यः। आ। द॒दे॒॥८॥

पदार्थः-**(उत)** **(त्या)** तौ **(यजता)** दातारावध्यापकोपदेशकौ **(हरी)** अविद्याया हर्त्तारौ **(कुमारात्)** ब्रह्मचारिणः **(साहदेव्यात्)** **(प्रयता)** प्रयतमानौ **(सद्यः)** **(आ)** **(ददे)** गृह्णीयात्॥८॥

अन्वयः-त्या यजता हरी प्रयताध्यापकोपदेशकौ साहदेव्यात्कुमारात् प्रतिज्ञां गृह्णीयातामुतापि ताभ्यां कुमारो विद्याः सद्य आददे॥८॥

भावार्थः-यदा विद्यार्थिनो विद्यार्थिन्यश्चाऽध्ययनाय गच्छेयुस्तदा तैः प्रतिज्ञा कार्य्या वयं धर्म्येण ब्रह्मचर्य्येण भवदानुकूल्येन वर्त्तित्वा विद्याभ्यासं करिष्यामो मध्ये ब्रह्मचर्य्यव्रतं न लोप्स्याम इति अध्यापकाश्च वयं प्रीत्या निष्कपटतया विद्यां दास्याम इति, च॥८॥

पदार्थः-**(त्या)** वे दोनों **(यजता)** देने और **(हरी)** अविद्या के हरनेवाले **(प्रयता)** प्रयत्न करते हुए अध्यापकोपदेशक **(साहदेव्यात्)** विद्वानों के साथ रहने वालों में उत्तम **(कुमारात्)** ब्रह्मचारी से प्रतिज्ञा को ग्रहण करें **(उत)** और उन दोनों से ब्रह्मचारी विद्या **(सद्यः)** शीघ्र **(आ, ददे)** ग्रहण करे॥८॥

भावार्थः-जब विद्यार्थी [और विद्यार्थिनी] पढ़ने के लिये जावें, तब उनको चाहिये कि प्रतिज्ञा करें कि हम लोग धर्म्मयुक्त ब्रह्मचर्य्य से आपके अनुकूल वर्त्ताव करके विद्या का अभ्यास करेंगे और मध्य में ब्रह्मचर्य्य व्रत का न लोप करेंगे और अध्यापक लोग यह प्रतिज्ञा करें कि हम निष्कपटता से विद्यादान करेंगे॥८॥

अथाऽध्यापकोपदेशकविषयमाह॥

अब अध्यापक और उपदेशक विषय को अगले मन्त्र में कहते हैं॥

एष वां देवावश्विना कुमारः साहदेव्यः। दीर्घायुरस्तु सोमकः॥९॥

एषः। वाम्। देवौ। अश्विना। कुमारः। साहऽदेऽव्यः। दीर्घऽआयुः। अस्तु। सोमकः॥९॥

पदार्थः-(**एषः**) ब्रह्मचारी (**वाम्**) युवयोरध्यापकोपदेशकयोः (**देवौ**) विद्वांसौ (**अश्विना**) सर्वविद्याव्यापिनौ (**कुमारः**) (**साहदेव्यः**) (**दीर्घायुः**) चिरञ्जीवी (**अस्तु**) भवतु (**सोमकः**) सोम इव शीतलस्वभावः॥९॥

अन्वयः-हे देवावश्विना! युवां यथैव वां साहदेव्यः सोमकः कुमारो दीर्घायुरस्तु तथा प्रयतेथाम्॥९॥

भावार्थः-अध्यापकोपदेशकौ तादृशं प्रयत्नं कुर्य्यातां येन धार्मिका दीर्घायुषो विद्वांसोऽध्येतारः स्युः॥९॥

पदार्थः-हे (**देवौ**) विद्वानो (**अश्विना**) सम्पूर्ण विद्याओं में व्याप्त आप दोनों! जैसे (**एषः**) यह ब्रह्मचारी (**वाम्**) आप दोनों अध्यापक और उपदेशक के (**साहदेव्यः**) विद्वानों के साथ रहनेवालों में श्रेष्ठ (**सोमकः**) चन्द्रमा के सदृश शीतलस्वभाववाला (**कुमारः**) ब्रह्मचारी (**दीर्घायुः**) बहुत काल पर्य्यन्त जीवने वाला (**अस्तु**) हो वैसा प्रयत्न करो॥९॥

भावार्थः-अध्यापक और उपदेशक ऐसा प्रयत्न करें कि जिससे धार्मिक अधिक अवस्था वाले और विद्वान् पढ़नेवाले होवें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तं युवं देवावश्विना कुमारं साहदेव्यम्। दीर्घायुषं कृणोतन॥१०॥१६॥

तम्। युवम्। देवौ। अश्विना। कुमारम्। साहऽदेव्यम्। दीर्घऽआयुषम्। कृणोतन॥१०॥

पदार्थः-(**तम्**) अध्येतारम् (**युवम्**) (**देवौ**) विद्यादातारौ (**अश्विना**) शुभगुणव्यापिनौ (**कुमारम्**) ब्रह्मचारिणम् (**साहदेव्यम्**) विद्वत्सहचरम् (**दीर्घायुषम्**) (**कृणोतन**) कुर्यातम्॥१०॥

अन्वयः-हे देवावश्विना युवं तं साहदेव्यं कुमारं दीर्घायुषं कृणोतन॥१०॥

भावार्थः-हे विद्वांसो! विदुष्यो यूयमध्यापनाय प्रवर्त्तित्वा सुशिक्षां कृत्वा विद्यायोगं सम्पाद्य सर्वान्त्सतश्चिरञ्जीविनः कुरुतेति॥१०॥

अत्राग्निराजाध्यापकाऽध्येतृकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चदशं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे (**देवौ**) विद्या के देनेवाले (**अश्विना**) श्रेष्ठ गुणों में व्यापक (**युवम्**) आप दोनों (**तम्**) उस पढ़नेवाले (**साहदेव्यम्**) विद्वानों के उत्तम साथी (**कुमारम्**) ब्रह्मचारी को (**दीर्घायुषम्**) अधिक

अवस्था वाला **(कृणोतन)** करो॥१०॥

भावार्थः–हे विद्वानो और विदुषियो! आप लोग पढ़ाने के लिये प्रवृत्त हो और उत्तम शिक्षा करके और विद्या के योग को सम्पादन करके सब श्रेष्ठ पुरुषों को बहुत कालपर्य्यन्त जीवनेवाले करो॥१०॥

इस सूक्त में अग्नि, राजा, अध्यापक और पढ़नेवाले के कर्म्मों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पन्द्रहवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथैकाधिकविंशत्यृचस्य षोडशस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १, ४, ६, ८, ९, १२, १९ निचृत्त्रिष्टुप्। ३ त्रिष्टुप्। ७, १६, १७ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, २१ निचृत्पङ्क्तिः। ५, १३-१५ स्वराट्पङ्क्तिः। १०, ११, १८, २० भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रपदवाच्यराजविषयमाह॥

अब इक्कीस ऋचावाले सोलहवें सूक्त का प्रारम्भ है उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजविषय को कहते हैं॥

आ स॒त्यो या॑तु म॒घवाँ॑ ऋजी॒षी द्र॒वन्त्वस्य॒ हर॑य॒ उप॑ नः।
तस्मा॒ इदन्धः॑ सुषुमा सु॒दक्ष॑मि॒हाभि॑पि॒त्वं क॑रते गृणा॒नः॥ १॥

आ। स॒त्यः। या॒तु॒। म॒घऽवा॑न्। ऋ॒जी॒षी। द्र॒वन्तु। अ॒स्य॒। हर॑यः। उप॑। न॒ः। तस्मै॑। इत्। अन्धः॑। सु॒सु॒म॒। सु॒ऽदक्ष॑म्। इ॒ह। अ॒भि॒ऽपि॒त्वम्। क॒र॒ते॒। गृ॒णा॒नः॥ १॥

पदार्थः-(**आ**) समन्तात् (**सत्यः**) सत्सु साधुः (**यातु**) आगच्छतु (**मघवान्**) बहुपूजितधनयुक्तः (**ऋजीषी**) ऋजुनीतिः (**द्रवन्तु**) गच्छन्तु (**अस्य**) राज्ञः (**हरयः**) मनुष्याः। **हरय इति मनुष्यनामसु पठितम्।** (निघं०२.३) (**उप**) (**नः**) अस्मान् (**तस्मै**) (**इत्**) (**अन्धः**) अन्नादिकम् (**सुषुम**) निष्पादयेम। अत्र **संहितायामिति** दीर्घः। (**सुदक्षम्**) सुष्ठुबलम्। (**इह**) अस्मिन् राज्ये (**अभिपित्वम्**) प्राप्तम् (**करते**) कुर्य्यात् (**गृणानः**) प्रशंसन्॥ १॥

अन्वयः-हे मनुष्या! य इह गृणानोऽभिपित्वं सुदक्षं करते तस्मा इदेव वयमन्धः सुषुम। यस्यास्य हरयो न द्रवन्तु स ऋजीषी सत्यो मघवान्नोऽस्मानुपायातु॥ १॥

भावार्थः-हे मनुष्या! यो राजाऽस्माकं बलं वर्धयेन्नीत्या प्रजाः पालयेद्यस्य पुरुषा अपि धार्मिकाः प्रजापालनप्रियाः स्युरस्मान् प्रेम्णा संयुञ्ज्मीरँस्तदर्थं वयमैश्वर्य्यमुन्नयेम॥ १॥

पदार्थः-हे मनुष्यो! जो (**इह**) इस राज्य में (**गृणानः**) प्रशंसा करता हुआ (**अभिपित्वम्**) प्राप्त (**सुदक्षम्**) श्रेष्ठ बल को (**करते**) करे (**तस्मै**) उसके लिये (**इत्**) ही हम लोग (**अन्धः**) अन्न आदि को (**सुषुम**) उत्पन्न करें, जिस (**अस्य**) इस राजा के (**हरयः**) मनुष्य नहीं (**द्रवन्तु**) जावें, वह (**ऋजीषी**) सरलनीति वाला (**सत्यः**) श्रेष्ठों में साधु और (**मघवान्**) बहुत श्रेष्ठ धन से युक्त जन (**नः**) हम लोगों के (**उप**) समीप (**आ**) सब प्रकार (**यातु**) प्राप्त होवे॥ १॥

भावार्थः-हे मनुष्यो! जो राजा हम लोगों के बल को बढ़ावे और नीति से प्रजाओं का पालन करे और जिस राजा के पुरुष भी धार्मिक और प्रजा के पालन में प्रिय हों और हम लोगों को प्रेम से संयुक्त करें, उसके लिये हम लोग ऐश्वर्य्य की वृद्धि करें॥ १॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

अव॑ स्य शू॒राध्व॑नो॒ नान्ते॒ऽस्मिन्नो॑ अ॒द्य सव॑ने म॒न्दध्यै॑।
शंसा॑त्युक्थमु॒शने॑व वे॒धाश्चि॑कि॒तुषे॑ अ॒सुर्या॑य॒ मन्म॑॥ २॥

अव॑। स्य॒। शू॒र॒। अध्व॑नः। न। अन्ते॑। अ॒स्मिन्। नः॒। अ॒द्य। सव॑ने। म॒न्दध्यै॑। शंसा॑ति। उ॒क्थम्। उ॒शना॑ऽइव। वे॒धाः। चि॒कि॒तुषे॑। अ॒सुर्या॑य। मन्म॑॥ २॥

पदार्थः-(**अव**) विरोधे (**स्य**) अन्तं प्रापय (**शूर**) शत्रूणां हिंसक (**अध्वनः**) मार्गस्य (**न**) निषेधे (**अन्ते**) समीपे (**अस्मिन्**) (**नः**) अस्माकम् (**अद्य**) (**सवने**) क्रियाविशेषयज्ञे (**मन्दध्यै**) मन्दितुमानन्दितुम् (**शंसाति**) शंसेत (**उक्थम्**) वक्तुं योग्यं शास्त्रम् (**उशनेव**) यथाकामाः (**वेधाः**) मेधावी (**चिकितुषे**) विज्ञापनाय (**असुर्याय**) असुरेष्वविद्वत्सु भवायाविदुषे (**मन्म**) विज्ञानम्॥ २॥

अन्वयः-हे शूर! योऽस्मिन् सवनेऽद्य मन्दध्यै नोऽस्मानुशनेव वेधा उक्थं मन्म शंसात्यसुर्य्याय चिकितुषे नः सवनेऽन्ते शंसाति तमध्वनो गन्तारं त्वं नाव स्य॥ २॥

भावार्थः-हे राजन्! ये धीमन्तः सर्वेभ्यो विद्याः कामयमाना उपदेशका भवेयुस्तान् सततं रक्ष॥ २॥

पदार्थः-हे (**शूर**) शत्रुओं के नाशक! जो (**अस्मिन्**) इस (**सवने**) क्रियाविशेषरूप यज्ञ में (**अद्य**) आज (**मन्दध्यै**) आनन्द करने को (**नः**) हम लोगों के (**उशनेव**) सदृश कामना करता हुआ (**वेधाः**) बुद्धिमान् जन (**उक्थम्**) कहने योग्य शास्त्र और (**मन्म**) विज्ञान को (**शंसाति**) प्रशंसित करे (**असुर्याय**) अविद्वानों में उत्पन्न अविद्वान् पुरुष के लिये (**चिकितुषे**) जनाने को हम लोगों के क्रियाविशेष यज्ञ में (**अन्ते**) समीप में प्रशंसित करे, उस (**अध्वनः**) मार्ग के जानेवाले को आप (**न**) न (**अव**) विरोध में (**स्य**) अन्त को प्राप्त कराओ॥ २॥

भावार्थः-हे राजन्! जो बुद्धिमान् सब से विद्याओं की कामना करते हुए उपदेशक हों, उनकी निरन्तर रक्षा करो॥ २॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

क॒विर्न नि॒ण्यं वि॒दथा॑नि॒ साध॒न् वृषा॒ यत्सेकं॑ विपिपा॒नो अर्चा॑त्।
दि॒व इ॒त्था जी॑जनत्सप्त॒ का॒रून॒ह्ना॑ चिच्चक्रु॒र्वयु॑ना॒ गृण॑न्तः॥ ३॥

क॒विः। न। नि॒ण्यम्। वि॒दथा॑नि। साध॑न्। वृषा॑। यत्। सेक॑म्। वि॒ऽपिपा॒नः। अर्चा॑त्। दि॒वः। इ॒त्था। जी॒ज॒न॒त्। स॒प्त। का॒रून्। अह्ना॑। चि॒त्। च॒क्रुः। वयु॑ना। गृण॑न्तः॥ ३॥

पदार्थः-(**कविः**) विद्वान् (**न**) इव (**निण्यम्**) निश्चितम् (**विदथानि**) विज्ञातव्यानि (**साधन्**) साध्नुवन् (**वृषा**) बलिष्ठः (**यत्**) यः (**सेकम्**) सिञ्चनम् (**विपिपानः**) विशेषेण रक्षन् (**अर्चात्**) सत्कुर्य्यात् (**दिवः**) प्रकाशान् (**इत्था**) अनेन प्रकारेण (**जीजनत्**) जनयति (**सप्त**) (**कारून्**) शिल्पिनः (**अह्ना**) दिवसेन (**चित्**) (**चक्रुः**) कुर्वन्ति (**वयुना**) प्रज्ञानानि (**गृणन्तः**) स्तुवन्त उपदिशन्तः॥३॥

अन्वयः-गृणन्तो विद्वांसोऽह्ना वयुना चक्रुः सप्त कारूञ्चिच्चक्रुरित्था यद्यो वृषा सेकं विपिपानो विदथानि साधन् दिवोऽर्चात् स निण्यं दिवः कविर्न जीजनत्॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये जना विद्यापुरुषार्थौ वर्धयन्ति ते सप्तविधाञ्छिल्पविदुषः कृत्वा सर्वाणि कार्य्याणि साधयित्वा कामसिद्धिं कर्त्तुं शक्नुयुः॥३॥

पदार्थः-(**गृणन्तः**) स्तुति और उपदेश करते हुए विद्वान् जन (**अह्ना**) दिन से (**वयुना**) प्रज्ञानों को (**चक्रुः**) करते हैं और (**सप्त**) सात (**कारून्**) कारीगर जनों को (**चित्**) भी करते हैं (**इत्था**) इस प्रकार से (**यत्**) जो (**वृषा**) बलिष्ठ (**सेकम्**) सिंचन की (**विपिपानः**) विशेष करके रक्षा और (**विदथानि**) जानने के योग्यों को (**साधन्**) सिद्ध करता हुआ (**दिवः**) प्रकाशों का (**अर्चात्**) सत्कार करे, वह (**निण्यम्**) निश्चित प्रकाशों को (**कविः**) विद्वान् के (**न**) सदृश (**जीजनत्**) उत्पन्न करता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो जन विद्या और पुरुषार्थ को बढ़ाते हैं, वे सात प्रकार के कारीगरों को करके सब कार्य्यों को सिद्ध करा कामसिद्धि कर सकें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्व१र्यद्वेदि॑ सु॒दृशी॑कम॒र्कैर्महि॒ ज्योती॑ रुरुचु॒र्यद्ध॒ वस्तोः॑।
अ॒न्धा तमां॑सि दु॒धि॑ता वि॒चक्षे॒ नृभ्य॑श्चकार॒ नृत॑मो अ॒भिष्टौ॥४॥

स्वः॑। यत्। वेदि॑। सु॒ऽदृशी॑कम्। अ॒र्कैः॑। महि॑। ज्योतिः॑। रु॒रु॒चुः॑। यत्। ह॒। वस्तोः॑। अ॒न्धा। तमां॑सि। दु॒धि॑ता। वि॒ऽचक्षे॑। नृऽभ्यः॑। च॒कार॑। नृऽत॑मः। अ॒भिष्टौ॑॥४॥

पदार्थः-(**स्वः**) सुखम् (**यत्**) (**वेदि**) विज्ञायते (**सुदृशीकम्**) सुष्ठु द्रष्टुं योग्यम् (**अर्कैः**) मन्त्रैर्विचारैः (**महि**) महत् (**ज्योतिः**) प्रकाशमयम् (**रुरुचुः**) रोचन्ते (**यत्**) (**ह**) (**वस्तोः**) दिनम् (**अन्धा**) अन्धकाररूपाणि (**तमांसि**) रात्रीः (**दुधिता**) दुधितानि दुर्हितानि (**विचक्षे**) प्रकाशयति (**नृभ्यः**) नायकेभ्यो मनुष्येभ्यः (**चकार**) करोति (**नृतमः**) अतिशयेन नायकः (**अभिष्टौ**) अभितः सङ्गते कर्मणि॥४॥

अन्वयः-हे मनुष्या! यत्सुदृशीकं महि ज्योतिस्स्वर्वेदि यद्ध वस्तोः किरणा रुरुचुयस्सूर्य्योऽन्धा तमांसि दुधिता विचक्षे तेन यो नृतमोऽभिष्टावर्कैर्नृभ्यः स्वश्चकार स एव सर्वैः सत्कर्त्तव्यो भवति॥४॥

भावार्थः-नित्यं नीतिवीरताभ्यां सम्वर्द्धितराज्यकर्म्मणि राजप्रजाजनेषु सर्वतः सुखं प्रतिदिनं सूर्य्यप्रकाश इव वर्द्धते॥४॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(सुदृशीकम्)** उत्तम प्रकार देखने योग्य **(महि)** बड़ा **(ज्योतिः)** प्रकाशमय **(स्वः)** सुख **(वेदि)** जाना जाता है **(यत्)** जो **(ह)** निश्चय **(वस्तोः)** दिन को किरणें **(रुरुचुः)** प्रकाशित करते हैं और जिनसे सूर्य्य **(अन्धा)** अन्धकाररूप **(तमांसि)** रात्रियों को **(दुधिता)** दूर की हुई **(विचक्षे)** प्रकाशित करता है, तिससे जो **(नृतमः)** अत्यन्त नायक **(अभिष्टौ)** चारों ओर से सङ्गत कर्म्म में **(अर्कैः)** विचारों से **(नृम्यः)** नायक मनुष्यों के लिये सुख को **(चकार)** करता है, वही सब लोगों के सत्कार करने योग्य होता है॥४॥

भावार्थः-नित्य नीति और वीरता से अच्छे प्रकार बढ़े हुए राज्यकर्म्म में राजा और प्रजाओं में सब ओर से सुख प्रतिदिन सूर्यप्रकाश के समान बढ़ता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

व॒व॒क्ष इन्द्रो॒ अमि॑तमृजी॒ष्यु१॑भे आ प॑प्रौ॒ रोद॑सी महि॒त्वा।
अत॑श्चिदस्य महि॒मा वि रे॑च्य॒भि यो विश्वा॒ भुव॑ना ब॒भूव॑॥५॥ १७॥

व॒व॒क्षे। इन्द्रः॑। अमि॑तम्। ऋ॒जी॒षी। उभे॒ इति॑। आ। प॒प्रौ॒। रोद॑सी॒ इति॑। म॒हि॒ऽत्वा। अत॑ः। चि॒त्। अ॒स्य॒। म॒हि॒मा। वि। रे॒चि॒। अ॒भि। यः। विश्वा॑। भुव॑ना। ब॒भूव॑॥५॥

पदार्थः-(**ववक्षे**) वहति **(इन्द्रः)** सूर्य्य इव राजा **(अमितम्)** अपरिमितम् **(ऋजीषी)** ऋजुः **(उभे)** द्वे **(आ)** **(पप्रौ)** व्याप्नोति **(रोदसी)** द्यावापृथिव्यौ **(महित्वा)** महत्त्वेन **(अतः)** **(चित्)** अपि **(अस्य)** **(महिमा)** **(वि)** **(रेचि)** विरिच्यते **(अभि)** **(यः)** **(विश्वा)** सर्वाणि **(भुवना)** भुवनानि **(बभूव)**॥५॥

अन्वयः-हे मनुष्या! यो जगदीश्वर इन्द्र इवाभि बभूव यतश्चिदस्य महिमा वि रेचि यो विश्वा भुवना दधात्यत उभे रोदसी महित्वा आ पप्रावृजीषी सन्नमितं ववक्षे स एव सर्वेभ्यो महान् वेद्यः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सर्वेभ्यो जगदीश्वरस्य महिमानमधिकं जानन्ति तेऽत्र महीयन्ते॥५॥

पदार्थः-हे मनुष्यो! **(यः)** जो जगदीश्वर **(इन्द्रः)** सूर्य्य के सदृश राजा **(अभि, बभूव)** हुआ जिससे **(चित्)** भी **(अस्य)** इसका **(महिमा)** बड़प्पन **(वि, रेचि)** विशेष करके शोभित होता है और जो **(विश्वा)** सम्पूर्ण **(भुवना)** भुवनों को धारण करता है **(अतः)** इससे **(उभे)** दोनों **(रोदसी)** अन्तरिक्ष और पृथिवी को **(महित्वा)** महत्त्व से **(आ, पप्रौ)** व्याप्त करता है और **(ऋजीषी)** सरल हुआ **(अमितम्)** परिमाणरहित पदार्थ **(ववक्षे)** प्राप्त करता है, वही सब से बड़ा समझना चाहिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सब से जगदीश्वर का बड़प्पन अधिक जानते हैं, वे इस जगत् में प्रतिष्ठा को प्राप्त होते हैं॥५॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

विश्वा॑नि शक्रो नर्या॑णि विद्वान॒पो रि॑रेच॒ सखि॑भि॒र्निका॑मैः।

अश्मा॑नं चि॒द्ये बि॑भि॒दुर्वचो॑भि॒र्व्रजं गोम॑न्तमु॒शिजो॒ वि ववु्रः॥६॥

विश्वा॑नि। शक्रः। नर्या॑णि। विद्वान्। अ॒पः। रि॒रे॒च॒। सखि॑ऽभिः। निऽका॑मैः। अश्मा॑नम्। चि॒त्। ये। बि॒भि॒दुः। वचः॑ऽभिः। व्रज॑म्। गोऽम॑न्तम्। उ॒शिज॑ः। वि। व॒वु्रिरिति॑ ववु्रः॥६॥

पदार्थः-(**विश्वानि**) सर्वाणि (**शक्रः**) शक्तिमान् (**नर्याणि**) नृषु साधूनि (**विद्वान्**) (**अपः**) कर्म्माणि (**रिरेच**) रिणक्ति (**सखिभिः**) मित्रैः (**निकामैः**) नित्यः कामो येषान्तैः (**अश्मानम्**) मेघम् (**चित्**) इव (**ये**) (**बिभिदुः**) भिन्दन्ति (**वचोभिः**) वचनैः (**व्रजम्**) (**गोमन्तम्**) बह्व्यो गावो विद्यन्ते यस्मिंस्तम् (**उशिजः**) कामयमानाः (**वि**) (**ववु्रः**)॥६॥

अन्वयः-हे मनुष्या! ये वायवोऽश्मानं चिदिव बिभिदुर्गोमन्तं व्रजमुशिज इव न्यायं वि ववु्रस्तैर्निकामैः सखिभिः सह यः शक्रो विद्वान् विश्वानि नर्याण्यपो वचोभी रिरेच स एव पृथिवीं भोक्तुमर्हति॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। सूर्य्यो मेघमिव दुष्टनिवारका गोपाला व्रजाद् गा इवाऽन्यायाद् विमोचयितारः सखायो यस्य भवेयुः स नरो भूपतिर्भवितुमर्हति॥६॥

पदार्थः-हे मनुष्यो! (**ये**) जो पवन (**अश्मानम्**) जैसे मेघ को (**चित्**) वैसे (**बिभिदुः**) विदीर्ण करते हैं (**गोमन्तम्**) बहुत गौओं से युक्त (**व्रजम्**) गौओं के स्थान की (**उशिजः**) कामना करते हुओं के समान न्याय को (**वि, ववु्रः**) अस्वीकार करते हैं, उन (**निकामैः**) नित्य कामना वाले (**सखिभिः**) मित्रों के साथ जो (**शक्रः**) सामर्थ्य वाला (**विद्वान्**) विद्वान् (**विश्वानि**) सम्पूर्ण (**नर्याणि**) मनुष्यों में उत्तम (**अपः**) कर्मों को (**वचोभिः**) वचनों से (**रिरेच**) पृथक् करता है, वही पृथिवी के भोगने के योग्य है॥६॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। सूर्य्य जैसे मेघ का वैसे दुष्टों के निवारण करनेवाले वा गोपाल लोग जैसे व्रज अर्थात् गौओं के बाड़े से गौओं को वैसे अन्याय से पृथक् करने वाले जिस पुरुष के मित्र होवें, वह मनुष्य राजा होने के योग्य है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अपो वृत्रं वव्रिवांसं परा हन् प्रावत्ते वज्रं पृथिवी सचेताः।

प्राणांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो॥७॥

अपः। वृत्रम्। वव्रिऽवांसम्। परा। अहन्। प्र। आवत्। ते। वज्रम्। पृथिवी। सऽचेताः। प्र। अर्णांसि। समुद्रियाणि। ऐनोः। पतिः। भवन्। शवसा। शूर। धृष्णो इति॥७॥

पदार्थः-(**अपः**) जलानि (**वृत्रम्**) मेघम् (**वव्रिवांसम्**) विवृतम् (**परा**) (**अहन्**) हन्ति (**प्र, आवत्**) रक्षति (**ते**) तव (**वज्रम्**) किरणरूपम् (**पृथिवी**) (**सचेताः**) चेतसा सहितः (**प्र**) (**अर्णांसि**) उदकानि (**समुद्रियाणि**) समुद्रार्हाणि (**ऐनोः**) प्रेरयेः (**पतिः**) स्वामी (**भवन्**) (**शवसा**) बलेन (**शूर**) (**धृष्णो**) दृढात्मन्॥७॥

अन्वयः-हे धृष्णो शूर! सचेताः शवसा पतिर्भवन्संस्त्वं यथा सूर्य्यो वज्रं प्रहृत्यापो वृत्रं वव्रिवांसं पराहन् समुद्रियाण्यर्णांसि पृथिवीव प्रावत् तथा ते यः प्रजां रक्षित्वा शत्रून् हन्यात्तं त्वं प्रैनोः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवत्प्रजाः सुखयन्ति त एव राजकर्मसु प्रेरणीयाः सन्ति॥७॥

पदार्थः-हे (**धृष्णो**) दृढ़ आत्मा वाले (**शूर**) वीरपुरुष! (**सचेताः**) चित्त के सहित वर्त्तमान (**शवसा**) बल से (**पतिः**) स्वामी (**भवन्**) होते हुए आप जैसे सूर्य्य (**वज्रम्**) किरणरूपी वज्र को फटकार (**अपः**) जलों को प्रकट करते (**वृत्रम्**) मेघ को (**वव्रिवांसम्**) फैल प्रकट (**परा, अहन्**) मारता और (**समुद्रियाणि**) समुद्र के योग्य (**अर्णांसि**) जलों की (**पृथिवी**) पृथिवी के सदृश (**प्र, आवत्**) रक्षा करता है, वैसे (**ते**) आपकी जो प्रजा की रक्षा करके शत्रुओं का नाश करे उसको आप (**प्र, ऐनोः**) प्रेरणा करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सूर्य के सदृश प्रजाओं को सुख देते हैं, वे ही राजकर्म्मों में प्रेरणा करने योग्य होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते।

स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नङ्गिरोभिर्गृणानः॥८॥

अपः। यत्। अद्रिम्। पुरुऽहूत। दर्दः। आविः। भुवत्। सरमा। पूर्व्यम्। ते। सः। नः। नेता। वाजम्। आ। दर्षि। भूरिम्। गोत्रा। रुजन्। अङ्गिरःऽभिः। गृणानः॥८॥

पदार्थः-(**अपः**) जलानि (**यत्**) यः (**अद्रिम्**) मेघम् (**पुरुहूत**) बहुभिः प्रशंसित (**दर्दः**) विदारय (**आविः**) प्राकट्ये (**भुवत्**) भवेत् (**सरमा**) या सरति सा सरला नीतिः (**पूर्व्यम्**) पूर्वम् (**ते**) तव (**सः**)

(नः) अस्माकम् **(नेता)** **(वाजम्)** वेगम् **(आ)** **(दर्षि)** विदीर्णं करोषि **(भूरिम्)** विपुलम् **(गोत्रा)** गोत्राणि मेघस्याऽवयवान् **(रुजन्)** भग्नानि कुर्वन् **(अङ्गिरोभिः)** वायुभिः **(गृणानः)** स्तूयमानः॥८॥

अन्वयः-हे पुरुहूत! या ते सरमाऽऽविर्भुवत्तया त्वं शत्रून् दर्दो यद्यो नो नेताऽऽविर्भुवत्तेन सह पूर्व्यं वाजमादर्षि यस्त्वमङ्गिगिरोभिस्सूर्योऽप इव गृणानो गोत्रा भूरिमद्रिं रुजन् वर्त्तसे, स ते सेनापतिर्भवेत्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये शुद्धनीतयो मनुष्याः प्रसिद्धाः स्युस्तान् रक्षित्वा न्यायेन प्रजाः पालय॥८॥

पदार्थः-हे **(पुरुहूत)** बहुतों से प्रशंसित! जो **(ते)** आपकी **(सरमा)** सरलनीति **(आविः)** प्रकट **(भुवत्)** होवे उससे आप शत्रुओं का **(दर्दः)** नाश करो **(यत्)** जो **(नः)** हम लोगों का **(नेता)** नायक प्रकट होवे उसके साथ **(पूर्व्यम्)** पूर्व **(वाजम्)** वेग का **(आ, दर्षि)** नाश करते हो और जो आप **(अङ्गिरोभिः)** पवनों से सूर्य जैसे **(अपः)** जलों को वैसे **(गृणानः)** स्तुति करते हुए **(गोत्रा)** मेघों के अवयवों को और **(भूरिम्)** बहुत **(अद्रिम्)** मेघ को **(रुजन्)** छिन्न-भिन्न करते हुए वर्त्तमान हो **(सः)** वह आपका सेनापति होवे॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो शुद्धनीति वाले मनुष्य प्रसिद्ध होवें, उनकी रक्षा करके न्याय से प्रजाओं का पालन करो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अच्छा॑ क॒विं नृ॑मणो गा अ॒भिष्टौ॒ स्व॑र्षाता मघव॒न्नाध॑मानम्।

ऊ॒तिभि॒स्तमि॑षणो द्यु॒म्नहू॑तौ॒ नि मा॒यावा॑नब्र॒ह्मा दस्यु॑रर्त॥९॥

अच्छ॑। क॒विम्। नृ॒ऽम॒न॒ः। गाः। अ॒भिष्टौ॑। स्वः॑ऽसाता। म॒घ॒ऽव॒न्। नाध॑मानम्। ऊ॒तिऽभिः॑। तम्। इ॒ष॒णः॒। द्यु॒म्नऽहू॑तौ। नि। मा॒याऽवा॑न्। अब्र॑ह्मा। दस्युः॑। अ॒र्त॒॥९॥

पदार्थः-(**अच्छ**) अत्र **निपातस्य चे**ति दीर्घः। **(कविम्)** विद्वांसम् **(नृमणः)** नृषु मनो यस्य तत्सम्बुद्धौ **(गाः)** वाचः **(अभिष्टौ)** अभीष्टसिद्धौ **(स्वर्षाता)** सुखस्यान्तं प्राप्तः **(मघवन्)** बहुधनयुक्त **(नाधमानम्)** ऐश्वर्य्यं कुर्वाणम् **(ऊतिभिः)** रक्षणादिभिः **(तम्)** **(इषणः)** प्रेरयेः **(द्युम्नहूतौ)** धनयशसोर्हूतिः प्राप्तिर्यस्यां तस्याम् **(नि)** **(मायावान्)** कुत्सितप्रज्ञायुक्तः **(अब्रह्मा)** अवेदवित् **(दस्युः)** दुष्टस्वभावः **(अर्त्त)** नश्यतु॥९॥

अन्वयः-हे नृमणो मघवन्! स्वर्षाता त्वमूतिभिरभिष्टौ द्युम्नहूतौ गा नाधमानं कविं चाच्छेषणो यो मायावानब्रह्मा दस्युरर्त्त तं त्वं नीषणो निस्सारय॥९॥

भावार्थः–हे राजँस्त्वं कपटिनो मूर्खान् दस्यून् हत्वा धार्मिकान् विदुषः सत्कृत्य प्रशंसितः सन्नस्माकं राजा भव॥९॥

पदार्थः–हे **(नृमणः)** मनुष्यों में मन रखनेवाले **(मघवन्)** बहुत धन से युक्त! **(स्वर्षाता)** सुख के अन्त को प्राप्त आप **(ऊतिभिः)** रक्षण आदि से **(अभिष्टौ)** अभीष्ट की सिद्धि होने पर **(द्युम्नहूतौ)** धन और यश की प्राप्ति जिसमें उसमें **(गाः)** वाणियों को **(नाधमानम्)** ईश्वरीय भाव को पहुंचाते हुए **(कविम्)** विद्वान् को **(अच्छ)** उत्तम प्रकार प्रेरणा करें और जो **(मायावान्)** निकृष्ट बुद्धियुक्त **(अब्रह्मा)** वेद को नहीं जानने वाला **(दस्युः)** दुष्ट स्वभावयुक्त पुरुष **[का]** **(अर्त्त)** नाश हो **(तम्)** उसको आप **(नि, इषणः)** निकालें॥९॥

भावार्थः–हे राजन्! आप कपटी, मूर्ख और दुष्ट स्वभाव वाले मनुष्यों का नाश करके और धार्मिक विद्वानों का सत्कार करके प्रशंसित हुए हम लोगों के राजा हूजिये॥९॥

अथ राजविषयसम्बन्धिप्रजाविषयमाह॥

अब राजविषयसम्बन्धिप्रजाविषय को अगले मन्त्र में कहते हैं॥

आ दस्युघ्ना मनसा याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः।
स्वे योनौ नि षदतं सरूपा वि वां चिकित्सद् ऋतचिद्ध नारी॥१०॥१८॥

आ। दस्युऽघ्ना। मनसा। याहि। अस्तम्। भुवत्। ते। कुत्सः। सख्ये। निऽकामः। स्वे। योनौ। नि। सदतम्। सऽरूपा। वि। वाम्। चिकित्सत्। ऋतऽचित्। ह। नारी॥१०॥

पदार्थः–**(आ)** समन्तात् **(दस्युघ्ना)** या दस्यून् हन्ति सा **(मनसा)** अन्तःकरणेन **(याहि)** प्राप्नुहि **(अस्तम्)** प्रक्षिप्ताम् **(भुवत्)** भवेत् **(ते)** तव **(कुत्सः)** निन्दितः **(सख्ये)** मित्राय **(निकामः)** निकृष्टः कामो यस्य सः **(स्वे)** स्वकीये **(योनौ)** गृहे **(नि)** **(सदतम्)** तिष्ठतम् **(सरूपा)** समानं रूपं यस्याः सा **(वि)** **(वाम्)** युवयोः **(चिकित्सत्)** चिकित्सते **(ऋतचित्)** या ऋतं सत्यं चिनोति सा **(ह)** किल **(नारी)** नरस्य स्त्री॥१०॥

अन्वयः-हे नर! या मनसा दस्युघ्ना सरूपा ऋतचिन्नारी भुवत्तां त्वमायाहि यस्ते सख्ये कुत्सो निकामो भुवत्तमस्तं कुरु यश्च ते स्वे योनौ वि चिकित्सत्तौ ह वां गृहे निषदतम्॥१०॥

भावार्थः–हे पुरुष! त्वं निन्दितां स्त्रियं त्यक्त्वा समानरूपां दोषघ्नीं प्राप्नुहि द्वौ मिलित्वा प्रीत्या स्वे गृहे निषीदतम्॥१०॥

पदार्थः–हे मनुष्य जो! **(मनसा)** अन्तःकरण से **(दस्युघ्ना)** दुष्टस्वभाव वालों को मारती **(सरूपा)** गुणादिकों से तुल्य रूपवती **(ऋतचित्)** सत्य को इकट्ठा करने वाली **(नारी)** मनुष्य की स्त्री **(भुवत्)** हो उसको आप **(आ)** सब प्रकार **(याहि)** प्राप्त हूजिये और जो **(ते)** आपके **(सख्ये)** मित्र के लिये **(कुत्सः)** निन्दित **(निकामः)** निकृष्ट कामनायुक्त होवे उसको आप **(अस्तम्)** प्रक्षिप्त अर्थात् दूर

करो और आपके **(स्वे)** अपने **(योनौ)** गृह में **(वि, चिकित्सत्)** विशेष चिकित्सा करता है, वह दोनों **(ह)** निश्चय से **(वाम्)** आप दोनों के गृह में **(नि, सदतम्)** रहें॥१०॥

भावार्थः-हे पुरुष! आप निन्दित स्त्री का त्याग करके समान रूपवाली और दोषों के नाश करनेवाली को प्राप्त होओ और दोनों मिल कर प्रीति से अपने गृह में रहो॥१०॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

यासि॒ कुत्से॑न स॒रथ॑मव॒स्युस्तो॒दो वात॑स्य॒ हर्यो॒रीशा॑नः।

ऋ॒ज्रा वाज॑ं न गध्यं॑ युयू॒षन् क॒विर्यदह॒न् पार्या॑य॒ भूषा॑त्॥ ११॥

यासि॑। कुत्से॑न। स॒ऽरथ॑म्। अ॒व॒स्युः। तो॒दः। वात॑स्य। हर्यो॑ः। ईशा॑नः। ऋ॒ज्रा। वाज॑म्। न। गध्य॑म्। युयू॑षन्। क॒विः। यत्। अह॑न्। पार्या॑य। भूषा॑त्॥ ११॥

पदार्थः-(**यासि**) गच्छसि (**कुत्सेन**) कुत्सितकर्मणा (**सरथम्**) रथादिभिः सहितं सैन्यम् (**अवस्युः**) आत्मनोऽवो रक्षणमिच्छुः (**तोदः**) शत्रूणां हन्ता (**वातस्य**) वायोः (**हर्य्योः**) अश्वयोः (**ईशानः**) स्वामी (**ऋज्रा**) ऋज्राणि (**वाजम्**) वेगम् (**न**) इव (**गध्यम्**) ग्रहीतव्यम्। अत्र वर्णव्यत्ययेन रेफलोपो हस्य धः। (**युयूषन्**) मिश्रयितुमिच्छन् (**कविः**) क्रान्तप्रज्ञः (**यत्**) यः (**अहन्**) हन्ति (**पार्य्याय**) पारभवाय (**भूषात्**) अलङ्कुर्यात्॥११॥

अन्वयः-हे राजन्! यतस्त्वमवस्युस्तोदो वातस्य हर्योरीशानः सन् सरथं यासि ऋज्रा गध्यं वाजं न युयूषन् कविः सन् कुत्सेन सहितमहन् यद्यः पार्याय भूषात् तं प्राप्नोषि तस्माद्राज्यं कर्त्तुं शक्नोसि॥११॥

भावार्थः-ये कुत्सितानि कर्माणि निन्दितजनसङ्गं च विहाय सत्येन न्यायेन प्रजाः पालयन्तः पुरुषार्थयेयुस्ते सर्वतोऽलङ्कृताः स्युः॥११॥

पदार्थः-हे राजन्! जिससे आप **(अवस्युः)** अपनी रक्षा की इच्छा करते हुए **(तोदः)** शत्रुओं के नाशकर्त्ता **(वातस्य)** पवन और **(हर्य्योः)** घोड़ों के **(ईशानः)** स्वामी होते हुए **(सरथम्)** रथ आदिकों के सहित सेना को **(यासि)** प्राप्त होते हो **(ऋज्रा)** और सरल गमनों को **(गध्यम्)** ग्रहण करने योग्य **(वाजम्)** वेग के **(न)** सदृश **(युयूषन्)** मिलाने की इच्छा करते हुए **(कविः)** श्रेष्ठ बुद्धियुक्त **(कुत्सेन)** निकृष्ट कर्म के सहित वर्त्तमान का **(अहन्)** नाश करता है **(यत्)** जो **(पार्याय)** पार होने के लिये **(भूषात्)** शोभित करे उसको प्राप्त होते हो, इससे राज्य करने को समर्थ हो सकते हो॥११॥

भावार्थः-जो लोग निन्दित कर्म्म और निन्दित जन के सङ्ग का त्याग करके सत्यन्याय से प्रजाओं का पालन करते हुए पुरुषार्थ करें, वे सब प्रकार से शोभित होवें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा।

सद्यो दस्यून् प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके॥ १२॥

कुत्साय। शुष्णम्। अशुषम्। नि। बर्हीः। प्रऽपित्वे। अह्नः। कुयवम्। सहस्रा। सद्यः। दस्यून्। प्र। मृण। कुत्स्येन। प्र। सूरः। चक्रम्। वृहतात्। अभीके॥ १२॥

पदार्थः-(**कुत्साय**) निन्दिताय (**शुष्णम्**) शुष्कं नीरसम् (**अशुषम्**) असुरं दुःखम् (**नि**) (**बर्हीः**) उत्पाटय (**प्रपित्वे**) प्रकृष्टप्राप्ते (**अह्नः**) दिवसस्य (**कुयवम्**) कुत्सिता यवा यस्य तम् (**सहस्रा**) सहस्राणि (**सद्यः**) (**दस्यून्**) दुष्टान् चोरान् (**प्र**) (**मृण**) हिन्धि (**कुत्स्येन**) कुत्से वज्रे भवेन वेगेन (**प्र**) (**सूरः**) सूर्य्यः (**चक्रम्**) चक्रमिव वर्त्तमानं ब्रह्माण्डम् (**वृहतात्**) छिन्द्यात् (**अभीके**) समीपे॥ १२॥

अन्वयः-हे राजंस्त्वमह्नः प्रपित्वे कुत्साय कुयवं शुष्णमशुषं निबर्हीः सूरश्चक्रमिव कुत्सेन सहस्रा दस्यून् सद्यः प्रमृणाऽभीके प्रवृहतात्॥ १२॥

भावार्थः-हे राजन्! भवान् वज्रादिशस्त्रैर्दस्यून् हत्वा सूर्य्यप्रतापी भवतु॥ १२॥

पदार्थः-हे राजन्! आप (**अह्नः**) दिन के (**प्रपित्वे**) उत्तम प्रकार प्राप्त होने पर (**कुत्साय**) निन्दित व्यवहार के लिये (**कुयवम्**) निकृष्ट यव जिसके उस (**शुष्णम्**) रसरहित (**अशुषम्**) दुःख को (**नि, बर्हीः**) दूर करो और जैसे (**सूरः**) सूर्य्य (**चक्रम्**) चक्र के सदृश वर्त्तमान ब्रह्माण्ड को (**कुत्सेन**) वैसे वज्र में हुए वेग से (**सहस्रा**) सहस्रों (**दस्यून्**) दुष्ट चोरों को (**सद्यः**) शीघ्र (**प्र**) (**मृण**) नाश कीजिये (**अभीके**) समीप में (**प्र, वृहतात्**) छेदन कीजिये॥ १२॥

भावार्थः-हे राजन्! आप वज्र आदि शस्त्रों से दुष्ट चोरों का नाश करके सूर्य्य के सदृश प्रतापी हूजिये॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं पिप्रुं मृगयं शूशुवांसमृजिश्वने वैदथिनाय रन्धीः।

पञ्चाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः॥ १३॥

त्वम्। पिप्रुम्। मृगयम्। शूशुऽवांसम्। ऋजिश्वने। वैदथिनाय। रन्धीः। पञ्चाशत्। कृष्णा। नि। वपः। सहस्रा। अत्कम्। न। पुरः। जरिमा। वि। दर्दरिति दर्दः॥ १३॥

पदार्थः-(**त्वम्**) (**पिप्रुम्**) व्यापकम् (**मृगयम्**) मृगमाचक्षाणम् (**शूशुवांसम्**) बलेन वृद्धम् (**ऋजिश्वने**) ऋजुगुणैर्वृद्धाय (**वैदथिनाय**) विज्ञानवतोऽपत्याय (**रन्धीः**) हिंस्याः (**पञ्चाशत्**) (**कृष्णा**) कृष्णानि सैन्यानि (**नि**) (**वपः**) सन्तनुहि (**सहस्रा**) सहस्राणि (**अत्कम्**) अतति व्याप्नोति तं वायुम् (**न**) इव (**पुरः**) (**जरिमा**) अतिशयेन जरा (**वि**) (**दर्दः**) विदारय॥ १३॥

अन्वयः-हे राजंस्त्वं वैदथिनाय ऋजिश्वने पिप्रुं शूशुवांसं मृगयं रन्धीः। अत्कं जरिमा न पुरः पञ्चाशत्सहस्रा कृष्णा निवपो दुष्टान् वि दर्दः॥१३॥

भावार्थः-अत्रोपमालङ्कारः। राजादिराजपुरुषैः सेनायां सहस्राणि वीरान् रक्षयित्वा विनयेन जरा रूपाणि बलानि हरतीव शत्रूणां बलं शनैः शनैर्हत्वा शुद्धा नीतिः प्रचारणीया॥१३॥

पदार्थः-हे राजन्! **(त्वम्)** आप **(वैदथिनाय)** विज्ञानवाले के पुत्र के लिये **(ऋजिश्वने)** सरलता आदि गुणों से बढ़े हुए पुरुष के लिये **(पिप्रुम्)** व्यापक **(शूशुवांसम्)** बल से वृद्ध **(मृगयम्)** मृग को ढूंढनेवाले का **(रन्धीः)** नाश करो और **(अत्कम्)** व्याप्त होने वाले वायु को **(जरिमा)** अतिवृद्ध अवस्था के **(न)** सदृश **(पुरः)** आगे **(पञ्चाशत्)** पचास और **(सहस्रा)** सहस्रों **(कृष्णा)** कृष्णवर्ण वाले सैन्यजनों का **(नि, वपः)** विस्तार करो और दुष्ट पुरुषों का **(वि, दर्दः)** नाश करो॥१३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजा आदि राजपुरुषों को चाहिये कि सेना में हजारों वीरों को रखके और नम्रता से वृद्धावस्था जैसे रूप और बलों को हरती है, वैसे ही शत्रुओं के बल को धीरे-धीरे नष्ट कर शुद्ध नीति का प्रचार करो॥१३॥

अथ राजविषये सैन्यपुरुषरक्षणं तत्फलं चाह॥

अब राजविषय में सेनायोग्य पुरुषों के रखने और उनके फल को अगले मन्त्र में कहते हैं॥

सूर॑ उपा॒के त॒न्वं१॑ दधा॑नो॒ वि यत्ते॒ चेत्य॒मृत॑स्य॒ वर्प॑ः।

मृ॒गो न ह॒स्ती तवि॑षीमुषा॒णः सिं॒हो न भी॒म आयु॑धानि॒ बिभ्र॑त्॥ १४॥

सूर॑ः। उ॒पा॒के। त॒न्व॑म्। दधा॑नः। वि। यत्। ते॒। चेति॑। अ॒मृत॑स्य। वर्प॑ः। मृ॒गः। न। ह॒स्ती। तवि॑षीम्। उ॒षा॒णः। सिं॒ह॒ः। न। भी॒मः। आयु॑धानि। बिभ्र॑त्॥ १४॥

पदार्थः-**(सूरः)** सूर्य्य इव **(उपाके)** समीपे **(तन्वम्)** तेजस्विशरीरम् **(दधानः)** धरन् **(वि)** **(यत्)** यः **(ते)** तव **(चेति)** ज्ञाप्यते **(अमृतस्य)** नित्यस्य **(वर्पः)** रूपम् **(मृगः)** **(न)** इव **(हस्ती)** **(तविषीम्)** बलयुक्तां सेनाम् **(उषाणः)** दहन् **(सिंहः)** **(न)** इव **(भीमः)** **(आयुधानि)** असिभुशुण्डीशतघ्न्यादीनि **(बिभ्रत्)** धरन्॥१४॥

अन्वयः-हे राजन्! यद्य उपाके सूर इव तन्वं दधानस्तेऽमृतस्य वर्पो मृगो न वेगवान् हस्तीव बलिष्ठः सिंहो न भीम आयुधानि बिभ्रच्छत्रुतविषीमुषाणो वि चेति तं त्वं सदा सत्कृत्य रक्ष॥१४॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! ये दीर्घब्रह्मचर्य्येण सूर्यवत्तेजस्विनो रूपवन्तो वेगवन्तो बलिष्ठाः सिंहवत्पराक्रमिणो धनुर्वेदविदो जनाः स्युस्तत्सेनया शत्रून् विजित्य सर्वत्र सत्कीर्त्या विदितो भव॥१४॥

पदार्थः-हे राजन्! **(यत्)** जो **(उपाके)** समीप में **(सूरः)** सूर्य्य के सदृश **(तन्वम्)** तेजस्वि शरीर

को (**दधानः**) धारण करता हुआ (**ते**) तुम्हारा (**अमृतस्य**) नित्य वस्तु के (**वर्पः**) रूप और (**मृगः**) हरिण के (**न**) तुल्य वा वेगवान् (**हस्ती**) हाथी के तुल्य बलवान् वा (**सिंहः**) सिंह के (**न**) तुल्य (**भीमः**) भयङ्कर (**आयुधानि**) तलवार, भुशुण्डी, शतघ्न्यादि नामों से प्रसिद्ध आयुधों को (**बिभ्रत्**) धारण और शत्रुओं की (**तविषीम्**) बलयुक्त सेना का (**उषाणः**) दाह करता हुआ (**वि, चेति**) जनाया जाता है, उसका आप सदा सत्कार करके रक्खो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जो लोग दीर्घ ब्रह्मचर्य से सूर्य्य के समान तेजस्वी रूपवान् और वेगवान् बलिष्ठ, सिंह के सदृश पराक्रमी, धनुर्वेद के जानने वाले जन हों; उनकी सेना से शत्रुओं को जीतकर सब स्थानों में उत्तम कीर्ति से विदित हूजिये॥१४॥

अथ राजविषये सेनामात्यादियोग्यताविषयं चाह॥

अब राजविषय में सेना और अमात्य आदिकों की योग्यता के विषय को अगले मन्त्र में कहते हैं॥

इन्द्रं कामा॑ वसू॒यन्तो॑ अग्म॒न्त्स्व॑र्मीळ्हे॒ न सव॑ने चका॒नाः।
श्र॒व॒स्यव॑ः शशमा॒नास॑ उ॒क्थैरोको॒ न र॒ण्वा सु॒दृशी॑व पु॒ष्टिः॥ १५॥ १६॥

इन्द्र॑म्। कामा॑ः। व॒सु॒ऽयन्त॑ः। अ॒ग्म॒न्। स्व॑ः॒ऽमीळ्हे। न। सव॑ने। च॒का॒नाः। श्र॒व॒स्यव॑ः। श॒श॒मा॒नास॑ः। उ॒क्थैः। ओक॑ः। न। र॒ण्वा। सु॒दृशी॑ऽइव। पु॒ष्टिः॥ १५॥

पदार्थः-(**इन्द्रम्**) परमैश्वर्य्यम् (**कामाः**) ये कामयन्ते (**वसूयन्तः**) आत्मनो वसूनि धनानीच्छन्तः (**अग्मन्**) प्राप्नुवन्ति (**स्वर्मीळ्हे**) स्वः सुखेन युक्ते सङ्ग्रामे। **मीळ्ह इति सङ्ग्रामनामसु पठितम्।** (निघं०२.१७) (**न**) इव (**सवने**) प्रेरणे (**चकानाः**) देदीप्यमानाः (**श्रवस्यवः**) आत्मनः श्रवोऽन्नमिच्छन्तः (**शशमानासः**) शत्रुबलस्योल्लङ्घकाः (**उक्थैः**) प्रशंसितैर्गुणैः (**ओकः**) गृहम् (**न**) इव (**रण्वा**) रमणीया (**सुदृशीव**) सुष्ठु द्रष्टुं योग्येव (**पुष्टिः**)॥१५॥

अन्वयः-हे राजन्! ये वसूयन्तः कामाः सवने चकानाः श्रवस्यवः शशमानास उक्थैरोको न स्वर्मीळ्हे न या सुदृशीव रण्वा पुष्टिस्तामग्मन्। तां प्राप्येन्द्रं तांस्त्वं सेनाराज्यकर्माचारिणः कुरु॥१५॥

भावार्थः-अत्रोपमालङ्कारः। ये धनकामाः स्युस्ते शरीरात्मबलं वर्धयित्वा युद्धस्य विद्यासामग्र्यौ पूर्णे कुर्वन्तु॥१५॥

पदार्थः-हे राजन्! जो (**वसूयन्तः**) अपने को धनों की इच्छा करते हुए (**कामाः**) कामना करनेवाले (**सवने**) प्रेरणा करने में (**चकानाः**) प्रकाशमान (**श्रवस्यवः**) अपने को अन्न की इच्छा करते हुए (**शशमानासः**) शत्रुओं के बल का उल्लङ्घन करनेवाले (**उक्थैः**) प्रशंसित गुणों से (**ओकः**) गृह के (**न**) सदृश (**स्वर्मीळ्हे**) जैसे सुख से युक्त संग्राम में (**न**) वैसे जो (**सुदृशीव**) उत्तम प्रकार देखने के योग्य सी (**रण्वा**) सुन्दर (**पुष्टिः**) पुष्टि उसको (**अग्मन्**) प्राप्त होते हैं, उसको प्राप्त होकर (**इन्द्रम्**)

अत्यन्त ऐश्वर्य्य वाले को और उन पूर्वोक्त जनों को आप सेना और राज्य के कर्मचारी करिये॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो धन की कामना वाले होवें, वे शरीर और आत्मा के बल को बढ़ाके युद्ध की विद्या और सामग्री पूर्ण करें॥१५॥

अथ राजप्रजाजनानामेकसम्मतिविषयमाह॥

अब राजा और प्रजाजनों की एक सम्मति होने के विषय को अगले मन्त्र में कहते हैं॥

तमिद्व इन्द्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि।

यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः॥१६॥

तम्। इत्। वः। इन्द्रम्। सुऽहवम्। हुवेम। यः। ता। चकार। नर्या। पुरूणि। यः। माऽवते। जरित्रे। गध्यम्। चित्। मक्षु। वाजम्। भरति। स्पार्हऽराधाः॥१६॥

पदार्थः-(**तम्**) (**इत्**) एव (**वः**) युष्मभ्यम् (**इन्द्रम्**) परमैश्वर्य्यम् (**सुहवम्**) सुष्ठु प्रशंसितम् (**हुवेम**) (**यः**) (**ता**) तानि (**चकार**) कुर्य्यात् (**नर्य्या**) नृभ्यो हितानि (**पुरूणि**) बहूनि सैन्यानि (**यः**) (**मावते**) मत्सदृशाय (**जरित्रे**) विद्यास्तावकाय (**गध्यम्**) गृह्यम् (**चित्**) अपि (**मक्षू**) अत्र **ऋचि तुनुघे**ति दीर्घः। (**वाजम्**) अन्नाद्यैश्वर्य्यम् (**भरति**) धरति (**स्पार्हराधाः**) स्पार्हं स्पृहणीयं राधो धनं यस्य सः॥१६॥

अन्वयः-हे प्रजाजना! यः स्पार्हराधा मावते जरित्रे गध्यं वाजं मक्षू भरति यश्चित् ता पुरूणि नर्य्या चकार तं सुहवमिन्द्रमिदेव वो हुवेम॥१६॥

भावार्थः-यदि राजप्रजाजनैरेकां सम्मतिं कृत्वा शुभगुणकर्म्मस्वभावसम्पन्नो राजा स्वीक्रियते तर्हि पूर्णसुखं प्राप्येत॥१६॥

पदार्थः-हे प्रजाजनो! (**यः**) जो (**स्पार्हराधाः**) इच्छा करने योग्य धनयुक्त पुरुष (**मावते**) मेरे सदृश (**जरित्रे**) विद्या की स्तुति करने वाले के लिये (**गध्यम्**) ग्रहण करने योग्य (**वाजम्**) अन्न आदि ऐश्वर्य को (**मक्षू**) शीघ्र (**भरति**) धारण करता है (**यः**) (**चित्**) और जो (**ता**) उन (**पुरूणि**) बहुत (**नर्य्या**) मनुष्यों के लिये हितकारक सैन्य कामों को (**चकार**) करे (**तम्**) उस (**सुहवम्**) उत्तम प्रकार प्रशंसित (**इन्द्रम्**) अत्यन्त ऐश्वर्य वाले को (**इत्**) ही (**वः**) आप लोगों के लिये (**हुवेम**) हवन करें॥१६॥

भावार्थः-जो राजा और प्रजाजन एक सम्मति करके उत्तम गुण, कर्म्म और स्वभाव से युक्त राजा को स्वीकार करें तो पूर्ण सुख प्राप्त हो॥१६॥

अथ युद्धप्रवृत्तौ विजयताविषयमाह॥

अब युद्ध की प्रवृत्ति में विजयता विषय को अगले मन्त्र में कहते हैं॥

तिग्मा यदन्तरशनिः पतात्ति कस्मिञ्चिच्छूर मुहुके जनानाम्।

घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः॥१७॥

तिग्मा। यत्। अन्तः। अशनिः। पताति। कस्मिन्। चित्। शूर। मुहुके। जनानाम्। घोरा। यत्। अर्य। समृऽऋतिः। भवाति। अध। स्मा। नः। तन्वः। बोधि। गोपाः॥ १७॥

पदार्थः-(**तिग्मा**) तीव्रा (**यत्**) या (**अन्तः**) मध्ये (**अशनिः**) विद्युत् (**पताति**) पतेत् (**कस्मिन्**) (**चित्**) अपि (**शूर**) (**मुहुके**) मोहप्रापके मुहुर्मुहुः करणीये सङ्ग्रामे (**जनानाम्**) मनुष्याणाम् (**घोरा**) भयङ्करा (**यत्**) या (**अर्य्य**) प्रशंसित (**समृतिः**) युद्धम् (**भवाति**) भवेत् (**अध**) आनन्तर्य्ये (**स्मा**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्माकम् (**तन्वः**) (**बोधि**) (**गोपाः**) रक्षकः॥ १७॥

अन्वयः-हे शूरार्य्य! यद् घोरा समृतिर्भवात्यध यत्तिग्माऽशनिर्जनानां कस्मिंश्चिन्मुहुकेऽन्तः पताति तत्र स्मा गोपाः सन्नस्तन्वो बोधि॥ १७॥

भावार्थः-हे शूरवीरा! यदा बहुशस्त्रसम्पातं युद्धं प्रवर्त्तेत तदा स्वस्य स्वकीयानां च शरीररक्षणेन शत्रूणां हिंसनेन विजयिनो भवत॥ १७॥

पदार्थः-हे (**शूर**) वीर! (**अर्य्य**) प्रशंसित (**यत्**) जो (**घोरा**) भयंकर (**समृतिः**) युद्ध (**भवाति**) होवे (**अध**) इसके अनन्तर (**यत्**) जो (**तिग्मा**) तीव्र (**अशनिः**) बिजुली (**जनानाम्**) मनुष्यों के (**कस्मिंश्चित्**) किसी (**मुहुके**) मोह के प्राप्त करानेवाले वारंवार करने योग्य संग्राम के (**अन्तः**) बीच (**पताति**) गिरे, उसमें (**स्मा**) ही (**गोपाः**) रक्षा करनेवाले हुए आप (**नः**) हम लोगों के (**तन्वः**) शरीरों की (**बोधि**) जानिये॥ १७॥

भावार्थः-हे शूरवीरो! जब बहुत शस्त्रों के संपातयुक्त युद्ध प्रवृत्त होवे, तब अपने और अपने सम्बन्धियों के शरीरों की रक्षा करने और शत्रुओं के नाश करने से विजयी हूजिये॥ १७॥

अथ कीदृशं राजानं कुर्य्युरित्याह॥

अब कैसे को राजा करें, इस विषय को अगले मन्त्र में कहते हैं॥

भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ।
त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वधा स्याः॥ १८॥

भुवः। अविता। वामऽदेवस्य। धीनाम्। भुवः। सखा। अवृकः। वाजऽसातौ। त्वाम्। अनु। प्रऽमतिम्। आ। जगन्म। उरुऽशंसः। जरित्रे। विश्वधा। स्याः॥ १८॥

पदार्थः-(**भुवः**) भव (**अविता**) (**वामदेवस्य**) सुरूपयुक्तस्य विदुषः (**धीनाम्**) प्रज्ञानाम् (**भुवः**) भव (**सखा**) सुहृत् (**अवृकः**) अस्तेनः (**वाजसातौ**) सङ्ग्रामे (**त्वाम्**) (**अनु**) (**प्रमतिम्**) प्रकृष्टां प्रज्ञाम् (**आ**) (**जगन्म**) (**उरुशंसः**) बहुप्रशंसः (**जरित्रे**) स्तुत्याय (**विश्वधा**) यो विश्वं दधाति तत्सम्बुद्धौ (**स्याः**) भवेत्॥ १८॥

अन्वयः-हे विश्वध राजंस्त्वं वाजसातौ वामदेवस्य धीनामविता भुवोऽवृकः सखा भुव उरुशंसो जरित्रे सुखदः स्या यतस्त्वामनु प्रमतिमाजगन्म॥१८॥

भावार्थः-हे मनुष्या! यः सर्वाधीशो वीराणां युद्धकुशलानामुपदेशकानां प्रज्ञानां रक्षको भवेत् तमेव राजानं कुरुत॥१८॥

पदार्थः-हे **(विश्वध)** संसार के धारण करने वाले राजन्! आप **(वाजसातौ)** संग्राम में **(वामदेवस्य)** उत्तमरूप से युक्त विद्वान् और **(धीनाम्)** बुद्धियों के **(अविता)** रक्षा करने वाले **(भुवः)** हूजिये **(अवृकः)** चोरीरहित **(सखा)** मित्र **(भुवः)** हूजिये और **(उरुशंसः)** बहुत प्रशंसायुक्त होते हुए **(जरित्रे)** स्तुति करने योग्य के लिये सुखदायक **(स्याः)** हूजिये जिससे **(त्वाम्)** आपके **(अनु)** पश्चात् **(प्रमतिम्)** उत्तम बुद्धि को **(आ, जगन्म)** प्राप्त होवें॥१८॥

भावार्थः-हे मनुष्यो! जो सब का स्वामी और वीरपुरुष युद्ध में चतुर उपदेश देनेवाले और बुद्धिमानों का रक्षक होवे, उसी को राजा करो॥१८॥

अथ राजकर्त्तव्यताविषयमाह॥

अब राजजन के लिये करने योग्य विषय को अगले मन्त्र में कहते हैं॥

एभिर्नृभिरिन्द्र त्वायुभिष्ट्वा मघवद्भिर्मघवन् विश्व आजौ।

द्यावो न द्युम्नैरभि सन्तो अर्यः क्षपो मदेम शरदश्च पूर्वीः॥१९॥

एभिः। नृऽभिः। इन्द्र। त्वायुऽभिः। त्वा। मघवत्ऽभिः। मघऽवन्। विश्वे। आजौ। द्यावः। न। द्युम्नैः। अभि। सन्तः। अर्यः। क्षपः। मदेम। शरदः। च। पूर्वीः॥१९॥

पदार्थः-(**एभिः**) पूर्वोक्तैः (**नृभिः**) नेतृभिः (**इन्द्र**) शत्रूणां विदारक (**त्वायुभिः**) त्वां कामयमानैः (**त्वा**) त्वाम् (**मघवद्भिः**) बहुपूजितधनयुक्तैः (**मघवन्**) बह्वैश्वर्य्य (**विश्वे**) समग्रे (**आजौ**) सङ्ग्रामे (**द्यावः**) किरणाः (**न**) इव (**द्युम्नैः**) यशोधनयुक्तैः (**अभि**) (**सन्तः**) वर्त्तमानाः (**अर्य्यः**) स्वामी (**क्षपः**) रात्रीः (**मदेम**) आनन्देम (**शरदः**) शरदृतून् (**च**) (**पूर्वीः**) पुरातनीः॥१९॥

अन्वयः-हे मघवन्निन्द्र राजन्! वयमेभिस्त्वायुभिर्मघवद्भिर्नृभिः सह विश्व आजौ द्यावो न द्युम्नैः सह त्वाऽऽश्रिताः सन्तोऽर्य्य इव पूर्वीः क्षपश्शरदश्चाभि मदेम॥१९॥

भावार्थः-अत्रोपमालङ्कारः। ये धार्मिकैः शरीरात्मबलैः सत्यं कामयमानैः स्वराज्यैर्भर्वैर्धनाढ्यैः पुरुषैः सह दृढं सन्धिं कृत्वा शत्रून् विजित्य राज्यं प्रशंसन्ति ते सूर्य्यप्रकाश इव कीर्त्तिमन्तो धनिनो भूत्वा सर्वदाऽऽनन्दिता भवन्ति॥१९॥

पदार्थः-हे **(मघवन्)** बहुत ऐश्वर्य्य से युक्त **(इन्द्र)** शत्रुओं के नाशकारक राजन्! हम लोग **(एभिः)** इन पूर्वोक्त **(त्वायुभिः)** आपकी कामना करते हुए **(मघवद्भिः)** बहुत श्रेष्ठ धनों से युक्त

(नृभिः) नायक मनुष्यों के साथ **(विश्वे)** सम्पूर्ण **(आजौ)** संग्राम में **(द्यावः)** किरणों के **(न)** तुल्य और **(द्युम्नैः)** यशरूप धन से युक्त सत्पुरुषों के साथ **(त्वा)** आपके आश्रय का **(सन्तः)** वर्ताव करते हुए **(अर्य्यः)** स्वामी के तुल्य **(पूर्वीः)** पुरानी **(क्षपः)** रात्रियों और **(शरदः)** शरद् ऋतुओं भर **(च)** भी **(अभि, मदेम)** सब ओर से आनन्द करें॥१९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो लोग धार्मिक शरीर और आत्मा के बल से युक्त सत्य की कामना करते हुए अपने राज्य में हुए धनयुक्त पुरुषों के साथ दृढ़ मेल कर और शत्रुओं को जीत के राज्य की प्रशंसा करते हैं, वे सूर्य्य के प्रकाश के सदृश कीर्तियुक्त और धनी होकर सब काल में आनन्दित होते हैं॥१९॥

पुनरमात्यादिकर्मचारिविषयमाह॥

फिर मन्त्री आदि कर्मचारियों के विषय को अगले मन्त्र में कहते हैं॥

एवेदिन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम्।
नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः॥२०॥

एव। इत्। इन्द्राय। वृषभाय। वृष्णे। ब्रह्म। अकर्म। भृगवः। न। रथम्। नु। चित्। यथा। नः। सख्या। वि।ऽयोषत्। असत्। नः। उग्रः। अविता। तनूऽपाः॥२०॥

पदार्थः-(**एव**) (**इत्**) अपि (**इन्द्राय**) परमैश्वर्य्यप्रदाय (**वृषभाय**) वृषभ इव बलिष्ठाय (**वृष्णे**) बलिष्ठाय (**ब्रह्म**) महद्धनम् (**अकर्म**) कुर्य्याम (**भृगवः**) देदीप्यमानाः शिल्पिनः (**न**) इव (**रथम्**) (**नु**) सद्यः (**चित्**) (**यथा**) (**नः**) अस्माकम् (**सख्या**) मित्रेण (**वियोषत्**) सन्दधीत (**असत्**) भवेत् (**नः**) अस्माकम् (**उग्रः**) तेजस्वी (**अविता**) रक्षकः (**तनूपाः**) शरीरपालकः॥२०॥

अन्वयः-यथा राजानः सख्या वियोषदुग्रस्तनूपाः सन्नोन्वविताऽसत्तस्मा इदेव वृषभाय वृष्ण इन्द्राय भृगवो रथं न ब्रह्म चिद्वयमकर्म॥२०॥

भावार्थः-अत्रोपमालङ्कारः। यथा शिल्पिनो विद्यया पदार्थसम्प्रयोगेण विमानादीनि निर्माय श्रीमन्तो भूत्वा मित्राण्यभ्यर्चन्ति तथैव राजसत्कृता वयं राज्ञैश्वर्य्यं वर्धयित्वा सर्वान् राजादीन् सत्कुर्याम॥२०॥

पदार्थः-(**यथा**) जैसे राजा (**नः**) हमारे (**सख्या**) मित्र के साथ (**वियोषत्**) धारण करे (**उग्रः**) तेजस्वी (**तनूपाः**) शरीर का पालन करने वाला हुआ (**नः**) हम लोगों का (**नु**) शीघ्र (**अविता**) रक्षक (**असत्**) होवे (**इत्, एव**) उसी (**वृषभाय**) बैल के सदृश बलिष्ठ (**वृष्णे**) वीर्यवान् (**इन्द्राय**) अत्यन्त ऐश्वर्य के देनेवाले के लिये (**भृगवः**) प्रकाशमान (**रथम्**) वाहन के (**न**) सदृश (**ब्रह्म, चित्**) बड़े भी धन को हम लोग (**अकर्म**) सिद्ध करें॥२०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शिल्पीजन विद्या के साथ पदार्थों के संयोग से विमान आदि की रचना करके धनवान् होकर मित्रों का सत्कार करते हैं, वैसे ही राजा से सत्कार किये

गये हम लोग राजा से ऐश्वर्य की वृद्धि करके सब राजा आदिकों का सत्कार करें॥ २०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इ॑न्द्र नू गृ॑णा॒न इषं॑ जरि॒त्रे न॒द्यो३॑ न पी॑पेः।
अका॑रि ते हरिवो॒ ब्रह्म॒ नव्यं॑ धि॒या स्या॑म र॒थ्यः॑ सदा॒साः॥ २१॥ २०॥

नु। स्तु॒तः। इ॒न्द्र॒। नु। गृ॒णा॒नः। इष॑म्। ज॒रि॒त्रे। नद्यः॑। न। पी॒पे॒रिति॑ पीपेः। अका॑रि। ते॒। हरि॒ऽवः॒। ब्रह्म॑। नव्य॑म्। धि॒या। स्या॒म॒। र॒थ्यः॑। स॒दा॒ऽसाः॥ २१॥

पदार्थः-(**नु**) सद्यः। अत्र सर्वत्र **ऋचि तुनुघे**ति दीर्घः। (**स्तुतः**) प्रशंसितः (**इन्द्र**) (**नु**) (**गृणानः**) प्रशंसन् (**इषम्**) अन्नाद्यैश्वर्यम् (**जरित्रे**) स्तावकाय (**नद्यः**) (**न**) इव (**पीपेः**) प्यायय (**अकारि**) (**ते**) तव (**हरिवः**) प्रशंसिताऽश्वः (**ब्रह्म**) असङ्ख्यं धनम् (**नव्यम्**) नवीनम् (**धिया**) प्रज्ञया कर्मणा वा (**स्याम**) (**रथ्यः**) रथेषु साधुः (**सदासाः**) दासैः सेवकैस्सह वर्त्तमानाः॥ २१॥

अन्वयः-हे हरिव इन्द्र! त्वं गृणानस्सञ्जरित्रे नद्यो नेषन्नु पीपेर्यैस्सर्वैर्नु स्तुतोऽकारि तैस्ते तुभ्यं नव्यं ब्रह्म सदासा वयं धिया रथ्यो न कृतवन्तः स्याम॥ २१॥

भावार्थः-अत्रोपमालङ्कारः। यो मनुष्यः परीक्षकः सर्वत्र प्रशंसितो नदीवत्प्रजानां तर्प्पकोऽश्व इव सुखेन स्थानान्तरं गमयिता भवेत् तं सर्वाधीशं कृत्वा सभृत्या वयं तदाऽज्ञायां वर्त्तित्वा सर्वे सततं सुखिनो भवेमेति॥ २१॥

अत्रेन्द्रराजाऽमात्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षोडशं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**हरिवः**) उत्तम घोड़ों से युक्त (**इन्द्र**) ऐश्वर्यवान् राजन्! आप (**गृणानः**) प्रशंसा करते हुए (**जरित्रे**) स्तुति करनेवाले के लिये (**नद्यः**) नदियों के (**न**) सदृश (**इषम्**) अन्न आदि ऐश्वर्य की (**नु**) शीघ्र (**पीपेः**) वृद्धि करावें और जिन सब लोगों से (**नु**) शीघ्र (**स्तुतः**) आप प्रशंसित (**अकारि**) किये गये उन जनों से (**ते**) आपके लिये (**नव्यम्**) नवीन (**ब्रह्म**) सङ्ख्यारहित धन को (**सदासाः**) सेवकों के सहित वर्त्तमान हम लोग (**धिया**) बुद्धि वा कर्म से (**रथ्यः**) वाहनों के निमित्त मार्ग के सदृश सिद्ध कर चुकनेवाले (**स्याम**) हों॥ २१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य परीक्षा करनेवाला, सब जगह प्रशंसित और नदी के सदृश प्रजाओं के तृप्तिकर्त्ता, अश्वसमान सुखपूर्वक दूसरे स्थान को पहुँचानेवाला होवे, उसको सर्वाधीश करके नौकरों के सहित हम उसकी आज्ञा के अनुकूल वर्त्ताव करके सब लोग निरन्तर सुखी होवें॥ २१॥

इस सूक्त में इन्द्र, राजा, मन्त्री और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्वसूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सोलहवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

अथैकाधिकविंशत्यृचस्य सप्तदशस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १ पङ्क्तिः। ७, ९ भुरिक् पङ्क्तिः। १४, १६ स्वराट्पङ्क्तिः। १५ याजुषी पङ्क्तिः। २१ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, १२, १३, १७, १८, १९ निचृत्त्रिष्टुप्। ३, ५, ६, ८, १०, ११ त्रिष्टुप्। ४, २० विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेन्द्रपदवाच्यराजगुणानाह॥

अब इक्कीस ऋचावाले सत्रहवें सूक्त का आरम्भ है उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों का वर्णन करते हैं॥

त्वं महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः।

त्वं वृत्रं शवसा जघन्वान्त्सृजः सिन्धूँरहिना जग्रसानान्॥ १॥

त्वम्। महान्। इन्द्र। तुभ्यम्। ह। क्षाः। अनु। क्षत्रम्। मंहना। मन्यत। द्यौः। त्वम्। वृत्रम्। शवसा। जघन्वान्। सृजः। सिन्धून्। अहिना। जग्रसानान्॥ १॥

पदार्थः-(**त्वम्**) महान् (**इन्द्र**) विद्यैश्वर्यसम्पन्न राजन्! (**तुभ्यम्**) (**ह**) खलु (**क्षाः**) भूमयः। **क्षेति पृथिवीनामसु पठितम्।** (निघं०१.१) (**अनु**) (**क्षत्रम्**) राज्यम् (**मंहना**) महती (**मन्यत**) मन्यसे (**द्यौः**) सूर्य्य इव (**त्वम्**) (**वृत्रम्**) मेघवद्वर्त्तमानं शत्रुम् (**शवसा**) बलेन (**जघन्वान्**) (**सृजः**) सृज (**सिन्धून्**) नदीः (**अहिना**) मेघेनेव धनेन (**जग्रसानान्**) शत्रुसेनाग्रसमानान्॥ १॥

अन्वयः-हे इन्द्र! यस्त्वं महान् क्षाः क्षत्रं मंहना द्यौरिवानुमन्यत तस्मै ह तुभ्यं वयमपि मन्यामहे यथा वृत्रं जघन्वान् सूर्य्योऽहिना सिन्धून् [सृजः] सृजति तथा त्वं शवसा जग्रसानान् सृजः॥ १॥

भावार्थः-हे राजजना! यथा महान् सूर्य्यो वृष्ट्या नदीः प्रीणाति तथैव धनैश्वर्य्येण राज्यमलङ्कुर्वन्तु राजाऽऽज्ञयाऽनुवर्त्य महद्राज्यं सम्पादयन्तु॥ १॥

पदार्थः-हे (**इन्द्र**) विद्या और ऐश्वर्य्य से युक्त राजन्! जो (**त्वम्**) आप (**महान्**) बड़े (**क्षाः**) भूमियों और (**क्षत्रम्**) राज्य को (**मंहना**) [महान्] जैसे (**द्यौः**) सूर्य्य वैसे (**अनु, मन्यत**) मानते हो (**ह**) उन्हीं (**तुभ्यम्**) आपके लिये हम लोग भी मानते और जैसे (**वृत्रम्**) मेघ के सदृश वर्त्तमान शत्रु को (**जघन्वान्**) नाश करने वाला (**अहिना**) मेघ के सदृश बड़े हुए धन से (**सिन्धून्**) नदियों को (**सृजः**) उत्पन्न करावे [उसी प्रकार] (**त्वम्**) आप (**शवसा**) बल से (**जग्रसानान्**) शत्रुसेना के अग्रणियों के समान उत्तम जनों को उत्पन्न कराओ॥ १॥

भावार्थः-हे राजसम्बन्धी जनो! जैसे बड़ा सूर्य वृष्टि से नदियों को पूर्ण करता है, वैसे ही धन और ऐश्वर्य्य से राज्य को शोभित करो। राजा की आज्ञा के अनुकूल वर्त्ताव करके बड़े राज्य को सम्पादन करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तव॑ त्विषो जनि॑मन् रेजत॒ द्यौ रेज॒द्भूमि॑र्भि॒यसा॒ स्वस्य॑ म॒न्योः।
ऋ॒घा॒यन्त॑ सु॒भ्व१॑: पर्व॑तास॒ आर्द॒न् धन्वा॑नि स॒रय॑न्त॒ आप॑:॥ २॥

तव॑। त्वि॒षः। जनि॑मन्। रे॒ज॒त॒। द्यौः। रेज॑त्। भूमि॑:। भि॒यसा॑। स्वस्य॑। म॒न्योः। ऋ॒घा॒यन्त॑। सु॒ऽभ्व॑:। पर्व॑तासः। आर्द॑न्। धन्वा॑नि। स॒रय॑न्ते। आप॑:॥ २॥

पदार्थः-(**तव**) (**त्विषः**) प्रतापात् (**जनिमन्**) जन्मवन् (**रेजत**) रेजते (**द्यौः**) (**रेजत्**) रेजते कम्पते (**भूमिः**) (**भियसा**) भयेन (**स्वस्य**) (**मन्योः**) (**ऋघायन्त**) बाध्यन्ते (**सुभ्वः**) सुष्ठु भवन्ति वृष्टयो येभ्यस्ते (**पर्वतासः**) शैला इवोच्छ्रिता मेघाः (**आर्दन्**) हिंसन्ति (**धन्वानि**) स्थलानि (**सरयन्ते**) गमयन्ति (**आपः**) जलानि॥ २॥

अन्वयः-हे जनिमन्! राजन्यस्य जगदीश्वरस्य त्विषो भियसा द्यौ रेजत भूमी रेजत्तथा तव स्वस्य मन्योः शत्रवः कम्पन्ताम्। यथा सुभ्वः पर्वतास ऋघायन्ताऽऽर्दनापो धन्वानि सरयन्ते तथैव तव सेना अमात्याश्च भवन्तु॥ २॥

भावार्थः-हे राजंस्त्वं परमेश्वरवत्पक्षपातं विहाय नृषु पितृवद्वर्त्तस्व यथा जगदीश्वरभयात् सर्वं जगद् व्यवतिष्ठते तथैव तव दण्डभयात् सर्वं जगद्भोगाय कल्पतां यथा सूर्य्यो मेघं बाधते जलवृष्ट्या जगदानन्दयति तथैव शत्रून् बाधित्वा सज्जनानानन्दय॥ २॥

पदार्थः-हे (**जनिमन्**) जन्मवाले राजन्! जिस जगदीश्वर के (**त्विषः**) प्रताप से (**भियसा**) भय से (**द्यौः**) अन्तरिक्ष (**रेजत**) कम्पित होता और (**भूमिः**) पृथ्वी (**रेजत्**) कम्पित होती वैसे (**तव**) आपके (**स्वस्य**) निज (**मन्योः**) क्रोध से शत्रु लोग कांपें और जैसे (**सुभ्वः**) उत्तम प्रकार वृष्टि जिनसे हो ऐसे (**पर्वतासः**) पर्वतों के सदृश ऊंचे मेघ (**ऋघायन्त**) बाधित होते (**आर्दन्**) और नाश करते हैं (**आपः**) जल और (**धन्वानि**) स्थल अर्थात् शुष्क भूमियाँ (**सरयन्ते**) गमन करती हैं, वैसे ही आपकी सेना और मन्त्रीजन होवें॥ २॥

भावार्थः-हे राजन्! आप परमेश्वर के सदृश पक्षपात का त्याग करके मनुष्यों में पिता के सदृश वर्त्ताव करो और जैसे जगदीश्वर के भय से सम्पूर्ण जगत् व्यवस्थित रहता है, वैसे ही आप के दण्ड के भय से सब जगत् भोग के लिये कल्पित हो और सूर्य जैसे मेघ को बाधा करता और जलवृष्टि से जगत् को आनन्दित करता है, वैसे ही शत्रुओं को बाधित करके सज्जनों को आनन्द दीजिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भि॒नद्गि॒रिं शव॑सा॒ वज्र॑मि॒ष्णन्नाविष्कृ॑ण्वा॒नः सह॑सा॒न ओज॑:।

वधीद् वृत्रं वज्रेण मन्दसानः सरन्नापो जवसा हतवृष्णीः॥ ३॥

भिनत्। गिरिम्। शवसा। वज्रम्। इष्णन्। आविःऽकृण्वानः। सहसानः। ओजः। वधीत्। वृत्रम्। वज्रेण। मन्दसानः। सरन्। आपः। जवसा। हतऽवृष्णीः॥ ३॥

पदार्थः-(**भिनत्**) भिनत्ति विदृणाति (**गिरिम्**) गिरिवद्वर्त्तमानं मेघम् (**शवसा**) बलेन (**वज्रम्**) किरणमिव शस्त्रम् (**इष्णन्**) प्राप्नुवन् (**आविष्कृण्वानः**) प्राकट्यं कुर्वन् (**सहसानः**) सहमानः। अत्र वर्णव्यत्ययेन मस्य सः। (**ओजः**) पराक्रमम् (**वधीत्**) हन्ति (**वृत्रम्**) मेघम् (**वज्रेण**) किरणेन (**मन्दसानः**) आनन्दन् (**सरन्**) गच्छन्ति। अत्राडभावः (**आपः**) जलानि (**जवसा**) वेगेन (**हतवृष्णीः**) हतो वृषा मेघो यासां ताः॥ ३॥

अन्वयः-हे राजन्! यथा सूर्य्यो गिरिं भिनद्ति वज्रेण वृत्रं वधीत् तद्धतान्मेघाद्धतवृष्णीरापो जवसा सरंस्तथैव मन्दसानः सहसान ओज आविष्कृण्वानो वज्रमिष्णञ्छवसा शत्रुसेनां विदारय च सेनया शत्रून् हत्वा रुधिराणि प्रवाहय॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवन्न्यायप्रकाशबलप्रसिद्धा दुष्टविदारकाः सत्पुरुषेभ्य आनन्दप्रदा वर्त्तन्ते त एव प्रकटकीर्त्तयो भूत्वेहाऽमुत्र परजन्मन्यक्षयाऽऽनन्दा जायन्ते॥ ३॥

पदार्थः-हे राजन्! जैसे सूर्य (**गिरिम्**) पर्वत के समान मेघ को (**भिनत्**) विदीर्ण कर और (**वज्रेण**) किरण से (**वृत्रम्**) मेघ का (**वधीत्**) नाश करता है, उस नाश हुए मेघ से (**हतवृष्णीः**) नष्ट किया गया मेघ जिनका वह (**आपः**) जल (**जवसा**) वेग से (**सरन्**) जाते हैं, वैसे ही (**मन्दसानः**) आनन्द वा (**सहसानः**) सहन करते (**ओजः**) और पराक्रम को (**आविष्कृण्वानः**) प्रकट करते वा (**वज्रम्**) किरण के समान शस्त्र को (**इष्णन्**) प्राप्त होते हुए (**शवसा**) बल से शत्रुओं की सेना का नाश करो और सेना से शत्रुओं का नाश करके रुधिरों को बहाओ॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग सूर्य्य के सदृश न्याय से प्रकाश बल से प्रसिद्ध, दुष्टों के नाशकारक और श्रेष्ठ पुरुषों के लिये आनन्ददायक होते हैं, वे ही प्रकट यश वाले होकर इस संसार में और परलोक अर्थात् दूसरे जन्म में अखण्ड आनन्द वाले होते हैं॥ ३॥

अथ राजसन्तानविचारविषयमाह॥

अब राजसन्तानविचार को अगले मन्त्र में कहते हैं॥

सुवीरस्ते जनिता मन्यत द्यौरिन्द्रस्य कर्ता स्वपस्तमो भूत्।
य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूम॥ ४॥

सुऽवीरः। ते। जनिता। मन्यत। द्यौः। इन्द्रस्य। कर्ता। स्वपःऽतमः। भूत्। यः। ईम्। जजान। स्वर्यम्। सुऽवज्रम्। अनपऽच्युतम्। सदसः। न। भूम॥ ४॥

पदार्थः-(**सुवीरः**) शोभनश्चासौ वीरश्च (**ते**) तव (**जनिता**) जनकः (**मन्यत**) मन्येत (**द्यौः**) विद्युदिव (**इन्द्रस्य**) परमैश्वर्यस्य (**कर्त्ता**) (**स्वपस्तमः**) शोभनान्यपांसि कर्माणि यस्य सोऽतिशयितः (**भूत्**) भवेत् (**यः**) (**ईम्**) महान्तम् (**जजान**) (**स्वर्य्यम्**) स्वर्हितम् (**सुवज्रम्**) शोभनानि वज्राण्यायुधानि यस्य तम् (**अनपच्युतम्**) अपचयरहितम् (**सदसः**) सभासदः (**न**) इव (**भूम**)॥४॥

अन्वयः-हे राजँस्त इन्द्रस्य द्यौरिव सुवीरो जनिता मन्यत स्वपस्तमः कर्त्ता भूद् य ईं स्वर्य्यमनपच्युतं सुवज्रं पुरुषं जजान ते सदसो न वयं प्राप्ता भूम॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे राजन्! यथा सुसभ्या अनुत्तमं राजानं प्राप्य न्यायं प्रचार्य कीर्त्तिमन्तो जायन्त एवमेव यदि भवान् धर्म्येण ब्रह्मचर्य्येण पुत्रेष्टिरीत्या प्रियायां सुतं जनयेत्तर्हि सोऽपि प्रख्यातसुकीर्तिः स्यात्॥४॥

पदार्थः-हे राजन्! (**इन्द्रस्य**) अत्यन्त ऐश्वर्यवान् (**ते**) आप का (**द्यौः**) बिजुली के सदृश (**सुवीरः**) श्रेष्ठवीर (**जनिता**) उत्पन्न करने वाला (**मन्यत**) माना जाय और वह (**स्वपस्तमः**) अतीव उत्तम कर्मों से पूरित (**कर्त्ता**) करने वाला (**भूत्**) हो वा (**यः**) जो (**ईम्**) महान् (**स्वर्य्यम्**) अत्यन्त सुख के लिये हित और (**अनपच्युतम्**) नाश से रहित (**सुवज्रम्**) उत्तम आयुधों वाले पुरुष को (**जजान**) उत्पन्न कर चुका उसको (**सदसः**) सभासदों के (**न**) सदृश हम लोग प्राप्त (**भूम**) होवें॥४॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। हे राजन्! जैसे श्रेष्ठ लोग अति उत्तम राजा को प्राप्त होकर और न्याय का प्रचार करके यशवाले होते हैं, इसी प्रकार यदि आप धर्मयुक्त ब्रह्मचर्य्य से पुत्रेष्टिकर्म्म की रीति से अपनी प्रिया में पुत्र उत्पन्न करें तो वह भी प्रसिद्ध यश वाला होवे॥४॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

य एकु इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इन्द्रः।
सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः॥५॥२१॥

यः। एकः। इत्। च्यवयति। प्र। भूम। राजा। कृष्टीनाम्। पुरुऽहूतः। इन्द्रः। सत्यम्। एनम्। अनु। विश्वे। मदन्ति। रातिम्। देवस्य। गृणतः। मघोनः॥५॥

पदार्थः-(**यः**) (**एकः**) (**इत्**) एव (**च्यावयति**) (**प्र**) (**भूम**) भवेम। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**राजा**) शुभगुणैः प्रकाशमानः (**कृष्टीनाम्**) कृषीवलादिप्रजास्थमनुष्याणाम् (**पुरुहूतः**) बहुभिराहूतः प्रशंसितः (**इन्द्रः**) परमैश्वर्य्यवान् (**सत्यम्**) सत्सु साधुम् (**एनम्**) (**अनु**) (**विश्वे**) सर्वे (**मदन्ति**) (**रातिम्**) दातारम् (**देवस्य**) दिव्यगुणसम्पन्नस्य (**गृणतः**) सकलविद्याः स्तुवतः (**मघोनः**) बहुधनयुक्तस्य सभ्यसमूहस्य मध्ये॥५॥

अन्वयः-यः पुरुहूत इन्द्रः कृष्टीनां राजैक इच्छत्रून् प्र च्यावयति तं मघोनो गृणतो देवस्य मध्ये वर्त्तमानं सत्यं रातिं विश्वे विद्वांसः सभासदोऽनुमदन्ति तमेनं राजानं कृत्वा वयं सुखिनो भूम॥५॥

भावार्थः-स एव राजा भवितुमर्हति य एकोऽपि बहूञ्छत्रून् विजेतुं शक्नोति स एव विजयी भवति यः सत्पुरुषाणां सङ्गमुपदेशं प्राप्य धर्म्यं न्यायं सततं करोति॥५॥

पदार्थः-(**यः**) जो (**पुरुहूतः**) बहुतों से बुलाया और प्रशंसा किया गया (**इन्द्रः**) अत्यन्त ऐश्वर्यवान् (**कृष्टीनाम्**) क्षेत्र बोनेवाले आदि प्रजास्थ मनुष्यों का (**राजा**) उत्तम गुणों से प्रकाशमान राजा (**एकः**) एक (**इत्**) ही शत्रुओं को (**प्र, च्यावयति**) कम्पाता है उसको (**मघोनः**) बहुत धन से युक्त श्रेष्ठ पुरुषों के समूह के मध्य में (**गृणतः**) सम्पूर्ण विद्या की स्तुति करते हुए (**देवस्य**) दिव्यगुणी विद्वानों के समूह में वर्त्तमान (**सत्यम्**) श्रेष्ठों में साधु (**रातिम्**) दाता जन को (**विश्वे**) सम्पूर्ण विद्वान् सभासद् (**अनु, मदन्ति**) अनुमति देते हैं उस (**एनम्**) इसको राजा करके हम लोग सुखी (**भूम**) होवें॥५॥

भावार्थः-वही राजा हो सकता है, जो एक भी बहुत शत्रुओं को जीत सकता है और वही विजयी होता है, जो श्रेष्ठ पुरुषों के सङ्ग और उपदेश को प्राप्त होकर धर्मयुक्त न्याय निरन्तर करता है॥५॥

पुनर्भूपतिविषयमाह॥

फिर भूपतिविषय को अगले मन्त्र में कहते हैं॥

सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः।

सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः॥६॥

सत्रा। सोमाः। अभवन्। अस्य। विश्वे। सत्रा। मदासः। बृहतः। मदिष्ठाः। सत्रा। अभवः। वसुऽपतिः। वसूनाम्। दत्रे। विश्वाः। अधिथाः। इन्द्र। कृष्टीः॥६॥

पदार्थः-(**सत्रा**) सत्याः (**सोमाः**) सोम्यगुणसम्पन्नाः सभ्या जनाः (**अभवन्**) भवन्तु (**अस्य**) राज्ञः (**विश्वे**) सर्वे (**सत्रा**) सत्याः (**मदासः**) आनन्दाः (**बृहतः**) महान्तः (**मदिष्ठाः**) अतिशयेनाऽऽनन्दप्रदाः (**सत्रा**) सत्यः (**अभवः**) भवेः (**वसुपतिः**) धनस्य स्वामी (**वसूनाम्**) धनाढ्यानाम् (**दत्रे**) दातव्ये हिरण्यादिधने सति। **दत्रमिति हिरण्यनामसु पठितम्।** (निघं०१.२) (**विश्वाः**) सर्वाः (**अधिथाः**) धारयेथाः (**इन्द्र**) परमैश्वर्य्यप्रद (**कृष्टीः**) मनुष्यादिप्रजाः॥६॥

अन्वयः-हे इन्द्र! यदि त्वं वसूनां वसुपतिः सत्राभवो दत्रे विश्वाः कृष्टीरधिथास्तर्ह्यस्य राज्यस्य मध्ये सत्रा विश्वे सोमाः सत्रा विश्वे मदासो बृहतो मदिष्ठा अभवन्॥६॥

भावार्थः-यो राजा यथात्मने प्रियमिच्छेत्तथैव प्रजाभ्यः सुखं प्रदद्यात्तस्यैवोत्तमाः सभासदः परमैश्वर्य्यं च वर्द्धेत॥६॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देनेवाले! जो आप **(वसूनाम्)** धनाढ्य पुरुषों के बीच **(वसुपतिः)** धन के स्वामी **(सत्रा)** सत्य **(अभवः)** होवें **(दत्रे)** देने योग्य सुवर्ण आदि धन के होने पर **(विश्वाः)** सम्पूर्ण **(कृष्टीः)** मनुष्यादि प्रजाओं को **(अधिथाः)** धारण करो तो **(अस्य)** इस राज्य के मध्य में **(सत्रा)** सत्य **(विश्वे)** सब **(सोमाः)** शान्तिगुणसम्पन्न सभ्यजन **(सत्रा)** सत्य सब **(मदासः)** आनन्द और **(बृहतः)** बड़े **(मदिष्ठाः)** अतीव आनन्द देनेवाले **(अभवन्)** होवें॥६॥

भावार्थः-जो राजा जैसे अपने निमित्त प्रिय की इच्छा करे, वैसे ही प्रजाओं के लिये सुख देवे, उसी के उत्तम सभासद् और अत्यन्त ऐश्वर्य बढ़े॥६॥

अथ राजानं प्रति प्रजापालनप्रकारमाह॥

अब राजा के प्रति प्रजापालन प्रकार को अगले मन्त्र में कहते हैं॥

त्वमध॑ प्रथ॒मं जाय॑मा॒नोऽमे॒ विश्वा॑ अधिथा इन्द्र कृ॒ष्टीः।

त्वं प्रति॑ प्र॒वत॑ आ॒शया॑न॒महिं॒ वज्रे॑ण मघवन् वि वृ॑श्चः॥७॥

त्वम्। अध॑। प्र॒थम॑म्। जाय॑मानः। अमे॑। विश्वा॑ः। अ॒धि॒थाः॒। इ॒न्द्र॒। कृ॒ष्टीः। त्वम्। प्रति॑। प्र॒ऽवतः॑। आ॒ऽशया॑नम्। अहि॑म्। वज्रे॑ण। म॒घ॒ऽव॒न्। वि। वृ॒श्च॒रिति॑ वृश्चः॥७॥

पदार्थः-**(त्वम्)** **(अध)** आनन्तर्य्ये **(प्रथमम्)** **(जायमानः)** उत्पद्यमानः **(अमे)** गृहे **(विश्वाः)** समग्राः **(अधिथाः)** धारयेथाः **(इन्द्र)** दुष्टानां विदारक **(कृष्टीः)** मनुष्याद्याः प्रजाः **(त्वम्)** **(प्रति)** **(प्रवतः)** निम्नदेशान् **(आशयानम्)** समन्ताच्छयानमिव वर्त्तमानम् **(अहिम्)** मेघम् **(वज्रेण)** किरणैः **(मघवन्)** बहुधनयुक्त **(वि)** **(वृश्चः)** छिन्धि॥७॥

अन्वयः-हे मघवन्निन्द्र राजन्नमे जायमानस्त्वं विश्वाः कृष्टीः प्रथममधिथाः, अध त्वं यथा प्रवतः प्रत्याशयानमहिं वज्रेण सूर्यो हन्ति तथैव दुष्टाँस्त्वं वि वृश्चः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो हि प्रथमतो ब्रह्मचर्य्येण विद्यया विनयसुशीलाभ्यां सर्वोत्कृष्टो जायते यश्च राज्यपालनयुद्धकरणं विजानाति तमेव राजानं कृत्वा सुखिनो भवत॥७॥

पदार्थः-हे **(मघवन्)** बहुत धन से युक्त **(इन्द्र)** दुष्ट पुरुषों के नाश करनेहारे राजन्! **(अमे)** गृह में **(जायमानः)** उत्पन्न होने वाले **(त्वम्)** आप **(विश्वाः)** सम्पूर्ण **(कृष्टीः)** मनुष्य आदि प्रजाओं को **(प्रथमम्)** पहिले **(अधिथाः)** धारण करो **(अध)** इसके अनन्तर **(त्वम्)** आप जैसे **(प्रवतः)** नीचले स्थलों के **(प्रति)** प्रति **(आशयानम्)** सब प्रकार सोते हुए के सदृश वर्त्तमान **(अहिम्)** मेघ को **(वज्रेण)** किरणों से सूर्य्य नाश करता है, वैसे ही दुष्ट पुरुषों का आप **(वि, वृश्चः)** नाश करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो पुरुष प्रथम से ब्रह्मचर्य्य, विद्या, विनय और सुशीलता से सब में उत्तम होता है और जो राज्यपालन और युद्ध करने को जानता है,

उसी को राजा करके सुखी होओ॥७॥

अथ प्रजाजनै राजस्वीकारमाह॥

अब प्रजाजनों से राजा के स्वीकार करने को अगले मन्त्र में कहते हैं॥

सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम्।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः॥८॥

सत्राऽहनम्। दधृषिम्। तुम्रम्। इन्द्रम्। महाम्। अपारम्। वृषभम्। सुऽवज्रम्। हन्ता। यः। वृत्रम्। सनिता। उत। वाजम्। दाता। मघानि। मघऽवा। सुऽराधाः॥८॥

पदार्थः-(**सत्राहणम्**) यः सत्येनाऽसत्यं हन्ति (**दाधृषिम्**) भृशं प्रगल्भम् (**तुम्रम्**) प्रेरकम् (**इन्द्रम्**) परमैश्वर्यवन्तम् (**महाम्**) महान्तम् (**अपारम्**) अपारविद्यं गम्भीराशयम् (**वृषभम्**) बलिष्ठम् (**सुवज्रम्**) शोभनशस्त्रास्त्राणां प्रयोक्तारम् (**हन्ता**) (**यः**) (**वृत्रम्**) मेघमिव शत्रुम् (**सनिता**) विभाजकः (**उत**) अपि (**वाजम्**) अन्नाद्यैश्वर्यम् (**दाता**) (**मघानि**) धनानि (**मघवा**) बहुधनयुक्तः (**सुराधाः**) धर्म्येण सञ्चितधनः॥८॥

अन्वयः-हे मनुष्या! यो वृत्रं सूर्य इव शत्रूणां हन्ता वाजं सनितोत मघवा सुराधा मघानि दाता भवेत्तं सत्राहणं दाधृषिं महामपारं तुम्रं वृषभं सुवज्रमिन्द्रं राजानं स्वीकुरुत॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यः पूर्णविद्यः सत्यवादी प्रगल्भो बलिष्ठः शस्त्राऽस्त्रप्रयोगविदभयदाता पुरुषो भवेत्तमेव राज्यायाधिकुरुत॥८॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**वृत्रम्**) मेघ को जैसे सूर्य वैसे शत्रुओं का (**हन्ता**) नाश करने वाला पुरुष (**वाजम्**) अन्न आदि ऐश्वर्य्य का (**सनिता**) विभाग करने वाला (**उत**) भी (**मघवा**) बहुत धन से युक्त (**सुराधाः**) धर्म युक्त व्यवहार से धनसंचयकर्त्ता (**मघानि**) और धनों का (**दाता**) दाता हो उस (**सत्राहणम्**) सत्य से असत्य के नाश करने वाले (**दाधृषिम्**) निरन्तर प्रगल्भ (**महाम्**) महान् (**अपारम्**) अपार विद्यावान् गम्भीर आशय युक्त (**तुम्रम्**) प्रेरणा देने वाले (**वृषभम्**) बलिष्ठ (**सुवज्रम्**) सुन्दर शस्त्र और अस्त्रों के प्रयोगकर्त्ता (**इन्द्रम्**) अत्यन्त ऐश्वर्य्य युक्त राजा को स्वीकार करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पूर्णविद्यायुक्त, सत्यवादी, प्रगल्भ, बलिष्ठ, शस्त्र और अस्त्रों का चलाने वाला और अभयदाता पुरुष हो; उसी को राज्य के लिये नियत करो॥८॥

अथ राज्ञा कीदृशा अमात्यादयो भृत्या संरक्षणीया इत्याह॥

अब राजा को अमात्य आदि भृत्य कैसे रखने चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अयं वृतश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः।
अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्याम॥९॥

अ॒यम्। वृ॒तः। चा॒त॒य॒ते। स॒म्ऽई॒ची॒ः। यः। आ॒जिषु॑। म॒घऽवा॑। शृ॒ण्वे। एक॑ः। अ॒यम्। वाज॑म्। भ॒र॒ति॒। यम्। स॒नोति॑। अ॒स्य। प्रि॒यास॑ः। स॒ख्ये। स्या॒म॒॥ ९॥

पदार्थः-(**अयम्**) राजा (**वृतः**) (**चातयते**) विज्ञापयति। **चततीति गतिकर्म्मासु पठितम्।** (निघं०२.१४)। (**समीचीः**) याः सम्यगञ्चन्ति शिक्षाः प्राप्नुवन्ति ताः सेनाः (**यः**) (**आजिषु**) सङ्ग्रामेषु (**मघवा**) बहुधनैश्वर्यः (**शृण्वे**) (**एकः**) असहायः (**अयम्**) (**वाजम्**) विज्ञानम् (**भरति**) (**यम्**) (**सनोति**) सम्पन्नं करोति (**अस्य**) (**प्रियासः**) (**सख्ये**) मित्रस्य कर्मणि (**स्याम**) भवेम॥९॥

अन्वयः-हे राजन्! योऽयं वृतः सन्नबुद्धाञ्जातयते यो मघवैक आजिषु समीचीर्भरति। अयं वाजं भरति यमाप्तः सनोति यमहं शृण्वेऽस्य सख्ये वयं प्रियासः स्याम॥९॥

भावार्थः-हे राजन्! यः सेनाः शिक्षयति विशेषतो युद्धसमय उचितवक्तृत्वेन योधॄनुत्साहयति ये सम्मुखे भवद्दोषान् कथयन्ति तेषां शासने स्थित्वा तेष्वेव मैत्रीं भावयित्वा सर्वाणि कार्याणि साध्नुहि॥९॥

पदार्थः-हे राजन्! (**यः**) जो (**अयम्**) यह राजा (**वृतः**) स्वीकार किया हुआ बोधरहितों को (**चातयते**) विज्ञान करता है और जो (**मघवा**) बहुत धनरूप ऐश्वर्य्य से युक्त (**एकः**) अकेला अर्थात् सहायरहित (**आजिषु**) संग्रामों में (**समीचीः**) शिक्षाओं को प्राप्त होने वाली सेनाओं का (**भरति**) पोषण करता है (**अयम्**) और यह (**वाजम्**) विज्ञान को पुष्ट करता है (**यम्**) जिसको यथार्थवक्ता पुरुष [प्राप्त कर] (**सनोति**) संपन्न करता है, जिसको मैं (**शृण्वे**) सुनता हूँ (**अस्य**) इसके (**सख्ये**) मित्रकर्म्म में हम लोग (**प्रियासः**) प्रिय (**स्याम**) होवें॥९॥

भावार्थः-हे राजन्! जो सेनाओं को शिक्षा दिलाता है, विशेष करके युद्ध के समय में उचित बात कहने से योद्धाजनों का उत्साह बढ़ाता है और जो जन सम्मुख आपके दोषों को कहते हैं, उनकी शिक्षा में स्थित होकर, उन्हीं जनों में मित्रता करके सम्पूर्ण कार्य्यों को सिद्ध करो॥९॥

अथ राज्ञा राज्यकरणप्रकारमाह॥

अब राजा को राज्य करने का प्रकार अगले मन्त्र में कहते हैं॥

अ॒यं शृ॑ण्वे॒ अध॒ जय॑न्न॒त घ्नन्न॒यमु॒त प्र कृ॑णुते यु॒धा गाः।
य॒दा स॒त्यं कृ॑णु॒ते म॒न्युमिन्द्रो॒ विश्वं॑ दृ॒ळ्हं भ॑यत॒ एज॑दस्मात्॥ १०॥ २२॥

अ॒यम्। शृ॒ण्वे। अध॑। जय॑न्। उ॒त। घ्न॒न्। अ॒यम्। उ॒त। प्र। कृ॒णु॒ते॒। यु॒धा। गाः। य॒दा। स॒त्यम्। कृ॒णु॒ते। म॒न्युम्। इन्द्रः॑। विश्व॑म्। दृ॒ळ्हम्। भ॒य॒ते॒। एज॑त्। अ॒स्मा॒त्॥ १०॥

पदार्थः-(**अयम्**) (**शृण्वे**) (**अध**) (**जयन्**) शत्रून् पराजयन् (**उत**) अपि (**घ्नन्**) नाशयन् (**अयम्**) (**उत**) (**प्र**) (**कृणुते**) (**युधा**) युद्धेन (**गाः**) पृथिवीराज्यानि (**यदा**) (**सत्यम्**) (**कृणुते**) (**मन्युम्**) क्रोधम्

(इन्द्रः) परमैश्वर्यो राजा **(विश्वम्)** सर्वं राज्यम् **(दृळ्हम्)** सुस्थिरम् **(भयते)** बिभेति **(एजत्)** कम्पते **(अस्मात्)** राज्ञः॥१०॥

अन्वयः-हे राजन्! सुपरीक्ष्य वृतोऽयं जनः शत्रून् घ्नुतापि युधा जयन् गाः प्र कृणुते उत यमहं राज्यं कर्त्तुं शृण्वे यदाऽयं सत्यं कृणुते तदा विश्वं दृळ्हं भवति यदाऽयमिन्द्रो मन्युं कृणुतेऽध तदास्माद्विश्वं दृढमपि राज्यमेजत् सद्भयते॥१०॥

भावार्थः-हे राजन्! यां सुकीर्तिं भवाञ्छृणुयाद्ये च राज्यपालनयुद्धकुशलास्तान् वृत्वा सत्याचारेण वर्तित्वा शान्त्या सज्जनान् सम्पाल्य दुष्टान् भृशं दण्डयेत्तदैव सर्वे धर्मपथं विहायेतस्ततो न विचलेयुः॥१०॥

पदार्थः-हे राजन्! उत्तम प्रकार परीक्षा करके स्वीकार किया गया **(अयम्)** यह जन शत्रुओं का **(घ्नन्)** नाश करता है और **(उत)** भी **(युधा)** युद्ध से **(जयन्)** शत्रुओं को पराजित करता हुआ **(गाः)** पृथिवी के राज्यों को **(प्र, कृणुते)** उत्तम प्रकार करता है **(उत)** और **(शृण्वे)** जिसको मैं राज्य करने को सुनता हूँ **(यदा)** जब **(अयम्)** यह **(सत्यम्)** सत्य को **(कृणुते)** करता है तब **(विश्वम्)** सब राज्य **(दृळ्हम्)** उत्तम प्रकार स्थिर होता है, जब यह **(इन्द्रः)** अत्यन्त ऐश्वर्यवाला राजा **(मन्युम्)** क्रोध को करता है **(अध)** इसके अनन्तर तब **(अस्मात्)** इस राजा से सम्पूर्ण उत्तम प्रकार स्थिर भी राज्य **(एजत्)** कंपता हुआ **(भयते)** डरता है॥१०॥

भावार्थः-हे राजन्! जिस उत्तम कीर्त्ति को आप सुनें और जो लोग राज्यपालन और युद्ध में चतुर हों उनका स्वीकार करके सत्याचार से वर्ताव कर शान्ति से सज्जनों का अच्छे प्रकार पालन करके दुष्टजनों को निरन्तर दण्ड देवें, तभी सब जन धर्म के मार्ग का त्याग करके इधर-उधर न चलित होवें॥१०॥

अथ राजा कथं विजयमानन्दं च प्राप्नोतीत्याह॥

अब राजा कैसे विजय और आनन्द को प्राप्त होता है, इस विषय को अगले मन्त्र में कहते हैं॥

समिन्द्रो गा अजयत् सं हिरण्या समश्विया मघवा यो ह पूर्वीः।
एभिर्नृभिर्नृतमो अस्य शाकै रायो विभक्ता संभरश्च वस्वः॥११॥

सम्। इन्द्रः। गाः। अजयत्। सम्। हिरण्या। सम्। अश्विया। मघऽवा। यः। ह। पूर्वीः। एभिः। नृऽभिः। नृऽतमः। अस्य। शाकैः। रायः। विऽभक्ता। सम्ऽभरः। च। वस्वः॥११॥

पदार्थः-(**सम्**) सम्यक् **(इन्द्रः)** शत्रुविदारकः **(गाः)** भूमीः **(अजयत्)** जयेत् **(सम्)** **(हिरण्या)** सुवर्णादीनि धनानि **(सम्)** **(अश्विया)** अश्वादियुक्तानि **(मघवा)** पूजितधनः **(यः)** **(ह)** खलु **(पूर्वीः)** प्राचीनाः प्रजाः **(एभिः)** **(नृभिः)** नायकैः सह **(नृतमः)** अतिशयेन नेता **(अस्य)** सैन्यस्य **(शाकैः)**

शक्तिभिः **(रायः)** धनस्य **(विभक्ता)** विभागकर्त्ता **(सम्भरः)** यः सम्भरति सः **(च)** **(वस्वः)** धनानि॥११॥

अन्वयः-हे मनुष्या! यो मघवेन्द्र एभिर्नृभिः सह नृतमः सन् गाः समजयदश्विया हिरण्या समजयद्यो ह पूर्वीः प्रजाः समजयत्। योऽस्य शाकै रायो विभक्ता वस्वश्च सम्भरो भवेत् स एव राज्यं कर्त्तुमर्हेत्॥११॥

भावार्थः-य उत्तमसहायः प्रशस्तधनसामग्री शत्रूणां जेता यथार्हेभ्यो विभज्य दाता विचक्षणो राजा भवेत् स एव विजयं प्राप्य मोदेत॥११॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(मघवा)** श्रेष्ठधनयुक्त **(इन्द्रः)** शत्रुओं का नाशकर्त्ता **(एभिः)** इन **(नृभिः)** नायकों के साथ **(नृतमः)** अतिशय नायक हुआ **(गाः)** भूमियों को **(सम्)** उत्तम प्रकार **(अजयत्)** जीते **(अश्विया)** घोड़े आदि से युक्त **(हिरण्या)** सुवर्ण आदि धनों को **(सम्)** उत्तम प्रकार जीते जो **(ह)** निश्चय से **(पूर्वीः)** प्राचीन प्रजाओं को **(सम्)** उत्तम प्रकार जीते और जो **(अस्य)** इस सेना की **(शाकैः)** शक्तियों से **(रायः)** धन का **(विभक्ता)** विभाग करने वाला **(वस्वः)** धनों को **(च)** और **(सम्भरः)** इकट्ठा करने वाला होवे, वही राज्य करने को योग्य होवे॥११॥

भावार्थः-जो उत्तम सहाय और उत्तम धन सामग्रीयुक्त तथा शत्रुओं का जीतने और यथायोग्यों के लिये विभाग करके देनेवाला विद्वान् राजा होवे, वही विजय को प्राप्त होकर आनन्द करे॥११॥

अथ प्रजाजनेषु कस्य राज्ययोग्यतेत्याह॥

अब प्रजाजनों में किसकी राज्य की योग्यता है, इस विषय को अगले मन्त्र में कहते हैं॥

कियꣳत्स्विदिन्द्रो अध्येति मातुः कियꣳत्पितुर्जनितुर्यो जजान।
यो अꣳस्य शुष्मꣳ मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः॥१२॥

कियꣳत्। स्वित्। इन्द्रः। अधि। एति। मातुः। कियꣳत्। पितुः। जनितुः। यः। जजानꣳ। यः। अस्य। शुष्मम्। मुहुकैः। इयर्ति। वातः। न। जूतः। स्तनयꣳत्भिः। अभ्रैः॥१२॥

पदार्थः-**(कियत्)** **(स्वित्)** अपि **(इन्द्रः)** **(अधि, एति)** स्मरति **(मातुः)** **(कियत्)** **(पितुः)** **(जनितुः)** जनकस्य **(यः)** **(जजान)** जायते **(यः)** **(अस्य)** **(शुष्मम्)** बलम् **(मुहुकैः)** मुहुर्मुहुः कुर्वद्भिः **(इयर्ति)** गच्छति **(वातः)** वायुः **(न)** इव **(जूतः)** प्राप्तवेगः **(स्तनयद्भिः)** शब्दायमानैः **(अभ्रैः)** घनैः सह॥१२॥

अन्वयः-यो मुहुकैरस्य शुष्मं स्तनयद्भिरभ्रैः सह जूतो वातो न विजयमियर्ति यः स्विदिन्द्रो मातुः कियज्जनितुः पितुः कियदध्येति स एव राजा जजान॥१२॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या मातुः पितुः कियानुपकारोऽस्तीति विज्ञाय प्रत्युपकुर्वन्ति ते मेघवायुभ्यां प्रेरिता विद्युदिव बलं प्राप्य वारं वारं शत्रून् विजित्य प्रकटकीर्त्तयो भवन्ति॥१२॥

पदार्थः-(**यः**) जो (**मुहुकैः**) बारंबार कार्य्य करने वालों से (**अस्य**) इसके (**शुष्मम्**) बल को (**स्तनयद्भिः**) शब्द करते हुए (**अभ्रैः**) मेघों के साथ (**जूतः**) वेग को प्राप्त (**वातः**) वायु के (**न**) तुल्य विजय को (**इयर्ति**) प्राप्त होता है और (**यः**) जो (**स्वित्**) कोई (**इन्द्रः**) तेजस्वी (**मातुः**) माता का (**कियत्**) कितना और (**जनितुः**) उत्पन्न करने वाले (**पितुः**) पिता का (**कियत्**) कितना उपकार (**अधि, एति**) स्मरण करता है, वही राजा (**जजान**) होता है॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य माता और पिता का कितना उपकार है, ऐसा जानकर प्रत्युपकार करते हैं, वे मेघ और वायु से प्रेरित बिजुली के सदृश बल को प्राप्त होकर बारंबार शत्रुओं को जीतकर प्रकट यश वाले होते हैं॥१२॥

अथा राज्ञोत्तमानुत्तमयोर्दण्डसत्कारौ कर्त्तव्यावित्याह॥

अब राजा को उत्तम और अनुत्तम का दण्ड और सत्कार करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

क्षियन्तं॑ त्व॒मक्षि॑यन्तं कृणो॒तीय॑र्ति रे॒णुं म॒घवा॑ स॒मोह॑म्।
वि॒भञ्ज॒नुर॒शनि॑माँइव॒ द्यौरु॒त स्तो॒तारं॑ म॒घवा॒ वसौ॑ धात्॥ १३॥

क्षि॒यन्त॑म्। त्व॒म्। अक्षि॑यन्तम्। कृ॒णो॒ति॒। इय॑र्ति। रे॒णुम्। म॒घऽवा॑। स॒म्ऽओह॑म्। वि॒ऽभ॒ञ्ज॒नुः। अ॒शनि॑मान्ऽइव। द्यौः। उ॒त। स्तो॒तार॑म्। म॒घऽवा॑। वसौ॑। धा॒त्॥ १३॥

पदार्थः-(**क्षियन्तम्**) निवसन्तम् (**त्वम्**) (**अक्षियन्तम्**) न निवसन्तम् (**कृणोति**) (**इयर्त्ति**) प्राप्नोति (**रेणुम्**) अपराधम् (**मघवा**) (**समोहम्**) सम्यग्गूढम् (**विभञ्जनुः**) शत्रूणां विभञ्जकः (**अशनिमानिव**) यथा बहुशस्त्राऽस्त्रः (**द्यौः**) प्रकाशः (**उत**) (**स्तोतारम्**) ऋत्विजम् (**मघवा**) (**वसौ**) धने (**धात्**) दधाति॥१३॥

अन्वयः-हे राजन्! यथा मघवा स्तोतारं वसौ धात्तथा यो द्यौरिवोताप्यशनिमानिव विभञ्जनुस्सन् मघवा क्षियन्तमक्षियन्तं कृणोति समोहं रेणुमियर्त्ति तं त्वं शिक्षय॥१३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः [=अत्र वाचकलुप्तोपमालङ्कारः]। हे राजँस्त्वं योऽपराधं कुर्य्यात्तं दण्डेन विना मा त्यजेः। यथा यजमानो विद्वांसं यज्ञे वृत्वा धनं दत्वा सुखयति तथैव श्रेष्ठान् सभासदो वृत्वैश्वर्य्यं दत्वा सर्वानानन्दय॥१३॥

पदार्थः-हे राजन्! जैसे (**मघवा**) अत्यन्त धनयुक्त पुरुष (**स्तोतारम्**) यज्ञ करनेवाले को (**वसौ**) धन में (**धात्**) धारण करता है, वैसे जो (**द्यौः**) प्रकाश के सदृश (**उत**) और भी (**अशनिमानिव**) बहुत शस्त्र और अस्त्र वाले के सदृश (**विभञ्जनुः**) शत्रुओं का नाश करता हुआ (**मघवा**) श्रेष्ठधन से युक्त

पुरुष **(क्षियन्तम्)** निवास करते और **(अक्षियन्तम्)** नहीं निवास करते हुए को **(कृणोति)** स्वीकार करता है **(समोहम्)** उत्तम प्रकार से छिपे हुए **(रेणुम्)** अपराध को **(इयर्ति)** प्राप्त होता है, उसको **(त्वम्)** आप शिक्षा दीजिये॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! आप जो अपराध करे उसको दण्ड के विना मत छोड़ो और जैसे यजमान विद्वान् जन को यज्ञ में स्वीकार करके धन देके सुख देता है, वैसे ही श्रेष्ठ सभासदों को स्वीकार करके ऐश्वर्य दे सब को आनन्द दीजिये॥१३॥

अथ राज्ञा वेगवन्ति यन्त्राणि निर्माय दुष्टसंशोधनं कार्यमित्याह॥

अब राजा को वेगवान् यन्त्रों को बनाय दुष्टसंशोधन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अयं चक्रमिषणत्सूर्यस्य न्येतशं रीरमत्ससृमाणम्।

आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ॥१४॥

अयम्। चक्रम्। इषणत्। सूर्यस्य। नि। एतशम्। रीरमत्। ससृमाणम्। आ। कृष्णः। ईम्। जुहुराणः। जिघर्ति। त्वचः। बुध्ने। रजसः। अस्य। योनौ॥१४॥

पदार्थः-(**अयम्**) (**चक्रम्**) (**इषणत्**) इष्णाति प्राप्नोति (**सूर्यस्य**) (**नि**) (**एतशम्**) अश्वम् (**रीरमत्**) रमयति (**ससृमाणम्**) भृशं गच्छन्तम् (**आ**) (**कृष्णः**) कर्षकः (**ईम्**) जलम् (**जुहुराणः**) कुटिलगतिः (**जिघर्त्ति**) क्षरति (**त्वचः**) वाचः (**बुध्ने**) अन्तरिक्षे (**रजसः**) लोकसमूहस्य (**अस्य**) (**योनौ**) गृहे॥१४॥

अन्वयः-हे राजन्! भवान् यथाऽयं सूर्यस्य मण्डलमिव चक्रमिषणत् ससृमाणमेतशं नि रीरमत् कृष्णो जुहुराण इवेमाजिघर्त्ति त्वचो रजसोऽस्य बुध्ने योनौ रमत इति विज्ञायेमं सत्कृत्य दुष्टं ताडय॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः कलाकौशलेन चक्रयन्त्राणि निर्माय वेगवन्ति यानान्यासाद्य रमन्ते ते ऐश्वर्यं प्राप्य कुटिलतां विहाय सुखयन्ति॥१४॥

पदार्थः-हे राजन्! आप जैसे **(अयम्)** यह **(सूर्यस्य)** सूर्य के मण्डल के सदृश **(चक्रम्)** चक्र को **(इषणत्)** प्राप्त होता है **(ससृमाणम्)** निरन्तर प्राप्त होते हुए **(एतशम्)** घोड़े को **(नि, रीरमत्)** रमाता है **(कृष्णः)** खीचने वाला **(जुहुराणः)** कुटिल गमन वाले के सदृश **(ईम्)** जल को **(आ, जिघर्ति)** नष्ट करता है **(त्वचः)** वाणी के संबन्ध में **(रजसः)** लोकसमूह और **(अस्य)** इसके **(बुध्ने)** अन्तरिक्ष और **(योनौ)** गृह में रमता है, ऐसा जानकर इसका सत्कार करके दुष्ट पुरुष को ताड़न दीजिये॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य कलाकौशल से चक्रयन्त्रों का निर्म्माण करके वेगयुक्त वाहनों को प्राप्त होकर रमण करते हैं, वे ऐश्वर्य को प्राप्त होकर और कुटिलता

को त्याग करके सुख को प्राप्त होते हैं॥१४॥

अथ राजदण्डप्रकर्षतामाह॥

अब राजदण्ड की प्रकर्षता को अगले मन्त्र में कहते हैं॥

असिक्न्यां यजमानो न होता॥ १५॥ २३॥

असिक्न्याम्। यजमानः। न। होता॥ १५॥

पदार्थः-(**असिक्न्याम्**) रात्रौ। **असिक्नीति रात्रिनामसु पठितम्।** (निघं०१.७) **(यजमानः)** सङ्गन्ता **(न)** इव **(होता)** सुखस्य दाता॥१५॥

अन्वयः-यो राजा यजमानो नाऽसिक्न्यामभयस्य होता स्यात् स एव सततं मोदेत॥१५॥

भावार्थः-यस्य राज्ञः प्रजाजनेषु प्राणिषु सुप्तेषु दण्डो जागर्त्ति सोऽभयदः कुतश्चिदपि भयं नाऽऽप्नोति॥१५॥

पदार्थः-जो राजा **(यजमानः)** मेल करने वाले के **(न)** सदृश **(असिक्न्याम्)** रात्रि में भयरहित **(होता)** सुख को देनेवाला होवे, वही निरन्तर आनन्द करे॥१५॥

भावार्थः-जिस राजा के प्रजाजनों में प्राणियों वा शयन किये हुओं में दण्ड जागता है, वह अभय का देने वाला पुरुष किसी से भी भय को नहीं प्राप्त होता है॥१५॥

अथ प्रजाभ्यः कथं सुखमैश्वर्यं चाह॥

अब प्रजाजनों को कैसे सुख और ऐश्वर्य हो, इस विषय को अगले मन्त्र में कहते हैं॥

गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः।

जनीयन्तो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशम्॥ १६॥

गव्यन्तः। इन्द्रम्। सख्याय। विप्राः। अश्वऽयन्तः। वृषणम्। वाजयन्तः। जनिऽयन्तः। जनिऽदाम्। अक्षितऽऊतिम्। आ। च्यवयामः। अवते। न। कोशम्॥ १६॥

पदार्थः-(**गव्यन्तः**) आत्मनो गा इच्छन्तः **(इन्द्रम्)** सूर्य्य इव प्रकाशमानं राजानम् **(सख्याय)** मित्रस्य भावाय कर्मणे वा **(विप्राः)** मेधाविनः **(अश्वायन्तः)** आत्मनोऽश्वानिच्छन्तः **(वृषणम्)** सुखवर्षकम् **(वाजयन्तः)** विज्ञानमन्नं वेच्छन्तः **(जनीयन्तः)** जायामिच्छन्तः **(जनिदाम्)** या जनिं जन्म ददाति **(अक्षितोतिम्)** अक्षीणा ऊती रक्षा यस्य तम् **(आ)** **(च्यावयामः)** प्रापयामः **(अवते)** कूपे। **अवत इति कूपनामसु पठितम्।** (निघं०३.२३) **(न)** इव **(कोशम्)** मेघम्॥१६॥

अन्वयः-हे मनुष्या! यथा गव्यन्तोऽश्वायन्तो वाजयन्तो जनीयन्तो विप्रा वयं सख्याय वृषणं जनिदामक्षितोतिमवते कोशं नेन्द्रमाच्यावयामस्तथैतं यूयमप्येनमन्यान् प्रापयत॥१६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। येषां सुखैश्वर्येच्छा स्यात्ते मेघ इव धनवर्षकं नित्यरक्षं राजानं मित्रत्वाय सङ्गृह्णीयुः॥१६॥

पदार्थः-हे मनुष्यो! जैसे **(गव्यन्तः)** अपनी गौओं की इच्छा **(अश्वायन्तः)** अपने घोड़ों की इच्छा **(वाजयन्तः)** विज्ञान वा अन्न की इच्छा **(जनीयन्तः)** तथा स्त्री की इच्छा करते हुए **(विप्राः)** बुद्धिमान् हम लोग **(सख्याय)** मित्र होने के वा मित्रकर्म के लिये **(वृषणम्)** सुख के वर्षाने वाले पिता **(जनिदाम्)** जन्म देनेवाली माता **(अक्षितोतिम्)** वा जिसकी रक्षा क्षीण नहीं होती, उस नित्यरक्षक पुरुष को और **(अवते)** कूप में **(कोशम्)** मेघ के **(न)** सदृश **(इन्द्रम्)** वा सूर्य्य के सदृश प्रकाशमान राजा को **(आ, च्यावयामः)** प्राप्त करावें, वैसे इस सब को आप लोग भी औरों को प्राप्त कराओ॥१६॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। जिनको सुख और ऐश्वर्य्य की इच्छा होवे, वे मेघ के सदृश धन वर्षाने और नित्य रक्षा करनेवाले राजा को मित्रभाव के लिये ग्रहण करें॥१६॥

अथेश्वरोपासनाविषयमाह॥

अब ईश्वरोपासना विषय को अगले मन्त्र में कहते हैं॥

त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानाम्।
सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः॥१७॥

त्राता। नः। बोधि। ददृशानः। आपिः। अभिऽख्याता। मर्डिता। सोम्यानाम्। सखा॥ पिता। पितृऽतमः। पितॄणाम्। कर्ता। ईम्। ऊम् इति। लोकम्। उशते। वयःऽधाः॥१७॥

पदार्थः-(**त्राता**) रक्षकः (**नः**) अस्माकमस्मान् वा (**बोधि**) बुध्यस्व (**ददृशानः**) सम्प्रेक्षकः (**आपिः**) व्याप्तः (**अभिख्याता**) आभिमुख्येनान्तर्यामितयोपदेष्टा (**मर्डिता**) सुखयिता (**सोम्यानाम्**) सोमवच्छान्त्यादिगुणयुक्तानाम् (**सखा**) सुहृत् (**पिता**) जगतो जनकः (**पितृतमः**) अतिशयेन पालकः (**पितॄणाम्**) जनकानां पालकानाम् (**कर्त्ता**) (**ईम्**) सर्वम् (उ) (**लोकम्**) (**उशते**) कामयमानाय (**वयोधाः**) यो वयो जीवनं कमनीयं वस्तु दधाति सः॥१७॥

अन्वयः-हे विद्वन्! यो नस्त्राता ददृशान आपिरभिख्याता मर्डिता सखा पिता सोम्यानां पितॄणां पितृतमः कर्त्ता लोकमुशत ईमु वयोधा जगदीश्वरोऽस्ति तं बोधि॥१७॥

भावार्थः-हे मनुष्या! यो जगदीश्वरो मित्रवत्सर्वेषां सुखकरस्सत्योपदेष्टा जनकानां जनकः पालकानां पालकः सर्वेषां कर्मणां द्रष्टा न्यायाधीशोऽन्तर्याम्यभिव्याप्तोऽस्ति तमेव विज्ञायोपाध्वम्॥१७॥

पदार्थः-हे विद्वन्! जो **(नः)** हम लोगों का वा हम लोगों को **(त्राता)** रक्षा करने **(ददृशानः)** उत्तम प्रकार देखने **(आपिः)** व्याप्त रहने **(अभिख्याता)** सम्मुख अन्तर्यामीपने से उपदेश देने **(मर्डिता)** सुख देने और **(सखा)** मित्र **(पिता)** संसार का उत्पन्न करने वाला **(सोम्यानाम्)** चन्द्रमा के तुल्य शान्ति आदि गुणों से युक्त **(पितॄणाम्)** उत्पन्न वा पालन करने वालों का **(पितृतमः)** अत्यन्त पालन करने वाला

(कर्त्ता) कर्त्तापुरुष **(लोकम्)** लोक की **(उशते)** कामना करते हुए के लिये **(ईम्)** सब को **(उ)** ही **(वयोधाः)** जीवन वा सुन्दर वस्तु का धारण करने वाला जगदीश्वर है, ऐसा उसको **(बोधि)** जानो॥१७॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर मित्र के तुल्य सब का सुखकर्त्ता, सत्य का उपदेश देनेवाला, उत्पन्न करने वालों का उत्पन्नकर्त्ता, पालन करने वालों का पालनकर्त्ता, सब कर्म्मों का देखने वाला, न्यायाधीश, अन्तर्य्यामी अभिव्याप्त है, उसी को जानकर उपासना करो॥१७॥

अथ राज्यवर्द्धनप्रकारमाह॥

अब राज्यवर्द्धन प्रकार को अगले मन्त्र में कहते हैं॥

सखीयतामविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः।
वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयन्त इन्द्र॥१८॥

सखिऽयताम्। अविता। बोधि। सखा। गृणानः। इन्द्र। स्तुवते। वयः। धाः। वयम्। हि। आ। ते। चकृम। सऽबाधः। आभिः। शमीभिः। महयन्तः। इन्द्र॥१८॥

पदार्थः-(**सखीयताम्**) सखेवाचरताम् **(अविता)** **(बोधि)** बुध्यस्व **(सखा)** सुहृत् **(गृणानः)** स्तुवन् **(इन्द्र)** परमैश्वर्य्यप्रद **(स्तुवते)** प्रशंसकाय **(वयः)** कमनीयं धनम् **(धाः)** धेहि **(वयम्)** **(हि)** **(आ)** **(ते)** तव **(चकृमा)** कुर्य्याम। अत्र **संहितायामिति** दीर्घः। **(सबाधः)** बाधेन सह वर्त्तमानः **(आभिः)** **(शमीभिः)** क्रियाभिः **(महयन्तः)** महानिवाचरन्तः **(इन्द्र)** सूर्य इव विद्याविनयप्रकाशित॥१८॥

अन्वयः-हे इन्द्र! सखीयतां सखाविता गृणानः सन् स्तुवते वयो धाः। हे इन्द्र! ये वयं हि ते तुभ्यमाभिः शमीभिर्महयन्तस्सन्तो वयश्चकृमा ताँस्त्वं सबाधः सन्नाऽबोधि॥१८॥

भावार्थः-हे राजन्! यदि वर्धयितुं भवानिच्छेत्तर्हि पक्षपातं विहाय सर्वैः सह मित्रवद्वर्त्तताम्। श्रेष्ठान् रक्षान् दुष्टान् दण्डयन्त्स्वतेजः प्रख्यापयताम्॥१८॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देनेवाले **(सखीयताम्)** मित्र के सदृश आचरण करते हुए पुरुषों के **(सखा)** मित्र **(अविता)** रक्षा करने वाले **(गृणानः)** स्तुति करते हुए **(स्तुवते)** प्रशंसा करनेवाले के लिये **(वयः)** सुन्दर धन को **(धाः)** धारण कीजिये। और हे **(इन्द्र)** सूर्य्य के सदृश विद्या और विनय से प्रकाशित जो **(वयम्)** हम लोग **(हि)** ही **(ते)** आपके लिये **(आभिः)** इन **(शमीभिः)** क्रियाओं से **(महयन्तः)** बड़े के सदृश आचरण करते हुए **(वयः)** सुन्दर धन को **(चकृमा)** करें उनको आप **(सबाधः)** विलोडन के सहित वर्त्तमान होते हुए **(आ, बोधि)** अच्छे प्रकार जानिये॥१८॥

भावार्थः-हे राजन्! यदि राज्य बढ़वाने की आप इच्छा करें तो पक्षपात का त्याग करके सब के साथ मित्र के सदृश वर्त्ताव करिये और श्रेष्ठ पुरुषों की रक्षा करते और दुष्ट पुरुषों को दण्ड देते हुए अपने तेज की प्रसिद्धि करिये॥१८॥

पुनः कीदृशाञ्जनान् राजा राज्यकर्म्मसु रक्षेदित्याह॥

फिर कैसे जनों को राजा राज्यकर्म्मों में रक्खे, इस विषय को अगले मन्त्र में कहते हैं॥

स्तुत इन्द्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हन्ति।
अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयन्ते न मर्ताः॥ १९॥

स्तुतः। इन्द्रः। मघऽवा। यत्। ह। वृत्रा। भूरीणि। एकः। अप्रतीनि। हन्ति। अस्य। प्रियः। जरिता। यस्य। शर्मन्। नकिः। देवाः। वारयन्ते। न। मर्ताः॥ १९॥

पदार्थः-(**स्तुतः**) प्रशंसितः (**इन्द्रः**) सूर्य्य इव राजा (**मघवा**) बह्वैश्वर्ययुक्तः (**यत्**) यः (**ह**) किल (**वृत्रा**) वृत्राणि मेघावयवान् (**भूरीणि**) बहूनि (**एकः**) असहायः सन् (**अप्रतीनि**) अप्रीतानि (**हन्ति**) (**अस्य**) (**प्रियः**) कमनीयः (**जरिता**) स्तोता (**यस्य**) (**शर्मन्**) गृहे (**नकिः**) निषेधे (**देवाः**) विद्वांसः (**वारयन्ते**) निषेधयन्ति (**न**) (**मर्त्ताः**) अविद्वांसो मनुष्याः॥ १९॥

अन्वयः-हे राजन्! यस्य शर्मन् प्रियो जरिता स्तुतो मघवेन्द्रो यथा सूर्य्योऽप्रतीनि भूरीणि वृत्रैकोऽपि हन्ति तथैव यद्योऽसहायोऽस्य सेनाया ह विद्वान् बहूनां हन्ता वर्त्तेत तं देवा नकिर्वारयन्ते न मर्त्ताश्च॥ १९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सत्योपदेशकान्त्स्वप्रियकारकान् विदुषो राज्यकृत्ये रक्षेत् तस्य पराजयं कर्त्तुं कोऽपि न समर्थो भवेत्॥ १९॥

पदार्थः-हे राजन्! (**यस्य**) जिसके (**शर्मन्**) गृह में (**प्रियः**) मनोहर (**जरिता**) स्तुति करने वाला (**स्तुतः**) प्रशंसित (**मघवा**) बहुत ऐश्वर्य्य से युक्त (**इन्द्रः**) सूर्य्य के सदृश प्रतापी राजा जैसे सूर्य्य (**अप्रतीनि**) नहीं प्रतीत (**भूरीणि**) बहुत (**वृत्रा**) मेघों के अवयवों को (**एकः**) सहायरहित अर्थात् अकेला भी (**हन्ति**) नाश करता है, वैसे ही (**यत्**) जो असहाय (**अस्य**) इसकी सेना में (**ह**) निश्चय से विद्वान् बहुतों का नाश करने वाला वर्त्ताव करे उसको (**देवाः**) विद्वान् लोग (**नकिः**) नहीं (**वारयन्ते**) रोकते हैं और (**न**) न (**मर्त्ताः**) अविद्वान् लोग॥ १९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सत्य के उपदेशक अपने प्रियकारक विद्वानों की राजकृत्य में रक्षा करे, उसका पराजय करने को कोई भी नहीं समर्थ होवे॥ १९॥

अथामात्यजनादिभी राज्ञो न्याये प्रवर्त्तयनमाह॥

अब अमात्य आदि जनों से राजा की न्याय के बीच प्रवृत्ति कराने को अगले मन्त्र में कहते हैं॥

एवा न इन्द्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा।
त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे॥ २०॥

एव। नः। इन्द्रः। मघऽवा। विऽरप्शी। करत्। सत्या। चर्षणिऽधृत्। अनर्वा। त्वम्। राजा। जनुषाम्। धेहि। अस्मे इति। अधि। श्रवः। माहिनम्। यत्। जरित्रे॥ २०॥

पदार्थः-(**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मभ्यम् (**इन्द्रः**) राजा (**मघवा**) धनप्रदः (**विरप्शी**) महान् (**करत्**) कुर्य्यात् (**सत्या**) अविनश्वराणि (**चर्षणीधृत्**) यो मनुष्यान् धरति (**अनर्वा**) अविद्यमाना अश्वा यस्य सः (**त्वम्**) (**राजा**) प्रकाशमानः (**जनुषाम्**) जन्मवताम् (**धेहि**) (**अस्मे**) अस्माकम् (**अधि**) (**श्रवः**) श्रवणमन्नं वा (**माहिनम्**) महत् (**यत्**) यः (**जरित्रे**) स्तावकाय॥२०॥

अन्वयः-हे राजन्! यद्यो नो राजा मघवा विरप्शी चर्षणीधृदनर्वेन्द्रस्त्वं सत्या करत् स एवा त्वं जनुषामस्मे माहिनं श्रवोऽधिधेह्येवं जरित्रे च॥२०॥

भावार्थः-ये मनुष्या अन्याये प्रवर्त्तमानं राजानं निरुन्धन्ति ते सत्यप्रचारकाः सन्तो महत्सुखं प्राप्नुवन्ति॥२०॥

पदार्थः-हे राजन्! (**यत्**) जो (**नः**) हम लोगों के लिये (**राजा**) प्रकाशमान (**मघवा**) धनदाता (**विरप्शी**) बड़े (**चर्षणीधृत्**) मनुष्यों को धारण करने वाले (**अनर्वा**) घोड़ों से रहित (**इन्द्रः**) राजा (**त्वम्**) आप (**सत्या**) नहीं नाश होने वाले कार्यों को (**करत्**) सिद्ध करें (**एवा**) वही आप (**जनुषाम्**) जन्म वाले (**अस्मे**) हम लोगों के (**माहिनम्**) बड़े (**श्रवः**) श्रवण वा अन्न को (**अधि, धेहि**) अधिक धारण करें, इसी प्रकार (**जरित्रे**) स्तुति करनेवाले के लिये भी॥२०॥

भावार्थः-जो मनुष्य अन्याय में प्रवर्त्तमान राजा को रोकते हैं, वे सत्य के प्रचार करनेवाले होते हुए बड़े सुख को प्राप्त होते हैं॥२०॥

अथामात्यादीनामपि कार्यप्रवृत्तिमाह॥

अब अमात्यादिकों की भी कार्य प्रवृत्ति को अगले मन्त्र में कहते हैं॥

नू ष्टुत इ॑न्द्र नू गृ॑णान इषं॑ जरि॒त्रे न॒द्यो३॑ न पी॑पेः।
अका॑रि ते हरिवो॒ ब्रह्म॒ नव्यं॑ धि॒या स्या॑म र॒थ्यः॑ सदा॒साः॥२१॥२४॥

नु। स्तु॒तः। इ॒न्द्र॒। नु। गृ॒णा॒नः। इष॑म्। ज॒रि॒त्रे। न॒द्यः॑। न। पी॒पे॒रिति॑ पीपेः। अका॑रि। ते॒। हरि॒ऽवः॒। ब्रह्म॑। नव्य॑म्। धि॒या। स्या॒म॒। र॒थ्यः॑। स॒दा॒ऽसाः॥२१॥

पदार्थः-(**नू**) सद्यः (**स्तुतः**) प्रशंसितः (**इन्द्र**) राजन् (**नू**) अत्र **ऋचि तुनुघे**त्युभयत्र दीर्घः। (**गृणानः**) सत्यं स्तुवन् (**इषम्**) अन्नं विज्ञानं वा (**जरित्रे**) स्तावकाय (**नद्यः**) सरितः (**न**) इव (**पीपेः**) वर्धय (**अकारि**) क्रियते (**ते**) (**हरिवः**) प्रशस्तमनुष्ययुक्त (**ब्रह्म**) महद्धनम् (**नव्यम्**) नूतनम् (**धिया**) प्रज्ञया कर्मणा वा (**स्याम**) भवेम (**रथ्यः**) बहुरथवन्तः (**सदासाः**) सेवकैः सह वर्त्तमानाः॥२१॥

अन्वयः-हे हरिव इन्द्र! यो गृणानस्त्वमस्माभिर्नू स्तुतोऽकारि स जरित्रे नद्यो नेषं पीपेः। हे इन्द्र! त्वया नव्यं ब्रह्म न्वकारि तस्य ते वयं सदासा रथ्यो धियाऽनुकूलाः स्याम॥२१॥

भावार्थः-हे मनुष्या! योऽनुत्तमगुणकर्मस्वभावविद्यः प्रजाहिताय धनाऽन्नानि वर्धयति तस्याऽऽनुकूल्येन वर्त्तित्वा सेनाऽङ्गानि दृढानि सम्पादनीयानीति॥ २१॥

अथेन्द्रराजप्रजाभृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तदशं सूक्तं चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(हरिवः)** श्रेष्ठ मनुष्यों से युक्त **(इन्द्र)** राजन्! जो **(गृणानः)** सत्य की स्तुति करते हुए आप हम लोगों से **(नू)** शीघ्र **(स्तुतः)** प्रशंसित **(अकारि)** किये गये वह आप **(जरित्रे)** स्तुति करने वाले के लिये **(नद्यः)** नदियों के **(न)** सदृश **(इषम्)** अन्न वा विज्ञान को **(पीपेः)** बढ़ाओ और हे राजन्! आप से **(नव्यम्)** नवीन **(ब्रह्म)** बड़ा धन **(नू)** निश्चय से किया गया उन **(ते)** आपके हम लोग **(सदासाः)** सेवकों के साथ वर्त्तमान **(रथ्यः)** बहुत वाहनों से युक्त **(धिया)** बुद्धि वा कर्म से अनुकूल **(स्याम)** होवें॥ २१॥

भावार्थः-हे मनुष्यो! जो अति उत्तम गुण, कर्म, स्वभाव और विद्या से युक्त और प्रजा के हित के लिये धन और अन्नों को बढ़ाता है, उसके अनुकूलपन से वर्त्ताव करके सेना के अङ्गों का दृढ़ सम्पादन करना चाहिये॥ २१॥

इस सूक्त में इन्द्र, राजा, प्रजा और भृत्यों के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्रहवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

अथ त्रयोदशर्चस्याष्टादशस्य सूक्तस्य वामदेव ऋषिः। इन्द्रादिती देवते। १, ८, १२ त्रिष्टुप्। ५-७, ९-११ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ पङ्क्तिः। ३, ४ भुरिक् पङ्क्तिः। १३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्राय मनुष्याय सन्मार्गोपदेशमाह॥

अब तेरह ऋचावाले अठारहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में उत्तम ऐश्वर्यवान् मनुष्य के लिये अच्छे मार्ग का उपदेश करते हैं॥

अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे।
अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः॥ १॥

अयम्। पन्थाः। अनुऽवित्तः। पुराणः। यतः। देवाः। उत्ऽअजायन्त। विश्वे। अतः। चित्। आ। जनिषीष्ट। प्रऽवृद्धः। मा। मातरम्। अमुया। पत्तवे। करिति कः॥ १॥

पदार्थः-(**अयम्**) (**पन्थाः**) मार्गः (**अनुवित्तः**) अनुलब्धः (**पुराणः**) सनातनः (**यतः**) यस्मात् (**देवाः**) विद्वांसः (**उदजायन्त**) उत्कृष्टा भवन्ति (**विश्वे**) सर्वे (**अतः**) अस्मात् (**चित्**) अपि (**आ**) (**जनिषीष्ट**) जायेत (**प्रवृद्धः**) (**मा**) निषेधे (**मातरम्**) जननीम् (**अमुया**) तया (**पत्तवे**) पत्तुं प्राप्तुम् (**कः**) कुर्याः॥ १॥

अन्वयः-हे मनुष्या! यतो विश्वे देवा उदजायन्त सोऽयमनुवित्तः पुराणः पन्था अस्ति। यतोऽयं संसारः प्रवृद्धो जनिषीष्टाऽतश्चित्त्वममुया मातरं पत्तवे माऽकः॥ १॥

भावार्थः-हे मनुष्या! येन मार्गेणाप्ता गच्छेयुस्तेनैव मार्गेण यूयमपि गच्छत। यदि महती वृद्धिरपि स्यात्तदपि माता केनापि नाऽवमन्तव्या॥ १॥

पदार्थः-हे मनुष्यो! (**यतः**) जिससे (**विश्वे**) सब (**देवाः**) विद्वान् लोग (**उदजायन्त**) उत्तम होते हैं वह (**अयम्**) यह (**अनुवित्तः**) अनुकूल प्राप्त (**पुराणः**) अनादि काल से सिद्ध (**पन्थाः**) मार्ग है, जिससे यह संसार (**प्रवृद्धः**) बढ़ा (**जनिषीष्ट**) उत्पन्न होवे (**अतः**) इस कारण से (**चित्**) भी आप (**अमुया**) उस उत्पत्ति से (**मातरम्**) माता को (**पत्तवे**) प्राप्त होने को (**मा**) मत (**आ, कः**) करे॥ १॥

भावार्थः-हे मनुष्यो! जिस मार्ग से यथार्थवक्ता पुरुष जावें, उसी मार्ग से आप लोग भी चलो, जो बड़ी वृद्धि भी होवे तो भी माता का अपमान किसो को न करना चाहिये॥ १॥

पुनर्दृष्टान्तेन पूर्वोक्तमाह॥

फिर दृष्टान्त से पूर्वोक्त विषय को अगले मन्त्र में कहते हैं॥

नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै॥ २॥

न। अहम्। अतः। निः। अय। दुःऽगहा। एतत्। तिरश्चता। पार्श्वात्। निः। गमानि। बहूनि। मे। अकृता। कर्त्वानि। युध्यै। त्वेन। सम्। त्वेन। पृच्छै॥ २॥

पदार्थः-(**न**) (**अहम्**) (**अतः**) अस्मात् (**निः**) नितराम् (**अय**) प्राप्नुहि (**दुर्गहा**) यो दुर्गान् दुःखेन गन्तुं योग्यान् हन्ति (**एतत्**) (**तिरश्चता**) तिरश्चीनेन (**पार्श्वात्**) (**निः**) (**गमानि**) गच्छेयम् (**बहूनि**) (**मे**) मम (**अकृता**) अकृता (**कर्त्वानि**) कर्त्तव्यानि (**युध्यै**) युद्धं कुर्याम् (**त्वेन**) केन (**सम्**) (**त्वेन**) अन्येन (**पृच्छै**) पृच्छेयम्॥ २॥

अन्वयः-हे विद्वन्! यथाऽहं दुर्गहा न भवेयं पार्श्वान्निर्गमाणि मे बहून्यकृता कर्त्वानि कर्माणि सन्ति तिरश्चता त्वेन युध्यै त्वेन सम्पृच्छै तथात्वमत एतन्निरय॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽहं कर्म न करोमि कृत्वाऽकृतानि न रक्षामि मया सह योद्धुमिच्छेत्तेन सह युद्धे प्रष्टव्यं पृच्छामि तथैतत्सर्वमाचर॥ २॥

पदार्थः-हे विद्वन्! जैसे (**अहम्**) मैं (**दुर्गहा**) दुःख से प्राप्त होने योग्यों का नाश करने वाला (**न**) न होऊँ (**पार्श्वात्**) पाश से (**निः, गमानि**) जाऊं (**मे**) मेरे (**बहूनि**) बहुत (**अकृता**) न किये गये (**कर्त्वानि**) कर्त्तव्य कर्म हैं (**तिरश्चता**) तिरछे बांके से (**त्वेन**) किससे (**युध्यै**) युद्ध करूं (**त्वेन**) अन्य से (**सम्, पृच्छै**) पूछूं, वैसे आप (**अतः**) इस कारण से (**एतत्**) इस पूर्वोक्त को (**निः**) अत्यन्त (**अय**) प्राप्त होओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे मैं कर्म नहीं करता हूँ और करके न किये गये न रखता हूँ, मेरे साथ जो युद्ध की इच्छा करे, उसके साथ युद्ध में पूछने योग्य को पूछता हूँ, वैसे इस सब का आचरण करो॥ २॥

अथेन्द्राय सेनासंरक्षणविषयमाह॥

अब उत्तम ऐश्वर्यवान् राजा के लिये सेना के संरक्षण विषय को अगले मन्त्र में कहते हैं॥

परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि।

त्वष्टुर्गृहे अपिबत्सोममिन्द्रः शतधन्यं चम्वोः सुतस्य॥ ३॥

परायतीम्॥ मातरम्। अनु। अचष्ट। न। न। अनु। गानि। अनु। नु। गमानि। त्वष्टुः। गृहे। अपिबत्। सोमम्। इन्द्रः। शतऽधन्यम्। चम्वोः। सुतस्य॥ ३॥

पदार्थः-(**परायतीम्**) म्रियमाणाम् (**मातरम्**) जननीम् (**अनु**) (**अचष्ट**) ख्यापयेत् (**न**) (**न**) (**अनु**) (**गानि**) गच्छेयम् (**अनु**) (**नु**) सद्यः (**गमानि**) गच्छेयम् (**त्वष्टुः**) प्रकाशस्य (**गृहे**) (**अपिबत्**) पिबति (**सोमम्**) ओषधिरसम् (**इन्द्रः**) शत्रुविदारकः सेनेशः (**शतधन्यम्**) असङ्ख्ये धने साधुम् (**चम्वोः**) सेनयोर्मध्ये (**सुतस्य**) निष्पन्नस्यैश्वर्यस्य॥ ३॥

अन्वयः-यथेन्द्रस्त्वष्टुर्गृहे सुतस्य शतधन्यं सोमं चम्वोरपिबत् परायतीं मातरं नाऽन्वचष्ट तथाऽहं न्वनुगानि तथाऽहं नानुगमानि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सेनाधीशा राजगृहे सत्कारं प्राप्य युक्ताऽऽहारविहाराभ्यां पूर्णं बलं निष्पाद्य द्वयोः स्वस्य शत्रूणां च सेनयोर्मध्ये विवादं विनाशेयुर्वा योधयेयुस्तेषां सदैव विजयो यथा रुग्णां मातरमपत्यानि सेवन्ते तथैव सेनायाः सेवनं कुर्वन्ति ते न्यायाऽनुगामिनो भवन्ति॥३॥

पदार्थः-जैसे **(इन्द्रः)** शत्रुओं का नाश करनेवाला सेना का ईश **(त्वष्टुः)** प्रकाश के **(गृहे)** स्थान में **(सुतस्य)** ऐश्वर्य्य से युक्त के **(शतधन्यम्)** असंख्य धन में साधु **(सोमम्)** ओषधियों के रस को **(चम्वोः)** सेनाओं के मध्य में **(अपिबत्)** पीता है **(परायतीम्)** और मरनेवाली **(मातरम्)** माता को **(न)** नहीं **(अनु, अचष्ट)** प्रसिद्ध करे, वैसे मैं **(नु)** शीघ्र **(अनु, गानि)** पीछे जाऊं और वैसे मैं **(न)** न **(अनु, गमानि)** पीछे जाऊं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सेना के अधीश राजगृह में सत्कार को प्राप्त होकर, नियमित आहार और विहार से पूर्ण बल को करके, दोनों अपनी और शत्रुओं की सेना के मध्य में विवाद का नाश करें वा युद्ध करावें, उनका सदा ही विजय और जैसे रोगग्रस्त माता की सन्तान सेवा करते हैं, वैसे ही सेना का सेवन करते हैं, वे न्याय के अनुगामी होते हैं॥३॥

अथेन्द्राय कालदृष्टान्तेन सन्मार्गमुपदिशति॥

अब उत्तम ऐश्वर्यवान् पुरुष के लिये काल दृष्टान्त से अच्छे मार्ग का उपदेश अगले मन्त्र में करते हैं॥

किꣳ स ऋधक् कृणवद्यꣳ सहस्रं मासो जभार शरदश्च पूर्वीः।

नही न्वस्य प्रतिमानमस्त्यन्तर्जातेषूत ये जनित्वाः॥४॥

किम्। सः। ऋधक्। कृणवत्। यम्। सहस्रम्। मासः। जभार। शरदः। च। पूर्वीः। नहि। नु। अस्य। प्रतिऽमानम्। अस्ति। अन्तः। जातेषु। उत। ये। जनिऽत्वाः॥४॥

पदार्थः-(**किम्**) (**सः**) (**ऋधक्**) सत्यम् (**कृणवत्**) कुर्यात् (**यम्**) (**सहस्रम्**) असङ्ख्यम् (**मासः**) चैत्रादिः (**जभार**) (**शरदः**) शरदाद्यृतून् (**च**) (**पूर्वीः**) सनातनीः (**नही**) अत्र **निपातस्य चे**ति दीर्घः। (**नु**) (**अस्य**) (**प्रतिमानम्**) परिमाणसाधनम् (**अस्ति**) (**अन्तः**) आभ्यन्तरे (**जातेषु**) उत्पन्नेषु (**उत**) अपि (**ये**) (**जनित्वाः**) ये जनिष्यन्ते ते॥४॥

अन्वयः-हे मनुष्या! ये जनित्वा अन्तर्जातेषु पूर्वीः शरदो जानन्त्युत यदस्य प्रतिमानं नह्यस्ति मासो जभार यं सहस्रमृधक् कृणवत् स च किन्न्वाप्नुयात्॥४॥

भावार्थः-हे मनुष्या! यथा कालो मासाद्यवयवान् धरति स्वयमनन्तः सञ्जगति जातेषु परिमापकोऽस्ति तथैव यूयमपि कुरुत॥४॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(जनित्वाः)** उत्पन्न होने वाले **[के] (अन्तः)** बीच **(जातेषु)** उत्पन्न हुए पदार्थों में **(पूर्वीः)** अनादि काल से सिद्ध **(शरदः)** शरद् ऋतुओं को जानते हैं **(उत)** और जो **(अस्य)** इसका **(प्रतिमानम्)** परिमाण साधन **(नही)** नहीं **(अस्ति)** है वा **(मासः)** चैत्र आदि मास **(जभार)** पोषण करे और **(यम्)** जिसे **(सहस्रम्)** सङ्ख्यारहित **(ऋधक्)** सत्य **(कृणवत्)** प्रसिद्ध करे **(सः)** वह **(च)** और **(किम्)** किस को **(नु)** निश्चय से प्राप्त होवे॥४॥

भावार्थः-हे मनुष्यो! जैसे काल, मास आदि अवयवों को धारण करता है और आप अनन्त हुआ संसार में उत्पन्न हुओं में नापने वाला है, वैसे ही आप लोग भी करो॥४॥

अथ मानं कुर्वत्या मात्रेन्द्रपालनादिविषयमाह॥

अब मान करने वाली माता से उत्तम ऐश्वर्यवान् पुरुष के पालनादि विषय को अगले मन्त्र में कहते हैं॥

अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येण न्यृष्टम्।
अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः॥५॥२५॥

अवद्यम्ऽइव। मन्यमाना। गुहा। अकरिति अकः। इन्द्रम्। माता। वीर्येण। निऽऋष्टम्। अथ। उत्। अस्थात्। स्वयम्। अत्कम्। वसानः। आ। रोदसी इति। अपृणात्। जायमानः॥५॥

पदार्थः-**(अवद्यमिव)** निन्दनीयमिव **(मन्यमाना)** **(गुहा)** बुद्धौ **(अकः)** करोति **(इन्द्रम्)** राजानम् **(माता)** जननी **(वीर्येणा)** पराक्रमेण। अत्र **संहितायामिति** दीर्घः। **(न्यृष्टम्)** नितरां प्राप्तम् **(अथ)** **(उत्)** **(अस्थात्)** उत्तिष्ठते **(स्वयम्)** **(अत्कम्)** कूपम् **(वसानः)** आच्छादयन् **(आ)** **(रोदसी)** द्यावापृथिव्यौ **(अपृणात्)** पृणाति पालयति **(जायमानः)** उत्पद्यमानः॥५॥

अन्वयः-यथा मन्यमाना माता गुहा वीर्येणा न्यृष्टमिन्द्रमवद्यमिवाऽकस्तथैव जायमानः सूर्यो रोदसी आपृणाद् यथात्कं वसानो जनस्स्वयमेवोपर्यागच्छेत्तथा य उदस्थात्सोऽथ सर्वं जगद्रक्षति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि माता सूर्यवद्यानि स्वापत्यानि बोधयति दुष्टाचारानपनीय शिक्षते तानि उत्तमानि भवन्ति॥५॥

पदार्थः-जैसे **(मन्यमाना)** आदर की गई **(माता)** माता **(गुहा)** बुद्धि में **(वीर्येणा)** पराक्रम से **(न्यृष्टम्)** अत्यन्त प्राप्त **(इन्द्रम्)** राजा को **(अवद्यमिव)** निन्दनीय के सदृश **(अकः)** करती है, वैसे ही **(जायमानः)** उत्पन्न होनेवाला सूर्य **(रोदसी)** अन्तरिक्ष और पृथ्वी का **(आ, अपृणात्)** पालन करता है और जैसे **(अत्कम्)** कूप का **(वसानः)** आच्छादन करता हुआ जन **(स्वयम्)** आप ही ऊपर को प्राप्त होवे, वैसे जो **(उत, अस्थात्)** उठता है वह **(अथ)** अनन्तर सब जगत् की रक्षा करता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो माता सूर्य के सदृश जिन अपने सन्तानों को बोध कराती और दुष्ट आचरणों को दूर करके शिक्षा करती है तो वे सन्तान उत्तम होते हैं॥५॥

अथ मेघकृत्यमाह॥

अब मेघ के कृत्य को अगले मन्त्र में कहते हैं॥

एता अर्षन्त्यललाभवन्तीर्ऋतावरीरिव संक्रोशमानाः।

एता वि पृच्छ किमिदं भनन्ति कमापो अद्रिं परिधिं रुजन्ति॥६॥

एताः। अर्षन्ति। अललाऽभवन्तीः। ऋतवरीःऽइव। सम्ऽक्रोशमानाः। एताः। वि। पृच्छ। किम्। इदम्। भनन्ति। कम्। आपः। अद्रिम्। परिऽधिम्। रुजन्ति॥६॥

पदार्थः-(**एताः**) (**अर्षन्ति**) गच्छन्ति (**अललाभवन्तीः**) अलला अलला इव शब्दयन्तीः (**ऋतावरीरिव**) उषस इव (**संक्रोशमानाः**) आक्रोशं कुर्वाणाः (**एताः**) गच्छन्त्यो नद्यः (**वि**) (**पृच्छ**) (**किम्**) (**इदम्**) (**भनन्ति**) शब्दयन्ति (**कम्**) (**आपः**) (**अद्रिम्**) मेघम् (**परिधिम्**) (**रुजन्ति**) भञ्जन्ति॥६॥

अन्वयः-हे जिज्ञासो! या एता नद्य ऋतावरीरिव संक्रोशमाना अललाभवन्तीरर्षन्ति ता एता किमिदं भनन्तीति वि पृच्छ। एता आपः कं परिधिमद्रिं रुजन्तीति च॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! एता नद्यो मेघपुत्र्यास्तटान् भञ्जन्त्य अव्यक्ताञ्छब्दान् कुर्वन्त्य उषा इव गच्छन्ति तथैव सेनाः शत्रूनभिमुखं गच्छन्तु॥६॥

पदार्थः-हे जिज्ञासुजन! जो (**एताः**) ये नदियाँ (**ऋतावरीरिव**) प्रातःकालों के सदृश (**संक्रोशमानाः**) उच्चस्वर को करती हुई (**अललाभवन्तीः**) अलल अर्राती हुई (**अर्षन्ति**) जाती हैं सो (**एताः**) ये (**किम्**) क्या (**इदम्**) यह (**भनन्ति**) शब्द करती हैं, ऐसा (**वि, पृच्छ**) विशेष करके पूछिये और ये (**आपः**) जल (**कम्**) किस (**परिधिम्**) घेर और (**अद्रिम्**) मेघ को (**रुजन्ति**) भञ्जते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! यह नदियाँ मेघों की पुत्रियाँ अर्थात् उनसे उत्पन्न हुई तटों को तोड़ती और अव्यक्त शब्दों को करती हुई प्रातःकालों के सदृश जाती हैं, वैसे ही सेना शत्रुओं के सम्मुख प्राप्त होवें॥६॥

पुनर्मेघविषयमाह॥

फिर मेघ विषय को अगले मन्त्र में कहते हैं॥

किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः।

ममैतान् पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिन्धून्॥७॥

किम्। ऊम् इति। स्वित्। अस्मै। निऽविदः। भनन्त। इन्द्रस्य। अवद्यम्। दिधिषन्ते। आपः। मम। एतान्। पुत्रः। महता। वधेन। वृत्रम्। जघन्वान्। असृजत्। वि। सिन्धून्॥७॥

पदार्थः-(**किम्**) (**उ**) (**स्वित्**) प्रश्ने (**अस्मै**) मेघाय (**निविदः**) नितरां विदन्ति याभिस्ता वाचः। **निविदिति वाङ्नामसु पठितम्।** (निघं०१.११) (**भनन्त**) वदन्ति (**इन्द्रस्य**) सूर्य्यस्य (**अवद्यम्**) गर्ह्यम् (**दिधिषन्ते**) शब्दयन्ति (**आपः**) (**मम**) (**एतान्**) (**पुत्रः**) (**महता**) (**वधेन**) (**वृत्रम्**) (**जघन्वान्**) हतवान् (**असृजत्**) सृजति (**वि**) (**सिन्धून्**) नदीः॥७॥

अन्वयः-हे मनुष्या! ममाऽपत्यस्येन्द्रस्य निविदोऽस्मै मेघाय किमु ष्विद्भनन्तापोऽवद्यं दिधिषन्ते मम पुत्रो महता वधेनैतान् वृत्रञ्च जघन्वान्तिसन्धून् व्यसृजत्॥७॥

भावार्थः-अत्राऽदितिसूर्य्यमेघाऽलङ्कारेण सेनासभाध्यक्षराज्ञां कृत्यं वर्णितमस्ति। यथाऽन्तरिक्षस्य पुत्रवद्वर्त्तमानोऽर्को मेघं हत्वा नदीर्वाहयति तथैव विदुषः सुशिक्षितः पुत्रः सेनाध्यक्षश्शत्रून् हत्वा सेना ऐश्वर्यं प्रापयति॥७॥

पदार्थः-हे मनुष्यो! (**मम**) मुझ पुत्र के (**इन्द्रस्य**) सूर्यसम्बन्ध की (**निविदः**) अत्यन्त ज्ञान जिनसे वे वाणी (**अस्मै**) इस मेघ के लिये (**किम्**) क्या (**उ**) और (**स्वित्**) क्यों (**भनन्त**) शब्द करती हैं (**आपः**) जल (**अवद्यम्**) निन्द्य (**दिधिषन्ते**) शब्द करते हैं, मेरा (**पुत्रः**) सन्तान (**महता**) बड़े (**वधेन**) वध से (**एतान्**) इनको और (**वृत्रम्**) मेघ का (**जघन्वान्**) नाश किया हुआ सूर्य्य (**सिन्धून्**) नदियों को (**वि, असृजत्**) उत्पन्न करता है॥७॥

भावार्थः-इस मन्त्र में अदिति, सूर्य्य और मेघ के अलङ्कार से सेना, सभाध्यक्ष और राजा के कृत्य का वर्णन है। जैसे अन्तरिक्ष के पुत्र के समान वर्त्तमान सूर्य्य मेघ का नाश करके नदियों को बहाता है, वैसे ही विद्वान् का उत्तम प्रकार शिक्षित पुत्र सेना का अध्यक्ष शत्रुओं का नाश करके सेनाओं को ऐश्वर्य्य प्राप्त कराता है॥७॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार।

ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिन्द्रः सहसोदतिष्ठत्॥८॥

ममत्। चन। त्वा। युवतिः। पराऽआस। ममत्। चन। त्वा। कुषवा। जगार। ममत्। चित्। आपः। शिशवे। ममृड्युः। ममत्। चित्। इन्द्रः। सहसा। उत्। अतिष्ठत्॥८॥

पदार्थः-(**ममत्**) प्रमादयन्ती (**चन**) अपि (**त्वा**) त्वाम् (**युवतिः**) पूर्णचतुर्विंशतिवार्षिका (**परास**) पराङ्मुखस्यति (**ममत्**) (**चन**) (**त्वा**) (**कुषवा**) कुत्सितः सवः प्रेरणा यस्याः सा (**जगार**) निगिलति

(ममत्) **(चित्)** **(आपः)** जलवद्वर्त्तमाना मातरः **(शिशवे)** पुत्राय **(ममृड्युः)** सुखयन्ति **(ममत्)** **(चित्)** **(इन्द्रः)** सूर्य इव **(सहसा)** बलेन **(उत्)** **(अतिष्ठत्)** उत्तिष्ठति॥८॥

अन्वयः-हे राजन्! या युवतिस्त्वा ममच्चन परास या ममत् कुषवा त्वा चन जगार तत्सङ्गं त्यज या ममदापश्चिदिव शिशवे ममृड्युर्ये ममच्चिदिन्द्रः सहसा उदतिष्ठत्तं सेवस्व॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये प्रमदासु न प्रमाद्यन्ति ते बलिनो जायन्ते ये पुत्रवत् प्रजाः पालयन्ति त उत्कृष्टा भवन्ति॥८॥

पदार्थः-हे राजन्! जो **(युवतिः)** पूर्ण चौबीस वर्ष वाली **(त्वा)** आपको **(ममत्)** मदयुक्त करती हुई **(चन)** भी **(परास)** पराङ्मुख करती है, जो **(ममत्)** प्रमादयुक्त करती हुई **(कुषवा)** निकृष्ट प्रेरणा वाली **(त्वा)** आपको **(चन)** भी **(जगार)** निगलती है, उसके सङ्ग का त्याग करो और जो **(ममत्)** मदयुक्त करती हुई **(आपः)** जलों के सदृश वर्तमान माता से **(चित्)** वैसे **(शिशवे)** पुत्र के लिये **(ममृड्युः)** सुख देती है और जो **(ममत्)** सुख देता हुआ **(चित्)** सा **(इन्द्रः)** सूर्य के सदृश **(सहसा)** बल से **(उत्, अतिष्ठत्)** उठता है, उसकी सेवा करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग प्रमत्त स्त्रियों में प्रमाद को नहीं प्राप्त होते, वे बली होते हैं और जो पुत्र के सदृश प्रजाओं का पालन करते, वे उत्तम होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मम॑च्च॒न ते॑ मघव॒न् व्यं॑सो निविवि॒ध्वाँ अप॒ हनू॑ ज॒घान॑।
अधा॒ निवि॑द्ध उत्त॑रो बभू॒वाञ्छिरो॑ दा॒सस्य॒ सं पि॑ण॒ग्व॒धेन॑॥९॥

मम॑त्। च॒न। ते॒। म॒घ॒ऽव॒न्। विऽअं॑सः। नि॒ऽवि॒वि॒ध्वान्। अप॑। हनू॒ इति॑। ज॒घान॑। अध॑। निऽवि॑द्धः। उत्ऽत॑रः। ब॒भू॒वान्। शिर॑ः। दा॒सस्य॑। सम्। पि॒ण॒क्। व॒धेन॑॥९॥

पदार्थः-**(ममत्)** हर्षन् **(चन)** अपि **(ते)** **(मघवन्)** बहुधनयुक्त **(व्यंसः)** विप्रकृष्टा अंसा बलादयो यस्य सः **(निविविध्वान्)** यो नितरां शत्रून् विध्यति सः **(अप)** दूरीकरणे **(हनू)** मुखपार्श्वौ **(जघान)** **(अधा)** अत्र **निपातस्य चे**ति दीर्घः। **(निविद्धः)** नितरां वाणैर्विच्छिन्नः **(उत्तरः)** उत्तरकालीनः **(बभूवान्)** भवति **(शिरः)** उत्तमाङ्गम् **(दासस्य)** दातुं योग्यस्य **(सम्)** **(पिणक्)** पिनष्टि **(वधेन)** ताडनेन॥९॥

अन्वयः-हे मघवन्! यस्त दासस्य वधेन शिरः सम्पिणग् व्यंसो निविविध्वान् हनू अप जघानाधा ममच्चनोत्तरो निविद्धो बभूवांस्तं त्वं दण्डय॥९॥

भावार्थः-हे राजन्! यो विरुद्धेन कर्मणा प्रजासु विचेष्टते तं सदा निबद्धं शस्त्रैर्व्यथितं कृत्वा सर्वतो निबध्नीहि॥९॥

पदार्थः-हे **(मघवन्)** बहुत धन से युक्त पुरुष जो **(ते)** आपके **(दासस्य)** देने योग्य के **(वधेन)** ताड़न से **(शिरः)** शिर को **(सम्, पिणक्)** अच्छे पीसता है **(व्यंसः)** खींच लिये गये हैं बल आदि जिसके ऐसा **(निविविध्वान्)** अत्यन्त शत्रुओं का नाश करने वाला **(हनू)** मुख के आस-पास के भागों को **(अप)** दूर करने में **(जघान)** नाश करता है **(अधा)** इसके **(ममत्)** प्रसन्न होता हुआ **(चन)** भी **(उत्तरः)** आगे के समय में होने वाला **(निविद्धः)** अत्यन्त वाणों से छेदा गया **(बभूवान्)** होता है, उसको आप दण्ड दीजिये॥९॥

भावार्थः-हे राजन्! जो विरुद्ध कर्म से प्रजाओं में चेष्टा करता है, उस सदा दृढ़ बंधे को शस्त्रों से व्यथित कर सब प्रकार से बांधो॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम्।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्वे इच्छमानम्॥१०॥

गृष्टिः। ससूव। स्थविरम्। तवागाम्। अनाधृष्यम्। वृषभम्। तुम्रम्। इन्द्रम्। अरीळ्हम्। वत्सम्। चरथाय। माता। स्वयम्। गातुम्। तन्वे। इच्छमानम्॥१०॥

पदार्थः-(**गृष्टिः**) सकृत् प्रसूता गौः **(ससूव)** जनयति **(स्थविरम्)** स्थूलं वृद्धं वा **(तवागाम्)** प्राप्तबलम् **(अनाधृष्यम्)** प्रगल्भम् **(वृषभम्)** वृषभ इव बलिष्ठम् **(तुम्रम्)** सत्कर्मसु प्रेरकम् **(इन्द्रम्)** परमैश्वर्यवन्तम् **(अरीळ्हम्)** शत्रूणां हन्तारम् **(वत्सम्)** **(चरथाय)** **(माता)** **(स्वयम्)** **(गातुम्)** वाणीम् **(तन्वे)** विस्तृणुयाम् **(इच्छमानम्)**॥१०॥

अन्वयः-हे मघवन् राजन्! यथा गृष्टिश्चरथाय वत्समिव माता स्थविरं तवागामनाधृष्यं तुम्रं वृषभमिवाऽरीळ्हं स्वयं गातुं पृथिवीमिच्छमानमिन्द्रं ससूव तथाहं त्वदर्थं भूमिराज्यं तन्वे॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा सुसंस्कृताऽन्नादेः समये समये मिताहारः कृतः शरीरं पुष्टं कृत्वा बलं वर्धयित्वा शत्रुविजयनिमित्तं भूत्वा राज्यं वर्धयति तथैव त्वं न्यायेनाऽस्माकं वर्धय॥१०॥

पदार्थः-हे बहुधनयुक्त राजन्! जैसे **(गृष्टिः)** एक वार प्रसूता हुई गौ **(माता)** माता **(चरथाय)** चरने के लिये **(वत्सम्)** बछड़े के सदृश **(स्थविरम्)** स्थूल वा वृद्ध **(तवागाम्)** बल को प्राप्त

(अनाधृष्यम्) प्रगल्भ **(तुग्रम्)** उत्तम कर्म्मों में प्रेरणा करने और **(वृषभम्)** बैल के सदृश बलिष्ठ **(अरीळहम्)** शत्रुओं के नाश करने वाले **(स्वयम्)** आप **(गातुम्)**[३] वाणी **(इन्द्रम्)** परमैश्वर्य्यवान् सुत की **(इच्छमानम्)** इच्छा करते हुए को **(ससूव)** उत्पन्न करती है, वैसे मैं आपके लिये पृथ्वी के राज्य का **(तन्वे)** विस्तार करूं॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे उत्तम प्रकार संस्कारयुक्त किये हुए अन्न आदि का समय पर नियमित भोजन किया गया शरीर को पुष्ट कर बल को बढ़ाय शत्रुओं का विजयनिमित्तक हो राज्य को बढ़ाता है, वैसे ही आप न्याय से हम लोगों के सुख की वृद्धि करो॥१०॥

अथ सन्तानशिक्षणेन विद्वद्विषयमाह॥

अब सन्तान शिक्षा से विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

उ॒त मा॒ता म॑हि॒षमन्व॑वेनदमी त्वा॑ जहति पुत्र दे॒वाः।

अथा॑ब्रवीद् वृ॒त्रमिन्द्रो॑ हनि॒ष्यन्त्सखे॑ विष्णो वित॒रं वि क्र॑मस्व॥ ११॥

उ॒त। मा॒ता। म॒हि॒षम्। अनु॑। अ॒वे॒न॒त्। अ॒मी इति॑। त्वा॒। ज॒ह॒ति॒॥ पु॒त्र॒। दे॒वाः। अथ॑। अ॒ब्र॒वी॒त्। वृ॒त्रम्। इन्द्रः॑। ह॒नि॒ष्यन्। सखे॑। वि॒ष्णो॒ इति॑। वि॒ऽत॒रम्। वि। क्र॒म॒स्व॒॥ ११॥

पदार्थः-(**उत**) (**माता**) जननी (**महिषम्**) महान्तम् (**अनु**) (**अवेनत्**) याचते (**अमी**) (**त्वा**) त्वाम् (**जहति**) (**पुत्र**) दुःखात्रातः (**देवाः**) विद्वांसः (**अथ**) (**अब्रवीत्**) ब्रूते (**वृत्रम्**) मेघमिवाऽविद्याम् (**इन्द्रः**) परमैश्वर्यवान्सूर्य्य इव पिता (**हनिष्यन्**) हननं करिष्यन् (**सखे**) मित्र (**विष्णो**) सकलविद्याव्यापिन् (**वितरम्**) विविधप्रकारेण तरितुं योग्यम् (**वि**) (**क्रमस्व**) पुरुषार्थी भव॥११॥

अन्वयः-हे सखे विष्णो पुत्र! त्वमिन्द्रो वृत्रमिवाऽविद्यां हनिष्यन् वितरं वि क्रमस्वाथ माता त्वा महिषमवेनदेवमुतापि यथा पिताऽब्रवीत्तथा न कुर्य्याश्चेत्तर्ह्यमी देवास्त्वाऽनुजहति॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सन्तानानां योग्यतास्ति यथा विद्वांसौ मातापितरौ ब्रह्मचर्य्यादिना विद्याग्रहणं शरीरसुखवर्धनमुपदिशेतां तथैवाऽनुष्ठेयं यानि सुशीलान्यपत्यानि भवन्ति तान्येवाऽऽप्ताऽध्यापका अनुगृह्णन्ति दुर्व्यसनानि त्यजन्ति॥११॥

पदार्थः-हे (**सखे**) मित्र (**विष्णो**) सम्पूर्ण विद्याओं में व्यापक (**पुत्र**) दुःख से रक्षा करने वाले! आप (**इन्द्रः**) अत्यन्त ऐश्वर्यवान् सूर्य्य के सदृश पालनकर्त्ता (**वृत्रम्**) मेघ के समान अविद्या का (**हनिष्यन्**) नाश करनेवाले हुए (**वितरम्**) विविध प्रकार तरने योग्य को (**वि, क्रमस्व**) पुरुषार्थी हूजिये

---

३. संस्कृत एवं हिन्दी पदार्थ में 'गातुम्' का अर्थ 'वाणी' किया है, जबकि अन्वय में 'गातुम्' का अर्थ 'पृथिवी' और निघण्टु (निघं०१.१.२०) में भी यह पृथिवीवाचक में पठित है।

(अथ) इसके अनन्तर **(माता)** माता **(त्वा)** आपको **(महिषम्)** बड़ा **(अवेनत्)** मांगती है, जो इस प्रकार **(उत)** भी जैसे पिता **(अब्रवीत्)** कहता है, वैसे नहीं करे तो **(अमी)** यह **(देवाः)** विद्वान् लोग आपका **(अनु, जहति)** त्याग करते हैं॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सन्तानों की योग्यता है कि जैसे विद्वान् माता पिता ब्रह्मचर्य आदि से विद्या का ग्रहण और शरीर के सुख के वर्धन का उपदेश करें, वैसे ही करना चाहिये और जो उत्तम शीलयुक्त पुत्र होते हैं, उन्हीं पर यथार्थवक्ता अध्यापक लोग कृपा करते और दुर्व्यसनियों का त्याग करते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरन्तम्।

कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य॥१२॥

कः। ते। मातरम्। विधवाम्। अचक्रत्। शयुम्। कः। त्वाम्। अजिघांसत्। चरन्तम्। कः। ते। देवः। अधि। मार्डीके। आसीत्। यत्। प्र। अक्षिणाः। पितरम्। पादऽगृह्य॥१२॥

पदार्थः-(**कः**) (**ते**) तव (**मातरम्**) (**विधवाम्**) विगतो धवः पतिर्यस्यास्ताम् (**अचक्रत्**) करोति (**शयुम्**) यः शेते तम् (**कः**) (**त्वाम्**) (**अजिघांसत्**) हन्तुमिच्छति (**चरन्तम्**) विहरन्तम् (**कः**) (**ते**) (**देवः**) दिव्यगुणः (**अधि**) उपरि (**मार्डीके**) सुखकरे (**आसीत्**) (**यत्**) यः (**प्र**) (**अक्षिणाः**) क्षयति हन्ति (**पितरम्**) जनकम् (**पादगृह्य**) पादान् ग्रहीतुं योग्यः॥१२॥

अन्वयः-हे पुत्र! ते मातरं विधवां कोऽचक्रत् कश्चरन्तं शयुं त्वामजिघांसत् कस्ते देवो मार्डीकेऽध्यासीत् पादगृह्य यद्यस्ते पितरं प्राऽक्षिणाः॥१२॥

भावार्थः-हे सन्ताना! ये या वा युष्माकं पितॄन् हत्वा मातॄर्विधवाः कुर्य्युर्युष्मानपि घ्नन्तु तेषां विश्वासं यूयं मा कुरुत॥१२॥

पदार्थः-हे पुत्र! (**ते**) आपकी (**मातरम्**) माता को (**विधवाम्**) पतिहीन (**कः**) कौन (**अचक्रत्**) करता है (**कः**) कौन (**चरन्तम्**) विहार वा (**शयुम्**) शयन करते हुए (**त्वाम्**) आपको (**अजिघांसत्**) मारने की इच्छा करता है (**कः**) कौन (**ते**) आपके (**देवः**) श्रेष्ठ गुण वाला (**मार्डीके**) सुख करने में (**अधि**) सर्वोपरि (**आसीत्**) विराजमान हुआ है (**पादगृह्य**) हे पैरों को ग्रहण करने योग्य! (**यत्**) जो आपके (**पितरम्**) उत्पन्न करने वाले को (**प्र, अक्षिणाः**) नाश करता है॥१२॥

भावार्थः-हे सन्तानो! जो पुरुष वा स्त्रियाँ आप लोगों के पितरों का नाश करके माताओं को विधवा करें और आप लोगों का भी नाश करें, उनका विश्वास आप लोग न करिये॥१२॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

अव॑र्त्या॒ शुन॑ आ॒न्त्राणि॑ पेचे॒ न दे॒वेषु॑ विविदे मर्डि॒तार॑म्।

अप॑श्यं जा॒यामम॑हीयमाना॒मधा॑ मे श्ये॒नो मध्वा ज॑भार॥ १३॥ २६॥ ५॥

अव॑र्त्या। शुन॑:। आ॒न्त्राणि॑। पे॒चे॒। न। दे॒वेषु॑। वि॒वि॒दे॒। म॒र्डि॒तार॑म्। अप॑श्यम्। जा॒याम्। अम॑हीयमानाम्। अध॑। मे॒। श्ये॒न:। मधु॑। आ। ज॒भा॒र॒॥ १३॥

पदार्थ:-(**अवर्त्या**) अवर्त्तनीयानि (**शुन:**) कुक्कुरस्येव (**आन्त्राणि**) उदरस्था: स्थूला नाडी (**पेचे**) पचति (**न**) (**देवेषु**) विद्वत्सु (**विविदे**) लभते (**मर्डितारम्**) सुखकरम् (**अपश्यम्**) पश्येयम् (**जायाम्**) स्त्रियम् (**अमहीयमानाम्**) असत्कृताम् (**अधा**) **निपातस्य चे**ति दीर्घ:। (**मे**) मम (**श्येन:**) श्येन इव शीघ्रगन्ता (**मधु**) मधुरं विज्ञानम् (**आ**) सर्वत: (**जभार**) हरति॥ १३॥

अन्वय:-हे इन्द्र! यो मेऽमहीयमानां जायां श्येन इवाऽऽजभाराऽधा शुनोऽवर्त्याऽऽन्त्राणीव शरीरं पेचे तस्मान्मर्डितारं त्वामहमपश्यं स यथा देवेषु मधु न विविदे तथा तं भृशं दण्डय॥ १३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे राजन्! ये पुरुषा या: स्त्रियश्च व्यभिचारं कुर्युस्तांस्तीव्रं दण्डं नीत्वा विनाशय॥ १३॥

अत्रेन्द्रमेघराजविद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्येण दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये तृतीयाष्टके पञ्चमोऽध्यायोऽष्टादशं सूक्तं षड्विंशो वर्गश्च समाप्त:॥

पदार्थ:-हे राजन्! जो (**मे**) मेरी (**अमहीयमानाम्**) नहीं सत्कार की गई (**जायाम्**) स्त्री को (**श्येन:**) वाज पक्षी के सदृश शीघ्र चलने वाला सब ओर से (**आ, जभार**) हरता है (**अधा**) इसके अनन्तर (**शुन:**) कुत्ते की (**अवर्त्या**) नहीं वर्त्तने योग्य (**आन्त्राणि**) और उठे हैं हाड़ जिनसे उन स्थूल नाड़ियों के सदृश शरीर को (**पेचे**) पचाता है, इससे (**मर्डितारम्**) सुख करने वाले आपका मैं (**अपश्यम्**) दर्शन करूं। वह जैसे (**देवेषु**) विद्वानों में (**मधु**) मधुर विज्ञान को (**न**) नहीं (**विविदे**) प्राप्त होता है, वैसे उसको निरन्तर दण्ड दीजिये॥ १३॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो पुरुष और स्त्रियाँ व्यभिचार करें, उनको तीव्र दण्ड देकर नाश करो॥ १३॥

इस सूक्त में इन्द्र मेघ राजा और विद्वान् के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तृतीय अष्टक में पांचवां अध्याय अठारहवां सूक्त और छब्बीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ तृतीयाष्टके षष्ठाध्यायारम्भः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथैकादशर्चस्यैकोनविंशतितमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। २, ९ निचृत् त्रिष्टुप्। ३, ५, ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४, ६ भुरिक् पङ्क्तिः। ७, १० पङ्क्तिः। ११ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रपदवाच्यराजगुणानाह॥

अब तृतीयाष्टक में छठे अध्याय का और [ग्यारह ऋचा वाले] उन्नसीवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों का उपदेश करते हैं॥

ए॒वा त्वामि॑न्द्र वज्रि॒न्नत्र॒ विश्वे॑ दे॒वास॑: सु॒हवा॑स ऊमा॑:।
म॒हामु॒भे रोद॑सी वृ॒द्धमृ॒ष्वं निरेक॒मिद् वृ॑णते वृत्र॒हत्ये॑॥ १॥

ए॒व। त्वाम्। इ॒न्द्र॒। व॒ज्रि॒न्। अत्र॑। विश्वे॑। दे॒वास॑:। सु॒ऽहवा॑सः। ऊमा॑:। म॒हाम्। उ॒भे इति॑। रोद॑सी॒ इति॑। वृ॒द्धम्। ऋ॒ष्वम्। निः। एक॑म्। इत्। वृ॒ण॒ते॒। वृ॒त्र॒ऽहत्ये॑॥ १॥

पदार्थः-(**एवा**) अत्र **निपातस्य च**ेति दीर्घः। (**त्वाम्**) त्वाम् (**इन्द्र**) शत्रूणां विदारक (**वज्रिन्**) प्रशंसितशस्त्रास्त्र (**अत्र**) (**विश्वे**) सर्वे (**देवासः**) विद्वांसः (**सुहवासः**) ये सुष्ठ्वाह्वयन्ति ते (**ऊमाः**) रक्षणादिकर्त्तारः (**महाम्**) महान्तम् (**उभे**) (**रोदसी**) द्यावापृथिव्यौ (**वृद्धम्**) सर्वेभ्यो विस्तीर्णम् (**ऋष्वम्**) श्रेष्ठम् (**निः**) (**एकम्**) अद्वितीयम् (**इत्**) एव (**वृणते**) स्वीकुर्वन्ति (**वृत्रहत्ये**) वृत्रस्य हत्या हननमिव शत्रुहननं यस्मिन्त्सङ्ग्रामे तस्मिन्॥१॥

अन्वयः-हे वज्रिन्निन्द्राऽत्र ये ऊमाः सुहवासो विश्वे देवासो महां वृद्धमृष्वमेकं त्वामेवा वृत्रहत्य उभे रोदसी सूर्य्यमिवेन्निर्वृणते तानेव त्वं सेवस्व॥१॥

भावार्तः-ये विद्वांसोऽत्युत्तमगुणवन्तं राजानं स्वीकुर्य्युस्त एव पूर्णसुखा भवन्ति॥१॥

पदार्थः-हे (**वज्रिन्**) प्रशंसित शस्त्र और अस्त्र से युक्त (**इन्द्र**) शत्रुओं के विदीर्ण करनेहारे (**अत्र**) इस संसार में जो (**ऊमाः**) रक्षा आदि करने वाले (**सुहवासः**) उत्तम प्रकार पुकारने वाले (**विश्वे**) सब (**देवासः**) विद्वान् लोग (**महाम्**) बड़े (**वृद्धम्**) सब से विस्तीर्ण (**ऋष्वम्**) श्रेष्ठ (**एकम्**) अद्वितीय (**त्वाम्**) (**त्वाम्**) आपको (**एवा**) ही (**वृत्रहत्ये**) मेघ के नाश के सदृश शत्रु का नाश जिस संग्राम में उसमें (**उभे**) दोनों (**रोदसी**) अन्तरिक्ष और पृथिवी सूर्य्य के सदृश (**इत्**) ही (**निः**, **वृणते**) स्वीकार करते हैं, उन्हीं की आप सेवा करिये॥१॥

भावार्थः-जो विद्वान् लोग अतिश्रेष्ठ गुण वाले राजा को स्वीकार करें, वे ही पूर्ण सुख वाले होते हैं॥१॥

अथ मेघदृष्टान्तेन राजगुणानाह॥

अब मेघ दृष्टान्त से राजगुणों को अगले मन्त्र में कहते हैं॥

अवासृजन्तु जिव्रयो न देवा भुवः सम्राळिन्द्र सत्ययोनिः।
अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः॥२॥

अव। असृजन्तु। जिव्रयः। न। देवाः। भुवः। सम्ऽराट्। इन्द्र। सत्यऽयोनिः। अहन्। अहिम्। परिऽशयानम्। अर्णः। प्र। वर्तनीः। अरदः। विश्वऽधेनाः॥२॥

पदार्थः-(**अव**) (**असृजन्त**) सृजन्ते (**जिव्रयः**) दृढजीवनाः (**न**) इव (**देवाः**) चन्द्रादयो दिव्याः पदार्था इव विद्वांसः (**भुवः**) पृथिव्या मध्ये (**सम्राट्**) यः सम्यग्राजते चक्रवर्त्ती (**इन्द्र**) परमैश्वर्य्ययुक्त (**सत्ययोनिः**) सत्यमविनाशि योनिः कारणङ्गृहं वा यस्य (**अहन्**) हन्ति (**अहिम्**) मेघम् (**परिशयानम्**) योऽन्तरिक्षे सर्वतः शेते तम् (**अर्णः**) उदकम् (**प्र**) (**वर्त्तनीः**) मार्गान् (**अरदः**) विलिखति (**विश्वधेनाः**) विश्वाः सर्वा धेना वाचो येषान्ते॥२॥

अन्वयः-हे इन्द्र! भवान् भुवः सम्राट् सत्ययोनिर्यथा सूर्य्यः परिशयानमहिमहन्नर्णो वर्त्तनीः प्रारदस्तथैव शत्रून् हत्वा विराजस्व ये विश्वधेना जिव्रयो न देवास्त्वामवाऽसृजन्त तांस्त्वं सङ्गच्छस्व॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे राजंस्त्वं सत्याचारः सन्नाप्तसहायेन चक्रवर्त्ती सार्वभौमो भव यथा सूर्य्यो मेघं हत्वा जगत् सुखयति तथा दस्यून् विनाश्य प्रजा आनन्दय॥२॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्ययुक्त! आप (**भुवः**) पृथिवी के मध्य में (**सम्राट्**) उत्तम प्रकार प्रकाशमान चक्रवर्त्ती (**सत्ययोनिः**) नहीं नाश होने वाला कारण वा स्थान जिसका ऐसा सूर्य्य जैसे (**परिशयानम्**) अन्तरिक्ष में सब ओर से शयन करने वाले (**अहिम्**) मेघ का (**अहन्**) नाश करता है (**अर्णः**) जल (**वर्त्तनीः**) मार्गों को (**प्र, अरदः**) अर्थात् करोदता है, वैसे ही शत्रुओं का नाश करके विराजमान हूजिये जो (**विश्वधेनाः**) समस्त वाणियों वाले (**जिव्रयः**) दृढजीवनों के (**न**) समान (**देवाः**) चन्द्र आदि दिव्य पदार्थों के सदृश विद्वान् जन आपको (**अव, असृजन्त**) उत्पन्न करते हैं, उनका तुम संग करो॥२॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। हे राजन्! आप सत्य आचरण करने वाले हुए यथार्थ वक्ताओं के सहाय से चक्रवर्त्ती सार्वभौम हूजिये और जैसे सूर्य्य मेघ का नाश करके संसार को सुख देता है, वैसे चोर डाकुओं का नाश करके प्रजाओं को आनन्द दीजिये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अतृ॑ण्णुवन्तं वियतमबु॒ध्यमबु॑ध्यमानं सुषुपा॒णमि॑न्द्र।

स॒प्त प्रति॑ प्र॒वत॑ आ॒शया॑न॒महि॒ वज्रे॑ण वि रि॑णा अप॒र्वन्॥ ३॥

अतृ॑ण्णुवन्तम्। विऽय॑तम्। अ॒बु॒ध्यम्। अबु॑ध्यमानम्। सु॒षु॒पा॒नम्। इ॒न्द्र॒। स॒प्त। प्रति॑। प्र॒ऽवत॑:। आ॒ऽश॒या॑नम्। अहि॑म्। वज्रे॑ण। वि। रि॒णा॒:। अ॒प॒र्वन्॥ ३॥

पदार्थ:-(**अतृण्णुवन्तम्**) भोगेष्वतृप्तम् (**वियतम्**) अजितेन्द्रियम् (**अबुध्यम्**) बुद्धिरहितम् (**अबुध्यमानम्**) उपदेशेनाऽप्यजानन्तम् (**सुषुपाणम्**) शोभनम्पानं यस्य तम् (**इन्द्र**) परमैश्वर्ययुक्त (**सप्त**) (**प्रति**) (**प्रवत:**) अधोमार्गान् (**आशयानम्**) (**अहिम्**) मेघम् (**वज्रेण**) (**वि**) (**रिणा:**) हिंस्या: (**अपर्वन्**) अपर्वणि पर्वरहिते समये॥ ३॥

अन्वय:-हे इन्द्र! त्वं यथा सूर्य्यो वज्रेणाऽऽशयानमहिं हत्वा सप्त प्रवतो गमयति तथैवाऽपर्वन्नतृण्णुवन्तं सुषुपाणं वियतमबुध्यमबुध्यमानमधआस्मिंकञ्चनं दण्डेन प्रति वि रिणा:॥ ३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा सूर्य्य: किरणैर्मेघञ्छिन्नङ्कृत्वा भूमौ निपात्य विविधेषु मार्गेषु वाहयति तथैव विद्ययाऽविद्यां हत्वा दण्डेनाधार्मिकान् कारगृहे निपात्य बहुशाखां राजनीतिं सर्वत्र प्रचालयेत्॥ ३॥

पदार्थ:-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्ययुक्त! आप जैसे सूर्य (**वज्रेण**) वज्र से (**आशयानम्**) सब ओर से सोते हुए (**अहिम्**) मेघ का नाश करके (**सप्त**) सात (**प्रवत:**) नीच के मार्गों को प्राप्त कराता है, वैसे ही (**अपर्वन्**) पर्व से रहित समय में (**अतृण्णुवन्तम्**) भोगों में नहीं तृप्त (**सुषुपाणम्**) उत्तम पानयुक्त (**वियतम्**) नहीं जितेन्द्रिय (**अबुध्यम्**) बुद्धि से रहित (**अबुध्यमानम्**) उपदेश से भी नहीं जानते हुए अधार्मिक जन की दण्ड से (**प्रति, वि, रिणा:**) विशेष हिंसा करें॥ ३॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य किरणों से मेघ को काट के और पृथिवी पर गिरा के नाना प्रकार के मार्गों में बहाता है, वैसे ही विद्या से अविद्या का नाश करके दण्ड से अधार्मिमक पुरुषों को कारगृह अर्थात् जेलखाने में छोड़ के बहुत शाखायुक्त नीति का सर्वत्र प्रचार करे॥ ३॥

अथ मेघदृष्टान्तेन राजसेनाविषयमाह॥

अब मेघदृष्टान्त से राजसेनाविषय को अगले मन्त्र में कहते हैं॥

अक्षो॑दय॒च्छव॑सा॒ क्षाम॑ बु॒ध्नं वार्ण वात॒स्तवि॑षीभि॒रिन्द्र॑:।

दृ॒ळ्हान्यौ॑भ्नादु॒शमा॑न॒: ओजोऽवा॑भिनत्क॒कुभ॒: पर्व॑तानाम्॥ ४॥

अक्षो॑दयत्। शव॑सा। क्षाम॑। बु॒ध्नम्। वा:। न। वात॑:। तवि॑षीभि:। इन्द्र॑:। दृ॒ळ्हानि॑। औ॒भ्नात्। उ॒शमा॑न:। ओज॑:। अव॑। अ॒भि॒न॒त्। क॒कुभ॑:। पर्व॑तानाम्॥ ४॥

पदार्थः-(**अक्षोदयत्**) सञ्चूर्णयति (**शवसा**) बलेन (**क्षाम**) क्षान्तम् (**बुध्नम्**) अन्तरिक्षम् (**वाः**) उदकम् (**न**) इव (**वातः**) वायुः (**तविषीभिः**) बलयुक्ताभिस्सेनाभिः (**इन्द्रः**) दुष्टानां विदारकः (**दृळ्हानि**) पुष्टानि (**औभ्नात्**) मृद्नाति (**उशमानः**) कामयमानः (**ओजः**) पराक्रमम् (**अव**) (**अभिनत्**) भिनत्ति (**ककुभः**) दिशाः (**पर्वतानाम्**) मेघानाम्॥४॥

अन्वयः-हे मनुष्या! यस्तविषीभिस्सहेन्द्रश्शवसा वातः क्षाम बुध्नं वार्ण दृळ्हानि शत्रुसैन्यान्यक्षोदयदोज उशमान औभ्नात् पर्वतानां शिखराणीव ककुभः शत्रूनवाभिनत् तमेव स्वकीयं राजानङ्कुरुत॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा वायुरग्निना सूक्ष्मीकृतञ्जलमन्तरिक्षन्नीत्वा वर्षयित्वा जगदानन्दयति तथैव ससामग्रीविद्यासेनो राजा दुष्टान् सूक्ष्मीकृत्य दण्डोपदेशाभ्यां दुष्टान् भित्त्वा सज्जनान् सम्पाद्य प्रजाः सततं सुखयेत्॥४॥

पदार्थः-हे मनुष्यो! जो (**तविषीभिः**) बल से युक्त सेनाओं के साथ (**इन्द्रः**) दुष्ट पुरुषों का नाश करने वाला (**शवसा**) बल से (**वातः**) वायु (**क्षाम**) सहनयुक्त (**बुध्नम्**) अन्तरिक्ष और (**वाः**) उदक को जैसे (**न**) वैसे (**दृळ्हानि**) पुष्ट शत्रुसैन्य-दलों को (**अक्षोदयत्**) सञ्चूर्णित करता है तथा (**ओजः**) पराक्रम की (**उशमानः**) कामना करता हुआ (**औभ्नात्**) मृदुता करता है (**पर्वतानाम्**) मेघों के शिखरों के सदृश (**ककुभः**) दिशाओं और शत्रुओं को (**अव, अभिनत्**) तोड़ता है, उसीको अपना राजा करो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे वायु अग्नि से सूक्ष्म किये हुए जल को अन्तरिक्ष में पहुँचा और वर्षा कर संसार को आनन्द देता है, वैसे ही सामग्री, विद्या और सेना के सहित राजा दुष्टों को न्यून करके दण्ड और उपदेश से दुष्टों का नाश कर और सज्जनों को सिद्ध करके प्रजाओं को निरन्तर सुख दीजिये॥४॥

अथ सेनापतिगुणानाह॥

अब सेनापति के गुणों को अगले मन्त्र में कहते हैं॥

अभि प्र दद्रुर्जनयो न गर्भं रथाइव प्र ययुः साकमद्रयः।

अतर्पयो विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इन्द्र सिन्धून्॥५॥१॥

अभि। प्र। दद्रुः। जनयः। न। गर्भम्। रथाःऽइव। प्र। ययुः। साकम्। अद्रयः। अतर्पयः। विऽसृतः। उब्जः। ऊर्मीन्। त्वम्। वृतान्। अरिणाः। इन्द्र। सिन्धून्॥५॥

पदार्थः-(**अभि**) आभिमुख्ये (**प्र**) (**दद्रुः**) गच्छन्ति प्राप्नुवन्ति (**जनयः**) जनित्र्यो भार्य्याः (**न**) इव (**गर्भम्**) (**रथाइव**) (**प्र**) (**ययुः**) प्रयान्ति (**साकम्**) सह (**अद्रयः**) मेघाः (**अतर्पयः**) तर्पय (**विसृतः**) ये विशेषेण सरन्ति तान् (**उब्जः**) हन्याः (**उर्म्मीन्**) सतरङ्गान् (**त्वम्**) (**वृतान्**) स्वीकृतान् (**अरिणाः**) हिनस्ति (**इन्द्र**) शत्रुविदारक (**सिन्धून्**) नदीः॥५॥

अन्वयः-हे इन्द्र! येऽद्रयो जनयो न गर्भम्प्राभिदद्रू रथा इव साकं प्रययुर्यथा तान् विसृत ऊर्म्मीन् सिन्धून्त्सूर्य्य उब्जोऽरिणास्तथा त्वं वृतानतर्पयस्तव भृत्या गच्छन्तु भार्य्या गर्भन्धरतु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्य राज्ञो मेघा इवोच्छ्रिता रथा इव सह गामिन्यस्सेना गच्छन्ति तस्य सूर्य्यस्येव विजयो भवति॥५॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के नाश करने वाले सेनापति! जो **(अद्रयः)** मेघ **(जनयः)** स्त्रियों के **(न)** तुल्य **(गर्भम्)** गर्भ को **(प्र, अभि, ददुः)** सब ओर से प्राप्त होते हैं **(रथाइव)** वाहनों के सदृश **(साकम्)** साथ **(प्र, ययुः)** शीघ्र जाते हैं और जैसे उन **(विसृतः)** जो विशेष करके फैलती **(ऊर्म्मीन्)** उन तरङ्गों के सहित **(सिन्धून्)** नदियों का सूर्य्य **(उब्जः)** नाश करे वा **(अरिणाः)** नाश करता है, वैसे **(त्वम्)** आप **(वृतान्)** स्वीकार किये हुओं को **(अतर्पयः)** तृप्त करो और आपके भृत्य जावें और स्त्री गर्भ को धारण करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस राजा की मेघ के सदृश ऊंची और वाहनों के सदृश साथ चलने वाली सेनायें चलती हैं, उसका सूर्य्य के सदृश विजय होता है॥५॥

पुना राजगुणानाह॥

फिर राजगुणों को अगले मन्त्र में कहते हैं॥

त्वं म॒हीम॒वनिं॑ वि॒श्वधे॑नां तु॒र्वीत॑ये व॒य्या॑य॒ क्षर॑न्तीम्।

अर॑मयो॒ नमसैज॒दर्ण॑: सु॒तर॒णाँ अ॑कृणोरिन्द्र॒ सिन्धू॑न्॥६॥

त्वम्। म॒हीम्। अ॒वनि॑म्। वि॒श्वऽधे॑नाम्। तु॒र्वीत॑ये। व॒य्या॑य। क्षर॑न्तीम्। अर॑मयः। नम॑सा। एज॑त्। अर्ण॑ः। सु॒ऽत॒र॒णान्। अ॒कृ॒णोः॒। इ॒न्द्र॒। सिन्धू॑न्॥६॥

पदार्थः-**(त्वम्)** **(महीम्)** पृथिवीम् **(अवनिम्)** रक्षिकाम् **(विश्वधेनाम्)** समग्रवाचम् **(तुर्वीतये)** शत्रूणां हिंसकाय **(वय्याय)** प्राप्तव्याय सुखाय **(क्षरन्तीम्)** प्रापयन्तीम् **(अरमयः)** रमय **(नमसा)** **(एजत्)** कम्पते **(अर्णः)** उदकम् **(सुतरणान्)** सुखं तरणं येषान्तान् **(अकृणोः)** कुर्याः **(इन्द्र)** राजन्! **(सिन्धून्)** नदान्॥६॥

अन्वयः-हे इन्द्र! त्वं तुर्वीतये वय्याय विश्वधेनां क्षरन्तीमवनिम्महीम्प्राप्याऽस्मान्नमसाऽरमयो यत्राऽर्ण एजत् तान् सिन्धून्त्सुतरणानकृणोः॥६॥

भावार्थः-हे राजन्! भवान् यदि राज्यम्प्राप्य स्वयमेवाऽऽनन्द्याऽस्मान्नाऽऽनन्दयेत्तर्हि तवाऽऽनन्दः क्षिपन्नश्येद्भवान् सर्वेषां सुखाय नदीनदतडागसमुद्रादीनान्तरणाय नौकादीन्निर्माय धनाढ्यान् सततं सम्पादयतु॥६॥

पदार्थः-हे **(इन्द्र)** राजन्! **(त्वम्)** आप **(तुर्वीतये)** शत्रुओं के नाश करने वाले के और **(वय्याय)**

प्राप्त होने योग्य सुख के लिये **(विश्वधेनाम्)** सम्पूर्ण वाणी जिसके लिये उस **(क्षरन्तीम्)** प्राप्त कराती हुई **(अवनिम्)** रक्षा करने वाली **(महीम्)** पृथिवी को प्राप्त होकर हम लोगों को **(नमसा)** अन्न आदि से **(अरमयः)** रमाओ और जिनमें **(अर्णः)** जल **(एजत्)** कम्पता है, उन **(सिन्धून्)** नदों को **(सुतरणान्)** सुखपूर्वक तरना जिनका ऐसे **(अकृणोः)** करो॥६॥

भावार्थः-हे राजन्! आप जो राज्य को प्राप्त हो, आप ही आनन्दित हो हम लोगों को नहीं आनन्द देवें तो आपका आनन्द शीघ्र नष्ट हो और आप सब लोगों के सुख के लिये नदी, नद, तड़ाग और समुद्र आदिकों के पार उतरने के लिये नौका आदि बना के धनाढ्य निरन्तर करिये॥६॥

अथ प्रजार्थ राजोपदेशविषयमाह॥

अब प्रजाओं के निमित्त राज-उपदेश को अगले मन्त्र में कहते हैं॥

प्राग्रुवो॑ नभन्वो३॑ न वक्वा॑ ध्वस्रा अ॑पिन्वद्युवतीर्ऋ॑तज्ञाः।
धन्वान्यञ्जाँ॑ अपृणक् तृषाणाँ अधो॒गिन्द्रः॑ स्तर्यो३॑ दंसु॑पत्नीः॥७॥

प्र। अग्रुवः॑। नभन्वः॑। न। वक्वाः॑। ध्वस्राः। अपिन्वत्। युवतीः। ऋतऽज्ञाः। धन्वा॑नि। अञ्जा॑न्। अपृणक्। तृषाणान्। अधोक्। इन्द्रः॑। स्तर्यः॑। दम्ऽसु॑पत्नीः॥७॥

पदार्थः-**(प्र)** **(अग्रुवः)** या अग्रङ्गच्छन्ति ता नद्यः। **अग्रुव इति नदीनामसु पठितम्।** (निघं०१.१३) **(नभन्वः)** अरीणां हिंसका वीराः **(न)** **(वक्वाः)** वक्ताः **(ध्वस्राः)** ध्वंसिकाः **(अपिन्वत्)** सेवेत सिञ्चेत वा **(युवतीः)** प्राप्तयौवनाः स्त्रियः **(ऋतज्ञाः)** या ऋतञ्जानन्ति ताः **(धन्वानि)** स्थलप्रदेशान् **(अञ्जान्)** येऽजन्ति नित्यङ्गच्छन्ति तान् **(अपृणत्)** तर्पयेत् **(तृषाणान्)** पिपासितान् **(अधोक्)** प्रायात् **(इन्द्रः)** **(स्तर्यः)** आच्छादिकाः **(दंसुपत्नीः)** दंसूनां कर्मकर्त्तृणाम्पत्न्यः॥७॥

अन्वयः-हे मनुष्या! य इन्द्रो वक्वा ध्वस्रा नभन्वोऽग्रुवो न ऋतज्ञा युवतीः प्रापिन्वद् धन्वान्यञ्जान् तृषाणानपृणग् याः स्तर्य्यो दंसुपत्नीः स्युस्ता नाधोक् स एव युष्माकं राजा भवतु॥७॥

भावार्थः-अत्रोपमालङ्कारः। यस्य राज्ञो नदीवत् शत्रुहिंसिका अन्नपानादितृप्ताः स्वविवराच्छादिकाः पतिव्रताः स्त्रिय इव राजभक्ताः सेनाः स्युस्स एव विजयम्प्राप्तुमर्हेत्॥७॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** राजा **(वक्वाः)** टेढ़ी **(ध्वस्राः)** विध्वंस करने वाली सेनाओं को और **(नभन्वः)** शत्रुओं के नाश करनेवाले वीर पुरुष जैसे **(अग्रुवः)** आगे चलनेवाली नदियों को **(न)** वैसे **(ऋतज्ञाः)** सत्य को जानने वाली **(युवतीः)** युवती स्त्रियों को **(प्र, अपिन्वत्)** अच्छे प्रकार सेवे वा सींचे **(धन्वानि)** और स्थलप्रदेशों को अर्थात् जहाँ-तहाँ मार्गस्थानों को **(अञ्जान्)** तथा नित्य चलनेवाले **(तृषाणान्)** पियासे मनुष्यादि प्राणियों को **(अपृणक्)** तृप्त करे वा जो **(स्तर्य्यः)** आच्छादन करनेवाली **(दंसुपत्नीः)** कर्म्म करनेवालों की स्त्रियाँ हों, उनके समान **(अधोक्)** पूर्ण करे अर्थात् उनके समान परिपूर्ण सेना रक्खे, वही आप लोगों का राजा होवे॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस राजा की नदी के सदृश और शत्रुओं के नाश करनेवाली, अन्न और पान आदि से तृप्त और अपने विवर के ढांपने वाली पतिव्रता स्त्रियों के सदृश राजभक्त सेना होवे, वही विजय प्राप्त होने योग्य है॥७॥

पुना राज्यविषयमाह॥

फिर राज्यविषय को अगले मन्त्र में कहते हैं॥

पूर्वीरुषसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद्वि सिन्धून्।

परिष्ठिता अतृणद्बद्बधानाः सीरा इन्द्रः स्रवितवे पृथिव्या॥८॥

पूर्वीः। उषसः। शरदः। च। गूर्ताः। वृत्रम्। जघन्वान्। असृजत्। वि। सिन्धून्। परिऽस्थिताः। अतृणत्। बद्बधानाः। सीराः। इन्द्रः। स्रवितवे। पृथिव्या॥८॥

पदार्थः-(**पूर्वीः**) पूर्वतनीः (**उषसः**) प्रभातवेलाः (**शरदः**) शरदृतून् (**च**) हेमन्तादीन् (**गूर्त्ताः**) गच्छन्त्यो हिंसिकाः (**वृत्रम्**) मेघम् (**जघन्वान्**) हतवान् (**असृजत्**) सृजति (**वि**) विविधान् (**सिन्धून्**) नद्यादीन् (**परिष्ठिताः**) परितः सर्वतः स्थिताः (**अतृणत्**) हिनस्ति (**बद्बधानाः**) वधङ्कुर्वाणाः (**सीराः**) याः सरन्ति ता नद्यः। **सीरा इति नदीनामसु पठितम्।** (निघं०१.१३) (**इन्द्रः**) सूर्य्यः (**स्रवितवे**) स्रवितुं चलितुम् (**पृथिव्या**) पृथिव्या सह॥८॥

अन्वयः-हे राजन्! यथेन्द्रः पूर्वीर्गूर्त्ता उषसो वृत्रं शरदश्च जघन्वान् सन् सिन्धून् व्यसृजत् परिष्ठिता बद्बधानाः सीराः स्रवितवे पृथिव्या सहाऽतृणत्तथैव नीतिं सेनां सृष्ट्वा विजयं सृज युद्धाय चलन्त्या सुशिक्षितया सेनया शत्रून् हिन्धि॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा प्रातःसमयवच्छुभान्नीतिं नद्योघवत् सेनां निर्मिमीते स एव पृथिवीराज्यमर्हति॥८॥

पदार्थः-हे राजन्! जैसे (**इन्द्रः**) सूर्य्य (**पूर्वीः**) पुरातन (**गूर्त्ताः**) चलती हुई हिंसा करने वाली (**उषसः**) प्रभातवेला (**वृत्रम्**) मेघ को (**शरदः**) शरद् ऋतुओं (**च**) और हेमन्तादि ऋतुओं को (**जघन्वान्**) नष्ट किये हुए (**सिन्धून्**) नद्यादिकों को (**वि**) अनेक प्रकार (**असृजत्**) उत्पन्न करता है (**परिष्ठिताः**) तथा सब ओर से स्थित (**बद्बधानाः**) बदबदातीं तटों का नाश करती हुईं (**सीराः**) जो बहने वाली नदियाँ उनको (**स्रवितवे**) चलने को (**पृथिव्या**) पृथिवी के साथ (**अतृणत्**) नाश करता है, वैसे ही नीति और सेना को उत्पन्न करके विजय सिद्ध करो और युद्ध के लिये चलती हुई उत्तम प्रकार शिक्षित सेना से शत्रुओं का नाश करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा प्रातःकाल के सदृश उत्तम नीति और नदी के समूह के सदृश सेना को निर्मित करता है, वही पृथिवी के राज्य के योग्य है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

व॒ग्रीभि॑: पु॒त्रम॒ग्रुवो॑ अदा॒नन्नि॒वेश॑नाद्धरिव॒ आ ज॑भर्थ।
व्य१॑न्धो अ॑ख्य॒दहि॑मादद॒ानो निर्भू॑दु॒खच्छित्सम॑रन्त॒ पर्व॑॥ ९॥

व॒ग्रीभि॑:। पु॒त्रम्। अ॒ग्रु॒व॑:। अ॒दा॒नम्। नि॒ऽवेश॑नात्। ह॒रि॒ऽव॒:। आ। ज॒भ॒र्थ॒। वि। अ॒न्ध॒:। अ॒ख्य॒त्। अहि॑म्। आ॒ऽद॒दा॒न:। नि:। भू॒त्। उ॒ख॒ऽछित्। सम्। अ॒र॒न्त॒। पर्व॑॥ ९॥

पदार्थ:-(**वग्रीभि:**) उद्गीर्णाभि: (**पुत्रम्**) (**अग्रुव:**) नद्य: (**अदानम्**) दानस्याऽकर्त्तारम् (**निवेशनात्**) स्वस्थानात् (**हरिव:**) प्रशस्ताऽश्वयुक्त (**आ**) (**जभर्थ**) हरसि (**वि**) (**अन्ध:**) अन्धकारकृत् (**अख्यत्**) ख्याति (**अहिम्**) मेघम् (**आददान:**) गृह्णन् (**नि:**) (**भूत्**) भवति (**उखच्छित्**) य उखङ्गमनच्छिनत्ति स: (**सम्**) (**अरन्त**) रमते (**पर्व**) पालकम्॥ ९॥

अन्वय:-हे हरिवो राजन्! यथा निवेशनाद् वग्रीभिरग्रुवस्तटादिकं हरन्ति तथैवाऽदानं पुत्रमाजभर्थ। यथान्धोऽहिमाददानो व्यख्यदुखच्छिन्निर्भूत् पर्व समरन्त तथैवाऽदाता गतिं लभते॥ ९॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे राजन्त्स्वस्य पुत्रोऽपि कुलक्षणश्चेन्निरधिकारी कर्त्तव्यो यथा वर्षासु नद्यो वर्धन्ते तथैव प्रजा वर्द्धनीया:॥ ९॥

पदार्थ:-हे (**हरिव:**) प्रशंसित घोड़ों से युक्त राजन्! जैसे (**निवेशनात्**) अपने स्थान से (**वग्रीभि:**) उगली हुई पहाड़ियों से (**अग्रुव:**) नदियाँ तट आदि का हरण करती हैं, वैसे ही (**अदानम्**) दान नहीं करने वाले (**पुत्रम्**) पुत्र को (**आ, जभर्थ**) हरते हो और जैसे (**अन्ध:**) अन्धकार करने वाले (**अहिम्**) मेघ को (**आददान:**) ग्रहण करता हुआ (**वि, अख्यत्**) विख्यात करता है और (**उखच्छित्**) गमन का काटने अर्थात् मार्ग छिन्न-भिन्न करने वाला (**नि:, भूत्**) निरन्तर होता (**पर्व**) और पालने वाले को (**सम् अरन्त**) अच्छे प्रकार रमाता है, वैसे ही नहीं दान करने वाला गति पाता है॥ ९॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! अपना पुत्र भी बुरे लक्षणों वाला हो तो नहीं अधिकार देने योग्य और वर्षाकालों में नदियाँ बढ़ती हैं, वैसे ही प्रजाओं की वृद्धि करनी चाहिये॥ ९॥

अथ विद्वद्गुणानाह॥

अब विद्वान् के गुणों को अगले मन्त्र में कहते हैं॥

प्र ते॒ पूर्वा॑णि॒ कर॑णानि॒ विप्रा॑वि॒द्वाँ आ॑ह वि॒दुषे॒ करा॑सि।
यथा॑यथा॒ वृष्ण्या॑नि॒ स्वगू॑र्तापा॑सि राजन्न॒र्याव॑विवेषी:॥ १०॥

प्र। ते॒। पूर्वा॑णि। कर॑णानि। वि॒प्र॒। आ॒ऽवि॒द्वान्। आ॒ह॒। वि॒दुषे॑। करा॑सि। यथा॑ऽयथा। वृष्ण्या॑नि। स्वऽगू॑र्ता। अपा॑सि। रा॒ज॒न्। न॒र्या॑। अव॑ऽविवेषी:॥ १०॥

पदार्थः-(**प्र**) (**ते**) तव (**पूर्वाणि**) सनातनानि (**करणानि**) क्रियन्ते यैस्तानि (**विप्र**) मेधाविन् (**आविद्वान्**) यः समन्तात् सर्वं वेत्ति (**आह**) ब्रूते (**विदुषे**) (**करांसि**) करणीयानि कर्म्माणि (**यथायथा**) (**वृष्ण्यानि**) बलकराणि (**स्वगूर्त्ता**) स्वेन प्राप्तानि (**अपांसि**) कर्म्माणि (**राजन्**) (**नर्य्या**) नृषु हितानि (**अविवेषीः**) विशेषेण प्राप्नुयाः॥१०॥

अन्वयः-हे विप्र राजन् विदुषे! ते यथायथा पूर्वाणि करणानि करांसि वृष्ण्यानि स्वगूर्त्ता नर्य्याऽपांस्याऽऽविद्वान् प्राह तानि त्वमविवेषीः॥१०॥

भावार्थः-हे विद्वन्! राजँस्त्वं सदाप्तशासने प्रवर्त्तस्व यद्यत्ते त उपदिशेयुस्तथैव कुरुष्व॥१०॥

पदार्थः-हे (**विप्र**) बुद्धिमान् (**राजन्**) राजन्! (**विदुषे**) विद्वान्! (**ते**) आपके लिये (**यथायथा**) जैसे-जैसे (**पूर्वाणि**) अनादि काल से सिद्ध (**करणानि**) जिनसे करें वह कार्य्यसाधन (**करांसि**) और करने योग्य कर्म्म (**वृष्ण्यानि**) बलकारक (**स्वगूर्त्ता**) अपने से प्राप्त (**नर्य्या**) मनुष्यों में हित करने वाले (**अपांसि**) कर्म्मों को (**आविद्वान्**) सब प्रकार से समस्त जानता हुआ (**प्र, आह**) अच्छे कहता है, उनको आप (**अविवेषीः**) विशेष करके प्राप्त हूजिये॥१०॥

भावार्थः-हे विद्वन् राजन्! आप सदा श्रेष्ठ पुरुषों की शिक्षा में प्रवृत्त हूजिये और जो-जो आपके लिये वे उपदेश देवें, वैसे ही करिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥११॥२॥

नु। स्तुतः। इन्द्र। नु। गृणानः। इषम्। जरित्रे। नद्यः। न। पीपेरिति पीपेः। अकारि। ते। हरिऽवः। ब्रह्म। नव्यम्। धिया। स्याम। रथ्यः। सदाऽसाः॥११॥

पदार्थः-(**नु**) सद्यः (**स्तुतः**) प्राप्तप्रशंसः (**इन्द्र**) प्रशंसनीयकर्म्मन् (**नु**) (**गृणानः**) सत्यं स्तुवन् (**इषम्**) अन्नं विज्ञानं वा (**जरित्रे**) स्तावकाय (**नद्यः**) सरितः (**न**) इव (**पीपेः**) वर्धय (**अकारि**) क्रियते (**ते**) तव (**हरिवः**) प्रशस्तपुरुषयुक्त (**ब्रह्म**) महद्धनम् (**नव्यम्**) नूतनम् (**धिया**) प्रज्ञया कर्म्मणा वा (**स्याम**) भवेम (**रथ्यः**) रमणीयबहुरथादियुक्ताः (**सदासाः**) ससेवकाः॥११॥

अन्वयः-हे हरिव इन्द्र! येन विदुषा ते नव्यम्ब्रह्माऽकारि तस्मै जरित्रे स्तुतस्संस्त्वन्नद्यो न नु पीपेः। गृणानः सन्निषन्नु देहि एवम्भूतस्य रथ्यः सदासा वयं धियाऽनुकूलाः स्याम॥११॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! ये प्रशंसितानि कर्म्माणि कुर्य्युस्तांस्त्वं सततं सत्कुर्य्यास्ते च भवदनुकूलास्सन्तः सर्वे यूयं धर्मार्थकामसाधका भवतेति॥११॥

अथेन्द्रमेघसेनासेनापतिराजप्रजाविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनविंशतितमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः–हे **(हरिवः)** उत्तम पुरुषों से युक्त **(इन्द्र)** प्रशंसा करने योग्य कर्म्म करनेवाले! जिस विद्वान् से **(ते)** आपका **(नव्यम्)** नवीन **(ब्रह्म)** बड़ा धन **(अकारि)** किया जाता है उस **(जरित्रे)** स्तुति करने वाले के लिये **(स्तुतः)** प्रशंसा को प्राप्त हुए आप **(नद्यः)** नदियों के **(न)** सदृश **(नु)** शीघ्र **(पीपेः)** वृद्धि दिलाइये और **(गृणानः)** सत्य की प्रशंसा करते हुए **(इषम्)** अन्न वा विज्ञान को **(नु)** शीघ्र दीजिये, इस प्रकार के हुए सम्बन्ध में **(रथ्यः)** रमण करने योग्य बहुत रथादिकों से युक्त **(सदासाः)** सेवकों के सहित हम लोग **(धिया)** बुद्धि वा कर्म्म से अनुकूल **(स्याम)** होवें॥११॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। हे राजन्! जो प्रशंसित कर्म्म करें, उनका आप निरन्तर सत्कार करिये और वे आपके अनुकूल हुए और तुम लोग सब धर्म्म, अर्थ और काम के साधक हूजिये॥११॥

इस सूक्त में इन्द्र, मेघ, सेना, सेनापति, राजा, प्रजा और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उन्नीसवां सूक्त और द्वितीय वर्ग समाप्त हुआ॥

अथैकादशर्चस्य विंशतितमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १, ३, ६ निचृत्त्रिष्टुप्। ४, ५ विराट्त्रिष्टुप्। ८, १० त्रिष्टुप् छन्दः। धैवतः स्वरः। २ पङ्क्तिः। ७, ९ स्वराट् पङ्क्तिः। ११ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रपदवाच्यराजगुणानाह॥

अब ग्यारह ऋचावाले बीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों को कहते हैं॥

आ नऽ इन्द्रो दूरादा नऽ आसादभिष्टिकृदवसे यासदुग्रः।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून्॥ १॥

आ। नः। इन्द्रः। दूरात्। आ। नः। आसात्। अभिष्टिऽकृत्। अवसे। यासत्। उग्रः। ओजिष्ठेभिः। नृऽपतिः। वज्रऽबाहुः। सम्ऽगे। समत्ऽसु। तुर्वणिः। पृतन्यून्॥ १॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मान् (**इन्द्रः**) परमैश्वर्य्यवान् राजा (**दूरात्**) (**आ**) (**नः**) अस्माकमस्मभ्यं वा (**आसात्**) समीपात् (**अभिष्टिकृत्**) अभीष्टसुखकारी (**अवसे**) रक्षणाद्याय (**यासत्**) प्राप्नुयात् (**उग्रः**) तेजस्वी (**ओजिष्ठेभिः**) अतिशयेन बलादिगुणयुक्तैर्नरोत्तमसैन्यैः (**नृपतिः**) नृणां पालकः (**वज्रबाहुः**) वज्रः शस्त्रविशेषो बाहौ यस्य सः (**सङ्गे**) सह (**समत्सु**) सङ्ग्रामेषु (**तुर्वणिः**) शीघ्रकारी (**पृतन्यून्**) आत्मनः पृतनां सेनामिच्छून्॥ १॥

अन्वयः-हे राजप्रजाजना! योऽभिष्टिकृद्वज्रबाहुरुग्रो नृपतिस्तुर्वणिरिन्द्र ओजिष्ठेभिस्सह नोऽवसे दूरादासाद्वाऽऽयासत्समत्सु पृतन्यून्नोऽस्मान् सङ्ग आयासत् सोऽस्माभिस्सदैव रक्षणीयः सत्कर्त्तव्यश्च॥ १॥

भावार्थः-हे मनुष्याः! सर्वतोऽभिरक्षितारम्महाबलिष्ठं विद्याबलयुक्तं सभ्यसेनं संग्रामे विजेतारं राजानं स्वीकृत्य सर्वदाऽऽनन्दन्तु॥ १॥

पदार्थः-हे राजा और प्रजाजनो! जो (**अभिष्टिकृत्**) अपेक्षित सुख करने वाला (**वज्रबाहुः**) शस्त्र विशेष जिसकी बाहु में विद्यमान (**उग्रः**) जो तेजस्वी (**नृपतिः**) मनुष्यों का पालन करने वाला (**तुर्वणिः**) शीघ्रकारी (**इन्द्रः**) अत्यन्त ऐश्वर्यवान् राजा (**ओजिष्ठेभिः**) अत्यन्त बल आदि गुणों से युक्त मनुष्यों में उत्तम सेनाजनों के साथ (**नः**) हम लोगों की वा हम लोगों के अर्थ (**अवसे**) रक्षा आदि के लिये (**दूरात्**) दूर और (**आसात्**) समीप से वा (**आ**) सब प्रकार सेना (**यासत्**) प्राप्त होवे और (**समत्सु**) सङ्ग्रामों में (**पृतन्यून्**) अपनी सेना की इच्छा करने वाले (**नः**) हम लोगों को (**सङ्गे**) साथ (**आ**) प्राप्त होवे, वह हम लोगों से सदा ही रक्षा करने और सत्कार करने योग्य है॥ १॥

भावार्थः-हे मनुष्यो! सब प्रकार से रक्षा करने वाले, बड़े बलिष्ठ, विद्या और बलयुक्त श्रेष्ठ सेनाजनों के सहित वर्त्तमान और सङ्ग्राम में जीतनेवाले राजा को स्वीकार करके सब काल में आनन्द करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ नऽ इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च।

तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ॥ २॥

आ। नः। इन्द्रः। हरिऽभिः। यातु। अच्छ। अर्वाचीनः। अवसे। राधसे। च। तिष्ठाति। वज्री। मघऽवा। विऽरप्शी। इमम्। यज्ञम्। अनु। नः। वाजऽसातौ॥ २॥

पदार्थः-(**आ**) (**नः**) अस्मानस्माकं वा (**इन्द्रः**) परमैश्वर्य्यवान् राजा (**हरिभिः**) प्रशस्तैर्नरैस्सह (**यातु**) आयातु प्राप्नोतु (**अच्छ**) (**अर्वाचीनः**) इदानीन्तनः (**अवसे**) अन्नाद्याय। **अव इत्यन्ननामसु पठितम्।** (निघं०२.७) (**राधसे**) धनाय (**च**) (**तिष्ठाति**) तिष्ठेत् (**वज्री**) शस्त्राऽस्त्रवित् (**मघवा**) न्यायार्जितधनत्वात् पूजनीयः (**विरप्शी**) महान् (**इमम्**) (**यज्ञम्**) प्रजापालनाख्यम् (**अनु**) (**नः**) अस्माकम् (**वाजसातौ**) संग्रामे॥ २॥

अन्वयः-हे मनुष्या! योऽर्वाचीनो मघवा वज्री विरप्शीन्द्रो हरिभिस्सह नोऽवसे राधसे चाऽच्छाऽऽयात्विमं यज्ञन्नो वाजसातौ चानुतिष्ठाति तमेव राजानं स्वीकुरुत॥ २॥

भावार्थः-यो राजोत्तमैस्सभ्यैः प्रजासुखायाऽन्नधने बहुले कृत्वा संग्रामे विजयी न्यायकारी भवेत् स खलु राजा भवितुमर्हेत्॥ २॥

पदार्थः-हे मनुष्यो! जो (**अर्वाचीनः**) इस काल में उत्पन्न (**मघवा**) न्याय से इकट्ठे किये हुए धन के होने से आदर करने योग्य (**वज्री**) शस्त्रों और अस्त्रों का जानने वाले (**विरप्शी**) बड़ा (**इन्द्रः**) अत्यन्त ऐश्वर्य्य वाला राजा (**हरिभिः**) श्रेष्ठ मनुष्यों के साथ (**नः**) हम लोगों को वा हम लोगों के (**अवसे**) अन्न आदि के (**च**) और (**राधसे**) धन के लिये (**अच्छ**) उत्तम प्रकार (**आ, यातु**) प्राप्त हो (**इमम्**) इस (**यज्ञम्**) प्रजापालनरूप यज्ञ का (**नः**) हम लोगों के (**वाजसातौ**) सङ्ग्राम में (**अनु, तिष्ठाति**) अनुष्ठान करे, उसी को राजा मानो॥ २॥

भावार्थः-जो राजा उत्तम सभा के जनों से प्रजा के सुख के लिये अन्न और धन बहुत करके सङ्ग्राम में जीतने वाला न्यायकारी होवे, वही राजा होने को योग्य होवे॥ २॥

अथामात्यगुणानाह॥

अब अमात्य के गुणों को अगले मन्त्र में कहते हैं॥

इमं यज्ञं त्वमस्माकमिन्द्र पुरो दधत्सनिष्यसि क्रतुं नः।

श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं जयेम॥ ३॥

इ॒मम्। य॒ज्ञम्। त्वम्। अ॒स्माक॑म्। इ॒न्द्र॒। पु॒रः। दध॑त्। स॒नि॒ष्य॒सि॒। क्रतु॑म्। न॒ः। श्वघ्नी॑ऽइ॑व। व॒ज्रि॒न्। स॒नये॑। धना॑नाम्। त्वया॑। व॒यम्। अ॒र्यः। आ॒जिम्। ज॒ये॒म॒॥ ३॥

पदार्थः-(**इमम्**) वर्त्तमानम् (**यज्ञम्**) राजधर्म्मानुष्ठानाख्यम् (**त्वम्**) (**अस्माकम्**) (**इन्द्र**) पुष्कलधनप्रद सेनापते! (**पुरः**) नगराणि (**दधत्**) धरन्त्सन् (**सनिष्यसि**) सम्भजिष्यसि (**क्रतुम्**) प्रज्ञाम् (**नः**) अस्माकम् (**श्वघ्नीव**) वृकीव (**वज्रिन्**) शस्त्राऽस्त्रवित् (**सनये**) संविभागाय (**धनानाम्**) (**त्वया**) (**वयम्**) (**अर्य्यः**) स्वामी (**आजिम्**) सङ्ग्रामम्। **आजिरिति सङ्ग्रामनामसु पठितम्।** (निघं०२.१७) (**जयेम**)॥३॥

अन्वयः-हे वज्रिन्निन्द्र! यतोऽर्य्यस्त्वमस्माकमिमं यज्ञं पुरश्च दधत् सन्नोऽस्माकं क्रतुं सनिष्यसि तस्मात्त्वया सह वयं धनानां सनये श्वघ्नीवाऽऽजिञ्जयेम॥३॥

भावार्थः-अत्रोपमालङ्कारः। यत्र राजाऽमात्यानमात्या राजानञ्च हर्षयित्वा सम्भज्य दत्त्वा गृहीत्वा प्रीत्या बलिष्ठाः सन्तो ह्यैश्वर्य्याय यथा वृक्यजां हन्यात्तथा शत्रून् हत्वा विजयेन भूषिता भवन्ति तत्रैव सर्वाणि सुखानि भवन्ति॥३॥

पदार्थः-हे (**वज्रिन्**) शस्त्र और अस्त्र के प्रयोग जानने और (**इन्द्र**) बहुत धन के देने वाले सेनापति! जिससे कि (**अर्य्यः**) स्वामी (**त्वम्**) आप (**अस्माकम्**) हम लोगों के (**इमम्**) इस वर्त्तमान (**यज्ञम्**) राजधर्म के निर्वाहरूप यज्ञ को और (**पुरः**) नगरों को (**दधत्**) धारण करते हुए (**नः**) हम लोगों की (**क्रतुम्**) बुद्धि का (**सनिष्यसि**) सेवन करोगे इससे (**त्वया**) आपके साथ (**वयम्**) हम लोग (**धनानाम्**) धनों के (**सनये**) सम्यक् विभाग करने के लिये (**श्वघ्नीव**) भेड़िनी के सदृश (**आजिम्**) सङ्ग्राम को (**जयेम**) जीतें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जहाँ राजा मन्त्रियों और मन्त्री राजा को प्रसन्न करके और विभाग कर दे और ग्रहण करके प्रीति से बलिष्ठ हुए ही ऐश्वर्य्य के लिये जैसे भेड़िनी बकरी को मारे, वैसे शत्रुओं का नाश करके विजय से भूषित होते हैं, वहीं सम्पूर्ण सुख होते हैं॥३॥

पुना राजगुणानाह॥

फिर राजगुणों को अगले मन्त्र में कहते हैं॥

उ॒शन्नु॒ षु ण॑ः सु॒मना॑ उपा॒के सोम॑स्य॒ नु सुषु॑तस्य स्वधावः।
पा इ॑न्द्र॒ प्रति॑भृतस्य॒ मध्व॒ः समन्ध॑सा ममदः पृ॒ष्ठ्येन॑॥ ४॥

उ॒शन्। ऊ॒म् इति॑। सु। न॒ः। सु॒ऽमना॑ः। उ॒पा॒के। सोम॑स्य। नु। सु॒ऽसु॒तस्य। स्व॒धा॒ऽव॒ः। पाः। इ॒न्द्र॒। प्रति॑ऽभृतस्य। मध्व॑ः। सम्। अन्ध॑सा। म॒म॒दु॒ः। पृ॒ष्ठ्येन॑॥ ४॥

पदार्थः-(**उशन्**) कामयमान (**उ**) (**सु**) (**नः**) अस्माकम् (**सुमनाः**) प्रसन्नचित्तः (**उपाके**) समीपे (**सोमस्य**) ऐश्वर्य्ययुक्तस्य (**नु**) (**सुषुतस्य**) सुष्ठु विद्याविनयाभ्यां निष्पन्नस्य (**स्वधावः**) अन्नाद्यैश्वर्य्ययुक्त (**पाः**) रक्ष (**इन्द्र**) (**प्रतिभृतस्य**) धृतं धृतं प्रति वर्त्तमानस्य (**मध्वः**) माधुर्य्यादिगुणोपेतस्य (**सम्**) (**अन्धसा**) अन्नाद्येन (**ममदः**) आनन्द (**पृष्ठ्येन**) पृष्ठ्येन पश्चाद्भवेन सुखेन॥४॥

अन्वयः-हे उशन् स्वधाव इन्द्र राजंस्त्वं सुमनाः सन्न उपाके सुषुतस्य सोमस्य प्रतिभृतस्य नु सु पाः। मध्वोऽन्धसा पृष्ठ्येनो सम्ममदः॥४॥

भावार्थः-यो राजा प्रेम्णा भृत्यवर्गमैश्वर्य्याऽन्नाद्येन रक्षति स कामनासिद्धिं प्राप्य पुनः सततं मोदते॥४॥

पदार्थः-हे (**उशन्**) कामना करते हुए (**स्वधावः**) अन्न आदि ऐश्वर्य से युक्त (**इन्द्र**) अत्यन्त ऐश्वर्य्यवान् राजन्! आप (**सुमनाः**) प्रसन्न चित्तवाले हुए (**नः**) हम लोगों के (**उपाके**) समीप में (**सुषुतस्य**) उत्तम प्रकार विद्या और विनय से निष्पन्न अर्थात् प्रसिद्ध (**सोमस्य**) ऐश्वर्ययुक्त (**प्रतिभृतस्य**) धारण-धारण किये गये के प्रति वर्त्तमान जन की (**नु**) निश्चय से (**सु, पाः**) अच्छे प्रकार रक्षा कीजिये और (**मध्वः**) माधुर्य्य आदि गुणों से युक्त पदार्थसम्बन्धी (**अन्धसा**) अन्न आदि से (**पृष्ठ्येन, उ**) और पीछे हुए सुख से (**सम्, ममदः**) अच्छे प्रकार आनन्द कीजिये॥४॥

भावार्थः-जो राजा प्रेम से भृत्यजनों के समूह की ऐश्वर्य और अन्न आदि से रक्षा करता है, वह कामना की सिद्धि को प्राप्त होकर फिर निरन्तर आनन्द को प्राप्त होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता।
मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिन्द्रम्॥५॥३॥

विः यः। ररप्शे। ऋषिऽभिः। नवेभिः। वृक्षः। नः। पक्वः। सृण्यः। नः। जेता। मर्यः। नः। योषाम्। अभि। मन्यमानः। अच्छ। विवक्मि। पुरुऽहूतम्। इन्द्रम्॥५॥

पदार्थः-(**वि**) (**यः**) (**ररप्शे**) स्तूयते। अत्र रभधातोर्लिटि सस्य शः। (**ऋषिभिः**) वेदार्थविद्भिः (**नवेभिः**) नूतनाऽध्ययनैः (**वृक्षः**) (**न**) इव (**पक्वः**) परिपक्वफलादिः (**सृण्यः**) प्राप्तबलाः सुशिक्षिताः सेनाः (**न**) इव (**जेता**) जेतुं शीलः (**मर्यः**) मनुष्यः (**न**) इव (**योषाम्**) स्त्रियम् (**अभि**) आभिमुख्ये (**मन्यमानः**) जानन् (**अच्छा**) **संहितायामिति** दीर्घः। (**विवक्मि**) विशेषेणोपदिशामि (**पुरुहूतम्**) बहुभिः स्तुतम् (**इन्द्रम्**) प्रशंसितगुणधरम्॥५॥

अन्वयः-हे मनुष्या! यो नवेभिर्ऋषिभिर्वि ररप्शे वृक्षो न पक्वः सृण्यो न जेता मर्य्यो योषां न प्रजामभिमन्यमानोऽस्ति तं पुरुहूतमिन्द्रं यथाऽहमच्छा विवक्मि तथैनं यूयमप्युपदिशत॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये आप्तेषु प्राप्तप्रशंसो वृक्ष इव दृढोत्साहफल एकाकी सेनावद्विजयमानः पतिव्रता भार्यावत् प्रजाप्रीतो भवेत् तं प्रशंसितं राजानं यूयम्मन्यध्वम्॥५॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(नवेभिः)** नवीन अध्ययनकर्त्ता **(ऋषिभिः)** वेदार्थ के जानने वालों से **(वि, ररप्शे)** स्तुति किये जाते हो **(वृक्षः)** वृक्ष के **(न)** सदृश **(पक्वः)** पके हुए फल आदि युक्त **(सृण्यः)** बल को प्राप्त उत्तम प्रकार शिक्षित सेना के **(न)** सदृश **(जेता)** जीतने वाला **(मर्य्यः)** मनुष्य **(योषाम्)** स्त्री के **(न)** तुल्य प्रजा को **(अभि, मन्यमानः)** प्रत्यक्ष जानता हुआ वर्तमान है, उस **(पुरुहूतम्)** बहुतों से स्तुति किये गये **(इन्द्रम्)** प्रशंसित गुणों के धारण करने वाले को जैसे मैं **(अच्छा)** उत्तम प्रकार **(विवक्मि)** विशेष करके उपदेश करता हूँ, वैसे इसको आप लोग भी उपदेश दीजिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो यथार्थवक्ता जनों में प्रशंसा को प्राप्त, वृक्ष के सदृश दृढ़ उत्साहरूप फलवान्, अकेला सेना के सदृश जीतने वाला, पतिव्रता स्त्री के सदृश प्रजा में प्रसन्न होवे, उस प्रशंसित को राजा आप लोग मानो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

गिरिर्न यः स्वतवाँ ऋष्व इन्द्रः सनादेव सहसे जात उग्रः।

आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टम्॥६॥

गिरिः। न। यः। स्वऽतवान्। ऋष्वः। इन्द्रः। सनात्। एव। सहसे। जातः। उग्रः। आऽदर्ता। वज्रम्। स्थविरम्। न। भीमः। उद्नाऽइव। कोशम्। वसुना। निऽऋष्टम्॥६॥

पदार्थः-(**गिरिः**) मेघः **(न)** इव **(यः)** **(स्वतवान्)** स्वैर्गृणैर्वृद्धः **(ऋष्वः)** महान् **(इन्द्रः)** सूर्य इव प्रतापी **(सनात्)** सदा **(एव)** **(सहसे)** बलाय **(जातः)** प्रसिद्धः **(उग्रः)** तीव्रस्वभावः **(आदर्त्ता)** समन्ताच्छत्रूणां विदारकः **(वज्रम्)** विद्युदूपम् **(स्थविरम्)** स्थूलम् **(न)** इव **(भीमः)** भयङ्करः **(उद्नेव)** जलानीव **(कोशम्)** मेघम् **(वसुना)** धनेन **(न्यृष्टम्)** नितरां प्राप्तम्॥६॥

अन्वयः-हे मनुष्या! यो गिरिर्न स्वतवानृष्वः सनादेव सहसे जात उग्र इन्द्रः स्थविरं वज्रं नादर्त्ता भीमः कोशमुद्नेव वसुना न्यृष्टं करोति स एव विजयी भवितुमर्हति॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यो मेघ इव महान् प्रजासुखकरः सनातनधर्म्मसेवी विद्युद्वद्भयङ्करोऽक्षयकोशः शत्रुविनाशको बलवान् भवेत् स सर्वस्य राजा भवितुमर्हेदिति विजानीत॥६॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(गिरिः)** मेघ के **(न)** सदृश **(स्वतवान्)** अपने गुणों से वृद्ध **(ऋष्वः)** बड़ा **(सनात्)** सब काल में **(एव)** ही **(सहसे)** बल के लिये **(जातः)** प्रसिद्ध **(उग्रः)** तीव्र स्वभावयुक्त **(इन्द्रः)** सूर्य्य के समान प्रतापी **(स्थविरम्)** स्थूल **(वज्रम्)** बिजुलीरूप के **(न)** समान **(आदर्त्ता)** सब प्रकार से शत्रुओं का नाश करने वाला **(भीमः)** भयङ्कर और **(कोशम्)** मेघ को **(उद्नेव)**

जलों के सदृश **(वसुना)** धन से **(न्यृष्टम्)** अत्यन्त प्राप्त करता है, वही विजयी होने के योग्य होता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो मेघ के सदृश बड़ा प्रजाओं का सुख करने और सनातनधर्म्म का सेवन करनेवाला, बिजुली के सदृश भयंकर, नहीं नाश होने वाले खजाने से युक्त, शत्रुओं का नाश करने वाला और बलवान् होवे, वह सब का राजा होने को योग्य है, ऐसा जानिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

न यस्य॑ व॒र्ता जनु॒षा न्व॑स्ति॒ न राध॑स आमरी॒ता म॒घस्य॑।
उद्वावृ॑षा॒णस्त॑विषीव उग्रा॒स्मभ्यं॑ दद्धि पुरुहूत रा॒यः॥७॥

न। यस्य॑। व॒र्ता। ज॒नुषा॑। नु। अस्ति॑। न। राध॑सः। आऽम॒री॒ता। म॒घस्य॑। उत्ऽव॒वृ॒षा॒णः। त॒वि॒षी॒ऽवः॒। उ॒ग्र॒। अ॒स्मभ्य॑म्। द॒द्धि॒। पु॒रु॒ऽहू॒त॒। रा॒यः॥७॥

पदार्थः-(**न**) निषेधे (**यस्य**) (**वर्त्ता**) निवारकः (**जनुषा**) जन्मना (**नु**) (**अस्ति**) (**न**) निषेधे (**राधसः**) धनाऽन्नस्य (**आमरीता**) समन्ताद्विनाशकः (**मघस्य**) धनस्य (**उद्वावृषाणः**) उत्कृष्टतया भृशम्बलकरस्य (**तविषीवः**) बलवत्सेनावन् (**उग्र**) प्रतापिन् (**अस्मभ्यम्**) (**दद्धि**) देहि (**पुरुहूत**) बहूनामाह्वयक (**रायः**) धनानि॥७॥

अन्वयः-हे पुरुहूतोग्र राजन्! यस्य जनुषा वर्त्ता कोऽपि नास्ति यस्य मघस्य राधस आमरीता न विद्यते। उद्वावृषाणस्तविषीवो विजयी स त्वमस्मभ्यं रायो नु दद्धि॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यस्योत्तमकुले जन्म यस्य कुलं प्रशंसितं कर्म्म कृतवद् यस्य संग्रामे विचारे वा रोधको न विद्यते स एव सुखदाता राजाऽस्माकम्भवेदिति वयमिच्छेम॥७॥

पदार्थः-हे (**पुरुहूत**) बहुतों के पुकारने वाले (**उग्र**) प्रतापी राजन् (**यस्य**) जिसका (**जनुषा**) जन्म से (**वर्त्ता**) निवारण करनेवाला कोई भी (**न**) नहीं (**अस्ति**) है जिसके (**मघस्य**) धन और (**राधसः**) धनरूप अन्न का (**आमरीता**) सब प्रकार नाश करनेवाला (**न**) नहीं विद्यमान है। हे (**उद्वावृषाणः**) उत्तमता से अत्यन्त बल करने वाले की (**तविषीवः**) बलयुक्त सेनावान् जीतने वाला वह आप (**अस्मभ्यम्**) हम लोगों के लिये (**रायः**) धनों को (**नु**) निश्चय से (**दद्धि**) दीजिये॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिसका उत्तम कुल में जन्म और जिसका कुल प्रशंसित कर्म्म किये गये के समान और जिसका संग्राम में वा विचार में रोकने वाला नहीं है, वही सुख देने वाला राजा हम लोगों का होवे, ऐसी हम लोग इच्छा करें॥७॥

पुनस्तमेव विषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

ईक्षे॑ रा॒यः क्षय॑स्य चर्षणी॒नामु॒त व्र॒जम॑पवर्ता॒सि॒ गोना॑म्।

शि॒क्षा॒न॒रः स॑मि॒थेषु॑ प्रहावा॒न् वस्वो॑ रा॒शिम॑भिने॒ताऽसि॒ भूरि॑म्॥८॥

ईक्षे॑। रा॒यः। क्षय॑स्य। च॒र्ष॒णी॒नाम्। उ॒त। व्र॒जम्। अ॒प॒ऽव॒र्ता। अ॒सि॒। गोना॑म्। शि॒क्षा॒ऽन॒रः। स॒म्ऽइ॒थेषु॑। प्र॒हाऽवा॑न्। वस्वः॑। रा॒शिम्। अ॒भि॒ऽने॒ता। अ॒सि॒। भूरि॑म्॥८॥

पदार्थः-(**ईक्षे**) पश्यामि (**रायः**) धनस्य (**क्षयस्य**) निवासस्य (**चर्षणीनाम्**) मनुष्याणाम् (**उत**) अपि (**व्रजम्**) शस्त्राऽस्त्रम् (**अपवर्त्ता**) अपवारयिता। अत्र तृन् प्रत्ययः। (**असि**) (**गोनाम्**) स्तोतॄणाम् (**शिक्षानरः**) विद्योपादानेन नेता (**समिथेषु**) संग्रामेषु (**प्रहावान्**) विजयं प्राप्तवान् (**वस्वः**) धनस्य (**राशिम्**) समूहम् (**अभिनेता**) आभिमुख्यं प्रापयिता। अत्रापि तृन्। (**असि**) (**भूरिम्**) बहुविधम्॥८॥

अन्वयः-हे राजन्! यतः शिक्षानरस्त्वं प्रहावान् समिथेषु वस्वो भूरिं राशिमभिनेताऽसि चर्षणीनां रायः क्षयस्योत गोनाञ्च व्रजमपवर्त्ताऽसि तमहं राजानमीक्षे॥८॥

भावार्थः-स एव राजा दिक्षु कीर्तिमान् भवेद्यो मनुष्येभ्यो विद्यां धनं सुवासं च दत्वा संग्रामादिषु सततं सर्वान् रक्षेत्॥८॥

पदार्थः-हे राजन्! जिस कारण (**शिक्षानरः**) विद्या के देने से नायक आप (**प्रहावान्**) विजय को प्राप्त तथा (**समिथेषु**) संग्रामों में (**वस्वः**) धन के (**भूरिम्**) बहुत प्रकार के (**राशिम्**) समूह को (**अभिनेता**) सम्मुख पहुंचाने वाले (**असि**) हो और (**चर्षणीनाम्**) मनुष्यों के (**रायः**) धन (**क्षयस्य**) निवास (**उत**) और (**गोनाम्**) स्तुति करने वालों के सम्बन्धी (**व्रजम्**) शस्त्र-अस्त्रों को (**अपवर्त्ता**) दूर करने वाले (**असि**) हो उनको मैं राजा होने को (**ईक्षे**) देखता हूँ॥८॥

भावार्थः-वही राजा दिशाओं में यशस्वी होवे कि जो मनुष्यों को विद्या, धन और उत्तम वास देकर संग्रामादिकों में निरन्तर सब की रक्षा करे॥८॥

अथ विद्वदुपदेशगुणानाह॥

अब विद्वानों के उपदेशगुणों को अगले मन्त्र में कहते हैं॥

कया॒ तच्छृ॑ण्वे॒ शच्या॒ शचि॑ष्ठो॒ यया॑ कृ॒णोति॒ मुहु॒ का चि॑दृ॒ष्वः।

पु॒रु दा॒शुषे॒ विच॑यिष्ठो॒ अंहो॑ऽथा॑ दधाति॒ द्रवि॑णं जरि॒त्रे॥९॥

कया॑। तत्। शृ॒ण्वे॒। शच्या॑। शचि॑ष्ठः। यया॑। कृ॒णोति॑। मुहु॑। का। चि॒त्। ऋ॒ष्वः। पु॒रु। दा॒शुषे॑। विऽच॑यिष्ठः। अंह॑ः। अथ॑। द॒धा॒ति॒। द्रवि॑णम्। ज॒रि॒त्रे॥९॥

पदार्थः-(**कया**) (**तत्**) तानि (**शृण्वे**) शृणुयाम् (**शच्या**) प्रज्ञया क्रियया वा (**शचिष्ठः**) अतिशयेन प्राज्ञः (**यया**) (**कृणोति**) (**मुहु**) वारं वारम् (**का**) कानि (**चित्**) अपि (**ऋष्वः**) महान् (**पुरु**)

बहु **(दाशुषे)** दात्रे **(विचयिष्ठः)** अतिशयेन वियोजकः **(अंहः)** अपराधम् **(अथा)** अत्र **निपातस्य चे**ति दीर्घः। **(दधाति) (द्रविणम्)** धनम् **(जरित्रे)** स्तावकाय॥९॥

अन्वयः-हे राजन्! यथा शचिष्ठो विचयिष्ठ ऋष्वो विद्वानंहः पृथक्कृत्याऽथा जरित्रे दाशुषे पुरु द्रविणं दधाति यानि का चिदुत्तमानि कर्म्माणि यया कया शच्या मुहु कृणोति तत्तया शृण्वे॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याणां योग्यतास्ति यथाऽऽप्ताः पापानि विहाय धर्म्माचरणङ्कृत्वा प्रमात्मकञ्ज्ञानं धृत्वा जगत्कल्याणाय पुष्कलं विज्ञानं प्रसारयन्ति तथैव यूयमाचरत॥९॥

पदार्थः-हे राजन्! जैसे **(शचिष्ठः)** अत्यन्त बुद्धिमान् **(विचयिष्ठः)** अत्यन्त वियोग करने वाला **(ऋष्वः)** बड़ा विद्वान् **(अंहः)** अपराध को पृथक् करके **(अथा)** अनन्तर **(जरित्रे)** स्तुति करने और **(दाशुषे)** देनेवाले के लिये **(पुरु)** बहुत **(द्रविणम्)** धन को **(दधाति)** धारण करता है और जिन **(का)** किन्हीं **(चित्)** भी उत्तम कर्म्मों को **(यया)** जिस **(कया)** किसी **(शच्या)** बुद्धि वा क्रिया से **(मुहु)** बार-बार **(कृणोति)** सिद्ध करता है **(तत्)** उन्हें उससे **(शृण्वे)** सुनूं॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों की योग्यता है कि जैसे यथार्थवक्ता जन पापों का त्याग, धर्म्म का आचरण और यथार्थ ज्ञानस्वरूप ज्ञान को धारण करके जगत् के कल्याण के लिये बहुत ज्ञान को फैलाते हैं, वैसे ही आप लोग आचरण करो॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मा नो॑ मर्धी॒रा भ॑रा द॒द्धि तन्नः॒ प्र दा॒शुषे॑ दात॑वे॒ भूरि॒ यत्ते॑।
नव्ये॑ दे॒ष्णे श॒स्ते अ॒स्मिन्त॑ उ॒क्थे प्र ब्र॑वाम व॒यमि॑न्द्र स्तु॒वन्तः॑॥१०॥

मा। नः॒। म॒र्धीः॒। आ। भ॒र॒। द॒द्धि। तत्। नः॒। प्र। दा॒शुषे॑। दात॑वे। भूरि॑। यत्। ते॒। नव्ये॑। दे॒ष्णे। श॒स्ते। अ॒स्मिन्। ते॒। उ॒क्थे। प्र। ब्र॒वा॒म॒। व॒यम्। इ॒न्द्र॒। स्तु॒वन्तः॑॥१०॥

पदार्थः-**(मा)** निषेधे **(नः)** अस्मान् **(मर्धीः)** उन्दितान् मा कुरु **(आ) (भर)** धर **(दद्धि)** देहि **(तत्)** धनम् **(नः)** अस्मभ्यम् **(प्र) (दाशुषे)** दानशीलाय **(दातवे)** दातुम् **(भूरि) (यत्) (ते)** तव **(नव्ये)** नवीने **(देष्णे)** दातुं योग्ये **(शस्ते)** प्रशंसिते **(अस्मिन्) (ते)** तुभ्यम् **(उक्थे)** वक्तव्ये **(प्र) (ब्रवाम)** उपदिशेम **(वयम्) (इन्द्र)** राजन् **(स्तुवन्तः)**॥१०॥

अन्वयः-हे इन्द्र! त्वं नो मा मर्धीर्नस्तदाऽऽभर यत्तेऽस्मिन् नव्ये देष्णे ते शस्त उक्थे भूरि द्रव्यमस्ति तद्दाशुषे दातवे प्रभर सर्वेभ्यो नोऽस्मभ्यं दद्धि। स्तुवन्तो वयमिदं त्वां प्र ब्रवाम॥१०॥

भावार्थः-हे राजंस्तुभ्यं कर्त्तव्यं कर्म्म यद्यद्वदेम तत्तदाचर प्रजाऽमात्यराज्योन्नतये बहु धनं विद्यान्यायौ च प्रसारय॥१०॥

पदार्थः-हे **(इन्द्र)** राजन्! आप **(नः)** हम लोगों को **(मा)** मत **(मर्धीः)** गीला कीजिये हम लोगों के लिये **(तत्)** उस धन को **(आ, भर)** धारण कीजिये **(यत्)** जो **(ते)** आपके **(अस्मिन्)** इस **(नव्ये)** नवीन **(देष्णे)** देने और **(ते)** आपके **(शस्ते)** प्रशंसित **(उक्थे)** कहने योग्य व्यवहार में **(भूरि)** बहुत द्रव्य है वह **(दाशुषे)** दानशील के लिये **(दातवे)** देने को **(प्र)** अत्यन्त धारण कीजिये और **(नः)** हम सब लोगों के लिये **(दद्धि)** दीजिये और **(स्तुवन्तः)** स्तुति करते हुए **(वयम्)** हम लोग यह आपको **(प्र, ब्रवाम)** उपदेश करें॥१०॥

भावार्थः-हे राजन्! आपके लिये करने योग्य कर्म्म जो-जो कहें उस-उसका आचरण करो और प्रजा, मन्त्री और राज्य की उन्नति के लिये बहुत धन, विद्या और न्याय को फैलाओ॥१०॥

पुनरुपदेशविषयमाह॥

फिर उपदेशविषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥११॥४॥

नु। स्तुतः। इन्द्र। नु। गृणानः। इषम्। जरित्रे। नद्यः। न। पीपेरिति पीपेः। अकारि। ते। हरिऽवः। ब्रह्म। नव्यम्। धिया। स्याम। रथ्यः। सदाऽसाः॥११॥

पदार्थः-(**नु**) सद्यः **(स्तुतः)** प्रशंसितः **(इन्द्र)** सुखप्रदातः **(नु)** **(गृणानः)** स्तुवन् **(इषम्)** विज्ञानम् **(जरित्रे)** सत्यप्रशंसकाय **(नद्यः)** **(न)** इव **(पीपेः)** वर्धय **(अकारि)** क्रियते **(ते)** तव **(हरिवः)** बहुसेनाङ्गयुक्त **(ब्रह्म)** महद्धनमन्नं वा **(नव्यम्)** नवीनम् **(धिया)** कर्म्मणा **(स्याम)** **(रथ्यः)** बहुरमणीयरथादियुक्ताः **(सदासाः)** समानदानसेवकाः॥११॥

अन्वयः-हे इन्द्र! स्तुतस्संस्त्वं जरित्रे नव्यम्ब्रह्म नु नद्यो न पीपेः। गृणानः सन्नव्यमिषम्पीपेः। हे हरिवो! यस्मै तेऽस्माभिर्धिया नव्यं ब्रह्माऽकारि तत्सहायेन सदासा वयं रथ्यो नु स्याम॥११॥

भावार्थः-अमात्यसेनाप्रजाजनैः प्रशंसितानि कर्म्माणि कुर्वतो राज्ञः स्तुतिर्यथा कार्य्या तथैव राज्ञाप्येतेषां शुभकर्म्मसु प्रवर्त्तमानानां प्रशंसा कर्त्तव्येति॥११॥

अत्रेन्द्रराजाऽमात्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति विंशतितमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** सुख के देनेवाले! **(स्तुतः)** प्रशंसित हुए आप **(जरित्रे)** सत्य कहनेवाले के लिये **(नव्यम्)** नवीन **(ब्रह्म)** बड़े धन वा अन्न की **(नु)** शीघ्र **(नद्यः)** नदियों के **(न)** सदृश **(पीपेः)** वृद्धि करो और **(गृणानः)** स्तुति करता हुआ नवीन **(इषम्)** विज्ञान की वृद्धि करो हे **(हरिवः)** बहुत

सेना के अङ्गों से युक्त! जिसके लिये **(ते)** आपके हम लोगों ने **(धिया)** कर्म से नवीन बड़ा धन वा अन्न **(अकारि)** किया उसके सहाय से **(सदासाः)** समान दान देने वाले सेवक हम लोग **(रथ्यः)** बहुत सुन्दर रथ आदिकों से युक्त **(नु)** निश्चय **(स्याम)** होवें॥११॥

भावार्थः–मन्त्री, सेना और प्रजाजनों को श्रेष्ठ कर्म्म करते हुए राजा की स्तुति जैसी कर्त्तव्य है, वैसी ही राजा को भी इन उत्तम कर्म्मों में प्रवर्त्तमान लोगों की प्रशंसा करनी चाहिये॥११॥

इस सूक्त में इन्द्र, राजा, अमात्य और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

**अथैकादशर्चस्यैकाधिकविंशतितमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १, २, ७, १०
भुरिक्पङ्क्तिः। ३ स्वराट् पङ्क्तिः। ११ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४, ५
निचृत्त्रिष्टुप्। ६, ८ विराट् त्रिष्टुप् छन्दः। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः॥**

अथेन्द्रपदवाच्यराजगुणानाह॥

अब ग्यारह ऋचावाले इक्कीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों को कहते हैं॥

**आ या॒त्विन्द्रो॑ऽव॑स॒ उप॑ न इ॒ह स्तु॒तः स॑ध॒मादं॑स्तु॒ शूर॑ः।
वा॒वृ॒धा॒नस्तवि॑षी॒र्यस्य॑ पू॒र्वीर्द्यौर्न क्ष॒त्रम॒भिभू॑ति॒ पुष्या॑त्॥ १॥**

आ। या॒तु॒। इन्द्र॑ः। अव॑से। उप॑। न॒ः। इ॒ह। स्तु॒तः। स॒ध॒ऽमात्। अ॒स्तु॒। शूर॑ः। व॒वृ॒धा॒नः। तवि॑षीः। यस्य॑। पू॒र्वीः। द्यौः। न। क्ष॒त्रम्। अ॒भिऽभू॑ति। पुष्या॑त्॥ १॥

पदार्थः-(**आ**) (**यातु**) आगच्छतु (**इन्द्रः**) प्रजारक्षकः (**अवसे**) रक्षणाद्याय (**उप**) (**नः**) अस्माकम् (**इह**) अस्मिन् राजप्रजाव्यवहारे (**स्तुतः**) प्राप्तप्रशंसः (**सधमात्**) समानस्थानात् यस्सह माद्यति (**अस्तु**) (**शूरः**) शत्रूणां हिंसकः (**वावृधानः**) वर्धमानः (**तविषीः**) बलयुक्ताः सेनाः (**यस्य**) (**पूर्वीः**) प्राचीनाः (**द्यौः**) सूर्य्यः (**न**) इव (**क्षत्रम्**) राज्यम् (**अभिभूति**) शत्रूणां तिरस्कारनिमित्तम् (**पुष्यात्**) पुष्टं भवेत्॥१॥

अन्वयः-हे विद्वांसो! यस्य राज्ञो द्यौर्न पूर्वीस्तविषीः स्युर्द्यौर्नाऽभिभूति क्षत्रं पुष्यात् स वावृधानः शूरः स्तुत इन्द्रो नोऽस्माकमवस इहोपायात्वस्माभिः सधमादस्तु॥१॥

भावार्थः-यो राजा विद्युद्बलिष्ठः सूर्य्यवत् सुप्रकाशाः सेनाः कृत्वा निष्कण्टकं राज्यं पुष्यात्स एवेह सर्वां प्रतिष्ठामखिलमानन्दं प्राप्य देहान्ते मोक्षं गच्छेत्॥१॥

पदार्थः-हे विद्वान् जनो! (**यस्य**) जिस राजा की (**द्यौः**) सूर्य्य के (**न**) सदृश (**पूर्वीः**) प्राचीन (**तविषीः**) बलयुक्त सेना हों और सूर्य्य के सदृश (**अभिभूति**) शत्रुओं के तिरस्कार में निमित्त (**क्षत्रम्**) राज्य (**पुष्यात्**) पुष्ट होवे वह (**वावृधानः**) बढ़ने और (**शूरः**) शत्रुओं का नाश करने वाला (**स्तुतः**) प्रशंसा को प्राप्त (**इन्द्रः**) प्रजारक्षक (**नः**) हम लोगों के (**अवसे**) रक्षण आदि के लिये (**इह**) यहाँ राजा और प्रजा के व्यवहार में (**उप, आ, यातु**) समीप प्राप्त हो और हम लोगों के (**सधमात्**) समीप स्थान से आनन्द करने वाला (**अस्तु**) हो॥१॥

भावार्थः-जो राजा बिजुली के सदृश बलिष्ठ, सूर्य्य के सदृश उत्तम प्रकार प्रकाशित, सेना कर निष्कंटक अर्थात् दुष्टजनादिरहित राज्य को पुष्ट करे, वही इस संसार में सम्पूर्ण प्रतिष्ठा और सम्पूर्ण आनन्द को प्राप्त होके शरीर के त्याग के समय मोक्ष को प्राप्त होवे॥१॥

अथ राजगुणानाह॥

अब राजगुणों को अगले मन्त्र में कहते हैं॥

तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄन्।
यस्य क्रतुर्विदथ्यो३ न सम्राट् साह्वान् तरुत्रो अभ्यस्ति कृष्टीः॥ २॥

तस्य। इत्। इह। स्तवथ। वृष्ण्यानि। तुविऽद्युम्नस्य। तुविऽराधसः। नॄन्। यस्य। क्रतुः। विदथ्यः। न। सम्ऽराट्। सह्वान्। तरुत्रः। अभि। अस्ति। कृष्टीः॥ २॥

पदार्थः-(**तस्य**) (**इत्**) (**इह**) अस्मिन् राज्ये (**स्तवथ**) प्रशंसथ (**वृष्ण्यानि**) बलेषु साधूनि (**तुविद्युम्नस्य**) बहुयशसः (**तुविराधसः**) बह्वैश्वर्यस्य (**नॄन्**) नायकान् (**यस्य**) (**क्रतुः**) प्रज्ञाराज्यपालनाख्यो यज्ञो वा (**विदथ्यः**) विज्ञातुं योग्यः (**न**) इव (**सम्राट्**) सार्वभौमो राजमानः (**साह्वान्**) सोढा (**तरुत्रः**) दुःखेभ्यस्तारकः (**अभि**) (**अस्ति**) (**कृष्टीः**) मनुष्यान्॥ २॥

अन्वयः-हे मनुष्या! यस्य तुविद्युम्नस्य तुविराधसो राज्ञ इह विदथ्यो सम्राण्न साह्वान् तरुत्रः क्रतुरभ्यस्ति वृष्ण्यानि सन्ति तस्येन्नॄन् कृष्टीर्यूयं स्तवथ॥ २॥

भावार्थः-हे मनुष्या! यस्य पूर्णबलानि सैन्यानि महाकीर्त्तिरसङ्ख्यं धनं पूर्णा विद्या शुभा गुणकर्म्मस्वभावाः सहायाश्च स्युस्स एव चक्रवर्त्ती राजा भवितुमर्हति॥ २॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिस (**तुविद्युम्नस्य**) बहुत यशयुक्त (**तुविराधसः**) बहुत ऐश्वर्य्य वाले राजा के (**इह**) इस राज्य में (**विदथ्यः**) जानने योग्य (**सम्राट्**) सम्पूर्ण भूमि में प्रसिद्ध और प्रकाशमान के (**न**) सदृश (**साह्वान्**) सहने वा (**तरुत्रः**) दुःखों से पार उतारने वाला (**क्रतुः**) बुद्धि और राज्य का पालनरूप यज्ञ (**अभि, अस्ति**) सब ओर से है और (**वृष्ण्यानि**) बलों में साधु कार्य हैं (**तस्य, इत्**) उसी के (**नॄन्**) नायक अर्थात् मुख्य (**कृष्टीः**) मनुष्यों की (**स्तवथ**) तुम लोग प्रशंसा करो॥ २॥

भावार्थः-हे मनुष्यो! जिसकी पूर्णबलवाली सेना और बड़ा यश, असंख्य धन, पूर्णविद्या, उत्तम गुण, कर्म्म, स्वभाव और सहाय होवें; वही चक्रवर्त्ती राजा होने के योग्य होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ यात्विन्द्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात्।
स्वर्णरादवसे नो मरुत्वान् परावतो वा सदनादृतस्य॥ ३॥

आ। यातु। इन्द्रः। दिवः। आ। पृथिव्याः। मक्षु। समुद्रात्। उत। वा। पुरीषात्। स्वः।ऽनरात्। अवसे। नः। मरुत्वान्। पराऽवतः। वा। सदनात्। ऋतस्य॥ ३॥

पदार्थः-(**आ**) समन्तात् (**यातु**) प्राप्नोतु (**इन्द्रः**) सूर्य इव राजा (**दिवः**) प्रकाशात् (**आ**) (**पृथिव्याः**) भूमेः (**मक्षू**) शीघ्रम्। **मक्ष्विति क्षिप्रनामसु पठितम्।** (निघं०२.१५) (**समुद्रात्**) अन्तरिक्षात्

(उत) (वा) (पुरीषात्) उदकात्। **पुरीषमित्युदकनामसु पठितम्।** (निघं०१.१२) **(स्वर्णरात्)** स्वरादित्य इव नरान्नायकात् **(अवसे)** रक्षणाद्याय **(नः)** अस्माकम् **(मरुत्वान्)** वायुवानिव प्रशस्तपुरुषयुक्तः **(परावतः)** दूरदेशात् **(वा) (सदनात्)** स्थानात् **(ऋतस्य)** सत्यस्य कारणस्य॥३॥

अन्वयः-यथा सूर्य्य आ दिवः पृथिव्या उत समुद्राद्वा पुरीषात् परावत ऋतस्य सदनाद्वा नोऽवसे मक्ष्वायाति तथैव स्वर्णरान्नोऽवसे मरुत्वान्त्सन्निन्द्र आ यातु॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा सूर्य्योऽन्तरिक्षं प्रकाशं भूमिञ्जलं कार्य्यं जगच्च व्याप्य सर्वं रक्षति तथैव प्रतापी सुसहायो भूत्वाऽस्मान् संरक्ष्य प्रकाशितो भव॥३॥

पदार्थः-जैसे सूर्य **(आ, दिवः)** प्रकाश से **(पृथिव्याः)** भूमि से **(उत)** और **(समुद्रात्)** अन्तरिक्ष से **(वा)** वा **(पुरीषात्)** जल से **(परावतः)** दूर देश से **(ऋतस्य)** सत्य कारण के **(सदनात्)** स्थान से **(वा)** वा हम संसारी जनों की रक्षा आदि के लिये **(मक्षू)** शीघ्र प्राप्त होता है, वैसे ही **(स्वर्णरात्)** सूर्य्य के सदृश नायक से **(नः)** हम लोगों के **(अवसे)** रक्षण आदि के लिये **(मरुत्वान्)** वायुवान् पदार्थ के सदृश प्रशंसित पुरुषों से युक्त होता हुआ **(इन्द्रः)** सूर्य के समान राजा **(आ, यातु)** प्राप्त हो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे सूर्य्य अन्तरिक्ष, प्रकाश, भूमि, जल और कार्य्य जगत् को व्याप्त होकर सब की रक्षा करता है, वैसे ही प्रतापी और उत्तम सहाययुक्त होकर और हम लोग की उत्तम प्रकार रक्षा करके प्रकाशित हूजिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्थूरस्य॑ रा॒यो बृ॑ह॒तो य ईशे॒ तमु॑ ष्टवाम वि॒दथे॒ष्विन्द्र॑म्।
यो वा॒युना॒ जय॑ति॒ गोम॑तीषु॒ प्र धृ॑ष्णु॒या नय॑ति॒ वस्यो॒ अच्छ॑॥४॥

स्थूरस्य॑। रा॒यः। बृ॒ह॒तः। यः। ईशे॑। तम्। ऊ॒म् इति॑। स्त॒वा॒म॒। वि॒दथे॑षु। इन्द्र॑म्। यः। वा॒युना॑। जय॑ति। गोऽम॑तीषु। प्र। धृ॒ष्णु॒ऽया। नय॑ति। वस्यः॑। अच्छ॑॥४॥

पदार्थः-**(स्थूरस्य)** स्थूलस्य **(रायः)** धनस्य **(बृहतः)** महतः **(यः)** **(ईशे)** ईष्ट ईश्वरो भवति **(तम्)** **(उ)** **(स्तवाम)** प्रशंसेम **(विदथेषु)** सङ्ग्रामेषु **(इन्द्रम्)** शत्रुविदारकम् **(यः)** **(वायुना)** पवनेन **(जयति)** **(गोमतीषु)** प्रशंसिता गावो वाचो यासु सेनासु तासु **(प्र)** **(धृष्णुया)** धृष्णूनि प्रगल्भानि याति यैस्तानि **(नयति)** **(वस्यः)** अतिशयेन श्रेष्ठं धनम् **(अच्छ)**॥४॥

अन्वयः-हे मनुष्या! यो बृहतः स्थूरस्य राय ईशे विदथेष्विन्द्रमच्छ नयति यो गोमतीषु धृष्णुया वायुनाऽच्छ जयति वस्यः प्रणयति तमु वयं स्तवाम॥४॥

भावार्थः–यो राजा महतीभिस्सेनाभिः सङ्ग्रामेषु विजयं प्राप्य महान्ति धनानि प्रतिष्ठाञ्च लब्ध्वा प्रशंसितो जायते तस्यैव स्तुतिः कर्त्तव्या॥४॥

पदार्थः–हे मनुष्यो! **(यः)** जो **(बृहतः)** बड़े **(स्थूरस्य)** स्थूल **(रायः)** धन का **(ईशे)** स्वामी होता है **(विदथेषु)** सङ्ग्रामों में **(इन्द्रम्)** शत्रु के नाश करने वाले को **(अच्छ)** उत्तम प्रकार **(नयति)** प्राप्त करता है **(यः)** जो **(गोमतीषु)** प्रशंसित वाणियों से युक्त सेनाओं में **(धृष्णुया)** प्रगल्भता और **(वायुना)** पवन के साथ उत्तम प्रकार **(जयति)** विजयी होता है **(वस्यः)** अत्यन्त श्रेष्ठ धन को **(प्र)** प्रीति के साथ चाहता है **(तम्, उ)** उसी की हम लोग **(स्तवाम)** प्रशंसा करे॥४॥

भावार्थः–जो राजा बड़ी सेनाओं से सङ्ग्रामों में विजय को प्राप्त हो तथा बहुत धनों और प्रतिष्ठा को प्राप्त होकर प्रशंसित होता है, उसी की स्तुति करनी चाहिये॥४॥

पुनस्तमेव राजविषयमाह॥

फिर उसी राजविषय को अगले मन्त्र में कहते हैं॥

उप॒ यो नमो॒ नम॑सि स्तभा॒यन्नि॒यर्ति॒ वाचं॑ ज॒नय॒न् यज॑ध्यै।

ऋ॒ञ्जसा॒नः पु॑रु॒वार॑ उ॒क्थैरेन्द्रं॑ कृ॒ण्वीत॒ सद॑नेषु॒ होता॑॥५॥५॥

उप॑। यः। नमः॑। नम॑सि। स्त॒भा॒यन्। इ॒यर्ति॑। वाच॑म्। ज॒नय॑न्। यज॑ध्यै। ऋ॒ञ्जसा॒नः। पु॒रु॒ऽवारः॑। उ॒क्थैः॑। आ। इन्द्र॑म्। कृ॒ण्वी॒त॒। सद॑नेषु। होता॑॥५॥

पदार्थः–**(उप)** **(यः)** **(नमः)** अन्नम् **(नमसि)** अन्ने सत्कारे वा **(स्तभायन्)** स्तम्भयन् **(इयर्त्ति)** प्राप्नोति **(वाचम्)** सुशिक्षितां वाणीम् **(जनयन्)** प्रकटयन् **(यजध्यै)** यष्टुं सङ्गन्तुम् **(ऋञ्जसानः)** प्रसाध्नुवन् **(पुरुवारः)** बहुभिः स्वीकृतः **(उक्थैः)** प्रशंसितैः कर्म्मभिः **(आ)** **(इन्द्रम्)** परमैश्वर्य्यम् **(कृण्वीत)** कुर्य्यात् **(सदनेषु)** न्यायस्थानेषु **(होता)** न्यायस्य दाता॥५॥

अन्वयः-हे मनुष्या! यो यजध्यै वाचं जनयन्नुक्थैर्ऋञ्जसानः पुरुवारो होता सदनेषु नमसि नम उप स्तभायन्निन्द्रमा कृण्वीत स नमः सत्कारमियर्त्ति॥५॥

भावार्थः–यो राजा विद्यासुशिक्षायुक्तां नीतिं प्रकटयन् सत्काराऽर्हान् सत्कुर्वन् दुष्टान् दण्डयन् प्रयतमानः राज्यपालनेनैश्वर्योन्नतिं करोति स एव सर्वत्र सत्कृतो जायते॥५॥

पदार्थः–हे मनुष्यो! **(यः)** जो **(यजध्यै)** मेल करने को **(वाचम्)** उत्तम शिक्षायुक्त वाणी **(जनयन्)** प्रकट करता हुआ **(उक्थैः)** प्रशंसित कर्म्मों से **(ऋञ्जसानः)** अत्यन्त सिद्ध करता हुआ **(पुरुवारः)** बहुतों से स्वीकार किया गया **(होता)** न्याय को देनेवाला **(सदनेषु)** न्याय के स्थानों में **(नमसि)** अन्न वा सत्कार के निमित्त **(नमः)** अन्न को **(उप, स्तभायन्)** स्तम्भित अर्थात् रोकता हुआ **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य को **(आ, कृण्वीत)** सिद्ध करे, वह अन्न और सत्कार को **(इयर्त्ति)** प्राप्त होता है॥५॥

भावार्थः-जो राजा विद्या और उत्तम शिक्षा से युक्त नीति को प्रकट करता, सत्कार करने के योग्यों का सत्कार करता, दुष्टों को दण्ड देता और प्रयत्न करता हुआ राज्य के पालन से ऐश्वर्य्य की उन्नति करता है, वही सर्वत्र सत्कृत होता है॥५॥

अथ राज्ञा सह प्रजाजनविषयमाह॥

अब राजा के साथ प्रजाजनों के विषय को अगले मन्त्र में कहते हैं॥

धि॒षा यदि॑ धि॒ष॒ण्यन्त॑: स॒र॒ण्यान्सद॑न्तो॒ अद्रि॑मौशि॒जस्य॒ गोहे॑।
आ दु॒रोषा॑: पा॒स्त्यस्य॒ होता॒ यो नो॑ म॒हान्त्सं॒व॑रणेषु॒ वह्नि॑:॥६॥

धि॒षा। यदि॑। धि॒ष॒ण्यन्त॑:। स॒र॒ण्यान्। सद॑न्तः। अद्रि॑म्। औ॒शि॒जस्य॑। गोहे॑। आ। दु॒रोषा॑:। पा॒स्त्यस्य॑। होता॑। यः। नः॒। म॒हान्। स॒म्ऽव॑रणेषु। वह्नि॑:॥६॥

पदार्थः-(**धिषा**) स्तुत्या (**यदि**) (**धिषण्यन्तः**) स्तुवन्तः (**सरण्यान्**) सरणं प्राप्तान् (**सदन्तः**) निवासयन्तः (**अद्रिम्**) मेघमिव (**औशिजस्य**) कामयमानाऽपत्यस्य (**गोहे**) संवरणीये गृहे (**आ**) (**दुरोषाः**) दुर्गतो दूरीभूत ओषः क्रोधो यस्य सः (**पास्त्यस्य**) गृहे भवस्य (**होता**) दाता (**यः**) (**नः**) अस्माकम् (**महान्**) (**संवरणेषु**) आच्छादकेषु व्यवहारेषु (**वह्निः**) वोढाग्निरिव॥६॥

अन्वयः-हे मनुष्या! यो नः पास्त्यस्य संवरणेषु वह्निरिव महान् दुरोषा होता भवेद्यदि तमद्रिमिवौशिजस्य गोहे धिषण्यन्तः सरण्यानासदन्तो धिषा यूयं गृह्णीत तर्हि युष्मान्त्सर्वं सुखम्प्राप्नुयात्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि राजादयो मनुष्याः प्रशंसितान् प्रशंसयेयुः प्राप्तान् रक्षेयुस्तर्हि ते महान्तो भवेयुः॥६॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**नः**) हम लोगों के (**पास्त्यस्य**) गृह में उत्पन्न हुए के (**संवरणेषु**) आच्छादक अर्थात् ढांपने वाले व्यवहारों में (**वह्निः**) पदार्थ पहुँचाने वाले अग्नि के सदृश (**महान्**) बड़ा (**दुरोषाः**) क्रोध से रहित (**होता**) देने वाला हो (**यदि**) जो उसके (**अद्रिम्**) मेघ के सदृश (**औशिजस्य**) कामना करने वाले के सन्तान के (**गोहे**) ढांपने योग्य गृह में (**धिषण्यन्तः**) स्तुति करते और (**सरण्यान्**) सरण्यान् अर्थात् सन्मार्ग को प्राप्त जनों को (**आ, सदन्तः**) निवास देते हुए (**धिषा**) स्तुति अर्थात् प्रशंसा के साथ आप लोग ग्रहण करो तो आप लोगों को सब सुख प्राप्त होवे॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा आदि मनुष्य प्रशंसित पुरुषों की प्रशंसा करावें **[**=करें**]** और प्राप्त हुए पुरुषों की रक्षा करें तो वे श्रेष्ठ होवें॥६॥

अथ राजविषयान्तर्गतराजभृत्यकर्माह॥

अब राजविषयान्तर्गत राजभृत्यों के कर्म को अगले मन्त्र में कहते हैं॥

सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शुष्मः स्तुवते भराय।

गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय॥७॥

सत्रा। यत्। ईम्। भार्वरस्य। वृष्णः। सिसक्ति। शुष्मः। स्तुवते। भराय। गुहा। यत्। ईम्। औशिजस्य। गोहे। प्र। यत्। धिये। प्र। अयसे। मदाय॥७॥

पदार्थः-(**सत्रा**) सत्येन (**यत्**) यः (**ईम्**) सर्वतः (**भार्वरस्य**) प्रजाः भर्तू राज्ञः (**वृष्णः**) बलिष्ठस्य (**सिषक्ति**) सिञ्चति (**शुष्मः**) बलवान् (**स्तुवते**) प्रशंसां कुर्वते (**भराय**) धारकाय (**गुहा**) बुद्धौ (**यत्**) यः (**ईम्**) (**औशिजस्य**) कामयमानेषु कुशलस्य (**गोहे**) संवरणीये गृहे (**प्र**) (**यत्**) यः (**धिये**) प्रज्ञायै (**प्र**) (**अयसे**) गमनाय (**मदाय**) आनन्दाय॥७॥

अन्वयः-यद्यः शुष्मः सत्रेम् भार्वरस्य वृष्णः स्तुवते भराय सिषक्ति यद्यो गुहौशिजस्य गोहे सत्यं प्र सिषक्ति यद्योऽयसे मदाय धिये गुहा प्रज्ञानमीं प्र सिषक्ति स एव सर्वं लभते॥७॥

भावार्थः-ये भृत्या धर्म्येण राज्यं शासतो राज्ञो राष्ट्रे सत्येन न्यायेन प्रजाः पालयन्ति तेऽतुलमानन्दं लभन्ते॥७॥

पदार्थः-(**यत्**) जो (**शुष्मः**) बलवान् (**सत्रा**) सत्य से (**ईम्**) सब प्रकार (**भार्वरस्य**) प्रजा के पालन करने वाले राजा के (**वृष्णः**) बलिष्ठ की (**स्तुवते**) प्रशंसा करते हुए (**भराय**) धारण करने वाले के लिए (**सिषक्ति**) सींचता है और (**यत्**) जो (**गुहा**) बुद्धि में (**औशिजस्य**) कामना करने वालों में चतुर के (**गोहे**) स्वीकार करने योग्य घर में सत्य का (**प्र**) सिञ्चन करता है (**यत्**) जो (**अयसे**) गमन (**मदाय**) आनन्द और (**धिये**) बुद्धि के लिये बुद्धि में प्रज्ञान को (**ईम्**) सब प्रकार से (**प्र**) अत्यन्त सींचता है, वही सम्पूर्ण लाभ को प्राप्त होता है॥७॥

भावार्थः-जो कर्मचारी लोग धर्म से राज्य का शासन करते हुए राजा के राज्य में सत्य-न्याय से प्रजाओं का पालन करते हैं, वे अतुल आनन्द को प्राप्त होते हैं॥७॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

वि यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि।

विदद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो३ वहन्ति॥८॥

वि। यत्। वरांसि। पर्वतस्य। वृण्वे। पयःऽभिः। जिन्वे। अपाम्। जवांसि। विदत्। गौरस्य। गवयस्य। गोहे। यदि। वाजाय। सुऽध्यः। वहन्ति॥८॥

पदार्थः-(**वि**) (**यत्**) यः (**वरांसि**) वरणीयानि धर्म्याणि कर्म्माणि (**पर्वतस्य**) मेघस्येव (**वृण्वे**) स्वीकुर्य्याम् (**पयोभिः**) उदकैः (**जिन्वे**) तर्पयामि (**अपाम्**) जलानाम् (**जवांसि**) वेगा इव (**विदत्**)

लभमानः **(गौरस्य)** **(गवयस्य)** गोसदृशस्य **(गोहे)** गृहे **(यदी)** अत्र **निपातस्य चे**ति दीर्घः। **(वाजाय)** वेगाय **(सुध्यः)** शोभना धीर्येषान्ते **(वहन्ति)** प्रापयन्ति॥८॥

अन्वयः-हे राजन्! यदी सुध्यो वाजाय गौरस्य गवयस्य गोहे वि वहन्ति तर्हि सुखं लभन्ते यद्योऽहं पर्वतस्य पयोभिरिव वरांसि वृण्वेऽपां जवांसि विदत् सन् राज्यं जिन्वे तान्माञ्च भवान् सत्करोतु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा गवयस्य साधर्म्यं गौ रक्षति तथैव धार्मिकानां साधर्म्यं राजानो रक्षन्तु यथा मेघो जलदानेन सर्वं प्रीणाति तथैव राजाऽभयदानेन सर्वं सुखयेत्॥८॥

पदार्थः-हे राजन्! **(यदी)** जो **(सुध्यः)** उत्तम बुद्धि वाले जन **(वाजाय)** वेग के लिये **(गौरस्य)** गौर **(गवयस्य)** गोसदृश के **(गोहे)** गृह में **(वि, वहन्ति)** स्वीकार करते हैं तो सुख को प्राप्त होते हैं और **(यत्)** जो मैं **(पर्वतस्य)** मेघ के **(पयोभिः)** जलों के सदृश पदार्थों और **(वरांसि)** स्वीकार करने योग्य धर्म्मयुक्त कर्म्मों का **(वृण्वे)** स्वीकार करूं और **(अपाम्)** जलों के **(जवांसि)** वेगों के सदृश कर्म्मों को **(विदत्)** प्राप्त होता हुआ राज्य को **(जिन्वे)** शोभित करता हूँ, उनका और मेरा आप सत्कार करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे गवय के साधर्म्य को गौ धारण करती है, वैसे ही धार्मिक पुरुषों के साधर्म्य को राजा लोग धारण करें और जैसे मेघ जलदान से सब को तृप्त करता है, वैसे ही राजा अभयदान से सब को सुख देवे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भद्रा ते हस्ता सुकृतोत पाणी प्रयन्तारा स्तुवते राध इन्द्र।

का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ॥९॥

भद्रा। ते। हस्ता। सुऽकृता। उत। पाणी इति। प्रऽयन्तारा। स्तुवते। राधः। इन्द्र। का। ते। निऽसत्तिः। किम्। ऊम् इति। नो इति। ममत्सि। किम्। न। उत्ऽउत्। ऊम् इति। हर्षसे। दातवै। ऊँ इति॥९॥

पदार्थः-**(भद्रा)** कल्याणकर्म्मकरौ **(ते)** तव **(हस्ता)** हस्तौ **(सुकृता)** शोभनं धर्म्यं कर्म्म क्रियते याभ्यान्तौ **(उत)** अपि **(पाणी)** बाहू **(प्रयन्तारा)** प्रयच्छन्ति याभ्यान्तौ **(स्तुवते)** सत्यं वदते **(राधः)** धनम् **(इन्द्र)** सर्वेभ्यः सुखप्रद **(का)** **(ते)** तव **(निषत्तिः)** निषीदन्ति यया सा स्थितिर्नीतिर्वा **(किम्)** **(उ)** **(नः)** अस्मान् **(ममत्सि)** हर्षयसि **(किम्)** **(न)** निषेधे **(उदुत्)** उत्कृष्टे **(उ)** वितर्के **(हर्षसे)** आनन्दसि **(दातवै)** दातुम् **(उ)**॥९॥

अन्वयः-हे इन्द्र! यस्य ते सुकृता हस्ता उतापि प्रयन्तारा भद्रा पाणी स्तुवते राधो दद्यातां तस्य ते का निषत्तिरु त्वं किं नो ममत्सि दातवा उ किं न उ उदुद्धर्षसे॥९॥

भावार्थः–हे राजन्! यस्मात्त्वमस्मानानन्दयसि तस्मादानन्दितः सततञ्जायसे यतस्त्वं सुवर्णपाणिर्दानहस्तो योग्यान् सत्करोषि तस्मात्तव कल्याणकरी नीतिरस्ति॥९॥

पदार्थः–हे **(इन्द्र)** सब के लिये सुख देनेवाले! जिन **(ते)** आपके **(सुकृता)** श्रेष्ठ धर्म्मयुक्त कर्म्म किया जाता जिनसे वे **(हस्ता)** हाथ **(उत)** और **(प्रयन्तारा)** देते हैं जिनसे वे **(भद्रा)** कल्याण कर्म करने वाले **(पाणी)** हाथ **(स्तुवते)** सत्य बोलते हुए के लिये **(राधः)** धन देवें उन **(ते)** आपको **(का)** कौन **(निषत्तिः)** स्थित होते हैं जिससे ऐसी मर्य्यादा वा नीति है **(उ)** और आप **(किम्)** क्या **(नः)** हम लोगों को **(ममत्सि)** प्रसन्न करते हो और **(दातवै)** देने को **(उ)** भी **(किम्)** क्यों **(न, उ)** नहीं **(उदुत्)** उत्तम प्रकार **(हर्षसे)** आनन्दित होते हो॥९॥

भावार्थः–हे राजन्! जिससे आप हम लोगों को आनन्द देते हो, इससे आनन्दित निरन्तर होते हो और जिससे आप सुवर्ण हस्त में धारण किये हुए दानसहित हस्तयुक्त हुए योग्यों का सत्कार करते हो, इससे आपकी कल्याण करनेवाली नीति है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एवा वस्व इन्द्रः सत्यः सम्राड्ढन्ता वृत्रं वरिवः पूरवे कः।
पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य॥१०॥

एव। वस्वः। इन्द्रः। सत्यः। सम्ऽराट्। हन्ता। वृत्रम्। वरिवः। पूरवे। करिति कः। पुरुऽस्तुत। क्रत्वा। नः। शग्धि। रायः। भक्षीय। ते। अवसः। दैव्यस्य॥१०॥

पदार्थः–**(एवा)** निश्चये। अत्र **निपातस्य चे**ति दीर्घः। **(वस्वः)** धनस्य **(इन्द्रः)** ऐश्वर्य्यप्रदाता **(सत्यः)** सत्सु पुरुषेषु साधुः **(सम्राट्)** सार्वभौमो राजा **(हन्ता)** **(वृत्रम्)** मेघमिव शत्रुम् **(वरिवः)** सेवनम् **(पूरवे)** धार्मिकाय मनुष्याय। **पूरव इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(कः)** कुर्य्याः **(पुरुष्टुत)** बहुभिः प्रशंसित **(क्रत्वा)** श्रेष्ठया प्रज्ञयोत्तमेन कर्म्मणा वा **(नः)** अस्मान् **(शग्धि)** देहि **(रायः)** धनानि **(भक्षीय)** सेवेय भुञ्जीय वा **(ते)** तव **(अवसः)** रक्षणस्य **(दैव्यस्य)** दिव्यसुखप्रापकस्य॥१०॥

अन्वयः-हे पुरुष्टुत! यः सत्य इन्द्रस्त्वं सूर्य्यो वृत्रमिव शत्रून् हन्तैवा सम्राट् पूरवे वस्वो वरिवः कः यस्त्वं क्रत्वा नो रायः शग्धि तस्यैव ते दैव्यस्याऽवसः सकाशाद्रक्षितोऽहं धनानि भक्षीय॥१०॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यः सूर्य्यवत् प्रकाशितन्यायोऽभयदाता सर्वथा सर्वस्य रक्षको नरो भवेत् स एव चक्रवर्त्ती भवितुमर्हति॥१०॥

पदार्थः–हे **(पुरुष्टुत)** बहुतों से प्रशंसित! जो **(सत्यः)** श्रेष्ठ पुरुषों में श्रेष्ठ **(इन्द्रः)** ऐश्वर्य्य के देने वाले आप सूर्य **(वृत्रम्)** मेघ को जैसे वैसे शत्रुओं को **(हन्ता, एवा)** नाश करनेवाले ही **(सम्राट्)** सम्पूर्ण भूमि के राजा **(पूरवे)** धार्मिक मनुष्य के लिये **(वस्वः)** धन का **(वरिवः)** सेवन **(कः)** करें और जो

आप **(क्रत्वा)** श्रेष्ठ बुद्धि वा उत्तम कर्म्म से **(नः)** हम लोगों के लिये **(रायः)** धनों को **(शग्धि)** देवें उन्हीं **(ते)** आपके **(दैव्यस्य)** श्रेष्ठ सुख प्राप्त कराने वाले **(अवसः)** रक्षण की उत्तेजना से रक्षित मैं धनों का **(भक्षीय)** सेवन वा भोग करूं॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के सदृश प्रकाशित, न्याययुक्त, अभय का देनेवाला और सब प्रकार से सब का रक्षक नायक होवे, वही चक्रवर्त्ती होने के योग्य होता है॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी राजविषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥११॥६॥

नु। स्तुतः। इन्द्र। नु। गृणानः। इषम्। जरित्रे। नद्यः। न। पीपेरिति पीपेः। अकारि। ते। हरिऽवः। ब्रह्म। नव्यम्। धिया। स्याम। रथ्यः। सदाऽसाः॥११॥

पदार्थः-(**नु**) सद्यः (**स्तुतः**) प्रशंसितः (**इन्द्र**) विद्यैश्वर्य्ययुक्त (**नु**) अत्रोभयत्र **ऋचि तुनुघेति** दीर्घः। (**गृणानः**) विद्यां स्तुवन् (**इषम्**) (**जरित्रे**) सकलविद्याऽध्यापकाय (**नद्यः**) (**न**) इव (**पीपेः**) वर्धय (**अकारि**) (**ते**) तुभ्यम् (**हरिवः**) विद्वत्सङ्गप्रिय (**ब्रह्म**) विद्याधनम् (**नव्यम्**) नवीनम् (**धिया**) प्रज्ञया (**स्याम**) (**रथ्यः**) बहुरथाद्यैश्वर्य्ययुक्ताः (**सदासाः**) ससेवकाः॥११॥

अन्वयः-हे हरिव इन्द्र! येन धिया ते नव्यं ब्रह्माऽकारि यस्य रथ्यः सदासा वयं स्याम तदर्थमिषं नु गृणानो नु ष्टुतस्सन्नस्मै जरित्रे नद्यो न पीपेः॥११॥

भावार्थः-यो यस्मै विद्यां दद्यात् तस्य सेवा तेन यथावत् कर्त्तव्येति॥११॥

अत्रेन्द्रराजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाऽधिकविंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे (**हरिवः**) विद्वानों के सङ्ग में प्रीति करने वाले (**इन्द्र**) विद्या और ऐश्वर्य्य से युक्त! जिस (**धिया**) बुद्धि से (**ते**) आपके लिये (**नव्यम्**) नवीन (**ब्रह्म**) विद्यारूप धन (**अकारि**) किया गया और जिसके (**रथ्यः**) बहुत रथ आदि ऐश्वर्य्य से युक्त (**सदासाः**) सेवा करनेवालों के सहित वर्त्तमान हम लोग (**स्याम**) होवें इसके लिये (**इषम्**) अन्न की (**नू**) निश्चय (**गृणानः**) विद्या की स्तुति करता हुआ (**नु**) शीघ्र (**स्तुतः**) प्रशंसा को प्राप्त इस (**जरित्रे**) सम्पूर्ण विद्याओं के अध्यापक के लिये (**नद्यः**) नदियों के (**न**) सदृश (**पीपेः**) वृद्धि करो॥११॥

भावार्थः-जो जिसके लिये विद्या को देवे उसकी सेवा उसको चाहिये कि यथायोग्य करे॥११॥

इस सूक्त में इन्द्र, राजा और प्रजा के गुणवर्णन करने से इसके अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्कीसवां सूक्त और छठा वर्ग समाप्त हुआ॥

अथैकादशर्चस्य द्वाविंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता १, २, ५, १० निचृत्त्रिष्टुप्। ३, ४ विराट्त्रिष्टुप्। ६, ७ त्रिष्टुप् छन्दः। धैवतः स्वरः। ८ भुरिक् पङ्क्तिः। ९ स्वराट् पङ्क्तिः। ११ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रगुणानाह॥

अब ग्यारह ऋचा वाले बाईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों को कहते हैं॥

यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान् करति शुष्म्या चित्।
ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति॥ १॥

यत्। नः। इन्द्रः। जुजुषे। यत्। च। वष्टि। तत्। नः। महान्। करति। शुष्मी। आ। चित्। ब्रह्म। स्तोमम्। मघऽवा। सोमम्। उक्था। यः। अश्मानम्। शवसा। बिभ्रत्। एति॥ १॥

पदार्थः-(**यत्**) यः (**नः**) अस्मान् (**इन्द्रः**) परमसुखप्रदो राजा (**जुजुषे**) सेवते (**यत्**) यः (**च**) (**वष्टि**) कामयते (**तत्**) सः (**नः**) अस्मभ्यम् (**महान्**) (**करति**) कुर्य्यात् (**शुष्मी**) महाबलिष्ठः (**आ**) (**चित्**) अपि (**ब्रह्म**) महद्धनमन्नं वा (**स्तोमम्**) प्रशंसनीयम् (**मघवा**) परमपूजितधनः (**सोमम्**) ओषध्यादिगणैश्वर्य्यम् (**उक्था**) प्रशंसनीयानि वस्तूनि (**यः**) (**अश्मानम्**) मेघमिव राज्यम् (**शवसा**) बलेन (**बिभ्रत्**) धरन्त्सन् (**एति**) प्राप्नोति॥ १॥

अन्वयः-हे मनुष्या! यद्य इन्द्रो नो जुजुषे यद्यो महांश्चाऽऽवष्टि यः शुष्मी मघवा सूर्य्योऽश्मानमिव शवसा ब्रह्म स्तोमं सोममुक्था चिद्बिभ्रत् सन् राज्यमेति तत् स नस्सुखं करतीति विजानीत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यो मेघं धरति हन्ति च तथैव यो राजा श्रेष्ठान् दधाति दुष्टान् दण्डयति स एवाऽस्मान् पालयितुमर्हति॥ १॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**इन्द्रः**) अत्यन्त सुख का देनेवाला राजा (**नः**) हम लोगों की (**जुजुषे**) सेवा करता है (**यत्, च**) और जो (**महान्**) बड़ा ऐश्वर्यवाला (**आ, वष्टि**) कामना करता है (**यः**) जो (**शुष्मी**) अत्यन्त बलवान् (**मघवा**) अति उत्तम धनयुक्त राजा सूर्य्य (**अश्मानम्**) मेघ को जैसे वैसे (**शवसा**) बल से (**ब्रह्म**) बहुत धन वा अन्न (**स्तोमम्**) प्रशंसा करने योग्य (**सोमम्**) ओषधी आदि पदार्थसमूह से ऐश्वर्य्य और (**उक्था**) प्रशंसा करने योग्य वस्तुओं को (**चित्**) भी (**बिभ्रत्**) धारण करता हुआ राज्य को (**एति**) प्राप्त होता है (**तत्**) वह (**नः**) हम लोगों को सुख (**करति**) करता है, ऐसा जानो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य मेघ को धारण करता और नाश करता है, वैसे ही जो राजा श्रेष्ठों को धारण करता और दुष्टों को दण्ड देता है, वही हम लोगों के पालन करने योग्य है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वृषा॒ वृष॑न्धिं॒ चतु॑रश्रिमस्य॒न्नुग्रो बा॒हुभ्या॑ं नृत॑म॒: शची॑वान्।

श्रि॒ये परु॑ष्णीमु॒षमा॑ण ऊर्णा॑ं॒ यस्या॒: पर्वा॑णि स॒ख्याय॑ वि॒व्ये॥ २॥

वृषा॑। वृष॑न्धिम्। चतु॑:ऽअश्रिम्। अस्य॑न्। उ॒ग्र:। बा॒हुभ्या॑म्। नृऽत॑म:। शची॑ऽवान्। श्रि॒ये। परु॑ष्णीम्। उ॒षमा॑ण:। ऊ॒र्णा॑म्। यस्या॑:। पर्वा॑णि। स॒ख्याय॑। वि॒व्ये॥ २॥

पदार्थ:-(**वृषा**) बलिष्ठ: (**वृषन्धिम्**) बलिष्ठानां धारकम् (**चतुरश्रिम्**) चतुरङ्गिणीं सेनां प्राप्तम् (**अस्यन्**) प्रक्षिपन् (**उग्र:**) तेजस्वी (**बाहुभ्याम्**) भुजाभ्याम् (**नृतम:**) अतिशयेन नायक: श्रेष्ठ: (**शचीवान्**) बहुप्रजावान् (**श्रिये**) लक्ष्म्यै (**परुष्णीम्**) विभागवतीम् (**उषमाण:**) दहन् (**ऊर्णाम्**) आच्छादिकाम् (**यस्या:**) (**पर्वाणि**) पूर्णानि पालनानि (**सख्याय**) मित्रस्य भावाय कर्म्मणे वा (**विव्ये**) कामयते॥ २॥

अन्वय:-हे मनुष्या! यो वृषा वृषन्धिं चतुरश्रिं बाहुभ्यामस्यन्नुग्रो नृतमश्शचीवान् यस्या: पर्वाणि श्रिये प्रभवन्ति तां परुष्णीमूर्णामुषमाण: सन्त्सख्याय विव्ये स एवाऽस्माकं राजा भवितुमर्हेत्॥ २॥

भावार्थ:-हे मनुष्या! यो बाहुबलेन दुष्टाँस्तिरस्कुर्वन्नरोत्तमगुणैरुत्कृष्टो मित्रवत् प्रजा: पालयति स एव श्रीमान् प्रजावान् न्यायाधीशो राजा भवितुमर्हति॥ २॥

पदार्थ:-हे मनुष्यो! जो (**वृषा**) अत्यन्त बलवान् (**वृषन्धिम्**) बलिष्ठों के धारण करने वाले (**चतुरश्रिम्**) चतुरङ्ग सेना को प्राप्त जन को (**बाहुभ्याम्**) भुजाओं से (**अस्यन्**) फेंकता हुआ (**उग्र:**) तेजस्वी (**नृतम:**) अतिशय नायक (**शचीवान्**) बहुत प्रजावाला (**यस्या:**) जिसके (**पर्वाणि**) पूर्ण पालन (**श्रिये**) लक्ष्मी के लिये समर्थ होते हैं उस (**परुष्णीम्**) विभागवती (**ऊर्णाम्**) ढांपने वाली दुर्बुद्धि को (**उषमाण:**) जलाता हुआ (**सख्याय**) मित्र होने के वा मित्र के कर्म्म के लिये (**विव्ये**) कामना करता है, वही हम लोगों का राजा होने को योग्य होवे॥ २॥

भावार्थ:-हे मनुष्यो! जो बाहुबल से दुष्टों का तिरस्कार करता हुआ मनुष्यों के उत्तम गुणों से उत्तम और मित्र के सदृश प्रजाओं को पालता है वही लक्ष्मीवान् प्रजावान् न्यायाधीश राजा होने के योग्य होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यो दे॒वो दे॒वत॑मो॒ जाय॑मानो म॒हो वाजे॑भिर्म॒हद्भि॑श्च॒ शुष्मै॑:।

दधा॑नो॒ वज्रं॑ बा॒ह्वो॒रु॒शन्तं॒ द्याम॑मे॒न रेज॑यत् प्र भूम॑॥ ३॥

यः। देवः। देवऽतमः। जायमानः। महः। वाजेभिः। महत्ऽभिः। च। शुष्मैः। दधानः। वज्रम्। बाह्वोः। उशन्तम्। द्याम्। अमेन। रेजयत्। प्र। भूम॥ ३॥

पदार्थः-(**यः**) (**देवः**) विद्वान् (**देवतमः**) विद्वत्तमः (**जायमानः**) उत्पद्यमानः (**महः**) महान् (**वाजेभिः**) वेगवद्भिः सैन्यैः (**महद्भिः**) महागुणविशिष्टैः (**च**) (**शुष्मैः**) बलैस्सह (**दधानः**) धरन् (**वज्रम्**) शस्त्राऽस्त्रम् (**बाह्वोः**) भुजयोः (**उशन्तम्**) कामयमानम् (**द्याम्**) प्रकाशम् (**अमेन**) बलेन (**रेजयत्**) कम्पयते (**प्र**) (**भूम**) भूमिम्। अत्र पृषोदरादिना रूपसिद्धिः॥ ३॥

अन्वयः-हे मनुष्या! यो महद्भिर्वाजेभिश्च शुष्मैस्सह महो जायमानो देवो देवतमो राजा बाह्वोर्वज्रं दधानोऽमेन सूर्य्यो द्यां भूम च यथा प्र रेजयत् तथोशन्तं कामयमानं शत्रुं कम्पयते तमस्माकं सुखं कामयमानं वयं वृणुयाम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो न्याय्येन दण्डेन सूर्यः प्रकाशं भूगोलांश्च कम्पयन्निव प्रजां अधर्म्माचरणात् कम्पयति स एव पूर्णविद्यो राजवरो ज्ञायते॥ ३॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**महद्भिः**) बड़े गुणों से विशिष्ट (**वाजेभिः**) वेगयुक्त सेनाजनों और (**शुष्मैः**) बलों के साथ (**महः**) बड़ा (**जायमानः**) उत्पन्न होता हुआ (**देवः**) विद्वान् (**देवतमः**) अत्यन्त विद्वान् राजा (**बाह्वोः**) भुजाओं के बीच (**वज्रम्**) शस्त्र और अस्त्र को (**दधानः**) धारण करता हुआ (**अमेन**) बल से सूर्य्य (**द्याम्**) प्रकाश (**च**) और (**भूम**) पृथिवी को जैसे (**प्र, रेजयत्**) कम्पाता है, वैसे (**उशन्तम्**) कामना करते हुए शत्रु को कम्पाता है, उस हम लोगों के सुख की कामना करते हुए राजा को हम लोग स्वीकार करें॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो योग्य दण्ड से सूर्य्य, प्रकाश और भूगोलों को कम्पाते हुए के सदृश प्रजाओं को अधर्म्माचरण से कम्पाता है, वही पूर्ण विद्वान् राजा होता है॥ ३॥

अथ पृथिवीधारणभ्रमणविषयमाह॥

अब पृथिवी के धारण [और] भ्रमणविषय को अगले मन्त्र में कहते हैं॥

विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्जनिमन् रेजत क्षाः।
आ मातरा भरति शुष्म्या गोर्नृवत्परिज्मन्नोनुवन्त वाताः॥ ४॥

विश्वा। रोधांसि। प्रऽवतः। च। पूर्वीः। द्यौः। ऋष्वात्। जनिमन्। रेजत। क्षाः। आ। मातरा। भरति। शुष्मी। आ। गोः। नृऽवत्। परिऽज्मन्। नोनुवन्त। वाताः॥ ४॥

पदार्थः-(**विश्वा**) सर्वाणि (**रोधांसि**) रोधनानि (**प्रवतः**) अधस्ताद्वर्त्तमानान् (**च**) (**पूर्वीः**) प्राचीनाः सनातनीः (**द्यौः**) विद्युत् (**ऋष्वात्**) महतः कारणात् (**जनिमन्**) जन्मनि प्रादुर्भावे (**रेजत**) कम्पयति (**क्षाः**) भूमयः (**आ**) (**मातरा**) मातापितृरूपौ राजप्रजाजनौ (**भरति**) धरति (**शुष्मी**) बलवान्

(आ) (गोः) पृथिव्याः **(नृवत्)** मनुष्यवत् **(परिज्मन्)** सर्वतो व्याप्तेऽन्तरिक्षे विस्तृतायां भूमौ वा। **ज्मेति पृथिवीनामसु पठितम्।** (निघं०१.१) **(नोनुवन्त)** भृशं शब्दायन्ते **(वाताः)** वायवः॥४॥

अन्वयः-हे मनुष्या! या ऋष्वाज्जनिमन् प्रादुर्भूता पूर्वीर्द्यौः क्षा आ भरति प्रवतश्च विश्वा रोधांसि नृवदाऽऽभरति यश्शुष्मी गोर्मातरा द्यावाभूमी नृवद्रेजत यत्र परिज्मन् वाता नोनुवन्त तान् यूयं विजानीत॥४॥

भावार्थः-हे मनुष्या! यः प्रकृतेर्जातो महानग्निः सर्वान् भूगोलान् रुणद्धि मातापितृवत् सर्वान् पालयत्यन्तरिक्षे भ्रामयति तं विज्ञायोपयुङ्ग्ध्वम्॥४॥

पदार्थः-हे मनुष्यो! जो **(ऋष्वात्)** बड़े प्रकृतिरूप कारण से **(जनिमन्)** उत्पत्ति में प्रकट हुई **(पूर्वीः)** प्राचीनकाल से सिद्ध क्रियाओं को **(द्यौः)** बिजुली और **(क्षाः)** पृथिवी **(आ, भरति)** अच्छे प्रकार धारण करती है **(च)** और **(प्रवतः)** नीचे के स्थल में वर्त्तमान **(विश्वा)** सम्पूर्ण प्रजाओं तथा **(रोधांसि)** रुकावटों को **(नृवत्)** मनुष्यों के सदृश **(आ)** अच्छे प्रकार धारण करती है और जो **(शुष्मी)** बलवान् अग्नि **(गोः)** पृथिवी के सम्बन्ध में **(मातरा)** माता और पितारूप राजा और प्रजाजन तथा अन्तरिक्ष और पृथिवी को मनुष्यों के सदृश **(रेजत)** कम्पाता है, जहाँ **(परिज्मन्)** सब ओर से व्याप्त अन्तरिक्ष वा विस्तृत भूमि में **(वाताः)** पवन **(नोनुवन्त)** अत्यन्त शब्द करते हैं, उनको आप लोग जानो॥४॥

भावार्थः-हे मनुष्यो! जो प्रकृतिरूप कारण से उत्पन्न हुआ बड़ा अग्नि सम्पूर्ण भूगोलों का आकर्षण करता है, माता और पिता के सदृश सब का पालन करता और अन्तरिक्ष में घुमाता है, उसको जान के कार्य्य सिद्ध करो॥४॥

अथ भूगोलभ्रमणदृष्टान्तेन राजगुणानाह॥

अब भूगोल के भ्रमणदृष्टान्त से राजगुणों को अगले मन्त्र में कहते हैं॥

ता तू त इन्द्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या।

यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः॥५॥७॥

ता। तु। ते। इन्द्र। महतः। महानि। विश्वेषु। इत्। सवनेषु। प्रऽवाच्या। यत्। शूर। धृष्णो इति। धृषता। दधृष्वान्। अहिम्। वज्रेण। शवसा। अविवेषीः॥५॥

पदार्थः-(**ता**) तानि (**तू**) अत्र **ऋचि तुनुघे**ति दीर्घः। (**ते**) तव (**इन्द्र**) परमैश्वर्य्यप्रयोजक (**महतः**) पूजनीयस्य (**महानि**) महान्ति (**विश्वेषु**) समग्रेषु (**इत्**) एव (**सवनेषु**) ऐश्वर्य्ययुक्तेषु लोकेषु (**प्रवाच्या**) प्रकर्षेण वक्तुं योग्यानि (**यत्**) यानि (**शूर**) निर्भय (**धृष्णो**) दृढप्रगल्भ (**धृषता**) प्रागल्भ्येन (**दधृष्वान्**) धारयन् (**अहिम्**) मेघमिव (**वज्रेण**) किरणेनेव शस्त्राऽस्त्रेण (**शवसा**) बलेन (**अविवेषीः**) व्याप्नुयाः॥५॥

अन्वयः-हे धृष्णो शूर इन्द्र राजन्! यद्यानि विश्वेषु सवनेषु महतस्ते महानि प्रवाच्या सन्ति ता इदेव तू दधृष्वान् धृषता शवसा वज्रेणाऽहिं सूर्य्य इवाऽविवेषीः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यः किरणैराकृष्य सर्वान् भूगोलान् धरति तथैव महतीं सत्पुरुषादिसामग्रीं कृत्वा राजा दीपद्वीपान्तरस्थानि राज्यानि शिष्यात्॥५॥

पदार्थः-हे **(धृष्णो)** अत्यन्त ढीठ **(शूर)** भयरहित **(इन्द्र)** परम ऐश्वर्य्य का प्रयोग करने वाले राजन्! **(यत्)** जो **(विश्वेषु)** सम्पूर्ण **(सवनेषु)** ऐश्वर्य्य से युक्त लोकों में **(महतः)** आदर करने योग्य **(ते)** आपके **(महानि)** बड़े-बड़े **(प्रवाच्या)** उत्तमता से कहने योग्य कार्य्य हैं **(ता, इत्)** उन्हीं को **(तू)** तो **(दधृष्वान्)** धारण करते हुए **(धृषता)** अत्यन्त ढिठाई और **(शवसा)** बल से **(वज्रेण)** किरण से **(अहिम्)** मेघ को सूर्य्य जैसे वैसे शस्त्र और अस्त्र से **(अविवेषीः)** प्राप्त हूजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य किरणों से आकर्षण करके सम्पूर्ण भूगोलों को धारण करता है, वैसे ही बड़ी सत्पुरुष आदि सामग्री को करके राजा द्वीप और द्वीपान्तरों में स्थित राज्यों को शासन देवे॥५॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

ता तू ते॑ स॒त्या तु॑विनृम्ण॒ विश्वा॒ प्र धे॒नव॑ः। सिस्र॑ते॒ वृष्ण॒ ऊध्न॑ः।

अधा॑ ह॒ त्वद् वृ॑षमणो भिया॒नाः प्र सिन्ध॑वो॒ जव॑सा चक्रमन्त॥६॥

ता। तु। ते॒। स॒त्या। तु॒वि॒ऽनृ॒म्ण॒। विश्वा॑। प्र। धे॒नव॑ः। सिस्र॑ते। वृष्ण॑ः। ऊध्न॑ः। अध॑। ह॒। त्वत्। वृ॒ष॒ऽम॒न॒ः। भि॒या॒नाः। प्र। सिन्ध॑वः। जव॑सा। च॒क्र॒म॒न्त॒॥६॥

पदार्थः-**(ता)** तानि **(तू)** पुनः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(ते)** तव **(सत्या)** सत्सु साधूनि कर्म्माणि **(तुविनृम्ण)** बहुधन **(विश्वा)** सर्वाणि **(प्र)** **(धेनवः)** वाचः **(सिस्रते)** सरन्ति प्राप्नुवन्ति **(वृष्णः)** ब्रह्मचर्य्यादिना बलिष्ठान् **(ऊध्नः)** विस्तीर्णबलान् **(अधा)** अत्र **निपातस्य चे**ति दीर्घः। **(ह)** खलु **(त्वत्)** तव सकाशात् **(वृषमणः)** वृषस्य बलयुक्तस्य मन इव मनो यस्य तत्सम्बुद्धौ **(भियानाः)** भयम्प्राप्ताः **(प्र)** **(सिन्धवः)** नद्यः **(जवसा)** वेगेन **(चक्रमन्त)** क्रमन्ते गच्छन्ति॥६॥

अन्वयः-हे तुविनृम्ण वृषमण इन्द्र! यथा सिन्धवो जवसा चक्रमन्त तथा त्वद्भियानाः शत्रवोः दूरं पलायन्तेऽधा या ते विश्वा सत्या आचरणानि धेनवो वाचो वृष्ण ऊध्नः प्र सिस्रते ता तू ह त्वं जवसा प्र साध्नुहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्य राज्ञोऽमोघा वाग्धर्म्यं कर्म्म वर्त्तते तस्माद्धेनुभ्यो वत्सा इव प्रजास्तृप्ता भवन्ति तस्माद् दुष्टा बिभ्यति यशश्च प्रथते॥६॥

पदार्थः-हे **(तुविनृम्ण)** बहुत धनवाले और **(वृषमणः)** बलयुक्त पुरुष के मन के सदृश मन से युक्त राजन्! जैसे **(सिन्धवः)** नदियाँ **(जवसा)** वेग से **(चक्रमन्त)** चलती हैं, वैसे **(त्वत्)** आपके समीप से **(भियानाः)** भय को प्राप्त शत्रु लोग दूर भागते हैं **(अधा)** इसके अनन्तर जो **(ते)** आपके **(विश्वा)** सम्पूर्ण **(सत्या)** श्रेष्ठ पुरुषों में साधु कर्म्म अर्थात् उत्तम आचरण और **(धेनवः)** वाणियाँ **(वृष्णः)** ब्रह्मचर्य्य आदि से बलिष्ठ **(ऊध्नः)** विस्तीर्ण बलवालों को **(प्र, सिस्रते)** अच्छे प्रकार प्राप्त होती हैं **(ता)** उनको **(तू)** फिर **(ह)** निश्चय से आप वेग से **(प्र)** अत्यन्त सिद्ध करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस राजा की सफल वाणी और धर्मयुक्त कर्म्म वर्तमान है, उससे गौओं से बछड़ों के सदृश प्रजा तृप्त होती है और उससे दुष्ट डरते हैं और यश विस्तृत होता है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अत्राह॑ ते हरिव॒स्ता उ॑ दे॒वीरवो॑भिरिन्द्र॒ स्तव॑न्त॒ स्वसा॑रः।

यत्सी॒मनु॒ प्र मु॒चो ब॑द्ब॒धा॒ना दी॒र्घामनु॒ प्रसि॑तिं स्यन्दयध्यै॥७॥

अत्र॑। अह॑। ते॒। ह॒रि॒ऽव॒रिति॑। ताः। ऊ॒म् इति॑। दे॒वीः। अव॑ः॑ऽभिः। इ॒न्द्र॒। स्त॒व॒न्त॒। स्वसा॑रः। यत्। सी॒म्। अनु॑। प्र। मु॒चः। ब॒द्ब॒धा॒नाः। दी॒र्घाम्। अनु॑। प्र॒ऽसि॑तिम्। स्य॒न्द॒यध्यै॥७॥

पदार्थः-(**अत्र**) अस्मिन् राज्ये **(अह)** विनिग्रहे **(ते)** तव **(हरिवः)** प्रशस्तपुरुषयुक्त **(ताः)** **(उ)** **(देवीः)** देदीप्यमाना विदुष्यस्त्रियः **(अवोभिः)** रक्षणादिभिः **(इन्द्र)** परमैश्वर्य्ययुक्त राजन् **(स्तवन्त)** स्तुवन्ति **(स्वसारः)** अङ्गुल्य इव मैत्रीं भगिनित्वमाचरन्त्यः **(यत्)** याः **(सीम्)** सर्वतः **(अनु)** **(प्र)** **(मुचः)** मोचय **(बद्बधानाः)** प्रबन्धकर्त्र्यः **(दीर्घाम्)** लम्बीभूताम् **(अनु)** **(प्रसितिम्)** बन्धनम् **(स्यन्दयध्यै)** स्यन्दयितुं प्रस्रावयितुम्॥७॥

अन्वयः-हे हरिव इन्द्र! अत्राऽह यद्या ते बद्बधानाः स्वसार इव वर्त्तमाना विदुष्यस्त्रियः स्यन्दयध्यै दीर्घां प्रसितिमनु स्तवन्त ता उ देवीरवोभिः सीं दुःखबन्धनात्त्वमनु प्र मुचः॥७॥

भावार्थः-हे राजादयो मनुष्या! यथा भवन्तो ब्रह्मचर्य्येण विद्या अधीत्य राजनीत्या राज्यं पालयन्ति तथैव भवतां स्त्रियः स्त्रीणां न्यायं कुर्युरेवं कृते सति दृढो राजधर्मप्रबन्धो भवतीति वेद्यम्॥७॥

पदार्थः-हे **(हरिवः)** श्रेष्ठ पुरुषों से और **(इन्द्र)** अत्यन्त ऐश्वर्य्य से युक्त **(अत्र)** इस राज्य में **(अह)** ग्रहण करने में **(यत्)** जो **(ते)** आपकी **(बद्बधानाः)** प्रबन्ध करने वाली **(स्वसारः)** अङ्गुलियों के समान वर्त्तमान बहिनपने का आचरण करती और पढ़ी हुई स्त्रियाँ **(स्यन्दयध्यै)** बहाने को **(दीर्घाम्)** लम्बीभूत **(प्रसितिम्)** बन्धावट की **(अनु, स्तवन्त)** अनुकूल स्तुति करती हैं **(ताः, उ)** उन्हीं **(देवीः)** प्रकाशित पढ़ी हुई स्त्रियों को **(अवोभिः)** रक्षण आदि व्यवहारों से **(सीम्)** सब प्रकार दुःखरूप बन्धन

से आप **(अनु, प्र, मुचः)** अच्छे प्रकार छुड़ाइये॥७॥

भावार्थः-हे राजा आदि मनुष्यो! जैसे आप लोग ब्रह्मचर्य से विद्याओं को पढ़कर राजनीति से राज्य का पालन करते हैं, वैसे ही आप लोगों की स्त्रियाँ स्त्रियों का न्याय करें। ऐसा करने पर दृढ़ राज्यधर्म्म का प्रबन्ध होता है, ऐसा जानना चाहिये॥७॥

अथ राजनीत्यध्ययनेनाध्यापकविषयमाह॥

अब राजनीति के अध्ययन से अध्यापकविषय को अगले मन्त्र में कहते हैं॥

पिपीळे अंशुर्मद्यो न सिन्धुरा त्वा शमी शशमानस्य शक्तिः।
अस्मद्र्यक् शुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः॥८॥

पिपीळे। अंशुः। मद्यः। न। सिन्धुः। आ। त्वा। शमी। शशमानस्य। शक्तिः। अस्मद्र्यक्। शुशुचानस्य। यम्याः। आशुः। न। रश्मिम्। तुविओजसम्। गोः॥८॥

पदार्थः-(**पिपीळे**) पीडयति (**अंशुः**) प्रापकः (**मद्यः**) आनन्दयिता (**न**) इव (**सिन्धुः**) नदीव (**आ**) (**त्वा**) त्वाम् (**शमी**) उत्तमं कर्म्म (**शशमानस्य**) अधर्म्ममुल्लङ्घतः (**शक्तिः**) सामर्थ्यम् (**अस्मद्र्यक्**) याऽस्मानञ्चति प्राप्नोति (**शुशुचानस्य**) भृशं शोधकस्य (**यम्याः**) रात्रयः। **यम्येति रात्रिनामसु पठितम्।** (निघं०१.७) (**आशुः**) शीघ्रगाम्यश्वः (**न**) इव (**रश्मिम्**) सूर्य्यप्रकाशम् (**तुव्योजसम्**) बहुबलपराक्रमम् (**गोः**) स्तावकस्य। **गौरिति स्तोतृनामसु पठितम्।** (निघं०३.१६)॥८॥

अन्वयः-हे राजन्! मद्यस्सिन्धुर्न यन्त्वामंशुरापिपीळे तस्य शशमानस्य शुशुचानस्य गोस्त आशुर्न यम्या रश्मिमिव याऽस्मद्र्यक् शक्तिरस्मान् पालयेत् सा शमी च तुव्योजसन्त्वाऽऽप्नोतु॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे प्रजाजना! ये स्वं राजानं पीडयेयुस्ते युष्माभिर्हन्तव्याः। यथा रात्रयो रश्मिं प्रानश्यन्ति तथैव धार्मिकस्य राज्ञो बलं प्राप्य शत्रवो निवर्त्तन्ते॥८॥

पदार्थः-हे राजन्! (**मद्यः**) आनन्दित कराने वाली (**सिन्धुः**) नदी जैसे (**न**) वैसे जिन आपको (**अंशुः**) पदार्थ पहुंचने वाला (**आ, पिपीळे**) पीड़ा देता है उन (**शशमानस्य**) अधर्म्म का उल्लङ्घन करने (**शुशुचानस्य**) अत्यन्त शोधने और (**गोः**) स्तुति करनेवाले आपके (**आशुः**) शीघ्र चलनेवाले घोड़े के (**न**) सदृश (**यम्याः**) रात्रियाँ (**रश्मिम्**) सूर्य्य के प्रकाश को जैसे वैसे जो (**अस्मद्र्यक्**) हम को प्राप्त होनेवाली (**शक्तिः**) सामर्थ्य हम लोगों का पालन करे वह और (**शमी**) उत्तम कर्म्म (**तुव्योजसम्**) बहुत बल और पराक्रमयुक्त (**त्वा**) आपको प्राप्त होवे॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे प्रजाजनो! जो लोग अपने राजा को पीड़ा देवें, वे आप लोगों से नाश करने योग्य हैं। और जैसे रात्रि[याँ] किरणों को नष्ट करती हैं, वैसे ही धार्म्मिक राजा के बल को प्राप्त होकर शत्रु दूर होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि।

अस्मभ्यं वृत्रा सुहनानि रन्धि जहि वधर्वनुषो मर्त्यस्य॥९॥

अस्मे इति। वर्षिष्ठा। कृणुहि। ज्येष्ठा। नृम्णानि। सत्रा। सहुरे। सहांसि। अस्मभ्यम्। वृत्रा। सुऽहनानि। रन्धि। जहि। वधः। वनुषः। मर्त्यस्य॥९॥

पदार्थः-(**अस्मे**) अस्मासु (**वर्षिष्ठा**) अतिशयेन वृद्धानि (**कृणुहि**) कुरु (**ज्येष्ठा**) प्रशस्यानि (**नृम्णानि**) धनानि (**सत्रा**) सत्यानि (**सहुरे**) सहनशीलेन्द्र (**सहांसि**) सहनानि (**अस्मभ्यम्**) (**वृत्रा**) वृत्राणि मेघघना इव शत्रुसैन्यानि (**सुहनानि**) सुष्ठु हन्तुं योग्यानि (**रन्धि**) नाशय (**जहि**) दूरे प्रक्षिप (**वधः**) वधसाधनम् (**वनुषः**) सेवमानस्य (**मर्त्यस्य**)॥९॥

अन्वयः-हे सहुरे राजन्! यानि ते सत्रा वर्षिष्ठा ज्येष्ठा नृम्णानि सहांसि वर्त्तन्ते तान्यस्मे कृणुहि। अस्मभ्यं दुःखप्रदस्य वनुषो मर्त्यस्य वधर्जहि सुहनानि वृत्रेव शत्रुसैन्यानि रन्धि॥९॥

भावार्थः-हे राजादयो जना! यूयम्मिलित्वा प्रजापीडकस्य बलं घ्नत यानि स्वेषामुत्तमानि वस्तूनि तान्यस्मासु दधत यान्यस्माकमुत्तमानि रत्नानि तानि युष्मासु वयं धरेम॥९॥

पदार्थः-हे (**सहुरे**) सहनशील राजन्! जो आपके (**सत्रा**) सत्य (**वर्षिष्ठा**) अत्यन्त वृद्ध (**ज्येष्ठा**) प्रशंसा करने योग्य (**नृम्णानि**) धन (**सहांसि**) और सहन वर्त्तमान हैं उनको (**अस्मे**) हम लोगों में (**कृणुहि**) करो (**अस्मभ्यम्**) हम लोगों के लिये दुःख देने वाले (**वनुषः**) सेवा करते हुए (**मर्त्यस्य**) मनुष्य के (**वधः**) मारने के साधन को (**जहि**) दूर फेंको और (**सुहनानि**) उत्तम प्रकार नाश करने योग्य (**वृत्रा**) मेघ बादलों के समान शत्रुओं की सेनाओं का (**रन्धि**) नाश कीजिये॥९॥

भावार्थः-हे राजा आदि जनो! आप लोग मिल के प्रजा को पीड़ा देने वाले के बल का नाश करो और जो आप लोगों के उत्तम वस्तु उनको हम लोगों में धारण कीजिये और जो हम लोगों के उत्तम रत्न उनको आप लोग धरें॥९॥

अथोपदेशकविषयमाह॥

अब उपदेशकविषय को अगले मन्त्र में कहते हैं॥

अस्माकमित्सु शृणुहि त्वमिन्द्रास्मभ्यं चित्राँ उप माहि वाजान्।

अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन् बोधि गोदाः॥१०॥

अस्माकम्। इत्। सु। शृणुहि। त्वम्। इन्द्र। अस्मभ्यम्। चित्रान्। उप। माहि। वाजान्। अस्मभ्यम्। विश्वाः। इषणः। पुरंध्रीः। अस्माकम्। सु। मघऽवन्। बोधि। गोऽदाः॥१०॥

पदार्थः-(**अस्माकम्**) (**इत्**) एव (**सु**) (**शृणुहि**) (**त्वम्**) (**इन्द्र**) (**अस्मभ्यम्**) (**चित्रान्**) अद्भुतान् (**उप**) (**माहि**) मन्यस्व (**वाजान्**) अन्नादीन् (**अस्मभ्यम्**) (**विश्वाः**) समग्राः (**इषणः**) प्रेरय (**पुरन्धीः**) याः पुरूणि विज्ञानानि दधति ताः प्रज्ञाः (**अस्माकम्**) (**सु**) (**मघवन्**) (**बोधि**) बुध्यस्व (**गोदाः**) यो गां धेनुं ददाति सः॥१०॥

अन्वयः-हे मघवन्निन्द्र! त्वमस्माकं वचांसि सुशृणुह्यस्मभ्यं चित्रान् वाजानुप माह्यस्मभ्यं विश्वाः पुरन्धीरिदिषणोऽस्माकं गोदास्सन्नस्मान् सु बोधि॥१०॥

भावार्थः-हे मनुष्या! येऽस्माकं न्यायवचांसि शृणवन्त्यस्मान् विदुषः प्रज्ञान् कुर्वन्ति तेषां सेवाऽस्माभिः सततं कार्य्या॥१०॥

पदार्थः-हे (**मघवन्**) बहुत धन से युक्त (**इन्द्र**) राजन् (**त्वम्**) आप (**अस्माकम्**) हम लोगों के वचनों को (**सु, शृणुहि**) उत्तम प्रकार सुनो और (**अस्मभ्यम्**) हम लोगों के लिये (**चित्रान्**) अद्भुत (**वाजान्**) अन्न आदिक पदार्थों को (**उप, माहि**) उपमित कीजिये अर्थात् उत्तमता से मानिये और (**अस्मभ्यम्**) हम लोगों के लिये (**विश्वाः**) सम्पूर्ण (**पुरन्धीः**) विज्ञानों को धारण करने वाली बुद्धियों को (**इत्**) ही (**इषणः**) प्रेरित करो और (**अस्माकम्**) हम लोगों के (**गोदाः**) गौ को देनेवाले होते हुए आप हम लागों को (**सु, बोधि**) उत्तम प्रकार जानिये॥१०॥

भावार्थः-हे मनुष्यो! जो लोग हम लोगों के नीति के अनुकूल वचनों को सुनते और हम लोगों को विद्वान् करते हैं, उन लोगों की सेवा हम लोगों को चाहिये कि निरन्तर करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥११॥८॥

नु। स्तुतः। इन्द्र। नु। गृणानः। इषम्। जरित्रे। नद्यः। न। पीपेरिति पीपेः। अकारि। ते। हरिऽवः। ब्रह्म। नव्यम्। धिया। स्याम। रथ्यः। सदाऽसाः॥११॥

पदार्थः-(**नु**) (**स्तुतः**) प्रशंसितः (**इन्द्र**) यज्ञैश्वर्य्ययुक्त (**नु**) (**गृणानः**) (**इषम्**) अन्नम् (**जरित्रे**) विदुषे (**नद्यः**) सरितः (**न**) इव (**पीपेः**) वर्धय (**अकारि**) (**ते**) (**हरिवः**) प्रशस्तविद्यार्थियुक्त (**ब्रह्म**) धनम् (**नव्यम्**) नवीनं नवीनम् (**धिया**) (**स्याम**) (**रथ्यः**) (**सदासाः**)॥११॥

अन्वयः-हे हरिव इन्द्र! यतस्त्वं स्तुतस्सञ्जरित्र इषं दत्वा नद्यो न नु पीपेः। यतस्त्वमस्माभिर्गृणानो न्वकारि ते तुभ्यं नव्यं ब्रह्म दीयेत तस्माद् रथ्यः सदासा वयं धिया तव सखायः स्याम॥११॥

भावार्थः-हे विद्वन्! यस्मात्त्वं सर्वेभ्यो विद्यां ददासि तस्मात्त्वया सह मैत्रीं कृत्वा तुभ्यं पुष्कलधनमन्नञ्च दत्वा सततं सत्कुर्याम॥११॥

अत्रेन्द्रपृथिवीधारणभ्रमणविद्वदध्यापकोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे **(हरिवः)** श्रेष्ठ विद्यार्थियों और **(इन्द्र)** यज्ञ के ऐश्वर्य्य से युक्त! जिससे आप **(स्तुतः)** प्रशंसित हुए **(जरित्रे)** विद्वान् पुरुष के लिये **(इषम्)** अन्न को देकर **(नद्यः)** नदियों के **(न)** सदृश **(नु)** शीघ्र **(पीपेः)** वृद्धि कराओ जिससे आप हम लोगों से **(गृणानः)** प्रशंसा करते हुए **(नु)** निश्चय **(अकारि)** किये गये और **(ते)** आपके लिये **(नव्यम्)** नवीन-नवीन **(ब्रह्म)** धन दिया जाय इससे **(रथ्यः)** रथयुक्त **(सदासाः)** दासों के सहित वर्त्तमान हम लोग **(धिया)** बुद्धि से आपके मित्र **(स्याम)** होवे॥११॥

भावार्थः-हे विद्वन्! जिससे आप सब के लिये विद्या देते हो, इससे आपके साथ मित्रता करके आपके लिये बहुत धन और अन्न देकर निरन्तर सत्कार करें॥११॥

इस सूक्त के अर्थ में इन्द्र, पृथिवी, धारण, भ्रमण, विद्वान्, अध्यापक और उपदेशक के गुणवर्णन करने से इसके अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बाईसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य त्रयोविंशत्तमस्य सूक्तस्य वामदेव ऋषिः। १-७, ११ इन्द्रः। ८-१० इन्द्र ऋतदेवा देवताः। १-३, ७-९ त्रिष्टुप्। ४, १० निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५, ६ भुरिक् पङ्क्तिः। ११ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ प्रश्नोत्तरविषयमाह॥

अब ग्यारह ऋचा वाले तेईसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में प्रश्नोत्तरविषय को कहते हैं॥

कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः।
पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय॥ १॥

कथा। महाम्। अवृधत्। कस्य। होतुः। यज्ञम्। जुषाणः। अभि। सोमम्। ऊधः। पिबन्। उशानः। जुषमाणः। अन्धः। ववक्षे। ऋष्वः। शुचते। धनाय॥ १॥

पदार्थः-(**कथा**) (**महाम्**) महान्तम् (**अवृधत्**) वर्धते (**कस्य**) (**होतुः**) न्यायादिकर्म्मकर्तुः (**यज्ञम्**) सङ्गन्तव्यं व्यवहारम् (**जुषाणः**) सेवमानः (**अभि**) (**सोमम्**) दुग्धादिरसम् (**ऊधः**) उत्कृष्टम् (**पिबन्**) (**उशानः**) कामयमानः (**जुषमाणः**) सेवमानः (**अन्धः**) अन्नम् (**ववक्षे**) वहति (**ऋष्वः**) महान् (**शुचते**) पवित्रयति विचारयति वा (**धनाय**)॥१॥

अन्वयः-हे विद्वन्! कस्य होतुर्महां यज्ञं जुषाणः कथाऽभ्यवृधत् य ऊधस्सोमं पिबन्नैश्वर्यमुशानोऽन्धो जुषमाणो ववक्ष ऋष्वस्सन् धनाय शुचते॥१॥

भावार्थः-हे विद्वन्! कस्मादधीत्य विद्यार्थी कथं वर्धेत कथं विद्यां सेवेत कश्च विद्वान् भवेदित्यस्य प्रश्नस्यः ब्रह्मचर्य्येण वीर्य्यं निगृह्य विद्यां कामयमान आचार्य्यमुपेत्य सेवां कृत्वा मिताऽऽहारविहारः सन्नरोगोः भूत्वा विद्याप्राप्तये भृशं प्रयतत इत्युत्तरम्॥१॥

पदार्थः-हे विद्वन्! (**कस्य**) किस (**होतुः**) न्याय आदि कर्म्म करनेवाले के (**महाम्**) बड़े (**यज्ञम्**) मेल करने योग्य व्यवहार का (**जुषाणः**) सेवन करता हुआ (**कथा**) किस प्रकार से (**अभि, अवृधत्**) बढ़ता और जो (**ऊधः**) उत्तम (**सोमम्**) दुग्ध आदि रस को (**पिबन्**) पीता ऐश्वर्य की (**उशानः**) कामना करता और (**अन्धः**) अन्न की (**जुषमाणः**) सेवा करता हुआ (**ववक्षे**) पदार्थ पहुंचाता है (**ऋष्वः**) तथा बड़ा हुआ (**धनाय**) धन के लिये (**शुचते**) पवित्र कराता विचार कराता है॥१॥

भावार्थः-हे विद्वन्! किससे पढ़कर विद्यार्थी कैसे बढ़े? कैसे विद्या का सेवन करे? और कौन विद्वान् होवे? इस प्रश्न का, ब्रह्मचर्य्य से वीर्य्य का निग्रह करके, विद्या की कामना करता हुआ, आचार्य्य के समीप जा और सेवा करके, नियत आहार-विहार युक्त हुआ, रोगरहित होकर, विद्या की प्राप्ति के लिये अत्यन्त प्रयत्न करता है, यह उत्तर है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

को अ॑स्य वी॒रः स॑ध॒मादं॑माप॒ समा॑नंश सुम॒तिभि॒: को अ॑स्य।

कद॑स्य चि॒त्रं चि॑कि॒ते॒ कदू॒ती वृ॒धे भुव॑च्छशमा॒नस्य॒ यज्यो॑:॥ २॥

कः। अ॒स्य॒। वी॒रः। स॒ध॒ऽमाद॑म्। आ॒प॒। सम्। आ॒नं॒श॒। सु॒म॒तिऽभि॑:। कः। अ॒स्य॒। कत्। अ॒स्य॒। चि॒त्रम्। चि॒कि॒ते॒। कत्। ऊ॒ती। वृ॒धे। भु॒व॒त्। श॒श॒मा॒नस्य॑। यज्यो॑:॥ २॥

पदार्थः-(**कः**) (**अस्य**) अध्यापकस्य राज्ञो वा (**वीरः**) विद्यया प्राप्तशरीरात्मबलः (**सधमादम्**) सहाऽऽनन्दम् (**आप**) आप्नुयात् (**सम्**) (**आनंश**) प्राप्नोति (**सुमतिभिः**) श्रेष्ठैर्विद्वद्भिस्सह (**कः**) (**अस्य**) (**कत्**) कदा (**अस्य**) (**चित्रम्**) अद्भुतं विज्ञानम् (**चिकिते**) जानाति (**कत्**) (**ऊती**) ऊत्या रक्षणाद्येन (**वृधे**) वृद्धये (**भुवत्**) भवेत् (**शशमानस्य**) प्रशंसितस्य (**यज्योः**) सङ्गन्तुमर्हस्य सत्यव्यवहारस्य॥ २॥

अन्वयः-हे विद्वन्! को वीरोऽस्य सधमादमाप को वीरोऽस्य सुमतिभिश्चित्रं चिकिते कदस्य विद्यां समानंश को वीर ऊती शशमानस्य यज्योर्वृधे कद्भुवत्॥ २॥

भावार्थः-हे विद्वन् राजन् वा! कः केन सह पठेत् कः केन सह न्यायं कुर्य्याद् युद्ध्येद्वा क एषां वरिष्ठ इति प्रश्नस्य ये प्रशंसितकर्म्मणामनुष्ठातारो वर्धकाः स्युरित्युत्तरम्॥ २॥

पदार्थः-हे विद्वन्! (**कः**) कौन (**वीरः**) विद्या से प्राप्त शरीर और आत्मबलयुक्त (**अस्य**) इस अध्यापक वा राजा के (**सधमादम्**) साथ आनन्द को (**आप**) प्राप्त होवे (**कः**) कौन वीर (**अस्य**) इसके (**सुमतिभिः**) श्रेष्ठ विद्वानों के साथ (**चित्रम्**) अद्भुत विज्ञान को (**चिकिते**) जानता है (**कत्**) कब (**अस्य**) इसको विद्या को (**सम्, आनंश**) प्राप्त होता है और कौन वीर (**ऊती**) रक्षण आदि से (**शशमानस्य**) प्रशंसित (**यज्योः**) संगम करने योग्य सत्य व्यवहार की (**वृधे**) वृद्धि के लिये (**कत्**) कब (**भुवत्**) होवे॥ २॥

भावार्थः-हे विद्वन् वा राजन्! कौन किसके साथ पढ़े? कौन किसके साथ न्याय करे? वा युद्ध करे? कौन इनमें श्रेष्ठ? इस प्रश्न का जो प्रशंसित कर्म्मों के अनुष्ठान और वृद्धि करने वाले होवें, यह उत्तर है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कथा शृ॑णोति हू॒यमा॑न॒मिन्द्रः॑ कथा शृ॒ण्वन्नव॑सामस्य वेद।

का अ॑स्य पू॒र्वीरुप॑मातयो ह कथै॑नमाहुः॒ पपु॑रिं जरि॒त्रे॥ ३॥

कथा। शृ॒णो॒ति॒। हू॒यमा॑नम्। इन्द्रः॑। कथा। शृ॒ण्वन्। अव॑साम्। अ॒स्य॒। वे॒द॒। काः। अ॒स्य॒। पू॒र्वीः। उप॑ऽमातयः। ह॒। कथा। ए॒न॒म्। आ॒हुः॒। पपु॑रिम्। ज॒रि॒त्रे॥ ३॥

पदार्थः-(**कथा**) केन प्रकारेण (**शृणोति**) (**हूयमानम्**) स्पर्द्धमानम् (**इन्द्रः**) अध्यापको राजा वा (**कथा**) (**शृण्वन्**) (**अवसाम्**) रक्षणादीनाम् (**अस्य**) (**वेद**) जानीयात् (**काः**) (**अस्य**) (**पूर्वीः**) प्राचीनाः (**उपमातयः**) उपमाः (**ह**) खलु (**कथा**) (**एनम्**) (**आहुः**) (**पपुरिम्**) पालकम् (**जरित्रे**) विदुषे॥३॥

अन्वयः-हे मनुष्या! इन्द्रो हूयमानं कथा शृणोति शृण्वन्नस्याऽवसां हूयमानं कथा वेदाऽस्य पूर्वीरुपमातयो ह काः सन्ति। अथैनं जरित्रे पपुरिं कथाऽऽहुरिति प्रष्टव्यम्॥३॥

भावार्थः-ये विद्यार्थिनो राजजनाश्चाऽऽप्तानां वचांसि शास्त्राणि सम्यक्छ्रुत्वा मत्वा निश्चित्य पुनः कर्म्माऽऽरभन्ते त एव सर्वं वेदितव्यं विजानन्ति॥३॥

पदार्थः-हे मनुष्यो! (**इन्द्रः**) अध्यापक वा राजा (**हूयमानम्**) स्पर्द्धा करते हुए को (**कथा**) किस प्रकार (**शृणोति**) सुनता है और (**शृण्वन्**) सुनता हुआ (**अस्य**) इसके (**अवसाम्**) रक्षण आदिकों की स्पर्द्धा करते हुए को (**कथा**) किस प्रकार से (**वेद**) जाने (**अस्य**) इसकी (**पूर्वीः**) प्राचीन (**उपमातयः**) उपमा (**ह**) ही (**काः**) कौन हैं? अनन्तर (**एनम्**) इसको (**जरित्रे**) विद्वान् के लिये (**पपुरिम्**) पालन करने वाला (**कथा**) किस प्रकार (**आहुः**) कहते हैं, ऐसा पूछना चाहिए॥३॥

भावार्थः-जो विद्यार्थी और राजा के जन यथार्थवक्ता पुरुषों के वचनों के शास्त्रों को उत्तम प्रकार सुन, मान और निश्चय करके पुनः कर्मों का आरम्भ करते हैं, वे ही सम्पूर्ण जानने योग्य को जानते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः।
देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत्॥४॥

कथा। सऽबाधः। शशमानः। अस्य। नशत्। अभि। द्रविणम्। दीध्यानः। देवः। भुवत्। नवेदाः। मे। ऋतानाम्। नमः। जगृभ्वान्। अभि। यत्। जुजोषत्॥४॥

पदार्थः-(**कथा**) (**सबाधः**) बाधेन सह वर्त्तमानः (**शशमानः**) प्रशंसन् (**अस्य**) (**नशत्**) नश्यति (**अभि**) (**द्रविणम्**) धनम् (**दीध्यानः**) प्रकाशयन् (**देवः**) विद्वान् (**भुवत्**) भवेत् (**नवेदाः**) यो न वेत्ति सः (**मे**) मम (**ऋतानाम्**) सत्यानाम् (**नमः**) अन्नम् (**जगृभ्वान्**) गृहीतवान् (**अभि**) (**यत्**) यः (**जुजोषत्**) सेवते॥४॥

अन्वयः-हे मनुष्या! अस्य सबाधः कथा नशद् द्रविणमभि दीध्यानः शशमानो देवः कथा भुवन्नवेदा म ऋतानां नमो जगृभ्वान् यद्यः स कथाऽभि जुजोषत्॥४॥

भावार्थः-हे अध्यापक राजन् वा! कथमेतान् विद्याऽभयं वा प्राप्नुयात्। कथमिमे विद्वांसो भवेयुरिति प्रश्नस्य ये सत्कारेण सत्पुरुषेभ्यः शिक्षां गृहीत्वा धर्म्मं सेवेरन्नित्युत्तरम्॥४॥

पदार्थः-हे मनुष्यो! **(अस्य)** इस का **(सबाधः)** बाधसहित अर्थात् दुःख के सहित वर्त्तमान **(कथा)** किस प्रकार से **(नशत्)** नष्ट होता है **(द्रविणम्)** धन का **(अभि, दीध्यानः)** सब ओर से प्रकाश और **(शशमानः)** प्रशंसा करता हुआ **(देवः)** विद्वान् किस प्रकार **(भुवत्)** होवे **(नवेदाः)** नहीं जाननेवाला जन **(मे)** मेरे **(ऋतानाम्)** सत्य व्यवहारों के सम्बन्ध में **(नमः)** अन्न को **(जगृभ्वान्)** ग्रहण किये हुए **(यत्)** जो जन वह किस प्रकार से **(अभि, जुजोषत्)** सेवन करता है॥४॥

भावार्थः-हे अध्यापक वा राजन्! किस प्रकार से इस विद्या वा अभय को प्राप्त होवे? और किस प्रकार से ये विद्वान् होवें? इस प्रश्न का, जो सत्कार से श्रेष्ठ पुरुषों से शिक्षा को ग्रहण करके धर्म्म का सेवन करें, यह उत्तर है॥४॥

अथ प्रश्नोत्तराभ्याम्मैत्रीकरणविषयमाह॥

अब प्रश्नोत्तर से मैत्रीकरणविषय को अगले मन्त्र में कहते हैं॥

कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष।

कथा कदस्य सख्यं सखिभ्यो ये अस्मिन् कामं सुयुजं ततस्रे॥५॥९॥

कथा। कत्। अस्याः। उषसः। विऽउष्टौ। देवः। मर्तस्य। सख्यम्। जुजोष। कथा। कत्। अस्य। सख्यम्। सखिऽभ्यः। ये। अस्मिन्। कामम्। सुऽयुजम्। ततस्रे॥५॥

पदार्थः-**(कथा)** **(कत्)** **(अस्याः)** वर्त्तमानायाः **(उषसः)** प्रातर्वेलायाः **(व्युष्टौ)** विशेषदीप्तौ **(देवः)** सूर्य्य इव विद्वान् **(मर्त्तस्य)** मनुष्यस्य **(सख्यम्)** सख्युर्भावं कर्म्म वा **(जुजोष)** सेवते **(कथा)** **(कत्)** कदा **(अस्य)** **(सख्यम्)** सख्युर्भावं कर्म्म वा **(सखिभ्यः)** मित्रेभ्यः **(ये)** **(अस्मिन्)** मित्रभावकर्म्मणि **(कामम्)** इच्छाम् **(सुयुजम्)** सुष्ठु योक्तुमर्हम् **(ततस्रे)** तन्वन्ति॥५॥

अन्वयः-हे विद्वांसो! देवो विद्वानस्या उषसो व्युष्टौ मर्त्तस्य सख्यं कत्कथा जुजोष तेभ्यः सखिभ्योऽस्य सख्यं कत् कथा भवितुं योग्यं येऽस्मिन्त्सुयुजं कामं ततस्रे॥५॥

भावार्थः-हे विद्वांसो! मनुष्यैः केन सह कदा मित्रता कथं मित्रत्वनिर्वाहं कर्त्तव्यः। सखिभिस्सह कथं वर्त्तितव्यमिति प्रश्नस्य यदा सम्यक् परीक्षां कुर्य्यात्तदा तेन सह मैत्रीं ये चाऽस्मिञ्जगति सर्वैस्सह मित्राचारं कर्त्तुं कामयन्ते तैः सह सदैव सखित्वं रक्षणीयम्॥५॥

पदार्थः-हे विद्वज्जनो **(देवः)** सूर्य्य के सदृश विद्वान् **(अस्याः)** इस वर्त्तमान **(उषसः)** प्रातःकाल के **(व्युष्टौ)** विशेष प्रकाश में **(मर्त्तस्य)** मनुष्य के **(सख्यम्)** मित्रपने वा मित्र के कर्म का **(कत्)** कब **(कथा)** किस प्रकार **(जुजोष)** सेवन करता है उन **(सखिभ्यः)** मित्रों के लिये **(अस्य)** इस का **(सख्यम्)** मित्रपन वा मित्रकर्म्म **(कत्)** कब **(कथा)** किस प्रकार से होने के योग्य है **(ये)** जो **(अस्मिन्)** इस

मित्रपने रूप कर्म्म में **(सुयुजम्)** उत्तम प्रकार मिलाने के योग्य **(कामम्)** इच्छा का **(ततस्रे)** विस्तार करते हैं॥५॥

भावार्थः–हे विद्वानो! मनुष्यों को किसके साथ कब मित्रता और किस प्रकार मित्रता का निर्वाह करना चाहिये और मित्रों के साथ कैसे वर्त्तना चाहिये? इस प्रश्न का यह उत्तर है कि जब उत्तम प्रकार परीक्षा करे, तब उसके साथ मित्रता करे और जो इस जगत् में सबके साथ मित्राचार करने की कामना करते हैं, उनके साथ सदा ही मित्रता की रक्षा करनी चाहिये॥५॥

पुनर्मैत्रीकरणविषयमाह॥

फिर भी मैत्रीकरणविषय को अगले मन्त्र में कहते हैं॥

किमादमंत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र ब्रवाम।

श्रिये सुदृशो वपुरस्य सर्गाः स्वर्ण चित्रतममिष आ गोः॥६॥

किम्। आत्। अमंत्रम्। सख्यम्। सखिऽभ्यः। कदा। नु। ते। भ्रात्रम्। प्र। ब्रवाम। श्रिये। सुऽदृशः। वपुः। अस्य। सर्गाः। स्वः। न। चित्रऽतमम्। इषे। आ। गोः॥६॥

पदार्थः–(**किम्**) (**आत्**) आनन्तर्ये (**अमत्रम्**) सुपात्रम् (**सख्यम्**) (**सखिभ्यः**) (**कदा**) (**नु**) (**ते**) तव (**भ्रात्रम्**) भ्रातुरिदं कर्म्म तद्वद्वर्त्तमानम् (**प्र**) (**ब्रवाम**) उपदिशेम (**श्रिये**) सेवायै धनाय वा (**सुदृशः**) सुष्ठु द्रष्टव्यस्य (**वपुः**) सुरूपं शरीरम् (**अस्य**) (**सर्गाः**) सृष्टयः (**स्वः**) सुखम् (**न**) इव (**चित्रतमम्**) अतिशयेनाश्चर्य्यरूपम् (**इषे**) इच्छायै (**आ**) (**गोः**) पृथिव्यादेः॥६॥

अन्वयः-हे विद्वन् राजन् वा! ते सखिभ्यो भ्रात्रं सख्यं कदा नु प्र ब्रवामाऽऽत् किममत्रं ते सखिभ्यः प्रब्रवाम। ये सुदृशोऽस्य श्रिये आ गोस्सर्गा वपुरिषे सन्ति तद्विज्ञानं चित्रतमं स्वर्ण वर्त्तत इति प्रब्रवाम॥६॥

भावार्थः–सर्वैर्मनुष्यैराप्तानां विदुषां मित्रता सदैव कार्या यतस्ते सदुपदेशेन सर्वान् सृष्टिविद्याविदो धर्म्मात्मनः सम्पाद्यातीवोत्तमं विज्ञानं दत्वा सुखिनः कुर्य्युरिति॥६॥

पदार्थः–हे विद्वन् वा राजन्! **(ते)** आपके **(सखिभ्यः)** मित्रों के लिये **(भ्रात्रम्)** भ्रातृसम्बन्धि कर्म्म के सदृश वर्त्तमान **(सख्यम्)** मित्रपने वा मित्र के कर्म्म का **(कदा)** कब **(नु)** शीघ्र **(प्र, ब्रवाम)** उपदेश देवें **(आत्)** इसके अनन्तर **(किम्)** किस **(अमत्रम्)** सुपात्र का आपके मित्रों के लिये उपदेश देवें और जो **(सुदृशः)** उत्तम प्रकार देखने योग्य **(अन्य)** इसकी **(श्रिये)** सेवा वा धन के लिये **(आ, गोः)** पृथिवी से लेकर **(सर्गाः)** सृष्टियाँ **(वपुः)** उत्तम रूपयुक्त शरीर की **(इषे)** इच्छा के लिये हैं, उनका विज्ञान **(चित्रतमम्)** अत्यन्त आश्चर्य्यरूप **(स्वः)** सुख के **(न)** सदृश वर्त्तमान है, ऐसा उपदेश देवें॥६॥

भावार्थः–सब मनुष्यों को चाहिये कि यथार्थवक्ता विद्वानों से मित्रता सदा ही करें, जिससे वे उत्तम उपदेश से सब को सृष्टिविद्या के जाननेवाले धर्म्मात्मा करके बहुत ही उत्तम विज्ञान को देकर सुखी

करें॥६॥

अथ शत्रुनिवारणसेनोन्नतिविषयमाह॥

अब शत्रुनिवारण के अनुकूल सेना की उन्नति के विषय को अगले मन्त्र में कहते हैं॥

दुहं॑ जिघां॑सन् ध्व॒रस॑मनि॒न्द्रां तेति॑क्ते ति॒ग्मा तु॒जसे॒ अनी॑का।

ऋ॒णा चि॒द्यत्र॑ ऋ॒ण॒या न॑ उ॒ग्रो दू॒रे अज्ञा॑ता उ॒षसो॑ बबा॒धे॥७॥

दुह॑म्। जिघां॑सन्। ध्व॒रस॑म्। अ॒नि॒न्द्राम्। तेति॑क्ते। ति॒ग्मा। तु॒जसे। अनी॑का। ऋ॒णा। चि॒त्। यत्र॑। ऋ॒ण॒ऽया॒:। न॒:। उ॒ग्र:। दू॒रे। अज्ञा॑ता:। उ॒षस॑:। ब॒बा॒धे॥७॥

पदार्थः-(**दुहम्**) द्रोग्धारम् (**जिघांसन्**) हन्तुमिच्छन् (**ध्वरसम्**) हिंसकम् (**अनिन्द्राम्**) अनीश्वरीं गतिम् (**तेतिक्ते**) भृशं तीक्ष्णं करोति (**तिग्मा**) तिग्मानि तीव्राणि (**तुजसे**) बलाय शत्रूणां हिंसनाय वा (**अनीका**) शत्रुभिः प्राप्तुमनर्हाणि सैन्यानि (**ऋणा**) प्राप्तानि (**चित्**) अपि (**यत्र**) (**ऋणयाः**) प्राप्तया सेनया (**नः**) अस्माकम् (**उग्रः**) तीव्रः प्रभावः (**दूरे**) विप्रकृष्टे (**अज्ञाताः**) न ज्ञाताः (**उषसः**) प्रभातान् (**बबाधे**) बाधते॥७॥

अन्वयः-हे मनुष्या! यत्र नो य उग्रो दूरेऽज्ञाताः शत्रुसेना उषसस्तमः सूर्य्य इव बबाध ऋणयाश्चित् तुजसे तिग्मा ऋणा अनीका तेतिक्ते दुहं ध्वरसं जिघांसन्ननिन्द्रां बबाधे॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये सुशिक्षितान्युत्तमानि शत्रूणां सद्यः पराजयकराणि सैन्यानि सम्पादयेयुर्यतोऽदूरेऽपि सन्तः शत्रवो बिभियुर्दारिद्र्यं भयञ्च दूरीकृत्य स्वप्रजाञ्चाऽऽनन्द्य दुष्टान् सततं हिंस्युस्तांस्त्वं सदैव सत्कुर्याः॥७॥

पदार्थः-हे मनुष्यो! (**यत्र**) जहाँ (**नः**) हम लोगों का जो (**उग्रः**) तीव्र प्रताप (**दूरे**) दूर स्थान में (**अज्ञाताः**) नहीं जानी गई शत्रुओं की सेनाओं को (**उषसः**) प्रातःकाल से अन्धकार को जैसे सूर्य्य वैसे (**बबाधे**) विलोता है (**ऋणयाः**) प्राप्त सेना से (**चित्**) भी (**तुजसे**) बल के लिये अथवा शत्रुओं के नाश के लिये (**तिग्मा**) तीव्र (**ऋणा**) प्राप्त (**अनीका**) शत्रुओं से प्राप्त नहीं होने योग्य सैन्यसमूहों को (**तेतिक्ते**) अत्यन्त तीक्ष्ण करता है (**दुहम्**) द्रोह करने और (**ध्वरसम्**) हिंसा करनेवाले को (**जिघांसन्**) नष्ट करने की इच्छा करता हुआ (**अनिन्द्राम्**) ईश्वरसम्बन्धरहित मार्ग को (**बबाधे**) विलोता है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो लोग उत्तम प्रकार शिक्षित, श्रेष्ठ, शत्रुओं को शीघ्र पराजय करने वाली सेनाओं को सिद्ध करें, जिनसे दूर स्थान में भी वर्त्तमान शत्रु लोग डरें, दारिद्र्य और भय को दूरकर अपनी प्रजा को आनन्द देकर दुष्टों का निरन्तर नाश करें, उनका आप सदा ही सत्कार करो॥७॥

अथ सत्याचरणोत्तमताविषयमाह॥

अब सत्याचरणोत्तमता विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तस्य॒ हि शु॒रुध॒: सन्ति॑ पू॒र्वीर्ऋ॒तस्य॑ धी॒तिर्वृ॑जि॒नानि॑ हन्ति।

ऋ॒तस्य॒ श्लोको॑ बधि॒रा त॑तर्द॒ कर्णा॑ बुधा॒न: शु॒चमा॑न आ॒यो:॥८॥

ऋ॒तस्य॑। हि। शु॒रुध॑:। सन्ति॑। पू॒र्वी:। ऋ॒तस्य॑। धी॒ति:। वृ॒जि॒नानि॑। ह॒न्ति॒। ऋ॒तस्य॑। श्लोक॑:। ब॒धि॒रा। त॒त॒र्द॒। कर्णा॑। बु॒धा॒न:। शु॒चमा॑न:। आ॒यो:॥८॥

पदार्थ:-(**ऋतस्य**) सत्यस्य (**हि**) यत: (**शुरुध:**) या: शु सद्यो रुन्धन्ति ता: स्वसेना:। **शुरुध इति पदनामसु पठितम्।** (निघं०४.३) (**सन्ति**) (**पूर्वी:**) प्राचीना: (**ऋतस्य**) यथार्थस्य (**धीति:**) धारणावती प्रज्ञा (**वृजिनानि**) बलानि। **वृजिनमिति बलनामसु पठितम्।** (निघं०२.९) (**हन्ति**) (**ऋतस्य**) सत्यस्य (**श्लोक:**) वाक्। **श्लोक इति वाङ्नामसु पठितम्।** (निघं०१.११) (**बधिरा**) बधिराणि (**ततर्द**) हिनस्ति (**कर्णा**) कर्णानि (**बुधान:**) बोधयन् (**शुचमान:**) पवित्र: पवित्रयन् (**आयो:**) जीवनस्य॥८॥

अन्वय:-हे राजन्! यस्यर्त्तस्य सत्याचारस्य पूर्वी: शुरुध: सन्ति यस्यर्त्तस्य धीतिर्वृजिनानि प्राप्य शत्रून् हन्ति यस्यर्त्तस्य श्लोको बधिरा कर्णा ततर्द योऽन्यान् बुधान: शुचमान आयोर्जीवनस्योपायानुपदिशति तं हि गुरुवत् सत्कुर्य्या:॥८॥

भावार्थ:-हे अध्यापक राजन् वा! ये जितेन्द्रिया दुष्टाचारस्य निरोधका: सत्यस्य प्रचारका: सत्यवाचो बधिरवद्वर्त्तमानाज्ञान् बोधयन्तो ब्रह्मचर्य्याद्युपदेशेन दीर्घायुष: सम्पादयन्त: क्लेशानां शत्रूणाञ्च हन्तार: स्युस्त एव स्वात्मवन्माननीया: स्यु:॥८॥

पदार्थ:-हे राजन्! जिस (**ऋतस्य**) सत्य आचार की (**पूर्वी:**) प्राचीन (**शुरुध:**) शीघ्र रोकने वाली अपनी सेना (**सन्ति**) हैं जिस (**ऋतस्य**) सत्य की (**धीति:**) धारणा करने वाली बुद्धि (**वृजिनानि**) बलों को प्राप्त होकर शत्रुओं का (**हन्ति**) नाश करती है और जिसे (**ऋतस्य**) सत्य की (**श्लोक:**) वाणी (**बधिरा**) बधिर (**कर्णा**) कर्णों का (**ततर्द**) नाश करती है और जो अन्य जनों को (**बुधान:**) जनाता और (**शुचमान:**) पवित्र होकर पवित्र करता हुआ (**आयो:**) जीवन के उपायों का उपदेश देता है, उसका (**हि**) जिससे गुरु के सदृश सत्कार करो॥८॥

भावार्थ:-हे अध्यापक वा राजन्! जो जितेन्द्रिय दुष्ट आचार के रोकने और सत्य के प्रचार करने वाले सत्यवाणीयुक्त और बधिर के सदृश वर्त्तमान अज्ञ पुरुषों को बोध देते हुए ब्रह्मचर्य्य आदि उपदेश से अधिक अवस्था वाले करते हुए क्लेश और शत्रुओं के नाश करनेवाले होवें, वे ही अपने आत्मा के सदृश आदर करने योग्य होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तस्य॑ दृ॒ळ्हा ध्रु॒रुणा॑नि सन्ति पु॒रूणि॑ च॒न्द्रा व॑पु॒षे॒ व॑पूं॒षि।

ऋ॒तेन॑ दी॒र्घमि॑षणन्त पृ॒क्षं ऋ॒तेन॒ गाव॑ ऋ॒तमा वि॑वेशुः॥९॥

ऋ॒तस्य॑। दृ॒ळ्हा। ध॒रु॒णा॑नि। स॒न्ति॒। पु॒रू॒णि॑। च॒न्द्रा। वपु॑षे। वपूं॑षि। ऋ॒तेन॑। दी॒र्घम्। इ॒ष॒ण॒न्त॒। पृ॒क्षः॑। ऋ॒तेन। गाव॑ः। ऋ॒तम्। आ। वि॒वे॒शुः॥९॥

पदार्थः-(**ऋतस्य**) सत्यस्य धर्म्मस्य (**दृळ्हा**) दृढानि (**धरुणानि**) उदकानीव शान्तान्याचरणानि। **धरुणमित्युदकनामसु पठितम्।** (निघं०१.१२) (**सन्ति**) (**पुरूणि**) बहूनि (**चन्द्रा**) आह्लादकानि सुवर्णादीनि (**वपुषे**) सुरूपाय शरीराय (**वपूंषि**) रूपाणि (**ऋतेन**) सत्याचरणेन (**दीर्घम्**) चिरञ्जीविनम् (**इषणन्त**) प्राप्नुवन्ति (**पृक्षः**) संस्पृष्टव्यमन्नादिकम् (**ऋतेन**) सत्याचरणेन (**गावः**) धेनवो वत्सस्थानानीव सुशिक्षिता वाचः (**ऋतम्**) सत्यं ब्रह्म (**आ**) (**विवेशुः**) आविशन्ति॥९॥

अन्वयः-हे मनुष्या! ऋतस्याचरणेनैव दृळ्हा धरुणानि पुरूणि चन्द्रा वपुषे वपूंषि प्राप्तानि सन्ति। ऋतेन पृक्षो दीर्घञ्चायुरिषणन्त ऋतेन गाव ऋतमाविवेशुरिति विजानीत॥९॥

भावार्थः-हे मनुष्या! यथा जलेन प्राणधारणमन्नाद्युत्पत्तिः सुरूपं दीर्घमायुश्च जायते तथैव सत्याचारेण सकलैश्वर्य्यं विद्या चिरञ्जीवनञ्च भवति यतः सततं सत्यमेवाऽऽचरत॥९॥

पदार्थः-हे मनुष्यो! (**ऋतस्य**) सत्य धर्म्म के आचरण से ही (**दृळ्हा**) दृढ़ (**धरुणानि**) जलों के सदृश शान्त आचार (**पुरूणि**) बहुत (**चन्द्रा**) आनन्द देने वाले सुवर्ण आदि (**वपुषे**) सुन्दर रूपयुक्त शरीर के लिये (**वपूंषि**) रूपों को प्राप्त (**सन्ति**) हैं और (**ऋतेन**) सत्य आचरण से (**पृक्षः**) उत्तम प्रकार स्पर्श होने योग्य अन्न आदिक (**दीर्घम्**) चिरकाल रहने वाले आयु को (**इषणन्त**) प्राप्त होते हैं (**ऋतेन**) सत्य आचरण से (**गावः**) गौवें जैसे बछड़ों के स्थानों को वैसे उत्तम प्रकार शिक्षित वाणियाँ (**ऋतम्**) सत्य ब्रह्म को (**आ, विवेशुः**) प्राप्त होती हैं, ऐसा जानो॥९॥

भावार्थः-हे मनुष्यो! जैसे जल से प्राणधारण, अन्न आदि की उत्पत्ति और सुन्दर और दीर्घ अवस्था होती है, वैसे ही सत्य आचरण से सम्पूर्ण ऐश्वर्य्य, विद्या और बहुत काल पर्य्यन्त जीवन होता है, जिससे निरन्तर सत्य ही का आचरण करो॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒तं येमा॒न ऋ॒तमिद्व॑नोत्यृ॒तस्य॒ शुष्मा॑स्तु॒रया॑ उ॑ ग॒व्युः।

ऋ॒ताय॑ पृ॒थ्वी ब॑हु॒ले ग॑भी॒रे ऋ॒ताय॑ धे॒नू प॑र॒मे दु॑हाते॥१०॥

ऋ॒तम्। ये॒मा॒नः। ऋ॒तम्। इत्। व॒नो॒ति॒। ऋ॒तस्य॑। शुष्मा॑ः। तु॒र॒ऽयाः। ऊ॒म् इति॑। ग॒व्युः। ऋ॒ताय॑। पृ॒थ्वी इति॑। ब॒हु॒ले इति॑। ग॒भी॒रे इति॑। ऋ॒ताय॑। धे॒नू इति॑। प॒र॒मे इति॑। दु॒हा॒ते॒ इति॑॥१०॥

पदार्थः-(**ऋतम्**) सत्यम् (**येमानः**) नियमयन्तः (**ऋतम्**) (**इत्**) एव (**वनोति**) याचते (**ऋतस्य**) (**शुष्मः**) बलम् (**तुरयाः**) शीघ्रतां प्राप्तम् (**उ**) (**गव्युः**) य आत्मनो गां पृथ्वीं वाचं वेच्छुः (**ऋताय**) सत्याय जलाय वा (**पृथ्वी**) भूम्यन्तरिक्षे (**बहुले**) बहुपदार्थयुक्ते (**गभीरे**) गम्भीराश्रये (**ऋताय**) सत्याय (**धेनू**) गावाविव वर्त्तमाने (**परमे**) प्रकृष्टे (**दुहाते**) प्रातः॥१०॥

अन्वयः-हे मनुष्या! यथर्त्ताय बहुले गभीरे पृथ्वी यथर्त्ताय परमे धेनू दुहाते तथर्तं ये येमानस्तथर्त्तं यो वनोति तथर्त्तस्य यः शुष्मस्तुरया उ गव्युरस्ति त इत् सदैव पूर्णं सुखं लभन्ते॥१०॥

भावार्थः-हे मनुष्या! ये मनुष्यशरीरं प्राप्य नियमेन सत्याचारं सत्ययाञ्चां कृत्या सद्यो धार्मिका जायन्ते भूमिसूर्य्यवत् सर्वेषां कामपूर्तिं कर्त्तुं शक्नुवन्ति॥१०॥

पदार्थः-हे मनुष्यो! जैसे (**ऋताय**) सत्य के लिये (**बहुले**) बहुत पदार्थों से युक्त (**गभीरे**) गम्भीर आश्रय में (**पृथ्वी**) भूमि और अन्तरिक्ष तथा जैसे (**ऋताय**) सत्य और जल के लिये (**परमे**) अति उत्तम (**धेनू**) गौओं के सदृश वर्त्तमान (**दुहाते**) प्रातःकाल वैसे (**ऋतम्**) सत्य को जो (**येमानः**) नियम करते हुए और वैसे (**ऋतम्**) सत्य की जो (**वनोति**) याचना करता है तथा (**ऋतस्य**) सत्य के जो (**शुष्मः**) बल को (**तुरयाः**) शीघ्रता को प्राप्त (**उ**) और (**गव्युः**) निज सम्बन्धिनी पृथिवी वा वाणी को चाहनेवाला है, वे (**इत्**) ही सर्वदा पूर्ण सुख को प्राप्त होते हैं॥१०॥

भावार्थः-हे मनुष्यो! जो लोग मनुष्य के शरीर को प्राप्त होकर नियम से सत्य आचार, सत्य याञ्चा करके शीघ्र धार्मिक होते हैं, वे भूमि और सूर्य्य के सदृश सब की कामना की पूर्ति कर सकते हैं॥१०॥

पुनः प्रशंसापरत्वेन पूर्वविषयमाह॥

फिर प्रशंसापरत्व से पूर्व विषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥११॥१०॥

नु। स्तुतः। इन्द्र। नु। गृणानः। इषम्। जरित्रे। नद्यः। न। पीपेरिति पीपेः। अकारि। ते। हरिऽवः। ब्रह्म। नव्यम्। धिया। स्याम। रथ्यः। सदाऽसाः॥११॥

पदार्थः-(**नु**) (**स्तुतः**) सत्याचारेण प्रशंसितः (**इन्द्र**) सत्यैश्वर्य्यप्रद (**नु**) (**गृणानः**) सत्याचारं स्तुवन् (**इषम्**) विज्ञानम् (**जरित्रे**) विद्यामिच्छुकाय (**नद्यः**) (**न**) इव (**पीपेः**) (**अकारि**) (**ते**) (**हरिवः**) (**ब्रह्म**) बृहद्विद्याधनम् (**नव्यम्**) (**धिया**) प्रज्ञया (**स्याम**) (**रथ्यः**) (**सदासाः**)॥११॥

अन्वयः-हे हरिव इन्द्र! यस्य ते नव्यम्ब्रह्म येनाऽकारि तस्मै जरित्रे स्तुतो नद्यो नेषं दत्वा नु पीपेः सत्यं गृणानो धर्म्मं प्रापय्य नु पीपेः यथा वयं धिया पुरुषार्थेन रथ्यः सदासाः स्याम तथा त्वं भव॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये यथा युष्मासु धर्म्यां नीतिं स्थापयेयुस्तेषां सेवां कृत्वा सखायो भूत्वा सर्वा विद्या विजानीतेति॥११॥

अत्र प्रश्नोत्तरमैत्रीशत्रुनिवारणसेनोन्नतिसत्याचारोत्कर्षवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोविंशतितमं सूक्तं दशमो वर्गश्च समाप्तः।

पदार्थः-हे **(हरिवः)** बहुत धनयुक्त **(इन्द्र)** सत्य ऐश्वर्य्य के देने वाले जिस **(ते)** आपका **(नव्यम्)** नवीन **(ब्रह्म)** बड़ा विद्यारूप धन जिसने **(अकारि)** किया उस **(जरित्रे)** विद्या की इच्छा करने वाले के लिये **(स्तुतः)** सत्य आचरण से प्रशंसित **(नद्यः)** नदियों के **(न)** सदृश **(इषम्)** विज्ञान को देकर **(नु)** शीघ्र **(पीपेः)** पालन करे और सत्य का **(गृणानः)** प्रचार करता हुआ धर्म्म को प्राप्त कराय के **(नु)** निश्चय पालन करो और जैसे हम लोग **(धिया)** बुद्धि से और पुरुषार्थ से **(रथ्यः)** रथयुक्त और **(सदासाः)** दासों के सहित वर्त्तमान **(स्याम)** होवें, वैसे आप हूजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो जैसे आप लोगों में धर्म्मयुक्त नीति का स्थापन करें, उनकी सेवा करके मित्र हो के सम्पूर्ण विद्याओं को जानिये॥११॥

इस सूक्त में प्रश्न उत्तर, मैत्री, शत्रुओं का निवारण, सेना की उन्नति और सत्य आचरण की उत्तमता का वर्णन करने से इसके अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेईसवां सूक्त तथा दशमा वर्ग समाप्त हुआ॥

अथैकादशर्चस्य चतुर्विंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १, ५, ७ त्रिष्टुप्। ३, ९ निचृत्त्रिष्टुप्। ४ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ८ भुरिक्पङ्क्तिः। ६ स्वराट् पङ्क्तिः। ११ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १० निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ ब्रह्मचर्य्यवतः पुत्रप्रशंसामाह॥

अब ग्यारह ऋचा वाले चौबीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में ब्रह्मचर्य्यावान् के पुत्र की प्रशंसा कहते हैं॥

का सुष्टुतिः शवसः सूनुमिन्द्रमर्वाचीनं राधस आ ववर्तत्।
ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधां नो जनासः॥ १॥

का। सुऽस्तुतिः। शवसः। सूनुम्। इन्द्रम्। अर्वाचीनम्। राधसे। आ। ववर्तत्। ददिः। हि। वीरः। गृणते। वसूनि। सः। गोऽपतिः। निःऽसिधाम्। नः। जनासः॥ १॥

पदार्थः-(**का**) (**सुष्टुतिः**) शोभना प्रशंसा (**शवसः**) बहुबलवतः (**सूनुम्**) अपत्यम् (**इन्द्रम्**) परमैश्वर्य्यप्रदम् (**अर्वाचीनम्**) इदानीन्तनं युवावस्थास्थम् (**राधसे**) धनैश्वर्य्याय (**आ**) (**ववर्त्तत्**) आवर्त्तयेत् (**ददिः**) दाता (**हि**) यतः (**वीरः**) व्याप्तविद्याशौर्य्यादिगुणः (**गृणते**) प्रशंसितकर्म्मणे (**वसूनि**) द्रव्याणि (**सः**) (**गोपतिः**) गोः पृथिव्याः स्वामी (**निष्षिधाम्**) नितरां शासितॄणां मङ्गलाचाराणाम् (**नः**) अस्माकम् (**जनासः**) विद्वांसो वीराः॥ १॥

अन्वयः-हे जनासो! यो वीरो गृणते वसूनि ददिर्वर्त्तते स हि निष्षिधां नो गोपतिर्भवतु। का सुष्टुतिः शवसः सूनुमर्वाचीनमिन्द्रमाववर्त्तत्। को राधसे धनस्य योगमाववर्त्तत्॥ १॥

भावार्थः-हे मनुष्या! यः पूर्णकृतब्रह्मचर्यस्य पुत्रः स्वयमनुष्ठितपूर्णब्रह्मचर्य्यविद्यः प्रशंसिताचरणस्सुखदाता भवेत् स एव युष्माकमस्माकञ्च राजा भवतु॥ १॥

पदार्थः-हे (**जनासः**) विद्वान् वीरपुरुषो! जो (**वीरः**) विद्या और शौर्य्य आदि गुणों से व्याप्त जन (**गृणते**) प्रशंसित कर्म्मवान् के लिये (**वसूनि**) द्रव्यों को (**ददिः**) देनेवाला वर्त्तमान है (**सः**) वह (**हि**) जिससे (**निष्षिधाम्**) अत्यन्त शासन करने वालों के मङ्गलाचारों से युक्त (**नः**) हम लोगों का (**गोपतिः**) पृथिवीपति अर्थात् राजा हो (**का**) कौन (**सुष्टुतिः**) उत्तम प्रशंसा और (**शवसः**) बहुत बलवान् के (**सूनुम्**) पुत्र को (**अर्वाचीनम्**) इस समय वाले युवावस्थायुक्त (**इन्द्रम्**) अत्यन्त ऐश्वर्य्य के देनेवाले का (**आ, ववर्त्तत्**) वर्त्ताव करावे और कौन (**राधसे**) धन और ऐश्वर्य्यवान् के लिये धन के योग का वर्त्ताव करावे॥ १॥

भावार्थः-हे मनुष्यो! जो पूर्ण ब्रह्मचर्य्य को किये हुए का पुत्र और वह स्वयं भी पूर्ण ब्रह्मचर्य्य और विद्या से युक्त और प्रशंसित आचरण करने और सुख देनेवाला होवे, वह ही आप का और हम लोगों का राजा हो॥ १॥

अथोक्तविषये धनुर्वेदाध्ययनफलमाह॥

अब पूर्वोक्त विषय के अन्तर्गत धनुर्वेदाध्ययन के फल को अगले मन्त्र में कहते हैं॥

स वृ॑त्र॒हत्ये॒ हव्य॒: स ईड्य॒: स सु॒ष्टु॒त इन्द्र॑: स॒त्यरा॑धाः।

स याम॒न्ना म॒घवा॒ मर्त्या॑य ब्रह्मण्य॒ते सु॒ष्वये॒ वरि॑वो धात्॥ २॥

सः। वृ॒त्र॒ऽहत्ये॑। हव्यः॑। सः। ईड्यः॑। सः। सु॒ऽस्तु॒तः। इन्द्रः॑। स॒त्यऽरा॑धाः। सः। याम॑न्। आ। म॒घऽवा॑। मर्त्या॑य। ब्र॒ह्म॒ण्य॒ते। सु॒स्वये॑। वरि॑वः। धा॒त्॥ २॥

पदार्थः-(**सः**) (**वृत्रहत्ये**) महासङ्ग्रामे (**हव्यः**) आह्वातुं योग्यः (**सः**) (**ईड्यः**) प्रशंसितुमर्हः (**सः**) (**सुष्टुतः**) सर्वत्र प्राप्तसुकीर्त्तिः (**इन्द्रः**) परमैश्वर्य्यवान् (**सत्यराधाः**) न्यायोपार्जितसत्यधनः (**सः**) (**यामन्**) यामनि मार्गे (**आ**) (**मघवा**) पूजितराज्यः (**मर्त्याय**) मनुष्याय (**ब्रह्मण्यते**) आत्मनो धर्मेण धनमिच्छते (**सुष्वये**) ऐश्वर्य्यप्राप्त्यनुष्ठात्रे (**वरिवः**) सेवनम् (**धात्**) दध्यात्॥ २॥

अन्वयः-हे मनुष्या! यो मघवा सुष्वये ब्रह्मण्यते मर्त्याय वरिव आ धात् स इन्द्रो यामन् स सत्यराधाः स वृत्रहत्ये सुष्टुतः स ईड्यः स हव्यश्च भवेत्॥ २॥

भावार्थः-यो मनुष्यो बाल्याऽवस्थामारभ्य सुचेष्टो विद्वत्सेवी सुशिक्षो न्यायमार्गाऽनुवर्ती धनुर्वेदविदज्ञो युद्धे निर्भयः स्यात्तमेव राजानङ्कुरुत॥ २॥

पदार्थः-हे मनुष्यो! जो (**मघवा**) सत्कृत राज्ययुक्त (**सुष्वये**) ऐश्वर्य्य की प्राप्ति का अनुष्ठान करने वाले (**ब्रह्मण्यते**) अपने धर्म से धन की इच्छा करने वाले (**मर्त्याय**) मनुष्य के लिये (**वरिवः**) सेवन को (**आ, धात्**) धारण करे (**सः**) वह (**इन्द्रः**) अत्यन्त ऐश्वर्य्यवाला (**यामन्**) मार्ग में (**सः**) वह (**सत्यराधाः**) न्याय से इकट्ठे किये हुए सत्यधन से युक्त (**सः**) वह (**वृत्रहत्ये**) बड़े सङ्ग्राम में (**सुष्टुतः**) सर्वत्र प्राप्त उत्तम कीर्त्तियुक्त (**सः**) वह (**ईड्यः**) प्रशंसा करने योग्य और वह (**हव्यः**) पुकारने योग्य होवे॥ २॥

भावार्थः-जो मनुष्य बाल्यावस्था से लेकर उत्तम चेष्टायुक्त, विद्वानों की सेवा करने वाला, उत्तम प्रकार शिक्षायुक्त, न्यायमार्ग का अनुगामी, धनुर्वेद का जानने वाला, चतुर और युद्ध में भयरहित होवे, उसी को राजा करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तमिन्नरो॒ वि ह्व॑यन्ते समी॒के रि॑रि॒क्वांस॑स्त॒न्व॑: कृण्वत॒ त्राम्।

मि॒थो यत्त्या॒गमु॒भया॑सो॒ अग्म॒न्नर॑स्तो॒कस्य॒ तन॑यस्य सा॒तौ॥ ३॥

तम्। इत्। नरः। वि। ह्वयन्ते। समऽईके। रिरिक्वांसः। तन्वः। कृण्वत। त्राम्। मिथः। यत्। त्यागम्। उभयासः। अग्मन्। नरः। तोकस्य। तनयस्य। सातौ॥ ३॥

पदार्थः-(**तम्**) (**इत्**) एव (**नरः**) नायकाः (**वि**) विशेषेण (**ह्वयन्ते**) स्पर्द्धन्ते (**समीके**) सम्यक् प्राप्ते सङ्ग्रामे। **समीक इति सङ्ग्रामनामसु पठितम्।** (निघं०२.१७) (**रिरिक्वांसः**) रेचनङ्कारयन्तः (**तन्वः**) शरीरस्य (**कृण्वत**) कुरुत (**त्राम्**) रक्षकम् (**मिथः**) अन्योऽन्यम् (**यत्**) यम् (**त्यागम्**) (**उभयासः**) उभयत्र वर्त्तमानाः (**अग्मन्**) प्राप्नुत (**नरः**) राज्यस्य नेतारः (**तोकस्य**) सद्यो जातस्याऽपत्यस्य (**तनयस्य**) कुमाराऽवस्थां प्राप्तस्य (**सातौ**) संविभक्ते॥ ३॥

अन्वयः-हे रिरिक्वांसो नरः! समीके यद्यं विद्वांसो वि ह्वयन्ते तमिदेव तन्वस्त्रां कृण्वत। हे नरस्तोकस्य तनयस्य साता उभयासो दुःखस्य त्यागङ्कुर्वन्तो मिथः शत्रून् घ्नन्तोऽग्मँस्तान् सेवध्वम्॥ ३॥

भावार्थः-हे सेनाजना! यो भृत्यानां रक्षक उत्साहक शूरवीरो भवेत्तं सत्कृत्य ये सङ्ग्रामङ्कृत्वा पलायन्ते तानसत्कृत्य भृशं दण्डयित्वा विजयं प्राप्नुत॥ ३॥

पदार्थः-हे (**रिरिक्वांसः**) रेचन कराते हुए (**नरः**) नायक लोगो! (**समीके**) उत्तम प्रकार प्राप्त सङ्ग्राम में (**यत्**) जिसकी विद्वान् लोग (**वि**) विशेष करके (**ह्वयन्ते**) स्पर्द्धा करते हैं (**तम्**) उसको (**इत्**) ही (**तन्वः**) शरीर का (**त्राम्**) रक्षक (**कृण्वत**) करिये और हे (**नरः**) राज्य के नायको! (**तोकस्य**) शीघ्र उत्पन्न हुए और (**तनयस्य**) कुमारावस्था को प्राप्त बालक के (**सातौ**) उत्तम प्रकार विभाग में (**उभयासः**) दोनों ओर वर्त्तमान और दुःख का (**त्यागम्**) त्याग तथा (**मिथः**) परस्पर शत्रुओं को नष्ट करते हुए जन (**अग्मन्**) प्राप्त हों, उनका सेवन करो॥ ३॥

भावार्थः-हे सेना के जनो! जो भृत्यों का रक्षक, उत्साहयुक्त और शूरवीर होवे, उसका सत्कार करके और जो सङ्ग्राम को छोड़के भागते हैं, उनका नहीं सत्कार करके और अत्यन्त दण्ड देकर विजय को प्राप्त होओ॥ ३॥

अथाधर्मत्यागेन सुकर्मणा प्रज्ञैश्वर्यवर्धनविषयमाह॥

अब अधर्मत्याग से तथा अच्छे कर्म से प्रज्ञा और ऐश्वर्यवृद्धि विषय को अगले मन्त्र में कहते हैं॥

क्रतूयन्ति क्षितयो योगे उग्राशुषाणासो मिथो अर्णसातौ।
सं यद्विशोऽववृत्रन्त युध्मा आदिन्नेम इन्द्रयन्ते अभीके॥ ४॥

क्रतुऽयन्ति। क्षितयः। योगे। उग्र। आशुषाणासः। मिथः। अर्णऽसातौ। सम्। यत्। विशः। अववृत्रन्त। युध्माः। आत्। इत्। नेमे। इन्द्रयन्ते। अभीके॥ ४॥

पदार्थः-(**क्रतूयन्ति**) प्रज्ञां कर्म्माणि चेच्छन्ति (**क्षितयः**) मनुष्याः (**योगे**) समागमे यमाऽऽद्यनुष्ठाने वा (**उग्र**) तीक्ष्णस्वभाव (**आशुषाणासः**) शीघ्रकारिणः (**मिथः**) परस्परम् (**अर्णसातौ**)

प्राप्तविभागे **(सम्)** **(यत्)** ये **(विशः)** प्रजाः **(अववृत्रन्त)** विरोधेन धनं प्राप्नुवन्तु **(युध्माः)** योद्धारः **(आत्)** **(इत्)** एव **(नेमे)** नियन्तारः **(इन्द्रयन्ते)** इन्द्रं स्वामिनं कुर्वते **(अभीके)** समीपे॥४॥

अन्वयः-हे उग्र राजन्! यद्ये क्षितयो योग आशुषाणासो मिथः प्रीतिमन्तः सन्तोऽर्णसातौ क्रतूयन्ति विश इन्द्रयन्ते युध्मा नेमेऽभीके समववृत्रन्त ताऽऽदिदेव तव भृत्याः सन्तु॥४॥

भावार्थः-न हि योगाऽभ्यासमन्तरा प्रज्ञा वर्धते, न प्रज्ञया विना धनात्मसिद्धिर्जायते, न विद्यापुरुषार्थन्यायैरन्तरा प्रजापालनं कर्त्तुं शक्नुवन्ति॥४॥

पदार्थः-हे **(उग्र)** तीक्ष्णस्वभावयुक्त राजन्! **(यत्)** जो **(क्षितयः)** मनुष्य **(योगे)** मिलने वा यम नियमादिकों के अनुष्ठान में **(आशुषाणासः)** शीघ्र करने वाले **(मिथः)** परस्पर प्रीतियुक्त हुए **(अर्णसातौ)** प्राप्त विभाग में **(क्रतूयन्ति)** बुद्धि कर्म्मों की इच्छा करते हैं और **(विशः)** प्रजा **(इन्द्रयन्ते)** स्वामी करती हैं **(युध्माः)** युद्ध करने वाले **(नेमे)** नायक अर्थात् अग्रणी लोग **(अभीके)** समीप में **(सम्, अववृत्रन्त)** विरोध से धन को प्राप्त हों और **(आत्)** **(इत्)** उसी समय आपके भृत्य हों॥४॥

भावार्थः-योगाभ्यास के विना बुद्धि नहीं बढ़ती है और बुद्धि के विना धन और आत्मा की सिद्धि नहीं होती है और विद्या पुरुषार्थ और न्याय के विना प्रजा का पालन-नहीं कर सकते हैं॥४॥

अथ युक्ताहारविहारविषयमाह॥

अब योग्य आहार-विहार विषय को अगले मन्त्र में कहते हैं॥

आदिद्ध नेम॑ इन्द्रि॒यं य॑जन्त॒ आदित्प॒क्तिः पु॑रो॒ळाश॑ रिरिच्यात्।

आदित्सोमो॒ वि प॑पृच्या॒दसु॑ष्वी॒नादिज्जु॑जोष वृष॒भं यज॑ध्यै॥५॥११॥

आत्। इत्। ह। नेम॑। इन्द्रि॒यम्। य॒ज॒न्ते। आत्। इत्। प॒क्तिः। पु॒रो॒ळाश॑म्। रि॒रि॒च्या॒त्। आत्। इत्। सोम॑ः। वि। प॒पृ॒च्या॒त्। असु॑स्वीन्। आत्। इत्। जु॒जो॒ष॒। वृ॒ष॒भम्। यज॑ध्यै॥५॥

पदार्थः-**(आत्)** आनन्तर्य्ये **(इत्)** एव **(ह)** किल **(नेमे)** अन्ये **(इन्द्रियम्)** धनम् **(यजन्ते)** सङ्गच्छन्ते **(आत्)** **(इत्)** **(पक्तिः)** पाकः **(पुरोळाशम्)** सुसंस्कृतान्नम् **(रिरिच्यात्)** अतिरिच्यात् **(आत्)** **(इत्)** **(सोमः)** ऐश्वर्य्यम् **(वि)** **(पपृच्यात्)** संयुज्येत **(असुष्वीन्)** येऽसूनभिसुन्वन्ति तान् **(आत्)** **(इत्)** **(जुजोष)** जुषते **(वृषभम्)** बलिष्ठम् **(यजध्यै)** यष्टुं सङ्गन्तुम्॥५॥

अन्वयः-हे मनुष्या! येषां पुरोळाशं पक्ती रिरिच्यात् ते नेम आदिदिन्द्रियं यजन्ते यस्यादित् सोमोऽसुष्वीन् वि पपृच्यात् स आदिद् यजध्यै वृषभं जुजोष। आदिद्ध ते सर्वे राज्यं बलञ्च प्राप्तुमर्हेयुः॥५॥

भावार्थः-ये जनाः सुसंस्कृतान्यन्नानि पक्त्वा यथारुचि भुञ्जते ते बलम्प्राप्य रोगातिरिक्ता भवितुमर्हेयुरैश्वर्य्यं प्राप्य धर्म्ममाप्तांश्च सेवेरन्॥५॥

पदार्थः-हे मनुष्यो! जिनके **(पुरोळाशम्)** उत्तम प्रकार संस्कारयुक्त अन्न को **(पक्तिः)** पाक **(रिरिच्यात्)** बढ़ावें वे **(नेमे)** अन्य जन **(आत्)** अनन्तर **(इत्)** ही **(इन्द्रियम्)** धन को **(यजन्ते)** प्राप्त होते हैं और जिसके **(आत्)** अनन्तर **(इत्)** ही **(सोमः)** ऐश्वर्य **(असुष्वीन्)** जो प्राणों को प्राप्त होते हैं उनको **(वि, पपृच्यात्)** संयुक्त हो वह **(आत्)** अनन्तर **(इत्)** ही **(यजध्यै)** मिलने के लिये **(वृषभम्)** बलिष्ठ का **(जुजोष)** सेवन करता है **(आत्)** अनन्तर **(इत्, ह)** ही वे सब राज्य और बल को प्राप्त होने के योग्य होवें॥५॥

भावार्थः-जो जन उत्तम प्रकार संस्कारयुक्त अन्नों का पाक करके रुचिपूर्वक भोजन करते हैं, वे बल को प्राप्त होके रोग से रहित होने के योग्य होवें और ऐश्वर्य्य को प्राप्त होके धर्म्म और यथार्थवक्ता पुरुषों की सेवा करें॥५॥

अथ शत्रुविजयार्थराज्यप्रबन्धविषयमाह॥

अब शत्रुजनों को जीतने के लिये राज्यप्रबन्ध को अगले मन्त्र में कहते हैं॥

कृणोत्यस्मै वरिवो य इत्थेन्द्राय सोममुशते सुनोति।
सध्रीचीनेन मनसाविवेनम् तमित्सखायं कृणुते समत्सु॥६॥

कृणोति। अस्मै। वरिवः। यः। इत्था। इन्द्राय। सोमम्। उशते। सुनोति। सध्रीचीनेन। मनसा। अविऽवेनम्। तम्। इत्। सखायम्। कृणुते। समत्ऽसु॥६॥

पदार्थः-(**कृणोति**) (**अस्मै**) (**वरिवः**) सेवनम् (**यः**) जनः (**इत्था**) अनेन प्रकारेण (**इन्द्राय**) परमैश्वर्य्याय राज्ञे (**सोमम्**) ऐश्वर्य्यम् (**उशते**) कामयमानाय (**सुनोति**) निष्पादयति (**सध्रीचीनेन**) संज्ञापकेनाऽनुष्ठापकेन वा (**मनसा**) अन्तःकरणेन (**अविवेनम्**) विगतकामः (**तम्**) (**इत्**) एव (**सखायम्**) मित्रम् (**कृणुते**) कुरुते (**समत्सु**) सङ्ग्रामेषु॥६॥

अन्वयः-हे मनुष्या! योऽस्मै सोममुशत इन्द्रायेत्था वरिवः कृणोति सध्रीचीनेन मनसाऽविवेनन्तन्नैश्वर्य्यं सुनोति समत्सु सखायं कृणुते तमिदेव राजानं प्रधानञ्च कुरुत॥६॥

भावार्थः-हे राजन्! ये मनुष्याः स्वराज्यभक्ता धर्म्मसेविन ऐश्वर्य्यं कामयमाना अधर्म्मं त्यक्तवन्तः सङ्ग्रामे परस्परं स्वकीयेषु जनेषु मैत्रीमाचरन्तो विचक्षणा जनाः स्युस्त एव भवता राजशासने संस्थापनीयाः॥६॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अस्मै)** इस **(सोमम्)** ऐश्वर्य्य की **(उशते)** कामना करनेवाले **(इन्द्राय)** अत्यन्त ऐश्वर्यवाले राजा के लिये **(इत्था)** इस प्रकार से **(वरिवः)** सेवन को **(कृणोति)** करता है **(सध्रीचीनेन)** ज्ञापक वा अनुष्ठापक अर्थात् समझाने वा आरम्भ करनेवाले के सहित **(मनसा)** अन्तःकरण से **(अविवेनन्)** कामनारहित होता हुआ ऐश्वर्य्य को **(सुनोति)** उत्पन्न करता और **(समत्सु)** सङ्ग्रामों में **(सखायम्)** मित्र को **(कृणुते)** करता है **(तम्)** उसको **(इत्)** ही राजा और प्रधान करो॥६॥

भावार्थः-हे राजन्! जो मनुष्य अपने राज्य के भक्त, धर्म्म का सेवन और ऐश्वर्य्य की कामना करने तथा अधर्म्म को छोड़ने वाले, सङ्ग्राम में परस्पर अपने जनों में मैत्री करते हुए विद्वान् जन होवें, वे ही आपको राजशासन में संस्थापन करने योग्य हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

य इन्द्रा॑य सु॒नव॒त् सोम॑म॒द्य पचा॑त् पु॒क्तीरु॒त भृ॒ज्जाति॑ धा॒नाः।
प्रति मना॒योरु॒चथा॑नि॒ हर्य॒न् तस्मि॑न् दध॒द् वृष॑णं॒ शुष्म॒मिन्द्रः॑॥७॥

यः। इन्द्रा॑य। सु॒नव॑त्। सोम॑म्। अ॒द्य। पचा॑त्। पु॒क्तीः। उ॒त। भृ॒ज्जाति॑। धा॒नाः। प्रति॑। म॒ना॒योः। उ॒चथा॑नि। हर्य॑न्। तस्मि॑न्। द॒ध॒त्। वृष॑णम्। शुष्म॑म्। इन्द्रः॑॥७॥

पदार्थः-(**यः**) (**इन्द्राय**) सुखप्रदात्रे द्रव्यैश्वर्य्याय (**सुनवत्**) निष्पादयेत् (**सोमम्**) ऐश्वर्य्यम् (**अद्य**) (**पचात्**) पचेत् (**पक्तीः**) पाकान् (**उत**) (**भृज्जाति**) भृज्जेत् (**धानाः**) यवाः (**प्रति**) (**मनायोः**) प्रशंसां कामयमानस्य (**उचथानि**) रुचिकराणि (**हर्य्यन्**) कामयमानः (**तस्मिन्**) (**दधत्**) धरेत् (**वृषणम्**) बलकरम् (**शुष्मम्**) बलिष्ठम् (**इन्द्रः**) राजा॥७॥

अन्वयः-य इन्द्रो राजाद्येन्द्राय सोमं सुनवत् पक्तीः पचादुतापि धाना भृज्जाति मनायोरुचथानि हर्य्यन् सँस्तस्मिन् वृषणं शुष्मं प्रति दधत् स पुष्कलां विजयिनीं सेनां प्राप्नुयात्॥७॥

भावार्थः-ये राजपुरुषा राज्यायैश्वर्य्यं बलाय सेनायै च भोजनादिसामग्रीर्दध्युस्ते रुचितानि सुखानि लभेरन्॥७॥

पदार्थः-(**यः**) जो (**इन्द्रः**) राजा (**अद्य**) आज (**इन्द्राय**) सुख देनेवाले द्रव्य और ऐश्वर्य्ययुक्त के लिये (**सोमम्**) ऐश्वर्य्य को (**सुनवत्**) उत्पन्न करे (**पक्तीः**) पाकों को (**पचात्**) पकावे (**उत**) और (**धानाः**) यवों को (**भृज्जाति**) भूंजे (**मनायोः**) प्रशंसा की कामना करने वाले की (**उचथानि**) रुचि करनेवालों की (**हर्य्यन्**) कामना करता हुआ (**तस्मिन्**) उसमें (**वृषणम्**) बल करने वाले (**शुष्मम्**) बलयुक्त पुरुष को (**प्रति, दधत्**) धारण करे, वह बहुत जीतने वाली सेना को प्राप्त होवे॥७॥

भावार्थः-जो राजपुरुष राज्य के लिये ऐश्वर्य्य को बल और सेना के लिये भोजन आदि सामग्रियों को धारण करें, वे प्रीतिकारक सुखों को प्राप्त होवें॥७॥

अथ शत्रुविजयेन राज्यादिरक्षणविषयमाह॥

अब शत्रुओं के विजय से राज्यादि पदार्थों के रक्षण विषय को अगले मन्त्र में कहते हैं॥

य॒दा सम॒र्यं व्यचे॒द् ऋघा॑वा दी॒र्घं यदा॒जिम॒भ्यख्य॑दु॒र्यः।
अचिक्रद॒द् वृष॑णं॒ पत्न्यच्छा॑ दु॒रो॒ण आ निशि॑तं सोम॒सुद्भिः॑॥८॥

यदा। सऽमर्य्यम्। वि। अचेत्। ऋघावा। दीर्घम्। यत्। आजिम्। अभि। अख्यत्। अर्यः। अचिक्रदत्। वृषणम्। पत्नी। अच्छ। दुरोणे। आ। निऽशितम्। सोमसुत्ऽभिः॥८॥

पदार्थः-(**यदा**) यस्मिन् काले (**समर्य्यम्**) सङ्ग्रामम् (**वि**) (**अचेत्**) चेतयति (**ऋघावा**) शत्रूणां हन्ता (**दीर्घम्**) लम्बीभूतम् (**यत्**) यः (**आजिम्**) अजन्ति प्रक्षिपन्ति शस्त्राण्यस्मिंस्तम् (**अभि**) (**अख्यत्**) प्रख्यापयेत् (**अर्य्यः**) स्वामीश्वरो राजा (**अचिक्रदत्**) भृशमाक्रन्दति (**वृषणम्**) बलिष्ठम् (**पत्नी**) (**अच्छा**) अत्र **संहितायामि**ति दीर्घः। (**दुरोणे**) गृहे (**आ**) (**निशितम्**) नितरां तीक्ष्णम् (**सोमसुद्भिः**) ये सोममैश्वर्य्यमोषधिगणं वा सुन्वन्ति तैः॥८॥

अन्वयः-यदाऽर्य्यः समर्य्यं व्यचेद्यदृघावा दीर्घमाजिमभ्यख्यद् वृषणमचिक्रदत्तदा दुरोणे पत्नीव सोमसुद्भिः सहानिशितमच्छाचिक्रदत्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पतिव्रता स्त्री सर्वाण्यैश्वर्य्याणि संरक्ष्योन्नीय पत्यादीनानन्दयति तथैव विद्याविनयो राजा स्वप्रजाः संरक्ष्यैश्वर्य्यं वर्द्धयित्वा सर्वान्त्सज्जनान् रक्षयति॥८॥

पदार्थः-(**यदा**) जिस काल में (**अर्य्यः**) स्वामी ईश्वर अर्थात् राजा (**समर्य्यम्**) सङ्ग्राम को (**वि, अचेत्**) चेतन कराता है (**यत्**) जो (**ऋघावा**) शत्रुओं का नाश करने वाला (**दीर्घम्**) लम्बे बहुत (**आजिम्**) फेंकते हैं शस्त्र जिसमें उस सङ्ग्राम की (**अभि, अख्यत्**) प्रसिद्धि करावे और (**वृषणम्**) बलिष्ठ के प्रति (**अचिक्रदत्**) अत्यन्त चिल्लाता है, तब (**दुरोणे**) गृह में (**पत्नी**) स्त्री के सदृश (**सोमसुद्भिः**) ऐश्वर्य्य वा ओषधियों के समूह को उत्पन्न करने वालों के साथ (**आ, निशितम्**) अच्छे प्रकार निरन्तर तीक्ष्ण (**अच्छा**) अच्छा अत्यन्त शब्द करता है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पतिव्रता स्त्री सम्पूर्ण ऐश्वर्य्यों की उत्तम प्रकार रक्षा और उन्नति करके पति आदि को आनन्द देती है, वैसे ही विद्या और विनययुक्त राजा अपने प्रजाजनों की अच्छे प्रकार रक्षा और ऐश्वर्य्य की वृद्धि करके सब सज्जनों की रक्षा करता है॥८॥

अथ ज्येष्ठकनिष्ठव्यवहारविषयमाह॥

अब ज्येष्ठ-कनिष्ठ के व्यवहार विषय को अगले मन्त्र में कहते हैं॥

भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन्।
स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्र वाणम्॥९॥

भूयसा। वस्नम्। अचरत्। कनीयः। अविऽक्रीतः। अकानिषम्। पुनः। यन्। सः। भूयसा। कनीयः। न। अरिरेचीत्। दीनाः। दक्षाः। वि। दुहन्ति। प्र। वाणम्॥९॥

पदार्थः-(**भूयसा**) बहुना (**वस्नम्**) हट्टस्तस्तरम् (**अचरत्**) (**कनीयः**) अतिशयेन कनिष्ठम् (**अविक्रीतः**) न विक्रीतः (**अकानिषम्**) प्रदीपयेयम् (**पुनः**) (**यन्**) गच्छन् (**सः**) (**भूयसा**) बहुना

(कनीयः) **(न)** निषेधे **(अरिरेचीत्)** रिक्तङ्कुर्यात् **(दीनाः)** क्षीणाः **(दक्षाः)** चतुराः **(वि)** **(दुहन्ति)** पूरिताङ्कुर्वन्ति **(प्र)** **(वाणम्)** वाणीम्। **वाण इति वाङ्नामसु पठितम्।** (निघं०१.११)॥९॥

अन्वयः-योऽविक्रीतो भूयसा कनीयो वस्नमचरत् स पुनर्यन् भूयसा कनीयो नारिरेचीद्दीना दक्षा वाणं वि प्र दुहन्ति तानहमकानिषं कामयेयम्॥९॥

भावार्थः-ये मनुष्या विविधव्यापारकारिणो निरभिमानाः प्राज्ञाः सन्तो विद्याशिक्षाभ्यां पूर्णां वाचं कुर्वन्ति ते कनीयसः पालयितुं शक्नुवन्ति॥९॥

पदार्थः-जो **(अविक्रीतः)** नहीं बेचा गया **(भूयसा)** बहुत प्रकार से **(कनीयः)** अत्यन्त अल्प **(वस्नम्)** हट्टस्तस्तर अर्थात् हटिया में बिछाने का **(अचरत्)** आचरण करे **(सः)** वह **(पुनः)** फिर **(यन्)** जाता हुआ **(भूयसा)** बहुत भाव से **(कनीयः)** अत्यन्त न्यून कर्म को **(न)** नहीं **(अरिरेचीत्)** रीता करे और जो **(दीनाः)** क्षीण **(दक्षाः)** चतुर जन **(वाणम्)** वाणी को **(वि, प्र, दुहन्ति)** अच्छे प्रकार पूरित करते हैं, उनको मैं **(अकानिषम्)** प्रदीप्त करूं और कामना करूं॥९॥

भावार्थः-जो मनुष्य अनेक प्रकार के व्यापार करने वाले, अभिमानरहित, बुद्धिमान् हुए, विद्या और शिक्षा से पूर्ण वाणी को करते हैं, वे छोटों को पाल सकते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

क इ॒मं द॒शभि॒र्ममेन्द्रं॑ क्रीणाति धे॒नुभि॑:।

य॒दा वृ॒त्राणि॒ जङ्घ॑न॒दथै॑नं मे॒ पुन॑र्ददत्॥ १०॥

कः। इ॒मम्। द॒शऽभि॑:। मम॑। इन्द्र॑म्। क्री॒णा॒ति॒। धे॒नुऽभि॑:। य॒दा। वृ॒त्राणि॑। जङ्घ॑नत्। अथ॑। ए॒न॒म्। मे॒। पुन॑:। द॒द॒त्॥ १०॥

पदार्थः-**(कः)** **(इमम्)** **(दशभिः)** अङ्गुलिभिः **(मम)** **(इन्द्रम्)** ऐश्वर्यम् **(क्रीणाति)** **(धेनुभिः)** दोग्ध्रीभिर्गोभिरिव वाग्भिः **(यदा)** **(वृत्राणि)** धनानि **(जङ्घनत्)** भृशं हन्ति प्राप्नोति **(अथ)** **(एनम्)** **(मे)** मह्यम् **(पुनः)** **(ददत्)** ददाति॥१०॥

अन्वयः-हे मनुष्याः! को दशभिर्धेनुभिर्ममेममिन्द्रं क्रीणाति यदा यो वृत्राणि जङ्घनदथैनं [मे] पुनर्ददत् तदैश्वर्य्यं वर्धेत॥१०॥

भावार्थः-क ऐश्वर्यं वर्द्धितुं शक्नुयादिति प्रश्नस्य, यः सर्वथा पुरुषार्थी सुशिक्षितया वाचा युक्तश्चेति कुतो य आदावैश्वर्य्यं प्राप्नुयात् स एवान्येभ्यो दातुमर्हेत्॥१०॥

पदार्थः-हे मनुष्यो! **(कः)** कौन **(दशभिः)** दश अङ्गुलियों और **(धेनुभिः)** दोहने वाली गौओं के सदृश वाणियों से **(मम)** मेरे **(इमम्)** इस **(इन्द्रम्)** ऐश्वर्य्य को **(क्रीणाति)** खरीदता है **(यदा)** जब जो

(वृत्राणि) धनों को **(जङ्घनत्)** अत्यन्त प्राप्त होता है **(अथ)** अनन्तर **(एनम्)** इसको **(मे)** मेरे लिये **(पुनः)** फिर **(ददत्)** देता है, तभी ऐश्वर्य्य बढ़े॥१०॥

भावार्थः-कौन ऐश्वर्य्य को बढ़ा सके इस प्रश्न का, जो सब प्रकार पुरुषार्थयुक्त, उत्तम प्रकार शिक्षित वाणी से युक्त है, यह उत्तर है, क्योंकि जो आदि में ऐश्वर्य्य को प्राप्त होवे, वही औरों को देने को योग्य होवे॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्योऽ३ न पीपेः।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥११॥१२॥

नु। स्तुतः। इन्द्र। नु। गृणानः। इषम्। जरित्रे। नद्यः। पीपेरिति पीपेः। अकारि। ते। हरिऽवः। ब्रह्म। नव्यम्। धिया। स्याम। रथ्यः। सदाऽसाः॥११॥

पदार्थः-(**नु**) अत्रोभयत्र **ऋचि तुनुघे**ति दीर्घः। **(स्तुतः)** शुद्धव्यवहारेण प्रशंसितः **(इन्द्र)** ऐश्वर्यमिच्छुक **(नु)** **(गृणानः)** पुरुषार्थं स्तुवन् **(इषम्)** अन्नम् **(जरित्रे)** याचमानाऽयाचिताय वा **(नद्यः)** सरितः **(न)** इव **(पीपेः)** वर्द्धय **(अकारि)** क्रियते **(ते)** तव **(हरिवः)** प्रशंसितभृत्ययुक्त **(ब्रह्म)** महद्धनम् **(नव्यम्)** देशदेशान्तराद् द्वीपद्वीपान्तराद्वा **(धिया)** व्यवहारज्ञया प्रज्ञया सुष्ठु कृतेन कर्म्मणा वा **(स्याम)** भवेम **(रथ्यः)** बहुरथादियुक्ताः **(सदासाः)** भृत्यैः सहिताः॥११॥

अन्वयः-हे हरिव इन्द्र! स्तुतो गृणानस्त्वं जरित्रे नद्यो नेषं नु पीपेस्तस्मात्तेऽस्माभिर्धिया नव्यं ब्रह्माकारि त्वया सह रथ्यः सदासा वयमैश्वर्य्यन्तो नु स्याम॥११॥

भावार्थः-हे मनुष्या! यदि यूयं धनमिच्छत तर्हि धर्म्येण पुरुषार्थेन योग्यां क्रियां सततं कुरुतेति॥११॥

अत्र ब्रह्मचर्य्यवतः पुत्रप्रशंसाऽधर्म्मत्यागेन सुकर्म्मणा प्रज्ञैश्वर्य्यवर्धनं युक्ताऽहारविहारः शत्रुविजयो ज्येष्ठकनिष्ठव्यवहारश्चोक्तोऽत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्विंशं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(हरिवः)** प्रशंसा करने योग्य भृत्यों से युक्त **(इन्द्र)** ऐश्वर्य्य की इच्छा करने वाले! **(स्तुतः)** शुद्ध व्यवहार से प्रशंसित **(गृणानः)** पुरुषार्थ की स्तुति करते हुए आप **(जरित्रे)** याचना करने वाले वा जिसकी याचना नहीं की गई उसके लिये **(नद्यः)** नदियों के **(न)** सदृश **(इषम्)** अन्न को **(नु)** निश्चय **(पीपेः)** बढ़ाओ तिससे **[**=उससे**]** **(ते)** आपका हम लोगों से **(धिया)** व्यवहार को जानने वाली बुद्धि वा उत्तम किये हुए कर्म्म से **(नव्यम्)** देश-देशान्तर वा द्वीप-द्वीपान्तर से नवीन **(ब्रह्म)** बहुत धन **(अकारि)** किया जाता है और आपके साथ **(रथ्यः)** बहुत रथ आदि से युक्त **(सदासाः)** भृत्यों के

सहित हम लोग ऐश्वर्य्य वाले **(नु)** शीघ्र **(स्याम)** होवें॥११॥

भावार्थः-हे मनुष्यो! यदि आप लोग धन की इच्छा करो तो धर्म्मयुक्त पुरुषार्थ से योग्य क्रिया को निरन्तर करो॥११॥

इस सूक्त में ब्रह्मचर्य्य वाले के पुत्र की प्रशंसा, अधर्म्म के त्याग से और उत्तम कर्म्म से बुद्धि और ऐश्वर्य्य की वृद्धि, नियमित आहार-विहार, शत्रु का विजय और ज्येष्ठ कनिष्ठ का व्यवहार कहा गया, इससे इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौबीसवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

अथाऽष्टर्चस्य पञ्चविंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १ निचृत् पङ्क्तिः। २, ८ स्वराट् पङ्क्तिः। ४, ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ५, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ प्रश्नोत्तरविषय आरभ्यते॥

अब आठ ऋचावाले पच्चीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में प्रश्नोत्तरविषय का आरम्भ किया जाता है॥

को अ॒द्य नर्यो॑ दे॒वका॑म उ॒शन्निन्द्र॑स्य स॒ख्यं जु॑जोष।
को वा॑ म॒हेऽव॑से पार्या॑य॒ समि॑द्धे अ॒ग्नौ सु॒तसो॑म ईट्टे॥ १॥

कः। अ॒द्य। नर्यः॑। दे॒वऽका॑मः। उ॒शन्। इन्द्र॑स्य। स॒ख्यम्। जु॒जो॒ष॒। कः। वा॒। म॒हे। अव॑से। पार्या॑य। सम्ऽइ॑द्धे। अ॒ग्नौ। सु॒तऽसो॑मः। ई॒ट्टे॒॥ १॥

पदार्थः-(**कः**) (**अद्य**) इदानीम् (**नर्य्यः**) नृषु साधुः (**देवकामः**) यो देवान् विदुषः कामयते (**उशन्**) कामयमानः (**इन्द्रस्य**) परमैश्वर्य्ययुक्तस्य (**सख्यम्**) मित्रत्वम् (**जुजोष**) सेवते (**कः**) (**वा**) विकल्पे (**महे**) महते (**अवसे**) रक्षणाद्याय (**पार्य्याय**) दुःखपारं गमयते (**समिद्धे**) प्रसिद्धे (**अग्नौ**) पावके (**सुतसोमः**) सुतः सोमो येन (**ईट्टे**) ऐश्वर्य्यं लभते॥१॥

अन्वयः-हे विद्वन्नद्य को देवकाम इन्द्रस्य सख्यमुशन्नर्य्यो धर्म्मं जुजोष को वा महे पार्य्यायावसे समिद्ध अग्नौ सुतसोमः सन्नैश्वर्य्यमीट्टे इति वयं पृच्छामः॥१॥

भावार्थः-यो विद्यामित्रत्वकामस्सर्वजगत्प्रियाचारी सर्वेषां रक्षणं कुर्वन्नग्नौ होमादिना प्रजाहितं कुर्य्यात् स एव जगद्धितैषी वर्त्तत इत्युत्तरम्॥१॥

पदार्थः-हे विद्वन्! (**अद्य**) इस समय (**कः**) कौन (**देवकामः**) विद्वानों की कामना करने वाला (**इन्द्रस्य**) अत्यन्त ऐश्वर्य्य से युक्त के (**सख्यम्**) मित्रत्व की (**उशन्**) कामना करता हुआ (**नर्य्यः**) मनुष्यों में श्रेष्ठ धर्म्म का (**जुजोष**) सेवन करता है (**कः, वा**) अथवा कौन (**महे**) बड़े (**पार्य्याय**) दुःख के पार उतारने वाले (**अवसे**) रक्षण आदि के लिये (**समिद्धे**) प्रसिद्ध (**अग्नौ**) अग्नि में (**सुतसोमः**) सोमरस को उत्पन्न करने वाला हुआ ऐश्वर्य्य को (**ईट्टे**) प्राप्त होता है, यह हम लोग पूछते हैं॥१॥

भावार्थः-जो विद्या और मित्रता की कामना करनेवाला, सम्पूर्ण जगत् का प्रिय आचरण करता और सब का रक्षण करता हुआ अग्नि में होम आदि से प्रजा का हित करे, वही जगत् का हित चाहने वाला है, यह उत्तर है॥१॥

अथ राजकर्त्तव्यविषयमाह॥

अब राजकर्त्तव्यविषय को अगले मन्त्र में कहते हैं॥

को नानाम॒ वच॑सा सो॒म्याय॑ मना॒युर्वा॑ भवति॒ वस्त॑ उ॒स्राः।

क इन्द्र॑स्य॒ युज्यं॒ कः स॑खि॒त्वं को भ्रा॒त्रं व॑ष्टि क॒वये॒ क ऊ॒ती॥ २॥

कः। न॒ना॒म॒। वच॑सा। सो॒म्याय॑। म॒ना॒युः। वा॒। भ॒व॒ति॒। वस्ते॑। उ॒स्राः। कः। इन्द्र॑स्य। युज्य॑म्। कः। सखि॒ऽत्वम्। कः। भ्रा॒त्रम्। व॒ष्टि॒। क॒वये॑। कः। ऊ॒ती॥ २॥

पदार्थः-(**कः**) (**नानाम**) नम्रो भवति। अत्र **तुजादीनां दीर्घोऽभ्यासस्ये**ति दीर्घः। (**वचसा**) वचनेन (**सोम्याय**) सोमैश्वर्य्यसाधवे (**मनायुः**) मनो विज्ञानं कामयमानः (**वा**) (**भवति**) (**वस्ते**) कामयते (**उस्राः**) रश्मय इव। **उस्रा इति रश्मिनामसु पठितम्।** (निघं०१.५) (**कः**) (**इन्द्रस्य**) (**युज्यम्**) योक्तुमर्हम् (**कः**) (**सखित्वम्**) (**कः**) (**भ्रात्रम्**) भ्रातृभावम् (**वष्टि**) कामयते (**कवये**) प्राज्ञाय (**कः**) (**ऊती**) ऊत्या रक्षणादिक्रियया॥ २॥

अन्वयः-हे विद्वांसः! को वचसा सोम्याय नानाम को वा वचसा सोम्याय मनायुर्भवति क उस्रा इव सर्वान् गुणैर्वस्ते क इन्द्रस्य युज्यं सखित्वं को वा कवय ऊती भ्रात्रं वष्टीत्युत्तरं ब्रूत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो मनसा कर्म्मणा वाचा नम्रो जायते यो रश्मिवत् प्रकाशात्मव्यवहारो यो जगदीश्वरेण मित्रत्वमाचरति सर्वैस्सह भ्रातृभावं रक्षति यश्च विद्वद्भ्यो हितं करोति स एव सर्वमिष्टं फलं लभते॥ २॥

पदार्थः-हे विद्वानो (**कः**) कौन (**वचसा**) वचन से (**सोम्याय**) सोमरूप ऐश्वर्य्य की सिद्धि करनेवाले के लिये (**नानाम**) नम्र होता है (**कः, वा**) अथवा कौन वचन से सोमरूप ऐश्वर्य्य की सिद्धि करने वाले के लिये (**मनायुः**) विज्ञान की कामना करता हुआ (**भवति**) होता है (**कः**) कौन (**उस्राः**) किरणों के सदृश सब को गुणों से (**वस्ते**) चाहता है (**कः**) कौन (**इन्द्रस्य**) ऐश्वर्य्ययुक्त के (**युज्यम्**) जोड़ने योग्य (**सखित्वम्**) मित्रपने को (**कः**) अथवा कौन (**कवये**) बुद्धिमान् के लिये (**ऊती**) रक्षण आदि कर्म्म से (**भ्रात्रम्**) भ्रातृपने की (**वष्टि**) कामना करता है, इस का उत्तर कहो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मन, कर्म्म और वचन से नम्र होता है, जो किरणों के तुल्य प्रकाशस्वरूप व्यवहारयुक्त, जो जगदीश्वर के साथ मित्रता करता तथा सबके साथ भ्रातृपन की रक्षा करता और जो विद्वानों के लिये हित करता है, वही सम्पूर्ण इष्टफल को प्राप्त होता है॥ २॥

अथोत्तममध्यमनिकृष्टकर्त्तव्यकर्मविषयमाह॥

अब उत्तम, मध्यम और निकृष्टों को कर्त्तव्यकर्मविषय का उपदेश अगले मन्त्र में दिया है॥

को दे॒वाना॒मवो॑ अ॒द्या वृ॑णीते॒ क आ॑दि॒त्याँ अदि॑तिं॒ ज्योति॑रीट्टे।

कस्या॒श्विना॒विन्द्रो॑ अ॒ग्निः सु॒तस्या॑ंशोः पि॑बन्ति॒ मन॒सावि॑वेनम्॥ ३॥

कः। देवानाम्। अवः। अद्य। वृणीते। कः। आदित्यान्। अदितिम्। ज्योतिः। ईट्टे। कस्य। अश्विनौ। इन्द्रः। अग्निः। सुतस्य। अंशोः। पिबन्ति। मनसा। अविऽवेनम्॥ ३॥

पदार्थः-(**कः**) (**देवानाम्**) विदुषाम् (**अवः**) रक्षणादि (**अद्य**) अत्र **संहितायामिति** दीर्घः। (**वृणीते**) स्वीकुरुते (**कः**) (**आदित्यान्**) मासानिव वर्त्तमानान् पूर्णविद्यान् (**अदितिम्**) पृथिवीम् (**ज्योतिः**) प्रकाशम् (**ईट्टे**) अधीच्छति (**कस्य**) (**अश्विनौ**) द्यावापृथिव्यौ (**इन्द्रः**) सूर्य्यः (**अग्निः**) विद्युत् प्रसिद्धस्वरूपः (**सुतस्य**) निष्पन्नस्य (**अंशोः**) प्राप्तव्यस्य महौषधिरस्य (**पिबन्ति**) (**मनसा**) विज्ञानेन (**अविवेनम्**) दुष्टकामनारहितम्॥ ३॥

अन्वयः-हे विद्वांसः! कोऽद्य देवानामवो वृणीते क आदित्यानदितिञ्ज्योतिश्चेट्टे। कस्य सुतस्यांशोर्मनसाऽविवेनमश्विनाविन्द्रोऽग्निश्च रसं पिबन्ति॥ ३॥

भावार्थः-ये विद्वत्सङ्गङ्कुर्वन्ति ते सूर्य्यादिवत् सर्वान् कामान् प्रापयितुं शक्नुवन्ति। येऽकमनीयं न कामयन्ते ते सिद्धकामा जायन्त इत्युत्तरम्॥ ३॥

पदार्थः-हे विद्वानो! (**कः**) कौन (**अद्य**) आज (**देवानाम्**) विद्वानों के (**अवः**) रक्षण आदि का (**वृणीते**) स्वीकार करता है (**कः**) कौन (**आदित्यान्**) मासों के सदृश वर्त्तमान पूर्ण विद्वानों तथा (**अदितिम्**) पृथिवी और (**ज्योतिः**) प्रकाश की (**ईट्टे**) अधिक इच्छा करता है (**कस्य**) किस (**सुतस्य**) उत्पन्न (**अंशोः**) प्राप्त होने योग्य बड़ी औषध के रस के (**मनसा**) विज्ञान से (**अविवेनम्**) दुष्ट कामनाओं से रहित जैसे हो, वैसे (**अश्विनौ**) अन्तरिक्ष-पृथिवी (**इन्द्रः**) सूर्य्य और (**अग्निः**) बिजुली वा प्रसिद्धरूप अग्निरस को (**पिबन्ति**) पीते हैं॥ ३॥

भावार्थः-जो विद्वानों के सङ्ग को करते हैं, वे सूर्य आदि के सदृश सम्पूर्ण कामनाओं को प्राप्त करा सकते हैं और जो नहीं कामना करने योग्य वस्तु की नहीं कामना करते हैं, वे कामनाओं की सिद्धि से युक्त होते हैं, यह उत्तर है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तस्मा अग्निर्भारतः शर्म यंसज्ज्योक् पश्यात् सूर्यमुच्चरन्तम्।
य इन्द्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणाम्॥ ४॥

तस्मै। अग्निः। भारतः। शर्म। यंसत्। ज्योक्। पश्यात्। सूर्यम्। उत्ऽचरन्तम्। यः। इन्द्राय। सुनवाम। इति। आह। नरे। नर्याय। नृऽतमाय। नृणाम्॥ ४॥

पदार्थः-(**तस्मै**) (**अग्निः**) पावकवद्वर्त्तमानः (**भारतः**) धारकस्यायं धर्त्ता (**शर्म्म**) गृहमिव सुखम्। **शर्मेति गृहनामसु पठितम्।** (निघं०३.४) (**यंसत्**) यच्छेत् प्राप्नुयात् (**ज्योक्**) निरन्तरम्

(पश्यात्) सम्प्रेक्षेत **(सूर्य्यम्)** सूर्य्यमण्डलम् **(उच्चरन्तम्)** ऊर्ध्वं विहरन्तम् **(यः)** **(इन्द्राय)** परमैश्वर्य्याय **(सुनवाम)** निष्पादयेम **(इति)** **(आह)** ब्रूते **(नरे)** नायकाय **(नर्य्याय)** नृषु कुशलाय **(नृतमाय)** अतिशयेन नायकाय **(नृणाम्)** विद्यासुशीलयुक्तानां मनुष्याणाम्॥४॥

अन्वयः-हे मनुष्या! योऽग्निरिव भारतः शर्म्म यंसत् स उच्चरन्तं सूर्य्यं ज्योक् पश्यात् तस्मै नृणां नृतमाय नरे नर्य्यायेन्द्रायेत्याह तं वयं सुनवाम॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो गृहे निवास इव विद्यायां निवसेद् ब्रह्मचर्य्येण खगोलदिविद्यां प्राप्नुयान्मनुष्येभ्यो हितमुपदिशेत् स एवोत्तमः सञ्छतं वर्षाणि जीवन्त्सूर्य्यादिकं पश्यन्त्सर्वं सुखं यच्छेत्॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अग्निः)** अग्नि के सदृश वर्त्तमान **(भारतः)** धारण करने वाले का यह धारण करने वाला **(शर्म्म)** गृह के सदृश सुख को **(यंसत्)** प्राप्त होवे वह **(उच्चरन्तम्)** ऊपर को घूमते हुए **(सूर्य्यम्)** सूर्य्यमण्डल को **(ज्योक्)** निरन्तर **(पश्यात्)** देखे **(तस्मै)** उस **(नृणाम्)** विद्या और उत्तमशीलयुक्त मनुष्यों के **(नृतमाय)** अत्यन्त मुखिया **(नरे)** नायक **(नर्य्याय)** मनुष्यों में कुशल **(इन्द्राय)** उत्तम ऐश्वर्य्यवान् के लिये **(इति)** ऐसा **(आह)** कहता है, उसको हम लोग **(सुनवाम)** उत्पन्न करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो गृह में निवास के सदृश विद्या में निवास करे और ब्रह्मचर्य्य से खगोल आदि विद्या को प्राप्त होवे और मनुष्यों के लिये हित का उपदेश देवे, वही उत्तम होता सौ वर्ष पर्य्यन्त जीवता और सूर्य्य आदि को देखता हुआ सब सुख को देवे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

न तं जिनन्ति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत्।

प्रियः सुकृत् प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी॥५॥१३॥

न। तम्। जिनन्ति। बहवः। न। दभ्राः। उरु। अस्मै। अदितिः। शर्म। यंसत्। प्रियः। सुऽकृत्। प्रियः। इन्द्रे। मनायुः। प्रियः। सुप्रऽअवीः। प्रियः। अस्य। सोमी॥५॥

पदार्थः-**(न)** **(तम्)** **(जिनन्ति)** जयन्ति। अत्र विकरणव्यत्ययः। **(बहवः)** अनेके **(न)** **(दभ्राः)** हिंसकाः **(उरु)** बहु **(अस्मै)** **(अदितिः)** माता **(शर्म)** सुखम् **(यंसत्)** ददाति **(प्रियः)** योऽन्यान् प्रीणाति सः **(सुकृत्)** सुष्ठु सत्यं कर्म्म करोति सः **(प्रियः)** प्रीतिकरः **(इन्द्रे)** परमैश्वर्य्ये **(मनायुः)** मन इवाचरति **(प्रियः)** हर्षशोकरहितः **(सुप्रावीः)** सुष्ठु शुभगुणप्राप्तः **(प्रियः)** कमनीयः **(अस्य)** **(सोमी)** सोमो बहुविधमैश्वर्य्यं विद्यते यस्य सः॥५॥

अन्वयः-हे मनुष्या! य इन्द्रे प्रियः सुकृज्जनेषु प्रियः प्रियेषु मनायुर्धर्म्येण प्रियो विद्यासु सुप्रावीर्विद्वत्सु प्रियोऽस्य जगतो मध्ये सोमी वर्त्तते तं शत्रवो न जिनन्ति बहवो दभ्रा न हिंसन्त्यस्मा अदितिरुरु शर्म यंसत्॥५॥

भावार्थः-येऽजातशत्रवः परमेश्वरोपासकाः सर्वप्रियसाधका जना भवन्ति तान् कोऽपि शत्रुर्जेतुं न शक्नोति यथा मातरं श्रेष्ठं गृहं वा प्राप्य मनुष्यः सुखयति तथैव सर्वाणि सुखानि प्राप्य सततं मोदते॥५॥

पदार्थः-हे मनुष्यो! जो (**इन्द्रे**) अत्यन्त ऐश्वर्य्य होने पर (**प्रियः**) अन्यों को प्रसन्न करने (**सुकृत्**) सत्य कर्म्म करने, जनों में (**प्रियः**) प्रीति करने और प्रियों में (**मनायुः**) मन के सदृश आचरण करने वाला धर्म्मयुक्त कर्म्म से (**प्रियः**) आनन्द और शोक से रहित विद्याओं में (**सुप्रावीः**) अच्छे प्रकार उत्तम गुणों को प्राप्त विद्वानों में (**प्रियः**) सुन्दर और (**अस्य**) इस जगत् के मध्य में (**सोमी**) अनेक प्रकार के ऐश्वर्य्य से युक्त है (**तम्**) उसको शत्रु लोग (**न**) नहीं (**जिनन्ति**) जीतते हैं (**बहवः**) अनेक (**दभ्राः**) नाश करने वाले (**न**) नहीं नाश करते हैं (**अस्मै**) इसके लिये (**अदितिः**) माता (**उरु**) बहुत (**शर्म्म**) सुख को (**यंसत्**) देती है॥५॥

भावार्थः-जो शत्रुरहित परमेश्वर की उपासना करने और सब के प्रिय साधने वाले जन होते हैं, उनको कोई भी शत्रु जीत नहीं सकता है और जैसे माता वा श्रेष्ठ गृह को प्राप्त होकर मनुष्य सुख का आचरण करता है, वैसे ही सब सुखों को प्राप्त होकर निरन्तर आनन्दित होता है॥५॥

अथ राजामात्यादिगुणानाह॥

अब राजा अमात्यादिकों के गुणों को अगले मन्त्र में कहते हैं॥

सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः।
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः॥६॥

सुप्रऽअव्यः। प्राशुषाट्। एषः। वीरः। सुस्वेः। पक्तिम्। कृणुते। केवला। इन्द्रः। न। असुस्वेः। आपिः। न। सखा। न। जामिः। दुःप्रऽअव्यः। अवहन्ता। इत्। अवाचः॥६॥

पदार्थः-(**सुप्राव्यः**) सुष्ठु रक्षितुं योग्यः (**प्राशुषाट्**) यः प्राशून् वेगवतश्शत्रून् सहते (**एषः**) वर्त्तमानः (**वीरः**) बलिष्ठः (**सुष्वेः**) सुष्ठु निष्पन्नस्याऽन्नस्य (**पक्तिम्**) पाकम् (**कृणुते**) करोति (**केवला**) केवलाम् (**इन्द्रः**) ऐश्वर्य्यवान् (**न**) (**असुष्वेः**) अलसस्याऽनिष्पादकस्य (**आपिः**) यः सर्वानाप्नोति (**न**) इव (**सखा**) सुहृत् (**न**) (**जामिः**) बन्धुः (**दुष्प्राव्यः**) दुःखेन प्रावितुं योग्यः (**अवहन्ता**) विरुद्धस्य हननकर्त्ता (**इत्**) एव (**अवाचः**) दुष्टवचनस्य॥६॥

अन्वयः-हे मनुष्या! यः सुप्राव्यः प्राशुषाडेष वीर इन्द्रः सुष्वेः केवला पक्तिं कृणुते योऽसुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवाचोऽवहन्तेदेव विरोधं न कृणुते स एव सर्वस्य सुखदाता जायते॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये राजपुरुषाः सुसंस्कृतान्नं भुक्त्वा मित्रवद् बन्धुवद्वर्त्तित्वा दुःशीलान् घ्नन्ति न ते दारिद्र्यं पराजयञ्च प्राप्नुवन्ति॥६॥

पदार्थः-हे मनुष्यो! जो **(सुप्राव्यः)** उत्तम प्रकार रक्षा करने योग्य **(प्राशुषाट्)** वेगयुक्त शत्रुओं को सहने वाला **(एषः)** यह **(वीरः)** बलिष्ठ **(इन्द्रः)** ऐश्वर्य्ययुक्त जन **(सुष्वेः)** उत्तम प्रकार उत्पन्न अन्न के **(केवला)** केवल **(पक्तिम्)** पाक को **(कृणुते)** करता है और जो **(असुष्वेः)** आलस्य भरे हुए अर्थात् नहीं उत्पन्न करने वाले के सम्बन्ध में **(आपिः)** सब को प्राप्त होने वाले के **(न)** सदृश वा **(सखा)** मित्र के **(न)** सदृश **(जामिः)** बन्धु **(दुष्प्राव्यः)** दुःख से रक्षा करने योग्य और **(अवाचः)** दुष्ट वचन वाले के **(अवहन्ता)** विरुद्ध काम का हनन करने वाला **(इत्)** ही विरोध को **(न)** नहीं करता है, वही सब का सुखदाता होता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजपुरुष उत्तम प्रकार संस्कारयुक्त अन्न का भोग तथा मित्र और बन्धुओं के सदृश वर्त्ताव करके दुष्ट स्वभाववालों का नाश करते, वे दारिद्र्य और पराजय को नहीं प्राप्त होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

न रेवतापणिनासख्यमिन्द्रोऽसुन्वता सुतपाः सं गृणीते।
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत्॥७॥

न। रेवता। पणिना। सख्यम्। इन्द्रः। असुन्वता। सुतऽपाः। सम्। गृणीते। आ। अस्य। वेदः। खिदति। हन्ति। नग्नम्। वि। सुस्वये। पक्तये। केवलः। भूत्॥७॥

पदार्थः-**(न)** **(रेवता)** प्रशस्तधनवता **(पणिना)** व्यवहर्त्रा वणिग्जनादिना **(सख्यम्)** मित्रभावम् **(इन्द्रः)** परमैश्वर्य्यवान् राजा **(असुन्वता)** अपुरुषार्थिना **(सुतपाः)** सुष्ठु धर्म्मात्मा रागद्वेषरहितः **(सम्)** **(गृणीते)** उपदिशति **(आ)** **(अस्य)** राज्ञः **(वेदः)** द्रव्यम् **(खिदति)** दैन्यं प्राप्नोति **(हन्ति)** **(नग्नम्)** निर्लज्जम् **(वि)** **(सुष्वये)** सुष्ठु निष्पादकाय **(पक्तये)** पाककर्त्रे **(केवलः)** असहायः **(भूत्)** भवति॥७॥

अन्वयः-यः सुतपा इन्द्रो रेवता पणिनाऽसुन्वता सह सख्यं न करोति सर्वेभ्यः सत्यं न्यायं सङ्गृणीते यः केवलः सन् सुष्वये पक्तये भूद्यो नग्नं विहन्त्यस्य वेदः कदाचिन्नाखिदति॥७॥

भावार्थः-यो राजा धनादिलोभेन धनिनामुपरि प्रीतो दरिद्रान् प्रत्यप्रसन्नो न भवति, यो दुष्टान्त्सम्यग्दण्डयित्वा श्रेष्ठान् सततं रक्षति नैवाऽस्य राष्ट्रं कदाचित् खेदं प्राप्नोति॥७॥

पदार्थः-जो **(सुतपाः)** उत्तम प्रकार धर्म्मात्मा और राग अर्थात् विषयों में प्रीति और प्राणियों में द्वेष से रहित **(इन्द्रः)** अत्यन्त ऐश्वर्य्यवाला राजा **(रेवता)** श्रेष्ठ धनवाले **(पणिना)** व्यवहारी वैश्य जन आदि और **(असुन्वता)** नहीं पुरुषार्थ करने वाले जन के साथ **(सख्यम्)** मित्रपने को **(न)** नहीं करता

और सब को सत्य न्याय का **(सम्, गृणीते)** अच्छे प्रकार उपदेश देता है और जो **(केवलः)** सहायरहित हुआ **(सुष्वये)** उत्तम प्रकार उत्पन्न करने वाले **(पक्तये)** पाककर्त्ता के लिये **(भूत्)** होता है और जो **(नग्नम्)** निर्लज्ज का **(वि, हन्ति)** उत्तम प्रकार नाश करता है **(अस्य)** इस राजा का **(वेदः)** द्रव्य कभी नहीं **(आ, खिदति)** दीनता अर्थात् नाश को प्राप्त होता है॥७॥

भावार्थः-जो राजा धन आदि के लोभ से धनियों के ऊपर प्रसन्न और दरिद्रों के प्रति अप्रसन्न नहीं होता है और जो दुष्टों को उत्तम प्रकार दण्ड देकर श्रेष्ठों की निरन्तर रक्षा करता है, नहीं इस का राज्य कभी खेद को प्राप्त होता है॥७॥

अथ पक्षपातराहित्याचरणविषयमाह॥

अब पक्षपातरहित आचरण विषय को अगले मन्त्र में कहते हैं॥

इन्द्रं॑ परेऽवरे॑ मध्य॒मास॒ इन्द्रं॒ यान्तोऽव॑सितास॒ इन्द्र॑म्।

इन्द्रं॑ क्षि॒यन्त॑ उ॒त यु॒ध्यमा॑ना॒ इन्द्रं॒ नरो॑ वाज॒यन्तो॑ हवन्ते॥८॥१४॥

इन्द्र॑म्। पर॑े। अवरे॑। म॒ध्य॒मास॑ः। इन्द्र॑म्। यान्त॑ः। अव॑ऽसितासः। इन्द्र॑म्। इन्द्र॑म्। क्षि॒यन्त॑ः। उ॒त। यु॒ध्यमा॑नाः। इन्द्र॑म्। नर॑ः। वा॒ज॒यन्त॑ः। ह॒व॒न्ते॥८॥

पदार्थः-(**इन्द्रम्**) परमैश्वर्य्यवन्तम् (**परे**) प्रकृष्टा जनाः (**अवरे**) निकृष्टाः (**मध्यमासः**) पक्षपातरहिताः (**इन्द्रम्**) सर्वसुखप्रदातारम् (**यान्तः**) प्राप्नुवन्तः (**अवसितासः**) कृतनिश्चयाः (**इन्द्रम्**) दुष्टानां हन्तारम् (**इन्द्रम्**) सर्वसुखधर्त्तारम् (**क्षियन्तः**) निवसन्तः (**उत**) अपि (**युध्यमानाः**) युद्धं कुर्वन्तः (**इन्द्रम्**) दुष्टानां विदारकम् (**नरः**) नायकाः (**वाजयन्तः**) विज्ञापयन्तः (**हवन्ते**) स्तुवन्ति स्पर्द्धयन्ति वा॥८॥

अन्वयः-हे मनुष्या! ये परेऽवरे मध्यमास इन्द्रं यान्त इन्द्रमवसितास इन्द्रं क्षियन्त इन्द्रं वाजयन्त उतापि युध्यमाना नर इन्द्रं हवन्ते त एव राज्यं कर्म कर्त्तुमर्हेयुः॥८॥

भावार्थः-यस्य राज्ये श्रेष्ठा मध्यस्था निकृष्टाश्च धर्म्मात्मानो विद्वांसोऽविद्वांसश्च स्वराज्यप्रियाः शत्रूणां हन्तारः स्वस्वामिभक्ताः सन्ति तत्र सदा राष्ट्रं वर्द्धत इति वेदितव्यम्॥८॥

अत्र प्रश्नोत्तरराजोत्तममध्यमनिकृष्टमनुष्यगुणवर्णनं राजाऽमात्यपक्षपातराहित्याचरणं चोपदिष्टमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशतितमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(परे)** श्रेष्ठ **(अवरे)** निकृष्ट और **(मध्यमासः)** पक्षपात से रहित जन **(इन्द्रम्)** अत्यन्त ऐश्वर्य वाले को **(यान्तः)** प्राप्त होते हुए **(इन्द्रम्)** सब सुख धारण करने वाले का **(अवसितासः)** निश्चय किये हुए और **(इन्द्रम्)** दुष्टों के मारनेवाले को **(क्षियन्तः)** निवास करते हुए **(इन्द्रम्)** सब सुख देनेवाले को **(वाजयन्तः)** जनाते **(उत)** और **(युध्यमानाः)** युद्ध करते हुए **(नरः)**

नायक लोग **(इन्द्रम्)** दुष्टों के नाश करने वाले की **(हवन्ते)** स्तुति वा ईर्ष्या करते हैं, वे ही राज्यकर्म्म करने को योग्य होवें॥८॥

भावार्थः-जिसके राज्य में श्रेष्ठ, मध्यस्थ और निकृष्ट अर्थात् नीची श्रेणी में वर्त्तमान धर्म्मात्मा, विद्वान् और अविद्वान् लोग, अपने राज्य के प्रिय, शत्रुओं के नाश करने वाले, धन और स्वामी के भक्त हैं, वहाँ सदा राज्य बढ़ता है, ऐसा जानना चाहिये॥८॥

इस सूक्त में प्रश्न-उत्तर, राजा, उत्तम, मध्यम, निकृष्ट मनुष्यों के गुणों का वर्णन, राजा के मन्त्री के पक्षपात राहित्यरूप आचरण का उपदेश किया, इससे इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह पच्चीसवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य षड्विंशतितमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता १ पङ्क्तिः। २ भुरिक् पङ्क्तिः। ३, ७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ निचृत्त्रिष्टुप्। ५ विराट् त्रिष्टुप्। ६ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेश्वरगुणानाह॥

अब सात ऋचावाले छब्बीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में ईश्वर के गुणों का उपदेश करते हैं॥

अ॒हं मनु॑रभवं॒ सूर्य॑श्चाहं क॒क्षीवाँ॒ ऋषि॑रस्मि॒ विप्र॑ः।
अ॒हं कुत्स॑मार्जुने॒यं न्यृ॑ञ्जेऽहं क॒विरु॒शना॒ पश्य॑ता मा॥ १॥

अ॒हम्। मनु॑ः। अ॒भ॒व॒म्। सूर्य॑ः। च॒। अ॒हम्। क॒क्षीवा॑न्। ऋषि॑ः। अ॒स्मि॒। विप्र॑ः। अ॒हम्। कुत्स॑म्। आ॒र्जु॒ने॒यम्। नि। ऋ॒ञ्जे॒। अ॒हम्। क॒विः। उ॒शना॑। पश्य॑त। मा॒॥ १॥

पदार्थः-(**अहम्**) सृष्टिकर्तेश्वरः (**मनुः**) मननशीलो विद्वानिव सर्वविद्याविज्ञापकः (**अभवम्**) अस्मि (**सूर्य्यः**) सूर्य्य इव सर्वप्रकाशकः (**च**) इन्द्र इव सर्वाह्लादकः (**अहम्**) (**कक्षीवान्**) सर्वसृष्टिकक्षा विद्यन्ते यस्मिन्त्सः (**ऋषिः**) मन्त्रार्थवेत्तेव (**अस्मि**) (**विप्रः**) मेधावीव सर्ववेत्ता (**अहम्**) (**कुत्सम्**) वज्रम् (**आर्जुनेयम्**) अर्जुनेनर्जुना विदुषा निष्पादितमिव (**नि**) नितराम् (**ऋञ्जे**) साध्नोमि (**अहम्**) (**कविः**) सर्वशास्त्रविद्विद्वान् (**उशना**) सर्वहितङ्कामयमानः (**पश्यत**) सम्प्रेक्षध्वम्। अत्र **संहितायामिति** दीर्घः। (**मा**) माम्॥ १॥

अन्वयः-हे मनुष्या! योऽहं मनुः सूर्य्यश्चाभवमहं कक्षीवानृषिर्विप्रोऽस्म्यहमार्जुनेयं कुत्सं न्यृञ्जेऽहमुशना कविरस्मि तं मा यूयं पश्यत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो जगदीश्वरो मन्त्रिणां मन्त्री प्रकाशकानां प्रकाशको विदुषां विद्वाननभिहतन्यायः सर्वज्ञः सर्वोपकारी वर्त्तते तमेव विद्याधर्म्माचरणयोगाभ्यासैः साक्षात्कुरुत॥ १॥

पदार्थः-हे मनुष्यो! जो (**अहम्**) मैं सृष्टि को करने वाला ईश्वर (**मनुः**) विचार करने और विद्वान् के सदृश सम्पूर्ण विद्याओं का जनाने वाला (**च**) और (**सूर्य्यः**) सूर्य्य के सदृश सब का प्रकाशक (**अभवम्**) हूँ और (**अहम्**) मैं (**कक्षीवान्**) सम्पूर्ण सृष्टि की कक्षा अर्थात् परम्पराओं से युक्त (**ऋषिः**) मन्त्रों के अर्थ जानने वाले के सदृश (**विप्रः**) बुद्धिमान् के सदृश सब पदार्थों को जानने वाला (**अस्मि**) हूँ और (**अहम्**) मैं (**आर्जुनेयम्**) सरल विद्वान् ने उत्पन्न किये हुए (**कुत्सम्**) वज्र को (**नि**) अत्यन्त (**ऋञ्जे**) सिद्ध करता हूँ और (**अहम्**) मैं (**उशना**) सब के हित की कामना करता हुआ (**कविः**) सम्पूर्ण शास्त्र को जानने वाला विद्वान् हूँ, उस (**मा**) मुझको तुम (**पश्यत**) देखो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो जगदीश्वर मन्त्रियों अर्थात्

विचार करने वालों में विचार करने और प्रकाश करने वालों का प्रकाशक, विद्वानों में विद्वान्, अखण्डित न्याययुक्त, सर्वज्ञ और सब का उपकारी है; उस ही का विद्या, धर्म्माचरण और योगाऽभ्यास से प्रत्यक्ष करो॥१॥

पुनरीश्वरगुणानाह॥

फिर ईश्वर के गुणों को अगले मन्त्र में कहते हैं॥

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय।

अहमपो अनयं वावशाना मम देवासो अनु केतमायन्॥२॥

अहम्। भूमिम्। अददाम्। आर्याय। अहम्। वृष्टिम्। दाशुषे। मर्त्याय। अहम्। अपः। अनयम्। वावशानाः। मम। देवासः। अनु। केतम्। आयन्॥२॥

पदार्थः-(अहम्) सर्वधर्त्ता सर्वस्रष्टेश्वरः **(भूमिम्)** पृथिवीराज्यम् **(अददाम्)** ददामि **(आर्य्याय)** धर्म्यगुणकर्मस्वभावाय **(अहम्) (वृष्टिम्) (दाशुषे)** दानशीलाय **(मर्त्याय)** मनुष्याय **(अहम्) (अपः)** प्राणान् वायून् वा **(अनयम्)** प्रापयेयम् **(वावशानाः)** कामयमानाः **(मम) (देवासः)** विद्वांसः **(अनु) (केतम्)** प्रज्ञां प्रज्ञापनं वा **(आयन्)** प्राप्नुवन्ति॥२॥

अन्वयः-हे मनुष्या! योऽहमार्य्याय भूमिमददामहं दाशुषे मर्त्याय वृष्टिमनयमहमपोऽनयं यस्य मम वावशाना देवासः केतमन्वायंस्तं मां यूयं सेवध्वम्॥२॥

भावार्थः-हे मनुष्या! यो न्यायशीलाय भूमिराज्यं ददाति सर्वस्य सुखाय वृष्टिं करोति सर्वेषां जीवनाय वायुं प्रेरयति यस्योपदेशद्वारा विद्वांसो भवन्ति तमेव सततमनूपाध्वम्॥२॥

पदार्थः-हे मनुष्यो! जो **(अहम्)** सबका धारण करने और सब का उत्पन्न करने वाला ईश्वर मैं **(आर्य्याय)** धर्म्मयुक्त गुण, कर्म्म और स्वभाव वाले के लिये **(भूमिम्)** पृथिवी के राज्य को **(अददाम्)** देता हूँ **(अहम्)** मैं **(दाशुषे)** देने वाले **(मर्त्याय)** मनुष्य के लिये **(वृष्टिम्)** वर्षा को **(अनयम्)** प्राप्त कराऊं **(अहम्)** मैं **(अपः)** प्राणों वा पवनों को प्राप्त कराऊं जिस **(मम)** मेरे **(वावशानाः)** कामना करते हुए **(देवासः)** विद्वान् लोग **(केतम्)** बुद्धि वा जनाने के लिये **(अनु, आयन्)** अनुकूल प्राप्त होते हैं, उस मुझको तुम सेवो॥२॥

भावार्थः-हे मनुष्यो! जो न्यायकारी स्वभाव वाले के लिये भूमि का राज्य देता, सब के सुख के लिये वृष्टि करता और सब के जीवन के लिये वायु को प्रेरणा करता है और जिसके उपदेश के द्वारा विद्वान् होते हैं, उसी की निरन्तर उपासना करो॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य।

शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम्॥ ३॥

अहम्। पुरः। मन्दसानः। वि। ऐरम्। नव। साकम्। नवतीः। शम्बरस्य। शतऽतमम्। वेश्यम्। सर्वऽताता। दिवः।ऽदासम्। अतिथिग्वम्। यत्। आवम्॥ ३॥

पदार्थः-(**अहम्**) जगदीश्वरः (**पुरः**) प्रथमम् (**मन्दसानः**) आनन्दस्वरूप आनन्दयिता (**वि**) (**ऐरम्**) प्रेरयेयम् (**नव**) (**साकम्**) सह (**नवतीः**) एतत्सङ्ख्याकान् पदार्थान् (**शम्बरस्य**) मेघस्य (**शततमम्**) अतिशयेनाऽसङ्ख्यातम् (**वेश्यम्**) वेशेषु प्रवेशेषु भवम् (**सर्वताता**) सर्वतातौ सर्वस्मिन्नेव सङ्गन्तव्ये जगति (**दिवोदासम्**) विज्ञानमयस्य प्रकाशस्य दातारम् (**अतिथिग्वम्**) योऽतिथीन् गच्छति गमयति वा तम् (**यत्**) यम् (**आवम्**) रक्षयेयम्॥ ३॥

अन्वयः-हे मनुष्या! यो मन्दसानोऽहं पुरः शम्बरस्य शततमं वेश्यं नव नवतीः साकं व्यैरम्। सर्वताता यद्यं दिवोदासमतिथिग्वमावन्तं मामुपाध्वं स चाऽऽनन्दी भवति॥ ३॥

भावार्थः-हे मनुष्या! यो जगदीश्वरो जगदुत्पत्तेः प्राक् चेतनस्वरूपेण वर्त्तमानः स सर्वं जगदुत्पाद्य सर्वैः सह सर्वेषां सम्बन्धं विधाय सर्वहितं विदधाति॥ ३॥

पदार्थः-हे मनुष्यो! जो (**मन्दसानः**) आनन्दस्वरूप और आनन्द देने वाला (**अहम्**) मैं जगदीश्वर (**पुरः**) प्रथम (**शम्बरस्य**) मेघ के (**शततमम्**) अत्यन्त असंख्यात (**वेश्यम्**) उत्तम वेशों अर्थात् प्रवेशों में उत्पन्न (**नव, नवतीः**) निन्नानवे पदार्थों को (**साकम्**) साथ (**वि, ऐरम्**) प्रेरणा करूं (**सर्वताता**) सब में ही मिलने योग्य जगत् में (**यत्**) जिस (**दिवोदासम्**) विज्ञानस्वरूप प्रकाश के देनेवाले (**अतिथिग्वम्**) अतिथियों को प्राप्त हो वा प्राप्त करावे उसकी (**आवम्**) रक्षा करूं, उस मेरी उपासना करो और वह आनन्दयुक्त होता है॥ ३॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर जगत् की उत्पति के प्रथम चेतनस्वरूप से वर्त्तमान, वह सब जगत् को उत्पन्न करके, सब के साथ सब का सम्बन्ध करके सब का हित करता है॥ ३॥

अथ राजसेनाविषयमाह॥

अब राजसेनाविषय को अगले मन्त्र में कहते हैं॥

प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा।

अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टम्॥ ४॥

प्र। सु। सः। विऽभ्यः। मरुतः। विः। अस्तु। प्र। श्येनः। श्येनेभ्यः। आशुऽपत्वा। अचक्रया। यत्। स्वधया। सुऽपर्णः। हव्यम्। भरत्। मनवे। देवऽजुष्टम्॥ ४॥

पदार्थः-(प्र) (सु) (सः) (विभ्यः) पक्षिभ्यः **(मरुतः)** मनुष्याः **(विः)** पक्षी **(अस्तु)** भवतु **(प्र) (श्येनः) (श्येनेभ्यः)** पक्षिविशेषेभ्यः **(आशुपत्वा)** सद्यः पतित्वा **(अचक्रया)** अविद्यमानचक्राकारया **(यत्)** यः **(स्वधया)** अन्नादिना **(सुपर्णः)** शोभनपतनः **(हव्यम्)** ग्रहीतुमर्हम् **(भरत्)** दधाति **(मनवे)** मनुष्याय **(देवजुष्टम्)** विद्वद्भिः सेवितम्॥४॥

अन्वयः-हे मनुष्या! यथा श्येनो विः श्येनेभ्यो विभ्य अचक्रया आशुपत्वा वेगं भरत्तथा मरुतो मनुष्याणां सेनावेगादिकं प्रभरद्यद्यो सुपर्णो मनवे स्वधया देवजुष्टं हव्यं प्र सु भरत् स सर्वत्र सुखकार्य्यस्तु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! अस्यां सृष्टावन्तरिक्षे यथा पक्षिण आकाशे गत्वाऽऽगच्छन्ति तथैव सर्वे लोकलोकान्तरा भ्रमन्ति यः सृष्टिविद्यां जानाति स एव मनुष्यादीनां सुखकारी भवति॥४॥

पदार्थः-हे मनुष्यो! जैसे **(श्येनः)** वाज **(विः)** पक्षी **(श्येनेभ्यः)** वाजनामक **(विभ्यः)** पक्षी विशेषों से **(अचक्रया)** अविद्यमान चक्राकारगति के साथ **(आशुपत्वा)** शीघ्र गिर के वेग को **(भरत्)** धारण करता है, वैसे **(मरुतः)** मनुष्य जन मनुष्यों की सेना के वेगादिगुण को **(प्र)** विशेष करके धारण करता है **(यत्)** जो **(सुपर्णः)** उत्तम पतनयुक्त **(मनवे)** मनुष्य के लिये **(स्वधया)** अन्न आदि से **(देवजुष्टम्)** विद्वानों से सेवित **(हव्यम्)** ग्रहण करने योग्य वस्तु को **(प्र)** अत्यन्त **(सु)** उत्तम प्रकार धारण करता है **(सः)** वह सब स्थानों में सुखकारी **(अस्तु)** हो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! इस सृष्टि और अन्तरिक्ष में जैसे पक्षी आकाश में जाकर आते हैं, वैसे ही सब लोक और लोकान्तर घूमते हैं, जो सृष्टिविद्या को जानता है, वही मनुष्यादिकों का सुखकारी होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि।

तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र॥५॥

भरत्। यदि। विः। अतः। वेविजानः। पथा। उरुणा। मनःऽजवाः। असर्जि। तूयम्। ययौ। मधुना। सोम्येन। उत। श्रवः। विविदे। श्येनः। अत्र॥५॥

पदार्थः-(भरत्) पुष्यात् **(यदि) (विः)** पक्षी **(अतः)** अस्मात् स्थानात् **(वेविजानः)** कम्पमानः **(पथा)** मार्गेण **(उरुणा)** बहुना **(मनोजवाः)** मनोवद्वेगाः **(असर्जि)** सृजति **(तूयम्)** तूर्णम् **(ययौ)** याति गच्छति **(मधुना)** मधुरेण **(सोम्येन)** सोमेष्वोषधीषु भवेन **(उत)** अपि **(श्रवः)** अन्नादिकम् **(विविदे)** विन्दति **(श्येनः)** हिंस्रो वेगवान् पक्षी **(अत्र)** अस्मिन् संसारे॥५॥

अन्वयः-हे राजपुरुषा! यद्यत्र भवद्भिर्मनोजवाः सेना असर्जि तर्ह्यतो यथा श्येनो विर्वेविजानः सन्नुरुणा पथा तूयं ययौ तथा यो राजा मधुना सोम्येन श्रवोऽन्नमुत सेनां भरत् स विजयं विविदे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजजना! भवन्तो यावच्छ्येनवद्वेगवतीं सेनां न कुर्वन्ति तावद्विजयधनलाभो भवितुमशक्यः॥५॥

पदार्थः-हे राजजनो! **(यदि)** जो **(अत्र)** इस संसार में आप लोगों से **(मनोजवाः)** मन के सदृश वेगयुक्त सेनाओं को **(असर्जि)** बनाता है तो **(अतः)** इस स्थान से जैसे **(श्येनः)** हिंसा करने वाला वेगयुक्त **(विः)** पक्षी **(वेविजानः)** कम्पता हुआ **(उरुणा)** बहुत **(पथा)** मार्ग से **(तूयम्)** शीघ्र **(ययौ)** जाता है, वैसे जो राजा **(मधुना)** मधुर **(सोम्येन)** सोम अर्थात् ओषधियों में उत्पन्न हुए रस से **(श्रवः)** अन्न आदि को **(उत)** और सेना को **(भरत्)** पुष्ट करे, वह विजय को **(विविदे)** प्राप्त होता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजजनो! आप लोग जब तक वाजपक्षी के के सदृश वेग युक्त सेना को नहीं करते हैं, तब तक विजय से धन का लाभ नहीं हो सकता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒जी॒पी श्ये॒नो दद॑मानो अं॒शुं प॑रा॒वत॑: शकु॒नो म॒न्द्रं मद॑म्।
सोम॑ भरद् दादृहा॒णो दे॒वावा॑न् दि॒वो अ॒मुष्मा॒दुत्त॑रादा॒दाय॑॥ ६॥

ऋ॒जी॒पी। श्ये॒नः। दद॑मानः। अं॒शुम्। प॒रा॒ऽवत॑ः। श॒कु॒नः। म॒न्द्रम्। मद॑म्। सोम॑म्। भ॒र॒त्। द॒दृ॒हा॒णः। दे॒वऽवा॑न्। दि॒वः। अ॒मुष्मा॑त्। उत्ऽत॑रात्। आ॒ऽदाय॑॥ ६॥

पदार्थः-**(ऋजीपी)** सरलगामी **(श्येनः)** प्रवृद्धवेगः **(ददमानः)** **(अंशुम्)** विज्ञानादिकं पदार्थम् **(परावतः)** दूरदेशात् **(शकुनः)** पक्षी **(मन्द्रम्)** प्रशंसनीयम् **(मदम्)** आनन्दकरम् **(सोमम्)** ऐश्वर्य्यम् **(भरत्)** धरति **(दादृहाणः)** वर्धमानः **(देवावान्)** बहवो देवा विद्वांसो विद्यन्ते यस्य सः **(दिवः)** विद्युत्प्रकाशात् **(अमुष्मात्)** परोक्षात् **(उत्तरात्)** **(आदाय)**॥६॥

अन्वयः-हे राजन्! यथर्जीपी श्येनः शकुनः परावतो देशात् पतित्वा स्वाभीष्टं पदार्थं भरत् तथैव भवानंशुं मदं मन्द्रं सोमं ददमानो देवावानमुष्मादुत्तराद् दिवो विद्यामादाय दादृहाणो भवेत्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा पक्षिणो भूमेरुत्थायाऽन्तरिक्षमार्गेण गत्वाऽऽगत्य स्वप्रयोजनं साध्नुवन्ति तथैव देशदेशान्तरं विमानादिना गत्वा स्वप्रयोजनं साध्नुवन्तु॥६॥

पदार्थः-हे राजन्! जैसे **(ऋजीपी)** सीधी चाल वाला **(श्येनः)** बढ़े हुए वेग से युक्त **(शकुनः)** पक्षी **(परावतः)** दूर देश से गिर के अपने अपेक्षित पदार्थ को **(भरत्)** धारण करता है, वैसे ही आप **(अंशुम्)** विज्ञान आदि पदार्थ **(मदम्)** आनन्द करने वाले **(मन्द्रम्)** प्रशंसा करने योग्य **(सोमम्)** ऐश्वर्य्य

को **(ददमानः)** देते हुए **(देवावान्)** बहुत विद्वानों से युक्त **(अमुष्मात्)** परोक्ष **(उत्तरात्)** आने वाले **(दिवः)** बिजुली के प्रकाश से विद्या को **(आदाय)** ग्रहण करके **(दादृहाणः)** बढ़ते हुए होवें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पक्षी पृथिवी से उड़ के अन्तरिक्ष के मार्ग से जाकर और आकर अपने प्रयोजन को सिद्ध करते हैं, वैसे ही देश-देशान्तर में विमान आदि से जाकर अपने प्रयोजन को सिद्ध करो॥६॥

पुनः प्रकारान्तरेण पूर्वोक्तविषयमाह॥

फिर प्रकारान्तर से पूर्वोक्त विषय को अगले मन्त्र में कहते हैं॥

आदायश्येनो अभरत्सोमꣳसहस्रꣳसवाँ अयुतं च साकम्।
अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अमूरः॥७॥१५॥

आऽदाय। श्येनः। अभरत्। सोमम्। सहस्रम्। सवान्। अयुतम्। च। साकम्। अत्र। पुरम्ऽधिः। अजहात्। अरातीः। मदे। सोमस्य। मूराः। अमूरः॥७॥

पदार्थः-(आदाय) गृहीत्वा **(श्येनः)** श्येनपक्षिवत् **(अभरत्)** धरेत् **(सोमम्)** ऐश्वर्य्यमोषध्यादिकं वा **(सहस्रम्)** **(सवान्)** निष्पन्नान् पदार्थान् **(अयुतम्)** अपरिमितसङ्ख्याकम् **(च)** **(साकम्)** **(अत्रा)** अत्र **ऋचि तुनुघे**ति दीर्घः। **(पुरन्धिः)** यः पुरं दधाति **(अजहात्)** जहाति त्यजति **(अरातीः)** शत्रून् **(मदे)** आनन्दे **(सोमस्य)** ऐश्वर्य्यस्य **(मूराः)** मूढाः **(अमूरः)** मोहरहितः॥७॥

अन्वयः-यः सेनेशः श्येन इव सहस्रं सोममयुतञ्च सवानादाय सेनाराष्ट्रेऽभरत् स अमूरोऽत्रा पुरन्धिः सोमस्य मदे मूरा अरातीरजहात् सोऽत्र साकं विजयमाप्नुयात्॥७॥

भावार्थः-ये शत्रुबलादधिकं बलं शत्रोः सामग्र्याः शतशोऽधिकां सामग्रीं सुक्षितां सेनां विदुषोऽध्यक्षान् कृत्वा युध्येरँस्ते ध्रुवं विजयमाप्नुयुः॥७॥

अत्रेश्वरराजसेनागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षड्विंशं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-जो सेना का स्वामी **(श्येनः)** वाज नामक पक्षी के सदृश **(सहस्रम्)** सहस्र संख्यायुक्त **(सोमम्)** ऐश्वर्य्य वा ओषधि आदि पदार्थ **(च)** और **(अयुतम्)** असंख्य **(सवान्)** उत्पन्न हुए पदार्थों को **(आदाय)** ग्रहण करके सेना और राज्य को **(अभरत्)** धारण करे वह **(अमूरः)** निर्मोह जन **(अत्रा)** इस में **(पुरन्धिः)** पुर को धारण करने वाला **(सोमस्य)** ऐश्वर्य्य सम्बन्धी **(मदे)** आनन्द के निमित्त **(मूराः)** मूढ़ **(अरातीः)** शत्रुओं का **(अजहात्)** त्याग करता है, वह इसमें **(साकम्)** साथ ही विजय को प्राप्त

होवे॥७॥

भावार्थः–जो शत्रु के बल से अधिक बल, शत्रु की सामग्री से सैकड़ों गुणी अधिक सामग्री, उत्तम प्रकार शिक्षायुक्त सेना और विद्वानों को अध्यक्ष करके युद्ध करें, वे निश्चय विजय को प्राप्त होवें॥७॥

इस सूक्त में ईश्वर और राजसेना के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छब्बीसवां सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य सप्तविंशतितमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १, ४ निचृत्त्रिष्टुप्। २ विराट् त्रिष्टुप्। ३ त्रिष्टुप् छन्दः। ५ निचृच्छक्वरीछन्दः। धैवतः स्वरः॥

अथ जीवगुणानाह॥

अब पांच ऋचा वाले सत्ताईसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में जीव के गुणों को कहते हैं॥

गर्भे॒ नु सन्नन्वे॑षामवेदम॒हं दे॒वानां॑ जनि॑मानि॒ विश्वा॑।

श॒तं मा॒ पुर॒ आय॑सीररक्ष॒न्नध॑ श्ये॒नो ज॒वसा॒ नि॑र॑दीयम्॥ १॥

गर्भे॑। नु। सन्। अनु॑। ए॒षा॒म्। अ॒वे॒द॒म्। अ॒हम्। दे॒वाना॑म्। जनि॑मानि। विश्वा॑। श॒तम्। मा॒। पुर॑ः। आय॑सीः। अ॒र॒क्ष॒न्। अध॑। श्ये॒नः। ज॒वसा॑। निः। अ॒दी॒य॒म्॥ १॥

पदार्थः-(गर्भे) (नु) सद्यः **(सन्) (अनु)** पश्चात् **(एषाम्) (अवेदम्)** विजानामि **(अहम्)** विद्वान् **(देवानाम्)** दिव्यानां पृथिव्यादीनां पदार्थानां विदुषां वा **(जनिमानि)** जन्मानि **(विश्वा)** सर्वाणि **(शतम्) (मा)** माम् **(पुरः)** नगर्य्यः **(आयसीः)** सुवर्णमयीर्लोहमयीर्वा **(अरक्षन्)** रक्षन्ति **(अध)** अथ **(श्येनः) (जवसा)** वेगेन **(निः)** नितराम् **(अदीयम्)** निःसरेयम्॥ १॥

अन्वयः-हे मनुष्या! यथाऽहं गर्भे सन्नेषां देवानां विश्वा जनिमान्यन्ववेदं यं मा आयसीः शतं पुरोऽरक्षन्नध सोऽहं श्येन इवाऽस्माच्छरीराज्जवसा नु निरदीयम्॥ १॥

भावार्थः-मनुष्यैस्सदा सृष्टिविद्याबोधस्य जन्ममरणयोः शारीरिकी च विद्या विज्ञेया, यतो सदैव निर्भयता वर्त्तेत॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(अहम्)** मैं विद्वान् **(गर्भे)** गर्भ में **(सन्)** वर्त्तमान **(एषाम्)** इन **(देवानाम्)** श्रेष्ठ पृथिवी आदि पदार्थ वा विद्वानों के **(विश्वा)** सम्पूर्ण **(जनिमानि)** जन्मों को **(अनु, अवेदम्)** अनुकूल जानता हूँ जिस **(मा)** मुझको **(आयसीः)** सुवर्ण वाली वा लोह वाली **(शतम्)** सौ **(पुरः)** नगरी **(अरक्षन्)** रक्षा करती हैं **(अध)** इसके अनन्तर सो मैं **(श्येनः)** वाज पक्षी के सदृश इस शरीर से **(जवसा)** वेग के साथ **(नु)** शीघ्र **(निः)** अत्यन्त **(अदीयम्)** निकलूं॥ १॥

भावार्थः-मनुष्यों को चाहिये कि सदा सृष्टिविद्या बोध और जन्म-मरण की शरीर सम्बन्धिनी विद्या जानें, जिससे सदैव निर्भयता वर्त्ते॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

न घा॒ स मामप॒ जोष॑ं॑ जभारा॒भीमा॑स॒ त्वक्ष॑सा॒ वी॒र्येण॑।

ई॒र्मा पुर॑ं॑धिरजहा॒दरा॑तीरु॒त वाताँ॑ अत॒रच्छूशु॑वानः॥ २॥

न। घ। सः। माम्। अप। जोषम्। जभार। अभि। ईम्। आस। त्वक्षसा। वीर्येण। ईर्मा। पुरन्धिः। अजहात्। अरातीः। उत। वातान्। अतरत्। शूशुवानः॥ २॥

पदार्थः-(न) निषेधे **(घा)** एव। अत्र **ऋचि तुनुघे**ति दीर्घः। **(सः)** **(माम्)** **(अप)** **(जोषम्)** विपरीतसेवनम् **(जभार)** धरेत् **(अभि)** **(ईम्)** सर्वतः **(आस)** भवेयम् **(त्वक्षसा)** तीव्रेण **(वीर्येण)** बलेन **(ईर्मा)** प्रेरकः **(पुरन्धिः)** बहुधरः **(अजहात्)** **(अरातीः)** शत्रून् **(उत)** **(वातान्)** वायुवद्वेगयुक्तान् **(अतरत्)** तरेत् **(शूशुवानः)** वर्धमानः॥ २॥

अन्वयः-यः शूशुवानः पुरन्धिरीर्मा त्वक्षसा वीर्येण वातानिवाऽरातीरजहादुत शत्रुबलमतरत् स घा मामप जोषं न जभार एतेनाऽहमीं सर्वतस्सुरभ्यास॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या वायुवद्बलिष्ठा भूत्वा शत्रून् धर्षन्ति ते दुःखं तीर्त्वा दुष्टकर्म्म त्यक्त्वा सुखिनो भवन्ति॥ २॥

पदार्थः-जो **(शूशुवानः)** बढ़ने **(पुरन्धिः)** बहुत पदार्थों को धारण करने और **(ईर्मा)** प्रेरणा करने वाला **(त्वक्षसा)** तीव्र **(वीर्य्येण)** बल से **(वातान्)** वायु के सदृश वेगयुक्त पदार्थों के समान **(अरातीः)** शत्रुओं का **(अजहात्)** त्याग करे **(उत)** और शत्रुओं के बल के **(अतरत्)** पार होवे **(सः, घा)** वही **(माम्)** मेरे **(अप, जोषम्)** विपरीत सेवन को **(न)** नहीं **(जभार)** धारण करे, इससे मैं **(ईम्)** सब प्रकार सुखयुक्त **(अभि, आस)** सब ओर से होऊँ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य वायु के सदृश बलवान् होकर शत्रुओं को दबाते हैं, वे दुःख को लांघ और और बुरे कर्म को त्याग के सुखी होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अव यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वातः ऊहुः पुरंधिम्।

सृजद्यदस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन्॥ ३॥

अव। यत्। श्येनः। अस्वनीत्। अध। द्योः। वि। यत्। यदि। वा। अतः। ऊहुः। पुरन्धिम्। सृजत्। यत्। अस्मै। अव। ह। क्षिपत्। ज्याम्। कृशानुः। अस्ता। मनसा। भुरण्यन्॥ ३॥

पदार्थः-(अव) **(यत्)** यः **(श्येनः)** श्येन इव वर्त्तमानः **(अस्वनीत्)** शब्दयेदुपदिशेत् **(अध)** **(द्योः)** प्रकाशस्य **(वि)** **(यत्)** यः **(यदि)** **(वा)** **(अतः)** **(ऊहुः)** वहन्ति **(पुरन्धिम्)** बहुधरं राजानम् **(सृजत्)** सृजेत् **(यत्)** यः **(अस्मै)** **(अव)** **(ह)** खलु **(क्षिपत्)** प्रेरयति **(ज्याम्)** धनुषः प्रत्यञ्चाम् **(कृशानुः)** शत्रूणां कर्षकः **(अस्ता)** प्रक्षेप्ता **(मनसा)** अन्तःकरणेन **(भुरण्यन्)** धरन् पुष्यन् वा॥ ३॥

अन्वयः-हे मनुष्याः! यद्यः श्येन इवावास्वनीदध यद् द्योः पुरन्धिं सृजद् यद्वा शत्रुबलं कम्पयेदस्मै ह ज्यामवक्षिपदतः कृशानुरिव मनसा भुरण्यन्नस्ता व्यवक्षिपद्यदि तमन्य ऊहुस्तर्हि स सर्वत्र विजयी स्यात्॥३॥

भावार्थः-ये मनुष्या सत्यमुपदेष्टारं सत्यन्यायकरं शत्रूणां जेतारं प्रजापालकं राजानं प्राप्नुयुस्ते सर्वतः सुखिनः स्युः॥३॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(श्येनः)** वाज पक्षी के सदृश वर्त्तमान **(अव, अस्वनीत्)** शब्द करे उपदेश देवे **(अध)** इसके अनन्तर **(यत्)** जो **(द्योः)** प्रकाश के सम्बन्ध में **(पुरन्धिम्)** बहुत धारण करने वाले राजा को **(सृजत्)** उत्पन्न करे **(यत्, वा)** अथवा जो शत्रुबल को कम्पावे **(अस्मै,ह)** इसी के लिये **(ज्याम्)** धनुष् की तांत की **(अव, क्षिपत्)** प्रेरणा देता है **(अतः)** इस कारण **(कृशानुः)** शत्रुओं को खींचने वाला जैसे वैसे **(मनसा)** अन्तःकरण से **(भुरण्यन्)** पदार्थों का धारण वा पोषण करता हुआ **(अस्ता)** फेंकनेवाला **(वि)** विशेष करके फेंकता है **(यदि)** जो उसको अन्य जन **(ऊहुः)** पहुँचाते हैं तो वह सब स्थान में विजयी होवे॥३॥

भावार्थः-जो मनुष्य सत्य के उपदेश करने, सत्य न्याय करने, शत्रुओं के जीतने और प्रजा के पालन करने वाले राजा को प्राप्त होवें, वे सब प्रकार से सुखी होवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒जि॒प्य ई॒मि॒न्द्रा॑वतो॒ न भु॒ज्युं श्ये॒नो ज॑भार बृह॒तो अधि॒ ष्णोः।

अ॒न्तः प॑तत् पत॒त्र्य॑स्य प॒र्णमध॒ यामं॑नि॒ प्रसि॑तस्य॒ तद्वेः॥४॥

ऋ॒जि॒प्यः। ई॒म्। इन्द्रा॑ऽवतः। न। भु॒ज्युम्। श्ये॒नः। ज॒भा॒र॒। बृ॒ह॒तः। अधि॑। स्नोः। अ॒न्तरिति॑। प॒त॒त्। प॒त॒त्रि। अ॒स्य॒। प॒र्णम्। अध॑। याम॑नि। प्रऽसि॑तस्य। तत्। वेरिति॒ वेः॥४॥

पदार्थः-**(ऋजिप्यः)** य ऋजुगामिषु साधुः **(ईम्)** सर्वतः **(इन्द्रावतः)** ऐश्वर्य्ययुक्तान् **(न)** इव **(भुज्युम्)** भोक्तारम् **(श्येनः)** श्येन इव **(जभार)** धरति **(बृहतः)** महतः **(अधि)** **(स्नोः)** प्रकाशमानात् पुरुषार्थात् **(अन्तः)** मध्ये **(पतत्)** पतति **(पतत्रि)** पतनशीलम् **(अस्य)** **(पर्णम्)** पत्रम् **(अध)** **(यामनि)** मार्गे **(प्रसितस्य)** बद्धस्य **(तत्)** **(वेः)** पक्षिणः॥४॥

अन्वयः-य ऋजिप्यो मनुष्यः श्येन इव बृहतः स्नोरिन्द्रावतो न भुज्युमधि जभार। अस्य पर्णं यामनि प्रसितस्य वेर्यत् पतत्रि पर्णमन्तः पतत् तज्जभार सोऽधेमानन्दं प्राप्नुयात्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा श्येनः पक्षी स्वपुरुषार्थेन पुष्कलं भोगं प्राप्नोति सद्यो गच्छति तथैव पुरुषार्थिनो जनाः पुष्कलं सुखं प्राप्नुवन्ति॥४॥

पदार्थः-जो (**ऋजिप्यः**) सरल मार्ग चलनेवालों में श्रेष्ठ मनुष्य (**श्येनः**) वाज पक्षी के सदृश (**बृहतः**) बड़े (**स्नोः**) प्रकाशमान पुरुषार्थ से (**इन्द्रावतः**) ऐश्वर्य्य से युक्तों को (**न**) जैसे वैसे (**भुज्युम्**) भोग करने वाले को (**अधि, जभार**) अधिक धारण करता है (**अस्य**) इसका (**पर्णम्**) पत्र (**यामनि**) मार्ग में और (**प्रसितस्य**) बंधे हुए (**वेः**) पक्षी का जो (**पतत्रि**) गिरनेवाला पत्र (**अन्तः**) मध्य में (**पतत्**) गिरता है (**तत्**) उसको (**जभार**) धारण करता है वह (**अध**) इसके अनन्तर (**ईम्**) सब प्रकार से आनन्द को प्राप्त होवे॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे वाज पक्षी अपने पुरुषार्थ से बहुत भोग को प्राप्त होता और शीघ्र चलता है, वैसे ही पुरुषार्थ करने वाले जन बहुत सुख को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अध॑ श्वे॒तं क॒लशं॒ गोभि॑र॒क्तमा॑पिप्या॒नं म॒घवा॑ शु॒क्रमन्ध॑सः।
अ॒ध्व॒र्युभि॒: प्रय॑तं॒ मध्वो॒ अग्र॒मिन्द्रो॒ मदा॑य॒ प्रति॑ ध॒त्पिब॑ध्यै
शूरो॒ मदा॑य॒ प्रति॑ ध॒त् पिब॑ध्यै॥५॥१६॥

अध॑। श्वे॒तम्। क॒लश॑म्। गोभि॑:। अ॒क्तम्। आ॒ऽपि॒प्या॒नम्। म॒घऽवा॑। शु॒क्रम्। अन्ध॑:। अ॒ध्व॒र्युऽभि॑:। प्रऽय॑तम्। मध्व॑:। अग्र॑म्। इन्द्र॑:। मदा॑य। प्रति॑। ध॒त्। पिब॑ध्यै। शूर॑:। मदा॑य। प्रति॑। ध॒त्। पिब॑ध्यै॥५॥

पदार्थः-(**अध**) (**श्वेतम्**) (**कलशम्**) कुम्भम् (**गोभिः**) धेनुभिः (**अक्तम्**) सम्बद्धम् (**आपिप्यानम्**) सर्वतो वर्धमानम् (**मघवा**) बहुपूजितधनः (**शुक्रम्**) उदकम्। **शुक्रमित्युदकनामसु पठितम्।** (निघं०१.१२) (**अन्धः**) अन्नम् (**अध्वर्युभिः**) आत्मनोऽध्वरमहिंसामिच्छुभिः (**प्रयतम्**) प्रयत्नसाध्यम् (**मध्वः**) मधुरादिगुणस्य (**अग्रम्**) (**इन्द्रः**) परमैश्वर्य्यवान् (**मदाय**) आनन्दाय (**प्रति**) (**धत्**) प्रतिदधाति (**पिबध्यै**) पातुम् (**शूरः**) निर्भयः (**मदाय**) (**प्रति**) (**धत्**) (**पिबध्यै**) पातुम्॥५॥

अन्वयः-हे मनुष्या! यो मघवा गोभिरक्तमापिप्यानं श्वेतं कलशं शुक्रमन्धः पिबध्यै मदाय प्रतिधदध यः शूर इन्द्रो मदायाऽध्वर्य्युभिः सह मध्वोऽग्रं प्रयतं पिबध्यै प्रतिधत् सोऽक्षयं बलमाप्नोति॥५॥

भावार्थः-ये युक्ताहारविहारा अहिंस्राः शूरवीराः स्युस्ते सदा विजयमाप्नुयुरिति॥५॥

अत्र जीवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तविंशतितमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो (**मघवा**) बहुत श्रेष्ठ धनयुक्त (**गोभिः**) गौओं से (**अक्तम्**) सम्बद्ध

(आपिप्यानम्) बढ़े हुए **(श्वेतम्)** श्वेत वर्ण वाले **(कलशम्)** घड़े **(शुक्रम्)** जल और **(अन्धः)** अन्न को **(पिबध्यै)** पीने के लिये **(मदाय)** आनन्द के लिये **(प्रति, धत्)** धारण करता है **(अध)** और जो **(शूरः)** भय से रहित **(इन्द्रः)** अत्यन्त ऐश्वर्य्य वाला **(मदाय)** आनन्द के लिये **(अध्वर्य्युभिः)** अपने नहीं नाश होने की इच्छा करने वालों के साथ **(मध्वः)** मधुर आदि गुणों के **(अग्रम्)** प्रथम **(प्रयतम्)** प्रयत्न से सिद्ध करने योग्य आनन्द के लिये **(पिबध्यै)** पीने को **(प्रति, धत्)** धारण करता है, वह नहीं नष्ट होने वाले बल को प्राप्त होता है॥५॥

भावार्थः-जो नियमित आहार और विहार करने और नहीं हिंसा करने वाले शूरवीर होवें, वे सदा विजय को प्राप्त होवें॥५॥

इस सूक्त में जीव के गुणों के वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्ताईसवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्याष्टविंशतितमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रासोमौ देवते। १ निचृत्त्रिष्टुप्। ३ विराट्त्रिष्टुप्। ४ त्रिष्टुप् छन्दः। धैवतः स्वरः। २ भुरिक् पङ्क्तिः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रपदवाच्यसूर्य्यदृष्टान्तेन राजप्रजागुणानाह॥

अब पांच ऋचा वाले अट्ठाईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य सूर्य्यदृष्टान्त से राजप्रजागुणों का उपदेश करते हैं॥

त्वा युजा तव तत्सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः।
अहन्नहिमरिणात् सप्त सिन्धूनपावृणोदपिहितेव खानि॥ १॥

त्वा। युजा। तव। तत्। सोम। सख्ये। इन्द्रः। अपः। मनवे। सऽस्रुतः। करिति कः। अहन्। अहिम्। अरिणात्। सप्त। सिन्धून्। अप। अवृणोत्। अपिहिताऽइव। खानि॥ १॥

पदार्थः-(त्वा) त्वाम् **(युजा)** युक्तेन **(तव)** **(तत्)** **(सोम)** ऐश्वर्य्यसम्पन्न **(सख्ये)** मित्रत्वाय **(इन्द्रः)** सूर्य्य इव राजा **(अपः)** जलानि **(मनवे)** मनुष्याय **(सस्रुतः)** गमनशीलान् **(कः)** करोति **(अहन्)** हन्ति **(अहिम्)** मेघम् **(अरिणात्)** प्रेरयति **(सप्त)** एतत्सङ्ख्याकान् **(सिन्धून्)** नदीः **(अप)** **(अवृणोत्)** आच्छादयति **(अपिहितेव)** आच्छादितानीव। **(खानि)** इन्द्रियाणि॥ १॥

अन्वयः-हे सोम! तव सख्ये यथेन्द्रो मनवे सस्रुतः कोऽहिमहन् सप्त सिन्धूनरिणात् खान्यपिहितेवापोऽपावृणोत् तथा तत्त्वा युजा पुरुषेण कर्म्म कर्त्तुं शक्यम्॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यः सर्वेषां सुखाय वृष्टिं कृत्वा सर्वानानन्दयति तथैव विदुषां मित्रता सर्वानन्दप्रदाऽस्तीति वेद्यम्॥ १॥

पदार्थः-हे **(सोम)** ऐश्वर्य्य से युक्त **(तव)** आपकी **(सख्ये)** मित्रता के लिये जैसे **(इन्द्रः)** सूर्य्य के सदृश राजा **(मनवे)** मनुष्य के लिये **(सस्रुतः)** चलने वालों को **(कः)** करता **(अहिम्)** मेघ का **(अहन्)** नाश करता **(सप्त)** सात **(सिन्धून्)** नदियों को **(अरिणात्)** प्रेरित करता और **(खानि)** इन्द्रियाँ **(अपिहितेव)** घिरी हुई सी **(अपः)** जलों को **(अप, अवृणोत्)** घेरती हैं, वैसे **(तत्)** वह **(त्वा)** आपको **(युजा)** युक्त पुरुष के साथ कर्म करने योग्य हो सकता है॥ १॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य सब के सुख के लिये वर्षा करके सब को आनन्द देता है, वैसे ही विद्वानों की मित्रता सब को आनन्द देने वाली है, यह जानना चाहिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वा युजा नि खिदत् सूर्यस्येन्द्रश्चक्रं सहसा सद्य इन्दो।

अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि॥ २॥

त्वा। युजा। नि। खिदत्। सूर्यस्य। इन्द्रः। चक्रम्। सहसा। सद्यः। इन्दो इति। अधि। स्नुना। बृहता। वर्तमानम्। महः। द्रुहः। अप। विश्वऽआयु। धायि॥ २॥

पदार्थः-(त्वा) त्वाम् **(युजा)** युक्तेन **(नि) (खिदत्)** दैन्यम्प्राप्नोति **(सूर्य्यस्य) (इन्द्रः)** विद्युत् **(चक्रम्) (सहसा)** बलेन **(सद्यः)** शीघ्रम् **(इन्दो)** ऐश्वर्य्यवन् **(अधि)** उपरि **(स्नुना)** व्याप्तेन **(बृहता)** महता **(वर्त्तमानम्) (महः)** महत् **(द्रुहः)** द्वेष्टुः **(अप) (विश्वायु)** सर्वमायुः **(धायि)** ध्रियते॥ २॥

अन्वयः-हे इन्दो! त्वा युजा द्रुहोऽप धायि महो वर्त्तमानं विश्वायु अधिधायि बृहता स्नुना सहसा सद्यः सूर्य्यस्येन्द्र इव चक्रं यो नि खिदत् स इष्टं सुखमाप्नुयात्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विदुषा राज्ञा पालिता विद्याधर्म्मब्रह्मचर्य्यादियुक्ता-श्चिरञ्जीविनः स्युस्ते शत्रूणां विजेतारो भवन्ति॥ २॥

पदार्थः-हे **(इन्दो)** ऐश्वर्य्यवान्! **(त्वा)** आपको **(युजा)** युक्तजन से **(द्रुहः)** द्वेष करने वाले का सम्बन्ध **(अप, धायि)** नहीं धारण किया जाता और **(महः)** बड़ी **(वर्त्तमानम्)** वर्त्तमान **(विश्वायु)** सम्पूर्ण अवस्था **(अधि)** अधिक धारण की जाती है **(बृहता)** बड़े **(स्नुना)** व्याप्त **(सहसा)** बल से **(सद्यः)** शीघ्र **(सूर्य्यस्य)** सूर्य्य की **(इन्द्रः)** बिजुली के सदृश **(चक्रम्)** चक्र की जो **(नि, खिदत्)** दीनता को प्राप्त होता है, वह अपेक्षित सुख को प्राप्त होवे॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् राजा से पालित विद्या धर्म्म और ब्रह्मचर्य्य आदि से युक्त अतिकाल पर्य्यन्त जीवने वाले होवें, वे शत्रुओं के जीतने वाले होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून् मध्यंदिनादभीके।

दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत्॥ ३॥

अहन्। इन्द्रः। अदहत्। अग्निः। इन्दो इति। पुरा। दस्यून्। मध्यंदिनात्। अभीके। दुःऽगे। दुरोणे। क्रत्वा। न। याताम्। पुरु। सहस्रा। शर्वा। नि। बर्हीत्॥ ३॥

पदार्थः-(अहन्) हन्ति **(इन्द्रः)** सूर्य्य इव राजा **(अदहत्)** दहति भस्मीकरोति **(अग्निः)** पावक इव **(इन्दो)** परमैश्वर्य्ययुक्त प्रजाजन **(पुरा)** प्रथमतः **(दस्यून्)** महासाहसिकान् **(मध्यन्दिनात्)** मध्यन्दिने वर्त्तमानात् तापात् **(अभीके)** समीपे **(दुर्गे)** प्रकोटे **(दुरोणे)** गृहे **(क्रत्वा)** प्रज्ञया कर्मणा वा **(न)** इव **(याताम्)** गच्छताम् **(पुरू)** बहूनि **(सहस्रा)** सहस्राणि **(शर्वा)** सर्वाणि हिंसनानि **(नि) (बर्हीत्)**॥ ३॥

अन्वयः-हे इन्दो! ये इन्द्र इव मध्यन्दिनाद् दस्यूनहन्नग्निरिवाभीके दुष्टानदहत् पुरा दुर्गे दुरोणे क्रत्वा न पुरू शर्वा सहस्रा नि बर्हीत् स त्वं चैवं सुखं याताम्॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। यथा मध्याह्ने सूर्य्यस्सर्वान् प्रतापयति तथैव न्यायशीलो राजा दुष्टाञ्चोरादीन् दुःखयति, अग्निवद्भस्मीभूतान् कृत्वा सर्वा हिंसा निवारयेत्॥३॥

पदार्थः-हे **(इन्दो)** अत्यन्त ऐश्वर्य्य से युक्त प्रजाजन जो **(इन्द्रः)** सूर्य्य के सदृश राजा **(मध्यन्दिनात्)** मध्य दिन में वर्त्तमान ताप से **(दस्यून्)** बड़े साहस करने वालों को **(अहन्)** नाश करता है **(अग्निः)** अग्नि के सदृश **(अभीके)** समीप में दुष्टों को **(अदहत्)** जलाता है और **(पुरा)** पहिले से **(दुर्गे)** राजगढ़ **(दुरोणे)** गृह में **(क्रत्वा)** बुद्धि वा कर्म्म के **(न)** सदृश **(पुरू)** बहुत **(शर्वा)** सम्पूर्ण हिंसनों और **(सहस्रा)** हजारों को **(नि, बर्हीत्)** नाश करे वह और आप इस प्रकार से सुख को **(याताम्)** प्राप्त होओ॥३॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार है। जैसे मध्याह्न में सूर्य्य सब को तपाता है, वैसे ही न्यायकारी राजा दुष्ट चोरादिकों को दुःख देता है और अग्नि के सदृश भस्मीभूत करके सम्पूर्ण हिंसा दूर करे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विश्वस्मात् सीमधमाँ इन्द्र दस्यून् विशो दासीरकृणोरप्रशस्ताः।

अबाधेथाममृणतं नि शत्रूनविन्देथामपचितिं वधत्रैः॥४॥

विश्वस्मात्। सीम्। अधमान्। इन्द्र। दस्यून्। विशः। दासीः। अकृणोः। अप्रऽशस्ताः। अबाधेथाम्। अमृणतम्। नि। शत्रून्। अविन्देथाम्। अपऽचितिम्। वधत्रैः॥४॥

पदार्थः-**(विश्वस्मात्)** सर्वस्मात् **(सीम्)** आदित्य इव **(अधमान्)** पापाचारान् **(इन्द्र)** दुष्टविदारक **(दस्यून्)** **(विशः)** प्रजाः **(दासीः)** दानशीलाः **(अकृणोः)** कुर्य्याः **(अप्रशस्ताः)** प्रशस्तसुखरहिताः **(अबाधेथाम्)** बाधेथाम् **(अमृणतम्)** सुखयतम् **(नि)** नितराम् **(शत्रून्)** **(अविन्देथाम्)** प्राप्नुतम् **(अपचितिम्)** सत्कारम् **(वधत्रैः)** वधैः॥४॥

अन्वयः-हे इन्द्र! त्वं सीमिव दासीर्विशोऽप्रशस्ताः कुर्वतोऽधमान् दस्यून् विश्वस्मात् पीडितानकृणोः। हे राजप्रजाजनौ! मिलित्वा युवां वधत्रैः शत्रूनबाधेथां प्रजा अमृणतमपचितिं न्यविन्देथाम्॥४॥

भावार्थः-हे राजादयो राजजना! ये साहसिका ये च कूपदेशेन प्रजादूषका नीचा जनाः स्युस्तान् सततं बाधन्ताम् श्रेष्ठान्त्सत्कुर्वन्तु एवङ्कृते युष्माकं महान् सत्कारो भविष्यतीति वेद्यम्॥४॥

पदार्थः-हे **(इन्द्र)** दुष्टों के नाश करने वाले आप **(सीम्)** सूर्य्य के सदृश **(दासीः)** देने वाली **(विशः)** प्रजाओं को **(अप्रशस्ताः)** श्रेष्ठ सुख से रहित करते हुए **(अधमान्)** पाप के आचरण करने वाले **(दस्यून्)** दुष्टों को **(विश्वस्मात्)** सब से पीड़ायुक्त **(अकृणोः)** करें। हे राजा और प्रजाजनो मिलकर आप दोनों **(वधत्रैः)** वधों से **(शत्रून्)** शत्रुओं को **(अबाधेथाम्)** बाधा देओ और प्रजा को **(अमृणतम्)** सुख देओ **(अपचितिम्)** सत्कार को **(नि)** अत्यन्त **(अविन्देथाम्)** प्राप्त होओ॥४॥

भावार्थः-हे राजा आदि राजजनो! जो साहस कर्म्म करने और जो दुष्ट उपदेश से प्रजा को दोषयुक्त करनेवाले नीच जन होवें, उनको निरन्तर बाधा देओ और श्रेष्ठों का सत्कार करो। ऐसा करने पर आप लोगों का बड़ा सत्कार होगा, यह जानना चाहिये॥४॥

पुना राजप्रजागुणानाह॥

फिर राजप्रजा के गुणों को अगले मन्त्र में कहते हैं॥

एवा सत्यं मघवाना युवं तदिन्द्रश्च सोमोर्वमश्व्यं गोः।
आददृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना॥५॥१७॥

एव। सत्यम्। मघऽवाना। युवम्। तत्। इन्द्रः। च। सोम। ऊर्वम्। अश्व्यम्। गोः। आ। अदर्दृतम्। अपिऽहितानि। अश्ना। रिरिचथुः। क्षाः। चित्। ततृदाना॥५॥

पदार्थः-(एवा) अत्र **निपातस्य चे**ति दीर्घः। **(सत्यम्)** **(मघवाना)** बहुधनयुक्तौ राजप्रजाजनौ **(युवम्)** **(तत्)** **(इन्द्रः)** राजा **(च)** **(सोम)** सोम्यगुणसम्पन्नौ **(ऊर्वम्)** आच्छादकम् **(अश्व्यम्)** अश्वेषु भवम् **(गोः)** पृथिव्याः **(आ)** **(अदर्दृतम्)** भृशं विदारयतम् **(अपिहितानि)** आच्छादितानि **(अश्ना)** भोक्तव्यानि **(रिरिचथुः)** रेचताम् **(क्षाः)** पृथिवीः **(चित्)** **(ततृदाना)** दुःखस्य हिंसकौ॥५॥

अन्वयः-हे सोम! मघवाना युवं यत्सत्यं गोरूर्वमश्व्यं प्राप्य शत्रूनादर्दृतं तदिन्द्रः सङ्गृह्य शत्रून् हिंस्याद् यान्यपिहितान्यश्ना रिरिचथुः क्षाश्च चिद्रिरिचथुस्ताः प्राप्य दुष्टानां ततृदाना स्यातामेवमेवेन्द्रः स्यात्॥५॥

भावार्थः-यदि राजाऽमात्यसेनाप्रजाजनाः परस्परस्मिन् प्रीतिं विधाय राज्यशासनं कुर्य्युस्तर्ह्येषां कोऽपि शत्रुर्नोपतिष्ठेतेति॥५॥

अत्रेन्द्रराजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टाविंशतितमं सूक्तं सप्तदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सोम)** उत्तम गुणों से युक्त **(मघवाना)** बहुत धनों से युक्त राजा और प्रजाजनो **(युवम्)** आप दोनों जो **(सत्यम्)** सत्य **(गोः)** पृथिवी का **(ऊर्वम्)** ढांपने वाला **(अश्व्यम्)** घोड़ों में उत्पन्न हुए को प्राप्त होकर शत्रुओं को **(आ, अदर्दृतम्)** निरन्तर नाश करो **(तत्)** उसको **(इन्द्रः)** राजा ग्रहण करके शत्रुओं का नाश करे और जिन **(अपिहितानि)** घिरे हुए **(अश्ना)** भोग करने योग्य पदार्थों

को **(रिरिचथुः)** छोड़ो **(क्षाः, च)** पृथिवियों को **(चित्)** भी छोड़ो, उनको प्राप्त होकर दुष्ट संबन्धी **(ततृदाना)** दुःख के नाश करने वाले होवें, इस प्रकार से **(एव)** ऐसे ही राजा भी होवे॥५॥

भावार्थः–जो राजा, मन्त्री, सेना और प्रजाजन परस्पर में स्नेह करके राज्य शिक्षा करें तो इनका कोई भी शत्रु नहीं उपस्थित हो॥५॥

इस सूक्त में राजा और प्रजादि के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठाईसवां सूक्त और सत्रहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्यैकोनत्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। ३ निचृत्त्रिष्टुप्। [२], ४ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजविषयमाह॥

अब पांच ऋचावाले उनतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजविषय को कहते हैं॥

आ नः स्तुत उप वाजेभिरूती इन्द्र याहि हरिभिर्मन्दसानः।
तिरश्चिदर्यः सवना पुरूण्याङ्गूषेभिर्गृणानः सत्यराधाः॥ १॥

आ। नः। स्तुतः। उप। वाजेभिः। ऊती। इन्द्र। याहि। हरिऽभिः। मन्दसानः। तिरः। चित्। अर्यः। सवना। पुरूणि। आङ्गूषेभिः। गृणानः। सत्यऽराधाः॥ १॥

पदार्थः-(आ) (**नः**) अस्मान् (**स्तुतः**) प्रशंसितः (**उप**) (**वाजेभिः**) अन्नसेनादिभिः सह (**ऊती**) ऊत्यै रक्षणाद्याय (**इन्द्र**) राजन् (**याहि**) प्राप्नुहि (**हरिभिः**) उत्तमैर्वीरपुरुषैः (**मन्दसानः**) आनन्दन् (**तिरः**) तिर्यक् (**चित्**) अपि (**अर्य्यः**) स्वामीश्वरः (**सवना**) ऐश्वर्याणि (**पुरूणि**) बहूनि (**आङ्गूषेभिः**) स्तावकैः (**गृणानः**) स्तूयमानः (**सत्यराधाः**) सत्येन राधो धनं यस्य सः॥१॥

अन्वयः-हे इन्द्र! स्तुतो मन्दसान आङ्गूषेभिर्गृणानः सत्यराधा अर्य्यस्त्वं पुरूणि सवना प्राप्तः तिरश्चित्सन्नूती वाजेभिर्हरिभिश्च सह न उपायाहि॥१॥

भावार्थः-हे मनुष्या! योऽत्र प्रशंसितगुणकर्मस्वभाव आपत्कालनिवारकः प्रजारक्षणतत्परः सुसहायोत्तमसेनो न्यायकारी धर्म्योपार्जितधनो निरभिमानो भवेत्तमेव राजानं मन्यध्वम्॥१॥

पदार्थः-हे (**इन्द्र**) राजन् (**स्तुतः**) प्रशंसित (**मन्दसानः**) आनन्द करते और (**आङ्गूषेभिः**) स्तुति करने वालों से (**गृणानः**) स्तुति को प्राप्त होते हुए (**सत्यराधाः**) सत्य से धनयुक्त (**अर्य्यः**) स्वामी आप (**पुरूणि**) बहुत (**सवना**) ऐश्वर्य्यों को प्राप्त (**तिरः**) तिरछे (**चित्**) भी होते हुए (**ऊती**) रक्षण आदि के लिये (**वाजेभिः**) अन्न, सेना आदि के और (**हरिभिः**) उत्तम वीर पुरुषों के साथ (**नः**) हम लोगों को (**उप, आ, याहि**) प्राप्त हूजिये॥१॥

भावार्थः-हे मनुष्यो! जो यहाँ प्रशंसित गुण, कर्म्म और स्वभावयुक्त, आपत्काल का निवारण करने वाला, प्रजा के रक्षण में तत्पर, श्रेष्ठ सहायवाली उत्तम सेना से युक्त, न्यायकारी, धर्म्म से इकट्ठे किये हुए धनवाला और अभिमान से रहित होवे, उसी को राजा मानो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ हि ष्मा याति नर्यश्चिकित्वान् हूयमानः सोतृभिरुप यज्ञम्।

स्वश्वो॒ यो अभी॑रुर्मन्यमानः सुष्वा॒णेभि॒र्मद॑ति॒ सं ह॑ वी॒रैः॥ २॥

आ। हि। स्म॒। याति॑। नर्यः॑। चि॒कि॒त्वान्। हू॒यमा॑नः। सो॒तृऽभिः॑। उप॑। य॒ज्ञम्। सु॒ऽअश्वः॑। यः। अभी॑रुः। मन्य॑मानः। सु॒स्वा॒नेभिः॑। मद॑ति। सम्। ह॒। वी॒रैः॥ २॥

पदार्थः-(आ) (हि) यतः **(स्मा)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(याति)** आगच्छति **(नर्य्यः)** नृषु साधुः **(चिकित्वान्)** ज्ञानवान् **(हूयमानः)** स्तूयमानः **(सोतृभिः)** अभिषवकर्तृभिः **(उप) (यज्ञम्)** राजप्रजाव्यवहारम् **(स्वश्वः)** शोभना अश्वा यस्य सः **(यः) (अभीरुः)** भयरहितः **(मन्यमानः)** सत्याभिमानी **(सुष्वाणेभिः)** सुष्ठु शब्दायमानैः **(मदति)** आनन्दति **(सम्) (ह)** खलु **(वीरैः)** शौर्य्यादिगुणोपेतैर्जनैः सह॥ २॥

अन्वयः-हे मनुष्या! योऽभीरुर्मन्यमानः स्वश्वश्चिकित्वान् हूयमानो नर्य्यो हि सोतृभिः सह यज्ञमुपायाति ष्मा स सुष्वाणेभिवीरैस्सह सम्मदति ह॥ २॥

भावार्थः-यथा चतुर्वेदविच्छ्रोत्रियैस्सह यज्ञमुपागत्य स्तूयते तथैव शुभलक्षणैरमात्यभृत्यैस्सह राजा स्तूयते॥ २॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अभीरुः)** भयरहित **(मन्यमानः)** सत्य का अभिमान रखने वाला **(स्वश्वः)** श्रेष्ठ घोड़ों से युक्त **(चिकित्वान्)** ज्ञानवान् **(हूयमानः)** स्तुति किया गया **(नर्य्यः)** मनुष्यों में श्रेष्ठ **(हि)** जिससे **(सोतृभिः)** सत्य आचरण करने वालों के साथ **(यज्ञम्)** राजा और प्रजा के व्यवहार को **(उप, आ, याति, स्म)** समीप आता ही है, वह **(सुष्वाणेभिः)** उत्तम प्रकार शब्द करते हुए **(वीरैः)** शूरता आदि गुणों से युक्त पुरुषों के साथ **(सम्, मदति, ह)** आनन्द करता ही है॥ २॥

भावार्थः-जैसे चार वेदों का जानने वाला वेद विद्यानिपुण विद्वानों के साथ यज्ञ को प्राप्त होकर स्तुति किया जाता है, वैसे ही श्रेष्ठ लक्षणों से युक्त मन्त्री और भृत्यों के साथ राजा स्तुति किया जाता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

श्रा॒वये॑दस्य॒ कर्णा॑ वाज॒यध्यै॒ जुष्टा॒मनु॒ प्र दिशं॑ मन्दु॒यध्यै॑।

उ॒द्ना॒वृ॒षा॒णो राध॑से॒ तुवि॑ष्मा॒न् कर॑न्न॒ इन्द्रः॑ सु॒ती॒र्था॒भय॑ं च॥ ३॥

श्रव॑य। इत्। अ॒स्य॒। कर्णा॑। वा॒ज॒यध्यै॑। जु॒ष्टा॑म्। अनु॑। प्र। दिश॑म्। म॒न्दु॒यध्यै॑। उ॒त्ऽव॒वृ॒षा॒णः। राध॑से। तुवि॑ष्मान्। कर॑त्। नः॒। इन्द्रः॑। सु॒ऽती॒र्था। अभ॑यम्। च॒॥ ३॥

पदार्थः-(श्रावय) (इत्) एव **(अस्य) (कर्णा)** श्रोत्रौ **(वाजयध्यै)** विज्ञापयितुम् **(जुष्टाम्)** सद्भी राजभिस्सेवितां नीतिम् **(अनु) (प्र) (दिशम्) (मन्दयध्यै)** आनन्दयितुम् **(उद्नावृषाणः)** उत्कृष्टतया बलिष्ठः

सन् **(राधसे)** धनाय **(तुविष्मान्)** प्रशंसितबलः **(करत्)** कुर्यात् **(नः)** अस्माकम् **(इन्द्रः)** सत्यन्यायधर्त्ता **(सुतीर्था)** शोभनानि तीर्थानि दुःखतारकाण्याचार्यब्रह्मचर्यसत्यभाषणादीनि येषान्तान् **(अभयम्)** भयरहितम् **(च)**॥३॥

अन्वयः-हे सत्योपदेशकाचार्योपदेशक! त्वमस्य कर्णा वाजयध्यै जुष्टामनु श्रावय येनाऽयं दिशं मन्दयध्यै उद्वावृषाणस्तुविष्मानिन्द्रो राधसे नः सुतीर्थाभयञ्चेदेव प्र करत्॥३॥

भावार्थः-यस्य राज्ञः सत्यन्यायोपदेशका धार्मिका विद्वांसः स्युस्स विद्याविनयादिशुभैर्गुणैः सहितः सन् सर्वानभयान् कृत्वा सततं प्रसादयितुं शक्नुयात्॥३॥

पदार्थः-हे सत्य के उपदेशक करने वाले आचार्य्य और उपदेशक! आप **(अस्य)** इसके **(कर्णा)** कानों को **(वाजयध्यै)** जनाने के लिये **(जुष्टाम्)** श्रेष्ठ राजाओं से सेवन की गई नीति को **(अनु, श्रावय)** अनुकूल सुनाइये जिससे यह **(दिशम्)** दिशा को **(मन्दयध्यै)** प्रसन्न करने को **(उद्वावृषाणः)** अति बलिष्ठ **(तुविष्मान्)** प्रशंसित बलयुक्त **(इन्द्रः)** सत्य-न्याय को धारण करने वाला **(राधसे)** धन के लिये **(नः)** हमारे **(सुतीर्था)** सुन्दर दुःखों को दूर करने वाले आचार्य्य, ब्रह्मचर्य्य और सत्यभाषण आदि जिनमें उनको **(च)** और **(अभयम्)** भय रहित को **(इत्)** ही **(प्र, करत्)** करे॥३॥

भावार्थः-जिस राजा के सत्य और न्याय के उपदेश करने वाले धार्मिक विद्वान् होवें, वह राजा विद्या और विनय आदि उत्तम गुणों के सहित होता हुआ सब को भयरहित करके निरन्तर प्रसन्न कर सके॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अच्छा॒ यो गन्ता॒ नाध॑मानमू॒ती इ॒त्था विप्रं॒ हव॑मानं गृ॒णन्त॑म्।

उप॒ त्मनि॒ दधा॑नो धु॒र्या३॑शून्स॒हस्रा॑णि श॒तानि॒ वज्र॑बाहुः॥४॥

अच्छ॑। यः। गन्ता॑। नाध॑मानम्। ऊ॒ती। इ॒त्था। विप्र॑म्। हव॑मानम्। गृ॒णन्त॑म्। उप॑। त्मनि॑। दधा॑नः। धु॒रि। आ॒शून्। स॒हस्रा॑णि। श॒तानि॑। वज्र॑ऽबाहुः॥४॥

पदार्थः-**(अच्छ)** सम्यक्। अत्र **संहितायामि**ति दीर्घः। **(यः)** **(गन्ता)** **(नाधमानम्)** ऐश्वर्य्यवन्तं प्रशंसितम् **(ऊती)** रक्षणाद्याय **(इत्था)** अनेन प्रकारेण **(विप्रम्)** मेधाविनम् **(हवमानम्)** स्पर्धमानम् **(गृणन्तम्)** स्तुवन्तम् **(उप)** **(त्मनि)** आत्मनि **(दधानः)** **(धुरि)** रथस्य युग्मे **(आशून्)** आशुगामिनोऽश्वात् **(सहस्राणि)** **(शतानि)** बहून् **(वज्रबाहुः)** शस्त्रहस्तः॥४॥

अन्वयः-हे मनुष्या! यो गन्तोती इत्था नाधमानं हवमानं गृणन्तं विप्रं त्मन्युप दधानः सहस्राणि शतान्याशून् धुरि दधानोऽच्छ गन्ता वज्रबाहू राजा भवेत् सोऽस्मानभयङ्कर्त्तुमर्हेत्॥४॥

भावार्थः–यो नृपः श्रेष्ठान् मनुष्यान् सङ्गृह्णीत स एव राज्यं वर्द्धयितुमर्हेत्॥४॥

पदार्थः–हे मनुष्यो! **(यः)** जो **(गन्ता)** चलने वाला **(ऊती)** रक्षण आदि के लिये **(इत्था)** इस प्रकार से **(नाधमानम्)** ऐश्वर्य्यवान् प्रशंसित **(हवमानम्)** ईर्ष्या करने वाले **(गृणन्तम्)** स्तुति करते हुए **(विप्रम्)** बुद्धिमान् को **(त्मनि)** आत्मा में **(उप, दधानः)** धारण करता हुआ **(सहस्राणि)** सहस्रों और **(शतानि)** सैकड़ों **(आशून्)** शीघ्र चलने वाले घोड़ों को **(धुरि)** रथ के जुए में धारण करता हुआ **(अच्छ)** उत्तम प्रकार चलने वाला **(वज्रबाहुः)** शस्त्र हाथों में लिये राजा होवे, वह हम लोगों को भयरहित करने योग्य हो॥४॥

भावार्थः–जो राजा श्रेष्ठ मनुष्यों को ग्रहण करे, वही राज्य बढ़ाने को योग्य होवे॥४॥

अथ प्रजागुणानाह॥

अब प्रजागुणों को अगले मन्त्र में कहते हैं॥

त्वोतासो मघवन्निन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः।

भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः॥५॥१८॥

त्वाऽऊतासः। मघऽवन्। इन्द्र। विप्राः। वयम्। ते। स्याम। सूरयः। गृणन्तः। भेजानासः। बृहत्ऽदिवस्य। रायः। आऽकाय्यस्य। दावने। पुरुऽक्षोः॥५॥

पदार्थः-(त्वोतासः) त्वया रक्षिता वर्धिताः **(मघवन्)** उत्तमधन **(इन्द्र)** शुभगुणधारक राजन् **(विप्राः)** मेधाविनः **(वयम्)** **(ते)** तव **(स्याम)** **(सूरयः)** प्रकाशितविद्याः **(गृणन्तः)** स्तुवन्तः **(भेजानासः)** भजमानाः। अत्र वर्णव्यत्ययेनास्यैत्वम्। **(बृहद्दिवस्य)** प्रकाशमानस्य **(रायः)** धनस्य **(आकाय्यस्य)** समन्तात् काये भवस्य **(दावने)** दात्रे **(पुरुक्षोः)** बह्वन्नादियुक्तस्य॥५॥

अन्वयः-हे मघवन्निन्द्र! त्वोतासो भेजानासो गृणन्तो विप्राः सूरयो वयं बृहद्दिवस्याकाय्यस्य पुरुक्षोः ते रायो दावने स्थिराः स्याम॥५॥

भावार्थः–हे राजन्! यदि भवानस्मान् सर्वतो रक्षेत्तर्हि वयमत्युन्नता भवेम॥५॥

अत्र राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनत्रिंशत्तमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः–हे **(मघवन्)** श्रेष्ठ धनयुक्त **(इन्द्र)** उत्तम गुणों के धारण करनेवाले राजन्! **(त्वोतासः)** आप से रक्षा और वृद्धि को प्राप्त **(भेजानासः)** सेवन और **(गृणन्तः)** स्तुति करते हुए **(विप्राः)** बुद्धिमान् **(सूरयः)** प्रकाशित विद्या वाले **(वयम्)** हम लोग **(बृहद्दिवस्य)** प्रकाशमान **(आकाय्यस्य)** सब प्रकार शरीर में उत्पन्न **(पुरुक्षोः)** बहुत अन्नादि से युक्त **(ते)** आपके **(रायः)** धन के और **(दावने)** देने वाले के लिये स्थिर **(स्याम)** होवें॥५॥

भावार्थः-हे राजन्! जो आप हम लोगों की सब प्रकार से रक्षा करें तो हम लोग अति उन्नतियुक्त होवें॥५॥

इस सूक्त में राजा और प्रजा के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनत्तीसवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

अथ चतुर्विंशत्यृचस्य त्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। १-८, १२-२४ इन्द्रः। ९-११ इन्द्र उषाश्च देवते। १, ३, ५, ९, ११, १२, १६, १८, १९, २३ निचृद् गायत्री। २, १०, ७, १३-१५, १७, २१, २२ गायत्री। ४, ६ विराट् गायत्री। २० पिपीलिकामध्या गायत्री छन्दः। षड्जः स्वरः। ८, २४ विराडनुष्टुप् छन्दः। ऋषभः स्वरः॥

अथ सूर्य्यदृष्टान्तेन राजविषयमाह॥

अब चौबीस ऋचा वाले तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में सूर्यदृष्टान्त से राजविषय को कहते हैं॥

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्। नकिरेवा यथा त्वम्॥ १॥

नकिः। इन्द्र। त्वत्। उत्ऽतरः। न। ज्यायान्। अस्ति। वृत्रऽहन्। नकिः। एव। यथा। त्वम्॥ १॥

पदार्थः-(नकिः) निषेधे **(इन्द्र)** राजन् **(त्वत्) (उत्तरः)** पश्चात् **(न)** निषेधे **(ज्यायान्)** ज्येष्ठः **(अस्ति) (वृत्रहन्)** यो वृत्रं हन्ति स सूर्य्यस्तद्वद्वर्त्तमान **(नकिः) (एव)** अत्र **निपातस्य चे**ति दीर्घः। **(यथा) (त्वम्)**॥ १॥

अन्वयः-हे वृत्रहन्निन्द्र! यथा त्वमसि तथैव त्वदुत्तरो नकिरस्ति न ज्यायानस्ति नकिरुत्तमश्चैव॥ १॥

भावार्थः-हे मनुष्या! यः सर्वेभ्यः श्रेष्ठो भवेत्तमेव राजानं कुरुत॥ १॥

पदार्थः-हे **(वृत्रहन्)** मेघ को नाश करने वाले सूर्य के सदृश वर्त्तमान **(इन्द्र)** राजन्! **(यथा)** जैसे **(त्वम्)** आप हो, वैसे ही **(त्वत्)** आप से **(उत्तरः)** पीछे **(नकिः)** नहीं **(अस्ति)** है **(न)** नहीं **(ज्यायान्)** बड़ा है और **(नकिः, एव)** न उत्तम ही है॥ १॥

भावार्थः-हे मनुष्यो! जो सबसे श्रेष्ठ होवे, उसी का राजा करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः। सत्रा महाँ असि श्रुतः॥ २॥

सत्रा। ते। अनु। कृष्टयः। विश्वा। चक्राऽइव। ववृतुः। सत्रा। महान्। असि। श्रुतः॥ २॥

पदार्थः-(सत्रा) सत्याचारस्य **(ते)** तव **(अनु) (कृष्टयः)** मनुष्याः **(विश्वा)** सर्वाणि **(चक्रेव)** चक्राणीव **(वावृतुः)** वर्त्तेरन्। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्। **(सत्रा)** सत्याचरणेन **(महान्) (असि) (श्रुतः)** सकलशास्त्रश्रवणेन कीर्तिमान्॥ २॥

अन्वयः-हे राजन्! यदि त्वं सत्रा महाञ्छ्रुतोऽसि तर्हि ते सत्रा कृष्टयो विश्वा चक्रेवानु वावृतुः॥ २॥

भावार्थः-हे राजन्! भवान् न्यायकारी भवेत्तर्हि सर्वाः प्रजास्त्वामानुवर्त्तेरन्॥२॥

पदार्थः-हे राजन्! जो आप **(सत्रा)** सत्य आचरण के **(महान्)** बड़े **(श्रुतः)** सम्पूर्ण शास्त्र के श्रवण से यशयुक्त **(असि)** हो तो **(ते)** आपके सम्बन्ध में **(सत्रा)** सत्य आचरण से **(कृष्टयः)** मनुष्य **(विश्वा)** सम्पूर्ण **(चक्रेव)** चक्रों के सदृश अर्थात् जैसे गाड़ी में पहिया वैसे **(अनु, वावृतुः)** वर्त्ताव करें॥२॥

भावार्थः-हे राजन्! आप न्यायकारी होवें तो सम्पूर्ण प्रजा आपके अनुकूल वर्ताव करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विश्वे॑ च॒नेदु॒ना त्वा॑ दे॒वास॑ इन्द्र युयुधुः। यदहा॒ नक्त॒मादि॑रः॥३॥

विश्वे॑। च॒न। इत्। अ॒ना। त्वा॒। दे॒वास॑ः। इ॒न्द्र॒। यु॒यु॒धुः॒। यत्। अहा॑। नक्त॑म्। आ। अदि॑रः॥३॥

पदार्थः-**(विश्वे)** **(सर्वे)** **(चन)** अपि **(इत्)** **(अना)** प्रणात्मकानि **(त्वा)** त्वाम् **(देवासः)** विद्वांसः **(इन्द्र)** शत्रूणां विदारक **(युयुधुः)** युध्यन्ते **(यत्)** ये **(अहा)** दिनानि **(नक्तम्)** रात्रिम् **(आ, अतिरः)** हन्याः॥३॥

अन्वयः-हे इन्द्र! यद्ये विश्व इद् देवासोऽनाऽहा नक्तं त्वाश्रित्य शत्रुभिः सह युयुधुस्तैश्चन त्वं शत्रूनातिरः॥३॥

भावार्थः-राज्ञा भृत्याः सुशिक्षिताः श्रेष्ठ रक्षणीया येनाहर्निशं शत्रवो निलीना निवसेयुः॥३॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के विदीर्ण करने वाले **(यत्)** जो **(विश्वे इत्)** सभी **(देवासः)** विद्वान् जन **(अना)** प्रतिज्ञास्वरूप **(अहा)** दिनों और **(नक्तम्)** रात्रि को **(त्वा)** आपका आश्रय लेकर शत्रुओं के साथ **(युयुधुः)** युद्ध करते हैं, उनके **(चन)** भी साथ आप शत्रुओं का **(आ, अतिरः)** नाश करिये॥३॥

भावार्थः-राजा को चाहिये कि भृत्यजन उत्तम शिक्षित और श्रेष्ठ रक्खें, जिससे दिन-रात्रि शत्रु लोग छिपे हुए रहें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यत्रो॒त बा॑धि॒तेभ्य॑श्च॒क्रं कुत्सा॑य यु॒ध्यते। मु॒षा॒य इ॑न्द्र॒ सूर्य॑म्॥४॥

यत्र॑। उ॒त। बा॒धि॒तेभ्य॑ः। च॒क्रम्। कुत्सा॑य। यु॒ध्यते। मु॒षा॒यः। इ॒न्द्र॒। सूर्य॑म्॥४॥

पदार्थः-**(यत्र)** यस्मिन् राज्ये **(उत)** अपि **(बाधितेभ्यः)** पीडितेभ्यः **(चक्रम्)** चक्रवद्वर्त्तमानं राज्यम् **(कुत्साय)** शस्त्रास्त्रयुक्ताय **(युध्यते)** युद्धङ्कुर्वते **(मुषायः)** यो मुष इवाऽऽचरति **(इन्द्र)** **(सूर्य्यम्)** सूर्य्यमिव वर्त्तमानं न्यायम्॥४॥

अन्वयः-हे इन्द्र! यत्र मुषायो बाधितेभ्यः कुत्साय युध्यते जनाय सूर्य्यमिव चक्रं वर्त्तयति तत्रोतापि सुखं न वर्द्धते॥४॥

भावार्थः-यो राजा प्रजापीडां न निवारयेत् सूर्यवद् सद्गुणैः प्रकाशमानो न स्यात् प्रजाभ्यः करञ्च गृह्णीयात् स च न स्यात्॥४॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के सदृश वर्त्तमान न्यायकारिन्! **(यत्र)** जिस राज्य में **(मुषायः)** चोरी करने वाले के सदृश आचरण करने वाले **(बाधितेभ्यः)** पीड़ायुक्त जनों से **(कुत्साय)** शस्त्र और अस्त्र से युक्तजन और **(युध्यते)** युद्ध करते हुए जन के लिये **(सूर्यम्)** सूर्य के सदृश वर्त्तमान न्यायरूपी **(चक्रम्)** चक्र को वर्त्ताता है, वहाँ **(उत)** भी सुख नहीं बढ़ता है॥४॥

भावार्थः-जो राजा प्रजा की पीड़ा को नहीं निवारण करे और सूर्य के सदृश श्रेष्ठ गुणों से प्रकाशमान न हो और प्रजाओं से कर ग्रहण करे, वह राजा नहीं होवे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यत्रा॑ दे॒वाँ ऋ॑घाय॒तो विश्वा॒ँ अयु॑ध्य॒ एक॒ इत्। त्वमि॑न्द्र व॒नूँरह॑न्॥५॥१९॥

यत्र॑। दे॒वान्। ऋ॒घा॒य॒तः। विश्वा॑न्। अयु॑ध्यः। एक॑ः। इत्। त्वम्। इ॒न्द्र॒। व॒नून्। अह॑न्॥५॥

पदार्थः-**(यत्र)** **(देवान्)** विदुषः **(ऋघायतः)** बाधमानान् **(विश्वान्)** **(अयुध्यः)** योद्धुमनर्हः **(एकः)** **(इत्)** एव **(त्वम्)** **(इन्द्र)** **(वनून्)** अधर्म्मसेविनः **(अहन्)** हन्याः॥५॥

अन्वयः-हे इन्द्र! एक इदेव त्वं यत्र विश्वान् देवानृघायतो वनूनहंस्तत्र शत्रुभिरयुध्यो भवेः॥५॥

भावार्थः-यदा यदा दुष्टाः श्रेष्ठान् बाधन्तां तदा तदा त्वं सर्वानधर्मिणो भृशं दण्डय॥५॥

पदार्थः-हे **(इन्द्र)** तेजस्वी राजन् **(एकः)** एक **(इत्)** ही **(त्वम्)** आप **(यत्र)** जहाँ **(विश्वान्)** सम्पूर्ण **(देवान्)** विद्वानों को **(ऋघायतः)** बाधते हुए **(वनून्)** अधर्म्म के सेवन करनेवालों का **(अहन्)** नाश करें, वहाँ शत्रुओं से **(अयुध्यः)** नहीं युद्ध करने योग्य अर्थात् शत्रुजन आप से युद्ध न कर सकें, ऐसे होवें॥५॥

भावार्थः-जब-जब दुष्टजन श्रेष्ठों को बाधा देवें, तब-तब आप सम्पूर्ण अधर्म्मियों को अत्यन्त दण्ड दीजिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यत्रो॒त मर्त्या॑य॒ कमरि॑णा इन्द्र॒ सूर्य॑म्। प्राव॒ः शची॑भि॒रेत॑शम्॥६॥

यत्र॑। उ॒त। मर्त्या॑य। कम्। अरि॑णाः। इ॒न्द्र॒। सूर्य॑म्। प्र। आ॒व॒रिति॑। शची॑भिः। एत॑शम्॥६॥

पदार्थः-(यत्र) यस्मिन् राज्ये **(उत)** अपि **(मर्त्याय)** मनुष्याय **(कम्)** सुखम् **(अरिणाः)** प्रदद्याः **(इन्द्र)** सुखप्रदातः **(सूर्य्यम्)** सवितारं वायुरिव **(प्र) (आवः)** रक्षेः **(शचीभिः)** प्रज्ञाभिः कर्म्मभिर्वा **(एतशम्)** प्राप्तविद्यमश्ववद् बलिष्ठम्॥६॥

अन्वयः-हे इन्द्र! त्वं सूर्य्यं वायुरिव शचीभिरेतशं प्रावः। यत्र मर्त्याय कमरिणास्तत्रोत दुष्टान् दुःखं दद्याः॥६॥

भावार्थः-यत्र राजा श्रेष्ठान्त्सत्कृत्य दुष्टान् दण्डयित्वा विद्याविनयौ वर्द्धयति तत्र सर्वाः प्रजाः स्वस्था भवन्ति॥६॥

पदार्थः-हे **(इन्द्र)** सुख के देनेवाले आप **(सूर्य्यम्)** सूर्य्य को वायु के सदृश **(शचीभिः)** बुद्धियों वा कर्म्मों से **(एतशम्)** विद्या को प्राप्त घोड़े के सदृश बलवान् की **(प्र, आवः,)** रक्षा करें **(यत्र)** जिस राज्य में **(मर्त्याय)** मनुष्य के लिये **(कम्)** सुख **(अरिणाः)** देवें वहाँ **(उत)** भी दुष्टों को दुःख देवें॥६॥

भावार्थः-जहाँ राजा श्रेष्ठों का सत्कार और दुष्टों को दण्ड देकर विद्या और विनय को बढ़ाता है, वहाँ सम्पूर्ण प्रजा स्वस्थ होती है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

किमादुतासि॑ वृत्रहन् मघ॑वन् मन्यु॒मत्त॑मः। अत्राह॒ दानु॒मात॑रः॥७॥

किम्। आत्। उ॒त। अ॒सि॒। वृ॒त्र॒ऽहन्। मघ॑ऽवन्। म॒न्यु॒मत्ऽत॑मः। अत्र॑। अह॑। दानु॑म्। आ। अ॒ति॒रः॥७॥

पदार्थः-(किम्) (आत्) आनन्तर्य्ये **(उत) (असि) (वृत्रहन्)** शत्रुनाशक **(मघवन्)** प्रशंसितधन **(मन्युमत्तमः)** प्रशंसितो मन्युः क्रोधो यस्य सोऽतिशयितः **(अत्र) (अह) (दानुम्)** दातारम् **(आ) (अतिरः)** हंसि॥७॥

अन्वयः-हे मघवन् वृत्रहन्! मन्युमत्तमस्त्वं सूर्य्यो मेघमिव दानुमातिरोऽत्राहाऽऽत् किमुत राजाऽसि॥७॥

भावार्थः-यो राजा दुष्टानामुपर्य्यतिक्रोधकृच्छ्रेष्ठेषु शान्ततमो भवति स एव राज्यं वर्द्धयितुमर्हति॥७॥

पदार्थः-हे **(मघवन्)** श्रेष्ठ धनयुक्त **(वृत्रहन्)** शत्रुओं के नाश करने वाले! **(मन्युमत्तमः)** प्रशंसित क्रोधयुक्त आप सूर्य्य मेघ को जैसे वैसे **(दानुम्)** देनेवाले का **(आ, अतिरः)** नाश करते हैं, **(अत्र, अह, आत्, किम्, उत)** अहह इस विषय में तो क्या अनन्तर आप राजा भी **(असि)** हो॥७॥

भावार्थः-जो राजा दुष्टों के ऊपर अति क्रोध करने और श्रेष्ठों में अत्यन्त शान्ति रखने वाला होता है, वही राज्य बढ़ा सकता है॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एतद् घेदुत वीर्यꣳमिन्द्र चकर्थ पौंस्यम्। स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः॥८॥

एतत्। घ। इत्। उत। वीर्यम्। इन्द्र। चकर्थ। पौंस्यम्। स्त्रियम्। यत्। दुःऽहनायुवम्। वधीः। दुहितरम्। दिवः॥८॥

पदार्थः-(एतत्) कर्म्म **(घ)** एव **(इत्)** **(उत)** **(वीर्य्यम्)** पराक्रमम् **(इन्द्र)** दोषविनाशक **(चकर्थ)** करोषि **(पौंस्यम्)** पुंभ्यो हितम् **(स्त्रियम्)** **(यत्)** **(दुर्हणायुवम्)** दुःखेन हन्तुं योग्यं कामयते ताम् **(वधीः)** हंसि **(दुहितरम्)** दुहितरमिव वर्त्तमानामुषसम् **(दिवः)** प्रकाशस्य॥८॥

अन्वयः-हे इन्द्र! यथा सूर्य्यो दुर्हणायुवं दिवो दुहितरं हन्ति तथैतत् पौंस्यं वीर्य्यं चकर्थ त्वं शत्रून् घ वधीरिद्यत् स्त्रियमुतापि भृत्यं पालयेः॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो रात्रिं हत्वा दिनं जनयित्वा प्राणिनः सुखयति तथैव दुष्टाचारान् हत्वा श्रेष्ठान्त्सम्पाल्य विद्यां जनयित्वा सर्वाः प्रजाः सुखयेत्॥८॥

पदार्थः-हे **(इन्द्र)** दोषों के नाश करनेवाले जैसे सूर्य्य **(दुर्हणायुवम्)** दुःख से नाश करने योग्य की कामना करनेवाले **(दिवः)** प्रकाश की **(दुहितरम्)** कन्या के सदृश वर्त्तमान प्रातर्वेला का नाश करता है, वैसे **(एतत्)** इस कर्म्म और **(पौंस्यम्)** पुरुषों के लिये हित **(वीर्य्यम्)** पराक्रम को **(चकर्थ)** करते हो और आप **(घ)** शत्रुओं ही का **(वधीः, इत्)** नाश करते ही हो **(यत्)** जो **(स्त्रियम्)** स्त्री **(उत)** और भृत्य को भी पालिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य रात्रि का नाश और दिन की उत्पत्ति करके प्राणियों को सुख देता है, वैसे ही दुष्ट आचरणों का नाश और श्रेष्ठों का पालन कर और विद्या को उत्पन्न करके सम्पूर्ण प्रजाओं को सुख देवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दिवश्चिद् घा दुहितरं महान् महीयमानाम्। उषासमिन्द्र सं पिणक्॥९॥

दिवः। चित्। घ। दुहितरम्। महान्। महीयमानाम्। उषसम्। इन्द्र। सम्। पिणक्॥९॥

पदार्थः-(दिवः) सूर्य्यस्य **(चित्)** इव **(घ)** इव। अत्र **ऋचि तुनुघे**ति दीर्घः। **(दुहितरम्)** कन्यामिव वर्त्तमानाम् **(महान्)** **(महीयमानाम्)** विस्तीर्णाम् **(उषासम्)** प्रातर्वेलाम् **(इन्द्र)** **(सम्)** **(पिणक्)** पिनष्टि॥९॥

अन्वयः-हे इन्द्र राजन्! यथा महान्त्सूर्य्यो दिवो दुहितरं महीयमानामुषासञ्चित् सम्पिणक् तथा घाविद्यां दुष्टांश्च निवारय॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये राजपुरुषा चान्यायान्धकारं निवार्य्य विद्यां न्यायार्कञ्च जनयन्ति ते सूर्य्य इव प्रतापिनो जायन्ते॥९॥

पदार्थः-हे **(इन्द्र)** तेजस्वि राजन्! जैसे **(महान्)** महानुभाव कोई **(दिवः, दुहितरम्)** कन्या के सदृश वर्त्तमान सूर्य्य की **(महीयमानाम्)** विस्तीर्ण **(उषासम्)** प्रातर्वेला के **(चित्)** सदृश **(सम्, पिणक्)** पीसता है, वैसे **(घ)** ही अविद्या और दुष्टों का निवारण करो॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजपुरुष और राजा अन्यायरूप अन्धकार को निवृत्त करके विद्या और न्यायरूप सूर्य्य को उत्पन्न करते, वे सूर्य्य के सदृश प्रतापी होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अपोषा अनसः सरत्संपिष्टादह बिभ्युषी। नि यत्सीं शिश्नथद् वृषा॥१०॥२०॥

अप। उषाः। अनसः। सरत्। सम्ऽपिष्टात्। अह। बिभ्युषी। नि। यत्। सीम्। शिश्नथत्। वृषा॥१०॥

पदार्थः-**(अप)** **(उषाः)** प्रातर्वेलेव **(अनसः)** शकटस्याग्रम् **(सरत्)** सरति **(सम्पिष्टात्)** सञ्चूर्णितात् **(अह)** **(बिभ्युषी)** भयप्रदा **(नि)** **(यत्)** या **(सीम्)** सर्वतः **(शिश्नथत्)** शिथिलीकरोति **(वृषा)** बलिष्ठो राजा॥१०॥

अन्वयः-यो वृषा यथा बिभ्युषी उषा अनसोऽग्रमिव सम्पिष्टादहाप सरद् यद् या सीं नि शिश्नथत् तथाचरेत् स सूर्य्य इव तेजस्वी भवेत्॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा रथस्याग्रं पुरःसरं भवति तथैव सूर्य्यस्याग्र उषा गच्छति यथा सूर्य्यस्तमो हन्ति तथा राजाऽन्यायाऽऽचारं हन्यात्॥१०॥

पदार्थः-जो **(वृषा)** बलिष्ठ राजा जैसे **(बिभ्युषी)** भय देनेवाली **(उषाः)** प्रातर्वेला **(अनसः)** गाड़ी के अग्रभाग के सदृश आगे चलने वाली **(सम्पिष्टात्)** चूर्णित हुए **(अह)** ही अन्धकार से **(अप, सरत्)** आगे चलती है **(यत्)** जो **(सीम्)** सब प्रकार **(नि, शिश्नथत्)** शिथिल करती है, वैसा आचरण करे, वह सूर्य्य के सदृश तेजस्वी होवे॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे रथ का अग्रभाग आगे होता है, वैसे ही सूर्य्य के आगे प्रातःकाल चलता है और जैसे सूर्य्य अन्धकार का नाश करता है, वैसे राजा अन्याय के आचार का नाश करे॥१०॥

[अथ] पुनः सूर्य्यविषयमाह॥

अब सूर्य्यविषय को अगले मन्त्र में कहते हैं॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या। ससार सीं परावतः॥११॥

एतत्। अस्याः। अनः। शये। सुऽसम्पिष्टम्। विऽपाशि। आ। ससार। सीम्। पराऽवतः॥ ११॥

पदार्थः-(एतत्) (अस्याः) उषसः **(अनः)** शकटमिव **(शये)** शयनं कुर्य्याम् **(सुसम्पिष्टम्)** सुष्ठ्वेकत्र पिष्टं यस्मिँस्तत् **(विपाशि)** विगतपाशे बन्धनरहिते मार्गे **(आ) (ससार)** समन्ताद्गच्छति **(सीम्)** आदित्यः **(परावतः)** दूरदेशात्॥ ११॥

अन्वयः-हे विद्वन्! यथा सीमादित्योऽस्या उषस एतत् सुसम्पिष्टमनो विपाशि परावत आ ससार यस्यामहं शये तथैतां त्वं विजानीहि॥ ११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा श्रेष्ठानि यानानि सद्यो दूरं यान्ति तथैवोषा दूरं गच्छतीति वेद्यम्॥ ११॥

पदार्थः-हे विद्वन्! जैसे **(सीम्)** सूर्य्य **(अस्याः)** इस प्रातःकाल का **(एतत्)** यह **(सुसम्पिष्टम्)** उत्तम प्रकार एक स्थान में पीसा चूर्ण हो जिसमें उस अन्धकार को **(अनः)** गाड़ी के सदृश **(विपाशि)** बन्धनरहित मार्ग में **(परावतः)** दूर देश से **(आ, ससार)** सब प्रकार चलता है, जिसमें मैं **(शये)** शयन करूं, वैसे इसको आप जानिये॥ ११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे श्रेष्ठ वाहन शीघ्र दूर जाते हैं, वैसे ही प्रातःकाल दूर जाता है, ऐसा जानना चाहिये॥ ११॥

अथ मेघसंबन्धिनदीसंतरणविषयमाह॥

अब मेघसंबन्धि नदीसंतरण विषय को अगले मन्त्र में कहते हैं॥

उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि। परि ष्ठा इन्द्र मायया॥ १२॥

उत। सिन्धुम्। विऽबाल्यम्। विऽतस्थानाम्। अधि। क्षमि। परि। स्थाः। इन्द्र। मायया॥ १२॥

पदार्थः-(उत) अपि **(सिन्धुम्)** नदम् **(विबाल्यम्)** विगतं बाल्यं यस्य तम् **(वितस्थानाम्)** विशेषेण स्थिताम् **(अधि) (क्षमि)** पृथिव्याम् **(परि)** सर्वतः **(स्थाः)** तिष्ठति **(इन्द्र)** विद्यैश्वर्य्य **(मायया)** प्रज्ञया॥ १२॥

अन्वयः-हे इन्द्र! भवान् मायया अधि क्षमि वितस्थानां नदीमुत विबाल्यं सिन्धुं परि ष्ठाः॥ १२॥

भावार्थः-हे मनुष्याः! समुद्रनदीनदतरणाय प्रज्ञया नौकादिकं निर्माय श्रीमन्तो भवन्तु॥ १२॥

पदार्थः-हे **(इन्द्र)** विद्या और ऐश्वर्य्य से युक्त आप **(मायया)** बुद्धि से **(अधि, क्षमि)** पृथिवी के बीच **(वितस्थानाम्)** विशेष करके स्थित नदी **(उत)** और **(विबाल्यम्)** बालपन से रहित अर्थात् छोटे नहीं बड़े **(सिन्धुम्)** नद के **(परि)** सब ओर से **(स्थाः)** स्थित होते हैं॥ १२॥

भावार्थः-हे मनुष्यो! समुद्र, नदी, नद के पार होने के लिये बुद्धि से नौका आदि को रच के लक्ष्मीवान् होओ॥ १२॥

अथ राजसम्बन्धेन मनुष्यविषयमाह॥

अब राजसम्बन्ध से मनुष्य विषय को अगले मन्त्र में कहते हैं॥

उ॒त शु॒ष्णस्य॑ धृष्णु॒या प्र मृ॑क्षो अ॒भि वेद॑नम्। पुरो॒ यद॑स्य संपि॒णक्॥ १३॥

उ॒त। शु॒ष्णस्य॑। धृ॒ष्णु॒ऽया। प्र। मृ॒क्षः॒। अ॒भि। वेद॑नम्। पुरः॑। यत्। अ॒स्य॒। स॒म्ऽपि॒णक्॥ १३॥

पदार्थः-(उत) अपि **(शुष्णस्य)** बलस्य **(धृष्णुया)** प्रगल्भत्वेन **(प्र)** **(मृक्षः)** सिञ्चय **(अभि)** **(वेदनम्)** विज्ञानम् **(पुरः)** नगराणि **(यत्)** यतः **(अस्य)** शत्रोः **(संपिणक्)** सञ्चूर्णय॥ १३॥

अन्वयः-हे राजन्! यद्यतस्त्वं शुष्णस्य बलिष्ठस्य सैन्यस्य धृष्णुयाऽस्य पुरः प्र मृक्षोऽतः शत्रून् संपिणगुताप्यभिवेदनं प्रापय॥ १३॥

भावार्थः-स एव राजा सम्मतो भवेद्यः सेनां वर्द्धयित्वाऽन्यायाचारान्निवार्य्याऽविहिताज्ञो भवेत्॥ १३॥

पदार्थः-हे राजन्! **(यत्)** जिससे आप **(शुष्णस्य)** बलयुक्त सेना की **(धृष्णुया)** ढिठाई से **(अस्य)** इस शत्रु के **(पुरः)** नगरों को **(प्र, मृक्षः)** अच्छे प्रकार सींचो अत एव शत्रुओं को **(सम्पिणक्)** चूर्णित करो **(उत)** और भी **(अभि, वेदनम्)** विज्ञान को प्राप्त कराओ॥ १३॥

भावार्थः-वही राजा सम्मत होवे कि जो सेना को बढ़ाय और अन्याय के आचरणों को दूर करके बिन कहे को अच्छा जानने वाला होवे॥ १३॥

पुनः सूर्यदृष्टान्तेन राजविषयमाह॥

फिर सूर्यदृष्टान्त से राजविषय को अगले मन्त्र में कहते हैं॥

उ॒त दा॒सं कौ॑लि॒तरं बृ॑हतः पर्व॑ता॒दधि॑। अव॑ाहन्निन्द्र शम्ब॑रम्॥ १४॥

उ॒त। दा॒सम्। कौ॒लि॒ऽत॒रम्। बृ॒हतः॑। पर्व॑तात्। अधि॑। अव॑। अ॒हन्। इ॒न्द्र॒। शम्ब॑रम्॥ १४॥

पदार्थः-(उत) **(दासम्)** सेवकम् **(कौलितरम्)** अतिशयेन कुलीनम् **(बृहतः)** महतः **(पर्वतात्)** शैलात् **(अधि)** उपरि **(अव)** **(अहन्)** हन्ति **(इन्द्र)** **(शम्बरम्)** शं सुखं वृणोति यस्मात्तं मेघम्॥ १४॥

अन्वयः-हे इन्द्र! त्वं यथा सूर्य्यो बृहतः पर्वतादधि शम्बरमवाहन्नुतापि प्रजाः पालयसि तथैव शत्रून् हत्वा कौलितरं दासं पालय॥ १४॥

भावार्थः-हे मनुष्या! यथा सूर्य्यो मेघाज्जलं भूमौ निपात्य सर्वाञ्जीवयति तथैव पर्वतोपरिस्थानपि दस्यूनधो निपात्य प्रजाः पालयतः॥ १४॥

पदार्थः-हे **(इन्द्र)** तेजस्वि राजन्! आप जैसे सूर्य्य **(बृहतः)** बड़े **(पर्वतात्)** पर्वत से **(अधि)** ऊपर **(शम्बरम्)** सुख प्राप्त होता है, जिससे उस मेघ को **(अव, अहन्)** नाश करता और **(उत)** भी प्रजाओं को पालता है, वैसे ही शत्रुओं का नाश करके **(कौलितरम्)** अत्यन्त कुलीन **(दासम्)** सेवक का

पालन करो॥१४॥

भावार्थः-हे मनुष्यो! जैसे सूर्य्य मेघ से जल को पृथिवी में गिरा के सब को जिलाता है, वैसे ही पर्वत के ऊपर स्थित भी डाकुओं को नीचे गिरा के प्रजाओं का पालन करो॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत दासस्य वर्चिनः सहस्राणि शताऽवधीः। अधि पञ्च प्रधीरिव॥१५॥२१॥

उत। दासस्य। वर्चिनः। सहस्राणि। शता। अवधीः। अधि। पञ्च। प्रधीन्ऽइव॥१५॥

पदार्थः-(**उत**) अपि (**दासस्य**) सेवकस्य (**वर्चिनः**) बह्वधीतस्य (**सहस्राणि**) असंख्यानि (**शता**) शतानि (**अवधीः**) हन्याः (**अधि**) (**पञ्च**) (**प्रधीनिव**) चक्रस्थानि तीक्ष्णानि कीलकानीव वर्त्तमानान् जगत्कण्टकान् दुष्टान्॥१५॥

अन्वयः-हे राजंस्त्वं प्रधीनिव वर्त्तमानान् पञ्च शता सहस्राणि दुष्टानध्यवधीरुतापि वर्चिनो दासस्य जनान् पालय॥१५॥

भावार्थः-स राजभी राजपुरुषैर्यदि दुष्टान्निवार्य्य श्रेष्ठान् सत्कुर्य्यात्तर्हि सर्वं जगत् तस्य सेवकं भवेत्॥१५॥

पदार्थः-हे राजन्! आप (**प्रधीनिव**) चक्र में स्थित पैनी कीलों के सदृश वर्त्तमान संसार में कण्टक दुष्टों को (**पञ्च**) पांच (**शता**) सौ वा (**सहस्राणि**) सहस्रों दुष्टों का (**अधि, अवधीः**) नाश करो (**उत**) और (**वर्चिनः**) बहुत पढ़े हुए (**दासस्य**) सेवक के जनों को पालिये॥१५॥

भावार्थः-वह राजा जो राजमान राजपुरुषों से यदि दुष्टों का निवारण करके श्रेष्ठों का सत्कार करे तो सम्पूर्ण जगत् उसका सेवक होवे॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः। उक्थेष्विन्द्र आभजत्॥१६॥

उत। त्यम्। पुत्रम्। अग्रुवः। परावृक्तम्। शतऽक्रतुः। उक्थेषु। इन्द्रः। आ। अभजत्॥१६॥

पदार्थः-(**उत**) अपि (**त्यम्**) तम् (**पुत्रम्**) (**अग्रुवः**) अग्रसराः (**परावृक्तम्**) अच्छिन्नवीर्य्यम् (**शतक्रतुः**) असंख्यप्रज्ञः (**उक्थेषु**) प्रशंसनीयेषु शास्त्रेषु (**इन्द्रः**) परमैश्वर्य्यवान् (**आ**) (**अभजत्**) समन्तात् सेवते॥१६॥

अन्वयः-यश्शतक्रतुरिन्द्र उक्थेषु त्यं परावृक्तं पुत्रमग्रुव इवाऽभजदुतापि शिक्षेत स सिद्धकार्य्यो भवेत्॥१६॥

भावार्थः-यो राजा मातरोऽपत्यानीव प्रजाः पालयेत्तं प्रजाः पितरमिव मन्येरन्॥१६॥

पदार्थः-जो **(शतक्रतुः)** असंख्यबुद्धियों वा **(इन्द्रः)** अत्यन्त ऐश्वर्य्यवान् राजा **(उक्थेषु)** प्रशंसा करने योग्य शास्त्रों में **(त्यम्)** उस **(परावृक्तम्)** नहीं नष्ट हुए पराक्रम वाले **(पुत्रम्)** पुत्र को **(अग्रुवः)** अग्रगामियों के सदृश **(आ, अभजत्)** सब प्रकार सेवन करता है **(उत)** और शिक्षा भी देवे, वह सिद्धकार्य्य होवे॥१६॥

भावार्थः-जो राजा माता पुत्रों का जैसे वैसे प्रजाओं का पालन करे, उसको प्रजाजन पिता के समान मानें॥१६॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

उत त्या तुर्वशायदू अस्नातारा शचीपतिः। इन्द्रो विद्वाँ अपारयत्॥१७॥

उत। त्या। तुर्वशायदू इति। अस्नातारा। शचीः३ऽपतिः। इन्द्रः। विद्वान्। अपारयत्॥१७॥

पदार्थः-(उत) अपि **(त्या)** तौ **(तुर्वशायदू)** शीघ्रं वशंकरो यत्नवाँश्च तौ मनुष्यौ। **तुर्वशा इति मनुष्यनामसु पठितम्।** (निघं०२.३) यदव इति च। **(अस्नातारा)** स्नानादिकर्मरहितौ **(शचीपतिः)** प्रजापतिर्वाक्पतिर्वा **(इन्द्रः)** राजा **(विद्वान्)** **(अपारयत्)** दुःखात् पारयेत्॥१७॥

अन्वयः-शचीपतिर्विद्वानिन्द्रो यौ तुर्वशायदू उताप्यस्नातारापारयत् त्या सुखिनौ स्याताम्॥१७॥

भावार्थः-यान् मनुष्यानाप्ता विद्वांसः सुशिक्षेरंस्ते दुःखान्तं गत्वा सुखिनो भवन्ति॥१७॥

पदार्थः-**(शचीपतिः)** प्रजा वा वाणी का पति **(विद्वान्)** विद्वान् **(इन्द्रः)** और राजा जिन **(तुर्वशायदू)** शीघ्र वश करने और यत्न करने वाले मनुष्य **(उत)** और **(अस्नातारा)** स्नान आदि कर्म्मों से रहित मनुष्यों को **(अपारयत्)** दुःख से पार उतारे **(त्या)** वे दोनों सुखी होवें॥१७॥

भावार्थः-जिन मनुष्यों को यथार्थवक्ता विद्वान् लोग शिक्षा देवें, वे दुःख के पार जाकर सुखी होते हैं॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत त्या सद्य आर्या सरयोरिन्द्र पारतः। अर्णाचित्ररथावधीः॥१८॥

उत। त्या। सद्यः। आर्या। सरयोः। इन्द्र। पारतः। अर्णाचित्ररथा। अवधीः॥१८॥

पदार्थः-(उत) **(त्या)** तौ **(सद्यः)** शीघ्रम् **(आर्या)** उत्तमगुणकर्म्मस्वभावौ **(सरयोः)** गच्छतोः **(इन्द्र)** **(पारतः)** पारात् **(अर्णाचित्ररथा)** अर्णौ प्रापकौ च तौ चित्ररथा आश्चर्य्यरथौ च तौ **(अवधीः)** हन्याः॥१८॥

अन्वयः-हे इन्द्र! त्वं सद्यस्त्या सरयोः पारतो वर्त्तमानावर्णाचित्ररथावधीरुताप्यार्य्या पालयेः॥१८॥

भावार्थः-हे राजँस्त्वं सततं दुष्टान् ताडय श्रेष्ठान् सत्कुरु॥१८॥

पदार्थः-हे **(इन्द्र)** राजन् आप **(सद्यः)** शीघ्र **(त्या)** उन दोनों **(सरयोः)** चलते हुओं के **(पारतः)** पार से वर्त्तमान **(अर्णाचित्ररथा)** पहुंचाने वाले आश्चर्य्यकारक रथों का **(अवधीः)** नाश करो **(उत)** और **(आर्य्या)** उत्तम गुण, कर्म्म और स्वभाव वालों का पालन करो॥१८॥

भावार्थः-हे राजन्! आप निरन्तर दुष्टों का ताड़न और श्रेष्ठों का सत्कार करो॥१८॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन्। न तत्ते सुम्नमष्टवे॥१९॥

अनु। द्वा। जहिता। नयः। अन्धम्। श्रोणम्। च। वृत्रऽहन्। न। तत्। ते। सुम्नम्। अष्टवे॥१९॥

पदार्थः-**(अनु)** **(द्वा)** द्वौ **(जहिता)** जहितौ त्यक्तारौ **(नयः)** नायकः **(अन्धम्)** चक्षुर्विज्ञानविकलम् **(श्रोणम्)** खञ्जम् **(च)** **(वृत्रहन्)** शत्रुहन्तः **(न)** **(तत्)** **(ते)** तव **(सुम्नम्)** सुखम् **(अष्टवे)** व्याप्तुम्॥१९॥

अन्वयः-हे वृत्रहन्! यदि नयः संस्त्वमन्धं श्रोणञ्च द्वा जहिताऽनु पालयेस्तर्हि ते तत्सुम्नमष्टवे कश्चिदपि शत्रुर्न शक्नुयात्॥१९॥

भावार्थः-यो राजानाथानन्धादीन् सततं पालयेत्तस्य राज्यं सुखञ्च न नश्येत्॥१९॥

पदार्थः-हे **(वृत्रहन्)** शत्रुओं के नाश करने वाले! जो **(नयः)** नायक अर्थात् अग्रणी होते हुए आप **(अन्धम्)** नेत्रों के विज्ञान से विकल **(श्रोणं, च)** और खञ्ज अर्थात् पङ्गु **(द्वा)** दोनों **(जहिता)** छोड़ने वालों का **(अनु)** पश्चात् पालन करें तो **(ते)** आपके **(तत्)** उस **(सुम्नम्)** सुख को **(अष्टवे)** व्याप्त होने को कोई भी शत्रु **(न)** नहीं समर्थ होवें॥१९॥

भावार्थः-जो राजा अनाथ अन्धादिकों का निरन्तर पालन करे, उसका राज्य और सुख कभी नहीं नष्ट होवे॥१९॥

पुनः सूर्यदृष्टान्तेन राजविषयमाह॥

फिर सूर्यदृष्टान्त से राजविषय को अगले मन्त्र में कहते हैं॥

शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत्। दिवोदासाय दाशुषे॥२०॥२२॥

शतम्। अश्मन्ऽमयीनाम्। पुराम्। इन्द्रः। वि। आस्यत्। दिवःऽदासाय। दाशुषे॥२०॥

पदार्थः-(शतम्) (अश्मन्मयीनाम्) मेघप्रचुराणामिव पाषाणनिर्मितानाम् **(पुराम्)** नगरीणाम् **(इन्द्रः) (वि) (आस्यत्)** व्यसेच्छिन्द्यात् **(दिवोदासाय)** प्रकाशस्य सेवकाय **(दाशुषे)** दात्रे॥२०॥

अन्वयः-य इन्द्रो रविरिव दिवोदासाय दाशुषेऽश्मन्मयीनां पुरां शतं व्यास्यत् स एव विजयी भवितुमर्हेत्॥२०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यदि त्वमतिप्रवृद्धानां मेघानां सूर्य्यवदनेकानि शत्रुपुराणि जेतुं शक्नुयास्तर्हि राज्यश्रियं कीर्तिञ्चाप्तुमर्हेः॥२०॥

पदार्थः-जो **(इन्द्रः)** तेजस्वी सूर्य्य के सदृश **(दिवोदासाय)** प्रकाश के सेवने वाले और **(दाशुषे)** देनेवाले के लिये **(अश्मन्मयीनाम्)** मेघों के समूहों के सदृश पाषाणों से बने हुए **(पुराम्)** नगरों के **(शतम्)** सैकड़े को **(वि, आस्यत्)** काटे, वही विजयी होने के योग्य होवे॥२०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो आप बहुत बढ़े हुए मेघों को जैसे सूर्य्य वैसे अनेक शत्रुओं के नगरों को जीत सकें तो राज्यलक्ष्मी और यश को प्राप्त होने के योग्य होवें॥२०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्वा॑पयद्दभी॒तये॑ स॒हस्रा॑ त्रिं॒शतं॒ हथैः॑। दा॒सानां॒ मिन्द्रो॑ मा॒यया॑॥२१॥

अस्वा॑पयत्। द॒भी॒तये॑। स॒हस्रा॑। त्रिं॒शत॑म्। हथैः॑। दा॒सानां॑। इन्द्रः॑। मा॒यया॑॥२१॥

पदार्थः-(अस्वापयत्) स्वापयेत् **(दभीतये)** हिंसनाय **(सहस्रा)** असंख्यानि **(त्रिंशतम्)** एतत्संख्यातम् **(हथैः)** हननैः **(दासानाम्)** सेवकानाम् **(इन्द्रः)** राजा **(मायया)** प्रज्ञया॥२१॥

अन्वयः-य इन्द्रो मायया दासानां सेवकानां शत्रूणां हथैर्दभीतये सहस्रा त्रिंशतमस्वापयत् स एव विजयवान् भवेत्॥२१॥

भावार्थः-ये सेनापत्यादयो बुद्ध्या शत्रून् हन्युस्ते सदैव सुखिनः स्युः॥२१॥

पदार्थः-जो **(इन्द्रः)** राजा **(मायया)** बुद्धि से **(दासानाम्)** सेवकों और शत्रुओं के **(हथैः)** हननसाधनों से **(दभीतये)** हिंसन करने के लिये **(सहस्रा)** असंख्य **(त्रिंशतम्)** वा तीस को **(अस्वापयत्)** सुलावे, वही जीतने वाला होवे॥२१॥

भावार्थः-जो सेनापति आदि बुद्धि से शत्रुओं का नाश करें, वे सदा ही सुखी होवें॥२१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स घेदु॒तासि॑ वृत्रहन्त्समा॒न इ॑न्द्र॒ गोप॑तिः। यस्ता विश्वा॑नि चिच्यु॒षे॥२२॥

सः। घ। इत्। उत। असि। वृत्रऽहन्। समानः। इन्द्र। गोऽपतिः। यः। ता। विश्वानि। चिच्युषे॥ २२॥

पदार्थः-(सः) (**घ**) एव (**इत्**) (**उत**) अपि (**असि**) (**वृत्रहन्**) शत्रुविदारक (**समानः**) सूर्येण तुल्यः (**इन्द्र**) पुष्कलैश्वर्य्यकारक (**गोपतिः**) पृथिव्याः स्वामी (**यः**) (**ता**) तानि (**विश्वानि**) सर्वाणि (**चिच्युषे**) च्यावयसि॥ २२॥

अन्वयः-हे वृत्रहन्निन्द्र! यो गोपतिः समानस्त्वं ता विश्वानि चिच्युषे घ स इद् बलवानुतापि सुख्यसि॥ २२॥

भावार्थः-यो राजा सूर्य्यवन्न्यायप्रकाशेन रागद्वेषवान् सन् सर्वं राष्ट्रं पालयति स एव गणनीयो जायते॥ २२॥

पदार्थः-हे (**वृत्रहन्**) शत्रुओं के नाश करनेवाले (**इन्द्र**) अत्यन्त ऐश्वर्य्य के कर्त्ता! (**यः**) जो (**गोपतिः**) पृथिवी के स्वामी (**समानः**) सूर्य्य के सदृश आप (**ता**) उन (**विश्वानि**) सब की (**चिच्युषे**) वृद्धि करते (**घ**) ही हो (**स, इत्**) वही बलवान् (**उत**) और सुखी (**असि**) होते हैं॥ २२॥

भावार्थः-जो राजा सूर्य्य के सदृश न्याय के प्रकाश से रागद्वेष वाला होता हुआ सम्पूर्ण राज्य का पालनकर्त्ता है, वही गणना करने योग्य होता है॥ २२॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

उत नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम्। अद्या नकिष्टदा मिनत्॥ २३॥

उत। नूनम्। यत्। इन्द्रियम्। करिष्याः। इन्द्र। पौंस्यम्। अद्य। नकिः। तत्। आ। मिनत्॥ २३॥

पदार्थः-(उत) अपि (**नूनम्**) निश्चितम् (**यत्**) (**इन्द्रियम्**) (**करिष्याः**) (**इन्द्र**) सर्वरक्षक (**पौंस्यम्**) पुंसु साधुः (**अद्य**) अत्र **संहितायामिति** दीर्घः। (**नकिः**) (**तत्**) (**आ**) (**मिनत्**) हिंस्यात्॥ २३॥

अन्वयः-हे इन्द्रत्वमद्य यन्नूनमिन्द्रियमुत पौंस्यं करिष्यास्तत् कोऽपि नकिरामिनत्॥ २३॥

भावार्थः-यो राजा वर्त्तमानसमये बलं वर्द्धयितुं शक्नुयात् शत्रुभिरजितस्सन् निश्चितं विजयं प्राप्नुयात्॥ २३॥

पदार्थः-हे (**इन्द्र**) सब के रक्षा करने वाले आप (**अद्य**) आज (**यत्**) जो (**नूनम्**) निश्चित (**इन्द्रियम्**) इन्द्रिय को (**उत**) और (**पौंस्यम्**) पुरुषों में श्रेष्ठ कर्म्म को (**करिष्याः**) करें (**तत्**) उसकी कोई भी (**नकिः**) नहीं (**आ, मिनत्**) हिंसा करे॥ २३॥

भावार्थः-जो राजा वर्त्तमान समय में बल को बढ़ा सके, वह शत्रुओं से अजित हुआ निश्चय विजय को प्राप्त होवे॥ २३॥

अथ विद्वदुपदेशविषयमाह॥

अब विद्वानों के उपदेशविषय को अगले मन्त्र में कहते हैं॥

वा॒मंवा॑मं त आदुरे दे॒वो द॑दात्वर्य॒मा।

वा॒मं पू॒षा वा॒मं भगो॑ वा॒मं दे॒वः क॑रू॒ळती॥ २४॥ २३॥

वा॒मम्ऽवा॑मम्। ते॒। आ॒ऽदु॒रे॒। दे॒वः॒। द॒दा॒तु॒। अ॒र्य॒मा। वा॒मम्। पू॒षा। वा॒मम्। भगः॑। वा॒मम्। दे॒वः॒। क॒रू॒ळती॥ २४॥

पदार्थः-(वामंवामम्) प्रशस्यं प्रशस्यम्। **वाम इति प्रशस्यनामसु पठितम्।** (निघं०३.८) **(ते)** तुभ्यम् **(आदुरे)** शत्रूणां विदारक **(देवः)** विजयप्रदाता **(ददातु) (अर्य्यमा)** न्यायेशः **(वामम्)** प्राप्तव्यम् **(पूषा)** पुष्टिकर्त्ता **(वामम्)** भजनीयं धनम् **(भगः)** ऐश्वर्यवान् **(वामम्)** श्रेष्ठं विज्ञानम् **(देवः)** प्रकाशमानः **(करूळती)** यः करूनूढा कामयते स करूळतः सोऽस्यास्तीति॥ २४॥

अन्वयः-हे आदुरे राजन्! यः करूळती देवस्ते वामंवामं ददातु यः करूळत्यर्य्यमा वामं ददातु यः करूळती पूषा वामं प्रयच्छतु यः करूळती भगो देवो वामं ददातु तान्सर्वांस्त्वं सदा सेवयेः॥ २४॥

भावार्थः-हे राजन्! ये सत्यमुपदेशं सत्यं न्यायं यथार्थां विद्यां क्रियां च त्वां शिक्षेरँस्तान् सर्वास्त्वं सततं सत्कुर्यादिति॥ २४॥

अत्र सूर्य्यमेघमनुष्यविद्वद्राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति त्रिंशत्तमं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-(आदुरे) शत्रुओं के नाश करनेवाले राजन्! **(करूळती)** जिसके कारीगरों की कामना करनेवाला विद्यमान वह **(देवः)** विजय का लेनेवाला **(ते)** आपके लिये **(वामंवामम्)** प्रशंसा करने योग्य प्रशंसा करने योग्य को **(ददातु)** देवे और जिसके कारीगरों की कामना करनेवाला विद्यमान वह **(अर्य्यमा)** न्यायाधीश **(वामम्)** प्राप्त होने योग्य पदार्थ दे और जिसके कारीगरों की कामना करनेवाला विद्यमान वह **(पूषा)** पुष्टि करनेवाला **(वामम्)** सेवन करने योग्य धन को दे और जिसके कारीगरों की कामना करनेवाला विद्यमान वह **(भगः)** ऐश्वर्य्य से युक्त **(देवः)** प्रकाशमान **(वामम्)** श्रेष्ठ विज्ञान को देवे, उन सब की आप सदा सेवा करो॥ २४॥

भावार्थः-हे राजन्! जो लोग सत्य उपदेश, सत्य न्याय, यथार्थ विद्या और क्रिया की आपको शिक्षा देवें, उन सब का आप निरन्तर सत्कार करो॥ २४॥

इस सूक्त में सूर्य्य, मेघ, मनुष्य, विद्वान् और राजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तीसवां सूक्त और तेईसवां वर्ग समाप्त हुआ॥

अथ पञ्चदशर्चस्यैकाऽधिकत्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रो देवता। १, ७-१०, १४ गायत्री। २, ६, १२, १३, १५ निचृद्गायत्री। ३ त्रिपाद्गायत्री। ४, ५ विराड् गायत्री। ११ पिपीलिकामध्यागायत्री छन्दः। षड्जः स्वरः॥

अथ राजप्रजाधर्ममाह॥

अब पन्द्रह ऋचा वाले इकतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजप्रजाधर्मविषय को कहते हैं॥

कया॑ नश्चि॒त्र आ भु॑व॒दूती स॒दावृ॑धः॒ सखा॑। कया॒ शचि॑ष्ठया वृ॒ता॥ १॥

कया॑। न॒ः। चि॒त्रः। आ। भु॒व॒त्। ऊ॒ती। स॒दाऽवृ॑धः। सखा॑। कया॑। शचि॑ष्ठया। वृ॒ता॥ १॥

पदार्थः-(कया) (नः) अस्माकम् **(चित्रः)** अद्भुतगुणकर्मस्वभावः **(आ) (भुवत्)** भवेः **(ऊती)** ऊत्या रक्षणादिक्रियया सह **(सदावृधः)** सर्वदा वर्धमानः **(सखा) (कया) (शचिष्ठया)** अतिशयेन श्रेष्ठया वाचा प्रज्ञया कर्मणा वा **(वृता)** संयुक्तया॥१॥

अन्वयः-हे राजन्! सदावृधस्त्वं नः कयोती, कया शचिष्ठया वृता चित्रः सखा आ भुवत्॥१॥

भावार्थः-हे राजन्! भवतास्माभिस्सह तादृशानि कर्माणि कर्त्तव्यानि यैरस्माकं प्रीतिर्वर्द्धेत॥१॥

पदार्थः-हे राजन्! **(सदावृधः)** सर्वदा वृद्धि को प्राप्त होते हुए आप **(नः)** हम लोगों की **(कया)** किस **(ऊती)** रक्षण आदि क्रिया के साथ और **(कया)** किस **(शचिष्ठया)** अत्यन्त श्रेष्ठ वाणी बुद्धि वा कर्म्म जो **(वृता)** संयुक्त उससे **(चित्रः)** अद्भुत गुण, कर्म्म और स्वभाव वाले **(सखा)** मित्र **(आ, भुवत्)** हूजिये॥१॥

भावार्थः-हे राजन्! आपको चाहिये कि हम लोगों के साथ, वैसे कर्म्म करें कि जिनसे हम लोगों की प्रीति बढ़े॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कस्त्वा॑ स॒त्यो मदा॑नां॒ मंहि॑ष्ठो मत्स॒दन्ध॑सः। दृ॒ळ्हा चि॑दा॒रुजे॒ वसु॑॥ २॥

कः। त्वा॒। स॒त्यः। मदा॑नाम्। मंहि॑ष्ठः। म॒त्स॒त्। अन्ध॑सः। दृ॒ळ्हा। चि॒त्। आ॒ऽरुजे॑। वसु॑॥ २॥

पदार्थः-(कः) (त्वा) (सत्यः) सत्सु साधुः **(मदानाम्)** आनन्दानाम् **(मंहिष्ठः)** अतिशयेन महान् **(मत्सत्)** आनन्दयेत् **(अन्धसः)** अन्नादेः **(दृळ्हा)** दृढानि **(चित्)** अपि **(आरुजे)** समन्ताद्रोगाय **(वसु)** धनानि॥२॥

अन्वयः-हे मनुष्य! मदानामन्धसो मंहिष्ठः सत्यस्त्वा मत्सदारुजे दृळ्हा वसु चित्को भवेत्॥२॥

भावार्थः-यदि मनुष्या ब्रह्मचर्यादिधर्म्माचरणेन यथावदाहारविहारौ कुर्युस्तर्हि तेषु कदाचिद्दारिद्र्यं रोगश्च नैवागच्छेत्॥२॥

पदार्थः-हे मनुष्य **(मदानाम्)** आनन्दों और **(अन्धसः)** अन्न आदि के सम्बन्ध में **(मंहिष्ठः)** अत्यन्त बड़ा **(सत्यः)** श्रेष्ठों में श्रेष्ठ **(त्वा)** आपको **(मत्सत्)** आनन्द देवे और **(आरुजे)** सब प्रकार से रोग के लिये **(दृळ्हा)** दृढ़ **(वसु)** धनरूप **(चित्)** भी **(कः)** कौन होवे अर्थात् रोग के दूर करने को अत्यन्त संलग्न कौन हो॥२॥

भावार्थः-जो मनुष्य ब्रह्मचर्य्य आदि धर्म्माचरण से यथायोग्य आहार और विहार करें तो उनमें कभी दारिद्र्य और रोग नहीं आवे॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अभी षु णः सखीनामविता जरितॄणाम्। शतं भवास्यूतिभिः॥३॥

अभि। सु। नः। सखीनाम्। अविता। जरितॄणाम्। शतम्। भवासि। ऊतिऽभिः॥३॥

पदार्थः-(अभि) आभिमुख्ये। अत्र **संहितायामिति** दीर्घः। **(सु)** **(नः)** अस्माकम् **(सखीनाम्)** सर्वसुहृदाम् **(अविता)** रक्षकः **(जरितॄणाम्)** सद्विद्याविदाम् **(शतम्)** **(भवासि)** **(ऊतिभिः)** रक्षणादिभिः॥३॥

अन्वयः-हे राजन्! यस्त्वमूतिभिर्जरितॄणां सखीनां नश्शतं भवासि तस्मादभि स्वविता भव॥३॥

भावार्थः-ये मनुष्याः स्वात्मवत्सुखदुःखहानिलाभानन्येषामपि विज्ञाय परप्रियाय वर्त्तेरंस्तेष्वन्येऽपि मैत्रीं कुर्य्युः॥३॥

पदार्थः-हे राजन्! जो आप **(ऊतिभिः)** रक्षणादिकों से **(जरितॄणाम्)** श्रेष्ठ विद्याओं के जानने वाले **(सखीनाम्)** सब के मित्र **(नः)** हम लोगों के **(शतम्)** सैकड़े **(भवासि)** होते हो इससे **(अभि)** सम्मुख **(सु)** उत्तम प्रकार **(अविता)** रक्षक हूजिये॥३॥

भावार्थः-जो मनुष्य अपने आत्मा के सदृश सुख-दुःख, हानि और लाभ को औरों के भी जानकर दूसरे के प्रिय के लिये वर्त्ताव करें, उनमें अन्य जन भी मित्रता करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः। नियुद्भिश्चर्षणीनाम्॥४॥

अभि। नः। आ। ववृत्स्व। चक्रम्। न। वृत्तम्। अर्वतः। नियत्ऽभिः। चर्षणीनाम्॥४॥

पदार्थः-(अभि) अत्र **संहितायामि**ति दीर्घः। **(नः)** अस्मान् **(आ) (ववृत्स्व)** आवर्तय **(चक्रम्) (न)** इव **(वृत्तम्)** सर्वतो दृढम् **(अर्वतः)** अश्वान् **(नियुद्भिः)** वायुगतिभिरिव वेगैः **(चर्षणीनाम्)** मनुष्याणाम्॥४॥

अन्वयः-हे राजँस्त्वं नोऽस्मान् वृत्तं चक्रं न सत्कर्मस्वभ्याववृत्स्व नियुद्भिः सह चर्षणीनामर्वतश्चाभ्याववृत्स्व॥४॥

भावार्थः-हे राजन्! भवान्सत्ये न्याये वर्तित्वास्मानपि वर्तयतु॥४॥

पदार्थः-हे राजन्! आप **(नः)** हम लोगों को **(वृत्तम्)** सब प्रकार से दृढ़ **(चक्रम्)** चक्र के **(न)** सदृश श्रेष्ठ कर्म्मों में **(अभि, आ, ववृत्स्व)** सब ओर से अच्छे प्रकार वर्त्ताइये **(नियुद्भिः)** और वायु के गमनों के सदृश वेगों के साथ **(चर्षणीनाम्)** मनुष्यों के **(अर्वतः)** घोड़ों को वर्त्ताईये॥४॥

भावार्थः-हे राजन्! आप सत्य न्याय में वर्त्ताव करके हम लोगों का भी उसी के अनुसार वर्त्ताव कराइये॥४॥

पुना राजप्रजाधर्मविषयमाह॥

फिर राजप्रजाधर्मविषय को अगले मन्त्र में कहते हैं॥

प्रवता॒ हि क्रतू॑नामा॒ हा॑ पदेव॒ गच्छसि॑। अभ॑क्षि॒ सूर्ये॒ सचा॑॥५॥२४॥

प्र॒ऽवता॑। हि। क्रतू॑नाम्। आ। ह॒। प॒दाऽइ॑व। गच्छ॑सि। अभ॑क्षि। सूर्ये॑। सचा॑॥५॥

पदार्थः-(प्रवता) निम्नेन मार्गेण **(हि)** यतः **(क्रतूनाम्)** प्रज्ञानां कर्मणां वा **(आ) (ह)** खलु। अत्र **निपातस्य च**ेति दीर्घः। **(पदेव)** पद्भ्यामिव **(गच्छसि) (अभक्षि)** सेवे **(सूर्ये)** सवितरि **(सचा)** सत्येन॥५॥

अन्वयः-हे राजँस्त्वं हि क्रतूनां प्रवता मार्गेण पदेवागच्छसि तस्माद्ध तथैव सचा सहाहं सूर्य्ये प्रकाश इव धर्म्ममभक्षि॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथाप्ता विद्वांसः शुद्धेन मार्गेण गत्वा पूर्णां प्रज्ञां प्राप्नुवन्ति तथैवेतरेऽपि वर्त्तित्वा प्रज्ञां प्राप्नुवन्तु॥५॥

पदार्थः-हे राजन्! आप **(हि)** जिससे **(क्रतूनाम्)** बुद्धि वा कर्म्मों के **(प्रवता)** नीचे मार्ग से **(पदेव)** पैरों के सदृश **(आ, गच्छसि)** आते हो इससे **(ह)** निश्चय वैसे ही **(सचा)** सत्य के साथ मैं **(सूर्य्ये)** सूर्य्ये में प्रकाश के सदृश धर्म्म का **(अभक्षि)** सेवन करता हूँ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे श्रेष्ठ विद्वान् लोग शुद्ध मार्ग से जाकर पूर्ण बुद्धि को प्राप्त होते हैं, वैसा ही अन्य जन भी वर्त्ताव करके बुद्धि को प्राप्त हों॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सं यत्ते इन्द्र मन्यवः सं चक्राणि दधन्विरे। अध त्वे अध सूर्ये॥६॥

सम्। यत्। ते। इन्द्र। मन्यवः। सम्। चक्राणि। दधन्विरे। अध। त्वे इति। अध। सूर्ये॥६॥

पदार्थः-(सम्) (**यत्**) ये (**ते**) तव (**इन्द्र**) जीव (**मन्यवः**) क्रोधादयो व्यवहाराः (**सम्**) (**चक्राणि**) चक्रवद्वर्त्तमानानि कर्माणि (**दधन्विरे**) धरन्ति (**अध**) (**त्वे**) त्वयि (**अध**) (**सूर्ये**) सवितरि॥६॥

अन्वयः-हे इन्द्र! ते यन्मन्यवश्चक्राणि संदधन्विरेऽध त्वे धनं दधत्यध ते सूर्य्ये प्रकाश इव प्रतापं संदधन्विरे॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्य! यदि त्वं दुष्टाचारं प्रति क्रोधं श्रेष्ठाचारं प्रत्याह्लादं कुर्यास्तर्हि त्वं सूर्य्य इव प्रतापी भवेः॥६॥

पदार्थः-हे (**इन्द्र**) जीव (**ते**) तेरे (**यत्**) जो (**मन्यवः**) क्रोध आदि व्यवहार (**चक्राणि**) चक्र के सदृश वर्तमान कर्म्मों को (**सम्, दधन्विरे**) धारण करते हैं (**अध**) अनन्तर (**त्वे**) आप में धन को धारण करते (**अध**) इसके अनन्तर वे (**सूर्य्य**) सूर्य्य में प्रकाश के सदृश प्रताप को (**सम्**) धारण करते हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्य! जो तू दुष्ट आचरण करने वाले पर क्रोध और श्रेष्ठ आचरण करने वाले के प्रति हर्ष करे तो सूर्य्य के सदृश प्रतापी होवे॥६॥

पुनः प्रतिज्ञापालकराजप्रजाधर्मविषयमाह॥

फिर प्रतिज्ञा पालने वाले राजप्रजाधर्मविषय को अगले मन्त्र में कहते हैं॥

उत स्मा हि त्वामाहुरिन्मघवानं शचीपते। दातारमविदीधयुम्॥७॥

उत। स्म। हि। त्वाम्। आहुः। इत्। मघऽवानम्। शचीऽपते। दातारम्। अविऽदीधयुम्॥७॥

पदार्थः-(उत) अपि (**स्मा**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**हि**) यतः (**त्वाम्**) (**आहुः**) कथयन्ति (**इत्**) एव (**मघवानम्**) परमपूजितबहुधनम् (**शचीपते**) वाचः प्रज्ञायाः पालक (**दातारम्**) (**अविदीधयुम्**) द्यूतादिदुष्टकर्म्मरहितम्॥७॥

अन्वयः-हे शचीपते राजन्! हि त्वां मघवानमविदीधयुं दातारं स्म विद्वांस आहुरुतापि सेवेरनतस्तमिदेव वयमपि सेवेमहि॥७॥

भावार्थः-हे विद्वांसो! यदि यूयं धर्म्याणि कर्माण्याचरत तर्हि युष्मास्वैश्वर्यं दातृत्वं च कदाचिन्न हीयेत॥७॥

पदार्थः-हे (**शचीपते**) वाणी और बुद्धि के पालन करने वाले राजन्! (**हि**) जिससे (**त्वाम्**) आपको (**मघवानम्**) अत्यन्त श्रेष्ठ बहुत धन वाले (**अविदीधयुम्**) जुआ आदि दुष्ट कर्म्मों से रहित (**दातारम्**) देनेवाला (**स्म**) ही विद्वान् लोग (**आहुः**) कहते हैं (**उत**) और सेवा भी करें, इससे (**इत्**) उन्हीं को हम लोग भी सेवें॥७॥

भावार्थः–हे विद्वानो! जो आप लोग धर्म्मयुक्त कर्म्मों का आचरण करें तो आप लोगों में ऐश्वर्य्य और दानकर्म्म कभी न नष्ट होवें॥७॥

पुनर्न्यायपालनराजप्रजाधर्मविषयमाह॥

फिर न्यायपालन राजप्रजाधर्मविषय को अगले मन्त्र में कहते हैं॥

उ॒त स्मा॑ स॒द्य इत्परि॑ शशमा॒नाय॑ सुन्व॒ते। पु॒रू चि॑न्मंहसे॒ वसु॑॥८॥

उ॒त। स्म॒। स॒द्यः। इत्। परि। श॒श॒मा॒नाय॑। सु॒न्व॒ते। पु॒रु। चि॒त्। मं॒ह॒से॒। वसु॑॥८॥

पदार्थः-(उत) अपि **(स्मा)** एव **(सद्यः)** **(इत्)** **(परि)** सर्वतः **(शशमानाय)** प्रशंसिताय **(सुन्वते)** पुरुषार्थेनाभिषवं कुर्वते **(पुरू)** बहु। अत्र **संहितायामि**ति दीर्घः। **(चित्)** अपि **(मंहसे)** वर्धयसि **(वसु)** धनम्॥८॥

अन्वयः-हे विद्वन्! यतस्त्वं शशमानाय सुन्वते चित् पुरू वसु परि मंहसे तस्मात्त्वं सद्य उत स्मेदैश्वर्य्यं प्राप्नोति॥८॥

भावार्थः–ये मनुष्या आप्तानां सत्कारं कुर्वन्ति ते तूर्णं गुणवन्तो भूत्वैश्वर्य्ययुक्ता भवेयुः॥८॥

पदार्थः–हे विद्वन्! जिससे कि आप **(शशमानाय)** प्रशंसित और **(सुन्वते)** पुरुषार्थ से ओषधियों के रस को उत्पन्न करते हुए के लिये **(चित्)** भी **(पुरू)** बहुत **(वसु)** धन को **(परि)** सब प्रकार **(मंहसे)** बढ़वाते हो इससे आप **(सद्यः)** शीघ्र **(उत)** फिर **(स्म)** ही **(इत्)** निश्चित ऐश्वर्य्य को प्राप्त होते हो॥८॥

भावार्थः–जो मनुष्य यथार्थवक्ता पुरुषों का सत्कार करते हैं, वे शीघ्र गुणवान् होकर ऐश्वर्य्य से युक्त होवें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

न॒हि ष्मा॑ ते श॒तं च॒न राधो॒ वर॑न्त आ॒मुरः॑। न च्यौ॒त्नानि॑ करिष्य॒तः॥९॥

न॒हि। स्म॒। ते॒। श॒तम्। च॒न। राधः॑। वर॑न्ते। आ॒ऽमुरः॑। न। च्यौ॒त्नानि॑। क॒रि॒ष्य॒तः॥९॥

पदार्थः-(नहि) निषेधे **(स्मा)** एव। अत्र **निपातस्य चे**ति दीर्घः। **(ते)** तव **(शतम्)** असंख्यम् **(चन)** अपि **(राधः)** धनम् **(वरन्ते)** स्वीकुर्वन्ति **(आमुरः)** समन्ताद् रोगकारिणः **(न)** **(च्यौत्नानि)** बलानि **(करिष्यतः)**॥९॥

अन्वयः-हे राजन्! च्यौत्नानि करिष्यतस्ते शतं राधश्चनामुरो नहि वरन्ते न च विजयं स्माप्नुवन्ति॥९॥

भावार्थः हे राजन्! यदि भवान् यथावन्न्यायशीलो भवेत्तर्हि तव धनं बलं कदाचिन्न नश्येच्छतशो वर्द्धेत॥९॥

पदार्थः-हे राजन्! **(च्यौत्नानि)** बलों को **(करिष्यतः)** करते हुए **(ते)** आपके **(शतम्)** असंख्य **(राधः)** धन को **(चन)** भी **(आमुरः)** सब प्रकार रोग करने वाले **(नहि)** नहीं **(वरन्ते)** स्वीकार करते हैं **(न)** और न विजय को **(स्म)** ही प्राप्त होते हैं॥९॥

भावार्थः-हे राजन्! जो आप यथायोग्य न्यायकारी होवें तो आपका धन और बल कभी न नष्ट होवे और सैकड़ों प्रकार बढ़े॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्माँ अवन्तु ते शतमस्मान्त्सहस्रमूतयः। अस्मान् विश्वा अभिष्टयः॥१०॥२५॥

अस्मान्। अवन्तु। ते। शतम्। अस्मान्। सहस्रम्। ऊतयः। अस्मान्। विश्वाः। अभिष्टयः॥१०॥

पदार्थः-(अस्मान्) (**अवन्तु**) (**ते**) तव (**शतम्**) असंख्याः (**अस्मान्**) (**सहस्रम्**) बहुविधाः (**ऊतयः**) रक्षाः (**अस्मान्**) (**विश्वाः**) सर्वाः (**अभिष्टयः**) इष्टय इच्छाः॥१०॥

अन्वयः-हे राजन्! ते सहस्रमूतयः शतं विश्वा अभिष्टयोऽस्मानवन्त्वस्मान् वर्द्धयन्त्वस्मानानन्दयन्तु॥१०॥

भावार्थः-हे राजँस्तदैव त्वं सत्यो राजा भवेर्यदा स्वात्मवत्पितृवदस्मान् पालयित्वा वर्द्धयित्वाऽऽनन्दयेः॥१०॥

पदार्थः-हे राजन्! **(ते)** आपकी **(सहस्रम्)** अनेक प्रकार की **(ऊतयः)** रक्षायें **(शतम्)** संख्यारहित **(विश्वाः)** सम्पूर्ण **(अभिष्टयः)** इच्छायें **(अस्मान्)** हम लोगों की **(अवन्तु)** रक्षा और **(अस्मान्)** हम लागों की वृद्धि करें **(अस्मान्)** तथा हम लोगों को आनन्द देवें॥१०॥

भावार्थः-हे राजन्! तभी आप सत्य राजा होवें, जब अपने और पिता के सदृश हम लोगों का पालन और वृद्धि करा के आनन्द देवें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्माँ इहा वृणीष्व सख्याय स्वस्तये। महो राये दिवित्मते॥११॥

अस्मान्। इहा। वृणीष्व। सख्याय। स्वस्तये। महः। राये। दिवित्मते॥११॥

पदार्थः-(अस्मान्) (**इहा**) संसारे राज्ये वा। अत्र **संहितायामिति** दीर्घः। (**वृणीष्व**) स्वीकुर्याः (**सख्याय**) मित्रत्वाय (**स्वस्तये**) सुखाय (**महः**) महते (**राये**) धनाय (**दिवित्मते**) विद्याधर्म्मन्यायप्रकाशिताय॥११॥

अन्वयः-हे इन्द्र! राजँस्त्वमिहास्मान् स्वस्तये महो दिवित्मते सख्याय राये च वृणीष्व॥११॥

भावार्थः–हे राजन्! यथा भवानस्मासु मैत्रीं रक्षति तथा वयमपि त्वयि सदैव सखायः सन्तो वर्त्तेमहि॥११॥

पदार्थः–हे तेजस्वी राजन्! आप **(इह)** इस संसार वा राज्य में **(अस्मान्)** हम लोगों को **(स्वस्तये)** सुख के लिये **(महः)** बड़े **(दिवित्मते)** विद्या, धर्म्म और न्याय से प्रकाशित **(सख्याय)** मित्रत्व के लिये और **(राये)** धन के लिये **(वृणीष्व)** स्वीकार करो॥११॥

भावार्थः–हे राजन्! जैसे आप हम लोगों में मित्रता रखते हैं, वैसे हम लोग भी आप में सदा ही मित्र हुए वर्त्ताव करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒स्माँ अ॑विड्ढि वि॒श्वहेन्द्र रा॒या परी॑णसा। अ॒स्मान् विश्वा॑भिरू॒तिभि॑:॥ १२॥

अ॒स्मान्। अ॒वि॒ड्ढि॒। वि॒श्वहा॑। इन्द्र॑। रा॒या। परी॑णसा। अ॒स्मान्। विश्वा॑भिः। ऊ॒तिऽभि॑:॥ १२॥

पदार्थः-(अस्मान्) (अविड्ढि) प्रवेशय **(विश्वहा)** सर्वाणि दिनानि **(इन्द्र)** परमैश्वर्य्ययुक्त राजन् **(राया)** धनेन **(परीणसा)** बहुविधेन **(अस्मान्) (विश्वाभिः)** अखिलाभिः **(ऊतिभिः)** रक्षादिभिः क्रियाभिः॥१२॥

अन्वयः-हे इन्द्र! त्वं विश्वहा परीणसा राया सहास्मानविड्ढि विश्वाभिरूतिभि-रस्मानविड्ढि॥१२॥

भावार्थः–स एवोत्तमो राजा राजपुरुषाश्च ये सर्वतो रक्षणेन प्रजा धनाढ्याः कुर्य्युः॥१२॥

पदार्थः–हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य से युक्त राजन्! आप **(विश्वहा)** सम्पूर्ण दिनों को **(परीणसा)** अनेक प्रकार के **(राया)** धन के साथ **(अस्मान्)** हम लोगों को **(अविड्ढि)** प्रवेश कराइये और **(विश्वाभिः)** सम्पूर्ण **(ऊतिभिः)** रक्षा आदि क्रियाओं से हम लोगों को प्रवेश कराईये अर्थात् युक्त करिये॥१२॥

भावार्थः–वही उत्तम राजा और राजपुरुष हैं कि जो सब प्रकार रक्षा से प्रजा को धनाढ्य करें॥१२॥

पुनः प्रजावर्द्धनप्रकारेण राजप्रजाधर्मविषयमाह॥

फिर प्रजावृद्धिप्रकार से राजप्रजाधर्म विषय को अगले मन्त्र में कहते हैं॥

अ॒स्मभ्यं॒ ताँ अपा॑ वृधि व्र॒जाँ अस्ते॑व॒ गोम॑तः। नवा॑भिरिन्द्रो॒तिभि॑:॥ १३॥

अ॒स्मभ्य॑म्। तान्। अप॑। वृ॒धि॒। व्र॒जान्। अस्ता॑ऽइव। गोऽम॑तः। नवा॑भिः। इ॒न्द्र॒। ऊ॒तिऽभि॑:॥ १३॥

पदार्थः-(अस्मभ्यम्) (तान्) (अपा) अत्र **निपातस्य चे**ति दीर्घः। **(वृधि)** वर्धय **(व्रजान्)** व्रजन्ति गावो येषु तान् **(अस्तेव)** गृहाणीव **(गोमतः)** बह्व्यो गावो विद्यन्ते येषु तान् **(नवाभिः)** नूतनाभिः **(इन्द्र)** परमैश्वर्य्यप्रद राजन् **(ऊतिभिः)** रक्षादिभिः॥१३॥

अन्वयः-हे इन्द्र! त्वं नवाभिरूतिभिरस्मभ्यं गोमतो व्रजाँस्तानस्तेव वृधि दुःखान्यपावृधि॥१३॥

भावार्थः-हे राजन्! यथा गोपाला गा वर्धयित्वा दुग्धादिभिराढ्या भूत्वाऽऽनन्दन्ति तथैवाऽऽस्मान् वर्धयित्वाऽढ्यो भूत्वा सदैवानन्द॥१३॥

पदार्थः-हे **(इन्द्र)** परम ऐश्वर्य्य के देनेवाले राजन्! आप **(नवाभिः)** नवीन **(ऊतिभिः)** रक्षादिकों से **(अस्मभ्यम्)** हम लोगों के लिये **(गोमतः)** जिनमें बहुत गौएँ विद्यमान और **(व्रजान्)** बहुत गौएँ जातीं **(तान्)** उन गोड़ों **(अस्तेव)** गृहों के समान बढ़ाइये और दुःखों को **(अपा, वृधि)** न्यून कीजिये, नष्ट कीजिये॥१३॥

भावार्थः-हे राजन्! जैसे गोपाल गौओं को बढ़ा के दुग्धादिकों से आढ्य होते हैं, वैसे ही हम लोगों की वृद्धि करो और आढ्य होकर सदैव आनन्द कीजिये॥१३॥

पुना राजप्रजाधर्मविषयमाह॥

फिर राजाप्रजा धर्मविषय को अगले मन्त्र में कहते हैं॥

अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः। गव्युरश्वयुरीयते॥१४॥

अस्माकम्। धृष्णुऽया। रथः। द्युऽमान्। इन्द्र। अनपऽच्युतः। गव्युः। अश्वऽयुः। ईयते॥१४॥

पदार्थः-(अस्माकम्) (धृष्णुया) दृढत्वेन युक्तः **(रथः)** सद्यो गमयिता विमानादियानविशेषः **(द्युमान्)** बहुकलायन्त्रादिप्रकाशित **(इन्द्र)** राजन्! **(अनपच्युतः)** अपचयरहितः **(गव्युः)** बहवो गावो विद्यन्ते यस्मिन् सः **(अश्वयुः)** बह्वश्वबलयुक्तः **(ईयते)** गच्छति॥१४॥

अन्वयः-हे इन्द्र! योऽस्माकं धृष्णुया द्युमाननपच्युतो गव्युरश्वयू रथ ईयते तेन सह शत्रून् विजयस्व॥१४॥

भावार्थः-राजा प्रजाजनाश्चैवं मन्येरन् ये राज्ञः पदार्थास्तेऽस्माकं येऽस्माकं ते च राज्ञस्सन्तीति॥१४॥

पदार्थः-हे **(इन्द्र)** राजन्! जो **(अस्माकम्)** हम लोगों को **(धृष्णुया)** दृढ़ता से युक्त **(द्युमान्)** बहुत कलायन्त्र आदि से प्रकाशित **(अनपच्युतः)** घटने से रहित **(गव्युः)** बहुत गौओं और **(अश्वयुः)** बहुत घोड़ों के बल से युक्त **(रथः)** शीघ्र पहुँचानेवाला विमान आदि विशेष वाहन **(ईयते)** जाता है, उसके साथ शत्रुओं को जीतिये॥१४॥

भावार्थः-राजा और प्रजाजन ऐसा मानें कि जो राजा के पदार्थ वे हम लोगों के और जो हम लोगों के वे राजा के हैं॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒स्माक॑मुत्त॒मं कृ॑धि॒ श्रवो॑ दे॒वेषु॑ सूर्य। वर्षि॑ष्ठं द्यामि॑वो॒परि॑॥ १५॥ २६॥

अ॒स्माक॑म्। उ॒त्ऽत॒मम्। कृ॒धि॒। श्रवः॑। दे॒वेषु॑। सूर्य॒। वर्षि॑ष्ठम्। द्याम्ऽइ॑व। उ॒परि॑॥ १५॥ २६॥

पदार्थः-(अस्माकम्) (उत्तमम्) अतिश्रेष्ठम् **(कृधि)** कुरु **(श्रवः)** अन्नादिकं श्रवणं वा **(देवेषु)** विद्वत्सु **(सूर्य्य)** सूर्य इव वर्त्तमान **(वर्षिष्ठम्)** अतिशयेन वृद्धम् **(द्यामिव)** प्रकाशमिव **(उपरि)** ऊर्ध्वं वर्त्तमानम्॥ १५॥

अन्वयः-हे सूर्य्य राजँस्त्वमुपरि द्यामिवाऽस्माकमुत्तमं वर्षिष्ठं श्रवो देवेषु कृधि॥ १५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथाऽऽकाशे सूर्य्यो महानस्ति तथैव विद्याविनयोन्नत्या सर्वोत्कृष्टमैश्वर्य्यं जनयतेति॥ १५॥

अत्र राजप्रजाधर्म्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकत्रिंशत्तमं सूक्तं षड्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सूर्य्य)** सूर्य्य के सदृश वर्त्तमान राजन्! आप **(उपरि)** ऊपर वर्त्तमान **(द्यामिव)** प्रकाश के सदृश **(अस्माकम्)** हम लोगों के **(उत्तमम्)** अत्यन्त श्रेष्ठ **(वर्षिष्ठम्)** अत्यन्त बड़े हुए **(श्रवः)** अन्न आदि वा श्रवण को **(देवेषु)** विद्वानों में **(कृधि)** करिये॥ १५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे आकाश में सूर्य्य बड़ा है, वैसे ही विद्या और विनय की उन्नति से उत्तम ऐश्वर्य्य को उत्पन्न करो॥ १५॥

इस सूक्त में राजा और प्रजा के धर्म्म वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकतीसवां सूक्त और छब्बीसवां वर्ग समाप्त हुआ॥

अथ चतुर्विंशत्यृचस्य द्वात्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। १-२२ इन्द्रः। २३, २४ इन्द्राश्वौ देवते। १, ८-१०, १४, १६, १८, २२, २३ गायत्री। २, ४, ७ विराड्गायत्री। ३, ५, ६, १२, १३, १५, १९-२१ निचृद्गायत्री। ११ पिपीलिकामध्या गायत्री छन्दः। १७ पादनिचृद्गायत्री। २४ स्वराडार्ची गायत्री च छन्दः। षड्जः स्वरः॥

अथेन्द्रपदवाच्यराजप्रजागुणानाह॥

अब चौबीस ऋचा वाले बत्तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजप्रजागुणों को कहते हैं॥

आ तू न॑ इन्द्र वृत्रहन्नस्माक॒मर्धमा ग॑हि। म॒हान् म॒हीभि॑रू॒तिभि॑:॥ १॥

आ। तु। नः। इन्द्र। वृत्रऽहन्। अस्माक॑म्। अर्धम्। आ। गहि। महान्। महीभि॑:। ऊतिऽभि॑:॥ १॥

पदार्थः-(आ) समन्तात् **(तु)** पुनः **(नः)** अस्मान् **(इन्द्र)** राजन्! **(वृत्रहन्)** यो वृत्रं हन्ति सूर्यस्तद्वत् **(अस्माकम्)** **(अर्द्धम्)** वर्धनम् **(आ, गहि)** आगच्छ **(महान्)** **(महीभिः)** महतीभिः **(ऊतिभिः)** रक्षादिभिः॥ १॥

अन्वयः-हे वृत्रहन्निन्द्र! त्वमस्माकमर्द्धमागहि महीभिरूतिभिस्सह महान् सन्नोऽस्माँस्त्वागहि॥ १॥

भावार्थः-हे राजन्! यदि भवानस्माकं वृद्धिं कुर्यात्तर्हि वयं भवन्तमति वर्धयेम॥ १॥

पदार्थः-हे **(वृत्रहन्)** मेघ को नाश करनेवाले सूर्य के सदृश **(इन्द्र)** राजन्! आप **(अस्माकम्)** हम लोगों की **(अर्द्धम्)** वृद्धि को **(आ, गहि)** प्राप्त हूजिये और **(महीभिः)** बड़ी **(ऊतिभिः)** ऊतियों अर्थात् रक्षादिकों के साथ **(महान्)** बढ़े हुए **(नः)** हम लोगों को **(तु)** फिर **(आ)** प्राप्त होओ॥ १॥

भावार्थः-हे राजन्! जो आप हम लोगों की वृद्धि करें तो हम लोग आपकी अतिवृद्धि करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भूमि॑श्चिद् घा॒सि तूतु॑जि॒रा चि॑त्र चि॒त्रिणी॒ष्वा। चि॒त्रं कृ॑णोष्यू॒तये॑॥ २॥

भूमि॑:। चि॒त्। घ॒। अ॒सि॒। तूतु॑जिः। आ। चि॒त्र॒। चि॒त्रिणी॑षु। आ। चि॒त्रम्। कृ॒णो॒षि॒। ऊ॒तये॑॥ २॥

पदार्थः-(भूमिः) भ्रमणशीलः **(चित्)** अपि **(घ)** **(असि)** अभीष्टकारी भवसि **(तूतुजिः)** शीघ्रकारी **(आ)** **(चित्र)** आश्चर्यगुणकर्मस्वभाव **(चित्रिणीषु)** अद्भुतासु सेनासु **(आ)** **(चित्रम्)** अद्भुतम् **(कृणोषि)** **(ऊतये)** रक्षाद्याय॥ २॥

अन्वयः-हे चित्र! तूतुजिर्भूमिस्त्वमूतये चित्रिणीषु चित्रमाकृणोषि चिदाघासि तस्मात् सत्कर्त्तव्योऽसि॥ २॥

भावार्थः–हे राजन्! यदि भवान्त्सर्वत्र भ्रमित्वा सद्यो न्यायं कृत्वा सर्वस्य रक्षां कुर्यात्तर्हि भवत आश्चर्याः प्रजा अद्भुतमैश्वर्यमुन्नयेयुः॥२॥

पदार्थः–हे **(चित्र)** आश्चर्य्यवान् गुण, कर्म स्वभावयुक्त **(तूतुजिः)** शीघ्रकारी **(भृमिः)** घूमने वाले आप **(ऊतये)** रक्षा आदि के लिये **(चित्रिणीषु)** अद्भुत सेनाओं में **(चित्रम्)** अद्भुत व्यवहार को **(आ, कृणोषि)** करते हो **(चित्)** और **(आ, घ, असि)** अभीष्टकारी होते हो, इससे सत्कार करने योग्य हो॥२॥

भावार्थः–हे राजन्! जो आप सब जगह घूमके शीघ्र न्याय करके सब की रक्षा करें तो आपकी आश्चर्यजनक प्रजा अद्भुत ऐश्वर्य की उन्नति करे॥२॥

पुनस्तमेव राजप्रजाविषयमाह॥

फिर उसी राजप्रजाविषय को अगले मन्त्र में कहते हैं॥

दभ्रेभिश्चिच्छशीयांसं हंसि व्राधन्तमोजसा। सखिभिर्ये त्वे सचा॥३॥

दभ्रेभिः। चित्। शशीयांसम्। हंसि। व्राधन्तम्। ओजसा। सखिऽभिः। ये। त्वे इति। सचा॥३॥

पदार्थः-(दभ्रेभिः) अल्पैर्ह्रस्वैर्वा **(चित्)** अपि **(शशीयांसम्)** धर्ममुत्प्लवमानम् **(हंसि)** **(व्राधन्तम्)** व्याधमिव प्रजाहिंसकम् **(ओजसा)** बलेन **(सखिभिः)** सुहृद्भिः **(ये)** **(त्वे)** त्वयि **(सचा)**॥३॥

अन्वयः-हे सेनेश राजन्! यदि त्वं दभ्रेभिः सखिभिश्चिदोजसा शशीयांसं व्राधन्तं हंसि ये च त्वे सचा सत्येन वर्त्तन्ते तान् रक्षसि तर्हि विजयं कथन्न प्राप्नोसि॥३॥

भावार्थः–यदि धार्मिका अल्पा अपि परस्परं सुहृदो भूत्वा शत्रुभिस्सह युद्धेरँस्तर्हि बहूनप्यधर्माचारिणो विजयेरन्॥३॥

पदार्थः–हे सेनापति राजन्! जो आप **(दभ्रेभिः)** थोड़े वा छोटे **(सखिभिः)** मित्रों से **(चित्)** भी **(ओजसा)** बल से **(शशीयांसम्)** धर्म्म के उल्लङ्घन करने और **(व्राधन्तम्)** बहिलिये के सदृश प्रजा के नाश करने वाले का **(हंसि)** नाश करते हो और **(ये)** जो **(त्वे)** आप में **(सचा)** सत्य से वर्त्तमान हैं, उनकी रक्षा करते हो तो विजय को कैसे न प्राप्त होते हो॥३॥

भावार्थः–जो धार्मिक थोड़े भी परस्पर मित्र होकर शत्रुओं के साथ युद्ध करें तो बहुत अधर्म्माचारियों को जीतें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वयमिन्द्र त्वे सचा वयं त्वाभि नोनुमः। अस्माँअस्माँ इदुदव॥४॥

व॒यम्। इ॒न्द्र॒। त्वे। इति॑। सचा॑। व॒यम्। त्वा॒। अ॒भि। नो॒नु॒मः॒। अ॒स्मान्ऽअ॑स्मान्। इत्। उत्। अ॒व॒॥४॥

पदार्थः-(वयम्) (इन्द्र) राजन् **(त्वे)** त्वयि **(सचा)** सत्याचारेण **(वयम्) (त्वा)** त्वाम् **(अभि, नोनुमः)** भृशं नताः स्मः **(अस्मानस्मान्) (इत्)** एव **(उत्) (अव)** रक्ष॥४॥

अन्वयः-हे इन्द्र! ये वयं त्वे सचा वर्त्तेमहि वयं त्वाभिनोनुमस्तानस्मानस्मान् सततमिदुदव॥४॥

भावार्थः-हे राजन्! यथा वयं त्वयि सत्यभावेन वर्त्तेमहि प्रीत्या भवन्तं सत्कुर्याम तथैव भवानस्मान्त्सततं वर्धयेत्॥४॥

पदार्थः-हे **(इन्द्र)** राजन्! जो **(वयम्)** हम लोग **(त्वे)** आप में **(सचा)** सत्य आचरण से वर्त्ताव करें और **(वयम्)** हम लोग **(त्वा)** आपको **(अभि, नोनुमः)** सब प्रकार निरन्तर नमस्कार करते हैं, उन **(अस्मानस्मान्)** हम लोगों की हम लोगों की निरन्तर **(इत्, उत)** निश्चित ही **(अव)** रक्षा करो॥४॥

भावार्थः-हे राजन्! जैसे हम लोग आप में सत्यभाव से वर्त्ताव और प्रीति से आप का सत्कार करें, वैसे ही आप हम लोगों की निरन्तर वृद्धि करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः। अनाधृष्टाभिरागहि॥५॥२७॥

सः। नः। चित्राभिः। अद्रिऽवः। अनवद्याभिः। ऊतिऽभिः। अनाधृष्टाभिः। आ। गहि॥५॥२७॥

पदार्थः-(सः) (नः) अस्माकम् **(चित्राभिः)** अद्भुताभिः **(अद्रिवः)** अद्रयो मेघा विद्यन्ते सम्बन्धे यस्य सूर्यस्य तद्वद्वर्त्तमान **(अनवद्याभिः)** प्रशंसनीयाभिः **(ऊतिभिः)** रक्षादिभिः **(अनाधृष्टाभिः)** शत्रुभिर्धर्षितुमयोग्याभिः **(आ, गहि)** प्राप्नुयाः॥५॥

अन्वयः-हे अद्रिवो राजन्! स त्वं चित्राभिरनवद्याभिरनाधृष्टाभिरूतिभिः सह नोऽस्मानागहि॥५॥

भावार्थः-हे प्रजाजना यथा राजा युष्मान् सर्वतो रक्षेत्तथा यूयमपि राजानं सर्वथा रक्षत॥५॥

पदार्थः-हे **(अद्रिवः)** मेघों के सम्बन्ध से युक्त सूर्य्य के सदृश वर्त्तमान राजन्! **(सः)** वह आप **(चित्राभिः)** अद्भुत **(अनवद्याभिः)** प्रशंसा करने योग्य **(अनाधृष्टाभिः)** शत्रुओं से दबाने को नहीं योग्य **(ऊतिभिः)** रक्षादिकों के साथ **(नः)** हम लोगों को **(आ, गहि)** प्राप्त हूजिये॥५॥

भावार्थः-हे प्रजाजनो! जैसे राजा आप लोगों की सब प्रकार रक्षा करे, वैसे आप लोग भी राजा की सब प्रकार रक्षा करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भूयामो॒ षु त्वाव॑तः॒ सखा॑य इन्द्र॒ गोम॑तः। युजो॒ वाजा॑य॒ घृष्व॑ये॥६॥

भूयामो॒ इति॑। सु। त्वाऽव॑तः। सखा॑यः। इ॒न्द्र॒। गोऽम॑तः। युज॑ः। वाजा॑य। घृष्व॑ये॥६॥

पदार्थः-(भूयामो) भवेम। अत्र **वाच्छन्दसी**त्यस्योत्वम् **(सु)** शोभने **(त्वावतः)** त्वया रक्षिताः **(सखायः)** सुहृदः **(इन्द्र)** राजन् **(गोमतः)** गावो विद्यन्ते येषान्ते **(युजः)** ये युञ्जते तान् **(वाजाय)** विज्ञानायाऽन्नाय वा **(घृष्वये)** घर्षणाय॥६॥

अन्वयः-हे इन्द्र! त्वावतः सखायो वयं घृष्वये वाजाय गोमतो युजः प्राप्य सुभूयामो॥६॥

भावार्थः-हे राजन्! यदि भवान् पृथिव्यादियुक्तानस्मानैश्वर्येण सह योजयेत्तर्हि वयमपि त्वया सह युञ्जीमहि॥६॥

पदार्थः-हे **(इन्द्र)** राजन्! **(त्वावतः)** आपसे रक्षित **(सखायः)** मित्र हम लोग **(घृष्वये)** घिसने और **(वाजाय)** विज्ञान वा अन्न के लिये **(गोमतः)** गौओं से युक्त **(युजः)** युक्त होने वालों को प्राप्त होकर **(सु)** सुन्दर **(भूयामो)** होवें॥६॥

भावार्थः-हे राजन्! जो आप पृथिवी आदि से युक्त हम लोगों को ऐश्वर्य्य के साथ युक्त करें तो हम लोग भी आपके साथ युक्त हों॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं ह्येक॒ ईशि॑ष॒ इन्द्र॒ वाज॑स्य॒ गोम॑तः। स नो॑ यन्धि म॒हीमिष॑म्॥७॥

त्वम्। हि। एक॑ः। ईशि॑षे। इन्द्र॑। वाज॑स्य। गोऽम॑तः। सः। न॒ः। य॒न्धि॒। म॒हीम्। इष॑म्॥७॥

पदार्थः-(त्वम्) **(हि)** यतः **(एकः)** असहायः **(ईशिषे)** **(इन्द्र)** परमैश्वर्य्ययुक्त विद्वन्! **(वाजस्य)** विज्ञानादियुक्तस्य **(गोमतः)** बहुविधपृथिव्यादिसहितस्य **(सः)** **(नः)** अस्मभ्यम् **(यन्धि)** प्रयच्छ **(महीम्)** महतीम् **(इषम्)** अन्नादिकम्॥७॥

अन्वयः-हे इन्द्र! यो ह्येकस्त्वं गोमतो वाजस्येशिषे स नो महीमिषं यन्धि॥७॥

भावार्थः-यो विद्वान् पुरुषार्थेन महदैश्वर्य्यं प्राप्यान्येभ्यो ददाति स एव सर्वेषामीश्वरो भवति॥७॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त विद्वान् जो **(हि)** जिससे **(एकः)** सहायरहित **(त्वम्)** आप **(गोमतः)** बहुत प्रकार की पृथिवी आदि के सहित **(वाजस्य)** विज्ञान आदि से युक्त जनसमूह के **(ईशिषे)** स्वामी हो **(सः)** वह **(नः)** हम लोगों के लिये **(महीम्)** बड़े **(इषम्)** अन्न आदि को **(यन्धि)** दीजिये॥७॥

भावार्थः-जो विद्वान् पुरुषार्थ से बड़े ऐश्वर्य्य को प्राप्त होकर अन्य जनों के लिये देता है, वही सब का ईश्वर होता है॥७॥

अथाध्यापकोपदेशकगुणानाह॥

अब अध्यापक और उपदेशक के गुणों को अगले मन्त्र में कहते हैं॥

न त्वा॑ वरन्ते अ॒न्यथा॒ यद्दित्स॑सि स्तु॒तो म॒घम्। स्तो॒तृभ्य॑ इन्द्र गिर्वणः॥८॥

न। त्वा॒। व॒र॒न्ते॒। अ॒न्यथा॑। यत्। दित्स॑सि। स्तु॒तः। म॒घम्। स्तो॒तृऽभ्यः॑। इ॒न्द्र॒। गि॒र्व॒णः॥८॥

पदार्थः-(न) (**त्वा**) त्वाम् (**वरन्ते**) स्वीकुर्वन्ति (**अन्यथा**) (**यत्**) यः (**दित्ससि**) दातुमिच्छसि (**स्तुतः**) प्रशंसितः (**मघम्**) धनम् (**स्तोतृभ्यः**) विद्वद्भ्यः (**इन्द्र**) राजन् (**गिर्वणः**) गीर्भिस्सत्कृत॥८॥

अन्वयः-हे गिर्वण इन्द्र! यद्यः स्तुतः सँस्त्वं स्तोतृभ्यो मघं दित्ससि तं त्वाऽन्यथा मनुष्या न वरन्ते॥८॥

भावार्थः-योऽत्र दाता भवति स एव सर्वेषां प्रियो जायते नैव तस्य कोऽपि विरोधी भवति॥८॥

पदार्थः-हे (**गिर्वणः**) वाणियों से सत्कार को प्राप्त (**इन्द्र**) राजन्! (**यत्**) जो (**स्तुतः**) प्रशंसा किये गये आप (**स्तोतृभ्यः**) विद्वानों के लिये (**मघम्**) धन को (**दित्ससि**) देने की इच्छा करते हो उन (**त्वा**) आपको (**अन्यथा**) अन्य प्रकार से मनुष्य (**न**) नहीं (**वरन्ते**) स्वीकार करते हैं॥८॥

भावार्थः-जो इस संसार में देनेवाला होता है, वही सब का प्रिय होता और कोई भी उसका विरोधी नहीं होता है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒भि त्वा॒ गोत॑मा गि॒रानू॑षत॒ प्र दा॒वने॑। इन्द्र॒ वाजा॑य॒ घृष्व॑ये॥९॥

अ॒भि। त्वा॒। गोत॑माः। गि॒रा। अनू॑षत। प्र। दा॒वने॑। इन्द्र॑। वाजा॑य। घृष्व॑ये॥९॥

पदार्थः-(अभि) (**त्वा**) त्वाम् (**गोतमाः**) प्रशस्ता गोर्वाग्विद्यते येषान्ते। **गौरिति वाङ्नामसु पठितम्।** (निघं०१.११) (**गिरा**) वाण्या (**अनूषत**) स्तुवन्तु (**प्र**) (**दावने**) दात्रे (**इन्द्र**) राजन् (**वाजाय**) विज्ञानाऽन्नाद्याय (**घृष्वये**) घर्षिताय शुद्धाय॥९॥

अन्वयः-हे इन्द्र! ये गोतमा गिरा त्वाभ्यनूषत वाजाय घृष्वये दावने प्राऽनूषत तांस्त्वं प्रशंस॥९॥

भावार्थः-यस्य प्रशंसां विद्वांसः कुर्वन्ति स एव प्रशंसितो मन्तव्यः॥९॥

पदार्थः-हे (**इन्द्र**) राजन्! (**गोतमाः**) श्रेष्ठ वाणी से युक्त जन (**गिरा**) वाणी से (**त्वा**) आपकी (**अभि, अनूषत**) सब ओर से स्तुति करें (**वाजाय**) विज्ञान और अन्न आदि के (**घृष्वये**) घिसे अर्थात् शुद्ध और (**दावने**) देनेवाले के लिये (**प्र**) उत्तम प्रकार स्तुति करें, उनकी आप प्रशंसा करो॥९॥

भावार्थः-जिसकी प्रशंसा विद्वान् जन करते हैं, वही प्रशंसित मानने के योग्य है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र ते॑ वोचाम वी॒र्या३॑ या म॑न्दसा॒न आरु॑जः। पुरो॒ दासी॑रभीत्य॑॥ १०॥ २८॥

प्र। ते॒। वो॒चा॒म॒। वी॒र्या॑। याः। म॒न्द॒सा॒नः। आ। अरु॑जः। पुरः॑। दासीः॑। अ॒भि॒ऽइत्य॑॥ १०॥

पदार्थः-(प्र) (**ते**) तव (**वोचाम**) उपदिशेम (**वीर्या**) बलपराक्रमयुक्तानि कर्म्माणि (**याः**) (**मन्दसानः**) कामयमानः (**आ, अरुजः**) समन्ताद्रोगयुक्ताः (**पुरः**) नगरीः (**दासीः**) सेविकाः (**अभीत्य**) अभितः प्राप्य॥ १०॥

अन्वयः-हे राजन्! मन्दसानस्त्वं शत्रूणां या दासीरिवारुजः पुरोऽभीत्य विजयसे तस्य ते वीर्या वयं प्रवोचाम॥ १०॥

भावार्थः-यो राजा शत्रूणां पराजयं कर्त्तुं शक्नुयात् स एव राज्यं कर्तुमर्हेत्॥ १०॥

पदार्थः-हे राजन्! (**मन्दसानः**) कामना करते हुए आप शत्रुओं की (**याः**) जो (**दासीः**) सेविकाओं के सदृश (**आ, अरुजः**) सब प्रकार रोगयुक्त (**पुरः**) नगरियों को (**अभीत्य**) सब ओर से प्राप्त होकर जीतते हो उन (**ते**) आपके (**वीर्य्या**) बल, पराक्रम से युक्त कर्म्मों का हम लोग (**प्र, वोचाम**) उपदेश करें॥ १०॥

भावार्थः-जो राजा शत्रुओं का पराजय कर सके, वही राज्य करने को योग्य हो॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ता ते॑ गृणन्ति वे॒धसो॒ यानि॑ च॒कर्थ॑ पौंस्या॑। सु॒तेष्वि॑न्द्र गिर्वणः॥ ११॥

ता। ते॒। गृ॒ण॒न्ति॒। वे॒धसः॑। यानि॒। च॒कर्थ॑। पौंस्या॑। सु॒तेषु॑। इ॒न्द्र॒। गि॒र्व॒णः॥ ११॥

पदार्थः-(ता) तानि (**ते**) तव (**गृणन्ति**) (**वेधसः**) मेधाविनः (**यानि**) (**चकर्थ**) करोषि (**पौंस्या**) पुंभ्यो हितानि बलानि (**सुतेषु**) निष्पन्नेषु पदार्थेषु (**इन्द्र**) राजन् (**गिर्वणः**) गीर्भिः स्तुत॥ ११॥

अन्वयः-हे गिर्वण इन्द्र! यानि वेधसस्ते पौंस्या गृणन्ति यानि त्वं सुतेषु चकर्थ ता वयं प्रशंसेम॥ ११॥

भावार्थः-तान्येव प्रशंसनीयानि कर्माणि भवन्ति यान्याप्ता प्रशंसेयुः॥ ११॥

पदार्थः-हे (**गिर्वणः**) वाणियों से स्तुति किये गये (**इन्द्र**) राजन्! (**यानि**) जो (**वेधसः**) बुद्धिमान् (**ते**) आपके (**पौंस्या**) पुरुषों के लिये हितकारक बलों को (**गृणन्ति**) कहते हैं और जिनको आप (**सुतेषु**) उत्पन्न पदार्थों में (**चकर्थ**) करते हो (**ता**) उनकी हम लोग प्रशंसा करें॥ ११॥

भावार्थः-वे ही प्रशंसा करने योग्य कर्म्म होते हैं कि जिनकी यथार्थवक्ता जन प्रशंसा करें॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः। एषु धा वीरवद्यशः॥ १२॥

अवीवृधन्त। गोतमाः। इन्द्र। त्वे इति। स्तोमऽवाहसः। आ। एषु। धाः। वीरऽवत्। यशः॥ १२॥

पदार्थः-(अवीवृधन्त) वर्धन्तु **(गोतमाः)** विद्वांसः **(इन्द्र)** विद्वन्! **(त्वे)** त्वयि **(स्तोमवाहसः)** प्रशंसाप्रापकाः **(आ) (एषु) (धाः)** धेहि **(वीरवत्)** वीरा विद्यन्ते यस्मिंस्तत् **(यशः)** कीर्तिं धनं वा॥ १२॥

अन्वयः-हे इन्द्र! ये स्तोमवाहसो गोतमास्त्वे वीरवद्यशोऽवीवृधन्तैषु त्वं वीरवद्यश आ धाः॥ १२॥

भावार्थः-हे राजन्! ये सत्कर्मणा तव कीर्त्तिं वर्धयेयुस्तेषां कीर्त्तिं त्वमपि वर्धय॥ १२॥

पदार्थः-हे **(इन्द्र)** विद्वन् जो **(स्तोमवाहसः)** प्रशंसा को प्राप्त करानेवाले **(गोतमाः)** विद्वान् जन **(त्वे)** आप में **(वीरवत्)** वीर पुरुष जिसमें विद्यमान उस **(यशः)** कीर्ति वा धन को **(अवीवृधन्त)** बढ़ावें **(एषु)** इनमें आप वीरयुक्त कीर्ति वा धन को **(आ, धाः)** अच्छे प्रकार धारण कीजिये॥ १२॥

भावार्थः-हे राजन्! जो लोग उत्तम कर्म्म से आपकी कीर्ति को बढ़ावें, उनकी कीर्ति आप भी बढ़ाइये॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम्। तं त्वा वयं हवामहे॥ १३॥

यत्। चित्। हि। शश्वताम्। असि। इन्द्र। साधारणः। त्वम्। तम्। त्वा। वयम्। हवामहे॥ १३॥

पदार्थः-(यत्) यः **(चित्)** अपि **(हि)** खलु **(शश्वताम्)** अनादिभूतानां मध्ये **(असि) (इन्द्र)** परमैश्वर्य्ययुक्त परमेश्वर **(साधारणः)** सामान्येन व्याप्तः **(त्वम्) (तम्) (त्वा)** त्वाम् **(वयम्) (हवामहे)** स्तूमह आश्रयेम॥ १३॥

अन्वयः-हे इन्द्र जगदीश्वर! यद्यस्त्वं शश्वतां प्रकृत्यादीनां मध्ये साधारणोऽसि तं चित् वा हि वयं हवामहे॥ १३॥

भावार्थः-हे मनुष्या! यः परमेश्वरः सनातनानां स्वामी धर्ता स कार्यनिर्माता व्यवस्थापकोऽन्तर्यामी वर्त्तते तमेव सदोपासीरन्॥ १३॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त जगदीश्वर! **(यत्)** जो **(त्वम्)** आप **(शश्वताम्)** अनादि काल से हुए प्रकृति आदि पदार्थों के मध्य में **(साधारणः)** सामान्य से व्याप्त **(असि)** होते हो **(तम्, चित्)** उन्हीं **(त्वा)** आपकी **(हि)** निश्चय **(वयम्)** हम लोग **(हवामहे)** स्तुति करते वा आपका आश्रय

करते हैं॥१३॥

भावार्थः-हे मनुष्यो! जो परमेश्वर अनादि काल से सिद्ध प्रकृति आदि पदार्थों का स्वामी, उनका धारण करनेवाला, वह कार्य्य का निर्माणकर्ता और कार्य्यों की व्यवस्था करनेवाला अन्तर्यामी है, उसी की सदा उपासना करो॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒र्वा॒ची॒नो व॑सो भवा॒स्मे सु म॒त्स्वान्ध॑सः। सोमा॑नामिन्द्र सोमपाः॥१४॥

अ॒र्वा॒ची॒नः। व॒सो॒ इति॑। भ॒व॒। अस्मे इति॑। सु। म॒त्स्व॒। अन्ध॑सः। सोमा॑नाम्। इ॒न्द्र॒। सो॒म॒ऽपाः॥१४॥

पदार्थः-(अर्वाचीनः) इदानीन्तनः **(वसो)** वासकर्त्तः **(भव)** **(अस्मे)** अस्मासु **(सु)** **(मत्स्व)** आनन्द **(अन्धसः)** अन्नादेः **(सोमानाम्)** पदार्थानाम् **(इन्द्र)** राजन् **(सोमपाः)** यः सोममैश्वर्य्यं पाति सः॥१४॥

अन्वयः-हे वसो इन्द्र! अर्वाचीनः सोमपास्त्वमस्मेऽन्धसः सोमानां रक्षको भव सु मत्स्व॥१४॥

भावार्थः-यो राजा प्रजापदार्थानां यथावद्रक्षां कुर्यात् स उत्तरकाले वृद्धसुखः स्यात्॥१४॥

पदार्थः-हे **(वसो)** वास करने वाले **(इन्द्र)** राजन्! **(अर्वाचीनः)** इस काल में वर्त्तमान **(सोमपाः)** ऐश्वर्य्य की रक्षा करनेवाले आप **(अस्मे)** हम लोगों में **(अन्धसः)** अन्न आदि और **(सोमानाम्)** अन्य पदार्थों के रक्षक **(भव)** हूजिये और **(सु, मत्स्व)** उत्तम प्रकार आनन्द कीजिये॥१४॥

भावार्थः-जो राजा प्रजा के पदार्थों की यथायोग्य रक्षा करे, वह आगे के समय में सुख की वृद्धियुक्त होवे॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒स्माक॑ं त्वा मती॒नामा स्तोम॑ इन्द्र यच्छतु। अ॒र्वागा व॑र्तया॒ हरी॑॥१५॥

अ॒स्माक॑म्। त्वा॒। म॒ती॒नाम्। आ। स्तोम॑ः। इ॒न्द्र॒। य॒च्छ॒तु॒। अ॒र्वाक्। आ। व॒र्त॒य॒। हरी॒ इति॑॥१५॥

पदार्थः-(अस्माकम्) **(त्वा)** त्वाम् **(मतीनाम्)** मननशीलानां मनुष्याणाम् **(आ)** **(स्तोमः)** स्तुतिः **(इन्द्र)** **(यच्छतु)** निगृह्णातु **(अर्वाक्)** पुनः **(आ)** **(वर्त्तय)** अत्र **संहितायामिति** दीर्घः। **(हरी)** अग्निजले अश्वौ वा॥१५॥

अन्वयः-हे इन्द्र! अस्माकं मतीनां स्तोमो यं त्वा आ यच्छतु स त्वमर्वाग्धरी आवर्त्तय॥१५॥

भावार्थः-यं विद्याविनययुक्तं राजानं सर्वतः प्रशंसा प्राप्नुयात् स एव प्रजा नियन्तुं शक्नुयात्॥१५॥

पदार्थः-हे **(इन्द्र)** राजन्! **(अस्माकम्)** हम **(मतीनाम्)** विचारशील मनुष्यों की **(स्तोमः)** स्तुति जिन **(त्वा)** आपको **(आ, यच्छतु)** प्राप्त होवे वह आप **(अर्वाक्)** फिर **(हरी)** अग्नि जल वा घोड़ों को **(आ, वर्त्तय)** अच्छे प्रकार वर्त्ताइये॥१५॥

भावार्थः-जिस विद्या और विनय से युक्त राजा को सब प्रकार प्रशंसा प्राप्त होवे, वही प्रजा को नियमयुक्त कर सके॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः। वधूयुरिव योषणाम्॥१६॥२९॥

पुरोळाशम्। च। नः। घसः। जोषयासे। गिरः। च। नः। वधूयुःऽइव। योषणाम्॥१६॥

पदार्थः-(पुरोळाशम्) सुसंस्कृतान्नविशेषम् **(च)** **(नः)** अस्मभ्यम् **(घसः)** भोगः **(जोषयासे)** सेवय **(गिरः)** वाणीः **(च)** **(नः)** अस्माकम् **(वधूयुरिव)** **(योषणाम्)** भार्याम्॥१६॥

अन्वयः-हे वैद्यराज! यो नो घसोऽस्ति तं पुरोळाशं च जोषयासे योषणां वधूयुरिव नो गिरश्च जोषयासे॥१६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यो राजा स्त्रियं कामयमानः पतिरिव प्रजावाचः श्रुत्वा न्यायं करोत्यैश्वर्यञ्च दधाति स राष्ट्रे पूज्यो भवति॥१६॥

पदार्थः-हे वैद्यराज! जो **(नः)** हम लोगों के लिये **(घसः)** भोग है उसकी **(पुरोळाशम्, च)** और उत्तम प्रकार संस्कारयुक्त अन्नविशेष की **(जोषयासे)** सेवा कराओ और **(योषणाम्)** स्त्री को **(वधूयुरिव)** वधूयु अर्थात् अपने को वधू की चाहना करनेवाली के सदृश **(नः)** हम लोगों को **(गिरः)** वाणियों की **(च)** भी सेवा कराओ॥१६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो राजा स्त्री की कामना करते हुए पति के सदृश प्रजा की वाणियों को सुन के न्याय करता और ऐश्वर्य को धारण करता है, वह राज्य में पूज्य होता है॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सहस्रं व्यतीनां युक्तानामिन्द्रमीमहे। शतं सोमस्य खार्यः॥१७॥

सहस्रम्। व्यतीनाम्। युक्तानाम्। इन्द्रम्। ईमहे। शतम्। सोमस्य। खार्यः॥१७॥

पदार्थः-(सहस्रम्) (**व्यतीनाम्**) गमनकर्तृणाम् (**युक्तानाम्**) समाहितानाम् (**इन्द्रम्**) दुष्टदर्त्तारं राजानम् (**ईमहे**) याचामहे (**शतम्**) (**सोमस्य**) धान्याद्यैश्वर्यस्य (**खार्यः**) एतत्परिमाण-मितान्यन्नादीनि॥१७॥

अन्वयः-हे धनाढ्य! व्यतीनां युक्तानां सहस्रं सोमस्य खार्यः शतं सन्ति ता इन्द्रं प्राप्येमहे॥१७॥

भावार्थः-ये धनाढ्यान् प्राप्यासंख्यान् पदार्थान् याचन्ते ते स्वल्पं लभन्ते ये च न याचन्ते ते बहु प्राप्नुवन्ति॥१७॥

पदार्थः-हे धनाढ्य पुरुष (**व्यतीनाम्**) गमन करने वाले (**युक्तानाम्**) उत्तम प्रकार सावधान चित्त हुए जनों का (**सहस्रम्**) एक सहस्र और (**सोमस्य**) धान्य आदि ऐश्वर्य की (**खार्यः, शतम्**) सौ खारी अर्थात् सौ मन तुले हुए अन्न आदि पदार्थ हैं उनकी (**इन्द्रम्**) दुष्टों को नाश करनेवाले राजा को प्राप्त होकर (**ईमहे**) याचना करते हैं॥१७॥

भावार्थः-जो धनाढ्य जनों को प्राप्त होकर असङ्ख्य पदार्थों की याचना करते हैं, वे थोड़ा पाते हैं और जो याचना नहीं करते हैं, वे बहुत पाते हैं॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सहस्रा॑ ते शता व॒यं गवा॒मा च्या॑वयामसि। अ॒स्मत्रा रा॒धः एतु ते॥१८॥

सहस्रा॑। ते॒। श॒ता। व॒यम्। गवा॑म्। आ। च्या॒व॒या॒म॒सि॒। अ॒स्मऽत्रा। रा॒धः॑। एतु॑। ते॒॥१८॥

पदार्थः-(सहस्रा) सहस्राणि (**ते**) तव (**शता**) शतानि (**वयम्**) (**गवाम्**) (**आ**) (**च्यावयामसि**) प्रापयामः (**अस्मत्रा**) अस्मासु (**राधः**) धनम् (**एतु**) प्राप्नोतु (**ते**) तव॥१८॥

अन्वयः-हे धनेश! ते राधोऽस्मत्रैतु ते तव गवां सहस्रा शता वयमाच्यावयामसि॥१८॥

भावार्थः-हे धनाढ्य! तव सकाशाद्वयं गवादीन् प्राप्याऽन्येभ्यो दद्मः। अस्माकं धनं भवन्तं प्राप्नोतु॥१८॥

पदार्थः-हे धन के ईश (**ते**) आप का (**राधः**) धन (**अस्मत्रा**) हम लोगों में (**एतु**) प्राप्त हो और (**ते**) आपकी (**गवाम्**) गौ के (**सहस्रा**) हजारों और (**शता**) सैकड़ों समूह को (**वयम्**) हम लोग (**आ, च्यावयामसि**) प्राप्त कराते हैं॥१८॥

भावार्थः-हे धनाढ्य! आपके समीप से हम लोग गौ आदि पदार्थों को प्राप्त होकर औरों के लिये देते हैं और हम लोगों का धन आपको प्राप्त हो॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दश॑ ते कु॒लशा॑नां॒ हिर॑ण्यानामधीमहि। भू॒रि॒दा अ॑सि वृत्रहन्॥ १९॥

दश॑। ते॒। कु॒लशा॑नाम्। हिर॑ण्यानाम्। अ॒धी॒म॒हि॒। भू॒रि॒ऽदाः। अ॒सि॒। वृ॒त्र॒ऽहन्॥ १९॥

पदार्थः-(दश) (**ते**) तव (**कलशानाम्**) घटानाम् (**हिरण्यानाम्**) (**अधीमहि**) प्राप्नुयाम (**भूरिदाः**) बहूनां दाता (**असि**) (**वृत्रहन्**) शत्रुहन्ता॥ १९॥

अन्वयः-हे वृत्रहन्! यतस्त्वं भूरिदा असि तस्मात्ते हिरण्यानां कलशानां दशाधीमहि॥ १९॥

भावार्थः-यो मनुष्यो बहुप्रदो भवति तस्य मित्राणि बहूनि जायन्ते॥ १९॥

पदार्थः-हे (**वृत्रहन्**) शत्रुओं के नाश करनेवाले! जिससे आप (**भूरिदाः**) बहुतों के देनेवाले (**असि**) हो इससे (**ते**) आपके (**हिरण्यानाम्**) सुवर्ण के बने हुए (**कलशानाम्**) घटों के (**दश**) दशसंख्यायुक्त समूह को हम लोग (**अधीमहि**) प्राप्त होवें॥ १९॥

भावार्थः-जो मनुष्य बहुत देनेवाला होता है, उसके मित्र बहुत होते हैं॥ १९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भूरि॑दा॒ भूरि॑ देहि नो॒ मा दभ्रं॑ भूर्या भ॑र। भूरि॒ घेदि॑न्द्र दित्ससि॥ २०॥

भूरि॑ऽदाः। भूरि॑। दे॒हि॒। नः॒। मा। द॒भ्रम्। भूरि॑। आ। भ॒र॒। भूरि॑। घ॒। इत्। इ॒न्द्र॒। दि॒त्स॒सि॒॥ २०॥

पदार्थः-(भूरिदाः) बहुदाः (**भूरि**) बहु (**देहि**) (**नः**) अस्मभ्यम् (**मा**) (**दभ्रम्**) अल्पम् (**भूरि**) बहु (**आ**) (**भर**) समन्ताद्धर (**भूरि**) बहु (**घ**) एव (**इत्**) अपि (**इन्द्र**) दातः (**दित्ससि**) दातुमिच्छसि॥ २०॥

अन्वयः-हे इन्द्र! यस्त्वं नो भूरि दित्ससि स भूरिदास्त्वं नो भूरि देहि भूर्याभर दभ्रं घेन्मा देहि दभ्रमिन्माभर॥ २०॥

भावार्थः-यो बहुप्रदोऽस्ति स एव प्रशंसां लभते योऽल्पदः स नैवं प्रशंसितो भवति॥ २०॥

पदार्थः-हे (**इन्द्र**) देनेवाले! जो आप (**नः**) हम लोगों के लिये (**भूरि**) बहुत (**दित्ससि**) देने की इच्छा करते हो वह (**भूरिदाः**) बहुत देनेवाले आप हम लोगों के लिये (**भूरि**) बहुत (**देहि**) दीजिये और (**भूरि**) बहुत को (**आ, भर**) सब प्रकार धारण कीजिये (**दभ्रम्**) थोड़े को (**घ**) ही (**मा**) मत दीजिये और थोड़े को (**इत्**) ही न धारण कीजिये॥ २०॥

भावार्थः-जो बहुत देनेवाला है वही प्रशंसा को प्राप्त होता है और जो थोड़ा देनेवाला वह नहीं इस प्रकार प्रशंसित होता है॥ २०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन्। आ नो भजस्व राधसि॥ २१॥

भूरिऽदाः। हि। असि। श्रुतः। पुरुऽत्रा। शूर। वृत्रऽहन्। आ। नः। भजस्व। राधसि॥ २१॥

पदार्थः-(भूरिदाः) बहुप्रदाः **(हि)** यतः **(असि)** **(श्रुतः)** सर्वत्र प्रसिद्धकीर्त्तिः **(पुरुत्रा)** बहुषु प्रतिष्ठितः **(शूर)** शत्रुहन्तः **(वृत्रहन्)** प्राप्तधन **(आ)** **(नः)** अस्मान् **(भजस्व)** सेवस्व **(राधसि)** संसाध्नोसि॥ २१॥

अन्वयः-हे शूर वृत्रहन्! राजँस्त्वं हि भूरिदा असि तस्मात् पुरुत्रा श्रुतोऽसि यतस्त्वं नो राधसि तस्मादस्माना भजस्व॥ २१॥

भावार्थः-योऽत्र जगति बहुदाता भवति स एव सर्वदिक्कीर्तिर्भवति॥ २१॥

पदार्थः-हे **(शूर)** शत्रुओं के नाश करनेवाले **(वृत्रहन्)** धन को प्राप्त राजन्! आप **(हि)** जिससे **(भूरिदाः)** बहुत देनेवाले **(असि)** हो इससे **(पुरुत्रा)** बहुतों में प्रतिष्ठित और **(श्रुतः)** सब जगह प्रसिद्ध यशवाले हो जिससे आप **(नः)** हम लोगों को **(राधसि)** अच्छे प्रकार साधते हैं, इससे हम लोगों को **(आ, भजस्व)** अच्छे प्रकार सेवो॥ २१॥

भावार्थः-जो इस संसार में बहुत देनेवाला होता है, वही सम्पूर्ण दिशाओं में कीर्तियुक्त होता है॥ २१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात्। माभ्यां गा अनु शिश्रथः॥ २२॥

प्र। ते। बभ्रू इति। विऽचक्षण। शंसामि। गोऽसनः। नपात्। मा। आभ्याम्। गाः। अनु। शिश्रथः॥ २२॥

पदार्थः-(प्र) **(ते)** तव **(बभ्रू)** सकलविद्याधारकावध्यापकोपदेशकौ **(विचक्षण)** प्राज्ञ **(शंसामि)** **(गोषणः)** यो गाः सनुते याचते तत्संबुद्धौ **(नपात्)** यो न पतति **(मा)** **(आभ्याम्)** सह **(गाः)** पृथिव्यादीन् **(अनु)** **(शिश्रथः)** श्रथ्नाति॥ २२॥

अन्वयः-हे गोषणो विचक्षण! यौ बभ्रू अहं प्रशंसामि तौ ते शिक्षकौ स्याताम्। आभ्यां त्वं नपात् सन् गा मानु शिश्रथः॥ २२॥

भावार्थः-हे जिज्ञासो! त्वमध्यापकमुपदेशकं च प्राप्य पुरुषार्थेन विद्यामुपदेशञ्च सद्यो गृहाणालस्यं मा कुरु॥ २२॥

पदार्थः-हे **(गोषणः)** गौ मांगने वाले **(विचक्षण)** उत्तम ज्ञाता! जो **(बभ्रू)** सम्पूर्ण विद्याओं के धारण करने वाले अध्यापक और उपदेशक की मैं **(प्र, शंसामि)** प्रशंसा करता हूँ वे **(ते)** आपके शिक्षक होवें **(आभ्याम्)** इनके साथ आप **(नपात्)** नहीं गिरने वाले होते हुए **(गाः)** पृथिव्यादिकों को **(मा)** मत

(अनु, शिश्रथः) शिथिल करते हैं॥२२॥

भावार्थः-हे जिज्ञासु ज्ञान को चाहने वाले! तू अध्यापक और उपदेशक को पाकर पुरुषार्थ से विद्या और उपदेश को शीघ्र ग्रहण कर, आलस्य मत कर॥२२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कनीनकेव विद्रधे नवे दुपदे अर्भके। बभ्रू यामेषु शोभेते॥२३॥

कनीनकाऽइव। विद्रधे। नवे। दुऽपदे। अर्भके। बभ्रू इति। यामेषु। शोभेते इति॥२३॥

पदार्थः-(कनीनकेव) कमनीयेव **(विद्रधे)** विशेषेण दृढे **(नवे)** नवीने **(दुपदे)** सद्यः प्रापणीये वृक्षादिद्रव्यपदे वा **(अर्भके)** अल्पे **(बभ्रू)** अध्यापकोपदेशकौ **(यामेषु)** प्रहरेषु **(शोभेते)**॥२३॥

अन्वयः-हे विद्वांसौ! भवन्तौ यौ बभ्रू यामेषु कनीनकेव नवे विद्रधे दुपदे अर्भके शोभेते ताविव जगदुपकारकौ भवितुमर्हतः॥२३॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसोऽधिकेऽल्पे विज्ञाने कर्मणि वा सुशोभिताः स्युस्ते जगति कल्याणकाराः स्युः॥२३॥

पदार्थः-हे विद्वानो! आप जो **(बभ्रू)** अध्यापक और उपदेशक **(यामेषु)** प्रहरों में **(कनीनकेव)** सुन्दर के तुल्य **(नवे)** नवीन **(विद्रधे)** विशेष दृढ़ **(दुपदे)** शीघ्र प्राप्त होने योग्य पदार्थ वा वृक्ष आदि द्रव्यों के स्थान और **(अर्भके)** छोटे बालक के निमित्त **(शोभेते)** शोभित होते हैं, उनके सदृश संसार के उपकार करनेवाले होने को योग्य हों॥२३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् अधिक वा न्यून विज्ञान में वा काम में सुशोभित हों, वे जगत् के बीच कल्याण करनेवाले हों॥२३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अरं म उस्रयाम्णेऽरमनुस्रयाम्णे। बभ्रू यामेष्वस्रिधा॥२४॥३०॥६॥३॥

अरम्। मे। उस्रऽयाम्ने। अरम्। अनुस्रऽयाम्ने। बभ्रू इति। यामेषु। अस्रिधा॥२४॥

पदार्थः-(अरम्) अलम् **(मे)** मह्यम् **(उस्रयाम्णे)** उस्रैः किरणैरिव यानेन याति तस्मै **(अरम्)** अलम् **(अनुस्रयाम्णे)** योऽनुस्रं शीतं देशं याति तस्मै **(बभ्रू)** सत्यधारकौ **(यामेषु)** प्रहरेषु **(अस्रिधा)** अहिंसकौ॥२४॥

अन्वयः-यावस्रिधा बभ्रू यामेषूस्रयाम्णे मेऽरमनुस्रयाम्णे मेऽरं भवतस्तौ मया सेवनीयौ॥२४॥

भावार्थः–यावध्यापकोपदेशकौ शीतोष्णदेशनिवासिनं मामध्यापयितुमुपदेष्टुं च शक्नुतस्तौ सदैव मया सत्कर्त्तव्यौ भवत इति॥ २४॥

अत्रेन्द्रराजाप्रजाध्यापकोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृक्संहितायां तृतीयाष्टके षष्ठोऽध्यायस्त्रिंशो वर्गश्चतुर्थमण्डले द्वात्रिंशत्तमं सूक्तं तृतीयोऽनुवाकश्च समाप्तः॥

पदार्थः–जो **(अस्त्रिधा)** नहीं हिंसा करने **(बभ्रू)** और सत्य की धारणा करने वाले **(यामेषु)** प्रहरों में **(उस्त्रयाग्ने)** किरणों के समान जो यान से जाता उस **(मे)** मेरे लिये **(अरम्)** समर्थ और **(अनुस्त्रयाग्ने)** शीत देश को जाने वाले मेरे लिये **(अरम्)** समर्थ होते हैं, वे मुझसे सेवन योग्य हैं॥ २४॥

भावार्थः–जो अध्यापक और उपदेशक शीतोष्ण देश निवासी मुझको पढ़ा और उपदेश दे सकते हैं, वे सदैव मुझ से सत्कार करने योग्य होते हैं॥ २४॥

इस सूक्त में इन्द्र, राजा, प्रजा, अध्यापक और उपदेशक के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ऋग्वेद संहिता के तीसरे अष्टक में छठा अध्याय तीसवां वर्ग तथा चतुर्थ मण्डल में बत्तीसवां सूक्त और तीसरा अनुवाक पूरा हुआ॥

॥ओ३म्॥

अथ तृतीयाष्टके सप्तमाध्यायारम्भः

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथैकादशर्चस्य त्रयस्त्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। ऋभवो देवताः। १ भुरिक् त्रिष्टुप्। २, ४, ५, ११ त्रिष्टुप्। ३, ६, १० निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ७, ८ भुरिक् पङ्क्तिः। ९ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब ग्यारह ऋचा वाले तेंतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

प्र ऋ॒भुभ्यो॑ दू॒तमि॑व॒ वाच॑मिष्य उप॒स्तिरे॒ श्वैत॑रीं धे॒नुमी॑ळे।

ये वात॑जूतास्त॒रणि॑भि॒रेवै॒: परि॒ द्यां स॒द्यो अ॒पसो॑ बभू॒वुः॥ १॥

प्र। ऋ॒भुऽभ्य॑:। दू॒तम्ऽइ॑व। वाच॑म्। इ॒ष्ये॒। उ॒प॒ऽअस्तिरे। श्वैत॑रीम्। धे॒नुम्। ई॒ळे॒। ये। वात॑ऽजूताः। त॒रणि॑ऽभिः। एवैः॑। परि॑। द्याम्। स॒द्यः। अ॒प॑सः। ब॒भू॒वुः॥ १॥

पदार्थः-(प्र) (**ऋभुभ्यः**) मेधाविभ्यः। **ऋभुरिति मेधाविनामसु पठितम्।** (निघं०३.१५) (**दूतमिव**) यथा दूतो दौत्यमिच्छति (**वाचम्**) (**इष्ये**) प्राप्नोमि (**उपस्तिरे**) स्वस्तराय (**श्वैतरीम्**) अतिशयेन शुद्धाम् (**धेनुम्**) धारणाम् (**ईळे**) स्तौमि प्राप्नोमि (**ये**) (**वातजूताः**) वायुप्रेरितास्त्रसरेण्वादिपदार्थाः (**तरणिभिः**) सन्तरणैः (**एवैः**) प्राप्तैर्वेगादिगुणैः (**परि**) (**द्याम्**) आकाशम् (**सद्यः**) शीघ्रम् (**अपसः**) कर्माणि (**बभूवुः**) भवन्ति॥१॥

अन्वयः-ये वाजतूजाः पदार्था एवैस्तरणिभिः सद्यो द्यामपसः परिबभूवुस्तैरहमुपस्तिर ऋभुभ्यो दूतमिव श्वैतरीं धेनुं वाचं प्रेष्ये तथा पदार्थविज्ञानमीळे॥१॥

भावार्थः-अत्रोपमालङ्कारः। ये पुरुषा यथा त्रसरेणवो वायुना क्रियां सततं कुर्वन्ति तथैव विद्वद्भ्यो विद्यां प्राप्य पुरुषार्थं सदा कुर्वन्ति ते सर्वविद्यायुक्तां शोभनां वाचं प्राप्नुवन्ति॥१॥

पदार्थः-(ये) जो (**वातजूताः**) वायु से उड़ाये गये त्रसरेणु आदि पदार्थ (**एवैः**) प्राप्त वेग आदि गुणों और (**तरणिभिः**) उत्तम प्रकार तैरने आदि क्रियाओं से (**सद्यः**) शीघ्र (**द्याम्**) आकाश और (**अपसः**) कर्मों के प्रति (**परिबभूवुः**) परिभूत तिरस्कृत अर्थात् रूपान्तर को प्राप्त होते हैं, उनसे **[मैं]** (**उपस्तिरे**) विस्तार के अर्थ और (**ऋभुभ्यः**) बुद्धिमानों के लिये (**दूतमिव**) जैसे दूत दूतपन की इच्छा करे वैसे (**श्वैतरीम्**) अत्यन्त शुद्ध (**धेनुम्**) धारण करने वाली (**वाचम्**) वाणी को (**प्र, इष्ये**) प्राप्त करता

हूँ, उस वाणी से पदार्थ विज्ञान की **(ईळे)** स्तुति करता हूँ॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पुरुष जैसे त्रसरेणु वायु से क्रिया को निरन्तर करते हैं, वैसे ही विद्वानों से विद्या को प्राप्त होकर पुरुषार्थ सदा करते हैं, वे सर्व विद्याओं से युक्त सुन्दर वाणी को प्राप्त होते हैं॥१॥

अथ मातापित्रादिशिक्षाविषयमाह॥

अब माता पिता आदि के शिक्षा विषय को अगले मन्त्र में कहते हैं॥

यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः।
आदिद्देवानामुप सख्यमायन् धीरासः पुष्टिमवहन् मनायै॥२॥

यदा। अरम्। अक्रन्। ऋभवः। पितृऽभ्याम्। परिऽविष्टी। वेषणा। दंसनाभिः। आत्। इत्। देवानाम्। उप। सख्यम्। आयन्। धीरासः। पुष्टिम्। अवहन्। मनायै॥२॥

पदार्थः-(यदा) **(अरम्)** अलम् **(अक्रन्)** कुर्वन्ति **(ऋभवः)** प्राज्ञाः **(पितृभ्याम्)** विद्वद्भ्यां जननीजनकाभ्याम् **(परिविष्टी)** सर्वतो विद्या व्याप्नोति यया तया क्रियया **(वेषणा)** व्याप्तेन पदार्थेन **(दंसनाभिः)** उत्तमैः कर्मभिः **(आत्)** **(इत्)** एव **(देवानाम्)** विदुषाम् **(उप)** **(सख्यम्)** मित्रभावम् **(आयन्)** प्राप्नुवन्ति **(धीरासः)** योगयुक्ता ध्यानवन्तः **(पुष्टिम्)** सर्वाऽवयवदृढत्वम् **(अवहन्)** प्राप्नुवन्ति **(मनायै)** मन्तव्यायै विद्यायै॥२॥

अन्वयः-ऋभवो यदा पितृभ्यां परिविष्टी वेषणा दंसनाभिर्देवानां सख्यमरमक्रन्नादित्ते धीरासो मनायै बुद्धिमुपायन् पुष्टिमवहन्॥२॥

भावार्थः-ये मनुष्या बाल्यावस्थायामापञ्चमाद् वर्षान्मातृशिक्षामाष्टात् संवत्सरात् पितृशिक्षामष्टाचत्वारिंशाद् वर्षादाचार्य्यशिक्षां च गृह्णन्ति त एव विद्वांसो मेधाविनो धार्मिका चिरञ्जीविनो जगत्कल्याणकरा भवन्ति॥२॥

पदार्थः-(ऋभवः) बुद्धिमान् जन **(यदा)** जब **(पितृभ्याम्)** विद्वान् माता और पिता से **(परिविष्टी)** सब प्रकार विद्या को व्याप्त होता जिससे उस क्रिया और **(वेषणा)** व्याप्त पदार्थ से तथा **(दंसनाभिः)** उत्तम कर्मों से **(देवानाम्)** विद्वानों के **(सख्यम्)** मित्रपन को **(अरम्)** पूरा **(अक्रन्)** करते हैं **(आत्, इत्)** तभी वे **(धीरासः)** योग से युक्त ध्यान वाले **(मनायै)** मानने योग्य विद्या के लिये बुद्धि को **(उप, आयन्)** प्राप्त होते और **(पुष्टिम्)** सम्पूर्ण अवयवों की पुष्टि को **(अवहन्)** प्राप्त होते हैं॥२॥

भावार्थः-जो मनुष्य बाल्यावस्था में पांचवें वर्ष से माता की शिक्षा और आठवें वर्ष से लेकर पिता की शिक्षा को और अड़तालीस वर्ष पर्य्यन्त आचार्य्य की शिक्षा को ग्रहण करते हैं, वे ही विद्वान्, बुद्धिमान्, धार्मिक, बहुत काल पर्य्यन्त जीवने और संसार के कल्याण करनेवाले होते हैं॥२॥

पुनर्मातापितृशिक्षाविषयमाह॥

फिर माता-पिता से शिक्षा विषय को अगले मन्त्र में कहते हैं॥

पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना।

ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुष्परसो नोऽवन्तु यज्ञम्॥ ३॥

पुनः। ये। चक्रुः। पितरा। युवाना। सना। यूपाऽइव। जरणा। शयाना। ते। वाजः। विऽभ्वा। ऋभुः। इन्द्रऽवन्तः। मधुऽष्परसः। नः। अवन्तु। यज्ञम्॥ ३॥

पदार्थः-(पुनः) (ये) (चक्रुः) कुर्य्युः **(पितरा)** पितरौ **(युवाना)** प्राप्तयौवनौ **(सना)** संसेविनौ **(यूपेव)** स्तम्भ इव दृढौ **(जरणा)** जरां प्राप्तौ **(शयाना)** यौ शयाते तौ **(ते) (वाजः)** ज्ञानवान् **(विभ्वा)** विभुना ज्ञानेन जगदीश्वरेण **(ऋभुः)** विद्वान् **(इन्द्रवन्तः)** परमैश्वर्य्ययुक्ताः **(मधुष्परसः)** मधुष्परस्स्वरूपं सुन्दरं येषान्ते **(नः)** अस्माकम् **(अवन्तु) (यज्ञम्)** अध्ययनाध्यापनादिकम्॥ ३॥

अन्वयः-ये जरणा शयाना सन्तौ सना पितरा युवाना यूपेव पुनश्चक्रुस्ते मधुष्परस इन्द्रवन्तो भूत्वा नो यज्ञमवन्तु तत्सङ्गेन विभ्वा वाज ऋभुरहं भवेयम्॥ ३॥

भावार्थः-ये पितरः स्वसन्तानान् दीर्घेण ब्रह्मचर्य्येण सुशीलान् विदुषः कुर्वन्ति ते तत्सेवया पुनरपि वृद्धाः सन्तो युवान इव भवन्ति॥ ३॥

पदार्थः-(ये) जो जन **(जरणा)** बुढ़ापे को प्राप्त **(शयाना)** सोते हुए **(सना)** उत्तम प्रकार सेवा करने वाले **(पितरा)** माता-पिता को **(युवाना)** जवान **(यूपेव)** खम्भे के सदृश पुष्ट **(पुनः)** फिर **(चक्रुः)** करें **(ते)** वे **(मधुष्परसः)** सुन्दर स्वरूप और **(इन्द्रवन्तः)** अत्यन्त ऐश्वर्य्य से युक्त होकर **(नः)** हम लोगों के **(यज्ञम्)** पढ़ने-पढ़ाने आदि कर्म्म की **(अवन्तु)** रक्षा करें, उस कर्म्म के संग से **(विभ्वा)** व्यापक जाने गये जगदीश्वर से **(वाजः)** ज्ञानवान् और **(ऋभुः)** विद्वान् मैं होऊँ॥ ३॥

भावार्थः-जो पितृजन अपने सन्तानों को अतिकाल पर्य्यन्त ब्रह्मचर्य्य से उत्तम स्वभाव और विद्यायुक्त करते हैं, वे उन सन्तानों की सेवा से फिर भी वृद्ध हुए युवावस्था वालों के सदृश होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यत्संवत्समृभवो गामरक्षन् यत्संवत्समृभवो मा अपिंशन्।

यत्संवत्समभरन् भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः॥ ४॥

यत्। सम्ऽवत्सम्। ऋभवः। गाम्। अरक्षन्। यत्। सम्ऽवत्सम्। ऋभवः। माः। अपिंशन्। यत्। सम्ऽवत्सम्। अभरन्। भासः। अस्याः। ताभिः। शमीभिः। अमृतत्वम्। आशुः॥ ४॥

पदार्थः-(यत्) ये **(संवत्सम्)** सङ्गतं वत्समिव **(ऋभवः)** मेधाविनः पितरः **(गाम्)** **(अरक्षन्)** रक्षन्ति **(यत्)** ये **(संवत्सम्)** एकीभूतं वात्सल्येन पालितं सन्तानम् **(ऋभवः)** **(माः)** मातॄः **(अपिंशन्)** साऽवयवान् कुर्वन्ति **(यत्)** याः **(संवत्सम्)** **(अभरन्)** धरन्ति पुष्णन्ति वा **(भासः)** प्रकाशमानायाः **(अस्याः)** विद्यायाः **(ताभिः)** मातृपित्राचार्यसेवया विद्याप्राप्तिभिः **(शमीभिः)** श्रेष्ठैः कर्मभिः **(अमृतत्वम्)** मोक्षभावमुत्तममानन्दं वा **(आशुः)** प्राप्नुवन्ति॥४॥

अन्वयः-यद्य ऋभवः संवत्समिवाऽपत्यानि शिक्षन्ते गां वाचमरक्षन् यद्य ऋभवः संवत्समिव मा अपिंशन् यद्या मातरो भासोऽस्याः संवत्समभरँस्ते ताश्च ताभिः शमीभिरमृतत्वमाशुः॥४॥

भावार्थः-ये विद्वांसः पितरः स्वसन्तानान् ब्रह्मचर्य्यविद्याविनयैर्विद्याबलशुभगुणकर्माचरणान् कुर्वन्ति तेऽत्यन्तं सुखमाप्नुवन्ति॥४॥

पदार्थः-(यत्) जो **(ऋभवः)** बुद्धिमान् पितृजन **(संवत्सम्)** प्राप्त बछड़े के सदृश सन्तानों को शिक्षा देते हैं **(गाम्)** वाणी की **(अरक्षन्)** रक्षा करते हैं और **(यत्)** जो **(ऋभवः)** बुद्धिमान् पितृ, आचार्य्यजन **(संवत्सम्)** एक हुए और प्रेम से पाले गये सन्तान के सदृश **(माः)** माताओं को **(अपिंशन्)** अवयवों के सहित करते हैं अर्थात् भरण-पोषण से उनके अङ्गों को पुष्ट करते और **(यत्)** जो मातृजन **(भासः)** प्रकाशमान **(अस्याः)** इस विद्या के **(संवत्सम्)** एकीभाव को प्राप्त प्रेम से पालित सन्तान का **(अभरन्)** धारण वा पोषण करते हैं, वे बुद्धिमान् पितृजन और मातृजन **(ताभिः)** उन मातृ-पितृ-आचार्य्य की सेवा और विद्या की प्राप्तियों और **(शमीभिः)** श्रेष्ठ कर्म्मों से **(अमृतत्वम्)** मोक्षभाव वा उत्तम आनन्द को **(आशुः)** प्राप्त होते हैं॥४॥

भावार्थः-जो विद्वान् पितृजन अपने सन्तानों को ब्रह्मचर्य्य और विद्या [तथा विनय] से विद्या, बल और उत्तम गुण और कर्मों के आचरण [से] युक्त करते हैं, वे अत्यन्त सुख को प्राप्त होते हैं॥४॥

अथ मनुष्यगुणानाह॥

अब मनुष्यगुणों को अगले मन्त्र में कहते हैं॥

ज्येष्ठ आह चमसा द्वा करेति कनीयान् त्रीन् कृणवामेत्याह।

कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः॥५॥१॥

ज्येष्ठः। आह। चमसा। द्वा। कर। इति। कनीयान्। त्रीन्। कृणवाम। इति। आह। कनिष्ठः। आह। चतुरः। कर। इति। त्वष्टा। ऋभवः। तत्। पनयत्। वचः। वः॥५॥

पदार्थः-(ज्येष्ठः) पूर्वजः **(आह)** वदति **(चमसा)** चमसौ **(द्वा)** द्वौ **(कर)** कुर्य्याः **(इति)** अनेन प्रकारेण **(कनीयान्)** कनिष्ठः **(त्रीन्)** **(कृणवाम)** कुर्य्याम **(इति)** **(आह)** **(कनिष्ठः)** **(आह)** **(चतुरः)** **(कर)** **(इति)** **(त्वष्टा)** शिक्षकः **(ऋभवः)** मेधाविनः **(तत्)** **(पनयत्)** प्रशंसेत् **(वचः)** वचनम् **(वः)** युष्माकम्॥५॥

अन्वयः-हे ऋभवो! यद्वो वचस्त्वष्टा पनयत् तत् द्वा चमसा करेति ज्येष्ठ आह। कनीयाँस्त्रीन् कृणवामेत्याह कनिष्ठश्चतुरः करेत्याह॥५॥

भावार्थः-बन्धवो विद्वांसो भूत्वा परस्परं संवदेरन् यथा ज्येष्ठ आज्ञो कुर्यात् तथा कनिष्ठो यथा कनिष्ठो ब्रूयात्तथा ज्येष्ठ आचरेत् यथात्र कनीयानिति कर्त्तृपदमेकवचनान्तं कृणवामेति बहुवचनान्ता क्रिया न सङ्गच्छत इति सम्बोधनीयं यद्वा यथा वयं परस्परं संवदेमहि तथैव युष्माभिरपि परस्परं वक्तव्यं यथा सत्यं प्रशंसितव्यं वचनं स्यात्तथैव सर्वैर्वाच्यमिति॥५॥

पदार्थः-हे **(ऋभवः)** बुद्धिमानो! जिस **(वः)** आपके **(वचः)** वचन की **(त्वष्टा)** शिक्षा देनेवाला **(पनयत्)** प्रशंसा करे **(तत्)** वह वचन **(द्वा)** दो **(चमसा)** चमसों को **(कर)** करे **(इति)** इस प्रकार से **(ज्येष्ठः)** प्रथम उत्पन्न हुआ **(आह)** कहता है **(कनीयान्)** पीछे उत्पन्न हुआ छोटा **(त्रीन्)** तीन को **(कृणवाम)** करे **(इति)** इस प्रकार से **(आह)** कहता है और **(कनिष्ठः)** कनिष्ठ अर्थात् छोटा **(चतुरः)** चार को **(कर)** करे **(इति)** इस प्रकार से **(आह)** कहता है॥५॥

भावार्थः-बन्धुजन विद्वान् होकर परस्पर वार्त्तालाप करें कि जैसे बड़ा आज्ञा करे, वैसे छोटा और जैसे छोटा कहे वैसा ही ज्येष्ठ आचरण करे। जैसे इस मन्त्र में **(कनीयान्)** यह कर्त्तृ पद एकवचनान्त और **(कृणवाम)** यह बहुवचनान्त क्रिया नहीं संगत होते हैं, ऐसा जनाना चाहिये अर्थात् अहं कर्त्ता की योग्यता में वयं कर्त्ता के पक्ष से योजना कर समझना चाहिये अथवा जैसे हम लोग परस्पर वार्त्तालाप करें, वैसे ही आप लोगों को भी परस्पर वार्त्तालाप करना चाहिये और जिस प्रकार सत्य और प्रशंसित वचन होवे, उसी प्रकार सब को बोलना चाहिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम्।
विभ्राजमानांश्चमसाँ अहेवावेनत् त्वष्टा चतुरो ददृश्वान्॥६॥

सत्यम्। ऊचुः। नरः। एव। हि। चक्रुः। अनु। स्वधाम्। ऋभवः। जग्मुः। एताम्। विऽभ्राजमानान्। चमसान्। अहाऽइव। अवेनत्। त्वष्टा। चतुरः। ददृश्वान्॥६॥

पदार्थः-**(सत्यम्)** यथार्थम् **(ऊचुः)** वदन्तु **(नरः)** मनुष्याः **(एवा)** अत्र **निपातस्य चे**ति दीर्घः। **(हि)** यतः **(चक्रुः)** कुर्य्युः **(अनु)** **(स्वधाम्)** अन्नम् **(ऋभवः)** मेधाविनः **(जग्मुः)** प्राप्नुवन्ति **(एताम्)** एतत् **(विभ्राजमानान्)** प्रकाशमानान् **(चमसान्)** मेघान्। **चमस इति मेघनामसु पठितम्।** (निघं०१.१०) **(अहेव)** अहानीव **(अवेनत्)** कामयते **(त्वष्टा)** ज्ञाता **(चतुरः)** **(ददृश्वान्)** दृष्टवान्॥६॥

अन्वयः-यथर्भव एतां स्वधां जग्मुराप्ताचरणमनुचक्रुस्तथैव नरः सत्यमूचुर्यो हि त्वष्टा चतुरो ददृश्वान् भवेत् स विभ्राजमानांश्चमसानहेव चतुरः पदार्थानवेनत्॥६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरिहाप्तानुकरणं कृत्वा यथाक्रमेण वर्त्तित्वा दिनानि प्रावृडृतुं प्राप्नुवन्ति तथैव क्रमेण कर्मोपासनाज्ञानानि सत्यभाषणादीनि वर्द्धयित्वा धर्मार्थकाममोक्षान् साधयन्तीति विज्ञातव्यम्॥६॥

पदार्थः-जैसे (**ऋभवः**) बुद्धिमान् जन (**एताम्**) इस (**स्वधाम्**) अन्न को (**जग्मुः**) प्राप्त होते हैं और यथार्थ वक्ताओं के आचरण को (**अनु, चक्रुः**) करें वैसे (**एवा**) ही (**नरः**) मनुष्य (**सत्यम्**) यथार्थ (**ऊचुः**) कहें और जो (**हि**) जिससे (**त्वष्टा**) जानने वाला (**चतुरः**) चार को (**ददृश्वान्**) देखने वाला होवे वह (**विभ्राजमानान्**) प्रकाशित हुए (**चमसान्**) मेघों को (**अहेव**) दिनों के सदृश चार पदार्थों की (**अवेनत्**) कामना करता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि इस संसार में यथार्थवक्ताओं का अनुकरण करके जैसे क्रम से वर्त्ताव कर दिन वर्षा ऋतु को प्राप्त होते हैं, वैसे ही क्रम से कर्म, उपासना और ज्ञान, सत्यभाषण आदि को बढ़ा के धर्म, अर्थ, काम और मोक्ष को सिद्ध कराते हैं, यह जानें॥६॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

द्वादश द्यून् यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः।

सुक्षेत्राकृण्वन्ननयन्त सिन्धून् धन्वातिष्ठन्नोषधीर्निम्नमापः॥७॥

द्वादश। द्यून्। यत्। अगोह्यस्य। आतिथ्ये। रणन्। ऋभवः। ससन्तः। सुऽक्षेत्रा। अकृण्वन्। अनयन्त। सिन्धून्। धन्व। आ। अतिष्ठन्। ओषधीः। निम्नम्। आपः॥७॥

पदार्थः-(**द्वादश**) (**द्यून्**) दिनानि (**यत्**) ये (**अगोह्यस्य**) असंवृतस्य (**आतिथ्ये**) अतिथीनां सत्कारम् (**रणन्**) उपदिशन्तु (**ऋभवः**) मेधाविनः (**ससन्तः**) शयाना उत्थाय (**सुक्षेत्रा**) शोभनानि क्षेत्राणि (**अकृण्वन्**) कुर्वन्ति (**अनयन्त**) नयन्ति (**सिन्धून्**) नदीन् समुद्रान् वा (**धन्व**) अन्तरिक्षम् (**आ**) (**अतिष्ठन्**) तिष्ठन्ति (**ओषधीः**) (**निम्नम्**) (**आपः**) जलानि॥७॥

अन्वयः-यद्ये ससन्त ऋभवो यथाऽऽपः सिन्धून् धन्वौषधीर्निम्नमातिष्ठँस्तथाऽगोह्यस्याऽऽतिथ्ये द्वादश द्यून् रणन्त्सुक्षेत्राऽकृण्वन्त्सुखान्यनयन्त ते मङ्गलप्रदाः सन्ति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वांसो यथा शयानान् प्रबोद्ध्य जागरयन्ति तथैवाऽविद्यान्त्संशिक्ष्य विदुषः कृत्वाऽऽनन्दयन्तु॥७॥

पदार्थः-(**यत्**) जो (**ससन्तः**) सोते हुए उठकर (**ऋभवः**) बुद्धिमान् जन जिस प्रकार से (**आपः**) जलों और (**सिन्धून्**) नदी वा समुद्रों (**धन्व**) तथा अन्तरिक्ष और (**ओषधीः**) ओषधियों के (**निम्नम्**) नीचे (**आ, अतिष्ठन्**) स्थित होते हैं, वैसे (**अगोह्यस्य**) अगुप्त के (**आतिथ्ये**) आतिथ्य में [अर्थात्] अतिथिसम्बन्धी सत्कार में (**द्वादश**) बारह (**द्यून्**) दिन (**रणन्**) उपदेश देवें तथा (**सुक्षेत्रा**) सुन्दर स्थानों

को **(अकृण्वन्)** करते और सुखों को **(अनयन्त)** प्राप्त होते हैं, वे मङ्गल देने वाले हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वान् जन जैसे सोते हुओं को चेताय के जगाते हैं, वैसे ही अविद्वानों को उत्तम शिक्षा दे विद्वान् करके आनन्द देवें॥७॥

पुनर्मनुष्यगुणानाह॥

फिर मनुष्यगुणों को अगले मन्त्र में कहते हैं॥

रथं॑ ये च॒क्रुः सु॒वृत॑ं नरे॒ष्ठां ये धे॒नुं वि॑श्व॒जुव॑ं वि॒श्वरू॑पाम्।

त आ त॑क्षन्वृ॒भवो॑ र॒यिं नः॒ स्ववं॑सः॒ स्वप॑सः सु॒हस्ता॑:॥८॥

रथ॑म्। ये। च॒क्रुः। सु॒ऽवृत॑म्। न॒रे॒ऽस्थाम्। ये। धे॒नुम्। वि॒श्व॒ऽजुव॑म्। वि॒श्व॒ऽरू॑पाम्। ते। आ। त॒क्ष॒न्तु॒। ऋ॒भव॑:। र॒यिम्। नः॒। सु॒ऽअव॑सः। सु॒ऽअप॑सः। सु॒ऽहस्ता॑:॥८॥

पदार्थः-(रथम्) विमानादियानम् **(ये)** **(चक्रुः)** कुर्वन्ति **(सुवृतम्)** सुष्ठु रचितं साङ्गोपाङ्गसहितम् **(नरेष्ठाम्)** नरास्तिष्ठन्ति यस्मिंस्तम् **(ये)** **(धेनुम्)** वाचम् **(विश्वजुवम्)** समग्रवेगाम् **(विश्वरूपाम्)** समग्रशास्त्रस्वरूपविदम् **(ते)** **(आ)** **(तक्षन्तु)** रचयन्तु **(ऋभवः)** मेधाविनः **(रयिम्)** धनम् **(नः)** अस्मभ्यम् **(स्ववसः)** शोभनमवी रक्षणादिकं कर्म येषान्ते **(स्वपसः)** सुष्ठु धर्म्याणि कर्म्माणि येषान्ते **(सुहस्ताः)** शोभनाः कर्मसाधका हस्ता येषान्ते॥८॥

अन्वयः-य ऋभवः सुवृतं नरेष्ठां रथं चक्रुर्ये विश्वरूपां विश्वजुवं धेनुं प्राप्नुवन्ति ते स्ववसः स्वपसः सुहस्ता नो रयिमा तक्षन्तु॥८॥

भावार्थः-ये मनुष्याः प्रथमतो विद्यां पुनर्हस्तक्रियां गृहीत्वा श्रेष्ठाचाराः सन्त आत्मीयं बाह्यञ्च विज्ञानं सुलक्षीकृत्य शिल्पकार्य्याणि कुर्वन्ति ते धीमन्तः सन्त ऐश्वर्य्यं प्राप्नुवन्ति॥८॥

पदार्थः-(ये) जो **(ऋभवः)** बुद्धिमान् जन **(सुवृतम्)** उत्तम रचित और अङ्गों वा उपाङ्गों के सहित **(नरेष्ठाम्)** मनुष्य जिसमें स्थित होते हैं उस **(रथम्)** विमान आदि वाहन को **(चक्रुः)** करते हैं और **(ये)** जो **(विश्वरूपाम्)** सम्पूर्ण शास्त्रज्ञान वाली और **(विश्वजुवम्)** सम्पूर्ण वेगों से युक्त **(धेनुम्)** वाणी को प्राप्त होते हैं **(ते)** वे **(स्ववसः)** सुन्दर रक्षण आदि कर्म से और **(स्वपसः)** उत्तम प्रकार धर्मयुक्त कर्मों से युक्त **(सुहस्ताः)** सुन्दर कर्मसाधक हाथों वाले **(नः)** हम लोगों के लिये **(रयिम्)** धन को **(आ, तक्षन्तु)** रखें॥८॥

भावार्थः-जो मनुष्य पहिले विद्या को और फिर हस्तक्रिया को ग्रहण करके उत्तम आचरण वाले होते हुए आत्मसम्बन्धी और बाहिर के विशेष ज्ञान को उत्तम प्रकार जांच के शिल्पविद्यासम्बन्धी कार्य्यों को करते हैं, वे बुद्धिमान् होते हुए ऐश्वर्य्य को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अपो॒ ह्येषा॒मजु॑षन्त दे॒वा अ॒भि क्रत्वा॒ मन॑सा॒ दीध्या॑नाः।

वाजो॑ दे॒वाना॑मभवत् सु॒कर्मेन्द्र॑स्य ऋभु॒क्षा वरु॑ण॒स्य॒ विभ्वा॑॥ ९॥

अपः॑। हि। ए॒षा॒म्। अजु॑षन्त। दे॒वाः॑। अ॒भि। क्रत्वा॑। मन॑सा। दीध्या॑नाः। वाजः॑। दे॒वाना॑म्। अ॒भ॒व॒त्। सु॒ऽकर्मा॑। इन्द्र॑स्य। ऋ॒भु॒क्षाः॑। वरु॑णस्य। वि॒ऽभ्वा॑॥ ९॥

पदार्थः-(अपः) विमानादिनिर्माणसाधकं कर्म **(हि)** यतः **(एषाम्)** **(अजुषन्त)** जुषन्ते **(देवाः)** विद्वांसः **(अभि)** **(क्रत्वा)** प्रज्ञया **(मनसा)** विज्ञानेन **(दीध्यानाः)** देदीप्यमानाः **(वाजः)** अन्नादि **(देवानाम्)** विदुषाम् **(अभवत्)** भवति **(सुकर्मा)** शोभनानि कर्माणि यस्य सः **(इन्द्रस्य)** विद्युदादेः **(ऋभुक्षाः)** महान्। **ऋभुक्षा इति महन्नामसु पठितम्।** (निघं०३.३) **(वरुणस्य)** जलादेः **(विभ्वा)** व्याप्त्या॥ ९॥

अन्वयः-ये क्रत्वा मनसा दीध्याना देवा ह्येषां पदार्थानां कार्य्यसिद्ध्यर्थमपोऽभ्यजुषन्त सुकर्मा देवानामिन्द्रस्य वरुणस्य विभ्वा वाजो देवानां मध्य ऋभुक्षा अभवत् ते स च श्रीमन्तो जायन्ते॥ ९॥

भावार्थः-ये मनुष्या इह सृष्टिस्थानां पदार्थानां सुपरीक्षया संयोगविभागाभ्यां श्रेष्ठान् पदार्थान् कर्माणि च निष्पादयन्ति ते विद्वद्वरा धनाढ्यतमाश्च जायन्ते॥ ९॥

पदार्थः-जो **(क्रत्वा)** बुद्धि और **(मनसा)** विज्ञान से **(दीध्यानाः)** प्रकाशमान **(देवाः)** विद्वान् जन **(हि)** जिस कारण **(एषाम्)** इन पदार्थों को कार्य्यसिद्धि के लिये **(अपः)** विमान आदि के बनाने में साधक कर्म का **(अभि, अजुषन्त)** सब प्रकार सेवन करते हैं और **(सुकर्मा)** उत्तम कर्म करने वाला **(देवानाम्)** विद्वानों **(इन्द्रस्य)** बिजुली आदि और **(वरुणस्य)** जल आदि की **(विभ्वा)** व्याप्ति से **(वाजः)** अन्न, आदि विद्वानों के मध्य में **(ऋभुक्षाः)** बड़ा **(अभवत्)** होता है, वे और वह श्रीमान् होते हैं॥ ९॥

भावार्थः-जो मनुष्य इस संसार में सृष्टिस्थ पदार्थों की उत्तम परीक्षा से संयोग और विभाग के द्वारा श्रेष्ठ पदार्थ और कार्य्यों को सिद्ध करते हैं, वे विद्वानों में श्रेष्ठ और अत्यन्त धनी होते हैं॥ ९॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

ये हरी॑ मे॒धयो॒क्था मद॑न्त॒ इन्द्रा॑य च॒क्रुः सु॒युजा॒ ये अश्वा॑।

ते रा॒यस्पोषं॒ द्रवि॑णान्य॒स्मे ध॒त्त ऋ॑भवः क्षेम॒यन्तो॒ न मि॒त्रम्॥ १०॥

ये। हरी॒ इति॑। मे॒धया॑। उ॒क्था। मद॑न्तः। इन्द्रा॑य। च॒क्रुः। सु॒ऽयुजा॑। ये अश्वा॑। ते। रा॒यः। पोष॑म्। द्रवि॑णानि। अ॒स्मे इति॑। ध॒त्त। ऋ॒भ॒वः॒। क्षे॒म॒ऽयन्तः॑। न। मि॒त्रम्॥ १०॥

पदार्थः-(ये) (**हरी**) तुरङ्गाविवाग्निजले (**मेधया**) प्रज्ञया (**उक्था**) प्रशंसनैः (**मदन्तः**) आनन्दन्तः (**इन्द्राय**) ऐश्वर्य्याय (**चक्रुः**) कुर्वन्ति (**सुयुजा**) यो सुष्ठु युङ्क्तस्तौ (**ये**) (**अश्वा**) आशुगामिनौ (**ते**) (**रायः**) धनादेः (**पोषम्**) पुष्टिम् (**द्रविणानि**) द्रव्याणि यशांसि वा (**अस्मे**) अस्मासु (**धत्त**) धरत (**ऋभवः**) मेधाविनः (**क्षेमयन्तः**) क्षेमं रक्षणं कुर्वन्तः (**न**) इव (**मित्रम्**) सुहृदम्॥१०॥

अन्वयः-हे ऋभवो! ये मेधयोक्था मदन्त इन्द्राय हरी अश्वा सुयुजा चक्रुः ये चैतद्विद्यां जानीयुस्ते यूयं मित्रं क्षेमयन्तो नाऽस्मे रायस्पोषं द्रविणानि धत्त॥१०॥

भावार्थः-हे विद्वांसो! भवन्तो सृष्टिक्रमेण पदार्थविद्याः प्राप्याऽन्यान् बोधयित्वा स्वसदृशान् कृत्वा धनाढ्यान् कुर्वन्तु॥१०॥

पदार्थः-हे (**ऋभवः**) बुद्धिमानो! (**ये**) जो (**मेधया**) बुद्धि (**उक्था**) और प्रशंसाओं से (**मदन्तः**) आनन्द करते हुए (**इन्द्राय**) ऐश्वर्य्य के लिये (**हरी**) घोड़ों के सदृश अग्नि और जल को (**अश्वा**) शीघ्र चलने वाले और (**सुयुजा**) उत्तम प्रकार जुड़े हुए (**चक्रुः**) करते हैं और (**ये**) जो इस विद्या को जानें (**ते**) वे आप लोग (**मित्रम्**) मित्र की (**क्षेमयन्तः**) रक्षा करते हुए के (**न**) सदृश (**अस्मे**) हम लोगों के निमित्त (**रायः, पोषम्**) धन आदि की पुष्टि को (**द्रविणानि**) तथा द्रव्यों वा यशों को (**धत्त**) धारण करो॥१०॥

भावार्थः-हे विद्वानो! आप लोग सृष्टि के क्रम से पदार्थविद्याओं को प्राप्त होकर अन्य जनों को बोध कराय के अपने सदृश करके धनाढ्य करो॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्त्सवने दधात॥११॥२॥

इदा। अह्नः। पीतिम्। उत। वः। मदम्। धुः। न। ऋते। श्रान्तस्य। सख्याय। देवाः। ते। नूनम्। अस्मे। इति। ऋभवः। वसूनि। तृतीये। अस्मिन्। सवने। दधात॥११॥

पदार्थः-(इदा) इदानीम् (**अह्नः**) दिनस्य मध्ये (**पीतिम्**) पानम् (**उत**) अपि (**वः**) युष्माकम् (**मदम्**) आनन्दम् (**धुः**) दध्युः (**न**) (**ऋते**) विना (**श्रान्तस्य**) तपसा हतकिल्विषस्य (**सख्याय**) मित्रभावाय (**देवाः**) विद्वांसः (**ते**) (**नूनम्**) निश्चितम् (**अस्मे**) अस्मासु (**ऋभवः**) मेधाविनः (**वसूनि**) धनानि (**तृतीये**) अन्त्ये (**अस्मिन्**) (**सवने**) सत्कर्मणि (**दधात**)॥११॥

अन्वयः-हे ऋभवो! ये देवा वो युष्माकमह्नः पीतिमुत वो मदं धुस्त इदा श्रान्तस्य सेवया ऋते सख्याय न प्रभवन्ति तेऽस्मिँस्तृतीये सवनेऽस्मे नूनं दधात॥११॥

भावार्थः–ये वर्त्तमाने समये यथार्थं पुरुषार्थं कुर्वन्ति ते धनपतयो भवन्ति ये च विद्वत्सङ्गं न कुर्वन्ति ते धनहीनाः सन्तो दारिद्र्यं भजन्ते॥११॥

अत्र विद्वन्मातापितृमनुष्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति त्रयस्त्रिंशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः–हे **(ऋभवः)** बुद्धिमानो! जो **(देवाः)** विद्वान् जन **(वः)** आप लोगों में से **(अह्नः)** दिन के मध्य में **(पीतिम्)** पान को **(उत)** और आप लोगों के **(मदम्)** आनन्द को **(धुः)** धारण करें **(ते)** वे **(इदा)** इस समय **(श्रान्तस्य)** तप से नष्ट हुआ है पाप जिसका उसकी सेवा के **(ऋते)** विना **(सख्याय)** मित्रपने के लिये **(न)** नहीं समर्थ होते हैं वे **(अस्मिन्)** इस **(तृतीये)** अन्त्य **(सवने)** श्रेष्ठ कर्म के निमित्त **(अस्मे)** हम लोगों में **(वसूनि)** धनों को **(नूनम्)** निश्चय युक्त **(दधात)** धारण करो॥११॥

भावार्थः–जो जन वर्त्तमान समय में यथार्थ पुरुषार्थ को करते हैं, वे धनपति होते हैं और जो विद्वानों के सङ्ग को नहीं करते हैं, वे धन से रहित हुए दारिद्र्य को भजते हैं॥११॥

इस सूक्त में विद्वान्, माता, पिता और मनुष्यों के गुणवर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह तेतीसवां सूक्त और द्वितीय वर्ग समाप्त हुआ॥

अथैकादशर्चस्य चतुस्त्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। ऋभवो देवताः। १ विराट् त्रिष्टुप्। २ भुरिक् त्रिष्टुप्। ४-९ निचृत् त्रिष्टुप्। १० त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ११, स्वराट् पङ्क्तिः। ५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मेधाविगुणानाह॥

अब ग्यारह ऋचा वाले चौतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मेधावी बुद्धिमान् के गुणों को कहते हैं॥

ऋ॒भुर्वि॑भ्वा॒ वाज॒ इन्द्रो॑ नो॒ अच्छे॒मं य॒ज्ञं र॑त्न॒धेयोप॑ यात।
इ॒दा हि वो॑ धि॒षणा॑ दे॒व्यह्नामधा॑त् पी॒तिं सं मदा॑ अग्मता वः॥ १॥

ऋभुः। विऽभ्वा॑। वाजः॑। इन्द्रः॑। नः॑। अच्छ॑। इ॒मम्। य॒ज्ञम्। र॒त्न॒ऽधेया॑। उप॑। या॒त॒। इ॒दा। हि। वः॑। धि॒षणा॑। दे॒वी। अह्ना॑म्। अधा॑त्। पी॒तिम्। सम्। मदाः॑। अ॒ग्म॒त॒। वः॥ १॥

पदार्थः-(**ऋभुः**) मेधावी (**विभ्वा**) विभुनेश्वरेण (**वाजः**) विज्ञानवान् (**इन्द्रः**) ऐश्वर्य्ययुक्तः (**नः**) अस्माकम् (**अच्छ**) (**इमम्**) (**यज्ञम्**) विद्याप्रज्ञावर्द्धकम् (**रत्नधेया**) रत्नानि धनानि धीयन्ते यया तस्यै (**उत, यात**) प्राप्नुत (**इदा**) इदानीम् (**हि**) (**वः**) युष्माकम् (**धिषणा**) प्रज्ञा (**देवी**) दिव्यगुणा (**अह्नाम्**) (**अधात्**) दधाति (**पीतिम्**) पानम् (**सम्**) (**मदाः**) आनन्दाः (**अग्मत**) प्राप्नुत। अत्र **संहितायामि**ति दीर्घः। (**वः**) युष्मान्॥१॥

अन्वयः-यथा मदा वः समग्मत यथा हि देवी धिषणाह्नां पीतिमधाद् विद्वांसो यूयं रत्नधेयेमं यज्ञमुप यात तथेदा वाज इन्द्र ऋभुर्विभ्वा नो वोऽच्छायातु॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा युष्मानानन्दाः प्राप्नुयुस्तथैव कर्मप्रज्ञावर्द्धिं च कुरुत विभोरीश्वरस्योपासना च विदधत॥१॥

पदार्थः-जैसे (**मदाः**) आनन्द (**वः**) आप लोगों के (**सम्, अग्मत**) सम्यक् प्राप्त होवें, जैसे (**हि**) निश्चित (**देवी**) श्रेष्ठ गुण वाली (**धिषणा**) बुद्धि (**अह्नाम्**) दिनों के बीच (**पीतिम्**) पान को (**अधात्**) धारण करती है और हे विद्वान् जनो! आप (**रत्नधेया**) धनों को धारण करने वाली क्रिया के लिये (**इमम्**) इस (**यज्ञम्**) विद्या और बुद्धि के बढ़ाने वाले यज्ञ को (**उप, यात**) प्राप्त होवें, वैसे (**इदा**) इस समय (**वाजः**) विज्ञानवान् और (**इन्द्रः**) ऐश्वर्य्य से युक्त (**ऋभुः**) बुद्धिमान् पुरुष (**विभ्वा**) ईश्वर की सहायता से (**नः**) हम लोगों को और (**वः**) तुम लोगों को (**अच्छ**) उत्तम प्रकार प्राप्त हो॥१॥

भावार्थः-[इस मन्त्र में वाचकलुप्तोपमालङ्कार है।] हे मनुष्यो! जैसे आप लोगों को आनन्द प्राप्त होवे, वैसे ही कर्म्म और बुद्धि की वृद्धि को करो और व्यापक ईश्वर की उपासना भी करो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वम्।

सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम्॥ २॥

विदानासः। जन्मनः। वाजऽरत्नाः। उत। ऋतुऽभिः। ऋभवः। मादयध्वम्। सम्। वः। मदाः। अग्मत। सम्। पुरम्ऽधिः। सुऽवीराम्। अस्मे इति। रयिम्। आ। ईरयध्वम्॥ २॥

पदार्थः-(विदानासः) ज्ञानवन्तो विद्याग्रहणाय कृतप्रतिज्ञाः **(जन्मनः)** **(वाजरत्नाः)** विज्ञानादीनि रत्नादीनि येषान्ते **(उत)** अपि **(ऋतुभिः)** मेधाविभिः सह **(ऋभवः)** मेधाविनः **(मादयध्वम्)** आनन्दयत **(सम्)** **(वः)** युष्मान् **(मदाः)** आनन्दाः **(अग्मत)** प्राप्नुवन्तु **(सम्)** **(पुरन्धिः)** पुरां धारको राज्यभावः **(सुवीराम्)** शोभना वीरा यस्यां सेनायां ताम् **(अस्मे)** अस्मभ्यम् **(रयिम्)** श्रियम् **(आ)** समन्तात् **(ईरयध्वम्)** प्रापयतम्॥ २॥

अन्वयः-हे वाजरत्ना ऋभवो! यूयं जन्मनो विदानासस्सन्त ऋभुभिः सह मादयध्वं यतो वो मदाः समग्मतोत पुरन्धिः प्राप्नोतु। अस्मे सुवीरां रयिं च समेरयध्वम्॥ २॥

भावार्थः-ये द्वितीये विद्याजन्मनि प्राप्तविद्यायौवना भवन्ति ते विद्वांसो भूत्वा विद्वत्सु मैत्रीमाचरन्तोऽविदुषां कल्याणाय प्रयतन्ते॥ २॥

पदार्थः-हे **(वाजरत्नाः)** विज्ञान आदि रत्नों से युक्त **(ऋभवः)** बुद्धिमानो! आप लोग **(जन्मनः)** जन्म से **(विदानासः)** ज्ञानवान् और विद्या ग्रहण के लिये प्रतिज्ञा करनेवाले हुए **(ऋतुभिः)** बुद्धिमानों के साथ **(मादयध्वम्)** आनन्द कराओ जिससे **(वः)** आप लोगों को **(मदाः)** आनन्द **(सम्)** उत्तम प्रकार **(अग्मत)** प्राप्त हों **(उत)** और **(पुरन्धिः)** नगरों का धारण करनेवाला राज्य प्राप्त हो तथा **(अस्मे)** हम लोगों के लिये **(सुवीराम्)** सुन्दर वीरों से युक्त सेना और **(रयिम्)** लक्ष्मी को **(सम्, आ, ईरयध्वम्)** सब प्रकार से प्राप्त कराओ॥ २॥

भावार्थः-जो दूसरे विद्यारूप जन्म के होने पर प्राप्त विद्यारूप यौवनावस्थायुक्त होते हैं, वे विद्वान् होकर विद्वानों में मित्रता करते हैं और अविद्वानों के कल्याण के लिये प्रयत्न करते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत् प्रदिवो दधिध्वे।

प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः॥ ३॥

अयम्। वः। यज्ञः। ऋभवः। अकारि। यम्। आ। मनुष्वत्। प्रऽदिवः। दधिध्वे। प्र। वः। अच्छ। जुजुषाणासः। अस्थुः। अभूत। विश्वे। अग्रिया। उत। वाजाः॥ ३॥

पदार्थः-(अयम्) (वः) युष्माकम् **(यज्ञः)** अध्यापनोपदेशाख्यः **(ऋभवः) (अकारि)** क्रियते **(यम्) (आ) (मनुष्वत्)** मननशीलविद्वद्वत् **(प्रदिवः)** प्रकर्षेण विद्यादिसद्गुणान् कामयमानान् **(दधिध्वे)** धरत **(प्र) (वः)** युष्मान् **(अच्छा)** अत्र **संहितायामिति** दीर्घः। **(जुजुषाणासः)** भृशं सेवमानाः **(अस्थुः)** तिष्ठन्तु **(अभूत)** भवत **(विश्वे)** सर्वे **(अग्रिया)** अग्रे भवाः **(उत)** अपि **(वाजाः)** सत्कर्मसु वेगाः॥३॥

अन्वयः-हे ऋभवो! विद्वद्भिरयं वो यज्ञोऽकारि यं मनुष्वद् यूयं दधिध्वे। ये प्रदिवो वोऽच्छा जुजुषाणासः प्रास्थुरुतापि विश्व अग्रिया वाजा ये भवेयुस्तान् यूयं प्राप्ता अभूत॥३॥

भावार्थः-हे धीमन्तो विद्यार्थिनो! ये युष्मभ्यं विद्यां प्रयच्छेयुस्तान्निष्कपटेन प्रीत्या सेवध्वं जितेन्द्रिया भूत्वा यथार्थविद्यां प्राप्नुत॥३॥

पदार्थः-हे **(ऋभवः)** बुद्धिमानो! विद्वानों से जो **(अयम्)** यह **(वः)** आप लोगों का **(यज्ञः)** पढ़ाना और उपदेश करना रूप यज्ञ **(अकारि)** किया जाता है **(यम्)** जिसको **(मनुष्वत्)** विचार करने वाले विद्वानों के सदृश आप लोग **(दधिध्वे)** धारण करो और जो **(प्रदिवः)** अतिशय विद्या आदि उत्तम गुणों की कामना करते हुए **(वः)** आप लोगों की **(अच्छा)** उत्तम प्रकार **(आ, जुजुषाणासः)** अत्यन्त सेवा करते हुए **(प्र, अस्थुः)** उत्तम स्थित हूजिये **(उत)** और **(विश्वे)** सम्पूर्ण **(अग्रिया)** प्रथम उत्पन्न हुए **(वाजाः)** श्रेष्ठ कर्म्मों में वेग जो होवें, उनको आप लोग प्राप्त **(अभूत)** हूजिये॥३॥

भावार्थः-हे बुद्धिमान् विद्यार्थी जनो! जो आप लोगों के लिये विद्या देवें, उनकी कपटरहित प्रीति से सेवा करो और जितेन्द्रिय होकर यथार्थ विद्या को प्राप्त होओ॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय॥४॥

अभूत्। ऊम् इति। वः। विधते। रत्नऽधेयम्। इदा। नरः। दाशुषे। मर्त्याय। पिबत। वाजाः। ऋभवः। ददे। वः। महि। तृतीयम्। सवनम्। मदाय॥४॥

पदार्थः-(अभूत्) भवेत् **(उ)** वितर्के **(वः)** युष्मभ्यम् **(विधते)** विद्यासुशिक्षाविधानं कुर्वतेऽध्यापकोपदेशकाय वा **(रत्नधेयम्)** रत्नानि धीयन्ते यस्मिँस्तत् **(इदा) (नरः)** नेतारः **(दाशुषे)** विद्यादात्रे **(मर्त्याय)** मनुष्याय **(पिबत) (वाजाः)** विज्ञानवन्तः **(ऋभवः)** प्राज्ञाः **(ददे)** दद्याम् **(वः)** युष्मभ्यम् **(महि)** महत् **(तृतीयम्)** त्रयाणां पूरकम् **(सवनम्)** सुखैश्वर्य्यम् **(मदाय)** आनन्दाय॥४॥

अन्वयः-हे वाजा नर ऋभवो! वो विधते दाशुषे मर्त्याय रत्नधेयमिदाभूदु वो युष्मभ्यं यन्मदाय महि तृतीयं सवनमहं ददे तद्यूयं पिबत युष्मभ्यं विद्यामहमाददे॥४॥

भावार्थः-हे मनुष्या! येषां सकाशाद्विद्या भवन्तो गृह्णीयुस्तेभ्यो रत्नानि ददतु। यत उभयत्र विद्यैश्वर्य्यं वर्द्धेत॥४॥

पदार्थः-हे **(वाजाः)** बुद्धिमान् **(नरः)** सत्कर्म्मों में अग्रगामी और **(ऋभवः)** विज्ञानवान् जनो! **(वः)** आप लोगों के वा **(विधते)** विद्या और उत्तम शिक्षा का ग्रहण करते हुए अध्यापक वा उपदेशक जन के तथा **(दाशुषे)** विद्या के देने वाले **(मर्त्याय)** मनुष्य के लिये **(रत्नधेयम्)** रत्नों का पात्र **(इदा)** इस समय **(अभूत्)** होवे **(उ)** और **(वः)** आप लोगों के लिये जो **(मदाय)** आनन्द के अर्थ **(महि)** बड़े **(तृतीयम्)** तीन संख्या को पूर्ण करने वाले **(सवनम्)** सुख और ऐश्वर्य को मैं **(ददे)** देता हूँ, उसका आप लोग **(पिबत)** पान करो और आप लोगों से मैं विद्याग्रहण करता हूँ॥४॥

भावार्थः-हे मनुष्यो! जिन लोगों के समीप से विद्या आप लोग ग्रहण करें, उनके लिये रत्न दो, जिससे दोनों जगह विद्या और ऐश्वर्य्य बढ़े॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ वाजा॑ या॒तोप॑ न ऋभुक्षा म॒हो नरो॒ द्रवि॑णसो गृणा॒नाः।
आ वः॑ पी॒तयोऽभिपि॒त्वे अह्वा॑मि॒मा अस्तं॑ नव॒स्वइव ग्मन्॥५॥३॥

आ। वा॒जाः॒। या॒त॒। उप॑। नः॒। ऋ॒भु॒क्षाः॒। म॒हः॒। नरः॒। द्रवि॑णसः। गृ॒णा॒नाः॒। आ। वः॒। पी॒तयः॑। अ॒भि॒ऽपि॒त्वे। अह्वा॑म्। इ॒माः॒। अस्त॑म्। न॒व॒स्वः॑ऽइव। ग्म॒न्॥५॥

पदार्थः-(आ) समन्तात् **(वाजाः)** प्राप्तब्रह्मचर्य्याः **(यात)** प्राप्नुत **(उप)** **(नः)** अस्मान् **(ऋभुक्षाः)** सद्गुणैर्महान्तः **(महः)** पूजनीयाः **(नरः)** नेतारः **(द्रविणसः)** यशोधनस्य **(गृणानाः)** स्तुवन्तः **(आ)** **(वः)** युष्मान् **(पीतयः)** पानानि **(अभिपित्वे)** प्राप्तौ **(अह्वाम्)** दिनानाम् **(इमाः)** प्रत्यक्षाः **(अस्तम्)** गृहम् **(नवस्वइव)** यथा नवीनसुखः **(ग्मन्)** प्राप्नुवन्तु॥५॥

अन्वयः-हे ऋभुक्षा वाजा महो नरो! द्रविणसो गृणाना यूयं न उपायाताह्वामभिपित्व इमाः पीतयोऽस्तं नवस्वइव व आग्मन्॥५॥

भावार्थः-सर्वैमनुष्यैरियमाशीर्नित्या कर्त्तव्यास्मानाप्ताविद्वांसः प्राप्नुताऽहर्निशमैश्वर्य्यप्राप्तिर्भवेद् यथा नूतना विवाहाश्रमं सेवन्ते तथैव स्त्रीपुरुषा गृहकृत्यानि सेवेरन्॥५॥

पदार्थः-हे **(ऋभुक्षाः)** उत्तम गुणों से बड़े **(वाजाः)** ब्रह्मचर्य्य को प्राप्त **(महः)** आदर करने योग्य **(नरः)** नायक! **(द्रविणसः)** यशरूप धन की **(गृणानाः)** स्तुति प्रशंसा करते हुए आप लोग **(नः)** हम लोगों के **(उप, आ, यात)** समीप प्राप्त हूजिये और **(अह्वाम्)** दिनों की **(अभिपित्वे)** प्राप्ति होने में **(इमाः)** यह प्रत्यक्ष **(पीतयः)** जो पान हैं वह **(अस्तम्, नवस्वइव)** जैसे नवीन सुख वाला घर को प्राप्त होता है, वैसे **(वः)** आपको **(आ, ग्मन्)** प्राप्त हों॥५॥

भावार्थः-सब मनुष्यों को चाहिये कि ऐसी इच्छा नित्य करें कि हम लोगों को यथार्थवक्ता विद्वान् लोग प्राप्त होवें और दिन-रात्रि ऐश्वर्य्य की प्राप्ति होवे। जैसे नवीन विवाहाश्रम का सेवन करते हैं, वैसे ही स्त्री और पुरुष गृह के कृत्यों का सेवन करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः।

सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः॥६॥

आ। नपातः। शवसः। यातन। उप। इमम्। यज्ञम्। नमसा। हूयमानाः। सऽजोषसः। सूरयः। यस्य। च। स्थ। मध्वः। पात। रत्नऽधाः। इन्द्रऽवन्तः॥६॥

पदार्थः-(आ) (नपातः) न विद्यते पात् पतनं येषान्ते **(शवसः)** बलवन्तः **(यातन)** प्राप्नुत **(उप) (इमम्) (यज्ञम्)** विद्यावृद्धिकरं व्यवहारम् **(नमसा)** सत्कारेण **(हूयमानाः)** स्पर्द्धमानाः **(सजोषसः)** समानप्रीतिसेवनाः **(सूरयः)** विद्वांसः **(यस्य) (च) (स्थ)** सन्तु **(मध्वः)** मधुरगुणयुक्तस्य **(पात)** रक्षत **(रत्नधाः)** ये रत्नानि धनानि दधति ते **(इन्द्रवन्तः)** ऐश्वर्य्यवन्तः॥६॥

अन्वयः-हे हूयमानाः शवसो नपातः सजोषसो रत्नधा इन्द्रवन्तः सूरयो! यूयन्नमसेमं यज्ञमुपायातन यस्य च मध्वः प्राप्ताः स्थ तन्नित्यं पात॥६॥

भावार्थः-मनुष्यैः परस्परम्मित्रतां विधाय शरीरात्मबलं वर्द्धयित्वा विद्याधनैश्वर्य्यं प्राप्य संरक्ष्य वर्द्धयित्वाऽनेन सर्वे सुखिनः कर्त्तव्याः॥६॥

पदार्थः-हे **(हूयमानाः)** ईर्ष्या करते हुए **(शवसः)** बलयुक्त **(नपातः)** नहीं गिरना जिनके विद्यमान **(सजोषसः)** तुल्य प्रीति के सेवनकर्त्ता **(रत्नधाः)** धनों को धारण करने वाले **(इन्द्रवन्तः)** ऐश्वर्य्य से युक्त **(सूरयः)** विद्वान् जनो! आप लोग **(नमसा)** सत्कार से **(इमम्)** इस **(यज्ञम्)** विद्यावृद्धि करनेवाले यज्ञ को **(उप, आ, यातन)** प्राप्त हूजिये **(च)** और **(यस्य)** जिसके **(मध्वः)** मधुरगुणयुक्त पदार्थ को प्राप्त **(स्थ)** होओ उसकी नित्य **(पात)** रक्षा कीजिये॥६॥

भावार्थः-मनुष्यों को चाहिये कि परस्पर मित्रता कर शरीर और आत्मा का बल बढ़ाय, विद्याधनरूप ऐश्वर्य्य को प्राप्त हों, उसकी उत्तम प्रकार रक्षा कर और बढ़ाय के इससे सब को सुखी करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः।

अग्रेपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः॥७॥

सऽजोषाः। इन्द्र। वरुणेन। सोमम्। सऽजोषाः। पाहि। गिर्वणः। मरुत्ऽभिः। अग्रेऽपाभिः। ऋतुऽपाभिः। सऽजोषाः। ग्नाःपत्नीभिः। रत्नऽधाभिः। सऽजोषाः॥७॥

पदार्थः-(सजोषाः) समानप्रीतिसेवी **(इन्द्र)** ऐश्वर्य्यप्रद **(वरुणेन)** वरेण पुरुषार्थेन **(सोमम्)** ऐश्वर्य्यम् **(सजोषाः) (पाहि) (गिर्वणः)** गीर्भिः स्तुत **(मरुद्भिः)** मनुष्यैः सह **(अग्रेपाभिः)** येऽग्रे पान्ति रक्षन्ति तैः **(ऋतुपाभिः)** ये ऋतुषु पान्ति तैः **(सजोषाः) (ग्नास्पत्नीभिः)** या ग्नाः पतीनां स्त्रियस्ताभिः **(रत्नधाभिः)** या रत्नानि द्रव्याणि दधति ताभिः **(सजोषाः)**॥७॥

अन्वयः-हे गिर्वण इन्द्र! त्वं वरुणेन सजोषाः सोमं पाह्यग्रेपाभिर्मरुद्भिः सह सजोषाः सन्त्सोमं पाहि त्वं रत्नधाभिर्ग्नास्पत्नीभिः सह सजोषाः सोमं पाहि त्वमृतुपाभिः सह सजोषाः सोमं पाहि॥७॥

भावार्थः-हे मनुष्या! यूयं सत्पुरुषसन्धिनैश्वर्य्यमुन्नयत ये विनाशात् पुरस्तादृतुषु च रक्षां कुर्वन्ति या च स्वपत्नी पतिव्रता भवति तैस्तया च सह समानप्रीतिसुखदुःखलाभसेविनः सन्तः सर्वेषां प्रिया भवत॥७॥

पदार्थः-हे **(गिर्वणः)** वाणियों से स्तुति किये **(इन्द्र)** ऐश्वर्य्य के देने वाले! आप **(वरुणेन)** श्रेष्ठ पुरुषार्थ से **(सजोषाः)** तुल्य प्रीति के सेवने वाले **(सोमम्)** ऐश्वर्य्य की **(पाहि)** रक्षा करो और **(अग्रेपाभिः)** प्रथम रक्षा करने वाले **(मरुद्भिः)** मनुष्यों के साथ **(सजोषाः)** तुल्य प्रीति सेवने वाले हुए ऐश्वर्य्य की रक्षा करो और आप **(रत्नधाभिः)** द्रव्यों को धारण करने वाली **(ग्नास्पत्नीभिः)** पतियों की स्त्रियों के साथ **(सजोषाः)** समान सेवने वाले ऐश्वर्य्य की रक्षा करो और आप **(ऋतुपाभिः)** ऋतुओं में रक्षा करने वालों के साथ **(सजोषाः)** समान सेवन करने वाले ऐश्वर्य्य की रक्षा करो॥७॥

भावार्थः-हे मनुष्यो! आप लोग श्रेष्ठ पुरुषों के मेल से ऐश्वर्य्य की उन्नति करो और जो विनाश से पहिले और ऋतुओं में रक्षा करते हैं और जो अपनी स्त्री पतिव्रता होती है, उन मनुष्यों और उस स्त्री के साथ तुल्य प्रीति, सुख-दुःख और लाभ का सेवन करते हुए सब के प्रिय होओ॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः।

सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः॥८॥

सऽजोषसः। आदित्यैः। मादयध्वम्। सऽजोषसः। ऋभवः। पर्वतेभिः। सऽजोषसः। दैव्येन। सवित्रा। सऽजोषसः। सिन्धुऽभिः। रत्नऽधेभिः॥८॥

पदार्थः-(सजोषसः) समानोत्तमगुणकर्मस्वभावसेविनः **(आदित्यैः)** कृताष्टाचत्वरिंशद् ब्रह्मचर्य्यविद्यैः **(मादयध्वम्)** परस्परानानन्दयत **(सजोषसः)** **(ऋभवः)** मेधाविनः **(पर्वतेभिः)** मेघैः सह **(सजोषसः)** **(दैव्येन)** दिव्यस्वरूपेण। अत्र **संहितायामिति** दीर्घः। **(सवित्रा)** विद्युद्रूपेण **(सजोषसः)** **(सिन्धुभिः)** नदीभिः समुद्रैर्वा **(रत्नधेभिः)** ये रत्नानि द्रव्याणि दधति तैः॥८॥

अन्वयः-हे ऋभवो! यूयमादित्यैः सह सजोषसः पर्वतेभिः सह सजोषसः दैव्येना सवित्रा सह सजोषसो रत्नधेभिः सिन्धुभिः सह सजोषसः सन्तोऽस्मान् मादयध्वम्॥८॥

भावार्थः-ये मनुष्याः पूर्णविद्यैः सह सङ्गत्य पदार्थविद्यां गृह्णन्ति ते विमानादीनि निर्माय मेघमण्डले तत ऊर्ध्वं वा समुद्रेषु नदीषु च सुखेन विहर्त्तुमर्हन्ति॥८॥

पदार्थः-हे **(ऋभवः)** बुद्धिमानो! आप लोग **(आदित्यैः)** अड़तालीस वर्ष पर्यन्त ब्रह्मचर्य्य और विद्या का ग्रहण जिन्होंने किया उनके साथ **(सजोषसः)** समान उत्तम गुण, कर्म, स्वभाव के सेवन करने और **(पर्वतेभिः)** मेघों के साथ **(सजोषसः)** समान उत्तम गुण, कर्म, स्वभाव के सेवन करने और **(दैव्येन)** उत्तम स्वरूप वाले **(सवित्रा)** बिजुलीरूप के साथ **(सजोषसः)** तुल्य प्रीति सेवन करने **(रत्नधेभिः)** रत्नों को धारण करने वाले **(सिन्धुभिः)** नदी वा समुद्रों के साथ **(सजोषसः)** उत्तम गुण, कर्म, स्वभाव के सेवन करने वाले हुए आप हम लोगों को परस्पर **(मादयध्वम्)** आनन्दित कीजिये॥८॥

भावार्थः-जो मनुष्य पूर्ण विद्वानों के साथ मेल करके पदार्थविद्या का ग्रहण करते हैं, वे विमान आदि को रचके मेघमण्डल वा उससे ऊपर समुद्र और नदियों में सुख से विहार करने के योग्य होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ये अ॒श्विना॒ ये पि॒तरा॒ य ऊ॒ती धे॒नुं त॑त॒क्षुर्ऋ॒भवो॒ ये अश्वा॑।
ये अंस॑त्रा॒ य ऋ॒धग्रोद॑सी॒ ये विभ्वो॒ नर॑: स्वप॒त्यानि॑ च॒क्रुः॥९॥

ये। अ॒श्विना॑। ये पि॒तरा॑। ये। ऊ॒ती। धे॒नुम्। त॒त॒क्षुः। ऋ॒भवः॑। ये। अश्वा॑। ये। अंस॑त्रा। ये। ऋ॒धक्। रोद॑सी॒ इति॑। ये। विऽभ्वः॑। नरः॑। सु॒ऽअ॒प॒त्यानि॑। च॒क्रुः॥९॥

पदार्थः-(ये) **(अश्विना)** सकलविद्याव्याप्तौ **(ये)** **(पितरा)** सर्वथा पालकौ **(ये)** **(ऊती)** रक्षणाद्येन **(धेनुम्)** विद्यासहितां वाचम् **(ततक्षुः)** सूक्ष्मां विस्तृताञ्च कुर्वन्ति **(ऋभवः)** मेधाविनः **(ये)** **(अश्वा)** वेगेनाऽध्वनि व्याप्तिशीलौ युग्मौ पदार्थौ **(ये)** **(अंसत्रा)** अंसान् गत्यादीन् रक्षतस्तौ **(ये)** **(ऋधक्)** यथार्थतया **(रोदसी)** द्यावापृथिव्यौ **(ये)** **(विभ्वः)** सकलविद्यासु व्यापकाः **(नरः)** नेतारो मनुष्याः **(स्वपत्यानि)** सुष्ठु शिक्षयोत्तमानि चापत्यानि च तानि **(चक्रुः)** कुर्य्युः॥९॥

अन्वयः-य ऋभवोऽश्विना ये पितरा येऽश्वा येंऽसत्रा ये रोदसी ये च विभ्वो नरो य ऋभव ऊती धेनुं ततक्षुः स्वपत्यानि चर्धक् चक्रुस्ते महाभाग्यशालिनः स्युः॥९॥

भावार्थः-ये मनुष्या विद्यां सत्पुरुषसङ्गं वृद्धसेवनं प्राप्तरक्षां च कृत्वा स्वसन्तानाञ्छ्रेष्ठान् कुर्य्युस्ते विस्तीर्णसुखप्राप्ता भवेयुः॥९॥

पदार्थः-(**ये**) जो (**ऋभवः**) बुद्धिमान् (**अश्विना**) सम्पूर्ण विद्याओं में व्याप्त (**ये**) जो (**पितरा**) सब प्रकार से पालन करने वाले और (**ये**) जो (**अश्वा**) वेग से मार्ग के बीच व्याप्त होने वाले दो पदार्थ (**ये**) (**अंसत्रा**) गमन आदि के रक्षक और (**ये**) जो (**रोदसी**) अन्तरिक्ष और पृथिवी और (**ये**) जो (**विभ्वः**) सम्पूर्ण विद्याओं में व्यापक (**नरः**) नायक मनुष्य और (**ये**) जो बुद्धिमान् (**ऊती**) रक्षण आदि से (**धेनुम्**) विद्यासहित वाणी को (**ततक्षुः**) सूक्ष्म और विस्तारयुक्त करते हैं और (**स्वपत्यानि**) उत्तम शिक्षा से सन्तानों को श्रेष्ठ (**ऋधक्**) यथार्थ भाव से (**चक्रुः**) करें, वे बड़े भाग्यशाली होवें॥९॥

भावार्थः-जो मनुष्य विद्या और सत्पुरुषों का संग, वृद्धों का सेवन और अपने समीप प्राप्तों की रक्षा करके अपने सन्तानों को श्रेष्ठ करें, वे विस्तारयुक्त सुख को प्राप्त होवें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षुम्।
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति॥१०॥

ये। गोऽमन्तम्। वाजऽवन्तम्। सुऽवीरम्। रयिम्। धत्थ। वसुऽमन्तम्। पुरुऽक्षुम्। ते। अग्रेऽपाः। ऋभवः। मन्दसानाः। अस्मे इति। धत्त। ये। च। रातिम्। गृणन्ति॥१०॥

पदार्थः-(**ये**) (**गोमन्तम्**) बह्व्यो गावो विद्यन्ते यस्मिँस्तं बहुराज्ययुक्तम् (**वाजवन्तम्**) बह्वन्नविज्ञानसाधकम् (**सुवीरम्**) उत्तमवीरप्रापकम् (**रयिम्**) धनम् (**धत्थ**) (**वसुमन्तम्**) बहुविधद्रव्यसहितम् (**पुरुक्षुम्**) बहुधनधान्यसहितम् (**ते**) (**अग्रेपाः**) पुरस्ताद्रक्षकाः (**ऋभवः**) विपश्चितः (**मन्दसानाः**) आनन्दन्तः (**अस्मे**) धत्त (**ये**) (**च**) (**रातिम्**) दानम् (**गृणन्ति**) स्तुवन्ति॥१०॥

अन्वयः-हे ऋभवो! ये गोमन्तं वाजवन्तं वसुमन्तं पुरुक्षुं सुवीरं रयिं येऽग्रेपा मन्दसाना ये चाऽस्मे रातिं गृणन्ति ते यूयमेतदस्मे धत्थैतेनास्मासु सुखं धत्त॥१०॥

भावार्थः-हे विद्वांसो! यूयं येभ्यः साध्यजन्यसुखं प्राप्याऽन्येभ्यो दत्थ ते सुपात्रेभ्यो दानं दातुं प्रशंसन्ति॥१०॥

पदार्थः-हे (**ऋभवः**) विद्वानो! (**ये**) जो (**गोमन्तम्**) बहुत गौओं से युक्त (**वाजवन्तम्**) बहुत अन्न और विज्ञान के साधने वाले और (**वसुमन्तम्**) अनेक प्रकार द्रव्यों तथा (**पुरुक्षुम्**) बहुत धन और

धान्य के सहित **(सुवीरम्)** श्रेष्ठ वीरों के प्राप्त कराने वाले **(रयिम्)** धन को **(ये)** जो **(अग्रेपाः)** पहिले रक्षा करने वाले **(मन्दसानाः)** आनन्द करते हुए **(च)** और जो **(अस्मे)** हम लोगों के लिये **(रातिम्)** दान की **(गृणन्ति)** स्तुति करते हैं **(ते)** वे आप लोग इसको हम लोगों के लिये **(धत्थ)** धारण करो और इससे हम लोगों में सुख को **(धत्त)** धारण करो॥१०॥

भावार्थः-हे विद्वानो! आप लोग जिनके लिये सिद्ध करने योग्य पदार्थ से उत्पन्न सुख को प्राप्त होकर अन्य जनों के लिये देते हैं, वे सुपात्रों के लिये दान देने की प्रशंसा करते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन्।
समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः॥११॥४॥

न। अप। अभूत। न। वः। अतीतृषाम। अनिःऽशस्ताः। ऋभवः। यज्ञे। अस्मिन्। सम्। इन्द्रेण। मदथ। सम्। मरुत्ऽभिः। सम्। राजऽभिः। रत्नऽधेयाय। देवाः॥११॥

पदार्थः-(न) निषेधे **(अप, अभूत)** तिरस्कृता भवत **(न)** **(वः)** युष्मान् **(अतितृषाम)** अतितृष्णायुक्तान् कुर्य्याम। अत्र **संहितायामिति** दीर्घः। **(अनिःशस्ताः)** निर्गतं शस्तं प्रशंसनं येभ्यस्तद्विरुद्धाः **(ऋभवः)** मेधाविनः **(यज्ञे)** राज्यपालनाख्ये **(अस्मिन्)** **(सम्)** **(इन्द्रेण)** ऐश्वर्य्येण **(मदथ)** आनन्दत **(सम्)** **(मरुद्भिः)** उत्तमैर्मनुष्यैः सह **(सम्)** **(राजभिः)** **(रत्नधेयाय)** रत्नानि धीयन्ते यस्मिन् कोषे तस्मै **(देवाः)** विद्वांसः॥११॥

अन्वयः-हे देवा ऋभवोऽनिःशस्ता यूयं क्वापि नापाभूत यथाऽस्मिन् यज्ञे वो नातितृषाम तथाऽत्रेन्द्रेण सह सम्मदथ मरुद्भिः सह सम्मदथ राजभिः सह रत्नधेयाय सम्मदथ॥११॥

भावार्थः-ये लोभादिदोषरहिता राजप्रजाजनैः सह मिलित्वा गृहाश्रमव्यवहारमुन्नयन्ति ते क्वापि तिरस्कृता न भवन्ति॥११॥

अत्र मेधाविगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुस्त्रिंशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(देवाः)** विद्वान् और **(ऋभवः)** बुद्धिमानो! **(अनिःशस्ताः)** निरन्तर प्रशंसा को प्राप्त आप लोग कहीं भी **(न)** नहीं **(अप, अभूत)** तिरस्कृत हूजिये और जैसे **(अस्मिन्)** इस **(यज्ञे)** राज्यपालन करने रूप यज्ञ में **(वः)** तुम लोगों को **(न)** नहीं **(अतितृषाम)** अतितृष्णा युक्त करें, वैसे इस में **(इन्द्रेण)** ऐश्वर्य्ये के साथ **(सम्, मदथ)** आनन्द करो और **(मरुद्भिः)** उत्तम मनुष्यों के साथ **(सम्)** आनन्द करो और **(राजभिः)** राजा लोगों के साथ **(रत्नधेयाय)** जिसमें धन रक्खे जाते हैं उस कोश के लिये **(सम्)** आनन्द करो॥११॥

भावार्थः–जो लोभ आदि दोषों से रहित हुए राजा और प्रजाजनों के साथ मिल कर गृहाश्रम के व्यवहार की उन्नति करते हैं, वे कहीं तिरस्कृत नहीं होते हैं॥११॥

इस सूक्त में मेधावी के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह चौबीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ नवर्चस्य पञ्चत्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। ऋभवो देवताः। १, २, ४, ६, ७, ९ निचृत् त्रिष्टुप्। ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब नव ऋचा वाले पैंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

इहोप॑ यात शवसो नपातः॒ सौध॑न्वना ऋभवो॒ माप॑ भूत।
अ॒स्मिन् हि वः॑ सव॑ने रत्न॒धेयं॑ गम॒न्त्विन्द्र॒मनु॑ वो॒ मदा॑सः॥ १॥

इ॒ह। उप॑। या॒त॒। श॒व॒सः॒। न॒पा॒तः॒। सौध॑न्वनाः। ऋ॒भ॒वः॒। मा। अप॑। भू॒त॒। अ॒स्मिन्। हि। वः॒। सव॑ने। र॒त्न॒ऽधेय॑म्। गम॑न्तु। इन्द्र॑म्। अनु॑। वः॒। मदा॑सः॥ १॥

पदार्थः-(इह) अस्मिन् **(उप)** **(यात)** प्राप्नुत **(शवसः)** प्रशस्तबलाः **(नपातः)** अविद्यमानह्रासाः **(सौधन्वनाः)** शोभनानि धन्वान्यन्तरिक्षस्थानि येषान्तेषामिमे **(ऋभवः)** मेधाविनः **(मा)** निषेधे **(अप)** **(भूत)** अपमानयुक्ता भवत **(अस्मिन्)** **(हि)** यतः **(वः)** युष्माकम् **(सवने)** क्रियामये व्यवहारे **(रत्नधेयम्)** **(गमन्तु)** गच्छन्तु **(इन्द्रम्)** परमैश्वर्य्यम् **(अनु)** **(वः)** युष्माकम् **(मदासः)** आनन्दाः॥ १॥

अन्वयः-हे शवसो नपातः सौधन्वना ऋभवो! यूयमिहोप यात वोऽस्मिन्त्सवने हि वो मदासो रत्नधेयमिन्द्रमनुगमन्तु। अत्र एतत्प्राप्य क्वचिन्मापभूत तिरस्कृता मा भवत॥ १॥

भावार्थः-य उत्साहेनैश्वर्य्यमुन्नेतुमिच्छन्ति ते सकलैश्वर्य्यं प्राप्य सर्वत्र सत्कृता ये चालसास्ते दरिद्रत्वेनाऽभिभूताः सदा तिरस्कृता भवन्ति॥ १॥

पदार्थः-हे **(शवसः)** प्रशंसा करने योग्य बलयुक्त **(नपातः)** पतनरहित अर्थात् हानि से रहित **(सौधन्वनाः)** सुन्दर धनुष् अन्तरिक्ष में स्थित जिनके उनके सम्बन्धी **(ऋभवः)** बुद्धिमानो! आप लोग **(इह)** यहाँ **(उप, यात)** समीप में प्राप्त हूजिये **(वः)** आप लोगों के **(अस्मिन्)** इस **(सवने)** क्रियामय व्यवहार में **(हि)** जिस कारण **(वः)** आप लोगों के **(मदासः)** आनन्द **(रत्नधेयम्)** धन धरने के पात्ररूप **(इन्द्रम्)** परम ऐश्वर्य्य युक्त जन के **(अनु, गमन्तु)** पीछे जावें, इस कारण इसको प्राप्त होकर कहीं **(मा)** मत **(अप, भूत)** अपमान से युक्त हूजिये॥ १॥

भावार्थः-जो लोग उत्साह से ऐश्वर्य्य की वृद्धि करने की इच्छा करते हैं, वे सब जगह सम्पूर्ण ऐश्वर्य्य को प्राप्त होकर सर्वत्र सत्कारयुक्त और जो आलस्ययुक्त होते हैं, वे दरिद्रपन से अभिभूत अर्थात् सदा तिरस्कृत होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आगन्नृभूणामिह रत्नधेयमभूत् सोमस्य सुषुतस्य पीतिः।

सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा॥ २॥

आ। अगन्। ऋभूणाम्। इह। रत्नऽधेयम्। अभूत्। सोमस्य। सुऽसुतस्य। पीतिः। सुऽकृत्यया। यत्। सुऽअपस्यया। च। एकम्। विऽचक्र। चमसम्। चतुःऽधा॥ २॥

पदार्थः-(आ) समन्तात् **(अगन्)** **(ऋभूणाम्)** मेधाविनाम् **(इह)** अस्मिन् संसारे **(रत्नधेयम्)** **(अभूत्)** भवेत् **(सोमस्य)** ऐश्वर्य्यस्य **(सुषुतस्य)** सुष्ठु निष्पादितस्य **(पीतिः)** पानम् **(सुकृत्यया)** शोभनक्रियया **(यत्)** यम् **(स्वपस्यया)** सुष्ठ्वपांसि कर्माणि तान्यात्मन इच्छया **(च)** **(एकम्)** **(विचक्र)** कुर्वन्ति **(चमसम्)** चमसं मेघमिव गर्जनावन्तं रथम् **(चतुर्धा)** अधऊर्ध्वतिर्यक्समगतियुक्तम्॥ २॥

अन्वयः-हे मनुष्या! भवन्तो सुकृत्यया स्वपस्यया यद्यमेकं चमसं चतुर्धा विचक्र येन सुषुतस्य सोमस्य पीतिरभूदिहभूणां रत्नधेयमागँस्तेन च गमनादिकार्य्याणि साध्नुत॥ २॥

भावार्थः-ये मनुष्याः सुष्ठुहस्तक्रिययोत्तमकर्मणा सर्वतो गमयितारं रथादिकं निर्ममते ते भोज्यपेयासङ्ख्यधनानि प्राप्नुवन्ति॥ २॥

पदार्थः-हे मनुष्यो! आप **(सुकृत्यया)** सुन्दर क्रिया से **(स्वपस्यया)** वा सुन्दर कर्म्मों को अपनी इच्छा से **(यत्)** जिस **(एकम्)** एक **(चमसम्)** मेघ के सदृश गर्जना करने वाले रथ को **(चतुर्धा)** नीचे, ऊपर, तिरछी और मध्यम गति वाला **(विचक्र)** करते हैं जिससे **(सुषुतस्य)** उत्तम प्रकार उत्पन्न किये गये **(सोमस्य)** ऐश्वर्य्य का **(पीतिः)** पान **(अभूत्)** होवे और **(इह)** इस संसार में **(ऋभूणाम्)** बुद्धिमानों के **(रत्नधेयम्)** रत्न धरने के पात्ररूप जन को **(आ, अगन्)** सब प्रकार प्राप्त होवें **(च)** उसीसे गमन आदि कार्य्यों को सिद्ध करो॥ २॥

भावार्थः-जो मनुष्य उत्तम हस्तक्रिया और उत्तम कर्म से सर्वत्र पहुँचाने वाले वाहन आदि को रचते हैं, वे खाने और पीने योग्य पदार्थ और असङ्ख्य धनों को प्राप्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत।

अथैत वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः॥ ३॥

वि। अकृणोत। चमसम्। चतुःऽधा। सखे। वि। शिक्ष। इति। अब्रवीत। अथ। ऐत। वाजाः। अमृतस्य। पन्थाम्। गणम्। देवानाम्। ऋभवः। सुऽहस्ताः॥ ३॥

पदार्थः-(वि) विशेषेण **(अकृणोत)** **(चमसम्)** यथा यज्ञसाधनम् **(चतुर्धा)** **(सखे)** **(वि)** **(शिक्ष)** अत्र व्यत्ययेन परस्मैपदम्। **(इति)** **(अब्रवीत)** उपदिशत **(अथ)** **(ऐत)** प्राप्नुत **(वाजाः)**

(अमृतस्य) नाशरहितस्य मोक्षस्य **(पन्थाम्)** **(गणम्)** समूहम् **(देवानाम्)** विदुषाम् **(ऋभवः)** मेधाविनः **(सुहस्ताः)**॥३॥

अन्वयः-हे सखे! यथाप्ता विद्वांसो सत्यविद्यां शिक्षन्ते तथा त्वं शिक्ष। हे वाजाः सुहस्ता ऋभवो! यथा सखायस्तथा यूयं चमसं चतुर्धा व्यकृणोत शास्त्राणि व्यब्रवीत। अथेति देवानां गणममृतस्य पन्थामैत॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! परमेश्वरो युष्मान् चतुर्विधं पुरुषार्थं साध्नुतेति ब्रूते यदि सखायो भूत्वा कार्य्यसिद्धये प्रयत्नं कुर्य्युस्तर्हि धर्मार्थकाममोक्षसिद्धिर्युष्मानसंशयं प्राप्नुयात्॥३॥

पदार्थः-हे **(सखे)** मित्र! जैसे यथार्थवक्ता विद्वान् जन सत्यविद्या की शिक्षा देते हैं, वैसे आप **(शिक्ष)** शिक्षा देओ और हे **(वाजाः)** विज्ञानयुक्त **(सुहस्ताः)** अच्छे हाथों वाले **(ऋभवः)** बुद्धिमान् जनो! जैसे मित्र वैसे आप लोग **(चमसम्)** यज्ञ सिद्ध कराने वाले पात्र के सदृश कार्य्य को **(चतुर्धा)** चार प्रकार **(वि)** विशेषता से **(अकृणोत)** करो और शास्त्रों का **(वि)** विशेष करके **(अब्रवीत)** उपदेश देओ। **(अथ)** इसके अनन्तर **(इति)** इस प्रकार से **(देवानाम्)** विद्वानों के **(गणम्)** समूह को और **(अमृतस्य)** नाशरहित मोक्ष के **(पन्थाम्)** मार्ग को **(ऐत)** प्राप्त होओ॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! परमेश्वर आप लोगों के प्रति चार प्रकार के पुरुषार्थ को सिद्ध करो, ऐसा कहता है कि जो परस्पर मित्र होकर कार्य्य की सिद्धि के लिये प्रयत्न करो तो धर्म्म, अर्थ, काम और मोक्ष की सिद्धि आप लोगों को विना संशय प्राप्त होवे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

किꣳमयः꣡ स्विच्चमꣳस एष आ꣡सꣳ यं काव्ये꣡न चꣳतुरो꣡ विचꣳक्र।
अथा꣡ सुनुध्वꣳ सव꣡नꣳ मदा꣡य पा꣡त ऋ꣡भवो꣡ मधु꣡नः सोम्यस्य꣡॥४॥

किꣳम्ऽमय꣡ः। स्वि꣡त्। चꣳम꣡सः। एषः। आ꣡सꣳ यम्। काव्ये꣡न। चꣳतुर꣡ः। विꣳऽचꣳक्र। अथ꣡। सुꣳनुध्वꣳम्। सव꣡नम्। मदा꣡य। पा꣡त। ऋꣳभुवः। मधु꣡नः। सो꣡म्यस्य꣡॥४॥

पदार्थः-**(किंमयः)** यः किं मिनोति सः **(स्वित्)** प्रश्ने **(चमसः)** आचामति येन सः **(एषः)** **(आस)** **(यम्)** **(काव्येन)** कविना निर्मितेन विधिना **(चतुरः)** एतत्सङ्ख्याकान् **(विचक्र)** विदधति **(अथ)** अत्र **निपातस्य चे**ति दीर्घः। **(सुनुध्वम्)** निष्पादयत **(सवनम्)** कार्य्यसिद्ध्यर्थं कर्म **(मदाय)** आनन्दाय **(पात)** रक्षत **(ऋभवः)** मेधाविनः **(मधुनः)** ज्ञानजन्यस्य **(सोम्यस्य)** सोमैश्वर्य्ये साधोः॥४॥

अन्वयः-हे ऋभव! एष चमसः स्वित्किंमय आस यं काव्येन चतुरो यूयं विचक्र मदाय मधुनः सोम्यस्य सवनं सुनुध्वमथैतत्पात॥४॥

भावार्थः-कर्म्मसाधनानि कीदृशानि किंमयानि भवन्तीति पृच्छ्यते यद्यद्विद्यायुक्तिभ्यां निर्मितं स्यात् तत्तत्साधनं कार्य्यसिद्धिकरं भवतीत्युत्तरम्॥४॥

पदार्थः-हे **(ऋभवः)** बुद्धिमानो! **(एषः)** यह **(चमसः)** यज्ञपात्र जिससे कि आचमन करता है **(स्वित्)** सो क्या **(किंमयः)** किसी को फेंकता **(आस)** हुआ है **(यम्)** जिसको **(काव्येन)** कवियों के बनाये गये कर्म से **(चतुरः)** चार भाग आप लोग **(विचक्र)** विधान करते हैं और **(मदाय)** आनन्द के लिये **(मधुनः)** ज्ञान से उत्पन्न **(सोमस्य)** ऐश्वर्य्य में श्रेष्ठ पदार्थ के **(सवनम्)** कार्य्य की सिद्धि करने वाले को **(सुनुध्वम्)** उत्पन्न करो **(अथ)** इसके अनन्तर इसकी **(पात)** रक्षा करो॥४॥

भावार्थः-कार्य्यों के साधन कैसे और काहे के बने हुए होते हैं, यह पूछा जाता है। जो-जो विद्या और युक्ति से बनाया गया हो, वह-वह साधन कार्य्य की सिद्धि करने वाला होता है, यह उत्तर है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम्

शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः॥५॥५॥

शच्या। अकर्त। पितरा। युवाना। शच्या। अकर्त। चमसम्। देवऽपानम्। शच्या। हरी इति। धनुऽतरौ। अतष्ट। इन्द्रऽवाहौ। ऋभवः। वाजऽरत्नाः॥५॥

पदार्थः-(**शच्या**) प्रज्ञया (**अकर्त्त**) कुरुत (**पितरा**) विज्ञानवन्तावध्यापकोपदेशकौ (**युवाना**) प्राप्तयौवनौ (**शच्या**) कर्मणा (**अकर्त्त**) (**चमसम्**) पेयसाधनम् (**देवपानम्**) देवाः पिबन्ति येन तत् (**शच्या**) वाण्या। **शचीति वाङ्नामसु पठितम्।** (निघं०१.११) (**हरी**) वायुविद्युतौ (**धनुतरौ**) शीघ्रं गमयितारौ (**अतष्ट**) निष्पादयत (**इन्द्रवाहौ**) ऐश्वर्यप्रापकौ (**ऋभवः**) धीमन्तः (**वाजरत्नाः**) वाजा अन्नादयो रत्नानि सुवर्णादीनि च येषान्ते॥५॥

अन्वयः-हे वाजरत्ना ऋभवो! यूयं शच्या युवाना पितराकर्त्त शच्या देवपानं चमसमकर्त्त शच्या धनुतराविन्द्रवाहौ हरी अतष्ट॥५॥

भावार्थः-हे विद्वांसो! यूयमेवं यत्नं कुरुत यथा मनुष्यसन्ताना युवावस्था यावत्तावत् प्राप्तपूर्णविज्ञाना भूत्वा पूर्णायां युवावस्थायां परस्परस्य प्रीत्यनुमतिभ्यां स्वयंवरं विवाहं कृत्वा सर्वदाऽऽनन्दिताः स्युः॥५॥

पदार्थः-हे **(वाजरत्नाः)** अन्न आदि पदार्थ और सुवर्ण आदि पदार्थों से युक्त **(ऋभवः)** बुद्धिमानो! आप लोग **(शच्या)** उत्तम बुद्धि से **(युवाना)** युवावस्था को प्राप्त **(पितरा)** विज्ञान वाले अध्यापक और उपदेशक को **(अकर्त्त)** करिये **(शच्या)** कर्म से **(देवपानम्)** देव विद्वान् जन जिससे पान करते हैं उस **(चमसम्)** पान करने के साधन को **(अकर्त्त)** करिये **(शच्या)** वाणी से **(धनुतरौ)** शीघ्र

पहुंचाने और **(इन्द्रवाहौ)** ऐश्वर्य्य को प्राप्त कराने वाले **(हरी)** वायु और बिजुली को **(अतष्ट)** उत्पन्न करो॥५॥

भावार्थः-हे विद्वानो! आप लोग इस प्रकार यत्न करो जैसे कि मनुष्यों के सन्तान युवावस्था जब तक तब तक प्राप्त पूर्ण विज्ञान वाले होकर पूर्ण युवावस्था में परस्पर प्रीति और अनुमति से स्वयंवर विवाह करके सदा आनन्दित होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय।

तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मन्दसानाः॥६॥

यः। वः। सुनोति। अभिऽपित्वे। अह्नाम्। तीव्रम्। वाजासः। सवनम्। मदाय। तस्मै। रयिम्। ऋभवः। सर्वऽवीरम्। आ। तक्षत। वृषणः। मन्दसानाः॥६॥

पदार्थः-(यः) (**वः**) युष्मभ्यम् **(सुनोति)** निष्पादयति **(अभिपित्वे)** अभीष्टप्राप्तौ **(अह्नाम्)** दिनानां मध्ये **(तीव्रम्)** तेजोमयम् **(वाजासः)** विज्ञानवन्तः **(सवनम्)** ऐश्वर्य्यम् **(मदाय)** नित्यानन्दाय **(तस्मै)** **(रयिम्)** श्रियम् **(ऋभवः)** प्राज्ञाः **(सर्ववीरम्)** सर्वे वीरा यस्मात्तम् **(आ)** **(तक्षत)** साध्नुत **(वृषणः)** बलिष्ठः **(मन्दसानाः)** कामयमानाः॥६॥

अन्वयः-हे वृषणो वाजास ऋभवो! मन्दसाना यूयं यो वोऽह्नामभिपित्वे मदाय तीव्रं सवनं सुनोति तस्मै सर्ववीरं रयिमातक्षत॥६॥

भावार्थः-हे विद्वांसो! ये युष्माकं सेवामाज्ञानुसारेण वर्त्तमानं कर्म च कुर्वन्ति तान् विदुषः सुशिक्षातान् कृत्वा समग्रैश्वर्य्यं प्रापयत॥६॥

पदार्थः-हे **(वृषणः)** बलयुक्त **(वाजासः)** विज्ञान वाले **(ऋभवः)** बुद्धिमानो! **(मन्दसानाः)** कामना करते हुए आप लोग **(यः)** जो **(वः)** आप लोगों के लिये **(अह्नाम्)** दिनों के मध्य में **(अभिपित्वे)** अभीष्ट की प्राप्ति होने पर **(मदाय)** नित्य आनन्द के लिये **(तीव्रम्)** तेजःस्वरूप **(सवनम्)** ऐश्वर्य्य को **(सुनोति)** उत्पन्न करता है **(तस्मै)** उसके लिये **(सर्ववीरम्)** सम्पूर्ण वीर जिससे हों उस **(रयिम्)** धन को **(आ, तक्षत)** सिद्ध करो॥६॥

भावार्थः-हे विद्वानो! जो आप लोगों की सेवा तथा आज्ञा के अनुसार कार्य करते हैं, उनको विद्वान् और उत्तम प्रकार शिक्षित करके सम्पूर्ण ऐश्वर्य्य को प्राप्त कराइये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्रातः सुतमपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते।

समृभुभिः पिबस्व रत्नधेभिः सखींर्यां इन्द्र चकृषे सुकृत्या॥७॥

प्रातरिति। सुतम्। अपिबः। हरिऽअश्व। माध्यंदिनम्। सवनम्। केवलम्। ते। सम्। ऋभुऽभिः। पिबस्व। रत्नऽधेभिः। सखीन्। यान्। इन्द्र। चकृषे। सुऽकृत्या॥७॥

पदार्थः-(प्रातः) (सुतम्) निष्पन्नं दुग्धमुदकं वा **(अपिबः)** पिब **(हर्य्यश्व)** हर्याः कमनीया गमनीया अश्वा यस्य तत्सम्बुद्धौ **(माध्यन्दिनम्)** मध्ये दिने भवं भोजनादिकम् **(सवनम्)** सकलसंस्काररसोपेतम् **(केवलम्) (ते)** तव **(सम्) (ऋभुभिः)** मेधाविभिः सह **(पिबस्व) (रत्नधेभिः)** ये रत्नानि दधति तैः **(सखीन्)** सुहृदः **(यान्) (इन्द्र)** ऐश्वर्य्यप्रद राजन् **(चकृषे)** करोषि **(सुकृत्या)** शोभनेन धर्म्येण कर्मणा॥७॥

अन्वयः-हे हर्य्यश्वेन्द्र! त्वं सुकृत्या यान् सखीञ्चकृषे तै रत्नधेभिर्ऋभुभिः सह प्रातः सुतं माध्यन्दिनं केवलं सवनमपिबः सम्पिबस्वैवं ते ध्रुवं ते कल्याणं भवेत्॥७॥

भावार्थः-ये मनुष्या विद्वन्मित्राः सर्वेषां सुखैषिणः प्रातर्मध्यसायं कर्त्तव्यानि कर्माण्यभिहरणानि च कृत्वा सुकर्मणो भवेयुस्ते सर्वमित्राः सन्तो भाग्यशालिनः स्युः॥७॥

पदार्थः-हे **(हर्य्यश्व)** उत्तम प्रकार चलने योग्य घोड़ों से युक्त **(इन्द्र)** ऐश्वर्य्य के देने वाले राजन्! आप **(सुकृत्या)** उत्तम धर्मयुक्त कर्म से **(यान्)** जिन **(सखीन्)** मित्रों को **(चकृषे)** करते हो और उन **(रत्नधेभिः)** धनों को धारण करने वाले **(ऋभुभिः)** बुद्धिमानों के साथ **(प्रातः)** प्रातःकाल में **(सुतम्)** उत्पन्न दूध वा जल **(माध्यन्दिनम्)** तथा मध्य दिन में उत्पन्न भोजन आदि और **(केवलम्)** केवल **(सवनम्)** सम्पूर्ण संस्कारों के रसों से युक्त पीने योग्य पदार्थ का **(अपिबः)** पान करो **(सम्, पिबस्व)** अच्छे प्रकार आप पान करिये, इस प्रकार **(ते)** आप का निश्चय कल्याण होवे॥७॥

भावार्थः-जो मनुष्य विद्वानों के मित्र, सब के सुख चाहने वाले, प्रातःकाल, मध्यकाल और सायंकाल में करने योग्य कर्मों को करके उत्तम कर्म करनेवाले होवें, ये सबके मित्र हुए भाग्यशाली होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ये देवासो अभवता सुकृत्या श्येनाइवेदधि दिवि निषेद।

ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः॥८॥

ये। देवासः। अभवत। सुऽकृत्या। श्येनाःऽइव। इत्। अधि। दिवि। निऽसेद। ते। रत्नम्। धात। शवसः। नपातः। सौधन्वनाः। अभवत। अमृतासः॥८॥

पदार्थः-(ये) (**देवासः**) विद्वांसः **(अभवत)** भवन्ति। अत्र **संहितायामिति** दीर्घः। **(सुकृत्या)** सुकृतेन कर्मणा **(श्येनाइव)** श्येनवत्पुरुषार्थिनः **(इत्)** एव **(अधि)** उपरि **(दिवि)** द्युलोके अन्तरिक्षे **(निषेद)** निषीदन्ति। अत्र वचनव्यत्ययेनैकवचनम्। **(ते)** **(रत्नम्)** रमणीयं धनम् **(धात)** धरन्ति **(शवसः)** बलवन्तः सन्तः **(नपातः)** ये धर्मान्न पतन्ति **(सौधन्वनाः)** शोभनं धन्वान्तरिक्षं येषान्ते तेषां पुत्राः **(अभवत)** भवन्ति **(अमृतासः)** प्राप्तमोक्षसुखाः॥८॥

अन्वयः-ये देवासः सुकृत्याऽभवत श्येनाइव दिव्यधि निषेद त इच्छवसो नपातः सौधन्वना रत्नं धातामृतासोऽभवत॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये श्येनवद्विमानेनान्तरिक्षे गच्छन्ति धर्माचरणेन विद्वांसो भूत्वाऽन्यानपि तादृशान् कुर्वन्ति ते ऐश्वर्य्यं लब्ध्वा भुक्त्वा मुक्तिमधिगच्छन्ति॥८॥

पदार्थः-(ये) जो **(देवासः)** विद्वान् **(सुकृत्या)** श्रेष्ठ कर्म से **(अभवत)** होते और **(श्येनाइव)** वाज के सदृश पुरुषार्थी **(दिवि)** अन्तरिक्ष में **(अधि)** ऊपर **(निषेद)** स्थित होते हैं **(ते)** वे **(इत्)** ही **(शवसः)** बलवान् हुए **(नपातः)** धर्म से नहीं गिरने वाले **(सौधन्वनाः)** जिनका सुन्दर अन्तरिक्ष अर्थात् जिन्होंने यज्ञादि कर्म से अन्तरिक्ष को स्वच्छ किया उनके पुत्र **(रत्नम्)** सुन्दर धन को **(धात)** धारण करते हैं और **(अमृतासः)** मोक्षसुख को प्राप्त **(अभवत)** होते हैं॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो बाज के सदृश विमान से अन्तरिक्ष में जाते हैं, धर्म के आचरण से विद्वान् होकर अन्य जनों को भी वैसे करते हैं, ऐश्वर्य्य को प्राप्त हो तथा उसका भोग करके अन्त में मोक्ष को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः।

तदृभवः परिषिक्तं व एतत्सं मदेभिरिन्द्रियेभिः पिबध्वम्॥९॥६॥

यत्। तृतीयम्। सवनम्। रत्नऽधेयम्। अकृणुध्वम्। सुऽअपस्या। सुऽहस्ताः। तत्। ऋभवः। परिऽसिक्तम्। वः। एतत्। सम्। मदेभिः। इन्द्रियेभिः। पिबध्वम्॥९॥

पदार्थः-(यत्) **(तृतीयम्)** अष्टाचत्वारिंशद्वर्षपरिमितसेवितं ब्रह्मचर्य्यम् **(सवनम्)** सकलैश्वर्य्यप्रापकम् **(रत्नधेयम्)** रत्नानि धीयन्ते यस्मिँस्तत् **(अकृणुध्वम्)** **(स्वपस्या)** सुष्ठु धर्म्यकर्मेच्छया **(सुहस्ताः)** शोभना धर्म्यकर्मकरा हस्ता येषान्ते **(तत्)** **(ऋभवः)** **(परिषिक्तम्)** परितः सर्वतः श्रेष्ठपदार्थैः संयोजितम् **(वः)** युष्मभ्यम् **(एतत्)** **(सम्)** **(मदेभिः)** आनन्दैः **(इन्द्रियेभिः)** **(पिबध्वम्)**॥९॥

अन्वयः-हे सुहस्ता ऋभवो! यूयं यद्व एतत्परिषिक्तं तन्मदेभिरिन्द्रियेभिः स्वपस्या सम्पिबध्वं तद्रत्नधेयं तृतीयं सवनमकृणुध्वम्॥९॥

भावार्थः–हे मनुष्या! यूयं प्रथमे वयसि विद्याभ्यासं द्वितीये गृहाश्रमं तृतीये न्यायादिकर्मानुष्ठानं च कृत्वा पूर्णमैश्वर्य्यं प्राप्नुत॥९॥

अत्र विद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चत्रिंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः–हे (**सुहस्ताः**) सुन्दर धर्म्मसम्बन्धी कर्म्म करने वाले हाथों से युक्त (**ऋभवः**) बुद्धिमानो! [आप] (**यत्**) जो (**वः**) आप लोगों के लिये (**एतत्**) यह (**परिषिक्तम्**) सब प्रकार श्रेष्ठ पदार्थों से संयुक्त किया हुआ (**तत्**) उसको (**मदेभिः**) आनन्दों (**इन्द्रियेभिः**) चक्षुरादि इन्द्रियों और (**स्वपस्या**) उत्तम धर्मसम्बन्धी कर्म की इच्छा से (**सम्, पिबध्वम्**) पान करो और (**रत्नधेयम्**) जिसमें रत्न धरे जाते हैं उस (**तृतीयम्**) तीसरे अर्थात् अड़तालीसवें वर्ष पर्य्यन्त सेवित ब्रह्मचर्य्य और (**सवनम्**) सम्पूर्ण ऐश्वर्य्यों के प्राप्त करने वाले कर्म को (**अकृणुध्वम्**) करिये॥९॥

भावार्थः–हे मनुष्यो! तुम प्रथम अर्थात् युवावस्था में विद्या का अभ्यास, द्वितीय अर्थात् मध्यम अवस्था में गृहाश्रम और तृतीय में न्याय आदि कर्मों का अनुष्ठान करके पूर्ण ऐश्वर्य्य को प्राप्त होओ॥९॥

इस सूक्त में विद्वानों का कृत्य वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैतीसवां सूक्त और छठा वर्ग समाप्त हुआ॥

अथ नवर्चस्य षट्त्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। ऋभवो देवताः। १, ६, ८ स्वराट् त्रिष्टुप् छन्दः। ९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २-५ विराड् जगती। ७ जगती छन्दः। निषादः स्वरः॥

अथ शिल्पविद्याविषयमाह॥

अब नव ऋचा वाले छत्तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में शिल्पविद्या के विषय को कहते हैं॥

अ॒न॒श्वो जा॒तो अ॑न॒भी॒शुरु॒क्थ्यो॒३॑ रथ॑स्त्रिच॒क्रः परि॑ वर्तते॒ रज॑॑:।
म॒हत्तद्वो॑ दे॒व्य॑स्य प्र॒वाच॑नं॒ द्यामृ॑भवः पृथि॒वीं यच्च॒ पुष्य॑थ॥ १॥

अ॒न॒श्वः। जा॒तः। अ॒न॒भी॒शुः। उ॒क्थ्यः॑। रथ॑ः। त्रि॒ऽच॒क्रः। परि॑। व॒र्त॒ते॒। रज॑ः। म॒हत्। तत्। वः॒। दे॒व्य॑स्य। प्र॒ऽवाच॑नम्। द्याम्। ऋ॒भ॒वः॒। पृ॒थि॒वीम्। यत्। च॒। पुष्य॑थ॥ १॥

पदार्थः-(अनश्वः) अविद्यमाना अश्वा यस्मिन्तसः **(जातः)** उत्पन्नः **(अनभीशुः)** अप्रतिग्रहः **(उक्थ्यः)** प्रशंसितुमर्हः **(रथः)** यानविशेषः **(त्रिचक्रः)** त्रीणि चक्राण्यस्मिन् सः **(परि)** सर्वतः **(वर्त्तते)** **(रजः)** लोकसमूहः **(महत्)** **(तत्)** **(वः)** युष्मभ्यम् **(देव्यस्य)** देवेषु विद्वत्सु भवस्य **(प्रवाचनम्)** उपदेशनम् **(द्याम्)** प्रकाशम् **(ऋभवः)** मेधाविनः **(पृथिवीम्)** अन्तरिक्षं भूमिं वा **(यत्)** **(च)** **(पुष्यथ)**॥ १॥

अन्वयः-हे ऋभवो! वोऽनश्वोऽनभीशुरुक्थ्यस्त्रिचक्रो रथो जातः सन् यन्महद्रजः परिवर्त्तते तद्देव्यस्य प्रवाचनं परिवर्त्तते तेन द्यां पृथिवीं च यूयं पुष्यथ॥ १॥

भावार्थः-हे मनुष्या! यूयमनेकविधान्यनेककलाचक्राणि पश्वश्ववहनरहितान्यग्न्युदकवाहितानि विमानादीनि यानानि निर्माय पृथिव्यामप्स्वन्तरिक्षे च गत्वाऽऽगत्यैश्वर्य्यं प्राप्य पुष्टसुखा भवत॥ १॥

पदार्थः-हे **(ऋभवः)** बुद्धिमानो! **(वः)** आप लोगों के लिये **(अनश्वः)** घोड़ों से रहित **(अनभीशुः)** जिसने किसी का दिया नहीं लिया वह **(उक्थ्यः)** प्रशंसा करने योग्य **(त्रिचक्रः)** तीन पहियों से युक्त **(रथः)** वाहनविशेष **(जातः)** उत्पन्न हुआ **(यत्)** जो **(महत्)** बड़े **(रजः)** लोकसमूह के **(परि)** सब ओर **(वर्तते)** वर्त्तमान है **(तत्)** वह **(देव्यस्य)** विद्वानों में उत्पन्न कर्म का **(प्रवाचनम्)** उपदेश सब ओर वर्त्तमान है, उससे **(द्याम्)** प्रकाश **(च)** और **(पृथिवीम्)** अन्तरिक्ष वा भूमि को आप लोग **(पुष्यथ)** पुष्ट करो॥ १॥

भावार्थः-हे मनुष्यो! तुम लोग अनेक प्रकार के अनेक कलाचक्रों तथा पशु घोड़ा के वाहन से रहित, अग्नि और जल से चलाये गये विमान आदि वाहनों को बना पृथिवी, जलों और अन्तरिक्ष में जा आकर और ऐश्वर्य्य को प्राप्त होकर पूर्ण सुख वाले होओ॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

रथं॑ ये च॒क्रुः सु॒वृतं॑ सु॒चेत॒सोऽवि॑ह्वरन्तं॒ मन॑स॒स्परि॒ ध्यया॑।

ताँ ऊ॒ न्व१॑स्य सव॑नस्य पी॒तय॒ आ वो॑ वाजा ऋभवो वेदयामसि॥ २॥

रथ॑म्। ये। च॒क्रुः। सु॒ऽवृत॑म्। सु॒ऽचेत॑सः। अवि॑ऽह्वरन्तम्। मन॑सः। परि॑। ध्यया॑। तान्। ऊ॒म् इति॑। नु। अ॒स्य। सव॑नस्य। पी॒तये॑। आ। व॒रिति॑। वा॒जा॒रिति॑। ऋ॒भ॒वः॒। वे॒द॒या॒म॒सि॒॥ २॥

पदार्थः-(रथम्) विमानादियानम् **(ये)** **(चक्रुः)** कुर्वन्ति **(सुवृतम्)** सुष्ठु साङ्गोपाङ्गसहितम् **(सुचेतसः)** सुष्ठुविज्ञानाः **(अविह्वरन्तम्)** अकुटिलगतिम् **(मनसः)** विज्ञानात् **(परि)** **(ध्यया)** ध्यानेन **(तान्)** **(उ)** **(नु)** **(अस्य)** **(सवनस्य)** शिल्पविद्याजनितस्य कार्यस्य **(पीतये)** तृप्तये **(आ)** **(वः)** युष्मान् **(वाजा)** प्राप्तहस्तक्रियाः **(ऋभवः)** मेधाविनः **(वेदयामसि)** वेदयामः प्रज्ञापयामः॥ २॥

अन्वयः-हे वाजा ऋभवो! ये वोऽस्य सनवस्य पीतये सुचेतसो मनसो ध्ययाविह्वरन्तं सुवृतं रथं परि चक्रुर्यान् वयमावेदयामसि तान्नू यूयं सद्यः परिगृह्णीत॥ २॥

भावार्थः-हे मेधाविनो ये यानरचनचालनकुशलाः शिल्पिनः स्युस्तान् परिगृह्य सत्कृत्य शिल्पविद्योन्नतिं कुरुत॥ २॥

पदार्थः-हे **(वाजाः)** हस्तक्रिया को प्राप्त हुए **(ऋभवः)** बुद्धिमानो! **(ये)** जो **(वः)** आप लोगों को **(अस्य)** इस **(सवनस्य)** शिल्पविद्या से उत्पन्न हुए कार्य की **(पीतये)** तृप्ति के लिये **(सुचेतसः)** उत्तम विज्ञान वाले **(मनसः)** विज्ञान से **(ध्यया)** ध्यान से **(अविह्वरन्तम्)** नहीं टेढ़े चलने वाले **(सुवृतम्)** उत्तम प्रकार अङ्ग और उपाङ्गों के सहित **(रथम्)** विमान आदि वाहन को **(परि, चक्रुः)** सब ओर से बनाते हैं और जिनको हम लोग **(आ, वेदयामसि)** जनाते हैं **(तान्)** उनको **(नु)** निश्चय करके **(उ)** ही आप लोग शीघ्र ग्रहण कीजिये॥ २॥

भावार्थः-हे बुद्धिमानो! जो वाहनो के बनाने और चलाने में चतुर शिल्पीजन होवें, उनका ग्रहण और सत्कार करके शिल्पविद्या की उन्नति करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तद्वो॑ वाजा ऋभवः सुप्रवाच॒नं दे॒वेषु॑ विभ्वो अभवन्महित्व॒नम्।

जिव्री॒ यत्सन्ता॑ पि॒तरा॑ सना॒जुरा॒ पुन॒र्युवा॑ना च॒रथा॑य॒ तक्ष॑थ॥ ३॥

तत्। व॒रिति॑। वा॒जा॒रिति॑। ऋ॒भ॒वः॒। सु॒ऽप्र॒वा॒च॒नम्। दे॒वेषु॑। वि॒ऽभ्वः॒। अ॒भ॒व॒त्। म॒हि॒ऽत्व॒नम्। जिव्री॒ इति॑। यत्। सन्ता॑। पि॒तरा॑। स॒ना॒ऽजुरा॑। पुनः॑। युवा॑ना। च॒रथा॑य। तक्ष॑थ॥ ३॥

पदार्थः-(तत्) (**वः**) युष्मान् (**वाजाः**) अन्नादियुक्ताः (**ऋभवः**) मेधाविनः (**सुप्रवाचनम्**) सुष्ठ्वध्यापनमुपदेशनं च (**देवेषु**) विद्वत्सु (**विभ्वः**) सकलविद्यासु व्याप्ताः (**अभवत्**) भवेत् (**महित्वनम्**) महत्त्वम् (**जिव्री**) जीवन्तौ (**यत्**) (**सन्ता**) सन्तौ विद्यमानौ (**पितरा**) पितरौ (**सनाजुरा**) सदा जरावस्थास्थौ (**पुनः**) (**युवाना**) प्राप्तयौवनौ (**चरथाय**) गमनाय विज्ञानाय भोजनाय वा (**तक्षथ**) कुरुत॥३॥

अन्वयः-हे वाजा ऋभवो! विभ्वो यद्वो युष्मान् प्रति देवेषु महित्वनं सुप्रवाचनमभवत् तत्प्राप्य जिव्री सन्ता सनाजुरा पितरा चरथाय पुनर्युवाना तक्षथ॥३॥

भावार्थः-हे धीमन्तो जना! यदि युष्माभिर्विद्वत्सु स्थित्वैतेभ्योऽध्ययनमुपदेशनं च क्रियेत तर्हि ज्ञानवृद्धत्वाद्युवानः सन्तोऽपि वृद्धा भूत्वा सत्कृताः स्युः॥३॥

पदार्थः-हे (**वाजाः**) अन्न आदिकों से युक्त (**ऋभवः**) बुद्धिमानो! (**विभ्वः**) सकल विद्याओं में व्याप्त (**यत्**) जो (**वः**) आप लोगों के प्रति (**देवेषु**) विद्वानों में (**महित्वनम्**) प्रतिष्ठा को (**सुप्रवाचनम्**) उत्तम प्रकार पढ़ाना और उपदेश करना (**अभवत्**) होवे (**तत्**) उसको प्राप्त होकर (**जिव्री**) जीवते हुए (**सन्ता**) विद्यमान और (**सनाजुरा**) सदा वृद्धावस्था को प्राप्त (**पितरः**) माता-पिता (**चरथाय**) चलने, विज्ञान वा भोजन के लिये (**पुनः**) फिर (**युवाना**) युवावस्था को प्राप्त हुए (**तक्षथ**) करो॥३॥

भावार्थः-हे बुद्धिमान् जनो! जो आप लोग विद्वानों में स्थित होकर उनसे अध्ययन और उपदेश करें तो ज्ञानवृद्ध होने से युवावस्था को प्राप्त हुए भी वृद्ध होकर सत्कृत होवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एकं॒ वि च॑क्र च॒मस॑ं चतु॑र्वय॒ं निश्चर्म॑णो॒ गाम॑रिणीत धी॒तिभि॑:।

अथा॑ दे॒वेष्वमृ॑त॒त्वमा॑नश श्रु॒ष्टी वा॑जा ऋभव॒स्तद्व॒ उ॒क्थ्य॑म्॥४॥

एक॑म्। वि। च॒क्र॒। च॒म॒सम्। चतु॑:ऽवयम्। निः। चर्म॑णः। गाम्। अ॒रि॒णी॒त॒। धी॒तिऽभि॑:। अथ॑। दे॒वेषु॑। अ॒मृ॒त॒ऽत्वम्। आ॒न॒श॒। श्रु॒ष्टी। वा॒जा॒:। ऋ॒भ॒व॒:। तत्। वः। उ॒क्थ्य॑म्॥४॥

पदार्थः-(एकम्) असहायम् (**वि**) (**चक्र**) कुर्य्याम (**चमसम्**) मेघमिव विभक्तम् (**चतुर्वयम्**) चत्वारो वयम् (**निः**) नितराम् (**चर्मणः**) त्वचः (**गाम्**) पृथिवीम् (**अरिणीत**) प्राप्नुत (**धीतिभिः**) अङ्गुलिभिरिव विलेखनगतिभिः (**अथ**) अत्र **निपातस्य चे**ति दीर्घः। (**देवेषु**) विद्वत्सु (**अमृतत्वम्**) मोक्षसुखम् (**आनश**) प्राप्नुयुः (**श्रुष्टी**) क्षिप्रम् (**वाजाः**) विभवयुक्ताः (**ऋभवः**) विपश्चितः (**तत्**) (**वः**) युष्माकम् (**उक्थ्यम्**) प्रशंसनीयं कर्म॥४॥

अन्वयः-हे वाजा ऋभवस्तद्व उक्थ्यं कर्म येन यूयं श्रुष्टी धीतिभिश्चर्मणो गामरिणीत। अथैतेन देवेष्वमृतत्वमानश यथैकं चमसं चतुर्वयं विनिश्चक्र तथ यूयमपि कुरुत॥४॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। ये प्रशंसितानि कर्माणि कुर्वन्ति ते व्यावहारिकपारमार्थिकसुखं लब्ध्वा विपश्चिद्वरेषु प्रशंसां लभन्ते॥४॥

पदार्थः–हे **(वाजाः)** ऐश्वर्य्य से युक्त **(ऋभवः)** बुद्धिमान् जनो! **(तत्)** वह **(वः)** आप लोगों का **(उक्थ्यम्)** प्रशंसा करने योग्य कर्म कि जिससे आप लोग **(श्रुष्टी)** शीघ्र **(धीतिभिः)** अङ्गुलियों के सदृश विलेखनगतियों से **(चर्मणः)** त्वचा की **(गाम्)** भूमि को **(अरिणीत)** प्राप्त हूजिये **(अथ)** इसके अनन्तर इससे **(देवेषु)** विद्वानों में **(अमृतत्वम्)** मोक्षसुख को **(आनश)** प्राप्त हूजिये और जैसे **(एकम्)** सहायरहित अर्थात् अकेले **(चमसम्)** मेघों के सदृश विभक्त **(चतुर्वयम्)** चार हम लोग **(वि, निः, चक्र)** करें, वैसे आप लोग भी करो॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो प्रशंसित कर्मों को करते हैं, वे व्यावहारिक और पारमार्थिक सुख को प्राप्त होकर पण्डितवरों में प्रशंसा को प्राप्त होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒भु॒तो र॒यिः प्र॑थ॒मश्र॑वस्तमो॒ वाज॑श्रुतासो॒ यमजी॑जन॒न् नर॑ः।

वि॒भ्व॒त॒ष्टो वि॒दथे॑षु प्र॒वाच्यो॒ यं दे॑वा॒सोऽव॑था॒ स विच॑र्षणिः॥५॥७॥

ऋ॒भु॒तः। र॒यिः। प्र॒थ॒मश्र॑वःऽतमः। वाज॑ऽश्रुतासः। यम्। अजी॑जनन्। नर॑ः। वि॒भ्व॒ऽत॒ष्टः। वि॒दथे॑षु। प्र॒ऽवाच्यः॑। यम्। दे॒वा॒सः॒। अव॑थ। सः। विऽच॑र्षणिः॥५॥

पदार्थः-(ऋभुतः) ऋभूणां सकाशात् **(रयिः)** श्रीः **(प्रथमश्रवस्तमः)** अतिशयेन प्रथमः श्रवः श्रवणमन्नं वा यस्मात् सः **(वाजश्रुतासः)** वाजं विज्ञानं श्रुतं यैस्ते **(यम्)** **(अजीजनन्)** जनयन्ति **(नरः)** नायकाः **(विभ्वतष्टः)** यो विभुषु पदार्थेष्वतष्टोऽविचक्षणः सः **(विदथेषु)** विज्ञापनीयेषु व्यवहारेषु **(प्रवाच्यः)** प्रवक्तुं योग्यः **(यम्)** **(देवासः)** विद्वांसः **(अवथ)** रक्षथ **(सः)** **(विचर्षणिः)** सर्वद्रष्टव्यद्रष्टा मनुष्यः॥५॥

अन्वयः-हे देवासो! ये वाजश्रुतासो नरो यमजीजनन्त्स विभ्वतष्टो विदथेषु प्रवाच्यः स्यात्। तेनर्भुतः प्रथमश्रवस्तमो रयिः प्राप्येत तं यूयमवथ स विचर्षणिर्भवेत्॥५॥

भावार्थः–त एव विद्वांस उत्तमा ये विद्यार्थिनो विदुषः कुर्वन्ति। त एवाध्यापनीया उपदेष्टव्या ये पदार्थविद्याविरहाः स्युस्त एव सुखिनो भवन्ति ये विद्याश्रियौ प्राप्य धर्मात्मानो भवेयुः॥५॥

पदार्थः–हे **(देवासः)** विद्वानो! जो **(वाजश्रुतासः)** विज्ञान के सुनने वाले **(नरः)** नायकजन **(यम्)** जिसको **(अजीजनन्)** उत्पन्न करते हैं **(सः)** वह **(विभ्वतष्टः)** व्यापक पदार्थों में नहीं पण्डित अर्थात् उनको नहीं जानने वाला **(विदथेषु)** जनाने योग्य व्यवहारों में **(प्रवाच्यः)** कहने के योग्य होवे इससे **(ऋभुतः)** बुद्धिमानों के समीप से **(प्रथमश्रवस्तमः)** अत्यन्त प्रथम श्रवण वा अन्न जिससे वह

(रयिः) धन प्राप्त होवे और **(यम्)** जिसकी आप लोग **(अवथ)** रक्षा करते हो **[**वह**]** **(विचर्षणिः)** सम्पूर्ण देखने योग्य पदार्थों को देखने वाला मनुष्य होवे॥५॥

भावार्थः-वे ही विद्वान् उत्तम हैं कि जो विद्यार्थियों को विद्वान् करते हैं, उन्हीं को पढ़ाना और उपदेश देना चाहिये जो पदार्थविद्या से रहित होवें, वे ही सुखी होते हैं जो विद्या और धन को प्राप्त होकर धर्मात्मा होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स वाज्यर्वा स ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः।
स रायस्पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः॥६॥

सः। वाजी। अर्वा। सः। ऋषिः। वचस्यया। सः। शूरः। अस्ता। पृतनासु। दुस्तरः। सः। रायः। पोषम्। सः। सुऽवीर्यम्। दधे। यम्। वाजः। विऽभ्वा। ऋभवः। यम्। आविषुः॥६॥

पदार्थः-(सः) **(वाजी)** विज्ञानवान् **(अर्वा)** शुभगुणप्रापकः **(सः)** **(ऋषिः)** वेदार्थवेत्ता **(वचस्यया)** अतिशयितया प्रशंसया **(सः)** **(शूरः)** **(अस्ता)** शत्रूणां प्रक्षेप्ता **(पृतनासु)** शत्रुसेनासु **(दुष्टरः)** दुःखेनोल्लङ्घयितुं योग्यः **(सः)** **(रायः)** धनस्य **(पोषम्)** **(सः)** **(सुवीर्य्यम्)** सुष्ठु बलं पराक्रमम् **(दधे)** दधाति **(यम्)** **(वाजः)** विज्ञानवान् **(विभ्वा)** विभुना पदार्थेन **(ऋभवः)** मेधाविनः **(यम्)** **(आविषुः)** प्राप्तविद्यं कुर्वन्तु॥६॥

अन्वयः-हे मनुष्या! ऋभवो विभ्वा यमाविषुर्यं वाजो दधाति स वचस्यया सहार्वा वाजी स ऋषिः सः पृतनासु दुष्टरः शूरोऽस्ता भवति स रायस्पोषं सः सुवीर्य्यं च दधे॥६॥

भावार्थः-ये मनुष्या विद्वत्सङ्गेन गुणान् ग्रहीतुमिच्छन्ति ते प्रशंसिता शत्रुभिरजेया धनाढ्या वीर्य्यवन्तश्च जायन्ते॥६॥

पदार्थः-हे मनुष्यो! **(ऋभवः)** बुद्धिमान् जन **(विभ्वा)** व्यापक पदार्थ से **(यम्)** जिसको **(आविषुः)** विद्यायुक्त करें और **(यम्)** जिसको **(वाजः)** विज्ञानवान् धारण करता है **(सः)** वह **(वचस्यया)** अत्यन्त प्रशंसा के साथ **(अर्वा)** उत्तम गुणों को प्राप्त कराने वाला **(वाजी)** विज्ञानयुक्त **(सः)** वह **(ऋषिः)** वेदार्थ को जानने वाला **(सः)** वह **(पृतनासु)** शत्रुओं की सेनाओं में **(दुष्टरः)** दुःख से उल्लङ्घन करने योग्य **(शूरः)** वीर पुरुष **(अस्ता)** शत्रुओं का फेंकने वाला होता है **(सः)** वह **(रायः)** धन की **(पोषम्)** पुष्टि और **(सः)** वह **(सुवीर्य्यम्)** उत्तम बल और पराक्रम को **(दधे)** धारण करता है॥६॥

भावार्थः-जो मनुष्य विद्वानों के संग से गुणों के ग्रहण करने की इच्छा करते हैं; वे प्रशंसित, शत्रुओं से नहीं जीतने योग्य, धनाढ्य और पराक्रमी होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

श्रेष्ठं॑ व॒: पेशो॒ अधि॑ धायि दर्श॒तं स्तोमो॑ वाजा ऋभव॒स्तं जु॑जुष्टन।

धीरा॑सो॒ हि ष्ठा क॒वयो॑ विप॒श्चित॒स्तान् व॑ एना ब्रह्म॒णा वे॑दयामसि॥७॥

श्रेष्ठ॑म्। व॒:। पेश॑:। अधि॑। धा॒यि॒। दर्श॒तम्। स्तोम॑:। वा॒जा॒:। ऋ॒भ॒व॒:। तम्। जु॒जु॒ष्ट॒न॒। धीरा॑स:। हि। स्थ। क॒वय॑:। वि॒प॒:ऽचित॑:। तान्। व:। ए॒ना। ब्रह्म॑णा। आ। वे॒द॒या॒म॒सि॥७॥

पदार्थ:-(श्रेष्ठम्) अतिशयेन प्रशस्यम् **(व:)** युष्माकम् **(पेश:)** सुन्दरं रूपं हिरण्यञ्च। **पेश इति रूपनामसु पठितम्।** (निघं०३.७) **हिरण्यनामसु च।** (निघं०१.२) **(अधि)** उपरि **(धायि)** ध्रियते **(दर्शतम्)** द्रष्टव्यम् **(स्तोम:)** प्रशंसा **(वाजा:)** प्राप्तसुशीला वेगवन्त: **(ऋभव:)** सूरय: **(तम्) (जुजुष्टन)** सेवध्वम् **(धीरास:)** योगिनो विचारवन्त: **(हि)** यत: **(स्थ)** भवत। अत्र **संहितायामि**ति दीर्घ:। **(कवय:)** बहुदर्शिन उपदेशका: **(विपश्चित:)** सदसद्विवेका विद्वांस: **(तान्) (व:)** युष्मान् **(एना)** एनेन **(ब्रह्मणा)** वेदेन **(आ) (वेदयामसि)** ज्ञापयाम:॥७॥

अन्वय:-हे वाजा ऋभवो! यूयं येन वो श्रेष्ठं दर्शतं पेश: स्तोमोऽधिधायि ये हि धीरास: कवयो विपश्चित उपदेशका: स्युर्यं यान् व एना ब्रह्मणाऽऽवेदयामसि तं तांश्च जुजुष्टनैतत्सङ्गेन विद्वांस: स्थ॥७॥

भावार्थ:-ये विद्यार्थिन: श्रेष्ठानध्यापकान् विदुष आप्तान् संसेव्य शिक्षां गृह्णीयुस्ते विद्वांस: श्रीमन्तश्च भवेयु:॥७॥

पदार्थ:-हे **(वाजा:)** उत्तम स्वभावयुक्त और वेगवाले **(ऋभव:)** बुद्धिमान्! आप लोग जिसके **(व:)** आप लोगों के **(श्रेष्ठम्)** अत्यन्त प्रशंसा करने योग्य और **(दर्शतम्)** देखने योग्य **(पेश:)** सुन्दररूप और सुवर्ण तथा **(स्तोम:)** प्रशंसा **(अधि)** ऊपर **(धायि)** धारण की जाती है और जो **(हि)** जिससे **(धीरास:)** योगी विचार वाले **(कवय:)** बहुत शास्त्रों को देखे अर्थात विचारे हुए उपदेशक **(विपश्चित:)** सत्य और मिथ्या को पृथक् करने वाले विद्वान् जन उपदेशक होवें जिसको और जिन **(व:)** आप लोगों को **(एना)** इस **(ब्रह्मणा)** वेद से **(आ, वेदयामसि)** जनाते हैं **(तम्)** उस और **(तान्)** उनकी **(जुजुष्टन)** सेवा करो अर्थात् उसमें और अपने में प्रीति करो इसके संग से विद्वान् **(स्थ)** होओ॥७॥

भावार्थ:-जो विद्यार्थी जन श्रेष्ठ अध्यापक और विद्वान् यथार्थवक्ता जनों की सेवा करके शिक्षा ग्रहण करें, वे विद्वान् और लक्ष्मीवान् होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यू॒यम॒स्मभ्यं॑ धि॒षणा॑भ्य॒स्परि॑ वि॒द्वांसो॒ विश्वा॒ नर्या॑णि॒ भोज॑ना।

द्युमन्तं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः॥८॥

यूयम्। अस्मभ्यम्। धिषणाभ्यः। परि। विद्वांसः। विश्वा। नर्याणि। भोजना। द्युऽमन्तम्। वाजम्। वृषऽशुष्मम्। उत्ऽतमम्। आ। नः। रयिम्। ऋभवः। तक्षत। आ। वयः॥८॥

पदार्थः-(यूयम्) (अस्मभ्यम्) (धिषणाभ्यः) प्रज्ञाभ्यः **(परि)** सर्वतः **(विद्वांसः) (विश्वा)** सर्वाणि **(नर्य्याणि)** नृषु साधूनि नृभ्यो हितानि वा **(भोजना)** पालनान्यन्नानि वा **(द्युमन्तम्)** प्रकाशवन्तम् **(वाजम्)** विज्ञानम् **(वृषशुष्मम्)** वृषणां बलीनां बलम् **(उत्तमम्)** श्रेष्ठम् **(आ) (नः)** अस्मभ्यम् **(रयिम्)** धनम् **(ऋभवः)** मेधाविनः **(तक्षत)** विस्तृणुत **(आ) (वयः)** जीवनम्॥८॥

अन्वयः-हे विद्वांस ऋभवो! यूयमस्मभ्यं धिषणाभ्यो विश्वा नर्य्याणि भोजना द्युमन्तं वृषशुष्ममुत्तमं वाजं रयिं नो वयश्चातक्षत तेन सुखं पर्य्यावर्द्धयत॥८॥

भावार्थः-ये विद्वांसोऽध्यापनोपदेशाभ्यां मनुष्याणां प्रज्ञां वर्द्धयन्ति ते सर्वहितैषिणो विज्ञेयाः॥८॥

पदार्थः-हे **(विद्वांसः)** विद्वानो **(ऋभवः)** बुद्धिमानो! **(यूयम्)** आप लोग **(अस्मभ्यम्)** हम लोगों के लिये **(धिषणाभ्यः)** बुद्धियों से **(विश्वा)** सम्पूर्ण **(नर्य्याणि)** मनुष्यों में श्रेष्ठ वा मनुष्यों के लिये हितकारक **(भोजना)** पालन वा अन्न **(द्युमन्तम्)** प्रकाश वाले **(वृषशुष्मम्)** बलियों के बल और **(उत्तमम्)** श्रेष्ठ **(वाजम्)** विज्ञान और **(रयिम्)** धन का तथा **(नः)** हम लोगों के लिये **(वयः)** जीवन का **(आ, तक्षत)** विस्तार कीजिये, उससे सुख को **(परि, आ)** सब प्रकार से बढ़ाइये॥८॥

भावार्थः-जो विद्वान् पढ़ाने और उपदेश करने से मनुष्यों की बुद्धि बढ़ाते हैं, वे सब के हितैषी जानने चाहिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः।

येन वयं चितयेमात्यन्यान् तं वाजं चित्रमृभवो ददा नः॥९॥८॥

इह। प्रऽजाम्। इह। रयिम्। रराणाः। इह। श्रवः। वीरऽवत्। तक्षत। नः। येन। वयम्। चितयेम। अति। अन्यान्। तम्। वाजम्। चित्रम्। ऋभवः। ददा। नः॥९॥८॥

पदार्थः-(इह) अस्मिन् संसारे **(प्रजाम्)** उत्तमान् सन्तानान् राष्ट्रं वा **(इह) (रयिम्)** धनम् **(ररणाः)** ददमानाः **(इह) (श्रवः)** अन्नं श्रवणं वा **(वीरवत्)** प्रशस्तवीरकारम् **(तक्षत)** प्रापयत। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मभ्यम् **(येन) (वयम्) (चितयेम)** चितिं संज्ञानमाचक्ष्महि **(अति) (अन्यान्) (तम्) (वाजम्)** विज्ञानम् **(चित्रम्)** अद्भुतम् **(ऋभवः) (ददा)** ददतु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)**॥९॥

अन्वयः-हे ऋभवो! भवन्त इह नः प्रजामिह रयिमिह वीरवच्छ्रवो रराणाः सन्तस्तक्षत येन वयमन्यानति चितयेम तं चित्रं वाजं नो ददा॥९॥

भावार्थः-यदा मनुष्या विदुषः सङ्गच्छन्ते तदा विज्ञानं सत्यश्रवणं धनमुत्तमां प्रजां शूरवीरयुक्तसेनां च याचन्तां तेभ्यो यथार्थां विद्यां प्राप्याऽन्यान् सततं बोधयेयुरिति॥९॥

अत्र विपश्चिद्गुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्त्रिंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे **(ऋभवः)** बुद्धिमानो! आप लोग **(इह)** इस संसार में **(नः)** हम लोगों के लिये **(प्रजाम्)** उत्तम सन्तान वा राज्य को **(इह)** इस संसार में **(रयिम्)** धन को और **(इह)** इस संसार में **(वीरवत्)** प्रशंसा करने योग्य वीरों के करने वाले **(श्रवः)** अन्न वा श्रवण को **(रराणाः)** देते हुए **(तक्षत)** प्राप्त कराओ **(येन)** जिससे **(वयम्)** हम लोग **(अन्यान्)** औरों के प्रति **(अति, चितयेम)** उत्तम रीति से विज्ञान को कहें **(तम्)** उस **(चित्रम्)** अद्भुत **(वाजम्)** विज्ञान को **(नः)** हम लोगों के लिये **(ददा)** दीजिये॥९॥

भावार्थः-जब मनुष्य विद्वानों को प्राप्त होवें तब विज्ञान, सत्यश्रवण, धन, उत्तम प्रजा और शूरवीरयुक्त सेना की याचना करें, उनसे यथार्थ विद्या को प्राप्त होकर अन्यों को निरन्तर बोध करावें॥९॥

इस सूक्त में विपश्चित् के गुणकृत्य [का] वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छत्तीसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

अथाष्टर्चस्य सप्तत्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। ऋभवो देवताः। १ विराट् त्रिष्टुप्। २ त्रिष्टुप्। ३, ८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ पङ्क्तश्छन्दः। पञ्चमः स्वरः। ५, ७ अनुष्टुप्। ६ निचृदनुष्टुप् छन्दः। ऋषभः स्वरः॥

अथाप्तविषयमाह॥

अब आठ ऋचा वाले सैंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में आप्त के विषय को कहते हैं॥

उप॑ नो वाजा अध्व॒रमृ॑भुक्षा॒ देवा॑ या॒त प॒थिभि॑र्देव॒यानै॑:।
यथा॑ य॒ज्ञं मनु॑षो वि॒क्ष्वा३॒सु दधि॒ध्वे र॑ण्वाः सु॒दिने॒ष्वह्ना॑म्॥ १॥

उप॑। न॒:। वा॒जा॒:। अ॒ध्व॒रम्। ऋ॒भु॒क्षा॒:। देवा॑:। या॒त। प॒थिऽभि॑:। दे॒व॒ऽयानै॑:। यथा॑। य॒ज्ञम्। मनु॑ष:। वि॒क्षु। आ॒सु। दधि॒ध्वे। र॒ण्वा॒:। सु॒ऽदिने॑षु। अह्ना॑म्॥ १॥

पदार्थः-(उप) (नः) अस्माकम् **(वाजाः)** विज्ञानवन्तः **(अध्वरम्)** अहिंसामयं यज्ञम् **(ऋभुक्षाः)** महान्तः **(देवाः) (यात)** प्राप्नुत **(पथिभिः)** मार्गैः **(देवयानैः)** देवा विद्वांसो यन्ति येषु तैः **(यथा) (यज्ञम्)** वैरादिदोषरहितं व्यवहारम् **(मनुषः)** मननशीलाः **(विक्षु)** प्रजासु **(आसु)** प्रत्यक्षवर्त्तमानासु **(दधिध्वे)** धरध्वम् **(रण्वाः)** रमणीयाः **(सुदिनेषु)** सुखेन वर्त्तमानेष्वहःसु **(अह्नाम्)** दिनानां मध्ये॥१॥

अन्वयः-हे ऋभुक्षा वाजा देवा! भवन्तो यथा रण्वा मनुषोऽह्नां सुदिनेष्वासु विक्षु यज्ञं दधति तथैव यूयमेतं दधिध्वे तथा पथिभिर्देवयानैर्नोऽध्वरमुपयात॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये धार्मिकाणां विदुषां मार्गेण गच्छन्ति ते प्रजाहितकरणे समर्था जायन्ते॥१॥

पदार्थः-हे **(ऋभुक्षाः)** बड़े **(वाजाः)** विज्ञानवाले **(देवाः)** विद्वानो! आप लोग **(यथा)** जैसे **(रण्वाः)** सुन्दर **(मनुषः)** विचार करने वाले **(अह्नाम्)** दिनों के मध्य में **(सुदिनेषु)** सुख से वर्त्तमान दिनों में और **(आसु)** इन प्रत्यक्ष वर्त्तमान **(विक्षु)** प्रजाओं में **(यज्ञम्)** वैर आदि दोषरहित व्यवहार को धारण करते हैं, वैसे ही आप लोग इसको **(दधिध्वे)** धारण कीजिये वैसे **(पथिभिः)** मार्गों **(देवयानैः)** विद्वान् लोग जिसमें जायें उनसे **(नः)** हम लोगों के **(अध्वरम्)** अहिंसामय यज्ञ को **(उप, यात)** प्राप्त हूजिये॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जन धार्मिक विद्वानों के मार्ग अर्थात् मर्यादा से चलते हैं, वे प्रजा के हित करने में समर्थ होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ते वो॑ हृ॒दे मन॑से सन्तु य॒ज्ञा जुष्टा॑सो अ॒द्य घृ॒तनि॑र्णिजो गुः।

प्र वः॑ सु॒तासो॑ हर॒यन्त॒ पूर्णाः॒ क्रत्वे॒ दक्षा॑य हर्षयन्त पी॒ताः॥ २॥

ते। व॒रुः। हृ॒दे। मन॑से। स॒न्तु॒। य॒ज्ञाः। जुष्टा॑सः। अ॒द्य। घृ॒तऽनि॑र्निजः। गु॒रुः। प्र। व॒रुः। सु॒तास॑रुः। हर॒य॒न्त॒। पूर्णाः॑। क्रत्वे॑। दक्षा॑य। हर्ष॒य॒न्त॒। पी॒ताः॥ २॥

पदार्थः-(ते) (वः) युष्माकम् **(हृदे)** हृदयाय **(मनसे)** अन्तःकरणाय **(सन्तु) (यज्ञाः)** सत्या व्यवहाराः **(जुष्टासः)** विद्वद्भिः सेविताः **(अद्य) (घृतनिर्णिजः)** घृतेनाज्येनोदकेन शुद्धीकृताः **(गुः)** प्राप्नुवन्तु **(प्र) (वः)** युष्मान् **(सुतासः)** निष्पन्नाः **(हरयन्त)** कामयन्ताम् **(पूर्णाः) (क्रत्वे)** प्रज्ञायै **(दक्षाय)** चातुर्याय **(हर्षयन्त) (पीताः)**॥ २॥

अन्वयः-हे विद्वांसस्ते हृदे मनसेऽद्य वो घृतनिर्णिजो जुष्टासो यज्ञाः प्राप्ताः सन्तु सुतासो वो गुः प्र हरयन्त क्रत्वे दक्षाय पूर्णाः पीता हर्षयन्त॥ २॥

भावार्थः-हे मनुष्या! भवन्त एवं पुरुषार्थमनुतिष्ठन्तु यतो पवित्रता प्रज्ञा चातुर्य्यञ्च वर्द्धेरन्। ये मांसमद्याहारं विहायोत्तमं भुञ्जते ते सततं विज्ञानमुन्नयन्ति॥ २॥

पदार्थः-हे विद्वानो! **(ते)** वे **(हृदे)** हृदय वा **(मनसे)** अन्तःकरण के लिये **(अद्य)** आज **(वः)** आप लोगों के **(घृतनिर्णिजः)** घृत वा जल से शुद्ध किये गये **(जुष्टासः)** विद्वानों से सेवित **(यज्ञाः)** सत्य व्यवहार प्राप्त **(सन्तु)** होवें **(सुतासः)** उत्पन्न हुए **(वः)** आप लोगों को **(गुः)** प्राप्त हों और **(प्र, हरयन्त)** कामना करें तथा **(क्रत्वे)** बुद्धि और **(दक्षाय)** चतुरता के लिये **(पूर्णाः)** पूर्ण **(पीताः)** पालन किये गये **(हर्षयन्त)** प्रसन्न होवें॥ २॥

भावार्थः-हे मनुष्यो! आप लोग ऐसा पुरुषार्थ करो जिससे पवित्रता, बुद्धि और चातुर्य्य बढ़े और जो मांस, मद्य के आहार का त्याग करके उत्तम पदार्थ का भोग करते, वे निरन्तर विज्ञान को बढ़ाते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्र्यु॒दा॒यं दे॒वहि॑तं॒ यथा॑ व॒रुः स्तोमो॑ वाजा ऋभुक्षणो द॒दे व॑रुः।

जु॒ह्वे म॑नु॒ष्वदु॑प॒रासु॒ वि॒क्षु यु॒ष्मे सचा॑ बृ॒हद्दि॑वेषु॒ सोम॑म्॥ ३॥

त्रि॒ऽउ॒दा॒यम्। दे॒वऽहि॑तम्। यथा॑। व॒रुः। स्तोम॑रुः। वा॒जा॒रुः। ऋ॒भु॒क्ष॒ण॒रुः। द॒दे। व॒रुः। जु॒ह्वे॒। म॒नु॒ष्वत्। उ॒प॒रासु॑। वि॒क्षु। यु॒ष्मे इति॑। सचा॑। बृ॒हत्ऽदि॑वेषु। सोम॑म्॥ ३॥

पदार्थः-(त्र्युदायम्) यं मनोदेहवचनैरुदायन्ति तम् **(देवहितम्)** देवेभ्यो हितकरम् **(यथा) (वः)** युष्माकं युष्मभ्यं वा **(स्तोमः)** प्रशंसा **(वाजाः)** अन्नविज्ञानवन्तः **(ऋभुक्षणः)** महान्तः **(ददे)** ददामि

(वः) युष्मान् **(जुह्वे)** स्पर्द्धे **(मनुष्वत्)** विद्वद्वत् **(उपरासु)** श्रेष्ठासु **(विक्षु)** मनुष्यादिप्रजासु **(युष्मे)** युष्मान् **(सचा)** सत्येन **(बृहद्दिवेषु)** दिव्येषु पदार्थेषु **(सोमम्)** ऐश्वर्य्यम्॥३॥

अन्वयः-हे वाजा ऋभुक्षणो! यथा वः स्तोमो मां सुखं ददाति तथा युष्मभ्यमानन्दमहं ददे। यथाहं मनुष्वद्व उपरासु विक्षु सचा बृहद्दिवेषु त्र्युदायं देवहितं सोमं जुह्वे युष्मे सुखं प्रयच्छामि तथा मां यूयमाह्वयत सुखं प्रयच्छत॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा विद्वांसो युष्मभ्यं सुखं ददति युष्माकं हितं चिकीर्षन्ति तथैव यूयमपि तदर्थमाचरत॥३॥

पदार्थः-हे **(वाजाः)** अन्न तथा विज्ञानवाले **(ऋभुक्षणः)** श्रेष्ठ जनो! **(यथा)** जैसे **(वः)** आप लोगों की वा आप लोगों के लिये **(स्तोमः)** प्रशंसा मुझको सुख देती है, वैसे आप लोगों के लिये आनन्द को मैं **(ददे)** देता हूँ और जैसे मैं **(मनुष्वत्)** विद्वान् के सदृश **(वः)** आप लोगों को **(उपरासु)** श्रेष्ठ **(विक्षु)** मनुष्य आदि प्रजाओं में **(सचा)** सत्य से **(बृहद्दिवेषु)** महान् दिव्य पदार्थों में **(त्र्युदायम्)** मन, देह और वचन इन तीनों से जिसको देते हैं उस **(देवहितम्)** विद्वानों के लिये हितकारक **(सोमम्)** ऐश्वर्य्य को **(जुह्वे)** स्पर्द्धा करता हूँ और **(युष्मे)** आप लोगों के लिये सुख देता हूँ, वैसे मुझको आप लोग भी बुलाओ और सुख दो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन आप लोगों के लिये सुख देते हैं और आप लोगों के हित की इच्छा करते हैं, वैसे ही आप लोग भी उनके लिये आचरण करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पीवोऽअश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः।

इन्द्रस्य सूनो शवसो नपातोऽनु वश्चेत्यग्रियं मदाय॥४॥

पीवःऽअश्वाः। शुचत्ऽरथाः। हि। भूत। अयःऽशिप्राः। वाजिनः। सुऽनिष्काः। इन्द्रस्य। सूनो इति। शवसः। नपातः। अनु। वः। चेति। अग्रियम्। मदाय॥४॥

पदार्थः-**(पीवोअश्वाः)** पीवसः स्थूला अश्वा येषान्ते **(शुचद्रथाः)** शुचन्तः पवित्रा रथा यानानि येषान्ते **(हि)** यतः **(भूत)** भवत **(अयःशिप्राः)** अय इव शिप्रे हनूनासिके येषामश्वानां तद्वन्तः **(वाजिनः)** वेगवन्तः **(सुनिष्काः)** शोभनानि निष्कानि सुवर्णमयान्याभूषणानि येषान्ते **(इन्द्रस्य)** परमैश्वर्य्यवतो राज्ञः **(सूनो)** अपत्य **(शवसः)** बलवतः **(नपातः)** अविद्यमानाऽधःपतनस्य **(अनु)** **(वः)** **(चेति)** विज्ञायते **(अग्रियम्)** अग्रे भवं सुखम् **(मदाय)** आनन्दाय॥४॥

अन्वयः-हे पीवोअश्वाः शुचद्रथा अयःशिप्राः सुनिष्का वाजिनो यूयं हि विजयिनो भूत। हे नपातः शवस इन्द्रस्य सूनो! त्वं मदायाग्रियं पुरुषार्थं कुरु यथाऽस्माभिर्वः सुखमनु चेति तथा युष्माभिरस्मत्सुखवृद्धिः प्रयत्येत॥४॥

भावार्थः-हे राजपुरुषा! भवन्तो विस्तीर्णबलाः सेनाङ्गसहिता ऐश्वर्य्यालङ्कृता राज्याऽऽनन्दवृद्धये पुरुषार्थं कुर्वन्तु यतः शत्रवो युष्मान् तिरस्कर्तुं न शक्नुयुः॥४॥

पदार्थः-हे **(पीवोअश्वाः)** मोटे घोड़ों **(शुचद्रथाः)** पवित्र वाहनों और **(अयः शिप्राः)** लोह के सदृश ठुड्ढी और नासिका वाले घोड़ों से युक्त **(सुनिष्काः)** सुन्दर सुवर्ण के आभूषणों वाले **(वाजिनः)** वेगयुक्त आप लोग **(हि)** जिससे जीतने वाले **(भूत)** हूजिये। और हे **(नपातः)** नीचे गिरना अर्थात् नीच दशा को प्राप्त होना जिसके नहीं उस **(शवसः)** बलवान् **(इन्द्रस्य)** अत्यन्त ऐश्वर्य्य वाले राजा के **(सूनो)** पुत्र! आप **(मदाय)** आनन्द के लिये **(अग्रियम्)** प्रथम हुए सुख और पुरुषार्थ को करो और जैसे हम लोगों से **(वः)** आप लोगों का सुख **(अनु, चेति)** जाना जाता है, वैसे आप लोगों को हम लोगों की सुखवृद्धि का प्रयत्न करना चाहिये॥४॥

भावार्थः-हे राजपुरुषो! आप लोग विस्तीर्ण बल से युक्त और सेना के अङ्गों के सहित विराजमान और ऐश्वर्य्य से शोभित हुए राज्य के आनन्द की वृद्धि के लिये पुरुषार्थ करो, जिससे शत्रुजन आप लोगों का तिरस्कार करने को समर्थ न हो सकें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒भुमृ॑भुक्षणो र॒यिं वाजे॑ वा॒जिन्त॑मं॒ युज॑म्।
इन्द्र॑स्वन्तं हवामहे सदा॒सात॑मम॒श्विन॑म्॥५॥९॥

ऋ॒भुम्। ऋ॒भुक्ष॑णः। र॒यिम्। वाजे॑। वा॒जिन्ऽत॑मम्। युज॑म्। इन्द्र॑स्वन्तम्। ह॒वा॒म॒हे॒। स॒दा॒ऽसात॑मम्। अ॒श्विन॑म्॥५॥

पदार्थः-**(ऋभुम्)** मेधाविनम् **(ऋभुक्षणः)** महान्तो विद्वांसः **(रयिम्)** धनम् **(वाजे)** सङ्ग्रामे **(वाजिन्तमम्)** प्रशंसिता बहवोऽतिशयिता वाजिनो विद्यन्ते यस्मिँस्तम् **(युजम्)** समाधातुमर्हम् **(इन्द्रस्वन्तम्)** परमैश्वर्य्ययुक्तस्वामिसहितम् **(हवामहे)** आदद्मः **(सदासातमम्)** सदाऽतिशयेन विभजनीयम् **(अश्विनम्)** बहूत्तमाश्वादियुक्तम्॥५॥

अन्वयः-हे ऋभुक्षणो! यूयं वाज ऋभुं वाजिन्तमं युजमिन्द्रस्वन्तं सदासातममश्विनं रयिं वयं हवामहे तथैवैतं यूयमप्याहूयत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं स्पर्द्धया परस्परस्य बलं वर्द्धयित्वा युधि शत्रून् विजयध्वम्॥५॥

पदार्थः-हे **(ऋभुक्षणः)** बड़े विद्वान्! आप लोग **(वाजे)** संग्राम में **(ऋभुम्)** बुद्धिमान् **(वाजिन्तमम्)** प्रशंसित अतीव बहुत घोड़ों से युक्त **(युजम्)** समाधान करने को योग्य **(इन्द्रस्वन्तम्)** अत्यन्त ऐश्वर्य्य से युक्त स्वामी के सहित **(सदासातमम्)** सदा अतिशय करके विभाग करने योग्य **(अश्विनम्)** बहुत उत्तम घोड़े आदि से युक्त **(रयिम्)** धन को हम लोग **(हवामहे)** ग्रहण करते हैं, वैसे ही इसको आप लोग बुलावें ग्रहण करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग स्पर्द्धा से परस्पर बल बढ़ाय के सङ्ग्राम में शत्रुओं को जीतो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सेदृभवो यमवथ यूयमिन्द्रश्च मर्त्यम्।

स धीभिरस्तु सनिता मेधसाता सो अर्वता॥६॥

सः। इत्। ऋभवः। यम्। अवथ। यूयम्। इन्द्रः। च। मर्त्यम्। सः। धीभिः। अस्तु। सनिता। मेधऽसाता। सः। अर्वता॥६॥

पदार्थः-**(सः)** **(इत्)** एव **(ऋभवः)** मेधावी **(यम्)** **(अवथ)** रक्षथ **(यूयम्)** **(इन्द्रः)** परमैश्वर्य्यो राजा **(च)** **(मर्त्यम्)** मनुष्यम् **(सः)** **(धीभिः)** प्रज्ञाभिः **(अस्तु)** भवतु **(सनिता)** सत्याऽसत्ययोः संविभाजकः **(मेधसाता)** शुद्धसङ्ग्रामविभक्तम् **(सः)** **(अर्वता)** अश्वादिना॥६॥

अन्वयः-हे ऋभवो! यूयं यं मर्त्यमवथेन्द्रश्चावति स इद्धीभिर्युक्तः स सनिता सोऽर्वता मेधसाता विजय्यस्तु॥६॥

भावार्थः-हे राजसेनाजना! यदि युष्माकमध्यक्षा राजा मेधाविनश्च रक्षकाः स्युस्तर्हि युष्माकं सर्वत्र विजयः सुखञ्च सततं वर्द्धेत॥६॥

पदार्थः-हे **(ऋभवः)** बुद्धिमान् जनो! **(यूयम्)** आप लोग **(यम्)** जिस **(मर्त्यम्)** मनुष्य की **(अवथ)** रक्षा करते हो और **(इन्द्रः)** अत्यन्त ऐश्वर्य्य युक्त राजा **(च)** भी रक्षा करता है **(सः)** **(इत्)** वही **(धीभिः)** बुद्धियों से युक्त **(सः)** वह **(सनिता)** सत्य और असत्य का विभाग करने वाला और **(सः)** वह **(अर्वता)** घोड़ा आदि से **(मेधसाता)** शुद्ध संग्राम में विजयी **(अस्तु)** होवे॥६॥

भावार्थः-हे राजसेनाजनो! जो आप लोगों के अध्यक्ष राजा और बुद्धिमान् रक्षक होवें तो आप लोगों का सर्वत्र विजय और सुख निरन्तर बढ़े॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वि नो॑ वाजा ऋभुक्षण: प॒थश्चि॑तन॒ यष्ट॑वे।

अ॒स्मभ्यं॑ सूरय: स्तु॒ता विश्वा॒ आशा॑स्तरी॒षणि॑॥७॥

वि। न॒:। वा॒जा॒:। ऋ॒भु॒क्ष॒ण॒:। प॒थ:। चि॒त॒न॒। यष्ट॑वे। अ॒स्मभ्य॑म्। सू॒र॒य॒:। स्तु॒ता:। विश्वा॑:। आशा॑:। त॒री॒षणि॑॥७॥

पदार्थ:-(वि) (न:) अस्माकम् **(वाजा:) (ऋभुक्षण:)** महान्त: **(पथ:)** मार्गान् **(चितन)** ज्ञापयत **(यष्टवे)** सङ्गन्तुम् **(अस्मभ्यम्) (सूरय:)** विद्वांस: **(स्तुता:) (विश्वा:)** अखिला: **(आशा:)** इच्छा: **(तरीषणि)** दु:खं तरितुं सामर्थ्यम्॥७॥

अन्वय:-हे वाजा ऋभुक्षण: स्तुता: सूरयो! यूयमस्मभ्यं यष्टवे पथो विचितन यतो तरीषणि प्राप्य नोऽस्माकं विश्वा आशा: पूर्णा: स्यु:॥७॥

भावार्थ:-ये मनुष्या बाल्यावस्थामारभ्य विद्वच्छिक्षां गृह्णीयुस्तेषां सकला इच्छा: पूर्णा: स्यु:॥७॥

पदार्थ:-हे **(वाजा:)** प्रशंसित **(ऋभुक्षण:)** बड़े **(स्तुता:)** स्तुति किये गये **(सूरय:)** विद्वानो! आप लोग **(अस्मभ्यम्)** हम लोगों के लिये **(यष्टवे)** मिलने को **(पथ:)** मार्ग **(वि चितन)** जनाइये जिससे **(तरीषणि)** दु:ख के पार उतरने के सामर्थ्य को प्राप्त होकर **(न:)** हम लोगों की **(विश्वा:)** सम्पूर्ण **(आशा:)** इच्छायें पूर्ण होवें॥७॥

भावार्थ:-जो मनुष्य बाल्यावस्था से लेकर विद्वानों की शिक्षा का ग्रहण करें, उनकी सम्पूर्ण इच्छा पूर्ण होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तं नो॑ वाजा ऋभुक्षण॒ इन्द्र॒ नास॑त्या र॒यिम्।

समश्वं॑ चर्ष॒णिभ्य॒ आ पु॒रु शꣳस्त म॒घत्त॑ये॥८॥१०॥

तम्। न॒:। वा॒जा॒:। ऋ॒भु॒क्ष॒ण॒:। इन्द्र॑। नास॑त्या। र॒यिम्। सम्। अश्व॑म्। च॒र्ष॒णिऽभ्य॑:। आ। पु॒रु। शꣳस्त॒। म॒घत्त॑ये॥८॥

पदार्थ:-(तम्) (न:) अस्मभ्यम् **(वाजा:)** दातार: **(ऋभुक्षण:)** महान्त: **(इन्द्र)** परमैश्वर्य्ययुक्त **(नासत्या)** अविद्यमानासत्याचारौ सभान्यायेशौ **(रयिम्)** धनम् **(सम्) (अश्वम्)** महान्तम् **(चर्षणिभ्य:)** मनुष्येभ्य: **(आ)** समन्तात् **(पुरु)** बहु **(शस्त)** प्रशंसत **(मघत्तये)** पूजितधनप्राप्तये॥८॥

अन्वय:-हे वाजा ऋभुक्षणो! यूयं यथा नासत्या तथा नश्चर्षणिभ्यो मघत्तये तमश्वं रयिं पुरु समादत्त। हे इन्द्र! त्वमेताञ्छस्त॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यै राज्ञो राजपुरुषेभ्यश्च धनोन्नतिः सदा कार्या येन बहुविधं सुखं भवेदिति॥८॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तत्रिंशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे **(वाजाः)** देने वाले! **(ऋभुक्षणः)** बड़े! आप लोग जैसे **(नासत्या)** असत्याचार से रहित सभा और न्याय के ईश वैसे **(नः)** हम **(चर्षणिभ्यः)** मनुष्यों के अर्थ **(मघत्तये)** श्रेष्ठ धन की प्राप्ति के लिये **(तम्)** उस **(अश्वम्)** बड़े **(रयिम्)** धन को **(पुरु)** बहुत **(सम्)** उत्तम प्रकार **(आ)** ग्रहण करिये। और हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य से युक्त! आप इन लोगों की **(शस्त)** प्रशंसा कीजिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि राजा और राजपुरुषों से धन की उन्नति सदा करें, जिससे बहुत प्रकार का सुख होवे॥८॥

इस सूक्त में विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सैंतीसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

अथ दशर्चस्याष्टत्रिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। १ द्यावापृथिव्यौ देवते। २-१० दधिक्रा देवताः। १, ४ विराट् पङ्क्तिः। ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ३ त्रिष्टुप्। ५, ८-१० निचृत् त्रिष्टुप्। ७ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

कीदृशो राजा भवेदित्याह॥

अब दश ऋचा वाले अड़तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में कैसा राजा हो, इस विषय को कहते हैं॥

उतो हि वां दात्रा सन्ति पूर्वा या पूरुभ्यस्त्रसदस्युर्नितोशे।
क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रम्॥ १॥

उतो इति। हि। वाम्। दात्रा। सन्ति। पूर्वा। या। पूरुऽभ्यः। त्रसदस्युः। निऽतोशे। क्षेत्रऽसाम्। ददथुः। उर्वराऽसाम्। घनम्। दस्युऽभ्यः। अभिऽभूतिम्। उग्रम्॥ १॥

पदार्थः-(**उतो**) अपि (**हि**) यतः (**वाम्**) युवयोः (**दात्रा**) दातारौ (**सन्ति**) (**पूर्वा**) पूर्वौ (**याः**) यः (**पुरुभ्यः**) बहुभ्यः (**त्रसदस्युः**) त्रस्यन्ति दस्यवो यस्मात्सः (**नितोशे**) नितरां वधे। **नितोशत इति वधकर्मासु पठितम्।** (निघं०२.१९) (**क्षेत्रासाम्**) यः क्षेत्राणि सनति विभजति तम् (**ददथुः**) दत्तः (**उर्वरासाम्**) बहुश्रेष्ठाः पदार्थाः सन्ति यस्यान्तां भूमिं सनति तम् (**घनम्**) हन्ति येन तम् (**दस्युभ्यः**) साहसिकेभ्यश्चौरेभ्यः (**अभिभूतिम्**) पराजयम् (**उग्रम्**) कठिनम्॥१॥

अन्वयः-हे राजन्! भवान् सेनापतिस्त्रसदस्युस्सन् ये हि वां भृत्याः सन्ति तेभ्यः पूरुभ्यो या पूर्वा दात्रा युवां नितोशे क्षेत्रासामुर्वरासां ददथुरुतो दस्युभ्य उग्रमभिभूतिं तेन सह दस्युभ्यो घनं प्रहृत्योग्रमभिभूतिं ददथुस्तस्मात् सत्कर्त्तव्यौ स्तः॥१॥

भावार्थः-हे राजसेनाध्यक्षौ! युवां सुशिक्षितान् भृत्यान् संरक्ष्य दस्यून् हत्वा विजयं प्राप्य न्यायेन राष्ट्रं पालयतम्॥१॥

पदार्थः-हे राजन्! आप और सेनापति (**त्रसदस्युः**) डरते हैं दस्यु जिससे ऐसे होते हुए जो (**हि**) जिस कारण (**वाम्**) आप दोनों के भृत्य (**सन्ति**) हैं उन (**पूरुभ्यः**) बुहतों से (**या**) जो (**पूर्वा**) प्रथम वर्त्तमान (**दात्रा**) दाता जन आप दोनों (**नितोशे**) अत्यन्त वध करने में (**क्षेत्रासाम्**) क्षेत्रों को विभाग करने और (**उर्वरासाम्**) बहुत श्रेष्ट पदार्थों से युक्त भूमि सेवने वाले को (**ददथुः**) देते हो (**उतो**) और (**दस्युभ्यः**) साहस करने वाले चोरों के लिये (**उग्रम्**) कठिन (**अभिभूतिम्**) पराजय को और उसके साथ चोरों के लिये (**घनम्**) जिससे नाश करता है, उसका प्रहार करके कठिन पराजय को देते हो, इससे सत्कार करने योग्य हो॥१॥

भावार्थः-हे राजा और सेना के अध्यक्ष! आप दोनों उत्तम प्रकार शिक्षित भृत्यों को रख दुष्टों को नाश करके और विजय को प्राप्त होकर न्याय से राज्य का पालन करो॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒त वा॒जिन॑ं पुरुनि॒ष्षिध्वा॑नं दधि॒क्रामु॑ ददथुर्वि॒श्वकृ॑ष्टिम्।

ऋ॒जि॒प्यं श्ये॒नं प्रु॑षि॒तप्सु॑मा॒शुं च॒र्कृत्य॑म॒र्यो नृ॒पति॒ न शूर॑म्॥ २॥

उ॒त। वा॒जिन॑म्। पु॒रु॒नि॒:ऽसिध्वा॑नम्। दु॒धि॒ऽक्राम्। ऊ॒म् इति॑। द॒द॒थु॒:। वि॒श्वऽकृ॑ष्टिम्। ऋ॒जि॒प्यम्। श्ये॒नम्। प्रु॒षि॒तऽप्सु॑म्। आ॒शुम्। च॒र्कृत्य॑म्। अ॒र्य:। नृ॒ऽपति॑म्। न। शूर॑म्॥ २॥

पदार्थ:-(**उत**) अपि (**वाजिनम्**) बहुवेगवन्तम् (**पुरुनिष्षिध्वानम्**) बहवः शत्रवो निष्षिध्यन्ते येन तम् (**दधिक्राम्**) यो दधिना धारकेणाऽधिकेन सह तम् (**उ**) (**ददथुः**) दद्याताम् (**विश्वकृष्टिम्**) विश्वे सर्वे कृष्टयो मनुष्या विजयिनो यस्मात्तम् (**ऋजिप्यम्**) ऋजिपेषु सरलानां पालकेषु साधुम् (**श्येनम्**) श्येनमिव सद्योगामिनम् (**प्रुषितप्सुम्**) यः प्रुषितान् स्निग्धान् पदार्थान् प्साति भक्षयति तम् (**आशुम्**) पूर्णमध्वानं प्राप्नुवन्तम् (**चर्कृत्यम्**) भृशं कर्त्तुं योग्यम् (**अर्य्यः**) स्वामी (**नृपतिम्**) नराणां पालकम् (**न**) इव (**शूरम्**) शूरवीरम्॥ २॥

अन्वयः-हे सभासेनेशौ! युवां यस्मायर्यः शूरं नृपतिं न वाजिनं पुरुनिष्षिध्वानं दधिक्रां विश्वकृष्टिमुत वाजिनमु ऋजिप्यं प्रुषितप्सुं श्येनमिव चर्कृत्यमाशुं ददथुः स विजयाय प्रभवेत्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यदि राजजनाः शिल्पविद्याजन्यानि शस्त्रास्त्राणि सुशिक्षितां चतुरङ्गिणीं सेनां च निष्पादयेयुस्तर्हि क्वापि पराजयो न स्यात्॥ २॥

पदार्थः-हे सभा और सेना के ईश! आप दोनों जिसके लिये (**अर्य्यः**) स्वामी (**शूरम्**) वीर (**नृपतिम्**) मनुष्यों के पालन करने वाले राजा के (**न**) सदृश (**वाजिनम्**) बहुत वेगयुक्त (**पुरुनिष्षिध्वानम्**) बहुत शत्रुओं के हराने वाले। (**दधिक्राम्**) धारण करने वाली अधिकता के सहित वर्त्तमान (**विश्वकृष्टिम्**) सब मनुष्य जीतते जिससे उस (**उत**) और बहुत वेगवाले (**उ**) और (**ऋजिप्यम्**) सरलों के पालन करने वालों में श्रेष्ठ (**प्रुषितप्सुम्**) जो श्रेष्ठ पदार्थों को भक्षण करने वाले (**श्येनम्**) शीघ्रगामी वाज के सदृश (**चर्कृत्यम्**) निरन्तर करने के योग्य (**आशुम्**) पूर्ण मार्ग को व्याप्त होने वाले को (**ददथुः**) देवें, वह विजय के लिये समर्थ होवे॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजजन शिल्पविद्या से उत्पन्न शस्त्र-अस्त्र और उत्तम प्रकार शिक्षित चार अङ्गों से युक्त सेना को सिद्ध करें तो कहीं भी पराजय न होवे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यं सी॒मनु॑ प्र॒वते॑व द्र॒वन्तं॑ विश्व॑: पू॒रुर्मद॑ति॒ हर्ष॑माण:।

पड्भिर्गृध्यन्तं मेधयुं न शूरं रथतुरं वातमिव ध्रजन्तम्॥ ३॥

यम्। सीम्। अनु। प्रवताऽइव। द्रवन्तम्। विश्वः। पूरुः। मदति। हर्षमाणः। पट्ऽभिः। गृध्यन्तम्। मेधऽयुम्। न। शूरम्। रथऽतुरम्। वातम्ऽइव। ध्रजन्तम्॥ ३॥

पदार्थः-(यम्) (सीम्) सर्वतः **(अनु) (प्रवतेव)** निम्नस्थलेनेव **(द्रवन्तम्) (विश्वः)** सर्वः **(पूरुः)** मनुष्यः **(मदति)** आनन्दति **(हर्षमाणः)** आनन्दितः सन् **(पड्भिः)** पादैः **(गृध्यन्तम्)** अभिकाङ्क्षमाणम् **(मेधयुम्)** मेधं हिंसां कामयमानम् **(न)** इव **(शूरम्) (रथतुरम्)** यो रथेन सद्यो गच्छति तम् **(वातमिव) (ध्रजन्तम्)** गच्छन्तम्॥ ३॥

अन्वयः-हे राजन्! यं सीं जलं प्रवतेव द्रवन्तमनु विश्वो हर्षमाणः पूरुर्मदति स मेधयुं शूरं न ध्रजन्तं वातमिव रथतुरं पड्भिर्गृध्यन्तं शत्रुं हन्तुं प्रभवति॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यस्य राज्ञो राष्ट्रे निम्नं स्थानं जलमिव सर्वतो गुणाधानं चेकीभवति तस्य सन्निधौ योग्याः पुरुषा निवसन्ति॥ ३॥

पदार्थः-हे राजन्! **(यम्)** जिसको **(सीम्)** सब ओर से जल **(प्रवतेव)** नीचे स्थल से जैसे वैसे **(द्रवन्तम्)** जाते हुए को **(अनु)** पीछे **(विश्वः)** सब **(हर्षमाणः)** हर्षित होता हुआ **(पूरुः)** मनुष्यमात्र **(मदति)** आनन्दित होता है वह **(मेधयुम्)** हिंसा की कामना करते और **(शूरम्)** वीर पुरुष के **(न)** सदृश **(ध्रजन्तम्)** चलते हुए **(वातमिव)** वायु के सदृश **(रथतुरम्)** रथ के द्वारा शीघ्र चलने वाले **(पड्भिः)** पैरों से **(गृध्यन्तम्)** अभिकांक्षा करते हुए शत्रु के मारने को समर्थ होता है॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस राजा के राज्य में नीचा स्थान जल के सदृश और सब प्रकार से गुणों का पात्र एक होता है, उसके समीप योग्य पुरुष रहते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यः स्मारुन्धानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन्।
आविर्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्यापः आयोः॥ ४॥

यः। स्म। आऽरुन्धानः। गध्या। समत्ऽसु। सनुऽतरः। चरति। गोषु। गच्छन्। आविःऽऋजीकः। विदथा। निऽचिक्यत्। तिरः। अरतिम्। परि। आपः। आयोः॥ ४॥

पदार्थः-(यः) (स्म) (आरुन्धानः) समन्ताच्छत्रून्निरुन्धानः **(गध्या)** मिश्रीभूतान् **(समत्सु)** सङ्ग्रामेषु **(सनुतरः)** सनातनविद्यः **(चरति) (गोषु)** पृथिवीषु **(गच्छन्) (आविर्ऋजीकः)** प्रसिद्धसरलस्वभावः **(विदथा)** विज्ञानानि **(निचिक्यत्)** पश्यन् **(तिरः)** तिरस्करणे **(अरतिम्)** दुःखम् **(परि) (आपः)** जलानि **(आयोः)** आयुषः॥ ४॥

अन्वयः-हे राजन्! यः सनुतरः समत्सु गध्याऽऽरुन्धान आविर्ऋजीको गोषु गच्छन् निचिक्यच्छत्रूंस्तिरस्कृत्यारतिं निवार्य परि चरति आप इवाऽऽयोर्विदथा प्राप्नोति तं स्म भवानधिकारिणं कुर्य्यात्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये जनाः स्वराष्ट्रे शान्तिकराः शत्रुराष्ट्र उद्वेजका बलिष्ठा दीर्घायुषः प्रसिद्धकीर्त्तयः स्युस्तानेव शत्रुजयाय नियोजय॥४॥

पदार्थः-हे राजन्! **(यः)** जो **(सनुतरः)** सनातन विद्यायुक्त **(समत्सु)** संग्रामों में **(गध्या)** मिले हुए **(आरुन्धानः)** सब ओर से शत्रुओं को रोकता हुआ **(आविर्ऋजीकः)** प्रसिद्ध सरल अर्थात् कपटरहित स्वभाववाला **(गोषु)** पृथिवियों में **(गच्छन्)** चलता और **(निचिक्यत्)** देखता हुआ शत्रुओं का **(तिरः)** तिरस्कार और **(अरतिम्)** दुःख का निवारण करके **(परि, चरति)** घूमता है **(आपः)** जलों के सदृश **(आयोः)** अवस्था के **(विदथा)** विज्ञानों को प्राप्त होता है **(स्म)** उसी को आप अधिकारी करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो जन अपने राज्य में शान्ति करने, शत्रुओं के राज्य में भय देने और बलयुक्त, अधिक अवस्था वाले, प्रसिद्ध कीर्तियुक्त होवें, उन्हीं को शत्रुओं के जीतने के लिये नियुक्त करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒त स्मैनं॑ वस्र॒मथिं॒ न ता॒युमनु॑ क्रोशन्ति क्षि॒तयो॒ भरे॑षु।

नी॒चाय॑मानं॒ जसु॑रिं॒ न श्ये॒नं श्रव॒श्चाच्छा॑ पशु॒मच्च॑ यू॒थम्॥५॥११॥

उ॒त। स्म॒। ए॒न॒म्। व॒स्त्र॒ऽमथि॑म्। न। ता॒युम्। अनु॑। क्रो॒श॒न्ति॒। क्षि॒तयः॑। भरे॑षु। नी॒चा। अय॑मानम्। जसु॑रिम्। न। श्ये॒नम्। श्रवः॑। च॒। अच्छ॑। प॒शु॒ऽमत्। च॒। यू॒थम्॥५॥

पदार्थः-(उत) (स्म) (एनम्) (वस्त्रमथिम्) यो वस्त्राणि मथ्नाति तम् (न) इव (तायुम्) तस्करम् (अनु) (क्रोशन्ति) रुदन्ति (क्षितयः) मनुष्याः (भरेषु) सङ्ग्रामेषु (नीचा) नीचानि कर्म्माणि (अयमानम्) प्राप्नुवन्तम् (जसुरिम्) प्रयतमानम् (न) इव (श्येनम्) पक्षिविशेषम् (श्रवः) अन्नं श्रवणं वा (च) (अच्छ) अत्र **संहितायामि**ति दीर्घः। (पशुमत्) पशवो विद्यन्ते यस्मिंस्तत् (च) (यूथम्) समूहम्॥५॥

अन्वयः-क्षितयो भरेषु यमेनं राजानं वस्त्रमथिं तायुं नाऽनु क्रोशन्ति जसुरिं श्येनं न नीचायमानं पशुमच्छ्रवश्चाऽच्छ यूथञ्चाऽनु क्रोशन्त्युत स स्म सद्यो विनश्यति॥५॥

भावार्थः-अत्रोपमालङ्कारः। यो राजा प्रजापालनेन विना करं हरति यस्य प्रजाभ्यो दुष्टा दुःखं ददति यः स्वयं नीचकर्मा श्येनवद्धिंस्रः पशुवन्मूर्खो यस्य सेना च चोरवद्वर्त्तते तस्य सद्यो विनाशो भवतीति निश्चयः॥५॥

पदार्थः-(क्षितयः) मनुष्य **(भरेषु)** संग्रामों में जिस **(एनम्)** इस राजा को **(वस्त्रमथिम्)** वस्त्रों को मथने वाले **(तायुम्)** चोर को **(न)** जैसे वैसे **(अनु, क्रोशन्ति)** पीछे कोशते रोते हैं **(जसुरिम्)** प्रयत्न करते हुए **(श्येनम्)** पक्षिविशेष अर्थात् वाज के **(न)** सदृश **(नीचा)** नीच कर्मों को **(अयमानम्)** प्राप्त होने वाले को और **(पशुमत्)** पशुओं से युक्त **(श्रवः)** अन्न वा श्रवण को **(च)** भी **(अच्छ)** उत्तम प्रकार **(यूथम्, च)** तथा समूह के पीछे कोशते रोते हैं **(उत, स्म)** वही तो शीघ्र नष्ट होता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा प्रजापालन के विना कर लेता है, जिस राजा की प्रजा को दुष्ट जन दुःख देते हैं और जो राजा आप नीच कर्म करने वाला, वाज पक्षी के सदृश हिंसक, पशु के सदृश मूर्ख और जिस राजा की सेना चोर के सदृश वर्त्तमान है, उसका शीघ्र विनाश होता है, यह निश्चय है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒त स्मा॑सु प्रथ॒मः स॑रि॒ष्यन्नि वे॑वेति॒ श्रेणि॑भी॒ रथा॑नाम्।
स्रजं॑ कृ॒ण्वा॒नो जन्यो॒ न शुभ्वा॑ रे॒णुं रेरि॑हत्कि॒रणं॑ दद॒श्वान्॥ ६॥

उ॒त। स्म॒। आ॒सु॒। प्र॒थ॒मः। स॒रि॒ष्यन्। नि। वे॒वे॒ति॒। श्रेणि॑ऽभिः। रथा॑नाम्। स्रज॑म्। कृ॒ण्वा॒नः। जन्यः॑। न। शुभ्वा॑। रे॒णुम्। रेरि॑हत्। कि॒रण॑म्। द॒द॒श्वान्॥ ६॥

पदार्थः-(उत) अपि **(स्म)** **(आसु)** सेनासु **(प्रथमः)** आदिमः **(सरिष्यन्)** गमिष्यन् **(नि)** **(वेवेति)** गच्छति **(श्रेणिभिः)** पङ्क्तिभिः **(रथानाम्)** यानानाम् **(स्रजम्)** मालामिव सेनाम् **(कृण्वानः)** कुर्वन् **(जन्यः)** यो जायते **(न)** इव **(शुभ्वा)** सुशोभमानः **(रेणुम्)** **(रेरिहत्)** **(किरणम्)** ज्योतिः **(ददश्वान्)** दत्तवान् वायुरिव॥६॥

अन्वयः-हे मनुष्या! य आसु रथानां श्रेणिभिः स्रजं कृण्वानः प्रथमः सरिष्यन् नि वेवेत्युत शुभ्वा जन्यो न किरणं ददश्वान् रेणुं रेरिहत् स स्मैव राजा सर्वतो वर्धते॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यो न्यायेन प्रजाः पालयन्त्सेनाष्वग्रगामी धनुर्वेदविद्विजयी दक्षो विद्वान् धार्मिकः सुसहायो राजा भवेत् स एव कीर्त्तिमान् भूत्वा महाराजः स्यात्॥६॥

पदार्थः-हे मनुष्यो! जो **(आसु)** इन सेनाओं में **(रथानाम्)** वाहनों की **(श्रेणिभिः)** पङ्क्तियों से **(स्रजम्)** माला के सदृश सेना को **(कृण्वानः)** करता और **(प्रथमः)** प्रथम **(सरिष्यन्)** चलने वाला होता हुआ **(नि, वेवेति)** जाता है **(उत)** और **(शुभ्वा)** उत्तम प्रकार शोभित **(जन्यः)** उत्पन्न होने वाले के **(न)** सदृश और **(किरणम्)** ज्योति को **(ददश्वान्)** देने वाले वायु के सदृश **(रेणुम्)** धूलि को **(रेरिहत्)** निरन्तर उड़ाता है **(स्म)** वही राजा सब ओर से वृद्धि को प्राप्त होता है॥६॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। जो न्याय से प्रजाओं का पालन करता हुआ सेनाओं में अग्रगामी, धनुर्वेद का जानने वाला, विजयी, चतुर, विद्वान्, धार्मिक और उत्तम सहाययुक्त राजा होवे, वही यशस्वी होकर महाराज होवे॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा समर्ये।

तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृञ्जन्॥७॥

उत। स्यः। वाजी। सहुरिः। ऋतऽवा। शुश्रूषमाणः। तन्वा। सऽमर्ये। तुरम्। यतीषु। तुरयन्। ऋजिप्यः। अधि। भ्रुवोः। किरते। रेणुम्। ऋञ्जन्॥७॥

पदार्थः-(उत) अपि **(स्यः)** सः **(वाजी)** विज्ञानवान् **(सहुरिः)** सहनशीलः **(ऋतावा)** सत्याचरणः **(शुश्रूषमाणः)** सेवमानः **(तन्वा)** शरीरेण **(समर्ये)** सङ्ग्रामे **(तुरम्)** शीघ्रकारिणम् **(यतीषु)** नियतासु सेनासु **(तुरयन्)** सद्यो गमयन् **(ऋजिप्यः)** सरलगामिषु साधुः **(अधि) (भ्रुवोः) (किरते)** विकिरति **(रेणुम्)** धूलिम् **(ऋञ्जन्)** प्रसाध्नुवन्॥७॥

अन्वयः-हे मनुष्याः! स्य वाजी सहुरिर्ऋतावा यतीषु तुरं तुरयन्नृतर्जिप्यस्तन्वा शुश्रूषमाण ऋञ्जन् समर्ये भ्रुवो रेणुमधिकिरते स राजा विजयी सत्कर्त्तव्यः॥७॥

भावार्थः-स एव राज्यं कर्त्तुमर्हेद्यो विद्वान् सर्वैः सह सत्यसेवी उत्तमसेनः सरलस्वभावो भवेत्॥७॥

पदार्थः-हे मनुष्यो! **(स्यः)** वह **(वाजी)** विज्ञानयुक्त **(सहुरिः)** सहनेवाला **(ऋतावा)** सत्य आचरण से युक्त **(यतीषु)** नियत सेनाओं में **(तुरम्)** शीघ्र करने वाले को **(तुरयन्)** शीघ्र चलाता हुआ **(उत)** भी **(ऋजिप्यः)** सरलगति वालों में श्रेष्ठ **(तन्वा)** शरीर से **(शुश्रूषमाणः)** सेवन करता और **(ऋञ्जन्)** प्रसिद्ध करता हुआ **(समर्ये)** सङ्ग्राम में **(भ्रुवोः)** भौओं की **(रेणुम्)** धूलि को **(अधि, किरते)** उड़ाता है, वह राजा विजयी और सत्कार करने योग्य होता है॥७॥

भावार्थः-वही राज्य करने योग्य होवे जो विद्वान्, सब को सहने वाला, सत्य का सेवी, उत्तम सेना और सरल स्वभावयुक्त होवे॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयन्ते।

यदा सहस्रमभि षीमयोधीद् दुर्वर्तुः स्मा भवति भीम ऋञ्जन्॥८॥

उ॒त। स्म॒। अ॒स्य॒। त॒न्य॒तोः।ऽइ॑व। द्योः। ऋ॒घा॒य॒तः। अ॒भि॒ऽयुज॑ः। भ॒य॒न्ते॒। य॒दा। स॒हस्र॑म्। अ॒भि। सी॒म्। अयो॑धीत्। दु॒ःऽव॑र्तुः। स्म॒। भ॒व॒ति॒। भी॒मः। ऋ॒ञ्जन्॥८॥

पदार्थः-(उत) (स्म) (अस्य) (तन्यतोरिव) विद्युत इव **(द्योः)** प्रकाशमानायाः **(ऋघायतः)** हिंसतः **(अभियुजः)** योऽभियुङ्क्ते तस्य **(भयन्ते)** बिभ्यति **(यदा) (सहस्रम्)** असङ्ख्यम् **(अभि)** सर्वतः **(सीम्) (अयोधीत्)** योधयति **(दुर्वर्त्तुः)** यो दुःखेन वर्त्तते तस्य **(स्म)** अत्र **निपातस्य चे**ति दीर्घः। **(भवति) (भीमः)** बिभेति यस्मात्सः **(ऋञ्जन्)** विजयं प्रसाध्नुवन्॥८॥

अन्वयः-हे मनुष्या! यः स्म भीम ऋञ्जन् भवति यो यदा सहस्रं सीमभ्ययोधीदस्य स्य दुर्वर्त्तुर्ऋघायत उताभियुजो द्योस्तन्यतोरिव सर्वे भयन्ते तदैव राजप्रतापः प्रवर्त्तते॥८॥

भावार्थः-अत्रोपमालङ्कारः। यो राजा विद्युद्वद् दुष्टान् हत्वा धार्मिकान् सत्करोति स एकोऽप्यसङ्ख्यैः सह योद्धुमर्हति यदाऽयं राजा न्यायेन प्रकटदण्डः स्यात्तदा सर्वे दुष्टा भीत्वा निलीयन्ते॥८॥

पदार्थः-हे मनुष्यो! **[**जो**]** **(स्म)** ही **(भीमः)** भयंकर **(ऋञ्जन्)** विजय को प्रसिद्ध करता हुआ **(भवति)** होता है जो **(यदा)** जब **(सहस्रम्)** सङ्ख्यारहित **(सीम्)** सब प्रकार **(अभि, अयोधीत्)** युद्ध करता है **(अस्य, स्म)** इसी **(दुर्वर्त्तुः)** दुःख से वर्त्तमान **(ऋघायतः)** हिंसा करते हुए **(उत)** और **(अभियुजः)** अभियोग करते हुए के समीप से **(द्योः)** प्रकाशमान **(तन्यतोरिव)** बिजुली के सदृश सब लोग **(भयन्ते)** भय करते हैं, तभी राजा का प्रताप प्रवृत्त होता है॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा बिजुली के सदृश दुष्टों का नाश करके धार्मिकों का सत्कार करता है, वह एक भी संख्यारहित वीरों के साथ युद्ध करने योग्य होता है और जब वह राजा न्याय से प्रकट दण्ड देने वाला होवे, तब सब दुष्ट जन डर के छिप जाते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒त स्मा॑स्य पनयन्ति॒ जना॑ जू॒तिं कृ॒ष्टिप्रो अ॒भिभू॑तिमा॒शोः।

उ॒तैन॑माहुः स॒मि॒थे वि॒यन्तः॒ परा॑ दधि॒क्रा अ॑सरत् स॒हस्रैः॥९॥

उ॒त। स्म॒। अ॒स्य॒। प॒न॒य॒न्ति॒। जना॑ः। जू॒तिम्। कृ॒ष्टिऽप्रः। अ॒भिऽभू॑तिम्। आ॒शोः। उ॒त। ए॒न॒म्। आ॒हु॒ः। स॒म्ऽइ॒थे। वि॒ऽयन्त॑ः। परा॑। दु॒धि॒ऽक्राः। अ॒स॒र॒त्। स॒हस्रैः॥९॥

पदार्थः-(उत) वितर्के **(स्म) (अस्य)** राज्ञः **(पनयन्ति)** व्यवहरन्ति स्तुवन्ति वा **(जनाः)** राजप्रजामनुष्याः **(जूतिम्)** न्यायवेगम् **(कृष्टिप्रः)** यः कृष्टीन् मनुष्यान् दूतचारैः प्राति तस्य **(अभिभूतिम्)** अभिभवं तिरस्कारम् **(आशोः)** सकलविद्याव्यापकस्य **(उत)** अपि **(एनम्) (आहुः)** कथयन्ति **(समिथे)**

सङ्ग्रामे **(वियन्तः)** विशेषेण प्राप्नुवन्तः **(परा)** **(दधिक्राः)** यो धारकैः सह क्रामति **(असरत्)** सरति गच्छति **(सहस्रैः)** असङ्ख्यैः॥९॥

अन्वयः-हे मनुष्या! जना अस्य कृष्टिप्र आशोः सङ्ग्रामेऽभिभूतिं जूतिमुत पनयन्त्युतैनं समिथे वियन्त आहुर्यो दधिक्राः सहस्रैः परासरत् स स्म विजेतुं शक्नुयात्॥९॥

भावार्थः-तमेव राजानं विद्वांसः प्रशंसन्ति यः प्रजापालनतत्परः सन् सर्वान् व्यावहारयति॥९॥

पदार्थः-हे मनुष्यो! **(जनाः)** राजा और प्रजाजन **(अस्य)** इस **(कृष्टिप्रः)** मनुष्य को दूतचार अर्थात् गुप्त दूत आदि से पालना करने वाले **(आशोः)** सम्पूर्ण विद्याओं में व्याप्त राजा के सङ्ग्राम में **(अभिभूतिम्)** तिरस्कार और **(जूतिम्)** न्याय के वेग का **(उत)** तर्क-वितर्क के साथ **(पनयन्ति)** व्यवहार करते वा प्रशंसा करते हैं **(उत)** और भी **(एनम्)** इसको **(समिथे)** सङ्ग्राम में **(वियन्तः)** विशेष करके प्राप्त होते हुए **(आहुः)** कहते हैं और जो **(दधिक्राः)** धारण करने वालों के साथ चलने वाला **(सहस्रैः)** असङ्ख्यों के साथ **(परा, असरत्)** उत्कृष्ट चलता है **(स्म)** वही जीत सके॥९॥

भावार्थः-उसी राजा की विद्वान् जन प्रशंसा करते हैं, जो प्रजा के पालन में तत्पर हुआ सब के व्यवहारों को सिद्ध करता है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्यइव ज्योतिषापस्ततान।

सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि॥१०॥१२॥

आ। दधिऽक्राः। शवसा। पञ्च। कृष्टीः। सूर्यः।ऽइव। ज्योतिषा। अपः। ततान। सहस्रऽसाः। शतऽसाः। वाजी। अर्वा। पृणक्तु। मध्वा। सम्। इमा। वचांसि॥१०॥

पदार्थः-**(आ)** **(दधिक्राः)** यो दधिभिर्धर्तृभिः क्रम्यते गम्यते सः **(शवसा)** बलेन **(पञ्च)** **(कृष्टीः)** मनुष्यान् **(सूर्य्यइव)** सवितेव **(ज्योतिषा)** प्रकाशेन **(अपः)** जलानि **(ततान)** विस्तृणोति **(सहस्रसाः)** यः सहस्राणि सनति विभजति सः **(शतसाः)** यः शतानि सनति सम्भजति **(वाजी)** वेगवान् **(अर्वा)** यः सद्यो मार्गान् गच्छति **(पृणक्तु)** स बध्नातु **(मध्वा)** क्षौद्रेण **(सम्)** **(इमा)** इमानि **(वचांसि)** वचनानि॥१०॥

अन्वयः-यो राजा शवसा सूर्य्यइव दधिक्राः पञ्च कृष्टी ज्योतिषा सूर्य्योऽप इवाऽऽततान सहस्रसाः शतसा वर्त्तमानोऽर्वा वाजी मध्वेमा वचांसि सम्पृणक्तु स एव राज्यं कर्त्तुमर्हति॥१०॥

भावार्थः-अत्रोपमालङ्कारः। यः सूर्य्यप्रकाश इव न्यायेन पञ्चविधाः प्रजाः पाति सोऽसङ्ख्यमानन्दमाप्नोति॥१०॥

अत्र राजधर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टत्रिंशत्तमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः–जो राजा (**शवसा**) बल से (**सूर्य्यइव**) सूर्य्य के सदृश (**दधिक्राः**) धारण करने वालों से प्राप्त होने वाला (**पञ्च**) पांच (**कृष्टीः**) मनुष्यों को (**ज्योतिषा**) प्रकाश से सूर्य्य जैसे (**अपः**) जलों को वैसे (**आ, ततान**) विस्तृत करता है (**सहस्रसाः**) हजारों का विभाग करने वाला (**शतसाः**) और सैकड़ों का विभागकर्त्ता वर्त्तमान (**अर्वा**) शीघ्र मार्गों को जाने वाला (**वाजी**) वेगवान् (**मध्वा**) सहत [शहद] के साथ (**इमा**) इन (**वचांसि**) वचनों का (**सम्, पृणक्तु**) सम्बन्ध करे, वही राज्य करने के योग्य होता है॥१०॥

भावार्थः–इस मन्त्र में उपमालङ्कार है। जो सूर्य्य के प्रकाश के सदृश न्याय से पांच प्रकार की प्रजाओं का पालन करता है, वह असंख्य आनन्द को प्राप्त होता है॥१०॥

इस सूक्त में राजा के धर्म का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अड़तीसवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

अथ षडर्चस्यैकोनचत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। दधिक्रा देवताः। १, ३, ५ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ६ अनुष्टुप् छन्दः। ऋषभः स्वरः॥

अथ राजा कीदृशो भवेदित्याह॥

अब छः ऋचा वाले उनतालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में कैसा राजा हो, इस विषय को कहते हैं॥

आ॒शुं द॑धि॒क्रां तमु॒ नु ष्ट॑वाम दि॒वस्पृ॑थि॒व्या उ॒त च॑र्किराम।
उ॒च्छन्ती॒र्मामु॒षस॑: सूदय॒न्त्वति॒ विश्वा॑नि दुरि॒ता॑ पर्षन्॥ १॥

आ॒शुम्। दु॒धि॒ऽक्राम्। तम्। ऊ॒म् इति॑। नु। स्त॒वा॒म॒। दि॒वः। पृ॒थि॒व्याः। उ॒त। च॒र्कि॒रा॒म॒। उ॒च्छन्ती॑ः। माम्। उ॒षस॑ः। सू॒द॒य॒न्तु॒। अति॑। विश्वा॑नि। दुः॒ऽइ॒ता॑नि। प॒र्ष॒न्॥ १॥

पदार्थः-(आशुम्) सद्योगामिनम् **(दधिक्राम्)** धर्त्तव्यधरम् **(तम्)** (उ) **(नु)** **(स्तवाम)** प्रशंसेम **(दिवः)** प्रकाशस्य **(पृथिव्याः)** भूमेर्मध्ये **(उत)** **(चर्किराम)** भृशं विक्षेपयाम **(उच्छन्तीः)** सेवयन्तीः **(माम्)** **(उषसः)** प्रभातवेलाः **(सूदयन्तु)** क्षरयन्तु दूरीकुर्वन्तु **(अति)** **(विश्वानि)** समग्राणि **(दुरितानि)** दुःखानि दुष्टाचरणानि वा **(पर्षन्)** सिञ्चन्तु॥१॥

अन्वयः-वयं दिवस्पृथिव्यास्तमाशुं दधिक्रां नु ष्टवामोत शत्रूनु चर्किराम या मां पर्षस्ता उच्छन्तीरुषसो विश्वानि दुरितान्यति सूदयन्तु॥१॥

भावार्थः-यो राजास्मद् दुःखानि दूरं नीत्वोषा अन्धकारमिवाऽन्यायं दुष्टान्निषेधति तस्यैव वयं प्रशंसां कुर्य्याम॥१॥

पदार्थः-हम लोग **(दिवः)** प्रकाश और **(पृथिव्याः)** भूमि के मध्य में **(तम्)** उस **(आशुम्)** शीघ्र चलने वाले **(दधिक्राम्)** धारण करने योग्य को धारण करने वाले की **(नु)** तर्क वितर्क के साथ **(स्तवाम)** प्रशंसा करें **(उत)** और शत्रुओं को (उ) भी **(चर्किराम)** निरन्तर फैकें और जो **(माम्)** मुझको **(पर्षन्)** सीचें उनकी **(उच्छन्तीः)** सेवा करती हुई **(उषसः)** प्रभात वेला **(विश्वानि)** सम्पूर्ण **(दुरितानि)** दुःखों वा दुष्टाचरणों को **(अति, सूदयन्तु)** अत्यन्त दूर करें॥१॥

भावार्थः-जो राजा हम लोगों के दुःखों को दूर करके जैसे प्रातःकाल अन्धकार को वैसे अन्याय और दुष्टों का निषेध करता है, उसी की हम लोग प्रशंसा करें॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

म॒हश्च॑र्कृ॒र्म्यर्व॑तः क्रतु॒प्रा द॑धि॒क्राव्ण॑: पुरु॒वार॑स्य॒ वृष्ण॑:।

यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम्॥ २॥

महः। चर्कर्मि। अर्वतः। क्रतुऽप्राः। दधिऽक्राव्णः। पुरुऽवारस्य। वृष्णः। यम्। पूरुऽभ्यः। दीदिऽवांसम्। न। अग्निम्। ददथुः। मित्रावरुणा। ततुरिम्॥ २॥

पदार्थः-(महः) महतः **(चर्कर्मि)** भृशं करोति **(अर्वतः)** अश्वानिव **(क्रतुप्राः)** ये प्रज्ञां पूरयन्ति ते **(दधिक्राव्णः)** यो विद्याधरान् कामयते तस्य **(पुरुवारस्य)** बहूत्तमजनस्वीकृतस्य **(वृष्णः)** सुखानां वर्षकस्य **(यम्)** **(पूरुभ्यः)** बहुभ्यः **(दीदिवांसम्)** देदीप्यमानम् **(न)** इव **(अग्निम्)** पावकम् **(ददथुः)** **(मित्रावरुणा)** प्राणोदानाविव वर्त्तमानौ सभासेनेशौ **(ततुरिम्)** त्वरमाणम्॥ २॥

अन्वयः-हे मित्रावरुणा! पूरुभ्यो यं ततुरिं दीदिवांसमग्निं न विनयं ददथुस्तस्य पुरुवारस्य दधिक्राव्णो वृष्णो ये क्रतुप्रास्तान् महोऽर्वतोऽहं कार्य्यं चर्कर्मि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यो राजा प्रज्ञान् प्रज्ञाप्रदान् सदा धरति स सूर्य्य इव प्रतापी सन् सद्यः स्वकार्य्यं साद्धुं शक्नोति॥ २॥

पदार्थः-हे **(मित्रावरुणा)** प्राण और उदान वायु के सदृश वर्त्तमान सभा और सेना के ईश आप दो जन **(पूरुभ्यः)** बहुतों से **(यम्)** जिस **(ततुरिम्)** शीघ्रता करते हुए **(दीदिवांसम्)** प्रकाशमान **(अग्निम्)** अग्नि के **(न)** सदृश विनय को **(ददथुः)** देते हैं उस **(पुरुवारस्य)** बहुत श्रेष्ठ जनों से स्वीकार किय गये और **(दधिक्राव्णः)** विद्या की धारणा करने वालों की कामना करने और **(वृष्णः)** सुखों के वर्षाने वाले के जो **(क्रतुप्राः)** बुद्धि के पूर्ण करने वाले उन **(महः)** बड़े **(अर्वतः)** घोड़ों के सदृशों को और कार्य्य को मैं **(चर्कर्मि)** निरन्तर करता हूँ॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा बुद्धि वाले और बुद्धि के देने वालों को सदा धारण करता है, वह सूर्य्य के सदृश प्रतापी होता हुआ शीघ्र अपने कार्य्य को सिद्ध कर सकता है॥ २॥

अथ प्रजाकृत्यमाह॥

अब प्रजाकृत्य को अगले मन्त्र में कहते हैं॥

यो अश्वस्य दधिक्राव्णो अकारीत् समिद्धे अग्ना उषसो व्युष्टौ।

अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः॥ ३॥

यः। अश्वस्य। दधिऽक्राव्णः। अकारीत्। सम्ऽइद्धे। अग्नौ। उषसः। विऽउष्टौ। अनागसम्। तम्। अदितिः। कृणोतु। सः। मित्रेण। वरुणेन। सऽजोषाः॥ ३॥

पदार्थः-(यः) **(अश्वस्य)** महतो व्याप्तविद्यस्य **(दधिक्राव्णः)** धारकाणां क्रमयितुः **(अकारीत्)** करोति **(समिद्धे)** प्रदीप्ते **(अग्नौ)** विद्युद्रूपे पावके **(उषसः)** प्रभातस्य **(व्युष्टौ)** विविधरूपायां सेवायाम्

(अनागसम्) अनपराधम् **(तम्)** **(अदितिः)** माता पिता वा **(कृणोतु)** **(सः)** **(मित्रेण)** **(वरुणेन)** श्रेष्ठेन। अत्र **संहितायामि**ति दीर्घः। **(सजोषाः)** समानप्रीतिसेवी॥३॥

अन्वयः-हे मनुष्या! यो विद्वान् दधिक्राव्णोऽश्वस्योषसो व्युष्टौ समिद्धऽग्नावनागसमकारीत् तमदितिरनागसं कृणोतु स च मित्रेण वरुणेन सजोषा भवेत्॥३॥

भावार्थः-हे मनुष्या! योग्नावबादीनां पदार्थानां संयोगं कर्त्तुं विजानीयात्। यश्च सज्जनैः सह मित्रतां कृत्वा प्रातरुत्थाय सत्कर्माणि करोति स एव सदैव प्रसन्नो भवतीति विजानीत॥३॥

पदार्थः-हे मनुष्यो! **(यः)** जो विद्वान् **(दधिक्राव्णः)** धारण करने वालों को क्रमण कराने वाले **(अश्वस्य)** बड़े और विद्या में अर्थात् पदार्थविद्या के गुणों में व्याप्त **(उषसः)** प्रातःकाल की **(व्युष्टौ)** अनेक प्रकार की सेवा में और **(समिद्धे)** बहुत प्रदीप्त **(अग्नौ)** बिजुलीरूप अग्नि में **(अनागसम्)** अपराधरहित को **(अकारीत्)** करता है **(तम्)** उसको **(अदितिः)** माता व पिता निरपराध **(कृणोतु)** करे **(सः)** सो भी **(मित्रेण)** मित्र **(वरुणेन)** श्रेष्ठ के साथ **(सजोषाः)** तुल्य प्रीति सेवनेवाला हो॥३॥

भावार्थः-हे मनुष्यो! जो अग्नि में जल आदि पदार्थों के संयोग करने को जाने और जो सज्जनों के साथ मित्रता कर और प्रातःकाल उठ के श्रेष्ठ कर्मों को करता है, वही सदैव प्रसन्न होता है, यह जानो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥

दधिक्राव्णः। अकारिषम्। जिष्णोः। अश्वस्य। वाजिनः। सुरभि। नः। मुखा। करत्। प्र। नः। आयूंषि। तारिषत्॥

पदार्थः-**(दधिक्राव्णः)** धर्त्तॄणां प्रचालकस्य **(अकारिषम्)** करोमि **(जिष्णोः)** जयशीलस्य **(अश्वस्य)** व्यापकस्य **(वाजिनः)** वेगवतः **(सुरभि)** सुगन्धियुक्तम् **(नः)** अस्माकम् **(मुखा)** मुखानि **(करत्)** करोतु **(प्र)** **(नः)** अस्माकम् **(आयूंषि)** जीवनानि **(तारिषत्)** वर्द्धयतु॥

अन्वयः-हे मनुष्या! यथाहं दधिक्राव्णो जिष्णोर्वाजिनोऽश्वस्य नो मुखा सुरभि करत् नः आयूंषि प्र तारिषत् तथैतमकारिषं यूयमप्येतं विजानीत॥

भावार्थः-मनुष्यैर्यथा विद्युदग्निः सुगन्धियुक्तं करोति तथा विद्वांसः सत्कर्मभिः सुगन्धियुक्तं कुर्वन्ति यथा विद्युदग्निः सर्वेषां जीवनानि वर्द्धयति तथा विद्वांसः सत्कर्मभिः सर्वेषां जीवनानि वर्द्धयन्ति॥

पदार्थः-हे मनुष्यो! **(यः)** जो विद्वान् **(दधिक्राव्णः)** धारण करने वालों को क्रमण कराने वाले **(जिष्णोः)** जयशील **(वाजिनः)** वेगवान् **(अश्वस्य)** व्यापक बिजुलीरूप अग्नि **(नः)** हमारे **(मुखा)** मुखों को **(सुरभि)** सुगन्धियुक्त **(करत्)** करता है **(नः)** हमारे **(आयूंषि)** जीवनों को **(प्र तारिषत्)** बढ़ाता है उसको **(अकारिषम्)** करता हूँ वैसे उसको तुम भी करो॥

भावार्थः-मनुष्यों को जैसे बिजुलीरूप अग्नि सुगन्धियुक्त करता है, वैसे विद्वान् लोग सत्कर्मों से सुगन्धियुक्त करते हैं, जैसे बिजुलीरूप अग्नि सबके जीवनों को बढ़ाता है, वैसे विद्वान् लोग सत्कर्मों से सबके जीवनों को बढ़ाते हैं॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। येऽन्नादिसंस्कारभोजनसमयरीतीर्ज्ञात्वा स्वयमाचर्य्यान्यानुपदिशन्ति राजविरोधं कृत्वा प्रजया मित्रवदाचरन्ति त एव प्रशंसनीया भवन्ति॥४॥

पदार्थः–हे मनुष्यो! हम लोग **(स्वस्तये)** सुख के लिये **(यत्)** जिस **(महः)** बड़ी **(दधिक्राव्णः)** धारण करने वालों के हिलाने वाले **(इषः)** अन्न आदि की **(ऊर्जः)** पराक्रम की **(मरुताम्)** और मनुष्यों के **(भद्रम्)** कल्याण करने वाली **(नाम)** संज्ञा को **(अमन्महि)** जानें। और **(वरुणम्)** जल के सदृश शान्ति आदि गुणों से युक्त **(मित्रम्)** प्राणों के सदृश सब के प्रिय **(अग्निम्)** बिजुली के सदृश सम्पूर्ण गुणों के प्रकाश करने वाले **(वज्रबाहुम्)** शस्त्र और अस्त्रों को सेवने वाले बाहुयुक्त **(इन्द्रम्)** अत्यन्त ऐश्वर्य्यवान् की **(हवामहे)** प्रशंसा करें वा ग्रहण करें, उस संज्ञा और ऐश्वर्य्यवान् को आप लोग जान के अन्यों के प्रति प्रशंसा करो॥४॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अन्न आदि संस्कार और भोजन के समय की रीतियों को जान और स्वयं आचरण करके अन्यों को उपदेश देते और राजा के साथ विरोध नहीं करके प्रजा के साथ मित्र के सदृश आचरण करते हैं, वे ही प्रशंसा करने योग्य होते हैं॥४॥

अथ राजप्रजाकृत्यमाह॥

अब राजप्रजाकृत्य को अगले मन्त्र में कहते हैं॥

इन्द्रमिवेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः।

दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम्॥५॥

इन्द्रम्ऽइव। इत्। उभये। वि। ह्वयन्ते। उत्ऽईराणाः। यज्ञम्। उपऽप्रयन्तः। दधिऽक्राम्। ऊम् इति। सूदनम्। मर्त्याय। ददथुः। मित्रावरुणा। नः। अश्वम्॥५॥

पदार्थः-(इन्द्रमिव) विद्युतमिव **(इत्)** एव **(उभये)** राजप्रजाजनाः **(वि)** विशेषेण **(ह्वयन्ते)** प्रशंसेयुः **(उदीराणाः)** उत्कृष्टतां प्राप्ताः **(यज्ञम्)** न्यायव्यवहारम् **(उपप्रयन्तः)** प्राप्नुवन्तः **(दधिक्राम्)** न्यायधर्त्तॄणां कामयितारम् **(उ)** **(सूदनम्)** क्षरणम् **(मर्त्याय)** **(ददथुः)** दद्यातम् **(मित्रावरुणा)** प्राणोदानवद् राजप्रधानामात्यौ **(नः)** अस्मभ्यम् **(अश्वम्)** आशु सुखकरं बोधम्॥५॥

अन्वयः-हे मित्रावरुणा! य उदीराणा यज्ञमुपप्रयन्त उभये मर्त्याय नोऽस्मभ्यं च दधिक्रां सूदनमश्वं च वि ह्वयन्ते तानुत्तमान् पदार्थान् युवां ददथुस्ताविन्द्रमिवेदु कृतज्ञौ स्यातम्॥५॥

भावार्थः–अत्रोपमालङ्कारः। ये राजप्रजाजनाः पक्षपातरहितं न्याय्यं धर्ममाचरन्ति तेऽजातशत्रवस्सन्तः सर्वप्रिया भवन्ति॥५॥

पदार्थः–हे **(मित्रावरुणा)** प्राण और उदान वायु के सदृश राजा के प्रधान और मन्त्री जो **(उदीराणाः)** उत्तमता को प्राप्त **(यज्ञम्)** न्याय व्यवहार को **(उपप्रयन्तः)** प्राप्त होते हुए **(उभये)** राजा और प्रजाजन **(मर्त्याय)** अन्य मनुष्य और **(नः)** हम लोगों के लिये **(दधिक्राम्)** न्याय धारण करने वालों

की कामना करने वाले **(सूदनम्)** जलादि बहने **(अश्वम्)** और शीघ्र सुख करने वाले बोध की **(वि)** विशेष करके **(ह्वयन्ते)** प्रशंसा करें और उन उत्तम पदार्थों को **(ददथुः)** तुम देओ वे आप **(इन्द्रमिव)** बिजुली के सदृश **(इत्, उ)** ही कृतज्ञ होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा और प्रजाजन पक्षपात से रहित, न्याययुक्त धर्म का आचरण करते हैं, वे शत्रुरहित हुए सब के प्रिय होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दधिक्राव्णो॑ अकारिषं जिष्णोरश्वस्य वाजिनः।

सुरभि नो॒ मुखा॑ कर॒त् प्र ण॒ आयूं॑षि तारिषत्॥६॥१३॥

दधिऽक्राव्णः। अकारिषम्। जिष्णोः। अश्वस्य। वाजिनः। सुरभि। नः। मुखा। करत्। प्र। नः। आयूंषि। तारिषत्॥६॥

पदार्थः-(दधिक्राव्णः) धर्मधरस्य क्रमयितुर्वा **(अकारिषम्)** कुर्य्याम् **(जिष्णोः)** जयशीलस्य **(अश्वस्य)** सकलशुभगुणव्याप्तस्य **(वाजिनः)** विज्ञानवतः **(सुरभि)** सुगन्धादिगुणयुक्तं द्रव्यम् **(नः)** अस्माकम् **(मुखा)** मुखेन सहचरितानि श्रोत्रादीनीन्द्रियाणि प्रति **(करत्)** कुर्य्यात् **(प्र)** **(नः)** अस्माकम् **(आयूंषि)** **(तारिषत्)** वर्द्धयेत्॥६॥

अन्वयः-हे मनुष्या! यो नो मुखा सुरभि करन्न आयूंषि प्रतारिषत्तस्य दधिक्राव्णोऽश्वस्य वाजिनो जिष्णो राज्ञो यथाहमाज्ञामकारिषं तथैव यूयमपि कुरुत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो राजा सुगन्धादियुक्तघृतादिहोमेन वायुवृष्टिजलादिं शोधयित्वा सर्वेषां रोगान्निवार्य्याऽऽयूंषि वर्धयति प्रयत्नेन सर्वाः प्रजाः पुत्रवत्पालयति च सोऽस्माभिः पितृवत्सत्कर्त्तव्योऽस्तीति॥६॥

अत्र राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इत्येकोनचत्वारिंशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(नः)** हम लोगों के **(मुखा)** मुख के सहचरित श्रवण आदि इन्द्रियों के प्रति **(सुरभि)** सुगन्ध आदि गुणों से युक्त द्रव्य को **(करत्)** करे और **(नः)** हम लोगों की **(आयूंषि)** अवस्थाओं को **(प्र, तारिषत्)** बढ़ावे उस **(दधिक्राव्णः)** धर्म को धारण करने वा चलाने वाले **(अश्वस्य)** सम्पूर्ण उत्तम गुणों में व्याप्त **(वाजिनः)** विज्ञानवाले **(जिष्णोः)** जयशील राजा की जिस प्रकार मैं आज्ञा को **(अकारिषम्)** करूं, वैसे ही आप लोग भी करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो राजा सुगन्ध आदि से युक्त घृत आदि के होम से वायु वृष्टि जलादि को पवित्र कर सब के रोगों का निवारण करके अवस्थाओं को बढ़ाता

है और प्रयत्न से सब प्रजाओं का पुत्र के सदृश पालन करता है, वह हम लोगों को पिता के सदृश सत्कार करने योग्य है॥६॥

इस सूक्त में राजा और प्रजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह उनतालीसवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य चत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। १-४ दधिक्रावा। ५ सूर्य्यश्च देवताः। १ निचृत् त्रिष्टुप्। २ त्रिष्टुप्। ३ स्वराट् त्रिष्टुप्। ४ भुरिक्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ निचृत् जगती छन्दः। निषादः स्वरः॥

अथ राजप्रजाकृत्यमाह॥

अब पांच ऋचा वाले चालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा और प्रजा के कृत्य को कहते हैं॥

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु।
अपामग्नेरुषसः सूर्यस्य बृहस्पतेराङ्गिरसस्य जिष्णोः॥ १॥

दधिक्राऽव्णाः। इत्। ऊम् इति। नु। चर्किराम। विश्वाः। इत्। माम्। उषसः। सूदयन्तु। अपाम्। अग्नेः। उषसः। सूर्यस्य। बृहस्पतेः। आङ्गिरसस्य। जिष्णोः॥ १॥

पदार्थः-(दधिक्राव्णः) वाय्वादिकारणं क्रामयितुः **(इत्)** **(उ)** **(नु)** **(चर्किराम)** भृशं विक्षिपेम **(विश्वाः)** अखिलाः **(इत्)** **(माम्)** **(उषसः)** प्रभातवेलाः **(सूदयन्तु)** वर्षयन्तु वर्धयन्तु **(अपाम्)** जलानाम् **(अग्नेः)** विद्युतः **(उषसः)** **(सूर्य्यस्य)** सवितुः **(बृहस्पतेः)** बृहतां पालकस्य **(आङ्गिरसस्य)** अङ्गिरस्सु प्राणेषु भवस्य **(जिष्णोः)** जयशीलस्य॥ १॥

अन्वयः-हे मनुष्या! यथा विश्वा उषसो दधिक्राव्ण आयुर्मा च सूदयन्तु तथेदु वयं सर्वाः प्रजाश्चर्किराम यथा विश्वा उषसोऽपामग्ने सूर्य्यस्य बृहस्पतेराङ्गिरसस्य जिष्णोर्जयशीलस्य राज्ञो दोषान् सूदयन्तु तथेदेव वयं सर्वाः प्रजाः सत्कर्मसु नु चर्किराम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन् राजपुरुषा वा! यूयं यथा प्रातर्वेला सर्वान् चेतयति तथा न्यायेनाखिलाः प्रजाश्चेतयत यथोषसो निमित्तं सूर्यः सूर्य्यस्य निमित्तं विद्युद्विद्युतो निमित्तं वायुर्वायोः कारणं प्रकृतिः प्रकृतेरधिष्ठाता परमेश्वरोऽस्ति तथैव प्रजापाननिमित्तं भृत्या भृत्यनिमित्तमध्यक्षा अध्यक्षनिमित्तं प्रधानः प्रधाननिमित्तं राजा भवेत्॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(विश्वाः)** सम्पूर्ण **(उषसः)** प्रातर्वेला **(दधिक्राव्णः)** वायु आदि के कारण को चलाने वाले की अवस्था को और **(माम्)** मुझको **(सूदयन्तु)** वर्षावें बढ़ावें **(इत्, उ)** वैसे ही हम लोग सम्पूर्ण प्रजाओं को **(चर्किराम)** कार्य्यसंलग्न करावें और जैसे सम्पूर्ण **(उषसः)** प्रातःकाल **(अपाम्)** जलों **(अग्नेः)** बिजुली **(सूर्य्यस्य)** सूर्य्य **(बृहस्पतेः)** बड़ों के पालन करने वाले **(आङ्गिरसस्य)** प्राणों में उत्पन्न **(जिष्णोः)** और जयशील राजा के दोषों को प्रकट करें वैसे **(इत्)** ही हम लोग सब प्रजाओं को उत्तम कर्म्मों में **(नु)** शीघ्र संलग्न करावें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन् वा राजपुरुषो! आप लोग जैसे प्रातर्वेला सब को चैतन्य करती है, वैसे न्याय से सम्पूर्ण प्रजाओं को चैतन्य करो और जैसे प्रातःकाल का

निमित्त सूर्य्य और सूर्य्य का निमित्त बिजुली, बिजुली का निमित्त वायु, वायु का कारण प्रकृति और प्रकृति का अधिष्ठाता परमेश्वर है, वैसे ही प्रजापाननिमित्त भृत्य, भृत्यनिमित्त अध्यक्ष, अध्यक्षों का निमित्त प्रधान और प्रधान का निमित्त राजा होवे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सत्वा॑ भरि॒षो गवि॒षो दु॑व॒न्य॒सच्छ्र॑व॒स्यादि॒ष उ॒षस॑स्तुरण्य॒सत्।

स॒त्यो द्र॒वो द्र॑व॒रः प॑तङ्ग॒रो द॑धि॒क्रावे॑षमू॒र्जं स्व॑र्जनत्॥ २॥

सत्वा॑। भ॒रि॒षः। गोऽइ॑षः। दु॒व॒न्य॒ऽसत्। श्र॒व॒स्यात्। इ॒षः। उ॒षस॑ः। तु॒र॒ण्य॒ऽसत्। स॒त्यः। द्र॒वः। द्र॒व॒रः। प॒त॒ङ्ग॒रः। द॒धि॒ऽक्रावा॑। इष॑म्। ऊर्ज॑म्। स्व॑रिति॑ सुऽअः। ज॒न॒त्॥ २॥

पदार्थः-(सत्वा) प्रापकः **(भरिषः)** धारणपोषणचतुरः **(गविषः)** गा इच्छन् **(दुवन्यसत्)** परिचरणमिच्छन् **(श्रवस्यात्)** आत्मनः श्रवणमिच्छेत् **(इषः)** इच्छाः **(उषसः)** प्रभातान् **(तुरण्यसत्)** आत्मनस्तुरणं त्वरणमिच्छन् **(सत्यः)** सत्सु साधुः **(द्रवः)** स्निग्धः **(द्रवरः)** यो द्रवे रमते द्रवान् ददाति वा **(पतङ्गरः)** यः पतङ्गेऽग्नौ रमते पतङ्गं ददाति वा **(दधिक्रावा)** धर्त्तव्ययानक्रमिता **(इषम्)** अन्नम् **(ऊर्जम्)** पराक्रमम् **(स्वः)** सुखम् **(जनत्)** जनयेत्॥ २॥

अन्वयः-हे मनुष्या! यः सत्वा भरिषो गविषो दुवन्यसदिष उषसस्तुरण्यसच्छ्रवस्याद्यः सत्यो द्रवो द्रवरः पतङ्गरो दधिक्रावेषमूर्जं स्वश्च जनत् स एव राजा युष्माभिः सत्कर्त्तव्योऽस्ति॥ २॥

भावार्थः-प्रजाजनैर्यो राजा सत्यवादी जितेन्द्रियः सर्वेषां सुखमिच्छुर्न्यायकारी पितृवद्वर्त्तेत स एव प्रजाः पालयितुं शक्नोति॥ २॥

पदार्थः-हे मनुष्यो! जो **(सत्वा)** प्राप्त करने वाला **(भरिषः)** धारण और पोषण में चतुर **(गविषः)** गौओं की और **(दुवन्यसत्)** सेवा की इच्छा करता हुआ तथा **(इषः)** इच्छाओं और **(उषसः)** प्रातःकालों को **(तुरण्यसत्)** अपनी शीघ्रता को चाहता हुआ **(श्रवस्यात्)** अपने श्रवण की इच्छा करे तथा जो **(सत्यः)** श्रेष्ठों में श्रेष्ठ **(द्रवः)** स्नेही **(द्रवरः)** द्रव में रमने वा द्रव अर्थात् गीले पदार्थों को देने और **(पतङ्गरः)** अग्नि में रमने वा अग्नि को देने वाला **(दधिक्रावा)** धारण करने योग्य वाहन पर जाता **(इषम्)** अन्न **(ऊर्जम्)** पराक्रम और **(स्वः)** सुख को **(जनत्)** उत्पन्न करे, वही राजा आप लोगों को सत्कार करने योग्य है॥ २॥

भावार्थः-प्रजाजनों के साथ जो राजा सत्यवादी, जितेन्द्रिय, सब के सुख की इच्छा करता हुआ, न्यायकारी पिता के सदृश वर्ताव करे, वही प्रजाओं का पालन कर सकता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत स्माꣳस्य द्रवꣳतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः।

श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः॥ ३॥

उत। स्म। अस्य। द्रवतः। तुरण्यतः। पर्णम्। न। वेः। अनु। वाति। प्रऽगर्धिनः। श्येनस्यऽइव। ध्रजतः। अङ्कसम्। परि। दधिऽक्राव्णः। सह। ऊर्जा। तरित्रतः॥ ३॥

पदार्थः-(उत) अपि **(स्म)** एव **(अस्य) (द्रवतः)** धावतः **(तुरण्यतः)** सद्यो गच्छतः **(पर्णम्)** प्रजापालनम् **(न)** इव **(वेः)** पक्षिणः **(अनु) (वाति)** अनुगच्छति **(प्रगर्धिनः)** प्रलुब्धस्य **(श्येनस्येव) (ध्रजतः)** वेगेन धावतः **(अङ्कसम्)** लक्षणम् **(परि)** सर्वतः **(दधिक्राव्णः)** धर्त्तृधरस्य वायोः **(सह) (ऊर्जा)** पराक्रमेण **(तरित्रतः)** अध्वनस्तरिता॥ ३॥

अन्वयः-यो जनोऽङ्कसं ध्रजतः प्रगर्धिनः श्येनस्येवोर्जा तरित्रतो दधिक्राव्णोऽस्योत द्रवतस्तुरण्यतः पर्णं न वेर्न राज्ञः पर्णं स्म पर्य्यनुवाति तेन सह सर्वेऽमात्या मन्त्रयन्तु॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यस्य राज्ञः श्येनेव सेना पराक्रमिणी वर्त्तते स तया प्रजापालनं कृत्वा दस्यून्निवारयेत्॥ ३॥

पदार्थः-जो जन **(अङ्कसम्)** लक्षण का **(ध्रजतः)** वेग से जाते हुए **(प्रगर्धिनः)** अत्यन्त लोभी **(श्येनस्येव)** वाज पक्षी के सदृश **(ऊर्जा)** पराक्रम से **(तरित्रतः)** मार्ग के पार उतारने और **(दधिक्राव्णः)** धारण करने वाले की धारणा करने वाले वायु **(अस्य, उत)** और इस **(द्रवतः)** दौड़ते तथा **(तुरण्यतः)** शीघ्र चलते हुए की **(पर्णम्)** प्रजापालना के **(न)** सदृश और **(वेः)** पक्षी के सदृश राजा की प्रजापालना के **(स्म)** ही **(परि)** सब प्रकार **(अनु, वाति)** पीछे चलता है उसके **(सह)** साथ मन्त्री जन सम्मति करें॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिस राजा की वाज पक्षिणी के सदृश सेना पराक्रम वाली है, वह उसके द्वारा प्रजा का पालन करके डाकू चोरों का निवारण करे॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि।

क्रतुं दधिक्रा अनु सन्तवीत्वत् पथामङ्कांस्यन्वापनीफणत्॥ ४॥

उत। स्यः। वाजी। क्षिपणिम्। तुरण्यति। ग्रीवायाम्। बद्धः। अपिऽकक्षे। आसनि। क्रतुम्। दधिऽक्राः। अनु। सम्ऽतवीत्वत्। पथाम्। अङ्कांसि। अनु। आऽपनीफणत्॥ ४॥

पदार्थः-(उत) (**स्यः**) सः **(वाजी)** वेगवान् **(क्षिपणिम्)** शीघ्रकारिणम् **(तुरण्यति)** सद्यो गमयति **(ग्रीवायाम्)** कण्ठे **(बद्धः) (अपिकक्षे)** पार्श्वे **(आसनि)** मुखे **(क्रतुम्)** प्रज्ञां कर्म वा **(दधिक्राः)**

धर्त्तव्यानां धारकः **(अनु)** **(सन्तवीत्वत्)** बहुबलः सन् **(पथाम्)** मार्गाणाम् **(अङ्कांसि)** लक्षणानि चिह्नानि **(अनु)** **(आपनीफणत्)** अत्यन्तं गच्छति॥४॥

अन्वयः-हे मनुष्या! यो वाजी ग्रीवायामपिकक्ष आसनि बद्धो दधिक्राः सन् क्षिपणिमनु तुरण्यत्युत सन्तवीत्वत् सन् पथामङ्कांसि क्रतुमन्वापनीफणत् स्य युष्माभिः कार्य्येषु नियोजनीयः॥४॥

भावार्थः-हे मनुष्या! यथा सर्वतोऽलङ्कृतो बन्धनेन सज्जोऽश्वः सद्यो गच्छति तथैवाग्न्यादिभिश्चालितेन यानेन सद्यो गच्छत॥४॥

पदार्थः-हे मनुष्यो! जो **(वाजी)** वेगयुक्त **(ग्रीवायाम्)** कण्ठ में **(अपिकक्षे)** कांख में **(आसनि)** मुख में **(बद्धः)** बंधा और **(दधिक्राः)** धारण करने योग्यों का धारण करने वाला हुआ **(क्षिपणिम्)** शीघ्र करने वाले को **(अनु, तुरण्यति)** शीघ्र चलाता है **(उत)** और **(सन्तवीत्वत्)** बहुत बलवान् होता हुआ **(पथाम्)** मार्गों के **(अङ्कांसि)** चिह्नों को **(क्रतुम्)** बुद्धि वा कर्म के **(अनु)** पीछे **(आपनीफणत्)** अत्यन्त प्राप्त होता है **(स्यः)** वह आप लोगों से कार्य्यों में नियुक्त करने योग्य है॥४॥

भावार्थः-हे मनुष्यो! जैसे सब प्रकार शोभित बन्धन से सन्नद्ध किया घोड़ा शीघ्र चलता है, वैसे ही अग्नि आदि से चलाये गये वाहन से शीघ्र जाओ॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।

नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्॥५॥१४॥

हꣳसः। शुचिऽसत्। वसुः। अन्तरिक्षऽसत्। होता। वेदिऽसत्। अतिथिः। दुरोणऽसत्। नृऽसत्। वरऽसत्। ऋतऽसत्। व्योमऽसत्। अप्ऽजाः। गोऽजाः। ऋतऽजाः। अद्रिऽजाः। ऋतम्॥५॥

पदार्थः-**(हंसः)** यो हन्ति पापानि सः **(शुचिषत्)** यः शुचिषु पवित्रेषु सीदति **(वसुः)** यः शरीरादिषु वसति **(अन्तरिक्षसत्)** योऽन्तरिक्ष आकाशे वा सीदति **(होता)** दाता आदाता वा **(वेदिषत्)** यो वेद्यां सीदति **(अतिथिः)** अनियततिथिः **(दुरोणसत्)** यो दुरोणे गृहे सीदति **(नृषत्)** यो नरेषु सीदति **(वरसत्)** यो वरेषु श्रेष्ठेषु सीदति **(ऋतसत्)** यः सत्ये सीदति **(व्योमसत्)** यो व्योम्नि सीदति **(अब्जाः)** योऽद्भ्यो जातः **(गोजाः)** यो गोषु पृथिव्यादिषु जातः **(ऋतजाः)** यः सत्याज्जातः **(अद्रिजाः)** योऽद्रेर्मेघाज्जातः **(ऋतम्)**॥५॥

अन्वयः-हे मनुष्या! यः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसन्नृषद्वरसद् व्योमसदृतसदब्जा गोजा ऋतजा अद्रिजा हंस ऋतमाचरति स एव जगदीश्वरप्रियो भवति॥५॥

भावार्थः-ये जीवाः शुभगुणकर्मस्वभावा ईश्वराज्ञानुकूला वर्त्तन्ते त एव परमेश्वरेण सहाऽऽनन्दं भुञ्जत इति॥५॥

अथ राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चत्वारिंशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(शुचिषत्)** पवित्रों में स्थित होने **(वसुः)** शरीरादिकों में रहने **(अन्तरिक्षसत्)** अन्तरिक्ष वा आकाश में स्थित होने **(होता)** दान वा ग्रहण करने और **(वेदिषत्)** वेदी पर स्थित होने वाला **(अतिथिः)** जिसकी कोई तिथि नियत न हो वह **(दुरोणसत्)** गृह में **(नृषत्)** मनुष्यों में **(वरसत्)** श्रेष्ठों में **(व्योमसत्)** अन्तरिक्ष में **(ऋतसत्)** और सत्य में स्थित होने वाला **(अब्जाः)** जलों से उत्पन्न **(गोजाः)** वा पृथिवी आदिकों में उत्पन्न **(ऋतजाः)** तथा सत्य से और **(अद्रिजाः)** मेघों से उत्पन्न हुआ **(हंसः)** पापों को हन्ता है और **(ऋतम्)** सत्य का आचरण करता है, वही जगदीश्वर का प्रिय होता है॥५॥

भावार्थः-जो जीव उत्तम गुण, कर्म और स्वभाव वाले ईश्वर की आज्ञा के अनुकूल वर्त्ताव करते हैं, वे ही परमेश्वर के साथ आनन्द को भोगते हैं॥५॥

इस सूक्त में राजा और प्रजा के कृत्यों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चालीसवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्यैकाऽधिकचत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रावरुणौ देवते। १, ५, ९, ११ त्रिष्टुप्। २, ४ निचृत् त्रिष्टुप्। ३, ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ पङ्क्तिः। ८, १० स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाध्यापकोपदेशकविषयमाह॥

अब ग्यारह ऋचा वाले इकतालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अध्यापक और उपदेशक के विषय को कहते हैं॥

इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता।
यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान्॥ १॥

इन्द्रा। कः। वाम्। वरुणा। सुम्नम्। आप। स्तोमः। हविष्मान्। अमृतः। न। होता। यः। वाम्। हृदि। क्रतुऽमान्। अस्मत्। उक्तः। पस्पर्शत्। इन्द्रावरुणा। नमस्वान्॥ १॥

पदार्थः-(इन्द्रा) परमैश्वर्य्ययुक्त **(कः)** **(वाम्)** युवाभ्याम् **(वरुणा)** श्रेष्ठाचारिन् **(सुम्नम्)** सुखम् **(आप)** प्राप्नुयात् **(स्तोमः)** प्रशंसा **(हविष्मान्)** बहुपदार्थहेतुः **(अमृतः)** नाशरहितः **(न)** इव **(होता)** दाता **(यः)** **(वाम्)** युवयोः **(हृदि)** **(क्रतुमान्)** बहुशुभप्रज्ञः **(अस्मत्)** **(उक्तः)** कथितः **(पस्पर्शत्)** **(इन्द्रावरुणा)** प्राणोदानवत् प्रियबलिनौ **(नमस्वान्)** बहूनि नमांस्यन्नादीनि सत्करणानि वा विद्यन्ते यस्य सः॥१॥

अन्वयः-हे इन्द्रावरुणाऽध्यापकोपदेशकौ! वां कः स्तोमः सुम्नं हविष्मानमृतो होता नाप। हे इन्द्रावरुणा! योऽस्मदुक्तो नमस्वान् क्रतुमान् वां हृदि पस्पर्शत्॥१॥

भावार्थः-हे अध्यापकोपदेशका! ये होतृवत्पुरुषार्थिनो धीमन्तो नम्राः शान्ताः सत्कारिणो मातापितृभिः सुशिक्षिताः स्युस्तानध्याप्योपदिश्य श्रीमतः श्रेष्ठान् सम्पादयत॥१॥

पदार्थः-हे **(इन्द्रा)** अत्यन्त ऐश्वर्य्य से युक्त **(वरुणा)** श्रेष्ठ आचरण करने वाले अध्यापक और उपदेशक जन! **(वाम्)** तुम दोनों से **(कः)** कौन **(स्तोमः)** प्रशंसा **(सुम्नम्)** सुख को **(हविष्मान्)** बहुत पदार्थों में कारण **(अमृतः)** नाश से रहित और **(होता)** दाता जन के **(न)** सदृश **(आप)** प्राप्त होवे। हे **(इन्द्रावरुणा)** प्राण और उदान वायु के सदृश प्रियबली जनो! **(यः)** जो **(अस्मत्)** हम लोगों से **(उक्तः)** कहा गया **(नमस्वान्)** बहुत अन्न आदि वा सत्करणों युक्त **(क्रतुमान्)** बहुत श्रेष्ठ बुद्धि वाला **(वाम्)** आप दोनों के **(हृदि)** हृदय में **(पस्पर्शत्)** स्पर्श करे॥१॥

भावार्थः-हे अध्यापक और उपदेशको! जो दाता जन के सदृश पुरुषार्थी, बुद्धिमान्, नम्र, शान्त, सत्कार करने वाले और माता-पिता से उत्तम प्रकार शिक्षित होवें, उनको पढ़ा और उपदेश देकर लक्ष्मीयुक्त और श्रेष्ठ करो॥१॥

अथ राजामात्यविषयमाह॥

अब राजा और अमात्य विषय को अगले मन्त्र में कहते हैं॥

इन्द्रा॑ ह॒ यो वरु॑णा च॒क्र आ॒पी दे॒वौ मर्त॑: स॒ख्याय॒ प्रय॑स्वान्।

स ह॑न्ति वृ॒त्रा स॑मि॒थेषु॒ शत्रू॒नवो॑भिर्वा म॒हद्भि॒: स प्र शृ॑ण्वे॥ २॥

इन्द्रा॑। ह॒। यः। वरु॑णा। च॒क्रे। आ॒पी इति॑। दे॒वौ। मर्त॑:। स॒ख्याय॑। प्रय॑स्वान्। सः। ह॒न्ति॒। वृ॒त्रा। स॒म्ऽइ॒थेषु॑। शत्रू॑न्। अव॑:ऽभिः। वा॒। म॒हत्ऽभि॑:। सः। प्र। शृ॒ण्वे॒॥ २॥

पदार्थः-(इन्द्रा) इन्द्र **(ह)** किल **(यः)** **(वरुणा)** श्रेष्ठः **(चक्रे)** **(आपी)** सकलविद्यां प्राप्तौ **(देवौ)** विद्वांसौ **(मर्त्तः)** मनुष्यः **(सख्याय)** सख्युर्भावाय **(प्रयस्वान्)** प्रयत्नवान् **(सः)** **(हन्ति)** **(वृत्रा)** वृत्राणि शत्रुसैन्यानि **(समिथेषु)** सङ्ग्रामेषु **(शत्रून्)** **(अवोभिः)** रक्षणादिभिः **(वा)** **(महद्भिः)** महाशयैः **(सः)** **(प्र)** **(शृण्वे)**॥ २॥

अन्वयः-हे इन्द्रा वरुणापी देवौ! युवयोर्यः प्रयस्वान् मर्त्तः सख्याय प्र चक्रे स हाऽवोभिस्स वा महद्भिः समिथेषु वृत्रा शत्रून् हन्ति तमहं कीर्तिमन्तं शृण्वे॥ २॥

भावार्थः-हे न्यायशीलौ राजामात्यौ! ये भवत्सत्कर्त्तारः शत्रूणां जेतारो महाशयास्सन्धयो भवत्सख्यप्रिया विजयिनो भवेयुस्तान् सत्कृत्य रक्षेतम्॥ २॥

पदार्थः-हे **(इन्द्रा)** अत्यन्त ऐश्वर्य्य से युक्त **(वरुणा)** उत्तम **(आपी)** सम्पूर्ण विद्याओं को प्राप्त **(देवौ)** विद्वान् जनो! आप लोगों के मध्य में **(यः)** **(प्रयस्वान्)** प्रयत्न करने वाला **(मर्त्तः)** मनुष्य **(सख्याय)** मित्रपन के लिये **(प्र, चक्रे)** उत्तमता करता है **(सः, ह)** वही **(अवोभिः)** रक्षण आदिकों के साथ **(वा)** वा **(सः)** वह **(महद्भिः)** महाशयों के साथ **(समिथेषु)** संग्रामों में **(वृत्रा)** शत्रुओं की सेनाओं और **(शत्रून्)** शत्रुओं का **(हन्ति)** नाश करता है, उसको मैं यशस्वी **(शृण्वे)** सुनता हूँ॥ २॥

भावार्थः-हे न्याय करने वाले राजा और मन्त्रीजनो! जो आप लोगों के सत्कार करने और शत्रुओं के जीतने वाले महाशय अर्थात् गम्भीर अभिप्राय वाले, मेलयुक्त, आप लोगों की मित्रता में प्रीतिकर्त्ता, विजयी होवें; उनका सत्कार करके रक्षा करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रा॑ ह॒ रत्नं॑ वरु॑णा धेष्ठे॒त्था नृभ्य॑: शशमा॒नेभ्य॒स्ता।

यदी॒ सखा॑या स॒ख्याय॒ सोमै॑: सु॒तेभि॑: सुप्र॒यसा॑ मा॒दयै॑ते॥ ३॥

इन्द्रा॑। ह॒। रत्न॑म्। वरु॑णा। धेष्ठा॑। इ॒त्था। नृऽभ्य॑:। श॒श॒मा॒नेभ्य॑:। ता। यदि॑। सखा॑या। स॒ख्याय॑। सोमै॑:। सु॒तेभि॑:। सु॒ऽप्र॒यसा॑। मा॒दयै॑ते॒। इति॑॥ ३॥

पदार्थः-(इन्द्रा) राजन् **(ह)** किल **(रत्नम्)** रमणीयं धनम् **(वरुणा)** शुभगुणयुक्तप्रधान **(धेष्ठा)** धातारौ **(इत्था)** एवं प्रकारेण **(नृभ्यः)** मनुष्येभ्यः **(शशमानेभ्यः)** प्रशंसमानेभ्यः **(ता)** तौ **(यदि)** अत्र **निपातस्य चे**ति दीर्घः। **(सखाया)** परस्परं सुहृदौ **(सख्याय)** सख्युर्भावाय **(सोमैः)** ऐश्वर्यैः **(सुतेभिः)** निष्पादितैः **(सुप्रयसा)** सुष्ठु प्रयत्नेन **(मादयैते)** सुखयेताम्॥३॥

अन्वयः-हे धेष्ठा इन्द्रावरुणा! यदि युवाभ्यां शशमानेभ्यो नृभ्यो ह रत्नं दत्तं तर्हि ता सखाया भवन्तौ सख्याय सुप्रयसा सुतेभिस्सोमैर्मादयैत इत्था युवामप्यानन्दितौ भवेथाम्॥३॥

भावार्थः-ये राजामात्याः शुभगुणानां जनानां धनादिना सत्कारं कुर्वन्ति त एवैश्वर्य्यं प्राप्य सदा मोदन्ते॥३॥

पदार्थः-हे **(धेष्ठा)** धाता जनो **(इन्द्रा)** राजन् **(वरुणा)** और उत्तम गुणों से युक्त प्रधान! **(यदी)** यदि जिन तुम दोनों ने **(शशमानेभ्यः)** प्रशंसा करते हुए **(नृभ्यः)** मनुष्यों के लिये **(ह)** ही **(रत्नम्)** सुन्दर धन दिया तो **(ता)** वे **(सखाया)** परस्पर मित्र आप दोनों **(सख्याय)** मित्रपन के लिये **(सुप्रयसा)** श्रेष्ठ प्रयत्न से **(सुतेभिः)** उत्पन्न किये गये **(सोमैः)** ऐश्वर्य्यों से **(मादयैते)** सुख को प्राप्त हों **(इत्था)** इस प्रकार से आप दोनों निश्चय आनन्दित हों॥३॥

भावार्थः-जो राजा और मन्त्रीजन उत्तम गुण वाले मनुष्यों का धन आदि से सत्कार करते हैं, वे ही ऐश्वर्य्य को प्राप्त होकर सदा आनन्दित होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रा॑ यु॒वं व॑रुणा दिद्यु॒मस्मि॒न्नोजि॑ष्ठमुग्रा॒ नि व॑धिष्टं॒ वज्र॑म्।
यो नो॑ दु॒रेवो॑ वृ॒कति॑र्दु॒भीति॒स्तस्मि॑न् मि॑माथाम॒भिभू॒त्योज॑॥४॥

इन्द्रा॑। यु॒वम्। व॒रु॒णा॒। दि॒द्यु॒म्। अ॒स्मि॒न्। ओजि॑ष्ठम्। उ॒ग्रा॒। नि। व॒धि॒ष्ट॒म्। वज्र॑म्। यः। नः॒। दु॒ःऽएवः॑। वृ॒कतिः॑। दु॒भीतिः॑। तस्मि॑न्। मि॒मा॒था॒म्। अ॒भिऽभूति॑। ओजः॑॥४॥

पदार्थः-(इन्द्रा) शत्रुविदारक राजन्! **(युवम्)** युवाम् **(वरुणा)** श्रेष्ठाऽमात्य **(दिद्युम्)** विद्यान्यायप्रकाशम् **(अस्मिन्)** **(ओजिष्ठम्)** अतिशयेन पराक्रमयुक्तम् **(उग्रा)** तेजस्विनी **(नि)** **(वधिष्टम्)** हन्यातम् **(वज्रम्)** **(यः)** **(नः)** अस्मान् **(दुरेवः)** दुःखेन प्राप्तुं योग्यः **(वृकतिः)** वृकवच्छत्रुहिंसकः **(दभीतिः)** हिंस्रः **(तस्मिन्)** **(मिमाथाम्)** रचयेतम् **(अभिभूति)** तिरस्कारकम् **(ओजः)** पराक्रमम्॥४॥

अन्वयः-हे इन्द्रावरुणोग्रा युवमस्मिन्नोजिष्ठं दिद्युं वज्रं गृहीत्वा शत्रून्नि वधिष्टं यो दुरेवो वृकतिर्दभीतिर्नोऽस्मभ्यमभिभूत्योजो तन् मिमाथां तस्मिन् विश्वासं कुर्य्यातम्॥४॥

भावार्थः-हे राजाऽमात्या! भवन्तो ब्रह्मचर्य्यविद्यासत्याचरणजितेन्द्रियत्वादिभिरतुलं बलं वर्द्धयित्वा शत्रून्निवार्य्य प्रजाः सम्पाल्य निष्कण्टकं राज्याऽऽनन्दं सततं भुञ्जाताम्॥४॥

पदार्थः-हे **(इन्द्रा)** शत्रु के नाश करने वाले राजन् और **(वरुणा)** श्रेष्ठ मन्त्रीजन! **(उग्रा)** तेजस्वी **(युवम्)** आप दोनों **(अस्मिन्)** इस में **(ओजिष्ठम्)** अत्यन्त पराक्रमयुक्त **(दिद्युम्)** विद्या और न्याय के प्रकाशरूप **(वज्रम्)** वज्र को ग्रहण कर शत्रुओं का **(नि, वधिष्टम्)** निरन्तर नाश करो तथा **(यः)** जो **(दुरेवः)** दुःख से प्राप्त होने योग्य **(वृकतिः)** भेड़िये के सदृश शत्रुओं का नाश करने वाला **(दभीतिः)** हिंसक **(नः)** हम लोगों के लिये **(अभिभूति)** तिरस्कार करने वाला **(ओजः)** पराक्रम है उसको **(मिमाथाम्)** रचो और **(तस्मिन्)** उस में विश्वास को करो॥४॥

भावार्थः-हे राजा और मन्त्री जनो! आप ब्रह्मचर्य्य, विद्या, सत्याचरण और जितेन्द्रियत्वादि गुणों से अतुल बल को बढ़ाय के शत्रुओं का निवारण और प्रजाओं का अच्छे प्रकार पालन करके निष्कण्टक राज्यानन्द का निरन्तर भोग करें॥४॥

पुनरध्यापकोपदेशकविषयमाह॥

फिर अध्यापकोपदेशक विषय को अगले मन्त्र में कहते हैं॥

इन्द्रा॑ यु॒वं व॑रुणा भू॒तम॒स्या धि॒यः प्रे॒तारा॑ वृष॒भेव॑ धे॒नोः।
सा नो॑ दुहीय॒द्यव॑सेव ग॒त्वी स॒हस्र॑धारा॒ पय॑सा म॒ही गौः॥५॥१५॥

इन्द्रा॑। युवम्। व॒रु॒णा॒। भू॒तम्। अ॒स्याः। धि॒यः। प्रे॒तारा॑। वृ॒ष॒भाऽइ॑व। धे॒नोः। सा। नः॒। दु॒हीय॒त्। यव॑साऽइव। ग॒त्वी। स॒हस्र॑ऽधारा। पय॑सा। म॒ही। गौः॥५॥

पदार्थः-(इन्द्रा) विद्यैश्वर्य्ययुक्त **(युवम्)** युवाम् **(वरुणा)** प्रशंसितगुण **(भूतम्)** अतीतम् **(अस्याः)** **(धियः)** प्रज्ञायाः **(प्रेतारा)** प्राप्तारौ **(वृषभेव)** **(धेनोः)** **(सा)** **(नः)** अस्मान् **(दुहीयत्)** प्रपूरयेत् **(यवसेव)** बुसादिनेव **(गत्वी)** गत्वा प्राप्य **(सहस्रधारा)** सहस्राण्यसङ्ख्या धाराः प्रवाहा यस्या वाचः सा **(पयसा)** दुग्धादिना **(मही)** महती **(गौः)** गन्त्री॥५॥

अन्वयः-हे इन्द्रावरुणा प्रेतारा! युवमस्या धियो धेनोर्वृषभेव भूतं प्राप्नुतं यथा सा सहस्रधारा मही गौः पयसा यवसेव नोऽस्मान् गत्वी दुहीयत् तथा शुभगुणैः पूरयतम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे अध्यापकोपदेशका! भवन्तः सर्वेभ्यः ईदृशीं प्रज्ञां प्रयच्छेयुर्यथा सर्वेऽलङ्कामाः स्युः॥५॥

पदार्थः-हे **(इन्द्रा)** विद्या और ऐश्वर्य्य से युक्त **(वरुणा)** प्रशंसित गुणवान् **(प्रेतारा)** प्राप्त होने वाले! **(युवम्)** आप दोनों **(अस्याः)** इस **(धियः)** बुद्धि के **(धेनोः)** गौ के सम्बन्ध में **(वृषभेव)** बैल के सदृश **(भूतम्)** व्यतीत हुए विषय को प्राप्त होओ और जैसे **(सा)** वह **(सहस्रधारा)** असंख्य प्रवाह वाली वाणी **(मही)** बड़ी **(गौः)** चलने वाली गौ **(पयसा)** दुग्धादि से **(यवसेव)** भूसा आदि के सदृश **(नः)**

हम लोगों को **(गत्वी)** प्राप्त होकर **(दुहीयत्)** पूर्ण करे, वैसे श्रेष्ठ गुणों से पूर्ण करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे अध्यापक और उपदेशक जनो! आप सब के लिये ऐसी बुद्धि देओ कि जिससे सब पूर्ण मनोरथ वाले होवें॥५॥

अथ राजविषयमाह॥

अब राज विषय को अगले मन्त्र में कहते हैं॥

तोके हिते तनये उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये।

इन्द्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायाम्॥६॥

तोके। हिते। तनये। उर्वरासु। सूरः। दृशीके। वृषणः। च। पौंस्ये। इन्द्रा। नः। अत्र। वरुणा। स्यातम्। अवः ऽभिः। दस्मा। परि ऽतक्म्यायाम्॥६॥

पदार्थः-(तोके) सद्यो जातेऽपत्ये **(हिते)** हितसाधके **(तनये)** कुमारे **(उर्वरासु)** भूमिषु **(सूरः)** सूर्य्यः **(दृशीके)** द्रष्टव्ये **(वृषणः)** बलिष्ठान् **(च)** **(पौंस्ये)** बले **(इन्द्रा)** ऐश्वर्य्यदातर्नृप **(नः)** अस्मान् **(अत्र)** अस्यां प्रजायाम् **(वरुणा)** श्रेष्ठसचिव **(स्याताम्)** **(अवोभिः)** रक्षणादिभिः **(दस्मा)** दुःखोपक्षयितारौ **(परितक्म्यायाम्)** परितस्तक्मानश्वो यस्यां तस्याम्॥६॥

अन्वयः-हे इन्द्रा वरुणा! भवन्तावत्र परितक्म्यायां चोर्वरासु सूर इव हिते तोके तनये दृशीके पौंस्ये नो वृषणः कुर्वातामवोभिर्दस्मा स्याताम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजपुरुषा ब्रह्माण्डे सूर्य्य इव प्रजासु पितृवद्वर्त्तित्वा चोरान् निवार्य्य न्यायेन प्रजाः पालयेयुः॥६॥

पदार्थः-हे **(इन्द्रा)** ऐश्वर्य्य के देने वाले राजन् **(वरुणा)** श्रेष्ठ मन्त्री! आप दोनों **(अत्र)** इस प्रजा में **(परितक्म्यायाम्)** सब ओर से घोड़ा जिसमें उस राज्य में **(च)** और **(उर्वरासु)** भूमियों में **(सूरः)** सूर्य्य के सदृश **(हिते)** हित के सिद्ध करने वाले **(तोके)** शीघ्र उत्पन्न हुए पुत्र **(तनये)** कुमार **(दृशीके)** और देखने योग्य **(पौंस्ये)** पुरुषार्थ के निमित्त **(नः)** हम लोगों को **(वृषणः)** बलयुक्त करें तथा **(अवोभिः)** रक्षा आदि से **(दस्मा)** दुःख के नाश करने वाले **(स्याताम्)** होवें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजपुरुष जैसे ब्रह्माण्ड में सूर्य्य, वैसे प्रजाओं में पिता के सदृश वर्त्ताव कर और चोरों का निवारण करके न्याय से प्रजाओं का पालन करें॥६॥

अथ प्रजाविषयमाह॥

अब प्रजा विषय को अगले मन्त्र में कहते हैं॥

युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी।

वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शम्भू॥७॥

युवाम्। इत्। हि। अवसे। पूर्व्यायं। परि। प्रभूती इति प्रऽभूती। गोऽइषः। स्वापी इति सुऽआपी। वृणीमहे। सख्याय। प्रियाय। शूरा। मंहिष्ठा। पितराऽइव। शम्भू इति शम्ऽभू॥७॥

पदार्थः-(युवाम्) (इत्) एव **(हि)** निश्चये **(अवसे)** रक्षणाद्याय **(पूर्व्याय)** पूर्वैं राजभिः कृताय **(परि) (प्रभूती)** समर्थौ **(गविषः)** गवामिच्छोः **(स्वापी)** शयानौ **(वृणीमहे)** स्वीकुर्महे **(सख्याय)** मित्रत्वाय **(प्रियाय)** कमनीयाय **(शूरा)** निर्भयौ शत्रुहिंसकौ **(मंहिष्ठा)** अतिशयेन सत्कर्त्तव्यौ **(पितरेव)** यथा जनकजनन्यौ **(शम्भू)** शं सुखं भावुकौ॥७॥

अन्वयः-हे राजाऽमात्यौ! युवां हि पूर्व्यायावसे इत्प्रभूती स्वापी शूरा मंहिष्ठा पितरेव शम्भू प्रियाय सख्याय गविषो वयं परि वृणीमहे तस्माद्युवामस्माकं पालकौ सततं भवेतम्॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे प्रजाजना भवन्तस्तानेव राजादीन् स्वीकुर्वन्तु ये पितृवत्सर्वान् पालयितुं समर्थाः स्युः॥७॥

पदार्थः-हे राजा और मन्त्रीजनो! **(युवाम्)** तुम दोनों **(हि)** ही को **(पूर्व्याय)** पूर्व राजाओं ने किये **(अवसे)** रक्षण आदि के लिये **(इत्)** ही **(प्रभूती)** समर्थ **(स्वापी)** शयन करते हुए **(शूरा)** भयरहित और शत्रुओं के नाश करने वाले **(मंहिष्ठा)** अत्यन्त सत्कार करने योग्य **(पितरेव)** जैसे पिता और माता, वैसे **(शम्भू)** सुख को हुवानेवाले **[**=करनेवाले**] (प्रियाय)** सुन्दर **(सख्याय)** मित्रपन के लिये **(गविषः)** गौओं की इच्छा करने वाले का हम लोग **(परि, वृणीमहे)** स्वीकार करते हैं, इससे आप दोनों हम लोगों के पालन करनेवाले निरन्तर होवें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे प्रजाजनो! आप लोग उन्हीं राजा आदिकों को स्वीकार करो कि जो पिता के सदृश सब लोगों के पालन करने को समर्थ होवें॥७॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

ता वां धियोऽवसे वाजयन्तीरा जिं न जग्मुर्युवयूः सुदानू।

श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः॥८॥

ताः। वाम्। धियः। अवसे। वाजयन्तीः। आजिम्। न। जग्मुः। युवयूः। सुदानू इति सुऽदानू। श्रिये। न। गावः। उप। सोमम्। अस्थुः। इन्द्रम्। गिरः। वरुणम्। मे। मनीषाः॥८॥

पदार्थः-(ताः) (वाम्) युवयोः **(धियः)** प्रज्ञाः कर्माणि वा **(अवसे)** रक्षणाद्याय **(वाजयन्तीः)** ज्ञापयन्त्यः **(आजिम्)** सङ्ग्रामम् **(न)** इव **(जग्मुः)** प्राप्नुयुः **(युवयूः)** युवां कामयमानाः **(सुदानू)** सुष्ठु दातारौ **(श्रिये)** धनाय **(न)** इव **(गावः)** पृथिव्यो धेनवो वा **(उप) (सोमम्)** ऐश्वर्य्यम् **(अस्थुः)** प्राप्नुवन्तु

(इन्द्रम्) परमसुखकारकम् **(गिरः)** सुशिक्षिता वाण्यः **(वरुणम्)** श्रेष्ठं जनम् **(मे)** मम **(मनीषाः)** प्रज्ञाः॥८॥

अन्वयः-हे मनुष्या! यथा मे गिरो मनीषाश्च श्रिये गावो न सोममिन्द्रं वरुणमुपास्थुस्तथैव या वां धियोऽवसे वाजयन्तीराजिं न सुदानू युवयूः प्रजा जग्मुस्ता युवां सततं पालयत॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा विदुष्यो मातरः स्वापत्यानि सुशिक्ष्य सम्पाल्य विद्यायुक्तानि कृत्वा सुखयन्ति तथैव राजा प्रजाः प्रति वर्त्तेत॥८॥

पदार्थः-हे मनुष्यो! जैसे **(मे)** मेरी **(गिरः)** उत्तम प्रकार शिक्षित वाणियाँ और **(मनीषाः)** बुद्धियाँ **(श्रिये)** धन के लिये **(गावः)** पृथिवी वा गौओं के **(न)** सदृश **(सोमम्)** ऐश्वर्य्य **(इन्द्रम्)** अत्यन्त सुख करने वाले **(वरुणम्)** श्रेष्ठ जन के **(उप, अस्थुः)** समीप प्राप्त होवें, वैसे ही जो **(वाम्)** आप दोनों की **(धियः)** बुद्धियाँ वा कर्म **(अवसे)** रक्षण आदि के लिये **(वाजयन्तीः)** जनाती हुई **(आजिम्)** संग्राम के **(न)** सदृश **(सुदानू)** उत्तम प्रकार दाता जनों को और **(युवयूः)** आप दोनों की कामना करते हुए प्रजाजनों को **(जग्मुः)** प्राप्त होवें **(ता)** उनका आप दोनों निरन्तर पालन करो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्या वाली माता अपने सन्तानों को उत्तम प्रकार शिक्षा दे पालन कर और विद्या से युक्त करके सुखी करती है, वैसे ही राजा प्रजा के प्रति वर्त्ताव करे॥८॥

अथ राजाप्रजाकृत्यमाह॥

अब राजा और प्रजा के कर्त्तव्य विषय को अगले मन्त्र में कहते हैं॥

इ॒मा इन्द्रं॑ वरु॒णं मे मनी॒षा अग्म॒न्नुप॒ द्रवि॑ण॒मिच्छमा॑नाः।
उपे॑मस्थुर्जो॒ष्टार॑इव॒ वस्वो॑ र॒घ्वीरि॑व॒ श्रव॑सो॒ भिक्ष॑माणाः॥९॥

इ॒माः। इन्द्र॑म्। वरु॑णम्। मे॒। म॒नी॒षाः। अग्म॑न्। उप॑। द्रवि॑णम्। इ॒च्छमा॑नाः। उप॑। ई॒म्। अ॒स्थुः॒। जो॒ष्टारः॑ऽइव। वस्वः॑। र॒घ्वीः॑ऽइ॑व। श्रव॑सः। भिक्ष॑माणाः॥९॥

पदार्थः-**(इमाः)** प्रत्यक्षाः **(इन्द्रम्)** परमैश्वर्य्यम् **(वरुणम्)** श्रेष्ठं स्वभावम् **(मे)** मम **(मनीषाः)** **(अग्मन्)** प्राप्नुवन्तु **(उप)** **(द्रविणम्)** धनं यशो वा **(इच्छमानाः)** **(उप)** **(ईम्)** **(अस्थुः)** तिष्ठन्ति **(जोष्टारइव)** सेवमाना इव **(वस्वः)** धनस्य **(रघ्वीरिव)** लघ्व्यो ब्रह्मचारिण्य इव **(श्रवसः)** अन्नस्य **(भिक्षमाणाः)** याचमानाः॥९॥

अन्वयः-हे राजन्! या इमाः कुमार्यो ब्रह्मचारिण्यो मे मनीषा इवेन्द्रं द्रविणं वरुणमिच्छमाना अध्यापिका अग्मन् जोष्टारइव वस्व उपास्थुरीं श्रवसो रघ्वीरिव भिक्षमाणा अध्यापिका उप तस्थुस्ता एव प्रवरा जायन्ते॥९॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यथा कन्या ब्रह्मचर्य्येण गृहीताभ्यां विद्यासुशिक्षाभ्यां यशस्विन्यो विदुष्यो भूत्वा स्वसदृशान् पतीन् प्राप्य सदाऽऽनन्दन्ति तथैव प्रजाभिः सह भवान् भवता सह प्रजाः सततमानन्दन्तु॥९॥

पदार्थः-हे राजन्! जो **(इमाः)** ये प्रत्यक्ष कुमारी ब्रह्मचारिणियाँ **(मे)** मेरी **(मनीषाः)** बुद्धियों के सदृश **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य **(द्रविणम्)** धन वा यश और **(वरुणम्)** श्रेष्ठ स्वभाव की **(इच्छमानाः)** इच्छा करती हुई पढ़ानेवालियों को **(अग्मन्)** प्राप्त होवें और **(जोष्टारइव)** सेवा करते हुए पुरुषों के समान **(वस्वः)** धन के **(उप, अस्थुः)** समीप स्थित होती **(ईम्)** और प्रत्यक्ष **(श्रवसः)** अन्न की **(रघ्वीरिव)** छोटी ब्रह्मचारिणियों के सदृश **(भिक्षमाणाः)** याचना करती हुई पढ़ाने वाली स्त्रियों के **(उप)** समीप स्थित हुई वे ही कन्या अत्यन्त श्रेष्ठ होती हैं॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जैसे कन्याजन ब्रह्मचर्य्य से ग्रहण की गई विद्या और उत्तम शिक्षा से यशयुक्त और विद्या वाली होकर अपने अनुकूल पतियों को प्राप्त होकर सदा आनन्दित होती हैं, वैसे ही प्रजाओं के साथ आप और आपके साथ प्रजाजन निरन्तर आनन्द करें॥९॥

अथ प्रजाविषयमाह॥

अब प्रजा विषय को अगले मन्त्र में कहते हैं॥

अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम।

ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम्॥१०॥

अश्व्यस्य। त्मना। रथ्यस्य। पुष्टेः। नित्यस्य। रायः। पतयः। स्याम। ता। चक्राणौ। ऊतिऽभिः। नव्यसीभिः। अस्मऽत्रा। रायः। निऽयुतः। सचन्ताम्॥१०॥

पदार्थः-(अश्व्यस्य) अश्वेष्वाशुगामिषु भवस्य **(त्मना)** आत्मना **(रथ्यस्य)** रथेषु रमणीयेषु साधोः **(पुष्टेः)** **(नित्यस्य)** **(रायः)** धनस्य **(पतयः)** स्वामिनः **(स्याम)** **(ता)** तौ **(चक्राणौ)** कुर्वन्तौ **(ऊतिभिः)** रक्षादिभिः **(नव्यसीभिः)** **(अस्मत्रा)** अस्मासु वर्त्तमानस्य **(रायः)** **(नियुतः)** निश्चययुक्ताः **(सचन्ताम्)** सम्बध्नन्तु॥१०॥

अन्वयः-हे मनुष्या! यथा ता चक्राणौ नव्यसीभिरूतिभिरस्मत्रा रायः सम्बन्धं प्राप्नुयातां नियुतश्च सचन्तां तथा वयं त्मना स्वस्याश्व्यस्य रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा युक्ताः पुरुषाः सर्वैश्वर्य्यमाप्नुवन्ति तथैव वयं सर्वाऽऽनन्दं प्राप्नुयामेतीच्छा कार्य्या॥१०॥

पदार्थः-हे मनुष्यो! जैसे **(ता)** वे **(चक्राणौ)** करते हुए दो जन **(नव्यसीभिः)** नवीन **(ऊतिभिः)** रक्षा आदि कर्मों से **(अस्मत्रा)** हम लोगों में वर्त्तमान **(रायः)** धन के सम्बन्ध को प्राप्त होवें और **(नियुतः)** निश्चययुक्त पदार्थ **(सचन्ताम्)** सम्बद्ध होवें, वैसे हम लोग **(त्मना)** आत्मा से अपने

(अश्व्यस्य) शीघ्र चलने वालों में उत्पन्न हुए **(रथ्यस्य)** रमण करने योग्य वाहनों में श्रेष्ठ **(पुष्टेः)** पुष्टि के सम्बन्ध में **(नित्यस्य)** नित्य वर्त्तमान **(रायः)** धन के **(पतयः)** स्वामी **(स्याम)** होवें॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे युक्त अर्थात् कार्य में लगे हुए पुरुष सम्पूर्ण ऐश्वर्य्य को प्राप्त होते हैं, वैसे हम लोग सम्पूर्ण आनन्द को प्राप्त होवें, ऐसी इच्छा करें॥१०॥

पुना राजप्रजाविषयमाह॥

फिर राजप्रजाविषय को अगले मन्त्र में कहते हैं॥

आ नो॑ बृहन्ता बृ॒हतीभि॑रू॒ती इन्द्र॑ या॒तं व॑रुण वाज॑सातौ।

यद् दि॒द्यव॒: पृत॑नासु प्र॒क्रीळा॒न् तस्य॑ वां स्याम सनि॒तार॑ आ॒जे:॥ ११॥ १६॥

आ। न॒:। बृ॒ह॒न्ता॒। बृ॒ह॒तीभि॑:। ऊ॒ती। इन्द्र॑। या॒तम्। व॒रु॒ण॒। वाज॑ऽसातौ। यत्। दि॒द्यव॑:। पृत॑नासु। प्र॒ऽक्रीळा॑न्। तस्य॑। वा॒म्। स्या॒म॒। स॒नि॒तार॑:। आ॒जे:॥ ११॥

पदार्थः-(आ) समन्तात् **(नः)** अस्मान् **(बृहन्ता)** सद्गुणैर्महान्तौ **(बृहतीभिः)** महतीभिः **(ऊती)** रक्षाभिः। अत्र **सुपां सुलुगि**ति भिसो लुक्। **(इन्द्र)** दुष्टदलक राजन् **(यातम्)** प्राप्नुतम् **(वरुण)** सेनेश **(वाजसातौ)** सङ्ग्रामे **(यत्)** ये **(दिद्यवः)** विद्याविनयाभ्यां प्रकाशमानास्तेजस्विनः **(पृतनासु)** सेनासु **(प्रक्रीळान्)** प्रकृष्टान् विहारान् **(तस्य) (वाम्)** युवाभ्याम् **(स्याम) (सनितारः)** विभक्तारः **(आजेः)** सङ्ग्रामस्य॥११॥

अन्वयः-हे इन्द्र वरुण! बृहन्ता युवां बृहतीभिरूती वाजसातौ न आ यातम्। यद्ये दिद्यवस्तस्याजेः सनितारो वयं पृतनासु प्रक्रीळान् प्राप्य वां क्रीडां प्राप्ताः स्याम तानस्मान् युवां सत्कुर्य्यातम्॥११॥

भावार्थः-हे राजन्! यथा वयं भवतः प्रति प्रीत्या वर्त्तेमहि तथैव भवताप्यस्मासु वर्त्तितव्यमिति॥११॥

अत्राध्यापकोपदेशकराजप्रजामात्यकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकचत्वारिंशत्तमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** दुष्टों के दलन करने वाले राजन् और **(वरुण)** सेना के ईश! **(बृहन्ता)** श्रेष्ठ गुणों से बड़े आप दोनों **(बृहतीभिः)** बड़ी **(ऊती)** रक्षा आदिकों से **(वाजसातौ)** सङ्ग्राम में **(नः)** हम लोगों को **(आ)** सब ओर से **(यातम्)** प्राप्त हूजिये **(यत्)** जो **(दिद्यवः)** विद्या और विनय से प्रकाशमान तेजस्वी **(तस्य)** उस **(आजेः)** सङ्ग्राम के **(सनितारः)** विभाग करने वाले हम **(पृतनासु)** सेनाओं में **(प्रक्रीळान्)** उत्तम क्रीड़ा अर्थात् विहारों को प्राप्त होकर **(वाम्)** आप दोनों से विहार को प्राप्त हुए **(स्याम)** होवें, उन हम लोगों का आप दोनों सत्कार करें॥११॥

भावार्थः-हे राजन्! जैसे हम लोग आपके प्रति प्रीति से वर्त्ताव करें, वैसा ही आपको भी चाहिये

कि हम लोगों में वर्त्ताव करें॥११॥

इस सूक्त में अध्यापक, उपदेशक, राजा, प्रजा और मन्त्री के कृत्य का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकतालीसवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथ दशर्चस्य द्विचत्वारिंशत्तमस्य सूक्तस्य। १-१० त्रसदस्युः पौरुकुत्स्य ऋषिः। १-६ आत्मा। ७-१० इन्द्रावरुणौ देवते। १-६,९ निचृत्त्रिष्टुप्। ७ विराट् त्रिष्टुप्। ८ भुरिक् त्रिष्टुप्। १० त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजविषयमाह॥

अब दश ऋचावाले बयालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजविषय को कहते हैं॥

मम॑ द्वि॒ता रा॒ष्ट्रं क्ष॒त्रिय॑स्य वि॒श्वायो॒र्विश्वे॑ अ॒मृता॒ यथा॑ नः।
क्रतुं॑ सचन्ते॒ वरु॑णस्य दे॒वा राजा॑मि कृ॒ष्टेरु॑प॒मस्य॑ व॒व्रेः॥ १॥

मम॑। द्वि॒ता। रा॒ष्ट्रम्। क्ष॒त्रिय॑स्य। वि॒श्वऽआ॑योः। विश्वे॑। अ॒मृता॑ः। यथा॑। न॒ः। क्रतु॑म्। स॒च॒न्ते॒। वरु॑णस्य। दे॒वाः। राजा॑मि। कृ॒ष्टेः। उ॒प॒ऽमस्य॑। व॒व्रेः॥ १॥

पदार्थः-(मम) (द्विता) द्वयोर्भावः **(राष्ट्रम्) (क्षत्रियस्य) (विश्वायोः)** विश्वं पूर्णमायुर्यस्य तस्य **(विश्वे)** सर्वे **(अमृताः)** नाशरहिताः **(यथा) (नः)** अस्माकम् **(क्रतुम्)** प्रज्ञाम् **(सचन्ते)** सम्बध्नन्ति **(वरुणस्य)** श्रेष्ठस्य **(देवाः)** देदीप्यमानाः **(राजामि) (कृष्टेः)** कृष्टस्य **(उपमस्य)** उपमा विद्यते यस्य तस्य **(वव्रेः)** स्वीकर्तुः॥ १॥

अन्वयः-हे विद्वांसो! यथा मम विश्वायोः क्षत्रियस्य द्विता विश्व अमृता नो राष्ट्रं क्रतुञ्च सचन्ते वरुणस्य कृष्टेरुपमस्य वव्रेर्मम क्रतुं देवाः सचन्ते तथैवैतेष्वहं राजामि॥ १॥

भावार्थः-हे मनुष्या! अस्मिञ्जगति स्वामी स्वं वा द्वावेव पदार्थौ वर्त्तेते यत्र दीर्घजीविनो न्यायशीलवृत्ता धार्मिका अमात्याः सर्वतो गुणग्राहकाः श्रेष्ठोपमा वर्त्तन्ते तत्रैव निवसन्त्सज्जनः सुखमत्यन्तमश्नुते॥ १॥

पदार्थः-हे विद्वानो! **(यथा)** जैसे **(मम)** मुझ **(विश्वायोः)** पूर्ण अवस्था वाले **(क्षत्रियस्य)** क्षत्रिय के **(द्विता)** दो का होना तथा **(विश्वे)** सम्पूर्ण **(अमृताः)** नाश से रहित जन **(नः)** हम लोगों के **(राष्ट्रम्)** राज्य **(क्रतुम्)** और बुद्धि को **(सचन्ते)** संबन्धयुक्त करते हैं और **(वरुणस्य)** श्रेष्ठ **(कृष्टेः)** खींचते हुए **(उपमस्य)** उपमायुक्त **(वव्रेः)** स्वीकार करनेवाले मुझ जन की बुद्धि को **(देवाः)** प्रकाशमान जन मेलते हैं, वैसे ही इन में मैं **(राजामि)** शोभित होता हूँ॥ १॥

भावार्थः-हे मनुष्यो! इस संसार में स्वामी और स्वम् अर्थात् अपना ये दो ही पदार्थ वर्त्तमान हैं और जिस देश में दीर्घकालपर्य्यन्त जीवने और न्याययुक्त स्वभाव वाले धार्मिक मन्त्री जन सब प्रकार के गुणग्रहणकर्त्ता श्रेष्ठ उपमा से युक्त वर्त्तमान हैं, वहाँ ही रहता हुआ सज्जन सुख का अत्यन्त भोग करता है॥ १॥

अथेश्वरविषयमाह॥

अब ईश्वरविषय को अगले मन्त्र में कहते हैं॥

अ॒हं राजा॒ वरु॑णो॒ मह्यं॒ तान्य॑सु॒र्या॑णि प्रथ॒मा धा॑रयन्त।

क्रतुं॑ सचन्ते॒ वरु॑णस्य दे॒वा राजा॑मि कृ॒ष्टेरु॑प॒मस्य॑ व॒व्रेः॥ २॥

अ॒हम्। राजा॑। वरु॑णः। मह्य॑म्। तानि॑। अ॒सु॒र्या॑णि। प्र॒थ॒मा। धा॒र॒य॒न्त॒। क्रतु॑म्। स॒च॒न्ते॒। वरु॑णस्य। दे॒वाः। राजा॑मि। कृ॒ष्टेः। उ॒प॒ऽम॒स्य॑। व॒व्रेः॥ २॥

पदार्थः-(अहम्) जगदीश्वरः **(राजा)** प्रकाशमानः **(वरुणः)** सर्वोत्तमप्रबन्धकर्त्ता **(मह्यम्) (तानि) (असुर्य्याणि)** असुराणां मेघादीनामिमानि चिह्नानि **(प्रथमा)** आदिमानि **(धारयन्त)** धरन्ति **(क्रतुम्)** प्रज्ञाम् **(सचन्ते)** प्राप्नुवन्ति **(वरुणस्य)** सम्बन्धस्योत्तमस्य **(देवाः)** विद्वांसः **(राजामि)** प्रकाशे **(कृष्टेः)** मनुष्यस्य **(उपमस्य)** उपमायुक्तस्य **(वव्रेः)** स्वीकर्त्तव्यस्य॥ २॥

अन्वयः-हे मनुष्या! यथा यो वरुणो राजाऽहं वरुणस्य वव्रेः कृष्टेरुपमस्य जगतो मध्ये राजामि तस्मै मह्यं देवाः प्रीणन्ति यानि प्रथमाऽसुर्य्याणि तानि धारयन्त क्रतुं सचन्ते तथा यूयमप्याचरत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सर्वत्र व्याप्तं बुद्धिधनप्रदं जगतः स्वामिनं मां परमात्मानं भजन्ते ते सर्वाणि भजन्ते॥ २॥

पदार्थः-हे मनुष्यो! जैसे जो **(वरुणः)** सम्पूर्ण उत्तम प्रबन्धों का कर्त्ता **(राजा)** प्रकाशमान **(अहम्)** मैं जगदीश्वर **(वरुणस्य)** उत्तम सम्बन्ध में और **(वव्रेः)** स्वीकार करने योग्य **(कृष्टेः)** मनुष्य के सम्बन्ध में तथा **(उपमस्य)** उपमायुक्त जगत् के बीच में **(राजामि)** प्रकाशित होता हूँ उस **(मह्यम्)** मेरे लिये **(देवाः)** विद्वान् जन तृप्त होते हैं तथा जो **(प्रथमा)** आदि से वर्त्तमान **(असुर्य्याणि)** मेघादिकों के चिह्न **(तानि)** उनको **(धारयन्त)** धारण करते हैं और **(क्रतुम्)** बुद्धि को **(सचन्ते)** प्राप्त होते हैं, वैसे तुम लोग भी आचरण करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सर्वत्र व्याप्त, बुद्धि और धन के देने वाले जगत् के स्वामी मुझ परमात्मा को भजते हैं, वे सब सुखों को भजते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒हमिन्द्रो॒ वरु॑ण॒स्ते म॑हि॒त्वोर्वी॑ ग॒भी॒रे रज॑सी सु॒मेके॑।

त्वष्टे॑व॒ विश्वा॒ भुव॑नानि वि॒द्वान्त्समैर॑यं॒ रोद॑सी धा॒रय॑ञ्च॥ ३॥

अ॒हम्। इन्द्रः॑। वरु॑णः। ते इति॑। म॒हि॒ऽत्वा। उ॒र्वी इति॑। ग॒भी॒रे इति॑। रज॑सी॒ इति॑। सु॒मेके॒ इति॑ सु॒ऽमेके॑। त्वष्टा॑ऽइव। विश्वा॑। भुव॑नानि। वि॒द्वान्। सम्। ऐर॑य॒म्। रोद॑सी॒ इति॑। धा॒रय॑म्। च॒॥ ३॥

पदार्थः-(अहम्) महान् व्याप्तः **(इन्द्रः)** परमैश्वर्य्यवान् **(वरुणः)** सर्वत उत्कृष्टः **(ते) (महित्वा)** पूजयित्वा **(ऊर्वी)** बहुपदार्थधरे **(गभीरे)** विस्तीर्णे **(रजसी)** द्यावापृथिव्यौ **(सुमेके)** शोभने मया सृष्टे सुष्ठु क्षिप्ते **(त्वष्टेव)** उत्तमः शिल्पीव **(विश्वा)** सर्वाणि **(भुवनानि)** लोकान् **(विद्वान्)** सकलविद्यावित् **(सम्)** एकीभावे **(ऐरयम्)** प्रेरयेयम् **(रोदसी)** सूर्य्यभूलोकौ **(धारयम्)** धरेयं धारयेयं वा **(च)**॥३॥

अन्वयः-हे मनुष्या! इन्द्रो वरुणोऽहं विद्वांस्त्वष्टेव गभीरे सुमेके रजसी महित्वा ते उर्वी रोदसी रचयित्वाऽत्र विश्वा भुवनानि समैरयन्धारयञ्चेति विजानीत॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा दक्षा विचक्षणाः पूर्णविद्याः शिल्पिन उत्तमानि वस्तूनि निर्मिमते तथैव मया विचित्रमुत्तमं जगन्निर्मितं ध्रियते यथा मया रचितं तथाऽन्यस्य जीवस्य सामर्थ्यं रचयितुं नास्ति किन्तु मत्कृतात् कार्य्यात् किञ्चिद् गृहीत्वा यथामति रचयन्तीति वेद्यम्॥३॥

पदार्थः-हे मनुष्यो! **(इन्द्रः)** अत्यन्त ऐश्वर्य्यवान् **(वरुणः)** सब से उत्तम **(अहम्)** अतीव व्याप्त मैं **(विद्वान्)** सकलविद्यावेत्ता **(त्वष्टेव)** उत्तम शिल्पी के सदृश **(गभीरे)** विस्तारयुक्त **(सुमेके)** सुन्दर मुझ से रचे और उत्तम प्रकार फैलाये गये **(रजसी)** सूर्य्य और पृथिवी को **(महित्वा)** पूजित कर **(ते)** उन **(उर्वी)** बहुत पदार्थों को धारण करने वाले **(रोदसी)** सूर्य्य और पृथिवी लोकों को रच के यहाँ **(विश्वा)** सब **(भुवनानि)** लोकों को **(सम्)** एक होने में **(ऐरयम्)** प्रेरणा करूं **(धारयम् च,)** और धारण करूं वा धारण कराऊं, यह जानो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे चतुर पण्डित, पूर्ण विद्यावान्, शिल्पी जन उत्तम वस्तुओं को रचते हैं, वैसे ही मुझ से विचित्र उत्तम उत्तम जगत् रचा गया धारण किया जाता है और जैसे मैंने रचा वैसे अन्य जीव का सामर्थ्य रचने का नहीं है, किन्तु मेरे किये हुए कार्य्य से कुछ ग्रहण करके अपनी अपनी बुद्धि के अनुसार रचते हैं, यह जानना चाहिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य।
ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम॥४॥

अहम्। अपः। अपिन्वम्। उक्षमाणाः। धारयम्। दिवम्। सदने। ऋतस्य। ऋतेन। पुत्रः। अदितेः। ऋतऽवा। उत। त्रिऽधातु। प्रथयत्। वि। भूम॥४॥

पदार्थः-(अहम्) परमात्मा **(अपः)** जलान्यन्तरिक्षं वा **(अपिन्वम्)** सेवे **(उक्षमाणाः)** सेवमानाः **(धारयम्) (दिवम्)** विद्युतम् **(सदने)** सर्वस्थित्यर्थे जगति **(ऋतस्य)** सत्यस्य प्रकृत्याख्यस्य **(ऋतेन)** सत्येन कारणेन **(पुत्रः)** तनय इव **(अदितेः)** अखण्डितस्यान्तरिक्षस्य **(ऋतावा)** ऋतं सत्यं विद्यते यस्मिन्

स: **(उत)** अपि **(त्रिधातु)** त्रय: सत्वरजस्तमांसि गुणा धारका यस्मिंस्तत् सर्वं जगत् **(प्रथयत्)** **(वि)** विविधम् **(भूम)** बहुविधम्॥४॥

अन्वय:-हे मनुष्या! अहमेवर्त्तस्य सदने दिवमुक्षमाणा अपोऽपिन्वमृतेनादितेर्ऋतावा पुत्र उत भूम त्रिधातु वि प्रथयत् तमहं धारयम्॥४॥

भावार्थ:-हे मनुष्या! मदृतेनास्य जगतो धर्त्ताऽन्य: कश्चिदपि नास्ति यादृशं त्रिगुणमयं कारणमस्ति तादृशमेवेदं कार्य्यं पश्यत॥४॥

पदार्थ:-हे मनुष्यो! **(अहम्)** मैं परमात्मा ही **(ऋतस्य)** सत्य प्रकृति नामक के **(सदने)** सदन में अर्थात् सब के ठहरने के लिये जो संसार उसमें **(दिवम्)** बिजुली की **(उक्षमाणा:)** सेवा करते हुए **(अप:)** जलों वा अन्तरिक्ष की **(अपिन्वम्)** सेवा करता हूँ और **(ऋतेन)** सत्य कारण से **(अदिते:)** खण्डरहित अन्तरिक्ष का **(ऋतावा)** सत्य से युक्त **(पुत्र:)** पुत्र के सदृश वर्त्तमान **(उत)** निश्चय से **(भूम)** अनेक प्रकार के **(त्रिधातु)** तीन अर्थात् सत्त्वगुण रजोगुण और तमोगुण धारण करने वाले जिसमें उस सम्पूर्ण जगत् को **(वि, प्रथयत्)** विविध प्रकट करे, उसको मैं **(धारयम्)** धारण करूं॥४॥

भावार्थ:-हे मनुष्यो! मेरे विना इस संसार का धारण करने वाला अन्य कोई भी नहीं है और जैसा तीन अर्थात् सत्त्वादिगुणमय कारण है, वैसे ही इस कार्य्य को देखो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मां नर: स्वश्वा वाजयन्तो मां वृता: समरणे हवन्ते।

कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजा:॥५॥१७॥

माम्। नर:। सुऽअश्वा:। वाजयन्त:। माम्। वृता:। सम्ऽअरणे। हवन्ते। कृणोमि। आजिम्। मघऽवा। अहम्। इन्द्र:। इयर्मि। रेणुम्। अभिभूतिऽओजा:॥५॥

पदार्थ:-**(माम्)** **(नर:)** नायका: **(स्वश्वा:)** शोभना अश्वास्तुरङ्गा अग्न्यादय: पदार्था वा येषान्ते **(वाजयन्त:)** जानन्तो ज्ञापयन्तो वा **(माम्)** **(वृता:)** कृतस्वीकारा: **(समरणे)** सङ्ग्रामे **(हवन्ते)** स्पर्द्धन्ते स्वीकुर्वन्ति **(कृणोमि)** करोमि **(आजिम्)** सङ्ग्रामम् **(मघवा)** परमपूजितधन: **(अहम्)** **(इन्द्र:)** **(इयर्मि)** प्राप्नोमि **(रेणुम्)** रज: **(अभिभूत्योजा:)** अभिभूतिर्दुष्टानामभिभवकर्त्रोजो यस्य स:॥५॥

अन्वय:-हे मनुष्या! यथा स्वश्वा मां वाजयन्तो वृता नरो समरणे मां हवन्ते तत्र मघवेन्द्रोऽभिभूत्योजा अहमाजिं कृणोमि रेणुमियर्मि तथा यूयमपि मां वृणोत॥५॥

भावार्थ:-हे मनुष्या! ये सर्वव्यापकं सर्वान्तर्यामिणं सर्वशक्तिमन्तं परमात्मानं सङ्ग्रामे प्रार्थयन्ति तेषामेवाहं विजयं कारयामि ये च धर्म्येण युध्यन्ते तेषामेव सहायो भवामि॥५॥

पदार्थः-हे मनुष्यो! जैसे **(स्वश्वाः)** सुन्दर घोड़े वा अग्नि आदि जिनके विद्यमान और **(माम्)** मुझको **(वाजयन्तः)** जानते वा जनाते हुए **(वृताः)** स्वीकार जिन्होंने किया वे **(नरः)** नायक जन **(समरणे)** संग्राम में **(माम्)** मेरी **(हवन्ते)** स्पर्द्धा अर्थात् स्वीकार करते हैं वहाँ **(मघवा)** अत्यन्त श्रेष्ठ धनयुक्त **(इन्द्रः)** तेजस्वी **(अभिभूत्योजाः)** दुष्टों का अभिभव करने वाले बल से युक्त **(अहम्)** मैं **(आजिम्)** संग्राम को **(कृणोमि)** करता हूँ **(रेणुम्)** धूलि को **(इयर्मि)** प्राप्त होता हूँ, वैसे तुम लोग भी मेरा स्वीकार करो॥५॥

भावार्थः-हे मनुष्यो! जो जन सब वस्तुओं में प्राप्त होने वाले, सब के अन्तर्यामि और सर्वशक्तिमान् मुझ परमात्मा की संग्राम में प्रार्थना करते हैं, उन्हीं का मैं विजय कराता हूँ और जो धर्म से युद्ध करते हैं, उन्हीं का मैं सहायक होता हूँ॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतम्।
यन्मा सोमासो ममदन् यदुक्थोभे भयेते रजसी अपारे॥६॥

अहम्। ता। विश्वा। चकरम्। नकिः। मा। दैव्यम्। सहः। वरते। अप्रतिऽइतम्। यत्। मा। सोमासः। ममदन्। यत्। उक्था। उभे इति। भयेते इति। रजसी इति। अपारे इति॥६॥

पदार्थः-**(अहम्)** **(ता)** तानि **(विश्वा)** सर्वाणि **(चकरम्)** भृशं करोमि **(नकिः)** निषेधे **(मा)** माम् **(दैव्यम्)** देवेषु विद्वत्सु प्रियम् **(सहः)** बलम् **(वरते)** स्वीकरोति **(अप्रतीतम्)** अप्रज्ञातम् **(यत्)** यम् **(मा)** माम् **(सोमासः)** ऐश्वर्य्यवन्तः **(ममदन्)** हर्षन्ति **(यत्)** यम् **(उक्था)** प्रशंसनीये **(उभे)** **(भयेते)** **(रजसी)** द्यावापृथिव्यौ **(अपारे)** पाररहितेऽपरिमिते॥६॥

अन्वयः-हे मनुष्या! योऽहं ता विश्वा चकरं जीवो यद् दैव्यं माप्रतीतं सहो वरते यद्यं माश्रिताः सोमासो ममदन् मत्त उक्थोभे अपारे रजसी भयेते तेन मया सदृशः कोऽपि नकिरस्ति॥६॥

भावार्थः-हे मनुष्या! ये पदार्था दृश्यन्ते ये चाऽदृष्टाः सन्ति ते सर्वे मयैव निर्मिता मय्यप्रमेयं बलं मां प्राप्य सर्वानन्दं लभन्ते ममैव भयात् सर्वैर्लोकैः सहचरिता जीवा बिभ्यति॥६॥

पदार्थः-हे मनुष्यो! जो **(अहम्)** मैं **(ता)** उन **(विश्वा)** सब कामों को **(चकरम्)** निरन्तर करता हूँ तथा जीव **(यत्)** जिस **(दैव्यम्)** विद्वानों में प्रिय **(मा)** मुझको और **(अप्रतीतम्)** नहीं जाने गये **(सहः)** बल को **(वरते)** स्वीकार करता है **(यत्)** जिस **(मा)** मेरी सेवा करते **(सोमासः)** ऐश्वर्य्यवाले **(ममदन्)** प्रसन्न होते हैं और मुझ से **(उक्था)** प्रशंसा करने योग्य **(उभे)** दोनों **(अपारे)** पाररहित अपरिमित **(रजसी)** सूर्य्यलोक और भूमिलोक **(भयेते)** कंपते हैं, उस मेरे सदृश कोई भी **(नकिः)** नहीं है॥६॥

भावार्थः-हे मनुष्यो! जो पदार्थ प्रत्यक्ष और जो नहीं प्रत्यक्ष हैं, वे सब मुझ से ही बनाये गये,

मेरे में अनन्त बल है, मुझको प्राप्त होकर सम्पूर्ण आनन्द को प्राप्त होते हैं और मेरे ही भय से सब लोगों के सहचारी जीव डरते हैं॥६॥

अथेश्वरोपासनाविषयमाह॥

अब ईश्वरोपासना विषय को अगले मन्त्र में कहते हैं॥

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः।

त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इन्द्र सिन्धून्॥७॥

विदुः। ते। विश्वा। भुवनानि। तस्य। ता। प्र। ब्रवीषि। वरुणाय। वेधः। त्वम्। वृत्राणि। शृण्विषे। जघन्वान्। त्वम्। वृतान्। अरिणाः। इन्द्र। सिन्धून्॥७॥

पदार्थः-(विदुः) जानन्ति **(ते)** तव **(विश्वा)** सर्वाणि **(भुवनानि) (तस्य) (ता)** तानि **(प्र) (ब्रवीषि)** उपदिशति **(वरुणाय)** श्रेष्ठाय जनाय **(वेधः)** अनन्तविद्य **(त्वम्) (वृत्राणि)** धनानि **(शृण्विषे)** शृणोषि **(जघन्वान्)** हतवान् **(त्वम्) (वृतान्)** स्वीकृतान् **(अरिणाः)** प्राप्नुयाः **(इन्द्र)** परमैश्वर्य्यप्रद **(सिन्धून्)** समुद्रान्नदीर्वा॥७॥

अन्वयः-हे वेध इन्द्र जगदीश्वर! यस्त्वं वरुणाय वेदान् प्र ब्रवीषि तस्य ते ता विश्वा भुवनानि विद्वांसो राज्यं विदुर्यस्त्वं वृत्राणि शृण्विषे सिन्धून् वृतानरिणाः स त्वं दुष्टानधर्मिणो जघन्वान्॥७॥

भावार्थः-हे परमेश्वर! यस्माद्भवता कृपां कृत्वाऽस्माकं कल्याणाय वेदा उपदिष्टा येनाऽस्माकं दोषा विनाशिता वर्षाद्वारा पालनं च क्रियते तमेव वयमुपास्महे॥७॥

पदार्थः-हे **(वेधः)** अनन्तविद्यायुक्त **(इन्द्र)** अतीव ऐश्वर्य्य के दाता जगदीश्वर! जो **(त्वम्)** आप **(वरुणाय)** श्रेष्ठ जन के लिये वेदों का **(प्र, ब्रवीषि)** उपदेश देते हो **(तस्य)** उन **(ते)** आप का **(ता)** उन **(विश्वा)** सम्पूर्ण **(भुवनानि)** लोकों को विद्वान् जन राज्य **(विदुः)** जानते हैं और जो **(त्वम्)** आप **(वृत्राणि)** धनों को **(शृण्विषे)** सुनते हो **(सिन्धून्)** समुद्र वा नदियों को और **(वृतान्)** स्वीकार किये हुओं को **(अरिणाः)** प्राप्त होओ, वह आप दुष्ट अधर्मियों के **(जघन्वान्)** नाशकारी हो॥७॥

भावार्थः-हे परमेश्वर! जिससे आपने कृपा करके हम लोगों के कल्याण के लिये वेदों का उपदेश किया, जिससे हम लोगों के दोष नाश किये गये और वर्षा के द्वारा पालन किया जाता है, उस ही की हम लोग उपासना करते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्माकमत्र पितरस्त आसन्सप्त ऋषयो दौर्गहे बध्यमाने।

त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम्॥८॥

अ॒स्माक॑म्। अ॒त्र॑। पि॒तर॑:। ते। आ॒स॒न्। स॒प्त। ऋष॑य:। दौ:ऽग॒हे। ब॒ध्यमा॑ने। ते। आ। अ॒य॒ज॒न्त॒। त्र॒सद॑स्युम्। अ॒स्या॒:। इन्द्र॑म्। न। वृ॒त्र॒ऽतु॒र॑म्। अ॒र्ध॒ऽदे॒वम्॥८॥

पदार्थ:-(अस्माकम्) (अत्र) अस्मिन् जगति **(पितर:)** पालका: **(ते) (आसन्)** सन्ति **(सप्त)** षड्ऋतवो वायुश्च सप्तम: **(ऋषय:)** प्राप्ता: **(दौर्गहे)** दुर्गहने **(बध्यमाने)** ताड्यमाने **(ते) (आ) (अयजन्त)** समन्तात् सङ्गच्छन्ते **(त्रसदस्युम्)** त्रस्यन्ति दस्यवो यस्मात्तम् **(अस्या:)** सृष्टेर्मध्ये **(इन्द्रम्)** सूर्य्यम् **(न)** इव **(वृत्रतुरम्)** यो वृत्रं मेघं धनं वा त्वरयति तम् **(अर्द्धदेवम्)** देवस्यार्द्धस्य जगतो देवं वा॥८॥

अन्वय:-हे जगदीश्वर! भवत्कृपया येऽत्रास्माकं सप्त ऋषय: पितर आसँस्ते दौर्गहे बध्यमाने वृत्रतुरमर्द्धदेवमिन्द्रं नास्या: सृष्टेर्मध्ये त्रसदस्युमायजन्त तेऽस्माकं सुखकरा: सन्तु॥८॥

भावार्थ:-हे मनुष्या! येन जगदीश्वरेण सर्वेषां रक्षणायर्त्वादय: पदार्था निर्मिता तमुपास्य दुर्जयं दु:खं विजयध्वम्॥८॥

पदार्थ:-हे जगदीश्वर आपकी कृपा से **(अत्र)** जो इस संसार में **(अस्माकम्)** हम लोगों के **(सप्त)** छ: ऋतु और सातवां वायु **(ऋषय:)** प्राप्त हुए **(पितर:)** पालन करने वाले **(आसन्)** हैं **(ते)** वे **(दौर्गहे)** अत्यन्त गहन **(बध्यमाने)** ताड़ना दिये जाते हुए में **(वृत्रतुरम्)** जो मेघ वा धन की शीघ्रता कराता है उस **(अर्द्धदेवम्)** देव के आधे जगत् के देव को **(इन्द्रम्)** सूर्य्य के **(न)** सदृश तथा **(अस्या:)** इस सृष्टि के मध्य में **(त्रसदस्युम्)** दुष्ट डाकू जिससे डरते हैं उसको **(आ, अयजन्त)** सब प्रकार मिलते हैं **(ते)** वे हमारे सुख के करनेवाले हों॥८॥

भावार्थ:-हे मनुष्यो! जिस जगदीश्वर ने सब के रक्षण के लिये ऋतु आदि पदार्थ रचे, उसकी उपासना करके दु:ख से जीतने योग्य दु:ख को जीतो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पु॒रु॒कु॒त्सा॑नी॒ हि वा॒मदा॑शद्ध्व्ये॒भि॑रिन्द्रावरुणा॒ नमो॑भि:।
अथा॒ राजा॑नं त्र॒सद॑स्युमस्या वृत्र॒हणं॑ ददथुर्ध॒दे॒वम्॥९॥

पु॒रु॒ऽकु॒त्सा॑नी। हि। वा॒म्। अदा॑शत्। ह॒व्ये॒भि॑:। इ॒न्द्रा॒व॒रु॒णा॒। नम॑:ऽभि:। अथ॑। राजा॑नम्। त्र॒सद॑स्युम्। अ॒स्या॒:। वृ॒त्र॒ऽह॒न॑म्। द॒द॒थु॒:। अ॒र्ध॒ऽदे॒वम्॥९॥

पदार्थ:-(पुरुकुत्सानी) पुरूणि कुत्सानि यस्यां सा **(हि)** यत: **(वाम्)** युवाम् **(अदाशत्)** ददाति **(हव्येभि:)** आदातुमर्हैं: **(इन्द्रावरुणा)** वायुविद्युताविव **(नमोभि:)** अन्नादिभि: **(अथा)** अत्र **निपातस्य चे**ति दीर्घ:। **(राजानम्) (त्रसदस्युम्)** त्रस्यन्ति दस्यवो यस्मात्तम् **(अस्या:)** पृथिव्या: **(वृत्रहणम्)** यो वृत्रं मेघं हन्ति तम् **(ददथु:)** दद्यातम् **(अर्द्धदेवम्)** अर्द्ध जगत् प्रकाशकं सूर्य्यम्॥९॥

अन्वयः-हे इन्द्रावरुणा! या पुरुकुत्सानी हव्येभिर्नमोभिर्युवां सुखमदाशदथास्या वृत्रहणमर्द्धदेवमिव त्रसदस्युं राजानं वां ददथुस्तां तौ हि वयं विजानीमः॥९॥

भावार्थः-हे मनुष्या! यस्य कृपया सकला पृथिवी शस्याढ्या जाता सूर्य्यश्च तं सततमुपाध्वम्॥९॥

पदार्थः-हे **(इन्द्रावरुणा)** वायु और बिजुली के सदृश वर्त्तमान! जो **(पुरुकुत्सानी)** बहुत निन्दित कर्मों से विशिष्ट **(हव्येभिः)** ग्रहण करने योग्य **(नमोभिः)** अन्नादिकों से आप दोनों को सुख **(अदाशत्)** देती है **(अथा)** इसके अनन्तर **(अस्याः)** इस पृथिवी के **(वृत्रहणम्)** मेघ को नाश करने और **(अर्द्धदेवम्)** आधे जगत् को प्रकाश करनेवाले सूर्य्य के सदृश **(त्रसदस्युम्)** जिससे दुष्ट डाकू जन डरते हैं उस **(राजानम्)** राजा को **(वाम्)** आप दोनों **(ददथुः)** दीजिये उसको और उनको **(हि)** जिससे हम लोग जानें॥९॥

भावार्थः-हे मनुष्यो! जिसकी कृपा से सम्पूर्ण पृथिवी धान्य से युक्त हुई और सूर्य्य प्रकट हुआ उसकी निरन्तर उपासना करो॥९॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

रा॒या व॒यं स॑स॒वांसो॑ मदेम ह॒व्येन॑ दे॒वा यव॑सेन॒ गाव॑:।

तां धे॒नुमि॑न्द्रावरुणा यु॒वं नो॑ वि॒श्वाहा॑ धत्तमन॑पस्फुरन्तीम्॥ १०॥ १८॥

रा॒या। व॒यम्। स॒स॒ऽवांस॑:। म॒दे॒म॒। ह॒व्येन॑। दे॒वाः। यव॑सेन। गाव॑:। ताम्। धे॒नुम्। इ॒न्द्रा॒व॒रु॒णा॒। यु॒वम्। नः॒। वि॒श्वाहा॑। ध॒त्त॒म्। अन॑प॒ऽस्फु॒र॒न्ती॒म्॥ १०॥

पदार्थः-**(राया)** धनेन **(वयम्)** **(ससवांसः)** सुशयाना इव **(मदेम)** **(हव्येन)** दातुमादातुमर्हेण **(देवाः)** विद्वांसः **(यवसेन)** बुसादिनेव **(गावः)** **(ताम्)** **(धेनुम्)** सर्वकामदोग्ध्रीं वाचम् **(इन्द्रावरुणा)** अध्यापकोपदेशकौ **(युवम्)** युवाम् **(नः)** अस्मभ्यम् **(विश्वाहा)** सर्वाणि दिनानि **(धत्तम्)** **(अनपस्फुरन्तीम्)** दृढां निश्चलां प्रज्ञां सम्पादयन्तीम्॥१०॥

अन्वयः-हव्येन देवा यवसेन गावो राया वयं ससवांसो मदेम। हे इन्द्रावरुणा! युवं विश्वाहानपस्फुरन्तीं तां धेनुं नो धत्तम्॥१०॥

भावार्थः-हे विद्वांसोऽस्मासु तादृशीं सर्वशास्त्रोक्तपदार्थविषयां वाचं स्थापयत येन वयं सदैवाऽऽनन्दिताः स्यामेति॥१०॥

अत्र राजेश्वरोपासनाविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति द्विचत्वारिंशत्तमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-(हव्येन) देने और ग्रहण करने योग्य वस्तु से **(देवाः)** विद्वान् जन **(यवसेन)** भूसा आदि से जैसे **(गावः)** गौवें वैसे **(राया)** धन से **(वयम्)** हम लोग **(ससवांसः)** उत्तम प्रकार शयन करते हुए से **(मदेम)** आनन्द करें। और हे **(इन्द्रावरुणा)** अध्यापक और उपदेशको! **(युवम्)** आप दोनों **(विश्वाहा)** सब दिन **(अनपस्फुरन्तीम्)** दृढ़ निश्चल बुद्धि को उत्पन्न करती और **(ताम्, धेनुम्)** सम्पूर्ण मनोरथों को पूर्ण करती हुई उस वाणी को **(नः)** हम लोगों के लिये **(धत्तम्)** धारण कीजिये॥१०॥

भावार्थः-हे विद्वानो! हम लोगों में वैसी सम्पूर्ण शास्त्रों में कहे पदार्थविषयक वाणी को स्थित करो, जिससे हम लोग सदा ही आनन्दित होवें॥१०॥

इस सूक्त में राजा, ईश्वरोपासना और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये।

यह बयालीसवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य त्रिचत्वारिंशत्तमस्य सूक्तस्य पुरुमीळाजमीळौ सौहोत्रावृषी। अश्विनौ देवते। १ त्रिष्टुप्। २, ३, ५-७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ स्वराट् पङ्क्तश्छन्दः। पञ्चमः स्वरः॥

अथाध्यापकोपदेशकविषये प्रश्नोत्तरविषयमाह॥

अब सात ऋचा वाले तेंतालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अध्यापकोपदेशकविषय में प्रश्नोत्तर विषय को कहते हैं॥

क उं श्रवत्कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते।
कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम्॥ १॥

कः। ऊम् इति। श्रवत्। कतमः। यज्ञियानाम्। वन्दारु। देवः। कतमः। जुषाते। कस्य। इमाम्। देवीम्। अमृतेषु। प्रेष्ठाम्। हृदि। श्रेषाम। सुऽस्तुतिम्। सुऽहव्याम्॥ १॥

पदार्थः-(कः) (उ) **(श्रवत्)** शृणोति **(कतमः)** **(यज्ञियानाम्)** यज्ञसिद्धिकर्त्तॄणाम् **(वन्दारु)** वन्दनशीलम् **(देवः)** विद्वान् **(कतमः)** **(जुषाते)** सेवते **(कस्य)** **(इमाम्)** **(देवीम्)** देदीप्यमानां विदुषीम् **(अमृतेषु)** मरणरहितेषु **(प्रेष्ठाम्)** अतिशयेन प्रियाम् **(हृदि)** **(श्रेषाम)** सेवेम **(सुष्टुतिम्)** शोभना प्रशंसा यस्यास्ताम् **(सुहव्याम्)** सुष्ठु गृहीतव्याम्॥ १॥

अन्वयः-हे विद्वन्! क उ कतमो देवो यज्ञियानां वन्दारु श्रवत्कतमश्च जुषाते। कस्य हृदीमां प्रेष्ठां सुष्टुतिं सुहव्याममृतेषु देवीं श्रेषाम॥ १॥

भावार्थः-हे विद्वांसो! कोऽत्र यज्ञः के यज्ञसम्पादकाः को देवः का देवी किममृतं सेवनीयं श्रवणीयञ्चेति पृच्छ्यते, उत्तरमग्रे॥ १॥

पदार्थः-हे विद्वन्! **(कः)** कौन **(उ)** और **(कतमः)** कौनसा **(देवः)** विद्वान् **(यज्ञियानाम्)** यज्ञ की सिद्धि करने वालों की **(वन्दारु)** वन्दना करने वाले स्वभाव को **(श्रवत्)** सुनता है और **(कतमः)** कौनसा **(जुषाते)** सेवन करता है **(कस्य)** किस के **(हृदि)** हृदय के निमित्त **(इमाम्)** इस **(प्रेष्ठाम्)** अत्यन्त प्रिय **(सुष्टुतिम्)** उत्तम प्रशंसा युक्त **(सुहव्याम्)** उत्तम प्रकार ग्रहण करने योग्य और **(अमृतेषु)** मरणरहितों में **(देवीम्)** प्रकाशमान और विद्यायुक्त स्त्री की **(श्रेषाम)** सेवा करें॥ १॥

भावार्थः-हे विद्वानो! कौन इस संसार में यज्ञ, कौन यज्ञ के करने वाले, कौन विद्वान्, कौन विद्यायुक्त स्त्री तथा कौन अमृत और कौन सेवने और सुनने योग्य है, यह पूछा है, उत्तर आगे हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

को मळाति कतम आगमिष्ठो देवानामु कतमः शंभविष्ठः।

रथं॒ कमा॑हुर्द्रव॒दश्व॑मा॒शुं यं सूर्य॑स्य दुहि॒तावृ॑णीत॥ २॥

कः। मृ॒ळा॒ति॒। क॒त॒मः। आऽग॑मिष्ठः। दे॒वाना॑म्। ऊ॒म् इति॑। क॒त॒मः। शम्ऽभ॑विष्ठः। रथ॑म्। कम्। आ॒हुः॒। द्र॒वत्ऽअ॑श्वम्। आ॒शुम्। यम्। सूर्य॑स्य। दु॒हि॒ता। अवृ॑णीत॥ २॥

पदार्थः-(कः) (मृळाति) सुखयति **(कतमः) (आगमिष्ठः)** अतिशयेनागन्ता **(देवानाम्)** विदुषां मध्ये पृथिव्यादीनां वा **(उ) (कतमः) (शम्भविष्ठः)** अतिशयेन कल्याणकारकः **(रथम्)** रमणीयं यानम् **(कम्) (आहुः)** कथयन्ति **(द्रवदश्वम्)** द्रवन्तो द्रुतं गच्छन्तोऽश्वा यस्मिँस्तम् **(आशुम्)** सद्यो गामिनम् **(यम्) (सूर्य्यस्य) (दुहिता)** दुहितेव कान्तिः **(अवृणीत)** स्वीकुरुते॥ २॥

अन्वयः-को देवानां मृळाति कतम आगमिष्ठः उ कतमः शम्भविष्ठो देवः कं द्रवदश्वमाशुं रथमाहुर्यं सूर्य्यस्य दुहितावृणीत॥ २॥

भावार्थः-हे विद्वांसो! वयं कं सुखकरं भृशमागन्तारं सुष्ठु कल्याणकरं पदार्थमग्निजलाश्वरथं विजानीयामेति मन्त्रद्वयोक्तानां प्रश्नानामिमान्युत्तराणि। य उषा सूर्य्यमिवाऽध्यापकाच्छृणोति वायुमिव विद्यां सेवते पतिव्रतेव विदुषी प्रशंसनीयं पतिं वृणुते यः परोपकारी स सुखकरो विद्युदतिशयेनागन्त्री परमेश्वरोऽतिशयेन कल्याणकरो विदुषां मध्ये विद्वाञ्जलाग्निकलाकौशलेन चालितं विमानादियानं प्रशंसनीयं भवतीति विज्ञेयम्॥ २॥

पदार्थः-(कः) कौन **(देवानाम्)** विद्वानों के बीच वा पृथिव्यादिकों में **(मृळाति)** सुख देता है **(कतमः)** कौनसा **(आगमिष्ठः)** अत्यन्त आने वाला **(उ)** और **(कतमः)** कौनसा **(शम्भविष्ठः)** अत्यन्त कल्याण करने वाला विद्वान् **(कम्)** किस **(द्रवदश्वम्)** शीघ्र चलने वाले घोड़ों से युक्त **(आशुम्)** शीघ्रगामी **(रथम्)** रमण करने योग्य वाहन को **(आहुः)** कहते हैं **(यम्)** जिसको **(सूर्य्यस्य)** सूर्य्य की **(दुहिता)** कन्या के सदृश कान्ति **(अवृणीत)** स्वीकार करती है॥ २॥

भावार्थः-हे विद्वानो! हम लोग किस सुखकारक निरन्तर आने वाले उत्तम प्रकार कल्याणकारक पदार्थ तथा अग्नि और जल के द्वारा चलने वाले वाहन को उत्तम प्रकार जानें, इस प्रकार दो मन्त्रों में कहे हुए प्रश्नों के ये उत्तर हैं। जो जैसे प्रातर्वेला उषा सूर्य्य को वैसे अध्यापक से सुनता, वायु के सदृश विद्या का सेवन करता है और पतिव्रता स्त्री के सदृश विद्यायुक्त स्त्री प्रशंसा के योग्य पति को स्वीकार करती है, जो परोपकारी है, वह सुख करने वाला, बिजुली अतीव आने वाली, परमेश्वर अत्यन्त कल्याण करने वाला, विद्वानों के मध्य में विद्वान्, जल-अग्नि [के] कलाकौशल से चलाया गया विमान आदि यान प्रशंसा के योग्य होता है, ऐसा जानो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

म॒क्षू हि ष्मा॒ गच्छ॑थ॒ ईव॑तो॒ द्यूनिन्द्रो॒ न श॒क्ति परि॑तक्म्यायाम्।

दि॒व आजा॑ता दि॒व्या सु॑प॒र्णा कया॒ शची॑नां भवथ॒: शचि॑ष्ठा॥ ३॥

म॒क्षु। हि। स्म॒। गच्छ॑थ:। ईव॑त:। द्यून्। इन्द्र॑:। न। श॒क्तिम्। परि॑ऽतक्म्यायाम्। दि॒व:। आऽजा॑ता। दि॒व्या। सु॒ऽप॒र्णा। कया॑। शची॑नाम्। भ॒व॒थ॒:। शचि॑ष्ठा॥ ३॥

पदार्थ:-(मक्षु) सद्य: **(हि)** **(स्मा)** एव। अत्र **निपातस्य चे**ति दीर्घ:। **(गच्छथ:)** **(ईवत:)** बहुगतिमत: **(द्यून्)** प्रकाशान् **(इन्द्र:)** विद्युत् **(न)** इव **(शक्तिम्)** सामर्थ्यम् **(परितक्म्यायाम्)** परित: सर्वतस्तकन्ति हसन्ति यस्यां सृष्टौ तस्याम् **(दिव:)** विद्याप्रकाशात् **(आजाता)** समन्ताज्जातौ **(दिव्या)** दिवि शुद्धे व्यवहारे भवौ **(सुपर्णा)** सुष्ठु पर्णानि पालनानि ययोस्तौ **(कया)** **(शचीनाम्)** प्रज्ञानां वाचां वा **(भवथ:)** **(शचिष्ठा)** अतिशयेन प्राज्ञौ॥ ३॥

अन्वया:-हे अध्यापकोपदेशकौ दिव्या सुपर्णा दिव आजाता शचिष्ठा! भवन्ताविन्द्र ईवतो द्यून्न परितक्म्यायां शक्तिं गच्छथो हि कया स्मा शचीनां शचिष्ठा मक्षु भवथ:॥ ३॥

भावार्थ:-अत्रोपमालङ्कार:। ये विद्युद्वत्सामर्थ्यं वर्द्धयन्ति ते धीमन्तो भूत्वाऽतुलां श्रियं जगति लभन्ते॥ ३॥

पदार्थ:-हे अध्यापकोपदेशको **(दिव्या)** शुद्ध व्यवहार में उत्पन्न **(सुपर्णा)** उत्तम पालनों से युक्त **(दिव:)** विद्या के प्रकाश से **(आजाता)** सब प्रकार उत्पन्न हुए **(शचिष्ठा)** अत्यन्त बुद्धिमानो! आप **(इन्द्र:)** बिजुली **(ईवत:)** बहुत गति वाले **(द्यून्)** प्रकाशों को जैसे **(न)** वैसे **(परितक्म्यायाम्)** सब प्रकार हंसने वालों से युक्त सृष्टि में **(शक्तिम्)** सामर्थ्य को **(गच्छथ:)** प्राप्त होते हैं **(हि)** ही हो और **(कया, स्मा)** किसी से **(शचीनाम्)** बुद्धियों वा वाणियों के अत्यन्त जानने वाले **(मक्षु)** शीघ्र **(भवथ:)** होते हो॥ ३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो बिजुली के सदृश सामर्थ्य को बढ़ाते हैं, वे बुद्धिमान् होकर अतुल लक्ष्मी को संसार में प्राप्त होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

का वां॑ भू॒दुप॑मा॒ति: कया॑ नृ॒ आश्वि॑ना गमथो हू॒यमा॑ना।

को वां॑ म॒हश्चि॒त् त्यज॑सो अ॒भीके॑ उरु॒ष्यतं॑ माध्वी दस्रा न ऊ॒ती॥ ४॥

का। वा॒म्। भू॒त्। उप॑ऽमाति:। कया॑। नृ॒:। आ। अ॒श्वि॒ना॒। ग॒म॒थ॒:। हू॒यमा॑ना। क:। वा॒म्। म॒ह:। चि॒त्। त्यज॑स:। अ॒भीके॑। उ॒रु॒ष्यत॑म्। मा॒ध्वी॒ इति॑। दस्रा॒। नृ॒:। ऊ॒ती॥ ४॥

पदार्थ:-(का) **(वाम्)** युवयो: **(भूत्)** भवति **(उपमाति:)** उपमानम् **(कया)** **(न:)** अस्मान् **(आ)** **(अश्विना)** व्याप्तविद्यावध्यापकोपदेशकौ **(गमथ:)** प्राप्नुथ: **(हूयमाना)** कृताह्वानौ प्रशंसितौ **(क:)**

(वाम्) युवयोः **(महः)** महान् **(चित्)** **(त्यजसः)** त्यक्तुं योग्यो व्यवहारः **(अभीके)** समीपे **(उरुष्यतम्)** सेवेतम् **(माध्वी)** माधुर्यादिगुणोपेतौ **(दस्रा)** दुःखोपक्षयितारौ **(नः)** अस्मान् **(ऊती)** रक्षणादिक्रियया॥४॥

अन्वयः-हे हूयमाना माध्वी दस्राऽश्विना! वां कोपमातिर्भूत्। युवां कया रीत्या न आ गमथः को वामभीके महश्चित् त्यजसोऽस्त्यभीके कयोती न उरुष्यतम्॥४॥

भावार्थः-हे अध्यापकोपदेशकौ! तदैव युवयोरुत्तमोपमा जायते यदाऽस्मान् विद्यावतः कुर्य्यातं दुष्टान् दोषान् दूरे गमयतम्॥४॥

पदार्थः-हे **(हूयमाना)** आह्वान के किये अर्थात् बुलावा दिये हुए प्रशंसा को प्राप्त **(माध्वी)** मधुरता आदि गुणों से युक्त **(दस्रा)** दुःख के नाश करने वाले **(अश्विना)** विद्या व्याप्त अध्यापक और उपदेशकजनो! **(वाम्)** आप दोनों का **(का)** कौन **(उपमातिः)** उपमान **(भूत्)** होता है। और आप दोनों **(कया)** किस रीति से **(नः)** हम लोगों को **(आ, गमथः)** प्राप्त होते हो और **(कः)** कौन **(वाम्)** आप दोनों के **(अभीके)** समीप में **(महः)** बड़ा **(चित्)** भी **(त्यजसः)** त्याग करने योग्य व्यवहार है और समीप में किस **(ऊती)** रक्षण आदि क्रिया से **(नः)** हम लोगों की **(उरुष्यतम्)** सेवा करो॥४॥

भावार्थः-हे अध्यापक और उपदेशक जनो! तभी आप दोनों की श्रेष्ठ उपमा होती है कि जब हम लोगों को विद्यावान् करो और दुष्ट दोषों को दूर पहुंचाओ॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वाम्।

मध्वा माध्वी मधु वां प्रुषायन् यत्सीं वां पृक्षो भुरजन्त पक्वाः॥५॥

उरु। वाम्। रथः। परि। नक्षति। द्याम्। आ। यत्। समुद्रात्। अभि। वर्तते। वाम्। मध्वा। माध्वी इति। मधु। वाम्। प्रुषायन्। यत्। सीम्। वाम्। पृक्षः। भुरजन्त। पक्वाः॥५॥

पदार्थः-(उरु) बहु **(वाम्)** युवयोः **(रथः)** **(परि)** सर्वतः **(नक्षति)** व्याप्नोति **(द्याम्)** **(आ)** **(यत्)** यः **(समुद्रात्)** अन्तरिक्षाज्जलाशयाद्वा **(अभि)** आभिमुख्ये **(वर्त्तते)** **(वाम्)** युवाम् **(मध्वा)** मधुना **(माध्वी)** मधुरा नीतिः **(मधु)** **(वाम्)** युवाम् **(प्रुषायन्)** प्राप्नुवन्ति **(यत्)** ये **(सीम्)** सर्वतः **(वाम्)** युवाम् **(पृक्षः)** सम्बन्धिनः **(भुरजन्त)** प्राप्नुवन्ति **(पक्वाः)** परिपक्वज्ञानाः परिपक्वस्वरूपा वा॥५॥

अन्वयः-हे अध्यापकोपदेशकौ! यो वां रथो द्यामुरु परि नक्षति यद्यो वां समुद्रादभ्या वर्त्तते वां माध्वी मध्वा मधु सीम्भुरजन्त यद्ये पृक्षः पक्वा वां प्रुषायँस्तान् विदुषो युवां सम्पादयेतम्॥५॥

भावार्थः-हे मनुष्या! ये युष्मान् विदुषः कुर्य्युस्तान् सेवध्वम्॥५॥

पदार्थः-हे अध्यापक और उपदेशक जनो! जो **(वाम्)** आप दोनों का **(रथः)** वाहन **(द्याम्)** आकाश को **(उरु)** बहुत **(परि)** सब ओर से **(नक्षति)** व्याप्त होता है **(यत्)** जो **(वाम्)** आप दोनों को **(समुद्रात्)** अन्तरिक्ष वा जलाशय से **(अभि)** सम्मुख **(आ, वर्त्तते)** वर्त्तमान होता है तथा **(वाम्)** आप दोनों और **(माध्वी)** मधुर नीति **(मध्वा)** मधुर गुण से **(मधु)** मधुरकर्म्म को **(सीम्)** सब ओर से **(भुरजन्त)** प्राप्त होती हैं और **(यत्)** जो **(पृक्षः)** सम्बन्धी जन **(पक्वाः)** पूर्ण ज्ञान से युक्त वा जिनका स्वरूप परिपक्व अर्थात् पूर्ण अवस्था वाले **(वाम्)** आप दोनों को **(प्रुषायन्)** प्राप्त होते हैं, उनको विद्वान् आप दोनों करें॥५॥

भावार्थः-हे मनुष्यो! जो आप लोगों को विद्वान् करें, उनकी निरन्तर सेवा करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सिन्धुर्ह वां रसया सिञ्चदश्वान् घृणा वयोऽरुषासः परि ग्मन्।
तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः॥६॥

सिन्धुः। ह। वाम्। रसया। सिञ्चत्। अश्वान्। घृणा। वयः। अरुषासः। परि। ग्मन्। तत्। ऊम् इति। सु। वाम्। अजिरम्। चेति। यानम्। येन। पती इति। भवथः। सूर्यायाः॥६॥

पदार्थः-**(सिन्धुः)** नदी समुद्रो वा **(ह)** किल **(वाम्)** **(रसया)** रसादिना **(सिञ्चत्)** सिञ्चति **(अश्वान्)** सद्यो गामिनोऽग्न्यादीन् **(घृणा)** प्रदीप्ताः **(वयः)** व्यापिनः **(अरुषासः)** रक्तगुणविशिष्टाः **(परि)** **(ग्मन्)** गच्छन्ति **(तत्)** **(उ)** **(सु)** **(वाम्)** युवाम् **(अजिरम्)** प्राप्तव्यं प्रक्षेपकं वा **(चेति)** जानाति। अत्र विकरणस्य लुक् **(यानम्)** **(येन)** **(पती)** पालकौ **(भवथः)** **(सूर्य्यायाः)** सूर्य्यस्येयं कान्तिरुषास्तस्याः॥६॥

अन्वयः-हे अध्यापकोपदेशकौ! यः सिन्धू रसयो वां सिञ्चद्वयो घृणाऽरुषासोऽश्वान् परि ग्मँस्तदु वामजिरं सु चेति येन यानं प्राप्य सूर्य्यायाः पती भवथस्तौ ह विजानीयाताम्॥६॥

भावार्थः-हे अध्यापकोपदेशकौ! भवन्तौ यथा सुरसेन जलेन वृक्षान् क्षेत्रादिकं च संसिच्य वर्द्धयित्वैतेभ्यः फलानि प्राप्नुवन्ति तथैवं सर्वान् मनुष्यानध्याप्योपदिश्य प्रज्ञया वर्धयित्वा सुखफलौ भवेताम्॥६॥

पदार्थः-हे अध्यापक और उपदेशक जनो! जो **(सिन्धुः)** नदी वा समुद्र **(रसया)** रस आदि से **(उ)** तो **(वाम्)** आप दोनों को **(सिञ्चत्)** सींचता है तथा **(वयः)** व्याप्त होने वाले **(घृणा)** प्रदीप्त **(अरुषासः)** रक्त गुण से विशिष्ट पदार्थ **(अश्वान्)** शीघ्र चलने वाले अग्न्यादिकों को **(परि, ग्मन्)** सब ओर से प्राप्त होते हैं **(तत्)** उनको और **(वाम्)** आप दोनों को वा **(अजिरम्)** प्राप्त होने योग्य और फेंकने वाले को **(सु चेति)** उत्तम प्रकार जानता है वा **(येन)** जिससे **(यानम्)** वाहन को प्राप्त होकर

(सूर्य्यायाः) सूर्य्य की कान्तिरूप प्रातःकाल के **(पती)** पालन करने वाले **(भवथः)** होते हो, उन [दोनों] को **(ह)** निश्चय जानो॥६॥

भावार्थः-हे अध्यापक और उपदेशक जनो! आप जैसे उत्तम रस युक्त जल से वृक्षों और क्षेत्रादि को उत्तम प्रकार सिञ्चन कर और बढ़ाय के इन से फलों को प्राप्त होते हैं, वैसे ही सब मनुष्यों को पढ़ा उपदेश दे और बुद्धि से बढ़ाय कर सुखरूपी फलयुक्त होओ॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒हेह॒ यद्वां॑ सम॒ना प॑पृ॒क्षे सेयम॒स्मे सु॑म॒तिर्वा॑जरत्ना।

उ॒रु॒ष्यत॑ं जरि॒तार॑ं यु॒वं ह॑ श्रि॒तः कामो॑ नासत्या युव॒द्रिक्॥७॥१९॥

इ॒हऽइ॑ह। यत्। वा॒म्। स॒म॒ना। प॒पृ॒क्षे। सा। इ॒यम्। अ॒स्मे इति॑। सु॒ऽम॒तिः। वा॒ज॒ऽर॒त्ना॒। उ॒रु॒ष्यत॑म्। ज॒रि॒ता॑रम्। यु॒वम्। ह॒। श्रि॒तः। कामः॑। ना॒स॒त्या॒। यु॒व॒द्रिक्॥७॥

पदार्थः-(इहेह) अस्मिन् संसारे **(यत्)** या **(वाम्)** युवाम् **(समना)** समनस्कौ **(पपृक्षे)** सम्बध्नाति **(सा) (इयम्) (अस्मे)** अस्मान् **(सुमतिः)** शोभना प्रज्ञा **(वाजरत्ना)** वाजो बोधो रत्नं धनं ययोस्तौ **(उरुष्यतम्)** सेवेथाम् **(जरितारम्)** स्तावकम् **(युवम्)** युवाम् **(ह) (श्रितः)** आश्रितः **(कामः)** इच्छा **(नासत्या)** अविद्यमानासत्याचरणौ **(युवद्रिक्)** युवां प्राप्नुवन्॥७॥

अन्वयः-हे वाजरत्ना नासत्या समना यद्या सुमतिवो पपृक्षे सेयमिहेहास्मे सुसेवतां युवं ह जरितारमुरुष्यतं तौ वां युवद्रिच्छ्रितः कामः सेवताम्॥७॥

भावार्थः-हे अध्यापकोपदेशका! भवन्त इह या प्रज्ञा युष्मान् प्राप्नुयात् तां सर्वेभ्यः प्रयच्छत यादृशी स्वहितायेच्छा क्रियते तादृशी सर्वार्था कार्य्या॥७॥

अत्राऽध्यापकोपदेशकाऽध्याप्योपदेश्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिचत्वारिंशत्तमं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वाजरत्ना)** बोधरुपरत्न धन जिनके वे **(नासत्या)** असत्य आचरण से रहित **(समना)** तुल्य मन वाले और **(यत्)** जो **(सुमतिः)** उत्तम बुद्धि **(वाम्)** आप दोनों को **(पपृक्षे)** सम्बन्धित होती है **(सा, इयम्)** सो यह **(इहेह)** इस संसार में **(अस्मे)** हम लोगों की उत्तम प्रकार सेवा करे **(युवम्)** आप दोनों **(ह)** ही **(जरितारम्)** स्तुति करने वाले की **(उरुष्यतम्)** सेवा करें उन **(युवद्रिक्)** आप दोनों को प्राप्त होती **(श्रितः)** और आश्रित हुई **(कामः)** इच्छा सेवे॥७॥

भावार्थः-हे अध्यापक और उपदेशक जनो! आप लोग इस संसार में जो बुद्धि आप लोगों को प्राप्त होवे उसको सब के लिये देओ और जैसी अपने हित के लिये इच्छा करते हो, वैसी सब के लिये करो॥७॥

इस सूक्त में अध्यापक और उपदेशक, पढ़ने और उपदेश सुनने वाले के गुणवर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेतालीसवां सूक्त और उन्नीसवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य चतुश्चत्वारिंशत्तमस्य सूक्तस्य पुरुमीढाजमीढौ सौहोत्रावृषी। अश्विनौ देवते। १, ३, ६, ७ निचृत्त्रिष्टुप्। २ त्रिष्टुप्। ५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाध्यापकोपदेशकविषये शिल्पविद्याविषयमाह॥

अब सात ऋचा वाले चवालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अध्यापक और उपदेशकविषय में शिल्पविद्याविषय को कहते हैं॥

तं वां॒ रथं॑ व॒यम॒द्या हु॑वेम पृथु॒ज्रय॑मश्विना॒ संग॑तिं॒ गोः।
यः सू॒र्यां वह॑ति वन्धु॒रायु॒र्गिर्वा॑हसं पुरु॒तमं॑ वसू॒युम्॥ १॥

तम्। वा॒म्। रथ॑म्। व॒यम्। अ॒द्य। हु॒वे॒म॒। पृ॒थु॒ऽज्रय॑म्। अ॒श्वि॒ना॒। सम्ऽग॑तिम्। गोः। यः। सू॒र्याम्। वह॑ति। व॒न्धु॒रऽआ॑युः। गिर्वा॑हसम्। पु॒रु॒ऽत॒मम्। व॒सु॒ऽयु॒म्॥ १॥

पदार्थः-(तम्) (वाम्) (रथम्) रमणीयं यानम् **(वयम्) (अद्या)** अस्मिन्नहनि। अत्र **संहितायामिति** दीर्घः। **(हुवेम)** आदद्याम **(पृथुज्रयम्)** विस्तीर्णं बहुगतिम् **(अश्विना)** अध्यापकोपदेशकौ **(सङ्गतिम्) (गोः)** पृथिव्याः **(यः) (सूर्य्याम्)** सूर्य्यसम्बन्धिनीं कान्तिम् **(वहति) (वन्धुरायुः)** वन्धुरमायुर्यस्य सः **(गिर्वाहसम्)** यो गिरा वहति प्राप्यते वा तम् **(पुरुतमम्)** यः पुरून् बहून् ताम्यति तम् **(वसूयुम्)** आत्मनो वसु द्रव्यमिच्छुम्॥१॥

अन्वयः-हे अश्विना! वयमद्या वां पृथुज्रयन्तं रथं हुवेम गोः सङ्गतिं हुवेम यो वन्धुरायुः सूर्य्यां वहति यं पुरुतमं गिर्वाहसं वसूयुं हुवेम स एव सुखी भवति॥१॥

भावार्थः-हे मनुष्या! येनाग्निजलाभ्यां शिल्पविद्यासाधनं रथादिकं सम्पाद्यते स एव स्वात्मवत् सर्वान् प्रीणाति॥१॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक जनो! **(वयम्)** हम लोग **(अद्या)** आज **(वाम्)** तुम दोनों के **(पृथुज्रयम्)** विस्तीर्ण और बहुत गति वाले **(तम्)** उस **(रथम्)** रमण करने योग्य वाहन को **(हुवेम)** ग्रहण करें और **(गोः)** पृथिवी के **(सङ्गतिम्)** सङ्ग को ग्रहण करें **(यः)** जो **(वन्धुरायुः)** थोड़ी अवस्था वाला **(सूर्य्याम्)** सूर्य्यसम्बन्धिनी कान्ति अर्थात् तेज की **(वहति)** प्राप्ति करता है जिस **(पुरुतमम्)** बहुतों को ग्लानि करने **(गिर्वाहसम्)** वाणी से प्राप्त करने वा प्राप्त होने **(वसूयुम्)** और अपने को द्रव्य की इच्छा करने वाले का ग्रहण करें, वही सुखी होता है॥१॥

भावार्थः-हे मनुष्यो! जिस अग्नि और जल से शिल्पविद्या ही साधन जिसका ऐसा रथ आदि उत्पन्न किया जाता है, वही अपने आत्मा के तुल्य सब को प्रसन्न करता है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः।

युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम्॥ २॥

युवम्। श्रियम्। अश्विना। देवता। ताम्। दिवः। नपाता। वनथः। शचीभिः। युवोः। वपुः। अभि। पृक्षः। सचन्ते। वहन्ति। यत्। ककुहासः। रथे। वाम्॥ २॥

पदार्थः-(युवम्) युवाम् **(श्रियम्)** लक्ष्मीम् **(अश्विना)** अध्यापकोपदेशकौ **(देवता)** दिव्यगुणसम्पन्नौ **(ताम्)** **(दिवः)** द्युलोकस्य **(नपाता)** पातरहितौ **(वनथः)** संसेवेथाम् **(शचीभिः)** प्रज्ञाभिः **(युवोः)** युवयोः **(वपुः)** शरीरम् **(अभि)** आभिमुख्ये **(पृक्षः)** सम्पर्कः **(सचन्ते)** सम्बध्नन्ति **(वहन्ति)** **(यत्)** याम् **(ककुहासः)** सर्वा दिशः **(रथे)** **(वाम्)** युवयोः॥ २॥

अन्वयः-हे दिवो नपाता देवताश्विना! युवं शचीभिः तां श्रियं वनथो यद्यां वां रथे युवोः पृक्षो वपुरभि सचन्ते ककुहासो वहन्ति॥ २॥

भावार्थः-ये विद्वांसः प्रज्ञां प्राप्याऽन्येभ्यो ददति ते सर्वासु दिक्षु पूज्या भवन्ति॥ २॥

पदार्थः-हे **(दिवः)** द्रष्टव्य अत्यन्त सुख के **(नपाता)** पतन से रहित **(देवता)** दिव्यगुणसम्पन्न **(अश्विना)** अध्यापक और उपदेशक जनो! **(युवम्)** आप दोनों **(शचीभिः)** बुद्धियों से **(ताम्)** उस **(श्रियम्)** लक्ष्मी का **(वनथः)** सेवन करो **(यत्)** जिसको **(वाम्)** आप दोनों के **(रथे)** वाहन में **(युवोः)** आप दोनों के **(पृक्षः)** सम्बन्ध और **(वपुः)** शरीर को **(अभि)** सम्मुख **(सचन्ते)** सम्बन्धयुक्त करती **(ककुहासः)** सम्पूर्ण दिशा **(वहन्ति)** प्राप्त होती हैं॥ २॥

भावार्थः-जो विद्वान् जन बुद्धि को प्राप्त होकर अन्य जनों के लिये देते हैं, वे सम्पूर्ण दिशाओं में पूजने अर्थात् सत्कार करने योग्य होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः।

ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत्॥ ३॥

कः। वाम्। अद्य। करते। रातऽहव्यः। ऊतये। वा। सुतऽपेयाय। वा। अर्कैः। ऋतस्य। वा। वनुषे। पूर्व्याय। नमः। येमानः। अश्विना। आ। ववर्तत्॥ ३॥

पदार्थः-(कः) **(वाम्)** युवाम् **(अद्या)** अस्मिन्नहनि **(करते)** करोति **(रातहव्यः)** दत्तदातव्यः **(ऊतये)** रक्षणाद्याय **(वा)** **(सुतपेयाय)** निष्पन्नरसपातव्याय **(वा)** **(अर्कैः)** सत्कारैः **(ऋतस्य)** सत्यस्य **(वा)** **(वनुषे)** याचसे **(पूर्व्याय)** पूर्वेषु कुशलाय **(नमः)** अन्नम् **(येमानः)** नियच्छन्तः **(अश्विना)** अध्यापकोपदेशकौ **(आ)** **(ववर्त्तत्)** वर्त्तते॥ ३॥

अन्वयः-हे अश्विनाऽद्या वां को रातहव्य ऊतये वाद्या सुतपेयाय करते वाऽर्कैः सत्करोति वर्त्तस्य पूर्व्याय नमो ददाति अनुकूलो आ ववर्त्तत् तद्ये येमानः सत्कुर्वन्ति तान् युवां सत्कुर्य्यातम्। हे विद्वन्! यतस्त्वमाभ्यां विद्यां वनुषे तस्मादेतौ सततं सत्कुरु॥३॥

भावार्थः-हे अध्यापकोपदेशकौ! ये युवां सत्कुर्य्युस्तान् सुशिक्षितान् सभ्यान् सम्पादयतम्, येभ्यो विद्यां ग्राहयतं तान् सततं पूजयतं च॥३॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक जनो! **(अद्या)** आज **(वाम्)** आप दोनों को **(कः)** कौन **(रातहव्यः)** देने योग्य को दिये हुए **(ऊतये)** रक्षण आदि के लिये **(वा)** वा आज **(सुतपेयाय)** उत्पन्न जो पीने योग्य रस उसके लिये **(करते)** करता अर्थात् प्रयत्नयुक्त करता **(वा)** वा **(अर्कैः)** सत्कारों से सत्कार करता **(वा)** वा **(ऋतस्य)** सत्य के सम्बन्ध में **(पूर्व्याय)** प्राचीन जनों में चतुर के लिये **(नमः)** अन्न को देता और अनुकूल हुआ **(आ, ववर्त्तत्)** वर्त्ताव करता है, उसका **(येमानः)** जो नियम करते हुए सत्कार करते हैं, उनका आप दोनों सत्कार करें। और हे विद्वन्! जिस कारण आप इन दोनों से विद्या को **(वनुषे)** मांगते हो, इससे इन दोनों का निरन्तर सत्कार करो॥३॥

भावार्थः-हे अध्यापक और उपदेशक जनो! जो आप दोनों का सत्कार करें, उनको उत्तम प्रकार शिक्षित और सभ्य अर्थात् सभा के योग्य करो और जिनसे विद्या का ग्रहण कराओ, उनका निरन्तर सत्कार भी करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातम्।
पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय॥४॥

हिरण्ययेन। पुरुभू इति पुरुऽभू। रथेन। इमम्। यज्ञम्। नासत्या। उप। यातम्। पिबाथः। इत्। मधुनः। सोम्यस्य। दधथः। रत्नम्। विधते। जनाय॥४॥

पदार्थः-**(हिरण्ययेन)** ज्योतिर्मयेन सुवर्णाद्यलङ्कृतेन **(पुरुभू)** यो पुरून् भावयतस्तौ **(रथेन)** यानेन **(इमम्)** **(यज्ञम्)** अध्यापनाऽध्ययनाख्यम् **(नासत्या)** सत्याचरणावध्यापकोपदेशकौ **(उप)** **(यातम्)** **(पिबाथः)** पिबतम् **(इत्)** एव **(मधुनः)** मधुरादिगुणयुक्तस्य **(सोम्यस्य)** सोमेषु भवस्य **(दधथः)** **(रत्नम्)** रमणीयं धनम् **(विधते)** पुरुषार्थं कुर्वते **(जनाय)** मनुष्याय॥४॥

अन्वयः-हे पुरुभू नासत्याऽश्विनौ! युवां हिरण्ययेन रथेनेमं यज्ञमुपयातं मधुनः सोम्यस्य रसं पिबाथो विधते जनाय रत्नं दधथस्तावित्सुखिनौ कथं न भवेतम्॥४॥

भावार्थः-हे मनुष्या! ये विद्याप्रचारकाः स्युस्त एव जगत्सुखकरा भवेयुः॥४॥

पदार्थः-हे **(पुरुभू)** बहुतों की भावना कराने और **(नासत्या)** सत्य आचरण वाले अध्यापक और उपदेशक जनो! आप दोनों **(हिरण्ययेन)** ज्योतिर्मय और सुवर्ण आदि से शोभित **(रथेन)** वाहन से **(इमम्)** इस **(यज्ञम्)** पढ़ाने और पढ़ने रूप यज्ञ को **(उप, यातम्)** प्राप्त होओ और **(मधुनः)** मधुर आदि गुणों से युक्त **(सोम्यस्य)** सोमलतारूप ओषधियों में उत्पन्न पदार्थ के रस का **(पिबाथः)** पान करो और **(विधते)** पुरुषार्थ को करते हुए **(जनाय)** मनुष्य के लिये **(रत्नम्)** सुन्दर धन को **(दधथः)** तुम धारण करते हो वे **[**दोनों**]** **(इत्)** ही सुखी कैसे न होओ॥४॥

भावार्थः-हे मनुष्यो! जो शिल्पविद्या के प्रचार करने वाले हों, वे ही संसार के सुख करने वाले होवें॥४॥

अथ राजामात्यविषयमाह॥

अब राजा और अमात्य विषय को अगले मन्त्र में कहते हैं॥

आ नो॑ यातं दि॒वो अच्छा॑ पृथि॒व्या हि॑र॒ण्ययेन॑ सुवृ॒ता॒ रथे॑न।
मा वा॑म॒न्ये नि य॑मन् देव॒यन्तः॑ सं यद्दु॒दे नाभिः॑ पू॒र्व्या वा॑म्॥५॥

आ। नः॑। या॒त॒म्। दि॒वः॑। अच्छ॑। पृ॒थि॒व्याः॑। हि॒र॒ण्ययेन॑। सु॒ऽवृ॒ता॑। रथे॑न। मा। वा॒म्। अ॒न्ये। नि। य॒म॒न्। दे॒व॒ऽयन्तः॑। सम्। यत्। दु॒दे। नाभिः॑। पू॒र्व्या। वा॒म्॥५॥

पदार्थः-(आ) **(नः)** **(यातम्)** प्राप्नुतम् **(दिवः)** कामयमानाम् **(अच्छा)** सम्यक्। अत्र **संहितायामिति** दीर्घः। **(पृथिव्याः)** भूम्याः **(हिरण्ययेन)** सुवर्णादिनाऽलङ्कृतेन **(सुवृता)** शोभनावरणेन **(रथेन)** विमानादियानेन **(मा)** **(वाम्)** युवयोः **(अन्ये)** **(नि)** **(यमन्)** निग्रहं कुर्वन्तु **(देवयन्तः)** कामयन्तः **(सम्)** **(यत्)** **(ददे)** ददामि **(नाभिः)** नाभिरिव वर्त्तमानः **(पूर्व्या)** पूर्वैः कृतेषु कुशलौ **(वाम्)** युवाभ्याम्॥५॥

अन्वयः-हे पूर्व्या राजाऽमात्यौ! वां सुवृता हिरण्ययेन रथेन पृथिव्या दिवो नोऽच्छाऽऽयातम्। यतोऽन्ये देवयन्तो वां मा नियमन् यदहं नाभिरिव वां सन्ददे तद्गृह्णीतम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वे प्रजाराजजना राज्ञो राजपुरुषाणाञ्च सङ्गं सदैवेच्छेयुः सदैव सुखदुःखे भुञ्जीरन्॥५॥

पदार्थः-हे **(पूर्व्या)** प्राचीनों से किये हुओं में चतुर राजा औ मन्त्री जनो! **(वाम्)** आप दोनों के **(सुवृता)** सुन्दर परदे से युक्त **(हिरण्ययेन)** सुवर्ण आदि से शोभित **(रथेन)** विमान आदि वाहन से **(पृथिव्याः)** भूमि की **(दिवः)** कामना करते हुए **(नः)** हम लोगों को **(अच्छा)** उत्तम प्रकार **(आ, यातम्)** प्राप्त होओ जिससे **(अन्ये)** अन्य जन **(देवयन्तः)** कामना करते हुए **(वाम्)** आप दोनों से **(मा)** नहीं **(नि, यमन्)** निग्रह करें और **(यत्)** जिसको मैं **(नाभिः)** नाभि के सदृश वर्त्तमान आप दोनों को **(सम्, ददे)** अच्छे प्रकार देता हूँ, उसका ग्रहण करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब प्रजा और राजाजन, राजा और राजा के पुरुषों के सङ्ग की सदा ही इच्छा करें और सदैव सुख और दुःख को भोगें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू नो॑ र॒यिं पु॑रु॒वीरं॑ बृ॒हन्तं॑ दस्रा॒ मिमा॑थामु॒भये॑ष्व॒स्मे।

नरो॒ यद्वा॑मश्विना॒ स्तोम॒मावं॑न्त्स॒धस्तु॑तिमाजमी॒ळ्हासो॑ अग्मन्॥६॥

नु। नः॑। र॒यिम्। पु॒रु॒ऽवीर॑म्। बृ॒हन्त॑म्। दस्रा॑। मिमा॑थाम्। उ॒भये॑षु। अ॒स्मे इति॑। नरः॑। यत्। वा॒म्। अ॒श्वि॒ना॒। स्तोम॑म्। आव॑न्। स॒धऽस्तु॑तिम्। आ॒ज॒ऽमी॒ळ्हासः॑। अ॒ग्म॒न्॥६॥

पदार्थः-(नु) सद्यः **(नः)** अस्मभ्यम् **(रयिम्) (पुरुवीरम्)** बहवो वीरा यस्मात्तम् **(बृहन्तम्)** महान्तम् **(दस्रा)** दुःखोपक्षयितारौ **(मिमाथाम्)** विधत्तम् **(उभयेषु)** राजप्रजाजनेषु **(अस्मे)** अस्मासु **(नरः)** नायकाः **(यत्)** ये **(वाम्)** युवाम् **(अश्विना)** सूर्य्याचन्द्रमसाविव शुभगुणयुक्तौ **(स्तोमम्)** प्रशंसाम् **(आवन्)** प्राप्नुयामः **(सधस्तुतिम्)** सहकीर्त्तिम् **(आजमीळ्हासः)** येऽजान् विद्यया सिञ्चन्ति तदपत्यानि **(अग्मन्)** प्राप्नुवन्ति॥६॥

अन्वयः-हे दस्राऽश्विना यदाजमीळ्हासो नरो! वां सधस्तुतिमग्मन्त्स्तोममावँस्तेभ्यो नोऽस्मभ्यं युवां पुरुवीरं बृहन्तं रयिं मिमाथाम्। यदुभयेष्वस्मे श्रीर्नु वर्द्धेत॥६॥

भावार्थः-हे राजमुख्याऽमात्यौ! भवन्तौ सूर्य्याचन्द्रवदस्मासु वर्तेथाम्। पुष्कलां श्रियं स्थापयत यतो वयं धनाढ्या स्याम॥६॥

पदार्थः-हे **(दस्रा)** दुःख के नाश करने वाले **(अश्विना)** सूर्य्य और चन्द्रमा के सदृश श्रेष्ठ गुणों से युक्त **(यत्)** जो **(आजमीळ्हासः)** बकरों को विद्या से सिञ्चन करने वालों के पुत्र **(नरः)** नायकजन! **(वाम्)** आप दोनों को और **(सधस्तुतिम्)** साथ कीर्त्ति को **(अग्मन्)** प्राप्त होते और **(स्तोमम्)** प्रशंसा को **(आवन्)** हम प्राप्त होते हैं उन **(नः)** हम सब लोगों के लिये आप दोनों **(पुरुवीरम्)** बहुत वीर हों जिससे उस **(बृहन्तम्)** बड़े **(रयिम्)** धन को **(मिमाथाम्)** धारण करो जिससे **(उभयेषु)** दोनों राजा और प्रजा जनों **[**में**]** **(अस्मे)** हम लोगों में लक्ष्मी **(नु)** शीघ्र बड़े॥६॥

भावार्थः-हे राजन् और मुख्य मन्त्रीजनो! आप दोनों सूर्य्य और चन्द्रमा के सदृश हम लोगों में वर्त्ताव कीजिये और बहुत लक्ष्मी को स्थापित कीजिये, जिससे हम लोग धन से युक्त होवें॥६॥

अथ सज्जनगुणविषयमाह॥

अब सज्जन विषय को अगले मन्त्र में कहते हैं॥

इ॒हेह॒ यद्वा॑ सम॒ना प॑प्रु॒क्षे सेय॑म॒स्मे सु॑म॒तिर्वा॑जरत्ना।

उ॒रु॒ष्यत॑ जरि॒तार॑ युव॑ ह॑ श्रि॒तः कामो॑ नासत्या युव॒द्रिक्॥७॥२०॥

इ॒हऽइ॑ह। यत्। वा॒म्। स॒म॒ना॒। प॒पृ॒क्षे॒। सा। इ॒यम्। अ॒स्मे इति॑। सु॒ऽम॒तिः। वा॒ज॒र॒त्ना॒। उ॒रु॒ष्यत॑म्। ज॒रि॒तार॑म्। युव॑म्। ह॒। श्रि॒तः। काम॑ः। ना॒स॒त्या॒। यु॒व॒द्रिक्॥७॥

पदार्थः-(इहेह) अस्मिञ्जगति **(यत्)** या **(वाम्)** **(समना)** सान्त्वनादिगुणयुक्ता **(पपृक्षे)** सम्बध्नातु **(सा)** **(इयम्)** **(अस्मे)** अस्मान् **(सुमतिः)** **(वाजरत्ना)** विज्ञानधनप्राप्तिसाधिका **(उरुष्यतम्)** सेवेतम् **(जरितारम्)** सकलविद्यास्तावकम् **(युवम्)** युवाम् **(ह)** खलु **(श्रितः)** आश्रितः **(कामः)** **(नासत्या)** धर्म्मात्मानौ **(युवद्रिक्)** युवां प्रापकः॥७॥

अन्वयः-हे नासत्याऽध्यापकोपदेशकाविहेह वां यद्या समना वाजरत्ना सुमतिरस्ति सेयमस्मे पपृक्षे योऽयं युवद्रिक् कामो जरितारं श्रितस्तं ह युवमुरुष्यतम्॥७॥

भावार्थः-मनुष्यैः सदात्राप्तानां प्रज्ञेषणीया सत्यस्य कामना च याभ्यां सर्वेच्छा पूर्णा स्यादिति॥७॥

अत्राऽध्यापकोपदेशकराजामात्यसज्जनगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुश्चत्वारिंशत्तमं सूक्तं विंशो वर्गश्च समाप्तः।

पदार्थः-हे **(नासत्या)** धर्मात्मा अध्यापक और उपदेशक जनो! **(इहेह)** इस संसार में **(वाम्)** आप दोनों की **(यत्)** जो **(समना)** शान्ति आदि गुणों से युक्त **(वाजरत्ना)** विज्ञान रूप धन की प्राप्ति सिद्ध करने वाली **(सुमतिः)** श्रेष्ठ मति है **(सा)** सो **(इयम्)** यह **(अस्मे)** हम लोगों को **(पपृक्षे)** सम्बन्धयुक्त करे जो यह और **(युवद्रिक्)** आप दोनों को प्राप्त कराने वाला **(कामः)** मनोरथ **(जरिताम्)** सम्पूर्ण विद्याओं के स्तुति करने वाले को **(श्रितः)** आश्रित है **(ह)** उसी का **(युवम्)** आप **(उरुष्यतम्)** सेवन करें॥७॥

भावार्थः-मनुष्यों को चाहिये सदा इस संसार में यथार्थवक्ता पुरुषों की बुद्धि की इच्छा करें और सत्य की कामना करें, जिससे सम्पूर्ण इच्छा पूर्ण होवे॥७॥

इस सूक्त में अध्यापक, उपदेशक, राजा, अमात्य और सज्जन के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चवालीसवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य पञ्चचत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। अश्विनौ देवते। १, ३, ४ जगती। ५ निचृज्जगती। ६ विराट् जगती छन्दः। निषादः स्वरः। २ भुरिक् त्रिष्टुप्। ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्य्यविषयमाह॥

अब सात ऋचा वाले पैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र से सूर्य्यविषय को कहते हैं॥

एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो अस्य सानवि।
पृक्षासो अस्मिन् मिथुना अधि त्रयो दृतिस्तुरीयो मधुनो वि रप्शते॥ १॥

एषः। स्यः। भानुः। उत्। इयर्त्ति। युज्यते। रथः। परिऽज्मा। दिवः। अस्य। सानवि। पृक्षासः। अस्मिन्। मिथुनाः। अधि। त्रयः। दृतिः। तुरीयः। मधुनः। वि। रप्शते॥ १॥

पदार्थः-(एषः) (स्यः) सः **(भानुः)** सूर्य्यः **(उत्)** ऊर्ध्वम् **(इयर्त्ति)** प्राप्नोति **(युज्यते) (रथः) (परिज्मा)** परितः सर्वतो ज्मायां भूमौ गच्छति त्यजति वा। **ज्मेति पृथिवीनामसु पठितम्।** (निघं०१.१) **(दिवः)** प्रशंसायुक्तस्यान्तरिक्षस्य मध्ये **(अस्य) (सानवि)** आकाशप्रदेशे **(पृक्षासः)** सम्बद्धाः **(अस्मिन्) (मिथुनाः)** द्वन्द्वा द्वौ द्वौ मिलिताः **(अधि)** उपरिभावे **(त्रयः)** वायुजलविद्युतः **(दृतिः)** मेघः। **दृतिरिति मेघनामसु पठितम्।** (निघं०१.१०) **(तुरीयः)** चतुर्थः **(मधुनः)** मधुरगुणयुक्तस्य **(वि) (रप्शते)** विशेषेण राजते॥ १॥

अन्वयः-हे मनुष्या! एषः स्यः परिज्मा भानुरुदियर्त्ति, अस्य सानवि रथो युज्यतेऽस्मिंस्त्रयः पृक्षासो मिथुनाः प्रकाशन्ते, अस्य मधुनो मध्ये तुरीयो दृतिर्दिवोऽधि वि रप्शते तान् सर्वान् विजानीत॥ १॥

भावार्थः-हे मनुष्या! यो हि प्रकाशमानः सूर्य्यो ब्रह्माण्डस्य मध्ये विराजतेऽस्याभितो बहवो भूगोलाः सम्बद्धाः सन्ति भूचन्द्रलोकौ च युक्तौ भ्रमतो यस्य प्रभावेन वर्षा जायन्त इति विजानीत॥ १॥

पदार्थः-हे मनुष्यो! **(एषः, स्यः)** सो वह **(परिज्मा)** सब ओर से भूमि में चलता वा त्यागता **(भानुः)** सूर्य्य **(उत्)** ऊपर को **(इयर्त्ति)** प्राप्त होता है **(अस्य)** इसके **(सानवि)** आकाशप्रदेश में **(रथः)** वाहन **(युज्यते)** जोड़ा जाता है **(अस्मिन्)** इस में **(त्रयः)** वायु, जल और बिजुली **(पृक्षासः)** सम्बन्ध को प्राप्त **(मिथुनाः)** दो दो मिले हुए प्रकाशित होते हैं इस **(मधुनः)** मधुर गुण से युक्त के बीच **(तुरीयः)** चौथा **(दृतिः)** मेघ **(दिवः)** प्रशंसायुक्त अन्तरिक्ष के बीच **(अधि)** ऊपर **(वि, रप्शते)** विशेष करके शोभित होता है, उन सबको जानिये॥ १॥

भावार्थः-हे मनुष्यो! जो प्रकाशमान सूर्य्य ब्रह्माण्ड के मध्य में विराजित है और इसके चारों ओर बहुत भूगोल सम्बन्धयुक्त हैं तथा पृथिवी और चन्द्रलोक एक साथ घूमते हैं और जिसके प्रभाव से वृष्टियाँ होती हैं, इस सम्पूर्ण को जानो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उद्वां॑ पृ॒क्षासो॒ मधु॑मन्त ईरते॒ रथा॒ अश्वा॑स उ॒षसो॒ व्यु॑ष्टिषु।

अ॒पो॒र्णु॒व॒न्तस्तम॒ आ परी॑वृतं॒ स्व॑र्ण॒ शुक्रं॑ त॒न्वन्त॒ आ रज॑:॥ २॥

उत्। वा॒म्। पृ॒क्षास॑:। मधु॑ऽमन्त:। ई॒र॒ते॒। रथा॑:। अश्वा॑स:। उ॒षस॑:। विऽउ॑ष्टिषु। अ॒प॒ऽऊ॒र्णु॒व॒न्त॑:। तम॑:। आ। परि॑ऽवृतम्। स्व॑:। न। शु॒क्रम्। त॒न्व॑न्त:। आ। रज॑:॥ २॥

पदार्थ:-(**उत्**) (**वाम्**) युवाम् (**पृक्षास:**) संसिक्ता: (**मधुमन्त:**) मधुरादिगुणयुक्ता: (**ईरते**) कम्पन्ते गच्छन्ति (**रथा:**) यथा यानानि (**अश्वास:**) तुरङ्गा: (**उषस:**) प्रभातवेलाया: (**व्युष्टिषु**) विविधासु सेवासु (**अपोर्णुवन्त:**) निवारयन्त: (**तम:**) रात्रीम् (**आ**) (**परीवृतम्**) सर्वत आवृतम् (**स्व:**) आदित्य: (**न**) इव (**शुक्रम्**) शुद्धम् (**तन्वन्त:**) विस्तृणन्त: (**आ**) (**रज:**) लोकलोकान्तरम्॥ २॥

अन्वय:-हे अध्यापकोपदेशकौ! यथा मधुमन्त: पृक्षास उषसस्तमोऽपोर्णुवन्तो व्युष्टिषु रथा अश्वास इवा परीवृतं स्वर्ण शुक्रमारजस्तन्वन्तस्सूर्यकिरणा वामुदीरते तान् यूयं विजानीत॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! इमे सर्वे लोका: सूर्य्यस्याऽभितो भ्रमन्ति यथा सूर्य्यकिरणा भूगोलार्धस्थं तमो निवार्य्य प्रकाशं जनयन्ति तथैव विद्वांसो विद्यादानेनाविद्यान् निवार्य्य विद्यां जनयेयु:॥ २॥

पदार्थ:-हे अध्यापक और उपदेशक जनो! जैसे (**मधुमन्त:**) मधुर आदि गुणों से युक्त (**पृक्षास:**) उत्तम प्रकार सींचे गये (**उषस:**) प्रभात वेला की (**तम:**) रात्रि को (**अपोर्णुवन्त:**) निवारण करते अर्थात् हटाते हुए (**व्युष्टिषु**) अनेक प्रकार की सेवाओं में (**रथा:**) वाहनों और (**अश्वास:**) घोड़ों के सदृश (**आ, परीवृतम्**) सब प्रकार से घिरे हुए को (**स्व:**) सूर्य्य के (**न**) सदृश (**शुक्रम्**) शुद्ध (**आ, रज:**) लोक-लोकान्तर को (**तन्वन्त:**) विस्तृत करते हुए सूर्य्यकिरण (**वाम्**) आप दोनों को (**उत्, ईरते**) कंपते, चञ्चल होते, ऊपर से प्राप्त होते हैं, उनको आप लोग विशेष करके जानो॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! ये सब लोक सूर्य्य के सब ओर घूमते हैं और जैसे सूर्य्य की किरणें भूगोल के आधे भाग में स्थित अन्धकार को निवारण करके प्रकाश उत्पन्न करते हैं, वैसे ही विद्वान् जन विद्या के दान से अविद्या को निवारण करके विद्या को उत्पन्न करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मध्व॑: पिबतं मधु॒पेभि॑रा॒सभि॑रु॒त प्रि॒यं मधु॑ने युञ्जाथां॒ रथ॑म्।

आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमन्तमश्विना॥ ३॥

मध्वः। पिबतम्। मधुऽपेभिः। आसऽभिः। उत। प्रियम्। मधुने। युञ्जाथाम्। रथम्। आ। वर्तनिम्। मधुना। जिन्वथः। पथः। दृतिम्। वहेथे इति। मधुऽमन्तम्। अश्विना॥ ३॥

पदार्थः-(मध्वः) मधुरादिगुणयुक्तस्य **(पिबतम्)** **(मधुपेभिः)** ये मधुरान् रसान् पिबन्ति तैः सह **(आसभिः)** आस्यैर्मुखैः **(उत)** अपि **(प्रियम्)** कमनीयम् **(मधुने)** विज्ञाताय मार्गाय **(युञ्जाथाम्)** **(रथम्)** विमानादियानम् **(आ)** **(वर्त्तनिम्)** वर्त्तन्ते यस्मिँस्तं मार्गम् **(मधुना)** माधुर्य्यगुणोपेतेन **(जिन्वथः)** गच्छथः **(पथः)** मार्गान् **(दृतिम्)** दृतिमिव वर्त्तमानं मेघम् **(वहेथे)** प्रापयेताम्। अत्र पुरुषव्यत्ययः। **(मधुमन्तम्)** मधुरादिगुणयुक्तम् **(अश्विना)** सेनेशयोद्धारौ॥ ३॥

अन्वयः-हे अश्विना! युवां मधुपेभिर्वीरैः सहासभिर्मध्वः प्रियं रसं पिबतमुत मधुने रथं युञ्जाथां मधुना वर्त्तनिमा जिन्वथः पथो जिन्वथो मधुमन्तं दृतिं सूर्य्यवायू वहेथे तथेमं वहेथाम्॥ ३॥

भावार्थः-हे सेनेशयोद्धारो! यूयं सेनास्थवीरैः सहेदृशानि भोजनानि कुरुत यानानि रचयत यैर्बलवृद्धिः श्रीप्राप्तिश्च स्याद्यथा वायुविद्युतौ वृष्टिं कृत्वा सर्वान् सुखयतस्तथा प्रजाः सुखयथ॥ ३॥

पदार्थः-हे **(अश्विना)** सेना के ईश और योद्धा जन आप दोनों **(मधुपेभिः)** मधुर रसों को पीने वाले वीर पुरुषों के साथ **(आसभिः)** मुखों से **(मध्वः)** मधुर आदि गुण से युक्त पदार्थ के **(प्रियम्)** मनोहर रस को **(पिबतम्)** पिओ **(उत)** और **(मधुने)** जाने गये मार्ग के लिये **(रथम्)** विमान आदि वाहन को **(युञ्जाथाम्)** युक्त करो तथा **(मधुना)** मधुरता गुण युक्त पदार्थ से **(वर्त्तनिम्)** जिसमें वर्त्तमान होते उस मार्ग को **(आ, जिन्वथः)** सब प्रकार प्राप्त होते हो और अन्य **(पथः)** मार्गों को प्राप्त होते हो और जैसे **(मधुमन्तम्)** मधुर आदि गुणों से युक्त **(दृतिम्)** जल के चर्मपात्र के सदृश वर्त्तमान मेघ को सूर्य्य और वायु **(वहेथे)** धारण करते हैं, वैसे इस व्यवहार को धारण करो॥ ३॥

भावार्थः-हे सेना के ईश और योद्धाजनो! तुम सेनास्थ वीरों के साथ ऐसे भोजन करो और वाहनों को रचो जिनसे बल की वृद्धि और लक्ष्मी की प्राप्ति हो, जैसे वायु और बिजुली वर्षा करके सबको सुखी करते हैं, वैसे प्रजा को सुखी करो॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः।

उदप्रुतो मन्दिनो मन्दिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः॥ ४॥

हंसासः। ये। वाम्। मधुऽमन्तः। अस्रिधः। हिरण्यऽपर्णाः। उहुवः। उषःऽबुधः। उदऽप्रुतः। मन्दिनः। मन्दिऽनिस्पृशः। मध्वः। न। मक्षः। सवनानि। गच्छथः॥ ४॥

पदार्थः-(हंसासः) हंस इव सद्यो गन्तारोऽश्वाः। **हंसास इत्यश्वनामसु पठितम्।** (निघं०१.१४) **(ये)** **(वाम्)** युवयोः **(मधुमन्तः)** मधुगत्योपेताः **(अस्रिधः)** अहिंसिताः **(हिरण्यपर्णाः)** हिरण्यानि पर्णाः पक्षा येषान्ते **(उहुवः)** भाराणां वोढारः **(उषर्बुधः)** उषसि बोधयुक्ताः **(उदप्रुतः)** उदकस्य गमयितारः **(मन्दिनः)** आनन्दयितारः **(मन्दिनिस्पृशः)** आनन्दस्य स्पर्शयितारः **(मध्वः)** मधुनः **(न)** इव **(मक्षः)** मक्षिराजः **(सवनानि)** ऐश्वर्याणि **(गच्छथः)**॥४॥

अन्वयः-हे राजसेनेशौ! वां ये मधुमन्तोऽस्रिधो हिरण्यपर्णा उषर्बुध उहुव उदप्रुतो मन्दिनः मन्दिनिस्पृशो मध्वो मक्षो न हंसासः सन्ति तैः सवनानि युवां गच्छथः॥४॥

भावार्थः-हे राजपुरुषा! भवन्तो यानयन्त्रेष्वग्निजलादिसम्प्रयोगात् सद्योगत्वाऽऽगत्यैश्वर्य्यं चिकीर्षेयुस्तर्हि किं रत्नं नोपलभेरन्॥४॥

पदार्थः-हे राजा और सेना के ईश जन! **(वाम्)** आप दोनों के **(ये)** जो **(मधुमन्तः)** मधुर गमन से युक्त **(अस्रिधः)** नहीं मारे गये **(हिरण्यपर्णाः)** तेजमय वा सुवर्ण आदि से बने हुए पंख जिनके **(उषर्बुधः)** जो प्रातःकाल में बोध से युक्त **(उहुवः)** भारों के ले चलने **(उदप्रुतः)** जल के चलाने **(मन्दिनः)** आनन्द के देने और **(मन्दिनिस्पृशः)** आनन्द के स्पर्श कराने वाले **(मध्वः)** मधुर पदार्थ के सम्बन्ध में **(मक्षः)** मक्षियों के राजा के **(न)** सदृश **(हंसासः)** तथा हंस के सदृश शीघ्र चलने वाले घोड़े हैं उनसे **(सवनानि)** ऐश्वर्य्यों को आप दोनों **(गच्छथः)** प्राप्त होते हैं॥४॥

भावार्थः-हे राजपुरुषो! आप लोग वाहनों की कलों में अग्निजलादि के संप्रयोग से शीघ्र आ आकर ऐश्वर्य्य की इच्छा करें तो क्या रत्न को न प्राप्त होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्वध्वरासो मधुमन्तो अग्नय उस्रा जरन्ते प्रति वस्तोरश्विना।

यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमन्तमद्रिभिः॥५॥

सुऽअध्वरासः। मधुऽमन्तः। अग्नयः। उस्रा। जरन्ते। प्रति। वस्तोः। अश्विना। यत्। निक्तऽहस्तः। तरणिः। विऽचक्षणः। सोमम्। सुषाव। मधुऽमन्तम्। अद्रिऽभिः॥५॥

पदार्थः-(स्वध्वरासः) सुष्ठ्वध्वराः क्रियायोगसिद्धयो येभ्यस्ते **(मधुमन्तः)** मधुरादिरसोपेताः **(अग्नयः)** पावकाः **(उस्रा)** रश्मीन्। **उस्रा इति रश्मिनामसु पठितम्।** (निघं०१.५) **(जरन्ते)** स्तुवन्ति **(प्रति)** **(वस्तोः)** दिनस्य **(अश्विना)** राजाऽमात्यौ **(यत्)** यः **(निक्तहस्तः)** शुद्धहस्तः **(तरणिः)** दुःखेभ्यस्तारकः **(विचक्षणः)** अतीव धीमान् **(सोमम्)** ओषधिसमूहम् **(सुषाव)** सुनोति **(मधुमन्तम्)** मधुरादिगुणोपेतम् **(अद्रिभिः)** मेघैः॥५॥

अन्वयः-हे अश्विना! यथा प्रति वस्तोः स्वध्वरासो मधुमन्तोऽग्नय उस्रा जरन्ते यद्यो निक्तहस्तस्तरणिर्विचक्षणोऽद्रिभिर्मधुमन्तं सोमं सुषाव ताँस्तञ्च युवां साध्नुतम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं शिल्पिनां विदुषां सङ्गेनाऽग्न्यादिसोमलतादीन् पदार्थान् विज्ञाय सम्प्रयोज्याऽभीष्टानि कार्य्याणि साध्नुत॥५॥

पदार्थः-हे **(अश्विना)** राजा और मन्त्री जनो! जैसे **(प्रति, वस्तोः)** प्रतिदिन की **(स्वध्वरासः)** उत्तम प्रकार क्रियायोगों की सिद्धियाँ जिनसे वे **(मधुमन्तः)** मधुर आदि गुणों से युक्त **(अग्नयः)** अग्नि **(उस्रा)** किरणों की **(जरन्ते)** स्तुति करते अर्थात् उन्हें प्रशंसित करते हैं और **(यत्)** जो **(निक्तहस्तः)** शुद्ध हाथों युक्त **(तरणिः)** दुःखों से पार करने वाला **(विचक्षणः)** अत्यन्त बुद्धिमान् **(अद्रिभिः)** मेघों से **(मधुमन्तम्)** मधुर आदि गुणयुक्त **(सोमम्)** ओषधियों के समूह को **(सुषाव)** उत्पन्न करता है, उन और उसको आप दोनों सिद्ध करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग शिल्पी विद्वानों के सङ्ग से अग्नि आदि और सोमलता आदि पदार्थों को जान के और अच्छे प्रकार प्रयोग करके अभीष्ट कार्य्यों को सिद्ध करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ॒के॒नि॒पासो॒ अह॑भि॒र्दवि॑ध्वत॒: स्व॑र्ण॒ शुक्रं॑ त॒न्वन्त॒ आ रज॑:।
सूर॑श्चि॒दश्वा॑न् युयुजा॒न ई॑यते॒ विश्वाँ॒ अनु॑ स्व॒धया॑ चेतथस्प॒थ:॥६॥

आ॒के॒ऽनि॒पास॑:। अह॑ऽभिः। दवि॑ध्वतः। स्व॑:। न। शु॒क्रम्। त॒न्व॑न्त॑:। आ। रज॑:। सूर॑:। चि॒त्। अश्वा॑न्। यु॒यु॒जा॒नः। ई॒य॒ते॒। विश्वा॑न्। अनु॑। स्व॒धया॑। चे॒त॒थ॒:। प॒थः॥६॥

पदार्थः-**(आकेनिपासः)** य आके समीपे नितरां पान्ति ते किरणाः **(अहभिः)** दिनैः। अत्र **वाच्छन्दसी**ति रुत्वाभावो नलोपश्च। **(दविध्वतः)** पदार्थान् ध्वंसयन्तः **(स्वः)** आदित्यः **(न)** इव **(शुक्रम्)** जलम् **(तन्वन्तः)** विस्तारयन्तः **(आ)** **(रजः)** लोकम् **(सूरः)** सूर्य्यः **(चित्)** **(अश्वान्)** आशुगामिनः किरणान् **(युयुजानः)** युक्तान् कुर्वन् **(ईयते)** गच्छति **(विश्वान्)** सर्वान् **(अनु)** **(स्वधया)** अन्नादिना **(चेतथः)** ज्ञापयथः **(पथः)** मार्गान्॥६॥

अन्वयः-हे क्रियाकुशलौ याननिर्मातृप्रचालकौ! युवां यथाहभिर्दविध्वत आकेनिपासः किरणाः शुक्रं रजश्चातन्वन्तः स्वर्ण विराजन्ते यथा कश्चित् सूरश्चिदश्वान् युयुजान ईयते तथा युवां स्वधया विश्वान् पदार्थान् विज्ञाय पथोऽनु चेतथः॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यदि यूयं किरणवत्सूर्य्यवद्यानेष्वग्निना जलं तनुत तर्हि जलस्थलान्तरिक्षमार्गान् सुखेन गच्छथः॥६॥

पदार्थः-हे क्रियाओं में कुशल वाहनों के बनाने और चलाने वाले! आप दोनों जैसे **(अहभिः)** दिनों से **(दविध्वतः)** पदार्थों का नाश करती हुईं **(आकेनिपासः)** समीप में अत्यन्त पालन करने वाली किरणें **(शुक्रम्)** जल और **(रजः)** लोक को **(आ, तन्वतः)** विस्तारयुक्त करते हुए **(स्वः)** सूर्य्य के **(न)** सदृश प्रकाशित होते हैं वा जैसे कोई **(सूरः)** सूर्य्य **(चित्)** भी **(अश्वान्)** शीघ्र चलने वाले किरणों को **(युयुजानः)** युक्त करता **(ईयते)** प्राप्त होता है, वैसे आप दोनों **(स्वधया)** अन्न आदि से **(विश्वान्)** सम्पूर्ण पदार्थों को जान के **(पथः)** मार्गों को **(अनु, चेतथः)** अनुकूल जनाते हो॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जो आप लोग किरणों और सूर्य्य के सदृश वाहनों में अग्नि से जल को विस्तारो तो जल, स्थल और आकाशमार्गों को सुख से जाओ॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र वाᳪमवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति।

येन सद्यः परि रजाᳪसि याथो हविष्मन्तं तरणिं भोजमच्छ॥७॥२१॥४॥

प्र। वाम्। अवोचम्। अश्विना। धियम्धाः। रथः। सुऽअश्वः। अजरः। यः। अस्ति। येन। सद्यः। परि। रजाᳪसि। याथः। हविष्मन्तम्। तरणिम्। भोजम्। अच्छ॥७॥

पदार्थः-(प्र) (वाम्) युवाम् **(अवोचम्)** उपदिशेयम् **(अश्विना)** अध्यापकोपदेशकौ **(धियन्धाः)** यो धियं प्रज्ञां शिल्पविद्यां कर्म दधाति **(रथः)** रमणीययानः **(स्वश्वः)** शोभनाश्वः **(अजरः) (यः) (अस्ति) (येन) (सद्यः)** शीघ्रम् **(परि) (रजांसि)** लोकानैश्वर्य्याणि वा **(याथः)** गच्छथः **(हविष्मन्तम्)** बहुसामग्रीयुक्तम् **(तरणिम्)** तारकम् **(भोजम्)** भोक्तुं योग्यम् **(अच्छ)**॥७॥

अन्वयः-हे अश्विना! यः स्वश्वोऽजरो रथोऽस्ति तद्विद्या धियन्धा अहं वां प्रावोचं येन युवां हविष्मन्तं तरणिं भोजं रजांसि सद्योऽच्छ परियाथः॥७॥

भावार्थः-हे मनुष्या! विद्वांसो वयं युष्मान् याः शिल्पविद्या ग्राहयेम ताभिर्यूयं विमानादीनि यानानि निर्माय सद्यो गमनागमने कृत्वा पुष्कलान् भोगान् प्राप्नुतेति॥७॥

अत्र सूर्याश्विगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चचत्वारिंशत्तमं सूक्तमेकविंशो वर्गश्चतुर्थोऽनुवाकश्च समाप्तः॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक जनो! **(यः)** जो **(स्वश्वः)** उत्तमोत्तम घोड़ों से युक्त **(अजरः)** वृद्धावस्थारहित **(रथः)** सुन्दर वाहन **(अस्ति)** है उसकी विद्या को **(धियन्धाः)** बुद्धि अर्थात शिल्पविद्या रूप कर्म को धारण करने वाला मैं **(वाम्)** आप दोनों को **(प्र, अवोचम्)** उत्तम उपदेश करूं **(येन)** जिससे आप दोनों **(हविष्मन्तम्)** बहुत सामग्री से युक्त **(तरणिम्)** तारने वाले

(भोजम्) खाने योग्य पदार्थ और **(रजांसि)** लोक वा ऐश्वर्य्यों को **(सद्यः)** शीघ्र **(अच्छ)** उत्तम प्रकार **(परि, याथः)** सब ओर से प्राप्त होते हैं॥७॥

भावार्थः–हे मनुष्यो! विद्वान् हम लोग आप लोगों को जिन शिल्पविद्याओं का ग्रहण करावें, उन विद्याओं से आप लोग विमान आदि वाहनों को रच शीघ्र गमन और आगमन को करके बहुत भोगों को प्राप्त होओ॥७॥

इस सूक्त में सूर्य्य और अश्वि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैंतालीसवां सूक्त और इक्कीसवां वर्ग और चौथा अनुवाक समाप्त हुआ॥

अथ सप्तर्चस्य षट्चत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्रवायू देवते। १ विराड् गायत्री। २, ३, ५-७ गायत्री। ४ निचृद्गायत्री छन्दः। षड्जः स्वरः॥

अथ विद्युद्विद्याविषयमाह॥

अब सात ऋचा वाले छियालीसवें सूक्त का आरम्भ हैं उसके प्रथम मन्त्र में बिजुली की विद्या के विषय को कहते हैं॥

अग्रं॑ पिबा॒ मधू॑नां सु॒तं वा॑यो॒ दिवि॑ष्टिषु। त्वं हि पू॒र्व॒पा असि॑॥ १॥

अग्र॑म्। पि॒ब॒। मधू॑नाम्। सु॒तम्। वा॒यो॒। इति॑। दिवि॑ष्टिषु। त्वम्। हि। पू॒र्व॒ऽपाः। असि॑॥ १॥

पदार्थः-(अग्रम्) उत्तमम् **(पिबा)।** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मधूनाम्)** मधुराणां रसानां मध्ये **(सुतम्)** निष्पादितम् **(वायो)** वायुरिव बलिष्ठ **(दिविष्टिषु)** दिव्यासु क्रियासु **(त्वम्)** **(हि)** यतः **(पूर्वपाः)** यः पूर्वान् पाति सः **(असि)**॥ १॥

अन्वयः-हे वायो! हि त्वं दिविष्टिषु पूर्वपा असि तस्मान्मधूनामग्रं सुतं रसं पिबा॥ १॥

भावार्थः-हे विद्वन्! यतस्त्वं सनातनीर्विद्या रक्षित्वा सर्वेभ्यो ददासि तस्माद्भवानेतासु क्रियास्वग्रगण्यो भवति॥ १॥

पदार्थः-हे **(वायो)** वायु के सदृश बलयुक्त **(हि)** जिससे **(त्वम्)** आप **(दिविष्टिषु)** श्रेष्ठ क्रियाओं में **(पूर्वपाः)** पूर्व वर्त्तमान जनों का पालन करने वाले **(असि)** हो इससे **(मधूनाम्)** मधुर रसों के बीच में **(अग्रम्)** उत्तम **(सुतम्)** उत्पन्न किये गये रस का **(पिबा)** पान कीजिये॥ १॥

भावार्थः-हे विद्वन्! जिससे आप सनातन विद्याओं की रक्षा करके सब के लिये देते हो, इससे आप इन क्रियाओं में मुखिया होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

श॒तेना॑ नो अ॒भिष्टि॑भिर्नि॒युत्वाँ॑ इन्द्र॑सारथिः। वायो॑ सु॒तस्य॑ तृम्पतम्॥ २॥

श॒तेन॑। न॒ः। अ॒भिष्टि॑ऽभिः। नि॒युत्वा॑न्। इन्द्र॑ऽसारथिः। वायो॒ इति॑। सु॒तस्य॑। तृ॒म्प॒त॒म्॥ २॥

पदार्थः-(शतेना) असङ्ख्येन। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मान् **(अभिष्टिभिः)** अभीष्टाभिः क्रियाभिः **(नियुत्वान्)** बलवान् समर्थो वायुः **(इन्द्रसारथिः)** इन्द्रो विद्युत् सारथिर्यस्य सः **(वायो)** वायुवद्वर्त्तमान विज्ञानयुक्त **(सुतस्य)** निष्पादितस्य **(तृम्पतम्)**॥ २॥

अन्वयः-हे वायो वायुवद्वर्त्तमानविज्ञानयुक्ताध्यापकोपदेशकावभिष्टिभिर्यथेन्द्रसारथिर्नियुत्वाञ्छतेना नोऽस्मान् तर्पयति तथा सुतस्य च युवां तृम्पतम्॥ २॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा वायुना सह विद्युद्विद्युता सह वायुश्चानेकाः क्रिया जनयतस्तथा पृथिवीजलादिभिर्यूयमनेकानि कार्य्याणि साध्नुत॥२॥

पदार्थः–हे **(वायो)** वायुवद्वर्त्तमान विज्ञानयुक्त अध्यापक और उपदेशक! **(अभिष्टिभिः)** अभीष्ट क्रियाओं से जैसे **(इन्द्रसारथिः)** बिजुलीरूप सारथि जिसका वह **(नियुत्वान्)** बलवान् समर्थ वायु **(शतेना)** असङ्ख्य से **(नः)** हम लोगों को तृप्त करता है, वैसे **(सुतस्य)** उत्पन्न किये गये के सम्बन्ध में आप दोनों **(तृम्पतम्)** तृप्त होओ॥२॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे वायु के साथ बिजुली, बिजुली के साथ वायु अनेक क्रियाओं को उत्पन्न करते हैं, वैसे पृथिवी और जलादिकों से आप अनेक कार्य्यों को सिद्ध करो॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ वां॑ स॒हस्रं॑ हर॑य॒ इन्द्र॑वायू अ॒भि प्रय॑ः। वह॑न्तु॒ सोम॑पीतये॥३॥

आ॑। वा॒म्। स॒हस्र॑म्। हर॑यः। इन्द्र॑वायू॒ इति॑। अ॒भि। प्रय॑ः। वह॑न्तु। सोम॑ऽपीतये॥३॥

पदार्थः-(आ) (वाम्) युवाम् **(सहस्रम्)** असङ्ख्यम् **(हरयः)** हरणशीला मनुष्याः **(इन्द्रवायू)** सूर्य्यपवनौ **(अभि) (प्रयः)** कमनीयम् **(वहन्तु) (सोमपीतये)** सोमस्य पानाय॥३॥

अन्वयः-हे इन्द्रवायू! ये हरयो वां सोमपीतये सहस्रं प्रय आवहन्तु तान् युवामभिबोधयतम्॥३॥

भावार्थः–हे मनुष्या! ये विद्वांसो युष्मानध्याप्य सुशिक्ष्य विदुषः कुर्वन्ति तान् सततं सेवध्वम्॥३॥

पदार्थः–हे **(इन्द्रवायू)** सूर्य्य और पवन! जो **(हरयः)** हरने वाले मनुष्य **(वाम्)** आप दोनों को **(सोमपीतये)** सोमलता के पान करने के लिये **(सहस्रम्)** असंख्य **(प्रयः)** मनोहर भाव जैसे हों वैसे **(आ, वहन्तु)** प्राप्त करें, उनको आप दोनों **(अभि)** सब ओर से बोध दीजिये॥३॥

भावार्थः–हे मनुष्यो! जो विद्वान् जन आप लोगों को पढ़ाय और उत्तम प्रकार शिक्षा देकर विद्वान् करते हैं, उनकी निरन्तर सेवा करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

रथ॑ं हिर॑ण्यवन्धु॒रमिन्द्र॑वायू स्वध्व॒रम्। आ हि स्थाथो॑ दिवि॒स्पृश॑म्॥४॥

रथ॑म्। हिर॑ण्यऽवन्धुरम्। इन्द्र॑वायू॒ इति॑। सु॒ऽअ॒ध्व॒रम् आ। हि। स्थाथ॑ः। दि॒वि॒ऽस्पृश॑म्॥४॥

पदार्थः-(रथम्) रमणीयं यानम् **(हिरण्यवन्धुरम्)** हिरण्यानि सुवर्णानि वन्धुराणि बन्धनानि यस्मिंस्तम् **(इन्द्रवायू)** वायुविद्युद्वच्छीघ्रकारिणौ शिल्पविद्याऽध्यापकोपदेशकौ **(स्वध्वरम्)** सुष्ठ्वध्वरा अहिंसिता क्रिया यस्मात्तम् **(आ) (हि) (स्थाथः)** भवथः **(दिविस्पृशम्)** दिवि स्पृशति येन तम्॥४॥

अन्वयः-हे इन्द्रवायू! युवां स्वध्वरं हिरण्यवन्धुरं दिविस्पृशं रथं ह्यास्थाथः॥४॥

भावार्थः-हे अध्यापकोपदेशका! भवन्तः प्रीत्या सुवर्णादिजटितानां यानानां विद्यां मनुष्येभ्यः सततमुपदिशन्तु यैरेतेऽन्तरिक्षादिषु गन्तुं शक्नुयुः॥४॥

पदार्थः-हे **(इन्द्रवायू)** वायु और बिजुली के सदृश शीघ्रकारी शिल्पविद्या के अध्यापक और उपदेशक जनो! आप दोनों **(स्वध्वरम्)** नहीं नष्ट हुई उत्तम क्रिया जिससे और **(हिरण्यवन्धुरम्)** सुवर्ण हैं बन्धन जिसमें उस **(दिविस्पृशम्)** आकाश में चलने वाले **(रथम्)** सुन्दर वाहन को **(हि)** ही **(आ, स्थाथः)** आ स्थित होओ॥४॥

भावार्थः-हे अध्यापक और उपदेशक जनो! आप लोग प्रीति से सुवर्ण आदि से जड़े हुए वाहनों की विद्या का मनुष्यों के लिये निरन्तर उपदेश देओ कि जिन वाहनों से ये लोग अन्तरिक्ष आदिकों में जा सकें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

रथेन पृथुपाजसा दाश्वांसमुप गच्छतम्। इन्द्रवायू इहा गतम्॥५॥

रथेन। पृथुऽपाजसा। दाश्वांसम्। उप। गच्छतम्। इन्द्रवायू इति। इह। आ। गतम्॥५॥

पदार्थः-(रथेन) रमणीयेन यानेन **(पृथुपाजसा)** विस्तीर्णबलेन **(दाश्वांसम्)** दातारम् **(उप) (गच्छतम्) (इन्द्रवायू)** वायुविद्युदग्नी इव राजसेनेशौ **(इह)** अस्मिन् सङ्ग्रामे **(आ) (गतम्)**॥५॥

अन्वयः-हे इन्द्रवायू इव प्रतापिनौ राजसेनेशौ! युवां पृथुपाजसा रथेनेहाऽऽगतं दाश्वांसमुपगच्छतम्॥५॥

भावार्थः-यथा वायुविद्युतौ महाप्रतापयुक्तौ वर्त्तेते तथैव राजाऽमात्यौ भवेताम्॥५॥

पदार्थः-हे **(इन्द्रवायू)** वायु और बिजुलीरूप अग्नि के सदृश प्रतापी राजा और सेना के ईश जनो! आप दोनों **(पृथुपाजसा)** विस्तीर्ण बलयुक्त **(रथेन)** रमणीय वाहन से **(इह)** इस संग्राम में **(आ, गतम्)** आओ और **(दाश्वासंम्)** दाता जन के **(उप, गच्छतम्)** समीप प्राप्त होओ॥५॥

भावार्थः-जैसे वायु और बिजुली बड़े प्रताप से युक्त वर्त्तमान हैं, वैसे ही राजा और मन्त्रीजन होवें॥५॥

अथ सूर्य्ययुक्तवायुविषयमाह॥

अब सूर्य्ययुक्त वायु विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॑वायू अ॒यं सु॒तस्तं दे॒वेभिः॒ स॒जोष॑सा। पिब॑तं दा॒शुषो॑ गृ॒हे॥६॥

इन्द्र॑वायू॒ इति॑। अ॒यम्। सु॒तः। तम्। दे॒वेभिः॑। स॒ऽजोष॑सा। पिब॑तम्। दा॒शुषः॑। गृ॒हे॥६॥

पदार्थः-(इन्द्रवायू) सूर्य्यवायू इवाध्यापकोपदेशकौ **(अयम्)** **(सुतः)** निष्पादितः **(तम्)** **(देवेभिः)** विद्वद्भिर्दिव्यैः पदार्थैर्वा **(सजोषसा)** समानप्रीतिकामौ **(पिबतम्)** **(दाशुषः)** दातुः **(गृहे)**॥६॥

अन्वयः-हे सजोषसेन्द्रवायू! योऽयं दाशुषो गृहे सुतस्तं देवेभिस्सह यथा पिबतं तथैव सूर्य्यवायू सर्वेभ्यो रसं पिबतः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽर्कपवनौ सर्वेषामुपकारं सततं कुरुतस्तथैव विद्वद्भिरनुष्ठेयम्॥६॥

पदार्थः-हे **(सजोषसा)** तुल्य प्रीति की कामना करने वाले **(इन्द्रवायू)** सूर्य्य और वायु के सदृश अध्यापक और उपदेशको! जो **(अयम्)** यह **(दाशुषः)** दाता जन के **(गृहे)** गृह में **(सुतः)** उत्पन्न किया गया **(तम्)** उसको **(देवेभिः)** विद्वानों वा श्रेष्ठ पदार्थों के साथ जैसे **(पिबतम्)** पान करो, वैसे ही सूर्य्य और वायु सब से रस पीते हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य और पवन सब के उपकार को निरन्तर करते हैं, वैसे ही विद्वानों को करना चाहिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒ह प्र॒याण॑मस्तु वा॒मिन्द्र॑वायू वि॒मोच॑नम्। इ॒ह वां॑ सोम॑पीतये॥७॥२२॥

इ॒ह। प्र॒ऽयान॑म्। अ॒स्तु॒। वा॒म्। इन्द्र॑वायू॒ इति॑। वि॒ऽमोच॑नम्। इ॒ह। वा॒म्। सोम॑ऽपीतये॥७॥

पदार्थः-(इह) अस्मिन् **(प्रयाणम्)** गमनम् **(अस्तु)** **(वाम्)** युवयोः **(इन्द्रवायू)** वायुविद्युद्वर्त्तमानौ राजाऽमात्यौ **(विमोचनम्)** **(इह)** **(वाम्)** युवयोः **(सोमपीतये)** सोमस्य पानाय॥७॥

अन्वयः-हे इन्द्रवायू! यथेह वां प्रयाणमस्तु यथेह वां सोमपीतये विमोचनमस्तु तथैव वायुविद्युतौ वर्त्तेत इति विजानीतम्॥७॥

भावार्थः-हे मनुष्या! यो नित्यमितस्ततः कार्य्यसिद्धये गच्छेदागच्छेत्तमेव राजानं मन्यध्वमिति॥७॥

अत्रेन्द्रवायुगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेद्यम्॥

इति षट्चत्वारिंशत्तमं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्रवायू)** वायु और बिजुली के सदृश वर्त्तमान राजा और मन्त्री जनो! जैसे **(इह)** इस में **(वाम्)** आप दोनों का **(प्रयाणम्)** गमन **(अस्तु)** हो और जैसे **(इह)** इस में **(वाम्)** आप दोनों का

(सोमपीतये) सोमपान के लिये **(विमोचनम्)** त्याग हो, वैसे ही वायु और बिजुली वर्त्तमान हैं, ऐसा जानो॥७॥

भावार्थः-हे मनुष्यो! जो नित्य इधर उधर कार्य्यसिद्धि के लिय जावे और आवे उसी को राजा मानो॥७॥

इस सूक्त में बिजुली और वायु के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह छियालीसवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

अथ चतुर्ऋचस्य सप्तचत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। १ वायुः। २-४ इन्द्रवायू देवते। १, ३ अनुष्टुप्। ४ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। २ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः॥

अथ वायुसादृश्येन विद्वद्गुणानाह॥

अब चार ऋचा वाले सैंतालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में वायुसादृश्य से विद्वानों के गुणों को कहते हैं॥

वायो॑ शु॒क्रो अ॑यामि ते॒ मध्वो॑ अग्रं॒ दिवि॑ष्टिषु।

आ या॑हि॒ सोम॑पीतये स्पा॒र्हो दे॑व नि॒युत्व॑ता॥ १॥

वायो॒ इति॑। शु॒क्रः। अ॒या॒मि॒। ते॒। मध्व॑ः। अग्र॑म्। दिवि॑ष्टिषु। आ। या॒हि॒। सोम॑ऽपीतये। स्पा॒र्हः। दे॒व॒। नि॒युत्व॑ता॥ १॥

पदार्थः-(वायो) (शुक्रः) शुद्धस्वभावः **(अयामि)** प्राप्नोमि **(ते)** तव **(मध्वः)** मधुरस्य **(अग्रम्) (दिविष्टिषु)** प्रकाशे स्थितासु क्रियासु **(आ) (याहि) (सोमपीतये)** उत्तमरसपानाय **(स्पार्हः)** स्पर्हणीयः **(देव) (नियुत्वता)** प्रभुणा राज्ञा सह॥ १॥

अन्वयः-हे देव वायो! स्पार्हः शुक्रोऽहं दिविष्टिषु नियुत्वता सह सोमपीतये ते मध्वोऽग्रं यथायामि तथा त्वमायाहि॥ १॥

भावार्थः-ये वायुवत्सर्वत्र विहृत्य विद्याग्रहणं कुर्वन्ति ते सर्वत्र स्पर्हणीया जायन्ते॥ १॥

पदार्थः-हे **(देव)** विद्वन् **(वायो)** वायु के सदृश वर्त्तमान! **(स्पार्हः)** ईप्सा करने योग्य **(शुक्रः)** शुद्ध स्वभाव वाला मैं **(दिविष्टिषु)** प्रकाश के बीच जो स्थित क्रिया उनमें **(नियुत्वता)** समर्थ राजा के साथ **(सोमपीतये)** उत्तम रस के पान के लिये **(ते)** आपके **(मध्वः)** मधुर रस के **(अग्रम्)** अग्रभाग को जैसे **(अयामि)** प्राप्त होता हूँ, वैसे आप **(आ, याहि)** प्राप्त होओ॥ १॥

भावार्थः-जो वायु के सदृश सर्वत्र विहार करके विद्या का ग्रहण करते हैं, वे सर्वत्र ईप्सा करने योग्य होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॑श्च वायवेषां॒ सोमा॑नां पी॒तिम॑र्हथः।

यु॒वां हि यन्तीन्द॑वो नि॒म्नमापो॒ न स॒ध्र्य॑क्॥ २॥

इन्द्रः॑। च॒। वा॒यो॒ इति॑। ए॒षा॒म्। सोमा॑नाम्। पी॒तिम्। अ॒र्ह॒थः॒। यु॒वाम्। हि। यन्ति॑। इन्द॑वः। नि॒म्नम्। आपः॑। न। स॒ध्र्य॑क्॥ २॥

पदार्थः-(इन्द्रः) परमैश्वर्य्यवान् **(च)** **(वायो)** बलयुक्त **(एषाम्)** **(सोमानाम्)** ओषध्युत्पन्नानां रसानाम् **(पीतिम्)** पानम् **(अर्हथः)** **(युवाम्)** **(हि)** **(यन्ति)** **(इन्दवः)** सङ्गन्तारः पूजनीयाः। **इन्दुरिति यज्ञनामसु पठितम्।** (निघं०३.१७) **(निम्नम्)** **(आपः)** **(न)** इव **(सध्र्यक्)** यः सहाञ्चति॥२॥

अन्वयः-हे वायो! त्वमिन्द्रश्च युवामापो निम्नं न यथेन्दवः सध्र्यक् यन्ति तथा हि युवामेषां सोमानां पीतिमर्हथः॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा यज्ञा अपो गच्छन्ति तथैव विद्वांसो विद्याव्यवहारमर्हन्ति॥२॥

पदार्थः-हे **(वायो)** बल से युक्त! आप **(च)** और **(इन्द्रः)** अत्यन्त ऐश्वर्यवान् **(युवाम्)** आप दोनों **(आपः)** जैसे जल **(निम्नम्)** नीचे के स्थल के **(न)** वैसे जिस प्रकार **(इन्दवः)** मिलने वाले और सत्कार करने योग्य जन और **(सध्र्यक्)** एक साथ सत्कार करने वाला ये सब **(यन्ति)** प्राप्त होते हैं **(हि)** उसी प्रकार आप दोनों **(एषाम्)** इन **(सोमानाम्)** ओषधियों से उत्पन्न हुए रसों के **(पीतिम्)** पान के **(अर्हथः)** योग्य हैं॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे यज्ञ जलों को प्राप्त होते हैं, वैसे ही विद्वान् विद्याव्यवहार के योग्य होते हैं॥२॥

अथ राजामात्यगुणानाह॥

अब राजा और अमात्य के गुणों को अगले मन्त्र में कहते हैं॥

वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती।

नियुत्वन्ता न ऊतय आ यातं सोमपीतये॥३॥

वायो इति। इन्द्रः। च। शुष्मिणा। सऽरथम्। शवसः। पती इति। नियुत्वन्ता। नः। ऊतये। आ। यातम्। सोमऽपीतये॥३॥

पदार्थः-(वायो) महाबल **(इन्द्रः)** राजा **(च)** **(शुष्मिणा)** बलिष्ठौ **(सरथम्)** समानं यानम् **(शवसः)** बलस्य **(पती)** पालकौ **(नियुत्वन्ता)** प्रभुसमर्थौ **(नः)** अस्माकम् **(ऊतये)** रक्षणाय **(आ)** **(यातम्)** **(सोमपीतये)** ऐश्वर्य्यपालनाय॥३॥

अन्वयः-हे शुष्मिणा शवसस्पती नियुत्वन्ता वायविन्द्रश्च न ऊतये सोमपीतये सरथमायातम्॥३॥

भावार्थः-हे मनुष्या! ये राज्ञोऽमात्याश्च बलवर्द्धिनः समर्था न्यायकारिणः स्युस्ते युष्माकं पालकाः सन्तु॥३॥

पदार्थः-हे **(शुष्मिणा)** बलयुक्त और **(शवसः)** बल के **(पती)** पालन करने वाले **(नियुत्वन्ता)** स्वामी और समर्थ **(वायो)** बड़े बल से युक्त **(इन्द्रः, च)** और राजा **(नः)** हम लोगों के **(ऊतये)** रक्षण

आदि के और **(सोमपीतये)** ऐश्वर्य्य के पालन के लिये **(सरथम्)** समान वाहन को **(आ, यातम्)** प्राप्त होओ॥३॥

भावार्थः-हे मनुष्यो! जो राजा के मन्त्री जन बल के बढ़ाने वाले सामर्थ्य युक्त और न्यायकारी होवें, वे आप लोगों के पालन करने वाले हों॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

या वां सन्ति पुरुस्पहो नियुतो दाशुषे नरा।
अस्मे ता यज्ञवाहसेन्द्रवायू नि यच्छतम्॥४॥२३॥

याः। वाम्। सन्ति। पुरुऽस्पहः। निऽयुतः। दाशुषे। नरा। अस्मे इति। ताः। यज्ञऽवाहसा। इन्द्रवायू इति। नि। यच्छतम्॥४॥

पदार्थः-(याः) **(वाम्)** युवयोः **(सन्ति)** **(पुरुस्पृहः)** बहुभिः स्पर्हणीयाः क्रियाः **(नियुतः)** निश्चितः **(दाशुषे)** दात्रे **(नरा)** नायकौ **(अस्मे)** अस्मभ्यम् **(ताः)** **(यज्ञवाहसा)** यज्ञप्रापकौ **(इन्द्रवायू)** धनिविद्वांसौ राजामात्यौ **(नि)** **(यच्छतम्)** नितरां दद्यातम्॥४॥

अन्वयः-हे यज्ञवाहसा नरेन्द्रवायू! वां या नियुतः पुरुस्पृहो दाशुषे सन्ति ता अस्मे नि यच्छतम्॥४॥

भावार्थः-हे राजाऽमात्या! युष्माभिरस्माकं प्रजाजनानामिच्छाः पूर्णाः कार्य्या यतो वयं युष्माकमलं कामं कुर्य्याम॥४॥

अत्र विद्वद्राजामात्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति बोध्यम्॥

इति सप्तचत्वारिंशत्तमं सूक्तं त्रयोविंशो वर्गश्च समाप्तः।

पदार्थः-हे **(यज्ञवाहसा)** यज्ञ को प्राप्त कराने वाले **(नरा)** नायक **(इन्द्रवायू)** धनी और विद्वान् तथा राजा और मन्त्री जनो! **(वाम्)** आप दोनों की **(याः)** जो **(नियुतः)** निश्चित **(पुरुस्पृहः)** बहुतों से ईप्सा करने योग्य क्रिया **(दाशुषे)** दाता जन के लिये **(सन्ति)** हैं **(ताः)** उन क्रियाओं को **(अस्मे)** हम लोगों के लिये **(नि, यच्छतम्)** अतिशय करके दीजिये॥४॥

भावार्थः-हे राजा और मन्त्री जनो! आप लोगों को चाहिये कि हम प्रजा जनों की इच्छा पूर्ण करें, जिससे हम लोग आप लोगों का पूर्ण काम करें॥४॥

इस सूक्त में विद्वान्, राजा और अमात्य के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति है, यह जानना चाहिये॥

यह सैंतालींसवाँ सूक्त और तेईसवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्याष्टचत्वारिंशत्तमस्य सूक्तस्य वामदेव ऋषिः। वायुर्देवता। १ निचृदनुष्टुप्। २ अनुष्टुप्। ३-५ भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः।

अथ राजा प्रजाभिः सह कथं वर्त्तेतित्याह॥

[अब पाँच ऋचावाले अड़तालीसवें सूक्त का आरम्भ है।] अब राजा प्रजा के साथ कैसे वर्ते, इस विषय को प्रथम मन्त्र में कहते हैं॥

वि॒हि होत्रा॒ अवी॑ता॒ विपो॒ न रायो॑ अ॒र्यः।

वायु॒वा च॒न्द्रेण॒ रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑॥ १॥

वि॒हि। होत्राः॑। अवी॑ताः। विपः॑। न। रायः॑। अ॒र्यः। वायो॒ इति॑। आ। च॒न्द्रेण॑। रथे॑न। या॒हि। सु॒तस्य॑। पी॒तये॑॥ १॥

पदार्थः-(विहि) व्याप्नुहि। अत्र **वाच्छन्दसी**ति ह्रस्वः। **(होत्राः)** आददानाः **(अवीताः)** नाशरहिताः **(विपः)** मेधावी **(न)** इव **(रायः)** धनानि **(अर्यः)** वैश्यः **(वायो)** विद्वन् **(आ) (चन्द्रेण)** सुवर्णमयेन **(रथेन)** यानेन **(याहि)** आगच्छ **(सुतस्य)** निष्पादितस्य **(पीतये)** रक्षणाय॥ १॥

अन्वयः-हे वायो विपस्त्वमर्यो रायो नावीता होत्रा विहि सुतस्य पीतये चन्द्रेण रथेनाऽऽयाहि॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा धीमान् वणिग्जनः प्रीत्या धनं रक्षति तथैव भवान् भवद्भृत्याश्च सम्प्रीत्या प्रजाः सततं रक्षन्तु॥ १॥

पदार्थः-हे **(वायो)** विद्वान् **(विपः)** बुद्धिमान्! आप **(अर्यः)** वैश्यजन **(रायः)** धनों के **(न)** जैसे वैसे **(अवीताः)** नाश से रहित क्रियाओं को **(होत्राः)** ग्रहण करते हुए **(विहि)** व्याप्त हूजिये और **(सुतस्य)** उत्पन्न किये रस की **(पीतये)** रक्षा के लिये **(चन्द्रेण)** सुवर्णमय **(रथेन)** वाहन से **(आ, याहि)** प्राप्त हूजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे बुद्धिमान् वैश्यजन प्रीति से धन की रक्षा करता है, वैसे ही आप और आपके भृत्यजन अच्छी प्रीति से प्रजाओं की निरन्तर रक्षा करो॥ १॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

नि॒र्यु॒वा॒णो अ॑शस्तीर्नि॒युत्वाँ॑ इन्द्र॑सारथिः।

वायु॒वा च॒न्द्रेण॒ रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑॥ २॥

नि॒ःऽयु॒वा॒नः। अ॒श॒स्तीः। नि॒युत्वा॑न्। इन्द्र॑ऽसारथिः। वायो॒ इति॑। आ। च॒न्द्रेण॑। रथे॑न। या॒हि। सु॒तस्य॑। पी॒तये॑॥ २॥

पदार्थः-(निर्युवाणः) निर्गता युवानो यस्मन्नितरां युवानो वा **(अशस्तीः)** अहिंसाः **(नियुत्वान्)** नियतगतिर्वायुः **(इन्द्रसारथिः)** इन्द्रस्य विद्युतः सूर्य्यस्याऽग्नेर्वा नियमेन गमयिता **(वायो)** वायुवद्गुणविशिष्ट **(आ)** **(चन्द्रेण)** आह्लादकेन सुवर्णादिजटितेन **(रथेन)** **(याहि)** आगच्छ **(सुतस्य)** निष्पन्नस्य रसस्य **(पीतये)** पानाय॥२॥

अन्वयः-हे वायो राजँस्त्वं नियुत्वानिन्द्रसारथिरिव चन्द्रेण रथेन सुतस्य पीतय आयाहि यथा निर्युवाणोऽशस्तीश्चरन्ति तथा चर॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायुनाग्निर्वर्धते सद्यो गच्छति तथैव न्यायेन पालितया प्रजया राजा वर्धते ये हिंसां नाचरन्ति तेऽजातशत्रवः सन्तः सर्वप्रिया भवन्ति॥२॥

पदार्थः-हे **(वायो)** वायु के सदृश गुणों से विशिष्ट राजन्! आप **(नियुत्वान्)** नियमयुक्त गमन वाले वायु के और **(इन्द्रसारथिः)** बिजुली सूर्य्य वा अग्नि को नियम से चलाने वाले के सदृश **(चन्द्रेण)** आनन्द देने वाले सुवर्ण आदि से जड़े हुए **(रथेन)** वाहन से **(सुतस्य)** उत्पन्न हुए रस के **(पीतये)** पान करने के लिये **(आ याहि)** आइये और जैसे **(निर्युवाणः)** निकल गये युवा जन जिससे वा निरन्तर युवाजन **(अशस्तीः)** अहिंसाओं का आचरण करते अर्थात् हिंसाओं को नहीं करते हैं, वैसे कीजिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायु से अग्नि बढ़ती और शीघ्र चलती है, वैसे ही न्याय से पालन की गई प्रजा से राजा वृद्धि को प्राप्त होता है और जो हिंसा नहीं करते हैं, वे शत्रुओं से रहित हुए सब के प्रिय होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अनु॑ कृ॒ष्णे वसु॑धिती ये॒माते॑ वि॒श्वपे॑शसा।

वायो॒वा च॒न्द्रेण रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑॥३॥

अनु॑। कृ॒ष्णे। इति॑। वसु॑धिती॒ इति॒ वसु॑ऽधिती। ये॒माते॒ इति॑। वि॒श्वऽपे॑शसा। वायो॒ इति॑। आ। च॒न्द्रेण॑। रथे॑न। या॒हि। सु॒तस्य॑। पी॒तये॑॥३॥

पदार्थः-(अनु) **(कृष्णे)** कर्षिते **(वसुधिती)** वसूनां धितिर्ययोर्द्यावापृथिव्योस्ते **(येमाते)** नियमेन गच्छतः **(विश्वपेशसा)** सर्वस्वरूपेण **(वायो)** राजन् **(आ)** **(चन्द्रेण)** रत्नजटितेन **(रथेन)** **(याहि)** **(सुतस्य)** **(पीतये)** रक्षणाय॥३॥

अन्वयः-हे वायो! यथा विश्वपेशसा कृष्णे वसुधिती अनु येमाते तथैव सुतस्य पीतये चन्द्रेण रथेन त्वमा याहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा भूमिसूर्य्यौ बहुफलदौ वर्त्तेते नियमेन गच्छतस्तथा बहुफलदो भूत्वा विद्याविनयनियमेन सततं गच्छेः॥३॥

पदार्थः-हे **(वायो)** राजन्! जैसे **(विश्वपेशसा)** सम्पूर्ण उत्तमरूप से **(कृष्णे)** खींची गई **(वसुधिती)** सम्पूर्ण लोकों की स्थिति जिनमें वे अन्तरिक्ष और पृथिवी **(अनु, येमाते)** नियम से चलती हैं, वैसे ही **(सुतस्य)** उत्पन्न किये गये पदार्थ की **(पीतये)** रक्षा के लिये **(चन्द्रेण)** रत्नों से जड़े हुए **(रथेन)** वाहन के द्वारा आप **(आ, याहि)** प्राप्त हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे भूमि और सूर्य्य बहुत फल देने वाले वर्त्तमान और नियम से चलते हैं, वैसे बहुत फलों के देने वाले होकर विद्या और विनय के नियम से निरन्तर जाइये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वहन्तु त्वा मनोयुजो युक्तासो नवतिर्नव।

वायवा चन्द्रेण रथेन याहि सुतस्य पीतये॥४॥

वहन्तु। त्वा। मनःऽयुजः। युक्तासः। नवतिः। नव। वायो इति। आ। चन्द्रेण। रथेन। याहि। सुतस्य। पीतये॥४॥

पदार्थः-(वहन्तु) प्राप्नुवन्तु प्रापयन्तु वा **(त्वा)** त्वां राजानम् **(मनोयुजः)** ये मनसा ब्रह्म युञ्जते ते **(युक्तासः)** कृतयोगाभ्यासाः **(नवतिः) (नव)** नवगुणिता **(वायो)** बलिष्ठ राजन् **(आ) (चन्द्रेण) (रथेन) (याहि) (सुतस्य)** प्राप्तस्य राज्यस्य **(पीतये)** रक्षणाय॥४॥

अन्वयः-हे वायो! मनोयुजो युक्तासो नव नवतिर्नाड्य इव त्वा वहन्तु त्वमेषां सुतस्य पीतये चन्द्रेण रथेनाऽऽयाहि॥४॥

भावार्थः-हे राजन्! यद्युत्तमा आप्तजनास्तव सहायाः स्युस्तर्हि भवान् यद्यदिच्छेत् तत्तत्सर्वं सिद्ध्येत्॥४॥

पदार्थः-हे **(वायो)** बलवान् राजन्! **(मनोयुजः)** मन से ब्रह्म का योग करने वाले **(युक्तासः)** जिन्होंने योगाभ्यास किया वे **(नव)** नौ वार गुनी गईं **(नवतिः)** नव्वे संख्या से युक्त नाड़ियो के सदृश **(त्वा)** आप राजा को **(वहन्तु)** प्राप्त हों वा प्राप्त करावें आप इनके **(सुतस्य)** प्राप्त राज्य के **(पीतये)** रक्षण आदि के लिये **(चन्द्रेण)** सुवर्ण आदि से बने हुए **(रथेन)** वाहन से **(आ, याहि)** आइये॥४॥

भावार्थः-हे राजन्! जो श्रेष्ठ यथार्थवक्ता जन आपके सहायक होवें तो आप जिस-जिस पदार्थ की इच्छा करें, वह-वह सब सिद्ध होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वायो॑ श॒तं हरी॑णां युवस्व॒ पोष्या॑णाम्।

उ॒त वा॑ ते सह॒स्रिणो॒ रथ॒ आ या॑तु पाज॑सा॥५॥२४॥

वायो॒ इति॑ श॒तम्। हरी॑णाम्। युव॒स्व॑। पोष्या॑णाम्। उ॒त। वा॒। ते॒। स॒ह॒स्रिण॑ः। रथ॑ः। आ। या॒तु॒। पाज॑सा॥५॥

पदार्थः-(वायो) (राजन्) (शतम्) असङ्ख्यम् **(हरीणाम्)** मनुष्याणाम् **(युवस्व)** कर्मसु प्रेर्स्व **(पोष्याणाम्)** पोषितुं योग्यानाम् **(उत) (वा) (ते)** तव **(सहस्रिणः)** असङ्ख्यपुरुषधनयुक्तस्य **(रथः) (आ) (यातु)** समन्तात्प्राप्नोतु **(पाजसा)** बलेन॥५॥

अन्वयः-हे वायो राजंस्त्वं पोष्याणां हरीणां शतं युवस्वोत वा सहस्रिणस्ते पाजसा रथ आयातु॥५॥

भावार्थः-हे राजन्! यदि राज्यं कर्त्तुमिच्छेस्तर्हि सुसहायान् गृहाणेति॥५॥

अत्र राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टाचत्वारिंशत्तमं सूक्तं चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वायो)** राजन्! आप **(पोष्याणाम्)** पोषण करने योग्य **(हरीणाम्)** मनुष्यों के **(शतम्)** असङ्ख्य को **(युवस्व)** कर्मों के बीच प्रेरणा देओ **(उत, वा)** अथवा **(सहस्रिणः)** असंख्य पुरुष और धन से युक्त **(ते)** आपके **(पाजसा)** बल से **(रथः)** वाहन **(आ, यातु)** सब ओर से प्राप्त हो॥५॥

भावार्थः-हे राजन्! जो राज्य करने की इच्छा करो तो उत्तम सहायों का ग्रहण करो॥५॥

इस सूक्त में राजगुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अड़तालीसवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

अथ षड्चस्यैकोनपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। इन्द्राबृहस्पती देवते। १ निचृद्गायत्री। २-६ गायत्री छन्दः। षड्जः स्वरः॥

अथ राजमनुष्याः कथं वर्धेरन्नित्याह॥

अब छः ऋचा वाले उनचासवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा और प्रजा की कैसे वृद्धि हो, इस विषय को कहते हैं॥

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते॥ १॥

इदम्। वाम्। आस्ये। हविः। प्रियम्। इन्द्राबृहस्पती इति। उक्थम्। मदः। च। शस्यते॥ १॥

पदार्थः-(इदम्) (वाम्) (आस्ये) मुखे **(हविः)** अत्तुमर्हं संस्कृतमन्नम् **(प्रियम्)** कमनीयम् **(इन्द्राबृहस्पती)** विद्युत्सूर्य्याविव प्रधानराजानौ **(उक्थम्)** प्रशंसनीयम् **(मदः)** आनन्दः **(च) (शस्यते)** स्तूयते॥ १॥

अन्वयः-हे इन्द्राबृहस्पती! वामास्य इदं प्रियमुक्थं मदश्च हविः शस्यते॥ १॥

भावार्थः-यदि राजादयो मनुष्याः सुसंस्कृतान्नं भुञ्जते तर्हि प्रकाशवन्तो दीर्घायुषो बलिष्ठाश्च जायन्ते॥ १॥

पदार्थः-हे **(इन्द्राबृहस्पती)** बिजुली और सूर्य्य के सदृश मन्त्री और राजा! **(वाम्)** आप दोनों के **(आस्ये)** सुख में **(इदम्)** यह **(प्रियम्)** सुन्दर **(उक्थम्)** प्रशंसा करने योग्य **(मदः)** आनन्द **(च)** और **(हविः)** खाने योग्य वस्तु **(शस्यते)** स्तुति किया जाता है॥ १॥

भावार्थः-जो राजा आदि मनुष्य उत्तम प्रकार संस्कारयुक्त अन्न को खाते हैं तो प्रकाशयुक्त अधिक अवस्था वाले और बलवान् होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अयं वां परि षिच्यते सोम इन्द्राबृहस्पती। चारुर्मदाय पीतये॥ २॥

अयम्। वाम्। परि। सिच्यते। सोमः। इन्द्राबृहस्पती इति। चारुः। मदाय पीतये॥ २॥

पदार्थः-(अयम्) (वाम्) युवयोः **(परि)** सर्वतः **(सिञ्चते) (सोमः)** महौषधिरसः **(इन्द्राबृहस्पती)** राजोपदेशकविद्वांसौ **(चारुः)** अत्युत्तमः **(मदाय)** आनन्दाय **(पीतये)** पानाय॥ २॥

अन्वयः-हे इन्द्राबृहस्पती! वामास्ये मदाय पीतये चारुः सोमोऽयं परिषिच्यतेऽनेन भवान्त्समर्थो भवेत्॥ २॥

भावार्थः-यथोत्तमाऽन्नं सेव्यते तथैव श्रेष्ठो रसोऽपि सेव्येत॥ २॥

पदार्थः-हे **(इन्द्राबृहस्पती)** राजा और उपदेशक विद्वान् जनो! **(वाम्)** आप दोनों के मुख में

(मदाय) आनन्द के लिये **(पीतये)** पान करने को **(चारुः)** अति उत्तम **(सोमः)** बड़ी ओषधि का रस **(अयम्)** यह **(परि)** सब प्रकार से **(सिच्यते)** सींचा जाता है, इससे आप समर्थ होवें॥२॥

भावार्थः-जैसे उत्तमान्न सेवन किया जाता, वैसे ही उत्तम रस भी सेवन किया जावे॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ नऽ इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम्। सोमपा सोमपीतये॥३॥

आ। नः। इन्द्राबृहस्पती इति। गृहम्। इन्द्रः। च। गच्छतम्। सोमपाऽपा। सोमऽपीतये॥३॥

पदार्थः-(आ) (नः) अस्माकम् **(इन्द्राबृहस्पती)** राजाऽध्यापकौ **(गृहम्) (इन्द्रः)** ऐश्वर्य्यवान् **(च) (गच्छतम्) (सोमपा)** यो सोमं पिबतस्तौ **(सोमपीतये)** सोमस्योत्तमरसपानाय॥३॥

अन्वयः-हे सोमपा इन्द्राबृहस्पती! युवां नो गृहं सोमपीतये आ गच्छतमिन्द्रश्चागच्छेत्॥३॥

भावार्थः-हे राजाऽमात्यधनाढ्या यथा वयं युष्मान्निमन्त्र्याऽन्नादिना सत्कुर्य्याम तथैव यूयमस्मान् सत्कुरुत॥३॥

पदार्थः-हे **(सोमपा)** सोमलता के रस को पीने वाले **(इन्द्राबृहस्पती)** राजा और अध्यापक आप दोनों **(नः)** हम लोगों के **(गृहम्)** घर को **(सोमपीतये)** सोमलता के उत्तम रस पीने के लिये **(आ, गच्छतम्)** आओ **(इन्द्रः)** और ऐश्वर्य्य वाला जन **(च)** भी आवे॥३॥

भावार्थः-हे राजा, मन्त्री और धनी जनो! जैसे हम लोग आप लोगों को निमन्त्रण देकर अन्न आदि से सत्कार करें, वैसे ही आप हम लोगों का सत्कार करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम्। अश्वावन्तं सहस्रिणम्॥४॥

अस्मे इति। इन्द्राबृहस्पती इति। रयिम्। धत्तम्। शतऽग्विनम्। अश्वऽवन्तम्। सहस्रिणम्॥४॥

पदार्थः-(अस्मे) अस्मभ्यम्। अत्र **शे** इति सूत्रेण प्रगृह्यसञ्ज्ञा, **प्लुतप्रगृह्या अचि नित्यमिति** सन्ध्यभावः। **(इन्द्राबृहस्पती)** विद्युत्सूर्य्याविव राजप्रधानौ **(रयिम्)** धनम् **(धत्तम्) (शतग्विनम्)** शतग्वोऽसङ्ख्याता गावो विद्यन्ते यस्मिँस्तम् **(अश्वावन्तम्)** प्रशस्ताऽश्वादिसहितम् **(सहस्रिणम्)** सहस्रमसङ्ख्याः पदार्था विद्यन्ते यस्मिँस्तम्॥४॥

अन्वयः-हे इन्द्राबृहस्पती! युवामस्मे शतग्विनमश्वावन्तं सहस्रिणं रयिं धत्तम्॥४॥

भावार्थः-तदैव राजप्रधानादीनां प्रशंसा जायेत यदा सर्वां प्रजां धनाढ्यां विदुषीं च ते कुर्य्युः॥४॥

पदार्थः-हे **(इन्द्राबृहस्पती)** बिजुली और सूर्य्य के सदृश राजा और प्रधान जनो! आप दोनों

(अस्मे) हम लोगों के लिये **(शतग्विनम्)** असङ्ख्यात गौओं और **(अश्वावन्तम्)** उत्तम घोड़ों आदि से युक्त **(सहस्रिणम्)** असंख्य पदार्थ जिसमें विद्यमान उस **(रयिम्)** धन को **(धत्तम्)** धारण करो॥४॥

भावार्थः-तभी राजा और प्रधानादिकों की प्रशंसा होवे कि जब सब प्रजा को धन और विद्या से युक्त करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे। अस्य सोमस्य पीतये॥५॥

इन्द्राबृहस्पती इति। वयम्। सुते। गीःऽभिः। हवामहे। अस्य। सोमस्य। पीतये॥५॥

पदार्थः-(इन्द्राबृहस्पती) अध्यापकोपदेशकौ **(वयम्)** **(सुते)** निष्पन्ने **(गीर्भिः)** **(हवामहे)** स्वीकुर्महे **(अस्य)** **(सोमस्य)** ओषधिजातस्य रसस्य **(पीतये)** पानाय॥५॥

अन्वयः-[हे] इन्द्राबृहस्पती! यथा वयं गीर्भिरस्य सोमस्य पीतये युवां हवामहे तथा सुतेऽस्मानाह्वयत॥५॥

भावार्थः-राजप्रजाजनैः परस्परस्य सत्कारेण महदैश्वर्य्यं भोक्तव्यम्॥५॥

पदार्थः-हे **(इन्द्राबृहस्पती)** अध्यापक और उपदेशकजनो! जैसे **(वयम्)** हम लोग **(गीर्भिः)** वाणियों से **(अस्य)** इस **(सोमस्य)** ओषधियों से उत्पन्न हुए रस के **(पीतये)** पान के लिये आप दोनों का **(हवामहे)** स्वीकार करते हैं, वैसे **(सुते)** रस के उत्पन्न होने पर हम लोगों का स्वीकार करो॥५॥

भावार्थः-राजा और प्रजाजनों को चाहिये कि परस्पर के सत्कार से बड़े ऐश्वर्य्य का भोग करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे। मादयेथां तदोकसा॥६॥२५॥

सोमम्। इन्द्राबृहस्पती इति। पिबतम्। दाशुषः। गृहे। मादयेथाम्। तत्ऽओकसा॥६॥

पदार्थः-(सोमम्) अत्युत्तमं रसम् **(इन्द्राबृहस्पती)** राजामात्यौ **(पिबतम्)** **(दाशुषः)** दातुः **(गृहे)** **(मादयेथाम्)** हर्षयेतम् **(तदोकसा)** तदोकः स्थानं ययोस्तौ॥६॥

अन्वयः-हे तदोकसेन्द्राबृहस्पती! युवां दाशुषो गृहे सोमं पिबतमस्मान् सततम्मादयेथाम्॥६॥

भावार्थः-राजादयो जना यथा स्वयं विद्यावन्तो धार्मिका न्यायशीला आनन्दिनः स्युस्तथा प्रजाजनानपि कुर्य्युः॥६॥

अत्र राजप्रजादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इत्येकोनपञ्चाशत्तमं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः–हे **(तदोकसा)** उस स्थान वाले **(इन्द्राबृहस्पती)** राजा और मन्त्री जनो! आप दोनों **(दाशुषः)** दाता जन के **(गृहे)** स्थान में **(सोमम्)** अति उत्तम रस का **(पिबतम्)** पान करो और हम लोगों को निरन्तर **(मादयेथाम्)** आनन्द देओ॥६॥

भावार्थः–राजा आदि जन जैसे स्वयं विद्यायुक्त, धार्मिक, न्यायकारी और आनन्दित होवें, वैसे प्रजाजनों को भी करें॥६॥

इस सूक्त में राजा और प्रजादि के गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह उनचासवां सूक्त और पच्चीसवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्य पञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। १-९ बृहस्पतिः। १०, ११ इन्द्राबृहस्पती देवते। १-३, ६, ७, ९ निचृत्त्रिष्टुप्। ५, ४, ११ विराट् त्रिष्टुप्। ८, १० त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वांसः किं कुर्य्युरित्याह॥

अब ग्यारह ऋचा वाले पचासवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

यस्तस्तम्भ सहसा वि ज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम्॥ १॥

यः। तस्तम्भ। सहसा। वि। ज्मः। अन्तान्। बृहस्पतिः। त्रिऽसधस्थः। रवेण। तम्। प्रत्नासः। ऋषयः। दीध्यानाः। पुरः। विप्राः। दधिरे। मन्द्रऽजिह्वम्॥ १॥

पदार्थः-(यः) विद्वान् राजा **(तस्तम्भ)** धरेत् **(सहसा)** बलेन **(वि) (ज्मः)** पृथिव्याः **(अन्तान्)** समीपान् **(बृहस्पतिः)** महान् बृहतां पतिर्वा **(त्रिषधस्थः)** त्रिषु समानस्थानेषु कर्मोपासनाज्ञानेषु वा तिष्ठति **(रवेण)** उपदेशेन **(तम)** **(प्रत्नासः)** प्राक्तनाः पूर्वमधीतविद्याः **(ऋषयः)** मन्त्रार्थवेत्तारः **(दीध्यानाः)** शुभैर्गुणैः प्रकाशमानाः **(पुरः)** महान्ति नगराणि **(विप्राः)** मेधाविनः **(दधिरे)** धरन्तु **(मन्द्रजिह्वम्)** मन्द्राऽऽनन्ददा कल्याणकरी जिह्वा यस्य तं विद्वांसम्॥१॥

अन्वयः-हे मनुष्या! यथा त्रिषधस्थो बृहस्पतिः सूर्य्यः सहसा ज्मोऽन्तान् वि तस्तम्भ तथा त्रिषधस्थो बृहस्पतिर्यो विद्वान् रवेण जनान् दध्यात् तं मन्द्रजिह्वमेषां पुरो दीध्यानाः प्रत्नास ऋषयो विप्रा दधिरे॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यस्स्वाकर्षणेन भूगोलान् दधाति तत्रस्थान् पदार्थांश्च तथैव विद्वांसो सर्वान् मनुष्यान् धृत्वा तेषामन्तःकरणानि प्रकाशयेयुः॥१॥

पदार्थः-हे मनुष्यो! जैसे **(त्रिषधस्थः)** तीन तुल्य स्थानों वा कर्म, उपासना ज्ञान में स्थित होने वाला **(बृहस्पतिः)** महान् वा बड़े पदार्थों का पालने वाला सूर्य्य **(सहसा)** बल से **(ज्मः)** पृथिवी के **(अन्तान्)** समीपों को **(वि, तस्तम्भ)** धारण करे, वैसे कर्मोपासना और ज्ञान में स्थित होने और बड़े पदार्थों का पालने वाला **(यः)** जो विद्वान् **(रवेण)** उपदेश से जनों को धारण करे **(तम्)** उस **(मन्द्रजिह्वम्)** आनन्द देने और कल्याण करने वाली जिह्वा से युक्त विद्वान् को इनके **(पुरः)** बड़े नगरों को **(दीध्यानाः)** उत्तम गुणों से प्रकाशित करते हुए **(प्रत्नासः)** प्राचीन और प्रथम जिन्होंने विद्या पढ़ी ऐसे **(ऋषयः)** मन्त्रों के अर्थ जानने वाले **(विप्राः)** बुद्धिमान् जन **(दधिरे)** धारण करें॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य अपनी आकर्षणशक्ति से भूगोलों को धारण करता और भूगोलों में वर्त्तमान पदार्थों को धारण करता है, वैसे ही विद्वान् लोग

सब मनुष्यों को धारण करके उनके अन्त:करणों को प्रकाशित करें॥ १॥

अथ के प्रशंसनीया भवन्तीत्याह॥

अब कौन प्रशंसा के योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

धुनेतय: सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे।

पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम्॥ २॥

धुनऽइतय:। सुऽप्रकेतम्। मदन्त:। बृहस्पते। अभि। ये। न:। ततस्रे। पृषन्तम्। सृप्रम्। अदब्धम्। ऊर्वम्। बृहस्पते। रक्षतात्। अस्य। योनिम्॥ २॥

पदार्थ:-(धुनेतय:) ये धुनान् धर्मात्मनां कम्पकान् कम्पयन्ति ते **(सुप्रकेतम्)** सुष्ठु प्रकृष्ट: केत: प्रज्ञा यस्य तमध्यापकम् **(मदन्त:)** आनन्दयन्त: **(बृहस्पते)** बृहत्या वाच: पालक **(अभि) (ये) (न:)** अस्मान् **(ततस्रे)** उपक्षयन्ति **(पृषन्तम्)** विद्यादिशुभगुणान् सिञ्चन्तम् **(सृप्रम्)** प्राप्तशुभगुणम् **(अदब्धम्)** अहिंसितम् **(ऊर्वम्)** हिंसकम् **(बृहस्पते)** बृहतां पालक **(रक्षतात्) (अस्य)** विद्याव्यवहारस्य **(योनिम्)** कारणम्॥ २॥

अन्वय:-हे बृहस्पते! ये मदन्तो धुनेतय: सुप्रकेतं पृषन्तं सृप्रमदब्धमूर्वं जनं ततस्रे नोऽस्माँश्चाभि ततस्रे तान्निवार्य तांस्त्वं निवारय। हे बृहस्पते! येषां निरोधेनास्य योनिं भवान् रक्षतात्॥ २॥

भावार्थ:-हे मनुष्या! ये दस्युचोरादीन्निवार्य्य धार्म्मिकान् विदुष: सुखयित्वा साङ्गोपाङ्गं विद्यावृद्धिव्यवहारं वर्धयेयुस्ते युष्माभि: सत्कर्त्तव्या: स्यु:॥ २॥

पदार्थ:-हे **(बृहस्पते)** बड़ी वाणी के पालन करने वाले **(ये)** जो **(मदन्त:)** आनन्द देते हुए **(धुनेतय:)** धर्मात्मा जनों के कंपाने वालों को कम्पाने वाले **(सुप्रकेतम्)** उत्तम तीक्ष्ण बुद्धि वाले **(पृषन्तम्)** विद्यादि उत्तम गुणों को सींचते हुए **(सृप्रम्)** उत्तम गुणों को प्राप्त **(अदब्धम्)** नहीं हिंसित **(ऊर्वम्)** हिंसा करने वाले जन का **(ततस्रे)** नाश करते हैं और **(न:)** हम लोगों को **(अभि)** चारों ओर से नाश करते हैं, उनका निवारण करके आप उनका निवारण करो। हे **(बृहस्पते)** बड़ी वस्तुओं के पालन करने वाले! जिनके रोकने से **(अस्य)** इस विद्याव्यवहार के **(योनिम्)** कारण की आप **(रक्षतात्)** रक्षा करें॥ २॥

भावार्थ:-हे मनुष्यो! जो लोग डाकू और चोरादिकों का निवारण कर धार्मिक विद्वानों को सुख दे कर अङ्ग और उपाङ्गों के सहित विद्या के व्यवहार को बढ़ावें, उनका आप लोग सत्कार करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदु:।

तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतन्त्यभितो विरप्शम्॥ ३॥

बृहस्पते। या। परमा। परावत्। अतः। आ। ते। ऋतस्पृशः। नि। सेदुः। तुभ्यम्। खाताः। अवताः। अद्रिदुग्धाः। मध्वः। श्चोतन्ति। अभितः। विरप्शम्॥ ३॥

पदार्थः-(बृहस्पते) बृहतो राष्ट्रस्य पालक **(या)** **(परमा)** उत्कृष्टा नीतिः **(परावत्)** परा गुणा विद्यन्ते यस्मिन् **(अतः)** अस्मात् **(आ)** **(ते)** तव **(ऋतस्पृशः)** सत्यस्पर्शस्य **(नि)** **(सेदुः)** निषीदेयुः **(तुभ्यम्)** **(खाताः)** खनिताः **(अवताः)** कूपाः **(अद्रिदुग्धाः)** मेघेन पूर्णाः **(मध्वः)** मधुरादिगुणयुक्तजलोपेताः **(श्चोतन्ति)** सिञ्चन्ति **(अभितः)** सर्वतः **(विरप्शम्)** महान्तं संसारम्॥ ३॥

अन्वयः-हे बृहस्पते! ते या परमा नीतिरस्ति तयर्तस्पृशस्तेऽद्रिदुग्धाः खाता मध्वोऽवतास्तुभ्यमभितः श्चोतन्ति विरप्शमा निषेदुरतस्तान् वयं परावत् सत्कुर्य्याम॥ ३॥

भावार्थः-हे मनुष्या! भवन्तो वृद्धानां विदुषां राज्ञां सकाशात् सनातनीं नीतिं गृहीत्वा मेघवत्प्रजाः सुखेन सिञ्चन्तु॥ ३॥

पदार्थः-हे **(बृहस्पते)** बड़े राज्य के पालन करने **(ते)** आपकी **(या)** जो **(परमा)** उत्तम नीति है उससे **(ऋतस्पृशः)** सत्य का स्पर्श करने वाले आपके **(अद्रिदुग्धाः)** मेघ से पूर्ण **(खाताः)** खोदे गये **(मध्वः)** मधुर आदि गुण वाले जल से युक्त **(अवताः)** कूप **(तुभ्यम्)** आपके लिये **(अभितः)** सब प्रकार से **(श्चोतन्ति)** सींचते हैं और **(विरप्शम्)** महान् संसार को **(आ, निषेदुः)** सब ओर से स्थित करें **(अतः)** इससे उनका हम लोग **(परावत्)** गुणयुक्त सत्कार करें॥ ३॥

भावार्थः-हे मनुष्यो! आप लोग वृद्ध विद्वान् राजा लोगों के समीप से अनादि काल से सिद्ध नीति को ग्रहण करके मेघों के सदृश प्रजाओं को सुख से सींचो॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्।

सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि॥ ४॥

बृहस्पतिः। प्रथमम्। जायमानः। महः। ज्योतिषः। परमे। विऽओमन्। सप्तऽआस्यः। तुविऽजातः। रवेण। वि। सप्तऽरश्मिः। अधमत्। तमांसि॥ ४॥

पदार्थः-(बृहस्पतिः) महान् **(प्रथमम्)** आदौ **(जायमानः)** **(महः)** महतः **(ज्योतिषः)** प्रकाशात् **(परमे)** प्रकृष्टे **(व्योमन्)** व्यापके **(सप्तास्यः)** सप्तकिरणा आस्यानि यस्य **(तुविजातः)** बहुषु प्रसिद्धः **(रवेण)** शब्देन **(वि)** **(सप्तरश्मिः)** सप्तविधकिरणः **(अधमत्)** धमति निराकरोति **(तमांसि)** रात्रीः॥ ४॥

अन्वयः-हे मनुष्या! यथा परमे व्योमन् महो ज्योतिषः प्रथमं जायमानः सप्तास्यस्तुविजातस्सप्तरश्मिर्बृहस्पतिस्सूर्य्यो रवेण तमांसि व्यधमत् तथैव महान् विद्वानुपदेशेनाऽविद्यां निवार्य्य विद्यां जनयेत्॥४॥

भावार्थः-हे विद्वांसो! यथा सूर्य्ये सप्तविधरूपाणि तत्त्वानि मिलितानि यैः सर्वेभ्यो रसान् गृह्णाति तथैव पञ्चभिर्ज्ञानेन्द्रियैर्मनसात्मना च सर्वा विद्याः सङ्गृह्याऽध्यापनोपदेशाभ्यां सर्वेषामज्ञानं निवार्य्य विद्याप्रकाशं जनयन्तु॥४॥

पदार्थः-हे मनुष्यो! जैसे **(परमे)** उत्तम **(व्योमन्)** व्यापक में **(महः)** बड़े **(ज्योतिषः)** प्रकाश से **(प्रथमम्)** पहिले **(जायमानः)** उत्पन्न हुआ **(सप्तास्यः)** सात किरणरूप मुखों से युक्त **(तुविजातः)** बहुतों में प्रसिद्ध **(सप्तरश्मिः)** सात प्रकार के किरणों से युक्त **(बृहस्पतिः)** बड़ा सूर्य **(रवेण)** शब्द से अर्थात् गति शब्द से **(तमांसि)** रात्रियों को **(वि, अधमत्)** दूर करता है, वैसे बड़ा विद्वान् उपदेश से अविद्या का निवारण करके विद्या को प्रकट करे॥४॥

भावार्थः-हे विद्वानो! जैसे सूर्य्य में सात प्रकार के रूप वाले तत्त्व मिले हुए वर्त्तमान हैं, जिन किरणों के द्वारा सब से रसों को ग्रहण करता है, वैसे पाँच ज्ञानेन्द्रिय, मन और आत्मा से सब विद्याओं को ग्रहण करके पढ़ाने और उपदेश करने से सबके अज्ञान को दूर करके विद्या के प्रकाश को उत्पन्न करो॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को अगले मन्त्र में कहते हैं॥

स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत्॥५॥२६॥

सः। सुऽस्तुभा। सः। ऋक्वता। गणेन। वलम्। रुरोज। फलिऽगम्। रवेण। बृहस्पतिः। उस्रियाः। हव्यऽसूदः। कनिक्रदत्। वावशतीः। उत्। आजत्॥५॥

पदार्थः-(**सः**) विद्वान् **(सुष्टुभा)** शोभनेन प्रशंसितेन **(सः)** **(ऋक्वता)** बहुप्रशंसायुक्तेन **(गणेन)** किरणसमूहेनोपदेश्यविद्यार्थिसमुदायेन **(वलम्)** वक्रगतिम् **(रुरोज)** रुजेत् **(फलिगम्)** मेघम्। **फलिग इति मेघनामसु पठितम्।** (निघं०१.१०) **(रवेण)** शब्देन **(बृहस्पतिः)** महान् सर्वेषां पालकः **(उस्रियाः)** पृथिव्यां वर्त्तमानाः **(हव्यसूदः)** यो हव्यानि सूदयति क्षरयति सः **(कनिक्रदत्)** भृशं शब्दयन् **(वावशतीः)** भृशं कामयमानाः प्रजाः **(उत्)** **(आजत्)** प्राप्नोति॥५॥

अन्वयः-हे विद्वन्! यथा स हव्यसूदः कनिक्रदद् बृहस्पतिः सूर्य्यः सुष्टुभा गणेन फलिगं रुरोज स ऋक्वता गणेन रवेण वलं रुरोजोस्रिया वावशतीरुदाजत् तथा त्वं वर्त्तस्व॥५॥

भावार्थः-यथा सविता वृष्टिद्वारा सर्वाः प्रजा रक्षति विद्युच्छब्देन सर्वान् प्रज्ञापयति तथैव सर्वे विद्वांसो विद्याद्वारा सर्वात्मनः प्रकाशयेयुः॥५॥

पदार्थः-हे विद्वन्! जैसे **(सः)** वह **(हव्यसूदः)** हवन करने योग्य पदार्थों को क्षरण कराने अर्थात् अपने प्रताप से अणुरूप कराने वाला **(कनिक्रदत्)** अत्यन्त शब्द करता हुआ **(बृहस्पतिः)** बड़ा और सब का पालन करने वाला सूर्य्य **(सुष्टुभा)** सुन्दर प्रशंसित **(गणेन)** किरणसमूह से **(फलिगम्)** मेघ को **(रुरोज)** भङ्ग करे और **(सः)** वह विद्वान् **(ऋक्वता)** बहुत प्रशंसायुक्त उपदेश देने योग्य विद्यार्थियों के समूह से **(रवेण)** शब्द से **(वलम्)** कुटिल चाल को भंग करे और **(उस्रियाः)** पृथिवी के बीच वर्त्तमान **(वावशतीः)** अत्यन्त कामना करती हुई प्रजाओं को **(उत्, आजत्)** प्राप्त होता है, वैसे आप वर्त्ताव करो॥५॥

भावार्थः-जैसे सूर्य्य वृष्टि के द्वारा सब प्रजाओं की रक्षा करता और बिजुली के शब्द से सब को जनाता है, वैसे ही सब विद्वान् जन विद्या के द्वारा सब के द्वारा सब के आत्माओं को प्रकाशित करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

एवा पित्रे विश्वेदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः।

बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम्॥६॥

एव। पित्रे। विश्वऽदेवाय। वृष्णे। यज्ञैः। विधेम। नमसा। हविऽभिः। बृहस्पते। सुऽप्रजाः। वीरऽवन्तः। वयम्। स्याम। पतयः। रयीणाम्॥६॥

पदार्थः-(एवा) अत्र **निपातस्य चे**ति दीर्घः। **(पित्रे)** पालकाय **(विश्वदेवाय)** विश्वस्य प्रकाशकाय **(वृष्णे)** वृष्टिकराय **(यज्ञैः)** सङ्गतैः कर्मभिः **(विधेम)** कुर्य्याम **(नमसा)** सत्कारेणान्नादिना वा **(हविर्भिः)** आदातुं योग्यैरुपदेशैर्द्रव्यैर्वा **(बृहस्पते)** बृहतां पालक **(सुप्रजाः)** विद्याविनययुक्ताः श्रेष्ठाः प्रजा येषान्ते **(वीरवन्तः)** वीरपुत्राः **(वयम्) (स्याम) (पतयः)** स्वामिनः **(रयीणाम्)** धनानाम्॥६॥

अन्वयः-हे बृहस्पते! यथा वयं यज्ञैर्विश्वदेवाय वृष्णे पित्रे नमसा हविर्भिर्विधेम सुप्रजा वीरवन्तो वयं रयीणां पतयस्स्याम तथैवा त्वं भव॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यो मेघालङ्कारेण सर्वेषां पालको वर्त्तते तथैव वयं वर्त्तित्वाऽत्युत्तमपुरुषा राज्याऽधिपतयो भवेम॥६॥

पदार्थः-हे **(बृहस्पते)** बड़ों के पालन करने वाले जैसे हम लोग **(यज्ञैः)** मिले हुए कर्मों से **(विश्वदेवाय)** संसार के प्रकाशक **(वृष्णे)** वृष्टि करने और **(पित्रे)** पालन करने वाले के लिये **(नमसा)** सत्कार वा अन्न आदि से **(हविर्भिः)** ग्रहण करने योग्य उपदेश वा द्रव्यों से **(विधेम)** करें और अर्थात् क्रिया विधान करें तथा **(सुप्रजाः)** विद्या और विनय वाली श्रेष्ठ प्रजाओं से युक्त **(वीरवन्तः)** वीर पुत्रों

वाले **(वयम्)** हम लोग **(रयीणाम्)** धनों के **(पतयः)** स्वामी **(स्याम)** होवें **(एवा)** वैसे ही आप हूजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य मेघ के अलङ्कार से सब का पालन करने वाला है, वैसे ही हम लोग वर्त्ताव करके अति उत्तम पुरुष और राज्य के स्वामी होवें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स इद्राजा॒ प्रति॑जन्या॒नि॒ विश्वा॒ शुष्मे॑ण तस्थाव॒भि वी॒र्येण।

बृह॒स्पति॒ यः सुभृ॑तं बि॒भर्ति॑ वल्गू॒यति॒ वन्द॑ते पूर्व॒भाज॑म्॥७॥

सः। इत्। राजा॑। प्रति॑ऽजन्यानि। विश्वा॑। शुष्मे॑ण। त॒स्थौ॒। अ॒भि। वी॒र्ये॑ण। बृह॒स्पति॑म्। यः। सुऽभृ॑तम्। बि॒भर्ति॑। व॒ल्गु॒ऽयति॑। वन्द॑ते। पू॒र्व॒ऽभाज॑म्॥७॥

पदार्थः-(सः) जगदीश्वरः **(इत्)** **(राजा)** सर्वप्रकाशकः **(प्रतिजन्यानि)** प्रत्यक्षेण जनितुं योग्यानि **(विश्वा)** सर्वाणि **(शुष्मेण)** बलेन **(तस्थौ)** तिष्ठति **(अभि)** आभिमुख्ये **(वीर्य्येण)** पराक्रमेण **(बृहस्पतिम्)** महतां महान्तम् **(यः)** **(सुभृतम्)** सुष्ठु धृतम् **(बिभर्त्ति)** धरति **(वल्गूयति)** सत्करोति। **वल्गूयतीत्यर्चतिकर्मा।** (निघं०३.१४) **(वन्दते)** कामयते **(पूर्वभाजम्)** पूर्वैर्भजनीयम्॥७॥

अन्वयः-हे मनुष्या! यः सुभृतं बृहस्पतिं पूर्वभाजं बिभर्त्ति वल्गूयति वन्दते यः शुष्मेण वीर्य्येण विश्वा प्रतिजन्यान्यभि तस्थौ स इदेव राजा सर्वैर्भजनीयोऽस्ति॥७॥

भावार्थः-हे मनुष्या! यः परमेश्वरः सर्वं जगदभिव्याप्य धृत्वा सूर्य्यमपि धरति सर्वान् वेदानुपदिश्य प्रशंसितो वर्त्तते यस्य सेवां योगिराजाः कुर्वन्ति तमेव नित्यमुपाध्वम्॥७॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(सुभृतम्)** उत्तम प्रकार धारण किये गये **(बृहस्पतिम्)** बड़ों में बड़े **(पूर्वभाजम्)** प्राचीनों से सेवा करने योग्य का **(बिभर्त्ति)** धारण करता **(वल्गूयति)** सत्कार करता और **(वन्दते)** कामना करता है जो **(शुष्मेण)** बल **(वीर्य्येण)** और पराक्रम से **(विश्वा)** सम्पूर्ण **(प्रतिजन्यानि)** प्रत्यक्ष से उत्पन्न होने योग्यों के **(अभि)** सम्मुख **(तस्थौ)** स्थित होता है **(सः, इत्)** वही जगदीश्वर **(राजा)** सब का प्रकाश करने वाला सब लोगों के सेवा करने योग्य है॥७॥

भावार्थः-हे मनुष्यो! जो परमेश्वर सम्पूर्ण जगत् को अभिव्याप्त होकर और धारके सूर्य्य को भी धारता है और सम्पूर्ण वेदों का उपदेश देकर प्रशंसित वर्त्तमान है और जिसकी सेवा योगिराज करते हैं, उसी की नित्य उपासना करो॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम्।

तस्मै विशः स्वयमेवा नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति॥८॥

सः। इत्। क्षेति। सुऽधितः। ओकसि। स्वे। तस्मै। इळा। पिन्वते। विश्वऽदानीम्। तस्मै। विशः। स्वयम्। एव। नमन्ते। यस्मिन्। ब्रह्मा। राजनि। पूर्वः। एति॥८॥

पदार्थः-(सः) (इत्) एव **(क्षेति)** निवसति **(सुधितः)** सुहितस्तृप्तः। अत्र **सुधितवसुधिते**ति सूत्रेण हस्य धः। **(ओकसि)** निवासस्थाने **(स्वे)** स्वकीये **(तस्मै) (इळा)** प्रशंसिता वाग्भूमिर्वा **(पिन्वते)** सेवते **(विश्वदानीम्)** सर्वस्मिन् काले **(तस्मै) (विशः)** प्रजाः **(स्वयम्) (एवा)** अत्र **निपातस्य चे**ति दीर्घः। **(नमन्ते)** नम्रीभूता भवन्ति **(यस्मिन्)** परमात्मनि **(ब्रह्मा)** चतुर्वेदवित् **(राजनि)** प्रकाशमाने **(पूर्वः)** अनादिभूत आदिमः **(एति)** प्राप्नोति॥८॥

अन्वयः-हे मनुष्या! यो जनः परमेश्वरं भजते स इद् सुधितः सन् स्व ओकसि क्षेति विश्वदानीं तस्मा इळा पिन्वते यस्मिन् राजनि ब्रह्मा पूर्व एति तस्मै राज्ञे विशः स्वयमेवा नमन्ते॥८॥

भावार्थः-हे मनुष्या! यद्यन्यान् सर्वान् विहायैकं परमेश्वरमेव यूयं भजत तर्हि युष्मासु श्री राज्यं प्रतिष्ठा यशश्च सदैव निवसेत्॥८॥

पदार्थः-हे मनुष्यो! जो जन परमेश्वर का भजन करता है **(सः, इत्)** वही **(सुधितः)** उत्तम प्रकार तृप्त हुआ **(स्वे)** अपने **(ओकसि)** निवासस्थान में **(क्षेति)** निवास करता है तथा **(विश्वदानीम्)** सब काल में **(तस्मै)** उसके लिये **(इळा)** प्रशंसित वाणी वा भूमि **(पिन्वते)** सेवन करती है **(यस्मिन्)** जिस **(राजनि)** प्रकाशमान परमात्मा में **(ब्रह्मा)** चार वेद का जानने वाला **(पूर्वः)** अनादि से हुआ प्रथम **(एति)** प्राप्त होता है **(तस्मै)** उस राजा के लिये **(विशः)** प्रजा **(स्वयम्) (एवा)** आप ही **(नमन्ते)** नम्र होती हैं॥८॥

भावार्थः-हे मनुष्यो! जो अन्य सब का त्याग करके एक परमेश्वर ही की आप लोग सेवा करें तो आप लोगों में लक्ष्मी, राज्य, प्रतिष्ठा और यश सदा ही निवास करें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या।

अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः॥९॥

अप्रतिऽइतः। जयति। सम्। धनानि। प्रतिऽजन्यानि। उत। या। सऽजन्या। अवस्यवे। यः। वरिवः। कृणोति। ब्रह्मणे। राजा। तम्। अवन्ति। देवाः॥९॥

पदार्थः-(अप्रतीतः) शत्रुभिरपराजितः **(जयति) (सम्) (धनानि) (प्रतिजन्यानि)** जनं जनं प्रति योग्यानि **(उत) (या)** यानि **(सजन्या)** समानैर्जन्यैः सह वर्त्तमानानि **(अवस्यवे)** रक्षामिच्छवे **(यः) (वरिवः)** सेवनम् **(कृणोति) (ब्रह्मणे)** परमात्मने **(राजा) (तम्) (अवन्ति)** रक्षन्ति **(देवाः)** विद्वांसः॥९॥

अन्वयः-हे मनुष्या! योऽप्रतीतो राजा अवस्यवे ब्रह्मणे वरिवः कृणोति तं देवा अवन्ति या सजन्योत प्रतिजन्यानि धनानि सन्ति तानि सहजस्वभावेन सञ्जयति॥९॥

भावार्थः-हे मनुष्या! यो राजा परमात्मानमेवोपास्त आप्तान् विदुषस्सेवते स एवाक्षतं राष्ट्रं धनं च प्राप्य सदैव विजयी जायते॥९॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अप्रतीतः)** शत्रुओं से नहीं पराजित किया गया **(राजा)** राजा **(अवस्यवे)** रक्षा की इच्छा करते हुए **(ब्रह्मणे)** परमात्मा के लिये **(वरिवः)** सेवन को **(कृणोति)** करता है **(तम्)** उसकी **(देवाः)** विद्वान् जन **(अवन्ति)** रक्षा करते हैं और **(या)** जो **(सजन्या)** तुल्य उत्पन्न हुए पदार्थों के साथ वर्त्तमान **(उत)** भी **(प्रतिजन्यानि)** मनुष्य-मनुष्य के प्रति वर्त्तमान **(धनानि)** धन हैं उनको सहज स्वभाव से **(सम्, जयति)** अच्छे प्रकार जीतता है॥९॥

भावार्थः-हे मनुष्यो! जो राजा परमात्मा ही की उपासना करता और यथार्थवक्ता विद्वानों की सेवा करता है, वही नहीं नाश होने वाले राज्य और धन को प्राप्त होकर सदा ही विजयी होता है॥९॥

अथ राजानः कीदृशो भवेयुरित्याह॥

अब राजा कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रश्च॒ सोमं॑ पिबतं बृहस्पतेऽस्मिन् य॒ज्ञे म॑न्दसा॒ना वृ॑षण्वसू।
आ वां॑ विश॒न्त्विन्द॑वः स्वा॒भुवोऽस्मे र॒यिं सर्व॑वीरं॒ नि य॑च्छतम्॥१०॥

इन्द्रः॑। च॒। सोम॑म्। पि॒ब॒त॒म्। बृ॒ह॒स्प॒ते॒। अ॒स्मिन्। य॒ज्ञे। म॒न्द॒सा॒ना। वृ॒ष॒ण्व॒सू॒ इति॑ वृष्ण्ऽवसू। आ। वा॒म्। वि॒श॒न्तु॒। इन्द॑वः। सु॒ऽआ॒भुवः॑। अ॒स्मे इति॑। र॒यिम्। सर्व॑ऽवीरम्। नि। य॒च्छ॒त॒म्॥१०॥

पदार्थः-(इन्द्रः) परमैश्वर्य्यवान् **(च) (सोमम्)** सदोषधिरसम् **(पिबतम्) (बृहस्पते)** पूर्णविद्वन्! **(अस्मिन्) (यज्ञे)** राज्यपालनाख्ये व्यवहारे **(मन्दसाना)** प्रशंसितावानन्दितौ **(वृषण्वसू)** यौ वृष्णो बलिष्ठान् वीरान् वासयतस्तौ **(आ) (वाम्)** युवाम् **(विशन्तु)** प्राप्नुवन्तु **(इन्दवः)** ऐश्वर्य्याणि **(स्वाभुवः)** ये स्वयं भवन्ति ते **(अस्मे)** अस्मभ्यम् **(रयिम्)** धनम् **(सर्ववीरम्)** सर्वे वीरा यस्मात्तम् **(नि)** नितराम् **(यच्छतम्)** प्रदद्यातम्॥१०॥

अन्वयः-हे बृहस्पते! इन्द्रश्च मन्दसाना वृषण्वसू युवामस्मिन् यज्ञे सोमं पिबतं यथा स्वाभुव इन्दवो वामा विशन्तु तथाऽस्मे सर्ववीरं रयिं युवां नियच्छतम्॥१०॥

भावार्थः-हे राजराजोपदेशकौ! युवां कदाचिदपि मादकद्रव्यं मा सेवेथां राज्यपालनेन सत्योपदेशेनैव प्रजाः सम्पाल्य सदैवानन्देतमस्मभ्यं सर्वैश्वर्य्यं प्रदद्यातम्॥१०॥

पदार्थः-हे **(बृहस्पते)** पूर्णविद्वन्! **(च)** और **(इन्द्रः)** अत्यन्त ऐश्वर्य्य वाला **(मन्दसाना)** प्रशंसित और आनन्दयुक्त **(वृषण्वसू)** बलिष्ठ वीर पुरुषों को निवास कराने वाले आप दोनों **(अस्मिन्)** इस **(यज्ञे)** राज्यपालननामक व्यवहार में **(सोमम्)** उत्तम ओषधियों के रस का **(पिबतम्)** पान करो और जैसे **(स्वाभुवः)** आप होने वाले **(इन्दवः)** ऐश्वर्य्य **(वाम्)** आप दोनों को **(आ, विशन्तु)** प्राप्त हों, वैसे **(अस्मे)** हम लोगों के लिये **(सर्ववीरम्)** सब वीर हों जिससे उस **(रयिम्)** धन को आप दोनों **(नि, यच्छतम्)** उत्तम प्रकार दीजिये॥१०॥

भावार्थः-हे राजा और राजोपदेशको! तुम कभी मदकारक वस्तु का सेवन न करो और राज्यपालन तथा सत्योपदेश से ही प्रजाओं का पालन कर सदैव आनन्दित होओ और हम लोगों के लिये सब ऐश्वर्य्य अच्छे प्रकार देओ॥१०॥

अथ प्रजाविषयमाह॥

अब प्रजाविषय को अगले मन्त्र में कहते हैं॥

बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे।

अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः॥११॥२७॥७॥

बृहस्पते। इन्द्र। वर्धतम्। नः। सचा। सा। वाम्। सुऽमतिः। भूतु। अस्मे इति। अविष्टम्। धियः। जिगृतम्। पुरम्ऽधीः। जजस्तम्। अर्यः। वनुषाम्। अरातीः॥११॥

पदार्थः-(बृहस्पते) सकलविद्यां प्राप्त **(इन्द्र)** परमैश्वर्य्य राजन्! **(वर्धतम्)** वर्धेथाम्। अत्र व्यत्ययेन परस्मैपदम्। **(नः)** अस्माकम् **(सचा)** सत्येन **(सा)** **(वाम्)** युवयोः **(सुमतिः)** श्रेष्ठा प्रज्ञा **(भूतु)** भवतु **(अस्मे)** अस्मान् **(अविष्टम्)** प्राप्नुयातम् **(धियः)** प्रज्ञाः **(जिगृतम्)** उपदेशयतम् **(पुरन्धीः)** बहुविद्याधराः **(जजस्तम्)** योधयतम् **(अर्य्यः)** स्वामी **(वनुषाम्)** संविभाजकानाम् **(अरातीः)** शत्रून्॥११॥

अन्वयः-हे बृहस्पते इन्द्र! या वां सुमतिर्भूतु सा वनुषां नः सचा भूतु तयास्मान् वर्धतम्। युवां याः पुरन्धीर्धियोऽविष्टं यया जिगृतं ता अस्मे प्राप्नुवन्तु यथाऽर्य्यः स्वामी तथा युवामस्माकमरातीर्जजस्तम्॥११॥

भावार्थः-मनुष्यैः सर्वदा विद्वद्भ्यो विद्याप्राप्तिर्याचनीया ययोत्तमाः प्रज्ञा जायेरञ्छत्रवश्च दूरतः प्लवेरन्निति॥११॥

अत्र विद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण दयानन्दसरस्वतीस्वामिना

विरचिते संस्कृतार्य्यभाषाभ्यां विभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये तृतीयाष्टके सप्तमेऽध्याये सप्तविंशो वर्गः सप्तमोऽध्यायश्चतुर्थे मण्डले पञ्चमानुवाकः पञ्चाशत्तमं सूक्तञ्च समाप्तम्॥

पदार्थः–हे **(बृहस्पते)** सम्पूर्ण विद्याओं को प्राप्त **(इन्द्र)** और अत्यन्त ऐश्वर्य्य वाले राजन्! जो **(वाम्)** आप दोनों की **(सुमतिः)** श्रेष्ठ बुद्धि **(भूतु)** हो **(सा)** वह **(वनुषाम्)** संविभाग करने वाले **(नः)** हमारे **(सचा)** सत्य के साथ हो और उससे हम लोगों की **(वर्धतम्)** वृद्धि करो, आप दोनों जो **(पुरन्धीः)** बहुत विद्याओं को धारण करने वाली **(धियः)** बुद्धियों को **(अविष्टम्)** प्राप्त होइये जिससे **(जिगृतम्)** उपदेश दीजिये वे **(अस्मे)** हम लोगों को प्राप्त होवें और जैसे **(अर्य्यः)** स्वामी वैसे आप दोनों हम लोगों के **(अरातीः)** शत्रुओं को **(जजस्तम्)** युद्ध कराइये॥११॥

भावार्थः–मनुष्यों को चाहिये कि सर्वदा विद्वानों से विद्याप्राप्ति विषयक याचना करें, जिससे उत्तम बुद्धियाँ होवें और शत्रुजन दूर से भागें॥११॥

इस सूक्त में विद्वान्, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्य श्रीमान् विरजानन्द सरस्वती स्वामीजी के शिष्य दयानन्द सरस्वती स्वामिविरचित संस्कृतार्य्यभाषासुशोभित सुप्रमाणयुक्त ऋग्वेदभाष्य में तृतीय अष्टक के सप्तम अध्याय में सत्ताईसवाँ वर्ग तथा सातवाँ अध्याय और चतुर्थमण्डल में पाँचवाँ अनुवाक और पचासवाँ सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथाष्टमाध्यायः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथैकादशर्चस्यैकाधिकपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। उषा देवता। १, ५, ८ त्रिष्टुप्। ३ विराट् त्रिष्टुप्। ४, ६, ७, ९, ११ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ पङ्क्तिः। १० भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ प्रातर्वर्णनविषयमाह॥

अब ग्यारह ऋचा वाले इक्कावनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में प्रातःकाल का वर्णन जिसमें ऐसे विषय को कहते हैं॥

इ॒दमु॒ त्यत्पु॑रु॒तमं॑ पु॒रस्ता॒ज्ज्योति॒स्तम॑सो व॒युना॑वदस्थात्।
नू॒नं दि॒वो दु॑हि॒तरो॑ विभा॒तीर्गा॒तुं कृ॑ण्वन्नु॒षसो॒ जना॑य॥ १॥

इ॒दम्। ऊ॒म् इति॑। त्यत्। पु॒रु॒ऽत॒मम्। पु॒रस्ता॑त्। ज्योतिः॑। तम॑सः। व॒युन॑ऽवत्। अ॒स्था॒त्। नू॒नम्। दि॒वः। दु॒हि॒तरः॑। वि॒ऽभा॒तीः। गा॒तुम्। कृ॒ण्व॒न्। उ॒षसः॑। जना॑य॥ १॥

पदार्थः-(इदम्) (उ) (त्यत्) तत् **(पुरुतमम्)** अतिशयेन बहुप्रकारम् **(पुरस्तात्)** पूर्वम् **(ज्योतिः)** तेजः **(तमसः)** रात्रेः **(वयुनावत्)** प्रज्ञानवत् **(अस्थात्)** वर्त्तते **(नूनम्) (दिवः)** प्रकाशस्य **(दुहितरः)** कन्या इव वर्त्तमानाः **(विभातीः)** प्रकाशयन्तः **(गातुम्)** पृथिवीम् **(कृणवन्)** कुर्वन्ति **(उषसः)** प्रभाताः **(जनाय)** मनुष्याद्याय॥१॥

अन्वयः-हे मनुष्यास्त्यदिदं पुरुतमं ज्योतिर्वयुनावत्तमसः पुरस्तादस्थात्तस्य दिवो विभातीर्दुहितर उषसो जनाय गातुमु नूनं प्रकाशितां कृणवन्निति विजानीत॥१॥

भावार्थः-हे मनुष्या! भवन्तः पुरुषार्थेन सूर्य्यप्रकाशवद्विज्ञानं प्राप्य तमोनिवृत्तिवदविद्यां निवार्य्याऽऽनन्दिताः भवन्तु॥१॥

पदार्थः-हे मनुष्यो! **(त्यत्)** सो **(इदम्)** यह **(पुरुतमम्)** अतिशय करके अनेक प्रकार का **(ज्योतिः)** तेज अर्थात् प्रकाश **(वयुनावत्)** प्रज्ञान के सदृश **(तमसः)** रात्रि से **(पुरस्तात्)** प्रथम **(अस्थात्)** वर्त्तमान है उस **(दिवः)** प्रकाश के सम्बन्ध से **(विभातीः)** प्रकाश करती हुई **(दुहितरः)** कन्याओं के सदृश वर्त्तमान **(उषसः)** प्रभातवेलाएं **(जनाय)** मनुष्य आदि के लिये **(गातुम्)** भूमि को **(उ)** तो **(नूनम्)** निश्चय प्रकाशित **(कृणवन्)** करती हैं, यह जानो॥१॥

भावार्थः-हे मनुष्यो! आप लोग पुरुषार्थ से सूर्य्य के प्रकाश के सदृश विज्ञान को प्राप्त होकर,

अन्धकार की निवृत्ति के सदृश अविद्या का निवारण करके आनन्दित होओ॥१॥

अथ स्त्रीपुरुषविषयमाह॥

अब स्त्री पुरुष के विषय को अगले मन्त्र में कहते हैं॥

अस्थु॑रु चि॒त्रा उ॒षस॑: पु॒रस्ता॑न्मि॒ताइ॑व॒ स्वर॑वोऽध्व॒रेषु॑।
व्यू॑ व्र॒जस्य॒ तम॑सो॒ द्वारो॒च्छन्ती॑रव्र॒ञ्छुच॑य: पाव॒का:॥२॥

अस्थु॑:। ऊँ॒ इति॒। चि॒त्रा:। उ॒षस॑:। पु॒रस्ता॑त्। मि॒ता:ऽइ॑व। स्वर॑व:। अ॒ध्व॒रेषु॑। वि। ऊ॒म् इति॑। व्र॒जस्य॑। तम॑स:। द्वारा॑। उ॒च्छन्ती॑:। अ॒व्र॒न्। शुच॑य:। पा॒व॒का:॥२॥

पदार्थ:-(अस्थु:) तिष्ठन्ति **(उ)** **(चित्रा:)** विचित्रगुणकर्मस्वभावा: **(उषस:)** प्रभातवेला इव दुहितर: **(पुरस्तात्)** पूर्वस्मात् **(मिताइव)** विद्यया सकलपदार्थवेदित्र्य इव **(स्वरव:)** प्रतापयुक्ता: **(अध्वरेषु)** गृहाश्रमव्यवहाराऽनुष्ठानेषु **(वि)** **(उ)** **(व्रजस्य)** **(तमस:)** अन्धकारस्य **(द्वारा)** द्वाराणि **(उच्छन्ती:)** विवासयन्त्य: **(अव्रन्)** वृणुयु: **(शुचय:)** पवित्रा: **(पावका:)** पवित्रकर्मकर्त्र्य:॥२॥

अन्वय:-हे ब्रह्मचारिणो! या उ अध्वरेषु शुचय: पावका: स्वरव: पुरस्तान्मिता इवोषसो व्रजस्य तमसो द्वारा व्युच्छन्तीरिव चित्रा अस्थुस्ता उ विवाहायाव्रन्॥२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे ब्रह्मचारिणो! या ब्रह्मचारिण्यो मेघस्वना मितभाषिण्य: पवित्रा विदुष्य: स्युस्ता एव पूर्वे सम्परीक्ष्य वोढव्या:॥२॥

पदार्थ:-हे ब्रह्मचारी जनो! जो **(उ)** ही **(अध्वरेषु)** गृहाश्रम के व्यवहारों के अनुष्ठानों में **(शुचय:)** पवित्र **(पावक:)** पवित्र कर्म करने वाली **(स्वरव:)** प्रताप से युक्त **(पुरस्तात्)** पूर्व से **(मिताइव)** विद्या से सम्पूर्ण पदार्थों को जानती सी हुईं **(उषस:)** प्रभात वेलाओं के सदृश कन्याएँ **(व्रजस्य)** प्राप्त **(तमस:)** अन्धकार के **(द्वारा)** द्वारों को **(वि, उच्छन्ती:)** विवास कराती हुईं सी **(चित्रा:)** विचित्र गुण, कर्म, स्वभावयुक्त ब्रह्मचारिणी **(अस्थु:)** स्थित होती हैं **(उ)** उन्हीं को विवाह के लिये **(अव्रन्)** स्वीकार करो॥२॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे ब्रह्मचारी जनो! जो ब्रह्मचारिणी मेघ के सदृश गम्भीर शब्दयुक्त, थोड़ा बोलने वाली, पवित्र और विद्यायुक्त होवें, वही प्रथम उत्तम प्रकार परीक्षा करके विवाहने योग्य हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उ॒च्छन्ती॑रद्य चि॒तय॑न्त भो॒जान् रा॑धो॒देया॑यो॒षसो॑ म॒घोनी॑:।
अ॒चि॒त्रे अ॒न्त: प॒णय॑: सस॒न्त्वबु॑ध्यमाना॒स्तम॑सो॒ विम॑ध्ये॥३॥

उ॒च्छन्ती॑:। अ॒द्य। चि॒त॒य॒न्त॒। भो॒जान्। रा॒ध्र॒:ऽदेया॑य। उ॒षस॑:। म॒घोनी॑:। अ॒चि॒त्रे। अ॒न्तरिति॑। प॒ण॒य॑:। स॒स॒न्तु॒। अबु॑ध्यमाना:। तम॑स:। विऽम॑ध्ये॥ ३॥

पदार्थ:-(उच्छन्ती:) सुवासयन्त्य: **(अद्य)** **(चितयन्त)** विज्ञापयन्ति **(भोजान्)** पालकान् पतीन् **(राधोदेयाय)** धनं दातुं योग्याय व्यवहाराय **(उषस:)** प्रातर्वेला इव **(मघोनी:)** सत्कृतधनानां स्त्रिय: **(अचित्रे)** अनाश्चर्ये **(अन्त:)** मध्ये **(पणय:)** प्रशंसनीया: **(ससन्तु)** शयीरन् **(अबुध्यमाना:)** बोधरहिता: **(तमस:)** रात्रे: **(विमध्ये)** विशेषान्धकारे॥ ३॥

अन्वय:-हे विद्वांसो! या तमसोऽचित्रे विमध्य उषस इव मघोनीरुच्छन्तीरन्तोऽबुध्यमाना: पणय: स्त्रिय: सुखेन ससन्तु राधोदेयाय भोजानद्य चितयन्त ता सङ्ग्रहीतव्या:॥ ३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे पुरुषा! या: कन्या: स्वसदृश्यो विदुष्य: शुभगुणकर्मस्वभावा: स्युस्ता एव भार्य्यत्वायाङ्गीकार्या:॥ ३॥

पदार्थ:-हे विद्वानो! जो **(तमस:)** रात्रि के **(अचित्रे)** नहीं आश्चर्य जिसमें ऐसे **(विमध्ये)** विशेष अन्धकार में **(उषस:)** प्रातर्वेलाओं के सदृश **(मघोनी:)** सत्कार किया धन का जिन्होंने उनकी स्त्रियाँ **(उच्छन्ती:)** और उत्तम प्रकार वास देती हुई **(अन्त:)** मध्य में **(अबुध्यमाना:)** बोधरहित **(पणय:)** प्रशंसा करने योग्य स्त्रियाँ **(ससन्तु)** सुख से सोवें और **(राधोदेयाय)** धन देने योग्य व्यवहार के लिये **(भोजान्)** पालन करने वाले पतियों को **(अद्य)** आज **(चितयन्त)** जनाती हैं, वे अच्छे प्रकार ग्रहण करनी चाहिये॥ ३॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे पुरुषो! जो कन्या अपने सदृश विदुषी और शुभ गुण, कर्म, स्वभाव वाली होवें, वे ही स्त्री होने के लिये स्वीकार करने योग्य हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कु॒वित्स दे॑वी: स॒नयो॒ नवो॑ वा॒ यामो॑ बभू॒यादु॑षसो वो अ॒द्य।

येना॒ नव॑ग्वे॒ अङ्गि॑रे॒ दश॑ग्वे स॒प्तास्ये॑ रेवती॒ रे॒वदू॑ष॥ ४॥

कु॒वित्। स:। दे॒वी:। स॒नय॑:। नव॑:। वा॒। याम॑:। ब॒भू॒यात्। उ॒ष॒स॒:। व॒:। अ॒द्य। येन॑। नव॑ऽग्वे। अङ्गि॑रे। दश॑ऽग्वे। स॒प्तऽआ॑स्ये। रे॒व॒ती॒:। रे॒वत्। ऊ॒ष॥ ४॥

पदार्थ:-(कुवित्) महान् **(स:)** **(देवी:)** **(सनय:)** विभक्त्र्य: **(नव:)** नवीनविद्यावयस्क: **(वा)** **(याम:)** यो याति स: **(बभूयात्)** भृशं भूयात् **(उषस:)** प्रभाता: **(व:)** युष्मान् **(अद्य)** **(येना)** अत्र **संहितायामि**ति दीर्घ:। **(नवग्वे)** नव गावो विद्यन्ते यस्य तस्मै **(अङ्गिरे)** प्राणवत्प्रिये पत्यौ **(दशग्वे)** दश

गावो यस्य तस्मै **(सप्तास्ये)** सप्त प्राणा आस्ये यस्य तस्मिन् **(रेवतीः)** बहुधनशोभायुक्ताः **(रेवत्)** बहुप्रशंसितधनवत् **(ऊष)** निवासयन्ति॥४॥

अन्वयः-हे पुरुषाः ! स कुविद्यामो नवस्त्वं बभूयात् तद्वद् रेवतीः सनयो देवीरुषस इव वो रेवदूष वा येनाद्य नवग्वे दशग्वे अङ्गिरे सप्तास्ये वर्त्तन्तेऽतस्ता गृहाश्रमाय सेवध्वम्॥४॥

भावार्थः-योऽधिकविद्याबलः समानरूपो नवयौवनः सुशीलो विद्वान् स्वसदृशीं स्त्रियमुपयच्छेत् स सुखी भूयात्। या स्त्री पतिं कामयमाना धनविद्योन्नतिं कुर्यात् सा सर्वान् मनुष्यान् सुखयितुमर्हेत्॥४॥

पदार्थः-हे पुरुषो! **(सः)** वह **(कुवित्)** बड़े **(यामः)** चलने वाले **(नव)** नवीन विद्या अवस्था युक्त आप **(बभूयात्)** निरन्तर हूजिये उसी प्रकार **(रेवतीः)** बहुत धन और शोभा से युक्त **(सनयः)** विभाग करने वाली **(देवीः)** प्रकाशमान **(उषसः)** प्रभात वेलाओं के सदृश कन्या **(वः)** आप लोगों को **(रेवत्)** बहुत प्रशंसित धनवान् जैसे हो वैसे **(ऊष)** निरन्तर वसाती हैं **(वा)** अथवा **(येना)** जिस कारण **(अद्य)** आज दिन **(नवग्वे)** नौ गौओं से युक्त **(दशग्वे)** और दश गौवों से युक्त **(अङ्गिरे)** प्राणों के सदृश प्रिय पति के निमित्त **(सप्तास्ये)** सात प्राण मुख में जिसके उसमें वर्त्तमान हैं, इससे उनकी गृहाश्रम के लिये सेवा करो॥४॥

भावार्थः-जो अधिक विद्या, बल, तुल्य रूप, नवीन युवावस्थायुक्त और सुशील, विद्वान् अपने सदृश स्त्री को स्वीकार करे; वह सुखी होवे और जो स्त्री पति की कामना करती हुई धन और विद्या की उन्नति करे; वह सब मनुष्यों को सुखी करने के योग्य होवे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यू॒यं हि दे॑वीर्ऋ॒तयु॑ग्भि॒रश्वै॑: परिप्रया॒थ भुव॑नानि स॒द्यः।

प्र॒बो॒धय॑न्तीरुषसः स॒सन्तं॑ द्वि॒पाच्च॑तु॒ष्पाच्च॒रथा॑य जी॒वम्॥५॥१॥

यू॒यम्। हि। दे॒वीः। ऋ॒तयुक्ऽभिः। अश्वैः। प॒रि॒ऽप्र॒या॒थ। भुव॑नानि। स॒द्यः। प्र॒ऽबो॒धय॑न्तीः। उ॒ष॒सः। स॒सन्त॑म्। द्वि॒ऽपात्। च॒तुः॒ऽपात्। च॒रथा॑य। जी॒वम्॥५॥

पदार्थः-**(यूयम्)** **(हि)** **(देवीः)** दिव्यगुणकर्मस्वभावाः **(ऋतयुग्भिः)** य ऋतेन सत्येन युञ्जते तैः **(अश्वैः)** महाबलिष्ठैः पुरुषार्थयुक्तैः **(परिप्रयाथ)** सर्वतः प्राप्नुयात् **(भुवनानि)** लोकलोकान्तराणि **(सद्यः)** शीघ्रम् **(प्रबोधयन्तीः)** जागरयन्त्यः **(उषसः)** **(ससन्तम्)** शयानम् **(द्विपात्)** द्वौ पादौ यस्य स मनुष्यादिः **(चतुष्पात्)** चत्वारः पादा यस्य स गवादिः **(चरथाय)** **(जीवम्)** प्राणधारिणम्॥५॥

अन्वयः-हे नरा! यूयं यथा चरथाय ससन्तं जीवं प्रबोधयन्तीरुषसो द्विपाच्चतुष्पाद्वत्सद्यो भुवनानि गच्छन्ति तथा ह्यृतयुग्भिरश्वैर्देवीः स्त्रियः परिप्रयाथ॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये शुभगुणान्विता विदुषीर्हृद्याः स्वसदृशीर्भार्याः प्राप्नुवन्ति ते सदैवोषर्वत्प्रकाशमानाः सर्वेषां ज्ञापका भवन्ति॥५॥

पदार्थः-हे मनुष्यो! **(यूयम्)** आप लोग जैसे **(चरथाय)** भ्रमण के लिये **(ससन्तम्)** शयन करते हुए **(जीवम्)** प्राणधारी को **(प्रबोधयन्तीः)** जगाती हुई **(उषसः)** प्रातर्वेला **(द्विपात्)** दो पाद वाले मनुष्य आदि और **(चतुष्पात्)** चार पैर वाली गौ आदि के सदृश **(सद्यः)** शीघ्र **(भुवनानि)** लोक-लोकान्तरों को प्राप्त होती हैं, वैसे **(हि)** ही **(ऋतयुग्भिः)** सत्य से युक्त **(अश्वैः)** बड़े बलिष्ठ और पुरुषार्थियों के साथ **(देवीः)** दिव्य गुण, कर्म, स्वभाव युक्त स्त्रियों को **(परिप्रयाथ)** सब ओर से प्राप्त होओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जन उत्तम गुणों से युक्त, विदुषी, सुन्दर, अपने सदृश स्त्रियों को प्राप्त होते हैं; वे सदा ही प्रातःकाल के सदृश प्रकाशमान और सब के बोधक होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

क्व॑ स्विदासां कत॒मा पु॑रा॒णी यया॑ वि॒धाना॑ विद॒धुर्ऋ॒॑भूणा॑म्।
शु॒भं॒ यच्छु॒भ्रा उ॒षस॒श्चर॑न्ति॒ न वि ज्ञा॑यन्ते स॒दृशी॒॑रजु॒र्याः॥६॥

क्व॑। स्वि॒त्। आ॒सा॒म्। क॒त॒मा। पु॒रा॒णी। यया॑। वि॒ऽधाना॑। वि॒ऽद॒धुः॒। ऋ॒भूणा॑म्। शु॒भ॑म्। यत्। शु॒भ्राः॒। उ॒षस॒॑। चर॑न्ति। न। वि। ज्ञा॒य॒न्ते॒। स॒ऽदृशी॒॑। अ॒जु॒र्याः॥६॥

पदार्थः-(क्व) कस्मिन् **(स्वित्)** प्रश्ने **(आसाम्)** **(कतमा)** **(पुराणी)** पुरातनी **(यया)** **(विधाना)** **(विदधुः)** विदध्यासुः **(ऋभूणाम्)** धीमताम् **(शुभम्)** कल्याणम् **(यत्)** याः **(शुभ्राः)** भास्वराः **(उषसः)** प्रातर्वेलाः **(चरन्ति)** गच्छन्ति **(न)** निषेधे **(वि)** **(ज्ञायन्ते)** **(सदृशीः)** समानाः **(अजुर्याः)** अजीर्णाः॥६॥

अन्वयः-हे मनुष्या! यद्या शुभ्राः सदृशीरजुर्या उषसः शुभं चरन्त्यासां कतमा पुराणी क्व विधाना ययर्भूणां स्विद् किं विदधुरेवं न वि ज्ञायन्ते इत्थंभूताः स्त्रियो वरा विजानीत॥६॥

भावार्थः-यथा सर्वाः प्रातर्वेलाः सदृश्यः सन्ति तथैव पतिभिः सदृशा भार्याः प्रशंसनीया भवन्ति ताः सदैव युवावस्थायां यूनः प्राप्यानन्दन्तु नैव विज्ञायते का नवीना का प्राचीनोषा वर्त्तते तद्वत्कृतब्रह्मचर्याः कन्या भवन्ति॥६॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(शुभ्राः)** चमकीली **(सदृशीः)** तुल्य **(अजुर्याः)** नहीं जीर्ण अर्थात् नवीन **(उषसः)** प्रातर्वेलायें **(शुभम्)** कल्याण को **(चरन्ति)** प्राप्त होती हैं **(आसाम्)** इनके मध्य में **(कतमा)** कौन सी **(पुराणी)** पुरानी **(क्व)** किस में **(विधाना)** करती **(यया)** जिससे **(ऋभूणाम्)** बुद्धिमानों का **(स्वित्)** क्या **(विदधुः)** विधान करें ऐसा **(न)** नहीं **(वि, ज्ञायन्ते)** जाना जाता है, इस प्रकार की स्त्रियों को श्रेष्ठ जानें॥६॥

भावार्थः-जैसे सम्पूर्ण प्रातर्वेला तुल्य होती हैं, वैसे ही पतियों के साथ सदृश स्त्रियाँ प्रशंसा करने योग्य होती हैं, वह सदा ही युवावस्था में युवा पुरुषों को प्राप्त होकर आनन्दित हों, नहीं जाना जाता है कि कौन नवीन कौन प्राचीन प्रातर्वेला होती है, वैसे ब्रह्मचर्य्य से युक्त कन्या होती हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ता घा॒ ता भ॒द्रा उ॒षस॑: पु॒रासु॑रभि॒ष्टिद्यु॑म्ना ऋ॒तजा॑तसत्या:।

यास्वी॑जा॒न: श॑शमा॒न उ॒क्थै: स्तु॒वच्छंस॒न् द्रवि॑णं स॒द्य आप॑॥७॥

ताः। घ॒। ताः। भ॒द्राः। उ॒षस॑:। पु॒रा। आ॒सु॒:। अ॒भि॒ष्टिऽद्यु॑म्नाः। ऋ॒तजा॑तऽसत्याः। यासु॑। ई॒जा॒नः। श॒श॒मा॒नः। उ॒क्थैः। स्तु॒वन्। शंस॑न्। द्रवि॑णम्। स॒द्यः। आप॑॥७॥

पदार्थः-(ताः) (घा) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। **(ताः) (भद्राः)** कल्याणकारीः **(उषसः)** प्रभातवेलाः **(पुरा) (आसुः)** आसन् **(अभिष्टिद्युम्नाः)** प्रशंसितयशोधनाः **(ऋतजातसत्याः)** ऋताज्जातेषु व्यवहारेषु सत्सु साध्व्यः **(यासु) (ईजानः) (शशमानः)** प्राप्तप्रशंसः सन् **(उक्थैः)** वक्तुमर्हैर्वचनैः **(स्तुवन्) (शंसन्)** प्रशंसन् **(द्रविणम्)** धनं यशो वा **(सद्यः)** शीघ्रम् **(आप)** प्राप्नोति॥७॥

अन्वयः-हे मनुष्या! ईजानः शशमान उक्थैः स्तुवच्छंसन् यासु द्रविणं सद्य आप ता उषसो भद्रा यादृश्यः पुराऽऽसुस्तादृश्यः पुनर्वर्त्तन्ते तद्वद्या अभिष्टिद्युम्ना ऋतजातसत्या ब्रह्मचारिण्यः सन्ति ता घा यूयं गृहाश्रमाय प्राप्नुत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्येण सहोषा सदा वर्त्तते तथैव कृतस्वयंवरौ स्त्रीपुरुषौ यशस्विनौ सत्याचरणौ भवेताम्॥७॥

पदार्थः-हे मनुष्यो! **(ईजानः)** गमन करने वाला जन **(शशमानः)** प्रशंसा को प्राप्त होता **(उक्थैः)** कहने योग्य वचनों से **(स्तुवन्)** स्तुति करता और **(शंसन्)** प्रशंसा करता हुआ **(यासु)** जिनमें **(द्रविणम्)** धन वा यश को **(सद्यः)** शीघ्र **(आप)** प्राप्त होता है **(ताः)** वे **(उषसः)** प्रभात वेला **(भद्राः)** कल्याण करने वाली जैसी **(पुरा)** पहिले **(आसुः)** हुईं वैसी फिर वर्त्तमान हैं, उनके समान जो **(अभिष्टिद्युम्ना)** प्रशंसित यशरूप धन से युक्त **(ऋतजातसत्याः)** सत्य से उत्पन्न हुए व्यवहारों में श्रेष्ठ ब्रह्मचारिणी हैं **(ताः, घा)** उन्हीं को आप लोग गृहाश्रम के लिये प्राप्त होओ॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य के साथ प्रातर्वेला सदा वर्त्तमान है, वैसे ही स्वयंवर जिन्होंने किया ऐसे स्त्री-पुरुष यशस्वी और सत्य आचरण वाले होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ता आ चरन्ति समना पुरस्तात् समानतः समना पप्रथानाः।

ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते॥८॥

ताः। आ। चरन्ति। समना। पुरस्तात्। समानतः। समना। पप्रथानाः। ऋतस्य। देवीः। सदसः। बुधानाः। गवाम्। न। सर्गाः। उषसः। जरन्ते॥८॥

पदार्थः-(ता) (आ) (चरन्ति) (समना) समानाः। अत्र **सुपां सुलुगिति** जसो लुक्। **(पुरस्तात्) (समानतः)** सदृशेभ्यः पतिभ्यः **(समना)** समानगुणकर्मस्वभावाः **(पप्रथानाः)** विस्तीर्णविद्यासौन्दर्यादिगुणाः **(ऋतस्य)** सत्यस्य **(देवीः)** विदुष्यः **(सदसः)** सभ्यान् **(बुधानाः)** प्रबोधयन्त्यः **(गवाम्) (न)** इव **(सर्गाः)** उत्पद्यमानाः **(उषसः)** प्रातर्वेलाः **(जरन्ते)** स्तुवन्ति॥८॥

अन्वयः-हे मनुष्या! या पुरस्तात् कृतब्रह्मचर्य्यपरीक्षाः समानतः समना ऋतस्य देवीः पप्रथानाः सदसो बुधाना उषसः समना गवां सर्गा ना चरन्ति जरन्ते ता उपयच्छन्तु॥८॥

भावार्थः-हे मनुष्या! गृहीतशिक्षा रूपलावण्यादिशुभगुणाढ्या विदुष्यो ब्रह्मचारिण्यः स्युस्ता एव यथायोग्यं विवहन्तु॥८॥

पदार्थः-हे मनुष्यो! जो **(पुरस्तात्)** पुरस्तात् कृत ब्रह्मचर्य्य परीक्षा अर्थात् प्रथम ब्रह्मचर्य्य की परीक्षा जिनकी की **[**गयी**]** ऐसी **(समानतः)** सदृश पतियों से **(समना)** तुल्य गुण, कर्म और स्वभाव वाली **(ऋतस्य)** सत्य की **(देवीः)** जानने वाली पण्डिता **(पप्रथानाः)** विस्तीर्ण विद्या और सौन्दर्य्य आदि गुणयुक्त कन्या **(सदसः)** श्रेष्ठ पुरुषों को **(बुधानाः)** ज्ञान से जगाती **(उषसः)** प्रातर्वेलाओं के **(समना)** समान और **(गवाम्)** गौओं के **(सर्गाः)** उत्पन्न हुए वृन्दों के **(न)** समान **(आ, चरन्ति)** आचरण करती और **(जरन्ते)** स्तुति करती हैं **(ताः)** उनको विवाहो॥८॥

भावार्थः-हे मनुष्यो! जो शिक्षा को ग्रहण किये हुए, रूप और कान्ति आदि उत्तम गुणों से युक्त, विदुषी, ब्रह्मचारिणी कन्या होवें; उन्हीं को यथायोग्य विवाहो॥८॥

अथ स्त्रीभ्य उपदेशविषयमाह॥

अब स्त्रियों के लिये उपदेशविषय को अगले मन्त्र में कहते हैं॥

ता इन्वेऽव समना समानीरमीतवर्णा उषसश्चरन्ति।

गूहन्तीभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः॥९॥

ताः। इत्। नु। एव। समना। समानीः। अमीतऽवर्णाः। उषसः। चरन्ति। गूहन्तीः। अभ्वम्। असितम्। रुशत्ऽभिः। शुक्राः। तनूभिः। शुचयः। रुचानाः॥९॥

पदार्थः-(ताः) (इत्) एव **(नु)** सद्यः **(एव) (समना)** समानाः **(समानीः) (अमीतवर्णाः)** अहिंसितवर्णाः **(उषसः)** प्रभातवेला इव **(चरन्ति) (गूहन्तीः)** संवृण्वत्यः **(अभ्वम्)** महान्तम् **(असितम्)**

निकृष्टवर्णन्तमः **(रुशद्भिः)** हिंसकैर्गुणैः **(शुक्राः)** प्रदीप्ताः **(तनूभिः)** विस्तृतशरीरैः **(शुचयः)** पवित्राः **(रुचानाः)** रुचिकर्य्यः॥९॥

अन्वयः-हे स्त्रियो! या अमीतवर्णाः समना समानी रुशद्भिरभ्वमसितं गूहन्तीस्तनूभिः शुक्राः शुचयो रुचाना उषसश्चरन्ति ता इन्त्वेव यथा सुखं प्रयच्छन्ति तथैव सर्वान्त्सुखयत॥९॥

भावार्थः-याः स्त्रिय उषर्वद् दुःखध्वंसिका सुखजनित्र्यः स्युस्ता एवाऽऽह्वादिका भवेयुः॥९॥

पदार्थः-हे स्त्रियो! जो **(अमीतवर्णाः)** विद्यमान वर्ण वाली **(समना)** तुल्य **(समानीः)** तुल्यविचारशील **(रुशद्भिः)** नाश करने वाले गुणों से **(अभ्वम्)** बड़े **(असितम्)** निकृष्ट वर्ण वाले अन्धकार को **(गूहन्तीः)** ढांपती हुई **(तनूभिः)** विस्तृत शरीरों से **(शुक्राः)** कान्तिमती और **(शुचयः)** पवित्र **(रुचानाः)** प्रीति करने वाली **(उषसः)** प्रभातवेलाओं के सदृश **(चरन्ति)** चलती हैं **(ताः)** वे **(इत्)** ही **(नु)** शीघ्र **(एव)** ही जैसे सुख देती हैं, वैसे सब को सुखी करो॥९॥

भावार्थः-जो स्त्रियाँ प्रातर्वेला के सदृश दुःख को नाश करने वाली और सुख को उत्पन्न करने वाली हों, वे ही आनन्द देने वाली होवें॥९॥

अथाग्रिमेण स्वयंवर उच्यते

अब अगले मन्त्र से स्वयंवर विवाह कहा है॥

रयिं दिवो दुहितरो विभातीः प्रजावन्तं यच्छतास्मासु देवीः।

स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम॥१०॥

रयिम्। दिवः। दुहितरः। विऽभातीः। प्रजाऽवन्तम्। यच्छत। अस्मासु। देवीः। स्योनात्। आ। वः। प्रतिऽबुध्यमानाः। सुऽवीर्यस्य। पतयः। स्याम॥१०॥

पदार्थः-**(रयिम्)** धनम् **(दिवः)** सूर्य्यस्य **(दुहितरः)** कन्या इव किरणाः **(विभातीः)** प्रकाशयन्त्यः **(प्रजावन्तम्)** बह्व्यः प्रजा विद्यन्ते यस्य तम् **(यच्छत)** गृह्णीत **(अस्मासु)** **(देवीः)** विदुष्यः **(स्योनात्)** सुखात् **(आ)** **(वः)** युष्मान् **(प्रतिबुध्यमानाः)** **(सुवीर्य्यस्य)** सुष्ठु पराक्रमयुक्तस्य सैन्यस्य **(पतयः)** **(स्याम)**॥१०॥

अन्वयः-हे मनुष्या! यथा दिवो विभातीर्दुहितरः किरणाः प्रकाशं ददति। हे देवीर्देव्यस्तथास्मासु स्योनात् प्रजावन्तं रयिमायच्छत वः प्रतिबुध्यमाना वयं सुवीर्य्यस्य पतयः स्याम॥१०॥

भावार्थः- अत्र वाचकलुप्तोपमालङ्कारः। याः कन्याः प्रभातवेलावत्सुशोभिताः सुखं जनयन्ति ताभिः सह स्वयंवरेण विवाहेनैव मनुष्याः श्रीमन्तो जायन्ते॥१०॥

पदार्थः-हे मनुष्यो! जैसे **(दिवः)** सूर्य्य की **(विभातीः)** प्रकाश करती हुई **(दुहितरः)** कन्याओं के सदृश वर्त्तमान किरणें प्रकाश को देती हैं। हे **(देवीः)** विदुषियों! वैसे **(अस्मासु)** हम लोगों में

(स्योनात्) सुख से **(प्रजावन्तम्)** बहुत प्रजायुक्त **(रयिम्)** धन को **(आ, यच्छत)** ग्रहण करो **(वः)** तुम को **(प्रतिबुध्यमानाः)** प्रतिबोध कराते हुए हम लोग **(सुवीर्यस्य)** उत्तम पराक्रम युक्त सेना के **(पतयः)** स्वामी **(स्याम)** होवें॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो कन्या प्रभात वेला के सदृश उत्तम प्रकार शोभित सुख को उत्पन्न करती हैं, उनके साथ स्वयंवर विवाह से ही मनुष्य श्रीमान् होते हैं॥१०॥

अथ पुरुषविषयमाह॥

अब पुरुष विषय को अगले मन्त्र में कहते हैं॥

तद्वो॑ दि॒वो दु॑हितरो॒ विभा॒तीरुप॑ ब्रुव उष॒सो य॒ज्ञके॑तुः।
व॒यं स्या॑म य॒शसो॒ जने॑षु॒ तद् द्यौश्च॑ ध॒त्तां पृ॑थि॒वी च॑ दे॒वी॥११॥२॥

तत्। व॒ः। दि॒व॒ः। दु॒हि॒त॒रः॒। वि॒ऽभा॒तीः॒। उप॑। ब्रु॒वे॒। उ॒ष॒सः॒। य॒ज्ञऽके॑तुः। व॒यम्। स्या॒म॒। य॒शसः॑। जने॑षु। तत्। द्यौः। च॒। ध॒त्ताम्। पृ॒थि॒वी। च॒। दे॒वी॥११॥

पदार्थः-(तत्) (वः) युष्माकम् **(दिवः)** प्रकाशस्य **(दुहितरः)** कन्या इव वर्त्तमानाः **(विभातीः)** प्रकाशयन्त्यः **(उप) (ब्रुवे)** उपदिशामि **(उषसः)** प्रातर्वेलायाः **(यज्ञकेतुः)** यज्ञस्य प्रापकः **(वयम्) (स्याम) (यशसः)** यशस्विनः **(जनेषु)** विद्वत्सु **(तत्) (द्यौः)** विद्युत् **(च) (धत्ताम्) (पृथिवी) (च) (देवी)** देदीप्यमाना॥११॥

अन्वयः-हे मनुष्या! विभातीर्दिवो दुहितर उषस इव स्त्रियो वो यद् ब्रूयुस्तद्यज्ञकेतुरहं युष्मानुप ब्रुवे यथा तद्देवी द्यौश्च पृथिवी च धत्तां तथा वयं जनेषु यशसः स्याम॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये परस्परानुपदिश्य सत्यं ग्राहयन्ति ते सूर्यवत्प्रकाशका भूमिवत्प्रजाधर्त्तारो भवन्तीति॥११॥

अत्रोषःस्त्रीपुरुषगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाधिकपञ्चाशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(विभातीः)** प्रकाश करती हुईं **(दिवः)** प्रकाश की **(दुहितरः)** कन्याओं के सदृश वर्त्तमान **(उषसः)** प्रातर्वेला के सदृश स्त्रियाँ **(वः)** आप लोगों का जो विषय कहें **(तत्)** उसको **(यज्ञकेतुः)** यज्ञ का जनाने वाला मैं आप लोगों को **(उप, ब्रुवे)** उपदेश देता हूँ जैसे **(तत्)** उसको **(देवी)** प्रकाश **(द्यौः)** बिजुली **(च)** और **(पृथिवी)** पृथिवी **(च)** भी **(धत्ताम्)** धारण करें, वैसे **(वयम्)** हम लोग **(जनेषु)** विद्वानों में **(यशसः)** यशस्वी **(स्याम)** होवें॥११॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो परस्पर जनों को उपदेश देकर सत्य का ग्रहण कराते हैं, वे सूर्य्य के सदृश प्रकाश करने और भूमि के सदृश प्रजा के धारण करने वाले होते हैं॥११॥

इस सूक्त में प्रातःकाल, स्त्री और पुरुष के गुण कर्म वर्णन करने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इक्क्यावनवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य द्विपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। उषा देवता। १-६ निचृद्गायत्री। ५, ७ गायत्री छन्दः। षड्जः स्वरः॥

अथोषर्वत्स्त्रीगुणानाह॥

अब सात ऋचा वाले बावनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में उषा की तुल्यता से स्त्री के गुणों का वर्णन करते हैं॥

प्रति॒ ष्या सू॒नरी॒ जनी॑ व्यु॒च्छन्ती॒ परि॒ स्वसु॑रः। दि॒वो अ॑दर्शि दुहि॒ता॥ १॥

प्रति॑। स्या। सू॒नरी॑। जनी॑। वि॒ऽउ॒च्छन्ती॑। परि॑। स्वसु॑रः। दि॒वः। अ॒दर्शि॑। दु॒हि॒ता॥ १॥

पदार्थः-(प्रति) (स्या) सा **(सूनरी)** सुष्ठु नेत्री **(जनी)** जनयित्री **(व्युच्छन्ती)** निवासयन्ती **(परि) (स्वसुः)** भगिन्याः **(दिवः)** कमनीयायाः **(अदर्शि)** दृश्यते **(दुहिता)** कन्येव वर्त्तमाना॥१॥

अन्वयः-हे मनुष्या! या दिवः स्वसुर्जनी सूनरी परिव्युच्छन्ती दुहितेवोषाः प्रत्यदर्शि स्या जागृतेन मनुष्येण द्रष्टव्या॥१॥

भावार्थः-सैव स्त्री वरा या उषर्वद्वर्त्तते॥१॥

पदार्थः-हे मनुष्यो! जो **(दिवः)** सुन्दर **(स्वसुः)** भगिनी की **(जनी)** उत्पन्न करने वाली **(सूनरी)** उत्तम पहुंचाती और **(परि, व्युच्छन्ती)** सब ओर से निवास देती हुई **(दुहिता)** कन्या के सदृश वर्त्तमान प्रातर्वेला **(प्रति, अदर्शि)** एक के प्रति एक देखी जाती है **(स्या)** वह जागे हुए मनुष्य से देखने योग्य है॥१॥

भावार्थः-वही स्त्री श्रेष्ठ, जो प्रातर्वेला के सदृश वर्त्तमान है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अश्वे॑व चि॒त्रारु॑षी मा॒ता गवा॑मृ॒ताव॑री। सखा॑भूदु॒श्विनो॑रु॒षाः॥ २॥

अश्वा॑ऽइव। चि॒त्रा। अरु॑षी। मा॒ता। गवा॑म्। ऋ॒तऽव॑री। सखा॑। अ॒भू॒त्। अ॒श्विनोः॑। उ॒षाः॥ २॥

पदार्थः-(अश्वेव) अश्वावद्वर्त्तमाना **(चित्रा)** अद्भुतगुणकर्म्मस्वभावा **(अरुषी)** आरक्ता **(माता)** जननी **(गवाम्)** किरणानाम् **(ऋतावरी)** बहुसत्यप्रकाशिका **(सखा) (अभूत्) (अश्विनोः)** सूर्य्याचन्द्रमसोः **(उषाः)**॥२॥

अन्वयः-हे मनुष्या! या चित्राऽरुष्यृतावरी उषा अश्वेवाश्विनोः सखाऽभूत् सा गवां मातेव पालिका वेद्या॥२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! या मातृवत्सखिवद्वर्त्तमानोषा वर्त्तते सा युक्त्या सर्वैः सेवनीया॥२॥

पदार्थः-हे मनुष्यो! जो **(चित्रा)** अद्भुत गुण, कर्म और स्वभावयुक्त **(अरुषी)** ईषत् लाल वर्ण **(ऋतावरी)** बहुत सत्य का प्रकाश कराने वाली **(उषाः)** प्रातर्वेला **(अश्वेव)** घोड़ी के सदृश वर्त्तमान **(अश्विनोः)** सूर्य और चन्द्रमा की **(सखा)** मित्र **(अभूत्)** हुई वह **(गवाम्)** किरणों की **(माता)** माता के सदृश पालन करने वाली जाननी चाहिये॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो माता और मित्र के सदृश वर्त्तमान प्रातर्वेला है, वह युक्ति से सब पुरुषों से सेवन करने योग्य है॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत सखास्यश्विनोरुत माता गवामसि। उतोषो वस्व ईशिषे॥३॥

उत। सखा। असि। अश्विनोः। उत। माता। गवाम्। असि। उत। उषः। वस्वः। ईशिषे॥३॥

पदार्थः-(उत) **(सखा)** **(असि)** **(अश्विनोः)** सूर्य्याचन्द्रमसोरिवाऽध्यापकोपदेशकयोः **(उत)** **(माता)** जननीव **(गवाम्)** किरणानां धेनूनां वा **(असि)** **(उत)** **(उषः)** उष इव शुम्भमाने **(वस्वः)** धनस्य **(ईशिषे)** इच्छसि॥३॥

अन्वयः-हे उष इव वर्त्तमाने स्त्रि! त्वं पत्युः सखेवासि उताऽश्विनोः सखासि उत गवां मातासि उत वस्व ईशिषे॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सैव स्त्री सुखप्रदा या सुहृद्वदाज्ञानुकारिणी सेविका वर्त्तते सैवोषर्वत् कुलप्रकाशिका भवति॥३॥

पदार्थः-हे **(उषः)** प्रातर्वेला के सदृश वर्त्तमान सुन्दर स्त्री! तू अपने पति की **(सखा)** सखी के सदृश वर्त्तमान **(असि)** है **(उत)** और **(अश्विनोः)** सूर्य्य और चन्द्रमा के सदृश अध्यापक और उपदेशक की सखी **(असि)** है **(उत)** और **(गवाम्)** किरण वा गौओं की **(माता)** माता **(उत)** और **(वस्वः)** धन की **(ईशिषे)** इच्छा करती है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वही स्त्री सुख देने वाली जो मित्र के सदृश आज्ञा मानने और सेवा करने वाली है, वही प्रातर्वेला के सदृश कुल की प्रकाशिका होती है॥३॥

पुनः स्त्रीगुणानाह॥

फिर स्त्री गुणों को अगले मन्त्र में कहते हैं॥

यावयद् द्वेषसं त्वा चिकित्वित्सूनृतावरि। प्रति स्तोमैरभूत्स्महि॥४॥

यवयत्ऽद्वेषसम्। त्वा। चिकित्वित्। सूनृताऽवरि। प्रति। स्तोमैः। अभूत्स्महि॥४॥

पदार्थः-(यावयद्द्वेषसम्) यावयन्तं द्वेष्टारं द्वेषसं द्वेष्टारं पृथक्कारयन्तीम् **(त्वा)** त्वाम् **(चिकित्वित्)** ज्ञापयन्तीम् **(सूनृतावरि)** सत्यवाक्प्रकाशिके **(प्रति)** **(स्तोमैः)** प्रशंसाभिः **(अभूत्स्महि)** विजानीयाम॥४॥

अन्वयः-हे चिकित्वित् सूनृतावरि स्त्रि! वयं स्तौमैर्यावयद्द्वेषसं त्वा प्रत्यभूत्स्महि॥४॥

भावार्थः-या कदाचिद् द्वेषं द्वेष्टृसङ्गन्न करोति सत्यवाक् प्रशंसिता वर्त्तते सैव स्त्री वरा॥४॥

पदार्थः-हे **(चिकित्वित्)** जनाने और **(सूनृतावरि)** सत्यवाणी का प्रकाश करने वाली स्त्री! हम लोग **(स्तोमैः)** प्रशंसाओं से **(यावयद्द्वेषसम्)** द्वेष करने वाले को पृथक् कराने वाली **(त्वा)** तुझको **(प्रति, अभूत्स्महि)** जानें॥४॥

भावार्थः-जो कभी द्वेष और द्वेष करने वाले के सङ्ग को नहीं करती और सत्यवाणी और प्रशंसायुक्त है, वही स्त्री श्रेष्ठ है॥४॥

अथ स्त्रीणामुत्तमव्यवहारेषु प्रशंसामाह॥

अब स्त्रियों की उत्तम व्यवहारों में प्रशंसा कहते हैं॥

प्रति॑ भ॒द्रा अ॑दृक्षत॒ गवा॑ं सर्गा॒ न र॒श्मय॑ः। ओषा अ॑प्रा उ॒रु ज्र॒य॑ः॥५॥

प्रति॑। भ॒द्राः। अ॒दृ॒क्ष॒त॒। गवा॑म्। सर्गाः॑। न। र॒श्मय॑ः। आ। उ॒षाः। अ॒प्राः॒। उ॒रु। ज्र॒य॑ः॥५॥

पदार्थः-(प्रति) **(भद्राः)** कल्याणकर्यः **(अदृक्षत)** दृश्यन्ते **(गवाम्)** पृथिवीनाम् **(सर्गाः)** सृष्टयः **(न)** इव **(रश्मयः)** किरणाः **(आ)** **(उषाः)** प्रभातवेलाः **(अप्राः)** प्राति व्याप्नोति **(उरु)** बहु **(ज्रयः)** अतितेजोमय॥५॥

अन्वयः-हे मनुष्या! या उरु ज्रयो रश्मयो न भद्रा गवां सर्गाः प्रत्यदृक्षत यथोषास्ता आऽप्रास्तथा स्त्री भवेत्॥५॥

भावार्थः-अत्रोपमालङ्कारः। याः स्त्रियो रश्मिवदुत्तमान् व्यवहारान् प्रकाशयन्ति ताः सततं कल्याणाय कुलोन्नतिकर्य्यो जायन्ते॥५॥

पदार्थः-हे मनुष्यो! जो **(उरु)** बहुत **(ज्रयः)** अत्यन्त तेजःस्वरूप मण्डल को **(रश्मयः)** किरणों के **(न)** सदृश **(भद्राः)** कल्याण करने वाली **(गवाम्)** पृथिवियों की **(सर्गाः)** सृष्टियां, रचना **(प्रति, अदृक्षत)** प्रति समय देखी जाती हैं जैसे **(उषाः)** प्रभातवेला उनको **(आ, अप्राः)** व्याप्त होती है, वैसे स्त्री हो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो स्त्रियाँ किरणों के समान उत्तम व्यवहारों का प्रकाश कराती हैं, वे निरन्तर कल्याण के लिये कुल की उन्नति करने वाली होती हैं॥५॥

पुनरुषर्वत्स्त्रीकर्त्तव्यकर्म्माण्याह॥

अब उषा के तुल्य स्त्रियों के कर्त्तव्य कामों को कहते हैं॥

आ॒प॒प्रु॒षी॑ वि॒भाव॑रि॒ व्या॑व॒र्ज्योति॑षा॒ तम॑:। उषो॒ अनु॑ स्व॒धाम॑व॥६॥

आ॒ऽप॒प्रु॒षी॑। वि॒भा॒ऽव॒रि॒। वि आ॒व॒:। ज्योति॑षा। तम॑:। उष॑:। अनु॑। स्व॒धाम्। अ॒व॒॥६॥

पदार्थ:-(आपप्रुषी) समन्तात् सर्वा विद्या व्याप्नुवती **(विभावरि)** प्रशस्तविविधप्रकाशयुक्ते **(वि) (आव:)** विरक्ष **(ज्योतिषा)** प्रकाशेन **(तम:)** अन्धकारम् **(उष:)** उषर्वत्सुप्रकाशे **(अनु) (स्वधाम्)** अन्नादिकम् **(अव)** रक्ष॥६॥

अन्वय:-हे उष इव विभावरि शुभगुणे स्त्रि! आपप्रुषी त्वं ज्योतिषा तम इव दोषान् व्यावोऽनु स्वधामव॥६॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथोषा: स्वप्रकाशेनान्धकारं निवारयति तथैव विदुष्य: स्त्रिय: स्वोत्तमस्वभावेन दोषान्निवार्य्य सुसंस्कृतान्नादिना सर्वान् संरक्षन्तु॥६॥

पदार्थ:-हे **(उष:)** प्रभात वेला के सदृश उत्तम प्रकाश और **(विभावरि)** प्रशंसित विविध प्रकाश से युक्त उत्तम गुणवाली स्त्री! **(आपप्रुषी)** सब ओर से सर्व विद्याओं को व्याप्त तू **(ज्योतिषा)** प्रकाश से **(तम:)** अन्धकार के सदृश दोषों की **(वि, आव:)** विगतरक्षा अर्थात् रखने के विरुद्ध निकाल और **(अनु, स्वधाम्)** अनुकूल अन्न आदि की **(अव)** रक्षा कर॥६॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभात वेला अपने प्रकाश से अन्धकार का निवारण करती है, वैसे ही विद्यायुक्त स्त्रियाँ अपने उत्तम स्वभाव से दोषों का निवारण करके उत्तम प्रकार संस्कारयुक्त अन्न आदि से सब की उत्तम प्रकार रक्षा करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ द्यां त॑नोषि र॒श्मिभि॒रान्तरि॑क्षमु॒रु प्रि॒यम्। उष॑: शु॒क्रेण॑ शो॒चिषा॑॥७॥३॥

आ। द्याम्। त॒नो॒षि॒। र॒श्मिऽभि॑:। आ। अ॒न्तरि॑क्षम्। उ॒रु। प्रि॒यम्। उष॑:। शु॒क्रेण॑। शो॒चिषा॑॥७॥

पदार्थ:-(आ) (द्याम्) प्रकाशम् **(तनोषि)** विस्तृणासि **(रश्मिभि:)** किरणै: **(आ)** सर्वत: **(अन्तरिक्षम्) (उरु)** बहु **(प्रियम्)** कमनीयं पतिम् **(उष:) (शुक्रेण)** शुद्धेन **(शोचिषा)** प्रकाशेन॥७॥

अन्वय:-हे उषरिव वर्त्तमाने स्त्रि! यथोषा रश्मिभिर्द्यामुर्वाऽन्तरिक्षञ्च प्रकाशयति तथैव त्वं शुक्रेण शोचिषा प्रियं पतिमातनोषि तस्मात् सत्कर्त्तव्यासि॥७॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। सैव स्त्री बहुसुखं प्राप्नोति या विद्याविनयसुशीलादिभि: स्वपतिं सदैव प्रीणातीति॥७॥

अत्रोषर्वत्स्त्रीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विपञ्चाशत्तमं सूक्तं तृतीयो वर्गश्च समाप्त:॥

पदार्थः-हे **(उषः)** प्रभात वेला के सदृश वर्त्तमान स्त्री जैसे प्रभातवेला **(रश्मिभिः)** किरणों से **(द्याम्)** प्रकाश और **(उरु)** बहुत **(आ, अन्तरिक्षम्)** सब ओर से अन्तरिक्ष को प्रकाशित करती है, वैसे ही तू **(शुक्रेण)** शुद्ध **(शोचिषा)** प्रकाश से **(प्रियम्)** सुन्दर पति का **(आ, तनोषि)** विस्तार करती अर्थात् पति की कीर्त्ति बढ़ाती है, इससे सत्कार करने योग्य है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वही स्त्री बहुत सुख को प्राप्त होती है, जो विद्या, विनय और उत्तम स्वभावादिकों से अपने पति को नित्य प्रसन्न करती है॥७॥

इस सूक्त में प्रभात वेला के सदृश स्त्रियों के गुणवर्णन करने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बावनवां सूक्त और तृतीय वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य त्रिपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। सविता देवता। १, ३, ६, ७ निचृज्जगती। २ विराड्जगती। ४ स्वराड्जगती। ५ जगती छन्दः। निषादः स्वरः॥

अथ सवितुर्गुणानाह॥

अब सात ऋचा वाले त्रेपनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में सविता परमात्मा के गुणों का वर्णन करते हैं॥

तद्देवस्य सवितुर्वार्यं महद् वृणीमहे असुरस्य प्रचेतसः।
छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान् देवो अक्तुभिः॥ १॥

तत्। देवस्य। सवितुः। वार्यम्। महत्। वृणीमहे। असुरस्य। प्रऽचेतसः। छर्दिः। येन। दाशुषे। यच्छति। त्मना। तत्। नः। महान्। उत्। अयान्। देवः। अक्तुऽभिः॥ १॥

पदार्थः-(तत्) (देवस्य) देदीप्यमानस्य **(सवितुः)** वृष्ट्यादीनां प्रसवकर्त्तुः **(वार्यम्)** वरणीयेषु वा जलेषु भवम् **(महत्) (वृणीमहे)** स्वीकुर्म्महे **(असुरस्य)** मेघस्य **(प्रचेतसः)** प्रज्ञापकस्य **(छर्दिः)** गृहम्। **छर्दिरिति गृहनामसु पठितम्।** (निघं०३.४) **(येन) (दाशुषे)** दात्रे **(यच्छति) (त्मना)** आत्मना **(तत्) (नः)** अस्मभ्यम् **(महान्) (उत्) (अयान्)** यच्छतु **(देवः)** द्योतमानः **(अक्तुभिः)** रात्रिभिः॥ १॥

अन्वयः-हे मनुष्या! वयं यत्सवितुर्देवस्य प्रचेतसोऽसुरस्य मेघस्य महद्वार्यं छर्दिर्वृणीमहे तद्यूयं स्वीकुरुत येन विद्वांस्त्मना दाशुषे वार्यं महच्छर्दिर्यच्छति तन्महान् देवोऽक्तुभिर्न उदयान्॥ १॥

भावार्थः-ये विद्वांसो मेघस्य सूर्य्यस्य च सम्बन्धविद्यां जानन्ति तेऽहोरात्रेषु महत्कार्य्यं संसाध्याऽऽनन्दन्ति॥ १॥

पदार्थः-हे मनुष्यो! हम लोग जिस **(सवितुः)** वृष्टि आदि की उत्पत्ति करने वाले **(देवस्य)** निरन्तर प्रकाशमान **(प्रचेतसः)** जनानेवाले **(असुरस्य)** मेघ के **(महत्)** बड़े **(वार्यम्)** स्वीकार करने योग्य पदार्थों वा जलों में उत्पन्न **(छर्दिः)** गृह का **(वृणीमहे)** स्वीकार करते हैं **(तत्)** उसका आप लोग स्वीकार करो **(येन)** जिस कारण से विद्वान् जन **(त्मना)** आत्मा से **(दाशुषे)** दाता जन के लिये स्वीकार करने योग्यों वा जलों में उत्पन्न हुए बड़े गृह को **(यच्छति)** देता है **(तत्)** उसको **(महान्)** बड़ा **(देवः)** प्रकाशमान होता हुआ **(अक्तुभिः)** रात्रियों से **(नः)** हम लोगों के लिये **(उत्, अयान्)** उत्कृष्टता से देवे॥ १॥

भावार्थः-जो विद्वान् जन मेघ और सूर्य्य के सम्बन्ध की विद्या को जानते हैं, वे दिन और रात्रियों में बड़े कार्य्य को सिद्ध करके आनन्दित होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दि॒वो ध॒र्ता भुव॑नस्य प्र॒जाप॑तिः पि॒शङ्गं॑ द्रा॒पिं प्रति॑ मुञ्चते क॒विः।

वि॒चक्ष॑णः प्र॒थय॑न्नापृ॒ण॒न्नु॒र्वजी॑जनत् स॒वि॒ता सु॒म्नमु॒क्थ्य॑म्॥ २॥

दि॒वः। ध॒र्ता। भुव॑नस्य। प्र॒जाऽप॑तिः। पि॒शङ्ग॑म्। द्रा॒पिम्। प्रति॑। मु॒ञ्च॒ते॒। क॒विः। वि॒ऽच॒क्ष॒णः। प्र॒थय॑न्। आ॒ऽपृ॒ण॒न्। उ॒रु। अजी॑जनत्। स॒वि॒ता। सु॒म्नम्। उ॒क्थ्य॑म्॥ २॥

पदार्थः-(दिवः) प्रकाशस्य **(धर्त्ता)** **(भुवनस्य)** अनेकभूगोलालङ्कृतस्य **(प्रजापतिः)** प्रजायाः पालकः **(पिशङ्गम्)** विचित्ररूपम् **(द्रापिम्)** कवचम् **(प्रति)** **(मुञ्चते)** त्यजति **(कविः)** क्रान्तदर्शनः **(विचक्षणः)** विविधपदार्थानां प्रकाशकः **(प्रथयन्)** विस्तारयन् **(आपृणन्)** समन्तात् पूरयन् **(उरु)** बहु **(अजीजनत्)** जनयति **(सविता)** सकलैश्वर्य्ययोक्ता प्रभ्वैश्वर्य्यदाननिमित्तो वा **(सुम्नम्)** सुखम् **(उक्थ्यम्)** प्रशंसनीयम्॥ २॥

अन्वयः-हे विद्वांसो! योऽयं दिवो भुवनस्य धर्त्ता प्रजापतिः कविः पिशङ्गं द्रापिं प्रति मुञ्चते विचक्षणः प्रथयन्नापृणन्त्सवितोरुक्थ्यं सुम्नमजीजनत् स युष्माभिर्यथावद्वेदितव्यः॥ २॥

भावार्थः-हे मनुष्या! येन परमेश्वरेण प्रजाया धारणाय प्रकाशाय पालनाय सूर्य्यो निर्मितस्तमेव परमेश्वरमुपास्य बहु सुखं प्राप्नुत॥ २॥

पदार्थः-हे विद्वान् जनो! जो यह **(दिवः)** प्रकाश और **(भुवनस्य)** अनेक भूगोलों से अलङ्कृत अर्थात् शोभित संसार का **(धर्त्ता)** धारण करने वाला **(प्रजापतिः)** प्रजा का पालनकर्त्ता **(कविः)** तेजयुक्त दर्शनवाला **(पिशङ्गम्)** विचित्र रूपवाले **(द्रापिम्)** कवच को **(प्रति, मुञ्चते)** त्याग करता है और **(विचक्षणः)** अनेक प्रकार से पदार्थों का प्रकाश करने वाला **(प्रथयन्)** विस्तार करता और **(आपृणन्)** सब प्रकार से पूर्ण करता हुआ **(सविता)** सम्पूर्ण ऐश्वर्य्यों से युक्त करने वाला वा समर्थ ऐश्वर्य्यों के देने का निमित्त **(उरु)** बहुत **(उक्थ्यम्)** प्रशंसा करने योग्य **(सुम्नम्)** सुख को **(अजीजनत्)** उत्पन्न करता है, वह आप लोगों को यथावत् जानने योग्य है॥ २॥

भावार्थः-हे मनुष्यो! जिस परमेश्वर ने प्रजा के धारण प्रकाश और पालन के लिये सूर्य्य बनाया, उसी परमेश्वर की उपासना करके बहुत सुख को प्राप्त होइये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आप्रा॒ रजा॑ꣳसि दि॒व्यानि॑ पार्थि॒वा॒ श्लोकं॑ दे॒वः कृ॑णुते॒ स्वाय॒ धर्म॑णे।

प्र बा॒हू अ॑स्राक् स॒वि॒ता सवी॑मनि नि॒वे॒शय॑न् प्रसु॒व॒न्न॒क्तुभि॒र्जग॑त्॥ ३॥

आ। अ॒प्राः॒। रजा॑ꣳसि। दि॒व्यानि॑। पार्थि॒वा। श्लोक॑म्। दे॒वः। कृ॒णु॒ते॒। स्वाय॑। धर्म॑णे। प्र। बा॒हू इति॑। अ॒स्रा॒क्। स॒वि॒ता। सवी॑मनि। नि॒ऽवे॒शय॑न्। प्रऽसु॒व॒न्। अ॒क्तुऽभिः॑। जग॑त्॥ ३॥

पदार्थः-(आ) समन्तात् **(अप्राः)** व्याप्नोति **(रजांसि)** लोकान् **(दिव्यानि)** शुद्धानि **(पार्थिवा)** पृथिव्यां विदितानि **(श्लोकम्)** श्लाघनीयां वाचम् **(देवः) (कृणुते) (स्वाय) (धर्म्मणे)** धर्मोन्नतये **(प्र) (बाहू)** भुजौ **(अस्राक्)** यः सृजति **(सविता)** सकलजगदुत्पादकः **(सवीमनि)** महैश्वर्ये **(निवेशयन्) (प्रसुवन्)** उत्पादयन् **(अक्तुभिः)** रात्रिभिः सह **(जगत्)** सर्वं विश्वम्॥३॥

अन्वयः-हे मनुष्या! यः सविता देवः सवीमन्यक्तुभिर्जगन्निवेशयन् प्रसुवन् बाहू अस्राक् स देवः स्वाय धर्म्मणे श्लोकं प्र कृणुते सविता दिव्यानि पार्थिवा रजांस्याऽऽप्राः॥३॥

भावार्थः-हे मनुष्या! यो जगदीश्वरः सर्वं जगदभिव्याप्य निर्माय धर्म्मं वेदवाणीं प्रचार्य्य जगद् व्यवस्थापयति तमेव सर्वस्वामिनं विज्ञाय सततमुपाध्वम्॥३॥

पदार्थः-हे मनुष्यो! जो **(सविता)** सम्पूर्ण जगत् का उत्पन्न करने वाला **(देवः)** प्रकाशमान विद्वान् **(सवीमनि)** बड़े ऐश्वर्य्य में **(अक्तुभिः)** रात्रियों के साथ **(जगत्)** सम्पूर्ण संसार को **(निवेशयन्)** प्रवेश कराता और **(प्रसुवन्)** उत्पन्न करता हुआ **(बाहू)** भुजाओं को **(अस्राक्)** उत्पन्न करता वह विद्वान् **(स्वाय)** अपनी **(धर्म्मणे)** धर्म्म की उन्नति के लिये **(श्लोकम्)** श्लाघा प्रशंसा करने योग्य वाणी को **(प्र, कृणुते)** उत्पन्न करता, परमात्मा और **(दिव्यानि)** शुद्ध **(पार्थिवा)** पृथिवीं में विदित **(रजांसि)** लोकों को **(आ, अप्राः)** व्याप्त होता है॥३॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर सम्पूर्ण जगत् में अभिव्याप्त हो और उस जगत् को रच के धर्म्म और वेदवाणी का प्रचार करके संसार को व्यवस्थित अर्थात् जैसा चाहिये वैसा नियत करता, उसीको सब का स्वामी जानके निरन्तर उपासना करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अदा॑भ्यो॒ भुव॑नानि प्रचाक॑शद् व्र॒ता॑नि॑ दे॒वः स॑वि॒ताभि र॑क्षते।

प्रास्रा॑ग्बा॒हू भुव॑नस्य प्र॒जाभ्यो॑ धृतव्र॑तो म॒हो अज्म॑स्य राजति॥४॥

अदा॑भ्यः। भुव॑नानि। प्र॒ऽचाक॑शत्। व्र॒ता॑नि॑। दे॒वः। स॒वि॒ता। अ॒भि। र॒क्ष॒ते॒। प्र। अ॒स्रा॒क्। बा॒हू इति॑। भुव॑नस्य। प्र॒ऽजाभ्यः॑। धृ॒तऽव्र॑तः। म॒हः। अज्म॑स्य। रा॒ज॒ति॒॥४॥

पदार्थः-(अदाभ्यः) अहिंसनीयः **(भुवनानि)** सर्वाणि लोकजातानि **(प्रचाकशत्)** प्रकाशते **(व्रतानि)** सत्यभाषणादीनि **(देवः)** कमनीयः **(सविता)** सूर्य्यः **(अभि)** आभिमुख्ये **(रक्षते) (प्र) (अस्राक्)** सृजति **(बाहू)** बलवीर्य्ये **(भुवनस्य) (प्रजाभ्यः) (धृतव्रतः)** धृतानि व्रतानि येन सः **(महः)** महतः **(अज्मस्य)** अन्तरिक्षे प्रक्षिप्तस्य **(राजति)**॥४॥

अन्वयः-हे मनुष्या! योऽदाभ्यः सविता धृतव्रतो देवो महोऽज्मस्य भुवनस्य मध्ये प्रजाभ्यो व्रतानि भुवनानि प्रचाकशद् बाहू प्रास्राक् सर्वमभि रक्षते राजति स एव सर्वैरुपासनीयः॥४॥

भावार्थः-हे मनुष्या! येन परमेश्वरेण प्रजासु सर्वं हितं साधितं योऽन्तर्बहिरभिव्याप्य सर्वेभ्यः कर्मफलानि प्रयच्छति स एव सततं ध्येयः॥४॥

पदार्थः-हे मनुष्यो! जो **(अदाभ्यः)** नहीं नष्ट होने योग्य अर्थात् नहीं मन से छोड़ने योग्य **(सविता)** सूर्य्य **(धृतव्रतः)** व्रतों को धारण करने वाला **(देवः)** सुन्दर **(महः)** बड़े **(अज्मस्य)** अन्तरिक्ष में छोड़े हुए **(भुवनस्य)** लोक **(प्रजाभ्यः)** प्रजाओं के लिये **(व्रतानि)** सत्यभाषण आदि व्रतों को और **(भुवनानि)** लोकोत्पन्न समस्त वस्तुओं को **(प्रचाकशत्)** प्रकाश करता **(बाहू)** बल और वीर्य्य को **(प्र, अस्राक्)** उत्पन्न करता सब की **(अभि)** प्रत्यक्ष **(रक्षते)** रक्षा करता और **(राजति)** प्रकाश करता है, वही सब लोगों को उपासना करने योग्य है॥४॥

भावार्थः-हे मनुष्यो! जिस परमेश्वर ने प्रजाओं में सम्पूर्ण हित सिद्ध किया और जो भीतर-बाहर अभिव्याप्त होके सब के लिये कर्म्मों का फल देता है, वही निरन्तर ध्यान करने योग्य है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्रिरन्तरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना।

तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना॥५॥

त्रिः। अन्तरिक्षम्। सविता। महिऽत्वना। त्री। रजांसि। परिऽभूः। त्रीणि। रोचना। तिस्रः। दिवः। पृथिवीः। तिस्रः। इन्वति। त्रिऽभिः। व्रतैः। अभि। नः। रक्षति। त्मना॥५॥

पदार्थः-(त्रिः) त्रिवारम् **(अन्तरिक्षम्)** अन्तरक्षयमाकशम् **(सविता)** सकलैश्वर्य्योत्पादकः **(महित्वना)** महत्त्वेन **(त्री)** त्रीणि त्रिप्रकारका **(रजांसि)** उत्तममध्यमनिकृष्टानि **(परिभूः)** यः सर्वतो भवति सर्वेषामुपरि विराजमानः **(त्रीणि)** त्रिप्रकाराणि **(रोचना)** विद्युद्भौतिकसूर्यरूपाणि ज्योतींषि **(तिस्रः)** त्रिविधाः **(दिवः)** प्रकाशान् **(पृथिवीः)** भूमीः **(तिस्रः)** **(इन्वति)** व्याप्नोति **(त्रिभिः)** **(व्रतैः)** नियमैः **(अभि)** **(नः)** अस्मान् **(रक्षति)** **(त्मना)** आत्मना॥५॥

अन्वयः-हे मनुष्या! यः परिभूः सविता परमेश्वरो महित्वना त्मनाऽन्तरिक्षं त्रिरिन्वति त्री रजांसीन्वति त्रीणि रोचनेन्वति तिस्रो दिवस्तिस्रः पृथिवीरिन्वति त्रिभिर्व्रतैर्नोऽभि रक्षति स एव सर्वदा भजनीयः॥५॥

भावार्थः-हे मनुष्या! यः परमेश्वरस्त्रिविधं सर्वं त्रिगुणमयं जगन्निर्माय सुनियमैः पालयति तमेवोपाध्वम्॥५॥

पदार्थः-हे मनुष्यो! जो **(परिभूः)** सब स्थानों में वर्त्तमान और सब के ऊपर विराजमान **(सविता)** सम्पूर्ण ऐश्वर्य्यों का उत्पन्न करने वाला परमेश्वर **(महित्वना)** महिमा और **(त्मना)** आत्मा से **(अन्तरिक्षम्)** भीतर नहीं नाश होने वाले आकाश को **(त्रिः)** तीन वार **(इन्वति)** व्याप्त होता **(त्री)** तीन

प्रकार के **(रजांसि)** उत्तम मध्यम निकृष्ट लोकों को व्याप्त होता **(त्रीणि)** तीन प्रकार के **(रोचना)** बिजुली, भौतिक और सूर्यरूप ज्योतियों को व्याप्त होता **(तिस्रः)** तीन प्रकार के **(दिवः)** प्रकाशों और **(तिस्रः)** तीन प्रकार की **(पृथिवीः)** भूमियों को व्याप्त होता और **(त्रिभिः)** तीन **(व्रतैः)** नियमों से **(नः)** हम लोगों की **(अभि)** सब ओर से **(रक्षति)** रक्षा करता है, वही सर्वदा सेवा करने योग्य है॥५॥

भावार्थः-हे मनुष्यो! जो परमेश्वर तीन प्रकार के सम्पूर्ण त्रिगुण अर्थात् सतोगुण, रजोगुण, तमोगुण स्वरूप जगत् को रच के उत्तम नियमों से पालन करता है, उसी की उपासना करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

बृहत्सुम्नः प्रसवीता निवेशनो जगतः स्थातुरुभयस्य यो वशी।
स नो देवः सविता शर्म यच्छत्वस्मे क्षयाय त्रिवरूथमंहसः॥६॥

बृहत्ऽसुम्नः। प्रऽसविता। निऽवेशनः। जगतः। स्थातुः। उभयस्य। यः। वशी। सः। नः। देवः। सविता। शर्म। यच्छतु। अस्मे इति। क्षयाय। त्रिऽवरूथम्। अंहसः॥६॥

पदार्थः-(बृहत्सुम्नः) महतः सुखस्य **(प्रसवीता)** उत्पादकः। अत्र **संहितायामिति** दीर्घः। **(निवेशनः)** निवेशस्य कर्त्ता **(जगतः)** जङ्गमस्य **(स्थातुः)** स्थिरस्य स्थावरस्य **(उभयस्य)** द्विविधस्य **(यः)** **(वशी)** वशीकर्त्तुं समर्थः **(सः)** **(नः)** अस्मभ्यम् **(देवः)** दाता **(सविता)** सकलैश्वर्यः **(शर्म)** सुसुखं गृहम् **(यच्छतु)** ददातु **(अस्मे)** अस्माकम् **(क्षयाय)** निवासाय **(त्रिवरूथम्)** त्रीणि वरूथानि गृहाणि यस्मिन् **(अंहसः)** दुःखात्पृथग्भूतम्॥६॥

अन्वयः-हे मनुष्या! यो नो बृहत्सुम्नः प्रसवीता जगतः स्थातुर्निवेशन उभयस्य वशी देवो जगदीश्वरो नो विद्यां यच्छतु स सविताऽस्मे क्षयायांऽहसः पृथग्भूतं त्रिवरूथं शर्म यच्छतु स एवास्माकमुपासनीयो देवो भवतु॥६॥

भावार्थः-हे मनुष्या! यो जगदीश्वरः सर्वस्य जगतो नियन्ता सर्वेषां जीवानां निवासायाऽनेकविधस्य स्थानस्य निर्माताऽस्ति तं विहायाऽन्यस्य कस्याप्युपासनां मा कुरुत॥६॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(नः)** हम लोगों के लिये **(बृहत्सुम्नः)** अत्यन्त सुख का **(प्रसवीता)** उत्पन्न करने वाला और **(जगतः)** जङ्गम अर्थात् चेतनता युक्त मनुष्य आदि और **(स्थातुः)** स्थिर स्थावर अर्थात् नहीं चलने-फिरने वाले वृक्ष आदि जगत् के **(निवेशनः)** निवेश अर्थात् स्थिति का करने वाला **(उभयस्य)** दो प्रकार के जगत् के **(वशी)** वश करने को समर्थ **(देवः)** दाता जगदीश्वर हम लोगों के लिये विद्या को **(यच्छतु)** देवे **(सः)** वह **(सविता)** सम्पूर्ण ऐश्वर्य्य से युक्त **(अस्मे)** हम लोगों के **(क्षयाय)** निवास के लिये **(अंहसः)** दुःख से अलग हुए **(त्रिवरूथम्)** तीन गृह जिसमें उस **(शर्म)** उत्तम प्रकार सुख देने वाले स्थान को देवे, वही हम लोगों का उपासना करने योग्य देव हो॥६॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर सब जगत् का नियामक और सब जीवों के निवास के लिये अनेक प्रकार के स्थान का रचने वाला है, उसको छोड़ के अन्य किसी की भी उपासना न करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आगन् देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषम्।

स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतु॥७॥४॥

आ। अगन्। देवः। ऋतुऽभिः। वर्धतु। क्षयम्। दधातु। नः। सविता। सुऽप्रजाम्। इषम्। सः। नः। क्षपाभिः। अहऽभिः। च। जिन्वतु। प्रजाऽवन्तम्। रयिम्। अस्मे इति। सम्। इन्वतु॥७॥

पदार्थः-(आ) समन्तात् **(अगन्)** आगच्छतु **(देवः)** देदीप्यमानः **(ऋतुभिः)** वसन्तादिभिः **(वर्धतु)** वर्धताम्। अत्र व्यत्ययेन परस्मैपदम्। **(क्षयम्)** निवासम् **(दधातु)** **(नः)** अस्माकम् **(सविता)** सकलजगज्जनकः **(सुप्रजाम्)** उत्तमां प्रजाम् **(इषम्)** अन्नादिकम् **(सः)** **(नः)** अस्मान् **(क्षपाभिः)** रात्रिभिः **(अहभिः)** दिनैः सह **(च)** **(जिन्वतु)** प्रीणात्वानन्दतु **(प्रजावन्तम्)** बहुप्रजायुक्तम् **(रयिम्)** धनम् **(अस्मे)** अस्मभ्यम् **(सम्)** **(इन्वतु)** ददातु॥७॥

अन्वयः-हे मनुष्या! यस्सविता देवो जगदीश्वर ऋतुभिर्नः क्षयं वर्धत्वस्मानागन् सुप्रजामिषं च दधातु स क्षपाभिरहभिश्च नो जिन्वत्वस्मे प्रजावन्तं रयिं समिन्वतु॥७॥

भावार्थः-हे मनुष्या! यः परमात्मा सर्वेष्वहोरात्रेषु सर्वं जगत्सर्वथा रक्षति सर्वान् पदार्थान् निर्मायाऽस्मभ्यं दत्वाऽस्मान् सततमानन्दयति सोऽस्माभिः सदैवोपासनीय इति॥७॥

अत्र सवितृगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिपञ्चाशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(सविता)** सम्पूर्ण जगत् का उत्पन्न करने वाला **(देवः)** निरन्तर प्रकाशमान जगदीश्वर **(ऋतुभिः)** वसन्त आदि ऋतुओं से **(नः)** हम लोगों के **(क्षयम्)** निवास की **(वर्धतु)** वृद्धि करें और हम लोगों को **(आ)** सब प्रकार से **(अगन्)** प्राप्त हो **(सुप्रजाम्)** उत्तम प्रजा और **(इषम्)** अन्न आदि को **(दधातु)** धारण करे **(सः)** वह **(क्षपाभिः)** रात्रियों और **(अहभिः)** दिनों के साथ **(च)** भी **(नः)** हम लोगों को **(जिन्वतु)** प्रसन्न और आनन्दित करे और **(अस्मे)** हम लोगों के लिये **(प्रजावन्तम्)** बहुत प्रजाओं से युक्त **(रयिम्)** धन को **(सम्, इन्वतु)** अच्छे प्रकार देवे॥७॥

भावार्थः-हे मनुष्यो! जो परमात्मा सब दिन, सब रात्रियों में सब जगत् की सब प्रकार से रक्षा करता है, सब पदार्थों को रच के हम लोगों के लिये देकर हम लोगों को निरन्तर आनन्दित करता है, वह हम लोगों को सदा उपासना करने योग्य है॥७॥

इस सूक्त में सविता अर्थात् सकल जगत् के उत्पन्न करने वाले परमात्मा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तिरपनवां सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ षड्चस्य चतु:पञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषि:। सविता देवता। १ भुरिक् त्रिष्टुप्। २ निचृत्त्रिष्टुप्। ३-५ स्वराट् त्रिष्टुप्। ६ त्रिष्टुप् छन्द:। धैवत: स्वर:॥

अथ सवितृगुणानाह॥

अब छ: ऋचा वाले चौपनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में सविता परमात्मा के गुणों का वर्णन करते हैं॥

अभूद् देव: सविता वन्द्यो नु न इदानीमह्न उपवाच्यो नृभि:।
वि यो रत्ना भजति मानवेभ्य: श्रेष्ठं नो अत्र द्रविणं यथा दधत्॥ १॥

अभूत्। देव:। सविता। वन्द्य:। नु। न:। इदानीम्। अह्न:। उपऽवाच्य:। नृऽभि:। वि। य:। रत्ना। भजति। मानवेभ्य:। श्रेष्ठम्। न:। अत्र। द्रविणम्। यथा। दधत्॥ १॥

पदार्थ:-(अभूत्) भवति **(देव:)** सर्वसुखप्रदाता **(सविता)** सर्वैश्वर्य्यप्रद: **(वन्द्य:)** प्रशंसनीय: **(नु)** सद्य: **(न:)** अस्माकम् **(इदानीम्) (अह्न:)** दिनस्य मध्ये **(उपवाच्य:)** उपदेशनीय: **(नृभि:)** नायकैर्मनुष्यै: **(वि) (य:) (रत्ना)** रमणीयानि धनानि **(भजति) (मानवेभ्य:)** मननशीलेभ्य: **(श्रेष्ठम्)** अत्युत्तमम् **(न:)** अस्मभ्यम् **(अत्र) (द्रविणम्)** धनं यशो वा **(यथा) (दधत्)** दध्यात्॥ १॥

अन्वय:-हे मनुष्या! य इदानीमह्नो यथा नृभिरुपवाच्यो नो वन्द्य: सविता देवोऽभूद्यो नो मानवेभ्यो रत्ना यथा विभजत्यत्र श्रेष्ठं द्रविणं नु दधत्तथैवाऽस्माभि: सत्कर्त्तव्योऽस्ति॥ १॥

भावार्थ:-अत्रोपमालङ्कार:। नष्टं तेषां भाग्यं ये सकलैश्वर्य्यकीर्त्तिप्रदातारं वन्दनीयं स्तोतुमुपासितुमुपदेष्टुमर्हं परमात्मानं विहायाऽन्यं भजन्ति॥ १॥

पदार्थ:-हे मनुष्यो! **(य:)** जो **(इदानीम्)** इस समय **(अह्न:)** दिन के मध्य में जैसे **(नृभि:)** नायक अर्थात् मुखिया मनुष्यों से **(उपवाच्य:)** उपदेश योग्य और **(न:)** हम लोगों के **(वन्द्य:)** प्रशंसा करने योग्य **(सविता)** सम्पूर्ण ऐश्वर्य्यों को और **(देव:)** सम्पूर्ण सुखों को देने वाला **(अभूत्)** होता है जो **(न:)** हम **(मानवेभ्य:)** विचारशीलों के लिये **(रत्ना)** रमण करने योग्य धनों को **(यथा)** जैसे **(वि, भजति)** बांटता और **(अत्र)** इस संसार में **(श्रेष्ठम्)** अत्यन्त उत्तम **(द्रविणम्)** धन वा यश को **(नु)** शीघ्र **(दधत्)** धारण करे, वैसे ही हम लोगों को सत्कार करने योग्य है॥ १॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। नष्ट उनका भाग्य जो सम्पूर्ण ऐश्वर्य और यश के देने वाले वन्दना करने योग्य तथा स्तुति, उपासना और उपदेश करने योग्य परमात्मा को छोड़ के अन्य की उपासना करते हैं॥ १॥

पुनरीश्वरगुणानाह॥

फिर ईश्वर के गुणों को अगले मन्त्र में कहते हैं॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम्।

आदिद् दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः॥ २॥

देवेभ्यः। हि। प्रथमम्। यज्ञियेभ्यः। अमृतऽत्वम्। सुवसि। भागम्। उत्ऽतमम्। आत्। इत्। दामानम्। सवितः। वि। ऊर्णुषे। अनूचीना। जीविता। मानुषेभ्यः॥ २॥

पदार्थः-(देवेभ्यः) दिव्यगुणकर्मस्वभावेभ्यो जीवेभ्यः **(हि)** यतः **(प्रथमम्)** आदौ **(यज्ञियेभ्यः)** सत्यभाषणादियज्ञानुष्ठातृभ्यः **(अमृतत्वम्)** मोक्षसुखम् **(सुवसि)** प्रेरयसि **(भागम्)** भजनीयम् **(उत्तमम्)** **(आत्)** आनन्तर्य्ये **(इत्)** **(दामानम्)** दातारम् **(सवितः)** सकलजगदुत्पादक जगदीश्वर **(वि)** **(ऊर्णुषे)** स्वव्याप्त्याऽऽच्छादयसि **(अनूचीना)** यान्यनुचरन्ति तानि **(जीविता)** जीवितानि **(मानुषेभ्यः)**॥ २॥

अन्वयः-हे सवितर्जगदुत्पादक! हि त्वं यज्ञियेभ्यो देवेभ्यः प्रथमं भागमुत्तममृतत्वं सुवस्याद् दामानं व्यूर्णुषेऽनूचीना जीवितेन्मानुषेभ्यो ददासि तस्मादस्माभिरुपास्योऽसि॥ २॥

भावार्थः-हे मनुष्या! यः परमात्मा सत्याचारे प्रेरयति मुक्तिसुखं प्रदाय सर्वानानन्दयति तमेव सदोपाध्वम्॥ २॥

पदार्थः-हे **(सवितः)** सम्पूर्ण संसार के उत्पन्न करने वाले जगदीश्वर! **(हि)** जिससे आप **(यज्ञियेभ्यः)** सत्यभाषण आदि यज्ञानुष्ठान करने वाले **(देवेभ्यः)** श्रेष्ठ गुण, कर्म्म और स्वभावयुक्त जीवों के लिये **(प्रथमम्)** पहिले **(भागम्)** भजने योग्य **(उत्तमम्)** श्रेष्ठ **(अमृतत्वम्)** मोक्षसुख की **(सुवसि)** प्रेरणा करते हो **(आत्)** इसके अनन्तर **(दामानम्)** दाता जन को **(वि, ऊर्णुषे)** अपनी व्याप्ति से ढांपते हो **(अनूचीना)** अनुचर **(जीविता)** जीवनों को **(इत्)** ही **(मानुषेभ्यः)** मनुष्यों के लिये देते हो, इससे हम लोगों को उपासना करने योग्य हो॥ २॥

भावार्थः-हे मनुष्यो! जो परमात्मा सत्य आचरण में प्रेरणा करता और मुक्तिसुख को देकर सब को आनन्दित करता है, उसी की सदा उपासना करो॥ २॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता।

देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः॥ ३॥

अचित्ती। यत्। चकृम। दैव्ये। जने। दीनैः। दक्षैः। प्रऽभूती। पुरुषत्वता। देवेषु। च। सवितः। मानुषेषु। च। त्वम्। नः। अत्र। सुवतात्। अनागसः॥ ३॥

पदार्थः-(अचित्ती) अचित्त्या अविद्यया **(यत्)** कर्म्म **(चकृमा)** कुर्य्याम। अत्र **संहितायामिति** दीर्घः। **(दैव्ये)** देवेषु विद्वत्सु कुशले **(जने)** विदुषि **(दीनैः)** क्षीणैः **(दक्षैः)** चतुरैः **(प्रभूती)** बहुत्वेन

(पूरुषत्वता) उत्तमाः पुरुषा विद्यन्तेऽस्मिंस्तेन **(देवेषु)** विद्वत्सु **(च)** **(सवितः)** सकलजगदुत्पादक **(मानुषेषु)** अविद्वत्सु **(च)** **(त्वम्)** **(नः)** अस्मान् **(अत्र)** अस्मिन् **(सुवतात्)** प्रेरय **(अनागसः)** अनपराधिनः॥३॥

अन्वयः-हे सवितरचित्ती प्रभूती दीनैर्दक्षैः पूरुषत्वता दैव्ये जने देवेषु च मानुषेषु च यच्चकृमाऽत्र नोऽनागसस्त्वं सुवतात्॥३॥

भावार्थः-हे विद्वांसो! यूयं यद् वयमविद्यया युष्माकमपराधं कुर्याम स क्षन्तव्योऽस्मानध्यापनोपदेशाभ्यां निरपराधिनः कुरुत॥३॥

पदार्थः-हे **(सवितः)** सम्पूर्ण जगत् के उत्पन्न करने वाले! **(अचित्ती)** अविद्या से **(प्रभूती)** बहुत्व से **(दीनैः)** क्षीण अर्थात् दुर्बल **(दक्षैः)** चतुरों से और **(पूरुषत्वता)** उत्तम पुरुषवान् से **(दैव्ये)** विद्वानों में चतुर **(जने)** विद्वान् में **(देवेषु)** विद्वानों **(च)** और **(मानुषेषु)** अविद्वानों में **(च)** भी **(यत्)** जो कर्म्म **(चकृमा)** हम लोग करें **(अत्र)** इस में **(नः)** हम **(अनागसः)** अनपराधियों को **(त्वम्)** आप **(सुवतात्)** प्रेरणा करो॥३॥

भावार्थः-हे विद्वानो! आप लोग जो हम लोग अविद्या से आप लोगों का अपराध करें, वह क्षमा करने योग्य है और हम लोगों को अध्यापन और उपदेश से निरपराधी करो॥३॥

अथ विद्वत्कर्त्तव्यकर्माह॥

अब विद्वानों के करने योग्य काम को कहते हैं॥

न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति।

यत्पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन् दिवः सुवति सत्यमस्य तत्॥४॥

न। प्रऽमिये। सवितुः। दैव्यस्य। तत्। यथा। विश्वम्। भुवनम्। धारयिष्यति। यत्। पृथिव्याः। वरिमन्। आ। सुऽअङ्गुरिः। वर्ष्मन्। दिवः। सुवति। सत्यम्। अस्य। तत्॥४॥

पदार्थः-**(न)** निषेधे **(प्रमिये)** मरणं प्राप्नुयाम् **(सवितुः)** सकलजगदुत्पादकस्य **(दैव्यस्य)** दिव्येषु पदार्थेषु साक्षात्कृतस्य **(तत्)** **(यथा)** **(विश्वम्)** समग्रम् **(भुवनम्)** भवन्ति भूतानि यस्मिंस्तत् **(धारयिष्यति)** **(यत्)** **(पृथिव्याः)** भूमेः **(वरिमन्)** बहुगुणयुक्त **(आ)** समन्तात् **(स्वङ्गुरिः)** शोभना अङ्गुलयो यस्य सः **(वर्ष्मन्)** यो वर्षति तत्सम्बुद्धौ **(दिवः)** कमनीयस्य **(सुवति)** **(सत्यम्)** **(अस्य)** **(तत्)**॥४॥

अन्वयः-हे वरिमन् वर्ष्मन् विद्वन्! यथा सवितुर्दैव्यस्य मध्ये यद् विश्वं भुवनं धारयिष्यति पृथिव्याः स्वङ्गुरिः सन्नस्य दिवोऽस्य यत्सत्यं तत्सुवति तत्प्राप्य यथाऽहं न प्रमिये तथैव त्वमाचर॥४॥

भावार्थः-हे विद्वांसो! यद्ब्रह्म सर्वं जगद्धरति सूर्यवायुभ्यां धारयति च वेदद्वारा सर्वं सत्यं प्रकाशयति च तदेव वयमुपास्महे॥४॥

पदार्थः-हे **(वरिमन्)** बहुत गुणों से युक्त **(वर्ष्मन्)** वर्षने वाले विद्वन्! **(यथा)** जैसे **(सवितुः)** सम्पूर्ण संसार के उत्पन्न करने वाले **(दैव्यस्य)** श्रेष्ठ पदार्थों में साक्षात् किये गये के मध्य में **(यत्)** जो **(विश्वम्)** सम्पूर्ण **(भुवनम्)** संसार को जिसमें प्राणी होते हैं **(धारयिष्यति)** धारण करावेगा **(पृथिव्याः)** और भूमि के सम्बन्ध में **(स्वङ्गुरिः)** श्रेष्ठ अंगुलियों से युक्त हस्तवाला हुआ **(अस्य)** इस **(दिवः)** सुन्दर का **(यत्)** जो **(सत्यम्)** सत्य **(तत्)** उसको **(सुवति)** प्रेरणा करता है **(तत्)** उसको प्राप्त होकर जैसे मैं **(न)** नहीं **(प्रमिये)** मरण को प्राप्त होऊँ, वैसे ही आप **(आ)** आचरण करो॥४॥

भावार्थः-हे विद्वानो! जो ब्रह्म सब जगत् को धारण करता और सूर्य और वायु से धारण कराता है, वेद के द्वारा सब सत्य का प्रकाश कराता है, उसी की हम लोग उपासना करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॑ज्येष्ठान् बृ॒हद्भ्य॒: पर्व॑तेभ्य॒: क्षया॑ँ एभ्य: सुवसि प॒स्त्या॑वत:।

यथा॑यथा प॒तय॑न्तो वियेमि॒र एवै॑व त॑स्थु: सवित: स॒वाय॑ ते॥५॥

इन्द्र॑ऽज्येष्ठान्। बृ॒हत्ऽभ्य॑:। पर्व॑तेभ्य:। क्षया॑न्। ए॒भ्य॒:। सु॒व॒सि॒। प॒स्त्य॑ऽवत:। यथा॑ऽयथा। प॒तय॑न्त:। वि॒ऽये॒मि॒रे। एव॑। एव॑। त॒स्थु॒:। स॒वि॒त॒रिति॑। स॒वाय॑। ते॒॥५॥

पदार्थः-(इन्द्रज्येष्ठान्) इन्द्रो विद्युत्सूर्य्यो वा ज्येष्ठो येषां तान् **(बृहद्भ्यः)** महद्भ्यः **(पर्वतेभ्यः)** मेघादिभ्यः **(क्षयान्)** निवासान् **(एभ्यः)** **(सुवसि)** **(पस्त्यावतः)** प्रशंसितानि पस्त्यानि विद्यन्ते येषु तान् **(यथायथा)** **(पतयन्तः)** पतिरिवाचरन्तः **(वियेमिरे)** विशेषेण नियच्छन्ति **(एव)** निश्चये **(एव)** **(तस्थुः)** तिष्ठन्ति **(सवितः)** जगदीश्वर **(सवाय)** ऐश्वर्य्याय **(ते)** तव॥५॥

अन्वयः-हे सवितर्जगदीश्वर! त्वं यथायथा बृहद्भ्य एभ्यः पर्वतेभ्यः पस्त्यावत इन्द्रज्येष्ठान् क्षयान् सुवसि तथा तथा पतयन्त एव सर्वे वियेमिरे ते सवायैव तस्थुः॥५॥

भावार्थः-हे भगवन्! भवता सर्वेषां जीवानां निवासादिव्यवहाराय भूम्यादिलोका निर्मिता अत एव भवन्तं धन्यवादान् समर्प्य वयं तवैश्वर्य्ये निवसाम॥५॥

पदार्थः-हे **(सवितः)** जगदीश्वर! आप **(यथायथा)** जैसे जैसे **(बृहद्भ्यः)** बड़े **(एभ्यः)** इन **(पर्वतेभ्यः)** मेघादिकों से **(पस्त्यावतः)** प्रशंसित गृहों से युक्त **(इन्द्रज्येष्ठान्)** बिजुली वा सूर्य्य बड़े जिनमें उन **(क्षयान्)** निवासों को **(सुवसि)** प्रेरणा करते हो, वैसे-वैसे **(पतयन्तः)** पति के सदृश आचरण करते हुए **(एव)** ही सब **(वियेमिरे)** विशेष करके देते हैं और **(ते)** आपके **(सवाय)** ऐश्वर्य्य के लिये **(एव)** ही **(तस्थुः)** स्थित होते हैं॥५॥

भावार्थः-हे भगवन्! आपने सब जीवों के निवासादि व्यवहार के लिये भूमि आदि लोक रचे, इसी से आपके लिये धन्यवादों को समर्पण करके हम लोग आपके ऐश्वर्य्य में निवास करें॥५॥

अथ पदार्थोद्देशेनेश्वरसेवनमाह॥

अब पदार्थोद्देश से ईश्वर की सेवा को कहते हैं॥

ये ते त्रिरह॑न्त्सवितः स॒वासो॑ दि॒वेदि॑वे॒ सौभ॑गमासु॒वन्ति॑।

इन्द्रो॒ द्यावा॑पृथि॒वी सिन्धु॑रद्भिरा॑दि॒त्यैर्नो॒ अदि॑तिः॒ शर्म॑ यंसत्॥६॥५॥

ये। ते॒। त्रिः। अह॑न्। स॒वि॒तरिति॑। स॒वासः॑। दि॒वेऽदि॑वे। सौभ॑गम्। आ॒ऽसु॒वन्ति॑। इन्द्रः॑। द्यावा॑पृथि॒वी इति॑। सिन्धुः॑। अ॒त्ऽभिः। आ॒दि॒त्यैः। नः॒। अदि॑तिः। शर्म॑। यं॒स॒त्॥६॥

पदार्थः-(ये) (ते) तव **(त्रिः) (अहन्)** अहनि **(सवितः)** परमेश्वर **(सवासः)** उत्पन्नाः पदार्थाः **(दिवेदिवे)** प्रतिदिनम् **(सौभगम्)** सुभगस्य श्रेष्ठैश्वर्य्यस्य भावम् **(आसुवन्ति)** उत्पादयन्ति **(इन्द्रः)** सूर्य्यः **(द्यावापृथिवी)** प्रकाशभूमी **(सिन्धुः) (अद्भिः)** जलैः **(आदित्यैः)** मासैः **(नः)** अस्मभ्यम् **(अदितिः)** अखण्डितः परमात्मा **(शर्म)** सुखम् **(यंसत्)** प्रदद्यात्॥६॥

अन्वयः-हे सवितर्जगदीश्वर! ते तव ये सवासोऽहन् दिवेदिवे सौभगं त्रिरासुवन्ति। अद्भिरादित्यैस्सह इन्द्रो द्यावापृथिवी सिन्धुश्चासुवन्ति सोऽदितिर्भवान्नः शर्म यंसत्॥६॥

भावार्थः-हे मनुष्या! यस्य जगदीश्वरस्य सृष्टौ वयमत्यन्तैश्वर्य्यवन्तो भवामोऽस्माकरक्षकाः सर्वे पदार्थाः सन्ति तमेव वयं सततं भजेमेति॥६॥

अत्र सवित्रीश्वरविद्वत्पदार्थगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुःपञ्चाशत्तमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(सवितः)** परमेश्वर **(ते)** आपके **(ये)** जो **(सवासः)** उत्पन्न पदार्थ **(अहन्)** दिन में **(दिवेदिवे)** प्रतिदिन **(सौभगम्)** श्रेष्ठ ऐश्वर्य्य के होने को **(त्रिः)** तीन वार **(आसुवन्ति)** उत्पन्न कराते हैं तथा **(अद्भिः)** जलों और **(आदित्यैः)** और महीनों के साथ **(इन्द्रः)** सूर्य्य **(द्यावापृथिवी)** प्रकाश-भूमि और **(सिन्धुः)** समुद्र भी उत्पन्न कराते हैं, वह **(अदितिः)** खण्डरहित परमात्मा आप **(नः)** हम लोगों के लिये **(शर्म)** सुख को **(यंसत्)** दीजिये॥६॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर की सृष्टि में हम लोग ऐश्वर्य्य वाले होते हैं और हम लोगों के रक्षा करने वाले सम्पूर्ण पदार्थ हैं, उसी का हम लोग निरन्तर भजन करें॥६॥

इस सूक्त में सविता, ईश्वर, विद्वान् और पदार्थों के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौवनवाँ सूक्त और पांचवां वर्ग समाप्त हुआ॥

अथ दशर्चस्य पञ्चपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। विश्वेदेवा देवताः। १ त्रिष्टुप्। २, ४ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ५ भुरिक् पङ्क्तिः। ६, ७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ८, ९ विराड्गायत्री। १० गायत्री छन्दः। षड्जः स्वरः॥

अथ विद्वद्गुणानाह॥

अब दश ऋचा वाले पचपनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् के गुणों का वर्णन करते हैं॥

को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः।
सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः॥ १॥

कः। वः। त्राता। वसवः। कः। वरूता। द्यावाभूमी इति। अदिते। त्रासीथाम्। नः। सहीयसः। वरुण। मित्र। मर्तात्। कः। वः। अध्वरे। वरिवः। धाति। देवाः॥ १॥

पदार्थः-(कः) (वः) युष्माकम् **(त्राता)** रक्षकः **(वसवः)** ये वसन्ति तत्सम्बुद्धौ **(कः) (वरूता)** स्वीकर्त्ता **(द्यावाभूमी)** प्रकाशपृथिव्यौ **(अदिते)** अविनाशिन् **(त्रासीथाम्)** रक्षेथाम् **(नः)** अस्माकम् **(सहीयसः)** अतिशयेन सहनशीलान् बलिष्ठान् **(वरुण)** उत्कृष्टविद्वन्नध्यापक **(मित्र)** सर्वसुहृदुपदेशक **(मर्त्तात्)** मनुष्यात् **(कः) (वः)** युष्माकम् **(अध्वरे)** सत्ये व्यवहारे **(वरिवः)** परिचरणं सेवनम् **(धाति)** दधाति **(देवाः)** विद्वांसः॥ १॥

अन्वयः-हे वरुण मित्र सहीयसो! नो वोऽध्वरे को मर्त्ताद्वरिवो धाति द्यावाभूमी इव युवामस्मान् त्रासीथाम्। हे वसवो देवा! वः वस्त्राताऽस्ति। हे अदिते जगदीश्वर! तव को वरुताऽस्ति॥ १॥

भावार्थः-यो हि परमेश्वराज्ञां पालयति स परमेश्वरेण स्वीक्रियते। हे मनुष्या! योऽस्माकं युष्माकञ्च रक्षकः स एवाऽस्माभिर्भजनीयः येऽहिंसया सर्वान् मनुष्यान् विज्ञाने दधति स ते च सदैव सत्कर्त्तव्याः॥ १॥

पदार्थः-हे **(वरुण)** उत्तम विद्वन् अध्यापक **(मित्र)** सम्पूर्ण मित्रों के उपदेशक **(सहीयसः)** अत्यन्त सहने वाले बलिष्ठ! **(नः)** हम लोगों के और **(वः)** आप लोगों के **(अध्वरे)** सत्य व्यवहार में **(कः)** कौन **(मर्त्तात्)** मनुष्य से **(वरिवः)** सेवन को **(धाति)** धारण करता है **(द्यावाभूमी)** प्रकाश और पृथिवी के सदृश आप दोनों हम लोगों की **(त्रासीथाम्)** रक्षा करो हे **(वसवः)** रहने वाले **(देवाः)** विद्वानो! **(वः)** आप लोगों का **(कः)** कौन **(त्राता)** रक्षक है। हे **(अदिते)** नहीं नाश होने वाले जगदीश्वर! आप का **(कः)** कौन **(वरूता)** स्वीकार करने वाला है॥ १॥

भावार्थः-जो परमेश्वर की आज्ञा का पालन करता है, वह परमेश्वर से स्वीकार किया जाता है। हे मनुष्यो! जो हमारा और आप लोगों का रक्षक है, वही हम लोगों से सेवा करने योग्य है और जो अहिंसा से सब मनुष्यों को विज्ञान में धारण करते हैं, वह और वे सदा सत्कार करने योग्य हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र ये धामा॑नि पू॒र्व्याण्यर्चा॒न् वि यदु॒च्छान् वि॑यो॒तारो॒ अमू॑राः।

वि॒धा॒तारो॒ वि ते द॑धुरजस्रा ऋ॒तधी॑तयो रुरुचन्त दु॒स्माः॥ २॥

प्र। ये। धामा॑नि। पू॒र्व्याणि॑। अचा॑न्। वि। यत्। उ॒च्छान्। वि॒ऽयो॒तारः॑। अमू॑राः। वि॒ऽधा॒तारः॑। वि। ते॒। द॒धुः॒। अ॒ज॒स्राः॒। ऋ॒तऽधी॑तयः। रु॒रु॒च॒न्त॒। दु॒स्माः॥ २॥

पदार्थः-(प्र) (ये) (धामानि) जन्मनामस्थानानि **(पूर्व्याणि)** पूर्वैः साक्षात्कृतानि **(अर्चान्)** सत्कुर्य्युः **(वि) (यत्)** ये **(उच्छान्)** विवासयेयुः **(वियोतारः)** विभाजकाः **(अमूराः)** अमूढाः **(विधातारः)** निर्मातारः **(वि) (ते) (दधुः)** दध्युः **(अजस्राः)** अहिंसकाः **(ऋतधीतयः)** ऋतस्य धीतिर्धारणं येषान्ते **(रुरुचन्त)** सुशोभन्ते **(दस्माः)** दुःखानां विनाशकाः॥ २॥

अन्वयः-हे मनुष्या! ये पूर्व्याणि धामानि प्रार्चान् यद्येऽमूरा वियोतारः पूर्व्याणि धामानि व्युच्छान् येऽजस्रा ऋतधीतयो विधातारो दस्मा रुरुचन्त ते सततं वि दधुः॥ २॥

भावार्थः-ये आप्ताः सर्वेषां सुखमिच्छुका विद्वांसस्स्युस्त एव सर्वेषां सर्वाणि सुखानि कर्त्तुमर्हेयुः॥ २॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(पूर्व्याणि)** प्राचीन जनों से प्रत्यक्ष किये गये **(धामानि)** जन्म, नाम, स्थानों का **(प्र, अर्चान्)** उत्तम सत्कार करें और **(यत्)** जो **(अमूराः)** नहीं मूर्ख **(वियोतारः)** विभाग करने वाले जन प्राचीन जनों से प्रत्यक्ष किये गये जन्म, नाम, स्थानों का **(वि, उच्छान्)** विवास करावें और जो **(अजस्राः)** नहीं हिंसा करने और **(ऋतधीतयः)** सत्य के धारण करने वाले **(विधातारः)** निर्माणकर्त्ता **(दस्माः)** दुःखों के विनाशक जन **(रुरुचन्त)** उत्तम प्रकार शोभित होते हैं **(ते)** वे निरन्तर **(वि, दधुः)** विधान करें॥ २॥

भावार्थः-जो यथार्थवक्ता सब के सुख की इच्छा करने वाले विद्वान् जन हों, वे ही सब के सब सुखों के करने योग्य होवें॥ २॥

अथ विद्वद्विषये गार्हस्थ्यकर्माह॥

अब विद्वानों के विषय में गृहस्थ के कर्म को कहते हैं॥

प्र पु॒स्त्या३॑मदि॑तिं॒ सिन्धु॒मर्कैः॒ स्व॒स्तिमी॑ळे सु॒ख्याय॑ दे॒वीम्।

उ॒भे यथा॑ नो॒ अह॑नी नि॒पात॑ उ॒षासा॒नक्ता॑ करता॒मद॑ब्धे॥ ३॥

प्र। पु॒स्त्या॑म्। अदि॑तिम्। सिन्धु॑म्। अ॒र्कैः॒। स्व॒स्तिम्। ई॒ळे॒। सु॒ख्याय॑। दे॒वीम्। उ॒भे इति॑। यथा॑। नः॒। अह॑नी इति॑। नि॒ऽपातः॑। उ॒षसा॒नक्ता॑। क॒र॒ता॒म्। अद॑ब्धे॒ इति॑॥ ३॥

पदार्थः-(प्र) (पस्त्याम्) गृहम् **(अदितिम्)** अखण्डिताम् **(सिन्धुम्)** नदीम् **(अर्कैः)** मन्त्रैः **(स्वस्तिम्)** सुखम् **(ईळे)** अध्यन्विच्छामि **(सख्याय)** मित्रभावाय **(देवीम्)** कमनीयां विदुषीं स्त्रियम् **(उभे) (यथा) (नः)** अस्माकम् **(अहनी)** रात्रिदिने **(निपातः)** यो नितरां पाति **(उषासानक्ता)** रात्रिदिवसौ **(करताम्) (अदब्धे)** अहिंसिते॥३॥

अन्वयः-हे मनुष्या! यथोभे अहनी उषासानक्ता अदब्धे करतां तथा नो निपातोऽहमर्कैरदितिं पस्त्यां सिन्धुं स्वस्ति सख्याय देवीं प्रेळे॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा रात्रिदिने सम्बद्धे वर्त्तित्वा सर्वव्यवहारसिद्धे निमित्ते भवतस्तथाऽऽवां विहितौ सखिवद्वर्त्तमानौ स्त्रीपुरुषौ श्रेष्ठं गृहं पुष्कलं सुखं सर्वदोन्नयेय॥३॥

पदार्थः-हे मनुष्यो! **(यथा)** जैसे **(उभे)** दोनों **(अहनी)** रात्रि और दिन **(उषासानक्ता)** रात्रि और दिन को **(अदब्धे)** नहीं हिंसित **(करताम्)** करें, वैसे **(नः)** हम लोगों का अर्थात् अपना **(निपातः)** अतिशय पालन करने वाला मैं **(अर्कैः)** मन्त्रों से **(अदितिम्)** खण्डरहित **(पस्त्याम्)** गृह और **(सिन्धुम्)** नदी की **(स्वस्तिम्)** सुख की और **(सख्याय)** मित्रपने के लिये **(देवीम्)** सुन्दर विद्यायुक्त स्त्री की **(प्र, ईळे)** विशेष इच्छा करता हूँ॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे रात्रि और दिन मिले हुए वर्ताव करके सम्पूर्ण व्यवहार में कारण होते हैं, वैसे हम दोनों विशेष करके हित चाहते हुए मित्र के सदृश वर्तमान स्त्री और पुरुष उत्तम गृह और बहुत सुख की सदा उन्नति करें॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः।

इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तमम॑वद्वरूथम्॥४॥

वि। अर्यमा। वरुणः। चेति। पन्थाम्। इषः। पतिः। सुवितम्। गातुम्। अग्निः। इन्द्राविष्णू इति। नृऽवत्। ऊम् इति। सु। स्तवाना। शर्म। नः। यन्तम्। अमऽवत्। वरूथम्॥४॥

पदार्थः-(वि) (अर्यमा) न्यायकर्त्ता **(वरुणः)** श्रेष्ठः **(चेति)** विजानाति **(पन्थाम्)** धर्म्ममार्गम् **(इषः)** अन्नादेः **(पतिः)** स्वामी **(सुवितम्)** सुष्ठूत्पादितम् **(गातुम्)** पृथिवीम् **(अग्निः)** अग्निरिव वर्त्तमानः **(इन्द्राविष्णू)** विद्युद्वायू **(नृवत्)** नायकवत् **(उ) (सु) (स्तवाना)** सत्यप्रशंसकौ **(शर्म)** सुखम् **(नः)** अस्माकम् **(यन्तम्)** प्राप्नुतम् **(अमवत्)** प्रशस्तरूपयुक्तम्। **(वरूथम्)** गृहम्॥४॥

अन्वयः-हे मनुष्या! योऽर्यमा वरुणश्च पन्थां वि चेति गातुमग्निरिवेषस्पतिः सुवितं वि चेति। हे अध्यापकोपदेशकौ युवामिन्द्राविष्णू इव स्तवाना! नृवदु नोऽमवच्छर्म वरूथं सु यन्तम्॥४॥

भावार्थः–हे मनुष्या! यथा न्यायशीला विद्वांसोऽधर्म्यमार्गं विहाय धर्म्ये गच्छन्ति तथा यूयमपि गच्छत॥४॥

पदार्थः–हे मनुष्यो! जो **(अर्यमा)** न्यायकर्त्ता और **(वरुणः)** श्रेष्ठ पुरुष **(पन्थाम्)** धर्मसम्बन्धी मार्ग को **(वि, चेति)** विशेष कर जानता है **(गातुम्)** पृथिवी को **(अग्निः)** अग्नि जैसे वैसे वर्त्तमान **(इषः)** अन्न आदि का **(पतिः)** स्वामी **(सुवितम्)** उत्तम प्रकार उत्पन्न किये गये को विशेष कर जानता है। और हे अध्यापकोपदेशको आप दोनों **(इन्द्राविष्णू)** बिजुली और वायु के सदृश **(स्तवाना)** सत्य की प्रशंसा करने वालो! **(नृवत्)** प्रधान पुरुष के सदृश **(उ)** और **(नः)** हम लोगों के **(अमवत्)** प्रशस्तरूप से युक्त **(शर्म)** सुख और **(वरूथम्)** गृह को **(सु, यन्तम्)** अच्छे प्रकार प्राप्त होओ॥४॥

भावार्थः–हे मनुष्यो! जैसे न्यायकारी विद्वान् लोग अधर्म्मसम्बन्धी मार्ग का त्याग करके धर्मसम्बन्धी मार्ग में चलते हैं, वैसे आप लोग भी चलें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ पर्व॑तस्य म॒रुता॒मवां॑सि दे॒वस्य॑ त्रा॒तुर॑व्रि॒ भग॑स्य।

पात् पति॒र्जन्या॒दंह॑सो नो मि॒त्रो मि॒त्रिया॑दु॒त न॑ उरुष्येत्॥५॥६॥

आ। पर्व॑तस्य। म॒रुता॑म्। अवां॑सि। दे॒वस्य॑। त्रा॒तुः। अ॒व्रि॒। भग॑स्य। पात्। पतिः॑। जन्या॑त्। अंह॑सः। नः॒। मि॒त्रः। मित्रिया॑त्। उ॒त। नः॒। उ॒रु॒ष्ये॒त्॥५॥

पदार्थः-(आ) **(पर्वतस्य)** मेघस्य **(मरुताम्)** मनुष्याणाम् **(अवांसि)** बहुविधानि रक्षणानि **(देवस्य)** दिव्यसुखप्रापकस्य **(त्रातुः)** रक्षकस्य **(अव्रि)** आवृणोमि **(भगस्य)** ऐश्वर्य्यस्य **(पात्)** रक्षतु **(पतिः)** स्वामी **(जन्यात्)** उत्पत्स्यमानात् **(अंहसः)** अपराधात् **(नः)** अस्मान् **(मित्रः)** सखा **(मित्रियात्)** मित्रात् **(उत)** **(नः)** अस्मान् **(उरुष्येत्)** सेवेत॥५॥

अन्वयः-हे विद्वन्! यथाऽहं पर्वतस्य देवस्य भगस्य त्रातुर्मरुतामवांस्यहमाऽऽव्रि तथा पतिर्भवान्नो जन्यादंहसः पान्न उत मित्रो मित्रियादुरुष्येत्॥५॥

भावार्थः–ये मनुष्याः सत्यं ज्ञातुमाचरितुमिच्छेयुस्ते सत्यं ज्ञानं प्राप्य सत्याचारिणो भवेयुः॥५॥

पदार्थः–हे विद्वन्! जैसे मैं **(पर्वतस्य)** मेघ के **(देवस्य)** उत्तम सुख प्राप्त कराने वाले के **(भगस्य)** ऐश्वर्य्य के **(त्रातुः)** रक्षा करने वाले और **(मरुताम्)** मनुष्यों के **(अवांसि)** अनेक प्रकार रक्षणों का मैं **(आ, अव्रि)** स्वीकार करता हूँ, वैसे **(पतिः)** स्वामी आप **(नः)** हम लोगों की **(जन्यात्)** उत्पन्न होने वाले **(अंहसः)** अपराध से **(पात्)** रक्षा करो और **(नः)** हम लोगों को **(उत)** तो **(मित्रः)** मित्र **(मित्रियात्)** मित्र से **(उरुष्येत्)** सेवन करे॥५॥

भावार्थः-जो मनुष्य सत्य के जानने और उसके आचरण करने की इच्छा करें, वे सत्य ज्ञान को प्राप्त होकर सत्य के आचरण करने वाले होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः।

समुद्रं न संचरणे सनिष्यवो धर्मस्वरसो नद्यो३ अप व्रन्॥६॥

नु। रोदसी इति। अहिना। बुध्न्येन। स्तुवीत। देवी इति। अप्येभिः। इष्टैः। समुद्रम्। न। सम्ऽचरणे। सनिष्यवः। धर्मऽस्वरसः। नद्यः। अप। व्रन्॥६॥

पदार्थः-(नू) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(रोदसी)** द्यावापृथिव्यौ **(अहिना)** मेघेन **(बुध्न्येन)** अन्तरिक्षे भवेन **(स्तुवीत)** प्रशंसेत् **(देवी)** देदीप्यमाने **(अप्येभिः)** अप्सु भवैः **(इष्टैः)** सङ्गन्तुं प्राप्तुमर्हैः **(समुद्रम्)** अन्तरिक्षम् **(न)** इव **(सञ्चरणे)** सम्यग्गमने **(सनिष्यवः)** विभागं करिष्यमाणाः **(धर्मस्वरसः)** घर्मे यज्ञे स्वकीयो रसो यस्य सः **(नद्यः)** सरितः **(अप) (व्रन्)** अपवृण्वन्ति॥६॥

अन्वयः-हे विद्वन्! घर्मस्वरसो भवान् यथेष्टैरप्येभिस्सह सनिष्यवो नद्यः सञ्चरणे समुद्रं नापव्रँस्तथा बुध्न्येनाहिना सहिते देवी रोदसी नू स्तुवीत॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा मेघजलैः पूर्णा नद्य आवरणानि छित्त्वाऽन्तिरक्ष आपो गच्छन्ति तथैव यूयं विद्याकाशं गत्वा सर्वा विद्याः प्रशंसत॥६॥

पदार्थः-हे विद्वन्! **(घर्मस्वरसः)** यज्ञ में अपने रस वाले आप जैसे **(इष्टैः)** मिलने और प्राप्त होने योग्य **(अप्येभिः)** जल में उत्पन्न हुए पदार्थों के साथ **(सनिष्यवः)** विभाग करती हुई **(नद्यः)** नदियाँ **(सञ्चरणे)** सुन्दर गमन में **(समुद्रम्)** अन्तरिक्ष के **(न)** तुल्य **(अप, व्रन्)** ढांपती हैं, वैसे **(बुध्न्येन)** अन्तरिक्ष में हुए **(अहिना)** मेघ के सहित **(देवी)** प्रकाशमान **(रोदसी)** अन्तरिक्ष और पृथिवी की **(नू)** शीघ्र **(स्तुवीत)** प्रशंसा करें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे मेघों के जलों से पूर्ण नदियाँ आवरणों को काट कर अन्तरिक्ष में जलों को प्राप्त होती हैं, वैसे ही आप लोग विद्या की दीप्ति को प्राप्त होकर सब विद्याओं की प्रशंसा करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्।

नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः॥७॥

दे॒वैः। न॒ः। दे॒वी। अदि॑तिः। नि। पा॒तु॒। दे॒वः। त्रा॒ता। त्रा॒य॒ता॒म्। अप्र॑ऽयुच्छन्। न॒हि। मि॒त्र॑स्य। वरु॑णस्य। धा॒सिम्। अर्हा॑मसि। प्रऽमि॑यम्। सानु॑। अ॒ग्नेः॥७॥

पदार्थः-(देवैः) विद्वद्भिः पृथिव्यादिभिस्सह वा **(नः)** अस्मान् **(देवी)** देदीप्यमाना विदुषी माता **(अदितिः)** अखण्डितज्ञाना **(नि) (पातु)** रक्षतु **(देवः)** विद्वान् पिता **(त्राता)** रक्षकः **(त्रायताम्)** पालयतु **(अप्रयुच्छन्)** अप्रमाद्यन् **(नहि)** निषेधे **(मित्रस्य) (वरुणस्य) (धासिम्)** अन्नम् **(अर्हामसि)** योग्या भवामः **(प्रमियम्)** प्रहिंसितुम् **(सानु)** शिखरम् **(अग्नेः)** पावकस्य॥७॥

अन्वयः-हे विद्वन्! यथा वयं वरुणस्य मित्रस्याग्नेः सानु धासिं प्रमियं नह्यर्हामसि तथा देवैस्सह देव्यदितिर्नो नि पात्वप्रयुच्छँस्त्राता देवोऽस्माँस्त्रायताम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। केनाऽपि मनुष्येण कस्याऽपि जनस्य पदार्थस्य वा हिंसा मादकद्रव्यसेवनञ्च सदैव न कार्य्यं सदा विदुषां मातुः पितुश्च शिक्षा सङ्ग्राह्या॥७॥

पदार्थः-हे विद्वन्! जैसे हम लोग **(वरुणस्य)** श्रेष्ठ पुरुष **(मित्रस्य)** मित्र और **(अग्नेः)** अग्नि के **(सानु)** शिखर और **(धासिम्)** अन्न के **(प्रमियम्)** नाश करने को **(नहि)** नहीं **(अर्हामसि)** योग्य होते हैं, वैसे **(देवैः)** विद्वानों वा पृथिवी आदिकों के साथ **(देवी)** प्रकाशमान विद्यायुक्त माता **(अदितिः)** अखण्डित ज्ञानवाली **(नः)** हम लोगों की **(नि, पातु)** रक्षा करे और **(अप्रयुच्छन्)** नहीं प्रमाद करता हुआ **(त्राता)** रक्षा करने वाला **(देवः)** विद्वान् पिता हम लोगों का **(त्रायताम्)** पालन करे॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। प्रत्येक मनुष्य को चाहिये कि किसी सज्जन वा किसी पदार्थ का नाश और नशा करने वाले द्रव्य का सेवन सदा ही न करे और सदा विद्वानों और माता-पिता की शिक्षा को ग्रहण करे॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒ग्निरीशे॒ वस॒व्यस्याग्निर्म॒हः सौभ॑गस्य। तान्य॒स्मभ्यं॑ रासते॥८॥

अ॒ग्निः। ईशे॒। व॒स॒व्यस्य। अ॒ग्निः। म॒हः। सौभ॑गस्य। तानि॑। अ॒स्मभ्य॑म्। रा॒स॒ते॒॥८॥

पदार्थः-(अग्निः) अग्निरिव पुरुषार्थी **(ईशे)** ईष्टे **(वसव्यस्य)** वसुषु धनेषु साधोः **(अग्निः)** पावकः **(महः)** महतः **(सौभगस्य)** सुष्ठ्वैश्वर्य्यभावस्य **(तानि) (अस्मभ्यम्) (रासते)** ददाति॥८॥

अन्वयः-हे विद्वन्! यथाऽग्निर्वसव्यस्य यथाऽग्निर्महः सौभगस्येशे तान्यस्मभ्यं रासते तथा त्वं कुरु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा विद्ययोपजितोऽग्निः कार्य्याणि संसाध्य महदैश्वर्य्यं प्रापयति तथैव सेविता यूयं विद्योपदेशादिकार्य्याणि संसाध्य सर्वानैश्वर्य्ययुक्तान् कुरुत॥८॥

पदार्थः-हे विद्वन्! जैसे **(अग्निः)** अग्नि के सदृश पुरुषार्थी **(वसव्यस्य)** धनों में श्रेष्ठ का और जैसे **(अग्निः)** अग्नि **(महः)** बड़े **(सौभगस्य)** उत्तम ऐश्वर्य्य के होने की **(ईशे)** इच्छा करता है **(तानि)** उनको **(अस्मभ्यम्)** हम लोगों के लिये **(रासते)** देता है, वैसे आप करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे विद्या से उपजित अर्थात् वश में किया गया अग्नि, कार्य्यों को सिद्ध करके बड़े ऐश्वर्य्य को प्राप्त कराता है, वैसे ही सेवा किये गये आप लोग विद्या और उपदेश आदि कार्य्यों को सिद्ध करके सब को ऐश्वर्य्ययुक्त करो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उषो॑ मघो॒न्या व॑ह सू॒नृ॑ते॒ वार्या॑ पु॒रु। अ॒स्मभ्यं॑ वाजिनीवति॥९॥

उषः॑। म॒घो॒नि॒। आ। व॒ह। सू॒नृ॑ते। वार्या॑। पु॒रु। अ॒स्मभ्य॑म्। वा॒जि॒नी॒ऽव॒ति॥९॥

पदार्थः-(उषः) उषर्वद्वर्त्तमाने **(मघोनि)** प्रशंसितधनकारिके **(आ) (वह)** समन्तात् प्रापय **(सूनृते)** सत्यवाक् **(वार्या)** वर्त्तुमर्हाणि वस्तूनि **(पुरु) (अस्मभ्यम्) (वाजिनीवति)** उत्तमविद्यायुक्ते॥९॥

अन्वयः-हे उषर्वद्वर्त्तमाने सूनृते मघोनि वाजिनीवति! पत्नी त्वमस्मभ्यं पुरु वार्याऽऽवह॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषाः सर्वजीवानां प्रियकारिणी वर्त्तते तथैव विदुषी स्त्री सर्वप्रिया जायते॥९॥

पदार्थः-हे **(उषः)** प्रातःकाल के सदृश वर्त्तमान **(सूनृते)** सत्यवाणीयुक्त **(मघोनि)** प्रशंसित धन को करने वाली **(वाजिनीवति)** उत्तम विद्या से युक्त पत्नी तू **(अस्मभ्यम्)** हम लोगों के लिये **(पुरु)** बहुत **(वार्या)** वर्त्ताव में लाने योग्य वस्तुओं को **(आ, वह)** सब प्रकार से प्राप्त कराओ॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभातवेला सब जीवों की प्रिय करने वाली है, वैसे ही विद्यायुक्त स्त्री सब को प्रिय होती है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तत्सु नः॑ सवि॒ता। भगो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा। इन्द्रो॑ नो॒ राध॒सा ग॑मत्॥१०॥७॥

तत्। सु। नः॒। स॒वि॒ता। भगः॑। वरु॑णः। मि॒त्रः। अ॒र्य॒मा। इन्द्रः॑। नः॒। राध॑सा। आ। ग॒म॒त्॥१०॥

पदार्थः-(तत्) तेन **(सु) (नः)** अस्मान् **(सविता)** सूर्य्यः **(भगः)** भजनीयः पदार्थसमुदायः **(वरुणः)** उदानः **(मित्रः)** प्राणः **(अर्यमा)** न्यायकारी **(इन्द्रः)** विद्युत् **(नः)** अस्मान् **(राधसा)** धनेन **(आ)** समन्तात् **(गमत्)** गच्छति॥१०॥

अन्वयः-हे विद्वन्! यथा सविता भगो वरुणो मित्रोऽर्यमा तद्राधसा न आ गमदिन्द्रो नः सु गमत्तथा त्वं भव॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे अध्यापकोपदेशका! यथा नियमेन सूर्य्यवायू प्राणादयो विद्युच्च प्राप्ताः सन्ति तथैवाऽस्मान् सततं प्राप्ता भवत॥१०॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चपञ्चाशत्तमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! जैसे **(सविता)** सूर्य **(भगः)** सेवन करने योग्य पदार्थसमुदाय **(वरुणः)** उदानवायु **(मित्रः)** प्राणवायु **(अर्यमा)** न्यायकारी **(तत्)** उस **(राधसा)** धन से **(नः)** हम लोगों को **(आ)** सब प्रकार **(गमत्)** प्राप्त होता और **(इन्द्रः)** बिजुली **(नः)** हम लोगों को **(सु)** उत्तम प्रकार प्राप्त होती है, वैसे आप हूजिये॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे अध्यापक और उपदेशक जनो! जैसे नियम से सूर्य, वायु, प्राण आदि और बिजुली प्राप्त हैं, वैसे ही आप हम लोगों को निरन्तर प्राप्त हूजिये॥१०॥

इस सूक्त में विद्वानों के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पचपनवाँ सूक्त और सप्तम वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य षट्पञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। द्यावापृथिव्यौ देवते। १, २ त्रिष्टुप्। ४ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५ निचृद्गायत्री। ६ विराट् गायत्री। ७ गायत्री छन्दः। षड्जः स्वरः॥

अथ द्यावापृथिव्योर्गुणानाह॥

अब सात ऋचा वाले छप्पनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में द्यावापृथिवी अर्थात् प्रकाश और भूमि के गुणों को कहते हैं॥

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः।
यत्सीं वरिष्ठे बृहती विमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः॥ १॥

मही इति। द्यावापृथिवी इति। इह। ज्येष्ठे इति। रुचा। भवताम्। शुचयत्ऽभिः। अर्कैः। यत्। सीम्। वरिष्ठे इति। बृहती इति। विऽमिन्वन्। रुवत्। ह। उक्षा। पप्रथानेभिः। एवैः॥ १॥

पदार्थः-(मही) महत्यौ **(द्यावापृथिवी)** सूर्यभूमी **(इह)** **(ज्येष्ठे)** अतिशयेन प्रशस्ये **(रुचा)** रुचिकर्यौ **(भवताम्)** **(शुचयद्भिः)** पवित्रयद्भिः **(अर्कैः)** अर्चनीयैः **(यत्)** यः **(सीम्)** सर्वतः **(वरिष्ठे)** अतिशयेन वरे **(बृहती)** बृहन्त्यौ **(विमिन्वन्)** विशेषेण प्रक्षिपन् **(रुवत्)** प्रशस्तशब्दवत् **(ह)** किल **(उक्षा)** सूर्यः **(पप्रथानेभिः)** भृशं विस्तृतैः **(एवैः)** सुखप्रापकैः॥ १॥

अन्वयः-हे मनुष्या! यद्यो विमिन्वन् रुवद्धोक्षेव विद्वानिह सीं शुचयद्भिरर्कैः पप्रथानेभिरेवैर्गुणै-स्सह वर्त्तमाने वरिष्ठे बृहती मही ज्येष्ठे रुचा द्यावापृथिवी भवतां ते [=तान्] यथावद्विजानाति स एव सर्वेषां कल्याणकरो भवति॥ १॥

भावार्थः-ये मनुष्याः पृथिवीमारभ्य सूर्य्यपर्य्यन्तान् पदार्थाञ्च जानन्ति त ऐश्वर्य्यवन्तो भूत्वा सर्वान् सुखयन्तु॥ १॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(विमिन्वन्)** विशेष करके फेंकता हुआ **(रुवन्)** प्रशंसित शब्दवान् जैसे हो वैसे **(ह)** ही **(उक्षा)** सूर्य्य के समान विद्वान् **(इह)** यहाँ **(सीम्)** सब ओर से **(शुचयद्भिः)** पवित्र करते हुए **(अर्कैः)** सेवा करने योग्य और **(पप्रथानेभिः)** अत्यन्त विस्तारयुक्त **(एवैः)** सुख को प्राप्त कराने वाले गुणों के साथ वर्त्तमान **(वरिष्ठे)** अतीव श्रेष्ठ **(बृहती)** बढ़ते हुए **(मही)** बड़े **(ज्येष्ठे)** अत्यन्त प्रशंसा करने योग्य **(रुचा)** रुचिकर **(द्यावापृथिवी)** सूर्य्य और भूमि **(भवताम्)** होते हैं, उनको यथावत् विशेष करके जानता है, वही सब का कल्याण करने वाला होता है॥ १॥

भावार्थः-जो मनुष्य पृथिवी से लेके सूर्य्यपर्य्यन्त पदार्थों को जानते हैं, वे धनवान् होकर सब को सुखी करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे।

ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः॥ २॥

देवी इति। देवेभिः। यजते इति। यजत्रैः। अमिनती इति। तस्थतुः। उक्षमाणे इति। ऋतवरी इत्यृतऽवरी। अद्रुहा। देवपुत्रे इति देवऽपुत्रे। यज्ञस्य। नेत्री इति। शुचयत्ऽभिः। अर्कैः॥ २॥

पदार्थः-(देवी) देदीप्यमाने **(देवेभिः)** दिव्यैर्गुणैर्विद्वद्भिर्वा **(यजते)** सङ्गन्तव्ये **(यजत्रैः)** सङ्गन्तव्यैः **(अमिनती)** अहिंसके **(तस्थतुः)** तिष्ठतः **(उक्षमाणे)** सर्वान् प्राणिनः सुखैः सिञ्चमाने **(ऋतावरी)** बह्वृतं सत्यं विद्यते ययोस्ते **(अद्रुहा)** अद्रोग्धव्ये **(देवपुत्रे)** देवा विद्वांसः पुत्रा ययोस्ते **(यज्ञस्य)** संसारव्यवहारस्य **(नेत्री)** नयनकर्त्र्यौ **(शुचयद्भिः)** शुचिमाचक्षाणैः **(अर्कैः)** सत्कर्त्तव्यैः॥ २॥

अन्वयः-हे मनुष्या! अर्कैः शुचयद्भिर्यजत्रैर्देवेभिर्विद्वद्भिर्ये देवी अमिनती ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री उक्षमाणे यजते द्यावापृथिवी तस्थतुर्विज्ञायैते यो यजते स एव भाग्यशाली जायते॥ २॥

भावार्थः-ये मनुष्या पृथिवीमारभ्य प्रकृतिपर्यन्तान् पदार्थान् यथावद् विज्ञाय कार्यसिद्धये सम्प्रयुञ्जते ते सदैव भाग्यशालिनो भवन्ति॥ २॥

पदार्थः-हे मनुष्यो! **(अर्कैः)** सत्कार करने योग्य **(शुचयद्भिः)** पवित्रता को कहते हुए **(यजत्रैः)** मिलने योग्य **(देवेभिः)** श्रेष्ठ गुणों वा विद्वानों से जो **(देवी)** प्रकाशमान **(अमिनती)** नहीं हिंसा करने वाले **(ऋतावरी)** बहुत सत्य से युक्त **(अद्रुहा)** नहीं द्रोह करने योग्य **(देवपुत्रे)** विद्वान् जन पुत्र जिनके वे **(यज्ञस्य)** संसार के व्यवहार के **(नेत्री)** चलाने वाले **(उक्षमाणे)** सब प्राणियों को सुखों से सींचते हुए **(यजते)** मिलने योग्य सूर्य्य और भूमि **(तस्थतुः)** स्थित होते हैं, उनको जान के जो व्यवहारों में संयुक्त करता है, वही भाग्यशाली होता है॥ २॥

भावार्थः-जो मनुष्य पृथिवी से लेके प्रकृति अर्थात् प्रधानपर्य्यन्त पदार्थों को उनके गुण, कर्म्म, स्वभाव से यथावत् जान के कार्य्य की सिद्धि के लिये सम्प्रयोग करते हैं, वे सदा ही भाग्यशाली होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान।

उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत्॥ ३॥

सः। इत्। सुऽअपाः। भुवनेषु। आस। यः। इमे इति। द्यावापृथिवी इति। जजान। उर्वी। गभीरे इति। रजसी। सुमेके इति सुऽमेके। अवंशे। धीरः। शच्या। सम्। ऐरत्॥ ३॥

पदार्थः-(सः) (इत्) एव **(स्वपाः)** शोभानान्यपांसि कर्माणि यस्य सः **(भुवनेषु)** लोकेषु **(आस)** आस्ते **(यः) (इमे) (द्यावापृथिवी)** सूर्य्यभूमी **(जजान)** उत्पादितवान् **(उर्वी)** बहुपदार्थयुक्ते **(गभीरे)** गाम्भीर्यादिगुणसहिते **(रजसी)** रजोभिर्निर्मिते **(सुमेके)** एकीभूते सम्बद्धे **(अवंशे)** अविद्यमानो वंशो ययोस्ते अन्तरिक्षस्थे **(धीरः) (शच्या)** प्रज्ञया **(सम्) (ऐरत्)** कम्पयति यथाक्रमं चालयति॥३॥

अन्वयः-हे मनुष्या! युष्माभिर्यः स्वपा धीरो जगदीश्वरो भुवनेष्वासेमे उर्वी गभीरे रजसी सुमेके अवंशे द्यावापृथिवी जजान शच्या समैरत्स इदेव सदोपासनीयोऽस्ति॥३॥

भावार्थः-हे मनुष्या! येन जगदीश्वरेणऽसङ्ख्या भूमयश्चाकाशे निर्मिता व्यवस्थया चाल्यन्ते स एव सदैव भजनीयः॥३॥

पदार्थः-हे मनुष्यो! आप लोगों को **(यः)** जो **(स्वपाः)** श्रेष्ठ कर्म्मों से युक्त **(धीरः)** धीर जगदीश्वर **(भुवनेषु)** लोकों में **(आस)** विद्यमान है **(इमे)** इन **(उर्वी)** बहुत पदार्थों से युक्त **(गभीरे)** गाम्भीर्य्य आदि गुणसहित **(रजसी)** रजोवृन्दों से बनाये गये **(सुमेके)** एक हुए अर्थात् परस्पर सम्बन्धयुक्त **(अवंशे)** वंश अर्थात् उत्पत्तिक्रम से आगे को रहित और अन्तरिक्ष में स्थित **(द्यावापृथिवी)** सूर्य्य और भूमि को **(जजान)** उत्पन्न किया **(शच्या)** बुद्धि से **(सम्, ऐरत्)** कम्पाता अर्थात् क्रम से अनुकूल चलाता है **(सः, इत्)** वही सदा उपासना करने योग्य है॥३॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर ने असङ्ख्य भूमि आदि लोक आकाश में रचे और व्यवस्था से चलाये हैं, वह सदा ही उपासना करने योग्य है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः।
उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः॥४॥

नु। रोदसी इति। बृहत्ऽभिः। नः। वरूथैः। पत्नीवत्ऽभिः। इषयन्ती इति। सऽजोषाः। उरूची इति। विश्वे इति। यजते इति। नि। पातम्। धिया। स्याम। रथ्यः। सदाऽसाः॥४॥

पदार्थः-(नू) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(रोदसी)** द्यावापृथिव्यौ **(बृहद्भिः)** महद्भिः **(नः)** अस्मान् **(वरूथैः)** उत्तमैर्गृहैः **(पत्नीवद्भिः)** बह्व्यः पत्न्यो विद्यन्ते येषु तैः **(इषयन्ती)** सुखं प्रापयन्त्यौ **(सजोषाः)** समानप्रीतिसेवी **(उरूची)** य उरून् बहूनञ्चतस्ते **(विश्वे)** अन्तरिक्षे प्रविष्टे **(यजते)** सङ्गन्तव्ये **(नि)** नितराम् **(पातम्)** रक्षतः। अत्र पुरुषव्यत्ययः। **(धिया)** प्रज्ञया कर्मणा वा **(स्याम)** भवेम **(रथ्यः)** बहुरथादियुक्ताः **(सदासाः)** ससेवकाः॥४॥

अन्वयः-हे मनुष्या! यथा सजोषा विद्वान् धिया ये इषयन्ती उरूची विश्वे यजते बृहद्भिः पत्नीवद्भिर्वरूथैस्सह वर्त्तमाने रोदसी नोऽस्मान् नि पातं ते जानाति तथैते विदित्वा वयं रथ्यः सदासा नू स्याम॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या बहुभिर्बृहद्भिः पदार्थैर्युक्ते विद्युद्भूमी विजानन्ति ते सद्यः श्रीमन्तो जायन्ते॥४॥

पदार्थः-हे मनुष्यो! जैसे **(सजोषाः)** तुल्य प्रीति का सेवन करने वाला विद्वान् **(धिया)** बुद्धि वा कर्म्म से जो **(इषयन्ती)** सुख को प्राप्त कराती हुई **(उरूची)** बहुतों का आदर करने वाली **(विश्वे)** अन्तरिक्ष में प्रविष्ट **(यजते)** मिलने योग्य और **(बृहद्भिः)** जो बड़े **(पत्नीवद्भिः)** बहुत स्त्रियों से युक्त **(वरूथैः)** उत्तम गृह उनके साथ वर्त्तमान **(रोदसी)** सूर्य्य और पृथिवी **(नः)** हम लोगों की **(नि)** अत्यन्त **(पातम्)** रक्षा करती हैं उनको जानता है, वैसे इनको जान के हम लोग **(रथ्यः)** बहुत रथ आदि से युक्त **(सदासाः)** सेवकों के सहित **(नू)** शीघ्र **(स्याम)** होवें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य बहुत और बड़े पदार्थों से युक्त बिजुली और भूमि को विशेष करके जानते हैं, वे शीघ्र लक्ष्मीवान् होते हैं॥४॥

अथ शिल्पविद्याशिक्षामाह॥

अब शिल्पविद्या की शिक्षा को अगले मन्त्र में कहते हैं॥

प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये॥५॥

प्र। वाम्। महि। द्यवी इति। अभि। उपऽस्तुतिम्। भरामहे। शुची इति। उप। प्रऽशस्तये॥५॥

पदार्थः-**(प्र)** **(वाम्)** युवयोरध्यापकक्रियाकर्त्रोः **(महि)** महागुणे **(द्यवी)** द्योतमाने **(अभि)** **(उपस्तुतिम्)** उपमितां प्रशंसाम् **(भरामहे)** धरामहे **(शुची)** पवित्रे **(उप)** **(प्रशस्तये)**॥५॥

अन्वयः-हे शिल्पविद्याप्रवीणौ! यतो वयं प्रशस्तये शुची महि द्यवी अभ्युप प्रभरामहे तस्माद् वामुपस्तुतिं कुर्महे॥५॥

भावार्थः-येषां सकाशाच्छिल्पादिविद्या गृह्यन्ते तेषां मान्यं मनुष्याः सदा कुर्वन्तु॥५॥

पदार्थः-हे शिल्पविद्या में प्रवीणो! जिससे हम लोग **(प्रशस्तये)** प्रशंसित **(शुची)** पवित्र **(महि)** महागुणयुक्त **(द्यवी)** प्रकाशमान को **(अभि, उप, प्र, भरामहे)** सब ओर से अच्छे प्रकार धारण करते हैं इससे **(वाम्)** आप दोनों अध्यापक और क्रिया करने वालों की **(उपस्तुतिम्)** उपमायुक्त प्रशंसा करते हैं॥५॥

भावार्थः-जिनके समीप से शिल्प आदि विद्या ग्रहण की जाती हैं, उनका आदर मनुष्य सदा करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम्॥६॥

पुनाने इति। तन्वा। मिथः। स्वेन। दक्षेण। राजथः। ऊह्याथे इति। सनात्। ऋतम्॥६॥

पदार्थः-(पुनाने) पवित्रकारिके **(तन्वा)** शरीरेण **(मिथः)** परस्परम् **(स्वेन)** स्वकीयेन **(दक्षेण)** बलयुक्तेन **(राजथः) (ऊह्याथे)** वितर्कयथः **(सनात्)** सनातनात् **(ऋतम्)** सत्यम्॥६॥

अन्वयः-यौ शिल्पविद्यापकाऽध्येतारौ स्वेन दक्षेण तन्वा पुनाने विदित्वा मिथो राजथः सनाद् ऋतमूह्याथे तौ सत्कर्त्तव्यौ भवथः॥६॥

भावार्थः-ये शिल्पविद्यायां निपुणा जायन्ते तेषां सत्कारो यथायोग्यं राजादिभिः कर्त्तव्यः॥६॥

पदार्थः-जो शिल्पविद्या के पढ़ाने और पढ़ने वाले **(स्वेन)** अपने **(दक्षेण)** बलयुक्त **(तन्वा)** शरीर से **(पुनाने)** पवित्र करनेवाली सूर्य और पृथिवी को जान के **(मिथः)** परस्पर **(राजथः)** शोभित होते हैं और **(सनात्)** सनातन से **(ऋतम्)** सत्य का **(ऊह्याथे)** ऊहापोह करते हैं, वे सत्कार के योग्य होते हैं॥६॥

भावार्थः-जो शिल्पविद्या में निपुण होते हैं, उनका सत्कार यथायोग्य राजा आदि को करना चाहिये॥६॥

पुनः शिल्पविद्याविषयमाह॥

फिर शिल्पविद्या विषय को अगले मन्त्र में कहते हैं॥

मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं नि षेदथुः॥७॥८॥

मही इति। मित्रस्य। साधथः। तरन्ती इति। पिप्रती इति। ऋतम्। परि। यज्ञम्। नि। सेदथुः॥७॥

पदार्थः-(मही) महत्यौ **(मित्रस्य)** सर्वस्य सुहृदः **(साधथः)** साध्नुतः। अत्र व्यत्ययः। **(तरन्ती)** दुःखं प्लावयन्त्यौ **(पिप्रती)** सर्वानन्दं प्रपूरयन्त्यौ **(ऋतम्)** सत्यं कारणम् **(परि)** सर्वतः **(यज्ञम्)** सङ्गन्तव्यम् **(नि) (सेदथुः)** निषीदतः॥७॥

अन्वयः-हे विद्वांसो! ये तरन्ती पिप्रती मही ऋतं यज्ञं परि नि षेदथुर्मित्रस्य कार्याणि साधथस्ते यथावद्विज्ञाय सम्प्रयुग्ध्वम्॥७॥

भावार्थः-मनुष्यैः सर्वाधारे सर्वकार्यसाधिके द्यावापृथिवी विज्ञायाभीष्टानि कार्याणि साधनीयानीति॥७॥

अत्र द्यावापृथिव्योर्गुणशिल्पविद्याशिक्षावर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्पञ्चाशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो जो **(तरन्ती)** दुःख से पार उतारती और **(पिप्रती)** सम्पूर्ण आनन्द को पूर्ण

करती हुईं (**मही**) बड़े सूर्य और पृथिवी (**ऋतम्**) सत्यकारणरूप (**यज्ञम्**) संग करने अर्थात् आरम्भ करने योग्य यज्ञ को (**परि**) सब प्रकार से (**नि, सेदथुः**) सिद्धि करती और (**मित्रस्य**) सब के मित्र के कार्य्यों को (**साधथः**) सिद्ध करती उन सूर्य्य और भूमि को यथावत् जान के उनका संयोग करो अर्थात् काम [में] लाओ॥७॥

भावार्थः–मनुष्यों को चाहिये सब के आधारभूत सब कार्य्य सिद्ध करने वाली सूर्य और पृथिवी को जान के अभीष्ट कार्य्यों को सिद्ध करें॥७॥

इस सूक्त में सूर्य्य और पृथिवी के गुण और शिल्पविद्या शिक्षा वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ साथ सङ्गति जाननी चाहिये॥७॥

यह छप्पनवाँ सूक्त और आठवाँ वर्ग समाप्त हुआ॥

अथाष्टर्चस्य सप्तपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। १-३ क्षेत्रपतिः। ४ शुनः। ५, ८ शुनासीरौ। ६, ७ सीता देवता। १, ४, ६, ७ अनुष्टुप् छन्दः। गान्धारः स्वरः। २, ३, ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ पुर उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ कृषिकर्माह॥

अब आठ ऋचा वाले सत्तावनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में कृषिकर्म को कहते हैं॥

क्षेत्रस्य पतिना वयं हितेनेव जयामसि।

गामश्वं पोषयित्नवा स नो मृळातीदृशे॥ १॥

क्षेत्रस्य। पतिना। वयम्। हितेनऽइव। जयामसि। गाम्। अश्वम्। पोषयित्नु। आ। सः। नः। मृळाति। ईदृशे॥ १॥

पदार्थः-(क्षेत्रस्य) शस्यस्योपत्त्यधिकरणस्य **(पतिना)** स्वामिना। अत्र **षष्ठीयुक्तश्छन्दसि वे**ति पतिशब्दस्य घिसंज्ञा। **(वयम्) (हितेनेव)** हितसाधकेन सैन्येनेव **(जयामसि)** जयामः **(गाम्)** पृथिवीम् **(अश्वम्)** तुरङ्गम् **(पोषयित्नु)** पुष्टिकरम् **(आ) (सः) (नः)** अस्मान् **(मृळाति) (ईदृशे)**॥ १॥

अन्वयः-हे मनुष्या! येन क्षेत्रस्य पतिना सहिता वयं हितेनेव गामश्वं पोषयित्नु द्रव्यं जयामसि स क्षेत्रपतिरीदृशे न आ मृळाति सुखयेत्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा सुशिक्षितेनानुरक्तेन सैन्येन वीरा विजयं प्राप्नुवन्ति तथैव कृषिकर्मसु कुशला ऐश्वर्यं लभन्ते॥ १॥

पदार्थः-हे मनुष्यो! जिस **(क्षेत्रस्य)** अन्न की उत्पत्ति के आधारस्थान अर्थात् खेत के **(पतिना)** स्वामी से **(वयम्)** हम लोग **(हितेनेव)** हित की सिद्धि करने वाली सेना के सदृश **(गाम्)** पृथिवी **(अश्वम्)** घोड़ा **(पोषयित्नु)** और पुष्टि करने वाले द्रव्य को **(जयामसि)** जीतते हैं **(सः)** वह क्षेत्र का स्वामी **(ईदृशे)** ऐसे में **(नः)** हम लोगों को **(आ, मृळाति)** सुख देवें॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। उस उत्तम प्रकार शिक्षित और अनुरक्त सेना से वीरजन विजय को प्राप्त होते हैं, वैसे ही कृषि अर्थात् खेतीकर्म्म में चतुर जन ऐश्वर्य्य को प्राप्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व।

मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु॥ २॥

क्षे॑त्रस्य। प॒ते॒। मधु॑ऽमन्तम्। ऊ॒र्मिम्। धे॒नुःऽइ॑व। पय॑ः। अ॒स्मासु॑। धु॒क्ष्व॒। म॒धु॒ऽश्चुत॑म्। घृत॑म्ऽइ॑व। सु॒ऽपू॒तम्। ऋ॒तस्य॑। न॒ः। पत॑यः। मृ॒ळ॒य॒न्तु॒॥ २॥

पदार्थः-(क्षेत्रस्य) (पते) स्वामिन् **(मधुमन्तम्)** मधुरादिगुणयुक्तम् **(ऊर्मिम्)** जलधाराम् **(धेनुरिव) (पयः)** दुग्धम् **(अस्मासु) (धुक्ष्व)** पूर्णे कुरु **(मधुश्चुतम्)** मधुरादिगुणयुक्तम् **(घृतमिव) (सुपूतम्)** सुष्ठु पवित्रम् **(ऋतस्य) (नः)** अस्मान् **(पतयः)** स्वामिनः **(मृळयन्तु)**॥ २॥

अन्वयः-हे क्षेत्रस्य पते! यथर्तस्य पतयो घृतमिव मधुश्चुतं सुपूतं विज्ञानं प्राप्य नो मृळयन्तु तथा धेनुरिव मधुमन्तमूर्मिं पयोऽस्मासु धुक्ष्व॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा धीमन्तः कृषीवलाः सुन्दराणि शुद्धान्यन्नान्युत्पाद्य सर्वानानन्दयन्ति तथैव कृषीवलान् संरक्ष्य सदैवोत्साहयेत्॥ २॥

पदार्थः-हे **(क्षेत्रस्य)** अन्न के उत्पन्न होने की आधारभूमि के **(पते)** स्वामी जैसे **(ऋतस्य)** सत्य के **(पतयः)** स्वामी **(घृतमिव)** घृत के सदृश **(मधुश्चुतम्)** मधुर आदि गुणों से युक्त **(सुपूतम्)** उत्तम प्रकार पवित्र विज्ञान को प्राप्त होकर **(नः)** हम लोगों को **(मृळयन्तु)** सुख दीजिये तथा **(धेनुरिव)** गौ के सदृश **(मधुमन्तम्)** मधुर आदि गुणों से युक्त **(ऊर्मिम्)** जलधारा और **(पयः)** दुग्ध को **(अस्मासु)** हम लोगों में **(धुक्ष्व)** पूर्ण करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बुद्धिमान् खेती करने वाले जन सुन्दर शुद्ध अन्नों को उत्पन्न करके सब को आनन्द देते हैं, वैसे ही खेती करने वाले जनों की उत्तम प्रकार रक्षा करके सदा उत्साह युक्त करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मधु॑मती॒रोष॑धी॒र्द्याव॒ आपो॒ मधु॑मन्नो भवत्व॒न्तरि॑क्षम्।
क्षेत्र॑स्य॒ पति॒र्मधु॑मान्नो अ॒स्त्वरि॑ष्यन्तो॒ अन्वे॑नं चरेम॥ ३॥

मधु॑ऽमतीः। ओष॑धीः। द्याव॑ः। आप॑ः। मधु॑ऽमत्। न॒ः। भ॒व॒तु॒। अ॒न्तरि॑क्षम्। क्षेत्र॑स्य। पति॑ः। मधु॑ऽमान्। न॒ः। अ॒स्तु॒। अरि॑ष्यन्तः। अनु॑। एन॑म्। च॒रे॒म॒॥ ३॥

पदार्थः-(मधुमतीः) मधुरादिगुणयुक्ताः **(ओषधीः)** यवाद्या ओषधयः **(द्यावः)** सूर्य्यादिप्रकाशाः **(आपः)** जलानि **(मधुमत्)** मधुरादिगुणयुक्तम् **(नः)** अस्मभ्यम् **(भवतु) (अन्तरिक्षम्)** आकाशम् **(क्षेत्रस्य) (पतिः)** स्वामी **(मधुमान्) (नः)** अस्मभ्यम् **(अस्तु) (अरिष्यन्तः)** अन्यैरहिंसिष्यन्तः **(अनु) (एनम्) (चरेम)**॥ ३॥

अन्वयः-हे मनुष्या! न ओषधीर्द्यावो आपश्च मधुमतीः सन्तु अन्तरिक्षं मधुमद्भवतु क्षेत्रस्य पतिर्नो मधुमानस्त्वरिष्यन्तो वयमेनमनु चरेम॥३॥

भावार्थः-सर्वैर्मनुष्यैर्यथा स्वार्थमुत्तमाः पदार्था इष्यन्ते तथैवाऽन्यार्थमप्येष्टव्याः॥३॥

पदार्थः-हे मनुष्यो! **(नः)** हम लोगों के लिये **(ओषधीः)** यव आदि ओषधियाँ **(द्यावः)** सूर्य्य आदि प्रकाश और **(आपः)** जल **(मधुमतीः)** मधुर आदि गुणों से युक्त हों **(अन्तरिक्षम्)** आकाश **(मधुमत्)** मधुर आदि गुणों से युक्त **(भवतु)** हो **(क्षेत्रस्य)** अन्न के उत्पन्न होने की भूमि का **(पतिः)** स्वामी **(नः)** हम लोगों के लिये **(मधुमान्)** मधुर गुण वाला **(अस्तु)** हो और **(अरिष्यन्तः)** अन्यों के साथ नहीं हिंसा करने वाले हम लोग **(एनम्)** इसको **(अनु, चरेम)** अनुकूल वर्त्तें॥३॥

भावार्थः-सब मनुष्यों को चाहिये कि वे जैसे अपने लिये उत्तम पदार्थ चाहते हैं, वैसे ही अन्य जनों के लिये भी इच्छा करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम्।

शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय॥४॥

शुनम्। वाहाः। शुनम्। नरः। शुनम्। कृषतु। लाङ्गलम्। शुनम्। वरत्राः। बध्यन्ताम्। शुनम्। अष्ट्राम्। उत्। इङ्गय॥४॥

पदार्थः-**(शुनम्)** सुखम् **(वाहाः)** वृषभादयः **(शुनम्) (नरः)** नेतारः कृषीवलाः **(शुनम्) (कृषतु) (लाङ्गलम्)** हलावयवः **(शुनम्) (वरत्राः)** रश्मयः **(बध्यन्ताम्) (शुनम्) (अष्ट्राम्)** कृषिसाधनावयवम् **(उत्) (इङ्गय)** गमय॥४॥

अन्वयः-हे कृषीवल! यथा वाहाः शुनं गच्छन्तु नरः शुनं कुर्वन्तु लाङ्गलं शुनं कृषतु वरत्राः शुनं बध्यन्तां तथाऽष्ट्रां शुनमुदिङ्गय॥४॥

भावार्थः-कृषीवला उत्तमानि हलादिसामग्रीवृषभबीजानि सम्पाद्य क्षेत्राणि सुष्ठु निष्पाद्य तत्रोत्तमान्यन्नानि निष्पादयन्तु॥४॥

पदार्थः-हे खेती करने वाले जन! जैसे **(वाहाः)** बैल आदि पशु **(शुनम्)** सुख को प्राप्त हों **(नरः)** मुखिया कृषीवल **(शुनम्)** सुख को करें **(लाङ्गलम्)** हल का अवयव **(शुनम्)** सुख जैसे हो, वैसे **(कृषतु)** पृथिवी में प्रविष्ट हो और **(वरत्राः)** बैल की रस्सी **(शुनम्)** सुखपूर्वक **(बध्यन्ताम्)** बांधी जायें, वैसे **(अष्ट्राम्)** खेती के साधन के अवयव को **(शुनम्)** सुखपूर्वक **(उत्, इङ्गय)** ऊपर चलाओ॥४॥

भावार्थः-खेती करने वाले जन उत्तम हल आदि सामग्री, वृषभ और बीजों को इकट्ठे करके

खेतों को उत्तम प्रकार जोत कर उनमें उत्तम अन्नों को उत्पन्न करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुना॑सीरा॒विमां वाचं॑ जुषेथां॒ यद्दि॒वि च॒क्रथु॒: पय॑:। तेने॒मामुप॑ सिञ्चतम्॥५॥

शुना॑सीरौ। इ॒माम्। वाच॑म्। जु॒षे॒था॒म्। यत्। दि॒वि। च॒क्रथु॑:। पय॑:। तेन॑। इ॒माम्। उप॑। सि॒ञ्च॒त॒म्॥५॥

पदार्थ:-(शुनासीरौ) क्षेत्रपतिभृत्यौ **(इमाम्)** कृषिविद्याप्रकाशिकां **(वाचम्)** वाणीम् **(जुषेथाम्)** सेवेथाम् **(यत्)** यम् **(दिवि)** कृषिविद्याप्रकाशे **(चक्रथु:)** **(पय:)** उदकम् **(तेन)** **(इमाम्)** भूमिम् **(उप)** **(सिञ्चतम्)**॥५॥

अन्वय:-हे शुनासीरौ! युवां यद्यामिमां वाचं पयश्च दिवि चक्रथुस्ते जुषेथां तेनेमामुप सिञ्चतम्॥५॥

भावार्थ:-कृषीवला: पूर्वं कृषिविद्यां गृहीत्वा पुनर्यथायोग्यां कृषिं कृत्वा धनधान्ययुक्ता: सदा भवन्तु॥५॥

पदार्थ:-हे **(शुनासीरौ)** क्षेत्र के स्वामी और भृत्य! आप दोनों **(यत्)** जिस **(इमाम्)** इस कृषिविद्या की प्रकाश करने वाली **(वाचम्)** वाणी और **(पय:)** जल को **(दिवि)** कृषिविद्या के प्रकाश में **(चक्रथु:)** करते हैं उनकी **(जुषेथाम्)** सेवा करो **(तेन)** इससे **(इमाम्)** इस भूमि को **(उप, सिञ्चतम्)** सींचो॥५॥

भावार्थ:-खेती करने वाले जन प्रथम खेती के करने की विद्या को ग्रहण करके पश्चात् यथायोग्य खेती कर धन और धान्य से युक्त सदा हों॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒र्वाची॑ सुभगे भव॒ सीते॒ वन्दा॑महे त्वा।

यथा॑ न: सु॒भगास॑सि॒ यथा॑ न: सु॒फलास॑सि॥६॥

अ॒र्वाची॑। सु॒ऽभ॒गे॒। भ॒व॒। सीते॑। वन्दा॑महे। त्वा॒। यथा॑। न॒:। सु॒ऽभगा॑। अस॑सि। यथा॑। न॒:। सु॒ऽफला॑। अस॑सि॥६॥

पदार्थ:-**(अर्वाची)** याऽर्वागधोऽञ्चति **(सुभगे)** सुष्ठ्वैश्वर्य्यवर्द्धिके **(भव)** **(सीते)** हलादिकर्षणावयवायोनिर्मिता **(वन्दामहे)** कामयामहे **(त्वा)** त्वाम् **(यथा)** **(न:)** अस्माकम् **(सुभगा)** सौभाग्ययुक्ता **(अससि)** असि। अत्र **बहुलं छन्दसी**ति शपो लुगभाव:। **(यथा)** **(न:)** अस्माकम् **(सुफला)** शोभनानि फलानि यस्यां सा **(अससि)**॥६॥

अन्वयः-हे सुभगे! यथाऽर्वाची सीते सीतास्ति तथा त्वं भव यथा भूमिः सुभगास्ति तथा त्वं नोऽससि यथा भूमिः सुफलास्ति तथा त्वं नोऽससि, अतो वयं त्वा वन्दामहे॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथा सुष्ठु सम्पादिता क्षेत्रभूमिरुत्तमानि शस्यानि जनयति तथैव ब्रह्मचर्य्येण प्राप्तविद्यः सुसन्तानान् सूते यथा भूमिराज्यमैश्वर्य्यकरं वर्त्तते तथा परस्परं प्रीतौ स्त्रीपुरुषौ महैश्वर्य्यौ भवतः॥६॥

पदार्थः-हे **(सुभगे)** उत्तम प्रकार ऐश्वर्य्य की बढ़ाने वाली **(यथा)** जैसे **(अर्वाची)** नीचे को चलने वाली **(सीते)** हल आदि के खींचने वाले अवयव लोहे से बनाई गयी सीता है, वैसे आप **(भव)** हूजिये और जैसे भूमि **(सुभगा)** सौभाग्य से युक्त है वैसे तू **(नः)** हम लोगों की **(अससि)** है और **(यथा)** जैसे भूमि **(सुफला)** उत्तम फलों से युक्त है, वैसे तू **(नः)** हम लोगों की **(अससि)** है, इससे हम लोग **(त्वा)** तेरी **(वन्दामहे)** कामना करते हैं॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे उत्तम प्रकार सम्पादित खेत की धरती उत्तम अन्नों को उत्पन्न करती है, वैसे ही ब्रह्मचर्य्य से विद्या को प्राप्त हुआ जन उत्तम सन्तानों को उत्पन्न करता है और जैसे भूमि का राज्य ऐश्वर्य्यकारक है, वैसे परस्पर प्रसन्न स्त्री और पुरुष बड़े ऐश्वर्य्यवाले होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु।

सा नः पयस्वती दुहामुत्तरामुत्तरां समाम्॥७॥

इन्द्रः। सीताम्। नि। गृह्णातु। ताम्। पूषा। अनु। यच्छतु। सा। नः। पयस्वती। दुहाम्। उत्तराम्ऽउत्तराम्। समाम्॥७॥

पदार्थः-**(इन्द्रः)** भूमेर्दारयिता **(सीताम्)** भूमिकर्षिकाम् **(नि)** **(गृह्णातु)** **(ताम्)** **(पूषा)** पुष्टिकर्त्ता **(अनु)** **(यच्छतु)** अनुगृह्णातु **(सा)** **(नः)** अस्मभ्यम् **(पयस्वती)** बहूदकयुक्ता **(दुहाम्)** प्रापूरिकाम् **(उत्तरामुत्तराम्)** पुनः पुनर्निर्मिताम् **(समाम्)** शुद्धाम्॥७॥

अन्वयः-हे कृषीवला! या पयस्वती नोऽनु यच्छतु सा युष्मानपि प्राप्नोतु यां सीतामिन्द्रो नि गृह्णातु तां दुहामुत्तरामुत्तरां समां सीतां पूषानु यच्छतु तां यूयमपि सम्प्रयुङ्ध्वम्॥७॥

भावार्थः-सर्वे कृषीवला विदुषां कर्षकानामनुकरणं कृत्वा कृष्युन्नतिं निष्पादयेयुः॥७॥

पदार्थः-हे खेती करने वाले जनो! जो **(पयस्वती)** बहुत जल से युक्त **(नः)** हम लोगों के लिये **(अनु, यच्छतु)** अनुग्रह करे **(सा)** वह आप लोगों को भी प्राप्त हो और जिस **(सीताम्)** भूमि जुताने

वाले वस्तु को (**इन्द्रः**) भूमि को दारण करानेवाला (**नि, गृह्णातु**) ग्रहण करे (**ताम्**) उस (**दुहाम्**) प्रपूरण करने वाली (**उत्तरामुत्तराम्**) फिर-फिर बनाई गई (**समाम्**) शुद्ध सीता अर्थात् भूमि जुताने वाले वस्तु को (**पूषा**) पुष्टि करनेवाला देवे, उसका आप लोग भी संयोग करें॥७॥

भावार्थः-सब कृषिकर्म करने वाले जन विद्वान् क्षेत्र जोतने वालों का अनुकरण करके कृषि की वृद्धि को उत्पन्न करें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम्॥८॥९॥

शुनम्। नः। फालाः। वि। कृषन्तु। भूमिम्। शुनम्। कीनाशाः। अभि। यन्तु। वाहैः। शुनम्। पर्जन्यः। मधुना। पयःऽभिः। शुनासीरा। शुनम्। अस्मासु। धत्तम्॥८॥

पदार्थः-(शुनम्) सुखम् (**नः**) अस्मभ्यम् (**फालाः**) अयोनिर्मिता भूमिविलेखनार्थाः (**वि**) (**कृषन्तु**) (**भूमिम्**) (**शुनम्**) सुखम् (**कीनाशाः**) कृषीवलाः (**अभि**) (**यन्तु**) (**वाहैः**) वृषभादिभिः (**शुनम्**) (**पर्जन्यः**) मेघः (**मधुना**) मधुरादिगुणेन (**पयोभिः**) उदकैः (**शुनासीरा**) सुखदस्वामिभृत्यौ कृषीवलौ (**शुनम्**) (**अस्मासु**) (**धत्तम्**) धरतम्॥८॥

अन्वयः-यथा फाला वाहैर्नो भूमिं शुनं वि कृषन्तु कीनाशाः शुनमभि यन्तु पर्जन्यो मधुना पयोभिः शुनमभिवर्षतु तथा शुनासीरास्मासु शुनं धत्तम्॥८॥

भावार्थः-कृषीवला मनुष्या अत्युत्तमानि फालादीनि निर्माय हलादिना भूमिमुत्तमां निष्कृष्योत्तमं सुखं प्राप्नुवन्तु तथैवान्येभ्यो राजादिभ्यः सुखं प्रयच्छन्त्विति॥८॥

अत्र कृषिक्रियावर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तपञ्चाशत्तमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-जैसे (**फालाः**) लोहे से बनाई गई भूमि के खोदने के लिये वस्तुयें (**वाहैः**) बैल आदिकों के द्वारा (**नः**) हम लोगों के लिये (**भूमिम्**) भूमि को (**शुनम्**) सुखपूर्वक (**वि, कृषन्तु**) खोदें (**कीनाशाः**) कृषिकर्म्म करने वाले (**शुनम्**) सुख को (**अभि, यन्तु**) प्राप्त हों (**पर्जन्यः**) मेघ (**मधुना**) मधुर आदि गुण से (**पयोभिः**) और जलों से (**शुनम्**) सुख को वर्षावे, वैसे (**शुनासीरा**) अर्थात् सुख

देने वाले स्वामी और भृत्य कृषिकर्म करनेवाले तुम दोनों **(अस्मासु)** हम लोगों में **(शुनम्)** सुख को **(धत्तम्)** धारण करो॥८॥

भावार्थः-कृषिकर्म्म करनेवाले मनुष्यों को चाहिये कि उत्तम फाल आदि वस्तुओं को बनाय के हल आदि से भूमि को उत्तम करके अर्थात् गोड़ के उत्तम सुख को प्राप्त हों, वैसे ही अन्य राजा आदि के लिये सुख देवें॥८॥

इस सूक्त में कृषिकर्म्म के वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सत्तावनवां सूक्त और नवम वर्ग समाप्त हुआ॥

अथैकादशर्चस्याष्टपञ्चाशत्तमस्य सूक्तस्य वामदेव ऋषिः। अग्निः सूर्यो वाऽपो वा गावो वा घृतं वा देवताः। १ निचृत्त्रिष्टुप्। २, ८-१० त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ अनुष्टुप्। ६, ७ निचृदनुष्टुप् छन्दः। ११ स्वराट् त्रिष्टुप् छन्दः। गान्धारः स्वरः। ५ निचृदुष्णिक् छन्दः। ऋषभः स्वरः॥

अथोदकविषयमाह॥

अब ग्यारह ऋचावाले अट्ठावनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में उदकविषय को कहते हैं॥

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना समममृतत्वमानट्।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥ १॥

समुद्रात्। ऊर्मिः। मधुऽमान्। उत्। आरत्। उप। अंशुना। सम्। अमृतऽत्वम्। आनट्। घृतस्य। नाम। गुह्यम्। यत्। अस्ति। जिह्वा। देवानाम्। अमृतस्य। नाभिः॥ १॥

पदार्थः-(समुद्रात्) अन्तरिक्षात् **(ऊर्मिः)** जलसमूहः **(मधुमान्)** मधुरगुणः **(उत्) (आरत्)** उत्कृष्टतया प्राप्नोति **(उप) (अंशुना)** सूर्य्येण **(सम्) (अमृतत्वम्) (आनट्)** व्याप्नोति **(घृतस्य)** उदकस्य **(नाम) (गुह्यम्)** गुप्तम् **(यत्) (अस्ति) (जिह्वा) (देवानाम्)** विदुषां दिव्यानां गुणानां वा **(अमृतस्य)** अमृतात्मकस्य कारणस्य **(नाभिः)** नाभिरिव॥ १॥

अन्वयः-हे मनुष्या! योंऽशुना समुद्रान्मधुमानूर्मिरुपोदारदमृतत्वं समानट् यद् घृतस्य गुह्यं नामास्ति तदमृतस्य नाभिर्देवानां जिह्वेवास्ति तद्विद्यां यूयं विजानीत॥ १॥

भावार्थः-हे मनुष्या! भूमेः सकाशात् सूर्यप्रतापेन वायुद्वारा यावदुदकमन्तरिक्षं गच्छति तत्रेश्वरसृष्टिक्रमेण मधुरादिगुणयुक्तं भूत्वा वर्षित्वाऽमृतात्मकं भवतीति विजानीत॥ १॥

पदार्थः-हे मनुष्यो! जो **(अंशुना)** सूर्य से **(समुद्रात्)** अन्तरिक्ष से **(मधुमान्)** मधुरगुणयुक्त **(ऊर्मिः)** जल का समूह **(उप, उत्, आरत्)** उत्तमता से प्राप्त होता और **(अमृतत्वम्)** अमृतपन को **(सम्, आनट्)** व्याप्त होता है **(यत्)** जो **(घृतस्य)** जल की **(गुह्यम्)** गुप्त **(नाम)** संज्ञा **(अस्ति)** है, वह **(अमृतस्य)** अमृतात्मक कारण की **(नाभिः)** नाभि के सदृश और **(देवानाम्)** विद्वानों वा श्रेष्ठ गुणों की **(जिह्वा)** जिह्वा के सदृश है, उस विद्या को आप लोग जानो॥ १॥

भावार्थः-हे मनुष्यो! भूमि के समीप से सूर्य्य के प्रताप से वायु के द्वारा जितना जल आकाश में जाता है, वहाँ ईश्वर की सृष्टि के क्रम से मधुर आदि गुणों से युक्त होके और वह वर्ष के अमृतस्वरूप होता है, यह जानो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

व॒यं नाम॒ प्र ब्र॑वामा घृ॒तस्या॒स्मिन् य॒ज्ञे धा॑रयामा॒ नमो॑भिः।

उप॑ ब्र॒ह्मा शृ॑णवच्छ॒स्यमा॑नं॒ चतु॑ःशृङ्गोऽवमीद् गौ॒र ए॒तत्॥ २॥

व॒यम्। नाम॑। प्र। ब्र॒वा॒म॒। घृ॒तस्य॑। अ॒स्मिन्। य॒ज्ञे। धा॒र॒या॒म॒। नमः॑ऽभिः। उप॑। ब्र॒ह्मा। शृ॒ण॒व॒त्। श॒स्यमा॑नम्। चतु॑ःऽशृङ्गः। अ॒व॒मी॒त्। गौ॒रः। ए॒तत्॥ २॥

पदार्थः-(वयम्) (नाम) (प्र) (ब्रवाम) उपदिशेम। अत्र **संहितायामि**ति दीर्घः। **(घृतस्य)** उदकस्य **(अस्मिन्) (यज्ञे)** वर्षादिजलव्यवहारे **(धारयाम)** अत्र **संहितायामि**ति दीर्घः। **(नमोभिः)** अन्नादिभिः **(उप) (ब्रह्मा)** चतुर्वेदवित् **(शृणवत्)** शृणुयात् **(शस्यमानम्)** प्रशंसनीयम् **(चतुःशृङ्गः)** चत्वारो वेदाः शृङ्गाणीव यस्य **(अवमीत्)** उपदिशेत् **(गौरः)** यो गवि सुशिक्षितायां वाचि रमते सः **(एतत्)**॥ २॥

अन्वयः-चतुःशृङ्गो ब्रह्मा यं शस्यमानमुप शृणवद् गौरो यदवमीत्तदेतद् घृतस्य नाम वयं प्र ब्रवामास्मिन् यज्ञे नमोभिस्तं धारयाम॥ २॥

भावार्थः-हे मनुष्याश्चतुर्वेदविदाप्तो यादृशमुपदेशं कुर्य्याद् यं सिद्धान्तं निश्चिनुयात् तादृशमेव वयमप्युपदिशेम निश्चिनुयाम च॥ २॥

पदार्थः-(चतुःशृङ्गः) चारवेद शृङ्गों अर्थात् शिखरों के सदृश जिसके ऐसा **(ब्रह्मा)** चार वेदों का जानने वाला जिस **(शस्यमानम्)** प्रशंसा करने योग्य को **(उप, शृणवत्)** समीप में सुने और **(गौरः)** उत्तम प्रकार शिक्षित वाणी में रमने वाला जो **(अवमीत्)** उपदेश देवे सो **(एतत्)** इस **(घृतस्य)** जल की **(नाम)** संज्ञा को **(वयम्)** हम लोग **(प्र, ब्रवाम)** उपदेश देवें और **(अस्मिन्)** इस **(यज्ञे)** वर्षा आदि जलव्यवहार में **(नमोभिः)** अन्न आदि पदार्थों से उसको **(धारयाम)** धारण करावें॥ २॥

भावार्थः-हे मनुष्यो! चारवेद का जानने वाला यथार्थवक्ता जन जैसा उपदेश करे और जिस सिद्धान्त का निश्चय करे, वैसे सिद्धान्त का हम लोग भी उपदेश और निश्चय करें॥ २॥

अथेश्वरविज्ञानमाह॥

अब अगले मन्त्र में ईश्वर के विज्ञान को कहते हैं॥

च॒त्वारि॒ शृङ्गा॒ त्रयो॑ अस्य॒ पादा॒ द्वे शी॒र्षे स॒प्त हस्ता॑सो अस्य।

त्रि॒धा ब॒द्धो वृ॑ष॒भो रो॑रवीति म॒हो दे॒वो मर्त्याँ॒ आ वि॑वेश॥ ३॥

च॒त्वारि॑। शृङ्गा॑। त्रयः॑। अ॒स्य॒। पादाः॑। द्वे इति॑। शी॒र्षे इति॑। स॒प्त। हस्ता॑सः। अ॒स्य॒। त्रिधा॑। ब॒द्धः। वृ॒ष॒भः। रो॒र॒वी॒ति॒। म॒हः। दे॒वः। मर्त्या॑न्। आ। वि॒वे॒श॒॥ ३॥

पदार्थः-(चत्वारि) चत्वारो वेदाः **(शृङ्गा)** शृङ्गाणीव **(त्रयः)** कर्मोपासनाज्ञानानि **(अस्य)** धर्म्मव्यवहारस्य **(पादाः)** पत्तव्याः **(द्वे)** अभ्युदयनिःश्रेयसे **(शीर्षे)** शिरसी इव **(सप्त)** पञ्च ज्ञानेन्द्रियाणि

वा कर्म्मेन्द्रियाण्यन्त:करणमात्मा च (**हस्तास:**) हस्तवद्वर्त्तमाना: (**अस्य**) धर्मयुक्तस्य नित्यनैमित्तिकस्य (**त्रिधा**) श्रद्धापुरुषार्थयोगाभ्यासै: (**बद्ध:**) (**वृषभ:**) सुखानां वर्षणात् (**रोरवीति**) भृशमुपदिशति (**मह:**) महान् पूजनीय: (**देव:**) स्वप्रकाश: सर्वसुखप्रदाता (**मर्त्यान्**) मरणधर्मान् मनुष्यादीन् (**आ**) समन्तात् (**विवेश**) व्याप्नोति॥ ३॥

अन्वय:-हे मनुष्या! यो महो देवो मर्त्याना विवेश यो वृषभस्त्रिधा बद्धो रोरवीति अस्य परमात्मनो बोधस्य द्वे शीर्षे त्रय: पादाश्चत्वारि शृङ्गा च युष्माभिर्वेदितव्यान्यस्य च सप्त हस्तासस्त्रिधा बद्धो व्यवहारश्च वेदितव्य:॥ ३॥

भावार्थ:–हे मनुष्या! अस्मिन् परमेश्वरव्याप्ते जगति यज्ञस्य चत्वारो वेदा नामाख्यातोपसर्गनिपाता विश्वतैजसप्राज्ञतुरीयधर्मार्थकाममोक्षाश्चेत्यादीनि शृङ्गाणि, त्रीणि सवनानि त्रय: काला: कर्म्मोपासनाज्ञानानि मनोवाक्छरीराणि चेत्यादीनि पादा:, द्वौ व्यवहारपरमार्थौ नित्यकार्यौ शब्दात्मानावुदगयनप्रायणीया अध्यापकोपदेशकौ चेत्यादीनि शिरांसि, गायत्र्यादीनि सप्त छन्दांसि सप्त विभक्तय: सप्त प्राणा: पञ्च कर्मेन्द्रियाणि शरीरमात्मा चेत्यादयो हस्तास्त्रिषु मन्त्रब्राह्मणकल्पेषूरसि कण्ठे शिरसि श्रवणमननिदिध्यासनेषु ब्रह्मचर्य्यसुकर्मसुविचारेषु सिद्धोऽयं व्यवहारो महान् सत्कर्तव्यो मनुष्येषु प्रविष्टोऽस्तीति सर्वे विजानन्तु॥ ३॥

पदार्थ:–हे मनुष्यो! जो (**मह:**) बड़ा सेवा और आदर करने योग्य (**देव:**) स्वप्रकाशस्वरूप और सब को सुख देने वाला (**मर्त्यान्**) मरणधर्मवाले मनुष्य आदिकों को (**आ**) सब प्रकार से (**विवेश**) व्याप्त होता है (**वृषभ:**) और जो सुखों को वर्षाने वाला (**त्रिधा**) तीन श्रद्धा, पुरुषार्थ और योगाभ्यास से (**बद्ध:**) बँधा हुआ (**रोरवीति**) निरन्तर उपदेश देता है (**अस्य**) इस धर्म से युक्त नित्य और नैमित्तिक परमात्मा के बोध के (**द्वे**) दो उन्नति और मोक्षरूप (**शीर्षे**) शिरस्थानापन्न (**त्रय:**) तीन अर्थात् कर्म, उपासना और ज्ञानरूप (**पादा:**) चलने योग्य पैर (**चत्वारि**) और चार वेद (**शृङ्गा**) शृङ्गों के सदृश आप लोगों को जानने योग्य हैं और (**अस्य**) इस धर्म व्यवहार के (**सप्त**) पांच ज्ञानेन्द्रिय वा पांच कर्मेन्द्रिय अन्त:करण और आत्मा ये सात (**हस्तास:**) हाथों के सदृश वर्त्तमान हैं और उक्त तीन प्रकार से बँधा हुआ व्यवहार भी जानने योग्य है॥ ३॥

भावार्थ:–हे मनुष्यो! इस परमेश्वर से व्याप्त संसार में यज्ञ के चार वेद और नाम, आख्यात, उपसर्ग और निपात; विश्व, तैजस, प्राज्ञ, तुरीय और धर्म, अर्थ, काम और मोक्ष आदि शृङ्ग हैं। तीन सवन अर्थात् त्रैकालिक यज्ञकर्म; तीन काल; कर्म, उपासना, ज्ञान; मन, वाणी, शरीर इत्यादि पाद हैं। दो व्यवहार और परमार्थ; नित्य, कार्य्य; शब्दस्वरूप उदगयन और प्रायणीय; अध्यापक और उपदेशक इत्यादि शिर हैं। गायत्री आदि सात छन्द सात विभक्तियाँ, सात प्राण, पांच कर्म्मेन्द्रिय शरीर और आत्मा इत्यादि [सात] हस्त हैं। तीन मन्त्र, ब्राह्मण, कल्प; और हृदय, कण्ठ, शिर में; श्रवण, मनन, निदिध्यासनों

में; ब्रह्मचर्य्य, श्रेष्ठ कर्म, उत्तम विचारों के बीच सिद्ध यह व्यवहार महान् सत्कर्त्तव्य और मनुष्यों के बीच प्रविष्ट है, यह सब जानें॥३॥

अथ सूर्यदृष्टान्तेन विद्वद्विषयमाह॥

अब सूर्यदृष्टान्त से विद्वद्विषय को कहते हैं॥

त्रिधा॑ हि॒तं प॒णिभि॑र्गु॒ह्यमा॑नं॒ गवि॑ दे॒वासो॑ घृ॒तमन्व॑विन्दन्।
इन्द्र॒ एकं॒ सूर्य॒ एकं॑ जजान वे॒नादेकं॑ स्व॒धया॒ निष्ट॑तक्षुः॥४॥

त्रिधा॑। हि॒तम्। प॒णिऽभि॑:। गु॒ह्यमा॑नम्। गवि॑। दे॒वास॑:। घृ॒तम्। अनु॑। अ॒वि॒न्द॒न्। इन्द्र॑:। एक॑म्। सूर्य॑:। एक॑म्। ज॒जा॒न॒। वे॒नात्। एक॑म्। स्व॒धया॑। नि:। त॒त॒क्षु॒:॥४॥

पदार्थ:-(त्रिधा) त्रिभि: प्रकारै: **(हितम्)** स्थितम् **(पणिभि:)** प्रशंसितैर्व्यवहर्त्तृभि: **(गुह्यमानम्)** गोप्यमानम् **(गवि)** वाचि **(देवास:)** विद्वांस: **(घृतम्)** घृतमिवानन्दप्रदं विज्ञानम् **(अनु) (अविन्दन्)** लभन्ते **(इन्द्र:)** विद्युत् **(एकम्) (सूर्य:)** सविता **(एकम्)** नि:श्रेयसम् **(जजान)** जनयति **(वेनात्)** कमनीयात् परमात्मन: सकाशात् **(एकम्)** अव्यक्तम् **(स्वधया)** स्वकीयया धृतया प्रज्ञया **(नि:)** नितराम् **(ततक्षु:)** विस्तृण्वन्ति॥४॥

अन्वय:-हे मनुष्या! यथा देवास: पणिभि: सह गवि गुह्यमानं त्रिधा हितं घृतमिवान्वविन्दन् स्वधया निष्टतक्षुर्यथेन्द्रो वेनादेकं सूर्यश्चैकं जजान तथा यूयमप्येकमनुतिष्ठत॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यथा प्रशंसितैर्व्यवहारै: सह वर्त्तमाना विद्वांस: सुशिक्षितां वाचं प्रज्ञां च लब्ध्वा विद्युदादिविद्यां प्राप्य परमेश्वरं बुद्ध्वा तदाज्ञामनुसृत्य सुखं वितन्वन्ति तथैव सर्वे समाचरन्तु॥४॥

पदार्थ:-हे मनुष्यो! जैसे **(देवास:)** विद्वान् जन **(पणिभि:)** प्रशंसित व्यवहार करने वालों के साथ **(गवि)** वाणी में **(गुह्यमानम्)** गुप्त कराया जाता **(त्रिधा)** तीन प्रकारों से **(हितम्)** स्थित और **(घृतम्)** घृत के सदृश आनन्द देने वाले विज्ञान को **(अनु, अविन्दन्)** अनुकूल प्राप्त होते और **(स्वधया)** अपनी धारण की हुई बुद्धि से **(नि:, ततक्षु:)** निरन्तर विस्तार करते हैं। और जैसे **(इन्द्र:)** बिजुली **(वेनात्)** सुन्दर परमात्मा के समीप से **(एकम्)** अव्यक्त अर्थात् प्रकृति को और **(सूर्य:)** सूर्य **(एकम्)** एक को **(जजान)** उत्पन्न करता है, वैसे आप लोग भी **(एकम्)** निरन्तर सुख अर्थात् मोक्ष को सिद्ध करो॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे श्रेष्ठ व्यवहारों के साथ वर्त्तमान विद्वान् जन, उत्तम प्रकार शिक्षित वाणी और बुद्धि को तथा बिजुली आदि की विद्या को प्राप्त हो परमेश्वर को जान और उसकी आज्ञा पालन करके सुख का विस्तार करते हैं, वैसे ही सब लोग अच्छा आचरण करें॥४॥

अथ मेघविषयमाह॥

अब मेघविषय को अगले मन्त्र में कहते हैं॥

एता अर्षन्ति हृद्यात् समुद्राच्छतव्रजा रिपुणा नावचक्षे।

घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम्॥५॥१०॥

एताः। अर्षन्ति। हृद्यात्। समुद्रात्। शतऽव्रजाः। रिपुणा। न। अवऽचक्षे। घृतस्य। धाराः। अभि। चाकशीमि। हिरण्ययः। वेतसः। मध्ये। आसाम्॥५॥

पदार्थः-(एताः) (अर्षन्ति) प्राप्नुवन्ति **(हृद्यात्)** हृदयस्य प्रियात् **(समुद्रात्)** अन्तरिक्षात् **(शतव्रजाः)** अपरिमितगतयः **(रिपुणा)** शत्रुणा **(न) (अवचक्षे)** प्रख्यातम् **(घृतस्य)** उदकस्य **(धाराः) (अभि, चाकशीमि)** प्रकाशयामि **(हिरण्ययः)** तेजोमयः सुवर्णमयो वा **(वेतसः)** कमनीयः **(मध्ये) (आसाम्)** धाराणाम्॥५॥

अन्वयः-हे मनुष्या! यथाऽऽसां मध्ये हिरण्ययो वेतसोऽहं या घृतस्यैताः शतव्रजा धारा हृद्यात् समुद्रादर्षन्ति ता अवचक्षेऽभि चाकशामि रिपुणा सह न वसामि तथा यूयं विजानीत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथाऽऽकाशात् पतिता वर्षा सर्वं जगत् पालयन्ति तथैव युष्मन्निसृता विज्ञानस्य वाचः सर्वं जगद्रक्षन्ति॥५॥

पदार्थः-हे मनुष्यो! जैसे **(आसाम्)** इन धाराओं के **(मध्ये)** मध्य में **(हिरण्ययः)** तेजःस्वरूप वा सुवर्णस्वरूप **(वेतसः)** सुन्दर मैं जो **(घृतस्य)** जल की **(एताः)** ये **(शतव्रजाः)** अपरिमित **[**गति**]** वाली **(धाराः)** धारायें **(हृद्यात्)** हृदय के प्रिय **(समुद्रात्)** अन्तरिक्ष से **(अर्षन्ति)** प्राप्त होती हैं, उनको **(अवचक्षे)** कहने को **(अभि, चाकशीमि)** प्रकाश करता हूँ और **(रिपुणा)** शत्रु के साथ **(न)** नहीं वसता हूँ, वैसे आप लोग जानो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे आकाश से गिरी हुई वर्षा सब जगत् का पालन करती हैं, वैसे ही आप लोगों से निकली हुई विज्ञान की वाणियाँ सब जगत् की रक्षा करती हैं॥५॥

पुनरुदकविषयमाह॥

फिर उदकविषय को अगले मन्त्र में कहते हैं॥

सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः।

एते अर्षन्त्यूर्मयो घृतस्य मृगाइव क्षिपणोरीषमाणाः॥६॥

सम्यक्। स्रवन्ति। सरितः। न। धेनाः। अन्तः। हृदा। मनसा। पूयमानाः। एते। अर्षन्ति। ऊर्मयः। घृतस्य। मृगाःऽइव। क्षिपणोः। ईषमाणाः॥६॥

पदार्थः-(सम्यक्) (स्रवन्ति) चलन्ति **(सरितः)** नद्यः **(न)** इव **(धेनाः)** विद्यायुक्ता वाचः **(अन्तः, हृदा)** अन्तःस्थितेनात्मना **(मनसा)** शुद्धेनान्तःकरणेन **(पूयमानाः)** पवित्रतां कुर्वाणाः **(एते) (अर्षन्ति)** गच्छन्ति **(ऊर्मयः)** तरङ्गाः **(घृतस्य)** उदकस्य **(मृगाइव) (क्षिपणोः)** प्रेषकात् **(ईषमाणाः)** गच्छन्तः॥६॥

अन्वयः-येषां विदुषामन्तर्हृदा मनसा पूयमाना धेनाः सरितो न सम्यक् स्रवन्ति त एते घृतस्योर्मयः क्षिपणोर्मृगाइवेषमाणाः सर्वां कीर्त्तिमर्षन्ति॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये सत्यं वदन्ति त एव पवित्रात्मानो भूत्वा जलवच्छान्ताः सन्तो मृगा इव सद्य इष्टं सुखं प्राप्नुवन्ति॥६॥

पदार्थः-जिन विद्वानों के **(अन्तः, हृदा)** अन्तर्विराजमान आत्मा और **(मनसा)** शुद्ध अन्तःकरण से **(पूयमानाः)** पवित्रता करती हुई **(धेनाः)** विद्यायुक्त वाणियाँ **(सरितः)** नदियों के **(न)** सदृश **(सम्यक्)** उत्तम प्रकार **(स्रवन्ति)** चलती हैं सो **(एते)** ये विद्वान् **(घृतस्य)** जल की **(ऊर्मयः)** लहरियों और **(क्षिपणोः)** प्रेरणा देने वाले से **(मृगाइव)** हरिणों के सदृश **(ईषमाणः)** चलते हुए सब कीर्ति को **(अर्षन्ति)** प्राप्त होते हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सत्य कहते हैं वे ही पवित्रात्मा होके जल के सदृश शान्त होते हुए मृगों के सदृश शीघ्र ही अपेक्षित सुख को प्राप्त होते हैं॥६॥

अथ जलदृष्टान्तेन वाग्विषयमाह॥

अब जलदृष्टान्त से वाणीविषय को अगले मन्त्र में कहते हैं॥

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः।

घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः॥७॥

सिन्धोःऽइव। प्रऽअध्वने। शूघनासः। वातऽप्रमियः। पतयन्ति। यह्वाः। घृतस्य। धाराः। अरुषः। न। वाजी। काष्ठाः। भिन्दन्। ऊर्मिभिः। पिन्वमानः॥७॥

पदार्थः-(सिन्धोरिव) नद्या इव **(प्राध्वने)** प्रकृष्टतया गन्तव्याय मार्गाय **(शूघनासः)** आशुगन्त्र्यः **(वातप्रमियः)** या वातं वायुं प्रमिन्वन्ति ताः **(पतयन्ति)** पतिरिवाचरन्ति **(यह्वाः)** महत्यः **(घृतस्य)** जलस्य **(धाराः) (अरुषः)** अरुणरूपः **(न)** इव **(वाजी)** अश्वः **(काष्ठाः)** दिश इव तटीः **(भिन्दन्)** विदृणन्ति **(ऊर्मिभिः)** तरङ्गैः **(पिन्वमानः)** प्रसादयन्॥७॥

अन्वयः-हे मनुष्याः! पिन्वमानोऽहं यथा शूघनासो यह्वा वातप्रमियः प्राध्वने सिन्धोरिव पतयन्त्यरुषो वाजी न घृतस्य धारा ऊर्मिभिः काष्ठा भिन्दँस्तथोपदेशान् वर्षयित्वाऽविद्यां भिनद्मि॥७॥

भावार्थः-अत्रोपमालङ्कारः। येषां विदुषां नदीप्रवाहा इव सदुपदेशाश्चलन्ति अश्व इव दुःखान्तं गमयन्ति ते एव महान्तः सन्तः सन्ति॥७॥

पदार्थः-हे मनुष्यो! **(पिन्वमानः)** प्रसन्न करता हुआ मैं जैसे **(शूघनाशः)** शीघ्रगामिनी **(यह्वाः)** बड़ी **(वातप्रमियः)** वायु को मापने वाली और **(प्राध्वने)** उत्तम प्रकार से चलने योग्य मार्ग के लिये **(सिन्धोरिव)** नदियों के अर्थात् नदियों की तरङ्गों के समान **(पतयन्ति)** पति के सदृश आचरण करती हैं तथा **(अरुषः)** लाल रूप वाले **(वाजी)** घोड़ों के **(न)** सदृश **(घृतस्य)** जल की **(धाराः)** धारा **(ऊर्म्मिभिः)** तरङ्गों से **(काष्ठाः)** दिशाओं के समान तटों को **(भिन्दन्)** विदीर्ण करती हैं, वैसे उपदेशों की वृष्टि करके अविद्याओं का नाश करता हूँ॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिन विद्वानों के नदियों के प्रवाह सदृश उत्तम उपदेश प्रचरित होते और घोड़ों के समान दुःखों के पार कराते हैं, वे ही बड़े श्रेष्ठ पुरुष हैं॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम्।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः॥८॥

अभि। प्रवन्त। समनाऽइव। योषाः। कल्याण्यः। स्मयमानासः। अग्निम्। घृतस्य। धाराः। सम्ऽइधः। नसन्त। ताः। जुषाणः। हर्यति। जातऽवेदाः॥८॥

पदार्थः-(अभि) (प्रवन्त) गच्छन्तु **(समनेव)** समानमनस्का पतिव्रतेव **(योषाः)** स्त्रियः **(कल्याण्यः)** कल्याणकारिण्यः **(स्मयमानासः)** किञ्चिद्धसन्त्यो मितहासाः **(अग्निम्)** पावकम् **(घृतस्य)** आज्यस्य **(धाराः)** **(समिधः)** काष्ठानि **(नसन्त)** प्राप्नुवन्ति **(ता)** **(जुषाणः)** प्रीतः सन् **(हर्यति)** कामयते **(जातवेदाः)** जातविज्ञानः॥८॥

अन्वयः-हे मनुष्या! यथा घृतस्य धाराः समिधश्चाग्निं नसन्त तथा कल्याण्यः स्मयमानासो योषाः समनेवाभीष्टान् पत्नीनभि प्रवन्त यथा ताः सुखं लभन्ते तथा विद्याधर्म्मौ जुषाणो जातवेदाः सर्वं प्रियं हर्यति॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथाग्नीन्धनसंयोगेन प्रकाशो जायते तथोत्तमाऽध्यापकाऽध्येतृसम्बन्धेन विद्याप्रकाशो भवति। यथा स्वयंवरौ स्त्रीपुरुषौ परस्परस्य सुखं कामयेते तथैवोत्पन्नविद्यायोगिनः सर्वस्य सुखं भावयन्ति॥८॥

पदार्थः-हे मनुष्यो! जैसे **(घृतस्य)** घृत की **(धाराः)** धारा और **(समिधः)** काष्ठ **(अग्निम्)** अग्नि को **(नसन्त)** प्राप्त होते हैं, वैसे **(कल्याण्यः)** कल्याण करने वाली **(स्मयमानासः)** कुछ हंसती हुई प्रमाणयुक्त हंसने वाली **(योषाः)** स्त्रियाँ **(समनेव)** तुल्य मन वाली पतिव्रता स्त्री के सदृश अभीष्ट

पतियों को **(अभि, प्रवन्त)** सम्मुख प्राप्त हों और जैसे **(ताः)** वे सुख को प्राप्त होती हैं, वैसे विद्या और धर्म का **(जुषाणः)** सेवन करता हुआ **(जातवेदाः)** विज्ञान से युक्त विद्वान् सब के प्रिय की **(हर्यति)** कामना करता है॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोमालङ्कार हैं। जैसे अग्नि और इन्धन के संयोग से प्रकाश होता है, वैसे उत्तम अध्यापक और पढ़ने वाले के सम्बन्ध से विद्या का प्रकाश होता है। और जैसे स्वयंवर जिन्होंने किया ऐसे स्त्री-पुरुष परस्पर के सुख की कामना करते हैं, वैसे ही उत्पन्न हुई विद्या जिनको ऐसे योगी जन सब का सुख उत्पन्न कराते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कन्याइव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि।

यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते॥९॥

कन्याःऽइव। वहतुम्। एतवै। ऊम् इति। अञ्जि। अञ्जानाः। अभि। चाकशीमि। यत्र। सोमः। सूयते। यत्र। यज्ञः। घृतस्य। धाराः। अभि। तत्। पवन्ते॥९॥

पदार्थः-(कन्याइव) यथा कुमार्य्यः **(वहतुम्)** वोढारम् **(एतवै)** प्राप्तुम् **(उ) (अञ्जि)** व्यक्तं सुलक्षणम् **(अञ्जानाः)** प्रकटयन्त्यः **(अभि) (चाकशीमि)** प्रकाशयामि **(यत्र) (सोमः)** ऐश्वर्यमोषधिगणो वा **(सूयते)** निष्पद्यते **(यत्र) (यज्ञः)** अनुष्ठातुमर्हो व्यवहारः **(घृतस्य)** प्रकाशस्य **(धाराः)** वाचः **(अभि) (तत्)** कर्म **(पवन्ते)** शोधयन्ति॥९॥

अन्वयः-या वहतुमेतवै कन्याइवाञ्ज्यञ्जाना घृतस्य धारा उ यत्र सोमो यत्र यज्ञः सूयते तत्कर्माभि पवन्ते ता अहमभि चाकशीमि॥९॥

भावार्थः-अत्रोपमालङ्कारः। यथा स्वयंवरा कन्या स्वसदृशं पतिं प्राप्तुमहर्निशं परीक्षयति पुरुषश्च तथाऽध्यापकोपदेशकौ परीक्षकौ स्याताम्, येन कर्म्मणैश्वर्य्यं क्रिया शुद्धिश्च जायते तदेव वचनं भाषितुं योग्यमस्ति॥९॥

पदार्थः-जो **(वहतुम्)** धारण करने वाले को **(एतवै)** प्राप्त होने की **(कन्याइव)** जैसे कुमारी वैसे **(अञ्जि)** व्यक्त उत्तम लक्षण को **(अञ्जानाः)** प्रकट करती हुई **(घृतस्य)** प्रकाशसम्बन्धिनी **(धाराः)** वाणियाँ **(उ)** और **(यत्र)** जहाँ **(सोमः)** ऐश्वर्य्य वा ओषधियों का समूह और **(यत्र)** जहाँ **(यज्ञः)** करने योग्य व्यवहार **(सूयते)** उत्पन्न होता है **(तत्)** उस कर्म्म को **(अभि, पवन्ते)** पवित्र कराती हैं, उनको मैं **(अभि, चाकशीमि)** प्रकाशित करता हूँ॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे स्वयंवर करने वाली कन्या अपने सदृश पति को प्राप्त होने की दिन-रात्रि परीक्षा करती है और ऐसे ही पुरुष परीक्षा करता है, वैसे अध्यापक और

उपदेशक परीक्षक होवें और जिस कर्म्म से ऐश्वर्य्य और क्रिया की शुद्धि होवे, वही वचन कहने योग्य है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒भ्यर्॑षत सुष्टु॒तिं गव्य॑मा॒जिम॒स्मासु॑ भ॒द्रा द्र॒विं॑णानि धत्त।

इ॒मं य॒ज्ञं न॑यत दे॒वता॑ नो घृ॒तस्य॒ धारा॒ मधु॑मत्पवन्ते॥ १०॥

अ॒भि। अ॒र्ष॒त॒। सु॒ऽस्तु॒तिम्। गव्य॑म्। आ॒जिम्। अ॒स्मासु॑। भ॒द्रा। द्र॒विं॑णानि। ध॒त्त॒। इ॒मम्। य॒ज्ञम्। न॒य॒त॒। दे॒वता॑। नः॒। घृ॒तस्य॑। धाराः॑। मधु॑ऽमत्। प॒व॒न्ते॒॥ १०॥

पदार्थः-(अभि) (अर्षत) प्राप्नुत **(सुष्टुतिम्)** शोभनां प्रशंसाम् **(गव्यम्)** गवे वाचे हितं व्यवहारम् **(आजिम्)** प्रसिद्धम् **(अस्मासु) (भद्रा)** भजनीयसुखप्रदानि **(द्रविणानि)** धनानि यशांसि वा **(धत्त) (इमम्) (यज्ञम्) (नयत)** प्रापयत **(देवता)** देव एव देवता विद्वानेव। **देवात्तल्** इति स्वार्थे तल् जातावेकवचनं च। **(नः)** अस्मान् **(घृतस्य)** प्रकाशितस्य बोधस्य **(धाराः)** प्रकाशिका वाचः **(मधुमत्)** प्रशस्तविज्ञानयुक्तं कर्म्म **(पवन्ते)** शोधयन्ति॥१०॥

अन्वयः-हे विद्वांसो! यूयमस्मास्वाजिं गव्यं भद्रा द्रविणानि च धत्त देवता यूयमिमं यज्ञं नो नयत यथा घृतस्य धारा मधुमत्पवन्ते तथाऽस्मान् पवित्रान् कृत्वा सुष्टुतिमभ्यर्षत॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। तेषामेव विदुषां प्रशंसा जायते ये सर्वेषु मनुष्येषूपदेशेनोत्तमान् गुणान् दधति॥१०॥

पदार्थः-हे विद्वानो! आप लोग **(अस्मासु)** हम लोगों में **(आजिम्)** प्रसिद्ध **(गव्यम्)** वाणी के लिये हितकारक व्यवहार को और **(भद्रा)** सेवने योग्य अपेक्षित सुख देने वाले **(द्रविणानि)** धनों वा यशों को **(धत्त)** धारण करो **(देवता)** विद्वान् जन आप लोग **(इमम्)** इस **(यज्ञम्)** यज्ञ को **(नः)** हम लोगों के लिये **(नयत)** प्राप्त कराओ और जैसे **(घृतस्य)** प्रकाशित बोध के **(धाराः)** प्रकाश करने वाली वाणियाँ **(मधुमत्)** श्रेष्ठविज्ञान से युक्त कर्म्म को **(पवन्ते)** शुद्ध करती हैं, वैसे हम लोगों को पवित्र करके **(सुष्टुतिम्)** उत्तम प्रशंसा को **(अभि, अर्षत)** प्राप्त हूजिये॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। उन्हीं विद्वानों की प्रशंसा होती है, जो सब मनुष्यों में उपदेश द्वारा उत्तम गुणों को धारण करते हैं॥१०॥

पुनरीश्वरविषयमाह॥

फिर ईश्वर के विषय को अगले मन्त्र में कहते हैं॥

धाम॑न् ते॒ विश्वं॑ भुव॒नम॑धि॒ श्रित॒मन्तः॑ स॒मु॒द्रे हृ॒द्य॑१॑न्तरायु॑षि।

अ॒पामनी॑के समि॒थे य आभृ॑तस्तमश्याम॒ मधु॑मन्तं त ऊ॒र्मिम्॥ ११॥ ११॥ ५॥ ४॥

धाम॑न्। ते॒। विश्व॑म्। भुव॑नम्। अधि॑। श्रि॒तम्। अ॒न्तरि॑ति। स॒मु॒द्रे। हृ॒दि। अ॒न्तः। आयु॑षि। अ॒पाम्। अनी॑के। स॒म्ऽइ॒त्थे। यः। आऽभृ॑तः। तम्। अ॒श्या॒म॒। मधु॑ऽमन्तम्। ते॒। ऊ॒र्मिम्॥ ११॥

पदार्थः-(धामन्) आधारे **(ते)** तव **(विश्वम्)** सर्वम् **(भुवनम्)** जगत् **(अधि)** उपरि **(श्रितम्)** स्थितम् **(अन्तः)** **(समुद्रे)** अन्तरिक्षे **(हृदि)** हृदये **(अन्तः)** मध्ये **(आयुषि)** जीवननिमित्ते प्राणे **(अपाम्)** प्राणानाम् **(अभीके)** सैन्ये **(समिथे)** सङ्ग्रामे **(यः)** **(आभृतः)** समन्ताद् धृतः **(तम्)** **(अश्याम)** प्राप्नुयाम **(मधुमन्तम्)** माधुर्य्यगुणोपेतम् **(ते)** तव **(ऊर्मिम्)** रक्षणादिकम्॥ ११॥

अन्वयः-हे भगवन्! यस्य ते धामन्नन्तः समुद्रे हृद्यन्तरायुष्यपामनीके समिथे विश्वं भुवनमधि श्रितं यस्ते विद्वद्भिराभृतस्तं मधुमन्तमूर्मिमानन्दं वयमश्याम तदुपासनां सततं कुर्य्याम॥ ११॥

भावार्थः-हे मनुष्या! यो जगदीश्वरो जगदभिव्याप्य सर्वं धृत्वा संरक्ष्यान्तर्यामिरूपेण सर्वत्र व्याप्तोऽस्ति यस्य कृपया विज्ञानं चिरजीवनं विजयश्च प्राप्यते तमेव सततं भजतेति॥ ११॥

अत्रोदकमेघसूर्यवाग्विद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिरस्तीति वेदितव्यम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्य्यभाषाभ्यां विभूषित ऋग्वेदभाष्ये चतुर्थमण्डले पञ्चमोऽनुवाकोऽष्टपञ्चाशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे भगवन्! जिस **(ते)** आपके **(धामन्)** आधाररूप **(अन्तः)** मध्य **(समुद्रे)** अन्तरिक्ष और **(हृदि)** हृदय के **(अन्तः)** मध्य में **(आयुषि)** जीवन के निमित्त प्राण में **(अपाम्)** प्राणों की **(अभीके)** सेना में और **(समिथे)** संग्राम में **(विश्वम्)** सम्पूर्ण **(भुवनम्)** जगत् **(अधि)** ऊपर **(श्रितम्)** स्थित है तथा **(यः)** जो **(ते)** आप का विद्वानों से **(आभृतः)** सब प्रकार धारण किया गया **(तम्)** उस **(मधुमन्तम्)** माधुर्य्यगुण से युक्त **(ऊर्मिम्)** रक्षा आदि व्यवहार और आनन्द को हम लोग **(अश्याम)** प्राप्त होवें, उस आपकी उपासना को निरन्तर करें॥ ११॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर जगत् को अभिव्याप्त होके सब को धारण कर और उत्तम प्रकार रक्षा करके अन्तर्य्यामिरूप से सर्वत्र व्याप्त है और जिसकी कृपा से विज्ञान, बहुत कालपर्य्यन्त जीवन और विजय प्राप्त होता है, उसी की निरन्तर सेवा करो॥ ११॥

इस सूक्त में जल, मेघ, सूर्य्य, वाणी, विद्वान् और ईश्वर के गुणवर्णन करने से इस सूक्त के अर्थ की पिछले सूक्तार्थ के साथ सङ्गति है, यह जानना चाहिये॥

यह श्रीमान् परमहंसपरिव्राजकाचार्य्य परम विद्वान् श्रीमद् विरजानन्द सरस्वती स्वामी जी के शिष्य श्रीमान् दयानन्द सरस्वती स्वामी जी के बनाये हुए, संस्कृत और आर्य्यभाषा से सुशोभित, ऋग्वेदभाष्य के चतुर्थ मण्डल में पञ्चम अनुवाक, अट्ठावनवाँ सूक्त और ग्यारहवाँ वर्ग समाप्त हुआ॥

इति चतुर्थं मण्डलम्॥

॥ओ३म्॥

अथ पञ्चमं मण्डलम्॥

विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ द्वादशर्चस्य प्रथमस्य सूक्तस्य बुधगविष्ठिरावात्रेयावृषी। अग्निर्देवता। १, ३, ४, ६, ११, १२ निचृत्त्रिष्टुप्। २, ७, १० त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक्पङ्क्तिः। ८ स्वराट्पङ्क्तिः। ९ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथोपदेश्योपदेशकगुणानाह॥

अब बारह ऋचा वाले प्रथम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में उपदेश देने योग्य और उपदेश देने वाले के गुणों को कहते हैं॥

अबो॑ध्य॒ग्निः स॒मिधा॒ जना॑नां॒ प्रति॑ धे॒नुमि॑वाय॒तीमु॒षास॑म्।
य॒ह्वाइ॑व॒ प्र व॒यामु॒ज्जिहा॑नाः॒ प्र भा॒नव॑ः सिस्रते॒ नाक॒मच्छ॑॥ १॥

अबो॑धि। अ॒ग्निः। स॒म्ऽइधा॑। जना॑नाम्। प्रति॑। धे॒नुम्ऽइ॑व। आ॒ऽय॒तीम्। उ॒षास॑म्। य॒ह्वाःऽइ॑व। प्र। व॒याम्। उ॒त्ऽजिहा॑नाः। प्र। भा॒नव॑ः। सि॒स्र॒ते॒। नाक॑म्। अच्छ॑॥ १॥

पदार्थः-(अबोधि) बुध्यते **(अग्निः)** पावकः **(समिधा)** इन्धनैर्घृतादिना **(जनानाम्)** मनुष्याणाम् **(प्रति) (धेनुमिव)** दुग्धप्रदां गामिव **(आयतीम्)** आगच्छन्तीम् **(उषासम्)** उषसम्। अत्रा**न्येषामपी**ति दीर्घः। **(यह्वाइव)** महान्तो वृक्षा इव **(प्र) (वयाम्)** शाखाम् **(उज्जिहानाः)** त्यजन्तः **(प्र) (भानवः)** दीप्तयः **(सिस्रते)** सरन्ति गच्छन्ति **(नाकम्)** अविद्यमानदुःखमन्तरिक्षम् **(अच्छ)** सम्यक्॥ १॥

अन्वयः-हे विद्वन्! यथा समिधाग्निरबोधि भानवो जनानामायतीं धेनुमिवोषासं प्रति प्र सिस्रते वयां प्रोज्जिहाना यह्वा इव नाकमच्छ सिस्रते तथा त्वं भव॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। येऽग्न्यादिविद्यां गृहीत्वा कार्य्येषु प्रयुञ्जते दुःखविरहाः सन्तो वृक्षा इव वर्द्धन्ते॥ १॥

पदार्थः-हे विद्वन्! जैसे **(समिधा)** ईन्धन और घृत आदि से **(अग्निः)** अग्नि **(अबोधि)** जाना जाता अर्थात् प्रज्वलित किया जाता है **(भानवः)** कान्तियें **(जनानाम्)** मनुष्यों की **(आयतीम्)** आती हुई **(धेनुमिव)** दुग्ध देने वाली गौ के तुल्य **(उषासम्)** प्रातर्वेला के **(प्रति) (प्र, सिस्रते)** प्राप्त होती और **(वयाम्)** शाखा को **(प्र, उज्जिहानाः)** अच्छे प्रकार त्यागते हुए **(यह्वा इव)** बड़े वृक्षों के सदृश **(नाकम्)** दुःख से रहित अन्तरिक्ष को **(अच्छ)** उत्तम प्रकार प्राप्त होती है, वैसे आप हूजिये॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार है। जो अग्न्यादि पदार्थों की विद्या को ग्रहण कर कार्य्यों में अच्छे प्रकार युक्त करते हैं, वे दुःख रहित हुए वृक्षों के समान बढ़ते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्।
समिद्धस्य रुशददर्शि पाजो महान् देवस्तमसो निरमोचि॥२॥

अबोधि। होता। यजथाय। देवान्। ऊर्ध्वः। अग्निः। सुऽमनाः। प्रातः। अस्थात्। सम्ऽइद्धस्य। रुशत्। अदर्शि। पाजः। महान्। देवः। तमसः। निः। अमोचि॥२॥

पदार्थः-(**अबोधि**) बुध्यते (**होता**) हवनकर्त्ता (**यजथाय**) यजनाय (**देवान्**) विदुषो दिव्यान् गुणान् वा (**ऊर्ध्वः**) ऊर्ध्वगामी (**अग्निः**) पावक इव (**सुमनाः**) शुद्धमनाः (**प्रातः**) (**अस्थात्**) तिष्ठति (**समिद्धस्य**) प्रदीप्तस्य (**रुशत्**) रूपम् (**अदर्शि**) दृश्यते (**पाजः**) बलम् (**महान्**) (**देवः**) देदीप्यमानः सूर्यः (**तमसः**) अन्धकरात् (**निः**) नितराम् (**अमोचि**) मुच्यते॥२॥

अन्वयः-हे मनुष्या! यः सुमना होता यजथायोर्ध्वोऽग्निरिव देवानबोधि प्रातरस्थात् स समिद्धस्य रुशदिवादर्शि महान् देवः पाजः तमसो निरमोचि तं यूयं सेवध्वम्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या उत्तमाचरणेनाग्निवदूर्ध्वगामिनो भवन्ति तेऽविद्यातो निवृत्य यशस्विनो जायन्ते॥२॥

पदार्थः-हे मनुष्यो! जो (**सुमनाः**) शुद्ध मन वाला (**होता**) हवनकर्त्ता पुरुष (**यजथाय**) यज्ञ करने के लिये (**ऊर्ध्वः**) ऊपर को चलने वाले (**अग्निः**) अग्नि के सदृश (**देवान्**) विद्वानों वा श्रेष्ठ गुणों को (**अबोधि**) जानता और (**प्रातः**) प्रातःकाल में (**अस्थात्**) स्थित होता है, वह (**समिद्धस्य**) प्रदीप्त अग्नि के (**रुशत्**) रूप के समान (**अदर्शि**) देखा जाता है और जो (**महान्**) बड़ा (**देवः**) प्रकाशमान सूर्य (**पाजः**) बल को प्राप्त होकर (**तमसः**) अन्धकार से (**निः**) (**अमोचि**) अत्यन्त छुटाया जाता है, उसकी आप लोग सेवा करो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य उत्तम आचरण से अग्नि सदृश ऊपर को जाने वाले होते हैं, वे अविद्या से निवृत्त होकर यशस्वी होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः।
आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः॥३॥

यत्। ईम्। गणस्य। रशनाम्। अजीगरिति। शुचिः। अड्क्ते। शुचिऽभिः। गोभिः। अग्निः। आत्। दक्षिणा। युज्यते। वाजऽयन्ती। उत्तानाम्। ऊर्ध्वः। अधयत्। जुहूभिः॥ ३॥

पदार्थः-(यत्) यः **(ईम्)** प्राप्तम् **(गणस्य)** समूहस्य **(रशनाम्)** रज्जुम् **(अजीगः)** भृशं गिरति **(शुचिः)** पवित्रः सन् **(अड्क्ते)** प्रसिद्धो भवति **(शुचिभिः)** पवित्रैः **(गोभिः)** किरणैः **(अग्निः)** पावक इव **(आत्)** **(दक्षिणा)** दक्षिणस्यां दिशि **(युज्यते)** **(वाजयन्ती)** प्रापयन्ती **(उत्तानाम्)** ऊर्ध्वगामिनीम् **(ऊर्ध्वः)** **(अधयत्)** पिबति **(जुहूभिः)** पानसाधनैः॥ ३॥

अन्वयः-हे मनुष्या! यद्यः शुचिभिर्गोभिरग्निरिव गणस्य रशनामजीग आच्छुचिरूर्ध्वोऽड्क्ते स दक्षिणा युज्यते या विदुषी वाजयन्त्युत्तानामजीगस्स ईं जुहूभिः पेयमधयत्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये समुदायस्य सन्तोषं जनयन्ति ते किरणैः सूर्य इव सर्वत्र यशसा प्रकाशिता जायन्ते॥ ३॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(शुचिभिः)** पवित्र **(गोभिः)** किरणों से **(अग्निः)** अग्नि के सदृश **(गणस्य)** समूह की **(रशनाम्)** डोरी को **(अजीगः)** अत्यन्त निगलता अर्थात् ग्रहण करता **(आत्)** और **(शुचिः)** पवित्र होता हुआ **(ऊर्ध्वः)** ऊपर को उठा **(अड्क्ते)** प्रसिद्ध होता है, वह **(दक्षिणा)** दक्षिणा दिशा में **(युज्यते)** युक्त किया जाता है, जो विद्यायुक्त स्त्री **(वाजयन्ती)** प्राप्ति कराती हुई **(उत्तानाम्)** ऊपर जाने वाली सामग्री को निरन्तर ग्रहण करती है, वह **(ईम्)** प्राप्त हुए **(जुहूभिः)** पान करने के साधनों से पीने योग्य पदार्थ को **(अधयत्)** पान करती है॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो समुदाय के संतोष को उत्पन्न करते हैं, वे किरणों से सूर्य जैसे वैसे सर्वत्र यश से प्रकाशित होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरन्ति।
यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम्॥ ४॥

अग्निम्। अच्छ। देवऽयताम्। मनांसि। चक्षूंषिऽइव। सूर्ये। सम्। चरन्ति। यत्। ईम्। सुवाते इति। उषसा। विरूपे इति विऽरूपे। श्वेतः। वाजी। जायते। अग्रे। अह्नाम्॥ ४॥

पदार्थः-(अग्निम्) पावकम् **(अच्छा)** सम्यक्। अत्र **संहितायामिति** दीर्घः। **(देवयताम्)** कामयमानानाम् **(मनांसि)** अन्तःकरणानि **(चक्षूंषीव)** **(सूर्ये)** सवितरीव सूर्ये **(सम्)** **(चरन्ति)** गच्छन्ति प्राप्नुवन्ति **(यत्)** यथा **(ईम्)** **(सुवाते)** उत्पादयतः **(उषसा)** रात्रिदिने **(विरूपे)** विरुद्धस्वरूपे **(श्वेतः)** **(वाजी)** विज्ञापको दिवसः **(जायते)** उत्पद्यते **(अग्रे)** **(अह्नाम्)** दिनानाम्॥ ४॥

अन्वयः-हे मनुष्या! यद्यथाऽह्नामग्रे विरूपे उषसेम् सुवाते तयोः श्वेतो वाजी जायते तथाग्निं देवयतां सूर्ये

चक्षूंषीव परमात्मनि मनांस्यच्छा सञ्चरन्ति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा दिनं तथा विद्वांसो यथा रात्रिस्तथाऽविद्वांसः सन्ति॥४॥

पदार्थः-हे मनुष्यो! **(यत्)** जैसे **(अह्नाम्)** दिनों के **(अग्रे)** अग्रभाग में **(विरूपे)** विरुद्धस्वरूप **(उषसा)** रात्रि और दिन **(ईम्)** प्राप्त हुई क्रिया को **(सुवाते)** उत्पन्न कराते हैं और उन में **(श्वेतः)** श्वेतवर्ण **(वाजी)** जनाने वाला अर्थात् कार्य्यों की सूचना दिलाने वाला दिवस **(जायते)** उत्पन्न होता है, वैसे **(अग्निम्)** अग्नि की **(देवयताम्)** कामना करते हुए जनों के बीच **(सूर्ये)** सूर्य्य में **(चक्षूंषीव)** नेत्रों के सदृश परमात्मा में **(मनांसि)** अन्तःकरण **(अच्छा)** उत्तम प्रकार **(सम्, चरन्ति)** प्राप्त होते हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे दिन वैसे विद्वान् जन और जैसे रात्रि वैसे अविद्वान् हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

जनिष्ट॒ हि जेन्यो॒ अग्रे॒ अह्नां॑ हि॒तो हि॒तेष्व॑रु॒षो वने॑षु।
दमे॑दमे स॒प्त रत्ना॒ दधा॑नोऽग्निर्होता॒ नि ष॑सादा॒ यजी॑यान्॥५॥

जनिष्ट। हि। जेन्यः। अग्रे। अह्नाम्। हितः। हितेषु। अरुषः। वनेषु। दमेऽदमे। सप्त। रत्ना। दधानः। अग्निः। होता। नि। ससाद। यजीयान्॥५॥

पदार्थः-**(जनिष्ट)** जायते **(हि)** **(जेन्यः)** जेतुं शीलः **(अग्रे)** **(अह्नाम्)** दिनानाम् **(हितः)** हितकारी **(हितेषु)** सुखनिमित्तेषु **(अरुषः)** न मर्मव्यापी **(वनेषु)** जङ्गलेषु **(दमेदमे)** गृहेगृहे **(सप्त)** सप्तसङ्ख्याकान् किरणान् **(रत्ना)** रत्नानि धनानि **(दधानः)** धरन् **(अग्निः)** अग्निरिव **(होता)** सङ्गतक्रियाकर्त्ता **(नि)** **(ससाद)** निषीदेत्। अत्र **संहितायामिति** दीर्घः। **(यजीयान्)** अतिशयेन यज्ञकर्त्ता॥५॥

अन्वयः-हे विद्वन्! योऽह्नामग्रे हितेषु हितो वनेष्वरुषो दमेदमे सप्त किरणान् रत्ना दधानो जेन्योऽग्निरिव होता जनिष्ट सत्कर्मसु निषसाद स हि यजीयान् जायते॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा दिवसाऽऽरम्भे प्रभातसमयः सर्वेषां हितकारी वर्त्तते तथैव सत्कर्मकर्त्ता यजमानः सर्वहितैषी जायते॥५॥

पदार्थः-हे विद्वन्! जो **(अह्नाम्)** दिनों के **(अग्रे)** अग्रभाग में **(हितेषु)** सुख के कारणों में **(हितः)** हित करने वाला **(वनेषु)** वनों में **(अरुषः)** मर्मस्थलों में न व्यापी **(दमेदमे)** गृह-गृह में **(सप्त)** सात किरणों और **(रत्ना)** धनों को **(दधानः)** धारण करता हुआ **(जेन्यः)** जीतने वाला **(अग्निः)** अग्नि के

सदृश **(होता)** सङ्गत क्रियाओं का कर्त्ता **(जनिष्ट)** उत्पन्न होता है और श्रेष्ठ कर्म्मों में **(नि, ससाद)** प्रवृत्त होवे **(हि)** वही **(यजीयान्)** अत्यन्त यज्ञ करने वाला होता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे दिन के आरम्भ में प्रभातसमय सब का हितकारी होता है, वैसे ही श्रेष्ठ कर्म करने वाला यजमान सब का हितैषी होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अग्निर्होता न्यसीदद् यजीयानुपस्थे मातुः सुरभा उ लोके।
युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः॥६॥१२॥

अग्निः। होता। नि। असीदत्। यजीयान्। उपऽस्थे। मातुः। सुरभौ। ऊँ इति। लोके। युवा। कविः। पुरुनिःऽस्थः। ऋतऽवा। धर्ता। कृष्टीनाम्। उत। मध्ये। इद्धः॥६॥

पदार्थः-(**अग्निः**) विद्युदिव **(होता)** यज्ञकर्ता **(नि)** **(असीदत्)** निषीदेत् **(यजीयान्)** अतिशयेन यष्टा **(उपस्थे)** समीपे **(मातुः)** **(सुरभौ)** सुगन्धिते **(उ)** **(लोके)** **(युवा)** बलिष्ठः **(कविः)** क्रान्तप्रज्ञो विपश्चित् **(पुरुनिःष्ठः)** पुरवो बहुविधा निष्ठा यस्य बहुस्थानो वा **(ऋतावा)** सत्यविभाजकः **(धर्त्ता)** **(कृष्टीनाम्)** मनुष्याणाम् **(उत)** अपि **(मध्ये)** **(इद्धः)** प्रदीप्तः॥६॥

अन्वयः-हे मनुष्या! यथा मध्य इद्धोऽग्निरिव यजीयान् युवा कविः पुरुनिःष्ठ ऋतावा धर्त्ता होता सुरभौ मातुरुपस्थे लोके न्यसीदत् स उ कृष्टीनामुत पश्वादीनां रक्षकः स्यात्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाग्निर्मातरि वायौ स्थितः सन् विद्युद्रूपेण सर्वान् सुखयति तथैव धार्मिको विद्वान् सर्वानानन्दयितुमर्हति॥६॥

पदार्थः-हे मनुष्यो! जैसे **(मध्ये)** मध्य में **(इद्धः)** प्रदीप्त **(अग्निः)** बिजुली सदृश **(यजीयान्)** अत्यन्त यज्ञकर्त्ता **(युवा)** बलवान् **(कविः)** उत्तम बुद्धि वाला विद्वान् **(पुरुनिःष्ठः)** अनेक प्रकार की श्रद्धा व बहुत स्थानों वाला **(ऋतावा)** सत्य का विभाग **[**करने वाला**]** **(धर्त्ता)** और धारण करने वाला **(होता)** यज्ञकर्त्ता **(सुरभौ)** सुगन्धित **(मातुः)** माता के **(उपस्थे)** समीप में **(लोके)** लोक में **(नि, असीदत्)** निरन्तर स्थित होवे **(उ)** वही **(कृष्टीनाम्)** मनुष्यों का **(उत)** और पशु आदिकों का रक्षक होवे॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि मातारूप वायु में विराजता हुआ बिजुलीरूप से सब को सुख देता है, वैसे ही धार्मिक विद्वान् सब को आनन्द दिलाने के योग्य है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः।

आ यस्तताऩ रोदसी ऋतेऩ नित्यं मृजन्ति वाजिनं घृतेन॥७॥

प्र। नु। त्यम्। विप्रम्। अध्वरेषु। साधुम्। अग्निम्। होतारम्। ईळते। नमःऽभिः। आ। यः। ततान। रोदसी इति। ऋतेन। नित्यम्। मृजन्ति। वाजिनम्। घृतेन॥७॥

पदार्थः-(प्र) (नु) सद्यः **(त्यम्)** तम् **(विप्रम्)** मेधाविनम् **(अध्वरेषु)** अहिंसनीयेषु व्यवहारेषु **(साधुम्) (अग्निम्)** पावकम् **(होतारम्) (ईळते)** स्तुवन्ति **(नमोभिः)** अन्नादिभिः **(आ) (यः) (ततान)** विस्तृणोति **(रोदसी)** द्यावापृथिव्यौ **(ऋतेन)** सत्येन **(नित्यम्) (मृजन्ति)** शुन्धन्ति **(वाजिनम्) (घृतेन)** उदकेन॥७॥

अन्वयः-हे मनुष्या! योऽग्निर्नमोभिर्ऋतेन घृतेन वाजिनं रोदसी आ ततान तद्विद्यया ये नित्यं मृजन्ति त्यमग्निमिव होतारं साधुं विप्रमध्वरेषु नु प्र ईळते ते सुखिनो जायन्ते॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसोऽग्निं कार्येषु सम्प्रयुज्य धनधान्ययुक्ता जायन्ते तथैतद् विद्यां कार्येषु संयोज्य प्रत्यक्षविद्या जायन्ते॥७॥

पदार्थः-हे मनुष्यो! **(यः)** जो अग्नि **(नमोभिः)** अन्न आदिकों से **(ऋतेन)** सत्य से **(घृतेन)** और जल से **(वाजिनम्)** गति वाले पदार्थ को **(रोदसी)** अन्तरिक्ष और पृथिवी को **(आ, ततान)** विस्तृत करता अर्थात् अन्तरिक्ष और पृथिवी पर पहुंचाता है, उसकी विद्या से जो **(नित्यम्)** नित्य **(मृजन्ति)** शुद्ध करते और **(त्यम्)** उस **(अग्निम्)** अग्नि के सदृश **(होतारम्)** यज्ञ करने वाले **(साधुम्)** श्रेष्ठ **(विप्रम्)** बुद्धिमान् की **(अध्वरेषु)** नहीं हिंसा करने योग्य व्यवहारों में **(नु)** शीघ्र **(प्र, ईळते)** अच्छे प्रकार स्तुति करते हैं, वे सुखी होते है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन अग्नि को कार्य्यों में संप्रयुक्त अर्थात् काम में लाकर धन और धान्य से युक्त होते हैं, वैसे ही इसकी विद्या को कार्यों में संयुक्त करके प्रत्यक्ष विद्यायुक्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः।

सहस्रशृङ्गो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान्॥८॥

मार्जाल्यः। मृज्यते। स्वे। दमूनाः। कविऽप्रशस्तः। अतिथिः। शिवः। नः। सहस्रऽशृङ्गः। वृषभः। तत्ऽओजाः। विश्वान्। अग्ने। सहसा। प्र। असि। अन्यान्॥८॥

पदार्थः-(मार्जाल्यः) संशोधकः **(मृज्यते)** शुद्ध्यते **(स्वे)** स्वकीये **(दमूनाः)** दमनशीलः **(कविप्रशस्तः)** कविभिः प्रशंसनीयः कविषु प्रशस्तो वा **(अतिथिः)** अविद्यमाननियततिथिः **(शिवः)** मङ्गलमयो मङ्गलकारी **(नः)** अस्मान् **(सहस्रशृङ्गः)** सहस्राणि शृङ्गाणीव तेजांसि यस्य सः **(वृषभः)**

बलिष्ठो वर्षणशील: **(तदोजा:)** तदेवौज: पराक्रमो यस्य स: **(विश्वान्)** समग्रान् **(अग्ने)** अग्निरिव वर्त्तमान **(सहसा)** बलेन **(प्र) (असि) (अन्यान्)**॥८॥

अन्वय:-हे अग्ने! दमूना: कविप्रशस्त: शिवोऽतिथि: सहस्रशृङ्गो वृषभस्तदोजा मार्जाल्योऽग्निरिव भवान् स्वे प्र मृज्यते स सहसा विश्वान्नोऽस्मानन्यांश्च प्ररक्षन्नसि तं वयं सेवेमहि॥८॥

भावार्थ:-त एवाऽतिथय: स्युर्ये दान्ता मङ्गलाचारा धर्मिष्ठा विद्वांसो जितेन्द्रिया: सर्वेषां प्रियसाधनरुचयो भवेयु:। यथाऽग्नि: सर्वशोधकोऽस्ति तथैव सर्वजगत्पवित्रकरा अतिथय: सन्ति॥८॥

पदार्थ:-हे **(अग्ने)** अग्नि के सदृश वर्तमान **(दमूना:)** इन्द्रियों को वश में रखने वाले **(कविप्रशस्त:)** विद्वानों से प्रशंसा करने योग्य अथवा विद्वानों में प्रशंसा को प्राप्त **(शिव:)** मङ्गलस्वरूप वा मङ्गल करने वाले **(अतिथि:)** जिनकी आने की कोई तिथि नियत विद्यमान न हो **(सहस्रशृङ्ग:)** जो हजारों शृङ्गों के तुल्य तेजों से युक्त **(वृषभ:)** बलिष्ठ और वृष्टि करने वाले **(तदोजा:)** जिनका वही पराक्रम **(मार्जाल्य:)** जो अत्यन्त शुद्ध करने वाले अग्नि के सदृश आप **(स्वे)** अपने में **(प्र, मृज्यते)** शुद्ध किये जाते हैं, वह **(सहसा)** बल से **(विश्वान्)** सम्पूर्ण **(न:)** हम लोगों की तथा **(अन्यान्)** अन्यों की रक्षा करते हुए **(असि)** विद्यमान हो, उनकी हम लोग सेवा करें॥८॥

भावार्थ:-वे ही अतिथि होवें जो इन्द्रियों के दमन करने और मङ्गलाचरण करने वाले धर्म्मिष्ठ विद्वान् और सब के प्रिय साधन में प्रीति करने वाले होवें और जैसे अग्नि सब का शुद्ध करने वाला है, वैसे ही सम्पूर्ण जगत् के पवित्र करने वाले अतिथि जन हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र स॒द्यो अ॑ग्ने॒ अत्ये॑ष्य॒न्यान॒विर्यस्मै॒ चारु॑तमो ब॒भूथ॑।
ई॒ळेन्यो॑ वपु॒ष्यो॑ वि॒भावा॑ प्रि॒यो वि॒शामति॑थि॒र्मानु॑षीणाम्॥९॥

प्र। स॒द्यः। अ॒ग्ने॒। अति॑। एषि॒। अ॒न्यान्। आ॒विः। यस्मै॑। चारु॑ऽतमः। ब॒भूथ॑। ई॒ळेन्यः॑। व॒पु॒ष्यः॑। वि॒भाऽवा॑। प्रि॒यः। वि॒शाम्। अति॑थिः। मानु॑षीणाम्॥९॥

पदार्थ:-**(प्र)** **(सद्य:)** समानेऽहनि **(अग्ने)** विद्वन् **(अति)** उल्लङ्घने **(एषि)** **(अन्यान्)** पूर्वोपदिष्टान् **(आवि:)** प्राकट्ये **(यस्मै)** **(चारुतम:)** अतिशयेन सुशील: सुन्दर: **(बभूथ)** भवसि **(ईळेन्य:)** प्रशंसनीयधर्म्यकर्मा **(वपुष्य:)** वपुषि सुन्दरे रूपे भव: **(विभावा)** विशेषेण भानवान् **(प्रिय:)** कमनीय: सेवनीयो वा **(विशाम्)** प्रजानाम् **(अतिथि:)** सर्वत्र भ्रमणकर्त्ता **(मानुषीणाम्)** मनुष्यादि-रूपाणाम्॥९॥

अन्वय:-हे अग्ने! यस्मै त्वमाविर्बभूथ स ईळेन्यो वपुष्यो विभावा चारुतमो मानुषीणां विशां प्रियोऽतिथि: प्र भवति यतस्त्वमन्यान् सद्योऽत्येषि स भवानस्माभि: सत्कर्त्तव्योऽस्ति॥९॥

भावार्थः-ये मनुष्या नित्यं भ्रमन्ति प्राप्तानुपदिश्याऽप्राप्तानुपदेशाय गच्छन्ति सर्वेषां हितैषिणो महाविद्वांस आप्ताः सन्ति त एवाऽतिथयो भवितुमर्हन्ति॥९॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**यस्मै**) जिसके लिये आप (**आविः**) प्रकट (**बभूथ**) होते हो वह (**ईळेन्यः**) प्रशंसा करने योग्य धर्म्मयुक्त कर्म्म करने वाला (**वपुष्यः**) सुन्दर रूप में प्रसिद्ध (**विभावा**) विशेष कान्तियुक्त (**चारुतमः**) अत्यन्त सुशील और सुन्दर और (**मानुषीणाम्**) मनुष्यादिरूप (**विशाम्**) प्रजाओं को (**प्रियः**) कामना वा सेवा करने योग्य (**अतिथिः**) सर्वत्र घूमने वाला (**प्र**) समर्थ होता है, जिस कारण आप (**अन्यान्**) प्रथम उपदेश दिये हुओं को (**सद्यः**) तुल्य दिन में (**अति, एषि**) उल्लङ्घन करके प्राप्त होते हो, वह आप हम लोगों से सत्कार करने योग्य हो॥९॥

भावार्थः-जो मनुष्य नित्य भ्रमण करते और प्राप्त हुए जनों को उपदेश कर और नहीं प्राप्त हुओं को उपदेश के लिये प्राप्त होते तथा सब के हितैषी बड़े विद्वान् और यथार्थवादी हैं, वे ही अतिथि होने के योग्य हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तुभ्यꣳ भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तत ओत दूरात्।
भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रम्॥ १०॥

तुभ्यम्। भरन्ति। क्षितयः। यविष्ठ। बलिम्। अग्ने। अन्तितः। आ। उत। दूरात्। आ। भन्दिष्ठस्य। सुऽमतिम्। चिकिद्धि। बृहत्। ते। अग्ने। महि। शर्म। भद्रम्॥ १०॥

पदार्थः-(**तुभ्यम्**) (**भरन्ति**) धरन्ति (**क्षितयः**) गृहस्था मनुष्याः (**यविष्ठ**) अतिशयेन युवन् (**बलिम्**) भक्ष्यभोज्यादिपदार्थसमुदायम् (**अग्ने**) विद्युद्वद्व्याप्तविद्य (**अन्तितः**) समीपतः (**आ**) (**उत**) (**दूरात्**) (**आ**) (**भन्दिष्ठस्य**) अतिशयेन कल्याणाचरणस्य (**सुमतिम्**) शोभनां प्रज्ञाम् (**चिकिद्धि**) विजानीहि (**बृहत्**) महत् (**ते**) तव (**अग्ने**) पवित्रकर्त्तः (**महि**) पूजनीयम् (**शर्म**) गृहं सुखं वा (**भद्रम्**) सेवनीयसुखप्रदम्॥१०॥

अन्वयः-हे यविष्ठाऽग्ने! यतस्त्वमन्तित उत दूरादागत्य सर्वान् सत्यमुपदिशसि तस्मात् क्षितयस्तुभ्यं बलिमाभरन्ति। हे अग्ने! त्वं भन्दिष्ठस्य सुमतिमा चिकिद्धीदं ते महि बृहद्भद्रं शर्मास्तु॥१०॥

भावार्थः-यस्मादतिथयः सर्वेषां मनुष्याणां सत्योपदेशेन परममुपकारं कुर्वन्ति तस्मात्तेऽन्नपानस्थानप्रियवचनधनादिना सत्कर्त्तव्या भवन्ति॥१०॥

पदार्थः-हे (**यविष्ठ**) अतिशय युवा (**अग्ने**) बिजली के सदृश विद्या में व्याप्त जिससे आप (**अन्तितः**) समीप से (**उत**) और (**दूरात्**) दूर से आकर सब को सत्य का उपदेश करते हो, इससे (**क्षितयः**) गृहस्थ मनुष्य (**तुभ्यम्**) आपके लिये (**बलिम्**) खाने और पीने योग्यादि पदार्थों के समूह को

(आ, भरन्ति) धारण करते हैं और हे **(अग्ने)** पवित्र कार्य्य करने वाले! आप **(भन्दिष्ठस्य)** अत्यन्त श्रेष्ठ आचरण करने वाले की **(सुमतिम्)** श्रेष्ठ बुद्धि को **(आ, चिकिद्धि)** विशेष करके जानिये और यह **(ते)** आपका **(महि)** सत्कार करने योग्य **(बृहत्)** बड़ा **(भद्रम्)** सेवन करने योग्य सुख देने वाला **(शर्म)** गृह वा सुख हो॥१०॥

भावार्थः-जिससे अतिथि जन सब मनुष्यों के सत्य उपदेश से परम उपकार को करते हैं, इससे वे अन्न, पान, स्थान, प्रिय वचन और धन आदि से सत्कार करने योग्य होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आद्य रथं भानुमो भानुमन्तमग्ने तिष्ठ यजतेभिः समन्तम्।
विद्वान् पथीनामुर्वन्तरिक्षमेह देवान् हविरद्याय वक्षि॥११॥

आ। अद्य। रथम्। भानुऽमः। भानुऽमन्तम्। अग्ने। तिष्ठ। यजतेभिः। सम्ऽअन्तम्। विद्वान्। पथीनाम्। उरु। अन्तरिक्षम्। आ। इह। देवान्। हविः।ऽअद्याय। वक्षि॥११॥

पदार्थः-**(आ)** समन्तात् **(अद्य)** इदानीम् **(रथम्)** रमणीयं यानम् **(भानुमः)** भानवन् **(भानुमन्तम्)** दीप्तिमन्तम् **(अग्ने)** विद्वान् **(तिष्ठ)** **(यजतेभिः)** सङ्गतैरश्वादिभिः संयुक्तम् **(समन्तम्)** सर्वतो दृढाङ्गम् **(विद्वान्)** **(पथीनाम्)** मार्गाणाम् **(उरु)** व्यापकम् **(अन्तरिक्षम्)** **(आ)** **(इह)** **(देवान्)** विदुषोऽतिथीन् **(हविरद्याय)** अत्तुं योग्यायाऽन्नाद्याय **(वक्षि)** वहसि॥११॥

अन्वयः-हे भानुमोऽग्ने! त्वमिहाद्य यजतेभिस्सह समन्तं भानुमन्तं रथमा तिष्ठ तेन विद्वांस्त्वं पथीनामुर्वन्तरिक्षं हविरद्याय देवान् यत आ वक्षि तस्मादस्माभिः सत्कर्त्तव्योऽसि॥११॥

भावार्थः-गृहस्थैर्दूरस्थानप्युत्तमानतिथीनुत्तमेषु यानेषु संस्थाप्योपदेशायाऽऽनेया अन्नादिना सत्कर्त्तव्याश्च॥११॥

पदार्थः-हे **(भानुमः)** कान्ति वाले **(अग्ने)** विद्वन्! आप **(इह)** यहाँ **(अद्य)** इस समय **(यजतेभिः)** प्राप्त हुए घोड़े आदिकों से संयुक्त **(समन्तम्)** सब प्रकार दृढ़ अवयवों वाले **(भानुमन्तम्)** कान्तियुक्त **(रथम्)** सुन्दर वाहन पर **(आ)** अच्छे प्रकार **(तिष्ठ)** विराजिये इससे **(विद्वान्)** विद्यायुक्त आप **(पथीनाम्)** मार्गों के **(उरु)** व्यापक **(अन्तरिक्षम्)** अन्तरिक्ष को और **(हविरद्याय)** खाने योग्य अन्न आदि के लिये **(देवान्)** विद्वान् अतिथियों को जिससे **(आ, वक्षि)** अच्छे प्रकार पहुँचाते हो, इससे हम लोगों से सत्कार करने योग्य हो॥११॥

भावार्थः-गृहस्थों को चाहिये कि दूर स्थित भी उत्तम अतिथियों को उत्तम वाहनों पर बैठाकर उपदेश के लिये लावें और अन्न आदि से उनका सत्कार करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत्॥ १२॥ १३॥

अवोचाम। कवये। मेध्याय। वचः। वन्दारु। वृषभाय। वृष्णे। गविष्ठिरः। नमसा। स्तोमम्। अग्नौ। दिविऽइव। रुक्मम्। उरुऽव्यञ्चम्। अश्रेत्॥ १२॥

पदार्थः-(अवोचाम) उपदिशेम **(कवये)** विदुषे **(मेध्याय)** पवित्राय **(वचः) (वन्दारु)** प्रशंसनीयं धर्म्यम् **(वृषभाय)** बलिष्ठाय **(वृष्णे)** सत्योपदेशवर्षकाय **(गविष्ठिरः)** यो गवि सुशिक्षितायां वाचि तिष्ठति **(नमसा)** सत्कारेणान्नादिना वा **(स्तोमम्)** श्लाघनीयम् **(अग्नौ)** पावके **(दिवीव)** यथा सूर्ये **(रुक्मम्)** रुचिकरं भास्वरम् **(उरुव्यञ्चम्)** बहुव्याप्तिमन्तम् **(अश्रेत्)** आश्रयेत्॥ १२॥

अन्वयः-हे राजादयो मनुष्या अतिथयो! वयं यो गविष्ठिरो नमसा दिवीवाग्नौ रुक्ममुरुव्यञ्चं स्तोममश्रेत् तस्मै वृष्णे वृषभाय मेध्याय कवये वन्दारु वचोऽवोचाम॥ १२॥

भावार्थः-तानेव विद्वांसोऽतिथयो विशिष्टमुपदिशन्तु ये पवित्रात्मानो विद्याप्रियाः सत्क्रियां जिज्ञासवो भवेयुर्ये चातो विपरीतास्तानधिकारयोग्यतामुपदेशेन प्रापय्याऽधिकारिणः सम्पादयेयुरिति॥ १२॥

अत्रोपदेश्योपदेष्टृगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति प्रथम सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे राजा आदि मनुष्यो अतिथि! हम लोग जो **(गविष्ठिरः)** उत्तम प्रकार शिक्षित वाणी में स्थित **(नमसा)** सत्कार वा अन्न आदि से **(दिवीव)** जैसे सूर्य्य में वैसे **(अग्नौ)** अग्नि में **(रुक्मम्)** प्रीतिकारक और प्रकाशयुक्त **(उरुव्यञ्चम्)** बहुत व्यापक और **(स्तोमम्)** प्रशंसा करने योग्य का **(अश्रेत्)** आश्रय करें उस **(वृष्णे)** सत्य उपदेश की वृष्टि करने वाले **(वृषभाय)** बलिष्ठ **(मेध्याय)** पवित्र **(कवये)** विद्वान् जन के लिये **(वन्दारु)** प्रशंसा करने योग्य और धर्म्मसम्बन्धी **(वचः)** वचन का **(अवोचाम)** उपदेश करें॥ १२॥

भावार्थः-उन पुरुषों को ही विद्वान् अतिथि जन विशेष उपदेश देवें कि जो पवित्रात्मा विद्या में प्रीति करने और उत्तम क्रियाओं के जानने की इच्छा करने वाले होवें और जो इन बातों से विपरीत अर्थात् रहित हों उनको अधिकार की योग्यता अर्थात् विशेष उपदेश के समझने का सामर्थ्य साधारण उपदेश के द्वारा प्राप्त करा के अधिकारी करें॥ १२॥

इस सूक्त में उपदेश सुनने और उपदेश के सुनाने वाले का गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह प्रथम सूक्त और तेरहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ द्वादशर्चस्य द्वितीयस्य सूक्तस्य १, ३-८, १०-१२ कुमार आत्रेयो वृशो वा जार उभौ वा। २, ९ वृशो जार ऋषिः। अग्निर्देवता। १, ३, ४, ७, ८ त्रिष्टुप्। ५, ९, १० निचृत्त्रिष्टुप्। ११ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ स्वराट्पङ्क्तिः। ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १२ भुरिगतिजगती छन्दः। निषादः स्वरः॥

अथ युवावस्थायां विवाहविषयमाह॥

अब बारह ऋचा वाले द्वितीय सूक्त का आरम्भ है, उसके प्रथम मन्त्र में युवावस्था में विवाह करने के विषय को कहते हैं॥

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे।
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ॥ १॥

कुमारम्। माता। युवतिः। सम्ऽउब्धम्। गुहा। बिभर्ति। न। ददाति। पित्रे। अनीकम्। अस्य। न। मिनत्। जनासः। पुरः। पश्यन्ति। निऽहितम्। अरतौ॥ १॥

पदार्थः-(कुमारम्) (माता) (युवतिः) पूर्णावस्था सती कृतविवाहा **(समुब्धम्)** समत्वेन गूढम् **(गुहा)** गुहायां गर्भाशये **(बिभर्ति) (न) (ददाति) (पित्रे)** जनकाय **(अनीकम्)** बलं सैन्यम् **(अस्य) (न)** निषेधे **(मिनत्)** हिंसत् **(जनासः)** विद्वांसः **(पुरः) (पश्यन्ति) (निहितम्)** स्थितम् **(अरतौ)** अरमणवेलायाम्॥ १॥

अन्वयः-हे मनुष्या! यथा युवतिर्माता समुब्धं कुमारं गुहा बिभर्ति पित्रे न ददात्यस्यानीकं न मिनदरतौ निहितं जनासः पुरः पश्यन्ति तथैव यूयमाचरत॥ १॥

भावार्थः-यदि कुमाराः कुमार्यश्च ब्रह्मचर्य्येण विद्यामधीत्य सन्तानोत्पत्तिं विज्ञाय पूर्णायां युवावस्थायां स्वयंवरं विवाहं कृत्वा सन्तानोत्पत्तिं कुर्वन्ति तर्हि ते सदाऽऽनन्दिता भवन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(युवतिः)** पूर्ण अवस्था अर्थात् विवाह करने योग्य अवस्थावाली होकर जिस स्त्री ने विवाह किया ऐसी **(माता)** माता **(समुब्धम्)** तुल्यता से ढपे हुए **(कुमारम्)** कुमार को **(गुहा)** गर्भाशय में **(बिभर्ति)** धारण करती और **(पित्रे)** उस पुत्र के पिता के लिये **(न)** नहीं **(ददाति)** देती है **(अस्य)** इस पिता के **(अनीकम्)** समुदायबल को अर्थात् **(न)** जो नहीं **(मिनत्)** नाश करने वाला होता हुआ **(अरतौ)** रमणसमय से अन्यसमय में **(निहितम्)** स्थित उसको **(जनासः)** विद्वान् जन **(पुरः)** पहिले **(पश्यन्ति)** देखते हैं, वैसा ही आप लोग आचरण करो॥ १॥

भावार्थः-जो कुमार और कुमारी ब्रह्मचर्य्य से विद्या पढ़के और सन्तान के उत्पन्न करने की रीति को जान के पूर्ण अवस्था अर्थात् विवाह करने के योग्य अवस्था होने पर स्वयंवर नामक विवाह को करके सन्तान की उत्पत्ति करते हैं तो वे सदा आनन्दित होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कमे॒तं त्वं यु॑वते कुमा॒रं पेषी॑ बिभर्षि॒ महि॑षी जजान।

पू॒र्वीर्हि गर्भ॑: श॒रदो॑ व॒वर्धाप॑श्यं जा॒तं यदसू॑त मा॒ता॥ २॥

कम्। ए॒तम्। त्वम्। यु॒व॒ते॒। कु॒मा॒रम्। पेषी॑। बि॒भ॒र्षि॒। महि॑षी। ज॒जा॒न॒। पू॒र्वीः। हि। गर्भ॑:। श॒रद॑:। व॒वर्ध॑। अप॑श्यम्। जा॒तम्। यत्। असू॑त। मा॒ता॥ २॥

पदार्थः-(कम्) (एतम्) कृतब्रह्मचर्य्यम् **(त्वम्) (युवते)** ब्रह्मचर्य्येणाधीतविद्ये पूर्णयुवावस्थे **(कुमारम्)** बालकम् **(पेषी)** पेष्याकारं गर्भाशयस्थं वीर्यं कृतवती **(बिभर्षि) (महिषी)** महारूपबलशीलादियोगेन पूजनीया **(जजान)** जायते **(पूर्वीः)** प्राचीनाः **(हि)** यतः **(गर्भः)** गर्भाशयं प्राप्तः **(शरदः)** शरदृतून् **(ववर्ध)** वर्धते **(अपश्यम्)** पश्यामि **(जातम्)** उत्पन्नम् **(यत्)** यम् **(असूत)** सूते **(माता)** जननी॥ २॥

अन्वयः-हे युवते पेषी महिषी! त्वं कमेतं कुमारम् बिभर्षि माता यद्यमसूत जातमहमपश्यं स गर्भः पूर्वीः शरदो हि ववर्धातो जजान॥ २॥

भावार्थः-हे कन्या! यूयं बाल्यावस्थायामाशेषषोडशाद् वर्षात् प्रागापञ्चविंशाद् वर्षाच्च कुमारा विवाहं मा कुरुत। य एवं ब्रह्मचर्यानन्तरं विवाहं कुर्युस्तेषामपत्यानि रूपगुणान्वितानि चिरञ्जीवीनि शिष्टसम्मतानि जायन्ते॥ २॥

पदार्थः-हे **(युवते)** ब्रह्मचर्य्य से पढ़ी विद्या जिसने ऐसी पूर्ण अवस्था वाली **(पेषी)** पेष्याकार अर्थात् डिब्बी के आकार करि गर्भाशय मे वीर्य्य को स्थित करने वाली **(महिषी)** महान् रूप, बल और उत्तम स्वभाव आदि के योग से आदर करने योग्य **(त्वम्)** तू **(कम्)** किस **(एतम्)** किया है ब्रह्मचर्य्य जिसने ऐसे इस **(कुमारम्)** बालक का **(बिभर्षि)** पालन करती है और **(माता)** माता **(यत्)** जिसको **(असूत)** उत्पन्न करती तथा **(जातम्)** उत्पन्न हुए को मैं **(अपश्यम्)** देखता हूँ वह **(गर्भः)** गर्भाशय में प्राप्त **(पूर्वीः)** प्राचीन **(शरदः)** शरद् ऋतुओं तक निरन्तर **(हि)** जिससे **(ववर्ध)** बढ़ता है, उससे **(जजान)** उत्पन्न होता है॥ २॥

भावार्थः-हे कन्याओ! तुम बाल्यावास्था में सोलह वर्ष के प्रथम और पच्चीस वर्ष के प्रथम कुमारजनो! विवाह को न करो। जो इस प्रकार से ब्रह्मचर्य्य के करने के अनन्तर विवाह को करें उनके सन्तान उत्तम रूप और गुणों से युक्त बहुत कालपर्य्यन्त जीवने वाले और शिष्ट जनों से उत्तम प्रकार मान पाने वाले होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हिरण्यदन्तं शुचिवर्णमारात् क्षेत्रादपश्यमायुधा मिमानम्।

ददानो अस्मा अमृतं विपृक्वत्किं मामनिन्द्राः कृणवन्ननुक्थाः॥ ३॥

हिरण्यऽदन्तम्। शुचिऽवर्णम्। आरात्। क्षेत्रात्। अपश्यम्। आयुधा। मिमानम्। ददानः। अस्मै। अमृतम्। विपृक्वत्। किम्। माम्। अनिन्द्राः। कृणवन्। अनुक्थाः॥ ३॥

पदार्थः-(हिरण्यदन्तम्) हिरण्येन सुवर्णेन तेजसा वा तुल्या दन्ता यस्य तम् **(शुचिवर्णम्)** पवित्रस्वरूपमतिसुन्दरं वा **(आरात्)** समीपात् **(क्षेत्रात्)** संस्कृताया भार्यायाः **(अपश्यम्)** पश्येयम् **(आयुधा)** आयुधानि **(मिमानम्)** धर्त्तारम् **(ददानः)** दाता **(अस्मै)** **(अमृतम्)** मोक्षसुखम् **(विपृक्वत्)** विशेषेण सम्बद्धम् **(किम्)** **(माम्)** **(अनिन्द्राः)** अनैश्वर्य्याः **(कृणवन्)** कुर्युः **(अनुक्थाः)** अविद्वांसः॥ ३॥

अन्वयः-हे मनुष्या! योऽहं कृतब्रह्मचर्य्ययोः क्षेत्राज्जातं हिरण्यदन्तं शुचिवर्णमायुधा मिमानमारादपश्यमस्मै विपृक्वदमृतं ददानोऽहमस्मि तं मामनिन्द्रा अनुक्थाः किं कृणवन्॥ ३॥

भावार्थः-हे मनुष्या! पूर्णब्रह्मचर्य्यशिक्षाविद्यायुवावस्थापरस्परप्रीतिभिर्विना सन्तानानां विवाहं मा कुर्वन्त्वेवं कुर्वाणाः सर्वेऽत्युत्तमान्यपत्यानि प्राप्यातीवानन्दं लभन्ते य एवं जायन्ते तत्समीपे दारिद्र्यं मूर्खता दरिद्रा अविद्वांसो वा जनाः किमपि विघ्नं कर्त्तुं न शक्नुवन्ति॥ ३॥

पदार्थः-हे मनुष्यो! जो मैं, किया ब्रह्मचर्य्य जिन्होंने ऐसे स्त्री पुरुषों में से **(क्षेत्रात्)** संस्कार की हुई भार्या स्त्री से उत्पन्न हुए **(हिरण्यदन्तम्)** सुवर्ण वा तेज के तुल्य दांत वाले **(शुचिवर्णम्)** पवित्र स्वरूपयुक्त अतिसुन्दर और **(आयुधा)** शस्त्र और अस्त्रों को **(मिमानम्)** धारण करने वाले को **(आरात्)** समीप से **(अपश्यम्)** देखूं और **(अस्मै)** इसके लिये **(विपृक्वत्)** विशेष करके सम्बद्ध **(अमृतम्)** मोक्षसुख को **(ददानः)** देता हुआ मैं हूँ उस **(माम्)** मुझ को **(अनिन्द्राः)** ऐश्वर्य्य से रहित **(अनुक्थाः)** अविद्वान् जन **(किम्)** क्या **(कृणवन्)** करें॥ ३॥

भावार्थः-हे मनुष्यो! पूर्ण शास्त्र नियत ब्रह्मचर्य्य, शिक्षा, विद्या, युवावस्था और परस्पर प्रीति के बिना सन्तानों का विवाह न करें। इस प्रकार करते हुए सब जन अति उत्तम सन्तानों को प्राप्त होकर अति ही आनन्द को प्राप्त होते हैं, जो इस प्रकार प्रसिद्ध होते हैं, उनके समीप दारिद्र्य मूर्खता वा दरिद्री और अविद्वान् जन कुछ भी विघ्न नहीं कर सकते हैं॥ ३॥

पुनर्विवाहसम्बन्धिसन्तानविषयमाह॥

फिर विवाहसम्बन्धी सन्तानविषय को कहते हैं॥

क्षेत्रादपश्यं सनुतश्चरन्तं सुमद्यूथं न पुरु शोभमानम्।

न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवन्ति॥ ४॥

क्षेत्रा॑त्। अ॒प॒श्य॒म्। स॒नु॒तरि॑ति। चर॑न्तम्। सु॒ऽमत्। यू॒थम्। न। पु॒रु। शोभ॑मानम्। न। ताः। अ॒गृ॒भ्र॒न्। अज॑निष्ट। हि। सः। पलि॑क्नीः। इत्। यु॒व॒तयः॑। भ॒व॒न्ति॒॥४॥

पदार्थः-(क्षेत्रात्) संस्कृताया भार्यायाः **(अपश्यम्)** पश्यामि **(सनुतः)** सनातनात् **(चरन्तम्)** व्यवहरन्तम् **(सुमत्)** स्वयमेव **(यूथम्)** सेनासमूहम् **(न)** इव **(पुरु)** बहु **(शोभमानम्) (न) (ताः) (अगृभ्रन्)** गृह्णन्ति **(अजनिष्ट)** जायते **(हि) (सः) (पलिक्नीः)** श्वेतकेशाः **(इत्)** एव **(युवतयः) (भवन्ति)**॥४॥

अन्वयः-हे मनुष्या! यद्यहं यं क्षेत्राज्जातं चरन्तं सुमत् पुरु शोभमानं न यूथं न बलिष्ठं सनुतोऽपश्यं स सुख्यजनिष्ट या ब्रह्मचारिण्यः कन्याः सुनियमाः सत्यो युवावस्थायाः प्राक् पतीनगृभ्रँस्ता हि युवतयः पुत्रपौत्रातिसुखयुक्ता इत् पलिक्नीर्भवन्ति॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यदि भवन्तः स्वसन्तानान् दीर्घं ब्रह्मचर्य्यं कारयेयुस्तर्हि ते धर्मिष्ठाः प्रज्ञायुक्ताश्चिरञ्जीविनः सन्तो युष्मभ्यमतीव सुखं प्रयच्छेयुः॥४॥

पदार्थः-हे मनुष्यो! जो मैं जिस **(क्षेत्रात्)** संस्कार की हुई स्त्री से उत्पन्न **(चरन्तम्)** व्यवहार करते हुए **(सुमत्)** आप ही **(पुरु)** बहुत **(शोभमानम्)** शोभायुक्त **[**के**]** **(न)** समान वा **(यूथम्)** सेनासमूह के **(न)** समान बलिष्ठ को **(सनुतः)** सनातन से **(अपश्यम्)** देखता हूं **(सः)** वह सुखी **(अजनिष्ट)** होता है और जो ब्रह्मचारिणी कन्यायें उत्तम नियमों वाली हुई युवावस्था के प्रथम पतियों को **(अगृभ्रन्)** ग्रहण करती हैं **(ताः)** वे **(हि)** ही **(युवतयः)** युवति हुईं पुत्र पौत्रों के अतिसुख के युक्त **(इत्)** और **(पलिक्नीः)** श्वेत केशों वाली अर्थात् वृद्धावस्थायुक्त **(भवन्ति)** होती हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! यदि आप लोग अपने सन्तानों को अतिकाल पर्यन्त ब्रह्मचर्य्य करावें तो वे धर्मिष्ठ बुद्धियुक्त और चिरञ्जीवी हुए आप लोगों के लिये अतीव सुख देवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

के मे॑ मर्य॒कं वि य॑वन्त॒ गोभि॒र्न येषा॑ गो॒पा अर॑णश्चि॒दास॑।
य ई॑ जगृ॒भुरव॒ ते सृ॑ज॒न्त्वाजा॑ति प॒श्व उप॑ नश्चिकि॒त्वान्॥५॥

के। मे॒। म॒र्य॒कम्। वि। य॒व॒न्त॒। गोभिः॑। न। येषा॑म्। गो॒पाः॒। अर॑णः। चि॒त्। आस॑। ये। ई॒म्। ज॒गृ॒भुः॒। अव॑। ते। सृ॒ज॒न्तु॒। आ। अ॒जा॒ति॒। प॒श्वः॒। उप॑। नः॒। चि॒कि॒त्वान्॥५॥

पदार्थः-(के) (मे) मम **(मर्यकम्)** मर्यम् **(वि) (यवन्त)** वियोजयेयुः **(गोभिः) (न)** इव **(येषाम्) (गोपाः)** गवां पालकाः **(अरणः)** सङ्गन्ता **(चित्)** अपि **(आस)** भवति **(ये) (ईम्)** विद्याम्

(जगृभुः) गृह्णीयुः **(अव)** **(ते)** **(सृजन्तु)** **(आ)** **(अजाति)** समन्ताज्जातिर्जननं यस्मिन् कुले तत्। **(पश्वः)** पशून् **(उप)** **(नः)** अस्माकम् **(चिकित्वान्)**॥५॥

अन्वयः-हे विद्वांसः! के गोपा गोभिर्न मे मर्यकं वि यवन्त येषां स चिदरण आस ये पश्वो जगृभुस्त आजात्युप सृजन्तु य ईं जगृभुस्ते दुःखमव सृजन्तु यश्चिकित्वानुपसृजतु सो नोऽस्माकं हितैषी वर्त्तत इति विज्ञापयत॥५॥

भावार्थः-अत्रोमालङ्कारः। मनुष्यैर्विदुषः प्रतीदं तावत्प्रष्टव्यं केऽस्माकमल्पप्रज्ञानान् सन्तानान् विशालधियः कर्त्तुं शक्नुयुस्त इदं समादध्युर्य आप्तास्त एवैतत्कर्त्तुं शक्नुयुर्नेतरे॥५॥

पदार्थः-हे विद्वानो! **(के)** कौन **(गोपाः)** गौओं के पालन करने वाले **(गोभिः)** गौओं के **(न)** सदृश **(मे)** मेरे **(मर्यकम्)** अल्प मनुष्य को **(वि, यवन्त)** दूर करें और **(येषाम्)** जिनका वह **(चित्)** निश्चित **(अरणः)** मिलने वाला **(आस)** होता है और **(ये)** जो **(पश्वः)** पशुओं को **(जगृभुः)** ग्रहण करें **(ते)** वे **(आ, अजाति)** अच्छे प्रकार सन्तानों की उत्पत्ति जिस कुल में उसको **(उप, सृजन्तु)** उत्पन्न करें और जो **(ईम्)** विद्या ग्रहण करें, वे दुःख को **(अव)** दूर करें और जो **(चिकित्वान्)** बुद्धिमान् उत्पन्न करता है वह **(नः)** हम लोगों का हितैषी है, यह समझाओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि विद्वानों के प्रति यह पूछें कौन हम लोगों के थोड़े ज्ञान वाले सन्तानों को उत्तम बुद्धि वाले कर सकें, वे विद्वान् यह उत्तर देवें कि जो यथार्थवादी हों, वे ही उक्त काम को कर सकें, अन्य जन नहीं॥५॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु।

ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु॥६॥१४॥

वसाम्। राजानम्। वसतिम्। जनानाम्। अरातयः। नि। दधुः। मर्त्येषु। ब्रह्माणि। अत्रेः। अव। तम्। सृजन्तु। निन्दितारः। निन्द्यासः। भवन्तु॥६॥

पदार्थः-**(वसाम्)** वसतां प्राणिनाम् **(राजानम्)** न्यायकारिणम् **(वसतिम्)** निवासम् **(जनानाम्)** सज्जनानाम् **(अरातयः)** अन्यायेनादातारः शत्रवः **(नि)** **(दधुः)** दधीरन् **(मर्त्येषु)** **(ब्रह्माणि)** महान्ति धनानि **(अत्रेः)** अविद्यमानत्रिविधदुःखस्य **(अव)** निषेधे **(तम्)** **(सृजन्तु)** निःसारयन्तु **(निन्दितारः)** गुणेषु दोषान् दोषेषु गुणान् स्थापयन्तः **(निन्द्यासः)** अधर्माचरणेन निन्दितुं योग्याः **(भवन्तु)**॥६॥

अन्वयः-यो वसां जनानां राजानं वसतिं जनयतु तं विद्वांसोऽव सृजन्तु ये निन्दितारो निन्द्यासोऽरातयो मर्त्येषु ब्रह्माणि नि दधुस्तेऽत्रेरपि दूरस्था भवन्तु॥६॥

भावार्थः-हे मनुष्या! ये कुत्सितकर्माचाराः परद्रव्यापहर्त्तारो द्वेष्टारः स्युस्तान् दण्डयित्वा निर्जने देशे बध्नन्तु। ये च स्तावका धर्मिष्ठाः स्युस्तान् समीपे निवास्य सदा सत्कुर्वन्तु॥६॥

पदार्थः-जो (**वसाम्**) वसते हुए प्राणियों और (**जनानाम्**) सज्जन पुरुषों के (**राजानम्**) न्याय करने वाले को और (**वसतिम्**) निवास को प्रकट करे। (**तम्**) उसको विद्वान् जन (**अव, सृजन्तु**) न निकाल दे और जो (**निन्दितारः**) गुणों में दोषों और दोषों में गुणों का स्थापन करने वाले (**निन्द्यासः**) अधर्म के आचरण से निन्दा करने योग्य और (**अरातयः**) अन्याय से ग्रहण करने वाले शत्रुजन (**मर्त्येषु**) मरणधर्म्मा मनुष्यों में (**ब्रह्माणि**) बड़े धनों को (**नि, दधुः**) स्थापन करें वे (**अत्रेः**) तीन प्रकार के दुःख से रहित के भी दूर स्थित (**भवन्तु**) हों॥६॥

भावार्थः-हे मनुष्यो! जो निकृष्ट कर्म्म करने और दूसरे के द्रव्य के हरने वाले द्वेषकर्त्ता हों, उनको दण्ड देकर निर्जन देश में बांधो और जो स्तुति करने वाले धर्म्मिष्ठ होवें, उनको समीप में निवास देकर सदा सत्कार करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

शुनश्चिच्छेपं निदितं सहस्राद् यूपादमुञ्चो अशमिष्ट हि षः।
एवास्मदग्ने वि मुमुग्धि पाशान् होतश्चिकित्व इह तू निषद्य॥७॥

शुनः। चित्। शेपम्। निऽदितम्। सहस्रात्। यूपात्। अमुञ्चः। अशमिष्ट। हि। सः। एव। अस्मत्। अग्ने। वि। मुमुग्धि। पाशान्। होतरिति। चिकित्वः। इह। तु। निऽसद्य॥७॥

पदार्थः-(**शुनःशेपम्**) सुखस्य प्रापकमिन्द्रियारामम् (**चित्**) अपि (**निदितम्**) निन्दितम् (**सहस्रात्**) असङ्ख्यात् (**यूपात्**) मिश्रितादमिश्रिताद् बन्धनात् (**अमुञ्चः**) मुच्याः (**अशमिष्ट**) शाम्यति (**हि**) यतः (**सः**) (**एव**) (**अस्मत्**) (**अग्ने**) विद्वन् (**वि**) (**मुमुग्धि**) विमोचय (**पाशान्**) बन्धनानि (**होतः**) (**चिकित्वः**) बुद्धिमन् (**इह**) युक्ते धर्म्ये व्यवहारे (**तू**) पुनः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**निषद्य**) निषण्णो भूत्वा॥७॥

अन्वयः-हे अग्ने विद्वँस्त्वं सहस्राद् यूपान्निदितं शुनःशेपं चिदमुञ्चो हि यतः सोऽशमिष्टैव। हे होतश्चिकित्व! इह निषद्याऽस्मत् पाशाँस्तू वि मुमुग्धि॥७॥

भावार्थः-विदुषामिदमेवावश्यकं कृत्यमस्ति यत्सर्वान् मनुष्यानविद्याऽधर्म्माचरणात् पृथक्कृत्य विदुषो धार्मिकान् सम्पाद्य तेषां दुःखबन्धनान्मोचनं सततं कर्त्तव्यमिति॥७॥

पदार्थः-हे (**अग्ने**) विद्वन्! आप (**सहस्रात्**) असंख्य (**यूपात्**) मिले वा न मिले हुए बन्धन से (**निदितम्**) निन्दित (**शुनःशेपम्**) सुख के प्राप्त कराने और इन्द्रियाराम अर्थात् इन्द्रियों में रमण रखने वाले को (**चित्**) भी (**अमुञ्चः**) त्याग करो (**हि**) जिससे (**सः**) वह (**अशमिष्ट**) शान्त होता (**एव**) ही है।

हे **(होतः)** हवन करने वाले **(चिकित्व)** बुद्धिमान्! **(इह)** यहाँ युक्तधर्म्म सम्बन्धी व्यवहार में **(निषद्य)** प्रवृत्त होकर **(अस्मत्)** हम लोगों से **(पाशान्)** संसाररूप बन्धनों को **(तू)** फिर **(वि, मुमुग्धि)** काटिये॥७॥

भावार्थः-विद्वानों का यही आवश्यक कर्म्म है, जो सब मनुष्यों को अविद्या और अधर्म्माचरण से अलग कर विद्वान् धार्मिक बना उनका दुःखबन्धन छुड़ाना निरन्तर करना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम्॥८॥

हृणीयमानः। अप। हि। मत्। ऐयेः। प्र। मे। देवानाम्। व्रतऽपाः। उवाच। इन्द्रः। विद्वान्। अनु। हि। त्वा। चचक्ष। तेन। अहम्। अग्ने। अनुऽशिष्टः। आ। अगाम्॥८॥

पदार्थः-**(हृणीयमानः)** क्रोधं कुर्वन् **(अप)** **(हि)** खलु **(मत्)** **(ऐयेः)** गच्छेः **(प्र)** **(मे)** मह्यम् **(देवानाम्)** विदुषाम् **(व्रतपाः)** सत्यरक्षकः **(उवाच)** उच्यात् **(इन्द्रः)** विद्यैश्वर्य्ययुक्तः **(विद्वान्)** **(अनु)** **(हि)** यतः **(त्वा)** त्वाम् **(चचक्ष)** कथयेत् **(तेन)** **(अहम्)** **(अग्ने)** त्रिदोषदाहक **(अनुशिष्टः)** प्राप्तशिक्षः **(आ)** **(अगाम्)** प्राप्नुयाम्॥८॥

अन्वयः-हे अग्ने! हृणीयमानस्त्वं हि मदपैयेर्यो हीन्द्रो विद्वाँस्त्वानु चचक्ष यो मे देवानां व्रतपाः सन् सत्यं प्रोवाच तेनाऽनुशिष्टोऽहं सत्यं बोधमागाम्॥८॥

भावार्थः-ये मनुष्या दुष्टगुणकर्मस्वभावाः स्युस्ते दूरं रक्षणीयाः। ये च धर्मिष्ठाः सत्यमुपदिशेयुस्तत्सङ्गेन शिष्टा भूत्वा सुखमाप्नुत॥८॥

पदार्थः-हे **(अग्ने)** तीन दोषों के नाश करनेवाले! **(हृणीयमानः)** क्रोध करते हुए आप **(हि)** ही **(मत्)** मेरे समीप से **(अप, ऐयेः)** जाइये और जो **(हि)** निश्चय **(इन्द्रः)** विद्या और ऐश्वर्य्य से युक्त **(विद्वान्)** विद्वान् **(त्वा)** आपको **(अनु, चचक्ष)** अनुकूल कहे और जो **(मे)** मेरे लिये **(देवानाम्)** विद्वानों के बीच **(व्रतपाः)** सत्य की रक्षा करने वाला हुआ सत्य को **(प्र, उवाच)** कहे **(तेन)** इससे **(अनुशिष्टः)** शिक्षा को प्राप्त **(अहम्)** मैं सत्यबोध को **(आ, अगाम्)** प्राप्त होऊं॥८॥

भावार्थः-जो मनुष्य दुष्ट गुण, कर्म, स्वभाव वाले हों वे दूर रखने योग्य हैं और जो धर्मिष्ठ सत्य का उपदेश करें, उनके सङ्ग से शिष्ट अर्थात् श्रेष्ठ होके सुख को प्राप्त होवें॥८॥

पुनर्विद्वद्विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा।

प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे॥ ९॥

वि। ज्योतिषा। बृहता। भाति। अग्निः। आविः। विश्वानि। कृणुते। महित्वा। प्र। अदेवीः। मायाः। सहते। दुःऽएवाः। शिशीते। शृङ्गे इति। रक्षसे। विऽनिक्षे॥ ९॥

पदार्थः-(वि) विशेषेण **(ज्योतिषा)** प्रकाशेन **(बृहता)** महता **(भाति)** प्रकाशते **(अग्निः)** सूर्यादिरूपेण पावकः **(आविः)** प्राकट्ये **(विश्वानि)** सर्वाणि वस्तूनि **(कृणुते)** **(महित्वा)** महत्त्वेन **(प्र)** **(अदेवीः)** अशुद्धाः **(मायाः)** छलादियुक्ता प्रज्ञाः **(सहते)** **(दुरेवाः)** दुष्टमेवः प्रापणं कर्म यासां ताः **(शिशीते)** तेजते **(शृङ्गे)** **(रक्षसे)** दुष्टानां विनाशय **(विनिक्षे)** विनाशाय॥ ९॥

अन्वयः-हे विद्वांसो! यथाग्निर्बृहता ज्योतिषा महित्वा विश्वान्याविष्कृणुते वि भाति प्र सहते शृङ्गे रक्षसे विनिक्षे शिशीते तथा दुरेवा अदेवीर्मायाः सर्वतो निवारयतः॥ ९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्योऽन्धकारं निवार्य प्रकाशं जनयित्वा भयं निवारयति तथैव विद्वांसो गाढमज्ञानं निवार्य विद्यार्कं जनयित्वा सर्वेषामात्मनः प्रकाशयन्तु॥ ९॥

पदार्थः-हे विद्वानो! जैसे **(अग्निः)** सूर्य्य आदि रूप से अग्नि **(बृहता)** बड़े **(ज्योतिषा)** प्रकाश से **(महित्वा)** बड़प्पन से **(विश्वानि)** सम्पूर्ण वस्तुओं को **(आविः)** प्रकट **(कृणुते)** करता है **(वि)** विशेष करके **(भाति)** प्रकाशित होता है और **(प्र)** अत्यन्त **(सहते)** सहन करता है **(शृङ्गे)** शृङ्ग के निमित्त **(रक्षसे)** दुष्टों के विनाश के लिये **(विनिक्षे)** वा अन्य विनाश के लिये **(शिशीते)** प्रतापयुक्त होता है, वैसे **(दुरेवाः)** दुष्ट प्राप्त कराने रूप कर्म वाली **(अदेवीः)** अशुद्ध **(मायाः)** छल आदि से युक्त बुद्धियों को सब प्रकार से वारण कीजिये॥ ९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य अन्धकार का वारण कर और प्रकाश को उत्पन्न करके भय का निवारण करता है, वैसे ही विद्वान् जन घोर अज्ञान का निवारण करके विद्यारूप सूर्य को उत्पन्न करके सब के आत्माओं को प्रकाशित करें॥ ९॥

अथ धनुर्वेददृष्टान्तेनाविद्यानिवारणमाह॥

अब धनुर्वेद के दृष्टान्त से अविद्यानिवारण को कहते हैं॥

उत स्वानासो दिवि षन्त्वग्नेऽस्तिग्मायुधा रक्षसे हन्तवा उ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः॥ १०॥

उत। स्वानासः। दिवि। सन्तु। अग्नेः। तिग्मऽआयुधाः। रक्षसे। हन्तवै। ऊँ इति। मदे। चित्। अस्य। प्र। रुजन्ति। भामाः। न। वरन्ते। परिऽबाधः। अदेवीः॥ १०॥

पदार्थः-(उत) **(स्वानासः)** उपदेशकाः **(दिवि)** विद्याप्रकाशे **(सन्तु)** **(अग्नेः)** पावकात् **(तिग्मायुधाः)** तीक्ष्णायुधाः **(रक्षसे)** दुष्टविनाशय **(हन्तवै)** हन्तुम् **(उ)** **(मदे)** आनन्दाय **(चित्)** **(अस्य)**

(प्र) (रुजन्ति) आभञ्जन्ति **(भामाः)** क्रोधाः **(न)** इव **(वरन्ते)** स्वीकुर्वन्ति **(परिबाधः)** सर्वतो बाधनानि **(अदेवीः)** अप्रमदाः क्रियाः॥१०॥

अन्वयः-हे विद्वांसोऽग्नेऽस्तिग्मायुधाः स्वानासो दिवि वर्त्तमाना भवन्तो रक्षसे हन्तवै समर्थाः सन्तु। उतापि मदे प्रवृत्ताः सन्तु चिद्वस्य भामा न परिबाधोऽदेवीः प्र रुजन्ति वरन्ते ता निवारयन्तु॥१०॥

भावार्थः-हे विद्वांसो! यूयं यथाऽधीतधनुर्वेदाः शस्त्रास्त्रप्रक्षेपयुद्धकुशला आग्नेयास्त्रादिभिश्शत्रून् निवार्य विजयं प्रकाशयन्ति तथैव तीव्रविद्याध्यापनोपदेशाभ्यामविद्याप्रमादान्निवार्य विद्याशुभगुणान् प्रकाशयत॥१०॥

पदार्थः-हे विद्वानो! **(अग्नेः)** अग्नि से **(तिग्मायुधाः)** तीक्ष्ण आयुधयुक्त **(स्वानासः)** उपदेश करने वाले **(दिवि)** विद्या के प्रकाश में वर्त्तमान **(रक्षसे)** दुष्टों के विनाश करने के लिये **(हन्तवै)** हनने को समर्थ **(सन्तु)** हूजिये और **(उत)** भी **(मदे)** आनन्द के लिये प्रवृत्त हूजिये **(चित्, उ)** और भी **(अस्य)** इसके **(भामाः)** क्रोधों के **(न)** तुल्य **(परिबाधः)** सब ओर से बन्धनों को **(अदेवीः)** प्रमादरहित क्रियायें **(प्र, रुजन्ति)** सब प्रकार भङ्ग करती और **(वरन्ते)** स्वीकार करती हैं, उनका निवारण करो॥१०॥

भावार्थः-हे विद्वानो! आप लोग जैसे धनुर्वेद को पढ़े हुए शस्त्र और अस्त्रों के प्रक्षेप अर्थात् चलाने रूप युद्ध में चतुर जन अग्निसम्बन्धी अस्त्रादिकों से शत्रुओं का निवारण करके विजय को प्रकाशित करते हैं, वैसे ही अत्यन्त विद्या के पढ़ाने और उपदेश करने से अविद्याकृत प्रमादों का निवारण करके विद्याकृत श्रेष्ठ गुणों का प्रकाश करो॥१०॥

पुनर्विद्वद्गुणानाह॥

फिर विद्वानों के गुणों को कहते हैं॥

एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम्।
यदीदग्ने प्रति त्वं देव हर्याः स्ववतीरप एना जयेम॥११॥

एतम्। ते। स्तोमम्। तुविऽजात। विप्रः। रथम्। न। धीरः। सुऽअपाः। अतक्षम्। यदि। इत्। अग्ने। प्रति। त्वम्। देव। हर्याः। स्वः।ऽवतीः। अपः। एना। जयेम॥११॥

पदार्थः-**(एतम्)** शुभगुणप्रकाशकम् **(ते)** तव **(स्तोमम्)** प्रशंसितव्यवहारम् **(तुविजात)** बहुषु विद्वत्सु प्रसिद्ध **(विप्रः)** मेधावी **(रथम्)** रमणीययानम् **(न)** इव **(धीरः)** क्षमादिगुणान्वितो ध्यानकृत् **(स्वपाः)** सुष्ठुकर्मा **(अतक्षम्)** निर्ममे **(यदि)** **(इत्)** **(अग्ने)** विद्वन् **(प्रति)** **(त्वम्)** **(देव)** सकलविद्याप्रदातः **(हर्याः)** कमनीयाः **(स्ववतीः)** प्रशस्तसुखयुक्ताः **(अपः)** प्राणान् **(एना)** एनेन **(जयेम)**॥११॥

अन्वयः-हे तुविजाताग्ने! यथाहं ते स्वपा धीरो विप्रो नैतं रथमतक्षं तथा त्वमाचर। हे देव! यदि त्वं रथं रचयेस्तर्हीत्स्तोमं प्राप्नुयाः। यथा वयमेना हर्याः स्ववतीरपः प्रति जयेम तथा त्वमेता जय॥११॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा विपश्चितो धर्म्याः कामनाः कृत्वा जयिनो भवन्ति तथैव यूयमप्याचरत॥११॥

पदार्थः-हे (**तुविजात**) बहुत विद्वानों में प्रसिद्ध (**अग्ने**) विद्वन्! जैसे मैं (**ते**) आपका (**स्वपाः**) उत्तम कर्म्म करने वाला (**धीरः**) क्षमा आदि गुणों से युक्त और ध्यान करने वाला (**विप्रः**) बुद्धिमान् जन के (**न**) सदृश (**एतम्**) इस श्रेष्ठ गुणों के प्रकाशक (**रथम्**) सुन्दर वाहन को (**अतक्षम्**) बनाता हूं, वैसे (**त्वम्**) आचारण कीजिये और हे (**देव**) सम्पूर्ण विद्या के देने वाले! (**यदि**) जो आप वाहन को रचिये तो (**इत्**) ही (**स्तोमम्**) प्रशंसित व्यवहार जिसमें ऐसे सुख को प्राप्त हूजिये और जैसे हम लोग (**एना**) इससे (**हर्याः**) कामना करने योग्य अर्थात् सुन्दर (**स्वर्वतीः**) अच्छे सुखों से युक्त (**अपः**) प्राणों से युक्त (**प्रति, जयेम**) प्रति जीतें, वैसे आप इनको जीतिये॥११॥

भावार्थ–इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन धर्म्मयुक्त कामनाओं को करके विजयी होते हैं, वैसे ही आप लोग भी आचरण करो॥११॥

पुनर्विद्वद्गुणानाह॥

फिर विद्वानों के गुणों को कहते हैं॥

तुविग्रीवो॑ वृष॒भो वा॑वृधा॒नोऽश॒त्रुर्य॑: सम॑जाति॒ वेद॑:।
इती॒ममग्नि॒ममृता॑ अवोचन् ब॒र्हिष्म॑ते॒ मन॑वे॒ शर्म॑॑
यंसद्ध॒विष्म॑ते॒ मन॑वे॒ शर्म॑॑ यंसत्॥ १२॥ १५॥

तु॒वि॒ऽग्रीव॑:। वृ॒ष॒भः। वा॒वृ॒धा॒नः। अ॒श॒त्रु॒। अ॒र्यः। सम्। अ॒जा॒ति॒। वेद॑:। इति॑। इ॒मम्। अ॒ग्निम्। अ॒मृता॑:। अ॒वो॒च॒न्। ब॒र्हिष्म॑ते। मन॑वे। शर्म॑। यं॒स॒त्। ह॒विष्म॑ते। मन॑वे। शर्म॑। यं॒स॒त्॥ १२॥

पदार्थः-(**तुविग्रीवः**) बहुबलयुक्तः सुन्दरी वा ग्रीवा यस्य सः (**वृषभः**) अतीव बलिष्ठः (**वावृधानः**) भृशं वर्धमानः। अत्र **तुजादीनामि**ति दीर्घः। (**अशत्रु**) अविद्यमानाः शत्रवो यस्य तम् (**अर्य्यः**) स्वामी (**सम्**) (**अजाति**) प्राप्नुयात् (**वेदः**) धनम् (**इति**) अनेन प्रकारेण (**इमम्**) (**अग्निम्**) विद्युतम् (**अमृताः**) प्राप्तात्मविज्ञानाः (**अवोचन्**) वदन्तु (**बर्हिष्मते**) प्रवृद्धविज्ञानाय (**मनवे**) मनुष्याय (**शर्म**) सुखं गृहं वा (**यंसत्**) दद्यात् (**हविष्मते**) बहूत्तमपदार्थयुक्ताय (**मनवे**) मननशीलाय (**शर्म**) सुखम् (**यंसत्**) प्रदद्यात्॥१२॥

अन्वयः-हे विद्वांसो! यथा तुविग्रावो वावृधानो वृषभोऽर्य्योऽशत्रु वेदः समजाति बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसदितीममग्निममृता अवोचन्॥१२॥

भावार्थः-सर्वे विद्वांसो हि सर्वेभ्यो विद्यार्थिभ्यः सुशिक्षां दत्त्वा शत्रुतां त्याजयित्वा सर्वथा सुखं प्राप्नुवन्तु॥१२॥

अत्र युवावस्थाविवाहविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीयं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! जैसे **(तुविग्रीवः)** बहुत बल वा सुन्दरी ग्रीवायुक्त **(वावृधानः)** अत्यन्त बढ़ता हुआ **(वृषभः)** अतीव बलवान् **(अर्य्यः)** स्वामी **(अशत्रु)** शत्रुओं से रहित **(वेदः)** धन को **(सम्, अजाति)** अच्छे प्रकार प्राप्त होवे और **(बर्हिष्मते)** ज्ञान की वृद्धि से युक्त **(मनवे)** मनुष्य के लिये **(शर्म)** सुख वा गृह को **(यंसत्)** देवे और **(हविष्मते)** बहुत उत्तम पदार्थों से युक्त **(मनवे)** विचारशील पुरुष के लिये **(शर्म)** सुख को **(यंसत्)** देवे **(इति)** इस प्रकार से **(इमम्)** इस **(अग्निम्)** बिजुली को **(अमृताः)** आत्मज्ञान जिनकी प्राप्त वे **(अवोचन्)** कहें॥१२॥

भावार्थः-सब विद्वान् जन ही सब विद्यार्थियों के लिये उत्तम शिक्षा देकर शत्रुता को छुड़ा के सब प्रकार के सुख को प्राप्त होवें॥१२॥

इस सूक्त में युवावस्था में विवाह और विद्वान् के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह द्वितीय सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ द्वादशर्चस्य तृतीयस्य सूक्तस्य वसुश्रुत आत्रेय ऋषिः। अग्निर्देवता। १ निचृत्पङ्क्तिः। ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ३, ५, ९, १२ निचृत्त्रिष्टुप्। ४, १० त्रिष्टुप्। ६, ७, ८ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजकर्तव्यकर्म्माह॥

अब बारह ऋचा वाले तीसरे सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा के कर्त्तव्य को कहते हैं॥

त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः।
त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय॥ १॥

त्वम्। अग्ने। वरुणः। जायसे। यत्। त्वम्। मित्रः। भवसि। यत्। सम्ऽइद्धः। त्वे इति। विश्वे। सहसः। पुत्र। देवाः। त्वम्। इन्द्रः। दाशुषे। मर्त्याय॥ १॥

पदार्थः-(**त्वम्**) (**अग्ने**) कृतविद्याभ्यास (**वरुणः**) दुष्टानां बन्धकृच्छ्रेष्ठः (**जायसे**) (**यत्**) यस्य (**त्वम्**) (**मित्रः**) सखा (**भवसि**) (**यत्**) येन (**समिद्धः**) प्रदीप्तः (**त्वे**) त्वयि (**विश्वे**) सर्वे (**सहसः**) (**पुत्रः**) बलस्य पालक (**देवाः**) विद्वांसः (**त्वम्**) (**इन्द्रः**) ऐश्वर्यदाता (**दाशुषे**) दातुं योग्याय (**मर्त्याय**)॥ १॥

अन्वयः-हे सहसस्पुत्राग्ने! यत्त्वं मित्रो यत्समिद्धो भवसि यस्त्वं वरुणो जायसे यस्त्वमिन्द्रो दाशुषे मर्त्याय धनं ददासि तस्मिँस्त्वे विश्वे देवाः प्रसन्ना जायन्ते॥ १॥

भावार्थः-हे राजन्! यस्य त्वं सखा यस्माद्विरुद्ध उदासीनो वा भवसि स त्वया सह सदैव मित्रतां रक्षेत् त्वमपि॥ १॥

पदार्थः-हे (**सहसः**) बल के (**पुत्र**) पालन करने वाले (**अग्ने**) विद्या का अभ्यास किये हुए विद्वान्! (**यत्**) जिसके (**त्वम्**) आप (**मित्रः**) सखा और (**यत्**) जिससे (**समिद्धः**) प्रकाशयुक्त (**भवसि**) होते हो और जो (**त्वम्**) आप (**वरुणः**) दुष्टों के बन्ध करने वाले श्रेष्ठ (**जायसे**) होते हो और जो (**त्वम्**) आप (**इन्द्रः**) ऐश्वर्य्य के दाता (**दाशुषे**) देने योग्य (**मर्त्याय**) मनुष्य के लिये धन देते हो उन (**त्वे**) आप में (**विश्वे**) सम्पूर्ण (**देवाः**) विद्वान् जन प्रसन्न होते हैं॥ १॥

भावार्थः-हे राजन्! जिसके आप मित्र वा जिससे आप विरुद्ध और उदासीन होते हैं, वह आपके साथ सदैव मित्रता रक्खे और आप भी उसके साथ रक्खें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन् गुह्यं बिभर्षि।

अञ्जन्ति॑ मि॒त्रं सुधि॑तं॒ न गोभि॒र्यद्द॒म्पती॒ सम॑नसा कृ॒णोषि॑॥ २॥

त्वम्। अ॒र्य॒मा। भ॒व॒सि॒। यत्। क॒नीना॑म्। नाम॑। स्व॒धा॒ऽव॒न्। गुह्य॑म्। बि॒भ॒र्षि॒। अ॒ञ्जन्ति॑। मि॒त्रम्। सुऽधि॑तम्। न। गोभि॑:। यत्। दम्प॑ती॒ इति॒ दम्ऽप॑ती। सऽम॑नसा। कृ॒णोषि॑॥ २॥

पदार्थ:-(त्वम्) (अर्यमा) न्यायाधीश: **(भवसि) (यत्)** यस्मात् **(कनीनाम्)** कामयमानाम् **(नाम) (स्वधावन्)** प्रशस्तान्नयुक्त **(गुह्यम्)** रहस्यम् **(बिभर्षि) (अञ्जन्ति)** व्यक्तीकुर्वन्ति **(मित्रम्)** सखायम् **(सुधितम्)** सुष्ठुप्रसन्नम् **(न)** इव **(गोभि:)** वागादिभि: **(यत्)** य: **(दम्पती)** विवाहितौ स्त्रीपुरुषौ **(समनसा)** समानमनस्कौ दृढप्रीती **(कृणोषि)**॥ २॥

अन्वय:-हे स्वधावन् राजन्! यत् त्वं कनीनामर्यमा भवसि गुह्यं नाम बिभर्षि यद्दम्पती समनसा कृणोषि तं त्वां विश्वे देवा गोभि: सुधितं मित्रं नाञ्जन्ति॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। स एव राजा श्रेष्ठोऽस्ति य: प्रजानां यथार्थं न्याय विधत्ते यथा मित्रं मित्रं प्रीणाति तथैव राजा प्रजा: प्रीणीत॥ २॥

पदार्थ:-हे **(स्वधावन्)** अच्छे अन्न से युक्त राजन्! **(यत्)** जिससे **(त्वम्)** आप **(कनीनाम्)** कामना करने वालों के **(अर्यमा)** न्यायाधीश **(भवसि)** होते हो और **(गुह्यम्)** गुप्त **(नाम)** नाम को **(बिभर्षि)** धारण करते हो और **(यत्)** जो **(दम्पती)** विवाहित स्त्री पुरुषों को **(समनसा)** तुल्य मन और दृढ़ प्रीतियुक्त **(कृणोषि)** करते हो उन आप को सम्पूर्ण विद्वान् जन **(गोभि:)** वाणी आदि पदार्थों से **(सुधितम्)** सुन्दर प्रसन्न **(मित्रम्)** मित्र के **(न)** सदृश **(अञ्जन्ति)** प्रकट करते हैं॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। वही राजा श्रेष्ठ है, जो प्रजाओं का यथार्थ न्याय करता है और जैसे मित्र मित्र को प्रसन्न करता है, वैसे ही राजा प्रजाओं को प्रसन्न करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र मे कहते हैं॥

तव॑ श्रि॒ये म॒रुतो॑ मर्जयन्त॒ रुद्र॒ यत्ते॒ जनि॑म॒ चारु॑ चि॒त्रम्।
प॒दं यद्विष्णो॑रुप॒मं नि॒धायि॒ तेन॑ पासि॒ गुह्यं॒ नाम॒ गोना॑म्॥ ३॥

तव॑। श्रि॒ये। म॒रुत॑:। म॒र्ज॒य॒न्त॒। रुद्र॑। यत्। ते॒। जनि॑म। चारु॑। चि॒त्रम्। प॒दम्। यत्। विष्णो॑:। उ॒प॒ऽमम्। नि॒ऽधायि॑। तेन॑। पा॒सि॒। गुह्य॑म्। नाम॑। गोना॑म्॥ ३॥

पदार्थ:-(तव) (श्रिये) लक्ष्म्यै **(मरुत:)** मनुष्या: **(मर्जयन्त)** शोधयन्तु **(रुद्र)** दुष्टानां रोदयित: **(यत्) (ते)** तव **(जनिम)** जन्म **(चारु)** सुन्दरम् **(चित्रम्)** अद्भुतम् **(पदम्)** प्राप्तव्यम् **(यत्) (विष्णो:)** व्यापकस्येश्वरस्य **(उपमम्) (निधायि)** ध्रियेत **(तेन) (पासि) (गुह्यम्) (नाम) (गोनाम्)** इन्द्रियाणां किरणानां वा॥ ३॥

अन्वय:-हे रुद्र! यो मरुतस्तव श्रिये मर्जयन्त ते यच्चारु चित्रं पदं जनिम तन्मर्जयन्त यत्त्वया

विष्णोरुपमं गोनां गुह्यं नाम निधायि तेन ताँस्त्वं पासि तस्मात् सत्कर्त्तव्योऽसि॥३॥

भावार्थः-हे राजँस्तेनैव तव जन्मसाफल्यं भवेद्येन त्वमीश्वरवत्पक्षपातं विहाय प्रजाः पालयेः॥३॥

पदार्थः-हे (**रुद्र**) दुष्टों के रुलाने वाले! जो (**मरुतः**) मनुष्य (**तव**) आपकी (**श्रिये**) लक्ष्मी के लिये (**मर्जयन्त**) शुद्ध करें (**ते**) आपका (**यत्**) जो (**चारु**) सुन्दर (**चित्रम्**) अद्भुत (**पदम्**) प्राप्त होने योग्य (**जनिम**) जन्म उसको शुद्ध करें और (**यत्**) जो आप (**विष्णोः**) व्यापक ईश्वर का (**उपमम्**) उपमायुक्त और (**गोनाम्**) इन्द्रियों वा किरणों का (**गुह्यम्**) गुप्त (**नाम**) नाम (**निधायि**) धारण करें (**तेन**) इसी हेतु से उनका आप (**पासि**) पालन करते हो, इससे सत्कार करने योग्य हो॥३॥

भावार्थः-हे राजन्! इसी से आपके जन्म का साफल्य होवे, जिससे आप ईश्वर के सदृश पक्षपात का त्याग करके प्रजाओं का पालन करो॥३॥

अथ प्रजाकृत्यमाह॥

अब प्रजाकृत्य को कहते हैं॥

तव॑ श्रि॒या सु॒दृशो॑ देव दे॒वाः पु॒रू दधा॑ना अ॒मृत॑ं सपन्त।
होता॑रम॒ग्निं मनु॑षो॒ नि षे॑दुर्दश॒स्यन्त॑ उ॒शिज॒ः शंस॑मा॒योः॥४॥

तव॑। श्रि॒या। सु॒ऽदृशः॑। दे॒व॒। दे॒वाः। पु॒रु। दधा॑नाः। अ॒मृत॑म्। स॒प॒न्त॒। होता॑रम्। अ॒ग्निम्। मनु॑षः। नि। से॒दुः॒। द॒श॒स्यन्तः॑। उ॒शिजः॑। शंस॑म्। आ॒योः॥४॥

पदार्थः-(**तव**) (**श्रिया**) शोभया लक्ष्म्या वा (**सुदृशः**) ये सुष्ठु पश्यन्ति (**देव**) दातः (**देवाः**) विद्वांसः (**पुरू**) बहु (**दधानाः**) धरन्तः (**अमृतम्**) मृत्युरहितम् (**सपन्त**) आक्रोशन्ति (**होतारम्**) आदातारम् (**अग्निम्**) पावकम् (**मनुषः**) मनुष्याः (**नि, षेदुः**) निषीदेयुः (**दशस्यन्तः**) विस्तारयन्तः (**उशिजः**) कामयमानाः (**शंसम्**) शंसन्ति येन तम् (**आयोः**) जीवनस्य॥४॥

अन्वयः-हे देव! राजंस्तव श्रिया सुदृशः पुर्वमृतं दधाना उशिज आयोः शंसं होतारमग्निं दशस्यन्त देवा मनुषः सपन्त तेऽमृतं नि षेदुः॥४॥

भावार्थः-हे मनुष्या! यूयमाप्तानां विदुषां सङ्गेन विद्या सङ्गृह्य श्रीमन्तो भूत्वेह सुखं भुक्त्वाऽन्ते मुक्तिमपि लभध्वम्॥४॥

पदार्थः-हे (**देव**) दानशील राजन्! (**तव**) आपकी (**श्रिया**) लक्ष्मी वा शोभा से (**सुदृशः**) उत्तम प्रकार देखने और (**पुरू**) बहुत (**अमृतम्**) मृत्युरहित अर्थात् अविनाशी पदवी को (**दधानाः**) धारण करते और (**उशिजः**) कामना करते हुए (**आयोः**) जीवन के (**शंसम्**) कहाने और (**होतारम्**) ग्रहण करने वाले (**अग्निम्**) अग्नि को (**दशस्यन्तः**) विस्तारते हुए (**देवाः**) विद्वान् (**मनुषः**) मनुष्य (**सपन्त**) आक्रोशी रहे अर्थात् चिल्ला-चिल्ला उसका उपदेश दे रहे हैं, वे मृत्युरहित पदवी को (**नि, षेदुः**) प्राप्त होवें॥४॥

भावार्थः-हे मनुष्यो! आप यथार्थवक्ता विद्वानों के सङ्ग से विद्याओं को ग्रहण कर लक्ष्मीवान् हों और इस संसार में सुख भोगकर अन्त अर्थात् मरणसमय में मुक्ति को भी प्राप्त होओ॥४॥३

पुना राजधर्ममाह॥

फिर राजधर्म को कहते हैं॥

न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः।

विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान्॥५॥

न। त्वत्। होता। पूर्वः। अग्ने। यजीयान्। न। काव्यैः। परः। अस्ति। स्वधाऽवः। विशः। च। यस्याः। अतिथिः। भवासि। सः। यज्ञेन। वनवत्। देव। मर्तान्॥५॥

पदार्थः-(**न**) निषेधे (**त्वत्**) तव सकाशात् (**होता**) दाता (**पूर्वः**) (**अग्ने**) विद्वन् राजन् वा (**यजीयान्**) अतिशयेन यष्टा (**न**) निषेधे (**काव्यैः**) कविभिर्निर्मितैः (**परः**) श्रेष्ठः (**अस्ति**) (**स्वधावः**) बहुधनधान्ययुक्त (**विशः**) प्रजायाः (**च**) (**यस्याः**) (**अतिथिः**) पूजनीयः (**भवासि**) भवेः (**सः**) (**यज्ञेन**) प्रजापालनव्यवहारेण (**वनवत्**) सेवयसि (**देव**) सुखप्रदातः (**मर्त्तान्**) मनुष्यान्॥५॥

अन्वयः-हे स्वधावो देवाग्ने! त्वं यज्ञेन मर्त्तान् वनवत्र त्वत्पूर्वो होता यजीयानस्ति न काव्यैः परोऽस्ति यस्या विशश्चातिथिर्यस्त्वं भवासि स भवांस्तस्याः सत्कर्तुं योग्योऽस्ति॥५॥

भावार्थः-यो राजा धर्म्येण प्रजाः पालयेत् स एव राज्यं कर्त्तुमर्हति॥५॥

पदार्थः-हे (**स्वधावः**) बहुत धन और धान्य से युक्त (**देव**) सुख के देने वाले (**अग्ने**) विद्वान् वा राजन्! आप (**यज्ञेन**) प्रजापालनरूप व्यवहार से (**मर्त्तान्**) मनुष्यों का (**वनवत्**) सेवन करते हो (**न**) न (**त्वत्**) आपके समीप से (**पूर्वः**) प्राचीन (**होता**) दाता (**यजीयान्**) अत्यन्त यज्ञ करने वाला (**अस्ति**) है और (**न**) न (**काव्यैः**) कवियों के बनाये हुओं से (**परः**) श्रेष्ठ है (**यस्याः**) जिस (**विशः**) प्रजा के (**च**) भी (**अतिथिः**) आदर करने योग्य जो आप (**भवासि**) होवें (**सः**) वह आप उस प्रजा के सत्कार करने योग्य है॥५॥

भावार्थः-जो राजा धर्मयुक्त व्यवहार से प्रजाओं का पालन करे, वही राज्य करने के योग्य होता है॥५॥

पुनः प्रजाविषयमाह॥

फिर प्रजाविषय को कहते हैं॥

वयमग्ने वनयाम त्वोता वसूयवो हविषा बुध्यमानाः।

वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान्॥६॥१६॥

व॒यम्। अ॒ग्ने॒। व॒नु॒या॒म॒। त्वाऽऊ॑ताः। व॒सु॒ऽय॑वः। ह॒विषा॑। बु॒ध्य॑माना॒ः। व॒यम्। स॒ऽम॒र्ये॑। वि॒दथे॑षु। अह्वा॑म्। व॒यम्। रा॒या। स॒ह॒स॒ः। पु॒त्र॒। मर्ता॑न्॥६॥

पदार्थः-(वयम्) (अग्ने) अग्निरिव राजन् **(वनुयाम)** याचेमहि **(त्वोताः)** त्वया रक्षिताः **(वसूयवः)** आत्मनो धनमिच्छवः **(हविषा)** दानेन **(बुध्यमानाः) (वयम्) (समर्ये)** स-ामे **(विदथेषु)** विज्ञानव्यवहारेषु **(अह्वाम्) (वयम्) (राया)** धनेन **(सहसस्पुत्र)** बलस्य पालक **(मर्त्तान्)** मनुष्यान्॥६॥

अन्वयः-हे सहसस्पुत्राग्ने! त्वोता वसूयवो हविषा बुध्यमाना वयं त्वत्तो रक्षणं वनुयाम वयमह्वां विदथेषु समर्ये प्रवर्त्तेमहि वयं राया मर्त्तान् वनुयाम॥६॥

भावार्थः-हे मनुष्या! विद्वद्भ्यः सद्गुणान् भवन्तो याचेरंस्तर्हि स्वयं प्रजा धनाढ्या भवेयुः॥६॥

पदार्थः-हे **(सहस्पुत्र)** बल की पालना करने वाले **(अग्ने)** अग्नि के सदृश तेजस्वी राजन्! **(त्वोताः)** आपसे रक्षा किये गये **(वसूयवः)** अपने धन की इच्छा करने वाले **(हविषा)** दान से **(बुध्यमानाः)** बोध को प्राप्त होते हुए **(वयम्)** हम लोग आपसे रक्षा की **(वनुयाम)** याचना करें और **(वयम्)** हम लोग **(अह्वाम्)** दिनों के **(विदथेषु)** विशेष ज्ञानसम्बन्धी व्यवहारों में **(समर्ये)** संग्राम के बीच प्रवृत्त होवें और **(वयम्)** हम लोग **(राया)** धन से **(मर्त्तान्)** मनुष्यों को याचें अर्थात् मनुष्यों से मांगें॥६॥

भावार्थः-हे मनुष्यो! विद्वानों से श्रेष्ठ गुणों की आप लोग प्रार्थना करें तो स्वयं प्रजायें धनवती होवें॥६॥

पुनश्चौर्य्याद्यपराधनिवारणप्रजापालनराजधर्ममाह॥

फिर चोरी आदि अपराधनिवारण प्रजापालन राजधर्म को कहते हैं॥

यो न॒ आगो॑ अ॒भ्येनो॒ भरा॒त्यधी॒दुघ॑म॒घशं॑से दधात।

ज॒ही चि॑कित्वो अ॒भिश॑स्तिमे॒तामग्ने॒ यो नो॑ म॒र्चय॑ति द्वये॑न॥७॥

यः। न॒ः। आग॑ः। अ॒भि। एन॑ः। भरा॑ति। अधि॑। इत्। अ॒घम्। अ॒घऽशं॑से। द॒धा॒त॒। ज॒हि। चि॒कि॒त्व॒ः। अ॒भिऽश॑स्तिम्। ए॒ताम्। अग्ने॑। यः। न॒ः। म॒र्चय॑ति। द्वये॑न॥७॥

पदार्थः-(यः) (नः) अस्माकम् **(आगः)** अपराधम् **(अभि) (एनः)** पापम् **(भराति)** धरति **(अधि) (इत्) (अघम्)** किल्विषम् **(अघशंसे)** स्तेने **(दधात)** दध्यात् **(जही)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(चिकित्वः)** विज्ञानवन् **(अभिशस्तिम्)** अभितो हिंसाम् **(एताम्) (अग्ने)** पावक इव महीपते **(यः) (न)** अस्मान् **(मर्चयति)** बाधते **(द्वयेन)** पापापराधाभ्याम्॥७॥

अन्वयः-हे चिकित्वोऽग्ने! यो न आग एनोऽभि भराति तस्मिन्नघशंसे योऽघमिदधि दधात यो द्वयेन नोऽस्मान् मर्चयति। एतामभिशस्तिं विधत्ते तं त्वं जही॥७॥

भावार्थः-हे राजन्! ये प्रजादूषकाः स्युस्तान् सदैव दण्डय, ये श्रेष्ठाचारा भवेयुस्तान् मानय॥७॥

पदार्थः-हे (**चिकित्वः**) विज्ञानवान् (**अग्ने**) अग्नि के सदृश प्रतापी पृथिवी के पालने वाले! (**यः**) जो (**नः**) हम लोगों के (**आगः**) अपराध और (**एनः**) पाप को (**अभि, भराति**) सन्मुख धारण करता है उस (**अघशंसे**) चोरीरूप कर्म में जो (**अघम्**) पाप (**इत**) ही को (**अधि, दधात**) अधिस्थापन करे और (**यः**) जो (**द्वयेन**) पाप और अपराध से (**नः**) हम लोगों को (**मर्चयति**) बाधता है और (**एताम्**) इस (**अभिशस्तिम्**) सब ओर से हिंसा को करता है, उसका आप (**जही**) त्याग कीजिए॥७॥

भावार्थः-हे राजन्! जो प्रजा को दोष देने वाले होवें, उनको सदा ही दण्ड दीजिये और जो श्रेष्ठ आचरण करने वाले होवें, उनको मानो अर्थात् सत्कार करो॥७॥

पुना राजधर्म्ममाह॥

फिर राजधर्म को कहते हैं॥

त्वाम॒स्या व्युषि॑ देव॒ पूर्वे॑ दू॒तं कृ॑ण्वा॒ना अ॑यजन्त ह॒व्यैः।

सं॒स्थे यद॑ग्न ईय॑से रयी॒णां दे॒वो मर्तै॒र्वसु॑भिरि॒ध्यमा॑नः॥८॥

त्वाम्। अ॒स्याः। वि॒ऽउषि॑। दे॒व॒। पूर्वे॑। दू॒तम्। कृ॒ण्वा॒नाः। अ॒य॒ज॒न्त॒। ह॒व्यैः। स॒म्ऽस्थे। यत्। अ॒ग्ने॒। ईय॑से। र॒यी॒णाम्। दे॒वः। मर्तैः॑। वसु॑ऽभिः। इ॒ध्यमा॑नः॥८॥

पदार्थः-(**त्वाम्**) (**अस्याः**) प्रजाया मध्ये (**व्युषि**) सेवसे (**देव**) दिव्यगुणसम्पन्न (**पूर्वे**) पालनकर्त्तारः (**दूतम्**) यो दुनोति शत्रूँस्तम् (**कृण्वानाः**) (**अयजन्त**) सङ्गच्छेरन् (**हव्यैः**) पूजितुमर्हैः (**संस्थे**) सम्यक् तिष्ठन्ति यस्मिँस्तस्मिन् (**यत्**) यस्मात् (**अग्ने**) पावकवद्वर्त्तमान (**ईयसे**) प्राप्नोषि गच्छसि वा (**रयीणाम्**) धनानाम् (**देवः**) विद्वान् सन् (**मर्त्तैः**) मरणधर्म्मैर्मनुष्यैः (**वसुभिः**) धनादियुक्तैः (**इध्यमानः**) देदीप्यमानः॥८॥

अन्वयः-हे देवाग्ने! देवस्त्वं यदस्याः संस्थे रयीणां वसुभिर्मर्तैरिध्यमान ईयसे पालनं व्युषि तं त्वां हव्यैर्दूतं कृण्वानाः पूर्वे विद्वांसोऽयजन्त॥८॥

भावार्थः-हे राजन्! यदि भवान् विद्याविनयाभ्यां न्यायेन प्रजाः सततं पालयेत्तर्हि त्वां कीर्त्तिर्धनं राज्योन्नतिरुत्तमाः पुरुषाश्च प्राप्नुयुः॥८॥

पदार्थः-हे (**देव**) श्रेष्ठ गुणों से युक्त (**अग्ने**) अग्नि के सदृश वर्त्तमान! (**देवः**) विद्वान् होते हुए आप (**यत्**) जिससे (**अस्याः**) इस प्रजा के मध्य में (**संस्थे**) उत्तम प्रकार स्थित होते हैं, जिसमें उसमें (**रयीणाम्**) धनों के बीच (**वसुभिः**) धन आदि पदार्थों से युक्त (**मर्तैः**) मरणधर्म वाले मनुष्यों से (**इध्यमानः**) प्रकाशित किये गये (**ईयसे**) प्राप्त होते वा जाते हो और पालन का (**व्युषि**) सेवन करते हो उन (**त्वाम्**) आपको (**हव्यैः**) प्रशंसा करने योग्य पदार्थों से (**दूतम्**) शत्रुओं के नाश करने वाले (**कृण्वानाः**) करते हुए (**पूर्वे**) पालन करने वाले विद्वान् जन (**अयजन्त**) मिलें॥८॥

भावार्थः-हे राजन्! जो आप विद्या और विनय से न्यायपूर्वक प्रजाओं का निरन्तर पालन करें तो आप को यश, धन, राज्य की उन्नति और उत्तम पुरुष प्राप्त होवें॥८॥

पुनः सन्तानशिक्षाविषयकं प्रजाधर्ममाह॥

फिर सन्तानशिक्षाविषयक प्रजाधर्म को कहते हैं॥

अव॑ स्पृधि पि॒तर॑ं योधि॑ वि॒द्वान् पु॒त्रो यस्ते॑ सहसः सून ऊ॒हे।
क॒दा चि॑कित्वो अ॒भि च॑क्षसे॒ नोग्ने॑ क॒दाँ ऋ॑त॒चिद् या॑तयासे॥९॥

अव॑। स्पृ॒धि॒। पि॒तर॑म्। योधि॑। वि॒द्वान्। पु॒त्रः। यः। ते॒। स॒हः॒स॒ः। सू॒नो॒ इति॑। ऊ॒हे। क॒दा। चि॒कि॒त्वः॒। अ॒भि। च॒क्ष॒से॒। नः॒। अ॒ग्ने॑। क॒दा। ऋ॒त॒ऽचित्। या॒त॒या॒से॒॥९॥

पदार्थः-(**अव**) (**स्पृधि**) अभिकाङ्क्ष (**पितरम्**) पालकम् (**योधि**) वियोजय (**विद्वान्**) (**पुत्रः**) (**यः**) (**ते**) (**सहसः**) ब्रह्मचर्यबलयुक्तस्य (**सूनो**) अपत्य (**ऊहे**) वितर्कयामि (**कदा**) (**चिकित्वः**) (**अभि**) (**चक्षसे**) उपदिशेः (**नः**) अस्मान् (**अग्ने**) (**कदा**) (**ऋतचित्**) य ऋतं चिनोति सः (**यातयासे**) प्रेरयेः॥९॥

अन्वयः-हे सहसस्सूनो चिकित्वोऽग्ने! ते तुभ्यमहमूहे यस्त्वं विद्वान् पुत्रस्स पितरमव स्पृधि दुःखं योधि। ऋतचित्त्वं नोऽस्मान् कदाऽभि चक्षसे सत्कर्मसु कदा यातयासे॥९॥

भावार्थः-यदि कन्या बालकाँश्च पितरौ ब्रह्मचर्य्येण विद्याः प्रापयेयुः पूर्णयुवावस्थायां विवाहयेयुस्तर्हि तेऽत्यन्तं सुखमाप्नुयुः॥९॥

पदार्थः-हे (**सहसः**) ब्रह्मचर्य्यबल से युक्त पुरुष के (**सूनो**) पुत्र (**चिकित्वः**) बुद्धियुक्त (**अग्ने**) अग्नि के सदृश तेजस्विन् (**ते**) तेरे लिये मैं (**ऊहे**) विशेष तर्क करता हूँ (**यः**) जो तू (**विद्वान्**) विद्यावान् (**पुत्रः**) दुःख से रक्षा करने वाला है सो (**पितरम्**) पिता अर्थात् अपने पालने वाले की (**अव, स्पृधि**) अभिकांक्षा कर और दुःख को (**योधि**) दूर कर तथा (**ऋतचित्**) सत्य का संचय करने वाले तुम (**नः**) हम लोगों को (**कदा**) कब (**अभि, चक्षसे**) उपदेश दोगे और (**कदा**) कब अच्छे कामों में (**यातयासे**) प्रेरणा करोगे॥९॥

भावार्थः-जो कन्या और बालकों को माता-पिता ब्रह्मचर्य से विद्या प्राप्त करावें और पूर्ण युवावस्था में विवाह करावें तो वे अत्यन्त सुख को प्राप्त होवें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

भूरि॒ नाम॒ वन्द॑मानो दधाति पि॒ता व॑सो॒ यदि॒ तज्जो॒षया॑से।
कु॒विद्दे॒वस्य॒ सह॑सा चकानः सु॒म्नम॒ग्निर्व॑नते वावृधा॒नः॥१०॥

भूरि॑। नाम॑। वन्द॑मानः। दु॒धा॒ति॒। पि॒ता। व॒सो॒ इति॑। यदि॑। तत्। जो॒ष॒या॑से। कु॒वित्। दे॒वस्य॑। सह॑सा। च॒का॒नः। सु॒म्नम्। अ॒ग्निः। व॒न॒ते॒। व॒वृ॒धा॒नः॥ १०॥

पदार्थः-(भूरि) बहु **(नाम)** संज्ञाम् **(वन्दमानः)** स्तुवन् **(दधाति) (पिता)** जनकः **(वसो)** वासयितः **(यदि) (तत्) (जोषयासे)** सेवयेः **(कुवित्)** महत् **(देवस्य)** विदुषः **(सहसा)** बलेन **(चकानः)** कामयमानः **(सुम्नम्)** सुखम् **(अग्निः)** पावक इव **(वनते)** सम्भजति **(वावृधानः)** अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्॥ १०॥

अन्वयः-हे वसो! यस्ते वन्दमानो देवस्य सहसा सुम्नं चकानोऽग्निरिव वावृधानः पिता यदि भूरि कुविद्यन्नाम दधाति वनते तत्तर्हि त्वं जोषयासे॥ १०॥

भावार्थः-हे सन्ताना! ये युष्माकं पितरो द्वितीयं विद्याजन्माख्यं द्विजेति नाम विदधति तेषां सेवनं सततं यूयं कुरुत॥ १०॥

पदार्थः-हे **(वसो)** निवास करने वाले! जो आपकी **(वन्दमानः)** स्तुति करता हुआ **(देवस्य)** विद्वान् के **(सहसा)** बल से **(सुम्नम्)** सुख की **(चकानः)** कामना करता और **(अग्निः)** अग्नि के सदृश **(वावृधानः)** निरन्तर बढ़ता हुआ **(पिता)** उत्पन्न करने वाला **(यदि)** यदि **(भूरि)** बहुत **(कुवित्)** बड़े जिस **(नाम)** नाम को **(दधाति)** धारण करता और **(वनते)** सेवन करता है और **(तत्)** उसका तो आप **(जोषयासे)** सेवन करें॥ १०॥

भावार्थः-हे सन्तानो! जो आप लोगों के माता-पिता दूसरे विद्यारूप जन्म नामक द्विज ऐसा नाम विधान करते हैं, उनका सेवन निरन्तर तुम लोग करो॥ १०॥

अथ चौर्यादिदोषनिवारणसन्तानशिक्षाकरणप्रजाधर्मविषयमाह॥

अब चोरी आदि दोषनिवारण, सन्तानशिक्षाकरण, प्रजाधर्मविषय को कहते हैं॥

त्वम॒ङ्ग ज॑रि॒तार॑ं यविष्ठ॒ विश्वा॑न्यग्ने दुरि॒ता॑ति॑ पर्षि।

स्ते॒ना अ॑दृश्रन् रि॒पवो॒ जना॒सोऽज्ञा॑तकेता वृजि॒ना अ॑भूवन्॥ ११॥

त्वम्। अ॒ङ्ग॒। ज॒रि॒तार॑म्। य॒विष्ठ॒। विश्वा॑नि। अ॒ग्ने॒। दुः॒ऽइ॒ता। अति॑। पर्षि॑। स्ते॒नाः। अ॒दृ॒श्र॒न्। रि॒पवः॑। जना॑सः। अज्ञा॑तऽकेताः। वृ॒जि॒नाः। अ॒भू॒व॒न्॥ ११॥

पदार्थः-(त्वम्) (अङ्ग) मित्र **(जरितारम्)** विद्यागुणस्तावकं पितरम् **(यविष्ठ)** अतिशयेन युवन् **(विश्वानि)** अखिलानि **(अग्ने) (दुरिता)** दुःखप्रापकाणि कर्माणि फलानि वा **(अति) (पर्षि)** अत्यन्तं पालयसि **(स्तेनाः)** चोराः **(अदृश्रन्)** पश्यन्ति **(रिपवः)** शत्रवः **(जनासः)** विद्वांसः **(अज्ञातकेताः)** अज्ञातः केतः प्रज्ञा यैस्ते मूढाः **(वृजिनाः)** पापाचारा वर्जनीयाः **(अभूवन्)** भवन्ति॥ ११॥

अन्वयः-हे यविष्ठाङ्गाग्ने! यतस्त्वं जरितारमति पर्षि विश्वानि दुरिता त्यजसि येऽज्ञातकेता वृजिनाः स्तेना रिपवोऽभूवन् याञ्जनासोऽदृश्रँस्तांस्त्वं परित्यज॥ ११॥

भावार्थः-हे सुसन्ताना! यूयं दुष्टाचारं त्यक्त्वा पितॄन् सत्कृत्य स्तेनादीन्निवार्य पुण्यकीर्त्तयो भवत॥११॥

पदार्थः-हे **(यविष्ठ)** अतिशय करके युवा **(अङ्गः)** मित्र **(अग्ने)** अग्नि के सदृश वर्त्तमान जिससे **(त्वम्)** आप **(जरितारम्)** विद्या और गुण की स्तुति करने वाले पिता की **(अति, पर्षि)** अत्यन्त पालना करते हो **(विश्वानि)** सम्पूर्ण **(दुरिता)** दुःख के प्राप्त कराने वाले कर्म्म वा फलों का त्याग करते हो और जो **(अज्ञातकेताः)** नहीं जानी बुद्धि जिन्होंने वे मूर्ख **(वृजिनाः)** पापाचरणयुक्त वर्जने योग्य **(स्तेनाः)** चोर **(रिपवः)** शत्रु **(अभूवन्)** होते हैं और जिनको **(जनासः)** विद्वान् जन **(अदृश्रन्)** देखते हैं, उनका आप परित्याग करो॥११॥

भावार्थः-हे उत्तम सन्तानो! आप लोग दुष्ट आचरणों का त्याग, माता-पितादि का सत्कार और चौरी कर्म्म आदि का निवारण करके पुण्य यश वाले हूजिये॥११॥

पुनः प्रजाधर्मविषयमाह॥

फिर प्रजाधर्मविषय को कहते हैं॥

इमे यामासस्त्वद्रिगभूवन् वसवे वा तदिदागो अवाचि।
नाहायमग्निरभिशस्तये नो न रीषते वावृधानः परा दात्॥१२॥१७॥

इमे। यामासः। त्वद्रिक्। अभूवन्। वसवे। वा। तत्। इत्। आगः। अवाचि। न। अह। अयम्। अग्निः। अभिऽशस्तये। नः। न। रिषते। ववृधानः। परा। दात्॥१२॥

पदार्थः-**(इमे)** **(यामासः)** यमनियमान्विताः **(त्वद्रिक्)** त्वां प्रति यतमानः **(अभूवन्)** भवन्ति **(वसवे)** धनाय **(वा)** **(तत्)** **(इत्)** एव **(आगः)** अपराधः **(अवाचि)** **(न)** **(अह)** **(अयम्)** **(अग्निः)** पावक इव **(अभिशस्तये)** अभितो हिंसनाय **(नः)** अस्मान् **(न)** **(रीषते)** हिनस्ति **(वावृधानः)** वर्धमानः **(परा, दात्)** दूरं गमयेत्॥१२॥

अन्वयः-हे सत्सन्तान! योऽयमग्निरिव नोऽभिशस्तये नाऽह परा दाद् वावृधानः सन्न रीषते त्वद्रिक् सन् वसवेऽवाचि वा तदाग इदवाचि तमिमे यामासोऽऽध्यापनोपदेशाभ्यां शोधयन्तु त आनन्दिता अभूवन्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये विद्वांसः कश्चिदपि विनाऽपराधेन नाऽपराध्नुवन्ति तान् स्वसमीपाद्दूरे मा निःसारयेतेति॥१२॥

अत्र राजप्रजास्तेनापराधनिवारणाद्युक्तत्वादस्य पूर्वसक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयं सूक्तं सप्तदशो वर्गश्च समाप्तः॥

पदार्थः-हे श्रेष्ठ सन्तान जो **(अयम्)** यह **(अग्निः)** अग्नि के सदृश वर्त्तमान **(नः)** हम लोगों को **(अभिशस्तये)** सब प्रकार के हिंसा करने के लिये **(न)** नहीं **(अह)** निश्चय **(परा, दात्)** दूर पहुँचावे और **(वावृधानः)** निरन्तर बढ़ता हुआ **(न)** नहीं **(रीषते)** हिंसा करता और **(त्वद्रिक्)** आपके प्रति यत्न कराता **(वसवे)** धन के लिए **(अवाचि)** कहा गया **(वा)** वा **(तत्)** वह **(आगः)** अपराध **(इत्)** ही कहा गया

उसको **(इमे)** जो **(यामासः)** यम और नियमों से युक्त जन पढ़ाने और उपदेश से पवित्र करें, वे आनन्दित **(अभूवन्)** होते हैं॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो विद्वान् जन किसी को भी बिना अपराध के नहीं दोष देते हैं, उनको अपने समीप से दूर मत निकालो॥१२॥

इस सूक्त में राजा और प्रजा को चोरी और अन्य अपराध आदि के निवारण आदि के कहने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तीसरा सूक्त और सत्रहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्य चतुर्थस्य सूक्तस्य वसुश्रुत आत्रेय ऋषिः। अग्निर्देवता। १, १०, ११ भुरिक् पङ्क्तिः। ४, ७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ९ विराट् त्रिष्टुप्। ३, ६, ८ निचृत्त्रिष्टुप्। ५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजविषयमाह॥

अब ग्यारह ऋचा वाले चतुर्थ सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजविषय को कहते हैं॥

त्वाम॑ग्ने॒ वसु॑पतिं॒ वसू॑नामभि॒ प्र म॑न्दे अध्व॒रेषु॑ राजन्।
त्वया॒ वाजं॑ वाज॒यन्तो॑ जयेमा॒भि ष्याम पृत्सु॒तीर्मर्त्या॑नाम्॥ १॥

त्वाम्। अ॒ग्ने॒। वसु॑ऽपतिम्। वसू॑नाम्। अ॒भि। प्र। म॒न्दे॒। अ॒ध्व॒रेषु॑। रा॒ज॒न्। त्वया॑। वाज॑म्। वा॒ज॒ऽयन्तः॑। ज॒येम॒। अ॒भि। स्याम॒। पृ॒त्सु॒तीः। मर्त्या॑नाम्॥ १॥

पदार्थः-(**त्वाम्**) (**अग्ने**) विद्युद्वद्व्याप्तविद्य (**वसुपतिम्**) धनस्वामिनम् (**वसूनाम्**) धनानाम् (**अभि**) (**प्र**) (**मन्दे**) आनन्दयेयमानन्दयामि वा (**अध्वरेषु**) अहिंसनीयेषु प्रजापालनन्यायव्यवहारेषु (**राजन्**) शुभगुणैः प्रकाशमान (**त्वया**) अधिष्ठात्रा (**वाजम्**) स-ामम् (**वाजयन्तः**) कुर्वन्तः कारयन्तो वा (**जयेम**) (**अभि**) (**स्याम**) (**पृत्सुतीः**) सेनाः (**मर्त्यानाम्**) मरणधर्माणां शत्रूणाम्॥ १॥

अन्वयः-हे अग्ने! राजन्नध्वरेषु वसूनां वसुपतिं त्वामहमभि प्र मन्दे। त्वया सह वाजं वाजयन्तो वयं मर्त्यानां पृत्सुतीरभि जयेमाऽनेन धनकीर्त्तियुक्ताः स्याम॥ १॥

भावार्थः-येषामधिष्ठातारो धार्मिका विद्वांसस्स्युस्तेषां सदैव विजयो राजवृद्धिरतुला श्रीश्च जायते॥ १॥

पदार्थः-हे (**अग्ने**) बिजुली के सदृश विद्या से व्याप्त (**राजन्**) उत्तम गुणों से प्रकाशमान राजन्! (**अध्वरेषु**) नहीं हिंसा करने योग्य प्रजापालन और न्यायव्यवहारों में (**वसूनाम्**) धनों के (**वसुपतिम्**) धनस्वामी (**त्वाम्**) आप को मैं (**अभि, प्र, मन्दे**) सब ओर से आनन्द देऊँ वा आनन्द देता हूँ और (**त्वया**) अधिष्ठातारूप आपके साथ (**वाजम्**) संग्राम को (**वाजयन्त**) करते वा कराते हुए हम लोग (**मर्त्यानाम्**) मरण धर्म वाले शत्रुओं की (**पृत्सुतीः**) सेनाओं को (**अभि, जयेम**) सब ओर से जीतें, इससे धन और यश से युक्त (**स्याम**) होवें॥ १॥

भावार्थः-जिनके अधिष्ठाता मुखिया धार्मिक और विद्वान् जन होवें, उनका सदा ही विजय, राज्य की वृद्धि और अतुल लक्ष्मी होती है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ह॒व्य॒वाळ॒ग्निर॒जरः॑ पि॒ता नो॑ वि॒भुर्वि॒भावा॑ सु॒दृशी॑को अ॒स्मे।

सुगार्हपत्याः समिषो दिदीह्यस्मद्र्यꣳक् सं मिमीहि श्रवाꣳसि॥ २॥

हव्यऽवाट्। अग्निः। अजरः। पिता। नः। विऽभुः। विभाऽवा। सुऽदृशीकः। अस्मे इति। सुऽगार्हपत्याः। सम्। इषः। दिदीहि। अस्मद्र्यक्। सम्। मिमीहि। श्रवांसि॥ २॥

पदार्थः-(हव्यवाट्) यो हव्यानि द्रव्याणि देशान्तरं प्रापयति **(अग्निः)** शुद्धस्वरूपः **(अजरः)** अवृद्धः **(पिता)** पालकः **(नः)** अस्माकम् **(विभुः)** व्यापकः परमेश्वरवत् **(विभावा)** विविधभानवान् **(सुदृशीकः)** दर्शयिता वा **(अस्मे)** अस्मभ्यम् **(सुगार्हपत्याः)** शोभनो गार्हपत्योऽग्न्यादिपदार्थसमुदायो यासान्ताः **(सम्)** **(इषः)** अन्नानि **(दिदीहि)** देहि **(अस्मद्र्यक्)** योऽस्मानञ्चति जानाति ज्ञापयति वा **(सम्)** **(मिमीहि)** विधेहि **(श्रवांसि)** अध्ययनाध्यापनादीनि कर्माणि॥ २॥

अन्वयः-हे राजन्! यथा हव्यवाट् सुदृशीकोऽग्निः पावको यथा विभुरीश्वरवत् सर्वं पाति प्रकाशते तथा विभावाऽजरो नः पिता सन्नस्मे सुगार्हपत्या इषः सन् दिदीहि अस्मद्र्यक् सन् श्रवांसि सं मिमीहि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा विद्युद्भौमरूपेणाग्निः सर्वानुपकरोति यथा च परमेश्वरोऽसङ्ख्यातपदार्थानामुत्पादनेन पितृवत्सर्वान् पालयति तथैव त्वं भव॥ २॥

पदार्थः-हे राजन् जैसे **(हव्यवाट्)** द्रव्यों को एक स्थान से दूसरे स्थान में पहुँचाने वा **(सुदृशीकः)** उत्तम प्रकार देखने वा दिखाने वाला **(अग्निः)** शुद्धस्वरूप अग्नि जैसे **(विभुः)** व्यापक परमेश्वर के सदृश सब का पालन करता और प्रकाशित होता है, वैसे **(विभावा)** अनेक प्रकार के प्रकाश वा ज्ञान से युक्त **(अजरः)** वृद्धावस्थारहित **(नः)** हम लोगों के **(पिता)** पालन करने वाले होते हुए **(अस्मे)** हम लोगों के लिये **(सुगार्हपत्याः)** सुन्दर अग्नि आदि पदार्थ समुदाय वाले **(इषः)** अन्नों को **(सम्, दिदीहि)** अच्छे प्रकार दीजिये और **(अस्मद्र्यक्)** हम लोगों का आदर करने, जानने वा जनाने वाले होते हुए **(श्रवांसि)** पढ़ने और पढ़ाने आदि कर्म्मों का **(सम्, मिमीह)** विधान करिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे बिजुली और भूमि में प्रसिद्ध हुए रूप से अग्नि सब का उपकार करता है और जैसे परमेश्वर असंख्यात पदार्थों के उत्पन्न करने से पितरों के सदृश सब का पालन करता है, वैसे ही आप हूजिये॥ २॥

अथ प्रजाविषयमाह॥

अब प्रजाविषय को कहते हैं॥

विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम्।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि॥ ३॥

विशाम्। कविम्। विश्पतिम्। मानुषीणाम्। शुचिम्। पावकम्। घृतऽपृष्ठम्। अग्निम्। नि। होतारम्। विश्वऽविदम्। दधिध्वे। सः। देवेषु। वनते। वार्याणि॥ ३॥

पदार्थः-(विशाम्) प्रजानाम् **(कविम्)** मेधाविनम् **(विश्पतिम्)** प्रजापालकम् **(मानुषीणाम्)** मनुष्यसम्बन्धिनीनाम् **(शुचिम्)** पवित्रम् **(पावकम्)** पवित्रकरं वह्निम् **(घृतपृष्ठम्)** घृतमुदकमाज्यं पृष्ठ आधारे यस्य तम् **(अग्निम्)** वह्निम् **(नि)** **(होतारम्)** दातारम् **(विश्वविदम्)** यो विश्वं वेत्ति तम् **(दधिध्वे)** **(सः)** **(देवेषु)** विद्वत्सु दिव्येषु पदार्थेषु वा **(वनते)** सम्भजति **(वार्य्याणि)** वरितुं स्वीकर्त्तुमर्हाणि॥३॥

अन्वयः-हे मनुष्या! यूयं घृतपृष्ठं पावकमग्निमिव विश्वविदमिव मानुषीणां विशां विश्पतिं शुचिं होतारं कविं यं राजानं यूयं नि दधिध्वे स देवेषु वार्य्याणि वनते॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो हि पावकवत्प्रतापी जगदीश्वरवन्न्यायकारी विद्वाञ्छुभलक्षणो राजा भवति स एव सम्राट् भवितुमर्हति॥३॥

पदार्थः-हे मनुष्यो! आप लोग **(घृतपृष्ठम्)** जल और घृत आधार में जिसके उस **(पावकम्)** पवित्र करने वाले **(अग्निम्)** अग्नि और **(विश्वविदम्)** संसार को जानने वाले के सदृश **(मानुषीणाम्)** मनुष्यसम्बन्धिनी **(विशाम्)** प्रजाओं के **(विश्पतिम्)** प्रजापालक **(शुचिम्)** पवित्र और **(होतारम्)** देने वाले **(कविम्)** मेधावी जिस राजा को आप लोग **(नि, दधिध्वे)** अच्छे स्वीकार करें **(सः)** वह **(देवेषु)** विद्वानों वा श्रेष्ठ पदार्थों में **(वार्य्याणि)** स्वीकार करने योग्यों का **(वनते)** सेवन करता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि के सदृश प्रतापी, जगदीश्वर के सदृश न्यायकारी, विद्वान् और उत्तम लक्षणों वाला राजा होता है, वही चक्रवर्त्ती राजा होने योग्य है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहतेहैं॥

जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य।
जुषस्व नः समिधं जातवेदु आ च देवान् हविरद्याय वक्षि॥४॥

जुषस्व। अग्ने। इळया। सऽजोषाः। यतमानः। रश्मिऽभिः। सूर्यस्य। जुषस्व। नः। समऽइधम्। जातऽवेदः। आ। च। देवान्। हविःऽअद्याय। वक्षि॥४॥

पदार्थः-(जुषस्व) सेवस्व **(अग्ने)** दुष्टप्रदाहक **(इळया)** प्रशंसितया वाचा **(सजोषाः)** समानप्रीतिसेवनः **(यतमानः)** प्रयतमानः **(रश्मिभिः)** **(सूर्य्यस्य)** **(जुषस्व)** **(नः)** अस्माकम् **(समिधम्)** काष्ठमिव शत्रुम् **(जातवेदः)** उत्पन्नप्रज्ञान **(आ)** **(च)** **(देवान्)** विदुषः **(हविरद्याय)** हविश्चाद्यमत्तव्यं च तस्मै **(वक्षि)** वहसि प्रापयसि॥४॥

अन्वयः-हे जातवेदोऽग्ने! यतमानः सजोषास्त्वं सूर्य्यस्य रश्मिभिरिवेळया नः समिधमिव शत्रुं जुषस्व हविरद्याय देवानां वक्षि तांश्च जुषस्व॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथाऽऽदित्यस्य प्रकाशेन सर्वेषां जीवानां कर्त्तव्यानि कर्म्माणि सिध्यन्ति तथैवाप्तैः पुरुषैः राज्ञः सर्वाणि न्याययुक्तानि प्रजापालनादीनि कर्माणि भवन्ति॥४॥

पदार्थः-हे (**जातवेदः**) ज्ञान की उत्पत्ति से विशिष्ट (**अग्ने**) दुष्टों के नाश करने वाले (**यतमानः**) प्रयत्न करते हुए (**सजोषाः**) तुल्य प्रीति सेवन करने वाले आप (**सूर्य्यस्य**) सूर्य्य की (**रश्मिभिः**) किरणों के सदृश (**इळया**) प्रशंसित वाणी से (**नः**) हम लोगों के (**समिधम्**) काष्ठ के तुल्य शत्रु की (**जुषस्व**) सेवा करो और (**हविरद्याय**) खाने योग्य पदार्थ के लिये (**देवान्**) विद्वानों को (**आ, वक्षि**) प्राप्त कराते अर्थात् पहुंचाते हो उनकी (**च**) और (**जुषस्व**) सेवा करो॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे सूर्य्य के प्रकाश से सब जीवों के करने योग्य कर्म्म सिद्ध होते हैं, वैसे ही यथार्थवक्ता पुरुषों से राजा के सर्व न्याययुक्त प्रजापालन आदि कर्म्म होते हैं॥४॥

पुना राजविषयमाह॥

फिर राजविषय को कहते हैं॥

जुष्टो॒ दमू॑ना॒ अति॑थिर्दुरो॒ण इ॒मं नो॑ य॒ज्ञमुप॑ याहि वि॒द्वान्।
विश्वा॑ अग्ने॑ अभि॒युजो॑ वि॒हत्या॑ श॒त्रूय॒तामा भ॑रा॒ भोज॑नानि॥५॥१८॥

जुष्टः॑। दमू॑नाः। अति॑थिः। दु॒रो॒णे। इ॒मम्। नः॒। य॒ज्ञम्। उप॑। या॒हि॒। वि॒द्वान्। विश्वाः॑। अ॒ग्ने॒। अ॒भि॒ऽयुज॑ः। वि॒ऽहत्या॑। श॒त्रु॒ऽय॒ताम्। आ। भ॒र॒। भोज॑नानि॥५॥

पदार्थः-(**जुष्टः**) सेवितः प्रीतो वा (**दमूनाः**) शमदमादियुक्तः (**अतिथिः**) अकस्मादागतः (**दुरोणे**) गृहे (**इमम्**) प्रत्यक्षम् (**नः**) अस्माकम् (**यज्ञम्**) अन्नाद्युत्तमपदार्थदानम् (**उप**) (**याहि**) (**विद्वान्**) (**विश्वाः**) समग्राः (**अग्ने**) विद्युदिव शुभगुणाढ्य राजन् (**अभियुजः**) या आभिमुख्यं युञ्जते ताः शत्रुसेनाः (**विहत्या**) विविधवधैर्हत्वा। अत्र **संहितायामिति** दीर्घः। (**शत्रूयताम्**) शत्रूणामिवाचरताम् (**आ**) (**भरा**) धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**भोजनानि**) प्रजापालनानि भोक्तव्यान्यन्नानि वा॥५॥

अन्वयः-हे अग्ने! जुष्टो दमूना अतिथिर्दुरोणे प्राप्त इव विद्वांस्त्वं न इमं यज्ञमुप याहि शत्रूयतां विश्वा अभियुजो विहत्या भोजनान्या भरा॥५॥

भावार्थः-यो राजा दुष्टान् हत्वा न्यायेन प्रजाः पालयति सोऽत्यन्तं प्रजाप्रियो भवति॥५॥

पदार्थः-हे (**अग्ने**) बिजुली के सदृश श्रेष्ठ गुणों से सम्पन्न राजन्! (**जुष्टः**) सेवित वा प्रसन्न किये गये (**दमूनाः**) शम, दम आदि से युक्त (**अतिथिः**) अकस्मात् आये (**दुरोणे**) गृह में प्राप्त हुए से (**विद्वान्**) विद्वान् आप (**नः**) हम लोगों के (**इमम्**) इस प्रत्यक्ष (**यज्ञम्**) अन्न आदि उत्तम पदार्थों के दान को (**उप, याहि**) प्राप्त हूजिये और (**शत्रूयताम्**) शत्रुओं के सदृश आचरण करते हुओं की (**विश्वाः**)

सम्पूर्ण (**अभियुजः**) सम्मुख प्राप्त हुई शत्रुसेनाओं का (**विहत्या**) अनेक प्रकार के वधों से नाश करके (**भोजनानि**) प्रजापालन वा खाने योग्य अन्नों को (**आ, भरा**) धारण कीजिये॥५॥

भावार्थः-जो राजा दुष्टों का नाश करके न्याय से प्रजाओं का पालन करता है, वह बहुत ही प्रजा का प्रिय होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै।
पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान्॥६॥

वधेन। दस्युम्। प्र। हि चातयस्व। वयः। कृण्वानः। तन्वे। स्वायै। पिपर्षि। यत्। सहसः। पुत्र। देवान्। सः। अग्ने। पाहि। नृऽतम। वाजे। अस्मान्॥६॥

पदार्थः-(**वधेन**) (**दस्युम्**) साहसिकं चोरम् (**प्र**) (**हि**) (**चातयस्व**) हिंसय हिंधि वा (**वयः**) जीवनम् (**कृण्वानः**) (**तन्वे**) शरीराय (**स्वायै**) स्वकीयाय (**पिपर्षि**) (**यत्**) यः (**सहसः, पुत्र**) बलिष्ठस्य पुत्र (**देवान्**) विदुषः (**सः**) (**अग्ने**) (**पाहि**) रक्ष (**नृतम**) अतिशयेन नायक (**वाजे**) स- ामे (**अस्मान्**)॥६॥

अन्वयः-हे सहसस्पुत्र नृतमाग्ने राजन्! यद्यस्त्वं स्वायै तन्वे वयः कृण्वानस्सन् वधेन दस्युं प्र चातयस्व। प्रजा हि पिपर्षि स त्वं वाजेऽस्मान् देवान् पाहि॥६॥

भावार्थः-हे राजन्! त्वं सदा दस्यून् हत्वा धार्मिकान् पालयेः शत्रून् विजयस्व॥६॥

पदार्थः-हे (**सहसः, पुत्र**) बलवान् के पुत्र (**नृतम**) अतिशय मुख्य (**अग्ने**) अग्नि के सदृश प्रतापी राजन्! (**यत्**) जो आप (**स्वायै**) अपने (**तन्वे**) शरीर के लिये (**वयः**) जीवन को (**कृण्वानः**) करते हुए (**वधेन**) वध से (**दस्युम्**) साहस कर्मकारी चोर का (**प्र, चातयस्व**) अत्यन्त नाश करो वा नाश कराओ तथा प्रजाओं को (**हि**) ही (**पिपर्षि**) प्रसन्न करते हो (**सः**) वह आप (**वाजे**) स- ामों में (**अस्मान्**) हम लोगों (**देवान्**) विद्वानों की (**पाहि**) रक्षा कीजिये॥६॥

भावार्थः-हे राजन्! आप सदा चोर डाकुओं का नाश कर धार्मिकों का पालन करें और शत्रुओं को जीतें॥६॥

अथ राजप्रजाविषयमाह॥

अथ राजप्रजाविषय को कहते हैं॥

वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे।
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि॥७॥

व॒यम्। ते॒। अ॒ग्ने॒। उ॒क्थैः। वि॒धे॒म॒। व॒यम्। ह॒व्यैः। पा॒व॒क॒। भ॒द्र॒ऽशो॒चे॒। अ॒स्मे इति॑। र॒यिम्। वि॒श्व॒ऽवा॑रम्। सम्। इ॒न्व॒। अ॒स्मे इति॑। विश्वा॑नि। द्र॒वि॒णा॑नि। धे॒हि॒॥७॥

पदार्थः-(वयम्) (ते) तव **(अग्ने)** विद्युदिव वर्त्तमान **(उक्थैः)** प्रशंसितैर्वचनैः **(विधेम)** कुर्याम **(वयम्) (हव्यैः)** दातुमादातुमर्हैः **(पावक)** पवित्र **(भद्रशोचे)** कल्याणप्रकाशक **(अस्मे)** अस्मभ्यम् **(रयिम्)** श्रियम् **(विश्ववारम्)** आविवरपदार्थयुक्ताम् **(सम्) (इन्व)** व्याप्नुहि **(अस्मे)** अस्मभ्यम् **(विश्वानि)** अखिलानि **(द्रविणानि)** यशांसि **(धेहि)**॥७॥

अन्वयः-हे पावक भद्रशोचेऽग्ने विद्वन् राजन्! यथा वयं यस्य त उक्थैर्विश्वानि द्रविणानि विधेम तथाऽस्म एतानि सन् धेहि यथा वयं हव्यैस्ते विश्ववारं रयिं प्रापयेम तथा त्वमस्म एतमिन्व॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रजाऽमात्यजना राजश्रियं वर्धयेयुस्तथैव राजा एभ्यो धनं वर्धयेदेवं न्यायेन पितृपुत्रवद्वर्त्तित्वा कीर्त्तिमन्तो भवन्तु॥७॥

पदार्थः-हे **(पावक)** पवित्र **(भद्रशोचे)** कल्याण के प्रकाश करने वाले **(अग्ने)** बिजुली के सदृश वर्त्तमान विद्वान् राजन्! जैसे **(वयम्)** हम लोग जिन **(ते)** आपके **(उक्थैः)** प्रशंसित वचनों से **(विश्वानि)** सम्पूर्ण **(द्रविणानि)** यशों को **(विधेम)** सिद्ध करें वैसे **(अस्मे)** हम लोगों के लिये इनको **(सम्, धेहि)** अत्यन्त धारण कीजिये और जैसे **(वयम्)** हम लोग **(हव्यैः)** देने और लेने योग्यों से आपकी **(विश्ववारम्)** विवरपर्यन्त अर्थात् अति उत्तम पदार्थपर्यन्त पदार्थों से युक्त **(रयिम्)** लक्ष्मी को प्राप्त करावें, वैसे आप **(अस्मे)** हम लोगों के लिये इसको **(इन्व)** व्याप्त कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रजा और मन्त्रीजन राजलक्ष्मी को बढ़ावें, वैसे ही राजा इन लोगों के लिये धन बढ़ावे। इस प्रकार न्याय से पिता और पुत्र के सदृश वर्त्ताव करके यशस्वी होवें॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒स्माक॑मग्ने अध्व॒रं जु॑षस्व॒ सह॑सः सूनो त्रिषधस्थ हु॒व्यम्।
व॒यं दे॒वेषु॑ सुकृ॒तः स्याम॒ शर्म॑णा नस्त्रि॒वरू॑थेन पाहि॥८॥

अ॒स्माक॑म्। अ॒ग्ने॒। अ॒ध्व॒रम्। जु॒ष॒स्व॒। सह॑सः। सू॒नो॒ इति॑। त्रि॒ऽस॒ध॒स्थ॒। हु॒व्यम्। व॒यम्। दे॒वेषु॑। सु॒ऽकृ॒तः॒। स्याम॒। शर्म॑णा। नः॒। त्रि॒ऽव॒रू॒थेन। पा॒हि॒॥८॥

पदार्थः-(अस्माकम्) (अग्ने) पावकवद्वर्त्तमान राजन् **(अध्वरम्)** पालनाख्यं व्यवहारम् **(जुषस्व) (सहसः)** बलिष्ठस्य कृतदीर्घब्रह्मचारिणः **(सूनो)** पुत्र **(त्रिषधस्थ)** त्रिभिः प्रजाभृत्यात्मीयैर्जनैः सह पक्षपातरहितस्तिष्ठति तत्सम्बुद्धौ **(हव्यम्)** दातुमर्हं सुखम् **(वयम्) (देवेषु)** विद्वत्सु **(सुकृतः)**

धर्म्मकर्माचरणाः **(स्याम)** **(शर्मणा)** गृहेण **(नः)** **(त्रिवरूथेन)** त्रिषु वर्षाहेमन्तग्रीष्मसमयेषु वरूथेन वरेण **(पाहि)**॥८॥

अन्वयः-हे सहसः सूनो त्रिषधस्थाग्ने! त्वमस्माकं हव्यमध्वरं जुषस्व त्रिवरूथेन शर्मणा सह नोऽस्मान्सततं पाहि यतो वयं देवेषु सुकृतः स्याम॥८॥

भावार्थः-सर्वे जना राजानं प्रतीदं ब्रूयुर्हे राजँस्त्वमस्माकं पालनं यथावत्कुरु त्वद्रक्षिता वयं सततं धर्माचारिणो भूत्वा तवोन्नतिं यथा कुर्याम॥८॥

पदार्थः-हे **(सहसः, सूनो)** बलवान् और अतिकालपर्य्यन्त ब्रह्मचर्य्य को धारण किये हुए जन के पुत्र और **(त्रिषधस्थ)** तीन अर्थात् प्रजा, भृत्य और अपने कुटुम्ब के जनों के साथ पक्षपात छोड़ के रहने वाले **(अग्ने)** अग्नि के सदृश तेजस्वी वर्त्तमान राजन्! आप **(अस्माकम्)** हम लोगों के **(हव्यम्)** देने योग्य सुख और **(अध्वरम्)** पालनरूप व्यवहार का **(जुषस्व)** सेवन करो और **(त्रिवरूथेन)** वर्षा, शीत और ग्रीष्मकाल में श्रेष्ठ **(शर्मणा)** गृह के साथ **(नः)** हम लोगों का निरन्तर **(पाहि)** पालन करो जिससे **(वयम्)** हम लोग **(देवेषु)** विद्वानों में **(सुकृतः)** धर्म्मसम्बन्धी कर्म्म करने वाले **(स्याम)** होवें॥८॥

भावार्थः-सब जन राजा के प्रति यह कहें कि हे राजन्! आप हम लोगों का पालन यथावत् करिये, आपसे रक्षित हम लोग निरन्तर धर्माचरणयुक्त होकर आपकी उन्नति को जैसे [=जिस प्रकार] करें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

विश्वा॑नि नो दु॒र्गहा॑ जातवेदः॒ सिन्धु॑ं न ना॒वा दु॑रि॒तात॑ि॒ पर्षि॑।
अग्ने॑ अत्रि॒वन्नम॑सा गृणा॒नो॒३॑स्माक॑ं बोध्यवि॒ता त॒नूना॑म्॥९॥

विश्वा॑नि। नः॑। दु॒ः॒ऽगहा॑। जा॒त॒वे॒दः॒। सिन्धु॑म्। न। ना॒वा। दु॒ः॒ऽइ॒ता। अति॑। पर्षि॑। अग्ने॑। अ॒त्रि॒ऽवत्। नम॑सा। गृ॒णा॒नः॒। अ॒स्माक॑म्। बो॒धि॒। अ॒वि॒ता। त॒नूना॑म्॥९॥

पदार्थः-**(विश्वानि)** अखिलानि **(नः)** अस्माकम् **(दुर्गहा)** दुःखेन पारं गन्तुं योग्यानि **(जातवेदः)** जातविद्य **(सिन्धुम्)** नदीं समुद्रं वा **(न)** इव **(नावा)** नौकया **(दुरिता)** दुःखेन प्राप्तुं योग्यानि **(अति)** **(पर्षि)** पारयसि **(अग्ने)** धर्मिष्ठ राजन् **(अत्रिवत्)** अत्रयः सततं गन्तारो विद्यन्ते यस्य तत्सम्बुद्धौ **(नमसा)** सत्कारेणान्नादिना वा **(गृणानः)** स्तुवन् **(अस्माकम्)** **(बोधि)** बुध्यसे **(अविता)** रक्षकः **(तनूनाम्)** शरीराणाम्॥९॥

अन्वयः-हेऽत्रिवज्जातवेदोऽग्ने! यतस्त्वं नावा सिन्धुं न नो विश्वानि दुर्गहा दुरिताति पर्षि। नमसा गृणानोऽस्माकं तनूनामविता सन् बोधि तस्मात् सततं सेवनीयोऽसि॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये राजाऽध्यापकोपदेशकाः सर्वान् जनान् दुःखात् पारयन्ति तेऽतुलं सुखं लभन्ते॥९॥

पदार्थः-हे **(अत्रिवत्)** निरन्तर चलने वालों से युक्त **(जातवेदः)** विद्याओं से सम्पन्न **(अग्ने)** धर्मिष्ठ राजन्! जिससे आप **(नावा)** नौका से **(सिन्धुम्)** नदी वा समुद्र को **(न)** जैसे वैसे **(नः)** हम लोगों के **(विश्वानि)** समस्त **(दुर्गहा)** दुःख से पार जाने को योग्य और **(दुरिता)** दुःख से प्राप्त होने योग्यों के भी **(अति, पर्षि)** पार जाते हो **(नमसा)** सत्कार वा अन्न आदि से **(गृणानः)** स्तुति करते हुए **(अस्माकम्)** हम लोगों के **(तनूनाम्)** शरीरों के **(अविता)** रक्षक होते हुए **(बोधि)** जानते हो, इससे निरन्तर सेवा करने योग्य हो॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा अध्यापक और उपदेशक जन सब लोगों को दुःख से पार पहुँचाते हैं, वे अतुल सुख को प्राप्त होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्त्वा॑ हृ॒दा की॒रिणा॒ मन्य॑मा॒नोऽम॑र्त्यं॒ मर्त्यो॒ जोह॑वीमि।

जात॑वेदो॒ यशो॑ अ॒स्मासु॑ धेहि प्र॒जाभि॑रग्ने अमृत॒त्वम॑श्याम्॥ १०॥

यः। त्वा॒। हृ॒दा। की॒रिणा॑। मन्य॑मानः। अम॑र्त्यम्। मर्त्यः॑। जोह॑वीमि। जात॑ऽवेदः। यशः॑। अ॒स्मासु॑। धे॒हि॒। प्र॒जाभि॑ः। अ॒ग्ने॒। अ॒मृ॒त॒ऽत्वम्। अ॒श्या॒म्॥ १०॥

पदार्थः-**(यः)** **(त्वा)** त्वाम् **(हृदा)** **(कीरिणा)** स्तावकेन। **कीरिरिति स्तोतृनामसु पठितम्।** (निघं०३.१६)। **(मन्यमानः)** विजानन् **(अमर्त्यम्)** मरणधर्मरहितम् **(मर्त्यः)** मनुष्यः **(जोहवीमि)** भृशं स्पर्द्धे **(जातवेदः)** जातविज्ञान **(यशः)** कीर्त्तिम् **(अस्मासु)** **(धेहि)** **(प्रजाभिः)** पालनीयाभिस्सह **(अग्ने)** पावकवद्वर्त्तमान राजन् **(अमृतत्वम्)** मोक्षभावम् **(अश्याम्)** प्राप्नुयाम्॥१०॥

अन्वयः-हे जातवेदोऽग्ने! यो मन्यमानो मर्त्योऽहं हृदा कीरिणामर्त्यं त्वा जोहवीमि यथा प्रजाभिः सहाऽमृतत्वमश्यां तथाऽस्मासु यशो धेहि॥१०॥

भावार्थः-यथा प्रजा राजहितं साध्नुवन्ति तथैव राजा प्रजासुखमिच्छेदेवं परस्परप्रीत्याऽतुलं सुखं प्राप्नुवन्तु॥१०॥

पदार्थः-हे **(जातवेदः)** विज्ञान से युक्त **(अग्ने)** अग्नि के सदृश वर्तमान राजन्! **(यः)** जो **(मन्यमानः)** जानता हुआ **(मर्त्यः)** मनुष्य मैं **(हृदा)** अन्तःकरण और **(कीरिणा)** स्तुति करने वाले से **(अमर्त्यम्)** मरणधर्म्म से रहित **(त्वा)** आपकी **(जोहवीमि)** अत्यन्त स्पर्द्धा करूं और जैसे **(प्रजाभिः)** पालन करने योग्य प्रजाओं के साथ **(अमृतत्वम्)** मोक्षभाव को **(अश्याम्)** प्राप्त होऊँ, वैसे **(अस्मासु)** हम लोगों में **(यशः)** कीर्त्ति को **(धेहि)** धरिये, स्थापन कीजिये॥१०॥

भावार्थः-जैसे प्रजायें राजा के हित को सिद्ध करती हैं, वैसे ही राजा प्रजा के सुख की इच्छा करें। इस प्रकार परस्पर प्रीति से अतुल सुख को प्राप्त होवें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यस्मै॒ त्वं सु॒कृ॑ते॑ जातवेद उ लो॒कम॑ग्ने कृ॒णव॒॑: स्यो॒नम्।

अ॒श्विनं॒ स पु॒त्रिणं॑ वी॒रव॑न्तं॒ गोम॑न्तं र॒यिं न॑शते स्व॒स्ति॥ ११॥ १९॥

यस्मै॑। त्वम्। सु॒ऽकृ॑ते॑। जा॒त॒ऽवे॒दः॒। ऊँ॒ इति॑। लो॒कम्। अ॒ग्ने॒। कृ॒णव॒॑ः। स्यो॒नम्। अ॒श्विन॑म्। सः। पु॒त्रिण॑म्। वी॒रऽव॑न्तम्। गोऽम॑न्तम्। र॒यिम्। न॒श॒ते॒। स्व॒स्ति॥ ११॥

पदार्थः-(**यस्मै**) (**त्वम्**) (**सुकृते**) धर्मात्मने (**जातवेदः**) जातप्रज्ञ (**उ**) (**लोकम्**) द्रष्टव्यम् (**अग्ने**) विद्वन् (**कृणवः**) करोषि (**स्योनम्**) सुखकारणम् (**अश्विनम्**) प्रशस्ताश्वादियुक्तम् (**सः**) (**पुत्रिणम्**) प्रशस्तपुत्रयुक्तम् (**वीरवन्तम्**) बहुवीराढ्यम् (**गोमन्तम्**) बहुगवादिसहितम् (**रयिम्**) धनम् (**नशते**) प्राप्नोति (**स्वस्ति**) सुखमयम्॥११॥

अन्वयः-हे जातवेदोऽग्ने! त्वं यस्मै सुकते स्योनं लोकं कृणवः स उ अश्विनं पुत्रिणं वीरवन्तं गोमन्तं स्वस्ति रयिं नशते॥११॥

भावार्थः-हे राजन्! यदि भवान् विद्याविनयाभ्यां प्रजाः पुत्राद्यैश्वर्ययुक्ताः कुर्यात् तर्हीमाः प्रजा भवन्तमतिमन्येरन्निति॥११॥

अत्र राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्थं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**जातवेदः**) बुद्धि से युक्त (**अग्ने**) विद्वन् (**त्वम्**) आप (**यस्मै**) जिस (**सुकृते**) धर्मात्मा के लिये (**स्योनम्**) सुख का कारण (**लोकम्**) देखने योग्य (**कृणवः**) करते हो (**सः, उ**) वही (**अश्विनम्**) अच्छे घोड़े आदि पदार्थों (**पुत्रिणम्**) अच्छे पुत्रों (**वीरवन्तम्**) बहुत वीरों तथा (**गोमन्तम्**) बहुत गौ आदिकों के सहित (**स्वस्ति**) सुखस्वरूप (**रयिम्**) धन को (**नशते**) प्राप्त होता है॥११॥

भावार्थः-हे राजन्! जो आप विद्या और विनय से प्रजाओं को पुत्र आदि ऐश्वर्य्यों से युक्त करें तो ये प्रजायें आपका अति सत्कार करें॥११॥

इस सूक्त में राजा और प्रजा के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौथा सूक्त और उन्नीसवाँ समाप्त हुआ॥

अथैकादशर्चस्य पञ्चमस्य सूक्तस्य वसुश्रुत आत्रेय ऋषिः। आप्री देवता। १, ५, ६, ७, ९, १० गायत्री। ३, ८ निचृद्गायत्री। ११ विराड्गायत्री। ४ पिपीलिकामध्या गायत्री छन्दः। षड्जः स्वरः। आर्च्युष्णिक् छन्दः। ऋषभः स्वरः॥

अथ विद्वद्विषयमाह॥

अब ग्यारह ऋचा वाले पञ्चम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे॥ १॥

सुऽसमिद्धाय। शोचिषे। घृतम्। तीव्रम्। जुहोतन। अग्नये। जातऽवेदसे॥ १॥

पदार्थः-(सुसमिद्धाय) सुप्रदीप्ताय **(शोचिषे)** पवित्रकराय **(घृतम्)** आज्यम् **(तीव्रम्)** सुशोधितम् **(जुहोतन)** **(अग्नये)** पावकाय **(जातवेदसे)** जातेषु विद्यमानाय॥ १॥

अन्वयः-हे मनुष्या! यूयं जातवेदसे सुसमिद्धाय शोचिषेऽग्नये तीव्रं घृतं जुहोतन॥ १॥

भावार्थः-येऽध्यापकाः शुद्धान्तःकरणेषु विद्यां वपन्ति ते सूर्य इव प्रतापयुक्ता भवन्ति॥ १॥

पदार्थः-हे मनुष्यो! आप लोग **(जातवेदसे)** उत्पन्न हुए पदार्थों में विद्यमान **(सुसमिद्धाय)** उत्तम प्रकार प्रदीप्त और **(शोचिषे)** पवित्र करने वाले **(अग्नये)** अग्नि के लिये **(तीव्रम्)** उत्तम प्रकार शुद्ध अर्थात् साफ किये **(घृतम्)** घृत का **(जुहोतन)** होम करो॥ १॥

भावार्थः-जो अध्यापक जन पवित्र अन्तःकरण वालों में विद्या का संस्कार डालते हैं, वे सूर्य्य के सदृश प्रताप से युक्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय कहते हैं॥

नराशंसः सुषूदतीमं यज्ञमदाभ्यः। कविर्हि मधुहस्त्यः॥ २॥

नराशंसः। सुसूदति। इमम्। यज्ञम्। अदाभ्यः। कविः। हि। मधुऽहस्त्यः॥ २॥

पदार्थः-(नराशंसः) यो नरैः प्रशस्यते **(सुषूदति)** अमृतं क्षरति **(इमम्)** **(यज्ञम्)** विद्याप्रचाराख्यं व्यवहारम् **(अदाभ्यः)** निष्कपटः **(कविः)** मेधावी **(हि)** यतः **(मधुहस्त्यः)** मधुहस्तेषु साधुः॥ २॥

अन्वयः-हे मनुष्या! योऽदाभ्यो मधुहस्त्यो नराशंसः कविर्जनो हीमं यज्ञं सुषूदत्यतः सोऽलंसुखो जायते॥ २॥

भावार्थः-हे विद्वन्! यथा गौः सर्वेषां सुखाय दुग्धं क्षरति तथा सर्वेषां सुखाय सत्यविद्योपदेशान् सततं वर्षय॥ २॥

पदार्थः-हे मनुष्यो! जो **(अदाभ्यः)** निष्कपट **(मधुहस्त्यः)** मधुर हस्त वालों में श्रेष्ठ **(नराशंसः)** मनुष्यों से प्रशंसा किया गया **(कविः)** बुद्धिमान् जन **(हि)** जिस कारण **(इमम्)** इस **(यज्ञम्)** विद्या के

प्रचारनामक व्यवहार को **(सुषूदति)** अमृत के सदृश टपकाता है, इस कारण वह पूर्ण सुखयुक्त होता है॥२॥

भावार्थः-हे विद्वान्! जैसे गौ सब के सुख के लिये दुग्ध देती है, वैसे सब के सुख के लिये सत्यविद्या के उपदेशों को निरन्तर वर्षाइये॥२॥

अथ राजविषयमाह॥

अब राजविषय को कहते हैं॥

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम्। सुखै रथेभिरूतये॥३॥

ईळितः। अग्ने। आ। वह। इन्द्रम्। चित्रम्। इह। प्रियम्। सुऽखैः। रथेभिः। ऊतये॥३॥

पदार्थः-**(ईळितः)** प्रशंसितः **(अग्ने)** प्रकाशात्मन् **(आ)** **(वह)** समन्तात् प्राप्नुहि **(इन्द्रम्)** परमैश्वर्यम् **(चित्रम्)** अद्भुतम् **(इह)** संसारे **(प्रियम्)** कमनीयम् **(सुखैः)** सुखकारकैः **(रथेभिः)** यानैः **(ऊतये)** रक्षणाद्याय॥३॥

अन्वयः-हे अग्ने! ईळितस्त्वमिह सुखै रथेभिरूतये चित्रं प्रियमिन्द्रमा वह॥३॥

भावार्थः-राजँस्त्वं महैश्वर्य्यं प्राप्य प्रजारक्षणाय सर्वत्र भ्रम॥३॥

पदार्थः-हे **(अग्ने)** आत्मप्रकाशस्वरूप **(ईळितः)** प्रशंसा किये गये आप **(इह)** इस संसार में **(सुखैः)** सुखकारक **(रथेभिः)** वाहनों से **(ऊतये)** रक्षण आदि के लिये **(चित्रम्)** अद्भुत **(प्रियम्)** मनोहर **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य को **(आ, वह)** सब प्रकार से प्राप्त कीजिये॥३॥

भावार्थः-हे राजन्! आप बड़े ऐश्वर्य्य को प्राप्त होके प्रजा के रक्षण के लिये सर्वत्र भ्रमण कीजिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय कहते हैं॥

ऊर्णम्रदा वि प्रथस्वाभ्यर्का अनूषत। भवा नः शुभ्र सातये॥४॥

ऊर्णऽम्रदाः। वि। प्रथस्व। अभि। अर्काः। अनूषत। भव। नः। शुभ्र। सातये॥४॥

पदार्थः-**(ऊर्णम्रदाः)** य ऊर्णे रक्षकैर्मृद्नन्ति **(वि)** **(प्रथस्व)** प्रख्याहि **(अभि)** **(अर्काः)** मन्त्रार्थविदः **(अनूषत)** **(भवा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मान् **(शुभ्र)** शुद्धाचरण **(सातये)** दायविभागाय॥४॥

अन्वयः-हे शुभ्र राजँस्त्वं सातये वि प्रथस्व नोऽस्मभ्यं सुखकारी भवा। हे ऊर्णम्रदा अर्का! यूयं नोऽस्मान्सर्वा विद्या अभ्यनूषत॥४॥

भावार्थः-राजा राजपुरुषाश्च विभज्य स्वमंशं गृह्णीयुः प्रजाभागाँश्च प्रजाभ्यो दद्युः॥४॥

पदार्थः-हे **(शुभ्र)** शुद्ध आचरण करने वाले राजन्! आप **(सातये)** दाय विभाग के लिये **(वि, प्रथस्व)** प्रसिद्ध कीजिये और हम लोगों के लिये सुखकारी **(भवा)** हूजिये। हे **(ऊर्णम्रदाः)** रक्षकों के सहित मर्दन करने और **(अर्काः)** मन्त्र और अर्थ के जानने वाले आप लोगो **(नः)** हम लोगों को सम्पूर्ण विद्याओं से सम्पन्न **(अभि, अनूषत)** कीजिये॥४॥

भावार्थः-राजा और राजपुरुष विभाग करके अपने-अपने अंश अर्थात् हिस्से को ग्रहण करें और प्रजाओं के भाग प्रजाओं के लिये देवें॥४॥

अथ गृहाश्रमविषयमाह॥

अब गृहाश्रमविषय को कहते हैं॥

देवीर्द्वारो॒ वि श्र॑यध्वं सुप्राय॒णा न॑ ऊ॒तये॑। प्रप्र॑ य॒ज्ञं पृ॑णीतन॥५॥२०॥

देवीः। द्वारः। वि। श्रय॒ध्व॒म्। सु॒ऽप्र॒ऽअ॒य॒नाः। नः। ऊ॒तये॑। प्रऽप्र॑। य॒ज्ञम्। पृ॒णी॒त॒न॥५॥

पदार्थः-**(देवीः)** दिव्याः शुद्धाः **(द्वारः)** द्वाराणीव सुखनिमित्ताः **(वि)** **(श्रयध्वम्)** विशेषेण सेवध्वम् **(सुप्रायणाः)** सुष्ठु प्रकृष्टमयनं गमनं याभ्यस्ताः **(नः)** अस्माकम् **(ऊतये)** रक्षणाद्याय **(प्रप्र)** **(यज्ञम्)** गृहाश्रमव्यवहारम् **(पृणीतन)** अलं कुरुत॥५॥

अन्वयः-हे पुरुषा! यूयं सुप्रायणा देवीर्द्वार इवोत्तमाः पत्नीर्वि श्रयध्वं न ऊतये यज्ञं प्रप्र पृणीतन॥५॥

भावार्थः-यदि तुल्यगुणकर्म्मस्वभावाः स्त्रीपुरुषा विवाहं कृत्वा गृहाश्रमारभेरंस्तर्हि पूर्णं सुखं लभेरन्॥५॥

पदार्थः-हे पुरुषो! तुम **(सुप्रायणाः)** उत्तम प्रकार गृहों में प्रवेश हो जिनसे ऐसी **(देवीः)** श्रेष्ठ और शुद्ध **(द्वारः)** द्वारों के सदृश सुख की कारणभूत उत्तम स्त्रियों का **(वि, श्रयध्वम्)** विशेष करके सेवन करो और **(नः)** हम लोगों के **(ऊतये)** रक्षण आदि के लिये **(यज्ञम्)** गृहाश्रमव्यवहार को **(प्रप्र, पृणीतन)** पुष्ट करो॥५॥

भावार्थः-यदि तुल्य गुण, कर्म, स्वभाव वाले स्त्री-पुरुष विवाह करके गृहाश्रम का आरम्भ करें तो पूर्ण सुख पावें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सु॒प्र॒तू॒के वयो॒वृधा॑ य॒ह्वी ऋ॒तस्य॑ मा॒तरा॑। दो॒षामु॒षास॑मीमहे॥६॥

सु॒प्र॒तू॒के इति॑ सु॒ऽप्र॒तू॒के। व॒यः॒ऽवृधा॑। य॒ह्वी इति॑। ऋ॒तस्य॑। मा॒तरा॑। दो॒षाम्। उ॒षस॑म्। ई॒म॒हे॒॥६॥

पदार्थः-**(सुप्रतीके)** सुष्ठु प्रतीतिकरे **(वयोवृधा)** ये वयः कमनीयं जीवनं वर्धयतः **(यह्वी)** महत्यौ **(ऋतस्य)** सत्यस्य **(मातरा)** मान्यप्रदे **(दोषाम्)** रात्रीम् **(उषासम्)** दिनम्। अत्रा**न्येषामपी**ति दीर्घः। **(ईमहे)** याचामहे॥६॥

अन्वयः-हे मनुष्या! यथा वयं सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा दोषामुषासमीमहे तथैते यूयमपि याचध्वम्॥६॥

भावार्थः-यथा रात्रिदिने सहैव वर्त्तेते तथैव कृतविवाहौ स्त्रीपुरुषौ वर्त्तेयाताम्॥६॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(सुप्रतीके)** उत्तम विश्वास करने **(वयोवृधा)** सुन्दर जीवन को बढ़ाने और **(यह्वी)** बड़े **(ऋतस्य)** सत्य के **(मातरा)** आदर देने वाले **(दोषाम्)** रात्रि और **(उषासम्)** दिन की **(ईमहे)** याचना करते हैं, वैसे इन की आप लोग भी याचना करो॥६॥

भावार्थः-जैसे रात्रि और दिन एक साथ ही वर्त्तमान हैं, वैसे ही जिन्होंने विवाह किया, ऐसे स्त्री पुरुष वर्त्ताव करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वातस्य॒ पत्मन्नीळि॒ता दैव्या॒ होता॑रा॒ मनु॑षः। इ॒मं नो॑ य॒ज्ञमा ग॑तम्॥७॥

वातस्य। पत्मन्। ईळि॒ता। दैव्या॑। होता॑रा। मनु॑षः। इ॒मम्। नः॒। य॒ज्ञम्। आ। ग॒त॒म्॥७॥

पदार्थः-**(वातस्य)** वायोः **(पत्मन्)** पतन्ति यस्मिन् मार्गे तस्मिन् **(ईळिता)** प्रशंसितौ **(दैव्या)** देवेषु दिव्यगुणेषु भवौ **(होतारा)** दातारौ **(मनुषः)** मनुष्यान् **(इमम्)** **(नः)** अस्माकम् **(यज्ञम्)** सङ्गन्तव्यं व्यवहारम् **(आ)** **(गतम्)** आगच्छतम्॥७॥

अन्वयः-हे ईळिता दैव्या होतारा! युवां वातस्य पत्मन्न इमं यज्ञं मनुषश्चऽऽगतम्॥७॥

भावार्थः-हे स्त्रीपुरुषौ! युवां धर्म्यकर्माचरणेन प्रशंसितौ भूत्वेतं गृहाश्रमव्यवहारं साध्नुतम्॥७॥

पदार्थः-हे **(ईळिता)** प्रशंसित **(दैव्या)** श्रेष्ठ गुणों में उत्पन्न **(होतारा)** दाता जनो! आप दोनों **(वातस्य)** वायु के **(पत्मन्)** गिरते हैं जिसमें उस मार्ग में **(नः)** हम लोगों के **(इमम्)** इस **(यज्ञम्)** मिलने योग्य व्यवहार को **(मनुषः)** और मनुष्यों को **(आ, गतम्)** प्राप्त होवें॥७॥

भावार्थः-हे स्त्री-पुरुषो! आप दोनों धर्म्मसम्बन्धी कर्म्म के आचरण से प्रशंसित होकर इस गृहाश्रमव्यवहार को सिद्ध करो॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

इळा॒ सर॑स्वती म॒ही ति॒स्रो दे॒वीर्म॑यो॒भुवः॑। ब॒र्हिः सी॑दन्त्व॒स्रिधः॑॥८॥

इळा॑। सर॑स्वती। म॒ही। ति॒स्रः। दे॒वीः। म॒यः॒ऽभुवः॑। ब॒र्हिः। सी॒द॒न्तु॒। अ॒स्रिधः॑॥८॥

पदार्थः-**(इळा)** प्रशंसिता विद्या **(सरस्वती)** वाक् **(मही)** भूमिः **(तिस्रः)** **(देवीः)** दिव्यगुणाः **(मयोभुवः)** सुखं भावुकाः **(बर्हिः)** उत्तमं गृहाश्रमम् **(सीदन्तु)** प्राप्नुवन्तु **(अस्रिधः)** अहिंस्राः॥८॥

अन्वयः-हे मनुष्या! यथाऽस्रिध इळा सरस्वती मही मयोभुवस्तिस्रो देवीर्बर्हिः सीदन्तु तथैव यूयमपि

सीदत॥८॥

भावार्थः-हे स्त्रीपुरुषा! यूयं विद्यां सुशिक्षितां वाचं भूमिराज्यं च सुखाय प्राप्नुत॥८॥

पदार्थः-हे मनुष्यो! जैसे **(अस्रिधः)** नहीं नाश करने वाली **(इळा)** प्रशंसित विद्या **(सरस्वती)** वाणी **(मही)** भूमि **(मयोभुवः)** सुख को कराने वाली **(तिस्रः)** तीन **(देवीः)** श्रेष्ठ गुणवती **(बर्हिः)** उत्तम गृहाश्रम को **(सीदन्तु)** प्राप्त हों, वैसे ही आप लोग भी प्राप्त होओ॥८॥

भावार्थः-हे स्त्री और पुरुषो! आप लोग विद्या उत्तम प्रकार शिक्षित वाणी और भूमि के राज्य को सुख के लिये प्राप्त हूजिये॥८॥

अथ राजप्रजाविषयमाह॥

अब राजप्रजाविषय को कहते हैं॥

शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना। यज्ञेयज्ञे न उदव॥९॥

शिवः। त्वष्टः। इह। आ। गहि। विऽभुः। पोषे। उत। त्मना। यज्ञेऽयज्ञे। नः। उत्। अव॥९॥

पदार्थः-**(शिवः)** मङ्गलकारी **(त्वष्टः)** सर्वदुःखछेत्तः **(इह)** अस्मिँस्थले **(आ) (गहि) (विभुः)** व्यापकः परमेश्वर इव **(पोषे)** पुष्यन्ति यस्मिँस्तस्मिन् **(उत) (त्मना)** आत्मना **(यज्ञेयज्ञे)** सङ्गन्तव्ये व्यवहारे **(नः)** अस्मान् **(उत्) (अव)** उत्कृष्टतया रक्ष॥९॥

अन्वयः-हे त्वष्टा राजन्निह पोषे विभुरिव शिवः सँस्त्मना यज्ञेयज्ञे आ गहि उत न उदव॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं परमेश्वरवद्वर्त्तित्वा सर्वेषां कल्याणं कुरुत॥९॥

पदार्थः-हे **(त्वष्टः)** सब दुःखों के नाश करने वाले राजन्! **(इह)** इस स्थल में **(पोषे)** कि जिसमें पुष्ट हों **(विभुः)** व्यापक परमेश्वर के सदृश **(शिवः)** मङ्गलकारी होते हुए **(त्मना)** आत्मा से **(यज्ञेयज्ञे)** मेल करने योग्य व्यवहार में **(आ, गहि)** प्राप्त होओ **(उत)** और **(नः)** हम लोगों की **(उत्, अव)** उत्तम प्रकार रक्षा करो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग परमेश्वर के सदृश वर्त्ताव करके सब के कल्याण को करो॥९॥

अथ विद्याग्रहणविषयमाह॥

अब विद्याग्रहणविषय को कहते हैं॥

यत्र वेत्थ वनस्पते देवानां गुह्या नामानि। तत्र हव्यानि गामय॥१०॥

यत्र। वेत्थ। वनस्पते। देवानाम्। गुह्या। नामानि। तत्र। हव्यानि। गमय॥१०॥

पदार्थः-**(यत्र)** अस्मिन् **(वेत्थ)** जानासि **(वनस्पते)** वनस्य पालक **(देवानाम्) (गुह्या)** गुप्तानि **(नामानि) (तत्र) (हव्यानि)** दातुमादातुमर्हाणि वस्तूनि **(गामय)** प्रापय। अत्र **तुजादीनामिति** दीर्घः॥१०॥

अन्वयः-हे वनस्पते! त्वं यत्र देवानां गुह्या नामानि वेत्थ तत्र हव्यानि गामय॥१०॥

भावार्थः-ये विदुषामन्तःस्थानि विद्याप्रभावेन जातानि नामानि जानन्ति ते पुष्कलं सुखं जनान् प्रापयन्ति॥१०॥

पदार्थः-हे **(वनस्पते)** वन के पालन करने वाले आप **(यत्र)** जिसमें **(देवानाम्)** विद्वानों के **(गुह्या)** गुप्त **(नामानि)** नाम **(वेत्थ)** जानते हैं **(तत्र)** वहाँ **(हव्यानि)** देने और लेने योग्य वस्तुओं को **(गामय)** पहुंचाइये॥१०॥

भावार्थः-जो विद्वानों के हृदयों में स्थित और विद्या के प्रभाव से उत्पन्न हुए नामों को जानते हैं, वे बहुत सुख मनुष्यों को प्राप्त कराते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः। स्वाहा देवेभ्यो हविः॥११॥२१॥

स्वाहा। अग्नये। वरुणाय। स्वाहा। इन्द्राय। मरुत्ऽभ्यः। स्वाहा। देवेभ्यः। हविः॥११॥

पदार्थः-**(स्वाहा)** सत्या वाक् **(अग्नये)** विद्युदादिविद्यायै **(वरुणाय)** श्रेष्ठाय **(स्वाहा)** सत्या क्रिया **(इन्द्राय)** ऐश्वर्याय **(मरुद्भ्यः)** मनुष्येभ्यः **(स्वाहा)** सत्क्रिया **(देवेभ्यः)** विद्वद्भ्यः **(हविः)** दातव्यवस्तु॥११॥

अन्वयः-हे मनुष्या! युष्माभिर्वरुणायाग्नये स्वाहेन्द्राय मरुद्भ्यः स्वाहा देवेभ्यो हविः स्वाहा प्रयोक्तव्या॥११॥

भावार्थः-मनुष्या विद्यासत्क्रियाभ्यामग्निविद्यां गृहीत्वा विदुषः सत्कृत्य मनुष्याणां हितं सततं कुर्वन्त्विति॥११॥

अत्र विद्वद्राजगृहाश्रमराजप्रजाविषयविद्याग्रहणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चमं सूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! आप लोगों को चाहिये कि **(वरुणाय)** श्रेष्ठ के और **(अग्नये)** बिजुली आदि की विद्या के लिये **(स्वाहा)** सत्य वाणी **(इन्द्राय)** ऐश्वर्य्य और **(मरुद्भ्यः)** मनुष्यों के लिये **(स्वाहा)** सत्य क्रिया तथा **(देवेभ्यः)** विद्वानों के लिये **(हविः)** देने योग्य वस्तु और **(स्वाहा)** श्रेष्ठ कर्म्म का प्रयोग करो॥११॥

भावार्थः-मनुष्य विद्या और श्रेष्ठ कर्म्म से अग्नि की विद्या को ग्रहण कर विद्वानों का सत्कार करके मनुष्यों के हित को निरन्तर करें॥११॥ इस सूक्त में विद्वान्, राजा, गृहाश्रम, राजप्रजाविषय और विद्याग्रहण का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पांचवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य षष्ठस्य सूक्तस्य वसुश्रुत आत्रेय ऋषिः। अग्निर्देवता। १, ८, ९ निचृत्पङ्क्तिः। २, ५ पङ्क्तिः। ७ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ४ स्वराड्बृहती। ६, १० भुरिग्बृहतीछन्दः। मध्यमः स्वरः॥

अथाग्निविषयमाह॥

अब दश ऋचा वाले छठे सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निविषय को कहते हैं॥

अ॒ग्निं तं म॑न्ये॒ यो वसु॒रस्तं॒ यं यन्ति॑ धे॒नव॑:।
अस्त॒मर्व॑न्त आ॒शवोऽस्तं॒ नित्या॑सो वा॒जिन॒ इषं॑ स्तो॒तृभ्य॒ आ भ॑र॥ १॥

अ॒ग्निम्। तम्। म॒न्ये॒। यः। वसुः॑। अस्त॑म्। यम्। यन्ति॑। धे॒नवः॑। अस्त॑म्। अर्व॑न्तः। आ॒शवः॑। अस्त॑म्। नित्या॑सः। वा॒जिनः॑। इष॑म्। स्तो॒तृऽभ्यः॑। आ। भ॒र॒॥ १॥

पदार्थः-(अग्निम्) (तम्) (मन्ये) (यः) (वसुः) सर्वत्र वस्ता **(अस्तम्)** प्रक्षिप्तं प्रेरितम् **(यम्) (यन्ति) (धेनवः)** गावः **(अस्तम्) (अर्वन्तः)** गच्छन्तः **(आशवः)** आशुगामिनः पदार्थाः **(अस्तम्) (नित्यासः)** अविनाशिनः **(वाजिनः)** वेगवन्तः **(इषम्)** अन्नम् **(स्तोतृभ्यः)** स्तावकेभ्यः **(आ) (भर)** धर॥१॥

अन्वयः-हे विद्वन्! यो वसुर्यमस्तमग्निं धेनवो यमस्तमर्वन्त आशवो नित्यासो वाजिनो यमस्तं यन्ति तमहं मन्ये तद्विद्यया त्वं स्तोतृभ्य इषमा भर॥१॥

भावार्थः-हे मनुष्या! यदि भवन्तो विद्युदादिरूपं सर्वत्राऽभिव्याप्तमग्निं युक्त्या चालयेयुस्तर्ह्ययं स्वयं वेगवान् भूत्वाऽन्यान्यपि सद्यो गमयति॥१॥

पदार्थः-हे विद्वन्! **(यः)** जो **(वसुः)** सब स्थानों में रहने वाला **(यम्)** जिस **(अस्तम्)** फेंके अर्थात् काम में लाये गये **(अग्निम्)** अग्नि को और **(धेनवः)** गौएँ जिस **(अस्तम्)** प्रेरणा किये गये को तथा **(अर्वन्तः)** जाते हुए और **(आशवः)** शीघ्र चलने वाले पदार्थ और **(नित्यासः)** नहीं नाश होने वाले **(वाजिनः)** वेग से युक्त पदार्थ जिस **(अस्तम्)** प्रेरणा किये गये को **(यन्ति)** प्राप्त होते हैं **(तम्)** उसको मैं **(मन्ये)** मानता हूँ, उसकी विद्या से आप **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(इषम्)** अन्न को **(आ, भर)** अच्छे प्रकार धारण कीजिये॥१॥

भावार्थः-हे मनुष्यो! यदि आप बिजुली आदि रूपवान् और सब कहीं अभिव्याप्त अग्नि को युक्ति से चलावें तो यह स्वयं वेगवान् होकर औरों को भी शीघ्र चलाता है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सो अ॒ग्निर्यो वसु॑र्गृ॒णे सं यमा॒यन्ति॑ धे॒नव॑:।

समर्व॑न्तो रघु॒द्रुव॒: सं सु॑जा॒तास॑: सू॒रय॒ इषं॑ स्तो॒तृभ्य॒ आ भ॑र॥ २॥

स:। अ॒ग्नि:। य:। वसु॑:। गृ॒णे। सम्। यम्। आ॒ऽय॒न्ति॑। धे॒नव॑:। सम्। अर्व॑न्त:। र॒घु॒ऽद्रुव॑:। सम्। सु॒ऽजा॒तास॑:। सू॒रय॑:। इष॑म्। स्तो॒तृऽभ्य॑:। आ। भ॒र॒॥ २॥

पदार्थ:-(स:) (अग्नि:) (य:) (वसु:) द्रव्यस्वरूप: **(गृणे)** स्तौमि **(सम्) (यम्) (आयन्ति)** आगच्छन्ति **(धेनव:)** वाच: **(सम्) (अर्वन्त:)** वेगवन्त: **(रघुद्रुव:)** ये लघु द्रवन्ति ते **(सम्) (सुजातास:)** सम्यक् प्रसिद्धा: **(सूरय:)** विद्वांस: **(इषम्) (स्तोतृभ्य:)** अध्यापकेभ्य: **(आ) (भर)**॥ २॥

अन्वय:-हे विद्वन्! यो वसुर्यं धेनव: समायन्ति यं रघुद्रुवोऽर्वन्त: समायन्ति यं सुजातास: सूरय: समायन्ति यमहं गृणे सोऽग्निस्तत्प्रयोगेन स्तोतृभ्य इषमा भर॥ २॥

भावार्थ:-हे मनुष्या! भवन्तोऽग्न्यादिपदार्थविज्ञानेन पण्डिता भूत्वाऽध्यापकेभ्य ऐश्वर्य्यमुन्नयन्तु॥ २॥

पदार्थ:-हे विद्वन्! **(य:)** जो **(वसु:)** धनरूप **(यम्)** जिसको **(धेनव:)** वाणियाँ **(सम्, आयन्ति)** अच्छे प्रकार प्राप्त होती हैं और जिसको **(रघुद्रुव:)** थोड़ा दौड़ने वाले **(अर्वन्त:)** वेगवान् पदार्थ **(सम्)** अच्छे प्रकार प्राप्त होते हैं और जिसको **(सुजातास:)** उत्तम प्रकार प्रसिद्ध **(सूरय:)** विद्वान् जन **(सम्)** अच्छे प्रकार प्राप्त होते हैं और जिसकी मैं **(गृणे)** प्रशंसा करता हूं **(स:)** वह **(अग्नि:)** अग्नि है, उसके प्रयोग से **(स्तोतृभ्य:)** अध्यापकों के लिये **(इषम्)** अन्न को **(आ, भर)** सब प्रकार धारण कीजिये॥ २॥

भावार्थ:-हे मनुष्यो! आप लोग अग्नि आदि पदार्थ के विज्ञान से चतुर होकर अध्यापकों के लिये ऐश्वर्य्य की प्राप्ति कराइये॥ २॥

पुनरग्निविषयमाह

फिर अग्निविषय को कहते हैं॥

अ॒ग्निर्हि वा॒जिनं॑ वि॒शे ददा॑ति वि॒श्वच॑र्षणि:।

अ॒ग्नी रा॒ये स्वा॒भुवं॒ स प्री॒तो या॑ति॒ वार्य॑मिषं॑ स्तो॒तृभ्य॒ आ भ॑र॥ ३॥

अ॒ग्नि:। हि। वा॒जिन॑म्। वि॒शे। ददा॑ति। वि॒श्वऽच॑र्षणि:। अ॒ग्नि:। रा॒ये। सु॒ऽआ॒भुव॑म्। स:। प्री॒त:। या॒ति॒। वार्य॑म्। इष॑म्। स्तो॒तृऽभ्य॑:। आ। भ॒र॒॥ ३॥

पदार्थ:-(अग्नि:) पावक: **(हि)** यत: **(वाजिनम्)** बहुवेगवन्तम् **(विशे)** प्रजायै **(ददाति) (विश्वचर्षणि:)** विश्वप्रकाशक: **(अग्नि:) (राये)** धनाय **(स्वाभुवम्)** य: स्वयमाभवति तम् **(स:) (प्रीत:)** कमित: **(याति) (वार्यम्)** वरणीयम् **(इषम्)** अन्नादिकम् **(स्तोतृभ्य:) (आ) (भर)**॥ ३॥

अन्वय:-हे विद्वन्! यो विश्वचर्षणिरग्निर्हि विशो वाजिनं ददाति योऽग्नी राये स्वाभुवं याति तद्विद्यया स: प्रीत: स्तोतृभ्यो वार्यमिषमा भर॥ ३॥

भावार्थः-हे मनुष्या! अग्निरेव सुसाधितः सन् सुखप्रदो भवति येन भवन्त ऐश्वर्यमुन्नयन्तु॥३॥

पदार्थः-हे विद्वन्! जो **(विश्वचर्षणिः)** संसार का प्रकाश करने वाला **(अग्निः)** अग्नि **(हि)** जिससे **(विशे)** प्रजा के लिये **(वाजिनम्)** बहुत वेग वाले को **(ददाति)** देता है और जो **(अग्निः)** अग्नि **(राये)** धन के लिये **(स्वाभुवम्)** स्वयं उत्पन्न होने वाले को **(याति)** प्राप्त होता है, उस विद्या से **(सः)** वह आप **(प्रीतः)** कामना किये गये **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(वार्यम्)** स्वीकार करने योग्य **(इषम्)** अन्न आदि का **(आ, भर)** धारण कीजिये॥३॥

भावार्थः-हे मनुष्यो! अग्नि ही उत्तम प्रकार साधित किया गया सुख देने वाला होता है, जिससे आप लोग ऐश्वर्य की वृद्धि करो॥३॥

अथाग्निविद्याविद्विद्वद्विषयमाह॥

अब अग्निविद्या के जानने वाले विद्वान् के विषय को कहते हैं॥

आ ते॑ अग्न इधीमहि द्यु॒मन्तं॑ देव॒ाज॑रम्।

यद्ध॒ स्या ते॒ पनी॑यसी स॒मिद्दी॒दय॑ति॒ द्यवी॑षं॑ स्तो॒तृभ्य॒ आ भ॑र॥४॥

आ। ते॒। अ॒ग्ने॒। इ॒धी॒म॒हि॒। द्यु॒ऽमन्त॑म्। दे॒व॒। अ॒जर॑म्। यत्। ह॒। स्या। ते॒। पनी॑यसी। स॒म्ऽइत्। दी॒दय॑ति। द्यवि॑। इष॑म्। स्तो॒तृऽभ्यः॑। आ। भ॒र॒॥४॥

पदार्थः-**(आ)** **(ते)** तव **(अग्ने)** विद्वन् **(इधीमहि)** प्रदीपयेम **(द्युमन्तम्)** दीप्तिमन्तम् **(देव)** सुखप्रदातः **(अजरम्)** जरारहितम् **(यत्)** या **(ह)** किल **(स्या)** सा **(ते)** तव **(पनीयसी)** अतीव प्रशंसनीया **(समित्)** प्रदीप्ता **(दीदयति)** प्रदीप्यते **(द्यवि)** प्रकाशे **(इषम्)** अन्नादिकम् **(स्तोतृभ्यः)** **(आ)** **(भर)**॥४॥

अन्वयः-हे देवाऽग्ने! त्वं द्युमन्तमजरमग्निं प्रदीपयसि यद्या ते पनीयसी समित् स्या ते द्यवि दीदयति येन स्तोतृभ्य इषं ह वयमेधीमहि तया स्तोतृभ्य इषं त्वमा भर॥४॥

भावार्थः-हे विद्वन्! यामग्न्यादिविद्यां भवाञ्जानाति यया भवतः प्रशंसा जायते तामस्मान् बोधय॥४॥

पदार्थः-हे **(देव)** सुख के देने वाले **(अग्ने)** विद्वन् आप **(द्युमन्तम्)** प्रकाशित **(अजरम्)** जरावस्था से रहित अग्नि को प्रज्वलित करते हो और **(यत्)** जो **(ते)** आपकी **(पनीयसी)** अतीव प्रशंसा करने योग्य **(समित्)** समिध् है **(स्या)** वह **(ते)** आपके **(द्यवि)** प्रकाश में **(दीदयति)** प्रज्वलित की जाती है और जिससे **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(इषम्)** अन्न आदि को **(ह)** निश्चय से हम लोग **(आ, इधीमहि)** प्रकाशित करें, उससे स्तुति करने वालों के लिये अन्न आदि को आप **(आ, भर)** अच्छे प्रकार धारण कीजिये॥४॥

भावार्थः-हे विद्वन्! जिस अग्नि आदि की विद्या को आप जानते हैं और जिस विद्या से आपकी प्रशंसा होती है, उसका हम लोगों को बोध दीजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ ते॑ अग्न ऋ॒चा ह॒विः शु॒क्रस्य शोचिषस्पते।

सु॒श्च॒न्द्र॒ दस्म॒ विश्प॑ते॒ हव्य॑वा॒ट् तुभ्यं॑ हूयत॒ इष॑ꣳ स्तो॒तृभ्य॒ आ भ॑र॥५॥२२॥

आ। ते॒। अ॒ग्ने॒। ऋ॒चा। ह॒विः। शु॒क्रस्य। शो॒चि॒षः॒। पते॒। सु॒ऽच॒न्द्र॒। दस्म॑। विश्प॑ते। हव्य॑ऽवाट्। तुभ्य॑म्। हू॒य॒ते॒। इष॑म्। स्तो॒तृऽभ्यः॑। आ। भ॒र॒॥५॥

पदार्थः-(आ) समन्तात् **(ते)** तव **(अग्ने)** विद्वन् **(ऋचा)** प्रशंसया **(हविः)** होतव्यम् **(शुक्रस्य)** शुद्धस्य **(शोचिषः)** प्रकाशस्य **(पते)** स्वामिन् **(सुश्चन्द्र)** शोभनं चन्द्रं हिरण्यं यस्य तत्सम्बुद्धौ **(दस्म)** दुःखोपक्षयितः **(विश्पते)** प्रजापालक **(हव्यवाट्)** यो हव्यं दातव्यं वहति प्राप्नोति **(तुभ्यम्)** **(हूयते)** दीयते **(इषम्)** अन्नम् **(स्तोतृभ्यः)** **(आ)** **(भर)**॥५॥

अन्वयः-हे शोचिषस्पते सुश्चन्द्र दस्म विश्पतेऽग्ने राजञ्छुक्रस्य ते ऋचा हविराहूयते। हे हव्यवाट्! तुभ्यं सुखं दीयते स त्वं स्तोतृभ्य इषमा भर॥५॥

भावार्थः-ये विद्वांसोऽग्न्यादिभ्यः कार्य्याणि साध्नुवन्ति ते सिद्धाकामा जायन्ते॥५॥

पदार्थः-हे **(शोचिषः, पते)** प्रकाश के स्वामिन् **(सुश्चन्द्र)** अच्छे सुवर्ण से युक्त **(दस्म)** दुःख के नाश करने वाले **(विश्पते)** प्रजाओं के पालक **(अग्ने)** विद्वान् राजन्! **(शुक्रस्य)** शुद्ध **(ते)** आपकी **(ऋचा)** प्रशंसा से **(हविः)** देने योग्य पदार्थ **(आ)** सब प्रकार से **(हूयते)** दिया जाता है और हे **(हव्यवाट्)** देने योग्य वस्तु के देने वाले! **(तुभ्यम्)** आपके लिये सुख दिया जाता है, वह आप **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(इषम्)** अन्न को **(आ, भर)** अच्छे प्रकार धारण कीजिये॥५॥

भावार्थः-जो विद्वान् लोग अग्नि आदिकों से कार्य्यों को सिद्ध करते हैं, उनके काम सिद्ध होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्रो त्ये अ॒ग्नयो॒ऽग्निषु॒ विश्वं॑ पुष्यन्ति॒ वार्य॑म्।

ते हि॑न्वि॒रे॒ त इ॑न्वि॒रे॒ त इ॒षण्यन्त्यानु॒षगिषं॑ स्तो॒तृभ्य॒ आ भ॑र॥६॥

प्रो इति॑। त्ये। अ॒ग्नयः॑। अ॒ग्निषु॑। विश्व॑म्। पु॒ष्य॒न्ति॒। वार्य॑म्। ते। हि॒न्वि॒रे॒। ते। इ॒न्वि॒रे॒। ते। इ॒ष॒ण्य॒न्ति॒। आ॒नु॒षक्। इष॑म्। स्तो॒तृऽभ्यः॑। आ। भ॒र॒॥६॥

पदार्थः-(प्रो) (त्ये) ते **(अग्नयः)** पावकाः **(अग्निषु)** अग्न्यादिपदार्थेषु **(विश्वम्)** सर्वं जगत् **(पुष्यन्ति) (वार्यम्)** वरणीयम् **(ते) (हिन्विरे)** वर्द्धयन्ति **(ते) (इन्विरे)** व्याप्नुवन्ति **(ते) (इषण्यन्ति)** अन्नादिकमिच्छन्ति **(आनुषक्)** आनुकूल्ये **(इषम्)** विज्ञानम् **(स्तोतृभ्यः) (आ) (भर)**॥६॥

अन्वयः-हे मनुष्या! येऽग्नयोऽग्निषु वर्त्तन्ते त्ये वार्यं विश्वं प्रो पुष्यन्ति ते वार्यं हिन्विरे त इन्विरे ते साधकाः सन्ति तान् विदित्वा य आनुषगिषण्यन्ति तद्विद्यया स्तोतृभ्यस्त्वमिषमा भर॥६॥

भावार्थः-हे मनुष्या! ये पृथिव्यादिष्वग्न्यादयः पदार्थाः सन्ति तान् विदित्वा पुनरीश्वरं विजानीत॥६॥

पदार्थः-हे मनुष्यो! जो **(अग्नयः)** अग्नि **(अग्निषु)** अग्नि आदि पदार्थों में वर्त्तमान हैं **(त्ये)** वे **(वार्यम्)** स्वीकार करने योग्य **(विश्वम्)** सब जगत् को **(प्रो, पुष्यन्ति)** पुष्ट करते हैं **(ते)** वे स्वीकार करने योग्य पदार्थ की **(हिन्विरे)** वृद्धि कराते हैं **(ते)** वे **(इन्विरे)** व्याप्त होते हैं और **(ते)** वे कार्य्यों के सिद्ध करने वाले हैं, उनको जान के जो **(आनुषक्)** अनुकूलता से **(इषण्यन्ति)** अन्न आदि की इच्छा करते हैं, उनकी विद्या से **(स्तोतृभ्यः)** स्तुति करने वालों के लिये आप **(इषम्)** विज्ञान को **(आ, भर)** धारण कीजिये॥६॥

भावार्थः-हे मनुष्यो! जो पृथिवी आदि में अग्नि आदि पदार्थ हैं, उनको जान के फिर ईश्वर को जानो॥६॥

पुनरग्निविद्योपदेशमाह॥

फिर अग्निविद्या के उपदेश को कहते हैं॥

तव॒ त्ये अ॑ग्ने अ॒र्चयो॒ महि॑ व्राधन्त वा॒जिन॑:।

ये पत्वा॑भिः श॒फाना॑ व्र॒जा भु॒रन्त॒ गोना॒मिष॑ स्तो॒तृभ्य॒ आ भ॑र॥७॥

तव॑। त्ये। अ॒ग्ने॒। अ॒र्चय॑:। महि॑। व्रा॒ध॒न्त॒। वा॒जिन॑:। ये। पत्वा॑ऽभिः। श॒फना॑म्। व्र॒जा। भु॒रन्त॑। गोना॑म्। इष॑म्। स्तो॒तृऽभ्य॑:। आ। भ॒र॒॥७॥

पदार्थः-(तव) (त्ये) ते **(अग्ने)** विद्वन् **(अर्चयः)** दीप्तयः **(महि)** महान्तः **(व्राधन्त)** वर्द्धन्ते **(वाजिनः)** वेगवन्तः **(ये) (पत्वभिः)** गमनैः **(शफानाम्)** खुराणाम् **(व्रजा)** वेगान् **(भुरन्त)** धरन्ति **(गोनाम्)** गवाम् **(इषम्) (स्तोतृभ्यः) (आ) (भर)**॥७॥

अन्वयः-हे अग्ने! ये गोनां शफानां पत्वभिर्व्रजा भुरन्त ये मह्यर्चयो वाजिनो व्राधन्त त्ये तव कार्यसाधकाः सन्ति तद्विज्ञानेन स्तोतृभ्य इषमा भर॥७॥

भावार्थः-यथाश्वा गावश्च पद्भिर्धावन्ति तथैवाग्नेर्ज्योतींषि सद्यो गच्छन्ति येऽग्न्यादीन् सम्प्रयोक्तुं जानन्ति ते सर्वतो वर्द्धन्ते॥७॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(ये)** जो **(गोनाम्)** गौओं के **(शफानाम्)** खुरों के **(पत्वभिः)** गमनों से **(व्रजा)** वेगों को **(भुरन्त)** धारण करते हैं और **[**जो**] (महि)** बड़े **(अर्चयः)** तेज **(वाजिनः)** वेग वाले

(व्राधन्त) बढ़ते हैं **(त्ये)** वे **(तव)** आपके कार्य सिद्ध करने वाले हैं, उनके विज्ञान से **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(इषम्)** अन्न को **(आ, भर)** अच्छे प्रकार धारण कीजिये॥७॥

भावार्थः-जैसे घोड़े और गाएँ पैरों से दौड़ती हैं, वैसे ही अग्नि के तेज शीघ्र चलते हैं और जो अग्न्यादिकों के संप्रयोग करने को जानते हैं, उन की सब प्रकार वृद्धि होती है॥७॥

अथ राजविषयमाह॥

अब राजविषय को अगले मन्त्र में कहते हैं॥

नवा॑ नो अग्न॒ आ भ॑र स्तो॒तृभ्य॑: सुक्षि॒तीरिष॑:।

ते स्या॑म॒ य आ॑नृ॒चुस्त्वादू॑तासो॒ दमे॑दम॒ इष॑ स्तो॒तृभ्य॒ आ भ॑र॥८॥

नवा॑:। न॒:। अ॒ग्ने॒। आ। भ॒र॒। स्तो॒तृऽभ्य॑:। सु॒ऽक्षि॒ती:। इष॑:। ते। स्या॒म॒। ये। आ॒नृ॒चु:। त्वाऽदू॑तास:। दमे॑ऽदमे। इष॑म्। स्तो॒तृऽभ्य॑:। आ। भ॒र॒॥८॥

पदार्थः-**(नवाः)** नवीनाः **(नः)** अस्मभ्यम् **(अग्ने)** राजन् **(आ)** **(भर)** **(स्तोतृभ्यः)** धार्मिकेभ्यो विद्वद्भ्यः **(सुक्षितीः)** शोभना क्षितयः पृथिव्यो मनुष्या वा यासु ताः **(इषः)** अन्नाद्याः **(ते)** **(स्याम)** **(ये)** **(आनृचुः)** अर्चामः **(त्वादूतासः)** त्वं दूतो येषां ते **(दमेदमे)** गृहेगृहे **(इषम्)** उत्तमामिच्छाम् **(स्तोतृभ्यः)** सुपात्रेभ्यो विपश्चिद्भ्यः **(आ)** **(भर)**॥८॥

अन्वयः-हे अग्ने! ये त्वादूतासो वयं त्वामानृचुस्तेभ्य नः स्तोतृभ्यस्त्वं सुक्षितीर्नवा इष आ भर येन ते वयमुत्साहिताः स्याम त्वं स्तोतृभ्यो दमेदम इषमा भर॥८॥

भावार्थः-स एव राजा श्रेयान् भवति य उत्तमान् भृत्यानतुलमैश्वर्यं सर्वसुखाय दधाति दूतचारैः सर्वस्य राजस्य सर्वं समाचारं विदित्वा यथायोग्यं प्रबन्धं करोति॥८॥

पदार्थः-हे **(अग्ने)** राजन्! **(ये)** जो **(त्वादूतासः)** त्वादूतास अर्थात् आप दूत जिनके ऐसे हम लोग आपका **(आनृचुः)** सत्कार करते हैं उन **(नः)** हम **(स्तोतृभ्यः)** धार्मिक विद्वानों के लिये आप **(सुक्षितीः)** सुन्दर पृथिवी वा मनुष्य विद्यमान जिनमें ऐसे **(नवाः)** नवीन **(इषः)** अन्न आदि को **(आ, भर)** धारण कीजिये जिससे **(ते)** वे हम लोग उत्साहित **(स्याम)** होवें और आप **(स्तोतृभ्यः)** सुपात्र अर्थात् सज्जन विद्वानों के लिये **(दमेदमे)** घर-घर में **(इषम्)** उत्तम इच्छा को **(आ, भर)** धारण कीजिये॥८॥

भावार्थः-वही राजा प्रशंसनीय होता है, जो [उत्तम] भृत्य और अतुल ऐश्वर्य्य को सब के सुख के लिये धारण करता है और दूत और चारों अर्थात् गुप्त संदेश देने वालों से सब राज्य का समाचार जान के यथायोग्य प्रबन्ध करता है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒भे सु॑श्चन्द्र स॒र्पिषो॒ दर्वी॑ श्रीणीष आ॒सनि॑।

उ॒तो न॒ उत्पु॑पूर्या उ॒क्थेषु॑ शवसस्पत॒ इषं॑ स्तो॒तृभ्य॒ आ भ॑र॥ ९॥

उ॒भे इति॑। सु॒ऽच॒न्द्र॒। स॒र्पिषः॑। दर्वी॑ इति॑। श्री॒णी॒षे॒। आ॒सनि॑। उ॒तो इति॑। न॒ः॑। उत्। पु॒पू॒र्याः॒। उ॒क्थेषु॑। श॒व॒सः॒। प॒ते॒। इष॑म्। स्तो॒तृऽभ्यः॑। आ। भ॒र॒॥ ९॥

पदार्थः-(उभे) (सुश्चन्द्र) सुष्ठुसुवर्णाद्यैश्वर्य्य **(सर्पिषः)** घृतादेः **(दर्वी)** दृणाति याभ्यां ते पाकसाधने **(श्रीणीषे)** पचसि **(आसनि)** आस्ये **(उतो) (नः)** अस्मान् **(उत्) (पुपूर्याः)** अलङ्कुर्याः पालये: **(उक्थेषु)** प्रशंसितेषु धर्म्येषु कर्मसु **(शवसः, पते)** बलस्य सैन्यस्य स्वामिन् **(इषम्) (स्तोतृभ्यः)** अध्यापकाध्येतृभ्य: **(आ) (भर)**॥ ९॥

अन्वयः-हे सुश्चन्द्र शवसस्पते! यत्स्त्वमुभे दर्वी घटयित्वाऽऽसनि सर्पिषः श्रीणीष उतो तेन नोऽस्मानुत्पुपूर्याः स त्वमुक्थेषु स्तोतृभ्य इषमा भर॥ ९॥

भावार्थः-यो राजा सैन्यस्य भोजनप्रबन्धमुत्तममारोग्याय वैद्यान् रक्षति स एव प्रशंसितो भूत्वा राज्यं वर्धयति॥ ९॥

पदार्थः-हे **(सुश्चन्द्र)** उत्तम सुवर्ण आदि ऐश्वर्य्य से युक्त **(शवसः, पते)** सेना के स्वामी! जो आप **(उभे)** दोनों **(दर्वी)** पाक करने के साधानों अर्थात् चम्मचों को इकट्ठे करके **(आसनि)** मुख में अर्थात् अग्निमुख में **(सर्पिषः)** घृत आदि का **(श्रीणीषे)** पाक करते हो **(उतो)** और उससे **(नः)** हम लोगों को **(उत्, पुपूर्याः)** उत्तमता से शोभित करें वा पालें वह आप **(उक्थेषु)** प्रशंसित धर्म्मसम्बन्धी कर्म्मों में **(स्तोतृभ्यः)** पढ़ाने और पढ़ने वालों के लिये **(इषम्)** अन्न का **(आ, भर)** धारण करें॥ ९॥

भावार्थः-जो राजा सेना के भोजन के उत्तम प्रबन्ध को आरोग्य के लिये वैद्यों को रखता है, वही प्रशंसित होकर राज्य बढ़ाता है॥ ९॥

पुना राजविषयमाह॥

फिर राजविषय को कहते हैं॥

ए॒वाँ अ॒ग्निम॑जुर्यमु॒र्गीर्भि॑र्य॒ज्ञेभि॑रानु॒षक्।

दध॑दु॒स्मे सु॒वीर्य॑मु॒त त्यदा॒श्वश्व्य॒मिषं॑ स्तो॒तृभ्य॒ आ भ॑र॥ १०॥ २३॥

ए॒व। अ॒ग्निम्। अ॒जु॒र्य॒मुः॒। गीः॒ऽभिः॒। य॒ज्ञेभि॑ः। आ॒नु॒षक्। दध॑त्। अ॒स्मे इति॑। सु॒ऽवीर्य॑म्। उ॒त। त्यत्। आ॒शु॒ऽअश्व्य॑म्। इष॑म्। स्तो॒तृऽभ्यः॑। आ। भ॒र॒॥ १०॥

पदार्थः-(एव) (अग्निम्) पावकम् **(अजुर्यमुः)** प्रक्षिपेयुर्नियच्छेयुश्च **(गीर्भिः)** वाग्भिः **(यज्ञेभिः)** सङ्गतैः कर्मभिः **(आनुषक्)** आनुकूल्येन **(दधत्)** दधाति **(अस्मे)** अस्मासु **(सुवीर्यम्)** सुष्ठुपराक्रमम् **(उत)**

(त्यत्) ताम् **(आश्वश्व्यम्)** आशवो वेगादयो गुणा अश्वा इव यस्मिँस्तम् **(इषम्)** **(स्तोतृभ्यः)** **(आ)** **(भर)**॥१०॥

अन्वयः-हे शवसस्पते! ये गीर्भिर्यज्ञेभिराश्वश्व्यं सुवीर्यमग्निमानुषगजुर्यमुस्तेष्वेवाऽस्मे भवान् सुवीर्यं दधदुतापि त्यदिषं स्तोतृभ्य आ भर॥१०॥

भावार्थः-हे राजन्! य अग्न्यादिविद्यां विदित्वाऽनेकानि विमानादीनि यानानि निर्मिमते तेभ्योऽन्नादिकं दत्त्वा सततं सत्कुर्या इति॥१०॥

अत्राग्निविद्वद्राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्ठं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-हे सेना के स्वामिन्! जो **(गीर्भिः)** वाणियों और **(यज्ञेभिः)** संगत कर्म्मों से **(आश्वश्व्यम्)** घोड़ों के सदृश वेग आदि गुणों से युक्त **(सुवीर्यम्)** उत्तम पराक्रम वाले **(अग्निम्)** अग्नि को **(आनुषक्)** अनुकूलता से **(अजुर्यमुः)** प्रेरणा दें और नियमयुक्त करें **(एव)** उन्हीं में **(अस्मे)** हम लोगों के निमित्त आप उत्तम पराक्रमयुक्त व्यवहार को **(दधत्)** धारण करते हैं **(उत)** और भी **(त्यत्)** उस **(इषम्)** इष्ट व्यवहार को **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(आ, भर)** अच्छे प्रकार धारण कीजिये॥१०॥

भावार्थः-हे राजन्! जो अग्नि आदि की विद्या को जान के अनेक विमान आदि वाहनों को बनाते हैं, उनके लिये अन्न आदि देकर निरन्तर सत्कार कीजिये॥१०॥

इस सूक्त में अग्नि, विद्वान् और राजा के गुणवर्णन करने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छठा सूक्त और तेईसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य सप्तमस्य सूक्तस्येष आत्रेय ऋषिः। अग्निर्देवता। १, ९ विराडनुष्टुप्। २ अनुष्टुप्। ३, ४, ५, ८, निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ६, ७ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। १० निचृद् बृहती छन्दः। मध्यमः स्वरः॥

अथ मित्रभावमाह॥

अब दश ऋचा वाले सातवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मित्रता को कहते हैं॥

सखा॑यः॒ सं वः॑ स॒म्यञ्च॒मिषं॒ स्तोमं॑ चा॒ग्नये॑।
वर्षि॑ष्ठाय क्षिती॒नामू॒र्जो नप्त्रे॒ सह॑स्वते॥ १॥

सखा॑यः। सम्। व॒रः। स॒म्यञ्च॑म्। इष॑म्। स्तोम॑म्। च॒। अ॒ग्नये॑। वर्षि॑ष्ठाय। क्षि॒ती॒नाम्। ऊ॒र्जः। नप्त्रे॑। सह॑स्वते॥ १॥

पदार्थः-(सखायः) सुहृदः सन्तः **(सम्)** **(वः)** युष्मभ्यम् **(सम्यञ्चम्)** समीचीनम् **(इषम्)** अन्नादिकम् **(स्तोमम्)** प्रशंसाम् **(च)** **(अग्नये)** **(वर्षिष्ठाय)** अतिशयेन वृष्टिकराय **(क्षितीनाम्)** मनुष्याणाम् **(ऊर्जः)** पराक्रमयुक्तस्य **(नप्त्रे)** नप्त्र इव वर्त्तमानाय **(सहस्वते)** सहो बलं विद्यते यस्मिँस्तस्मै॥ १॥

अन्वयः-हे सखायो भवन्तो ये क्षितीनां वो वर्षिष्ठायोर्जो नप्त्रे सहस्वतेऽग्नये सम्यञ्चं स्तोममिषं च सन् दधति तान् सदा सत्कुर्वन्तु॥ १॥

भावार्थः-हे मनुष्या! इह संसारे भवन्तो मित्रभावेन वर्त्तित्वा मनुष्यादिप्रजाहितायाग्न्यादिविद्यां लब्ध्वान्येभ्यः प्रयच्छन्तु॥ १॥

पदार्थः-हे **(सखायः)** मित्र हुए आप लोग जो **(क्षितीनाम्)** मनुष्यों के बीच **(वः)** आप लोगों के लिये **(वर्षिष्ठाय)** अत्यन्त वृष्टि करने वाले के लिये और **(ऊर्जः)** पराक्रम युक्त के **(नप्त्रे)** नाती के सदृश वर्त्तमान **(सहस्वते)** बलयुक्त **(अग्नये)** अग्नि के लिये **(सम्यञ्चम्)** श्रेष्ठ **(स्तोमम्)** प्रशंसा और **(इषम्)** अन्न आदि को **(च)** भी **(सम्)** अच्छे प्रकार धारण करते हैं, उनका सदा सत्कार करो॥ १॥

भावार्थः-हे मनुष्यो! इस संसार में आप लोग मित्रभाव से वर्ताव करके मनुष्य आदि प्रजा के हित के लिये अग्नि आदि की विद्या को प्राप्त होके अन्य जनों के लिये शिक्षा दीजिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

कुत्रा॑ चि॒द्यस्य॒ समृ॑तौ र॒ण्वा नरो॑ नृ॒षद॑ने।
अर्ह॑न्तश्चि॒द्यमि॑न्धते संजन॒यन्ति॑ जन्त॒वः॥ २॥

कुत्र॑। चि॒त्। यस्य॑। सम्ऽऋ॑तौ। र॒ण्वाः। नरः॑। नृ॒ऽसद॑ने। अर्ह॑न्तः। चि॒त्। यम्। इ॒न्ध॒ते॒। सम्ऽज॒न॒यन्ति॑। ज॒न्त॒वः॥ २॥

पदार्थः-(कुत्रा) कस्मिन्। अत्र **ऋचि तुनुघे**ति दीर्घः। **(चित्) (यस्य) (समृतौ)** सम्यग् यथार्थबोधयुक्तायां प्रज्ञायाम् **(रण्वाः)** रममाणाः **(नरः)** नायकाः **(नृषदने)** नृणां स्थाने **(अर्हन्तः)** सत्कुर्वन्तः **(चित्) (यम्) (इन्धते)** प्रकाशयन्ति **(सञ्जनयन्ति) (जन्तवः)** जीवाः॥२॥

अन्वयः-हे नरो ये जन्तवो यस्य समृतौ रण्वा नृषदने चिदर्हन्तो यं समिन्धते सञ्जनयन्ति ते चित्कुत्रापि तिरस्कारं नाप्नुवन्ति॥२॥

भावार्थः-ये जीवाः सर्वेषां मनुष्याणां हिते वर्त्तमाना यथाशक्ति परोपकारं कुर्वन्ति ते योग्याः सन्तिः॥२॥

पदार्थः-हे **(नरः)** नायक अर्थात् कार्य्यों में अग्रगामी मुख्यजनो! जो **(जन्तवः)** जीव **(यस्य)** जिसकी **(समृतौ)** अच्छे प्रकार यथार्थ बोध से युक्त बुद्धि में **(रण्वाः)** रमण करते और **(नृषदने)** मनुष्यों के स्थान में **(चित्)** भी **(अर्हन्तः)** सत्कार करते हुए **(यम्)** जिसको **(इन्धते)** **[**अच्छे प्रकार**]** प्रकाशित कराते और **(सञ्जनयन्ति)** उत्तम प्रकार उत्पन्न कराते हैं, वे **(चित्)** भी **(कुत्रा)** किसी में अनादर को नहीं प्राप्त होते हैं॥२॥

भावार्थः-जो जीव सब मनुष्यों के हित में वर्त्तमान हुए यथाशक्ति परोपकार करते हैं, वे योग्य हैं॥२॥

अथ विद्वद्विषयमाह॥

अब विद्वान् के विषय को कहते हैं॥

सं यदि॒षो वना॑महे॒ सं ह॒व्या मानु॑षाणाम्।

उ॒त द्यु॒म्नस्य॒ शव॑स ऋ॒तस्य॑ र॒श्मिमा द॑दे॥३॥

सम्। यत्। इ॒षः। वना॑महे। सम्। ह॒व्या। मानु॑षाणाम्। उ॒त। द्यु॒म्नस्य॑। शव॑सा। ऋ॒तस्य॑। र॒श्मिम्। आ। द॒दे॒॥३॥

पदार्थः-(सम्) (यत्) यथा **(इषः)** अन्नाद्याः सामग्रीः **(वनामहे)** सम्भजामः **(सम्) (हव्या)** दातुमादातुमर्हाः **(मानुषाणाम्)** मनुष्याणाम् **(उत) (द्युम्नस्य)** धनस्य यशसो वा **(शवसा) (ऋतस्य)** सत्यस्य **(रश्मिम्)** प्रकाशम् **(आ) (ददे)**॥३॥

अन्वयः-हे मनुष्या! मानुषाणां द्युम्नस्यर्तस्य शवसा यद्धव्या इषो वयं सं वनामहे। उत रश्मिं समा ददे तथा यूयमपि कुरुत॥३॥

भावार्थः-अत्रोपमालङ्कारः। यदि विद्वांसः पक्षपातं विहाय यथायोग्यं व्यवहारं कृत्वा मनुष्यात्मसु विद्याप्रकाशं सन्दध्युस्तर्हि सर्वे योग्या जायन्ते॥३॥

पदार्थः-हे मनुष्यो! **(मानुषाणाम्)** मनुष्यों के बीच **(द्युम्नस्य)** धन वा यश तथा **(ऋतस्य)** सत्य का **(शवसा)** सेना से **(यत्)** जैसे **(हव्या)** देने और लेने योग्य **(इषः)** अन्न आदि सामग्रियों का हम लोग

(सम्, वनामहे) अच्छे प्रकार सेवन करें **(उत)** वा **(रश्मिम्)** प्रकाश को मैं **(सम्, आ, ददे)** ग्रहण करता हूँ, वैसे आप लोग भी करो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन पक्षपात को छोड़ के यथायोग्य व्यवहार कर मनुष्यों के आत्माओं में विद्याप्रकाश को धारण करें तो सब योग्य होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स स्मा॑ कृणोति के॒तुमा नक्तं॑ चिद्दू॒र आ स॒ते।

पा॒व॒को यद्व॑न॒स्पती॒न् प्र स्मा॑ मि॒नात्य॒जर॑ः॥४॥

सः। स्म॒। कृ॒णो॒ति॒। के॒तुम्। आ। नक्त॑म्। चि॒त्। दू॒रे। आ। स॒ते। पा॒व॒कः। यत्। व॒न॒स्पती॑न्। प्र। स्म॒। मि॒नाति॑। अ॒जर॑ः॥४॥

पदार्थः-(**सः**) (**स्मा**) एव (**कृणोति**) (**केतुम्**) प्रज्ञाम् (**आ**) (**नक्तम्**) रात्रौ (**चित्**) (**दूरे**) (**आ**) (**सते**) सत्पुरुषाय (**पावकः**) पवित्रकरः (**यत्**) यः (**वनस्पतीन्**) वनानां पालकान् (**प्र**) (**स्मा**) अत्रोभयत्र **निपातस्य चे**ति दीर्घः। (**मिनाति**) हिनस्ति (**अजरः**) नाशरहितः॥४॥

अन्वयः-हे मनुष्या! यद्योऽजरः पावको वनस्पतीन् स्माऽऽकृणोति नक्तं चिद् दूरे सते केतुं प्रयच्छति दूरे सन् स्मा दुष्टान् दोषान् प्रा मिनाति स सर्वत्र सत्कृतो जायते॥४॥

भावार्थः-हे मनुष्या! ये विद्वांसो दूरेऽपि स्थिता अहर्निशमग्निवद्वनस्पतिवच्च परोपकारिणो जायन्ते त एव जगद्भूषणा भवन्ति॥४॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**अजरः**) नाश से रहित (**पावकः**) पवित्र करने वाला (**वनस्पतीन्**) वनों के पालने वालों का (**स्मा**) ही (**आ, कृणोति**) अनुकरण करता (**नक्तम्**) रात्रि में (**चित्**) भी (**दूरे**) दूर देश में (**सते**) सत्पुरुष के लिये (**केतुम्**) बुद्धि देता और दूर स्थान में वर्त्तमान हुआ (**स्मा**) ही दुष्ट और दोषों का (**प्र, आ, मिनाति**) अच्छे प्रकार नाश करता है (**सः**) वह सर्वत्र सत्कृत होता है॥४॥

भावार्थः-हे मनुष्यो! विद्वान् दूर भी वर्त्तमान हुए रात्रि दिन अग्नि वा वनस्पतियों के सदृश परोपकारी होते हैं, वे संसार के भूषण अंलकार होते हैं॥४॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को कहते हैं॥

अव॑ स्म॒ यस्य॒ वेष॑णे॒ स्वेदं॑ प॒थिषु॒ जुह्व॑ति।

अ॒भीम॑ह॒ स्वर्जे॑न्यं॒ भूमा॑ पृ॒ष्ठेव॑ रुरुहुः॥५॥२४॥

अव॑। स्म॒। यस्य॑। वेष॑णे। स्वेद॑म्। प॒थिषु॑। जुह्व॑ति। अ॒भि। ई॒म्। अह॑। स्वऽजे॑न्यम्। भूम॑। पृ॒ष्ठाऽइ॑व। रुरु॒हुः॥५॥

पदार्थः-(अव) (स्म) (यस्य) (वेषणे) व्याप्ते व्यवहारे **(स्वेदम्) (पथिषु) (जुह्वति)** क्षरन्ति **(अभि) (ईम्) (अह) (स्वजेन्यम्)** स्वेन जेतुं योग्यम् **(भूमा)** पृथिव्याः **(पृष्ठेव) (रुरुहुः)** वर्धन्ते॥५॥

अन्वयः-हे मनुष्या! यस्य वेषणे पथिषु वीराः स्वेदं स्माव जुह्वति भूमाह स्वजेन्यं पृष्ठेवाभि रुरुहुस्तस्यान्वेषणं तथा यूयमपि कुरुत॥५॥

भावार्थः-ये मनुष्या मार्गेषु व्याप्तान् व्यवहारान् विज्ञाय कार्य्याणि साध्नुवन्ति ते सौख्यानि प्राप्नुवन्ति॥५॥

पदार्थः-हे मनुष्यो! **(यस्य)** जिसके **(वेषणे)** व्याप्त व्यवहार के निमित्त **(पथिषु)** मार्गों में वीर **(स्वेदम्)** जल को **(स्म)** ही **(अव, जुह्वति)** बहाते और **(भूमा)** पृथिवी के **(अह)** निश्चित **(स्वजेन्यम्)** अपने से जीतने योग्य स्थान को **(पृष्ठेव)** पृष्ठ के सदृश **(अभि, रुरुहुः)** अभिवर्द्धन करते अर्थात् उस पर बढ़ते हैं उसकी खोज **[**करते हैं**] (ईम्)** वैसे ही आप लोग भी करो॥५॥

भावार्थः-जो मनुष्य मार्ग में व्याप्त व्यवहारों को जान कर कार्यों को सिद्ध करते हैं, वे सुखों को प्राप्त होते हैं॥५॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को कहते हैं॥

यं मर्त्यः॑ पुरु॒स्पृहं॑ वि॒दद्विश्व॑स्य॒ धाय॑से।

प्र स्वाद॑नं पितू॒नामस्त॑तातिं चिदा॒यवे॑॥६॥

यम्। मर्त्यः॑। पुरु॒ऽस्पृह॑म्। वि॒दत्। विश्व॑स्य। धाय॑से। प्र। स्वाद॑नम्। पि॒तू॒नाम्। अस्त॑ऽतातिम्। चि॒त्। आ॒यवे॑॥६॥

पदार्थः-(यम्) (मर्त्यः) (पुरुस्पृहम्) बहुभिः स्पर्हणीयम् **(विदत्)** लभेत **(विश्वस्य)** जगतः **(धायसे)** धारणाय **(प्र) (स्वादनम्) (पितूनाम्)** अन्नानाम् **(अस्ततातिम्)** गृहस्थम् **(चित्) (आयवे)** मनुष्याय॥६॥

अन्वयः-मर्त्य आयवे विश्वस्य धायसे यं पुरुस्पृहं पितूनां स्वादनमस्ततातिं चित्प्र विदत्तं सर्वोपकाराय दध्यात्॥६॥

भावार्थः-मनुष्येण यद्यदुत्तमं वस्तु ज्ञानं च लभ्येत तत्तत्सर्वेषां सुखाय दध्यात्॥६॥

पदार्थः-(मर्त्यः) मनुष्य **(आयवे)** मनुष्य के लिये और **(विश्वस्य)** संसार के **(धायसे)** धारण के लिये **(यम्)** जिस **(पुरुस्पृहम्)** बहुतों से प्रशंसा करने योग्य **(पितूनाम्)** अन्नों के **(स्वादनम्)** स्वाद और **(अस्ततातिम्)** गृहस्थ को **(चित्)** भी **(प्र, विदत्)** प्राप्त होवे, उसको परोपकार के लिये धारण करे॥६॥

भावार्थः-मनुष्य को जिस उत्तम वस्तु और ज्ञान की प्राप्ति होवे, उस उसको सब के सुख के लिये धारण करे॥६॥

अथ राजविषयमाह॥

अब राजविषय को कहते हैं॥

स हि ष्मा॒ धन्वाक्षि॑तं दाता॒ न दात्या प॒शुः।

हिरि॑श्मश्रुः शुचि॑दन्नृ॒भुरनि॑भृष्टतविषिः॥७॥

सः। हि। स्म॒। धन्व॑। आऽक्षि॑तम्। दाता॑। न। दाति॑। आ। प॒शुः। हिरि॑ऽश्मश्रुः। शुचि॑ऽदन्। ऋ॒भुः। अनि॑भृष्टऽतविषिः॥७॥

पदार्थः-(**सः**) (**हि**) यतः (**स्मा**) एव। अत्र **निपातस्य च**ेति दीर्घः। (**धन्व**) अन्तरिक्षम् (**आक्षितम्**) समन्तादनष्टमिव (**दाता**) (**न**) इव (**दाति**) ददाति (**आ**) (**पशुः**) (**हिरिश्मश्रुः**) हिरण्यमिव श्मश्रूणि यस्य सः (**शुचिदन्**) शुचयः पवित्रा दन्ता यस्य सः (**ऋभुः**) मेधावी (**अनिभृष्टतविषिः**) न निर्भृष्टा प्रदग्धा तविषी सेना यस्य सः॥७॥

अन्वयः-यो हिरिश्मश्रुः शुचिदन्ननिभृष्टतविषिर्ऋभुर्दाता पशुर्न धन्वाक्षितं दुष्टानां दाति स हि ष्मा सुखमेधते॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा निदाता धान्यं खण्डयित्वा बुसं पृथक्कृत्यान्नं गृह्णाति यथा पशुश्च खुरैर्धान्यादिकं खण्डयति तथैव राजा साहसिकान् दुष्टान् मनुष्यान् भृशं ताडयेत्॥७॥

पदार्थः-जो (**हिरिश्मश्रुः**) सुवर्ण के तुल्य दाढ़ी और (**शुचिदन्**) पवित्र दाँतों से युक्त (**अनिभृष्टतविषिः**) नहीं जली सेना जिसकी ऐसा (**ऋभुः**) मेधावी (**दाता**) [देनेवाला] (**पशुः**) पशु (**न**) जैसे (**धन्व**) अन्तरिक्ष जो (**आक्षितम्**) सब ओर से अविनाशी उसको वैसे दुष्टों को (**आ, दाति**) ग्रहण करता है (**सः, हि, स्मा**) यही निश्चित सुखपूर्वक बढ़ता है॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे नहीं देने वाला धान्य को कटवा कर भूसे को अलग करके अन्न का ग्रहण करता है और जैसे पशु खुरों से धान्य आदि को तोड़ता है, वैसे ही राजा साहस करने वाले दुष्ट मनुष्यों का निरन्तर ताड़न करे॥७॥

अथ राजशासनविषयमाह॥

अब राजशिक्षा विषय को कहते हैं॥

शुचि॑: ष्म॒ यस्मा॑ अत्रि॒वत् प्र स्वधि॑तीव॒ रीय॑ते।

सु॒षू॒र॑सूत मा॒ता क्रा॒णा यदा॑न॒शे भग॑म्॥८॥

शुचिः। स्म। यस्मै। अत्रिऽवत्। प्र। स्वधितिःऽइव। रीयते। सुऽसूः। असूत। माता। क्राणा। यत्। आनशे। भगम्॥८॥

पदार्थः-(शुचिः) पवित्रः **(स्म)** **(यस्मै)** **(अत्रिवत्)** **(प्र)** **(स्वधितीव)** वज्रधर इव **(रीयते)** श्लिष्यति **(सुषूः)** सुष्ठु जनयित्री **(असूत)** सूते **(माता)** जननी **(क्राणा)** कुर्वती **(यत्)** या **(आनशे)** प्राप्नोति **(भगम्)** ऐश्वर्य्यम्॥८॥

अन्वयः-यद्या शुचिः क्राणा माता यस्मै स्वधितीवात्रिवत्सुषूरसूत प्र रीयते सा स्म भगमानशे॥८॥

भावार्थः-अत्रोपमालङ्कारः। यदि मातापितरौ कृतब्रह्मचर्य्यौ विधिवत्सन्तानानुत्पादयेतां तर्हि सुखैश्वर्य्यं लभेताम्॥८॥

पदार्थः-(यत्) जो **(शुचिः)** पवित्र **(क्राणाः)** करती हुई **(माता)** माता **(यस्मै)** जिसके लिये **(स्वधितीव)** वज्र के धारण करने वाले के सदृश और **(अत्रिवत्)** अविद्यमान तीन वाले के सदृश **(सुषूः)** उत्तम प्रकार उत्पन्न करने वाली **(असूत)** उत्पन्न करती और **(प्र, रीयते)** मिलती है **(स्म)** वही **(भगम्)** ऐश्वर्य्य को **(आनशे)** प्राप्त होती है॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो माता-पिता ब्रह्मचर्य्य किये हुए विधिपूर्वक सन्तानों को उत्पन्न करें तो सुख और ऐश्वर्य्य को प्राप्त होवें॥८॥

अथाग्निशब्दार्थविद्वद्विषयमाह॥

अब अग्निशब्दार्थ विद्वद्विषय को अगले मन्त्र में कहते हैं॥

आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे।

एषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः॥९॥

आ। यः। ते। सर्पिःऽआसुते। अग्ने। शम्। अस्ति। धायसे। आ। एषु। द्युम्नम्। उत। श्रवः। आ। चित्तम्। मर्त्येषु। धाः॥९॥

पदार्थः-(आ) **(यः)** **(ते)** तव **(सर्पिरासुते)** सर्पिभिः सर्वतो जनिते **(अग्ने)** विद्वन् **(शम्)** सुखम् **(अस्ति)** **(धायसे)** धात्रे **(आ)** **(एषु)** **(द्युम्नम्)** यशो धनं वा **(उत)** **(श्रवः)** अन्नम् **(आ)** **(चित्तम्)** संज्ञानम् **(मर्त्येषु)** **(धाः)** दधाति॥९॥

अन्वयः-हे अग्ने! यो धायसे ते सर्पिरासुते शमस्ति तद्धरत्येषु मर्त्येषु द्युम्नमा धाः श्रव आ धा उत चित्तमा धास्तस्मै त्वमैश्वर्यं देहि॥९॥

भावार्थः-यदि कश्चित् कस्मैचिद्विद्यां धनं विज्ञानञ्च दधाति तर्हि तस्मा उपकृतोऽपि प्रत्युपकाराय तादृशमेव सत्कारं कुर्यात्॥९॥

पदार्थः-हे **(अग्ने)** विद्वन् **(यः)** जो **(धायसे)** धारण करने वाले के लिये **(ते)** आपका **(सर्पिरासुते)** घृतों से सब प्रकार उत्पन्न किये गये में **(शम्)** सुख **(अस्ति)** है उसको ग्रहण करता **(एषु)**

इन **(मर्त्येषु)** मनुष्यों में **(द्युम्नम्)** यश वा धन को **(आ, धाः)** धारण करता **(श्रवः)** अन्न को **(आ)** धारण करता **(उत)** और **(चित्तम्)** संज्ञान को **(आ)** धारण करता है, उसके लिये आप ऐश्वर्य्य दीजिये॥९॥

भावार्थः-जो कोई किसी के लिये विद्या धन और विज्ञान को धारण करता है तो उसके लिये उपकार किया भी पुरुष प्रत्युपकार के लिये वैसे ही सत्कार को करे॥९॥

अथाग्निशब्दार्थराजविषयमाह॥

अब अग्निशब्दार्थ राजविषय को कहते हैं॥

इति॑ चिन्म॒न्युम॒ध्रिज॒स्त्वादा॑त॒मा प॒शुं द॑दे।

आद॑ग्ने॒ अपृ॑ण॒तोऽत्रि॑: सासह्या॒द्दस्यू॑नि॒षः सा॑सह्या॒न्नॄन्॥ १०॥ २५॥

इति॑। चि॒त्। म॒न्युम्। अ॒ध्रिज॑:। त्वाऽदा॑तम्। आ। प॒शुम्। द॒दे॒। आत्। अ॒ग्ने॒। अ॑पृणतः। अत्रि॑:। स॒स॒ह्या॒त्। दस्यू॑न्। इ॒षः। स॒स॒ह्या॒त्। नॄन्॥ १०॥

पदार्थः-**(इति)** अनेन प्रकारेण **(चित्)** अपि **(मन्युम्)** क्रोधम् **(अध्रिजः)** अध्रिषु धारकेषु जातः **(त्वादातम्)** त्वया दातव्यम् **(आ)** **(पशुम्)** **(ददे)** ददामि **(आत्)** **(अग्ने)** विद्वन् **(अपृणतः)** अपालयतः **(अत्रिः)** सततं पुरुषार्थी **(सासह्यात्)** भृशं सहेत् **(दस्यून्)** दुष्टान् साहसिकान् चोरान् **(इषः)** इच्छाः **(सासह्यात्)** अत्रोभयत्राभ्यासदीर्घः। **(नॄन्)** नीतियुक्तान् मनुष्यान्॥१०॥

अन्वयः-हे अग्नेऽध्रिजो भवान् मन्युं सासह्यादत्रिस्त्वमपृणतो दस्यून् सासह्यादादिषो नॄँश्च सासह्यादिति वर्त्तमानाच्चित्त्वत्त्वादातं पशुमहमा ददे॥१०॥

भावार्थः-ये राजानः क्रोधादीन् दुर्व्यसनानि च निवार्य दस्यूञ्जित्वा श्रेष्ठैः कृतमपमानं सहेरँस्तेऽखण्डितराज्या भवन्तीति॥१०॥

अत्र मित्रत्वविद्वद्राजाग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तमं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(अध्रिजः)** धारण करने वालों में उत्पन्न आप **(मन्युम्)** क्रोध को **(सासह्यात्)** निरन्तर सहें **(अत्रिः)** निरन्तर पुरुषार्थी आप **(अपृणतः)** नहीं पालन करते हुए **(दस्यून्)** दुष्ट साहस करने वाले चोरों को **(सासह्यात्)** निरन्तर सहें और **(आत्)** सब ओर से **(इषः)** इच्छाओं और **(नॄन्)** नीति से युक्त मनुष्यों को निरन्तर सहें **(इति)** इस प्रकार वर्त्तमान **(चित्)** भी **(त्वादातम्)** आपसे देने योग्य **(पशुम्)** पशु को मैं **(आ, ददे)** ग्रहण करता हूँ॥१०॥

भावार्थः-जो राजजन क्रोधादि और दुष्ट व्यसनों का निवारण करके चोर डाकुओं को जीत कर श्रेष्ठ पुरुषों से किये गये अपमान को सहें, वे अखण्डित राज्य युक्त होते हैं॥१०॥

इस सूक्त में मित्रत्व विद्वान् राजा और अग्नि के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सप्तम सूक्त और पच्चीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्याष्टमस्य सूक्तस्येष आत्रेय ऋषिः। अग्निर्देवता। १, ५ स्वराट् त्रिष्टुप्। २ भुरिक् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ४ निचृज्जगती। ६, ७ विराड्जगती छन्दः। निषादः स्वरः॥

अथाग्निशब्दार्थगृहाश्रमविषयमाह॥

अब सात ऋचा वाले आठवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में अग्निशब्दार्थ गृहाश्रमी के विषय को कहते हैं॥

त्वाम॑ग्न ऋत॒यव॒: समी॑धिरे प्र॒त्नं प्र॒त्नास॑ ऊ॒तये॑ सहस्कृत।
पु॒रु॒श्च॒न्द्रं य॑ज॒तं वि॒श्वधा॑यस॒ं दमू॑नसं गृ॒हप॑ति॒ं वरे॑ण्यम्॥ १॥

त्वाम्। अ॒ग्ने॒। ऋ॒त॒ऽयव॑:। सम्। ई॒धि॒रे॒। प्र॒त्नम्। प्र॒त्नास॑:। ऊ॒तये॑। स॒हः॒ऽकृ॒त॒। पु॒रु॒ऽच॒न्द्रम्। य॒ज॒तम्। वि॒श्वऽधा॑यसम्। दमू॑नसम्। गृ॒हऽप॑तिम्। वरे॑ण्यम्॥ १॥

पदार्थः-(त्वाम्) (अग्ने) कृतब्रह्मचर्य्यगृहाश्रमिन् **(ऋतायवः)** ऋतं सत्यमिच्छवः **(सम्, ईधिरे)** सम्यक् प्रदीपयेयुः **(प्रत्नम्)** प्राचीनम् **(प्रत्नासः)** प्राचीना विद्वांसः **(ऊतये)** रक्षणाद्याय **(सहस्कृत)** सहो बलं कृतं येन तत्सम्बुद्धौ **(पुरुश्चन्द्रम्)** बहुहिरण्यादियुक्तम् **(यजतम्)** पूजनीयम् **(विश्वधायसम्)** सर्वव्यवहारधनधर्त्तारम् **(दमूनसम्)** इन्द्रियान्तःकरणस्य दमकरम् **(गृहपतिम्)** गृहव्यवहारपालकम् **(वरेण्यम्)** अतिशयेन वर्त्तव्यम्॥ १॥

अन्वयः-हे सहस्कृताग्ने! प्रत्नास ऋतायव ऊतये यं प्रत्नं पुरुश्चन्द्रं यजतं विश्वधायसं **[**दमूनसं**]** वरेण्यं गृहपतिं त्वां समीधिरे स त्वमेतान् सत्कुरु॥ १॥

भावार्थः-हे मनुष्या! ये युष्मान् विद्यादानादिभिर्वर्धयन्ति तान् यूयं सततं सत्कुरुत॥ १॥

पदार्थः-हे **(सहस्कृत)** बल किये **(अग्ने)** और ब्रह्मचर्य्य किये हुए गृहाश्रमी! **(प्रत्नासः)** प्राचीन विद्वान् जन **(ऋतायवः)** सत्य की इच्छा करने वाले **(ऊतये)** रक्षण आदि के लिये जिस **(प्रत्नम्)** प्राचीन **(पुरुश्चन्द्रम्)** बहुत सुवर्ण आदि से युक्त **(यजतम्)** आदर करने योग्य **(विश्वधायसम्)** सब व्यवहार और धन के धारण तथा **(दमूनसम्)** इन्द्रिय और अन्तःकरण के दमन करने वाले **(वरेण्यम्)** अतीव स्वीकार करने योग्य और श्रेष्ठ **(गृहपतिम्)** गृहस्थ व्यवहार के पालन करने वाले **(त्वाम्)** आप को **(सम्, ईधिरे)** उत्तम प्रकार प्रकाशित करावें, वह आप इनका सत्कार करो॥ १॥

भावार्थः-हे मनुष्यो! जो आप लोगों की विद्या और दान आदिकों से वृद्धि करते हैं, उनका आप लोग निरन्तर सत्कार करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे।

बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम्॥ २॥

त्वाम्। अग्ने। अतिथिम्। पूर्व्यम्। विशः। शोचिःऽकेशम्। गृहऽपतिम्। नि। सेदिरे। बृहत्ऽकेतुम्। पुरुऽरूपम्। धनऽस्पृतम्। सुऽशर्माणम्। सुऽअवसम्। जरत्ऽविषम्॥ २॥

पदार्थः-(त्वाम्) (अग्ने) गृहस्थ **(अतिथिम्)** सर्वदोपदेशाय भ्रमन्तम् **(पूर्व्यम्)** पूर्वैः कृतं विद्वांसम् **(विशः)** प्रजाः **(शोचिष्केशम्)** शोचींषि न्यायव्यवहारप्रकाशाः केशा इव यस्य तम् **(गृहपतिम्)** गृहव्यवहारपालकम् **(नि, षेदिरे)** निषीदन्ति **(बृहत्केतुम्)** महाप्रज्ञम् **(पुरुरूपम्)** बहुरूपयुक्तं सुन्दराकृतिम् **(धनस्पृतम्)** धनस्पृहायुक्तम् **(सुशर्म्माणम्)** प्रशंसितगृहम् **(स्ववसम्)** शोभनमवो रक्षणादिकं यस्य तम् **(जरद्विषम्)** जरद् विनष्टं शत्रुरूपं विषं यस्य तम्॥ २॥

अन्वयः-हे अग्ने! या विशोऽतिथिमिव वर्त्तमानं पूर्व्यं शोचिष्केशं बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्म्माणं स्ववसं जरद्विषं गृहपतिं त्वां नि षेदिरे तास्त्वं सततं सत्कुर्य्याः॥ २॥

भावार्थः-गृहस्थाः सदैव प्रजापालनमतिथिसेवामुत्तमगृहाणि विद्याप्रचारं प्रज्ञावर्द्धनं सर्वतो रक्षणं रागद्वेषराहित्यं च सततं कुर्युः॥ २॥

पदार्थः-हे **(अग्ने)** गृहस्थ जो **(विशः)** प्रजायें **(अतिथिम्)** सदा उपदेश देने के लिये घूमते हुए के सदृश वर्त्तमान **(पूर्व्यम्)** प्राचीनों से किये गये विद्वान् और **(शोचिष्केशम्)** केशों के सदृश न्यायव्यवहार के प्रकाशों से युक्त **(बृहत्केतुम्)** बड़ी बुद्धि वाले **(पुरुरूपम्)** बहुत रूपों से युक्त सुन्दर आकृतिमान् **(धनस्पृतम्)** धन की इच्छा से युक्त **(सुशर्म्माणम्)** प्रशंसित गृह वाले **(स्ववसम्)** श्रेष्ठ रक्षण आदि जिनके **(जरद्विषम्)** वा निवृत्त हुआ शत्रुरूपी विष जिनका ऐसे **(गृहपतिम्)** गृहव्यवहार के पालन करने वाले **(त्वाम्)** आप को **(नि, षेदिरे)** स्थित करते हैं, उनका आप निरन्तर सत्कार करें॥ २॥

भावार्थः-गृहस्थ जन सदा ही प्रजा का पालन, अतिथि की सेवा, उत्तम गृह तथा विद्या का प्रचार, बुद्धि की वृद्धि, सब प्रकार से रक्षा तथा राग और द्वेष का त्याग निरन्तर करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम्।

गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम्॥ ३॥

त्वाम्। अग्ने। मानुषीः। ईळते। विशः। होत्राऽविदम्। विविचिम्। रत्नऽधातमम्। गुहा। सन्तम्। सुऽभग। विश्वऽदर्शतम्। तुविऽस्वनसम्। सुऽयजम्। घृतऽश्रियम्॥ ३॥

पदार्थः-(त्वाम्) (अग्ने) अग्निरिव वर्त्तमान **(मानुषीः)** मनुष्यसम्बन्धिन्यः **(ईळते)** स्तुवन्ति गुणैः प्रकाशितं कुर्वन्ति **(विशः)** प्रजाः **(होत्राविदम्)** होत्राणि हवनानि वेत्ति तम् **(विविचिम्)** विवेचकं विभागकर्त्तारम् **(रत्नधातमम्)** रत्नानामतिशयेन धर्त्तारम् **(गुहा)** गुहायामन्तःकरणे **(सन्तम्)** अभिव्याप्य स्थितम् **(सुभग)** शोभनैश्वर्य्य **(विश्वदर्शतम्)** विश्वस्य प्रकाशकम् **(तुविष्वणसम्)** बहूनां सेवकम् **(सुयजम्)** सुष्ठु यजन्ति यस्मात्तम् **(घृतश्रियम्)** यो घृतं श्रयति घृतेन शुम्भमानस्तम्॥३॥

अन्वयः-हे सुभगाग्ने! मानुषीर्विशो यं होत्राविदं विविचिं रत्नधातमं विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियं गुहा सन्तं त्वामीळते ता वयमपि विजानीयाम॥३॥

भावार्थः-हे मनुष्या! भवन्तो येन विद्युद्रूपेणाग्निना जीवनं चेतनता च जायते तद्वद्राजानं विज्ञाय सुखं वर्धयन्तु॥३॥

पदार्थः-हे **(सुभग)** सुन्दर ऐश्वर्य्य से युक्त **(अग्ने)** अग्नि के सदृश वर्त्तमान! **(मानुषीः)** मनुष्यसम्बन्धिनी **(विशः)** प्रजायें जिस **(होत्राविदम्)** हवनों के गुणों को जानने वाले **(विविचिम्)** विवेचक विभाग करने **(रत्नधातमम्)** रत्नों के अतीव धारण करने **(विश्वदर्शतम्)** संसार के प्रकाश करने और **(तुविष्वणसम्)** बहुतों की सेवा करने वाले **(सुयजम्)** उत्तम प्रकार यज्ञ करते जिससे उस **(घृतश्रियम्)** घृत का आश्रय करते वा घृत से शोभते हुए **(गुहा)** अन्तःकरण में **(सन्तम्)** अभिव्याप्त होकर स्थित **(त्वाम्)** आपको **(ईळते)** गुणों से प्रकाशित करती हैं, उनको हम लोग भी जानें॥३॥

भावार्थः-हे मनुष्यो! आप लोग जिस बिजुली रूप अग्नि से जीवन और चेतनता होती है, तद्वत् राजा को जान के सुख बढ़ाओ॥३॥

अथाग्निशब्दार्थविद्वद्विषयमाह॥

अब अग्निशब्दार्थ विद्वद्विषय को कहते हैं॥

त्वाम॑ग्ने धर्ण॒सिं वि॒श्वधा॑ व॒यं गी॒र्भिर्गृ॒णन्तो॒ नम॒सोप॑ सेदिम।
स नो॑ जुषस्व समिधा॒नो अ॑ङ्गिरो देवो मर्त॑स्य य॒शसा॑ सुदी॒तिभि॑:॥४॥

त्वाम्। अ॒ग्ने॒। ध॒र्ण॒सिम्। वि॒श्वधा॑। व॒यम्। गी॒:ऽभिः। गृ॒णन्तः॑। नम॑सा। उप॑। से॒दि॒म॒। सः। नः॒। जु॒ष॒स्व॒। स॒म्ऽइ॒धा॒नः। अ॒ङ्गि॒रः॒। देवः। मर्त॑स्य। य॒शसा॑। सु॒दी॒तिऽभिः॥४॥

पदार्थः-(त्वाम्) (अग्ने) विद्वन् **(धर्णसिम्)** अन्यद्धारकम् **(विश्वधा)** विश्वस्य धर्त्तारम् **(वयम्) (गीर्भिः)** वाग्भिः **(गृणन्तः)** स्तुवन्तः **(नमसा)** सत्कारेण **(उप) (सेदिम)** उपतिष्ठेम **(सः) (नः)** अस्मान् **(जुषस्व)** सेवस्व **(समिधानः)** देदीप्यमानः **(अङ्गिरः)** अङ्गेषु रममाणः **(देवः)** दाता **(मर्त्तस्य)** मनुष्यस्य **(यशसा)** उदकेनान्नेन धनेन वा। **यश इति उदकनामसु पठितम्।** (निघ०१.१२) **अन्ननामसु पठितम्।** (निघ०२.७) **धननामसु पठितम्।** (निघं०२.१०)। **(सुदीतिभिः)** सुष्ठै दानैः॥४॥

अन्वयः-हे अग्ने विद्वँस्त्वं यथा वयं गीर्भिर्गृणन्तो विश्वधा धर्णसिं त्वां नमसोप सेदिम। हे अङ्गिरः! स

देव: समिधानस्त्वं मर्त्तस्य सुदीतिभिर्यशसा नोऽस्मान् जुषस्व तथा वयं त्वामुपतिष्ठेम॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। सर्वथायं सर्वेषां स्वभावोऽस्ति यो यादृशेन भावेन यं प्राप्नुयात् सेवेत तादृश एव भाव: सेवनं च तस्योपजायते॥४॥

पदार्थ:-हे **(अग्ने)** विद्वन्! आप जैसे हम लोग **(गीर्भि:)** वाणियों से **(गृणन्त:)** स्तुति करते हुए **(विश्वधा)** संसार के धारण करने वा **(धर्णसिम्)** अन्य को धारण करने वाले **(त्वाम्)** आपके **(नमसा)** सत्कार से **(उप, सेदिम)** समीप प्राप्त होवें और हे **(अङ्गिर:)** अङ्गों में रमते हुए! **(स:)** वह **(देव:)** दाता **(समिधान:)** प्रकाशमान आप **(मर्त्तस्य)** मनुष्य के **(सुदीतिभि:)** उत्तम दानों से **(यशसा)** जल, अन्न वा धन से **(न:)** हम लोगों का **(जुषस्व)** सेवन करें, वैसे **(वयम्)** हम लोग आपके समीप स्थित होवें॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब प्रकार से यह सब का स्वभाव है, जो जिस भाव से जिसको प्राप्त होवे सेवन करे, वैसा ही भाव और सेवन उसका होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत।

पुरूण्यन्ना सहसा वि राजसि त्विषि: सा ते तित्विषाणस्य नाधृषे॥५॥

त्वम्। अग्ने। पुरुऽरूप:। विशेऽविशे। वय:। दधासि। प्रत्नऽथा। पुरुऽस्तुत। पुरूणि। अन्ना। सहसा। वि। राजसि। त्विषि:। सा। ते। तित्विषाणाय। न। आऽधृषे॥५॥

पदार्थ:-**(त्वम्)** **(अग्ने)** राजन् **(पुरुरूप:)** बहुरूप: **(विशेविशे)** प्रजायै प्रजायै **(वय:)** जीवनम् **(दधासि)** **(प्रत्नथा)** प्राचीनेनेव **(पुरुष्टुत)** बहुभि: प्रशंसित **(पुरूणि)** बहूनि **(अन्ना)** अन्नानि **(सहसा)** बलेन **(वि)** **(राजसि)** **(त्विषि:)** दीप्ति: **(सा)** **(ते)** **(तित्विषाणस्य)** अग्निज्वालयेव विद्यया प्रकाशमानस्य **(न)** इव **(आधृषे)** समन्ताद् धृषाय॥५॥

अन्वय:-हे पुरुष्टुताग्ने! यया त्वं वि राजसि सा तित्विषाणस्य ते त्विषिरस्ति साऽऽधृषे न विशेविशे पुरूण्यन्ना दधाति यया त्वं विशेविशे पुरुरूपस्त्वं प्रत्नथा सहसा वयो दधासि तां विजानीहि॥५॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! भवन्तो यथाऽग्नि: सर्वं जगद्दधाति तथा सर्वान् मनुष्यान् विद्याप्रकाशे धरन्तु॥५॥

पदार्थ:-हे **(पुरुष्टुत)** बहुतों से प्रशंसित **(अग्ने)** राजन्! जिससे आप **(वि, राजसि)** विशेष प्रकाशमान हैं **(सा)** वह **(तित्विषाणस्य)** अग्निज वाला के समान विद्या से प्रकाशमान **(ते)** आपकी **(त्विषि:)** दीप्ति है और वह **(आधृषे)** सब प्रकार से धृष्ट के लिये **(न)** जैसे वैसे **(विशेविशे)** प्रजा-प्रजा के लिये **(पुरूणि)** बहुत **(अन्ना)** अन्नों को धारण करती है तथा जिससे **(त्वम्)** आप प्रजा-प्रजा के लिये

(पुरुरूपः) बहुत रूप वाले आप **(प्रत्नथा)** प्राचीन के सदृश **(सहसा)** बल से **(वयः)** जीवन को **(दधासि)** धारण करते हो, उसको विशेषता से जानिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग जैसे अग्नि सब जगत् को धारण करता है, वैसे सब मनुष्यों को विद्या के प्रकाश में धारण करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वाम॑ग्ने समिधा॒नं य॑विष्ठ्य दे॒वा दू॒तं च॑क्रिरे हव्य॒वाह॑नम्।
उ॒रु॒ञ्चय॑सं घृ॒तयो॑नि॒माहु॑तं त्वे॒षं चक्षु॒र्दधि॑रे चोदय॒न्मति॥६॥

त्वाम्। अ॒ग्ने॒। स॒म्ऽइ॒ध्दा॒नम्। य॒वि॒ष्ठ्य॒। दे॒वाः। दू॒तम्। च॒क्रि॒रे॒। ह॒व्य॒ऽवाह॑नम्। उ॒रु॒ऽञ्चय॑सम्। घृ॒तऽयो॑निम्। आऽहु॑तम्। त्वे॒षम्। चक्षुः॑। दधि॑रे। चो॒द॒यत्ऽम॑ति॥६॥

पदार्थः-(**त्वाम्**) (**अग्ने**) विद्वन् (**समिधानम्**) देदीप्यमानम् (**यविष्ठ्य**) अतिशयेन युवसु साधो (**देवाः**) विद्वांसः (**दूतम्**) सर्वतो व्यवहारसाधकम् (**चक्रिरे**) कुर्वन्ति (**हव्यवाहनम्**) यो हव्यान्यादातुमर्हाणि यानानि सद्यो वहति तम् (**उरुञ्चयसम्**) बहुवेगवन्तम् (**घृतयोनिम्**) घृतमुदकं प्रदीप्तं कारणं वा योनिर्गृहं यस्य तम् (**आहुतम्**) स्पर्द्धितं समन्ताच्छब्दितम् (**त्वेषम्**) प्रदीप्तम् (**चक्षुः**) दर्शकम् (**दधिरे**) (**चोदयन्मति**) प्रज्ञाप्रेरकम्॥६॥

अन्वयः-हे यविष्ठ्याग्ने! यथा देवा हव्यवाहनमुरुञ्चयसं घृतयोनिमाहुतं त्वेषं चोदयन्मति चक्षुस्समिधानमग्निं दधिरे दूतं चक्रिरे तथा त्वां दध्याम॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। नहि मनुष्या विद्वत्सङ्गेन विनाऽग्निगुणानग्न्यादिसंयोग-गुणाँश्च ज्ञातुमर्हन्ति॥६॥

पदार्थः-हे (**यविष्ठ्य**) अत्यन्त युवाजनों में श्रेष्ठ (**अग्ने**) विद्वन् जैसे (**देवाः**) विद्वान् जन (**हव्यवाहनम्**) ग्रहण करने योग्य वाहनों को शीघ्र प्राप्त करने वाले (**उरुञ्चयसम्**) बहुत वेगयुक्त (**घृतयोनिम्**) जल वा प्रदीप्त अथवा कारण है गृह जिसका (**आहुतम्**) जो सब ओर से शब्दयुक्त (**त्वेषम्**) प्रदीप्त तथा (**चोदयन्मति**) बुद्धि को प्रेरणा करने और (**चक्षुः**) पदार्थों को दिखाने वाले (**समिधानम्**) प्रकाशमान अग्नि को (**दधिरे**) धारण करते और (**दूतम्**) सब ओर से व्यवहारसाधक (**चक्रिरे**) करते हैं, वैसे (**त्वाम्**) आप को हम लोग धारण करें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य विद्वानों के सङ्ग के बिना अग्नियों के गुण और अग्नि आदि संयोग के गुणों को जानने योग्य नहीं होते हैं॥६॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे।

स वावृधान ओषधीभिरुक्षितो३भि ऋयांसि पार्थिवा वि तिष्ठसे॥७॥२६॥८॥३॥

त्वाम्। अग्ने। प्रऽदिवः। आऽहुतम्। घृतैः। सुम्नऽयवः। सुऽसमिधा। सम्। ईधिरे। सः। ववृधानः। ओषधीभिः। उक्षितः। अभि। ऋयांसि। पार्थिवा। वि। तिष्ठसे॥७॥

पदार्थः-(त्वाम्) शिल्पविद्योपदेशकम् **(अग्ने)** विद्वन् **(प्रदिवः)** प्रकृष्टात् प्रकाशात् **(आहुतम्)** गृहीतम् **(घृतैः)** प्रदीपकैः साधनैः **(सुम्नायवः)** य आत्मनः सुम्नमिच्छवः **(सुषमिधा)** सम्यक् प्रदीपकेनेन्धनेन **(सम्)** **(ईधिरे)** सम्यक् प्रदीपयन्ति **(सः)** **(वावृधानः)** भृशं वर्धनः **(ओषधीभिः)** सोमयवादिभिः **(उक्षितः)** संसिक्तः **(अभि)** **(ऋयांसि)** वेगयुक्तानि कर्माणि **(पार्थिवा)** पृथिव्यां विदितानि **(वि)** **(तिष्ठसे)**॥७॥

अन्वयः-हे अग्ने! यथा सुम्नायवो घृतैः सुषमिधा प्रदिव आहुतं यं समीधिरे स वावृधान उक्षितस्त्वमोषधीभिः पार्थिवा अभि ऋयांसि वि तिष्ठसे तथा त्वां सततं वयं सुखयेम॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्वांसः सर्वेभ्यः पदार्थेभ्यो विद्युद्विद्यामुत्पादयन्ति तथा विद्वांसः सर्वतो गुणान् गृह्णन्तीति॥७॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां महाविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीदयानन्दसरस्वतीस्वामिना विरचिते सुप्रमाणयुक्ते संस्कृतार्य्यभाषाभ्यां विभूषित ऋग्वेदभाष्ये तृतीयाष्टकेऽष्टमोऽध्यायः षड्विंशो वर्गस्तृतीयाष्टकश्च पञ्चमे मण्डलेऽष्टमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(अग्ने)** विद्वन् जैसे **(सुम्नायवः)** अपने सुख की इच्छा करने वाले जन **(घृतैः)** प्रकाशित करने वाले साधनों और **(सुषमिधा)** उत्तम प्रकार प्रकाश करने वाले इन्धन के साथ **(प्रदिवः)** अत्यन्त प्रकाश से **(आहुतम्)** ग्रहण किये गये जिनको **(सम्, ईधिरे)** उत्तम प्रकार प्रकाशित करते हैं **(सः)** वह **(वावृधानः)** निरन्तर बढ़ने वाले **(उक्षितः)** उत्तम प्रकार सींचे गये आप **(ओषधीभिः)** सोमलता और यवादिकों से **(पार्थिवा)** पृथिवी में विदित **(अभि)** सब ओर से **(ऋयांसि)** वेगयुक्त कर्मों को **(वि, तिष्ठसे)** विशेष करके स्थित करते हो, वैसे **(त्वाम्)** आप को निरन्तर हम लोग सुख देवें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन सब पदार्थों से बिजुली की विद्या को उत्पन्न करते हैं, वैसे विद्वान् जन सब से गुणों को ग्रहण करते हैं॥७॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन होने से इस सूक्त के अर्थ की इस पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह श्रीमत्परमहंसपरिव्राजकाचार्य महाविद्वान् श्रीमद्विरजानन्द सरस्वती स्वामीजी के शिष्य श्री दयानन्द सरस्वती स्वामिविरचित उत्तम प्रमाणयुक्त संस्कृत और आर्य्यभाषाविभूषित ऋग्वेदभाष्य में तृतीयाष्टक में अष्टम अध्याय और छब्बीसवां वर्ग, तीसरा अष्टक तथा पञ्चम मण्डल में अष्टम सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्थाष्टकारम्भः॥

तत्र प्रथमाऽध्यायः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ सप्तर्चस्य नवमस्य सूक्तस्य गय आत्रेय ऋषिः। अग्निर्देवता। १ स्वराडुष्णिक्। ३, ४ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। २ निचृदनुष्टुप्। ६ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ५ स्वराड् बृहती छन्दः। मध्यमः स्वरः। ७ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्न्यादिगुणानाह॥

अब चतुर्थ अष्टक में सात ऋचा वाले नवम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्न्यादि पदार्थों के गुणों को कहते हैं॥

त्वाम॑ग्ने ह॒विष्म॑न्तो दे॒वं मर्ता॑स ईळते।

मन्ये॑ त्वा जा॒तवे॑दसं॒ स ह॒व्या व॑क्ष्यानु॒षक्॥ १॥

त्वाम्। अ॒ग्ने॒। ह॒विष्म॑न्तः। दे॒वम्। मर्ता॑सः। ई॒ळ॒ते॒। मन्ये॑। त्वा॒। जा॒तऽवे॑दसम्। सः। ह॒व्या। व॒क्षि॒। आ॒नु॒षक्॥ १॥

पदार्थः-(त्वाम्) विद्वांसम् **(अग्ने)** पावक इव वर्त्तमान **(हविष्मन्तः)** प्रशस्तदानादियुक्ताः **(देवम्)** देदीप्यमानम् **(मर्त्तासः)** मनुष्याः **(ईळते)** स्तुवन्ति **(मन्ये) (त्वा)** त्वाम् **(जातवेदसम्) (सः) (हव्या)** होतुमर्हाणि **(वक्षि) (आनुषक्)** आनुकूल्येन॥ १॥

अन्वयः-हे अग्ने! यथा हविष्मन्तो मर्त्तासो जातवेदसं देवमग्निं प्रशंसन्ति तथा त्वामीळते। अहं यं त्वा मन्ये स त्वं हव्यानुषग्वक्षि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽग्न्यादिगुणानन्विच्छन्ति त एव विद्यानुकूलान् व्यवहारान् जनयन्ति॥ १॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान जैसे **(हविष्मन्तः)** अच्छे दान आदि से युक्त **(मर्त्तासः)** मनुष्य **(जातवेदसम्)** उत्पन्न हुए पदार्थों को जानने वाले **(देवम्)** प्रकाशमान अग्नि की प्रशंसा करते है, वैसे **(त्वाम्)** विद्वान् आपकी **(ईळते)** स्तुति करते हैं मैं जिन **(त्वा)** आप को **(मन्ये)** मानता हूं **(सः)** वह आप **(हव्या)** ग्रहण करने योग्य पदार्थों को **(आनुषक्)** अनुकूलता से **(वक्षि)** धारण करते हो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि आदि के गुणों को ढूंढ़ते हैं, वे ही विद्या के अनुकूल व्यवहारों को उत्पन्न करते हैं॥ १॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को कहते हैं॥

अग्निर्होता॒ दास्व॑त॒: क्षय॑स्य वृ॒क्तब॑र्हिषः।

सं य॒ज्ञास॒श्चर॑न्ति॒ यं सं वाजा॑स॒: श्रव॒स्यव॑:॥ २॥

अ॒ग्निः। होता॑। दास्व॑तः। क्षय॑स्य। वृ॒क्तऽब॑र्हिषः। सम्। य॒ज्ञास॑:। चर॑न्ति। यम्। सम्। वाजा॑सः। श्रव॒स्यव॑:॥ २॥

पदार्थः-(अग्निः) पावक इव **(होता)** दाता **(दास्वतः)** दातृस्वभावस्य **(क्षयस्य)** निवासस्य **(वृक्तबर्हिषः)** वृक्तं वर्जितं बर्हिर्यस्मिन् **(सम्)** **(यज्ञासः)** सङ्गन्तव्याः **(चरन्ति)** **(यम्)** **(सम्)** **(वाजासः)** वेगवन्तः **(श्रवस्यवः)** आत्मनः श्रवमिच्छवः॥ २॥

अन्वयः-हे विद्वन्! यथा होताग्निर्दास्वतो वृक्तबर्हिषः क्षयस्य मध्ये वसति तथा यं श्रवस्यवो वाजासो यज्ञासः सं चरन्ति स संज्ञापको भवति॥ २॥

भावार्थः-मनुष्या विस्तीर्णावकाशानि गृहाणि निर्माय पुरुषार्थेन पदार्थविद्यां प्राप्नुवन्तु॥ २॥

पदार्थः-हे विद्वान्! जैसे **(होता)** दाता **(अग्निः)** अग्नि के सदृश पुरुष **(दास्वतः)** देने वाले के स्वभाव से युक्त **(वृक्तबर्हिषः)** जल से रहित **(क्षयस्य)** स्थान के मध्य में बसता है, वैसे **(यम्)** जिसको **(श्रवस्यवः)** अपने धन की इच्छा करने वाले **(वाजासः)** वेग से युक्त **(यज्ञासः)** मिलने योग्य जन **(सम्, चरन्ति)** उत्तम प्रकार संचार करते हैं, वह **(सम्)** उत्तम प्रकार जनाने वाला होता है॥ २॥

भावार्थः-मनुष्य बड़े अवकाश वाले गृहों को रच के पुरुषार्थ से पदार्थविद्या को प्राप्त हों॥ २॥

पुनरग्निविषयमाह॥

फिर अग्निविषय को कहते हैं॥

उ॒त स्म॒ यं शिशुं॑ यथा॒ नवं॑ जनि॒ष्टार॑णी।

ध॒र्तार॑ं मानु॒षीणां॑ वि॒शाम॒ग्निं स्व॑ध्व॒रम्॥ ३॥

उ॒त। स्म॒। यम्। शिशु॑म्। य॒था॒। नव॑म्। जनि॑ष्ट। अ॒रणी॒ इति॑। ध॒र्तार॑म्। मानु॑षीणाम्। वि॒शाम्। अ॒ग्निम्। सु॒ऽअ॒ध्व॒रम्॥ ३॥

पदार्थः-(उत) अपि **(स्म)** **(यम्)** **(शिशुम्)** बालकम् **(यथा)** **(नवम्)** नवीनम् **(जनिष्ट)** जनयतः **(अरणी)** काष्ठविशेषाविव **(धर्त्तारम्)** **(मानुषीणाम्)** मनुष्यादीनाम् **(विशाम्)** प्रजानाम् **(अग्निम्)** **(स्वधरम्)** सुष्ठ्वहिंसाधर्मं प्राप्तम्॥ ३॥

अन्वयः-यथा मातापितरौ नवं शिशुं जनिष्ट तथा स्म यमरणी मानुषीणां विशां धर्त्तारमुत स्वध्वरमग्निं विद्वांसो जनयन्तु॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यथा मातापितरौ श्रेष्ठं सन्तानं जनयित्वा सुखमाप्नुतस्तथा विद्वांसो विद्युतमग्निमुत्पाद्यैश्वर्य्यमाप्नुवन्ति॥३॥

पदार्थः-(**यथा**) जैसे माता और पिता (**नवम्**) नवीन (**शिशुम्**) बालक को (**जनिष्ट**) उत्पन्न करते हैं, वैसे (**स्म**) ही (**यम्**) जिसको (**अरणी**) काष्ठविशेषों के सदृश (**मानुषीणाम्**) मनुष्य आदि (**विशाम्**) प्रजाओं के (**धर्त्तारम्**) धारण करने वाले (**उत**) भी (**स्वध्वरम्**) उत्तम प्रकार अहिंसारूप धर्म को प्राप्त (**अग्निम्**) अग्नि को विद्वान् जन उत्पन्न करें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे माता-पिता श्रेष्ठ सन्तान को उत्पन्न करके सुख को प्राप्त होते हैं, वैसे विद्वान् जन बिजुलीरूप अग्नि को उत्पन्न करके ऐश्वर्य्य को प्राप्त होते हैं॥३॥

पुनर्विद्वद्गुणानाह॥

फिर विद्वानों के गुणों को कहते हैं॥

उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम्।

पुरू यो दग्धासि वनाग्ने पशुर्न यवसे॥४॥

उत। स्म। दुःऽगृभीयसे। पुत्रः। न। ह्वार्याणाम्। पुरु। यः। दग्धा। असि। वना। अग्ने। पशुः। न। यवसे॥४॥

पदार्थः-(**उत**) (**स्म**) (**दुर्गृभीयसे**) दुःखेन गृह्णासि (**पुत्रः**) (**न**) इव (**ह्वार्याणाम्**) कुटिलानाम् (**पुरू**) बहु। अत्र **संहितायामिति** दीर्घः। (**यः**) (**दग्धा**) (**असि**) (**वना**) वनानि (**अग्ने**) अग्निः (**पशुः**) (**न**) इव (**यवसे**) अद्याय घासाय॥४॥

अन्वयः-हे अग्ने! विद्वन्! ह्वार्य्याणां पुत्रो न पुरू दुर्गृभीयसे स्म योऽग्निर्वना दग्धेवोत यवसे पशुर्नाऽसि तस्मात् पदार्थविदसि॥४॥

भावार्थः-अत्रोपमालङ्कारः। यो हि पदार्थविद्याग्रहणाय पुत्रवद्धेनुवच्च वर्त्तते स एवाग्न्यादिविद्यां ज्ञातुमर्हति॥४॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश तेजस्वी विद्वन्! (**ह्वार्याणाम्**) कुटिलों के (**पुत्रः**) पुत्र के (**नः**) सदृश (**पुरू**) बहुत को (**दुर्गृभीयसे**) दुःख से ग्रहण करते (**स्म**) ही हो (**यः**) जो अग्नि (**वना**) वनों को (**दग्धा**) जलाने वाले के सदृश (**उत**) भी (**यवसे**) खाने योग्य घास के लिये (**पशुः**) पशु के (**न**) सदृश है, उससे पदार्थों को जानने वाले (**असि**) हो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो पदार्थविद्या के ग्रहण के लिये पुत्र और गौ के सदृश वर्त्तमान है, वही अग्नि आदि की विद्या को जान सकता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अध स्म यस्यार्चयः सम्यक् संयन्ति धूमिनः।

यदी॒मह॒ त्रि॒तो दि॒व्युप॒ ध्मातेॅव॒ धम॑ति॒ शिशी॑ते ध्मा॒तरी॑ यथा॥५॥

अध॑। स्म॒। यस्य॑। अ॒र्चय॑:। स॒म्यक्। स॒मऽय॑न्ति। धू॒मिन॑:। यत्। ई॒म्। अह॑। त्रि॒त:। दि॒वि। उप॑। ध्मात॑ाऽइव। धम॑ति। शिशी॑ते। ध्मा॒तरि॑। य॒था॥५॥

पदार्थ:-(अध) अथ **(स्म)** **(यस्य)** **(अर्चय:)** **(सम्यक्)** **(संयन्ति)** **(धूमिन:)** बहुर्धूमो विद्यते येषान्ते **(यत्)** य: **(ईम्)** सर्वत: **(अह)** विनिग्रहे **(त्रित:)** संप्लावक: **(दिवि)** अन्तरिक्षे **(उप)** **(ध्मातेव)** धमनकर्त्तेव **(धमति)** **(शिशीते)** तनूकरोति **(ध्मातरी)** अत्र **संहितायामि**ति दीर्घ:। **(यथा)**॥५॥

अन्वय:-हे मनुष्या! यस्याग्नेऽर्चयो धूमिन: संयन्त्यध यद्य ईमह त्रित: सन् दिवि ध्मातेवोप धमति यथा ध्मातरी सम्यक् शिशीते तेन तथा स्म कार्याणि साध्नुवन्तु॥५॥

भावार्थ:-अत्रोपमालङ्कार:। हे मनुष्या: ! सर्वाभ्य: पदार्थविद्याभ्य: पुराग्निविद्या वेदितव्या॥५॥

पदार्थ:-हे मनुष्यो! **(यस्य)** जिस अग्नि के **(अर्चय:)** तेज **(धूमिन:)** बहुत धूम से युक्त **(संयन्ति)** उत्तम प्रकार प्राप्त होते हैं **(अध)** इसके अनन्तर **(यत्)** जो **(ईम्)** सब ओर से **(अह)** निश्चय ग्रहण करने में **(त्रित:)** अच्छे प्रकार ले जाने वाला हुआ **(दिवि)** अन्तरिक्ष में **(ध्मातेव)** शब्द करने वाले के सदृश **(उप, धमति)** शब्द करता है और **(यथा)** जैसे **(ध्मातरी)** चलने वाले में **(सम्यक्)** उत्तम प्रकार **(शिशीते)** सूक्ष्म करता है, उससे वैसे **(स्म)** ही कार्यों को सिद्ध करो॥५॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! सब पदार्थविद्याओं से पहले अग्निविद्या जाननी चाहिये॥५॥

पुनर्मित्रभावेनोक्तविषयमाह॥

फिर मित्रभाव से उक्त विषय को कहते हैं॥

तवा॒हम॑ग्न ऊ॒तिभि॑र्मि॒त्रस्य॑ च॒ प्रश॑स्तिभि:।

द्वेषो॒युतो॒ न दु॑रि॒ता तु॒र्याम॒ मर्त्या॑नाम्॥६॥

तव॑। अ॒हम्। अ॒ग्ने॒। ऊ॒तिऽभि॑:। मि॒त्रस्य॑। च॒। प्रश॑स्तिऽभि:। द्वेष॒:ऽयुत॑:। न। दु॒:ऽइ॒ता। तु॒र्याम॑। मर्त्या॑नाम्॥६॥

पदार्थ:-(तव) **(अहम्)** **(अग्ने)** विद्वन् **(ऊतिभि:)** रक्षादिभि: **(मित्रस्य)** **(च)** **(प्रशस्तिभि:)** प्रशंसाभि: **(द्वेषोयुत:)** द्वेषयुक्ता: **(न)** इव **(दुरिता)** दु:खेनेता प्राप्तानि **(तुर्याम)** हिंस्याम **(मर्त्यानाम्)** मनुष्याणाम्॥६॥

अन्वय:-हे अग्ने! अहं मित्रस्य तवोतिभि: प्रशस्तिभिश्च प्रशंसितो भवेयं तथा त्वं भव सर्वे वयं मिलित्वा द्वेषोयुतो न मर्त्यानां दुरिता तुर्य्याम॥६॥

भावार्थ:-अत्रोपमालङ्कार:। हे मनुष्या! यथा मित्रं मित्रस्य प्रशंसां करोति शत्रवो हितं घ्नन्ति तथैव मित्रतां कृत्वा मनुष्याणां दु:खानि वयं हिंस्येम॥६॥

पदार्थः-हे **(अग्ने)** विद्वन् **(अहम्)** मैं **(मित्रस्य)** मित्र **(तव)** आपकी **(ऊतिभिः)** रक्षा आदिकों से और **(प्रशस्तिभिः)** प्रशंसाओं से **(च)** भी प्रशंसित होऊं, वैसे आप हूजिये और सब हम लोग मिल कर **(द्वेषोयुतः)** द्वेषयुक्तों के **(न)** सदृश **(मर्त्यानाम्)** मनुष्यों के **(दुरिता)** दुःख से प्राप्त हुए दोषों की **(तुर्याम)** हिंसा करें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे मित्र मित्र की प्रशंसा करता और शत्रुजन हित का नाश करते हैं, वैसे ही मित्रता करके मनुष्यों के दुःखों का हम नाश करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तं नो॑ अग्ने अ॒भी नरो॑ र॒यिं स॑हस्व॒ आ भ॑र।

स क्षे॑पय॒त्स पो॑षय॒द्भुव॒द्वाज॑स्य सा॒तय॑ उ॒तैधि॑ पृ॒त्सु नो॑ वृ॒धे॥७॥१॥

तम्। नः। अग्ने। अभि। नरः। रयिम्। सहस्वः। आ। भर। सः। क्षेपयत्। सः। पोषयत्। भुवत्। वाजस्य। सातये। उत। एधि। पृतऽसु। नः। वृधे॥७॥

पदार्थः-**(तम्)** **(नः)** अस्माकम् **(अग्ने)** विद्वन् **(अभि)** आभिमुख्ये **(नरः)** नायकान्। व्यत्ययेन प्रथमा। **(रयिम्)** धनम् **(सहस्वः)** बहुसहनादिगुणयुक्त **(आ)** **(भर)** **(सः)** **(क्षेपयत्)** प्रेरयेत् **(सः)** **(पोषयत्)** पोषयेत् **(भुवत्)** भवेत् **(वाजस्य)** अन्नादेः **(सातये)** संविभागाय **(उत)** **(एधि)** भव **(पृत्सु)** स-ामेषु **(नः)** अस्माकम् **(वृधे)** वर्धनाय॥७॥

अन्वयः-हे सहस्वोऽग्ने विद्वन्! यस्त्वं नो नरो रयिमभ्या भर तं वयं सत्कुर्याम स भवानस्मान् क्षेपयत् पोषयत् स वाजस्य सातये भुवदुत पृत्सु नो वृध एधि॥७॥

भावार्थः-जिज्ञासुभिर्विदुषः प्रतीयं प्रार्थना कार्य्या भवन्तोऽस्मान् सद्गुणेषु प्रेरयन्तु ब्रह्मचर्य्यादिना पोषयन्तु सत्यासत्ययोर्विभाजका युद्धविद्याकुशला अस्मान् सततं रक्षन्त्विति॥७॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति नवमं सूक्तं प्रथमो वर्गश्च समाप्तः॥

पदार्थः-हे **(सहस्वः)** बहुत सहन आदि गुणों से युक्त **(अग्ने)** विद्वन्! जो आप **(नः)** हम लोगों के **(नरः)** नायक अर्थात् कार्य्यों में अग्रगामियों और **(रयिम्)** धन को **(अभि)** सन्मुख **(आ, भर)** सब प्रकार धारण करें **(तम्)** उनका हम लोग सत्कार करें **(सः)** वह आप हम लोगों की **(क्षेपयत्)** प्रेरणा करें और **(पोषयत्)** पोषण पालन करें **(सः)** वह **(वाजस्य)** अन्न आदि के **(सातये)** संविभाग के लिये **(भुवत्)** होवें **(उत)** और **(पृत्सु)** स-ामों में **(नः)** हम लोगों की **(वृधे)** वृद्धि के लिये **(एधि)** हूजिये॥७॥

भावार्थ:-सुकर्म्मों के जानने की इच्छा करने वालों को चाहिये कि विद्वानों के प्रति यह प्रार्थना करें कि आप लोग हम लोगों को श्रेष्ठ गुणों में प्रेरित करो और ब्रह्मचर्य्य आदि से पुष्ट करो और सत्य और असत्य के विभाग करने वाले और युद्धविद्या में चतुर जन हम लोगों की निरन्तर रक्षा करें॥७॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह नवमा सूक्त और पहिला वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य दशमस्य सूक्तस्य गय आत्रेय ऋषिः। अग्निर्देवता। १, ६ निचृदनुष्टुप्। ५ अनुष्टुप् छन्दः। गान्धारः स्वरः। २ स्वराडुष्णिक्। ३ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ४ स्वराड् बृहती छन्दः। मध्यमः स्वरः। ७ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निशब्दार्थविद्वद्गुणानाह॥

अब सात ऋचा वाले दशवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निशब्दार्थ विद्वद्विषय को कहते हैं॥

अग्न॒ ओजि॑ष्ठमा भ॑र द्यु॒म्नम॒स्मभ्य॑मध्रिगो।
प्र नो॑ रा॒या परी॑णसा॒ रत्सि॒ वाजा॑य॒ पन्था॑म्॥ १॥

अग्ने॑। ओजि॑ष्ठम्। आ। भ॒र॒। द्यु॒म्नम्। अ॒स्मभ्य॑म्। अ॒ध्रि॒गो॒ इत्य॑ध्रिऽगो। प्र। नः॒। रा॒या। परी॑णसा। रत्सि॑। वाजा॑य। पन्था॑म्॥ १॥

पदार्थः-(**अग्ने**) विद्वन् (**ओजिष्ठम्**) अतिशयेन पराक्रमयुक्तम् (**आ**) (**भर**) समन्ताद्धर (**द्युम्नम्**) यशो धनं वा (**अस्मभ्यम्**) (**अध्रिगो**) योऽधृन् धारकान् गच्छन्ति तत्सम्बुद्धौ (**प्र**) (**नः**) अस्मान् (**राया**) धनेन (**परीणसा**) (**रत्सि**) रमसे (**वाजाय**) विज्ञानाय (**पन्थाम्**) मार्गम्॥ १॥

अन्वयः-हे अध्रिगोऽग्ने! त्वमस्मभ्यमोजिष्ठं द्युम्नमा भर नोऽस्मान् परीणसा राया वाजाय पन्थां प्राप्य रत्सि तस्मात् सत्कर्त्तव्योऽसि॥ १॥

भावार्थः-ये मनुष्या अन्येषां सदुपदेशेन पुण्यकीर्तिं वर्धयन्ति ते धर्मकीर्तयो भवन्ति॥ १॥

पदार्थः-हे (**अध्रिगो**) धारण करने वालों को प्राप्त होने वाले (**अग्ने**) विद्वन्! आप (**अस्मभ्यम्**) हम लोगों के लिये (**ओजिष्ठम्**) अत्यन्त पराक्रमयुक्त (**द्युम्नम्**) यश वा धन को (**आ, भर**) चारों ओर से धारण कीजिये और (**नः**) हम लागों को (**परीणसा**) बहुत (**राया**) धन से (**वाजाय**) विज्ञान के लिये (**पन्थाम्**) मार्ग को (**प्र**) प्राप्त होकर (**रत्सि**) रमते हो, इससे सत्कार करने योग्य हो॥ १॥

भावार्थः-जो मनुष्य अन्य जनों के श्रेष्ठ उपदेश से पुण्यकीर्त्ति को बढ़ाते, वे धर्म्म सम्बन्धी यश वाले होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वं नो॑ अग्ने अद्भु॒त क्रत्वा॒ दक्ष॑स्य मं॒हना॑।
त्वे अ॑सु॒र्य१॒॑मारु॑हत् क्रा॒णा मि॒त्रो न य॒ज्ञिय॑ः॥ २॥

त्वम्। नः। अग्ने। अद्भुत। क्रत्वा। दक्षस्य। मंहना। त्वे इति। असुर्यम्। आ। अरुहत्। क्राणा। मित्रः। न। यज्ञियः॥ २॥

पदार्थः-(त्वम्) (नः) अस्मान् **(अग्ने)** अध्यापकोपदेशक **(अद्भुत)** आश्चर्योत्तमगुणकर्मस्वभाव **(क्रत्वा)** प्रज्ञया **(दक्षस्य)** चतुरस्य विद्याबलयुक्तस्य **(मंहना)** महत्त्वेन **(त्वे)** त्वयि **(असुर्य्यम्)** असुरसम्बन्धिनम् **(आ, अरुहत्) (क्राणा)** कुर्वन् **(मित्रः) (न)** इव **(यज्ञियः)** यज्ञमनुष्ठातुमर्हः॥ २॥

अन्वयः-हे अद्भुताऽग्ने! त्वं क्रत्वा दक्षस्य मंहना यथा त्वेऽसुर्य्यं क्राणा मित्रो यज्ञियो नाऽऽरुहत्तथा नः वर्धय॥ २॥

भावार्थः-अत्रोपमालङ्कारः। स एवोत्तमो विद्वान् भवति यः सर्वेषां सत्काराय विद्योपदेशं ददाति॥ २॥

पदार्थः-हे **(अद्भुत)** आश्चर्ययुक्त उत्तम गुण, कर्म्म और स्वभाव वाले **(अग्ने)** अध्यापक और उपदेशक! **(त्वम्)** आप **(क्रत्वा)** बुद्धि से **(दक्षस्य)** चतुर विद्या और बल से युक्त पुरुष के **(मंहना)** महत्त्व से जैसे **(त्वे)** आप में **(असुर्य्यम्)** असुरसम्बन्धी कर्म **(क्राणा)** करता हुआ **(मित्रः)** मित्र **(यज्ञियः)** यज्ञ करने योग्य के **(न)** सदृश **(आ, अरुहत्)** बढ़ता है, वैसे **(नः)** हम लोगों को बढ़ाइये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वही उत्तम विद्वान् होता है, जो सब के सत्कार के लिये विद्या का उपदेश देता है॥ २॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को मन्त्र में कहते हैं॥

त्वं नो॑ अग्न एषां॒ गयं॑ पु॒ष्टिं च॑ वर्धय।

ये स्तोमे॑भि॒: प्र सू॒रयो॒ नरो॑ म॒घान्या॑न॒शुः॥ ३॥

त्वम्। नः। अग्ने। एषाम्। गयम्। पुष्टिम्। च। वर्धय। ये। स्तोमेभिः। प्र। सूरयः। नरः। मघानि। आनशुः॥ ३॥

पदार्थः-(त्वम्) (नः) अस्माकम् **(अग्ने)** विद्वन् **(एषाम्) (गयम्)** अपत्यं गृहं च। **गय इत्यपत्यनामसु पठितम्।** (निघं०२.२)। **धननामसु पठितम्।** (निघं०२.१०) **गृहनामसु पठितम्।** (निघं०३.४) **(पुष्टिम्) (च) (वर्धय) (ये) (स्तोमेभिः)** वेदस्थैः प्रकरणैः स्तोत्रैः **(प्र) (सूरयः)** विपश्चितः **(नरः)** नेतारः **(मघानि)** मघानि धनानि **(आनशुः)** प्राप्नुयुः॥ ३॥

अन्वयः-हे अग्ने! ये नरः सूरयः स्तोमेभिर्मघानि प्रानशुस्तैः सह त्वं न एषां गयं च पुष्टिं च वर्धय॥ ३॥

भावार्थः-विद्वद्भिराप्तैः सहितैः सर्वेषां मनुष्याणां सुखं बलं च वर्द्धयेत॥ ३॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(ये)** जो **(नरः)** नायक **(सूरयः)** विद्वान् जन **(स्तोमेभिः)** वेद में वर्त्तमान स्तुति के प्रकरणों से **(मघानि)** धनों को **(प्र, आनशुः)** प्राप्त होवें, उनके साथ **(त्वम्)** आप

(नः) हम लोगों और **(एषाम्)** इनके **(गयम्)** सन्तान तथा गृह वा धन **(च)** और **(पुष्टिम्)** पुष्टि को **(वर्धय)** वृद्धि कीजिये॥३॥

भावार्थः-विद्वानों को चाहिये कि यथार्थवक्ताओं के सहित सब मनुष्यों के सुख और बल को बढ़ावें॥३॥

पुनस्तमेव विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

ये अ॑ग्ने चन्द्र ते॒ गिर॑: शु॒म्भन्त्यश्व॑राधसः।

शु॒ष्मेभि॑: शु॒ष्मिणो॒ नरो॑ दि॒वश्चि॒द्येषां॑ बृ॒हत्सु॑की॒र्तिर्बोध॑ति॒ त्मना॑॥४॥

ये। अ॒ग्ने॒। च॒न्द्र॒। ते॒। गिर॑:। शु॒म्भन्ति॑। अश्व॑ऽराधसः। शु॒ष्मेभिः॑। शु॒ष्मिण॒:। नर॑:। दि॒वः। चि॒त्। येषा॑म्। बृ॒हत्। सु॒ऽकी॒र्त्तिः॑। बोध॑ति। त्मना॑॥४॥

पदार्थः-**(ये)** **(अग्ने)** विद्वन् **(चन्द्र)** आह्लादप्रद **(ते)** तव **(गिरः)** धर्म्या वाचः **(शुम्भन्ति)** विराजन्ते **(अश्वराधसः)** विद्युदादिपदार्थसंसाधिकाः **(शुष्मेभिः)** बलैः **(शुष्मिणः)** बलिनः **(नरः)** नायकाः **(दिवः)** कामयमानाः **(चित्)** अपि **(येषाम्)** **(बृहत्, सुकीर्त्तिः)** महोत्तमप्रशंसः **(बोधति)** जानाति **(त्मना)** आत्मना॥४॥

अन्वयः-हे चन्द्राग्ने! तेऽश्वराधसो गिरो ये शुष्मेभिः सह शुष्मिणो दिवश्चिन्नरः शुम्भन्ति येषामेता गिरो बृहत्सुकीर्त्तिर्भवान् त्मना बोधति ते सखायो भवन्तु॥४॥

भावार्थः-ये विद्वांसस्तुल्यगुणकर्मस्वभावाः सखायो भूत्वाऽग्न्यादिपदार्थविद्यां परस्परं बोधयन्ति ते सिद्धकामा जायन्ते॥४॥

पदार्थः-हे **(चन्द्र)** आनन्द देने वाले **(अग्ने)** विद्वन्! **(ते)** आपकी **(अश्वराधसः)** बिजुली आदि पदार्थों की सिद्धि करने वाली **(गिरः)** धर्मसम्बन्धिनी वाणियों को **(ये)** जो **(शुष्मेभिः)** बलों के साथ **(शुष्मिणः)** बली **(दिवः)** कामना करते हुए **(चित्)** भी **(नरः)** मुख्य नायकजन **(शुम्भन्ति)** विराजते हैं और **(येषाम्)** जिनकी इन वाणियों को **(बृहत्, सुकीर्त्तिः)** बड़ी उत्तम प्रशंसायुक्त आप **(त्मना)** आत्मा से **(बोधति)** जानते हैं, वे मित्र हों॥४॥

भावार्थः-जो विद्वान् सदृश गुण, कर्म और स्वभाव वाले मित्र होकर अग्नि आदि पदार्थों की विद्याओं को परस्पर जनाते हैं, वे सिद्ध मनोरथ वाले होते हैं॥४॥

अथ शिल्पविद्याविषयकविद्वद्गुणानाह॥

अब शिल्पविद्याविषयक विद्वानों के गुणों को कहते हैं॥

तव॒ त्ये अ॑ग्ने अ॒र्चयो॒ भ्राज॑न्तो यन्ति धृष्णु॒या।

परिज्मानो न विद्युतः स्वानो रथो न वाजयुः॥५॥

तवं। त्ये। अग्ने। अर्चयः। भ्राजन्तः। यन्ति। धृष्णुऽया। परिऽज्मानः। न। विऽद्युतः। स्वानः। रथः। न। वाजऽयुः॥५॥

पदार्थः-(तव) (त्ये) ते **(अग्ने)** विद्वन् **(अर्चयः)** विद्याविनयप्रकाशिताः **(भ्राजन्तः)** अन्यान् प्रकाशयन्तः **(यन्ति)** प्राप्नुवन्ति **(धृष्णुया)** प्रगल्भाः **(परिज्मानः)** परितो ज्मा भूमिराज्यं येषान्ते **(न)** इव **(विद्युतः) (स्वानः)** शब्दायमानः **(रथः)** विमानादियानसमूहः **(न)** इव **(वाजयुः)** आत्मनो वाजं वेगमिच्छुरिव॥५॥

अन्वयः-हे अग्ने! तव सङ्गेन येऽर्चयो भ्राजन्तो धृष्णुया विद्वांसः परिज्मानो विद्युतो न वाजयुः स्वानो रथो न शिल्पविद्यां यन्ति त्ये सद्यः श्रीमन्तो जायन्ते॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये नरो यथार्थां शिल्पविद्यां जानन्ति ते सर्वत्र व्याप्तविद्युदिव विमानादियानवत् सद्योगामिनो भूत्वा सर्वतो धनमाप्य बहुसुखं लभन्ते॥५॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(तव)** आपके सङ्ग से जो **(अर्चयः)** विद्या और विनय से प्रकाशित **(भ्राजन्तः)** परस्पर एक-दूसरे को प्रकाशित करते हुए **(धृष्णुया)** न्यायपूर्वक बोलने में ढीठ विद्वान् जन **(परिज्मानः)** सब ओर से भूमि के राज्य से युक्त **(विद्युतः)** बिजुलियों के **(न)** सदृश **(वाजयुः)** अपने वेग की इच्छा करने वाले के सदृश और **(स्वानः)** शब्द करते हुए **(रथः)** विमान आदि वाहनसमूह के **(न)** सदृश शिल्पविद्या को **(यन्ति)** प्राप्त होते हैं **(त्ये)** वे शीघ्र धनवान् होते हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो जन यथार्थ शिल्पविद्या को जानते हैं, वे सर्वत्र व्याप्त बिजुली के समान विमान आदि वाहनों के सदृश शीघ्रगामी हो और सब प्रकार से धन को प्राप्त होकर बहुत सुख को प्राप्त होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

नू नो अग्न ऊतये सबाधसश्च रातये।

अस्माकासश्च सूरयो विश्वा आशास्तरीषणि॥६॥

नू। नः। अग्ने। ऊतये। सऽबाधसः। च। रातये। अस्माकासः। च। सूरयः। विश्वाः। आशाः। तरीषणि॥६॥

पदार्थः-(नू) सद्यः **(नः)** अस्माकम् **(अग्ने)** विद्वन् राजन् **(ऊतये)** रक्षाद्याय **(सबाधसः)** बाधेन सह वर्त्तमानाः **(च) (रातये)** दानाय **(अस्माकासः)** अस्माकमिमे **(च) (सूरयः) (विश्वाः)** सकलाः **(आशाः)** दिशः **(तरीषणि)** तरणे॥६॥

अन्वयः-हे अग्ने! यो सबाधसश्चास्माकासः सूरयो न ऊतये रातये च विश्वा आशास्तरीषणि नोऽस्मान्नू प्रापयेयुस्ते परोपकारिणो जायन्ते॥६॥

भावार्थः-त एव पण्डिता ये विमानादीनि यानानि निर्माय भूगोलेऽभितो भ्रामयन्ति ते प्रशंसितदाना भवन्ति॥६॥

पदार्थः-हे (**अग्ने**) विद्वन् राजन्! जो (**सबाधसः**) बाध के सहित वर्त्तमान (**च**) और (**अस्माकासः**) हम लोगों के सम्बन्धी (**सूरयः**) विद्वान् जन (**नः**) हम लोगों की (**ऊतये**) रक्षा आदि के लिये और (**रातये**) दान के लिये (**च**) भी (**विश्वाः**) सम्पूर्ण (**आशाः**) दिशाओं को (**तरीषणि**) तरण में, हम लोगों को (**नू**) शीघ्र पहुंचावें, वे परोपकारी होते हैं॥६॥

भावार्थः-वे ही चतुर विद्वान् हैं जो विमान आदि वाहनों को रच के भूगोल में चारों ओर घुमाते हैं, वे प्रशंसित दान वाले होते हैं॥६॥

अथ विद्यार्थिविषयमाह॥

अब विद्यार्थिविषय को कहते हैं॥

त्वं नो अग्ने अङ्गिरः स्तुतः स्तवाꣳन आ भर।

होतर्विभ्वासहꣳ रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे॥७॥२॥

त्वम्। नः। अग्ने। अङ्गिरः। स्तुतः। स्तवानः। आ। भर। होतः। विभ्वऽसहम्। रयिम्। स्तोतृभ्यः। स्तवसे। च। नः। उत। एधि। पृत्ऽसु। नः। वृधे॥७॥

पदार्थः-(**त्वम्**) (**नः**) अस्मान् (**अग्ने**) विद्वन् (**अङ्गिरः**) प्राण इव प्रियः (**स्तुतः**) प्रशंसितः (**स्तवानः**) प्रशंसन् (**आ**) (**भर**) (**होतः**) दातः (**विभ्वासहम्**) यो विभूनासहते तम् (**रयिम्**) (**स्तोतृभ्यः**) (**स्तवसे**) स्तावकाय (**च**) (**नः**) अस्मान् (**उत**) (**एधि**) (**पृत्सु**) स- ामेषु (**नः**) (**वृधे**) वर्द्धनाय॥७॥

अन्वयः-हे होतरङ्गिरोऽग्ने! स्तुतः स्तवानः सँस्त्वं नो विभ्वासहं रयिमा भर स्तोतृभ्यः स्तवसे च नोऽस्मानाभरोत पृत्सु नो वृध एधि॥७॥

भावार्थः-विद्यार्थिनो विदुष एवं प्रार्थयेर्युर्हे भगवन्तो यूयमस्मान् ब्रह्मचर्य्यं कारयित्वा सुशिक्षां विद्यां दत्त्वा स- ामान् जित्वाऽस्माकं वृद्धिं सततं कुरुतेति॥७॥

अत्राग्निविद्वद्विद्यार्थिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति दशमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे (**होतः**) दाता और (**अङ्गिरः**) प्राण के सदृश प्रिय (**अग्ने**) विद्वन्! (**स्तुतः**) प्रशंसित (**स्तवानः**) प्रशंसा करते हुए (**त्वम्**) आप (**नः**) हम लोगों के लिये (**विभ्वासहम्**) व्यापकों के अच्छे प्रकार सहने वाले (**रयिम्**) धन को (**आ, भर**) धारण कीजिये तथा (**स्तोतृभ्यः**) स्तुति करने वालों और (**स्तवसे**) स्तुति करने वाले के लिये (**च**) भी (**नः**) हम लोगों को **[**धारण कीजिये (**उत**) और (**पृत्सु**) संग्रामों में**]** (**वृधे**) वृद्धि के लिये (**एधि**) प्राप्त हूजिये॥७॥

भावार्थ:-विद्यार्थियों को चाहिये कि विद्वानों की इस प्रकार प्रार्थना करें कि हे भगवानो! अर्थात् विद्यारूप ऐश्वर्य्ययुक्त महाशयो! आप लोग हम लोगों को ब्रह्मचर्य्य करा और उत्तम शिक्षा तथा विद्या देके और संग्रामों को जीतकर हम लोगों की निरन्तर वृद्धि करिये॥७॥

इस सूक्त में अग्निशब्दार्थ विद्वान् और विद्यार्थी के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह दशवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्यैकादशस्य सूक्तस्य सुतम्भर आत्रेय ऋषिः। अग्निर्देवता। १, ३, ५ निचृज्जगती। २ जगती। ४, ६ विराड्जगती छन्दः। निषादः स्वरः॥

अथाग्निगुणानाह॥

अब छः ऋचा वाले ग्याहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्नि के गुणों का उपदेश करते हैं॥

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः॥ १॥

जनस्य। गोपाः। अजनिष्ट। जागृविः। अग्निः। सुऽदक्षः। सुविताय। नव्यसे। घृतऽप्रतीकः। बृहता। दिविऽस्पृशा। द्युऽमत्। वि। भाति। भरतेभ्यः। शुचिः॥ १॥

पदार्थः-(जनस्य) मनुष्यस्य **(गोपाः)** रक्षकः **(अजनिष्ट)** जायते **(जागृविः)** जागरूकः **(अग्निः)** पावकः **(सुदक्षः)** सुष्ठु बलं यस्मात् **(सुविताय)** ऐश्वर्य्याय **(नव्यसे)** अतिशयेन नवीनाय **(घृतप्रतीकः)** घृतमाज्यमुदकं वा प्रतीतिकरं यस्य सः **(बृहता)** महता **(दिविस्पृशा)** यो दिवि प्रकाशे स्पृशति तेन **(द्युमत्)** प्रकाशवत् **(वि)** विशेषेण **(भाति)** प्रकाशते **(भरतेभ्यः)** धारणपोषणकृद्भ्यो मनुष्येभ्यः **(शुचिः)** पवित्रः॥ १॥

अन्वयः-हे मनुष्या! यो जनस्य गोपा जागृविः सुदक्षो घृतप्रतीकः शुचिरग्निर्बृहता दिविस्पृशा नव्यसे सुविताय़ाजनिष्ट भरतेभ्यो द्युमद्विभाति तं यथावद्विजानीत॥ १॥

भावार्थः-विद्वद्भिरग्न्यादिपदार्थगुणा अवश्यं विज्ञातव्याः॥ १॥

पदार्थः-हे मनुष्यो! जो **(जनस्य)** मनुष्य की **(गोपाः)** रक्षा करने और **(जागृविः)** जागने वाला **(सुदक्षः)** अच्छे प्रकार बल जिससे **(घृतप्रतीकः)** और घृत वा जल प्रतीतिकर जिसका ऐसा **(शुचिः)** पवित्र **(अग्निः)** अग्नि **(बृहता)** बड़े **(दिविस्पृशा)** प्रकाश में स्पर्श करने वाले से **(नव्यसे)** अत्यन्त नवीन **(सुविताय)** ऐश्वर्य के लिये **(अजनिष्ट)** उत्पन्न होता तथा **(भरतेभ्यः)** धारण और पोषण करने वाले मनुष्यों के लिये **(द्युमत्)** प्रकाश के सदृश **(वि)** विशेष करके **(भाति)** प्रकाशित होता है, उसको यथावत् जानिये॥ १॥

भावार्थः-विद्वानों को चाहिये कि अग्नि आदि पदार्थों के गुण अवश्य जानें॥ १॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे।

इन्द्रे॑ण दे॒वैः स॒रथं॑ स ब॒र्हिषि॒ सीद॒न्नि होता॑ य॒जथा॑य सु॒क्रतुः॑॥ २॥

य॒ज्ञस्य॑। के॒तुम्। प्र॒थ॒मम्। पु॒रः॒ऽहि॒त॒म्। अ॒ग्निम्। नरः॑। त्रिऽस॒ध॒स्थे। सम्। ई॒धि॒रे॒। इ॒न्द्रे॒ण। दे॒वैः॑। स॒ऽरथ॑म्। सः। ब॒र्हिषि॑। सीद॑त्। नि। होता॑। य॒जथा॑य। सु॒ऽक्रतुः॑॥ २॥

पदार्थः-(यज्ञस्य) सम्यग्ज्ञानस्य **(केतुम्)** प्रज्ञाम् **(प्रथमम्)** आदिमम् **(पुरोहितम्)** पुर एनं दधति **(अग्निम्)** पावकमिव प्रकाशमानम् **(नरः)** नायका विद्वांसः **(त्रिषधस्थे)** त्रिभिस्सह स्थाने **(सम्, ईधिरे)** सम्यक् प्रदीपयेयुः **(इन्द्रेण)** विद्युता **(देवैः)** पृथिव्यादिभिः **(सरथम्)** रथेन यानसमूहेन सहितम् **(सः) (बर्हिषि)** अन्तरिक्षे **(सीदत्)** सीद **(नि) (होता)** दाता **(यजथाय)** सङ्गमनाय **(सुक्रतुः)** सुष्ठुप्रज्ञः शोभनकर्मा वा॥ २॥

अन्वयः-हे नरो विद्वांसो! यथा यूयं त्रिषधस्थे यजथाय यज्ञस्य केतुं प्रथमं पुरोहितमग्निं समीधिरे तथा स सुक्रतुर्होता त्वमिन्द्रेण देवैः सह बर्हिषि सरथं नि षीदत्॥ २॥

भावार्थः-ये विद्वांसो विद्याधर्मपुरुषार्थेषु स्वयं वर्त्तित्वाऽन्यान् वर्त्तयन्ति त एव सर्वविज्ञापका भवन्ति॥ २॥

पदार्थः-हे **(नरः)** श्रेष्ठ कार्य्यों में अग्रणी विद्वान् लोगो! जैसे आप लोग **(त्रिषधस्थे)** तीन पदार्थों के सहित स्थान में **(यजथाय)** मिलने के लिये **(यज्ञस्य)** उत्तम ज्ञान की **(केतुम्)** बुद्धि को तथा **(प्रथमम्)** प्रथम वर्त्तमान **(पुरोहितम्)** प्रथम इसको धारण करें ऐसे **(अग्निम्)** अग्नि के समान प्रकाशमान को **(सम्, इधिरे)** उत्तम प्रकार प्रकाशित करें, वैसे **(सः)** वह **(सुक्रतुः)** उत्तम बुद्धि वा उत्तम कर्म्म वाले **(होता)** दाता आप **(इन्द्रेण)** बिजुली और **(देवैः)** पृथिवी आदिकों के साथ **(बर्हिषि)** अन्तरिक्ष में **(सरथम्)** वाहनों के समूह के सहित **(नि, सीदत्)** स्थित हूजिये॥ २॥

भावार्थः-जो विद्वान् जन विद्या, धर्म और पुरुषार्थ में स्वयं वर्त्ताव करके अन्यों का उसके अनुसार वर्त्ताव कराते हैं, वे ही सब को बोध देने वाले होते हैं॥ २॥

पुनस्तमेवविषयमाह॥

फिर उसी विषय को कहते हैं॥

असं॑मृष्टो जायसे मा॒त्रोः शुचि॑र्मन्द्रः क॒विरु॑दति॒ष्ठो वि॒वस्व॑तः।

घृ॒तेन॑ त्वावर्धयन्नग्न आहुत ध्रु॒मस्ते॑ के॒तुर॑भवद्दि॒वि श्रि॒तः॥ ३॥

असं॑ऽमृष्टः। जा॒य॒से॒। मा॒त्रोः। शुचिः॑। म॒न्द्रः। क॒विः। उत्। अ॒ति॒ष्ठः॒। वि॒वस्व॑तः। घृ॒तेन॑। त्वा॒। अ॒व॒र्ध॒य॒न्। अ॒ग्ने॒। आ॒ऽहु॒त॒। ध्रु॒मः। ते॒। के॒तुः। अ॒भ॒व॒त्। दि॒वि। श्रि॒तः॥ ३॥

पदार्थः-(असंमृष्ट) सम्यगशुद्धः **(जायसे)** उत्पद्यसे **(मात्रोः)** मातृवन्मान्यकारकयोर्विद्याचार्ययोः **(शुचिः) (मन्द्रः)** प्रशंसित आनन्दितः **(कविः)** विद्वान् **(उत्) (अतिष्ठः)** उत्तिष्ठते **(विवस्वतः)** सूर्यात् **(घृतेन)** विद्याप्रकाशेन **(त्वा)** त्वाम् **(अवर्धयन्)** वर्धयन्तु **(अग्ने)** पावकवद्वर्त्तमान **(आहुत)** सत्कारेण

निमन्त्रित (**धूमः**) (**ते**) तव (**केतुः**) प्रज्ञापक इव प्रज्ञा (**अभवत्**) भवति (**दिवि**) प्रकाशमाने कमनीये सत्कर्त्तव्ये परमेश्वरे (**श्रितः**) सेवितः॥३॥

अन्वयः-हे आहुताग्ने विद्यार्थिन्! ये विद्वांसो विवस्वतो घृतेन त्वावर्धयन् यस्य तेऽग्नेर्धूम इव दिवि केतुः श्रितोऽभवन्मात्रोः शिक्षां प्राप्याऽसंमृष्टस्त्वं मन्द्रः शुचिर्जायसे कविरुदतिष्ठस्तं वयं सत्कुर्याम॥३॥

भावार्थः-यो बालकः कन्या वा विद्वद्भ्यो विदुषीभ्यो वा ब्रह्मचर्य्येण विद्यां प्राप्य पवित्रौ जायेते तौ जगतो भूषकौ भवतः॥३॥

पदार्थः-हे (**आहुत**) सत्कार से निमन्त्रित (**अग्ने**) अग्नि के सदृश वर्त्तमान विद्यार्थी! जो विद्वान् जन (**विवस्वतः**) सूर्य्य से (**घृतेन**) विद्या के प्रकाश से (**त्वा**) आपकी (**अवर्धयन्**) वृद्धि करें और जिन (**ते**) आपकी अग्नि के (**धूमः**) धूम के सदृश (**दिवि**) प्रकाशमान मनोहर और सत्कार करने योग्य परमेश्वर में (**केतुः**) जनाने वाले के सदृश बुद्धि (**श्रितः**) सेवन किई [=की गयी] (**अभवत्**) होती है तथा (**मात्रोः**) माता के सदृश आदर करने वाले विद्या और आचार्य्य की शिक्षा को प्राप्त होकर (**असंमृष्टः**) अच्छे प्रकार अशुद्ध आप (**मन्द्रः**) प्रशंसित और आनन्दित (**शुचिः**) पवित्र (**जायसे**) होते हो और (**कविः**) विद्वान् (**उत्, अतिष्ठः**) उठता है, उनका हम लोग सत्कार करें॥३॥

भावार्थः-जो बालक वा कन्या विद्वानों वा पढ़ी हुई स्त्रियों से ब्रह्मचर्य्यपूर्वक विद्या को प्राप्त होकर पवित्र होते, वे संसार को शोभित करने वाले होते हैं॥३॥

पुनरग्न्यादिगुणानाह॥

फिर अग्न्यादिकों के गुणों को मन्त्र में कहते हैं॥

अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरन्ते गृहेगृहे।
अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुम्॥४॥

अग्निः। नः। यज्ञम्। उप। वेतु। साधुऽया। अग्निम्। नरः। वि। भरन्ते। गृहेऽगृहे। अग्निः। दूतः। अभवत्। हव्यऽवाहनः। अग्निम्। वृणानाः। वृणते। कविऽक्रतुम्॥४॥

पदार्थः-(**अग्निः**) पावकः (**नः**) अस्माकम् (**यज्ञम्**) सङ्गन्तव्यं व्यवहारम् (**उप**) (**वेतु**) व्याप्नोतु (**साधुया**) साधवः (**अग्निम्**) पावकम् (**नरः**) नेतारो मनुष्याः (**वि**) (**भरन्ते**) धरन्ति (**गृहेगृहे**) प्रतिगृहम् (**अग्निः**) (**दूतः**) दूतवत्कार्यसाधकः (**अभवत्**) भवति (**हव्यवाहनः**) आदातव्यान् पदार्थान् देशान्तरे प्रापकः (**अग्निम्**) (**वृणानाः**) स्वीकुर्वाणाः (**वृणते**) स्वीकुर्वन्ति (**कविक्रतुम्**) प्रज्ञप्रज्ञाम्॥४॥

अन्वयः-हे मनुष्या! यथाग्निर्नो यज्ञमुप वेतु यथा साधुया नरो गृहेगृहेऽग्निं वि भरन्ते यथा हव्यवाहनोऽग्निर्दूतोऽभवद् यथाऽग्निं वृणानाः कविक्रतुं वृणते तथैव यूयमाचरत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽग्निवत्प्रतापिनः सज्जनवदुपकारकाः प्रतिजनाय मङ्गलप्रदाः सन्ति ते सर्वदा सत्कर्त्तव्या भवन्ति॥४॥

पदार्थः-हे मनुष्यो! जैसे **(अग्निः)** अग्नि **(नः)** हम लोगों के **(यज्ञम्)** मिलने योग्य व्यवहार को **(उप, वेतु)** व्याप्त हो और जैसे **(साधुया)** श्रेष्ठ **(नरः)** अग्रणी मनुष्य **(गृहेगृहे)** गृहगृह में **(अग्निम्)** अग्नि के सदृश **(वि, भरन्ते)** धारण करते हैं और जैसे **(हव्यवाहनः)** ग्रहण करने योग्य पदार्थों को एक देश से दूसरे देशों में पहुँचाने वाला **(अग्निः)** अग्नि **(दूतः)** दूत के सदृश कार्य्यों का सिद्धकर्त्ता **(अभवत्)** होता है और जैसे **(अग्निम्)** अग्नि को **(वृणानाः)** स्वीकार करते हुए जन **(कविक्रतुम्)** बुद्धिमान् की बुद्धि का **(वृणते)** स्वीकार करते हैं, वैसे ही आप लोग आचरण करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि के सदृश तेजस्वी, सज्जनों के सदृश उपकार करने और प्रत्येक जन के लिये मङ्गल देने वाले हैं, वे सर्वदा सत्कार करने योग्य हैं॥४॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को कहते हैं॥

तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे।
त्वां गिरः सिन्धुमिवावनीर्महीरा पृणन्ति शवसा वर्धयन्ति च॥५॥

तुभ्य। इदम्। अग्ने। मधुमत्ऽतम्। वचः। तुभ्यम्। मनीषा। इयम्। अस्तु। शम्। हृदे। त्वाम्। गिरः। सिन्धुम्ऽइव। अवनीः। महीः। आ। पृणन्ति। शवसा। वर्धयन्ति। च॥५॥

पदार्थः-**(तुभ्य)** तुभ्यम्। अत्र **सुपां सुलुगिति** भ्यसो लुक्। **(इदम्)** **(अग्ने)** **(मधुमत्तमम्)** अतिशयेन मधुरादिगुणयुक्तम् **(वचः)** वचनम् **(तुभ्यम्)** **(मनीषा)** प्रज्ञा **(इयम्)** **(अस्तु)** **(शम्)** सुखकरम् **(हृदे)** हृदयाय **(त्वाम्)** **(गिरः)** वाचः **(सिन्धुमिव)** समुद्रमिव **(अवनीः)** रक्षिकाः **(महीः)** श्रेष्ठा धरा इव पूज्याः **(आ)** **(पृणन्ति)** पालयन्ति विद्याः पूरयन्ति वा **(शवसा)** बलेन परिचरणेन वा। **शवतीति परिचरणकर्मा।** (निघं०३।५) अस्मादसुनि कृते रूपसिद्धिः। **(वर्धयन्ति)** **(च)**॥५॥

अन्वयः-हे अग्ने! पावकवत्पवित्रान्तःकरण विद्यार्थिस्तुभ्येदं मधुमत्तमं वचस्तुभ्यमियं मनीषा हृदे शमस्तु याः सिन्धुमिवावनीर्महीर्गिरः शवसा त्वामा पृणन्ति वर्धयन्ति च तास्त्वं गृहाण॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्यार्थिनो! यथा नद्यः सिन्धुमलंकुर्वन्ति तथैव विद्याविनययुक्ता वाचो युष्मानलं कुर्वन्तु यत्प्रतापेन युष्माकं मुखेभ्यः सत्यं सर्वहितकरं वचः सदैव निःसरेत्॥५॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश पवित्र अन्तःकरण वाले विद्यार्थी **(तुभ्य)** आपके लिये **(इदम्)** यह **(मधुमत्तमम्)** अतिशय मधुर आदि गुण से युक्त **(वचः)** वचन और **(तुभ्यम्)** आपके लिये **(इयम्)** यह **(मनीषा)** बुद्धि **(हृदे)** हृदय के लिये **(शम्)** सुखकारक **(अस्तु)** हो और जो **(सिन्धुमिव)** समुद्र को जैसे वैसे **(अवनीः)** रक्षा करने वाली **(महीः)** श्रेष्ठ भूमियों के सदृश आदर करने योग्य **(गिरः)** वाणियाँ **(शवसा)** बल वा सेवा से **(त्वाम्)** आपका **(आ, पृणन्ति)** अच्छे प्रकार पालन करतीं वा विद्याओं को पूर्ण करतीं **(वर्धयन्ति, च)** और वृद्धि करती हैं, उनका आप ग्रहण कीजिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्यार्थीजनो! जैसे नदियाँ समुद्र को शोभित करती हैं, वैसे ही विद्या और नम्रता से युक्त वाणियाँ आप लोगों को शोभित करें, जिनके प्रताप से आप लोगों के मुखों से सत्य और सब का हितकारक वचन सर्वदा ही निकले॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने।

स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः॥६॥३॥

त्वाम्। अग्ने। अङ्गिरसः। गुहा। हितम्। अनु। अविन्दन्। शिश्रियाणम्। वनेऽवने। सः। जायसे। मथ्यमानः। सहः। महत्। त्वाम्। आहुः। सहसः। पुत्रम्। अङ्गिरः॥६॥

पदार्थः-(**त्वाम्**) (**अग्ने**) विद्यां जिघृक्षो (**अङ्गिरसः**) प्राणा इव विद्यासु व्याप्ता जनाः (**गुहा**) बुद्धौ (**हितम्**) स्थितं परमात्मानम् (**अनु**) (**अविन्दन्**) अनुलभन्ते (**शिश्रियाणम्**) व्याप्तम् (**वनेवने**) जङ्गलेजङ्गलेऽग्नाविव जीवेजीवे (**सः**) (**जायसे**) (**मथ्यमानः**) विलोड्यमानः (**सहः**) बलम् (**महत्**) (**त्वाम्**) (**आहुः**) कथयेयुः (**सहसः**) विद्याशरीरबलयुक्तस्य (**पुत्रम्**) (**अङ्गिरः**) प्राण इव प्रियः॥६॥

अन्वयः-हे अग्ने! यथाङ्गिरसो वनेवने शिश्रियाणं गुहा हितमन्वविन्दन् यं त्वां प्रापयन्ति तथा स त्वं मथ्यमानो विद्वाञ्जायसे येन सहसस्पुत्रं सहो महत्प्राप्तं त्वामङ्गिरः विद्वांस आहुः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा योगिनः संयमेन परमात्मानं प्राप्य नित्यं मोदन्ते तथैतं प्राप्य यूयमप्यानन्दतेति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकादशं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) विद्या की इच्छा करने वाले! जैसे (**अङ्गिरसः**) प्राणों के सदृश विद्याओं में व्याप्त जन (**वनेवने**) जंगल-जंगल में अग्नि के सदृश जीव-जीव में (**शिश्रियाणम्**) व्याप्त (**गुहा**) बुद्धि में (**हितम्**) स्थित परमात्मा को (**अनु, अविन्दन्**) प्राप्त होते हैं और जिन (**त्वाम्**) आप को प्राप्त कराते हैं, वैसे (**सः**) वह आप (**मथ्यमानः**) मथे गये विद्वान् (**जायसे**) होते हो और जिससे (**सहसः**) विद्या और शरीर के बल से युक्त के (**पुत्रम्**) पुत्र और (**सहः**) बल (**महत्**) बड़े को प्राप्त (**त्वाम्**) आप को (**अङ्गिरः**) प्राण के सदृश प्रिय विद्वान् जन (**आहुः**) कहें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे योगी जन संयम अर्थात् इन्द्रियों को अन्य विषयों से रोकने से परमात्मा को प्राप्त होकर नित्य आनन्दित होते हैं, वैसे इसको प्राप्त होकर आप लोग आनन्दित हूजिये॥६॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ग्यारहवां सूक्त और तृतीय वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य द्वादशस्य सूक्तस्य सुतम्भर आत्रेय ऋषिः। अग्निर्देवता। १, २ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ४, ५ त्रिष्टुप् ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथाग्निविषयमाह॥

अब छः ऋचा वाले बारहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्निविषय को कहते हैं॥

प्राग्नये॑ बृह॒ते य॒ज्ञिया॑य ऋ॒तस्य॒ वृष्णे॒ असु॑राय॒ मन्म॑।
घृ॒तं न य॒ज्ञ आ॒स्ये३॑ सु॒पू॒तं गिर॑ भरे वृष॒भाय॑ प्रती॒चीम्॥ १॥

प्र। अ॒ग्नये॑। बृ॒ह॒ते। य॒ज्ञिया॑य। ऋ॒तस्य॑। वृष्णे॑। असु॑राय। मन्म॑। घृ॒तम्। न। य॒ज्ञे। आ॒स्ये॑। सु॒ऽपू॒तम्। गिर॑म्। भ॒रे॒। वृ॒ष॒भाय॑। प्र॒ती॒चीम्॥ १॥

पदार्थः-(प्र) (अग्नये) पावकाय **(बृहते)** महते **(यज्ञियाय)** यज्ञार्हाय **(ऋतस्य)** जलस्य **(वृष्णे)** वर्षकाय **(असुराय)** असुषु प्राणेषु रममाणाय **(मन्म)** ज्ञानोत्पादकं कारणम् **(घृतम्)** आज्यम् **(न)** इव **(यज्ञे)** सङ्गन्तव्ये **(आस्ये)** मुखे **(सुपूतम्)** सुष्ठु पवित्रम् **(गिरम्)** वाचम् **(भरे)** धरामि **(वृषभाय)** बलिष्ठाय **(प्रतीचीम्)** पश्चिमां क्रियाम्॥१॥

अन्वयः-हे मनुष्या! यथाहमास्ये यज्ञे सुपूतं घृतं न बृहते यज्ञियायर्त्तस्य वृष्णेऽसुराय वृषभायाग्नये मन्म प्रतीचीं गिरं प्र भरे तथैतस्मा एतां यूयमपि धरत॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथाऽग्निज्ञानाय प्रयत्यते तथैव पृथिव्यादिपदार्थ-विज्ञानाय प्रयतितव्यम्॥१॥

पदार्थः-हे मनुष्यो! जैसे मैं **(आस्ये)** मुख में और **(यज्ञे)** मिलने योग्य व्यवहार में **(सुपूतम्)** उत्तम प्रकार पवित्र **(घृतम्)** घृत के **(न)** सदृश पदार्थ को तथा **(बृहते)** बड़े **(यज्ञियाय)** यज्ञ के योग्य और **(ऋतस्य)** जल के **(वृष्णे)** वर्षाने और **(असुराय)** प्राणों में रमने वाले **(वृषभाय)** बलिष्ठ **(अग्नये)** अग्नि के लिये **(मन्म)** ज्ञान के उत्पन्न कराने वाले कारण को **(प्रतीचीम्)** पिछली क्रिया और **(गिरम्)** वाणी को **(प्र, भरे)** अच्छे प्रकार धारण करता हूं, वैसे इसके लिये इसको आप लोग भी धारण करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों से जैसे अग्निविद्या के ज्ञान के लिये प्रयत्न किया जाता है, उनको चाहिये कि वैसे ही पृथिवी आदि पदार्थों की विद्या के ज्ञान के लिये प्रयत्न करें॥१॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृन्धि पूर्वीः।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः॥ २॥

ऋतम्। चिकित्वः। ऋतम्। इत्। चिकिद्धि। ऋतस्य। धाराः। अनु। तृन्धि। पूर्वीः। न। अहम्। यातुम्। सहसा। न। द्वयेन। ऋतम्। सपामि। अरुषस्य। वृष्णः॥ २॥

पदार्थः-(ऋतम्) सत्यं कारणम् **(चिकित्वः)** विज्ञातव्यम् **(ऋतम्)** सत्यं ब्रह्म **(इत्)** एव **(चिकिद्धि)** विजानीहि **(ऋतस्य)** सत्यस्य विज्ञापिकाः **(धाराः)** वाचः **(अनु) (तृन्धि)** हिन्धि **(पूर्वीः)** प्राचीनाः **(न) (अहम्) (यातुम्)** गन्तुम् **(सहसा)** बलेन **(न)** इव **(द्वयेन)** कार्यकारणात्मकेन **(ऋतम्)** उदकम् **(सपामि)** आक्रुशामि **(अरुषस्य)** अहिंसकस्य **(वृष्णः)** बलिष्ठस्य॥ २॥

अन्वयः-हे ऋतं चिकित्वस्त्वमृतमिच्चिकिद्धि ऋतस्य पूर्वीर्धाराश्चिकिद्धि अविद्यामनु तृन्धि अहं सहसा यातुं नेच्छामि द्वयेन सहसारुषस्य वृष्ण ऋतं न सपामि॥ २॥

भावार्थः-हे मनुष्या! यथा विद्वांसोऽसत्यं खण्डयित्वा सत्यं धरन्ति अविद्यां विहाय विद्यां धरन्ति तथैव यूयमपि कुरुत॥ २॥

पदार्थः-हे **(ऋतम्)** सत्य कारण को **(चिकित्वः)** जानने योग्य! आप **(ऋतम्)** सत्य ब्रह्म को **(इत्)** निश्चय से **(चिकिद्धि)** जानिये और **(ऋतस्य)** सत्य के जनाने वाली **(पूर्वीः)** प्राचीन **(धाराः)** वाणियों को जानिये और अविद्या का **(अनु, तृन्धि)** नाश करिये **(अहम्)** मैं **(सहसा)** बल से **(यातुम्)** जाने की **(न)** नहीं इच्छा करता हूं और **(द्वयेन)** कार्य्यकारणस्वरूप बल से **(अरुषस्य)** नहीं हिंसा करने वाले **(वृष्णः)** बलिष्ठ के **(ऋतम्)** जल के **(न)** सदृश पदार्थ को **(सपामि)** गम्भीर शब्द से क्रोशता हूँ॥ २॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् जन असत्य का खडन करके सत्य को धारण करते हैं और अविद्या का त्याग करके विद्या को धारण करते हैं, वैसे ही आप लोग भी करो॥ २॥

पुनरग्निपदवाच्यविद्वद्विषयमाह॥

फिर अग्निपदवाच्य विद्वद्विषय को कहते हैं॥

कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः॥ ३॥

कया। नः। अग्ने। ऋतयन्। ऋतेन। भुवः। नवेदाः। उचथस्य। नव्यः। वेद। मे। देवः। ऋतुऽपाः। ऋतूनाम्। न। अहम्। पतिम्। सनितुः। अस्य। रायः॥ ३॥

पदार्थः-(कया) विद्यया युक्तया वा **(नः)** अस्मान् **(अग्ने)** विद्वन् **(ऋतयन्)** सत्यमाचरन् **(ऋतेन)** सत्येन **(भुवः)** पृथिव्याः **(नवेदाः)** यो न विन्दति सः **(उचथस्य)** उचितस्य **(नव्यः)** नवेषु साधुः

(वेदा) जानीहि **(मे)** माम् **(देवः)** विद्वान् **(ऋतुपाः)** य ऋतून् पाति **(ऋतूनाम्)** वसन्तादीनाम् **(न)** निषेधे **(अहम्)** **(पतिम्)** **(सनितुः)** विभाजकस्य **(अस्य)** **(रायः)** धनस्य॥३॥

अन्वयः-हे अग्ने! त्वं कया युक्त्या नोऽस्मान् विज्ञापयेः ऋतेनर्त्तयन् सन् भुवो नवेदा उचथस्य नव्य ऋतुपा भुवो देवोऽहमृतूनामस्य सनितू रायः पतिं न नाशयामि तथा मे वेदा मा नाशय॥३॥

भावार्थः-हे मनुष्याः! सत्याचरणेनैव भूराज्यं प्राप्यते पृथिवीराज्येन श्रिया च सर्वेषां सुखं जायते॥३॥

पदार्थः-हे **(अग्ने)** विद्वन्! आप **(कया)** किस विद्या वा युक्ति से **(नः)** हम लोगों को जनावें **(ऋतेन)** सत्य से **(ऋतयन्)** सत्य का आचरण करता हुआ **(भुवः)** पृथिवी का **(नवेदाः)** नहीं प्राप्त होने वाला **(उचथस्य)** उचित का सम्बन्धी **(नव्यः)** नवीनों में श्रेष्ठ **(ऋतुपाः)** ऋतुओं का पालन करने वाला पृथ्वीसम्बन्धी **(देवः)** विद्वान् **(अहम्)** मैं **(ऋतूनाम्)** वसन्त आदि ऋतुओं और **(अस्य)** इस **(सनितुः)** विभाग करने वाले **(रायः)** धन के **(पतिम्)** स्वामी का **(न)** नहीं नाश कराता हूं, वैसे आप **(मे)** मुझ को **(वेदा)** जानिये और मुझ को नष्ट मत करिये॥३॥

भावार्थः-हे मनुष्यो! सत्य के आचरण से ही पृथ्वी का राज्य प्राप्त होता है और पृथ्वी के राज्य और लक्ष्मी से सब को सुख होता है॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

के ते॑ अग्ने रि॒पवे॒ बन्ध॑नास॒: के पा॒यव॑: सनिषन्त द्यु॒मन्त॑:।

के धा॒सिम॑ग्ने॒ अनृ॑तस्य पान्ति॒ क आस॑तो॒ वच॑स: सन्ति गो॒पा:॥४॥

के। ते॒। अ॒ग्ने॒। रि॒पवे॑। बन्ध॑नासः। के। पा॒यव॑ः। स॒नि॒ष॒न्त॒। द्यु॒मन्तः॑। के। धा॒सिम्। अ॒ग्ने॒। अनृ॑तस्य। पा॒न्ति॒। के। अस॑तः। वच॑सः। स॒न्ति॒। गो॒पाः॥४॥

पदार्थः-**(के)** **(ते)** तव **(अग्ने)** राजन् **(रिपवे)** **(बन्धनासः)** बन्धकाः **(के)** **(पायवः)** पालकाः **(सनिषन्त)** विभजन्ते **(द्युमन्तः)** कामयमानाः प्रकाशवन्तो वा **(के)** **(धासिम्)** अन्नम् **(अग्ने)** विद्याविनयप्रकाशक **(अनृतस्य)** असत्यव्यवहारस्य **(पान्ति)** रक्षन्ति **(के)** **(असतः)** निन्द्यात् **(वचसः)** वचनात् **(सन्ति)** **(गोपाः)**॥४॥

अन्वयः-हे अग्ने! ते रिपवे के बन्धनासः के ते राज्यस्य पायवः के द्युमन्तः सनिषन्त। हे अग्ने! के धासिं पान्ति केऽनृतस्यासतो वचसो गोपाः सन्ति॥४॥

भावार्थः-हे विद्वन् राजन्! त्वयैवं कर्मानुष्ठेयं येन रिपूणां विनाशः प्रजापालनं सम्भवेदस्योत्तरम्॥४॥

पदार्थः-हे **(अग्ने)** राजन् **(ते)** आपके **(रिपवे)** शत्रु के लिये **(के)** कौन **(बन्धनासः)** बन्धक और **(के)** कौन आपके राज्य के **(पायवः)** पालन करने वाले **(के)** कौन **(द्युमन्तः)** कामना करने वाले वा प्रकाशयुक्त **(सनिषन्त)** विभाग करते हैं, और हे **(अग्ने)** विद्या और विनय के प्रकाशक कौन

(धासिम्) अन्न की **(पान्ति)** रक्षा करते हैं **(के)** कौन **(अनृतस्य)** असत्य व्यवहार के **(आसतः)** निन्द्य **(वचसः)** वचन से **(गोपाः)** रक्षा करने वाले **(सन्ति)** हैं॥४॥

भावार्थः-हे विद्वन्! राजन्! आप को चाहिये कि इस प्रकार का कर्म्म करें जिससे शत्रुओं का नाश, प्रजा का पालन होवे, यह इस का उत्तर है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सखा॑यस्ते॒ विषु॑णा अग्न ए॒ते शि॒वास॒: सन्तो॒ अशि॑वा अभूवन्।

अधू॑र्षत स्व॒यमे॒ते वचो॑भिर्ऋजू॒य॒ते वृ॑जि॒नानि॑ ब्रु॒वन्त॑:॥५॥

सखा॑यः। ते॒। विषु॑णाः। अ॒ग्ने॒। ए॒ते। शि॒वास॑ः। सन्त॑ः। अशि॑वाः। अ॒भू॒व॒न्। अधू॑र्षत। स्व॒यम्। ए॒ते। वचः॑ऽभिः। ऋ॒जु॒ऽय॒ते। वृ॒जि॒नानि॑। ब्रु॒वन्त॑ः॥५॥

पदार्थः-(**सखायः**) सुहृदः सन्तः **(ते)** तव **(विषुणाः)** विद्यां व्याप्नुवन्तः **(अग्ने)** विद्वन् **(एते)** **(शिवासः)** मङ्गलाचरणाः **(सन्तः)** **(अशिवाः)** अमङ्गलाचरणाः **(अभूवन्)** भवेयुः **(अधूर्षत)** हिंसन्तु **(स्वयम्)** **(एते)** **(वचोभिः)** **(ऋजूयते)** ऋजूयन्ते **(वृजिनानि)** धनानि बलानि वा **(ब्रुवन्तः)** उपदिशन्तः॥५॥

अन्वयः-हे अग्ने! य एते ते विषुणाः सखायः शिवासः सन्तोऽशिवा अभूवँस्तांस्तव भृत्यास्त्वं चाऽधूर्षत घ्नन्तु हिन्धि, हे राजभृत्या! य एते स्वयं वचोभिर्वृजिनानि ब्रुवन्त ऋजूयते तान् सततं पालयत॥५॥

भावार्थः-मनुष्याणां योग्यतास्ति ये मित्रजना असुहृदो भवेयुस्ते तिरस्करणीया येऽरयस्सखायस्स्युस्ते सत्कर्त्तव्याः॥५॥

पदार्थः-हे **(अग्ने)** विद्वन्! जो **(एते)** ये **(ते)** आपके **(विषुणाः)** विद्या को व्याप्त **(सखायः)** मित्र हुए **(शिवासः)** मङ्गल अर्थात् अच्छे आचरण करते **(सन्तः)** हुए **(अशिवाः)** अमङ्गल आचरण करने वाले **(अभूवन्)** होवें उनका आपके नौकर और आप **(अधूर्षत)** नाश करो और हे राजा के नौकरो! जो **(एते)** ये **(स्वयम्)** अपने ही **(वचोभिः)** वचनों से **(वृजिनानि)** धनों और बलों का **(ब्रुवन्तः)** उपदेश देते हुए **(ऋजूयते)** सरल होते हैं, उनका निरन्तर पालन करो॥५॥

भावार्थः-मनुष्यों को यह योग्यता है कि जो मित्रजन शत्रु होवें, वे निरादर करने योग्य हैं और जो शत्रु मित्र होवें, वे सत्कार करने योग्य हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यस्ते॑ अग्ने॒ नम॑सा य॒ज्ञमीट्ट ऋ॒तं स पा॑त्यरु॒षस्य॒ वृष्ण॑:।

तस्य॒ क्षय॑: पृ॒थुरा सा॒धुरे॑तु प्र॒सर्स्राणस्य॒ नहु॑षस्य॒ शेष॑:॥ ६॥ ४॥

यः। ते॒। अ॒ग्ने॒। नम॑सा। य॒ज्ञम्। ईट्टे॑। ऋ॒तम्। सः। पा॒ति॒। अ॒रु॒षस्य॑। वृष्ण॑:। तस्य॑। क्षय॑:। पृ॒थुः। आ। सा॒धुः। ए॒तु॒। प्र॒ऽसस्रा॒णस्य॑। नहु॑षस्य। शेष॑:॥ ६॥

पदार्थः-(यः) (ते) तव **(अग्ने)** राजन् **(नमसा)** अन्नादिना **(यज्ञम्) (ईट्टे)** ऐश्वर्य्ययुक्तं करोति **(ऋतम्)** सत्यं न्यायम् **(सः) (पाति)** रक्षति **(अरुषस्य)** अहिंसकस्य **(वृष्णः)** सुखवर्षकस्य **(तस्य) (क्षयः)** निवासः **(पृथुः)** विस्तीर्णः **(आ) (साधुः)** श्रेष्ठः **(एतु)** प्राप्नोतु **(प्रसर्स्राणस्य)** भृशं धर्मं प्रापमाणस्य **(नहुषस्य)** मनुष्यस्य। **नहुष इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(शेषः)** यः शिष्यते सः॥६॥

अन्वयः-हे अग्नेऽरुषस्य वृष्णस्तस्य ते यः पृथुः प्रसर्स्राणस्य नहुषस्य शेष इव साधुः क्षयो नमसा यज्ञमीट्टे स ऋतं पाति सोऽस्मानैतु॥६॥

भावार्थः-हे मनुष्या! यो विद्वत्सेवां धर्म्मरक्षणं करोति तद्रक्षणं यूयं कृत्वा शिष्टं सुखं प्राप्नुतेति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वादशं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** राजन्! **(अरुषस्य)** नहीं हिंसा करने और **(वृष्णः)** सुख के वर्षाने वाले **(तस्य)** उन **(ते)** आपका **(यः)** जो **(पृथुः)** विस्तारयुक्त **(प्रसर्स्राणस्य)** अत्यन्त धर्म को प्राप्त हुए **(नहुषस्य)** मनुष्य के **(शेषः)** बाकी रहे के सदृश **(साधुः)** श्रेष्ठ **(क्षयः)** निवास **(नमसा)** अन्न आदि से **(यज्ञम्)** यज्ञ को **(ईट्टे)** ऐश्वर्ययुक्त करता है **(सः)** वह **(ऋतम्)** सत्य-न्याय की **(पाति)** रक्षा करता है, वह हम लोगों को **(आ, एतु)** सब प्रकार प्राप्त हो॥६॥

भावार्थः-हे मनुष्यो! जो विद्वानों की सेवा और धर्म की रक्षा करता है, उसके रक्षण को आप लोग करके शेष सुख को प्राप्त हूजिये॥६॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बारहवां सूक्त और चौथा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य त्रयोदशस्य सूक्तस्य सुतम्भर आत्रेय ऋषिः। अग्निर्देवता। १, ४, ५ निचृद्गायत्री। २, ६ गायत्री। ३ विराड् गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निपदवाच्यविद्वद्गुणानाह॥

अब छः ऋचा वाले तेरहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निपदवाच्य विद्वान् के गुणों को कहते हैं॥

अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि। अग्ने अर्चन्त ऊतये॥ १॥

अर्चन्तः। त्वा। हवामहे। अर्चन्तः। सम्। इधीमहि। अग्ने। अर्चन्तः। ऊतये॥ १॥

पदार्थः-(अर्चन्तः) सत्कुर्वन्तः **(त्वा)** त्वाम् **(हवामहे)** स्वीकुर्महे **(अर्चन्तः) (सम्, इधीमहि)** प्रकाशयेम **(अग्ने)** विद्वन् **(अर्चन्तः)** सत्कुर्वन्तः **(ऊतये)** रक्षणाद्याय॥ १॥

अन्वयः-हे अग्ने! वयमूतये त्वार्चन्तो हवामहे त्वामर्चन्तः समिधीमहि त्वामर्चन्तो विपश्चितो भवेम॥ १॥

भावार्थः-हे विद्वांसो! वयं भवतां सत्कारेण सुशिक्षां विद्यां लब्ध्वाऽऽनन्दिताः स्याम॥ १॥

पदार्थः-हे **(अग्ने)** विद्वन्! हम लोग **(ऊतये)** रक्षण आदि के लिये **(त्वा)** आपका **(अर्चन्तः)** सत्कार करते हुए **(हवामहे)** स्वीकार करते हैं, और आपका **(अर्चन्तः)** सत्कार करते हुए **(सम्, इधीमहि)** प्रकाश करें और आपका **(अर्चन्तः)** सत्कार करते हुए विद्वान् होवें॥ १॥

भावार्थः-हे विद्वानो! हम लोग आप लोगों के सत्कार से उत्तम शिक्षा और विद्या को प्राप्त होकर आनन्दित होवें॥ १॥

अथाग्निगुणानाह॥

अब अग्निगुणों को अगले मन्त्र में कहते हैं॥

अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः। देवस्य द्रविणस्यवः॥ २॥

अग्नेः। स्तोमम्। मनामहे। सिध्रम्। अद्य। दिविऽस्पृशः। देवस्य। द्रविणस्यवः॥ २॥

पदार्थः-(अग्नेः) पावकस्य **(स्तोमम्)** गुणकर्मस्वभावप्रशंसाम् **(मनामहे) (सिध्रम्)** साधकम् **(अद्य) (दिविस्पृशः)** यो दिवि परमात्मनि सुखं स्पृशति तस्य **(देवस्य)** द्योतमानस्य **(द्रविणस्यवः)** आत्मनो द्रविणमिच्छमानाः॥ २॥

अन्वयः-हे मनुष्या! यथा द्रविणस्यवो वयमद्य दिविस्पृशो देवस्याग्नेः सिध्रं स्तोमं मनामहे तथैतं यूयमपि विजानीत॥ २॥

भावार्थः-येषा धनेच्छा स्यात्तेऽग्न्यादिपदार्थविज्ञानं सङ्गृह्णन्तु॥ २॥

पदार्थः-हे मनुष्यो! जैसे **(द्रविणस्यवः)** अपने धन की इच्छा करने वाले हम लोग **(अद्य)** आज **(दिविस्पृशः)** परमात्मा में सुख को स्पर्श करने वाले **(देवस्य)** प्रकाशमान **(अग्नेः)** अग्नि के **(सिध्रम्)** साधक **(स्तोमम्)** गुण, कर्म और स्वभाव की प्रशंसा को **(मनामहे)** मानते हैं, वैसे इसको आप लोग भी जानो॥२॥

भावार्थः-जिनकी धन की इच्छा होवे, वे अग्नि आदि पदार्थों के विज्ञान को ग्रहण करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निर्जुषत नो गिरो होता यो मानुषेष्वा। स यक्षद्दैव्यं जनम्॥३॥

अग्निः। जुषत। नः। गिरः। होता। यः। मानुषेषु। आ। सः। यक्षत्। दैव्यम्। जनम्॥३॥

पदार्थः-**(अग्निः)** पावक इव विद्वान् **(जुषत)** जुषते **(नः)** अस्माकम् **(गिरः)** वाचः **(होता)** दाता **(यः)** मानुषेषु **(आ)** **(सः)** **(यक्षत्)** सङ्गच्छेत् पूजयेद्वा **(दैव्यम्)** दिव्येषु गुणेषु भवम् **(जनम्)** विद्वांसम्॥३॥

अन्वयः-हे विद्वन्! यो होता यथाग्निर्नो गिरो जुषत यथा स मानुषेषु दैव्यं जनमा यक्षत्तथा त्वमनुतिष्ठ॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यद्यग्निर्न स्यात्तर्हि कोऽपि जीवो जिह्वां चालयितुं न शक्नुयात्॥३॥

पदार्थः-हे विद्वन्! **(यः)** जो **(होता)** दाता **(अग्नि)** अग्नि के सदृश तेजस्वी विद्वान् **(नः)** हम लोगों की **(गिरः)** वाणियों का **(जुषत)** सेवन करता है और जैसे **(सः)** वह **(मानुषेषु)** मनुष्यों में **(दैव्यम्)** श्रेष्ठ गुणों में उत्पन्न **(जनम्)** विद्वान् जन को **(आ, यक्षत्)** प्राप्त हो वा सत्कार करे, वैसे आप करिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि न हो तो कोई भी जीव जिह्वा न चला सके॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वि तन्वते॥४॥

त्वम्। अग्ने। सऽप्रथाः। असि। जुष्टः। होता। वरेण्यः। त्वया। यज्ञम्। वि। तन्वते॥४॥

पदार्थः-**(त्वम्)** **(अग्ने)** विद्वन् **(सप्रथाः)** प्रसिद्धकीर्तिः **(असि)** **(जुष्टः)** सेवितः **(होता)** दाताऽऽदाता वा **(वरेण्यः)** अतिश्रेष्ठः **(त्वया)** **(यज्ञम्)** **(वि)** **(तन्वते)**॥४॥

अन्वयः-हे अग्ने! यतो विद्वांसस्त्वया सह यज्ञं वि तन्वते तैः सह होता वरेण्यः सप्रथा जुष्टस्त्वमसि

तस्मात् सत्कर्त्तव्योऽसि॥४॥

भावार्थः-मनुष्या आप्तविदुषां सङ्गेन धर्मार्थकाममोक्षसिद्धिकरं यज्ञं वितन्वन्तु॥४॥

पदार्थः-हे **(अग्ने)** विद्वन्! जिससे विद्वान् जन **(त्वया)** आपके साथ **(यज्ञम्)** यज्ञ का **(वि, तन्वते)** विस्तार करते हैं उनके साथ **(होता)** दाता वा ग्रहण करने वाले **(वरेण्यः)** अतिश्रेष्ठ और **(सप्रथाः)** प्रसिद्ध यश वाले **(जुष्टः)** सेवन किये गये **(त्वम्)** आप **(असि)** हो, इससे सत्कार करने योग्य हो॥४॥

भावार्थः-मनुष्य लोग यथार्थवक्ता विद्वानों के संग से धर्म्म, अर्थ, काम और मोक्ष की सिद्धि करने वाले यज्ञ का विस्तार करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम्॥५॥

त्वाम्। अग्ने। वाजऽसातमम्। विप्राः। वर्धन्ति। सुऽस्तुतम्। सः। नः। रास्व। सुऽवीर्यम्॥५॥

पदार्थः-(**त्वाम्**) (**अग्ने**) महाविद्वन् (**वाजसातमम्**) वाजानां विज्ञानानां वेगानामतिशयेन विभाजकम् (**विप्राः**) मेधाविनः (**वर्धन्ति**) वर्धयन्ति (**सुष्टुतम्**) शोभनकीर्त्तिम् (**सः**) (**नः**) अस्मभ्यम् (**रास्व**) देहि (**सुवीर्यम्**) सुष्ठुपराक्रमम्॥५॥

अन्वयः-हे अग्ने! विप्रा यं वाजसातमं सुष्टुतं सुवीर्य्यं त्वां वर्धन्ति स त्वं नस्सुवीर्यं रास्व॥५॥

भावार्थः-हे मनुष्या! यदि युष्मानाप्ता विद्वांसः सर्वतो वर्धयेयुस्तर्हि युष्माकमतुलः प्रभावो वर्द्धेत॥५॥

पदार्थः-हे **(अग्ने)** महाविद्वन्! **(विप्राः)** बुद्धिमान् जन जिन **(वाजसातमम्)** विज्ञान और वेगों के विभाग करने वाले **(सुष्टुतम्)** उत्तम यश वाले और **(सुवीर्य्यम्)** उत्तम पराक्रमयुक्त **(त्वाम्)** आपकी **(वर्धन्ति)** वृद्धि करते हैं, **(सः)** वह आप **(नः)** हम लोगों के लिये उत्तम पराक्रम को **(रास्व)** दीजिये॥५॥

भावार्थः-हे मनुष्यो! जो आप लोगों की यथार्थवक्ता विद्वान् जन सब प्रकार से वृद्धि करें तो आप लोगों का अतुल प्रताप बढ़े॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्ने नेमिरराँइव देवांस्त्वं परिभूरसि। आ राधश्चित्रमृञ्जसे॥६॥५॥

अग्ने। नेमिः। अरान्ऽइव। देवान्। त्वम्। परिऽभूः। असि। आ। राधः। चित्रम्। ऋञ्जसे॥६॥

पदार्थः-(अग्ने) विद्वान् **(नेमिः)** रथाङ्गम् **(अरानिव)** चक्राङ्गानीव **(देवान्)** दिव्यान् गुणान् विदुषो वा **(त्वम्)** **(परिभूः)** सर्वतो भावयिता **(असि)** **(आ)** **(राधः)** धनम् **(चित्रम्)** **(ऋञ्जसे)** प्रसाध्नोसि॥६॥

अन्वयः-हे अग्ने! त्वं नेमिररानिव देवान् परिभूरसि चित्रं राध आ ऋञ्जसे तस्मात् सत्कर्त्तव्योऽसि॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽरादिभिश्चक्रं सुशोभते तथैव विद्वद्भिः शुभैर्गुणैश्च मनुष्याः शोभन्त इति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोदशं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(त्वम्)** आप जैसे **(नेमिः)** रथाङ्ग **(अरानिव)** चक्रों के अङ्गों को वैसे **(देवान्)** श्रेष्ठ गुणों वा विद्वानों को **(परिभूः)** सब प्रकार से हुवाने वाले **(असि)** हो और **(चित्रम्)** विचित्र **(राधः)** धन को **(आ, ऋञ्जसे)** सिद्ध करते हो, इससे सत्कार करने योग्य हो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अरादिकों से चक्र उत्तम प्रकार शोभित होता है, वैसे ही विद्वानों और उत्तम गुणों से मनुष्य शोभित होते हैं॥६॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेरहवां सूक्त और पांचवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य चतुर्दशस्य सूक्तस्य सुतम्भर आत्रेय ऋषिः। अग्निर्देवता। १, ४, ५, ६ निचृद्गायत्री। २ विराड् गायत्री। ३ गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निगुणानाह॥

अब छः ऋचा वाले चौदहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निगुणों को कहते हैं॥

अग्निं स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्॥ १॥

अग्निम्। स्तोमेन। बोधय। समिऽइधानः। अमर्त्यम्। हव्या। देवेषु। नः। दधत्॥ १॥

पदार्थः-(अग्निम्) (स्तोमेन) गुणप्रशंसनेन **(बोधय)** प्रदीपय **(समिधानः)** सम्यक् स्वयं प्रकाशमानः **(अमर्त्यम्)** मरणधर्मरहितम् **(हव्या)** दातुमादातुमर्हाणि वस्तूनि **(देवेषु)** विद्वत्सु दिव्यगुणपदार्थेषु वा **(नः)** अस्मभ्यम् **(दधत्)** दधाति॥ १॥

अन्वयः-हे विद्वन्! यस्समिधानोऽग्निर्देवेषु नो हव्या दधत् तममर्त्यमग्निं स्तोमेन बोधय॥ १॥

भावार्थः-हे मनुष्याः! प्रयत्नेनाऽग्न्यादिपदार्थविद्यां प्राप्नुत॥ १॥

पदार्थः-हे विद्वन्! जो **(समिधानः)** उत्तम प्रकार स्वयं प्रकाशमान अग्नि **(देवेषु)** विद्वानों वा श्रेष्ठ गुणों वाले पदार्थों में **(नः)** हम लोगों के लिये **(हव्या)** देने और ग्रहण करने योग्य वस्तुओं को **(दधत्)** धारण करता है, उस **(अमर्त्यम्)** मरणधर्म से रहित **(अग्निम्)** अग्नि को **(स्तोमेन)** गुणों की प्रशंसा से **(बोधय)** प्रकाशित कीजिये॥ १॥

भावार्थः-हे मनुष्यो! प्रयत्न से अग्नि आदि पदार्थों की विद्या को प्राप्त होओ॥ १॥

पुनस्तेमव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तमध्वरेष्वीळते देवं मर्ता अमर्त्यम्। यजिष्ठं मानुषे जने॥ २॥

तम्। अध्वरेषु। ईळते। देवम्। मर्ताः। अमर्त्यम्। यजिष्ठम्। मानुषे। जने॥ २॥

पदार्थः-(तम्) (अध्वरेषु) अहिंसनीयेषु धर्म्येषु व्यवहारेषु **(ईळते)** स्तुवन्ति **(देवम्)** दिव्यगुणम् **(मर्त्ताः)** मनुष्याः **(अमर्त्यम्)** स्वरूपतो नित्यम् **(यजिष्ठम्)** अतिशयेन सङ्गन्तारम् **(मानुषे) (जने)**॥ २॥

अन्वयः-ये मर्त्ता अध्वरेषु मानुषे जने तममर्त्यं यजिष्ठं देवमग्निमिव स्वप्रकाशं परमात्मानमीळते ते हि पुष्कलं सुखमश्नुवते॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अग्न्यादिपदार्थमिव पदार्थविद्यां गृह्णन्ति ते सर्वतः सुखिनो जायन्ते॥ २॥

पदार्थः-जो (**मर्ताः**) मनुष्य (**अध्वरेषु**) नहीं नाश करने योग्य धर्मयुक्त व्यवहारों में (**मानुषे**) विचारशील (**जने**) जन में (**तम्**) उस (**अमर्त्यम्**) स्वरूप से नित्य (**यजिष्ठम्**) अतिशय मेल करने वाले (**देवम्**) श्रेष्ठ गुण वाले अग्नि के सदृश स्वयं प्रकाशित परमात्मा की (**ईळते**) स्तुति करते हैं, वे ही बहुत सुख का भोग करते हैं॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अग्नि आदि पदार्थ के सदृश पदार्थविद्या को ग्रहण करते हैं, वे सब प्रकार सुखी होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता। अग्निं हव्याय वोळ्हवे॥३॥

तम्। हि। शश्वन्तः। ईळते। स्रुचा। देवम्। घृतऽश्चुता। अग्निम्। हव्याय। वोळ्हवे॥३॥

पदार्थः-(**तम्**) (**हि**) (**शश्वन्तः**) अनादिभूता जीवाः (**ईळते**) प्रशंसन्ति (**स्रुचा**) यज्ञसाधनेनेव योगाभ्यासेन (**देवम्**) देदीप्यमानम् (**घृतश्चुता**) घृतं श्चोतति तेन (**अग्निम्**) (**हव्याय**) दातुमादातुमर्हाय (**वोळ्हवे**) वोढुम्॥३॥

अन्वयः-शश्वन्तो जीवा यथा ऋत्विग्यजमाना घृतश्चुता स्रुचा हव्याय वोळ्हवेऽग्निमीळते तथा हि तं परमात्मानं देवमीळन्ताम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा शिल्पिनोऽग्न्यादितत्त्वविद्यां प्राप्यानेकानि कार्य्याणि संसाध्य सिद्धप्रयोजना जायन्ते तथा मनुष्याः परमात्मानं यथावद्विज्ञाय सिद्धेच्छा भवन्तु॥३॥

पदार्थः-(**शश्वन्तः**) अनादि से वर्त्तमान जीव जैसे यज्ञ करने वाला और यजमान (**घृतश्चुता**) जो घृत वा जल चुआती उस (**स्रुचा**) यज्ञ सिद्ध कराने वाली स्रुच् उससे (**हव्याय**) देने और लेने के योग्य के लिये (**वोळ्हवे**) धारण करने को (**अग्निम्**) अग्नि की (**ईळते**) प्रशंसा करते हैं, वैसे (**हि**) ही योगाभ्यास से (**तम्**) उस परमात्मा (**देवम्**) देव अर्थात् निरन्तर प्रकाशमान की स्तुति करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे शिल्पीजन अग्नि आदि तत्वों की विद्या को प्राप्त होकर और अनेक कार्य्यों को सिद्ध करके प्रयोजनों को सिद्ध करते हैं, वैसे मनुष्य परमात्मा को यथावत् जान के अपनी इच्छाओं को सिद्ध करें॥३॥

पुनरग्निविषयमाह॥

फिर अग्निविषय को कहते हैं॥

अग्निर्जातो अरोचत घ्नन् दस्यूञ्ज्योतिषा तमः। अविन्दद् गा अपः स्वः॥४॥

अग्निः। जातः। अरोचत। घ्नन्। दस्यून्। ज्योतिषा। तमः। अविन्दत्। गाः। अपः। स्वरिति स्वः॥४॥

पदार्थः-(अग्निः) पावकः **(जातः)** प्रकटः सन् **(अरोचत)** प्रकाशते **(घ्नन्)** **(दस्यून्)** दुष्टाँश्चोरान् **(ज्योतिषा)** प्रकाशेन **(तमः)** अन्धकाररूपां रात्रिम् **(अविन्दत्)** लभते **(गाः)** किरणान् **(अपः)** अन्तरिक्षम् **(स्वः)** आदित्यम्॥४॥

अन्वयः-हे मनुष्या! राजा यथा जातोऽग्निर्ज्योतिषां तमो घ्नन्नरोचत गा अपः स्वश्चाऽविन्दत् तथा जातविद्याविनयो दस्यून् घ्नन् न्यायेनाऽन्यायं निवार्य्य विजयं कीर्तिं च लभेत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाग्निरन्धकारं निवार्य्य प्रकाशते तथा राजा दुष्टान् चोरान् निवार्य्य विराजेत॥४॥

पदार्थः-हे मनुष्यो! राजा जैसे **(जातः)** प्रकट हुआ **(अग्निः)** अग्नि **(ज्योतिषा)** प्रकाश से **(तमः)** अन्धकाररूप रात्रि का **(घ्नन्)** नाश करता हुआ **(अरोचत)** प्रकाशित होता और **(गाः)** किरणों **(अपः)** अन्तरिक्ष और **(स्वः)** सूर्य्य को **(अविन्दत्)** प्राप्त होता, वैसे प्राप्त हुए विद्या विनय जिसको वह **(दस्यून्)** दुष्ट चोरों का नाश करते हुए और न्याय से अन्याय का निवारण करके विजय और यश को प्राप्त हो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि अन्धकार का निवारण करके प्रकाशित होता है, वैसे राजा दुष्ट चोरों का निवारण करके विशेष शोभित होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत। वेतु मे शृणवद्धवम्॥५॥

अग्निम्। ईळेन्यम्। कविम्। घृतऽपृष्ठम्। सपर्यत। वेतु। मे। शृणवत्। हवम्॥५॥

पदार्थः-(अग्निम्) **(ईळेन्यम्)** प्रशंसनीयम् **(कविम्)** क्रान्तदर्शनम् **(घृतपृष्ठम्)** घृतं दीपनमाज्यमुदकं वा पृष्ठे यस्य तम् **(सपर्यत)** सेवध्वम् **(वेतु)** व्याप्नोतु **(मे)** मम **(शृणवत्)** शृणुयात् **(हवम्)**॥५॥

अन्वयः-हे मनुष्या! यथा विद्वान् मे हवं वेतु शृणवत् तथैवेळेन्यं कविं घृतपृष्ठमग्निं यूयं सपर्यत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या अग्न्यादिपदार्थविद्याभ्यासं कुर्य्युस्ते निरन्तरं सुखं सेवेरन्॥५॥

पदार्थः-हे मनुष्यो! जैसे विद्वान् **(मे)** मेरे **(हवम्)** देने-लेने योग्य व्यवहार को **(वेतु)** व्याप्त हो और **(शृणवत्)** सुने वैसे **(ईळेन्यम्)** प्रशंसा करने योग्य **(कविम्)** प्रतापयुक्त दर्शन वाले **(घृतपृष्ठम्)** प्रकाश घृत वा जल पृष्ठ में जिसके उस **(अग्निम्)** अग्नि का **(सपर्यत)** सेवन करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अग्नि आदि पदार्थों की विद्या का अभ्यास करें, वे निरन्तर सुख को सेवें॥५॥

पुनरग्निविषयमाह॥

फिर अग्निविषय को कहते हैं॥

अ॒ग्निं घृ॒तेन॑ वावृधु॒: स्तोमे॑भिर्वि॒श्वच॑र्षणिम्। स्वा॒धीभि॑र्वच॒स्युभि॑:॥ ६॥ ६॥ १॥

अ॒ग्निम्। घृ॒तेन॑। व॒वृ॒धु॒:। स्तोमे॑भिः। वि॒श्वऽच॑र्षणिम्। सु॒ऽआ॒धीभि॑:। व॒च॒स्युऽभि॑:॥ ६॥

पदार्थ:-(अग्निम्) (घृतेन) आज्येन **(वावृधु:)** वर्धयेयु: **(स्तोमेभि:)** प्रशंसितै: कर्मभि: **(विश्वचर्षणिम्)** विश्वप्रकाशकम् **(स्वाधीभि:)** सुष्ठुध्यानयुक्तै: **(वचस्युभि:)** आत्मनो वचनमिच्छुभि:॥ ६॥

अन्वय:-ये स्तोमेभिर्घृतेन विश्वचर्षणिमग्निं वावृधुस्तैर्वचस्युभि: स्वाधीभिर्जनै: सह जना अग्न्यादिविद्यां गृह्णीयु:॥ ६॥

भावार्थ:-यथेन्धनादिनाग्निर्वर्धते तथैव सत्सङ्गेन विज्ञानं वर्धत इति॥ ६॥

अत्राग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्दशं सूक्तं पञ्चमे मण्डले प्रथमोऽनुवाक: षष्ठो वर्गश्च समाप्त:॥

पदार्थ:-जो **(स्तोमेभि:)** प्रशंसित कर्मों और **(घृतेन)** घृत से **(विश्वचर्षणिम्)** संसार के प्रकाश करने वाले **(अग्निम्)** अग्नि की **(वावृधु:)** वृद्धि करावें उन **(वचस्युभि:)** अपने वचन की इच्छा करने वाले **(स्वाधीभि:)** उत्तम प्रकार ध्यान से युक्त जनों के साथ सब मनुष्य अग्नि आदि पदार्थों की विद्या को ग्रहण करें॥ ६॥

भावार्थ:-जैसे ईंधन आदि से अग्नि बढ़ता है, वैसे ही सत्सङ्ग से विज्ञान बढ़ता है॥ ६॥

इस सूक्त में अग्नि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के साथ संगति जाननी चाहिये॥

यह चतुर्दश सूक्त और पञ्चम मण्डल में प्रथम अनुवाक और छठा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य पञ्चदशस्य सूक्तस्य धरुण अङ्गिरस ऋषिः। अग्निर्देवता। १, ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४ त्रिष्टुप्। ३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वदग्निगुणविषयमाह॥

अब पांच ऋचा वाले पन्द्रहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् और अग्निगुणविषय को कहते हैं॥

प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः॥ १॥

प्र। वेधसे। कवये। वेद्याय। गिरम्। भरे। यशसे। पूर्व्याय। घृतऽप्रसत्तः। असुरः। सुऽशेवः। रायः। धर्ता। धरुणः। वस्वः। अग्निः॥ १॥

पदार्थः-(प्र) (वेधसे) मेधाविने **(कवये)** विपश्चिते **(वेद्याय)** वेदितुं योग्याय **(गिरम्)** वाचम् **(भरे)** धरामि **(यशसे)** प्रशंसिताय **(पूर्व्याय)** पूर्वेषु लब्धविद्याय **(घृतप्रसत्तः)** घृते प्रसक्तः **(असुरः)** प्राणेषु सुखदाता **(सुशेवः)** शोभनं शेवः सुखं यस्मात् **(रायः)** द्रव्यस्य **(धर्त्ता) (धरुणः)** धारकः **(वस्वः)** पृथिव्यादेः **(अग्निः)** पावकः॥१॥

अन्वयः-हे विद्वांसो! यथा मया घृतप्रसक्तोऽसुरः सुशेवो रायो धर्त्ता वस्वो धरुणोऽग्निर्ध्रियते तद्बोधाय कवये वेद्याय यशसे पूर्व्याय वेधसे गिरं प्र भरे तथा यूयमप्येनमेतदर्थं धरत॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! याग्न्यादिविद्यासाधारणास्ति तां शुभलक्षणान् मेधाविनो विद्यार्थिनो ग्राहयत॥१॥

पदार्थः-हे विद्वानो! जैसे मुझ को **(घृतप्रसक्तः)** जल में प्रसक्त होने **(असुरः)** और प्राणों में सुख देने वाला तथा **(सुशेवः)** सुन्दर सुख जिसमें ऐसे **(रायः)** धन का **(धर्त्ता)** धारण करने और **(वस्वः)** पृथिवी आदि का **(धरुणः)** धारण करने वाला **(अग्निः)** अग्नि धारण किया जाता है, उसके बोध के लिये **(कवये)** विद्वान् और **(वेद्याय)** जानने योग्य के लिये और **(यशसे)** प्रशंसित **(पूर्व्याय)** प्राचीनों में प्राप्त विद्या वाले **(वेधसे)** बुद्धिमान् के लिये **(गिरम्)** वाणी को **(प्र, भरे)** धारण करता हूं, वैसे आप लोग भी इसको इसलिये धारण करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जो अग्नि आदि पदार्थों की विद्या असाधारण अर्थात् विलक्षण है, उसको उत्तम लक्षण वाले बुद्धिमान् विद्यार्थियों के लिये ग्रहण कराइये॥१॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

ऋ॒तेन॑ ऋ॒तं ध॒रुणं॑ धारयन्त य॒ज्ञस्य॑ शा॒के प॑र॒मे व्यो॑मन्।

दि॒वो धर्म॑न् ध॒रुणे॑ से॒दुषो॒ नॄञ्जा॒तैरजा॑ताँ अ॒भि ये न॑न॒क्षुः॥ २॥

ऋ॒तेन॑। ऋ॒तम्। ध॒रुण॑म्। धा॒र॒य॒न्त॒। य॒ज्ञस्य॑। शा॒के। प॒र॒मे। विऽओ॑मन्। दि॒वः। धर्म॑न्। ध॒रुणे॑। से॒दुषः॑। नॄन्। जा॒तैः॑। अजा॑तान्। अ॒भि। ये। न॒न॒क्षुः॥ २॥

पदार्थः-(ऋतेन) सत्येन परमात्मना वा **(ऋतम्)** सत्यं कारणादिकम् **(धरुणम्)** सर्वस्य धर्त्तृ **(धारयन्त) (यज्ञस्य)** सर्वस्य व्यवहारस्य **(शाके)** शक्तिनिमित्ते **(परमे)** प्रकृष्टे **(व्योमन्)** व्यापके **(दिवः)** सूर्य्यादेः **(धर्मन्)** धर्मे **(धरुणे)** धारके **(सेदुषः)** ज्ञानवतः **(नॄन्)** मनुष्यान् **(जातैः) (अजातान्) (अभि) (ये) (ननक्षुः)** प्राप्नुवन्ति। **नक्षतिर्गतिकर्मासु पठितम्।** (निघं०२.१४)॥ २॥

अन्वयः-य ऋतेनर्त्तं धरुणं यज्ञस्य शाके परमे व्योमन् दिवो धर्मन् धरुणे जातैरजातान् सेदुषो नृनभि ननक्षुस्ते सत्यां विद्यां धारयन्त॥ २॥

भावार्थः-त एव मनुष्या विद्वांसो ये पूर्वापरवर्त्तमानान् विदुषः सङ्गत्य परमेश्वरप्रकृतिजीवकार्यविद्यां जानन्ति॥ २॥

पदार्थः-(ये) जो **(ऋतेन)** सत्य वा परमात्मा से **(ऋतम्)** सत्य कारणादिक **(धरुणम्)** सब के धारण करने वाले को **(यज्ञस्य)** सम्पूर्ण व्यवहार के **(शाके)** सामर्थ्य के निमित्त **(परमे)** उत्तम **(व्योमन्)** व्यापक **(दिवः)** सूर्य्य आदि से **(धर्मन्)** धर्म **(धरुणे)** और धारण करने वाले में **(जातैः)** उत्पन्न हुए पदार्थों से **(अजातान्)** न उत्पन्न हुए **(सेदुषः)** ज्ञानवान् **(नॄन्)** मनुष्यों को **(अभि, ननक्षुः)** प्राप्त होते हैं, वे सत्यविद्या को **(धारयन्त)** धारण करें॥ २॥

भावार्थः-वे ही मनुष्य विद्वान् हैं जो पूर्व और आगे वर्त्तमान विद्वानों को मिलकर परमेश्वर, प्रकृति और जीव के कार्य्य की विद्या को जानते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अं॒होयु॑वस्त॒न्वस्त॒न्व॑ते॒ वि वयो॑ म॒हद्दु॒ष्टरं॑ पू॒र्व्याय॑।

स सं॒वतो॒ नवजा॑तस्तुतु॒र्यात् सिं॒हं न क्रु॒द्धम॒भित॒ परि॑ ष्ठुः॥ ३॥

अं॒हः॒ऽयु॒वः॒। त॒न्वः॑। त॒न्व॑ते। वि। वयः॑। म॒हत्। दु॒स्तर॑म्। पू॒र्व्याय॑। सः। स॒म्ऽवतः॑। नव॑ऽजातः। तु॒तु॒र्यात्। सिं॒हम्। न। क्रु॒द्धम्। अ॒भित॑ः। परि॑। स्थुः॥ ३॥

पदार्थः-(अंहोयुवः) येंऽहोऽपराधं युवन्ति पृथक्कुर्वन्ति ते **(तन्वः)** शरीरस्य मध्ये **(तन्वते)** विस्तृणन्ति **(वि) (वयः)** जीवनम् **(महत्) (दुष्टरम्)** दुःखेन तरितुं योग्यम् **(पूर्व्याय)** पूर्वेषु भवाय **(सः)**

(संवतः) संसेवमानः **(नवजातः)** नवीनाभ्यासेन जातो विद्यावान् **(तुतुर्यात्)** हिंस्यात् **(सिंहम्)** **(न)** इव **(क्रुद्धम्)** **(अभितः)** सर्वतः **(परि)** सर्वतः **(स्थुः)** तिष्ठन्ति॥३॥

अन्वयः-हे मनुष्या! यस्यांहोयुवस्तन्वस्तन्वते महद्दुष्टरं वयो वि तन्वते सुखं परि ष्ठुः स तत्सङ्गी संवतो नवजातः पूर्व्याय क्रुद्धं सिंहं नाऽभितस्तुतुर्यात्॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः पापं दूरीकृत्य धर्ममाचरन्ति ते शरीरात्मसुखं जीवनं च वर्धयन्ति। यथा क्रुद्धः सिंहः प्राप्तान् प्राणिनो हिनस्ति तथा प्राप्तान् दुर्गुणान् सर्वे घ्नन्तु॥३॥

पदार्थः-हे मनुष्यो! जिसके सम्बन्ध में **(अंहोयुवः)** जो अपराध को दूर करते वे **(तन्वः)** शरीर के मध्य में **(तन्वते)** विस्तार को प्राप्त होते और **(महत्)** बड़े **(दुष्टरम्)** दुःख से पार होने योग्य **(वयः)** जीवन को **(वि)** विशेष करके विस्तृत करते और सुख के **(परि)** सब ओर **(स्थुः)** स्थित होते हैं **(सः)** वह उनका सङ्गी **(संवतः)** उत्तम प्रकार सेवन किया गया **(नवजातः)** नवीन अभ्यास से उत्पन्न हुई विद्या जिसकी ऐसा पुरुष **(पूर्व्याय)** पूर्वज के लिये **(क्रुद्धम्)** क्रोधयुक्त **(सिंहम्)** सिंह के **(न)** सदृश अन्य को **(अभितः)** सब प्रकार से **(तुतुर्यात्)** नाश करे॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य पाप को दूर करके धर्म का आचरण करते हैं, वे शरीर और आत्मा के सुख और जीवन की वृद्धि कराते हैं। और जैसे क्रुद्ध सिंह प्राप्त हुए प्राणियों का नाश करता है, वैसे प्राप्त हुए दुर्गुणों का सब जन नाश करें॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

मातेव॒ यद्भर॑से पप्रथा॒नो जन॑ञ्जनं॒ धाय॑से॒ चक्ष॑से च।

वयो॑वयो जरसे॒ यद्दधा॑नः॒ परि॒ त्मना॒ विषु॑रूपो जिगा॑सि॥४॥

मा॒ताऽइ॑व। यत्। भर॑से। प॒प्र॒था॒नः। जन॑म्ऽजनम्। धाय॑से। चक्ष॑से। च॒। वयः॑ऽवयः। ज॒र॒से॒। यत्। दधा॑नः। परि॑। त्मना॑। विषु॑ऽरूपः। जि॒गा॒सि॒॥४॥

पदार्थः-**(मातेव)** यथा जननी **(यत्)** यतः **(भरसे)** **(पप्रथानः)** प्रख्यातविद्यः **(जनञ्जनम्)** मनुष्यं मनुष्यम् **(धायसे)** धातुम् **(चक्षसे)** ख्यापयितुम् **(च)** **(वयोवयः)** कमनीयं जीवनं जीवनम् **(जरसे)** स्तौषि **(यत्)** यतः **(दधानः)** **(परि)** सर्वतः **(त्मना)** आत्मना **(विषुरूपः)** प्राप्तविद्यः **(जिगासि)** प्रशंससि॥४॥

अन्वयः-हे विद्वन्! यद्यतः पप्रथानस्त्वं मातेव धायसे चक्षसे च जनञ्जनं भरसे त्मना यद्दधानो वयोवयो जरसे विषुरूपः सन् सर्वान् पदार्थान् परि जिगासि तस्माद्विद्वान् भवसि॥४॥

भावार्थः-ये विद्वांसो मातृवद्विद्यार्थिनो रक्षन्ति सर्वेषामुन्नतिं चिकीर्षन्ति ब्रह्मचर्य्यायुर्वर्धननिमित्तानि कर्म्माण्युपदिशन्ति ते जगत्पूज्या भवन्ति॥४॥

पदार्थः-हे विद्वन्! **(यत्)** जिस कारण **(पप्रथानः)** प्रसिद्ध विद्यायुक्त आप **(मातेव)** माता के सदृश **(धायसे)** धारण करने और **(चक्षसे)** कहाने को **(च)** भी **(जनञ्जनम्)** मनुष्य-मनुष्य का **(भरसे)** पोषण करते हो और **(त्मना)** आत्मा से **(यत्)** जिस कारण **(दधानः)** धारण करते हुए **(वयोवयः)** सुन्दर जीवन की **(जरसे)** स्तुति करते हो और **(विषुरूपः)** विद्या जिनको प्राप्त ऐसे हुए सम्पूर्ण पदार्थों की **(परि)** सब प्रकार से **(जिगासि)** प्रशंसा करते हो, इससे विद्वान् होते हो॥४॥

भावार्थः-जो विद्वान् जन माता के सदृश विद्यार्थियों की रक्षा करते, सब की उन्नति करने की इच्छा करते और ब्रह्मचर्य तथा अवस्था के बढ़ने में कारणरूप कार्य्यों का उपदेश करते हैं, वे संसार के आदर करने योग्य होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वाजो॒ नु ते॒ शव॑सस्पा॒त्वन्त॑मु॒रुं दोध॑ं ध॒रुणं॑ देव रा॒यः।

प॒दं न ता॒युर्गुहा॒ दधा॑नो म॒हो रा॒ये चि॒तय॒न्नत्रि॑मस्पः॥५॥७॥

वाज॑ः। नु। ते॒। शव॑सः। पा॒तु॒। अन्त॑म्। उ॒रुम्। दोध॑म्। ध॒रुण॑म्। दे॒व॒। रा॒यः। प॒दम्। न। ता॒युः। गुहा॑। दधा॑नः। म॒हः। रा॒ये। चि॒तय॑न्। अत्रि॑म्। अ॒स्प॒रित्य॑स्पः॥५॥

पदार्थः-**(वाजः)** वेगः **(नु)** सद्यः **(ते)** **(शवसः)** बलस्य **(पातु)** रक्षतु **(अन्तम्)** **(उरुम्)** बहुम् **(दोधम्)** प्रपूरकम् **(धरुणम्)** धर्त्तारम् **(देव)** **(रायः)** धनस्य **(पदम्)** पादचिह्नम् **(न)** इव **(तायुः)** चोरः **(गुहा)** बुद्धौ **(दधानः)** **(महः)** महते **(राये)** धनाय **(चितयन्)** ज्ञापयन् **(अत्रिम्)** पालकम् **(अस्पः)** प्रीणय॥५॥

अन्वयः-हे देव! ते वाजः शवस उरुमन्तं दोधं रायो धरुणं नु पातु तायुः पदं न महो राये गुहा सत्यं दधानोऽत्रिं चितयन् सर्वास्त्वमस्पः॥५॥

भावार्थः-हे मनुष्या! यथा चोरश्चोरस्य पदमन्विष्य गृह्णाति तथैवाऽऽत्मसु सत्यं धृत्वा कामपूर्त्तिं विधाय सर्वान् प्रीणयन्तु॥५॥

अत्र विद्वदग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चदशं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हे **(देव)** विद्वन् **(ते)** आपका **(वाजः)** वेग **(शवसः)** बल के **(उरुम्)** बहुत **(अन्तम्)** अन्त की **(दोधम्)** तथा उत्तम पूर्ण करने वाले और **(रायः)** धन के **(धरुणम्)** धारण करने वाले की **(नु)** शीघ्र **(पातु)** रक्षा करे और **(तायुः)** चोर **(पदम्)** पैरों के चिह्न को **(न)** जैसे वैसे **(महः)** बड़े **(राये)** धन के लिये **(गुहा)** बुद्धि में सत्य को **(दधानः)** धारण करते और **(अत्रिम्)** पालन करने वाले को **(चितयन्)** जनाते हुए आप सब को **(अस्पः)** प्रसन्न कीजिये॥५॥

भावार्थ:-हे मनुष्यो! जैसे चोर, चोर के पाद के चिह्न को ढूढं के ग्रहण करता है, वैसे ही आत्माओं में सत्य को धारण कर और कामना की पूर्ति करके सब को प्रसन्न करें॥५॥

इस सूक्त में विद्वान् और अग्नि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह पन्द्रहवां सूक्त और सप्तम वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चस्य षोडशस्य सूक्तस्य पुरुरात्रेय ऋषिः। अग्निर्देवता। १, २, ३ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ४ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ५ बृहती छन्दः। मध्यमः स्वरः॥

अथ विद्युद्विषयमाह॥

अब पांच ऋचा वाले सोलहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में बिजुली के विषय को कहते हैं॥

बृ॒हद्व॒यो हि भा॒नवेऽर्चा॑ दे॒वाया॒ग्नये॑। यं मि॒त्रं न प्रश॑स्तिभि॒र्मर्ता॑सो दधि॒रे पु॒रः॥ १॥

बृ॒हत्। वय॑ः। हि। भा॒नवे॑। अर्चा॑। दे॒वाय॑। अ॒ग्नये॑। यम्। मि॒त्रम्। न। प्रश॑स्तिऽभिः। मर्ता॑सः। द॒धि॒रे। पु॒रः॥ १॥

पदार्थः-(बृहत्) महत् **(वयः)** प्रदीपकं तेजः **(हि)** **(भानवे)** प्रकाशाय **(अर्चा)** पूजय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(देवाय)** दिव्यगुणाय **(अग्नये)** विद्युदाद्याय **(यम्)** **(मित्रम्)** सखायम् **(न)** इव **(प्रशस्तिभिः)** प्रशंसाभिः **(मर्त्तासः)** मनुष्याः **(दधिरे)** दधति **(पुरः)** पुरस्तात्॥ १॥

अन्वयः-हे विद्वन्! मर्त्तासः प्रशस्तिभिर्यं मित्रं न पुरो दधिरे तं भानवे देवायाग्नये बृहद्वयो यथा स्यात् तथा ह्यर्चा॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा सखा सखायं धृत्वा सुखमेधते तथैवाग्न्यादिविद्यां प्राप्य विद्वांस आनन्देन वर्धन्ते॥ १॥

पदार्थः-हे विद्वन्! **(मर्त्तासः)** मनुष्य **(प्रशस्तिभिः)** प्रशंसाओं से **(यम्)** जिसको **(मित्रम्)** मित्र के **(न)** समान **(पुरः)** प्रथम से **(दधिरे)** धारण करते हैं, उसको **(भानवे)** प्रकाश के लिये और **(देवाय)** श्रेष्ठ गुण वाले **(अग्नये)** बिजुली आदि के लिये **(बृहत्)** बड़ा **(वयः)** प्रदीप्त करने वाला तेज जैसे हो, वैसे **(हि)** ही **(अर्चा)** पूजिये, आदर करिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मित्र, मित्र को धारण करके सुख की वृद्धि को प्राप्त होता है, वैसे ही अग्नि आदि पदार्थों की विद्या को प्राप्त होकर विद्वान् जन आनन्द से वृद्धि को प्राप्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स हि द्यु॒भि॒र्जना॑ना॒ं होता॒ दक्ष॑स्य बा॒ह्वोः।

वि ह॒व्यम॒ग्निरा॑नु॒षग्भगो॒ न वा॑रमृण्वति॥ २॥

सः। हि। द्युऽभिः। जना॑नाम्। होता॑। दक्ष॑स्य। बा॒ह्वोः। वि। ह॒व्यम्। अ॒ग्निः। आ॒नु॒षक्। भगः॑। न। वार॑म्। ऋ॒ण्व॒ति॥ २॥

पदार्थः-(सः) (हि) (द्युभिः) धर्म्यैः कामैः **(जनानाम्) (होता)** दाता **(दक्षस्य)** बलस्य **(बाह्वोः)** भुजयोः **(वि) (हव्यम्)** दातुमर्हम् **(अग्निः)** पावकः **(आनुषक्)** आनुकूल्येन **(भगः)** सूर्य्यः **(न)** इव **(वारम्)** वरणीयम् **(ऋण्वति)** साध्नोति॥२॥

अन्वयः-यो जनानां बाह्वोर्दक्षस्य होताऽग्निर्भगो नानुषग्वारं हव्यं व्यृण्वति स हि द्युभिर्बलिष्ठो जायते॥२॥

भावार्थः-ये विद्वांसः स्वात्मवत्सर्वान् जनान् विदित्वा विद्यां प्रापय्योन्नतिं कर्त्तुमिच्छन्ति त एव भाग्यशालिनो वर्त्तन्ते॥२॥

पदार्थः-जो **(जनानाम्)** मनुष्यों की **(बाह्वोः)** भुजाओं के **(दक्षस्य)** बल का **(होता)** देने वाला **(अग्निः)** अग्नि **(भगः)** सूर्य्य के **(न)** सदृश **(आनुषक्)** अनुकूलता से **(वारम्)** स्वीकार करने और **(हव्यम्)** देने योग्य पदार्थ को **(वि, ऋण्वति)** विशेष सिद्ध करता है **(सः, हि)** वही **(द्युभिः)** धर्मयुक्त कामों से बलवान् होता है॥२॥

भावार्थः-जो विद्वान् जन अपने आत्मा के सदृश सब मनुष्यों को जान और विद्या को प्राप्त करा के उन्नति करने की इच्छा करते हैं, वे ही भाग्यशाली वर्तमान हैं॥२॥

अथ स- ामविजयविषयमाह॥

अब संग्रामविजयविषय को कहते हैं॥

अ॒स्य स्तोमे॑ म॒घोन॑: स॒ख्ये वृ॒द्धशो॑चिषः।

विश्वा॒ यस्मि॑न् तुवि॒ष्वणि॒ सम॒र्ये शुष्म॑मादु॒धुः॥३॥

अ॒स्य। स्तोमे॑। म॒घोन॑:। स॒ख्ये। वृ॒द्धऽशो॑चिषः। विश्वा॑। यस्मि॑न्। तु॒वि॒ऽस्वनि॑। सम्। अ॒र्ये। शुष्म॑म्। आ॒ऽदु॒धुः॥३॥

पदार्थः-(अस्य) (स्तोमे) प्रशंसायाम् **(मघोनः)** बहुधनयुक्तस्य **(सख्ये)** सख्युर्भावाय कर्मणे वा **(वृद्धशोचिषः)** वृद्धा शोचिर्दीप्तिर्यस्य सः **(विश्वा)** सर्वाणि **(यस्मिन्) (तुविष्वणि)** बलसेवने **(सम्)** सम्यक् **(अर्य्ये)** स्वामिनि वैश्ये वा **(शुष्मम्)** बलम् **(आदधुः)** समन्ताद्धरन्तु॥३॥

अन्वयः-ये मनुष्या अस्य वृद्धशोचिषो मघोनः स्तोमे सख्ये यस्मिन् तुविष्वणि समर्य्ये शुष्ममादधुस्ते विश्वा सुखानि प्राप्नुयुः॥३॥

भावार्थः-ये सखायो भूत्वा शरीरात्मबलं धृत्वा प्रयतन्ते ते स- ामादिषु विजयं प्राप्य प्रशंसितश्रियो जायन्ते॥३॥

पदार्थः-जो मनुष्य **(अस्य)** इस **(वृद्धशोचिषः)** वृद्ध अर्थात् बढ़ी हुई कान्ति जिसकी ऐसे **(मघोनः)** बहुत धन से युक्त पुरुष की **(स्तोमे)** प्रशंसा में और **(सख्ये)** मित्रपन वा मित्र के कार्य्य के

लिये **(यस्मिन्)** जिस **(तुविष्वणि)** बलसेवन तथा **(सम्, अर्य्ये)** अच्छे प्रकार स्वामी वा वैश्य में **(शुष्मम्)** बल को **(आदधुः)** सब प्रकार धारण करें, वे **(विश्वा)** सम्पूर्ण सुखों को प्राप्त होवें॥३॥

भावार्थः-जो मित्र होकर शरीर और आत्मा के बल को धारण करके प्रयत्न करते हैं, वे स- ामादिकों में विजय को प्राप्त होकर प्रशंसित लक्ष्मीवान् होते हैं॥३॥

अथ राज्यैश्वर्य्यवर्द्धनमाह॥

अब राज्य और ऐश्वर्य्यवृद्धि को कहते हैं॥

अधा॒ ह्य॑ग्न एषां सु॒वीर्य॑स्य मं॒हना॑।

तमिद्यह्वं न रोद॑सी॒ परि॒ श्रवो॑ बभूवतुः॥४॥

अध॑। हि। अ॒ग्ने॒। ए॒षा॒म्। सु॒ऽवीर्य॑स्य। मं॒हना॑। तम्। इत्। य॒ह्वम्। न। रोद॑सी॒ इति॑। परि॑। श्रवः॑। ब॒भू॒व॒तुः॥४॥

पदार्थः-(**अधा**) अत्र **निपातस्य च**ेति दीर्घः। **(हि) (अग्ने)** राजन् **(एषाम्)** वीराणाम् **(सुवीर्य्यस्य)** सुष्ठु पराक्रमस्य **(मंहना)** महत्त्वेन **(तम्) (इत्) (यह्वम्)** महान्तं सूर्य्यम् **(न)** इव **(रोदसी)** द्यावापृथिव्यौ **(परि)** सर्वतः **(श्रवः)** अन्नम् **(बभूवतुः)** भवतः॥४॥

अन्वयः-हे अग्ने! एषां सुवीर्य्यस्य मंहना यौ तमिद्यह्वमधा रोदसी न श्रवो यथास्यात्तथा परि बभूवतुस्तौ हि विजयं प्राप्नुतः॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये महतीं सुशिक्षितां सेनां लभन्ते तेषामेव राज्यैश्वर्य्यं वर्धते॥४॥

पदार्थः-हे **(अग्ने)** राजन् **(एषाम्)** इन वीरों और **(सुवीर्यस्य)** उत्तम पराक्रम वाले के **(मंहना)** बड़प्पन से जो **(तम्)** उसको **(इत्)** ही **(यह्वम्)** बड़े सूर्य्य **(अधा)** इसके अन्तर **(रोदसी)** अन्तरिक्ष और पृथिवी के **(न)** सदृश **(श्रवः)** अन्न जैसे हो, वैसे **(परि)** सब ओर से **(बभूवतुः)** होते हैं, वे **(हि)** ही विजय को प्राप्त होते हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो बड़ी, उत्तम प्रकार शिक्षित सेना को प्राप्त होते हैं, उनके ही राज्य का ऐश्वर्य बढ़ता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू न॒ एहि॒ वार्य॒मग्ने॑ गृणा॒न आ भ॑र।

ये व॒यं ये च॑ सू॒रयः॑ स्व॒स्ति धाम॑हे॒ सचो॒तैधि॑ पृ॒त्सु नो॑ वृ॒धे॥५॥८॥

नु। नः॑। आ। इ॒हि॒। वार्य॑म्। अग्ने॑। गृ॒णा॒नः॑। आ। भ॒र॒। ये। व॒यम्। ये। च॒। सू॒रयः॑। स्व॒स्ति। धाम॑हे। सचा॑। उ॒त। ए॒धि॒। पृ॒त्ऽसु। नः॑। वृ॒धे॥५॥

पदार्थः-(नू) सद्यः **(नः)** अस्मान् **(आ) (इहि)** समन्तात् प्राप्नुहि **(वार्यम्)** वर्त्तुमर्हम् **(अग्ने)** विद्वन् **(गृणानः)** विद्वद्गुणान् स्तुवन् **(आ) (भर)** समन्तात् पुष्णीहि **(ये) (वयम्) (ये) (च) (सूरयः) (स्वस्ति)** सुखम् **(धामहे) (सचा)** सम्बद्धः **(उत) (एधि) (पृत्सु)** स-ामेषु **(नः)** अस्माकम् **(वृधे)** वर्धनाय॥५॥

अन्वयः-हे अग्ने! ये सूरयो ये च वयं स्वस्ति धामहे तैः सचा त्वं वार्यं नू गृणानो नोऽस्मानेहि। उत स्वस्ति चा भर पृत्सु नो वृध एधि॥५॥

भावार्थः-ये मनुष्येभ्यः सततं सुखं प्रयच्छन्ति तैः सह मनुष्याः सदोन्नतिं कुर्वन्त्विति॥५॥

अत्र विद्युद्विषयसङ्ग्रामविजयराज्यैश्वर्य्यवर्द्धनवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षोडशं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन् **(ये)** जो **(सूरयः)** विद्वान् **(ये, च)** और जो **(वयम्)** हम लोग **(स्वस्ति)** सुख को **(धामहे)** धारण करते हैं उनसे **(सचा)** सम्बद्ध आप **(वार्यम्)** स्वीकार करने योग्य की **(नू)** शीघ्र और **(गृणानः)** विद्वानों के गुणों की स्तुति करते हुए **(नः)** हम लोगों को **(आ, इहि)** सब प्रकार से प्राप्त हूजिये **(उत)** और सुख की **(आ, भर)** सब प्रकार पुष्टि कीजिये तथा **(पृत्सु)** संग्रामों में **(नः)** हम लागों की **(वृधे)** वृद्धि के लिये **(एधि)** प्राप्त हूजिये॥५॥

भावार्थः-जो मनुष्यों के लिये निरन्तर सुख देते हैं, उनके साथ मनुष्य सदा उन्नति करें॥५॥

इस सूक्त में बिजुली का विषय, संग्रामविजय और राज्यैश्वर्य के वर्धन का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सोलहवां सूक्त और आठवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य सप्तदशस्य सूक्तस्य पुरुरात्रेय ऋषिः। अग्निर्देवता। १ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। २ अनुष्टुप्। ३ निचृदनुष्टुप्। ४ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ५ भुरिग्बृहती छन्दः। मध्यमः स्वरः॥

अथाग्न्यादिविद्याविषयमाह॥

अब पांच ऋचा वाले सत्रहवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्न्यादि विद्याविषय को कहते हैं॥

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये।
अग्निं कृते स्वध्वरे पूरुरीळीतावसे॥ १॥

आ। यज्ञैः। देव। मर्त्यः। इत्था। तव्यांसम्। ऊतये। अग्निम्। कृते। सुऽअध्वरे। पूरुः। ईळीत। अवसे॥ १॥

पदार्थः-(आ) (**यज्ञैः**) विद्वत्सत्काराद्यैर्व्यवहारैः (**देव**) विद्वन् (**मर्त्यः**) मनुष्यः (**इत्था**) अस्माद्धेतोः (**तव्यांसम्**) अतिशयेन वृद्धम् (**ऊतये**) रक्षणाद्याय (**अग्निम्**) पावकम् (**कृते**) (**स्वध्वरे**) शोभनेऽहिंसामये (**पूरुः**) मननशीलो मनुष्यः (**ईळीत**) स्तौति (**अवसे**) विद्यादिसद्गुणप्रवेशाय॥ १॥

अन्वयः-हे देव! यथा पूरुर्मर्त्यः कृते स्वध्वरे यज्ञैरवसे तव्यांसमग्निमीळीतेत्थोतय आ प्रयुङ्क्ष्व॥ १॥

भावार्थः-ये विद्वत्सङ्गरुचयो मनुष्या अग्न्यादिपदार्थविद्यां प्राप्य सत्क्रियां कुर्वन्ति ते सर्वतो रक्षिता भवन्ति॥ १॥

पदार्थः-हे (**देव**) विद्वन् जैसे (**पूरुः**) मननशील (**मर्त्यः**) मनुष्य (**कृते**) किये हुए (**स्वध्वरे**) शोभन अहिंसामय यज्ञ में (**यज्ञैः**) विद्वानों के सत्कारादिक व्यवहारों से (**अवसे**) विद्या आदि श्रेष्ठ गुणों में प्रवेश होने के लिये (**तव्यांसम्**) अत्यन्त वृद्ध बड़े तेजयुक्त (**अग्निम्**) अग्नि की (**ईळीत**) प्रशंसा करता है (**इत्था**) इस कारण से (**ऊतये**) रक्षा आदि के लिये (**आ**) प्रयोग अर्थात् विशेष उद्योग करो॥ १॥

भावार्थः-जो विद्वानों के सङ्ग में प्रीति करने वाले मनुष्य अग्नि आदि पदार्थों की विद्या को प्राप्त हो कर श्रेष्ठ कर्म को करते हैं, वे सब प्रकार से रक्षित होते हैं॥ १॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को मन्त्र में कहते हैं॥

अस्य हि स्वयशस्तर आसा विधर्मन् मन्यसे।
तं नाकं चित्रशोचिषं मन्द्रं पुरो मनीषया॥ २॥

अस्य। हि। स्वयशःतरः। आसा। विऽधर्मन्। मन्यसे। तम्। नाकम्। चित्रऽशोचिषम्। मन्द्रम्। पुरः। मनीषया॥ २॥

पदार्थः-(अस्य) (हि) (स्वयशस्तरः) अतिशयेन स्वकीयं यशो यस्य सः **(आसा)** मुखेनासनेन वा **(विधर्मन्)** विशेषधर्मानुचारिन् **(मन्यसे) (तम्) (नाकम्)** अविद्यमानदुःखम् **(चित्रशोचिषम्)** अद्भुत-प्रकाशम् **(मन्द्रम्)** आनन्दप्रदम् **(परः) (मनीषया)** प्रज्ञया॥२॥

अन्वयः-हे विधर्मन्! यो ह्यस्य स्वयशस्तर आसा वर्त्तते परः सन्मनीषया तं मन्द्रं चित्रशोचिषं नाकं त्वं मन्यसे तमहं मन्ये॥२॥

भावार्थः-हे विद्वन्! भवान् सदैव धर्म्यं कीर्त्तिकरं कर्म्म कुर्य्याद्येन परं सुखमाप्नुयात्॥२॥

पदार्थः-हे **(विधर्मन्)** विशेष धर्म के अनुगामी! जो **(हि)** निश्चय **(अस्य)** इसके सम्बन्ध में **(स्वयशस्तरः)** अत्यन्त अपना यश जिसका ऐसा पुरुष **(आसा)** मुख वा आसन से वर्त्तमान है और **(परः)** श्रेष्ठ हुए **(मनीषया)** बुद्धि से **(तम्)** उस **(मन्द्रम्)** आनन्द देने वाले और **(चित्रशोचिषम्)** अद्भुत प्रकाशयुक्त **(नाकम्)** दुःख से रहित को आप **(मन्यसे)** जानते हो, उसका मैं आदर करता हूं॥२॥

भावार्थः-हे विद्वन्! आप सदा ही धर्म्मयुक्त यश को बढ़ाने वाले कर्म्म को करें, जिससे अत्यन्त सुख को प्राप्त होवें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अ॒स्य वासा उ॑ अ॒र्चिषा॒ य आयु॑क्त तु॒जा गि॒रा।

दि॒वो न यस्य॒ रेत॑सा बृ॒हच्छोच॑न्त्य॒र्चयः॥३॥

अ॒स्य। वै। अ॒सौ। ऊँ॒ इति॑। अ॒र्चि॒षा॑। यः। अयु॑क्त। तु॒जा। गि॒रा। दि॒वः। न। यस्य॑। रेत॑सा। बृ॒हत्। शोच॑न्ति। अ॒र्चयः॥३॥

पदार्थः-(अस्य) (वै) निश्चयेन **(असौ) (उ) (अर्चिषा)** विद्याप्रकाशेन **(यः) (आयुक्त)** युक्तो भवति **(तुजा)** प्रेरय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(गिरा)** वाण्या **(दिवः)** कमनीयार्थस्य **(न)** इव **(यस्य) (रेतसा) (बृहत्) (शोचन्ति) (अर्चयः)** सत्कृतयः॥३॥

अन्वयः-हे विद्वन्! योऽसावस्य वा अर्चिषा गिराऽऽयुक्त। उ यस्य रेतसा दिवो नार्चयो बृहच्छोचन्ति स त्वं दुःखानि तुजा॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! येषां विदुषां सूर्यप्रकाशवद्विद्यायशःकीर्त्तयो विलसन्ति त एव बृहद्विज्ञानं प्रसृजन्ति॥३॥

पदार्थः-हे विद्वन्! **(यः)** जो **(असौ)** यह **(अस्य)** इसकी **(वै)** निश्चय से **(अर्चिषा)** विद्या की दीप्ति और **(गिरा)** वाणी से **(आयुक्त)** युक्त होता **(उ)** और **(यस्य)** जिसके **(रेतसा)** पराक्रम से **(दिवः)** जैसे मनोहर प्रयोजन के **(न)** वैसे **(अर्चयः)** उत्तम सत्कार **(बृहत्)** बड़े **(शोचन्ति)** शोभित होते हैं, वह आप दुःखों की **(तुजा)** हिंसा करो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिन विद्वानों के सूर्य्य के प्रकाश के सदृश विद्या यशः और कीर्ति विलास को प्राप्त होते हैं, वे ही बड़े विज्ञान को उत्पन्न करते हैं॥३॥

अथाग्निदृष्टान्तेन विद्याविषयमाह॥

अब अग्निदृष्टान्त से विद्याविषय को कहते हैं॥

अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ।
अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते॥४॥

अस्य। क्रत्वा। विऽचेतसः। दस्मस्य। वसु। रथे। आ। अध। विश्वासु। हव्यः। अग्निः। विक्षु। प्र। शस्यते॥४॥

पदार्थः-(**अस्य**) (**क्रत्वा**) प्रज्ञया (**विचेतसः**) विज्ञापकस्य (**दस्मस्य**) दुःखापक्षयितुः (**वसु**) द्रव्यम् (**रथे**) रमणीये याने (**आ**) (**अधा**) (**विश्वासु**) सर्वासु (**हव्यः**) आदातुमर्हः (**अग्निः**) पावकः (**विक्षु**) प्रजासु (**प्र**) (**शस्यते**)॥४॥

अन्वयः-हे विद्वन्! यस्य विश्वासु विक्षु हव्योऽग्निः प्र शस्यतेऽधास्य क्रत्वा विचेतसो दस्मस्य क्रत्वा रथे वस्वा प्रशस्यते॥४॥

भावार्थः-यथा प्रजायामग्निर्विराजते तथैव विद्याविनययुक्ता धीमन्तो पुरुषा विराजन्ते॥४॥

पदार्थः-हे विद्वन्! जिसकी (**विश्वासु**) सम्पूर्ण (**विक्षु**) प्रजाओं में (**हव्यः**) ग्रहण करने योग्य (**अग्निः**) अग्नि (**प्र, शस्यते**) प्रशंसा को प्राप्त होता है (**अधा**) इसके अनन्तर (**अस्य**) इसकी (**क्रत्वा**) बुद्धि तथा (**विचेतसः**) जनाने और (**दस्मस्य**) दुःख के नाश करने वाले की बुद्धि से (**रथे**) सुन्दर वाहन में (**वसु**) द्रव्य (**आ**) प्रशंसित होता है॥४॥

भावार्थः-जैसे प्रजा में अग्नि विराजता है, वैसे ही विद्या और विनय से युक्त बुद्धिमान् पुरुष शोभित होते हैं॥४॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

नू न इद्धि वार्यमासा सचन्त सूरयः।
ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे॥५॥९॥

नु। नः। इत्। हि। वार्यम्। आसा। सचन्त। सूरयः। ऊर्जः। नपात्। अभिष्टये। पाहि। शग्धि। स्वस्तये। उत। एधि। पृत्ऽसु। नः। वृधे॥५॥

पदार्थः-(**नू**) सद्यः (**नः**) अस्मान् (**इत्**) (**हि**) यतः (**वार्यम्**) वरेषु पदार्थेषु भवं विद्युदग्निम् (**आसा**) उपवेशनेन (**सचन्त**) सम्बध्नन्ति (**सूरयः**) विद्वांसः (**ऊर्जः**) पराक्रमान् (**नपात्**) यो न पतति

(अभिष्टये) इष्टसुखाय **(पाहि)** **(शग्धि)** समर्थो भव **(स्वस्तये)** सुखाय **(उत)** अपि **(एधि)** भव **(पृत्सु)** स-ामेषु **(नः)** अस्माकम् **(वृधे)** वृद्धये॥५॥

अन्वयः-हे विद्वन्! यथा सूरय आसा नो वार्यं सचन्त तथा नपात् त्वं नोऽभिष्टय ऊर्जः पाहि पृत्सु नो वृधे हि शग्धि स्वस्तये न्विदुतैधि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि मनुष्या विद्वदनुकरणं कुर्युस्तर्हि शुभगुणप्राप्तिबलवृद्धिं सुखेन विजयं कुर्वन्तीति॥५॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तदशं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! जैसे **(सूरयः)** विद्वान् जन **(आसा)** उपवेशन अर्थात् स्थिति से **(नः)** हम लोगों को और **(वार्यम्)** श्रेष्ठ पदार्थों में उत्पन्न बिजुलीरूप अग्नि को **(सचन्त)** सम्बद्ध करते हैं, वैसे **(नपात्)** नहीं गिरने वाले आप **(नः)** हम लोगों के **(अभिष्टये)** अपेक्षित सुख के लिये **(ऊर्जः)** पराक्रमों की **(पाहि)** रक्षा कीजिये और **(पृत्सु)** संग्रामों में हम लोगों की **(वृधे)** वृद्धि के लिये **(हि)** जिससे **(शग्धि)** समर्थ हूजिये और **(स्वस्तये)** सुख के लिये **(नू)** शीघ्र **(इत्)** ही **(उत)** निश्चय से **(एधि)** प्राप्त हूजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वानों के अनुकरण को करें तो उत्तम गुणों की प्राप्ति, बल की वृद्धि और सुखपूर्वक विजय को करते हैं॥५॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्रहवां सूक्त और नववां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्याष्टादशस्य सूक्तस्य द्वितो मृक्तवाहा आत्रेय ऋषिः। अग्निर्देवता। १, ४ विराडनुष्टुप। २ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ३ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ५ भुरिग्बृहती छन्दः। मध्यमः स्वरः॥

अथाग्निवदतिथिविषयमाह॥

अब पांच ऋचा वाले अठारहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्नि के सदृश अतिथि के विषय को कहते हैं॥

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति॥ १॥

प्रातः। अग्निः। पुरुऽप्रियः। विशः। स्तवेत। अतिथिः। विश्वानि। यः। अमर्त्यः। हव्या। मर्तेषु। रण्यति॥ १॥

पदार्थः-(प्रातः) (अग्निः) अग्निरिव पवित्रः **(पुरुप्रियः)** बहुभिः कमितः सेवितो वा **(विशः)** प्रजाः **(स्तवेत)** प्रशंसेत् **(अतिथिः)** पूजनीय आप्तो विद्वान् **(विश्वानि) (यः) (अमर्त्यः)** स्वभावेन मरणधर्मरहितः **(हव्या)** दातुमर्हाणि **(मर्तेषु)** मरणधर्मेषु कार्य्येषु **(रण्यति)** रमते॥ १॥

अन्वयः-हे मनुष्या! योऽग्निरिव पुरुप्रियो मर्त्तेष्वमर्त्यो रण्यति विश्वानि हव्या स्तवेत यः प्रातरारभ्य विश उपदिशेत् सोऽतिथिः पूजनीयो भवति॥ १॥

भावार्थः-हे मनुष्या! योऽतिथिरात्मवित्सत्योपदेशको विद्वान् विद्वत्प्रियः परमात्मेव सर्वहितैषी नित्यं क्रीडते स एव सत्कर्त्तव्योऽस्ति॥ १॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अग्निः)** अग्नि के सदृश पवित्र **(पुरुप्रियः)** बहुतों से कामना किया वा सेवन किया गया **(मर्त्तेषु)** नाश होने वाले कार्य्यों में **(अमर्त्यः)** स्वभाव से मरणधर्म्मरहित **(रण्यति)** रमता है **(विश्वानि)** सम्पूर्ण **(हव्या)** देने योग्यों की **(स्तवेत)** प्रशंसा करे और जो **(प्रातः)** प्रातःकाल के आरम्भ से **(विशः)** प्रजाओं को उपदेश देवे वह **(अतिथिः)** आदर करने योग्य यथार्थवक्ता विद्वान् सत्कार करने योग्य होता है॥ १॥

भावार्थः-हे मनुष्यो! जो अतिथि आत्मा का जानने वाला, सत्य का उपदेशक, विद्वान्, विद्वानों का प्रिय, परमात्मा के सदृश सब के हित को चाहने वाला नित्य क्रीड़ा करता है, वह ही सत्कार करने योग्य है॥ १॥

पुनरतिथिविषयमाह॥

फिर अतिथिविषय को कहते हैं॥

द्वितायं मृक्तवाहसे स्वस्य दक्षस्य मंहना।

इन्दुं स धत्त आनुषक् स्तोता चित्ते अमर्त्य॥ २॥

द्वितायꣳ मृक्तऽवाꣳहसे। स्वस्यꣳ दक्षꣳस्य। मꣳहनाꣳ इन्दुꣳम्। सः। धत्ते। आनुषक्। स्तोता। चित्। ते। अमꣳर्त्य॥ २॥

पदार्थः-(द्वितय) द्वाभ्यां जन्मभ्यां विद्यां प्राप्ताय **(मृक्तवाहसे)** शुद्धविज्ञानप्रापकाय **(स्वस्य) (दक्षस्य) (मंहना)** महत्त्वेन **(इन्दुम्)** ऐश्वर्यम् **(सः) (धत्ते) (आनुषक्)** आनुकूल्ये **(स्तोता)** सत्यविद्याप्रशंसकः **(चित्)** अपि **(ते)** तुभ्यम् **(अमर्त्य)** आत्मस्वरूपेण नित्य॥ २॥

अन्वयः-हे अमर्त्य! यः स्तोतानुषगिन्दुं चित्ते धत्ते स द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना सह वर्त्तमानायाऽतिथये सुखं प्रयच्छेत्॥ २॥

भावार्थः-ये मनुष्या आप्तानतिथीन् सत्कुर्वन्ति ते सत्यं विज्ञानं प्राप्य सर्वदानन्दन्ति॥ २॥

पदार्थः-हे **(अमर्त्य)** अपने स्वरूप से नित्य! जो **(स्तोता)** सत्य विद्या की प्रशंसा करने वाला **(आनुषक्)** अनुकूलता से **(इन्दुम्)** ऐश्वर्य्य को **(चित्)** ही **(ते)** तेरे लिये **(धत्ते)** धारण करता है **(सः)** वह **(द्विताय)** दो जन्मों से विद्या को प्राप्त **(मृक्तवाहसे)** शुद्ध विज्ञान को प्राप्त कराने वाले **(स्वस्य)** और अपने **(दक्षस्य)** बल के **(मंहना)** बडप्पन के साथ वर्त्तमान अतिथि के लिये सुख देवे॥ २॥

भावार्थः-जो मनुष्य यथार्थवक्ता अतिथियों का सत्कार करते हैं, वे सत्य विज्ञान को प्राप्त हो कर सर्वदा आनन्दित होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम्।
अरिष्टो येषां रथो व्यश्वदावन्नीयते॥ ३॥

तम्। वः। दीर्घायुꣳशोचिषम्। गिरा। हुवे मघोनाम्। अरिष्टः। येषाम्। रथः। वि। अश्वꣳदावन्। ईयते॥ ३॥

पदार्थः-(तम्) (वः) युष्माकम् **(दीर्घायुशोचिषम्)** दीर्घमायुः शोचिः पवित्रकरं यस्य तम् **(गिरा) (हुवे)** आह्वये **(मघोनाम्)** बहुधनयुक्तानाम् **(अरिष्टः)** अहिंसनीयः **(येषाम्)** अतिथीनाम् **(रथः)** यानम् **(वि) (अश्वदावन्)** योऽश्वान् व्याप्तिकरान् विज्ञानादिगुणान् ददाति तत्सम्बुद्धौ **(ईयते)** गच्छति॥ ३॥

अन्वयः-हे मनुष्या! येषां मघोनां वोऽरिष्टो रथो वीयते तानहं हुवे। हे अश्वदावन् गृहस्थ! त्वत्कल्याणाय तं दीर्घायुशोचिषमतिथिमहं गिरा हुवे॥ ३॥

भावार्थः-येऽहिंसादिधर्मयुक्ता मनुष्याश्चिरञ्जीविनो धार्मिकानतिथीन् सेवन्ते तेऽपि दीर्घायुषः श्रीमन्तो भूत्वाऽऽनन्दिता जायन्ते॥ ३॥

पदार्थः-हे मनुष्यो! **(येषाम्)** जिन अतिथियों और **(मघोनाम्)** बहुत धन से युक्त **(वः)** आप लोगों का **(अरिष्टः)** नहीं हिंसा करने योग्य **(रथः)** वाहन **(वि, ईयते)** विशेषता से चलता है, उनका मैं

(हुवे) आह्वान करता हूं और हे **(अश्वदावन्)** व्याप्त करने वाले विज्ञान आदि गुणों के दाता गृहस्थ! आपके कल्याण के लिये **(तम्)** उस **(दीर्घायुशोचिषम्)** दीर्घ अर्थात् अधिक अवस्था पवित्र करनेवाली जिसकी ऐसे अतिथि विद्वान् का मैं **(गिरा)** वाणी से आह्वान करता हूं॥३॥

भावार्थः-जो अहिंसादि धर्म से युक्त मनुष्य अतिकालपर्य्यन्त जीवने वाले धार्मिक अतिथियों की सेवा करते हैं, वे भी दीर्घायु और लक्ष्मीवान् होकर आनन्दित होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

चित्रा वा येषु दीधितिरासन्नुक्था पान्ति ये।
स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि॥४॥

चित्रा। वा। येषु। दीधितिः। आसन्। उक्था। पान्ति। ये। स्तीर्णम्। बर्हिः। स्वः।ऽनरे। श्रवांसि। दधिरे। परि॥४॥

पदार्थः-**(चित्रा)** **(वा)** **(येषु)** अतिथिषु **(दीधितिः)** प्रकाशमाना विद्या **(आसन्)** आसन आस्ये वा **(उक्था)** प्रशंसनीयानि कर्माणि **(पान्ति)** रक्षन्ति **(ये)** **(स्तीर्णम्)** आच्छादितम् **(बर्हिः)** अन्तरिक्षमिव विज्ञानम् **(स्वर्णरे)** स्वः सुखेन युक्ते नरे **(श्रवांसि)** अन्नादीनि **(दधिरे)** दध्युः **(परि)** सर्वतः॥४॥

अन्वयः-हे मनुष्या! येषु चित्रा दीधितिरस्त्यासन्नुक्था सन्ति ये वा स्तीर्णं बर्हिरिव स्वर्णरे पान्ति श्रवांसि परि दधिरे त एवोत्तमा अतिथयः सन्ति॥४॥

भावार्थः-ये विद्याशुभगुणपूर्णाः सर्वेषां हितं प्रेप्सवः पुरुषार्थिनः पक्षपातरहिता अतिथय उपदेशेन सर्वान् रक्षन्ति ते जगत्कल्याणकरा भवन्ति॥४॥

पदार्थः-हे मनुष्यो! **(येषु)** जिन अतिथियों में **(चित्रा)** विचित्र **(दीधितिः)** प्रकाशमान विद्या है और **(आसन्)** आसन वा मुख में **(उक्था)** प्रशंसा करने योग्य कर्म हैं और **(ये, वा)** अथवा जो **(स्तीर्णम्)** आच्छादित अर्थात् अन्तःकरण में व्याप्त **(बर्हिः)** अन्तरिक्ष के सदृश विज्ञान की **(स्वर्णरे)** सुख से युक्त मनुष्य में **(पान्ति)** रक्षा करते हैं और **(श्रवांसि)** अन्नादिकों को **(परि)** सब ओर से **(दधिरे)** धारण करों, वे ही श्रेष्ठ अतिथि होते हैं॥४॥

भावार्थः-जो विद्या के उत्तम गुणों से पूर्ण, सब के हित चाहने वाले, पुरुषार्थी अर्थात् उत्साही और पक्षपात से रहित अतिथिजन उपदेश से सब की रक्षा करते हैं, वे संसार के कल्याण करने वाले होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ये मे पञ्चाशतं ददुरश्वानां सधस्तुति।

द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम्॥५॥१०॥

ये। मे। पञ्चाशतम्। ददुः। अश्वानाम्। सधऽस्तुति। द्युऽमत्। अग्ने। महि। श्रवः। बृहत्। कृधि। मघोनाम्। नृऽवत्। अमृत। नृणाम्॥५॥

पदार्थः-(ये) (मे) मह्यम् **(पञ्चाशतम्) (ददुः)** दत्तवन्तः स्युः **(अश्वानाम्)** वेगवतामग्न्यादि-पदार्थानाम् **(सधस्तुति)** सहप्रशंसितम् **(द्युमत्)** यथार्थज्ञानप्रकाशयुक्तम् **(अग्ने)** विद्वन् **(महि)** महत् **(श्रवः)** अन्नं श्रवणं वा **(बृहत्) (कृधि) (मघोनाम्)** बहुधनवताम् **(नृवत्)** नृभिस्तुल्यम् **(अमृत)** मरणधर्मरहित **(नृणाम्)** मनुष्याणाम्॥५॥

अन्वयः-येऽतिथयो मेऽश्वानां सधस्तुति द्युमत्पञ्चाशतं विज्ञानं ददुस्तैः सहाग्ने विद्वँस्त्वं सधस्तुति द्युमन्महि बृहच्छ्रवः कृधि। हे अमृत! तेषां मघोनां नृणां नृवदुन्नतिं विधेहीति॥५॥

भावार्थः-हे मनुष्या! येऽतिथयः पदार्थविद्यां प्रयच्छेयुस्तेषां सत्कारं यथावत्कुरुतेति॥५॥

अत्राग्निवदतिथिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टादशं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-(ये) जो अतिथि जन **(मे)** मेरे लिये **(अश्वानाम्)** वेग से युक्त अग्नि आदि पदार्थों के **(सधस्तुति)** साथ प्रशंसित **(द्युमत्)** यथार्थ ज्ञान के प्रकाश से युक्त **(पञ्चाशतम्)** पञ्चाशत् संख्यायुक्त विज्ञान को **(ददुः)** देने वाले हों, उनके साथ हे **(अग्ने)** विद्वन्! आप एक साथ प्रशंसित और यथार्थ ज्ञान के प्रकाश से युक्त **(महि)** बड़े **(बृहत्)** बहुत **(श्रवः)** अन्न वा श्रवण को **(कृधि)** करिये और हे **(अमृत)** मरणधर्म्म से रहित! उन **(मघोनाम्)** बहुत धनवान् **(नृणाम्)** मनुष्यों के **(नृवत्)** मनुष्यों के तुल्य उन्नति का विधान करो॥५॥

भावार्थः-हे मनुष्यो! जो अतिथिजन पदार्थविद्या को देवें, उनका सत्कार यथायोग्य करो॥५॥

इस सूक्त में अग्निवत् अतिथि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अठारहवां सूक्त और दशवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकोनविंशतितमस्य सूक्तस्य वव्रिरात्रेय ऋषिः। अग्निर्देवता। १ गायत्री। २ निचृद्गायत्री छन्दः। षड्जः स्वरः। ३ अनुष्टुप् छन्दः। गान्धारः स्वरः। ४ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ५ निचृत् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वत्साध्योपदेशविषयमाह॥

अब पांच ऋचा वाले उन्नीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वानों के सिद्ध करने योग्य उपदेश विषय को कहते हैं॥

अभ्यवस्थाः प्र जायन्ते प्र वव्रेर्वव्रिश्चिकेत। उपस्थे मातुर्वि चष्टे॥ १॥

अभि। अवऽस्थाः। प्र। जायन्ते। प्र। वव्रेः। वव्रिः। चिकेत। उपऽस्थे। मातुः। वि। चष्टे॥ १॥

पदार्थः-(अभि) आभिमुख्ये **(अवस्थाः)** अवतिष्ठन्ति विरुद्धं प्राप्नुवन्ति यासु ता वर्त्तमाना दशाः **(प्र)** **(जायन्ते)** उत्पद्यन्ते **(प्र)** **(वव्रेः)** स्वीकर्त्तुः **(वव्रिः)** अङ्गीकर्त्ता **(चिकेत)** विजानीयात् **(उपस्थे)** समीपे **(मातुः)** जनन्याः **(वि)** **(चष्टे)** विख्यायते॥ १॥

अन्वयः-हे विद्वन्! वव्रेर्या अवस्थाः प्र जायन्ते ता वव्रिरभि प्र चिकेत मातुरुपस्थे वि चष्ट एता त्वमपि जानीहि॥ १॥

भावार्थः-न कोऽपि प्राण्यस्ति यस्योत्तममध्यमाऽधमा अवस्था न जायेरन् यश्च मात्रा पित्राऽऽचार्य्येण शिक्षितोऽस्ति स एव स्वकीया अवस्थाः शोधयितुं शक्नोति॥ १॥

पदार्थः-हे विद्वन्! **(वव्रेः)** स्वीकार करने वाले की जो **(अवस्थाः)** विरुद्ध वर्त्ताव को प्राप्त होते हैं, जिनमें ऐसी वर्त्तमान दशायें **(प्र, जायन्ते)** उत्पन्न होती हैं, उनका **(वव्रिः)** स्वीकार करने वाला **(अभि)** सन्मुख **(प्र, चिकेत)** विशेष करके जाने और **(मातुः)** माता के **(उपस्थे)** समीप में **(वि, चष्टे)** प्रसिद्ध होता है, इनको आप भी जानिये॥ १॥

भावार्थः-ऐसा नहीं कोई भी प्राणी है कि जिसकी उत्तम, मध्यम और अधम दशायें न होवें और जो माता पिता और आचार्य से शिक्षित है, वही अपनी दशाओं को सुधार सकता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति। आ दृळ्हां पुरं विविशुः॥ २॥

जुहुरे। वि। चितयन्तः। अनिऽमिषम्। नृम्णम्। पान्ति। आ। दृळ्हाम्। पुरम्। विविशुः॥ २॥

पदार्थः-(जुहुरे) कुटिलयन्ति **(वि)** विरुद्धे **(चितयन्तः)** ज्ञापयन्तः **(अनिमिषम्)** अहर्निशम् **(नृम्णम्)** धनम् **(पान्ति)** रक्षन्ति **(आ)** **(दृळ्हाम्)** **(पुरम्)** नगरम् **(विविशुः)** आविशन्ति॥ २॥

अन्वयः-येऽनिमिषं चितयन्तो वि जुहुरे नृम्णं पान्ति ते दृळ्हां पुरमा विविशुः॥२॥

भावार्थः-ये सरलस्वभावाः सत्यविज्ञापकाः प्रतिक्षणं पुरुषार्थयन्ते ते राज्यैश्वर्य्यं लभन्ते॥२॥

पदार्थः-जो **(अनिमिषम्)** दिन-रात्रि **(चितयन्तः)** बोध कराते हुए **(वि)** विरुद्ध **(जुहुरे)** कुटिलता करते और **(नृम्णम्)** धन की **(पान्ति)** रक्षा करते हैं, वे **(दृळहाम्)** दृढ़ **(पुरम्)** नगर को **(आ, विविशुः)** सब प्रकार प्राप्त होते हैं॥२॥

भावार्थः-जो सरल स्वभाव वाले और सत्य के बोधक प्रतिक्षण पुरुषार्थ करते हैं, वे राज्य और ऐश्वर्य को प्राप्त होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ श्वैत्रेयस्य जन्तवो द्युमद्वर्धन्त कृष्टयः।

निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः॥३॥

आ। श्वैत्रेयस्य। जन्तवः। द्युऽमत्। वर्धन्त। कृष्टयः। निष्कऽग्रीवः। बृहत्ऽउक्थः। एना। मध्वा। न। वाजऽयुः॥३॥

पदार्थः-**(आ)** **(श्वैत्रेयस्य)** श्वित्रास्वन्तरिक्षस्थासु दिक्षु भवस्य जलस्य **(जन्तवः)** जीवाः **(द्युमत्)** प्रकाशवत् **(वर्धन्त)** वर्धन्ते **(कृष्टयः)** मनुष्याः **(निष्कग्रीवः)** निष्कं चतुस्सौवर्णप्रमितमाभूषणं ग्रीवायां यस्य सः **(बृहदुक्थः)** महत् प्रशंसितः **(एना)** एनेन **(मध्वा)** मधुना **(न)** इव **(वाजयुः)** वाजमन्नं कामयमानः॥३॥

अन्वयः-हे विद्वांसो! यस्य श्वैत्रेयस्य मध्ये जन्तवः कृष्टयो वर्धन्तैना मध्वा वाजयुर्न बृहदुक्थो निष्कग्रीवो द्युमत् सुखमा लभते॥३॥

भावार्थः-हे मनुष्या! इह संसारे यावन्तः पदार्थास्सन्ति तावन्तो जलेनैव भवन्ति सर्वेषां बीजं जलमेवास्तीति विज्ञाय सर्वाणि सुखानि लभध्वम्॥३॥

पदार्थः-हे विद्वानो जिस **(श्वैत्रेयस्य)** अन्तरिक्ष में स्थित दिशाओं में उत्पन्न जल के मध्य में **(जन्तवः)** जीव और **(कृष्टयः)** मनुष्य **(वर्धन्त)** वृद्धि को प्राप्त होते हैं **(एना)** इस **(मध्वा)** मधुर जल से **(वाजयुः)** अन्न की कामना करते हुए के **(न)** सदृश **(बृहदुक्थः)** अत्यन्त प्रशंसित **(निष्कग्रीवः)** एक निष्क का जिसमें चार सुवर्ण प्रमाण से युक्त आभूषण जिसकी ग्रीवा में ऐसा पुरुष **(द्युमत्)** प्रकाश से युक्त सुख को **(आ)** प्राप्त होता है॥३॥

भावार्थः-हे मनुष्यो! इस संसार में जितने पदार्थ हैं, वे सब जल ही से होते हैं अर्थात् सब का बीज जल ही है, ऐसा जान कर सब सुखों को प्राप्त होओ॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्रि॒यं दु॒ग्धं न काम्य॒मजा॑मि जा॒म्योः सचा॑।

घ॒र्मो न वाज॑जठ॒रोऽद॑ब्धः शश्व॒तो॒ दभ॑:॥४॥

प्रि॒यम्। दुग्धम्। न। काम्य॑म्। अजा॑मि। जा॒म्योः। सचा॑। घ॒र्मः। न। वाज॑ऽजठरः। अद॑ब्धः। शश्व॒तः। दभ॑:॥४॥

पदार्थः-(प्रियम्) (**दुग्धम्**) (**न**) इव (**काम्यम्**) कमनीयम् (**अजामि**) प्राप्नोमि (**जाम्योः**) अत्तव्यान्नप्रदयोर्द्यावापृथिव्योः (**सचा**) सम्बन्धेन (**घर्मः**) प्रतापः (**न**) इव (**वाजजठरः**) वाजो क्षुद्वेगो जठरे यस्मात्सः (**अदब्धः**) अहिंसनीयः (**शश्वतः**) निरन्तरोऽव्याप्तः (**दभः**) दम्नाति हिनस्ति येन सः॥४॥

अन्वयः-वाजजठरोऽदब्धः शश्वतो दभो घर्मो न प्रियं दुग्धं न सचा जाम्योः काम्यमजामि तेन मया सह यूयमप्येदं कुरुत॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये सूर्य्यप्रकाशवद् व्याप्तविद्या दुग्धवत्प्रियवचसो धर्मं कामयमाना जनास्सन्ति ते भूमिवत्सर्वेषां रक्षका भवन्ति॥४॥

पदार्थः-(वाजजठरः) क्षुधा का वेग उदर में जिससे हो (**अदब्धः**) जो नहीं हिंसा करने योग्य (**शश्वतः**) निरन्तर व्याप्त (**दभः**) और जिससे नाश करता है उस (**घर्मः**) प्रताप के (**न**) सदृश वा (**प्रियम्**) प्रिय (**दुग्धम्**) दुग्ध के (**न**) सदृश (**सचा**) सम्बन्ध से (**जाम्योः**) खाने योग्य अन्न को देने वाले प्रकाश और पृथिवी के (**काम्यम्**) कामना करने योग्य पदार्थ को (**अजामि**) प्राप्त होता हूं, इससे मेरे साथ आप लोग भी इसको करो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सूर्य्य के प्रकाश के सदृश विद्या से व्याप्त, दुग्ध के सदृश प्रिय वचन वाले और धर्म्म की कामना करते हुए जन हैं, वे पृथ्वी के सदृश सब के रक्षक होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

क्रीळ॑न्नो र॒श्मि॒ आ भु॑व॒: सं भस्म॑ना वा॒युना॒ वेवि॑दानः।

ता अ॑स्य सन् धृ॒षजो॒ न ति॒ग्माः सुसं॑शिता व॒क्ष्यो॑ वक्षणे॒स्थाः॥५॥११॥

क्रीळ॑न्। न॒:। र॒श्मे॒। आ। भु॒व॒:। सम्। भस्म॑ना। वा॒युना॑। वेवि॑दानः। ताः। अ॒स्य॒। स॒न्। धृ॒षज॑:। न। ति॒ग्माः। सुऽसं॑शिताः। व॒क्ष्य॑:। व॒क्ष॒णे॒ऽस्थाः॥५॥

पदार्थः-(क्रीळन्) (**नः**) अस्मान् (**रश्मे**) रश्मिवद्वर्त्तमान (**आ**) (**भुवः**) भवेः (**सम्**) (**भस्मना**) (**वायुना**) पवनेन (**वेविदानः**) विज्ञापयन् (**ताः**) (**अस्य**) (**सन्**) (**धृषजः**) धार्ष्ट्यार्ज्जातान् (**न**) इव

(तिग्माः) तीव्राः **(सुसंशिताः)** सुष्ठु प्रशंसिताः **(वक्ष्यः)** वोढव्यः **(वक्षणेस्थाः)** या वाहने तिष्ठन्ति ताः॥५॥

अन्वयः-हे रश्मे रश्मिवद्वर्त्तमान विद्वन्! यथा विद्युदग्निर्भस्मना वायुना वेविदानस्ता अस्य धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्था वहन् सन् सुखं सम्भावयति तथा क्रीळन्नोऽस्मान् सुखकार्या भुवः॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे विद्वांसो! यथा सूर्य्यस्य रश्मय सर्वत्र प्रसृताः सर्वान् सुखयन्ति तथैव सर्वत्र विहरन्त उपदिशन्तः सर्वानानन्दयन्त्विति॥५॥

अत्र विद्वत्साध्योपदेशविषयवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनविंशं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(रश्मे)** किरणों के सदृश वर्त्तमान विद्वन्! जैसे बिजुलीरूप अग्नि **(भस्मना)** भस्म और **(वायुना)** पवन से **(वेविदानः)** जनाता अर्थात् अपने को प्रकट करता हुआ **(ताः)** उन **(अस्य)** इसकी **(धृषजः)** धृष्टता से उत्पन्न हुओं के **(न)** सदृश **(तिग्माः)** तीव्र **(सुसंशिताः)** उत्तम प्रकार प्रशंसित **(वक्ष्यः)** ले चलनेवाली और **(वक्षणेस्थाः)** वाहन में स्थिर ऐसी लपटों को धारण करता **(सन्)** हुआ सुख की **(सम्)** संभावना कराता है, वैसे **(क्रीळन्)** क्रीड़ा करते हुए आप **(नः)** हम लोगों के सुखकारी **(आ, भुवः)** हूजिये॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे विद्वानो! जैसे सूर्य की किरणें सर्वत्र फैली हुई सब को सुख देती हैं, वैसे ही सब स्थानों में भ्रमण तथा उपदेश करते हुए आप सब को आनन्द दीजिये॥५॥

इस सूक्त में विद्वानों के सिद्ध करने योग्य उपदेश विषय का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उन्नीसवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य विंशतितमस्य सूक्तस्य प्रयस्वन्त अत्रय ऋषयः। अग्निर्देवता। १, ३ विराडनुष्टुप्। २ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ४ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निपदवाच्यविद्वद्विषयमाह॥

अब चार ऋचा वाले बीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्निपदवाच्य विद्वान् के गुणों का वर्णन करते हैं॥

यमग्ने वाजसातम त्वं चिन्मन्यसे रयिम्।
तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम्॥ १॥

यम्। अग्ने। वाजऽसातम। त्वम्। चित्। मन्यसे। रयिम्। तम्। नः। गीःऽभिः। श्रवाय्यम्। देवऽत्रा। पनय। युजम्॥ १॥

पदार्थः-(**यम्**) (**अग्ने**) विद्वन् (**वाजसातम**) अतिशयेन वाजानां विज्ञानादिपदार्थानां विभाजक (**त्वम्**) (**चित्**) अपि (**मन्यसे**) (**रयिम्**) श्रियम् (**तम्**) (**नः**) अस्मान् (**गीर्भिः**) सूपदिष्टाभिर्वाग्भिः (**श्रवाय्यम्**) श्रोतुं योग्यम् (**देवत्रा**) देवेषु (**पनया**) व्यवहारेण प्रापय। अत्र **संहितायामिति** दीर्घः। (**युजम्**) यो युनक्ति तम्॥ १॥

अन्वयः-हे वाजसातमाग्ने! त्वं गीर्भिर्यं देवत्रा श्रवाय्यं युजं रयिं स्वार्थं मन्यसे तं चिन्नः पनया॥ १॥

भावार्थः-अयमेव धर्म्यो व्यवहारो यादृशीच्छा स्वार्था भवति तादृशीमेव परार्थां कुर्याद्यथा प्राणिनः स्वार्थं दुःखं नेच्छन्ति सुखं च प्रार्थयन्ते तथैवान्यार्थमपि तैर्वर्त्तितव्यम्॥ १॥

पदार्थः-हे (**वाजसातम**) अतिशय विज्ञान आदि पदार्थों के विभाजक (**अग्ने**) विद्वन्! (**त्वम्**) आप (**गीर्भिः**) उत्तम प्रकार उपदेशरूप हुई वाणियों से (**यम्**) जिस (**देवत्रा**) विद्वानों में (**श्रवाय्यम्**) सुनने योग्य (**युजम्**) योग करने वाले (**रयिम्**) धन को अपने लिये (**मन्यसे**) स्वीकार करते हो (**तम्**) उसको (**चित्**) भी (**नः**) हम लोगों को (**पनया**) व्यवहार से प्राप्त कराइये॥ १॥

भावार्थः-यही धर्मयुक्त व्यवहार है कि जैसे इच्छा अपने लिये होती है, वैसे ही दूसरे के लिये करे और जैसे प्राणी अपने लिये दुःख की नहीं इच्छा करते हैं और सुख की प्रार्थना करते हैं, वैसे ही अन्य के लिये भी उनको वर्त्ताव करना चाहिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः।
अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे॥ २॥

ये। अ॒ग्ने॒। न। ई॒र्य॒न्ति॒। ते॒। वृ॒द्धाः। उ॒ग्रस्य॑। शव॑सः। अप॑। द्वेष॑ः। अप॑। ह्वर॑ः। अ॒न्य॒ऽव्र॒तस्य॑। स॒श्चि॒रे॒॥ २॥

पदार्थः-(ये) (अग्ने) विद्वन् **(न)** निषेधे **(ईरयन्ति) (ते)** तव **(वृद्धाः)** विद्यावयोभ्यां स्थविराः **(उग्रस्य)** उत्कृष्टस्य **(शवसः)** बलस्य **(अप) (द्वेषः)** ये द्विषन्ति ते **(अप) (ह्वरः)** कुटिलाचरणाः **(अन्यव्रतस्य)** धर्म्मविरुद्धाचरणस्य **(सश्चिरे)**॥ २॥

अन्वयः-हे अग्ने! ये वृद्धा ते उग्रस्य शवसः सश्चिरे द्वेषोऽप सश्चिरेऽन्यव्रतस्य ह्वरोऽप सश्चिरे ते दुःखं नेरयन्ति॥ २॥

भावार्थः-त एव वृद्धा ये सत्यं वदन्ति सर्वानुपकृत्य स्वात्मवत्सुखयन्ति कदाचिद्धर्म्मविरुद्धं नाचरन्ति॥ २॥

पदार्थः-हे **(अग्ने)** विद्वन् **(ये)** जो **(वृद्धाः)** विद्या और अवस्था से वृद्ध जन **(ते)** आपके **(उग्रस्य)** उत्तम **(शवसः)** बल के सम्बन्ध में **(सश्चिरे)** गमन करने वाले हैं और **(द्वेषः)** द्वेष करने वाले **(अप)** दूर जाते हैं **(अन्यव्रतस्य)** धर्म से विरुद्ध आचरण वाले के सम्बन्ध में **(ह्वरः)** कुटिल आचरण वाले **(अप)** अलग जाते हैं, वे दुःख की **(न)** नहीं **(ईरयन्ति)** प्रेरणा करते हैं॥ २॥

भावार्थः-वे ही वृद्ध हैं, जो सत्य बोलते और सब का उपकार करके अपने सदृश सुख देते और कभी धर्म्म से विरुद्ध आचरण नहीं करते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

होता॑रं त्वा वृणीम॒हेऽग्ने॒ दक्ष॑स्य॒ साध॑नम्।

य॒ज्ञेषु॑ पू॒र्व्यं गि॒रा प्रय॑स्वन्तो हवामहे॥ ३॥

होता॑रम्। त्वा॒। वृ॒णी॒म॒हे॒। अग्ने॑। दक्ष॑स्य। साध॑नम्। य॒ज्ञेषु॑। पू॒र्व्यम्। गि॒रा। प्रय॑स्वन्तः। ह॒वा॒म॒हे॒॥ ३॥

पदार्थः-(होतारम्) दातारम् **(त्वा)** त्वाम् **(वृणीमहे)** स्वीकुर्महे **(अग्ने)** विद्वन् **(दक्षस्य)** बलस्य **(साधनम्) (यज्ञेषु) (पूर्व्यम्)** पूर्वैराप्तैः कृतम् **(गिरा)** वाण्या **(प्रयस्वन्तः)** प्रयतमानाः **(हवामहे)**॥ ३॥

अन्वयः-हे अग्ने! यथा प्रयस्वन्तो वयं गिरा यज्ञेषु दक्षस्य पूर्व्यं साधनं हवामहे होतारमग्निं वृणीमहे तथा त्वा स्वीकुर्य्याम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मनुष्याः परोपकारिणं प्रीत्या बहु मन्यन्ते तथैव विद्वद्भिः सर्वाण्युत्तमानि कर्म्माणि क्रियन्ते॥ ३॥

पदार्थः-हे **(अग्ने)** विद्वान्! जैसे **(प्रयस्वन्तः)** प्रयत्न करते हुए लोग **(गिरा)** वाणी से **(यज्ञेषु)** यज्ञों में **(दक्षस्य)** बल के **(पूर्व्यम्)** प्राचीन यथार्थवक्ता पुरुषों से किये गये **(साधनम्)** साधन को **(हवामहे)** देते और **(होतारम्)** दाता अग्नि को **(वृणीमहे)** स्वीकार करते हैं, वैसे **(त्वा)** आपको स्वीकार करें॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मनुष्य परोपकारी का प्रीति से बहुत आदर करते हैं, वैसे ही विद्वान् जनों से सब उत्तम कर्म्म किये जाते हैं॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

इ॒त्था यथा॑ त ऊ॒तये॒ सह॑सावन् दि॒वेदि॑वे।

रा॒य ऋ॒ताय॑ सुक्रतो॒ गोभि॑: ष्याम सध॒मादो॑ वी॒रै: स्या॑म सध॒माद॑:॥४॥१२॥

इ॒त्था। यथा॑। ते॒। ऊ॒तये॑। सह॑साऽवन्। दि॒वेऽदि॑वे। रा॒ये। ऋ॒ताय॑। सु॒क्र॒तो॒ इति॑ सुऽक्रतो। गोभि॑:। स्या॒म॒:। स॒ध॒ऽमाद॑:। वी॒रै:। स्या॒म॒। स॒ध॒ऽमाद॑:॥४॥

पदार्थः-(**इत्था**) अस्माद्धेतोः (**यथा**) (**ते**) तव (**ऊतये**) रक्षणाद्याय (**सहसावन्**) बलेन तुल्य (**दिवेदिवे**) प्रतिदिनम् (**राये**) धनाय (**ऋताय**) धर्म्यव्यवहारेण प्राप्ताय (**सुक्रतो**) सुष्ठुप्रज्ञ (**गोभिः**) वाग्भिः (**स्याम**) (**सधमादः**) सहस्थानाः (**वीरैः**) शूरवीरैः (**स्याम**) (**सधमादः**)॥४॥

अन्वयः-हे सहसावन् सुक्रतो! यथा त ऊतये दिवेदिव ऋताय राये वयं गोभिः सधमादः स्याम वीरैः सधमादः स्यामेत्था त्वं भव॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये साहसेन पुरुषार्थयन्तः वीरसेनां गृहीत्वैश्वर्य्यप्राप्तये प्रयतन्ते त एव सुखिनो भवन्तीति॥४॥

अत्राग्निगुणवर्णनादेतर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति विंशतितमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे (**सहसावन्**) बल से तुल्य (**सुक्रतो**) उत्तम बुद्धि से युक्त! (**यथा**) जैसे (**ते**) आपके (**ऊतये**) रक्षण आदि के लिये (**दिवेदिवे**) प्रतिदिन (**ऋताय**) धर्मयुक्त व्यवहार से प्राप्त (**राये**) धन के लिये हम लोग (**गोभिः**) वाणियों से (**सधमादः**) साथ स्थान वाले (**स्याम**) होवें **[**(**वीरैः**) शूरवीरों से (**सधमादः**) साथ स्थान वाले (**स्याम**) होवें**]** (**इत्था**) इस कारण से आप हूजिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो साहस से पुरुषार्थ करते हुए वीर जनों की सेना को ग्रहण करके ऐश्वर्य्य की प्राप्ति के लिये प्रयत्न करते हैं, वे ही सुखी होते हैं॥४॥

इस सूक्त में अग्नि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बीसवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्यैकाधिकविंशतितमस्य सूक्तस्य सस आत्रेय ऋषिः। अग्निर्देवता। १ अनुष्टुप् छन्दः। गान्धारः स्वरः। २ भुरिगुष्णिक्। ३ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ४ भुरिग्बृहती छन्दः। मध्यमः स्वरः॥

अथाग्निविषयमाह॥

अब चार ऋचा वाले इक्कीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्निविषय को कहते हैं॥

मनुष्यवत्त्वा नि धीमहि मनुष्वत्समिधीमहि।
अग्ने मनुष्वदङ्गिरो देवान् देवयते यज॥ १॥

मनुष्वत्। त्वा। नि। धीमहि। मनुष्वत्। सम्। इधीमहि। अग्ने। मनुष्वत्। अङ्गिरः। देवान्। देवऽयते। यज॥ १॥

पदार्थः-(मनुष्वत्) मनुष्येण तुल्यम् **(त्वा)** त्वाम् **(नि) (धीमहि)** निधिमन्तो भवेम **(मनुष्वत्) (सम्) (इधीमहि)** प्रकाशितान् कुर्याम **(अग्ने)** विद्वन् **(मनुष्वत्) (अङ्गिरः)** प्राणा इव प्रिय **(देवान्)** दिव्यविद्वद्विपश्चितः **(देवयते)** देवान् दिव्यगुणान् कामयमानाय **(यज)** सङ्गच्छस्व॥ १॥

अन्वयः-हे अङ्गिरोऽग्ने! यथा वयं कार्यसिद्धयेऽग्निं मनुष्यवन्नि धीमहि देवयते देवान् मनुष्वत् समिधीमहि तथा त्वा सत्यक्रियायां निधीमहि त्वं मनुष्वद्यज॥ १॥

भावार्थः-अत्रोपमालङ्कारः। ये नरा मननशीला भूत्वा दिव्यान् गुणान् कामयन्ते ते अग्न्यादिपदार्थविद्यां विजानन्तु॥ १॥

पदार्थः-हे **(अङ्गिरः)** प्राणों के सदृश प्रिय **(अग्ने)** विद्वन्! जैसे हम लोग कार्य्य की सिद्धि के लिये अग्नि को **(मनुष्वत्)** मनुष्य को जैसे वैसे **(नि, धीमहि)** निरन्तर धारण होवें और **(देवयते)** श्रेष्ठ गुणों की कामना करते हुए के लिये **(देवान्)** श्रेष्ठ विद्यायुक्त विद्वानों को **(मनुष्वत्)** मनुष्यों के समान **(सम्, इधीमहि)** प्रकाशित करें वैसे **(त्वा)** आपको उत्तम कर्म्म में स्थित करें और आप **(मनुष्वत्)** मनुष्य के तुल्य **(यज)** मिलिये अर्थात् कार्य्यों को प्राप्त हूजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य विचारशील होकर श्रेष्ठ गुणों की कामना करते हैं, वे अग्नि आदि पदार्थों की विद्या को जानें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वं हि मानुषे जनेऽग्ने सुप्रीत इध्यसे।
स्रुचस्त्वा यन्त्यानुषक् सुजात सर्पिरासुते॥ २॥

त्वम्। हि। मानुषे। जने। अग्ने। सुऽप्रीतः। इध्यसे। स्रुचः। त्वा। यन्ति। आनुषक्। सुऽजात। सर्पिःऽआसुते॥ २॥

पदार्थः-(**त्वम्**) (**हि**) (**मानुषे**) (**जने**) प्रसिद्धे (**अग्ने**) पावकवद्वर्त्तमान (**सुप्रीतः**) सुष्ठु प्रसन्नः (**इध्यसे**) प्रदीप्यसे (**स्रुचः**) यज्ञसाधनानि पात्राणि (**त्वा**) त्वाम् (**यन्ति**) (**आनुषक्**) आनुकूल्येन (**सुजात**) सुष्ठुजात (**सर्पिरासुते**) सर्पिषा समन्तात् प्रदीपिते॥ २॥

अन्वयः-हे सुजाताग्ने! यथाऽग्निः सर्पिरासुते प्रदीप्यते तथा हि त्वं मानुषे जने सुप्रीत इध्यसे यथा त्वा स्रुच आनुषक् यन्ति तथैव त्वं सर्वान् प्रत्यनुकूलो भव॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! भवन्तो यथाग्निरिन्धनघृतादीनि प्राप्य वर्धते तथैव विद्यां शुभगुणाँश्च प्राप्य सततं वर्धन्ताम्॥ २॥

पदार्थः-हे (**सुजात**) उत्तम प्रकार उत्पन्न (**अग्ने**) अग्नि के सदृश प्रताप से वर्त्तमान! जैसे अग्नि (**सर्पिरासुते**) घृत से सब ओर से प्रकाशित हुए में प्रकाशित किया जाता है, वैसे (**हि**) ही (**त्वम्**) आप (**मानुषे, जने**) प्रसिद्ध मनुष्य में (**सुप्रीतः**) उत्तम प्रकार प्रसन्न हुए (**इध्यसे**) प्रकाशित होते हो और जैसे (**त्वा**) आपको (**स्रुचः**) यज्ञ के साधन पात्र (**आनुषक्**) अनुकूलता से (**यन्ति**) प्राप्त होते हैं, वैसे ही आप सबके प्रति अनुकूल हूजिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग जैसे अग्नि इन्धन और घृत आदिकों को प्राप्त होकर वृद्धि को प्राप्त होता है, वैसे ही विद्या और उत्तम गुणों को प्राप्त होकर निरन्तर वृद्धि को प्राप्त हूजिये॥ २॥

अथ शिल्पविद्याविद्विषयमाह॥

अब शिल्पविद्यावेत्ता विद्वान् के विषय को कहते हैं॥

त्वां विश्वे सजोषसो देवासो दूतमक्रत।
सपर्यन्तस्त्वा कवे यज्ञेषु देवमीळते॥ ३॥

त्वाम्। विश्वे। सऽजोषसः। देवासः। दूतम्। अक्रत। सपर्यन्तः। त्वा। कवे। यज्ञेषु। देवम्। ईळते॥ ३॥

पदार्थः-(**त्वाम्**) (**विश्वे**) सर्वे (**सजोषसः**) समानप्रीतिसेविनः (**देवासः**) विद्वांसः (**दूतम्**) दूतवद्वर्त्तमानवह्निम् (**अक्रत**) कुर्वते (**सपर्यन्तः**) परिचरन्तः (**त्वा**) त्वाम् (**कवे**) विपश्चित् (**यज्ञेषु**) सत्सङ्गेषु (**देवम्**) दिव्यगुणम् (**ईळते**) स्तुवन्ति॥ ३॥

अन्वयः-हे कवे! यथा विश्वे सजोषसो देवासो देवं दूतमक्रत सपर्यन्तो यज्ञेषु देवमीळते तथा त्वां वयं सेवेमहि त्वा सत्कुर्य्याम॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽग्निं दूतकर्म कारयन्ति ते सर्वत्र प्रशंसितैश्वर्य्या जायन्ते॥ ३॥

पदार्थः-हे (**कवे**) विद्वन्! जैसे (**विश्वे**) सम्पूर्ण (**सजोषसः**) तुल्य प्रीति के सेवन करने वाले (**देवासः**) विद्वान् जन् (**देवम्**) श्रेष्ठ गुण वाले (**दूतम्**) दूत के सदृश वर्त्तमान अग्नि को (**अक्रत**) करते हैं

और **(सपर्यन्तः)** सेवा करते हुए जन **(यज्ञेषु)** सत्संगो में श्रेष्ठ गुणों वाले विद्वान् की **(ईळते)** स्तुति करते हैं, वैसे **(त्वाम्)** आपकी हम लोग सेवा करें और **(त्वा)** आपका सत्कार करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जन अग्नि से दूतकर्म अर्थात् नौकर के सदृश काम कराते हैं, वे सब स्थानों में प्रशंसित ऐश्वर्य्य वाले होते हैं॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

देवं वो देवयज्ययाग्निमीळीत मर्त्यः।

समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः॥४॥१३॥

देवम्। वः। देवऽयज्यया। अग्निम्। ईळीत। मर्त्यः। सम्ऽइद्धः। शुक्र। दीदिहि। ऋतस्य। योनिम्। आ। असदः। ससस्य। योनिम्। आ। असदः॥४॥

पदार्थः-**(देवम्)** **(वः)** युष्माकम् **(देवयज्यया)** देवानां विदुषां सङ्गत्या **(अग्निम्)** **(ईळीत)** प्रशंस्येत् **(मर्त्यः)** मनुष्यः **(समिद्धः)** **(शुक्र)** शक्तिमन् **(दीदिहि)** प्रकाशय **(ऋतस्य)** सत्यस्य परमाण्वादेः **(योनिम्)** कारणम् **(आ)** **(असदः)** जानीयाः **(ससस्य)** कार्य्यस्य **(योनिम्)** कारणम् **(आ, असदः)** समन्ताज्जानीहि॥४॥

अन्वयः-हे विद्वांसो! वो देवयज्यया मर्त्यो देवमग्निमीळीत हे शुक्र समिद्धस्त्वं दीदिहि ऋतस्य योनिमासदः ससस्य योनिमासदः॥४॥

भावार्थः-ये मनुष्या विद्वत्सङ्गेन कार्यकारणात्मिकां सृष्टिं विज्ञाय कार्य्यसिद्धिं समाचरन्ति ते सृष्टिक्रमं विज्ञाय दुःखं कदाचिन्न भजन्त इति॥४॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाधिकविंशतितमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! **(वः)** आप लोगों के **(देवयज्यया)** विद्वानों के मेल से **(मर्त्यः)** मनुष्य **(देवम्)** प्रकाशित **(अग्निम्)** अग्नि की **(ईळीत)** प्रशंसा करे। हे **(शुक्र)** सामर्थ्य वाले **(समिद्धः)** उत्तम गुणों से प्रकाशित! आप **(दीदिहि)** प्रकाश कराओ और **(ऋतस्य)** सत्य परमाणु आदि के **(योनिम्)** कारण को **(आ, असदः)** सब प्रकार जानिये और **(ससस्य)** कार्य्य के **(योनिम्)** कारण को **(आ, असदः)** सब प्रकार जानिये॥४॥

भावार्थः-जो मनुष्य विद्वानों के संग से कार्य्य और कारणस्वरूप सृष्टि अर्थात् सत्त्व, रज और तमोगुण को साम्यावस्थारूप प्रधान को जान के कार्य को सिद्ध करते हैं, वे सृष्टि के क्रम को जान के दुःख को कभी नहीं प्राप्त होते हैं॥४॥

इस सूक्त में अग्नि और विद्वानों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्कीसवां सूक्त और त्रयोदशवां वर्ग सम्पात हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य द्वाविंशतितमस्य सूक्तस्य विश्वसामात्रेय ऋषिः। अग्निर्देवता। १ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। २, ३ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ४ बृहती छन्दः। मध्यमः स्वरः॥

अथाग्निविषयमाह॥

अब चार ऋचा वाले बाईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निविषय को कहते हैं॥

प्र विश्वसामन्नत्रिवदर्चा पावकशोचिषे।
यो अध्वरेष्वीड्यो होता मन्द्रतमो विशि॥ १॥

प्र। विश्वऽसामन्। अत्रिऽवत्। अर्च। पावकऽशोचिषे। यः। अध्वरेषु। ईड्यः। होता। मन्द्रऽतमः। विशि॥ १॥

पदार्थः-(प्र) (**विश्वसामन्**) विश्वानि सामानि यस्य तत्सम्बुद्धौ (**अत्रिवत्**) व्यापकविद्यावत् (**अर्चा**) सत्कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**पावकशोचिषे**) पावकस्य शोचः प्रकाश इव प्रकाशो यस्य तस्मै (**यः**) (**अध्वरेषु**) (**ईड्यः**) प्रशंसनीयः (**होता**) दाता (**मन्द्रतमः**) अतिशयेनानन्दयुक्तः (**विशि**) प्रजायाम्॥ १॥

अन्वयः-हे विश्वसामन्! योऽध्वरेष्वीड्यो होता विशि मन्द्रतमो भवेत् तस्मै पावकशोचिषेऽत्रिवत् प्रार्चा॥ १॥

भावार्थः-मनुष्यैर्धार्मिकाणामेव सत्कारः कर्त्तव्यो नान्येषाम्॥ १॥

पदार्थः-हे (**विश्वसामन्**) सम्पूर्ण सामों वाले (**यः**) जो (**अध्वरेषु**) यज्ञों में (**ईड्यः**) प्रशंसा करने योग्य (**होता**) दाता (**विशि**) प्रजा में (**मन्द्रतमः**) अतिशय आनन्द युक्त होवे उस (**पावकशोचिषे**) अग्नि के प्रकाश के सदृश प्रकाश वाले पुरुष के लिये (**अत्रिवत्**) व्यापक विद्या वाले के सदृश (**प्र, अर्चा**) सत्कार कीजिये॥ १॥

भावार्थः-मनुष्यों को चाहिये कि धार्मिक जनों का ही सत्कार करें, अन्य जनों का नहीं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

न्यग्निं जातवेदसं दधाता देवमृत्विजम्।
प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः॥ २॥

नि। अग्निम्। जातऽवेदसम्। दधात। देवम्। ऋत्विजम्। प्र। यज्ञः। एतु। आनुषक्। अद्य। देवव्यचःऽतमः॥ २॥

पदार्थः-(नि) (**अग्निम्**) पावकम् (**जातवेदसम्**) जातेषु विद्यमानम् (**दधाता**) धरत। अत्र **संहितायामिति** दीर्घः। (**देवम्**) दिव्यगुणकर्मस्वभावम् (**ऋत्विजम्**) य ऋतुषु यजति तद्वद्वर्त्तमानम् (**प्र**)

(यज्ञः) सङ्गन्तव्यः **(एतु)** प्राप्नोतु **(आनुषक्)** आनुकूल्येन **(अद्या)** अत्र **संहितायामिति** दीर्घः। **(देवव्यचस्तमः)** यो देवान् पृथिव्यादीन् धरति भिनत्ति च सोऽतिशयितः॥२॥

अन्वयः-हे विद्वांसो! यो देवव्यचस्तमो यज्ञ आनुषगद्यास्मानेतु तमृत्विजमिव जातवेदसं देवमग्निं प्र णि दधाता॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथर्त्विजो यज्ञं पूर्णं कुर्वन्ति तथैवाग्निः शिल्पविद्याकृत्यसिद्धिमलङ्करोति॥२॥

पदार्थः-हे विद्वानो! जो **(देवव्यचस्तमः)** पृथिव्यादिकों का धारण करने और अति तोड़ने वाला **(यज्ञः)** मिलने योग्य **(आनुषक्)** अनुकूलता से **(अद्या)** आज हम लोगों को **(एतु)** प्राप्त हो उस **(ऋत्विजम्)** ऋतुओं में यज्ञ करने वाले के सदृश **(जातवेदसम्)** उत्पन्न हुओं में विद्यमान **(देवम्)** श्रेष्ठ गुण, कर्म्म और स्वभाव वाले **(अग्निम्)** अग्नि को **(प्र, नि, दधाता)** उत्तमता से निरन्तर धारण करो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यज्ञ करने वाले यज्ञ को पूर्ण करते हैं, वैसे ही अग्नि शिल्पविद्या के कृत्य की सिद्धि को पूर्ण करता है॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

चिकित्विन्मनसं त्वा देवं मर्तास ऊतये।

वरेण्यस्य तेऽवस इयानासो अमन्महि॥३॥

चिकित्वित्ऽमनसम्। त्वा। देवम्। मर्तासः। ऊतये। वरेण्यस्य। ते। अवसः। इयानासः। अमन्महि॥३॥

पदार्थः-**(चिकित्विन्मनसम्)** चिकित्वितां विज्ञानवतां मन इव मनो यस्य तम् **(त्वा)** त्वाम् **(देवम्)** विद्वांसम् **(मर्त्तासः)** मनुष्याः **(ऊतये)** रक्षणाद्याय **(वरेण्यस्य)** वरितुमर्हस्य **(ते)** तव **(अवसः)** कमनीयस्य **(इयानासः)** प्राप्नुवन्तः **(अमन्महि)** विजानीयाम॥३॥

अन्वयः-हे विद्वन्! वरेण्यस्याऽवसस्ते सङ्गेनेयानासो मर्त्तासो वयमूतये चिकित्विन्मनसं देवं त्वाऽग्निमिवामन्महि॥३॥

भावार्थः-मनुष्यैः सदैव विद्वत्सङ्गेन पदार्थविद्यान्वेषणीया॥३॥

पदार्थः-हे विद्वन्! **(वरेण्यस्य)** स्वीकार करने और **(अवसः)** कामना करने योग्य **(ते)** आपके सङ्ग से **(इयानासः)** प्राप्त होते हुए **(मर्त्तासः)** मनुष्य हम लोग **(ऊतये)** रक्षा आदि के लिये **(चिकित्विन्मनसम्)** विज्ञानयुक्त पुरुषों के मन के सदृश मन से युक्त **(देवम्)** विद्वान् **(त्वा)** आपको अग्नि के सदृश **(अमन्महि)** विशेष करके जानें॥३॥

भावार्थः-मनुष्यों को चाहिये कि सदा ही विद्वानों के संग से पदार्थविद्या का खोज करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्ने॑ चिकि॒द्ध्य१॑स्य न॑ इ॒दं वच॑: सहस्य।

तं त्वा॑ सुशिप्र दम्पते॒ स्तोमै॑र्वर्धन्त्य॒त्रय॑यो गी॒र्भि: शु॑म्भन्त्य॒त्रय॑:॥४॥१४॥

अग्ने॑। चि॒कि॒द्धि॒। अ॒स्य॒। न॒:। इ॒दम्। वच॑:। स॒ह॒स्य॒। तम्। त्वा॒। सु॒ऽशि॒प्र॒। दम्ऽप॒ते॒। स्तोमै॑:। व॒र्ध॒न्ति॒। अ॒त्रय॑:। गी॒:ऽभि:। शु॒म्भ॒न्ति॒। अ॒त्रय॑:॥४॥

पदार्थ:-(अग्ने) विद्वन् **(चिकिद्धि)** विजानीहि **(अस्य) (न:)** अस्माकम् **(इदम्) (वच:) (सहस्य)** सहसि बले साधो **(तम्) (त्वा)** त्वाम् **(सुशिप्र)** शोभनहनुनासिक **(दम्पते)** स्त्रीपुरुष **(स्तोमै:)** प्रशंसितैर्व्यवहारै: वाग्भि: **(वर्धन्ति) (अत्रय:)** अविद्यमानत्रिविधदु:खा **(गीर्भि:) (शुम्भन्ति)** पवित्रयन्ति **(अत्रय:)** त्रिभि: कामक्रोधलोभदोषै रहिता:॥४॥

अन्वय:-हे सहस्य सुशिप्र दम्पतेऽग्ने! त्वं यथाऽत्रय: स्तोमैर्वर्धन्ति यथाऽत्रयो गीर्भि: शुम्भन्ति तथा न इदं वचोऽस्य च चिकिद्धि तं त्वा वयं सत्कुर्य्याम॥४॥

भावार्थ:-यथा पुरुषार्थिनो मनुष्या सर्वान् वर्धयन्त्युपदेशका: सर्वान् पवित्रयन्ति तथैव सर्वे मनुष्या आचरन्त्विति॥४॥

अत्राग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशतितमं सूक्तं चतुर्दशो वर्गश्च समाप्त:॥

पदार्थ:-हे **(सहस्य)** बल में श्रेष्ठ **(सुशिप्र)** सुन्दर ठुड्डी और नासिका वाले **(दम्पते)** स्त्री और पुरुष **(अग्ने)** विद्वन्! आप जैसे **(अत्रय:)** तीन प्रकार के दु:खों से रहित जन **(स्तोमै:)** प्रशंसित व्यवहारों से **(वर्धन्ति)** वृद्धि को प्राप्त होते हैं और जैसे **(अत्रय:)** काम, क्रोध, और लोभ इन तीन दोषों से रहित जन **(गीर्भि:)** वाणियों से **(शुम्भन्ति)** पवित्र करते हैं, वैसे **(न:)** हम लोगों के **(इदम्)** इस **(वच:)** वचन को और **(अस्य)** इसके वचन को **(चिकिद्धि)** जानिये **(तम्)** उन **(त्वा)** आपका हम लोग सत्कार करें॥४॥

भावार्थ:-जैसे पुरुषार्थी मनुष्य सबकी वृद्धि करते हैं और उपदेशक जन सब जनों को पवित्र करती हैं, वैसे ही सब मनुष्य आचरण करें॥४॥

इस सूक्त में अग्नि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बाईसवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य त्रयोविंशतितमस्य सूक्तस्य द्युम्नो विश्वचर्षणिर्ऋषिः। अग्निर्देवता। १, २ निचृदनुष्टुप् छन्दः। ३ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ४ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाग्निपदवाच्यवीरगुणानाह॥

अब चार ऋचा वाले तेईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निपदवाच्य वीर के गुणों का उपदेश करते हैं॥

अग्ने॒ सह॑न्त॒मा भ॑र द्यु॒म्नस्य॑ प्रा॒सहा॑ र॒यिम्।
विश्वा॒ यश्चर्ष॑णीर॒भ्या३॑सा वाजे॑षु सा॒सह॑त्॥ १॥

अग्ने॑। सह॑न्तम्। आ। भ॒र॒। द्यु॒म्नस्य॑। प्र॒ऽसहा॑। र॒यिम्। विश्वाः॑। यः। चर्ष॑णीः। अ॒भि। आ॒सा। वाजे॑षु। स॒सह॑त्॥ १॥

पदार्थः-(अग्ने) वीरपुरुष **(सहन्तम्) (आ) (भर) (द्युम्नस्य)** धनस्य यशसो वा **(प्रासहा)** याः प्रकर्षेण शत्रुबलानि सहन्ते ताः सेनाः। अत्र**ान्येषामपी**त्याद्यचो दीर्घः। **(रयिम्)** धनम् **(विश्वाः) (यः) (चर्षणीः)** प्रकाशमाना मनुष्यसेनाः **(अभि) (आसा)** आस्येन **(वाजेषु)** संग्रामेषु **(सासहत्)** भृशं सहेत। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्॥ १॥

अन्वयः-हे अग्ने वीर! यो विश्वाः प्रासहा चर्षणीर्वाजेषु सासहदासाभ्युपदिशेत्तं शत्रुबलं सहन्तं द्युम्नस्य रयिं त्वमा भर॥ १॥

भावार्थः-यस्य विजयेच्छा स्यात् स शूरवीरसेनां सुशिक्षितां रक्षेत् वीररसोपदेशेनोत्साह्य शत्रुभिः सह योधयेत्॥ १॥

पदार्थः-हे **(अग्ने)** वीरपुरुष! **(यः)** जो **(विश्वाः)** सम्पूर्ण **(प्रासहा)** अत्यन्त शत्रुओं के बलों को सहने वाली **(चर्षणीः)** पराक्रम से प्रकाशमान मनुष्यों की सेनाओं को **(वाजेषु)** संग्रामों में **(सासहत्)** अत्यन्त सहे और **(आसा)** मुख से **(अभि)** सब प्रकार से उपदेश देवे, उस शत्रुओं के बल को **(सहन्तम्)** सहते हुए **(द्युम्नस्य)** धन वा यश के सम्बन्ध में **(रयिम्)** धन को आप **(आ, भर)** सब प्रकार धारण करो॥ १॥

भावार्थः-जिसकी विजयी की इच्छा होवे, यह शूरवीरों की सेना उत्तम प्रकार शिक्षा की गई रक्खे और वीररस के उपदेश से उत्साह दिलाकर शत्रुओं के साथ लड़ावे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तमग्ने॑ पृतना॒षह॑ꣳ र॒यिं सह॑स्व॒ आ भ॑र।

त्वं हि स॒त्यो अद्भु॑तो दा॒ता वाज॑स्य॒ गोम॑तः॥ २॥

तम्। अ॒ग्ने॒। पृ॒त॒ना॒ऽसह॑म्। र॒यिम्। स॒ह॒स्व॒ः। आ। भ॒र॒। त्वम्। हि। स॒त्यः। अद्भु॑तः। दा॒ता। वाज॑स्य। गोऽम॑तः॥ २॥

पदार्थः-(तम्) (अग्ने) राजन् **(पृतनाषहम्)** यः पृतनां सेनां सहते तम् **(रयिम्)** धनम् **(सहस्वः)** बहु सहो बलं विद्यते यस्य तत्सम्बुद्धौ **(आ) (भर) (त्वम्) (हि) (सत्यः)** सत्सु साधुः **(अद्भुतः)** आश्चर्य्यगुणकर्मस्वभावः **(दाता) (वाजस्य)** सुखधनादेः **(गोमतः)** बह्व्यो गावो धेनुपृथिव्यादयो विद्यन्ते यस्मिँस्तस्य॥ २॥

अन्वयः-हे सहस्वोऽग्ने! यो हि सत्योऽद्भुतो गोमतो वाजस्य दाता भवेत्तं पृतनाषहं रयिं च त्वमा भर॥ २॥

भावार्थः-यो राजा सत्यवादिनो विदुषो विचित्रविद्यान् दृढानुदाराञ्छूरान् वीरान् बिभृयात् स एव विजयं श्रियं च लभेत॥ २॥

पदार्थः-हे **(सहस्वः)** बहुत बल से युक्त **(अग्ने)** राजन्! जो **(हि)** निश्चय से **(सत्यः)** श्रेष्ठों में श्रेष्ठ **(अद्भुतः)** आश्चर्य्ययुक्त गुण, कर्म्म और स्वभाव वाला जन **(गोमतः)** बहुत धेनु और पृथिव्यादिकों से युक्त **(वाजस्य)** सुख और धन आदि का **(दाता)** देने वाला होवे **(तम्)** उस **(पृतनाषहम्)** सेना सहने वाले को और **(रयिम्)** धन को **(त्वम्)** आप **(आ, भर)** सब ओर से धारण कीजिये॥ २॥

भावार्थः-जो राजा सत्यवादी विद्वानों और विचित्र विद्यायुक्त दृढ़ और उदार अर्थात् उत्तम आशययुक्त शूरवीरों का धारण पोषण करे, वही विजय और लक्ष्मी को प्राप्त होवे॥ २॥

पुनर्वीरगुणानाह॥

फिर वीर गुणों को कहते हैं॥

विश्वे॒ हि त्वा॑ स॒जोष॑सो॒ जना॑सो वृ॒क्तब॑र्हिषः।

होता॑रं॒ सद्म॑सु प्रि॒यं व्यन्ति॒ वार्या॑ पु॒रु॥ ३॥

विश्वे॑। हि। त्वा॒। स॒ऽजोष॑सः। जना॑सः। वृ॒क्तऽब॑र्हिषः। होता॑रम्। सद्म॑ऽसु। प्रि॒यम्। व्यन्ति॑। वार्या॑। पु॒रु॥ ३॥

पदार्थः-(विश्वे) सर्वे **(हि) (त्वा)** त्वाम् राजानम् **(सजोषसः)** समानप्रीतिसेवनाः **(जनासः)** प्रसिद्धशुभाचरणाः **(वृक्तबर्हिषः)** श्रोत्रिया ऋत्विज इव सर्वविद्यासु कुशलाः **(होतारम्)** दातारम् **(सद्मसु)** राजगृहेषु **(प्रियम्)** कमनीयम् **(व्यन्ति)** प्राप्नुवन्ति **(वार्य्या)** वर्त्तुमर्हाणि धनादीनि **(पुरु)** बहूनि॥ ३॥

अन्वयः-हे राजन्! ये विश्वे सजोषसो जनासो वृक्तबर्हिषो इव हि सद्मसु होतारं प्रियं त्वाश्रयन्ति ते पुरु वार्य्या व्यन्ति॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये राज्योन्नतिप्रिया धर्म्मिष्ठा भृत्यास्त्वां प्राप्नुयुस्तान् सर्वान् सत्कृत्य सततं रक्षेः॥ ३॥

पदार्थः-हे राजन्! जो (**विश्वे**) सम्पूर्ण (**सजोषसः**) तुल्य प्रीति के सेवने वाले (**जनासः**) प्रसिद्ध उत्तम आचरणों से युक्त (**वृक्तबर्हिषः**) अग्निहोत्र करने वाले और यज्ञ करने वाले के सदृश सम्पूर्ण विद्याओं में कुशल जन (**हि**) ही (**सद्मसु**) राजगृहों अर्थात् राजदर्बारों में (**होतारम्**) दाता और (**प्रियम्**) सुन्दर (**त्वा**) आपका आश्रय करते हैं, वे (**पुरु**) बहुत (**वार्य्या**) स्वीकार करने योग्य धन आदिकों को (**व्यन्ति**) प्राप्त होते हैं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो राज्य की उन्नति में प्रीति करने वाले और धर्म्मिष्ठ भृत्य आपको प्राप्त होवें, उन सबका सत्कार करके निरन्तर रक्षा करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स हि ष्मा॑ वि॒श्वच॑र्षणिर॒भिमा॑ति॒ सहो॑ दु॒धे।

अग्न॑ ए॒षु क्षये॒ष्वा रे॒वन्नः॒ शुक्र दीदिहि द्यु॒मत्पा॑वक दीदिहि॥४॥१५॥

सः। हि स्म॒। वि॒श्वऽच॑र्षणिः। अ॒भिऽमा॑ति। सहः॑। दु॒धे॒। अग्ने॑। ए॒षु॒। क्षये॑षु। आ। रे॒वत्। नः॒। शु॒क्र॒। दी॒दि॒हि॒। द्यु॒ऽमत्। पा॒व॒क॒। दी॒दि॒हि॒॥४॥

पदार्थः-(**सः**) (**हि**) (**स्मा**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**विश्वचर्षणिः**) अखिलविद्याप्रकाशः (**अभिमाति**) अभिमन्यते येन (**सहः**) बलम् (**दधे**) दधाति (**अग्ने**) पावकवद्वर्त्तमान (**एषु**) (**क्षयेषु**) निवासेषु (**आ**) (**रेवत्**) प्रशस्तधनयुक्तम् (**नः**) अस्मभ्यम् (**शुक्र**) शक्तिमन् (**दीदिहि**) देहि (**द्युमत्**) प्रकाशमत् (**पावक**) पवित्र (**दीदिहि**) प्रकाशय॥४॥

अन्वयः-हे शुक्राग्ने! यो विश्वचर्षणिरेषु क्षयेष्वभिमाति सहो दधे स हि ष्मा विजेता भवति तेन त्वं नो रेवद्दीदिहि। हे पावक! पवित्राचरणेनाऽस्मभ्यं द्युमदा दीदिहि॥४॥

भावार्थः-ये मनुष्याः पूर्णं शरीरात्मबलं दधति ते सर्वेभ्यः सुखं दातुं शक्नुवन्तीति॥४॥

अत्राग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोविंशतितमं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**शुक्र**) सामर्थ्ययुक्त (**अग्ने**) अग्नि के सदृश वर्तमान! जो (**विश्वचर्षणिः**) सम्पूर्ण विद्याओं का प्रकाश (**एषु**) इन (**क्षयेषु**) निवास स्थानों में (**अभिमाति**) अभिमान जिससे हो उस (**सहः**) बल को (**दधे**) धारण करता (**सः, हि**) वही (**स्मा**) निश्चय से जीतने वाला होता है, इससे आप (**नः**) हम लोगों के लिये (**रेवत्**) प्रशस्त धन से युक्त पदार्थ को (**दीदिहि**) दीजिये और हे (**पावक**) पवित्र, पवित्राचरण से हम लोगों के लिये (**द्युमत्**) प्रकाशयुक्त का (**आ, दीदिहि**) प्रकाश कीजिये॥४॥

भावार्थः-जो मनुष्य पूर्ण शरीर और आत्मा के बल को धारण करते हैं, वे सब के लिये सुख दे सकते हैं॥४॥

इस सूक्त में अग्नि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेईसवाँ सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य चतुर्विंशतितमस्य सूक्तस्य बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च गोपायना लौपायना वा ऋषयः। अग्निर्देवता। १, २ पूर्वार्द्धस्य साम्नी बृहत्युत्तरार्द्धस्य भुरिक् साम्नी बृहती। ३, ४ पूर्वार्द्धस्योत्तरार्द्धस्य च भुरिक् साम्नी बृहती छन्दसी। मध्यमः स्वरः॥

अथाग्निपदवाच्यराजविषयमाह॥

अब चार ऋचा वाले चौबीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्निपदवाच्य राजविषय को कहते हैं॥

अग्ने॒ त्वं नो॒ अन्त॑म उ॒त त्रा॒ता शि॒वो भ॑वा वरू॒थ्यः॑।
वसु॑र॒ग्निर्वसु॑श्रवा॒ अच्छा॑ नक्षि द्यु॒मत्त॑मं र॒यिं दाः॑॥ १॥ २॥

अग्ने॑। त्वम्। नः॒। अन्त॑मः। उ॒त। त्रा॒ता। शि॒वः। भ॒व॒। व॒रू॒थ्यः॑। वसुः॑। अ॒ग्निः॒। वसु॑ऽश्रवाः। अच्छ॑। न॒क्षि॒। द्यु॒मत॑ऽतमम्। र॒यिम्। दाः॒॥ १॥ २॥

पदार्थः-(अग्ने) राजन् **(त्वम्) (नः)** अस्मानस्मभ्यं वा **(अन्तमः)** समीपस्थः **(उत) (त्राता)** रक्षकः **(शिवः)** मङ्गलकारी **(भवा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(वरूथ्यः)** वरूथेषुत्तमेषु गृहेषु भवः **(वसुः)** वासयिता **(अग्निः)** पावकः **(वसुश्रवाः)** धनधान्ययुक्तः **(अच्छा) (नक्षि)** व्याप्नुहि **(द्युमत्तमम्) (रयिम्)** धनम् **(दाः)** देहि॥ १॥ २॥

अन्वयः-हे अग्ने! त्वं नोऽन्तमः शिवो वरूथ्यो वसुर्वसुश्रवा अग्निरिव शिव उत त्राता भवा य द्युमत्तमं रयिं त्वमच्छा नक्षि तमस्मभ्यं दाः॥ १॥ २॥

भावार्थः-हे राजन्! यथा परमात्मा सर्वाभिव्याप्तः सर्वरक्षकः सर्वेभ्यो मङ्गलप्रदः सर्वपदार्थदाता सुखकारी वर्त्तते तथैव राज्ञा भवितव्यम्॥ १॥ २॥

पदार्थः-हे **(अग्ने)** राजन्! **(त्वम्)** आप **(नः)** हम लोगों के हम लोगों को वा हम लोगों के लिये **(अन्तमः)** समीप में वर्त्तमान **(शिवः)** मङ्गलकारी **(वरूथ्यः)** उत्तम गृहों में उत्पन्न **(वसुः)** वसाने वाले **(वसुश्रवाः)** धन और धान्य से युक्त **(अग्निः)** अग्नि के सदृश मङ्गलकारी **(उत)** और **(त्राता)** रक्षक **(भवा)** हूजिये और जिस **(द्युमत्तमम्)** अत्यन्त प्रकाशयुक्त **(रयिम्)** धन को आप **(अच्छा)** उत्तम प्रकार **(नक्षि)** व्याप्त हूजिये और उसको हम लोगों के लिये **(दाः)** दीजिये॥ १॥ २॥

भावार्थः-हे राजन्! जैसे परमात्मा सब में अभिव्याप्त सबका रक्षक और सबके लिये मङ्गलदाता, सब पदार्थों का दाता और सुखकारी है, वैसे ही राजा को होना चाहिये॥ १॥ २॥

अथाग्निपदवाच्यविद्वद्गुणानाह॥

अब अग्निपदवाच्य विद्वान् के गुणों को अगले मन्त्र में कहते हैं॥

स नो॑ बोधि श्रु॒धी हव॑मुरु॒ष्या णो॑ अघाय॒तः सं॑मस्मात्।

तं त्वा॑ शोचिष्ठ दीदिवः सु॒म्नाय॑ नू॒नमी॑महे॒ सखि॑भ्यः॥ ३॥ ४॥ १६॥

सः। नः। बो॒धि॒। श्रु॒धि॒। हव॑म्। उ॒रु॒ष्य। नः। अ॒घ॒ऽय॒तः। स॒म॒स्मा॒त्। तम्। त्वा॒। शो॒चि॒ष्ठ॒। दी॒दि॒ऽवः। सु॒म्नाय॑। नू॒नम्। ई॒म॒हे॒। सखि॑ऽभ्यः॥ ३॥

पदार्थः-(सः) (नः) अस्माकम् **(बोधि)** बोधय **(श्रुधी)** शृणु **(हवम्)** पठितम् **(उरुष्या)** रक्ष। अत्र **संहितायामि**ति दीर्घः। **(नः)** अस्मान् **(अघायतः)** आत्मनोऽघमाचरतः **(समस्मात्)** सर्वस्मात् **(तम्) (त्वा)** त्वाम् **(शोचिष्ठ)** अतिशयेन शोधक **(दीदिवः)** सत्यप्रद्योतक **(सुम्नाय)** सुखाय **(नूनम्)** निश्चितम् **(ईमहे)** याचामहे **(सखिभ्यः)** मित्रेभ्यः॥ ३॥ ४॥

अन्वयः-हे शोचिष्ठ दीदिवोऽग्निरिव राजन्! स त्वं नो बोधि नो हवं श्रुधी समस्मादघायतो न उरुष्या तं त्वा सखिभ्यः सुम्नाय वयं नूनमीमहे॥ ३॥ ४॥

भावार्थः-सर्वैः प्रजाराजजनै राजानं प्रत्येवं वाच्यं भवान् सर्वेभ्योऽपराधेभ्यः स्वयम्पृथग्भूत्वाऽस्मान् रक्षयित्वा विद्याप्रचारं धार्मिकेभ्यो मित्रेभ्यः सुखं वर्धयित्वा दुष्टान् सततं दण्डयेदिति॥ ३॥ ४॥

अत्राग्नीश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्विंशतितमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(शोचिष्ठ)** अत्यन्त शुद्ध करने और **(दीदिवः)** सत्य के जनाने वाले अग्नि के सदृश तेजस्विजन! **(सः)** वह आप **(नः)** हम लोगों को **(बोधि)** बोध दीजिये और **(नः)** हम लोगों के **(हवम्)** पढ़े हुए विषय को **(श्रुधी)** सुनिये **(समस्मात्)** सब **(अघायतः)** आत्मा से पाप के आचरण करते हुए हम लोगों की **(उरुष्या)** रक्षा कीजिये **(तम्)** उन **(त्वा)** आप को **(सखिभ्यः)** मित्रों से **(सुम्नाय)** सुख के लिये हम लोग **(नूनम्)** निश्चित **(ईमहे)** याचना करते हैं॥ ३॥ ४॥

भावार्थः-सब प्रजा और राजजनों को चाहिये कि राजा के प्रति यह कहें कि आप सब अपराधों से स्वयं पृथक् हो के और हम लोगों की रक्षा करके विद्या का प्रचार और धार्मिक मित्रों के लिये सुख की वृद्धि करके दुष्टों को निरन्तर दण्ड दीजिये॥ ३॥ ४॥

इस सूक्त में अग्निपदवाच्य ईश्वर अर्थात् राजा और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौबीसवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य पञ्चविंशतितमस्य सूक्तस्य वसूयव आत्रेया ऋषयः। अग्निर्देवता। १, ८ निचृदनुष्टुप् २, ५, ६, ९ अनुष्टुप्। ३, ७ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ४ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः॥

अथाग्निविषयमाह॥

अब नव ऋचा वाले पच्चीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में
अग्निविषय को कहते हैं॥

अच्छा॑ वो अ॒ग्निमव॑से दे॒वं गा॑सि॒ स नो॒ वसुः॑।
रास॑त्पु॒त्र ऋ॒षू॒णामृ॒तावा॑ पर्षति द्वि॒षः॥ १॥

अच्छ॑। व॒ः। अ॒ग्निम्। अव॑से। दे॒वम्। गा॒सि॒। सः। न॒ः। वसुः॑। रास॑त्। पु॒त्रः। ऋ॒षू॒णाम्। ऋ॒तऽवा॑। पर्ष॑ति। द्वि॒षः॥ १॥

पदार्थः-(अच्छा) सम्यक्। अत्र **संहितायामि**ति दीर्घः। **(वः)** युष्माकम् **(अग्निम्)** पावकम् **(अवसे)** रक्षणाद्याय **(देवम्)** देदीप्यमानम् **(गासि)** प्रशंससि **(सः)** **(नः)** अस्मभ्यम् **(वसुः)** द्रव्यप्रदः **(रासत्)** ददाति **(पुत्रः)** अपत्यम् **(ऋषूणाम्)** मन्त्रार्थविदाम्। अत्र वर्णव्यत्ययेन इकारस्य स्थान उत्वम् **(ऋतावा)** सत्यस्य विभाजकः **(पर्षति)** पारयति **(द्विषः)** शत्रून्॥१॥

अन्वयः-हे विद्वंस्त्वं यं देवमग्निं वोऽवसेऽच्छा गासि स वसुर्ऋषूणामृतावा पुत्रो द्विषः पर्षतीव नो रासत्॥१॥

भावार्थः-यथा विदुषां सत्पुत्रो विद्वान् भूत्वा लोभादीन् दोषान्निवार्य्य पित्रादीन् सुखयति तथैवाऽग्निः संसाधितः सन् सर्वान् सुखयति॥१॥

पदार्थः-हे विद्वन्! आप जिस **(देवम्)** प्रकाशमान **(अग्निम्)** अग्नि की **(वः)** आप लोगों के **(अवसे)** रक्षण आदि के लिये **(अच्छा)** उत्तम प्रकार **(गासि)** प्रशंसा करते हो **(सः)** वह **(वसुः)** द्रव्यदाता **(ऋषूणाम्)** वेदमन्त्रार्थ जानने वालों के **(ऋतावा)** सत्य का विभाग करने वाला **(पुत्रः)** सन्तानरूप **(द्विषः)** शत्रुओं के **(पर्षति)** पार जाता है अर्थात् उनको जीतता है, वैसे ही **(नः)** हम लोगों के लिये **(रासत्)** देता है अर्थात् विजय दिलाता है॥१॥

भावार्थः-जैसे विद्वानों का श्रेष्ठ पुत्र विद्वान् होकर तथा लोभ आदि दोषों का त्याग करके पितृ आदिकों को सुख देता है, वैसे ही अग्नि उत्तम प्रकार सिद्धि किया गया सबको सुख देता है॥१॥

अथाग्निदृष्टान्तेन राजविषयमाह॥

अब अग्निदृष्टान्त से राजविषय को कहते हैं॥

स हि स॒त्यो यं पूर्वे॑ चिद्दे॒वास॑श्चि॒द्यमी॑धि॒रे।

होतारं मन्द्रजिह्वमित्सुदीतिभिर्विभावसुम्॥ २॥

सः। हि। सत्यः। यम्। पूर्वे। चित्। देवासः। चित्। यम्। ईधिरे। होतारम्। मन्द्रजिह्वम्। इत्। सुदीतिऽभिः। विभावसुम्॥ २॥

पदार्थः-(सः) (हि) (सत्यः) सत्सु साधुः **(यम्) (पूर्वे)** प्राचीनाः **(चित्)** अपि **(देवासः)** विद्वांसः **(चित्) (यम्) (ईधिरे)** प्रदीपयन्ति **(होतारम्)** दातारम् **(मन्द्रजिह्वम्)** मन्द्रा प्रशंसनीया जिह्वा यस्य तम् **(इत्)** एव **(सुदीतिभिः)** सुष्ठु दीप्तिभिस्सहितम् **(विभावसुम्)** प्रकाशयुक्तं वसु धनं यस्य तम्॥ २॥

अन्वयः-पूर्वे देवासो यं होतारं मन्द्रजिह्वं सुदीतिभिस्सह वर्त्तमानं चिद् विभावसुमग्निमिव वर्त्तमानं यं राजानं चिदिदीधिरे स हि सत्यो राज्यं कर्त्तुमर्हति॥ २॥

भावार्थः-यं राजानमाप्ताः सत्कुर्युः स एव सततं राज्यं रक्षितुं वर्धितुं योग्यः स्यात्॥ २॥

पदार्थः-(पूर्वे) प्राचीन **(देवासः)** विद्वान् जन **(यम्)** जिस **(होतारम्)** देने वाले **(मन्द्रजिह्वम्)** प्रशंसनीय जिह्वा से युक्त **(सुदीतिभिः)** उत्तम प्रकाशों के सहित वर्त्तमान को **(चित्)** और **(विभावसुम्)** प्रकाशित धन से युक्त अग्नि के सदृश वर्त्तमान **(यम्)** जिस राजा को **(चित्)** निश्चय से **(इत्)** ही **(ईधिरे)** प्रकाशित करते हैं **(सः, हि)** वही **(सत्यः)** सज्जनों में श्रेष्ठ पुरुष राज्य करने को योग्य है॥ २॥

भावार्थः-जिस राजा का यथार्थवक्ता जन सत्कार करें, वही निरन्तर राज्य की रक्षा और वृद्धि करने को योग्य हो॥ २॥

अथाग्निसादृश्येन विद्वद्विषयमाह॥

अब अग्निसादृश्य से विद्वद्विषय को कहते हैं॥

स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या।

अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य॥ ३॥

सः। नः। धीती। वरिष्ठया। श्रेष्ठया। च। सुऽमत्या। अग्ने। रायः। दिदीहि। नः। सुवृक्तिऽभिः। वरेण्य॥ ३॥

पदार्थः-(सः) (नः) अस्माकम् **(धीती)** धीत्या धारणवत्या **(वरिष्ठया)** अतिशयेन स्वीकर्त्तव्यया **(श्रेष्ठया)** अत्युत्तमया **(च) (सुमत्या)** शोभनया प्रज्ञया **(अग्ने) (रायः)** धनानि **(दिदीहि)** देहि **(नः)** अस्मभ्यम् **(सुवृक्तिभिः)** सुष्ठु वृक्तिर्वर्जनं यासां क्रियाभिः **(वरेण्य)** स्वीकर्त्तुमर्ह॥ ३॥

अन्वयः-हे वरेण्याग्ने! स त्वं धीती वरिष्ठया श्रेष्ठया सुमत्या नो रायो दिदीहि सुवृक्तिभिश्च नः सततं वर्धय॥ ३॥

भावार्थः-य उत्तमां प्रज्ञां चेच्छन्ति त एव सर्वैः सत्कर्त्तव्याः सन्ति॥ ३॥

पदार्थः-हे **(वरेण्य)** स्वीकार करने योग्य **(अग्ने)** अग्नि के सदृश वर्त्तमान! **(सः)** वह आप **(धीती)** धारणावाली **(वरिष्ठया)** अत्यन्त स्वीकार करने योग्य **(श्रेष्ठया)** अति उत्तम **(सुमत्या)** सुन्दर बुद्धि

से **(नः)** हम लोगों के लिये **(रायः)** धनों को **(दिदीहि)** दीजिये **(सुवृक्तिभिः)** उत्तम वर्जनवाली क्रियाओं से **(च)** भी **(नः)** हम लोगों की निरन्तर वृद्धि कीजिये॥३॥

भावार्थः-जो उत्तम बुद्धि की इच्छा करते वा उत्तम बुद्धि को अन्य जनों के लिये देते हैं, वे ही सब लोगों से सत्कार करने योग्य हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन्।
अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत॥४॥

अग्निः। देवेषु। राजति। अग्निः। मर्तेषु। आऽविशन्। अग्निः। नः। हव्यऽवाहनः। अग्निम्। धीभिः। सपर्यत॥४॥

पदार्थः-**(अग्निः)** पावक इव वर्त्तमानो विद्वान् **(देवेषु)** विद्वत्सु पृथिव्यादिषु वा **(राजति)** प्रकाशते **(अग्निः)** विद्युत् **(मर्त्तेषु)** मरणधर्मेषु मनुष्यादिषु **(आविशन्)** आविष्टः सन् **(अग्निः)** सूर्य्यादिरूपः **(नः)** अस्मान् **(हव्यवाहनः)** यो हव्यानि वहति सः **(अग्निम्)** पावकम् **(धीभिः)** प्रज्ञाभिः **(सपर्य्यत)** सेवध्वम्॥४॥

अन्वयः-हे मनुष्या! योऽग्निर्देवेषु योऽग्निर्मर्त्तेषु यो हव्यवाहनोऽग्निर्न आविशन् राजति तमग्निं धीभिर्यूयं सपर्य्यत॥४॥

भावार्थः-हे विद्वांसो! यद्यनेकविधोऽग्निर्युष्माभिर्विज्ञायेत तर्हि किं किं सुखं न लभ्येत॥४॥

पदार्थः-हे मनुष्यो! जो **(अग्निः)** अग्नि के सदृश वर्त्तमान तेजस्वी विद्वान् **(देवेषु)** विद्वानों वा पृथिवी आदिकों में और जो **(अग्निः)** बिजुलीरूप अग्नि **(मर्त्तेषु)** मरणधर्म्म वाले मनुष्य आदिकों में और जो **(हव्यवाहनः)** हवन करने योग्य पदार्थों को धारण करने वाला **(अग्निः)** सूर्य्यादिरूप अग्नि **(नः)** हम लोग में **(आविशन्)** प्रविष्ट हुआ **(राजति)** प्रकाशित होता है, उस **(अग्निम्)** अग्नि को **(धीभिः)** बुद्धियों से आप लोग **(सपर्य्यत)** सेवो अर्थात् कार्य्य में लाओ॥४॥

भावार्थः-हे विद्वानो! जो अनेक प्रकार का अग्नि आप लोगों से जाना जाये अर्थात् अनेक प्रकार के अग्नि का आप लोगों को परिज्ञान हो तो क्या-क्या सुख न पाया जाये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम्।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे॥५॥१७॥

अग्निः। तुविश्रवःऽतमम्। तुविऽब्रह्माणम्। उत्ऽतमम्। अतूर्तम्। श्रवयत्ऽपतिम्। पुत्रम्। ददाति। दाशुषे॥५॥

पदार्थः-(अग्निः) विद्वान् **(तुविश्रवस्तमम्)** अतिशयेन बह्वन्नश्रवणयुक्तम् **(तुविब्रह्माणम्)** बहवो ब्रह्माणश्चतुर्वेदविदो विद्वांसो यस्य तम् **(उत्तमम्)** अतिशयेन श्रेष्ठम् **(अतूर्त्तम्)** अहिंसितम् **(श्रावयत्पतिम्)** श्रावयन्पतिर्यस्य तम् **(पुत्रम्) (ददाति) (दाशुषे)** दानशीलाय॥५॥

अन्वयः-यो अग्निरिव दाशुषे तुविश्रवस्तमं तुविब्रह्माणमुत्तममतूर्त्तं श्रावयत्पतिं पुत्रं ददाति स एव पूजनीयतमो भवति॥५॥

भावार्थः-हे मनुष्यास्तेषामेव यूयं सत्कारं कुरुत ये सर्वान् विदुषो धार्मिकान् कुर्वन्ति॥५॥

पदार्थः-जो **(अग्निः)** अग्नि के सदृश तेजस्वी विद्वान् **(दाशुषे)** दानशील जन के लिये **(तुविश्रवस्तमम्)** अत्यन्त बहुत अन्न और श्रवण से युक्त और **(तुविब्रह्माणम्)** चार वेद के जानने वाले बहुत विद्वानों के युक्त **(उत्तमम्)** अत्यन्त श्रेष्ठ **(अतूर्त्तम्)** नहीं हिंसित और **(श्रावयत्पतिम्)** सुनाते हुए पालन करने वाले से युक्त **(पुत्रम्)** सन्तान को **(ददाति)** देता है, वही अत्यन्त आदर करने योग्य होता है॥५॥

भावार्थः-हे मनुष्यो! उन लोगों का ही आप लोग सत्कार करो, जो सबको विद्वान् और धार्मिक करते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः।

अग्निरत्यं रघुष्यदं जेतारमपराजितम्॥६॥

अग्निः। ददाति। सत्ऽपतिम्। ससाह। यः। युधा। नृऽभिः। अग्निः। अत्यम्। रघुऽस्यदम्। जेतारम्। अपराऽजितम्॥६॥

पदार्थः-(अग्निः) परमेश्वरो विद्वान् वा **(ददाति) (सत्पतिम्)** सतां पालकम् **(सासाह)** सहते। अत्र लडर्थे लिट्। **तुजादीनामि**त्यभ्यासदैर्घ्यम्। **(यः) (युधा)** युध्यमानेन सैन्येन **(नृभिः)** नायकैर्मनुष्यैः **(अग्निः)** पावकः **(अत्यम्)** अतति व्याप्नोत्यध्वानमत्यमश्वम् **(रघुष्यदम्)** लघुगमनम् **(जेतारम्)** अपराजितम्॥६॥

अन्वयः-हे मनुष्याः! सोऽग्निः सत्पतिं ददाति योऽग्निर्युधा नृभी रघुष्यदं जेतारमपराजितं राजानमत्यमिव सासाह॥६॥

भावार्थः-हे विद्वांसो! यथेश्वरो धर्मिष्ठेभ्यो धर्म्मात्मानं राजानं ददाति यथा सुसेना विद्वांसं शूरवीरं धर्म्मात्मानं सेनाध्यक्षं प्राप्य शत्रून् विजयते तथैव स सर्वैर्बहु मन्तव्यः॥६॥

पदार्थः-हे मनुष्यो! वह **(अग्निः)** परमेश्वर वा विद्वान् **(सत्पतिम्)** श्रेष्ठों के पालन करने वाले को **(ददाति)** देता है **(यः)** जो **(अग्निः)** अग्नि **(युधा)** युद्ध करती हुई सेना और **(नृभिः)** नायक अर्थात् अग्रणी मनुष्यों से **(रघुष्यदम्)** लघुगमनवान् **(जेतारम्)** जीतने और **(अपराजितम्)** नहीं हारने वाले राजा को **(अत्यम्)** मार्ग्ग को व्याप्त होते घोड़े को जैसे वैसे **(सासाह)** सहता है॥६॥

भावार्थः-हे विद्वानो! जैसे ईश्वर धर्मिष्ठ जनों के लिये धर्म्मात्मा राजा को देता है और जैसे उत्तम सेना विद्वान् शूरवीर और धर्म्मात्मा सेनाध्यक्ष को प्राप्त होकर शत्रुओं को जीतती है, वैसे ही वह सब लोगों को आदर करने योग्य है॥६॥

अथाग्निपदवाच्यराजदृष्टान्तेन विद्वद्विषयमाह॥

अब अग्निपदवाच्य राजदृष्टान्त से विद्वद्विषय को कहते हैं॥

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो।

महिषीव त्वद्रयिस्त्वद्वाजा उदीरते॥७॥

यत्। वाहिष्ठम्। तत्। अग्नये। बृहत्। अर्च। विभावसो इति विभाऽवसो। महिषीऽइव। त्वत्। रयिः। त्वत्। वाजाः। उत्। ईरते॥७॥

पदार्थः-(**यत्**) यम् **(वाहिष्ठम्)** अतिशयेन वोढारम् **(तत्)** तम् **(अग्नये)** राज्ञे **(बृहत्)** **(अर्च)** सत्कुरु **(विभावसो)** स्वप्रकाश **(महिषीव)** ज्येष्ठा राज्ञीव **(त्वत्)** **(रयिः)** धनम् **(त्वत्)** **(वाजाः)** अन्नाद्याः **(उत्)** **(ईरते)** उत्कृष्टतया जायन्ते॥७॥

अन्वयः-हे विभावसो! यद्यं वाहिष्ठमग्नये बृहदर्च तत्तम्महिषीव सेवस्व यस्त्वद्रयिस्त्वद् वाजा उदीरते तान् वयं लभेमहि॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा पतिव्रता राज्ञी स्वपतिं सततं सत्करोति तस्माज्जातं पुष्कलसुखं लभते तथैव मनुष्या विदुषः संसेव्य तेभ्यो जातां प्रज्ञां प्राप्य सततं सुखयन्तु॥७॥

पदार्थः-हे **(विभावसो)** स्वयं प्रकाशित! **(यत्)** जिस **(वाहिष्ठम्)** अतिशय प्राप्त करने वाले का **(अग्नये)** राजा के लिये **(बृहत्)** बड़ा **(अर्च)** सत्कार करो **(तत्)** उसकी **(महिषीव)** बड़ी अर्थात् पटरानी के सदृश सेवा करो और जो **(त्वत्)** आपसे **(रयिः)** धन और **(त्वत्)** आपसे **(वाजाः)** अन्न आदि **(उत्, ईरते)** उत्तमता से उत्पन्न होते हैं, उनको हम लोग प्राप्त होवें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पतिव्रता रानी अपने पति का निरन्तर सत्कार करती और उससे उत्पन्न हुए अत्यन्त सुख को प्राप्त होती है, वैसे ही मनुष्य विद्वानों का आदर करके उनसे उत्पन्न हुई अर्थात् उनके सम्बन्ध से प्रकट हुई बुद्धि को प्राप्त होकर निरन्तर सुखी हो॥७॥

अथ मेघदृष्टान्तेन विद्वद्विषयमाह॥

अब मेघदृष्टान्त से विद्वद्विषय को कहते हैं॥

तव॑ द्यु॒मन्तो॑ अ॒र्चयो॒ ग्रावे॑वोच्यते बृ॒हत्।

उ॒तो ते॑ तन्य॒तुर्यथा॑ स्वा॒नो अ॑र्त॒ त्मना॑ दि॒वः॥८॥

तव॑। द्यु॒ऽम॒न्तः॑। अ॒र्चयः॑। ग्रावा॑ऽइव। उ॒च्य॒ते॒। बृ॒हत्। उ॒तो इति॑। ते॒। त॒न्य॒तुः॑। यथा॑। स्वा॒नः॑। अ॒र्त॒। त्मना॑। दि॒वः॥८॥

पदार्थः-(तव) (**द्युमन्तः**) बहुप्रकाशवन्तः (**अर्चयः**) किरणाः (**ग्रावेव**) मेघ इव (**उच्यते**) (**बृहत्**) महत्सत्यम् (**उतो**) अपि (**ते**) तव (**तन्यतुः**) विद्युत् (**यथा**) (**स्वानः**) शब्दः (**अर्त्त**) प्राप्नुत (**त्मना**) आत्मना (**दिवः**) कामयमानान् पदार्थान्॥८॥

अन्वयः-हे विद्वँस्तव द्युमन्तो येऽर्चयः सन्ति ताभिर्यद् ग्रावेव बृहदुच्यते उतो ते यथा तन्यतुस्तथा स्वानो वर्त्तते ततस्त्मना दिवो यूयं सर्वेऽर्त्त॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये मेघवद् गम्भीरशब्देन गूढार्थानुपविशन्ति विद्युद्वत्पुरुषार्थयन्ति ते सर्वाणि सुखानि लभन्ते॥८॥

पदार्थः-हे विद्वन्! (**तव**) आपके (**द्युमन्तः**) बहुत प्रकाश वाली (**अर्चयः**) किरणें हैं उनसे जो (**ग्रावेव**) मेघ के सदृश (**बृहत्**) बहुत सत्य (**उच्यते**) कहा जाता (**उतो**) और (**ते**) आपका (**यथा**) जैसे (**तन्यतुः**) बिजुली वैसे (**स्वानः**) शब्द वर्त्तमान है, इस कारण (**त्मना**) आत्मा से (**दिवः**) प्रकाशयुक्त पदार्थों को तुम सब लोग (**अर्त्त**) प्राप्त होओ॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मेघ के सदृश गम्भीर शब्द से गूढ़ अर्थों के उपदेश देते और बिजुली के सदृश पुरुषार्थ करते हैं, वे सम्पूर्ण सुखों को प्राप्त होते हैं॥८॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

ए॒वाँ अ॒ग्निं व॑सू॒यव॑: सहसा॒नं व॑वन्दिम।

स नो॒ विश्वा॒ अति॒ द्विष॒: पर्ष॑न्ना॒वेव॑ सु॒क्रतु॑:॥९॥१८॥

ए॒व। अ॒ग्निम्। व॒सु॒ऽय॑वः। स॒ह॒सा॒नम्। व॒व॒न्दि॒म॒। सः। नः॒। विश्वाः॑। अति॑। द्विषः॑। पर्ष॑त्। ना॒वाऽइ॑व। सु॒ऽक्रतुः॑॥९॥

पदार्थः-(एवा) निश्चये (**अग्निम्**) विद्युतमिव विद्वांसम् (**वसूयवः**) आत्मनो वस्विच्छवः (**सहसानम्**) यः सर्वं सहते तम् (**ववन्दिम**) प्रशंसेम (**सः**) (**नः**) अस्माकम् (**विश्वाः**) समग्राः (**अति**) (**द्विषः**) द्वेषयुक्ताः क्रियाः (**पर्षत्**) पारयेत् (**नावेव**) यथा नौकया समुद्रम् (**सुक्रतुः**) सुष्ठुप्रज्ञः सुकर्मा वा॥९॥

अन्वयः-हे विद्वन्! वसूयवो वयमग्निमिव सहसानं त्वां ववन्दिम स एवा सुक्रतुर्भवान्नावेव नो विश्वा

द्विषोऽति पर्षत्॥९॥

भावार्थः-अत्रोपमालङ्कारः। यथा महत्या नौकया समुद्रादिपारं सुखेन गच्छन्ति तथैव विद्वत्सङ्गेन सर्वेभ्यो दोषेभ्यस्सहजतया दूरं प्राप्नुवन्तीति॥९॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चविंशतितमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! **(वसूयवः)** अपने धन की इच्छा करते हुए हम लोग **(अग्निम्)** बिजुली के सदृश तेजस्वी विद्वान् और **(सहसानम्)** सबको सहने वाले आपकी **(ववन्दिम)** प्रशंसा करें **(सः, एवा)** वही **(सुक्रतुः)** उत्तम बुद्धि वा उत्तम कर्मों से युक्त आप **(नावेव)** जैसे नौका से समुद्र के वैसे **(न)** हम लोगों की **(विश्वाः)** सम्पूर्ण **(द्विषः)** द्वेषयुक्त क्रियाओं के **(अति, पर्षत्)** पार करें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे बड़ी नौका से समुद्र आदि के पार सुखपूर्वक जाते हैं, वैसे ही विद्वानों के संग से सब दोषों से साधारणापन से दूर को प्राप्त होते हैं॥९॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पच्चीसवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य षड्विंशतितमस्य सूक्तस्य वसूयव आत्रेया ऋषयः। अग्निर्देवाता। १, ४, ९ गायत्री। २, ३, ५, ६, ८ निचृद्गायत्री। ७ विराड्गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निपदवाच्यविद्वद्गुणानाह॥

अब नव ऋचा वाले छब्बीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निपदवाच्य विद्वान् के गुणों को कहते हैं॥

अग्ने॑ पावक रो॒चिषा॑ म॒न्द्रया॑ देव जि॒ह्वया॑। आ दे॒वान् व॑क्षि॒ यक्षि॑ च॥ १॥

अग्ने॑। पा॒व॒क॒। रो॒चिषा॑। म॒न्द्रया॑। दे॒व॒। जि॒ह्वया॑। आ। दे॒वान्। व॒क्षि॒। यक्षि॑। च॒॥ १॥

पदार्थः-(अग्ने) विद्वन् **(पावक)** पवित्रशुद्धिकर्त्तः **(रोचिषा)** अतिरुचियुक्तया **(मन्द्रया)** विज्ञानानन्दप्रदया **(देव)** विद्याप्रदातः **(जिह्वया)** वाण्या **(आ)** समन्तात् **(देवान्)** विदुषो दिव्यगुणान् पदार्थान् वा **(वक्षि)** प्राप्नोषि प्रापयसि वा **(यक्षि)** सत्करोषि सङ्गच्छसे **(च)**॥ १॥

अन्वयः-हे पावक देवाग्ने! यतस्त्वं रोचिषा मन्द्रया जिह्वयाऽत्र देवाना वक्षि यक्षि च तस्मादर्चनीयोऽसि॥ १॥

भावार्थः-ये प्रीत्या सत्योपदेशान् कृत्वा विदुषो दिव्यान् गुणांश्च प्राप्य प्रापयन्ति त एव पूजनीया भवन्ति॥ १॥

पदार्थः-हे **(पावक)** पवित्र और शुद्धि करने तथा **(देव)** विद्या के देने वाले **(अग्ने)** विद्वन्! जिससे आप **(रोचिषा)** अति प्रीति से युक्त **(मन्द्रया)** विज्ञान और आनन्द देने वाली **(जिह्वया)** वाणी से इस संसार में **(देवान्)** विद्वानों और श्रेष्ठ गुणों वा पदार्थों को **(आ, वक्षि)** सब ओर से प्राप्त होते वा प्राप्त कराते हो तथा **(यक्षि)** सत्कार करते और मिलते **(च)** भी हो, इससे सत्कार करने योग्य हो॥ १॥

भावार्थः-जो प्रीति से सत्य उपदेशों को कर और विद्वान् तथा श्रेष्ठ गुणों को प्राप्त होकर अन्यों को प्राप्त कराते हैं, वे ही आदर करने योग्य होते हैं॥ १॥

अथाग्निगुणानाह॥

अब अग्निगुणों को कहते हैं॥

तं त्वा॑ घृतस्नवीमहे चित्र॑भानो स्व॒र्दृश॑म्। दे॒वाँ आ वी॒तये॑ वह॥ २॥

तम्। त्वा॒। घृ॒त॒स्नो॒ इति॑ घृतऽस्नो। ई॒म॒हे॒। चित्र॑भानो॒ इति॒ चित्र॑ऽभानो। स्व॒रिति॑ स्वः॒ऽदृश॑म्। दे॒वान्। आ। वी॒तये॑। व॒ह॒॥ २॥

पदार्थः-(तम्) (त्वा) त्वाम् **(घृतस्नो)** यो घृतं स्नाति शुन्धति तत्सम्बुद्धौ **(ईमहे)** याचामहे **(चित्रभानो)** अद्भुतदीप्ते **(स्वर्दृशम्)** यः स्वरादित्येन दृश्यते तम् **(देवान्)** दिव्यगुणान् विदुषो वा **(आ) (वीतये)** प्राप्तये **(वह)**॥२॥

अन्वयः-हे घृतस्नो चित्रभानो विद्वन्! यथा घृतशोधको विचित्रप्रकाशोऽग्निर्वीतये स्वर्दृशं त्वाऽऽवहति तं वयमीमहे तथा त्वं देवाना वह॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि बहूत्तमगुणमग्निं मनुष्या विजानीयुस्तर्हि पुष्कलं सुखं लभन्ताम्॥२॥

पदार्थः-हे **(घृतस्नो)** घृत को शुद्ध करने वाले **(चित्रभानो)** अद्भुतप्रकाशयुक्त विद्वन्! जैसे घृत को स्वच्छ करने वाला और अद्भुतप्रकाश से युक्त अग्नि **(वीतये)** प्राप्ति के लिये **(स्वर्दृशम्)** जो सूर्य्य से देखे गये उन **(त्वा)** आपको धारण करता है **(तम्)** उसको हम लोग **(ईमहे)** याचते हैं, वैसे आप **(देवान्)** दिव्य गुण वा विद्वानों को **(आ, वह)** सब ओर से प्राप्त कीजिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बहुत उत्तम गुणयुक्त अग्नि को मनुष्य विशेष करके जानें तो बहुत सुख को प्राप्त हों॥२॥

पुनरग्निसादृश्येन विद्वद्गुणानाह॥

फिर अग्नि के सादृश्य से विद्वान् के गुणों को कहते हैं॥

वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि। अग्ने बृहन्तमध्वरे॥३॥

वीतिऽहोत्रम्। त्वा। कवे। द्युऽमन्तम्। सम्। इधीमहि। अग्ने। बृहन्तम्। अध्वरे॥३॥

पदार्थः-(वीतिहोत्रम्) वीतेर्व्याप्तेर्होत्रं ग्रहणं यस्मात् तम् **(त्वा) (कवे)** विद्वन् **(द्युमन्तम्)** प्रकाशवन्तम् **(सम्) (इधीमहि)** सम्यक् प्रकाशयेम **(अग्ने)** पावकवद्वर्त्तमान **(बृहन्तम्)** महान्तम् **(अध्वरे)** अहिंसायज्ञे॥३॥

अन्वयः-हे कवे अग्ने! वयमध्वरे **[**वीतिहोत्रं**]** द्युमन्तमग्निमिव यं बृहन्तं त्वा समिधीमहि स त्वमस्माञ्छुद्धविद्यया प्रकाशय॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः शिल्पविद्यासिद्धयेऽग्निसम्प्रयोगोऽवश्यं कार्य्यः॥३॥

पदार्थः-हे **(कवे)** विद्वन् **(अग्ने)** अग्नि के सदृश वर्त्तमान! हम लोग **(अध्वरे)** अहिंसारूप यज्ञ में **(वीतिहोत्रम्)** व्याप्ति का ग्रहण जिससे उस **(द्युमन्तम्)** प्रकाश वाले अग्नि के सदृश जिन **(बृहन्तम्)** महान् **(त्वा)** आपको **(सम्, इधीमहि)** उत्तम प्रकार प्रकाशित करें, वह आप हम लागों को शुद्ध विद्या से प्रकाशित करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि शिल्पविद्या की सिद्धि के लिये अग्नि का सम्प्रयोग अवश्य करें॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

अग्ने॒ विश्वे॑भि॒रा ग॑हि दे॒वेभि॑र्हव्यदा॑तये। होता॑रं त्वा वृणीमहे॥४॥

अग्ने॑। विश्वे॑भिः। आ। ग॒हि॒। दे॒वेभिः॑। ह॒व्य॒ऽदा॑तये। होता॑रम्। त्वा॒। वृ॒णी॒म॒हे॒॥४॥

पदार्थः-(अग्ने) विद्वन् **(विश्वेभिः)** समग्रैः **(आ) (गहि)** आगच्छ **(देवेभिः)** विद्वद्भिः **(हव्यदातये)** दातव्यदानाय **(होतारम्) (त्वा) (वृणीमहे)**॥४॥

अन्वयः-हे अग्ने! यं होतारं त्वा वयं वृणीमहे स त्वं हव्यदातये विश्वेभिर्देवेभिः सहा गहि॥४॥

भावार्थः-मनुष्यैर्विदुषां स्वीकारं कृत्वा त आह्वातव्या, विद्वांसश्च विद्वद्भिः सहागत्य सततं सत्यमुपदिशन्तु॥४॥

पदार्थः-हे **(अग्ने)** विद्वन्! जिन **(होतारम्)** देने वाले **(त्वा)** आपका हम लोग **(वृणीमहे)** स्वीकार करते हैं, वह आप **(हव्यदातये)** देने योग्य दान के लिये **(विश्वेभिः)** सम्पूर्ण **(देवेभिः)** विद्वानों के साथ **(आ, गहि)** प्राप्त हूजिये॥४॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों का सत्कार कर उन्हें बुलावें और विद्वान् जन भी विद्वानों के साथ प्राप्त होकर निरन्तर सत्य का उपदेश करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यज॑मानाय सुन्व॒त आग्ने॑ सु॒वीर्य॑ं वह। दे॒वैरा स॑त्सि ब॒र्हिषि॑॥५॥१९॥

यज॑मानाय। सु॒न्व॒ते। आ। अ॒ग्ने॒। सु॒ऽवीर्य॑म्। व॒ह॒। दे॒वैः। आ। स॒त्सि॒। ब॒र्हिषि॑॥५॥

पदार्थः-(यजमानाय) दात्रे **(सुन्वते)** यज्ञं निष्पादयते **(आ) (अग्ने)** विद्वन् **(सुवीर्यम्) (वह)** प्राप्नुहि **(देवैः)** विद्वद्भिः **(आ) (सत्सि)** सभायाम् **(बर्हिषि)** अत्युत्तमायाम्॥५॥

अन्वयः-हे अग्ने! त्वं देवैः सह बर्हिषि सत्सि सुन्वते यजमानाय सुवीर्यमा वह यज्ञमा यज॥५॥

भावार्थः-हे मनुष्याः! पालकाय जनाय यूयं सुखं सदैव दत्त सर्वेषां सभया सर्वान् व्यवहारान् निश्चिनुत॥५॥

पदार्थः-हे **(अग्ने)** विद्वन्! आप **(देवैः)** विद्वानों के साथ **(बर्हिषि)** अति उत्तम **(सत्सि)** सभा में **(सुन्वते)** यज्ञ करते हुए **(यजमानाय)** दाता जन के लिये **(सुवीर्यम्)** उत्तम पराक्रम को **(आ, वह)** प्राप्त हूजिये और यज्ञ को **(आ)** अच्छे प्रकार करिये॥५॥

भावार्थः-हे मनुष्यो! पालन करने वाले जन के लिये आप लोग सुख सदा ही दीजिये और सब **[**प्रजा**]** की सभा से सब व्यवहारों का निश्चय कीजिये॥५॥

पुनरग्निसादृश्येन विद्वद्विषयमाह॥

फिर अग्निसादृश्य से विद्वद्विषय को कहते हैं॥

स॒मि॒धा॒नः स॑हस्रजि॒दग्ने॒ धर्मा॑णि पुष्यसि। दे॒वाना॑ दू॒त उ॒क्थ्यः॥६॥

स॒म्ऽइ॒धा॒नः। स॒ह॒स्र॒ऽजि॒त्। अग्ने॑। धर्मा॑णि। पु॒ष्य॒सि॒। दे॒वाना॑म्। दू॒तः। उ॒क्थ्यः॥६॥

पदार्थः-(समिधानः) देदीप्यमानः **(सहस्रजित्)** असङ्ख्यानां विजेता **(अग्ने)** अग्निरिव दुष्टदाहक **(धर्म्माणि)** धर्म्याणि कर्माणि **(पुष्यसि) (देवानाम्) (दूतः)** यो दुनोति समाचारं दूरं दूराद्वा गमयत्यागमयति **(उक्थ्यः)** प्रशंसनीयः॥६॥

अन्वयः-हे अग्ने! यथा समिधानः पावको देवानां दूतोऽस्ति तथा सहस्रजिदुक्थ्यो देवानां समिधानो दूतः सन् यतो धर्म्माणि पुष्यसि तस्मात् सत्कर्तव्योऽसि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्या विद्यया विज्ञाय कार्यसिद्धये यमग्निं सम्प्रयुञ्जते सोऽग्निर्मनुष्यवत् कार्यसिद्धिं करोति॥६॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश दुष्टों के जलाने वाले! जैसे **(समिधानः)** निरन्तर प्रकाशित हुआ अग्नि **(देवानाम्)** विद्वानों के **(दूतः)** समाचार को दूर व्यवहरता वा दूर पहुँचाता और ले आता है, वैसे **(सहस्रजित्)** असङ्ख्यों के जीतने वाले **(उक्थ्यः)** प्रशंसा करने योग्य विद्वानों का निरन्तर प्रकाश करने, समाचार को दूर व्यवहरने वा दूर पहुँचाने और लाने वाले होते हुए जिससे **(धर्म्माणि)** धर्म्मसम्बन्धी कर्म्मों को **(पुष्यसि)** पुष्ट करते हो, इससे सत्कार करने योग्य हो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य विद्या से अग्नि के गुणों को जान के कार्य्य की सिद्धि के लिये जिस अग्नि का सम्प्रयोग करते हैं, वह अग्नि मनुष्य के तुल्य कार्य्य की सिद्धि को करता है॥६॥

अथाग्निधारणविषयमाह॥

अब अग्निधारणविषय को कहते हैं॥

न्य१॒॑ग्निं जा॒तवे॑दसं होत्र॒वाह॑ं यवि॑ष्ठ्यम्। दधा॑ता दे॒वमृ॒त्विज॑म्॥७॥

नि। अ॒ग्निम्। जा॒तऽवे॑दसम्। होत्र॒ऽवाह॑म्। यवि॑ष्ठ्यम्। दधा॑त। दे॒वम्। ऋ॒त्विज॑म्॥७॥

पदार्थः-(नि) (अग्निम्) पावकम् **(जातवेदसम्)** जातेषु विद्यमानम् **(होत्रवाहम्)** यो होत्राणि हुतानि द्रव्याणि वहति **(यविष्ठ्यम्)** योऽतिशयितेषु युवसु भवम् **(दधाता)** धरत। अत्र **संहितायामिति** दीर्घः। **(देवम्)** दिव्यगुणम् **(ऋत्विजम्)** यज्ञसाधकम्॥७॥

अन्वयः-हे मनुष्या! यूयं यविष्ठ्यमृत्विजं देवमिव जातवेदसं होत्रवाहमग्निं नि दधाता॥७॥

भावार्थः-यथा शिल्पिनः स्वकार्य्यं साध्नुवन्ति तथैवाग्न्यादयोऽपि कार्य्यसिद्धिं कुर्वन्ति॥७॥

पदार्थः-हे मनुष्यो! आप लोग **(यविष्ठ्यम्)** अतिशयित युवा जनों में प्रसिद्ध हुए **(ऋत्विजम्)** यज्ञसाधक और **(देवम्)** दिव्य **[**गुण**]** वाले के सदृश **(जातवेदसम्)** उत्पन्न हुए पदार्थों में विद्यमान **(होत्रवाहम्)** हवन की हुई वस्तुओं को धारण करने वाले **(अग्निम्)** अग्नि को **(नि, दधाता)** निरन्तर धारण करो॥७॥

भावार्थः-जैसे शिल्पविद्या के जानने वाले जन अपने कार्य्य को सिद्ध करते हैं, वैसे ही अग्नि आदि भी कार्य की सिद्धि करते हैं॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः। स्तृणीत बर्हिरासदे॥८॥

प्र। यज्ञः। एतु। आनुषक्। अद्य। देवव्यचःऽतमः। स्तृणीत। बर्हिः। आऽसदे॥८॥

पदार्थः-**(प्र)** **(यज्ञः)** सत्यः सङ्गतो व्यवहारः **(एतु)** प्राप्नोतु **(आनुषक्)** आनुकूल्येन **(अद्या)** अत्र **संहितायामिति** दीर्घः। **(देवव्यचस्तमः)** यो देवेषु दिव्येषु पदार्थेष्वतिशयेन व्याप्तः **(स्तृणीत)** आच्छादयत **(बर्हिः)** अन्तरिक्षम् **(आसदे)** समन्तात् स्थित्यर्थं गमनार्थं वा॥८॥

अन्वयः-हे विद्वांसो! यो देवव्यचस्तमो यज्ञोऽद्याऽऽसदे बर्हिरानुषगेतु तं यूयं प्र स्तृणीत॥८॥

भावार्थः-ये मनुष्याः सत्सङ्गतिं कृत्वा शिल्पोन्नतिं विदधते ते सर्वहितैषिणो भवन्ति॥८॥

पदार्थः-हे विद्वानो! जो **(देवव्यचस्तमः)** उत्तम पदार्थों में अतिशय करके व्याप्त **(यज्ञः)** सत्य और संगत व्यवहार **(अद्या)** आज **(आसदे)** सब प्रकार से ठहरने वा जाने के अर्थ **(बर्हिः)** अन्तरिक्ष को **(आनुषक्)** अनुकूलता से **(एतु)** प्राप्त हो, उसको आप लोग **(प्र, स्तृणीत)** अच्छे प्रकार आच्छादित करो अर्थात् सुरक्षित रक्खो॥८॥

भावार्थः-जो मनुष्य श्रेष्ठों की संगति करके शिल्पविद्या की उन्नति करते हैं, वे सबके हितैषी होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एदं मरुतो अश्विना मित्रः सीदन्तु वरुणः। देवासः सर्वया विशा॥९॥२०॥

आ। इदम्। मरुतः। अश्विना। मित्रः। सीदन्तु। वरुणः। देवासः। सर्वया। विशा॥९॥

पदार्थः-**(आ)** समन्तात् **(इदम्)** आसनम् **(मरुतः)** मनुष्याः **(अश्विना)** अध्यापकोपदेशकौ **(मित्रः)** सखा **(सीदन्तु)** आसताम् **(वरुणः)** सर्वोत्तमः **(देवासः)** विद्वांसः **(सर्वया)** **(विशा)** प्रजया॥९॥

अन्वयः-मरुतो मित्रो वरुणोऽश्विना देवासः सर्वया विशेदमा सीदन्तु॥९॥

भावार्थः-राजा सभ्या जनाश्च न्यायासनमधिष्ठायान्यायं पक्षपातं विहाय न्यायं कृत्वा प्रजानां प्रिया भवन्त्विति॥९॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षड्विंशतितमं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-(**मरुतः**) मनुष्य (**मित्रः**) मित्र (**वरुण**) सब में उत्तम (**अश्विना**) अध्यापक और उपदेशक तथा (**देवासः**) विद्वान् जन (**सर्वया**) सम्पूर्ण (**विशा**) प्रजा से (**इदम्**) इस आसन पर (**आ, सीदन्तु**) विराजें॥९॥

भावार्थः-राजा और श्रेष्ठ जन न्यायासन पर विराज के अन्याय और पक्षपात का त्याग और न्याय करके प्रजाओं के प्रिय होवें॥९॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छब्बीसवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य सप्तविंशतितमस्य सूक्तस्य त्र्यरुणस्त्रैवृष्णस्त्रसदस्युश्च पौरुकुत्स्य अश्वमेधश्च भारतोऽत्रिर्वा ऋषयः। १-५ अग्निः। ६ इन्द्राग्नी देवते। १, ३ निचृत्त्रिष्टुप्। २ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ५, ६ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः॥

अथाग्निसादृश्येन विद्वद्गुणानाह॥

अब छः ऋचा वाले सत्ताईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अग्निसादृश्य से विद्वान् के गुणों को कहते हैं॥

अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत॥ १॥

अनस्वन्ता। सत्ऽपतिः। ममहे। मे। गावा। चेतिष्ठः। असुरः। मघोनः। त्रैवृष्णः। अग्ने। दशऽभिः। सहस्रैः। वैश्वानर। त्रिऽअरुणः। चिकेत॥ १॥

पदार्थः-(अनस्वन्ता) उत्तमशकटादियुक्तः **(सत्पतिः)** सतां पालकः **(मामहे)** सत्कुर्याम् **(मे) (गावा) (चेतिष्ठः)** अतिशयेन चेतिता ज्ञापकः **(असुरः)** असुषु प्राणेषु रममाणः **(मघोनः)** परमधनयुक्तान् **(त्रैवृष्णः)** यस्त्रिषु वर्षति स एव **(अग्ने) (दशभिः) (सहस्रैः) (वैश्वानर)** विश्वेषु राजमान **(त्र्यरुणः)** त्रयोऽरुणा गुणा यस्य सः **(चिकेत)** जानीयात्॥ १॥

अन्वयः-हे वैश्वानराग्ने! सत्पतिर्दशभिः सहस्रैरनस्वन्ता गावा सह चेतिष्ठोऽसुरस्त्रैवृष्णस्त्र्यरुणः संस्त्वं मे मघोनश्चिकेत तमहं मामहे॥ १॥

भावार्थः-ये मनुष्याः शकटादियानचालनकुशला अनेकैः सहस्रैः पुरुषैः सह सन्धिं कुर्वन्ति ते धनधान्यपशुयुक्ता जायन्ते॥ १॥

पदार्थः-हे **(वैश्वानर)** सब में प्रकाशमान **(अग्ने)** अग्नि के सदृश! **(सत्पतिः)** श्रेष्ठ जनों के पालने वाले **(दशभिः)** दश **(सहस्रैः)** सहस्रों के साथ **(अनस्वन्ता)** उत्तम शकट आदि वाहनों से युक्त **(गावा)** गौ अर्थात् वाणी के साथ **(चेतिष्ठः)** अत्यन्तता से बोध देने वाले **(असुरः)** प्राणों में रमते हुए **(त्रैवृष्णः)** जो तीन में वर्षते वही **(त्र्यरुणः)** तीन गुणों से युक्त हुए आप **(मे)** मेरे **(मघोनः)** अत्यन्त धनयुक्त पुरुषों को **(चिकेत)** जानें, उनका मैं **(मामहे)** सत्कार करूं॥ १॥

भावार्थः-जो पुरुष शकट आदि वाहनों के चलाने में चतुर और अनेक सहस्रों पुरुषों के साथ मेल करते हैं, वे धन-धान्य और पशुओं से युक्त होते हैं॥ १॥

पुनर्विद्वद्गुणानाह॥

फिर विद्वान् के गुणों को कहते हैं॥

यो मे॑ श॒ता च॑ विंश॒तिं च॒ गोना॑ं हरी॑ च यु॒क्ता सु॒धुरा॒ ददा॑ति।
वैश्वा॑नर॒ सुष्टु॑तो वावृधा॒नोऽग्ने॒ यच्छ॒ त्र्य॑रुणाय॒ शर्म॑॥ २॥

यः। मे॒। श॒ता। च॒। विं॒श॒तिम्। च॒। गोना॑म्। हरी॒ इति॑। च॒। यु॒क्ता। सु॒ऽधुरा॑। ददा॑ति। वैश्वा॑नर। सुऽस्तु॑तः। व॒वृ॒धा॒नः। अग्ने॑। यच्छ॑। त्रिऽअ॑रुणाय। शर्म॑॥ २॥

पदार्थः-(यः) (मे) (शता) शतानि **(च) (विंशतिम्) (च) (गोनाम्) (हरी)** हरणशीलावश्वौ **(च) (युक्ता)** युक्तौ **(सुधुरा)** शोभना धूर्ययोस्तौ **(ददाति) (वैश्वानर)** विश्वस्मिन् राजमान **(सुष्टुतः)** शोभनप्रशंसितः **(वावृधानः)** अत्यन्तं वर्धमानः **(अग्ने)** विद्वन् **(यच्छ)** देहि **(त्र्यरुणाय) (शर्म्म)** गृहं सुखं वा॥ २॥

अन्वयः-हे वैश्वनराऽग्ने! यस्सुष्टुतो वावृधानो मे गोनां शता च विंशतिं **[च]** युक्ता सुधुरा हरी च ददाति तस्मै त्र्यरुणाय त्वं शर्म्म यच्छ॥ २॥

भावार्थः-हे मनुष्या! ये गवाश्वहस्त्यादीनां पशूनां पालकाः स्युस्तेभ्यो यथायोग्यां भृतिं प्रयच्छन्तु॥ २॥

पदार्थः-हे **(वैश्वानर)** सब में प्रकाशमान **(अग्ने)** विद्वन् **(यः)** जो **(सुष्टुतः)** उत्तम प्रकार प्रशंसा किया गया **(वावृधानः)** अत्यन्त बढ़ता अर्थात् वृद्धि को प्राप्त होता हुआ **(मे)** मेरे **(गोनाम्)** गौओं के **(शता)** सैकड़ौं **(च)** और **(विंशतिम्)** बीसों संख्या वाले समूह को **(च)** और **(युक्ता)** युक्त **(सुधुरा)** उत्तम धुरा जिनमें उन **(हरी)** ले चलने वाले घोड़ों को **(च)** भी **(ददाति)** देता है उस **(त्र्यरुणाय)** तीन गुणों वाले पुरुष के लिये आप **(शर्म्म)** गृह वा सुख को **(यच्छ)** दीजिये॥ २॥

भावार्थः-हे मनुष्यो! जो गौ, घोड़ा और हस्ति आदि पशुओं के पालन करने वाले होवें, उनके लिये यथायोग्य मासिक **[**वृत्ति**]** दीजिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ए॒वा ते॑ अग्ने सुम॒तिं च॑का॒नो नवि॑ष्ठाय नव॒मं त्र॒सद॑स्युः।
यो मे॒ गिर॑स्तुविजा॒तस्य॑ पू॒र्वीर्यु॒क्तेना॒भि त्र्य॑रुणो गृ॒णाति॑॥ ३॥

ए॒व। ते॒। अ॒ग्ने॒। सु॒ऽम॒तिम्। च॒का॒नः। नवि॑ष्ठाय। न॒व॒मम्। त्र॒सद॑स्युः। यः। मे॒। गिर॑ः। तु॒वि॒ऽजा॒तस्य॑। पू॒र्वीः। यु॒क्तेन॑। अ॒भि। त्रिऽअ॑रुणः। गृ॒णाति॑॥ ३॥

पदार्थः-(एवा) अत्र **निपातस्य चे**ति दीर्घः। **(ते)** तव **(अग्ने) (सुमतिम्)** शोभनां प्रज्ञाम् **(चकानः)** कामयमानः **(नविष्ठाय)** अतिशयेन नवीनाय **(नवमम्)** नवानां पूरणम् **(त्रसदस्युः)** त्रस्यन्ति दस्यवो यस्मात्सः **(यः) (मे))** मम **(गिरः) (तुविजातस्य) (पूर्वीः)** सनातनीः **(युक्तेन)** कृतयोगाभ्यासेन मनसा **(अभि) (त्र्यरुणः)** त्रीणि मनःशरीरात्मसुखान्यृच्छति **(गृणाति)**॥ ३॥

अन्वयः-हे अग्ने! यस्ते सुमतिं तुविजातस्य मे गिरश्चकानो नविष्ठाय नवमं चकानस्त्रसदस्युर्युक्तेन त्र्यरुणः सन् पूर्वीगिरोऽभि गृणाति तमेवा त्वमहं च सततं सत्कुर्य्याव॥३॥

भावार्थः-हे विद्वँस्त्वमहं च य आवयोः सकाशाद् गुणान् ग्रहीतुमिच्छति तमावां विद्यां ग्राहयेव॥३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वान्! **(यः)** जो **(ते)** आपकी **(सुमतिम्)** सुन्दर बुद्धि को और **(तुविजातस्य)** बहुतों में प्रकट हुए **(मे)** मेरी **(गिरः)** वाणियों की **(चकानः)** कामना करता तथा **(नविष्ठाय)** अतिशय नवीन जन के लिये **(नवमम्)** नव के पूर्ण करने वाले की कामना करता हुआ **(त्रसदस्युः)** त्रसदस्यु अर्थात् जिससे चोर डरते ऐसा **(युक्तेन)** किया योगाभ्यास जिससे ऐसे मन से **(त्र्यरुणः)** तीन मन, शरीर और आत्मा के सुखों को प्राप्त होता हुआ जन **(पूर्वीः)** अनादि काल से सिद्ध वाणियों को **(अभि, गृणाति)** सब ओर से कहता है **(एवा)** उसी का आप और हम निरन्तर सत्कार करें॥३॥

भावार्थः-हे विद्वन्! आप और मैं जो हमारे समीप से गुणों के ग्रहण करने की इच्छा करता है, उसको हम दोनों विद्याग्रहण करावें॥३॥

अथोपदेशविषयमाह॥

अब उपदेशविषय को अगले मन्त्र में कहते हैं॥

यो म इति प्रवोचत्यश्वमेधाय सूरये। ददद्ऋचा सनिं यते ददन्मेधामृतायते॥४॥

यः। मे। इति। प्रऽवोचति। अश्वऽमेधाय। सूरये। ददत्। ऋचा। सनिम्। यते। ददत्। मेधाम्। ऋतऽयते॥४॥

पदार्थः-**(यः)** **(मे)** मह्यम् **(इति)** अनेन प्रकारेण **(प्रवोचति)** उपदिशति **(अश्वमेधाय)** आशुपवित्राय **(सूरये)** विदुषे **(ददत्)** दद्यात् **(ऋचा)** ऋग्वेदादिना **(सनिम्)** सेवनीयां सत्याऽसत्ययोर्विभाजिकां वाणीम् **(यते)** यत्नशीलाय **(ददत्)** दद्यात् **(मेधाम्)** प्रज्ञाम् **(ऋतायते)** ऋतं कामयमानाय॥४॥

अन्वयः-योऽश्वमेधाय सूरये म ऋचा सनिं ददद्तायते यते मे मेधां ददत् तस्य सत्कारं त्वं कुर्विति मां प्रति यः प्रवोचति तस्योपकारमहं मन्ये॥४॥

भावार्थः-उपदेशका यदाऽन्यान् प्रत्युपदिशेयुस्तदैव वेदशास्त्रेषूक्तमाप्तैराचरितमिदं वयं युष्मभ्यमुपदिशामेति प्रत्युपदेशं ब्रूयुः॥४॥

पदार्थः-**(यः)** जो **(अश्वमेधाय)** शीघ्र पवित्र **(सूरये)** विद्वान् **(मे)** मेरे लिये **(ऋचा)** ऋग्वेदादि से **(सनिम्)** सेवन करने योग्य तथा सत्य और असत्य की विभाग करने वाली वाणी को **(ददत्)** देवे और **(ऋतायते)** सत्य की कामना करते हुए **(यते)** यत्न करने वाले मेरे लिये **(मेधाम्)** बुद्धि को **(ददत्)** देवे, उसका सत्कार आप करो **(इति)** इस प्रकार से मेरे प्रति जो **(प्रवोचति)** उपदेश देता है, उसका उपकार मैं मानता हूं॥४॥

भावार्थः-उपदेशक जन जब अन्य जनों के प्रति उपदेश देवें, तब इस प्रकार वेद और शास्त्रों में कहे और यथार्थवक्ताओं से आचरण किये गये इस विषय का हम आप लोगों के लिये उपदेश देवें, इस प्रकार प्रत्युपदेश कहें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यस्य॑ मा परु॒षाः श॒तमु॒द्धर्ष॑यन्त्यु॒क्षणः॑। अश्व॑मेधस्य॒ दाना॒ः सोमा॑इव॒ त्र्याशिरः॥५॥

यस्य॑। मा॒। प॒रु॒षाः। श॒तम्। उ॒त्ऽह॒र्ष॒यन्ति। उ॒क्षणः॑। अश्व॑ऽमेधस्य। दानाः॑। सोमाः॑ऽइव। त्रिऽआ॑शिरः॥५॥

पदार्थः-(**यस्य**) (**मा**) माम् (**परुषाः**) कठोराः (**शतम्**) असङ्ख्याः (**उद्धर्षयन्ति**) उत्साहयन्ति (**उक्षणः**) मधुरैरुपदेशैः सेचमानाः (**अश्वमेधस्य**) चक्रवर्तिराज्यपालनस्य विद्यायाः (**दानाः**) ददानाः (**सोमाइव**) सोमलतादय इव (**त्र्याशिरः**) यास्त्रिभिर्जीवाग्निवायुभिरश्यन्ते भुज्यन्ते ताः॥५॥

अन्वयः-यस्याश्वमेधस्य शतं परुषा उक्षणः सोमाइव दानास्त्र्याशिरो मा मामुद्धर्षयन्ति ता वाचो मया सोढव्याः॥५॥

भावार्थः-ये विद्यामिच्छेयुस्ते सर्वेषां मर्मच्छिदो वाचः सहन्ताम्। चन्द्रवच्छान्ता भूत्वा विद्याविनयौ गृह्णन्तु॥५॥

पदार्थः-(**यस्य**) जिस (**अश्वमेधस्य**) चक्रवर्त्तिराज्यपालन की विद्या की (**शतम्**) असङ्ख्य (**परुषाः**) कठोर (**उक्षणः**) मधुर उपदेशों से सींचती और (**सोमाइव**) सोमलतादिकों के सदृश (**दानाः**) देती हुई (**त्र्याशिरः**) जीव, अग्नि और पवनों से भोगी गईं (**मा**) मुझ को (**उद्धर्षयन्ति**) उत्साहित करती हैं, वे वाणियाँ मुझ से सहने योग्य हैं॥५॥

भावार्थः-जो विद्या की इच्छा करें, वे सबकी मर्म्म भेदने वाली वाणियों को सहें और चन्द्रमा के सदृश शान्त होके विद्या और विनय को ग्रहण करें॥५॥

अथोपदेशविषये राज्योपदेशविषयमाह॥

अब उपदेशविषय में राज्योपदेशविषय को अगले मन्त्र में कहते हैं॥

इन्द्रा॑ग्नी श॒तदा॒व्यश्व॑मेधे सु॒वीर्य॑म्।

क्ष॒त्रं धा॑रयतं बृ॒हद्दि॒वि सूर्य॑मि॒वा॒जर॑म्॥६॥२१॥

इन्द्रा॑ग्नी॒ इति॑। श॒त॒ऽदा॒व्नि॑। अश्व॑ऽमेधे। सु॒ऽवीर्य॑म्। क्ष॒त्रम्। धा॒र॒य॒त॒म्। बृ॒हत्। दि॒वि। सूर्य॑म्ऽइव। अ॒ज॒र॑म्॥६॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युताविवाध्यापकोपदेशकौ (**शतदाव्नि**) असङ्ख्यदाने (**अश्वमेधे**) राज्यपालनाख्ये व्यवहारे (**सुवीर्य्यम्**) सुष्ठु वीर्य्यं पराक्रमो बलं च यस्मिंस्तत् (**क्षत्रम्**) क्षत्रियकुलं राष्ट्रं वा (**धारयतम्**) (**बृहत्**) महत् (**दिवि**) प्रकाशयुक्तेऽन्तरिक्षे (**सूर्य्यमिव**) (**अजरम्**) नाशरहितम्॥६॥

अन्वयः-हे इन्द्राग्नी इव वर्त्तमानावध्यापकौपदेशकौ! शतदाव्न्यश्वमेधे दिवि सूर्य्यमिव सुवीर्य्यमजरं

बृहत् क्षत्रं धारयतं यथावदुपदिशेतम्॥६॥

भावार्थः-हे राजादयो जनाः! प्रयत्नेन भवन्त आप्तानध्यापकोपदेशकान् बहून् स्वपरराज्ये प्रचारयन्तु यतो युष्माकं राज्यमक्षयं भवेदिति॥६॥

अत्राग्निविद्वद्राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तविंशतितमं सूक्तमेकविंशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्राग्नी)** वायु और बिजुली के सदृश अध्यापक और उपदेशक जनो! **(शतदाव्नि)** असङ्ख्य पदार्थों को देने वाले **(अश्वमेधे)** राज्यपालन व्यवहार और **(दिवि)** प्रकाशयुक्त अन्तरिक्ष में **(सूर्य्यमिव)** सूर्य्य के सदृश **(सुवीर्य्यम्)** उत्तम पराक्रम तथा बलयुक्त और **(अजरम्)** नाश से रहित **(बृहत्)** बड़े **(क्षत्रम्)** क्षत्रियों के कुल वा राज्यदेश को **(धारयतम्)** धारण करो अर्थात् यथायोग्य उपदेश दीजिये॥६॥

भावार्थः-हे राजा आदि जनो! प्रयत्न से आप लोग यथार्थवक्ता, बहुत अध्यापक और उपदेशकों को अपने और दूसरे के राज्य में प्रचार कराइये जिससे आप लोगों का राज्य नाशरहित होवे॥६॥

इस सूक्त में अग्नि, विद्वान् और राजा के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्ताईसवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्याष्टविंशतितमस्य सूक्तस्य विश्ववारात्रेयी ऋषिः। अग्निर्देवता। १ त्रिष्टुप्। २ स्वराट् त्रिष्टुप्। ३ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ५, ६ विराड् गायत्री छन्दः। षड्जः स्वरः॥

अथाग्निगुणानाह॥

अब छः ऋचा वाले अट्ठाईसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अग्नि के गुणों को कहते हैं॥

समि॑द्धो अ॒ग्निर्दि॒वि शो॒चिर॑श्रेत् प्र॒त्यङ्डु॒षस॑मु॒र्विया॒ वि भा॑ति।
एति॒ प्राची॑ वि॒श्ववा॑रा॒ नमो॑भिर्दे॒वाँ ई॑ळा॒ना ह॒विषा॑ घृ॒ताची॑॥ १॥

सम्ऽइ॑द्धः। अ॒ग्निः। दि॒वि। शो॒चिः। अ॒श्रे॒त्। प्र॒त्यङ्। उ॒षस॑म्। उ॒र्विया॑। वि। भा॒ति॒। एति॑। प्राची॑। वि॒श्वऽवा॑रा। नम॑ःऽभिः। दे॒वान्। ई॒ळा॒ना। ह॒विषा॑। घृ॒ताची॑॥ १॥

पदार्थः-(समिद्धः) प्रदीप्तः **(अग्निः)** पावकः **(दिवि)** प्रकाशे **(शोचिः)** विद्युद्रूपां दीप्तिम् **(अश्रेत्)** श्रयति **(प्रत्यङ्)** प्रत्यञ्चतीति **(उषसम्)** प्रभातम् **(उर्विया)** बहुरूपया दीप्त्या **(वि)** **(भाति)** **(एति)** प्राप्नोति **(प्राची)** पूर्वा दिक् **(विश्ववारा)** या विश्वं वृणोति सा **(नमोभिः)** अन्नादिभिस्सह **(देवान्)** दिव्यगुणान् **(ईळाना)** प्रशंसन्ती **(हविषा)** दानेन **(घृताची)** रात्रिः। **घृताचीति रात्रिनामसु पठितम्।** (निघं०१. ७)॥१॥

अन्वयः-हे मनुष्या! यस्समिद्धोऽग्निर्दिवि शोचिरश्रेदुर्वियोषसं प्रत्यङ् वि भाति विश्ववारा देवानीळाना घृताची प्राची च हविषा नमोभिश्चैति तं ताञ्च यूयं विजानीत॥१॥

भावार्थः-हे मनुष्या! योऽयं सूर्य्यो दृश्यते सोऽनेकैस्तत्त्वैरीश्वरेण निर्मितो विद्युतमाश्रितोऽस्ति यस्य प्रभावेन प्राच्यादयो दिशो विभज्यन्ते रात्रयश्च जायन्ते तमग्निरूपं विज्ञाय सर्वकृत्यं साध्नुत॥१॥

पदार्थः-हे मनुष्यो! जो **(समिद्धः)** प्रज्वलित किया गया **(अग्निः)** अग्नि **(दिवि)** प्रकाश में **(शोचिः)** बिजुलीरूप प्रकाश का **(अश्रेत्)** आश्रय करता है और **(उर्विया)** अनेक रूप वाले प्रकाश से **(उषसम्)** प्रभातकाल के **(प्रत्यङ्)** प्रति चलने वाला **(वि, भाति)** विशेष करके शोभित होता है और **(विश्ववारा)** संसार को प्रकट करने वाली **(देवान्)** श्रेष्ठ गुणों को **(ईळाना)** प्रशंसित करती हुई **(घृताची)** रात्रि और **(प्राची)** पूर्व दिशा **(हविषा)** दान और **(नमोभिः)** अन्नादि पदार्थों के साथ **(एति)** प्राप्त होती है, उस अग्नि को और उस विश्ववारा को आप लोग विशेष करके जानो॥१॥

भावार्थः-हे मनुष्यो! जो यह सूर्य्य देख पड़ता है, वह अनेक तत्त्वों के द्वारा ईश्वर से बनाया गया और बिजुली के आश्रित है और जिसके प्रभाव से पूर्व आदि दिशायें विभक्त की जाती हैं और रात्रियां होती हैं, उस अग्निरूप सूर्य को जान के सम्पूर्ण कृत्य सिद्ध करो॥१॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्त सचसे स्वस्तये।

विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः॥ २॥

सम्ऽइध्यमानः। अमृतस्य। राजसि। हविः। कृण्वन्तम्। सचसे। स्वस्तये। विश्वम्। सः। धत्ते। द्रविणम्। यम्। इन्वसि। आतिथ्यम्। अग्ने। नि। च। धत्ते। इत्। पुरः॥ २॥

पदार्थः-(समिध्यमानः) सम्यग्देदीप्यमानः **(अमृतस्य)** कारणस्योदकस्य मध्ये वा **(राजसि)** प्रकाशसे **(हविः)** अत्तव्यं वस्तु **(कृण्वन्तम्)** कुर्वन्तम् **(सचसे)** समवैषि **(स्वस्तये)** सुखाय **(विश्वम्)** सर्वम् **(सः)** **(धत्ते)** धरति **(द्रविणम्)** धनं यशो वा **(यम्)** **(इन्वसि)** व्याप्नोति। **व्यत्ययो बहुलमिति** लकारव्यत्ययः। **(आतिथ्यम्)** अतिथिसत्कारम् **(अग्ने)** विद्वन् **(नि)** **(च)** **(धत्ते)** **(इत्)** एव **(पुरः)** पुरस्तात्॥ २॥

अन्वयः-हे अग्ने! यतस्समिध्यमानस्त्वममृतस्य मध्ये राजसि स्वस्तये हविष्कृण्वन्तं सचसे भवान् विश्वं द्रविणं धत्ते यमातिथ्यमिन्वसि पुरश्च नि धत्ते तस्मात् स इत् त्वं पूजनीयोऽसि॥ २॥

भावार्थः-हे विद्वांसो! यूयं विद्याविनयाभ्यां प्रकाशमाना अतिथयस्सन्तः सर्वत्र भ्रमित्वा सर्वान् सत्यमुपदिशन्तः कीर्तिं प्रसारयत॥ २॥

पदार्थः-हे **(अग्ने)** विद्वन्! जिससे **(समिध्यमानः)** उत्तम प्रकार निरन्तर प्रकाशमान आप **(अमृतस्य)** कारण वा जल के मध्य में **(राजसि)** प्रकाशित होते हो और **(स्वस्तये)** सुख के लिये **(हविः)** खाने योग्य वस्तु को **(कृण्वन्तम्)** करते हुए का **(सचसे)** सम्बन्ध करते हो और आप **(विश्वम्)** सम्पूर्ण **(द्रविणम्)** धन वा यश का **(धत्ते)** धारण करते हो तथा **(यम्)** जिनको **(आतिथ्यम्)** अतिथि सत्कार **(इन्वसि)** व्याप्त होता है और **(पुरः)** पहिले **(च)** भी आप **(नि, धत्ते)** निरन्तर धारण करते हो इससे **(सः, इत्)** वही आप सत्कार करने योग्य हो॥ २॥

भावार्थः-हे विद्वान् जनो! आप लोग विद्या और विनय से प्रकाशमान अतिथियों की दशा को धारण किये हुए सब स्थानों में भ्रमण करके सम्पूर्ण जनों के लिये सत्य का उपदेश देते हुए यश को निरन्तर पसारिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।

सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि॥ ३॥

अग्नेऽ। शर्धा। महते। सौभगाय। तवा। द्युम्नानिऽ। उत्ऽतमानिऽ। सन्तु। सम्। जाःऽपत्यम्। सुऽयमम्। आ। कृणुष्व। शत्रुऽयताम्। अभि। तिष्ठ। महांसि॥ ३॥

पदार्थः-(अग्ने) विद्वन् **(शर्ध)** प्रशंसितबलयुक्त **(महते) (सौभगाय)** शोभनैश्वर्य्याय **(तव) (द्युम्नानि)** यशांसि धनानि वा **(उत्तमानि) (सन्तु) (सम्) (जास्पत्यम्)** जायायाः पतित्वम् **(सुयमम्)** शोभनो यमः सत्याचरणनिग्रहो यस्मिँस्तम् **(आ) (कृणुष्व) (शत्रूयताम्)** शत्रूणामिवाचरताम् **(अभि)** आभिमुख्ये **(तिष्ठा) (महांसि)** महान्ति सैन्यानि॥ ३॥

अन्वयः-हे शर्धाग्ने! तव महते सौभगायोत्तमानि द्युम्नानि सन्तु त्वं सुयमं जास्पत्यमा कृणुष्व शत्रूयतां महांसि समभितिष्ठा॥ ३॥

भावार्थः-हे धर्मिष्ठौ! वयं त्वदर्थं महदैश्वर्य्यमिच्छेम युवां स्त्रीपुरुषौ जितेन्द्रियौ धर्म्मात्मानौ बलिष्ठौ पुरुषार्थिनो भूत्वा सर्वां दुष्टसेनां विजयेथाम्॥ ३॥

पदार्थः-हे **(शर्ध)** प्रशंसित बल से युक्त **(अग्ने)** विद्वन्! **(तव)** आपके **(महते)** बड़े **(सौभगाय)** सुन्दर ऐश्वर्य्य के लिये **(उत्तमानि)** श्रेष्ठ **(द्युम्नानि)** यश वा धन **(सन्तु)** हों और तुम **(सुयमम्)** सुन्दर सत्य आचरणों का ग्रहण जिसमें ऐसे **(जास्पत्यम्)** स्त्री के पतिपने को **(आ, कृणुष्व)** अच्छे प्रकार करिये और **(शत्रूयताम्)** शत्रु के सदृश आचरण करते हुओं की **(महांसि)** बड़ी सेनाओं के **(सम्, अभि, तिष्ठा)** सन्मुख स्थित हूजिये॥ ३॥

भावार्थः-हे धर्म्मिष्ठो! हम लोग आपके लिये बड़े ऐश्वर्य्य की इच्छा करें और आप दोनों स्त्री और पुरुष जितेन्द्रिय, धर्म्मात्मा, बलवान् और पुरुषार्थी होकर सम्पूर्ण दुष्टों की सेना को जीतिये॥ ३॥

अथ विद्वद्विषये राज्यप्रकारमाह॥

अब विद्वद्विषय में राज्यप्रकार को अगले मन्त्र में कहते हैं॥

समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम्।
वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे॥ ४॥

सम्ऽइद्धस्य। प्रऽमहसः। अग्नेऽ। वन्दे। तवा। श्रियम्। वृषभः। द्युम्नऽवान्। असि। सम्। अध्वरेषु। इध्यसे॥ ४॥

पदार्थः-(समिद्धस्य) प्रकाशमानस्य **(प्रमहसः)** प्रकृष्टस्य महतः **(अग्ने)** राजन् **(वन्दे)** प्रशंसामि सत्करोमि वा **(तव) (श्रियम्)** धनम् **(वृषभः)** बलिष्ठ उत्तमो वा **(द्युम्नवान्)** यशस्वी **(असि) (सम्) (अध्वरेषु)** राज्यपालनादिषु व्यवहारेषु **(इध्यसे)** प्रदीप्यसे॥ ४॥

अन्वयः-हे अग्ने राजन्! यस्त्वं वृषभो द्युम्नवानस्यध्वरेषु समिध्यसे तस्य समिद्धस्य प्रमहसस्तव श्रियमहं वन्दे॥ ४॥

भावार्थः-यो राजा अग्न्यादिगुणयुक्तः सन्न्यायं यथावत्करोति स यज्ञेषु पावक इव सर्वत्र प्रकाशितकीर्त्तिर्भवति॥ ४॥

पदार्थः-हे **(अग्ने)** राजन्! जो तुम **(वृषभः)** बलिष्ठ वा उत्तम और **(द्युम्नवान्)** यशस्वी **(असि)** हो और **(अध्वरेषु)** राज्य के पालन आदि व्यवहारों में **(सम्, इध्यसे)** प्रकाशित किये जाते हो उन **(समिद्धस्य)** प्रकाशमान और **(प्रमहसः)** और प्रकृष्ट बड़े **(तव)** आपके **(श्रियम्)** धन की मैं **(वन्दे)** प्रशंसा वा सत्कार करता हूँ॥४॥

भावार्थः-जो राजा अग्नि आदि के गुणों से युक्त हुआ अच्छे न्याय को यथावत् करता है, वह यज्ञों में अग्नि के सदृश सर्वत्र प्रकट यश वाला होता है॥४॥

पुनरग्निदृष्टान्तेन पूर्वोक्तविषयमाह॥

फिर अग्निदृष्टान्त से पूर्वोक्त विषय को अगले मन्त्र में कहते हैं॥

समि॑द्धो अग्न आहुत दे॒वान् य॑क्षि॒ स्वध्व॑र। त्वं हि ह॑व्य॒वाळसि॑॥५॥

सम्ऽइ॑द्धः। अ॒ग्ने॒। आ॒ऽहु॒त॒। दे॒वान्। य॒क्षि॒। सु॒ऽअ॒ध्व॒र॒। त्वम्। हि। ह॒व्य॒ऽवाट्। असि॑॥५॥

पदार्थः-**(समिद्धः)** प्रदीप्तः **(अग्ने)** पावक इव **(आहुत)** सत्कृत **(देवान्)** दिव्यान् गुणान् विदुषो वा **(यक्षि)** पूजयसि **(स्वध्वर)** सुष्ठु अहिंसायुक्त **(त्वम्)** **(हि)** यतः **(हव्यवाट्)** पृथिव्यादिवोढा **(असि)**॥५॥

अन्वयः-हे स्वध्वराहुताऽग्ने! यथा समिद्धो हि हव्यवाडग्निरस्ति तथा त्वं देवान् यक्षि पालकोऽसि तस्मादुत्तमोऽसि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यादिरूपेणाग्निः सर्वान् रक्षति तथैव राजा भवति॥५॥

पदार्थः-हे **(स्वध्वरः)** उत्तम प्रकार अहिंसा से युक्त **(आहुत)** सत्कृत **(अग्ने)** अग्नि के सदृश वर्त्तमान! जिस प्रकार से **(समिद्धः)** प्रज्वलित किया गया **(हि)** जिस कारण **(हव्यवाट्)** पृथिव्यादिकों की प्राप्ति करने वाला अग्नि है, वैसे **(त्वम्)** आप **(देवान्)** श्रेष्ठ गुणों वा विद्वानों का **(यक्षि)** सत्कार करते हो और पालन करने वाले **(असि)** हो, इससे श्रेष्ठ हो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य आदि रूप से अग्नि सब की रक्षा करता है, वैसा ही राजा होता है॥५॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

आ जु॑होता दुव॒स्यता॒ग्निं प्र॑यत्य॒ध्व॒रे। वृ॒णी॒ध्वं ह॑व्य॒वाह॑नम्॥६॥२२॥

आ। जु॒हो॒त॒। दु॒व॒स्यत॑। अ॒ग्निम्। प्र॒ऽय॒ति॒। अ॒ध्व॒रे। वृ॒णी॒ध्व॒म्। ह॒व्य॒ऽवाह॑नम्॥६॥

पदार्थः-**(आ)** **(जुहोता)** दत्त। अत्र **संहितायामिति** दीर्घः। **(दुवस्यत)** परिचरत **(अग्निम्)** पावकम् **(प्रयति)** प्रयत्नसाध्ये **(अध्वरे)** शिल्पादिव्यवहारे **(वृणीध्वम्)** स्वीकुरुत **(हव्यवाहनम्)** उत्तम-पदार्थप्रापकम्॥६॥

अन्वय:-हे विद्वांसो! यूयं प्रयत्यध्वरे हव्यवाहनमग्निं दुवस्यत वृणीध्वमन्येभ्य आ जुहोता॥६॥

भावार्थ:-विद्यार्थिनो, यथा विद्वांस: शिल्पविद्यां स्वीकुर्वन्ति तथैव स्वयमपि कुर्युरिति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टाविंशतितमं सूक्तं द्वाविंशो वर्गश्च समाप्त:॥

पदार्थ:-हे विद्वानो! आप लोग **(प्रयति)** प्रयत्न से साध्य **(अध्वरे)** शिल्पादि व्यवहार में **(हव्यवाहनम्)** उत्तम पदार्थों को प्राप्त कराने वाले **(अग्निम्)** अग्नि का **(दुवस्यत)** परिचरण करो अर्थात् युक्ति से उसको कार्य्य में लगाओ और **(वृणीध्वम्)** स्वीकार करो तथा अन्य जनों के लिये **(आ, जुहोता)** आदान करो अर्थात ग्रहण करो॥६॥

भावार्थ:-विद्यार्थिजन, जैसे विद्वान् जन शिल्पविद्या को स्वीकार करते हैं, वैसे ही स्वयं भी स्वीकार करें॥६॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठाईसवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्यैकोनत्रिंशत्तमस्य सूक्तस्य १-१५ गौरिवीतिः शाक्त्य ऋषिः। १-८, ९[२]-, १५ इन्द्रः। ९[१]- इन्द्र उशना वा देवता। १ भुरिक् पङ्क्तिः। ८ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४, ७ त्रिष्टुप्। ३, ५, ६, ९, १०, ११ निचृत् त्रिष्टुप्। १२, १३, १४, १५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेन्द्रपदवाच्यराजगुणानाह॥

अब पन्द्रह ऋचा वाले उनतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों को कहते हैं॥

त्र्यर्यमा मनुषो देवताता त्री रोचना दिव्या धारयन्त।
अर्चन्ति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिन्द्रासि धीरः॥ १॥

त्री। अर्यमा। मनुषः। देवऽताता। त्री। रोचना। दिव्या। धारयन्त। अर्चन्ति। त्वा। मरुतः। पूतऽदक्षाः। त्वम्। एषाम्। ऋषिः। इन्द्र। असि। धीरः॥ १॥

पदार्थः-(त्री) त्रीणि **(अर्यमा)** व्यवस्थापकः **(मनुषः)** मनुष्याः **(देवताता)** विद्वत्कर्त्तव्ये व्यवहारे **(त्री)** त्रीणि **(रोचना)** प्रकाशकानि **(दिव्या)** दिव्यानि **(धारयन्त)** **(अर्चन्ति)** सत्कुर्वन्ति **(त्वा)** त्वाम् **(मरुतः)** मनुष्याः **(पूतदक्षाः)** पवित्रबलाः **(त्वम्)** **(एषाम्)** **(ऋषिः)** मन्त्रार्थवेत्ता **(इन्द्र)** परमैश्वर्य्ययोजक **(असि)** **(धीरः)**॥ १॥

अन्वयः-हे इन्द्र राजन्! ये मनुषो देवताता दिव्या त्री रोचना धारयन्ताऽर्यमा त्री सुखानि धरति ये पूतदक्षा मरुतस्त्वार्चन्त्येषां त्वमृषिर्धीरोऽसि॥ १॥

भावार्थः-ये त्रीणि कर्मोपासनाज्ञानानि धृत्वा पवित्रा जायन्ते त एव बलवतो भूत्वा सत्कृता भवन्ति॥ १॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त करने वाले राजन्! जो **(मनुषः)** मनुष्य **(देवताता)** विद्वानों से करने योग्य व्यवहार में **(दिव्या)** श्रेष्ठ **(त्री)** तीन **(रोचना)** प्रकाशकों को **(धारयन्त)** धारण करते हैं **(अर्यमा)** व्यवस्थापक अर्थात् किसी कार्य्य को रीति से संयुक्त करने वाला **(त्री)** तीन सुखों को धारण करता है और जो **(पूतदक्षाः)** पवित्र बल से संयुक्त करने वाला **(त्री)** तीन सुखों को धारण करता है और जो **(पूतदक्षाः)** पवित्र बल वाले **(मरुतः)** मनुष्य **(त्वा)** आपका **(अर्चन्ति)** सत्कार करते हैं **(एषाम्)** इनके **(त्वम्)** आप **(ऋषिः)** मन्त्र और अर्थों के जानने वाले **(धीरः)** धीर **(असि)** हो॥ १॥

भावार्थः-जो तीन कर्म्म, उपासना और ज्ञान को धारण करके पवित्र होते हैं, वे ही बलवान् होकर सत्कृत होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अनु॒ यदी॑ म॒रुतो॑ मन्दसा॒नमार्च॒न्निन्द्रं॑ पपि॒वांस॑ सु॒तस्य॑।
आद॑त्त॒ वज्र॑म॒भि यदहिं॒ हन्न॒पो य॒ह्वीर॑सृज॒त्सर्त॒वा उ॑॥ २॥

अनु॑। यत्। ई॒म्। म॒रुत॑:। म॒न्दु॒सा॒नम्। आ॒र्चन्। इन्द्र॑म्। प॒पि॒ऽवांस॑म्। सु॒तस्य॑। आ। अ॒द॒त्त॒। वज्र॑म्। अ॒भि। यत्। अहि॑म्। हन्। अ॒प:। य॒ह्वी:। अ॒सृ॒ज॒त्। सर्त॑वै। ऊ॒म् इति॑॥ २॥

पदार्थ:-(अनु) (यत्) यम् **(ईम्)** सर्वत: **(मरुत:)** मनुष्या: **(मन्दसानम्)** स्तूयमानम् **(आर्चन्)** सत्कुर्यु: **(इन्द्रम्)** परमैश्वर्यवन्तम् **(पपिवांसम्)** रक्षकम् **(सुतस्य)** प्राप्तस्य राज्यस्य **(आ) (अदत्त)** ददाति **(वज्रम्) (अभि)** आभिमुख्ये **(यत्)** यम् **(अहिम्)** मेघम् **(हन्)** हन्ति **(अप:)** जलानि **(यह्वी:)** महतीर्नदी: **(असृजत्)** सृजति **(सर्त्तवै)** सर्त्तुं गन्तुम् **(उ)** वितर्के॥ २॥

अन्वय:-हे राजन्! यन्मरुतो मन्दसानं सुतस्य पपिवांसं यदिन्द्रं त्वामार्चस्तान् भवान् सोऽन्वादत्त यथा सूर्यो वज्रमभि हत्वाहिं हन्त्सर्त्तवै यह्वीरपोऽसृजत् तथेमु त्वं न्यायं कुर्य्या:॥ २॥

भावार्थ:-ये मनुष्या राजानं सत्कुर्वन्ति तान् राजापि सत्कुर्याद् यथेन्द्रो मेघं हत्वा जलं प्रवाह्य सर्वं जगद्रक्षति तथा राजा दुष्टान् हत्वा श्रेष्ठान् रक्षेत्॥ २॥

पदार्थ:-हे राजन्! **(यत्)** जो **(मरुत:)** मनुष्य **(मन्दसानम्)** स्तुति किये गये **(सुतस्य)** प्राप्त राज्य की **(पपिवांसम्)** रक्षा करने वाले **(यत्)** जिन **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य से युक्त आपका **(आर्चन्)** सत्कार करें, उनका वह आप **(अनु, आ, अदत्त)** अनुकूलता से ग्रहण करते हैं और जैसे सूर्य **(वज्रम्)** वज्ररूप किरण का **(अभि)** सम्मुख ताड़न करके **(अहिम्)** मेघ का **(हन्)** नाश करता है तथा **(सर्त्तवै)** जाने के लिये **(यह्वी:)** बड़ी नदियों को और **(अप:)** जलों को **(असृजत्)** उत्पन्न करता है, वैसे **(ईम्)** सब ओर से **(उ)** तर्क-वितर्क पूर्वक तुम न्याय करो॥ २॥

भावार्थ:-जो मनुष्य राजा का सत्कार करते हैं, उनका राजा भी सत्कार करे और जैसे सूर्य मेघ का नाश कर और जल का प्रवाह करके सर्व जगत् की रक्षा करता है, वैसे राजा दुष्टों का नाश करके श्रेष्ठ की रक्षा करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒त ब्र॑ह्मा॒णो॒ मरुतो मे॒ अ॒स्येन्द्र॒: सोम॑स्य॒ सुषु॑तस्य पेया:।
तद्धि हव्यं मनु॑षे॒ गा अवि॑न्दु॒दहन्नहिं॑ पपि॒वाँ इन्द्रो॑ अस्य॥ ३॥

उ॒त। ब्र॒ह्मा॒ण॒:। म॒रुत॑:। मे॒। अ॒स्य॒। इन्द्र॑:। सोम॑स्य। सु॒ऽसु॒तस्य। पे॒या॒:। तत्। हि। हव्यम्। मनु॑षे। गा:। अवि॑न्दत्। अहन्। अहि॑म्। प॒पि॒ऽवान्। इन्द्र॑:। अ॒स्य॒॥ ३॥

पदार्थः-(उत) अपि **(ब्रह्माणः)** चतुर्वेदविदः **(मरुतः)** मनुष्याः **(मे)** मम **(अस्य) (इन्द्रः)** राजमानः **(सोमस्य)** ऐश्वर्य्यकारकस्य **(सुषुतस्य)** सुष्ठुतया साधुकृतस्य **(पेयाः)** पिबेः **(तत्) (हि)** किल **(हव्यम्)** अत्तुमर्हम् **(मनुषे)** जनाय **(गाः) (अविन्दत्)** लभेत **(अहन्)** हन्ति **(अहिम्)** मेघम् **(पपिवान्)** पानकरः सूर्यः **(इन्द्रः)** सूर्यः **(अस्य)** राष्ट्रस्य॥३॥

अन्वयः-यथेन्द्रः सूर्यो रसं पिबति तथा हे राजन् इन्द्रस्त्वं मेऽस्य च तद्धि सुषुतस्य हव्यं पेया येन मनुषे भवान् गा अविन्दद् यथा पपिवानहिमहँस्तथा भवानस्य राज्यस्य पालनं कुर्य्यादुत ब्रह्माणो मरुतो यूयमप्याचरत॥३॥

भावार्थः-ये मनुष्याः सर्वान् वेदानधीत्याऽभक्ष्याऽपेयं वर्जयित्वा न्यायाधीशवन्न्यायं सूर्य्यवत्सत्यासत्यप्रकाशं कुर्वन्ति ते महाशया भवन्ति॥३॥

पदार्थः-जिस प्रकार **(इन्द्रः)** सूर्य्य रस को पीता है, वैसे हे राजन् **(इन्द्रः)** प्रकाशमान! आप **(मे)** मेरे **(अस्य)** और इसके भी **(तत्, हि)** उसी **(सुषुतस्य)** अच्छे प्रकार श्रेष्ठ बनाये **(सोमस्य)** ऐश्वर्य्यकारक पदार्थ के **(हव्यम्)** खाने योग्य भाग को **(पेया)** पीजिये जिससे **(मनुषे)** मनुष्यमात्र के लिये आप **(गाः)** गौ वा उत्तम वाणियों को **(अविन्दत्)** प्राप्त हों और जैसे **(पपिवान्)** भूमिस्थजलादि को पान करने वाला सूर्य्य **(अहिम्)** मेघ का **(अहन्)** नाश करता है, वैसे आप **(अस्य)** इस राज्य के पालन को करिये **(उत)** इसी प्रकार हे **(ब्रह्माणः)** चार वेदों के जानने वाले **(मरुतः)** मनुष्यो! तुम लोग भी आचरण करो॥३॥

भावार्थः-जो मनुष्य सब वेदों को पढ़कर नहीं खाने और नहीं पीने योग्य वस्तु का वर्ज्जन करके न्यायाधीश के सदृश न्याय और सूर्य्य के सदृश सत्य और असत्य का प्रकाश करते हैं, वे महाशय होते हैं॥३॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

आद्रोदसी वितरं वि ष्कभायत् संविव्यानश्चिद्भियसे मृगं कः।
जिगर्तिमिन्द्रो अपजर्गुराणः प्रति श्वसन्तमव दानवं हन्॥४॥

आत्। रोदसी इति। विऽतरम्। वि। स्कभायत्। सम्ऽविव्यानः। चित्। भियसे। मृगम्। करिति कः। जिगर्तिम्। इन्द्रः। अपऽजगुराणः। प्रति। श्वसन्तम्। अव। दानवम्। हन्निति हन्॥४॥

पदार्थः-(आत्) आनन्तर्ये **(रोदसी)** द्यावापृथिव्यौ **(वितरम्)** विशेषेण प्लवनम् **(वि) (स्कभायत्)** विशेषेण स्कभ्नाति **(संविव्यानः)** सम्यग्व्याप्नुवन् **(चित्)** अपि **(भियसे)** भयाय **(मृगम्) (कः)** करोति **(जिगर्त्तिम्)** प्रशंसां निगलनं वा **(इन्द्रः)** सूर्य्यः **(अपजर्गुराणः)** आच्छादनात् पृथक्कुर्वन् **(प्रति) (श्वसन्तम्)** प्राणन्तम् **(अव) (दानवम्)** दुष्टप्रकृतिम् **(हन्)** हन्यात्॥४॥

अन्वयः-हे राजन्! यथेन्द्रः सूर्य्यो रोदसी वितरं वि ष्कभायदात्संविव्यानः सन् भियसे चिन्मृगं को

जिगर्त्तिमपजर्गुराणस्स दानवमव हन् तथा प्रतिश्वसन्तं प्राणिनं सततं प्रतिपालय॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजानः सूर्य्यवद्राज्यं धरन्ति ते सिंहो मृगमिव दुष्टानुद्वेजयन्ति तथैव वर्त्तित्वा यशः प्रथयेयुः॥४॥

पदार्थः-हे राजन्! जैसे **(इन्द्रः)** सूर्य्य **(रोदसी)** अन्तरिक्ष और पृथिवी को **(वितरम्)** विशेष उलांघना जैसे हो, वैसे **(वि, स्कभायत्)** विशेष करके आकर्षित करता है **(आत्)** और **(संविव्यानः)** उत्तम प्रकार व्याप्त होता हुआ **(भियसे)** भय के लिये **(चित्)** भी **(मृगम्)** हरिण को **(कः)** करता तथा **(जिगर्त्तिम्)** प्रशंसा वा निगलने को **(अपजर्गुराणः)** आच्छादन से अलग करता हुआ **[**वह**]** **(दानवम्)** दुष्टप्रकृति मनुष्य को **(अव, हन्)** हनन करे, वैसे **(प्रति, श्वसन्तम्)** श्वास लेते हुए प्राणी का निरन्तर प्रतिपालन करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सूर्य्य के सदृश राज्य को धारण करते हैं, जैसे सिंह मृग को व्याकुल करता है, वैसे दुष्टों को व्याकुल करते हैं, वैसा ही बर्त्ताव करके यश को प्रकट करें॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

अध॒ क्रत्वा॑ मघव॒न् तुभ्यं॑ दे॒वा अनु॒ विश्वे॑ अददुः सोम॒पेय॑म्।

यत्सूर्य॑स्य हरित॒: पत॑न्तीः पु॒रः स॒तीरुप॑रा॒ एत॑शे॒ कः॥५॥२३॥

अध॑। क्रत्वा॑। म॒घ॒ऽव॒न्। तुभ्य॑म्। दे॒वाः। अनु॑। विश्वे॑। अ॒द॒दुः॒। सोम॒ऽपेय॑म्। यत्। सूर्य॑स्य। ह॒रितः॑। पत॑न्तीः। पु॒रः। स॒तीः। उप॑राः। एत॑शे। क॒रित॒। कः॥५॥

पदार्थः-**(अध)** अथ **(क्रत्वा)** प्रज्ञया **(मघवन्)** बहुधननुक्त **(तुभ्यम्)** **(देवाः)** विद्वांसः **(अनु)** **(विश्वे)** सर्वे **(अददुः)** ददति **(सोमपेयम्)** सोमस्य पातव्यं रसम् **(यत्)** यः **(सूर्य्यस्य)** **(हरितः)** हरितवर्णाः किरणाः **(पतन्तीः)** गच्छन्तीः **(पुरः)** पालिकाः पुरस्ताद्वा **(सतीः)** विद्यमानाः **(उपराः)** समीपे रममाणाः **(एतशे)** अश्वेऽश्विक इव **(कः)** करोति॥५॥

अन्वयः-हे मघवन्! यत्सूर्यस्य पतन्तीः पुरः सतीरुपरा हरित एतशे कस्तस्य विद्यया तुभ्यं ये विश्वे देवाः सोमपेयमन्वददुस्तेऽध क्रत्वा विज्ञानिनो भवन्ति॥५॥

भावार्थः-हे मनुष्याः! सूर्य्यमण्डलेऽनेकेषां तत्त्वानां विद्यमानत्वादेनकानि रूपाणि दृश्यन्त इति विज्ञेयम्॥५॥

पदार्थः-हे **(मघवन्)** बहुत धन से युक्त! **(यत्)** जो **(सूर्यस्य)** सूर्य्य के **(पतन्तीः)** चलती हुई **(पुरः)** पालने वाली वा आगे से **(सतीः)** विद्यमान **(उपराः)** समीप में रमती हुई **(हरितः)** हरिद्वर्ण किरणों को **(एतशे)** घोड़े पर घोड़े के चढ़ने वाले के सदृश **(कः)** करता है, उसकी विद्या से **(तुभ्यम्)**

आपके लिये जो **(विश्वे)** सम्पूर्ण **(देवाः)** विद्वान् जन **(सोमपेयम्)** सोम ओषधि के पान करने योग्य रस को **(अनु, अददुः)** अनुकूल देते हैं, वे **(अध)** इसके अनन्तर **(क्रत्वा)** बुद्धि से विशेष ज्ञानी होते हैं॥५॥

भावार्थः-हे मनुष्यो! सूर्य्यमण्डल में अनेक तत्त्वों के विद्यमान होने से अनेक रूप देख पढ़ते हैं, यह जानना चाहिये॥५॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

नव॒ यदस्य नव॒तिं च॑ भो॒गान्त्सा॒कं वज्रे॑ण म॒घवा॑ विवृ॒श्चत्।
अर्च॒न्तीन्द्रं॑ म॒रुत॑: स॒धस्थे॒ त्रैष्टु॑भेन॒ वच॑सा बाधत॒ द्याम्॥६॥

नव॑। यत्। अ॒स्य॒। न॒व॒तिम्। च॒। भो॒गान्। सा॒कम्। वज्रे॑ण। म॒घऽवा॑। वि॒ऽवृ॒श्चत्। अर्च॑न्ति। इन्द्र॑म्। म॒रुत॑:। स॒धऽस्थे॑। त्रैस्तु॑भेन। वच॑सा। बा॒धत॒। द्याम्॥६॥

पदार्थः-(**नव**) (**यत्**) यान् (**अस्य**) सूर्य्यस्य (**नवतिम्**) (**च**) (**भोगान्**) (**साकम्**) (**वज्रेण**) (**मघवा**) बहुधनयुक्तः (**विवृश्चत्**) छिनत्ति (**अर्चन्ति**) सत्कुर्वन्ति (**इन्द्रम्**) परमैश्वर्य्यवन्तम् (**मरुतः**) मनुष्याः (**सधस्थे**) सहस्थाने (**त्रैष्टुभेन**) त्रिधा स्तुतेन (**वचसा**) (**बाधत**) (**द्याम्**) कामनाम्॥६॥

अन्वयः-हे राजन्! मघवा त्वं यथा सूर्य्यो वज्रेण साकमस्य जगतो मध्ये यद्यान् नव नवतिं भोगाञ्जनयत्यन्धकारादिकं विवृश्चद्यथा मरुतः सधस्थे त्रैष्टुभेन वचसेन्द्रमर्चन्ति द्यां च बाधत तथैव दुःखदारिद्र्यं विनाशय॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजँस्त्वं कामासक्तिं विहाय न्यायेन सर्वान् सत्कृत्याऽसङ्ख्यान् भोगान् प्रजाभ्यो धेहि॥६॥

पदार्थः-हे राजन् (**मघवा**) बहुत धन से युक्त आप जैसे सूर्य्य (**वज्रेण**) वज्र के (**साकम्**) साथ (**अस्य**) इस सूर्य्य और जगत् के मध्य में (**यत्**) जिन (**नव**) नव और (**नवतिम्**) नब्बे (**भोगान्**) भोगों को उत्पन्न करता और अन्धकार आदि का (**विवृश्चत्**) नाश करता है तथा जैसे (**मरुतः**) मनुष्य (**सधस्थे**) समान स्थान में (**त्रैष्टुभेन**) तीन प्रकार स्तुति किये गये (**वचसा**) वचन से (**इन्द्रम्**) अत्यन्त ऐश्वर्य्य वाले का (**अर्चन्ति**) सत्कार करते हैं, और (**द्याम्**) कामना की (**च**) भी (**बाधत**) बाधा करते हैं, वैसे ही दुःख और दारिद्र्य का नाश करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! आप काम की आसक्ति का त्याग करके और न्याय से सबका सत्कार करके असङ्ख्य भोगों को प्रजाओं के लिये धारण कीजिये॥६॥

पुनः सूर्य्यदृष्टान्तेन राजविषयमाह॥

फिर सूर्य्यदृष्टान्त से राजविषय को अगले मन्त्र में कहते हैं॥

सखा॒ सख्ये॑ अपच॒त्तूय॑म॒ग्निर॒स्य क्रत्वा॑ म॒हिषा त्री श॒तानि॑।

त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद् वृत्रहत्याय सोमम्॥७॥

सखा। सख्ये। अपचत्। तूयम्। अग्निः। अस्य। क्रत्वा। महिषा। त्री। शतानि। त्री। साकम्। इन्द्रः। मनुषः। सरांसि। सुतम्। पिबत्। वृत्रऽहत्याय। सोमम्॥७॥

पदार्थः-(सखा) मित्रम् **(सख्ये)** **(अपचत्)** पचति **(तूयम्)** तूर्णम् **(अग्निः)** पावकः **(अस्य)** **(क्रत्वा)** प्रज्ञया कर्म्मणा वा **(महिषा)** महिषाणां महताम् पशूनाम् **(त्री)** त्रीणि **(शतानि)** **(त्री)** **(साकम्)** **(इन्द्रः)** सूर्य्यः **(मनुषः)** मनुषस्य **(सरांसि)** तडागान् **(सुतम्)** वर्षितम् **(पिबत्)** पिबति **(वृत्रहत्याय)** मेघस्य हननाय **(सोमम्)** ऐश्वर्य्यम्॥७॥

अन्वयः-यथाग्निरिन्द्रस्तूयमस्य जगतो मध्ये त्री भुवनानि प्रकाशयन् सरांसि पिबद् वृत्रहत्याय सुतं सोममपचत् तथा सखा क्रत्वा सख्ये साकं मनुषो महिषा त्री शतानि रक्षेत्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्य ऊर्ध्वाऽधोमध्यस्थान् स्थूलान् पदार्थान् प्रकाशयति तथोत्तममध्याऽधमान् व्यवहारान् राजा प्रकटीकुर्य्यात् सर्वैः सह सुहृद्वद्वर्त्तेत॥७॥

पदार्थः-जैसे **(अग्निः)** अग्नि और **(इन्द्रः)** सूर्य्य **(तूयम्)** शीघ्र **(अस्य)** इस जगत् के मध्य में **(त्री)** तीन भुवनों को प्रकाशित करता हुआ **(सरांसि)** तडागों का **(पिबत्)** पान करता है और **(वृत्रहत्याय)** मेघ के नाश करने के लिये **(सुतम्)** वर्षाये गये **(सोमम्)** ऐश्वर्य्य को **(अपचत्)** पचाता है, वैसे **(सखा)** मित्र **(क्रत्वा)** बुद्धि वा कर्म्म से **(सख्ये)** मित्र के लिये **(साकम्)** सहित **(मनुषः)** मनुष्य के **(महिषा)** बड़े पशुओं के **(त्री)** तीन **(शतानि)** सैकड़ों की रक्षा करे॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य ऊपर, नीचे और मध्यभाग में वर्त्तमान स्थूल पदार्थों का प्रकाश करता है, वैसे उत्तम, मध्यम और अधम व्यवहारों को राजा प्रकट करे और सबके साथ मित्र के सदृश वर्त्ताव करे॥७॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः।
कारं न विश्वे अह्वन्त देवा भरमिन्द्राय यदहिं जघान॥८॥

त्री। यत्। शता। महिषाणाम्। अघः। माः। त्री। सरांसि। मघऽवा। सोम्या। अपाः। कारम्। न। विश्वे। अह्वन्त। देवाः। भरम्। इन्द्राय। यत्। अहिम्। जघान॥८॥

पदार्थः-(त्री) **(यत्)** यः **(शता)** शतानि **(महिषाणाम्)** महतां पदार्थनाम् **(अघः)** अहन्तव्यः **(माः)** रचयेः **(त्री)** **(सरांसि)** मेघमण्डलभूम्यन्तरिक्षस्थानि **(मघवा)** बहुधनवान् **(सोम्या)** सोमगुणसम्पन्न **(अपाः)** पाहि **(कारम्)** कर्त्तारम् **(न)** इव **(विश्वे)** सर्वे **(अह्वन्त)** आह्वयन्ति **(देवाः)** विद्वांसः **(भरम्)** पालनम् **(इन्द्राय)** ऐश्वर्य्याय **(यत्)** यथा **(अहिम्)** मेघम् **(जघान)** हन्ति॥८॥

अन्वयः-हे राजन्! यद्यस्त्वमघः सन् महिषाणां त्री शता माः। हे सोम्या! मघवा सँस्त्री सरांसि सूर्य इव प्रजा अपाः सूर्यो यदहिं जघान यथा विश्वे देवा इन्द्राय कारं न भरमह्वन्त तथेन्द्राय प्रयतस्व॥८॥

भावार्थः-अत्रोपमालङ्कारः। यथा पुरुषार्थिनं जनं सर्वे स्वीकुर्वन्ति तथैव सूर्य्य ईश्वरनियमनियतजलरसं गृह्णाति यथा जना महतां पदार्थानां सकाशाच्छतशः कार्याणि साध्नुवन्ति तथैव राजा मरुद्भ्यः पुरुषेभ्यो महद्राजकार्य्यं साध्नुयात्॥८॥

पदार्थः-हे राजन्! **(यत्)** जो आप **(अघः)** नहीं मारने योग्य होते हुए **(महिषाणाम्)** बड़े पदार्थों के **(त्री)** तीन **(शता)** सैकड़ों को **(माः)** रचिये और हे **(सोम्या)** चन्द्रमा के गुणों से सम्पन्न! **(मघवा)** बहुत धनवान् होते हुए **(त्री)** तीन **(सरांसि)** मेघमण्डल, भूमि और अन्तरिक्ष में स्थित पदार्थों को सूर्य के सदृश प्रजाओं का **(अपाः)** पालन कीजिये और सूर्य्य **(यत्)** जैसे **(अहिम्)** मेघ का **(जघान)** नाश करता है और जैसे **(विश्वे)** सम्पूर्ण **(देवाः)** सम्पूर्ण **(देवाः)** विद्वान् जन **(इन्द्राय)** ऐश्वर्य्य के लिये **(कारम्)** कर्त्ता के **(न)** सदृश **(भरम्)** पालन को **(अह्वन्त)** कहते हैं, वैसे ऐश्वर्य्य के लिये प्रयत्न कीजिये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पुरुषार्थी जन को सब स्वीकार करते हैं, वैसे ही सूर्य ईश्वरीय नियमों से नियत जलरस का ग्रहण करता है, जैसे जन बड़े पदार्थों की उत्तेजना से सैकड़ों काम सिद्ध करते हैं, वैसे ही राजा प्रजाजनों से बड़े राजकार्य्य को सिद्ध करे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒शना॒ यत्स॑हस्यै३॑रया॑तं गृ॒हमि॑न्द्र जूजुवा॒नेभि॒रश्वै॑:।

व॒न्वा॒नो अत्रं॑ स॒रथं॑ ययाथ॒ कुत्से॑न दे॒वैर॑वनोह॒ शुष्ण॑म्॥९॥

उ॒शना॑। यत्। स॒ह॒स्यै॑:। अया॑तम्। गृ॒हम्। इ॒न्द्र॒। जू॒जु॒वा॒नेभि॑:। अश्वै॑:। व॒न्वा॒नः। अत्र॑। स॒ऽरथ॑म्। य॒याथ॒। कुत्से॑न। दे॒वैः। अव॑नोः। ह॒। शुष्ण॑म्॥९॥

पदार्थः-**(उशना)** कामयमानः **(यत्)** **(सहस्यैः)** सहस्सु बलेषु भवैः **(अयातम्)** प्राप्नुतम् **(गृहम्)** **(इन्द्र)** राजन् **(जूजुवानेभिः)** वेगवद्भिः। अत्र **तुजादीनामित्यभ्यासदैर्घ्यम्**। **(अश्वैः)** तुरङ्गैरग्न्यादिभिर्वा **(वन्वानः)** याचमानः **(अत्र)** अस्मिन् जगति **(सरथम्)** रथेन सह वर्त्तमानम् **(ययाथ)** प्राप्नुत **(कुत्सेन)** वज्रेणेव दृढेन कर्मणा **(देवैः)** विद्वद्भिः **(अवनोः)** रक्ष **(ह)** किल **(शुष्णम्)** बलम्॥९॥

अन्वयः-हे इन्द्र त्वमुशना च! युवां सहस्यैः सह जूजुवानेभिरश्वैश्चालिते याने स्थित्वा यद् गृहमयातमत्र ह वन्वानस्त्वं कुत्सेन देवैः शुष्णमवनोः। हे मनुष्या! यूयमेताभ्यां सह सरथं ह ययाथ॥९॥

भावार्थः-ये राजादयो मनुष्याः सुसभ्याः स्युस्ते विमानादीनि निर्मातुं शक्नुयुर्दुष्टान् हन्तुं समर्था भवेयुः॥९॥

पदार्थः-हे **(इन्द्र)** राजन् आप और **(उशना)** कामना करता हुआ जन! तुम दोनों **(सहस्यैः)** बलों में उत्पन्न हुए पदार्थों के साथ **(जूजुवानेभिः)** वेग वाले **(अश्वैः)** घोड़ों वा अग्नि आदिकों से चलाये गये वाहन पर स्थित हो के **(यत्)** जिस **(गृहम्)** गृह को **(अयातम्)** प्राप्त हूजिये और **(अत्र)** इस जगत् में **(ह)** निश्चय से **(वन्वानः)** याचना करते हुए आप **(कुत्सेन)** वज्र के सदृश दृढ़ कर्म्म से **(देवैः)** विद्वानों से **(शुष्णम्)** बल की **(अवनोः)** रक्षा करिये और हे मनुष्यो! आप लोग इन दोनों के साथ **(सरथम्)** रथ के साथ वर्त्तमान जैसे हो, वैसे निश्चय से **(यथाय)** प्राप्त होओ॥९॥

भावार्थः-जो राजा आदि मनुष्य उत्तम प्रकार श्रेष्ठ होवें, वे विमान आदि वाहनों को बना सकें और दुष्ट जनों के मारने को समर्थ होवें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः।

अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः॥ १०॥ २४॥

प्र। अन्यत्। चक्रम्। अवृहः। सूर्यस्य। कुत्साय। अन्यत्। वरिवः। यातवे। अकरित्यकः। अनासः। दस्यून्। अमृणः। वधेन। नि। दुर्योणे। अवृणक्। मृध्रऽवाचः॥ १०॥

पदार्थः-**(प्र)** **(अन्यत्)** **(चक्रम्)** **(अवृहः)** वर्धयेः **(सूर्य्यस्य)** **(कुत्साय)** वज्राय **(अन्यत्)** **(वरिवः)** परिचरणम् **(यातवे)** यातुं गन्तुम् **(अकः)** कुर्य्याः **(अनासः)** अविद्यमानास्यान् **(दस्यून्)** दुष्टान् चोरान् **(अमृणः)** हिंस्याः **(वधेन)** **(नि)** नितराम् **(दुर्य्योणे)** गृहनयने **(आवृणक्)** वृङ्धि **(मृध्रवाचः)** हिंस्रावाचो जनान्॥१०॥

अन्वयः-हे राजंस्त्वं सूर्य्यस्येवाऽन्यच्चक्रं प्रावृहः कुत्सायाऽन्यद्वरिवो यातवेऽकरनासो दस्यून् वधेनामृणो दुर्य्योणे मृध्रवाचो जनान् न्यावृणक्॥१०॥

भावार्थः-हे राजन्! यथा सूर्य्यः स्वं चक्रमाकर्षणेन वर्त्तयति तथैव विमानादियानै राज्यमनुवर्त्तय दस्यून् दुष्टवाचश्च हत्वा राज्येऽचोरान् श्रेष्ठवचनांश्च सम्पादय॥१०॥

पदार्थः-हे राजन्! आप **(सूर्यस्य)** सूर्य के सदृश **(अन्यत्)** अन्य **(चक्रम्)** चक्र की **(प्र, अवृहः)** उत्तम वृद्धि करिये और **(कुत्साय)** वज्र के लिये **(अन्यत्)** अन्य **(वरिवः)** सेवन को **(यातवे)** प्राप्त होने को **(अकः)** करिये तथा **(अनासः)** मुखरहित **(दस्यून्)** दुष्ट चोरों का **(वधेन)** वध से **(अमृणः)** नाश करिये और **(दुर्य्योणे)** गृह के प्राप्त होने में **(मृध्रवाचः)** कुत्सित वाणियों वाले जनों को **(नि, आवृणक्)** निरन्तर वर्जिये॥१०॥

भावार्थः-हे राजन्! जैसे सूर्य्य अपने चक्र का आकर्षण से वर्त्ताव करता है, वैसे ही विमान आदि वाहनों से राज्य का अनुवर्त्तन करो और चोर तथा दुष्ट वाणीवालों का नाश करके राज्य में नहीं चोरी करने वाले और श्रेष्ठ वचनों वाले जनों का सम्पादन कीजिये॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स्तोमा॑सस्त्वा॒ गौरि॑वीतेरवर्ध॒न्नर॑न्धयो वैदथि॒नाय॒ पिप्रु॑म्।

आ त्वामृ॒जिश्वा॑ स॒ख्याय॑ चक्रे॒ पच॑न् प॒क्तीरपि॑ब॒: सोम॑मस्य॥११॥

स्तोमा॑सः। त्वा॒। गौरि॑ऽवीतेः। अ॒व॒र्ध॒न्। अर॑न्धयः। वै॒द॒थि॒नाय॑। पिप्रु॑म्। आ। त्वाम्। ऋ॒जिश्वा॑। स॒ख्याय॑। च॒क्रे॒। पच॑न्। प॒क्तीः। अपि॑बः। सोमम्। अ॒स्य॒॥११॥

पदार्थः-(स्तोमासः) प्रशंसिताः **(त्वा)** त्वाम् **(गौरिवीतेः)** यो गौरीं वाचं व्येति सः। **गौरीति वाङ्नामसु पठितम्।** (निघं०१.११) **(अवर्धन्)** वर्धन्तम् **(अरन्धयः)** हिंसय **(वैदथिनाय)** विदिथिना स- ामकर्त्रा निर्मिताय **(पिप्रुम्)** व्यापकम् **(आ) (त्वाम्) (ऋजिश्वा)** ऋजिः सरलश्चासौ श्वा च **(सख्याय)** मित्रत्वाय **(चक्रे) (पचन्) (पक्तीः)** पाकान् **(अपिबः)** पिबेः **(सोमम्)** ऐश्वर्य्यमोषधिरसं वा **(अस्य)** जगतो मध्ये॥११॥

अन्वयः-हे राजन्! गौरिवीतेस्तव सङ्गेन स्तोमासोऽवर्धंस्तैः सह वैदथिनाय शत्रूनरन्धयः। य ऋजिश्वेव पिप्रुं त्वा सख्यायाऽऽचक्रे तेन सहास्य पक्तीः पचंस्त्वं सोममपिबो ये त्वां पालयेयुस्तान् सर्वांस्त्वं सत्कुर्याः॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये शुभैर्गुणैस्त्वां वर्धयन्ति मित्रं जानन्ति तान् सखीकृत्य त्वमैश्वर्य्यं वर्धय॥११॥

पदार्थः-हे राजन् **(गौरिविते:)** वाणी को विशेष प्राप्त अर्थात् जानने वाले आपके संग से **(स्तोमासः)** प्रशंसित **(अवर्धन्)** वृद्धि को प्राप्त हों, उनके साथ **(वैदथिनाय)** संग्राम करने वाले से बनाये गये के लिये शत्रुओं का **(अरन्धयः)** नाश करो और जो **(ऋजिश्वा)** सरल कुत्ते के सदृश ही मनुष्य **(पिप्रुम्)** व्यापक **(त्वा)** आपको **(सख्याय)** मित्रपने के लिये **(आ, चक्रे)** अच्छे प्रकार कर चुका, उसके साथ **(अस्य)** इस जगत् के मध्य में **(पक्तीः)** पाकों का **(पचन्)** पाक करते हुए आप **(सोमम्)** ऐश्वर्य वा ओषधि के रस का **(अपिबः)** पान करिये और जो **(त्वाम्)** आपकी रक्षा करें, उन सबका आप सत्कार करिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो उत्तम गुणों से आपकी वृद्धि करते और आपको मित्र जानते हैं, उनको मित्र करके आप ऐश्वर्य की वृद्धि करो॥११॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

नवग्वासः सुतसोमास इन्द्रं दशग्वासो अभ्यर्चन्त्यर्कैः।

गव्यं चिदूर्वमपिधानवन्तं तं चिन्नरः शशमाना अप व्रन्॥ १२॥

नवऽग्वासः। सुतसोमासः। इन्द्रम्। दशऽग्वासः। अभि। अर्चन्ति। अर्कैः। गव्यम्। चित्। ऊर्वम्। अपिधानऽवन्तम्। तम्। चित्। नरः। शशमानाः। अप। व्रन्॥ १२॥

पदार्थः-(नवग्वासः) नवीनगतयः **(सुतसोमासः)** निष्पादितैश्वर्यौषधयः **(इन्द्रम्)** विद्यैश्वर्ययुक्तम् **(दशग्वासः)** दश गाव इन्द्रियाणि जितानि यैस्ते **(अभि)** सर्वतः **(अर्चन्ति)** सत्कुर्वन्ति **(अर्कैः)** मन्त्रैर्विचारैः **(गव्यम्)** गोरिदम् **(चित्)** अपि **(ऊर्वम्)** अविद्याहिंसकम् **(अपिधानवन्तम्)** आच्छादनयुक्तम् **(तम्) (चित्) (नरः)** नेतारः **(शशमानाः)** अविद्या उल्लङ्घमानाः **(अप) (व्रन्)** वृण्वन्ति॥ १२॥

अन्वयः-हे विद्वन्! सुतसोमासो नवग्वासो दशग्वासः शशमाना नरो यं गव्यं चिदूर्वमपिधानवन्तमिन्द्रमर्कैरभ्यर्चन्ति तस्याऽविद्यामप व्रँस्तं चित् त्वमपि शिक्षय॥ १२॥

भावार्थः-ये नूतनविद्याजिघृक्षव ऐश्वर्य्यमिच्छुका जितेन्द्रिया विद्वांसोऽज्ञानिनः प्रबोध्य विदुषः कुर्वन्ति त एव पूजनीया भवन्ति॥ १२॥

पदार्थः-हे विद्वन्! **(सुतसोमासः)** संपादन की ऐश्वर्य और ओषधियां जिन्होंने **(नवग्वासः)** जो नवीन गति वाले **(दशग्वासः)** जिन्होंने दशों इन्द्रियों को जीता ऐसे **(शशमानाः)** अविद्याओं का उल्लंघन करते हुए **(नरः)** नायक जिन जिस **(गव्यम्)** गोसम्बन्धी **(चित्)** निश्चित **(ऊर्वम्)** अविद्या के नाश करने वाले **(अपिधानवन्तम्)** आच्छादन से युक्त गुप्त **(इन्द्रम्)** विद्या और ऐश्वर्य्यवान् का **(अर्कैः)** मन्त्र वा विचारों से **(अभि)** सब प्रकार **(अर्चन्ति)** सत्कार करते और उसकी अविद्या का **(अप, व्रन्)** अस्वीकार करते हैं **(तम्)** उसको **(चित्)** भी आप शिक्षा दीजिये॥ १२॥

भावार्थः-जो नवीन विद्या का ग्रहण करना चाहते और ऐश्वर्य्य की इच्छा करने और इन्द्रियों के जीतने वाले विद्वान् जन अज्ञानी जनों को बोध देकर विद्वान् करते हैं, वे ही सत्कार करने योग्य होते हैं॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

कथो नु ते परि चराणि विद्वान् वीर्या मघवन् या चकर्थ।

या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम॥ १३॥

कथो इति। नु। ते। परि। चराणि। विद्वान्। वीर्या। मघऽवन्। या। चकर्थ। या। चो इति। नु। नव्या। कृणवः। शविष्ठ। प्र। इत्। ऊँ इति। ता। ते। विदथेषु। ब्रवाम॥ १३॥

पदार्थः-(कथो) कथम् **(नु)** **(ते)** तव **(परि)** सर्वतः **(चराणि)** गतिमन्ति प्राप्तव्यानि वा **(विद्वान्)** **(वीर्या)** वीर्ययुक्तानि सैन्यानि **(मघवन्)** पूजितधनयुक्त **(या)** यानि **(चकर्थ)** करोषि **(या)** यानि **(चो)** च **(नु)** **(नव्या)** नवेषु भवानि **(कृणवः)** करोषि **(शविष्ठ)** अतिशयेन बलिष्ठ **(प्र)** **(इत्)** एव **(उ)** **(ता)** तानि **(ते)** तव **(विदथेषु)** स-ामेषु **(ब्रवाम)** उपदिशेम॥ १३॥

अन्वयः-हे मघवन्! या ते परि चराणि वीर्या कथो नु चकर्थ विद्वांस्त्वं या चो नव्या नु कृणवः। हे शविष्ठ! ते यानि विदथेषु वयं प्र ब्रवाम ता तानीदु त्वं गृहाण॥ १३॥

भावार्थः-मनुष्याः सदैव नवीना नवीना विद्या नूतनं नूतनं कार्य्यं संसाध्यैश्वर्य्यं प्राप्नुयुरेवमन्यान् प्रत्युपदिशन्तु॥ १३॥

पदार्थः-हे **(मघवन्)** श्रेष्ठ धन से युक्त! **(या)** जो **(ते)** आपकी **(परि)** सब ओर से **(चराणि)** चलने वाली और प्राप्त होने योग्य **(वीर्या)** पराक्रमयुक्त सेनाओं को **(कथो)** किस प्रकार **(नु)** निश्चय से **(चकर्थ)** करते हो तथा **(विद्वान्)** विद्वान् आप **(या)** जिनको **(चो)** और **(नव्या)** नवीनों में उत्पन्नों को **(नु)** निश्चय से **(कृणवः)** सिद्ध करते हो। हे **(शविष्ठ)** अतिशय करके बलिष्ठ! **(ते)** आपके जिनको **(विदथेषु)** स-ामों में हम लोग **(प्र, ब्रवाम)** उपदेश करें **(ता)** उनको **(इत्)** निश्चय से **(उ)** भी आप ग्रहण करो॥ १३॥

भावार्थः-मनुष्यों को चाहिये कि सदा ही नवीन-नवीन विद्या और नवीन-[नवीन] कार्य्य को सिद्ध करके ऐश्वर्य्य को प्राप्त होवें, इसी प्रकार अन्यों के प्रति उपदेश करें॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एता विश्वा चकृवाँ इन्द्र भूर्यपरीतो जनुषा वीर्येण।

या चित्नु वज्रिन् कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः॥ १४॥

एता। विश्वा। चकृऽवान्। इन्द्र। भूरि। अपरिऽइतः। जनुषा। वीर्येण। या। चित्। नु। वज्रिन्। कृणवः। दधृष्वान्। न। ते। वर्ता। तविष्याः। अस्ति। तस्याः॥ १४॥

पदार्थः-(एता) एतानि **(विश्वा)** सर्वाणि **(चकृवान्)** कृतवान् **(इन्द्र)** परमैश्वर्य्ययुक्त राजन् **(भूरि)** बहूनि बलानि **(अपरीतः)** अवर्जितः **(जनुषा)** द्वितीयेन जन्मना **(वीर्येण)** पराक्रमेण **(या)** यानि **(चित्)** अपि **(नु)** सद्यः **(वज्रिन्)** प्रशस्तशस्त्रास्त्रयुक्त **(कृणवः)** कुर्य्याः **(दधृष्वान्)** धर्षितवान् **(न)** निषेधे **(ते)** तव **(वर्त्ता)** स्वीकर्त्ता **(तविष्याः)** बलयुक्तायाः सेनायाः **(अस्ति)** **(तस्याः)**॥ १४॥

अन्वयः-हे वज्रिन्निन्द्रापरीतस्त्वं जनुषा वीर्येण चिदेता विश्वा चकृवान् या च भूरि कृणवो हे राजँस्ते

चित् तस्यास्तविष्या दधृष्वान्नु वर्त्ता वोऽपि नास्ति॥१४॥

भावार्थः-ये राजादयो जनास्ते ब्रह्मचर्य्येण विद्याः प्राप्य चत्वारिंशद्वर्षायुष्कास्सन्तः समावर्त्य स्वयंवरं विवाहं विधाय सेनां वर्धयित्वा प्रजायाः सर्वतोऽभिरक्षणं कुर्य्युः॥१४॥

पदार्थः-हे **(वज्रिन्)** उत्तम शस्त्र और अस्त्रों से और **(इन्द्र)** अत्यन्त ऐश्वर्य्य से युक्त राजन्! **(अपरीतः)** नहीं वर्ज्जित आप **(जनुषा)** दूसरे जन्म से और **(वीर्य्येण)** पराक्रम से **(चित्)** भी **(एता)** इन **(विश्वा)** सब को **(चकृवान्)** किये हुए हो और **(या)** जिन **(भूरि)** बहुत बलों को **(कृणवः)** करिये। हे राजन्! **(ते)** आपकी निश्चित **(तस्याः)** उस **(तविष्याः)** बलयुक्त सेना का **(दधृष्वान्)** धृष्ट अर्थात् हर्षित किया हुआ **(नु)** शीघ्र **(वर्त्ता)** स्वीकार करने वाला कोई भी **(न)** नहीं **(अस्ति)** है॥१४॥

भावार्थः-जो राजा आदि जन हैं, वे ब्रह्मचर्य्य से विद्याओं को प्राप्त होकर चवालीस वर्ष की अवस्था से युक्त हुए समावर्त्तन करके अर्थात् गृहस्थाश्रम को विधिपूर्वक ग्रहण कर स्वयंवर विवाह कर और सेना की वृद्धि करके प्रजा की सब प्रकार से रक्षा करें॥१४॥

अथ विद्वद्विषये पुरुषार्थरक्षणविषयमाह॥

अब विद्वद्विषय में पुरुषार्थरक्षणविषय को कहते हैं॥

इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म।
वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम्॥१५॥२५॥

इन्द्र। ब्रह्म। क्रियमाणा। जुषस्व। या। ते। शविष्ठ। नव्याः। अकर्म। वस्त्राऽइव। भद्रा। सुऽकृता। वसुऽयुः। रथम्। न। धीरः। सुऽअपाः। अतक्षम्॥१५॥

पदार्थः-**(इन्द्र)** विद्यैश्वर्य्ययुक्त **(ब्रह्म)** अन्नानि धनानि वा। **ब्रह्मेत्यन्ननामसु पठितम्।** (निघं०२.७) **(क्रियमाणा)** वर्त्तमानेन पुरुषार्थेन सिद्धानि **(जुषस्व)** सेवस्व **(या)** यानि **(ते)** तव **(शविष्ठ)** अतिशयेन बलयुक्त **(नव्याः)** नवीनाः श्रियः **(अकर्म)** कुर्य्याम **(वस्त्रेव)** यथा वस्त्राणि प्राप्यन्ते तथा **(भद्रा)** कल्याणकराणि **(सुकृता)** धर्म्येण निष्पादितानि **(वसूयुः)** आत्मनो धनमिच्छुः **(रथम्)** रमणीयम् **(न)** इव **(धीरः)** ध्यानवान् योगी **(स्वपाः)** सत्यभाषणादिकर्मा **(अतक्षम्)** प्राप्नुयाम्॥१५॥

अन्वयः-हे शविष्ठेन्द्र! यस्य ते नव्याः श्रियो वयकर्म या क्रियमाणा ब्रह्म त्वं जुषस्व ता भद्रा सुकृता वस्त्रेव स्वपा धीरो वसूयू रथं न भद्रा सुकृता अहमतक्षम्॥१५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! गोत्रधनस्याशया यूयमालस्येन पुरुषार्थं मा त्यजत, किन्तु नित्यं पुरुषार्थवर्धनेनैश्वर्यं वर्धयित्वा वस्त्रवद्रथवत्सुखं भुक्त्वा नूतनं यशः प्रथयतेति॥१५॥

अत्रेन्द्रविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनत्रिंशत्तमं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(शविष्ठ)** अतिशय करके बल से और **(इन्द्र)** विद्या और ऐश्वर्य्य से युक्त! जिन **(ते)** आपके **(नव्याः)** नवीन धनों को हम लोग **(अकर्म)** करें और **(या)** जिन **(क्रियमाणा)** वर्त्तमान पुरुषार्थ से सिद्ध हुए **(ब्रह्म)** अन्न वा धनों का आप **(जुषस्व)** सेवन करो उन **(भद्रा)** कल्याणकारक **(सुकृता)** धर्म्म से उत्पन्न किये हुओं को **(वस्त्रेव)** जैसे वस्त्र प्राप्त होते वैसे तथा **(स्वपाः)** सत्यभाषण आदि कर्म्म करने वाला **(धीरः)** ध्यानवान् योगी और **(वसूयूः)** अपने को धन की इच्छा करने वाला **(रथम्)** उत्तम वाहन को **(न)** जैसे वैसे कल्याणकारक और धर्म्म जैसे उत्पन्न किये गयों को मैं **(अतक्षम्)** प्राप्त होऊँ॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! वंश और धन की आशा से आप लोग आलस्य से पुरुषार्थ का न त्याग करो, किन्तु नित्य पुरुषार्थ की वृद्धि से ऐश्वर्य्य की वृद्धि करके वस्त्र और रथ से जैसे वैसे सुख का भोग करके नवीन यश प्रकट करो॥१५॥

इस सूक्त में इन्द्र और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इनसे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनतीसवां सूक्त और पञ्चीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्य त्रिंशत्तमस्य सूक्तस्य बभ्रुरात्रेय ऋषिः। इन्द्र ऋणञ्चयश्च देवता। १, २, ३, ४, ५, ८, ९ निचृत् त्रिष्टुप्। १० विराट् त्रिष्टुप्। ७, ११ १२ त्रिष्टुप् छन्दः। धैवतः स्वरः। ६, १३ पङ्क्तिः। १४ स्वराट् पङ्क्तिः। १५ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रविषयमाह॥

अब पन्द्रह ऋचा वाले तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में
इन्द्र के विषय को कहते हैं॥

क्व१ स्य वीरः को अपश्यदिन्द्रं सुखरथमीयमानं हरिभ्याम्।
यो राया वज्री सुतसोममिच्छन् तदोको गन्ता पुरुहूत ऊती॥ १॥

क्व। स्यः। वीरः। कः। अपश्यत्। इन्द्रम्। सुखऽरथम्। ईयमानम्। हरिऽभ्याम्। यः। राया। वज्री। सुतऽसोमम्। इच्छन्। तत्। ओकः। गन्ता। पुरुऽहूतः। ऊती॥ १॥

पदार्थः-(क्व) कस्मिन् **(स्यः)** सः **(वीरः)** शूरः **(कः)** **(अपश्यत्)** पश्यति **(इन्द्रम्)** विद्युतम् **(सुखरथम्)** सुखाय रथस्सुखरथस्तम् **(ईयमानम्)** गच्छन्तम् **(हरिभ्याम्)** वेगाकर्षणाभ्याम् **(यः)** **(राया)** धनेन **(वज्री)** शस्त्रास्त्रयुक्तः **(सुतसोमम्)** सुतः सोम ऐश्वर्यं यस्मिँस्तम् **(इच्छन्)** **(तत्)** **(ओकः)** गृहम् **(गन्ता)** **(पुरुहूतः)** बहुभिः स्तुतः **(ऊती)** रक्षणाद्याय॥ १॥

अन्वयः-हे विद्वन्! को वीर इन्द्रमपश्यत् क्व हरिभ्यां सुखरथमीयमानमपश्यत् यो वज्री गन्ता पुरुहूतः सतुसोमं तदोक इच्छन्नूती रायेन्द्रमपश्यत् स्यः सुखरथं प्राप्नुयात्॥ १॥

भावार्थः-हे विद्वन्! के विद्युदादिविद्यां प्राप्तुमधिकारिणः सन्तीति पृच्छामि ये विदुषां सङ्गेनाप्तरीत्या विद्यां हस्तक्रियां गृहीत्वा नित्यं प्रयतेरन्नित्युत्तरम्॥ १॥

पदार्थः-हे विद्वन्! **(कः)** कौन **(वीरः)** शूर **(इन्द्रम्)** बिजुली को **(अपश्यत्)** देखता है **(क्व)** किसमें **(हरिभ्याम्)** वेग और आकर्षण से **(सुखरथम्)** सुख के अर्थ **(ईयमानम्)** चलते हुए रथ को देखता है **(यः)** जो **(वज्री)** शस्त्र और अस्त्रों में युक्त **(गन्ता)** जाने वाला **(पुरुहूतः)** बहुतों से स्तुति किया गया **(सुतसोमम्)** इकट्ठा किया ऐश्वर्य्य जिसमें **(तत्)** उस **(ओकः)** गृह की **(इच्छन्)** इच्छा करता हुआ **(ऊती)** रक्षण आदि के लिये **(राया)** धन से बिजुली को देखता है **(स्यः)** वह सुख के लिये रथ को प्राप्त हो॥ १॥

भावार्थः-हे विद्वन्! कौन बिजुली आदि की विद्या के प्राप्त होने को अधिकारी हैं, इस प्रकार पूछता हूँ; जो विद्वानों के सङ्ग से यथार्थवक्ता जनों की रीति से विद्या और हस्तक्रिया को ग्रहण करके नित्य प्रयत्न करें, यह उत्तर है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन्।

अपृच्छमन्याँ उत ते म आहुरिन्द्रं नरो बुबुधाना अशेम॥ २॥

अव। अचचक्षम्। पदम्। अस्य। सस्वः। उग्रम्। निऽधातुः। अनु। आयम्। इच्छन्। अपृच्छम्। अन्यान्। उत। ते। मे। आहुः। इन्द्रम्। नरः। बुबुधानाः। अशेम॥ २॥

पदार्थः-(अव) (अचचक्षम्) कथयेयम् **(पदम्)** प्रापणीयं विज्ञानम् **(अस्य)** शिल्पस्य **(सस्वः)** गुप्तम् **(उग्रम्)** उग्रगुणकर्मस्वभावम् **(निधातुः)** धरतुः **(अनु) (आयम्)** प्राप्नुयाम् **(इच्छन्) (अपृच्छम्)** पृच्छेयम् **(अन्यान्)** विदुषः **(उत) (ते)** विद्वांसः **(मे)** मह्यम् **(आहुः)** कथयन्तु **(इन्द्रम्)** विद्युतम् **(नरः)** नायकाः **(बुबुधानाः)** सम्बोधयुक्ताः **(अशेम)** प्राप्नुयाम॥ २॥

अन्वयः-शिल्पविद्यामिच्छन्नहं यावन्यान् विदुषोऽपृच्छं ते बुबुधाना नरो म इन्द्रमाहुस्तमस्य निधातुः सस्वरुग्रं पदमन्वायमन्यान् प्रत्यवाचचक्षमेवमुत मित्रवद्वर्त्तमाना वयं साङ्गोपाङ्गाः शिल्पविद्या अशेम॥ २॥

भावार्थः-यदा जिज्ञासवो विदुषः प्रति पृच्छेयुस्तदा तान् प्रति यथार्थमुत्तरं प्रदद्युरेवं सखायः सन्तो विद्युदादिविद्यामुन्नयेयुः॥ २॥

पदार्थः-शिल्पविद्या की **(इच्छन्)** इच्छा करता हुआ मैं जिन **(अन्यान्)** अन्य विद्वानों को **(अपृच्छम्)** पूछूं **(ते)** वे **(बुबुधानाः)** सम्बोधयुक्त **(नरः)** नायक जन विद्वान् **(मे)** मेरे लिये **(इन्द्रम्)** बिजुली को **(आहुः)** कहें, उसको **(अस्य)** इस शिल्पविद्या के **(निधातुः)** धारण करने वाले के **(सस्वः)** गुप्त **(उग्रम्)** उग्र गुण, कर्म्म और स्वभाव वाले **(पदम्)** प्राप्त होने योग्य विज्ञान को **(अनु, आयम्)** अनुकूल प्राप्त होऊं और अन्यों के प्रति **(अव, अचचक्षम्)** निश्शेष कहूँ, इस प्रकार **(उत)** भी मित्र के सदृश वर्त्तमान हम लोग अङ्ग और उपाङ्गों के सहित शिल्पविद्याओं को **(अशेम)** प्राप्त होवें॥ २॥

भावार्थः-जब शिल्प आदि के जानने कि इच्छा करने वाले जन विद्वानों के प्रति पूछें, तब उनके प्रति यथार्थ उत्तर देवें, इस प्रकार परस्पर मित्र हुए बिजुली आदि की विद्या की उन्नति करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र नु वयं सुते या ते कृतानीन्द्र ब्रवाम यानि नो जुजोषः।

वेददविद्वाञ्छृणवच्च विद्वान् वहतेऽयं मघवा सर्वसेनः॥ ३॥

प्र। नु। वयम्। सुते। या। ते। कृतानि। इन्द्र। ब्रवाम। यानि। नः। जुजोषः। वेदत्। अविद्वान्। शृणवत्। च। विद्वान्। वहते। अयम्। मघऽवा। सर्वऽसेनः॥ १॥

पदार्थः-(प्र) (**नु**) सद्यः (**वयम्**) (**सुते**) उत्पन्ने जगति (**या**) यानि (**ते**) तव (**कृतानि**) (**इन्द्र**) विद्वन् (**ब्रवाम**) उपदिशेम (**यानि**) (**नः**) अस्माकम् (**जुजोषः**) जुषसे (**वेदत्**) विजानीयात् (**अविद्वान्**) (**शृणवत्**) शृणुयात् (**च**) विद्वान् (**वहते**) प्राप्नोति प्रापयति वा (**अयम्**) (**मघवा**) बहुधनवान् (**सर्वसेनः**) सर्वाः सेना यस्य सः॥३॥

अन्वयः-हे इन्द्र! या ते सुते कृतानि नः यानि त्वं जुजोषस्तानि वयं नु प्र ब्रवाम यदाऽयं मघवा सर्वसेनो विद्वान् विद्यां वहते तदायमविद्वाञ्छृणवद्वेदच्च॥३॥

भावार्थः-द्वावुपायौ विद्याप्राप्तये वेदितव्यौ तत्राद्यो विद्याऽध्यापक आप्तो भवेच्छ्रोताऽध्येता च पवित्रो निष्कपटी पुरुषार्थी स्यात्। द्वितीयः सतां विदुषां क्रियां दृष्ट्वा स्वयमपि तादृशीं कुर्य्यादेवं कृते सर्वेषां विद्यालाभो भवेत्॥३॥

पदार्थः-हे (**इन्द्र**) विद्वन्! (**या**) जिन (**ते**) आपके (**सुते**) उत्पन्न हुए संसार में (**कृतानि**) किये हुए कार्य्यों का (**नः**) हम लोगों के (**यानि**) जिन कार्य्यों को (**जुजोषः**) आप सेवते हो उनका (**वयम्**) हम लोग (**नु**) शीघ्र (**प्र, ब्रवाम**) उपदेश देवें और जब (**अयम्**) यह (**मघवा**) बहुत धन वाला और (**सर्वसेनः**) सम्पूर्ण सेनाओं से युक्त (**विद्वान्**) विद्वान् जन विद्या को (**वहते**) प्राप्त होता वा प्राप्त कराता है, तब यह (**अविद्वान्**) विद्या से रहित जन (**शृणवत्**) श्रवण करे और (**वेदत्**) विशेष करके जाने (**च**) भी॥३॥

भावार्थः-दो उपाय विद्या की प्राप्ति के लिए जानने चाहियें, उनमें प्रथम उपाय यह कि विद्या का अध्यापक यथार्थवक्ता होवे तथा सुनने और पढ़ने वाला पवित्र, कपटरहित और पुरुषार्थी होवे। दूसरा उपाय यह है कि श्रेष्ठ विद्वानों का कर्म्म देख कर आप भी वैसा ही कर्म्म करे, ऐसा करने पर सब को विद्या का लाभ होवे॥३॥

अथ वीरकर्म्माह॥

अब वीरों के कर्म्म को कहते हैं॥

स्थि॒रं मन॑श्चकृषे जा॒त इ॑न्द्र॒ वेषी॑देको॑ यु॒धये॒ भूय॑सश्चित्।

अश्मा॑नं चि॒च्छव॑सा दिद्यु॒तो॒ वि वि॒दो गवा॑मू॒र्वमु॒स्रिया॑णाम्॥४॥

स्थि॒रम्। मन॑ः। च॒कृ॒षे॒। जा॒तः। इ॒न्द्र॒ः। वेषि॑। इत्। एक॑ः। यु॒धये॑। भूय॑सः। चि॒त्। अश्मा॑नम्। चि॒त्। शव॑सा। दि॒द्यु॒त॒ः। वि॒। वि॒दः। गवा॑म्। ऊ॒र्वम्। उ॒स्रिया॑णाम्॥४॥

पदार्थः-(**स्थिरम्**) निश्चलम् (**मनः**) अन्तःकरणम् (**चकृषे**) करोति (**जातः**) प्रकटः सन् (**इन्द्र**) योगैश्वर्यमिच्छुक (**वेषि**) व्याप्नोषि (**इत्**) एव (**एकः**) (**युधये**) युद्धाय (**भूयसः**) बहून् (**चित्**) अपि (**अश्मानम्**) मेघम् (**चित्**) अपि (**शवसा**) बलेन (**दिद्युतः**) प्रकाशयतः (**वि**) (**विदः**) वेदय (**गवाम्**) गन्तॄणाम् (**ऊर्वम्**) हिंसकम् (**उस्रियाणाम्**) रश्मीनाम्॥४॥

अन्वयः-हे इन्द्र! यथैकः सूर्य्यो युधये शवसाऽश्मानं भूयसश्चिद् घनाँश्च गवामुस्रियाणामूर्वं चकृषे द्यौ चिद्वि दिद्युतस्तथा त्वं विजयं विदः। एको जातस्त्वं यतो मनः स्थिरं चकृषे तस्मादिद् राज्यं वेषि॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यमेघौ युद्धचेते तथा राजा शत्रुणा सह स-ामं कुर्य्याद्यथा सूर्य्यः किरणैः सर्वं कार्यं साध्नोति तथा राजा सेनाऽमात्यैः सर्वं राजकृत्यं साधयेत्॥४॥

पदार्थः-हे **(इन्द्र)** योगजन्य ऐश्वर्य की इच्छा करने वाले जन! जिस प्रकार **(एकः)** एक सूर्य्य **(युधये)** युद्ध के लिये **(शवसा)** बल से **(अश्मानम्)** मेघ को और **(भूयसः)** बहुत **(चित्)** भी मेघों को तथा **(गवाम्)** चलने वाले **(उस्रियाणाम्)** किरणों के **(ऊर्वम्)** नाश करने वालों को **(चकृषे)** करता और दोनों **(चित्)** निश्चित **(वि, दिद्युतः)** प्रकाश करते हैं, वैसे आप विजय को **(विदः)** जनाइये, एक **(जातः)** प्रकट हुए आप जिससे **(मनः)** अन्तःकरण को **(स्थिरम्)** निश्चल करते हो **(इत्)** इसी से राज्य को **(वेषि)** प्राप्त होते हो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य और मेघ परस्पर युद्ध करते हैं, वैसे राजा शत्रु के साथ संग्राम करे और जैसे सूर्य्य किरणों से सब कार्य्य को सिद्ध करता है, वैसे राजा सेना और मन्त्रीजनों से सम्पूर्ण राजकृत्य सिद्ध करे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

पुरो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत्।

अतश्चिदिन्द्रादभयन्त देवा विश्वा अपो अजयद्दासपत्नीः॥५॥२६॥

पुरः। यत्। त्वम्। परमः। आऽजनिष्ठाः। परावति। श्रुत्यम्। नाम। बिभ्रत्। अतः। चित्। इन्द्रात्। अभयन्त। देवाः। विश्वाः। अपः। अजयत्। दासऽपत्नीः॥५॥

पदार्थः-**(परः)** उत्कृष्टः **(यत्)** यः **(त्वम्)** **(परमः)** अतीव श्रेष्ठः **(आजनिष्ठाः)** समन्ताज्जायसे **(परावति)** दूरे देशे **(श्रुत्यम्)** श्रुतौ श्रवणे भवम् **(नाम)** संज्ञाम् **(बिभ्रत्)** **(अतः)** **(चित्)** अपि **(इन्द्रात्)** विद्युतः **(अभयन्त)** **(देवाः)** विद्वांसः **(विश्वाः)** सर्वाः **(अपः)** जलानि **(अजयत्)** जयति **(दासपत्नीः)** यो जलं ददाति स दासो मेघः स पतिः पालको यासां ताः॥५॥

अन्वयः-हे विद्वन्! यत्त्वं परः परमः श्रुत्यं नाम बिभ्रत्सन्नाजनिष्ठाः स यथा परावति देशे स्थितः सूर्य्यो विश्वा दासपत्नीरपोऽजयद्यथा देवा इन्द्रादभयन्त तथा वर्त्तमानेऽतश्चित्सुखं वर्धय॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा दूरस्थोऽपि सूर्य्यः स्वप्रकाशेन प्रख्यातो वर्त्तते तथैव दूरे सन्तोऽप्याप्ताः प्रकाशितकीर्त्तयो भवन्ति॥५॥

पदार्थः-हे विद्वन्! **(यत्)** जो **(त्वम्)** आप **(परः)** उत्तम **(परमः)** अत्यन्त श्रेष्ठ **(श्रुत्यम्)** श्रवण में उत्पन्न **(नाम)** संज्ञा को **(बिभ्रत्)** धारण करते हुए **(आजनिष्ठाः)** सब प्रकार से प्रकट होते हो, वह

जैसे (**परावति**) दूर देश में स्थित सूर्य्य (**विश्वाः**) सम्पूर्ण (**दासपत्नीः**) जल का देने वाला मेघ जिनका पालनकर्त्ता ऐसे (**अपः**) जलों को (**अजयत्**) जीतता है और जैसे (**देवाः**) विद्वान् जन (**इन्द्रात्**) बिजुली से (**अभयन्त**) नहीं डरते हैं, वैसे वर्त्तमान होने पर (**अतः**) इससे (**चित्**) भी सुख की वृद्धि करिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे दूरस्थित भी सूर्य्य अपने प्रकाश से प्रसिद्ध होता है, वैसे ही दूर वर्त्तमान भी यथार्थवक्ता जन प्रकाशित यश वाले होते हैं॥५॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वन्त्यन्धः।
अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिन्द्रः॥६॥

तुभ्य। इत्। एते। मरुतः। सुऽशेवाः। अर्चन्ति। अर्कम्। सुन्वन्ति। अन्धः। अहिम्। ओहानम्। अपः। आऽशयानम्। प्र। मायाभिः। मायिनम्। सक्षत्। इन्द्रः॥६॥

पदार्थः-(**तुभ्य**) तुभ्यम्। अत्र विभक्तेर्लुक् (**इत्**) एव (**एते**) (**मरुतः**) ऋत्विजः (**सुशेवाः**) सुष्ठुसुखाः (**अर्चन्ति**) सत्कुर्वन्ति (**अर्कम्**) सत्करणीयम् (**सुन्वन्ति**) निष्पादयन्ति (**अन्धः**) अन्नम् (**अहिम्**) मेघम् (**ओहानम्**) त्यजन्तम् (**अपः**) जलानि (**आशयानम्**) यः समन्ताच्छेते तम् (**प्र**) (**मायाभिः**) प्रज्ञाभिः (**मायिनम्**) कुत्सिता माया प्रज्ञा विद्यते यस्य तम् (**सक्षत्**) समवैति (**इन्द्रः**) विद्युत्॥६॥

अन्वयः-हे विद्वन्! यथेन्द्रो मायाभिराशयानं मायिनमोहानमहिं सक्षद्धत्वाऽपो भूमौ निपातयति यथैते तुभ्य सुशेवा मरुतोऽर्कमर्चन्त्यन्धः सुन्वन्ति तथेत् तुभ्यं सर्वे विद्वांसस्सुखं प्र यच्छन्तु॥६॥

भावार्थः-त एव विद्वांसो जगतः सुखकरा भवन्ति ये सूर्य्यमेघवज्जगतः सुखकराः सन्ति स्वात्मवदन्येषां सुखकरा भवन्ति॥६॥

पदार्थः-हे विद्वन्! जैसे (**इन्द्रः**) बिजुली (**मायाभिः**) बुद्धियों से (**आशयानम्**) चारों ओर शयन करते हुए (**मायिनम्**) निकृष्ट बुद्धि वाले और (**ओहानम्**) त्याग करते हुए (**अहिम्**) मेघ को (**सक्षत्**) प्राप्त होता और ताड़न करके (**अपः**) जलों को भूमि में गिराता है और जैसे (**एते**) ये (**तुभ्य**) आपके लिये (**सुशेवाः**) उत्तम सुख वाले (**मरुतः**) ऋत्विक् मनुष्य (**अर्कम्**) सत्कार करने योग्य का (**अर्चन्ति**) सत्कार करते हैं और (**अन्धः**) अन्न को (**सुन्वन्ति**) उत्पन्न करते हैं, वैसे (**इत्**) ही आपके लिये सम्पूर्ण विद्वान् जन सुख (**प्र**) देवें॥६॥

भावार्थः-वे ही विद्वान् जन जगत् के सुख करने वाले होते हैं, जो सूर्य्य और मेघ के समान जगत् के सुख करने वाले हैं तथा अपने समान दूसरों के सुख करने वाले होते हैं॥६॥

अथवीरविषयमाह॥

अब वीर विषय को अगले मन्त्र में कहते हैं॥

वि षू मृधो॑ जनुषा दान॒मिन्व॒न्नहन् गवा॑ मघवन्त्संचका॒नः।

अत्रा॑ दा॒सस्य॒ नमु॑चे॒: शिरो॒ यदव॑र्तयो॒ मन॑वे गा॒तुमि॒च्छन्॥७॥

वि। सु। मृधः। जनुषा। दानम्। इन्वन्। अहन्। गवा। मघऽवन्। सम्ऽचकानः। अत्र। दासस्य। नमुचेः। शिरः। यत्। अवर्तयः। मनवे। गातुम्। इच्छन्॥७॥

पदार्थः-(वि) विशेषेण **(सु)** शोभने **(मृधः)** स-ामान् **(जनुषा)** जन्मना **(दानम्)** **(इन्वन्)** प्राप्नुवन् **(अहन्)** हन्ति **(गवा)** किरणेन **(मघवन्)** धनैश्वर्य्याढ्य **(सञ्चकानः)** सम्यक् कामयमानः **(अत्रा)** अस्मिन् व्यवहारे। अत्र **ऋचि तुनुघे**ति दीर्घः। **(दासस्य)** सेवकवद् वर्त्तमानस्य मेघस्य **(नमुचेः)** यः स्वं रूपं न मुञ्चति तस्य **(शिरः)** उत्तमाङ्गम् **(यत्)** **(अवर्त्तयः)** वर्त्तयेः **(मनवे)** मननशीलाय धार्मिकाय मनुष्याय **(गातुम्)** भूमिं वाणीं वा **(इच्छन्)**॥७॥

अन्वयः-हे मघवन् राजंस्त्वं जनुषा दानमिन्वन् सन् यथा सूर्य्यो गवा मेघमंहस्तथा मृधो जहि। सञ्चकानः सन् यथात्रा सूर्य्यो नमुचेर्दासस्य मेघस्य शिरो व्यहँस्तथा त्वं मनवे यद्यां गातुमिच्छंस्तदर्थं शत्रुशिरः स्ववर्त्तयः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजानो! यः सूर्यो मेघं जित्वा जगत्सुखयति तथा दुष्टाञ्छत्रून् विजित्य प्रजाः सुखयन्तु॥७॥

पदार्थः-हे **(मघवन्)** धन और ऐश्वर्य से युक्त राजन्! आप **(जनुषा)** जन्म से **(दानम्)** दान को **(इन्वन्)** प्राप्त होते हुए जैसे सूर्य्य **(गवा)** किरण से मेघ का **(अहन्)** नाश करता है, वैसे **(मृधः)** संग्रामों को जीतिये और **(सञ्चकानः)** उत्तम प्रकार कामना करते हुए जैसे **(अत्रा)** इस व्यवहार में सूर्य **(नमुचेः)** अपने स्वरूप को नहीं त्यागने वाले **(दासस्य)** सेवक के सदृश वर्त्तमान मेघ के **(शिरः)** उत्तम अङ्ग का **(वि)** विशेष करके नाश करता है, वैसे आप **(मनवे)** विचारशील धार्मिक मनुष्य के लिये **(यत्)** जिस **(गातुम्)** भूमि वा वाणी की **(इच्छन्)** इच्छा करते हुए हो, उसके लिये शत्रु के शिर को **(सु)** उत्तम प्रकार **(अवर्त्तयः)** नाश करिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजजनो! जो सूर्य मेघ को जीत कर जगत् को सुख देता है, वैसे दुष्ट शत्रुओं को जीत कर प्रजाओं को सुख दीजिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

युजं॒ हि मामकृ॑था॒ आदिदि॑न्द्र॒ शिरो॑ दा॒सस्य॒ नमु॑चेर्मथा॒यन्।

अश्मा॑नं चित्स्व॒र्यं॑१ वर्त॑मानं॒ प्र च॒क्रिये॑व॒ रोद॑सी मरुद्भ्यः॥८॥

युजꣳम्। हि। माम्। अकृꣳथाः। आत्। इत्। इन्द्र। शिरꣳः। दासस्यꣳ। नमुचेः। मथायन्। अश्मानꣳम्। चित्। स्वर्यꣳम्। वर्तꣳमानम्। प्र। चक्रियाꣳइव। रोदꣳसी इतिꣳ। मरुत्ऽभ्यꣳः॥८॥

पदार्थः-(युजम्) युक्तम् **(हि) (माम्) (अकृथाः)** कुर्याः **(आत्) (इत्) (इन्द्र)** राजन् **(शिरः)** शिरोवद्वर्त्तमानं धनम् **(दासस्य)** जलस्य दातुः **(नमुचेः)** प्रवाहरूपेणाऽविनाशिनो मेघस्य **(मथायन्)** मन्थनं कुर्वन् **(अश्मानम्)** अश्नुवन्तं मेघम् **(चित्)** अपि **(स्वर्यम्)** स्वरेषु शब्देषु साधुः **(वर्त्तमानम्) (प्र) (चक्रियेव)** यथा चक्राणि तथा **(रोदसी)** द्यावापृथिव्यौ **(मरुद्भ्यः)** वायुभ्यः॥८॥

अन्वयः-हे इन्द्र! यथा सूर्यो नमुचेर्दासस्य शिरो मथायञ्चिदपि स्वर्यं वर्त्तमानमश्मानं पृथिव्या सह युनक्ति चक्रियेव मरुद्भ्यो रोदसी भ्रामयति तथादिन्मां हि युजं प्राकृथाः॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे राजानो! यूयं यथा सूर्यो मेघं वर्षयित्वा जगत्सुखं वायुना भूगोलान् भ्रामयित्वाऽहर्निशं च करोति तथैव विद्याविनयौ राज्ये प्रवर्ष्य स्वे स्वे कर्मणि सर्वांश्चालयित्वा सुखविजयौ तनयत॥८॥

पदार्थः-हे **(इन्द्र)** राजन्! जैसे सूर्य्य **(नमुचेः)** प्रवाहरूप से नहीं नाश होने और **(दासस्य)** जल देने वाले मेघ के **(शिरः)** शिर के सदृश वर्त्तमान कठिन अङ्ग का **(मथायन्)** मन्थन करता हुआ **(चित्)** भी **(स्वर्यम्)** शब्दों में श्रेष्ठ **(वर्त्तमानम्)** वर्त्तमान **(अश्मानम्)** व्याप्त होते हुए मेघ को पृथिवी के साथ युक्त करता और **(चक्रियेव)** जैसे चक्र वैसे **(मरुद्भ्यः)** पवनों से **(रोदसी)** अन्तरिक्ष और पृथिवी को घुमाता है, वैसे **(आत्)** अनन्तर **(इत्)** ही **(माम्)** मुझ को **(हि)** ही **(युजम्)** युक्त **(प्र, अकृथाः)** अच्छे प्रकार करिये॥८॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे राजजनो! आप लोग जैसे सूर्य्य मेघ को वर्षाय जगत् के सुख को और पवन से भूगोलों को घुमा के दिन रात्रि करता है, वैसे ही विद्या और विनय की राज्य में वृष्टि कर अपने-अपने कर्म में सब को चलाय के सुख और विजय को उत्पन्न करो॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स्त्रियो॒ हि दा॒स आयु॑धानि च॒क्रे किं मा॑ करन्नब॒ला अ॑स्य॒ सेना॑ः।

अ॒न्तर्ह्यख्यदु॒भे अ॑स्य॒ धेने॒ अथो॒ प्रैद्यु॒धये॒ दस्यु॒मिन्द्रः॑॥९॥

स्त्रियꣳः। हि। दा॒सः। आयु॑धानि। च॒क्रे। किम्। मा॒। क॒र॒न्। अ॒ब॒लाः। अ॒स्य॒। सेना॑ꣳः। अ॒न्तः। हि। अख्यꣳत्। उ॒भे इतिꣳ। अ॒स्य॒। धेने॒ इतिꣳ। अथꣳ। उपꣳ। प्र। ऐत्। यु॒धयेꣳ। दस्यु॑म्। इन्द्रꣳः॥९॥

पदार्थः-(स्त्रियः) (**हि**) **(दासः)** सेवक इव मेघः **(आयुधानि)** अस्यादीनि शस्त्राणीव **(चक्रे)** करोति **(किम्) (मा)** माम् **(करन्)** कुर्य्यात् **(अबलाः)** अविद्यमानं बलं यासां ताः **(अस्य) (सेनाः)**

(अन्तः) **(हि)** किल **(अख्यत्)** प्रकटयति **(उभे)** मन्दतीव्रे **(अस्य)** मेघस्य **(धेने)** वाचौ **(अथ)** **(उप)** **(प्र)** **(ऐत्)** प्राप्नोति **(युधये)** स-ामाय **(दस्युम्)** **(इन्द्रः)** सूर्य इव राजा॥९॥

अन्वयः-हे राजन्! यथा दासः स्त्रिय आयुधानि चक्रेऽस्याबलाः सेनाः सन्तीन्द्रो हि मा किं करन्। योऽन्तरख्यद् यस्यास्योभे धेने वर्त्तेतेऽथ यमिन्द्रो युधय उप प्रैत् तद्वद्वर्त्तमानं हि दस्युं राजा वशं करन्॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव दासा येषां स्त्रिय एव शत्रुवद्विजयप्रदा वर्त्तेरन् यथा सूर्य्यमेघयोः स-ामो वर्त्तते तथैव दुष्टैः सह राज्ञः स-ामो वर्त्तताम्॥९॥

पदार्थः-हे राजन्! जैसे **(दासः)** सेवक के सदृश मेघ **(स्त्रियः)** स्त्रियों को **(आयुधानि)** तलवार आदि शस्त्रों के सदृश **(चक्रे)** करता है **(अस्य)** इसकी **(अबलाः)** बल से रहित **(सेनाः)** सेनायें है **(इन्द्रः)** सूर्य्य के सदृश राजा **(हि)** ही **(मा)** मुझ को **(किम्)** क्या **(करन्)** करे और जो **(अन्तः)** अन्तःकरण में **(अख्यत्)** प्रकट करता है और जिस **(अस्य)** इस मेघ की **(उभे)** दोनों अर्थात् मन्द और तीव्र **(धेने)** वाणी वर्तमान हैं **(अथ)** अनन्तर जिसको सूर्य्य **(युधये)** संग्राम के लिये **(उप, प्र, ऐत्)** समीप प्राप्त होता है, उसके सदृश वर्त्तमान **(हि)** निश्चित **(दस्युम्)** दुष्ट डाकू को राजा वश में करे॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही जन दास हैं कि जिनकी स्त्रियाँ ही शत्रु के सदृश विजय को देने वाली वर्त्तमान होवें और जैसे सूर्य्य और मेघ का स-ाम है, वैसे ही दुष्टजनों के साथ राजा का स-ाम हो॥९॥

अथ विद्वदुपदेशविषयमाह॥

अब विद्वानों के उपदेश विषय को कहते हैं॥

समत्र गावोऽभितोऽनवन्तेहेह वत्सैर्वियुता यदासन्।

सं ता इन्द्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमन्दन्॥१०॥२७॥

सम्। अत्र। गावः। अभितः। अनवन्त। इहऽइह। वत्सैः। विऽयुताः। यत्। आसन्। सम्। ताः। इन्द्रः। असृजत्। अस्य। शाकैः। यत्। ईम्। सोमासः। सुऽसुताः। अमन्दन्॥१०॥

पदार्थः-**(सम्)** **(अत्र)** **(गावः)** किरणाः **(अभितः)** **(अनवन्त)** स्तुवन्तु **(इहेह)** अस्मिञ्जगति **(वत्सैः)** **[(वियुताः)]** वियुक्ताः **(यत्)** याः **(आसन्)** भवन्ति **(सम्)** **(ताः)** **(इन्द्रः)** सूर्य्यः **(असृजत्)** सृजति **(अस्य)** मेघस्य **(शाकैः)** शक्तिभिः **(यत्)** ये **(ईम्)** सर्वतः **(सोमासः)** पदार्था ऐश्वर्यवन्तो जीवाः **(सुषुताः)** सुष्ठु निष्पन्नाः **(अमन्दन्)** आनन्दन्ति॥१०॥

अन्वयः-हे मनुष्या! यदेहेह गावो वत्सैर्वियुता अभित आसँस्ता भवन्तोऽनवन्त। या अस्य शाकैरत्रेन्द्रो गाः समसृजदीं सुषुताः सोमासो यदमन्दँस्तानिन्द्रः समसृजत्॥१०॥

भावार्थः-यथा विवत्सा गावो न शोभन्ते तथैवापत्यवद्वर्त्तमानैर्घनैर्वियुक्तो मेघो न शोभते॥१०॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**इहेह**) इस जगत् में (**गावः**) किरणें (**वत्सैः**) बछड़ों से (**वियुताः**) वियुक्त (**अभितः**) चारों ओर से (**आसन्**) होती हैं (**ताः**) उनकी आप लोग (**अनवन्त**) स्तुति प्रशंसा करें और जिसको (**अस्य**) इस मेघ के (**शाकैः**) सामर्थ्यों से (**अत्र**) इस संसार में (**इन्द्रः**) सूर्य्य (**सम्**) अच्छे प्रकार (**असृजत्**) उत्पन्न करता है वा (**ईम्**) सब ओर से (**सुषुताः**) उत्तम प्रकार उत्पन्न (**सोमासः**) पदार्थ वा ऐश्वर्य्य वाले जीव (**यत्**) जो (**अमन्दन्**) आनन्दित होते हैं, उनको सूर्य्य (**सम्**) एक साथ उत्पन्न करता है॥१०॥

भावार्थः-जैसे बछड़ों से वियुक्त गौएं नहीं शोभित होती हैं, वैसे ही सन्तानों के सदृश वर्त्तमान सघन अवयवों से रहित मेघ नहीं शोभित होता है॥१०॥

अथ वीरराजविषयमाह॥

अब वीरराजविषय को कहते हैं॥

यदीं सोमा बभ्रुधूता अमन्दन्नरोरवीद् वृषभः सादनेषु।

पुरंदरः पपिवाँ इन्द्रो अस्य पुनर्गवामददादुस्रियाणाम्॥ ११॥

यत्। ईम्। सोमाः। बभ्रुऽधूताः। अमन्दन्। अरोरवीत्। वृषभः। सदनेषु। पुरंऽदरः। पपिऽवान्। इन्द्रः। अस्य। पुनः। गवाम्। अददात्। उस्रियाणाम्॥ ११॥

पदार्थः-(**यत्**) यतः (**ईम्**) सर्वतः (**सोमाः**) सोमौषधिवद्वर्त्तमानाः (**बभ्रुधूताः**) बभ्रुभिर्धृतविद्यैर्धूताः पवित्रीकृताः (**अमन्दन्**) आनन्दन्ति। (**अरोरवीत्**) भृशं शब्दायते (**वृषभः**) वर्षकः (**सादनेषु**) स्थानेषु। अत्रा**न्येषामपी**ति दीर्घः। (**पुरन्दरः**) यः पुराणि दृणाति सः (**पपिवान्**) य पिबति सः (**इन्द्रः**) सूर्यः (**अस्य**) (**पुनः**) (**गवाम्**) (**अददात्**) ददाति (**उस्रियाणाम्**) किरणानाम्॥११॥

अन्वयः-हे राजन्! यथेन्द्रोऽस्य मेघस्य सादनेषु पपिवान् पुरन्दर उस्रियाणां गवां पुनस्तेजोऽददाद् वृषभः सन्नरोरवीद् यद्येन बभ्रुधूताः सोमा ईं जायन्ते यतः प्राणिनोऽमन्दँस्तथा त्वं प्रजासु वर्त्तस्व॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सूर्यमेघस्वभावः सन्नष्टौ मासान् प्रजाभ्यः करं गृह्णाति चतुरो मासान् यथेष्टान् पदार्थान् ददात्येवं सकलाः प्रजा रञ्जयति स एव सर्वत ऐश्वर्य्यवान् भवति॥११॥

पदार्थः-हे राजन्! जैसे (**इन्द्रः**) सूर्य (**अस्य**) इस मेघ के (**सादनेषु**) स्थानों में (**पपिवान्**) पीवने और (**पुरन्दरः**) पुरों को नाश करने वाला (**उस्रियाणाम्**) किरणों और (**गवाम्**) गौओं के (**पुनः**) फिर तेज को (**अददात्**) देता है (**वृषभः**) वृष्टि करने वाला हुआ (**अरोरवीत्**) अत्यन्त शब्द करता है (**यत्**) जिससे (**बभ्रुधूताः**) विद्या को धारण किये हुओं से पवित्र किये गये (**सोमाः**) सोम ओषधि के सदृश वर्त्तमान पदार्थ (**ईम्**) सब ओर से उत्पन्न होते हैं, जिससे प्राणी (**अमन्दन्**) आनन्दित होते हैं, वैसे आप प्रजाओं में वर्त्ताव कीजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सूर्य्य [और] मेघ के स्वभाव के सदृश स्वभाव वाला हुआ धर्म्मशास्त्र में कहे हुए अष्ट मास परिमाण परिमित प्रजाओं से कर लेता है और चार मास यथेष्ट पदार्थों को देता है, इस प्रकार सब प्रजाओं को प्रसन्न करता है, वही सब प्रकार से ऐश्वर्यवान् होता है॥११॥

अथाग्निदृष्टान्तेन राजविषयमाह॥

अब अग्निदृष्टान्त से राजविषय को कहते हैं॥

भद्रमिदं रुशमा अग्ने अक्रन् गवां चत्वारि ददतः सहस्रा।

ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम्॥१२॥

भद्रम्। इदम्। रुशमाः। अग्ने। अक्रन्। गवाम्। चत्वारि। ददतः। सहस्रा। ऋणम्ऽचयस्य। प्रऽयता। मघानि। प्रति। अग्रभीष्म। नृऽतमस्य। नृणाम्॥१२॥

पदार्थः-(**भद्रम्**) कल्याणम् (**इदम्**) (**रुशमाः**) ये रुशान् हिंसकान् मिन्वति (**अग्ने**) पावकवद्राजन् (**अक्रन्**) कुर्वन्ति (**गवाम्**) किरणानाम् (**चत्वारि**) (**ददतः**) (**सहस्रा**) सहस्राणि (**ऋणञ्चयस्य**) ऋणं चिनोति येन तस्य (**प्रयता**) प्रयत्नेन (**मघानि**) धनानि (**प्रति**) (**अग्रभीष्म**) गृह्णीयाम (**नृतमस्य**) (**नृणाम्**)॥१२॥

अन्वयः-हे अग्ने! यस्यर्णञ्चयस्य गवां चत्वारि सहस्रा ददतः सूर्यस्येदं भद्रं रुशमा अक्रँस्तद्वद्वर्त्तमानस्य तस्य नृणां नृतमस्य तव मघानि वयं प्रयता प्रत्यग्रभीष्म॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्यः सहस्राणि किरणान् प्रदाय सर्वं जगदाननन्दयति तथैव राजाऽसङ्ख्याञ्छुभान् गुणान् दत्त्वा प्रजाः सततं हर्षयेत्॥१२॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश तेजस्वी राजन्! जिस (**ऋणञ्चयस्य**) अर्थात् जिससे ऋण बटोरता है उसके और (**गवाम्**) किरणों के (**चत्वारि**) चार (**सहस्रा**) हजार को (**ददतः**) देते हुए सूर्य के (**इदम्**) इस (**भद्रम्**) कल्याण को (**रुशमाः**) हिंसा करने वालों के फेंकने वाले (**अक्रन्**) करते हैं, उसके सदृश वर्त्तमान उस (**नृणाम्**) मनुष्यों के (**नृतमस्य**) नृतम् अर्थात् अत्यन्त मनुष्यपनयुक्त श्रेष्ठ आपके (**मघानि**) धनों को हम लोग (**प्रयता**) प्रयत्न से (**प्रति, अग्रभीष्म**) प्रतीति से ग्रहण करें॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य सहस्रों किरणों को देकर सम्पूर्ण जगत् को आनन्दित करता है, वैसे ही राजा असंख्य उत्तम गुणों को देकर प्रजाओं को निरन्तर प्रसन्न करे॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सुपेशसं माव सृजन्त्यस्तं गवां सहस्रै रुशमासो अग्ने।

तीव्रा इन्द्रंममन्दुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः॥ १३॥

सुऽपेशसम्। मा। अव। सृजन्ति। अस्तम्। गवाम्। सहस्रैः। रुशमासः। अग्ने। तीव्राः। इन्द्रम्। अममन्दुः। सुतासः। अक्तोः। विऽउष्टौ। परिऽतक्म्यायाः॥ १३॥

पदार्थः-(सुपेशसम्) अतीवसुन्दररूपम् **(मा)** माम् **(अव) (सृजन्ति) (अस्तम्)** गृहम् **(गवाम्)** किरणानाम् **(सहस्रैः) (रुशमासः)** हिंसकहिंसकाः **(अग्ने) (तीव्राः)** तीक्ष्णस्वभावाः **(इन्द्रम्)** सूर्यमिव राजानम् **(अममन्दुः)** आनन्दयेयुः **(सुतासः)** विद्यादिशुभगुणैर्निष्पन्नाः **(अक्तोः)** रात्रेः **(व्युष्टौ)** प्रभातवेलायाम् **(परितक्म्यायाः)** परितः सर्वतस्तकन्ति हसन्ति यैः कर्म्मभिस्तेषु भवायाः॥ १३॥

अन्वयः-हे अग्ने! ये गवां सहस्रै रुशमासस्तीव्राः सुतासः परितक्म्याया अक्तोर्व्युष्टौ सुपेशसं माऽस्तं गृहमिवाव सृजन्तीन्द्रममन्दुस्ताँस्त्वं विज्ञाय यथावत् सेवस्व॥ १३॥

भावार्थः-हे मनुष्या! यदि विद्युत्सूर्यरूपोऽग्निर्युक्त्या युष्माभिः सेव्येत तर्ह्यहर्निशं सुखैनैव गच्छेत्॥ १३॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान राजन्! जो **(गवाम्)** किरणों के **(सहस्रैः)** सहस्रों समूहों से **(रुशमासः)** हिंसकों के नाश करने वाले **(तीव्राः)** तीक्ष्ण स्वभावयुक्त जो **(सुतासः)** विद्या आदि उत्तम गुणों से उत्पन्न हुए **(परितक्म्यायाः)** सब प्रकार हंसते हैं, जिन कर्म्मों से उनमें हुई **(अक्तोः)** रात्रि की **(व्युष्टौ)** प्रभातवेला में **(सुपेशसम्)** अत्यन्त सुन्दर रूप वाले **(मा)** मुझे को **(अस्तम्)** गृह के सदृश **(अव, सृजन्ति)** उत्पन्न करते हैं और **(इन्द्रम्)** सूर्य्य के सदृश तेजस्वी राजा को **(अममन्दुः)** आनन्दित करें, उनको आप जान के यथावत् सेवा करो॥ १३॥

भावार्थः-हे मनुष्यो! जो बिजुली और सूर्यरूप अग्नि युक्तिपूर्वक आप लोगों से सेवन किया जाये तो दिन और रात्रि सुखपूर्वक व्यतीत होवे॥ १३॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम्।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत् सहस्रा॥ १४॥

औच्छत्। साः। रात्री। परिऽतक्म्या। या। ऋणम्ऽचये। राजनि। रुशमानाम्। अत्यः। न। वाजी। रघुः। अज्यमानाः। बभ्रुः। चत्वारि। असनत्। सहस्रा॥ १४॥

पदार्थः-(औच्छत्) निवासयति **(सा) (रात्री) (परितक्म्या)** आनन्दप्रदा **(या) (ऋणञ्चये)** ऋणं चिनोति यस्मात्तस्मिन् **(राजनि) (रुशमानाम्)** हिंसकमन्त्रीणाम् **(अत्यः)** अतति मार्गं व्याप्नोति सः **(न)** इव **(वाजी)** वेगवान् **(रघुः)** लघुः **(अज्यमानः)** चाल्यमानः **(बभ्रुः)** धारकः पोषको वा **(चत्वारि) (असनत्)** विभजति **(सहस्रा)** सहस्राणि॥ १४॥

अन्वयः-हे मनुष्या! या रुशमानामृणञ्चये राजनि रघुरज्यमानो बभ्रुरत्यो वाजी न चत्वारि सहस्रासनत् सा परितक्म्या रात्री सर्वानौच्छदिति विजानन्तु॥१४॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! यूयं रात्रिदिनकृत्यानि विज्ञाय स्वयमनुष्ठाय सुपरीक्ष्य राजादिभ्यः उपदिशत यत एते सर्वे सुखिनः स्युर्यथा सद्योगाम्यश्वो धावति तथैवाऽहर्निशं धावतीति विज्ञेयम्॥१४॥

पदार्थः-हे मनुष्यो! **(या)** जो **(रुशमानाम्)** हिंसा करने वाले मन्त्रियों के **(ऋणञ्चये)** ऋण को इकट्ठा करता है, जिससे उस **(राजनि)** राजा में **(रघुः)** छोटा **(अज्यमानः)** चलाया गया **(बभ्रुः)** धारण वा पोषण करने वाले और **(अत्यः)** मार्ग को व्याप्त होने वाले **(वाजी)** वेगयुक्त के **(न)** सदृश **(चत्वारि)** चार **(सहस्रा)** सहस्रों का **(असनत्)** विभाग करता है **(सा)** वह **(परितक्म्या)** आनन्द देने वाली **(रात्री)** रात्री सम्पूर्णों को **(औच्छत्)** निवास देती है, यह जानो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! आप लोग रात्रि और दिन के कृत्यों को जान कर और स्वयं करके, उत्तम परीक्षा करके राजा आदिकों के लिये उन कृत्यों का उपदेश दीजिये, जिससे ये सब सुखी हों और जैसे शीघ्र चलने वाला घोड़ा दौड़ता है, वैसे ही दिन और रात्रि व्यतीत होता है, यह जानना चाहिये॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

चतुः॑सहस्रं॒ गव्य॑स्य॒ पुश्वः॒ प्रत्य॑ग्रभीष्म रु॒शमे॑ष्वग्ने।

घ॒र्मश्चि॑त्त॒प्तः प्र॒वृजे॒ य आसी॑दय॒स्मय॒स्तम्वादा॑म॒ विप्राः॑॥१५॥२८॥

चतुः॑ऽसहस्रम्। गव्य॑स्य। पुश्वः॑। प्रति॑। अ॒ग्र॒भी॒ष्म॒। रु॒शमे॑षु। अ॒ग्ने॒। घ॒र्मः॑। चि॒त्। त॒प्तः॑। प्र॒ऽवृजे॑। यः॑। आसी॑त्। अ॒य॒स्मयः॑। तम्। ऊँ॒ इति॑। आदा॑म। विप्राः॑॥१५॥

पदार्थः-**(चतुःसहस्रम्)** चत्वारि सहस्राणि सङ्ख्या यस्य तम् **(गव्यस्य)** गवां किरणानां विकारस्य **(पश्वः)** पशोः **(प्रति)** **(अग्रभीष्म)** प्रतिगृह्णीयाम **(रुशमेषु)** हिंसकमन्त्रिषु **(अग्ने)** अग्निरिव वर्त्तमान राजन् **(घर्मः)** प्रतापः **(चित्)** अपि **(तप्तः)** **(प्रवृजे)** प्रवृजते यस्मिँस्तस्मिन् **(यः)** **(आसीत्)** अस्ति **(अयस्मयः)** हिरण्यमिव तेजोमयः **(तम्)** **(उ)** **(आदाम)** समन्ताद् दद्याम **(विप्राः)** मेधाविनः॥१५॥

अन्वयः-हे अग्ने! योऽयस्मयस्तप्तो घर्मः प्रवृजे रुशमेष्वासीत्तं चतुःसहस्रं गव्यस्य पश्वो यथा वयं प्रत्यग्रभीष्म तथा त्वं गृहाण। हे विप्रा! युष्मभ्यं तमु वयमादाम तमस्मभ्यं यूयं चिद् दत्त॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः शीतोष्णसेवनं युक्त्या कर्त्तुं जानन्त्येतद्विद्यां परस्परं ददति ते सर्वदाऽरोगा भवन्तीति॥१५॥

अत्रेन्द्रवीराग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिंशत्तमं सूक्तमष्टाविंशो वर्गश्च समाप्तः॥

पदार्थः-(अग्ने) अग्नि के सदृश वर्त्तमान राजन्! **(यः)** जो **(अयस्मयः)** सुवर्ण के सदृश तेजःस्वरूप **(तप्तः)** तापयुक्त **(घर्मः)** प्रताप **(प्रवृजे)** अच्छे प्रकार त्याग करते हैं जिसमें उसमें और **(रुशमेषु)** हिंसक मन्त्रियों में **(आसीत्)** वर्त्तमान है **(तम्)** उस **(चतुःसहस्रम्)** चार हजार संख्या युक्त को **(गव्यस्य)** किरणों के विकार और **(पश्वः)** पशु के सम्बन्ध में जैसे हम लोग **(प्रति, अग्रभीष्म)** ग्रहण करें, वैसे आप ग्रहण करो और हे **(विप्राः)** बुद्धिमान् जनो! आप लोगों के लिये उस **(उ)** ही को हम लोग **(आदाम)** सब प्रकार से देवें, उसको हम लोगों के लिये आप लोग **(चित्)** भी दीजिये॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य शीत और उष्ण का सेवन युक्ति से करने को जानते हैं और इसकी विद्या को परस्पर देते हैं, वे सर्वदा रोगरहित होते हैं॥१५॥

इस सूक्त में राजा, वीर, अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तीसवां सूक्त और अट्ठाईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ त्रयोदशर्चस्यैकाधिकत्रिंशत्तमस्य सूक्तस्य अवस्युरात्रेय ऋषिः। १-८[२], १०-१३ इन्द्रः। ८[३] इन्द्रः कुत्सो वा। ८[४] इन्द्र उशना वा। ९ इन्द्रः कुत्सश्च देवताः। १, २, ५, ७, ९, ११ निचृत् त्रिष्टुप्। ३, ४, १० त्रिष्टुप्। ६ भुरिक् त्रिष्टुप्। १३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ८, १२ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रगुणानाह॥

अब तेरह ऋचा वाले इकतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्रगुणों को कहते हैं॥

इन्द्रो॒ रथा॑य॒ प्रव॑तं॑ कृणोति॒ यम॒ध्यस्था॑न्म॒घवा॑ वाज॒यन्त॑म्।
यू॒थेव॑ प॒श्वो व्यु॑नोति गो॒पा अरि॑ष्टो॒ याति॒ प्रथ॒मः सिषा॑सन्॥ १॥

इन्द्रः॑। रथा॑य। प्र॒ऽवत॑म्। कृ॒णो॒ति॒। यम्। अ॒धि॒ऽअस्था॑त्। म॒घऽवा॑। वा॒ज॒ऽयन्त॑म्। यू॒थाऽइ॑व। प॒श्वः। वि। उ॒नो॒ति॒। गो॒पाः। अरि॑ष्टः। या॒ति॒। प्र॒थ॒मः। सिसा॑सन्॥ १॥

पदार्थः-(इन्द्रः) सूर्य्य इव सेनेशः **(रथाय) (प्रवतम्)** निम्नं स्थलम् **(कृणोति)** करोति **(यम्) (अध्यस्थात्)** अधितिष्ठति **(मघवा)** परमपूजितधननिमित्तः **(वाजयन्तम्)** भूगोलान् गमयन्तम् **(यूथेव)** समूहानिव **(पश्वः)** पशूनाम् **(वि)** विशेषेण **(उनोति)** प्रेरयति **(गोपाः)** गवां पालकः **(अरिष्टः)** अहिंसितः **(याति)** गच्छति **(प्रथमः) (सिषासन्)** इच्छन्॥ १॥

अन्वयः-हे मनुष्या! यथाऽरिष्टः प्रथमः सिषासन् मघवेन्द्रो गोपाः पश्वो यूथेव लोकान् व्युनोति वाजयन्तं याति यं लोकमध्यस्थात् तेन रथाय प्रवतं कृणोति तथा भवानाचरतु॥ १॥

भावार्थः-अत्र **[**उपमा**]**वाचकलुप्तोपमालङ्कारौ। यो राजा रथादिगमनाय मार्गान्निर्माय रथादीनि यानान्यारुह्य गत्वाऽऽगत्य पशुपालः पशूनिव शत्रून्निरोध्य प्रजा सततं पालयति स एव सर्वतो वर्धते॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(अरिष्टः)** नहीं मारा गया **(प्रथमः)** प्रथम **(सिषासन्)** इच्छा करता हुआ **(मघवा)** अत्यन्त श्रेष्ठ धनरूप कारणयुक्त **(इन्द्रः)** सूर्य्य के सदृश सेना का ईश **(गोपाः)** गौओं का पालन करने वाला **(पश्वः)** पशुओं के **(यूथेव)** समूहों के सदृश लोकों की **(वि)** विशेष करके **(उनोति)** प्रेरणा करता और **(वाजयन्तम्)** भूगोलों को चलाते हुए को **(याति)** जाता है और **(यम्)** जिस लोक का **(अध्यस्थात्)** अधिष्ठित होता, उससे **(रथाय)** वाहन के लिये **(प्रवतम्)** नीचे स्थल को **(कृणोति)** करता है, वैसे आप आचरण करिये॥ १॥

भावार्थः-इस मन्त्र में **[**उपमा और**]** वाचकलुप्तोपमालङ्कार हैं। जो राजा रथ आदि के चलने के लिये मार्गों को सुडौल बनाय के उन मार्गों से रथ आदि वाहनों पर चढ़ के तथा जाय और आय के पशुओं का पालन करने वाला पशुओं को जैसे वैसे शत्रुओं को रोक के प्रजाओं का निरन्तर पालन करता है, वही सब प्रकार वृद्धि को प्राप्त होता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ प्र द्रव हरिवो मा वि वेनः पिशङ्गराते अभि नः सचस्व।
नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ॥ २॥

आ। प्र। द्रव। हरिऽवः। मा। वि। वेनः। पिशङ्गऽराते। अभि। नः। सचस्व। नहि। त्वत्। इन्द्र। वस्यः। अन्यत्। अस्ति। अमेनान्। चित्। जनिऽवतः। चकर्थ॥ २॥

पदार्थः-(आ) समन्तात् **(प्र)** **(द्रव)** धाव **(हरिवः)** प्रशस्ताश्वयुक्त **(मा)** **(वि)** **(वेनः)** कामयेः **(पिशङ्गराते)** यः पिशङ्गं सुवर्णादिकं राति ददाति तत्सम्बुद्धौ **(अभि)** **(नः)** अस्मान् **(सचस्व)** **(नहि)** **(त्वत्)** **(इन्द्र)** परमैश्वर्य्यप्रद **(वस्यः)** वसीयान् **(अन्यत्)** अन्यः **(अस्ति)** **(अमेनान्)** अविद्यमाना मेना प्रक्षेपकर्त्र्यः स्त्रियो येषां तान् **(चित्)** **(जनिवतः)** जन्मवतः **(चकर्थ)** कुरु॥ २॥

अन्वयः-हे हरिवः पिशङ्गरात इन्द्र राजँस्त्वं मा वि वेनः कामी मा भवेरमेनांश्चिज्जनिवतश्चकर्थ नोऽभि सचस्व शत्रुविजयाय प्रा द्रव यतस्त्वद्वस्योऽन्यन्नह्यस्ति स त्वमस्मान् सुखेन सम्बध्नीहि॥ २॥

भावार्थः-यो दीर्घं जीवितुं बलमुन्नेतुं राज्यं कर्त्तुं वर्धितुं च प्रयतते स एव कृतकृत्यो जायते॥ २॥

पदार्थः-हे **(हरिवः)** श्रेष्ठ घोड़ों से युक्त **(पिशङ्गराते)** सुवर्ण आदि के और **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देने वाले राजन्! आप **(मा, वि, वेनः)** कामना मत करें अर्थात् कामी न हों और **(अमेनान्)** नहीं विद्यमान हैं, प्रक्षेप करने वाली स्त्रियाँ जिनकी उनको **(चित्)** उन्हीं **(जनिवतः)** जन्म वाले **(चकर्थ)** करें और **(नः)** हम लोगों का **(अभि, सचस्व)** सब ओर से सम्बन्ध करें और शत्रु के विजय के लिये **(प्र, आ, द्रव)** अच्छे प्रकार दौड़े जिससे **(त्वत्)** आपसे **(वस्यः)** अत्यन्त वसने वाला **(अन्यत्)** दूसरा **(नहि)** नहीं **(अस्ति)** है, वह आप हम लोगों को सुख से सम्बन्ध कीजिये॥ २॥

भावार्थः-जो अतिकालपर्य्यन्त जीवने, बल बढ़ाने, राज्य करने और वृद्धि करने के लिये यत्न करता है, वही कृतकृत्य होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उद्यत्सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा।
प्राचोदयत् सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत् तमोऽवः॥ ३॥

उत्। यत्। सहः। सहसः। आ। अजनिष्ट। देदिष्टे। इन्द्रः। इन्द्रियाणि। विश्वा। प्र। अचोदयत्। सुऽदुघाः। वव्रे। अन्तः। वि। ज्योतिषा। सम्ऽववृत्वत्। तमः। अवरित्यवः॥ ३॥

पदार्थः-(उत्) (यत्) (सहः) बलम् **(सहसः)** बलात् **(आ) (अजनिष्ट)** जनयति **(देदिष्टे)** दिशत्युपदिशति **(इन्द्रः)** योगैश्वर्य्ययुक्तः **(इन्द्रियाणि)** श्रोत्रादीनि धनानि वा **(विश्वा)** सर्वाणि **(प्र, अचोदयत्)** प्रेरयति **(सुदुघाः)** सुष्ठा कामप्रपूरिकाः क्रियाः **(वव्रे)** वृणाति **(अन्तः)** मध्ये **(वि) (ज्योतिषा)** प्रकाशेन **(संववृत्वत्)** संवरणशीलम् **(तमः)** रात्री **(अवः)** रक्ष॥३॥

अन्वयः-हे राजन्! यथेन्द्रः सूर्य्यः सहसो यत्सह उदाजनिष्ट विश्वा इन्द्रियाणि देदिष्टे प्राचोदयत् सुदुघा वव्रे तथाऽन्तर्ज्योतिषा संववृत्वत्तमो व्यवः॥३॥

भावार्थः-यो राजा बलाद् बलं धनाद्धनं जनयित्वा न्यायप्रकाशेनाऽन्यायाऽन्धकारं निवार्य्य पूर्णकामाः प्रजाः कृत्वा विद्यादिशुभगुणग्रहणाय प्रेरयति स एवाऽखण्डैश्वर्य्यः सदा भवति॥३॥

पदार्थः-हे राजन्! जैसे **(इन्द्रः)** योगरूप ऐश्वर्य से युक्त सूर्य्य **(सहसः)** बल से जिस **(सहः)** बल को **(उत्, आ, अजनिष्ट)** उत्पन्न करता **(विश्वा)** सम्पूर्ण **(इन्द्रियाणि)** श्रोत्र आदि इन्द्रियों वा धनों का **(देदिष्टे)** उपदेश देता और **(प्र, अचोदयत्)** प्रेरणा करता और **(सुदुघाः)** उत्तम प्रकार कामनाओं को पूर्ण करने वाली क्रियाओं का **(वव्रे)** स्वीकार करता है, वैसे **(अन्तः)** मध्य में **(ज्योतिषा)** प्रकाश से **(संववृत्वत्)** घेरने वाली **(तमः)** रात्रि की **(वि)** विशेष करके **(अवः)** रक्षा करो॥३॥

भावार्थः-जो राजा बल से बल और धन से धन को उत्पन्न करके, न्याय के प्रकाश से अन्यायरूप अन्धकार का निवारण कर, पूर्ण मनोरथों से युक्त प्रजाओं को करके विद्या आदि उत्तम गुणों के ग्रहण के लिये प्रेरणा करता है, वही अखण्ड ऐश्वर्य्य वाला सदा होता है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अनवस्ते रथमश्वाय तक्षन् त्वष्टा वज्रं पुरुहूत द्युमन्तम्।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ॥४॥

अनवः। ते। रथम्। अश्वाय। तक्षन्। त्वष्टा। वज्रम्। पुरुऽहूत। द्युऽमन्तम्। ब्रह्माणः। इन्द्रम्। महयन्तः। अर्कैः। अवर्धयन्। अहये। हन्तवै। ऊँ इति॥४॥

पदार्थः-(अनवः) मनुष्याः। **अनव इति मनुष्यनामसु पठितम्।** (निघं०२.३) **(ते)** तव **(रथम्) (अश्वाय)** सद्योगमनाय **(तक्षन्)** रचयन्तु **(त्वष्टा)** सर्वतो विद्यया प्रदीप्तः **(वज्रम्)** शस्त्रास्त्रसमूहम् **(पुरुहूत)** बहुभिः स्तुत **(द्युमन्तम्) (ब्रह्माणः)** चतुर्वेदविदः **(इन्द्रम्)** अखण्डैश्वर्यं राजानम् **(महयन्तः)** पूजयन्तः **(अर्कैः)** सत्कारसाधकतमैर्विचारैर्वचनैः कर्मभिर्वा **(अवर्धयन्)** वर्धयन्ति **(अहये)** मेघाय **(हन्तवै)** हन्तुम् **(उ)** वितर्के॥४॥

अन्वयः-हे पुरुहूत राजन्! येऽनवस्तेऽश्वाय रथं तक्षन् त्वष्टा द्युमन्तं वज्रं निपातयति महयन्तो ब्रह्माणोऽर्कैस्त्वामिन्द्रमवर्धयन्नहये हन्तवैऽवर्धयंस्तानु त्वं सततं सत्कुरु॥४॥

भावार्थः-राज्ञां योग्यतास्ति येऽन्तःकरणेन राज्योन्नतिं कर्त्तुमिच्छेयुस्ते राज्ञा सदैव माननीयाः॥४॥

पदार्थः-हे **(पुरुहूत)** बहुतों से स्तुति किये गये राजन्! जो **(अनवः)** मनुष्य **(ते)** आपके **(अश्वाय)** शीघ्र गमन के लिये **(रथम्)** वाहन को **(तक्षन्)** रचें और **(त्वष्टा)** सब प्रकार से विद्या से प्रदीप्तजन **(द्युमन्तम्)** प्रकाशयुक्त **(वज्रम्)** शस्त्र और अस्त्र के समूह को गिराता है और **(महयन्तः)** प्रशंसा करते हुए **(ब्रह्माणः)** चारों वेदों के जानने वाले विद्वान् **(अर्कैः)** सत्कार के अत्यन्त सिद्ध करने वाले विचारों वचनों वा कर्मों से आप **(इन्द्रम्)** अखण्ड ऐश्वर्य्ययुक्त राजा की **(अवर्धयन्)** वृद्धि करते हैं और **(अहये)** मेघ के लिये **(हन्तवै)** नाश करने की वृद्धि करते हैं उनका **(उ)** तर्क पूर्वक आप निरन्तर सत्कार करिये॥४॥

भावार्थः-राजाओं की योग्यता है कि जो अन्तःकरण से राज्य की उन्नति करने की इच्छा करें, वे सदा ही सत्कार करने योग्य हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वृष्णे॒ यत्ते॒ वृष॑णो अ॒र्कमर्चा॒निन्द्र॒ ग्रावा॑णो॒ अदि॑तिः स॒जोषा॑ः।

अ॒न॒श्वासो॒ ये प॒वयोऽर॒था इन्द्रे॑षिता अ॒भ्यव॑र्तन्त॒ दस्यू॑न्॥५॥२९॥

वृष्णे॑। यत्। ते॒। वृष॑णः। अ॒र्कम्। अर्चा॑न्। इन्द्र॑। ग्रावा॑णः। अदि॑तिः। स॒ऽजोषा॑ः। अ॒न॒श्वासः॑। ये। प॒वयः॑। अ॒र॒थाः। इन्द्रे॑ऽइषिताः। अ॒भि। अव॑र्तन्त। दस्यू॑न्॥५॥

पदार्थः-**(वृष्णे)** वृष्टिकराय **(यत्)** यस्मै **(ते)** तुभ्यम् **(वृषणः)** वृष्टिनिमित्ताः **(अर्कम्)** पूजनीयम् **(अर्चान्)** पूजयन्तु **(इन्द्र)** दुष्टदलहर **(ग्रावाणः)** मेघाः **(अदितिः)** अन्तरिक्षम् **(सजोषाः)** समानप्रीतिसेवी **(अनश्वासः)** अविद्यमाना अश्वा येषु ते **(ये)** **(पवयः)** चक्राणि **(अरथाः)** अविद्यमाना रथा येषान्ते **(इन्द्रेषिताः)** इन्द्रेण स्वामिना प्रेरिताः **(अभि)** **(अवर्त्तन्त)** वर्त्तन्ते **(दस्यून्)** दुष्टाञ्चोरान्॥५॥

अन्वयः-हे इन्द्र राजन्! यद्यस्मै वृष्णे तेऽर्कं प्रजाजना अर्चान् स यथा वृषणो ग्रावाणः सजोषा अदितिश्च वर्त्तन्ते तथा भव येऽरथा अनश्वास इन्द्रेषिताः पवयो दस्यूनभ्यवर्त्तन्त तांस्त्वं सततं सत्कुर्याः॥५॥

भावार्थः-ये राजानो मेघवत्सुखवर्षका आकाशवदक्षोभा अग्न्यादियानानि रचयित्वेतस्ततो भ्रमणं विधाय दस्यून् हत्वा प्रजाः प्रसादयेयुस्ते भाग्यशालिनो जायन्ते॥५॥

पदार्थः-हे **(इन्द्र)** दुष्ट दलों के नाश करने वाले राजन्! **(यत्)** जिन **(वृष्णे)** वृष्टि करने वाले **(ते)** आपके लिये **(अर्कम्)** सत्कार करने योग्य का प्रजाजन **(अर्चान्)** सत्कार करें वह जैसे **(वृषणः)** वर्षा के निमित्त **(ग्रावाणः)** मेघ और **(सजोषाः)** समान प्रीति का सेवन करने वाला और **(अदितिः)** अन्तरिक्ष वर्त्तमान हैं, वैसे हूजिये और **(ये)** जो **(अरथाः)** वाहनों से रहित **(अनश्वासः)** घोड़ों से रहित

(इन्द्रेषिता:) स्वामी से प्रेरणा किये गये **(पवय:)** चक्र **(दस्यून्)** दुष्ट चोरों के **(अभि)** सन्मुख **(अवर्त्तन्त)** वर्त्तमान हैं, उनका आप निरन्तर सत्कार कीजिये॥५॥

भावार्थ:-जो राजाजन मेघ के सदृश सुख वर्षाने और आकाश के सदृश नहीं हिलने वाले, अग्नि आदिकों के वाहनों को रच के इधर-उधर भ्रमण करके दुष्ट चोरों का नाश करके प्रजाओं को प्रसन्न करें, वे भाग्यशाली होते हैं॥५॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को कहते हैं॥

प्र ते॒ पूर्वा॑णि॒ कर॑णानि वोचं॒ प्र नूत॑ना मघव॒न् या च॒कर्थ॑।
शक्ती॑वो॒ यद्बि॑भरा॒ रोद॑सी॒ उभे जय॑न्नपो मन॑वे॒ दानु॑चित्राः॥६॥

प्र। ते॒। पूर्वा॑णि॒। कर॑णानि। वो॒च॒म्। प्र। नूत॑ना। म॒घ॒ऽव॒न्। या। च॒कर्थ॑। शक्ति॑ऽवः। यत्। वि॒ऽभरा॑:। रोद॑सी॒ इति॑। उ॒भे इति॑। जय॑न्। अ॒पः। मन॑वे। दानु॑ऽचित्राः॥६॥

पदार्थ:-(प्र) **(ते)** तुभ्यम् **(पूर्वाणि)** प्राचीनानि **(करणानि)** कुर्वन्ति यैस्तानि साधनानि **(वोचम्)** उपदिशेयम् **(प्र)** **(नूतना)** नवीनानि **(मघवन्)** पूजितैश्वर्य **(या)** यानि **(चकर्थ)** करोषि **(शक्तीव:)** शक्तिर्बहुविधं सामर्थ्यं विद्यते यस्य तत्सम्बुद्धौ **(यत्)** यथा **(विभरा:)** ये विशेषेण विभरन्ति पोषयन्ति ते **(रोदसी)** द्यावापृथिव्यौ **(उभे)** **(जयन्)** **(अप:)** सूर्यो जलानीव शत्रुप्राणान् **(मनवे)** मनुष्याय **(दानुचित्रा:)** चित्राण्यद्भुतानि दानानि येषान्ते॥६॥

अन्वय:-हे शक्तीवो मघवन् राजन्! विपश्चितो यद्या पूर्वाणि करणानि या नूतना प्र साध्नुवन्ति तान्यहं ते तथा प्र वोचं ये विभरा दानुचित्रा विद्वांसो मनव उभे रोदसी विज्ञापयन्ति तै: सह त्वं मनवेऽपो जयँस्तेषां सुखाय सत्कारं चकर्थ॥६॥

भावार्थ:-हे राजादयो जना! ये विद्वांसो युष्मान् सनातनीं राजनीतिं विजयोपायाँश्च शिक्षेरँस्तान् स्वात्मवद्भवन्त: सत्कुर्वन्तु॥६॥

पदार्थ:-हे **(शक्तीव:)** बहुत प्रकार **[की]** सामर्थ्य से युक्त **(मघवन्)** श्रेष्ठ ऐश्वर्य्य वाले राजन्! बुद्धिमान् जन **(यत्)** जैसे **(या)** जिन **(पूर्वाणि)** प्राचीन **(करणानि)** साधनों और जिन **(नूतना)** नवीनों को **(प्र)** सिद्ध करते हैं, उन साधनों का मैं **(ते)** आपके लिये वैसे **(प्र, वोचम्)** उपदेश करूं और जो **(विभरा:)** विशेष करके पोषण करने और **(दानुचित्रा:)** अद्भुत दान वाले विद्वान् जन **(मनवे)** मनुष्य के लिये **(उभे)** दोनों **(रोदसी)** अन्तरिक्ष और पृथिवी को जनाते हैं, उनके साथ आप मनुष्य के लिये **(अप:)** सूर्य्य जैसे जलों को वैसे शत्रुओं के प्राणों को **(जयन्)** जीतते हुए उनके सुख के लिये सत्कार को **(चकर्थ)** करते हैं॥६॥

भावार्थः-हे राजा आदि जनो! जो विद्वान् जन आप लोगों के लिये अनादिकाल से सिद्ध राजनीति और विजय के उपायों की शिक्षा करें, उनको अपने आत्मा के सदृश आप लोग सत्कार करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तदिन्नु ते करणं दस्म विप्राहिं यद् घ्नन्नोजो अत्रामिमीथाः।
शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः॥७॥

तत्। इत्। नु। ते। करणम्। दस्म। विप्र। अहिम्। यत्। घ्नन्। ओजः। अत्र। अमिमीथाः। शुष्णस्य। चित्। परि। मायाः। अगृभ्णाः। प्रऽपित्वम्। यन्। अप। दस्यून्। असेधः॥७॥

पदार्थः-(**तत्**) (**इत्**) एव (**नु**) (**ते**) तव (**करणम्**) करोति येन तत् (**दस्म**) उपक्षेतः (**विप्र**) मेधाविन् (**अहिम्**) मेघमिव दोषान् (**यत्**) (**घ्नन्**) विनाशयन् (**ओजः**) जलमिव बलम् (**अत्र**) अस्मिन् जगति (**अमिमीथाः**) निर्माणं कुर्याः (**शुष्णस्य**) बलस्य (**चित्**) अपि (**परि**) (**मायाः**) प्रज्ञाः (**अगृभ्णाः**) गृहाण (**प्रपित्वम्**) प्राप्तिम् (**यन्**) (**अप**) (**दस्यून्**) दुष्टान् (**असेधः**) निवारयतु॥७॥

अन्वयः-हे दस्म विप्र! भवान् सूर्योऽहिं हन्ति अत्रौजो यन्निपातयति तत्करणं यथा तथा शत्रुबलं घ्नन्नत्र त्वं शुष्णस्य वृद्धिममिमीथाश्चिदपि मायाः पर्यगृभ्णाः प्रपित्वं यन् दस्यूनपासेधस्तस्मै ते तुभ्यं न्वित् सुखं प्राप्नुयात्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वन्! यथेश्वरेण सूर्य्यमेघसम्बन्धी निर्मित- स्तथैवान्येऽपि बहवः सम्बन्धा रचिता इति वेद्यम्॥७॥

पदार्थः-हे (**दस्म**) उपेक्षा करने वाले (**विप्र**) बुद्धिमान्! आप सूर्य्य (**अहिम्**) जैसे मेघ को वैसे दोषों को नाश करते हैं (**अत्र**) वा इस जगत् में (**ओजः, यत्**) जल के सदृश जो बल को गिराते हैं (**तत्**) वह (**करणम्**) साधन जैसे हो, वैसे शत्रु के बल का (**घ्नन्**) नाश करते हुए इस जगत् में तुम (**शुष्णस्य**) बल की वृद्धि का (**अमिमीथाः**) निर्माण करो (**चित्**) और (**मायाः**) बुद्धियों का (**परि, अगृभ्णाः**) सब ओर से ग्रहण करो और (**प्रपित्वम्**) प्राप्ति को (**यन्**) प्राप्त होते हुए (**दस्यून्**) दुष्टों का (**अप, असेधः**) निवारण करें उन (**ते**) आपके लिये (**नु**) तर्क-वितर्क के साथ (**इत्**) ही सुख प्राप्त होवे॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वन्! जैसे ईश्वर ने सूर्य्य और मेघ का सम्बन्ध रचा वैसे ही अन्य भी बहुत सम्बन्ध रचे, यह जानना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र।

उ॒ग्रम्॑यात॒मव॑हो ह॒ कुत्सं॑ सं ह॒ यद्वा॑मु॒शनार॑न्त दे॒वाः॥८॥

त्वम्। अ॒पः। यद॑वे। तु॒र्वशा॑य। अर॑मयः। सु॒ऽदुघाः॑। पा॒रः। इ॒न्द्र॒। उ॒ग्रम्। अ॒या॒त॒म्। अव॑हः। ह॒। कुत्स॑म्। सम्। ह॒। यत्। वा॒म्। उ॒शना॑। अर॑न्त। दे॒वाः॥८॥

पदार्थः-(त्वम्) (अपः) जलानीव कर्माणि **(यदवे)** मनुष्याय **(तुर्वशाय)** सद्यो वशकरणसमर्थाय **(अरमयः)** रमय **(सुदुघाः)** सुष्ठु दोग्धुमर्हाः **(पारः)** यः पारयिता **(इन्द्र)** परमैश्वर्य्यप्रद **(उग्रम्)** दुर्जयम् **(अयातम्)** अप्राप्तम् **(अवहः)** प्राप्नुहि **(ह)** किल **(कुत्सम्) (सम्) (ह) (यत्) (वाम्)** युवाम् **(उशना)** कामयमानाः **(अरन्त)** रमन्ताम् **(देवाः)** विद्वांसः॥८॥

अन्वयः-हे इन्द्र! पारः सँस्त्वं तुर्वशाय यदेव सुदुघा अपोऽरमय उग्रमयातं कुत्सं ह समवहः यद् यत्रोशना देवा अरन्त तत्र ह वां रमयेयुः॥८॥

भावार्थः-ऐश्वर्य्यवान् मनुष्योऽन्येभ्यो धनधान्यादिकं दद्याद्यत्र विद्वांसो रमेरंस्तत्रैव सर्वे क्रीडेरन्॥८॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्यदाता! **(पारः)**पार लगाने वाले होते हुए **(त्वम्)** आप **(तुर्वशाय)** शीघ्र वश करने में समर्थ **(यदवे)** मनुष्य के लिये **(सुदुघाः)** उत्तम प्रकार पूर्ण करने योग्य **(अपः)** जलों के सदृश कर्म्मों को **(अरमयः)** रमावें और **(उग्रम्)** बड़े कष्ट से जिसको जीत सकें उस **(अयातम्)** न आये हुए **(कुत्सम्)** कुत्सित को **(ह)** निश्चय **(सम्, अवहः)** अच्छे प्रकार प्राप्त होवें तथा **(यत्)** जिसमें **(उशना)** कामना करते हुए **(देवाः)** विद्वान् जन **(अरन्त)** रमें, उसमें **(ह)** निश्चय **(सम्, अवहः)** अच्छे प्रकार प्राप्त होवें तथा **(यत्)** जिसमें **(उशना)** कामना करते हुए **(देवाः)** विद्वान् जन **(अरन्त)** रमें उसमें **(ह)** निश्चय **(वाम्)** आप दोनों अर्थात् आप को और पूर्वोक्त मनुष्य को रमावें॥८॥

भावार्थः-ऐश्वर्य्य वाला मनुष्य अन्य जनों के लिये धन और धान्य आदिक देवें और जहाँ विद्वान् रमें, वहाँ ही सम्पूर्ण जन क्रीड़ा करें॥८॥

अथ यन्त्रकलाविषयं शिल्पकर्माह॥

अब यन्त्रकलाविषय शिल्पकर्म को कहते हैं॥

इन्द्रा॑कुत्सा॒ वह॑माना॒ रथे॑ना वा॒मत्या॒ अपि॒ कर्णे॑ वहन्तु।

निः षी॒म॒द्भ्यो धम॑थो॒ निः ष॒धस्था॑न्म॒घोनो॑ ह॒दो व॑रथ॒स्तमां॑सि॥९॥

इन्द्रा॑कुत्सा। वह॑माना। रथे॑न। आ। वा॒म्। अत्याः॑। अपि॑। कर्णे॑। व॒ह॒न्तु॒। निः। सी॒म्। अ॒त्ऽभ्यः। धम॑थः। निः। स॒धऽस्था॑त्। म॒घोनः॑। ह॒दः। व॒र॒थ॒ः। तमां॑सि॥९॥

पदार्थः-(इन्द्राकुत्सा) इन्द्रश्चकुत्सश्चेन्द्राकुत्सौ विद्युदाघातौ **(वहमाना)** प्रापयन्तौ **(रथेन)** यानेन **(आ) (वाम्)** युवयोः **(अत्याः)** सततं गामिनोऽश्वाः **(अपि) (कर्णे)** कुर्वन्ति येन तस्मिन् **(वहन्तु)** गमयन्तु **(निः)** नितराम् **(सधस्थात्)** सह स्थानात् **(मघोनः)** धनाढ्यान् **(ह्रदः)** ह्रद इव प्रियान् **(वरथः)** स्वीकुरुथः **(तमांसि)** रात्रीः॥९॥

अन्वयः-हे अध्यापकोपदेशकौ! यथेन्द्राकुत्सा रथेन वहमाना स्तः विद्वांसः कर्णे वामा वहन्तु तथाऽत्या अपि सर्वान् वोढुं शक्नुवन्ति यदि विद्युदग्नी अद्भ्यो निर्धमथस्तर्हि तौ सधस्थात् सीमावहतो यदि हृदो मघोनो निर्वरथस्तर्हि सुखेन तमांसि गमयितुं शक्नुयातम्॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यद्यग्निजलसंयोगं कृत्वा सन्धाम्य वाष्पेन यन्त्रकलाः संहृत्य यानादीनि चालयेयुस्तर्हि स्वयं सखींश्च धनाढ्यान् कृत्वा दुःखेभ्यः पारं गच्छेयुर्गमयेयुर्वा॥९॥

पदार्थः-हे अध्यापको और उपदेशको! जैसे **(इन्द्राकुत्सा)** बिजुली और बिजुली का आघात **(रथेन)** वाहन से **(वहमाना)** प्राप्त कराते हुए वर्त्तमान हैं वा विद्वान् जन **(कर्णे)** करते हैं जिससे उसमें **(वाम्)** आप दोनों को **(आ, वहन्तु)** पहुंचावें वैसे **(अत्याः)** निरन्तर चलने वाले घोड़े **(अपि)** भी सब को प्राप्त कराने को समर्थ होते हैं और जो बिजुली और अग्नि **(अद्भ्यः)** जलों से **(निः, धमथः)** शब्द करते हैं तो वे दोनों **(सधस्थात्)** तुल्य स्थान से **(सीम्)** सब प्रकार प्राप्त कराते और जो **(हृदः)** हृदयों के सदृश प्रिय **(मघोनः)** धनाढ्य पुरुषों का **(निः)** अत्यन्त **(वरथः)** स्वीकार करते हैं तो सुख से **(तमांसि)** अन्धकारों को हटाने को समर्थ होओ॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो अग्नि और जल का संयोग कर शब्द कर और भाफ से यन्त्र कलाओं को ताड़ित करके वाहनादिकों को चलावें तो आप अपने को और मित्रों को धन से युक्त करके दुःखों के पार जावें और अन्यों को भी पार करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वातस्य युक्तान्सुयुजश्चिदश्वान् कविश्चिदृषो अजगन्नवस्युः।

विश्वे ते अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीमवर्धन्॥१०॥३०॥

वातस्य। युक्तान्। सुऽयुजः। चित्। अश्वान्। कविः। चित्। एषः। अजगन्। अवस्युः। विश्वे। ते। अत्र। मरुतः। सखायः। इन्द्र। ब्रह्माणि। तविषीम्। अवर्धन्॥१०॥

पदार्थः-**(वातस्य)** वायोर्वेगेन **(युक्तान्)** **(सुयुजः)** ये सुष्ठु युञ्जते तान् **(चित्)** अपि **(अश्वान्)** आशुगामिनोऽग्न्यादीन् **(कविः)** मेधावी **(चित्)** अपि **(एषः)** वर्त्तमानः **(अजगन्)** गमयेयुः **(अवस्युः)** आत्मनोऽवो रक्षणमिच्छुः **(विश्वे)** सर्वे **(ते)** तव **(अत्र)** अस्मिञ्छिल्पविद्याकर्मणि **(मरुतः)** ऋत्विजो विद्वांसः **(सखायः)** सुहृदः **(इन्द्र)** विद्वन् **(ब्रह्माणि)** धनान्यन्नानि वा **(तविषीम्)** सेनाम् **(अवर्धन्)** वर्धयन्ति॥१०॥

अन्वयः-हे इन्द्र! ये तेऽत्र सखायो विश्वे मरुतो ब्रह्माणि तविषीं चावर्धन् वातस्य युक्तान् सुयुजश्चिदश्वानजगन् गमयेयुस्तानेषोऽवस्युः कविश्चिद्भवान् सततं सत्कुर्यात्॥१०॥

भावार्थः-हे ऐश्वर्यमिच्छुक! येऽग्न्यादिपदार्थविद्ययाऽद्भुतानि यानादिकार्य्याणि साद्धुं शक्नुवन्ति तैः सह मैत्रीं कृत्वा विद्यां प्राप्याभीष्टानि कार्य्याणि साधयन् भवान् महदैश्वर्य्यं प्राप्नुयात्॥१०॥

पदार्थः-हे **(इन्द्र)** विद्वन्! जो **(ते)** आपके **(अत्र)** इस शिल्पविद्या के जाननेरूप कार्य्य में **(सखायः)** मित्र **(विश्वे)** सम्पूर्ण **(मरुतः)** ऋतु-ऋतु में यज्ञ करने वाले विद्वान् जन **(ब्रह्माणि)** धनों वा अन्नों की और **(तविषीम्)** सेना की **(अवर्धन्)** वृद्धि करते हैं और **(वातस्य)** वायु के वेग से **(युक्तान्)** युक्त हुए **(सुयुजः)** उत्तम प्रकार पदार्थों के मेल करने वाले **(चित्)** निश्चित **(अश्वान्)** शीघ्रगामी अर्थात् तीव्र वेगयुक्त अग्नि आदि पदार्थों को **(अजगन्)** चलावें उनको **(एषः)** यह वर्त्तमान **(अवस्युः)** अपने को रक्षण की इच्छा रखने वाले **(कविः, चित्)** निश्चित बुद्धिमान् आप निरन्तर सत्कार करें॥१०॥

भावार्थः-हे ऐश्वर्य्य की इच्छा रखने वाले पुरुष! जो अग्नि आदि पदार्थों की विद्या से विचित्र आश्चर्य्यजनक वाहन आदि कार्य्यों की सिद्धि कर सकते हैं, उनके साथ मित्रता करके और उनसे विद्या को प्राप्त हो अभीष्ट कार्य्यों को सिद्धि करते हुए आप अत्यन्त ऐश्वर्य्य को प्राप्त होवें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसम्।

भरच्चक्रमेतशः सं रिणाति पुरो दधत् सनिष्यति क्रतुं नः॥११॥

सूरः। चित्। रथम्। परितक्म्यायाम्। पूर्वम्। करत्। उपरम्। जूजुवांसम्। भरत्। चक्रम्। एतशः। सम्। रिणाति। पुरः। दधत्। सनिष्यति। क्रतुम्। नः॥११॥

पदार्थः-(**सूरः**) सूर्य्यः **(चित्)** इव **(रथम्)** रमणीयं यानम् **(परितक्म्यायाम्)** परितः सर्वतस्तक्मानि भवन्ति यस्यां तस्या रात्रौ **(पूर्वम्)** प्रथमम् **(करत्)** कुर्य्यात् **(उपरम्)** मेघमिव। **उपरमिति मेघनामसु पठितम्।** (निघं०१.१०) **(जूजुवांसम्)** अतिशयेन वेगवन्तम् **(भरत्)** धरेत् **(चक्रम्)** कलाचालकम् **(एतशः)** अश्वोऽश्विकमिव **(सम्)** **(रिणाति)** गच्छति **(पुरः)** पुरस्तात् **(दधत्)** दधाति **(सनिष्यति)** सम्भजेत् **(क्रतुम्)** प्रज्ञां कर्माणि वा **(नः)** अस्माकम्॥११॥

अन्वयः-हे विद्वन्! यः सूरश्चित्परितक्म्यायां पूर्वं रथमुपरमिव करज्जूजुवांसं चक्रमेतश इवा भरत् पुरश्चक्रं सं रिणाति यानं दधन्नः क्रतुं सनिष्यति तं सर्वथा सत्कुर्य्याः॥११॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यदि मनुष्या कलाकौशलेन यानयन्त्राणि विधाय जलाग्निप्रयोगेण चक्राणि सञ्चाल्य कार्याणि साध्नुयुस्तर्हि सूर्यवायु मेघमिव बहुभारं यानमन्तरिक्षे जले स्थले च गमयितुं शक्नुयुः॥११॥

पदार्थः-हे विद्वन्! जो **(सूरः)** सूर्य्य के **(चित्)** सदृश **(परितक्म्यायाम्)** सर्व ओर से हर्ष होते हैं जिस रात्रि में उसमें **(पूर्वम्)** प्रथम **(रथम्)** सुन्दर वाहन को **(उपरम्)** मेघ के सदृश **(करत्)** करे और

(जूजुवांसम्) अत्यन्त वेग से युक्त **(चक्रम्)** कलाओं के चलाने वाले चक्र को **(एतशः)** जैसे घोड़ा घोड़े वाले को वैसे सब प्रकार **(भरत्)** धारण करे **(पुरः)** पहिले चक्र को **(सम्, रिणाति)** प्राप्त होता, वाहन को **(दधत्)** धारण करता और **(नः)** हम लोगों की **(क्रतुम्)** बुद्धि वा कर्म्मों का **(सनिष्यति)** सेवन करे, उसका आप सब प्रकार सत्कार करें॥११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य कलाकौशल से वाहनों के यन्त्रों को रच के जल और अग्नि के अत्यन्त योग से चक्रों को उत्तम प्रकार चलाय कार्य्यों को सिद्ध करें तो जैसे सूर्य्य और पवन मेघ को वैसे बहुत भारयुक्त वाहन को अन्तरिक्ष जल और स्थल में पहुंचाने को समर्थ होवें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोममिच्छन्।
वदन् ग्रावाव वेदिं भ्रियाते यस्य जीरमध्वर्यवश्चरन्ति॥ १२॥

आ। अयम्। जनाः। अभिऽचक्षे। जगाम। इन्द्रः। सखायम्। सुतऽसोमम्। इच्छन्। वदन्। ग्रावा। अव। वेदिम्। भ्रियाते। यस्य। जीरम्। अध्वर्यवः। चरन्ति॥१२॥

पदार्थः-**(आ)** **(अयम्)** **(जनाः)** प्रसिद्धा विद्वांसः **(अभिचक्षे)** अभितः ख्यातुम् **(जगाम)** गच्छेत् **(इन्द्रः)** ऐश्वर्य्यवान् **(सखायम्)** मित्रम् **(सुतसोमम्)** निष्पादितपदार्थविद्यम् **(इच्छन्)** **(वदन्)** उपदिशन् **(ग्रावा)** गर्जनायुक्तो मेघ इव **(अव)** **(वेदिम्)** अग्निस्थानम् **(भ्रियाते)** धरेताम् **(यस्य)** **(जीरम्)** वेगम् **(अध्वर्यवः)** विद्यायज्ञसम्पादकाः **(चरन्ति)**॥१२॥

अन्वयः-हे जना! योऽयमिन्द्रोऽभिचक्षे सुतसोमं सखायमिच्छन् ग्रावेव वदन् वेदिमवा जगाम यस्य जीरमध्वर्यवश्चरन्ति यौ द्वौ शिल्पविद्या भ्रियाते तौ सदैव भवन्तः सत्कुर्वन्तु॥१२॥

भावार्थः-ये मनुष्या विद्याप्राप्तये विद्यादानाय वा सर्वैः सह मैत्रीं कृत्वा सङ्गच्छेरँस्ते सर्वां विद्यां प्राप्तुं शक्नुयुः॥१२॥

पदार्थः-हे **(जनाः)** प्रसिद्ध विद्वान् जनो! जो **(अयम्)** यह **(इन्द्रः)** ऐश्वर्य्य वाला **(अभिचक्षे)** सब ओर से प्रसिद्ध होने को **(सुतसोमम्)** संपन्न की पदार्थविद्या जिसने ऐसे **(सखायम्)** मित्र की **(इच्छन्)** इच्छा करता और **(ग्रावा)** गर्जना से युक्त मेघ के सदृश **(वदन्)** उपदेश देता हुआ जन **(वेदिम्)** अग्नि के स्थान को **(अव, आ, जगाम)** प्राप्त होवे **(यस्य)** जिसके **(जीरम्)** वेग को **(अध्वर्यवः)** विद्यारूप यज्ञ के सम्पादक अर्थात् उक्त यज्ञ को प्रसिद्ध करने वाले जन **(चरन्ति)** प्राप्त होते हैं और जो दो शिल्पविद्या को **(भ्रियाते)** धारण करें, उन दोनों का सदा ही आप लोग सत्कार करें॥१२॥

भावार्थः-जो जन विद्या की प्राप्ति तथा विद्या देने के लिये सम्पूर्ण जनों के साथ मित्रता करके मिलें, वे सम्पूर्ण विद्या के प्राप्त होने को समर्थ होवें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ये चा॒कन॑न्त चा॒कन॑न्त॒ नू ते मर्ता॑ अमृत॒ मो ते अं॒ह॒ आर॑न्।

वा॒व॒न्धि यज्यू॑रु॒त तेषु॑ धे॒ह्योजो॒ जने॑षु॒ येषु॑ ते॒ स्याम॑॥१३॥३१॥

ये। चा॒कन॑न्त। चा॒कन॑न्त। नु। ते। मर्ता॑ः। अ॒मृ॒त॒। मो॒ इति॑। ते। अं॒ह॒ः। आ। अ॒र॒न्। व॒व॒न्धि। यज्यू॑न्। उ॒त। तेषु॑। धे॒हि॒। ओजः॑। जने॑षु। येषु॑। ते॒। स्याम॑॥१३॥

पदार्थः-(**ये**) (**चाकनन्त**) कामयन्ते (**चाकनन्त**) (**नू**) सद्यः (**ते**) (**मर्त्ताः**) मनुष्याः (**अमृत**) आत्मस्वरूपेण मरणधर्मरहित (**मो**) (**ते**) (**अंहः**) अपराधम् (**आ**) (**अरन्**) समन्तात् प्राप्नुयुः (**वावन्धि**) बध्नन्ति (**यज्यून्**) सत्यभाषणादियज्ञानुष्ठातॄन् (**उत**) अपि (**तेषु**) (**धेहि**) (**ओजः**) पराक्रमम् (**जनेषु**) सत्याचरणेषु मनुष्येषु (**येषु**) (**ते**) तव (**स्याम**) भवेम॥१३॥

अन्वयः-हे अमृत विद्वन्! ये विद्याविनयसत्याचाराश्चाकनन्तान्यार्थमपि चाकनन्त ते मर्त्ताः सत्यं नू चाकनन्त तेंऽहो मो आरन् त उत यज्यून् वावन्धि येषु जनेषु वयं ते तव सखायः स्याम तेष्वस्मासु त्वमोजो धेहि॥१३॥

भावार्थः-हे विद्वांसो! ये विद्यासत्याचरणपरोपकारानधर्म्माचरणराहित्यं च कामयित्वा सर्वोपकारमिच्छेयुस्ते धन्याः सन्तु वयमपीदृशाः स्यामेतीच्छामेति॥१३॥

अत्रेन्द्रविद्वच्छिल्पगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकत्रिंशत्तमं सूक्तमेकत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**अमृत**) आत्मस्वरूप से मरणधर्म्मरहित विद्वान्! (**ये**) जो विद्या, विनय और सत्य आचरणों की (**चाकनन्त**) कामना करते हैं तथा अन्यों के लिये भी (**चाकनन्त**) कामना करते हैं, (**ते**) वे (**मर्त्ताः**) मनुष्य सत्य की (**नू**) शीघ्र कामना करते हैं और (**ते**) वे (**अंहः**) अपराध को (**मो**) नहीं (**आ, अरन्**) सब प्रकार से प्राप्त हों और वे (**उत**) ही (**यज्यून्**) सत्यभाषण आदि यज्ञ के अनुष्ठान करने वाले जनों को (**वावन्धि**) बन्धनयुक्त करते हैं तथा (**येषु**) जिन (**जनेषु**) सत्य आचरण करने वाले मनुष्यों में हम लोग (**ते**) आपके मित्र (**स्याम**) होवें (**तेषु**) उन हम लोगों में आप (**ओजः**) पराक्रम को (**धेहि**) धारण कीजिये॥१३॥

भावार्थः-हे विद्वान् जनो! जो जन विद्या, सत्य आचरण तथा परोपकार की और अधर्म्म आचरण के त्याग की कामना करके सब के उपकार की इच्छा करें, वे धन्यवादयुक्त होवें और हम लोग भी ऐसे होवें, ऐसी इच्छा करें॥१३॥

इस सूक्त में इन्द्र और शिल्पविद्या के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के साथ संगति जाननी चाहिये॥

यह इकतीसवां सूक्त और इकतीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ द्वादशर्चस्य द्वात्रिंशत्तमस्य सूक्तस्य गातुरात्रेय ऋषिः। इन्द्रो देवता।१, ७, ९, ११ त्रिष्टुप्। २, ३, ४, १०, १२, निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५, ८ स्वराट् पङ्क्तिः। ६ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रगुणानाह॥

अब बारह ऋचा वाले बत्तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों को कहते हैं॥

अदर्दरुत्समसृजो वि खानि त्वमर्णवान् बद्बधानाँ अरम्णाः।
महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्॥ १॥

अदर्दरिति। उत्सम्। असृजः। वि। खानि। त्वम्। अर्णवान्। बद्बधानान्। अरम्णाः। महान्तम्। इन्द्र। पर्वतम्। वि। यत्। वरिति वः। सृजः। वि। धाराः। अव। दानवम्। हन्निति हन्॥ १॥

पदार्थः-(**अदर्दः**) विदृणाति (**उत्सम्**) कूपमिव (**असृजः**) सृजति (**वि**) (**खानि**) इन्द्रियाणि (**त्वम्**) (**अर्णवान्**) नदीः समुद्रान् वा (**बद्बधानान्**) प्रबद्धान् (**अरम्णाः**) रमय (**महान्तम्**) (**इन्द्र**) शत्रूणां दारयिता राजन् (**पर्वतम्**) पर्वताकारं मेघम् (**वि**) (**यत्**) यः (**वः**) युष्मभ्यम् (**सृजः**) सृजति (**वि**) (**धाराः**) जलप्रवाहा इव वाचः (**अव**) (**दानवम्**) दुष्टजनम् (**हन्**) सन्ति॥ १॥

अन्वयः-हे इन्द्र! यथा सूर्य उत्समिव महान्तं पर्वतं हत्वा बद्बधानानदर्दोऽर्णवान् सृजस्तथा त्वं खानि वि सृजास्मान् व्यरम्णा यद्यः सूर्य्यो धारा इव दानवमव हन् वो व्यसृजस्तं सत्कुरु॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजा यथा सूर्य्यो निपातितमेघेन नदीसमुद्रादीन् पिपर्ति कूलानि विदारयति तथैवाऽन्यायं निपात्य न्यायेन प्रजाः प्रपूर्य दुष्टाञ्छिन्द्यात्॥ १॥

पदार्थः-हे (**इन्द्र**) शत्रुओं के नाश करने वाले राजन्! जिस प्रकार सूर्य्य (**उत्सम्**) कूप के समान (**महान्तम्**) बड़े (**पर्वतम्**) पर्वताकार मेघ का नाश करके (**बद्बधानान्**) अत्यन्त बंधे हुओं को (**अदर्दः**) नाश कता है और (**अर्णवान्**) नदियों वा समुद्रों का (**सृजः**) त्याग करता है, वैसे (**त्वम्**) आप (**खानि**) इन्द्रियों को (**वि**) विशेष करके त्याग कीजिये और हम लोगों का (**वि, अरम्णाः**) विशेष रमण कराइये और (**यत्**) जो सूर्य्य (**धाराः**) जल के प्रवाहों के सदृश वाणियों का और (**दानवम्**) दुष्ट जन का (**अव, हन्**) नाश करता है (**वः**) आप लोगों के लिये (**वि, असृजः**) विशेषकर त्यागता अर्थात् जलादि का त्याग करता है, उसका सत्कार प्रशंसा उत्तम किया कीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा जैसे सूर्य्य गिराये हुए मेघ से नदी और समुद्र आदिकों को पूर्ण करता और तटों को तोड़ता है, वैसे ही अन्याय को गिरा और न्याय से प्रजा का पालन करके दुष्टों का नाश करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वमुत्साँ॑ ऋ॒तुभि॑र्बद्बधा॒नाँ अरं॑ह॒ ऊध्व॒: पर्व॑तस्य व्रज्रिन्।

अहिं॑ चिदुग्र प्रयु॑तं शया॑नं जघ॒न्वाँ इ॑न्द्र तवि॑षीमधत्था:॥ २॥

त्वम्। उत्सा॑न्। ऋ॒तुऽभि॑:। ब॒द्ब॒धा॒नान्। अरं॑ह। ऊध्व॑:। पर्व॑तस्य। व॒ज्रि॒न्। अहि॑म्। चि॒त्। उ॒ग्र॒। प्रऽयु॑तम्। शया॑नम्। ज॒घ॒न्वान्। इ॒न्द्र॒। तवि॑षीम्। अ॒ध॒त्था॒:॥ २॥

पदार्थ:-(त्वम्) (उत्सान्) कूपानिव **(ऋतुभि:)** वसन्तादिभि: **(बद्बधानान्)** सम्बद्धान् **(अरंह:)** गमयति **(ऊध्व:)** जलाधारं घनसमूहम् **(पर्वतस्य)** मेघस्य **(वज्रिन्)** प्रशस्तवज्रवन् **(अहिम्)** मेघम् **(चित्) (उग्र)** तेजस्विन् **(प्रयुतम्)** बहुविधम् **(शयानम्)** शयानमिवाचरन्तम् **(जघन्वान्)** हन्ति **(इन्द्र)** सूर्यवद्वर्त्तमान **(तविषीम्)** बलयुक्तां सेनाम् **(अधत्था:)** दध्या:॥ २॥

अन्वय:-हे वज्रिन्नुग्रेन्द्र राजँस्त्वं यथा कृषीबला ऋतुभिर्बद्धानानुत्सानरंहो यथा सूर्य्य: पर्वतस्योधश्चित् प्रयुतं शयानमहिं जघन्वाँस्तथा त्वं तविषीमधत्था:॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा कृषीबला: कूपेभ्यो जलं क्षेत्राणि नीत्वा शस्यानुत्पाद्य सर्वर्त्तुषु सुखैश्वर्यमुन्नयन्ति तथैव त्वं प्रजा उन्नय॥ २॥

पदार्थ:-हे **(वज्रिन्)** अच्छे वज्र वाले और **(उग्र)** तेजस्वी **(इन्द्र)** सूर्य्य के सदृश वर्त्तमान राजन्! **(त्वम्)** आप, जैसे खेती करने वाले जन **(ऋतुभि:)** वसन्त आदि ऋतुओं से **(बद्बधानान्)** अत्यन्त बद्ध हुओं को **(उत्सान्)** कूपों के सदृश **(अरंह:)** चलाता है और जैसे सूर्य्य **(पर्वतस्य)** मेघ के **(ऊध्व:)** जलाधार घनसमूह को **(चित्)** और **(प्रयुतम्)** बहुत प्रकार **(शयानम्)** शयन करते हुए के सदृश आचरण करते हुए **(अहिम्)** मेघ का **(जघन्वान्)** नाश करता है, वैसे आप **(तविषीम्)** बलयुक्त सेना का **(अधत्था:)** धारण करिये॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे खेती करने वाले जन कूपों से जल को क्षेत्रों के प्रति प्राप्त कर अन्न उत्पन्न करके सब ऋतुओं में सुख और ऐश्वर्य्य की वृद्धि करते हैं, वैसे ही आप प्रजाओं की उन्नति कीजिये॥ २॥

अथ धनुर्वेदविद्राजगुणानाह॥

अब इन्द्रपदवाच्य धनुर्वेदवित् राजगुणों को कहते हैं॥

त्यस्य॑ चिन्महतो निर्मृ॒गस्य॒ वध॑र्जघा॒न॒ तवि॑षीभि॒रिन्द्र॑:।

य एक॒ इद्प्र॒तिर्मन्य॑मा॒न॒ आद्स्मादु॒न्यो अ॑जनिष्ट॒ तव्या॑न्॥ ३॥

त्यस्य। चित्। महतः। निः। मृगस्य। वधः। जघान। तविषीभिः। इन्द्रः। यः। एकः। इत्। अप्रतिः। मन्यमानः। आत्। अस्मात्। अन्यः। अजनिष्ट। तव्यान्॥ ३॥

पदार्थः-(त्यस्य) तस्य **(चित्) (महतः) (निः) (मृगस्य)** सद्योगामिनः **(वधः)** घ्नन्ति यस्मिन् सः **(जघान)** हन्ति **(तविषीभिः)** सेनादिबलैः **(इन्द्रः)** सेनेशः **(यः) (एकः) (इत्) (अप्रतिः)** अविद्यमाना प्रतिः प्रतीतिर्यस्य सः **(मन्यमानः) (आत्) (अस्मात्) (अन्यः)** भिन्नः **(अजनिष्ट)** जनयति **(तव्यान्)** ये तविषि बले भवास्तान्। अत्र **छान्दसो वर्णलोपो वे**ति सलोपः॥ ३॥

अन्वयः-हे विद्वन्! य एकोऽप्रतिर्मन्यमानस्त्वं तविषीभिर्यथेन्द्रस्त्यस्य महतो मृगस्य मेघस्य वधर्जघान तथाऽस्मांश्चिज्जनयादस्माद्यथाऽन्यो निरजनिष्ट तथेत्त्वमस्मान् तव्यान्निज्जनय॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो मेघं विजित्य स्वप्रभावं जनयित्वा सर्वान् प्राणिनः पालयति तथैव धनुर्वेदविदेकोऽप्यनेकान् विजित्य प्रजाः पालयेत्॥ ३॥

पदार्थः-हे विद्वन्! **(यः)** जो **(एकः)** एक **(अप्रतिः)** नहीं है विश्वास जिनके वह **(मन्यमानः)** आदर किये गये आप **(तविषीभिः)** सेना आदि बलों से जैसे **(इन्द्रः)** सेना का स्वामी **(त्यस्य)** उस **(महतः)** बड़े **(मृगस्य)** शीघ्र चलने वाले मेघ का **(वधः)** नाश करते हैं जिसमें तदनुकूल **(जघान)** नाश करता है, वैसे हम लोगों को **(चित्)** भी प्रकट कीजिये **(आत्)** अनन्तर **(अस्मात्)** इससे जैसे **(अन्यः)** भिन्न और जन **(निः)** अत्यन्त **(अजनिष्ट)** उत्पन्न करता है, वैसे **(इत्)** ही आप **(तव्यान्)** बलों में उत्पन्न हम लोगों को ही उत्पन्न कीजिये अर्थात् प्रकट कीजिये॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य मेघ को जीतकर अपने प्रताप को प्रकट करके सब प्राणियों का पालन करता है, वैसे ही धनुर्वेद की विद्या को जानने वाला एक भी अनेकों को जीतकर प्रजाओं का पालन करे॥ ३॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

त्यं चिदेषां स्वधया मदन्तं मिहो नपातं सुवृधं तमोगाम्।

वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम्॥ ४॥

त्यम्। चित्। एषाम्। स्वधया। मदन्तम्। मिहः। नपातम्। सुऽवृधम्। तमःऽगाम्। वृषऽप्रभर्मा। दानवस्य। भामम्। वज्रेण। वज्री। नि। जघान। शुष्णम्॥ ४॥

पदार्थः-(त्यम्) तम् **(चित्)** इव **(एषाम्)** वीराणां मध्ये **(स्वधया)** अन्नादिना **(मदन्तम्)** हर्षन्तम् **(मिहः)** वृष्टेः **(नपातम्)** अपतनशीलम् **(सुवृधम्)** सुष्ठुवर्धमानम् **(तमोगाम्)** प्राप्ताऽन्धकारम् **(वृषप्रभर्मा)** यो वर्षणशीलं मेघं प्रबिभर्ति सः **(दानवस्य)** दुष्टजनस्य **(भामम्)** क्रोधम् **(वज्रेण)** तीव्रेण शस्त्रेण **(वज्री)** प्रशस्तशस्त्रास्त्रयुक्तः **(नि) (जघान)** निहन्यात् **(शुष्णम्)** शोषकं बलवन्तम्॥ ४॥

अन्वयः-हे सेनेश वीर! भवानेषां स्वधया मदन्तं त्यं चित् यथा वृषप्रभर्मा सूर्यो मिहो नपातं सुवृधं तमोगां जघान तथा वज्री सन् वज्रेण दानवस्य शुष्णं भामं नि जघान॥४॥

भावार्थः-अत्र [उपमा]वाचकलुप्तोपमालङ्कारौ। हे राजन्! यथा सूर्य्योऽतिविस्तीर्णं मेघं विछिद्य भूमौ निपात्य जगद्रक्षति तथैवाऽतिप्रबलानापि शत्रून् विदार्याऽधो निपात्य न्यायेन प्रजाः पालय॥४॥

पदार्थः-हे सेना के ईश वीरपुरुष! आप **(एषाम्)** इन वीरों के मध्य में **(स्वधया)** अन्न आदि से **(मदन्तम्)** प्रसन्न होता हुआ जो जीव **(त्यम्)** उसके **(चित्)** समान जैसे **(वृषप्रभर्मा)** वर्षने वाले मेघ को धारण करने वाला सूर्य्य **(मिहः)** वृष्टि के **(नपातम्)** नहीं गिरने वाले **(सुवृधम्)** सुन्दर बढ़ते हुए **(तमोगाम्)** अन्धकार को प्राप्त अर्थात् सघनघन मेघ को **(जघान)** नाश करे, वैसे **(वज्री)** उत्तम शस्त्र और अस्त्रों से युक्त होते हुए **(वज्रेण)** तीव्र शस्त्र से **(दानवस्य)** दुष्टजन के **(शुष्णम्)** सुखाने वाले बलवान् **(भामम्)** क्रोध को **(नि)** निरन्तर नाश करिये॥४॥

भावार्थः-इस मन्त्र में [उपमा और] वाचकलुप्तोपमालङ्कार हैं। हे राजन्! जैसे सूर्य्य अति विस्तारयुक्त मेघ का नाश कर भूमि में गिरा के जगत् की रक्षा करता है, वैसे ही अतिप्रबल भी शत्रुओं का नाश कर नीचे गिरा के न्याय से प्रजाओं का पालन कीजिये॥४॥

अथ शिल्पविद्याविद्गुणानाह॥

अब शिल्पविद्या के जानने वाले विद्वान् के गुणों को कहते हैं॥

त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म।
यदी सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः॥५॥

त्यम्। चित्। अस्य। क्रतुऽभिः। निऽसत्तम्। अमर्मणः। विदत्। इत्। अस्य। मर्म। यत्। ईम्। सुऽक्षत्र। प्रऽभृता। मदस्य। युयुत्सन्तम्। तमसि। हर्म्ये। धाः॥५॥

पदार्थः-(**त्यम्**) तम् **(चित्)** अपि **(अस्य)** शत्रोः **(क्रतुभिः)** प्रज्ञाभिः कर्मभिर्वा **(निषत्तम्)** निषण्णम् **(अमर्मणः)** अविद्यमानानि मर्माणि यस्य तस्य **(विदत्)** विन्देत **(इत्)** एव **(अस्य)** मेघस्य **(मर्म)** गुह्यावयवम् **(यत्)** यम् **(ईम्)** **(सुक्षत्र)** शोभनं क्षत्रं क्षत्रियकुलं धनं वा यस्य तत्सबुद्धौ। **क्षत्रमिति धननामसु पठितम्।** (निघं०२।१०) **(प्रभृता)** प्रकर्षेण धारणे पोषणे वा **(मदस्य)** हर्षस्य **(युयुत्सन्तम्)** योद्धुमिच्छन्तम् **(तमसि)** रात्रौ **(हर्म्ये)** प्रासादे **(धाः)** धेहि॥५॥

अन्वयः-हे सुक्षत्र राजन्! भवानस्यामर्मणः क्रतुभिर्निषत्तं त्यं चिदस्य मदस्य प्रभृता यन्मर्मेद्विदत्तमीं युयुत्सन्तं तमसि हर्म्ये त्वं धाः॥५॥

भावार्थः-ये पदार्थानां गुप्तानि स्वरूपाणि विज्ञाय प्रज्ञया शिल्पविद्यां वर्धयन्ति ते सुराज्यैश्वर्या भवन्ति॥५॥

पदार्थः-हे **(सुक्षत्र)** श्रेष्ठ क्षत्रियकुल वा धन से युक्त राजन्! आप **(अस्य)** इस **(अमर्मणः)** मर्म की बातों से रहित शत्रु की **(क्रतुभिः)** बुद्धि वा कर्म्मों से **(निषत्तम्)** स्थित **(त्यम्)** उसको **(चित्)** तथा **(अस्य)** इस मेघ के और **(मदस्य)** आनन्द के **(प्रभृता)** अत्यन्त धारण करने वा पोषण करने में **(यत्)** जिस **(मर्म)** गुप्त अवयव को **(इत्)** ही **(विदत्)** प्राप्त होवे, उसको **(ईम्)** सब प्रकार प्राप्त हुए **(युयुत्सन्तम्)** युद्ध करने की इच्छा करते हुए को **(तमसि)** रात्रि में **(हर्म्ये)** प्रासाद के ऊपर आप **(धाः)** धारण कीजिये॥५॥

भावार्थः-जो पदार्थों के गुप्त स्वरूपों को जान के बुद्धि से शिल्पविद्या की वृद्धि करते हैं, वे उत्तम राज्य और ऐश्वर्ययुक्त होते हैं॥

पुना राजविषयमाह॥

फिर राजविषय को कहते हैं॥

त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम्।

तं चिन्मन्दानो वृषभः सुतस्योच्चैरिन्द्रो अपगूर्या जघान॥६॥३२॥

त्यम्। चित्। इत्था। कत्पयम्। शयानम्। असूर्ये। तमसि। ववृधानम्। तम्। चित्। मन्दानः। वृषभः। सुतस्य। उच्चैः। इन्द्रः। अपऽगूर्या। जघान॥६॥

पदार्थः-(त्यम्) तम् **(चित्)** अपि **(इत्था)** अनेन प्रकारेण **(कत्पयम्)** कतिपयम्। अत्र **छान्दसो वर्णलोपो वे**तीलोपः। **(शयानम्) (असूर्ये)** अविद्यमानः सूर्यो यस्मिँस्तस्मिन् **(तमसि)** रात्रौ **(वावृधानम्) (तम्) (चित्) (मन्दानः)** आनन्दन् **(वृषभः)** श्रेष्ठः **(सुतस्य)** निष्पन्नस्य पदार्थस्य **(उच्चैः) (इन्द्रः)** सेनेशः **(अपगूर्या)** उद्यम्य **(जघान)** हन्ति॥६॥

अन्वयः-हे मनुष्या! य इन्द्र उच्चैरपगूर्या सुतस्य मन्दानो वृषभस्तं चित्कत्पयमसूर्ये तमसि शयानं वावृधानं चिन्मेघं जघानेत्था त्यं विच्छत्रुं हन्यात्॥६॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्य्येण मेघो हन्यते तमो निवार्य, तथैव राज्ञा दुष्टा हन्तव्याः श्रेष्ठाः पालनीयाः॥६॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** सेना का ईश **(उच्चैः)** उच्चता के साथ **(अपगूर्या)** उद्यम कर **(सुतस्य)** उत्पन्न हुए पदार्थ का **(मन्दानः)** आनन्द करता हुआ **(वृषभः)** श्रेष्ठ पुरुष **(तम्)** उसको **(चित्)** भी **(कत्पयम्)** कितने को तथा **(असूर्ये)** जिसमें सूर्य्य विद्यमान नहीं उस **(तमसि)** रात्री में **(शयानम्)** शयन करते और **(वावृधानम्)** निरन्तर वृद्धि को प्राप्त होते हुए को **(चित्)** वा मेघ को **(जघान)** नाश करता है **(इत्था)** इस प्रकार से **(त्यम्)** उस शत्रु का भी नाश करे॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य्य मेघ का नाश करता है अन्धकार का वारण करके, वैसे ही राजा को चाहिये कि दुष्टों का नाश और श्रेष्ठों का पालन करे॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उद्यदिन्द्रो॑ महते दा॑नवाय॒ वध॒र्यमि॑ष्ट॒ सहो॒ अप्र॑तीतम्।

यदी॑ वज्र॑स्य॒ प्रभृ॑तौ द॒दाभ॒ विश्व॑स्य ज॒न्तोर॑ध॒मं च॑कार॥७॥

उत्। यत्। इन्द्रः। म॒हते। दा॒न॒वाय॑। वधः॑। यमि॑ष्ट। सहः॑। अप्र॑तिऽइतम्। यत्। ई॒म्। वज्र॑स्य। प्रऽभृ॑तौ। द॒दाभ॑। विश्व॑स्य। ज॒न्तोः॑। अ॒ध॒मम्। च॒का॒र॒॥७॥

पदार्थः-(**उत्**) (**यत्**) यम् (**इन्द्रः**) (**महते**) (**दानवाय**) दानकर्त्रे (**वधः**) वधम् (**यमिष्ट**) नियच्छेत् (**सहः**) बलम् (**अप्रतीतम्**) अधर्मिभिरप्राप्तम् (**यत्**) यः (**ईम्**) सर्वतः (**वज्रस्य**) शस्त्रप्रहारस्य (**प्रभृतौ**) प्रकृष्टधारणे (**ददाभ**) हिनस्ति (**विश्वस्य**) समग्रस्य (**जन्तोः**) जीवमात्रस्य मध्ये (**अधमम्**) (**चकार**) करोति॥७॥

अन्वयः-हे विद्वन्! यद्य इन्द्रो महते दानवाय वधरुद्यमिष्ट यदप्रतीतं सह ईं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोरधमं चकार तं विज्ञाय संप्रयुङ्क्ष्व॥७॥

भावार्थः-हे राजादयो जना यूयं सूर्य्यवद्वर्त्तित्वा राज्यस्याऽधमां दिशां निवारयत॥७॥

पदार्थः-हे विद्वन्! (**यत्**) जो (**इन्द्रः**) राजा (**महते**) बड़े (**दानवाय**) दान करने वाले के लिये (**वधः**) वध को (**उत्, यमिष्ट**) उत्तम नियम करे और (**यत्**) जिस (**अप्रतीतम्**) अधर्मिजनों से नहीं प्राप्त हुए (**सहः**) बल को (**ईम्**) सब ओर से (**वज्रस्य**) शस्त्रप्रहार के (**प्रभृतौ**) उत्तम प्रकार धारण करने में (**ददाभ**) नाश करता और (**विश्वस्य**) सम्पूर्ण (**जन्तोः**) जीवमात्र के मध्य में (**अधमम्**) नीचा (**चकार**) करता अर्थात् जो सब पर अपना आक्रमण करता है, उसको जान के उत्तम प्रकार प्रयोग करो अर्थात् उससे प्रयोजन सिद्ध करो॥७॥

भावार्थः-हे राजा आदि जनो! आप लोग सूर्य्य के सदृश वर्त्ताव करके राज्य की अधमदशा का निवारण करें॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

त्यं चि॒दर्ण॑ मधु॒पं शया॑नमसि॒न्वं व॒व्रं मह्यादद॑ु॒ग्रः।

अ॒पा॒द॑म॒त्रं म॑हता व॒धेन॒ नि दु॑र्यो॒ण आ॑वृणङ् मृ॒ध्रवा॑चम्॥८॥

त्यम्। चि॒त्। अर्णम्। म॒धु॒ऽपम्। शया॑नम्। अ॒सि॒न्वम्। व॒व्रम्। मह्या॑। आद॑त्। उ॒ग्रः। अ॒पाद॑म्। अ॒त्रम्। म॒ह॒ता। व॒धे॑न। नि। दु॒र्यो॒णे। अ॒वृ॒ण॒क्। मृ॒ध्रऽवा॑चम्॥८॥

पदार्थः-(त्यम्) (चित्) (अर्णम्) जलम् **(मधुपम्)** यन्मधूनि पाति तम् **(शयानम्)** शयानमिव वर्त्तमानम् **(असिन्वम्)** अबद्धम् **(वव्रम्)** वरणीयम् **(महि)** महत् **(आदत्)** आदद्यात् **(उग्रः)** तेजस्वी **(अपादम्)** अविद्यमानपादम् **(अत्रम्)** योऽतति सर्वत्र व्याप्नोति तम् **(महता) (वधेन) (नि)** नितराम् **(दुर्योणे)** गृहे **(आवृणक्)** वृणोति। अत्र **तुजादीनामि**ति दीर्घः। **(मृध्रवाचम्)** हिंसितवाचम्॥८॥

अन्वयः-हे विद्वन्! यथोग्रः सूर्य्यो महता वधेन दुर्योणे त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रमपादमत्रं मृध्रवाचं मेघं मह्यादन्यावृणक् तथा त्वं वर्त्तस्व॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्युता मेघो भूमौ निपात्यते तथा भवन्तो दुष्टानधो निपातयन्तु॥८॥

पदार्थः-हे विद्वन्! जैसे **(उग्रः)** तेजस्वी सूर्य्य **(महता)** बड़े **(वधेन)** वध से **(दुर्योणे)** गृह में **(त्यम्)** उस **(चित्)** निश्चित **(अर्णम्)** जल का **(मधुपम्)** मधुर पदार्थों की रक्षा करने वाले का **(शयानम्)** और सोते हुए के सदृश वर्त्तमान **(असिन्वम्)** नहीं बद्ध **(वव्रम्)** स्वीकार करने योग्य **(अपादम्)** पादों से रहित और **(अत्रम्)** सर्वत्र व्याप्त होने वाले **(मृध्रवाचम्)** हिंसित वाणी से युक्त मेघ का **(महि)** अतीव **(आदत्)** ग्रहण करे वा **(नि)** अत्यन्त **(आवृणक्)** स्वीकार करता है, वैसे आप वर्त्ताव कीजिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्य! जैसे बिजुली मेघ को भूमि में गिराती है, वैसे आप दुष्टों के [=को] नीच दशा को प्राप्त करिये [=कराइये]॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

को अ॑स्य॒ शुष्मं॑ तवि॑षीं वरात॒ एको॒ धना॑ भरते॒ अप्र॑तीतः।
इ॒मे चि॑दस्य॒ व्रय॑सो॒ नु दे॒वी इन्द्र॑स्यौज॑सो भि॒यसा॑ जिहाते॥९॥

कः। अ॒स्य॒। शुष्म॑म्। तवि॑षीम्। व॒रा॒ते॒। एकः॑। धना॑। भ॒र॒ते॒। अप्र॑तिऽइतः। इ॒मे इति॑। चि॒त्। अ॒स्य॒। व्रय॑सः। नु। दे॒वी इति॑। इन्द्र॑स्य। ओज॑सः। भि॒यसा॑। जि॒हा॒ते॒ इति॑॥९॥

पदार्थः-(कः) (अस्य) (शुष्मम्) बलम् **(तविषीम्)** सेनाम् **(वराते)** वृणुयाताम् **(एकः) (धना)** धनानि **(भरते) (अप्रतीतः)** अप्रत्यक्षः **(इमे) (चित्) (अस्य) (व्रयसः) (नु) (देवी)** देदीप्यमाने **(इन्द्रस्य)** विद्युतः **(ओजसः)** बलस्य **(भियसा)** धारणेन **(जिहाते)** गच्छतः॥९॥

अन्वयः-हे विद्वांसः! कोऽस्य शुष्मन्तविषीं धरेदिमे देवी इन्द्रस्यौजसो भियसा नु जिहाते। अनयोरेको धना भरतेऽपरोऽप्रतीतोऽस्य चिज्व्रयसो धर्त्ता वर्त्तते ताविमौ सर्वं वराते **[**यतो हि**]** इमे सर्वे ताभ्यां धृताः सन्ति॥९॥

भावार्थः-हे मनुष्या! यो द्विविधोऽग्निरेकः प्रसिद्धः सूर्य्यभौमरूपो द्वितीयो गुप्तो विद्युद्रूप इमावेव सर्वं जगद्धृत्वा गमयतः॥९॥

पदार्थः-हे विद्वान् जनो! **(कः)** कौन **(अस्य)** इसके **(शुष्मम्)** बल को और **(तविषीम्)** सेना को धारण करे और **(इमे)** ये **(देवी)** प्रकाशमान दो अग्नि **(इन्द्रस्य)** बिजुली के **(ओजसः)** बल के **(भियसा)** धारण से **(नु)** शीघ्र **(जिहाते)** चलते हैं, इन दोनों के मध्य में **(एकः)** एक तो **(धना)** धनों को **(भरते)** धारण करता है और दूसरा **(अप्रतीतः)** नहीं प्रत्यक्ष हुआ **(अस्य)** **[**इसके**]** **(चित्)** भी **(त्रयसः)** वेगवान् का धारण करने वाला वर्त्तमान है, वे ये दोनों सब को **(वराते)** स्वीकार को प्राप्त होवें, क्योंकि ये सब पदार्थ उन दोनों से धारण किये गये हैं॥९॥

भावार्थः-हे मनुष्यो! जो दो प्रकार का अग्नि- एक तो प्रसिद्ध सूर्य्य पृथ्वी में प्रसिद्धरूप और दूसरा गुप्त बिजुलीरूप ये ही दोनों सब जगत् को धारण करके चलाते हैं॥९॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

न्य॑स्मै दे॒वी स्वधि॑तिर्जिहीत॒ इन्द्रा॑य गा॒तुरु॑श॒तीव॑ येमे।

सं यदोजो॑ यु॒वते॒ विश्व॑माभि॒रनु॑ स्व॒धाव्ने॑ क्षि॒तयो॑ नमन्त॥ १०॥

नि। अ॒स्मै॒। दे॒वी। स्वऽधि॑तिः। जि॒हीते॒। इन्द्रा॑य। गा॒तुः। उ॒श॒तीऽइ॑व। ये॒मे॒। सम्। यत्। ओजः॑। यु॒वते॑। विश्व॑म्। आ॒भि॒रिति॑। अनु॑। स्व॒धाऽव्ने॑। क्षि॒तयः॑। न॒म॒न्त॒॥ १०॥

पदार्थः-**(नि)** **(अस्मै)** **(देवी)** **(स्वधितिः)** वज्र इव **(जिहीते)** गमयेते **(इन्द्राय)** ऐश्वर्य्याय **(गातुः)** भूमिः **(उशतीव)** कामयमाना स्त्रीव **(येमे)** **(सम्)** **(यत्)** यथा **(ओजः)** वीर्य्यम् **(युवते)** प्राप्तयुवावस्थे **(विश्वम्)** सर्वम् **(आभिः)** क्रियाभिः **(अनु)** **(स्वधाव्ने)** यः स्वं दधाति तस्मै **(क्षितयः)** मनुष्याः **(नमन्त)** नमन्ति॥१०॥

अन्वयः-हे युवते! स्वधितिरिव देवी त्वमस्मा इन्द्राय गातुरिवोशतीव इमे यदोजः सङ्गृह्य सन्नि येमे। आभिः स्वधाव्ने विश्वमनु जिहीते यथा वा क्षितयो नमन्त तथा त्वं भव॥१०॥

भावार्थः-यथा कृतब्रह्मचर्य्या ब्रह्मचारिणी पूर्णचतुर्विंशतिवर्षा पतिं कामयमाना सदृशं हृद्यं स्वामिनं गृह्णाति तथैव विद्युदादिरूपोऽग्निः सर्वं विश्वं धरति यथा गुणवतो जनान् मनुष्या नमन्ति तथैव सुलक्षणौ स्त्रीपुरुषौ सर्वे जना नमन्ति॥१०॥

पदार्थः-हे **(युवते)** युवावस्था को प्राप्त हुई **(स्वधितिः)** वज्र के सदृश **(देवी)** विदुषी तुम **(अस्मै)** इस **(इन्द्राय)** ऐश्वर्य्य के लिये यह दो स्त्रियाँ **(गातुः)** भूमि और **(उशतीव)** कामना करती हुई स्त्री के समान **(यत्)** जैसे **(ओजः)** वीर्य को उत्तम प्रकार ग्रहण करके **(सम्, नि, येमे)** अच्छे प्रकार नियम में रखती और **(आभिः)** इन क्रियाओं से **(स्वधाव्ने)** धन को धारण करने वाले के लिये **(विश्वम्)** समस्त व्यवहार को **(अनु, जिहीते)** अनुकूल चलाती हैं तथा जैसे **(क्षितयः)** मनुष्य **(नमन्त)** नम्र होते हैं, वैसे आप होइये॥१०॥

भावार्थः-जैसे बह्मचर्य्य को धारण को हुई ब्रह्मचारिणी कन्या पूर्ण चौबीस वर्ष की अवस्था से युक्त हुई पति की कामना करती हुई गुण, कर्म्म और स्वभाव के सदृश और प्रिय स्वामी का ग्रहण करती है, वैसे ही बिजुली आदि रूप अग्नि सम्पूर्ण संसार को धारण करता है और जैसे गुणवान् जनों को मनुष्य नमते हैं, वैसे ही उत्तम लक्षणों से युक्त स्त्री-पुरुषों को सम्पूर्ण जन नमते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एकं॒ नु त्वा॒ सत्प॑तिं॒ पाञ्च॑जन्यं जा॒तं शृ॑णोमि य॒शस॒ं जने॑षु।

तं मे॑ जगृभ्र आ॒शसो॒ नवि॑ष्ठं दो॒षा वस्तो॒र्हव॑मानास॒ इन्द्र॑म्॥ ११॥

एक॑म्। नु। त्वा॒। सत्ऽप॑तिम्। पाञ्च॑ऽजन्यम्। जा॒तम्। शृ॒णो॒मि॒। य॒शस॑म्। जने॑षु। तम्। मे॒। ज॒गृ॒भ्रे॒। आ॒ऽशसः॑। नवि॑ष्ठम्। दो॒षा। वस्तोः॑। हव॑मानासः। इन्द्र॑म्॥ ११॥

पदार्थः-(एकम्) असहायम् **(नु)** सद्यः **(त्वा)** त्वाम् **(सत्पतिम्)** सतां पालकम् **(पाञ्चजन्यम्)** पञ्चजनाः प्राणा बलवन्तो यस्य तदपत्यम् **(जातम्)** प्रसिद्धम् **(शृणोमि) (यशसम्)** यशस्विनम् **(जनेषु) (तम्) (मे)** मम **(जगृभ्रे)** गृह्णन्तु **(आशसः)** काममिच्छन्तः **(नविष्ठम्)** अतिशयेन नवम् **(दोषा)** रात्रीः **(वस्तोः)** दिनम् **(हवमानासः)** आदातुमिच्छन्तः **(इन्द्रम्)** परमैश्वर्य्यम्॥११॥

अन्वयः-हे विद्वांसः! कृताष्टाचत्वारिंशद् ब्रह्मचर्य्यमेकं सत्पतिं पाञ्चजन्यं जनेषु जातं यशसं त्वा त्वां शृणोमि तमिन्द्रं नविष्ठं मे स्वामिनं हवमानास आशसो जना दोषा वस्तोर्नु जगृभ्रे॥११॥

भावार्थः-ब्रह्मचारिणी प्रसिद्धकीर्तिं सत्पुरुषं सुशीलं शुभगुणरूपसमन्वितं प्रीतिमन्तं पतिं ग्रहीतुमिच्छेत्तथैव ब्रह्मचार्य्यपि स्वसदृशीमेव ब्रह्मचारिणी स्त्रियं गृह्णीयात्॥११॥

पदार्थः-हे विद्वानो! किया है अड़तालीस वर्ष ब्रह्मचर्य्य जिसने ऐसे **(एकम्)** द्वितीय सहाय से रहित **(सत्पतिम्)** श्रेष्ठों के पालन करने वाले **(पाञ्चजन्यम्)** प्राण आदि पांच पवन बलवान् जिसके उसके पुत्र और **(जनेषु)** मनुष्यों में **(जातम्)** प्रसिद्ध और **(यशसम्)** यशस्वी **(त्वा)** आपको **(शृणोमि)** सुनती हूं **(तम्)** उन **(इन्द्रम्)** अत्यन्त ऐश्वर्य्ययुक्त **(नविष्ठम्)** अत्यन्त नवीन **(मे)** मेरे स्वामी की **(हवमानासः)** ग्रहण करने की इच्छा करते और **(आशसः)** मनोरथ की इच्छा करते हुए जन **(दोषा)** रात्रियों और **(वस्तोः)** दिन का **(नु)** शीघ्र **(जगृभ्रे)** ग्रहण करें॥११॥

भावार्थः-ब्रह्मचर्य्य को वेदोक्त समयानुसार धारण किये हुई कन्या प्रसिद्ध जिसका यश ऐसे श्रेष्ठ पुरुष, उत्तम स्वभाव वाले और उत्तम गुण और रूप से युक्त, प्रीति करने वाले स्वामी के अर्थात् पति के ग्रहण करने की इच्छा करे, वैसे ही ब्रह्मचारी भी अपने सदृश ही जो ब्रह्मचारिणी स्त्री उसका ग्रहण करे॥११॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

एवा हि त्वामृतुथा यातयन्तं मघा विप्रेभ्यो ददतं शृणोमि।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिन्द्र॥ १२॥ ३३॥ १॥ २॥

एव। हि। त्वाम्। ऋतुऽथा। यातयन्तम्। मघा। विप्रेभ्यः। ददतम्। शृणोमि। किम्। ते। ब्रह्माणः। गृहते। सखायः। ये। त्वाऽया। निऽदधुः। कामम्। इन्द्र॥ १२॥

पदार्थः-(एवा) अत्र **निपातस्य चे**ति दीर्घः। **(हि) (त्वाम्) (ऋतुथा)** ऋतोर्ऋतोर्मध्ये **(यातयन्तम्)** सन्तानाय प्रयतन्तम् **(मघा)** मघानि धनानि **(विप्रेभ्यः)** मेधाविभ्यः **(ददतम्) (शृणोमि) (किम्) (ते)** तव **(ब्रह्माणः)** चतुर्वेदविदः **(गृहते)** गृह्णन्ति **(सखायः)** सुहृदः **(ये) (त्वाया)** त्वयि। अत्र विभक्तेः **सुपां सुलुगि**ति याजादेशः। **(निदधुः)** निदधति **(कामम्) (इन्द्र)** परमैश्वर्य्ययुक्त॥ १२॥

अन्वयः-हे इन्द्र! विद्यैश्वर्य्ययुक्त पतिकामाहं हि विप्रेभ्यो मघा ददतमृतुथा यातयन्तं त्वामेवा शृणोमि ते तव ये ब्रह्माणः सखायस्ते त्वाया किं गृहते कं कामं निदधुः॥ १२॥

भावार्थः-स्त्री ऋतुगामिकाममूद्ध्वरितसं सुशीलं विद्वांसं प्रसिद्धकीर्त्तिं जनं पतित्वाय गृह्णीयात् तेन सह यथावद्वर्त्तित्वाऽलंकामा सौभाग्याढ्या भवेदिति॥ १२॥

अत्रेन्द्रविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वात्रिंशत्तमं सूक्तं त्रयस्त्रिंशो वर्ग्गश्चतुर्थाष्टके प्रथमोऽध्यायः पञ्चमे मण्डले द्वितीयोऽनुवाकश्च समाप्तः॥

अस्मिन्नध्यायेऽग्निविद्वदिन्द्रादिगुणवर्णनादेतदध्यायोक्तार्थानां पूर्वाऽध्यायोक्तार्थैः सह सङ्गतिरस्तीति वेद्यम्॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्य्ययुक्त! विद्या और ऐश्वर्य्य से युक्त पति की कामना करती हुई मैं **(हि)** निश्चय से **(विप्रेभ्यः)** बुद्धिमान् जनों के लिये **(मघा)** धनों को **(ददतम्)** देते और **(ऋतुथा)** ऋतु-ऋतु के मध्य में **(यातयन्तम्)** सन्तान के लिये प्रयत्न करते हुए **(त्वाम्)** आप को **(एवा)** ही **(शृणोमि)** सुनती हैं और **(ते)** आपके **(ये)** जो **(ब्रह्माणः)** चार वेद के जानने वाले **(सखायः)** मित्र वे **(त्वाया)** आप में **(किम्)** क्या **(गृहते)** ग्रहण करते और किस **(कामम्)** मनोरथ को **(निदधुः)** धारण करते हैं॥ १२॥

भावार्थः-स्त्री, ऋतु-ऋतु के मध्य में जाने की कामना वाला है वीर्य्य जिसका ऐसे ऊर्ध्वरिता वीर्य्य को वृथा न छोड़ने वाले, ब्रह्मचर्य्य को धारण किये हुए, उत्तम स्वभाव वाले और विद्यायुक्त उत्तम यश वाले जन को पतिपने के लिये स्वीकार करे, उसके साथ यथावत् वर्त्ताव करके, पूर्ण मनोरथ करने वाली और सौभाग्य से युक्त होवे॥ १२॥

इस सूक्त में इन्द्र और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बत्तीसवां सूक्त और तेतीसवां वर्ग, चौथे अष्टक में प्रथम अध्याय और पञ्चम मण्डल में द्वितीय अनुवाक समाप्त हुआ॥

इस अध्याय में अग्नि विद्वान् और इन्द्रादिकों के गुणों का वर्णन होने से इस अध्याय में कहे हुए अर्थों की पहिले अध्यायों में कहे हुए अर्थों के साथ सङ्गति है ऐसा जानना चाहिये॥

॥ओ३म्॥

अथ द्वितीयाऽध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ दशर्चस्य त्रयस्त्रिंशत्तमस्य सूक्तस्य संवरणः प्राजापत्य ऋषिः। इन्द्रो देवता। १, २, ७ पङ्क्तिः। ३ निचृत्पङ्क्तिः। ४, १० भुरिक् पङ्क्तिः। ५, ६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ८ त्रिष्टुप्। ९ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेन्द्रगुणानाह॥

अब दूसरे अध्याय का प्रारम्भ है। दश ऋचा वाले तेतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्र के गुण को कहते हैं॥

महि॑ म॒हे त॒वसे॑ दी॒ध्ये॒ नॄनिन्द्रा॑येत्था त॒वसे॒ अत॑व्यान्।
यो अ॑स्मै सुम॒तिं वाज॑सातौ स्तु॒तो जने॑ सम॒र्यो॑ऽचिके॑त॥ १॥

महि॑। म॒हे। त॒वसे॑। दी॒ध्ये॒। नॄन्। इन्द्रा॑य। इ॒त्था। त॒वसे॑। अत॑व्यान्। यः। अ॒स्मै॒। सु॒ऽम॒तिम्। वाज॑ऽसातौ। स्तु॒तः। जने॑। स॒ऽम॒र्यः॑। चि॒के॒त॥ १॥

पदार्थः-(महि) महतः **(महे)** महते **(तवसे)** बलाय **(दीध्ये)** प्रकाशये **(नॄन्)** मनुष्यान् **(इन्द्राय)** परमैश्वर्य्याय **(इत्था)** **(तवसे)** बलिने **(अतव्यान्)** यतमानः **(यः)** **(अस्मै)** **(सुमतिम्)** शोभनां प्रज्ञाम् **(वाजसातौ)** स-ामे **(स्तुतः)** **(जने)** **(समर्यः)** स-ाममिच्छुः **(चिकेत)** जानीयात्॥ १॥

अन्वयः-हे मनुष्या! योऽतव्याँ स्तुतो जने समर्यो वाजसातौ सुमतिं महे तवसे चिकेतास्मै तवसे इन्द्रायेत्था महि नॄनहं दीध्ये॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यो मनुष्यो यस्मै सुखमुपकुर्य्यात् स तस्मै प्रत्युपकारं सततं कुर्यात्॥ १॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अतव्यान्)** प्रयत्न करता हुआ **(स्तुतः)** स्तुति किया गया **(जने)** मनुष्यों के समूह में **(समर्यः)** संग्राम की इच्छा करता हुआ **(वाजसातौ)** संग्राम में **(सुमतिम्)** उत्तम बुद्धि को **(महे)** बड़े **(तवसे)** बल के लिये **(चिकेत)** जाने **(अस्मै)** इस **(तवसे)** बली **(इन्द्राय)** अत्यन्त ऐश्वर्य्य से युक्त के लिये **(इत्था)** इस प्रकार **(महि)** बड़े **(नॄन्)** मनुष्यों का मैं **(दीध्ये)** प्रकाश करता हूं॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य जिस मनुष्य के लिये सुखविषयक उपकार करे, वह उसके लिये प्रत्युपकार निरन्तर करे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स त्वं न॑ इन्द्र धियसा॒नो अ॒र्कैर्हरी॑णां वृष॒न् योक्त्र॑मश्रेः।

या इ॒त्था म॑घव॒न्ननु॒ जोषं॑ व॒क्षो॑ अ॒भि प्रार्यः॑ स॑क्षि॒ जना॑न्॥ २॥

सः। त्वम्। नः। इन्द्र। धि॒य॒सा॒नः। अ॒र्कैः। हरी॑णाम्। वृ॒ष॒न्। योक्त्र॑म्। अ॒श्रेः। याः। इ॒त्था। म॒घ॒ऽव॒न्। अनु॑। जोष॑म्। व॒क्षः॑। अ॒भि। प्र। अ॒र्यः। स॒क्षि॒। जना॑न्॥ २॥

पदार्थः-(सः) (त्वम्) (नः) अस्मान् **(इन्द्र)** परमैश्वर्ययुक्त **(धियसानः)** ध्यानं कुर्वन् **(अर्कैः)** विचारैः **(हरीणाम्)** मनुष्याणाम् **(वृषन्)** सुखवृष्टिं कुर्वन् **(योक्त्रम्)** योजनम् **(अश्रेः)** सेवयेः **(याः) (इत्था) (मघवन्)** अत्युत्तमधनयुक्त **(अनु) (जोषम्)** प्रीतिम् **(वक्षः)** प्राप्नुहि **(अभि) (प्र) (अर्यः)** स्वामी राजा **(सक्षि)** सम्बध्नासि **(जनान्)** मनुष्यान्॥ २॥

अन्वयः-हे वृषन् मघवन्निन्द्र! स धियसानोऽर्यस्त्वमर्कैर्नोऽस्माकमस्मान् वा हरीणां योक्त्रमश्रेः। या उत्तमा नीतयः सन्ति तासां जोषमनु वक्षो इत्था जनानाभि प्र सक्षि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। स एवोत्तमो विद्वान् यो मनुष्यान् प्रज्ञा योगाभ्यासादिना वर्धयेत् सर्वदा नीत्यनुसारं कर्म्म कृत्वा प्रजाः प्रसादयेत्॥ २॥

पदार्थः-हे **(वृषन्)** सुख की वृष्टि करते हुए **(मघवन्)** अत्युत्तम धन से युक्त और **(इन्द्र)** अत्यन्त ऐश्वर्य्य वाले **(सः)** वह **(धियसानः)** ध्यान करता हुआ **(अर्यः)** स्वामी राजा **(त्वम्)** आप **(अर्कैः)** विचारों से **(नः)** हम लोगों के वा हम लोगों को **(हरीणाम्)** मनुष्यों के सम्बन्ध में **(योक्त्रम्)** एकत्र करने का **(अश्रेः)** सेवन कीजिये और **(याः)** जो उत्तम नीतियां हैं उनकी **(जोषम्)** प्रीति को **(अनु, वक्षः)** अनुकूल प्राप्त हूजिये **(इत्था)** इस प्रकार से **(जनान्)** मनुष्यों को **(अभि, प्र, सक्षि)** अच्छे प्रकार सम्बन्धित करते हो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वही उत्तम विद्वान् है, जो मनुष्यों की बुद्धि को योगाभ्यास आदि से बढ़ावे और सब काल में नीति के अनुसार कर्म्म करके प्रजाओं को प्रसन्न करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

न ते त॑ इन्द्राभ्य१॑स्मदृ॒ष्वायु॑क्तासो अब्रह्मता॒ यदस॑न्।

तिष्ठा॒ रथ॒मधि॒ तं व॑ज्रहस्ता र॒श्मिं दे॑व यमसे॒ स्वश्वः॑॥ ३॥

नः। ते। ते॒। इ॒न्द्र॒। अ॒भि। अ॒स्मत्। ऋ॒ष्व॒। अयु॑क्तासः। अ॒ब्र॒ह्म॒ता॑। यत्। अस॑न्। तिष्ठ॑। रथ॑म्। अधि॑। तम्। व॒ज्र॒ऽह॒स्त॒। आ। र॒श्मिम्। दे॒व॒। य॒म॒से॒। सु॒ऽअश्वः॑॥ ३॥

पदार्थः-(न) निषेधे **(ते) (ते)** तव **(इन्द्र)** राजन् **(अभि)** आभिमुख्ये **(अस्मत्) (ऋष्व)** महापुरुष **(अयुक्तासः)** योगरहिताः **(अब्रह्मता)** अधनता **(यत्)** यदा **(असन्)** भवन्ति **(तिष्ठा)** अत्र **द्व्यचोऽतस्तिङ**

इति दीर्घः। **(रथम्)** रमणीयं यानम् **(अधि)** उपरि **(तम्)** **(वज्रहस्त)** शस्त्रास्त्रबाहो **(आ)** **(रश्मिम्)** किरणम् **(देव)** दातः **(यमसे)** निगृह्णासि **(स्वश्वः)** शोभना अश्वा अस्य॥३॥

अन्वयः-हे वज्रहस्त ऋष्व देवेन्द्र! ये तेऽब्रह्मताऽयुक्तासो नाभ्यसन्। यद्यदा तेऽस्मद्दूरे निवसन्ति तदा स्वश्वस्त्वं रश्मिमिव तं रथमा यमसे तस्मादेतमधि तिष्ठा॥३॥

भावार्थः-हे ऐश्वर्य्ययुक्त! येऽयुक्तव्यवहाराः स्युस्तेऽस्मत्त्वच्च दूरे वसन्तु, यदि त्वं यानचालनविद्यां विजानीयास्तर्हि युद्धेऽपि सामर्थ्यं प्राप्नुयाः॥३॥

पदार्थः-हे **(वज्रहस्त)** शस्त्र और अस्त्रों को बाहुओं में धारण करने वाले **(ऋष्व)** महापुरुष **(देव)** दानशील **(इन्द्र)** राजन्! जो **(ते)** आपकी **(अब्रह्मता)** निर्धनता **(अयुक्तासः)** और योग से रहित पुरुष **(न)** नहीं **(अभि)** सम्मुख **(असन्)** होते हैं **(यत्)** जब **(ते)** वे **(अस्मत्)** हम लोगों से दूर वसते हैं तब **(स्वश्वः)** उत्तम घोड़ों से युक्त आप **(रश्मिम्)** किरण के सदृश **(तम्)** उस **(रथम्)** सुन्दर वाहन को **(आ, यमसे)** विस्तृत करते हो, इससे इसके **(अधि)** ऊपर **(तिष्ठा)** स्थित हूजिये॥३॥

भावार्थः-हे ऐश्वर्य्य से युक्त! जो अयोग्य व्यवहार वाले होवें वे हम लोगों के और आपके दूर वसें और आप वाहनों के चलाने की विद्या को विशेष करके जानें तो युद्ध में भी सामर्थ्य को प्राप्त होवें॥३॥

पुनरिन्द्रगुणानाह॥

फिर इन्द्र के गुणों को कहते हैं॥

पुरु यत्ते इन्द्र सन्युक्था गवे चकर्थोर्वरासु युध्यन्।
ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित्॥४॥

पुरु। यत्। ते। इन्द्र। सन्ति। उक्था। गवे। चकर्थ। उर्वरासु। युध्यन्। ततक्षे। सूर्याय। चित्। ओकसि। स्वे। वृषा। समत्ऽसु। दासस्य। नाम। चित्॥४॥

पदार्थः-(**पुरु**) बहूनि **(यत्)** यानि **(ते)** तव **(इन्द्र)** विद्यैश्वर्य्ययुक्त **(सन्ति)** **(उक्था)** प्रशंसितानि कर्म्माणि **(गवे)** गवादिपशुहिताय **(चकर्थ)** कुर्याः **(उर्वरासु)** भूमिषु **(युध्यन्)** **(ततक्षे)** तनूकरोषि **(सूर्य्याय)** सूर्यायेव वर्त्तमानाय **(चित्)** **(ओकसि)** गृहे **(स्वे)** स्वकीये **(वृषा)** बलिष्ठ सन् **(समत्सु)** स- ामेषु **(दासस्य)** **(नाम)** संज्ञाम् **(चित्)** अपि॥४॥

अन्वयः-हे इन्द्र! वृषा त्वं ते यत्पुरूक्था गवे सन्ति तार्न्युवरासु समत्सु युध्यन् सँश्चकर्थ शत्रूँस्ततक्षे सूर्य्याय चिदिव स्व ओकसि दासस्य चिन्नाम प्रकटय॥४॥

भावार्थः-हे राजन्! यावत्य उत्तमाः सामग्र्यः स्युस्ताः सेनायां युद्धाय स्थापय यानि च गृहार्थानि वस्तूनि भवेयुस्तानि गृहे निधेहि॥४॥

पदार्थः-हे **(इन्द्र)** विद्या और ऐश्वर्य्य से युक्त **(वृषा)** बलिष्ठ होते हुए आप **(ते)** आपके **(यत्)** जो **(पुरु)** बहुत **(उक्था)** प्रशंसित कर्म्म **(गवे)** गौ आदि पशुओं के हित के लिये **(सन्ति)** हैं उनको **(उर्वरासु)** भूमियों में और **(समत्सु)** स- ामों में **(युध्यन्)** युद्ध करते हुए **(चकर्थ)** करें और शत्रुओं को **(ततक्षे)** सूक्ष्म अर्थात् निर्बल करते हो और **(सूर्य्याय)** सूर्य्य के सदृश वर्त्तमान के लिये **(चित्)** भी **(स्वे)** अपने **(ओकसि)** गृह में **(दासस्य)** दास के **(चित्)** निश्चित **(नाम)** नाम को प्रकट कीजिये॥४॥

भावार्थः-हे राजन्! जितनी उत्तम सामग्रियां होवें, उनको सेना में युद्ध के लिये स्थापित कीजिये और जो गृह के लिये वस्तु होवें, उनको गृह में स्थापित कीजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

व॒यं ते त॑ इन्द्र॒ ये च॒ नर॒: शर्धो॑ जज्ञा॒ना या॒ताश्च॒ रथा॑:।

आस्माञ्छ॑गम्यादहिशुष्म॒ सत्वा॒ भगो॒ न हव्य॑: प्रभृ॒थेषु॒ चारु॑:॥५॥१॥

व॒यम्। ते। त॒े। इ॒न्द्र॒। ये। च॒। नर॑:। शर्ध॑:। ज॒ज्ञा॒ना:। या॒ता:। च॒। रथा॑:। आ। अ॒स्मान्। ज॒ग॒म्या॒त्। अ॒हि॒ऽशु॒ष्म॒। सत्वा॑। भग॑:। न। हव्य॑:। प्र॒ऽभृ॒थेषु॑। चारु॑:॥५॥

पदार्थः-**(वयम्)** **(ते)** **(ते)** तव **(इन्द्र)** राजन् **(ये)** **(च)** **(नरः)** नायकाः **(शर्धः)** बलानि **(जज्ञानाः)** जायमानाः **(याताः)** ये प्राप्तास्ते **(च)** **(रथाः)** यानादयः **(आ)** **(अस्मान्)** **(जगम्यात्)** यथावत्प्राप्नुयात् **(अहिशुष्म)** योऽहिं मेघं शोषयति स सूर्य्यस्तद्वद्वर्त्तमान **(सत्वा)** यः सीदति **(भगः)** ऐश्वर्य्ययोगः **(न)** इव **(हव्यः)** आदातुं योग्यः **(प्रभृथेषु)** प्रकर्षेण धर्त्तव्येषु **(चारुः)** सुन्दरः॥५॥

अन्वयः-हे अहिशुष्मेन्द्र! ये ते शर्धो जज्ञाना याता नरो रथाश्च सन्ति तेऽस्मान् प्राप्नुवन्तु। यो भगो न प्रभृथेषु हव्यश्चारुः सत्वा भवानस्माना जगम्यात्तं भवन्तं वयं च प्राप्नुयाम॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यदा वयं तव त्वमस्माकं मित्रं भवेस्तदैवास्माकमैश्वर्य्यं प्रवर्धेत यथैश्वर्य्यं सर्वेषां प्रियं वर्त्तते तथैव धर्मः प्रियः सदा रक्षणीयः॥५॥

पदार्थः-हे **(अहिशुष्म)** मेघ को सुखाने वाले सूर्य्य के सदृश वर्त्तमान **(इन्द्र)** राजन्! **(ये)** जो **(ते)** आपके **(शर्धः)** बल और **(जज्ञानाः)** उत्पन्न तथा **(याताः)** प्राप्त हुए **(नरः)** नायक **(रथाः, च)** और वाहन आदि हैं **(ते)** वे **(अस्मान्)** हम लोगों को प्राप्त होवें और जो **(भगः)** ऐश्वर्य्य के योग के **(न)** सदृश **(प्रभृथेषु)** अत्यन्त धारण करने योग्यों में **(हव्यः)** ग्रहण करने योग्य **(चारुः)** सुन्दर **(सत्वा)** स्थिर होने वाले आप हम लोगों को **(आ, जगम्यात्)** यथावत् प्राप्त होवें, उन आप को **(वयम्)** हम लोग **(च)** भी प्राप्त होवें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जब हम लोग आपके और आप हम लोगों के मित्र होवें, तभी हम लोगों का ऐश्वर्य्य बड़े और जैसे ऐश्वर्य्य सब का प्रिय है, वैसे ही धर्म्म, प्रिय [=प्रिय धर्म] सदा रक्षा करने योग्य है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

पपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः।
स नः एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानम्॥६॥

पपृक्षेण्यम्। इन्द्र। त्वे इति। हि। ओजः। नृम्णानि। च। नृतमानः। अमर्तः। सः। नः। एनीम्। वसवानः। रयिम्। दाः। प्र। अर्यः। स्तुषे। तुविऽमघस्य। दानम्॥६॥

पदार्थः-(**पपृक्षेण्यम्**) प्रष्टुं योग्यम् (**इन्द्र**) विद्वन् (**त्वे**) त्वयि (**हि**) यतः (**ओजः**) पराक्रमः (**नृम्णानि**) नरै रमणीयानि धनानि (**च**) (**नृतमानः**) नृत्यन्। अत्र विकरणव्यत्ययेन शः। (**अमर्त्तः**) आत्मत्वेन मरणधर्मरहितः (**सः**) (**नः**) अस्मभ्यम् (**एनीम्**) प्राप्तुं योग्याम् (**वसवानः**) निवासयन् (**रयिम्**) धनम् (**दाः**) दद्याः (**प्र**) (**अर्यः**) स्वामी (**स्तुषे**) प्रशंससि (**तुविमघस्य**) बहुधनस्य (**दानम्**)॥६॥

अन्वयः-हे इन्द्र! यो नृतमानोऽमर्त्तस्त्वे पपृक्षेण्यमोजो नृम्णानि च दध्यात् स एनीं वसवानो रयिं दाः। हि यतस्तुविमघस्याऽर्यः सन्दानं प्र स्तुषे स त्वं नोऽस्मभ्यं सुखं प्रयच्छ॥६॥

भावार्थः-हे मनुष्या! भवन्तो विदुषः प्रति प्रष्टव्यान् प्रश्नान् कृत्वा बलं वर्धयित्वैश्वर्य्यमुन्नीय सन्मार्गे दानं दत्त्वा प्रशंसितविद्याचरणा भवन्तु॥६॥

पदार्थः-हे (**इन्द्र**) विद्वन्! जो (**नृतमानः**) नृत्य करता हुआ (**अमर्त्तः**) आत्मभाव से मरणधर्म्म-रहित जन (**त्वे**) आप में (**पपृक्षेण्यम्**) पूंछने योग्य (**ओजः**) पराक्रम (**नृम्णानि, च**) और मनुष्यों से रमने योग्य धनों को धारण करे (**सः**) वह (**एनीम्**) प्राप्त होने योग्य को (**वसवानः**) वसाता हुआ (**रयिम्**) धन को (**दाः**) दीजिये (**हि**) जिससे (**तुविमघस्य**) बहुत धन के (**अर्यः**) स्वामी होते हुए (**दानम्**) दान की (**प्र, स्तुषे**) प्रशंसा करते हो (**सः**) वह आप (**नः**) हम लोगों के लिये सुख दीजिये॥६॥

भावार्थः-हे मनुष्यो! आप लोग विद्वानों के प्रति पूंछने योग्य प्रश्नों को कर, बल को बढ़ाय और ऐश्वर्य्य की वृद्धि करके उत्तम मार्ग में दान देकर प्रशंसित विद्या और आचरणयुक्त होवें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एवा न इन्द्रोतिभिरव पाहि गृणतः शूर कारून्।

उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः॥७॥

एव। नः। इन्द्र। ऊतिऽभिः। अव। पाहि। गृणतः। शूर। कारून्। उत। त्वचम्। ददतः। वाजऽसातौ। पिप्रीहि। मध्वः। सुऽसुतस्य। चारोः॥७॥

पदार्थः-(एवा) निश्चये। अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्मान् **(इन्द्र)** **(ऊतिभिः)** अन्वेक्षणादिरक्षादिभिः **(अव)** रक्ष **(पाहि)** **(गृणतः)** उपदेशकान् **(शूर)** निर्भय **(कारून्)** शिल्पिनः **(उत)** अपि **(त्वचम्)** त्वगाच्छादकं रक्षकवर्म **(ददतः)** **(वाजसातौ)** स-ामे **(पिप्रीहि)** प्राप्नुहि **(मध्वः)** मधुरस्य **(सुषुतस्य)** सम्यक्संस्कृतस्य **(चारोः)** उत्तमस्य॥७॥

अन्वयः-हे इन्द्र! त्वमूतिभिरेवा गृणतः कारून्नोऽस्मानव। हे शूर! वाजसातौ त्वचं ददतः सुषुतस्य मध्वश्चारोर्जनस्यैश्वर्य्यं पाहि उत पिप्रीहि॥७॥

भावार्थः-हे राजँस्त्वं शूरान् प्राज्ञाञ्छिल्पिनो जनान् रक्षित्वा प्रजाः सततं सम्पाल्य स-ामे शत्रूञ्जित्वा प्राप्नुहि॥७॥

पदार्थः-हे **(इन्द्र)** राजन्! आप **(ऊतिभिः)** अन्वेक्षण आदि रक्षा आदिकों से **(एवा)** ही **(गृणतः)** उपदेशक **(कारून्)** शिल्पी **(नः)** हम लोगों की **(अव)** रक्षा कीजिये और हे **(शूर)** भय से रहित! **(वाजसातौ)** स-ाम में **(त्वचम्)** त्वचा को आच्छादन करने और रक्षा करने वाले कवच को **(ददतः)** देते हुए **(सुषुतस्य)** उत्तम प्रकार संस्कार किये गये **(मध्वः)** मधुर और **(चारोः)** उत्तम जन के ऐश्वर्य्य का **(पाहि)** पालन कीजिये और **(उत)** भी **(पिप्रीहि)** प्राप्त हूजिये॥७॥

भावार्थः-हे राजन्! आप शूरवीर विद्वान् शिल्पीजनों की रक्षा कर प्रजाओं का निरन्तर पालन करके स-ाम में शत्रुओं को जीत कर प्राप्त हूजिये॥७॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरण्यिनो रराणाः।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे॥८॥

उत। त्ये। मा। पौरुऽकुत्स्यस्य। सूरेः। त्रसदस्योः। हिरण्िनः। रराणाः। वहन्तु। मा। दश। श्येतासः। अस्य। गैरिऽक्षितस्य। क्रतुऽभिः। नु। सश्चे॥८॥

पदार्थः-(उत) अपि **(त्ये)** ते **(मा)** माम् **(पौरुकुत्स्यस्य)** बहुवज्रादिशस्त्राऽस्त्रविदोऽपत्यस्य **(सूरेः)** मेधाविनः **(त्रसदस्योः)** त्रस्यन्ति दस्यवो यस्मात् **(हिरण्िनः)** हिरण्यादिधनयुक्तस्य **(ररणाः)** रममाणा ददमाना वा **(वहन्तु)** **(मा)** माम् **(दश)** **(श्येतासः)** श्वेतवर्णा अश्वाः **(अस्य)** **(गैरिक्षितस्य)** गिरौ पर्वते क्षितं निवसनं यस्य तस्य **(क्रतुभिः)** प्रज्ञाकर्मभिः **(नु)** सद्यः **(सश्चे)** सम्बध्नामि॥८॥

अन्वयः-पौरुकुत्स्यस्य त्रसदस्योर्हिरण्निनोऽस्य गैरिक्षितस्य सूरेः क्रतुभिस्सह रराणा मा वहन्तूत त्ये दश श्येतास इव मा वहन्तु तानहं नु सश्चे॥८॥

भावार्थः-ये सत्यसन्धाः सत्पुरुषमित्राः प्रज्ञां वर्धयन्तो दुष्टान्निवारयन्ति तैः सहाहमनुबध्नामि॥८॥

पदार्थः-(**पौरुकुत्स्यस्य**) बहुत वज्र आदि शस्त्र और अस्त्रों को जानने वाले के सन्तान (**त्रसदस्योः**) जिससे डाकू चोर आदि डरते हैं ऐसे (**हिरण्निनः**) सुवर्ण धन आदि से युक्त (**अस्य**) इस (**गैरिक्षितस्य**) पर्वत में रहने वाले (**सूरेः**) बुद्धिमान् जन की (**क्रतुभिः**) बुद्धि और कर्म्मों के साथ (**रराणाः**) रमते वा देते हुए (**मा**) मुझ को (**वहन्तु**) प्राप्त हों (**उत**) और भी (**त्ये**) वे (**दश**) दश संख्या परिमित (**श्येतासः**) श्वेत वर्ण वाले घोड़े के सदृश (**मा**) मुझ को प्राप्त हों, उनका मैं (**नु**) शीघ्र (**सश्चे**) सम्बन्ध करता हूं॥८॥

भावार्थः-जो सत्य धारण करने वाले और सत्पुरुष जिनके मित्र ऐसे जन बुद्धि को बढ़ाते हुए दुष्टों का निवारण करते हैं, उनके साथ मैं मेल करता हूं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒त त्ये मा॑ मारु॒ताश्च॑स्य॒ शोणा॒: क्रत्वा॑मघासो वि॒दथ॑स्य रा॒तौ।

स॒हस्रा॑ मे॒ च्यव॑तानो॒ ददा॑न आनू॒कम॒र्यो वपु॑षे॒ नार्चा॑त्॥९॥

उ॒त। त्ये। मा॒। मा॒रु॒तऽअ॑श्वस्य। शोणा॑:। क्रत्वा॑ऽमघासः। वि॒दथ॑स्य। रा॒तौ। स॒हस्रा॑। मे॒। च्यव॑तानः। ददा॑नः। आ॒नू॒कम्। अ॒र्यः। वपु॑षे। न। आ॒र्चा॒त्॥९॥

पदार्थः-(**उत**) अपि (**त्ये**) ते (**मा**) माम् (**मारुताश्वस्य**) मरुतामिवाश्वानामयं तस्य (**शोणाः**) रक्तगुणविशिष्टा अग्न्यादयः (**क्रत्वामघासः**) क्रतुः प्रज्ञा कर्म्मैव मघं धनं येषां ते (**विदथस्य**) लब्धुं योग्यस्य (**रातौ**) दाने (**सहस्रा**) सहस्राणि (**मे**) मम मह्यं वा (**च्यवतानः**) च्यावयन् सन् (**ददानः**) (**आनूकम्**) आनुकूल्यम् (**अर्य्यः**) स्वामी (**वपुषे**) सुरूपाय शरीराय (**न**) निषेधे (**आर्चत्**) सत्कुर्यात्॥९॥

अन्वयः-ये क्रत्वामघासः शोणा मारुताश्वस्य विदथस्य मे रातौ सहस्रा च्यवतानश्चोत सुखयितुं शक्नुयुस्त्ये यश्च ददानो वपुषे मा मामामानूकमार्चत् सोऽर्य्यश्चाऽभितस्तिरस्कृतो न भवति॥९॥

भावार्थः-हे मनुष्याः! येऽस्माकमभीष्टं साध्नुवन्ति तेषामभीष्टं वयमपि साध्नुयाम एवं स्वामिसेवका अपि वर्त्तेरन्॥९॥

पदार्थः-जो (**क्रत्वामघासः**) बुद्धि वा कर्म्म ही है धन जिनका वे (**शोणाः**) रक्त गुण से विशिष्ट जन और (**मारुताश्वस्य**) पवनों के सदृश घोड़ों के सम्बन्धी (**विदथस्य**) प्राप्त होने योग्य (**मे**) मेरे वा मेरे लिये (**रातौ**) दान में (**सहस्रा**) हजारों को (**च्यवतानः**) प्राप्त होता हुआ जन (**उत**) भी सुख देने को समर्थ हों (**त्ये**) वे और जो (**ददानः**) देता हुआ (**वपुषे**) सुन्दर शरीर के लिये (**मा**) मुझ को (**आनूकम्**)

अनुकूलतापूर्वक **(आर्चत्)** आदरयुक्त करे वह **(अर्य्यः)** स्वामी भी सब प्रकार से तिरस्कृत **(न)** नहीं होता है॥९॥

भावार्थः-हे मनुष्यो! जो हम लोगों के अभीष्ट की सिद्धि करते हैं, उनके अभीष्ट की हम लोग भी सिद्धि करें, इस प्रकार स्वामी और सेवक भी वर्त्ताव करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒त त्ये मा॑ ध्व॒न्य॑स्य॒ जुष्टा॑ लक्ष्म॒ण्य॑स्य सु॒रुचो॒ यता॑नाः।

म॒ह्ना रा॒यः सं॑वर॒णस्य॒ ऋषे॑र्व्र॒जं न गाव॒ः प्रय॑ता॒ अपि॑ ग्मन्॥१०॥२॥

उ॒त। त्ये। मा॒। ध्व॒न्य॑स्य। जुष्टा॑ः। ल॒क्ष्म॒ण्य॑स्य। सु॒ऽरुच॑ः। यता॑नाः। म॒ह्ना। रा॒यः। सं॒ऽव॒र॒णस्य। ऋषे॑ः। व्र॒जम्। न। गाव॑ः। प्रऽय॑ताः। अपि॑। ग्म॒न्॥१०॥

पदार्थः-**(उत)** **(त्ये)** **(मा)** माम् **(ध्वन्यस्य)** ध्वनिषु कुशलस्य **(जुष्टाः)** प्रीताः **(लक्ष्मण्यस्य)** सुलक्षणेषु भवस्य **(सुरुचः)** सुष्ठुप्रीतिमत्यः **(यतानाः)** **(मह्ना)** महत्त्वेन **(रायः)** धनस्य **(संवरणस्य)** स्वीकृतस्य **(ऋषेः)** मन्त्रार्थविदः **(व्रजम्)** व्रजन्ति यस्मिन् **(न)** इव **(गावः)** धेनवः **(प्रयताः)** प्रयतमानाः **(अपि)** **(ग्मन्)** गच्छन्ति॥१०॥

अन्वयः-ये ध्वन्यस्य संवरणस्य रायो मह्नोत लक्ष्मण्यस्यर्षेः प्रयतास्त्ये गावो व्रजन्नापि ग्मन् तथा मह्ना मा मामपि ग्मन्। या यतानाः सुरुचो मा जुष्टाः सन्ति ताः सर्वे प्राप्नुवन्तु॥१०॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः प्रयत्नेनाऽप्राप्तस्य प्राप्तिं लब्धस्य रक्षणं कुर्वन्ति ते वत्सान् गाव इव धनमाप्नुवन्तीति॥१०॥

अत्रेन्द्रविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयस्त्रिंशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-जो **(ध्वन्यस्य)** ध्वनियों में कुशल और **(संवरणस्य)** स्वीकार किये हुए **(रायः)** धन के **(मह्ना)** महत्त्व से **(उत)** और **(लक्ष्मण्यस्य)** श्रेष्ठ लक्षणों में उत्पन्न **(ऋषेः)** मन्त्रों के अर्थ जानने वाले के सम्बन्ध में **(प्रयताः)** प्रयत्न करते हुए जन हैं **(त्ये)** वे **(गावः)** गौवें **(व्रजम्)** गोष्ठ को **(न)** जैसे **(अपि)** निश्चित **(ग्मन्)** जाती हैं, वैसे महत्त्व से **(मा)** मुझ को भी प्राप्त होते हैं और जो **(यताना:)** यत्न करती हुई **(सुरुचः)** उत्तम प्रीति वाली मुझ को **(जुष्टाः)** प्रसन्नतापूर्वक प्राप्त हैं, उनको सब प्राप्त होवें॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य प्रयत्न से नहीं प्राप्त हुए की प्राप्ति और प्राप्त हुए की रक्षा करते हैं, वे जैसे बछड़ों को गौवें वैसे धन को प्राप्त होते हैं॥१०॥

इस सूक्त में इन्द्र और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेंतीसवां सूक्त और द्वितीय वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य चतुस्त्रिंशत्तमस्य सूक्तस्य संवरणः प्राजापत्य ऋषिः। इन्द्रो देवता। १ भुरिक् त्रिष्टुप्। ९ त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ४, ५ निचृज्जगती। ३, ७ जगती। ६, ८ विराड् जगती छन्दः। निषादः स्वरः॥

अथेन्द्रगुणयुक्तदम्पतीविषयमाह॥

अब नव ऋचा वाले चौंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रगुणयुक्त स्त्री-पुरुष का वर्णन करते हैं॥

अजा॑तशत्रुम॒जरा॒ स्व॑र्व॒त्यनु॑ स्व॒धामि॑ता दु॒स्मम॑ीयते।
सु॒नोत॑न॒ पच॑त॒ ब्रह्म॑वाहसे पुरुष्टु॒ताय॑ प्र॒तरं॑ दधातन॥ १॥

अजा॑तऽशत्रुम्। अ॒जरा॑। स्व॑ःऽवती। अनु॑। स्व॒धा॒। अमि॑ता। दु॒स्मम्। ई॒य॒ते॒। सु॒नोत॑न। पच॑त। ब्रह्म॑ऽवाहसे। पु॒रु॒ऽस्तु॒ताय॑। प्र॒ऽत॒रम्। दु॒धा॒त॒न॒॥ १॥

पदार्थः-(अजातशत्रुम्) न जाताः शत्रवो यस्य तम् **(अजरा)** जरारहिता **(स्वर्वती)** सुखवती **(अनु)** **(स्वधा)** या स्वं दधाति सा **(अमिता)** अतुलशुभगुणा **(दस्मम्)** दुष्टोपक्षेतारम् **(ईयते)** प्राप्नोति **(सुनोतन)** **(पचत)** **(ब्रह्मवाहसे)** धनप्रापकाय **(पुरुष्टुताय)** बहुभिः प्रशंसिताय **(प्रतरम्)** प्रतरन्ति दुःखं येन तम् **(दधातन)** धरत॥ १॥

अन्वयः-हे मनुष्या! स्वर्वत्यमिता स्वधाजरा युवतिः स्त्री यमजातशत्रुं दस्ममन्वीयते तस्मै पुरुष्टुताय ब्रह्मवाहसे जनाय प्रतरं सुनोतन उत्तममन्नं पचत धनादिकं दधातन॥ १॥

भावार्थः-हे मनुष्यो! यो निर्वैरोऽमितशुभगुणः सर्वहितकारी पुरुषोऽथवेदृशी स्त्री भवेत्तयोः सत्कारः कर्त्तव्यः॥ १॥

पदार्थः-हे मनुष्यो! **(स्वर्वती)** सुखवाली **(अमिता)** अतुल उत्तम गुणों से युक्त **(स्वधा)** धन को धारण करने वाली **(अजरा)** वृद्धावस्था से रहित युवती स्त्री जिस **(अजातशत्रुम्)** शत्रुओं से रहित **(दस्मम्)** दुष्टों के नाश करने वाले जन को **(अनु, ईयते)** अनुकूला से प्राप्त होती है, उस **(पुरुष्टुताय)** बहुतों से प्रशंसा किये गये **(ब्रह्मवाहसे)** धन प्राप्त कराने वाले के लिये **(प्रतरम्)** अच्छे प्रकार पार होते हैं, दुःख के जिससे उसको **(सुनोतन)** उत्पन्न करो और उत्तम अन्न का **(पचत)** पाक करो और धन आदि को **(दधातन)** धारण करो॥ १॥

भावार्थः-हे मनुष्यो! जो वैररहित अत्यन्त उत्तम गुणों से युक्त और सब का हितकारी पुरुष अथवा इस प्रकार की स्त्री हो, उन दोनों का निरन्तर सत्कार करना योग्य है॥ १॥

अथ विद्वद्विषये पाकगुणानाह॥

अब विद्वद्विषय में पाक के गुणों को कहते हैं॥

आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः।

यदी मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत्॥ २॥

आ। यः। सोमेन। जठरम्। अपिप्रत। अमन्दत। मघऽवा। मध्वः। अन्धसः। यत्। ईम्। मृगाय। हन्तवे। महाऽवधः। सहस्रऽभृष्टिम्। उशना। वधम्। यमत्॥ २॥

पदार्थः-(आ) समन्तात् **(यः)** **(सोमेन)** सोमलतोद्भवेन **(जठरम्)** उदराग्निम् **(अपिप्रत)** पूरयेत् **(अमन्दत)** आनन्देत् **(मघवा)** बहुधनः **(मध्वः)** मधुरादिगुणयुक्तस्य **(अन्धसः)** अन्नादेः **(यत्)** यः **(ईम्)** सर्वतः **(मृगाय)** मृगम् **(हन्तवे)** हन्तुम् **(महावधः)** महान् वधो नाशनं येन **(सहस्रभृष्टिम्)** भृष्टयो भञ्जनानि दहनानि यस्मात्तम् **(उशना)** कामयमानः **(वधम्)** **(यमत्)** नियच्छेत्॥ २॥

अन्वयः-हे मनुष्या! य उशना मघवा सोमेन जठरमापिप्रत मध्वोऽन्धसो भुक्त्वामन्दत यद्यो महावधो मृगाय हन्तवे सहस्रभृष्टि वधमीं यमत् सः सर्वं सुखं लभते॥ २॥

भावार्थः-ये मनुष्या वैद्यकशास्त्ररीत्या सोमलताद्योषधिरसेन सह संस्कृतान्यन्नानि भुञ्जते तेऽतुलं सुखमाप्नुवन्ति॥ २॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(उशना)** कामना करता हुआ **(मघवा)** बहुत धन से युक्त **(सोमेन)** सोमलता से उत्पन्न रस से **(जठरम्)** उदर की अग्नि को **(आ, अपिप्रत)** अच्छे प्रकार पूर्ण करे और **(मध्वः)** मधुर आदि गुणों से युक्त **(अन्धसः)** अन्न आदि का भोग करके **(अमन्दत)** आनन्द करे और **(यत्)** जो **(महावधः)** अत्यन्त नाश करने वाला **(मृगाय)** हरिण को **(हन्तवे)** मारने के लिये **(सहस्रभृष्टिम्)** हजारों दहन जिससे उस **(वधम्)** वध को **(ईम्)** सब प्रकार से **(यमत्)** देवे, वह सब सुख को प्राप्त होता है॥ २॥

भावार्थः-जो मनुष्य वैद्यकशास्त्र की रीति से सोमलता आदि ओषधियों के रस के साथ संस्कारयुक्त किये गये अन्नों का भोग करते हैं, वे अतुल सुख को प्राप्त होते हैं॥ २॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह।

अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः॥ ३॥

यः। अस्मै। घ्रंसे। उत। वा। यः। ऊधनि। सोमम्। सुनोति। भवति। द्युऽमान्। अह। अपऽअप। शक्रः। ततनुष्टिम्। ऊहति। तनूऽशुभ्रम्। मघऽवा। यः। कवऽसखः॥ ३॥

पदार्थः-(यः) **(अस्मै)** **(घ्रंसे)** दिने। **घ्रंस इत्यहर्नामसु पठितम्।** (निघं०१।९) **(उत)** अपि **(वा)** पक्षान्तरे **(यः)** **(ऊधनि)** उषः समये **(सोमम्)** जलम् **(सुनोति)** पिबति **(भवति)** **(द्युमान्)**

बहुविद्याप्रकाशः **(अह)** विशेषेण ग्रहणे **(अपाप)** दूरीकरणे **(शक्रः)** शक्तिमान् **(ततनुष्टिम्)** विस्तारम् **(ऊहति)** वितर्कयति **(तनूशुभ्रम्)** शुभ्रा शुद्धा तनूर्यस्य तम् **(मघवा)** प्रशंसितधनवान् **(यः)** **(कवासखः)** कविः सखा यस्य॥३॥

अन्वयः-हे मनुष्या! योऽस्मै घ्रंस उत वोधनि सोमं सुनोत्यह द्युमान् भवति यः शक्रः ततनुष्टि- मूहति यः कवासखो मघवा तनूशुभ्रमूहति स सततं दुःखमपापोहति॥३॥

भावार्थः-ये मनुष्या अहर्निशं पुरुषार्थयन्ति ते सततं सुखिनो जायन्ते॥३॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अस्मै)** इसके लिये **(घ्रंसे)** दिन में **(उत)** भी **(वा)** अथवा **(ऊधनि)** प्रभातसमय में **(सोमम्)** जल का **(सुनोति)** पान करता और **(अह)** विशेष करके ग्रहण करने में **(द्युमान्)** बहुत विद्या प्रकाश वाला **(भवति)** होता तथा **(यः)** जो **(शक्रः)** शक्तिमान् **(ततनुष्टिम्)** विस्तार की **(ऊहति)** तर्कना करता और **(यः)** जो **(कवासखः)** विद्वान् जन मित्र जिसके ऐसा **(मघवा)** प्रशंसित धनयुक्त पुरुष **(तनूशुभ्रम्)** शुद्ध शरीर वाले की तर्कना करता है, वह निरन्तर दुःख को **(अपाप)** दूर करने की तर्कना करता है॥३॥

भावार्थः-जो मनुष्य दिन और रात्रि पुरुषार्थ करते हैं, वे निरन्तर सुखी होते हैं॥३॥

अथ प्रजाविषयमाह॥

अब प्रजाविषय को अगले मन्त्र में कहते हैं॥

यस्यावधीत् पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते।
वेतीद्वस्य प्रयता यतंकरो न किल्विषादीषते वस्व आकरः॥४॥

यस्य। अवधीत्। पितरम्। यस्य। मातरम्। यस्य। शक्रः। भ्रातरम्। न। अतः। ईषते। वेति। इत्। ऊँ इति। अस्य। प्रऽयता। यतम्ऽकरः। न। किल्विषात्। ईषते। वस्वः। आऽकरः॥४॥

पदार्थः-**(यस्य)** **(अवधीत्)** **(पितरम्)** **(यस्य)** **(मातरम्)** जननीम् **(यस्य)** **(शक्रः)** शक्तिमान् **(भ्रातरम्)** सहोदरम् **(न)** निषेधे **(अतः)** **(ईषते)** हिनस्ति **(वेति)** कामयते **(इत्)** **(उ)** **(अस्य)** **(प्रयता)** प्रकर्षेण दत्तानि **(यतङ्करः)** यः प्रयत्नं करोति **(न)** इव **(किल्विषात्)** पापात् **(ईषते)** **(वस्वः)** वसुनो धनस्य **(आकरः)** समूहः॥४॥

अन्वयः-शक्रो यस्य पितरं यस्य मातरं यस्य भ्रातरं नावधीदतोऽस्य नेषतेऽस्य यतङ्करो न प्रयता वेति उ वस्व आकरः किल्विषात् पृथगिदीषते प्राप्नोति॥४॥

भावार्थः-ये पितामाताभ्रात्रादयः पालयेयुस्तेषां पुत्रादिभिः सततं सत्कारः कर्त्तव्यो ये पापाचरणं विहाय धर्म्ममाचरन्ति ते सर्वदा सुखिनो जायन्ते॥४॥

पदार्थः-**(शक्रः)** सामर्थ्यवान् जन **(यस्य)** जिसके **(पितरम्)** पिता का **(यस्य)** जिसकी **(मातरम्)** माता का और **(यस्य)** जिसके **(भ्रातरम्)** भ्राता का **(न)** नहीं **(अवधीत्)** नाश करे **(अतः)**

इससे इसका **(न)** नहीं **(ईषते)** नाश करता और **(अस्य)** इसके **(यतङ्करः)** प्रयत्न करने वाले के **(न)** सदृश **(प्रयता)** अत्यन्त दिये हुओं की **(वेति)** कामना करता है **(उ)** और **(वस्वः)** धन का **(आकरः)** समूह **(किल्विषात्)** पाप से पृथक् **(इत्)** ही **(ईषते)** प्राप्त होता है॥४॥

भावार्थः-जो पिता, माता और भ्रातृ आदि पालन करें, उनके पुत्र आदि को चाहिये कि निरन्तर सत्कार करें और जो पापाचरण का त्याग करके धर्म्म का आचरण करते हैं, वे सब काल में सुखी होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

न पञ्चभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन।

जिनाति वेदमुया हन्ति वा धुनिरा देवयुं भजति गोमति व्रजे॥५॥३॥

न। पञ्चऽभिः। दशऽभिः। वष्टि। आऽरभम्। न। असुन्वता। सचते। पुष्यता। चन। जिनाति। वा। इत्। अमुया। हन्ति। वा। धुनिः। आ। देवऽयुम्। भजति। गोऽमति। व्रजे॥५॥

पदार्थः-(**न**) निषेधे (**पञ्चभिः**) इन्द्रियैः (**दशभिः**) प्राणैः (**वष्टि**) कामयते (**आरभम्**) आरब्धुम् (**न**) निषेधे (**असुन्वता**) अपुरुषार्थिना (**सचते**) सम्बध्नाति (**पुष्यता**) पुष्टिमाचरता (**चन**) अपि (**जिनाति**) अभिभवति (**वा**) (**इत्**) (**अमुया**) (**हन्ति**) (**वा**) (**धुनिः**) कम्पकः (**आ**) समन्तात् (**देवयुम्**) देवान् कामयमानम् (**भजति**) (**गोमति**) बह्व्यो गावो विद्यन्ते यस्मिँस्तस्मिन् (**व्रजे**) गवां स्थित्यधिकरणे॥५॥

अन्वयः-योऽसुन्वता पञ्चभिर्दशभिरारभं न वष्टि स पुष्यता न सचते जिनाति चन वामुया हन्ति वा यो धुनिर्गोमति व्रजे देवयुमा भजति स सर्वमित् सुखमश्नुते॥५॥

भावार्थः-येऽलसा पुरुषार्थं न कुर्वन्ति तेऽभीष्टसिद्धिं न लभन्ते॥५॥

पदार्थः-जो (**असुन्वता**) नहीं पुरुषार्थ करने वाले से (**पञ्चभिः**) पांच इन्द्रियों और (**दशभिः**) दश प्राणों से (**आरभम्**) आरम्भ करने की (**न**) नहीं (**वष्टि**) कामना करता वह (**पुष्यता**) पुष्टि को करने वाले से (**न**) नहीं (**सचते**) सम्बन्धित होता (**जिनाति, चन**) और अपमान को प्राप्त होता है (**वा**) वा (**अमुया**) इससे (**हन्ति**) नाश करता है (**वा**) वा जो (**धुनिः**) कंपने वाला (**गोमति**) बहुत गौंवे विद्यमान जिसमें उस (**व्रजे**) गौवों के ठहरने के स्थान में (**देवयुम्**) विद्वानों की कामना करने वाले का (**आ**) सब प्रकार से (**भजति**) आदर करता और वह सब (**इत्**) ही सुख का भोग करता है॥५॥

भावार्थः-जो आलस्ययुक्त जन पुरुषार्थ को नहीं करते हैं, वे अभीष्ट सिद्धि को नहीं प्राप्त होते हैं॥५॥

अथेन्द्रसादृश्येन राजगुणानाह॥

अब इन्द्र के सादृश्य से राजगुणों को कहते हैं॥

वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः।
इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः॥ ६॥

विऽत्वक्षणः। सम्ऽऋतौ। चक्रऽआसजः। असुन्वतः। विषुणः। सुन्वतः। वृधः। इन्द्रः। विश्वस्य। दमिता। विऽभीषणः। यथाऽवशम्। नयति। दासम्। आर्यः॥ ६॥

पदार्थः-(वित्वक्षणः) विशेषेण दुःखस्य विच्छेता **(समृतौ)** संग्रामे **(चक्रमासजः)** यो चक्रस्य मासकालस्य मासास्तेभ्यो जातः **(असुन्वतः)** अयजमानस्य **(विषुणः)** व्याप्तविद्यस्य **(सुवन्तः)** यज्ञं कुर्वतः **(वृधः)** वर्धकः **(इन्द्रः)** विद्युदिव राजा **(विश्वस्य)** सर्वस्य जगतः **(दमिता)** **(विभीषणः)** भयप्रदः **(यथावशम्)** वशमनतिक्रम्य करोति **(नयति)** **(दासम्)** सेवकं शूद्रम् **(आर्यः)** ब्राह्मणक्षत्रियवैश्यवर्णः॥ ६॥

अन्वयः-हे मनुष्या! यथा वृधः इन्द्रो विश्वस्य दमिता विभीषणोऽस्ति तथा वित्वक्षणः समृतौ चक्रमासजो विषुणः सुन्वतोऽसुन्वतश्च दमिता सन्नार्यो राजा यथावशं दासं नयति॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा ब्राह्मणक्षत्रियवैश्यानामार्याणां शुभगुणकर्म्मयुक्तानां शूद्रः सेवको भवति तथा शुभगुणकर्मयुक्तस्य राज्ञः प्रजा सेविका भवति॥ ६॥

पदार्थः-हे मनुष्यो! जैसे **(वृधः)** बढ़ाने वाला **(इन्द्रः)** बिजुली के सदृश राजा **(विश्वस्य)** सम्पूर्ण जगत् का **(दमिता)** दमन करने और **(विभीषणः)** भय देने वाला है, वैसे **(वित्वक्षणः)** विशेष करके दुःख का नाश करने वाला **(समृतौ)** संग्राम में **(चक्रमासजः)** कालरूप चक्र के महीनों से उत्पन्न हुआ जन **(विषुणः)** विद्या में व्याप्त और **(सुन्वतः)** यज्ञ करने और **(असुन्वतः)** नहीं यज्ञ करने वाले का दमन करने वाला होता हुआ **(आर्यः)** ब्राह्मण, क्षत्रिय वा वैश्य वर्ण आर्य्य राजा **(यथावशम्)** यथाशक्ति **(दासम्)** सेवक शूद्र को **(नयति)** प्राप्त करता है॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ब्राह्मण, क्षत्रिय और वैश्य आर्यों तथा उत्तम गुण, कर्म्म और स्वभाव वालों का शूद्र सेवक होता है, वैसे ही उत्तम गुण और कर्म्म से युक्त राजा की प्रजा सेवन करने वाली होती है॥ ६॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत्॥ ७॥

सम्। ईम्। पणेः। अजति। भोजनम्। मुषे। वि। दाशुषे। भजति। सूनरम्। वसु। दुःऽगे। चन। ध्रियते। विश्वः। आ। पुरु। जनः। यः। अस्य। तविषीम्। अचुक्रुधत्॥ ७॥

पदार्थः-(सम्) सम्यक् **(ईम्)** सर्वतः **(पणेः)** स्तूयमानस्य **(अजति)** प्राप्नोति **(भोजनम्)** पालनमन्नादिकं वा **(मुषे)** चोराय **(वि) (दाशुषे)** दानशीलाय **(भजति) (सूनरम्)** शोभना नरा यस्मिँस्तत् **(वसु)** धनम् **(दुर्गे)** दुःखेन गन्तुं योग्ये प्रकोटे वा **(चन) (ध्रियते) (विश्वः)** सर्वः **(आ) (पुरु)** बहु **(जनः)** मनुष्यः **(यः) (अस्य)** जनस्य **(तविषीम्)** बलम् **(अचुक्रुधत्)** भृशं क्रोधयति॥७॥

अन्वयः-हे राजन्! यः पणेर्भोजनमजति मुषे दण्डं दाशुषे दानं चन सं वि भजति योऽस्य शत्रोस्तविषीमचुक्रुधत् स ईं विश्वो जनो दुर्गे पुरु सूनरं वस्वा भजति राज्ञा ध्रियते॥७॥

भावार्थः-यो राजा दस्व्यादिभ्यः कठिनं दण्डं श्रेष्ठेभ्यः प्रतिष्ठां प्रयच्छति तस्य राज्यं धनादियुक्तं सद्वर्धते तस्येह यशोऽमुत्र सुखं च जायते॥७॥

पदार्थः-हे राजन्! जो **(पणेः)** स्तुति किये गये के **(भोजनम्)** पालन वा अन्न आदि को **(अजति)** प्राप्त होता और **(मुषे)** चोर के लिये दण्ड को और **(दाशुषे)** दानशील के लिये दान **(चन)** भी **(सम्)** उत्तम प्रकार **(वि, भजति)** बांटता है तथा **(यः)** जो **(अस्य)** इस शत्रुजन की **(तविषीम्)** सेना को **(अचुक्रुधत्)** अत्यन्त क्रुद्धित करता है वह **(ईम्)** सब प्रकार से **(विश्वः)** सम्पूर्ण **(जनः)** मनुष्य **(दुर्गे)** दुःख से प्राप्त होने योग्य व्यवहार वा उत्तम कोट में **(पुरु)** बहुत **(सूनरम्)** उत्तम मनुष्य जिसमें उस **(वसु)** धन का **(आ)** सेवन करता है और राजा से **(ध्रियते)** धारण किया जाता है॥७॥

भावार्थः-जो राजा चोर, डाकू आदि जनों के लिये कठिन दण्ड और श्रेष्ठ जनों के लिये प्रतिष्ठा देता है, उसका राज्य धन आदि से युक्त हुआ वृद्धि को प्राप्त होता और उसका इस संसार में यश और परलोक में सुख होता है॥७॥

पुनः पूर्वोक्तविषयमाह॥

फिर पूर्वोक्त विषय को अगले मन्त्र में कहते हैं॥

सं यज्जनौ॑ सु॒धनौ॑ वि॒श्वश॑र्धसा॒ववे॒दिन्द्रो॑ म॒घवा॒ गोषु॑ शु॒भ्रिषु॑।
युज॒ं ह्य१॑न्यमकृ॑त प्रवेप॒न्युदी॑ं गव्यं॑ सृजते॒ सत्त्व॑भि॒र्धुनि॑:॥८॥

सम्। यत्। जनौ॑। सु॒धनौ॑। वि॒श्वऽश॑र्धसौ। अवे॑त्। इन्द्रः॑। म॒घऽवा॑। गोषु॑। शु॒भ्रिषु॑। युज॑म्। हि। अ॒न्यम्। अकृ॑त। प्र॒ऽवे॒प॒नी। उत्। ईम्। गव्य॑म्। सृ॒ज॒ते॒। सत्त्व॑ऽभिः। धुनिः॑॥८॥

पदार्थः-(सम्) यौ **(जनौ)** **(सुधनौ)** धर्मेण जातश्रेष्ठधनौ **(विश्वशर्धसौ)** समग्रबलयुक्तौ **(अवेत्)** प्राप्नुयात् **(इन्द्रः)** राजा **(मघवा)** परमपूजितबहुधनः **(गोषु)** धेनुपृथिव्यादिषु **(शुभ्रिषु)** शुभगुणेषु **(युजम्)** युक्तम् **(हि)** यतः **(अन्यम्) (अकृत)** करोति **(प्रवेपनी)** गच्छन्ती **(उत्) (ईम्)** उदकम् **(गव्यम्)** गोभ्यो हितम् **(सृजते) (सत्त्वभिः)** पदार्थैः **(धुनिः)** कम्पकः॥८॥

अन्वयः-हे मनुष्या! यो धुनिर्मघवेन्द्रो यत्सुधनौ विश्वशर्धसौ जनौ समवेच्छुभ्रिषु गोषु हि युजमन्यमकृत प्रवेपनी सती गव्यमीं सत्त्वभिरुत्सृजते स सुखकरो जायते॥८॥

भावार्थः-राज्ञा स्वराज्य उत्तमान् धनिनो विदुषोऽध्यापकोपदेशकाँश्च संरक्ष्यैतैर्व्यवहारधन-विद्योन्नतिः कार्य्या॥८॥

पदार्थः-हे मनुष्यो! जो (**धुनिः**) कंपने वाला (**मघवा**) अत्यन्त श्रेष्ठ बहुत धन से युक्त (**इन्द्रः**) राजा और (**यत्**) जो (**सुधनौ**) धर्म्म से उत्पन्न हुए श्रेष्ठ धन से तथा (**विश्वशर्धसौ**) सम्पूर्ण बल से युक्त (**जनौ**) दो जनों को (**सम्, अवेत्**) अच्छे प्रकार प्राप्त होवे और (**शुभ्रिषु**) उत्तम गुण वाले (**गोषु**) धेनु और पृथिवी आदिकों में (**हि**) जिससे (**युजम्**) युक्त (**अन्यम्**) अन्य को (**अकृत**) करता है और (**प्रवेपनी**) चलती हुई (**गव्यम्**) गौओं के लिये हितकारक (**ईम्**) जल को (**सत्त्वभिः**) पदार्थों से (**उत्, सृजते**) उत्पन्न करता है, वह सुख करने वाला होता है॥८॥

भावार्थः-राजा को चाहिये कि अपने राज्य में उत्तम धनी, विद्वान् तथा अध्यापक और उपदेशकों की उत्तम प्रकार रक्षा करके उनसे व्यवहार धन और विद्या की उन्नति करे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः।

तस्मा आपः संयतः पीपयन्त तस्मिन् क्षत्रममवत्त्वेषमस्तु॥९॥४॥

सहस्रऽसाम्। आग्निऽवेशिम्। गृणीषे। शत्रिम्। अग्ने। उपऽमाम्। केतुम्। अर्यः। तस्मै। आपः। संऽयतः। पीपयन्त। तस्मिन्। क्षत्रम्। अमऽवत्। त्वेषम्। अस्तु॥९॥

पदार्थः-(**सहस्रसाम्**) यः सहस्रानसंख्यातान् पदार्थान् सनति विभजति तम् (**आग्निवेशिम्**) योऽग्निं प्रवेशयति तम् (**गृणीषे**) स्तौषि (**शत्रिम्**) दुःखविच्छेदकम् (**अग्ने**) पावक इव (**उपमाम्**) दृष्टान्तम् (**केतुम्**) प्रज्ञाम् (**अर्यः**) स्वामी (**तस्मै**) (**आपः**) जलानीव प्रजाः (**संयतः**) संयमयुक्ताः (**पीपयन्त**) तर्पयन्ति (**तस्मिन्**) (**क्षत्रम्**) धनं राज्यं वा (**अमवत्**) गृहेण तुल्यम् (**त्वेषम्**) प्रकाशयुक्तम् (**अस्तु**)॥९॥

अन्वयः-हे अग्ने राजन्! अर्यस्त्वं सहस्रसामाग्निवेशिं शत्रिमुपमां केतुं गृणीषे तस्मै त आप इव संयतः प्रजाः पीपयन्त तस्मिंस्त्वयि राज्ञि अमवत्त्वेषं क्षत्रमस्तु॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि राजा भवितुमिच्छेत्तर्हि सर्वशास्त्रविशारदीं शुभगुणाढ्यां प्रज्ञां प्राप्य पितृवत्प्रजाः पालयेदेवं कृते सति प्रशस्तं राष्ट्रं वर्धेतेति॥९॥

अत्रेन्द्रविद्वत्प्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुस्त्रिंशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश तेजस्वी राजन्! (**अर्यः**) स्वामी आप (**सहस्रसाम्**) असङ्ख्य पदार्थों के विभाग करने (**आग्निवेशिम्**) अग्नि को प्रवेश कराने और (**शत्रिम्**) दुःख के नाश करने वाले (**उपमाम्**) दृष्टान्त और (**केतुम्**) बुद्धि की (**गृणीषे**) स्तुति करते हो (**तस्मै**) उन आपके लिये (**आपः**)

जलों के सदृश प्रजायें **(संयतः)** इन्द्रियों के निग्रह से युक्त हुईं **(पीपयन्त)** तृप्ति करती हैं **(तस्मिन्)** उन आप राजा में **(अमवत्)** गृह के तुल्य **(त्वेषम्)** प्रकाश से युक्त **(क्षत्रम्)** धन वा राज्य **(अस्तु)** होवे॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा होने की इच्छा करे तो सर्व शास्त्रों में प्रविष्ट हुई स्वच्छ और उत्तम गुणों से युक्त बुद्धि को प्राप्त होकर जैसे पितृजन पुत्रों का पालन करते वैसे प्रजाओं का पालन करे, ऐसा करने पर श्रेष्ठ राज्य बढ़े॥९॥

इस सूक्त में इन्द्र, विद्वान् और प्रजा के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौंतीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य पञ्चत्रिंशत्तमस्य सूक्तस्य प्रभूवसुराङ्गिरसो ऋषिः। इन्द्रो देवता। १ निचृदनुष्टुप्। ३ विराडनुष्टुप्। ७ अनुष्टुप् छन्दः। गान्धारः स्वरः। २ भुरिगुष्णिक्। ४, ५ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ८ भुरिग्बृहती छन्दः। मध्यमः स्वरः॥

अथेन्द्रगुणानाह॥

अब आठ ऋचा वाले पैंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजगुणों का वर्णन करते हैं॥

यस्ते साधिष्ठोऽवस इन्द्र क्रतुष्टमा भर।
अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम्॥ १॥

यः। ते। साधिष्ठः। अवसे। इन्द्र। क्रतुः। तम्। आ। भर। अस्मभ्यम्। चर्षणिऽसहम्। सस्निम्। वाजेषु। दुस्तरम्॥ १॥

पदार्थः-(यः) (ते) तव **(साधिष्ठः)** अतिशयेन साधुः **(अवसे)** रक्षणाद्याय **(इन्द्र)** सूर्य्यवन्न्यायप्रकाशित राजन् **(क्रतुः)** प्रज्ञा **(तम्) (आ) (भर)** धर **(अस्मभ्यम्) (चर्षणीसहम्)** मनुष्याणां सोढारम् **(सस्निम्)** ब्रह्मचर्य्यव्रतविद्याग्रहणाभ्यां पवित्रम् **(वाजेषु)** स-ामेषु **(दुष्टरम्)** दुःखेनोल्लङ्घयितुं योग्यम्॥ १॥

अन्वयः-हे इन्द्र! यस्तेऽवसे साधिष्ठः क्रतुरस्ति तं चर्षणीसहं सस्निं वाजेषु दुष्टरमस्मभ्यमा भर॥ १॥

भावार्थः-स एव राजोत्तमः स्याद्यो दीर्घेण ब्रह्मचर्य्येणाप्तेभ्यो विद्याविनयौ गृहीत्वा न्यायेन राज्यं शिष्यात्॥ १॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के सदृश न्याय से प्रकाशित राजन् **(यः)** जो **(ते)** आपकी **(अवसे)** रक्षा आदि के लिये **(साधिष्ठः)** अत्यन्त श्रेष्ठ **(क्रतुः)** बुद्धि है **(तम्)** उस **(चर्षणीसहम्)** मनुष्यों को सहने वाले **(सस्निम्)** ब्रह्मचर्य्यव्रत और विद्या के ग्रहण से पवित्र **(वाजेषु)** और संग्रामों में **(दुष्टरम्)** दुःख से उल्लंघन करने योग्य को **(अस्मभ्यम्)** हम लोगों के लिये **(आ, भर)** सब प्रकार धारण करिये॥ १॥

भावार्थः-वही राजा उत्तम होवे जो दीर्घ ब्रह्मचर्य्य से यथार्थवक्ता जनों से विद्या और विनय को ग्रहण करके न्याय से राज्य की शिक्षा देवे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यदिन्द्र ते चतस्रो यच्छूर सन्ति तिस्रः।
यद्वा पञ्च क्षितीनामवस्तत्सु न आ भर॥ २॥

यत्। इ॒न्द्र॒। ते॒। चत॑स्रः। यत्। शू॒र॒। सन्ति॑। ति॒स्रः। यत्। वा॒। पञ्च॑। क्षि॒ती॒नाम्। अव॑रः। तत्। सु। नः॒। आ। भ॒र॒॥ २॥

पदार्थः-(यत्) याः **(इन्द्र)** राजन् **(ते)** तव **(चतस्रः)** सामदामदण्डभेदाख्या वृत्तयः **(यत्) (शूर) (सन्ति) (तिस्रः)** सुशिक्षिता सभा सेना प्रजा **(यत्) (वा) (पञ्च)** भूम्यादीनि पञ्चतत्त्वानि **(क्षितीनाम्)** मनुष्याणाम् **(अवः)** रक्षणादिकम् **(तत्) (सु) (नः)** अस्मभ्यम् **(आ) (भर)** समन्ताद्धर पुष्णीहि वा॥ २॥

अन्वयः-हे शूरेन्द्र राजन्! यत्ते चतस्रो यत्तिस्रः पञ्च च सन्ति वा यत् क्षितीनामवोऽस्ति तन्नः स्वा भर॥ २॥

भावार्थः-स एव राज्यं वर्धयितुं शक्नुयाद्यो राज्याङ्गानि सर्वाणि पूर्णानि सङ्गृह्णीयात्॥ २॥

पदार्थः-हे **(शूर)** वीर **(इन्द्र)** राजन्! **(यत्)** जो **(ते)** आपकी **(चतस्रः)** चार साम, दाम, दण्ड और भेद नामक वृत्ति और **(यत्)** जो **(तिस्रः)** तीन उत्तम प्रकार शिक्षित सभा, सेना और प्रजा और **(पञ्च)** पृथिवी, अप्, तेज, वायु, आकाश पांच तत्त्व **(सन्ति)** हैं **(वा)** वा **(यत्)** जो **(क्षितीनाम्)** मनुष्यों का **(अवः)** रक्षण आदि है **(तत्)** उसको **(नः)** हम लोगों के लिये **(सु)** उत्तमता से **(आ, भर)** सब प्रकार धारण करो वा पुष्ट करो॥ २॥

भावार्थः-वही राज्य बढ़ाने को समर्थ होवे कि जो राज्य के अङ्ग सब पूर्ण उत्तम प्रकार ग्रहण करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ तेऽव॒ो वरे॑ण्यं॒ वृष॑न्तमस्य हूमहे।

वृष॑जूतिर्हि ज॑ज्ञिष आ॒भूभि॑रिन्द्र तु॒र्वणि॑:॥ ३॥

आ। ते॒। अव॑:। वरे॑ण्यम्। वृष॑न्ऽतमस्य। हू॒म॒हे॒। वृष॑ऽजूतिः। हि। ज॒ज्ञि॒षे॒। आ॒ऽभूभि॑:। इ॒न्द्र॒। तु॒र्वणि॑:॥ ३॥

पदार्थः-(आ) समन्तात् **(ते)** तव **(अवः)** रक्षणादिकं कर्म्म **(वरेण्यम्)** अतीवोत्तमम् **(वृषन्तमस्य)** अतिशयेन बलिष्ठस्य **(हूमहे)** स्वीकुर्महे **(वृषजूतिः)** वृषस्येव जूतिर्वेगो यस्य सः **(हि)** यतः **(जज्ञिषे)** जायसे **(आभूभिः)** ये विद्याविनये समन्ताद्भवन्ति तैः सह **(इन्द्र)** परमैश्वर्य्ययुक्त राजन् **(तुर्वणिः)** यस्तुरः शीघ्रकारिणः शुभगुणानमात्यान् याचते सः॥ ३॥

अन्वयः-हे इन्द्र! हि यतो वृषजूतिस्तुर्वणिस्त्वमाभूभिस्सह जज्ञिषे तस्य वृषन्तमस्य ते वरेण्यमवो वयमा हूमहे॥ ३॥

भावार्थः-हे राजन्! यतो भवान् शुभगुणकर्मस्वभावोऽस्ति पितृवदस्मान् पालयति तस्माद्भवन्तं राजानं वयं मन्यामहे॥ ३॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य से युक्त राजन्! (**हि**) जिससे (**वृषजूतिः**) वृष के वेग से युक्त (**तुर्वणिः**) शीघ्रकारी और श्रेष्ठ गुणों से युक्त मंत्रियों की याचना करने वाले आप (**आभूभिः**) जो विद्या और विनय में सब ओर से प्रकट होते हैं, उनके साथ (**जज्ञिषे**) प्रकट होते हो, उन (**वृषन्तमस्य**) अत्यन्त बलिष्ठ (**ते**) आपके (**वरेण्यम्**) अतीव उत्तम (**अवः**) रक्षण आदि कर्म्म को हम लोग (**आ, हूमहे**) उत्तम प्रकार से स्वीकार करते हैं॥३॥

भावार्थः-हे राजन्! जिससे आप उत्तम गुण, कर्म्म और स्वभाव वाले हो और पितृजन जैसे सन्तानों को वैसे हम लोगों का पालन करते हो, इससे आपको राजा हम लोग मानते हैं॥३॥

अथ प्रजाविषयमाह॥

अब प्रजाविषय को अगले मन्त्र में कहते हैं॥

वृषा॒ ह्यसि॒ राध॑से जज्ञि॒षे वृष्णि॑ ते॒ शव॑ः।

स्वक्ष॑त्रं ते धृ॒षन्मन॑ः स॒त्रा॒हमि॑न्द्र पौंस्य॑म्॥४॥

वृषा॑। हि। असि॑। राध॑से। ज॒ज्ञि॒षे। वृष्णि॑। ते॒। शव॑ः। स्वक्ष॑त्रम्। ते॒। धृ॒षत्। मन॑ः। स॒त्रा॒ऽहम्। इ॒न्द्र॒। पौंस्य॑म्॥४॥

पदार्थः-(**वृषा**) बलिष्ठः सुखवर्षको वा (**हि**) यतः (**असि**) (**राधसे**) धनैश्वर्य्याय (**जज्ञिषे**) (**वृष्णि**) सुखवर्षकम् (**ते**) तव (**शवः**) बलम् (**स्वक्षत्रम्**) त्वं राज्यं स्वस्य क्षत्रियकुलं वा (**ते**) तव (**धृषत्**) प्रगल्भम् (**मनः**) चित्तम् (**सत्राहम्**) सत्यधर्म्माचरणदिनम् (**इन्द्र**) बलिष्ठ (**पौंस्यम्**) पुम्भ्यो हितं बलम्॥४॥

अन्वयः-हे इन्द्र! हि यतस्त्वं वृषासि राधसे जज्ञिषे यस्य ते वृष्णिः शवः स्वक्षत्रं यस्य ते धृषन्मनो यस्य ते सत्राहं पौंस्यं चास्ति तं त्वां वयं राजानं मन्यामहे॥४॥

भावार्थः-प्रजाभिर्यो बलिष्ठः पूर्णविद्याविनयबलः शौर्य्यादिगुणैर्धृष्टः सदा न्यायधर्म्माचरणो भवेत्स एव राजा मन्तव्यः॥४॥

पदार्थः-हे (**इन्द्र**) बलवान् पुरुष! (**हि**) जिससे आप (**वृषा**) बलिष्ठ वा सुख के वर्षाने वाले (**असि**) हैं और (**राधसे**) धनरूप ऐश्वर्य्य के लिये (**जज्ञिषे**) प्रकट होते हो, जिन (**ते**) आपका (**वृष्णिः**) सुख वर्षाने वाले (**शवः**) बल और (**स्वक्षत्रम्**) अपना राज्य वा अपना क्षत्रियकुल जिन (**ते**) आपका (**धृषत्**) प्रगल्भ अर्थात् धृष्ट (**मनः**) चित्त जिन आपका (**सत्राहम्**) सत्य धर्म्म के आचरण का प्रकट करने वाला दिन और (**पौंस्यम्**) पुरुषों के लिये हितकारक बल है, उन आप को हम लोग राजा मानते हैं॥४॥

भावार्थः-प्रजाओं को चाहिये कि जो बलवान्, पूर्ण विद्या, विनय और बल से युक्त, शूरता आदि गुणों से धृष्ट, सदा न्याय और धर्म्माचरणयुक्त हो, उसी को राजा मानें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः।

सर्वरथा शतक्रतो नि याहि शवसस्पते॥५॥५॥

त्वम्। तम्। इन्द्र। मर्त्यम्। अमित्रऽयन्तम्। अद्रिऽवः। सर्वऽरथा। शतक्रतो इति शतऽक्रतो। नि। याहि। शवसः। पते॥५॥

पदार्थः-(त्वम्) (तम्) (इन्द्र) ऐश्वर्य्यमिच्छुक प्रजाजन **(मर्त्यम्)** मनुष्यशरीरधारिणम् **(अमित्रयन्तम्)** शत्रुवदाचरन्तम् **(अद्रिवः)** मेघयुक्तसूर्य्यवद्राजमान **(सर्वरथा)** सर्वे रथा यानानि यस्य सः **(शतक्रतो)** अमितप्रज्ञ **(नि)** नितराम् **(याहि)** गच्छ **(शवसः)** बलस्य सैन्यस्य **(पते)** पालक सेनेश॥५॥

अन्वयः-हे शवसस्पते! शतक्रतोऽद्रिव इन्द्र! सर्वरथा त्वं तममित्रयन्तं मर्त्यं विजयाय नि याहि॥५॥

भावार्थः- हे राजन्! यो ह्यन्यायेन तव शत्रुर्भवेत् तच्छासनाय सबलसत्वं नित्यं गच्छेः॥५॥

पदार्थः-(शवसः) बल अर्थात् सेना के **(पते)** पालक सेना के स्वामिन्! **(शतक्रतो)** अमित बुद्धि वाले **(अद्रिवः)** मेघयुक्त सूर्य्य के सदृश राजमान **(इन्द्र)** ऐश्वर्य्य की इच्छा करने वाले प्रजाजन! **(सर्वरथा)** सम्पूर्ण वाहनों से युक्त **(त्वम्)** आप **(तम्)** उस **(अमित्रयन्तम्)** शत्रु के सदृश आचरण करते हुए **(मर्त्यम्)** मनुष्यशरीरधारी को विजय करने के लिये **(नि)** अत्यन्त **(याहि)** प्राप्त हूजिये॥५॥

भावार्थः-हे राजन्! जो अन्याय से आपका शत्रु होवे, उसके शासन के लिये बल के सहित आप नित्य प्राप्त हूजिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः।

उग्रं पूर्वीषु पूर्व्यं हवन्ते वाजसातये॥६॥

त्वाम्। इत्। वृत्रहन्ऽतम। जनासः। वृक्तऽबर्हिषः। उग्रम्। पूर्वीषु। पूर्व्यम्। हवन्ते। वाजऽसातये॥६॥

पदार्थः-(त्वाम्) (इत्) (वृत्रहन्तम) यो वृत्रं धनं हन्ति प्राप्नोति सोऽतिशयितस्तत्सम्बुद्धौ **(जनासः)** प्रसिद्धाः पुण्यात्मानः **(वृक्तबर्हिषः)** वृक्तं विदीर्णीकृतं हुतपदार्थैरन्तरिक्षं यैस्त ऋत्विजः **(उग्रम्)** दुष्टेषु कठिनस्वभावम् **(पूर्वीषु)** प्राचीनासु प्रजासु **(पूर्व्यम्)** पूर्वैं राजभिः कृतसत्कारम् **(हवन्ते)** स्तुवन्ति गृह्णन्ति वा **(वाजसातये)** स- ामायान्नादीनां विभागाय वा॥६॥

अन्वयः-हे वृत्रहन्तम राजन्! वृक्तबर्हिषो जनासो वाजसातय उग्रं पूर्वीषु पूर्व्यं त्वां हवन्ते स त्वं तान् सर्वदेत्संरक्ष॥६॥

भावार्थः-हे मनुष्या! यः प्रतिष्ठितक्षत्रियकुलजो विद्याविनयादिसम्पन्नः प्रजापालनतत्परेच्छो भवेत्तं राजानं मन्यध्वम्॥६॥

पदार्थः-हे **(वृत्रहन्तम)** अतिशय करके धन को प्राप्त होने वाले राजन्! **(वृक्तबर्हिषः)** विदीर्ण किया है हवन किये हुए पदार्थों से अन्तरिक्ष को जिन्होंने ऐसे ऋत्विक् **(जनासः)** प्रसिद्ध पुण्यात्मा जन **(वाजसातये)** संग्राम वा अन्न आदि के विभाग के लिये **(उग्रम्)** दुष्टों में कठिन स्वभाव वाले और **(पूर्वीषु)** प्राचीन प्रजाओं में **(पूर्व्यम्)** पूर्व राजाओं से किया गया सत्कार जिनका ऐसे **(त्वाम्)** आपकी **(हवन्ते)** स्तुति करते वा ग्रहण करते हैं, वह आप उनकी सर्वदा **(इत्)** ही उत्तम प्रकार रक्षा कीजिये॥६॥

भावार्थः-हे मनुष्यो! जो प्रतिष्ठित क्षत्रियों के कुल में उत्पन्न हुआ, विद्या और विनय आदि से युक्त और प्रजा के पालन में तत्पर इच्छा जिसकी ऐसा होवे, उसको राजा मानो॥६॥

पुनः प्रजाविषयमाह॥

फिर प्रजाविषय को कहते हैं॥

अस्माकमिन्द्र दुष्टरं पुरोयावानमाजिषु।

सयावानं धनेधने वाजयन्तमवा रथम्॥७॥

अस्माकम्। इन्द्र। दुस्तरम्। पुरःऽयावानम्। आजिषु। सऽयावानम्। धनेऽधने। वाजऽयन्तम्। अव। रथम्॥७॥

पदार्थः-**(अस्माकम्)** **(इन्द्र)** राजन् **(दुष्टरम्)** शत्रुभिर्दुःखेन तरितुं योग्यम् **(पुरोयावानम्)** नगरम् यान्तम् **(आजिषु)** स-ामेषु **(सयावानम्)** सेनादिना सह गच्छन्तम् **(धनेधने)** **(वाजयन्तम्)** कृताऽन्वेक्षणम् **(अवा)** अत्र **निपातस्य चे**ति दीर्घः। **(रथम्)** रमणीयं यानम्॥७॥

अन्वयः-हे इन्द्र! त्वमस्माकं दुष्टरं पुरोयावानमाजिषु धनेधने सयावानं वाजयन्तं रथञ्चाऽवा॥७॥

भावार्थः-हे राजन्! यदि त्वमस्माकं पुरं राष्ट्रं च यथावद्रक्षितुं शक्नुयास्तर्ह्यस्माकं राजा भव॥७॥

पदार्थः-हे **(इन्द्र)** राजन्! आप **(अस्माकम्)** हम लोगों के **(दुष्टरम्)** शत्रुओं से दुःख से पार होने योग्य **(पुरोयावानम्)** नगर को चलते हुए **(आजिषु)** संग्रामों में **(धनेधने)** धन-धन में **(सयावानम्)** सेना आदि के साथ चलते हुए **(वाजयन्तम्)** किया अन्वेक्षण जिसका ऐसे **(रथम्)** सुन्दर वाहन की **(अवा)** रक्षा करो॥७॥

भावार्थः-हे राजन्! जो आप लोग हम लोगों के नगर और राज्य की यथावत् रक्षा करने को समर्थ होवें तो हम लोगों के राजा होवें॥७॥

अथ राजद्वारा विद्वद्विषयमाह॥

अब राजद्वारा विद्वद्विषय को अगले मन्त्र में कहते हैं॥

अस्माकमिन्द्रेहि नो रथमवा पुरंध्या।

वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे॥८॥६॥

अ॒स्माक॑म्। इ॒न्द्र॒। आ। इ॒हि॒। न॒:। रथ॑म्। अ॒व॒। पुर॑म्ऽध्या। व॒यम्। श॒वि॒ष्ठ॒। वार्य॑म्। दि॒वि। श्रव॑:। दु॒धी॒म॒हि॒। दि॒वि। स्तोम॑म्। म॒ना॒म॒हे॒॥८॥

पदार्थ:-(अस्माकम्) (इन्द्र) (आ, इहि) प्राप्नुहि **(न:)** अस्मान् **(रथम्)** बहुविधं यानम् **(अवा)** पाहि **(पुरन्ध्या)** बहुविद्याधरित्र्या प्रज्ञया **(वयम्) (शविष्ठ)** अतिशयेन बलयुक्त **(वार्य्यम्)** वरणीयम् **(दिवि)** कमनीये राष्ट्रे **(श्रव:)** श्रवणमन्नं वा **(दधीमहि)** धरेम **(दिवि)** प्रशंसनीये राज्ये **(स्तोमम्)** सकलशास्त्राध्ययनाऽध्यापनम् **(मनामहे)** विजानीयाम॥८॥

अन्वय:-हे शविष्ठेन्द्र! त्वं पुरन्ध्याऽस्माकं रथमेहि नोऽस्माँश्च सततमवा येन वयं दिवि वार्य्यं श्रवो दधीमहि दिवि स्तोमं मनामहे॥८॥

भावार्थ:-स एव प्रजाप्रियो भवति यो राजा न्यायेन प्रजा: सम्पाल्य विद्यासुशिक्षे प्रजासु प्रवर्त्तयेदिति॥८॥

अत्रेन्द्रराजप्रजाविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चत्रिंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्त:॥

पदार्थ:-हे **(शविष्ठ)** अत्यन्त बल से युक्त **(इन्द्र)** राजन्! आप **(पुरन्ध्या)** बहुत विद्या को धारण करने वाली बुद्धि से **(अस्माकम्)** हम लोगों के **(रथम्)** बहुत प्रकार के वाहन को **(आ, इहि)** प्राप्त हूजिये और **(न:)** हम लोगों का निरन्तर **(अवा)** पालन कीजिये जिससे **(वयम्)** हम लोग **(दिवि)** मनोहर राज्य में **(वार्य्यम्)** स्वीकार करने योग्य **(श्रव:)** श्रवण वा अन्न को **(दधीमहि)** धारण करें और **(दिवि)** प्रशंसा करने योग्य राज्य में **(स्तोमम्)** सम्पूर्ण शास्त्र के पढ़ने और पढ़ाने को **(मनामहे)** जानें॥८॥

भावार्थ:-वही प्रजा का प्रिय होता है, जो राजा न्याय से प्रजाओं का उत्तम प्रकार पालन करके विद्या और उत्तम शिक्षा की प्रजाओं में प्रवृत्ति करे॥८॥

इस सूक्त में इन्द्र, राजा, प्रजा और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैतीसवां सूक्त और छठा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य षट्त्रिंशत्तमस्य सूक्तस्य प्रभूवसुराङ्गिरस ऋषिः। इन्द्रो देवता। १, ४, ५ निचृत् त्रिष्टुप्। २, ६ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ जगती छन्दः। निषादः स्वरः॥

अथेन्द्रपदवाच्यराजविषयमाह॥

अब छः ऋचा वाले छत्तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्रपदवाच्य राजविषय को कहते हैं॥

स आ गमदिन्द्रो यो वसूनां चिकेतद्दातुं दामनो रयीणाम्।
धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम्॥ १॥

सः। आ। गमत्। इन्द्रः। यः। वसूनाम्। चिकेतत्। दातुम्। दामनः। रयीणाम्। धन्वऽचरः। न। वंसगः। तृषाणः। चकमानः। पिबतु। दुग्धम्। अंशुम्॥ १॥

पदार्थः-(**सः**) (**आ**) समन्तात् (**गमत्**) गच्छेत् (**इन्द्रः**) दाता (**यः**) (**वसूनाम्**) द्रव्याणाम् (**चिकेतत्**) जानाति (**दातुम्**) (**दामनः**) दात्रीः (**रयीणाम्**) (**धन्वचरः**) यो धन्वन्यन्तरिक्षे चरति (**न**) इव (**वंसगः**) यो वंसान् सत्याऽसत्यविभाजकान् गच्छति (**तृषाणः**) तृषातुर इव (**चकमानः**) कामयमानः (**पिबतु**) (**दुग्धम्**) (**अंशुम्**) प्राणप्रदम्॥ १॥

अन्वयः-हे मनुष्या! य इन्द्रो वसूनां दातुं चिकेतद्रयीणां दामनश्चिकेतत्स तृषाणो धन्वचरो न वंसगश्चकमानोऽस्माना गमदंशुं दुग्धं पिबतु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्यो धनप्रदो विवेचकः सत्यं कामयमान इष्टमर्य्यादो जनो भवेत् स एव राजा भावनीयः॥ १॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**इन्द्रः**) दाता (**वसूनाम्**) द्रव्यों के (**दातुम्**) देने को (**चिकेतत्**) जानता और (**रयीणाम्**) धनों की (**दामनः**) देने वालियों को जानता है (**सः**) वह (**तृषाणः**) पिपासा से व्याकुल के सदृश और (**धन्वचरः**) अन्तरिक्ष में चलने वाले के (**न**) सदृश (**वंसगः**) सत्य और असत्य के विभाग करने वालों को प्राप्त होने वाला और (**चकमानः**) कामना करता हुआ हम लोगों को (**आ**) सब प्रकार से (**गमत्**) प्राप्त होवे और (**अंशुम्**) प्राणों के देने वाले (**दुग्धम्**) दुग्ध का (**पिबतु**) पान करे॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि जो धन देने, विचार करने, सत्य की कामना करने और मर्य्यादा को चाहने वाला होवे, उसी को राजा मानें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे।

अनु त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे॥ २॥

आ। ते। हनू इति। हरिऽवः। शूर। शिप्रे इति। रुहत्। सोमः। न। पर्वतस्य। पृष्ठे। अनु। त्वा। राजन्। अर्वतः। न। हिन्वन्। गीःऽभिः। मदेम। पुरुऽहूत। विश्वे॥ २॥

पदार्थः-(आ) (ते) तव **(हनू)** मुखनासिके **(हरिवः)** प्रशस्तमनुष्ययुक्त **(शूर)** शत्रूणां हिंसक **(शिप्रे)** सुशोभिते **(रुहत्)** रोहति **(सोमः)** सोमलता **(न)** इव **(पर्वतस्य)** शैलस्य **(पृष्ठे)** उपरि **(अनु) (त्वा)** त्वाम् **(राजन्) (अर्वतः)** अश्वान् **(न)** इव **(हिन्वन्)** गमयन् **(गीर्भिः)** सत्योज्ज्वलाभिर्वाग्भिः **(मदेम)** आनन्देम **(पुरुहूत)** बहुभिः कृतसत्कार **(विश्वे)** सर्वे॥ २॥

अन्वयः-हे हरिवः शूर पुरुहूत राजन्! यस्य ते शिप्रे हनू गीर्भिर्हिन्वन्नर्वतो न पर्वतस्य पृष्ठे सोमो न व्यवहार आ रुहत् तं त्वा विश्वे वयमनु मदेम त्वमस्मानानन्दय॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यो राजा सत्सङ्गं विदधाति स पर्वते सोमलतेव सर्वतो वर्धते॥ २॥

पदार्थः-हे **(हरिवः)** अच्छे मनुष्यों से युक्त **(शूर)** शत्रुओं के नाश करने वाले **(पुरुहूत)** बहुतों से सत्कार किये गये **(राजन्)** राजन्! जिन **(ते)** आप को **(शिप्रे)** उत्तम प्रकार शोभित **(हनू)** मुख और नासिका **(गीर्भिः)** सत्य से उज्ज्वल वाणियों से **(हिन्वन्)** चलवाता हुआ **(अर्वतः)** घोड़ों के **(न)** सदृश और **(पर्वतस्य)** पर्वत के **(पृष्ठे)** ऊपर **(सोमः)** सोमलता के **(न)** सदृश व्यवहार **(आ, रुहत्)** प्रकट होता है उन **(त्वा)** आप को **(विश्वे)** सब हम लोग **(अनु, मदेम)** आनन्दित करें तथा आप हम लोगों को आनन्दित करिये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा सत्सङ्ग करता है, वह पर्वत में सोमलता के सदृश सब ओर से वृद्धि को प्राप्त होता है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः।

रथादधि त्वा जरिता सदावृध कुवित्नु स्तोषन्मघवन् पुरूवसुः॥ ३॥

चक्रम्। न। वृत्तम्। पुरुऽहूत। वेपते। मनः। भिया। मे। अमतेः। इत्। अद्रिऽवः। रथात्। अधि। त्वा। जरिता। सदाऽवृध। कुवित्। नु। स्तोषत्। मघऽवन्। पुरुऽवसुः॥ ३॥

पदार्थः-(चक्रम्) (न) इव **(वृत्तम्) (पुरुहूत)** बहुषु सत्कृत **(वेपते)** कम्पते **(मनः)** चित्तम् **(भिया)** भयेन **(मे)** मम **(अमतेः)** निर्बुद्धेः **(इत्)** एव **(अद्रिवः)** मेघवत्सूर्य इव **(रथात्)** यानात् **(अधि)**

(त्वा) त्वाम् **(जरिता)** स्तावकः **(सदावृध)** सदैव वर्धक **(कुवित्)** महान् **(नु)** **(स्तोषत्)** स्तुयात् **(मघवन्)** बहुधनयुक्त **(पुरूवसुः)** असङ्ख्यधनः॥३॥

अन्वयः-हे अद्रिवः पुरुहूत मघवन् सदावृध राजन्! यस्मादमतेर्म इन्मनो रथाद् वृत्तं चक्रं न भिया वेपते तं त्वं निवारय यः कुवित्पुरूवसुर्जरिता त्वा न्वधि स्तोषत् तं त्वं सत्कुर्य्याः॥३॥

भावार्थः-अत्रोपमालङ्कारः। यदि राजा चोरान् साहसिकादीन् प्रयत्नेन न निरुन्ध्याच्छ्रेष्ठान् न सत्कुर्यात्तर्हि भयोद्भवेन प्रजा उद्विग्नाः स्युः॥३॥

पदार्थः-हे **(अद्रिवः)** मेघ और सूर्य्य के सदृश वर्त्तमान **(पुरुहूत)** बहुतों में सत्कार पाये हुए **(मघवन्)** बहुत धनों से युक्त **(सदावृध)** सदा वृद्धि करने वाले राजन्! जिस कारण **(अमतेः, मे)** मुझ निर्बुद्धि का **(इत्)** ही **(मनः)** चित्त **(रथात्)** वाहन से **(वृत्तम्)** वर्त्ते हुए **(चक्रम्)** चक्र के **(न)** सदृश **(भिया)** भय से **(वेपते)** कंपता है, उस कारण का आप निवारण कीजिये और जो **(कुवित्)** महान् **(पुरूवसुः)** असंख्यधन से युक्त **(जरिता)** स्तुति करने वाला **(त्वा)** आपकी **(नु)** निश्चय **(अधि, स्तोषत्)** स्तुति करे उसका आप सत्कार करें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा चोर और साहस करने वाले जनों का प्रयत्न से न निवारण करे और श्रेष्ठ जनों का न सत्कार करे तो भय के उद्भव से प्रजायें व्याकुल होवें॥३॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

एष ग्रावेव जरिता त इन्द्रेयर्ति वाचं बृहदाशुषाणः।
प्र सव्येन मघवन् यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः॥४॥

एषः। ग्रावाऽइव। जरिता। ते। इन्द्र। इयर्ति। वाचम्। बृहत्। आशुषाणः। प्र। सव्येन। मघऽवन्। यंसि। रायः। प्र। दक्षिणित्। हरिऽवः। मा। वि। वेनः॥४॥

पदार्थः-(एषः) **(ग्रावेव)** मेघ इव **(जरिता)** सकलविद्याप्रशंसकः **(ते)** तव **(इन्द्र)** शत्रुविदारक राजन्! **(इयर्त्ति)** प्राप्नोति **(वाचम्)** सुशिक्षितां वाणीम् **(बृहत्)** महत् **(आशुषाणः)** व्याप्नुवन् सन् **(प्र)** **(सव्येन)** वामपार्श्वेन **(मघवन्)** धनाढ्य **(यंसि)** प्राप्नोषि नियच्छसि वा **(रायः)** धनस्य **(प्र, दक्षिणित्)** दक्षिणेन पार्श्वेनैति गच्छतीति **(हरिवः)** उत्तमाऽमात्ययुक्त **(मा)** **(वि)** विगतार्थे **(वेनः)** कामयमानः॥४॥

अन्वयः-हे हरिवो मघवन्निन्द्र! यस्त एष जरिता ग्रावेव वाचमियर्त्ति स बृहदाशुषाणः सव्येन प्र दक्षिणित् सन् रायः प्र यंसि स त्वं वि वेनो मा भव॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये महान्तो विद्वांसो वाचं गृहीत्वा ग्राहयित्वा संयतेन्द्रिया भवन्ति ते निष्कामा न भवन्ति, किन्तु सत्यकामा असत्यद्वेषिणः सततं वर्त्तन्ते॥४॥

पदार्थः-हे (**हरिवः**) उत्तम मन्त्रियों से और (**मघवन्**) धन से युक्त (**इन्द्र**) शत्रुओं के नाश करने वाले राजन्! जो (**ते**) आपका (**एषः**) यह (**जरिता**) सम्पूर्ण विद्याओं की प्रशंसा करने वाला (**ग्रावेव**) मेघ के सदृश (**वाचम्**) उत्तम शिक्षायुक्त वाणी को (**इयर्त्ति**) प्राप्त होता है, वह (**बृहत्**) बड़े को (**आशुषाणः**) व्याप्त होता हुआ (**सव्येन**) वाम ओर से (**प्र, दक्षिणित्**) उत्तम प्रकार दहिने भाग से चलने वाला (**रायः**) धन के (**प्र, यंसि**) उत्तम प्रकार प्राप्त होने वा नियम करने वाले हो वह आप (**वि**) विशेष करके (**वेनः**) कामना करने वाले (**मा**) न हूजिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो बड़े विद्वान् जन वाणी को ग्रहण कर वा ग्रहण कराय के इन्द्रियों के निग्रह करने वाले होते हैं, वे निष्फल मनोरथ वाले नहीं होते हैं, किन्तु सत्यकाम और असत्य के द्वेषी निरन्तर वर्त्तमान हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वृषा त्वा॒ वृष॑णं वर्धतु॒ द्यौर्वृषा॒ वृष॑भ्यां वहसे॒ हरि॑भ्याम्।
स नो॒ वृषा॒ वृष॑रथः सुशिप्र॒ वृष॑क्रतो॒ वृषा॑ वज्रि॒न् भरे॑ धाः॥५॥

वृषा॑। त्वा॒। वृष॑णम्। व॒र्धतु॒। द्यौः। वृषा॑। वृष॑भ्याम्। व॒ह॒से॒। हरि॑भ्याम्। सः। नः॒। वृषा॑। वृष॑रथः। सु॒शि॒प्र॒। वृष॑क्रतो॒ इति॑ वृषऽक्रतो। वृषा॑। वज्रि॒न्। भरे॑। धाः॒॥५॥

पदार्थः-(**वृषा**) सुखवर्षकः (**त्वा**) त्वाम् (**वृषणम्**) बलिष्ठम् (**वर्धतु**) वर्धताम् (**द्यौः**) सत्यकामः (**वृषा**) वृष इव बलिष्ठः (**वृषभ्याम्**) बलयुक्ताभ्याम् (**वहसे**) प्राप्नोषि प्रापयसि वा (**हरिभ्याम्**) हरणशीलाभ्यां हस्ताभ्याम् (**सः**) (**नः**) अस्मान् (**वृषा**) दुष्टानां शक्तिबन्धकः (**वृषरथः**) बलिष्ठा वृषभा रथे यस्य (**सुशिप्र**) सुमुखारविन्द (**वृषक्रतो**) वृषाणां बलवतां प्रज्ञाकर्म्माणीव प्रज्ञाकर्म्माणि यस्य सः (**वृषा**) विद्यावर्षकः (**वज्रिन्**) शस्त्रास्त्रवित् (**भरे**) स-ामे (**धाः**) धर॥५॥

अन्वयः-हे सुशिप्र वृषक्रतो वज्रिन्निन्द्र राजन्! यो वृषा वृषणं त्वा वर्धतु यो वृषा त्वं द्यौरिव वृषभ्यां हरिभ्यां वहसे स वृषा त्वं च वृषरथो वृषा नो भरे धाः॥५॥

भावार्थः-हे मनुष्या! ये विद्वांसो युष्मान् सर्वदा वर्धयन्ति तांस्त्वं स-ामे विजयाय प्रेर्ष्व॥५॥

पदार्थः-हे (**सुशिप्र**) उत्तम कमल के समान मुख वाले (**वृषक्रतो**) बलवानों की बुद्धि और कर्म्मों के सदृश बुद्धि और कर्म्म जिसके वह (**वज्रिन्**) शस्त्र और अस्त्र के ज्ञान से युक्त राजन्! जो (**वृषा**) सुख वर्षाने वाला (**वृषणम्**) बलिष्ठ (**त्वा**) आप को (**वर्धतु**) बढ़ावे और जो (**वृषा**) वृष के समान बलवान् आप (**द्यौः**) सत्य कामना वाले के सदृश (**वृषभ्याम्**) बल से युक्त (**हरिभ्याम्**) हरणशील हस्तों से (**वहसे**) प्राप्त होते वा प्राप्त कराते हो (**सः**) वह (**वृषा**) दुष्टों की शक्ति रोकने वाला और आप

(वृषरथः) बलिष्ठ बैल रथ में जिनके ऐसे **(वृषा)** विद्या के वर्षाने वाले **(नः)** हम लोगों को **(भरे)** संग्राम में **(धाः)** धरिये धारण कीजिये॥५॥

भावार्थः-हे मनुष्यो! जो विद्वान् तुम लोगों को सर्वदा बढ़ाते हैं, उनको आप संग्राम में विजय के लिये प्रेरणा दीजिये॥५॥

अथ शिल्पिकार्य्यविषयमाह॥

अब शिल्पिकार्य्यविषय को अगले मन्त्र में कहते हैं॥

यो रोहि॑तौ वा॒जिनौ॑ वा॒जिनी॑वान् त्रि॒भिः श॒तैः सच॑मानाव॒दि॑ष्ट।
यू॒ने सम॑स्मै क्षि॒तयो॑ नमन्तां श्रु॒तर॑थाय मरुतो दुवो॒या॥६॥७॥

यः। रोहि॑तौ। वा॒जिनौ॑। वा॒जिनी॑ऽवान्। त्रि॒ऽभिः। श॒तैः। सच॑मानौ। अदि॑ष्ट। यू॒ने॑। सम्। अ॒स्मै॒। क्षि॒तयः। न॒म॒न्ता॒म्। श्रु॒तऽर॑थाय। म॒रु॒तः॒। दु॒व॒ःऽया॥६॥

पदार्थः-**(यः)** **(रोहितौ)** विद्युत्प्रसिद्धवह्नी **(वाजिनौ)** अतिवेगवन्तौ **(वाजिनीवान्)** वेगक्रिया-ज्ञानयुक्तः **(त्रिभिः)** **(शतैः)** **(सचमानौ)** सम्बद्धौ **(अदिष्ट)** दिशेत् **(यूने)** पूर्णयुवावस्थाय **(सम्)** **(अस्मै)** **(क्षितयः)** मनुष्याः **(नमन्ताम्)** **(श्रुतरथाय)** श्रुता रथा यस्य **(मरुतः)** मनुष्याः **(दुवोया)** यौ दुवः परिचरणं यातस्तौ॥६॥

अन्वयः-हे मरुतो! यो वाजिनीवाँस्त्रिभिः शतैरस्मै यूने सचमानौ दुवोया वाजिनौ रोहतावदिष्ट तस्मै श्रुतरथाय क्षितयः सन्नमन्ताम्॥६॥

भावार्थः-ये विमानादियानकार्य्येष्वग्न्यादिपदार्थान् संप्रयोजयन्ति ते यावता त्रिभिः शतैरश्वैर्यानं सद्यो नयन्ति तावद्बलं तस्यां कलायां भवति। य एव शिल्पविद्याकृत्येषु प्रसिद्धा जायन्ते तेषां सत्कारः सर्वे कुर्वन्तीति॥६॥

अत्रेन्द्रविद्वच्छिल्पिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्त्रिंशत्तमं सूक्तं सप्तमो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(मरुतः)** मनुष्यो! **(यः)** जो **(वाजिनीवान्)** वेग की क्रिया का जानने वाला **(त्रिभिः)** तीन **(शतैः)** सैकड़ों से **(अस्मै)** इस **(यूने)** युवा पुरुष के लिये **(सचमानौ)** मिले हुए **(दुवोया)** जो परिचरण को प्राप्त होते हैं उन **(वाजिनौ)** बड़े वेग वाले **(रोहितौ)** बिजुली और प्रसिद्ध अग्नि का **(अदिष्ट)** उपदेश देवे उस **(श्रुतरथाय)** सुने गये वाहन जिसके उसके लिये **(क्षितयः)** मनुष्य **(सम्, नमन्ताम्)** अच्छे प्रकार नम्र होवें॥६॥

भावार्थः-जो विमान आदि वाहन के कार्य्यों में अग्नि आदि पदार्थों का संप्रयोग करते हैं, वे जितने तीन सौ घोड़ों से वाहन शीघ्र पहुंचाते हैं, उतना बल उस कला में होता है और जो इस प्रकार शिल्पविद्या के कृत्यों में प्रसिद्ध होते हैं, उनका सत्कार सब करते हैं॥६॥

इस सूक्त में इन्द्र, विद्वान् और शिल्पी के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छत्तीसवां सूक्त और सप्तम वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य सप्तत्रिंशत्तमस्य सूक्तस्य अत्रिर्ऋषिः। इन्द्रो देवता। १ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २ विराट् त्रिष्टुप्। ३, ५ निचृत् त्रिष्टुप्। ४ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथेन्द्रविषयमाह॥

अब पांच ऋचा वाले सैंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्रविषय को कहते हैं॥

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः।
तस्मा अमृध्रा उषसो व्युच्छान् य इन्द्राय सुनवामेत्याह॥ १॥

सम्। भानुना। यतते। सूर्यस्य। आऽजुह्वानः। घृतऽपृष्ठः। सुऽअञ्चाः। तस्मै। अमृध्राः। उषसः। वि। उच्छान्। यः। इन्द्राय। सुनवाम। इति। आह॥ १॥

पदार्थः-(सम्) (भानुना) किरणेन **(यतते) (सूर्य्यस्य) (आजुह्वानः)** कृताह्वानः **(घृतपृष्ठः)** घृतमुदकं पृष्ठे यस्य सः **(स्वञ्चाः)** यः सुष्ठ्वञ्चति **(तस्मै) (अमृध्राः)** अहिंसिकाः **(उषसः)** प्रभातवेलाः **(वि) (उच्छान्)** विवासयेत् **(यः) (इन्द्राय)** ऐश्वर्य्ययुक्ताय जनाय **(सुनवाम)** निष्पादयेत् **(इति) (आह)** उपदिशति॥ १॥

अन्वयः-हे मनुष्या! य आजुह्वानो घृतपृष्ठः स्वञ्चा अग्निः सूर्य्यस्य भानुना सं यतते योऽमृध्रा उषसो व्युच्छान् य एतद्विद्यां जानाति तस्मा इन्द्राय य आहेति वयं तं सुनवाम॥ १॥

भावार्थः-हे मनुष्या! या विद्युत्सूर्य्यप्रकाशेन सह वर्त्तते तदादिविद्यां य उपदिशेत् सोऽस्माकमुन्नतिकरो भवतीति वयं विजानीमः॥ १॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(आजुह्वानः)** आह्वान किया गया **(घृतपृष्ठः)** जल जिसके पीठ पर ऐसा **(स्वञ्चाः)** उत्तम प्रकार चलने वाला अग्नि **(सूर्य्यस्य)** सूर्य्य की **(भानुना)** किरण से **(सम्)** उत्तम प्रकार **(यतते)** प्रयत्न करता और जो **(अमृध्राः)** नहीं हिंसा करनेवाली **(उषसः)** प्रभातवेलाओं को **(वि, उच्छान्)** वसावे और जो इस विद्या को जानता है **(तस्मै)** उस **(इन्द्राय)** ऐश्वर्ययुक्त जन के लिये जो **(आह)** उपदेश देता है **(इति)** इस प्रकार हम लोग उसको **(सुनवाम)** उत्पन्न करें॥ १॥

भावार्थः-हे मनुष्यो! जो बिजुली, सूर्य्य के प्रकाश के साथ वर्त्तमान है, उसको आदि लेकर विद्या का जो उपदेश देवे, वह हम लोगों की उन्नति करने वाला होता है, यह हम लोग जानें॥ १॥

अथ शिल्पिविद्वद्विषयमाह॥

अब शिल्पी विद्वान् के विषय को कहते हैं॥

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते।
ग्रावाणो यस्येषिरं वदन्त्यध्वर्यवो हविषा सिन्धुम्॥ २॥

समि॑द्धऽअग्निः। व॒न॒व॒त्। स्ती॒र्णऽब॑र्हिः। यु॒क्तऽग्रा॑वा। सु॒तऽसो॑मः। ज॒रा॒ते॒। ग्रावा॑णः। यस्य॑। इ॒षि॒रम्। वद॑न्ति। अय॑त्। अ॒ध्व॒र्युः। ह॒विषा॑। अव॑। सिन्धु॑म्॥ २॥

पदार्थः-(समिद्धाग्निः) प्रदीप्तः पावकः **(वनवत्)** सम्भजते **(स्तीर्णबर्हिः)** स्तीर्णमाच्छादितं बर्हिरन्तरिक्षं येन सः **(युक्तग्रावा)** युक्तो ग्रावा मेघो येन **(सुतसोमः)** सुतः सोमो यस्मात् **(जराते)** स्तौति **(ग्रावाणः)** मेघाः **(यस्य)** **(इषिरम्)** गमनम् **(वदन्ति)** **(अयत्)** गच्छति **(अध्वर्युः)** अध्वरं शिल्पविद्यां कामयमानः **(हविषा)** अग्नौ प्रक्षेप्य सामग्र्या **(अव)** **(सिन्धुम्)** समुद्रम्॥ २॥

अन्वयः-हे विद्वन्! यः स्तीर्णबर्हिर्युक्तग्रावा सुतसोमः समिद्धाग्निः सर्वान् पदार्थान् वनवद् यस्येषिरं ग्रावाणो वदन्ति यमध्वर्युर्हविषा सिन्धुमवायज्जराते च तमग्निं कार्य्येषु संप्रयुङ्क्ष्व॥ २॥

भावार्थः-हे विद्वांसो! योऽग्निः सर्वेषु पदार्थेषु व्याप्तो बहूत्तमगुणक्रियावान् वर्त्तते तं विज्ञाय कार्य्याणि साध्नुत॥ २॥

पदार्थः-हे विद्वन्! जो **(स्तीर्णबर्हिः)** अर्थात् आच्छादित किया अन्तरिक्ष जिसने ऐसा और **(युक्तग्रावा)** युक्त मेघ जिससे **(सुतसोमः)** तथा प्रकट हुआ चन्द्रमा जिससे **(समिद्धाग्निः)** वह प्रदीप्त हुआ अग्नि सम्पूर्ण पदार्थों का **(वनवत्)** सम्भोग करता है **(यस्य)** जिसके **(इषिरम्)** गमन को **(ग्रावाणः)** मेघ **(वदन्ति)** शब्द से सूचित करते हैं, जिसको **(अध्वर्युः)** शिल्पविद्या की कामना करता हुआ जन **(हविषा)** अग्नि में छोड़ने योग्य सामग्री से **(सिन्धुम्)** समुद्र को **(अव, अयत्)** प्राप्त होता और **(जराते)** स्तुति करता है, उस अग्नि का कार्य्यों में संप्रयोग करो॥ २॥

भावार्थः-हे विद्वानो! जो अग्नि सम्पूर्ण पदार्थों में व्याप्त और बहुत उत्तम गुण और क्रियावान् है, उसको जानकर कार्य्यों को सिद्ध करो॥ २॥

अथ युवावस्थाविवाहविषयमाह॥

अब युवावस्थाविवाहविषय को अगले मन्त्र में कहते हैं॥

व॒धूरि॒यं पति॑मि॒च्छन्त्ये॑ति॒ य ई॑ं वहा॑ते॒ महि॑षीमिषि॒राम्।
आस्य॑ श्रवस्या॒द्रथ॒ आ च॑ घोषात्पु॒रू स॒हस्रा॒ परि॑ वर्तयाते॥ ३॥

व॒धूः। इ॒यम्। पति॑म्। इ॒च्छन्ती॑। ए॒ति॒। यः। ई॒म्। वहा॑ते। महि॑षीम्। इ॒षि॒राम्। आ। अ॒स्य॒। श्र॒व॒स्या॒त्। रथ॑ः। आ। च॒। घो॒षा॒त्। पु॒रु। स॒हस्रा॑। परि॑। व॒र्त॒या॒ते॥ ३॥

पदार्थः-(वधूः) भार्य्या **(इयम्)** **(पतिम्)** **(इच्छन्ती)** **(एति)** प्राप्नोति **(यः)** **(ईम्)** उदकं सर्वान् पदार्थान् वा **(वहाते)** वहेताम् **(महिषीम्)** महाशुभगुणाम् **(इषिराम्)** प्राप्नुवन्तीम् **(आ)** **(अस्य)** **(श्रवस्यात्)** य आत्मनः श्रव इच्छति तस्मात् **(रथः)** **(आ)** **(च)** **(घोषात्)** शब्दद्वारया **(पुरू)** बहूनि **(सहस्रा)** सहस्राणि **(परि)** सर्वतः **(वर्त्तयाते)** वर्त्तयेत। लेट् प्रथमैकवचन आडागमे णिजन्तस्य वर्त्तेः प्रयोगः॥ ३॥

अन्वयः-हे विद्वांसो! यथेयं पतिमिच्छन्ती वधूर्हृद्यं स्वामिनमेति यो हि वधूयुः प्रियामिषिरां महिषीमेति यथा तौ सर्वं गृहकृत्यं वहाते तथेमग्निं संप्रयुक्तो रथो वाहयति सोऽस्याश्रवस्याद् घोषाच्च पुरू सहस्रा पर्या वर्त्तयाते॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कृतब्रह्मचर्य्यौ स्त्रीपुरुषौ परस्परं पतिभार्ये इच्छतः परस्परं संप्रीतौ हृद्यौ संयुक्तौ सन्तौ गृहाश्रमव्यवहारमलंकुरुतस्तथैव जलाग्नी संप्रयुक्तौ सर्वं व्यवहारं साधयतो बहुभ्यः क्रोशेभ्य आमुहूर्त्तादपि रथादिकं सद्यो गमयत इति सर्वैर्वेद्यम्॥३॥

पदार्थः-हे विद्वानो! जैसे **(इयम्)** यह **(पतिम्)** पति की **(इच्छन्ती)** इच्छा करती हुई **(वधूः)** स्त्री प्रिय स्वामी को **(एति)** प्राप्त होती है और **(यः)** जो स्त्री को प्राप्त होने वाला प्रिय **(इषिराम्)** प्राप्त होती हुई **(महिषीम्)** बहुत श्रेष्ठ गुणवाली स्त्री को प्राप्त होता है और जैसे वे दोनों सम्पूर्ण गृहकृत्य को **(वहाते)** चलावें वैसे **(ईम्)** जल वा सम्पूर्ण पदार्थों को अग्नि से चलाया गया **(रथः)** वाहन चलाता है वह **(अस्य)** इसके **(आ, श्रवस्यात्)** आत्मा के श्रवण की इच्छा करने वाले से **(घोषात् च)** और शब्दद्वारा से **(पुरू)** बहुतों और **(सहस्रा)** हजारों के **(परि)** सब ओर **(आ, वर्त्तयाते)** अच्छे प्रकार वर्त्तमान है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे किया ब्रह्मचर्य्य जिन्होंने ऐसे स्त्री और पुरुष परस्पर पति और स्त्रीभाव की इच्छा करते हैं तथा परस्पर प्रसन्न प्रिय होकर संयुक्त हुए गृहाश्रम के व्यवहार को उत्तम रीति से पूर्ण करते हैं, वैसे ही जल और अग्नि संप्रयुक्त किये गये सम्पूर्ण व्यवहार को सिद्ध करते हैं और बहुत कोशों से भी मुहूर्त्तमात्र से वाहन आदि को शीघ्र पहुंचाते हैं, यह सब को जानना चाहिये॥३॥

अथ सद्यो यानचालनविषयमाह॥

अब शीघ्र यानचालनविषय को कहते हैं॥

न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम्।
आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन्॥४॥

न। सः। राजा। व्यथते। यस्मिन्। इन्द्रः। तीव्रम्। सोमम्। पिबति। गोऽसखायम्। आ। सत्वनैः। अजति। हन्ति। वृत्रम्। क्षेति। क्षितीः। सुऽभगः। नाम। पुष्यन्॥४॥

पदार्थः-(न) निषेधे **(सः)** **(राजा)** **(व्यथते)** भयं पीडां प्राप्नोति **(यस्मिन्)** **(इन्द्रः)** विद्युत् **(तीव्रम्)** **(सोमम्)** जलम् **(पिबति)** **(गोसखायम्)** गौर्भूगोलः सखा यस्य तम् **(आ)** **(सत्वनैः)** रथादिद्रव्यैः **(अजति)** गच्छति **(हन्ति)** नाशयति **(वृत्रम्)** मेघम् **(क्षेति)** निवासयत्यैश्वर्य्यं करोति वा **(क्षितीः)** मनुष्यान् **(सुभगः)** शोभनो भग ऐश्वर्य्यं यस्मात्तम् **(नाम)** प्रसिद्धिम् **(पुष्यन्)**॥४॥

अन्वयः-यस्मिन् राजनीन्द्रो गोसखायं तीव्रं सोमं पिबति सत्वनैराजति वृत्रं हन्ति स राजा सुभगो नाम

पुष्यन् क्षितीः क्षेति न व्यथते॥४॥

भावार्थः-यस्य राज्ञो वशे भूमिजलाग्निवायवो वर्त्तन्ते यस्य राज्ञः कुतश्चिदप्यर्य्यादेर्भयं कदाचिन्न जायते यशस्वी प्रसिद्धश्चाऽस्मिञ्जगति भवति॥४॥

पदार्थः-(**यस्मिन्**) जिस राजा में (**इन्द्रः**) बिजुली (**गोसखायम्**) भूगोल है मित्र जिसका उस (**तीव्रम्**) तीव्र (**सोमम्**) जल का (**पिबति**) पान करती (**सत्वनैः**) और रथ आदि द्रव्यों से (**आ, अजति**) आती और (**वृत्रम्**) मेघ का (**हन्ति**) नाश करती है (**सः**) वह (**राजा**) राजा (**सुभगः**) सुन्दर ऐश्वर्य्य जिससे उस (**नाम**) प्रसिद्धि को (**पुष्यन्**) पुष्ट करता हुआ (**क्षितीः**) मनुष्यों को (**क्षेति**) वसाता है वा ऐश्वर्य्य करता और (**न**) न (**व्यथते**) भय वा पीड़ा को प्राप्त होता है॥४॥

भावार्थः-जिस राजा के वश में भूमि, जल, अग्नि और पवन हैं, उस राजा को किसी शत्रु आदि से भय कभी नहीं होता और वह राजा यशस्वी और प्रसिद्ध इस जगत् में होता है॥४॥

अथ विद्युद्विषयमाह॥

अब विद्युद्विद्याविषय को अगले मन्त्र में कहते हैं॥

पुष्यात् क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति।

प्रियः सूर्ये प्रियो अग्ना भवाति य इन्द्राय सुतसोमो ददाशत्॥५॥८॥

पुष्यात्। क्षेमे। अभि। योगे। भवाति। उभे इति। वृतौ। संयती इति सम्ऽयती। सम्। जयाति। प्रियः। सूर्ये। प्रियः। अग्ना। भवाति। यः। इन्द्राय। सुतऽसोमः। ददाशत्॥५॥

पदार्थः-(**पुष्यात्**) पुष्टिं कुर्य्यात् (**क्षेमे**) रक्षणे (**अभि**) आभिमुख्ये (**योगे**) अप्राप्तस्य प्राप्तिलक्षणे (**भवाति**) भवेत् (**उभे**) (**वृतौ**) संवृतौ आच्छादने (**संयती**) सम्मिलिते (**सम्**) (**जयाति**) जयेत् (**प्रियः**) (**सूर्ये**) सवितरि (**प्रियः**) कामयमानः (**अग्ना**) अग्नौ (**भवाति**) भवेत् (**यः**) (**इन्द्राय**) ऐश्वर्य्योन्नतये (**सुतसोमः**) निष्पादितैश्वर्य्यः (**ददाशत्**) दद्यात्॥५॥

अन्वयः-यः सूर्य्ये प्रियोऽग्ना प्रियो भवाति क्षेमे योगेऽभि पुष्याद् वृतावुभे संयती विज्ञाय भवाति सुतसोमः सन्निन्द्राय ददाशत् सः जनः शत्रून् सं जयाति॥५॥

भावार्थः-ये मनुष्या अग्न्यादिविद्यां कामयमाना योगक्षेमसाधने कुशला दातारो न्यायप्रिया भवेयुस्त एव दुष्टाञ्जेतुं शक्नुयुरिति॥५॥

अत्रेन्द्रशिल्पिविद्वद्युवावस्थाविवाहवर्णनं सद्यो यानचालनं विद्युद्विद्यावर्णनं च कृतमत एतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तत्रिंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-(**यः**) जो (**सूर्ये**) सूर्य में (**प्रियः**) कामना करने वाला (**अग्ना**) अग्नि में (**प्रियः**) कामना करता हुआ (**भवाति**) प्रसिद्ध होवे तथा (**क्षेमे**) रक्षण में और (**योगे**) अप्राप्त वस्तु की प्राप्ति के

लक्षण में **(अभि)** सन्मुख **(पुष्यात्)** पुष्टि करे तथा **(वृतौ)** आच्छादन करने में **(उभे)** दोनों **(संयती)** मिली हुइयों का जानकर **(भवाति)** प्रसिद्ध होवे और **(सुतसोमः)** एकत्र किया ऐश्वर्य्य जिसने ऐसा जन **(इन्द्राय)** ऐश्वर्य्य की वृद्धि के लिये **(ददाशत्)** देवे वह जन शत्रुओं को **(सम्, जयाति)** अच्छे प्रकार जीते॥५॥

भावार्थः-जो मनुष्य अग्नि आदि विद्या की कामना करते हुए योगक्षेम के साधन में चतुर, दाता और न्याय में प्रीति करने वाले होवें, वे ही दुष्टों को जीतने को समर्थ होवें॥५॥

इस सूक्त में इन्द्र, शिल्पी, विद्वान् और युवावस्था में विवाह का वर्णन, शीघ्र वाहन का चलाना और बिजुली की विद्या का वर्णन किया, इससे इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सैतीसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्याष्टात्रिंशत्तमस्य सूक्तस्य अत्रिर्ऋषिः। इन्द्रो देवता। १ अनुष्टुप्। २, ३, ४ निचृदनुष्टुप्। ५ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथेन्द्रगुणानाह॥

अब पांच ऋचा वाले अड़तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्र के गुणों को कहते हैं॥

उरोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो।

अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय॥ १॥

उरोः। ते। इन्द्र। राधसः। विऽभ्वी। रातिः। शतक्रतो इति शतऽक्रतो। अध। नः। विश्वऽचर्षणे। द्युम्ना। सुऽक्षत्र। मंहय॥ १॥

पदार्थः-(**उरोः**) बहोः (**ते**) तव (**इन्द्र**) परमैश्वर्य्ययुक्त (**राधसः**) धनस्य (**विभ्वी**) व्यापिका (**रातिः**) दानम् (**शतक्रतो**) अमितप्रज्ञ (**अधा**) आनन्तर्य्ये। अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मान् (**विश्वचर्षणे**) समस्तद्रष्टव्यदर्शन (**द्युम्ना**) यशसा धनेन वा (**सुक्षत्र**) शोभनं क्षयं द्रव्यं वा यस्य तत्सम्बुद्धौ (**मंहय**) महतः कुरु॥ १॥

अन्वयः-हे विश्वचर्षणे शतक्रतो सुक्षत्रेन्द्र! यस्य त उरो राधसो विभ्वी रातिरस्त्यधा न्यायेन प्रजाः पालयसि स त्वं नोऽस्मान् द्युम्ना मंहय॥ १॥

भावार्थः-यः पूर्णविद्योऽसंख्य**[**धन**]**प्रदः सर्वव्यवहारवित्परमैश्वर्य्यः सुशीलो विनयवान् भवेत् स राजा प्रजाः पालयितुं शक्नुयात्॥ १॥

पदार्थः-हे (**विश्वचर्षणे**) सम्पूर्ण देखने योग्य पदार्थों के देखने वाले (**शतक्रतो**) अनन्त बुद्धि से युक्त और (**सुक्षत्र**) सुन्दर क्षत्र वा द्रव्य वाले (**इन्द्र**) अत्यन्त ऐश्वर्य्य से युक्त! जिन (**ते**) आपके (**उरोः**) बहुत (**राधसः**) धन का (**विभ्वी**) व्याप्त होने वाला (**रातिः**) दान है (**अधा**) इसके अनन्तर न्याय से प्रजाओं का पालन करते हो वह आप (**नः**) हम लोगों को (**द्युम्ना**) यश वा धन से (**मंहय**) बड़े करिये॥ १॥

भावार्थः-जो पूर्णविद्या से युक्त, असंख्य धन देने और सम्पूर्ण व्यवहारों को जाननेवाला, अत्यन्त ऐश्वर्य्य से युक्त उत्तम स्वभाव और नम्रता से युक्त होवे, वह राजा प्रजाओं के पालन करने को समर्थ होवे॥ १॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

यदी॑मिन्द्र श्र॒वाय्य॒मिषं॑ शविष्ठ दधि॒षे।

प॒प्र॒थे दी॑र्घ॒श्रुत्त॑मं॒ हिर॑ण्यवर्ण दु॒ष्टर॑म्॥ २॥

यत्। ई॒म्। इ॒न्द्र॒। श्र॒वाय्य॑म्। इष॑म्। श॒वि॒ष्ठ॒। द॒धि॒षे। प॒प्र॒थे। दी॒र्घ॒श्रुत्ऽत॑मम्। हिर॑ण्यऽवर्ण। दु॒स्तर॑म्॥ २॥

पदार्थः-(यत्) यः **(ईम्)** प्राप्तव्यम् **(इन्द्र)** दुःखविदारक **(श्रवाय्यम्)** श्रोतुं योग्यम् **(इषम्)** अन्नादिकम् **(शविष्ठ)** अतिबल**[**युक्त**]** **(दधिषे)** **(पप्रथे)** प्रथते **(दीर्घश्रुत्तमम्)** यो दीर्घेण कालेन शृणोति सोऽतिशयितस्तम् **(हिरण्यवर्ण)** यो हिरण्यं वृणोति तत्सम्बुद्धौ **(दुष्टरम्)** दुःखेन तरितुं योग्यम्॥ २॥

अन्वयः-हे शविष्ठ हिरण्यवर्णेन्द्र! यद्यः श्रवाय्यं दुष्टरमिषं पप्रथे तमीं दुष्टरं दीर्घश्रुत्तमं त्वं दधिषे॥ २॥

भावार्थः-हे राजन्! यः पूर्णविद्यो धनधान्यपशुप्रजानां वर्धको ब्रह्मचर्येण महावीर्य्योऽस्ति तमेव राजकर्मचारिणं कुरु॥ २॥

पदार्थः-हे **(शविष्ठ)** अतिबलयुक्त और **(हिरण्यवर्ण)** सुवर्ण को स्वीकार करने वाले **(इन्द्र)** दुःख के नाश करनेवाले! **(यत्)** जो **(श्रवाय्यम्)** सुनने के योग्य और **(दुष्टरम्)** दुःख से तरने योग्य **(इषम्)** अन्न आदि को **(पप्रथे)** प्रकट करता है उस **(ईम्)** प्राप्त होने योग्य और दुःख से तरने योग्य **(दीर्घश्रुत्तमम्)** अतिकाल से अधिकतर सुनने वाले को आप **(दधिषे)** धारण करते हो॥ २॥

भावार्थः-हे राजन्! जो पूर्णविद्या से युक्त, धन-धान्य, पशु और प्रजाओं का बढ़ाने और ब्रह्मचर्य्य से बड़ा पराक्रम वाला है, उसी को राजकर्म्मचारी कीजिये॥ २॥

अथ राजप्रजाधर्मविषयमाह॥

अब राजप्रजाधर्मविषय को अगले मन्त्र में कहते हैं॥

शु॒ष्मा॑सो॒ ये ते॑ अद्रिवो मे॒हना॑ के॒त॒सापः॑।

उ॒भा दे॒वाव॒भिष्ट॑ये दि॒वश्च॒ ग्मश्च॑ राजथः॥ ३॥

शु॒ष्मा॑सः। ये। ते॒। अ॒द्रि॒ऽव॒ः। मे॒हना॑। के॒त॒ऽसापः॑। उ॒भा। दे॒वौ। अ॒भिष्ट॑ये। दि॒वः। च॒। ग्मः। च॒। रा॒ज॒थ॒ः॥ ३॥

पदार्थः-(शुष्मासः) अतिबलवन्तः **(ये)** **(ते)** **(अद्रिवः)** अद्रयो मेघा इव शैला वर्त्तन्ते यस्य राज्ये तत्सम्बुद्धौ **(मेहना)** वर्षणेन **(केतसापः)** ये केतेन प्रज्ञया सपन्ति ते **(उभा)** उभौ **(देवौ)** दिव्यगुणकर्मस्वभावौ **(अभिष्टये)** इष्टसिद्धये **(दिवः)** अन्तरिक्षस्य **(च)** **(ग्मः)** पृथिव्याः **(च)** **(राजथः)** प्रकाशेते॥ ३॥

अन्वयः-हे अद्रिवो राजन्! यथोभा सूर्य्याचन्द्रमसौ देवौ दिवश्च ग्मश्च मध्ये राजेते तथा ये शुष्मासः केतसापस्तेऽभिष्टये मेहना प्रजासु सन्ति सा प्रजा त्वं च सततं राजथः॥ ३॥

भावार्थः-यथा सूर्य्याचन्द्रमसौ सर्वं जगत्प्रकाशयतस्तथैव प्रजाराजानौ मिलित्वा सर्वं राजधर्म्मं दीपयेताम्॥ ३॥

पदार्थः-हे **(अद्रिवः)** मेघों के सदृश पर्वत हैं जिसके राज्य में ऐसे राजन्! जैसे **(उभा)** दोनों सूर्य और चन्द्रमा **(देवौ)** उत्तम गुण, कर्म्म और स्वभाव वाले **(दिवः)** अन्तरिक्ष **(च)** और **(गमः)** पृथिवी के **(च)** भी मध्य में प्रकाशित हैं, वैसे **(ये)** जो **(शुष्मासः)** अधिक बलयुक्त **(केतसापः)** बुद्धि से सम्बन्ध रखने वाले जन **(ते)** वे **(अभिष्टये)** इष्टसिद्धि के लिये **(मेहना)** वर्षण से प्रजाओं में हैं, वह प्रजा और आप निरन्तर **(राजथः)** प्रकाशित होते हैं॥३॥

भावार्थः-जैसे सूर्य्य और चन्द्रमा सम्पूर्ण जगत् को प्रकाशित करते हैं, वैसे ही प्रजा और राजा मिल के सम्पूर्ण राजधर्म्म को प्रकाशित करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन्।

अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे॥४॥

उतो इति। नः। अस्य। कस्य। चित्। दक्षस्य। तव। वृत्रऽहन्। अस्मभ्यम्। नृम्णम्। आ। भर। अस्मभ्यम्। नृऽमनस्यसे॥४॥

पदार्थः-(**उतो**) अपि **(नः)** अस्माकम् **(अस्य)** **(कस्य)** **(चित्)** अपि **(दक्षस्य)** **(तव)** **(वृत्रहन्)** यथा सूर्य्यो वृत्रं हन्ति तद्वद्वर्त्तमान **(अस्मभ्यम्)** **(नृम्णम्)** नरो रमन्ते यस्मिँस्तद्धनम् **(आ)** भर **(अस्मभ्यम्)** **(नृमणस्यसे)** आत्मनो नृम्णमिच्छसि॥४॥

अन्वयः-हे वृत्रहन्! तव नोऽस्माकमुतो अस्य कस्यचिद्दक्षस्य नृमणस्यसे स त्वमस्मभ्यं नृम्णमा भरास्मभ्यमभयं देहि॥४॥

भावार्थः-स एव नरोत्तमः स्याद्यो राष्ट्रस्य रक्षणे तत्परो भूत्वा वर्तेत॥४॥

पदार्थः-हे **(वृत्रहन्)** जैसे सूर्य्य मेघ का नाश करता है, उसके सदृश वर्तमान **(तव)** आपका और **(नः)** हम लोगों के **(उतो)** भी **(अस्य)** इसके **(कस्य)** किसके **(चित्)** भी **(दक्षस्य)** बलसम्बन्धी **(नृमणस्यसे)** अपने धन की इच्छा करते हो वह आप **(अस्मभ्यम्)** हम लोगों के लिये **(नृम्णम्)** मनुष्य रमते हैं जिसमें उस धन का **(आ, भर)** धारण कीजिये और **(अस्मभ्यम्)** हम लोगों के लिये अभय दीजिये॥४॥

भावार्थः-वही श्रेष्ठ मनुष्यों में मुख्य हो जो राज्य के रक्षण में तत्पर होकर वर्त्ताव करे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो।

इन्द्र स्याम सुगोपाः शूर स्याम सुगोपाः॥५॥९॥

नु। ते। आभिः। अभिष्टिऽभिः। तव। शर्मन्। शतक्रतो इति शतऽक्रतो। इन्द्र। स्याम। सुऽगोपाः। शूर। स्याम। सुऽगोपाः॥५॥

पदार्थः-(नू) (ते) तव **(आभिः)** वर्त्तमानाभिः **(अभिष्टिभिः)** इष्टेच्छाभिः **(तव) (शर्मन्)** शर्म्मणि गृहे **(शतक्रतो)** अतुलप्रज्ञ **(इन्द्र)** राजन् **(स्याम) (सुगोपाः)** सुष्ठु रक्षकाः **(शूर)** निर्भय **(स्याम) (सुगोपाः)** यथावत्प्रजापालकाः॥५॥

अन्वयः-हे शतक्रतो इन्द्र! त आभिरभिष्टिभिस्तव शर्मन् वयं सुगोपाः स्याम। हे शूर! तव राज्ये स- ामे वा वयं सुगोपा नू स्याम॥५॥

भावार्थः-हे राजन्! वयं सत्यप्रतिज्ञया प्रीत्या च तव गृहस्य शरीरस्य राज्यस्य सेनायाश्च सदैव रक्षका भूत्वा कृतकृत्या भवेमेति॥५॥

अत्रेन्द्रविद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टात्रिंशत्तमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे **(शतक्रतो)** अत्यन्त बुद्धि वाले **(इन्द्र)** राजन्! **(ते)** आपकी **(आभिः)** इन वर्त्तमान **(अभिष्टिभिः)** इष्ट पदार्थों की इच्छाओं से **(तव)** आपके **(शर्मन्)** गृह में हम लोग **(सुगोपाः)** उत्तम प्रकार रक्षा करने वाले **(स्याम)** होवें। और हे **(शूर)** भय से रहित राजन्! आपके राज्य वा संग्राम में हम लोग **(सुगोपाः)** यथावत् प्रजा के पालन करने वाले **(नू)** निश्चय **(स्याम)** होवें॥५॥

भावार्थः-हे राजन्! हम लोग सत्य प्रतिज्ञा और प्रीति से आपके गृह, शरीर, राज्य और सेना के सदा ही रक्षक होके कृतकृत्य होवें॥५॥

इस सूक्त में इन्द्र, विद्वान्, राजा और प्रजा के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अड़तीसवां सूक्त और नववां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकोनचत्वारिंशत्तमस्य सूक्तस्याऽत्रिर्ऋषिः। इन्द्रो देवता। १ विराडनुष्टुप्। २, ३ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ४ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ५ बृहती छन्दः। मध्यमः स्वरः॥

अथेन्द्रगुणानाह॥

अब पांच ऋचा वाले उनचालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्र के गुणों को कहते हैं॥

यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः।

राधस्तन्नो विदद्वस उभयाहस्त्या भर॥ १॥

यत्। इन्द्र। चित्र। मेहना। अस्ति। त्वाऽदातम्। अद्रिऽवः। राधः। तत्। नः। विदद्वसो इति विदत्ऽवसो। उभयाहस्ति। आ। भर॥ १॥

पदार्थः-(**यत्**) (**इन्द्र**) विद्यैश्वर्य्ययुक्त (**चित्र**) अद्भुतगुणकर्मस्वभाव (**मेहना**) वृष्टिः (**अस्ति**) (**त्वादातम्**) त्वया शोधितम् (**अद्रिवः**) सूर्य्य इव विद्याप्रकाशक (**राधः**) द्रव्यम् (**तत्**) (**नः**) अस्मभ्यम् (**विदद्वसो**) लब्धधन (**उभयाहस्ति**) उभये हस्ता प्रवर्त्तन्ते यस्मिँस्तत् (**आ, भर**)॥१॥

अन्वयः-हे अद्रिवो विदद्वसो चित्रेन्द्र! यत्त्वादातं राधो मेहनेवास्ति तदुभयाहस्ति न आ भर॥१॥

भावार्थः-स एव राजा धनाढ्यो वा सुकृती स्याद्यो वृष्टिवदन्येषां कामान् वर्षेत्॥१॥

पदार्थः-हे (**अद्रिवः**) सूर्य के सदृश विद्या के प्रकाश करने वाले (**विदद्वसो**) धन को प्राप्त हुए (**चित्र**) अद्भुत गुण, कर्म्म और स्वभाव वाले (**इन्द्र**) विद्या और ऐश्वर्य्य से युक्त! (**यत्**) जो (**त्वादातम्**) आपसे शुद्ध किया (**राधः**) द्रव्य (**मेहना**) वृष्टि के सदृश (**अस्ति**) है (**तत्**) उस (**उभयाहस्ति**) उभयाहस्ति अर्थात् दो प्रकार के हाथ प्रवृत्त होते हैं जिसमें ऐसे को (**नः**) हम लोगों के लिये (**आ, भर**) सब प्रकार धारण कीजिये॥१॥

भावार्थः-वही राजा धन से युक्त वा कुशली होवे, जो वृष्टि के सदृश अन्यों के मनोरथों को वर्षावे॥१॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर।

विद्याम तस्य ते वयमकूपारस्य दावने॥ २॥

यत्। मन्यसे। वरेण्यम्। इन्द्र। द्युक्षम्। तत्। आ। भर। विद्याम। तस्य। ते। वयम्। अकूपारस्य। दावने॥ २॥

पदार्थः-(यत्) (मन्यसे) (वरेण्यम्) वरितुमर्हम् **(इन्द्र)** परमैश्वर्य्ययुक्त **(द्युक्षम्)** धर्मविद्याप्रकाशयुक्तम् **(तत्) (आ) (भर) (विद्याम)** जानीयाम **(तस्य) (ते) (वयम्) (अकूपारस्य)** अकुत्सितः पारो यस्य तस्य **(दावने)** दात्रे॥२॥

अन्वयः-हे इन्द्र! त्वं यद्वरेण्यं द्युक्षं मन्यसे तदस्मभ्यमा भर यतोऽकूपारस्य तस्य ते दावने वयं प्रयत्नं विद्याम॥२॥

भावार्थः-हे विद्वंस्त्वं यद्यदुत्तमं जानासि तदस्मान् प्रत्युपदिश येन वयं तव राजकार्य्यमलंकर्त्तुं शक्नुयाम॥२॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त! आप **(यत्)** जिस **(वरेण्यम्)** स्वीकार करने योग्य **(द्युक्षम्)** धर्म्म और विद्या के प्रकाश से युक्त को **(मन्यसे)** मानते हो **(तत्)** उसको हम लोगों के लिये **(आ, भर)** धारण कीजिये जिससे **(अकूपारस्य)** श्रेष्ठ है पार जिनका **(तस्य)** उन **(ते)** आपके **(दावने)** दाता के लिये **(वयम्)** हम लोग प्रयत्न को **(विद्याम)** जानें॥२॥

भावार्थः-हे विद्वन्! आप जिस-जिस उत्तम विषय को जानते हैं, उसका हम लोगों के प्रति उपदेश कीजिये, जिससे हम लोग आपके राजकार्य्य को पूर्णरूप से करने को समर्थ होवें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यत्ते॑ दि॒त्सु प्र॒राध्यं॒ मनो॒ अस्ति॑ श्रु॒तं बृ॒हत्।
तेन॑ दृ॒ळ्हा चि॑दद्रिव॒ आ वाज॑ं॑ दर्षि सा॒तये॑॥३॥

यत्। ते॒। दि॒त्सु। प्र॒ऽराध्य॑म्। मन॑ः। अस्ति॑। श्रु॒तम्। बृ॒हत्। तेन॑। दृ॒ळ्हा। चि॒त्। अ॒द्रि॒ऽव॒ः। आ। वाज॑म्। द॒र्षि॒। सा॒तये॑॥३॥

पदार्थः-(यत्) (ते) तव **(दित्सु)** दातुमिच्छु **(प्रराध्यम्)** प्रकर्षेण साद्धुं योग्यम् **(मनः)** चित्तम् **(अस्ति) (श्रुतम्) (बृहत्)** महत् **(तेन) (दृळ्हा)** दृढानि **(चित्) (अद्रिवः)** सुशोभितशैलयुक्त **(आ) (वाजम्)** स- ामम् **(दर्षि)** विदृणासि **(सातये)** धर्म्माधर्म्मविभागाय॥३॥

अन्वयः-हे अद्रिवो विद्वंस्ते यद्दित्सु प्रराध्यं श्रुतं बृहन्मनोऽस्ति तेन चित्त्वं दृळ्हा रक्षसि सातये वाजमा दर्षि॥३॥

भावार्थः-यतो मनुष्यो ब्रह्मचर्य्यविद्यायोगाभ्याससत्यभाषणाद्याचरणेन सर्वविद्यायुक्तं मनः सम्पाद्य धर्मेण सार्वजनिकहिताय दुष्टान् दण्डयति तस्मात् सोऽत्युत्तमोऽस्ति॥३॥

पदार्थः-हे **(अद्रिवः)** उत्तम प्रकार शोभित पर्वत से युक्त विद्वन्! **(ते)** आपके **(यत्)** जो **(दित्सु)** देने की इच्छा करने वाला **(प्रराध्यम्)** अत्यन्त साधने योग्य **(श्रुतम्)** श्रवण और **(बृहत्)** बड़ा **(मनः)**

चित्त **(अस्ति)** है **(तेन)** इससे **(चित्)** भी आप **(दृळ्हा)** दृढ़ वस्तुओं की रक्षा करते हो और **(सातये)** धर्म और अधर्म के **[**विभाग के**]** लिये **(वाजम्)** संग्राम का **(आ, दर्षि)** भङ्ग करते हो॥३॥

भावार्थः-जिससे मनुष्य ब्रह्मचर्य्य, विद्या, योगाभ्यास और सत्यभाषण आदि के आचरण से सम्पूर्ण विद्याओं से युक्त मन को सिद्ध कर धर्म से सम्पूर्ण जनों के हित के लिये दुष्टों को दण्ड देता है, इससे वह अति उत्तम है॥३॥

अथ राजप्रजाविषयमाह॥

अब राजप्रजाविषय को कहते हैं॥

मंहि॑ष्ठं वो म॒घोना॑ं॒ राजा॑नं चर्षणी॒नाम्।

इन्द्र॒मुप॒ प्रश॑स्तये पू॒र्वीभि॑र्जुजुषे॒ गिर॑:॥४॥

मंहि॑ष्ठम्। व॒:। म॒घोना॑म्। राजा॑नम्। च॒र्ष॒णी॒नाम्। इन्द्र॑म्। उप॑। प्रऽश॑स्तये। पू॒र्वीभि॑:। जु॒जु॒षे॒। गिर॑:॥४॥

पदार्थः-**(मंहिष्ठम्)** अतिशयेन महान्तम् **(वः)** युष्माकम् **(मघोनाम्)** बह्वैश्वैर्य्ययुक्तानाम् **(राजानम्)** **(चर्षणीनाम्)** मनुष्याणाम् **(इन्द्रम्)** परमैश्वर्य्यपदम् **(उप)** **(प्रशस्तये)** प्रशंसायै **(पूर्वीभिः)** प्राचीनाभिः प्रजाभिः सह **(जुजुषे)** सेवसे प्रीणासि वा **(गिरः)** वाणीः॥४॥

अन्वयः-हे मनुष्या! यं वो मघोनां चर्षणीनां मंहिष्ठमिन्द्रं राजानं प्रशस्तये पूर्वीभिः सनातनीभिः सह गिर उप जुजुषे ते स च सर्वत्र सुखिनो जायन्ते॥४॥

भावार्थः-हे मनुष्या! ये राजानो याः प्रजाश्च परस्परमानुकूल्ये वर्त्तन्ते ते सदैवाऽऽनन्दिता भवन्ति॥४॥

पदार्थः-हे मनुष्यो! जिस **(वः)** आप लोगों और **(मघोनाम्)** बहुत ऐश्वर्य्यों से युक्त **(चर्षणीनाम्)** मनुष्यों के **(मंहिष्ठम्)** अत्यन्त बड़े और **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य के देने वाले **(राजानम्)** राजा को **(प्रशस्तये)** प्रशंसा के लिये **(पूर्वीभिः)** प्राचीन प्रजाओं के साथ **(गिरः)** वाणियों को **(उप, जुजुषे)** समीप से सेवते वा प्रसन्नता करते हो, वे और वह सर्वत्र सुखी होते हैं॥४॥

भावार्थः-हे मनुष्यो! जो राजा और जो प्रजाजन परस्पर अनुकूलता अर्थात् प्रीतिपूर्वक वर्त्ताव रखते, वे सदा आनन्दित होते हैं॥४॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

अस्मा॒ इत्काव्यं॒ वच॑ उ॒क्थमिन्द्रा॑य॒ शंस्य॑म्।

तस्मा॑ उ॒ ब्रह्म॑वाहसे॒ गिरो॑ वर्धन्त्यत्र॒यो॒ गिर॑: शुम्भ॒न्त्यत्र॑यः॥५॥१०॥

अस्मै॑। इत्। काव्य॑म्। वच॑:। उ॒क्थम्। इन्द्रा॑य। शंस्य॑म्। तस्मै॑। ऊँ॒ इति॑। ब्रह्म॑ऽवाहसे। गिर॑:। व॒र्ध॒न्ति॒। अत्र॑यः। गिर॑:। शु॒म्भ॒न्ति॒। अत्र॑यः॥५॥

पदार्थः-(अस्मै) (इत्) (काव्यम्) कविभिः कमनीयम् **(वचः) (उक्थम्)** प्रशंसितम् **(इन्द्राय)** परमैश्वर्य्याय **(शंस्यम्)** स्तोतुं योग्यम् **(तस्मै) (उ) (ब्रह्मवाहसे)** यो ब्रह्माणि धनानि वहति प्राप्नोति सः **(गिरः) (वर्धन्ति)** वर्धन्ते। अत्र व्यत्ययेन परस्मैपदम्। **(अत्रयः)** अविद्यमानत्रिविधदुःखाः **(गिरः)** वाण्यः **(शुम्भन्ति)** शुभाचरणयन्ति **(अत्रयः)** अविद्यमानत्रिविधगुणानां दोषा येषु॥५॥

अन्वयः-हे मनुष्या! य इन्द्राय काव्यमुक्थं शंस्यं वचः प्रयुङ्क्ते अस्मा इत्तस्मै ब्रह्मवाहसे जनायाऽत्रयो गिरो वर्धन्त्यु अत्रयो गिरः शुम्भन्ति॥५॥

भावार्थः-हे मनुष्या! ये विद्वांसो गिरः शोधयन्ति ते कवित्वमैश्वर्य्यं च प्राप्नुवन्तीति॥५॥

अत्रेन्द्रराजप्रजाविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनचत्वारिंशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(इन्द्राय)** अत्यन्त ऐश्वर्य्य के लिये **(काव्यम्)** कवियों विद्वानों से कामना करने योग्य **(उक्थम्)** प्रशंसित **(शंस्यम्)** स्तुति करने योग्य **(वचः)** वचन का प्रयोग करता है **(अस्मै)** इसके लिये **(इत्)** और **(तस्मै)** उस **(ब्रह्मवाहसे)** धनों को प्राप्त होने वाले जन के लिये **(अत्रयः)** नहीं है तीन प्रकार के दुःख जिनमें वे **(गिरः)** वाणियां **(वर्धन्ति)** बढ़ती हैं **(उ)** और **(अत्रयः)** नहीं हैं तीन प्रकार के गुणों के दोष जिनमें व **(गिरः)** वाणियां **(शुम्भन्ति)** उत्तम आचरण कराती हैं॥५॥

भावार्थः-हे मनुष्यो! जो विद्वान् जन वाणियों को विद्याभ्यास से शुद्ध करते हैं, वे कवित्व और ऐश्वर्य्य को प्राप्त होते हैं॥५॥

इस सूक्त में इन्द्र, राजा, प्रजा और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह उनचालीसवां सूक्त और दशम वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य चत्वारिंशत्तमस्य सूक्तस्याऽत्रिर्ऋषिः। १-४ इन्द्रः। ५ सूर्य्यः। ६-९ अत्रिर्देवता। १ निचृदुष्णिक्। २, ३ उष्णिक्। ५, ९ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। ४ त्रिष्टुप्। ६, ८ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रगुणानाह॥

अब नव ऋचा वाले चालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इन्द्र के गुणों को कहते हैं॥

आ या॒ह्यद्रि॑भिः सु॒तं सोम॑ꣳ सोमपते पिब।

वृष॑न्निन्द्र॒ वृष॑भिर्वृत्रहन्तम॥ १॥

आ। या॒हि॒। अद्रि॑ऽभिः। सु॒तम्। सोम॑म्। सो॒म॒ऽप॒ते॒। पि॒ब॒। वृष॑न्। इ॒न्द्र॒। वृष॑ऽभिः। वृ॒त्र॒ह॒न्ऽत॒म॒॥ १॥

पदार्थः-(आ) (याहि) आगच्छ **(अद्रिभिः)** मेघैः **(सुतम्)** निष्पन्नम् **(सोमम्)** सोमलतादिरसम् **(सोमपते)** ऐश्वर्य्यपालक **(पिब) (वृषन्)** वृष इवाचरन् **(इन्द्र)** ऐश्वर्य्यमिच्छुक **(वृषभिः)** बलिष्ठैस्सह **(वृत्रहन्तम)** यो वृत्रं धनं हन्ति प्राप्नोति सोऽतिशयितस्तत्सम्बुद्धौ॥ १॥

अन्वयः-हे सोमपते वृषन् वृत्रहन्तमेन्द्र! वृषभिस्सहितस्त्वमद्रिभिः सुतं सोमं पिब स- ाममा याहि॥ १॥

भावार्थः-य ऐश्वर्यमिच्छेयुस्तेऽवश्यं बलबुद्धिं वर्धयेयुः॥ १॥

पदार्थः-हे **(सोमपते)** ऐश्वर्य्य के स्वामिन् **(वृषन्)** बैल के सदृश आचरण करते हुए **(वृत्रहन्तम)** अत्यन्त धन को प्राप्त होने और **(इन्द्र)** ऐश्वर्य की इच्छा करने वाले जन! **(वृषभिः)** बलिष्ठों के साथ आप **(अद्रिभिः)** मेघों से **(सुतम्)** उत्पन्न हुए **(सोमम्)** सोमलता आदि ओषधियों के रस को **(पिब)** पान करिये और स- ाम को **(आ, याहि)** प्राप्त हूजिये॥ १॥

भावार्थः-जो ऐश्वर्य्य की इच्छा करें, वे अवश्य बल और बुद्धि की वृद्धि करें॥ १॥

अथ मेघविषयमाह॥

अब मेघविषय को कहते हैं॥

वृषा॒ ग्रावा॒ वृषा॒ मदो॒ वृषा॒ सोमो॑ अ॒यं सु॒तः।

वृष॑न्निन्द्र॒ वृष॑भिर्वृत्रहन्तम॥ २॥

वृषा॑। ग्रावा॑। वृषा॑। मदः॑। वृषा॑। सोमः॑। अ॒यम्। सु॒तः। वृष॑न्। इ॒न्द्र॒। वृष॑ऽभिः। वृ॒त्र॒ह॒न्ऽत॒म॒॥ २॥

पदार्थः-(वृषा) वृष्टिकरः **(ग्रावा)** मेघः **(वृषा)** आनन्दकरः **(मदः)** हर्षः **(वृषा)** सुखवर्षकः **(सोमः)** ओषधिगणः **(अयम्) (सुतः)** निष्पादितः **(वृषन्)** बलमिच्छन् **(इन्द्र)** दुःखविदारक **(वृषभिः)** मेघादिभिः **(वृत्रहन्तम)** अतिशयेन शत्रुविनाशक॥ २॥

अन्वयः-हे वृषन् वृत्रहन्तमेन्द्र! योऽयं वृषा वृषा ग्रावा मदो वृषा सोमः सुतोऽस्ति तैर्वृषभिः कार्य्याणि

साध्नुहि॥२॥

भावार्थः-ये मेघादयः पदार्थाः सन्ति तैर्मनुष्या बहूनि कार्य्याणि साद्धुं शक्नुवन्ति॥२॥

पदार्थः-(**वृषन्**) बल की इच्छा करते हुए (**वृत्रहन्तम**) अतिशय करके शत्रुओं के और (**इन्द्र**) दुःखों के नाश करने वाले जन! जो (**अयम्**) यह (**वृषा**) आनन्द को उत्पन्न करने और (**वृषा**) वृष्टि करने वाला (**ग्रावा**) मेघ और (**मदः**) आनन्द तथा (**वृषा**) सुख का वर्षाने वाला (**सोमः**) ओषधियों का समूह (**सुतः**) उत्पन्न किया गया है उन (**वृषभिः**) मेघादिकों से कार्य्यों को सिद्ध कीजिये॥२॥

भावार्थः-जो मेघ आदि पदार्थ हैं, उनसे मनुष्य बहुत कार्य्यों को सिद्ध कर सकते हैं॥२॥

पुनरिन्द्रपदवाच्यराजविषयमाह॥

फिर इन्द्रपदवाच्य राजा के गुणों को कहते हैं॥

वृषा॑ त्वा॒ वृष॑णं हुवे॒ वज्रि॑ञ्चि॒त्राभि॑रू॒तिभि॑:।

वृष॑न्निन्द्र॒ वृष॑भिर्वृत्रहन्तम॥

वृषा॑। त्वा॒। वृष॑णम्। हु॒वे॒। वज्रि॑न्। चि॒त्राभि॑:। ऊ॒तिऽभि॑:। वृष॑न्। इ॒न्द्र॒। वृष॑ऽभिः। वृ॒त्र॒ह॒न्ऽत॒म॒॥३॥

पदार्थः-(**वृषा**) वृष्टिकरः (**त्वा**) त्वाम् (**वृषणम्**) बलिष्ठम् (**हुवे**) (**वज्रिन्**) बहुशस्त्रास्त्रायुक्त (**चित्राभिः**) अद्भुताभिः (**ऊतिभिः**) रक्षादिभिः क्रियाभिः (**वृषन्**) सुखकर (**इन्द्र**) ऐश्वर्य्यमिच्छुक (**वृषभिः**) दुष्टशक्तिबन्धकैः (**वृत्रहन्तम**) अतिशयेन दुष्टविनाशक॥३॥

अन्वयः-हे वृषन् वज्रिन् वृत्रहन्तमेन्द्र! वृषाहं चित्राभिरूतिभिर्वृषभिश्च सह वर्त्तमानं वृषणं त्वा हुवे॥३॥

भावार्थः-मनुष्यैः सूर्य्यवद्वर्त्तमानः सर्वथा गुणसम्पन्नो बलिष्ठो न्यायकारी राजा स्वीकार्यो येन सर्वथा रक्षा स्यात्॥३॥

पदार्थः-हे (**वृषन्**) सुख करने वाले (**वज्रिन्**) बहुत शस्त्र और अस्त्रों से युक्त (**वृत्रहन्तम**) अत्यन्त दुष्टों के नाश करने वाले (**इन्द्र**) ऐश्वर्य्य की इच्छा करनेवाले! (**वृषा**) वृष्टि करने वाला मैं (**चित्राभिः**) अद्भुत (**ऊतिभिः**) रक्षादि क्रियाओं और (**वृषभिः**) दुष्टों के सामर्थ्य को बांधने वालों के साथ वर्त्तमान (**वृषणम्**) बलिष्ठ (**त्वा**) आप को (**हुवे**) बुलाता हूं॥३॥

भावार्थः-मनुष्यों को चाहिये कि सूर्य्य के सदृश वर्त्तमान और सब प्रकार गुणों से सम्पन्न बलिष्ठ, न्यायकारी राजा को स्वीकार करें, जिससे सब प्रकार से रक्षा होवे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ऋ॒जी॒षी व॒ज्री वृ॑ष॒भस्तु॑रा॒षाट्छु॒ष्मी राजा॑ वृत्र॒हा सो॑म॒पावा॑।

यु॒क्त्वा हरि॑भ्या॒मुप॑ यासदु॒र्वाङ्माध्यं॑दिने॒ सव॑ने मत्स॒दिन्द्र॑:॥४॥

ऋ॒जी॒षी। व॒ज्री। वृ॒ष॒भः। तु॒रा॒षाट्। शु॒ष्मी। राजा॑। वृ॒त्र॒ऽहा। सो॒म॒ऽपावा॑। यु॒क्त्वा। हरि॑ऽभ्याम्। उप॑। या॒स॒त्। अ॒र्वाङ्। माध्य॑न्दिने। सव॑ने। म॒त्स॒त्। इन्द्रः॑॥४॥

पदार्थः-(ऋजीषी) सरलादियुक्तः **(वज्री)** शस्त्रास्त्राभृत् **(वृषभः)** बलिष्ठः **(तुराषाट्)** तुरान् हिंसकान् शत्रून् सहते **(शुष्मी)** शुष्मं बलिष्ठं सैन्यं विद्यते यस्य सः **(राजा)** विद्याविनयाभ्यां प्रकाशमानः **(वृत्रहा)** दुष्टशत्रुहन्ता **(सोमपावा)** श्रेष्ठौषधिरसस्य पाता **(युक्त्वा) (हरिभ्याम्)** अश्वाभ्याम् **(उप) (यासत्)** उपागच्छेत् **(अर्वाङ्)** पश्चात् **(माध्यन्दिने)** मध्याह्ने **(सवने)** भोजनसमये **(मत्सत्)** आनन्देत् **(इन्द्रः)** परमैश्वर्य्यकर्त्ता॥४॥

अन्वयः-हे मनुष्या! य ऋजीषी वज्री वृषभः शुष्मी तुराषाट् सोमपावा वृत्रहेन्द्रो राजा हरिभ्यां यानं युक्त्वाऽर्वाङुप यासन्माध्यन्दिने सवने मत्सत्तमेवाऽधिष्ठातारं कुर्वन्तु॥४॥

भावार्थः-स एव राजा प्रशस्तः स्याद्यो राज्याङ्गानि विद्याश्च गृहीत्वा प्रजापालनाय प्रयतेत॥४॥

पदार्थः-हे मनुष्यो! जो **(ऋजीषी)** सरल आदि से युक्त **(वज्री)** शस्त्र और अस्त्रों का धारण करने वाला **(वृषभः)** बलिष्ठ **(शुष्मी)** बलिष्ठ सेना से युक्त **(तुराषाट्)** हिंसा करने वाले शत्रुओं को सहने **(सोमपावा)** श्रेष्ठ ओषधियों के रस को पीने **(वृत्रहा)** दुष्ट शत्रुओं के नाश करने और **(इन्द्रः)** अत्यन्त ऐश्वर्य्य का करने वाला **(राजा)** विद्या और विनय से प्रकाशमान **(हरिभ्याम्)** घोड़ों से वाहन को **(युक्त्वा)** युक्त करके **(अर्वाङ्)** पीछे **(उप, यासत्)** समीप प्राप्त होवे और **(माध्यन्दिने)** मध्याह्न में **(सवने)** भोजन के समय **(मत्सत्)** आनन्दित होवे, उसी को अधिष्ठाता करो॥४॥

भावार्थः-वही राजा प्रशंसित होवे जो राज्य के अङ्गों और विद्याओं को ग्रहण करके प्रजापालन के लिये प्रयत्न करे॥४॥

अथ सूर्य्यविषयमाह॥

अब सूर्य्यविषय को कहते हैं॥

यत्त्वा॑ सूर्य॒ स्व॑र्भानु॒स्तम॒साऽवि॑ध्यदासु॒रः।

अक्षे॑त्रवि॒द्यथा॑ मु॒ग्धो भुव॑नान्यदीधयुः॥५॥११॥

यत्। त्वा॒। सूर्य॑। स्वः॑ऽभानुः। तम॑सा। अवि॑ध्यत्। आ॒सु॒रः। अक्षे॑त्रऽवित्। यथा॑। मु॒ग्धः। भुव॑नानि। अ॒दी॒ध॒युः॥५॥

पदार्थः-(यत्) यः **(त्वा)** त्वाम् **(सूर्य्य)** सूर्य्य इव वर्त्तमान **(स्वर्भानुः)** यः स्वरादित्यं भाति स विद्युद्रूपः **(तमसा)** रात्र्यन्धकारेण **(अविध्यत्)** युक्तो भवति **(आसुरः)** अनुद्भूतरूपः **(अक्षेत्रवित्)** यः क्षेत्रं रेखागणितं न वेत्ति **(यथा) (मुग्धः)** मूढः **(भुवनानि)** लोकान् **(अदीधयुः)** दृश्यन्ते। अत्र व्यत्ययेन परस्मैपदम्॥५॥

अन्वयः-हे सूर्य्य! यथाऽक्षेत्रविन्मुग्धः किमपि कर्त्तुं न शक्नोति तथा यद्यः स्वर्भानुरासुरस्तमसाविध्यद्

येन सूर्य्येण भुवनान्यदीधयुस्तं विदन्तं त्वा वयमाश्रयेम॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा विद्युद् गुप्ता सत्यन्धकारे न प्रकाशते तथैवाऽविदुषो मूढस्यात्मा न प्रदीप्यते यथा सूर्य्यप्रकाशेन सर्वे लोकाः प्रकाश्यन्ते तथैव विदुष आत्मा सर्वान्त्सत्याऽसत्यव्यवहारान् प्रकाशयति॥५॥

पदार्थः-हे **(सूर्य्य)** सूर्य्य के सदृश वर्तमान! **(यथा)** जैसे **(अक्षेत्रवित्)** क्षेत्र अर्थात् रेखागणित को नहीं जानने वाला **(मुग्धः)** मूर्ख कुछ भी नहीं कर सकता है, वैसे **(यत्)** जो **(स्वर्भानुः)** सूर्य्य से प्रकाशित होने वाला बिजुलीरूप **(आसुरः)** जिसका प्रकट रूप नहीं वह **(तमसा)** रात्रि के अन्धकार से **(अविध्यत्)** युक्त होता है, जिस सूर्य्य से **(भुवनानि)** लोक **(अदीधयुः)** देखे जाते हैं, उसके जानने वाले **(त्वा)** आपका हम लोग आश्रयण करें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे बिजुली गुप्त हुई अन्धकार में नहीं प्रकाशित होती है, वैसे ही विद्यारहित मूर्खजन का आत्मा नहीं प्रकाशित होता है और जैसे सूर्य्य के प्रकाश से सम्पूर्ण लोक प्रकाशित होते हैं, वैसे ही विद्वान् का आत्मा सम्पूर्ण सत्य और असत्य व्यवहारों को प्रकाशित करता है॥५॥

पुनः सूर्यविषयमाह॥

फिर सूर्य्यविषय को अगले मन्त्र में कहते हैं॥

स्व॑र्भानो॒रध॒ यदि॑न्द्र मा॒या अ॒वो दि॒वो वर्त॑माना अ॒वाह॑न्।
गू॒ळ्हं सूर्य॒ तम॒सापव्र॑तेन तु॒रीये॑ण॒ ब्रह्म॑णाविन्दद॒त्रिः॥ ६॥

स्व॑ः॑ऽभानोः। अध॑। यत्। इ॒न्द्र॒। मा॒याः। अ॒वः। दि॒वः। वर्त॑मानाः। अ॒व॒ऽअह॑न्। गू॒ळ्हम्। सूर्य॑म्। तम॑सा। अप॑ऽव्रतेन। तु॒रीये॑ण। ब्रह्म॑णा। अ॒वि॒न्द॒त्। अत्रिः॥ ६॥

पदार्थः-**(स्वर्भानोः)** आदित्यप्रकाशस्य **(अध)** आनन्तर्य्ये **(यत्)** याः **(इन्द्र)** विद्वन् **(मायाः)** प्रज्ञाः **(अवः)** अधस्थात् **(दिवः)** प्रकाशमानाः **(वर्त्तमानाः)** **(अवाहन्)** वहन्ति **(गूळ्हम्)** गुप्तं विद्युदाख्यम् **(सूर्य्यम्)** सवितुः सवितारम् **(तमसा)** अन्धकारेण **(अपव्रतेन)** अन्यथा वर्त्तमानेन **(तुरीयेण)** चतुर्थेन **(ब्रह्मणा)** धनेन **(अविन्दत्)** लभते **(अत्रिः)** सततं गामी॥६॥

अन्वयः-हे इन्द्र! यद्या स्वर्भानोर्दिवो वर्त्तमाना माया अपव्रतेन तमसा तुरीयेण ब्रह्मणा गूळ्हं सूर्य्यमवोऽवाहन्नधात्रिरविन्दत् तास्त्वं विजानीहि॥६॥

भावार्थः-यथा गुप्ता विद्युदीप्तयो महत्कार्य्यं साध्नुवन्ति तथैव विदुषां प्रज्ञाः सर्वाणि प्रज्ञानकृत्यानि साध्नुवन्ति॥६॥

पदार्थः-हे **(इन्द्र)** विद्वन्! **(यत्)** जो **(स्वर्भानोः)** सूर्य्य के प्रकाशक के सम्बन्ध में **(दिवः)** प्रकाशमान **(वर्त्तमानाः)** स्थित **(मायाः)** बुद्धियां **(अपव्रतेन)** अन्यथा वर्त्तमान **(तमसा)** अन्धकार से और

(तुरीयेण) चौथे **(ब्रह्मणा)** धन से **(गूळहम्)** गुप्त बिजलीनामक **(सूर्यम्)** सूर्य के उत्पन्न करने वाले को **(अवः)** नीचे **(अवाहन्)** प्राप्त करती हैं **(अध)** इसके अनन्तर **(अत्रिः)** निरन्तर चलने वाला **(अविन्दत्)** प्राप्त होता है, उनको आप जानिये॥६॥

भावार्थः-जैसे गुप्त बिजुली के प्रकाश बड़े कार्य को सिद्ध करते हैं, वैसे ही विद्वानों की बुद्धियां सम्पूर्ण विज्ञान कार्य्यों को सिद्ध करती हैं॥६॥

अथोक्तविषये राजविषयमाह॥

अब उक्तविषय में राजविषय को कहते हैं॥

मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत्।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा॥७॥

मा। माम्। इमम्। तव। सन्तम्। अत्रे। इरस्या। द्रुग्धः। भियसा। नि। गारीत्। त्वम्। मित्रः। असि। सत्यऽराधाः। तौ। मा। इह। अवतम्। वरुणः। च। राजा॥७॥

पदार्थः-**(मा)** निषेधे **(माम्)** **(इमम्)** **(तव)** **(सन्तम्)** **(अत्रे)** अविद्यमानत्रिविधदुःख **(इरस्या)** अन्नेच्छया **(द्रुग्धः)** प्राप्तद्रोहः **(भियसा)** भयेन **(नि)** **(गारीत्)** निगलेत् **(त्वम्)** **(मित्रः)** सखा **(असि)** **(सत्यराधाः)** सत्याचरणेन सत्यं वा राधो धनं यस्य **(तौ)** **(मा)** माम् **(इह)** **(अवतम्)** रक्षतम् **(वरुणः)** वरः सेनेशः **(च)** **(राजा)** सर्वाधिष्ठाता॥७॥

अन्वयः-हे अत्रे! इरस्या भियसा द्रुग्ध इमन्तवाश्रितं सन्तं मां मा नि गारीद्यस्त्वं मित्रः सत्यराधा असि स त्वं राजा वरुणश्च तावह मावतम्॥७॥

भावार्थः-हे धर्मिष्ठौ राजसेनाध्यक्षावन्यायेन कस्यापि पदार्थं मा गृह्णीयातां भयन्यायप्रचालनाभ्यां राजधर्म्मान्मा चलेतां सदैव सत्यधर्मप्रियौ सन्तौ मित्रवत्प्रजाः पालयेताम्॥७॥

पदार्थः-हे **(अत्रे)** तीन प्रकार के दुःखों से रहित! **(इरस्या)** अन्न की इच्छा से तथा **(भियसा)** भय से **(द्रुग्धः)** द्रोह को प्राप्त **(इमम्)** इसको और **(तव)** आपके आश्रित **(सन्तम्)** हुए **(माम्)** मुझ को **(मा)** नहीं **(नि, गारीत्)** निगलिये और जो **(त्वम्)** आप **(मित्रः)** मित्र **(सत्यराधाः)** सत्य आचरण से वा सत्यधन जिनका ऐसे **(असि)** हो वह आप राजा सब के अधिष्ठाता और **(वरुणः)** श्रेष्ठ सेना का ईश **(च)** भी **(तौ)** वे दोनों **(इह)** इस संसार में **(मा)** मेरी **(अवतम्)** रक्षा करो॥७॥

भावार्थः-हे धर्मिष्ठ राजा और सेना के स्वामी! अन्याय से किसी के पदार्थ को भी न ग्रहण करें, भय और न्याय के अच्छे प्रकार चलाने से राजधर्म से पृथक् न होवें और सदा ही सत्य धर्म में प्रिय हुए मित्र के सदृश प्रजाओं का पालन करो॥७॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

ग्राव्णो॑ ब्र॒ह्मा यु॑युजा॒नः स॑प॒र्यन् की॒रिणा॑ दे॒वान्नम॑सोप॒शिक्ष॑न्।

अत्रि॒: सूर्य॑स्य दि॒वि चक्षु॒राधा॒त्स्वर्भा॑नो॒रप॑ मा॒या अ॑घुक्षत्॥ ८॥

ग्राव्ण॑:। ब्र॒ह्मा। यु॒यु॒जा॒नः। स॒प॒र्यन्। की॒रिणा॑। दे॒वान्। नम॑सा। उ॒प॒ऽशिक्ष॑न्। अत्रि॑:। सूर्य॑स्य। दि॒वि। चक्षु॑:। आ। अ॒धा॒त्। स्व॑:ऽभानो:। अप॑। मा॒या:। अ॒घु॒क्ष॒त्॥ ८॥

पदार्थ:-(ग्राव्ण:) मेघात् **(ब्रह्मा)** चतुर्वेदवित् **(युयुजान:)** **(सपर्यन्)** सेवमानः **(कीरिणा)** सकलविद्यास्तावकेन। **कीरिरिति स्तोतृनामसु पठितम्।** (निघं०३.१६) **(देवान्)** विदुषः **(नमसा)** सत्कारेणान्नादिना वा **(उपशिक्षन्)** उपगतां विद्यां ग्राहयन् **(अत्रि:)** सकलविद्याव्यापकः **(सूर्यस्य)** **(दिवि)** प्रकाशे **(चक्षु:)** **(आ, अधात्)** आदध्यात् **(स्वर्भानो:)** स्वरादित्यस्य भानुर्दीप्तिर्यस्य तस्य **(अप)** **(माया:)** प्रज्ञाः **(अघुक्षत्)** अपशब्दयेत्॥ ८॥

अन्वय:-हे मनुष्या! यो ब्रह्मा कीरिणा युयुजानो नमसा देवान् सपर्यन् विद्यार्थिन उपशिक्षन्नत्रिः सन् स्वर्भानोर्ग्राव्णः सूर्यस्य दिवि चक्षुराधात् स मायाः प्राप्नुयादविद्या अपाघुक्षत्॥ ८॥

भावार्थ:-हे मनुष्या! यो विद्वत्सेवी योगी विद्याप्रचारप्रियो विद्वान् भवेत्स यथा विद्युत्सूर्यमेघसम्बन्धेन सृष्टेः पालनं दुःखनिवारणं च भवति तथैवाऽध्यापकाध्येतृसम्बन्धेन विद्यारक्षणमविद्यानिवारणं च करोति॥ ८॥

पदार्थ:-हे मनुष्यो! **(ब्रह्मा)** चारों वेदों का जानने वाला **(कीरिणा)** सम्पूर्ण विद्याओं की स्तुति करने वाले से **(युयुजान:)** मिलता हुआ **(नमसा)** सत्कार वा अन्न आदि से **(देवान्)** विद्वानों की **(सपर्यन्)** सेवा करता और विद्यार्थियों को **(उपशिक्षन्)** समीप प्राप्त विद्या को ग्रहण कराता हुआ **(अत्रि:)** सम्पूर्ण विद्याओं में व्यापक **(स्वर्भानो:)** सूर्य्य की कान्ति के सदृश कान्ति जिसकी उसके **(ग्राव्ण:)** मेघ से **(सूर्यस्य)** सूर्य के **(दिवि)** प्रकाश में **(चक्षु:)** नेत्र का **(आ, अधात्)** स्थापन करे वह **(माया:)** बुद्धियों को प्राप्त होवे और अविद्याओं को **(अप, अघुक्षत्)** अपशब्दित करे॥ ८॥

भावार्थ:-हे मनुष्यो! जो विद्वानों की सेवा करने वाला, योगी, विद्या के प्रचार में प्रिय, विद्वान् होवे, वह जैसे बिजुली सूर्य और मेघ के सम्बन्ध से सृष्टि की पालना और दुःख का निवारण होता है, वैसे ही अध्यापक और अध्येता के सम्बन्ध से विद्या की रक्षा और अविद्या का निवारण करता है॥ ८॥

अथ सूर्यान्धकारदृष्टान्तेन विद्वदविद्वद्विषयमाह॥

अब सूर्य और अन्धकार के दृष्टान्त से विद्वान् और अविद्वान् के विषय को कहते हैं॥

यं वै सूर्यं॑ स्व॑र्भानु॒स्तम॒सावि॑ध्यदासु॒रः।

अत्र॑य॒स्तमन्व॑विन्दन्न॒ह्य॑१॑न्ये अश॑क्नुवन्॥ ९॥ १२॥

यम्। वै। सूर्य॑म्। स्व॑:ऽभानुः। तम॑सा। अवि॑ध्यत्। आ॒सु॒रः। अत्र॑यः। तम्। अनु॑। अ॒वि॒न्द॒न्। न॒हि। अ॒न्ये। अश॑क्नुवन्॥ ९॥

पदार्थः-(यम्) (वै) निश्चये **(सूर्यम्)** सवितारम् **(स्वर्भानुः)** आदित्येन प्रकाशितः **(तमसा)** अन्धकारेण **(अविध्यत्)** विध्यति **(आसुरः)** आसुरो मेघ एव **(अत्रयः)** विद्याविशालाः **(तम्) (अनु) (अविन्दन्)** लभेरन् **(नहि) (अन्ये) (अशक्नुवन्)** शक्नुयुः॥९॥

अन्वयः-हे विद्वांसः! स्वर्भानुरासुरस्तमसा यं सूर्यमविध्यत् तं वै अत्रयोऽन्वविन्दन्नह्यन्य एतं ज्ञातुमशक्नुवन्॥९॥

भावार्थः-हे मनुष्या! यथा मेघः सूर्यमावृत्याऽन्धकारं जनयति तथैवाऽविद्यात्मानमावृत्याऽज्ञानं जनयति यथा सूर्यो मेघं हत्वाऽन्धकारं निवार्य प्रकाशमाविष्करोति तथैव प्राप्ता विद्याऽविद्यां विनाश्य विज्ञानप्रकाशं जनयति। एतद्विवेचनं विद्वांसो जानन्ति नेतर इति॥९॥

अत्रेन्द्रमेघसूर्यविद्वदविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चत्वारिंशत्तमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! **(स्वर्भानुः)**! सूर्य से प्रकाशित **(आसुरः)** मेघ ही **(तमसा)** अन्धकार से **(यम्)** जिस **(सूर्यम्)** सूर्य्य को **(अविध्यत्)** ताड़ित करता है **(तम्)** उसको **(वै)** निश्चय करके **(अत्रयः)** विद्या में दक्ष जन **(अनु, अविन्दन्)** अनुकूल प्राप्त होवें **(नहि)** नहीं **(अन्ये)** अन्य इसके जानने को **(अशक्नुवन्)** समर्थ होवें॥९॥

भावार्थः-हे मनुष्यो! जैसे मेघ सूर्य्य को ढाप के अन्धकार को उत्पन्न करता है, वैसे ही अविद्या आत्मा का आवरण करके अज्ञान को उत्पन्न करती है और जैसे सूर्य मेघ का नाश और अन्धकार का निवारण करके प्रकाश करता है, वैसे ही प्राप्त हुई विद्या अविद्या का नाश करके विज्ञान के प्रकाश को उत्पन्न करती है, इस विवेचन को विद्वान् जन जानते हैं, अन्य नहीं॥९॥

इस सूक्त में इन्द्र मेघ सूर्य विद्वान् अविद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चालसीवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ विंशत्यृचस्यैकचत्वारिंशत्तमस्य सूक्तस्याऽत्रिर्ऋषिः। विश्वेदेवा देवताः। १, २, ६, १५, १८ त्रिष्टुप्। ४, १३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, १४, १९ पङ्क्तिः। ५, ९, १०, ११, १२ भुरिक्पङ्क्तिः। ७, ८ स्वराट् पङ्क्तिश्छन्दः। २० याजुषी पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १६ जगती। १७ निचृदतिजगती छन्दः। निषादः स्वरः॥

अथ विश्वदेवगुणानाह॥

अब बीस ऋचा वाले एकचालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विश्वदेवों के गुणों को कहते हैं॥

को नु वां॑ मित्रावरुणावृता॒यन् दि॒वो वां॑ म॒हः पार्थि॑वस्य वा॒ दे।
ऋ॒तस्य॑ वा॒ सद॑सि॒ त्रासी॑थां नो यज्ञाय॒ते वां॑ पशु॒षो न वाजा॑न्॥ १॥

कः। नु। वा॒म्। मि॒त्रा॒व॒रु॒णौ॒। ऋ॒त॒ऽयन्। दि॒वः। वा॒। म॒हः। पार्थि॑वस्य। वा॒। दे। ऋ॒तस्य॑। वा॒। सद॑सि। त्रासी॑थाम्। नः॒। य॒ज्ञ॒ऽय॒ते। वा॒। प॒शु॒ऽसः। न। वाजा॑न्॥ १॥

पदार्थः-(कः) (नु) सद्यः **(वाम्)** युवाम् **(मित्रावरुणौ)** प्राणोदानाविवाध्यापकाध्येतारौ **(ऋतायन्)** ऋतमाचरन् **(दिवः)** प्रकाशान् **(वा) (महः) (पार्थिवस्य)** पृथिव्यां विदितस्य **(वा) (दे)** देदीप्यमानौ देवौ। अत्र **छान्दसो वर्णलोपो वे**ति वलोपः, **सुपां सुलुगि**ति विभक्तेर्लुक्। **(ऋतस्य)** सत्यस्य **(वा) (सदसि)** सभायाम् **(त्रासीथाम्)** रक्षेतम् **(नः)** अस्मान् **(यज्ञायते)** यज्ञं कामयमानाय **(वा) (पशुषः)** पशून् **(न)** इव **(वाजान्)**॥ १॥

अन्वयः-हे मित्रावरुणौ! वां दिवः क ऋतायन् वा पार्थिवस्य महः को नु विजानीयाद्वा दे ऋतस्य सदसि त्रासीथां वा यज्ञायते नस्त्रासीथां वा पशुषो वाजान्नोऽस्मान् भोगान् प्रापयतम्॥ १॥

भावार्थः-हे विद्वांसो! यदि भवन्तः पृथिव्यादिपदार्थविद्यां जानन्ति तर्ह्यस्मभ्यमुपदिशन्तु सभायां निषद्य सत्यं न्यायं कुर्वन्तु॥ १॥

पदार्थः-हे **(मित्रावरुणौ)** प्राण और उदान वायु के सदृश वर्त्तमान पढ़ने और पढ़ाने वाले जनो! **(वाम्)** आप दोनों और **(दिवः)** प्रकाशों को **(कः)** कौन **(ऋतायन्)** सत्य का आचरण करता हुआ **(वा)** वा **(पार्थिवस्य)** पृथिवी में विदितजन के **(महः)** तेज को कौन **(नु)** शीघ्र जाने **(वा)** वा **(दे)** प्रकाशमान विद्वान् जनो **(ऋतस्य)** सत्य की **(सदसि)** सभा में **(त्रासीथाम्)** रक्षा करो **(वा)** वा **(यज्ञायते)** यज्ञ की कामना करते हुए के लिये **(नः)** हम लोगों की रक्षा करिये **(वा)** वा **(पशुषः)** पशुओं और **(वाजान्)** अन्नों के **(न)** सदृश हम लोगों के लिये भोगों को प्राप्त कराइये॥ १॥

भावार्थः-हे विद्वानो! जो आप लोग पृथिवी आदि पदार्थों की विद्या को जानते हैं, तो हम लोगों को उपदेश देवें और सभा में बैठ के सत्य न्याय को करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ते नो॑ मि॒त्रो वरु॑णो अर्य॒मायुरिन्द्र॑ ऋभु॒क्षा म॒रुतो॑ जुषन्त।

नमो॑भिर्वा॒ ये दध॑ते सुवृ॒क्तिं स्तोमं॑ रु॒द्राय॑ मी॒ळ्हुषे॑ स॒जोषा॑:॥ २॥

ते। न॒:। मि॒त्र:। वरु॑ण:। अ॒र्य॒मा। आ॒यु:। इन्द्र॑:। ऋ॒भु॒क्षा:। म॒रुत॑:। जु॒ष॒न्त॒। नम॑:ऽभि:। वा॒। ये। दध॑ते। सु॒ऽवृ॒क्तिम्। स्तोम॑म्। रु॒द्राय॑। मी॒ळ्हुषे॑। स॒ऽजोषा॑:॥ २॥

पदार्थ:-(ते) (**न:**) अस्मभ्यम् (**मित्र:**) सखा (**वरुण:**) श्रेष्ठाचार: (**अर्य्यमा**) न्यायेश: (**आयु:**) जीवनम् (**इन्द्र:**) परमैश्वर्य्यवान् (**ऋभुक्षा:**) महान् विद्वान् (**मरुत:**) मनुष्या: (**जुषन्त**) सेवन्ते (**नमोभि:**) सत्कारान्नादिभि: (**वा**) (**ये**) (**दधते**) (**सुवृक्तिम्**) सुष्ठुवर्जनम् (**स्तोमम्**) श्लाघाम् (**रुद्राय**) दुष्टाचाराणां रोदकाय (**मीळ्हुषे**) सुखं सिञ्चते (**सजोषा:**) समानप्रीतिसेविन:। अत्र वचनव्यत्ययेनैकवचनम्॥ २॥

अन्वय:-ये मरुतो नमोभिर्मीळ्हुषे रुद्राय सजोषा: सन्त: सुवृक्तिं स्तोमं दधते वा जुषन्त ते मित्रो वरुणोऽर्य्यमेन्द्र ऋभुक्षाश्च न आयुर्जुषन्त॥ २॥

भावार्थ:-त एव विद्वांस उत्तमा विज्ञेया ये स्वात्मवत्सर्वेषु प्राणिषु वर्त्तेरन्॥ २॥

पदार्थ:-(ये) जो (**मरुत:**) मनुष्य (**नमोभि:**) सत्कार और अन्नादिकों से (**मीळ्हुषे**) सुख का सेचन करते हुए (**रुद्राय**) दुष्ट आचरणों के करने वाले जनों के रुलाने वाले के लिये (**सजोषा:**) तुल्य प्रीति के सेवन करने वाले हुए (**सुवृक्तिम्**) उत्तम प्रकार वर्जन होता है जिससे उस (**स्तोमम्**) प्रशंसा को (**दधते**) धारण करते (**वा**) वा (**जुषन्त**) सेवन करते हैं (**ते**) वे (**मित्र:**) मित्र (**वरुण:**) श्रेष्ठ आचरण करने वाला (**अर्य्यमा**) न्याय का ईश और (**इन्द्र:**) परमैश्वर्य्यवान् (**ऋभुक्षा:**) बड़ा विद्वान् (**न:**) हम लोगों के लिये (**आयु:**) जीवन का सेवन करें॥ २॥

भावार्थ:-उन्हीं विद्वानों को उत्तम समझना चाहिये जो अपने सदृश सब प्राणियों में वर्त्ताव करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैंह॥

आ वा॑मि॒ येष्ठा॑श्विना हुवध्यै॒ वात॑स्य॒ पत्म॒न् रथ्य॑स्य पु॒ष्टौ।

उ॒त वा॑ दि॒वो असु॑राय॒ मन्म॒ प्रान्धां॑सीव॒ यज्य॑वे भरध्वम्॥ ३॥

आ। वा॒म्। येष्ठा॑। अ॒श्वि॒ना॒। हु॒व॒ध्यै॑। वात॑स्य। पत्म॑न्। रथ्य॑स्य। पु॒ष्टौ। उ॒त। वा॒। दि॒व:। असु॑राय। मन्म॑। प्र। अन्धां॑सिऽइव। यज्य॑वे। भ॒र॒ध्व॒म्॥ ३॥

पदार्थः-(आ) (वाम्) युवाम् **(येष्ठा)** अतिशयेन नियन्तारौ **(अश्विना)** अध्यापकोपदेशकौ **(हुवध्यै)** ग्रहणाय **(वातस्य)** वायोः **(पत्मन्)** पत्मनि मार्गे **(रथ्यस्य)** रथे याने भवस्य **(पुष्टौ)** पोषणे **(उत) (वा) (दिवः)** कामयमानस्य **(असुराय)** मेघाय **(मन्म)** विज्ञानम् **(प्र) (अन्धांसीव)** यथान्नीदीनि **(यज्यवे)** यज्ञानुष्ठानाय यजमानाय वा **(भरध्वम्)**॥३॥

अन्वयः-हे येष्ठाश्विना! यथा वां रथ्यस्य वातस्य पत्मन् पुष्टौ उत वाऽसुराय दिवोऽन्धांसीव यज्यवे निमित्ते भवतस्तथा हुवध्यै मन्म प्रा भरध्वम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽध्येताध्यापकौ विद्याप्रचाराय प्रयतेते तथैव सर्वैर्मनुष्यैः सततं प्रयततिव्यम्॥३॥

पदार्थः-हे **(येष्ठा)** अत्यन्त नियम के निर्वाहक **(अश्विना)** अध्यापक और उपदेशक जनो! जैसे **(वाम्)** आप दोनों **(रथ्यस्य)** रथ में उत्पन्न हुए **(वातस्य)** पवन के **(पत्मन्)** मार्ग में और **(पुष्टौ)** पोषण करने में **(उत, वा)** अथवा **(असुराय)** मेघ के लिये **(दिवः)** कामना करते हुए के **(अन्धांसीव)** अन्न आदिकों के सदृश **(यज्यवे)** यज्ञारम्भ वा यजमान के लिये कारण होते हो, वैसे **(हुवध्यै)** ग्रहण करने के लिये **(मन्म)** विज्ञान का **(प्र, आ, भरध्वम्)** प्रारम्भ करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पढ़ने और पढ़ाने वाले विद्या के प्रचार के लिये प्रयत्न करते हैं, वैसे ही सब मनुष्यों को चाहिये कि निरन्तर प्रयत्न करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः॥४॥

प्र। सक्षणः। दिव्यः। कण्वऽहोता। त्रितः। दिवः। सऽजोषाः। वातः। अग्निः। पूषा। भगः। प्रऽभृथे। विश्वऽभोजाः। आजिम्। न। जग्मुः। आश्वश्वऽतमाः॥४॥

पदार्थः-(प्र) (सक्षणः) सोढा **(दिव्यः)** शुद्धव्यवहारः **(कण्वहोता)** कण्वो मेधावी चासौ होता दाता च **(त्रितः)** त्रिषु क्षित्युदकान्तरिक्षेषु वर्धमानः **(दिवः)** दिव्याः कामनाः **(सजोषाः)** सहैव सेवमानः **(वातः)** वायुः **(अग्निः)** पावकः **(पूषा)** पुष्टिकर्ता **(भगः)** ऐश्वर्य्यप्रदः **(प्रभृथे)** शुद्धकरणे व्यवहारे **(विश्वभोजाः)** यो विश्वं भुनक्ति पालयति सः **(आजिम्)** स-ामम् **(न)** इव **(जग्मुः)** प्राप्नुवन्ति **(आश्वश्वतमाः)** आशवः सद्योगामिनो अश्वा विद्यन्ते येषान्ते॥४॥

अन्वयः-हे विद्वन्! दिव्यः कण्वहोतेव यः सक्षणस्त्रितो दिवः कामयमानः सजोषा वातोऽग्निः प्रभृथे पूषा भगो विश्वभोजा आश्वश्वतमा आजिं जग्मुर्न प्र यत्यते स एव पुष्कलं भोगं प्रापयति॥४॥

भावार्थः-हे मनुष्यो! यूयमग्न्यादिकपदार्थैर्दारिद्र्यं विच्छिद्य श्रीमन्तो भवेयुः॥४॥

पदार्थः-हे विद्वन्! (**दिव्यः**) शुद्ध व्यवहारयुक्त (**कण्वहोता**) बुद्धिमान् तथा देने और ग्रहण करने वाले के सदृश जो (**सक्षणः**) सहने वाला (**त्रितः**) तीन पृथिवी, जल और अन्तरिक्ष में बढ़ता (**दिवः**) श्रेष्ठ कामनाओं की इच्छा करता और (**सजोषाः**) साथ ही सेवन (**वातः**) वायु और (**अग्निः**) अग्नि (**प्रभृथे**) शुद्ध करने वाले व्यवहार में (**पूषा**) पुष्टि करने वा (**भगः**) ऐश्वर्य का देने वा (**विश्वभोजाः**) संसार का पालन करने वाला और (**आश्वश्वतमाः**) शीघ्र चलने वाले घोड़े जिसके विद्यमान वे (**आजिम्**) सङ्ग्राम को (**जग्मुः**) जैसे प्राप्त होते हैं (**न**) वैसे (**प्र**) प्रयत्न किया जाता है, वही बहुत भोग की प्राप्ति कराता है॥४॥

भावार्थः-हे मनुष्यो! आप लोग अग्नि आदि पदार्थों से दारिद्र्य का नाश करके धनवान् हूजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र वो॑ र॒यिं युक्ताश्वं॑ भरध्वं रा॒य एषेऽव॑से दधीत॒ धीः।

सु॒शेव॒ एवैरौ॑शि॒जस्य॒ होता॒ ये व॒ एवा॑ मरुतस्तु॒राणा॑म्॥५॥१३॥

प्र। व॒ः। र॒यिम्। युक्तऽअ॑श्वम्। भ॒र॒ध्व॒म्। रा॒यः। एषे॑। अव॑से। दधी॒त॒। धीः। सु॒ऽशेव॑ः। एवैः॑। औ॒शि॒जस्य॑। होता॑। ये। व॒ः। एवा॑ः। म॒रु॒तः॒। तु॒राणा॑म्॥५॥

पदार्थः-(**प्र**) (**वः**) युष्मभ्यम् (**रयिम्**) धनम् (**युक्ताश्वम्**) युक्ता अश्वा येन तत् (**भरध्वम्**) (**रायः**) धनानि (**एषे**) एतुं प्राप्तुम् (**अवसे**) रक्षणाद्याय (**दधीत**) धरत (**धीः**) प्रज्ञाः (**सुशेवः**) शोभनं सुखं यस्य सः (**एवैः**) प्रापणैः (**औशिजस्य**) कामयमानस्यापत्यस्य (**होता**) (**ये**) (**वः**) युष्माकम् (**एवाः**) कामयमानाः (**मरुतः**) मनुष्याः (**तुराणाम्**) हिंसकानाम्॥५॥

अन्वयः-हे मरुतो मनुष्या! यूयं धीर्दधीत वो युक्ताश्वं रयिं प्रभरध्वम्। अवस एषे सुशेव एवैरौशिजस्य रायः होता भवति ये वस्तुराणां हिंसका एवाः सन्ति तान् यूयं सत्कुरुत॥५॥

भावार्थः-हे मनुष्या! यूयमग्न्यादिपदार्थविद्यया श्रीमन्तो भूत्वा सत्यतयाऽनाथान् सर्वान् पालयत दुष्टान् ताडयत॥५॥

पदार्थः-हे (**मरुतः**) मनुष्यो! आप लोग (**धीः**) बुद्धियों को (**दधीत**) धारण करो और (**वः**) आप लोगों के लिये अर्थात् आप अपने लिये (**युक्ताश्वम्**) युक्त घोड़े जिससे उस (**रयिम्**) धन को (**प्र, भरध्वम्**) अत्यन्त धारण करो। तथा (**अवसे**) रक्षण आदि के लिये (**एषे**) प्राप्त होने को (**सुशेवः**) सुन्दर सुख से युक्त जन (**एवैः**) गमनों से (**औशिजस्य**) कामना करने वाले सन्तान का और (**रायः**) धनों का (**होता**) देने वाला होता है और (**ये**) जो (**वः**) आप लोगों के (**तुराणाम्**) नाश करनेवालों के नाश करने वाले (**एवाः**) और कामना करने वाले हैं, उनका आप लोग सत्कार करो॥५॥

भावार्थः-हे मनुष्यो! आप लोग अग्नि आदि पदार्थों की विद्या से धनवान् होकर सत्यता से सब अनाथों का पालन करो और दुष्टों का ताड़न करो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र वो॑ वा॒युं र॑थ॒युजं॑ कृणुध्वं॒ प्र दे॒वं विप्रं॑ पनि॒तार॑मर्कैः।

इ॒षु॒ध्यव॑ ऋत॒साप॒: पुर॑ंधी॒र्वस्वी॑र्नो॒ अत्र॒ पत्नी॒रा धि॒ये धु॑:॥६॥

प्र। वः॒। वा॒युम्। र॒थ॒ऽयुज॑म्। कृ॒णु॒ध्व॒म्। प्र। दे॒वम्। विप्र॑म्। प॒नि॒तार॑म्। अ॒र्कैः॒। इ॒षु॒ध्यवः॑ ऋ॒त॒ऽसापः॑। पुर॑म्ऽधीः। वस्वीः॑। नः॒। अत्र॑। पत्नीः॑। आ। धि॒ये। धुरिति॑ धुः॥६॥

पदार्थः-(**प्र**) (**वः**) युष्मभ्यम् (**वायुम्**) वेगवन्तम् (**रथयुजम्**) रथेन युक्तम् (**कृणुध्वम्**) (**प्र**) (**देवम्**) विद्वांसम् (**विप्रम्**) मेधाविनम् (**पनितारम्**) स्तावकं धर्म्मेण व्यवहर्त्तारम् (**अर्कैः**) अर्चनीयैः पदार्थैः (**इषुध्यवः**) य इषुभिर्युध्यन्ते (**ऋतसापः**) सत्यसम्बन्धाः (**पुरन्धीः**) द्यावापृथिव्यौ। **पुरन्धी इति द्यावापृथिवीनामसु पठितम्।** (निघं०३.३०)। (**वस्वीः**) बहुपदार्थयुक्ताः (**नः**) अस्मभ्यम् (**अत्र**) अस्मिञ्जगति (**पत्नीः**) पत्नीवद्वर्त्तमानाः (**आ**) (**धिये**) प्रज्ञायै (**धुः**) दध्युः॥६॥

अन्वयः-हे मनुष्या! येऽत्र इषुध्यव ऋतसापो विद्वांसो वो रथयुजं वायुं धुर्युष्मभ्यं नोऽस्मभ्यं पत्नीरिव धिये वस्वीः पुरन्धीरा धुस्तत्सङ्गेन वायुं रथयुजं प्र कृणुध्वमर्कैः पनितारं विप्रं देवं प्र कृणुध्वम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! भवन्तो यथा पतिव्रता पत्न्यः पत्यादीन् सुखयन्ति तथैव वायुवद्वेगयुक्तं रथं धार्मिकान् विदुषश्च धृत्वा सर्वान् सुखयेयुः॥६॥

पदार्थः-हे मनुष्यो! जो (**अत्र**) इस संसार में (**इषुध्यवः**) बाणों के द्वारा युद्ध करने वा (**ऋतसापः**) सत्य सम्बन्ध रखने वाले विद्वान् जन (**वः**) आप लोगों के लिये (**रथयुजम्**) वाहन से युक्त (**वायुम्**) वेग वाले वायु को (**धुः**) धारण करें वा आप लोगों और (**नः**) हम लोगों के लिये (**पत्नीः**) स्त्रियों के सदृश वर्त्तमानों को और (**धिये**) बुद्धि के लिये (**वस्वीः**) बहुत पदार्थों से युक्त (**पुरन्धीः**) अन्तरिक्ष और पृथिवी को (**आ**) सब प्रकार धारण करें उनके संग से वेगयुक्त वाहन से युक्त को (**प्र, कृणुध्वम्**) अच्छे प्रकार सिद्ध करें (**अर्कैः**) प्रशंसनीय पदार्थों से (**पनितारम्**) स्तुति करने और धर्म्म से व्यवहार करने वाले (**विप्रम्**) बुद्धिमान् (**देवम्**) विद्वान् को (**प्र**) अच्छे प्रकार प्रकट करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे पतिव्रता पत्नी पति आदि को सुख देती हैं, वैसे ही वायु के समान वेगयुक्त रथ को और धार्मिक विद्वानों को धारण कर सब को सुखयुक्त करो॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उप॑ व॒ एषे॒ वन्द्यो॑भिः शू॒षैः प्र यह्वी दि॒वश्चि॒तय॑द्भि॒र॒र्कैः।

उ॒षास॒॒नक्ता॑ वि॒दुषी॑व॒ विश्व॒मा हा॑ वहतो॒ मर्त्या॑य यज्ञम्॥७॥

उप॑। व॒रः। एषे॑। वन्द्यो॑भिः। शू॒षैः। प्र। यह्वी इति॑। दि॒वः। चि॒तय॑त्ऽभिः। अ॒र्कैः। उ॒षास॒॒नक्ता॑। वि॒दुषी॑ऽइवेति॑ वि॒दुषी॑व। विश्व॑म्। आ। ह॒। व॒ह॒तः। मर्त्या॑य। य॒ज्ञम्॥७॥

पदार्थः-(उप) (वः) युष्मान् **(एषे)** एतुं प्राप्तुम् **(वन्द्योभिः)** वन्दितुं स्तोतुं योग्यैः **(शूषैः)** बलैः **(प्र) (यह्वी)** महती **(दिवः)** विद्याप्रकाशान् **(चितयद्भिः)** ज्ञापयद्भिः **(अर्कैः)** पूजनीयैर्विद्वद्भिस्सह **(उषसानक्ता)** रात्रिदिने **(विदुषीव)** पूर्णविद्या स्त्रीव **(विश्वम्)** सर्वम् **(आ)** समन्तात् **(हा)** किल। अत्र **निपातस्य चे**ति दीर्घः। **(वहतः)** धरतः **(मर्त्याय)** मनुष्यसुखाय **(यज्ञम्)** विद्याप्रचारादिकम्॥७॥

अन्वयः-हे मनुष्या! दिवश्चितयद्भिरर्कैर्वन्द्योभिः शूषैश्च सह यह्वी विदुषीव ये उषासानक्ता व उपैषे मर्त्याय विश्वं यज्ञं हा प्रा वहतस्तत्सेवनविद्यां यूयं विजानीत॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा महाविदुषी स्त्री सर्वत्र विदुषीषु विद्वत्सु च सत्कृता भूत्वा सर्वानुत्तमान् गुणान् धृत्वा विदुषः पत्यादीनुन्नयति तथैव रात्रिदिने सर्वान् व्यवहारान् धृत्वा सर्वं जगद्वर्धयतः॥७॥

पदार्थः-हे मनुष्यो! **(दिवः)** विद्या के प्रकाशों के **(चितयद्भिः)** जनाते हुए **(अर्कैः)** सत्कार करने योग्य विद्वानों के साथ और **(वन्द्योभिः)** स्तुति करने योग्य **(शूषैः)** बलों के साथ **(यह्वी)** बड़ी **(विदुषीव)** पूर्णविद्यायुक्त स्त्री के तुल्य जो **(उषसानक्ता)** रात्रि और दिन **(वः)** आप लोगों के **(उप, एषे)** समीप प्राप्त होने को **(मर्त्याय)** मनुष्य के सुख के लिये **(विश्वम्)** सम्पूर्ण **(यज्ञम्)** विद्या के प्रचार आदि को **(हा)** निश्चय **(प्र, आ, वहतः)** सब प्रकार धारण करते हैं, उनकी सेवन की विद्या को आप लोग जानें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे बड़ी विद्यायुक्त स्त्री सब जगह विद्यायुक्त स्त्रियों और विद्वानों में सत्कारयुक्त हो और सम्पूर्ण उत्तम गुणों को धारण करके विद्यायुक्त पति आदि की वृद्धि करती है, वैसे ही रात्रि और दिन सब व्यवहारों को धारण करके सब जगत् की वृद्धि करते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अ॒भि वो॑ अर्चे पो॒ष्यावं॑तो॒ नृन् वास्तो॒ष्पति॒ त्वष्टा॑रं॒ ररां॑णः।

धन्या॑ स॒जोषा॑ धि॒षणा॒ नमो॑भि॒र्वन॒स्पती॒॑रोष॑धी रा॒य एषे॑॥८॥

अ॒भि। व॒रः। अ॒र्चे॒। पो॒ष्याऽव॑तः। नृन्। वास्तो॑ः। पति॑म्। त्वष्टा॑रम्। ररां॑णः। धन्या॑। स॒ऽजोषा॑ः। धि॒षणा॑। नमः॑ऽभिः। वन॒स्पती॑न्। ओष॑धीः। रा॒यः। एषे॑॥८॥

पदार्थः-(अभि) आभिमुख्ये **(वः)** युष्मान् **(अर्चे)** सत्करोमि **(पोष्यावतः)** बहवः पोष्याः पोषणीया विद्यन्ते येषान्तान् **(नॄन्)** मनुष्यान् **(वास्तोः)** निवासस्थानस्य **(पतिम्)** पालकम् **(त्वष्टारम्)** तेजस्विनम् **(रराणः)** दाता **(धन्या)** धनं लब्ध्री **(सजोषाः)** समानप्रीतिसेविनी **(धिषणा)** प्रज्ञा **(नमोभिः)** सत्कारैरन्नादिभिर्वा **(वनस्पतीन्)** अश्वत्थादीन् **(ओषधीः)** यवसोमलतादीन् **(रायः)** धनानि **(एषे)** प्राप्तुम्॥८॥

अन्वयः-हे मनुष्या! यथा धन्या सजोषा धिषणा नमोभिर्वनस्पतीनोषधी राय एषे प्रभवति तथा वास्तोष्पतिं त्वष्टारं रराणोऽहं पोष्यावतो वो नॄन्भ्यर्चे॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा तीव्रया प्रज्ञया विद्यया च युक्ता नरो वैद्यकविद्यां विज्ञाय मनुष्यादीन् पालयन्ति तथैव सर्वहितमिच्छुकान् जनान् सदैव सत्कुर्वन्तु॥८॥

पदार्थः-हे मनुष्यो! जैसे **(धन्या)** धन को प्राप्त हुई **(सजोषाः)** तुल्य प्रीति की सेवने वाली **(धिषणा)** बुद्धि **(नमोभिः)** सत्कारों वा अन्न आदिकों से **(वनस्पतीन्)** अश्वत्थ आदि और **(ओषधीः)** यव सोमलतादिकों को तथा **(रायः)** धनों को **(एषे)** प्राप्त होने के लिये समर्थ होती है, वैसे **(वास्तोः)** निवास के स्थान के **(पतिम्)** पालने वाले **(त्वष्टारम्)** तेजस्वीजन को **(रराणः)** दाता मैं **(पोष्यावतः)** बहुत पोषण करने योग्य पदार्थ जिनके विद्यमान उन **(वः)** आप **(नॄन्)** मनुष्यों का **(अभि, अर्चे)** प्रत्यक्ष सत्कार करता हूँ॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे तीव्र बुद्धि और विद्या से युक्त मनुष्य वैद्यक विद्या को जान कर मनुष्य आदिकों का पालन करते हैं, वैसे ही सब के हित की इच्छा करने वाले मनुष्यों का सदा ही सत्कार करिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः।
पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ॥९॥

तुजे। नः। तने। पर्वताः। सन्तु। स्वऽएतवः। ये। वसवः। न। वीराः। पनितः। आप्त्यः। यजतः। सदा। नः। वर्धात्। नः। शंसम्। नर्यः। अभिष्टौ॥९॥

पदार्थः-(तुजे) दाने **(नः)** अस्मभ्यम् **(तने)** विस्तीर्णे **(पर्वताः)** जलप्रदा मेघा इव **(सन्तु)** **(स्वैतवः)** सुष्ठुगमनाः **(ये)** **(वसवः)** पृथिव्यादयः **(न)** इव **(वीराः)** प्रज्ञाशरीरबलयुक्ताः **(पनितः)** प्रशंसितः **(आप्त्यः)** आप्तेषु भवः **(यजतः)** सङ्गन्ता पूजनीयः **(सदा)** **(नः)** अस्मान् **(वर्धात्)** वर्धयेत् **(नः)** अस्मान् **(शंसम्)** प्रशंसाम् **(नर्यः)** नृषु साधुः **(अभिष्टौ)** इष्टसिद्धौ॥९॥

अन्वयः-हे मनुष्या! ये स्वैतवो वसवो वीरा न तने तुजे नः पर्वता मेघा दातार इव सन्तु योऽभिष्टौ पनित

आप्त्यो यजतो नः सदा वर्धाद्यो नर्य्यो नः शंसं प्रापयेत्तान् सर्वान् वयं सत्कुर्याम॥९॥

भावार्थः-अत्रोपमालङ्कारः। ये वीरवच्छत्रुनिवारका मेघवद्दातारो वायुवद्वेगवन्तो विद्वांसोऽस्मान्नित्यं वर्धयेयुस्तान् वयमपि वर्धयेमहि॥९॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(स्वैतवः)** उत्तम गमन वाले **(वसवः)** पृथिवी आदि **(वीराः)** बुद्धि और शरीर के बल से युक्त जनों के **(न)** सदृश **(तने)** विस्तीर्ण **(तुजे)** दान में **(वः)** हम लोगों के लिये **(पर्वताः)** जल के देने वाले मेघ और दाता जनों के सदृश **(सन्तु)** होवें और जो **(अभिष्टौ)** इष्ट की सिद्धि में **(पनितः)** प्रशंसित **(आप्त्यः)** यथार्थवक्ता जनों में उत्पन्न **(यजतः)** मिलने वा सत्कार करने योग्य जन **(नः)** हम लोगों की **(सदा)** सदा **(वर्धात्)** वृद्धि करे और जो **(नर्य्यः)** मनुष्यों में श्रेष्ठ **(नः)** हम लोगों को **(शंसम्)** प्रशंसा को प्राप्त करावें, उन सब का हम लोग सत्कार करें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो जन वीरजनों के सदृश शत्रुओं के निवारण करने, मेघ के सदृश देने वाले और वायु के सदृश वेगयुक्त विद्वान् हम लोगों की नित्य वृद्धि करें, उनकी हम लोग भी वृद्धि करें॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वृष्णो॑ अस्तोषि भू॒म्यस्य॒ गर्भं॑ त्रि॒तो नपा॑तम॒पां सु॑वृ॒क्ति।

गृ॒णी॒ते अ॒ग्निरे॒तरी॒ न शू॒षैः शो॒चिष्के॑शो॒ नि रि॑णाति॒ वना॑॥१०॥१४॥

वृष्णः॑। अ॒स्तो॒षि॒। भू॒म्यस्य॑। गर्भ॑म्। त्रि॒तः। नपा॑तम्। अ॒पाम्। सु॒ऽवृ॒क्ति। गृ॒णी॒ते। अग्निः॑। ए॒तरि॑। न। शू॒षैः॑। शो॒चिःऽके॑शः। नि। रि॒णा॒ति॒। वना॑॥१०॥

पदार्थः-**(वृष्णः)** सुखवर्षकान् **(अस्तोषि)** प्रशंससि **(भूम्यस्य)** भूमौ भवस्य **(गर्भम्)** **(त्रितः)** त्रिषु वर्द्धकः **(नपातम्)** न विद्यते पातो यस्य तम् **(अपाम्)** प्राणिनां जनानामिव **(सुवृक्ति)** सुष्ठु व्रजन्ति यस्मिंस्तम् **(गृणीते)** स्तौति **(अग्निः)** पावक इव **(एतरी)** प्राप्नुवन्ती **(न)** इव **(शूषैः)** बलैः **(शोचिष्केशः)** प्रदीप्तविज्ञानः **(नि)** **(रिणाति)** गच्छति प्राप्नोति वा **(वना)** किरणान्॥१०॥

अन्वयः-हे विद्वँस्त्वं वृष्णोऽस्तोषि त्रितोऽपां नपातं भूम्यस्य गर्भं सुवृक्ति गृणीत एवं योऽग्निरेतरी शोचिष्केशो न शूषैर्वना नि रिणाति स एव सर्वं सृष्टिजन्यं सुखं प्राप्नोति॥१०॥

भावार्थः-स एव पुरुषो बहुधनं मान्यं च लभते यः सृष्टिक्रमविद्यां विज्ञाय कार्यसिद्धये प्रयतते॥१०॥

पदार्थः-हे विद्वन्! आप **(वृष्णः)** सुख की वृष्टि करनेवालों की **(अस्तोषि)** प्रशंसा करते हो **(त्रितः)** तीनों में वृद्धिकरने वाला **(अपाम्)** मनुष्यों के सदृश प्राणियों के **(नपातम्)** नहीं पतन जिसका उस **(भूम्यस्य)** पृथ्वी में हुए **(गर्भम्)** गर्भ की **(सुवृक्ति)** उत्तम गमन के सहित **(गृणीते)** स्तुति करता है, इस प्रकार जो **(अग्निः)** पवित्र करने वाले अग्नि के **(एतरी)** प्राप्त होती हुई के और **(शोचिष्केशः)**

प्रकाशित विज्ञान वाले के (**न**) सदृश (**शूषैः**) बलों से (**वना**) किरणों को (**नि, रिणाति**) जाता वा प्राप्त होता है, वही सम्पूर्ण सृष्टि में उत्पन्न हुए सुख को प्राप्त होता है॥१०॥

भावार्थः-वही पुरुष बहुत धन और आदर को प्राप्त होता है कि जो सृष्टिक्रम की विद्या को जान कर कार्य्य की सिद्धि के लिये यत्न करता है॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः॥ ११॥

कथा। महे। रुद्रियाय। ब्रवाम। कत्। राये। चिकितुषे। भगाय। आपः। ओषधीः। उत। नः। अवन्तु। द्यौः। वना। गिरयः। वृक्षऽकेशाः॥ ११॥

पदार्थः-(कथा) केन प्रकारेण **(महे)** महते **(रुद्रियाय)** रुद्रैर्लब्धाय **(ब्रवाम)** उपदिशेम **(कत्)** कदा **(राये)** धनाय **(चिकितुषे)** ज्ञातव्याय **(भगाय)** ऐश्वर्याय **(आपः)** जलानि **(ओषधीः)** सोमलताद्याः **(उत)** **(नः)** अस्मान् **(अवन्तु)** **(द्यौः)** सूर्य्यः **(वना)** किरणानीव **(गिरयः)** मेघाः **(वृक्षकेशाः)** वृक्षाः केशा इव येषां शैलानां ते॥११॥

अन्वयः-हे विद्वांसो! मनुष्या आप ओषधीर्वृक्षकेशा गिरय उत द्यौर्वनेव नोऽवन्तु तत्सहायेन वयं महे चिकितुषे रुद्रियाय कथा ब्रवाम राये भगाय कद् ब्रवाम॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वे मनुष्याः स्वेषामन्येषां च रक्षणाय विदुषः सङ्गत्य प्रश्नोत्तराभ्यां सत्या विद्याः प्राप्यान्येभ्य उपदिश्यैश्वर्य्यवृद्धिं कदा करिष्याम इति नित्यं प्रोत्साहेरन्॥११॥

पदार्थः-हे विद्वान् जनो! मनुष्य **(आपः)** जल **(ओषधीः)** सोमलता आदि ओषधियां **(वृक्षकेशाः)** वृक्ष हैं केशों के समान जिनके वे पर्वत **(गिरयः)** मेघ **(उत)** और **(द्यौः)** सूर्य्य **(वना)** किरणों के सदृश **(नः)** हम लोगों की **(अवन्तु)** रक्षा करें, उनके सहाय से हम लोग **(महे)** बड़े **(चिकितुषे)** जानने योग्य और **(रुद्रियाय)** रुलाने वाले से प्राप्त हुए के लिये **(कथा)** किस प्रकार से **(ब्रवाम)** उपदेश देवें और **(राये)** धन और **(भगाय)** ऐश्वर्य्य के लिये **(कत्)** कब उपदेश देवें॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्य अपने और अन्यों के रक्षण के लिये विद्वानों को मिल के प्रश्न और उत्तर से सत्य विद्याओं को प्राप्त हो और अन्यों के लिये उपदेश देकर ऐश्वर्य्य की वृद्धि कब करें, इस प्रकार नित्य उत्साह करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा।

शृण्वन्त्वाप॒: पुरो॒ न शु॒भ्रा परि॒ स्रुचो॑ बबृह॒ाणस्याद्रे॑:॥ १२॥

शृ॒णोतु॑। न॒:। ऊ॒र्जाम्। पति॑:। गिर॑:। स:। नभ॑:। तरी॑यान्। इ॒षि॒र:। परि॑ऽज्मा। शृ॒ण्वन्तु॑। आप॑:। पुर॑:। न। शु॒भ्रा:। परि॑। स्रुच॑:। ब॒बृ॒ह॒ाणस्य॑। अद्रे॑:॥ १२॥

पदार्थ:-(शृणोतु) (न:) अस्माकम् **(ऊर्जाम्)** बलयुक्तानां सेनानामन्नादीनां वा **(पति:)** स्वामी पालक: **(गिर:)** सुशिक्षिता वाच: **(स:) (नभ:)** जलम्। **नभ इति साधारणनामसु पठितम्।** (निघं०१.४) **(तरीयान्)** तरणीय: **(इषिर:)** गन्तव्य: **(परिज्मा)** य: परित: सर्वतो गच्छति स: **(शृण्वन्तु) (आप:)** जलानीव व्याप्तविद्या विद्वांस: **(पुर:)** नगराणि **(न)** इव **(शुभ्रा:)** श्वेता: **(परि)** सर्वत: **(स्रुच:)** गमनशीला: **(बबृहाणस्य)** प्रवृद्धस्य **(अद्रे:)** मेघस्य॥ १२॥

अन्वय:-हे मनुष्या: ! स नभस्तरीयां इषिर: परिज्मोर्जां पतिर्नो गिर: शृणोतु शुभ्रा: पुरो नापो नोऽस्माकं गिर: शृण्वन्तु बबृहाणस्याऽद्रे: स्रुच इवास्माकं वाच: विद्वांस: परि शृण्वन्तु॥ १२॥

भावार्थ:-अत्रोपमालङ्कार:। त एव विद्वांसो भवितुमर्हन्ति ये विद्वद्भ्योऽधीतपरीक्षां प्रसन्नतया ददति त एवाऽध्यापका विद्यार्थिनो विदुष: कर्त्तुं शक्नुवन्ति ये प्रीत्या सम्यगध्याप्य विरोधिवत्परीक्षयन्ति। य एवमुभये प्रयतन्ते ते नद्योन्नतिवत् प्रवर्धन्ते॥ १२॥

पदार्थ:-हे मनुष्यो! **(स:)** वह **(नभ:)** जल **(तरीयान्)** तैरने और **(इषिर:)** प्राप्त होने योग्य **(परिज्मा)** सर्वत्र प्राप्त होने वाला **(ऊर्जाम्)** बल से युक्त सेनाओं वा अन्नादिकों का **(पति:)** स्वामी पालन करने वाला **(न:)** हम लोगों की **(गिर:)** उत्तम शिक्षा से युक्त वाणियों को **(शृणोतु)** सुने तथा **(शुभ्रा:)** श्वेत वर्ण वाले **(पुर:)** नगरों के **(न)** सदृश **(आप:)** और जलों के सदृश विद्याओं से व्याप्त विद्वान् जन **(न:)** हम लोगों की वाणियों को सुनो **(बबृहाणस्य)** उत्तम प्रकार बढ़े **(अद्रे:)** मेघ के **(स्रुच:)** चलनेवालों के सदृश हम लोगों की वाणियों को विद्वान् जन **(परि, शृण्वणतु)** सुनें॥ १२॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। वे ही जन विद्वान् होने योग्य हैं जो विद्वानों से पढ़ी हुई विद्या की परीक्षा को प्रसन्नता से देते हैं और वे ही अध्यापक विद्यार्थियों को विद्वान् कर सकते हैं, जो प्रीति से उत्तम प्रकार पढ़ा के विरोधियों के सदृश परीक्षा लेते हैं। जो इस प्रकार दोनों प्रयत्न करते हैं, वे नदी की उन्नति के समान अच्छे प्रकार बढ़ते हैं॥ १२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वि॒दा चि॒न्नु म॑हान्तो॒ ये व॒ एवा॒ ब्रवा॑म दस्मा॒ वार्यं॑ दधा॑ना:।

वय॑श्च॒न सु॒भ्व॑: आव॑ यन्ति क्षु॒भा मर्त॑मनु॑यतं वध॒स्नै:॥ १३॥

वि॒द। चि॒त्। नु। म॒हा॒न्त॒:। ये। व॒:। एवा॑:। ब्रवा॑म। दु॒स्मा॒:। वार्य॑म्। दधा॑ना:। वय॑:। च॒न। सु॒ऽभ्व॑:। आ। अव॑। य॒न्ति॒। क्षु॒भा। मर्त॑म्। अनु॑ऽयतम्। व॒ध॒ऽस्नै:॥ १३॥

पदार्थः-(विदा) विजानीत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(चित्)** अपि **(नु)** सद्यः **(महान्तः) (ये) (वः)** युष्मान् **(एवाः) (ब्रवाम)** वदेम **(दस्माः)** दुःखोपक्षेतारः **(वार्य्यम्)** वरणीयं सुखम् **(दधानाः) (वयः)** जीवनम् **(चन)** अपि **(सुभ्वः)** ये शोभनेषु कर्म्मसु भवन्ति **(आ) (अव) (यन्ति)** गच्छन्ति **(क्षुभा)** संचलनेन **(मर्त्तम्)** मनुष्यम् **(अनुयतम्)** आनुकूल्येन यतन्तम् **(वधस्नैः)** ये वधेन स्नान्ति पवित्रा भवन्ति ते॥१३॥

अन्वयः-हे दस्मा महान्तो जना! ये वार्य्यं वयश्चन दधानाः सुभ्वो वयं यद्वो ब्रवाम तदेवाश्चिन्नु यूयं विदा। ये वधस्नैः क्षुभाऽनुयतं मर्त्तमाव यन्ति तान् यूयं शिक्षध्वम्॥१३॥

भावार्थः-हे मनुष्या! यथा विद्वांसः शुभकर्माचरेयुरुपदिशेयुश्च तथैव यूयमाचरत ये मनुष्यान् क्षोभयन्ति तान् दण्डयत॥१३॥

पदार्थः-हे **(दस्माः)** दुःख की उपेक्षा करने वाले **(महान्तः)** बड़े श्रेष्ठ जनो! **(ये)** जो **(वार्य्यम्)** स्वीकार करने योग्य सुख और **(वयः)** जीवन को **(चन)** भी **(दधानाः)** धारण करते हुए **(सुभ्वः)** श्रेष्ठ कर्म्मों में प्रवृत्त होने वाले हम लोग जो **(वः)** आप लोगों को **(ब्रवाम)** कहें, उसके **(एवाः)** ही **(चित्)** निश्चय **(नु)** शीघ्र आप लोग **(विदा)** जानिये जो **(वधस्नैः)** ताड़न से स्नान करते अर्थात् पवित्र होते हैं, उनके साथ **(क्षुभा)** उत्तम प्रकार चलने से **(अनुयतम्)** अनुकूलता से प्रयत्न करते हुए **(मर्त्तम्)** मनुष्य को **(आ, अव, यन्ति)** उत्तम प्रकार प्राप्त होते हैं, उनकी आप लोग शिक्षा करो॥१३॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् जन शुभ कर्म्म को करें और उपदेश देवें, वैसे ही आप लोग आचरण करो और जो मनुष्य को क्लेश देते हैं, उनको दण्ड दीजिये॥१३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ दैव्या॑नि॒ पार्थि॑वानि॒ जन्मा॒पश्चाच्छा॒ सुम॑खाय वोचम्।
वर्ध॑न्तां॒ द्यावो॒ गिर॑श्चन्द्राग्रा॑ उ॒दा व॑र्धन्ताम॒भिषा॑ता॒ अर्णा॑ः॥१४॥

आ। दैव्या॑नि। पार्थि॑वानि। जन्म॑। अ॒पः। च॒। अच्छ॑। सुऽम॑खाय। वो॒च॒म्। वर्ध॑न्ताम्। द्यावः॑। गिरः॑। च॒न्द्रऽअ॑ग्राः। उ॒दा। व॒र्ध॒न्ता॒म्। अ॒भिऽसा॑ताः। अर्णा॑ः॥१४॥

पदार्थः-(आ) समन्तात् **(दैव्यानि)** देवेषु दिव्येषु गुणेषु भवानि **(पार्थिवानि)** पृथिव्यां विदितानि **(जन्म)** जन्मानि **(अपः)** अपांसि कर्म्माणि **(च) (अच्छा)** सुष्ठु। अत्र **संहितायामिति** दीर्घः। **(सुमखाय)** शोभना मखा यज्ञा यस्य तस्मै **(वोचम्)** उपदिशेयम् **(वर्धन्ताम्) (द्यावः)** सत्याः कामाः **(गिरः)** सुशिक्षिता वाचः **(चन्द्राग्राः)** चन्द्रं सुवर्णमानन्दो वाऽग्रे यासां ताः **(उदा)** उदकेन **(वर्धन्ताम्) (अभिषाताः)** अभितो विभक्ताः **(अर्णाः)** समुद्राः॥१४॥

अन्वयः-हे मनुष्या! अहं यानि दैव्यानि पार्थिवानि जन्मापश्चाच्छाऽऽवोचं येनोदा अर्णा इवाऽस्माकं

चन्द्राग्रा अभिषाता द्यावो गिरश्च वर्धन्ताम् यत: सुमखाय प्राणिनो वर्धन्ताम्॥१४॥

भावार्थ:-अत्र [वाचकलुप्तो]पमालङ्कार:। हे मनुष्या! यूयं धर्म्याणि कर्म्माणि शुभान् गुणांश्च गृहीत्वा स्वकीया: कामना वाणीं चाऽलं कुरुत यथोदकेन नद्य: समुद्राश्च वर्धन्ते तथैव धर्म्मयुक्तेन पुरुषार्थेन मनुष्या वर्धन्ते॥१४॥

पदार्थ:-हे मनुष्यो! मैं जिन **(दैव्यानि)** श्रेष्ठ गुणों में हुए **(पार्थिवानि)** पृथिवीं में विदित **(जन्म)** जन्मों और **(अप:)** कर्म्मों को **(च)** भी **(अच्छा)** उत्तम प्रकार **(आ, वोचम्)** सब ओर से उपदेश करूं जिस **(उदा)** जल से **(अर्णा:)** समुद्रों के सदृश हम लोगों की **(चन्द्राग्रा:)** सुवर्ण वा आनन्द अग्रे अर्थात् परिणाम दशा में जिनके उन **(अभिषाता:)** चारों ओर से बँटी हुई **(द्याव:)** सत्य कामनाओं को और **(गिर:)** उत्तम प्रकार शिक्षित वाणियों की **(वर्धन्ताम्)** वृद्धि कीजिये जिससे **(सुमखाय)** शोभन यज्ञों वाले के लिये प्राणियों की **(वर्धन्ताम्)** वृद्धि हो॥१४॥

भावार्थ:-इस मन्त्र में [वाचकलुप्तो]पमालङ्कार है। हे मनुष्यो! आप लोग धर्म्मयुक्त कर्म्मों और श्रेष्ठ गुणों को ग्रहण करके अपनी कामनाओं और वाणी को शोभित करो, जैसे जल से नदियां और समुद्र बढ़ते हैं, वैसे ही धर्म्मयुक्त पुरुषार्थ से मनुष्य बढ़ते हैं॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च।

सिषक्तु माता मही रसा न: स्मत् सूरिभिर्ऋजुहस्त ऋजुवनि:॥१५॥१५॥

पदेऽपदे। मे। जरिमा। नि। धायि। वरूत्री। वा। शक्रा। या। पायुऽभि:। च। सिसुक्तु। माता। मही। रसा। न:। स्मत्। सूरिऽभि:। ऋजुऽहस्ता। ऋजुऽवनि:॥१५॥

पदार्थ:-(पदेपदे) प्राप्तव्ये प्राप्तव्ये वेदितव्ये वेदितव्ये गन्तव्ये गन्तव्ये वा पदार्थे **(मे)** मम **(जरिमा)** स्तावका **(नि)** नितराम् **(धायि)** निधीयते **(वरूत्री)** वरसुखप्रदा **(वा)** **(शक्रा)** शक्तिनिमित्ता **(या)** **(पायुभि:)** रक्षणै: **(च)** **(सिषक्तु)** सम्बध्नातु **(माता)** जननी **(महा)** महती वाग्भूमिर्वा **(रसा)** रसादिगुणयुक्ता **(न:)** अस्मान् **(स्मत्)** एव **(सूरिभि:)** विद्वद्भि: **(ऋजुहस्ता)** ऋजू सरलौ हस्तौ यस्या यस्यां वा सा **(ऋजुवनि:)** ऋजूनामकुटिलानां पदार्थानां संविभाजिका॥१५॥

अन्वय:-हे मनुष्या! सूरिभि: पायुभिश्च या मे पदेपदे वरूत्री जरिमा वा शक्रा माता रसा मही ऋजुहस्ता ऋजुवनिर्न: सिषक्तु सा स्मन्निधायि॥१५॥

भावार्थ:-हे मनुष्या! यथा माताऽपत्यानि रक्षति तथैव विद्वत्सङ्गेन लब्धा सुशिक्षिता विद्या विदुष: सर्वतो रक्षति॥१५॥

पदार्थः-हे मनुष्यो! (**सूरिभिः**) विद्वानों और (**पायुभिः**) रक्षकों से (**च**) और (**या**) जो (**मे**) मेरे (**पदेपदे**) प्राप्त होने प्राप्त होने, जानने जानने वा जाने जाने योग्य पदार्थ में (**वरूत्री**) श्रेष्ठ सुख की देने (**जरिमा**) और स्तुति कराने वाली (**वा**) वा (**शक्रा**) सामर्थ्य में कारण (**माता**) माता (**रस**) रस आदि गुणों से युक्त (**मही**) बड़ी वाणी वा भूमि (**ऋजुहस्ता**) ऋजु अर्थात् सरल हस्त जिसके वा जिसमें वह (**ऋजुवनिः**) ऋजु अर्थात् नहीं जो कुटिल उन पदार्थों के विभक्त करने वाली (**नः**) हम लोगों को (**सिषक्तु**) सम्बन्धित करे वह (**स्मत्**) ही (**नि**) निरन्तर (**धायि**) स्थित की जाती है॥१५॥

भावार्थः-हे मनुष्यो! जैसे माता सन्तानों की रक्षा करती है, वैसे ही विद्वानों के संग से प्राप्त और उत्तम प्रकार शिक्षित विद्या विद्वानों की सब प्रकार रक्षा करती है॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ।
मा नोऽहिर्बुध्न्यो रिषे धात्तुस्माकं भूदुपमातिवनिः॥१६॥

कथा। दाशेम। नमसा। सुऽदानून्। एवऽया। मरुतः। अच्छऽउक्तौ। प्रऽश्रवसः। मरुतः। अच्छऽउक्तौ। मा। नः। अहिः। बुध्न्यः। रिषे। धात्। अस्माकम्। भूत्। उपमातिऽवनिः॥१६॥

पदार्थः-(**कथा**) केन प्रकारेण (**दाशेम**) दद्याम (**नमसा**) सत्कारेणान्नादिना वा (**सुदानून्**) उत्तमदानान् (**एवया**) गमनक्रियया (**मरुतः**) मनुष्याः (**अच्छोक्तौ**) सत्योक्तौ (**प्रश्रवसः**) प्रकृष्टं श्रवः श्रवणमन्नं वा येषान्ते (**मरुतः**) वायवः (**अच्छोक्तौ**) सम्यग्वचने (**मा**) निषेधे (**नः**) अस्मान् (**अहिः**) मेघः (**बुध्न्यः**) अन्तरिक्षे भवः (**रिषे**) अन्नाय (**धात्**) दध्यात् (**अस्माकम्**) (**भूत्**) भवेत् (**उपमातिवनिः**) उपमातेर्विभाजकः॥१६॥

अन्वयः-हे विद्वांसः! प्रश्रवसो मरुतो वयमेवयाच्छोक्तौ नमसा सुदानून् कथा दाशेम यथा मरुतोच्छोक्तौ प्रवर्त्तयन्ति तथा नोऽस्मानत्र प्रवर्त्तयत। यथा बुध्न्योऽहिरस्माकमुपमातिवनिर्भूत् रिषेऽस्मान् मा धात्तथा यूयमप्यस्मान् हिंसायां मा प्रवर्त्तयत॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं विदुषः प्रति पृष्ट्वा वयं किं दद्याम कस्मात् किं गृह्णीयामेति निश्चित्य व्यवहरत यथा मेघः स्वयं छिन्नो भिन्नो भूत्वाऽन्यान् रक्षति तथैव विद्वांसस्स्वयं पराऽपकारेण छिन्नो भिन्ना भूत्वाप्यन्यान् सदैवोपकुर्वन्ति॥१६॥

पदार्थः-हे विद्वानो! (**प्रश्रवसः**) उत्तम श्रवण वा अन्न जिनका वे (**मरुतः**) मनुष्य हम लोग (**एवया**) गमन क्रिया से (**अच्छोक्तौ**) सत्य कथन में (**नमसा**) सत्कार वा अन्न आदि से (**सुदानून्**) उत्तम दानों को (**कथा**) कैसे (**दाशेम**) देवें जैसे (**मरुतः**) पवन (**अच्छोक्तौ**) उत्तम वचन में प्रवृत्त कराते हैं, वैसे (**नः**) हम लोगों को इस विषय में प्रवृत्त करिये। जैसे (**बुध्न्यः**) अन्तरिक्ष में हुआ (**अहिः**) मेघ

(अस्माकम्) हम लोगों का **(उपमातिवनिः)** उपमा का विभाग करने वाला **(भूत्)** हो और **(रिषे)** अन्न के लिये हम लोगों को **(मा)** नहीं **(धात्)** धारण करे, वैसे आप लोग भी हम लोगों को हिंसा में न प्रवृत्त कीजिये॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग विद्वानों के प्रति प्रश्न करके कि हम लोग क्या देवें और किससे क्या ग्रहण करें, ऐसा निश्चय करके व्यवहार करो और जैसे मेघ स्वयं छिन्न-भिन्न होके अन्यों की रक्षा करता है, वैसे ही विद्वान् जन स्वयं दूसरे से अपकार किये हुये से छिन्न-भिन्न होकर भी अन्यों का सदा उपकार करते हैं॥१६॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

इति॑ चि॒न्नु प्र॒जायै॑ पशु॒मत्यै॒ देवा॑सो॒ वन॑ते॒ मर्त्यो॑ व॒ आ दे॑वासो वनते॒ मर्त्यो॑ वः।
अत्रा॑ शि॒वां त॒न्वो॑ धा॒सिम॒स्या ज॒रां चि॑न्मे॒ निर्ऋ॑तिर्जग्रसीत॥ १७॥

इति॑। चि॒त्। नु। प्र॒ऽजायै॑। प॒शु॒ऽमत्यै॑। देवा॑सः। वन॑ते। मर्त्यः॑। व॒ः। आ। दे॒वा॒सः॒। वन॑ते। मर्त्यः॑। व॒ः। अत्र॑। शि॒वाम्। त॒न्वः॑। धा॒सिम्। अ॒स्याः॒। ज॒राम्। चि॒त्। मे॒। निः॒ऽऋ॑तिः। ज॒ग्र॒सी॒त॒॥ १७॥

पदार्थः-**(इति)** अनेन प्रकारेण **(चित्)** निश्चयेन **(नु)** सद्यः **(प्रजायै)** **(पशुमत्यै)** बहवः पशवो विद्यन्ते यस्यां तस्यै **(देवासः)** विद्वांसः **(वनते)** सम्भजसि **(मर्त्यः)** मनुष्यः **(वः)** युष्मान् **(आ)** समन्तात् **(देवासः)** विद्वांसः **(वनते)** सम्भजति **(मर्त्यः)** **(वः)** युष्माकम् **(अत्रा)** अस्यां प्रजायाम्। अत्र **ऋचि तुनुघे**ति दीर्घः। **(शिवाम्)** मङ्गलमयीम् **(तन्वः)** शरीरस्य **(धासिम्)** अन्नम् **(अस्याः)** प्रजायाः **(जराम्)** वृद्धावस्थाम् **(चित्)** निश्चयेन **(मे)** मम **(निर्ऋतिः)** भूमिः। **निर्ऋतिरिति पृथिवीनामसु पठितम्।** (निघं०१।१) **(जग्रसीत)** ग्रसते॥१७॥

अन्वयः-हे देवासो! यो मर्त्यो वः पशुमत्यै प्रजायै धासिं वनते यश्चिदित्यस्याः प्रजायास्तन्वः शिवां जरामा वनते यो मर्त्यश्चिन्मे तन्वः शिवां जरां वनते निर्ऋतिरिवात्रा वो धासिं जग्रसीतेति, हे देवासो! यूयमस्मभ्यमेतन्नु साध्नुत॥१७॥

भावार्थः-हे विद्वांसो! यूयमीदृशं प्रयत्नं कुरुत येन मनुष्याणामायुर्वर्द्धेत यावन्मनुष्या वृद्धा न भवन्ति तावदेते परीक्षका अपि न जायन्ते॥१७॥

पदार्थः-हे **(देवासः)** विद्वान् जनो! जो **(मर्त्यः)** मनुष्य **(वः)** आप लोगों को **(पशुमत्यै)** बहुत पशु विद्यमान जिसमें उस **(प्रजायै)** प्रजा के लिये **(धासिम्)** अन्न की **(वनते)** सेवा करता है और जो **(चित्)** निश्चय से **(इति)** इस प्रकार से **(अस्याः)** इस प्रजा के **(तन्वः)** शरीर की **(शिवाम्)** मंगलस्वरूप **(जराम्)** वृद्धावस्था की **(आ, वनते)** अच्छे प्रकार सेवा करता है और जो **(मर्त्यः)** मनुष्य **(चित्)** निश्चय से **(मे)** मेरे शरीर की मंगलस्वरूप वृद्धावस्था का सेवन करता है और **(निर्ऋतिः)** भूमि के सदृश

(अत्रा) इस प्रजा में **(वः)** आप लोगों के अन्न को **(जग्रसीत)** खाता है, इस प्रकार हे **(देवासः)** विद्वान्! आप लोग हम लोगों के लिये इसको **(नु)** शीघ्र सिद्ध कीजिये॥१७॥

भावार्थः-हे विद्वान् जनो! आप लोग ऐसा प्रयत्न करो जिससे मनुष्यों की अवस्था बढ़े, जब तक मनुष्य वृद्ध नहीं होते, तब तक ये परीक्षक भी नहीं होते हैं॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तां वो॑ देवाः सुम॒तिमू॒र्जय॑न्ती॒मिष॑मश्याम वसव॒ः शस॒ा गोः।
सा नः॑ सु॒दानु॑र्मृ॒ळय॑न्ती दे॒वी प्रति॒ द्रव॑न्ती सुवि॒ताय॑ गम्याः॥१८॥

ताम्। वः॒। दे॒वाः॒। सु॒ऽम॒तिम्। ऊ॒र्जय॑न्तीम्। इष॑म्। अ॒श्या॒म॒। व॒स॒वः॒। शसा॑। गोः। सा। नः॒। सु॒ऽदानुः॑। मृ॒ळय॑न्ती। दे॒वी। प्रति॑। द्रव॑न्ती। सु॒वि॒ताय॑। ग॒म्याः॒॥१८॥

पदार्थः-**(ताम्)** **(वः)** युष्मान् **(देवाः)** धार्मिका विद्वांसः **(सुमतिम्)** श्रेष्ठां प्रज्ञाम् **(ऊर्जयन्तीम्)** पराक्रमादिदानेनोन्नयन्तीम् **(इषम्)** अन्नम् **(अश्याम)** भुञ्जीमहि **(वसवः)** शुभगुणेषु कृतनिवासाः **(शसा)** प्रशंसया **(गोः)** पृथिव्या मध्ये **(सा)** **(नः)** अस्मान् **(सुदानुः)** उत्तमदाना **(मृळयन्ती)** सुखयन्ती **(देवी)** विदुषी **(प्रति)** **(द्रवन्ती)** जानन्ती गच्छन्ती वा **(सुविताय)** ऐश्वर्य्याय **(गम्याः)** प्राप्नुयाः॥१८॥

अन्वयः-हे देवा या सुदानुर्मृळयन्ती प्रति द्रवन्ती देवी सुविताय वो याति तामूर्जयन्तीं सुमतिमिषं च वयमश्याम। हे वसवो! या गोः शसा सह वर्त्तते सा नोऽस्मान् प्राप्नोतु। हे विदुषि स्त्रि! त्वमेतान् प्रति गम्याः॥१८॥

भावार्थः-मनुष्याः सदा सुसंस्कृतं बुद्धिबलवर्धकमन्नं सदाऽदन्तु येन प्रज्ञा कीर्त्तिर्धनं च वर्धेत॥१८॥

पदार्थः-हे **(देवाः)** धार्मिक विद्वान् जनो! जो **(सुदानुः)** उत्तम दान से युक्त **(मृळयन्ती)** सुख देती **([प्रति] द्रवन्ती)** जानती वा चलती हुई **(देवी)** विद्यायुक्त स्त्री **(सुविताय)** ऐश्वर्य्य के लिये **(वः)** आप लोगों को प्राप्त होती है **(ताम्)** उसको **(ऊर्जयन्तीम्)** तथा पराक्रम आदि के दान से वृद्धि कराती हुई **(सुमतिम्)** श्रेष्ठ बुद्धि को और **(इषम्)** अन्न को हम लोग **(अश्याम)** भोगें। हे **(वसवः)** उत्तम गुणों में निवास किये हुए जनो! जो **(गोः)** पृथिवी के मध्य में **(शसा)** प्रशंसा के साथ वर्त्तमान है **(सा)** वह **(नः)** हम लोगों को प्राप्त हो। और हे विद्यायुक्त स्त्री! आप इन जनों के **(प्रति)** प्रति **(गम्याः)** प्राप्त हूजिये॥१८॥

भावार्थः-मनुष्य सदा उत्तम प्रकार घृत आदि के संस्कार से युक्त बुद्धि और बल के बढाने वाले अन्न का सदा भोग करें, जिससे बुद्धि यश और धन बढ़े॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु।

उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः॥ १९॥

अभि। नः। इळा। यूथस्य। माता। स्मत्। नदीभिः। उर्वशी। वा। गृणातु। उर्वशी। वा। बृहत्ऽदिवा। गृणाना। अभिऽऊर्ण्वाना। प्रऽभृथस्य। आयोः॥ १९॥

पदार्थः-(अभि) **(नः)** अस्मान् **(इळा)** प्रशंसनीया वाग्भूमिर्वा **(यूथस्य)** समूहस्य **(माता)** मान्यकर्त्री जननीव **(स्मत्)** एव **(नदीभिः)** सद्भिरिव नाडीभिः **(उर्वशी)** उरवो बहवो वशे भवन्ति यया सा वाणी। **उर्वशीति पदनामसु पठितम्।** (निघं०४.२) **(वा)** **(गृणातु)** स्तौतु **(उर्वशी)** बहुवशकर्त्री प्रज्ञा **(वा)** **(बृहद्दिवा)** बृहती द्यौः प्रकाशो यस्याः सा **(गृणाना)** स्ताविका **(अभ्यूर्ण्वाना)** आभिमुख्येनार्थानाच्छादयन्ती **(प्रभृथस्य)** प्रकर्षेण ध्रियमाणस्य **(आयोः)** जीवनस्य॥ १९॥

अन्वयः-हे मनुष्या! येळा यूथस्य मातेव नोऽस्मानभि गृणातु वायोरुर्वशी नदीभिस्स्मद् गृणातु वा बृहद्दिवा गृणानोर्वश्यभ्यूर्ण्वाना प्रभृथस्यायोर्गृणातु॥ १९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं यदि सत्यभाषणयुक्तां वाणीं धरत तर्हि युष्माकमायुर्वर्धेत॥ १९॥

पदार्थः-हे मनुष्यो! जो **(इळा)** प्रशंसा करने योग्य वाणी वा भूमि **(यूथस्य)** समूह की **(माता)** आदर करने वाली माता के सदृश **(नः)** हम लोगों की **(अभि, गृणातु)** सब ओर से स्तुति करे **(वा)** वा **(आयोः)** जीवन की **(उर्वशी)** बहुत वश में होते हैं, जिससे ऐसी वाणी **(नदीभिः)** श्रेष्ठों के सदृश नाड़ियों से **(स्मत्)** ही स्तुति करे **(वा)** वा **(बृहद्दिवा)** बड़ा प्रकाश जिसका ऐसी **(गृणाना)** स्तुति करने वाली **(उर्वशी)** और बहुतों को वश में करने वाली बुद्धि **(अभ्यूर्ण्वाना)** संमुखता से अर्थों को ढांपती हुई **(प्रभृथस्य)** प्रकर्षता से धारण किये गये जीवन की स्तुति करे॥ १९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग जो सत्यभाषण से युक्त वाणी को धारण करें तो आप लोगों की अवस्था बढ़े॥ १९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सिषक्तु न ऊर्जव्यस्य पुष्टेः॥ २०॥ १६॥

सिषक्तु। नः। ऊर्जव्यस्य। पुष्टेः॥ २०॥

पदार्थः-(सिषक्तु) परिचरतु **(नः)** अस्मान् **(ऊर्जव्यस्य)** बहुबलप्राप्तस्य **(पुष्टेः)**॥ २०॥

अन्वयः-यो विद्वान् भवेत् स न ऊर्जव्यस्य पुष्टेर्योगं सिषक्तु॥ २०॥

भावार्थः-यो जगदुपकारी भवति स एव सर्वविद्यासम्बन्धं कर्त्तुमर्हति॥ २०॥

अत्र विश्वेषां देवानां गुणवर्णनं कृतमतोऽस्य सूक्तस्यार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकचत्वारिंशत्तमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-जो विद्वान् होवे वह **(नः)** हम लोगों को **(ऊर्जव्यस्य)** बहुत बल से प्राप्त **(पुष्टेः)** पुष्टि के योग का **(सिषक्तु)** सेवन करे॥ २०॥

भावार्थः-जो जगत् का उपकार करने वाला होता है, वही सम्पूर्ण विद्याओं के सम्बन्ध करने योग्य होता है॥ २०॥

इस सूक्त में विश्वेदेवों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकतालीसवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टादशर्चस्य द्विचत्वारिंशत्तमस्य सूक्तस्याऽत्रिर्ऋषिः। विश्वेदेवा देवताः। १, ४, ६, ९, ११, १२, १८ निचृत्त्रिष्टुप्। २, १५ विराट् त्रिष्टुप्। ३, ५, ७, ८, १०, १३, १४, १६ त्रिष्टुप् छन्दः। धैवतः स्वरः। १७ याजुषी पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विश्वेदेवगुणानाह॥

अब अठारह ऋचा वाले बयालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विश्वेदेवों के गुणों को कहते हैं॥

प्र शंतमा॒ वरु॑णं दीधि॒ती गीर्मि॒त्रं भग॒मदि॑तिं नू॒नम॑श्याः।
पृष॑द्योनि॒: पञ्च॑होता शृणो॒त्वतू॑र्तपन्था॒ असु॑रो मयो॒भुः॥ १॥

प्र। शम्ऽतमा। वरु॑णम्। दीधि॑ती। गीः। मि॒त्रम्। भग॑म्। अदि॑तिम्। नू॒नम्। अ॒श्याः। पृष॑त्ऽयोनिः। पञ्च॑ऽहोता। शृ॒णो॒तु॒। अतू॑र्तऽपन्थाः। असु॑रः। म॒यः॒ऽभुः॥ १॥

पदार्थः-(प्र) (शन्तमा) अतिशयेन सुखकरी **(वरुणम्)** उदानम् **(दीधिती)** प्रकाशयन्ती **(गीः)** वाक् **(मित्रम्)** प्राणम् **(भगम्)** ऐश्वर्य्यम् **(अदितिम्)** आकाशं भूमिं वा **(नूनम्) (अश्याः)** प्राप्नुयाः **(पृषद्योनिः)** पृषतिर्वृष्टिर्योनिर्यस्याः सा **(पञ्चहोता)** पञ्च प्राणा होता आदातारो यस्याः सा **(शृणोतु) (अतूर्त्तपन्थाः)** अतूर्त्तोऽहिंसितः पन्था यस्य सः। **(असुरः)** प्रकाशाऽऽवरको मेघः **(मयोभुः)** सुखं भावुकः॥ १॥

अन्वयः-हे विद्वन्! या वरुणं दीधिती शन्तमा पृषद्योनिः पञ्चहोता गीर्वर्त्तते तां मित्रं भगमदितिं च नूनं प्राश्याः। योऽतूर्त्तपन्थाः मयोभुरसुरो मेघोऽस्ति तत्रस्था या वाक् तां भवाञ्छृणोतु॥ १॥

भावार्थः-सर्वेषु चराचरेषु पदार्थेष्वाकाशसंयोगाद् वाणी वर्त्तते तां विद्वांस एव ज्ञातुं कार्य्येषु व्यवहर्त्तुं च शक्नुवन्ति॥ १॥

पदार्थः-हे विद्वन्! जो **(वरुणम्)** उदान वायु को **(दीधिती)** प्रकाशित करती हुई **(शन्तमा)** अत्यन्त सुख करने वाली **(पृषद्योनिः)** वृष्टि है कारण जिसका ऐसी तथा **(पञ्चहोता)** पांच प्राण ग्रहण करने वाले जिसके ऐसी **(गीः)** वाणी वर्त्तमान है उसको **(मित्रम्)** प्राण **(भगम्)** ऐश्वर्य और **(अदितिम्)** आकाश वा भूमि को **(नूनम्)** निश्चय करके **(प्र, अश्याः)** प्राप्त होवे और जो **(अतूर्त्तपन्थाः)** नहीं हिंसित है मार्ग जिसका ऐसा **(मयोभुः)** सुखकारक **(असुरः)** प्रकाश का आवरण करने वाले मेघ है, उसमें स्थित जो वाणी उसको आप **(शृणोतु)** सुनिये॥ १॥

भावार्थः-सब चर और अचर पदार्थों में आकाश के संयोग से वाणी वर्त्तमान है, उसको विद्वान् ही जान और कार्य्यों में व्यवहार में ला सकते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्रति॑ मे॒ स्तोम॒मदि॑तिर्जगृभ्यात् सू॒नुं न मा॒ता हृद्यं॑ सु॒शेव॑म्।
ब्रह्म॑ प्रि॒यं दे॒वहि॑तं॒ यदस्त्य॒हं मि॒त्रे वरु॑णे॒ यन्म॑यो॒भु॥ २॥

प्रति॑। मे॒। स्तोम॑म्। अदि॑तिः। जगृभ्यात्। सू॒नुम्। न। मा॒ता। हृद्य॑म्। सु॒ऽशेव॑म्। ब्रह्म॑। प्रि॒यम्। दे॒वऽहि॑तम्। यत्। अस्ति॑। अ॒हम्। मि॒त्रे। वरु॑णे। यत्। म॒यः॒ऽभु॥ २॥

पदार्थः-(प्रति) (मे) मम **(स्तोमम्)** स्तुतिम् **(अदितिः)** अखण्डसुखप्रदा **(जगृभ्यात्)** भृशं गृह्णीयात् **(सूनुम्)** अपत्यम् **(न)** इव **(माता) (हृद्यम्)** हृदयस्य प्रियम् **(सुशेवम्)** सुसुखकरम् **(ब्रह्म)** सच्चिदानन्दलक्षणं चेतनम् **(प्रियम्)** कमनीयं प्रीतिकरम् **(देवहितम्)** देवेभ्यो विद्वद्भ्यो हितकारि **(यत्) (अस्ति) (अहम्) (मित्रे)** प्राणे **(वरुणे)** उदाने **(यत्) (मयोभुः)** सुखं भावुकम्॥ २॥

अन्वयः-हे मनुष्या! अदितिर्माता हृद्यं सूनुं न यो मे स्तोमं प्रति जगृभ्याद्यत्सुशेवं प्रियं देवहितं ब्रह्मास्ति यच्च मित्रे वरुणे मयोभ्वस्ति तदहमिष्टं मन्ये तथा यूयमपि मन्यध्वम्॥ २॥

भावार्थः-हे मनुष्या! यो जगदीश्वरः प्रेमभावेन स्तुतस्तदाऽऽज्ञासेवनं कृतं चेत्तर्हि स यथा कृपायमाणा माता सद्यो जातं बालकमिव धार्मिकमुपासकमनुगृह्णाति, यो जगदीश्वरः सर्वत्र व्याप्तोऽपि प्राणादिषु प्राप्यते तं सर्वदा सुखप्रदं वयमुपास्महि॥ २॥

पदार्थः-हे मनुष्यो! **(अदितिः)** पूर्ण सुख की देने वाली **(माता)** माता **(हृद्यम्)** हृदय के प्रिय **(सूनुम्)** सन्तान के **(न)** सदृश जो **(मे)** मेरी **(स्तोमम्)** स्तुति को **(प्रति, जगृभ्यात्)** अत्यन्त ग्रहण करे और **(यत्)** जिस **(सुशेवम्)** उत्तम प्रकार सुख देने वाले **(प्रियम्)** सुन्दर और प्रीतिकारक तथा **(देवहितम्)** देव अर्थात् विद्वानों के लिये हितकारक **(ब्रह्म)** सत्, चित् और आनन्दस्वरूप चेतन **(अस्ति)** है और **(यत्)** जो **(मित्रे)** प्राणवायु और **(वरुणे)** उदान वायु में **(मयोभु)** सुखकारक है, उसको **(अहम्)** मैं इष्ट मानता हूं, वैसे आप लोग भी मानिये॥ २॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर प्रेमभाव से स्तुति किया गया और जो उसकी आज्ञा का सेवन किया हो तो वह जैसे कृपा करनेवाली माता शीघ्र उत्पन्न हुए बालक पर वैसे धार्मिक उपासक जन पर दया करता है, जो जगदीश्वर सर्वत्र व्याप्त हुआ भी प्राणादिकों में पाया जाता है, उस सब काल में सुख देने वाले परमात्मा की हम उपासना करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उदी॑रय क॒वित॑मं कवी॒नामु॒नत्तै॑न॒मभि मध्वा॑ घृ॒तेन॑।
स नो॒ वसू॑नि॒ प्रय॑ता हि॒तानि॑ च॒न्द्राणि॑ दे॒वः स॑वि॒ता सु॑वाति॥ ३॥

उत्। ईरय। कविऽतमम्। कवीनाम्। उनत्त। एनम्। अभि। मध्वा। घृतेन। सः। नः। वसूनि। प्रऽयता। हितानि। चन्द्राणि। देवः। सविता। सुवाति॥३॥

पदार्थः-(उत्) (ईरय) प्रेरयत **(कवितमम्)** अतिशयेन मेधाविनम् **(कवीनाम्)** मेधाविनाम् **(उनत्त)** विद्यासुशिक्षाभ्यां सिञ्चत **(एनम्) (अभि)** आभिमुख्ये **(मध्वा)** मधुरेण **(घृतेन)** उदकेनेव **(सः) (नः)** अस्मभ्यम् **(वसूनि)** द्रव्याणि **(प्रयता)** प्रयत्नसाध्यानि **(हितानि)** हितकराणि **(चन्द्राणि)** आनन्दप्रदानि सुवर्णादीनि **(देवः)** विद्वान् **(सविता)** विद्यैश्वर्य्यकारकः **(सुवाति)** सुवेत् प्रयच्छेत्॥३॥

अन्वयः-हे मनुष्या! यथा कृषीवला मध्वा घृतेन क्षेत्रादीनि सिक्त्वा शस्यादीनि लभन्ते तथैवैनं कवीनां कवितममुदीरयाभ्युदयायोनत्त। हे विद्वांसो! यं कवीनां कवितममुदीरय स सविता देवो नो प्रयता चन्द्राणि हितानि वसूनि सुवाति॥३॥

भावार्थः-हे विद्वांसोऽध्यापका यो हि सर्वेभ्य उत्तमोऽखिलविद्योऽनूचानो विद्वान् भवेत्तं गृहाश्रमं मा कुर्वित्युपदिशत। येन संसारस्थमनुष्याणां महत्सुखं वर्धेत, कुतो यो हि पूर्णविद्यो भूत्वा गृहाश्रमं बहुव्यापारवत्त्वेन वीर्य्यादिक्षयादल्पायुर्भूत्वा सततं मनुष्यहितं कर्त्तुं न शक्नुयात्॥३॥

पदार्थः-हे मनुष्यो! जैसे खेत बोने वाले जन **(मध्वा)** मधुर **(घृतेन)** जल से क्षेत्र आदि सींच कर अन्नादिकों को प्राप्त होते हैं, वैसे ही **(एनम्)** इस **(कवीनाम्)** बुद्धिमानों के मध्य में **(कवितमम्)** अत्यन्त बुद्धिमान् को **(उत्, ईरय)** उत्तमता से प्रेरणा देओ तथा **(अभि, उनत्त)** अभ्युदय के अर्थ विद्या और उत्तम शिक्षा से सींचो और हे विद्वन्! जिस कवियों के मध्य में श्रेष्ठ कवि की प्रेरणा करो **(सः)** वह **(सविता)** विद्या और ऐश्वर्य्य का करने वाला **(देवः)** विद्वान् **(नः)** हम लोगों के लिये **(प्रयता)** प्रयत्न से सिद्ध होने योग्य **(चन्द्राणि)** आनन्द के देने वाले सुवर्ण आदि **(हितानि)** हितकारक **(वसूनि)** द्रव्यों को **(सुवाति)** देवे॥३॥

भावार्थः-हे विद्वान् अध्यापक पुरुषो! आप लोग जो निश्चय करके सब से उत्तम, सम्पूर्ण विद्याओं से युक्त, श्रेष्ठ विद्वान् होवे, उसको गृहाश्रम न कर, ऐसा उपदेश दीजिये। जिससे संसार में वर्त्तमान मनुष्यों का बड़ा सुख बढ़े, क्योंकि जो निश्चय करके पूर्ण विद्यायुक्त होकर गृहाश्रम को करे, वह बहुत व्यापारवान् होने से, वीर्य्य आदि के नाश होने से, थोड़ी अवस्थायुक्त होकर निरन्तर मनुष्यों के हित करने को नहीं समर्थ होवे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम्॥४॥

सम्। इन्द्र। नः। मनसा। नेषि। गोभिः। सम्। सूरिऽभिः। हरिऽवः। सम्। स्वस्ति। सम्। ब्रह्मणा। देवऽहितम्। यत्। अस्ति। सम्। देवानाम्। सुऽमत्या। यज्ञियानाम्॥४॥

पदार्थः-(सम्) उत्तमप्रकारेण **(इन्द्र)** विद्यैश्वर्य्यसम्पन्न **(नः)** अस्मान् **(मनसा)** विज्ञानेन **(नेषि)** नयसि **(गोभिः)** इन्द्रियैर्वाग्भिर्वा **(सम्)** **(सूरिभिः)** विद्वद्भिस्सह **(हरिवः)** प्रशस्तमनुष्ययुक्त **(सम्)** **(स्वस्ति)** सुखम् **(सम्)** **(ब्रह्मणा)** वेदेन धनेनाऽन्नेन वा **(देवहितम्)** **(यत्)** **(अस्ति)** **(सम्)** **(देवानाम्)** विदुषाम् **(सुमत्या)** श्रेष्ठया प्रज्ञया **(यज्ञियानाम्)** यज्ञकर्तृणाम्॥४॥

अन्वयः-हे इन्द्र! यतस्त्वं यद् गोभिः सह सं स्वस्त्यस्ति तन्नो मनसा सन्नेषि। हे हरिवो! यत्सूरिभिः सह स्वस्त्यस्ति तन्नः सन्नेषि। यद् ब्रह्मणा सह देवहितं स्वस्त्यस्ति तन्न सन्नेषि। यद्यज्ञियानां देवानां सुमत्या सह देवहितं स्वस्त्यस्ति तन्नः सन्नेषि तस्मात् सत्कर्त्तव्योऽसि॥४॥

भावार्थः-हे मनुष्या! यूयं सत्यवाचा विद्वत्सङ्गेन वेदविद्यया श्रेष्ठप्रज्ञया च सहिताः सुभूषिताः सन्तोऽभीष्टं सुखं लभध्वम्॥४॥

पदार्थः-हे **(इन्द्र)** विद्या और ऐश्वर्य्य से युक्त जिससे आप **(यत्)** जो **(गोभिः)** इन्द्रियों वा वाणियों के साथ **(सम्, स्वस्ति)** उत्तम सुख **(अस्ति)** है वह **(नः)** हम लोगों को **(मनसा)** विज्ञान के साथ **(सम्, नेषि)** अच्छे प्रकार प्राप्त करते हैं और हे **(हरिवः)** श्रेष्ठ मनुष्यों से युक्त! जो **(सूरिभिः)** विद्वानों के साथ सुख है, वह हम लोगों को **(सम्)** एक साथ प्राप्त करते हैं और जो **(ब्रह्मणा)** वेद, धन वा अन्न के साथ **(देवहितम्)** विद्वानों का हितकारक सुख है, वह हम लोगों को **(सम्)** एक साथ प्राप्त करते हैं और जो **(यज्ञियानाम्)** यज्ञ करने वाले **(देवानाम्)** विद्वानों की **(सुमत्या)** श्रेष्ठ बुद्धि के साथ विद्वानों का हितकारक सुख है, वह हम लोगों के लिये **(सम्)** एक साथ प्राप्त करते हैं, इससे सत्कार करने योग्य हो॥४॥

भावार्थः-हे मनुष्यो! आप लोग सत्यवाणी, विद्वानों का सङ्ग, वेदविद्या और श्रेष्ठ बुद्धि के सहित उत्तम प्रकार शोभित हुए अभीष्ट सुख को प्राप्त हूजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम्।
ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः॥५॥१७॥

देवः। भगः। सविता। रायः। अंशः। इन्द्रः। वृत्रस्य। सम्ऽजितः। धनानाम्। ऋभुक्षाः। वाजः। उत। वा। पुरम्ऽधिः। अवन्तु। नः। अमृतासः। तुरासः॥१५॥

पदार्थः-(देवः) दाता **(भगः)** ऐश्वर्य्यसम्पन्नः **(सविता)** प्रेरकः **(रायः)** धनानि **(अंशः)** विभागः **(इन्द्रः)** सूर्यः **(वृत्रस्य)** मेघस्य **(संजितः)** सम्यग्जेता **(धनानाम्)** **(ऋभुक्षाः)** महान् **(वाजः)** ज्ञानवान्

(उत) अपि **(वा)** **(पुरन्धिः)** पूर्वी बह्वी धीर्यस्य सः। **(अवन्तु)** **(नः)** अस्मान् **(अमृतासः)** स्वरूपेणाऽविनाशिनः **(तुरासः)** शीघ्रकारिणस्त्वरिताः॥५॥

अन्वयः-हे मनुष्या! यथा देवो भगः सविता रायोंऽशो वृत्रस्य धनानां संजित इन्द्र ऋभुक्षा वाज उत वा पुरन्धिस्तुरासोऽमृतासो नोऽस्मानवन्तु तथैते युष्मानपि रक्षन्तु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः स्वात्मवदन्येषां सुखदुःखहानिलाभप्रतिष्ठाऽप्रतिष्ठा मन्यन्ते त एव प्रशंसार्हा जायन्ते॥५॥

पदार्थः-हे मनुष्यो! जैसे **(देवः)** दाता **(भगः)** ऐश्वर्य्य से सम्पन्न **(सविता)** प्रेरणा करने वाला **(रायः)** धनों का **(अंशः)** विभाग तथा **(वृत्रस्य)** मेघ और **(धनानाम्)** धनों का **(संजितः)** उत्तम प्रकार जीतने वाला **(इन्द्रः)** सूर्य्य **(ऋभुक्षाः)** बड़ा **(वाजः)** ज्ञानवान् **(उत)** भी **(वा)** वा **(पुरन्धिः)** बहुत बुद्धिमान् और **(तुरासः)** शीघ्र कार्य्य करने वाले तथा **(अमृतासः)** अपने रूप में नहीं नाश होने वाले **(नः)** हम लोगों की **(अवन्तु)** रक्षा करें, वैसे ये आप लोगों की भी रक्षा करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अपने सदृश अन्यों के भी सुख-दुःख, हानि-लाभ, प्रतिष्ठा और अप्रतिष्ठा को मानते हैं, वे ही प्रशंसा के योग्य होते हैं॥५॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को कहते हैं॥

मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि।
न ते पूर्वे मघवन्नापरासो न वीर्यं१ नूतनः कश्चनाप॥६॥

मरुत्वतः। अप्रतिऽइतस्य। जिष्णोः। अजूर्यतः। प्र। ब्रवाम। कृतानि। न। ते। पूर्वे। मघऽवन्। न। अपरासः। न। वीर्यम्। नूतनः। कः। चन। आप॥६॥

पदार्थः-**(मरुत्वतः)** प्रशंसितविद्वद्युक्तस्य **(अप्रतीतस्य)** प्रतीत्यविषयस्य **(जिष्णोः)** जयशीलस्य **(अजूर्य्यतः)** अप्राप्तजीर्णावस्थस्य **(प्र)** **(ब्रवामा)** उपदिशेम। अत्र **संहितायामिति** दीर्घः। **(कृतानि)** अनुष्ठितानि **(न)** **(ते)** तव **(पूर्वे)** प्राचीनाः **(मघवन्)** परमपूजितधनयुक्त **(न)** **(अपरासः)** पश्चाद्भूताः **(न)** **(वीर्य्यम्)** पराक्रमं बलम् **(नूतनः)** **(कः)** **(चन)** अपि **(आप)** व्याप्नोति॥६॥

अन्वयः-हे मघवन्नतुलविद्य विद्वन्नतिबल राजन् वा! मरुत्वतोऽप्रतीतस्याऽजूर्य्यतो जिष्णोस्ते तव यानि कृतानि वयं प्र ब्रवामा तानि न पूर्वे नापरासो व्याप्नुवन्ति तथा नूतनः कश्चन तव वीर्य्यं नाप॥६॥

भावार्थः-विद्वद्भिस्तेषामेव प्रशंसितकर्म्मणां कृत्यान्यन्येभ्य उपदेश्यानि येषामप्रतिहतानि सन्ति॥६॥

पदार्थः-हे **(मघवन्)** अत्यन्त श्रेष्ठ धन से युक्त और अत्यन्त विद्या वाले विद्वान् वा अतिबलवान् राजन्! **(मरुत्वतः)** प्रशंसित विद्वानों से युक्त **(अप्रतीतस्य)** प्रतीति के अविषय **(अजूर्य्यतः)** जिसको जीर्ण अवस्था नहीं प्राप्त हुई ऐसे **(जिष्णोः)** जीतने वाले **(ते)** आपके जिन **(कृतानि)** कृत्यों का हम लोग

(प्र, ब्रवामा) उपदेश देवें उनको **(न)** न **(पूर्वे)** प्राचीनजन **(न)** न **(अपरासः)** पीछे से हुए जन व्याप्त होते हैं और **(नूतनः)** नवीन **(कः, चन)** कोई भी, आपके **(वीर्य्यम्)** पराक्रम को **(न)** नहीं **(आप)** व्याप्त होता है॥६॥

भावार्थः-विद्वानों को चाहिये कि उन्हीं प्रशंसित कर्म वालों के कृत्यों को अन्य जनों के लिये उपदेश देवें, जिनके कर्म अप्रतिहत अर्थात् नष्ट नहीं होते हैं॥६॥

पुनर्विद्वदुपदेशविषयमाह॥

फिर विद्वानों के उपदेशविषय को कहते हैं॥

उप॑ स्तुहि प्रथ॒मं र॑त्न॒धेयं॒ बृह॒स्पति॑ सनि॒तार॒ं धना॑नाम्।

यः शंसते स्तुव॒ते शंभ॑विष्ठः पुरू॒वसु॑रा॒गम॒ज्जोहु॑वानम्॥७॥

उप॑। स्तुहि॒। प्र॒थ॒मम्। र॒त्न॒ऽधेय॑म्। बृह॒स्पति॑म्। स॒नि॒तार॑म्। धना॑नाम्। यः। शंस॑ते। स्तुव॒ते। शम्ऽभ॑विष्ठः। पु॒रु॒ऽवसु॑ः। आ॒ऽगम॑त्। जोहु॑वानम्॥७॥

पदार्थः-**(उप)** **(स्तुहि)** **(प्रथमम्)** आदिमम् **(रत्नधेयम्)** रत्नानि धेयानि तेन तम् **(बृहस्पतिम्)** बृहतां पालकम् **(सनितारम्)** संविभाजकम् **(धनानाम्)** **(यः)** **(शंसते)** प्रशंसकाय **(स्तुवते)** प्रशंसां कुर्वते **(शम्भविष्ठः)** योऽतिशयेन शम्भावयति सः **(पुरूवसुः)** पुरूणि बहूनि वसूनि धनानि यस्य सः **(आगमत्)** आगच्छेत् **(जोहुवानम्)** आहूयमानमाह्वयितारं वा॥७॥

अन्वयः-हे विद्यैश्वर्य्ययुक्त! यः पुरूवसुः शम्भविष्ठो जनः शंसते स्तुवते प्रथमं रत्नधेयं जोहुवानं बृहस्पतिं धनानां सनितारमागमत् तं त्वमुप स्तुहि॥७॥

भावार्थः-त एव प्रशंसनीया भवन्ति ये सर्वं सम्भज्य भुञ्जते॥७॥

पदार्थः-हे विद्या और ऐश्वर्य्य से युक्त! **(यः)** जो **(पुरूवसुः)** बहुत धनों से युक्त **(शम्भविष्ठः)** अत्यन्त सुखकारक जन **(शंसते)** प्रशंसा करने वाले और **(स्तुवते)** स्तुति करने वाले के लिये **(प्रथमम्)** पहिले **(रत्नधेयम्)** रत्न धरने योग्य जिससे उस **(जोहुवानम्)** पुकारे गये वा पुकारने वाले के लिये **(बृहस्पतिम्)** बड़ों के पालन करने और **(धनानाम्)** धनों के **(सनितारम्)** उत्तम प्रकार विभाग करने वाले को **(आगमत्)** प्राप्त हो, उसकी आप **(उप, स्तुहि)** समीप में स्तुति करो॥७॥

भावार्थः-वे ही जन प्रशंसा करने योग्य होते हैं, जो सब पदार्थ बांट अर्थात् विभाग करके खाते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तवो॒तिभि॒ः सच॑माना॒ अरि॑ष्टा॒ बृह॑स्पते म॒घवा॑नः सु॒वीरा॑ः।

ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः॥८॥

तवऽ ऊतिऽभिः। सचमानाः। अरिष्टाः। बृहस्पते। मघऽवानः। सुऽवीराः। ये। अश्वऽदाः। उत। वा। सन्ति। गोऽदाः। ये। वस्त्रऽदाः। सुऽभगाः। तेषु। रायः॥८॥

पदार्थः-(तव) (**ऊतिभिः**) रक्षादिभिः सह (**सचमानाः**) सम्बध्नन्तः (**अरिष्टाः**) अहिंसिताः (**बृहस्पते**) विद्याद्युत्तमपदार्थानां पालक (**मघवानः**) परमपूजितधनाः (**सुवीराः**) शोभनाश्च ते वीराश्च ते (**ये**) (**अश्वदाः**) अश्वानग्न्यादींस्तुरङ्गान् वा ददति (**उत**) अपि (**वा**) (**सन्ति**) (**गोदाः**) ये गाः सुशिक्षिता वाचो धेनुं ददति (**ये**) (**वस्त्रदाः**) ये वस्त्राणि ददति (**सुभगाः**) सुष्ठु भग ऐश्वर्य्यं धनं वा येषान्ते (**तेषु**) (**रायः**) धनानि॥८॥

अन्वयः-हे बृहस्पते! ये तवोतिभिररिष्टाः सचमाना मघवानः सुवीरा अश्वदा उत वा ये गोदा वस्त्रदाः सुभगाः सन्ति तेषु रायो भवन्ति॥८॥

भावार्थः-ये धार्मिका राज्ञा रक्षिताः प्रशंसितधनयुक्ता दातारः सन्ति त एव यशस्विनो भूत्वा धनाढ्या जायन्ते॥८॥

पदार्थः-हे (**बृहस्पते**) बृहत् अर्थात् विद्या आदि उत्तम पदार्थों की रक्षा करनेवाले! (**ये**) जो (**तव**) आपकी (**ऊतिभिः**) रक्षा आदिकों के साथ (**अरिष्टाः**) नहीं हिंसा किये गये (**सचमानाः**) सम्बन्ध करते हुए (**मघवानः**) अत्यन्त श्रेष्ठ धन से युक्त (**सुवीराः**) उत्तम वीरजन (**अश्वदाः**) अग्नि आदि वा घोड़ों को देने वाले (**उत**) भी (**वा**) वा (**ये**) जो (**गोदाः**) सुशिक्षित वाणी वा गौवों के देने वाले (**वस्त्रदाः**) वस्त्रों के देने वाले और (**सुभगाः**) सुन्दर ऐश्वर्य्य वा धन से युक्त (**सन्ति**) हैं (**तेषु**) उनमें (**रायः**) धन होते हैं॥८॥

भावार्थः-जो धार्मिक राजा से रक्षा किये गये प्रशंसित धनों से युक्त दाताजन हैं, वे ही यशस्वी होके धनाढ्य होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः।
अपव्रतान् प्रसवे वावृधानान् ब्रह्मद्विषः सूर्याद् यावयस्व॥९॥

विऽसर्माणम्। कृणुहि। वित्तम्। एषाम्। ये। भुञ्जते। अपृणन्तः। नः। उक्थैः। अपऽव्रतान्। प्रऽसवे। ववृधानान्। ब्रह्मऽद्विषः। सूर्यात्। यवयस्व॥९॥

पदार्थः-(विसर्माणम्) यो विसृजति तम् (**कृणुहि**) (**वित्तम्**) धनं भोगं वा (**एषाम्**) (**ये**) (**भुञ्जते**) (**अपृणन्तः**) अपूर्णा अपालयन्तो वा (**नः**) अस्माकम् (**उक्थैः**) उत्तमैर्वाक्यैः (**अपव्रतान्**)

ब्रह्मचर्यसत्यभाषणादिव्रताचाररहितान् **(प्रसवे)** उत्पन्ने जगति **(वावृधानान्)** विवर्धमानान् **(ब्रह्मद्विषः)** ये ब्रह्म वेदं परमात्मानं वा द्विषन्ति **(सूर्यात्)** सवितुः **(यावयस्व)** अमिश्रितान् कुरु॥९॥

अन्वयः-हे विद्वन्! येऽपृणन्तो भुञ्जते न उक्थैः प्रसवे वावृधानानपव्रतान् ब्रह्मद्विषो निवारयन्त्येषां विसर्म्माणं वित्तं कृणुहि सूर्यात्तान् यावयस्व॥९॥

भावार्थः-हे मनुष्या! येऽनाचारान् साचारानविदुषो विदुषः कृत्वा नास्तिकान् निरुध्याधर्माचरणात् पृथग्भूत्वा सततं सुखयन्ति ते माननीया भवन्ति॥९॥

पदार्थः-हे विद्वन्! **(ये)** जो **(अपृणन्तः)** नहीं पूर्ण वा नहीं पालन करते हुए **(भुञ्जते)** भोगते हैं और **(नः)** हमारे **(उक्थैः)** उत्तम वाक्यों से **(प्रसवे)** उत्पन्न हुए जगत् में **(वावृधानान्)** अत्यन्त बढ़ते हुए **(अपव्रतान्)** ब्रह्मचर्य्य, सत्यभाषणादि व्रताचाररहित **(ब्रह्मद्विषः)** वेद वा परमात्मा से द्वेष करने वालों को रोकते हैं **(एषाम्)** इन लोगों के **(विसर्म्माणम्)** उत्पन्न करने वाले **(वित्तम्)** धन वा भोग को **(कृणुहि)** करो और **(सूर्य्यात्)** सूर्य्य से उनको **(यावयस्व)** अमिश्रित करो॥९॥

भावार्थः-हे मनुष्यो! जो लोग शुद्ध आचरणों से रहितों को शुद्ध आचरणों के सहित और अविद्वानों को विद्वान् करके नास्तिकों को रोक के अधर्म्म के आचरण से पृथक् होके निरन्तर सुखी करते, वे निरन्तर आदर करने योग्य होते हैं॥९॥

पुनः शिक्षाविषयमाह॥

फिर शिक्षाविषय को अगले मन्त्र में कहते हैं॥

यः ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात।

यो वः शमीं शशमानस्य निन्दात् तुच्छ्यान् कामान् करते सिष्विदानः॥१०॥१८॥

यः। ओहते। रक्षसः। देवऽवीतौ। अचक्रेभिः। तम्। मरुतः। नि। यात। यः। वः। शमीम्। शशमानस्य। निन्दात्। तुच्छ्यान्। कामान्। करते। सिस्विदानः॥१०॥

पदार्थः-(**यः**) **(ओहते)** वहति प्रापयति **(रक्षसः)** दुष्टाचारान् मनुष्यान् **(देववीतौ)** देवैर्विद्वद्भिर्व्याप्तायां क्रियायाम् **(अचक्रेभिः)** अविद्यमानचक्रैः **(तम्)** **(मरुतः)** मनुष्याः **(नि)** **(यात)** प्राप्नुत **(यः)** **(वः)** युष्माकम् **(शमीम्)** कर्म्म **(शशमानस्य)** प्रशंसितस्य **(निन्दात्)** निन्देत् **(तुच्छ्यान्)** तुच्छेषु क्षुद्रेषु भवान् **(कामान्)** **(करते)** कुर्य्यात् **(सिष्विदानः)** स्निह्यमानः॥१०॥

अन्वयः-हे मरुतो! यो देववीतौ रक्षस ओहते यो वः शशमानस्य च शमीं निन्दात् सिष्विदानः सँस्तुच्छ्यान् कामान् करते तमचक्रेभिर्दण्डेन नि यात॥१०॥

भावार्थः-हे राजादयो मनुष्या भवन्तो ये कुशिक्षया मनुष्यान् दूषयन्ति निन्दायां विषयासक्तौ च प्रवर्त्तयन्ति तान् भृशं दण्डयन्तु॥१०॥

पदार्थः-हे **(मरुतः)** मनुष्यो! **(यः)** जो **(देववीतौ)** देव अर्थात् विद्वानों से व्याप्त क्रिया में **(रक्षसः)** दुष्ट आचरणयुक्त मनुष्यों को **(ओहते)** प्राप्त कराता है **(यः)** जो **(वः)** आप लोगों और **(शशमानस्य)** प्रशंसा किये गये के **(शमीम्)** कर्म्म की **(निन्दात्)** निन्दा करे और **(सिष्विदानः)** संलग्न हुआ **(तुच्छ्यान्)** क्षुद्रों में हुए **(कामान्)** मनोरथों को **(करते)** करे **(तम्)** उसको **(अचक्रेभिः)** चक्रों से रहितों के द्वारा दण्ड से **(नि, यात)** निरन्तर प्राप्त हूजिये॥१०॥

भावार्थः-हे राजा आदि मनुष्यो! जो बुरी शिक्षा से मनुष्यों को दूषित करते और निन्दा तथा विषयों की आसक्ति में प्रवृत्त कराते हैं, उनको निरन्तर दण्ड दीजिये॥१०॥

अथ रुद्रविषयमाह॥

अब रुद्रविषय को अगले मन्त्र में कहते हैं॥

तमु॑ ष्टुहि॒ यः स्वि॒षुः सु॒धन्वा॒ यो विश्व॑स्य॒ क्षय॑ति भेष॒जस्य॑।
यक्ष्वा॑ म॒हे सौम॑न॒साय॑ रु॒द्रं नमो॑भि॒र्देव॒मसु॑रं दुवस्य॥ ११॥

तम्। ऊँ इति। स्तुहि। यः। सुऽइषुः। सुऽधन्वा। यः। विश्वस्य। क्षयति। भेषजस्य। यक्ष्वा। महे। सौमनसाय। रुद्रम्। नमःऽभिः। देवम्। असुरम्। दुवस्य॥ ११॥

पदार्थः-**(तम्)** **(उ)** **(स्तुहि)** **(यः)** **(स्विषुः)** शोभना इषवो यस्य सः **(सुधन्वा)** शोभनं धनुर्यस्य सः **(यः)** **(विश्वस्य)** समग्रस्य जगतः **(क्षयति)** निवसति निवासयति वा **(भेषजस्य)** औषधस्य **(यक्ष्वा)** सङ्गमय प्राप्नुहि वा। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(महे)** महते **(सौमनसाय)** शोभनस्य मनसो भावाय **(रुद्रम्)** दुष्टाना रोदयितारम् **(नमोभिः)** अन्नादिभिः **(देवम्)** दिव्यगुणम् **(असुरम्)** मेघम् **(दुवस्य)** सेवस्व॥११॥

अन्वयः-हे राजन् विद्वन् वा! यः स्विषुः सुधन्वा शत्रूञ्जयति यो विश्वस्य मध्ये भेषजस्य प्रवृत्तिं क्षयति निवासयति तं महे सौमनसाय स्तुहि सत्कर्माणि यक्ष्वा तमु देवं रुद्रमसुरं च महे सौमनसाय नमोभिर्दुवस्य॥११॥

भावार्थः-हे राजन्! ये शस्त्रास्त्रप्रक्षेपणाय युद्धविद्यायां कुशला वैद्यविद्यायां निपुणा दुष्टानां दण्डप्रदाश्च जनाः स्युस्तान् स्तुत्वा सत्कर्म्मसु नियोज्य सम्यक् परिचर्य सर्वाणि राजकृत्यान्यलङ्कुर्य्याः॥११॥

पदार्थः-हे राजन् अथवा विद्वान्! **(यः)** जो **(स्विषुः)** सुन्दर वाणों से युक्त **(सुधन्वा)** उत्तम धनुष् वाला शत्रुओं को जीतता है और **(यः)** जो **(विश्वस्य)** सम्पूर्ण जगत् के मध्य में **(भेषजस्य)** ओषधि की प्रवृति का **(क्षयति)** निवास करता वा निवास कराता है **(तम्)** उसकी **(महे)** बड़े **(सौमसनाय)** श्रेष्ठ मन के भाव के लिये **(स्तुहि)** स्तुति कीजिये और श्रेष्ठ कर्म्मों को **(यक्ष्वा)** मिलाइये वा प्राप्त हूजिये उस **(उ)** ही **(देवम्)** श्रेष्ठ गुणों से युक्त **(रुद्रम्)** और दुष्टों के रुलाने वाले **(असुरम्)** मेघ को बड़े श्रेष्ठ मन के भाव के लिये **(नमोभिः)** अन्नादिकों से **(दुवस्य)** सेवन कीजिये॥११॥

भावार्थः-हे राजन्! जो शस्त्र और अस्त्रों के चलाने के लिये युद्धविद्या में चतुर, वैद्यविद्या में निपुण और दुष्टों के दण्ड देने वाले जन होवें, उनकी स्तुति कर अच्छे कर्म्मों में नियुक्त कर और अच्छे प्रकार सेवन कर समस्त राजकृत्यों को पूर्ण करो॥११॥

अथ विद्वत्कर्त्तव्यशिक्षाविषयमाह॥

अब विद्वत्कर्त्तव्यशिक्षविषय को कहते हैं॥

दमू॑नसो अ॒पसो॒ ये सु॒हस्ता॒ वृष्ण॒: पत्नी॑र्न॒द्यो॑ विभ्वत॒ष्टा:।
सर॑स्वती बृहद्दि॒वोत रा॒का द॒॑शस्यन्ती॑र्वरिवस्यन्तु शु॒भ्रा:॥ १२॥

दमू॑नसः। अ॒पस॑:। ये। सु॒ऽहस्ता॑:। वृष्ण॑:। पत्नी॑:। न॒द्य॑:। वि॒भ्व॒ऽत॒ष्टा:। सर॑स्वती। बृ॒हत्ऽदि॒वा। उ॒त। रा॒का। द॒श॒स्यन्ती॑:। व॒रि॒व॒स्य॒न्तु॒। शु॒भ्रा:॥ १२॥

पदार्थः-(**दमूनसः**) दान्ताः (**अपसः**) सुकर्म्माणः (**ये**) (**सुहस्ताः**) शोभनेषु कर्म्मसु येषान्ते (**वृष्णः**) वीर्यवन्तः (**पत्नीः**) भार्याः (**नद्यः**) नद्य इव (**विभ्वतष्टाः**) विभुनेश्वरेण निर्मिताः (**सरस्वती**) विज्ञानवती वाक् (**बृहद्दिवा**) बृहती द्यौर्विद्याप्रकाशो यस्यां सा (**उत**) (**राका**) राति ददाति सुखं या सा। **राकेति पदनामसु पठितम्।** (निघं०५.५) (**दशस्यन्तीः**) इष्टान् कामान् कामान् ददति (**वरिवस्यन्तु**) सेवन्ताम् (**शुभ्राः**) शुद्धस्वरूपाचाराः॥१२॥

अन्वयः-हे मनुष्या! येऽपसो दमूनसः सुहस्ता वृष्णो विभ्वतष्टा नद्य इव उत बृहद्दिवा राका सरस्वतीव दशस्यन्तीः शुभ्राः पत्नीर्वरिवस्यन्तु तेऽतुलं सुखमाप्नुवन्तु॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। कन्या वराश्च यदा ब्रह्मचर्य्येण विद्याः पूर्णा युवावस्था च परस्परस्य परीक्षा च भवेत्तदा स्वयंवरेण विवाहेन पतिपत्न्यौ भूत्वा सौभाग्यवन्तो भवन्तु॥१२॥

पदार्थः-हे मनुष्यो! (**ये**) जो (**अपसः**) उत्तम कर्म्म करने (**दमूनसः**) देने (**सुहस्ताः**) और उत्तम कर्म्मों में हाथ लगाने वाले (**वृष्णः**) पराक्रम से युक्त और (**विभ्वतष्टाः**) व्यापक ईश्वर से रचे गये जन (**नद्यः**) नदियों के सदृश (**उत**) और (**बृहद्दिवा**) बड़ा विद्या का प्रकाश जिसमें ऐसी (**राका**) सुख को देनेवाली (**सरस्वती**) विज्ञानयुक्त वाणी के सदृश (**दशस्यन्तीः**) अभीष्ट मनोरथ-मनोरथ को देती हुई और (**शुभ्राः**) सुन्दर स्वरूप तथा उत्तम आचरण करने वाली (**पत्नीः**) विवाहित स्त्रियों का (**वरिवस्यन्तु**) सेवन करें, वे अत्यन्त सुख को प्राप्त होवें॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। कन्या और वर जब ब्रह्मचर्य्य से विद्यायें पूर्ण, युवावस्था और परस्पर की परीक्षा होवे, तब स्वयंवर विवाह से पति और पत्नी होकर सौभाग्यवान् होते हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम्।

य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः॥ १३॥

प्र। सु। महे। सुऽशरणाय। मेधाम्। गिरम्। भरे। नव्यसीम्। जायमानाम्। यः। आहना। दुहितुः। वक्षणासु। रूपा। मिनानः। अकृणोत्। इदम्। नः॥ १३॥

पदार्थः-(प्र) (सू) अत्र **निपातस्य च**ेति दीर्घः। **(महे)** महते **(सुशरणाय)** शोभनायाऽऽश्रयाय **(मेधाम्)** प्रज्ञाम् **(गिरम्)** वाचम् **(भरे)** धरामि **(नव्यसीम्)** अतिशयेन नूतनाम् **(जायमानाम्)** प्रसिद्धाम् **(यः) (आहनाः)** या आहन्यन्ते ताः **(दुहितुः)** कन्यायाः **(वक्षणासु)** वहमानासु नदीषु **(रूपा)** सुन्दराणि रूपाणि **(मिनानः)** मानं कुर्वाणः **(अकृणोत्)** कुर्यात् **(इदम्)** वर्त्तमानं सुखम् **(नः)** अस्मान्॥ १३॥

अन्वयः-हे विद्वन्! यो मनुष्यो वक्षणासु दुहितू रूपा आहना मिनानो न इदं प्राप्तानकृणोत्। तेनाहं महे सुशरणाय नव्यसीं जायमानां मेधां गिरं च प्र सू भरे॥ १३॥

भावार्थः-हे मनुष्या! यथा सरूपां दुहितरं दृष्ट्वैतस्याः सदृशं पतिं कारयित्वेव प्रज्ञां शिक्षितां वाचं वर्द्धयित्वा गृहाश्रमजन्यं सुखं सर्वान् मनुष्यान् यूयं प्रापयत॥ १३॥

पदार्थः-हे विद्वन्! **(यः)** जो मनुष्य **(वक्षणासु)** बहती हुई नदियों के निमित्त **(दुहितुः)** कन्या के **(रूपा)** सुन्दर रूपों **(आहनाः)** और जो सब और से ताड़ित होती उनका **(मिनानः)** मान करता हुआ **(नः)** हम लोगों को **(इदम्)** इस वर्त्तमान सुख में पाये हुए **(अकृणोत्)** करे उसके साथ मैं **(महे)** बड़े **(सुशरणाय)** उत्तम आश्रय के लिये **(नव्यसीम्)** अत्यन्त नवीन **(जायमानाम्)** प्रसिद्ध **(मेधाम्)** उत्तम बुद्धि और **(गिरम्)** वाणी को **(प्र, सू, भरे)** उत्तम प्रकार धारण करता हूँ॥ १३॥

भावार्थः-हे मनुष्यो! समान रूप वाली कन्या को देखके ही उसका सदृश पति कराने के समान बुद्धि और शिक्षित वाणी को बढ़ाय के गृहाश्रम से उत्पन्न हुए सुख को सब मनुष्यों के लिये आप लोग प्राप्त कराओ॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः।

यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः॥ १४॥

प्र। सुऽस्तुतिः। स्तनयन्तम्। रुवन्तम्। इळः। पतिम्। जरितः। नूनम्। अश्याः। यः। अब्दिऽमान्। उदनिऽमान्। इयर्ति। प्र। विऽद्युता। रोदसी इति। उक्षमाणः॥ १४॥

पदार्थः-(प्र) प्रकर्षेण **(सुष्टुतिः)** शोभना प्रशंसा **(स्तनयन्तम्)** गर्जनां कुर्वन्तम् **(रुवन्तम्)** शब्दयन्तम् **(इळः)** पृथिव्याः **(पतिम्)** पालकम् **(जरितः)** स्तावकः **(नूनम्)** निश्चयेन **(अश्याः)** प्राप्नुयाः

(यः) **(अब्दिमान्)** जलदवान् **(उदनिमान्)** बहूदकः **(इयर्त्ति)** प्राप्नोति **(प्र)** **(विद्युता)** तडिता सह **(रोदसी)** द्यावापृथिव्यौ **(उक्षमाणः)** सिञ्चमानः॥१४॥

अन्वयः-हे जरितस्त्वं योऽब्दिमानुदनिमान् रोदसी उक्षमाणो विद्युता सह मेघ इयर्त्ति यस्सुष्टुतिरस्ति तं स्तनयन्तं नूनं प्राश्यास्त्वं रुवन्तमिळस्पतिं प्र ज्ञापयेः॥१४॥

भावार्थः-हे मनुष्या! यो मेघो भूमिस्थानां जीवानां पालकस्तथा विद्युता सह वर्षयञ्छब्दयन् भूमिं प्राप्नोति तं विदित्वाऽन्यान् विज्ञापयत॥१४॥

पदार्थः-हे **(जरितः)** स्तुति करने वाले! आप **(यः)** जो **(अब्दिमान्)** मेघों से युक्त और **(उदनिमान्)** बहुत जल वाला **(रोदसी)** अन्तरिक्ष और पृथिवी को **(उक्षमाणः)** सींचता हुआ **(विद्युता)** बिजली के साथ मेघ **(इयर्त्ति)** प्राप्त होता है और जो **(सुष्टुतिः)** उत्तम प्रशंसायुक्त है उस **(स्तनयन्तम्)** गर्जना करते हुए को **(नूनम्)** निश्चय से **(प्र, अश्याः)** प्राप्त होओ और आप **(रुवन्तम्)** शब्द करते हुए **(इळः)** पृथिवी के **(पतिम्)** पालन करने वाले की **(प्र)** उत्तम प्रकार जनाइये॥१४॥

भावार्थः-हे मनुष्यो! जो मेघ भूमि में वर्त्तमान जीवों का पालन करनेवाला, बिजुली के साथ वृष्टि करता और शब्द करता हुआ भूमि को प्राप्त होता है, उसको जान के अन्यों को जनाइये॥१४॥

अथ रुद्रविषयकं विद्वत्कर्त्तव्यशिक्षाविषयमाह॥

अब रुद्रविषयक विद्वत्कर्त्तव्य शिक्षाविषय को अगले मन्त्र में कहते हैं॥

एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः॥१५॥

एषः। स्तोमः। मारुतम्। शर्धः। अच्छ। रुद्रस्य। सूनून्। युवन्यून्। उत्। अश्याः। कामः। राये। हवते। मा। स्वस्ति। उप। स्तुहि। पृषत्ऽअश्वान्। अयासः॥१५॥

पदार्थः-**(एषः)** **(स्तोमः)** श्लाघाविषयः **(मारुतम्)** मनुष्याणामिदम् **(शर्धः)** बलम् **(अच्छा)** अत्र **संहितायामिति** दीर्घः। **(रुद्रस्य)** प्राणादिरूपस्य वायोः **(सूनून्)** प्रसवगुणान् **(युवन्यून्)** आत्मनो मिश्रितानमिश्रितान् पदार्थानिच्छून् **(उत्)** **(अश्याः)** प्राप्नुयाः **(कामः)** इच्छा **(राये)** धनाय **(हवते)** गृह्णाति **(मा)** माम् **(स्वस्ति)** सुखम् **(उप)** **(स्तुहि)** **(पृषदश्वान्)** सिञ्चकानाशुगामिनः पदार्थान् वा **(अयासः)** गच्छन्तः॥१५॥

अन्वयः-हे विद्वन्! यः कामो मा राये स्वस्ति हवते तमुपस्तुहि येऽयासः पृषदश्वान् प्राप्नुवन्ति तान् युवन्यूँस्त्वमुदश्याः। य एषः स्तोमो मारुतं शर्धो हवते तं रुद्रस्य सूनूनच्छोदश्याः॥१५॥

भावार्थः-हे मनुष्या! यूयं वह्निमेघविद्यां विज्ञायालङ्कामा भवत॥१५॥

पदार्थः-हे विद्वन्! जो **(कामः)** इच्छा **(मा)** मुझ को **(राये)** धन के लिये **(स्वस्ति)** सुख को **(हवते)** ग्रहण करती है उसकी **(उप, स्तुहि)** समीप में स्तुति प्रशंसा कीजिये और जो **(अयासः)** चलते

हुए **(पृषदश्वान्)** सींचने वाले तथा शीघ्र चले वाले पदार्थों को प्राप्त होते हैं उन **(युवन्यून्)** अपने मिले और नहीं मिले हुए पदार्थों की इच्छा करते हुओं को आप **(उत्, अश्याः)** अत्यन्त प्राप्त हूजिये और जो **(एषः)** यह **(स्तोमः)** प्रशंसा का विषय **(मारुतम्)** मनुष्यों के इस **(शर्धः)** बल को ग्रहण करता है उस **(रुद्रस्य)** प्राण आदि है रूप जिसका ऐसे वायु के **(सूनून्)** उत्पत्ति के गुणों को **(अच्छा)** उत्तम प्रकार प्राप्त हूजिये॥१५॥

भावार्थः-हे मनुष्यो! आप लोग वह्नि और मेघविद्या को जानकर पूर्ण मनोरथ वाले हूजिये॥१५॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को अगले मन्त्र में कहते हैं॥

प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतींरोषधी राये अश्याः।

देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात्॥१६॥

प्र। एषः। स्तोमः। पृथिवीम्। अन्तरिक्षम्। वनस्पतीन्। ओषधीः। राये। अश्याः। देवःऽदेवः। सुऽहवः। भूतु। मह्यम्। मा। नः। माता। पृथिवी। दुःऽमतौ। धात्॥१६॥

पदार्थः-**(प्र)** **(एषः)** **(स्तोमः)** श्लाघनीयो मेघो वह्निर्वा **(पृथिवीम्)** भूमिम् **(अन्तरिक्षम्)** आकाशम् **(वनस्पतीन्)** वटाऽश्वत्थादीन् **(ओषधीः)** यवाद्याः **(राये)** धनाय **(अश्याः)** प्राप्नुयाः **(देवोदेवः)** विद्वान्विद्वान् **(सुहवः)** सुष्ठुग्रहणदानः **(भूतु)** भवतु **(मह्यम्)** **(मा)** निषेधे **(नः)** अस्मान् **(माता)** जननीव पालिका **(पृथिवी)** **(दुर्म्मतौ)** दुष्टायां बुद्धौ **(धात्)** दध्यात्॥१६॥

अन्वयः-हे विद्वन्! देवोदेवस्सुहवस्त्वं य एषः स्तोमो राये पृथिवीमन्तरिक्षमोषधीर्वनस्पतींश्च प्राप्नोति तं त्वं प्राश्याः स मह्यं सुखकरो भूतु यत इयं पृथिवी मातेव नो दुर्म्मतौ मा धात्॥१६॥

भावार्थः-सर्वे स्त्रीपुरुषा विद्वांसो भूत्वा विद्युन्मेघादिविद्यां गृह्णीयुर्यत इयं युष्मान् मातृवत् पालयेद्यथा माता सुशिक्षया स्वसन्तानानुत्तमान् करोति तथैव मेघवृष्टिविद्यया युक्ता भूमिरुत्तमानि शस्यादीनि जनयति॥१६॥

पदार्थः-हे विद्वन्! **(देवोदेवः)** विद्वान् विद्वान् **(सुहवः)** उत्तम प्रकार ग्रहण करने वाले और दाता आप और जो **(एषः)** यह **(स्तोमः)** प्रशंसा करने योग्य मेघ वा वह्नि **(राये)** धन के लिये **(पृथिवीम्)** भूमि **(अन्तरिक्षम्)** आकाश और **(ओषधीः)** यव आदि औषधियां तथा **(वनस्पतीन्)** वट और अश्वत्थ आदि वनस्पतियों को प्राप्त होता है उसको आप **(प्र, अश्याः)** अच्छे प्रकार प्राप्त हूजिये वह **(मह्यम्)** मेरे लिये सुखकारक **(भूतु)** होवे जिससे यह **(पृथिवी)** पृथिवी **(माता)** माता के सदृश पालन करने वाली **(नः)** हम लोगों को **(दुर्म्मतौ)** दुष्टबुद्धि में **(मा)** नहीं **(धात्)** धारण करे॥१६॥

भावार्थः-सब स्त्री और पुरुष विद्वान् होकर बिजुली और मेघ आदि की विद्या को ग्रहण करें जिससे यह विद्या आप लोगों की माता के सदृश पालना करे और जैसे माता उत्तम शिक्षा से अपने

सन्तानों को उत्तम करती है, वैसे ही मेघवृष्टिविद्या से युक्त भूमि उत्तम अन्न आदिकों को उत्पन्न करती है॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒रौ दे॑वा अनिबा॒धे स्या॑म॥१७॥

उ॒रौ। दे॒वा॒:। अ॒नि॒ऽब॒धे। स्या॒म॒॥१७॥

पदार्थ:-(उरौ) बहुसुखकरे **(देवा:)** विद्वांस: **(अनिबाधे)** निर्विघ्ने सति **(स्याम)** भवेम॥१७॥

अन्वय:-हे देवा! यथा वयमनिबाध उरौ विद्वांस: स्याम तथा यूयं विधत्त॥१७॥

भावार्थ:-अध्यापकैर्विद्वद्भि: सर्वान् विद्याप्रतिबन्धकान् निवार्य सर्वे विद्वांस: सम्पादनीया:॥१७॥

पदार्थ:-हे **(देवा:)** विद्वान् जनो! जैसे हम लोग **(अनिबाधे)** विघ्नरहित होने पर **(उरौ)** बहुत सुख करने वाले कार्य्य में विद्वान् **(स्याम)** होवें, वैसे आप लोग करिये॥१७॥

भावार्थ:-अध्यापक विद्वान् जनों को चाहिये कि सम्पूर्ण विद्या के प्रतिबन्धकों का निवारण करके सम्पूर्ण जनों को विद्वान् करें॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती॒ गमेम।

आ नो॑ र॒यिं व॑ह॒तमोत वी॒राना विश्वा॑न्यमृता॒ सौभ॑गानि॥१८॥१९॥

सम्। अ॒श्विनो॑:। अव॑सा। नूत॑नेन। म॒य॒:ऽभुवा॑। सु॒ऽप्रनी॑ती। ग॒मेम॒। आ। न॒:। र॒यिम्। व॒ह॒त॒म्। आ। उ॒त। वी॒रान्। आ। विश्वा॑नि। अ॒मृ॒ता॒। सौभ॑गानि॥१८॥

पदार्थ:-(सम्) (अश्विनो:) अध्यापकोपदेशकयो: **(अवसा)** रक्षणेन **(नूतनेन) (मयोभुवा)** सुखं भावुकौ **(सुप्रणीती)** सुष्ठु प्रगता नीतिर्याभ्यां तौ **(गमेम)** प्राप्नुयाम **(आ) (न:)** अस्मान् **(रयिम्)** श्रियम् **(वहतम्)** प्रापयतम् **(आ) (उत)** अपि **(वीरान्)** श्रेष्ठान् शूरान् शौर्यादिगुणोपेतान् **(आ) (विश्वानि)** समग्राणि **(अमृता)** नित्यानि **(सौभगानि)** शोभनानामैश्वर्याणां भावरूपाणि॥१८॥

अन्वय:-हे मयोभुवा सुप्रणीती अध्यापकोपदेशकौ! यौ युवां नो रयिमा वहतमुत वीराना वहतमपि च विश्वान्यमृता सौभागान्या वहतं तयोरश्विनोर्नूतनेनावसा वयं विश्वान्यमृता सौभगानि सङ्गमेम॥१८॥

भावार्थ:-हे मनुष्या! विद्वद्रक्षिता बोधिता: सन्तो यूयं श्रियमुत्तममनुष्यसहायेन सर्वाण्यैश्वर्य्याणि प्राप्नुतेति॥१८॥

अत्र विश्वेदेवरुद्रविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विचत्वारिंशत्तमं सूक्तमेकोनविंशो वर्गश्च समाप्त:॥

पदार्थः-हे **(मयोभुवा)** सुख के करनेवालो **(सुप्रणीती)** उत्तम प्रकार वर्त्ती गई नीति जिनसे ऐसे अध्यापक और उपदेशक जनो! जो आप दोनों **(नः)** हम लोगों के लिये **(रयिम्)** लक्ष्मी को **(आ, वहतम्)** प्राप्त कराइये **(उत)** भी **(वीरान्)** श्रेष्ठ शूरता आदि गुणों से युक्त शूरवीर जनों को **(आ)** प्राप्त कराइये और भी **(विश्वानि)** सम्पूर्ण **(अमृता)** नित्य **(सौभगानि)** सुन्दर ऐश्वर्य्यों के भावरूप को **(आ)** प्राप्त कराइये उन **(अश्विनोः)** अध्यापक और उपदेशकों के **(नूतनेन)** नवीन **(अवसा)** रक्षण से हम लोग सम्पूर्ण नित्य सुन्दर ऐश्वर्य्यों के भावरूपों को **(सम्, गमेम)** उत्तम प्रकार प्राप्त होवें॥१८॥

भावार्थः-हे मनुष्यो! विद्वानों से रक्षित और बोध को प्राप्त हुए आप लोग लक्ष्मी और मनुष्यों के सहाय से सम्पूर्ण ऐश्वर्य्यों को प्राप्त हूजिये॥१८॥

इस सूक्त में विश्वेदेव, रुद्र और विद्वानों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बयालीसवां सूक्त और उन्नीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तदशर्चस्य त्रिचत्वारिंशत्तमस्य सूक्तस्याऽत्रिर्ऋषिः॥ विश्वेदेवा देवताः। १, ३, ६, ८, ९, १७ निचृत्त्रिष्टुप्। २, ४, ५, १०, ११, १२, १५ त्रिष्टुप्। ७, १३, विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। १४ भुरिक्पङ्क्तिः। १६ याजुषी पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्विषयमाह॥

अब सत्रह ऋचा वाले तेंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् के विषय को कहते हैं॥

आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति॥ १॥

आ। धेनवः। पयसा। तूर्णिऽअर्थाः। अमर्धन्तीः। उप। नः। यन्तु। मध्वा। महः। राये। बृहतीः। सप्त। विप्रः। मयःऽभुवः। जरिता। जोहवीति॥ १॥

पदार्थः-(आ) (धेनवः) गाव इव वाचः **(पयसा)** दुग्धदानेन **(तूर्ण्यर्थाः)** तूर्णयः सद्योगामिनोऽर्था यासु ताः **(अमर्धन्तीः)** अहिंसन्त्यः **(उप) (नः)** अस्मान् **(यन्तु)** प्राप्नुवन्तु **(मध्वा)** मधुरादिगुणेन सह **(महः)** महते **(राये)** धनाय **(बृहतीः)** महत्यः **(सप्त)** सप्तविधाः **(विप्रः)** मेधावी **(मयोभुवः)** सुखं भावुकाः **(जरिता)** सकलविद्याः स्तावकः **(जोहवीति)** भृशमुपदिशति॥ १॥

अन्वयः-हे मनुष्या! यो जरिता विप्रो महो राये सप्त बृहतीर्गिरो जोहवीति तत्प्रेरिता मध्वा पयसा सहाऽमर्धन्तीस्तूर्ण्यर्था मयोभुवो धेनवो न उपायन्तु॥ १॥

भावार्थः-ये मनुष्या आप्तविद्वत्सङ्गेन सर्वशास्त्रविषया वाचो गृहीत्वैताः कृपयाऽन्येभ्योऽप्युपदिशेयुस्तेऽऽप्याप्ता जायन्ते॥ १॥

पदार्थः-हे मनुष्यो! जो **(जरिता)** सम्पूर्ण विद्याओं की स्तुति करने वाला **(विप्रः)** बुद्धिमान् जन **(महः)** बड़े **(राये)** धन के लिये **(सप्त)** सात प्रकार की **(बृहतीः)** बड़ी वाणियों का **(जोहवीति)** वार-वार उपदेश करता है और उससे प्रेरणा किये गये **(मध्वा)** मधुर आदि गुणों के साथ और **(पयसा)** दुग्धदान के साथ **(अमर्धन्तीः)** नहीं हिंसा करती हुई और **(तूर्ण्यर्थाः)** शीघ्र चलने वाले अर्थ जिनमें ऐसी **(मयोभुवः)** सुख की भावना कराने वाली **(धेनवः)** गौओं के सदृश वाणियां **(नः)** हम लोगों को **(उप, आ, यन्तु)** समीप में उत्तम प्रकार प्राप्त होवें॥ १॥

भावार्थः-जो मनुष्य यथार्थवक्ता विद्वानों के सङ्ग से शास्त्रों के विषय से युक्त वाणियों को ग्रहण करके उनकी कृपा से अन्यों के लिये उपदेश देवें, वे भी श्रेष्ठ होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे।

पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम्॥ २॥

आ। सुऽस्तुती। नमसा। वर्तयध्यै। द्यावा। वाजाय। पृथिवी इति। अमृध्रे इति। पिता। माता। मधुऽवचाः। सुऽहस्ता। भरेऽभरे। नः। यशसौ। अविष्टाम्॥ २॥

पदार्थः-(आ) समन्तात् **(सुष्टुती)** श्रेष्ठया प्रशंसया **(नमसा)** सत्कारेणान्नादिना वा **(वर्त्तयध्यै)** वर्त्तयितुम् **(द्यावा)** द्यौः **(वाजाय)** विज्ञानाय **(पृथिवी)** भूमी **(अमृध्रे)** अहिंसिते **(पिता)** जनक इव **(माता)** जननीव **(मधुवचाः)** मधुवचो यस्य यस्या वा स सा **(सुहस्ता)** शोभना हस्ता वर्त्तन्ते ययोस्ते **(भरेभरे)** स- ामे स- ामे **(नः)** अस्मान् **(यशसौ)** कीर्तिधनयुक्ते **(अविष्टाम्)** प्राप्नुयाताम्॥ २॥

अन्वयः-हे मनुष्या! युष्माभिर्वाजाय सुष्टुती नमसाऽमृध्रे सुहस्ता यशसौ द्यावा पृथिवी मधुवचाः पिता माता चेव भरेभरे नोऽस्मानविष्टां ते आ वर्त्तयध्या अविष्टाम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा मातापितरौ स्वसन्तानान् सुशिक्ष्य वर्धयित्वा विजयकारिणः सम्पादयतस्तथैव प्राप्ता सूर्य्यपृथिवीविद्या सर्वत्र विजयं प्रापयति॥ २॥

पदार्थः-हे मनुष्यो! आप लोगों से **(वाजाय)** विज्ञान के लिये **(सुष्टुती)** श्रेष्ठ प्रशंसा से **(नमसा)** सत्कार वा अन्न आदि आदि से **(अमृध्रे)** नहीं हिंसा किये गये में **(सुहस्ता)** सुन्दर हस्त जिनके वे **(यशसौ)** यश और धन से युक्त **(द्यावा)** अन्तरिक्ष और **(पृथिवी)** पृथिवी **(मधुवचाः)** मधुर वचन जिसका ऐसा वा **(पिता)** पिता और **(माता)** माता के सदृश **(भरेभरे)** संग्राम संग्राम में **(नः)** हम लोगों को **(अविष्टाम्)** प्राप्त होवें, वे **(आ, वर्त्तयध्यै)** उत्तम प्रकार वर्त्ताव करने को प्राप्त होवें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपालङ्कार है। हे मनुष्यो! जैसे माता और पिता अपने सन्तानों को उत्तम प्रकार शिक्षा देकर और वृद्धि करके विजयकारी करते हैं, वैसे ही प्राप्त हुई सूर्य्य और पृथिवी की विद्या सर्वत्र विजय को प्राप्त होती हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम्।

होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय॥ ३॥

अध्वर्यवः। चकृऽवांसः। मधूनि। प्र। वायवे। भरत। चारु। शुक्रम्। होताऽइव। नः। प्रथमः। पाहि। अस्य। देव। मध्वः। ररिम। ते। मदाय॥ ३॥

पदार्थः-(अध्वर्य्यवः) आत्मनोऽध्वरमहिंसामिच्छवः **(चकृवांसः)** कुर्वन्तः **(मधूनि)** विज्ञानानि **(प्र)** **(वायवे)** वायुविद्यायै **(भरत)** **(चारु)** सुन्दरम् **(शुक्रम्)** उदकम्। **शुक्रमित्युदकनामसु पठितम्।**

(निघं०१।१२) **(होतेव)** यथा दाता **(नः)** अस्मान् **(प्रथमः)** **(पाहि)** **(अस्य)** **(देव)** विद्वन् **(मध्वः)** मधुरस्य **(ररिमा)** रमेमहि। अत्र **संहितायामिति** दीर्घः। **(ते)** तव **(मदाय)** आनन्दाय॥३॥

अन्वयः-हे देव! प्रथमस्त्वं होतेवाऽस्य मध्वो मध्ये नः पाहि यतो वयं ते मदाय ररिमा। हे चक्रिवांसोऽध्वर्यवो! यूयं वायवे मधूनि चारु शुक्रं च प्र भरत॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा होता होमेन सर्वहितं साध्नोति तथैव सर्वहिताय वायुजलविद्यां प्रसारयत येन सर्वे वयमानन्दिता वर्त्तेमहि॥३॥

पदार्थः-हे **(देव)** विद्वन् **(प्रथमः)** पहिले आप **(होतेव)** दाता जन के सदृश **(अस्य)** इस **(मध्वः)** मधुर के मध्य में **(नः)** हम लोगों की **(पाहि)** रक्षा करिये, जिससे हम लोग **(ते)** आपके **(मदाय)** आनन्द के लिये **(ररिमा)** क्रीड़ा करें। हे **(चक्रिवांसः)** कार्य्य करते हुए और **(अध्वर्य्यवः)** अपनी अहिंसा की इच्छा करते हुए आप लोग **(वायवे)** वायुविद्या के लिये **(मधूनि)** विज्ञानों और **(चारु)** सुन्दर **(शुक्रम्)** जल को **(प्र, भरत)** उत्तम प्रकार धारण कीजिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे हवन करने वाला होम से सब के हित को सिद्ध करता है, वैसे ही सब के हित के लिये वायु और जल की विद्या को विस्तारिये, जिससे सब हम लोग आनन्दित हुए वर्त्ताव करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दश॒ क्षिपो॑ युञ्जते बा॒हू अद्रि॒ सोम॑स्य॒ या श॑मि॒तारा॑ सु॒हस्ता॑।
मध्वो॒ रस॑ सु॒गभ॑स्तिर्गिरि॒ष्ठां च॑नि॒श्चदद् दुदुहे शु॒क्रम॒ंशुः॥४॥

दश॒। क्षिप॑ः। यु॒ञ्ज॒ते॒। बा॒हू इति॑। अद्रि॑म्। सोम॑स्य। या। श॒मि॒तारा॑। सु॒ऽहस्ता॑। मध्व॑ः। रस॑म्। सु॒ऽगभ॑स्तिः। गि॒रि॒ऽस्थाम्। च॒नि॒श्चदत्। दु॒दु॒हे॒। शु॒क्रम्। अं॒शुः॥४॥

पदार्थः-**(दश)** दशसंख्याकाः **(क्षिपः)** क्षिपन्ति प्रेरयन्ति याभिस्ता अङ्गुलयः। **क्षिप इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५) **(युञ्जते)** **(बाहू)** भुजौ **(अद्रिम्)** मेघम् **(सोमस्य)** ऐश्वर्य्यस्य **(या)** यौ **(शमितारा)** शान्त्या यज्ञकर्मकर्त्तारौ **(सुहस्ता)** शौभनौ हस्तौ ययोस्तौ **(मध्वः)** मधुरादिगुणयुक्तस्य **(रसम्)** **(सुगभस्तिः)** शोभना गभस्तयः किरणा यस्य सूर्यस्य सः। **(गिरिष्ठाम्)** गिरौ मेघे स्थितम्। **गिरिरिति मेघनामसु पठितम्।** (निघं०१.१०) **(चनिश्चदत्)** आह्लादयति **(दुदुहे)** दोग्धि **(शुक्रम्)** उदकम् **(अंशुः)** किरणः॥४॥

अन्वयः-हे मनुष्या! यथा सुगभस्तिरंशुश्चनिश्चदत् सन् मध्वः सोमस्य गिरिष्ठामद्रिं रसं शुक्रं दुदुहे तथा या दश क्षिपो या शमितारा सुहस्ता बाहू युञ्जते ताभिर्धर्म्याणि कृत्यानि कुरुत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मनुष्यादयः प्राणिनोऽङ्गुलिभिः पदार्थान् गृह्णन्ति त्यजन्ति तथैव सूर्य्यः किरणैर्भूमेस्तलाज्जलं गृहीत्वा प्रक्षिपतीति वेद्यम्॥४॥

पदार्थः-हे मनुष्यो! जैसे (**सुगभस्तिः**) सुन्दर किरणें जिसकी वह सूर्य्य और (**अंशुः**) किरण (**चनिश्चदत्**) प्रसन्न करता है और (**मध्वः**) मधुर आदि गुणों से युक्त (**सोमस्य**) ऐश्वर्य्य के सम्बन्धी (**गिरिष्ठाम्**) मेघ में वर्त्तमान (**अद्रिम्**) मेघ को (**रसम्**) रस को और (**शुक्रम्**) जल को (**दुदुहे**) दुहता है, वैसे जो (**दश**) दश संख्यावाली (**क्षिपः**) प्रेरणा करते हैं जिनसे वे अङ्गुलियां और (**या**) जो (**शमितारा**) शान्ति से यज्ञकर्म्म के करने वाले और (**सुहस्ता**) अच्छे हाथों वाले (**बाहू**) भुजाओं को (**युञ्जते**) युक्त करते हैं, उनसे धर्मसम्बन्धी कार्य्यों को करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मनुष्य आदि प्राणी अङ्गुलियों से पदार्थों को ग्रहण करते और त्यागते हैं, वैसे ही सूर्य्य किरणों से भूमि के नीचे से जल को ग्रहण करके फेंकता अर्थात् वृष्टि करता है, ऐसा जानो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय।

हरी रथे सुधुरा योगे अर्वागिन्द्र प्रिया कृणुहि हूयमानः॥५॥२०॥

असावि। ते। जुजुषाणाय। सोमः। क्रत्वे। दक्षाय। बृहते। मदाय। हरी इति। रथे। सुऽधुरा। योगे। अर्वाक्। इन्द्र। प्रिया। कृणुहि। हूयमानः॥५॥

पदार्थः-(**असावि**) सूयते (**ते**) तुभ्यम् (**जुजुषाणाय**) प्रीत्या सेवमानाय (**सोमः**) महौषधिरस ऐश्वर्य्यं वा (**क्रत्वे**) प्रज्ञानाय (**दक्षाय**) चातुर्य्याय बलाय (**बृहते**) महते (**मदाय**) आनन्दाय (**हरी**) हरणशीलावश्वौ (**रथे**) याने (**सुधुरा**) शोभना धूर्ययोस्तौ (**योगे**) संयोजने (**अर्वाक्**) योऽर्वागधोगञ्चतः (**इन्द्र**) परमैश्वर्य्ययुक्त (**प्रिया**) सेवनीयानि कमनीयानि वस्तूनि सुखानि वा (**कृणुहि**) (**हूयमानः**) स्पर्धमानः॥५॥

अन्वयः-हे इन्द्र विद्वन्! यैस्ते बृहते जुजुषाणाय क्रत्वे दक्षाय मदाय सोमोऽसावि तेषां योगे सत्यर्वाक् सुधुरा हरी रथे युक्त्वा हूयमानः सन् प्रिया कृणुहि॥५॥

भावार्थः-हे मनुष्या! येन प्रज्ञाबलाऽऽन्दपुरुषार्था वर्धेरन्नग्नितुरङ्गादिचालनविद्या प्राप्नुयात् तत्कर्म्म सदाऽनुष्ठेयम्॥५॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य से युक्त विद्वान्! जिनसे (**ते**) आपके (**बृहते**) बड़े (**जुजुषाणाय**) प्रीति से सेवन किये गये (**क्रत्वे**) प्रज्ञान तथा (**दक्षाय**) चातुर्य्य बल और (**मदाय**) आनन्द के लिये (**सोमः**) बड़ी ओषधियों का रस वा ऐश्वर्य्य (**असावि**) उत्पन्न किया जाये और उनके (**योगे**)

संयोग होने पर (**अर्वाक्**) नीचे वाले (**सुधुरा**) सुन्दर धुरा जिनकी ऐसे (**हरी**) हरणशील घोड़ों को (**रथे**) वाहन में जोड़ के (**हूयमानः**) स्पर्द्धा किये गये आप (**प्रिया**) सेवन करने योग्य सुन्दर वस्तुओं वा सुखों को (**कृणुहि**) सिद्ध करिये॥५॥

भावार्थः-हे मनुष्यो! जिससे बुद्धि, बल, आनन्द और पुरुषार्थ बढ़े और अग्नि और घोड़े आदि के चलाने की विद्या प्राप्त होवे, वह कर्म्म सदा करना चाहिये॥५॥

पुनस्तमेव विद्वद्विषयमाह॥

फिर उसी विद्वद्विषय को कहते हैं॥

आ नो॑ म॒हीम॒रम॑तिं स॒जोषा॒ ग्नां दे॒वीं नम॑सा रा॒तह॑व्याम्।
मधो॒र्मदा॑य बृह॒तीमृ॑त॒ज्ञामाग्ने॑ वह प॒थिभि॑र्देव॒यानै॑:॥६॥

आ। नः। महीम्। अरमतिम्। सऽजोषाः। ग्नाम्। देवीम्। नमसा। रातऽहव्याम्। मधोः। मदाय। बृहतीम्। ऋतऽज्ञाम्। आ। अग्ने। वह। पथिऽभिः। देवऽयानैः॥६॥

पदार्थः-(**आ**) (**नः**) अस्मान् (**महीम्**) महतीं वाचम् (**अरमतिम्**) विषयेष्वरममाणाम् (**सजोषाः**) समानप्रीतिसेवी (**ग्नाम्**) गच्छन्ति ज्ञानं यया ताम् (**देवीम्**) देदीप्यमानां कमनीयाम् (**नमसा**) सत्कारेणान्नादिना वा (**रातहव्याम्**) रातानि हव्यानि दातव्यानि दानानि यया ताम् (**मधोः**) मधुरादिगुणयुक्तात् (**मदाय**) आनन्दाय (**बृहतीम्**) बृहत्पदार्थविषयाम् (**ऋतज्ञाम्**) ऋतं सत्यं जानाति यया ताम् (**आ**) (**अग्ने**) विद्वन् (**वह**) प्रापय (**पथिभिः**) मार्गैः (**देवयानैः**) देवा आप्ता विद्वांसो गच्छन्ति येषु तैः॥६॥

अन्वयः-हे अग्ने! आ सजोषास्त्वं नमसा पथिभिर्देवयानैर्मधोर्मदाय नोऽरमतिं रातहव्यां ग्नामृतज्ञां बृहतीं देवीं महीं न आ वह॥६॥

भावार्थः-त एव विद्वांसो जायन्ते ये सर्वथा सर्वदा विद्यां याचन्ते त एव विद्वांसो ये धर्म्यात् पथो विरुद्धं किमप्याचरणं न कुर्वन्ति॥६॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**आ**) सब ओर से (**सजोषाः**) तुल्य प्रीति के सेवन करने वाले आप (**नमसा**) सत्कार वा अन्न आदि से (**देवयानैः**) यथार्थवक्ता विद्वान् चलते हैं जिनसे उन (**पथिभिः**) मार्गों से (**मधोः**) मधुर आदि गुण युक्त से (**मदाय**) आनन्द के लिये (**नः**) हम लोगों को (**अरमतिम्**) विषयों में नहीं रमण करती हुई (**रातहव्याम्**) देने योग्य दान जिससे (**ग्नाम्**) प्राप्त होते हैं ज्ञान को जिससे तथा (**ऋतज्ञाम्**) सत्य को जानता है जिससे उस (**बृहतीम्**) बड़े पदार्थों के विषय से युक्त (**देवीम्**) देदीप्यमान मनोहर (**महीम्**) बड़ी वाणी को हम लोगों के लिये (**आ, वह**) प्राप्त कराइये॥६॥

भावार्थः-वे ही विद्वान् होते हैं जो सब प्रकार से सब काल में विद्या की याचना करते हैं और वे ही विद्वान् हैं, जो धर्मयुक्त मार्ग से विरुद्ध कुछ भी आचरण नहीं करते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अञ्जन्ति॒ यं प्र॒थय॑न्तो॒ न विप्रा॑ व॒पाव॑न्तं॒ नाग्निना॒ तप॑न्तः।

पि॒तुर्न पु॒त्र उ॒पसि॒ प्रेष्ठ॒ आ घ॒र्मो अ॒ग्निमृ॒तय॑न्नसादि॥७॥

अ॒ञ्जन्ति॑। यम्। प्र॒थय॑न्तः। न। विप्रा॑ः। व॒पाऽव॑न्तम्। न। अ॒ग्निना॑। तप॑न्तः। पि॒तुः। न। पु॒त्रः। उ॒पसि॑। प्रेष्ठ॑ः। आ। घ॒र्मः। अ॒ग्निम्। ऋ॒तय॑न्। अ॒सा॒दि॒॥७॥

पदार्थः-(अञ्जन्ति) कामयन्ते प्रकटयन्ति वा **(यम्)** **(प्रथयन्तः)** प्रख्यापयन्तः **(न)** इव **(विप्राः)** मेधाविनः **(वपावन्तम्)** विद्याबीजं विस्तरन्तम् **(न)** इव **(अग्निना)** पावकेनेव ब्रह्मचर्य्येण **(तपन्तः)** सन्तापदुःखं सहमानाः **(पितुः)** जनकस्य **(न)** इव **(पुत्रः)** **(उपसि)** समीपे **(प्रेष्ठः)** अतिशयेन प्रियः **(आ)** समन्तात् **(घर्मः)** यज्ञस्तापो वा **(अग्निम्)** **(ऋतयन्)** सत्यमिवाचरन् **(असादि)** सीदेत्॥७॥

अन्वयः-हे विद्यार्थिन्! यं वपावन्तं न त्वामग्निना तपन्तो वपावन्तं न प्रथयन्तो विप्रा नाऽग्निना तपन्तोऽञ्जन्ति यः पितुः पुत्रो नोपसि प्रेष्ठो घर्मोऽग्निमृतयन्नासादि ताँस्तञ्च त्वं सततं सेवित्वा विद्यामुपादत्स्व॥७॥

भावार्थः-अत्रोपमालङ्कारः। हे अध्यापकविद्वांसो यूयं ये जितेन्द्रिया आप्तस्वभावाः शीतोष्णसुख-दुःखहर्षशोकनिन्दास्तुत्यादिद्वन्द्वं सोढारो निरभिमानिनो निर्म्मोहाः सत्याचरणपरोपकारप्रिया ब्रह्मचारिणो विद्यार्थिनः स्युस्तान् पुरुषार्थेन विदुषः कुरुत॥७॥

पदार्थः-हे विद्यार्थिन्! **(यम्)** जिस **(वपावन्तम्)** विद्या के बीज के विस्तार को करते हुए के **(न)** सदृश आप को **(अग्निना)** अग्नि के सदृश ब्रह्मचर्य्य से **(तपन्तः)** संताप दुःख को सहते और विद्या के बीज का विस्तार करते हुए के **(न)** सदृश **(प्रथयन्तः)** प्रसिद्ध करते हुए **(विप्राः)** बुद्धिमान जनों के **(न)** सदृश अग्नि के समान ब्रह्मचर्य्य से सन्ताप दुःख को सहते हुए **(अञ्जन्ति)** कामना करते वा प्रकट करते हैं और जो **(पितुः)** पिता के **(पुत्रः)** पुत्र के सदृश **(उपसि)** समीप में **(प्रेष्ठः)** अत्यन्त प्रिय **(घर्मः)** यज्ञ वा तप **(अग्निम्)** अग्नि को **(ऋतयन्)** सत्य के सदृश आचरण करते हुए **(आ, असादि)** उत्तम प्रकार स्थित होवे, उनको और उसको आप निरन्तर सेवन करके विद्या को ग्रहण करिये॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे अध्यापक विद्वानो! तुम लोग जो जितेन्द्रिय उत्तम स्वभावयुक्त शीत-उष्ण, सुख-दुःख, आनन्द, शोक, निन्दा-स्तुति आदि द्वन्द्व को सहने वाले अभिमान और मोह से रहित सत्य आचरणकर्त्ता और परोपकारप्रिय ब्रह्मचारी विद्यार्थी होवें, उनको पुरुषार्थ से विद्वान् करिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विद्वद्विषय को कहते हैं॥

अच्छा॑ म॒ही बृ॑ह॒ती शं॑त॒मा॒ गीर्दू॒तो न ग॑न्त्व॒श्विना॑ हु॒वध्यै॑।

म॒योभुवा॑ स॒रथा या॑तम॒र्वाग्ग॒न्तं नि॒धिं धुर॑मा॒णिर्न नाभि॑म्॥८॥

अच्छ॑। म॒ही। बृ॒हती। शम्ऽत॑मा। गीः। दू॒तः। न। ग॒न्तु॒। अ॒श्विना॑। हु॒वध्यै॑। म॒यः॒ऽभुवा॑। स॒ऽरथा॑। आ। या॒त॒म्। अ॒र्वाक्। ग॒न्त॒म्। नि॒ऽधिम्। धुर॑म्। आ॒णिः। न। नाभि॑म्॥८॥

पदार्थः-(अच्छा) अत्र **संहितायामि**ति दीर्घः। **(मही)** महती **(बृहती)** बृहद्ब्रह्मादिवस्तुप्रकाशिका **(शन्तमा)** अतिशयेन कल्याणकारिणी **(गीः)** गायन्ति पदार्थान् यया सा **(दूतः)** धार्म्मिको विद्वान् दक्षो राजदूतः **(न)** इव **(गन्तु)** प्राप्नोतु **(अश्विना)** अध्यापकोपदेशकौ **(हुवध्यै)** आह्वातुम् **(मयोभुवा)** सुखं भावुकौ **(सरथा)** रथादिभिः सह वर्त्तमानौ **(आ)** **(यातम्)** गच्छतम् **(अर्वाक्)** सत्यधर्ममनु **(गन्तम्)** गच्छन्तम् **(निधिम्)** **(धुरम्)** यानाधारकाष्ठम् **(आणिः)** कीलकम् **(न)** इव **(नाभिम्)** मध्यम्॥८॥

अन्वयः-हे मनुष्या! या बृहती शन्तमा मही गीर्मयोभुवा सरथाऽश्विना हुवध्यै दूतो न गन्तु ययाऽश्विना नाभिं धुरमाणिर्नार्वाग्गन्तं निधिमच्छाऽऽयातं तां यूयं प्राप्नुत॥८॥

भावार्थः-अत्रोपमालङ्कारः। त एव मनुष्या यान् राजानं दूत इव सर्वशास्त्रप्रवीणा वाक् प्राप्नुयात् त एव भाग्यवन्तो यान् धर्म्येण पुरुषार्थेनातुलमैश्वर्य्यमीयात्॥८॥

पदार्थः-हे मनुष्यो! जो **(बृहती)** बड़े ब्रह्म आदि वस्तु को प्रकाश करने वाली और **(शन्तमा)** अत्यन्त कल्याणकारिणी **(मही)** बड़ी **(गीः)** गाते हैं पदार्थों को जिससे ऐसी वाणी और **(मयोभुवा)** सुख को उत्पन्न करने वाले **(सरथा)** वाहन आदिकों के साथ वर्त्तमान **(अश्विना)** अध्यापक और उपदेशक जनों को **(हुवध्यै)** बुलाने को जैसे **(दूतः)** धार्म्मिक विद्वान् चतुर राजा का दूत **(न)** वैसे **(गन्तु)** प्राप्त हूजिये तथा जिससे अध्यापक और उपदेशक जन **(नाभिम्)** मध्य **(धुरम्)** वाहन के आधार काष्ठ को **(आणिः)** कीले के **(न)** सदृश और **(अर्वाक्)** सत्य धर्म्म के पीछे **(गन्तम्)** चलते हुए **(निधिम्)** द्रव्यपात्र को **(अच्छा)** उत्तम प्रकार **(आ, यातम्)** प्राप्त हूजिये, उसको आप लोग प्राप्त होओ॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वे ही मनुष्य हैं जिनको जैसे राजा को दूत वैसे सम्पूर्ण शास्त्रों में प्रवीण वाणी प्राप्त होवे और वे ही भाग्यशाली हैं, जिनको धर्मयुक्त पुरुषार्थ से अतुल ऐश्वर्य्य प्राप्त होवे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र तव्य॑सो॒ नम॑उक्तिं तु॒रस्या॒हं पू॒ष्ण उ॒त वा॒योर॑दिक्षि।

या राध॑सा चोदि॒तारा॑ मती॒नां या वाज॑स्य द्रविणो॒दा उ॒त त्मन्॥९॥

प्र। तव्य॑सः। नम॑ः॒ऽउक्तिम्। तु॒रस्य॑। अ॒हम्। पू॒ष्णः। उ॒त। वा॒योः। अ॒दि॒क्षि॒। या। राध॑सा। चो॒दि॒तारा॑। म॒ती॒नाम्। या। वाज॑स्य। द्र॒वि॒ण॒ः॒ऽदौ। उ॒त। त्मन्॥९॥

पदार्थः-(प्र) (**तव्यसः**) बलस्य (**नमउक्तिम्**) नमस्सत्कारस्यान्नाऽऽदेर्वा वचनम् (**तुरस्य**) शीघ्रकारिणः (**अहम्**) (**पूष्णः**) पुष्टिकरस्य (**उत**) अपि (**वायोः**) (**अदिक्षि**) उपदिशामि (**या**) यौ (**राधसा**) धनेन (**चोदितारा**) प्रेरकौ (**मतीनाम्**) मनुष्याणाम् (**या**) यौ (**वाजस्य**) विज्ञानस्याऽन्नस्य वा (**द्रविणोदौ**) यौ द्रविणसौ दत्तस्तौ (**उत**) अपि (**त्मन्**) आत्मनि॥९॥

अन्वयः-हे विद्वांसो! यथाऽहं तुरस्य तव्यस उत पूष्णो वायोर्नमउक्तिमदिक्षि उत त्मन्या राधसा मतीनां प्र चोदितारा या वाजस्य द्रविणोदौ वर्त्तेते तावदिक्षि तथा यूयमप्युपदिशत॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसो विद्योपदेशदानाभ्यां मनुष्यान् सुशिक्षितान् कुर्वन्ति तथैव यूयमप्यनुतिष्ठत॥९॥

पदार्थः-हे विद्वान् जनो! जैसे (**अहम्**) मैं (**तुरस्य**) शीघ्र कार्य्य करने वाले (**तव्यसः**) बलयुक्त (**उत**) और (**पूष्णः**) पुष्टिकारक (**वायोः**) वायु के (**नमउक्तिम्**) सत्कार वा अन्न आदि के वचन का (**अदिक्षि**) उपदेश करता हूं और (**उत**) भी (**त्मन्**) आत्मा में (**या**) जो (**राधसा**) धन से (**मतीनाम्**) मनुष्यों के (**प्र, चोदितारा**) अत्यन्त प्रेरणा करने वाले और (**या**) जो (**वाजस्य**) विज्ञान वा अन्न के (**द्रविणोदौ**) बल से देने वाले वर्त्तमान हैं, उनको उपदेश देता हूं, वैसे आप लोग भी उपदेश दीजिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन विद्या के उपदेश और दान से मनुष्यों को उत्तम प्रकार शिक्षित करते हैं, वैसे ही तुम लोग भी करो॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ नामभिर्मरुतो वक्षि विश्वान रूपेभिर्जातवेदो हुवानः।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती॥१०॥२१॥

आ। नामऽभिः। मरुतः। वक्षि। विश्वान्। आ। रूपेभिः। जातऽवेदः। हुवानः। यज्ञम्। गिरः। जरितुः। सुऽस्तुतिम्। च। विश्वे। गन्त। मरुतः। विश्वे। ऊती॥१०॥

पदार्थः-(आ) समन्तात् (**नामभिः**) संज्ञाभिः (**मरुतः**) मनुष्यान् (**वक्षि**) आवह (**विश्वान्**) समग्रान् (**आ**) (**रूपेभिः**) रूपैः (**जातवेदः**) प्रजातप्रज्ञः (**हुवानः**) ददन् (**यज्ञम्**) सङ्गतिकरणम् (**गिरः**) वाचः (**जरितुः**) स्तावकस्य (**सुष्टुतिम्**) स्तावकस्य उत्तमां प्रशंसाम् (**च**) (**विश्वे**) सर्वे (**गन्त**) गच्छन्तु प्राप्नुवन्तु (**मरुतः**) मनुष्यान् (**विश्वे**) सर्वे (**ऊती**) ऊत्या रक्षणादिक्रियया॥१०॥

अन्वयः-हे जातवेदो हुवानस्त्वं नामभी रूपेभिर्विश्वान् मरुत आ वक्षि जरितुः सुष्टुतिं गिरो यज्ञञ्च विश्वे गन्त विश्वे मरुत ऊत्याऽऽगन्त॥१०॥

भावार्थः-हे विद्वन्! भवान् सर्वैर्नामभी रूपादिभिश्चाऽखिलान् पदार्थान् सर्वान् मनुष्यान् साक्षात्कारयतु येन सर्वे मनुष्याः प्रशंसिता भूत्वा सर्वान् प्रशस्तविद्यान् सम्पादयन्तु॥१०॥

पदार्थः-हे (**जातवेदः**) बुद्धि से युक्त (**हुवानः**) दान करते हुए आप (**नामभिः**) संज्ञाओं और (**रूपेभिः**) रूपों से (**विश्वान्**) सम्पूर्ण (**मरुतः**) मनुष्यों को (**आ**) सब प्रकार (**वक्षि**) प्राप्त हूजिये (**जरितुः**) स्तुति करने वाले की (**सुष्टुतिम्**) स्तुति करने वाले की उत्तम प्रशंसा को (**गिरः**) वाणियों को (**यज्ञम्, च**) और संगति करने को (**विश्वे**) सम्पूर्ण (**गन्त**) प्राप्त होवें तथा (**विश्वे**) समस्त (**मरुतः**) मनुष्यों को (**ऊती**) रक्षण आदि क्रिया से (**आ**) प्राप्त होवें॥१०॥

भावार्थः-हे विद्वन्! आप सम्पूर्ण नाम और रूप आदिकों से सम्पूर्ण पदार्थों को सम्पूर्ण मनुष्यों के लिये साक्षात् कराओ, जिससे सब मनुष्य प्रशंसित होकर सब को प्रशंसित विद्यायुक्त सम्पादित करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ नो॑ दि॒वो बृ॑ह॒तः पर्व॑ता॒दा सर॑स्वती यज॒ता ग॑न्तु य॒ज्ञम्।
हवं॑ दे॒वी जु॑जुषा॒णा घृ॒ताची॑ शग्मां नो॒ वाच॑मुश॒ती शृ॑णोतु॥ ११॥

आ। नः। दिवः। बृहतः। पर्वतात्। आ। सरस्वती। यजता। गन्तु। यज्ञम्। हवम्। देवी। जुजुषाणा। घृताची। शग्माम्। नः। वाचम्। उशती। शृणोतु॥ ११॥

पदार्थः-(**आ**) (**नः**) अस्मान् (**दिवः**) कामयमानान् (**बृहतः**) महाशयान् (**पर्वतात्**) मेघात् (**आ**) (**सरस्वती**) विज्ञानयुक्ता वाक् (**यजता**) सङ्गन्तव्या (**गन्तु**) प्राप्नोतु (**यज्ञम्**) विद्याव्यवहारम् (**हवम्**) वक्तव्यं श्रोतव्यं वा (**देवी**) दिव्यगुणशास्त्रबोधयुक्ता (**जुजुषाणा**) सम्यक् सेवमाना (**घृताची**) या घृतमुदकमञ्चति (**शग्माम्**) सुखमयीम् (**नः**) अस्माकम् (**वाचम्**) वाणीम् **[(उशती)]** कामयमाना (**शृणोतु**)॥११॥

अन्वयः-हे विद्यार्थिनो! यथेयं यजता सरस्वती दिवो बृहतो नोऽस्मान् पर्वताज्जलमिवाऽऽगन्तु घृताची जुजुषाणा देव्युशती कामयमाना विदुषी स्त्री नो यज्ञं हवं शग्मां वाचं नोऽस्मांश्चऽऽशृणोतु तथैव युष्मानपि प्राप्ता सतीयं युष्माकं कृत्यं शृणुयात्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। तानेव दिव्या वाक् प्राप्नोति ये सत्यकामा महाशयाः परोपकारप्रिया धर्मिष्ठा विद्यार्थिनां परीक्षकाः स्युः॥११॥

पदार्थः-हे विद्यार्थी जनो! जैसे यह (**यजता**) उत्तम प्रकार प्राप्त होने योग्य (**सरस्वती**) विज्ञानयुक्त वाणी (**दिवः**) कामना करते हुए (**बृहतः**) महदाशययुक्त (**नः**) हम लोगों को (**पर्वतात्**) मेघ से जल के सदृश (**आ, गन्तु**) सब प्रकार प्राप्त होवे (**घृताची**) घृत को प्राप्त होने वाली (**जुजुषाणा**)

उत्तम प्रकार से सेवन की गई **(देवी)** श्रेष्ठ गुण और शास्त्र के बोध से युक्त **(उशती)** कामना करती हुई विद्यायुक्त स्त्री **(नः)** हम लोगों के **(यज्ञम्)** विद्याव्यवहार को **(हवम्)** कहने-सुनने योग्य व्यवहार को वा **(शग्माम्)** सुखमयी **(वाचम्)** वाणी को और हम लागों को **(आ, शृणोतु)** अच्छे प्रकार सुने, वैसे आप लोगों को भी प्राप्त हुई यह आप लोगों के कृत्य को सुने॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। उन्हीं को श्रेष्ठ वाणी प्राप्त होती है, जो सत्य की कामना करने वाले, महाशय, परोपकारप्रिय, धर्मिष्ठ और विद्यार्थियों के परीक्षक होवें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम्।

सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम॥१२॥

आ। वेधसम्। नीलऽपृष्ठम्। बृहन्तम्। बृहस्पतिम्। सदने। सादयध्वम्। सादत्ऽयोनिम्। दमे। आ। दीदिऽवांसम्। हिरण्यऽवर्णम्। अरुषम्। सपेम॥१२॥

पदार्थः-**(आ)** **(वेधसम्)** मेधाविनम् **(नीलपृष्ठम्)** नीलसंवृत्तं पृष्ठं यस्य तम् **(बृहन्तम्)** महान्तम् **(बृहस्पतिम्)** महतां पतिम् **(सदने)** सभास्थाने **(सादयध्वम्)** स्थापयत **(सादद्योनिम्)** सीदन्तं धर्म्ये कारणे **(दमे)** गृहे **(आ)** **(दीदिवांसम्)** देदीप्यमानं दातारम् **(हिरण्यवर्णम्)** तेजस्विनम् **(अरुषम्)** मर्मविद्यायां सीदन्तम् **(सपेम)** सपथैर्नियमयेम॥१२॥

अन्वयः-हे धीमन्तो जना! यूयं नीलपृष्ठं बृहन्तं बृहस्पतिं वेधसं सदन आ सादयध्वम्। वयं सादद्योनिं तं दीदिवांसं हिरण्यवर्णमरुषं दमे सभास्थान आ सपेम॥१२॥

भावार्थः-त एव मनुष्या राज्यं कर्त्तुं वर्धयितुं च शक्नुयुर्ये धर्मिष्ठान् कृतज्ञान् कुलीनान् विदुषः सभायां स्थापयेयुस्तत्र स्थापनसमये सपथैर्यूयमन्यायं कदाचिन्मा करिष्यथेति प्रलम्भयेयुः॥१२॥

पदार्थः-हे बुद्धिमान् जनो! आप लोग **(नीलपृष्ठम्)** नीलगुण से युक्त पृष्ठ जिसका उस **(बृहन्तम्)** बड़े **(बृहस्पतिम्)** बड़ों के स्वामी **(वेधसम्)** बुद्धिमान् को **(सदने)** सभा के स्थान में **(आ, सादयध्वम्)** उत्तम प्रकार स्थित कीजिये। और हम लोग **(सादद्योनिम्)** धर्मसम्बन्धी कारण में स्थित होते और **(दीदिवांसम्)** निरन्तर प्रकाशमान देने वाले **(हिरण्यवर्णम्)** तेजस्वी **(अरुषम्)** मर्मविद्या में स्थित होते हुए को **(दमे)** गृह में अर्थात् सभास्थान में **(आ, सपेम)** अच्छे प्रकार सपथों से नियत करावें॥१२॥

भावार्थः-वे ही मनुष्य राज्य करने और बढ़ाने को समर्थ होवें, जो धर्मिष्ठ और किये हुए उपकारों को जानने वाले, कुलीन विद्वानों को सभा में स्थित करें तथा वहाँ स्थापनसमय में सपथों से आप लोग अन्याय को कभी मत करो, ऐसा प्रलम्भन करावें॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः।

ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृङ्गो वृषभो वयोधाः॥ १३॥

आ। धर्णसिः। बृहत्ऽदिवः। रराणः। विश्वेभिः। गन्तु। ओमऽभिः। हुवानः। ग्नाः। वसानः। ओषधीः। अमृध्रः। त्रिधातुऽशृङ्गः। वृषभः। वयःऽधाः॥ १३॥

पदार्थः-(आ) समन्तात् **(धर्णसिः)** धर्त्ता **(बृहद्दिवः)** बृहतः प्रकाशस्य **(रराणः)** ददन् **(विश्वेभिः)** सर्वैः **(गन्तु)** प्राप्नोतु **(ओमभिः)** रक्षणादिकारकैः सह **(हुवानः)** आददानः **(ग्नाः)** वाचः। **ग्नेति वाङ्नामसु पठितम्।** (निघं०१.११) **(वसानः)** आच्छादयन् **(ओषधीः)** सोमलताद्याः **(अमृध्रः)** अहिंसकः **(त्रिधातुशृङ्गः)** त्रयो धातवो शुल्करक्तकृष्णगुणाः शृङ्गवद्यस्य सः **(वृषभः)** वर्षकः **(वयोधाः)** यो वयः कमनीयमायुर्दधाति सः॥ १३॥

अन्वयः-हे विद्वन्! यथा धर्णसिर्बृहद्दिवो रराणो विश्वेभिरोमभिर्हुवानो ग्ना वसान ओषधीरमृध्र-स्त्रिधातुशृङ्गो वयोधा वृषभस्सूर्य्यो जगदुपकारी वर्त्तते तथैव भवान् जगदुपकारायाऽऽगन्तु॥ १३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसः त्रिगुणयुक्तप्रकृतिबोधका वाग्विज्ञापका अहिंस्रा औषधै रोगनिवारका ब्रह्मचर्य्यादिबोधेनायुर्वर्धका भवन्ति त एव जगत्पूज्या जायन्ते॥ १३॥

पदार्थः-हे विद्वन्! जैसे **(धर्णसिः)** धारण करने वाला **(बृहद्दिवः)** बड़े प्रकाश का **(रराणः)** दान करता हुआ **(विश्वेभिः)** सम्पूर्ण **(ओमभिः)** रक्षण आदि के करने वालों के साथ **(हुवानः)** ग्रहण करता और **(ग्नाः)** वाणियों को **(वसानः)** आच्छादित करता हुआ **(ओषधीः)** सोमलता आदि का **(अमृध्रः)** नहीं नाश करने वाला **(त्रिधातुशृङ्गः)** तीन धातु अर्थात् शुक्ल, रक्त, कृष्ण गुण शृङ्गों के सदृश जिसके और **(वयोधाः)** सुन्दर आयु को धारण करने वाला **(वृषभः)** वृष्टिकारक सूर्य्य संसार का उपकारी है, वैसे ही आप संसार के उपकार के लिये **(आ, गन्तु)** उत्तम प्रकार प्राप्त हूजिये॥ १३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् तीन गुणों से युक्त प्रकृति के जानने, वाणी के जानने, नहीं हिंसा करने, औषधों से रोगों के निवारने और ब्रह्मचर्य्य आदि के बोध से अवस्था के बढ़ाने वाले होते हैं, वे ही संसार के पूज्य होते हैं॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्परासो अग्मन्।

सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे॥ १४॥

मा॒तुः। प॒दे। प॒र॒मे। शु॒क्रे। आ॒योः। वि॒प॒न्यवः॑। रा॒स्पि॒रासः॑। अ॒ग्म॒न्। सु॒ऽशेव्य॑म्। नम॑सा। रा॒तऽह॑व्याः। शिशु॑म्। मृ॒ज॒न्ति॒। आ॒यवः॑। न। वा॒से॥ १४॥

पदार्थः-(मातुः) जननीव वर्त्तमानाया भूमेः **(पदे)** प्रापणीये **(परमे)** उत्कृष्टे **(शुक्रे)** शुद्धे **(आयोः)** जीवनस्य **(विपन्यवः)** विशेषेण स्तावकाः **(रास्पिरासः)** ये रा दानानि स्पृणन्ति ते **(अग्मन्)** गच्छन्ति **(सुशेव्यम्)** सुष्ठु सुखेषु भवम् **(नमसा)** सत्कारेणान्नादिना वा **(रातहव्याः)** दत्तदातव्याः **(शिशुम्)** शासनीयं बालकम् **(मृजन्ति)** शोधयन्ति **(आयवः)** मनुष्याः **(न)** इव **(वासे)**॥ १४॥

अन्वयः-हे मनुष्या! ये शुक्रे परमे मातुष्पद आयोर्विपन्यवो रास्पिरासो रातहव्या नमसा वास आयवः शिशुं मृजन्ति न सुशेव्यमग्मन् ते सुशेव्या जायन्ते॥ १४॥

भावार्थः-अत्रोपमालङ्कारः। यथा माता सद्योजातं बालकं संशोध्य सुवासे रक्षति तथैव ये योगाभ्यासे चित्तं शोधयन्ति ते सैश्वर्य्यं सुखं प्राप्नुवन्ति॥ १४॥

पदार्थः-हे मनुष्यो! जो **(शुक्रे)** शुद्ध **(परमे)** उत्तम **(मातुः)** माता के सदृश वर्त्तमान भूमि के **(पदे)** प्राप्त होने योग्य स्थान में **(आयोः)** जीवन के **(विपन्यवः)** विशेषतया स्तुति करने और और **(रास्पिरासः)** दोनों की प्रीति करने वाले **(रातहव्याः)** दिये हुओं के देने योग्य **(नमसा)** सत्कार वा अन्न आदि से **(वासे)** वसने में **(आयवः)** मनुष्य **(शिशुम्)** शासन करने योग्य बालक को **(मृजन्ति)** शुद्ध करते हैं **(न)** जैसे वैसे **(सुशेव्यम्)** उत्तम सुखों में हुए व्यवहार को **(अग्मन्)** प्राप्त होते हैं, वे उत्तम प्रकार सुखों से युक्त होते हैं॥ १४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे माता शीघ्र उत्पन्न हुए बालक को उत्तम प्रकार शुद्ध करके उत्तम स्थान में रक्षा करती है, वैसे ही जो योगाभ्यास में चित्त को शुद्ध करते हैं, वे ऐश्वर्य्य के सहित सुख को प्राप्त होते हैं॥ १४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

बृ॒हद्व॒यो॑ बृ॒हते॒ तुभ्य॑मग्ने धिया॒जुरो॑ मिथु॒नासः॑ सचन्त।
दे॒वोदे॑वः सु॒हवो॑ भूतु॒ मह्यं॒ मा नो॑ मा॒ता पृ॑थि॒वी दु॒र्मतौ॑ धात्॥ १५॥

बृ॒हत्। वयः॑। बृ॒हते॑। तुभ्य॑म्। अ॒ग्ने॒। धि॒या॒ऽजुरः॑। मि॒थु॒नासः॑। स॒च॒न्त॒। दे॒वःऽदे॑वः। सु॒ऽह॒वः॑। भू॒तु॒। मह्य॑म्। मा। नः॒। मा॒ता। पृ॒थि॒वी। दुः॒ऽम॒तौ। धा॒त्॥ १५॥

पदार्थः-(बृहत्) महत् **(वयः)** जीवनम् **(बृहते)** वृद्धाय **(तुभ्यम्)** **(अग्ने)** विद्वन् **(धियाजुरः)** धिया प्रज्ञया कर्म्मणा वा प्राप्तजरावस्थाः **(मिथुनासः)** सपत्नीकाः **(सचन्त)** समवयन्ति **(देवोदेवः)** विद्वान् विद्वान् **(सुहवः)** सुष्ठुप्रशंसनीयः **(भूतु)** भवतु **(मह्यम्)** **(मा)** निषेधे **(नः)** अस्मान् **(माता)** जननी **(पृथिवी)** भूमिरिव **(दुर्मतौ)** दुष्टायां प्रज्ञायाम् **(धात्)** दध्यात्॥ १५॥

अन्वयः-हे अग्ने! ये धियाजुरो मिथुनासो बृहते तुभ्यं बृहद्वयः सचन्त सुहवो देवोदेवो मह्यं सुखकारी भूतु पृथिवीव माता नोऽस्मान् दुर्म्मतौ मा धात्॥१५॥

भावार्थः-हे मनुष्या! ये वयोविद्यावृद्धा युष्मान् विद्याभिः सह सम्बध्नन्ति मातृवत् कृपया रक्षन्ति ते युष्माकं पूज्या भवन्तु॥१५॥

पदार्थः-हे **(अग्ने)** विद्वन्! जो **(धियाजुरः)** बुद्धि वा कर्म्म से प्राप्त हुई वृद्धावस्था जिनको ऐसे **(मिथुनासः)** स्त्रियों के सहित वर्त्तमान जन **(बृहते)** वृद्ध **(तुभ्यम्)** आपके लिये **(बृहत्)** बड़े **(वयः)** जीवन को **(सचन्त)** उत्तम प्रकार प्राप्त होते हैं और **(सुहवः)** उत्तम प्रकार प्रशंसा करने योग्य **(देवोदेवः)** विद्वान् विद्वान् **(मह्यम्)** मेरे लिये सुखकारी **(भूतु)** हो और **(पृथिवी)** भूमि के सदृश **(माता)** माता **(नः)** हम लोगों को **(दुर्म्मतौ)** दुष्ट बुद्धि में **(मा)** नहीं **(धात्)** धारण करे॥१५॥

भावार्थः-हे मनुष्यो! जो अवस्था और विद्या में वृद्ध आप लोगों को विद्याओं से सम्बन्धित करते हैं और माता के सदृश कृपा से रक्षा करते हैं, वे आप लोगों के पूज्य हों॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उरौ देवा अनिबाधे स्याम॥१६॥

उरौ। देवाः। अनिऽबाधे। स्याम॥१६॥

पदार्थः-(**उरौ**) बहौ **(देवाः)** विद्वांसः **(अनिबाधे)** व्यवहारे **(स्याम)** भवेम॥१६॥

अन्वयः-हे देवा! यूयं यथा वयमुरावनिबाधे स्याम तथा विदधत॥१६॥

भावार्थः-विद्वद्भिः सर्वे मनुष्या यथा निर्विघ्नाः स्युस्तथा विधेयम्॥१६॥

पदार्थः-हे **(देवाः)** विद्वान् जनो! आप लोग जैसे हम लोग **(उरौ)** बहु **(अनिबाधे)** व्यवहार में **(स्याम)** होवें वैसे करिये॥१६॥

भावार्थः-विद्वानों को चाहिये कि सब मनुष्य जैसे विघ्नरहित होवें, वैसा करें॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम।

आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥१७॥२२॥

सम्। अश्विनोः। अवसा। नूतनेन। मयःऽभुवा। सुऽप्रनीती। गमेम। आ। नः। रयिम्। वहतम्। आ। उत। वीरान्। आ। विश्वानि। अमृता। सौभगानि॥१७॥

पदार्थः-(सम्) (अश्विनोः) अध्यापकोपदेशकयोः **(अवसा)** रक्षणाद्येन **(नूतनेन)** नवीनेन **(मयोभुवा)** सुखंभावुकौ **(सुप्रणीती)** धर्म्यनीतियुक्तौ **(गमेम)** प्राप्नुयाम **(आ) (नः)** अस्मान् **(रयिम्)** धनम् **(वहतम्)** प्रापयेतम् **(आ) (उत)** अपि **(वीरान्)** अत्युत्तमान् पुत्रपौत्रादीन् **(आ) (विश्वानि)** समग्राणि **(अमृता)** नाशरहितानि **(सौभगानि)** शोभनैश्वर्य्याणां भावान्॥१७॥

अन्वयः-हे अध्यापकोपदेशकौ! यौ मयोभुवा सुप्रणीती युवां नो रयिमुतापि वीराना वहतं ययोरश्विनोर्नूतनेनावसा वयं विश्वान्यमृता सौभगानि वयं सोमा गमेम तावस्माभिः सदैवा सेवनीयौ स्तः॥१७॥

भावार्थः-येऽध्यापकोपदेशकाः सर्वान् मनुष्यान् नूतनयाऽनूतनया विद्यया युक्तान् कृत्वैश्वर्य्यं प्रापयन्ति ते सदैव प्रशंसिता भवन्तीति॥१७॥

अत्र विश्वदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिचत्वारिंशत्तमं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे अध्यापकोपदेशको! जो **(मयोभुवाः)** सुख के उत्पन्न करने वाले **(सुप्रणीती)** धर्मसन्बधी नीति से युक्त आप **(नः)** हम लोगों को **(रयिम्)** धन **(उत)** और **(वीरान्)** अति उत्तम पुत्र-पौत्र आदिकों को **(आ, वहतम्)** अच्छे प्रकार प्राप्त करावें और जिन **(अश्विनोः)** अध्यापक और उपदेशकों के **(नूतनेन)** नवीन **(अवसा)** रक्षण आदि से हम लोग **(विश्वानि)** सम्पूर्ण **(अमृता)** नाश से रहित **(सौभगानि)** सुन्दर ऐश्वर्य्यों के भावों को हम लोग **(सम्, आ गमेम)** उत्तम प्रकार प्राप्त होवें, वे दोनों हम लोगों से सदा **(आ)** उत्तम प्रकार सेवन करने योग्य हैं॥१७॥

भावार्थः-जो अध्यापक और उपदेशक जन सब मनुष्यों को नवीन और प्राचीन विद्या से युक्त कर ऐश्वर्य्य को प्राप्त कराते हैं, वे सदा ही प्रशंसित होते हैं॥१७॥

इस सूक्त में सम्पूर्ण विद्वानों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह तेतालीसवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्य चतुश्चत्वारिंशत्तमस्य सूक्तस्य अवत्सारः काश्यप अन्ये च ऋषयो दृष्टलिङ्गाः। विश्वेदेवा देवताः। १, ३, १३, विराड्जगती। २, ४, ५, ६, १२ निचृज्जगती। ८, ९ जगती छन्दः। निषादः स्वरः। ७ भुरिक् त्रिष्टुप्। १०, ११ स्वराट् त्रिष्टुप्। १४ विराट् त्रिष्टुप्। १५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्यरूपतया राजगुणानाह॥

अब पंद्रह ऋचा वाले चवालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में सूर्यरूपता से राजगुणों को कहते हैं॥

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे॥ १॥

तम्। प्रत्नऽथा। पूर्वऽथा। विश्वऽथा। इमऽथा ज्येष्ठऽतातिम्। बर्हिऽसदम्। स्वःऽविदम्। प्रतीचीनम्। वृजनम्। दोहसे। गिरा। आशुम्। जयन्तम्। अनु। यासु। वर्धसे॥ १॥

पदार्थः-(तम्) (प्रत्नथा) प्रत्नमिव **(पूर्वथा)** पूर्वमिव **(विश्वथा)** विश्वमिव **(इमथा)** इममिव **(ज्येष्ठतातिम्)** ज्येष्ठमेव **(बर्हिषदम्)** बर्हिष्युत्तमासनेऽन्तरिक्षे वा सीदन्तम् **(स्वर्विदम्)** स्वः सुखं विदन्ति येन तम् **(प्रतीचीनम्)** अस्मान् प्रत्यभिमुखं प्राप्नुवन्तम् **(वृजनम्)** बलम् **(दोहसे)** पिपरसि **(गिरा)** वाण्या **(आशुम्)** शीघ्रकारिणं स- ाम् **(जयन्तम्)** विजयमानम् **(अनु) (यासु) (वर्धसे)**॥१॥

अन्वयः-हे राजन्! यस्त्वं गिरा प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदं प्रतीचीनं वृजनमाशुं जयन्तं दोहसे तं त्वां यास्वनु वर्धसे ताः सेना प्रजाश्च वयं सततं वर्धयेम॥१॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये सनातनरीत्या पूर्वोत्तमराजवत्पितृवद् राष्ट्रं सम्पाल्य पूर्णबलां सेनां कृत्वा सद्योविजयमानाः प्रजाः सुखानुकूला वर्त्तयन्तु तानेवोत्तमाऽधिकारे नियोजयत यतो राजप्रजानां सततं सुखं वर्धेत॥१॥

पदार्थः-हे राजन्! जो आप **(गिरा)** वाणी से **(प्रत्नथा)** पुराने के सदृश **(पूर्वथा)** पूर्व के सदृश **(विश्वथा)** सम्पूर्ण संसार के सदृश **(इमथा)** इसके सदृश **(ज्येष्ठतातिम्)** जेठे ही को **(बर्हिषदम्)** उत्तम आसन वा अन्तरिक्ष में स्थित होने वाले **(स्वर्विदम्)** सुख को जानते जिससे उस **(प्रतीचीनम्)** हम लोगों के सम्मुख प्राप्त होते हुए **(वृजनम्)** बल को तथा **(आशुम्)** शीघ्रकारी संग्राम को **(जयन्तम्)** जीतते हुए को **(दोहसे)** पूर्ण करते हो **(तम्)** उन आपको और **(यासु)** जिनमें **(अनु, वर्धसे)** वृद्धि को प्राप्त होते हो, उन सेनाओं और उन प्रजाओं की हम लोग निरन्तर वृद्धि करें॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो प्राचीन रीति से प्राचीन उत्तम राजाओं के तुल्य पिता के सदृश राज्य का उत्तम प्रकार पालन करके पूर्ण बलयुक्त सेना को कर शीघ्र विजय को

प्राप्त हुई प्रजाओं को सुख के अनुकूल वर्त्तावें, उन्हीं को उत्तम अधिकार में नियुक्त करिये, जिससे राजा और प्रजा का निरन्तर सुख बढ़े॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते॥२॥

श्रिये। सुऽदृशीः। उपरस्य। याः। स्वः। विऽरोचमानः। ककुभाम्। अचोदते। सुऽगोपाः। असि। न। दभाय। सुक्रतो इति सुऽक्रतो। परः। मायाभिः। ऋते। आस। नाम। ते॥२॥

पदार्थः-(श्रिये) धनाय शोभायै वा **(सुदृशीः)** शोभनं दृग्दर्शनं यासां ताः **(उपरस्य)** मेघस्य **(याः)** **(स्वः)** आदित्यः **(विरोचमानः)** प्रकाशमानः **(ककुभाम्)** दिशाम् **(अचोदते)** अप्रेरकाय **(सुगोपाः)** सुष्ठु रक्षकः **(असि)** **(न)** निषेधे **(दभाय)** हिंसकाय **(सुक्रतो)** उत्तमकर्म्मप्रज्ञायुक्त **(परः)** प्रकृष्टः **(मायाभिः)** प्रज्ञाभिः **(ऋते)** सत्ये **(आस)** वर्त्तते **(नाम)** **(ते)** तव॥२॥

अन्वयः-हे सुक्रतो विद्वँस्त्वं यथा विरोचमानः स्वः ककुभामुपरस्य प्रकाशक आस तथा श्रिये याः सुदृशीः प्रेरितवान् परः सुगोपा अस्यचोदते दभाय मायाभिर्न वर्त्तसे यस्य त ऋते नामाऽऽस तस्य ताः प्रजाः सर्वतो वर्धन्ते॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो दिशाप्रकाशकः सन् सर्वाः प्रजाः शोभनाय वृष्टिकरो भवति, तथैव सर्वाः प्रजा न्यायेन प्रकाश्य विद्यासु वर्धको राजा भवेत्॥२॥

पदार्थः-हे **(सुक्रतो)** उत्तम कर्म्म और बुद्धि से युक्त विद्वान्! आप जैसे **(विरोचमानः)** प्रकाशमान **(स्वः)** सूर्य्य **(ककुभाम्)** दिशाओं और **(उपरस्य)** मेघ का प्रकाशमान **[**=प्रकाशक**]** **(आस)** वर्त्तमान है, वैसे **(श्रिये)** धन वा शोभा के लिये **(याः)** जिन **(सुदृशीः)** दर्शनों वालियों को प्रेरणा करने वाले और **(परः)** उत्तम से उत्तम **(सुगोपाः)** उत्तम प्रकार रक्षा करने वाले **(असि)** हो और **(अचोदते)** नहीं प्रेरणा करने और **(दभाय)** हिंसा करने वाले जन के लिये **(मायाभिः)** बुद्धियों के साथ **(न)** नहीं वर्त्तमान हो जिन **(ते)** आपके **(ऋते)** सत्य में **(नाम)** नाम वर्त्तमान है, उसकी वे प्रजायें सब प्रकार वृद्धि को प्राप्त होती हैं॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य दिशाओं का प्रकाशक हुआ सब प्रजाओं को सुख देने के लिये वृष्टि करने वाला होता है, वैसे ही सब प्रजाओं को न्याय से प्रकाशित करके विद्या और सुख का बढ़ाने वाला राजा होता है॥२॥

अथ मेघविषयेण राजगुणानाह॥

अब मेघविषय से राजगुणों को कहते हैं॥

अत्यं॑ ह॒विः स॑चते॒ सच्च॒ धातु॒ चारि॑ष्टगातु॒ः स होता॑ सहो॒भरि॑ः।
प्र॒सर्स्राणो॒ अनु॑ ब॒र्हिर्वृषा॒ शिशु॒र्मध्ये॒ युवा॒जरो॑ वि॒स्रुहा॑ हि॒तः॥ ३॥

अत्य॑म्। ह॒विः। स॒च॒ते॒। सत्। च॒। धातु॑। च॒। अरि॑ष्टऽगातुः। सः। होता॑। स॒ह॒ः॒ऽभरि॑ः। प्र॒ऽसर्स्रा॑णः। अनु॑। ब॒र्हिः। वृषा॑। शिशु॑ः। मध्ये॑। युवा॑। अ॒जरः॑। वि॒ऽस्रुहा॑। हि॒तः॥ ३॥

पदार्थः-(**अत्यम्**) अतति व्याप्नोति तत्र भवम् (**हविः**) होतव्यं द्रव्यम् (**सचते**) सम्बध्नाति (**सत्**) यद्वर्त्तते तत् (**च**) (**धातु**) यद्दधाति तत् (**च**) (**अरिष्टगातुः**) अरिष्टा अहिंसिता गातुर्वाग्यस्य सः (**सः**) (**होता**) दाता (**सहोभरिः**) यः सहो बलं बिभर्ति (**प्रसर्स्राणः**) प्रकर्षेण भृशं गच्छन् (**अनु**) (**बर्हिः**) अन्तरिक्षम् (**वृषा**) बलिष्ठः (**शिशुः**) बालकः (**मध्ये**) (**युवा**) प्राप्तयौवनावस्थः (**अजरः**) वृद्धावस्था-रहितः (**विस्रुहा**) यो विस्रून् रोगान् हन्ति (**हितः**) हितकारी॥ ३॥

अन्वयः-हे मनुष्या! योऽरिष्टगातुः सहोभरिर्होता प्रसर्स्राणो वृषा युवाजरो विस्रुहा हितो बर्हिरनु सच्च धातु चात्यं हविः सचते स शिशुर्मातरमिव जगतो मध्ये पुण्येन युज्यते॥ ३॥

भावार्थः-हे राजन्! यथा होता सुगन्ध्यादियुक्तेनाग्नौ हुतेन द्रव्येण वायुवृष्टिजलशुद्धिद्वारा जगति सुखमुपकरोति तथा न्यायकीर्तिवासनया दत्तया विद्यया च राष्ट्रं सुखी कुरु॥ ३॥

पदार्थः-हे मनुष्यो! जो (**अरिष्टगातुः**) ऐसा है कि जिसकी नहीं हिंसित वाणी वह (**सहोभरिः**) बल को धारण करने वाला (**होता**) दाताजन (**प्रसर्स्राणः**) प्रकर्षता से अत्यन्त चलता हुआ (**वृषा**) बलिष्ठ (**युवा**) यौवन अवस्था को प्राप्त (**अजरः**) वृद्ध अवस्था से रहित (**विस्रुहा**) रोगों का नाश करने वाला (**हितः**) हितकारी (**बर्हिः**) अन्तरिक्ष को (**अनु**) पश्चात् (**सत्**) वर्त्तमान को (**च**) और (**धातु**) धारण करने वाले (**च**) और (**अत्यम्**) व्याप्त होने वाले में उत्पन्न (**हविः**) हवन करने योग्य द्रव्य को (**सचते**) सम्बन्धित करता है (**सः**) वह (**शिशुः**) बालक माता को जैसे वैसे संसार के (**मध्ये**) बीच में पुण्य से युक्त होता है॥ ३॥

भावार्थः-हे राजन्! जैसे हवन करने वाला सुगन्धि आदि से युक्त, अग्नि में हवन किये हुए द्रव्य से वायु, वृष्टि और जल की शुद्धि के द्वारा संसार में सुख का उपकार करता है, वैसे न्याय और कीर्ति की वासना से युक्त दी हुई विद्या से राज्य देश को सुखी करिये॥ ३॥

अथ सूर्यसंयोगतो मेघदृष्टान्तेन राजगुणानाह॥

अब सूर्य्यसंयोग से मेघदृष्टान्त से राजगुणों को अगले मन्त्र में कहते हैं॥

प्र वं॑ ए॒ते सु॒युजो॒ याम॑न्नि॒ष्टये॒ नीची॑र॒मुष्मै॒ य॒म्यं॑ ऋ॒ता॒वृधः॑।
सु॒यन्तु॑भिः सर्वशा॒सैर॒भीशु॑भि॒ः क्रिवि॒र्नामा॑नि प्रव॒णे मु॑षायति॥ ४॥

प्र। व॒:। ए॒ते। सु॒ऽयुज॑:। याम॑न्। इ॒ष्टये॑। नीची॑:। अ॒मुष्मै॑। य॒म्य॑:। ऋ॒त॒ऽवृध॑:। सु॒यन्तु॑ऽभिः। स॒र्व॒ऽशा॒सैः। अ॒भीशु॑ऽभिः। क्रिवि॑:। नामा॑नि। प्र॒व॒णे। मु॒षा॒य॒ति॒॥४॥

पदार्थः-(प्र) (वः) युष्माकम् **(एते)** राजादयो जनाः **(सुयुजः)** ये सुष्ठु धर्मेण युञ्जते **(यामन्)** यामनि मार्गे **(इष्टये)** इष्टसुखाय **(नीचीः)** निम्नगताः **(अमुष्मै)** परोक्षाय सुखाय **(यम्यः)** यमाय न्यायकारिणे हिताः **(ऋतावृधः)** या ऋतं सत्यं वर्धयन्ति ताः **(सुयन्तुभिः)** सुष्ठु यन्तवो नियन्तारो येषु तैः **(सर्वशासैः)** ये सर्वं राज्यं शासन्ति तैः **(अभीशुभिः)** रश्मिभिः। **अभीशव इति रश्मिनामसु पठितम्।** (निघं०१.५) **(क्रिविः)** प्रजापालनकर्त्ता **(नामानि)** जलानि **(प्रवणे)** निम्ने देशे **(मुषायति)** चोरयति॥४॥

अन्वयः-यथा क्रिविः सूर्योऽभीशुभिः प्रवणे नामानि प्र मुषायति तथैव हे मनुष्य! ये सुयुज एते व इष्टये यामन्नमुष्मै सुयन्तुभिः सर्वशासैर्यम्य ऋतावृधो नीचीः प्रजाः सम्पादयन्तु॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यस्सर्वसुखाय जलमाकर्षति तथैव राजा न्यायमार्गेण सर्वाः प्रजा ग्मन् सुष्ठु विज्ञानयुक्तैर्भृत्यैः सहितः सार्वजनिकहितं सम्पादयति॥४॥

पदार्थः-जैसे **(क्रिविः)** प्रजा का पालन करने वाला सूर्य्य **(अभीशुभिः)** किरणों से **(प्रवणे)** नीचे स्थल में **(नामानि)** जलों को **(प्र, मुषायति)** अत्यन्त चुराता है, वैसे ही हे मनुष्यो! जो **(सुयुजः)** अच्छे धर्म से युक्त होते वे **(एते)** राजा आदि जन **(वः)** आप लोगों के **(इष्टये)** इष्ट सुख के लिये **(यामन्)** मार्ग में और **(अमुष्मै)** परोक्ष सुख के लिये **(सुयन्तुभिः)** उत्तम नियन्ता जिनमें उन **(सर्वशासैः)** सम्पूर्ण राज्य के शासन करने वालों से **(यम्यः)** न्यायकारी के लिये हितकारक **(ऋतावृधः)** सत्य को बढ़ाने वाली **(नीचीः)** नीची हुई प्रजाओं को सम्पन्न करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य सब के सुख के लिये जल को खींचता है, वैसे ही राजा न्यायमार्ग से सम्पूर्ण प्रजाओं को चलाता हुआ उत्तम विज्ञान से युक्त भृत्यों के सहित सब मनुष्यों के हित का सम्पादन करता है॥४॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को अगले मन्त्र में कहते हैं॥

स॒ंजभु॑राण॒स्तरु॑भिः सु॒ते॒गृभं॑ वया॒किन॑ं चि॒त्तग॑र्भासु सु॒स्वरु॑:।

धा॒र॒वा॒केष्वृ॑जुगाथ शोभसे॒ वर्ध॑स्व पत्नी॑र॒भि जी॒वो अ॑ध्व॒रे॥५॥२३॥

स॒म्ऽजभु॑राणः। तरु॑ऽभिः। सु॒ते॒ऽगृभ॑म्। व॒या॒किन॑म्। चि॒त्तऽग॑र्भासु। सु॒ऽस्वरुः॑। धा॒र॒ऽवा॒केषु॑। ऋ॒जु॒ऽगा॒थ॒। शो॒भ॒से॒। वर्ध॑स्व। पत्नी॑ः। अ॒भि। जी॒वः। अ॒ध्व॒रे॥५॥

पदार्थः-(सञ्जभुराणः) सम्यक् पालयन् धरन् **(तरुभिः)** वृक्षैः **(सुतेगृभम्)** उत्पन्ने जगति गृहीतम् **(वयाकिनम्)** व्यापिनम् **(चित्तगर्भासु)** चित्तं चेतनत्वं गर्भो यासु तासु **(सुस्वरुः)** सुष्ठूपदेशकः **(धारवाकेषु)** शास्त्रवागुपदेशकेषु **(ऋजुगाथ)** य ऋजुं सरलं व्यवहारं गाति स्तौति तत्सम्बुद्धौ **(शोभसे)**

शोभां प्राप्नुया: **(वर्धस्व)** **(पत्नी:)** स्त्रिय: **(अभि)** आभिमुख्ये **(जीव:)** **(अध्वरे)** अहिंसायुक्ते व्यवहारे॥५॥

अन्वय:-हे ऋजुगाथ! त्वं तरुभिस्सञ्जर्भुराणो धारवाकेषु चित्तगर्भासु सुतेगृभं वयाकिनं प्रजासु सुस्वरु: सन्नध्वरे शोभसे जीव: सन् पत्नीरिव प्रजा अभि वर्धस्व॥५॥

भावार्थ:-ये मनुष्या: स्थावरजङ्गमाभ्य: प्रजाभ्य उपकारं ग्रहीतुं शक्नुयुस्ते सदैवानन्दिता भवेयु:॥५॥

पदार्थ:-हे **(ऋजुगाथ)** सरल व्यवहार के स्तुति करने वाले! आप **(तरुभि:)** वृक्षों से **(सञ्जर्भुराण:)** उत्तम प्रकार पालन और धारण करते हुए **(धारवाकेषु)** शास्त्रवाणी के उपदेश करने वालों में और **(चित्तगर्भासु)** चेतनतारूप गर्भ जिनमें उनके निमित्त **(सुतेगृभम्)** उत्पन्न जगत् में ग्रहण किये गये **(वयाकिनम्)** व्यापी को, प्रजाओं में **(सुस्वरु:)** उत्तम प्रकार उपदेश करने वाले हुए **(अध्वरे)** अहिंसायुक्त व्यवहार में **(शोभसे)** शोभा को प्राप्त हूजिये और **(जीव:)** जीवते हुए **(पत्नी:)** स्त्रियों को जैसे वैसे प्रजाओं के **(अभि)** सन्मुख **(वर्धस्व)** वृद्धि को प्राप्त हूजिये॥५॥

भावार्थ:-जो मनुष्य स्थावर, जङ्गमरूप प्रजाओं से उपकार ग्रहण कर सकें, वे सदा ही आनन्दित होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा।
महीमस्मभ्यमुरुषामुरु व्रयो बृहत्सुवीरमनपच्युतं सह:॥६॥

यादृक्। एव। ददृशे। तादृक्। उच्यते। सम्। छायया। दधिरे। सिध्रया। अप्सु। आ। महीम्। अस्मभ्यम्। उरुषाम्। उरु। व्रय:। बृहत्। सुवीरम्। अनपच्युतम्। सह:॥६॥

पदार्थ:-(**यादृक्**) (**एव**) (**ददृशे**) दृश्यते (**तादृक्**) (**उच्यते**) (**सम्**) (**छायया**) (**दधिरे**) दधति (**सिध्रया**) मङ्गलया (**अप्सु**) जलेषु प्राणेषु वा (**आ**) (**महीम्**) महतीं वाचम् (**अस्मभ्यम्**) (**उरुषाम्**) यो बहून् सनति विभजति तम् (**उरु**) बहु (**व्रय:**) वेगवन्त: (**बृहत्**) महत् (**सुवीरम्**) शोभना वीरा यस्मात्तम् (**अनपच्युतम्**) ह्रासरहितम् (**सह:**) बलम्॥६॥

अन्वय:-ये व्रय: सिध्रया छाययाप्स्वस्मभ्यमुरुषां महीमुरु बृहत्सुवीरमनपच्युतं सह: समा दधिरे यैर्यादृग्ददृशे तादृगेवोच्यते तेऽस्माभि: सततं सत्कर्त्तव्या:॥६॥

भावार्थ:-येऽन्येषु विद्याबलं धनसञ्चयञ्च स्थापयन्ति यैर्यादृशमात्मनि वर्त्तते तादृङ् मनसि यादृङ् मनसि तादृग्वाचा भाष्यते त एव आप्ता विज्ञेया:॥६॥

पदार्थ:-जो **(व्रय:)** वेग वाले **(सिध्रया)** मङ्गलस्वरूप **(छायया)** छाया से **(अप्सु)** जलों वा प्राणों में **(अस्मभ्यम्)** हम लोगों के लिये **(उरुषाम्)** बहुतों के विभाग करने वाले को **(महीम्)** बड़ी वाणी

और **(उरु)** बहुत **(बृहत्)** बड़े **(सुवीरम्)** सुन्दर वीर पुरुष जिससे उस **(अनपच्युतम्)** नाश से रहित **(सहः)** बल को **(सम्, आ, दधिरे)** उत्तम प्रकार धारण करते हैं और जिन लोगों से **(यादृक्)** जैसा **(ददृशे)** देखा जाता है **(तादृक्)** वैसा **(एव)** ही **(उच्यते)** कहा जाता है, वे हम लोगों से निरन्तर सत्कार करने योग्य हैं॥६॥

भावार्थः-जो अन्य जनों में विद्या के बल और धन के संचय को स्थापित करते हैं और जिनसे जैसा आत्मा में वर्त्तमान है, वैसा मन में और जैसा मन में वैसा वाणी से कहा जाता है, वे ही यथार्थवक्ता जानने योग्य हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

वेत्यग्रुर्जनिवान् वा अति स्पृधः समर्यता मनसा सूर्यः कविः।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत् स्वावसुः॥७॥

वेति। अग्रुः। जनिऽवान्। वै। अति। स्पृधः। सऽमर्यता। मनसा। सूर्यः। कविः। घ्रंसम्। रक्षन्तम्। परि। विश्वतः। गयम्। अस्माकम्। शर्म। वनवत्। स्वऽवसुः॥७॥

पदार्थः-(**वेति**) प्राप्नोति (**अग्रुः**) अग्रगन्ता (**जनिवान्**) विद्यायां जन्मवान् (**वै**) निश्चयेन (**अति**) (**स्पृधः**) स्पर्द्धन्ते येषु तान् स-ामान् (**समर्य्यता**) समरमिच्छता (**मनसा**) चित्तेन (**सूर्यः**) सवितेव (**कविः**) क्रान्तप्रज्ञः (**घ्रंसम्**) दिनम् (**रक्षन्तम्**) (**परि**) सर्वतः (**विश्वतः**) सर्वस्मात् (**गयम्**) श्रेष्ठमपत्यं धनं वा (**अस्माकम्**) (**शर्म**) गृहम् (**वनवत्**) संविभाजयेत् (**स्वावसुः**) स्वेषु यो वसति स्वान् वा वासयति॥७॥

अन्वयः-यः स्वावसुः सूर्य्य इव कविरग्रुर्जनिवान् विद्वान् समर्य्यता मनसा स्पृधोऽति वेति स वै सूर्य्यो घ्रंसमिवास्माकं विश्वतो रक्षन्तं गयं शर्म्म च परि वनवत् स वा अस्माभिः सत्कर्त्तव्यः॥७॥

भावार्थः-यो मनुष्यो विद्याविनयप्राप्तो दुष्टेषूग्रो धार्मिकेषु शान्तः सदैव दुष्टैः सह युद्धेन प्रजा रक्षन् सुखे वासयेत् स सूर्य्यवत् प्रकाशकीर्त्तिर्भवेत्॥७॥

पदार्थः-जो **(स्वावसुः)** अपनों में बसता वा अपनों को जो बसाता है वह **(सूर्य्यः)** सूर्य्य के सदृश **(कविः)** उत्तम बुद्धिमान् **(अग्रुः)** अग्रगन्ता **(जनिवान्)** विद्या में जन्मवान् विद्यायुक्त पुरुष **(समर्य्यता)** संग्राम की इच्छा करते हुए **(मनसा)** चित्त से **(स्पृधः)** स्पर्द्धा करते हैं जिनमें उन संग्रामो की इच्छा करते हुए **(अति, वेति)** अत्यन्त व्याप्त होता है, वह **(वै)** निश्चय से जैसे सूर्य्य **(घ्रंसम्)** दिन को वैसे **(अस्माकम्)** हम लोगों को **(विश्वतः)** सब से **(रक्षन्तम्)** रक्षा करते हुए **(गयम्)** श्रेष्ठ अपत्य वा धन और **(शर्म्म)** गृह का **(परि)** सब प्रकार से **(वनवत्)** संविभाग करे, वह हम लोगों से सत्कार करने योग्य है॥७॥

भावार्थः-जो मनुष्य विद्या और विनय को प्राप्त, दुष्टों में उग्र और धार्मिको में शान्त और सदा ही दुष्टों के साथ युद्ध करने से प्रजाओं की रक्षा करता हुआ सुख में वास करावे, वह सूर्य्य के सदृश प्रकाशित यश वाला हो॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ज्यायांसमस्य यतनस्य केतुनं ऋषिस्वरं चरति यासु नाम ते।

यादृश्मिन् धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत्॥८॥

ज्यायांसम्। अस्य। यतुनस्य। केतुना। ऋषिऽस्वरम्। चरति। यासु। नाम। ते। यादृश्मिन्। धायि। तम्। अपस्यया। विदत्। यः। ऊँ इति। स्वयम्। वहते। सः। अरम्। करत्॥८॥

पदार्थः-(**ज्यायांसम्**) श्रेष्ठम् (**अस्य**) (**यतुनस्य**) यत्नशीलस्य (**केतुना**) प्रज्ञानेन (**ऋषिस्वरम्**) ऋषीणामुपदेशम् (**चरति**) प्राप्नोति (**यासु**) प्रजासु (**नाम**) (**ते**) तव (**यादृश्मिन्**) यादृशो व्यवहारे (**धायि**) ध्रियते (**तम्**) (**अपस्यया**) आत्मनः कर्मेच्छया (**विदत्**) लभते (**यः**) (**उ**) (**स्वयम्**) (**वहते**) प्राप्नोति (**सः**) (**अरम्**) अलम् (**करत्**) कुर्य्यात्॥८॥

अन्वयः-योऽस्य यतुनस्य विदुषः केतुना ज्यायांसमृषिस्वरं चरति यस्य ते यासु नामास्ति यादृश्मिन् योऽन्यैर्धायि तमपस्यया विददु स्वयं वहते सोऽस्मानरं करत्॥८॥

भावार्थः-ये मनुष्या आप्तस्य सकाशात् प्राप्तेन बोधेन स्वयमुत्तमा भूत्वाऽन्यान् सुभूषितान् कुर्य्युस्ते सुखं लभन्ते॥८॥

पदार्थः-(**यः**) जो (**अस्य**) इस (**यतुनस्य**) यत्न करने वाले विद्वान् के (**केतुना**) प्रज्ञान से (**ज्यायांसम्**) श्रेष्ठ (**ऋषिस्वरम्**) ऋषियों के उपदेश को (**चरति**) प्राप्त होता है और जिन (**ते**) आपका (**यासु**) जिन प्रजाओं में (**नाम**) नाम है और (**यादृश्मिन्**) जैसे व्यवहार में जो अन्य जनों से (**धायि**) धारण किया जाता है (**तम्**) उसको (**अपस्यया**) अपने कर्म्म की इच्छा से (**विदत्**) प्राप्त होता और (**उ**) भी (**स्वयम्**) स्वयम् (**वहते**) प्राप्त होता है (**सः**) वह हम लोगों को (**अरम्**) समर्थ (**करत्**) करे॥८॥

भावार्थः-जो मनुष्य यथार्थवक्ता जन के समीप से प्राप्त हुए बोध से स्वयं उत्तम होकर अन्यों को उत्तम प्रकार भूषित करें, वे सुख को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता।

अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी॥९॥

समुद्रम्। आसाम्। अव। तस्थे। अग्रिमा। न। रिष्यति। सवनम्। यस्मिन्। आऽयता। अत्र। न। हार्दि। क्रवणस्य। रेजते। यत्र। मतिः। विद्यते। पूतऽबन्धनी॥९॥

पदार्थः-(समुद्रम्) अन्तरिक्षम् **(आसाम्)** प्रज्ञानाम् **(अव) (तस्थे)** अवतिष्ठते **(अग्रिमा)** अतिश्रेष्ठः **(न)** निषेधे **(रिष्यति)** हिनस्ति **(सवनम्)** ऐश्वर्य्यम् **(यस्मिन्) (आयता)** विस्तृतानि **(अत्रा)** अत्र **ऋचि तुनुघे**ति दीर्घः। **(न)** निषेधे **(हार्दि)** हृदयस्येदम् **(क्रवणस्य)** शब्दकर्त्तुः **(रेजते)** चलति **(यत्रा)** अत्रापि **ऋचि तुनुघे**ति दीर्घः। **(मतिः)** प्रज्ञा **(विद्यते) (पूतबन्धनी)** या पूतान् पवित्रान् गुणान् बध्नाति गृह्णाति सा॥९॥

अन्वयः-हे विद्वन्! यस्मिन्नग्रिमा सवनं च न रिष्यत्यासां समुद्रमव तस्थे यत्रायता धनानि वर्धन्ते पूतबन्धनी मतिश्च विद्यते नात्रा क्रवणस्य हार्दि रेजते॥९॥

भावार्थः-ये प्रजानां मध्येऽन्तरिक्षमिव सुखाऽवकाशदा अहिंस्रा धीमन्त उपदेशका विद्यन्ते त एव सुखयुक्ता भवन्ति॥९॥

पदार्थः-हे विद्वन्! **(यस्मिन्)** जिसमें **(अग्रिमा)** अतिश्रेष्ठ **(सवनम्)** ऐश्वर्य्य का **(न)** नहीं **(रिष्यति)** नाश करता है और **(आसाम्)** इन प्रजाओं के बीच **(समुद्रम्)** अन्तिरक्ष को **(अव, तस्थे)** स्थित होता है और **(यत्रा)** जहाँ **(आयता)** बहुत धनों की वृद्धि होती है और **(पूतबन्धनी)** पवित्र गुणों को ग्रहण करने वाली **(मतिः)** बुद्धि **(विद्यते)** विद्यमान है **(न)** नहीं **(अत्रा)** इस में **(क्रवणस्य)** शब्द करने वाले का **(हार्दि)** हृदयसम्बन्धी कार्य **(रेजते)** चलता है॥९॥

भावार्थः-जो प्रजाओं के मध्य में अन्तरिक्ष के सदृश सुखरूपी अवकाश देने वाले और नहीं हिंसा करने वाले बुद्धिमान् उपदेशक विद्यमान हैं, वे ही सुखयुक्त होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्र्योः।

अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम्॥१०॥२४॥

सः। हि। क्षत्रस्य। मनसस्य। चित्तिऽभिः। एवऽवदस्य। यजतस्य। सध्र्योः। अवऽत्सारस्य। स्पृणवाम। रण्वऽभिः। शविष्ठम्। वाजम्। विदुषा। चित्। अर्ध्यम्॥१०॥

पदार्थः-(सः) (हि) (क्षत्रस्य) राजकुलस्य राष्ट्रस्य वा **(मनसस्य)** यन्मन्यते तस्य **(चित्तिभिः)** चयनक्रियाभिः **(एवावदस्य)** एवान् प्राप्तान् गुणान् वदन्ति येन तस्य **(यजतस्य)** यजन्ति सङ्गच्छन्ते येन तस्य **(सध्र्योः)** सहस्थानस्य **(अवत्सारस्य)** योऽवतो रक्षकान् सरति प्राप्नोति तस्य **(स्पृणवाम)** अभीच्छेम **(रण्वभिः)** रमणीयैः **(शविष्ठम्)** अतिशयेन बलिष्ठम् **(वाजम्)** विज्ञानवन्तम् **(विदुषा) (चित्) (अर्ध्यम्)** अर्द्धे भवम्॥१०॥

अन्वयः-हे मनुष्याश्चित्तिभिर्यस्यैवावदस्य यजतस्याऽवत्सारस्य मनसस्य सध्रेः क्षत्रस्य सम्बन्धं स्पृणवाम विदुषा चिदर्ध्यं रण्वभिः शविष्ठं वाजं स्पृणवाम स ह्यस्मान् स्पृहेत्॥१०॥

भावार्थः-ये मनुष्या अहर्निशं राज्योन्नतिं चिकीर्षन्ति ते महाराजा जायन्ते॥१०॥

पदार्थः-हे मनुष्यो! **(चित्तिभिः)** इकट्ठे करनेरूप क्रियाओं से जिस **(एवावदस्य)** एवावद अर्थात् प्राप्त गुणों को कहते हैं जिससे वा **(यजतस्य)** मिलते हैं जिससे वा जो **(अवत्सारस्य)** रक्षकों को प्राप्त होते और **(मनसस्य)** माना जाता और उस **(सध्रेः)** तुल्य स्थान वाले **(क्षत्रस्य)** राजकुल वा राज्य के सम्बन्ध की **(स्पृणवाम)** इच्छा करें तथा **(विदुषा)** विद्वान् से **(चित्)** भी **(अर्ध्यम्)** अर्द्ध में उत्पन्न की तथा **(रण्वभिः)** रमणीयों से **(शविष्ठम्)** अत्यन्त बलिष्ठ **(वाजम्)** विज्ञानवान् की हम इच्छा करें **(स, हि)** वही हम लोगों की इच्छा करे॥१०॥

भावार्थः-जो मनुष्य दिन-रात्रि राज्य की उन्नति करने की इच्छा करते हैं, वे महाराज होते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

श्ये॒न आ॑सा॒मदि॑तिः क॒क्ष्यो॑३॑ मदो॑ वि॒श्ववा॑रस्य यज॒तस्य॑ मा॒यिन॑:।

सम॒न्यम॑न्यमर्थयन्त्येत॑वे वि॒दुर्वि॒षाणं॑ परि॒पान॒मन्ति॒ ते॥ ११॥

श्ये॒नः। आ॒सा॒म्। अदि॑तिः। क॒क्ष्यः॑। मदः॑। वि॒श्वावा॑रस्य यज॒तस्य॑। मा॒यिनः॑। सम्। अ॒न्यम्ऽअ॑न्यम्। अ॒र्थ॒य॒न्ति॒। एत॑वे। वि॒दुः॒। वि॒ऽसान॑म्। प॒रि॒ऽपान॑म्। अन्ति॑। ते॥ ११॥

पदार्थः-**(श्येनः)** प्रशंसनीयगतिरश्वः **(आसाम्)** प्रजानाम् **(अदितिः)** अविनाशिनी प्रकृतिः **(कक्ष्यः)** कक्षासु भवः **(मदः)** आनन्दः **(विश्ववारस्य)** समग्रस्वीकरणीयस्य **(यजतस्य)** सङ्गतस्य **(मायिनः)** कुत्सिता माया विद्यन्ते यस्य तस्य **(सम्)** **(अन्यमन्यम्)** **(अर्थयन्ति)** अर्थं कुर्वन्ति **(एतवे)** प्राप्तुम् **(विदुः)** जानन्ति **(विषाणम्)** प्रविष्टम् **(परिपानम्)** परितः सर्वतो पानम् **(अन्ति)** समीपे **(ते)**॥११॥

अन्वयः-यो मनुष्यः श्येन इवासामदितिः कक्ष्यो मदश्च विश्ववारस्य यजतस्य मायिनोऽन्यमन्यमर्थयन्त्येतवेऽन्ति परिपानं विषाणं सं विदुस्ते सुखिनो जायन्ते॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसो दुष्टधियः श्रेष्ठप्रज्ञान् कुर्वन्ति श्येनपक्षीव दुष्टान् घ्नन्ति ते जना भद्राः सन्ति॥११॥

पदार्थः-जो मनुष्य **(श्येनः)** प्रशंसनीय गमन वाले घोड़ें के सदृश **(आसाम्)** इन प्रजाओं की **(अदितिः)** नहीं नाश होने वाली प्रकृति और **(कक्ष्यः)** श्रेणियों में उत्पन्न **(मदः)** आनन्द **(विश्ववारस्य)** सम्पूर्ण स्वीकार करने योग्य **(यजतस्य)** मिले हुए **(मायिनः)** निकृष्ट बुद्धि वाले के **(अन्यमन्यम्)** अन्य

अन्य को **(अर्थयन्ति)** अर्थ करते अर्थात् याचते हैं और **(एतवे)** प्राप्त होने को **(अन्ति)** समीप में **(परिपानम्)** सब ओर से पान और **(विषाणम्)** प्रवेश किये हुए को **(सम्, विदुः)** उत्तम प्रकार जानते हैं, **(ते)** वे सुखी होते हैं॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् जन दुष्ट बुद्धिवालों को श्रेष्ठ बुद्धियुक्त करते हैं और श्येन पक्षी के सदृश दुष्टों का नाश करते हैं, वे जन कल्याणकारक हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सदापृणो यजतो वि द्विषो वधीद् बाहुवृक्तः श्रुतवित्तर्यो वः सचा।
उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः॥१२॥

सदाऽपृणः। यजतः। वि। द्विषः। वधीत्। बाहुऽवृक्तः। श्रुतऽवित्। तर्यः। वः। सचा। उभा। सः। वरा। प्रति। एति। भाति। च। यत्। ईम्। गणम्। भजते। सुप्रयावऽभिः॥१२॥

पदार्थः-(**सदापृणः**) यः सदा पृणाति तर्पयति सः **(यजतः)** सत्कर्त्ता **(वि)** **(द्विषः)** धर्मद्वेष्टॄन् **(वधीत्)** हन्ति **(बाहुवृक्तः)** यो बाहुभ्यां दुष्टान् वृङ्क्ते छिनत्ति **(श्रुतवित्)** यः श्रुतं वेत्ति **(तर्य्यः)** यस्तीर्यते तरितुं योग्यः **(वः)** युष्मान् **(सचा)** सम्बन्धी **(उभा)** उभौ **(सः)** **(वरा)** श्रेष्ठौ श्रोताश्रावकौ **(प्रति)** **(एति)** प्राप्नोति विजानाति वा **(भाति)** प्रकाशते प्रकाशयति वा **(च)** **(यत्)** यः **(ईम्)** एव **(गणम्)** समूहम् **(भजते)** सेवते **(सुप्रयावभिः)** ये सुष्ठु प्रयान्ति तैः॥१२॥

अन्वयः-हे मनुष्या! यद्यः श्रुतिवित्तर्य्यः सचा बाहुवृक्तो यजतः सदापृणस्सुप्रयावभिर्द्विषो वि वधीद्यश्च वः प्रत्येति सत्यं भाति गणं भजते स उभा वरें सत्कर्त्तुं शक्नोति॥१२॥

भावार्थः-ये बहुश्रुतो न्यायाचरणा दुष्टान् घ्नन्तः श्रेष्ठान् पालयन्ति ते सदा प्रसन्ना भवन्ति॥१२॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(श्रुतवित्)** श्रुत को जानने वाला **(तर्य्यः)** जो तैरा जाता वा तैरने के योग्य **(सचा)** सम्बन्धी **(बाहुवृक्तः)** बाहुओं से दुष्टों का नाश करने वाला **(यजतः)** सत्कर्ता **(सदापृणः)** सदा तृप्ति करने वाला **(सुप्रयावभिः)** उत्तम प्रकार चलने वालों से **(द्विषः)** धर्म्म के द्वेष करने वालों का **(वि, वधीत्)** विशेष करके नाश करता है **(च)** और जो **(वः)** आप लोगों को **(प्रति, एति)** प्राप्त होता वा विशेष करके जानता है, सत्य **(भाति)** प्रकाशित होता वा सत्य को प्रकाशित करता और **(गणम्)** समूह का **(भजते)** सेवन करता है **(सः)** वह **(उभा)** दोनों **(वरा)** श्रेष्ठ सुनने और सुनाने वालों का **(ईम्)** ही सत्कार कर सकता है॥१२॥

भावार्थः-जो बहुत शास्त्रों को सुननेवाले, न्याय का आचरण करने वाले जन दुष्टों का नाश करते हुए श्रेष्ठों का पालन करते हैं, वे सदा प्रसन्न होते हैं॥१२॥

पुनर्विद्वान् किं कुर्य्यादित्युपदिश्यते॥

फिर विद्वान् क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदञ्चनः।

भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन्॥ १३॥

सुतम्ऽभरः। यजमानस्य। सत्ऽपतिः। विश्वासाम्। ऊधः। सः। धियाम्। उत्ऽअञ्चनः। भरत्। धेनुः। रसऽवत्। शिश्रिये। पयः। अनुऽब्रुवाणः। अधि। एति। न। स्वपन्॥ १३॥

पदार्थः-(सुतम्भरः) य उत्पन्नं जगद् बिभर्ति **(यजमानस्य)** सत्कर्त्तुः **(सत्पतिः)** सत्पुरुषाणां पालकः **(विश्वासाम्)** सर्वासाम् **(ऊधः)** ऊर्ध्वं गमयिता **(सः) (धियाम्)** प्रज्ञानां कर्म्मणां वा **(उदञ्चनः)** उत्कृष्टतां प्रापकः **(भरत्)** धरति **(धेनुः) (रसवत्)** बहुरसयुक्तम् **(शिश्रिये)** श्रयति **(पयः)** दुग्धमिव **(अनुब्रुवाणः)** पठित्वाऽनूपदिशन् **(अधि) (एति)** स्मरति **(न)** निषेधे **(स्वपन्)** शयानः सन्॥ १३॥

अन्वयः-हे मनुष्या! यो विद्वान् यजमानस्य सुतम्भरो विश्वासां धियामुदञ्चन ऊधः सत्पती रसवत्पयो धेनुरिव विद्यां भरद्धर्म शिश्रिये न स्वपन्नन्यान् प्रत्यनुब्रुवाणः सत्यस्याध्येति स एव सत्कर्त्तव्योऽस्ति॥ १३॥

भावार्थः-स एवोत्तमः पुरुषोऽस्ति यः कृतज्ञ आप्तसेवाप्रियः समग्रमनुष्येभ्यो बुद्धिप्रदो धेनुवत्सत्योपदेशवर्षकोऽविद्यादिक्लेशेभ्यः पृथग्वर्त्तमानोऽस्ति स एव सर्वैः सङ्गन्तव्यः॥ १३॥

पदार्थः-हे मनुष्यो! जो विद्वान् **(यजमानस्य)** सत्कार करने वाला **(सुतम्भरः)** उत्पन्न जगत् को धारण करने वाला **(विश्वासाम्)** सम्पूर्ण **(धियाम्)** प्रज्ञान और कर्म्मों का **(उदञ्चनः)** उत्कृष्टता को प्राप्त कराने और **(ऊधः)** ऊपर को पहुंचाने और **(सत्पतिः)** सत्पुरुषों का पालन करने वाला **(रसवत्)** बहुत रस से युक्त **(पयः)** दुग्ध को जैसे **(धेनुः)** गौ वैसे विद्या को **(भरत्)** धारण करता और धर्म्म का **(शिश्रिये)** आश्रयण करता और **(न)** न **(स्वपन्)** शयन करता हुआ अन्यों के प्रति **(अनु, ब्रुवाणः)** पढ़कर पीछे उपदेश देता हुआ सत्य का **(अधि, एति)** स्मरण करता है **(सः)** वही सत्कार करने योग्य है॥ १३॥

भावार्थः-वही उत्तम पुरुष है, जो कृतज्ञ और यथार्थवक्ता जनों की सेवा में प्रिय, सम्पूर्ण मनुष्यों के लिये बुद्धि देने और गो के सदृश सत्य उपदेश का वर्षाने वाला और अविद्या आदि क्लेशों से पृथक् वर्त्तमान है, वही सब से मेल करने योग्य है॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति।

यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ १४॥

यः। जागार। तम्। ऋचः। कामयन्ते। यः। जागार। तम्। ॐ इति। सामानि। यन्ति। यः। जागार। तम्। अयम्। सोमः। आह। तव। अहम्। अस्मि। सख्ये। निऽओकाः॥ १४॥

पदार्थः-(यः) (जागार) अविद्यानिद्राया उत्थाय जागर्ति **(तम्) (ऋचः)** ऋच्छतयः **(कामयन्ते) (यः) (जागार) (तम्) (उ) (सामानि)** सामविभागाः **(यन्ति)** प्राप्नुवन्ति **(यः) (जागार) (तम्) (अयम्) (सोमः)** सोमलताद्योषधिगण ऐश्वर्य्यं वा **(आह)** वदति **(तव) (अहम्) (अस्मि) (सख्ये)** मित्रत्वे **(न्योकाः)** निश्चितस्थानः॥ १४॥

अन्वयः-यो जागार तमृच इव जनाः कामयन्ते यो जागार तमु सामानि यन्ति यो जागार तमयं सोम इव न्योकाः सख्ये तवाहमस्मीत्याह॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये वेदविद्यां प्राप्तुमिच्छन्ति तानेव वेदविद्या प्राप्नोति यो मनुष्यादिभिः सह मैत्रीमाचरति स बहुसुखं लभते॥ १४॥

पदार्थः-(यः) जो **(जागार)** अविद्यारूप निद्रा से उठ के जागने वाला है **(तम्)** उसको **(ऋचः)** ऋचाओं के सदृश जन **(कामयन्ते)** कामना करते हैं और **(यः)** जो **(जागार)** अविद्यारूप निद्रा से उठ के जागने वाला है **(तम्)** उसको **(उ)** भी **(सामानि)** सामवेद के विभाग **(यन्ति)** प्राप्त होते हैं और **(यः)** जो **(जागार)** अविद्यारूप निद्रा से उठके जागने वाला **(तम्)** उसको **(अयम्)** यह **(सोमः)** सोमलता आदि ओषधियों का समूह वा ऐश्वर्य्य के सदृश **(न्योकाः)** निश्चित स्थान वाला **(सख्ये)** मित्रत्व में **(तव)** आपका **(अहम्)** मैं **(अस्मि)** हूं, इस प्रकार **(आह)** कहता है॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वेदविद्या को प्राप्त होने की इच्छा करते हैं, उनको ही वेदविद्या प्राप्त होती और जो मनुष्य आदिकों के साथ मित्रता करता है, वह बहुत सुख को प्राप्त होता है॥ १४॥

ये सत्यं कामयन्ते ते प्राप्तसत्या जायन्ते॥

जो सत्य की कामना करते हैं, वे सत्य को प्राप्त होते हैं॥

अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति।

अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ १५॥ २५॥ ३॥

अग्निः। जागार। तम्। ऋचः। कामयन्ते। अग्निः। जागार। तम्। ॐ इति। सामानि। यन्ति। अग्निः। जागार। तम्। अयम्। सोमः। आह। तव। अहम्। अस्मि। सख्ये। निऽओकाः॥ १५॥

पदार्थः-(अग्निः) पावक इव **(जागार)** जागृतो भवति **(तम्) (ऋचः)** प्रशंसितबुद्धयो विद्यार्थिनः **(कामयन्ते) (अग्निः)** पावकवद्वर्त्तमानः **(जागार) (तम्) (उ) (सामानि)** सामवेदप्रतिपादितविज्ञानानि **(यन्ति)** प्राप्नुवन्ति **(अग्निः) (जागार) (तम्) (अयम्) (सोमः)** विद्यैश्वर्य्यमिच्छुः **(आह) (तव) (अहम्) (अस्मि) (सख्ये) (न्योकाः)** निश्चितस्थानः॥ १५॥

अन्वयः-हे मनुष्या! योऽग्निरिव जागार तमृचः कामयन्ते योऽग्निर्जागार तमु सामानि यन्ति अग्निर्जागार तमयं न्योकाः सोमस्तव सख्येऽहमस्मीत्याह॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या निरलसाः पुरुषार्थिनो धार्मिका जायन्ते जितेन्द्रिया विद्यार्थिनश्च भवन्ति तानेव विद्यासुशिक्षे प्राप्नुतः॥१५॥

अत्र सूर्यमेघविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुश्चत्वारिंशत्तमं सूक्तं तृतीयोऽनुवाकः पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो (**अग्निः**) अग्नि के सदृश (**जागार**) जागृत होता है (**तम्**) उसकी (**ऋचः**) प्रशंसित बुद्धि वाले विद्यार्थी जन (**कामयन्ते**) कामना करते हैं, और जो (**अग्निः**) अग्नि के सदृश वर्त्तमान (**जागार**) जागृत होता है (**तम्**) उसको (**उ**) भी (**सामानि**) सामवेद में कहे हुए विज्ञान (**यन्ति**) प्राप्त होते हैं (**अग्निः**) के सदृश वर्तमान (**जागार**) जागृत होता है (**तम्**) उसको (**अयम्**) यह (**न्योकाः**) निश्चित स्थान युक्त (**सोमः**) विद्या और ऐश्वर्य्य की इच्छा करने वाला (**तव**) आपकी (**सख्ये**) मित्रता में (**अहम्**) मैं (**अस्मि**) हूं ऐसा (**आह**) कहता है॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य आलस्य से रहित पुरुषार्थी धार्मिक होते और जितेन्द्रिय विद्यार्थी होते हैं, उन्हीं को विद्या और उत्तम शिक्षा प्राप्त होती है॥१५॥

इस सूक्त में सूर्य, मेघ और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह चवालीसवां सूक्त, तीसरा अनुवाक और पच्चीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्य पञ्चचत्वारिंशत्तमस्य सूक्तस्य सदापृण आत्रेय ऋषिः। विश्वेदेवा देवताः। १, २ पङ्क्तिः। ५, ९, ११ भुरिक् पङ्क्तिः। ८, १०, स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३ विराट् त्रिष्टुप्। ४, ६, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्य्यविषयमाह॥

अब ग्यारह ऋचा वाले पैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में आदित्य विषय को कहते हैं॥

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः।
अपावृत व्रजिनीरुत्स्वर्गाद् वि दुरो मानुषीर्देव आवः॥ १॥

विदाः। दिवः। विऽस्यन्। अद्रिम्। उक्थैः। आऽयत्याः। उषसः। अर्चिनः। गुः। अप। अवृत। व्रजिनीः। उत्। स्वः। गात्। वि। दुरः। मानुषीः। देवः। आवरित्यावः॥ १॥

पदार्थः-(विदाः) विद्वांसः **(दिवः)** कामयमानाः **(विष्यन्)** व्याप्नुवन्ति **(अद्रिम्)** मेघम् **(उक्थैः)** वेदविद्याजन्यैरुपदेशैः **(आयत्याः)** पश्चाद्भवाः **(उषसः)** प्रभाताः **(अर्चिनः)** सत्कर्त्तारः **(गुः)** गच्छन्ति **(अप)** **(अवृत)** दूरीकुर्वन्ति **(व्रजिनीः)** वर्जनक्रियाः **(उत्)** **(स्वः)** आदित्यः **(गात्)** प्राप्नोति **(वि)** **(दुरः)** द्वाराणि **(मानुषीः)** मनुष्याणामिमाः **(देवः)** दिव्यगुणः **(आवः)** आवृणोति॥ १॥

अन्वयः-हे मनुष्या! यथा स्वरादित्यो देवो मेघो वा मानुषीर्दुरो वि गादावोऽद्रिं व्रजिनीश्च उदपावृत तथैव दिवो विदा अर्चिन उक्थैरायत्या उषस इव विष्यन् गुस्तान् सततं सेवध्वम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य उषसादित्यवन्मनुष्यप्रजासु विद्याधर्मप्रकाशकाः स्युस्त एवाऽध्यापकोपदेशका भवन्तु॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(स्वः, देवः)** श्रेष्ठ गुणों से विशिष्ट सूर्य्य वा मेघ **(मानुषीः)** मनुष्य सम्बन्धी **(दुरः)** द्वारों को **(वि, गात्)** विशेषतया प्राप्त होता और **(आवः)** ढांपता है और **(अद्रिम्)** मेघ को और **(व्रजिनीः)** वर्जन क्रियाओं को **(उद्, अप, अवृत)** अत्यन्त दूर करते हैं, वैसे ही **(दिवः)** कामना करते हुए **(विदाः)** विद्वान् जन **(अर्चिनः)** सत्कार करने वाले **(उक्थैः)** वेदविद्या से उत्पन्न हुए उपदेशों से **(आयत्याः)** पीछे से हुए **(उषसः)** प्रभात कालों के सदृश **(विष्यन्)** व्याप्त होते और **(गुः)** चलते हैं, उनकी निरन्तर सेवा करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो प्रभातकाल और सूर्य्य के सदृश मनुष्यरूप प्रजाओं में विद्या और धर्म्म के प्रकाश करने वाले होवें, वे ही अध्यापक और उपदेशक होवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वि सूर्यो॑ अ॒मति॑ं न श्रिय॑ं सा॒दोर्वाद् गवा॑ं मा॒ता जा॑न॒ती गा॑त्।
धन्व॑र्णसो न॒द्य१॑: खादो॑अर्णा॒: स्थूणे॑व॒ सुमि॑ता दृंह॒त द्यौः॥ २॥

वि। सूर्यः॑। अ॒मति॑म्। न। श्रिय॑म्। सा॒त्। आ। ऊ॒र्वात्। गवा॑म्। मा॒ता॒। जा॒न॒ती। गा॒त्। धन्व॑ऽअर्णसः। न॒द्यः॑। खादः॑ऽअर्णाः। स्थूणा॑ऽइव। सुऽमि॑ता। दृं॒ह॒त॒। द्यौः॥ २॥

पदार्थः-(**वि**) (**सूर्य्यः**) (**अमतिम्**) रूपम् (**न**) इव (**श्रियम्**) (**सात्**) विभजति (**आ**) (**ऊर्वात्**) बहुरूपात् (**गवाम्**) किरणानाम् (**माता**) जननी (**जानती**) (**गात्**) अगाद् गच्छति (**धन्वर्णसः**) धन्वे स्थलेऽर्णांसि यासां ताः (**नद्यः**) या नदन्ति ताः (**खादोअर्णाः**) खादो भक्षणीयान्यन्नानि वा यान्यर्णांसि यासु ताः (**स्थूणेव**) स्थूणावत् (**सुमिता**) सुष्ठुकृतप्रमाणानि (**दृंहत**) वर्धयति धरति वा (**द्यौः**) कामयमानः॥ २॥

अन्वयः-यो द्यौः सुमिता स्थूणेव विद्यादिसद्गुणान् दृंहत खादोअर्णा धन्वर्णसो नद्य इव जानती मातेव शिष्यानुपदेश्यान् गात् सूर्य्योऽमतिं न श्रियं वि षाद् गवामूर्वादैश्वर्यमा गात् स एव सर्वान् सुखयितुमर्हेत्॥ २॥

भावार्थः-अत्र [उपमा]वाचकलुप्तोपमालङ्कारौ। ये सूर्यवद्विद्यां जननीवत्कृपां नदीवदुपकारं स्तम्भवद्धारणं कुर्वन्ति त एव श्रीमन्तः सदा सुखिनो भवन्ति॥ २॥

पदार्थः-जो (**द्यौः**) कामना करता हुआ (**सुमिता**) उत्तम प्रकार किया प्रमाण जिनका (**स्थूणेव**) स्तम्भ के समान विद्या आदि सद्गुणों को (**दृंहत**) बढ़ाता या धारण करता तथा (**खादोअर्णाः**) भक्षण करने योग्य अन्न और जल जिनमें और (**धन्वर्णसः**) स्थल में जल जिनका ऐसी (**नद्यः**) शब्द करनेवाली नदियों के सदृश वा (**जानती**) जानती हुई (**माता**) माता के सदृश शिष्यों और उपदेश करने योग्यों को (**गात्**) प्राप्त होता है और (**सूर्यः**) सूर्य्य (**अमतिम्**) रूप के (**न**) सदृश (**श्रियम्**) लक्ष्मी का (**वि, सात्**) विशेष करके विभाग करता है (**गवाम्**) किरणों के (**ऊर्वात्**) बहुत रूप से ऐश्वर्य्य को (**आ**) अच्छे प्रकार प्राप्त होता है, वही सब को सुखी करने को योग्य होवे॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो सूर्य्य के सदृश विद्या माता के सदृश कृपा, नदी के सदृश उपकार और खम्भ के सदृश धारणा करते हैं, वे ही श्रीमान् और सदा सुखी होते हैं॥ २॥

अथ विद्वद्विषयमाह॥

अब विद्वद्विषय को कहते हैं॥

अ॒स्मा उ॒क्थाय॒ पर्व॑तस्य॒ गर्भो॑ म॒हीना॑ं जु॒नुषे॑ पू॒र्व्याय॑।
वि पर्व॑तो॒ जिही॑त॒ साध॑त॒ द्यौरा॒विवा॑सन्तो दसयन्त॒ भूम॑॥ ३॥

अ॒स्मै। उ॒क्थाय॑। पर्व॑तस्य। गर्भ॑:। म॒हीना॑म्। ज॒नुषे॑। पू॒र्व्याय॑। वि। पर्व॑त:। जिहीत। साध॑त। द्यौ:। आ॒ऽवि॒वा॒स॒न्त:। द॒स॒य॒न्त॒। भूम॑॥ ३॥

पदार्थ:-(अस्मै) (उक्थाय) प्रशंसिताय **(पर्वतस्य)** मेघस्य **(गर्भ:)** कारणभूत: **(महीनाम्)** भूमीनाम् **(जनुषे)** जन्मने **(पूर्व्याय)** पूर्वेषु भवाय **(वि) (पर्वत:)** पक्षीव पर्ववान् मेघ: **(जिहीत)** गच्छति **(साधत)** साध्नुवन्तु **(द्यौ:)** कामयमान इव **(आविवासन्त:)** सर्वत: परिचरन्त: **(दसयन्त)** दोषानुपक्षयन्तु **(भूम)** भवेम॥ ३॥

अन्वय:-हे मनुष्या! यो महीनां पर्वतस्य च पूर्व्याय जनुषेऽस्मा उक्थाय गर्भ: पर्वत इव द्यौर्वि जिहीत यमाविवासन्त: साधत येन दु:खं दसयन्त तेन तुल्या वयं भूम॥ ३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये विद्यार्थिषु विद्याया गर्भं दधति ते मेघवत्सर्वेषां सुखकारका भवन्ति॥ ३॥

पदार्थ:-हे मनुष्यो! जो **(महीनाम्)** भूमियों और **(पर्वतस्य)** मेघ के **(पूर्व्याय)** पूर्वों में उत्पन्न **(जनुषे)** जन्म के लिये तथा **(अस्मै)** इस **(उक्थाय)** प्रशंसित के लिये **(गर्भ:)** कारणभूत **(पर्वत:)** पक्षी के समान पर्ववान् मेघ वा **(द्यौ:)** कामना करते हुए के सदृश **(वि, जिहीत)** विशेष चलता है और जिसको **(आविवासन्त:)** सब ओर घूमते हुए **(साधत)** सिद्ध करें, जिससे दु:ख का और **(दसयन्त)** दोषों का नाश करें, उसके तुल्य हम लोग **(भूम)** होवें॥ ३॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्यार्थियों में विद्या के गर्भ की धारण करते हैं, वे मेघ के सदृश सब के सुखकारक होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सू॒क्तेभि॑र्वो॒ वचो॑भिर्देव॒जुष्टै॒रिन्द्रा॒ न्व॑ग्नी अव॑से हुवध्यै।
उ॒क्थेभि॒र्हि ष्मा॑ क॒वय॑: सुय॒ज्ञा आ॒विवा॑सन्तो म॒रुतो॒ यज॑न्ति॥ ४॥

सु॒ऽउ॒क्तेभि:। व॒:। वच॑:ऽभि:। दे॒व॒ऽजु॒ष्टै:। इन्द्रा॑। नु। अ॒ग्नी इति॑। अव॑से। हु॒व॒ध्यै॑। उ॒क्थेभि॑:। हि। स्म॒। क॒वय॑:। सु॒ऽय॒ज्ञा:। आ॒ऽवि॒वा॒स॒न्त:। म॒रुत॑:। यज॑न्ति॥ ४॥

पदार्थ:-(सूक्तेभि:) सुष्ठूच्यन्ते यानि तै: **(व:)** युष्मान् **(वचोभि:)** सुशिक्षितैर्वचनै: **(देवजुष्टै:)** विद्वद्भि: सेवितै: **(इन्द्रा)** विद्युतम् **(नु)** सद्य: **(अग्नी)** पावकौ **(अवसे)** रक्षणाद्याय **(हुवध्यै)** ग्रहीतुम् **(उक्थेभि:)** प्रशंसकै: **(हि)** निश्चयेन **(स्मा)** एव। अत्र **निपातस्य चे**ति दीर्घ:। **(कवय:)** मेधाविनो विद्वांस: **(सुयज्ञा:)** शोभना यज्ञा विद्याधर्मप्रचारिका क्रिया येषान्ते **(आविवासन्त:)** सत्यं समन्तात् सेवमाना: **(मरुत:)** मनुष्या: **(यजन्ति)** सङ्गच्छन्ते॥ ४॥

अन्वय:-हे मनुष्या! यथा आविवासन्त: सुयज्ञा: कवयो मरुत: सूक्तेभिर्देवजुष्टैरुक्थेभिर्वचोभि-

हीन्द्राग्नी वो युष्मांश्चावसे हुवध्यै नु यजन्ति तथा स्मा यूयमप्येवं यजत॥४॥

भावार्थः-ये विद्वांसः सर्वार्थं सुखं विद्यां विज्ञानं सेवमाना अग्न्यादिविद्यां सर्वेभ्यः प्रयच्छन्ति त एवोत्तमा भवन्ति॥४॥

पदार्थः-हे मनुष्यो! जैसे (**आविवासन्तः**) सत्य का सब प्रकार से सेवन करते हुए (**सुयज्ञाः**) सुन्दर विद्या और धर्म के प्रचार करने वाली क्रिया जिनकी ऐसे (**कवयः**) बुद्धिमान् विद्वान् (**मरुतः**) मनुष्य (**सूक्तेभिः**) जो उत्तम प्रकार कहे जायें उन (**देवजुष्टैः**) विद्वानों से सेवित और (**उक्थेभिः**) प्रशंसा करने वाले (**वचोभिः**) उत्तम प्रकार शिक्षित वचनों से (**हि**) निश्चय से (**इन्द्रा**) बिजुली (**अग्नी**) और अग्नि को तथा (**वः**) आप लोगों को (**अवसे**) रक्षण आदि के लिये (**हुवध्यै**) ग्रहण करने को (**नु**) शीघ्र (**यजन्ति**) मिलते हैं, वैसे (**स्मा**) ही आप लोग भी इस प्रकार मिलो॥४॥

भावार्थः-जो विद्वान् जन सब के लिये सुख, विद्या और विज्ञान का सेवन करते हुए अग्नि आदि की विद्या को सब के लिये देते हैं, वे ही उत्तम होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एतो न्वद्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा वरीयः।

आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ॥५॥२६॥

एतो इति। नु। अद्य। सुऽध्यः। भवाम। प्र। दुच्छुनाः। मिनवाम। वरीयः। आरे। द्वेषांसि। सनुतः। दधाम। अयाम। प्राञ्चः। यजमानम्। अच्छ॥५॥

पदार्थः-(**एतो**) एते (**नु**) (**अद्य**) (**सुध्यः**) शोभना धीर्येषान्ते (**भवाम**) (**प्र**) (**दुच्छुनाः**) दुष्टाः श्वान इव वर्त्तमानाः (**मिनवामा**) हिंसेम। अत्र **संहितायामिति** दीर्घः। (**वरीयः**) अतिशयेन वरम् (**आरे**) समीपे दूरे वा (**द्वेषांसि**) द्वेषयुक्तानि कर्म्माणि (**सनुतः**) सदा (**दधाम**) (**अयाम**) गमयेम (**प्राञ्चः**) प्राक्तना चिरमायवः (**यजमानम्**) सङ्गन्तारम् (**अच्छ**)॥५॥

अन्वयः-हे मनुष्या! यथाऽद्यैतो वयं नु सुध्यो भवाम ये दुच्छुनास्तान् प्र मिनवामा द्वेषांस्यार अयाम प्राञ्चो वयं सनुतर्वरीयो यजमानं चाच्छ दधाम तथा यूयमपि धत्त॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विज्ञानं वर्धयन्तो दुष्टान् निवारयन्तो द्वेषादिदोषरहिताः सन्तस्सनातनं सत्यं धरन्ति तेऽतीव प्रशंसनीया भवन्ति॥५॥

पदार्थः-हे मनुष्यो! जैसे (**अद्य**) आज (**एतो**) ये हम लोग (**नु**) शीघ्र (**सुध्यः**) अच्छी बुद्धि वाले (**भवाम**) हों और जो (**दुच्छुनाः**) दुष्ट कुत्तों के सदृश वर्त्तमान उनका (**प्र, मिनवामा**) अत्यन्त नाश करें और (**द्वेषांसि**) द्वेषयुक्त कर्म्मों को (**आरे**) समीप वा दूर में (**अयाम**) प्राप्त करावें (**प्राञ्चः**) प्राचीन काल

में वर्त्तमान अधिक अवस्था वाले हम लोग **(सनुतः)** सदा **(वरीयः)** अत्यन्त श्रेष्ठ **(यजमानम्)** मिलने वाले को **(अच्छ)** उत्तम प्रकार **(दधाम)** धारण करें, वैसे आप लोग भी धारण करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विज्ञान को बढ़ाते, दुष्टों का निवारण करते और द्वेष आदि दोषों से रहित हुए सनातन सत्य को धारण करते हैं, वे अत्यन्त प्रशंसा के योग्य होते हैं॥

पुनर्मनुष्यैः प्रज्ञा कथं प्राप्तव्येत्याह॥

फिर मनुष्यों को उत्तम बुद्धि कैसे प्राप्त होनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः।
यया मनुर्विशिशिप्रं जिगाय ययां वणिग्वड्कुरापा पुरीषम्॥६॥

आ। इत। धियम्। कृणवाम। सखायः। अप। या। माता। ऋणुत। व्रजम्। गोः। ययां। मनुः। विशिऽशिप्रम्। जिगाय। ययां। वणिक्। वड्कुः। आप। पुरीषम्॥६॥

पदार्थः-**(आ)** समन्तात् **(इता)** प्राप्नुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(धियम्)** प्रज्ञानम् **(कृणवामा)** कुर्याम। अत्र **संहितायामिति** दीर्घः। **(सखायः)** सुहृदः सन्तः **(अप)** **(या)** **(माता)** जननीव **(ऋणुत)** साध्नुत **(व्रजम्)** मेघम् **(गोः)** किरणात् **(यया)** **(मनुः)** मनुष्यः **(विशिशिप्रम्)** विशीशिप्रे शोभने हनुनासिके यस्य तम् **(जिगाय)** जयति **(यया)** **(वणिक्)** व्यापारी वैश्यः **(वड्कुः)** धनेच्छुः **(आपा)** आप्नोति। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(पुरीषम्)** पूर्तिकरमुदकम्। **पुरीषमित्युदकनामसु पठितम्।** (निघं०१। १२)॥६॥

अन्वयः-हे मनुष्या! यथा मनुर्विशिशिप्रं जिगाय यया वड्कुर्वणिक् पुरीषमापा तां धियं सखायो वयं कृणवामा यथा या माता गोर्व्रजं करोति दुःखमप नयति तथैतं यूयमृणुत धियमेता॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याणां योग्यमस्त्यन्योऽन्येषु सखायो भूत्वा बुद्धिं वर्धयित्वाऽन्येभ्यो विज्ञानं प्रददतु यथा वैश्यो धनं प्राप्यैधते तथा प्रज्ञां प्राप्य वर्द्धन्ताम्॥६॥

पदार्थः-हे मनुष्यो! **(यया)** जिससे **(मनुः)** मनुष्य **(विशिशिप्रम्)** सुन्दर ठुड्ढी और नासिका जिसकी उसको **(जिगाय)** जीतता है **(यया)** जिससे **(वड्कुः)** धन की इच्छा करने वाला **(वणिक्)** व्यापारी वैश्य **(पुरीषम्)** पूर्ण करने वाले जल को **(आपा)** प्राप्त होता है उस **(धियम्)** बुद्धि को **(सखायः)** मित्र होते हुए हम लोग **(कृणवामा)** करें और जैसे **(या)** जो **(माता)** माता के सदृश **(गोः)** किरण से **(व्रजम्)** मेघ को करता है और दुःख को **(अप)** दूर करता है, वैसे इसको आप लोग **(ऋणुत)** सिद्ध करिये और बुद्धि को **(आ)** सब प्रकार **(इता)** प्राप्त हूजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि परस्पर में मित्र होकर बुद्धि को बढ़ाय औरों के लिये विशेष ज्ञान अच्छे प्रकार देवें, जैसे वैश्य धन को प्राप्त होकर बढ़ता है, वैसे उत्तम बुद्धि को पाकर बढ़े॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अनूनोदत्र हस्तयतो अद्रिरार्चन् येन दश मासो नवग्वाः।

ऋतं यती सरमा गा अविन्दुद् विश्वानि सत्याङ्गिराश्चकार॥७॥

अनूनोत्। अत्र। हस्तऽयतः। अद्रिः। आर्चन्। येन। दश। मासः। नवऽग्वाः। ऋतम्। यती। सरमा। गाः। अविन्दुत्। विश्वानि। सत्या। अङ्गिराः। चकार॥७॥

पदार्थः-(**अनूनोत्**) प्रेरयेत् (**अत्र**) (**हस्तयतः**) हस्ता यता निगृहीता वशीभूता यस्य सः (**अद्रिः**) मेघ इव (**आर्चन्**) सत्कुर्वन् (**येन**) (**दश**) (**मासः**) चैत्राद्याः (**नवग्वाः**) नवीनगतयः (**ऋतम्**) सत्यम् (**यती**) यतमाना (**सरमा**) समानरमणा (**गाः**) इन्द्रियाणि (**अविन्दत्**) प्राप्नोति (**विश्वानि**) सर्वाणि (**सत्या**) सत्यानि (**अङ्गिराः**) अङ्गानां रसरूपः प्राण इव (**चकार**) करोति॥७॥

अन्वयः-येनात्र नवग्वा दश मासो वर्त्तन्ते हस्तयतोऽद्रिर्राचन्ननूनोद्या सरमा ऋतं यती गा अविन्दत्। यश्चाङ्गिरा विश्वानि सत्या चकार ते सत्कर्त्तुमर्हाः सन्ति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सर्वदा सत्याचारा भूत्वा सर्वोपकारं साध्नुवन्ति तेऽत्र धर्मात्मानो गण्यन्ते॥७॥

पदार्थः-(**येन**) जिससे (**अत्र**) इस संसार में (**नवग्वाः**) नवीन गमन वाले (**दश**) दश (**मासः**) चैत्र आदि महीने वर्तमान हैं और (**हस्तयतः**) हाथ निग्रह किये अर्थात् वशीभूत किये जिसके वह (**अद्रिः**) मेघ के सदृश (**आर्चन्**) सत्कार करता हुआ (**अनूनोत्**) प्रेरणा करे और जो (**सरमा**) तुल्य रमनेवाली (**ऋतम्**) सत्य का (**यती**) यत्न करती हुई (**गाः**) इन्द्रियों को (**अविन्दत्**) प्राप्त होती है और जो (**अङ्गिराः**) अङ्गों का रसरूप प्राण के सदृश (**विश्वानि**) सम्पूर्ण (**सत्या**) सत्य कार्य्यों को (**चकार**) करता है, वे सत्कार करने योग्य हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सर्वदा सत्य आचारण से युक्त होकर सब के उपकार को सिद्ध करते हैं, वे इस संसार में धर्मात्मा गिने जाते हैं॥७॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्तना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

विश्वे अस्या व्युषि माहिनाया: सं यद् गोभिरङ्गिरसो नवन्त।

उत्सं॑ आसां पर॒मे स॒धस्थं॑ ऋ॒तस्य॑ प॒था स॒रमां॑ विदु॒न्नः॥८॥

विश्वे॑। अ॒स्याः। वि॒ऽउषि॑। माहि॑नायाः। सम्। यत्। गोभिः॑। अङ्गि॑रसः। नव॑न्त। उत्सः॑। आ॒सा॒म्। प॒र॒मे। स॒धऽस्थे॑। ऋ॒तस्य॑। प॒था। स॒रमा॑। वि॒दु॒त्। गाः॥८॥

पदार्थः-(विश्वे) सर्वे **(अस्याः)** उषसः **(व्युषि)** विशिष्टे निवासे **(माहिनायाः)** महत्त्वयुक्तायाः **(सम्)** **(यत्)** यतः **(गोभिः)** किरणैः **(अङ्गिरसः)** वायवः **(नवन्त)** स्तुवन्ति **(उत्सः)** कूप इव **(आसाम्)** उषसाम् **(परमे)** प्रकृष्टे **(सधस्थे)** सहस्थाने **(ऋतस्य)** सत्यस्योदकस्य वा **(पथा)** मार्गेण **(सरमा)** या सरान् प्राप्तान् **(विदत्)** वेत्ति **(गाः)** किरणान्॥८॥

अन्वयः-हे मनुष्या! यथा विश्वे प्राणिनो माहिनाया अस्या व्युषि गोभिस्सहाङ्गिरसः सन्नवन्त यदासां परमे सधस्थ ऋतस्य पथा उत्स इव सरमा गा विदत् तांस्तांश्च यूयं विजानीत॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यता प्रभातवेलायां प्राणिनो हर्षन्ति तथैव निःसन्देहा भूत्वा मनुष्या आनन्दन्ति॥८॥

पदार्थः-हे मनुष्यो! जैसे **(विश्वे)** सम्पूर्ण प्राणी **(माहिनायाः)** महत्त्व से युक्त **(अस्याः)** प्रातर्वेला के **(व्युषि)** विशिष्ट निवास में **(गोभिः)** किरणों के साथ **(अङ्गिरसः)** पवन **(सम्, नवन्त)** अच्छे प्रकार स्तुति करते हैं **(यत्)** जिससे **(आसाम्)** इन प्रातर्वेलाओं के **(परमे)** प्रकृष्ट **(सधस्थे)** साथ के स्थान में **(ऋतस्य)** सत्य वा जल के **(पथा)** मार्ग से **(उत्सः)** कूप के सदृश **(सरमा)** प्राप्त हुओं का आदर करनेवाली **(गाः)** किरणों को **(विदत्)** जानती है, उन उनको आप लोग विशेष कर जानिये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभातवेला में प्राणी प्रसन्न होते हैं, वैसे ही सन्देहरहित होकर मनुष्य आनन्दित होते हैं॥८॥

पुनः सूर्य्यवन्मनुष्याः किं कुर्य्युरित्युपदिश्यते॥

फिर सूर्य्य के समान मनुष्य क्या करें, उसका उपदेश करते हैं॥

आ सूर्यो॑ यातु स॒प्ताश्वः॒ क्षेत्रं॒ यद॑स्योर्वि॒या दी॑र्घया॒थे।

र॒घुः श्ये॒न प॑तय॒दन्धो॒ अच्छा॒ युवा॑ क॒विर्दी॑दय॒द् गोषु॒ गच्छ॑न्॥९॥

आ। सूर्यः॑। या॒तु॒। स॒प्तऽअ॑श्वः। क्षेत्र॑म्। यत्। अ॒स्य॒। उ॒र्वि॒या। दी॒र्घऽया॒थे। र॒घुः। श्ये॒नः। प॒त॒य॒त्। अन्धः॑। अच्छ॑। युवा॑। क॒विः। दी॒द॒य॒त्। गोषु॑। गच्छ॑न्॥९॥

पदार्थः-(आ) समन्तात् **(सूर्य्यः)** सविता **(यातु)** गच्छतु **(सप्ताश्वः)** सप्तविधा अश्वा आशुगामिनः किरणा यस्य सः **(क्षेत्रम्)** निवासस्थानम् **(यत्)** **(अस्य)** **(उर्विया)** पृथिव्याः **(दीर्घयाथे)** यान्ति यस्मिन्त्स याथो मार्गः दीर्घश्चासौ याथस्तस्मिन् **(रघुः)** लघुः **(श्येनः)** अन्तरिक्षस्थः श्येन इव **(पतयत्)** पतिरिवाचरति **(अन्धः)** अन्नादिकम् **(अच्छा)** अत्र **संहितायामिति** दीर्घः। **(युवा)**

मिश्रितामिश्रितकर्त्ता यौवनावस्थः **(कविः)** मेधावी विद्वान् **(दीदयत्)** प्रकाशयति **(गोषु)** पृथिवीषु **(गच्छन्)**॥९॥

अन्वयः-हे मनुष्या! यथा सप्ताश्वः सूर्य्यो यत् क्षेत्रमस्योर्विया दीर्घयाथे रघुः श्येन इवान्तरिक्षे याति तथा भवान् सेनाया मध्य आ यातु यथा गोषु गच्छन् दीदयत्तथा युवा कविरच्छान्धः पतयदिति विजानीत॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यस्मिन् सूर्ये सप्त तत्त्वानि सन्ति यः स्वक्षेत्रं विहाय इतस्ततो नो गच्छति तथा बहूनां भूगोलानां मध्य एकः सन् प्रकाशते तथैव सर्वे पुरुषा भवन्तु॥९॥

पदार्थः-हे मनुष्यो! जैसे **(सप्ताश्वः)** सात प्रकार शीघ्र चलनेवाली किरणें जिसकी ऐसा **(सूर्य्यः)** सूर्य्य **(यत्)** जिस **(क्षेत्रम्)** निवास के स्थान को **(अस्य)** इस जगत् सम्बन्धिनी **(उर्विया)** पृथिवी के **(दीर्घयाथे)** चलें जिसमें ऐसे बड़े मार्ग में **(रघुः)** लघु **(श्येनः)** अन्तरिक्षस्थ वाज पक्षी के सदृश अन्तरिक्ष में जाता है, वैसे आप सेना के मध्य में **(आ)** सब प्रकार से **(यातु)** प्राप्त हूजिये और जैसे **(गोषु)** पृथिवियों में **(गच्छन्)** चलता हुआ **(दीदयत्)** प्रकाश करता है, वैसे **(युवा)** मिले और नहीं मिले हुए को करने वाले यौवनावस्थायुक्त **(कविः)** बुद्धिमान् विद्वान् **(अच्छा)** उत्तम प्रकार **(अन्धः)** अन्न आदि का **(पतयत्)** स्वामी के सदृश आचरण करता है, यह जानो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिस सूर्य्य में सात तत्त्व हैं और जो और जो अपने चक्र को छोड़ के इधर-उधर नहीं जाता है और बहुत भूगोलों के मध्य में एक ही प्रकाशित है, वैसे ही सब पुरुष होवें॥९॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

आ सूर्यो॑ अरुहच्छु॒क्रमर्णोऽयु॑क्त॒ यद्ध॒रितो॑ वी॒तपृ॑ष्ठाः।

उ॒द्ना न नाव॑मनयन्त॒ धीरा॑ आशृण्व॒तीरापो॑ अ॒र्वाग॑तिष्ठन्॥ १०॥

आ। सूर्यः॑। अ॒रु॒ह॒त्। शु॒क्रम्। अर्णः॑। अयु॑क्त। यत्। ह॒रितः॑। वीतऽपृ॑ष्ठाः। उ॒द्ना। न। नाव॑म्। अ॒न॒य॒न्त॒। धीराः॑। आऽशृ॑ण्व॒तीः। आपः॑। अ॒र्वाक्। अ॒ति॒ष्ठ॒न्॥ १०॥

पदार्थः-**(आ)** **(सूर्य्यः)** **(अरुहत्)** रोहति **(शुक्रम्)** वीर्य्यम् **(अर्णः)** उदकम् **(अयुक्त)** युनक्ति **(यत्)** **(हरितः)** ये हरन्त्युदकादिकम् **(वीतपृष्ठाः)** वीतानि व्याप्तानि लोकलोकान्तराणां पृष्ठानि यैस्ते **(उद्ना)** उदकेन **(न)** इव **(नावम्)** **(अनयन्त)** नयन्ति **(धीराः)** ध्यानवन्तो मेधाविनः **(आशृण्वतीः)** याः समन्ताच्छ्रूयन्ते ताः **(आपः)** प्राणाः **(अर्वाक्)** पश्चात् **(अतिष्ठन्)** तिष्ठन्ति॥१०॥

अन्वयः-हे मनुष्या! यत्सूर्यः शुक्रमारुहदर्णोऽयुक्त वीतपृष्ठा हरितो धीरा उद्ना नावं नानयन्तार्वागाशृण्वतीरापोऽतिष्ठन् तत्सर्वं यूयं विजानीत॥१०॥

भावार्थः-ये मनुष्याः सूर्य्यजलादिविद्यां विज्ञाय नावादिकं चालयेयुस्ते श्रीमन्तो जायन्ते॥१०॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(सूर्य्यः)** सूर्य्य **(शुक्रम्)** वीर्य का **(आ, अरुहत्)** आरोहण करता और **(अर्णः)** उदक का **(अयुक्त)** योग करता है और **(वीतपृष्ठाः)** व्याप्त हैं लोकान्तरों के पृष्ठ जिनसे वे **(हरितः)** जल आदि को हरने वाले **(धीराः)** ध्यानवान् बुद्धिमान् जन **(उद्ना)** जल से **(नावम्)** नौका को **(न)** जैसे वैसे **(अनयन्त)** प्राप्त होते अर्थात् व्यवहार को पहुंचते हैं **(अर्वाक्)** पीछे **(आशृण्वतीः)** जो चारों ओर से सुन पड़ते हैं वह **(आपः)** प्राण **(अतिष्ठन्)** स्थित होते हैं, उस सब को आप लोग जानें॥१०॥

भावार्थः-जो मनुष्य सूर्य्य और जल आदि की विद्याओं को जान के नौका आदि को चलावें, वे लक्ष्मीवान् होते हैं॥१०॥

ये मनुष्याः प्रज्ञां याचन्ते ते विद्वांसो जायन्त इत्याह॥

जो मनुष्य उत्तम बुद्धि की याचना करते हैं, वे विद्वान् होते हैं,
इस विषय को अगले मन्त्र में कहते हैं॥

धियं॑ वो अ॒प्सु दं॑धिषे स्व॒र्षां ययात॑र॒न् दश॑ मा॒सो नव॑ग्वाः।
अ॒या धि॒या स्या॑म दे॒वगो॑पा अ॒या धि॒या तु॑तुर्या॒मात्यंह॑सः॥११॥२७॥

धिय॑म्। व॒रिति॑ वः। अ॒प्ऽसु। दु॒धि॒षे॒। स्व॒रिति॑ सुऽआ॑म्। ययाँ॑। अत॑रन्। दश॑। मा॒सः। नव॑ऽग्वाः। अ॒या। धि॒या। स्या॒म॒। दे॒वऽगो॑पाः। अ॒या। धि॒या। तु॒तु॒र्या॒म॒। अति॑। अंह॑सः॥११॥

पदार्थः-(धियम्) प्रज्ञां कर्म वा **(वः)** युष्माकम् **(अप्सु)** **(दधिषे)** धारयेयम् **(स्वर्षाम्)** स्वः सुखं सनति विभजति यया ताम् **(यया)** **(अतरन्)** तरन्ति **(दश)** **(मासः)** **(नवग्वाः)** नवीनगतयः **(अया)** अनया **(धिया)** **(स्याम)** **(देवगोपाः)** देवानां विदुषां रक्षकाः **(अया)** **(धिया)** **(तुतुर्याम)** विनाशयेम **(अति)** **(अंहः)** पापं पापजन्यं दुःखं वा॥११॥

अन्वयः-हे मनुष्या! यया नवग्वा दश मासोऽतरन्नया धिया वयं देवगोपाः स्यामाऽया धियांऽहोऽति तुतुर्याम वः स्वर्षां तां धियमप्सु प्राणेष्वहं दधिषे॥११॥

भावार्थः-ये धीमन्तो धनवन्तो बलाढ्या भूत्वा सर्वान् रक्षन्ति ते दुःखानि तरन्ति॥११॥

अत्र सूर्य्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चचत्वारिंशत्तमं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(यया)** जिससे **(नवग्वाः)** नवीन गमन वाले **(दश)** दश **(मासः)** महीने **(अतरन्)** पार होते हैं **(अया)** इस **(धिया)** बुद्धि से हम लोग **(देवगोपाः)** विद्वानों के रक्षक **(स्याम)** होवें और **(अया)** इस **(धिया)** बुद्धि से **(अंहः)** पाप वा पाप से उत्पन्न दुःख का **(अति, तुतुर्याम)** अत्यन्त विनाश करें **(वः)** आपकी **(स्वर्षाम्)** सुख का विभाग करता है जिससे उस **(धियम्)** बुद्धि को **(अप्सु)** प्राणों में मैं **(दधिषे)** धारण करूं॥११॥

भावार्थः-जो बुद्धिमान्, धनवान् और बल से युक्त होकर सब की रक्षा करते हैं, वे दुःखों के पार होते हैं॥११॥

इस सूक्त में सूर्य्य और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के संगति जाननी चाहिये॥

यह पैंतालीसवां सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य षट्चत्वारिंशत्तमस्य सूक्तस्य प्रतिक्षत्र आत्रेय ऋषिः। १-६ विश्वेदेवाः। ७-८ देवपत्न्यो देवताः। १ भुरिग्जगती। ३, ४, ५, ६ निचृज्जगती। ७ जगती छन्दः। निषादः स्वरः। २ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ८ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ शिल्पविद्याविद्वान् यानानि निर्माय सुखेन पन्थानं गच्छतीत्याह॥

अब आठ ऋचा वाले छयालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में शिल्पविद्या का विद्वान् रथों को रचकर सुख से मार्ग को जाता है, इस विषय को कहते हैं॥

हयो॒ न वि॒द्वाँ अ॑युजि स्व॒यं धु॒रि तां व॑हामि प्र॒तर॑णीमव॒स्युव॑म्।
नास्या॑ वश्मि वि॒मुचं॒ नावृ॑तं पुन॑र्वि॒द्वान् प॒थः पु॑र॒एत ऋ॒जु ने॑षति॥ १॥

हय॑ः। न। वि॒द्वान्। अ॒यु॒जि॒। स्व॒यम्। धु॒रि। ताम्। व॒हा॒मि॒। प्र॒ऽतर॑णीम्। अ॒व॒स्युव॑म्। न। अ॒स्याः। व॒श्मि॒। वि॒ऽमुच॑म्। न। आ॒ऽवृत॑म्। पुन॑ः। वि॒द्वान्। प॒थः। पु॒रः॒ऽए॒ता। ऋ॒जु। ने॒ष॒ति॥ १॥

पदार्थः-(हयः) सुशिक्षितोऽश्वः **(न)** इव **(विद्वान्)** **(अयुजि)** असंयुक्तायाम् **(स्वयम्)** **(धुरि)** मार्गे **(ताम्)** **(वहामि)** प्राप्नोमि प्रापयामि वा **(प्रतरणीम्)** प्रतरन्ति यया ताम् **(अवस्युवम्)** आत्मनोऽवमिच्छन्तीम् **(न)** **(अस्याः)** **(वश्मि)** कामये **(विमुचम्)** विमुचन्ति येन तम् **(न)** **(आवृतम्)** आच्छादितम् **(पुनः)** **(विद्वान्)** **(पथः)** **(पुरएता)** पूर्वं गन्ता **(ऋजु)** सरलम् **(नेषति)** नयेत्॥ १॥

अन्वयः-हे मनुष्या! विद्वानहं स्वयमयुजि धुरि हयो न तां प्रतरणीमवस्युवं वहामि। अस्या विमुचं न वश्मि न आवृतं वश्मि पुनः पुरएता विद्वानृजु पथो नेषति॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा विद्वद्भिः सुशिक्षिता अश्वाः कार्य्याणि साध्नुवन्ति तथैव प्राप्तविद्याशिक्षा मनुष्याः कार्यसिद्धिमाप्नुवन्ति॥ १॥

पदार्थः-हे मनुष्यो! **(विद्वान्)** विद्यायुक्त मैं **(स्वयम्)** आप **(अयुजि)** नहीं संयुक्त **(धुरि)** मार्ग में **(हयः)** उत्तम प्रकार शिक्षायुक्त घोड़े के **(न)** सदृश **(ताम्, प्रतरणीम्)** पार होते हैं जिससे उस **(अवस्युवम्)** अपनी रक्षा की इच्छा करती हुई को **(वहामि)** प्राप्त होता वा प्राप्त कराता हूं और **(अस्याः)** इसके सम्बन्ध में **(विमुचम्)** त्यागते हैं जिससे उसकी **(न)** नहीं **(वश्मि)** कामना करता हूं और **(न)** नहीं **(आवृतम्)** ढँपे हुए की कामना करता हूं **(पुनः)** फिर **(पुरएता)** प्रथम जाने वाला **(विद्वान्)** विद्यायुक्त जन **(ऋजु)** सरलता जैसे हो, वैसे **(पथः)** मार्गों को **(नेषति)** प्राप्त करावे॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वानों से उत्तम प्रकार शिक्षित घोड़े कार्यों को सिद्ध करते हैं, वैसे ही प्राप्त हुई विद्या और शिक्षा जिनको ऐसे मनुष्य कार्य्य की सिद्धि को प्राप्त होते हैं॥ १॥

मनुष्यैर्विद्युदादिविद्यावश्यं स्वीकार्येत्याह॥

मनुष्यों को विद्युदादि विद्या अवश्य स्वीकार करने योग्य है, इस विषय को कहते हैं॥

अग्न॒ इन्द्र॒ वरु॑ण॒ मित्र॒ देवा॒: शर्ध॒: प्र य॑न्त॒ मारु॑तो॒त वि॑ष्णो।

उ॒भा नास॑त्या रु॒द्रो अध॒ ग्ना: पू॒षा भग॒: सर॑स्वती जुषन्त॥ २॥

अग्ने॑। इन्द्र॑। वरु॑ण। मित्र॑। देवा॑:। शर्धः॑। प्र। य॒न्त॒। मारु॑त। उ॒त। वि॒ष्णो॒ इति॑। उ॒भा। नास॑त्या। रु॒द्रः। अध॑। ग्नाः। पू॒षा। भग॑:। सर॑स्वती। जु॒ष॒न्त॒॥ २॥

पदार्थः-(**अग्ने**) विद्वन् (**इन्द्र**) परमैश्वर्य्ययुक्त (**वरुण**) श्रेष्ठ (**मित्र**) सुहृत् (**देवाः**) विद्वांसः (**शर्धः**) बलम् (**प्र**) (**यन्त**) प्राप्नुवन्ति (**मारुत**) मरुतां मनुष्याणां मध्ये विदित (**उत**) अपि (**विष्णो**) व्यापनशीलम् (**उभा**) उभौ (**नासत्या**) अविद्यमानासत्याचरणौ (**रुद्रः**) दुष्टानां भयङ्करः (**अध**) (**ग्नाः**) वाणी (**पूषा**) पुष्टिकर्त्ता: वायुः (**भगः**) ऐश्वर्यवान् (**सरस्वती**) सुशिक्षिता वाणी (**जुषन्त**) सेवन्ताम्॥ २॥

अन्वयः-हे इन्द्राग्ने वरुण मित्र मारुत देवा! भवन्तः शर्धः प्र यन्त। उत हे विष्णो! उभा नासत्या रुद्रो भगः पूषाध सरस्वती च ग्ना जुषन्त॥ २॥

भावार्थः-हे मनुष्या! भवद्भिर्विद्याशरीरबलयोगवृद्धिं कृत्वाऽग्न्यादिविद्या स्वीकार्य्या॥ २॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त (**अग्ने**) विद्वन् (**वरुण**) श्रेष्ठ (**मित्र**) मित्र (**मारुत**) मनुष्यों में विदित और (**देवाः**) विद्वानो! आप (**शर्धः**) बल को (**प्र, यन्त**) प्राप्त होते हैं (**उत**) और हे (**विष्णोः**) व्यापनशील! (**उभा**) दो (**नासत्या**) असत्य आचरण से रहित जन (**रुद्रः**) दुष्टों को भयंकर (**भगः**) ऐश्वर्य्यवान् (**पूषा**) पुष्टिकारक वायु (**अध**) इसके अनन्तर (**सरस्वती**) उत्तम प्रकार शिक्षित वाणी भी (**ग्नाः**) वाणियों का (**जुषन्त**) सेवन करें॥ २॥

भावार्थः-हे मनुष्यो! आप लोगों को चाहिये कि विद्या, शरीर, बल और योग की वृद्धि करके अग्नि आदि विद्या को स्वीकार करें॥ २॥

अत्र सृष्टौ मनुष्यैः किं किं वेदितव्यमित्याह॥

इस सृष्टि में मनुष्यों को क्या क्या जानना योग्य है, इस विषय को कहते हैं॥

इ॒न्द्रा॒ग्नी मि॒त्रावरु॑णादि॒तिं स्व॑: पृथि॒वीं द्यां म॒रुत॒: पर्व॑ताँ अ॒प:।

हु॒वे विष्णुं॑ पू॒षणं॒ ब्रह्म॑ण॒स्पति॒ भगं॒ नु शंस॑ꣳ सवि॒तार॑मू॒तये॑॥ ३॥

इ॒न्द्रा॒ग्नी इति॑। मि॒त्रावरु॑णा। अदि॑तिम्। स्व॑रि॒ति॑ स्व॑:। पृ॒थि॒वीम्। द्याम्। म॒रुत॑:। पर्व॑तान्। अ॒प:। हु॒वे। विष्णु॑म्। पू॒षण॑म्। ब्रह्म॑णः। पति॑म्। भग॑म्। नु। शंस॑म्। स॒वि॒तार॑म्। ऊ॒तये॑॥ ३॥

पदार्थः-(**इन्द्राग्नी**) सूर्य्यविद्युतौ (**मित्रावरुणा**) प्राणोदानौ (**अदितिम्**) अन्तरिक्षम् (**स्वः**) आदित्यम् (**पृथिवीम्**) भूमिम् (**द्याम्**) प्रकाशम् (**मरुतः**) वायून् मनुष्यान् वा (**पर्वतान्**) मेघान् शैलान् वा (**अपः**) जलानि (**हुवे**) आदद्मि (**विष्णुम्**) व्यापकं धनं जयं वा (**पूषणम्**) पुष्टिकरं व्यानम् (**ब्रह्मणः**)

ब्रह्माण्डस्य **(पतिम्)** पालकं सूत्रात्मानम् **(भगम्)** ऐश्वर्य्यम् **(नु)** सद्यः **(शंसम्)** प्रशंसनीयम् **(सवितारम्)** जगदुत्पादकं परमात्मानम् **(ऊतये)** रक्षादिव्यवहारसिद्धये॥३॥

अन्वयः-हे मनुष्या! यथाहमूतय इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वतानपो विष्णुं पूषणं ब्रह्मणस्पतिं भगं शंसं सवितारं हुवे तथा यूयमपि न्वेतानाह्वयत॥३॥

भावार्थः-मनुष्यैर्विद्युदादिविद्यावश्यं स्वीकार्य्या॥३॥

पदार्थः-हे मनुष्यो! जैसे मैं **(ऊतये)** रक्षा आदि व्यवहार की सिद्धि के लिये **(इन्द्राग्नी)** सूर्य्य और बिजुली **(मित्रावरुणा)** प्राण और उदान वायु तथा **(अदितिम्)** अन्तरिक्ष को **(स्वः)** सूर्य्य और **(पृथिवीम्)** भूमि को **(द्याम्)** प्रकाश को **(मरुतः)** पवनों वा मनुष्यों को **(पर्वतान्)** मेघों वा पर्वतों को **(अपः)** जलों को **(विष्णुम्)** व्यापक धन वा जय को **(पूषणम्)** पुष्टिकारक व्यान वायु और **(ब्रह्मणः)** ब्रह्माण्ड के **(पतिम्)** पालन करने वाले सूत्रात्मा को **(भगम्)** ऐश्वर्य और **(शंसम्)** प्रशंसा करने योग्य **(सवितारम्)** संसार के उत्पन्न करने वाले परमात्मा को **(हुवे)** ग्रहण करता हूं, वैसे आप लोग **(नु)** शीघ्र इनको ग्रहण करना चाहिये॥३॥

भावार्थः-मनुष्यों को विद्युद्विद्या अवश्य स्वीकार करनी चाहिये॥३॥

अवश्यं मनुष्यैरीश्वरादिसेवनं कार्यमित्याह॥

अवश्य मनुष्यों को ईश्वरादिकों का सेवन करना चाहिये, इस विषय को कहते हैं॥

उ॒त नो॒ विष्णु॑रु॒त वातो॑ अ॒स्रिधो॑ द्रविणो॒दा उ॒त सोमो॒ मय॑स्करत्।

उ॒त ऋ॒भव॑ उ॒त रा॒ये नो॑ अ॒श्विनो॒त त्वष्टो॒त विभ्वा॑नु॒ मंस॑ते॥४॥

उ॒त। नः॒। विष्णुः॑। उ॒त। वातः॑। अ॒स्रिधः॑। द्र॒वि॒ण॒ऽदाः॑। उ॒त। सोमः॑। मयः॑। क॒र॒त्। उ॒त। ऋ॒भवः॑। उ॒त। रा॒ये। नः॒। अ॒श्विना॑। उ॒त। त्वष्टा॑। उ॒त। विऽभ्वा॑। अनु॑। मं॒स॒ते॥४॥

पदार्थः-**(उत)** अपि **(नः)** अस्मान् **(विष्णुः)** व्यापकेश्वरः **(उत)** **(वातः)** वायुः **(अस्रिधः)** अहिंसकः **(द्रविणोदाः)** धनप्रदः **(उत)** **(सोमः)** ऐश्वर्य्यवान् **(मयः)** **(करत्)** कुर्य्यात् **(उत)** **(ऋभवः)** मेधाविनः **(उत)** **(राये)** **(नः)** **(अश्विना)** अध्यापकोपदेशकौ **(उत)** **(त्वष्टा)** तनूकर्त्ता **(उत)** **(विभ्वा)** विभुना **(अनु)** **(मंसते)** मन्यताम्॥४॥

अन्वयः-हे मनुष्या! नो विष्णुरुत वात उतास्रिधो द्रविणोदा उत सोम उतर्भव उत राये नोऽस्मानुताश्विनोत त्वष्टा विभ्वाऽनु मंसते तैर्विद्वान् मयस्करत्॥४॥

भावार्थः-ये मनुष्या ईश्वरादीन् पदार्थान् सेवन्ते ते विदितवेदितव्या जायन्ते॥४॥

पदार्थः-हे मनुष्यो! **(नः)** हम लोगों को **(विष्णुः)** व्यापक ईश्वर **(उत)** और **(वातः)** वायु **(उत)** और **(अस्रिधः)** नहीं हिंसा करने और **(द्रविणोदाः)** धन का देने वाला **(उत)** और **(सोमः)** ऐश्वर्य्यवान् **(उत)** और **(ऋभवः)** बुद्धिमान् जन **(उत)** और **(राये)** धन के लिये **(नः)** हम लोगों को **(उत)** और

(अश्विना) अध्यापक और उपदेशक जन **(उत)** और **(त्वष्टा)** सूक्ष्म करने वाला **(विभ्वा)** समर्थ से **(अनु, मंसते)** अनुमान करें, उनसे विद्वान् **(मयः)** सुख को **(करत्)** सिद्ध करे॥४॥

भावार्थः-जो मनुष्य ईश्वर आदि पदार्थों का सेवन करते हैं, वे जानने योग्य पदार्थों के जानने वाले होते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हिरासदे।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यꣳ वरुणो मित्रो अर्यमा॥५॥

उत। त्यत्। नः। मारुतम्। शर्धः। आ। गमत्। दिविऽक्षयम्। यजतम्। बर्हिः। आऽसदे। बृहस्पतिः। शर्म। पूषा। उत। नः। यमत्। वरूथ्यम्। वरुणः। मित्रः। अर्यमा॥५॥

पदार्थः-**(उत)** अपि **(त्यत्)** तत् **(नः)** अस्मान् **(मारुतम्)** मरुतां मनुष्याणामिदम् **(शर्धः)** बलम् **(आ) (गमत्)** गच्छेत् **(दिविक्षयम्)** दिवि प्रकाशे क्षयो निवासो यस्य तम् **(यजतम्)** सङ्गतम् **(बर्हिः)** उत्तममासनम् **(आसदे)** आसत्तुमुपवेष्टुम् **(बृहस्पतिः)** बृहतां पालकः **(शर्म)** गृहम् **(पूषा)** पुष्टिकर्त्ता **(उत)** अपि **(नः)** अस्मानस्माकम् वा **(यमत्)** यच्छति **(वरूथ्यम्)** गृहेषु साधु **(वरुणः)** श्रेष्ठ उदान इव उत्तमः **(मित्रः)** प्राण इव प्रियः **(अर्यमा)** न्यायकारी॥५॥

अन्वयः-हे मनुष्यो! दिविक्षयं यजतं त्यन्मारुतं बर्हिः शर्धो न आ गमदुतापि बृहस्पतिः पूषा वरुणो मित्र उताऽऽर्यमाऽऽसदे वरूथ्यं शर्माऽऽसदे नो यमत्॥५॥

भावार्थः-ये मनुष्या वायुगुणान् विजानीयुस्ते सर्वतो धनं लभेरन्॥५॥

पदार्थः-हे मनुष्यो! **(दिविक्षयम्)** जिसका प्रकाश में निवास **(यजतम्)** जो मिलता हुआ **(त्यत्)** वह **(मारुतम्)** मनुष्यसम्बन्धी **(बर्हिः)** उत्तम आसन और **(शर्धः)** बल **(नः)** हम लोगों को **(आ, गमत्)** प्राप्त होवे और **(उत)** भी **(बृहस्पतिः)** बड़ों का पालन करने और **(पूषा)** पुष्टि करने वाला **(वरुणः)** उदानवायु के सदृश उत्तम **(मित्रः)** प्राणवायु के सदृश प्रिय **(उत)** भी **(अर्यमा)** न्यायकारी और **(आसदे)** प्रवेश होने को **(वरूथ्यम्)** गृहों में श्रेष्ठ **(शर्म)** गृह को प्रवेश होने को **(नः)** हम लोगों को **(यमत्)** देता है॥५॥

भावार्थः-जो मनुष्य वायु के गुणों को विशेषकर जानें, वे सब प्रकार से धन को प्राप्त होवें॥५॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्यꣳस्त्रामणे भुवन्।

भगो॑ विभ॒क्ता शव॒सावसा ग॑मदुरु॒व्यचा॒ अदि॑तिः श्रोतु मे॒ हव॑म्॥६॥

उ॒त। त्ये। न॒:। पर्व॑तास:। सु॒ऽश॒स्तय॑:। सु॒ऽदी॒तय॑:। न॒द्य॑:। त्रामणे। भुव॒न्। भग॑:। वि॒ऽभ॒क्ता। शव॑सा। अव॑सा। आ। ग॒म॒त्। उ॒रु॒ऽव्यचा॑:। अदि॑ति:। श्रो॒तु॒। मे॒। हव॑म्॥६॥

पदार्थ:-(उत) (त्ये) ते **(न:)** अस्मानस्माकं वा **(पर्वतास:)** मेघा इव **(सुशस्तय:)** शोभनप्रशंसा: **(सुदीतय:)** प्रशंसितप्रकाशा: **(नद्य:)** सरित: **(त्रामणे)** पालनव्यवहाराय **(भुवन्)** भवन्तु **(भग:)** भजनीय ऐश्वर्य्ययोग: **(विभक्ता)** विभज्य दाता **(शवसा)** बलेन **(अवसा)** रक्षणादिना **(आ) (गमत्)** आगच्छेत् समन्तात् प्राप्नुयात् **(उरुव्यचा:)** बहुषु व्याप्त: **(अदिति:)** अविद्यमानखण्डन: **(श्रोतु)** शृणोतु **(मे)** मम **(हवम्)** शब्दम्॥६॥

अन्वय:-हे मनुष्या! ये पर्वतास इव सुशस्तयो नद्य इव सुदीतयो नस्त्रामणे भुवन्। उत उरुव्यचा अदितिर्भगो विभक्ता शवसाऽवसाऽऽगमन्मे हवं श्रोतु त्ये स च सत्कर्त्तव्या भवेयु:॥६॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये मेघवज्जगत्पालका: प्रशंसितं न्यायं विधाय सर्वस्या: प्रजाया विनतिं श्रुत्वा न्यायं कुर्य्युस्ते विनयवन्तो भवन्ति॥६॥

पदार्थ:-हे मनुष्यो! जो **(पर्वतास:)** मेघों के सदृश **(सुशस्तय:)** उत्तम प्रशंसायुक्त **(नद्य:)** नदियों के सदृश **(सुदीतय:)** प्रशंसित प्रकाश वाले **(न:)** हम लोगों को वा हमारे **(त्रामणे)** पालन व्यवहार के लिये **(भुवन्)** हों **(उत)** और **(उरुव्यचा:)** बहुतों में व्याप्त **(अदिति:)** खण्डन से रहित **(भग:)** आदर करने योग्य ऐश्वर्य का योग **(विभक्ता)** विभाग कर देने वाला **(शवसा)** बल और **(अवसा)** रक्षण आदि से **(आ, गमत्)** सब प्रकार प्राप्त होवे और **(मे)** मेरे **(हवम्)** शब्द को **(श्रोतु)** सुने **(त्ये)** वे और वह सत्कार करने योग्य होवें॥६॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मेघ के सदृश संसार के पालन करने वाले प्रशंसित न्याय का विधान कर सम्पूर्ण प्रजा की विनती सुन के न्याय करें, वे विनययुक्त होते हैं॥६॥

राजवद्राज्ञ: स्त्री न्यायं करोत्वित्याह॥

राजा के समान राजपत्नी न्याय करे, इस विषय को अगले मन्त्र में कहते हैं॥

दे॒वानां॑ पत्नी॑रुश॒तीर॑वन्तु न॒: प्राव॑न्तु नस्तु॒जये॒ वाज॑सातये।

या: पार्थि॑वासो॒ या अ॒पामपि॑ व्र॒ते ता नो॑ देवी: सुहवा॒: शर्म॑ यच्छत॥७॥

दे॒वाना॑म्। पत्नी॑:। उ॒श॒ती:। अ॒व॒न्तु॒। न॒:। प्र। अ॒व॒न्तु॒। न॒:। तु॒जये॑। वाज॑ऽसातये। या:। पार्थि॑वास:। या:। अ॒पाम्। अपि॑। व्र॒ते। ता:। न॒:। दे॒वी:। सु॒ऽहु॒वा॒:। शर्म॑। य॒च्छ॒त॥७॥

पदार्थ:-(देवानाम्) विदुषाम् **(पत्नी:)** स्त्रिय: **(उशती:)** कामयमाना: **(अवन्तु)** रक्षन्तु **(न:)** अस्मानस्माकं वा **(प्र, अवन्तु) (न:)** अस्मान् **(तुजये)** बलाय **(वाजसातये) (या:) (पार्थिवास:)**

पृथिव्यां विदिताः **(याः)** अपां जलानाम् **(अपि)** **(व्रते)** शीले **(ताः)** **(नः)** अस्मभ्यम् **(देवीः)** देदीप्यमानाः **(सुहवाः)** शोभनाह्वानाः **(शर्म)** सुखकारकं गृहम् **(यच्छत)** ददत॥७॥

अन्वयः-हे मनुष्या! या देवानां राज्ञां न्यायमुशतीः पत्नीर्नोऽवन्तु तुजये वाजसातये प्रावन्तु याः पार्थिवासोऽपां व्रतेऽपि देवीः सुहवा नः शर्म प्रदद्युस्ता नो यूयं यच्छत॥७॥

भावार्थः-यथा राजानः पुरुषाणां न्यायं कुर्युस्तथैव स्त्रीणां न्यायं राज्ञः कुर्युः॥७॥

पदार्थः-हे मनुष्यो! **(याः)** जो **(देवानाम्)** विद्वानों वा राजाओं के न्याय की **(उशतीः)** कामना करती हुई **(पत्नीः)** स्त्रियां **(नः)** हम लोगों की वा हमारे सम्बन्धी पदार्थों की **(अवन्तु)** रक्षा करें और **(तुजये)** बल और **(वाजसातये)** संग्राम के लिये **(प्र, अवन्तु)** अच्छे प्रकार रक्षा करें और **(याः)** जो **(पार्थिवासः)** पृथिवी में विदित **(अपाम्)** जलों के **(व्रते)** स्वभाव में **(अपि)** भी **(देवीः)** प्रकाशमान **(सुहवाः)** उत्तम आह्वान वाली **(नः)** हम लोगों को **(शर्म)** सुखकारक गृह देवें और **(ताः)** उनको **(नः)** हम लोगों के लिये आप लोग **(यच्छत)** दीजिये॥७॥

भावार्थः-जैसे राजा लोग पुरुषों का न्याय करें, वैसे ही स्त्रियों के न्याय को रानियां करें॥७॥

राजवद्राज्ञ्यः स्त्रीणां न्यायं कुर्य्युरित्याह॥

राजा के समान रानी स्त्रियों का न्याय करें, इस विषय को कहते हैं॥

उ॒त ग्ना व्य॑न्तु दे॒वप॑त्नीरिन्द्रा॒ण्य१॑ग्नाय्य॒श्विनी॒ राट्।

आ रोद॑सी वरुणा॒नी शृ॑णोतु॒ व्यन्तु॑ दे॒वीर्य ऋ॒तुर्जनी॑नाम्॥८॥२८॥२॥

उ॒त। ग्नाः। व्य॒न्तु॒। दे॒वऽप॑त्नीः। इ॒न्द्रा॒णी। अ॒ग्नायी॑। अ॒श्विनी॑। राट्। आ। रोद॑सी॒ इति॑। व॒रु॒णानी। शृ॒णो॒तु॒। व्यन्तु॑। दे॒वीः। यः। ऋ॒तुः। जनी॑नाम्॥८॥

पदार्थः-(उत) **(ग्नाः)** वाणी **(व्यन्तु)** व्याप्नुवन्तु **(देवपत्नीः)** देवानां विदुषां स्त्रियः **(इन्द्राणी)** इन्द्रस्य परमैश्वर्ययुक्तस्य स्त्री **(अग्नायी)** अग्नेः पावकवद्वर्त्तमानस्य पत्नी **(अश्विनी)** आशुगामिनः स्त्री **(राट्)** या राजते **(आ)** **(रोदसी)** द्यावापृथिव्याविव **(वरुणानी)** वरस्य भार्य्या **(शृणोतु)** **(व्यन्तु)** कामयन्ताम् **(देवीः)** विदुष्यः **(यः)** **(ऋतुः)** **(जनीनाम्)** जनित्रीणां भार्य्याणाम्॥८॥

अन्वयः-यो राडिन्द्राण्यग्नाय्यश्विनी देवपत्नीर्न्यायकरणाय स्त्रीणां ग्ना व्यन्तु रोदसी इव वरुणानी जनीनां वाच आ शृणोतु उतापि देवीर्ऋतुरिव क्रमेण जनीनां यो न्यायस्तं व्यन्तु॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा राज्ञां समीपे पुरुषा अमात्या भवन्ति तथा राज्ञीनां निकटे स्त्रियो भवन्तु॥८॥

अत्र विद्वदग्न्यादिराजराज्ञीकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यणां महाविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते सुप्रमाणयुक्त ऋग्वेदभाष्ये पञ्चमे मण्डले षट्चत्वारिंशत्तमं सूक्तं

तथा चतुर्थाऽष्टके द्वितीयोऽध्यायोऽष्टाविंशो वर्गश्च समाप्तः॥

पदार्थः-(यः) जो **(राट्)** प्रकाशमान **(इन्द्राणी)** अत्यन्त ऐश्वर्य्य से युक्त पुरुष की स्त्री और **(अग्नायी)** अग्नि के सदृश तेजस्वी पुरुष की स्त्री **(अश्विनी)** शीघ्र चलने वाले की स्त्री और **(देवपत्नीः)** विद्वानों की स्त्रियाँ न्याय करने के लिये स्त्रियों की **(ग्नाः)** वाणियों को **(व्यन्तु)** व्याप्त हों और **(रोदसी)** अन्तरिक्ष तथा पृथिवी के सदृश **(वरुणानी)** श्रेष्ठ जन की स्त्री **(जनीनाम्)** उत्पन्न करनेवाली स्त्रियों की वाणियों को **(आ, शृणोतु)** सब प्रकार से सुने और **(उत)** भी **(देवीः)** विद्यायुक्त स्त्रियाँ **(ऋतुः)** ऋतु के सदृश क्रम से उत्पन्न करनेवाली स्त्रियों का जो न्याय उसकी **(व्यन्तु)** कामना करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपालङ्कार है। जैसे राजाओं के समीप पुरुष मन्त्री होते हैं, वैसे रानियों के समीप स्त्रियाँ मन्त्री होवें॥८॥

श्रीमत्परमहंस परिव्राजकाचार्य महाविद्वान् विरजानन्द सरस्वती स्वामीजी के शिष्य श्रीमद्दयानन्द सरस्वती स्वामीजी से रचे हुए, उत्तम प्रमाणयुक्त ऋग्वेदभाष्य के पांचवें मण्डल में छयालीसवां सूक्त और चतुर्थ अष्टक में द्वितीय अध्याय और अट्ठाईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ तृतीयाऽध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ सप्तर्चस्य सप्तचत्वारिंशत्तमस्य सूक्तस्य प्रतिरथ आत्रेय ऋषिः। विश्वेदेवा देवताः। १, २, ४, ७ त्रिष्टुप्। ३ निचृत् त्रिष्टुप्। ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ स्त्रीपुरुषगुणानाह॥

अब सात ऋचा वाले सैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में स्त्री पुरुषों के गुणों को कहते हैं॥

प्र॒यु॒ञ्जती॒ दि॒व ए॑ति ब्रुवा॒णा म॒ही मा॒ता दु॑हि॒तुर्बो॑धय॑न्ती।
आ॒विवा॑सन्ती युव॒तिर्म॑नी॒षा पि॒तृभ्य॒ आ सद॑ने॒ जोहु॑वाना॥ १॥

प्र॒ऽयु॒ञ्जती॒। दि॒वः। ए॒ति॒। ब्रु॒वा॒णा। म॒ही। मा॒ता। दु॒हि॒तुः। बो॒धय॑न्ती। आ॒ऽविवा॑सन्ती। यु॒व॒तिः। म॒नी॒षा। पि॒तृऽभ्य॑ः। आ। सद॑ने। जोहु॑वाना॥ १॥

पदार्थः-(प्रयुञ्जती) प्रयोगं कुर्वन्ती **(दिवः)** प्रकाशात् **(एति)** गच्छति प्राप्नोति वा **(ब्रुवाणा)** उपदिशन्ती **(मही)** पूजनीया **(माता)** मान्यकारिणी जननी **(दुहितुः)** कन्यायाः **(बोधयन्ती) (आविवासन्ती)** समन्तात् सेवमाना **(युवतिः)** युवावस्थायां विद्या अधीत्य कृतविवाहा **(मनीषा)** प्रज्ञया **(पितृभ्यः)** पालकेभ्यः **(आ) (सदने)** गृहे **(जोहुवाना)** भृशं प्राप्तप्रशंसा॥ १॥

अन्वयः-या दिव उषा इव ब्रुवाणा प्रयुञ्जती दुहितुर्बोधयन्ती मही आविवासन्ती सदने जोहुवाना युवतिर्माता मनीषा पितृभ्यः प्राप्तशिक्षा गृहाश्रममैति सा मङ्गलकारिणी भवति॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। या माता आपञ्चमाद्वर्षात् सन्तानान् बोधयित्वा पञ्चमे वर्षे पित्रे समर्पयति पितापि वर्षत्रयं शिक्षित्वाऽऽचार्याय पुत्रानाचार्यायै कन्या ब्रह्मचर्य्येण विद्याग्रहणाय समर्पयति तेऽपि यथाकालं ब्रह्मचर्यं समापयित्वा विद्याः प्रापय्य व्यवहारशिक्षां दत्त्वा समावर्त्तयन्ति ते ताश्च कुलस्य भूषका अलङ्कर्त्र्यश्च स्युः॥ १॥

पदार्थः-जो **(दिवः)** प्रकाश से प्रातःकाल के सदृश **(ब्रुवाणा)** उपदेश देती **(प्रयुञ्जती)** उत्तम कर्म्म में अच्छे प्रकार योग करती **(दुहितुः)** कन्या का **(बोधयन्ती)** बोध देती और **(मही)** आदर करने योग्य **(आविवासन्ती)** सब प्रकार से सेवती हुई **(सदने)** गृह में **(जोहुवाना)** अत्यन्त प्रशंसा को प्राप्त **(युवतिः)** युवा अवस्था में विद्याओं को पढ़कर विवाह जिसने किया वह **(माता)** आदर करने वाली माता

(मनीषा) बुद्धि से **(पितृभ्यः)** पालन करने वालों से शिक्षा को प्राप्त गृहाश्रम को **(आ)** सब प्रकार से **(एति)** जाती वा प्राप्त होती है, वह मंगलकारिणी होती है॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो माता पांचवें वर्ष के प्रारम्भ होने तक सन्तानों को बोध देकर पांचवें वर्ष में पिता को सौंपती है और पिता भी तीन वर्ष पर्य्यन्त शिक्षा देकर आचार्य्य को पुत्रों को और आचार्य्य की स्त्री को कन्याओं को ब्रह्मचर्य से विद्याग्रहण के लिये सौंपता है और वे आचार्यादि भी नियत समयपर्य्यन्त ब्रह्मचर्य्य को समाप्त करा के और विद्याओं को प्राप्त करा के तथा व्यवहार की शिक्षा देकर गृहाश्रम में प्रविष्ट कराते हैं, वे आचार्य और आचार्य्या कुल के भूषक और शोभाकारक होते हैं॥१॥

अथ मनुष्यैः कार्य्यकारणसन्ततिऽनन्तपदार्थान् विज्ञाय कार्य्यसिद्धिः संपादनीया॥

अब मनुष्यों का कार्य कारण से विस्तृत अनन्त पदार्थों को जान कर कार्यसिद्धि करनी चाहिये॥

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम्।
अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः॥२॥

अजिरासः। तत्ऽअपः। ईयमानाः आतस्थिऽवांसः। अमृतस्य। नाभिम्। अनन्तासः। उरवः। विश्वतः। सीम्। परि। द्यावापृथिवी इति। यन्ति। पन्थाः॥२॥

पदार्थः-(**अजिरासः**) वेगवन्तः **(तदपः)** तेषां प्राणान् **(ईयमानाः)** प्राप्नुवन्तः **(आतस्थिवांसः)** समन्तात् स्थिताः **(अमृतस्य)** नाशरहितस्य कारणस्य **(नाभिम्)** मध्ये **(अनन्तासः)** अविद्यमानोऽन्तो येषान्ते **(उरवः)** बहवः **(विश्वतः)** सर्वतः **(सीम्)** आदित्यप्रकाश इव **(परि)** **(द्यावापृथिवी)** प्रकाशभूमी **(यन्ति)** प्राप्नुवन्ति **(पन्थाः)** मार्गः॥२॥

अन्वयः-येऽजिरास ईयमानास्तदपोऽमृतस्य नाभिमातस्थिवांसोऽनन्तास उरवो विश्वतो द्यावापृथिवी सीमिव परि यन्ति तेषां पन्था विज्ञातव्यः॥२॥

भावार्थः-अत्र वाचकलुप्तोपपमालङ्कारः। ये आकाशादयोऽनन्ताः पदार्थास्तत्रस्था असङ्ख्या परमाणवश्च कारणध्ये कारणतो जाता आदित्यप्रकाशवद्विस्तीर्णाः सन्ति॥२॥

पदार्थः-जो **(अजिरासः)** वेग से युक्त **(ईयमानाः)** प्राप्त होते हुए **(तदपः)** उनके प्राणों को **(अमृतस्य)** नाश से रहित कारण के **(नाभिम्)** मध्य में **(आतस्थिवांसः)** सब ओर से स्थित **(अनन्तासः)** नहीं विद्यमान अन्त जिनका वे **(उरवः)** बहुत **(विश्वतः)** सब ओर **(द्यावापृथिवी)** प्रकाश और भूमि **(सीम्)** सूर्य्य के प्रकाश के सदृश **(परि)** चारों और **(यन्ति)** प्राप्त होते हैं उनका **(पन्थाः)** मार्ग जानना चाहिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो आकाश आदि अनन्त पदार्थ है, उनमें वर्त्तमान असंख्य परमाणु और [वे] कारण के मध्य में कारण से उत्पन्न हुए सूर्य्य और प्रकाश के सदृश विस्तीर्ण हैं॥२॥

पुनर्मनुष्यैः किं विज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ॥३॥

उक्षा। समुद्रः। अरुषः। सुऽपर्णः। पूर्वस्य। योनिम्। पितुः। आ। विवेश। मध्ये। दिवः। निऽहितः। पृश्निः। अश्मा। वि। चक्रमे। रजसः। पाति। अन्तौ॥३॥

पदार्थः-(**उक्षा**) सेचकः (**समुद्रः**) सागरः (**अरुषः**) सुखप्रापकः (**सुपर्णः**) शोभनानि पर्णानि पालनानि यस्य सः (**पूर्वस्य**) पूर्णस्याऽऽकाशादेः (**योनिम्**) कारणम् (**पितुः**) पालकस्य (**आ**) (**विवेश**) प्रविशति (**मध्ये**) (**दिवः**) प्रकाशस्य (**निहितः**) स्थापितः (**पृश्निः**) अन्तरिक्षम् (**अश्मा**) मेघः (**वि**) (**चक्रमे**) क्रमते (**रजसः**) लोकजातस्य (**पाति**) (**अन्तौ**) समीपे॥३॥

अन्वयः-हे मनुष्या! यः समुद्रोऽरुषः सुपर्णो दिवो मध्ये निहितः पृश्निरश्मोक्षा पूर्वस्य पितुर्योनिमा विवेश रजसो वि चक्रमेऽन्तौ पाति स सर्वैर्वेदितव्यः॥३॥

भावार्थः-हे मनुष्या! यूयं कार्य्यकारणे विज्ञाय तत्संयोगजन्यानि वस्तूनि कार्य्येषूपयुज्य स्वाभीष्टसिद्धिं सम्पादयत॥३॥

पदार्थः-हे मनुष्यो! जो (**समुद्रः**) सागर (**अरुषः**) सुख को प्राप्त कराने वाला (**सुपर्णः**) सुन्दर पालन जिसके ऐसा और (**दिवः**) प्रकाश के (**मध्ये**) मध्य में (**निहितः**) स्थापित किया गया (**पृश्निः**) अन्तरिक्ष और (**अश्मा**) मेघ (**उक्षा**) सींचने वाला (**पूर्वस्य**) पूर्ण आकाश आदि और (**पितुः**) पालन करने वाले के (**योनिम्**) कारण को (**आ, विवेश**) सब प्रकार प्रविष्ट होता है और (**रजसः**) लोक में उत्पन्न हुए का (**वि, चक्रमे**) विशेष करके क्रमण करता और (**अन्तौ**) समीप में (**पाति**) रक्षा करता है, वह सब को जानने योग्य है॥३॥

भावार्थः-हे मनुष्यो! आप लोग कार्य्य और कारण को जानकर उनके संयोग से उत्पन्न हुए वस्तुओं को कार्य्यों में उपयुक्त करके अपने अभीष्ट की सिद्धि करें॥३॥

मनुष्यैः पृथिव्यादीनि तत्वानि जगत्पालनानि सन्तीति वेद्यमित्याह॥

मनुष्यों को चाहिये कि पृथिवी आदि तत्त्व जगत् के पालक हैं, ऐसा जानें,
इस विषय को अगले मन्त्र में कहते हैं॥

चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते।

त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान्॥४॥

चत्वारः। ईम्। बिभ्रति। क्षेमऽयन्तः। दश। गर्भम्। चरसे। धापयन्ते। त्रिऽधातवः। परमाः। अस्य। गावः। दिवः। चरन्ति। परि। सद्यः। अन्तान्॥४॥

पदार्थः-(चत्वारः) पृथिव्यादयः **(ईम्)** सर्वतः **(बिभ्रति)** धरन्ति **(क्षेमयन्तः)** रक्षयन्तः **(दश)** दिशः **(गर्भम्)** सर्वजगदुत्पत्तिस्थानम् **(चरसे)** चरितुं गन्तुम् **(धापयन्ते)** धारयन्ति **(त्रिधातवः)** त्रयः सत्त्वरजस्तमांसि धातवो धारका येषान्ते **(परमाः)** प्रकृष्टाः **(अस्य)** गावः किरणाः **(दिवः)** प्रकाशस्य मध्ये **(चरन्ति)** गच्छन्ति **(परि)** **(सद्यः)** शीघ्रम् **(अन्तान्)** समीपस्थान् देशान्॥४॥

अन्वयः-हे मनुष्या! अस्य जगतो मध्ये चरसे क्षेमयन्तः परमास्त्रिधातवश्चत्वार ईं गर्भं बिभ्रति दश धापयन्ते सद्यो दिवोऽन्तान् गावः परि चरन्तीति वि जानीत॥४॥

भावार्थः-हे मनुष्या! अस्य जगतो धारकाः पृथिव्यप्तेजोवायवः सन्ति ते च कारणादुत्पद्य उपयुक्ता भवन्ति॥४॥

पदार्थः-हे मनुष्यो! **(अस्य)** इस संसार के मध्य में **(चरसे)** चलने को **(क्षेमयन्तः)** रक्षा करते हुए **(परमाः)** प्रकृष्ट **(त्रिधातवः)** तीन सत्त्व, रज और तमोगुण धारण करने वाले जिनके वे और **(चत्वारः)** चार पृथिवी आदि **(ईम्)** सब ओर से **(गर्भम्)** समस्त जगत् उत्पत्ति के स्थान को **(बिभ्रति)** धारण करते हैं तथा **(दश)** दश दिशाओं को **(धापयन्ते)** धारण कराते हैं और **(सद्यः)** शीघ्र **(दिवः)** प्रकाश के मध्य में **(अन्तान्)** समीपवर्ती देशों के **(गावः)** किरणें **(परि, चरन्ति)** चारों और चलते हैं, ऐसा जानिये॥४॥

भावार्थः-ये मनुष्यो! इस संसार के धारण करने वाले पृथिवी, जल, तेज और पवन हैं और वे कारण से उत्पन्न हो के उपयुक्त होते हैं॥४॥

पुनर्मनुष्यैः किं विज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या सबन्धू॥५॥

इदम्। वपुः। निऽवचनम्। जनासः। चरन्ति। यत्। नद्यः। तस्थुः। आपः। द्वे इति। यत्। ईम्। बिभृतः। मातुः। अन्ये इति। इहऽइह। जाते इति। यम्या। सबन्धू इति सऽबन्धू॥५॥

पदार्थः-(इदम्) **(वपुः)** शरीरम् **(निवचनम्)** निश्चितं वचनं यस्य तत् **(जनासः)** विद्वांसः **(चरन्ति)** **(यत्)** ये **(नद्यः)** सरित इव **(तस्थुः)** तिष्ठन्ति **(आपः)** जलानि **(द्वे)** **(यत्)** ये **(ईम्)** उदकम् **(बिभृतः)** **(मातुः)** जनन्याः **(अन्ये)** **(इहेह)** **(जाते)** **(यम्या)** रात्रिदिने **(सबन्धू)** समानो बन्धुर्ययोस्तद्वद्वर्त्तमाने॥५॥

अन्वयः-हे मनुष्या! यथेहेह द्वे यम्या सबन्धू मातुरन्ये जाते ईं बिभृतो यद्ये जगदुपकुरुतो यद्ये जनासो नद्य आप इवेदं निवचनं वपुश्चरन्ति तस्थुस्तथैतानि विजानीत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्यथा रात्रिदिने क्रमेण व्यवहरतस्थैव क्रमेणाहारविहारौ कृत्वा शरीरं संरक्षणीयम्॥५॥

पदार्थः-हे मनुष्यो! जैसे **(इहेह)** इसी संसार में **(द्वे)** दो **(यम्या)** रात्रि और दिन **(सबन्धू)** तुल्य बन्धु जिनका उनके सदृश वर्त्तमान और **(मातुः)** माता से **(अन्ये)** अन्य **(जाते)** उत्पन्न हुए **(ईम्)** जल को **(बिभृतः)** धारण करते हैं और **(यत्)** जो संसार का उपकार करते हैं और **(यत्)** जो **(जनासः)** विद्वान् जन जैसे **(नद्यः)** नदियां **(आपः)** जलों को वैसे **(इदम्)** इस **(निवचनम्)** निश्चित वचन जिसका उस **(वपुः)** शरीर को **(चरन्ति)** प्राप्त होते और **(तस्थुः)** स्थित होते हैं, वैसे इनको विशेष कर जानिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि जैसे रात्रि-दिन क्रम से व्यवहार करते हैं, वैसे क्रम से आहार-विहार करके शरीर की रक्षा करनी चाहिये॥५॥

मनुष्यैर्युवावस्थायामेव स्वयंवरो विवाहः कर्त्तव्य इत्याह॥

मनुष्यों को चाहिये कि युवा अवस्था ही में स्वयंवर विवाह करें, इस विषय को कहते हैं॥

वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति।

उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ॥६॥

वि। तन्वते। धियः। अस्मै। अपांसि। वस्त्रा। पुत्राय। मातरः। वयन्ति। उपऽप्रक्षे। वृषणः। मोदमानाः। दिवः। पथा। वध्वः। यन्ति। अच्छ॥६॥

पदार्थः-**(वि)** **(तन्वते)** विस्तारयन्ति **(धियः)** प्रज्ञाः **(अस्मै)** व्यवहारसिद्धाय **(अपांसि)** कर्म्माणि **(वस्त्रा)** वस्त्राणि **(पुत्राय)** **(मातरः)** **(वयन्ति)** निर्मिमते **(उपप्रक्षे)** सम्पर्के **(वृषणः)** यूनः **(मोदमानाः)** आनन्दन्त्यः **(दिवः)** कामयमानाः **(पथा)** गृहाश्रममार्गेण वर्त्तमानाः **(वध्वः)** युवत्यः स्त्रियः **(यन्ति)** प्राप्नुवन्ति **(अच्छ)**॥६॥

अन्वयः-या दिवो मोदमाना वध्वः स्त्रियः पथोपप्रक्षे वृषणोऽच्छ यन्ति ता मातरोऽस्मै पुत्राय धियोऽपांसि वि तन्वते वस्त्रा वयन्ति॥६॥

भावार्थः-ये स्त्रीपुरुषा ब्रह्मचर्य्येण विद्या अधीत्य युवावस्थास्थाः सन्तो गृहाश्रमं कामयमानाः परस्परस्मिन् प्रीत्या स्वयंवरं विवाहं विधाय धर्म्येण सन्तानानुत्पाद्य सुशिक्ष्य शरीरात्मबलं विस्तृणन्ति वस्त्रैः शरीरमिव गृहाश्रमव्यवहारमाच्छाद्यानन्दन्ति॥६॥

पदार्थः-जो **(दिवः)** कामना और **(मोदमानाः)** आनन्द करती हुई **(वध्वः)** युवावस्थायुक्त स्त्रियां **(पथा)** गृहाश्रम के मार्ग से वर्त्तमान **(उपप्रक्षे)** सम्बन्ध में **(वृषणः)** युवा पुरुषों को **(अच्छ)** उत्तम

प्रकार **(यन्ति)** प्राप्त होती हैं, वे **(मातरः)** माता **(अस्मै)** इस व्यवहार से सिद्ध **(पुत्राय)** पुत्र के लिये **(धियः)** बुद्धियों और **(अपांसि)** कर्म्मों को **(वि, तन्वते)** विस्तार करती हैं और **(वस्त्रा)** वस्त्रों को **(वयन्ति)** बनाती हैं॥६॥

भावार्थः-जो स्त्री और पुरुष ब्रह्मचर्य्य से विद्याओं को पढ़ कर युवावस्था में वर्त्तमान गृहाश्रम की कामना करते हुए परस्पर प्रीति से स्वयंवर विवाह करके धर्म से सन्तानों को उत्पन्न कर और उत्तम प्रकार शिक्षा देकर शरीर और आत्मा के बल का विस्तार करते हैं और जैसे वस्त्रों से शरीर को वैसे गृहाश्रम के व्यवहार का आच्छादन करके आनन्द करते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम्।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय॥७॥१॥

तत्। अस्तु। मित्रावरुणा। तत्। अग्ने। शम्। योः। अस्मभ्यम्। इदम्। अस्तु। शस्तम्। अशीमहि। गाधम्। उत। प्रतिऽस्थाम्। नमः। दिवे। बृहते। सादनाय॥७॥

पदार्थः-(**तत्**) (**अस्तु**) (**मित्रावरुणा**) प्राणोदानाविव मातापितरौ (**तत्**) (**अग्ने**) पावक (**शम्**) सुखम् (**योः**) दुःखात्पृथग्भूतम् (**अस्मभ्यम्**) (**इदम्**) (**अस्तु**) (**शस्तम्**) प्रशंसनीयम् (**अशीमहि**) प्राप्नुयाम (**गाधम्**) गभीरम् (**उत**) (**प्रतिष्ठाम्**) (**नमः**) सत्कारम् (**दिवे**) कामयमानाय (**बृहते**) महते (**सादनाय**) स्थितिमते॥७॥

अन्वयः-हे मित्रावरुणा अध्यापकोपदेशकौ! युवयोः सङ्गेन तच्छं वयमशीमहि। हे अग्नेऽस्मभ्यं तदस्तु योरिदं शस्तमस्तु गाधमुत प्रतिष्ठां प्राप्य बृहते सादनाय दिवे नमोऽस्तु॥७॥

भावार्थः-ये मनुष्या आप्तान् विदुषोऽध्यापकान् सत्कुर्वन्ति त एव सुखं लभन्ते॥७॥

अत्र स्त्रीपुरुषादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तचत्वारिंशत्तमं सूक्तं प्रथमो वर्गश्च समाप्तः॥

पदार्थः-हे (**मित्रावरुणा**) प्राण और उदान वायु के सदृश वर्त्तमान माता-पिता तथा अध्यापक और उपदेशक जन! आप दोनों के सङ्ग से (**तत्**) उस (**शम्**) सुख को हम लोग (**अशीमहि**) प्राप्त होवें और (**अग्ने**) हे अग्ने! (**अस्मभ्यम्**) हम लोगों के लिये (**तत्**) वह (**अस्तु**) हो। (**योः**) दुःख से पृथग्भूत (**इदम्**) यह (**शस्तम्**) प्रशंसा करने योग्य (**अस्तु**) हो और (**गाधम्**) गम्भीर (**उत**) भी (**प्रतिष्ठाम्**) आदर को प्राप्त हो कर (**बृहते**) बड़े (**सादनाय**) स्थितिमान् के लिये और (**दिवे**) कामना करते हुए के लिये (**नमः**) सत्कार हो॥७॥

भावार्थः-जो मनुष्य यथार्थवक्ता विद्वानों और अध्यापकों का सत्कार करते हैं, वे ही सुख को प्राप्त होते हैं॥७॥

इस सूक्त में स्त्री-पुरुषादि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सैंतालीसवां सूक्त और पहिला वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्याष्टचत्वारिंशत्तमस्य सूक्तस्य प्रतिभानुरात्रेय ऋषिः। विश्वेदेवाः देवताः। १, ३ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ४, ५ निचृज्जगती छन्दः। निषादः स्वरः॥

पुनर्मनुष्यैः किमेष्टव्यमित्याह॥

अब पांच ऋचा वाले अड़तालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर मनुष्यों को किसकी इच्छा करनी चाहिये, इस विषय को कहते हैं॥

कदु॑ प्रि॒याय॒ धाम्ने॑ मनामहे॒ स्वक्ष॑त्राय॒ स्वय॑शसे म॒हे व॒यम्।
आ॒मे॒न्यस्य॒ रज॑सो॒ यदु॒भ्र आँ अ॒पो वृ॒॑णा॒ना वि॒॑त॒नोति॑ मा॒यिनी॑॥ १॥

कत्। ऊँ इति। प्रियाय। धाम्ने। मनामहे। स्वऽक्षत्राय। स्वऽयशसे। महे। वयम्। आऽमेन्यस्य। रजसः। यत्। अभ्रे। आ। अपः। वृणाना। विऽतनोति। मायिनी॥ १॥

पदार्थः-(कत्) कदा **(उ)** **(प्रियाय)** कमनीयाय **(धाम्ने)** जन्मस्थाननामस्वरूपाय **(मनामहे)** जानीमहे **(स्वक्षत्राय)** स्वकीयराज्याय क्षत्रियकुलाय वा **(स्वयशसे)** स्वकीयं यशो यस्मात्तस्मै **(महे)** महते **(वयम्)** **(आमेन्यस्य)** समन्तान्मेयस्य **(रजसः)** लोकस्य **(यत्)** या **(अभ्रे)** घने **[(आ)]** **(अपः)** जलानि **(वृणाना)** स्वीकुर्वाणा **(वितनोति)** विस्तीर्णां करोति **(मायिनी)** माया प्रज्ञा विद्यते यस्यां सा॥ १॥

अन्वयः-यद्या आमेन्यस्य रजसो मध्येऽभ्रेऽप आ वृणाना मायिनी सती वितनोति तामु वयं महे प्रियाय धाम्ने स्वक्षत्राय स्वयशसे कन्मनामहे॥ १॥

भावार्थः-मनुष्यैः सततमेवमाशंसितव्यं येन राज्यं यशो धर्मश्च वर्धेत तथैव स्वीकृत्याऽनुष्ठातव्यम्॥ १॥

पदार्थः-(यत्) जो **(आमेन्यस्य)** चारों और से ज्ञान के विषय **(रजसः)** लोक के मध्य में और **(अभ्रे)** मेघ में **(अपः)** जलों का **(आ, वृणाना)** उत्तम प्रकार स्वीकार करती हुई और **(मायिनी)** बुद्धि जिसमें विद्यमान वह नीति **(वितनोति)** विस्तारयुक्त करती है उसको **(उ)** भी **(वयम्)** हम लोग **(महे)** बड़े **(प्रियाय)** सुन्दर **(धाम्ने)** जन्म, स्थान और नाम स्वरूप के लिये **(स्वक्षत्राय)** अपने राज्य वा क्षत्रिय कुल के लिये और **(स्वयशसे)** अपना यश जिससे उसके लिये **(कत्)** कब **(मनामहे)** जानें॥ १॥

भावार्थः-मनुष्यों को चाहिये कि निरन्तर इस प्रकार से इच्छा करें, जिससे राज्य, यश और धर्म्म बढ़े, वैसे ही स्वीकार करके अनुष्ठान करें॥ १॥

पुनर्मनुष्यैः किं कार्य्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

ता अ॒॑लत॑ व॒युनं॑ वी॒रव॑क्षणं सम॒न्या॒ वृ॒त॒या॒ विश्व॒मा रज॑ः।
अपो॒ अपा॑ची॒रप॑रा॒ अपे॑जते॒ प्र पूर्वा॑भिस्तिरते देव॒युर्जन॑ः॥ २॥

ताः। अ॒त्ल॒त॒। व॒युन॑म्। वी॒र॒ऽव॒क्ष॒णम्। स॒मा॒न्या। वृ॒तया॑। विश्व॑म्। आ। रज॑ः। अपो॒ इति॑। अपा॑चीः। अप॑राः। अप॑। ई॒ज॒ते॒। प्र। पूर्वा॑भिः। ति॒र॒ते॒। दे॒व॒ऽयुः। जन॑ः॥ २॥

पदार्थः-(ताः) आपः **(अत्लत)** निरन्तरं गच्छत **(वयुनम्)** कर्म प्रज्ञानं वा **(वीरवक्षणम्)** वीराणां वहनम् **(समान्या)** तुल्यया **(वृतया)** आवरकया क्रियया **(विश्वम्)** समग्रम् **(आ) (रजः)** लोकलोकान्तरम् **(अपो) (अपाचीः)** या अधोऽञ्चन्ति **(अपराः)** अन्याः **(अप) (ईजते)** कम्पते **(प्र) (पूर्वाभिः) (तिरते) (देवयुः)** देवान् विदुषः कामयमानः **(जनः)**॥ २॥

अन्वयः-देवयुर्जनो वीरवक्षणं वयुनं समान्या वृतया विश्वं रजो या अपाचीरपरा अपो अपेजते पूर्वाभिः प्र तिरते ता यूयमाऽत्लत॥ २॥

भावार्थः-हे मनुष्या! यूयं विद्वत्सङ्गं कामयमाना विश्वा विद्या गृह्णीत॥ २॥

पदार्थः-(देवयुः) विद्वानों की कामना करता हुआ **(जनः)** जन **(वीरवक्षणम्)** वीरों के पहुंचाने को **(वयुनम्)** कर्म वा प्रज्ञान को तथा **(समान्या)** तुल्य **(वृतया)** आवरण करने वाली क्रिया से **(विश्वम्)** सम्पूर्ण **(रजः)** लोक-लोकान्तर और जिन **(अपाचीः)** नीचे चलने वाले **(अपराः)** अन्य **(अपः)** जलों को **(अप, ईजते)** चलाता है वा **(पूर्वाभिः)** प्राचीन जलों से **(प्र, तिरते)** पार होता है **(ताः)** उन जलों को आप लोग **(आ)** सब ओर से **(अत्लत)** निरन्तर प्राप्त होओ॥ २॥

भावार्थः-हे मनुष्यो! आप लोग विद्वानों के सङ्ग की कामना करते हुए सम्पूर्ण विद्याओं को ग्रहण कीजिए॥ १॥

पुनः स्त्रीपुरुषौ कथं वर्त्तेयातामित्याह॥

फिर स्त्री-पुरुष कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

आ ग्रा॑व॒भिर॑हन्ये॒भि॑र॒क्तुभि॒र्वरि॑ष्ठं वज्र॒मा जि॑घर्त्ति मा॒यिनि॑।
श॒तं वा॒ यस्य॑ प्र॒चर॒न्त्स्वे दमे॑ संव॒र्तय॑न्तो॒ वि च॑ वर्तय॒न्नहा॑॥ ३॥

आ। ग्रा॒व॑ऽभिः। अ॒हन्ये॑भिः। अ॒क्तु॒ऽभिः। वरि॑ष्ठम्। व॒ज्र॒म्। आ। जि॒घ॒र्त्ति॒। मा॒यिनि॑। श॒तम्। वा॒। यस्य॑। प्र॒ऽचर॑न्। स्वे। दमे॑। स॒म्ऽव॒र्तय॑न्तः। वि। च॒। व॒र्त॒य॒न्। अहा॑॥ ३॥

पदार्थः-(आ) समन्तात् **(ग्रावभिः)** मेघैः **(अहन्येभिः)** दिनैः **(अक्तुभिः)** रात्रिभिः **(वरिष्ठम्)** अतिश्रेष्ठम् **(वज्रम्)** शस्त्रविशेषम् **(आ) (जिघर्त्ति) (मायिनि)** माया प्रशंसिता प्रज्ञा विद्यते यस्य तत्सम्बुद्धौ **(शतम्) (वा) (यस्य) (प्रचरन्) (स्वे)** स्वकीये **(दमे)** गृहे **(संवर्त्तयन्तः)** सम्यग्वर्त्तमानाः **(वि) (च) (वर्तयन्) (अहा)** अहानि॥ ३॥

अन्वयः-हे मायिनि! यतो भवती ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति शतं वा यस्य स्वे दमे प्रचरन्नहाऽऽवर्तयन् व्यवहारमाजिघर्त्ति यस्य च संवर्त्तयन्तः किरणा वि चरन्ति तं त्वं जानीहि॥ ३॥

भावार्थः-यदि स्त्रीपुरुषौ निर्भयौ भवेतां तर्हि सूर्य्यविद्युद्वदहर्निशं पुरुषार्थं कृत्वैश्वर्य्येण प्रकाशितौ भवेताम्॥३॥

पदार्थः-हे **(मायिनि)** प्रशंसित बुद्धि से युक्त! जिससे आप **(ग्रावभिः)** मेघों **(अहन्येभिः)** दिनों और **(अक्तुभिः)** रात्रियों से **(वरिष्ठम्)** अति श्रेष्ठ **(वज्रम्)** शस्त्रविशेष को **(आ, जिघर्त्ति)** प्रदीप्त करती हो **(शतम्, वा)** अथवा सैकड़ों का दल **(यस्य)** जिसके **(स्वे)** अपने **(दमे)** गृह में **(प्रचरन्)** चलता और **(अहा)** दिनों को **(आ, वर्तयन्)** अच्छे प्रकार व्यतीत करता हुआ व्यवहार को प्रकाशित करता है **(च)** और जिसकी **(संवर्त्तयन्तः)** उत्तम प्रकार वर्त्तमान किरणें **(वि)** विशेष फैलती हैं, उसको तू विशेष करके जान॥३॥

भावार्थः-जो स्त्री और पुरुष भयरहित हों तो सूर्य्य और बिजुली के सदृश दिन-रात्रि पुरुषार्थ को करके ऐश्वर्य्य से प्रकाशित हों॥३॥

राजा कथं राज्यं कुर्य्यादित्याह॥

राजा कैसे राज्य को करे, इस विषय को कहते हैं॥

तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे॥४॥

ताम्। अस्य। रीतिम्। परशोःऽइव। प्रति। अनीकम्। अख्यम्। भुजे। अस्य। वर्पसः। सचा। यदि। पितुमन्तम्ऽइव। क्षयम्। रत्नम्। दधाति। भरहूतये। विशे॥४॥

पदार्थः-**(ताम्)** **(अस्य)** **(रीतिम्)** **(परशोरिव)** **(प्रति)** **(अनीकम्)** सैन्यम् **(अख्यम्)** कथनीयम् **(भुजे)** पालनाय **(अस्य)** **(वर्पसः)** रूपस्य **(सचा)** सम्बन्धि **(यदि)** **(पितुमन्तमिव)** **(क्षयम्)** निवासस्थानम् **(रत्नम्)** रमणीयम् **(दधाति)** **(भरहूतये)** भरा पालिका धारिका हूतयो यस्यास्तस्यै **(विशे)** प्रजायै॥४॥

अन्वयः-हे मनुष्या! योऽस्य भुजेऽख्यमनीकं प्रति परशोरिव तां रीतिं दधात्यस्य वर्पसः सचा पितुमन्तमिव यदि भरहूतये विशे रत्नं क्षयं दधाति तर्हि स एव राज्यं कर्त्तुमर्हति॥४॥

भावार्थः-प्रजापालनाय गूढनीत्या राजा व्यवहारान् व्यवहरेत् सर्वस्य च रक्षणं यथार्थतया कुर्य्यात्॥४॥

पदार्थः-हे मनुष्यो! जो **(अस्य)** इसके **(भुजे)** पालन के लिये **(अख्यम्)** कहने योग्य **(अनीकम्)** सेनादल के **(प्रति)** प्रति **(परशोरिव)** परशु के सम्बन्ध को जैसे वैसे **(ताम्)** उस **(रीतिम्)** रीति को **(दधाति)** धारण करता है **(अस्य)** इस **(वर्पसः)** रूप के **(सचा)** सम्बन्धि **(पितुमन्तमिव)** अन्नवान् के सदृश **(यदि)** **(भरहूतये)** पालन-धारण करने वाली वाणी आह्वान के लिये जिसकी उस **(विशे)** प्रजा के लिये **(रत्नम्)** रमणीय **(क्षयम्)** निवासस्थान को धारण करता है तो वही राज्य करने के योग्य होता है॥१४॥

भावार्थः-प्रजा की पालना के लिये गूढनीति से राजा व्यवहारों का अनुष्ठान करे और सब की पालना यथार्थभाव से करे॥१४॥

प्रशंसितसेन एव राजा विजयी भवितुमर्हति॥

प्रशंसित सेना जिसकी ऐसा ही राजा जीतने वाला होने को योग्य है॥

स जि॒ह्वया॒ चतु॑रनीक ऋञ्जते॒ चारु॒ वसा॑नो॒ वरु॑णो॒ यत॑न्नरिम्।

न तस्य॑ विद्म पुरुष॒त्वता॑ व॒यं यतो॒ भग॑: सवि॒ता दाति॒ वार्य॑म्॥५॥२॥

सः। जि॒ह्वया॑। चतु॑:ऽअनीकः। ऋ॒ञ्ज॒ते॒। चारु॑। वसा॑नः। वरु॑णः। यत॑न्। अ॒रिम्। न। तस्य॑। वि॒द्म॒। पु॒रु॒ष॒त्वता॑। व॒यम्। यतः॑। भग॑:। स॒वि॒ता। दाति॑। वार्य॑म्॥५॥

पदार्थः-(**सः**) (**जिह्वया**) वाण्या (**चतुरनीकः**) चतुर्विधान्यनीकानि अस्य सः (**ऋञ्जसे**) प्रसाध्नोति (**चारु**) सुन्दरं वस्त्रम् (**वसानः**) धरन् (**वरुणः**) श्रेष्ठः (**यतन्**) यत्नं कुर्वन् (**अरिम्**) शत्रुम् (**न**) (**तस्य**) (**विद्म**) जानीयाम (**पुरुषत्वता**) बहुपुरुषार्थेन सह (**वयम्**) (**यतः**) (**भगः**) ऐश्वर्य्यवान् (**सविता**) सत्ये प्रेरकः (**दाति**) ददाति (**वार्य्यम्**) वर्त्तुं योग्यमुपदेशम्॥५॥

अन्वयः-यो वरुणश्चारु वसानश्चतुरनीको जिह्वयाऽरिं यतन् पुरुषत्वता भगः सविता वार्यं दाति स ऋञ्जते यतो वयं तस्य पुरुषार्थान्तं न विद्म॥५॥

भावार्थः-यस्योत्तमं सैन्यं स एव राजा प्रशंसितो भवति॥५॥

अत्र विद्वद्राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टाचत्वारिंशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-जो (**वरुणः**) श्रेष्ठ (**चारु**) सुन्दर वस्त्र को (**वसानः**) धारण करता हुआ (**चतुरनीकः**) चार प्रकार की सेनायें जिसकी यह (**जिह्वया**) वाणी से (**अरिम्**) शत्रु का (**यतन्**) यत्न करता हुआ (**पुरुषत्वता**) बहुत पुरुषार्थ के साथ (**भगः**) ऐश्वर्य्य से युक्त (**सविता**) सत्य में प्रेरणा करने वाला (**वार्यम्**) स्वीकार करने योग्य उपदेश को (**दाति**) देता है (**सः**) वह (**ऋञ्जते**) उत्तम प्रकार सिद्ध करता है (**यतः**) जिससे (**वयम्**) हम लोग (**तस्य**) उसके पुरुषार्थ के अन्त को (**न**) नहीं (**विद्म**) जानें॥५॥

भावार्थः-जिसकी उत्तम सेना है वही राजा प्रशंसित होता है॥५॥

इस सूक्त में विद्वान् और राजा के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अड़तालीसवां सूक्त और द्वितीय वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकोनपञ्चाशत्तमस्य सूक्तस्य प्रतिप्रभ आत्रेय ऋषिः। विश्वेदेवाः देवताः। १, २, ४ त्रिष्टुप्। ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

मनुष्यैः परोपकार एव कर्त्तव्य इत्याह॥

अब पांच ऋचा वाले उनचासवें सूक्त का प्रारम्भ किया जाता है, उसके प्रथम मन्त्र में मनुष्यों को चाहिये कि परोपकार ही करें, इस विषय को कहते हैं॥

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन्॥ १॥

देवम्। वः। अद्य। सवितारम्। आ। ईषे। भगम्। च। रत्नम्। विऽभजन्तम्। आयोः। आ। वाम्। नरा। पुरुऽभुजाः। ववृत्याम्। दिवेऽदिवे। चित्। अश्विना। सखिऽयन्॥ १॥

पदार्थः-(देवम्) विद्वांसम् **(वः)** युष्मदर्थम् **(अद्य)** **(सवितारम्)** ऐश्वर्य्यवन्तम् **(आ)** **(ईषे)** इच्छामि **(भगम्)** ऐश्वर्य्यम् **(च)** **(रत्नम्)** रमणीयं धनम् **(विभजन्तम्)** विभागं कुर्वन्तम् **(आयोः)** जीवनस्य **(आ)** **(वाम्)** युवाम् **(नरा)** नेतारौ **(पुरुभुजा)** यौ पुरून् बहून् पालयतस्तौ **(ववृत्याम्)** वर्त्तयेयम् **(दिवेदिवे)** प्रतिदिनम् **(चित्)** **(अश्विना)** राजप्रजाजनौ **(सखीयन्)** सखेवाचरन्॥ १॥

अन्वयः-हे मनुष्या! अहमद्य व आयोर्विभजन्तं देवं सवितारं रत्नं भगञ्चेषे। हे पुरुभुजा नरा अश्विना! सखीयन्नहं चिद्दिवेदिवे वामा ववृत्याम्॥ १॥

भावार्थः-ये मनुष्या सखायो भूत्वा परार्थं सुखमिच्छेयुस्ते सदैव माननीया भवेयुः॥ १॥

पदार्थः-हे मनुष्यो! मैं **(अद्य)** आज **(वः)** आप लोगों के लिये **(आयोः)** जीवन का **(विभजन्तम्)** विभाग करते हुए **(देवम्)** विद्वान् **(सवितारम्)** ऐश्वर्यवान् **(रत्नम्)** रमणीय धन **(भगम्)** और ऐश्वर्य्य को **(च)** भी **(आ, ईषे)** अच्छे प्रकार चाहता हूं और हे **(पुरुभुजा)** बहुतों का पालन करते हुए **(नरा)** अग्रणी **(अश्विना)** राजा और प्रजाजनो! **(सखीयन्)** मित्र के सदृश आचरण करता हुआ मैं **(चित्)** निश्चित **(दिवेदिवे)** प्रतिदिन **(वाम्)** आप दोनों को **(आ, ववृत्याम्)** अच्छे प्रकार वर्त्ताऊं॥ १॥

भावार्थः-जो मनुष्य मित्र होकर दूसरे के लिये सुख की इच्छा करें, वे सदा ही आदर करने योग्य होवें॥ १॥

मेघस्य कारणं किमस्तीत्याह॥

मेघ का कारण क्या है, इस विषय को कहते हैं॥

प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य।
उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजन्तमायोः॥ २॥

प्रति। प्रऽयानम्। असुरस्य। विद्वान्। सुऽउक्तैः। देवम्। सवितारम्। दुवस्य। उप। ब्रुवीत। नमसा। विऽजानन्। ज्येष्ठम्। च। रत्नम्। विऽभजन्तम्। आयोः॥ २॥

पदार्थः-(प्रति) प्रत्यक्षे **(प्रयाणाम्)** यात्राम् **(असुरस्य)** मेघस्य **(विद्वान्)** **(सूक्तैः)** सुष्ठ्वर्थ-वाचकैर्वेदविभागैः **(देवम्)** देदीप्यमानम् **(सवितारम्)** मेघोत्पादकम् **(दुवस्य)** सेवस्व **(उप)** **(ब्रुवीत)** **(नमसा)** अन्नाद्येन सत्कारेण **(विजानन्)** **(ज्येष्ठम्)** अतिशयेन प्रशस्यम् **(च)** **(रत्नम्)** धनम् **(विभजन्तम्)** **(आयोः)** जीवनस्य॥ २॥

अन्वयः-हे जन विद्वांस्त्वं सूक्तैरसुरस्य प्रयाणं देव सवितारं प्रति दुवस्य नमसा ज्येष्ठं रत्नञ्च विजानन्नायोर्विभजन्तमुप ब्रुवीत॥ २॥

भावार्थः-हे मनुष्याः ! सूर्य्य एव मेघादीनामुत्पादकोऽस्ति तद्विद्यामुपदिशत॥ २॥

पदार्थः-हे जन **(विद्वान्)** विद्वान्! आप **(सूक्तैः)** अच्छे अर्थों को कहने वाले वेद के विभागों से **(असुरस्य)** मेघ की **(प्रयाणम्)** यात्रा का और **(देवम्)** प्रकाशित होते हुए **(सवितारम्)** मेघ को उत्पन्न करने वाले का **(प्रति)** प्रत्यक्ष में **(दुवस्य)** सेवन करो और **(नमसा)** अन्न आदि के दानरूप सत्कार से **(ज्येष्ठम्)** अत्यन्त प्रशंसा करने योग्य **(रत्नम्)** धन को **(च)** भी **(विजानन्)** विशेष करके जानता हुआ **(आयोः)** जीवन के **(विभजन्तम्)** विभाग करते हुए को **(उप, ब्रुवीत)** कहें॥ २॥

भावार्थः-हे मनुष्यो! सूर्य्य ही मेघ आदिकों का उत्पन्न करने वाला है, उसकी विद्या का उपदेश दीजिये॥ २॥

पुनर्मनुष्यैः किं वेदितव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः॥ ३॥

अदत्रऽया। दयते। वार्याणि। पूषा। भगः। अदितिः। वस्ते। उस्रः। इन्द्रः। विष्णुः। वरुणः। मित्रः। अग्निः। अहानि। भद्रा। जनयन्त। दस्माः॥ ३॥

पदार्थः-(अदत्रया) अत्तुं योग्यान्यन्नादीनि **(दयते)** ददाति **(वार्य्याणि)** वरितुमर्हाणि **(पूषा)** पुष्टिकर्त्ता **(भगः)** भजनीयः **(अदितिः)** माता **(वस्ते)** आच्छादयति **(उस्रः)** किरणान्। **उस्रा इति रश्मिनामसु पठितम्।** (निघं०१।५) **(इन्द्रः)** सूर्य्यः **(विष्णुः)** व्यापिका विद्युत् **(वरुणः** उदानः **(मित्रः)** प्राणः **(अग्निः)** प्रसिद्धो वह्निः **(अहानि)** दिनानि **(भद्रा)** भद्राणि **(जनयन्त)** जनयन्ति **(दस्मा)** दुःखोपक्षयितारः॥ ३॥

अन्वयः-हे मनुष्या! विद्वानदत्रया वार्य्याणि दयते पूषा भगोऽदितिरुस्रो वस्त इन्द्रो विष्णुर्वरुणो मित्रोऽग्निर्दस्मा भद्राऽहानि जनयन्त तानि व्यर्थानि मा नयत॥ ३॥

भावार्थः-यथा माता कृपयान्नपानादिदानेनाऽपत्यानि पालयति तथैव सूर्य्यादयोऽहोरात्रिभ्यां सर्वान् रक्षन्ति॥३॥

पदार्थः-हे मनुष्यो! विद्वान् **(अदत्रया, वार्य्याणि)** खाने और स्वीकार करने योग्य अन्नादिकों को **(दयते)** देता है और **(पूषा)** पुष्टिकर्त्ता **(भगः)** सेवन करने योग्य तथा **(अदितिः)** माता **(उस्रः)** किरणों का **(वस्ते)** आच्छादन करती है और **(इन्द्रः)** सूर्य्य **(विष्णुः)** व्यापक बिजुली **(वरुणः)** उदान **(मित्रः)** प्राण **(अग्निः)** प्रसिद्ध अग्नि **(दस्माः)** और दुःख के नाश करने वाले **(भद्रा)** कल्याणकारक **(अहानि)** दिनों को **(जनयन्त)** उत्पन्न करते हैं, उनको व्यर्थ मत व्यतीत करिये॥३॥

भावार्थः-जैसे माता अनुग्रह से अन्न-पान आदि के दान से सन्तानों का पालन करती है, वैसे ही सूर्य्य आदि पदार्थ दिन और रात्रि से सब की रक्षा करते हैं॥३॥

पुनर्मनुष्यैः किं वर्त्तित्वा किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या वर्त्ताव करके क्या प्राप्त करना चाहिये, इस विषय को कहते हैं॥

तन्नो॑ अ॒नर्वा॑ स॑वि॒ता वरू॑थं॒ तत्सिन्ध॑व इ॒षय॑न्तो॒ अनु॑ ग्मन्।

उप॒ यद्वोचे॑ अध्व॒रस्य॒ होता॑ रा॒यः स्या॑म॒ पत॑यो॒ वाज॑रत्नाः॥४॥

तत्। नः॑। अ॒न॒र्वा। स॒वि॒ता। वरू॑थम्। तत्। सिन्ध॑वः। इ॒षय॑न्तः। अनु॑। ग्म॒न्। उप॑। यत्। वोचे॑। अ॒ध्व॒रस्य॑। होता॑। रा॒यः। स्या॒म॒। पत॑यः। वाज॑ऽरत्नाः॥४॥

पदार्थः-**(तत्)** **(नः)** अस्मान् **(अनर्वा)** अविद्यमानाश्वः **(सविता)** सूर्य्यः **(वरूथम्)** गृहम् **(तत्)** **(सिन्धवः)** नद्यः समुद्रा वा **(इषयन्तः)** प्राप्नुवन्तः प्रापयन्तो वा **(अनु)** **(ग्मन्)** अनुगच्छन्ति **(उप)** **(यत्)** **(वोचे)** उपदिशेयम् **(अध्वरस्य)** अहिंसामयस्य यज्ञस्य **(होता)** आदाता **(रायः)** धनस्य **(स्याम)** भवेम **(पतयः)** स्वामिनः **(वाजरत्नाः)** विज्ञानधनवन्तः॥४॥

अन्वयः-अध्वरस्य होताऽहं सर्वान् प्रति यदुप वोचे तन्नो वरूथमनर्वा सविता तदिषयन्तः सिन्धवोऽनु ग्मन्। येन वाजरत्ना वयं रायः पतयः स्यामः॥४॥

भावार्थः-हे मनुष्या! यदि यूयं सूर्य्यादिवत् सततं पुरुषार्थिनः स्यात् तर्हि श्रीमन्तो भवेत॥४॥

पदार्थः-**(अध्वरस्य)** अहिंसारूप यज्ञ का **(होता)** ग्रहण करने वाला मैं सब के प्रति **(यत्)** जिसका **(उप, वोचे)** उपदेश करूं **(तत्)** उसके और **(नः)** हम लोगों के **(वरूथम्)** गृह **(अनर्वा)** घोड़े जिसके नहीं वह और **(सविता)** सूर्य्य तथा **(तत्)** उसको **(इषयन्तः)** प्राप्त होते वा प्राप्त कराते हुए। **(सिन्धवः)** नदियां वा समुद्र **(अनु, ग्मन्)** पीछे चलते हैं, जिससे **(वाजरत्नाः)** विज्ञान धन है जिनके ऐसे हम लोग **(रायः)** धन के **(पतयः)** स्वामी **(स्याम)** होवें॥४॥

भावार्थः-हे मनुष्यो! जो तुम सूर्य्य आदि के सदृश निरन्तर पुरुषार्थी होओ तो लक्ष्मीवान् होओ॥४॥

मनुष्यैः किं कृत्वा किं प्राप्तव्यमित्याह॥

मनुष्यों को क्या करके क्या प्राप्त करना चाहिये, इस विषय को कहते हैं॥

प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः।
अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम॥५॥३॥

प्र। ये। वसुऽभ्यः। ईवत्। आ। नम। दुः। ये। मित्रे। वरुणे। सूक्तऽवाचः। अव। एतु। अभ्वम्। कृणुत। वरीयः। दिवःपृथिव्योः। अवसा। मदेम॥५॥

पदार्थः-(प्र) (ये) (वसुभ्यः) धनेभ्यः **(ईवत्)** गतिरक्षणवत् **(आ) (नमः)** अन्नम् **(दुः)** दद्युः **(ये) (मित्रे)** सख्याम् **(वरुणे)** उत्तमतिथौ **(सूक्तवाचः)** सुस्तुता सुप्रशंसिता वाग्येषान्ते **(अव) (एतु)** प्राप्नोतु **(अभ्वम्)** महत् **(कृणुता)** कुरुत। अत्र **संहितायामि**ति दीर्घः। **(वरीयः)** अत्युत्तमं धनादिकम् **(दिवः) (पृथिव्योः)** सूर्य्यभूम्योर्मध्ये **(अवसा)** रक्षणादिना **(मदेम)**॥५॥

अन्वयः-हे मनुष्यो! ये मित्रे वरुण ईवत्प्रा दुर्ये यूयं वसुभ्यो नमः कृणुता तद्युक्ता सूक्तवाचो वयं दिवस्पृथिव्योर्मध्ये येन वरीयोऽभ्वमवैतु तदवसा मदेम॥५॥

भावार्थः-हे मनुष्याः! पुरुषार्थेन श्रियं तस्या अन्नादिकं सञ्चित्य महत् सुखं प्राप्य सर्वेषां रक्षणं विदधत्विति॥५॥

अत्र सूर्य्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनपञ्चाशत्तमं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(मित्रे)** मित्र **(वरुणे)** उत्तम तिथि के निमित्त **(ईवत्)** गतिमान् तथा रक्षणवान् पदार्थ को **(प्र, आ, दुः)** उत्तम प्रकार देवें वा **(ये)** जो तुम लोग **(वसुभ्यः)** धनों के लिये **(नमः)** अन्न को **(कृणुता)** सिद्ध करो उनसे युक्त **(सूक्तवाचः)** उत्तम प्रशंसित वाणी वाले हम लोग **(दिवः, पृथिव्योः)** प्रकाश सूर्य्य और भूमि के मध्य में जिससे **(वरीयः, अभ्वम्)** अत्युत्तम धनादि तथा अत्यन्त **(अव, एतु)** प्राप्त हो उसकी **(अवसा)** रक्षा से **(मदेम)** आनन्दित हों॥५॥

भावार्थः-हे मनुष्यो! पुरुषार्थ से लक्ष्मी को और उससे अन्न आदि को इकट्ठा कर बड़े सुख को प्राप्त होकर सब का रक्षण करो॥५॥

इस सूक्त में सूर्य और विद्वानों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह उनचासवां सूक्त और तीसरा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य पच्चाशत्तमस्य सूक्तस्य स्वस्त्यात्रेय ऋषिः। विश्वेदेवा देवताः। १ स्वराडुष्णिक्। २ निचृदुष्णिक्। ४ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ३ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ५ भुरिग्बृहती छन्दः। मध्यमः स्वरः॥

मनुष्यैर्विद्वन्मित्रत्वेन विद्याधने प्राप्य यशः प्रथितव्यमित्याह॥

अब पांच ऋचा वाले पचासवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को चाहिये कि विद्वानों के साथ मित्रता से विद्या और धन को प्राप्त होकर यज्ञ बढ़ावें, इस विषय को कहते हैं॥

विश्वो॑ दे॒वस्य॑ ने॒तुर्मर्तो॑ वुरीत स॒ख्यम्।
विश्वो॑ रा॒य इ॑षुध्यति द्यु॒म्नं वृ॑णीत पु॒ष्यसे॑॥ १॥

विश्वः॑। दे॒वस्य॑। ने॒तुः। मर्तः॑। वु॒रीत॒। स॒ख्यम्। विश्वः॑। रा॒ये। इ॒षु॒ध्य॒ति। द्यु॒म्नम्। वृ॒णी॒त॒। पु॒ष्यसे॑॥ १॥

पदार्थः-(विश्वः) सर्वः **(देवस्य)** विदुषः **(नेतुः)** नायकस्य **(मर्त्तः)** मनुष्यः **(वुरीत)** स्वीकुर्य्यात् **(सख्यम्)** मित्रत्वम् **(विश्वः)** समग्रः **(राये)** धनाय **(इषुध्यति)** इषून् धरति **(द्युम्नम्)** यशः **(वृणीत) (पुष्यसे)** पुष्टो भवसि॥ १॥

अन्वयः-विश्वो मर्त्तो नेतुर्देवस्य सख्यं वुरीत विश्वो राय इषुध्यति येन त्वं पुष्यसे तत् द्युम्नं भवान् वृणीत॥ १॥

भावार्थः-सर्वैमनुष्यैर्विद्याधनशरीरपुष्टिप्राप्तये विद्वच्छिक्षा शरीरात्मपरिश्रमश्च सततं कर्त्तव्यः॥ १॥

पदार्थः-(विश्वः) सम्पूर्ण **(मर्त्तः)** मनुष्य **(नेतुः)** अग्रणी **(देवस्य)** विद्वान् की **(सख्यम्)** मित्रता को **(वुरीत)** स्वीकार करें और **(विश्वः)** सम्पूर्ण **(राये)** धन के लिये **(इषुध्यति)** वाणों को धारण करता है और जिससे आप **(पुष्यसे)** पुष्ट होते हैं, उस **(द्युम्नम्)** यश को आप **(वृणीत)** स्वीकार करिये॥ १॥

भावार्थः-सब मनुष्यों को चाहिये कि विद्या धन और शरीरपुष्टि की प्राप्ति के लिये विद्वानों की शिक्षा, शरीर और आत्मा से परिश्रम निरन्तर करें॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये इस उस विषय को कहते हैं॥

ते तं॑ देव नेतर्ये चे॒माँ अ॑नु॒शसे॑।
ते रा॒या ते ह्या३॑पृचे॒ सचे॑महि स॒चथ्यैः॑॥ २॥

ते। ते॒। दे॒व॒। ने॒तः॒। ये। च॒। इ॒मान्। अ॒नु॒ऽशसे॑। ते। रा॒या। ते। हि। आ॒ऽपृचे॑। सचे॑महि। स॒चथ्यैः॑॥ २॥

पदार्थः-(**ते**) तव (**ते**) (**देव**) विद्वान् (**नेतः**) नायक (**ये**) (**च**) (**इमान्**) (**अनुशसे**) अनुशासनाय (**ते**) (**राया**) धनेन (**ते**) (**हि**) (**आपृचे**) समन्तात् सम्पर्काय (**सचेमहि**) संयुञ्जमहि (**सचथ्यैः**) सचथेषु समवायेषु भवैः॥२॥

अन्वयः-हे नेतर्देव! ये तेऽनुशस इमान् सम्बध्नन्ति ते ते सत्कर्त्तव्याः स्युः। ये च राया सर्वान् रक्षन्ति ते प्रीतिमन्तो जायन्ते। ये ह्यापृचे सचथ्यैर्वर्त्तन्ते तैः सह वयं सचेमहि॥२॥

भावार्थः-हे विद्वँस्त्वमिमान् वर्त्तमानान् समीपस्थान् जनाननुशाधि विद्वद्भिः सह सङ्गत्य विद्याः प्राप्नुहि॥२॥

पदार्थः-हे (**नेतः**) अग्रणी (**देव**) विद्वन्! (**ये**) जो (**ते**) आपके (**अनुशसे**) अनुशासन के लिये (**इमान्**) इनको सम्बन्धित करते हैं (**ते, ते**) वे वे सत्कार करने योग्य हों (**च**) और जो (**राया**) धन से सब की रक्षा करते हैं (**ते**) वे प्रीति से युक्त होते हैं और जो (**हि**) निश्चित (**आपृचे**) सब ओर से सम्बन्ध के लिये (**सचथ्यैः**) पूर्ण सम्बन्धों में उत्पन्न हुओं के साथ वर्त्तमान हैं, उनके साथ हम लोग (**सचेमहि**) मिलें॥२॥

भावार्थः-हे विद्वन्! आप इन वर्त्तमान और समीप में स्थित जनों को शिक्षा दीजिये और विद्वानों के साथ मिल के विद्याओं को प्राप्त हूजिये॥२॥

मनुष्यैः किं सत्कर्त्तव्यं किं प्राप्तव्यमित्याह॥

मनुष्यों को किस का सत्कार करना और क्या प्राप्त करना चाहिये, इस विषय को कहते हैं॥

अतो॑ न॒ आ नृ॒नति॑थी॒न॒तः॒ पत्नी॑र्दशस्यत।

आ॒रे विश्वं॑ पथे॒ष्ठां द्वि॒षो यु॑योतु॒ यूयु॑विः॥३॥

अत॑ः। न॒ः। आ। नृ॒न्। अति॑थीन्। अत॑ः। पत्नी॑ः। द॒श॒स्य॒त॒। आ॒रे। विश्व॑म्। प॒थे॒ऽस्था॒म्। द्वि॒षः। यु॒यो॒तु॒। यूयु॑विः॥३॥

पदार्थः-(**अतः**) कारणात् (**नः**) अस्मान् (**आ**) समन्तात् (**नॄन्**) अधर्माद्वियोज्य धर्म्मपथं गमयितॄन् (**अतिथीन्**) अनियततिथीन् (**अतः**) (**पत्नीः**) (**दशस्यत**) बलयत (**आरे**) (**विश्वम्**) सर्वज्ञनम् (**पथेष्ठाम्**) यो धर्मे पथि तिष्ठति तम् (**द्विषः**) द्वेष्ट्रीन् (**युयोतु**) वियोजयतु (**यूयुविः**) विभागकर्त्ता॥३॥

अन्वयः-हे मनुष्या! अतो नो नॄनतिथीनतोऽनन्तरं पत्नीरा दशस्यत। विश्वं पथेष्ठां जनमारे दशस्यत यूयुविर्द्विष आरे युयोतु॥३॥

भावार्थः-मनुष्यैर्धार्म्मिकानतिथीन्त्संसेव्य सङ्गत्य विवेकमाप्य द्वेषादिदोषा आरे प्रक्षेपणीयाः॥३॥

पदार्थः-हे मनुष्यो! (**अतः**) इस कारण से (**नः**) हम लोगों और (**नॄन्**) अधर्म्म से अलग कर धर्म्म के मार्ग को चलाने वाले (**अतिथीन्**) जिनके आगमन की तिथि नियत नहीं उनको (**अतः**) इसके अनन्तर (**पत्नीः**) स्त्रियों को (**आ**) सब प्रकार से (**दशस्यत**) प्रबल करिये और (**विश्वम्**) सम्पूर्ण जन को

तथा **(पथेष्ठाम्)** जो धर्म्मयुक्त पथ में स्थित हो उसको **(आरे)** समीप में प्रबल करिये और **(यूयुविः)** विभाग करने वाला **(द्विषः)** द्वेष्टा जनों को दूर में **(युयोतु)** विशेष करके विभक्त करें॥३॥

भावार्थः-मनुष्यों को चाहिये कि धार्मिक अतिथियों की उत्तम प्रकार सेवा कर मिल के विवेक को प्राप्त होकर द्वेष आदि दोषों को दूर करें॥३॥

ये वह्निवद्व्यवहारवोढारः स्युस्ते धीरा जायन्त इत्याह॥

जो अग्नि के सदृश व्यवहार के धारण करने वाले होवें, वे धीर होते हैं, इस विषय को कहते हैं॥

यत्र॒ वह्नि॑र॒भिहि॑तो दु॒द्रव॒द् द्रोण्यः॑ प॒शुः।

नृ॒मणा॑ वी॒रप॒स्त्योऽर्णा॒ धीरे॑व॒ सनि॑ता॥४॥

यत्र॑। वह्निः॑। अ॒भिऽहि॑तः। दु॒द्रव॑त्। द्रोण्यः॑। प॒शुः। नृ॒ऽमनाः॑। वी॒रऽप॑स्त्यः। अर्णा॑। धीरा॑ऽइव। सनि॑ता॥४॥

पदार्थः-**(यत्र)** यस्मिन् **(वह्निः)** वोढाऽग्निः **(अभिहितः)** कथितो धृतो वा **(दुद्रवत्)** भृशं गच्छति **(द्रोण्यः)** द्रोणेषु शीघ्रगामिषु भवः **(पशुः)** यो दृश्यते **(नृमणाः)** नृषु मनो यस्य सः **(वीरपस्त्यः)** वीरा पस्त्ये गृहे यस्य सः **(अर्णा)** प्रापिका **(धीरेव)** ध्यानवतीव **(सनिता)** विभक्ता॥४॥

अन्वयः-हे मनुष्या! यत्र द्रोण्यः पशुरिवाऽभिहितो वह्निर्दुद्रवत् तत्रार्णा धीरेव नृमणा वीरपस्त्यस्तनयः सनिता भवेत्॥४॥

भावार्थः-अत्र **[**उपमा**]**वाचकलुप्तोपमालङ्कारौ। येऽग्निवत्तेजस्विनो वेगवन्तो भवेयुस्ते सत्याऽसत्यविभाजका भवेयुः॥४॥

पदार्थः-हे मनुष्यो! **(यत्र)** जिसमें **(द्रोण्यः)** शीघ्र चलने वालों में उत्पन्न **(पशुः)** जो देखा जाता है उसके सदृश **(अभिहितः)** कहा गया वा धारण किया गया **(वह्निः)** प्राप्त करने वाला अग्नि **(दुद्रवत्)** अत्यन्त चलता है वहाँ **(अर्णा)** प्राप्त कराने वाली **(धीरेव)** ध्यानवती के सदृश **(नृमणाः)** मनुष्यों में जिसका मन **(वीरपस्त्यः)** जिसके गृह में वीर वह पुत्र **(सनिता)** विभाग करने वाला होवे॥४॥

भावार्थः-इस मन्त्र में **[**उपमा और**]** वाचकलुप्तोपमालङ्कार हैं। जो अग्नि के सदृश तेजस्वी और वेग से युक्त होवें, वे सत्य और असत्य के विभाग करने वाले होवें॥४॥

मनुष्यैः किं याचनीयमित्याह॥

मनुष्यों को क्या मांगना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

ए॒ष ते॑ देव नेता॒ रथ॒स्पति॒ः शं र॒यिः।

शं रा॒ये शं स्व॒स्तय॑ इष॒ःस्तुतो॑ मनामहे देव॒स्तुतो॑ मनामहे॥५॥४॥

ए॒षः। ते॒। दे॒व॒। नेत॒रिति॑। रथ॒ःपतिः॑। शम्। र॒यिः। शम्। रा॒ये। शम्। स्व॒स्तये॑। इष॒ःऽस्तुतः॑। म॒ना॒म॒हे॒। दे॒व॒ऽस्तुतः॑। म॒ना॒म॒हे॒॥५॥

पदार्थः-(एषः) (ते) तव **(देव)** विद्वन् **(नेतः)** प्रापक **(रथस्पतिः)** रथस्य स्वामी **(शम्)** सुखरूपम् **(रयिः)** धनम् **(शम्) (राये)** धनाय **(शम्)** कल्याणम् **(स्वस्तये)** सुखाय **(इषःस्तुतः)** अन्नादेः स्तावकः **(मनामहे)** याचामहे **(देवस्तुतः)** देवैर्विद्वद्भिः प्रशंसितः **(मनामहे)** विजानीमः॥५॥

अन्वयः-हे नेतर्देव! त एषो रथस्पतिः शं रयिः शं राये स्वस्तये शमिषः स्तुतः देवस्तुतोऽस्ति तान् वयं मनामहे तान् वयं मनामहे॥५॥

भावार्थः-ये विद्वत्प्रशंसिताः कल्याणकराः पदार्थाः स्युस्तान् वयं गृह्णीयाम॥५॥

अत्र विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चाशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(नेतः)** प्राप्ति कराने वाले **(देव)** विद्वन्! **(ते)** आपका **(एषः)** यह **(रथस्पतिः)** वाहन का स्वामी **(शम्)** सुखरूप **(रयिः)** धन और **(शम्)** सुख **(राये)** धन के लिये वा **(स्वस्तये)** सुख के लिये **(शम्)** कल्याण **(इषःस्तुतः)** अन्न आदि की स्तुति करने वाला और जो **(देवस्तुतः)** विद्वानों से प्रशंसित है, उनकी हम लोग **(मनामहे)** याचना करते हैं और हम लोग **(मनामहे)** जानते हैं॥५॥

भावार्थः-जो विद्वानों में प्रशंसित और कल्याणकारक पदार्थ होवें उनको हम लोग ग्रहण करें॥५॥

इस सूक्त में विद्वानों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पचासवां सूक्त और चतुर्थ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्यैकपञ्चाशत्तमस्य सूक्तस्य स्वस्त्यात्रेय ऋषिः। विश्वेदेवा देवताः। १, २ गायत्री। ३, ४ निचृद्गायत्री छन्दः। षड्जः स्वरः। ५, ६, ८, ९, १० निचृदुष्णिक्। ७ विराडुष्णिक् छन्दः। ऋषभः स्वरः। ११ निचृत्त्रिष्टुप्। १२ त्रिष्टुप् छन्दः। धैवतः स्वरः। १३ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १४ विराडनुष्टुप्। १५ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

विद्वान् विद्वद्भिस्सह किं कुर्य्यादित्युपदिश्यते॥

अब पन्द्रह ऋचा वाले इक्यावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् जन विद्वानों के साथ क्या करे, यह उपदेश किया जाता है॥

अग्ने॑ सु॒तस्य॑ पी॒तये॒ विश्वै॒रूमे॑भि॒रा ग॑हि। दे॒वेभि॑र्ह॒व्यदा॑तये॥ १॥

अग्ने॑। सु॒तस्य॑। पी॒तये॒। विश्वैः॑। ऊमे॑भिः। आ। ग॒हि॒। दे॒वेभिः॑। ह॒व्यऽदा॑तये॥ १॥

पदार्थः-(अग्ने) विद्वन् **(सुतस्य)** निष्पादितस्यौषधिरसस्य **(पीतये)** पानाय **(विश्वैः)** सर्वैः **(ऊमेभिः)** रक्षणादिकर्त्तृभिस्सह **(आ) (गहि)** आगच्छ **(देवेभिः)** विद्वद्भिः **(हव्यदातये)** दातव्यदानाय॥ १॥

अन्वयः-हे अग्ने! त्वं विश्वैरूमेभिर्देवेभिः सह सुतस्य पीतये हव्यदातय आ गहि॥ १॥

भावार्थः-यदि विद्वांसः परमविदुषा सह सर्वाञ्जनान् सम्बोधयेयुस्तर्हि सर्व आनन्दिताः स्युः॥ १॥

पदार्थः-हे **(अग्ने)** विद्वन्! आप **(विश्वैः)** सम्पूर्ण **(ऊमेभिः)** रक्षा आदि करने वाले **(देवेभिः)** विद्वानों के साथ **(सुतस्य)** निकाले हुए ओषधिरस के **(पीतये)** पान करने के लिये और **(हव्यदातये)** देने योग्य वस्तु के देने के लिये **(आ, गहि)** प्राप्त हूजिये॥ १॥

भावार्थः-जो विद्वान् जन अत्यन्त विद्वान् के साथ सम्पूर्ण जनों को उत्तम प्रकार बोध देवें तो सब आनन्दित होवें॥ १॥

कीदृशैर्मनुष्यैर्भवितव्यमित्याह॥

कैसे मनुष्यों को होना चाहिये, इस विषय को कहते हैं॥

ऋ॒तधी॑तय॒ आ ग॑त॒ सत्यधर्माणो अध्व॒रम्। अ॒ग्नेः पि॑बत जि॒ह्वया॑॥ २॥

ऋ॒तऽधी॑तयः। आ। ग॒त॒। सत्यऽधर्माणः। अ॒ध्व॒रम्। अ॒ग्नेः। पि॒ब॒त॒। जि॒ह्वया॑॥ २॥

पदार्थः-(ऋतधीतयः) ऋतस्य सत्यस्य धीतिर्धारणं येषान्ते **(आ) (गत)** आगच्छत **(सत्यधर्म्माणः)** सत्यो धर्म्मो येषान्ते **(अध्वरम्)** अहिंसामयं व्यवहारम् **(अग्नेः)** पावकस्य **(पिबत) (जिह्वया)**॥ २॥

अन्वयः-हे ऋतधीतयः! सत्यधर्म्माणो विद्वांसो यूयमध्वरमा गताग्नेर्जिह्वया रसं पिबत॥ २॥

भावार्थः-हे मनुष्या! यूयं सत्यधर्म्मस्य धारणेनातुलं सुखं प्राप्नुत॥२॥

पदार्थः-हे **(ऋतधीतयः)** सत्य के धारण करने वाले **(सत्यधर्म्माणः)** सत्य धर्म्म जिनका ऐसा विद्वानो! आप लोग **(अध्वरम्)** अहिंसारूप व्यवहार को **(आ, गत)** प्राप्त हूजिये और **(अग्नेः)** अग्नि की **(जिह्वया)** जिह्वा से रस को **(पिबत)** पीजिये॥२॥

भावार्थः-हे मनुष्यो! आप लोग सत्यधर्म्म के धारण से अत्यन्त सुख को प्राप्त हूजिये॥२॥

विद्वद्भिस्सह विद्वान् किङ्कुर्य्यादित्याह॥

विद्वानों के साथ विद्वान् क्या करे, इस विषय को कहते हैं॥

विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि। देवेभिः सोमपीतये॥३॥

विप्रेभिः। विप्र। सन्त्य। प्रातर्यावऽभिः। आ। गहि। देवेभिः। सोमऽपीतये॥३॥

पदार्थः-(**विप्रेभिः**) मेधाविभिः **(विप्र)** मेधाविन् **(सन्त्य)** सन्तौ वर्त्तमानो साधो **(प्रातर्यावभिः)** ये प्रातर्यान्ति तैः **(आ) (गहि)** आगच्छ **(देवेभिः)** विद्वद्भिस्सह **(सोमपीतये)** सोमस्य पानाय॥३॥

अन्वयः-हे सन्त्य विप्र! त्वं प्रातर्यावभिर्देवेभिर्विप्रेभिस्सह सोमपीतय आ गहि॥३॥

भावार्थः-यदा विद्वद्भिस्सह विदुषां सङ्गो जायते तदैश्वर्य्यस्य प्रादुर्भावो भवति॥३॥

पदार्थः-हे **(सन्त्य)** वर्त्तमान में श्रेष्ठ **(विप्र)** बुद्धिमान्! आप **(प्रातर्यावभिः)** प्रातःकाल में जाने वाले **(देवेभिः)** विद्वानों के और **(विप्रेभिः)** बुद्धिमानों के साथ **(सोमपीतये)** सोमलता नामक ओषधि के रस के पान के लिये **(आ, गहि)** प्राप्त हूजिये॥३॥

भावार्थः-जब विद्वानों के साथ विद्वानों का सङ्ग होता है, तब ऐश्वर्य्य का प्रादुर्भाव होता है॥३॥

पुनर्मनुष्यै किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते। प्रिय इन्द्राय वायवे॥४॥

अयम्। सोमः। चमू इति। सुतः। अमत्रे। परि। सिच्यते। प्रियः। इन्द्राय। वायवे॥४॥

पदार्थः-(**अयम्**) **(सोमः)** ऐश्वर्य्ययोगः **(चमू)** द्विविधे सेने **(सुतः)** निष्पन्नः **(अमत्रे)** पात्रे **(परि)** सर्वतः **(सिच्यते) (प्रियः)** कमनीयः **(इन्द्राय)** परमैश्वर्य्ययुक्ताय **(वायवे)** बलवते॥४॥

अन्वयः-हे मनुष्या! योऽयं वायव इन्द्राय सुतः प्रियः सोमोऽमत्रे परि षिच्यते स चमू परि वर्धयति॥४॥

भावार्थः-यदि वैद्या ओषधिसारान्निस्सार्य्याऽरोगान् मनुष्यान् कुर्युस्तर्हि सर्व ऐश्वर्य्यवन्तो जायन्ते॥४॥

पदार्थः-हे मनुष्यो! जो **(अयम्)** यह **(वायवे)** बलवान् **(इन्द्राय)** अत्यन्त ऐश्वर्य्य से युक्त पुरुष के लिये **(सुतः)** उत्पन्न किया गया **(प्रियः)** सुन्दर **(सोमः)** ऐश्वर्य्य का योग **(अमत्रे)** पात्र में **(परि)** सब

ओर से **(सिच्यते)** सींचा जाता है वह **(चमू)** दो प्रकार की सेनाओं को सब प्रकार से वृद्धि करता है॥४॥

भावार्थः-जो वैद्यजन ओषधियों के सारभागों को निकाल कर रोगरहित मनुष्यों को करें तो सब ऐश्वर्य्यों से युक्त होते हैं॥४॥

मनुष्यैः किं भोक्तव्यं पेयं चेत्युपदिश्यते॥

मनुष्यो को क्या भोजन करना और क्या पीना चाहिये, इस विषय को कहते हैं॥

वायवा याहि वीतये जुषाणो हव्यदातये।

पिबा सुतस्यान्धसो अभि प्रयः॥५॥५॥

वायो इति। आ। याहि। वीतये। जुषाणः। हव्यऽदातये। पिब। सुतस्य। अन्धसः। अभि। प्रयः॥५॥

पदार्थः-**(वायो)** परमबलयुक्त **(आ)** **(याहि)** आगच्छ **(वीतये)** विज्ञानादिप्राप्तये **(जुषाणः)** सेवमानः **(हव्यदातये)** दातव्यदानाय **(पिबा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(सुतस्य)** निष्पन्नस्य **(अन्धसः)** अन्नस्य रसान् **(अभि)** **(प्रयः)** कमनीयं जलम्॥५॥

अन्वयः-हे वायो! त्वं हव्यदातये वीतयेऽभि प्रयो जुषाण आ याहि सुतस्यान्धसः पिबा॥५॥

भावार्थः-हे विद्वंस्त्वं रोगप्रमादनाशकं बुद्धिवर्द्धकमन्नं भुङ्क्ष्व रसं पिब॥५॥

पदार्थः-हे **(वायो)** अत्यन्त बल से युक्त! आप **(हव्यदातये)** देने योग्य वस्तु के देने के लिये और **(वीतये)** विज्ञान आदि की प्राप्ति के लिये **(अभि, प्रयः)** सब ओर से सुन्दर जल का **(जुषाणः)** सेवन करते हुए **(आ, याहि)** प्राप्त हूजिये और **(सुतस्य)** उत्पन्न हुए **(अन्धसः)** अन्न के रस का **(पिबा)** पान करिये॥५॥

भावार्थः-हे विद्वन्! आप रोग और प्रमाद के नाश करने और बुद्धि के बढ़ाने वाले अन्न को खाइये और रस को पीजिये॥५॥

अथ राजामात्यौ किं कुर्य्यातामित्याह॥

अब राजा और अमात्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः। तान् जुषेथामरेपसावभि प्रयः॥६॥

इन्द्रः। च। वायो इति। एषाम्। सुतानाम्। पीतिम्। अर्हथः। तान्। जुषेथाम्। अरेपसौ। अभि। प्रयः॥६॥

पदार्थः-**(इन्द्रः)** राजा **(च)** **(वायो)** प्रधानपुरुष **(एषाम्)** वर्त्तमानानाम् **(सुतानाम्)** निष्पालनानाम् **(पीतिम्)** पानम् **(अर्हथः)** **(तान्)** **(जुषेथाम्)** **(अरेपसौ)** दयालू **(अभि)** **(प्रयः)** कमनीयमन्नम्॥६॥

अन्वयः-हे वायो! इन्द्रश्च युवामेषां सुतानां पीतिमर्हथस्तानरेपसौ सन्तौ प्रयोऽभि जुषेथाम्॥६॥

भावार्थः-यत्र राजामात्या धार्मिकाः स्युस्तत्र सर्वा योग्यता जायेत॥६॥

पदार्थः-हे **(वायो)** मुख्य पुरुष! **(इन्द्रः, च)** और राजा आप दोनों **(एषाम्)** इन वर्त्तमान **(सुतानाम्)** पालना से छूटे अर्थात् सिद्ध हुए पदार्थों के **(पीतिम्)** पान के **(अर्हथः)** योग्य होते हैं **(तान्)** उनको और **(अरेपसौ)** दयालु हुए **(प्रयः)** सुन्दर अन्न को **(अभि, जुषेथाम्)** सेवन करें॥६॥

भावार्थः-जहाँ राजा और मन्त्री धार्मिक होवें, वहाँ सम्पूर्ण योग्यता होवे॥६॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

सुता इन्द्राय वायवे सोमासो दध्याशिरः।
निम्नं न यन्ति सिन्धवोऽभि प्रयः॥७॥

सुताः। इन्द्राय। वायवे। सोमासः। दधिऽआशिरः। निम्नम्। न। यन्ति। सिन्धवः। अभि। प्रयः॥७॥

पदार्थः-(**सुताः**) निष्पन्नाः **(इन्द्राय)** परमैश्वर्याय **(वायवे)** वायुवद्बलाय **(सोमासः)** ऐश्वर्य्ययुक्ताः पदार्थाः **(दध्याशिरः)** ये धातुमशितुं योग्याः **(निम्नम्)** **[**निम्नं**]** देशम् **(न)** इव **(यन्ति)** प्राप्नुवन्ति **(सिन्धवः)** नद्यः **(अभि)** **(प्रयः)** अतीव प्रियम्॥७॥

अन्वयः-हे मनुष्याः! सिन्धवो निम्नं देशं न दध्याशिरः सुतास्सोमासो वायव इन्द्राय प्रयोऽभि यन्ति॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा नद्यः समुद्रं गच्छन्ति तथैव महौषधिसेविनः सुखं यान्ति॥७॥

पदार्थः-हे मनुष्यो! **(सिन्धवः)** नदियां **(निम्नम्)** अर्थात् नीचे स्थल को **(न)** जैसे वैसे **(दध्याशिरः)** धारण करने और खाने योग्य **(सुताः)** उत्पन्न हुए **(सोमासः)** ऐश्वर्य्य से युक्त पदार्थ **(वायवे)** वायु के सदृश बलयुक्त **(इन्द्राय)** अत्यन्त ऐश्वर्य्य वाले के लिये **(प्रयः)** अत्यन्त प्रिय को **(अभि)** सब ओर से **(यन्ति)** प्राप्त होते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे नदियां समुद्र को प्राप्त होती हैं, वैसे ही बड़ी ओषधियों के सेवन करने वाले सुख को प्राप्त होते हैं॥७॥

अथाग्निरिव विद्वान् कीदृशोऽस्तीत्याह॥

अब अग्नि के समान विद्वान् कैसा है, इस विषय को कहते हैं॥

सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः। आ याह्यग्ने अत्रिवत्सुते रण॥८॥

सऽजूः। विश्वेभिः। देवेभिः। अश्विऽभ्याम्। उषसा। सऽजूः। आ। याहि। अग्ने। अत्रिऽवत्। सुते। रण॥८॥

पदार्थः-(**सजूः**) संयुक्तः **(विश्वेभिः)** सर्वैः **(देवेभिः)** पृथिव्यादिभिः **(अश्विभ्याम्)** प्रकाशाऽप्रकाशलोकाभ्याम् **(उषसा)** प्रातर्वेलया **(सजूः)** संयुक्तः **(आ)** **(याहि)** आगच्छ **(अग्ने)** पावक इव विद्वान् **(अत्रिवत्)** व्यापकवत् **(सुते)** उत्पन्ने जगति **(रण)** उपदिश॥८॥

अन्वय:-हे अग्ने विद्वन्! यथाऽग्निर्विश्वेभिर्देवेभिस्सजूरश्विभ्यामुषसा सजू: सुतेऽत्रिवदस्ति तथाऽऽयाहि रण॥८॥

भावार्थ:-अत्र [उपमा]वाचकलुप्तोपमालङ्कारौ। हे मनुष्या! या विद्युत्सर्वेषु पदार्थेषु व्याप्ताऽस्ति तां विजानीत॥८॥

पदार्थ:-हे **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वन्! जैसे अग्नि **(विश्वेभि:)** सम्पूर्ण **(देवेभि:)** पृथिवी आदिकों से **(सजू:)** संयुक्त तथा **(अश्विभ्याम्)** प्रकाशित और अप्रकाशित लोकों तथा **(उषसा)** प्रात:काल से **(सजू:)** संयुक्त **(सुते)** उत्पन्न जगत् में **(अत्रिवत्)** व्यापक के सदृश है, वैसे **(आ, याहि)** प्राप्त हूजिये और **(रण)** उपदेश करिये॥८॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जो बिजुली सब पदार्थों में व्याप्त है, उसको विशेष करके जानिये॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सजूर्मित्रावरुणाभ्यां सजू: सोमेन विष्णुना। आ याह्यग्ने अत्रिवत्सुते रण॥९॥

सऽजू:। मित्रावरुणाभ्याम्। सऽजू:। सोमेन। विष्णुना। आ। याहि। अग्ने। अत्रिऽवत्। सुते। रण॥९॥

पदार्थ:-**(सजू:)** संयुक्त: **(मित्रावरुणाभ्याम्)** प्राणोदानाभ्याम् **(सजू:)** **(सोमेन)** ऐश्वर्य्येण चन्द्रेण वा **(विष्णुना)** व्यापकेनाकाशेन **(आ)** **(याहि)** **(अग्ने)** **(अत्रिवत्)** **(सुते)** **(रण)**॥९॥

अन्वय:-हे अग्ने विद्वन्! त्वं मित्रावरुणाभ्यां सजू: सोमेन विष्णुना सजू: सुतेऽत्रिवदस्ति तद्बोधनायाऽऽयाहि अस्मान् सत्यमुपदेशं रण॥९॥

भावार्थ:-अत्रोपमालङ्कार:। यदि मनुष्या: प्राणापानादिस्थविद्युद्विद्यां विजानीयुस्तर्हि बहुसुखं लभेरन्॥९॥

पदार्थ:-हे **(अग्ने)** विद्वन्! आप **(मित्रावरुणाभ्याम्)** प्राण और उदान पवनों से **(सजू:)** संयुक्त **(सोमेन)** ऐश्वर्य्य वा चन्द्र से और **(विष्णुना)** व्यापक आकाश से **(सजू:)** संयुक्त और **(सुते)** उत्पन्न हुए जगत् में **(अत्रिवत्)** व्यापक के सदृश है, उसके जानने के लिये **(आ, याहि)** प्राप्त हूजिये और हम लोगों के लिये सत्य का **(रण)** उपदेश कीजिये॥९॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो मनुष्य प्राण और अपान आदि में स्थित बिजुली की विद्या को जानें तो बहुत सुख को प्राप्त होवें॥९॥

पुन: स कीदृश इत्याह॥

फिर वह कैसा है, इस विषय को कहते हैं॥

सजूरादित्यैर्वसुभि: सजूरिन्द्रेण वायुना। आ याह्यग्ने अत्रिवत्सुते रण॥१०॥६॥

स॒ऽज्जूः। आ॒दि॒त्यैः। वसु॑ऽभिः। स॒ऽज्जूः। इन्द्रे॑ण। वा॒युना॑। आ। या॒हि॒। अ॒ग्ने॒। अ॒त्रि॒ऽवत्। सु॒ते। र॒ण॒॥ १०॥

पदार्थः-(सजूः) (**आदित्यैः**) मासैः (**वसुभिः**) पृथिव्यादिभिः (**सजूः**) (**इन्द्रेण**) जीवेन (**वायुना**) बलवता (**आ, याहि**) (**अग्ने**) पावकवद्विद्वन् (**अत्रिवत्**) (**सुते**) (**रण**) उपदिश॥ १०॥

अन्वयः-हे अग्ने विद्वन्नादित्यैर्वसुभिस्सह सजूर्वायुनेन्द्रेण सजूः सुतेऽत्रिवद् वर्त्तते तद्विज्ञापनायाऽऽयाहि रण च॥ १०॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यो मानसो विद्युदग्निराकाशस्थो वर्त्तते तं विज्ञाय कार्य्येषूपयुङ्ध्वम्॥ १०॥

पदार्थः-हे (**अग्नि**) अग्नि के समान विद्वन्! जो (**आदित्यैः**) महीनों और (**वसुभिः**) पृथिवी आदिकों के साथ (**सजूः**) संयुक्त और (**वायुना**) बलवान् (**इन्द्रेण**) जीव के साथ (**सजूः**) संयुक्त (**सुते**) उत्पन्न हुए जगत् में (**अत्रिवत्**) व्यापक के सदृश वर्त्तमान है, उसके जनाने के लिये (**आ, याहि**) प्राप्त हूजिये और (**रण**) उपदेश करिये॥ १०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो मन सम्बन्धी बिजुलीरूप अग्नि आकाश में स्थित हुआ वर्त्तमान है, उसको जान कर कार्य्यों में उपयोग करिये॥ १०॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहतेहैं॥

स्व॒स्ति नो॑ मिमीताम॒श्विना॒ भगः॑ स्व॒स्ति दे॒व्यदि॑तिरन॒र्वणः॑।
स्व॒स्ति पू॒षा अ॑सु॒रो द॑धातु नः स्व॒स्ति द्यावा॑पृथि॒वी सु॑चे॒तुना॑॥ ११॥

स्व॒स्ति। नः॒। मि॒मी॒ता॒म्। अ॒श्विना॑। भगः॑। स्व॒स्ति। दे॒वी। अदि॑तिः। अ॒न॒र्वणः॑। स्व॒स्ति। पू॒षा। अ॒सु॒रः॑। द॒धा॒तु॒। नः॒। स्व॒स्ति। द्यावा॑पृथि॒वी इति॑। सु॒ऽचे॒तुना॑॥ ११॥

पदार्थः-(स्वस्ति) सुखम् (**नः**) अस्मभ्यम् (**मिमीताम्**) सृजेथाम् (**अश्विना**) अध्यापकोपदेशकौ (**भगः**) ऐश्वर्य्यकर्त्ता वायुः (**स्वस्ति**) (**देवी**) देदीप्यमाना (**अदितिः**) अखण्डिता (**अनर्वणः**) अनश्वस्य (**स्वस्ति**) (**पूषा**) पुष्टिकरो दुग्धादिः (**असुरः**) मेघः (**दधातु**) (**नः**) अस्मभ्यम् (**स्वस्ति**) (**द्यावापृथिवी**) प्रकाशभूमी (**सुचेतुना**) सुष्ठु विज्ञापनेन॥ ११॥

अन्वयः-हे मनुष्या! यथाश्विनानर्वणः स्वस्ति मिमीतां भगो नः स्वस्ति देव्यदितिर्विद्या नः स्वस्ति सुचेतुना द्यावापृथिवी नः स्वस्ति पूषाऽसुरो नः स्वस्ति दधातु तथा युष्मभ्यमपि ते दधतु॥ ११॥

भावार्थः-ये मनुष्याः पदार्थविद्यया यान् पदार्थान् उपयुञ्जीरन् त एभ्य उपकारं ग्रहीतुं शक्नुयुः॥ ११॥

पदार्थः-हे मनुष्यो! जैसे (**अश्विना**) अध्यापक और उपदेशक जन (**अनर्वणः**) अश्वरहित का (**स्वस्ति**) सुख (**मिमीताम्**) रचें और (**भगः**) ऐश्वर्य्य को करने वाला वायु (**नः**) हम लोगों के लिये (**स्वस्ति**) सुख (**देवी**) प्रकाशित (**अदितिः**) अखण्डविद्या (**नः**) हम लोगों के लिये (**स्वस्ति**) सुख

(सुचेतुना) उत्तम विज्ञापन से **(द्यावापृथिवी)** प्रकाश और भूमि हम लोगों के लिये **(स्वस्ति)** सुख और **(पूषा)** पुष्टि करने वाला दुग्धादि पदार्थ और **(असुरः)** मेघ हम लोगों के लिये सुख को **(दधातु)** धारण करे, वैसे आप लोगों के लिये भी वे सुख को धारण करें॥११॥

भावार्थः-जो मनुष्य पदार्थविद्या से जिन पदार्थों को उपयुक्त करें अर्थात् काम में लावें, वे इनसे उपकार ग्रहण करने को समर्थ होवें॥११॥

पुनर्मनुष्याः कथं विद्यावृद्धिं कुर्युरित्याह॥

फिर मनुष्य कैसे विद्यावृद्धि करें, इस विषय को कहते हैं॥

स्व॒स्तये॑ वा॒युमुप॑ ब्रवामहै॒ सोम॑ꣳ स्व॒स्ति भुव॑नस्य॒ यस्पति॑:।
बृह॒स्पति॒ꣳ सर्व॑गणं स्व॒स्तये॑ स्व॒स्तय॑ आदि॒त्यासो॑ भवन्तु नः॥१२॥

स्व॒स्तये॑। वा॒युम्। उप॑। ब्र॒वा॒म॒है॒। सोम॑म्। स्व॒स्ति। भुव॑नस्य। यः। पति॑:। बृह॒स्पति॑म्। सर्व॑ऽगणम्। स्व॒स्तये॑। स्व॒स्तये॑। आ॒दि॒त्यास॑:। भ॒व॒न्तु॒। नः॥१२॥

पदार्थः-**(स्वस्तये)** सुखाय **(वायुम्)** वायुविद्याम् **(उप)** **(ब्रवामहै)** उपदिशेम **(सोमम्)** ऐश्वर्य्यम् **(स्वस्ति)** **(भुवनस्य)** लोकस्य **(यः)** **(पतिः)** पालकः **(बृहस्पतिम्)** बृहतीनां स्वामिनम् **(सर्वगणम्)** सर्वे गणाः समूहा यस्मिन् **(स्वस्तये)** निरुपद्रवाय **(स्वस्तये)** परमसुखाय **(आदित्यासः)** अष्टचत्वारिंशद्वर्ष-परिमितेन ब्रह्मचर्येण कृतविद्या मासा इव व्याप्ताखिलविद्या वा **(भवन्तु)** **(नः)** अस्मभ्यम्॥१२॥

अन्वयः-हे मनुष्या! यथा वयं स्वस्तये वायुं सोममुप ब्रवामहै तथा श्रुत्वा यूयमन्यान् प्रत्युप ब्रुवत। यो भुवनस्य पतिः सः स्वस्तये सर्वगणं बृहस्पतिं नः स्वस्ति च दधातु यथाऽऽदित्यासो नः स्वस्तये भवन्तु तथा युष्मभ्यमपि सन्तु॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याः परस्परं पदार्थविद्यां श्रुत्वाऽभ्यस्य च विद्वांसो भवन्तु॥१२॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(स्वस्तये)** सुख के लिये **(वायुम्)** वायुविद्या और **(सोमम्)** ऐश्वर्य्य का **(उप, ब्रवामहै)** उपदेश देवें, वैसे सुनकर आप लोग अन्यों के प्रति उपदेश दीजिये और **(यः)** जो **(भुवनस्य** लोक का **(पतिः)** स्वामी है वह **(स्वस्तये)** उपद्रव दूर होने के लिये **(सर्वगणम्)** सम्पूर्ण समूह जिसमें उस **(बृहस्पतिम्)** बड़ी वेदवाणियों के स्वामी को और **(नः)** हम लोगों के लिये **(स्वस्ति)** सुख को धारण करे और जैसे **(आदित्यासः)** अड़तालीस वर्ष परिमित ब्रह्मचर्य्य से किया विद्याभ्यास जिन्होंने तथा जो मास के सदृश सम्पूर्ण विद्याओं में व्याप्त वे हम लोगों के अर्थ **(स्वस्तये)** अत्यन्त सुख के लिये **(भवन्तु)** होवें, वैसे आप लोगों के लिये भी हों॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य परस्पर पदार्थविद्या को सुन और अभ्यास करके विद्वान् होवें॥१२॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

विश्वे॑ दे॒वा नो॑ अ॒द्या स्व॒स्तये॑ वैश्वान॒रो वसु॑र॒ग्निः स्व॒स्तये॑।
दे॒वा अ॑वन्त्वृ॒भवः॑ स्व॒स्तये॑ स्व॒स्ति नो॑ रु॒द्रः पा॒त्वंह॑सः॥ १३॥

विश्वे॑। दे॒वाः॑। नः॑। अ॒द्य। स्व॒स्तये॑। वै॒श्वा॒न॒रः॑। वसुः॑। अ॒ग्निः॑। स्व॒स्तये॑। दे॒वाः॑। अ॒व॒न्तु॒। ऋ॒भवः॑। स्व॒स्तये॑। स्व॒स्ति। नः॑। रु॒द्रः॑। पा॒तु॒। अंह॑सः॥ १३॥

पदार्थः-(विश्वे) सर्वे **(देवाः)** विद्वांसः **(नः)** अस्मान् **(अद्या)** अत्र **निपातस्य चे**ति दीर्घः। **(स्वस्तये)** सुखाय **(वैश्वानरः)** विश्वेषु नरेषु राजमानः **(वसुः)** यः सर्वत्र वसति **(अग्निः)** पावकः **(स्वस्तये)** आनन्दाय **(देवाः)** विद्वांसः **(अवन्तु)** **(ऋभवः)** मेधाविनः **(स्वस्तये)** विद्यासुखाय **(स्वस्ति)** सुखकरं वर्त्तमानम् **(नः)** अस्मान् **(रुद्रः)** दुष्टदण्डकः **(पातु)** **(अंहसः)** अपराधात्॥ १३॥

अन्वयः-हे मनुष्या! यथाद्या विश्वे देवाः स्वस्तये नोऽवन्तु स्वस्तये वैश्वानरो वसुरग्निरवन्त्वृभवो देवाः स्वस्तयेऽवन्तु रुद्रः स्वस्ति भावयित्वा नोऽस्मानंहसः पातु॥ १३॥

भावार्थः-विदुषां योग्यतास्ति उपदेशाध्यापनाभ्यां सर्वान् मनुष्यान् सततं रक्षयित्वा वर्धयन्तु॥ १३॥

पदार्थः-हे मनुष्यो! जैसे **(अद्या)** आज **(विश्वे, देवाः)** सम्पूर्ण विद्वान् जन **(स्वस्तये)** सुख के लिये **(नः)** हम लोगों की **(अवन्तु)** रक्षा करें और **(स्वस्तये)** सुख के लिये **(वैश्वानरः)** समस्त मनुष्यों में प्रकाशमान **(वसुः)** सर्वत्र वसने वाला **(अग्निः)** अग्नि रक्षा करे और **(ऋभवः)** बुद्धिमान् **(देवाः)** विद्वान् जन **(स्वस्तये)** विद्यासुख के लिये रक्षा करें और **(रुद्रः)** दुष्टों को दण्ड देने वाला **(स्वस्ति)** सुख की भावना करके **(नः)** हम लोगों की **(अंहसः)** अपराध से **(पातु)** रक्षा करे॥ १३॥

भावार्थः-विद्वानों की योग्यता है कि उपदेश और अध्यापन से सब मनुष्यों की निरन्तर रक्षा करके वृद्धि करावें॥ १३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स्व॒स्ति मि॑त्रावरुणा स्व॒स्ति प॑थ्ये॑ रेवति।
स्व॒स्ति न॒ इन्द्र॑श्चा॒ग्निश्च॑ स्व॒स्ति नो॑ अदिते कृधि॥ १४॥

स्व॒स्ति। मि॒त्रा॒व॒रु॒णा॒। स्व॒स्ति। प॒थ्ये॑। रे॒व॒ति॒। स्व॒स्ति। नः॒। इन्द्रः॑। च॒। अ॒ग्निः॑। च॒। स्व॒स्ति। नः॒। अ॒दि॒ते॒। कृ॒धि॒॥ १४॥

पदार्थः-(स्वस्ति) सुखम् **(मित्रावरुणा)** प्राणोदानौ **(स्वस्ति) (पथ्ये)** पथोनपेते कर्मणि **(रेवति)** बहुधनयुक्ते **(स्वस्ति) (नः)** अस्मभ्यम् **(इन्द्रः)** वायुः **(च) (अग्निः)** विद्युत् **(च) (स्वस्ति)** सुखम् **(नः)** अस्मभ्यम् **(अदिते)** अखण्डितविद्य **(कृधि)** कुरु॥१४॥

अन्वयः-हे अदिते रेवति! त्वं पथ्ये यथा मित्रावरुणा नः स्वस्ति इन्द्रश्च स्वस्ति अग्निश्च स्वस्ति नः करोति तथा स्वस्ति कृधि॥१४॥

भावार्थः-यः सर्वेभ्यः सुखं प्रयच्छति स एव विद्वान् प्रशंसितो भवति॥१४॥

पदार्थः-हे **(अदिते)** खण्डितविद्या से रहित **(रेवति)** बहुत धन से युक्त! आप **(पथ्ये)** मार्गयुक्त कर्म्म में जैसे **(मित्रावरुणा)** प्राण और उदान **(नः)** हम लोगों के लिये **(स्वस्ति)** सुख **(इन्द्रः, च)** और वायु **(स्वस्ति)** सुख को **(अग्निः, च)** और बिजुली **(स्वस्ति)** सुख **(नः)** हम लोगों के लिये करती है, वैसे **(स्वस्ति)** सुख **(कृधि)** करिये॥१४॥

भावार्थः-जो सब जीवों के लिये सुख देता है वही विद्वान् प्रशंसित होता है॥१४॥

मनुष्यैर्विद्वत्सङ्गेन धर्ममार्गेण गन्तव्यमित्याह॥

मनुष्यों को विद्वानों के संग से जो धर्ममार्ग उससे चलना चाहिये, इस विषय को कहते हैं॥

स्व॒स्ति पन्था॒मनु॑ चरेम सू॒र्याचन्द्र॒मसा॑विव।

पुन॒र्दद॒ताघ्न॑ता जान॒ता सं ग॑मेमहि॥१५॥७॥

स्व॒स्ति। पन्था॑म्। अनु॑। च॒रे॒म॒। सू॒र्या॒च॒न्द्र॒मसौ॑ऽइव। पुन॑रिति॑। दद॑ता। अघ्न॑ता। जा॒न॒ता। सम्। ग॒मे॒म॒हि॒॥१५॥

पदार्थः-(स्वस्ति) सुखम् **(पन्थाम्)** पन्थानाम् **(अनु) (चरेम)** अनुगच्छेम **(सूर्याचन्द्रमसाविव) (पुनः) (ददता)** दानकर्त्रा **(अघ्नता)** अहिंसकेन **(जानता)** विदुषा **(सम्) (गमेमहि)** सङ्गच्छेमहि॥१५॥

अन्वयः-वयं सूर्याचन्द्रमसाविव स्वस्ति पन्थामनु चरेम पुनर्ददताघ्नता जानता सह सङ्गमेमहि॥१५॥

भावार्थः-हे मनुष्या! यथा सूर्य्यश्चन्द्रश्च नियमेनाहर्निशं गच्छतस्तथा न्यायमार्गं गच्छत सज्जनैः सह समागमं कुरुतेति॥१५॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या।

इत्येकपञ्चाशत्तमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हम लोग **(सूर्याचन्द्रमसाविव)** सूर्य्य और चन्द्रमा के सदृश **(स्वस्ति)** सुख **(पन्थाम्)** मार्गों के **(अनु, चरेम)** अनुगामी हों और **(पुनः)** फिर **(ददता)** दान करने **(अघ्नता)** और नहीं नाश करने वाले **(जानता)** विद्वान् के साथ **(सम्, गमेमहि)** मिलें॥१५॥

भावार्थः-हे मनुष्यो! जैसे सूर्य्य और चन्द्रमा नियम से दिनरात्रि चलते हैं, वैसे न्याय के मार्ग को प्राप्त हूजिये और सज्जनों के साथ समागम करिये॥१५॥

इस सूक्त में अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इक्यावनवां सूक्त और सप्तम वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तदशर्चस्य द्विपञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १, ४, ५, १५ विराडनुष्टुप्। २, ७, १० निचृदनुष्टुप्। ८, १२, १३ अनुष्टुप् छन्दः। गान्धारः स्वरः। ६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ९, ११ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। १४ विराड् बृहती। १६ भुरिग्बृहती। १७ स्वराड्बृहती छन्दः। मध्यमः स्वरः॥

अथ मनुष्याः सत्कर्त्तव्यान् सत्कुर्युरित्याह॥

अब सत्रह ऋचा वाले बावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्य सत्कार करने योग्यों का सत्कार करें, इस विषय को कहते हैं॥

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः।

ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः॥ १॥

प्र। श्यावऽअश्व। धृष्णुऽया। अर्च। मरुत्ऽभिः। ऋक्वऽभिः। ये। अद्रोघम्। अनुऽस्वधम्। श्रवः। मदन्ति। यज्ञियाः॥ १॥

पदार्थः-(प्र) (श्यावाश्व) श्यावाः कृष्णशिखाऽग्नयोऽश्वा यस्य तत्सम्बुद्धौ **(धृष्णुया)** दृढत्वेन **(अर्चा)** सत्कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मरुद्भिः)** मनुष्यैः **(ऋक्वभिः)** सत्कर्त्तृभिः **(ये) (अद्रोघम्)** द्रोहरहितम् **(अनुष्वधम्)** स्वधामन्नमनुवर्त्तमानम् **(श्रवः)** श्रवणम् **(मदन्ति)** हर्षन्ति **(यज्ञियाः)** यज्ञकर्त्तारः॥ १॥

अन्वयः-हे श्यावाश्व! ये यज्ञिया अद्रोघमनुश्वधं श्रवो मदन्ति तानृक्वभिर्मरुद्भिर्धृष्णुया प्रार्चा॥ १॥

भावार्थः-ये मनुष्याः सत्कर्त्तव्यान्त्सत्कुर्वन्ति ते सर्वे सत्कृता भवन्ति॥ १॥

पदार्थः-हे **(श्यावाश्व)** काली शिखा वाले अग्नि रूप घोड़ों से युक्त **(ये)** जो **(यज्ञियाः)** सत्कार करने वाले **(अद्रोघम्)** द्रोह से रहित **(अनुष्वधम्, श्रवः)** अन्न और श्रवण के अनुकूल वर्त्तमान **(मदन्ति)** आनन्दित होते हैं उनकी **(ऋक्वभिः)** सत्कार करने वाले **(मरुद्भिः)** मनुष्यों के साथ **(धृष्णुया)** दृढ़ता से **(प्र, अर्चा)** सत्कार करो॥ १॥

भावार्थः-जो मनुष्य सत्कार करने योग्यों का सत्कार करते हैं, वे सब सत्कृत होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया।

ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः॥ २॥

ते। हि। स्थिरस्य। शवसः। सखायः। सन्ति। धृष्णुऽया। ते। यामन्। आ। धृषत्ऽविनः। त्मना। पान्ति। शश्वतः॥ २॥

पदार्थः-(**ते**) (**हि**) (**स्थिरस्य**) (**शवसः**) बलस्य (**सखायः**) (**सन्ति**) (**धृष्णुया**) दृढत्वादिगुण-युक्ताः (**ते**) (**यामन्**) यामनि (**आ**) (**धृषद्विनः**) बहुदृढत्वादिगुणयुक्ताः (**त्मना**) आत्मना (**पान्ति**) (**शश्वतः**) निरन्तराः॥ २॥

अन्वयः-ये स्थिरस्य शवसो धृष्णुया सखायस्सन्ति ते हि त्मना यामन् धृषद्विन आ पान्ति ये यामन् प्रवृत्ताः सन्ति ते शश्वतः पथिकान् रक्षन्ति॥ २॥

भावार्थः-विदुषामेव मित्रत्वं रक्षणं स्थिरं भवति नान्यस्य॥ २॥

पदार्थः-जो (**स्थिरस्य**) स्थिर (**शवसः**) बल के (**धृष्णुया**) दृढ़त्वादि गुणों से युक्त (**सखायः**) मित्र (**सन्ति**) हैं (**ते**) वे (**हि**) ही (**त्मना**) आत्मा से (**यामन्**) मार्ग में (**धृषद्विनः**) बहुत दृढ़त्व आदि गुणों से युक्त (**आ, पान्ति**) अच्छे प्रकार पालन करते हैं और जो मार्ग में प्रवृत्त है (**ते**) वे (**शश्वतः**) निरन्तर पथिकों की रक्षा करते हैं॥ २॥

भावार्थः-विद्वानों का ही मित्रपन और रक्षण स्थिर होता है, अन्य किसी का नहीं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ते स्यन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः।
मरुतामधा महो दिवि क्षमा च मन्महे॥ ३॥[१]

ते। स्यन्द्रासः। न। उक्षणः। अति। स्कन्दन्ति। शर्वरीः। मरुताम्। अध। महः। दिवि। क्षमा। च। मन्महे॥ ३॥

पदार्थः-(**ते**) (**स्यन्द्रासः**) किञ्चिच्चेष्टमानाः (**न**) इव (**उक्षणः**) सेचकान् (**अति**) (**स्कन्दन्ति**) (**शर्वरीः**) रात्रीः (**मरुताम्**) मनुष्याणाम् (**अधा**) अत्र **निपातस्य चे**ति दीर्घः। (**महः**) महति (**दिवि**) प्रकाशे (**क्षमा**) (**च**) (**मन्महे**) विजानीमः॥ ३॥

अन्वयः-हे विद्वन्! ये महो दिवि मरुतां सन्निधौ क्षमाऽधा च स्यन्द्रासो नोक्षणः शर्वरीरति ष्कन्दन्ति तान्वयं मन्महे ते सर्वैर्मनुष्यैर्विज्ञातव्याः॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या अहर्निशं पुरुषार्थमनुतिष्ठन्ति ते दुःखमुल्लङ्घन्ते॥ ३॥

पदार्थः-हे विद्वन्! जो (**महः**) बड़े (**दिवि**) प्रकाश और (**मरुताम्**) मनुष्यों के समीप में (**क्षमा**) (**अधा, च**) और इसके अनन्तर (**स्यन्द्रासः**) कुछ चेष्टा करते हुओं के (**न**) सदृश (**उक्षणः**) सेवन करने

---

१. अन्यत्र 'स्पन्द्रासः' दृश्यते।

वा **(शर्वरीः)** रात्रियों को **(अति, स्कन्दन्ति)** अत्यन्त प्राप्त होते हैं, उनको हम लोग **(मन्महे)** विशेष प्रकार से जानते हैं **(ते)** वे सब मनुष्यों को जानने योग्य हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य दिन-रात्रि पुरुषार्थ करते हैं, वे दुःख का उल्लंघन करते हैं॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया।

विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः॥४॥

मरुत्ऽसु। वः। दधीमहि। स्तोमम्। यज्ञम्। च। धृष्णुऽया। विश्वे। ये। मानुषा। युगा। पान्ति। मर्त्यम्। रिषः॥४॥

पदार्थः-**(मरुत्सु)** मनुष्येषु **(वः)** युष्मान् **(दधीमहि) (स्तोमम्)** श्लाघनीयम् **(यज्ञम्)** पुरुषार्थम् **(च) (धृष्णुया)** दृढानि **(विश्वे)** सर्वे **(ये) (मानुषा)** मनुष्याणामिमानि **(युगा)** युगानि वर्षाणि **(पान्ति)** रक्षन्ति **(मर्त्यम्)** मनुष्यम् **(रिषः)** हिंसकात्॥४॥

अन्वयः-हे मनुष्या! ये विश्वे भवन्तो धृष्णुया मानुषा युगा स्तोमं यज्ञं मर्त्यं च रिषः पान्ति तान् वो वयं मरुत्सु दधीमहि॥४॥

भावार्थः-ये दैविकमानुषाणि युगानि वर्षाणि च जानन्ति ते गणितविद्याविदो जायन्ते॥४॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(विश्वे)** सब आप लोग **(धृष्णुया)** दृढ़ **(मानुषा)** मनुष्यों के सम्बन्धी **(युगा)** वर्षों को **(स्तोमम्)** प्रशंसा करने योग्य **(यज्ञम्)** पुरुषार्थ को **(मर्त्यम्, च)** और मनुष्य को **(रिषः)** हिंसक के **(पान्ति)** रखते अर्थात् बचाते हैं, उन **(वः)** आप लोगों को हम लोग **(मरुत्सु)** मनुष्यों में **(दधीमहि)** धारण करें॥४॥

भावार्थः-जो देव और मनुष्यसम्बन्धी युगों और वर्षों को जानते हैं, वे गणितविद्या के जानने वाले होते हैं॥४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अर्हन्तो ये सुदानवो नरो असामिशवसः।

प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः॥५॥८॥

अर्हन्तः। ये। सुऽदानवः। नरः। असामिऽशवसः। प्र। यज्ञम्। यज्ञियेभ्यः। दिवः। अर्च। मरुत्ऽभ्यः॥५॥

पदार्थः-(**अर्हन्तः**) योग्यतां प्राप्नुवन्तः (**ये**) (**सुदानवः**) उत्तमदानाः (**नरः**) (**असामिशवसः**) अखण्डितबलाः (**प्र**) (**यज्ञम्**) सत्काराख्यं कर्म (**यज्ञियेभ्यः**) यज्ञसम्पादकेभ्यः (**दिवः**) कामयमानाः (**अर्चा**) सत्कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**मरुद्भ्यः**) मनुष्येभ्यः॥५॥

अन्वयः-हे विद्वन्! यज्ञियेभ्यो यज्ञमर्हन्तः सुदानवोऽसामिशवसो नरो दिवो मरुद्भ्यो यज्ञं साध्नुवन्ति ताँस्त्वं प्रार्चा॥५॥

भावार्थः-मनुष्या यावद्बलं वर्द्धितुमिच्छेयुस्तावदेव वर्द्धितुं शक्यम्॥५॥

पदार्थः-हे विद्वन्! (**ये**) जो (**यज्ञियेभ्यः**) यज्ञ करनेवालों के लिये (**यज्ञम्**) सत्कार नामक कर्म्म की (**अर्हन्तः**) योग्यता को प्राप्त होते हुए (**सुदानवः**) उत्तम दान देने वाले (**असामिशवसः**) अखण्डित बलयुक्त (**नरः**) जन (**दिवः**) कामना करते हुए (**मरुद्भ्यः**) मनुष्यों के लिये सत्कार नामक कर्म्म को सिद्ध करते हैं, उनका आप (**प्र, अर्चा**) सत्कार करिये॥५॥

भावार्थः-मनुष्य जितने बल बढ़ाने की इच्छा करें, उतना ही बढ़ सकता है॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत।
अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः॥६॥

आ। रुक्मैः। आ। युधा। नरः। ऋष्वाः। ऋष्टीः। असृक्षत। अनु। एनान्। अह। विऽद्युतः। मरुतः। जज्झतीःऽइव। भानुः। अर्त। त्मना। दिवः॥६॥

पदार्थः-(**आ**) समन्तात् (**रुक्मैः**) रोचमानैः प्रदीप्तैः (**आ**) (**युधा**) युद्धेन (**नरः**) नायकाः (**ऋष्वाः**) महान्तः (**ऋष्टीः**) प्राप्ताः सेनाजनाः (**असृक्षत**) सृजन्तु (**अनु**) (**एनान्**) (**अह**) विनिग्रहे (**विद्युतः**) (**मरुतः**) वायो (**जज्झतीरिव**) शब्दकारिण्यः शीघ्रगतयो वा ता इव (**भानुः**) दीप्तिः (**अर्त्त**) प्राप्नुत (**त्मना**) आत्मना (**दिवः**) कामयमानाः॥६॥

अन्वयः-हे विद्वांसः! यथा ऋष्वा नरो युधर्ष्टीरान्वसृक्षत। एनानह जज्झतीरिव विद्युतो मरुतो दिवो भानुस्त्मना ज्ञातुं योग्याः सन्ति तान् यूयं रुक्मैराऽऽर्त्त॥६॥

भावार्थः-विद्वांसो मनुष्यान् विद्युदादिविद्याः प्रापयन्तु॥६॥

पदार्थः-हे विद्वानो! जैसे (**ऋष्वाः**) बड़े (**नरः**) अग्रणी जन (**युधा**) युद्ध से (**ऋष्टीः**) प्राप्त हुए सेनाओं के जन (**आ, अनु, असृक्षत**) सब प्रकार अनुकूल उत्पन्न करें और (**एनान्**) इनको (**अह**) ग्रहण करने में (**जज्झतीरिव**) शब्द करने वा शीघ्र चलनेवालियों के सदृश (**विद्युतः**) बिजुली और (**मरुतः**) पवन की (**दिवः**) कामना करते हुए जन और (**भानुः**) दीप्ति (**त्मना**) आत्मा से जानने योग्य हैं, उनको आप (**रुक्मैः**) रोचमान प्रदीप्तों से (**आ**) सब प्रकार (**अर्त्त**) प्राप्त हूजिये॥६॥

भावार्थः-विद्वान् जन मनुष्यों के लिये बिजुली आदि विद्याओं को प्राप्त करावें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

ये वा॑वृधन्त॒ पार्थि॑वा॒ य उ॒रावन्तरि॑क्ष॒ आ।

वृ॒जने॑ वा न॒दीना॑ स॒धस्थे॑ वा म॒हो दि॒वः॥७॥

ये। व॒वृ॒धन्त॑। पार्थि॑वाः। ये। उ॒रौ। अ॒न्तरि॑क्षे। आ। वृ॒जने॑। वा॒। न॒दीना॑म्। स॒धऽस्थे॑। वा। म॒हः। दि॒वः॥७॥

पदार्थः-(**ये**) (**वावृधन्त**) भृशं वर्धन्ते (**पार्थिवाः**) पृथिव्यां विदिताः (**ये**) (**उरौ**) बहुरूपे (**अन्तरिक्षे**) आकाशे (**आ**) (**वृजने**) वृजन्ति यस्मिँस्तस्मिन् (**वा**) (**नदीनाम्**) (**सधस्थे**) समानस्थाने (**वा**) (**महः**) महान्तः (**दिवः**) कामयानाः॥७॥

अन्वयः-हे मनुष्या! य उरावन्तरिक्षे पार्थिवा वावृधन्त ये वा नदीनां सधस्थे वृजने वाऽऽवावृधन्त महो दिवो वावृधन्त तान् यूयं विजानीत॥७॥

भावार्थः-ये पृथिव्यादिविद्यां जानन्ति ते सर्वतो वर्धन्ते॥७॥

पदार्थः-हे मनुष्यो! (**ये**) जो (**उरौ**) बहुत रूप वाले (**अन्तरिक्षे**) आकाश में (**पार्थिवः**) पृथिवी में जाने गये पदार्थ (**वावृधन्त**) अत्यन्त वृद्धि को प्राप्त होते हैं (**ये, वा**) अथवा जो (**नदीनाम्**) नदियों के (**सधस्थे**) समान स्थान में (**वृजने, वा**) वा वर्जते हैं जिसमें उसमें (**आ**) सब प्रकार अत्यन्त वृद्धि को प्राप्त होते हैं और (**महः**) महान् (**दिवः**) कामना करने वाले वृद्धि को प्राप्त होते हैं, उनको आप लोग विशेष करके जानिये॥७॥

भावार्थः-जो पृथिवी आदिकों की विद्या को जानते हैं, वे सब प्रकार वृद्धि को प्राप्त होते हैं॥७॥

पुनर्विद्वान् किं कुर्यादित्याह॥

फिर विद्वान् क्या करे, इस विषय को कहते हैं॥

शर्धो॑ मारु॒तमुच्छं॑स स॒त्यश॑वस॒मृभ्व॑सम्।

उ॒त स्म॒ ते शु॒भे नरः॒ प्र स्य॒न्द्रा यु॑ज॒त॒ त्मना॑॥८॥

शर्धः॑। मारु॑तम्। उत्। शं॒स॒। स॒त्यऽश॑वसम्। ऋभ्व॑सम्। उ॒त। स्म॒। ते। शु॒भे। नरः॑। प्र। स्य॒न्द्राः। यु॒ज॒त॒। त्मना॑॥८॥

पदार्थः-(**शर्धः**) बलम् (**मारुतम्**) मनुष्याणामिदम् (**उत्**) (**शंस**) स्तुहि (**सत्यशवसम्**) सत्यं शवो बलं यस्य (**ऋभ्वसम्**) ऋभुं मेधाविनमसते गृह्णाति तम्। **ऋभुरिति मेधाविनामसु पठितम्।** (निघं०३.१५) अस-गत्यादिः। (**उत**) (**स्म**) (**ते**) (**शुभे**) (**नरः**) नेतारो मनुष्याः (**प्र**) (**स्यन्द्राः**) धैर्य्यगतयः (**युजत**) (**त्मना**) आत्मना॥८॥

अन्वयः-हे विद्वँस्त्व मारुतं शर्धः सत्यशवसमृभ्वसमुच्छंस। उत स्म ते स्यन्द्रा नरो यूयं शुभे त्मना परमात्मानं प्र युजत॥८॥

भावार्थः-मनुष्यैरुत्तमं बलं परमात्मा च सततं प्रशंसनीयाः॥८॥

पदार्थः-हे विद्वन्! आप **(मारुतम्)** मनुष्यों के सम्बन्धी इस **(शर्धः)** बल और **(सत्यशवसम्)** सत्य बल जिसका उस **(ऋभ्वसम्)** बुद्धिमान् को ग्रहण करने वाले की **(उत्, शंस)** अच्छे प्रकार स्तुति करो **(उत)** और **(स्म)** निश्चित **(ते)** वे **(स्यन्द्राः)** धीरतायुक्त गमन वाले **(नरः)** नायक आप लोग **(शुभे)** उत्तम कार्य में **(त्मना)** आत्मा से परमात्मा को **(प्र, युजत)** प्रयुक्त करो॥८॥

भावार्थः-मनुष्यों को चाहिये कि उत्तम बल और परमात्मा की निरन्तर प्रशंसा करें॥८॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

उत स्म ते परुष्ण्यामूर्णा वसत शुन्ध्यवः।

उत पव्या रथानामद्रिं भिन्दन्त्योजसा॥९॥

उत। स्म। ते। परुष्ण्याम्। ऊर्णाः। वसत। शुन्ध्यवः। उत। पव्या। रथानाम्। अद्रिम्। भिन्दन्ति। ओजसा॥९॥

पदार्थः-(**उत**) अपि (**स्म**) एव (**ते**) (**परुष्ण्याम्**) पालनकर्त्र्याम् (**ऊर्णाः**) रक्षिताः (**वसत**) (**शुन्ध्यवः**) शोधिकाः (**उत**) (**पव्या**) रथचक्राणां रेखाः (**रथानाम्**) (**अद्रिम्**) मेघम् (**भिन्दन्ति**) (**ओजसा**) बलेन॥९॥

अन्वयः-हे मनुष्या! याः परुष्ण्यां शुन्ध्यवो रथानां पव्या इवौजसाऽद्रिं भिन्दन्ति। उत वर्षन्ति तास्ते स्युः। उत स्मोर्णाः सन्तोऽत्र सत्कृता यूयं वसत॥९॥

भावार्थः-यथा मेघा वर्षन्तः पृथिवीं विदीर्णन्ति तथैव सत्पुरुषसङ्गोऽशुद्धिं छिनत्ति॥९॥

पदार्थः-हे मनुष्यो! जो **(परुष्ण्याम्)** पालन करने वाली में **(शुन्ध्यवः)** शोधन करने वाली **(रथानाम्)** वाहनों के **(पव्या)** रथों के चक्रों पहियों की लीकों के सदृश **(ओजसा)** बल से **(अद्रिम्)** मेघ को **(भिन्दन्ति)** तोड़ती हैं **(उत)** और वर्षाती हैं, वे **(ते)** तुम्हारे लिये हों **(उत)** और **(स्म)** निश्चित **(ऊर्णाः)** रक्षित हुए यहाँ सत्कार किये गये आप लोग **(वसत)** वसिये॥९॥

भावार्थः-जैसे मेघ वर्षते हुए पृथिवी को विदीर्ण करते हैं, वैसे ही श्रेष्ठ पुरुषों का सङ्ग अशुद्धि का नाश करता है॥९॥

मनुष्यैः सर्वे विद्याधर्ममार्गा अन्वेषणीया इत्याह॥

मनुष्यों को समस्त विद्या धर्ममार्ग ढूंढने चाहियें, इस विषय को कहते हैं॥

आपथयो विपथयोन्तस्पथा अनुपथाः।

एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते॥ १०॥ ९॥

आऽपथयः। विऽपथयः। अन्तःऽपथा। अनुऽपथाः। एतेभिः। मह्यम्। नामऽभिः। यज्ञम्। विऽस्तारः। ओहते॥ १०॥

पदार्थः-(आपथयः) समन्तादभिमुखः पन्था येषान्ते **(विपथयः)** विविधा विरुद्धा वा पन्थानो येषान्ते **(अन्तस्पथा)** अन्तराभ्यन्तरे पन्था येषान्ते **(अनुपथाः)** अनुकूलः पन्था येषान्ते **(एतेभिः)** मार्गैर्मार्गस्थैर्वा **(मह्यम्) (नामभिः)** संज्ञाभिः **(यज्ञम्)** विद्वत्सत्कारादिकम् **(विष्टारः)** प्रसारः **(ओहते)** प्राप्नोति॥ १०॥

अन्वयः-हे मनुष्या! आपथयो विपथयोऽन्तस्पथाऽनुपथा एतेभिर्नामभिर्मह्यं यज्ञं विष्टार ओहते॥ १०॥

भावार्थः-हे मनुष्या! यूयं सर्वविद्यातज्जन्यक्रियाकौशलमार्गान् यथावत् साक्षात् कृत्याऽन्यानपि सम्यक् विज्ञापयत॥ १०॥

पदार्थः-हे मनुष्यो! **(आपथयः)** सब ओर अभिमुख मार्ग जिनका वे और **(विपथयः)** अनेक प्रकार के वा विरुद्ध मार्ग जिनके वे और **(अन्तस्पथा)** भीतर मार्ग जिनके वे और **(अनुपथाः)** अनुकूल मार्ग जिनका वे **(एतेभिः)** इन मार्गों में स्थित हुओं और **(नामभिः)** संज्ञाओं से **(मह्यम्)** मेरे लिये **(यज्ञम्)** विद्वानों के सत्कार आदि कर्म को **(विष्टारः)** विस्तार **(ओहते)** प्राप्त होता है॥ १०॥

भावार्थः-हे मनुष्यो! आप लोग सम्पूर्ण विद्याओं और उनसे उत्पन्न क्रिया हुए क्रिया कौशल मार्गों को यथावत् प्रत्यक्ष करके अन्यों को भी उत्तम प्रकार जनाओ सिखलाओ॥ १०॥

मनुष्याः क्रमेण विद्यादिव्यवहारं प्राप्नुयुरित्याह॥

मनुष्य क्रम से विद्यादि व्यवहार को प्राप्त होवें, इस विषय को कहते हैं॥

अधा नरो न्योहतेऽधा नियुत ओहते।

अधा पारावता इति चित्रा रूपाणि दर्श्या॥ ११॥

अधः। नरः। नि। ओहते। अधः। निऽयुतः। ओहते। अधः। पारावताः। इति। चित्रा। रूपाणि। दर्श्या॥ ११॥

पदार्थः-(अधा) अथ। अत्र सर्वत्र **निपातस्य च**ेति दीर्घः। **(नरः)** विद्यासु नायकः **(नि)** निश्चयेन **(ओहते)** प्राप्नोति प्रापयति वा **(अधा) (नियुतः)** निश्चितवाय्वादिगतिमान् **(ओहते) (अधा) (पारावताः)** पारावति दूरदेशे भवाः **(इति)** अनेन प्रकारेण **(चित्रा)** चित्राण्यद्भुतानि **(रूपाणि) (दर्श्या)** द्रष्टुं योग्यानि॥ ११॥

अन्वयः-हे मनुष्या! अधा यो नरो विद्याकार्य्याणि न्योहतेऽधा नियुत ओहतेऽधा पारावता दर्श्या चित्रा रूपाणीति साक्षात्करोति स कृतकृत्यो जायते॥ ११॥

भावार्थः-मनुष्यैः पुरस्ताद्ब्रह्मचर्येण विद्या अधीत्य तदनन्तरं कार्य्यरचनकौशलं साक्षात्कृत्य पुनरनुमानेन दूरस्थानामदृश्यानां पदार्थानां विज्ञानं कृत्वाऽश्चर्य्याणि कर्माणि कर्त्तव्यानि॥ ११॥

पदार्थः-हे मनुष्यो! **(अधा)** इसके अनन्तर जो **(नरः)** विद्याओं में अग्रणी जन विद्याओं के कार्यों को **(नि)** निश्चय करके **(ओहते)** प्राप्त होते हैं, और **(अधा)** इसके अनन्तर **(नियुतः)** निश्चित वायु आदि गमन वाला **(ओहते)** प्राप्त होता वा प्राप्त कराता है **(अधा)** इसके अनन्तर **(पारावता)** दूर देश में होने वालो **(दर्श्या)** देखने के योग्य **(चित्रा)** अद्भुत **(रूपाणि)** रूपों के **(इति)** इस प्रकार से प्रत्यक्ष करता है, वह कृत कृत्य होता है॥११॥

भावार्थः-मनुष्यों में चाहिये कि पहिले ब्रह्मचर्य्य से विद्याओं को पढ़कर उसके अनन्तर कार्य्यों के रचने में प्रवीणता को प्रत्यक्ष करके फिर अनुमान से दूर में स्थित अदृश्य पदार्थों के विज्ञान को करके आश्चर्य्ययुक्त कार्य्य करें॥११॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

छन्दःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः।

ते मे के चिन्न तायव ऊमा आसन् दृशि त्विषे॥१२॥

छन्दःस्तुभः। कुभन्यवः। उत्सम्। आ। कीरिणः। नृतुः ते। मे। के। चित्। न। तायवः। ऊमाः। आसन्। दृशि। त्विषे॥१२॥

पदार्थः-**(छन्दःस्तुभः)** ये छन्दोभिः स्तोभनं स्तवनं कुर्वन्ति **(कुभन्यवः)** आत्मनः कुभनमुन्दनमिच्छवः **(उत्सम्)** कूपमिव **(आ)** समन्तात् **(कीरिणः)** विक्षेपकाः **(नृतुः)** नर्त्तक इव **(ते)** **(मे)** मम **(के)** **(चित्)** अपि **(न)** **(तायवः)** स्तेनाः **(ऊमाः)** सर्वस्य रक्षणादिकर्त्तारः **(आसन्)** भवेयुः **(दृशि)** दर्शके **(त्विषे)** शरीरात्मदीप्तिबलाय॥१२॥

अन्वयः-ये के चिच्छन्दःस्तुभ उत्समिव कुभन्यव ऊमा दृशि मे त्विष आसँस्ते नृतुरिवाऽऽकीरिणस्तायवो न स्युः॥१२॥

भावार्थः-हे मनुष्या! येऽन्येषां विक्षेपं तायवं चाऽकृत्वा तृषातुराय जलमिव शान्तिप्रदा भूत्वा सर्वेषां शरीरात्मबलं वर्धयन्ति ते एवाप्ता भवन्ति॥१२॥

पदार्थः-जो **(के)** कोई **(चित्)** भी **(छन्दःस्तुभः)** छन्दों से स्तुति करने वाले **(उत्सम्)** कूप के सदृश **(कुभन्यवः)** अपने को आर्द्रपन की इच्छा करते हुए **(ऊमाः)** सब के रक्षण आदि करने वाले **(दृशि)** दर्शक में **(मे)** मेरे **(त्विषे)** शरीर और आत्मा के प्रकाश और बल के लिये **(आसन्)** होवें **(ते)** वे **(नृतुः)** नाचने वाले के सदृश **(आ)** सब ओर से **(कीरिणः)** विक्षेप व्याकुल करने वाले **(तायवः)** चोर जन **(न)** न होवें॥१२॥

भावार्थः-हे मनुष्यो! जो अन्य जनों के विक्षेप और चोरी न करके जैसे पिपासा से व्याकुल के लिये जल वैसे शान्ति के देने वाले होकर सब के शरीर और आत्मा के बल को बढ़ाते हैं, वे ही श्रेष्ठ यथार्थवक्ता होते हैं॥१२॥

मनुष्यैः केषां सङ्गः कर्त्तव्य इत्याह॥

मनुष्यों को किसका संग करना चाहिये, इस विषय को कहते हैं॥

य ऋ॒ष्वा ऋ॒ष्टिवि॑द्युतः क॒वय॒ः सन्ति॑ वे॒धस॑ः।

तमृ॑षे मारु॒तं ग॒णं न॑म॒स्या र॒मया॑ गि॒रा॥१३॥

ये। ऋ॒ष्वाः। ऋ॒ष्टिऽवि॑द्युतः। क॒वय॑ः। सन्ति॑। वे॒धस॑ः। तम्। ऋ॒षे॒। मारु॒तम्। ग॒णम्। न॒म॒स्य। र॒मय॑। गि॒रा॥१३॥

पदार्थः-**(ये)** **(ऋष्वाः)** महान्तो महाशयाः **(ऋष्टिविद्युतः)** विद्युति ऋष्टिर्विज्ञानं येषान्ते **(कवयः)** सकलशास्त्रेषु निपुणाः **(सन्ति)** **(वेधसः)** मेधाविनः **(तम्)** **(ऋषे)** वेदार्थवित् **(मारुतम्)** विदुषां मनुष्याणामिमम् **(गणम्)** समूहम् **(नमस्या)** सत्कुरु। अत्र **संहितायामि**ति दीर्घः। **(रमया)** क्रीडयाऽऽनन्दय। अत्रापि **संहितायामि**ति दीर्घः। **(गिरा)** सुशिक्षितया सत्यया कोमलया वाचा॥१३॥

अन्वयः-हे ऋषे! य ऋष्टिविद्युतः कवय ऋष्वा वेधसः सन्ति तान् गिरा नमस्याऽनेन तं मारुतं गणं रमया॥१३॥

भावार्थः-ये महाशया आप्तान् सेवित्वा सत्कृत्य सुशिक्षां प्राप्य सत्यासत्यविवेकायोपदेशं कृत्वा सर्वान् मनुष्यानानन्दयन्ति ते सर्वैः सत्कर्त्तव्या भवन्ति॥१३॥

पदार्थः-हे **(ऋषे)** वेदार्थ के जानने वाले! **(ये)** जो **(ऋष्टिविद्युतः)** ऋष्टिविद्युत् अर्थात् बिजुली में विज्ञान जिनका वे **(कवयः)** सम्पूर्ण शास्त्रों में निपुण **(ऋष्वाः)** बड़े महाशय **(वेधसः)** बुद्धिमान् जन **(सन्ति)** हैं उनका **(गिरा)** उत्तम प्रकार शिक्षित सत्य कोमल वाणी से **(नमस्या)** सत्कार करिये और इससे **(तम्)** उस **(मारुतम्)** विद्वान् मनुष्यों के **(गणम्)** समूह को **(रमया)** क्रीड़ा से आनन्दित करिये॥१३॥

भावार्थः-जो महाशय यथार्थवक्त जनों की सेवा और सत्कार कर उत्तम शिक्षा को प्राप्त होकर सत्य और असत्य के विवेक के लिये उपदेश करके सब मनुष्यों को आनन्दित करते हैं, वे सब लोगों से सत्कार पाने योग्य होते हैं॥१३॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अच्छ॑ ऋषे मारु॒तं ग॒णं दा॒ना मि॒त्रं न यो॒षणा॑।

दि॒वो वा॑ धृष्णव॒ ओज॑सा स्तु॒ता धी॒भिर॑षण्यत॥१४॥

अच्छ॑। ऋ॒षे॒। मारु॑तम्। ग॒णम्। दा॒ना। मि॒त्रम्। न। यो॒षणा॑। दि॒वः। वा॒। धृ॒ष्ण॒वः॒। ओज॑सा। स्तु॒ताः। धी॒भिः। इ॒ष॒ण्य॒त॒॥ १४॥

पदार्थः-(अच्छ) (ऋषे) विद्वन् **(मारुतम्)** मरुतां मनुष्याणामिमम् **(गणम्)** समूहम् **(दाना)** दानानि **(मित्रम्)** सखायम् **(न)** इव **(योषणा)** स्त्री **(दिवः)** कामयमानाः **(वा) (धृष्णवः)** धृष्टाः प्रगल्भा दृढनिश्चयाः **(ओजसा)** बलादिना **(स्तुताः)** प्रशंसिताः **(धीभिः)** प्रज्ञाभिः **(इषण्यत)** प्राप्नुवन्ति॥ १४॥

अन्वयः-हे ऋषे! त्वं योषणा मित्रं न मारुतं गणमच्छ प्राप्नुहि वा यथा दिवो धृष्णवः स्तुता धीभिरोजसा दाना मारुतं गणमिषण्यत तथा सर्वे प्राप्नुवन्तु॥ १४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। सर्वेऽध्यापका अध्येतारश्च मित्रवद्वर्त्तित्वा वाय्वादि-पदार्थविद्यां सङ्गृह्णन्तु॥ १४॥

पदार्थः-हे **(ऋषे)** विद्वन्! आप **(योषणा)** स्त्री और **(मित्रम्)** मित्र के **(न)** सदृश **(मारुतम्)** मनुष्यसम्बन्धी **(गणम्)** समूह को **(अच्छ)** उत्तम प्रकार प्राप्त हूजिये **(वा)** वा जैसे **(दिवः)** कामना करते हुए **(धृष्णवः)** धृष्ट, प्रगल्भ, दृढ़ निश्चय वाले **(स्तुताः)** प्रशंसितजन **(धीभिः)** बुद्धियों और **(ओजसा)** बल आदि से **(दाना)** दानों को देकर मनुष्यसम्बन्धी समूह को **(इषण्यत)** प्राप्त होते हैं, वैसे सब प्राप्त हों॥ १४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। सम्पूर्ण अध्यापक और पढ़ने वाले मित्र के सदृश परस्पर वर्त्ताव करके वायु आदि पदार्थों की विद्या का अच्छे प्रकार ग्रहण करें॥ १४॥

पुनर्मनुष्या विद्वत्सङ्गेन विद्याः प्राप्नुवन्त्वित्याह॥

फिर मनुष्य विद्वानों के संग से विद्याओं को प्राप्त हों, इस विषय को कहते हैं॥

नू म॑न्वा॒न एषां॑ दे॒वाँ अच्छा॒ न व॒क्षणा॑।
दा॒ना स॑चेत सू॒रिभि॒र्यामं॑श्रु॒तेभि॒रञ्जि॑भिः॥ १५॥

नु। म॒न्वा॒नः। ए॒षा॒म्। दे॒वान्। अच्छ॑। न। व॒क्षणा॑। दा॒ना। स॒चे॒त॒। सू॒रिऽभिः॑। याम॑ऽश्रुतेभिः। अ॒ञ्जिऽभिः॑॥ १५॥

पदार्थः-(**नू**) **(मन्वानः)** मननशीलः **(एषाम्)** मनुष्याणां मध्ये **(देवान्)** दिव्यान् विदुषः पदार्थान् वा **(अच्छा)** अत्र **संहितायामि**ति दीर्घः। **(न)** निषेधे **(वक्षणा)** वहनेन **(दाना)** दानानि **(सचेत)** सम्बध्नीत **(सूरिभिः)** विद्वद्भिः **(यामश्रुतेभिः)** यामाः श्रुता यैस्तैः **(अञ्जिभिः)** विद्याशुभगुणप्रकटकारकैः॥ १५॥

अन्वयः-हे मनुष्या! यो मन्वानो यामश्रुतेभिरञ्जिभिः सूरिभिः सहैषां मध्ये देवानच्छाऽऽप्नोति वक्षणा दाना करोति स नू दारिद्र्यमज्ञानञ्च नाप्नोति तं यूयं सचेत॥ १५॥

भावार्थः-ये मनुष्या विद्वत्सङ्गप्रिया विद्यादानरुचयः स्युस्त एव सद्यो विद्यामाप्नुयुः॥ १५॥

पदार्थः-हे मनुष्यो! जो **(मन्वानः)** मननशील पुरुष **(यामश्रुतेभिः)** याम प्रहर सुने गये जिनसे उन **(अञ्जिभिः)** विद्या और श्रेष्ठ गुणों के प्रकट करने वाले **(सूरिभिः)** विद्वानों के साथ **(एषाम्)** इन

मनुष्यों के मध्य में **(देवान्)** श्रेष्ठ विद्वानों वा श्रेष्ठ पदार्थों को **(अच्छा)** उत्तम प्रकार प्राप्त होता और **(वक्षणा)** प्रवाह से **(दाना)** दानों को करता है वह **(नू)** निश्चय दारिद्र्य और अज्ञान को **(न)** नहीं प्राप्त होता है, उसको आप लोग **(सचेत)** सम्बन्धित करिये॥१५॥

भावार्थः-जो मनुष्य विद्वानों के संग को प्रिय मानने और विद्या के दान में रुचि करने वाले होवें, वे ही शीघ्र विद्या को प्राप्त होवें॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्र ये मे॑ बन्ध्वे॒षे गां वोच॑न्त सू॒रय॒: पृश्नि॑ं वोचन्त मा॒तर॑म्।

अधा॑ पि॒तर॑मि॒ष्मिणं॑ रु॒द्रं वो॑चन्त॒ शिक्व॑सः॥१६॥

प्र। ये। मे॒। ब॒न्धु॒ऽए॒षे। गाम्। वोच॑न्त। सू॒रय॑ः। पृश्नि॑म्। वो॒च॒न्त॒। मा॒तर॑म्। अध॑। पि॒तर॑म्। इ॒ष्मिण॑म्। रु॒द्रम्। वो॒च॒न्त॒। शिक्व॑सः॥१६॥

पदार्थः-**(प्र)** **(ये)** **(मे)** मम **(बन्ध्वेषे)** बन्धूनामिच्छायै **(गाम्)** वाचम् **(वोचन्त)** ब्रुवन्ति **(सूरयः)** विद्वांसः **(पृश्निम्)** अन्तरिक्षम् **(वोचन्त)** **(ब्रुवन्ति)** **(मातरम्)** जननीम् **(अधा)** अथ। अत्र **निपातस्य चे**ति दीर्घः। **(पितरम्)** पालकं जनकम् **(इष्मिणम्)** इष्मो बहुविधो **[**बलं**]** विद्यते यस्य तम् **(रुद्रम्)** दुष्टानां भयप्रदम् **(वोचन्त)** उपदिशेयुः **(शिक्वसः)** शक्तिमन्तः॥१६॥

अन्वयः-ये सूरयो मे बन्ध्वेषे गां प्र वोचन्त पृश्निं मातरं वोचन्त। अधा शिक्वस इष्मिणं पितरं रुद्रं वोचन्त ते मया सत्कर्त्तव्याः॥१६॥

भावार्थः-मनुष्यैरेवं वेदितव्यं येऽस्मभ्यं विद्यां सुशिक्षां दद्युस्तेऽस्माभिः सदा माननीया भवेयुः॥१६॥

पदार्थः-**(ये)** जो **(सूरयः)** विद्वान् जन **(मे)** मेरी **(बन्ध्वेषे)** बन्धुओं की इच्छा के लिये **(गाम्)** वाणी को **(प्र, वोचन्त)** उत्तम प्रकार उच्चारण करते हैं और **(पृश्निम्)** अन्तरिक्ष और **(मातरम्)** माता का **(वोचन्त)** उपदेश करते हैं **(अधा)** इसके अनन्तर **(शिक्वसः)** सामर्थ्य वाले **(इष्मिणम्)** बहुत प्रकार का बल जिसका उस **(पितरम्)** पालन करने वाले पिता और **(रुद्रम्)** दुष्टों के भय देने वाले का **(वोचन्त)** उपदेश करते हैं, वे मुझ से सत्कार करने योग्य हैं॥१६॥

भावार्थः-मनुष्यों को इस प्रकार जानना चाहिये कि जो हम लोगों के लिये विद्या और उत्तम शिक्षा को देवें, वे हम लोगों से सदा आदर करने योग्य होवें॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स॒प्त मे॑ स॒प्त शा॒किन॒ एक॑मेका श॒ता द॑दुः।

यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे॥ १७॥ १०॥

सप्त। मे। सप्त। शाकिनः। एकम्ऽएका। शता। ददुः। यमुनायाम्। अधि। श्रुतम्। उत्। राधः। गव्यम्। मृजे। नि। राधः। अश्व्यम्। मृजे॥ १७॥

पदार्थः-(सप्त) सप्तविधा मरुद्गणा मनुष्यभेदाः **(मे)** मम **(सप्त)** **(शाकिनः)** शक्तिमन्तः **(एकमेका)** एकमेकानि **(शता)** शतानि **(ददुः)** प्रयच्छेयुः **(यमुनायाम्)** यमनियमान्वितायां क्रियायाम् **(अधि)** **(श्रुतम्)** **(उत्)** **(राधः)** धनम् **(गव्यम्)** गोहितम् **(मृजे)** शुन्धामि **(नि)** नितराम् **(राधः)** द्रव्यम् **(अश्व्यम्)** अश्वेषु साधु **(मृजे)** शुन्धामि॥ १७॥

अन्वयः-हे मनुष्या! यद्राधो यमुनायां मयाधि श्रुतं यद्गव्यमुन्मृजे यदश्व्यं राधो नि मृजे तन्मे सप्त शाकिनः सप्तैकमेका शता ये ददुः तत्ताँश्च यूयं प्राप्नुत विजानीत॥ १७॥

भावार्थः-अत्र जगति मूढो मूढतरो मूढतमो विद्वान् विद्वत्तरो विद्वत्तमोऽनूचानश्च सप्त सप्तविधा मनुष्या भवन्तीति॥ १७॥

अत्र वायुविश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विपञ्चाशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जिस **(राधः)** धन को **(यमुनायाम्)** यम और नियमों से अन्वित क्रिया के बीच मैंने **(अधि, श्रुतम्)** सुना और जो **(गव्यम्)** गौओं के हित को **(उत्, मृजे)** उत्तमता से शुद्ध करता हूं और जो **(अश्व्यम्)** घोड़ों में श्रेष्ठ **(राधः)** द्रव्य को **(नि)** निरन्तर **(मृजे)** स्वच्छ करता हूं वह **(मे)** मेरे **(सप्त)** सात प्रकार के मनुष्यों के भेद और **(शाकिनः)** सामर्थ्य वाले **(सप्त)** सात **(एकमेका)** एक-एक **(शता)** सैकड़ों को जो **(ददुः)** देवें, उसको और उनको आप लोग प्राप्त हूजिये और विशेष करके जानिये॥ १७॥

भावार्थः-इस संसार में मूढ, मूढतर, मूढतम, विद्वान्, विद्वत्तर, विद्वत्तम और अनूचान ये सात प्रकार के मनुष्य होते हैं॥ १७॥

इस सूक्त में वायु और विश्वेदेव के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बावनवां सूक्त और दशवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षोडशर्चस्य त्रिपञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १ भुरिग्गायत्री। ८, १२ गायत्री छन्दः। षड्जः स्वरः। २ निचृद्बृहती। ९ स्वराड्बृहती। १४ बृहतीच्छन्दः। मध्यमः स्वरः। ३ अनुष्टुप् छन्दः। गान्धारः स्वरः। ४, ५ उष्णिक्। १०, १५ विराडुष्णिक्। ११ निचृदुष्णिक्छन्दः। ऋषभः स्वरः। ६, १६ पङ्क्तिः। ७, १३ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्याः किं जानीयुरित्याह॥

अब सोलह ऋचा वाले त्रेपनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अब मनुष्य क्या जानें इस विषय को कहते हैं॥

को वेद॒ जान॑मेषा॒ं को वा॑ पु॒रा सु॒म्नेष्वा॑स म॒रुता॑म्। यद्यु॑यु॒ज्रे कि॑ला॒स्य॑ः॥ १॥

कः। वे॒द॒। जान॑म्। ए॒षा॒म्। कः। वा॒। पु॒रा। सु॒म्नेषु॑। आ॒स॒। म॒रुता॑म्। यत्। यु॒यु॒ज्रे। कि॒ला॒स्य॑ः॥ १॥

पदार्थः-(**कः**) (**वेद**) जानाति (**जानम्**) प्रादुर्भावम् (**एषाम्**) मनुष्याणां वायूनां वा (**कः**) (**वा**) (**पुरा**) पुरस्तात् (**सुम्नेषु**) (**आस**) आस्ते (**मरुताम्**) मनुष्याणां वायूनां वा (**यत्**) (**युयुज्रे**) युञ्जते (**किलास्यः**) निश्चितमास्यं यस्य सः॥ १॥

अन्वयः-हे मनुष्या विद्वांसो वा! यद्युयुज्रे तदेषां मरुतां जानं किलास्यः को वेद को वा सुम्नेषु पुरास॥ १॥

भावार्थः-मनुष्यवाय्वादिपदार्थलक्षणलक्ष्याणि विद्वांस एव ज्ञातुं शक्नुवन्ति नेतरे॥ १॥

पदार्थः-हे मनुष्यो वा विद्वानो! (**यत्**) जो (**युयुज्रे**) युक्त होता है, वह (**एषाम्**) इन (**मरुताम्**) मनुष्यों वा पवनों के (**जानम्**) प्रादुर्भाव को (**किलास्यः**) निश्चित सुख जिसका वह (**कः**) कौन (**वेद**) जानता है (**कः, वा**) अथवा कौन (**सुम्नेषु**) सुखों में (**पुरा**) प्रथम (**आस**) स्थित है॥ १॥

भावार्थः-मनुष्य और वायु आदि पदार्थों के लक्षण और लक्ष्यों को विद्वान् जन ही जानने को समर्थ हो सकते हैं, अन्य नहीं॥ १॥

पुनर्मनुष्याः कथं पृष्ट्वा किं जानीयुरित्याह॥

फिर मनुष्य कैसे पूँछ के क्या जानें, इस विषय को कहते हैं॥

ऐता॒न् रथे॑षु त॒स्थुष॒ः कः शु॑श्राव कु॒था य॑युः।

कस्मै॑ सस्रु॒ः सु॒दासे॒ अन्वा॒पय॒ इळा॑भिर्वृ॒ष्टय॑ः स॒ह॥ २॥

आ। ए॒ता॒न्। रथे॑षु। त॒स्थुष॑ः। कः। शु॒श्रा॒व॒। कु॒था। य॒यु॒ः। कस्मै॑। स॒स्रु॒ः। सु॒ऽदासे॑। अनु॑। आ॒पय॑ः। इळा॑भिः। वृ॒ष्टय॑ः। स॒ह॥ २॥

पदार्थः-(आ) (एतान्) मनुष्यान् वाय्वादीन् **(रथेषु)** विमानादियानेषु **(तस्थुषः)** स्थावरान् काष्ठादिपदार्थान् **(कः) (शुश्राव)** श्रावयति **(कथा)** केन प्रकारेण **(ययुः)** यान्ति **(कस्मै) (सस्रुः)** प्राप्नुवन्ति **(सुदासे)** शोभना दासा यस्य तस्मिन् **(अनु) (आपयः)** य आप्नुवन्ति ते **(इळाभिः)** अन्नादिभिः **(वृष्टयः) (सह)**॥२॥

अन्वयः-हे विद्वांसो! रथेष्वेताँस्तस्थुषः क आ शुश्राव कथा मनुष्या ययुः। कस्मै सस्रुरिळाभि-र्वृष्टय आपयः सह सुदासेऽनुसस्रुः॥२॥

भावार्थः-कश्चिदेव मनुष्यः सर्वं शिल्पविद्याव्यवहारं कर्त्तुं शक्नोति यो व्याप्तान् बहूत्तमगुणान् विद्युदादीन् पदार्थान् यथावज्जानाति॥२॥

पदार्थः-हे विद्वानो! **(रथेषु)** विमान आदि वाहनों से **(एतान्)** इन **(तस्थुषः)** स्थावर काष्ठ आदि पदार्थों को **(कः)** कौन **(आ, शुश्राव)** अच्छे प्रकार सुनाता है और **(कथा)** कैसे मनुष्य **(ययुः)** प्राप्त होते हैं और **(कस्मै)** किस के लिये **(सस्रुः)** प्राप्त होते हैं **(इळाभिः)** अन्न आदिकों से **(वृष्टयः)** वृष्टियां और **(आपयः)** प्राप्त होने वाले पदार्थ **(सह)** एक साथ **(सुदासे)** सुन्दर दास जिसके उसमें **(अनु)** अनुकूल प्राप्त होते हैं॥२॥

भावार्थः-कोई ही मनुष्य सम्पूर्ण शिल्पविद्या के व्यवहार करने को समर्थ होता है, जो व्याप्त और बहुत उत्तम गुण वाले बिजुली आदि पदार्थों को यथावत् जानता है॥२॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

ते म॑ आहु॒र्य आ॑य॒युरु॒प द्युभि॒र्विभि॒र्मदे॑।
नरो॒ मर्या॑ अरे॒पस॑ इ॒मान् पश्य॒न्निति॑ ष्टुहि॥३॥

ते। मे॒। आ॒हुः॒। ये। आ॒ऽय॒युः॒। उप॑। द्युऽभिः॑। विऽभिः॑। मदे॑। नरः॑। मर्याः॑। अरे॒पसः॑। इ॒मान्। पश्य॑न्। इति॑। स्तु॒हि॒॥३॥

पदार्थः-**(ते) (मे)** मम **(आहुः)** कथयेयुः **(ये) (आययुः)** जानीयुः प्राप्नुयुर्वा **(उप) (द्युभिः)** कामयमानैः **(विभिः)** पक्षिभिरिव **(मदे)** आनन्दाय **(नरः)** नेतारः **(मर्य्याः)** मरणधर्माणः **(अरेपसः)** दोषलेपरहिताः **(इमान्) (पश्यन्) (इति) (स्तुहि)** प्रशंस॥३॥

अन्वयः-येऽरेपसो मर्य्या नरो द्युभिर्विभिर्मदे मे सत्यमाहुरायय्युस्त इमाम् कामान् पश्यन्निवाऽऽहुरिति त्वं मामुप स्तुहि॥६॥

भावार्थः-ये विद्वांसोऽहर्निशं परिश्रमेण विद्यां प्राप्याऽन्यानुपदिशेयुस्त आप्ता विज्ञेयाः॥३॥

पदार्थः-**(ये)** जो **(अरेपसः)** दोषों के लेप से रहित **(मर्य्याः)** मरण धर्म्म वाले **(नरः)** नायक मनुष्य **(द्युभिः)** कामना करते हुए **(विभिः)** पक्षियों के सदृश **(मदे)** आनन्द के लिये **(मे)** मेरे सत्य को

(आहुः) कहें और **(आययुः)** जानें वा प्राप्त होवें **(ते)** वे **(इमान्)** इन मनोरथों को **(पश्यन्)** देखते हुए के समान कहें **(इति)** इस प्रकार आप मेरी **(उप, स्तुहि)** समीप में स्तुति करिये॥३॥

भावार्थः-जो विद्वान् जन दिन-रात्रि परिश्रम से विद्या को प्राप्त होकर अन्यों को उपदेश देवें, उनको यथार्थवक्ता जानना चाहिये॥३॥

मनुष्याः पुरुषार्थेन किं किं प्राप्नुयुरित्याह॥

मनुष्य पुरुषार्थ से किस किसको प्राप्तहोवें इस विषय को कहते हैं॥

ये अञ्झिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु। श्राया रथेषु धन्वसु॥४॥

ये। अञ्झिषु। ये। वाशीषु। स्वऽभानवः। स्रक्षु। रुक्मेषु। खादिषु। श्रायाः। रथेषु। धन्वऽसु॥४॥

पदार्थः-**(ये)** **(अञ्झिषु)** प्रकटेषु व्यवहारेषु **(ये)** **(वाशीषु)** वाणीषु **(स्वभानवः)** स्वकीया भानवः प्रकाशा येषान्ते **(स्रक्षु)** माल्येषु मणिषु **(रुक्मेषु)** सुवर्णादिषु **(खादिषु)** भक्षणादिषु **(श्रायाः)** ये शृण्वन्ति श्रावयन्ति वा ते **(रथेषु)** वाहनेषु **(धन्वसु)** स्थलेषु॥४॥

अन्वयः-हे मनुष्या! ये वाशीषु स्वभानवोऽञ्झिषु स्रक्षु रुक्मेषु ये खादिषु रथेषु धन्वसु श्रायाः सन्ति ते विख्याता भवन्ति॥४॥

भावार्थः-ये मनुष्या पुरुषार्थिनः स्युस्ते सर्वतः सत्कृताः सन्तः श्रीमन्तो भवन्ति॥४॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(वाशीषु)** वाणियों में **(स्वभानवः)** अपने प्रकाश जिनके वे **(अञ्झिषु)** प्रकट व्यवहारों में **(स्रक्षु)** माला के मणियों में और **(रुक्मेषु)** सुवर्ण आदिकों में वा **(ये)** जो **(खादिषु)** भक्षण आदिकों में **(रथेषु)** वाहनों में और **(धन्वसु)** स्थलों में **(श्रायाः)** सुनते वा सुनाते हैं, वे प्रसिद्ध होते हैं॥४॥

भावार्थः-जो मनुष्य पुरुषार्थी होवें, वे सब प्रकार से सत्कार को प्राप्त हुए लक्ष्मीवान् होते हैं॥४॥

पुनर्मनुष्यैः कि कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

युष्माकꣳ स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः। वृष्टी द्यावो यतीरिव॥५॥११॥

युष्माकम्। स्म। रथान्। अनु। मुदे। दधे। मरुतः। जीरऽदानवः। वृष्टी। द्यावः। यतीःऽइव॥५॥

पदार्थः-**(युष्माकम्)** **(स्मा)** एव। अत्र **निपातस्य च**ेति दीर्घः। **(रथान्)** विमानादियानान् **(अनु)** **(मुदे)** हर्षाय **(दधे)** दधामि **(मरुतः)** मनुष्याः **(जीरदानवः)** जीवन्ति ते **(वृष्टी)** वर्षाः **(द्यावः)** प्रकाशान् **(यतीरिव)** प्रयत्नसाध्या क्रिया इव॥५॥

अन्वयः-हे जीरदानवो मरुतोऽहं युष्माकं मुदे रथान् दधे वृष्टी द्यावो यतीरिव स्माऽनु मुदे दधे॥५॥

भावार्थः-हे मनुष्या! यथाहमभ्यासेन विद्याप्रकाशम् यज्ञेन वृष्टिमनु दधे तथा यूयमप्येतान् धत्त॥५॥

पदार्थः-हे **(जीरदानवः)** जीवते हुए **(मरुतः)** मनुष्यो! मैं **(युष्माकम्)** आप लागों के **(मुदे)** आनन्द के लिये **(रथान्)** विमान आदि यानों को **(दधे)** धारण करता हूं और **(वृष्टी)** वर्षाओं तथा **(द्यावः)** प्रकाशों को **(यतीरिव)** प्रयत्न से सिद्ध होने वालीं क्रियाओं के समान **(स्मा)** ही **(अनु)** पीछे आनन्द के लिये धारण करता हूं॥५॥

भावार्थः-हे मनुष्यो! जैसे मैं अभ्यास से विद्या के प्रकाशों को यज्ञ से वृष्टि को धारण करता हूं, वैसे आप लोग भी इनको धारण कीजिये॥५॥

पुनर्मनुष्या किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः॥६॥

आ। यम्। नरः। सुऽदानवः। ददाशुषे। दिवः। कोशम्। अचुच्यवुः। वि। पर्जन्यम्। सृजन्ति। रोदसी इति। अनु। धन्वना। यन्ति। वृष्टयः॥६॥

पदार्थः-**(आ)** समन्तात् **(यम्)** **(नरः)** नेतारो मनुष्याः **(सुदानवः)** उत्तमविद्यादिशुभगुणदानाः **(ददाशुषे)** दात्रे **(दिवः)** कामयमानाः **(कोशम्)**। मेघम्। **कोश इति मेघनामसु पठितम्।** (निघं०१.१०) **(अचुच्यवुः)** च्यावयेयुः **(वि)** **(पर्जन्यम्)** मेघम् **(सृजन्ति)** **(रोदसी)** द्यावापृथिव्यौ **(अनु)** **(धन्वना)** **(यन्ति)** **(वृष्टयः)** वर्षाः॥६॥

अन्वयः-हे मनुष्याः! सुदानवो दिवो नरो ददाशुषे यं कोशमाऽचुच्यवू रोदसी पर्जन्यं वि सृजन्ति तमनु धन्वना वृष्टयो यन्ति तथा यूयमप्याचरत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव मनुष्या उत्तमा दातारो ये यज्ञेन जङ्गलरक्षणेन जलाशयनिर्माणेन पुष्कला वर्षाः कारयन्ति॥६॥

पदार्थः-हे मनुष्यो! **(सुदानवः)** उत्तमविद्या आदि श्रेष्ठ गुणों के दान से युक्त **(दिवः)** कामना करते हुए **(नरः)** नायक मनुष्य **(ददाशुषे)** देने वाले के लिये **(यम्)** जिस **(कोशम्)** मेघ को **(आ)** चारों ओर से **(अचुच्युवुः)** वर्षावें और **(रोदसी)** अन्तरिक्ष और पृथिवी को **(पर्जन्यम्)** मेघ को **(वि, सृजन्ति)** विशेषतया छोड़ते हैं उसके **(अनु)** अनुकूल **(धन्वना)** अन्तरिक्ष से **(वृष्टयः)** वर्षायें **(यन्ति)** प्राप्त होती हैं, वैसे आप लोग भी आचरण करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही मनुष्य उत्तम दाता हैं जो यज्ञ, जङ्गलों की रक्षा और जलाशयों के निर्म्माण से बहुत वर्षाओं को कराते हैं॥६॥

पुनर्मनुष्यैः किं विज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा।
स्यन्ना अश्वाइवाध्वनो विमोचने वि यद्वर्तन्त एन्यः॥७॥

ततृदानाः। सिन्धवः। क्षोदसा। रजः। प्र। सस्रुः। धेनवः। यथा। स्यन्नाः। अश्वाःऽइव। अध्वनः। विऽमोचने। वि। यत्। वर्तन्ते। एन्यः॥७॥

पदार्थः-(ततृदानाः) भूमिं हिंसन्तः **(सिन्धवः)** नद्यः **(क्षोदसा)** जलेन **(रजः)** लोकम् **(प्र) (सस्रुः)** स्रवन्ति **(धेनवः)** दुग्धदात्र्यो गावः **(यथा)** येन प्रकारेण **(स्यन्नाः)** आशुगमनाः **(अश्वाइव)** यथा तुरङ्गं धावन्ति तथा **(अध्वनः)** मार्गान् **(विमोचने) (वि) (यत्)** याः **(वर्त्तन्ते) (एन्यः)** या यन्ति ता नद्यः। (निघं०१.१३)॥७॥

अन्वयः-हे मनुष्या! यथा धेनवस्तथा क्षोदसा ततृदानाः सिन्धवो रजः प्र सस्रुरश्वाइव यद्याः स्यन्ना एन्यो विमोचनेऽध्वनो वि वर्त्तन्ते ताभ्यस्सर्व उपकारा ग्राह्याः॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा धेनवो दुग्धं वषन्ति तथैव नदी सरः समुद्रादयो जलाशयाः पृथिव्यां वर्षन्ति॥७॥

पदार्थः-हे मनुष्यो! **(यथा)** जिस प्रकार से **(धेनवः)** दुग्ध देने वाली गौएं वैसे **(क्षोदसा)** जल से **(ततृदानाः)** भूमि को तोड़ने वाली **(सिन्धवः)** नदियां **(रजः)** लोक को **(प्र, सस्रुः)** प्रस्रवित करती हैं। और **(अश्वाइव)** जैसे घोड़े दौड़ते हैं, वैसे **(यत्)** जो **(स्यन्नाः)** शीघ्र जाने वाली **(एन्यः)** नदियां **(विमोचने)** विमोचन में **(अध्वनः)** मार्गों को **(वि, वर्त्तन्ते)** बितातीं हैं उनसे सम्पूर्ण उपकार ग्रहण करने चाहियें॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे दुग्ध देने वाली गौवें दुग्ध की वृष्टि करती हैं, वैसे ही नदी, तड़ाग, समुद्र आदि और अन्य जलाशय पृथिवी में वृष्टि करते हैं॥७॥

पुनर्मनुष्यैः किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या प्राप्त करना योग्य है, इस विषय को कहते हैं॥

आ यात मरुतो दिव आन्तरिक्षादुमादुत। माव स्थात परावतः॥८॥

आ। यात। मरुतः। दिवः। आ। अन्तरिक्षात्। अमात्। उत। मा। अव। स्थात। पराऽवतः॥८॥

पदार्थः-(आ) समन्तात् **(यात)** प्राप्नुत **(मरुतः)** मनुष्याः **(दिवः)** कामनाः **(आ) (अन्तरिक्षात्) (अमात्)** गृहात् **(उत)** अपि **(मा) (अव) (स्थात)** तिष्ठत **(परावतः)** दूरदेशात्॥८॥

अन्वयः-हे मरुतो! यूयमन्तरिक्षादुतामाद्दिव आ यात परावतो मावाऽऽस्थात॥८॥

भावार्थः-त एव मनुष्याः कामसिद्धिमाप्नुवन्ति ये विरोधं त्यक्त्वा विद्यावन्तो भवन्ति॥८॥

पदार्थः-हे (**मरुतः**) मनुष्यो! आप लोग (**अन्तरिक्षात्**) अन्तरिक्ष (**उत**) और (**अमात्**) गृह से (**दिवः**) कामनाओं को (**आ**) सब प्रकार से (**यात**) प्राप्त हूजिये और (**परावतः**) दूर देश से (**मा**) नहीं (**अव, आ, स्थात**) अच्छे प्रकार से स्थित हूजिये॥८॥

भावार्थः-वे ही मनुष्य कामना की सिद्धि को प्राप्त होते हैं, जो विरोध का त्याग करके विद्वान् होते हैं॥८॥

पुनर्विद्वद्भिः किमुपदेष्टव्यमित्याह॥

फिर विद्वानों को क्या उपदेश देना योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

मा वो॑ र॒सानि॑तभा॒ कुभा॒ क्रुमु॒र्मा व॒ः सिन्धु॒र्नि री॑रमत्।

मा व॒ः परि॑ ष्ठात्स॒रयु॑ः पुरी॒षिण्य॒स्मे इत्सु॒म्नम॑स्तु वः॥९॥

मा। व॒ः। र॒सा। अनि॑तभा। कुभा॑। क्रमु॑ः। मा। व॒ः। सिन्धु॑ः। नि। री॒र॒म॒त्। मा। व॒ः। परि॑। स्था॒त्। स॒रयु॑ः। पु॒री॒षिणी॑। अ॒स्मे इति॑। इत्। सु॒म्नम्। अ॒स्तु॒। व॒ः॥९॥

पदार्थः-(**मा**) निषेधे (**वः**) युष्मान् (**रसा**) पृथिवी (**अनितभा**) अप्राप्तदीप्तिः (**कुभा**) कुत्सितप्रकाशा (**क्रुमुः**) क्रमिता (**मा**) (**वः**) युष्मान् (**सिन्धुः**) नदी समुद्रो वा (**नि**) निरताम् (**रीरमत्**) रमयेत् (**मा**) (**वः**) युष्मान् (**परि**) (**स्थात्**) तिष्ठेत् (**सरयुः**) यः सरति (**पुरीषिणी**) पुर इषिणी (**अस्मे**) अस्मभ्यम् (**इत्**) एव (**सुम्नम्**) सुखम् (**अस्तु**) भवतु (**वः**) युष्मभ्यम्॥९॥

अन्वयः-हे मनुष्या! अनितभा कुभा क्रुमू रसा मा वो नि रीरमत् सिन्धुर्मा वो नि रीरमत्। सरयुः पुरीषिणी मा वः परि ष्ठाद्येनाऽस्मे वश्च सुम्नमिदस्तु॥९॥

भावार्थः-मनुष्यैरेवं पुरुषार्थः कर्त्तव्यो यथा सर्वे पदार्थाः सुखप्रदाः स्युः॥९॥

पदार्थः-हे मनुष्यो! (**अनितभा**) दीप्ति को न प्राप्त (**कुभा**) कुत्सित प्रकाशयुक्त (**क्रुमुः**) क्रमण करनेवाली (**रसा**) पृथिवी (**मा**) मत (**वः**) आप लोगों को (**नि**) अत्यन्त (**रीरमत्**) रमण करावे और (**सिन्धुः**) नदी वा समुद्र (**मा**) नहीं (**वः**) आप लोगों को निरन्तर रमण करावें तथा (**सरयुः**) चलने वाला और (**पुरीषिणी**) पुरों की इच्छा करने वाली (**मा**) मत (**वः**) आप लोगों को (**परि, स्थात्**) परिस्थित करावे अर्थात् मत आलसी बनावे जिससे (**अस्मे**) हम लोगों के लिये और (**वः**) आप लोगों के लिये (**सुम्नम्**) सुख (**इत्**) ही (**अस्तु**) हो॥९॥

भावार्थः-मनुष्यों को चाहिये कि इस प्रकार का पुरुषार्थ करें कि जिस प्रकार सम्पूर्ण पदार्थ सुख देने वाले होवें॥९॥

पुनर्विदुषा मनुष्यार्थं किमेष्टव्यमित्याह॥

फिर विद्वान् जन को मनुष्यों के अर्थ क्या इच्छा करनी चाहिये, इस विषय को कहते हैं॥

तं व॒ः शर्धं॑ रथा॑नां त्वे॒षं ग॒णं मारु॑तं॒ नव्य॑सीनाम्। अनु॒ प्र य॑न्ति वृ॒ष्टय॑ः॥१०॥१२॥

तम्। व॒:। शर्ध॑म्। रथा॑नाम्। त्वे॒षम्। ग॒णम्। मारु॑तम्। नव्य॑सीनाम्। अनु॑। प्र। य॒न्ति॒। वृ॒ष्टय॑:॥१०॥

पदार्थ:-(तम्) (व:) युष्मभ्यम् **(शर्धम्)** बलम् **(रथानाम्)** यानानाम् **(त्वेषम्)** सद्गुणप्रकाशम् **(गणम्) (मारुतम्)** मरुतां मनुष्याणामिदम् **(नव्यसीनाम्)** नवीनानाम् **(अनु) (प्र) (यन्ति)** प्राप्नुवन्ति **(वृष्टय:)**॥१०॥

अन्वय:-हे मनुष्या! यं रथानां नव्यसीनां मारुतं गणं त्वेषमुपदिशामि यं वृष्टयोऽनु प्र यन्ति तं शर्धं व: प्रापयामि॥१०॥

भावार्थ:-ये विदुषां नवीनां नवीनां नीतिं प्राप्नुवन्ति ते बलं लभन्ते॥१०॥

पदार्थ:-हे मनुष्यो! जिस **(रथानाम्)** वाहनों और **(नव्यसीनाम्)** नवीनाओं के बीच **(मारुतम्)** मनुष्यों के सम्बन्धी **(गणम्)** समूह का और **(त्वेषम्)** सद्गुणों के प्रकाश का उपदेश करता हूं और जिसको **(वृष्टय:)** वर्षायें **(अनु, प्र, यन्ति)** प्राप्त होती हैं **(तम्)** उस **(शर्धम्)** बल को **(व:)** आप लोगों के लिये प्राप्त करता हूं॥१०॥

भावार्थ:-जो विद्वानों की नवीन-नवीन नीति को प्राप्त होते हैं, वे बल को प्राप्त होते हैं॥१०॥

पुनर्मनुष्यै: किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

शर्धं॑शर्धं व एषां॒ व्रातं॑व्रातं ग॒णंग॑णं सुश॒स्तिभि॑:। अनु॑ क्रामेम धी॒तिभि॑:॥११॥

शर्धं॑म्ऽशर्धम्। व॒:। ए॒षा॒म्। व्रात॑म्ऽव्रातम्। ग॒ण॒म्ऽग॒ण॒म्। सु॒श॒स्तिऽभि:। अनु॑। क्रा॒मे॒म॒। धी॒तिऽभि॑:॥११॥

पदार्थ:-(शर्धंशर्धम्) बलंबलम् **(व:)** युष्माकम् **(एषाम्) (व्रातंव्रातम्)** वर्त्तमानं वर्त्तमानम् **(गणंगणम्)** समूहंसमूहम् **(सुशस्तिभि:)** सुष्ठुप्रशंसाभि: **(अनु) (क्रामेम)** उल्लङ्घेम **(धीतिभि:)** अङ्गुलिभि: कर्माणीव॥११॥

अन्वय:-हे मनुष्या! यथा वयं धीतिभि: कर्माणीव सुशस्तिभिर्व एषाञ्च शर्धंशर्धं व्रातंव्रातं गणंगणमनु क्रामेम तथा युष्माभिरपि कर्त्तव्यम्॥११॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यदि मनुष्या: पूर्णं बलं कुर्युस्तर्हि बहून् बलिष्ठानप्युत्क्रामयेयु:॥११॥

पदार्थ:-हे मनुष्यो! जैसे हम लोग **(धीतिभि:)** जैसे अङ्गुलियों से कर्म्मों को वैसे **(सुशस्तिभि:)** अच्छी प्रशंसाओं से **(व:)** आप लोगों के और **(एषाम्)** इनके **(शर्धशर्धम्)** बल-बल और **(व्रातंव्रातम्)** वर्त्तमान-वर्त्तमान **(गणंगणम्)** समूह-समूह को **(अनु, क्रामेम)** उल्लंघन करें, वैसे आप लोगों को भी करना चाहिये॥११॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य पूर्ण बल को करें तो बहुत बलिष्ठों का भी उत्क्रमण करें॥११॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

कस्मा॑ अ॒द्य सुजा॑ताय रा॒तह॑व्याय॒ प्र य॑युः। ए॒ना याम॑न॒ मरु॑तः॥ १२॥

कस्मै॑। अ॒द्य। सुऽजा॑ताय। रा॒तह॑व्याय। प्र। य॒युः॒। ए॒ना। याम॑न। मरु॑तः॥ १२॥

पदार्थः-(कस्मै) (अद्य) (सुजाताय) सुष्ठुविद्यासु प्रसिद्धाय **(रातहव्याय)** दत्तदातव्याय **(प्र, ययुः)** प्राप्नुवन्ति **(एना)** एनेन **(यामेन)** उपरतेन **(मरुतः)** मनुष्याः॥ १२॥

अन्वयः-ये मरुतोऽद्यैना यामेन कस्मै सुजाताय रातहव्याय प्र ययुस्ते विद्यादातारो भूत्वा प्रशंसिता जायन्ते॥ १२॥

भावार्थः-विद्यादिशुभगुणदानेन विना विदुषां प्रशंसा नैव जायते॥ २॥

पदार्थः-जो **(मरुतः)** मनुष्य **(अद्य)** आज **(एना)** इस **(यामेन)** विरक्त हुए से **(कस्मै)** किस **(सुजाताय)** उत्तम विद्याओं में प्रसिद्ध **(रातहव्याय)** दिया दातव्य जिसने उसके लिये **(प्र, ययुः)** प्राप्त होते हैं, वे विद्या के देने वाले होकर प्रशंसित होते हैं॥ १२॥

भावार्थः-विद्या आदि उत्तम गुणों के दान के विना विद्वानों की प्रशंसा नहीं होती है॥ १२॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

येन॑ तो॒काय॒ तन॑याय धा॒न्यं॑ बी॒जं॒ वह॑ध्वे॒ अक्षि॑तम्।

अ॒स्मभ्यं॒ तद्ध॒त्तन॒ यद्व॒ ईम॑हे॒ राधो॑ वि॒श्वायु॒ सौभ॑गम्॥ १३॥

येन॑। तो॒काय॑। तन॑याय। धा॒न्य॑म्। बीज॑म्। वह॑ध्वे। अक्षि॑तम्। अ॒स्मभ्य॑म्। तत्। ध॒त्त॒न॒। यत्। व॒ः। ईम॑हे। राध॑ः। वि॒श्वऽआयु॑। सौभ॑गम्॥ १३॥

पदार्थः-(येन) कर्मणा **(तोकाय)** सद्यो जातायापत्याय **(तनयाय)** कुमाराय **(धान्यम्)** तण्डुलादिकम् **(बीजम्)** वपनार्हम् **(वहध्वे)** वहत **(अक्षितम्)** क्षयरहितम् **(अस्मभ्यम्) (तत्) (धत्तन)** धरत **(यत्) (वः)** युष्मदर्थम् **(ईमहे)** याचामहे **(राधः)** धनम् **(विश्वायु)** सम्पूर्णमायुष्करम् **(सौभगम्)** सौभाग्यवर्धकम्॥ १३॥

अन्वयः-हे मनुष्या! येन तोकाय तनयायाक्षितं धान्यं बीजं च यूयं वहध्वे। यद्विश्वायु सौभगमक्षितं राधो वा ईमहे तदस्मभ्यं धत्तन॥ १३॥

भावार्थः-ये मनुष्या अपत्यरक्षार्थं धान्यादिवस्तु संरक्षन्ति तेऽक्षयं सुखं लभन्ते॥ १३॥

पदार्थः-हे मनुष्यो! **(येन)** जिस कर्म्म से **(तोकाय)** तुरन्त उत्पन्न हुए सन्तान के और **(तनयाय)** कुमार के लिये **(अक्षितम्)** नाश से रहित **(धान्यम्)** तण्डुल आदि को और **(बीजम्)** बोने के योग्य को

(वहध्वे) प्राप्त हूजिये और **(यत्)** जिस **(विश्वायु)** सम्पूर्ण आयु के करने और **(सौभगम्)** सौभाग्य को बढ़ाने वाले नाश से रहित **(राघः)** धन की **(वः)** आप लोगों के लिये **(ईमहे)** याचना करते हैं **(तत्)** उसको **(अस्मभ्यम्)** हम लोगों के लिये **(धत्तन)** धारण करिये॥१३॥

भावार्थः-जो मनुष्य सन्तानों की रक्षा के लिये धान्य आदि वस्तु की उत्तम प्रकार रक्षा करते हैं, वे नाश रहित सुख को प्राप्त होते हैं॥१३॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः।

वृष्टी शं योरापऽउस्रि भेषजं स्यामऽमरुतः सहः॥१४॥

अतिऽइयामऽनिदःऽतिरःऽस्वस्तिऽभिःऽहित्वाऽअवद्यम्ऽअरातीःऽवृष्टीवीऽशम्ऽयोःऽआपःऽउस्रिऽभेषजम्ऽस्यामऽमरुतःऽसहः॥१४॥

पदार्थः-(**अति, इयाम**) उलङ्घेम त्यजेम **(निदः)** ये निन्दन्ति तान् मिथ्यावादिनः **(तिरः)** तिरश्चीनं कर्म्म **(स्वस्तिभिः)** सुखादिभिः **(हित्वा)** त्यक्त्वा **(अवद्यम्)** निन्दितं कर्म **(अरातीः)** शत्रून् **(वृष्टीवी)** वृष्ट्वा वर्षित्वा **(शम्)** सुखम् **(योः)** मिश्रितम् **(आपः)** जलानि **(उस्रि)** गवादियुक्तम् **(भेषजम्)** औषधम् **(स्याम)** **(मरुतः)** मनुष्याः **(सह)**॥१४॥

अन्वयः-हे मरुतो! यथा वयं निदोऽतीयाम स्वस्तिभिस्तिरोऽवद्यमरातीश्च हित्वा शं वृष्टीवी आपो योरुस्रि भेषजं स्वस्तिभिस्सह प्राप्ताः स्याम तथा युष्माभिर्भवितव्यम्॥१४॥

भावार्थः-मनुष्यैर्निन्दकान् निन्दां पापिनः पापं च त्यक्त्वा शत्रून् विजित्यौषधादिसेवनेन शरीरमरोगं विधाय विद्यायोगाभ्यासेनात्मानमुन्नीय सततं सुखमाप्तव्यम्॥१४॥

पदार्थः-हे **(मरुतः)** मनुष्यो! जैसे हम लोग **(निदः)** निन्दा करने वाले मिथ्यावादियों का **(अति, इयाम)** उल्लङ्घन करें अर्थात् त्याग करें और **(स्वस्तिभिः)** सुख आदिकों से **(तिरः)** तिरश्चीन कर्म्म और **(अवद्यम्)** निन्दित कर्म्म **(अरातीः)** और शत्रुओं का **(हित्वा)** त्याग और **(शम्)** सुख **(वृष्टीवी)** वर्षा करके **(आपः)** जलों को और **(योः)** मिश्रित **(उस्रि)** गो आदि से युक्त **(भेषजम्)** ओषधि को सुख आदिकों के **(सह)** साथ प्राप्त **(स्याम)** होवें, वैसे आप लोगों को होना चाहिये॥१४॥

भावार्थः-मनुष्यों को चाहिये कि निन्दक, निन्दा और पापी **[**तथा**]** पाप को छोड़ शत्रुओं को जीतकर, ओषधि आदि के सेवन से शरीर रोगरहित कर, विद्या और योगाभ्यास से आत्मा की उन्नति करके निरन्तर सुख प्राप्त करें॥१४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः। यं त्रायध्वे स्याम ते॥ १५॥

सुऽदेवः। समह। असति। सुऽवीरः। नरः। मरुतः। सः। मर्त्यः। यम्। त्रायध्वे। स्याम। ते॥ १५॥

पदार्थः-(सुदेवः) शोभनश्चासौ विद्वान् **(समह)** सत्कारसहित **(असति)** भवति **(सुवीरः)** शोभनश्चासौ वीरः **(नरः)** नायकाः **(मरुतः)** मनुष्याः **(सः)** **(मर्त्यः)** **(यम्)** **(त्रायध्वे)** रक्षत **(स्याम)** **(ते)**॥ १५॥

अन्वयः-हे समह! स सुदेवः सुवीरो मर्त्योऽसति यं हे मरुतो नरस्ते यूयं त्रायध्वे वयं तेन सहिताः स्याम॥ १५॥

भावार्थः-मनुष्यैरत्युन्नतैर्भूत्वा निर्बलाः प्राणिनः सदैव रक्षणीयाः॥ १५॥

पदार्थः-हे **(समह)** सत्कार से सहित! **(सः)** वह **(सुदेवः)** सुन्दर विद्वान् **(सुवीरः)** सुन्दर वीर **(मर्त्यः)** मनुष्य **(असति)** है **(यम्)** जिसको हे **(मरुतः)** मनुष्यो **(नरः)** अग्रणीजनो! **(ते)** वे आप लोग **(त्रायध्वे)** रक्षा करो, हम लोग उसके साथ **(स्याम)** होवें॥ १५॥

भावार्थः-मनुष्यों को चाहिये कि अति उन्नत होकर निर्बल प्राणियों की सदा ही रक्षा करें॥ १५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स्तुहि भोजान्स्तुवतो अस्य यामनि रणन् गावो न यवसे।
यतः पूर्वानिव सखीरनु ह्वय गिरा गृणीहि कामिनः॥ १६॥ १३॥

स्तुहि। भोजान्। स्तुवतः। अस्य। यामनि। रणन्। गावः। न। यवसे। यतः। पूर्वान्ऽइव। सखीन्। अनु। ह्वय। गिरा। गृणीहि। कामिनः॥ १६॥

पदार्थः-(स्तुहि) **(भोजान्)** पालकान् **(स्तुवतः)** प्रशंसकान् **(अस्य)** रक्षणस्य **(यामनि)** मार्गे **(रणन्)** उपदिशन् **(गावः)** धेनवः **(न)** इव **(यवसे)** बुसादौ **(यतः)** **(पूर्वानिव)** यथा पूर्वास्तथा वर्त्तमानान् **(सखीन्)** मित्रान् **(अनु)** **(ह्वय)** निमन्त्रय **(गिरा)** वाण्या **(गृणीहि)** **(कामिनः)** प्रशस्तं कामो येषामस्ति तान्॥ १६॥

अन्वयः-हे विद्वन्! रणँस्त्वं स्तुवतो भोजान् स्तुहि। अस्य यामनि यतः पूर्वानिव सखीन् गिराऽनु ह्वय सखीन् यवसे गावो नाऽनु ह्वय कामिनो गृणीहि॥ १६॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वन्! ये प्रशंसनीयाः सर्वेषां सुहृदः सत्यकामाः स्युस्तान् सदैव सत्कुर्य्या इति॥ १६॥

अत्र प्रश्नोत्तरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिपञ्चाशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! **(रणन्)** उपदेश देते हुए आप **(स्तुवतः)** प्रशंसा करने वाले **(भोजान्)** पालकों की **(स्तुहि)** स्तुति कीजिये और **(अस्य)** इस रक्षण के **(यामनि)** मार्ग में **(यतः)** जिससे **(पूर्वनिव)** जैसे पूर्व वैसे वर्त्तमान **(सखीन्)** मित्रों का **(गिरा)** वाणी से **(अनु, ह्वय)** निमन्त्रण करो और मित्रों को **(यवसे)** बुस आदि में **(गावः)** गौओं के **(न)** सदृश निमन्त्रण करो और **(कामिनः)** श्रेष्ठ मनोरथ जिनका उनकी **(गृणीहि)** स्तुति करो॥१६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वन्! जो प्रशंसा करने योग्य और सब के मित्र और सत्य की कामना करने वाले होवें, उनका सदा ही सत्कार करो॥१६॥

इस सूक्त में प्रश्न उत्तर और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह तिरपनवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्य चतु:पञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषि:। मरुतो देवता:। १, ३, ७, १२ जगती। २ विराड् जगती। ६ भुरिग् जगती। ११, १५ निचृज्जगती छन्द:। निषाद: स्वर:। ४, ८, १० भुरिक् त्रिष्टुप्। ५, ९, १३, १४ त्रिष्टुप् छन्द:। गान्धार: स्वर:॥

अथं विद्वद्भि: कथं वर्त्तितव्यमित्याह॥

अब पन्द्रह ऋचा वाले चौवनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वानों को कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

प्र शर्धा॑य॒ मारु॑ताय॒ स्वभा॑नव॒ इ॒मां वाच॑मनजा पर्वत॒च्युते॑।
घ॒र्म॒स्तुभे॑ दि॒व आ पृ॑ष्ठ॒यज्व॑ने द्यु॒म्नश्र॑वसे॒ महि॑ नृ॒ण्मर्च॑त॥ १॥

प्र। शर्धा॑य। मारु॑ताय। स्वऽभा॑नवे। इ॒माम्। वाच॑म्। अ॒न॒ज॒। प॒र्व॒त॒ऽच्युते॑। घ॒र्म॒ऽस्तुभे॑ दि॒वः। आ। पृ॒ष्ठ॒ऽयज्व॑ने। द्यु॒म्नऽश्र॑वसे। महि॑। नृ॒ण्म्। अ॒र्च॒त॒॥ १॥

पदार्थ:-(प्र) (शर्धाय) बलाय **(मारुताय)** मरुतामिदं तस्मै **(स्वभानवे)** स्वकीया भानवो दीप्तयो यस्य तस्मै **(इमाम्)** वर्त्तमानाम् **(वाचम्)** सुशिक्षितां वाणीम् **(अनज)** उच्चरतोपदिशत। अत्र **संहितायामि**ति दीर्घ:, व्यत्ययेनैकवचनं च। **(पर्वतच्युते)** पर्वतान्मेघाच्च्युतो य: पर्वतं मेघं च्यावयति वा तस्मै **(घर्मस्तुभे)** यो घर्मं यज्ञं स्तोभति स्तौति तस्मै **(दिव:)** कामयमाना: **(आ)** समन्तात् **(पृष्ठयज्वने)** य: पृष्ठेन यजति तस्मै **(द्युम्नश्रवसे)** द्युम्नं यश: श्रव: श्रुतं यस्य तस्मै **(महि)** महत् **(नृम्णम्)** नरोऽभ्यस्यन्ति यत्तत् **(अर्चत)** सत्कुरुत॥ १॥

अन्वय:-हे दिवो विद्वांसो! यूयं स्वभानवे मारुताय शर्धायेमां वाचं प्रानज पर्वतच्युते घर्मस्तुभे पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमार्चत॥ १॥

भावार्थ:-हे विद्वांसो! यूयं सदैवाज्ञान् विद्यादानेन ज्ञानवत: कुरुत सत्यासत्यं विविच्य सत्यं ग्राहयित्वाऽसत्यं त्याजयत सर्वसुखायैश्वर्य्यं सञ्चिनुत॥ १॥

पदार्थ:-हे **(दिव:)** कामना करते हुए विद्वानो! आप लोग **(स्वभानवे)** अपनी कान्ति विद्यमान जिसके उस **(मारुताय)** मनुष्यों के सम्बन्धी **(शर्धाय)** बल के लिये **(इमाम्)** इस वर्त्तमान **(वाचम्)** उत्तम प्रकार शिक्षित वाणी का **(प्रानज)** उच्चारण कीजिये अर्थात् उपदेश दीजिये और **(पर्वतच्युते)** मेघ से गिरे वा जो मेघ को वर्षाता **(घर्मस्तुभे)** यज्ञ की स्तुति करता और **(पृष्ठयज्वने)** पृष्ठ से यज्ञ करता **(द्युम्नश्रवसे)** वा यश सुना गया जिसका उसके लिये **(महि)** बड़े **(नृम्णम्)** मनुष्य अभ्यास करते हैं जिसका उसका **(आ, अर्चत)** सत्कार करो॥ १॥

भावार्थः-हे विद्वानो! आप लोग सदा ही ज्ञानरहित पुरुषों को विद्या के दान से ज्ञानवान् करो, सत्य और असत्य का विचार करके सत्य का ग्रहण कराय के असत्य का त्याग कराइये और सब के सुख के लिये ऐश्वर्य्य को इकट्ठा करो॥१॥

पुनर्म्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

प्र वो॑ मरुतस्तवि॒षा उ॑दन्यवो॑ वयो॒वृधो॑ अश्व॒युज॒: परि॑ज्रयः।

सं वि॒द्युता॒ दध॑ति॒ वाश॑ति॒ त्रित॒: स्वर॒न्त्यापो॒ऽवना॒ परि॑ज्रयः॥२॥

प्र। व॒ः। म॒रुत॒ः। त॒वि॒षाः। उ॒द॒न्य॑वः। व॒यः॒ऽवृधः। अ॒श्व॒ऽयुजः। परि॑ऽज्रयः। सम्। वि॒ऽद्युता॑। दध॑ति। वाश॑ति। त्रि॒तः। स्वर॑न्ति। आपः॑। अ॒वना॑। परि॑ऽज्रयः॥२॥

पदार्थः-**(प्र)** **(वः)** युष्मान् **(मरुतः)** मनुष्याः **(तविषाः)** बलवन्तः **(उदन्यवः)** आत्मन उदकमिच्छवः **(वयोवृधः)** ये वयसा वर्धन्ते वयो वर्धयन्ति वा **(अश्वयुजः)** येऽश्वान् सद्योगामिनः पदार्थान् योजयन्ति **(परिज्रयः)** ये परितः सर्वतो गच्छन्ति ते **(सम्)** **(विद्युता)** **(दधति)** **(वाशति)** वाणीवाचरन्ति **(त्रितः)** त्रिभ्यः **(स्वरन्ति)** शब्दयन्ति **(आपः)** जलानि **(अवना)** अवनादीनि रक्षणदीनि **(परिज्रयः)** परितः सर्वतो ज्रयो गतिमन्तः॥२॥

अन्वयः-हे मरुतो! ये तविषा उदन्यवो वयोवृधोऽश्वयुजः परिज्रयो विद्युता सह वो युष्मान् सन्दधति वाशति। त्रितः परिज्रय आपोऽवना प्र स्वरन्ति तान् यूयं सत्कुरुत॥२॥

भावार्थः-ये मनुष्या विद्युदादिविद्यां जानन्ति ते सर्वं सुखं सर्वार्थं दधति॥२॥

पदार्थः-हे **(मरुतः)** मनुष्यो! जो **(तविषाः)** बलवान् **(उदन्यवः)** अपने को जल की इच्छा करने **(वयोवृधः)** अवस्था से बढ़ने वा अवस्था को बढ़ाने **(अश्वयुजः)** शीघ्रगामी पदार्थों को युक्त करने **(परिज्रयः)** और सब और जाने वाले जन **(विद्युता)** बिजुली के साथ **(वः)** आप लोगों को **(सम्, दधति)** उत्तम प्रकार धारण करते और **(वाशति)** वाणी के सदृश आचरण करते हैं और **(त्रितः)** तीन से **(परिज्रयः)** सब ओर जाने वाले **(आपः)** जल **(अवना)** रक्षण आदि का **(प्र, स्वरन्ति)** अच्छे प्रकार उच्चारण करते हैं, उनका आप लोग सत्कार करो॥२॥

भावार्थः-जो मनुष्य बिजुली आदि की विद्या को जानते हैं, वे सम्पूर्ण सुख को सब के लिये धारण करते हैं॥२॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को कहते हैं॥

वि॒द्युन्म॑हसो॒ नरो॒ अश्म॑दिद्यवो॒ वात॑त्विषो म॒रुत॑: पर्वत॒च्युत॑:।

अ॒ब्दु॒या चि॒न्मुहु॒रा ह्वा॑दुनी॒वृत॑: स्त॒नय॑दमा रभ॒सा उदो॑जस:॥ ३॥

वि॒द्युत्ऽम॑हस:। नर॑:। अश्म॑ऽदिद्यव:। वात॑ऽत्विष:। म॒रुत॑:। प॒र्व॒त॒ऽच्यु॒त॑:। अ॒ब्दु॒या। चि॒त्। मुहु॑:। आ। ह्वा॒दु॒नि॒ऽवृत॑:। स्त॒नय॑त्ऽअमा:। र॒भ॒सा:। उत्ऽओ॑जस:॥ ३॥

पदार्थ:-(विद्युन्महस:) ये विद्युद्विद्यायां महसो महान्त: **(नर:)** नायका: **(अश्मदिद्यव:)** मेघविद्याप्रकाशका: **(वातत्विष:)** वातविद्यया त्विष: कान्तयो येषान्ते **(मरुत:)** मानवा: **(पर्वतच्युत:)** ये पवतान्मेघान् च्यावयन्ति **(अब्दया)** येऽपो जलानि ददति ते **(चित्)** अपि **(मुहु:)** वारंवारम् **(आ) (ह्वादुनीवृत:)** ये ह्वादुन्या शब्दकर्त्र्या विद्युता युक्ता: **(स्तनयदमा:)** स्तनयन्ति शब्दयन्त्यमा गृहाणि येषान्ते **(रभसा:)** वेगवन्त: **(उदोजस:)** उत्कृष्टमोज: पराक्रमो येषां ते॥ ३॥

अन्वय:-हे नरो! ये विद्युन्महसोऽश्मदिद्यवो वातत्विष: पर्वतच्युतोऽब्दया स्तनयदमा रभसा उदोजसो मुहुरा ह्वादुनीवृतश्चिन्मरुत: सन्ति तै: सङ्गच्छस्व॥ ३॥

भावार्थ:-ये विद्युन्मेघवायुशब्दादिविद्याविद: सन्ति ते सर्वतो श्रीमन्तो जायन्ते॥ ३॥

पदार्थ:-हे **(नर:)** नायकजनो! जो **(विद्युन्महस:)** बिजुली की विद्या में विद्या में बड़े श्रेष्ठ **(अश्मदिद्यव:)** मेघ विद्या के प्रकाश करने वाले **(वातत्विष:)** वायुविद्या से कांतियां जिनकी ऐसे और **(पर्वतच्युत:)** मेघों को वर्षाने वा **(अब्दया)** जलों को देने वाले और **(स्तनयदमा:)** शब्द करते गृह जिनके वे **(रभसा:)** वेग से युक्त **(उदोजस:)** उत्कृष्ट पराक्रम जिनका वे **(मुहु:)** वार-वार **(आ)** सब प्रकार से **(ह्वादुनीवृत:)** शब्द करने वाली बिजुली से युक्त **(चित्)** भी **(मरुत:)** मनुष्य हैं, उनसे मिलिये॥ ३॥

भावार्थ:-जो बिजुली, मेघ, वायु और शब्द आदि की विद्या को जानने वाले हैं, वे सब प्रकार से लक्ष्मीवान् होते हैं॥ ३॥

पुनर्मनुष्यै: किं ज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

व्य१॑क्तून् रु॒द्रा व्यहा॑नि शिक्वसो॒ व्य१॑न्तरि॑क्षं॒ वि रजां॑सि धू॒तय:।
वि यदज्रा॒ँ अज॑थ॒ नाव॑ ई॒ं यथा॒ वि दु॒र्गाणि॑ मरुतो॒ नाह॑ रिष्यथ॥ ४॥

वि। अ॒क्तून्। रु॒द्रा:। वि। अहा॑नि। शि॒क्व॒स॒:। वि। अ॒न्तरि॑क्षम्। वि। रजां॑सि। धू॒त॒य॒:। वि। यत्। अज्रा॑न्। अज॑थ। नाव॑:। ई॒म्। य॒था॒। वि। दु॒:ऽगानि॑। म॒रु॒त॒:। न। अह॑। रि॒ष्य॒थ॥ ४॥

पदार्थ:-(वि) (अक्तून्) प्रसिद्धान् **(रुद्रा:) (वायव:) (वि)** विशेषे **(अहानि)** दिनानि **(शिक्वस:)** शक्तिमन्त: **(वि) (अन्तरिक्षम्) (वि) (रजांसि)** लोकान् **(धूतय:)** ये धुन्वन्ति **(वि) (यत्) (अज्रान्)** सततगामिन: **(अजथ)** गच्छथ **(नाव:)** महत्यो नौका: **(ईम्)** जलम् **(यथा) (वि) (दुर्गाणि)** दु:खेन गन्तुं योग्यानि **(मरुत:)** मनुष्या: **(न) (अह)** विनिग्रहे **(रिष्यथ)** हिंस्यथ॥ ४॥

अन्वयः-हे मरुतो! यद्ये शिक्वसो धूतयो रुद्रा अक्तून् प्रकटयन्त्यहानि वि मिमतेऽन्तरिक्षं प्रति रजांसि विदधति विचालयन्तीं नाव इव सर्वान् लोकानागमयन्ति तानज्ञान् व्यजथ यथा दुर्गाणि नाह वि रिष्यथ तथा विचरत॥४॥

भावार्थः-मनुष्यैर्वायुविद्या अवश्यं ज्ञातव्या॥४॥

पदार्थः-हे (**मरुतः**) मनुष्यो! (**यत्**) जो (**शिक्वसः**) सामर्थ्य से युक्त (**धूतयः**) कांपने वाले (**रुद्राः**) पवन (**अक्तून्**) प्रसिद्धों को प्रकट करते हैं और (**अहानि**) दिनों का (**वि**) विशेष करके परिणाम करते अर्थात् गिनाते हैं (**अन्तरिक्षम्**) अन्तरिक्ष के प्रति (**रजांसि**) लोकों का (**वि**) विधान करते और (**वि**) विशेष करके चलाते हैं तथा (**ईम्**) जल को जैसे (**नावः**) बड़ी नौकायें, वैसे सम्पूर्ण लोकों को चलाते हैं उन (**अज्रान्**) निरन्तर चलाने वालों को (**वि, अजथ**) प्राप्त हूजिये और (**यथा**) जैसे (**दुर्गणि**) दुःख से प्राप्त होने योग्यों को (**न**) नहीं (**अह**) ग्रहण करने में (**वि, रिष्यथ**) नाश करें वैसे (**वि**) विचरिये॥४॥

भावार्थः-मनुष्यों को चाहिये कि वायुविद्या को अवश्य जानें॥४॥

पुनर्मनुष्यैः किं वेदितव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

तद्वीर्यं॑ वो मरुतो महित्व॒नं दी॒र्घं त॑ता॒न॒ सूर्यो॒ न योज॑नम्।

एता॒ न यामे॒ अगृ॑भीतशोचि॒षोऽन॑श्वदां॒ यन्न्यया॑तना गि॒रिम्॥५॥१४॥

तत्। वी॒र्यं॑म्। व॒ः। म॒रु॒तः। म॒हि॒ऽत्व॒नम्। दी॒र्घम्। त॒ता॒न॒। सूर्यः॑। न। योज॑नम्। एताः॑। न। यामे॑। अगृ॑भीतऽशोचिषः। अन॑श्वऽदाम्। यत्। नि। अया॑तन। गि॒रि॒म्॥५॥

पदार्थः-(**तत्**) (**वीर्यम्**) (**वः**) युष्माकम् (**मरुतः**) वायुवद्वर्त्तमानाः (**महित्वनम्**) महत्त्वम् (**दीर्घम्**) विशालम् (**तताने**) तनयति (**सूर्यः**) (**नः**) इव (**योजनम्**) युजन्ति येन तदाकर्षणाख्यम् (**एताः**) गतयः (**न**) इव (**यामे**) प्रहर (**अगृभीतशोचिषः**) न गृहीतं शोचिस्तेजो यैस्ते (**अनश्वदाम्**) अविद्यमाना अश्वा तस्यां तां गतिम् (**यत्**) (**नि**) (**अयातना**) प्राप्नुत। अत्र **संहितायामि**ति दीर्घः। (**गिरिम्**) मेघम्॥५॥

अन्वयः-हे मरुतः! सूर्यो योजनं न महित्वनं दीर्घं वस्तद्वीर्यं ततानागृभीतशोचिषो याम एता गतयो नानश्वदां गिरिं ददति। यद्यूयं न्ययातना तत्सर्वं वयं गृह्णीमः॥५॥

भावार्थः-ये सूर्यमेघगुणान्विदित्वा सामर्थ्यं धनं च वयन्ति ते परोपकारिणो भवन्ति॥५॥

पदार्थः-हे (**मरुतः**) वायु के सदृश वर्त्तमान मनुष्यो! (**सूर्यः**) सूर्य्य (**योजनम्**) युक्त करते हैं जिससे उस आकर्षण नामक के (**न**) सदृश और (**महित्वनम्**) बड़प्पन को जैसे वैसे (**दीर्घम्**) विशाल (**वः**) आपके (**तत्**) उस (**वीर्यम्**) पराक्रम को (**ततान**) विस्तृत करता है और (**अगृभीतशोचिषः**) नहीं ग्रहण किया तेज जिन्होंने वे (**यामे**) प्रहर में (**एताः**) ये गमन (**न**) जैसे (**अनश्वदाम्**) नहीं घोड़े जिसमें

उस गमन और (**गिरिम्**) मेघ को देते हैं और (**यत्**) जिसको आप लोग (**नि, अयातना**) प्राप्त हूजिये, उस सब को हम लोग ग्रहण करें॥५॥

भावार्थः-जो लोग सूर्य और मेघों के गुणों को जान कर सामर्थ्य और धन को इकट्ठा करते हैं, वे परोपकारी होते हैं॥५॥

मनुष्यैः कथं वर्त्तितव्यमित्याह॥

मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

अभ्रा॑जि॒ शर्धो॑ मरुतो॒ यर्दर्ण॒सं मोष॑था वृ॒क्षं क॑प॒नेव॑ वेधसः।
अध॑ स्मा नो अ॒रम॑तिं सजोषस॒श्चक्षु॑रिव॒ यन्त॒मनु॑ नेषथा सु॒गम्॥६॥

अभ्रा॑जि। शर्धः॑। म॒रु॒तः॒। यत्। अ॒र्ण॒सम्। मोष॑थ। वृ॒क्षम्। क॒प॒नाऽइ॑व। वे॒ध॒सः॒। अध॑। स्म॒। नः॒। अ॒रम॑तिम्। स॒ऽजो॒ष॒सः॒। चक्षु॑ःऽइव। यन्त॑म्। अनु॑। ने॒ष॒थ॒। सु॒ऽगम्॥६॥

पदार्थः-(**अभ्राजि**) प्रकाश्यते (**शर्धः**) बलम् (**मरुतः**) मनुष्याः (**यत्**) (**अर्णसम्**) जलम् (**मोषथ**) चोरयत। अत्र **संहितायामि**ति दीर्घः। (**वृक्षम्**) वटादिकम् (**कपनेव**) कपना वायुगतय इव (**वेधसः**) मेधाविनः (**अध**) अथ (**स्म**) (**नः**) अस्माकम् (**अरमतिम्**) अरमणम् (**सजोषसः**) समानप्रीतिसेविनः (**चक्षुरिव**) यथा चक्षुः (**यन्तम्**) प्राप्नुवन्तम् (**अनु**) (**नेषथ**) नयथ। अत्र **संहितायामि**ति दीर्घः। (**सुगम्**) सुष्ठु गच्छन्ति यस्मिन्॥६॥

अन्वयः-हे मरुतो! युष्माभिर्यच्छर्धोऽभ्राजि यदर्णसं यूयं मोषथ तर्हि युष्मान् वृक्षं कपनेव वयं दण्डयेयाध हे वेधसः! सजोषसो यूयं चक्षुरिव नोऽरमतिं यन्तं सुगं स्मानु नेषथ॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये सर्वेषां शरीरात्मबलं प्रकाशयन्ति ते धन्या सन्ति ये च सद्विद्यागुणाँश्चोरयन्ति तान् धिग्धिक्॥६॥

पदार्थः-हे (**मरुतः**) मनुष्यो! आप लोगों से (**यत्**) जो (**शर्धः**) बल (**अभ्राजि**) प्रकाशित किया जाता और (**अर्णसम्**) जल को जो तुम लोग (**मोषथ**) चुराइये तो आप लोगों को जैसे (**वृक्षम्**) वट आदि वृक्ष को (**कपनेव**) पवनों के गमन वैसे हम लोग दण्ड देवें (**अध**) इसके अनन्तर हे (**वेधसः**) बुद्धिमान् जनो! (**सजोषसः**) तुल्य प्रीति के सेवन करने वाले आप लोग (**चक्षुरिव**) नेत्र को जैसे वैसे (**नः**) हम लोगों के (**अरमतिम्**) रमणरहित (**यन्तम्**) प्राप्त होने वाले (**सुगम्**) सुग अर्थात् उत्तमता से चलते हैं, जिसमें उसको (**स्म**) ही (**अनु, नेषथ**) अनुकूल प्राप्त कीजिये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सब के शरीर और आत्मा के बल को प्रकाशित करते हैं, वे धन्य हैं और जो श्रेष्ठ विद्या और गुणों को चुराते, उनको धिक्कार धिक्कार॥६॥

अथेश्वरः कीदृशोऽस्तीत्युपदिश्यते॥

अब ईश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति।

नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ॥७॥

न। सः। जीयते। मरुतः। न। हन्यते। न। स्रेधति। व्यथते। न। रिष्यति। न। अस्य। रायः। उप। दस्यन्ति। न। ऊतयः। ऋषिम्। वा। यम्। राजानम्। वा। सुषूदथ॥७॥

पदार्थः-(न) (**सः**) जगदीश्वरः (**जीयते**) जितो भवति (**मरुतः**) मनुष्याः (**न**) (**हन्यते**) (**न**) (**स्रेधति**) न क्षीयते (**न**) (**व्यथते**) पीड्यते (**न**) (**रिष्यति**) हिनस्ति (**न**) (**अस्य**) (**रायः**) धनम् (**उप**) (**दस्यन्ति**) क्षयन्ति (**न**) (**ऊतयः**) रक्षणाद्याः (**ऋषिम्**) वेदार्थविदम् (**वा**) (**यम्**) (**राजानम्**) (**वा**) (**सुषूदथ**) रक्षथ॥७॥

अन्वयः-हे मरुतो! स न जीयते न हन्यते न स्रेधति न व्यथते न रिष्यति अस्य न रायो नोतय उप दस्यन्ति यमृषिं वा राजानं वा यूयं सुषूदथ॥७॥

भावार्थः-हे मनुष्या! योऽजरोऽमरः सच्चिदानन्दस्वरूपो नित्यगुणकर्मस्वभावो जगदीश्वरोऽस्ति तं सर्वे यूयमुपाध्वम्॥७॥

पदार्थः-हे (**मरुतः**) मनुष्यो! (**सः**) वह (**न**) न (**जीयते**) जीता जाता (**न**) न (**हन्यते**) नाश किया जाता (**न**) न (**स्रेधति**) नाश होता (**न**) न (**व्यथते**) पीड़ित होता और (**न**) न (**रिष्यति**) हिंसा करता है (**अस्य**) इस का (**न**) न (**रायः**) धन और (**न**) न (**ऊतयः**) रक्षण आदि व्यवहार (**उप, दस्यन्ति**) नाश होते हैं (**यम्**) जिस (**ऋषिम्**) वेदार्थ के जानने वाले (**वा**) अथवा (**राजानम्**) राजा को (**वा**) भी आप लोग (**सुषूदथ**) रखिये॥७॥

भावार्थः-हे मनुष्यो! जो वृद्धावस्था वा मरणावस्था रहित, सत्, चित् और आनन्दस्वरूप, नित्य गुण, कर्म्म और स्वभाव वाला जगदीश्वर है, उसकी सब आप लोग उपासना करो॥७॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को कहते हैं॥

नियुत्वन्तो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कबन्धिनः।

पिन्वन्त्युत्सं यदिनासो अस्वरन् व्युन्दन्ति पृथिवीं मध्वो अन्धसा॥८॥

नियुत्वन्तः। ग्रामऽजितः। यथा। नरः। अर्यमणः। न। मरुतः। कबन्धिनः। पिन्वन्ति। उत्सम्। यत्। इनासः। अस्वरन्। वि। उन्दन्ति। पृथिवीम्। मध्वः। अन्धसा॥८॥

पदार्थः-(नियुत्वन्तः) निश्चयवन्तः (**ग्रामजितः**) ये ग्रामं जयन्ति ते (**यथा**) (**नरः**) नायकाः (**अर्यमणः**) न्यायेशाः (**नः**) (**मरुतः**) (**कबन्धिनः**) बहूदकाः (**पिन्वन्ति**) प्रीणन्ति (**उत्सम्**) कूपमिव

(यत्) **(इनासः)** ईश्वराः समर्थाः **(अस्वरन्)** स्वरन्ति शब्दयन्ति **(वि)** **(उन्दन्ति)** क्लेदयन्ति **(पृथिवीम्)** **(मध्वः)** मधुरगुणयुक्ताः **(अन्धसा)** अन्नेन सह॥८॥

अन्वयः-हे मनुष्या! यथा नियुत्वन्तो ग्रामजितोऽर्यमणो न कबन्धिन इनासो नरो मरुतो यदुत्समिव पिन्वन्त्यस्वरन्नन्धसा सह मध्वस्सन्तः पृथिवीं व्युन्दन्ति ते भाग्यशालिनो भवन्ति॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये जलवच्छान्तिकराः सामर्थ्यं वर्धयमाना विजयन्ते ते श्रियं लभन्ते॥८॥

पदार्थः-हे मनुष्यो! **(यथा)** जैसे **(नियुत्वन्तः)** निश्चयवान् **(ग्रामजितः)** ग्राम को जीतने वाले **(अर्यमणः)** न्यायाधीशो के **(न)** सदृश **(कबन्धिनः)** बहुत जलों से युक्त **(इनासः)** समर्थ **(नरः)** नायक **(मरुतः)** मनुष्य **(यत्)** जिसको **(उत्सम्)** कूप के समान **(पिन्वन्ति)** तृप्त करते वा **(अस्वरन्)** शब्द करते हैं और **(अन्धसा)** अन्न के साथ **(मध्वः)** मधुर गुणयुक्त होते हुए **(पृथिवीम्)** पृथिवी को **(वि, उन्दन्ति)** विशेष गीला करते हैं, वे भाग्यशाली होते हैं॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो जल के सदृश शान्ति करने वाले और सामर्थ्य को बढ़ाते हुए विजय को प्राप्त होते हैं, वे लक्ष्मी को प्राप्त होते हैं॥८॥

मनुष्यैः कथमुपकारो ग्रहीतव्य इत्याह॥

मनुष्यों को कैसे उपकार लेना चाहिये, इस विषय को कहते हैं॥

प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः।

प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः॥९॥

प्रवत्वती। इयम्। पृथिवी। मरुत्ऽभ्यः। प्रवत्वती। द्यौः। भवति। प्रयत्ऽभ्यः। प्रवत्वतीः। पथ्याः। अन्तरिक्ष्याः। प्रवत्वन्तः। पर्वताः। जीरऽदानवः॥९॥

पदार्थः-**(प्रवत्वती)** निम्नदेशयुक्ता **(इयम्)** **(पृथिवी)** भूमिः **(मरुद्भ्यः)** मनुष्यादिभ्यः **(प्रवत्वती)** प्रणवती **(द्यौः)** प्रकाशः **(भवति)** **(प्रयद्भ्यः)** प्रयत्नं कुर्वद्भ्यः **(प्रवत्वतीः)** निम्नगामिनीः **(पथ्याः)** पथे हिताः **(अन्तरिक्ष्याः)** अन्तरिक्षे भवाः **(प्रवत्वन्तः)** प्रवणशीलाः **(पर्वताः)** मेघाः **(जीरदानवः)** जीवनप्रदाः॥९॥

अन्वयः-हे मनुष्या! येयं प्रवत्वती पृथिवी प्रवत्वती द्यौः प्रयद्भ्यो मरुद्भ्यो हितकारिणी भवति यस्यां प्रवत्वन्तो जीरदानवः पर्वता अन्तरिक्ष्याः प्रवत्वतीः पथ्याः वर्षाः कुर्वन्ति ते यथावद्वेदितव्याः॥९॥

भावार्थः-मनुष्यैः पृथिव्याः सकाशाद्यावाञ्छक्यस्तावानुपकारो ग्रहीतव्यः॥९॥

पदार्थः-हे मनुष्यो! जो **(इयम्)** यह **(प्रवत्वती)** नीचे के स्थान से युक्त **(पृथिवी)** भूमि और **(प्रवत्वती)** फैलने वाला **(द्यौः)** प्रकाश और **(प्रयद्भ्यः)** प्रयत्न करते हुए **(मरुद्भ्यः)** मनुष्य आदिकों के लिये हितकारक **(भवति)** होता है जिसमें **(प्रवत्वन्तः)** गमनशील **(जीरदानवः)** जीवन को देने वाले

(पर्वता:) मेघ **(अन्तरिक्ष्या:)** अन्तरिक्ष में उत्पन्न **(प्रवत्वती:)** नीचे चलने वाले **(पथ्या:)** मार्ग के लिये हितकारक वृष्टियों को करते हैं, वे यथावत् जानने योग्य हैं॥९॥

भावार्थ:-मनुष्यों को चाहिये कि पृथिवी के समीप से जितना हो सकता है, उतना उपकार ग्रहण करें॥९॥

पुनर्मनुष्यै: कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

यन्मरुत: सभरस: स्वर्णर: सूर्य उदिते मदथा दिवो नर:।

न वोऽश्वा: श्रथयन्ताह सिस्रत: सद्यो अस्याध्वन: पारमश्नुथ॥१०॥१५॥

यत्। मरुत:। सऽभरस:। स्व:ऽनर:। सूर्ये। उत्ऽइते। मदथ। दिव:। नर:। न। व:। अश्वा:। श्रथयन्त। अह। सिस्रत:। सद्य:। अस्य। अध्वन:। पारम्। अश्नुथ॥१०॥

पदार्थ:-(यत्) ये **(मरुत:)** मनुष्या: **(सभरस:)** समानपालनपोषणा: **(स्वर्णर:)** ये स्व: सुखं नयन्ति ते **(सूर्ये)** **(उदिते)** उदयं प्राप्ते **(मदथ)** आनन्दथ **(दिव:)** कामयमाना: **(नर:)** सत्ये धर्मे नेतार: **(न)** **(व:)** युष्माकम् **(अश्वा:)** तुरङ्गा: **(श्रथयन्त)** हिंसन्ति **(अह)** विनिग्रहे **(सिस्रत:)** गन्तार: **(सद्य:)** शीघ्रम् **(अस्य)** **(अध्वन:)** मार्गस्य **(पारम्)** **(अश्नुथ)** प्राप्नुथ॥१०॥

अन्वय:-हे सभरस: स्वर्णरो दिवो नरो मरुतो! यूयमुदिते सूर्ये यत्प्राप्य मदथ तेन व: सिस्रतोऽश्वा न श्रथयन्ताह तैरस्याध्वन: पारं सद्योऽश्नुथ॥१०॥

भावार्थ:-ये मनुष्या: सूर्य्योदयात् प्रागुत्थाय यावच्छयनं तावत्प्रयतन्ते दु:ख दारिद्र्यान्तं गत्वा सुखिन: श्रीमन्तो जायन्ते॥१०॥

पदार्थ:-हे **(सभरस:)** तुल्य पालन और पोषण करने वाले **(स्वर्णर:)** सुख को प्राप्त कराते और **(दिव:)** कामना करते हुए **(नर:)** सत्य धर्म्म में पहुंचाने वाले **(मरुत:)** जनो! आप लोग **(उदिते)** उदय को प्राप्त हुए **(सूर्ये)** सूर्य में **(यत्)** जिसको प्राप्त होकर **(मदथ)** आनन्दित होओ उससे **(व:)** आप लोगों के **(सिस्रत:)** चलने वाले **(अश्वा:)** घोड़े **(न)** नहीं **(श्रथयन्त, अह)** हिंसा करते रुकते हैं, उनसे **(अस्य)** इस **(अध्वन:)** मार्ग के **(पारम्)** पार को **(सद्य:)** शीघ्र **(अश्नुथ)** प्राप्त हूजिये॥१०॥

भावार्थ:-जो मनुष्य सूर्य्योदय से पहले उठ के जब तक सोवैं नहीं तब तक प्रयत्न करते हैं, दु:ख और दारिद्र्य के अन्त को प्राप्त होकर सुखी और लक्ष्मीवान् होते हैं॥१०॥

पुनर्मनुष्या: के कीदृशा भवेयुरित्याह॥

फिर मनुष्य कौन कैसे हों, इस विषय को कहते हैं॥

अंसेषु व ऋष्टय: पत्सु खादयो वक्ष:सु रुक्मा मरुतो रथे शुभ:।

अ॒ग्निभ्रा॑जसो वि॒द्युतो॒ गभ॑स्त्योः शिप्रा॑: शी॒र्षसु॒ वित॑ता हिर॒ण्ययी॑:॥ ११॥

अंसे॑षु। व॒:। ऋ॒ष्टय॑:। प॒त्सु। खा॒दय॑:। वक्ष॑:सु। रु॒क्मा:। म॒रु॒त॒:। रथे॑। शुभ॑:। अ॒ग्निऽभ्रा॑जस:। वि॒ऽद्युत॑:। गभ॑स्त्यो:। शिप्रा॑:। शी॒र्षऽसु॑। विऽत॑ता:। हिर॒ण्ययी॑:॥ ११॥

पदार्थ:-(अंसेषु) स्कन्धेषु **(व:)** युष्माकम् **(ऋष्टय:)** शस्त्रास्त्राणि **(पत्सु)** पादेषु **(खादय:)** भोक्तार: **(वक्ष:सु) (रुक्मा:)** सुवर्णालङ्कारा: **(मरुत:)** मनुष्या: **(रथे)** रमणीये याने **(शुभ:)** शुम्भमाना: **(अग्निभ्राजस:)** अग्निरिव प्रकाशमाना: **(विद्युत:)** तडित: **(गभस्त्यो:)** हस्तयोर्मध्ये **(शिप्रा:)** उष्णिष: **(शीर्षसु)** शिरस्सु **(विताता:)** विस्तृता: **(हिरण्ययी:)** सुवर्णप्रचुरा:॥ ११॥

अन्वय:-हे मरुतो यदा वो वायुवद्वर्तमाना वीरा! यद् वोंऽसेष्वृष्टय: पृत्सु खादयो वक्ष:सु रुक्मा रथे शुभो गभस्त्योरग्निभ्राजसो विद्युत: शीर्षसु विताता हिरण्ययी: शिप्रा: स्युस्तदा हस्तगतो विजयो वर्त्तते॥ ११॥

भावार्थ:-ये राजपुरुषा अहर्निशं राजकार्य्येषु प्रवीणा दुर्व्यसनेभ्यो विरक्ता: साङ्गोपाङ्गराजसामग्रीमन्त: स्युस्ते सदैव प्रतिष्ठां लभन्ते॥ ११॥

पदार्थ:-हे **(मरुत:)** मनुष्यो जब **(व:)** आप लोगों के वायु के सदृश वर्त्तमान वीरजनो! जो आप लोगों के **(अंसेषु)** कन्धों में **(ऋष्टय:)** शस्त्र और अस्त्र **(पत्सु)** पैरों में **(खादय:)** भोक्ताजन **(वक्ष:सु)** वक्ष:स्थलों में **(रुक्मा:)** सुवर्ण अलंकार **(रथे)** सुन्दर वाहन में **(शुभ:)** शोभित पदार्थ **(गभस्त्यो:)** हाथों के मध्य में **(अग्निभ्राजस:)** अग्नि के सदृश प्रकाशमान **(विद्युत:)** बिजुलियाँ **(शीर्षसु)** शिरों में **(विताता:)** विस्तृत **(हिरण्ययी:)** सुवर्ण जिनमें बहुत ऐसी **(शिप्रा:)** पगड़ियाँ होवें, तब हस्तगत विजय होता है॥ ११॥

भावार्थ:-जो राजपुरुष अहर्निश राजकार्य्यों में प्रवीण, दुर्व्यसनों से विरक्त और साङ्गोपाङ्ग राजसामग्री वाले हों, वे सदैव प्रतिष्ठा को प्राप्त होते हैं॥ ११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तं नाक॑म॒र्यो अगृ॑भीतशोचिषं॒ रुश॒त्पिप्प॑लं मरुतो॒ वि धू॑नुथ।
सम॑च्यन्त वृ॒जनाति॑त्विषन्त॒ यत्स्वर॑न्ति घोषं॒ वित॑तमृता॒यव॑:॥ १२॥

तम्। नाक॑म्। अ॒र्य:। अगृ॑भीतऽशोचिषम्। रुश॑त्। पिप्प॑लम्। म॒रु॒त॒:। वि। धू॒नु॒थ॒। सम्। अ॒च्य॒न्त॒। वृ॒जना॑। अति॑त्विषन्त। यत्। स्वर॑न्ति। घोष॑म्। विऽत॑तम्। ऋ॒त॒ऽयव॑:॥ १२॥

पदार्थ:-(तम्) (नाकम्) अविद्यमानदु:खम् **(अर्य:)** स्वामीश्वर: **(अगृभीतशोचिषम्)** न गृहीतं शोचिर्यस्मिंस्तम् **(रुशत्)** सुस्वरूपम् **(पिप्पलम्)** फलभोगम् **(मरुत:)** वायुरिव वर्त्तमाना: **(वि)** विशेषेण **(धूनुथ)** कम्पयथ **(सम्) (अच्यन्त)** सम्यक् प्राप्नुत **(वृजना)** वृजन्ति यैस्तानि **(अतित्विषन्त)** प्रदीपयत

प्रकाशिता भवत **(यत्)** यम् **(स्वरन्ति)** उच्चरन्ति **(घोषम्)** वाचम् **(विततम्)** विस्तृतम् **(ऋतायवः)** आत्मन ऋतमिच्छवः॥१२॥

अन्वयः-हे मरुतो! यूयमर्य इव ऋतायवो यद्विततं घोषं स्वरन्ति तमगृभीतशोचिषं रुशत् पिप्पलं नाकं समच्यन्त दुःखं वि धूनुथ वृजनातित्विषन्त॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या ईश्वरवन्न्यायकारिणो जगदुपकारकाः उपदेशकाः सन्ति ते जगद्भूषका वर्त्तन्ते॥१२॥

पदार्थः-हे **(मरुतः)** वायु के सदृश वेगयुक्त वर्त्तमान जनो! आप लोग **(अर्यः)** स्वामी ईश्वर के सदृश **(ऋतायवः)** अपने सत्य की इच्छा करते हुए **(यत्)** जिस **(विततम्)** विस्तृत **(घोषम्)** वाणी का **(स्वरन्ति)** उच्चारण करते हैं **(तम्)** उस **(अगृभीतशोचिषम्)** अगृभीतशोचिषम् अर्थात् नहीं ग्रहण की स्वच्छता जिसमें ऐसे **(रुशत्)** अच्छे स्वरूप वाले **(पिप्पलम्)** फलभोगरूप **(नाकम्)** दुःखरहित आनन्द को **(सम्, अच्यन्त)** उत्तम प्रकार प्राप्त हूजिये दुःख को **(वि)** विशेष करके **(धूनुथ)** कम्पाइये और **(वृजना)** चलते हैं जिनसे उनको **(अतित्विषन्त)** प्रकाशित कीजिये तथा प्रकाशित हूजिये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य ईश्वर के सदृश न्यायकारी सम्पूर्ण जगत् के उपकार करने वाले और उपदेशक हैं, वे संसार के भूषक हैं॥१२॥

पुनर्मनुष्यैः किमेष्टव्यमित्याह॥

फिर मनुष्यों को क्या इच्छा करनी चाहिये, इस विषय को कहते हैं॥

युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः।
न यो युच्छति तिष्यो३ यथा दिवो३ऽस्मे रारन्त मरुतः सहस्रिणम्॥१३॥

युष्माऽदत्तस्य। मरुतः। विऽचेतसः। रायः। स्याम। रथ्यः। वयस्वतः। न। यः। युच्छति। तिष्यः। यथा। दिवः। अस्मे इति। ररन्त। मरुतः। सहस्रिणम्॥१३॥

पदार्थः-**(युष्मादत्तस्य)** युष्माभिर्दत्तस्य **(मरुतः)** प्राणवत्प्रिया जनाः **(विचेतसः)** विविधं चेतः संज्ञानं येषान्ते **(रायः)** धनस्य **(स्याम)** **(रथ्यः)** बहुरथादियुक्ताः **(वयस्वतः)** प्रशस्तं वयो जीवनं विद्यते यस्य तस्य **(न)** **(यः)** **(युच्छति)** प्रमाद्यति **(तिष्यः)** आदित्यः पुष्यनक्षत्रं वा **(यथा)** **(दिवः)** प्रकाशमध्ये **(अस्मे)** अस्मभ्यमस्मासु वा **(रारन्त)** रमन्ते **(मरुतः)** मानवाः **(सहस्रिणम्)** सहस्राण्यसङ्ख्यानि वस्तूनि विद्यन्ते यस्य तम्॥१३॥

अन्वयः-हे विचेतसो रथ्यो मरुतो! वयं युष्मादत्तस्य वयस्वतो रायः पतयः स्याम। योऽस्मे न युच्छति यथा दिवो मध्ये तिष्योऽस्ति तथा प्रकाश्येत। हे मरुतो! यूयं सहस्रिणं रारन्त॥१३॥

भावार्थः-मनुष्यैः सदा धनाढ्यत्वमेषणीयं प्रमादो नैव कर्त्तव्यः॥१३॥

पदार्थः-हे **(विचेतसः)** अनेक प्रकार का संज्ञान जिनका वे **(रथ्यः)** बहुत रथ आदि से युक्त **(मरुतः)** प्राणों के सदृश प्रियजनो! हम लोग **(युष्मादत्तस्य)** आप लोगों से दिये गये **(वयस्वतः)** प्रशंसित जीवन जिसका उस **(रायः)** धन के स्वामी **(स्याम)** होवें और **(यः)** जो **(अस्मे)** हम लोगों के लिये वा हम लोगों में **(न)** नहीं **(युच्छति)** प्रमाद करता और **(यथा)** जैसे **(दिवः)** प्रकाश के मध्य में **(तिष्यः)** सूर्य्य वा पुष्य नक्षत्र है, वैसे प्रकाशित होवे और हे **(मरुतः)** जनो! आप लोग **(सहस्रिणम्)** असंख्य वस्तु है विद्यमान जिसके उसको **(रारन्त)** रमण करते हैं॥१३॥

भावार्थः-मनुष्यों को चाहिये कि सदा धनाढ्यपन का खोज करें और प्रमाद न करें॥१३॥

राजादिभिः के के रक्षणीया इत्याह॥

राजादिकों से कौन-कौन रक्षा पाने योग्य हैं, इस विषय को कहते हैं॥

यू॒यं र॒यिं म॑रुतः स्पा॒र्हवी॑रं यू॒यमृषि॑मवथ॒ साम॑विप्रम्।
यू॒यमर्व॑न्तं भर॒ताय॒ वाज॑ं यू॒यं ध॑त्थ॒ राजा॑नं श्रु॒ष्टिमन्त॑म्॥ १४॥

यू॒यम्। र॒यिम्। म॒रु॒तः। स्पा॒र्हऽवी॑रम्। यू॒यम्। ऋषि॑म्। अ॒व॒थ॒। साम॑ऽविप्रम्। यू॒यम्। अर्व॑न्तम्। भ॒र॒ताय॑। वाज॑म्। यू॒यम्। ध॒त्थ॒। राजा॑नम्। श्रु॒ष्टिऽमन्त॑म्॥ १४॥

पदार्थः-(**यूयम्**) (**रयिम्**) श्रियम् (**मरुतः**) पुरुषार्थिनो मनुष्याः (**स्पार्हवीरम्**) स्पार्हा अभिकाङ्क्षिता वीरा यस्मिन् (**यूयम्**) (**ऋषिम्**) वेदार्थविदम् (**अवथ**) रक्षथ (**सामविप्रम्**) सामसु मेधाविनम् (**यूयम्**) (**अर्वन्तम्**) प्राप्नुवन्तम् (**भरताय**) धारणपोषणाय (**वाजम्**) वेगान्नविज्ञानादिकम् (**यूयम्**) (**धत्थ**) (**राजानम्**) न्यायविनयाभ्यां प्रकाशमानम् (**श्रुष्टिमन्तम्**) श्रुष्टी प्रशस्तं क्षिप्रकरं यस्मिँस्तम्॥१४॥

अन्वयः-हे मरुतो! यूयं स्पार्हवीरं रयिमवथ यूयं सामविप्रमृषिमवथ यूयं भरतायार्वन्तं वाजं धत्थ यूयं श्रुष्टिमन्तं राजानं धत्थ॥१४॥

भावार्थः-मनुष्यैः सुसहायेन श्रीर्विद्वांसः सेना राजा च धर्त्तव्याः॥१४॥

पदार्थः-हे **(मरुतः)** पुरुषार्थी मनुष्यो! **(यूयम्)** आप लोग **(स्पार्हवीरम्)** अभिकांक्षित वीर जिसमें उस **(रयिम्)** लक्ष्मी की **(अवथ)** रक्षा कीजिये और **(यूयम्)** आप लोग **(सामविप्रम्)** सामों में बुद्धिमान् **(ऋषिम्)** वेदार्थ के जानने वाले की रक्षा कीजिये और **(यूयम्)** आप लोग **(भरताय)** धारण और पोषण के लिये **(अर्वन्तम्)** प्राप्त होते हुए **(वाजम्)** वेग, अन्न और विज्ञान आदि को **(धत्थ)** धारण करो और **(यूयम्)** आप लोग **(श्रुष्टिमन्तम्)** अच्छा क्षिप्रकरण जिसमें उस **(राजानम्)** न्याय और विनय से प्रकाशमान को धारण कीजिये॥१४॥

भावार्थः-मनुष्यों को चाहिये कि उत्तम सहाय से लक्ष्मी, विद्वान्, सेना और राजा को धारण करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तद्वो॑ यामि॒ द्रवि॑णं सद्यऊतयो॒ येना॒ स्व॑र्ण॒ त॒तना॑म॒ नॄँर॒भि।

इ॒दं सु मे॑ मरुतो हर्यता॒ वचो॒ यस्य॒ तरे॑म॒ तर॑सा श॒तं हिमा॑:॥ १५॥ १६॥

तत्। व॒:। या॒मि॒। द्रवि॑णम्। स॒द्य॒:ऽऊ॒त॒य॒:। येन॑। स्व॑:। न। त॒तना॑म। नॄन्। अ॒भि। इ॒दम्। सु। मे॒। म॒रु॒त॒:। ह॒र्य॒त॒। वच॑:। यस्य॑। तरे॑म। तर॑सा। श॒तम्। हिमा:॥ १५॥

पदार्थ:-(तत्) (व:) युष्माकं सकाशात् **(यामि)** प्राप्नोमि **(द्रविणम्)** धनं यशो वा **(सद्यऊतय:)** क्षिप्राणि रक्षणादीनि येषां ते **(येना) (स्व:)** सुखम् **(न)** इव **(ततनाम)** विस्तीर्णीयाम **(नॄन्)** मनुष्यान् **(अभि) (इदम्) (सु) (मे) (मरुत:)** मनुष्या: **(हर्यता)** कामयध्वम् **(वच:)** वचनम् **(यस्य) (तरेम) (तरसा)** बलेन (निघं०२.९) **(शतम्) (हिमा:)** वर्षाणि॥ १५॥

अन्वय:-हे सद्यऊतयो मरुतो! वो यद्द्रविणमहं यामि तद्यूयं प्रयच्छत येना स्वर्ण नॄनभि ततनाम यूयमिदं मे वचो सु हर्यत यस्य तरसा वयं शतं हिमास्तरेम तेन यूयममि तरत॥ १५॥

भावार्थ:-हे विद्वांसो! भवन्तो यशो धनं सुखं सत्यं वचो बलं च वर्धयित्वा दु:खानि तरन्त्विति॥ १५॥

अत्र सूर्य्यविद्युन्सुखगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतु:पञ्चाशत्तमं सूक्तं षोडशो वर्गश्च समाप्त:॥

पदार्थ:-हे **(सद्यऊतय:)** शीघ्र रक्षण आदि वाले **(मरुत:)** मनुष्यो **(व:)** आप लोगों के समीप से जिस **(द्रविणम्)** धन वा यश को **(यामि)** प्राप्त होता हूं **(तत्)** उसको आप लोग दीजिये **(येना)** जिससे **(स्व:)** सुख के **(न)** सदृश **(नॄन्)** मनुष्यों को **(अभि, ततनाम)** सब प्रकार विस्तृत करें और आप लोग **(इदम्)** इस **(मे)** मेरे **(वच:)** वचन की **(सु, हर्यता)** अच्छे प्रकार कामना करिये और **(यस्य)** जिसके **(तरसा)** बल से हम लोग **(शतम्)** सौ **(हिमा:)** वर्ष **(तरेम)** पार होवें, उससे आप लोग भी पार हूजिये॥ १५॥

भावार्थ:-हे विद्वानो! आप लोग यश, धन, सुख, सत्य, वचन और बल को बढ़ाय दु:खों के पार हूजिये॥ १५॥

इस सूक्त में बिजुली और सुख के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौवनवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य पञ्चपञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १, ५ जगती। २, ४, ७, ८ निचृज्जगती। ९ विराड्जगती छन्दः। निषादः स्वरः। ३ स्वराट् त्रिष्टुप्। ६ त्रिष्टुप्। १० निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्याह॥

अब दश ऋचा वाले पचपनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर मनुष्य कैसे वर्त्तें, इस विषय को कहते हैं॥

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत॥ १॥

प्रऽयज्यवः। मरुतः। भ्राजत्ऽऋष्टयः। बृहत्। वयः। दधिरे। रुक्मऽवक्षसः। ईयन्ते। अश्वैः। सुऽयमेभिः। आशुऽभिः। शुभम्। यातम्। अनु। रथाः। अवृत्सत॥ १॥

पदार्थः-(प्रयज्यवः) प्रकृष्टयज्यवः सङ्गन्तारो मनुष्याः **(मरुतः)** प्राणा इव वर्त्तमानाः **(भ्राजदृष्टयः)** भ्राजन्त ऋष्टयो विज्ञानानि येषान्ते **(बृहत्)** महत् **(वयः)** कमनीयं जीवनम् **(दधिरे)** दध्यासुः **(रुक्मवक्षसः)** रुक्माणि सुवर्णादियुक्तान्याभूषणानि **[**वक्षःसु**]** येषान्ते **(ईयन्ते)** प्राप्यन्ते **(अश्वैः)** आशुकारिभिः **(सुयमेभिः)** शोभना यमा येषु तैः **(आशुभिः)** सद्योऽभिगामिभिः **(शुभम्)** धर्म्यं व्यवहारम् **(यातम्)** गच्छताम् **(अनु)** **(रथाः)** रमणीया विमानादयः **(अवृत्सत)** वर्त्तन्ते॥ १॥

अन्वयः-हे मनुष्या! यैरश्वैराशुभिः सुयमेभिर्जनैः शुभं यातां रथा ईयन्ते प्रयज्यवो भ्राजदृष्टयो रुक्मवक्षसो मरुतो बृहद्वयो दधिरे ये चान्ववृत्सत तैस्सह यूयमप्येवं प्रयतध्वम्॥ १॥

भावार्थः-हे मनुष्या! भवन्तो ब्रह्मचर्य्यादिना चिरञ्जीविनो योगिनः पुरुषार्थिनः स्युः॥ १॥

पदार्थः-हे मनुष्यो! जिन **(अश्वैः)** शीघ्र करने वा **(आशुभिः)** शीघ्र जाने वाले **(सुयमेभिः)** सुन्दर यम इन्द्रियनिग्रह आदि जिनके उन जनों से **(शुभम्)** धर्मयुक्त व्यवहार को **(यातम्)** प्राप्त होते हुओं के **(रथाः)** सुन्दर वाहन आदि **(ईयन्ते)** प्राप्त किये जाते हैं और **(प्रयज्यवः)** उत्तम मिलाने वाले मनुष्य **(भ्राजदृष्टयः)** शोभित होते हैं विज्ञान जिनके वे **(रुक्मवक्षसः)** सुवर्ण आदि से युक्त आभूषण **[**वक्षःस्थलों पर**]** जिनके वे **(मरुतः)** प्राणों के सदृश वर्त्तमान **(बृहत्)** बड़े **(वयः)** सुन्दर जीवन को **(दधिरे)** धारण करें और जो **(अनु)** पश्चात् **(अवृत्सत)** वर्त्तमान होते हैं, उनके साथ आप लोग भी इस प्रकार प्रयत्न कीजिये॥ १॥

भावार्थः-हे मनुष्यो! आप लोग ब्रह्मचर्य आदि से अति काल पर्य्यन्त जीवन वाले योगी पुरुषार्थी होइये॥ १॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को कहते हैं॥

स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ।

उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत॥ २॥

स्वयम्। दधिध्वे। तविषीम्। यथा। विद। बृहत्। महान्तः। उर्विया। वि। राजथ। उत। अन्तरिक्षम्। ममिरे। वि। ओजसा। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥ २॥

पदार्थः-(स्वयम्) (दधिध्वे) धरत **(तविषीम्)** बलेन युक्तां सेनाम् **(यथा) (विद)** विजानीत **(बृहत्)** महत् **(महान्तः)** महाशयाः **(उर्विया)** बहुना **(वि) (राजथ) (उत) (अन्तरिक्षम्)** आकाशम् **(ममिरे)** व्याप्नुवन्ति **(वि) (ओजसा)** बलेन **(शुभम्) (याताम्)** प्राप्नुताम् **(अनु) (रथाः) (अवृत्सत)**॥ २॥

अन्वयः-हे राजजना! यथा महान्तो यूयं तविषीं स्वयं दधिध्वे बृहद्विदोर्विया वि राजथ यथा शुभं यातां रथा अन्ववृत्सतोताप्यन्तिक्षं वि ममिरे तथा यूयमोजसा विराजथ॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ब्रह्मचर्य्येण शरीरात्मबलं धृत्वा क्रियाकौशलं विज्ञाय यथेश्वरोऽन्तरिक्षे सर्वान् पदार्थान् सृजति तथैव यूयमनेकान् व्यवहारान् साध्नुत॥ २॥

पदार्थः-हे राजजनो! **(यथा)** जैसे **(महान्तः)** गम्भीर आशय वाले आप लोग **(तविषीम्)** बल युक्त सेना को **(स्वयम्)** अपने से **(दधिध्वे)** धारण कीजिये और **(बृहत्)** बड़े को **(विद)** जानिये **(उर्विया)** बहुत से **(वि)** विशेष करके **(राजथ)** शोभित हूजिये और जैसे **(शुभम्)** कल्याण को **(याताम्)** प्राप्त होते हुओं के **(रथाः)** वाहन **(अनु, अवृत्सत)** अनुकूल वर्तमान हैं **(उत)** और **(अन्तरिक्षम्)** आकाश को **(वि)** विशेष करके **(ममिरे)** व्याप्त होते हैं, वैसे आप लोग **(ओजसा)** बल से **(वि)** विशेष करके **(राजथ)** शोभित हूजिये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! ब्रह्मचर्य्य से शरीर और आत्मा के बल को धारण करके और क्रियाकुशलता को जान के जैसे ईश्वर अन्तरिक्ष में सम्पूर्ण पदार्थों को उत्पन्न करता है, वैसे ही आप लोग अनेक व्यवहारों को सिद्ध कीजिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः।

विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत॥ ३॥

साकम्। जाताः। सुऽभ्वः। साकम्। उक्षिताः। श्रिये। चित्। आ। प्रऽतरम्। ववृधुः। नरः। विऽरोकिणः। सूर्यस्यऽइव। रश्मयः। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥ ३॥

पदार्थः-(साकम्) सह **(जाताः)** उत्पन्नाः **(सुभ्वः)** ये शोभना भवन्ति **(साकम्)** सङ्गे **(उक्षिताः)** सिक्ताः **(श्रिये)** शोभायै धनाय वा **(चित्)** अपि **(आ) (प्रतरम्)** प्रकर्षेण दुःखात्तारकं व्यवहाराम् **(वावृधुः)** वर्धयन्तु **(नरः)** सत्यं नेतारः **(विरोकिणः)** विविधो रोको रुचिर्विद्यते येषु ते **(सूर्य्यस्येव) (रश्मयः)** किरणाः **(शुभम्)** कल्याणम् **(याताम्)** प्राप्नुवताम् **(अनु) (रथाः)** रमणीया यानादयः **(अवृत्सत)** वर्त्तन्ते॥ ३॥

अन्वयः-हे नरः! सूर्य्यस्येव साकं जाताः सुभ्वः साकमुक्षिता विरोकिणो रश्मय प्रतरमा वावृधुस्तथा चित्सखायः सन्तः श्रिये प्रवृत्ता भवत यथा शुभं यातां रथा अन्ववृत्सत तथा सर्वोपकारमनुवर्त्तध्वम्॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यूयं सूर्यस्य रश्मय इव सहैव पुरुषार्थाय समुपतिष्ठध्वम्। यथा कल्याणकारिणा रथाननु भृत्या वर्त्तन्ते तथैव धर्ममनुवर्त्तध्वम्॥ ३॥

पदार्थः-हे **(नरः)** सत्य को पहुंचाने वाले मनुष्यो! **(सूर्य्यस्येव)** सूर्य के जैसे **(साकम्)** एक साथ **(जाताः)** उत्पन्न और **(सुभ्वः)** शोभित **(साकम्)** साथ में **(उक्षिताः)** सींचे हुए **(विरोकिणः)** अनेक प्रकार की रुचि वर्त्तमान जिनमें वे **(रश्मयः)** किरण **(प्रतरम्)** अत्यन्त दुःख से पार करने वाले व्यवहार को **(आ)** सब प्रकार **(वावृधुः)** बढ़ावें वैसे **(चित्)** भी मित्र होते हुए **(श्रिये)** शोभा वा धन के लिये प्रवृत्त हूजिये और जैसे **(शुभम्)** कल्याण को **(याताम्)** प्राप्त होते हुओं के **(रथाः)** सुन्दर वाहन आदि **(अनु, अवृत्सत)** पीछे वर्त्तमान हैं, वैसे सब के उपकार के पीछे वर्तिये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! आप लोग सूर्य्य की किरणों के सदृश एक साथ ही पुरुषार्थ के लिये उद्यत हूजिये और जैसे कल्याण करने वालों के रथों के पीछे भृत्यजन वर्त्तमान होते हैं, वैसे ही धर्म के पीछे वर्त्तमान हूजिये॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम्।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत॥ ४॥

आऽभूषेण्यम्। वः। मरुतः। महिऽत्वनम्। दिदृक्षेण्यम्। सूर्यस्यऽइव। चक्षणम्। उतो इति। अस्मान्। अमृतऽत्वे। दधातन। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥ ४॥

पदार्थः-(आभूषेण्यम्) अलङ्कर्त्तव्यम् **(वः)** युष्माकम् **(मरुतः)** प्राण इव प्रियाचरणाः **(महित्वनम्) (दिदृक्षेण्यम्)** द्रष्टुं योग्यम् **(सूर्यस्येव) (चक्षणम्)** प्रकाशनम् **(उतो)** अपि **(अस्मान्)**

(अमृतत्वे) अमृतानां नाशरहितानां पदार्थानां भावे वर्त्तमाने **(दधातन)** **(शुभम्)** धर्म्यं मार्गम् **(याताम्)** गच्छताम् **(अनु)** **(रथाः)** **(अवृत्सत)**॥४॥

अन्वयः-हे मरुतो! येषां वस्सूर्य्यस्येवाऽऽभूषेण्यं दिदृक्षेण्यं चक्षणं महित्वनमस्ति येनोतो अस्मानमृतत्वे दधातन येषां शुभं यातां रथा अन्ववृत्सत तान् वयं सततं सत्कुर्य्याम॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सूर्य्यवन्न्यायप्रकाशका अन्यायान्धकारनिरोधका धर्मपथामनुगामिनः स्युस्तान् सदैव यूयं प्रशंसत॥४॥

पदार्थः-हे **(मरुतः)** प्राण के सदृश प्रिय आचरण करने वालो! जिन **(वः)** आप लोगों का **(सूर्य्यस्येव)** सूर्य्य के सदृश **(आभूषेण्यम्)** शोभा करने और **(दिदृक्षेण्यम्)** देखने को योग्य **(चक्षणम्)** प्रकाश **(महित्वनम्)** और बड़प्पन है जिससे **(उतो)** निश्चित **(अस्मान्)** हम लोगों को **(अमृतत्वे)** नाशरहित पदार्थों के भाव अर्थात् नित्यपन के वर्त्तमान होने पर **(दधातन)** धारण कीजिये और जिन **(शुभम्)** धर्मयुक्त मार्ग को **(याताम्)** प्राप्त होते हुओं के **(रथाः)** वाहन **(अनु, अवृत्सत)** अनुकूल वर्त्तमान हैं, उनका हम लोग निरन्तर सत्कार करें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सूर्य्य के सदृश न्याय के प्रकाशक, अन्यायरूपी अन्धकार के रोकने वाले, धर्ममार्ग के अनुगामी होवें, उनकी सदा ही आप लोग प्रशंसा करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत॥५॥१७॥

उत्। ईरयथ। मरुतः। समुद्रतः। यूयम्। वृष्टिम्। वर्षयथ। पुरीषिणः। न। वः। दस्राः। उप। दस्यन्ति। धेनवः। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥५॥

पदार्थः-(**उत्**) उत्कृष्टे **(ईरयथा)** प्रेरयथ। अत्र **संहितायामिति** दीर्घः। **(मरुतः)** मनुष्याः **(समुद्रतः)** अन्तरिक्षात् **(यूयम्)** **(वृष्टिम्)** **(वर्षयथा)** अत्र **संहितायामिति** दीर्घः। **(पुरीषिणः)** पुरीषं बहुविधं पोषणं विद्यते येषु ते **(न)** **(वः)** युष्मान् **(दस्राः)** उपक्षेतारः **(उप)** **(दस्यन्ति)** क्षयन्ति **(धेनवः)** वाचः **(शुभम्)** **(याताम्)** **(अनु)** **(रथाः)** **(अवृत्सत)**॥५॥

अन्वयः-हे पुरीषिणो मरुतो! यूयमस्मान् सत्कर्मसूदीरयथा यथा वायवः समुद्रतो वृष्टिं कुर्वन्ति तथा यूयं वर्षयथा यतो दस्रा धेनवो वो नोप दस्यन्ति यथा शुभं यातां रथा अन्ववृत्सत तथा धर्ममार्गमनुवर्त्तध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा वायवोऽन्तरिक्षाद्वृष्टिं कृत्वा सर्वान् प्राणिनस्तर्प्पयित्वा दुःखक्षयं कुवन्ति तथैव सत्यविद्यापदेशवृष्ट्याऽविद्यान्धकारदुःखं निवारयन्तु॥५॥

पदार्थः-हे (**पुरीषिणः**) बहुत प्रकार का पोषण विद्यमान जिनमें वे (**मरुतः**) मनुष्यो! (**यूयम्**) आप लोग हम लोगों की श्रेष्ठकर्मों में (**उत्, ईरयथा**) प्रेरणा कीजिये और जैसे पवन (**समुद्रतः**) अन्तरिक्ष से (**वृष्टिम्**) वर्षा करते हैं, वैसे आप लोग (**वर्षयथा**) वर्षाइये जिससे (**दस्राः**) नाश होने वाले और (**धेनवः**) वाणियाँ (**वः**) आप लोगों को (**न**) नहीं (**उप, दस्यन्ति**) उपक्षय करते जैसे (**शुभम्**) कल्याण को (**याताम्**) प्राप्त होते हुओं के (**रथाः**) वाहन (**अनु, अवृत्सत**) अनुकूल वर्त्तते हैं, वैसे धर्ममार्ग का अनुकूल वर्त्ताव कीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमाङ्कार है। हे विद्वान् जनो! जैसे पवन अन्तरिक्ष से वृष्टि करके सम्पूर्ण प्राणियों को तृप्त करके दुःख का नाश करते हैं, वैसे ही सत्यविद्या के उपदेश की वृष्टि से अविद्यारूप अन्धकार से हुए दुःख का निवारण कीजिये॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यदश्वान् धूर्षु पृषतीरयुग्ध्वं हिरण्ययान् प्रत्यत्कान् अमुग्ध्वम्।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत॥६॥

यत्। अश्वान्। धूःऽसु। पृषतीः। अयुग्ध्वम्। हिरण्ययान्। प्रति। अत्कान्। अमुग्ध्वम्। विश्वाः। इत्। स्पृधः। मरुतः। वि। अस्यथ। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥६॥

पदार्थः-(**यत्**) यान् (**अश्वान्**) अग्न्यादीन् (**धूर्षु**) विमानादियानावयवकोष्ठेषु (**पृषतीः**) वायुजलगतीः (**अयुग्ध्वम्**) संयोजयत (**हिरण्ययान्**) ज्योतिर्मयान् (**प्रति**) (**अत्कान्**) व्यक्तान् (**अमुग्ध्वम्**) मुञ्चत (**विश्वाः**) समग्राः (**इत्**) एव (**स्पृधः**) याः स्पर्ध्यन्ते ताः स-ामा वा (**मरुतः**) वायुवद्वेगबलयुक्ताः (**वि**) विशेषेण (**अस्यथ**) प्रचालयत (**शुभम्**) (**याताम्**) (**अनु**) (**रथाः**) (**अवृत्सत**)॥६॥

अन्वयः-हे मरुतो! यथा शुभं यातां रथा अन्ववृत्सत तथा धूर्षु यद्धिरण्ययान् प्रत्यत्कान् पृषतीरश्वान् यूयमयुग्ध्वममुग्ध्वम्। तैर्विश्वाः स्पृध इद् व्यस्यथ॥६॥

भावार्थः-ये मनुष्या अग्निवायुजलादीन् यानेषु सम्प्रयुञ्जते ते विजयाय प्रभवो भूत्वा धर्म्यमार्गमनुगा जायन्ते॥६॥

पदार्थः-हे (**मरुतः**) वायु के सदृश वेग और बल से युक्त जनो! जैसे (**शुभम्**) कल्याण को (**याताम्**) प्राप्त होते हुओं के (**रथाः**) वाहन (**अनु, अवृत्सत**) अनुकूल वर्त्तमान हैं, वैसे (**धूर्षु**) विमान आदि यानों के अवयव कोष्ठों में (**यत्**) जिन (**हिरण्ययान्**) ज्योतिर्मय (**प्रति, अत्कान्**) स्पष्ट (**पृषतीः**) वायु और जल के गमनों और (**अश्वान्**) अग्नि आदिकों को आप लोग (**अयुग्ध्वम्**) संयुक्त कीजिये और (**अमुग्ध्वम्**) त्यागिये, उनसे (**विश्वाः**) सम्पूर्ण (**स्पृधः**) स्पर्धायें, रोष (**इत्**) ही (**वि**) विशेष करके (**अस्यथ**) चलाइये॥६॥

भावार्थः-जो मनुष्य अग्नि, वायु और जल आदिकों को वाहनों में उत्तम प्रकार युक्त करते हैं, वे विजय के लिये समर्थ होकर धर्मसम्बन्धी मार्ग के अनुगामी होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत्।

उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत॥७॥

न। पर्वताः। न। नद्यः। वरन्त। वः। यत्र। अचिध्वम्। मरुतः। गच्छथ। इत्। ऊँ इति। तत्। उत। द्यावापृथिवी इति। याथन। परि। शुभम्। यातम्। अनु। रथाः। अवृत्सत॥७॥

पदार्थः-(**न**) निषेधे (**पर्वताः**) मेघाः (**न**) (**नद्यः**) (**वरन्त**) वारयन्ति (**वः**) (**यत्र**) (**अचिध्वम्**) प्राप्नुत गच्छथ (**मरुतः**) मनुष्याः (**गच्छथ**) (**इत्**) एव (**उ**) (**तत्**) (**उत**) अपि (**द्यावापृथिवी**) प्रकाशभूमी (**याथना**) प्राप्नुत। अत्र **संहितायामि**ति दीर्घः। (**परि**) सर्वतः (**शुभम्**) (**याताम्**) (**अनु**) (**रथाः**) (**अवृत्सत**)॥७॥

अन्वयः-हे मरुतो! यूयं द्यावापृथिवी गच्छथेत्तदु परि याथना। उत यत्राऽचिध्वं यथा शुभं यातां रथान्ववृत्सत तत्रानुवर्त्तध्वम् यथा सूर्य्यस्य न पर्वता न नद्यो वरन्त तथा वो युष्मान् केऽपि रोद्धुं न शक्नुवन्ति॥७॥

भावार्थः-ये मनुष्याः पृथिव्यादिविद्यया सृष्टिक्रमतः कार्य्याणि साधयेयुस्तान् दारिद्र्यं कदाचिन्नाप्नुयात्॥७॥

पदार्थः-हे (**मरुतः**) मनुष्यो! आप लोग (**द्यावापृथिवी**) प्रकाश और भूमि को (**गच्छथ, इत्**) प्राप्त ही हूजिये (**तत्**) उनको (**उ**) और भी (**परि, याथना**) सब ओर से प्राप्त हूजिये (**उत**) और (**यत्र**) जहाँ (**अचिध्वम्**) प्राप्त हूजिये और जैसे (**शुभम्**) कल्याण को (**याताम्**) प्राप्त होते हुओं के (**रथाः**) वाहन (**अनु, अवृत्सत**) पश्चात् वर्त्तमान है, यहाँ वर्त्तमान हूजिये और जैसे सूर्य्य के सम्बन्ध को (**न**) न (**पर्वताः**) मेघ (**न**) न (**नद्यः**) नदियां (**वरन्त**) वारण करती हैं, वैसे (**वः**) आप लोगों को कोई भी रोक नहीं सकते हैं॥७॥

भावार्थः-जो मनुष्य पृथिवी आदि की विद्या से तथा सृष्टि के क्रम से कार्य्यों को सिद्ध करें, उनको दारिद्र्य कभी प्राप्त नहीं होवे॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते।

विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत॥८॥

यत्। पूर्व्यम्। मरुतः। यत्। च। नूतनम्। यत्। उद्यते। वसवः। यत्। च। शस्यते। विश्वस्य। तस्य। भवथ। नवेदसः। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥८॥

पदार्थः-(यत्) (पूर्व्यम्) पूर्वैर्विद्वद्भिर्निष्पादितम् **(मरुतः)** मनुष्याः **(यत्) (च) (नूतनम्)** नवीनम् **(यत्) (उद्यते)** कथ्यते **(वसवः)** वासकर्त्तारः **(यत्) (च) (शस्यते)** स्तूयते **(विश्वस्य)** समग्रस्य संसारस्य **(तस्य) (भवथा) (नवेदसः)** न विद्यते वेदो वित्तं येषान्ते **(शुभम्) (याताम्) (अनु) (रथाः) (अवृत्सत)**॥८॥

अन्वयः-हे वसवो नवेदसो मरुतो! यत्पूर्व्यं यन्नूतनं यच्चोद्यते यच्च शस्यते तस्य विश्वस्य तथा रक्षितारो भवथा। यथा शुभं यातां रथा अन्ववृत्सत॥८॥

भावार्थः-ये शिक्षया विद्यादण्डेन जगद्रक्षन्ति त एव प्रशंसिता भूत्वा कल्याणमुपगच्छन्ति॥८॥

पदार्थः-हे **(वसवः)** वास करानेवाले! **(नवेदसः)** नहीं विद्यमान धन जिनके वे **(मरुतः)** मनुष्यो! **(यत्)** जो **(पूर्व्यम्)** प्राचीन विद्वानों से निष्पन्न किया हुआ **(यत्)** जो **(नूतनम्)** नवीन **(यत्, च)** जो **(उद्यते)** कहा जाता है **(यत्, च)** और जो **(शस्यते)** स्तुत किया जाता है **(तस्य)** उस **(विश्वस्य)** सम्पूर्ण संसार की वैसे रक्षा करने वाले **(भवथा)** हूजिये जैसे **(शुभम्)** कल्याण को **(याताम्)** प्राप्त होते हुओं के **(रथाः)** वाहन **(अनु, अवृत्सत)** वर्त्तमान होते हैं॥८॥

भावार्थः-जो शिक्षा और विद्या के दण्ड से संसार की रक्षा करते हैं, वे ही प्रशंसित होकर कल्याण को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन।
अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत॥९॥

मृळत। नः। मरुतः। मा। वधिष्टन। अस्मभ्यम्। शर्म। बहुलम्। वि। यन्तन। अधि। स्तोत्रस्य। सख्यस्य। गातन। शुभम्। याताम्। अनु। रथाः। अवृत्सत॥९॥

पदार्थः-(मृळत) सुखयत **(नः)** अस्मान् **(मरुतः)** विद्वांसः **(मा) (वधिष्टन) (अस्मभ्यम्) (शर्म)** सुखं गृहं वा **(बहुलम्) (वि) (यन्तन)** वियच्छत **(अधि) (स्तोत्रस्य)** प्रशंसितस्य **(सख्यस्य)** सख्युर्भावस्य **(गातन)** प्रशंसत **(शुभम्) (याताम्) (अनु) (रथाः) (अवृत्सत)**॥९॥

अन्वयः-हे मरुतो! यूयं नो मूळत मा वधिष्टनास्मभ्यं बहुलं शर्म वि यन्तनाधि स्तोत्रस्य सख्यस्य शुभं गातन ये यातां रथा अवृत्सत ताननु गच्छथ॥९॥

भावार्थः-मनुष्यैर्विद्वद्भ्यः प्रार्थयित्वा शुभा गुणा ग्राह्याः सर्वत्र मैत्रीं भावयित्वा सर्वार्थं सुखमनुगम्येत॥९॥

पदार्थः-हे **(मरुतः)** विद्वानो! आप लोग **(न)** हम लोगों को **(मृळत)** सुखी करिये किन्तु **(मा)** मत **(वधिष्टन)** नष्ट करिये और **(अस्मभ्यम्)** हम लोगों के लिये **(बहुलम्)** बहुत **(शर्म)** सुख वा गृह **(वि, यन्तन)** विशेष करके दीजिये और **(अधि, स्तोत्रस्य)** अधिक प्रशंसित **(सख्यस्य)** मित्रपने के **(शुभम्)** सुख की **(गातन)** प्रशंसा करिये और जो **(याताम्)** प्राप्त होते हुओं के **(रथाः)** वाहन **(अवृत्सत)** वर्त्तमान हैं, उनके **(अनु)** अनुगामी हूजिये॥९॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों से प्रार्थना करके श्रेष्ठ गुणों को ग्रहण करें और सब जगह मित्रता करके सब के लिये सुख प्राप्त कराया जावे॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः।

जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम्॥१०॥१८॥

यूयम्। अस्मान्। नयत। वस्यः। अच्छ। निः। अंहतिऽभ्यः। मरुतः। गृणानाः। जुषध्वम्। नः। हव्यऽदातिम्। यजत्राः। वयम्। स्याम। पतयः। रयीणाम्॥१०॥

पदार्थः-**(यूयम्)** **(अस्मान्)** **(नयत)** **(वस्यः)** वसीयसोऽतिधनाढ्यान् **(अच्छा)** अत्र **संहितायामि**ति दीर्घः। **(निः)** नितराम् **(अंहतिभ्यः)** **(मरुतः)** विद्वांसो मनुष्याः **(गृणानाः)** स्तुवन्तः **(जुषध्वम्)** सेवध्वम् **(नः)** अस्मान् **(हव्यदातिम्)** दातव्यदानम् **(यजत्राः)** सङ्गन्तारः **(वयम्)** **(स्याम)** भवेम **(पतयः)** पालकाः **(रयीणाम्)** धनानाम्॥१०॥

अन्वयः-हे गृणाना मरुतो! यूयं वस्योऽस्मान् रक्षतांहतिभ्यः पृथगच्छा निर्नयत नोऽस्मान् जुषध्वम्। हे यजत्रा! नो हव्यदातिं नयत यतो वयं रयीणां पतयः स्याम॥१०॥

भावार्थः-जिज्ञासवो विदुषां प्रार्थनामेवं कुर्युर्भवन्तोऽस्मान् दुष्टाचारात् पृथक्कृत्य धर्म्यं पन्थानं प्रापयन्तु॥१०॥

अत्र मरुद्विद्वदादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चपञ्चाशत्तमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(गृणानाः)** स्तुति करते हुए **(मरुतः)** विद्वान् मनुष्यो! **(यूयम्)** आप लोग **(वस्यः)** अति धन से युक्त **(अस्मान्)** हम लोगों की रक्षा कीजिये और **(अंहतिभ्यः)** मारते हैं जिनसे उन अस्त्रों से पृथक् **(अच्छा)** उत्तम प्रकार **(निः, नयत)** निरन्तर पहुंचाइये और **(नः)** हम लोगों की **(जुषध्वम्)** सेवा करिये। और हे **(यजत्राः)** मिलने वाले जनो! हम लोगों के लिये **(हव्यदातिम्)** देने योग्य दान को

प्राप्त कराइये जिससे **(वयम्)** हम लोग **(रयीणाम्)** धनों के **(पतयः)** पालन करने वाले **(स्याम)** होवें॥१०॥

भावार्थः-जिज्ञासुजन विद्वानों की प्रार्थना इस प्रकार करें कि आप लोग हम लोगों को दुष्ट आचरण से अलग करके धर्मयुक्त मार्ग को प्राप्त कराइये॥१०॥

इस सूक्त में मरुत नाम से विद्वान् आदि के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पचपनवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य षट्पञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १, २, ६ निचृद्बृहती। ४ विराड्बृहती। ८, ९ बृहती छन्दः। मध्यमः स्वरः। ३ विराट्पङ्क्तिः। ७ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ विद्वदुपदेशेन मनुष्यगुणान् वायुगुणान् विदित्वा पुनर्मनुष्याः किं कुर्युरित्याह॥

विद्वानों के उपदेश से मनुष्य और वायु के गुणों को जानकर फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

अग्ने॒ शर्ध॑न्तमा ग॒णं पि॒ष्टं रु॒क्मेभि॑र॒ञ्जिभि॑:।
विशो॑ अ॒द्य म॒रुता॒मव॑ ह्वये दि॒वश्चि॑द्रोच॒नादधि॑॥ १॥

अग्ने॑। शर्ध॑न्तम्। आ। ग॒णम्। पि॒ष्टम्। रु॒क्मेभि॑:। अ॒ञ्जिभि॑:। विश॑:। अ॒द्य। म॒रुता॑म्। अव॑। ह्वये॒। दि॒व:। चि॒त्। रो॒च॒नात्। अधि॑॥ १॥

पदार्थः-(**अग्ने**) विद्वन् (**शर्धन्तम्**) बलवन्तम् (**आ**) समन्तात् (**गणम्**) समूहम् (**पिष्टम्**) अवयवीभूतम् (**रुक्मेभिः**) रोचमानैः सुवर्णादिभिर्वा (**अञ्जिभिः**) कमनीयैः (**विशः**) (**अद्य**) (**मरुताम्**) मनुष्याणाम् (**अव**) (**ह्वये**) शब्दयेयम् (**दिवः**) प्रकाशमानात् (**चित्**) अपि (**रोचनात्**) रुचिविषयात् (**अधि**) उपरिभावे॥ १॥

अन्वयः-हे अग्ने! यथाऽहं रुक्मेभिरञ्जिभिर्मरुतां पिष्टं शर्धन्तं गणमाह्वयेऽद्य दिवो रोचनाच्चिद्विशोऽध्यव ह्वये तथा त्वमप्याचर॥ १॥

भावार्थः-अत्र वाचकलुप्तोपालङ्कारः। ये पुरुषा वायूनां मनुष्याणाञ्च गुणान् जानन्ति ते सत्कर्त्तारो भवन्ति॥ १॥

पदार्थः-हे (**अग्ने**) विद्वन्! जैसे मैं (**रुक्मेभिः**) प्रकाशमान सुवर्ण आदि वा (**अञ्जिभिः**) सुन्दर पदार्थों से (**मरुताम्**) मनुष्यों के (**पिष्टम्**) अवयवीभूत (**शर्धन्तम्**) बलवान् (**गणम्**) समूह को (**आ**) सब ओर से (**ह्वये**) पुकारता हूँ और (**अद्य**) आज (**दिवः**) प्रकाशमान (**रोचनात्**) प्रीति के विषय से (**चित्**) भी (**विशः**) मनुष्यों को (**अधि**) ऊपर के भाव में (**अव**) अत्यन्त पुकारता हूँ, वैसे आप भी आचरण करिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य वायु और मनुष्यों के गुणों को जानते हैं, वे सत्कार करने वाले होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यथा॑ चि॒न्मन्य॑से हृ॒दा तदिन्मे॑ जग्मुरा॒शस॑:।

ये त॒ नेदि॑ष्ठं हव॑नान्या॒गम॒न् तान् व॑र्ध भी॒मसं॑दृश:॥ २॥

यथा॑। चि॒त्। मन्य॑से। हृ॒दा। तत्। इत्। मे॒। ज॒ग्मु॒:। आ॒ऽशस॑:। ये। ते॒। नेदि॑ष्ठम्। हव॑नानि। आ॒ऽगम॑न्। तान्। व॒र्ध॒। भी॒मऽसं॑दृश:॥ २॥

पदार्थ:-(यथा) येन प्रकारेण **(चित्)** अपि **(मन्यसे)** **(हृदा)** हृदयेन **(तत्)** **(इत्)** एव **(मे)** मह्यम् **(जग्मु:)** प्राप्नुवन्ति **(आशस:)** ये आशंसन्ति ते **(ये)** **(ते)** तुभ्यम् **(नेदिष्ठम्)** अतिशयेनान्तिकम् **(हवनानि)** दातुं ग्रहीतुं योग्यानि वस्तूनि **(आगमन्)** आगच्छन्तु **(तान्)** **(वर्ध)** वर्धय **(भीमसन्दृश:)** भीमं भयङ्करं सन् दृग्दर्शनं येषान्ते॥ २॥

अन्वय:-हे मनुष्य! ये ते नेदिष्ठमाशसो जग्मुस्ताँस्त्वं वर्ध। यथा चित् त्वं हृदा मे तन्मन्यसे तथा हवनान्यागमन्। भीमसन्दृश इज्जग्मु:॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। मनुष्या: परस्परस्योपकारेण सुखिनो भवन्तु॥ २॥

पदार्थ:-हे मनुष्य! **(ये)** जो **(ते)** आपके लिये **(नेदिष्ठम्)** अत्यन्त सामीप्य को **(आशस:)** कहने वाले **(जग्मु:)** प्राप्त होते हैं **(तान्)** उनकी आप **(वर्ध)** वृद्धि करिये और **(यथा, चित्)** जिसी प्रकार से आप **(हृदा)** हृदय से **(मे)** मेरे लिये **(तत्)** उसको **(मन्यसे)** मानते हो, उस प्रकार **(हवनानि)** देने-लेने योग्य वस्तुयें **(आगमन्)** प्राप्त होवें और **(भीमसन्दृश:)** भयङ्कर दर्शन जिनका वे **(इत्)** ही प्राप्त होते हैं॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। मनुष्य लोग परस्पर के उपकार से सुखी हों॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मी॒ळ्हुष्म॑तीव पृथि॒वी परा॑हता॒ मद॑न्त्येत्य॒स्मदा।

ऋक्षो॒ न वो॑ मरुत॒: शिमी॑वाँ॒ अमो॑ दु॒ध्रो गौरि॑व भीम॒यु:॥ ३॥

मी॒ळ्हुष्म॑तीऽइव। पृ॒थि॒वी। परा॑ऽहता। मद॑न्ती। ए॒ति॒। अ॒स्मत्। आ। ऋक्ष॑:। न। व॒:। म॒रु॒त॒:। शिमी॑ऽवान्। अम॑:। दु॒ध्र:। गौ:ऽइ॑व। भी॒म॒ऽयु:॥ ३॥

पदार्थ:-(मीळ्हुष्मतीव) मीढु: सेक्ता वीर्यप्रद: प्रशस्त: पतिर्विद्यते यस्यास्तत् **(पृथिवी)** भूमि: **(पराहता)** दूरं प्राप्ता **(मदन्ती)** हर्षन्ती **(एति)** प्राप्नोति **(अस्मत्)** **(आ)** **(ऋक्ष:)** पशुविशेष: **(न)** इव **(व:)** युष्मान् **(मरुत:)** मनुष्या: **(शिमीवान्)** प्रशस्तकर्मवान् **(अम:)** गृहम् **(दुध्र:)** दु:खेन धर्त्तुं योग्य: **(गौरिव)** आदित्य इव **(भीमयु:)** यो भीमं भयङ्करं योद्धारं याति स:॥ ३॥

अन्वय:-हे मरुतो! यथा: व: पृथिवी मीळ्हुष्मतीवास्मत् पराहता मदन्ती वर्त्तते तां शिमीवानृक्षो नैति

गौरिव भीमयुर्दुध्रोऽम एति तथा यूयमप्याचरत॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये यतमानाः कर्माणि कुर्वन्ति ते सदा सुखिनो भवन्ति॥३॥

पदार्थः-हे **(मरुतः)** मनुष्यो! जैसे **(वः)** आप लोगों को **(पृथिवी)** भूमि **(मीळ्हुष्मतीव)** वीर्य्य का देने वाला सुन्दर स्वामी जिसका उसके समान **(अस्मत्)** हम लोगों से **(पराहता)** दूर को प्राप्त **(मदन्ती)** प्रसन्न होती हुई वर्त्तमान है, उसको **(शिमीवान्)** अच्छे कर्म्मों वाला **(ऋक्षः)** पशुविशेष के **(न)** समान **(आ, एति)** प्राप्त होता तथा **(गौरिव)** सूर्य्य के सदृश **(भीमयुः)** भयङ्कर युद्ध करने वाले को प्राप्त होने वाला **(दुध्रः)** दुःख से धारण करने योग्य पुरुष **(अमः)** गृह को प्राप्त होता है, वैसे आप लोग भी आचरण करो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो प्रयत्न करते हुए कर्म्मों को करते हैं, वे सदा सुखी होते हैं॥३॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वानों के विषय को अगले मन्त्र में कहते हैं॥

नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः।
अश्मानं चित्स्वर्यं१ पर्वतं गिरिं प्र च्यावयन्ति यामभिः॥४॥

नि। ये। रिणन्ति। ओजसा। वृथा। गावः। न। दुःऽधुरः। अश्मानम्। चित्। स्वर्यम्। पर्वतम्। गिरिम्। प्र। च्यावयन्ति। यामऽभिः॥४॥

पदार्थः-**(नि)** **(ये)** **(रिणन्ति)** प्राप्नुवन्ति गच्छन्ति वा **(ओजसा)** पराक्रमेण **(वृथा)** **(गावः)** **(न)** इव **(दुर्धुरः)** दुर्गता धुरो येषान्ते **(अश्मानम्)** मेघम् **(चित्)** अपि **(स्वर्यम्)** स्वरेषु शब्देषु साधुम् **(पर्वतम्)** पर्वतमिवोच्छ्रितं **(गिरिम्)** यो गृणाति शब्दयति तम् **(प्र)** **(च्यावयन्ति)** निपातयन्ति **(यामभिः)** प्रहरैः॥४॥

अन्वयः-ये मनुष्या ओजसा नि रिणन्ति ये चिदपि यामभिः स्वर्यं पर्वतं गिरिमश्मानं दुर्धुरो न प्र च्यावयन्ति वृथा गावो न भवन्ति ते सर्वैः सत्कर्त्तव्या भवन्ति॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्यकिरणाः मेघमधः पातयन्ति तथा विद्वांसो दोषन्निपातयन्ति॥४॥

पदार्थः-**(ये)** जो मनुष्य **(ओजसा)** पराक्रम से **(नि, रिणन्ति)** प्राप्त होते हैं **(चित्)** और जो **(यामभिः)** प्रहरों से **(स्वर्यम्)** शब्दों में श्रेष्ठ **(पर्वतम्)** पर्वत के सदृश ऊँचे **(गिरिम्)** शब्द कराने वाले **(अश्मानम्)** मेघ को **(दुर्धुरः)** दूरगत हैं धुरा जिनकी उनके **(न)** समान **(प्र, च्यावयन्ति)** गिराते हैं और **(वृथा)** व्यर्थ निज अर्थ के विना **(गावः)** गौओं के सदृश होते हैं, वे सब से सत्कार करने योग्य होते हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य की किरणें मेघ को नीचे गिराती हैं, वैसे विद्वान् लोग दोषों को दूर करते हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उत्ति॑ष्ठ नू॒नमे॑षां॒ स्तोमै॒: समु॑क्षितानाम्।

म॒रुता॑ पुरु॒तम॒मपू॑र्व्यं॒ गवां॒ सर्गं॑मिव ह्वये॥५॥१९॥

उत्। ति॒ष्ठ॒। नू॒नम्। ए॒षा॒म्। स्तोमै॑:। सम्ऽउ॑क्षितानाम्। म॒रुता॑म्। पु॒रु॒ऽतम॑म्। अपू॑र्व्यम्। गवा॑म्। सर्ग॑म्ऽइव। ह्व॒ये॒॥५॥

पदार्थः-(**उत्**) (**तिष्ठ**) ऊद्ध्वं गच्छ (**नूनम्**) निश्चयेन (**एषाम्**) (**स्तोमैः**) प्रशंसाभिः (**समुक्षितानाम्**) सम्यक् सेक्तॄणाम् (**मरुताम्**) मनुष्याणाम् (**पुरुतमम्**) बहुतमम् (**अपूर्व्यम्**) अपूर्वे भवम् (**गवाम्**) धेनूनाम् (**सर्गमिव**) उदकमिव (**ह्वये**)॥५॥

अन्वयः-हे विद्वन्! यथाहं गवां सर्गमिव पुरुतममपूर्व्यं ह्वये तथैषां समुक्षितानां मरुतां स्तोमैर्नूनमुत्तिष्ठ॥५॥

भावार्थः-मनुष्यैः सृष्टिक्रमं विज्ञाय सर्वानन्द आप्तव्यः॥५॥

पदार्थः-हे विद्वान्! जैसे मैं (**गवाम्**) गौओं के (**सर्गमिव**) जल के सदृश (**पुरुतमम्**) अत्यन्त बहुत (**अपूर्व्यम्**) अपूर्व में हुए को (**ह्वये**) पुकारता हूँ वैसे (**एषाम्**) इन (**समुक्षितानाम्**) उत्तम प्रकार से सींचने वाले (**मरुताम्**) मनुष्यों की (**स्तोमैः**) प्रशंसाओं से (**नूनम्**) निश्चय से (**उत्, तिष्ठ**) ऊपर पहुँचिये॥५॥

भावार्थः-मनुष्यों को चाहिये कि सृष्टि के क्रम को जानकर सम्पूर्ण आनन्द को प्राप्त हों॥५॥

अथाग्निविद्योपदेशमाह॥

अब अग्निविद्या के उपदेश को कहते हैं॥

यु॒ङ्ग्ध्वं ह्यरु॑षी॒ रथे॑ यु॒ङ्ग्ध्वं रथे॑षु रो॒हित॑:।

यु॒ङ्ग्ध्वं हरी॑ आजि॒रा धु॒रि वो॑ळ्ह॒वे॒ वहि॑ष्ठा धु॒रि वो॑ळ्ह॒वे॥६॥

यु॒ङ्ग्ध्वम्। हि। अरु॑षीः। रथे॑। यु॒ङ्ग्ध्वम्। रथे॑षु। रो॒हित॑:। यु॒ङ्ग्ध्वम्। हरी॒ इति॑। अ॒जि॒रा। धु॒रि। वो॒ळ्ह॒वे॒। वहि॑ष्ठा। धु॒रि। वो॒ळ्ह॒वे॥६॥

पदार्थः-(**युङ्ग्ध्वम्**) संयोजयत (**हि**) खलु (**अरुषीः**) रक्तगुणविशिष्टाः वडवा इव ज्वालाः (**रथे**) (**युङ्ध्वम्**) (**रथेषु**) (**रोहितः**) रक्तगुणविशिष्टान् (**युङ्ग्ध्वम्**) (**हरी**) धारणाकर्षणाख्यौ (**अजिरा**)

गन्तारौ **(धुरि)** **(वोळ्हवे)** वहनाय **(वहिष्ठा)** अतिशयेन वोढारः **(धुरि)** **(वोळ्हवे)** स्थानान्तरं प्रापणाय॥६॥

अन्वयः-हे विद्वांसः शिल्पिनो! यूयं रथेऽरुषीर्युङ्ग्ध्वं रथेषु रोहितो युङ्ग्ध्वं धुरि वोळ्हवेऽजिरा हरी धुरि वोळ्हवे वहिष्ठा ह्यग्निवायू युङ्ध्वम्॥६॥

भावार्थः-मनुष्यैरग्न्यादिपदार्था यानादिवहनाय नियोजनीयाः॥६॥

पदार्थः-हे विद्वान् कारीगरो! आप लोग **(रथे)** वाहन में **(अरुषीः)** रक्तगुणों में विशिष्ट घोड़ियों के सदृश ज्वालाओं को **(युङ्ग्ध्वम्)** युक्त कीजिये **(रथेषु)** रथों में **(रोहितः)** लाल गुण वाले पदार्थों को और **(युङ्ग्ध्वम्)** युक्त कीजिये और **(धुरि)** अग्रभाग में **(वोळ्हवे)** प्राप्त करने के लिये **(अजिरा)** जाने वाले **(हरी)** धारण और आकर्षण को तथा **(धुरि)** अग्रभाग में **(वोळ्हवे)** स्थानान्तर में प्राप्त होने के लिये **(वहिष्ठा)** अत्यन्त पहुँचाने वाले **(हि)** निश्चय अग्नि और पवन को **(युङ्ग्ध्वम्)** युक्त कीजिए॥६॥

भावार्थः-मनुष्यों को चाहिये कि अग्नि आदि पदार्थों को वाहन आदि के चलाने के लिए निरन्तर युक्त करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः।

मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत॥७॥

उत। स्यः। वाजी। अरुषः। तुविऽस्वनिः। इह। स्म। धायि। दर्शतः। मा। वः। यामेषु। मरुतः। चिरम्। करत्। प्र। तम्। रथेषु। चोदत॥७॥

पदार्थः-(उत) **(स्यः)** सः **(वाजी)** वेगवान् **(अरुषः)** मर्मणः **(तुविष्वणिः)** बलसेवी **(इह)** अस्मिन् **(स्म)** **(धायि)** ध्रियते **(दर्शतः)** द्रष्टव्यः **(मा)** **(वः)** युष्मान् **(यामेषु)** यमादियुक्तशुभव्यवहारेषु प्रहरेषु वा **(मरुतः)** मानवाः **(चिरम्)** **(करत्)** कुर्यात् **(प्र)** **(तम्)** **(रथेषु)** **(चोदत)**॥७॥

अन्वयः-हे मरुतो! यो वाजी इहाऽरुषस्तुविष्वणिर्दर्शतो धायि स्यो यामेषु वश्चिरं मा स्म करत्तमुत रथेषु प्र चोदत प्रेरयत॥७॥

भावार्थः-येऽग्निविद्यां धरन्ति तान् सर्वदा सत्कुरुत॥७॥

पदार्थः-हे **(मरुतः)** मनुष्यो! जो **(वाजी)** वेगवान् **(इह)** इस में **(अरुषः)** मर्मस्थल के **(तुविष्वणिः)** बल का सेवी **(दर्शतः)** देखने योग्य **(धायि)** धारण किया जाता है **(स्यः)** वह **(यामेषु)** यम आदि से युक्त उत्तम व्यवहारों वा प्रहरों में **(वः)** आप लोगों को **(चिरम्)** बहुत कालपर्य्यन्त **(मा)** मत **(स्म)** ही **(करत्)** करे अर्थात् न निषेध करे **(तम्, उत)** उसी को **(रथेषु)** रथों में **(प्र, चोदत)** प्रेरित करो॥७॥

भावार्थः-जो अग्निविद्या को धारण करते हैं, उनका सब समय में सत्कार करो॥७॥

पुनर्वायुगुणानाह॥

फिर वायुगुणों को अगले मन्त्र में कहते हैं॥

रथं॑ नु मारु॑तं व॒यं श्र॑व॒स्युमा हु॑वामहे।

आ यस्मि॑न् त॒स्थौ सु॒रणा॑नि॒ बिभ्र॑ती॒ सचा॑ म॒रुत्सु॑ रोदसी॥८॥

रथ॑म्। नु। मारु॑तम्। व॒यम्। श्र॒व॒स्युम्। आ। हु॒वा॒म॒हे॒। आ। यस्मि॑न्। त॒स्थौ। सु॒ऽरणा॑नि। बिभ्र॑ती। सचा॑। म॒रुत्ऽसु॑। रो॒द॒सी॒॥८॥

पदार्थः-(**रथम्**) विमानादियानम् (**नु**) सद्यः (**मारुतम्**) मनुष्यवायुसम्बन्धिनम् (**वयम्**) (**श्रवस्युम्**) आत्मनः श्रव इच्छुम् (**आ**) (**हुवामहे**) स्पर्धामहे (**आ**) (**यस्मिन्**) (**तस्थौ**) (**सुरणानि**) सुष्ठु रमणीयानि (**बिभ्रती**) धरन्त्यौ (**सचा**) सम्बुद्धौ (**मरुत्सु**) वायुषु (**रोदसी**) भूमिसूर्य्यौ॥८॥

अन्वयः-यस्मिन् सुरणानि सन्ति वीर आ तस्थौ यत्र मरुत्सु सुरणानि बिभ्रती सचा रोदसी वर्त्तेते तं मारुतं श्रवस्युं रथं नु वयमा हुवामहे॥८॥

भावार्थः-यथा वायवो भूम्यादिकं धरन्ति तथैव विद्वांसः सर्वान् मनुष्यान् धरन्तु॥८॥

पदार्थः-(**यस्मिन्**) जिसमें (**सुरणानि**) सुन्दर रमण करने योग्य पदार्थ हैं और वीर (**आ**) सब प्रकार से (**तस्थौ**) स्थिर हैं तथा जिसमें (**मरुत्सु**) पवनों में सुन्दर पदार्थों को (**बिभ्रती**) धारण करते हुए (**सचा**) सम्बन्ध रखने वाले (**रोदसी**) पृथिवी और सूर्य्य वर्त्तमान हैं उस (**मारुतम्**) मनुष्य और वायुसम्बन्धी (**श्रवस्युम्**) अपनी श्रवण की इच्छा करने वाले की और (**रथम्**) विमान आदि वाहन की (**नु**) शीघ्र (**वयम्**) हम लोग (**आ, हुवामहे**) स्पर्द्धा करें॥८॥

भावार्थः-जैसे पवन भूमि आदि को धारण करते हैं, वैसे ही विद्वान् जन सब मनुष्यों को धारण करें॥८॥

पुनर्विद्वदुपदेशविषयमाह॥

फिर विद्वानों के उपदेश विषय को कहते हैं॥

तं व॒: शर्धं॑ रथे॒शुभं॑ त्वे॒षं प॑न॒स्युमा हु॑वे।

यस्मि॒न्त्सुजा॑ता सु॒भगा॑ महीयते॒ सचा॑ म॒रुत्सु॑ मी॒ळ्हुषी॥९॥२०॥४॥

तम्। व॒:। शर्ध॑म्। र॒थे॒ऽशुभ॑म्। त्वे॒षम्। प॒न॒स्युम्। आ। हु॒वे॒। यस्मि॑न्। सु॒ऽजा॑ता। सु॒ऽभगा॑। म॒हीय॑ते। सचा॑। म॒रुत्ऽसु॑। मी॒ळ्हुषी॥९॥

पदार्थः-(**तम्**) (**वः**) युष्माकम् (**शर्धम्**) बलयुक्तम् (**रथेशुभम्**) यो रथे शुम्भते तम् (**त्वेषम्**) देदीप्यमानम् (**पनस्युम्**) आत्मनः पनः स्तवनमिच्छुम् (**आ**) (**हुवे**) (**यस्मिन्**) कुले (**सुजाता**) सम्यक्

प्रसिद्धा **(सुभगा)** सौभाग्ययुक्ता **(महीयते)** सत्क्रियते **(सचा)** समवेता **(मरुत्सु)** मनुष्येषु **(मीळ्हुषी)** सेचनकर्त्री॥९॥

अन्वयः-हे मनुष्या! यस्मिन् सुजाता सुभगा सचा मीळ्हुषी मरुत्सु महीयते यमियमाप्नोति तं पनस्युमा हुवे तं वो रथेशुभं त्वेषं शर्धमा हुवे॥९॥

भावार्थः-यस्मिन् कुले कृतब्रह्मचर्याः स्त्रीपुरुषा वर्त्तन्ते तदेव कुलं भाग्यशालि मन्तव्यमिति॥९॥

अत्र विद्वद्वायुगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्पञ्चाशत्तमं सूक्तं विंशो वर्गः [चतुर्थोऽनुवाकश्च] समाप्तः॥

पदार्थः-हे मनुष्यो! **(यस्मिन्)** जिस कुल में **(सुजाता)** उत्तम प्रकार प्रसिद्ध **(सुभगा)** सौभाग्य से युक्त **(सचा)** सम्बद्ध **(मीळ्हुषी)** सेचन करने वाली **(मरुत्सु)** मनुष्यों में **(महीयते)** सत्कार की जाती और जिसको सेवन करने वाली प्राप्त होती है **(तम्)** उस **(पनस्युम्)** अपनी स्तुति की इच्छा करते हुए को **(आ, हुवे)** बुलाता हूँ, उसको **(वः)** आप लोगों के **(रथेशुभम्)** रथ के द्वारा कहते हुए **(त्वेषम्)** प्रकाशमान **(शर्धम्)** बलयुक्त को पुकारता हूँ॥९॥

भावार्थः-जिस कुल में किया ब्रह्मचर्य्य जिन्होंने ऐसे स्त्री और पुरुष वर्त्तमान हैं, उसी कुल को भाग्यशाली जानना चाहिये॥९॥

इस सूक्त में विद्वान् तथा वायु के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छप्पनवां सूक्त और बीसवां वर्ग [चतुर्थ अनुवाक] समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य सप्तपञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १, ४, ५ जगती। २, ६ विराड् जगती। ३ निचृज्जगती छन्दः। निषादः स्वरः। ७ विराट् त्रिष्टुप्। ८ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ रुद्रगुणानाह॥

अब आठ ऋचा वाले सत्तावन सूक्त का आरम्भ है, उसके प्रथम मन्त्र में रुद्रगुणों को कहते हैं॥

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे॥ १॥

आ। रुद्रासः। इन्द्रऽवन्तः। सऽजोषसः। हिरण्यऽरथाः। सुविताय। गन्तन। इयम्। वः। अस्मत्। प्रति। हर्यते। मतिः। तृष्णऽजे। न। दिवः। उत्साः। उदन्यवे॥ १॥

पदार्थः-(**आ**) समन्तात् (**रुद्रासः**) दुष्टानां रोदयितारः (**इन्द्रवन्तः**) बह्विन्द्र ऐश्वर्य्यं विद्यन्ते येषान्ते (**सजोषसः**) समानप्रीतिसेविनः (**हिरण्यरथाः**) हिरण्यं सुवर्णं रथेषु येषान्ते यद्वा हिरण्यं तेज इव रथा येषान्ते (**सुविताय**) ऐश्वर्य्याय (**गन्तन**) गच्छथ (**इयम्**) (**वः**) युष्मान् (**अस्मत्**) अस्माकं सकाशात् (**प्रति**) (**हर्यते**) कामयते (**मतिः**) प्रज्ञा (**तृष्णजे**) यः तृष्णाति तस्मै (**न**) इव (**दिवः**) दिवः कामनाः (**उत्साः**) कूपाः (**उदन्यवे**) उदकानीच्छवे॥ १॥

अन्वयः-हे मनुष्या! यथा हिरण्यरथा सजोषस इन्द्रवन्तो रुद्रासः सुवितायाऽऽगन्तन। येयमस्मन्मतिः सा वः प्रति हर्यते तृष्णज उदन्यव उत्सा न ये दिवः कामयन्ते तेऽस्माभिः सततं सत्कर्त्तव्याः॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा तृषातुराय जलं शान्तिकरं भवति तथा विद्वांसो जिज्ञासुभ्यः शान्तिप्रदा भवन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**हिरण्यरथाः**) सुवर्ण रथों में जिनके अथवा तेज के सदृश रथ जिनके वे (**सजोषसः**) समान प्रीति सेवने और (**इन्द्रवन्तः**) बहुत ऐश्वर्य्य रखने और (**रुद्रासः**) दुष्टों को रुलाने वाले (**सुविताय**) ऐश्वर्य्य के लिए (**आ**) सब और (**गन्तन**) प्राप्त होवें और जो (**इयम्**) यह (**अस्मत्**) हम लोगों के समीप से (**मतिः**) बुद्धि है वह (**वः**) आप लोगों की (**प्रति, हर्यते**) कामना करती है और (**तृष्णजे**) तृष्णायुक्त (**उदन्यवे**) जल की इच्छा करने वाले के लिए (**उत्साः**) कूप (**न**) जैसे वैसे जो (**दिवः**) कामनाओं की कामना करते हैं, वे हम लोगों से निरन्तर सत्कार करने योग्य हैं॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पिपासा से व्याकुल के लिये जल शान्तिकारक होता है, वैसे विद्वान् जन जानने की इच्छा करने वालों के लिए शान्ति के देने वाले होते हैं॥ १॥

अथ मरुद्गुणानाह॥

अब पवनों के गुणों को अगले मन्त्र में कहते हैं॥

वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः।

स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम्॥ २॥

वाशीऽमन्तः। ऋष्टिऽमन्तः। मनीषिणः। सुऽधन्वानः। इषुऽमन्तः। निषङ्गिणः। सुऽअश्वाः। स्थ। सुऽरथाः। पृश्निऽमातरः। सुऽआयुधाः। मरुतः। याथन। शुभम्॥ २॥

पदार्थः-(वाशीमन्तः) प्रशस्ता वाग् विद्यते येषान्ते **(ऋष्टिमन्तः)** ज्ञानवन्तः **(मनीषिणः)** मनसा ईषिणः **(सुधन्वानः)** शोभनं धनुर्येषान्ते **(इषुमन्तः)** वाणवन्तः **(निषङ्गिणः)** निषङ्गाः प्रशस्ता अस्यादयो येषान्ते **(स्वश्वाः)** उत्तमाश्वाः **(स्थ)** भवथ **(सुरथाः)** शोभना रथा येषान्ते **(पृश्निमातरः)** पृश्निरन्तरिक्षं मातेव येषान्ते **(स्वायुधाः)** शोभनान्यायुधानि येषान्ते **(मरुतः)** सुशिक्षिता मानवाः **(याथना)** गच्छथ। अत्र **संहितायामि**ति दीर्घः। **(शुभम्)** कल्याणं स-ामं वा॥ २॥

अन्वयः-हे पृश्निमातरो मरुतो! यूयं वाशीमन्त ऋष्टिमन्तो मनीषिणस्सुधन्वान इषुमन्तो निषङ्गिणः स्वश्वाः स्वायुधाः सुरथाश्च स्थ शुभं याथना॥ २॥

भावार्थः-मनुष्यैर्विद्यादिशुभान् गुणान् गृहीत्वा सदैव विजयेन युक्तैर्भवितव्यम्॥ २॥

पदार्थः-हे **(पृश्निमातरः)** अन्तरिक्ष माता के सदृश जिनका ऐसे **(मरुतः)** उत्तम प्रकार शिक्षित जनो! आप लोग **(वाशीमन्तः)** उत्तम वाणी जिनकी वा जो **(ऋष्टिमन्तः)** ज्ञान वाले **(मनीषिणः)** वा मन की इच्छा करने वाले **(सुधन्वानः)** सुन्दर धनुष जिनका **(इषुमन्तः)** वा वाणों वाले और **(निषङ्गिणः)** अच्छे तरवार आदि पदार्थ जिनके वा जो **(स्वश्वाः)** उत्तम घोड़ों से युक्त **(स्वायुधाः)** सुन्दर आयुधों वाले वा **(सुरथाः)** सुन्दर रथ जिनके ऐसे **(स्थ)** होओ और **(शुभम्)** कल्याणकारक व्यवहार वा संग्राम को **(याथना)** प्राप्त होओ॥ २॥

भावार्थः-मनुष्यों को चाहिये कि विद्या आदि श्रेष्ठ गुणों को ग्रहण करके सदा ही विजय से युक्त हों॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

धूनुथ द्यां पर्वतान् दाशुषे वसु नि वो वना जिहते यामनो भिया।

कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम्॥ ३॥

धूनुथ। द्याम्। पर्वतान्। दाशुषे। वसु। नि। वः। वना। जिहते। यामनः। भिया। कोपयथ। पृथिवीम्। पृश्निऽमातरः। शुभे। यत्। उग्राः। पृषतीः। अयुग्ध्वम्॥ ३॥

पदार्थः-(धूनुथ) कम्पयथ **(द्याम्)** विद्युतम् **(पर्वतान्)** मेघान् **(दाशुषे)** दात्रे **(वसु)** द्रव्यम् **(नि)** **(वः)** युष्मान् **(वना)** जङ्गलानि **(जिहते)** गच्छन्ति **(यामनः)** ये यान्ति ते **(भिया)** भयेन **(कोपयथ)**

(पृथिवीम्) **(पृश्निमातरः)** अन्तरिक्षमातरः **(शुभे)** उदकाय। **शुभमित्युदकनामसु पठितम्।** (निघं०१.२) **(यत्)** **(उग्राः)** तेजस्विनः **(पृषतीः)** सेचनकर्त्रीरुदकधाराः **(अयुग्ध्वम्)** योजयत॥३॥

अन्वयः-हे उग्राः! पृश्निमातरो वायव इव यद्यूयं द्यां पर्वतान् धूनुथ तद्दाशुषे वसु धूनुथ यानि वो वना जिहते तानि यामनो यूयं भिया नि कोपयथ यथा वायवः पृथिवीं युञ्जते तथा शुभे पृषतीरयुग्ध्वम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायवः पृथिवीं मेघं वनादीनि च कम्पयन्ते यथा शत्रवः शत्रून् कोपयन्ति तथैव विद्वांसः पदार्थान् विमथ्य विद्युदादीन् कम्पयन्ते कार्य्येषु योजयन्ति॥३॥

पदार्थः-हे **(उग्राः)** तेजस्वियो! **(पृश्निमातरः)** जिनकी माता के सदृश अन्तरिक्ष उन पवनों के सदृश वेग से युक्त **(यत्)** जो आप लोग **(द्याम्)** बिजुली और **(पर्वतान्)** मेघों को **(धूनुथ)** कँपाइये वह **(दाशुषे)** दाताजन के लिये **(वसु)** द्रव्य को कंपित कीजिये जो **(वः)** आप लोगों को **(वना)** जङ्गल **(जिहते)** प्राप्त होते हैं उनको **(यामनः)** जाने वाले आप लोग **(भिया)** भय से **(नि, कोपयथ)** निरन्तर कंपाइये और जैसे पवन **(पृथिवीम्)** पृथिवी को युक्त होते हैं, वैसे **(शुभे)** जल के लिये **(पृषतीः)** सेचन करने वाली जल की धाराओं को **(अयुग्ध्वम्)** युक्त कीजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पवन पृथिवी, मेघ और वन आदिकों को कंपाते हैं और जैसे शत्रुजन शत्रुओं को क्रुद्ध करते हैं, वैसे ही विद्वान् जन पदार्थों को मथकर बिजुली आदि को कंपाते हैं और कार्य्यों में युक्त करते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वातत्विषो मरुतो वर्षनिर्णिजो यमाइव सुसदृशः सुपेशसः।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः॥४॥

वातऽत्विषः। मरुतः। वर्षऽनिर्निजः। यमाःऽइव। सुऽसदृशः। सुऽपेशसः। पिशङ्गऽअश्वाः। अरुणऽअश्वाः। अरेपसः। प्रऽत्वक्षसः। महिना। द्यौःऽइव। उरवः॥४॥

पदार्थः-**(वातत्विषः)** वातस्य त्विट् कान्तिर्येषान्ते **(मरुतः)** मनुष्याः **(वर्षनिर्णिजः)** ये वर्षं निर्नेनिजन्ति ते **(यमाइव)** न्यायाधीशा इव **(सुसदृशः)** सम्यक्तुल्यगुणकर्मस्वभावाः **(सुपेशसः)** सुष्ठु पेशो रूपं सुवर्णं वा येषान्ते **(पिशङ्गाश्वाः)** आ पीतवर्णा अश्वा येषान्ते **(अरुणाश्वाः)** रक्तवर्णाऽश्वाः **(अरेपसः)** अनपराधिनः **(प्रत्वक्षसः)** प्रकर्षेण सूक्ष्मकर्त्तारः **(महिना)** महिम्ना **(द्यौरिव)** सूर्य्य इव **(उरवः)** बहवः॥४॥

अन्वयः-हे विद्वांसो! ये यमाइव वातत्विषो वर्षनिर्णिजः सुसदृशः सुपेशसः पिशङ्गाश्वा अरेपसोऽरुणाश्वा प्रत्वक्षसो महिना द्यौरिवोरवो मरुतः स्युस्तान् सत्कुरुत॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सूर्य्यवदात्मप्रकाशा न्यायाधीशवद् व्यवहर्त्तारो विमानादि-यानयुक्ताः सन्ति तान् सततं सत्कुरुत॥४॥

पदार्थः-हे विद्वान् जनो! जो **(यमाइव)** न्यायाधीशों के सदृश **(वातत्विषः)** वायु की कान्ति के समान कान्ति जिनकी ऐसे **(वर्षनिर्णिजः)** वर्ष का निर्णय करने वाले **(सुसदृशः)** उत्तम प्रकार तुल्य गुण, कर्म और स्वभाव युक्त **(सुपेशसः)** उत्तम तुल्य रूप वा सुवर्ण जिनका वे **(पिशङ्गाश्वाः)** सब ओर से पीले वर्ण के घोड़ों वाले **(अरेपसः)** अपराध से रहित **(अरुणाश्वाः)** रक्त वर्ण के घोड़ों वाले **(प्रत्वक्षसः)** अत्यन्त सूक्ष्म करने वाले **(महिना)** महिमा से **(द्यौरिव)** सूर्य्य के सदृश **(उरवः)** बहुत **(मरुतः)** मनुष्य होवें, उनका सत्कार करो॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सूर्य्य के सदृश आत्मा से प्रकाशित और न्यायाधीशों के सदृश व्यवहार करने वाले विमान आदि वाहन से युक्त हैं, उनका निरन्तर सत्कार करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे॥५॥२१॥

पुरुऽद्रप्साः। अञ्जिऽमन्तः। सुऽदानवः। त्वेषऽसंदृशः। अनवभ्रऽराधसः। सुऽजातासः। जनुषा। रुक्मऽवक्षसः। दिवः। अर्काः। अमृतम्। नाम। भेजिरे॥५॥

पदार्थः-(**पुरुद्रप्साः**) बहुमोहाः **(अञ्जिमन्तः)** प्रकृष्टा अञ्जयः कामना विद्यन्ते येषान्ते **(सुदानवः)** उत्तमदानाः **(त्वेषसन्दृशः)** ये त्वेषं सम्पश्यन्ति **(अनवभ्रराधसः)** न विद्यतेऽवभ्रो धननाशो येषान्ते **(सुजातासः)** सुष्ठु धर्म्येण व्यवहारेण प्रसिद्धाः **(जनुषा)** जन्मना **(रुक्मवक्षसः)** रुक्माणि जटितान्याभूषणानि वक्षःसु येषान्ते **(दिवः)** कामयमानाः **(अर्काः)** सत्कर्त्तव्याः **(अमृतम्)** नाशरहितम् **(नाम)** **(भेजिरे)** सेवन्ताम्॥५॥

अन्वयः-हे मनुष्या! ये पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेषसन्दृशोऽनवभ्रराधसो जनुषा सुजातासो रुक्मवक्षसो दिवोऽर्का अमृतं नाम भेजिरे तान् सर्वथा सत्कुरुत॥५॥

भावार्थः-ये मनुष्या उत्तमगुणकर्मस्वभावान् सर्वतो गृह्णन्ति ते सर्वथा सुखिनो जायन्ते॥५॥

पदार्थः-हे मनुष्यो! जो **(पुरुद्रप्साः)** बहुत मोह वाले **(अञ्जिमन्तः)** अच्छी कामना विद्यमान जिनकी ऐसे वा **(सुदानवः)** उत्तम दोनों के करने और **(त्वेषसन्दृशः)** प्रकाशित रूप को देखने वाले **(अनवभ्रराधसः)** नहीं विद्यमान धन का नाश जिनके ऐसे और **(जनुषा)** जन्म से **(सुजातासः)** उत्तम प्रकार धर्म्मयुक्त व्यवहार से प्रसिद्ध **(रुक्मवक्षसः)** सुवर्ण आदि से जुड़े हुए आभूषण वक्षस्थलों में

जिनके वे (**दिवः**) कामना करने वाले (**अर्काः**) सत्कार करने योग्य जन (**अमृतम्**) नाश से रहित (**नाम**) **[**नाम**]** का (**भेजिरे**) सेवन करें, उनका सब प्रकार सत्कार करिये॥५॥

भावार्थः-जो जन उत्तम गुण, कर्म्म और स्वभाव को सब प्रकार ग्रहण करते हैं, वे सब प्रकार से सुखी होते हैं॥५॥

पुनर्मरुद्विषये यानचालनफलमाह॥

फिर मरुद्विषय में यान चलाने के फल को कहते हैं॥

ऋ॒ष्टयो॑ वो मरुतो॒ अंस॑यो॒रधि॒ सह॒ ओजो॑ बा॒ह्वो॑र्वो॒ बल॑ हि॒तम्।
नृ॒ष्णा शी॒र्षस्वायु॑धा॒ रथे॑षु वो॒ विश्वा॑ व॒: श्रीरधि॑ त॒नूषु॑ पिपिशे॥६॥

ऋ॒ष्टय॑:। व॒:। म॒रु॒त॒:। अंस॑यो:। अधि॑। सह॑:। ओज॑:। बा॒ह्वो:। व॒:। बल॑म्। हि॒तम्। नृ॒ष्णा। शी॒र्ष॒ऽसु॑। आयु॑धा। रथे॑षु। व॒:। विश्वा॑। श्री:। अधि॑। त॒नूषु॑। पि॒पि॒शे॒॥६॥

पदार्थः-(**ऋष्टयः**) ज्ञानवन्तः (**वः**) युष्माकम् (**मरुतः**) मनुष्याः (**अंसयोः**) भुजदण्डमूलयोः (**अधि**) उपरि (**सहः**) सहनम् (**ओजः**) पराक्रमः (**बाह्वोः**) (**वः**) युष्माकम् (**बलम्**) (**हितम्**) स्थितम् (**नृष्णा**) नरो रमन्ते येषु तानि (**शीर्षसु**) मस्तकेषु (**आयुधा**) शस्त्रास्त्राणि (**रथेषु**) स- ामार्थेषु यानेषु (**वः**) युष्माकम् (**विश्वा**) सर्वाणि (**वः**) (**श्रीः**) धनं शोभा वा (**अधि**) (**तनूषु**) शरीरेषु (**पिपिशे**) आश्रीयते॥६॥

अन्वयः-हे ऋष्टयो मरुतो! वोंऽसयोर्यत्सह ओजो बाह्वोर्वो बलं हितं शीर्षस्वधि नृष्णाऽऽयुधा रथेषु वो विश्वा श्रीरधि पिपिशे वस्तनूषु श्रीरधि पिपिशे ता यूयं सङ्गृह्णीत॥६॥

भावार्थः-ये मनुष्याः शरीरात्मबलिष्ठा भूत्वाऽऽयुधविद्यायां निपुणा भूत्वोत्तमयानादिसामग्री-सहिताः पुरुषार्थयन्ते ते श्रीमन्तो जायन्ते॥६॥

पदार्थः-हे (**ऋष्टयः**) ज्ञानवान् (**मरुतः**) मनुष्यो! (**वः**) आप लोगों के (**अंसयोः**) भुजारूप दण्डों के मूलों में जो (**सहः**) सहन और (**ओजः**) पराक्रम तथा (**बाह्वोः**) बाहु सम्बन्धी (**वः**) आप लोगों का (**बलम्**) बल (**हितम्**) स्थित (**शीर्षसु**) मस्तकों (**अधि**) पर (**नृष्णा**) और मनुष्य रमते हैं जिनमें ऐसे (**आयुधा**) शस्त्र और अस्त्र (**रथेषु**) संग्रामार्थ वाहनों में वा (**वः**) आप लोगों के (**विश्वा**) सम्पूर्ण (**श्रीः**) धन वा शोभा (**अधि, पिपिशे**) अधिक आश्रय की जाती और (**वः**) आप लोगों के (**तनूषु**) शरीरों में धन वा शोभा अधिक आश्रयण की जाती, उनका आप लोग संग्रहण कीजिये॥६॥

भावार्थः-जो मनुष्य शरीर और आत्मा से बलिष्ठ और आयुधों की विद्या में निपुण होकर उत्तम वाहन आदि सामग्रियों से युक्त हुए पुरुषार्थ करते हैं, वे धनवान् होते हैं॥६॥

पुनर्मरुद्विषयमाह॥

फिर मरुद्विषय को कहते हैं॥

गोमदश्वावद्रथवत्सुवीरं चन्द्रवद्राधो मरुतो ददा नः।

प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य॥७॥

गोऽमत्। अश्वऽवत्। रथऽवत्। सुऽवीरम्। चन्द्रऽवत्। राधः। मरुतः। ददा। नः। प्रऽशस्तिम्। नः। कृणुत। रुद्रियासः। भक्षीय। वः। अवसः। दैव्यस्य॥७॥

पदार्थः-(गोमत्) बह्व्यो गावो विद्यन्ते यस्मिँस्तत् **(अश्वावत्)** बह्वश्वयुक्तम् **(रथवत्)** प्रशंसितरथसहितम् **(सुवीरम्)** उत्तमवीरनिमित्तम् **(चन्द्रवत्)** सुवर्णादियुक्तमानन्दादिप्रदं वा **(राधः)** धनम् **(मरुतः)** मनुष्याः **(ददा)** दत्त। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मभ्यम् **(प्रशस्तिम्)** प्रशंसाम् **(नः)** अस्माकम् **(कृणुत)** कुरुत **(रुद्रियासः)** रुद्रेषु साधनकर्त्तृषु भवाः **(भक्षीय)** भजेयम् **(वः)** युष्माकम् **(अवसः)** रक्षादेः **(दैव्यस्य)** देवैः कृतस्य॥७॥

अन्वयः-हे रुद्रियासो मरुतो! यूयं नो गोमदश्वावद्रथवच्चन्द्रवत्सुवीरं राधो ददा। दैव्यस्यावसो नः प्रशस्तिं कृणुत येन वः सकाशादेकैकोऽहं सुखं भक्षीय॥७॥

भावार्थः-यदा मनुष्याः सत्पुरुषाणां सङ्गं कुर्युस्तदेह समग्रैश्वर्य्यं परत्र धर्मानुष्ठानं कर्त्तुं याचन्ताम्॥७॥

पदार्थः-हे **(रुद्रियासः)** साधन करने वालों में हुए **(मरुतः)** मनुष्यो! आप लोग **(नः)** हम लोगों के लिये **(गोमत्)** बहुत गौवें विद्यमान जिसमें वा **(अश्वावत्)** बहुत घोड़ों से युक्त **(रथवत्)** व प्रशंसित वाहनों के सहित **(चन्द्रवत्)** वा सुवर्ण आदि से युक्त वा आनन्द आदि के देने वाले **(सुवीरम्)** उत्तम वीर निमित्तक **(राधः)** धन को **(ददा)** दीजिये और **(दैव्यस्य)** विद्वानों से किये गये **(अवसः)** रक्षण आदि के सम्बन्ध में **(नः)** हम लोगों की **(प्रशस्तिम्)** प्रशंसा को **(कृणुत)** करिये जिससे **(वः)** आप लोगों के समीप से एक-एक मैं सुख का **(भक्षीय)** सेवन करूं॥७॥

भावार्थः-जब मनुष्य सत्पुरुषों का सङ्ग करें, तब इस लोक में सम्पूर्ण ऐश्वर्य और परलोक में धर्म्म के अनुष्ठान करने की याचना करें॥७॥

पुनर्मरुद्विषयकविद्वद्गुणानाह॥

फिर मरुद्विषयक विद्वानों के गुणों को कहते हैं॥

हुये नरो मरुतो मृळता नस्तुविमघासो अमृता ऋतज्ञाः।

सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः॥८॥२२॥

हुये। नरः। मरुतः। मृळत। नः। तुविऽमघासः। अमृताः। ऋतऽज्ञाः। सत्यऽश्रुतः। कवयः। युवानः। बृहत्ऽगिरयः। बृहत्। उक्षमाणाः॥८॥

पदार्थः-(हये) सम्बोधने **(नरः)** नायकाः **(मरुतः)** मरणशीलाः **(मृळता)** सुखयत। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मान् **(तुवीमघासः)** बहुधनयुक्ताः **(अमृताः)** स्वस्वरूपेण मृत्युरहिताः

(ऋतज्ञाः) ये ऋतं यथार्थं जानन्ति ते **(सत्यश्रुतः)** ये सत्यं श्रुतवन्तः शृण्वन्ति वा **(कवयः)** विद्वांसः **(युवानः)** प्राप्तयुवावस्थाः **(बृहद्गिरयः)** बहुप्रशंसाः **(बृहत्)** महत् **(उक्षमाणाः)** सेवमानाः॥८॥

अन्वयः-हये नरो मरुतो! तुवीमघासोऽमृता ऋतज्ञाः सत्यश्रुतो युवानो बृहद्गिरयो बृहदुक्षमाणाः कवयः सन्तो यूयं नो मृळता॥८॥

भावार्थः-ये मनुष्या आप्तान् विदुषः सेवन्ते ते सत्यां विद्यां प्राप्य सदैव मोदन्ते॥८॥

अत्र रुद्रमरुद्गुणवर्णानादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तपञ्चाशत्तमं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-**(हये)** हे **(नरः)** नायक **(मरुतः)** मरणशील जनो! **(तुवीमघासः)** बहुत धनों से युक्त **(अमृताः)** अपने स्वरूप से मृत्युरहित **(ऋतज्ञाः)** यथार्थ को जानने वाले **(सत्यश्रुतः)** सत्य को सुने हुए वा सत्य को सुनने वाले **(युवानः)** युवावस्था को प्राप्त **(बृहद्गिरयः)** बहुत प्रशंसा वाले **(बृहत्)** बहुत **(उक्षमाणाः)** सेवन किये और **(कवयः)** विद्वान् होते हुए आप लोग **(नः)** हम लोगों को **(मृळता)** सुखी करो॥८॥

भावार्थः-जो मनुष्य यथार्थवक्ता विद्वानों का सेवन करते हैं, वे सत्य विद्या को प्राप्त होकर सदा ही प्रसन्न होते हैं॥८॥

इस सूक्त में रुद्र और वायु के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सत्तावनवाँ सूक्त और बाईसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्याष्टपञ्चाशत्तमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १, ३, ४, ६, ८ निचृत्त्रिष्टुप्। २, ५ त्रिष्टुप् छन्दः। धैवतः स्वरः। ७ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ वायुगुणानाह॥

अब आठ ऋचा वाले अट्ठावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में वायुगुणों को कहते हैं॥

तमु॑ नू॒नं तवि॑षीमन्तमेषां स्तु॒षे ग॒णं मारु॑तं नव्य॑सीनाम्।
य आ॒श्वश्वा॒ अम॑व॒द्वह॑न्त उ॒तेशि॑रे अ॒मृत॑स्य स्व॒राज॑:॥ १॥

तम्। ऊँ इति। नूनम्। तविषीऽमन्तम्। एषाम्। स्तुषे। गणम्। मारुतम्। नव्यसीनाम्। ये। आशुऽअश्वाः। अमऽवत्। वहन्ते। उत। ईशिरे। अमृतस्य। स्वऽराजः॥ १॥

पदार्थः-(तम्) (उ) वितर्के **(नूनम्)** निश्चितम् **(तविषीमन्तम्)** प्रशस्ता तविषी सेना यस्य तम् **(एषाम्)** वीराणाम् **(स्तुषे)** स्तोतुम् **(गणम्)** समूहम् **(मारुतम्)** मरुतामिमम् **(नव्यसीनाम्)** अतिशयेन नवीनानां प्रजानाम् **(ये)** **(आश्वश्वाः)** आशुगामिनोऽग्न्यादयो अश्वा येषान्ते **(अमवत्)** गृहवत् **(वहन्ते)** प्राप्नुवन्ति **(उत)** अपि **(ईशिरे)** ऐश्वर्य्यं प्राप्नुवन्ति **(अमृतस्य)** नाशरहितस्य कारणस्य **(स्वराजः)** स्वः राजत इति स्वराट् तस्य॥ १॥

अन्वयः-अमृतस्य स्वराज आश्वश्वा येऽमवद्वहन्ते उतापि नव्यसीनां मारुतं गणं स्तुष ईशिर एषामु तविषीमन्तं तं नूनं वहन्ते ते विजयिनो जायन्ते॥ १॥

भावार्थः-ये कार्य्यकारणात्मकस्य जगतो गुणकर्म्मस्वभावाञ्जानन्ति ते गृहवत्सर्वान् सुखयितुं शक्नुवन्ति॥ १॥

पदार्थः-(अमृतस्य) नाश से रहित कारण **(स्वराजः)** जो कि आप प्रकाशवान् उसके सम्बन्ध में **(आश्वश्वाः)** शीघ्र चलने वाले अग्नि आदि अश्व जिनके वे **(ये)** जो **(अमवत्)** गृहों को प्राप्त हों, वैसे **(वहन्ते)** प्राप्त होते हैं **(उत)** और **(नव्यसीनाम्)** अत्यन्त नवीन प्रजाओं के **(मारुतम्)** पवनसम्बन्धी **(गणम्)** समूह की **(स्तुषे)** स्तुति करने के लिये **(ईशिरे)** ऐश्वर्य को प्राप्त होते हैं **(एषाम्)** इन वीरों के **(उ)** तर्क के साथ **(तविषीमन्तम्)** अच्छी सेना जिसकी **(तम्)** उसी को **(नूनम्)** निश्चय प्राप्त होते हैं, वे विजयी होते हैं॥ १॥

भावार्थः-जो कार्य्य और कारणस्वरूप संसार के गुण, कर्म्म और स्वभावों को जानते हैं, वे गृह के सदृश सब को सुखी कर सकते हैं॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम्।

मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन्॥ २॥

त्वेषम्। गणम्। तवसम्। खादिऽहस्तम्। धुनिऽव्रतम्। मायिनम्। दातिऽवारम्। मयःऽभुवः। ये। अमिताः। महिऽत्वा। वन्दस्व। विप्र। तुविऽराधसः। नॄन्॥ २॥

पदार्थः-(**त्वेषम्**) दीप्तिमन्तम् (**गणम्**) गणनीयम् (**तवसम्**) बलवन्तम् (**खादिहस्तम्**) खादि हस्तयोर्यस्य तम् (**धुनिव्रतम्**) धुनिः कम्पनमिव व्रतं शीलं यस्य तम् (**मायिनम्**) प्रशस्ता माया प्रज्ञा विद्यते यस्य तम् (**दातिवारिम्**) यो दातिं दानं वृणोति तम् (**मयोभुवः**) सुखं भावुकाः (**ये**) (**अमिताः**) अतुलशुभगुणाः (**महित्वा**) महत्त्वं प्राप्य (**वन्दस्व**) (**विप्र**) मेधाविन् (**तुविराधसः**) बहुधनवतः (**नॄन्**) मनुष्यान्॥ २॥

अन्वयः-हे विप्र! त्वं त्वेषं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारं वीराणां गणं वन्दस्व। ये महित्वाऽमिता मयोभुवः स्युस्ताँस्तुविराधसो नॄन् वन्दस्व॥ २॥

भावार्थः-मनुष्यैर्योग्यानां धार्मिकाणां विदुषामेव सत्कारः कर्त्तव्यो यतः सुखं वर्त्तेत॥ २॥

पदार्थः-हे (**विप्र**) बुद्धिमन्! आप (**त्वेषम्**) प्रकाशित (**तवसम्**) बलवान् (**खादिहस्तम्**) खाद्य हाथों में जिसके (**धुनिव्रतम्**) कंपन के सदृश स्वभाव जिसका वा (**मायिनम्**) उत्तम बुद्धि जिसकी उस (**दातिवारम्**) दान के स्वीकार करने वाले वीरों के (**गणम्**) गणन करने योग्य की (**वन्दस्व**) वन्दना करिये और (**ये**) जो (**महित्वा**) महत्त्व को प्राप्त होकर (**अमिताः**) अतुल शुभ गुण वाले (**मयोभुवः**) सुख को कराने वाले हों उन (**तुविराधसः**) बहुत धन वाले (**नॄन्**) मनुष्यों की वन्दना कीजिये॥ २॥

भावार्थः-मनुष्यों को चाहिये कि योग्य धार्मिक विद्वानों का ही सत्कार करें, जिससे सुख बढ़े॥ २॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति।

अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः॥ ३॥

आ। वः। यन्तु। उदुऽवाहासः। अद्य। वृष्टिम्। ये। विश्वे। मरुतः। जुनन्ति। अयम्। यः। अग्निः। मरुतः। सम्ऽइद्धः। एतम्। जुषध्वम्। कवयः। युवानः॥ ३॥

पदार्थः-(**आ**) समन्तात् (**वः**) युष्मान् (**यन्तु**) प्राप्नुवन्तु (**उदवाहासः**) य उदकं वहन्ति तानिव (**अद्य**) इदानीम् (**वृष्टिम्**) वर्षणम् (**ये**) (**विश्वे**) सर्वे (**मरुतः**) वायवः (**जुनन्ति**) प्रेरयन्ति (**अयम्**) (**यः**)

(अग्निः) पावकः **(मरुतः)** मनुष्याः **(समिद्धः)** प्रदीप्तः **(एतम्)** **(जुषध्वम्)** **(कवयः)** मेधाविनः **(युवानः)** प्राप्तयौवनाः॥३॥

अन्वयः-हे कवयो युवानो मरुतो मनुष्या! ये विश्व उदवाहसो मरुतो वृष्टिं जुनन्ति तेऽद्य व आ यन्तु। योऽयं समिद्धोऽग्निरस्त्येतं यूयं जुषध्वम्॥३॥

भावार्थः-ये वृष्टिकरान् वाय्वग्न्यादीन् विजानन्ति त एतान् वृष्टये प्रेरयितुं शक्नुवन्ति॥३॥

पदार्थः-हे **(कवयः)** बुद्धिमान् **(युवानः)** युवावस्था को प्राप्त हुए **(मरुतः)** मनुष्यो! **(ये)** जो **(विश्वे)** सम्पूर्ण **(उदवाहासः)** जल को जो धारण करते हैं उनके सदृश **(मरुतः)** पवन **(वृष्टिम्)** वृष्टि की **(जुनन्ति)** प्रेरणा करते हैं, वे **(अद्य)** इस समय **(वः)** आप लोगों को **(आ, यन्तु)** प्राप्त हों और **(यः)** जो **(अयम्)** यह **(समिद्धः)** प्रदीप्त **(अग्निः)** अग्नि है **(एतम्)** इसको आप लोग **(जुषध्वम्)** सेवन करो॥३॥

भावार्थः-जो वृष्टि करने वाले वायु और अग्नि आदि को विशेष करके जानते हैं, वे इनको वृष्टि करने के लिये प्रेरणा करने को समर्थ होते हैं॥३॥

पुनर्मरुद्गुणानाह॥

फिर मरुद् के गुणों को अगले मन्त्र में कहते हैं॥

यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः।

युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः॥४॥

यूयम्। राजानम्। इर्यम्। जनाय। विभ्वऽतष्टम्। जनयथ। यजत्राः। युष्मत्। एति। मुष्टिऽहा। बाहुऽजूतः। युष्मत्। सत्ऽअश्वः मरुतः। सुऽवीरः॥४॥

पदार्थः-**(यूयम्)** **(राजानम्)** न्यायविनयाभ्यां प्रकाशमानम् **(इर्यम्)** प्रेरकम्। अत्र वर्णव्यत्ययेन दीर्घैकारस्य ह्रस्वः। **(जनाय)** मनुष्याय **(विभ्वतष्टम्)** विभूनां मेधाविनां मध्ये तष्टं तीव्रप्रज्ञम् **(जनयथा)** अत्र **संहितायामि**ति दीर्घः। **(यजत्राः)** सङ्गन्तारः **(युष्मत्)** युष्माकं सकाशात् **(एति)** प्राप्नोति **(मुष्टिहा)** यो मुष्टिना हन्ति **(बाहुजूतः)** बाहुभ्यां बलवान् **(युष्मत्)** **(सदश्वः)** सन्तः समीचीना अश्वा यस्य सः **(मरुतः)** सुशिक्षिता मानवाः **(सुवीरः)** शोभनश्चासौ वीरश्च॥४॥

अन्वयः-हे यजत्रा मरुतो! यो युष्मन्मुष्टिहा बाहुजूतो युष्मत्सदश्वः सुवीर एति तं जनायेर्यं विभ्वतष्टं राजानं यूयं जनयथा॥४॥

भावार्थः-मनुष्याः सर्वैरुपायैर्धर्म्यगुणकर्मस्वभावं राजानं तादृशान् सहायांश्च जनयेयुः॥४॥

पदार्थः-हे **(यजत्राः)** मिलने वाले **(मरुतः)** उत्तम प्रकार शिक्षित मनुष्यो! जो **(युष्मत्)** आप लोगों के समीप **(मुष्टिहा)** मुष्टि से मारने वाला **(बाहुजूतः)** बाहुओं से बलवान् वा **(युष्मत्)** आप लोगों के समीप **(सदश्वः)** अच्छे घोड़े जिसके ऐसा **(सुवीरः)** सुन्दर वीरजन **(एति)** प्राप्त होता है उसको

(जनाय) मनुष्य के लिये **(इर्यम्)** प्रेरणा करने वाले **(विभ्वतष्टम्)** बुद्धिमानों के मध्य में तीव्र बुद्धि वाले **(राजानम्)** न्याय और विनय से प्रकाशमान राजा को **(यूयम्)** आप **(जनयथा)** प्रकट कीजिये॥४॥

भावार्थः-मनुष्य सम्पूर्ण उपायों से धर्मयुक्त गुण, कर्म और स्वभाव वाले राजा और उसी प्रकार के सहायों को उत्पन्न करें॥४॥

अथ विद्वदुपदेशगुणानाह॥

अब विद्वानों के उपदेशगुणों को कहते हैं॥

अराड्वेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः॥५॥

अराःऽइव। इत्। अचरमाः। अहाऽइव। प्रऽप्र। जायन्ते। अकवाः। महःऽभिः। पृश्नेः। पुत्राः। उपऽमासः। रभिष्ठाः। स्वया। मत्या। मरुतः। सम्। मिमिक्षुः॥५॥

पदार्थः-**(अराइव)** चक्रावयवा इव **(इत्)** एव **(अचरमाः)** नान्त्यावयवाः **(अहेव)** अहानीव **(प्रप्र)** **(जायन्ते)** **(अकवाः)** अशब्दायमानाः **(महोभिः)** महद्भिः **(पृश्नेः)** अन्तरिक्षस्य **(पुत्राः)** **(उपमासः)** **(रभिष्ठाः)** अतिशयेनाऽऽरब्धारः **(स्वया)** **(मत्या)** प्रज्ञया **(मरुतः)** वायवः **(सम्)** **(मिमक्षुः)** सिञ्चन्ति॥५॥

अन्वयः-हे विद्वांसो! ये मरुतोऽराइवाऽचरमा अहेवाऽकवाः पृश्नेः पुत्रा महोभिरित् प्रप्र जायन्ते सं मिमक्षुस्तथोपमासो रभिष्ठा यूयं स्वया मत्या प्रप्र जायध्वम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा रथचक्राङ्गानि दिनानि च क्रमेण वर्त्तन्ते यथा वायवो गत्वागत्य वर्षन्ति तथैव मनुष्यैः क्रमेण वर्त्तित्वा प्रज्ञया सुखवृष्टिः सर्वेषां सुखाय कर्त्तव्या॥५॥

पदार्थः-हे विद्वानो! जो **(मरुतः)** पवन **(अराइव)** चक्रों के अवयवों के सदृश **(अचरमाः)** नहीं अन्त्यावयव जिनके वे **(अहेव)** दिनों के सदृश **(अकवाः)** नहीं शब्द करते हुए **(पृश्नेः)** अन्तरिक्ष के **(पुत्राः)** पुत्र **(महोभिः, इत्)** बड़ों के ही साथ **(प्रप्र, जायन्ते)** अत्यन्त उत्पन्न होते और **(सम्, मिमिक्षुः)** अच्छे प्रकार सिञ्चन करते हैं, वैसे **(उपमासः)** प्रत्येक के तुल्य **(रभिष्ठाः)** अत्यन्त आरम्भ करने वाले आप लोग **(स्वया)** अपनी **(मत्या)** बुद्धि से अत्यन्त उत्पन्न होओ॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे वाहन के चक्रों के अङ्ग और दिन, क्रम से वर्त्तमान हैं और जैसे पवन जा, आकर वर्षाते हैं, वैसे ही मनुष्यों को चाहिये कि क्रम से वर्त्ताव करके बुद्धि से सुख की वृष्टि सब के सुख के लिये करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः।

क्षोद॑न्त॒ आपो॑ रिण॒ते वना॒न्यवो॒स्रियो॑ वृष॒भः क्र॑न्दतु॒ द्यौः॥६॥

यत्। प्र। अया॑सिष्ट। पृष॑तीभिः। अश्वैः॑। वी॒ळु॒प॒विऽभिः॑। म॒रु॒तः॒। रथे॑भिः। क्षोद॑न्ते। आपः॑। रि॒ण॒ते। वना॑नि। अव॑। उ॒स्रिय॑ः। वृ॒ष॒भः॒। क्र॒न्द॒तु॒। द्यौः॥६॥

पदार्थः-(यत्) (प्र) (अयासिष्ट) यातु **(पृषतीभिः)** वेगादिभिः **(अश्वैः)** आशुगामिभिः **(वीळुपविभिः)** दृढचक्रैः **(मरुतः)** विद्वांसो मनुष्याः **(रथेभिः)** विमानादियानैः **(क्षोदन्ते)** क्षरन्ति वर्षन्ति **(आपः)** जलानि **(रिणते)** गच्छन्ति **(वनानि)** किरणान् **(अव)** **(उस्रियः)** उस्रासु किरणेषु भवः **(वृषभः)** वर्षको मेघः **(क्रन्दतु)** आह्वयतु **(द्यौः)** कामयमानः॥६॥

अन्वयः-हे मरुतो! भवन्तः पृषतीभिरश्वै रथेभिर्यद्वीळुपविभिः क्षोदन्ते यथाऽऽपो वनानि रिणते तथैवोस्रियो वृषभो द्यौर्वनान्यव क्रन्दतु इष्टं प्रायासिष्ट॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यदि यूयं वायुवत्सद्योगमनं जलवत्तृप्तिकरणं कुर्य्यात तर्हि सर्वणि सुखानि प्राप्नुयात॥६॥

पदार्थः-हे **(मरुतः)** विद्वान् मनुष्यो! आप लोग **(पृषतीभिः)** वेग आदिकों और **(अश्वैः)** शीघ्र चलने वाले **(रथेभिः)** विमान आदि वाहनों से **(यत्)** जो **(वीळुपविभिः)** दृढ़ चक्रों से **(क्षोदन्ते)** वृष्टि करते हैं और जैसे **(आपः)** जल **(वनानि)** किरणों को **(रिणते)** प्राप्त होते हैं, वैसे ही **(उस्रियः)** किरणों में उत्पन्न **(वृषभः)** वर्षाने वाला मेघ **(द्यौः)** कामना करता हुआ किरणों का **(अव, क्रन्दतु)** आह्वान करे और इष्ट को **(प्र, अयासिष्ट)** अत्यन्त प्राप्त हों॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो आप लोग वायु के सदृश शीघ्र गमन और जल के सदृश तृप्ति करने रूप कार्य को करें तो सम्पूर्ण सुखों को प्राप्त हों॥६॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

प्रथि॑ष्ट॒ याम॑न् पृथि॒वी चि॑दे॒षां भर्ते॑व॒ गर्भं॑ स्वमिच्छवो॑ धुः।

वाता॒न् ह्यश्वा॑न् धु॒र्यायु॑युज्रे व॒र्षं स्वेद॑ं चक्रिरे रु॒द्रिया॑सः॥७॥

प्रथि॑ष्ट। याम॑न्। पृ॒थि॒वी। चि॒त्। ए॒षा॒म्। भर्ता॑ऽइव। गर्भ॑म्। स्वम्। इत्। श॒वः॒। धुः॒। वाता॑न्। हि। अश्वा॑न्। धु॒रि। आ॒ऽयु॒यु॒ज्रे॒। व॒र्षम्। स्वेद॑म्। च॒क्रि॒रे॒। रु॒द्रिया॑सः॥७॥

पदार्थः-(प्रथिष्ट) प्रथते **(यामन्)** यामनि **(पृथिवी)** भूमिः **(चित्)** अपि **(एषाम्)** **(भर्त्तेव)** **(गर्भम्)** **(स्वम्)** **(इत्)** **(शवः)** गमनम् **(धुः)** दधति **(वातान्)** वायून् **(हि)** यतः **(अश्वान्)** सद्योगामिनः **(धुरि)** यानमध्ये **(आयुयुज्रे)** समन्तात् युञ्जते **(वर्षम्)** **(स्वेदम्)** प्रस्वेदमिव **(चक्रिरे)** **(रुद्रियासः)** रुद्रेषु दुष्टरोदयितृषु कुशलाः॥७॥

अन्वयः-हे मनुष्या! यथैषां मध्ये पृथिवी यामन् गर्भं भर्त्तेव प्रथिष्ट तथा भवन्तः स्वं शव इद् धुरि

धुरश्चान् वातानायुयुञ्जे चिदपि रुद्रियासः सन्त स्वेदमिव हि वर्ष चक्रिरे॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः पृथिवीवत् क्षमाशीला विस्तीर्णविद्या यानेषु वायूनश्वान् संयोज्य वर्षानिमित्तान् निर्माय कार्याणि साध्नुवन्ति ते सर्वं सुखं कर्त्तुं शक्नुवन्ति॥७॥

पदार्थः-हे मनुष्यो! जैसे **(एषाम्)** इनके मध्य में **(पृथिवी)** भूमि **(यामन्)** प्रहर में **(गर्भम्)** गर्भ को **(भर्त्तेव)** स्वामी के सदृश **(प्रथिष्ट)** प्रकट करती है, वैसे आप लोग **(स्वम्)** सुख और **(शवः)** गमन को **(इत्)** ही **(धुरि)** वाहन के मध्य में **(धुः)** धारण करते और **(अश्वान्)** शीघ्र चलने वाले **(वातान्)** पवनों को **(आयुयुञ्जे)** सब ओर से युक्त करते और **(चित्)** भी **(रुद्रियासः)** दुष्टों के रुलाने वालों में चतुर हुए **(स्वेदम्)** पसीने के सदृश **(हि)** निश्चय **(वर्षम्)** वृष्टि को **(चक्रिरे)** करते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य पृथिवी के सदृश क्षमाशील और विस्तीर्ण विद्या वाले वाहनों के पवन रूप घोड़ों को संयुक्त करके और वृष्टि के कारणों का निर्माण करके कार्य्यों को सिद्ध करते हैं, वे सम्पूर्ण सुख कर सकते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः।

सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः॥८॥२३॥

हये। नरः। मरुतः। मृळत। नः। तुविऽमघासः। अमृताः। ऋतऽज्ञाः। सत्यऽश्रुतः। कवयः। युवानः। बृहत्ऽगिरयः। बृहत्। उक्षमाणाः॥८॥

पदार्थः-**(हये)** **(नरः)** नायकाः **(मरुतः)** मनुष्याः **(मृळता)** सुखयत। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मान् **(तुवीमघासः)** बहुधनाः **(अमृताः)** प्राप्तमोक्षाः **(ऋतज्ञाः)** य ऋतं परमात्मानं प्रकृतिं वा जानन्ति **(सत्यश्रुतः)** ये सत्यं यथार्थं शृण्वन्ति ते **(कवयः)** पूर्णविद्याः **(युवानः)** प्राप्ताऽत्मशरीरयौवनाः **(बृहद्गिरयः)** बृहन्तो गिरयो मेघा इवोपकारका गुणा येषान्ते **(बृहत्)** महद् ब्रह्म **(उक्षमाणाः)** सेवमानाः॥८॥

अन्वयः-हये नरो मरुतस्तुवीमघासोऽमृताः सत्यश्रुतः ऋतज्ञा युवानो बृहद्गिरयो बृहदुक्षमाणाः कवयो यूयं नो मृळता॥८॥

भावार्थः-ये मनुष्याः सर्वसत्यविद्याः प्राप्याप्तं परमात्मानं तदाज्ञां च सेवमाना महाशयाः पूर्णशरीरात्मबला अध्यापनोपदेशाभ्यामस्मानुन्नयन्ति तः एव सर्वदाऽस्माभिः सत्कर्त्तव्याः॥८॥

अत्र विद्वद्वायुगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टपञ्चाशत्तमं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-(हये) हे **(नरः)** नायक **(मरुतः)** जनो! **(तुवीमघासः)** बहुत धनवान् **(अमृताः)** मोक्ष को प्राप्त हुए **(सत्यश्रुतः)** सत्य को यथार्थ सुनने और **(ऋतज्ञाः)** परमात्मा वा प्रकृति को जानने वाले **(युवानः)** प्राप्त हुई अपने शरीर को यौवन अवस्था जिनको **(बृहद्गिरयः)** जिनके बड़े मेघों के सदृश उपकार करने वाले गुण वे **(बृहत्)** महत् ब्रह्म का **(उक्षमाणाः)** सेवन करते हुए **(कवयः)** पूर्णविद्या वाले आप लोग **(नः)** हम लोगों को **(मृळता)** सुखी करिये॥८॥

भावार्थः-जो मनुष्य सम्पूर्ण सत्य विद्याओं को प्राप्त होकर यथार्थवक्ता, परमात्मा और उसकी आज्ञा का सेवन करते हुए महाशय पूर्ण शरीर और आत्मा के बल से युक्त अध्यापन और उपदेश से हम लोगों की वृद्धि करते हैं, वे ही सर्वदा हम लोगों से सत्कार करने योग्य हैं॥८॥

इस सूक्त में विद्वान् तथा वायु के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के [साथ] संगति जाननी चाहिये॥

यह अट्ठावनवां सूक्त तथा तेईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्यैकोनषष्टितमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो देवताः। १, ४ विराड्जगती। २, ३, ६, निचृज्जगती। ५ जगती छन्दः। निषादः स्वरः। ७ स्वराट्त्रिष्टुप्। ८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्गुणानाह॥

अब आठ ऋचा वाले उनसठवें सूक्त का प्रारम्भ है, उसके
प्रथम मन्त्र में विद्वद्गुणों को कहते हैं॥

प्र वः स्पळक्रन्त्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे।
उक्षन्ते अश्वान् तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः॥ १॥

प्र। वः। स्पट्। अक्रन्। सुविताय। दावने। अर्च। दिवे। प्र। पृथिव्यै। ऋतम्। भरे। उक्षन्ते। अश्वान्। तरुषन्ते। आ। रजः। अनु। स्वम्। भानुम्। श्रथयन्ते। अर्णवैः॥ १॥

पदार्थः-(प्र) (वः) युष्मभ्यम् **(स्पट्)** स्पष्टा **(अक्रन्)** कुर्वन्ति **(सुविताय)** ऐश्वर्य्यवते **(दावने)** दात्रे **(अर्चा)** सत्कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(दिवे)** कामयमानाय **(प्र) (पृथिव्यै)** अन्तरिक्षाय भूमये वा **(ऋतम्)** सत्यम् **(भरे)** बिभ्रति यस्मिंस्तस्मिन् **(उक्षन्ते)** सेवन्ते **(अश्वान्)** वेगवतोऽग्न्यादीन् **(तरुषन्ते)** सद्यः प्लवन्ते **(आ) (रजः)** लोकम् **(अनु) (स्वम्)** स्वकीयम् **(भानुम्)** दीप्तिम् **(श्रथयन्ते)** शिथिलीकुर्वन्ति **(अर्णवैः)** समुद्रैर्नदीभिर्वा॥ १॥

अन्वयः-हे विद्वांसो! ये सुविताय दावने दिवे पृथिव्यै वो भर ऋतं प्राक्रन्नश्वानुक्षन्ते तरुषन्ते रजोऽनु स्वं भानुं चार्णवैः प्राश्रथयन्ते तान् यूयं सत्कुरुत। हे राजन् स्पट्! त्वमेतान् सततमर्चा॥ १॥

भावार्थः-हे राजन्! ये मनुष्या शिल्पविद्यया विमानादिकं निर्मायान्तरिक्षादिषु गत्वागत्य सर्वेषां सुखायैश्वर्य्यमाश्रयन्ति ते जगद्विभूषका भवन्ति॥ १॥

पदार्थः-हे विद्वानो! जो **(सुविताय)** ऐश्वर्य से युक्त और **(दावने)** देने वाले के लिए **(दिवे)** कामना करते हुए के लिए **(पृथिव्यै)** अन्तरिक्ष वा भूमि के लिये तथा **(वः)** आप लोगों के लिये **(भरे)** धारण करते हैं जिसमें उस व्यवहार में **(ऋतम्)** सत्य को **(प्र, अक्रन्)** अच्छे प्रकार करते हैं और **(अश्वान्)** वेग से युक्त अग्नि आदि को **(उक्षन्ते)** सेवते हैं तथा **(तरुषन्ते)** शीघ्र प्लवित होते हैं तथा **(रजः)** लोक के **(अनु)** पश्चात् **(स्वम्)** अपनी **(भानुम्)** कान्ति को **(अर्णवैः)** समुद्रों वा नदियों से **(प्र, आ, श्रथयन्ते)** सब प्रकार शिथिल करते हैं, उनका आप लोग सत्कार करिये और हे राजन् **(स्पट्)** स्पर्श करने वाले! आप इनका निरन्तर **(अर्चा)** सत्कार कीजिये॥ १॥

भावार्थः-हे राजन्! जो मनुष्य शिल्पविद्या से विमानादि को रच के अन्तरिक्षादि मार्गों में जा आ कर सब के सुख के लिये ऐश्वर्य्य का आश्रयण करते हैं, वे संसार के विभूषक होते हैं॥ १॥

अथ वायुगुणानाह॥

अब वायुगुणों को अगले मन्त्र में कहते हैं॥

अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती।
दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः॥२॥

अमात्। एषाम्। भियसा। भूमिः। एजति। नौः। न। पूर्णा। क्षरति। व्यथिः। यती। दूरेऽदृशः। ये। चितयन्ते। एमऽभिः। अन्तः। महे। विदथे। येतिरे। नरः॥२॥

पदार्थः-(अमात्) गृहात् **(एषाम्)** वाय्वग्न्यादीनाम् **(भियसा)** भयेन **(भूमिः)** पृथिवी **(एजति)** कम्पते **(नौः)** बृहती नौका **(न)** इव **(पूर्णा))** **(क्षरति)** वर्षति **(व्यथिः)** या व्यथते सा **(यती)** गच्छन्ती **(दूरेदृशः)** ये दूरे दृश्यन्ते पश्यन्ति वा **(ये)** **(चितयन्ते)** प्रज्ञापयन्ति **(एमभिः)** प्रापकैर्गुणैः **(अन्तः)** मध्ये **(महे)** महते **(विदथे)** स-ामे विज्ञानमये व्यवहारे वा **(येतिरे)** यतन्ते **(नरः)** नेतारो मनुष्याः॥२॥

अन्वयः-हे नरो नायका मनुष्या! या भूमिः पूर्णा नौर्न भियसा व्यथिर्यती स्त्रीवैजति एषाममात् क्षरति तां य एमभिरस्यान्तर्मध्ये दूरेदृशो महे चितयन्ते विदथे यतिरे त एव सर्वान् सुखयितुमर्हन्ति॥२॥

भावार्थः-अत्रोपमालङ्कारः। यथा शूराणां समीपाद् भीरवः पलायन्ते तथैव वायुसूर्य्याभ्यां भूमिः कम्पते चलति च यथा पदार्थैः पूर्णा नौरग्न्यादियोगेन समुद्रपारं सद्यो गच्छति तथा विद्यापारं मनुष्या गच्छन्तु यथा वीराः स-ामे प्रयतन्ते तथैवेतरैर्मनुष्यैः प्रयतितव्यम्॥२॥

पदार्थः-हे **(नरः)** नायक मनुष्यो! जो **(भूमिः)** पृथिवी **(पूर्णा)** पूर्ण **(नौः)** बड़े नौका के **(न)** सदृश **(भियसा)** भय से **(व्यथिः)** पीड़ित होने वाली **(यती)** जाती हुई स्त्री के तुल्य **(एजति)** कांपती है और **(एषाम्)** इन वायु और अग्नि आदि के **(अमात्)** गृह से **(क्षरति)** वर्षाती है उसको **(ये)** जो **(एमभिः)** प्राप्त कराने वाले गुणों से इसके **(अन्तः)** मध्य में **(दूरेदृशः)** जो दूर देखे जाते वा दूर देखने वाले **(महे)** बड़े के लिये **(चितयन्ते)** उत्तमता से समझाते हैं और **(विदथे)** संग्राम वा विज्ञानयुक्त व्यवहार में **(येतिरे)** प्रयत्न करते हैं, वे ही सब को सुखी करने के योग्य होते हैं॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे शूरवीर जनों के समीप से डरने वाले जन भागते हैं, वैसे ही वायु और सूर्य से भूमि काँपती और चलती है और जैसे पदार्थों से पूर्ण नौका अग्नि आदि के योग से समुद्र के पार को शीघ्र जाती है, वैसे विद्या के पार मनुष्य जावें और जैसे वीर संग्राम में प्रयत्न करते हैं, वैसे ही अन्य मनुष्यों को प्रयत्न करना चाहिये॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने।

अत्याइव सुभ्वश्चारवः स्थन मर्याइव श्रियसे चेतथा नरः॥ ३॥

गवाम्ऽइव। श्रियसे। शृङ्गम्। उत्ऽतमम्। सूर्यः। न। चक्षुः। रजसः। विऽसर्जने। अत्याःऽइव। सुऽभ्वः। चारवः। स्थन। मर्याःऽइव। श्रियसे। चेतथ। नरः॥ ३॥

पदार्थः-(गवामिव) किरणानामिव **(श्रियसे)** सेवितुम् **(शृङ्गम्)** उपरिभागम् **(उत्तमम्)** **(सूर्यः)** सविता **(न)** इव **(चक्षुः)** प्रकाशकः **(रजसः)** लोकस्य **(विसर्जने)** त्यागे **(अत्याइव)** अश्ववत् **(सुभ्वः)** ये सुष्ठु भवन्ति **(चारवः)** सुन्दरस्वभावा गन्तारो वा **(स्थन)** भवत **(मर्य्याइव)** यथा विद्वांसो मनुष्याः **(श्रियसे)** श्रयितुमाश्रयितुम् **(चेतथा)** सञ्जानीध्वं ज्ञापयत वा। अत्र **संहितायामि**ति दीर्घः। **(नरः)** नेतारो मनुष्याः॥ ३॥

अन्वयः-हे सुभ्वश्चारवो नरः! शृङ्गमुत्तमं सूर्य्यो न गवामिव श्रियसे रजसो विसर्जने चक्षुरिव यूयं स्थनात्याइव मर्य्याइव श्रियसे यूयं चेतथा॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। ये किरणवत्सूर्य्यवदश्ववन्मनुष्यवत्प्रकाशं दानं वेगं विवेकं च सेवन्ते त एवोत्तमं सुखं लभन्ते॥ ३॥

पदार्थः-हे **(सुभ्वः)** उत्तम प्रकार होने वाले **(चारवः)** सुन्दर स्वभाव युक्त वा जाने वाले **(नरः)** नायक मनुष्यो! **(शृङ्गम्)** ऊपर के **(उत्तमम्)** उत्तम भाग को **(सूर्य्यः)** सूर्य्य के **(न)** सदृश **(गवामिव)** किरणों के सदृश **(श्रियसे)** सेवने को **(रजसः)** लोक के **(विसर्जने)** त्याग में **(चक्षुः)** प्रकाश करने वाले के सदृश आप लोग **(स्थन)** हूजिये और **(अत्याइव)** घोड़े के सदृश **(मर्य्याइव)** वा विद्वानों के सदृश **(श्रियसे)** आश्रयण करने को आप लोग **(चेतथा)** उत्तम प्रकार जानिये वा जनाइये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य किरणों, सूर्य्य, घोड़े और मनुष्यों के सदृश प्रकाश, दान, वेग और विवेक को सेवते हैं, वे ही उत्तम सुख को प्राप्त होते हैं॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

को वो महान्ति महतामुदश्नवत् कस्काव्या मरुतः को ह पौंस्या।
यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने॥ ४॥

कः। वः। महान्ति। महताम्। उत्। अश्नवत्। कः। काव्या। मरुतः। कः। ह। पौंस्या। यूयम्। ह। भूमिम्। किरणम्। न। रेजथ। प्र। यत्। भरध्वे। सुविताय। दावने॥ ४॥

पदार्थः-(कः) **(वः)** युष्माकं युष्मान् वा **(महान्ति)** विज्ञानादीनि **(महताम्)** **(उत्)** **(अश्नवत्)** प्राप्नोति **(कः)** **(काव्या)** कवीनां मेधाविनां कर्म्माणि **(मरुतः)** मननशीलाः **(कः)** **(ह)** किल **(पौंस्या)** पुंसामिमानि बलानि **(यूयम्)** **(ह)** खलु **(भूमिम्)** **(किरणम्)** दीप्तिम् **(न)** इव **(रेजथ)** कम्पध्वम् **(प्र)** **(यत्)** यम् **(भरध्वे)** धरत **(सुविताय)** ऐश्वर्य्याय **(दावने)** दात्रे॥ ४॥

अन्वयः-हे मरुतो! महतां वो महान्ति क उदश्नवत् कः काव्योदश्नवत्को ह पौंस्योदश्नवद्यतो यूयं भूमिं किरणं न रेजथ यद्ध सुविताय दावने प्र भरध्वे तदेव सर्वैः प्राप्तव्यम्॥४॥

भावार्थः-अत्र प्रश्नोत्तराणि सन्ति-क आप्तानां सकाशान्महान्ति विज्ञानानि प्राप्नोति, कश्चाप्तानां कर्म्माणि, को वीराणां बलानि चेत्यतेषामुत्तरं ये पवित्रान्तःकरणाः शुश्रूषवो धर्मिष्ठाः पुरुषार्थिनो ब्रह्मचारिणश्चेति॥४॥

पदार्थः-हे (**मरुतः**) विचार करने वाले जनो! (**महताम्**) बड़े (**वः**) आप लोगों के वा आप लोगों को (**महान्ति**) बड़े विज्ञान आदिकों को (**कः**) कौन (**उत्, अश्नवत्**) उत्तमता से प्राप्त होता है (**कः**) कौन (**काव्या**) बुद्धिमानों के कामों को उत्तमता से प्राप्त होता है (**कः**) कौन (**ह**) निश्चय से (**पौंस्या**) पुरुषों के इन बलों को प्राप्त होता है जिससे (**यूयम्**) आप लोग (**भूमिम्**) पृथिवी को (**किरणम्**) दीप्ति के (**न**) समान (**रेजथ**) कंपावें और (**यत्**) जिसको (**ह**) निश्चय (**सुविताय**) ऐश्वर्य और (**दावने**) देने वाले के लिये (**प्र, भरध्वे**) धारण कीजिये, उसी को सब लोग प्राप्त होवें॥४॥

भावार्थः-इस मन्त्र में प्रश्न और उत्तर हैं-कौन यथार्थवक्ता जनों के समीप से बड़े विज्ञानों को प्राप्त होता है और कौन आप्तजनों के कर्म्मों को और कौन वीरों के बलों को प्राप्त होता है, इन प्रश्नों का उत्तर यह है कि पवित्र अन्तःकरण युक्त और धर्म्म के सुनने की इच्छा करने वाले धर्मिष्ठ पुरुषार्थी और ब्रह्मचारी हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अश्वाऽइवेदरुषासः सबन्धवः शूराइव प्रयुधः प्रोत युयुधुः।
मर्याइव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः॥५॥

अश्वाःऽइव। इत्। अरुषासः। सऽबन्धवः। शूराऽइव। प्रऽयुधः। प्र। उत। युयुधुः। मर्याःऽइव। सुऽवृधः। ववृधुः। नरः। सूर्यस्य। चक्षुः। प्र। मिनन्ति। वृष्टिऽभिः॥५॥

पदार्थः-(**अश्वाइव**) तुरङ्गा इव (**इत्**) (**अरुषासः**) रक्तादिगुणविशिष्टाः (**सबन्धवः**) समाना बन्धवो येषान्ते (**शूराइव**) शूरवत् (**प्रयुधः**) ये प्रकर्षेण युध्यन्ते (**प्र**) (**उत**) (**युयुधुः**) स-ामं कुर्युः (**मर्याइव**) मनुष्यवत् (**सुवृधः**) ये सुष्ठु वर्धन्ते ते (**वावृधुः**) वर्धन्ताम् (**नरः**) नायकाः (**सूर्यस्य**) सवितृदेवस्य (**चक्षुः**) चष्टे येन तत् (**प्र**) (**मिनन्ति**) हिंसन्ति (**वृष्टिभिः**) वर्षाभिः॥५॥

अन्वयः-हे विद्वांसो! सबन्धवो नरो भवन्तोऽरुषासोऽश्वाइवेत् सद्यो गच्छन्तूत प्रयुधः शूराइव प्र युयुधुः सुवृधो मर्याइव वावृधुर्वायवः सूर्य्यस्य चक्षुर्वृष्टिभिरिव शत्रुसेनाः प्र मिनन्ति ते सत्कर्त्तव्याः सन्ति॥५॥

भावार्थः-अत्रोपमालङ्कारः। येऽश्वद्वल्लिष्ठाः शूरवन्निर्भया मनुष्यवद्विचारशीलाः सूर्यवदविद्याऽन्धकारनिवारकाः सन्ति ते सर्वस्य कल्याणाय भवन्ति॥५॥

पदार्थः-हे विद्वान् जनो! (**सबन्धवः**) तुल्य बन्धु जिनके ऐसे (**नरः**) नायक आप लोग (**अरुषासः**) रक्त आदि गुणों से विशिष्ट (**अश्वाइव, इत्**) घोड़ों के सदृश ही शीघ्र चलिये (**उत**) और (**प्रयुधः**) अत्यन्त युद्ध करने वाले (**शूराइव**) शूरवीरों के सदृश (**प्र, युयुधुः**) अत्यन्त युद्ध करिये तथा (**सुवृधः**) उत्तम प्रकार बढ़ने वाले (**मर्याइव**) मनुष्यों के सदृश (**वावृधुः**) बढ़िये और पवन (**सूर्यस्य**) सूर्य्य देव के (**चक्षुः**) देखता जिससे उसको (**वृष्टिभिः**) वर्षाओं से जैसे वैसे शत्रुओं की सेनाओं को (**प्र, मिनन्ति**) अत्यन्त नाश करते हैं, वे सत्कार करने योग्य हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो घोड़ों के सदृश बलिष्ठ, शूरवीरों के सदृश भयरहित, मनुष्यों के सदृश विचारशील और सूर्य के सदृश अविद्यारूपी अन्धकार के निवारक हैं, वे सब के कल्याण के लिये होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ते अ॑ज्ये॒ष्ठा अक॑निष्ठास उ॒द्भिदोऽम॑ध्यमासो॒ मह॑सा॒ वि वा॑वृधुः।
सु॒जा॒तासो॑ जनुषा॒ पृश्नि॑मातरो दि॒वो मर्या॒ आ नो॒ अच्छा॑ जिगातन॥६॥

ते। अ॒ज्ये॒ष्ठाः। अक॑निष्ठासः। उ॒त्ऽभिदः॑। अम॑ध्यमासः। मह॑सा। वि। व॒वृ॒धुः॒। सु॒ऽजा॒तासः॑। ज॒नुषा॑। पृश्नि॑ऽमातरः। दि॒वः। मर्याः॑। आ। नः॒। अच्छ॑। जि॒गा॒त॒न॒॥६॥

पदार्थः-(**ते**) (**अज्येष्ठाः**) अविद्यमानो ज्येष्ठो येषान्ते (**अकनिष्ठासः**) अविद्यमानाः कनिष्ठा येषान्ते (**उद्भिदः**) ये पृथिवीं भित्त्वा प्ररोहन्ति (**अमध्यमासः**) अविद्यमानो मध्यमो येषां ते (**महसा**) महता बलादिना (**वि**) (**वावृधुः**) वर्धन्ते (**सुजातासः**) शोभनेषु व्यवहारेषु प्रसिद्धाः (**जनुषा**) जन्मना (**पृश्निमातरः**) पृश्निरन्तरिक्षं माता येषान्ते (**दिवः**) कामयमानाः (**मर्याः**) मनुष्याः (**आ**) समन्तात् (**नः**) अस्मान् (**अच्छा**) अत्र **संहितायामि**ति दीर्घः। (**जिगातन**) प्रशंसन्ति॥६॥

अन्वयः-हे विद्वांसो! येऽज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो जनुषा सुजातासः पृश्निमातरो दिवो मर्या महसा वि वावृधुस्ते नोऽच्छाऽऽजिगातन॥६॥

भावार्थः-यदि मनुष्येषु यथावत्सुशिक्षा भवेत्तर्हि कनिष्ठा मध्यमोत्तमा जना विवेकिनो भूत्वा यथावज्जगदुन्नतिं कर्त्तुं शक्नुयुः॥६॥

पदार्थः-हे विद्वानो! जो (**अज्येष्ठाः**) नहीं विद्यमान ज्येष्ठ जिनके वा (**अकनिष्ठासः**) नहीं विद्यमान छोटा जिनके वा (**उद्भिदः**) पृथिवी को फोड़कर उगने वाले तथा (**अमध्यमासः**) नहीं विद्यमान मध्यम जिनके वे (**जनुषा**) जन्म से (**सुजातासः**) उत्तम व्यवहारों में प्रसिद्ध वा (**पृश्निमातरः**) अन्तरिक्ष माता जिनका वे और (**दिवः**) कामना करते हुए (**मर्याः**) मनुष्य (**महसा**) बड़े बल आदि से (**वि, वावृधुः**)

विशेष बढ़ते हैं **(ते)** वे **(नः)** हम लोगों की **(अच्छा)** उत्तम प्रकार **(आ, जिगातन)** सब ओर से प्रशंसा करते हैं॥६॥

भावार्थः-जो मनुष्यों में यथायोग्य उत्तम शिक्षा हो तो कनिष्ठ, मध्यम और उत्तम जन विचारशील होकर यथायोग्य जगत् की उन्नति कर सकें॥६॥

पुनः शिक्षा विषयमाह॥

फिर शिक्षविषय को कहते हैं॥

वयो॒ न ये श्रेणी॑: प॒प्तुरोज॒सान्ता॑न् दि॒वो बृ॑ह॒तः सानु॑न॒स्परि॑।
अश्वा॑स एषामु॒भये॒ यथा॑ वि॒दुः प्र पर्व॑तस्य नभ॒नूँर॑चुच्यवुः॥७॥

वयः॑। न। ये। श्रेणी॑:। प॒प्तुः। ओज॑सा। अन्ता॑न्। दि॒वः। बृ॒ह॒तः। सानु॑नः। परि॑। अश्वा॑सः। ए॒षा॒म्। उ॒भये॑। यथा॑। वि॒दुः। प्र। पर्व॑तस्य। न॒भ॒नून्। अ॒चु॒च्य॒वुः॥७॥

पदार्थः-(**वयः**) पक्षिणः (**न**) इव (**ये**) (**श्रेणीः**) पङ्क्तीः (**पप्तुः**) प्राप्नुवन्ति (**ओजसा**) पराक्रमेण (**अन्तान्**) समीपस्थान् (**दिवः**) व्यवहर्तॄन् (**बृहतः**) (**सानुनः**) शिखरस्येव (**परि**) (**अश्वासः**) सद्योगामिनः (**एषाम्**) (**उभये**) (**यथा**) (**विदुः**) जानन्ति (**प्र**) (**पर्वतस्य**) मेघस्य (**नभनून्**) धनान् (**अचुच्यवुः**) च्यावयेयुः॥७॥

अन्वयः-य ओजसा वयो न श्रेणीः पप्तुर्बृहतः सानुनोऽन्तान् दिवः परि पप्तुरेषां य उभयेऽश्वासः सन्ति तान् यथा विदुः पर्वतस्य नभनून् प्राचुच्यवुस्ते जगदाधाराः सन्ति॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथा पक्षिणः श्रेणीभूताः सद्यो गच्छन्ति तथैव सुशिक्षिता भृत्या अश्वादयो यानानि त्रिषु मार्गेषु सद्यो गच्छन्ति॥७॥

पदार्थः-(**ये**) जो (**ओजसा**) पराक्रम से (**वयः**) पक्षियों के (**न**) सदृश (**श्रेणीः**) पङ्क्तियों को (**पप्तुः**) प्राप्त होते और (**बृहतः**) बड़े (**सानुनः**) शिखर के समान (**अन्तान्**) समीप में वर्त्तमान (**दिवः**) व्यवहार करने वालों को (**परि**) सब ओर से प्राप्त होते हैं (**एषाम्**) इनके जो (**उभये**) दो प्रकार के (**अश्वासः**) शीघ्र चलने वाले पदार्थ हैं उनको (**यथा**) जिस प्रकार से (**विदुः**) जानते हैं और (**पर्वतस्य**) मेघ के (**नभनून्**) समूहों को (**प्र, अचुच्यवुः**) अत्यन्त वर्षावें, वे संसार के आधार होते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पक्षी पंक्तिबद्ध हुए शीघ्र जाते हैं, वैसे ही उत्तम प्रकार शिक्षा युक्त नौकर और घोड़े आदि वाहन तीनों मार्गों में शीघ्र जाते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मिमा॑तु॒ द्यौरदि॑तिर्वी॒तये॒ नः॒ सं दानु॑चित्रा उ॒षसो॑ यतन्ताम्।

आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः॥८॥२४॥

मिमातु। द्यौः। अदितिः। वीतये। नः। सम्। दानुऽचित्राः। उषसः। यतन्ताम्। आ। अचुच्यवुः। दिव्यम्। कोशम्। एते। ऋषे। रुद्रस्य। मरुतः। गृणानाः॥८॥

पदार्थः-(मिमातु) (द्यौः) प्रकाश इव **(अदितिः)** मातेव **(वीतये)** विज्ञानादिप्राप्तये **(नः)** अस्मान् **(सम्)** सम्यक् **(दानुचित्राः)** चित्रा अद्भुता दानवो दानानि यासु ताः **(उषसः)** प्रभातवेलाः **(यतन्ताम्) (आ, अचुच्यवुः)** आगच्छन्तु **(दिव्यम्)** दिवि कामनायां साधुम् **(कोशम्)** धनालयम् **(एते) (ऋषे)** विद्याप्रद **(रुद्रस्य)** अन्यायकारिणो रोदयितुः **(मरुतः)** मनुष्याः **(गृणानाः)** स्तुवन्तः॥८॥

अन्वयः-हे ऋषे! यथाऽदितिर्द्यौर्वीतये नो मिमातु तथा त्वमस्मान् मिमीहि। यथा दानुचित्रा उषसो व्यवहारान् निर्म्मापयन्ति यथैत रुद्रस्य दिव्यं कोशमाचुच्यवुस्तथा गृणाना मरुतः सं यतन्ताम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। वे विद्युद्वदुषर्वदृषिवद्धनकोशं सञ्चिन्वन्ति ते प्रतिष्ठिता भवन्ति॥८॥

अत्र वायुविद्युद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्याः॥

इत्येकोनषष्टितमं सूक्तं चतुर्विंशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(ऋषे)** विद्या के देने वाले! जैसे **(अदितिः)** माता वा **(द्यौः)** प्रकाश के सदृश **(वीतये)** विज्ञान आदि की प्राप्ति के लिये **(नः)** हम लोगों का **(मिमातु)** आदर करे, वैसे आप आदर करिये जैसे **(दानुचित्राः)** अद्भुत दान जिनमें ऐसी **(उषसः)** प्रातर्वेलायें व्यवहारों को सिद्ध कराती हैं वा जैसे **(एते)** ये **(रुद्रस्य)** अन्यायकारियों को रुलाने वाले **(दिव्यम्)** कामना में श्रेष्ठ **(कोशम्)** धन के स्थान को **(आ, अचुच्यवुः)** प्राप्त होवें वैसे **(गृणानाः)** स्तुति करते हुए **(मरुतः)** मनुष्य **(सम्)** उत्तम प्रकार **(यतन्ताम्)** प्रयत्न करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जन बिजुली, प्रातःकाल और ऋषि के सदृश धन के कोश को इकट्ठा करते हैं, वे प्रतिष्ठित होते हैं॥८॥

इस सूक्त में पवन और बिजुली के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह उनसठवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य षष्टितमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। मरुतो वाग्निश्च देवता। ३, ४, ५ निचृत्त्रिष्टुप्। २ भुरिक् त्रिष्टुप्। ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ७, ८ जगती छन्दः। निषादः स्वरः॥

अथ मनुष्यैः किं साधनीयमित्याह॥

अब मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

ईळे॑ अ॒ग्निं स्ववव॑सुं॒ नमो॑भिरि॒ह प्र॑स॒त्तो वि च॑यत्कृ॒तं न॑:।
रथै॑रिव॒ प्र भ॑रे वाज॒यद्भि॑: प्रदक्षि॒णिन्म॒रुता॑ं॒ स्तोम॑मृध्याम्॥ १॥

ईळे॑। अ॒ग्निम्। सु॒ऽअव॑सम्। नम॑:ऽभिः। इ॒ह। प्र॒ऽस॒त्तः। वि। च॒य॒त्। कृ॒तम्। न॒:। रथै॑:ऽइव। प्र। भ॒रे॒। वा॒ज॒यत्ऽभि॑:। प्र॒ऽदक्षि॒णित्। म॒रुता॑म्। स्तोम॑म्। ऋ॒ध्या॒म्॥ १॥

पदार्थः-(ईळे) अधीच्छामि **(अग्निम्)** विद्युतम् **(स्ववसम्)** सुष्ठ्ववो रक्षणं यस्मात्तम् **(नमोभिः)** सत्कारैः **(इह)** अस्मिन् संसारे **(प्रसत्तः)** प्रसन्नः **(वि) (चयत्)** विचिनोमि **(कृतम्) (नः)** अस्मान् **(रथैरिव) (प्र) (भरे) (वाजयद्भिः)** वेगवद्भिः **(प्रदक्षिणित्)** यः प्रदक्षिणां नयति **(मरुताम्)** मनुष्याणाम् **(स्तोमम्)** श्लाघाम् **(ऋध्याम्)** वर्धयेयम्॥ १॥

अन्वयः-यथा प्रसत्त इहाहं नमोभिरस्मि तथा नमोभिः स्ववसमग्निमीळे कृतं वि चयत्। ये मरुतां गणा वाजयद्भी रथैरिव नोऽस्मान् वहन्ति तानहं प्र भरे प्रदक्षिणिदहं मरुतां स्तोममृध्याम्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। विदुषा विदुषां सङ्गेनाग्न्यादिविद्यामाविर्भाव्य प्रसन्नता सम्पादनीया॥ १॥

पदार्थः-जैसे **(प्रसत्तः)** प्रसन्न **(इह)** इस संसार में मैं **(नमोभिः)** सत्कारों से हूँ वैसे सत्कारों से **(स्ववसम्)** उत्तम रक्षण जिससे उस **(अग्निम्)** बिजुली की **(ईळे)** अधिक इच्छा करता और **(कृतम्)** किये काम को **(वि, चयत्)** विवेक करता हूँ और जो **(मरुताम्)** मनुष्यों के समूह **(वाजयद्भिः)** वेग वाले **(रथैरिव)** वाहनों के सदृश पदार्थों से **(नः)** हम लोगों को पहुँचाते हैं उनको मैं **(प्र, भरे)** धारण करता हूँ और **(प्रदक्षिणित्)** प्रदक्षिणा को प्राप्त कराने वाला मैं मनुष्यों की **(स्तोमम्)** प्रशंसा को **(ऋध्याम्)** बढाऊं॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। विद्वान् जन को चाहिये कि विद्वानों के सङ्ग से अग्नि आदि विद्या को प्रकट करा के प्रसन्नता सम्पादित करे॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ ये त॒स्थुः पृष॑तीषु श्रु॒तासु॑ सु॒खेषु॑ रु॒द्रा म॒रुतो॒ रथे॑षु।

वना॑ चिदुग्रा जिहते॒ नि वो॑ भि॒या पृ॑थि॒वी चि॑द्रेजते॒ पर्व॑तश्चित्॥ २॥

आ। ये। त॒स्थुः। पृष॑तीषु। श्रु॒तासु॑। सु॒ऽखेषु॑। रु॒द्राः। म॒रुत॑ः। रथे॑षु। वना॑। चि॒त्। उ॒ग्राः। जि॒हते॒। नि। व॒ः। भि॒या। पृ॒थि॒वी। चि॒त्। रे॒ज॒ते॒। पर्व॑तः। चि॒त्॥ २॥

पदार्थः-(आ) (ये) (तस्थुः) (पृषतीषु) सेचनकर्त्रीषु **(श्रुतासु)** विद्यासु **(सुखेषु) (रुद्राः)** प्राणादयः **(मरुतः)** मनुष्याः **(रथेषु)** विमानादिषु यानेषु **(वना)** किरणाः **(चित्)** अपि **(उग्राः)** तीव्रस्वभावाः **(जिहते)** गच्छन्ति **(नि)** नितराम् **(वः)** युष्माकम् **(भिया)** भयेन **(पृथिवी)** भूमिः **(चित्) (रेजते)** कम्पते **(पर्वतः)** मेघः **(चित्)** इव॥ २॥

अन्वयः-ये रुद्रा मरुतः श्रुतासु पृषतीषु सुखेषु रथेष्वा तस्थुश्चिदपि वनोग्रा इव नि जिहते। वो भिया पृथिवी चिद्रेजते पर्वतश्चिदिव रेजते तान् वयं सततं सत्कुर्याम॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! उत्तमासु विद्यासूत्तमेषु यानेषु च स्थित्वा शीघ्रगमनाय समर्था भवत॥ २॥

पदार्थः-(ये) जो **(रुद्राः)** प्राण आदि और **(मरुतः)** मनुष्य **(श्रुतासु)** विद्याओं में **(पृषतीषु)** सेचन करने वालियों में **(सुखेषु)** सुखों में और **(रथेषु)** विमानादि वाहनों में **(आ, तस्थुः)** स्थित होवें **(चित्)** और **(वना)** किरण **(उग्राः)** तीव्र स्वभाव वालों के सदृश **(नि, जिहते)** निरन्तर जाते हैं और **(वः)** आप लोगों के **(भिया)** भय से **(पृथिवी)** भूमि **(चित्)** भी **(रेजते)** कम्पित होती है **(पर्वतः)** मेघ के **(चित्)** समान पदार्थ कम्पित होता है, उनका हम लोग निरन्तर सत्कार करें॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! उत्तम विद्याओं और उत्तम वाहनों पर स्थित होकर शीघ्र जाने के लिये समर्थ हूजिये॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

पर्व॑तश्चि॒न्महि॑ वृ॒द्धो बि॑भाय दि॒वश्चि॒त्सानु॑ रेजत स्व॒ने व॑ः।

यत्क्रीळ॑थ मरुत ऋष्टिमन्त आप॑इव स॒ध्र्य॑ञ्चो धवध्वे॥ ३॥

पर्व॑तः। चि॒त्। महि॑। वृ॒द्धः। बि॒भा॒य॒। दि॒वः। चि॒त्। सानु॑। रे॒ज॒त॒। स्व॒ने। व॒ः। यत्। क्रीळ॑थः। म॒रुत॒ः। ऋ॒ष्टि॒ऽम॒न्त॑ः। आप॑ःऽइव। स॒ध्र्य॑ञ्चः। ध॒व॒ध्वे॒॥ ३॥

पदार्थः-(पर्वतः) मेघः **(चित्)** इव **(महि)** महान् **(वृद्धः) (बिभाय)** बिभेति **(दिवः)** प्रकाशात् **(चित्) (सानु)** शिखरमिव **(रेजत)** कम्पते **(स्वने)** शब्दे **(वः)** युष्माकम् **(यत्)** यत्र **(क्रीळथ) (मरुतः)** मनुष्याः **(ऋष्टिमन्तः)** प्रशस्तविज्ञानवन्तः **(आपइव) (सध्र्यञ्चः)** सहाञ्चन्तः **(धवध्वे)** कम्पयध्वे॥ ३॥

अन्वयः-हे ऋष्टिमन्तो मरुतो! यद्यूयं क्रीळथाऽऽपइव सध्र्यञ्चो धवध्वे वः स्वने पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत तत्रान्वेषणं कुरुत॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या विद्याव्यवहारसिद्धये क्रीडन्ते तथा सखायो भूत्वा कार्य्यसिद्धिं कुर्वन्ति ते सर्वथाऽऽनन्दिता जायन्ते॥३॥

पदार्थः-हे (**ऋष्टिमन्तः**) अच्छे विज्ञान वाले (**मरुतः**) मनुष्यो! (**यत्**) जहाँ तुम (**क्रीळथ**) क्रीड़ा करते हो (**आपइव**) जलों के सदृश (**सध्र्यञ्चः**) एक साथ गमन करते हुए (**धवध्वे**) कंपाओ और (**वः**) आप लोगों के (**स्वने**) शब्द में (**पर्वतः**) मेघ के (**चित्**) सदृश (**महि**) बड़ा (**वृद्धः**) वृद्ध (**बिभाय**) डरता है (**दिवः**) प्रकाश से (**चित्**) भी जैसे वैसे (**सानु**) शिखर के तुल्य (**रेजत**) कम्पित होता है, वहाँ अन्वेषण करो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य विद्या के व्यवहार की सिद्धि के लिये क्रीड़ा करते हैं तथा मित्र होकर कार्य की सिद्धि करते हैं, वे सब प्रकार आनन्दित होते हैं॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

वराइवेद् रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे।

श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु॥४॥

वराःऽइव। इत्। रैवतासः। हिरण्यैः। अभि। स्वधाभिः। तन्वः। पिपिश्रे। श्रिये। श्रेयांसः। तवसः। रथेषु। सत्रा। महांसि। चक्रिरे। तनूषु॥४॥

पदार्थः-(**वराइव**) वरैस्तुल्याः (**इत्**) एव (**रैवतासः**) रेवतीषु पशुषु भवाः (**हिरण्यैः**) सुवर्णैस्तेज आदिभिः (**अभि**) (**स्वधाभिः**) अन्नादिभिः (**तन्वः**) शरीराणि (**पिपिश्रे**) स्थूलावयवानि कुर्वन्ति (**श्रिये**) लक्ष्म्यै (**श्रेयांसः**) अतिशयेन श्रेय इच्छन्तः (**तवसः**) बलिष्ठा गतिमन्तः (**रथेषु**) यानेषु (**सत्रा**) सत्यानि (**महांसि**) (**चक्रिरे**) कुवन्ति (**तनूषु**) शरीरेषु॥४॥

अन्वयः-ये श्रेयांसस्तवसो रैवतासो मनुष्या वराइवेद्धिरण्यैः स्वधाभिस्तन्वः पिपिश्रे। श्रिये रथेषु तनूषु सत्रा महांस्यभि चक्रिरे ते भाग्यशालिनो भवन्ति॥४॥

भावार्थः-ये मनुष्यशरीरमाश्रित्य श्रियमन्विच्छन्ति ते दारिद्र्यं घ्नन्ति॥४॥

पदार्थः-जो (**श्रेयांसः**) अत्यन्त कल्याण की इच्छा करते हुए (**तवसः**) बलवान् गति वाले (**रैवतासः**) पशुओं में हुए मनुष्य (**वराइव**) श्रेष्ठों के तुल्य (**इत्**) ही (**हिरण्यैः**) सुवर्ण तेज आदिकों से और (**स्वधाभिः**) अन्न आदिकों से (**तन्वः**) शरीरों को (**पिपिश्रे**) स्थूल अवयव वाले करते हैं, और (**श्रिये**) लक्ष्मी के लिये (**रथेषु**) वाहनों और (**तनूषु**) शरीरों में (**सत्रा**) सत्य (**महांसि**) बड़े काम (**अभि, चक्रिरे**) करते हैं, वे भाग्यशाली होते हैं॥४॥

भावार्थः-जो मनुष्य के शरीर का आश्रय करके लक्ष्मी की इच्छा करते हैं, वे दारिद्र्य का नाश करते हैं॥४॥

पुनर्मनुष्यैः कथं भवितव्यमित्याह॥

फिर मनुष्यों को कैसे होना चाहिये, इस विषय को कहते हैं॥

अ॒ज्ये॒ष्ठासो॒ अक॑निष्ठास ए॒ते सं भ्रात॑रो वावृधु॒: सौभ॑गाय।
युवा॑ पि॒ता स्वपा॑ रु॒द्र ए॑षां सु॒दुघा॒ पृश्नि॑: सु॒दिना॑ म॒रुद्ध्य॑:॥५॥

अ॒ज्ये॒ष्ठास॑:। अक॑निष्ठास:। ए॒ते। सम्। भ्रात॑र:। व॒वृ॒धु॒:। सौभ॑गाय। युवा॑। पि॒ता। सु॒ऽअपा॑:। रु॒द्र:। ए॒षा॒म्। सु॒ऽदुघा॑। पृश्नि॑:। सु॒ऽदिना॑। म॒रुत्ऽभ्य॑:॥५॥

पदार्थः-(अज्येष्ठासः) ज्येष्ठभावरहिताः **(अकनिष्ठासः)** कनिष्ठभावमप्राप्ताः **(एते)** **(सम्)** **(भ्रातरः)** बन्धवः **(वावृधुः)** वर्धन्ते **(सौभगाय)** श्रेष्ठैश्वर्य्यस्य भावाय **(युवा)** **(पिता)** पालकः **(स्वपाः)** श्रेष्ठकर्मानुष्ठानः **(रुद्रः)** अन्येषां रोदयिता **(एषाम्)** **(सुदुघा)** सुष्ठु कामस्य प्रपूरिका **(पृश्निः)** अन्तरिक्षमिव बुद्धिः **(सुदिना)** उत्तमदिना **(मरुद्ध्यः)** वायुभ्यः॥५॥

अन्वयः-हे मनुष्या! यथा स्वपा युवा रुद्रः पितैषां सुदुघा सुदिना पृश्निर्मरुद्ध्यो मनुष्येभ्यो विद्यादिदानं ददाति तथाऽज्येष्ठासोऽकनिष्ठास एते भ्रातरः सौभगाय सं वावृधुः॥५॥

भावार्थः-ये मनुष्याः पूर्णयुवावस्थायां विद्याः समाप्य सुशीलतां स्वीकृत्यातीवोत्तमाः सन्तः सुशीलाः स्त्रियः स्वीकृत्य च प्रयतन्ते त ऐश्वर्य्यं प्राप्यानन्दिता भवन्ति॥५॥

पदार्थः-हे मनुष्यो! जैसे **(स्वपाः)** श्रेष्ठ कर्म का अनुष्ठान करने वाला **(युवा)** युवावस्थायुक्त और **(रुद्रः)** अन्यों को रुलाने वाला **(पिता)** पालक जन और **(एषाम्)** इन की **(सुदुघा)** उत्तम प्रकार मनोरथ को पूर्ण करने वाली **(सुदिना)** सुन्दर दिन जिससे वह **(पृश्निः)** अन्तरिक्ष के सदृश बुद्धि **(मरुद्ध्यः)** मनुष्यों के लिये विद्यादि दान देती है, वैसे **(अज्येष्ठासः)** जेठेपन से रहित **(अकनिष्ठासः)** कनिष्ठपन से रहित **(एते)** ये **(भ्रातरः)** बन्धु जन **(सौभगाय)** श्रेष्ठ ऐश्वर्य्य होने के लिये **(सम्, वावृधुः)** बढ़ते हैं॥५॥

भावार्थः-जो मनुष्य पूर्ण युवावस्था में विद्याओं को समाप्त कर और सुशीलता को स्वीकार कर बहुत ही उत्तम हुए उत्तम स्वभावयुक्त स्त्रियों को विवाह द्वारा स्वीकार करके प्रयत्न करते हैं, वे ऐश्वर्य्य को प्राप्त होकर आनन्दित होते हैं॥५॥

पुनर्मनुष्यैः परस्परं कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को परस्पर कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

यदु॒त्त॒मे म॑रुतो मध्य॒मे वा॒ यद्वा॑व॒मे सु॑भगासो दि॒वि ष्ठ।
अतो॑ नो रुद्रा उ॒त वा॒ न्व१॒स्याग्ने॑ वि॒त्ताद्ध॒विषो॒ यद्य॑जाम॥६॥

यत्। उत्ऽतमे। मरुतः। मध्यमे। वा। यत्। वा। अवमे। सुऽभगासः। दिवि। स्थ। अतः। नः। रुद्राः। उत। वा। नु। अस्य। अग्नेः। वित्तात्। हविषः। यत्। यजाम॥६॥

पदार्थः-(यत्) यत्र **(उत्तमे)** [उत्तमे] व्यवहारे **(मरुतः)** मनुष्याः **(मध्यमे)** मध्यस्थे **(वा)** **(यत्)** यत्र **(वा)** **(अवमे)** निकृष्टे **(सुभगासः)** उत्तमैश्वर्याः **(दिवि)** शुद्धे व्यवहारे **(स्थ)** भवत **(अतः)** अस्मात् कारणात् **(नः)** अस्मान् **(रुद्राः)** मध्यस्था विद्वांसः **(उत)** **(वा)** **(नु)** **(अस्य)** **(अग्ने)** पावकवत् प्रकाशितात्मन् **(वित्तात्)** **(हविषः)** भोक्तुमर्हात् **(यत्)** यम् **(यजाम)** प्रेरयेम॥६॥

अन्वयः-हे सुभगासो रुद्रा मरुतो! यूयं यदुत्तमे मध्यमे वावमे यद्वान्यत्रावमे दिवि वा स्थ तत्रातो नोऽस्मानुत्तमे व्यवहारे स्थापयत। उत वा हे अग्नेऽस्य वित्ताद्धविषो यन्नु वयं यजाम तत्र त्वमपि यजस्व॥६॥

भावार्थः-ये मनुष्या उत्तममध्यमकनिष्ठेषु व्यवहारेषु यथावद्वर्त्तित्वोत्तमैश्वर्या जायन्ते तान् सर्वे सत्कुर्य्युः॥६॥

पदार्थः-हे **(सुभगासः)** उत्तम ऐश्वर्य्य वाले और **(रुद्राः)** मध्यस्थ विद्वान् **(मरुतः)** मनुष्यो! आप लोग **(यत्)** जिस **(उत्तमे)** उत्तम व्यवहार में **(मध्यमे)** मध्यस्थ व्यवहार में **(वा)** वा **(अवमे)** निकृष्ट व्यवहार में **(यत्)** जहाँ **(वा)** अथवा अन्यत्र निकृष्ट व्यवहार में **(दिवि)** शुद्ध व्यवहार में **(स्थ)** हूजिये वहाँ **(अतः)** इस कारण से **(नः)** हम लोगों को उत्तम व्यवहार में स्थापित कीजिये **(उत, वा)** और अथवा हे **(अग्ने)** अग्नि के सदृश प्रकाशित आत्मा वाले! **(अस्य)** इसके **(वित्तात्)** धन से और **(हविषः)** भोग करने योग्य से **(यत्)** जिसको **(नु)** निश्चय हम लोग **(यजाम)** प्रेरणा करें, वहाँ आप भी प्रेरणा करिये॥६॥

भावार्थः-जो मनुष्य उत्तम, मध्यम और कनिष्ठ व्यवहारों में यथायोग्य वर्त्ताव करके उत्तम ऐश्वर्य्य वाले होते हैं, उनका सब लोग सत्कार करें॥६॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्वे उत्तरादधि ष्णुभिः।

ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते॥७॥

अग्निः। च। यत्। मरुतः। विश्वऽवेदसः। दिवः। वहध्वे। उत्ऽतरात्। अधि। स्नुऽभिः। ते। मन्दसानाः। धुनयः। रिशादासः। वामम्। धत्त। यजमानाय। सुन्वते॥७॥

पदार्थः-(अग्निः) पावक इव **(च)** **(यत्)** ये **(मरुतः)** मननशीला मानवाः **(विश्ववेदसः)** समग्रैश्वर्य्याः **(दिवः)** कामयमानाः **(वहध्वे)** प्राप्नुत **(उत्तरात्)** पश्चात् **(अधि)** उपरिभावे **(स्नुभिः)** इच्छावद्भिः **(ते)** **(मन्दसानाः)** आनन्दन्तः **(धुनयः)** दुष्टानां कम्पकाः **(रिशादसः)** हिंसकानां नाशकाः **(वामम्)** प्रशस्यम् **(धत्त)** **(यजमानाय)** सङ्गन्त्रे **(सुन्वते)** यज्ञकर्त्रे॥७॥

अन्वयः-हे मनुष्या! यद्येऽग्निरिव विश्ववेदसो दिवो रिशादसो मन्दसानो धुनयो मरुतो यूयं सुन्वते यजमानाय वामं धत्त। उत्तरादधि ष्णुभिर्वामं वहध्वे ते च यूयं सदा सर्वानुपकुरुत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव महात्मानः सन्ति ये सर्वार्थं सत्यं दधति॥७॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(अग्निः)** अग्नि के सदृश **(विश्ववेदसः)** सम्पूर्ण ऐश्वर्य्य से युक्त **(दिवः)** कामना करते हुए **(रिशादसः)** हिंसकों के नाश करने वाले **(मन्दसानाः)** आनन्द करते हुए **(धुनयः)** दुष्टों के कम्पाने वाले **(मरुतः)** विचारशील मनुष्य आप लोग **(सुन्वते)** यज्ञ करने और **(यजमानाय)** पदार्थों के मेल करने वाले जन के लिये **(वामम्)** प्रशंसा करने योग्य व्यवहार को **(धत्त)** धारण करो और **(उत्तरात्)** पीछे से **(अधि)** ऊपर के होने में **(स्नुभिः)** इच्छा वालों से प्रशंसा करने योग्य को **(वहध्वे)** प्राप्त हूजिये **(ते, च)** वे भी आप लोग सदा सब का उपकार करिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही महात्मा हैं जो सब के लिये सत्य को धारण करते हैं॥७॥

अथ विद्वत्सेवनमाह॥

अब विद्वानों की सेवा करना अगले मन्त्र में कहते हैं॥

अग्ने॑ म॒रुद्भिः॑ शु॒भय॑द्भिर्ऋ॒क्व॑भिः॒ सोम॑ पिब मन्दसा॒नो ग॑ण॒श्रिभिः॑।
पा॒व॒केभि॑र्विश्वमि॒न्वेभि॒रा॒युभि॒र्वैश्वा॑नर प्र॒दिवा॑ के॒तुना॑ स॒जूः॥८॥२५॥

अग्ने॑। म॒रुत्ऽभिः॑। शु॒भय॑त्ऽभिः। ऋ॒क्व॑ऽभिः। सोम॑म्। पि॒ब॒। म॒न्द॒सा॒नः। ग॒ण॒श्रिऽभिः॑। पा॒व॒केभिः॑। वि॒श्व॒म्ऽइ॒न्वेभिः॑। आ॒युऽभिः॑। वैश्वा॑नर। प्र॒ऽदिवा॑। के॒तुना॑। स॒ऽजूः॥८॥

पदार्थः-**(अग्ने)** विद्वन् **(मरुद्भिः)** मनुष्यैः **(शुभयद्भिः)** शुभमाचरद्भिः **(ऋक्वभिः)** सत्कर्त्तव्यैः **(सोमम्)** महौषधिरसम् **(पिब)** **(मन्दसानः)** आनन्दन् **(गणश्रिभिः)** समुदायलक्ष्मीभिः **(पावकेभिः)** पवित्रैः **(विश्वमिन्वेभिः)** सर्वं जगद्व्यवहारं प्रापयद्भिः **(आयुभिः)** जीवनैः **(वैश्वानर)** विश्वेषु सर्वेषु नायक **(प्रदिवा)** प्रकृष्टप्रकाशवता **(केतुना)** प्रज्ञया सह **(सजूः)** समानप्रीतिसेवी॥८॥

अन्वयः-हे अग्ने! गणश्रिभिर्मन्दसानः प्रदिवा केतुना सजूर्वैश्वानर त्वं शुभयद्भिर्ऋक्वभिः पावकेभिर्विश्वमिन्वेभिरायुभिर्मरुद्भिः सह सोमं पिब॥८॥

भावार्थः-मनुष्याणां योग्यतास्ति सदाऽऽप्तैर्विद्वद्भिस्सह सङ्गत्य विद्यायुः प्रज्ञा वर्धयित्वौषधवदाहारविहारौ च विधाय शुभाचरणं सर्वदा कुर्युरिति॥८॥

अत्र वाय्वग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्टितमं सूक्तं पञ्चविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(गणश्रिभिः)** समुदाय की लक्ष्मियों से **(मन्दसानः)** आनन्द करता हुआ **(प्रदिवा)** अत्यन्त प्रकाश वाली **(केतुना)** बुद्धि के साथ **(सजूः)** तुल्य प्रीति को सेवने वाले

(वैश्वानर) सब में मुख्य आप **(शुभयद्भिः)** उत्तम आचरण करने वाले **(ऋक्वभिः)** सत्कार करने योग्य **(पावकेभिः)** पवित्र **(विश्वमिन्वेभिः)** सम्पूर्ण संसार के व्यवहार को प्राप्त कराते हुए **(आयुभिः)** जीवनों में **(मरुद्भिः)** मनुष्यों के साथ **(सोमम्)** बड़ी औषधियों के रस का **(पिब)** पान करिये॥८॥

भावार्थः-मनुष्यों की योग्यता है कि सदा यथार्थवक्ता विद्वानों के साथ मिलकर विद्या, अवस्था और बुद्धि को बढ़ाकर औषध के सदृश आहार और विहार को करके उत्तम आचरण सर्वदा करें॥८॥

इस सूक्त में वायु, अग्नि और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह साठवां सूक्त और पच्चीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकोनविंशत्यृचस्यैकषष्टितमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। १-४, ११-१६ मरुतः। ५-८ शशीयसी तरन्तमहिषी। ९ पुरुमीळ्हो वैददश्विः। १० तरन्तो वैददश्विः। १७-१९ रथवीतिर्दाल्भ्यो देवताः। १, ४, ६, ७, ८, ११, १५, १६, १८ गायत्री। २, ३, १०, १२-१४, १९ निचृद्गायत्री। १७ विराड्गायत्री छन्दः। षड्जः स्वरः। ५ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। ९ सतोबृहती छन्दः। मध्यमः स्वरः॥

अथ प्रश्नोत्तरैर्मरुदादिगुणानाह॥

अब उन्नीस ऋचा वाले एकसठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में प्रश्नोत्तरों से मरुदादिकों के गुणों को कहते हैं॥

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः परावतः॥ १॥

के। स्थ। नरः। श्रेष्ठऽतमाः। ये। एकःऽएकः। आऽयय। परमस्याः। पराऽवतः॥ १॥

पदार्थः-(के) (स्था) तिष्ठत। अत्र **संहितायामिति** दीर्घः। **(नरः)** नायकाः **(श्रेष्ठतमाः)** अतिशयेन श्रेयस्कराः **(ये) (एकएकः) (आयय)** आयाथ **(परमस्याः)** अतिश्रेष्ठायाः **[**पारगन्तारः**] (परावतः)** दूरतः॥ १॥

अन्वयः-हे श्रेष्ठतमा नरः! परमस्याः पारगन्तारः के यूयं स्था ये परावत आगत्य उपदिशन्ति येषां मध्य एकएको यूयं परावतो देशादेकमायय॥ १॥

भावार्थः-के श्रेष्ठतमा मनुष्या भवन्ति? ये सर्वदा श्रेष्ठतमानि कर्माणि कुर्युः॥ १॥

पदार्थः-हे **(श्रेष्ठतमाः)** अत्यन्त कल्याण करने वाले **(नरः)** नायक जनो! **(परमस्याः)** अत्यन्त श्रेष्ठ के पार जाने वाले **(के)** कौन **(स्था)** ठहरें **(ये)** जो **(परावतः)** दूर से आकर उपदेश करते हैं और जिनके मध्य में **(एकएकः)** एकएक आप दूर देश से एक को **(आयय)** प्राप्त होवें॥ १॥

भावार्थः-कौन अत्यन्त श्रेष्ठ मनुष्य होते हैं? जो सर्वदा अत्यन्त श्रेष्ठ कर्म्मों को करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा यय। पृष्ठे सदो नसोर्यमः॥ २॥

क्व। वः। अश्वाः। क्व। अभीशवः। कथम्। शेक। कथा। यय। पृष्ठे। सदः। नसोः। यमः॥ २॥

पदार्थः-(क्व) कस्मिन् **(वः)** युष्माकम् **(अश्वाः)** आशुगामिनः **(क्व) (अभीशवः)** अङ्गुलय इव। **अभीशव इत्यङ्गुलिनामसु पठितम्।** (निघं०२.५) **(कथम्) (शेक)** सद्योगामिनो भवत **(कथा)** केन प्रकारेण **(यय)** गच्छत **(पृष्ठे)** पश्चाद्भागे **(सदः)** छेद्यं वस्तु **(नसोः)** नासिकयोः **(यमः)** नियन्ता॥ २॥

अन्वय:-हे मनुष्या! व: क्वाश्वा: क्वाभीशव: सन्ति तान् यूयं कथं शेक कथा यय। यथा नसो: पृष्ठे सदो यमोऽस्ति तथा यूयं भवत॥२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यदा कश्चित् विदुष: पृच्छेत्तदा त उत्तरं दद्यु: पक्षपातञ्च विहाय न्यायाधीशा इव भवेयुस्तदा समग्रं बोधमाप्नुयु:॥२॥

पदार्थ:-हे मनुष्यो! **(व:)** आप लोगों के **(क्व)** कहाँ **(अश्वा:)** शीघ्र चलने वाले घोड़े और **(क्व)** कहाँ **(अभीशव:)** अङ्गुलियां हैं, उनको आप लोग **(कथम्)** किस प्रकार **(शेक)** शीघ्र पहुंचने वाले हूजिये और **(कथा)** किस प्रकार से **(यय)** जाइये और जैसे **(नसो:)** नासिकाओं के **(पृष्ठे)** पीछे के भाग में **(सद:)** छेदन करने योग्य वस्तु का **(यम:)** नियन्ता है, वैसे आप लोग हूजिये॥२॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब कोई विद्वानों को पूछे तब वे उत्तर दें और पक्षपात को छोड़कर न्यायाधीशों के सदृश होवें, तब सम्पूर्ण बोध को प्राप्त होवें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

जघने चोद एषां वि सक्थानि नरो यमु:। पुत्रकृथे न जनय:॥३॥

जघने। चोद:। एषाम्। वि। सक्थानि। नर:। यमु:। पुत्रऽकृथे। न। जनय:॥३॥

पदार्थ:-**(जघने)** कट्यधोभागावयवे **(चोद:)** प्रेरक: **(एषाम्)** **(वि)** **(सक्थानि)** सक्थीनि **(नर:)** नेतार: **(यमु:)** नियच्छेयु: **(पुत्रकृथे)** पुत्रकरणे **(न)** इव **(जनय:)** मातापितर:॥३॥

अन्वय:-हे नर: ! पुत्रकृथे जनयो नैषां जघने यश्चोदोऽस्ति ये सक्थानि वि यमुस्तान् यूयं सत्कुरुत॥३॥

भावार्थ:-अत्रोपमालङ्कार:। यथा जनका मातापितर: सुनियमेन सन्तानोत्पत्तिं कृत्वैतान् सुनियम्य सुशिक्षितान् कुर्युस्तथा सर्वे कुर्वन्तु॥३॥

पदार्थ:-हे **(नर:)** नायक जनो! **(पुत्रकृथे)** पुत्र करने में **(जनय:)** माता-पिता **(न)** जैसे वैसे **(एषाम्)** इनके **(जघने)** कटि के नीचे के भाग के अवयवों को जो **(चोद:)** प्रेरणा करने वाला है और जो **(सक्थानि)** घुटनों को **(वि, यमु:)** नियम में रक्खें, उनका आप लोग सत्कार करो॥३॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे उत्पन्न करने वाले माता-पिता सुन्दर नियम से सन्तानोत्पत्ति करके इनको उत्तम प्रकार नियम युक्त करके उत्तम प्रकार शिक्षित करें, वैसे सब करें॥३॥

अथ विद्वदुपदेशविषयमाह॥

अब विद्वानों के उपदेश विषय को कहते हैं॥

परा वीरास एतन मर्यासो भद्रजानय:। अग्नितपो यथासथ॥४॥

परा। वीरास:। इतन। मर्यासः। भद्रऽजानयः। अग्निऽतपः। यथा। असथ॥४॥

पदार्थः-(परा) दूरार्थे **(वीरासः)** व्याप्तविद्याबलाः **(एतन)** प्राप्नुत। अत्रेण्गतावित्यस्माल्लोटि युष्मद्वहुवचने **तप्तनप्तनथनाश्च** (अष्टा०७.१.४५) इति तनबादेशः। **(मर्यासः)** मनुष्याः **(भद्रजानयः)** ये भद्रं कल्याणं जानन्ति ते **(अग्नितपः)** येऽग्निना तापयन्ति ते **(यथा) (असथ)** भवथ॥४॥

अन्वयः-हे मनुष्या! यूयं यथाऽग्नितपो वीरासो मर्यासः परैतन भद्रजानयोऽसथ तथा ते सत्कर्त्तव्यास्युः॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये बन्धनसाधनं पापाचरणं त्यक्त्वा त्याजयित्वा मुक्तिसाधनं गृहीत्वा ग्राहयित्वा सर्वानानन्दयन्ति तान्सर्व आनन्दयन्तु॥४॥

पदार्थः-हे मनुष्यो! आप लोग **(यथा)** जैसे **(अग्नितपः)** अग्नि से तपाने वाले **(वीरासः)** विद्या और बल से व्याप्त **(मर्यासः)** मनुष्य **(परा)** दूर के लिये **(एतन)** प्राप्त हों और **(भद्रजानयः)** कल्याण के जानने वाले **(असथ)** होवें, वैसे वे सत्कार करने योग्य होवें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो बन्धन के साधन और पाप के आचरण का त्याग कर और त्याग करा के और मुक्ति के साधन को ग्रहण कर और ग्रहण करा के सब को आनन्दित करते हैं, उनको सब आनन्दित करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सनत्साश्व्यं पशुमुत गव्यं शतावयम्।

श्यावाश्वस्तुताय या दोवीरायोपबर्बृहत्॥५॥२६॥

सनत्। सा। अश्व्यम्। पशुम्। उत। गव्यम्। शतऽअवयम्। श्यावाश्वऽस्तुताय। या। दोः। वीराय। उपऽबर्बृहत्॥५॥

पदार्थः-(सनत्) सनातनम् **(सा)** विदुषी स्त्री **(अश्व्यम्)** अश्वेषु साधुम् **(पशुम्)** पश्यन्तम् **(उत)** अपि **(गव्यम्)** गोषु साधुम् **(शतावयम्)** शतान्यवयवा यस्मिँस्तम् **(श्यावाश्वस्तुताय)** श्यावैरश्वैः प्रशंसिताय **(या) (दोः)** भुजस्य बलम् **(वीराय)** शूराय **(उपबर्बृहत्)** भृशमुपबर्हयति॥५॥

अन्वयः-या श्यावाश्वस्तुताय वीराय दोरुपबर्बृहत् सा सनदश्व्यं गव्यमुत शतावयं पशुं वर्धयितुं शक्नोति॥५॥

भावार्थः-सैव स्त्री प्रशंसिता भवति या स्वपतिं कामासक्तं कृत्वा बलं न नाशयति गृहस्थानश्वादीन् सम्पाल्य वर्धयति॥५॥

पदार्थः-(या) जो **(श्यावाश्वस्तुताय)** घोड़ों से प्रशंसित **(वीराय)** वीर जन के लिये **(दोः)** भुजा का बल **(उपबर्बृहत्)** अत्यन्त समीप में देती है **(सा)** वह विद्यायुक्त स्त्री **(सनत्)** सनातन **(अश्व्यम्)**

घोड़ों में श्रेष्ठ **(गव्यम्)** गौओं में श्रेष्ठ **(उत)** और **(शतावयम्)** सौ अवयव जिसमें उस **(पशुम्)** देखते हुए को बढ़ा सकती है॥५॥

भावार्थः-वही स्त्री प्रशंसित होती है, जो अपने पति को काम में आसक्त करके बल का नाश नहीं करती है और गृहस्थित घोड़े आदि का पालन करके बढ़ाती है॥५॥

पुनः स्त्रीपुरुषार्थोपदेशमाह॥

फिर स्त्री के पुरुषार्थ उपदेश को कहते हैं॥

उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी। अदेवत्रादराधसः॥६॥

उत। त्वा। स्त्री। शशीयसी। पुंसः। भवति। वस्यसी। अदेवऽत्रात्। अराधसः॥६॥

पदार्थः-**(उत)** अपि **(त्वा)** त्वाम् **(स्त्री)** **(शशीयसी)** अतिशयेन दुखं प्लावयन्ती **(पुंसः)** पुरुषस्य **(भवति)** **(वस्यसी)** अतिशयेन वसुमती **(अदेवत्रात्)** देवान् त्रायते यस्मात्तद्विरुद्धात् **(अराधसः)** अधनात्॥६॥

अन्वयः-हे पुरुष! या स्त्री-अदेवत्रादराधसः पृथग्भूत्वा पुंसो वस्यस्युत शशीयसी भवति त्वा सुखयति तां त्वं सुखय॥६॥

भावार्थः-सैव स्त्री पत्या माननीया भवति याऽन्यायाचरणादपूज्यपूजनाद्विरहा सती पतिं सुखयति सैव पत्या सततं सत्कर्त्तव्यास्ति॥६॥

पदार्थः-हे पुरुष! जो **(स्त्री)** स्त्री **(अदेवत्रात्)** विद्वानों की रक्षा करता है जिससे उससे विरुद्ध **(अराधसः)** धनविरुद्ध पदार्थ से पृथक् होकर **(पुंसः)** पुरुष की **(वस्यसी)** अत्यन्त धनवाली **(उत)** और **(शशीयसी)** अत्यन्त दुःख को दूर करने वाली **(भवति)** होती और **(त्वा)** आपको सुखी करती है, उसको आप सुखयुक्त करो॥६॥

भावार्थः-वही स्त्री पति से आदर करने योग्य होती है जो अन्यायाचरण और नहीं आदर करने योग्य के आदर करने से रहित हुई पति को सुखी करती है, वही पति से निरन्तर आदर करने योग्य होती है॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम्। देवत्रा कृणुते मनः॥७॥

वि। या। जानाति। जसुरिम्। वि। तृष्यन्तम्। वि। कामिनम्। देवऽत्रा। कृणुते। मनः॥७॥

पदार्थः-**(वि)** विशेषेण **(या)** **(जानाति)** **(जसुरिम्)** प्रयतमानम् **(वि)** **(तृष्यन्तम्)** तृषातुरमिव **(वि)** **(कामिनम्)** कामातुरम् **(देवत्रा)** देवेषु **(कृणुते)** करोति **(मनः)** चित्तम्॥७॥

अन्वयः-हे मनुष्या! या जसुरिं वि जानाति तृष्यन्तं वि जानाति कामिनं वि जानाति सा देवत्रा मनः

कृणुते॥७॥

भावार्थः-या स्त्री पुरुषार्थिनं धार्मिकं लोभिनं कामातुरं च पतिं विज्ञाय दोषनिवारणाय गुणग्रहणाय च प्रेरयति सैव पत्यादिकल्याणकारिणी भवति॥७॥

पदार्थः-हे मनुष्यो! **(या)** जो **(जसुरिम्)** प्रयत्न करते हुए को **(वि)** विशेष करके **(जानाति)** जानती है **(तृष्यन्तम्)** पिपासा से व्याकुल हुए के तुल्य को **(वि)** विशेष करके जानती है और **(कामिनम्)** कामातुर पुरुष को **(वि)** विशेष करके जानती है वह **(देवत्रा)** विद्वानों में **(मनः)** चित्त **(कृणुते)** करती है॥७॥

भावार्थः-जो स्त्री पुरुषार्थी, धार्मिक, लोभी और कामातुर पति को जानकर दोषों के निवारण और गुणों के ग्रहण करने के लिये प्रेरणा करती है, वही पति आदि की कल्याण करने वाली होती है॥७॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

उ॒त घा॒ नेमो॒ अस्तु॑तः पुमाँ॒ इति॑ ब्रु॒वे प॒णिः। स वैर॑देय॒ इत्स॒मः॥८॥

उ॒त। घ॒। नेम॑ः। अस्तु॑तः। पुमा॑न्। इति॑। ब्रु॒वे॒। प॒णिः। सः। वैर॑ऽदेये। इत्। स॒मः॥८॥

पदार्थः-(**उत**) अपि (**घा**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**नेमः**) अर्द्धाधिकारी (**अस्तुतः**) अप्रशंसितः (**पुमान्**) पुरुषः (**इति**) अनेन प्रकारेण (**ब्रुवे**) (**पणिः**) प्रशंसितः (**सः**) (**वैरदेये**) वैरं देयं येन तस्मिन् (**इत्**) एव (**समः**) तुल्यः॥८॥

अन्वयः-हे मनुष्या! योऽस्तुत उत नेमो घा वैरदेये पुमान् यश्च पणिर्वर्त्तते स इत्सम इत्यहं ब्रुवे॥८॥

भावार्थः-योऽलसः सत्कर्मसु न प्रवर्त्तते द्वितीयो विद्वान् सत्याऽसत्यं विज्ञाय सत्यं नाचरति तौ द्वौ तुल्यावधर्मात्मानौ वर्त्तेते इति बोध्यम्॥८॥

पदार्थः-हे मनुष्यो! जो **(अस्तुतः)** नहीं प्रशंसा किया गया **(उत)** और **(नेमः)** आधे का अधिकारी **(घा)** ही **(वैरदेये)** वैर देने योग्य जिससे उसमें **(पुमान्)** पुरुष और जो **(पणिः)** प्रशंसित वर्त्तमान है **(सः, इत्)** वही **(समः)** तुल्य है **(इति)** इस प्रकार से मैं **(ब्रुवे)** कहता हूं॥८॥

भावार्थः-जो आलस्ययुक्त जन श्रेष्ठ कर्म्मों में नहीं प्रवृत्त होता है और दूसरा विद्वान् पुरुष सत्य और असत्य को जानकर सत्य का आचरण नहीं करता है, वे दोनों तुल्य अधर्मात्मा हैं, यह जानना चाहिये॥८॥

पुनर्दम्पतीविषयमाह॥

फिर स्त्री-पुरुष के विषय को कहते हैं॥

उ॒त मे॑ऽरपद्युव॒तिर्म॑म॒न्दुषी॒ प्रति॑ श्या॒वाय॑ वर्त॒निम्।

वि रोहि॑ता पुरुमी॒ळ्हाय॑ येमतु॒र्विप्रा॑य दी॒र्घय॑शसे॥ ९॥

उ॒त। मे॒। अ॒र॒प॒त्। यु॒व॒तिः। म॒म॒न्दु॒षी॑। प्रति॑। श्या॒वाय॑। व॒र्त॒निम्। वि। रोहि॑ता। पु॒रु॒ऽमी॒ळ्हाय॑। ये॒म॒तुः॒। विप्रा॑य। दी॒र्घऽय॑शसे॥ ९॥

पदार्थः-(उत) अपि **(मे)** मह्यम् **(अरपत्)** व्यक्तमुपदिशति **(युवतिः)** प्राप्तयौवनावस्था **(ममन्दुषी)** प्रशंसनीयानन्दकरी **(प्रति) (श्यावाय)** श्याववर्णयुक्तायाऽश्वाय **(वर्त्तनिम्)** मार्गम् **(वि) (रोहिता)** रोहणकर्त्री **(पुरुमीळ्हाय)** बहुवीर्यसेक्त्रे **(येमतुः)** नियच्छतः **(विप्राय)** मेधाविने **(दीर्घयशसे)** महद्यशसे॥ ९॥

अन्वयः-या प्रति श्यावाय पुरुमीळ्हाय दीर्घशयसे विप्राय मे ममन्दुषी वर्त्तनिं वि रोहिता युवतिररपदुताहमरपं तावावां यथा सद्गुणाढ्यौ स्त्रीपुरुषौ येमतुस्तथा वर्त्तावहै॥ ९॥

भावार्थः-यदि स्त्रीपुरुषौ तुल्यगुणकर्म्मस्वभावौ स्यातां तर्हि सन्मार्गं बृहत्कीर्त्तिमानन्दञ्च लभेताम्॥ ९॥

पदार्थः-जो **(प्रति, श्यावाय)** धूमिल वर्ण से युक्त अश्व और **(पुरुमीळ्हाय)** बहुत वीर्य्य के सींचने वाले **(दीर्घयशसे)** बड़े यशस्वी **(विप्राय)** बुद्धिमान् **(मे)** मेरे लिये **(ममन्दुषी)** प्रशंसा करने योग्य और आनन्द करने वाली **(वर्त्तनिम्)** मार्ग को **(वि, रोहिता)** जानेवाली **(युवतिः)** यौवनावस्था को प्राप्त स्त्री **(अरपत्)** स्पष्ट उपदेश देती है **(उत)** और मैं स्पष्ट उपदेश करूं, वे हम दोनों जैसे श्रेष्ठ गुणों से युक्त स्त्री और पुरुष **(येमतुः)** नियम करते हैं, वैसे वर्त्ताव करें॥ ९॥

भावार्थः-जो स्त्री-पुरुष परस्पर तुल्य गुण, कर्म और स्वभाव वाले हों तो श्रेष्ठ मार्ग, अत्यन्त कीर्त्ति और आनन्द को प्राप्त हों॥ ९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यो मे॑ धे॒नूनां॒ श॒तं वैद॑दश्वि॒र्यथा॒ दद॑त्। त॒र॒न्तइ॑व मं॒हना॑॥ १०॥ २७॥

यः। मे॒। धे॒नूना॑म्। श॒तम्। वैद॑त्ऽअश्विः। यथा॑। दद॑त्। त॒र॒न्तःऽइ॑व। मं॒हना॑॥ १०॥

पदार्थः-(यः) **(मे)** मम **(धेनूनाम्)** गवाम् **(शतम्)** **(वैददश्विः)** योऽश्वान् विन्दति स विददश्वस्तस्यापत्यं वैददश्विः **(यथा)** **(ददत्)** ददाति **(तरन्तइव)** तरन्त इव **(मंहना)** महत्या नौकया॥ १०॥

अन्वयः-यो वैददश्विर्मे धेनूनां शतं ददद्यथा मंहना तरन्तइव दुःखपारं नयति स एव स्वामी भवितुमर्हति॥ १०॥

भावार्थः-यो मनुष्यः शतदः सहस्रदो भवति दोग्ध्रीणां गवां रक्षणं करोति स नौकया नदीं समुद्रं वा तरति तथैव मेधाविनौ स्त्रीपुरुषौ दुःखसागरं धर्म्माचरणेन तरतः॥ १०॥

पदार्थः-(यः) जो **(वैददश्विः)** घोड़ों के ज्ञाता का पुत्र **(मे)** मेरी **(धेनूनाम्)** गौओं के **(शतम्)** सैकड़े को **(ददत्)** देता है **(यथा)** जैसे **(मंहना)** बड़ी नौका से **(तरन्तइव)** तैरते हुओं के समान दुःख के पार पहुंचाता है, वही स्वामी होने के योग्य होता है॥१०॥

भावार्थः-जो मनुष्य सैकड़ों वा हजारों का देने वाला होता है और दुग्ध देनेवाली गौओं की रक्षा करता है, वह नौका से नदी वा समुद्र को तरता है, वैसे ही बुद्धिमान् स्त्री और पुरुष दुःखरूपी सागर को धर्म के आचरण से तरते हैं॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

य ईं॑ वह॑न्त आ॒शुभि॒: पिब॑न्तो मदि॒रं मधु॑। अत्र॒ श्रवां॑सि दधिरे॥११॥

ये। ईम्। वह॑न्ते। आ॒शुऽभि॑:। पिब॑न्त॒:। म॒दि॒रम्। मधु॑। अत्र॑। श्रवां॑सि। द॒धि॒रे॒॥११॥

पदार्थः-(ये) **(ईम्)** उदकम् **(वहन्ते)** प्राप्नुवन्ति **(आशुभिः)** आशुकारिभिर्गुणैः **(पिबन्तः)** **(मदिरम्)** आनन्दकरम् **(मधु)** माधुर्यादिगुणोपेतम् **(अत्र)** **(श्रवांसि)** अन्नादीनि **(दधिरे)** धरन्ति॥११॥

अन्वयः-हे मनुष्या! या आशुभिर्मदिरमीं वहन्ते मधु पिबन्तोऽत्र श्रवांसि दधिरे त एव श्रीमन्तो जायन्ते॥११॥

भावार्थः-ये सद्यः सुखकराणि मेधावर्धकानि वस्तूनि सेवन्ते तेऽत्र श्रीमन्तो जायन्ते॥११॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(आशुभिः)** शीघ्रकारी गुणों से **(मदिरम्)** आनन्दकारक **(ईम्)** जल को **(वहन्ते)** प्राप्त होते हैं और **(मधु)** माधुर्य्य आदि गुणों से युक्त को **(पिबन्तः)** पीते हुए **(अत्र)** यहाँ **(श्रवांसि)** अन्न आदिकों को **(दधिरे)** धारण करते हैं, वे ही लक्ष्मीवान् होते हैं॥११॥

भावार्थः-जो शीघ्र सुखकारक और बुद्धिवर्धक वस्तुओं का सेवन करते हैं, वे यहाँ लक्ष्मीवान् होते हैं॥११॥

पुनरुपदेशविषयमाह॥

फिर उपदेश विषय को अगले मन्त्र में कहते हैं॥

येषा॑म॒ श्रि॒याधि॒ रोद॑सी वि॒भ्राज॑न्ते॒ रथे॒ष्वा। दि॒वि रु॒क्मइ॑वो॒परि॑॥१२॥

येषा॑म्। श्रि॒या। अधि॑। रोद॑सी॒ इति॑। वि॒ऽभ्राज॑न्ते। रथे॑षु। आ। दि॒वि। रु॒क्मःऽइ॑व। उ॒परि॑॥१२॥

पदार्थः-(येषाम्) **(श्रिया)** शोभया लक्ष्म्या वा **(अधि)** **(रोदसी)** द्यावापृथिव्यौ **(विभ्राजन्ते)** **(रथेषु)** विमानादियानेषु **(आ)** **(दिवि)** कामनायाम् **(रुक्मइव)** रुचिकरः सुवर्णादिपदार्थो यथा **(उपरि)**॥१२॥

अन्वयः-हे मनुष्या! येषां विदुषां श्रिया धर्म्या व्यवहारा दिवि रुक्मइव विभ्राजन्ते। ये रथेष्वाऽधिष्ठिता स्युस्त उपरि रोदसी इव प्रकाशन्ते॥१२॥

भावार्थः-अत्रोपमालङ्कारः। ये धर्म्येण पुरुषार्थेन धनादिकं सञ्चिन्वन्ति ते सूर्य्यकिरणा इव प्रकाशितकीर्त्तयो भवन्ति॥१२॥

पदार्थः-हे मनुष्यो! **(येषाम्)** जिन विद्वानों की **(श्रिया)** शोभा वा लक्ष्मी से, धर्मयुक्त व्यवहार **(दिवि)** कामना में **(रुक्मइव)** प्रीतिकारक सुवर्ण आदि पदार्थ जैसे वैसे **(विभ्राजन्ते)** शोभित होते हैं और जो **(रथेषु)** विमान आदि वाहनों में **(आ, अधि)** विराजित होवें वे **(उपरि)** ऊपर **(रोदसी)** अन्तरिक्ष और पृथिवी के सदृश प्रकाशित होते हैं॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो धर्मयुक्त पुरुषार्थ से धन आदि को इकट्ठे करते हैं, वे सूर्य्य के किरणों के सदृश प्रकाशित यश वाले होते हैं॥१२॥

पुनर्दम्पतीविषयमाह॥

फिर स्त्री-पुरुष के विषय को अगले मन्त्र में कहते हैं॥

युवा॒ स मारु॑तो ग॒णस्त्वे॒षर॑थो॒ अने॑द्यः। शु॒भं॒यावाप्र॑तिष्कुतः॥१३॥

युवा॑। सः। मारु॑तः। ग॒णः। त्वे॒षऽर॑थः। अने॑द्यः। शु॒भ॒म्ऽयावा॑। अप्र॑तिऽस्कुतः॥१३॥

पदार्थः-**(युवा)** प्राप्तयौवनाः **(सः)** **(मारुतः)** वायूनां समूह इव मनुष्याणां **(गणः)** **(त्वेषरथः)** त्वेषः प्रकाशवान् रथो यस्य सः **(अनेद्यः)** अनिन्दनीयः **(शुभंयावा)** यः शुभं जलं याति **(अप्रतिष्कुतः)** अकम्पितो दृढः॥१३॥

अन्वयः-हे मनुष्या! योऽनेद्यस्त्वेषरथः शुभंयावाऽप्रतिष्कुतो युवा मारुतो गणोऽस्ति स बहूनि कार्य्याणि साद्धुं शक्नोति॥१३॥

भावार्थः-ये मनुष्याः सर्वान् स्त्रीपुरुषान् यूनो विदुषः सम्पादयन्ति ते प्रशंसनीयाः कल्याणकारिणो दृढा जायन्ते॥१३॥

पदार्थः-हे मनुष्यो! जो **(अनेद्यः)** नहीं निन्दा करने योग्य **(त्वेषरथः)** प्रकाशवान् वाहन जिसका वह **(शुभंयावा)** जल को प्राप्त होने वाला **(अप्रतिष्कुतः)** नहीं कम्पित दृढ़ **(युवा)** यौवनावस्था को प्राप्त **(मारुतः)** पवनों के समूह के सदृश मनुष्यों का **(गणः)** समूह है **(सः)** वह बहुत कार्य्यों को सिद्ध कर सकता है॥१३॥

भावार्थः-जो मनुष्य सम्पूर्ण स्त्रीपुरुषों को यौवनावस्थायुक्त और विद्वान् करते हैं, वे प्रशंसा करने योग्य, कल्याणकारी और दृढ़ होते हैं॥१३॥

पुनरुपदेशार्थविषयमाह॥

फिर उपदेशार्थ विषय को कहते हैं॥

को वे॑द नू॒नमे॑षां॒ यत्रा॒ मद॑न्ति॒ धूत॑यः। ऋ॒तजा॑ता अरे॒पसः॥१४॥

कः। वे॒द॒। नू॒नम्। ए॒षा॒म्। यत्र॑। मद॑न्ति। धूत॑यः। ऋ॒तऽजा॑ताः। अ॒रे॒पसः॥१४॥

पदार्थः-(कः) (वेद) जानाति **(नूनम्)** निश्चितम् **(एषाम्)** वाय्वादीनाम् **(यत्रा) (मदन्ति)** हर्षन्ति **(धूतयः)** ये पापं धूनयन्ति ते **(ऋतजाताः)** य ऋते जायन्ते ते **(अरेपसः)** अनपराधिनः॥१४॥

अन्वयः-हे विद्वांसो! यत्रर्तजाता अरेपसो धूतयो मदन्ति तत्रैषां स्वरूपं नूनं को वेद॥१४॥

भावार्थः-हे मनुष्या! अपराधानपराधौ सत्यासत्ये च को वेत्तीति पृच्छामः। ये प्रमादविरहाः परमेश्वरभक्ता भवन्तीति॥१४॥

पदार्थः-हे विद्वानो! **(यत्रा)** जहाँ **(ऋतजाताः)** सत्य में उत्पन्न होने वाले **(अरेपसः)** अपराध से रहित **(धूतयः)** पाप को कम्पाने वाले **(मदन्ति)** प्रसन्न होते हैं वहाँ **(एषाम्)** इन वायु आदि के स्वरूप को **(नूनम्)** निश्चित **(कः)** कौन **(वेद)** जानता है॥१४॥

भावार्थः-हे मनुष्यो! अपराध-अनपराध तथा सत्य और असत्य को कौन जानता है, यह हम पूछते हैं। जो प्रमाद से रहित और परमेश्वर भक्त होते हैं॥१४॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

यू॒यं मर्त॑ विपन्यवः प्रणे॒तार॑ इ॒त्था धि॒या। श्रोता॑रो॒ याम॑हूतिषु॥१५॥२८॥

यू॒यम्। मर्त॑म्। वि॒प॒न्य॒वः॒। प्र॒ऽने॒तारः॑। इ॒त्था। धि॒या। श्रोता॑रः। याम॑ऽहूतिषु॥१५॥

पदार्थः-(यूयम्) (मर्त्तम्) मनुष्यम् **(विपन्यवः)** मेधाविनः **(प्रणेतारः)** प्रेरकाः **(इत्था)** अनेन प्रकारेण **(धिया)** प्रज्ञया कर्म्मणा वा **(श्रोतारः) (यामहूतिषु)** उपरमाऽऽह्वानरूपकर्म्मसु॥१५॥

अन्वयः-हे विपन्यवो! यूयं प्रणेतारः श्रोतारो धिया यामहूतिष्वित्था मर्त्तं प्रेरयत॥१५॥

भावार्थः-ये विद्वांसो धर्म्येषु व्यवहारेषु मनुष्यान् प्रेरयित्वा प्रज्ञान् कुर्वन्ति ते धन्या भवन्ति॥१५॥

पदार्थः-हे **(विपन्यवः)** बुद्धिमानो! **(यूयम्)** आप लोग **(प्रणेतारः)** प्रेरणा करने और **(श्रोतारः)** सुनने वाले जन **(धिया)** बुद्धि वा कर्म से **(यामहूतिषु)** उपरम अर्थात् निवृत्ति और आह्वानरूप कर्म्मों में **(इत्था)** इस प्रकार से **(मर्त्तम्)** मनुष्यों को प्रेरणा करो॥१५॥

भावार्थः-जो विद्वान् जन धर्मयुक्त व्यवहारों में मनुष्यों को प्रेरणा करके बुद्धिमान् करते हैं, वे धन्य होते हैं॥१५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ते नो॒ वसू॑नि॒ काम्या॑ पुरुश्च॒न्द्रा रि॑शादसः। आ य॑ज्ञि॒यासो ववृत्तन॥१६॥

ते। नः॒। वसू॑नि। काम्या॑। पु॒रु॒ऽच॒न्द्राः॒। रि॒शा॒द॒सः॒। आ। य॒ज्ञि॒यासः॒। व॒वृ॒त्त॒न॒॥१६॥

पदार्थः-(ते) विद्वांसः **(नः)** अस्माकम् **(वसूनि)** धनानि **(काम्या)** कमनीयानि **(पुरुश्चन्द्राः)** बहुसुवर्णानि **(रिशादसः)** हिंसकहिंसकाः **(आ) (यज्ञियासः)** यज्ञसम्पादकाः **(ववृत्तन)** वर्त्तन्ते॥१६॥

अन्वयः-ये यज्ञियासो रिशादसो नः पुरुश्चन्द्राः काम्या वसून्याऽऽववृत्तन तेऽस्माकं कल्याणकारिणो भवन्ति॥१६॥

भावार्थः-हे मनुष्यास्त एवात्र जगति परोपकाराय वर्त्तन्ते ये न्यायेन द्रव्योपार्जनमाचरन्ति॥१६॥

पदार्थः-जो **(यज्ञियासः)** यज्ञ के करने **(रिशादासः)** और हिंसकों के मारने वाले **(नः)** हम लोगों के **(पुरुश्चन्द्राः)** बहुत सुवर्ण और **(काम्या)** सुन्दर **(वसूनि)** धनों को **(आ, ववृत्तन)** प्राप्त होते हैं **(ते)** वे विद्वान् हम लोगों के कल्याणकारी होते हैं॥१६॥

भावार्थः-हे मनुष्यो! वे ही इस संसार में परोपकार के लिये वर्त्तमान हैं, जो न्याय से द्रव्य को स-ह करते हैं॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एतं मे स्तोमंमूर्म्ये दाभ्र्याय परा वह। गिरो देवि रथीरिव॥१७॥

एतम्। मे। स्तोमम्। ऊर्म्ये। दाभ्र्याय। परा। वह। गिरः। देवि। रथीःऽइव॥१७॥

पदार्थः-**(एतम्)** **(मे)** मम **(स्तोमम्)** श्लाघाम् **(ऊर्म्ये)** रात्रीव वर्त्तमाने **(दाभ्र्याय)** दर्भेषु विदारकेषु भवाय **(परा)** **(वह)** **(गिरः)** वाणीः **(देवि)** देदीप्यमाने विदुषि **(रथीरिव)** प्रशंसितो रथवान्यथा॥१७॥

अन्वयः-हे देवि! ऊर्म्ये रात्रिवद्वर्त्तमाने त्वं म एतं स्तोमं शृणु दाभ्र्याय वर्त्तमानं परा वह रथीरिव गिर आवह॥१७॥

भावार्थः-अत्रोपमालङ्कारः। यथा भूतानां सुखाय रात्री वर्त्तते तथैव पत्यादीनां सुखाय सत् स्त्री भवति॥१७॥

पदार्थः-हे **(देवि)** प्रकाशमान विद्यायुक्त स्त्री! **(ऊर्म्ये)** रात्रि के सदृश वर्त्तमान आप **(मे)** मेरी **(एतम्)** इस **(स्तोमम्)** प्रशंसा को सुनिये और **(दाभ्र्याय)** विदारण करने वालों में हुए के लिये वर्त्तमान को **(परा, वह)** दूर कीजिये तथा **(रथीरिव)** प्रशंसित रथ वाला जैसे वैसे **(गिरः)** वाणियों को धारण कीजिये॥१७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्राणियों के सुख के लिये रात्रि है, वैसे ही पति आदिकों के सुख के लिये श्रेष्ठ स्त्री होती है॥१७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उत मे वोचतादिति सुतसोमे रथवीतौ। न कामो अप वेति मे॥१८॥

उत। मे। वोचतात्। इति। सुतऽसोमे। रथऽवीतौ। न। कामः। अप। वेति। मे॥१८॥

पदार्थः-(उत) अपि **(मे)** मह्यम् **(वोचतात्)** उपदिशतु **(इति)** **(सुतसोमे)** निष्पादितैश्वर्य्यादौ **(रथवीतौ)** रथानां गतौ **(न)** **(कामः)** कामना **(अप)** **(वेति)** नश्यति **(मे)** मम॥१८॥

अन्वयः-हे विद्वन्! भवान् मे रथवीतावुत सुतसोमे सत्यमुपदेश्यमिति वोचतात्। यतो मे कामो नाप वेति॥१८॥

भावार्थः-सर्वैर्मनुष्यैर्विदुषः प्रतीयं प्रार्थना कार्या भवन्तोऽस्मभ्यमीदृशानुपदेशान् कुर्वन्तु यतोऽस्माकमिच्छाः सिद्धाः स्युरिति॥१८॥

पदार्थः-हे विद्वन्! आप **(मे)** मेरे लिये **(रथवीतौ)** वाहनों के गमन में **(उत)** और **(सुतसोमे)** उत्पन्न किये हुए ऐश्वर्य्य आदि में सत्य का उपदेश देने योग्य हैं **(इति)** इस प्रकार **(वोचतात्)** उपदेश देवे जिससे **(मे)** मेरी **(कामः)** कामना **(न)** नहीं **(अप, वेति)** नष्ट होती है॥१८॥

भावार्थः-सब मनुष्यों को चाहिये कि विद्वान् जनों के प्रति यह प्रार्थना करें कि आप लोग हम लोगों को ऐसे उपदेश करो जिससे हम लोगों की इच्छायें सिद्ध होवें॥१८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एष क्षेति रथवीतिर्मघवा गोमतीरनु। पर्वतेष्वपश्रितः॥१९॥१९॥

एषः। क्षेति। रथऽवीतिः। मघऽवा। गोऽमतीः। अनु। पर्वतेषु। अपऽश्रितः॥१९॥

पदार्थः-(एषः) **(क्षेति)** निवसति **(रथवीतिः)** यो रथेन व्याप्नोति मार्गम् **(मघवा)** परमधनवान् **(गोमतीः)** गावः किरणा विद्यन्ते यासु गतिषु ताः **(अनु)** **(पर्वतेषु)** मेघेषु **(अपश्रितः)** योऽपश्रयति सः॥१९॥

अन्वयः-हे मनुष्या! यथा पर्वतेष्वपश्रितः सूर्य्यो गोमतीरनु वर्त्तयति तथैवैष रथवीतिर्मघवा क्षेति॥१९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो मेघनिमित्तं भूत्वा पृथक् स्वरूपोऽस्ति तथैव विद्वान् सर्वत्र वासं कुर्वन्नपि निर्म्मोहो भवतीति॥१९॥

अत्र प्रश्नोत्तरमरुदादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकषष्टितमं सूक्तमेकोनत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे **(पर्वतेषु)** मेघों में **(अपश्रितः)** आश्रित सूर्य्य **(गोमतीः)** किरणें विद्यमान जिनमें ऐसे गमनों को **(अनु)** अनुकूल वर्त्ताता है, वैसे **(एषः)** यह **(रथवीतिः)** रथ से मार्ग को व्याप्त होने वाला **(मघवा)** अत्यन्त धनवान् जन **(क्षेति)** निवास करता है॥१९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य मेघ का कारण होकर पृथक् स्वरूप है, वैसे ही विद्वान् सर्वत्र वास करता हुआ भी मोहरहित होता है॥१९॥

इस सूक्त में प्रश्न, उत्तर और वायु आदि के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह इकसठवाँ सूक्त और उनतीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अत्र नवर्चस्य द्विषष्टितमस्य सूक्तस्य श्रुतिविदात्रेय ऋषिः। मित्रावरुणौ देवते। १, २, ३ त्रिष्टुप्। ४, ५, ६ निचृत्त्रिष्टुप्। ७, ८, ९ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्य्यगुणानाह॥

अब नव ऋचा वाले बासठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में सूर्य्यगुणों को कहते हैं॥

ऋ॒तेन॑ ऋ॒तमपि॑हितं ध्रु॒वं वां॒ सूर्य॑स्य॒ यत्र॑ विमु॒चन्त्यश्वा॑न्।
दश॑ श॒ता स॒ह त॑स्थु॒स्तदेकं॑ दे॒वानां॒ श्रेष्ठं॒ वपु॑षामपश्यम्॥ १॥

ऋ॒तेन॑। ऋ॒तम्। अपि॑ऽहितम्। ध्रु॒वम्। वा॒म्। सूर्य॑स्य। यत्र॑। वि॒ऽमु॒चन्ति॑। अश्वा॑न्। दश॑। श॒ता। स॒ह। त॒स्थुः॒। तत्। एक॑म्। दे॒वाना॑म्। श्रेष्ठ॑म्। वपु॑षाम्। अ॒प॒श्य॒म्॥

पदार्थः-(ऋतेन) सत्येन कारणेन **(ऋतम्)** सत्यं स्वरूपम् **(अपहितिम्)** आच्छादितम् **(ध्रुवम्)** निश्चलम् **(वाम्)** युवयोः **(सूर्यस्य)** सवितुः **(यत्र) (विमुचन्ति)** त्यजन्ति **(अश्वान्)** किरणान् **(दश) (शता)** शतानि **(सह)** सार्धम् **(तस्थुः)** तिष्ठन्ति **(तत्) (एकम्)** अद्वितीयम् **(देवानाम्)** विदुषाम् **(श्रेष्ठम्) (वपुषाम्)** रूपवतां शरीराणाम् **(अपश्यम्)** पश्यामि॥ १॥

अन्वयः-हे अध्यापकोपदेशकौ! यत्र विद्वांसः सूर्यस्य दश शताऽश्वान् विमुचन्ति सह तस्थुर्वां युवयोर्ऋतेन ध्रुवमृतमपिहितमस्ति तेदकं देवानां वपुषां च श्रेष्ठमहमपश्यं तदेव यूयमपि पश्यत॥ १॥

भावार्थः-हे मनुष्या! योऽयं सूर्यलोकः स परमेश्वरेणानेकैस्तत्त्वैर्निर्मितत्वादनेकैर्गुणैर्युक्तोऽस्ति तं यथावद्विजानीत॥

पदार्थः-हे अध्यापक और उपदेश जनो! **(यत्र)** जहाँ विद्वान् जन **(सूर्यस्य)** सूर्य्य के **(दश)** दश **(शता)** सैकड़ों **(अश्वान्)** किरणों को **(विमुचन्ति)** छोड़ते और **(सह)** साथ **(तस्थुः)** स्थित होते हैं **(वाम्)** तुम दोनों के **(ऋतेन)** सत्य कारण से **(ध्रुवम्)** निश्चल **(ऋतम्)** सत्यस्वरूप **(अपिहितम्)** आच्छादित है **(तत्)** उस **(एकम्)** अद्वितीय **(देवानाम्)** विद्वानों के और **(वपुषाम्)** रूप वाले शरीरों के **(श्रेष्ठम्)** श्रेष्ठभाव को मैं **(अपश्यम्)** देखता हूं, उसको आप लोग भी देखिये॥ १॥

भावार्थः-हे मनुष्यो! जो यह सूर्य्यलोक है वह परमेश्वर से अनेक तत्त्वों द्वारा रचा गया है, इस कारण अनेक गुणों से युक्त है, उसको तुम लोग यथावत् जानो॥ १॥

अथ मित्रावरुणगुणानाह॥

अब मित्रावरुण के गुणों को कहते हैं॥

तत्सु वां॑ मित्रावरुणा महि॒त्वमी॒र्मा त॒स्थुषी॒रह॑भिर्दुदुह्रे।
विश्वाः॑ पिन्वथ॒ः स्वस॑रस्य॒ धेना॒ अनु॑ वा॒मेक॑ः प॒विरा व॑वर्त॥ २॥

तत्। सु। वाम्। मित्रावरुणा। महित्वम्। ईर्मा। तस्थुषीः। अहःऽभिः। दुदुह्रे। विश्वाः। पिन्वथः। स्वसरस्य। धेनाः। अनु। वाम्। एकः। पविः। आ। ववर्त्त॥ २॥

पदार्थः-(तत्) (सु) ((वाम्) युवयोः **(मित्रावरुणा)** प्राणोदानवदध्यापकोपदेशकौ **(महित्वम्)** महत्त्वम् **(ईर्मा) (तस्थुषीः)** स्थिराः **(अहभिः)** दिनैः **(दुदुह्रे)** प्रपूरयन्ति **(विश्वाः)** सर्वाः **(पिन्वथः)** प्रीणयतम् **(स्वसरस्य)** दिनस्य **(धेनाः)** वाचः **(अनु) (वाम्)** युवाम् **(एकः)** असहायः **(पविः)** पवित्रो व्यवहारः **(आ) (ववर्त्त)**॥ २॥

अन्वयः-हे मित्रावरुणा! वां यन्महित्वमीर्मा रक्षति तद्युवां पिन्वथो यथाऽहभिः किरणास्तस्थुषीः स दुदुह्रे स्वसरस्य मध्ये वां विश्वा धेनाः पिन्वथस्तथैकः पविरन्वाऽऽववर्त्त॥ २॥

भावार्थः-हे अध्यापकोपदेशकौ! युवां मनुष्यान् रात्र्यहर्प्राणोदानविद्युद्विद्या ग्राहयतं यतः सर्वाः प्रजा आनन्दिताः स्युः॥ २॥

पदार्थः-हे **(मित्रावरुणा)** प्राण और उदान वायु के सदृश अध्यापक और उपदेशक जनो! **(वाम्)** आप दोनों के जिस **(महित्वम्)** महत्त्व की **(ईर्मा)** निरन्तर चलने वाला रक्षा करता है **(तत्)** उसकी आप दोनों **(पिन्वथः)** तृप्ति कीजिये और जैसे **(अहभिः)** दिनों से किरणें **(तस्थुषीः)** स्थिर वेलाओं को **(सु)** उत्तम प्रकार **(दुदुह्रे)** पूर्ण करते हैं और **(स्वसरस्य)** दिन के मध्य में **(वाम्)** आप दोनों **(विश्वाः)** सम्पूर्ण **(धेनाः)** वाणियों को तृप्त कीजिये वैसे **(एकः)** सहायरहित केवल एक **(पविः)** पवित्र व्यवहार **(अनु)** अनुकूल **(आ) (ववर्त)** वर्तमान हो॥ २॥

भावार्थः-हे अध्यापक और उपदेशक जनो! आप दोनों मनुष्यों को रात्रि-दिन, प्राण, उदान और बिजुली की विद्याओं को ग्रहण कराइये, जिससे सम्पूर्ण प्रजायें प्रजायें आनन्दित होवें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः।

वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू॥ ३॥

अधारयतम्। पृथिवीम्। उत। द्याम्। मित्रऽराजाना। वरुणा। महःऽभिः। वर्धयतम्। ओषधीः। पिन्वतम्। गाः। अव। वृष्टिम्। सृजतम्। जीरदानू इति जीरऽदानू॥ ३॥

पदार्थः-(अधारयतम्) धारयतम् **(पृथिवीम्)** भूमिम् **(उत) (द्याम्)** सूर्य्यम् **(मित्रराजाना)** प्राणविद्युतौ **(वरुणा)** श्रेष्ठौ **(महोभिः)** बृहद्भिर्गुणैः **(वर्धयतम्) (ओषधीः)** यवाद्याः **(पिन्वतम्)** तर्प्पयतम् **(गाः)** पृथिवीः **(अव) (वृष्टिम्) (सृजतम्) (जीरदानू)** यौ जीवनं दद्यातां तौ॥ ३॥

अन्वयः-हे जीरदानू वरुणा! मित्रराजाना यथा वायुविद्युतौ पृथिवीमुत द्यां धारयतस्तथाऽधारयतं यथेमौ महोभिरोषधीर्वर्धयतस्तथा युवां वर्धयतं गाः पिन्वतस्तथा युवां पिन्वतं तथैतौ वृष्टिमव सृजतस्तथाऽव

सृजतम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजामात्यौ! युवां प्राणसूर्य्यवद्वर्त्तित्वा पृथिवीराज्यं सम्पाल्य वैद्योषधीर्वर्धयित्वा वृष्टिमुन्नीय सर्वेषां सुखाय वर्त्तेयाताम्॥३॥

पदार्थः-हे (**जीरदानू**) जीवन के देने वाले (**वरुणा**) श्रेष्ठ! (**मित्रराजाना**) जैसे वायु और बिजुली (**पृथिवीम्**) भूमि को (**उत**) और (**द्याम्**) सूर्य्य को धारण करते हैं, वैसे (**अधारयतम्**) धारण कीजिये और जैसे ये दोनों (**महोभिः**) बड़े गुणों से (**ओषधीः**) यव आदि ओषधियों को बढ़ाते हैं, वैसे आप दोनों (**वर्धयतम्**) बढ़ावें, (**गाः**) पृथिवियों को तृप्त करते हैं, वैसे आप दोनों (**पिन्वतम्**) तृप्त कीजिये और जैसे ये दोनों (**वृष्टिम्**) वृष्टि को उत्पन्न करते हैं, वैसे (**अव, सृजतम्**) उत्पन्न कीजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा और मन्त्रीजनो! आप दोनों प्राण और सूर्य्य के सदृश वर्त्ताव कर पृथिवी के राज्य का पालन कर वैद्य और ओषधियों की वृद्धि कर और वृष्टि की उन्नति करके सबके सुख के लिये वर्त्ताव कीजिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ वा॒मश्वा॑सः सु॒युजो॑ वहन्तु य॒तर॑श्मय॒ उप॑ यन्त्व॒र्वाक्।

घृ॒तस्य॑ नि॒र्णिग॑नु॒ वर्त॑ते वा॒मुप॒ सिन्ध॑वः प्र॒दिवि॑ क्षरन्ति॥४॥

आ। वा॒म्। अश्वा॑सः। सु॒ऽयुजः॑। व॒ह॒न्तु॒। य॒तऽर॑श्मयः। उप॑। य॒न्तु॒। अ॒र्वाक्। घृ॒तस्य॑। निः॒ऽनिक्। अनु॑। वर्त॑ते। वा॒म्। उप॑। सिन्ध॑वः। प्र॒ऽदिवि॑। क्ष॒र॒न्ति॒॥४॥

पदार्थः-(**आ**) (**वाम्**) युवयोः (**अश्वासः**) अग्न्याद्यास्तुरङ्गा वा (**सुयुजः**) ये सुष्ठु युञ्जते ते (**वहन्तु**) गमयन्तु (**यतरश्मयः**) यता निगृहीता रश्मयः किरणा रज्जवो वा येषान्ते (**उप**) (**यन्तु**) गमयन्तु (**अर्वाक्**) अधस्तात् (**घृतस्य**) उदकस्य (**निर्णिक्**) यो निर्णेनेक्ति स सारथिः (**अनु**) (**वर्त्तते**) (**वाम्**) युवाम् (**उप**) (**सिन्धवः**) नद्यः (**प्रदिवि**) प्रद्योतनात्मकेऽग्नौ (**क्षरन्ति**) वर्षन्ति॥४॥

अन्वयः-हे याननिर्मातृचालकौ! ये यथा वां सुयुजो यतरश्मयोऽश्वासो घृतस्यार्वागा वहन्तु यानान्युप यन्तु यथा निर्णिगनु वर्त्तते प्रदिवि सिन्धवो वामुप क्षरन्ति तथा प्रयतेथाम्॥४॥

भावार्थः-यदि मनुष्या यानेषु यन्त्रकला रचयित्वाऽधोऽग्निमुपरि जलं संस्थाप्य प्रदीप्य मार्गेषु चालयेयुस्तर्हि पुष्कलाः श्रिय एतान् प्राप्नुयुः॥४॥

पदार्थः-हे वाहन के बनाने और चलाने वाले जनो! जो जैसे (**वाम्**) आप दोनों के (**सुयुजः**) उत्तम प्रकार मिलने वाले (**यतरश्मयः**) ग्रहण की गई किरणें वा रस्सियां जिनकी ऐसे (**अश्वासः**) अग्नि आदि पदार्थ वा घोड़े (**घृतस्य**) जल के (**अर्वाक्**) नीचे से (**आ, वहन्तु**) पहुंचावें और यानों को (**उप, यन्तु**) चलावें और (**निर्णिक्**) निर्णय करने वाला सारथी (**अनु, वर्त्तते**) प्रवृत्त होता है और (**प्रदिवि**)

प्रकाशस्वरूप अग्नि में **(सिन्धवः)** नदियां **(वाम्)** आप दोनों को **(उप, क्षरन्ति)** जल किंछती हैं, वैसा प्रयत्न कीजिये॥४॥

भावार्थः-जो मनुष्य वाहनों में यन्त्रकलाओं को रच के नीचे अग्नि और ऊपर जल स्थापित करके और फिर उस अग्नि को प्रदीप्त करके मार्गों में चलावें तो बहुत लक्ष्मियां इनको प्राप्त हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अनु॑ श्रु॒तामु॒मति॒ वर्धदु॒वीं ब॒र्हिरि॑व॒ यजु॑षा॒ रक्ष॑माणा।

नम॑स्वन्ता धृतदु॒क्षाधि॒ गर्ते॒ मित्रासा॑थे वरु॒णेळा॑स्व॒न्तः॥५॥३०॥

अनु॑। श्रु॒ताम्। अ॒मति॑म्। वर्धत्। उ॒र्वीम्। ब॒र्हिः॑ऽइव। यजु॑षा। रक्ष॑माणा। नम॑स्वन्ता। धृ॒त॒ऽदु॒क्षा॒। अधि॑। गर्ते॑। मित्रा॑। आसा॑थे इति॑। व॒रु॒ण॒। इळा॑सु। अ॒न्तरिति॑ अन्तः॥५॥

पदार्थः-(**अनु**) (**श्रुताम्**) (**अमतिम्**) रूपम् (**वर्धत्**) वर्धयेत् (**उर्वीम्**) पृथिवीम् (**बर्हिरिव**) जलमिव। **बर्हिरित्युदकनामसु पठितम्।** (निघं०१.२) (**यजुषा**) सत्संगेन क्रियया वा (**रक्षमाणा**) यौ रक्षतस्तौ (**नमस्वन्ता**) बह्वन्नवन्तौ (**धृतदक्षा**) धृतं दक्षं बलं याभ्यां तौ (**अधि**) उपरिभावे (**गर्त्ते**) गृहे। **गर्त्त इति गृहनामसु पठितम्।** (निघं०३.४) (**मित्र**) (**आसाथे**) (**वरुण**) (**इळासु**) वाक्षु (**अन्तः**) मध्ये॥५॥

अन्वयः-हे मित्र वरुण! धृतदक्षा बर्हिरिव यजुषोर्वी रक्षमाणा नमस्वन्तेळास्वन्तर्गर्ते युवामासाथे सोऽनु श्रुताममतिमधि वर्धत् तान् वयं परिचरेम॥५॥

भावार्थः-हे विद्वांसो! यथा प्राणोदानादयो वायवः सर्वं जगद्रक्षन्ति तथा भवन्तो रक्षन्तु॥५॥

पदार्थः-हे (**मित्र**) प्राण के सदृश (**वरुण**) श्रेष्ठ (**धृतदक्षा**) धारण किया बल जिन्होंने वे (**बर्हिरिव**) जल के सदृश (**यजुषा**) सत्संग वा क्रिया से (**उर्वीम्**) पृथिवी की (**रक्षमाणा**) रक्षा करते हुए (**नमस्वन्ता**) बहुत अन्न वाले (**इळासु**) वाणियों में और (**अन्तः**) मध्य (**गर्त्ते**) गृह में आप दोनों (**आसाथे**) वर्त्तमान हैं और वह (**अनु, श्रुताम्**) पीछे श्रवण किये गये (**अमतिम्**) रूप को (**अधि**) ऊपर को (**वर्धत्**) बढ़ावे, उनकी हम लोग परिचर्य्या करें॥५॥

भावार्थः-हे विद्वानो! जैसे प्राण और उदान आदि पवन सब जगत् की रक्षा करते हैं, वैसे आप लोग रक्षा करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अक्रं॑विहस्ता सु॒कृते॑ पर॒स्पा यं त्रासा॑थे वरु॒णेळा॑स्व॒न्तः।

राजा॑ना क्ष॒त्रमह॑णीयमाना स॒हस्र॑स्थूणं बिभृथः स॒ह द्वौ॥६॥

अक्रविऽहस्ता। सुऽकृते। परःऽपा। यम्। त्रासाथे इति। वरुणा। इळासु। अन्तरिति अन्तः। राजाना। क्षत्रम्। अहणीयमाना। सहस्रऽस्थूणम्। बिभृथः। सह। द्वौ॥६॥

पदार्थः-(अक्रविहस्ता) अहिंसाहस्तौ दानशीलहस्तौ वा **(सुकृते)** धर्म्ये कर्मणि **(परस्पा)** यौ परां पातो रक्षतस्तौ **(यम्)** **(त्रासाथे)** भयं दद्यातम् **(वरुणा)** अतिश्रेष्ठौ **(इळासु)** पृथिवीषु **(अन्तः)** मध्ये **(राजाना)** राजमानौ **(क्षत्रम्)** राज्यं धनं वा **(अहणीयमाना)** क्रोधरहिताचरणौ सन्तौ **(सहस्रस्थूणम्)** सहस्रमसंख्या वा स्थूणा यस्मिंस्तज्जगत् राज्यं यानं वा **(बिभृथः)** धरथः **(सह)** सार्धम् **(द्वौ)**॥६॥

अन्वयः-हे वरुणा सभासेनेशौ राजामात्यौ! वायुसूर्य्यवदक्रविहस्ता परस्पा राजाना क्षत्रमहणीयमाना द्वौ युवामिळास्वन्तः सुकृते वर्त्तमानौ सह यं त्रासाथे तं सहस्रस्थूणं बिभृथः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजामात्या! भवन्तः स्वयं धर्मात्मानो भूत्वा सहस्रशाखस्य राज्यस्य रक्षणाय दुष्टान् दण्डयित्वा श्रेष्ठान् सत्कृत्य यशस्विनो भवन्तु॥६॥

पदार्थः-हे **(वरुणा)** अति श्रेष्ठ सभा और सेना के स्वामी राजा और मन्त्री जनो! वायु और सूर्य के सदृश **(अक्रविहस्ता)** नहीं हिंसा करने वाले हस्त जिनके वा दानशील हस्त जिनके वे **(परस्पा)** दूसरों की रक्षा करने वाले **(राजाना)** प्रकाशमान और **(क्षत्रम्)** राज्य वा धन को **(अहणीयमाना)** क्रोध से रहित आचरण करते हुए **(द्वौ)** दोनों आप **(इळासु)** पृथिवियों के **(अन्तः)** मध्य में **(सुकृते)** धर्मयुक्त काम में वर्त्तमान **(सह)** साथ **(यम्)** जिसको **(त्रासाथे)** भय देवें उस **(सहस्रस्थूणम्)** सहस्र वा असंख्य थूनी वाले जगत्, राज्य वा वाहन को **(बिभृथः)** धारण करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा और मन्त्रीजन! आप स्वयं धर्मात्मा होकर सहस्र शाखा जिसकी ऐसे राज्य के रक्षण के लिये दुष्टों को दण्ड देकर और श्रेष्ठों का सत्कार करके यशस्वी होवें॥६॥

पुनः प्रसङ्गाद्विद्युद्विद्याविषयमाह॥

फिर प्रसङ्ग से विद्युद्विद्या विषय को कहते हैं॥

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्यश्वाजनीव।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य॥७॥

हिरण्यऽनिर्निक्। अयः। अस्य। स्थूणा। वि। भ्राजते। दिवि। अश्वाजनीऽइव। भद्रे। क्षेत्रे। निऽमिता। तिल्विले। वा। सनेम। मध्वः। अधिऽगर्त्यस्य॥७॥

पदार्थः-(हिरण्यनिर्णिक्) यः पृथिव्या हिरण्यमग्नेस्तेजश्च नितरां नेनेक्ति **(अयः)** योऽयते गच्छति सः **(अस्य)** राज्यस्य **(स्थूणा)** स्तम्भ इव दृढा नीतिः **(वि)** **(भ्राजते)** प्रकाशते **(दिवि)** प्रकाशे **(अश्वाजनीव)** विद्युदिव **(भद्रे)** कल्याणकरे **(क्षेत्रे)** क्षियन्ति निवसन्ति यस्मिन् पुण्ये कर्म्मणि तत्र

(निमिता) नितरां मिता **(तिल्विले)** स्नेहस्थाने **(वा)** **(सनेम)** विभजेम **(मध्वः)** मधुरादिपदार्थस्य **(अधिगर्त्यस्य)** अधिकसुन्दरे गर्त्ते गृहे भवस्य॥७॥

अन्वयः-अत्र यो हिरण्यनिर्णिगयोऽस्या जगतो मध्ये दिवि भद्रे तिल्विले क्षेत्रे वि भ्राजते या अश्वाजनीव निमिता वा स्थूणा वि भ्राजते तं तां चाधिगर्त्यस्य मध्वो मध्ये वयं सनेम॥७॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्या दिव्ये व्यवहारे विराजमानां विद्युदादिविद्यां गृहीतवन्तः सन्तो गृहकृत्ये यथावत् न्यायं कुर्वन्ति विभज्य विभागञ्च दत्त्वा कृतकृत्या भवन्ति त एव नीतिमन्तो भवन्ति॥७॥

पदार्थः-इस संसार में जो **(हिरण्यनिर्णिक्)** पृथिवी के सुवर्ण और अग्नि के तेज को अत्यन्त निश्चय करने और **(अयः)** जाने वाला **(अस्य)** इस राज्य और जगत् के मध्य में **(दिवि)** प्रकाश में **(भद्रे)** कल्याणकारक **(तिल्विले)** स्नेह के स्थान में **(क्षेत्रे)** निवास करते हैं जिस पुण्य कर्म्म में उसमें **(वि, भ्राजते)** विशेष प्रकाशित होता है और **(अश्वाजनीव)** बिजुली के सदृश **(निमिता)** अत्यन्त मापी अर्थात् जांची गई **(वा)** अथवा **(स्थूणा)** खंभे के सदृश दृढनीति विशेष प्रकाशित होती है उस और उसको **(अधिगर्त्यस्य)** अधिक सुन्दर गृह में हुए **(मध्वः)** मधुरादि पदार्थ के मध्य में हम लोग **(सनेम)** विभाग करें॥७॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य श्रेष्ठ व्यवहार में विराजमान बिजुली आदि की विद्या को ग्रहण करते हुए गृह के कृत्य में यथावत् न्याय को करते हैं, विभाग कर और विभाग देकर कृत्यकृत्य होते हैं, वे नीति वाले होते हैं॥७॥

पुनर्मित्रावरुणगुणानाह॥

फिर मित्रावरुण के गुणों को अगले मन्त्र में कहते हैं॥

हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च॥८॥

हिरण्यऽरूपम्। उषसः। विऽउष्टौ। अयःऽस्थूणम्। उत्ऽइता। सूर्यस्य। आ। रोहथः। वरुण। मित्र। गर्तम्। अतः। चक्षाथे इति। अदितिम्। दितिम्। च॥८॥

पदार्थः-**(हिरण्यरूपम्)** तेजःस्वरूपम् **(उषसः)** प्रातर्वेलायाः **(व्युष्टौ)** विशेषदाहे निवासे वा **(अयःस्थूणम्)** सुवर्णस्तम्भमिव **(उदिता)** उदये **(सूर्य्यस्य)** **(आ)** **(रोहथः)** **(वरुण, मित्र)** प्राणोदानाविव वर्त्तमानौ राजामात्यौ **(गर्त्तम्)** गृहम् **(अतः)** कारणात् **(चक्षाथे)** उपदिशथः **(अदितिम्)** अविनाशिकारणम् **(दितिम्)** नाशवत्कार्य्यम् **(च)**॥८॥

अन्वयः-हे मित्रवरुणद्वर्त्तमानौ राजामात्यौ! युवां यथा सूर्य्यस्योदितोषसो व्युष्टौ हिरण्यरूपमयःस्थूणमारोहथोऽतो गर्त्तमधिष्ठायाऽदितिं दितिं च चक्षाथे तो वयं सङ्गच्छेमहि॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्योदयेऽन्धकारो निवर्त्तते प्रकाशः प्रवर्त्तते तथैव कार्य्यकारणात्मविद्याविदो राजाऽमात्या मित्रवद्वर्त्तित्वा दृढं न्यायं प्रचारयेयुः॥८॥

पदार्थः-हे **(मित्र)** **(वरुण)** प्राण और उदान वायु के सदृश वर्त्तमान राजा और मन्त्रीजनो! आप दोनों जैसे **(सूर्य्यस्य)** सूर्य्य के **(उदिता)** उदय में और **(उषसः)** प्रातःकाल के **(व्युष्टौ)** विशेष दाह वा निवास में **(अयःस्थूणम्)** सुवर्ण के खम्भे के सदृश **(हिरण्यरूपम्)** तेजःस्वरूप को **(आ, रोहथः)** आरोहण करते हैं, **(अतः)** इस कारण से **(गर्त्तम्)** गृह को अधिष्ठित हो के **(अदितिम्)** नहीं नष्ट होने वाले कारण **(दितिम्, च)** और नाश होने वाले कार्य्य का **(चक्षाथे)** उपदेश करते हैं, उन दोनों को हम लोग मिलें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य के उदय होने पर अन्धकार निवृत्त होता और प्रकाश होता है, वैसे ही कार्य्य और कारणरूप विद्या के जानने वाले राजा और मन्त्रीजन मित्र के सदृश वर्त्ताव करके दृढ़ न्याय का प्रचार करावें॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यद् बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा।

तेन नो मित्रावरुणाविष्टं सिषासन्तो जिगीवांसः स्याम॥९॥३१॥३॥

यत्। बंहिष्ठम्। न। अतिऽविधे। सुदानू इति सुऽदानू। अच्छिद्रम्। शर्म। भुवनस्य। गोपा। तेन। नः। मित्रावरुणौ। अविष्टम्। सिसासन्तः। जिगीवांसः। स्याम॥९॥

पदार्थः-**(यत्)** **(बंहिष्ठम्)** अतिशयेन वृद्धम् **(न)** निषेधे **(अतिविधे)** अतिवेद्धुं योग्यौ **(सुदानू)** उत्तमदानकर्त्तारौ **(अच्छिद्रम्)** छिद्ररहितम् **(शर्म)** गृहम् **(भुवनस्य)** अखिलसंसारस्य **(गोपा)** रक्षकौ **(तेन)** **(नः)** अस्मान् **(मित्रावरुणौ)** प्राणोदानवद्वर्त्तमानौ राजामात्यौ **(अविष्टम्)** व्याप्नुतम् **(सिषासन्तः)** विभजन्तः **(जिगीवांसः)** शत्रुधनानि जेतुमिच्छन्तः **(स्याम)** भवेम॥९॥

अन्वयः-हे सुदानू भुवनस्य गोपा मित्रावरुणौ! युवां यथा नाऽतिविधे यद्बंहिष्ठमच्छिद्रं शर्म प्राप्नुतं तेन नोऽविष्टं येन वयं सिषासन्तो जिगीवांसः स्याम॥९॥

भावार्थः-विद्वांसोऽत्युत्तमानि गृहाणि निर्म्माय तत्र विचारं कृत्वा विजयं विद्यां क्रियां च प्राप्नुवन्ति॥९॥

अत्र सूर्यमित्रावरुणराजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते सुप्रमाणयुक्त ऋग्वेदभाष्ये चतुर्थोऽष्टके तृतीयोध्याय एकत्रिंशो वर्गः पञ्चमे मण्डले द्विषष्टितमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(सुदानू)** उत्तम दान करने वाले **(भुवनस्य)** सम्पूर्ण संसार के **(गोपा)** रक्षक **(मित्रावरुणौ)** प्राण और उदान के सदृश वर्त्तमान राजा और मन्त्रीजनो! आप दोनों जैसे **(न, अतिविधे)** अतिवेधन करने के अयोग्य **(यत्)** जिस **(बंहिष्ठम्)** अत्यन्त वृद्ध **(अच्छिद्रम्)** छिद्ररहित **(शर्म)** गृह को प्राप्त हूजिये **(तेन)** इससे **(नः)** हम लोगों को **(अविष्टम्)** व्याप्त हूजिये जिससे हम लोग **(सिषासन्तः)** विभाग करते हुए **(जिगीवांसः)** शत्रुओं के धनों को जीतने की इच्छा करने वाले **(स्याम)** होवें॥९॥

भावार्थः-विद्वान् जन अति उत्तम गृहों को रचकर और वहाँ विचार करके विजय, विद्या और क्रिया को प्राप्त होते हैं॥९॥

इस सूक्त में सूर्य, प्राण, उदान और राजा के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह श्रीत्परमहंसपरिव्राजकाचार्य श्रमद्विरजानन्दसरस्वती स्वामाजी के शिष्य श्रीमद्दयानन्दसरस्वतीस्वामिविरचित उत्तम प्रमाणयुक्त ऋग्वेदभाष्य में चतुर्थाष्टक में तीसरा अध्याय इकतीसवां वर्ग और पञ्चम मण्डल में बासठवाँ सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्थाऽध्यायारम्भः॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ सप्तर्चस्य त्रिषष्टितमस्य सूक्तस्यार्चनाना आत्रेय ऋषिः। मित्रावरुणौ देवते। १, २, ४, ७ निचृज्जगती। ३, ५, ६ जगती छन्दः। निषादः स्वरः॥

अथ मित्रावरुणाविद्वद्विषयमाह॥

अब चतुर्थाध्याय का आरम्भ है और पञ्चम मण्डल में सात ऋचा वाले त्रेसठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मित्रावरुण विद्वद्विषय को कहते हैं॥

ऋ॒त॑स्य गोपा॒वधि॑ तिष्ठथो॒ रथं॑ स॒त्यध॑र्माणा पर॒मे व्यो॑मनि।
यमत्र॑ मित्रावरु॒णाव॑थो यु॒वं तस्मै॑ वृ॒ष्टिर्मधु॑मत्पिन्वते दि॒वः॥ १॥

ऋ॒त॑स्य। गो॒पौ॒। अधि॑। ति॒ष्ठ॒थः॒। रथ॑म्। स॒त्यऽध॑र्माणा। प॒र॒मे। विऽओ॑मानि। यम्। अत्र॑। मि॒त्रा॒व॒रु॒णा॒। अव॑थः। यु॒वम्। तस्मै॑। वृ॒ष्टिः। मधु॑ऽमत्। पि॒न्व॒ते॒। दि॒वः॥ १॥

पदार्थः-(ऋतस्य) सत्यस्य **(गोपौ)** रक्षकौ राजामात्यौ **(अधि) (तिष्ठथः) (रथम्) (सत्यधर्माणा)** सत्यो धर्मो ययोस्तौ **(परमे)** प्रकृष्टे **(व्योमनि)** व्योमवत्प्रकाशिते व्यापके परमात्मनि **(यम्) (अत्र)** राज्ये **(मित्रावरुणा) (अवथः) (युवम्)** युवाम् **(तस्मै) (वृष्टिः)** वर्षाः **(मधुमत्)** मधुरादिगुणयुक्तम् **(पिन्वते)** सिञ्चति **(दिवः)** अन्तरिक्षात्॥ १॥

अन्वयः-हे ऋतस्य गोपौ सत्यधर्माणा मित्रावरुणा राजामात्यौ! युवं परमे व्योमनि स्थित्वा रथमधि तिष्ठथोऽत्र यमवथस्तस्मै दिवो वृष्टिर्मधुमत्पिन्वते॥ १॥

भावार्थः-यत्र धार्मिका विद्वांसः पुत्रमिव प्रजां पालयितारो राजादयो भवन्ति तत्र काले वृष्टिः काले मृत्युश्च जायते॥ १॥

पदार्थः-हे **(ऋतस्य)** ऋत अर्थात् सत्य की **(गोपौ)** रक्षा करने वाले और **(सत्यधर्माणा)** सत्य है धर्म जिनका ऐसे **(मित्रावरुणा)** प्राण और उदान वायु के सदृश वर्त्तमान राजा और अमात्य जनो! **(युवम्)** आप दोनों **(परमे)** अति उत्तम **(व्योमनि)** आकाश के सदृश प्रकाशित व्यापक परमात्मा में स्थित होकर **(रथम्)** वाहन पर **(अधि, तिष्ठथः)** वर्त्तमान हूजिये और **(अत्र)** इस राज्य में **(यम्)** जिसकी **(अवथः)** रक्षा करते हैं **(तस्मै)** उसके लिये **(दिवः)** अन्तरिक्ष से **(वृष्टिः)** वर्षा **(मधुमत्)** मधुर आदि श्रेष्ठ गुणों से युक्त **(पिन्वते)** सिञ्चन करती है॥ १॥

भावार्थः-जहाँ धार्मिक विद्वान् पुत्र की जैसे वैसे प्रजा की पालना करने वाला राजा आदि होते हैं, वहाँ उचित काल में वृष्टि और उचित काल में मृत्यु होता है॥ १॥

पुनर्मित्रावरुणवाच्यराजामात्यविषयमाह॥

फिर मित्रावरुणवाच्य राजा अमात्य विषय को अगले मन्त्र में कहते हैं॥

स॒म्राजा॑व॒स्य भु॑वनस्य राजथो॒ मित्रा॑वरुणा वि॒दथे॑ स्व॒र्दृशा॑।
वृ॒ष्टिं वां॒ राधो॑ अमृत॒त्वमी॑महे॒ द्यावा॑पृथि॒वी वि च॑रन्ति त॒न्यव॑:॥ २॥

स॒म्ऽराजौ॑। अ॒स्य। भुव॑नस्य। रा॒ज॒थ॒:। मित्रा॑वरुणा। वि॒दथे॑। स्व॒:ऽदृशा॑। वृ॒ष्टिम्। वा॒म्। राध॑:। अ॒मृ॒त॒ऽत्वम्। ई॒म॒हे॒। द्यावा॑पृथि॒वी इति॑। वि। च॒र॒न्ति॒। त॒न्यव॑:॥ २॥

पदार्थ:-(सम्राजौ) यौ सम्यग्राजेते तौ **(अस्य)** **(भुवनस्य)** जगतो मध्ये **(राजथ:)** प्रकाशेथे **(मित्रावरुणा)** वायुसूर्याविव **(विदथे)** स-ामे **(स्वर्दृशा)** यौ स्व: सुखं दर्शयतस्तौ **(वृष्टिम्)** **(वाम्)** युवाभ्याम् **(राध:)** धनम् **(अमृतत्वम्)** उदकस्य भावम् **(ईमहे)** याचामहे **(द्यावापृथिवी)** प्रकाशभूमी **(वि)** विविधे **(चरन्ति)** गच्छन्ति **(तन्यव:)** विद्युत:॥ २॥

अन्वय:-हे मित्रावरुणा स्वर्दृशा सम्राजौ राजामात्यौ! युवां यथा तन्यवो द्यावापृथिवी वि चरन्ति वृष्टिं जनयन्ति तथाऽस्य भुवनस्य मध्ये विदथे राजथो वयं वा राधोऽमृतत्वं चेमहे॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा वायुविद्युतौ वृष्टिं कृत्वा सर्वान् मनुष्यान् धनधान्याढ्यान् कुरुतस्तथा धार्मिकौ राजामात्यौ प्रजा ऐश्वर्य्ययुक्ता: कुर्याताम्॥ २॥

पदार्थ:-हे **(मित्रावरुणा)** वायु और सूर्य्य के सदृश वर्त्तमान **(स्वर्दृशा)** सुख को दिखाने और **(सम्राजौ)** उत्तम प्रकार शोभित होने वाले राजा और मन्त्रीजनो! आप जैसे **(तन्यव:)** बिजुलियां **(द्यावापृथिवी)** प्रकाश और भूमि को **(वि, चरन्ति)** विचरती और **(वृष्टिम्)** वृष्टि को उत्पन्न करती हैं, वैसे **(अस्य)** इस **(भुवनस्य)** संसार के मध्य **(विदथे)** स-ाम में **(राजथ:)** प्रकाशित होते हैं, हम लोग **(वाम्)** आप दोनों से **(राय:)** धन और **(अमृतत्वम्)** जल होने की **(ईमहे)** याचना करते हैं॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायु और बिजुली वर्षा करके सब मनुष्यों को धन और धान्य से युक्त करते हैं, वैसे धार्मिक राजा और मन्त्री प्रजाओं को ऐश्वर्य्ययुक्त करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स॒म्राजा॑ उ॒ग्रा वृ॑ष॒भा दि॒वस्पती॑ पृथि॒व्या मि॒त्रावरु॑णा॒ विच॑र्षणी।
चि॒त्रेभि॑र॒भ्रैरुप॑ तिष्ठथो॒ रवं॒ द्यां व॑र्षयथो॒ असु॑रस्य मा॒यया॑॥ ३॥

स॒म्ऽराजौ॑। उ॒ग्रा। वृ॒ष॒भा। दि॒व:। प॒ती॒ इति॑। पृ॒थि॒व्या:। मि॒त्रावरु॑णा। विच॑र्षणी॒ इति॒ विऽच॑र्षणी। चि॒त्रेभि॑:। अ॒भ्रै:। उप॑। ति॒ष्ठ॒थ॒:। रव॑म्। द्याम्। व॒र्ष॒य॒थ॒:। असु॑रस्य। मा॒यया॑॥ ३॥

पदार्थः-(सम्राजौ) यौ सम्यक् राजेते तौ **(उग्रा)** तेजस्विनौ **(वृषभा)** बलिष्ठौ वृष्टिहेतू **(दिवः)** प्रकाशस्य **(पती)** पालयितारौ **(पृथिव्याः)** भूमेः **(मित्रावरुणा)** वायुसवितारौ **(विचर्षणी)** प्रकाशकौ **(चित्रेभिः)** अद्भुतैः **(अभ्रैः)** घनैः **(उप)** **(तिष्ठथः)** समीपस्थौ भवथः **(रवम्)** शब्दम् **(द्याम्)** प्रकाशम् **(वर्षयथः)** **(असुरस्य)** मेघस्य **(मायया)** आच्छादनादिना प्रज्ञया वा॥३॥

अन्वयः-हे राजामात्यौ! यथा वृषभा पृथिव्या दिवस्पती विचर्षणी मित्रावरुणा चित्रेभिरभ्रैः सहोप तिष्ठथोऽसुरस्य मायया रवं द्यां कुरुथस्तथोग्रा सम्राजौ युवां प्रजा उपतिष्ठथः कामैः प्रजाः वर्षयथः॥३॥

भावार्थः-हे प्रजाजना! ये राजाऽमात्यादयो न्यायविनयाभ्यां प्रकाशमाना दुष्टेषु तेजस्विनः कठोरदण्डप्रदाः सूर्य्यवायुवत्कामवर्षकाः सन्ति ते यशस्विनः प्रजाप्रियाश्च जायन्ते॥३॥

पदार्थः-हे राजा और मन्त्रीजनो! जैसे **(वृषभा)** बलिष्ठ वृष्टि के कारण **(पृथिव्याः)** भूमि के और **(दिवः)** प्रकाश के **(पती)** पालन करने वाले **(विचर्षणी)** प्रकाशक **(मित्रावरुणा)** वायु और सूर्य्य **(चित्रेभिः)** अद्भुत **(अभ्रैः)** मेघों के साथ **(उप, तिष्ठथः)** समीप में स्थित होते हैं और **(असुरस्य)** मेघ के **(मायया)** आच्छादन आदि से वा बुद्धि से **(रवम्)** शब्द को और **(द्याम्)** प्रकाश को करते हैं, वैसे **(उग्रा)** तेजस्वी **(सम्राजौ)** उत्तम प्रकार शोभित होने वाले आप दोनों प्रजाओं के समीप स्थित होते हैं, और कामनाओं से प्रजाओं को **(वर्षयथः)** वृष्टियुक्त करते हैं॥३॥

भावार्थः-हे प्रजाजनो! जो राजा और मन्त्री आदि जन न्याय और विनय से प्रकाशमान, दुष्टों में तेजस्वी और कठोर दण्ड के देने वाले, सूर्य्य और वायु के सदृश मनोरथों की वृष्टि करते वाले हैं, वे यशस्वी और प्रजाओं के प्रिय होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मा॒याव्वां॑ मित्रावरुणा दि॒वि श्रि॒ता सूर्यो॑ ज्योति॑श्चरति चि॒त्रमायु॑धम्।

तम॒भ्रेण॑ वृ॒ष्ट्या गू॑हथो दि॒वि पर्ज॑न्य द्र॒प्सा मधु॑मन्त ईरते॥४॥

मा॒याव्वाम्। मि॒त्रा॒व॒रु॒णा॒। दि॒वि। श्रि॒ता। सूर्यः॑। ज्योतिः॑। च॒र॒ति॒। चि॒त्रम्। आयु॑धम्। तम्। अ॒भ्रेण॑। वृ॒ष्ट्या। गू॒ह॒थः॒। दि॒वि। पर्ज॑न्य। द्र॒प्साः॒। मधु॑ऽमन्तः। ई॒र॒ते॒॥४॥

पदार्थः-(माया) प्रज्ञा **(वाम्)** युवयोः **(मित्रावरुणा)** प्राणोदानवद्राजामात्यौ **(दिवि)** विद्युति **(श्रिता)** **(सूर्य्यः)** सवितेव **(ज्योतिः)** प्रकाशस्वरूपम् **(चरति)** गच्छति **(चित्रम्)** अद्भुतम् **(आयुधम्)** आयुध्यन्ति येन तत् **(तम्)** **(अभ्रेण)** घनेन **(वृष्ट्या)** **(गूहथः)** संवृणुथः **(दिवि)** सूर्य्यप्रकाशे **(पर्जन्य)** मेघ इव वर्त्तमान **(द्रप्साः)** विमोहकारकाः **(मधुमन्तः)** बहूनि मधुराणि कर्माणि विद्यन्ते येषान्ते **(ईरते)** गच्छन्ति कम्पन्ते वा॥४॥

अन्वयः-हे मित्रावरुणा! या वां दिवि श्रिता माया सूर्य्यइव यं ज्योतिश्चित्रमायुधं चरति तमभ्रेण वृष्ट्या

गूहथो हे पर्जन्य! दिवि मधुमन्तो द्रप्सा ईरते तथा यूयं विजानीत॥४॥

भावार्थः-ये राजाऽमात्याः सूर्य्यचन्द्रवत्तीव्रशान्तस्वभावा मेधाविनो वृष्टिवत्प्रजाः पालयन्ति ते सर्वदा सुखमुन्नयन्ति॥४॥

पदार्थः-हे **(मित्रावरुणा)** प्राण और उदान के सदृश वर्त्तमान राजा और मन्त्रीजनो! **(वाम्)** आप दोनों की **(दिवि)** बिजुली में **(श्रिता)** आश्रित **(माया)** बुद्धि **(सूर्य्यः)** सूर्य्य के सदृश जिस **(ज्योतिः)** प्रकाश रूप **(चित्रम्)** अद्भुत **(आयुधम्)** युद्ध करते हैं जिससे उस शस्त्र को **(चरति)** प्राप्त होती है **(तम्)** उसको **(अभ्रेण)** मेघ से और **(वृष्ट्या)** वृष्टि से **(गूहथः)** घेरते हो, हे **(पर्जन्य)** मेघ के समान वर्तमान जन! **(दिवि)** सूर्य्य के प्रकाश में **(मधुमन्तः)** बहुत मधुर कर्म्म विद्यमान जिनके वे **(द्रप्साः)** विमोह के करने वाले **(ईरते)** चलते वा कंपते हैं, वैसे आप जानिये॥४॥

भावार्थः-जो राजा और मन्त्री जन सूर्य्य और चन्द्रमा के सदृश तीव्र और शान्तस्वभाव वाले, बुद्धिमान्, वृष्टि के सदृश प्रजाओं का पालन करते हैं, वे सब काल में सुख की वृद्धि करते हैं॥४॥

अथ मित्रावरुणवाच्यशिल्पविषयमाह॥

अब मित्रावरुणवाच्य शिल्पविषय को कहते हैं॥

रथं॑ युञ्जते म॒रुतः॑ शु॒भे सु॒खं शूरो॒ न मि॑त्रावरुणा॒ गवि॑ष्टिषु।
रजां॑सि चि॒त्रा वि चर॑न्ति त॒न्यवो॑ दि॒वः स॑म्राजा॒ पय॑सा न उक्षतम्॥५॥

रथ॑म्। यु॒ञ्ज॒ते॒। म॒रुत॑ः। शु॒भे। सु॒ऽखम्। शूर॑ः। न। मि॒त्रा॒व॒रु॒णा॒। गोऽइ॑ष्टिषु। रजां॑सि। चि॒त्रा। वि। चर॑न्ति। त॒न्यव॑ः। दि॒वः। स॒म्ऽरा॒जा॒। पय॑सा। नः॒। उ॒क्ष॒त॒म्॥५॥

पदार्थः-**(रथम्)** विमानादियानम् **(युञ्जते)** **(मरुतः)** शिल्पिनो मनुष्याः **(शुभे)** कल्याणाय **(सुखम्)** सुखकरम् **(शूरः)** निर्भयो वीरः शत्रुहन्ता **(न)** इव **(मित्रावरुणा)** प्राणोदानाविव यज्ञशिल्पकारिणौ **(गविष्टिषु)** किरणानां सङ्गतिषु **(रजांसि)** लोकाः **(चित्रा)** अद्भुतानि **(वि, चरन्ति)** विचलन्ति **(तन्यवः)** विद्युतः **(दिवः)** कामयमानान् **(सम्राजा)** यौ सम्यग् राजेते तौ **(पयसा)** उदकेन **(नः)** अस्मान् **(उक्षतम्)** सिञ्चतम्॥५॥

अन्वयः-हे दिवः सम्राजा मित्रावरुणा! ये मरुतः शूरो न शुभे सुखं रथं युञ्जते गविष्टिषु चित्रा रजांसि तन्यवश्च वि चरन्ति तैः पयसा नोऽस्मान् युवामुक्षतम्॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये शूरवत्सुखं रथमधिष्ठाय यथेष्टे स्थाने विहरन्ति तेऽभीष्टं प्राप्नुवन्ति॥५॥

पदार्थः-हे **(दिवः)** कामना करने वालों के प्रति **(सम्राजा)** उत्तम प्रकार शोभित होने वाले **(मित्रावरुणा)** प्राण और उदान वायु के सदृश यज्ञ और शिल्प के करने वालो! जो **(मरुतः)** कारीगर मनुष्य **(शूरः)** भयरहित वीरशत्रु को मारने वाले के **(न)** सदृश **(शुभे)** कल्याण के लिये **(सुखम्)**

सुखकारक (**रथम्**) विमान आदि वाहन को (**युञ्जते**) युक्त करते हैं और (**गविष्टिषु**) किरणों की सङ्गतियों में (**चित्रा**) अद्भुत (**रजांसि**) लोक और (**तन्यवः**) बिजुलियां (**वि**) विशेष करके (**चरन्ति**) चलती हैं उनके साथ (**पयसा**) जल से (**नः**) हम लोगों को आप दोनों (**उक्षतम्**) सींचिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो शूरवीर जनों के सदृश सुखकारक रथ पर चढ़कर यथेष्ट स्थान में घूमते हैं, वे अभीष्ट पदार्थ को प्राप्त होते हैं॥५॥

पुनर्मित्रावरुणवाच्यविद्वद्विषयमाह॥

फिर मित्रावरुणवाच्य विद्वद्विषय को कहते हैं॥

वाचꣳ सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम्।
अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसम्॥ ६॥

वाचम्। सु। मित्रावरुणौ। इरावतीम्। पर्जन्यः। चित्राम्। वदति। त्विषिऽमतीम्। अभ्रा। वसत। मरुतः। सु। मायया। द्याम्। वर्षयतम्। अरुणाम्। अरेपसम्॥६॥

पदार्थः-(**वाचम्**) (**सु**) सुष्ठु (**मित्रावरुणौ**) अध्यापकाऽध्येतारौ (**इरावतीम्**) इरा जलानि विद्यन्ते यस्यास्ताम् (**पर्जन्य**) मेघः (**चित्राम्**) अद्भुताम् (**वदति**) (**त्विषीमतीम्**) प्रशस्तविद्याप्रकाशयुक्ताम् (**अभ्रा**) अभ्राणि (**वसत**) (**मरुतः**) मानवाः (**सु, मायया**) शोभनया प्रज्ञया (**द्याम्**) कामनाम् (**वर्षयतम्**) (**अरुणाम्**) प्राप्तव्याम् (**अरेपसम्**) अनपराधिनीम्॥६॥

अन्वयः-हे मित्रावरुणौ! युवां यथा पर्जन्यो वदति तथेरावतीं त्विषीमतीं चित्रां वाचं वदतं यथाऽभ्राऽऽकाशे सन्ति तथैव मरुतः सु मायया सु वसत। हे मित्रावरुणावरुणामरेपसं द्यां युवां वर्षयतम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विद्यायुक्तां वाचं प्राप्य पर्जन्य इव कामान् वर्षयन्ति ते प्रज्ञया विदुषः सम्पाद्यानपराधिनः कुर्वन्ति॥६॥

पदार्थः-हे (**मित्रावरुणौ**) पढ़ाने और पढ़ने वाले जनो! आप दोनों जैसे (**पर्जन्यः**) मेघ (**वदति**) शब्द करता है, वैसे (**इरावतीम्**) जल विद्यमान जिसमें उस (**त्विषीमतीम्**) अच्छी विद्याओं के प्रकाश से युक्त (**चित्राम्**) अद्भुत (**वाचम्**) वाणी को कहो जैसे (**अभ्रा**) मेघ प्रकाश में हैं, वैसे ही (**मरुतः**) मनुष्य (**सु, मायया**) उत्तम बुद्धि से (**सु**) उत्तम प्रकार (**वसत**) बसें और हे मित्रावरुण! (**अरुणाम्**) प्राप्त होने योग्य (**अरेपसम्**) अपराधरहित (**द्याम्**) कामना की आप लोग (**वर्षयतम्**) वृष्टि करिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्या से युक्त वाणी को प्राप्त होकर मेघ के सदृश मनोरथों की वृष्टि करते हैं, वे बुद्धि से विद्वान् करके [=बनाके] अपराध रहित करते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया।

ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम्॥७॥१॥

धर्मणा। मित्रावरुणा। विपःऽचिता। व्रता। रक्षेथे इति। असुरस्य। मायया। ऋतेन। विश्वम्। भुवनम्। वि। राजथः। सूर्यम्। आ। धत्थः। दिवि। चित्र्यम्। रथम्॥७॥

पदार्थः-(धर्मणा) (मित्रावरुणा) प्राणोदानाविव **(विपश्चिता)** विद्वांसौ **(व्रता)** सत्यभाषणादीनि व्रतानि **(रक्षेथे) (असुरस्य)** मेघस्य **(मायया)** आडम्बरेण **(ऋतेन)** यथार्थेन **(विश्वम्)** विशन्ति परस्मिंस्तत्सर्वम् **(भुवनम्)** भवन्ति यस्मिन् **(वि, राजथः)** विशेषेण प्रकाशेथे **(सूर्यम्) (आ) (धत्थः) (दिवि)** प्रकाशे **(चित्र्यम्)** अद्भुते भवम् **(रथम्)** यानम्॥७॥

अन्वयः-हे विपश्चिता मित्रावरुणा! यतो युवामसुरस्य मायया धर्मणा व्रता रक्षेथे ऋतेन विश्वं भुवनं वि राजथो दिवि सूर्यमिव चित्र्यं रथमा धत्थस्तस्मात्सत्कर्त्तव्यौ भवथः॥७॥

भावार्थः-ये मनुष्या धर्म्मस्य सत्यभाषणादीनि व्रतानि कर्म्माणि वा कुर्वन्ति ते सूर्य्य इव सत्येन प्रकाशिता भवन्तीति॥७॥

अत्र मित्रावरुणविद्वद्गुणावर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिषष्टितमं सूक्तं प्रथमो वर्गश्च समाप्तः॥

पदार्थः-हे **(विपश्चिताः)** विद्वान् **(मित्रावरुणा)** प्राण और उदान वायु के सदृश वर्त्तमानो! जिससे आप दोनों **(असुरस्य)** मेघ के **(मायया)** आडम्बर से और **(धर्मणा)** धर्म से **(व्रता)** सत्यभाषण आदि व्रतों की **(रक्षेथे)** रक्षा करते हैं तथा **(ऋतेन)** यथार्थ से **(विश्वम्)** प्रविष्ट होते हैं **(भुवनम्)** वा होते हैं जिसमें उस सम्पूर्ण जगत् को **(वि, राजथः)** विशेष करके प्रकाशित करते हैं और **(दिवि)** प्रकाश में **(सूर्यम्)** सूर्य के सदृश **(चित्र्यम्)** अद्भुत में हुए **(रथम्)** वाहन को **(आ, धत्थः)** धारण करते हैं, इससे सत्कार करने के योग्य होते हैं॥७॥

भावार्थः-जो मनुष्य धर्म सम्बन्धी सत्यभाषण आदि व्रत वा कर्मों को करते हैं, वे सूर्य के सदृश सत्य से प्रकाशित होते हैं॥७॥

इस सूक्त में मित्रावरुणा और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पिछले सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह त्रेसठवां सूक्त और पहिला वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य चतु:षष्टितमस्य सूक्तस्य अर्चनाना ऋषि:। मित्रावरुणौ देवते। १, २ विराडनुष्टुप्। ६ निचृदनुष्टुप् छन्द:। गान्धार: स्वर:। ३, ५ भुरिगुष्णिक्। ४ उष्णिक् छन्द:। ऋषभ: स्वर:। ७ निचृत्पङ्क्तिश्छन्द:। पञ्चम: स्वर:॥

अथ मित्रावरुणपदवाच्यविद्वद्गुणानाह॥

अब सात ऋचा वाले चौसठवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में मित्रावरुण पदवाच्य विद्वानों के गुणों को कहते हैं॥

वरु॑णं वो रि॒शाद॑समृ॒चा मि॒त्रं ह॑वामहे।
परि॑ व्र॒जेव॑ बा॒ह्वोर्ज॑गन्वांसा॒ स्व॑र्णरम्॥ १॥

वरु॑णम्। व॒:। रि॒शाद॑सम्। ऋ॒चा। मि॒त्रम्। ह॒वा॒म॒हे॒। परि॑। व्र॒जाऽइ॑व। बा॒ह्वो:। ज॒ग॒न्वांसा॑। स्व॑:ऽनरम्॥ १॥

पदार्थ:-(वरुणम्) उत्तमं विद्वांसम् **(व:)** युष्मान् **(रिशादसम्)** शत्रुनिवारकम् **(ऋचा)** स्तुत्या **(मित्रम्)** सखायम् **(हवामहे)** स्वीकुर्महे **(परि)** सर्वत: **(व्रजेव)** व्रजन्ति यथा गत्या तद्वत् **(बाह्वो:)** भुजयो: **(जगन्वांसा)** गच्छन्तौ **(स्वर्णरम्)** य: स्व: सुखं नयति तम्॥ १॥

अन्वय:-यथा जगन्वांसा मित्रावरुणौ स्वर्णरं बाह्वोर्व्रजेव व: स्वीकुरुतस्तथा वयं रिशादसं वरुणं मित्रमृचा परि हवामहे॥ १॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथा विद्वांस: प्रीत्या युष्मान् गृह्णन्ति तथैतान् यूयमपि स्वीकुरुत॥ १॥

पदार्थ:-जैसे **(जगन्वांसा)** जाते हुए प्राण और उदान वायु के सदृश वर्त्तमान जन **(स्वर्णरम्)** सुख को प्राप्त कराने वाले को **(बाह्वो:)** भुजाओं की **(व्रजेव)** चलते हैं जिससे उस गति से जैसे वैसे **(व:)** आप लोगों को स्वीकार करते हैं, वैसे हम लोग **(रिशादसम्)** शत्रुओं के रोकने वाले **(वरुणम्)** उत्तम विद्वान् और **(मित्रम्)** मित्र का **(ऋचा)** स्तुति से **(परि)** सब ओर से **(हवामहे)** स्वीकार करते हैं॥ १॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जैसे विद्वान् जन प्रीति से आप लोगों का ग्रहण करते हैं, वैसे इनको आप लोग भी स्वीकार करिये॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता बा॒हवा॑ सु॒चे॒तुना॒ प्र य॑न्तमस्मा॒ अर्च॑ते।
शेव॑ं हि जा॒र्यं॑ वां॒ विश्वा॑सु॒ क्षासु॒ जोगु॑वे॥ २॥

ता। बाहवा। सुऽचेतुना। प्र। यन्तम्। अस्मै। अर्चते। शेवम्। हि। जार्यम्। वाम्। विश्वासु। क्षासु। जोगुवे॥ २॥

पदार्थः-(ता) तौ **(बाहवा)** बाहुना **(सुचेतुना)** उत्तमविज्ञानेन **(प्र)** **(यन्तम्)** प्रयत्नं कुर्वन्तम् **(अस्मै)** **(अर्चते)** सत्कर्त्रे **(शेवम्)** सुखम् **(हि)** **(जार्यम्)** जरावस्थाजन्यम् **(वाम्)** युवयोः **(विश्वासु)** समग्रासु **(क्षासु)** भूमिषु **(जोगुवे)** उपदिशामि॥ २॥

अन्वयः-हे मित्रावरुणौ! ता युवां बाहवा सुचेतुनाऽस्मा अर्चते शेवं हि प्र यन्तं वां जार्यमहं विश्वासु क्षासु जोगुवे तथा तं प्रशंसतम्॥ २॥

भावार्थः-ये सर्वस्यां पृथिव्यां विद्याबाहुबलाभ्यामुत्तमेभ्यः सुखं प्रयच्छन्ति तेभ्यो वयमपि सुखं प्रयच्छेम॥ २॥

पदार्थः-हे प्राण और उदान वायु के सदृश वर्त्तमानो! **(ता)** वे दोनों आप **(बाहवा)** बाहु और **(सुचेतुना)** उत्तम विज्ञान से **(अस्मै)** इस **(अर्चते)** सत्कार करने वाले जन के लिये **(शेवम्)** सुख को **(हि)** ही **(प्र, यन्तम्)** प्रयत्न करते हुए **(वाम्)** आप दोनों का **(जार्यम्)** जरा वृद्धावस्था में उत्पन्न विषय का मैं **(विश्वासु)** सम्पूर्ण **(क्षासु)** भूमियों में **(जोगुवे)** उपदेश करता हूं, वैसे उसकी आप लोग प्रशंसा करो॥ २॥

भावार्थः-जो मनुष्य सब पृथिवी पर विद्या और बाहुबल से उत्तम पुरुषों के लिये सुख देते हैं, उनके लिये हम लोग भी सुख देवें॥ २॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

यन्नूनमश्यां गतिं मित्रस्य यायां पथा।

अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे॥ ३॥

यत्। नूनम्। अश्याम्। गतिम्। मित्रस्य। यायाम्। पथा। अस्य। प्रियस्य। शर्मणि। अहिंसानस्य। सश्चिरे॥ ३॥

पदार्थः-(यत्) याम् **(नूनम्)** निश्चितम् **(अश्याम्)** प्राप्नुयाम् **(गतिम्)** **(मित्रस्य)** सख्युः **(यायाम्)** **(पथा)** मार्गेण **(अस्य)** **(प्रियस्य)** कमनीयस्य **(शर्मणि)** गृहे **(अहिंसानस्य)** हिंसारहितस्य **(सश्चिरे)** समवयन्ति प्राप्नुवन्ति॥ ३॥

अन्वयः-हे मनुष्या! अस्य प्रियस्याहिंसानस्य मित्रस्य शर्मणि यद्यां गतिं विद्वांसः सश्चिरे तामहं नूनमश्यां पथा यायाम्॥ ३॥

भावार्थः-सर्वे मनुष्या विद्वदनुकरणं कृत्वा धर्म्ममार्गेण गत्वा सद्गतिं प्राप्नुवन्तु॥ ३॥

पदार्थः-हे मनुष्यो! **(अस्य)** इस **(प्रियस्य)** सुन्दर **(अहिंसानस्य)** हिंसा से रहित **(मित्रस्य)** मित्र के **(शर्मणि)** गृह में **(यत्)** जिस **(गतिम्)** गमन को विद्वान् जन **(सश्चिरे)** प्राप्त होते हैं, उस गमन को मैं **(नूनम्)** निश्चित **(अश्याम्)** प्राप्त होऊँ और **(पथा)** मार्ग से **(यायाम्)** जाऊँ॥ ३॥

भावार्थः-सब मनुष्य विद्वानों का अनुकरण कर और धर्ममार्ग से चलकर उत्तम गति को प्राप्त होवें॥३॥

पुनर्मित्रावरुणपदवाच्यविद्वद्गुणानाह॥

फिर मित्रावरुणपदवाच्य विद्वानों के गुणों को कहते हैं॥

युवाभ्यां मित्रावरुणोपमं धेयामृचा।
यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे॥४॥

युवाभ्याम्। मित्रावरुणा। उपऽमम्। धेयाम्। ऋचा। यत्। ह। क्षये। मघोनाम्। स्तोतॄणाम्। च। स्पूर्धसे॥४॥

पदार्थः-(**युवाभ्याम्**) (**मित्रावरुणा**) अध्यापकोपदेशकौ (**उपमम्**) उपमाम् (**धेयाम्**) दध्याम् (**ऋचा**) स्तुत्या (**यत्**) याम् (**ह**) किल (**क्षये**) गृहे (**मघोनाम्**) बहुधनवताम् (**स्तोतॄणाम्**) विदुषाम् (**च**) (**स्पूर्धसे**) स्पर्धायै॥४॥

अन्वयः-हे मित्रावरुणा! युवाभ्यामृचा स्पूर्धसे यन्मघोनां स्तोतॄणाञ्च क्षय उपमं यथाहं धेयां तथा तां ह युवां धरतम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वैर्मनुष्यैर्विदुषामुपमा ग्राह्या॥४॥

पदार्थः-हे (**मित्रावरुणा**) अध्यापक और उपदेशक जनो! (**युवाभ्याम्**) आप दोनों से (**ऋचा**) स्तुति से (**स्पूर्धसे**) स्पर्धा के लिए (**यत्**) जिस (**मघोनाम्**) बहुत धन वालों के (**स्तोतॄणाम्, च**) और विद्वानों के (**क्षये**) गृह में (**उपमम्**) उपमा को जैसे मैं (**धेयाम्**) धारण करूं, वैसे उसको (**ह**) निश्चय आप धारण करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को चाहिये कि विद्वानों की उपमा को ग्रहण करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ नो मित्र सुदीतिभिर्वरुणश्च सधस्थ आ।
स्वे क्षये मघोनां सखीनां च वृधसे॥५॥

आ। नः। मित्र। सुदीतिऽभिः। वरुणः। च। सधऽस्थे। आ। स्वे। क्षये। मघोनाम्। सखीनाम्। च। वृधसे॥५॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्माकम् (**मित्र**) सखे (**सुदीतिभिः**) प्रशस्तप्रकाशैः (**वरुणः**) श्रेष्ठः (**च**) (**सधस्थे**) समानस्थाने (**आ**) (**स्वे**) स्वकीये (**क्षये**) निवासे (**मघोनाम्**) प्रशंसितधनानाम् (**सखीनाम्**) मित्राणाम् (**च**) (**वृधसे**) वर्धितुम्॥५॥

अन्वयः-हे मित्र त्वं वरुणश्च युवां सुदीतिभिर्मघोनां सखीनां नो वृधसे स्वे क्षय आ वसत सधस्थे

चाऽऽवसतं वयं च युवयोः क्षये सधस्थे च वसेम॥५॥

भावार्थः-त एव सखायः श्रेष्ठाः ये परस्परोन्नतये सुखदुःखे सङ्गे च प्रयतन्ते॥५॥

पदार्थः-हे **(मित्र)** मित्र आप और **(वरुणः)** श्रेष्ठ जन! आप दोनों **(सुदीतिभिः)** अच्छे प्रकाशों से **(मघोनाम्)** प्रशंसित धन जिसके ऐसे **(सखीनाम्)** मित्रों और **(नः)** हम लोगों को **(वृधसे)** वृद्धि के लिये **(स्वे)** अपने **(क्षये)** निवास स्थान में **(आ)** सब और बसिये **(सधस्थे, च)** और तुल्यस्थान में **(आ)** सब ओर से बसिये तथा हम लोग भी आप दोनों के निवास स्थान **(च)** और तुल्यस्थान में बसें॥५॥

भावार्थः-वे ही मित्र श्रेष्ठ हैं, जो परस्पर की उन्नति के लिये सुख दुःख और सङ्ग में प्रयत्न करते हैं॥५॥

पुनर्विरोधत्यागधनप्राप्तिविषयमाह॥

फिर विरोध के त्याग और धनप्राप्ति विषय को कहते हैं॥

युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः।

उरु णो वाजसातये कृतं राये स्वस्तये॥६॥

युवम्। नः। येषु। वरुण। क्षत्रम्। बृहत्। च। बिभृथः। उरु। नः। वाजऽसातये। कृतम्। राये। स्वस्तये॥६॥

पदार्थः-(**युवम्**) युवाम् **(नः)** अस्मभ्यम् **(येषु) (वरुण)** उत्तम **(क्षत्रम्)** धनम् **(बृहत्)** महत् **(च)** मित्र **(बिभृथः) (उरु)** बहु **(नः)** अस्मान् **(वाजसातये)** स-ामाय **(कृतम्) (राये)** धनाय **(स्वस्तये)** सुखाय॥६॥

अन्वयः-हे वरुण च! युवं येषु नो बृहदुरु क्षत्रं बिभृथो नो वाजसातये राये स्वस्तये कृतं तेषु तथैव भवतम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विरोधं विहाय सम्प्रयोगेणोद्यमं कृत्वा विजयधनादिकं प्रापणीयम्॥६॥

पदार्थः-हे **(वरुण)** उत्तम **(च)** और हे मित्र! **(युवम्)** आप दोनों **(येषु)** जिनमें **(नः)** हम लोगों के लिये **(बृहत्)** बड़े और **(उरु)** बहुत **(क्षत्रम्)** धन को **(बिभृथः)** धारण करते हैं और **(नः)** हम लोगों को **(वाजसातये)** स-ाम के लिये **(राये)** धन के और **(स्वस्तये)** सुख के लिये **(कृतम्)** किया उनमें वैसे ही हूजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि विरोध का त्याग कर और उत्तम प्रकार मिलने से उद्यम करके विजय और धन आदि को प्राप्त करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उच्छन्त्यां म यजता देवक्षत्रे रुशद्गवि।

सुतं सोमं॑ न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसम्॥७॥ २॥

उच्छन्त्यां॑म्। मे॒। यजता। देवऽक्षत्रे। रुशत्ऽगवि। सुतम्। सोमम्। न। हस्तिऽभिः। आ। पट्ऽभिः। धावतम्। नरा। बिभ्रतौ। अर्चनानसम्॥७॥

पदार्थः-(उच्छन्त्याम्) विवसन्त्याम् **(मे)** मम **(यजता)** सङ्गन्तारौ **(देवक्षत्रे)** देवानां धने राज्ये वा **(रुशद्गवि)** प्रकाशमानरश्मियुक्ते **(सुतम्)** निष्पादितम् **(सोमम्)** ऐश्वर्य्यम् **(न)** इव **(हस्तिभिः)** इभैः **(आ)** **(पड्भिः)** पादैः **(धावतम्)** गच्छन्तम् **(नरा)** नैतारौ **(बिभ्रतौ)** धरन्तौ **(अर्चनानसम्)** अर्चिता श्रेष्ठा नासिका यस्य तम्॥७॥

अन्वयः-हे मित्रावरुणौ यजता नरा राजाऽमात्यौ! युवामुच्छन्त्यां रुशद्गवि देवक्षत्रे सुतं सोमं हस्तिभिर्न पड्भिर्धावतमर्चनानसं बिभ्रतौ मे सुतं सोममा प्राप्नुतम्॥७॥

भावार्थः-हे पुरुषार्थिनो राजजनाः! प्रजा न्यायेन पालयित्वा विद्वद्धनं प्राप्नुतेति॥७॥

अत्र मित्रावरुणविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुःषष्टितमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे प्राण और उदान वायु के सदृश वर्त्तमान **(यजता)** मिलने वाले **(नरा)** नायक राजा और मन्त्रीजन! आप दोनों **(उच्छन्त्याम्)** विवास करती हुई में तथा **(रुशद्गवि)** प्रकाशमान किरणों से युक्त **(देवक्षत्रे)** विद्वानों के धन वा राज्य में **(सुतम्)** उत्पन्न किये गये **(सोमम्)** ऐश्वर्य को **(हस्तिभिः)** हाथियों से **(न)** जैसे वैसे **(पड्भिः)** पैरों से **(धावतम्)** प्राप्त होओ और **(अर्चनानसम्)** श्रेष्ठ नासिका जिसकी उसको **(बिभ्रतौ)** धारण करते हुए **(मे)** मेरे उत्पन्न किये गये ऐश्वर्य को **(आ)** अच्छे प्रकार प्राप्त हूजिये॥७॥

भावार्थः-हे पुरुषार्थी राजजनो! प्रजाओं का न्याय से पालन करके विद्वानों के धन को प्राप्त होओ॥७॥

इस सूक्त में प्राण और उदान के सदृश वर्त्तमान तथा विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौसठवां सूक्त तथा द्वितीय वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षडर्चस्य पञ्चषष्टितमस्य सूक्तस्य रातहव्यात्रेय ऋषिः। मित्रावरुणौ देवते। १, ४ अनुष्टुप्। २ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ३ स्वराडुष्णिक्। ५ भुरिगुष्णिक्छन्दः। ऋषभः स्वरः। ६ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अत्र मित्रावरुणपदवाच्याध्यापकाध्येत्रुपदेश्योपदेशकविषयमाह॥

अब छः ऋचा वाले पैंसठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मित्रावरुण पदवाच्य पढ़ने पढ़ाने वाले वा उपदेश योग्य वा उपदेश देने वालों के विषय को कहते हैं॥

यश्चि॒केत॒ स सु॒क्रतु॑र्देव॒त्रा स ब्र॑वीतु नः।
वरु॑णो॒ यस्य॑ दर्श॒तो मि॒त्रो वा॒ वन॑ते॒ गिर॑ः॥ १॥

यः। चि॒केत॑। सः। सु॒ऽक्रतु॑ः। दे॒व॒ऽत्रा। सः। ब्र॒वी॒तु॒। नः। वरु॑णः। यस्य॑। दर्श॒तः। मि॒त्रः। वा॒। वन॑ते। गिर॑ः॥ १॥

पदार्थः-(यः) (चिकेत) जानीयात् **(सः) (सुक्रतुः)** सुष्ठु बुद्धिमान् **(देवत्रा)** देवेषु **(सः) (ब्रवीतु) (नः)** अस्मान् **(वरुणः)** वरः **(यस्य) (दर्शतः)** द्रष्टव्यः **(मित्रः)** सखा **(वा) (वनते)** सम्भजति **(गिरः)** वाणीः॥ १॥

अन्वयः-यत्सुक्रतुर्वरुणोऽस्ति स चिकेत यो देवत्रा देवोऽस्ति स नो ब्रवीतु वा यस्य दर्शतो मित्रोऽस्ति स नो गिरो वनते॥ १॥

भावार्थः-हे मनुष्या! योऽस्माकं मध्येऽधिकविद्यो भवेत् स एवोपदिशेत् यो ज्ञानाऽधिकः स्यात् स सत्याऽसत्ये विविच्यात्॥ १॥

पदार्थः-(यः) जो **(सुक्रतुः)** उत्तम प्रकार बुद्धिमान् और **(वरुणः)** श्रेष्ठ है **(सः)** वह **(चिकेत)** जाने और जो **(देवत्रा)** विद्वानों में विद्वान् है **(सः)** वह **(नः)** हम लोगों को **(ब्रवीतु)** कहे **(वा)** वा **(यस्य)** जिसका **(दर्शतः)** देखने के योग्य **(मित्रः)** मित्र है वह हम लोगों की **(गिरः)** वाणियों को **(वनते)** पालन करता है॥ १॥

भावार्थः-हे मनुष्यो! जो हम लोगों के मध्य में अधिक विद्वान् होवे, वही उपदेश करे और जो अधिक ज्ञानवान् होवे, वह सत्य और असत्य को अलग करे॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता हि श्रेष्ठ॑वर्चसा॒ राजा॑ना दीर्घ॒श्रुत्त॑मा।
ता सत्प॑ती ऋत॒ावृ॑धा ऋ॒तावा॑ना॒ जने॑जने॥ २॥

ता। हि। श्रेष्ठऽवर्चसा। राजाना। दीर्घश्रुतऽतमा। ता। सत्पती इति सत्ऽपती। ऋतऽवृधा। ऋतऽवाना। जनेऽजने॥ २॥

पदार्थः-(ता) तौ **(हि)** यतः **(श्रेष्ठवर्चसा)** श्रेष्ठं वर्चोऽध्ययनं ययोस्तौ **(राजाना)** प्रकाशमानौ **(दीर्घश्रुत्तमा)** यौ दीर्घकालं श्रृणुतस्तावतिशयितौ **(ता)** तौ **(सत्पती)** सतां पालकौ **(ऋतावृधा)** यावृतं सत्यं वर्धयतस्तौ **(ऋतावाना)** ऋतं सत्यं विद्यते ययोस्तौ **(जनेजने)**॥ २॥

अन्वयः-हे मनुष्या! यौ दीर्घश्रुत्तमा श्रेष्ठवर्चसा राजाना वर्त्तेते ता यौ जनेजने सत्पती ऋतावृधा ऋतावाना वर्त्तेते ता हि वयं सततं सत्कुर्य्याम॥ २॥

भावार्थः-ये मनुष्या बहुश्रुताः पूर्णविद्याः सत्यधर्म्मनिष्ठा विद्याप्रवृत्तिप्रियाश्च स्युस्त एवोपदेशका अध्यापकाश्च भवन्तु॥ २॥

पदार्थः-हे मनुष्यो! जो **(दीर्घश्रुत्तमा)** दीर्घकालपर्यन्त अत्यन्त शास्त्र को सुनने वाले **(श्रेष्ठवर्चसा)** श्रेष्ठ अध्ययन जिनका ऐसे **(राजाना)** प्रकाशमान जन वर्त्तमान हैं **(ता)** वे दोनों और जो **(जनेजने)** मनुष्य मनुष्य में **(सत्पती)** श्रेष्ठों के पालन करने और **(ऋतावृधा)** सत्य को बढ़ाने वाले **(ऋतावाना)** तथा सत्य विद्यमान जिनमें **(ता, हि)** उन्हीं दोनों का हम लोग निरन्तर सत्कार करें॥ २॥

भावार्थः-जो मनुष्य बहुश्रुत, पूर्ण विद्या वाले, सत्य धर्म्म में निष्ठा करने वाले और जो विद्या की प्रवृत्ति में प्रीति करने वाले हों, वे ही उपदेशक अध्यापक होवें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा।

स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने॥ ३॥

ता। वाम्। इयानः। अवसे। पूर्वौ। उप। ब्रुवे। सचा। सुऽअश्वासः। सु। चेतुना। वाजान। अभि। प्र। दावने॥ ३॥

पदार्थः-(ता) तौ **(वाम्)** युवाम् **(इयानः)** प्राप्नुवन् **(अवसे)** रक्षणाद्याय **(पूर्वौ)** प्रथमाधीतविद्यौ **(उप) (ब्रुवे) (सचा)** समवेतौ **(स्वश्वासः)** शोभना अश्वा येषान्ते **(सु)** सुष्ठु **(चेतुना)** विज्ञानवता सह **(वाजान्)** स-ामान् **(अभि) (प्र) (दावने)** दात्रे॥ ३॥

अन्वयः-हे मित्रावरुणौ! स्वश्वासः सु चेतुना दावने वाजानभि प्र ब्रूयुस्तानहमुप ब्रुवे। हे अध्यापकोपदेशकौ! यौ पूर्वौ वामियानोऽवसे वर्त्ते ता सचाऽहमुपब्रुवे॥ ३॥

भावार्थः-यथोपदेशका उपदिशेयुस्तथैवोपदेश्या अन्यानप्युपदिशन्तु॥ ३॥

पदार्थः-हे प्राण और उदान के समान वर्तमानो! **(स्वश्वासः)** अच्छे घोड़े जिनके ये **(सु, चेतुना)** उत्तम ज्ञानवान् के साथ **(दावने)** देने वाले के लिये **(वाजान्)** संग्रामों के **(अभि, प्र)** सम्मुख अच्छे प्रकार कहें उनको मैं **(उप, ब्रुवे)** समीप में कहूँ। हे अध्यापक और उपदेशक जनो! जिन **(पूर्वौ)** प्रथम

विद्या पढ़े हुए **(वाम्)** आप दोनों को **(इयानः)** प्राप्त होता हुआ **(अवसे)** रक्षा आदि के लिये वर्त्तमान हूं **(ता)** उन **(सचा)** मिले हुओं के मैं समीप में कहता हूँ॥३॥

भावार्थः-जैसे उपदेशक जन उपदेश देवें, वैसे ही जिनको उपदेश दिया जाये वे औरों को भी उपदेश करें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते।

मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः॥४॥

मित्रः। अंहोः। चित्। आत्। उरु। क्षयाय। गातुम्। वनते। मित्रस्य। हि। प्रऽतूर्वतः। सुऽमतिः। अस्ति। विधतः॥४॥

पदार्थः-(**मित्रः**) सखा (**अंहोः**) दुष्टाचारात् (**चित्**) (**आत्**) (**उरु**) बहु (**क्षयाय**) निवासाय (**गातुम्**) पृथिवीम् (**वनते**) सम्भजति (**मित्रस्य**) (**हि**) खलु (**प्रतूर्वतः**) शीघ्रं कर्त्तुः (**सुमतिः**) उत्तमप्रज्ञा (**अस्ति**) (**विधतः**) परिचरतः॥४॥

अन्वयः-हे मनुष्या! यो मित्रोंऽहोश्चिद्वियोज्याऽऽदुरु क्षयाय गातुं वनते स हि प्रतूर्वतो विधतो मित्रस्य या सुमतिरस्ति तां गृह्णीयात्॥४॥

भावार्थः-त एव सखायः सन्ति ये निष्कापट्येन शुद्धभावेन परस्परैः सह वर्त्तन्ते॥४॥

पदार्थः-हे मनुष्यो! जो (**मित्रः**) मित्र (**अंहोः**) दुष्ट आचरण से (**चित्**) भी वियुक्त करके (**आत्**) अनन्तर (**उरु**) बहुत (**क्षयाय**) निवास के लिये (**गातुम्**) पृथिवी को (**वनते**) सेवन करता है वह (**हि**) निश्चय से (**प्रतूर्वतः**) शीघ्र करने वाले (**विधतः**) परिचरण करते हुए (**मित्रस्य**) मित्र की जो (**सुमतिः**) श्रेष्ठ बुद्धि (**अस्ति**) है, उसको ग्रहण करे॥४॥

भावार्थः-वे ही मित्र हैं, जो निष्कपटता से और शुद्ध भाव से परस्पर के जनों के साथ वर्तमान हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वयं मित्रस्यावसि स्याम सप्रथस्तमे।

अनेहसस्त्वोतयः सत्रा वरुणशेषसः॥५॥

वयम्। मित्रस्य। अवसि। स्याम। सप्रथःऽतमे। अनेहसः। त्वाऽऊतयः। सत्रा। वरुणऽशेषसः॥५॥

पदार्थः-(**वयम्**) (**मित्रस्य**) (**अवसि**) रक्षणादौ कर्मणि (**स्याम**) प्रवृत्ता भवेम (**सप्रथस्तमे**) अतिविस्तारयुक्ते (**अनेहसः**) अहिंसकाः सन्तः (**त्वोतयः**) त्वया रक्षिताः (**सत्रा**) सत्येन युक्ताः (**वरुणशेषसः**) वरुण उत्तमो जनः शेषो येषान्ते॥५॥

अन्वयः-हे मनुष्या! यथाऽनेहसस्त्वोतयो वरुणशेषसो वयं सत्रा मित्रस्य सप्रथस्तमेऽवसि स्याम॥५॥

भावार्थः-मनुष्यैः सर्वदा कृतज्ञता भाव्या कृतघ्नता च दूरतस्त्याज्या॥५॥

पदार्थः-हे मनुष्यो! जैसे (**अनेहसः**) नहीं हिंसक होते हुए (**त्वोतयः**) आपसे रक्षित और (**वरुणशेषसः**) उत्तम जन शेष जिनके वे (**वयम्**) हम लोग (**सत्रा**) सत्य से युक्त (**मित्रस्य**) मित्र के (**सप्रथस्तमे**) अतिविस्तार युक्त (**अवति**) रक्षण आदि कर्म्म में (**स्याम**) प्रवृत्त होवें॥५॥

भावार्थः-मनुष्यों को चाहिये कि सदा कृतज्ञता करें और कृतघ्नता का दूर से त्याग करें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

युवं मित्रेमं जनं यतथः सं च नयथः।

मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतम्॥६॥३॥

युवम्। मित्रा। इमम्। जनम्। यतथः। सम्। च। नयथः। मा। मघोनः। परि। ख्यतम्। मो इति। अस्माकम्। ऋषीणाम्। गोऽपीथे। नः। उरुष्यतम्॥६॥

पदार्थः-(**युवम्**) युवाम् (**मित्रा**) (**इमम्**) (**जनम्**) उपदेश्यं मनुष्यम् (**यतथः**) प्रेरयथः (**सम्**) (**च**) (**नयथः**) प्रापयथः (**मा**) निषेधे (**मघोनः**) बहुधनयुक्तान् (**परि**) वर्जने (**ख्यतम्**) निराकुरुतम् (**मो**) निषेधे (**अस्माकम्**) (**ऋषीणाम्**) वेदार्थविदाम् (**गोपीथे**) गवां पेये दुग्धादौ (**नः**) अस्मान् (**उरुष्यतम्**) प्रेरयेतम्॥६॥

अन्वयः-हे मित्रा अध्यापकोपदेशकौ! युवमिमं जनं यतथः सन्नयथश्च मघोनो नो मा परि ख्यतमृषीणामस्माकं गोपीथे मो परिख्यतं शुभे कर्मण्यस्मानुरुष्यतम्॥६॥

भावार्थः-हे विद्वांसो! भवन्तः सर्वान् जनान् प्रयतमानान् कृत्वा सुखं प्रापयन्तु। हे विद्यार्थिनः श्रोतारो वा! यूयमस्मानध्यापकानुपदेशकान् कदाचिन्मावमन्यध्वमेव वर्त्तित्वा सत्यं धर्मं सेवेमहीति॥६॥

अत्र मित्रावरुणाध्यापकाध्येत्रुपदेशकोपदेश्यकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चषष्टितमं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे (**मित्रा**) प्राण और उदान के समान वर्त्तमान अध्यापक और उपदेशक जनो! (**युवम्**) आप दोनों (**इमम्**) इस (**जनम्**) उपदेश देने योग्य जन को (**यतथः**) प्रेरणा करते और (**सम्, नयथः, च**) प्राप्त कराते हैं तथा (**मघोनः**) बहुत धनों से युक्त (**नः**) हम लोगों का (**मा**) मत (**परि, ख्यतम्**) निरादर कीजिये और (**ऋषीणाम्**) वेदार्थ के जानने वाले (**अस्माकम्**) हम लोगों का (**गोपीथे**) गौओं के

पीने योग्य दुग्ध आदि में **(मो)** नहीं निरादर करिये और शुभ कर्म में हम लोगों को **(उरुष्यतम्)** प्रेरणा करिये॥६॥

भावार्थः-हे विद्वानो! आप लोग सब लोगों को प्रयत्न से युक्त करके सुख को प्राप्त कराइये और हे विद्यार्थीजनो वा श्रोतृजनो! आप लोग हम अध्यापक और उपदेशकों का अपमान मत करो इस प्रकार वर्त्ताव कर सत्य धर्म का सेवन हम लोग करें॥६॥

इस सूक्त में मित्रावरुणपदवाच्य अध्यापक और अध्ययन करने तथा उपदेश करने और उपदेश देने योग्यों के कर्मों का वर्णन होने से इस सूक्त के अर्थ की पिछले सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैसठवां सूक्त और तीसरा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य षट्षष्टितमस्य सूक्तस्य रातहव्य आत्रेय ऋषिः। मित्रावरुणौ देवते। १ भुरिगनुष्टुप्। २ निचृदनुष्टुप्। ३, ४, ५, ६ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मनुष्यः किं कुर्य्यादित्याह॥

अब छः ऋचा वाले छासठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र मे मनुष्य क्या करें, इस विषय को कहते हैं॥

आ चिकितान सुक्रतू देवौ मर्त रिशादसा।
वरुणाय ऋतपेशसे दधीत प्रयसे महे॥ १॥

आ। चिकितान। सुक्रतू इति सुऽक्रतू। देवौ। मर्त। रिशादसा। वरुणाय। ऋतऽपेशसे। दधीत। प्रयसे। महे॥ १॥

पदार्थः-(आ) समन्तात् **(चिकितान)** ज्ञानयुक्त **(सुक्रतू)** शोभनप्रज्ञौ **(देवौ)** विद्वांसौ **(मर्त्त)** मरणधर्मयुक्त **(रिशादसा)** दुष्टहिंसकौ **(वरुणाय)** उत्तमाय व्यवहाराय **(ऋतपेशसे)** सत्यस्वरूपाय **(दधीत)** दधेत **(प्रयसे)** प्रयतमानाय **(महे)** महते॥ १॥

अन्वयः-हे चिकितान मर्त्त! भवानृतपेशसे प्रयसे महे वरुणाय रिशादसा सुक्रतू देवावा दधीत॥ १॥

भावार्थः-स एव विद्वान् भवति यो विदुषां सङ्गं कृत्वा प्रज्ञां वर्धयति॥ १॥

पदार्थः-हे **(चिकितान, मर्त्त)** ज्ञान और मरण धर्मयुक्त! आप **(ऋतपेशसे)** सत्यस्वरूप और **(प्रयसे)** प्रयत्न करते हुए **(महे)** बड़े **(वरुणाय)** उत्तम व्यवहारयुक्त के लिये **(रिशादसा)** दुष्टों के मारने वाले **(सुक्रतू)** उत्तम बुद्धिमान् **(देवौ)** दो विद्वानों को **(आ)** सब प्रकार से **(दधीत)** धारण करिये॥ १॥

भावार्थः-वही विद्वान् होता है, जो विद्वानों का सङ्ग करके बुद्धि को बढ़ाता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता हि क्षत्रमविह्रुतं सम्यगसुर्यꣳमाशाते।
अध व्रतेव मानुषꣳ स्वꣳर्ण धायि दर्शतम्॥ २॥

ता। हि। क्षत्रम्। अविऽह्रुतम्। सम्यक्। असुर्यम्। आशाते इति। अध। व्रताऽइव। मानुषम्। स्वः। न। धायि। दर्शतम्॥ २॥

पदार्थः-(ता) तौ **(हि)** एव **(क्षत्रम्)** धनं राज्यं वा **(अविह्रुतम्)** अकुटिलम् **(सम्यक्)** यत्समीचीनमञ्चति **(असुर्य्यम्)** असुरेभ्यो विद्वद्भ्यो हितम् **(आशाते)** व्याप्नुतः **(अध)** अथ **(व्रतेव)** कर्म्माणीव **(मानुषम्)** मनुष्याणामिदम् **(स्वः)** सुखम् **(न)** इव **(धायि)** ध्रियताम् **(दर्शतम्)** द्रष्टव्यम्॥ २॥

अन्वयः-हे मनुष्याः! ता ह्यविह्रुतमसुर्य्यं सम्यक् क्षत्रमाशाते अथ याभ्यां हितम्मानुषं दर्शतं व्रतेव स्वर्ण

धायि॥२॥

भावार्थः-अत्रोपमालङ्कारः। सर्वे मनुष्या धर्मपथा सुखं कर्म्म च धरन्तु॥२॥

पदार्थः-हे मनुष्यो! **(ता)** वे **(हि)** ही **(अविह्रुतम्)** नहीं कुटिल **(असुर्य्यम्)** विद्वानों के लिये हितकारक **(सम्यक्)** उत्तम प्रकार चलने वाले **(क्षत्रम्)** धन वा राज्य को **(आशाते)** व्याप्त होते हैं **(अध)** इसके अनन्तर जिन्होंने हित **(मानुषम्)** मनुष्य सम्बन्धी **(दर्शतम्)** देखने योग्य **(व्रतेव)** कर्म्मों के सदृश और **(स्वः)** सुख के **(न)** सदृश **(धायि)** धारण किया॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब मनुष्य धर्म पथ से सुख और कर्म्म को धारण करें॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता वामेषे रथानामुर्वीं गव्यूतिमेषाम्।

रातहव्यस्य सुष्टुतिं दधृक् स्तोमैर्मनामहे॥३॥

ता। वाम्। एषे। रथानाम्। उर्वीम्। गव्यूतिम्। एषाम्। रातऽहव्यस्य। सुऽस्तुतिम्। दधृक्। स्तोमैः। मनामहे॥३॥

पदार्थः-**(ता)** तौ **(वाम्)** युवाम् **(एषे)** गन्तुम् **(रथानाम्)** विमानादियानानाम् **(उर्वीम्)** पृथिवीम् **(गव्यूतिम्)** मार्गम् **(एषाम्)** **(रातहव्यस्य)** दत्तदातव्यस्य **(सुष्टुतिम्)** शोभनां प्रशंसाम् **(दधृक्)** प्रागल्भ्यं प्राप्तौ **(स्तोमैः)** प्रशंसनैः **(मनामहे)** विजानीमः॥३॥

अन्वयः-हे अध्यापकोपदेशकौ! युवामेषां रथानां रातहव्यस्य सुष्टुतिं गव्यूतिमेषे प्रवर्त्तेथे यथा विद्वान् स्तोमैरेतेषामुर्वीं दधाति तथा ता दधृग् वां तं च वयं मनामहे॥३॥

भावार्थः-हे मनुष्या! ये जगत्कल्याणाय सृष्टिक्रमेण पदार्थविद्यां प्रकाशयन्ति ते धन्या भवन्ति॥३॥

पदार्थः-हे अध्यापक और उपदेशक जन! आप दोनों **(एषाम्)** इन **(रथानाम्)** विमान आदि वाहनों का **(रातहव्यस्य)** दिया है देने योग्य पदार्थ जिसने उसको **(सुष्टुतिम्)** उत्तम प्रशंसा को और **(गव्यूतिम्)** मार्ग को **(एषे)** प्राप्त होने को प्रवृत्त होते हैं, और जैसे विद्वान् जन **(स्तोमैः)** प्रशंसाओं से इन की **(उर्वीम्)** पृथिवी को धारण करता है, वैसे **(ता)** उन **(दधृक्)** प्रगल्भता को प्राप्त **(वाम्)** आप दोनों को और उस विद्वान् को हम लोग **(मनामहे)** अच्छे प्रकार जानते हैं॥३॥

भावार्थः-हे मनुष्यो! जो जगत् के कल्याण के लिये सृष्टिक्रम से पदार्थविद्या को प्रकाशित करते हैं, वे धन्य होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अधा॒ हि काव्या॑ युवं दक्ष॑स्य पू॒र्भिर॑द्भुता।

नि के॒तुना॒ जना॑नां चि॒केथे॑ पूतदक्षसा॥४॥

अध॑। हि। काव्या॑। युवम्। दक्ष॑स्य। पू॒:ऽभि:। अ॒द्भुता॒। नि। के॒तुना॑। जना॑नाम्। चि॒केथे॒ इति॑। पू॒त॒ऽद॒क्ष॒सा॒॥४॥

पदार्थ:-(अधा) अथ। अत्र **निपातस्य चे**ति दीर्घ:। **(हि)** यत: **(काव्या)** कवीनां कर्माणि **(युवम्)** युवाम् **(दक्षस्य)** बलस्य **(पूर्भि:)** नगरै: **(अद्भुता)** आश्चर्य्यरूपाणि **(नि)** **(केतुना)** प्रज्ञया **(जनानाम्)** मनुष्याणाम् **(चिकेथे)** जानीथ: **(पूतदक्षसा)** पूतं पवित्रं दक्षो बलं ययोस्तौ॥४॥

अन्वय:-हे अध्यापकोपदेशकौ! पूतदक्षसा युवं केतुनाऽद्भुता काव्या चिकेथे अधा हि जनानां दक्षस्य पूर्भिर्नि चिकेथे तौ वयं सदा सत्कुर्याम॥४॥

भावार्थ:-विदुषामिदं योग्यमस्ति यत्स्वयं पूर्णा विद्वांसो भूत्वाऽज्ञजनानध्यापनोपदेशाभ्यामुप- कृतान् कुर्य्यु:॥४॥

पदार्थ:-हे अध्यापक और उपदेशक जनो! **(पूतदक्षसा)** पवित्र बल जिनका ऐसे **(युवम्)** आप दोनों **(केतुना)** बुद्धि से **(अद्भुता)** आश्चर्य्य रूप **(काव्या)** कवियों के कर्म्मों को **(चिकेथे)** जानते हैं **(अधा)** इसके अनन्तर **(हि)** जिससे **(जनानाम्)** मनुष्यों के **(दक्षस्य)** बल सम्बन्धी **(पूर्भि:)** नगरों से **(नि)** निरन्तर करके जानते हैं, उनका हम लोग सदा सत्कार करें॥४॥

भावार्थ:-विद्वानों को यह योग्य है कि स्वयं पूर्ण विद्वान् होके अज्ञजनों को अध्यापन और उपदेश से उपकृत करें॥४॥

स्त्रियोऽपि विद्वद्वद्भूत्वोत्तमाचरणं कुर्य्युरित्याह॥

स्त्री भी विद्वानों के समान होकर उत्तमाचरण करे, इस विषय को अगले मन्त्र में कहते हैं॥

तदृ॒तं पृ॑थिवि बृ॒हच्छ्र॑वए॒ष ऋषी॑णाम्।

व्र॒य॒सा॒नाव॑रं॑ पृ॒थ्वति॑ क्षरन्ति॒ याम॑भि:॥५॥

तत्। ऋ॒तम्। पृ॒थि॒वि॒। बृ॒हत्। श्र॒व॒:ऽए॒षे। ऋषी॑णाम्। व्र॒य॒सा॒नौ। अर॑म्। पृ॒थु। अति॑। क्ष॒र॒न्ति॒। याम॑ऽभि:॥५॥

पदार्थ:-(तत्) **(ऋतम्)** सत्यं जलं वा **(पृथिवि)** भूमिरिव वर्त्तमाने **(बृहत्)** महत् **(श्रव:)** अन्नं श्रवणं वा **(एषे)** प्राप्तुम् **(ऋषीणाम्)** मन्त्रार्थविदाम् **(व्रयसानौ)** गच्छन्तौ विजानन्तौ वा **(अरम्)** अलम् **(पृथु)** विस्तीर्णम् **(अति)** **(क्षरन्ति)** वर्षन्ति **(यामभि:)** प्रहरैर्यमोद्भवै: कर्म्मभिर्वा॥५॥

अन्वय:-हे पृथिवि विदुषि स्त्रि! यथा मेघा योगिनो वा यामभि: पृथु जलमरमति क्षरन्ति यथा च व्रयसानौ वर्त्तेते यथर्षीणां तद् बृहदृतं श्रवश्चैषे प्रवर्त्तस्व॥५॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यदि स्त्रियो विदुष्यो भूत्वा सत्यं धर्म्मं शीलं च स्वीकृत्य मेघवत्सुखानि वर्षन्ति तर्हि ता महत्सुखमाप्नुवन्ति॥५॥

पदार्थः-हे **(पृथिवि)** पृथिवी के सदृश वर्त्तमान विद्या से युक्त स्त्री! जैसे मेघ वा योगी जन **(यामभिः)** प्रहरों वा प्रहर में उत्पन्न कर्म्मों से **(पृथु)** विस्तीर्ण जल को **(अरम्)** पूरा **(अति, क्षरन्ति)** वर्षाते हैं और जैसे **(त्रयसानौ)** जाते हुए वा विशेष करके जानते हुए वर्त्तमान हैं, वैसे **(ऋषीणाम्)** मन्त्रार्थ जानने वालों के **(तत्)** उस **(बृहत्)** बड़े **(ऋतम्)** सत्य को वा जल को **(श्रवः)** और अन्न वा श्रवण को **(एषे)** प्राप्त होने को प्रवृत्त होओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्रियाँ विद्यायुक्त होकर सत्य, धर्म्म और उत्तम स्वभाव को स्वीकार करके मेघ के सदृश सुखों की वृष्टि करती हैं तो वे बड़े सुख को प्राप्त होती हैं॥५॥

मनुष्यैर्न्यायेन राज्यं रक्षणीयमित्याह॥

मनुष्यों को न्याय से राज्य की रक्षा करनी चाहिये, इस विषय को कहते हैं॥

आ यद्वामीयचक्षसा मित्रा वयं च सूरयः।

व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये॥६॥४॥

आ। यत्। वाम्। ईयऽचक्षसा। मित्रा। वयम्। च। सूरयः। व्यचिष्ठे। बहुऽपाय्ये। यतेमहि। स्वऽराज्ये॥६॥

पदार्थः-**(आ)** समन्तात् **(यत्)** यस्मिन् **(वाम्)** युवाम् **(ईयचक्षसा)** ईयं प्राप्तव्यं ज्ञातव्यं वा चक्षो दर्शनं कथनं च ययोस्तौ **(मित्रा)** सखायौ **(वयम्)** **(च)** **(सूरयः)** विद्वांसः **(व्यचिष्ठे)** अतिशयेन व्याप्ते **(बहुपाय्ये)** बहुभी रक्षणीये **(यतेमहि)** **(स्वराज्ये)** स्वकीये राष्ट्रे॥६॥

अन्वयः-हे ईयचक्षसा मित्रा! वां युवयोर्यद् व्यचिष्ठे बहुपाय्ये राज्ये स्वराज्ये च सूरयो वयमा यतेमहि तस्मिन् यतेयाथाम्॥६॥

भावार्थः-मनुष्यैर्मैत्रीं कृत्वा स्वं परकीयं च राज्यं न्यायेन रक्षित्वा धर्म्मोन्नतिः कार्य्येति॥६॥

अत्र मित्रावरुणविद्वद्विदुषिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्षष्टितमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(ईयचक्षसा)** प्राप्त होने वा जानने योग्य दर्शन वा कथन जिनका वे **(मित्रा)** मित्र **(वाम्)** आप दोनों के **(यत्)** जिस **(व्यचिष्ठे)** अत्यन्त व्याप्त और **(बहुपाय्ये)** बहुतों से रक्षा करने योग्य राज्य **(स्वराज्ये, च)** और अपने राज्य में **(सूरयः)** विद्वान् जन **(वयम्)** हम लोग **(आ)** सब प्रकार से **(यतेमहि)** यत्न करें, उसमें यत्न करो॥६॥

भावार्थः-मनुष्यों को चाहिये कि मित्रता करके अपने और दूसरे के राज्य की न्याय से रक्षा करके धर्म की उन्नति करें॥६॥

इस सूक्त में मित्र और श्रेष्ठ विद्वान् के और विद्यायुक्त स्त्री के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिए॥

यह छासठवां सूक्त और चौथा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य सप्तषष्टितमस्य सूक्तस्य यजत आत्रेय ऋषिः। मित्रावरुणौ देवते। १, २, ४ निचृदनुष्टुप्। ३, ५ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मनुष्यैः किंवत् किं करणीयमित्याह॥

अब पाँच ऋचा वाले सड़सठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को किसके तुल्य क्या करना चाहिये, इस विषय को कहते हैं॥

बळित्था देवा निष्कृतमादित्या यजतं बृहत्।
वरुण मित्रार्यमन् वर्षिष्ठं क्षत्रमाशाथे॥ १॥

बट्। इत्था। देवा। निःऽकृतम्। आदित्या। यजतम्। बृहत्। वरुण। मित्र। अर्यमन्। वर्षिष्ठम्। क्षत्रम्। आशाथे इति॥ १॥

पदार्थः-(बट्) सत्यम् **(इत्था)** अनेन प्रकारेण **(देवा)** दिव्यस्वभावौ **(निष्कृतम्)** निष्पन्नम् **(आदित्या)** अविनाशिनौ **(यजतम्)** सङ्गच्छेताम् **(बृहत्)** महत् **(वरुण)** श्रेष्ठ **(मित्र)** सुहृत् **(अर्यमन्)** न्यायकारिन् **(वर्षिष्ठम्)** अतिशयेन वृद्धम् **(क्षत्रम्)** राज्यं धनं वा **(आशाथे)** प्राप्नुथः॥१॥

अन्वयः-हे देवा आदित्या मित्र वरुण! युवां बृहन्निष्कृतं यजतं, हे अर्य्यमन्नित्था त्वं च यज। हे मित्रावरुण! युवां यथा बड् वर्षिष्ठं क्षत्रमाशाथे तथेदमर्यमन्नपि प्राप्नोतु॥१॥

भावार्थः-अत्रोपमालङ्कारः। यथा विद्वांसोऽत्र धर्म्याणि कुर्युस्तथा राज्यं राजादयः पालयन्तु॥१॥

पदार्थः-हे **(देवा)** श्रेष्ठ स्वभाव वाले **(आदित्या)** अविनाशी **(मित्र)** मित्र **(वरुण)** श्रेष्ठ! आप दोनों **(बृहत्)** बड़े **(निष्कृतम्)** उत्पन्न हुए को **(यजतम्)** उत्तम प्रकार मिलो, हे **(अर्य्यमन्)** न्यायकारी! **(इत्था)** इस प्रकार से आप भी मिलिये और हे मित्र श्रेष्ठ जनो! तुम जैसे **(बट्)** सत्य **(वर्षिष्ठम्)** अत्यन्त बढ़े हुए **(क्षत्रम्)** राज्य वा धन को **(आशाथे)** प्राप्त होते हो, वैसे इसको न्यायकारी भी प्राप्त हो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् जन इस संसार में धर्म्म युक्त कर्म्मों को करें, वैसे राज्य का राजा आदि पालन करें॥१॥

पुनर्मनुष्यैः किंवत् किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को किसके तुल्य क्या करना चाहिये, इस विषय को कहते हैं॥

आ यद्योनिं हिरण्ययं वरुण मित्र सदथः।
धर्तारा चर्षणीनां यन्त सुम्नं रिशादसा॥ २॥

आ। यत्। योनिम्। हिरण्ययम्। वरुण। मित्र। सदथः। धर्तारा। चर्षणीनाम्। यन्तम्। सुम्नम्। रिशादसा॥ २॥

पदार्थः-(आ) समन्तात् **(यत्)** यत् **(योनिम्)** कारणम् **(हिरण्ययम्)** तेजोमयम् **(वरुण) (मित्र) (सदथः) (धर्त्तारा) (चर्षणीनाम्)** मनुष्याणाम् **(यन्तम्)** प्राप्नुवन्तम् **(सुम्नम्)** सुखम् **(रिशादसा)** दुष्टानां दण्डयितारौ॥२॥

अन्वयः- हे रिशादसा मित्र वरुण! चर्षणीनां युवा यत्सुम्नं यन्तं हिरण्ययं योनिमा सदथस्तं वयमप्याऽऽसीदेम॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसस्तेजोमयं विद्युद्रूपं सूर्य्यादिकारणं विज्ञायोपकुर्वन्ति तथैवैतत्कृत्वा मनुष्याः सुखं प्राप्नुवन्तु॥२॥

पदार्थः-हे **(रिशादसा)** दुष्टों को दण्ड देने वाले **(मित्र) (वरुण)** श्रेष्ठ **(चर्षणीनाम्)** मनुष्यों के **(धर्त्तारा)** धारण करने वाले तुम **(यत्)** जिस **(सुम्नम्)** सुख को **(यन्तम्)** प्राप्त होते हुए और **(हिरण्ययम्)** तेजःस्वरूप **(योनिम्)** कारण को **(आ)** सब प्रकार से **(सदथः)** प्राप्त हो उसको हम लोग भी प्राप्त होवें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन तेजःस्वरूप बिजुलीरूप सूर्य्य आदि कारण को जान के उपकार करते हैं, वैसे ही इसको करके मनुष्य सुख को प्राप्त हों॥२॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

विश्वे॒ हि वि॒श्ववे॑दसो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा।

व्र॒ता प॒देव॑ सश्चिरे॒ पान्ति॒ मर्त्यं॑ रि॒षः॥३॥

विश्वे॑। हि। वि॒श्वऽवे॑दसः। वरु॑णः। मि॒त्रः। अ॒र्य॒मा। व्र॒ता। प॒दाऽइ॑व। स॒श्चि॒रे॒। पान्ति॑। मर्त्य॑म्। रि॒षः॥३॥

पदार्थः-(विश्वे) सर्वे **(हि)** **(विश्ववेदसः)** समग्रप्राप्तविद्यैश्वर्याः **(वरुणः)** श्रेष्ठः **(मित्रः)** सर्वेषां सखा **(अर्यमा)** न्यायकारी **(व्रता)** व्रतानि सत्याचरणरूपाणि कर्म्माणि **(पदेव)** पद्यन्ते यैस्तानि पदानि चरणानीव **(सश्चिरे)** प्राप्नुवन्ति गच्छन्ति वा। **सश्चतीति गतिकर्म्मसु पठितम्।** (निघं०२.२४) **(पान्ति)** रक्षन्ति **(मर्त्यम्)** मनुष्यम् **(रिषः)** हिंसकाद्धिंसाया वा॥३॥

अन्वयः-हे मनुष्या! ये विश्वे विश्ववेदसो वरुणो मित्रोऽर्यमा च पदेव व्रता सश्चिरे रिषो मर्त्यं पान्ति ते हि युष्माभिर्मानानीयाः सन्ति॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा प्राणिनः पदैरभीष्टं स्थानान्तरं गत्वा स्वप्रयोजनं साध्नुवन्ति तथैव सत्यभाषणादीनि कर्माणि धर्मार्थं प्राप्याऽभीष्टमानन्दं साध्नुत॥३॥

पदार्थः-हे मनुष्यो! जो **(विश्वे)** सब **(विश्ववेदसः)** सम्पूर्ण विद्या और ऐश्वर्य्य पाये हुए **(वरुणः)** श्रेष्ठ **(मित्रः)** और सब का मित्र **(अर्यमा)** और न्यायकारी जन **(पदेव)** चलते हैं जिनसे उन चरणों के सदृश **(व्रता)** सत्याचरण रूप कर्म्मों को **(सश्चिरे)** प्राप्त होते वा जाते हैं और **(रिषः)** मारने

वाले से वा हिंसा से **(मर्त्यम्)** मनुष्य की **(पान्ति)** रक्षा करते हैं वे **(हि)** ही आप लोगों से आदर करने योग्य हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे प्राणी पैरों से अभीष्ट एक स्थान से दूसरे स्थान को जाके अपने प्रयोजन को सिद्ध करते हैं वैसे ही सत्यभाषण आदि कर्म्मों को धर्म्ममार्ग के लिए प्राप्त होकर अभीष्ट आनन्द को सिद्ध करो॥३॥

पुनर्विद्वांसः कीदृशा भूत्वा किं कुर्य्युरित्याह॥

फिर विद्वान् कैसे होकर क्या करें, इस विषय को कहते हैं॥

ते हि सत्या ऋतस्पृश ऋतावानो जनेजने।

सुनीथासः सुदानवोऽहोश्चिदुरुचक्रयः॥४॥

ते। हि। सत्याः। ऋतऽस्पृशः। ऋतऽवानः। जनेऽजने। सुऽनीथासः। सुऽदानवः। अंहोः। चित्। उरुऽचक्रयः॥४॥

पदार्थः-(ते) (हि) यतः **(सत्याः)** सत्सु साधवः **(ऋतस्पृशः)** य ऋतं सत्यं यथार्थं स्पृशन्ति स्वीकुर्वन्ति ते **(ऋतावानः)** ऋतं सत्यं मतं कर्म वा विद्यते येषु ते **(जनेजने)** मनुष्ये मनुष्ये **(सुनीथासः)** सुनीतिप्रदाः **(सुदानवः)** शोभनं सद्विद्यादिदानं येषान्ते **(अंहोः)** अपराधात् **(चित्)** अपि **(उरुचक्रयः)** बहुकर्त्तारो महापुरुषार्थिनः॥४॥

अन्वयः-हे मनुष्या! हि यतो जनेजने ये सत्या ऋतस्पृश ऋतावानः सुदानवस्सुनीथास उरुचक्रयोऽहोश्चित्पृथग्भूताः स्युस्ते सर्वदा सर्वथा सत्कर्त्तव्या भवन्तु॥४॥

भावार्थः-ये स्वयं धर्म्यगुणकर्म्मस्वभावाः सन्तो दुष्टाचाराद् पृथग्वर्त्तित्वाऽन्यान्मनुष्यांस्तादृशान् कुर्वन्ति ते धन्यवादार्हाः सन्ति॥४॥

पदार्थः-हे मनुष्यो! **(हि)** जिससे **(जनेजने)** मनुष्य मनुष्य में जो **(सत्याः)** श्रेष्ठों में श्रेष्ठ **(ऋतस्पृशः)** यथार्थ को स्वीकार करने वाले **(ऋतावानः)** सत्य मत वा कर्म्म विद्यमान जिनमें वे **(सुदानवः)** सुन्दर श्रेष्ठ विद्या आदि का दान जिनका और **(सुनीथासः)** उत्तम नीति के देने और **(उरुचक्रयः)** बहुत करने वाले बड़े पुरुषार्थी हुए **(अंहोः)** अपराध से **(चित्)** भी **(पृथक्)** हुए होवें **(ते)** वे सर्वदा सब प्रकार से सत्कार करने योग्य हों॥४॥

भावार्थः-जो स्वयं धर्मयुक्त गुण, कर्म और स्वभाव वाले हुए दुष्ट आचरण से पृथक् वर्त्ताव करके अन्य मनुष्यों को तादृश अर्थात् अपने समान करते हैं, वे धन्यवाद के योग्य हैं॥४॥

मनुष्यैर्विद्वद्भ्यः कथं विद्यां ग्राह्येत्याह॥

मनुष्य विद्वानों से किस प्रकार विद्या ग्रहण करें, इस विषय को कहते हैं॥

को नु वां मित्रास्तुतो वरुणो वा तनूनाम्।

तत्सु वा॒मेष॑ते म॒तिरत्रि॑भ्य॒ एष॑ते म॒तिः॥५॥५॥

कः। नु। वा॒म्। मि॒त्र॒। अस्तु॑तः। वरु॑णः। वा॒। त॒नूना॑म्। तत्। सु। वा॒म्। आ। ई॒ष॒ते॒। म॒तिः। अत्रि॑ऽभ्यः। आ। ई॒ष॒ते॒। म॒तिः॥५॥

पदार्थः-(कः) (**नु**) सद्यः (**वाम्**) युवयोः (**मित्र**) सुहृत् (**अस्तुतः**) अप्रशंसितः (**वरुणः**) उत्तमस्वभावः (**वा**) (**तनूनाम्**) शरीराणाम् (**तत्**) ताम् (**सु**) (**वाम्**) (**आ**) (**ईषते**) अभिगच्छति (**मतिः**) प्रज्ञा (**अत्रिभ्यः**) व्याप्तविद्येभ्यः (**आ**) (**ईषते**) समन्तात्प्राप्नोति (**मतिः**) मननशीलान्तःकरणवृत्तिः॥५॥

अन्वयः-हे मित्र! वां तनूनां क एषते त्वं वा वरुणः को न्वस्तुतोऽस्ति या वां मतिरस्मानेषतेऽत्रिभ्यो मतिः स्वेषते तत्तां वयं स्वीकुर्य्याम॥५॥

भावार्थः-ये मनुष्या अध्यापकोपदेशकानभिगम्य तदुपदेशान् विद्यां च गृहीत्वैतेभ्यः प्रज्ञामुत्तमकृतिं च स्वीकुर्वन्ति ते प्रसिद्धस्तुतयो जायन्त इति॥५॥

अत्र मित्रावरुणविद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तषष्टितमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे (**मित्र**) मित्र (**वाम्**) आप दोनों के (**तनूनाम्**) शरीरों के (**कः**) कौन (**आ, ईषते**) सब प्रकार से प्राप्त होता है, आप (**वा**) वा (**वरुणः**) उत्तम स्वभावयुक्त कौन (**नु**) शीघ्र (**अस्तुतः**) नहीं प्रशंसित है और जो (**वाम्**) आप दोनों की (**मतिः**) बुद्धि हम लोगों को (**आ, ईषते**) सब प्रकार प्राप्त होती है और (**अत्रिभ्यः**) व्याप्त विद्या जिनमें उनके लिये (**मतिः**) मननशील अन्तःकरण की वृत्ति (**सु**) उत्तम प्रकार प्राप्त होती है (**तत्**) उसका हम लोग स्वीकार करें॥५॥

भावार्थः-जो मनुष्य अध्यापक और उपदेशकों को प्राप्त होकर उनके उपदेश और विद्या को ग्रहण करके उनसे बुद्धि और उत्तम क्रिया का स्वीकार करते हैं, वे प्रसिद्ध स्तुति वाले होते हैं॥५॥

इस सूक्त में मित्रावरुण और विद्वानों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सड़सठवां सूक्त और पांचवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्याष्टषष्टितमस्य सूक्तस्य यजत आत्रेय ऋषिः। मित्रावरुणौ देवते। १, २ गायत्री। ४ निचृद्गायत्री। ५ विराड् गायत्री छन्दः। षड्जः स्वरः॥

अथ मनुष्यैर्मिथः किं कर्त्तव्यमित्याह॥

अब मनुष्यों को परस्पर क्या करना चाहिये, इस विषय को कहते हैं॥

प्र वो॑ मि॒त्राय॑ गायत॒ वरु॑णाय वि॒पा गि॒रा। महि॑क्षत्रावृ॒तं बृ॒हत्॥ १॥

प्र। वः। मि॒त्राय॑। गा॒य॒त॒। वरु॑णाय। वि॒पा। गि॒रा। महि॑ऽक्षत्रौ। ऋ॒तम्। बृ॒हत्॥ १॥

पदार्थः-(प्र) **(वः)** युष्माकम् **(मित्राय)** सुहृदे **(गायत)** प्रशंसत **(वरुणाय)** उत्तमाचरणाय **(विपा)** यौ विविधप्रकारेण पातस्तौ **(गिरा)** वाण्या **(महिक्षत्रौ)** महत्क्षत्रं ययोस्तौ **(ऋतम्)** सत्याढ्यम् **(बृहत्)** महत्॥ १॥

अन्वयः-हे मनुष्या! वो यौ विपा महिक्षत्रौ बृहदृतं गृह्णीयातां ताभ्यां मित्राय वरुणाय यूयं गिरा प्र गायत॥ १॥

भावार्थः-यावाध्यापकोपदेशकौ सर्वान् मनुष्यान् विद्यादिना शोधयतस्तौ मनुष्यैः सर्वदा सत्कर्त्तव्यौ॥ १॥

पदार्थः-हे मनुष्यो! **(वः)** तुम लोगों के जो **(विपा)** अनेक प्रकार से रक्षा करने वाले **(महिक्षत्रौ)** बड़े क्षत्र जिनके वे **(बृहत्)** बड़े **(ऋतम्)** सत्य से युक्त को ग्रहण करें, उन दोनों से **(मित्राय)** मित्र के और **(वरुणाय)** उत्तम आचरण के लिये तुम **(गिरा)** वाणी से **(प्र, गायत)** प्रशंसा करो॥ १॥

भावार्थः-जो अध्यापक और उपदेशक जन सब मनुष्यों को विद्यादि से पवित्र करते हैं, वे मनुष्यों से सर्वदा सत्कार करने योग्य हैं॥ १॥

मनुष्यैरिह कथं भवितव्यमित्याह॥

मनुष्यो को यहां कैसे होना चाहिए, इस विषय को कहते हैं॥

स॒म्राजा॒ या घृ॒तयो॑नी मि॒त्रश्चो॒भा वरु॑णश्च। दे॒वा दे॒वेषु॑ प्रश॒स्ता॥ २॥

स॒म्ऽराजा॑। या। घृ॒तयो॑नी॒ इति॑ घृ॒तऽयो॑नी। मि॒त्रः। च॒। उ॒भा। वरु॑णः। च॒। दे॒वा। दे॒वेषु॑। प्र॒ऽश॒स्ता॥ २॥

पदार्थः-(सम्राजा) यौ सम्यग्राजेते तौ **(या)** यौ **(घृतयोनी)** घृतमुदकं कारणं ययोस्तौ **(मित्रः)** सखा **(च)** **(उभा)** उभौ **(वरुणः)** वरणीयः **(च)** **(देवा)** देवौ **(देवेषु)** विद्वत्सु **(प्रशस्ता)** श्रेष्ठौ॥ २॥

अन्वयः-हे मनुष्या! या घृतयोनी देवेषु प्रशस्ता सम्राजा देवा मित्रश्च वरुणश्चोभा प्रवर्त्तेते तौ यूयं बहु मन्यध्वम्॥ २॥

भावार्थः-ये विद्वत्सु विद्वांसो राजपुरुषाश्चक्रवर्त्तिराज्यं साद्धुं शक्नुवन्ति त एव कीर्त्तिमन्तो जायन्ते॥ २॥

पदार्थः-हे मनुष्यो! **(या)** जो **(घृतयोनी)** घृतयोनी अर्थात् जल कारण जिनका वे **(देवेषु)** विद्वानों में **(प्रशस्ता)** श्रेष्ठ **(सम्राजा)** उत्तम प्रकार शोभित होने वाले **(देवा)** दो विद्वान् अर्थात् **(मित्रः)** मित्र **(च)** और **(वरुणः)** स्वीकार करने योग्य **(च)** भी **(उभा)** दोनों प्रवृत्त होते हैं, उन दोनों को आप लोग बहुत आदर करिये॥२॥

भावार्थः-जो विद्वानों में विद्वान् राजपुरुष चक्रवर्त्तिराज्य को सिद्ध कर सकते हैं, वे ही यशस्वी होते हैं॥२॥

पुना राज्यं कथमुन्नेयमित्याह॥

फिर राज्य कैसे उन्नति को प्राप्त करना चाहिये, इस विषय को कहते हैं॥

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु॥३॥

ता। नः। शक्तम्। पार्थिवस्य। महः। रायः। दिव्यस्य। महि। वाम्। क्षत्रम्। देवेषु॥३॥

पदार्थः-(ता) तौ **(नः)** अस्माकम् **(शक्तम्)** समर्थम् **(पार्थिवस्य)** पृथिव्यां विदितस्य **(महः)** महतः **(रायः)** धनस्य **(दिव्यस्य)** दिवि शुद्धे व्यवहारे भवस्य **(महि)** महत् **(वाम्)** युवयोः **(क्षत्रम्)** राज्यं धन वा **(देवेषु)** सत्यविद्यां प्राप्तेषु॥३॥

अन्वयः-हे मनुष्या! **[यो]** नः पार्थिवस्य महो रायो दिव्यस्य शक्तं ययोर्वां देवेषु महि क्षत्रं वर्त्तते ता युवां वयं सत्कुर्य्याम॥३॥

भावार्थः-हे राजपुरुषा! युष्माभिर्यदि स्वं राज्यं विद्वद्भी रक्ष्येत तर्हि तत्पृथिव्यां विदितं समर्थं जायेत॥३॥

पदार्थः-हे मनुष्यो! जो **(नः)** हम लोगों के सम्बन्ध में **(पार्थिवस्य)** पृथिवी में विदित **(महः)** बड़े **(रायः)** धन के और **(दिव्यस्य)** शुद्ध व्यवहार में हुए का **(शक्तम्)** समर्थ, जिन **(वाम्)** आप दोनों का **(देवेषु)** सत्य विद्या को प्राप्त हुओं में **(महि)** बड़ा **(क्षत्रम्)** राज्य वा धन वर्त्तमान है **(ता)** उन आप दोनों का हम लोग सत्कार करें॥३॥

भावार्थः-हे राजपुरुषो! आप लोग जो अपने राज्य वा विद्वानों से रक्षा करें तो वह पृथिवी में विदित हुआ समर्थ होवे॥३॥

विद्वद्वदितरैर्वर्त्तितव्यमित्याह॥

विद्वानों के सदृश इतरजनों को वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

ऋतमृतेन सपन्तेषिरं दक्षमाशाते। अदुहा देवौ वर्धेते॥४॥

ऋतम्। ऋतेन। सपन्ता। इषिरम्। दक्षम्। आशाते इति। अदुहा। देवौ। वर्धेते इति॥४॥

पदार्थः-(ऋतम्) सत्यम् **(ऋतेन)** सत्येन **(सपन्ता)** आक्रोशन्तौ **(इषिरम्)** प्राप्तव्यम् **(दक्षम्)** बलम् **(आशाते)** **(अदुहा)** द्रोहरहितौ **(देवौ)** विद्वांसौ **(वर्धेते)**॥४॥

अन्वयः-हे मनुष्या! यथर्त्तेनर्त्तं सपन्तेषिरं दक्षमाशातेऽद्रुहा देवौ वर्धेते तथा यूयमपि प्रयतध्वम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्विद्वद्वत् क्रियां कृत्वा सदैव वर्धितव्यम्॥४॥

पदार्थः-हे मनुष्यो! जैसे **(ऋतेन)** सत्य से **(ऋतम्)** सत्य का **(सपन्ता)** आक्रोश करते हुए **(इषिरम्)** प्राप्त होने योग्य **(दक्षम्)** बल को **(आशाते)** व्याप्त होते हैं और **(अद्रुहा)** द्वेष से रहित **(देवौ)** दो विद्वान् जन **(वर्धते)** वृद्धि को प्राप्त होते हैं, वैसे आप लोग भी प्रयत्न करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि विद्वानों के सदृश क्रिया करके सदा ही वृद्धि करें॥४॥

पुनर्मनुष्यैः किं विज्ञाय किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या जान क्या करना चाहिये, इस विषय को कहते हैं॥

वृ॒ष्टिद्या॑वा री॒त्या॑पे॒षस्पती॒ दानु॑मत्याः। बृ॒हन्तं॒ गर्त॑माशाते॥५॥६॥

वृ॒ष्टिऽद्या॑वा री॒तिऽआ॑पा। इ॒षः। पती॒ इति॑। दानु॑ऽमत्याः। बृ॒हन्त॑म्। गर्त॑म्। आ॒शा॒ते॒ इति॑॥५॥

पदार्थः-(वृष्टिद्यावा) वृष्टिश्च द्यौश्च याभ्यां तौ **(रीत्यापा)** रीतिश्चापश्च ययोस्तौ **(इषः)** अन्नादेः **(पती)** पालकौ **(दानुमत्याः)** बहूनि दानवो दानानि विद्यन्ते यस्यां पृथिव्यां तस्या मध्ये **(बृहन्तम्)** महान्तम् **(गर्त्तम्)** गृहम् **(आशाते)** व्याप्नुतः॥५॥

अन्वयः-हे मनुष्या! वृष्टिद्यावा रीत्यापेषस्पती वायुविद्युतौ दानुमत्या बृहन्तं गर्त्तमाशाते तौ यूयं विज्ञायोपकुरुत॥५॥

भावार्थः-यदि मनुष्या वृष्ट्यादिनिमित्तानि सूर्य्यवायुविद्युदादीनि जानीयुस्तर्हि तत्तत्कार्य्यं कर्त्तुं शक्नुयुरिति॥५॥

अत्र मित्रावरुणविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टषष्टितमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(वृष्टिद्यावा)** वृष्टि और अन्तरिक्ष के कारण **(रीत्यापा)** रीति और जल जिनके सम्बन्ध में वह **(इषः)** अन्न आदि के **(पती)** पालक वायु और विद्युदग्नि **(दानुमत्याः)** बहुत दान विद्यमान जिसमें उस पृथिवी के मध्य में **(बृहन्तम्)** बड़े **(गर्त्तम्)** गृह को **(आशाते)** व्याप्त होते हैं, उन दोनों को आप लोग जान के उपकार करो॥५॥

भावार्थः-जो मनुष्य वृष्टि आदि में कारण सूर्य्य, वायु और बिजुली आदि को जानें तो उस कार्य्य को कर सकें॥५॥

इस सूक्त में मित्र, श्रेष्ठ और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अड़सठवां सूक्त और छठवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

त्री रोचनेति चतुर्ऋचस्यैकोनसप्ततितमस्य सूक्तस्य उरुचक्रिरात्रेय ऋषिः। मित्रावरुणौ देवते। १ निचृत्त्रिष्टुप्। २ त्रिष्टुप्। ३, ४ विराट् त्रिष्टुप् छन्दः। गान्धारः स्वरः॥

अत्र मनुष्यैः किं विज्ञाय किं कर्त्तव्यमित्याह॥

अब चार ऋचा वाले उनहत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में इस संसार में मनुष्यों को क्या जान कर क्या करना चाहिये, इस विषय को कहते हैं॥

त्री रोचना वरुण त्रीँरुत द्यून् त्रीणि मित्र धारयथो रजांसि।
वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यम्॥ १॥

त्री। रोचना। वरुण। त्रीन्। उत। द्यून्। त्रीणि। मित्र। धारयथः। रजांसि। ववृधानौ। अमतिम्। क्षत्रियस्य। अनु। व्रतम्। रक्षमाणौ। अजुर्यम्॥ १॥

पदार्थः-(त्री) त्रीणि भौमविद्युत्सूर्यादीनि **(रोचना)** प्रकाशनानि **(वरुण)** उदान इव वर्त्तमान **(त्रीन्)** **(उत)** **(द्यून्)** प्रकाशान् **(त्रीणि)** प्रकाशनीयानि **(मित्र)** प्राण इव **(धारयथः)** **(रजांसि)** लोकान् **(वावृधानौ)** वर्धमानौ **(अमतिम्)** रूपम् **(क्षत्रियस्य)** क्षत्रापत्यस्य राज्ञः **(अनु)** **(व्रतम्)** कर्म शीलं वा **(रक्षमाणौ)** **(अजुर्य्यम्)** अजीर्णम्॥ १॥

अन्वयः-हे मित्र वरुण! यथा प्राणोदानौ त्री रोचना त्रीन् द्यूनुत त्रीणि प्रकाशनीयानि रजांसि वावृधानौ सन्तौ क्षत्रियस्यामतिमजुर्य्यमनु व्रतं रक्षणाणौ सन्तौ धारयतस्तथैतो युवां धारयथः॥ १॥

भावार्थः-अस्मिञ्जगति त्रिविधा दीप्तिवर्त्तत एका सूर्य्यस्य, द्वितीया विद्युतस्तृतीया भूमिस्थस्याग्नेस्ताः सर्वा ये क्षत्रियादयो जानीयुस्तेऽक्षयं राज्यं कर्त्तुं शक्नुयुः॥ १॥

पदार्थः-हे **(मित्र)** प्राणवायु के और **(वरुण)** उदानवायु के सदृश वर्त्तमान! जैसे प्राण और उदानवायु वा **(त्री)** तीन अर्थात् भूमि, बिजुली और सूर्य्य रूप अग्नि जो **(रोचना)** प्रकाश होने योग्य उनको और **(त्रीन्)** तीन **(द्यून्)** प्रकाशों **(उत)** और **(त्रीणि)** प्रकाशित होने योग्य **(रजांसि)** लोकों को **(वावृधानौ)** बढ़ाते हुए **(क्षत्रियस्य)** राजपूत राजा के **(अमतिम्)** रूप को और **(अजुर्य्यम्)** नहीं जीर्ण हुए **(अनु, व्रतम्)** कर्म वा स्वभाव को **(रक्षमाणौ)** रक्षा करते हुए धारण करते हैं, वैसे इन दोनों को आप दोनों **(धारयथः)** धारण करते हैं॥ १॥

भावार्थः-इस संसार में तीन प्रकार का प्रकाश है-एक सूर्य का, दूसरा बिजुली का, तीसरा पृथिवी में वर्त्तमान अग्नि का उन तीनों को जो क्षत्रिय आदि जानें, वे अक्षय राज्य करने को समर्थ होवें॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

इरा॑वतीर्वरुण धे॒नवो॑ वां॒ मधु॑मद्वां॒ सिन्ध॑वो मित्र दुह्रे।

त्रय॑स्तस्थुर्वृष॒भास॑स्तिसृ॒णां धि॒षणा॑नां रेतो॒धा वि द्यु॒मन्त॑:॥ २॥

इरा॑वती:। व॒रु॒ण॒। धे॒नव॑:। वा॒म्। मधु॑ऽमत्। वा॒म्। सिन्ध॑व:। मि॒त्र॒। दु॒ह्रे॒। त्रय॑:। त॒स्थु॒:। वृ॒ष॒भास॑:। ति॒सृ॒णाम्। धि॒षणा॑नाम्। रे॒त॒:ऽधा:। वि। द्यु॒ऽमन्त॑:॥ २॥

पदार्थ:-(इरावती:) बह्वन्नादिसामग्रीस्ता: **(वरुण)** उत्तमकर्मकारी **(धेनव:)** वाण्यो गाव इव **(वाम्)** युवाम् **(मधुमत्) (वाम्) (सिन्धव:)** नद्य: **(मित्र)** सखे **(दुह्रे)** प्रपूरयन्ति **(त्रय:) (तस्थु:)** तिष्ठन्ति **(वृषभास:)** वर्षका: **(तिसृणाम्)** त्रिविधानाम् **(धिषणानाम्)** कर्म्मोपासनाज्ञानविदाम् **(रेतोधा:)** यो रेतो वीर्यं दधाति स: **(वि) (द्युमन्त:)** प्रशस्तकामनायुक्ता:॥ २॥

अन्वय:-हे वरुण मित्र! वां या इरावतीर्धेनवो मधुमद् दुह्रे ये सिन्धवो वां दुह्रे तिसृणां धिषणानां त्रयो द्युमन्तो वृषभासो रेतोधाश्च वितस्थुस्तान् युवां सम्प्रयुङ्क्तम्॥ २॥

भावार्थ:-हे सर्वमित्रा जना! यूयं धेनुवत्सुखप्रदा नदीवन्मलापहारका: प्रज्ञाप्रदा: कामनासिद्धिदाश्च भवन्तु॥ २॥

पदार्थ:-हे **(वरुण)** उत्तम कर्म्म के करने वाले **(मित्र)** मित्र! **(वाम्)** आप दोनों की जो **(इरावती:)** बहुत अन्न आदि सामग्रियां **(धेनव:)** और वाणियाँ गौओं के सदृश **(मधुमत्)** मधुमान् जैसे हो, वैसे **(दुह्रे)** अच्छे प्रकार पूरित करती हैं और जो **(सिन्धव:)** नदियाँ वे **(वाम्)** आप दोनों को उत्तम प्रकार पूरित करती हैं **(तिसृणाम्)** तीन प्रकार के **(धिषणानाम्)** कर्म्म, उपासना और ज्ञान के जानने वालों के **(त्रय:)** तीन **(द्युमन्त:)** उत्तम कामनाओं से युक्त **(वृषभास:)** वर्षाने वाले **(रेतोधा:)** और जो वीर्य्य को धारण करता है वह **(वि)** विशेष करके **(तस्थु:)** स्थित होते हैं, उनको आप दोनों संप्रयुक्त करिये॥ २॥

भावार्थ:-हे सब के मित्र जनो! आप लोग गौ के सदृश सुख के देने वाले, नदी के सदृश मल के दूर करने, बुद्धि के देने और कामनाओं की सिद्धि के देने वाले हूजिये॥ २॥

मनुष्यै: सततं प्रयतितव्यमित्याह॥

मनुष्यों को निरन्तर प्रयत्न करना चाहिये, इस विषय को कहते हैं॥

प्रा॒तर्दे॒वीमदि॑तिं जोहवीमि म॒ध्यंदि॑न॒ उदि॑ता॒ सूर्य॑स्य।

रा॒ये मि॑त्रावरुणा स॒र्वता॒तेळे॑ तो॒काय॒ तन॑याय॒ शं यो:॥ ३॥

प्रा॒त:। दे॒वीम्। अदि॑तिम्। जो॒हु॒वी॒मि॒। म॒ध्यंदि॑ने। उत्ऽइ॑ता। सूर्य॑स्य। रा॒ये। मि॒त्रा॒ऽव॒रु॒णा॒। स॒र्वऽता॑ता। ईळे॑। तो॒काय॑। तन॑याय। शम्। यो:॥ ३॥

पदार्थः-(प्रातः) (देवीम्) दिव्यां प्रज्ञाम् **(अदितिम्)** अखण्डितबोधाम् **(जोहवीमि)** भृशं गृह्णामि **(मध्यन्दिने)** मध्याह्ने **(उदिता)** उदिते **(सूर्य्यस्य) (राये)** धनाद्याय **(मित्रावरुणा)** प्राणोदानवन्मातापितरौ **(सर्वताता)** सर्वेषां सुखप्रदे यज्ञे **(ईळे)** प्रशंसे **(तोकाय)** अल्पाय **(तनयाय)** कुमाराय **(शम्)** सुखम् **(योः)** संयुक्तम्॥३॥

अन्वयः-हे मित्रावरुणा! यथाहं सर्वताता राये तोकाय तनयाय प्रातर्देवीमदितिं सूर्य्यस्य मध्यन्दिन उदिता योः शं जोहवीमि योऽहमीळे योऽहमीळे तथा युवामाचरतम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या कुटुम्बपालनाय सतां शिक्षायै वृद्धये सर्वदा प्रयतन्ते ते विद्वत्कुलं कुर्वन्ति॥३॥

पदार्थः-हे **(मित्रावरुणा)** प्राण और वायु के सदृश माता और पिता! जैसे मैं **(सर्वताता)** सब के सुख देने वाले यज्ञ में **(राये)** धन आदि के लिये **(तोकाय)** छोटे **(तनयाय)** कुमार के अर्थ **(प्रातः)** प्रातःकाल **(देवीम्)** श्रेष्ठ बुद्धि को **(अदितिम्)** अखण्डित बोध से युक्त को और **(सूर्य्यस्य)** सूर्य्य के **(मध्यन्दिने)** मध्याह्न **(उदिता)** उदित में **(योः)** संयुक्त **(शम्)** सुख को **(जोहवीमि)** अत्यन्त ग्रहण करता हूँ और मैं **(ईळे)** प्रशंसा करता हूँ, वैसे आप दोनों आचरण कीजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य कुटम्ब के पालन के लिये श्रेष्ठ पुरुषों की शिक्षा और वृद्धि के लिये सर्वदा प्रयत्न करते हैं, वे विद्वानों के कुल को करते हैं॥३॥

मनुष्यैः किं किं ज्ञातव्यमित्याह॥

मनुष्यों को क्या क्या जानना चाहिये, इस विषय को कहते हैं॥

या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य।
न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि॥४॥७॥

या। धर्तारा। रजसः। रोचनस्य। उत। आदित्या। दिव्या। पार्थिवस्य। न। वाम्। देवाः। अमृताः। आ। मिनन्ति। व्रतानि। मित्रावरुणा। ध्रुवाणि॥४॥

पदार्थः-(या) यौ **(धर्त्तारा)** धर्त्तारौ **(रजसः)** लोकस्य **(रोचनस्य)** दीप्तिमतः **(उत) (आदित्या)** आदित्यानाम् **(दिव्या)** दिव्यानाम् **(पार्थिवस्य)** पृथिव्यां विदितस्य **(न)** निषेधे **(वाम्)** युवयोः **(देवाः)** विद्वांसः **(अमृताः)** प्राप्तजीवनमुक्तिसुखाः **(आ)** समन्तात् **(मिनन्ति)** हिंसन्ति **(व्रतानि)** कर्म्माणि **(मित्रावरुणा)** प्राणोदानवदध्यापकोपदेशकौ **(ध्रुवाणि)** निश्चलानि॥४॥

अन्वयः-हे मित्रावरुणा! येऽमृता देवा वां ध्रुवाणि व्रतानि नामिनन्ति या रोचनस्य रजस आदित्या दिव्या उत पार्थिवस्य रजसो धर्त्तारा वर्त्तेते तौ विजानीयातम्॥४॥

भावार्थः-हे मनुष्या! यौ वायुविद्युत्सूर्यौ सर्वलोकधर्त्तारौ वर्त्तेते तौ परमेश्वरेण धृताविति मत्वा सर्वमीश्वरेणैव धृतमिति वेद्यम्॥४॥

अत्र मित्रावरुणाविद्युद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनसप्ततितमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः–हे **(मित्रावरुणा)** प्राण और उदान वायु के समान वर्त्तमान अध्यापक और उपदेशक जनो! जो **(अमृता)** प्राप्त हुआ जीवनमुक्तिसुख जिनको वे **(देवाः)** विद्वान् जन **(वाम्)** आप दोनों के **(ध्रुवाणि)** निश्चित **(व्रतानि)** कर्म्मों का **(न)** नहीं **(आ)** सब प्रकार से **(मिनन्ति)** नाश करते हैं और **(या)** जो **(रोचनस्य)** प्रकाश वाले **(रजसः)** लोक के **(आदित्या)** सूर्य्यों के **(दिव्या)** प्रकाशमानों के **(उत)** और **(पार्थिवस्य)** पृथिवी में विदित लोक के **(धर्त्तारा)** धारण करने वाले वर्त्तमान हैं, उनको जानिये॥४॥

भावार्थः–हे मनुष्यो! जो वायु बिजुली और सूर्य्य सम्पूर्ण लोक के धारण करने वाले हैं, वे परमेश्वर से धारण किये गये हैं, ऐसा जानकर सम्पूर्ण ईश्वर ने ही धारण किया ऐसा जानना चाहिये॥४॥

इस सूक्त में प्राण, उदान और बिजुली के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनहत्तरवां सूक्त और सप्तम वर्ग समाप्त हुआ॥

॥ओ३म्॥

पुरूरुणेति चतुर्ऋचस्य सप्ततितमस्य सूक्तस्य उरुचक्रिरात्रेय ऋषिः। मित्रावरुणौ देवते। १, २ विराड्गायत्री। ३ गायत्री। ४ निचृद्गायत्री छन्दः। षड्जः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब चार ऋचा वाले सत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वंसि वां सुमतिम्॥ १॥

पुरुऽउरुणा। चित्। हि। अस्ति। अवः। नूनम्। वाम्। वरुण। मित्र। वंसि। वाम्। सुऽमतिम्॥ १॥

पदार्थः-(पुरूरुणा) बहुतरम्। अत्र **सुपां सुलुगि**त्याकारादेशः। **(चित्)** अपि **(हि)** यतः **(अस्ति) (अवः)** रक्षणादिकम् **(नूनम्)** निश्चितम् **(वाम्)** युवयोः **(वरुण)** वर **(मित्र)** सखे **(वंसि)** सम्भजसि **(वाम्)** युवयोः **(सुमतिम्)** शोभनां प्रज्ञाम्॥ १॥

अन्वयः-हे मित्र वरुण! हि वां यत्पुरूरुणा नूनमवोऽस्ति यत् चित् त्वं वंसि यो वां सुमतिं गृह्णाति तौ युवां तं च वयं सेवेमहि॥ १॥

भावार्थः-हे मनुष्या! ये रक्षका राजपुरुषाः प्रजा अत्यन्तं रक्षन्ति त एव प्रजापुरुषैः सेव्याः सन्ति॥ १॥

पदार्थः-हे **(मित्र)** मित्र **(वरुण)** श्रेष्ठ! **(हि)** जिससे **(वाम्)** आप दोनों का जो **(पुरूरुणा)** अत्यन्त बहुत **(नूनम्)** निश्चित **(अवः)** रक्षण आदि **(अस्ति)** है और जिसको **(चित्)** निश्चित आप **(वंसि)** सेवन करते हैं और जो **(वाम्)** आप दोनों की **(सुमतिम्)** उत्तम बुद्धि को ग्रहण करता है, उन आप दोनों और उसकी हम लोग सेवा करें॥ १॥

भावार्थः-हे मनुष्यो! जो रक्षक राजपुरुष प्रजाओं की अत्यन्त रक्षा करते हैं, वे ही प्रजापुरुषों से सेवा करने योग्य हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता वां सम्यगद्रुह्वाणेषमश्याम धायसे। वयं ते रुद्रा स्याम॥ २॥

ता। वाम्। सम्यक्। अद्रुह्वाणा। इषम्। अश्याम। धायसे। वयम्। ते। रुद्रा। स्याम॥ २॥

पदार्थः-(ता) तौ **(वाम्)** युवयोः **(सम्यक्) (अद्रुह्वाणा)** द्रोहरहितौ **(इषम्)** अन्नं विज्ञानं वा **(अश्याम)** प्राप्नुयाम **(धायसे)** धर्त्तुम् **(वयम्) (ते) (रुद्रा)** रुतो रोदनाद्रावयितारौ **(स्याम)** भवेम॥ २॥

अन्वयः-हे अद्रुह्वाणा रुद्रा! वयं वां धायस इष सम्यगश्याम ते वयं ता सेवन्तः सर्वस्य धायसे स्याम॥ २॥

भावार्थः-तावेवाध्यापकोपदेशकौ कृतक्रियौ भवतां यौ क्रोधलोभादिविरहौ स्यातां ये ताभ्यामधीयते ते विद्याधारणे प्रयतमानाः स्युः॥२॥

पदार्थः-हे **(अद्रुह्वाणा)** द्वेष से रहित **(रुद्रा)** रोदन से शब्द कराने वाले! **(वयम्)** हम लोग **(वाम्)** आप दोनों के **(धायसे)** धारण करने को **(इषम्)** अन्न वा विज्ञान को **(सम्यक्)** उत्तम प्रकार **(अश्याम)** प्राप्त होवें **(ते)** वे हम लोग **(ता)** उन दोनों का सेवन करते हुए सब के धारण करने को **(स्याम)** होवें॥२॥

भावार्थः-वे ही अध्यापक और उपदेशक कृतक्रिय होवें, जो क्रोध और लोभ आदि दोषों से रहित होवें और जो उनसे पढ़ते हैं, वे विद्या के धारण में प्रयत्न करते हुए होवें॥२॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य कैसे वर्त्तें, इस विषय को कहते हैं॥

पा॒तं नो॑ रुद्रा पा॒युभि॑रु॒त त्रा॑येथां सुत्रा॒त्रा। तु॒र्याम॒ दस्यू॑न् त॒नूभि॑:॥३॥

पा॒तम्। न॒:। रु॒द्रा॒। पा॒युऽभि॑:। उ॒त। त्रा॒ये॒था॒म्। सु॒ऽत्रा॒त्रा॒। तु॒र्याम॑। दस्यू॑न्। त॒नूभि॑:॥३॥

पदार्थः-(पातम्) **(नः)** अस्मान् **(रुद्रा)** दुष्टानां रोदयितारौ **(पायुभिः)** रक्षणै रक्षकैर्वा **(उत)** अपि **(त्रायेथाम्)** **(सुत्रात्रा)** यः सुष्ठु त्रायते तेन **(तुर्याम)** हिंस्याम **(दस्यून्)** दुष्टान् स्तेनान् **(तनूभिः)** शरीरैः॥३॥

अन्वयः-हे रुद्रा सभासेनेशौ! युवां सुत्रात्रा सह पायुभिर्नः पातमुत त्रायेथाम्। यतो वयं तनूभिर्दस्यूंस्तुर्याम॥३॥

भावार्थः-हे मनुष्या! यौ सभासेनेशौ सततं प्रजा रक्षेतां तयो रक्षणं प्रजाः कुर्युः॥३॥

पदार्थः-हे **(रुद्रा)** दुष्टों के रुलाने वाले सभा और सेना के स्वामी! आप दोनों **(सुत्रात्रा)** उत्तम प्रकार पालन करने वाले के साथ **(पायुभिः)** रक्षणों वा रक्षकों से **(नः)** हम लोगों का **(पातम्)** पालन करिये और **(उत)** भी **(त्रायेथाम्)** रक्षा कीजिये जिससे हम लोग **(तनूभिः)** शरीरों से **(दस्यून्)** दुष्ट चोरों का **(तुर्याम)** नाश करें॥३॥

भावार्थः-हे मनुष्यो! जो सभा और सेना के स्वामी निरन्तर प्रजाओं की रक्षा करें, उन का रक्षण प्रजा करें॥३॥

उत्तमैः कस्माच्चिदपि पुरुषाद्दानं कदाचिन्न ग्रहीतव्यमित्याह॥

उत्तमों को किसी पुरुष से भी दान कभी न ग्रहण करना चाहिये, इस विषय को कहते हैं॥

मा कस्या॑द्भुतक्रतू य॒क्षं भु॑जेमा त॒नूभि॑:। मा शेष॑सा॒ मा तन॑सा॥४॥८॥

मा। कस्य॑। अ॒द्भु॒त॒क्र॒तू॒ इत्य॑द्भुतऽक्रतू। य॒क्षम्। भु॒जे॒म॒। त॒नूभि॑:। मा। शेष॑सा। मा। तन॑सा॥४॥

पदार्थः-(मा) (कस्य) (अद्भुतक्रतू) अद्भुतां क्रतुः प्रज्ञा कर्म्म वां ययोस्तौ **(यक्षम्)** दानम् **(भुजेमा)** पालयेम। अत्र **संहितायामि**ति दीर्घः। **(तनूभिः)** शरीरैः **(मा) (शेषसा)** अपत्यैः सह वर्त्तमानाः **(मा) (तनसा)** पौत्रादिसहिता॥४॥

अन्वयः-हे अद्भुतक्रतू! वयं तनूभिः कस्यचिद्यक्षं मा भुजेम। शेषसा मा भुजेम तनसा मा भुजेम॥४॥

भावार्थः-विद्वांस एवमुपदेशं कुर्य्युर्येन कस्माच्चिद्दानं कोऽपि न गृह्णीयात्। तथैव मातापितृभ्यां पुत्रपौत्रादयोऽपि दानरुचिं न कुर्य्युरिति॥४॥

अत्र मित्रावरुणविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्ततितमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे **(अद्भुतक्रतू)** अद्भुत बुद्धि वा कर्म वालो! हम लोग **(तनूभिः)** शरीरों से **(कस्य)** किसी के **(यक्षम्)** दान का **(मा)** नहीं **(भुजेम)** सेवन करें और **(शेषसा)** अन्यों के साथ वर्त्तमान हुए **(मा)** नहीं पालन करें और **(तनसा)** पौत्र आदि के सहित **(मा)** नहीं पालन करें॥४॥

भावार्थः-विद्वान् जन ऐसा उपदेश करें जिससे कि किसी से दान कोई भी नहीं ग्रहण करे, वैसे ही माता और पिता से पुत्र, पौत्र आदि भी दान की रुचि न करें॥४॥

इस सूक्त में प्राण, उदान और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्तरवां सूक्त और अष्टम वर्ग समाप्त हुआ॥

॥ओ३म्॥

आ नो गन्तमिति त्र्यृचस्यैकसप्ततितमस्य सूक्तस्य बाहुवृक्त आत्रेय ऋषिः। मित्रावरुणौ देवते। १, २, ३ गायत्री छन्दः। षड्जः स्वरः॥

पुनरध्यापकोपदेशकौ किं कुर्य्यातामित्याह॥

अब तीन ऋचा वाले एकहत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर अध्यापक और उपदेशक क्या करें, इस विषय को कहते हैं॥

आ नो॑ गन्तं रिशादसा॒ वरु॑ण॒ मित्र॑ बृ॒हणा॑। उप॒ इमं चारु॑मध्व॒रम्॥ १॥

आ। नः। गन्तम्। रिशादसा। वरुण। मित्र। बृहणा। उप। इमम्। चारुम्। अध्वरम्॥ १॥

पदार्थः-(आ) समन्तात् **(नः)** अस्माकम् **(गन्तम्)** गच्छतम् **(रिशादसा)** दुष्टहिंसकौ **(वरुण)** श्रेष्ठ **(मित्र)** सुहृत् **(बर्हणा)** वर्धकौ **(उप) (इमम्) (चारुम्)** सुन्दरम् **(अध्वरम्)** यज्ञम्॥ १॥

अन्वयः-हे रिशादसा वरुण मित्र! बर्हणा युवामिमं नश्चारुमध्वरमुपागन्तम्॥ १॥

भावार्थः-यदि विद्वांसौ व्यवहाराख्यं यज्ञमकरिष्यंस्तर्ह्यस्माकमुन्नतये प्रभवोऽभविष्यन्॥ १॥

पदार्थः-हे **(रिशादसा)** दुष्टों के मारने वाले **(वरुण)** श्रेष्ठ और **(मित्र)** मित्र! **(बर्हणा)** बढ़ाने वाले आप दोनों **(इमम्)** इस **(नः)** हम लोगों के **(चारुम्)** सुन्दर **(अध्वरम्)** यज्ञ के **(उप)** समीप **(आ)** सब प्रकार से **(गन्तम्)** प्राप्त होओ॥ १॥

भावार्थः-जो विद्वान् जन व्यवहार नामक यज्ञ को करें तो हम लोगों की उन्नति के लिये समर्थ हों॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को करना चाहिये, इस विषय को कहते हैं॥

विश्व॑स्य॒ हि प्र॑चेतसा॒ वरु॑ण॒ मित्र॒ राज॑थः। ई॒शा॒ना पि॑प्यतं॒ धिय॑ः॥ २॥

विश्वस्य। हि। प्रऽचेतसा। वरुण। मित्र। राजथः। ईशाना। पिप्यतम्। धियः॥ २॥

पदार्थः-(विश्वस्य) संसारस्य **(हि)** यतः **(प्रचेतसा)** प्रकृष्टज्ञानौ **(वरुण)** वरप्रद **(मित्र)** सर्वसुखकारक **(राजथः) (ईशाना)** समर्थौ **(पिप्यतम्)** वर्धयेतम् **(धियः)** बुद्धीः॥ २॥

अन्वयः-हे प्रचेतसेशाना वरुण मित्र विश्वस्य मध्ये युवां राजथः धियो हि पिप्यतम्॥ २॥

भावार्थः-हे मनुष्या! यथान्तरिक्षे सूर्य्याचन्द्रमसौ प्रकाशेते तथा जनानां बुद्धीर्वर्द्धयन्तु॥ २॥

पदार्थः-हे **(प्रचेतसा)** उत्तम ज्ञान वाले **(ईशाना)** समर्थ **(वरुण)** वर के देने और **(मित्र)** सब के सुख करने वालो! **(विश्वस्य)** संसार के मध्य में आप दोनों **(राजथः)** प्रकाशित होते हैं और **(धियः)** बुद्धियों को **(हि)** ही **(पिप्यतम्)** बढ़ाइये॥ २॥

भावार्थः-हे मनुष्यो! जैसे अन्तरिक्ष में सूर्य्य और चन्द्रमा प्रकाशित होते हैं, वैसे मनुष्यों की बुद्धियों को बढ़ाइये॥२॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को अगले मन्त्र में कहते हैं॥

उप॑ नः सु॒तमा ग॑तं॒ वरु॑ण॒ मित्र॑ दा॒शुष॑:। अ॒स्य सोम॑स्य पी॒तये॑॥३॥९॥

उप॑। न॒:। सु॒तम्। आ। ग॒त॒म्। वरु॑ण। मित्र॑। दा॒शुष॑:। अ॒स्य। सोम॑स्य। पी॒तये॑॥३॥

पदार्थः-(उप) समीपे **(नः)** अस्माकम् **(सुतम्)** निष्पन्नम् **(आ) (गतम्)** आगच्छतम् **(वरुण)** श्रेष्ठ **(मित्र)** मित्र **(दाशुषः)** दातुः **(अस्य) (सोमस्य)** महौषधिरसस्य **(पीतये)** पानाय॥३॥

अन्वयः-हे मित्र वा वरुण! युवामस्य दाशुषः सोमस्य पीतये नः सुतमुपागतम्॥३॥

भावार्थः-मनुष्या धार्मिकान् विदुष आहूय सदा सत्कुर्वन्त्विति॥३॥

अत्र मित्रावरुणविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकसप्ततितमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे **(मित्र)** मित्र **(वरुण)** श्रेष्ठ! आप दोनों **(अस्य)** इस **(दाशुषः)** देने वाले के **(सोमस्य)** बड़ी औषधियों के रस को **(पीतये)** पीने के लिये **(नः)** हम लोगों के **(सुतम्)** उत्पन्न किये हुए पदार्थ के **(उप)** समीप में **(आ, गतम्)** आइये॥३॥

भावार्थः-मनुष्य धार्मिक विद्वानों को बुलाकर सदा उनका सत्कार करें॥३॥

इस सूक्त में मित्र, श्रेष्ठ और विद्वानों के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥३॥

यह इकहत्तरवां सूक्त और नववां वर्ग समाप्त हुआ॥

॥ओ३म्॥

आमित्र इति त्र्यृचस्य द्विसप्ततितमस्य सूक्तस्य बाहुवृक्त आत्रेय ऋषिः। मित्रावरुणौ देवते। १, २, ३ उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ मनुष्यान् प्रति कथं कथं वर्त्तितव्यमित्याह॥

अब तीन ऋचा वाले बहत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों के प्रति कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत्। नि बर्हिषि सदतं सोमपीतये॥ १॥

आ। मित्रे। वरुणे। वयम्। गीःऽभिः। जुहुमः। अत्रिऽवत्। नि। बर्हिषि। सदतम्। सोमऽपीतये॥ १॥

पदार्थः-(आ) (मित्रे) (वरुणे) उत्तमे पुरुषे **(वयम्) (गीर्भिः)** वाग्भिः **(जुहुमः) (अत्रिवत्)** अविद्यमानत्रिविधदुःखेन तुल्यम् **(नि) (बर्हिषि)** उत्तमे गृहे आसने वा **(सदतम्)** सीदतम् **(सोमपीतये)** सोमस्य पानाय॥ १॥

अन्वयः-हे अध्यापकोपदेशकौ! वयं गीर्भिरत्रिवन्मित्रे वरुण आ जुहुमः युवां सोमपीतये बर्हिषि उत्तमे नि सदतम्॥ १॥

भावार्थः-ये मित्रवद्वर्त्तित्वा सर्वं जगत्सत्कुर्वन्ति तदनुसरणैः सर्वैर्वर्त्तितव्यम्॥ १॥

पदार्थः-हे अध्यापक और उपदेशक जनो! जैसे **(वयम्)** हम लोग **(गीर्भिः)** वाणियों से **(अत्रिवत्)** नहीं विद्यमान तीन प्रकार का दुःख जिसको उसके तुल्य **(मित्रे)** मित्र और **(वरुणे)** उत्तम पुरुष के निमित्त **(आ, जुहुमः)** अच्छे प्रकार होम करते है और आप **(सोमपीतये)** सोम रस के पान करने के लिये **(बर्हिषि)** उत्तम गृह वा आसन में **(नि, सदतम्)** बैठिये॥ १॥

भावार्थः-जो मित्र के सदृश वर्त्ताव करके संपूर्ण जगत् का सत्कार करते हैं, उनके अनुसार सबको वर्त्तना चाहिये॥ १॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना। नि बर्हिषि सदतं सोमपीतये॥ २॥[२]

व्रतेन। स्थः। ध्रुवऽक्षेमा। धर्मणा। यातयत्ऽजना। नि। बर्हिषि। सदतम्। सोमऽपीतये॥ २॥

---

२. अन्यत्र 'सदताम्' उपलभ्यते।

पदार्थः-(व्रतेन) धर्मयुक्तेन कर्म्मणा **(स्थः)** भवथः **(ध्रुवक्षेमा)** ध्रुवं क्षेमं रक्षणं ययोस्तौ **(धर्म्मणा)** धर्म्मेण सह वर्त्तमानौ **(यातयज्जना)** यातयन्तो जना ययोस्तौ **(नि) (बर्हिषि)** उत्तमे व्यवहारे **(सदतम्)** तिष्ठतम् **(सोमपीतये)** सोमस्य पानाय॥२॥

अन्वयः-हे ध्रुवक्षेमा यातयज्जना! यौ युवां धर्म्मणा व्रतेन स्थस्तौ सोमपीतये बर्हिषि निषदतम्॥२॥

भावार्थः-जो मनुष्य निश्चितधर्मव्रतशीलानि धरन्ति ते स्थिरसुखा जायन्ते॥२॥

पदार्थः-हे **(ध्रुवक्षेमा)** निश्चित रक्षण और **(यातयजना)** यत्न कराते हुए जनों वाले मनुष्यो! जो तुम **(धर्म्मणा)** धर्म्म के और **(व्रतेन)** धर्म्मयुक्त कर्म्म के साथ वर्त्तमान **(स्थः)** होते हो **[**वे दोनों आप**]** **(सोमपीतये)** सोम पीने के लिये **(बर्हिषि)** उत्तम व्यवहार में **(नि, सदतम्)** उपस्थित हूजिये॥२॥

भावार्थः-जो मनुष्य निश्चित धर्म्म व्रत और शील को धारण करते हैं, वे दृढ़ सुख से युक्त होते हैं॥२॥

मनुष्यैरिह कथं वर्त्तितव्यमित्याह॥

मनुष्यों को यहां कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

मि॒त्रश्च॑ नो॒ वरु॑णश्च जु॒षेतां॑ य॒ज्ञमि॒ष्टये॑। नि ब॒र्हिषि॑ सदतं॒ सोम॑पीतये॥३॥१०॥५॥

मित्रः। च॒। नः। वरु॑णः। च॒। जु॒षेता॑म्। य॒ज्ञम्। इ॒ष्टये॑। नि। ब॒र्हिषि॑। स॒द॒त॒म्। सोम॑ऽपीतये॥३॥

पदार्थः-(मित्रः) सखा **(च)** **(नः)** अस्माकम् **(वरुणः)** वरणीयः **(च)** **(जुषेताम्)** **(यज्ञम्)** **(इष्टये)** इष्टसुखाय **(नि)** **(बर्हिषि)** उत्तमे व्यवहारे **(सदतम्)** निषीदतम् **(सोमपीतये)** सोमस्य पानाय॥३॥

अन्वयः-हे स्त्रीपुरुषौ! यथा मित्रश्च वरुणश्चेष्टये सोमपीतये नो यज्ञं जुषेतां बर्हिष्याशाते तथा युवां निषदतम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सखीवद्वर्त्तित्वेष्टसुखं सिषाधिषन्ति ते गणनीया जायन्ते॥३॥

अत्र मित्रवरुणविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे द्विसप्ततितमं सूक्तं पञ्चमोऽनुवाकश्चतुर्थाष्टको दशमो वर्गश्च समाप्तः॥

पदार्थः-हे स्त्री पुरुषो! जैसे **(मित्रः)** मित्र **(च)** और **(वरुणः)** स्वीकार करते योग्य जन **(च)** भी **(इष्टये)** इष्ट सुख के लिये और **(सोमपीतये)** सोमरस के पान के लिये **(नः)** हम लोगों के **(यज्ञम्)** यज्ञ का **(जुषेताम्)** सेवन करिये और **(बर्हिषि)** उत्तम व्यवहार में प्रवृत्त होते हैं, वैसे आप दोनों **(नि, सदतम्)** स्थिर हूजिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मित्र के सदृश वर्त्ताव करके वांछित सुख से सिद्ध करने की इच्छा करते हैं, वे गणना करने योग्य होते हैं॥३॥

इस सूक्त में मित्र और श्रेष्ठ विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह ऋग्वेद में बहत्तरवां सूक्त पञ्चम अनुवाक और चतुर्थ अष्टक में दशवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

यदद्य स्थ इति दशर्चस्य त्रिसप्ततितमस्य सूक्तस्य पौर आत्रेय ऋषिः। अश्विनौ देवते। १, २, ५, ७, निचृदनुष्टुप्। ३, ४, ६, ८, ९ अनुष्टुप्। १० विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

पुनः स्त्रीपुरुषौ कथं वर्त्तेयातामित्याह॥

अब दश ऋचा वाले तिहत्तरवें सूक्त का आरम्भ है, इसके प्रथम मन्त्र में फिर स्त्री-पुरुष कैसे वर्त्तें, इस विषय को कहते हैं॥

यद॒द्य स्थः पर॒वति॒ यदर्वा॒वत्य॑श्विना। यद्वा॑ पु॒रू पु॑रुभुजा॒ यद॒न्तरि॑क्ष॒ आ ग॑तम्॥ १॥

यत्। अ॒द्य। स्थः। प॒रा॒ऽव॒ति॑। यत्। अ॒र्वा॒ऽव॒ति॑। अ॒श्वि॒ना॒। यत्। वा॒। पु॒रु। पु॒रु॒ऽभु॒जा॒। यत्। अ॒न्तरि॑क्षे। आ। ग॒त॒म्॥ १॥

पदार्थः-(यत्) यौ **(अद्य)** **(स्थः)** तिष्ठथः **(परावति)** दूरदेशे **(यत्)** यौ **(अर्वावति)** निकटदेशे **(अश्विना)** वायुविद्युतौ **(यत्)** यौ **(वा)** **(पुरू)** बहु। अत्र **संहितायामि**ति दीर्घः। **(पुरुभुजा)** बहुपालकौ **(यत्)** यौ **(अन्तरिक्षे)** आकाशे **(आ)** **(गतम्)** आगच्छतम्॥ १॥

अन्वयः-हे स्त्रीपुरुषा! यदश्विना परावति यदर्वावति यत् पुरुभुजा वा यदन्तरिक्षे पुरू स्थस्तयोर्विज्ञानायाऽद्यागतम्॥ १॥

भावार्थः-यौ ब्रह्मचर्य्येण विद्यामधीत्य परस्परप्रीत्या गृहारम्भं कुर्य्यातां तौ स्त्रीपुरुषौ शिल्पविद्यामपि साद्धुं शक्नुयाताम्॥ १॥

पदार्थः-हे स्त्री पुरुषो! **(यत्)** जो **(अश्विना)** वायु **[**और**]** बिजुली **(परावति)** दूर देश में और **(यत्)** जो **(अर्वावति)** निकट देश में **(यत्)** जो **(पुरुभुजा)** बहुतों के पालन करने वाले **(वा)** वा **(यत्)** जो **(अन्तरिक्षे)** आकाश में **(पुरू)** बहुत **(स्थः)** स्थित होते हैं, उनके विज्ञान के लिये **(अद्य)** आज **(आ, गतम्)** आइये॥ १॥

भावार्थः-जो ब्रह्मचर्य्य से विद्या को पढ़कर परस्पर प्रीति से गृहारम्भ करें, वे स्त्री-पुरुष शिल्प विद्या को भी सिद्ध कर सकें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

इ॒ह त्या पु॑रुभूत॒मा पु॒रू दंसां॑सि॒ बिभ्र॑ता। व॒र॒स्या या॒म्यध्रि॑गू हु॒वे तु॑विष्ट॒मा भु॒जे॥ २॥

इ॒ह। त्या। पु॒रु॒ऽभू॒त॒मा। पु॒रु। दंसां॑सि। बिभ्र॑ता। व॒र॒स्या। या॒मि॒। अध्रि॑गू॒ इत्यध्रि॑ऽगू। हु॒वे। तु॒विः॒ऽत॒मा। भु॒जे॥ २॥

पदार्थः-(इह) (**त्या**) तौ (**पुरुभूतमा**) अतिशयेन बहुव्यापकौ (**पुरू**) बहूनि (**दंसांसि**) कर्म्माणि (**बिभ्रता**) धरन्तौ (**वरस्या**) अतिशयेन वरौ (**यामि**) प्राप्नोमि (**अध्रिगू**) अधिकगन्तारौ (**हुवे**) स्वीकरोमि (**तुविष्टमा**) अतिशयेन बलिष्ठौ (**भुजे**) भोगाय॥२॥

अन्वयः-हे पत्नि! यौ पुरुभूतमा पुरु दंसांसि बिभ्रता वरस्या तुविष्टमाऽध्रिगू इह भुजे हुवे याभ्यामिष्टसिद्धिं यामि त्या त्वमपि संप्रयुङ्क्ष्व॥२॥

भावार्थः-यत्र स्त्रीपुरुषौ तुल्यगुणकर्म्मस्वभावसुरूपौ वर्त्तेते तत्र सकलपदार्थविद्या जायते॥२॥

पदार्थः-हे स्त्रि! जिन (**पुरुभूतमा**) अत्यन्त बहुत व्यापक (**पुरु**) बहुत (**दंसांसि**) कर्म्मों को (**बिभ्रता**) धारण करते हुए (**वरस्या**) अत्यन्त श्रेष्ठ और (**तुविष्टमा**) अत्यन्त बलिष्ठ (**अध्रिगू**) अधिक चलने वालों को (**इह**) इस संसार में (**भुजे**) भोग के लिये (**हुवे**) स्वीकार करता हूं, जिन दोनों से इष्टसिद्धि को (**यामि**) प्राप्त होता हूं (**त्या**) उन दोनों को तू भी संप्रयुक्त कर॥२॥

भावार्थः-जहां स्त्री और पुरुष तुल्य गुण, कर्म्म, स्वभाव और सुरूपवान् हैं, वहाँ सम्पूर्ण पदार्थविद्या होती है॥२॥

मनुष्यैरतः परं किं कर्त्तव्यमित्याह॥

मनुष्यों को इसके आगे क्या करना चाहिये, इस विषय को कहते हैं॥

ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः। पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः॥३॥

ईर्मा। अन्यत्। वपुषे। वपुः। चक्रम्। रथस्य। येमथुः। परि। अन्या। नाहुषा। युगा। मह्ना। रजांसि। दीयथः॥३॥

पदार्थः-(ईर्मा) प्राप्तव्यं ज्ञातव्यं वा (**अन्यत्**) (**वपुषे**) सुरूपाय (**वपुः**) सुरूपम् (**चक्रम्**) चरति येन तत् (**रथस्य**) (**येमथुः**) गमयतम् (**परि**) सर्वतः (**अन्या**) अन्यानि (**नाहुषा**) मनुष्याणामिमानि (**युगा**) युगानि वर्षाणि वर्षसमूहा वा (**मह्ना**) महत्त्वेन (**रजांसि**) लोकान् (**दीयथः**) क्षयथः॥३॥

अन्वयः-हे स्त्रीपुरुषौ! वायुसूर्य्याविव यौ युवां रथस्य चक्रमिव वपुषेऽन्यदीर्मा वपुर्येमथुरन्या नाहुषा युगा परियेमथुर्मह्ना रजांसि दीयथस्तौ कालविद्यां ज्ञातुमर्हथः॥३॥

भावार्थः-हे मनुष्या! यथा रथचक्राणि भ्रमन्ति तथाऽहर्निशं कालचक्रं भ्रमति येन क्षणादियुगकल्पमहाकल्पादिका गणितविद्या सिद्ध्यतीति वित्त॥३॥

पदार्थः-हे स्त्री और पुरुषो! वायु और सूर्य्य के सदृश जो तुम (**रथस्य**) वाहन के (**चक्रम्**) चलता है जिससे उस पहिये के सदृश (**वपुषे**) सुन्दर रूप के लिये (**अन्यत्**) अन्य (**ईर्मा**) प्राप्त होने वा जानने योग्य (**वपुः**) सुरूप को (**येमथुः**) प्राप्त होओ और (**अन्या**) अन्य (**नाहुषा**) मनुष्यों के सम्बन्धी (**युगा**) वर्ष वा वर्षों के समूहों को (**परि**) सब ओर से प्राप्त होओ और (**मह्ना**) महत्त्व से (**रजांसि**) लोकों का (**दीयथः**) नाश करते हो, वे कालविद्या के जानने योग्य हो॥३॥

भावार्थः-हे मनुष्यो! जैसे रथ के पहिये घूमते हैं, वैसे दिन-रात्रि कालसम्बन्धी चक्र घूमता है, जिससे क्षण आदि तथा युग, कल्प और महाकल्प आदि सम्बन्धी गणितविद्या सिद्ध होती है, ऐसा जानो॥३॥

पुनर्मनुष्याः किं विजानीयुरित्याह॥

फिर मनुष्य क्या विशेष जानें, इस विषय को कहते हैं॥

तदू षु वामेना कृतं विश्वा यद्वामनु ष्टवे।
नाना जातावरेपसा समस्मे बन्धुमेयथुः॥४॥

तत्। ऊँ इति। सु। वाम्। एना। कृतम्। विश्वा। यत्। वाम्। अनु। स्तवे। नाना। जातौ। अरेपसा। सम्। अस्मे इति। बन्धुम्। आ। ईयथुः॥४॥

पदार्थः-(तत्) (उ) (सु) (वाम्) युवाम् **(एना)** एनानि **(कृतम्)** निष्पादितम् **(विश्वा)** सर्वाणि **(यत्)** यानि **(वाम्)** युवाम् **(अनु) (स्तवे)** स्तौमि **(नाना) (जातौ)** प्रकटौ **(अरेपसा)** अनपराधिनौ **(सम्) (अस्मे)** अस्माकम् **(बन्धुम्) (आ) (ईयथुः)** प्राप्नुयातम्। अत्र पुरुषव्यत्ययः॥४॥

अन्वयः-हे अध्यापकोपदेशकौ! यद्युवाभ्यां कृतं तदेना विश्वाहमनुष्टवे यावरेपसा नाना जातौ वां प्राप्नुथ**[स्]**तावस्मे बन्धुं समेयथुस्तदु अहं वां सुप्रेरयेयम्॥४॥

भावार्थः-हे मनुष्या! यथाहं वायुविद्युद्विद्यां जानीयां तथैव यूयमपि विजानीत॥४॥

पदार्थः-हे अध्यापक और उपदेशक जनो! **(यत्)** जो आप दोनों ने **(कृतम्)** सिद्ध किया **(तत्)** उन **(एना)** इन **(विश्वा)** संपूर्णों की मैं **(अनु, स्तवे)** स्तुति करता हूँ और जो **(अरेपसा)** अपराधरहित **(नाना)** अनेक प्रकार **(जातौ)** प्रकट **(वाम्)** आप दोनों प्राप्त होते हैं वह **[**=आप दोनों**]** **(अस्मे)** हम लोगों के **(बन्धुम्)** बन्धु को **(सम्, आ, ईयथुः)** प्राप्त हूजिये **(उ)** और उसको मैं **(वाम्)** आप दोनों की **(सु)** उत्तम प्रकार प्रेरणा करूं॥४॥

भावार्थः-हे मनुष्यो! जैसे मैं वायु और बिजुली की विद्या को जानूं, वैसे ही आप लोग भी जानिये॥४॥

पुनः स्त्रियः कीदृशो भवेयुरित्याह॥

फिर स्त्रियाँ कैसी हों, इस विषय को कहते हैं॥

आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा।
परि वामरुषा वयो घृणा वरन्त आतपः॥५॥११॥

आ। यत्। वाम्। सूर्या। रथम्। तिष्ठत्। रघुऽस्यदम्। सदा। परि। वाम्। अरुषाः। वयः। घृणा। वरन्ते। आऽतपः॥५॥

पदार्थः-(आ) समन्तात् **(यत्)** या **(वाम्)** युवयोः **(सूर्या)** सूर्य्यसम्बन्धिन्युषा इव **(रथम्)** विमानादियानम् **(तिष्ठत्)** तिष्ठति **(रघुष्यदम्)** या लघु स्यन्दति सा **(सदा)** निरन्तरम् **(परि)** **(वाम्)** युवयोः **(अरुषाः)** रक्तभास्वरगुणाः **(वयः)** पक्षिणः **(घृणा)** दीप्तिः **(वरन्ते)** स्वीकुर्वन्ति **(आतपः)** समन्तात् प्रतापकः॥५॥

अन्वयः-हे मनुष्या! यद्या घृणारुषा सूर्योषा इव स्त्री वां रघुष्यदं रथमातिष्ठत् वां वयः परि वरन्ते सा आतप इव सदोपकारिणी भवति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा प्रातर्वेला सर्वथा प्रिया सुखप्रदा वर्त्तते तथा परस्परं प्रीतौ स्त्रीपुरुषौ प्रसन्नौ वर्त्तेते॥५॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(घृणा)** प्रकाशित **(अरुषाः)** लाल चमकते हुए गुणों वाली **(सूर्या)** सूर्य्यसम्बन्धिनी प्रातर्वेला के सदृश स्त्री **(वाम्)** तुम्हारे **(रघुष्यदम्)** थोड़े चलने वाले **(रथम्)** विमान आदि वाहन पर **(आ)** सब प्रकार से **(तिष्ठत्)** स्थित होती है, जिसको **(वाम्)** आप दोनों के **(वयः)** पक्षी **(परि, वरन्ते)** सब ओर से स्वीकार करते हैं, वह **(आतपः)** चारों और से उष्ण करने वाले घर्म्म के सदृश **(सदा)** सब काल में उपकार करने वाली होती है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रातःकाल सब प्रकार से प्रिय और सुखकारक है, वैसे परस्पर प्रीतियुक्त स्त्री पुरुष प्रसन्न [रहते] हैं॥५॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा।
घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति॥६॥

युवोः। अत्रिः। चिकेतति। नरा। सुम्नेन। चेतसा। घर्मम्। यत्। वाम्। अरेपसम्। नासत्या। आस्ना। भुरण्यति॥६॥

पदार्थः-(युवोः) अध्यापकोपदेशकयोः **(अत्रिः)** अविद्यमानत्रिविधदुःखम् **(चिकेतति)** जानाति **(नरा)** नायकौ धर्म्मपथनेतारौ **(सुम्नेन)** सुखेन **(चेतसा)** चित्तेन **(घर्मम्)** यज्ञम् **(यत्)** यः **(वाम्)** युवयोः **(अरेपसम्)** अनपराधिनम् **(नासत्या)** अविद्यमानासत्यौ **(आस्ना)** आस्येन **(भुरण्यति)** धरति॥६॥

अन्वयः-हे नासत्या नरा! यद्योऽत्रिः सुम्नेन चेतसा युवोर्घर्मं चिकेतत्यास्ना वामरेपसं यज्ञं भुरण्यति तं युवां ज्ञापयेताम्॥६॥

भावार्थः-ये पुरुषा विद्वत्सङ्गेनाध्ययनाध्यापनं यज्ञं विस्तारयन्ति ते जगदुपकारकाः सन्ति॥६॥

पदार्थः-हे **(नासत्या)** असत्य से रहित **(नरा)** धर्म्म मार्ग में चलने वाले दो नायक जनो! **(यत्)** जो **(अत्रिः)** आध्यात्मिक, आधिभौतिक, आधिदैविक आदि तीन प्रकार के दुःख से रहित जन **(सुम्नेन)**

सुख और **(चेतसा)** चित्त से **(युवोः)** आप दोनों अध्यापक और उपदेशकों के **(घर्मम्)** यज्ञ को **(चिकेतति)** जानता और **(आस्ना)** मुख से **(वाम्)** आप दोनों के **(अरेपसम्)** अपराध रहित यज्ञ को **(भुरण्यति)** धारण करता है, उसको आप जानिये॥६॥

भावार्थः-जो पुरुष विद्वानों के संग से अध्ययन और अध्यापन रूप यज्ञ का विस्तार करते हैं, वे संसार के उपकारक हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒ग्रो वां॑ कक्कु॒हो य॒यिः शृ॒ण्वे यामे॑षु संत॒निः।

यद्वां॑ दंसो॑भिरश्वि॒नात्रि॑र्नरा॒व॒र्त॑ति॥७॥

उ॒ग्रः। वा॒म्। क॒कु॒हः। य॒यिः। शृ॒ण्वे। यामे॑षु। स॒म्ऽत॒निः। यत्। वा॒म्। दंस॑ःऽभिः। अ॒श्वि॒ना॒। अत्रिः॑। न॒रा॒। आ॒ऽव॒र्त॑ति॥७॥

पदार्थः-(उग्रः) तेजस्वी **(वाम्)** युवाम् **(ककुहः)** महान् **(ययिः)** यो याति सः **(शृण्वे)** **(यामेषु)** प्रहरेषु **(सन्तनिः)** सम्यक् विस्तारकः **(यत्)** यः **(वाम्)** युवयोः **(दंसोभिः)** कर्म्मभिः **(अश्विना)** अध्यापकोपदेशकौ **(अत्रिः)** अत्रिवारम् **(नरा)** नेतारौ **(आववर्तति)** भृशं वर्त्तते॥७॥

अन्वयः-हे नराश्विना! यद्यो ययिः ककुह उग्रः सन्तनिरहं यामेषु वां शृण्वे यश्च वां दंसोभिरत्रिरावर्त्तति ता आवां युवां बोधयतम्॥७॥

भावार्थः-ये मनुष्या सूर्य्यचन्द्रवन्नियमेन वर्त्तित्वा कार्य्याणि साध्नुवन्ति ते सर्वदोन्नता जायन्ते॥७॥

पदार्थः-हे **(नरा)** नायक **(अश्विना)** अध्यापक और उपदेशक जनो! **(यत्)** जो **(ययिः)** चलने वाला **(ककुहः)** बड़ा **(उग्रः)** तेजस्वी **(सन्तनिः)** उत्तम प्रकार विस्तारकर्त्ता मैं **(यामेषु)** प्रहरों में **(वाम्)** आप दोनों को **(शृण्वे)** सुनूं और जो **(वाम्)** आप दोनों के **(दंसोभिः)** कर्म्मों से **(अत्रिः)** न तीन वार **(आववर्त्तति)** अत्यन्त वर्त्तमान हैं, उन हम दोनों को आप दोनों बोध कराइये॥७॥

भावार्थः-जो मनुष्य सूर्य्य और चन्द्रमा के सदृश नियम से वर्त्ताव करके कार्य्यों को सिद्ध करते हैं, वे सर्वदा उन्नत होते हैं॥७॥

पुनर्मनुष्यै किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

मध्व॑ ऊ॒ षु मधू॑युवा॒ रुद्रा॒ सिष॑क्ति पि॒प्युषी॑।

यत्स॑मु॒द्राति॒ पर्ष॑थः पु॒क्वाः पृक्षो॑ भरन्त वाम्॥८॥

मध्व॑:। ऊँ इति॑। सु। म॒धु॒ऽयु॒वा॒। रु॒द्रा॑। सिस॑क्ति। पि॒प्युषी॑। यत्। स॒मु॒द्रा॒। अति॑। पर्षथ:। प॒क्वा:। पृक्ष॑:। भ॒र॒न्त॒। वा॒म्॥८॥

पदार्थ:-(मध्व:) मधुरस्य **(उ)** वितर्के **(सु)** **(मधूयुवा)** यौ मधूनि यावयतस्तौ **(रुद्रा)** दुष्टानां रोदयितारौ **(सिषक्ति)** सिञ्चति **(पिप्युषी)** प्यायन्ती **(यत्)** या **(समुद्रा)** यानि सम्यग्द्रवन्ति **(अति)** **(पर्षथ:)** सिञ्चथ: **(पक्वा:)** **(पृक्ष:)** संपर्का: **(भरन्त)** भरन्ति **(वाम्)** युवयो:॥८॥

अन्वय:-हे मधूयुवा रुद्रा! यद्या पिप्युषी मध्व ऊ षु सिषक्ति तया युवां समुद्रातिपर्षथो यत: पक्वा: पृक्षो वां भरन्त॥८॥

भावार्थ:-हे मनुष्या! यथा सूर्य्यवायू वृष्ट्या सर्वान् सिञ्चत: पक्वानि फलानि जनयतस्तथा यूयमप्याचरत॥८॥

पदार्थ:-हे **(मधूयुवा)** सोम आदि रस को मिलाने और **(रुद्रा)** दुष्टों के रुलाने वाले जनो! **(यत्)** जो **(पिप्युषी)** पान कराती हुई **(मध्व:)** सोमलता के रस को **(उ)** तर्क-वितर्क से **(सु, सिषक्ति)** अच्छे प्रकार सींचती है, उससे आप दोनों **(समुद्रा)** उत्तम प्रकार द्रवित होने वालों को **(अति, पर्षथ:)** सींचते हैं जिससे **(पक्वा:)** पके **(पृक्ष:)** सम्बन्ध हुए फल **(वाम्)** आप दोनों का **(भरन्त)** पोषण करते हैं॥८॥

भावार्थ:-हे मनुष्यो! जैसे सूर्य्य और वायु वृष्टि से सब को सींचते और पके हुए फलों को उत्पन्न करते हैं, वैसे आप लोग भी आचरण करो॥८॥

पुनर्मनुष्यै: किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

स॒त्यमिद्वा उ॑ अश्विना यु॒वामा॑हुर्मयो॒भुवा॑।
ता याम॑न् याम॒हूत॑मा याम॒न्ना मृ॑ळ॒यत्त॑मा॥९॥

स॒त्यम्। इत्। वै। ऊँ इति॑। अ॒श्वि॒ना॒। यु॒वाम्। आ॒हु॒:। म॒यो॒ऽभुवा॑। ता। याम॑न्। या॒म॒ऽऊ॒हूत॑मा। याम॑न्। आ। मृ॒ळ॒यत्ऽत॑मा॥९॥

पदार्थ-(सत्यम्) यथार्थं व्यवहारमुदकं वा **(इत्)** अपि **(वै)** निश्चये **(उ)** वितर्के **(अश्विना)** द्यावापृथिव्याविवाध्यापकोपदेशकौ **(युवाम्)** **(आहु:)** कथयन्ति **(मयोभुवा)** सुखं भावुकौ **(ता)** तौ **(यामन्)** यामनि प्रहरादौ **(यामहूतमा)** यौ यामानाह्वयतस्तावतिशयितौ **(यामन्)** यामनि **(आ)** **(मृळयत्तमा)** अत्यन्तसुखकारकौ॥९॥

अन्वय:-हे मयोभुवाऽश्विना! यौ युवां यामहूतमा यामन्नामृळयत्तमा आहुस्ता यामन् वै सत्यमु इत्प्रचारयेतम्॥९॥

भावार्थ:-यथा भूमिमेघौ सर्वेषां प्राणिनां सुखकरौ वर्त्तेते तथैवाध्यापकोपदेशकौ भृशं सुखकरौ भवेताम्॥९॥

पदार्थः-हे **(मयोभुवा)** सुखकारक **(अश्विना)** अन्तरिक्ष और पृथिवी के सदृश अध्यापक और उपदेशक जनो! जो **(युवाम्)** आप दोनों **(यामहूतमा)** प्रहरों को बुलाने वाले अत्यन्त **(यामन्)** प्रहर में **(आ, मृळयत्तमा)** सब ओर से अतीव सुखकारकों को **(आहुः)** कहते हैं **(ता)** वे दोनों **(यामन्)** प्रहर में **(वै)** निश्चय **(सत्यम्)** यथार्थ व्यवहार वा जल को **(उ)** तर्क के साथ **(इत्)** भी प्रचारित कीजिये॥९॥

भावार्थः-जैसे भूमि और मेघ सब प्राणियों के सुखकारक हैं, वैसे ही अध्यापक और उपदेशक जन अत्यन्त सुखकारक हों॥९॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् क्या करें, इस विषय को कहते हैं॥

इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा।

या तक्षाम रथाँइवावोचाम बृहन्नमः॥१०॥१२॥

इमा। ब्रह्माणि। वर्धना। अश्विऽभ्याम्। सन्तु। शम्ऽतमा। या। तक्षाम। रथान्ऽइव। अवोचाम। बृहत्। नमः॥१०॥

पदार्थः-(इमा) इमानि **(ब्रह्माणि)** धनान्यन्नानि वा **(वर्धना)** वर्धन्ते तानि **(अश्विभ्याम्)** द्यावापृथिवीभ्याम् **(सन्तु)** **(शन्तमा)** अतिशयेन सुखकराणि **(या)** यानि **(तक्षाम)** संवृणुयामाऽऽच्छादयाम स्वीकुर्य्याम **(रथानिव)** **(अवोचाम)** उपदिशेम **(बृहत्)** महत् **(नमः)** सत्कारम्॥१०॥

अन्वयः-हे मनुष्या! अश्विभ्यां येमा वर्धना शन्तमा ब्रह्माणि रथानिव तक्षाम तानि युष्मभ्यं सुखकाराणि सन्तु तैर्बृहन्नमो वयमवोचाम॥१०॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! भवन्तो यथा वस्त्रादिना रथानावृत्य शृङ्गारयन्ति तथैव धनधान्यानि संगृह्य सुसंस्कृतानि कुर्य्युः शुद्धान्नभोगेन महद्विज्ञानं प्राप्यान्यानप्येतदुपपदिशेयुः॥१०॥

अत्राश्विविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिसप्ततितमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(अश्विभ्याम्)** अन्तरिक्ष और पृथिवी से **(या)** जो **(इमा)** ये **(वर्धना)** वृद्धि को प्राप्त होते जिनसे उन **(शन्तमा)** अत्यन्त सुखकारक **(ब्रह्माणि)** धनों या अन्नों का **(रथानिव)** रथों के समान **(तक्षाम)** आच्छादन करें, वे आप लोगों के लिये सुखकारक **(सन्तु)** हों उनसे **(बृहत्)** बड़े **(नमः)** सत्कार का हम **(अवोचाम)** उपदेश करें॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! आप जैसे वस्त्र आदि से वाहनों को उढ़ाकर शृङ्गारयुक्त करते हैं, वैसे ही धन और धान्यों को उत्तम प्रकार ग्रहण करके उत्तम प्रकार संस्कारयुक्त करें और शुद्ध अन्न के भोग से बड़े विज्ञान को प्राप्त होकर अन्य जनों को भी इस का उपदेश करें॥१०॥

इस सूक्त में अन्तरिक्ष पृथिवी और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इस से पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह तिहत्तरवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

कूष्ठ इति दशर्चस्य चतु:सप्ततितमस्य सूक्तस्य आत्रेय ऋषि:। अश्विनौ देवते। १, २, १० विराडनुष्टुप्। ३ अनुष्टुप्। ४, ५, ६, ९ निचृदनुष्टुप् छन्द:। गान्धार: स्वर:। ७ भुरिगुष्णिक्। ८ निचृदुष्णिक् छन्द:। ऋषभ: स्वर:॥

अथ मनुष्यै: किमनुष्ठेयमित्याह॥

[अब दश ऋचा वाले चौहत्तरवें सूक्त का आरम्भ है, इसके प्रथम मन्त्र में] अब मनुष्यों को क्या अनुष्ठान करना चाहिये, इस विषय को कहते हैं॥

कूष्ठो॑ देवावश्विना॒द्या दि॒वो म॑नावसू।
तच्छ्र॑वथो वृषण्वसू अत्रि॑र्वा॒मा वि॑वासति॥ १॥

कू॒स्थ॑:। दे॒वौ॒। अ॒श्वि॒ना॒। अ॒द्य। दि॒व:। म॒ना॒व॒सू॒ इति॑। तत्। श्र॒व॒थ॒:। वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू। अत्रि॑:। वा॒म्। आ। वि॒वा॒स॒ति॒॥ १॥

पदार्थ:-(कूष्ठ:) य: कौ पृथिव्यां तिष्ठति **(देवौ)** विद्वांसौ **(अश्विना)** व्याप्तविद्यौ **(अद्य)** **(दिव:)** प्रकाशस्य **(मनावसू)** यौ मनो वासयतस्तौ **(तत्)** **(श्रवथ:)** शृणुथ: **(वृषण्वसू)** यौ वृषणो वासयतस्तौ **(अत्रि:)** आप्तविद्य: **(वाम्)** **(आ, विवासति)** समन्तात्सेवते॥ १॥

अन्वय:-हे मनावसू वृषण्वसू अश्विना देवौ! य: कूष्ठोऽत्रिरद्य दिवो वामाविवासति तद्युवां श्रवथ:॥ १॥

भावार्थ:-हे विद्वांसो! ये युष्मान् सेवन्ते ते बहुश्रुता मननशीला विद्वांस: सर्वाणि सत्कर्म्माणि सेवन्ते ते दु:खरहिता जायन्ते॥ १॥

पदार्थ:-हे **(मनावसू)** मन को वसाने वाले **(वृषण्वसू)** उत्तमों को वसाने वाले **(अश्विना)** विद्या से व्याप्त **(देवौ)** विद्वानो! जो **(कूष्ठ:)** पृथिवी में स्थित होने वाला **(अत्रि:)** विद्या प्राप्त जन **(अद्य)** इस समय **(दिव:)** प्रकाश के सम्बन्ध में **(वाम्)** आप दोनों का **(आ, विवासति)** सब प्रकार से सेवन करता है **(तत्)** उसको आप दोनों **(श्रवथ:)** सुनते हैं॥ १॥

भावार्थ:-हे विद्वानो! जो आप लोगों का सेवन करते हैं वे बहुश्रुत, विचारशील विद्वान् जन सम्पूर्ण श्रेष्ठ कर्म्मों का सेवन करते हैं और वे दु:ख से रहित होते हैं॥ १॥

पुनर्मनुष्यैर्विदुष: प्रति कथं प्रष्टव्यमित्याह॥

फिर मनुष्यों को विद्वानों के प्रति कैसे पूछना चाहिये, इस विषय को कहते हैं॥

कुह॒ त्या कुह॒ नु श्रु॒ता दि॒वि नास॑त्या।
कस्मि॒न्ना य॑तथो॒ जने॒ को वां॑ न॒दीनां॒ सचा॑॥ २॥

कुहा। त्या। कुहा। नु। श्रुता। दिवि। देवा। नासत्या। कस्मिन्। आ। यतथः। जने। कः। वाम्। नदीनाम्। सचा॥ २॥

पदार्थः-(कुह) क्व **(त्या)** तौ **(कुह)** **(नु)** सद्यः **(श्रुता)** श्रुतौ **(दिवि)** दिव्ये व्यवहारे प्रकाशे वा **(देवा)** दिव्यगुणौ **(नासत्या)** सत्यस्वरूपौ **(कस्मिन्)** **(आ)** **(यतथः)** यतेथे। अत्र व्यत्ययेन परस्मैपदम्। **(जने)** **(कः)** **(वाम्)** युवाम् **(नदीनाम्)** **(सचा)** समवाये॥ २॥

अन्वयः-हे अध्यापकोपदेशकौ! त्या नासत्या कुह वर्त्तेते कुह श्रुता देवा भवतो युवां कस्मिञ्जन आ यतथो वां तयोर्युवयोर्नदीनां सचा को न्वस्ति यौ दिव्या यतथः॥ २॥

भावार्थः-जिज्ञासुभिर्विदुषां सनीडं गत्वा विद्युदादिविद्याः प्रष्टव्याः॥ २॥

पदार्थः-हे अध्यापक और उपदेशक जनो! **(त्या)** ये **(नासत्या)** सत्यस्वरूप **(कुह)** कहाँ वर्त्तमान हैं और **(कुह)** कहाँ **(श्रुता)** सुने हुए **(देवा)** श्रेष्ठ गुण वाले होते हैं और तुम **(कस्मिन्)** किस **(जने)** जन में **(आ, यतथः)** सब ओर से यत्न करते हो **(वाम्)** उन आप दोनों की **(नदीनाम्)** नदियों के **(सचा)** सम्बन्ध से **(कः)** कौन **(नु)** शीघ्र है जो **(दिवि)** श्रेष्ठ व्यवहार वा प्रकाश में प्रयत्न करते हो॥ २॥

भावार्थः-जिज्ञासु जनों को चाहिये कि विद्वानों के समीप जाकर बिजुली आदि की विद्याओं को पूछें॥ २॥

अथ मनुष्यैः किं प्रष्टव्यमित्याह॥

अब मनुष्यों को क्या पूछना चाहिये, इस विषय को कहते हैं॥

कं याथः कं ह गच्छथः कमच्छा युञ्जाथे रथम्।
कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये॥ ३॥

कम्। याथः। कम्। ह। गच्छथः। कम्। अच्छ। युञ्जाथे इति। रथम्। कस्य। ब्रह्माणि। रण्यथः। वयम्। वाम्। उश्मसि। इष्टये॥ ३॥

पदार्थः-(कम्) **(याथः)** प्राप्नुथः **(कम्)** **(ह)** किल **(गच्छथः)** **(कम्)** **(अच्छा)** अत्र **संहितायामिति** दीर्घः। **(युञ्जाथे)** **(रथम्)** रमणीयं यानम् **(कस्य)** **(ब्रह्माणि)** धनधान्यानि **(रण्यथः)** रमयथः **(वयम्)** **(वाम्)** युवाम् **(उश्मसि)** कामयेमहि **(इष्टये)**॥ ३॥

अन्वयः-हे अध्यापकोपदेशकौ! युवां कं याथः कं गच्छथः कं रथमच्छा युञ्जाथे कस्य ह ब्रह्माणि रण्यथो वयमिष्टये वामुश्मसि॥ ३॥

भावार्थः-हे मनुष्या! विद्वांसो यं प्राप्नुयुर्युञ्जते वाञ्छन्ति तमेव यूयमपीच्छत॥ ३॥

पदार्थः-हे अध्यापक और उपदेशक जनो! आप दोनों **(कम्)** किसको **(याथः)** प्राप्त होते हो और **(कम्)** किसको **(गच्छथः)** जाते हो **(कम्)** किस **(रथम्)** रमण करने योग्य वाहन को **(अच्छा)**

उत्तम प्रकार (**युञ्जाथे**) युक्त होते हो और (**कस्य**) किसके (**ह**) निश्चय से (**ब्रह्माणि**) धन और धान्यों को (**रण्यथः**) रमाते हो (**वयम्**) हम लोग (**इष्टये**) इच्छा के लिये (**वाम्**) आप दोनों की (**उश्मसि**) कामना करें॥३॥

भावार्थः-हे मनुष्यो! विद्वान् जन जिसको प्राप्त होवें और युक्त होते तथा इच्छा करते हैं, उसी की आप लोग इच्छा करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पौरं चिद्ध्युदप्रुतं पौरं पौराय जिन्वथः।

यदीं गृभीततातये सिंहमिव द्रुहस्पदे॥४॥

पौरम्। चित्। हि। उदऽप्रुतम्। पौरं। पौराय। जिन्वथः। यत्। ईम्। गृभीतऽतातये। सिंहम्ऽइव। द्रुहः। पदे॥४॥

पदार्थः-(पौरम्) पुरि भवं मनुष्यम् (**चित्**) अपि (**हि**) यतः (**उदप्रुतम्**) उदकयुक्तम् (**पौर**) पुरोर्मनुष्यस्याऽपत्यं तत्सम्बुद्धौ (**पौराय**) पुरे भवाय (**जिन्वथः**) प्राप्नुथः (**यत्**) यम् (**ईम्**) सर्वतः (**गृभीततातये**) गृहीता तातिः सत्कर्म्मविस्तृतिर्येन (**सिंहमिव**) सिंहवत् (**द्रुहः**) शत्रोः (**पदे**) प्राप्तव्ये॥४॥

अन्वयः-हे पौर! त्वं ह्युदप्रुतं पौरं चित् प्राप्नुहि पौरायाऽध्यापकस्त्वं च जिन्वथो गृभीततातये द्रुहस्पदे सिंहमिव यदीं जिन्वथस्तं त्वं सन्तोषय॥४॥

भावार्थः-हे मनुष्या! यथैकपुरवासिनः परस्परं सुखोन्नतिं कुर्वन्ति तथैव भिन्नदेशवासिनोऽप्याचरन्तु॥४॥

पदार्थः-हे (**पौर**) पुर में हुए! आप (**हि**) ही (**उदप्रुतम्**) जल से युक्त (**पौरम्**) मनुष्य के सन्तान को (**चित्**) निश्चय से प्राप्त हूजिये और (**पौराय**) पुर में हुए मनुष्य के लिये अध्यापक और आप (**जिन्वथः**) प्राप्त होते हो (**गृभीततातये**) ग्रहण किया श्रेष्ठ कर्म्मों का विस्तार जिसने उसके लिये (**द्रुहः**) शत्रु के (**पदे**) प्राप्त होने योग्य स्थान में (**सिंहमिव**) सिंह के सदृश (**यत्**) जिसको (**ईम्**) सब ओर से प्राप्त होते हो, उसको आप सन्तुष्ट कीजिये॥४॥

भावार्थः-हे मनुष्यो! जैसे एक नगर के वासी जन परस्पर सुख की उन्नति करते हैं, वैसे ही अन्य देशवासी भी करें॥४॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को कहते हैं॥

प्रच्यवानाज्जुजुरुषो वव्रिमत्कं न मुञ्चथः।

युवा यदी कृथः पुनरा काममृण्वे वध्वः॥५॥१३॥

प्र। च्यवानात्। जुजुरुषः। वव्रिम्। अत्कम्। न। मुञ्चथः। युवा। यदि। कृथः। पुनः। आ। कामम्। ऋण्वे। वध्वः॥५॥

पदार्थः-(प्र) (च्यवानात्) गमनात् **(जुजुरुषः)** जीर्णावस्थां प्राप्तः **(वव्रिम्)** रूपम्। **वव्रिरिति रूपनामसु पठितम्।** (निघं०१.७)। **(अत्कम्)** व्याप्तम् **(न)** इव **(मुञ्चथः) (युवा)** प्राप्तयौवनावस्थः **(यदी)** अत्र **निपातस्य चे**ति दीर्घः। **(कृथः)** कुरुथः **(पुनः) (आ) (कामम्) (ऋण्वे)** प्रसाध्नोमि **(वध्वः)** भार्यायाः॥५॥

अन्वयः-हे स्त्रीपुरुषौ! जुजुरुषश्च्यवानादत्कं वव्रिं व्यभिचारं प्रमुञ्चथः यदी युवा न कार्यं कृथः पुनर्वध्वः कामं युवा सन्नहमृण्वे तथा युवामाकृथः॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा वृद्धावस्थासु रूपं मुक्त्वा वृद्धावस्थां प्राप्नुवन्ति तथैव दोषज्ञा गुणांस्त्यक्त्वा दोषान् गृह्णन्ति॥५॥

पदार्थः-हे स्त्री-पुरुषो! **(जुजुरुषः)** वृद्धावस्था को प्राप्त जन **(च्यवानात्)** गमन से **(अत्कम्)** व्याप्त **(वव्रिम्)** रूप और व्यभिचार का **(प्र, मुञ्चथः)** त्याग करते हो और **(यदी)** जो **(युवा)** युवावस्था को प्राप्त पुरुष के **(न)** समान कार्य्य को **(कृथः)** करते हो **(पुनः)** फिर **(वध्वः)** स्त्री के **(कामम्)** मनोरथ को युवावस्था को प्राप्त हुआ मैं **(ऋण्वे)** सिद्ध करता हूं, वैसे आप दोनों **(आ)** सब ओर से करिये॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे वृद्धावस्थाओं में रूप का त्याग करके वृद्धावस्था को प्राप्त होते हैं, वैसे ही दोषों के जानने वाले गुणों का त्याग कर के दोषों को ग्रहण करते हैं॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अस्ति॒ हि वा॑मि॒ह स्तो॒ता स्मसि॑ वां सं॒दृशि॑ श्रि॒ये

नू श्रु॒तं म॒ आ ग॑त॒मवो॑भिर्वाजिनीवसू॥६॥

अस्ति॑। हि। वा॒म्। इ॒ह। स्तो॒ता। स्मसि॑। वा॒म्। स॒म्ऽदृशि॑। श्रि॒ये। नु। श्रु॒तम्। मे॒। आ। ग॒त॒म्। अव॑ःऽभिः। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू॥६॥

पदार्थः-(अस्ति) (हि) यतः **(वाम्)** युवयोः **(इह) (स्तोता)** प्रशंसकः **(स्मसि) (वाम्)** युवाम् **(संदृशि)** सादृश्ये **(श्रिये)** धनाय **(नु)** सद्यः **(श्रुतम्) (मे)** मम **(आ) (गतम्)** आगच्छतम् **(अवोभिः)** रक्षणादिभिः **(वाजिनीवसू)** यौ वाजिनीं बह्वन्नादिक्रियां वासयतस्तौ॥६॥

अन्वयः-हे वाजिनीवसू अध्यापकोपदेशकाविह यो वां स्तोतास्ति तं हि वयं प्राप्ताः स्मसि। वां संदृशि श्रिये नु श्रुतमवोभिर्मां प्राप्नुतं मे मम श्रुतमागतम्॥६॥

भावार्थः-ये विदुषां गुणान्त्स्तुवन्ति ते गुणाढ्या भूत्वा विद्वत्सादृश्यं प्राप्य श्रीमन्तो भवन्ति॥६॥

पदार्थः-हे **(वाजिनीवसु)** बहुत अन्नादि क्रिया को वसाने वाले अध्यापक और उपदेशक जनो! **(इह)** इस संसार में जो **(वाम्)** आप दोनों का **(स्तोता)** प्रशंसा करने वाला **(अस्ति)** है उसको **(हि)** जिससे हम लोग प्राप्त **(स्मसि)** होवें और **(वाम्)** आप दोनों को **(संदृशि)** सादृश्य में **(श्रिये)** धन के लिये **(नु)** शीघ्र **(श्रुतम्)** सुनिये और **(अवोभिः)** रक्षणादिकों से मुझ को प्राप्त हूजिये **(मे)** मेरे कथन को सुनने को **(आ, गतम्)** आइये॥६॥

भावार्थः-जो विद्वानों के गुणों की स्तुति करते हैं, वे गुणों से युक्त हो और विद्वानों की समता को प्राप्त होकर श्रीमान् होते हैं॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

को वा॑म॒द्य पु॑रू॒णामा व॑व्ने॒ मर्त्या॑नाम्।

को विप्रो॑ विप्रवाहसा॒ को य॒ज्ञैर्वा॑जिनीवसू॥७॥

कः। वा॒म्। अ॒द्य। पु॒रू॒णाम्। आ। व॒व्ने॒। मर्त्या॑नाम्। कः। विप्रः॑। वि॒प्र॒ऽवा॒ह॒सा॒। कः। य॒ज्ञैः। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू॥७॥

पदार्थः-(कः) (वाम्) युवयोः **(अद्य) (पुरूणाम्)** बहूनाम् **(आ) (वव्ने)** संभजति **(मर्त्यानाम्)** मनुष्याणाम् **(कः) (विप्रः)** मेधावी **(विप्रवाहसा)** यौ विद्वद्भिः प्रापणीयौ **(कः) (यज्ञैः) (वाजिनीवसू)** धनधान्यप्रापकौ॥७॥

अन्वयः-हे विप्रवाहसा वाजिनीवसू! पुरूणां मर्त्यानां मध्ये को विप्रोऽद्य वामावव्ने को यज्ञैर्विद्यां कश्च प्रज्ञां वव्ने॥७॥

भावार्थः-ये विद्यां याचन्ते ते विदुषः सनीडं प्राप्य प्रश्नोत्तरैरानन्द्य महान्तं लाभं प्राप्नुयुस्तेऽन्यानपि प्रापयितुं शक्नुयुः॥७॥

पदार्थः-हे **(विप्रवाहसा)** विद्वानों से प्राप्त होने योग्य **(वाजिनीवसू)** धन धान्य प्राप्त कराने वालो! **(पुरूमाण्)** बहुत **(मर्त्यानाम्)** मनुष्यों के मध्य में **(कः)** कौन **(विप्रः)** बुद्धिमान् **(अद्य)** आज **(वाम्)** आप दोनों का **(आ, वव्ने)** अच्छे प्रकार आदर करता **(कः)** कौन **(यज्ञैः)** यज्ञों से विद्या को और **(कः)** कौन बुद्धि का आदर करता है॥७॥

भावार्थः-जो विद्या की याचना करते हैं वे विद्वान् के समीप प्राप्त होकर प्रश्न और उत्तरों से आनन्द कर के लाभ को प्राप्त होवें, वे अन्यों को भी प्राप्त करा सकें॥७॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ वां रथो रथानां येष्ठो यात्वश्विना।

पुरू चिदस्मयुस्तिर आङ्गूषो मर्त्येष्वा॥८॥

आ। वाम्। रथः। रथानाम्। येष्ठः। यातु। अश्विना। पुरु। चित्। अस्मऽयुः। तिरः। आङ्गूषः। मर्त्येषु। आ॥८॥

पदार्थः-(आ) समन्तात् **(वाम्)** युवयोः **(रथः)** यानम् **(रथानाम्)** यानानां मध्ये **(येष्ठः)** अतिशयेन याता **(यातु)** गच्छतु **(अश्विना)** अध्यापकोपदेशकौ **(पुरू)** पुरूणि **(चित्)** अपि **(अस्मयुः)** योऽस्मान् याति सः **(तिरः)** तिरस्करणे **(आङ्गूषः)** अङ्गेषु भवा प्रशंसा **(मर्त्येषु)** मनुष्येषु **(आ)** समन्तात्॥८॥

अन्वयः-हे अश्विना! यो वां रथानां येष्ठो रथो यात्वस्मयुश्चिन्मर्त्येष्वाङ्गूषः सन् पुरू पुरून् प्रायातु दुःखानि तिरस्कृत्य सुखमायाति तं युवामा प्राप्नुयातम्॥८॥

भावार्थः-हे मनुष्या! यथाऽध्यापकोपदेशकाः शिल्पिन उत्तमानि यानानि निर्मिमते तथैव सुखसाधनानि यूयं सृजत॥८॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक जनो! जो **(वाम्)** तुम्हारा **(रथानाम्)** वाहनों के मध्य में **(येष्ठः)** अतिशय चलने वाला **(रथः)** वाहन **(यातु)** चले **(अस्मयुः)** हम लोगों को प्राप्त होने वाली **(चित्)** भी **(मर्त्येषु)** मनुष्यों में **(आङ्गूषः)** अङ्गों में हुई प्रशंसा **(पुरू)** बहुतों को **(आ)** सब प्रकार से प्राप्त हो और दुःखों का **(तिरः)** तिरस्कार कर के सुख प्राप्त होता है, उसको आप दोनों **(आ)** प्राप्त हूजिये॥८॥

भावार्थः-हे मनुष्यो! जैसे अध्यापक और उपदेशक, शिल्पी जन उत्तम वाहनों को रचते हैं, वैसे सुख के साधनों को आप लोग उत्पन्न कीजिये॥८॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

शमू षु वां मधूयुवास्माकमस्तु चर्कृतिः।

अर्वाचीना विचेतसा विभिः श्येनेव दीयतम्॥९॥

शम्। ऊँ इति। सु। वाम्। मधुऽयुवा। अस्माकम्। अस्तु। चर्कृतिः। अर्वाचीना। विऽचेतसा। विऽभिः। श्येनाऽइव। दीयतम्॥९॥

पदार्थः-(शम्) सुखं कल्याणं वा **(उ)** **(सु)** **(वाम्)** युवयोः **(मधूयुवा)** माधुर्य्यगुणोपेतौ **(अस्माकम्)** **(अस्तु)** **(चर्कृतिः)** अत्यन्तक्रिया **(अर्वाचीना)** यावर्वागञ्चतस्तौ **(विचेतसा)** विविधविज्ञानौ **(विभिः)** पक्षिभिः सह **(श्येनेव)** श्येनः पक्षीव **(दीयतम्)** दद्यातम्॥९॥

अन्वयः-हे मधूयुवा विचेतसार्वाचीना वां युवयोर्या चर्कृतिरस्ति साऽस्माकमस्तु यतो युवामु विभिः

श्येनेव शं सु दीयतम्॥९॥

भावार्थः-अत्रोपमालङ्कारः। त एव विद्वांसो ये त्वैश्वर्य्यं परसुखार्थं नियोजयन्ति यथा पक्षिभिः सह श्येनः सद्यो गच्छति तथैभिः सह विद्यार्थिनः पूर्णं गच्छन्तु॥९॥

पदार्थः-हे **(मधूयुवा)** माधुर्य्य गुण से युक्त **(विचेतसा)** अनेक प्रकार के विज्ञान वाले **(अर्वाचीना)** सन्मुख चलते हुए दो जनो! **(वाम्)** आप दोनों की जो **(चर्कृतिः)** अत्यन्त क्रिया है वह **(अस्माकम्)** हम लोगों की **(अस्तु)** हो जिससे आप दोनों **(उ)** ही **(विभिः)** पक्षियों के साथ **(श्येनेव)** वाज पक्षी के सदृश **(शम्)** सुख वा कल्याण को **(सु, दीयतम्)** उत्तम प्रकार देवें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वे ही विद्वान् हैं जो अपने ऐश्वर्य्य को अन्य जनों के सुख के लिये नियुक्त करते हैं, जैसे पक्षियों के साथ श्येन पक्षी शीघ्र चलता है, वैसे इनके साथ विद्यार्थी जन पूर्ण रीति से चलें॥९॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवम्।

वस्वीरू षु वां भुजः पृञ्चन्ति सु वां पृचः॥१०॥१४॥

अश्विना। यत्। ह। कर्हि। चित्। शुश्रूयातम्। इमम्। हवम्। वस्वीः। ऊँ इति। सु। वाम्। भुजः। पृञ्चन्ति। सु। वाम्। पृचः॥१०॥

पदार्थः-(अश्विना) अध्यापकोपदेशकौ **(यत्)** यौ **(ह)** किल **(कर्हि)** कदा **(चित्)** अपि **(शुश्रूयातम्)** प्राप्नुयातम् **(इमम्)** वर्त्तमानम् **(हवम्)** प्रशंसनम् **(वस्वीः)** धनसम्बन्धिनीः **(उ)** **(सु)** **(वाम्)** युवयोः **(भुजः)** भोगक्रियाः **(पृञ्चन्ति)** सम्बध्नन्ति **(सु)** शोभने **(वाम्)** युवयोः **(पृचः)** कामनाः॥१०॥

अन्वयः-हे अश्विना! यद्यौ कर्हि चिदिममस्माकं हवं शुश्रूयातं या पृचो वस्वीर्भुजो वां सुपृञ्चन्ति ता हो वां वयं सुपृञ्चेम॥१०॥

भावार्थः-ये विद्वांसो विद्यार्थिनां परीक्षां कुर्वन्ति तान् विद्यार्थिनो विद्वांसो भूत्वा प्रीणयन्तीति॥१०॥

अत्राश्विविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुःसप्ततितमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशक जनो! **(यत्)** जो **(कर्हि, चित्)** कभी हम लोगों को **(इमम्)** इस वर्त्तमान **(हवम्)** प्रशंसा को **(शुश्रूयातम्)** प्राप्त होओ और जो **(पृचः)** कामना और **(वस्वीः)** धनसम्बन्धिनी **(भुजः)** भोग की क्रियाओं को **(वाम्)** आप दोनों के सम्बन्ध में **(सु)** उत्तम

प्रकार **(पृञ्चन्ति)** सम्बन्धित करते हैं उनको **(ह)** निश्चय से **(उ)** और **(वाम्)** आप दोनों की हम लोग **(सु)** उत्तम प्रकार कामना करें॥१०॥

भावार्थः-जो विद्वान् जन विद्यार्थियों की परीक्षा करते हैं, उनको विद्यार्थीजन विद्वान् होकर प्रसन्न करते हैं॥१०॥

इस सूक्त में अध्यापक, उपदेशक और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौहत्तरवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य पञ्चसप्ततितमस्य सूक्तस्य अवस्युरात्रेय ऋषिः। अश्विनौ देवते। १, ३, पङ्क्तिः। २, ४, ६, ७, ८ निचृत्पङ्क्तिः। ५, ९ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वद्भिः किं कर्त्तव्यमित्याह॥

अब नव ऋचा वाले पचहत्तरवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

प्रति॑ प्रि॒यत॑मं॒ रथं॒ वृष॑णं वसु॒वाह॑नम्।

स्तो॒ता वा॑मश्विना॒वृषि॒: स्तोमे॒न प्रति॑ भूषति॒ माध्वी॒ मम॑ श्रु॒तं हव॑म्॥ १॥

प्रति॑। प्रि॒यऽत॑मम्। रथ॑म्। वृष॑णम्। व॒सु॒ऽवाह॑नम्। स्तो॒ता। वा॒म्। अ॒श्वि॒नौ॒। ऋषि॑:। स्तोमे॑न। प्रति॑। भू॒ष॒ति॒। माध्वी॒ इति॑। मम॑। श्रु॒त॒म्। हव॑म्॥ १॥

पदार्थः-(प्रति) **(प्रियतमम्)** अतिशयेन प्रियम् **(रथम्)** रमते येन तद् विमानादियानम् **(वृषणम्)** सुखवर्षकम् **(वसुवाहनम्)** वसूनां द्रव्याणां वाहनम् **(स्तोता)** स्तावकः **(वाम्)** युवयोः **(अश्विनौ)** अध्यापकपरीक्षकौ **(ऋषिः)** मन्त्रार्थवेत्ता **(स्तोमेन)** स्तवनेन **(प्रति)** **(भूषति)** अलङ्करोति **(माध्वी)** मधुरादिगुणप्रापकौ **(मम)** **(श्रुतम्)** शृणुतम् **(हवम्)**॥१॥

अन्वयः-हे माध्वी अश्विनौ! यः स्तोता ऋषिः स्तोमेन वां प्रियतमं वृषणं वसुवाहनं रथं प्रति भूषति तस्य मम च हवं प्रति श्रुतम्॥१॥

भावार्थः-येऽध्यापनोपदेशौ कुर्वन्ति ते यथासमयं परीक्षामपि कुर्य्युः॥१॥

पदार्थः-हे **(माध्वी)** मधुर आदि गुणों को प्राप्त कराने वाले **(अश्विनौ)** अध्यापक परीक्षक जनो! जो **(स्तोता)** स्तुति करने और **(ऋषिः)** मन्त्र और अर्थ का जानने वाला **(स्तोमेन)** स्तवन से **(वाम्)** आप दोनों के **(प्रियतमम्)** अत्यन्त प्रिय **(वृषणम्)** सुख के वर्षाने और **(वसुवाहनम्)** द्रव्यों के पहुंचाने वाले **(रथम्)** रमते हैं, जिससे उस विमान आदि वाहन को **(प्रति, भूषति)** शोभित करता है, उसके और **(मम)** मेरे **(हवम्)** बुलाने को **(प्रति, श्रुतम्)** सुनिये॥१॥

भावार्थः-जो अध्यापन और उपदेश करते हैं, वे योग्य समय में परीक्षा भी करें॥१॥

पुनर्मनुष्यैः किमेष्टव्यमित्याह॥

फिर मनुष्यों को किस विषय की इच्छा करनी चाहिये, इस विषय को कहते हैं॥

अ॒त्याया॑तमश्विना ति॒रो विश्वा॑ अहं सना॑।

दस्रा॒ हिर॑ण्यवर्तनी॒ सुषु॑म्ना॒ सिन्धु॑वाहसा॒ माध्वी॒ मम॑ श्रु॒तं हव॑म्॥ २॥

अ॒ति॒ऽआया॑तम्। अ॒श्वि॒ना॒। ति॒रः। विश्वाः॑। अ॒हम्। सना॑। दस्रा॑। हिर॑ण्यवर्तनी॒ इति॒ हिर॑ण्यऽवर्तनी। सु॒ऽसु॑म्ना। सिन्धु॑ऽवाहसा। माध्वी॒ इति॑। मम॑। श्रु॒त॒म्। हव॑म्॥ २॥

पदार्थः-(**अत्यायातम्**) देशानतिक्रम्याऽऽगच्छतम् (**अश्विना**) शिल्पकार्य्यविदौ (**तिरः**) (**विश्वाः**) समग्राः (**अहम्**) (**सना**) सदा (**दस्रा**) दुःखनिवारकौ (**हिरण्यवर्त्तनी**) यौ हिरण्यं ज्योतिः सुवर्णं वा वर्त्तयतस्तौ (**सुषुम्ना**) सुष्ठु सुखयुक्तौ (**सिन्धुवाहसा**) यौ सिन्धुं वहतः प्रापयतस्तौ (**माध्वी**) मधुरगतिमन्तौ (**मम**) (**श्रुतम्**) शृणुतम् (**हवम्**) अधीतम्॥ २॥

अन्वयः-हे दस्रा हिरण्यवर्त्तनी सुषुम्ना सिन्धुवाहसा माध्वी अश्विना! यथाहं सना विश्वा विद्या गृह्णामि तथा युवामत्यायातं मम तिरो हवं श्रुतम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! येभ्यो विद्वद्भ्यो विद्या यूयमधीध्वं ते यदा यदा परीक्षां कुर्युस्तदा तदा तिरस्कारपुरःसरं वर्त्तमानं विदधीरन् यतः सर्वान् सम्यग्विद्या प्राप्नुयात्॥ २॥

पदार्थः-हे (**दस्रा**) दुःख के दूर करने और (**हिरण्यवर्त्तनी**) ज्योतिः वा सुवर्ण को वर्त्ताने वाले! (**सुषुम्ना**) उत्तम सुख से युक्त तथा (**सिन्धुवाहसा**) नदियों को प्राप्त कराने वालो! (**माध्वी**) मधुर गति से युक्त और (**अश्विना**) शिल्प कार्य्यों के जानने वालो! जैसे (**अहम्**) मैं (**सना**) सदा (**विश्वाः**) सम्पूर्ण विद्याओं को ग्रहण करता हूं, वैसे आप दोनों (**अत्यायातम्**) देशों का अतिक्रमण करके आइये और (**मम**) मेरा (**तिरः**) तिरस्कारपूर्वक (**हवम्**) पठित (**श्रुतम्**) सुनिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिन विद्वानों से विद्याओं को आप लोग पढ़ो, वे जब जब परीक्षा करें, तब-तब तिरस्कार के साथ वर्त्तमान को धारण करें, जिससे सब को अच्छे प्रकार विद्या प्राप्त होवे॥ २॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को कहते हैं॥

आ नो॒ रत्ना॑नि॒ बिभ्र॑ता॒श्वि॒ना॒ गच्छ॑तं यु॒वम्।
रु॒द्रा हिर॑ण्यवर्तनी जुषा॒णा वा॑जिनीवसू॒ माध्वी॒ मम॑ श्रु॒तं॒ हव॑म्॥ ३॥

आ। नः॒। रत्ना॑नि। बिभ्र॑तौ। अ॒श्वि॒ना॒। गच्छ॑तम्। युवम्। रु॒द्रा॑। हिर॑ण्यवर्तनी॒ इति॒ हिर॑ण्यऽवर्तनी। जु॒षा॒णा। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू। माध्वी॒ इति॑। मम॑। श्रु॒त॒म्। हव॑म्॥ ३॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मान् (**रत्नानि**) रमणीयानि धनानि (**बिभ्रतौ**) धरन्तौ (**अश्विनौ**) विद्यायुक्तौ (**गच्छतम्**) (**युवम्**) युवाम् (**रुद्रा**) दुष्टानां भयङ्करौ (**हिरण्यवर्त्तनी**) यौ हिरण्यं ज्योतिर्वर्त्तेयातां तौ (**जुषाणा**) सेवमानौ (**वाजिनीवसू**) यौ वाजिनीमन्नादियुक्तां सामग्रीं वासयतस्तौ (**माध्वी**) मधुरस्वभावौ (**मम**) (**श्रुतम्**) (**हवम्**)॥ ३॥

अन्वयः-हे वाजिनीवसू हिरण्यवर्त्तनी रत्नानि जुषाणा बिभ्रतौ रुद्राश्विना माध्वी! युवं न आ गच्छतं मम

हवं श्रुतम्॥३॥

भावार्थः-त एव भाग्यशालिनो भवेयुर्य आप्तान् विदुष उपगम्याऽऽहूय वा प्रयत्नेन विद्याभ्यासं कृत्वा परीक्षां प्रददति॥३॥

पदार्थः-हे **(वाजिनीवसू)** अन्न आदि से युक्त सामग्री को वसाने और **(हिरण्यवर्त्तनी)** सुवर्ण वा ज्योति को वर्त्ताने वाले **(रत्नानि)** रमणीय धनों को **(जुषाणा)** सेवन और **(बिभ्रतौ)** धारण करते हुए **(रुद्रा)** दुष्टों को भय देने वाले **(अश्विना)** विद्या से युक्त **(माध्वी)** मधुरस्वभाव वालो! **(युवम्)** आप दोनों **(नः)** हम लोगों को **(आ)** सब प्रकार से **(गच्छतम्)** प्राप्त होइये और **(मम)** मेरे **(हवम्)** आह्वान को **(श्रुतम्)** सुनिये॥३॥

भावार्थः-वे ही भाग्यशाली होवें, जो यथार्थवक्ता विद्वानों के समीप जाकर वा उनको बुलाकर प्रयत्न से विद्या का अभ्यास कर के परीक्षा देते हैं॥३॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता।

उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवम्॥४॥

सुऽस्तुभः। वाम्। वृषण्वसू इति वृषण्ऽवसू। रथे। वाणीची। आऽहिता। उत। वाम्। ककुहः। मृगः। पृक्षः। कृणोति। वापुषः। माध्वी इति। मम। श्रुतम्। हवम्॥४॥

पदार्थः-(सुष्टुभः) शोभनस्तोता **(वाम्)** **(वृषण्वसू)** यौ वृषणौ बलिष्ठान् वासयतस्तौ **(रथे)** **(वाणीची)** वाक् **(आहिता)** स्थापिता **(उत)** **(वाम्)** **(ककुहः)** महान् **(मृगः)** यो मार्ष्टि सः **(पृक्षः)** अन्नम्। **पृक्ष इत्यन्ननामसु पठितम्।** (निघं०२.७) **(कृणोति)** **(वापुषः)** वपुषि भवः **(माध्वी)** **(मम)** **(श्रुतम्)** **(हवम्)**॥४॥

अन्वयः-हे वृषण्वसू माध्वी अश्विनौ! यः सुष्टुभो वां रथं रमते येन वाणीच्याहितोत यो वां ककुहो मृगो वापुषः पृक्षः कृणोति तस्य मम च हवं श्रुतम्॥४॥

भावार्थः-स एव महान् भवति यो विदुषां सकाशाद्विद्यां सुशीलतां गृह्णाति॥४॥

पदार्थः-हे **(वृषण्वसू)** बलिष्ठों को बसाने वाले **(माध्वी)** मधुर स्वभाव वाले विद्यायुक्त जनो! जो **(सुष्टुभः)** उत्तम स्तुति करने वाला **(वाम्)** आप दोनों के **(रथे)** रथ में रमता है जिससे **(वाणीची)** वाणी **(आहिता)** स्थापित की गई **(उत)** और जो **(वाम्)** दोनों का **(ककुहः)** बड़ा **(मृगः)** शुद्ध करने वाला और **(वापुषः)** शरीर में हुआ **(पृक्षः)** अन्न को **(कृणोति)** करता है उसके और **(मम)** मेरे **(हवम्)** आह्वान को **(श्रुतम्)** सुनिये॥४॥

भावार्थः–वही बड़ा होता है जो विद्वानों के समीप से विद्या और सुशीलता को ग्रहण करता है॥४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

बोधिन्मनसा रथ्येषिरा हवनश्रुता।

विभिश्च्यवानमश्विना नि याथो अद्वयाविनं माध्वी मम श्रुतं हवम्॥५॥१५॥

बोधित्ऽमनसा। रथ्या। इषिरा। हवनऽश्रुता। विऽभिः। च्यवानम्। अश्विना। नि। याथः। अद्वयाविनम्। माध्वी इति। मम। श्रुतम्। हवम्॥५॥

पदार्थः-(बोधिन्मनसा) बोधितं मनो ययोस्तौ **(रथ्या)** रथेषु साधू **(इषिरा)** गन्तारौ **(हवनश्रुता)** हवनं श्रुतं ययोस्तौ **(विभिः)** पक्षिभिस्सह **(च्यवानम्)** पृच्छन्तम् **(अश्विना)** विद्याऽध्यापकोपदेशकौ **(नि)** नितराम् **(याथः)** प्राप्नुथः **(अद्वयाविनम्)** इन्द्रभावरहितम् **(माध्वी) (मम) (श्रुतम्) (हवम्)**॥५॥

अन्वयः–हे रथ्येषिरा हवनश्रुता बोधिन्मनसा माध्वी अश्विना! युवामद्वयाविनं विभिश्च्यवानं नि याथो मम हवं च श्रुतम्॥५॥

भावार्थः–ये मनुष्याः शुद्धान्तःकरणाः प्राप्तशिल्पविद्या निष्कपटा विद्यार्थिनां परीक्षकाः सन्ति ते जगन्मङ्गलकरा भवन्ति॥५॥

पदार्थः–हे **(रथ्या)** रथों में श्रेष्ठ **(इषिरा)** चलने वाले **(हवनश्रुता)** आह्वान सुना गया जिनका और **(बोधिन्मनसा)** बोधित मन जिनका ऐसे **(माध्वी)** मधुर स्वभाव वाले **(अश्विना)** विद्या के अध्यापक और उपदेशक! आप दोनों **(अद्वयाविनम्)** द्वन्द्वभाव से रहित **(विभिः)** पक्षियों के साथ **(च्यवानम्)** पूंछते हुए को **(नि)** अत्यन्त **(याथः)** प्राप्त होते हैं और **(मम)** मेरे **(हवम्)** आह्वान को भी **(श्रुतम्)** सुनिये॥५॥

भावार्थः–जो मनुष्य शुद्ध अन्तःकरण वाले, प्राप्त हुई शिल्पविद्या जिनको ऐसे और कपटरहित होकर विद्यार्थियों के परीक्षक हैं, वे जगत् के मङ्गलकारक होते हैं॥५॥

मनुष्यैः शिल्पविद्या कार्य्याणि साधनीयानीत्याह॥

मनुष्यों को शिल्पविद्या से कार्य्य सिद्ध करने चाहियें, इस विषय को कहते हैं॥

आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः।

वयो वहन्तु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवम्॥६॥

आ। वाम्। नरा। मनःऽयुजः। अश्वासः। प्रुषितऽप्सवः। वयः। वहन्तु। पीतये। सह। सुम्नेभिः। अश्विना। माध्वी इति। मम। श्रुतम्। हवम्॥६॥

पदार्थः-(आ) समन्तात् **(वाम्)** युवयोः **(नरा)** नेतारौ **(मनोयुजः)** ये मन इव युञ्जन्ते ते वेगवत्तराः **(अश्वासः)** वेगादयो गुणाः **(प्रुषितप्स्वः)** प्रुषितं दग्धं प्सु इन्धनान्नादिकं यैस्ते **(वयः)** व्याप्तिशीलाः **(वहन्तु) (पीतये)** पानाय **(सह) (सुम्नेभिः)** सुखैः **(अश्विना)** शिल्पविद्याविदौ **(माध्वी) (मम) (श्रुतम्) (हवम्)**॥६॥

अन्वयः-हे माध्वी नराऽश्विना! युवां सुम्नेभिः सह पीतये ये वां मनोयुजः प्रुषितप्सवो वयोऽश्वासः सन्ति ते यानान्या वहन्तु तदर्थं मम हवं श्रुतम्॥६॥

भावार्थः-यदि मनुष्याः पदार्थविद्यया शिल्पसिद्धानि कार्य्याणि साध्नुवन्तु तर्हि धनवत्तरा भवन्तु॥६॥

पदार्थः-हे **(माध्वी)** मधुर स्वभावयुक्त **(नरा)** नायक **(अश्विना)** शिल्पविद्या के जानने वालो! आप लोगो आप दोनों **(सुम्नेभिः)** सुखों के **(सह)** साथ **(पीतये)** पान के लिये जो **(वाम्)** आप दोनों के **(मनोयुजः)** मन के सदृश युक्त होने वाले अत्यन्त वेगवान् **(प्रुषितप्सवः)** जलाया ईंधन आदि जिन्होंने ऐसे **(वयः)** व्याप्तिशील **(अश्वासः)** वेग आदि गुण हैं वे वाहनों को **(आ)** सब प्रकार से **(वहन्तु)** पहुंचावें उनके लिये **(मम)** मेरे **(हवम्)** आह्वान को **(श्रुतम्)** सुनिये॥६॥

भावार्थः-जो मनुष्य पदार्थविद्या से शिल्पसिद्ध कार्य्यों को सिद्ध करें तो अधिक धनी होवें॥६॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अश्वि॑नावेह ग॑च्छतं॒ नास॑त्या॒ मा वि वे॑नतम्।

ति॒रश्चि॑दर्य॒या परि॑ व॒र्तिर्या॑तमदाभ्या॒ माध्वी॒ मम॑ श्रु॒तं हव॑म्॥७॥

अश्वि॑नौ। आ। इ॒ह। ग॒च्छ॒त॒म्। नास॑त्या। मा। वि। वे॒न॒त॒म्। ति॒रः। चि॒त्। अ॒र्य॒ऽया। परि॑। व॒र्तिः। या॒त॒म्। अ॒दा॒भ्या॒। माध्वी॒ इति॑। मम॑। श्रु॒त॒म्। हव॑म्॥७॥

पदार्थः-(अश्विनौ) व्याप्तविद्यौ **(आ) (इह)** अस्मिन् संसारे **(गच्छतम्) (नासत्या)** अविद्यमानासत्यव्यवहारौ **(मा) (वि) (वेनतम्)** कामयतम् **(तिरः)** तिरस्कारम् **(चित्)** अपि **(अर्य्यया)** अर्य्यस्य स्त्रिया **(परि) (वर्त्तिः)** मार्गम् **(यातम्) (अदाभ्या)** अहिंसनीयौ **(माध्वी) (मम) (श्रुतम्) (हवम्)**॥७॥

अन्वयः-हे नासत्याऽदाभ्या माध्वी अश्विनौ! युवामिहाऽऽगच्छतमर्य्यया वेनतं तिरश्चिन्मां कुर्य्यातं वर्त्तिः परि यातं मम हवं विश्रुतम्॥७॥

भावार्थः-हे स्त्रीपुरुषौ! युवां गृहस्थमार्गे वर्त्तित्वा धर्म्येण सन्तानानैश्वर्य्यं चेच्छतम्। अध्यापनपरीक्षे च सदैव कुर्य्यातम्॥७॥

पदार्थः-हे **(नासत्या)** नहीं विद्यमान असत्य व्यवहार जिनके ऐसे **(अदाभ्या)** नहीं हिंसा करने योग्य **(माध्वी)** मधुर स्वभाव वाले **(अश्विनौ)** विद्या में व्याप्त! आप दोनों **(इह)** इस संसार में **(आ,**

गच्छतम्) आइये तथा (**अर्य्यया**) वैश्य या स्वामी की स्त्री से (**वेनतम्**) कामना करो (**तिरः**) तिरस्कार को (**चित्**) भी (**मा**) मत करो (**वर्त्तिः**) मार्ग को (**परि, यातम्**) सब ओर से प्राप्त होओ और (**मम**) मेरे (**हवम्**) आह्वान को (**वि**) विशेष करके (**श्रुतम्**) सुनो॥७॥

भावार्थः–हे स्त्रीपुरुषो! आप दोनों गृहस्थ मार्ग में वर्त्ताव करके धर्म्म से सन्तान और ऐश्वर्य की इच्छा करो तथा अध्यापन और परीक्षा सदा ही करो॥७॥

पुनः स्त्रीपुरुषौ किं कुर्य्यातामित्याह॥

फिर स्त्रीपुरुष क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अस्मिन् यज्ञे अदाभ्या जरितारं शुभस्पती।

अवस्युमश्विना युवं गृणन्तमुप भूषथो माध्वी मम श्रुतं हवम्॥८॥

अस्मिन्। यज्ञे। अदाभ्या। जरितारम्। शुभः। पती इति। अवस्युम्। अश्विना। युवम्। गृणन्तम्। उप। भूषथः। माध्वी इति। मम। श्रुतम्। हवम्॥८॥

पदार्थः-(अस्मिन्) गृहाश्रमाख्ये **(यज्ञे)** सम्यग्गन्तव्ये **(अदाभ्या)** अहिंसनीयौ **(जरितारम्)** स्तोतारम् **(शुभः, पती)** कल्याणकरव्यवहारस्य पालकौ **(अवस्युम्)** आत्मनोऽवं रक्षणमिच्छुं कामयमानं वा **(अश्विना)** ब्रह्मचर्य्येण प्राप्तविद्यौ स्त्रीपुरुषौ **(युवम्)** युवाम् **(गृणन्तम्)** स्तुवन्तम् **(उप) (भूषथः) (माध्वी) (मम) (श्रुतम्) (हवम्)**॥८॥

अन्वयः–हे अदाभ्या माध्वी शुभस्पती अश्विना! युवस्मिन् यज्ञे जरितारमवस्युं गृणन्तं जनमुपभूषथो मम हवं च श्रुतम्॥८॥

भावार्थः–ये स्त्रीपुरुषा गृहाश्रमे वर्त्तमानाः शुभाचरणाः स्तुतिभिः स्तावका गृहकृत्यान्यलङ्कुर्वन्ति। अध्यापनपरीक्षाभ्यां विद्यां चोन्नयन्ति त एवेह प्रशंसिता भवन्ति॥८॥

पदार्थः–हे **(अदाभ्या)** नहीं हिंसा करने योग्य **(माध्वी)** मधुर स्वभाव वाले **(शुभः, पती)** कल्याणकारक व्यवहार के पालन करने वाले **(अश्विना)** ब्रह्मचर्य्य से प्राप्त हुई विद्या जिनको ऐसे स्त्री पुरुषो! **(युवम्)** आप दोनों **(अस्मिन्)** इस गृहाश्रम नामक **(यज्ञे)** उत्तम प्रकार प्राप्त होने योग्य यज्ञ में **(जरितारम्)** स्तुति करने और **(अवस्युम्)** अपने कल्याण की इच्छा वा कामना करने वाले **(गृणन्तम्)** स्तुति करते हुए जन को **(उप, भूषथः)** शोभित करते हो **(मम)** मेरे **(हवम्)** आह्वान को भी **(श्रुतम्)** सुनिये॥८॥

भावार्थः–जो स्त्री पुरुष गृहाश्रम में वर्त्तमान उत्तम आचरण वाले स्तुतियों से स्तुति करने वाले गृह के कृत्यों को शोभित करते हैं तथा अध्यापन और परीक्षा से विद्या का उन्नति करते हैं, वे ही इस जगत् में प्रशंसित होते हैं॥८॥

पुनः स्त्रीपुरुषौ कथं वर्त्तेयातामित्याह॥

फिर स्त्री-पुरुष कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः।

अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवम्॥ ९॥ १६॥

अभूत्। उषाः। रुशत्ऽपशुः। आ। अग्निः। अधायि। ऋत्वियः। अयोजि। वाम्। वृषण्वसू इति वृषण्ऽवसू। रथः। दस्रौ। अमर्त्यः। माध्वी इति। मम। श्रुतम्। हवम्॥ ९॥

पदार्थः-(अभूत्) भवेत् **(उषाः)** प्रातर्वेलेव **(रुशत्पशुः)** पालितः पशुर्येन सः। **रुशदिति पशुनामसु पठितम्।** (निघं०४.३) **(आ) (अग्निः)** पावकः **(अधायि)** ध्रियते **(ऋत्वियः)** ऋतुयाजकः **(अयोजि)** योज्यते **(वाम्)** युवयोः **(वृषण्वसू)** यौ वृषणौ बलिष्ठौ देहौ वासयतस्तौ **(रथः)** यानम् **(दस्रौ)** दुःखनाशकौ **(अमर्त्यः)** अविद्यमाना मर्त्या यस्मिन् सः **(माध्वी) (मम) (श्रुतम्) (हवम्)**॥ ९॥

अन्वयः-हे वृषण्वसू दस्रौ माध्वी स्त्रीपुरुषौ! ययोर्वां रुशत्पशुर्ऋत्वियोऽग्निराऽधाय्युषा अभूत्। अमर्त्यो रथोऽयोजि तौ युवां मम हवं श्रुतम्, हे पते! या पत्न्युषा इवाभूतां सततं प्रसादय॥ ९॥

भावार्थः-सदा स्त्रीपुरुषावृतुगामिनौ भवेतां सर्वदा शरीरस्यारोग्यं पुष्टिं च सम्पादयेतां विद्योन्नतिञ्च विधायाऽऽनन्दमुन्नयतामिति॥ ९॥

अत्राश्विविद्वद्स्त्रीपुरुषगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चसप्ततितमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वृषण्वसू)** बलिष्ठ दो देहों को वसाने और **(दस्रौ)** दुःख के नाश करने वाले **(माध्वी)** मधुर स्वभाव वाले स्त्री-पुरुषो! जिन **(वाम्)** आप दोनों को **(रुशत्पशुः)** पाला पशु जिसने वह **(ऋत्वियः)** ऋतु-ऋतु में यज्ञ कराने वाला **(अग्निः)** अग्नि **(आ, अधायि)** स्थापन किया जाता है और **(उषाः)** प्रातःकाल के सदृश **(अभूत्)** होवे और **(अमर्त्यः)** नहीं विद्यमान मनुष्य जिसमें ऐसा **(रथः)** वाहन **(अयोजि)** युक्त किया जाता वे आप दोनों **(मम)** मेरे **(हवम्)** आह्वान को **(श्रुतम्)** सुनिये और हे स्त्री के पति! जो पत्नी प्रातःकाल के सदृश होवे, उसको निरन्तर प्रसन्न करो॥ ९॥

भावार्थः-सदा स्त्री-पुरुष ऋतुगामी होवें, सदा शरीर के आरोग्य और पुष्टि को करें तथा विद्या की उन्नति करके आनन्द की उन्नति करें॥ ९॥

इस सूक्त में अश्विपदवाच्य विद्वान्, स्त्री-पुरुष के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पचहत्तरवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य षट्सप्ततितमस्य सूक्तस्य अत्रिर्ऋषिः। अश्विनौ देवते। १, २ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ४, ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनः स्त्रीपुरुषौ कथं वर्त्तेयातामित्याह॥

अब पाँच ऋचा वाले छहत्तरवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर स्त्री-पुरुष कैसे वर्त्तें, इस विषय को कहते हैं॥

आ भा॑त्य॒ग्निरु॒षसा॒मनी॑क॒मुद्विप्रा॑णां देव॒या वाचो॑ अस्थुः।
अ॒र्वाञ्चा॑ नू॒नं र॑थ्ये॒ह या॑तं पीपि॒वांस॑मश्विना घ॒र्ममच्छ॑॥ १॥

आ। भा॒ति॒। अ॒ग्निः। उ॒षसा॑म्। अनी॑कम्। उत्। विप्रा॑णाम्। दे॒व॒ऽयाः। वाचः॑। अ॒स्थुः॒। अ॒र्वाञ्चा॑। नू॒नम्। र॒थ्या॒। इ॒ह। या॒त॒म्। पी॒पि॒ऽवांस॑म्। अ॒श्वि॒ना॒। घ॒र्मम्। अच्छ॑॥ १॥[1]

पदार्थः-(आ) समन्तात् **(भाति)** **(अग्निः)** सूर्य्यरूपेण परिणतः **(उषसाम्)** प्रभातवेलानाम् **(अनीकम्)** सैन्यम् **(उत्)** **(विप्राणाम्)** मेधाविनाम् **(देवयाः)** या देवान् विदुषो यान्ति ताः **(वाचः)** वाण्यः **(अस्थुः)** सन्ति **(अर्वाञ्चा)** यावर्वागञ्चतो गच्छतस्तौ **(नूनम्)** निश्चितम् **(रथ्या)** रथेषु यानेषु साधू **(इह)** **(यातम्)** **(पीपिवांसम्)** सम्यग्वर्धमानम् **(अश्विना)** स्त्रीपुरुषौ **(घर्मम्)** गृहाश्रमकृत्याख्यं यज्ञम् **(अच्छ)** सम्यक्॥ १॥

अन्वयः-हे रथ्याऽर्वाञ्चाऽश्विना! या विप्राणां देवया वाचोऽस्थुर्यं उषसामनीकमग्निरुद्भाति तैरिह पीपिवांसं घर्मं नूनमच्छाऽऽयातम्॥ १॥

भावार्थः-हे धीमन्तो! यथा विद्युदादिरग्निर्बहूनि कार्याणि साध्नोति तथैव स्त्रीपुरुषौ मिलित्वा गृहकृत्यानि साध्नुयाताम्॥ १॥

पदार्थः-हे **(रथ्या)** वाहनों में प्रवीण **(अर्वाञ्चा)** नीचे चलने वाले **(अश्विना)** स्त्रीपुरुषो! जो **(विप्राणाम्)** बुद्धिमानों की **(देवयाः)** विद्वानों को प्राप्त होने वाली **(वाचः)** वाणियां **(अस्थुः)** हैं और जो **(उषसाम्)** प्रभात वेलाओं की **(अनीकम्)** सेनारूप **(अग्नि)** सूर्य्यरूप से परिणत हुआ अग्नि **(उत्)** ऊपर को **(भाति)** प्रकाशित होता है उनसे **(इह)** इस संसार में **(पीपिवांसम्)** उत्तम प्रकार बढ़ते हुए **(घर्मम्)** गृहाश्रम के कृत्य नामक यज्ञ को **(नूनम्)** निश्चित **(अच्छ)** अच्छे प्रकार **(आ)** सब प्रकार से **(यातम्)** प्राप्त होओ॥ १॥

भावार्थः-हे बुद्धिमान् जनो! जैसे बिजुली आदि अग्नि बहुत कार्य्यों को सिद्ध करता है, वैसे ही स्त्रीपुरुष मिलकर गृहकृत्यों को सिद्ध करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह।

दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा॥ २॥

न। संस्कृतम्। प्र। मिमीतः। गमिष्ठा। अन्ति। नूनम्। अश्विना। उपऽस्तुता। इह। दिवा। अभिऽपित्वे। अवसा। आऽगमिष्ठा। प्रति। अवर्त्तिम्। दाशुषे। शम्ऽभविष्ठा॥ २॥

पदार्थः-(न) निषेधे **(संस्कृतम्)** कृतसंस्कारम् **(प्र)** **(मिमीतः)** जनयतः **(गमिष्ठा)** अतिशयेन गन्तारौ **(अन्ति)** समीपे **(नूनम्)** निश्चितम् **(अश्विना)** स्त्रीपुरुषौ **(उपस्तुता)** उपगतप्रशंसया कीर्त्तितौ **(इह)** अस्मिन् **(दिवा)** दिवसेन **(अभिषित्वे)** अभितः प्राप्ते **(अवसा)** रक्षणाद्येन **(आगमिष्ठा)** समन्तादतिशयेन गन्तारौ **(प्रति)** **(अवर्त्तिम्)** अमार्गम् **(दाशुषे)** दात्रे **(शम्भविष्ठा)** अतिशयेन सुखस्य भावयितारौ॥ २॥

अन्वयः-हे गमिष्ठा शम्भविष्ठा नूनमुपस्तुताऽश्विनेह संस्कृतं न प्र मिमीतः। अभिपित्वेऽवसाऽवर्तिं प्रति मिमीतो दाशुषे दिवान्त्यागमिष्ठा भवेताम्॥ २॥

भावार्थः-ये गृहस्थाः कृतसंस्कारान् पदार्थान् वृथा न हिंसन्ति ते श्रीमन्तो जायन्ते॥ २॥

पदार्थः-हे **(गमिष्ठा)** अतिशय चलने वाले **(शम्भविष्ठा)** अतिशय सुखकारक और **(नूनम्)** निश्चित **(उपस्तुता)** प्राप्त हुई प्रशंसा से कीर्त्ति को पाये हुए **(अश्विना)** स्त्रीपुरुषो! आप **(इह)** इस संसार में **(संस्कृतम्)** किया संस्कार जिसका उसको **(न)** नहीं **(प्र, मिमीतः)** उत्पन्न करते हो और **(अभिपित्वे)** सब ओर से प्राप्त होने पर **(अवसा)** रक्षण आदि से **(अवर्त्तिम्)** अमार्ग के **(प्रति)** प्रतिकूल उत्पन्न करते हो और **(दाशुषे)** दान करने वाले के लिये **(दिवा)** दिवस से **(अन्ति)** समीप में **(आगमिष्ठा)** चारों और अतिशय चलने वाले होओ॥ २॥

भावार्थः-जो गृहस्थ जन-किया है संस्कार जिनका ऐसे पदार्थों का वृथा नहीं नाश करते हैं, वे लक्ष्मीवान् होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य।

दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान॥ ३॥

उत। आ। यातम्। सम्ऽगवे। प्रातः। अह्नः। मध्यंदिने। उत्ऽइता। सूर्यस्य। दिवा। नक्तम्। अवसा। शम्ऽतमेन। न। इदानीम्। पीतिः। अश्विना। आ। ततान॥ ३॥

पदार्थः-(उत) अपि **(आ)** **(यातम्)** आगच्छतम् **(सङ्गवे)** सङ्गच्छन्ति गावो यस्मिन् सायं समये तस्मिन् **(प्रातः)** प्रभाते **(अहः)** दिवसस्य **(मध्यन्दिने)** मध्याह्ने **(उदिता)** उदिते **(सूर्य्यस्य)** **(दिवा)** दिवसे

(नक्तम्) रात्रौ **(अवसा)** रक्षणादिना **(शन्तमेन)** अतिशयितेन सुखेन **(न)** **(इदानीम्)** **(पीतिः)** पानम् **(अश्विना)** व्याप्तसुखौ **(आ)** **(ततान)** आतनोति॥३॥

अन्वयः-हे अश्विना स्त्रीपुरुषौ! युवमह्नो मध्यन्दिने प्रातः सूर्य्यस्योदिताऽह्नः सङ्गवे च दिवा नक्तं शन्तमेनावसा सहाऽऽयातम्। उत युवयोर्या पीतिराऽऽततान तामिदानीन्न हिंस्यातम्॥३॥

भावार्थः-कृतविवाहाः स्त्रीपुरुषाः प्रातर्मध्यसायंसमयेष्वहर्निशं कल्याणकरैः कर्म्मभिः सुखानि प्राप्नुवन्तु कदाचिदालस्यं मा कुर्वन्तु॥३॥

पदार्थः-हे **(अश्विना)** व्याप्तसुख स्त्रीपुरुषो! तुम **(अह्नः)** दिवस के **(मध्यन्दिने)** मध्याह्न भाग में और **(प्रातः)** प्रभातसमय में **(सूर्य्यस्य)** सूर्यमण्डल के **(उदिता)** उदय होने में और दिन के **(सङ्गवे)** सायं समय में जिसमें गौएँ संगत होतीं अर्थात् चर के आतीं **(दिवा)** दिन **(नक्तम्)** रात्रि **(शन्तमेन)** अत्यन्त सुख से **(अवसा)** रक्षा आदि के साथ **(आ, यातम्)** आओ **(उत)** और तुम दोनों की जो **(पीतिः)** पिआवट **(आ, ततान)** विस्तृत होती है उसको **(इदानीम्)** अब **(न)** नहीं नाश करो॥३॥

भावार्थः-किया विवाह जिन्होंने वे स्त्री-पुरुष प्रातः, मध्याह्न, सायं समयों में दिन-रात्रि को कल्याण करने वाले कर्म्मों को सुखों से प्राप्त हों, कभी आलस्य मत करें॥३॥

पुनर्गृहस्थैः कथं वर्त्तितव्यमित्याह॥

फिर गृहस्थों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणम्।
आ नो दिवो बृहतः पर्वतादद्भ्यो यातमिषमूर्जं वहन्ता॥४॥

इदम्। हि। वाम्। प्रऽदिवि। स्थानम्। ओकः। इमे। गृहाः। अश्विना। इदम्। दुरोणम्। आ। नः। दिवः। बृहतः। पर्वतात्। आ। अत्ऽभ्यः। यातम्। इषम्। ऊर्जम्। वहन्ता॥४॥

पदार्थः-(इदम्) **(हि)** यतः **(वाम्)** युवयोः **(प्रदिवि)** प्रकृष्टप्रकाशे **(स्थानम्)** तिष्ठन्ति यस्मिन् **(ओकः)** गृहम् **(इमे)** **(गृहाः)** ये गृह्णन्ति ते गृहस्थाः **(अश्विना)** स्त्रीपुरुषौ **(इदम्)** **(दुरोणम्)** गृहम् **(आ)** समन्तात् **(नः)** अस्मानस्माकं वा **(दिवः)** प्रकाशात् **(बृहतः)** महतः **(पर्वतात्)** मेघात् **(आ)** **(अद्भ्यः)** **(यातम्)** प्राप्नुतम् **(इषम्)** अन्नम् **(ऊर्जम्)** पराक्रमम् **(वहन्ता)**॥४॥

अन्वयः-हे दिवो बृहतः पर्वतादद्भ्य इषमूर्जमाऽऽवहन्ताश्विना! न इदं दुरोणमाऽऽयातं हीदं वां प्रदिवि स्थानमोक इमे गृहाः प्राप्नुवन्ति तानायातम्॥४॥

भावार्थः-ये गृहस्था गृहाश्रमकर्माण्यलङ्कुर्वन्ति ते सर्वाणि सुखानि प्राप्नुवन्ति॥४॥

पदार्थः-हे **(दिवः)** प्रकाश से **(बृहतः)** बड़े **(पर्वतात्)** मेघ और **(अद्भ्यः)** जलों से **(इषम्)** अन्न और **(ऊर्जम्)** पराक्रम को **(आ)** सब प्रकार से **(वहन्ता)** प्राप्त करने वाले **(अश्विना)** स्त्रीपुरुषो! **(नः)** हम लोगों को वा हम लोगों के **(इदम्)** इस **(दुरोणम्)** गृह को **(आ)** सब प्रकार से **(यातम्)** प्राप्त

होओ **(हि)** जिससे **(इदम्)** यह **(वाम्)** आप दोनों के **(प्रदिवि)** उत्तम प्रकाश में **(स्थानम्)** स्थित होते हैं जिस में उस **(ओकः)** गृह को **(इमे)** ये **(गृहाः)** ग्रहण करने वाले गृहस्थ जन प्राप्त होते हैं, उनको सब प्रकार से प्राप्त होओ॥४॥

भावार्थः-जो गृहस्थ जन गृहाश्रम के कर्म्मों को पूर्ण रीति से करते हैं, वे सब सुखों को प्राप्त होते हैं॥४॥

मनुष्यैः पुरुषार्थविद्वत्सङ्गेनैश्वर्य्यं प्राप्तव्यमित्याह॥

मनुष्यों को चाहिये कि पुरुषार्थ और विद्वानों के संग से ऐश्वर्य्य को प्राप्त करें,
इस विषय को अगले मन्त्र में कहते हैं॥

सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती॒ गमेम।
आ नो॑ र॒यिं व॑ह॒तमोत वी॒राना विश्वा॑न्यमृता॒ सौभ॑गानि॥५॥१७॥

सम्। अ॒श्विनोः। अव॑सा। नूत॑नेन। म॒यः॒ऽभुवा॑। सु॒ऽप्रनी॑ती। ग॒मेम॒। आ। नः॒। र॒यिम्। व॒ह॒त॒म्। आ। उ॒त। वी॒रान्। आ। विश्वा॑नि। अ॒मृ॒ता॒। सौभ॑गानि॥५॥

पदार्थः-(सम्) सम्यक् **(अश्विनोः)** द्यावापृथिव्योरिव राजोपदेशकयोः **(अवसा)** अन्नादिना। **अव इत्यन्ननामसु पठितम्।** (निघं०२.७) **(नूतनेन)** नवीनेन **(मयोभुवा)** सुखं भावुकेन **(सुप्रणीती)** शोभनयोत्तमया नीत्या **(गमेम)** प्राप्नुयाम **(आ)** **(नः)** अस्मभ्यम् **(रयिम्)** धनम् **(वहतम्)** प्रापयतम् **(आ)** **(उत)** अपि **(वीरान्)** शौर्यादिगुणोपेतान् **(आ)** **(विश्वानि)** सर्वाणि **(अमृता)** स्वादून्युदकानि **(सौभगानि)** सुभगानामुत्तमधनाद्यैश्वर्याणां भावरूपाणि॥५॥

अन्वयः-हे मनुष्या! यथाऽश्विनोर्नूतनेनावसा मयोभुवा सुप्रणीती नो रयिमाऽऽवहतं वीरानुत विश्वान्यमृता सौभगान्या वहतं वयं समाऽऽगमेम तथा यूयमप्युपगच्छत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य आप्तोपदेशेन राजन्यायव्यवस्थया सह वर्त्तित्वा न्यायेनोत्तमपुरुषानखिलान्यैश्वर्याणि च प्राप्नुवन्ति तेऽभीष्टसिद्धा भवन्तीति॥५॥

अत्राग्न्यश्विराजोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्सप्ततितमं सूक्तं सप्तदशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे **(अश्विनोः)** अन्तरिक्ष और पृथिवी के सदृश राजा और उपदेशक के **(नूतनेन)** नवीन **(अवसा)** अन्न आदि और **(मयोभुवा)** सुखकारक से और **(सुप्रणीती)** उत्तम नीति से **(नः)** हम लोगों के लिये **(रयिम्)** धन को **(आ)** सब प्रकार **(वहतम्)** प्राप्त कराते हुए को **(वीरान्)** वीरों को **(उत)** और **(विश्वानि)** सम्पूर्ण **(अमृता)** स्वादु जलों और **(सौभगानि)** उत्तम धनादि ऐश्वर्यों के भावरूपों को **(आ)** सब प्रकार प्राप्त कराते हुए को हम लोग **(सम्, आ, गमेम)** उत्तम प्रकार से प्राप्त होवें, वैसे आप लोग भी प्राप्त होओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो लोग यथार्थवक्ताओं के उपदेश से राजा की न्यायव्यवस्था के साथ वर्त्ताव करके न्याय से उत्तम पुरुषों को और सम्पूर्ण ऐश्वर्यों को प्राप्त होते हैं, वे अभीष्ट पदार्थों की सिद्धि को प्राप्त होते हैं॥५॥

इस सूक्त में अग्नि, अश्वि, राजा और उपदेशक के गुण-वर्णन करने से इस सूक्त के अर्थ की इस से पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छहत्तरवां सूक्त और सत्रहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य सप्तसप्ततितमस्य सूक्तस्य अत्रिर्ऋषिः। अश्विनौ देवते। १, २, ३, ४ त्रिष्टुप्। ५ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब पांच ऋचा वाले सतहत्तरवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः।
प्रातर्हि यज्ञमश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजः॥ १॥

प्रातःऽयावाना। प्रथमा। यजध्वम्। पुरा। गृध्रात्। अररुषः। पिबातः। प्रातः। हि। यज्ञम्। अश्विना। दधाते इति। प्र। शंसन्ति। कवयः। पूर्वऽआजः॥ १॥

पदार्थः-(प्रातर्यावाणा) यौ सूर्य्योषसौ प्रातर्यातस्तौ **(प्रथमा)** आदिमौ विस्तीर्णस्वरूपौ **(यजध्वम्)** सङ्गच्छध्वम् **(पुरा)** पुरस्तात् **(गृध्रात्)** अभिकाङ्क्षया **(अररुषः)** अदातुः **(पिबातः)** पिबतः **(प्रातः) (हि) (यज्ञम्)** राज्यपालनम् **(अश्विना)** अध्यापकोपदेशकौ **(दधाते) (प्र) (शंसन्ति)** प्रशंसन्ति **(कवयः)** मेधाविनः **(पूर्वभाजः)** ये पूर्वान् भजन्ति ते॥ १॥

अन्वयः-हे मनुष्या! यूयं यथा पुरा प्रातर्यावाणा प्रथमाऽश्विना यजध्वं तथा तावररुषो गृध्राद् रसं पिबातः प्रातर्हि यज्ञं दधाते तौ पूर्वभाजः कवयः प्र शंसन्ति तथा तौ यूयं विजानीत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यौ राजोपदेशकौ दिवास्वापरहितौ तथा यौ विद्वांसः तत्सङ्गेन यूयं काङ्क्षासिद्धिं कुरुत॥ १॥

पदार्थः-हे मनुष्यो! तुम जैसे **(पुरा)** पहिले **(प्रातर्यावाणा)** जो सूर्य्य और उषा प्रातर्वेला में चलते हैं उन **(प्रथमा)** प्रथम और विस्तीर्ण स्वरूप वालों को और **(अश्विना)** अध्यापक और उपदेशक जनों को **(यजध्वम्)** मिलाओ और **(अररुषः)** नहीं देने वाले की **(गृध्रात्)** अभिकांक्षा से रस को **(पिबातः)** पीते और **(प्रातः हि)** प्रातःकाल ही **(यज्ञम्)** राज्यपालन को **(दधाते)** धारण करते हैं उनकी **(पूर्वभाजः)** पूर्वजनों के आदर करने वाले **(कवयः)** बुद्धिमान् जन **(प्र, शंसन्ति)** प्रशंसा करते हैं, वैसे उनको आप लोग जानो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो राजा और उपदेशक जन दिन में शयनरहित और जिनकी विद्वान् जन स्तुति करते हैं, उनके सत्सङ्ग से आप लोग कांक्षासिद्धि करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम्।
उतान्यो अस्मद्यजते वि चाव: पूर्वःपूर्वो यजमानो वनीयान्॥ २॥

प्रातः। यजध्वम्। अश्विना। हिनोत। न। सायम्। अस्ति। देवऽयाः। अजुष्टम्। उत। अन्यः। अस्मत्। यजते। वि। च। आवः। पूर्वःऽपूर्वः। यजमानः। वनीयान्॥ २॥

पदार्थः-(प्रातः) प्रभातसमये **(यजध्वम्)** सङ्गच्छध्वम् **(अश्विना)** सूर्योषसौ **(हिनोत)** वर्धयत **(न)** निषेधे **(सायम्)** सन्ध्यासमयः **(अस्ति)** **(देवयाः)** ये देवान् दिव्यगुणान् विदुषो यान्ति **(अजुष्टम्)** सेवेध्वम् **(उत)** अपि **(अन्यः)** **(अस्मत्)** **(यजते)** सङ्गच्छते **(वि)** **(च)** **(आवः)** रक्षति **(पूर्वःपूर्वः)** आदिम आदिमः **(यजमानः)** यो यजते **(वनीयान्)** अतिशयेन विभाजकः॥ २॥

अन्वयः-हे मनुष्या! यूयं प्रातरश्विना यजध्वं हिनोत यत्र न सायमस्ति तत्र मे देवयास्तानजुष्टं योऽन्योऽस्मद्यजते यश्च व्यावः स उत पूर्वःपूर्वो यजमानो वनीयान् भवति तमपि सत्कुरुत॥ २॥

भावार्थः-मनुष्यैः प्रत्यहं रात्रेश्चतुर्थे याम उत्थाय यथा नियमेन द्यावापृथिव्यौ वर्त्तेते तथा वर्त्तित्वा सर्वे रक्षितव्याः॥ २॥

पदार्थः-हे मनुष्यो! आप लोग **(प्रातः)** प्रभातकाल में **(अश्विना)** सूर्य्य और उषा को **(यजध्वम्)** उत्तम प्रकार प्राप्त हूजिये और **(हिनोत)** वृद्धि कीजिये जहां **(न)** नहीं **(सायम्)** सन्ध्याकाल **(अस्ति)** है वहाँ जो **(देवयाः)** श्रेष्ठ गुण और विद्वानों को प्राप्त होने वाले हैं उनका **(अजुष्टम्)** सेवन करिये और जो **(अन्यः)** अन्य **(अस्मत्)** हम लोगों से **(यजते)** मिलता है **(च)** और जो **(वि, आवः)** विशेष रक्षा करता है वह **(उत)** भी **(पूर्वःपूर्वः)** पहिला पहिला **(यजमानः)** यज्ञ करने वाला **(वनीयान्)** अतिशय विभाग करने वाला होता है, उसका भी सत्कार करो॥ २॥

भावार्थः-मनुष्यों को चाहिये कि प्रतिदिन रात्रि के चोथे शेष प्रहर में उठकर जैसे नियम से अन्तरिक्ष और पृथिवी वर्त्तमान हैं, वैसे वर्त्ताव करके सब की रक्षा करें॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

हिरण्यत्वङ् मधुऽवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वाम्।
मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा॥ ३॥

हिरण्यऽत्वक्। मधुऽवर्णः। घृतऽस्नुः। पृक्षः। वहन्। आ। रथः। वर्तते। वाम्। मनःऽजवाः। अश्विना। वातऽरंहाः। येन। अतिऽयाथः। दुःऽइतानि। विश्वा॥ ३॥

पदार्थः-(हिरण्यत्वक्) हिरण्यं तेजः सुवर्णं चेव त्वगुपरिवर्णं यस्य सः। **(मधुवर्णः)** मधुर्दृष्टव्यो वर्णो यस्य सः **(घृतस्नुः)** यो घृतमुदकं स्नाति **(पृक्षः)** अन्नादिकम् **(वहन्)** प्राप्नुवन् प्रापयन् वा **(आ)**

(रथः) विमानादियानम् **(वर्त्तते)** **(वाम्)** युवयोः **(मनोजवाः)** मन इव वेगवन्तः **(अश्विना)** शिल्पविद्याविदौ **(वातरंहाः)** वायुवद्वेगवन्तोऽग्न्यादयः **(येन)** रथेन **(अतियाथः)** अत्यन्तं गच्छन्तः **(दुरितानि)** दुःखैनैतुं प्राप्तुं योग्यानि स्थानान्तराणि **(विश्वा)** सर्वाणि॥३॥

अन्वयः-हे अश्विना! वां हिरण्यत्वङ् मधुवर्णो घृतस्नुः पृक्षो वहन् रथ आ वर्त्तते यं मनोजवा वातरंहा वहन्ति येन विश्वा दुरितान्यतियाथस्तं युवां रचयेतम्॥३॥

भावार्थः-यदि मनुष्या विमानादियानान्यग्न्युदकादिभिश्चालयेयुस्तर्ह्येतानि मनोवद्वायुवच्छीघ्रं गत्वाऽऽगच्छेयुः॥३॥

पदार्थः-हे **(अश्विना)** शिल्पविद्या के जानने वालो! **(वाम्)** आप दोनों का **(हिरण्यत्वक्)** तेज और सुवर्ण के सदृश त्वचा पर का वर्ण और **(मधुवर्णः)** देखने योग्य वर्ण जिसका वह **(घृतस्नुः)** जल को शुद्ध करने वाला **(पृक्षः)** अन्न आदि को **(वहन्)** प्राप्त होता वा प्राप्त कराता हुआ **(रथः)** विमान आदि वाहन को **(आ, वर्त्तते)** सब प्रकार वर्त्तमान है और जिसको **(मनोजवाः)** मन के सदृश वेग वाले **(वातरंहाः)** वायु के सदृश वेगयुक्त अग्नि आदि पदार्थ प्राप्त होते हैं और **(येन)** जिस रथ से **(विश्वा)** सम्पूर्ण **(दुरितानि)** दुःख से प्राप्त होने योग्य स्थानान्तरों को **(अतियाथः)** अत्यन्त प्राप्त होते हैं, उसको आप दोनों रचिये॥३॥

भावार्थः-जो मनुष्य विमानादिकों को अग्नि और जलादिकों से चलावें तो वे विमान आदि मन और वायु के सदृश शीघ्र जा कर लौट आवें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे।

स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित्ततुर्यात्॥४॥

यः। भूयिष्ठम्। नासत्याभ्याम्। विवेष। चनिष्ठम्। पित्वः। ररते। विऽभागे। सः। तोकम्। अस्य। पीपरत्। शमीभिः। अनूर्ध्वऽभासः। सदम्। इत्। ततुर्यात्॥४॥

पदार्थः-(यः) **(भूयिष्ठम्)** अतिशयेन बहु **(नासत्याभ्याम्)** अविद्यमानासत्याभ्याम् **(विवेष)** वेवेष्टि **(चनिष्ठम्)** अतिशयेनान्नम् **(पित्वः)** अन्नस्य **(ररते)** राति ददाति **(विभागे)** **(सः)** **(तोकम्)** अपत्यम् **(अस्य)** **(पीपरत्)** पालयेत् **(शमीभिः)** कर्म्मभिः **(अनूर्ध्वभासः)** न ऊर्द्ध्वा भासो दीप्तिर्यस्य **(सदम्)** प्राप्तं दुःखम् **(इत्)** **(ततुर्यात्)** हिंस्यात्॥४॥

अन्वयः-हे मनुष्या! यो नासत्याभ्यां शमीभिर्भूयिष्ठं चनिष्ठं विवेष पित्वो विभागे ररते सोऽनूर्ध्वभासोऽस्य तोकं पीपरत् स इत्सदं ततुर्यात्॥४॥

भावार्थः-येऽग्न्युदकाभ्यां बहूनि कार्य्याणि साध्नुवन्ति ते जगतो रक्षणं कृत्वा सर्वं विषादं हन्तुमर्हन्ति॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(नासत्याभ्याम्)** नहीं विद्यमान असत्य जिनके उनसे **(शमीभिः)** कर्म्मों के द्वारा **(भूयिष्ठम्)** अतीव बहुत **(चनिष्ठम्)** अतिशय अन्न को **(विवेष)** व्याप्त होता है और **(पित्वः)** अन्न के **(विभागे)** विभाग में **(ररते)** देता है **(सः)** वह **(अनूर्ध्वभासः)** नहीं ऊपर कान्तियां जिसकी **(अस्य)** इसके **(तोकम्)** सन्तान का **(पीपरत्)** पालन करे वह **(इत्)** ही **(सदम्)** प्राप्त दुःख का **(तुतुर्यात्)** नाश करे॥४॥

भावार्थः-जो अग्नि और जल से बहुत कार्य्यों को सिद्ध करते हैं, वे जगत् का रक्षण करके सम्पूर्ण दुःख के नाश करने योग्य हैं॥४॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती॒ गमेम।

आ नो॑ र॒यिं व॑ह॒तमोत वी॒राना विश्वा॑न्यमृता॒ सौभ॑गानि॥५॥१८॥

सम्। अ॒श्विनोः॑। अव॑सा। नूत॑नेन। मय॒ः॒भुवा॑। सु॒ऽप्रनी॑ती। ग॒मेम॒। आ। नः॒। र॒यिम्। व॒ह॒त॒म्। आ। उ॒त। वी॒रान्। आ। विश्वा॑नि। अ॒मृ॒ता॒। सौभ॑गानि॥५॥

पदार्थः-(सम्) एकीभावे **(अश्विनोः)** अग्न्युदकयोस्सकाशात् **(अवसा)** रक्षणादिना **(नूतनेन) (मयोभुवा)** सुखसाधकेन **(सुप्रणीती)** शोभनया नीत्या **(गमेम)** प्राप्नुयाम **(आ) (नः)** अस्मभ्यम् **(रयिम्)** धनम् **(वहतम्)** प्रापयन्तम् **(आ) (उत)** अपि **(वीरान्)** शौर्यादिगुणोपेतान् **(आ) (विश्वानि)** सर्वाणि **(अमृता)** उदकानि सुखकराणि **(सौभगानि)** शोभनैश्वर्य्याणि॥५॥

अन्वयः-हे मनुष्या! यथा वयमश्विनोर्नूतनेन मयोभुवऽवसा सुप्रणीती नो रयिमाऽऽवहतं नो वीरानुत विश्वान्यमृता सौभगान्यावहतं समाऽऽगमेम तथैतानि यूयमपि समागच्छध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाप्ताः सर्वैः सह वर्त्तेरन् तथैतैः सर्वैर्वर्त्तितव्यमिति॥५॥

अत्राश्विविद्वद्राजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तसप्ततितमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(अश्विनोः)** अग्नि और जल के समीप से **(नूतनेन)** नवीन **(मयोभुवा)** सुख के साधक **(अवसा)** रक्षण आदि और **(सुप्रणीती)** श्रेष्ठ नीति से **(नः)** हम अपने लिये **(रयिम्)** धन को **(आ, वहतम्)** प्राप्त कराते हुए को और हमारे लिये **(वीरान्)** शूरता आदि गुणों से युक्त पुरुषों को **(उत)** और **(विश्वानि)** संपूर्ण **(अमृता)** जलों के सदृश सुखकारक **(सौभगानि)** सुन्दर

ऐश्वर्य्यों को प्राप्त कराते हुए को **(सम्, आ, गमेम)** मिलें, वैसे उनको आप लोग भी **(आ)** उत्तम प्रकार मिलिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यथार्थवक्ता जन सब के साथ वर्त्ताव करें वैसे इन सब लोगों को वर्त्ताव करना चाहिये॥५॥

इस सूक्त में अग्नि, जल, विद्वान् और राजा के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संङ्गति जाननी चाहिये॥

यह सतहत्तरवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्याष्टसप्ततितमस्य सूक्तस्य सप्तवध्रिरात्रेय ऋषिः। अश्विनौ देवते। १, २, ३ उष्णिक् छन्दः। ऋषभः स्वरः। ४ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५, ७, ८, ९ निचृदनुष्टुप्। ६ अनुष्टुप् छन्दः। गान्धारः स्वरः।

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

अब नव ऋचा वाले अठहत्तरवें सूक्त का आरम्भ किया है, उसके प्रथम मन्त्र में फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अश्विनावेह गच्छतं नासत्या मा वि वेनतम्। हंसाविव पततमा सुताँ उप॥ १॥

अश्विनौ। आ। इह। गच्छतम्। नासत्या। मा। वि। वेनतम। हंसौऽइव। पततम्। आ। सुतान्। उप॥ १॥

पदार्थः-(अश्विनौ) वायूदके इवोपदेष्ट्र्युपदेश्यौ **(आ) (इह)** अस्मिन् संसारे **(गच्छतम्) (नासत्या)** सत्यव्यवहारयुक्तौ **(मा)** निषेधे **(वि)** विरोधे **(वेनतम्)** कामयेथाम् **(हंसाविव)** हंसवत् **(पततम्) (आ) (सुतान्)** निष्पन्नान् पदार्थान् **(उप)**॥ १॥

अन्वयः-हे नासत्याऽश्विनौ! युवामिह हंसाविवाऽऽगच्छतं सुतानुपाऽऽपततं मा वि वेनतं विरुद्धं मा कामयेथाम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विमानेन हंसवदन्तरिक्षे गत्वाऽऽगत्य विरुद्धाचरणं त्यक्त्वा सत्यं कामयन्ते ते बहुसुखं लभन्ते॥ १॥

पदार्थः-हे **(नासत्या)** सत्य व्यवहार से युक्त तथा **(अश्विनौ)** वायु और जल के सदृश उपदेश देने वा ग्रहण करने वाले! आप दोनों **(इह)** इस संसार में **(हंसाविव)** दो हंसों के सदृश **(आ, गच्छतम्)** आइये और **(सुतान्)** उत्पन्न हुए पदार्थों के **(उप)** समीप **(आ)** सब प्रकार **(पततम्)** प्राप्त हूजिये तथा **(मा, वि, वेनतम्)** विरुद्ध कामना मत कीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विमान से हंस के सदृश अन्तरिक्ष में जा आकर विरुद्ध आचरण का त्याग करके सत्य की कामना करते हैं, वे बहुत सुख को प्राप्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अश्विना हरिणाविव गौराविवानु यवसम्। हंसाविव पततमा सुताँ उप॥ २॥

अश्विना। हरिणौऽइव। गौरौऽइव। अनु। यवसम्। हंसौऽइव। पततम्। आ। सुतान्। उप॥

पदार्थः-(अश्विना) यजमानर्त्विजौ **(हरिणाविव)** यथा हरिणौ धावतः **(गौराविव)** यथा गौरौ मृगौ धावतः **(अनु) (यवसम्)** सोमलताम् **(हंसाविव) (पततम्) (आ) (सुतान्)** निष्पन्नानैश्वर्य्यादीन् **(उप)**॥२॥

अन्वयः-हे अश्विना! युवां हंसाविव सुतानुपाऽऽपततं यवसमनु हरिणाविव गौराविवाऽऽपततम्॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये जलविद्युतौ साध्नुवन्ति ते हरिणवत्सद्यो गन्तुमर्हन्ति॥२॥

पदार्थः-हे **(अश्विना)** यजमान और यज्ञ कराने वाले आप दोनों **(हंसाविव)** दो हंसों के सदृश **(सुतान्)** उत्पन्न हुए ऐश्वर्य्य आदिकों के **(उप)** समीप **(आ, पततम्)** आइये तथा **(यवसम्)** सोमलता के **(अनु)** पश्चात् **(हरिणाविव)** जैसे हरिण दौड़ते हैं, वैसे और **(गौराविव)** जैसे दो मृग दौड़ते हैं, वैसे आइये॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य जल और बिजुली को सिद्ध करते हैं, वे हरिण के सदृश शीघ्र जाने के योग्य हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये। हंसाविव पततमा सुताँ उप॥३॥

अश्विना। वाजिनीवसू इति वाजिनीऽवसू। जुषेथाम्। यज्ञम्। इष्टये। हंसौऽइव। पततम्। आ। सुतान्। उप॥३॥

पदार्थः-(अश्विना) अध्यापकोपदेशकौ **(वाजिनीवसू)** यौ विज्ञानक्रियां वासयतस्तौ **(जुषेथाम्) (यज्ञम्)** विज्ञानसङ्गतिमयम् **(इष्टये)** इष्टसुखप्राप्तये **(हंसाविव) (पततम्) (आ) (सुतान्)** पुत्रवद्वर्त्तमानान् शिक्षणीयान् शिष्यान् **(उप)**॥३॥

अन्वयः-हे वाजिनीवसू अश्विना! युवामिष्टये यज्ञमा जुषेथां हंसाविव सुतानुप पततम्॥३॥

भावार्थः-अत्रोपमालङ्कारः। उपदेशकाः सर्वान् शिक्षणीयान् मनुष्यान् पुत्रवन्मत्वा सर्वत्र भ्रमित्वा सत्योपदेशेन कृतकृत्यान् कुर्वन्तु॥३॥

पदार्थः-हे **(वाजिनीवसू)** विज्ञानक्रिया को वसाने वाले **(अश्विना)** अध्यापक और उपदेशक जनो! आप लोग **(इष्टये)** इष्ट सुख की प्राप्ति के लिये **(यज्ञम्)** विज्ञान की संगतिमय यज्ञ का **(आ)** सब प्रकार से **(जुषेथाम्)** सेवन करिये तथा **(हंसाविव)** दो हंसों के समान **(सुतान्)** पुत्र के सदृश वर्त्तमान शिक्षा करने योग्य शिष्यों के **(उप)** समीप **(पततम्)** प्राप्त हूजिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। उपदेशक जन सम्पूर्ण शिक्षा करने योग्य मनुष्यों को पुत्र के सदृश मान कर और सब जगह भ्रमण कर के सत्य उपदेश से कृतकृत्य करें॥३॥

पुनः स्त्रीपुरुषैः किं कर्त्तव्यमित्याह॥

फिर स्त्रीपुरुष क्या करें, इस विषय को कहते हैं॥

अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा।

श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन॥ ४॥ १९॥

अत्रिः। यत्। वाम्। अवऽरोहन्। ऋबीसम्। अजोहवीत्। नाधमानाऽइव। योषा। श्येनस्य। चित्। जवसा। नूतनेन। आ। अगच्छतम्। अश्विना। शम्ऽतमेन॥ ४॥

पदार्थः-(अत्रिः) अविद्यमानत्रिविधदुःखः **(यत्)** यः **(वाम्)** युवाम् **(अवरोहन्)** अवरोहं कुर्वन् **(ऋबीसम्)** सरलम् **(अजोहवीत्)** भृशमाह्वयति **(नाधमानेव)** याचमानेव **(योषा) (श्येनस्य) (चित्)** अपि **(जवसा)** वेगेन **(नूतनेन) (आ) (अगच्छतम्)** गच्छतम् **(अश्विना)** सूर्य्याचन्द्रमसाविवाध्यापकोपदेशकौ **(शन्तमेन)** अतिशयेन सुखकरेण॥ ४॥

अन्वयः-हे अश्विना! यद्योऽत्रिर्वामवरोहन् योषा नाधमानेव ऋबीसमजोहवीत् तेन सह श्येनस्य नूतनेन **[**शन्तमेन**]** जवसा चिन्मानेनाऽऽगच्छतम्॥ ४॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वदनुकरणेन सरलभावं स्वीकृत्य प्रयतन्ते ते सर्वदा सुखिनो भवन्ति॥ ४॥

पदार्थः-हे **(अश्विना)** सूर्य्य और चन्द्रमा के सदृश वर्त्तमान अध्यापक और उपदेशक जनो! **(यत्)** जो **(अत्रिः)** त्रिविध दुःखरहित **(वाम्)** आप दोनों को **(अवरोहन्)** प्राप्त होता हुआ **(योषा)** स्त्री **(नाधमानेव)** जो याचना करती उसके समान **(ऋबीसम्)** सरल को **(अजोहवीत)** अत्यन्त आह्वान करता है उसके साथ **(श्येनस्य)** वाज पक्षी के **(नूतनेन)** नवीन **(शन्तमेन)** अतिशय सुखकारक **(जवसा)** वेग के **(चित्)** सदृश मान से **(आ, अगच्छतम्)** आइये॥ ४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वानों के अनुकरण से सरल स्वभाव को स्वीकार करके प्रयत्न करते हैं, वे सर्वदा सुखी होते हैं॥ ४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वि जिहीष्व वनस्पते योनिः सूष्यन्त्याइव।

श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम्॥ ५॥

वि। जिहीष्व। वनस्पते। योनिः। सूष्यन्त्याःऽइव। श्रुतम्। मे। अश्विना। हवम्। सप्तऽवध्रिम्। च। मुञ्चतम्॥ ५॥

पदार्थः-(वि) (जिहीष्व) त्यज **(वनस्पते) (योनिः)** कारणम् **(सूष्यन्त्याइव)** प्रसवन्त्याः स्त्रिया इव **(श्रुतम्) (मे)** मम **(अश्विना)** विद्याव्यापिनावध्यापकपरीक्षकौ **(हवम्) (सप्तवध्रिम्)** हतसप्तेन्द्रियम् **(च) (मुञ्चतम्)**॥ ५॥

अन्वयः-हे अश्विना! मे हवं श्रुतं सप्तवध्रिं च मुञ्चतम्। हे वनस्पते! सूष्यन्त्याइव योनिस्त्वं वि

जिहीष्व॥५॥

भावार्थः-अत्रोपमालङ्कारः। यूयमाप्तानध्यापकोपदेशकानिच्छत तथा प्रसववती स्त्री बालकं त्यजति तथैवान्तःकरणादविद्या दूरतोऽस्यत॥५॥

पदार्थः-हे **(अश्विना)** विद्या से व्याप्त अध्यापक और परीक्षकजनो! **(मे)** मेरे **(हवम्)** शब्द को **(श्रुतम्)** श्रवण को और **(सप्तवध्रिम्)** नष्ट हुए सात इन्द्रिय जिसके उसका **(च)** और **(मुञ्चतम्)** त्याग करो और **(वनस्पते)** हे वनस्पति! **(सूष्यन्त्याइव)** गर्भवती स्त्री के सदृश **(योनिः)** कारण आप **(वि)** विशेष करके **(जिहीष्व)** त्याग करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। आप लोग यथार्थवक्ता अध्यापक और उपदेशकों की इच्छा करिये और जैसे गर्भवती स्त्री बालक का त्याग करती है, वैसे ही अन्तःकरणः से अविद्या को दूर करिये॥५॥

अथ विद्वांसः किं कुर्य्युरित्याह॥

इसके अनन्तर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

भी॒ताय॒ नाध॑मानाय॒ ऋष॑ये स॒प्तव॑ध्रये।

मा॒याभि॑रश्विना यु॒वं वृ॒क्षं सं च॒ वि चा॑चथः॥६॥

भी॒ताय॑। नाध॑मानाय। ऋष॑ये। स॒प्तऽव॑ध्रये। मा॒याभि॑ः। अ॒श्वि॒ना॒। यु॒वम्। वृ॒क्षम्। सम्। च॒। वि। च॒। अ॒चा॒थ॒ः॥६॥

पदार्थः-(भीताय) प्राप्तभयाय **(नाधमानाय)** उपतप्यमानाय **(ऋषये)** वेदार्थविदे **(सप्तवध्रये)** पञ्चज्ञानेन्द्रियाणि मनो बुद्धिश्च सप्त हता यस्य तस्मै **(मायाभिः)** प्रज्ञाभिः **(अश्विना)** अध्यापकोपदेशकौ **(युवम्)** युवाम् **(वृक्षम्)** यो वृश्च्यते तम् **(सम्) (च) (वि) (च) (अचथः)**॥६॥

अन्वयः-हे अश्विना! युवं मायाभिर्भीताय नाधमानाय सप्तवध्रये ऋषये च समचथः वृक्षं च व्यचथः॥६॥

भावार्थः-विदुषां योग्यतास्ति प्रज्ञादानेनाविद्यादिभयभीतान्निर्भयान् कृत्वा संसारे मोहाऽधर्म्मयोगात् वियोज्य सुखिनः सम्पादयन्तु॥६॥

पदार्थः-हे **(अश्विना)** अध्यापक और उपदेशकजनो! **(युवम्)** आप दोनों **(मायाभिः)** बुद्धियों से **(भीताय)** भय को प्राप्त **(नाधमानाय)** उपतप्यमान और **(सप्तवध्रये)** पांच ज्ञानेन्द्रियां मन और बुद्धि ये सात नष्ट हुईं जिसकी अर्थात् इनकी प्रबलता से रहित उसके लिये और **(ऋषये)** वेदार्थ के जानने वाले के लिये **(च)** भी **(सम्, अचथः)** उत्तम प्रकार जाइये **(वृक्षम्, च)** और जो काटा जाता उस वृक्ष को **(वि)** उत्तम प्रकार प्राप्तहूजिये॥६॥

भावार्थः-विद्वानों की योग्यता है कि बुद्धि के देने से अविद्यादि भय के कारण डरे हुओं को भयरहित करके तथा संसार में मोह और अधर्म्म के योग से वियुक्त करके सुखी करें॥६॥

कीदृशो गर्भो जन्म चेत्याह॥

कैसा गर्भ और जन्म इस विषय को कहते हैं॥

यथा॒ वात॑: पुष्क॒रिणी॑ं समि॒ङ्ग॑यति स॒र्वत॑:।

ए॒वा ते॒ गर्भ॑ एजतु नि॒रैतु॒ दश॑मास्य:॥७॥

यथा॑। वात॑:। पु॒ष्क॒रिणी॑म्। स॒म्ऽइङ्ग॑यति। स॒र्वत॑:। ए॒व। ते॒। गर्भ॑:। ए॒ज॒तु॒। नि॒:ऽऐतु॑। दश॑ऽमास्य:॥७॥

पदार्थ:-(यथा) येन प्रकारेण **(वात:)** वायु: **(पुष्करिणीम्)** अल्पान् तडागान् **(समिङ्गयति)** सम्यक् चालयति **(सर्वत:)** **(एवा)** अत्र **निपातस्य चे**ति दीर्घ:। **(ते)** तव **(गर्भ:)** यो गृह्यते **(एजतु)** कम्पताम् **(निरैतु)** निर्गच्छतु **(दशमास्य:)** दशसु मासेषु भव:॥७॥

अन्वय:-हे मनुष्या! यथा वात: पुष्करिणीं सर्वत: समिङ्गयति तथैवा ते गर्भ एजतु दशमास्यो निरैत्विति विजानीत॥७॥

भावार्थ:-अत्रोपमालङ्कार:। यदि स्त्रीपुरुषा ब्रह्मचर्येण विद्यामधीत्य विवाहं कुर्युस्तदा दशमे मासे प्रसव: स्यादिति वेदितव्यम्॥७॥

पदार्थ:-हे मनुष्यो! **(यथा)** जिस प्रकार से **(वात:)** पवन **(पुष्करिणीम्)** छोटे तालाबों को **(सर्वत:)** सब ओर से **(समिङ्गयति)** उत्तम प्रकार हिलाता है, वैसे **(एवा)** ही **(ते)** आपका **(गर्भ:)** जो धारण किया जाता वह गर्भ **(एजतु)** कंपित होवे और **(दशमास्य:)** दश महीनों में हुआ **(निरैतु)** निकले, ऐसा जानो॥७॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो स्त्रीपुरुष ब्रह्मचर्य्य से विद्या को पढ़ के विवाह करें तो दशवें मास में प्रसव हो, ऐसा जानना चाहिये॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यथा॒ वाते॒ यथा॒ वन॑ं यथा॑ समु॒द्र एज॑ति।

ए॒वा त्वं द॑शमास्य स॒हावे॑हि जरायु॒णा॥८॥

यथा॑। वात॑:। यथा॑। वन॑म्। यथा॑। स॒मु॒द्र:। एज॑ति। ए॒व। त्वम्। द॒श॒ऽमा॒स्य॒। स॒ह। अव॑। इ॒हि॒। ज॒रा॒यु॒णा॥८॥

पदार्थ:-(यथा) येन प्रकारेण **(वात:)** वायु: **(यथा)** **(वनम्)** जङ्गलम् **(यथा)** **(समुद्र:)** उदधि: **(एजति)** कम्पते चलति वा **(एवा)** अत्र **निपातस्य चे**ति दीर्घ:। **(त्वम्)** **(दशमास्य)** दशसु मासेषु जात: **(सह)** **(अव)** **(इहि)** आगच्छ **(जरायुणा)** देहावरणेन॥८॥

अन्वय:-हे दशमास्य! यथा वातो यथा वनं यथा समुद्र एजति तथैवा त्वं जरायुणा सहाऽवेहि॥८॥

भावार्थ:-अत्रोपमालङ्कार:। स एव गर्भस्तत्स्थो बालकश्चोत्तमो जायते यो दशमे मासे जायते॥८॥

पदार्थः-हे **(दशमास्य)** दश महीनों में उत्पन्न हुए! **(यथा)** जिस प्रकार से **(वातः)** वायु और **(यथा)** जिस प्रकार से **(वनम्)** जङ्गल **(यथा)** जिस प्रकार से **(समुद्रः)** समुद्र **(एजति)** कम्पित होता वा चलता है वैसे **(एवा)** ही **(त्वम्)** आप **(जरायुणा)** देह के ढांपने वाले के **(सह)** सहित **(अव, इहि)** आइये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वही गर्भ और उसमें स्थित बालक उत्तम होता है, जो दशवें महीने में होता है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

दश॒ मासा॑ञ्छशया॒नः कु॑मा॒रो अधि॑ मा॒तरि॑।

नि॒रैतु॑ जी॒वो अक्ष॑तो जी॒वो जीव॑न्त्या॒ अधि॑॥९॥२०॥

दश॑। मासा॑न्। श॒श॒या॒नः। कु॒मा॒रः। अधि॑। मा॒तरि॑। नि॒:ऐतु॑। जी॒वः। अक्ष॑तः। जी॒वः। जीव॑न्त्याः। अधि॑॥९॥

पदार्थः-(दश) **(मासान्)** **(शशयानः)** कृतशयनः **(कुमारः)** **(अधि)** उपरि **(मातरि)** **(निरैतु)** निर्गच्छतु **(जीवः)** यः प्राणान् धरति **(अक्षतः)** क्षतवर्जितः **(जीवः)** **(जीवन्त्याः)** **(अधि)**॥९॥

अन्वयः-हे मनुष्या! यो जीवोऽधि मातरि दश मासाञ्छशयानोऽक्षतः कुमारो निरैतु स जीवो जीवन्त्या अधि जीवति॥९॥

भावार्थः-त एव सन्ताना उत्तमा भवन्ति ये दश मासा यावत्तावद् गर्भे स्थित्वा जायन्ते॥९॥

अत्राश्विस्त्रीपुरुषगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टसप्ततितमं सूक्तं विंशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(जीवः)** प्राण आदि का धारण करने वाला **(अधि)** ऊपर **(मातरि)** माता में **(दश)** दश **(मासान्)** महीनों तक **(शशयानः)** शयन करता हुआ **(अक्षतः)** घाव से रहित **(कुमारः)** बालक **(निरैतु)** निकले वह **(जीवः)** जीव **(जीवन्त्याः)** जीवती हुई के **(अधि)** ऊपर जीवता है॥९॥

भावार्थः-वे ही सन्तान उत्तम होते हैं कि जो दश महीने पूर्ण हों, जबतक तबतक गर्भ में स्थित होकर प्रकट होते हैं॥९॥

इस सूक्त में अश्विपदवाच्य स्त्रीपुरुष के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पिछले सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अठहत्तरवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्यैकोनाऽशीतितमस्य सूक्तस्य सत्यश्रवा आत्रेय ऋषिः। उषा देवता। १ स्वराड्ब्राह्मी गायत्री छन्दः। षड्जः स्वरः। २, ३, ७ भुरिक् बृहती। १० स्वराड्बृहती छन्दः। मध्यम स्वरः। ४, ५, ८ पङ्क्तिः। ६, ९ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ स्त्री कीदृशी भवेदित्याह॥

अब दश ऋचा वाले उनासी**[वें]** सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में स्त्री कैसी हो, इस विषय को कहते हैं॥

म॒हे नो॑ अ॒द्य बो॑धयोषो॑ रा॒ये दि॒वित्म॑ती।
यथा॑ चिन्नो॒ अबो॑धयः स॒त्यश्र॑वसि वा॒य्ये सुजा॑ते॒ अश्व॑सूनृते॥ १॥

म॒हे। नः॑। अ॒द्य। बो॒ध॒य॒। उषः॑। रा॒ये। दि॒वित्म॑ती। यथा॑। चि॒त्। नः॑। अबो॑धयः। स॒त्यऽश्र॑वसि। वा॒य्ये। सुऽजा॑ते। अश्व॑ऽसूनृते॥ १॥

पदार्थः-(महे) महते **(नः)** अस्मान् **(अद्य) (बोधय) (उषः)** उषर्वद्वर्त्तमाने **(राये)** धनाय **(दिवित्मती)** प्रकाशयुक्ता **(यथा) (चित्)** अपि **(नः)** अस्मान् **(अबोधयः)** बोधय **(सत्यश्रवसि)** सत्यानां श्रवणे सत्येऽन्ने वा **(वाय्ये)** तन्तुसदृशे सन्ताननीये विस्तारणीये सन्ततिरूपे **(सुजाते)** सुष्ठुरीत्योत्पन्ने **(अश्वसूनृते)** अश्वा महती सूनृता प्रिया वाग्यस्यास्तत्सम्बुद्धौ। **अश्व इति महन्नामसु पठितम्।** (निघं०३।६)॥१॥

अन्वयः-हे उषर्वद्वर्त्तमाने वाय्ये सुजातेऽश्वसूनृते स्त्रि! यथा दिवित्मत्युषा महे राये बोधयति तथाऽद्य नो बोधय चिदपि सत्यश्रवसि नोऽस्मानबोधयः॥१॥

भावार्थः-अत्रोपमालङ्कारः। यथा प्रातर्वेला दिनं जनयित्वा सर्वाञ्जागरयति तथैव विदुषी स्त्री स्वसन्तानानविद्यानिद्रात उत्थाप्य विद्यां बोधयति॥१॥

पदार्थः-हे **(उषः)** श्रेष्ठ गुणों से प्रातःकालः के सदृश वर्त्तमान **(वाय्ये)** डोरे के सदृश फैलाने योग्य सन्ततिरूप **(सुजाते)** उत्तम रीति से उत्पन्न **(अश्वसूनृते)** बड़ी प्रिय वाणी जिसकी ऐसी हे स्त्रि! **(यथा)** जैसे **(दिवित्मती)** प्रकाश से युक्त प्रातर्वेला **(महे)** बड़े **(राये)** धन के लिये प्रबोध देती है, वैसे **(अद्य)** आज **(नः)** हम लोगों को **(बोधय)** जनाइये और **(चित्)** भी **(सत्यश्रवसि)** सत्यों के श्रवण, सत्य वा अन्न में **(नः)** हम लोगों को **(अबोधयः)** जनाइये॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्रातर्वेला दिन को उत्पन्न कर के सब को जगाती है, वैसे ही विद्यायुक्त स्त्री अपने सन्तानों को अविद्या के सदृश वर्त्तमान निद्रा से उठा कर विद्या को जनाती है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

या सु॑नी॒थे शौच॒द्रथे व्यौच्छो॑ दुहितर्दिवः।

सा व्यु॑च्छ॒ सही॑यसि स॒त्यश्र॑वसि वा॒य्ये सुजा॑ते॒ अश्व॑सूनृते॥ २॥

या। सु॒ऽनी॒थे। शौ॒च॒त्ऽर॒थे। वि। औच्छ॑ः। दु॒हि॒तः॒। दि॒व॒ः। सा। वि। उ॒च्छ॒। सही॑यसि। स॒त्यऽश्र॑वसि। वा॒य्ये। सुऽजा॑ते। अश्व॑ऽसूनृते॥ २॥

पदार्थः-(या) (सुनीथे) शोभने न्याये **(शौचद्रथे)** पवित्रे रथे **(वि) (औच्छः)** विवासयति **(दुहितः)** पुत्रीव **(दिवः)** सूर्य्यस्य **(सा) (वि) (उच्छ) (सहीयसि)** यातिशयेन सोढ्रि **(सत्यश्रवसि)** सत्यस्य श्रवो यस्मिन् **(वाय्ये)** ज्ञापनीये **(सुजाते)** शोभनैः संस्कारैरुत्पन्ने **(अश्वसूनृते)** महदन्नयुक्ते॥ २॥

अन्वयः-हे अश्वसूनृते सुजाते वाय्ये सहीयसि दिवो दुहितरिव वर्त्तमाने स्त्रि! या त्वं शौचद्रथे सुनीथे सत्यश्रवसि व्यौच्छः सा त्वमस्मान् सुखे व्युच्छ॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषाः सर्वान् सुखे वासयति तथैव साध्वी स्त्र्यानन्दयुक्ते गृहाश्रमे सर्वान् निवासयति॥ २॥

पदार्थः-हे **(अश्वसूनृते)** बड़े अन्न से युक्त **(सुजाते)** उत्तम संस्कारों से उत्पन्न **(वाय्ये)** जनाने योग्य **(सहीयसि)** अतिशय सहने वाली **(दिवः)** सूर्य्य की **(दुहितः)** पुत्री के समान वर्त्तमान स्त्री! **(या)** जो तू **(शौचद्रथे)** पवित्र रथ में **(सुनीथे)** श्रेष्ठ न्याय में **(सत्यश्रवसि)** सत्य का श्रवण जिसमें उसमें **(वि, औच्छः)** विशेष वसाती है **(सा)** वह तू हम लोगों को सुख में **(वि, उच्छ)** विशेष बसावे॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रातर्वेला सब को सुख में वसाती है, वैसे ही श्रेष्ठ स्त्री आनन्दयुक्त गृहाश्रम में सबको वसाती है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

सा नो॑ अ॒द्याभ॒रद्व॑सु॒र्व्यु॑च्छा दुहितर्दिवः।

यो व्यौच्छ॒: सही॑यसि स॒त्यश्र॑वसि वा॒य्ये सुजा॑ते॒ अश्व॑सूनृते॥ ३॥

सा। नः॒। अ॒द्य। आ॒भ॒रत्ऽव॑सुः। वि। उ॒च्छ॒। दु॒हि॒त॒ः॒। दि॒व॒ः। यो इति॑। वि। औच्छ॑ः। सही॑यसि। स॒त्यऽश्र॑वसि। वा॒य्ये। सुऽजा॑ते। अश्व॑ऽसूनृते॥ ३॥

पदार्थः-(सा) (नः) अस्मान् **(अद्य) (आभरद्वसुः)** या समन्ताद्वसूनि बिभर्त्ति सा **(वि) (उच्छ)** विवासय **(दुहितः)** दुहितरिव **(दिवः)** कामयमानस्य **(यो)** या **(वि) (औच्छः)** निवासितवती वर्त्तते

(सहीयसि) अतिशयेन सोढ्रि **(सत्यश्रवसि)** सत्येन व्यवहारेण प्राप्तान्नाद्यैश्वर्य्ये **(वाय्ये)** गमनीये **(सुजाते)** शोभनया विद्यया प्रकटीभूते **(अश्वसूनृते)** महाज्ञानयुक्ते॥३॥

अन्वयः-हे सत्यश्रवसि सुजाते वाय्येऽश्वसूनृते सहीयसि दिवो दुहितरिव विदुषि स्त्रि! यो या त्वमाभरद्वसुः सती नोऽस्मान् व्यौच्छः सा त्वमद्य सुसुखे व्युच्छ॥३॥

भावार्थः-यदि स्त्रियः प्रातर्वेलावच्छुभगुणाः स्युस्तर्हि सर्वानानन्दे निवासयितुमर्हन्ति॥३॥

पदार्थः-हे **(सत्यश्रवसि)** सत्य व्यवहार से प्राप्त अन्न आदि ऐश्वर्य्य वाली **(सुजाते)** अच्छी विद्या से प्रकट हुई **(वाय्ये)** प्राप्त होने योग्य **(अश्वसूनृते)** बड़े ज्ञान से युक्त **(सहीयसि)** अतिशय सहनशील और **(दिवः)** कामना करते हुए की **(दुहितः)** कन्या के सदृश विदुषी स्त्री **(यो)** जो तू **(आभरद्वसुः)** सब प्रकार से धनों को धारण करने वाली हुई **(नः)** हम लोगों को **(वि)** विशेष करके **(औच्छः)** निवास कराने वाली है **(सा)** वह आप **(अद्य)** आज उत्तम सुख में **(वि)** विशेष करके **(उच्छ)** निवास कराओ॥३॥

भावार्थः-जो स्त्रियाँ प्रातर्वेला के सदृश श्रेष्ठ गुण वाली हों तो सब को आनन्द में वसाने के योग्य होती हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अभि ये त्वा विभावरि स्तोमैर्गृणन्ति वह्नयः।

मघैर्मघोनि सुश्रियो दामन्वन्तः सुरातयः सुजाते अश्वसूनृते॥४॥

अभि। ये। त्वा। विभाऽवरि। स्तोमैः। गृणन्ति। वह्नयः। मघैः। मघोनि। सुऽश्रियः। दामन्ऽवन्तः। सुऽरातयः। सुऽजाते। अश्वऽसूनृते॥४॥

पदार्थः-(अभि) आभिमुख्ये **(ये)** विद्वांसः **(त्वा)** त्वाम् **(विभावरि)** प्रकाशयुक्तोषर्वद्वर्त्तमाने **(स्तोमैः)** **(गृणन्ति)** स्तुवन्ति **(वह्नयः)** वोढारोऽग्नय इव वर्त्तमानाः **(मघैः)** धनैः **(मघोनि)** बहुधनयुक्ते **(सुश्रियः)** शोभना लक्ष्म्यो येषान्ते **(दामन्वन्तः)** बहुदानक्रियायुक्ताः **(सुरातयः)** शोभना रातिर्दानेच्छा येषान्ते **(सुजाते)** **(अश्वसूनृते)**॥४॥

अन्वयः-हे मघोनि सुजातेऽश्वसूनृते विभावरीव विदुषि स्त्रि! ये सुश्रियो दामन्वन्तः सुरातयो वह्नयो विद्वांसो मघैः स्तोमैस्त्वाऽभि गृणन्ति ते त्वया सत्कर्त्तव्याः॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्नय उषसः कर्त्तारः सन्ति तथैव शिक्षका विद्याप्राप्तिकर्त्तारः स्युः॥४॥

पदार्थः-हे **(मघोनि)** बहुत धन से युक्त **(सुजाते)** उत्तम विद्या से प्रकट हुई **(अश्वसूनृते)** बड़े ज्ञान से युक्त और **(विभावरि)** प्रकाशवती प्रातर्वेला के सदृश वर्त्तमान विद्यायुक्त स्त्री! **(ये)** जो विद्वान्

जन (**सुश्रियः**) सुन्दर लक्ष्मी जिनकी ऐसे (**दामन्वन्तः**) बहुत दान क्रिया से युक्त (**सुरातयः**) सुन्दर दान की इच्छा जिनकी वे (**वह्नयः**) पहुंचाने वाले अग्नियों के समान वर्त्तमान विद्वान् जन (**मघैः**) धनों से और (**स्तोमैः**) स्तोत्रों से (**त्वा**) आप को (**अभि**) सन्मुख (**गृणन्ति**) स्तुति करते हैं, वे आप से सत्कार करने योग्य हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि प्रातर्वेलाओं के कर्त्ता हैं, वैसे ही शिक्षक जन विद्या की प्राप्ति करने वाले हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यच्चिद्धि ते॑ गृ॒णा इ॒मे छ॒दय॑न्ति म॒घत्त॑ये।

परि॑ चिद्वृष्टयो दधुर्द॒दतो॒ राधो॒ अह्र॑यं॒ सुजा॑ते अश्वसूनृते॥५॥२१॥

यत्। चित्। हि। ते। गृणाः। इमे। छदयन्ति। मघत्तये। परि। चित्। वृष्टयः। दधुः। ददतः। राधः। अह्रयम्। सुऽजाते। अश्वऽसूनृते॥५॥

पदार्थः-(यत्) ये (**चित्**) अपि (**हि**) एव (**ते**) तव (**गणाः**) समूहाः (**इमे**) (**छदयन्ति**) ऊर्जयन्ति (**मघत्तये**) धनदानाय (**परि**) (**चित्**) (**वृष्टयः**) कामयमानाः (**दधुः**) धरन्तु (**ददतः**) दानशीलान् (**राधः**) धनम् (**अह्रयम्**) लज्जादिदोषरहितम् (**सुजाते**) (**अश्वसूनते**)॥५॥

अन्वयः-हे अश्वसूनृते सुजाते विदुषि स्त्रि! यद्य इमे वृष्टयस्ते गणा मघत्तयेऽह्रयं चिद्राधो ददतश्चिच्छदयन्ति ते चिद्धि सुखानि परि दधुः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषसः किरणगणाः स्वतेजसा सर्वाञ्छादयन्ति तथैव शुभगुणस्त्रियः स्वैः शुभैर्गुणैः सर्वाञ्छादयन्ति॥५॥

पदार्थः-हे (**अश्वसूनृते**) बड़े ज्ञान से युक्त (**सुजाते**) उत्तम विद्या से प्रकट हुई विदुषि स्त्रि! (**यत्**) जो (**इमे**) ये (**वृष्टयः**) कामना करते हुए (**ते**) आप के (**गणाः**) समूह (**मघत्तये**) धनदान के लिये (**अह्रयम्**) लज्जा आदि दोष से रहित को (**चित्**) और (**राधः**) धन को (**ददतः**) देने वालों को (**चित्**) निश्चय (**छदयन्ति**) प्रबल करते हैं, वे निश्चय (**हि**) ही सुखों की (**परि, दधुः**) धारण करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रातःकाल के किरणसमूह अपने तेज से सब को ढांपते हैं, वैसे ही शुभगुण वाली स्त्रियाँ अपने शुभगुणों से सब को आच्छादित करती हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ऐषु॑ धा वी॒रव॒द्यश॒ उषो॑ मघोनि सू॒रिषु॑।

ये नो राधांस्यह्नया मघवानो अरासत सुजाते अश्वसूनृते॥ ६॥

आ। एषु। धाः। वीरऽवत्। यशः। उषः। मघोनि। सूरिषु। ये। नः। राधांसि। अह्नया। मघऽवानः। अरासत। सुऽजाते। अश्वऽसूनृते॥ ६॥

पदार्थः-(आ) समन्तात् **(एषु)** स्त्रीपुरुषेषु **(धाः)** धेहि **(वीरवत्)** वीरा विद्यन्ते यस्मिँस्तत् **(यशः)** कीर्त्तिम् **(उषः)** उषर्वद्वर्त्तमाने **(मघोनि)** प्रशंसितधनयुक्ते **(सूरिषु)** विद्वत्सु **(ये)** **(नः)** अस्मान् **(राधांसि)** अन्नानि **(अह्नया)** अलज्जया प्रतिपादितानि **(मघवानः)** बहुधनयुक्ताः **(अरासत)** दद्युः **(सुजाते)** **(अश्वसूनृते)**॥ ६॥

अन्वयः-हे अश्वसूनृते सुजाते मघोन्युषर्वद्वर्त्तमान उत्तमे स्त्रि! त्वमेषु सूरिषु वीरवद्यश आ धाः। ये मघवानो नोऽह्नया राधांस्यरासत तांस्त्वं सत्कुर्य्याः॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सैव प्रशंसिता स्त्री या पितृपतिकुले शुभाचरणेन पितृपतिकुलं प्रकाशयेत्॥ ६॥

पदार्थः-हे **(अश्वसूनृते)** बड़े ज्ञानवाली **(सुजाते)** उत्तम विद्या से प्रकट हुई **(मघोनि)** प्रशंसित धन से युक्त और **(उषः)** प्रातःकाल के सदृश वर्त्तमान उत्तम स्त्री! तू **(एषु)** इन स्त्री-पुरुषों और **(सूरिषु)** विद्वानों में **(वीरवत्)** वीरजन विद्यमान जिसमें उस **(यशः)** यश को **(आ)** सब प्रकार से **(धाः)** धारण कर और **(ये)** जो **(मघवानः)** बहुत धनों से युक्त जन **(नः)** हम लोगों को **(अह्नया)** विना लज्जा से कहे गये **(राधांसि)** अन्नों को **(अरासत)** देवें, उनका तू सत्कार कर॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वही प्रशंसित स्त्री है जो पिता और पति के कुल में श्रेष्ठ आचरण से पिता और पति के कुल को प्रकाशित करे॥ ६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह।
ये नो राधांस्यश्व्या गव्या भजन्त सूरयः सुजाते अश्वसूनृते॥ ७॥

तेभ्यः। द्युम्नम्। बृहत्। यशः। उषः। मघोनि। आ। वह। ये। नः। राधांसि। अश्व्या। गव्या। भजन्त। सूरयः। सुऽजाते। अश्वऽसूनृते॥ ७॥

पदार्थः-(तेभ्यः) विद्वद्भ्यः **(द्युम्नम्)** धनम् **(बृहत्)** महत् **(यशः)** कीर्त्तिम् **(उषः)** उषर्वद्वर्त्तमाने **(मघोनि)** बहुधनयुक्ते **(आ)** **(वह)** समन्तात्प्रापय **(ये)** **(नः)** अस्माकम् **(राधांसि)** **(अश्व्या)** अश्वेभ्यो हितानि **(गव्या)** गोभ्यो हितानि **(भजन्त)** सेवन्ते **(सूरयः)** विद्वांसः **(सुजाते)** **(अश्वसूनृते)**॥ ७॥

अन्वयः-हे अश्वसूनृते सुजाते मघोन्युषर्वद्विदुषि स्त्रि! ये नः सूरयोऽश्व्या गव्या राधांसि भजन्त तेभ्यो बृहद् द्युम्नं यशश्चाऽऽवह॥ ७॥

भावार्थः-ये विद्वांसो सर्वसुखाय पदार्थानुन्नयन्ति त उषर्वत्प्रकाशकीर्त्तयो भूत्वा सुखिनो जायन्ते॥७॥

पदार्थः-हे **(अश्वसूनृते)** बड़े ज्ञान से युक्त और **(सुजाते)** उत्तम विद्या से प्रकट हुई **(मघोनि)** बहुत धनवती **(उषः)** प्रातःकाल के सदृश वर्त्तमान विदुषि स्त्रि! **(ये)** जो **(नः)** हम लोगों में **(सूरयः)** विद्वान् जन **(अश्व्या)** घोड़ों के लिये और **(गव्या)** गौओं के लिये हितकारक **(राधांसि)** धनों का **(भजन्त)** सेवन करते हैं **(तेभ्यः)** उन विद्वानों के लिये **(बृहत्)** बड़े **(द्युम्नम्)** धन और **(यशः)** यश को **(आ, वह)** सब प्रकार से प्राप्त कराओ॥७॥

भावार्थः-जो विद्वान् जन सब के सुख के लिये पदार्थों की वृद्धि करते हैं, वे प्रातःकाल के सदृश प्रकाशित यश वाले होकर सुखी होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उ॒त नो॒ गोम॑तीरिष॒ आ व॑हा दुहितर्दिवः।

सा॒कं सूर्य॑स्य र॒श्मिभि॑: शु॒क्रैः शोच॑द्भिर॒र्चिभि॒: सुजा॑ते॒ अश्व॑सूनृते॥८॥

उ॒त। नः॒। गोऽम॑तीः। इषः॑। आ। व॒ह॒। दु॒हि॒तः॒। दि॒वः॒। सा॒कम्। सूर्य॑स्य। र॒श्मिऽभि॑:। शु॒क्रैः। शोच॑त्ऽभिः। अ॒र्चिऽभिः। सुऽजा॑ते। अश्व॑ऽसूनृते॥८॥

पदार्थः-(उत) अपि **(नः)** अस्मान् **(गोमतीः)** गावो विद्यन्ते यासु ताः **(इषः)** अन्नाद्याः **(आ) (वहा)** समन्तात्प्रापय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(दुहितः)** कन्येव **(दिवः)** प्रकाशमानस्य **(साकम्)** सार्धम् **(सूर्य्यस्य) (रश्मिभिः) (शुक्रैः)** शुद्धैः **(शोचद्भिः)** पवित्रकारकैः **(अर्चिभिः)** पूजितैर्गुणकर्मस्वभावैः **(सुजाते) (अश्वसूनृते)**॥८॥

अन्वयः-हे सुजाते अश्वसूनृते दिवो दुहितरिव स्त्रि! सूर्य्यस्य रश्मिभिः साकमुत शुक्रैः शोचद्भिरर्चिभिः सह नो गोमतीरिष आ वहा॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यस्य किरणैरुत्पन्नोषा उपकारिणी भवति तथैव शुभगुणकर्मस्वभावैः सहिता स्त्र्यानन्दोपकारिणी जायते॥८॥

पदार्थः-हे **(सुजाते)** उत्तम विद्या से प्रकट हुई **(अश्वसूनृते)** बड़े ज्ञान से युक्त और **(दिवः)** प्रकाशमान की **(दुहितः)** कन्या के सदृश वर्त्तमान स्त्रि! **(सूर्य्यस्य)** सूर्य्य के **(रश्मिभिः)** किरणों के **(साकम्)** साथ **(उत)** और **(शुक्रैः)** शुद्ध **(शोचद्भिः)** पवित्र करने वाले **(अर्चिभिः)** श्रेष्ठ गुण, कर्म्म और स्वभाव के साथ **(नः)** हम लोगों को **(गोमतीः)** गौवें विद्यमान जिनमें उन **(इषः)** अन्न आदिकों को **(आ, वह)** सब प्रकार से प्राप्त कराइये॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य की किरणों से उत्पन्न उषा उपकार करने वाली होती है, वैसे ही शुभ गुण, कर्म और स्वभावों के सहित स्त्री आनन्द की उपकार करने वाली होती है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः।
नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते॥९॥

वि। उच्छ। दुहितः। दिवः। मा। चिरम्। तनुथाः। अपः। नः। इत्। त्वा। स्तेनम्। यथा। रिपुम्। तपाति। सूरः। अर्चिषा। सुऽजाते। अश्वऽसूनृते॥९॥

पदार्थः-(वि) (उच्छा) निवासय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(दुहितः)** कन्येव **(दिवः)** प्रकाशस्य **(मा) (चिरम्) (तनुथाः)** विस्तारयेः **(अपः)** कर्म्म **(न)** निषेधे **(इत्)** एव **(त्वा)** त्वाम् **(स्तेनम्)** चोरम् **(यथा) (रिपुम्)** शत्रुम् **(तपाति)** तापयति **(सूरः)** सूर्य्यः **(अर्चिषा)** तेजसा **(सुजाते) (अश्वसूनृते)**॥९॥

अन्वयः-हे सुजाते अश्वसूनृते दिवो दुहितरिव वर्त्तमाने शुभाचारे स्त्रि! त्वमपश्चिरं मा तनुथाः। यथा रिपुं तपाति तथा स्तेनं तापय त्वा कोऽपि न तापयतु यथार्चिषा सूरः सर्वान् तापयति तथेत्त्वं दुष्टान् तापयित्वाऽस्मान् व्युच्छा॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये स्त्रीपुरुषा दीर्घसूत्रिणोऽलसाः स्तेनाश्च न भवन्ति ते सूर्य्यवत्प्रकाशिता भवन्ति॥९॥

पदार्थः-हे **(सुजाते)** उत्तम विद्या से प्रकट हुई **(अश्वसूनृते)** बड़े ज्ञान से युक्त **(दिवः)** प्रकाश की **(दुहितः)** कन्या के सदृश वर्त्तमान उत्तम आचरण वाली स्त्रि! तू **(अपः)** कर्म को **(चिरम्)** बहुत काल पर्यन्त **(मा)** नहीं **(तनुथाः)** विस्तार कर **(यथा)** जैसे **(रिपुम्)** शत्रु को **(तपाति)** संतापित करती है, वैसे **(स्तेनम्)** चोर को सन्तापित कर और **(त्वा)** तुझको कोई भी **(न)** नहीं सन्तापयुक्त करे और जैसे **(अर्चिषा)** तेज से **(सूरः)** सूर्य सब को तपाता है, वैसे **(इत्)** ही तू दुष्टजनों को सन्तापित करके हम लोगों को **(वि, उच्छा)** अच्छे प्रकार वसाओ॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्री और पुरुष मन्द, आलसी और चोर नहीं होते हैं, वे सूर्य्य के सदृश प्रकाशित होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि।

या स्तो॒तृभ्यो॑ विभावर्युच्छन्ती॒ न प्र॒मीय॑से॒ सुजा॑ते अश्वसूनृते॥ १०॥ २२॥

ए॒तावँ॑त्। वा॒। इ॒त्। उ॒षः॒। त्वम्। भूय॑ः। वा॒। दा॒तु॒म्। अ॒र्ह॒सि॒। या। स्तो॒तृऽभ्य॑ः। वि॒भा॒ऽवरि॒। उ॒च्छन्ती॑। न। प्र॒ऽमीय॑से। सु॒ऽजा॑ते। अश्व॑ऽसूनृते॥ १०॥

पदार्थः-(एतावत्) (वा) (इत्) एव **(उषः)** उषर्वद्वर्त्तमाने **(त्वम्) (भूयः)** अधिकम् **(वा)** वा **(दातुम्) (अर्हसि) (या) (स्तोतृभ्यः)** स्तावकेभ्यः **(विभावरि)** प्रकाशमाने **(उच्छन्ती)** निवसन्ती **(न)** निषेधे **(प्रमीयसे)** म्रियसे **(सुजाते) (अश्वसूनृते)**॥ १०॥

अन्वयः-हे अश्वसूनृते सुजाते विभावर्युषर्वद्वर्त्तमाने स्त्रि! त्वमेतावद्वा भूयो वा दातुमर्हसि या त्वं स्तोतृभ्य उच्छन्ती निवसन्ती वर्त्तसे सा त्वमात्मस्वरूपेणेन्न प्रमीयसे॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे स्त्रियो! यथोषाः स्वल्पा महत आनन्दान् प्रयच्छति तथा त्वं भवेति॥ १०॥

अत्रोषःस्त्रीगुणवर्णानादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनाऽशीतितमं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अश्वसूनृते)** बड़े ज्ञान से युक्त **(सुजाते)** उत्तम विद्या से प्रकट हुई **(विभावरि)** प्रकाशमान और **(उषः)** प्रातर्वेला के सदृश वर्त्तमान स्त्री! **(त्वम्)** तू **(एतावत्)** इतने को **(वा)** वा **(भूयः)** अधिक को **(वा)** भी **(दातुम्)** देने को **(अर्हसि)** योग्य है और **(या)** जो तू **(स्तोतृभ्यः)** स्तुति करने वालों के लिये **(उच्छन्ती)** निवास करती हुई वर्त्तमान है, वह तू अपने स्वरूप से **(इत्)** ही **(न)** नहीं **(प्रमीयसे)** मरती है॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे स्त्रीजनो! जैसे उषर्वेला थोड़ी भी बड़े आनन्दों को देती है, वैसे तुम होओ॥ १०॥

इस सूक्त में प्रातः और स्त्री के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह उनासीवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षडर्चस्याऽशीतितमस्य सूक्तस्य सत्यश्रवा आत्रेय ऋषिः। उषा देवता। १, ३ निचृत्त्रिष्टुप्। ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ४, ५ भुरिक्पङ्क्तिश्छन्दः पञ्चमः स्वरः॥

अथ स्त्रीगुणानाह॥

अब छः ऋचा वाले अस्सीवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में स्त्रियों के गुणों को कहते हैं॥

द्युतद्यामानं बृहतीमृतेनर्तावरीमरुणप्सुं विभातीम्।
देवीमुषसं स्वरावहन्तीं प्रति विप्रासो मतिभिर्जरन्ते॥ १॥

द्युतत्ऽयामानम्। बृहतीम्। ऋतेन। ऋतऽवरीम्। अरुणऽप्सुम्। विऽभातीम्। देवीम्। उषसम्। स्वः। आऽवहन्तीम्। प्रति। विप्रासः। मतिऽभिः। जरन्ते॥ १॥

पदार्थः-(द्युतद्यामानम्) प्रहरान् द्योतयन्तीम् **(बृहतीम्) (ऋतेन)** जलेनेव सत्येन **(ऋतावरीम्)** बहुसत्याचरणयुक्ताम् **(अरुणप्सुम्) प्सु इति रूपनामसु पठितम्।** (निघं०३.७) **(विभातीम्)** प्रकाशयन्तीम् **(देवीम्)** देदीप्यमानाम् **(उषसम्)** प्रातर्वेलाम् **(स्वः)** आदित्यमिव विद्याप्रकाशम् **(आवहन्तीम्)** प्रापयन्तीम् **(प्रति) (विप्रासः) (मतिभिः)** प्रज्ञाभिः **(जरन्ते)** स्तुवन्ति॥ १॥

अन्वयः-हे स्त्रि! यथा विप्रासो मतिभिर्ऋतेन द्युतद्यामानं बृहतीमृतावरीमरुणप्सुं विभातीं देवीं स्वरावहन्तीमुषहं प्रति जरन्ते तांस्त्वं प्रशंस॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मेधाविनः पतय उषसादिपदार्थविद्यां विज्ञाय क्षणमपि कालं व्यर्थं न नयन्ति तथैव स्त्रियोऽपि निरर्थकं समयन्न गमयेयुः॥ १॥

पदार्थः-हे स्त्रि! जैसे **(विप्रासः)** बुद्धिमान् जन **(मतिभिः)** बुद्धियों से और **(ऋतेन)** जल के सदृश सत्य से **(द्युतद्यामानम्)** प्रहरों को प्रकाश करती और **(बृहतीम्)** बढ़ती हुई **(ऋतावरीम्)** बहुत सत्य आचरण से युक्त **(अरुणप्सुम्)** लालरूप वाली **(विभातीम्)** प्रकाश करती हुई **(देवीम्)** प्रकाशमान और **(स्वः)** सूर्य्य के सदृश विद्या के प्रकाश को **(आवहन्तीम्)** धारण करती हुई **(उषसम्)** उषर्वेला की **(प्रति)** उत्तम प्रकार **(जरन्ते)** स्तुति करते हैं, उनकी तू प्रशंसा कर॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बुद्धिमान् पति उषःकाल आदि पदार्थों की विद्या को जान कर क्षणभर भी काल व्यर्थ नहीं व्यतीत करते हैं, वैसे ही स्त्रियाँ भी व्यर्थ समय न व्यतीत करें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एषा जनं दर्शता बोधयन्ती सुगान् पथः कृण्वती यात्यग्रे।

बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम्॥ २॥

एषा। जनम्। दर्शता। बोधयन्ती। सुऽगान्। पथः। कृण्वती। याति। अग्रे। बृहत्ऽरथा। बृहती। विश्वम्ऽइन्वा। उषाः। ज्योतिः। यच्छति। अग्रे। अह्नाम्॥ २॥

पदार्थः-(एषा) (**जनम्**) (**दर्शता**) द्रष्टव्या भूमीः (**बोधयन्ती**) (**सुगान्**) सुखेन गच्छन्ति येषु तान् (**पथः**) मार्गान् (**कृण्वती**) प्रकाशं कुर्वती (**याति**) गच्छति (**अग्रे**) दिवसात्पुरः (**बृहद्रथा**) महान्तो रथा यस्याः सा (**बृहती**) महती (**विश्वमिन्वा**) या विश्वं सर्वं जगन्मिनोति (**उषाः**) प्रातर्वेला (**ज्योतिः**) प्रकाशम् (**यच्छति**) ददाति (**अग्रे**) प्रथमतः (**अह्नाम्**) दिवसानाम्॥ २॥

अन्वयः-हे सुशीलाः स्त्रियो! यथैषा बृहद्रथा बृहती विश्वमिन्वा जनं दर्शता बोधयन्ती सुगान् पथः कृण्वत्युषा अग्रे यात्यह्नामग्रे ज्योतिर्यच्छति तथा यूयं भवत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। याः स्त्रियः प्रभातवेलावत्स्वकीयान् पत्यादीन् सूर्योदयात्प्राक् चेतयन्त्यो गृहस्थान् बाह्यांश्च मार्गांश्छोधयन्त्य आगच्छतां पत्यादीनां कृताञ्जलयोऽग्रे तिष्ठन्ति सर्वदा विज्ञानं च प्रयच्छन्ति ता एव देशकुलभूषणानि भवन्ति॥ २॥

पदार्थः-हे उत्तम स्वभाववाली स्त्रियो! जैसे (**एषा**) यह (**बृहद्रथा**) बड़े रथ जिसके ऐसी (**बृहती**) बड़ी (**विश्वमिन्वा**) संपूर्ण जगत् को प्रक्षेप करती अलग करती और (**जनम्**) मनुष्य को और (**दर्शता**) देखने योग्य भूमियों को (**बोधयन्ती**) जनाती हुई (**सुगान्**) सुखपूर्वक जिनमें चलें उन (**पथः**) मार्गों को (**कृण्वती**) प्रकाशित करती हुई (**उषाः**) प्रातर्वेला (**अग्रे**) दिन से आगे (**याति**) चलती है और (**अह्नाम्**) दिनों के (**अग्रे**) पहिले से (**ज्योतिः**) प्रकाश को (**यच्छति**) देती है, वैसे तुम होओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो स्त्रियाँ प्रभातवेला के सदृश अपने पति आदि को सूर्य्योदय से पहिले जगातीं, गृह और बाहर के मार्गों को साफ करतीं, आते हुए पतियों के हाथ जोड़ के आगे खड़ी होतीं और सब काल में विज्ञान को देती हैं, वे ही देश और कुल को शोभन करने वाली हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एषा गोभिररुणेभिर्युजानास्त्रेधन्ती रयिमप्रायु चक्रे।
पथो रदन्ती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति॥ ३॥

एषा। गोभिः। अरुणेभिः। युजाना। अस्त्रेधन्ती। रयिम्। अप्रऽआयु। चक्रे। पथः। रदन्ती। सुविताय। देवी। पुरुऽस्तुता। विश्वऽवारा। वि। भाति॥ ३॥

पदार्थः-(एषा) उषाः (**गोभिः**) किरणैः (**अरुणेभिः**) आरक्तवर्णैः सह (**युजाना**) युक्ता (**अस्त्रेधन्ती**) साधयन्ती (**रयिम्**) धनम् (**अप्रायु**) यत्र प्रैति नश्यति तत् (**चक्रे**) करोति (**पथः**) मार्गान्

(रदन्ती) लिखन्ती **(सुविताय)** ऐश्वर्य्याय **(देवी)** द्योतमाना **(पुरुष्टुता)** बहुभिः प्रशंसिता **(विश्ववारा)** विश्वैः सर्वैर्मनुष्यैर्वरणीया **(वि, भाति)** विशेषेण प्रकाशते॥३॥

अन्वयः–हे विदुषि स्त्रि! यथैषोषा अरुणेभिर्गोभिर्युजाना रयिमस्रेधन्ती अप्रायु चक्रे पथो रदन्ती पुरुष्टुता विश्ववारा देवी सुविताय वि भाति तथा त्वं भव॥३॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा पतिव्रता विदुषी विचक्षणा स्त्री गृहस्य प्रकाशिका वर्त्तते तथैवोषा ब्रह्माण्डस्य प्रकाशिका वर्त्तते॥३॥

पदार्थः–हे विद्यायुक्त स्त्रि! जैसे **(एषा)** यह प्रातर्वेला **(अरुणेभिः)** चारों ओर रक्त वर्ण वाले **(गोभिः)** किरणों के साथ **(युजाना)** युक्त और **(रयिम्)** धन को **(अस्रेधन्ती)** सिद्ध करती हुई **(अप्रायु)** नहीं नष्ट होने वाले को **(चक्रे)** करती है और **(पथः)** मार्गों को **(रदन्ती)** खोदती हुई **(पुरुष्टुता)** बहुतों से प्रशंसा की गई **(विश्ववारा)** सम्पूर्ण मनुष्यों से स्वीकार करने योग्य **(देवी)** प्रकाशित होती हुई **(सुविताय)** ऐश्वर्य्य के लिये **(वि, भाति)** विशेष करके प्रकाशित होती है, वैसे आप होओ॥३॥

भावार्थः–इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पतिव्रता, विद्यायुक्त और चतुर स्त्री गृह को प्रकाशित करने वाली होती है, वैसे ही प्रातर्वेला ब्रह्माण्ड को प्रकाशित करने वाली है॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात्।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति॥४॥

एषा। विऽएनी। भवति। द्विऽबर्हाः। आविःऽकृण्वाना। तन्वम्। पुरस्तात्। ऋतस्य। पन्थाम्। अनु। एति। साधु। प्रजानतीऽइव। न। दिशः। मिनाति॥४॥

पदार्थः-(एषा) (व्येनी) या विशिष्टमृगीवद्वेगवती **(भवति) (द्विबर्हाः)** या द्वाभ्यां रात्रिदिनाभ्यां बृंहयति वर्धयति **(आविष्कृण्वाना)** सर्वेषां मूर्तिमतां द्रव्याणां प्राकट्यं सम्पादयन्ती **(तन्वम्)** शरीरम् **(पुरस्तात्) (ऋतस्य)** सत्यस्य **(पन्थाम्)** मार्गम् **(अनु) (एति)** अनुगच्छति **(साधु)** उत्तमं विज्ञानम् **(प्रजानतीव) (न)** निषेधे **(दिशः) (मिनाति)** हिनस्ति॥४॥

अन्वयः–हे विदुषि स्त्रि! यथैषोषाः पुरस्तात्तन्वमाविष्कृण्वाना द्विबर्हा व्येनी भवति। ऋतस्य पन्थामन्वेति साधु प्रजानतीव दिशो न मिनाति तथा त्वं वर्त्तस्व॥४॥

भावार्थः–अत्र वाचकलुप्तोपमालङ्कारः। यथा सती स्त्री गृहाश्रमस्य मार्गं प्रकाश्य सर्वाणि सुखानि प्रकटयति तथैवोषा वर्त्तते॥४॥

पदार्थः–हे विद्यायुक्त स्त्रि! जैसे **(एषा)** यह प्रातर्वेला **(पुरस्तात्)** प्रथम **(तन्वम्)** शरीर को **(आविष्कृण्वाना)** और संपूर्ण रूप वाले द्रव्यों की प्रकटता करती हुई **(द्विबर्हाः)** दिन और रात्रि से बढ़ाने

वाली **(व्येनी)** विशेष हरिणी के सदृश वेगयुक्त **(भवति)** होती है और **(ऋतस्य)** सत्य के **(पन्थाम्)** मार्ग की **(अनु, एति)** अनुगामिनी होती है और **(साधु)** उत्तम विज्ञान को **(प्रजानतीव)** विशेष करके जानती हुई सी **(दिशः)** दिशाओं का **(न)** नहीं **(मिनाति)** नाश करती है, वैसा तू वर्त्ताव कर॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सती स्त्री गृहाश्रम के मार्ग को प्रकाशित करके सम्पूर्ण सुखों को प्रकट करती है, वैसे ही प्रातर्वेला वर्त्तमान है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात्।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्॥५॥

एषा। शुभ्रा। न। तन्वः। विदाना। ऊर्ध्वाऽइव। स्नाती। दृशये। नः। अस्थात्। अप। द्वेषः। बाधमाना। तमांसि। उषाः। दिवः। दुहिता। ज्योतिषा। आ। अगात्॥५॥

पदार्थः-(एषा) **(शुभ्रा)** श्वेतवर्णा **(न)** इव **(तन्वः)** शरीराणि **(विदाना)** ज्ञापयन्ती **(ऊर्ध्वेव)** ऊर्ध्वेव स्थिता **(स्नाती)** शुद्धा **(दृशये)** दर्शनाय **(नः)** अस्माकम् **(अस्थात्)** तिष्ठति **(अप)** **(द्वेषः)** द्वेष्टॄन् **(बाधमाना)** निवारयन्ती **(तमांसि)** रात्रीः **(उषाः)** प्रातर्वेला **(दिवः)** सूर्य्यस्य **(दुहिता)** कन्येव **(ज्योतिषा)** प्रकाशेन **(आ)** **(अगात्)** आगच्छति॥५॥

अन्वयः-हे शुभलक्षणे स्त्रि! यथैषोषाः शुभ्रा विद्युन्न तन्वो विदानोर्ध्वेव स्नाती नो दृशयेऽस्थाद् द्वेषस्तमांसि चाप बाधमाना दिवो दुहिता ज्योतिषाऽऽगात्तथा त्वं भवेः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कुलीना स्त्री जलादीन्द्रियसंयमाभ्यां बाह्याऽऽभ्यन्तरे शुद्धा गृहस्थाऽन्धकारं निवारयन्ती सर्वेषां शरीररक्षां विदधाति गृहकृत्येषु दक्षा वर्त्तते तथैवोषा भवति॥५॥

पदार्थः-हे श्रेष्ठ लक्षणों वाली स्त्रि! जैसे **(एषा)** यह **(उषाः)** प्रातर्वेला **(शुभ्रा)** श्वेतवर्णवाली बिजुली के **(न)** सदृश **(तन्वः)** शरीरों को **(विदाना)** जनाती हुई **(ऊर्ध्वेव)** ऊपर सी स्थित **(स्नाती)** शुद्ध और **(नः)** हम लोगों के **(दृशये)** दर्शन के लिये **(अस्थात्)** स्थित होती है और **(द्वेषः)** द्वेष करने वाले जनों और **(तमांसि)** रात्रियों को **(अप, बाधमाना)** निवारण करती हुई **(दिवः)** सूर्य्य की **(दुहिता)** कन्या के सदृश वर्त्तमान **(ज्योतिषा)** प्रकाश से **(आ, अगात्)** प्राप्त होती है, वैसे तू हो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे कुलीन स्त्री जलादिकों और इन्द्रियों के निग्रहों से बाहर और भीतर से शुद्ध, गृहस्थान्धकार को निवृत्त करती हुई, सब के शरीर की रक्षा करती है और गृह के कृत्यों में चतुर है, वैसे ही प्रातर्वेला होती है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एषा प्रतीची दुहिता दिवो नॄन् योषेव भद्रा नि रिणीते अप्सः।
व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः॥६॥२३॥

एषा। प्रतीची। दुहिता। दिवः। नॄन्। योषाऽइव। भद्रा। नि। रिणीते। अप्सः। विऽऊर्ण्वती। दाशुषे। वार्याणि। पुनः। ज्योतिः। युवतिः। पूर्वऽथा। अकरित्यकः॥६॥

पदार्थः-(एषा) (प्रतीची) पश्चिमदिशां प्राप्ता **(दुहिता)** कन्येव **(दिवः)** सूर्य्यस्य **(नॄन्)** नायकान् श्रेष्ठान् पुरुषान् **(योषेव) (भद्रा)** कल्याणकारिणी **(नि) (रिणीते)** गच्छति **(अप्सः)** सुरूपम् **(व्यूर्ण्वती)** विशेषणाच्छादयन्ती **(दाशुषे)** दात्रे **(वार्याणि)** वर्त्तुमर्हाणि धनादीनि **(पुनः) (ज्योतिः) (युवतिः)** प्राप्तयौवनावस्थेव **(पूर्वथा)** पूर्वा इव **(अकः)** करोति॥६॥

अन्वयः-हे शुभलक्षणे स्त्रि! यथैषोषा दिवो दुहिता नॄन् योषेव भद्रा प्रतीच्यप्सो नि रिणीते दाशुषे वार्याणि व्यूर्ण्वती पूर्वथा पुनर्ज्योतियुवतिरिवाकस्तथा त्वं भव॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। याः स्त्रियो भद्राचाराः प्राप्तयुवावस्थाः स्वसदृशान् पतीन् प्राप्य सर्वाणि गृहकृत्यानि व्यवस्थापयन्ति ता उषर्वत्सुशोभन्त इति॥६॥

अत्रोषःस्त्रीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यशीतितमं सूक्तं त्रयोविंशो वर्गश्च समाप्तः॥

पदार्थः-हे शुभ लक्षणों वाली स्त्रि! जैसे **(एषा)** यह प्रातर्वेला **(दिवः)** सूर्य्य की **(दुहिता)** कन्या के सदृश **(नॄन्)** अग्रणी श्रेष्ठ पुरुषों को **(योषेव)** स्त्री के सदृश **(भद्रा)** कल्याण करने वाली **(प्रतीची)** पश्चिम दिशा को प्राप्त **(अप्सः)** सुन्दर रूप को **(नि, रिणीते)** अत्यन्त प्राप्त होती है और **(दाशुषे)** देने वाले के लिये **(वार्याणि)** स्वीकार करने योग्य धन आदि को **(व्यूर्ण्वती)** विशेष करके आच्छादित करती हुई **(पूर्वथा)** पहिली के सदृश **(पुनः)** फिर **(ज्योतिः)** ज्योतिःरूप को **(युवतिः)** प्राप्त यौवनावस्था वाली के सदृश **(अकः)** करती है, वैसी तुम होओ॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो स्त्रियाँ शुभ आचरण वालीं और युवावस्था को प्राप्त हुईं अपने सदृश पतियों को प्राप्त होकर सम्पूर्ण गृहकृत्यों को व्यवस्थापित करती हैं वे प्रातर्वेला के सदृश अत्यन्त शोभित होती हैं॥६॥

इस सूक्त में प्रातर्वेला और स्त्री के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अस्सीवां सूक्त और तेईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकाऽशीतितमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। सविता देवता। १, ५ जगती। २ विराड्जगती। ३, ४ निचृज्जगती छन्दः। निषादः स्वरः।

अथ योगिनः किं कुर्वन्तीत्याह॥

अब पांच ऋचा वाले इक्यासीवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में योगीजन क्या करते हैं, इस विषय को कहते हैं॥

युञ्जते॑ मन॑ उ॒त यु॑ञ्जते॒ धियो॒ विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चित॑:।
वि होत्रा॑ दधे वयुना॒विदेक॒ इन्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुतिः॥ १॥

युञ्जते॑। मन॑:। उ॒त। यु॒ञ्जते॒। धिय॑:। विप्रा॑:। विप्र॑स्य। बृ॒ह॒त:। वि॒प॒:ऽचित॑:। वि। होत्रा॑:। द॒धे॒। व॒युन॒ऽवित्। एक॑:। इत्। म॒ही। दे॒वस्य॑। स॒वि॒तु:। परि॑ऽस्तुति:॥ १॥

पदार्थः-(युञ्जते) समादधाति **(मनः)** मननात्मकम् **(उत)** अपि **(युञ्जते) (धियः)** प्रज्ञाः **(विप्राः)** मेधाविनो योगिनः **(विप्रस्य)** विशेषेण प्राति व्याप्नोति तस्य **(बृहतः)** महतः **(विपश्चितः)** अनन्तविद्यस्य **(वि) (होत्राः)** आदातारो दातारो वा **(दधे)** दधाति **(वयुनावित्)** यो वुयनानि प्रज्ञानानि वेत्ति। अत्रा**न्येषामपी**त्युपधाया दीर्घः। **(एकः)** अद्वितीयोऽसहायः **(इत्)** एव **(मही)** महती पूज्या **(देवस्य)** सर्वस्य जगतः प्रकाशकस्य **(सवितुः)** सकलजगदुत्पादकस्य **(परिष्टुतिः)** परितो व्याप्ता चासौ स्तुतिश्च॥ १॥

अन्वयः-हे मनुष्या! यथा होत्रा विप्रा विप्रस्य बृहतो विपश्चितः सवितुर्देवस्य परमात्मनो मध्ये मनो युञ्जत उत धियो युञ्जते यो वयुनाविदेक इदेव सर्वं जगद्वि दधे यस्य मही परिष्टुतिरस्ति तथा तस्मिन्यूयमपि चित्तं धत्त॥ १॥

भावार्थः-अनेकविद्याबृंहितस्य बुद्ध्यादिपदार्थाधिष्ठानस्य जगदीश्वरस्य मध्ये ये मनो बुद्धिं वा निदधति ते सर्वमैहिकं पारलौकिकं सुखं चाप्नुवन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(होत्राः)** लेने वा देने वाले **(विप्राः)** बुद्धिमान् योगीजन **(विप्रस्य)** विशेष कर के व्याप्त होने वाले **(बृहतः)** बड़े **(विपश्चितः)** अनन्त विद्यावान् **(सवितुः)** सम्पूर्ण जगत् के उत्पन्न करने वाले **(देवस्य)** सम्पूर्ण जगत् के प्रकाशक परमात्मा के मध्य में **(मनः)** मननस्वरूप मन को **(युञ्जते)** युक्त करते **(उत)** और **(धियः)** बुद्धियों को **(युञ्जते)** युक्त करते हैं और जो **(वयुनावित्)** प्रज्ञानों को जानने वाला **(एकः)** सहायरहित अकेला **(इत्)** ही संपूर्ण जगत् को **(वि, दधे)** रचता और जिसकी **(मही)** बड़ी आदर करने योग्य **(परिष्टुतिः)** सब और व्याप्त स्तुति है, वैसे उस में आप लोग भी चित्त को धारण करो॥ १॥

भावार्थः-अनेक विद्याबृंहित, बुद्धि आदि पदार्थों के अधिष्ठान, जगदीश्वर के बीच जो मन और बुद्धि को निरन्तर स्थापन करते हैं, वे समस्त ऐहिक और पारलौकिक सुख को प्राप्त होते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

विश्वा॑ रू॒पाणि॒ प्रति॑ मुञ्चते क॒विः प्रासा॑वीद्भ॒द्रं द्वि॒पदे॒ चतु॑ष्पदे।

वि नाक॑मख्यत्सवि॒ता वरे॒ण्योऽनु॑ प्र॒याण॑मुषसो॒ वि रा॑जति॥२॥

विश्वा॑। रू॒पाणि॑। प्रति॑। मु॒ञ्च॒ते॒। क॒विः। प्र। अ॒सा॒वी॒त्। भ॒द्रम्। द्वि॒ऽपदे॑। चतु॑ः॒ऽपदे। वि। नाक॑म्। अ॒ख्य॒त्। स॒वि॒ता। वरे॑ण्यः। अनु॑। प्र॒ऽयाण॑म्। उ॒षसः॑। वि। रा॒ज॒ति॒॥२॥

पदार्थः-(विश्वा) सर्वाणि **(रूपाणि)** सूर्यादीनि **(प्रति)** **(मुञ्चते)** त्यजति **(कविः)** सर्वेषां क्रान्तप्रज्ञः सर्वज्ञः **(प्र)** **(असावीत्)** उत्पादयति **(भद्रम्)** कल्याणम् **(द्विपदे)** मनुष्याद्याय **(चतुष्पदे)** गवाद्याय **(वि)** **(नाकम्)** अविद्यमानदुःखम् **(अख्यत्)** ख्याति प्रकाशयति **(सविता)** सकलैश्वर्य्यप्रदः **(वरेण्यः)** वरितुमर्हः **(अनु)** **(प्रयाणम्)** **(उषसः)** **(वि)** **(राजति)** प्रकाशते॥२॥

अन्वयः-हे मनुष्या! यः कविर्वरेण्यः सवितेश्वरो द्विपदे चतुष्पदे भद्रं प्रासावीत्। विश्वा रूपाणि प्रति मुञ्चते नाकं व्यख्यत् स यथोषसोऽनु प्रयाणं सूर्यो वि राजति तथा सूर्य्यादिकं प्रकाशयति तं सर्वे यूयमुपाध्वम्॥२॥

भावार्थः-हे मनुष्या! येन जगदीश्वरेण विचित्रं विविधं जगत्सर्वेषां प्राणिनां सुखाय निर्मितं तमेव यूयं भजध्वम्॥२॥

पदार्थः-हे मनुष्या! जो **(कविः)** सर्व पदार्थों का जानने वाला सर्वज्ञ **(वरेण्यः)** स्वीकार करने योग्य और **(सविता)** सम्पूर्ण ऐश्वर्य्यों का देने वाला ईश्वर **(द्विपदे)** मनुष्य आदि और **(चतुष्पदे)** गौ आदि के लिये **(भद्रम्)** कल्याण को **(प्र, असावीत्)** उत्पन्न करता और **(विश्वा)** सम्पूर्ण **(रूपाणि)** सूर्य्य आदिकों का **(प्रति, मुञ्चते)** त्याग करता है तथा **(नाकम्)** नहीं विद्यमान दुःख जिसमें उसका **(वि, अख्यत्)** प्रकाश करता है, वह जैसे **(उषसः)** प्रातःकाल के **(अनु, प्रयाणम्)** पीछे गमन को सूर्य्य **(वि, राजति)** विशेष करके शोभित करता है, वैसे सूर्य्य आदि को प्रकाशित करता है, उसकी तुम सब उपासना करो॥२॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर ने विचित्र और अनेक प्रकार के जगत् को सम्पूर्ण प्राणियों के सुख के लिये रचा उसी जगदीश्वर की आप लोग उपासना करो॥२॥

पुनरीश्वरः कीदृशोऽस्तीत्याह॥

फिर ईश्वर कैसा है, इस विषय को कहते हैं॥

यस्य॑ प्र॒याण॒मन्व॒न्य इद्ययु॒र्देवा॒ देव॑स्य॒ मह्ना॒मोज॑सा।

यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना॥ ३॥

यस्य। प्रऽयानम्। अनु। अन्ये। इत्। ययुः। देवाः। देवस्य। महिमानम्। ओजसा। यः। पार्थिवानि। विऽममे। सः। एतशः। रजांसि। देवः। सविता। महिऽत्वना॥ ३॥

पदार्थः-(यस्य) जगदीश्वरस्य **(प्रयाणम्)** प्रकर्षेण याति गच्छति येन तत् **(अनु) (अन्ये) (इत्)** एव **(ययुः)** गच्छन्ति **(देवाः)** सूर्य्यादयः **(देवस्य)** सर्वेषां प्रकाशस्य **(महिमानम्) (ओजसा)** पराक्रमेण बलेन **(यः) (पार्थिवानि)** अन्तरिक्षे विदितानि कार्य्याणि। **पृथिवीत्यन्तरिक्षनामसु पठितम्।** (निघं०१.३) **(विममे)** विशेषेण मिमीते विधत्ते **(सः) (एतशः)** सर्वत्र प्राप्तः **(रजांसि)** लोकान् **(देवः)** सर्वसुखदाता **(सविता)** सकलैश्वर्य्यविधाता **(महित्वना)** महिम्ना॥ ३॥

अन्वयः-हे विद्वांसो! यस्य देवस्य प्रयाणं महिमानमन्वन्य इत् वस्वादयो देवा ययुः। य एतशस्सविता देवो महित्वनैजसा पार्थिवानि रजांसि विममे स एव सर्वैर्ध्येयोऽस्ति॥ ३॥

भावार्थः-हे मनुष्या! यः सूर्य्यादीनां धर्तॄणां धर्त्ता दातॄणां दाता महतां महान् प्रकृत्याख्यात् कारणात् सर्वं जगद्विधत्ते यमनु सर्वे जीवन्ति तिष्ठन्ति च स एव सर्वजगद्विधाता ध्यातव्योऽस्ति॥ ३॥

पदार्थः-हे विद्वानो! **(यस्य)** जिस जगदीश्वर **(देवस्य)** सब के प्रकाशक के **(प्रयाणम्)** अच्छी तरह चलते हैं, जिससे उस मार्ग और **(महिमानम्)** महिमा को **(अनु)** पश्चात् **(अन्ये, इत्)** और ही वसु आदि **(देवाः)** प्रकाश करने वाले सूर्य्य आदि **(ययुः)** चलते अर्थात् प्राप्त होते हैं और **(यः)** जो **(एतशः)** सर्वत्र व्याप्त **(सविता)** सम्पूर्ण ऐश्वर्य्यों का करने और **(देवः)** सम्पूर्ण सुखों का देने वाला **(महित्वना)** महिमा से **(ओजसा)** पराक्रम से और बल से **(पार्थिवानि)** अन्तरिक्ष में विदित कार्यों और **(रजांसि)** लोकों को **(विममे)** विशेष करके रचता है **(सः)** वही सब से ध्यान करने योग्य है॥ ३॥

भावार्थः-हे मनुष्यो! जो सूर्य्य आदिकों के धारण करने वालों का धारण करने वाला और देने वालों का देने वाला, बड़ों और प्रकृतिरूप कारण से सम्पूर्ण जगत् को रचता है और जिसके पीछे अर्थात् आश्रय से सब जीवते और स्थित हैं, वही सम्पूर्ण जगत् का रचने वाला ईश्वर ध्यान करने योग्य है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि।

उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः॥ ४॥

उत। यासि। सवितरिति। त्रीणि। रोचना। उत। सूर्यस्य। रश्मिऽभिः। सम्। उच्यसि। उत। रात्रीम्। उभयतः। परि। ईयसे। उत। मित्रः। भवसि। देव। धर्मऽभिः॥ ४॥

पदार्थः-(उत) अपि **(यासि)** प्राप्नोषि **(सवितः)** सकलजगदुत्पादक **(त्रीणि)** सूर्य्याचन्द्रविद्युदाख्यानि **(रोचना)** प्रकाशकानि **(उत) (सूर्य्यस्य) (रश्मिभिः)** किरणैः **(सम्) (उच्यसि)**

वदसि **(उत)** **(रात्रीम्)** **(उभयतः)** **(परि, ईयसे)** **(उत)** **(मित्रः)** सखा **(भवसि)** **(देव)** विद्वन् **(धर्मभिः)** धर्म्माचरणैः॥४॥

अन्वयः-हे सवितर्देव! यस्त्वमुत त्रीणि रोचना यास्युत सूर्य्यस्य रश्मिभिः समुच्यसि। उतोभयतो रात्रीं परीयस उत धर्म्मभिर्मित्रो भवसि स त्वमस्माभिः सत्कर्त्तव्योऽसि॥४॥

भावार्थः-हे मनुष्या! यस्सर्वेश्वरस्त्रीन् विद्युत्सूर्य्याचन्द्रान् महतो दीपान्निर्माय सर्वत्र व्याप्तः सर्वस्य सुहृत् सन् सूर्य्यादीनभिव्याप्य धृत्वा प्रकाशयति स एव सर्वथा पूज्योऽस्ति॥४॥

पदार्थः-हे **(सवितः)** सम्पूर्ण जगत् को उत्पन्न करने वाले **(देव)** विद्वन्! जो आप **(उत)** निश्चय से **(त्रीणि)** सूर्य्य, चन्द्रमा और बिजुली नामक **(रोचना)** प्रकाशकों को **(यासि)** प्राप्त होते **(उत)** और **(सूर्य्यस्य)** सूर्य की **(रश्मिभिः)** किरणों से **(सम्, उच्यसि)** उत्तम प्रकार कहते हो **(उत)** और **(उभयतः)** दोनों ओर से **(रात्रीम्)** अन्धकार को **(परि, ईयसे)** दूर करते हो **(उत)** और **(धर्म्मभिः)** धर्म्माचरणों से **(मित्रः)** मित्र **(भवसि)** होते हो, वह आप हम लोगों से सत्कार करने योग्य हो॥४॥

भावार्थः-हे मनुष्यो! जो सब का स्वामी, ईश्वर तीन-बिजुली, सूर्य्य और चन्द्रमा रूप बड़े दीपों को रच के सर्वत्र व्याप्त और सब का मित्र हुआ और सूर्य्य आदि को अभिव्याप्त हो और धारण कर के प्रकाशित करता है, वही सब प्रकार पूज्य है अर्थात् उपासना करने योग्य है॥४॥

पुनरीश्वरविषयमाह॥

फिर ईश्वरविषय को कहते हैं॥

उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः।

उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे॥५॥२४॥

उत। ईशिषे। प्रऽसवस्य। त्वम्। एकः। इत्। उत। पूषा। भवसि। देव। यामऽभिः। उत। इदम्। विश्वम्। भुवनम्। वि। राजसि। श्यावऽअश्वः। ते। सवितरिति। स्तोमम्। आनशे॥५॥

पदार्थः-**(उत)** **(ईशिषे)** ऐश्वर्य्यं विदधासि **(प्रसवस्य)** प्रसूतस्य जगतः **(त्वम्)** **(एकः)** अद्वितीयः **(इत्)** एव **(उत)** अपि **(पूषा)** पुष्टिकर्ता **(भवसि)** **(देव)** सकलसुखप्रदातः **(यामभिः)** प्रहरैः **(उत)** **(इदम्)** **(विश्वम्)** **(भुवनम्)** **(वि)** **(राजसि)** **(श्यावाश्वः)** सूर्य्यलोकः **(ते)** तव **(सवितः)** सत्यव्यवहारे प्रेरक **(स्तोमम्)** प्रशंसाम् **(आनशे)** व्याप्नोति॥५॥

अन्वयः-हे सवितर्देव! ते यः श्यावाश्वो यामभिः स्तोममानशे तद्दृष्टान्तेनोतेदं विश्वं भुवनं त्वं वि राजसि उत पूषा भवसि उतैक इदेव प्रसवस्येशिषे॥५॥

भावार्थः-हे मनुष्या! यस्य महिमज्ञापनाय सूर्य्यादयो लोका दृष्टान्ताः सन्ति तमेवाखिलं परमैश्वर्य्यप्रदं यूयं ध्याययेति॥५॥

अत्र सवित्रीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकाशीतितमं सूक्तं चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सवितः)** सत्य व्यवहार में प्रेरणा करने और **(देव)** सम्पूर्ण सुखों के देने वाले **(ते)** आपका जो **(श्यावाश्वः)** सूर्यलोक **(यामभिः)** प्रहरों से **(स्तोमम्)** प्रशंसा को **(आनशे)** व्याप्त होता है, उसके दृष्टान्त से **(उत)** भी **(इदम्)** इस **(विश्वम्)** समस्त **(भुवनम्)** भुवन को **(त्वम्)** आप **(वि, राजसि)** प्रकाशित करते हो **(उत)** और **(पूषा)** पुष्टि करने वाले **(भवसि)** होते हो **(उत)** और **(एकः)** द्वितीयरहित **(इत्)** ही **(प्रसवस्य)** उत्पन्न हुए जगत् के **(ईशिषे)** ऐश्वर्य का विधान करते हो॥५॥

भावार्थः-हे मनुष्यो! जिसके महत्त्व के जनाने के लिये सूर्य्य आदि लोक दृष्टान्त हैं, उसी सम्पूर्ण परमैश्वर्य के देने वाले का तुम ध्यान करो॥५॥

इस सूक्त में सत्यव्यवहार में प्रेरणा करने वाले ईश्वर के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इक्यासीवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य द्व्यशीतितमस्य सूक्तस्य श्यावाश्व आत्रेय ऋषिः। सविता देवता। १ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। २, ४, ९ निचृद्गायत्री। ३, ५, ६, ७ गायत्री। ८ विराड्गायत्री छन्दः। षड्जः स्वरः॥

अथ मनुष्यैः क उपास्य इत्याह॥

अब नव ऋचा वाले बयासीवें सूक्त का प्रारम्भ है उसके प्रथम मन्त्र में मनुष्यों को किसकी उपासना करनी चाहिये, इस विषय को कहते हैं॥

तत्स॑वि॒तुर्वृ॑णीमहे व॒यं दे॒वस्य॒ भोज॑नम्। श्रेष्ठं॑ सर्व॒धात॑मं॒ तुरं॑ भग॑स्य धीमहि॥ १॥

तत्। स॒वि॒तुः। वृ॒णी॒म॒हे॒। व॒यम्। दे॒वस्य॑। भोज॑नम्। श्रेष्ठ॑म्। स॒र्व॒ऽधात॑मम्। तुर॑म्। भग॑स्य। धी॒म॒हि॒॥ १॥

पदार्थः-(तत्) (सवितुः) अन्तर्य्यामिणो जगदीश्वरस्य **(वृणीमहे)** स्वीकुर्महे **(वयम्) (देवस्य)** सकलप्रकाशकस्य **(भोजनम्)** पालनं भोक्तव्यं वा **(श्रेष्ठम्)** अतिशयेन प्रशस्तम् **(सर्वधातमम्)** यः सर्वं दधाति सोऽतिशयितस्तम् **(तुरम्)** अविद्यादिदोषनाशकं सामर्थ्यम् **(भगस्य)** सकलैश्वर्य्ययुक्तम् **(धीमहि)** दधीमहि॥ १॥

अन्वयः-हे मनुष्या! वयं भगस्य सवितुर्देवस्य यच्छ्रेष्ठं भोजनं सर्वधातमं तुरं वृणीमहे धीमहि तद्यूयं स्वीकुरुत॥ १॥

भावार्थः-ये मनुष्याः सर्वोत्तमजगदीश्वरमुपास्यान्यस्योपासनं त्यजन्ति ते सर्वैश्वर्य्या भवन्ति॥ १॥

पदार्थः-हे मनुष्यो! **(वयम्)** हम लोग **(भगस्य)** सम्पूर्ण ऐश्वर्य्य से युक्त **(सवितुः)** अन्तर्य्यामी **(देवस्य)** सम्पूर्ण के प्रकाशक जगदीश्वर का जो **(श्रेष्ठम्)** अतिशय उत्तम और **(भोजनम्)** पालन वा भोजन करने योग्य **(सर्वधातमम्)** सब को अत्यन्त धारण करने वाले **(तुरम्)** अविद्या आदि दोषों के नाश करने वाले सामर्थ्य को **(वृणीमहे)** स्वीकार करते और **(धीमहि)** धारण करते हैं **(तत्)** उसको तुम लोग स्वीकार करो॥ १॥

भावार्थः-जो मनुष्य सबसे उत्तम जगदीश्वर की उपासना करके अन्य की उपासना का त्याग करते हैं, वे सम्पूर्ण ऐश्वर्य्य से युक्त होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अस्य॒ हि स्वय॑शस्तरं सवि॒तुः कच्च॒न प्रि॒यम्। न मि॒नन्ति॑ स्व॒राज्य॑म्॥ २॥

अस्य॑। हि। स्वय॑शःऽतरम्। स॒वि॒तुः। कत्। च॒न। प्रि॒यम्। न। मि॒नन्ति॑। स्व॒ऽराज्य॑म्॥ २॥

पदार्थः-(अस्य) परमात्मनः **(हि)** **(स्वयशस्तरम्)** स्वकीयं यशं कीर्त्तिर्यस्य तदतिशयितम् **(सवितुः)** जगदीश्वरस्य **(कत्)** कदा **(चन)** अपि **(प्रियम्)** **(न)** निषेधे **(मिनन्ति)** हिंसन्ति **(स्वराज्यम्)** स्वकीयं राष्ट्रम्॥२॥

अन्वयः-ये ह्यस्य सवितुरीश्वरस्य स्वयशस्तरं प्रियं स्वराज्यं कच्चन न मिनन्ति ते धार्मिका जायन्ते॥२॥

भावार्थः-ये परमात्माज्ञानं हिंसन्ति ते यशस्विनो भूत्वा राज्यमाप्नुवन्ति॥२॥

पदार्थः-जो **(हि)** निश्चय से **(अस्य)** इस परमात्मा **(सवितुः)** जगदीश्वर का **(स्वयशस्तरम्)** अपना यश जिसका वह अतिशयित **(प्रियम्)** अत्यन्त प्रिय **(स्वराज्यम्)** अपने राज्य को **(कत्, चन)** कभी **(न)** नहीं **(मिनन्ति)** नष्ट करते हैं, वे धार्म्मिक होते हैं॥२॥

भावार्थः-जो परमात्मा के बीच अज्ञान का नाश करते हैं, वे यशस्वी होकर राज्य को प्राप्त होते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे॥३॥

सः। हि। रत्नानि। दाशुषे। सुवाति। सविता। भगः। तम्। भागम्। चित्रम्। ईमहे॥३॥

पदार्थः-(सः) **(हि)** **(रत्नानि)** धनानि **(दाशुषे)** दात्रे **(सुवाति)** जनयति **(सविता)** प्रसवकर्त्ता **(भगः)** ऐश्वर्य्यवान् **(तम्)** **(भागम्)** भगानामिमम् **(चित्रम्)** अद्भुतम् **(ईमहे)** प्राप्नुयाम जानीम वा॥३॥

अन्वयः-यः सविता भगो दाशुषे रत्नानि सुवाति तं भागं चित्रमीमहे स हि दातोदारोऽस्ति॥३॥

भावार्थः-ये मनुष्याः सर्वरत्नप्रदं परमात्मानं सेवन्ते तेऽद्भुतमैश्वर्य्यमाप्नुवन्ति॥३॥

पदार्थः-जो **(सविता)** उत्पन्न करने वाला **(भगः)** ऐश्वर्य्यवान् परमात्मा **(दाशुषे)** दाताजन के लिये **(रत्नानि)** धनों को **(सुवाति)** उत्पन्न करता है **(तम्)** उस **(भागम्)** ऐश्वर्य्यसम्बन्धी **(चित्रम्)** अद्भुत को **(ईमहे)** प्राप्त होवें वा जानें और **(सः, हि)** वही उदार दाता है॥३॥

भावार्थः-जो मनुष्य सम्पूर्ण रत्नों के देने वाले परमात्मा की सेवा करते हैं वे अद्भुत ऐश्वर्य्य को प्राप्त होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अद्या नो देव सवितः प्रजावत्सावीः सौभगम्। परा दुःष्वप्न्यं सुव॥४॥

अद्य। नः। देव। सवितरिति। प्रजाऽवत्। सावीः। सौभगम्। परा। दुःऽस्वप्न्यम्। सुव॥४॥

पदार्थः-(अद्या) अद्य। अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्मभ्यमस्माकं वा **(देव)** प्रकाशमान **(सवितः)** सर्वैश्वर्य्यप्रदेश्वर **(प्रजावत्)** बह्व्यः प्रजा विद्यन्ते यस्य तत् **(सावीः)** जनय **(सौभगम्)** शौभनैश्वर्य्यस्य भागम् **(परा) (दुःष्वप्न्यम्)** दुष्टेषु स्वप्नेषु भवं दुःखम् **(सुव)** प्रेरय॥४॥

अन्वयः-हे सवितर्देव! त्वं कृपया नोऽद्या प्रजावत्सौभगं सावीर्दुःष्वप्न्यं परा सुव दूरं गमय॥४॥

भावार्थः-ये परमेश्वरं प्रार्थयित्वा धर्म्यं पुरुषार्थं कुर्वन्ति ते महदैश्वर्या भूत्वा दुःखदारिद्र्यविरहा जायन्ते॥४॥

पदार्थः-हे **(सवितः)** सम्पूर्ण ऐश्वर्य्य के देने वाले स्वामिन् **(देव)** शोभित! आप कृपा से **(नः)** हम लोगों के लिये वा हम लोगों के **(अद्या)** आज **(प्रजावत्)** बहुत प्रजायें विद्यमान जिसके उस **(सौभगम्)** सुन्दर ऐश्वर्य के भाग को **(सावीः)** उत्पन्न कीजिये और **(दुःष्वप्न्यम्)** दुष्ट स्वप्नों में उत्पन्न दुःख को **(परा, सुव)** दूर कीजिये॥४॥

भावार्थः-जो परमेश्वर की प्रार्थना करके धर्म्मयुक्त पुरुषार्थ करते हैं, वे बहुत ऐश्वर्य्य वाले होकर दुःख और दारिद्र्य से रहित होते हैं॥४॥

मनुष्यैः किमर्थमीश्वरः प्रार्थनीय इत्याह॥

मनुष्य किसलिये ईश्वर की प्रार्थना करें, इस विषय को कहते हैं॥

विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥५॥२५॥

विश्वा॑नि। दे॒व॒। स॒वि॒तः॒। दुः॒ऽइ॒ता॒नि॑। परा॑। सु॒व॒। यत्। भ॒द्रम्। तत्। न॒ः॒। आ। सु॒व॒॥५॥

पदार्थः-(विश्वानि) सर्वाणि **(देव)** सकलजगत्प्रकाशक **(सवितः)** सर्वविश्वोत्पादक **(दुरितानि)** दुष्टाचरणानि **(परा) (सुव)** दूरे प्रक्षिप **(यत्) (भद्रम्)** कल्याणकरम् **(तत्) (नः)** अस्मभ्यम् **(आ) (सुव)** समन्तात् प्रापय॥५॥

अन्वयः-हे सवितर्देव जगदीश्वर! विश्वानि दुरितानि त्वं परा सुव यद्भद्रं तन्न आ सुव॥५॥

भावार्थः-हे परमेश्वर! भवान् कृपया यावन्त्यस्मासु दुष्टाचरणानि सन्ति तावन्ति पृथक्कृत्य धर्म्यगुणकर्म-स्वभावान् स्थापयतु॥५॥

पदार्थः-हे **(सवितः)** संपूर्ण संसार के उत्पन्न करने वाले **(देव)** और संपूर्ण संसार को प्रकाशित करने वाले जगदीश्वर! **(विश्वानि)** संपूर्ण **(दुरितानि)** दुष्ट आचरणों को आप **(परा, सुव)** दूर कीजिये और **(यत्)** जो **(भद्रम्)** कल्याणकारक है **(तत्)** उसको **(नः)** हम लोगों के लिये **(आ, सुव)** सब प्रकार से प्राप्त कीजिये॥५॥

भावार्थः-हे परमेश्वर! आप कृपा से जितने हम लोगों में दुष्ट आचरण हैं, उनको अलग करके धर्म्मयुक्त गुण, कर्म्म और स्वभावों को स्थापित कीजिये॥५॥

अस्मिन् जगति मनुष्यैः किं कर्त्तव्यमित्याह॥

इस जगत् में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अनागसो॒ अदि॑तये दे॒वस्य॑ स॒वितुः॑ स॒वे। विश्वा॑ वा॒मानि॑ धीमहि॥६॥

अनागसः। अदितये। देवस्य। सवितुः। सवे। विश्वा। वामानि। धीमहि॥६॥

पदार्थः-(अनागसः) अनपराधाः **(अदितये)** मात्राद्याय **(देवस्य)** सर्वसुखदातुः **(सवितुः)** सकलैश्वर्य्यसम्पन्नस्य **(सवे)** जगदूपैश्वर्य्ये **(विश्वा)** सर्वाणि **(वामानि)** वननीयानि सम्भजनीयानि धनानि **(धीमहि)** धरेम॥६॥

अन्वयः-हे मनुष्या! यथाऽनागसो वयमदितये देवस्य सवितुः सवे विश्वा वामानि धीमहि तथा यूयमपि धरत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्वांसोऽस्मिन्नीश्वररचिते जगति सृष्टिक्रमेण विद्यया कार्य्याणि साध्नुवन्ति तथैवान्यैरपि साधनीयानि॥६॥

पदार्थः-हे मनुष्यो! जैसे **(अनागसः)** अपराध से रहित हम लोग **(अदितये)** माता आदि के लिये **(देवस्य)** सर्व सुख देने वाले **(सवितुः)** सम्पूर्ण ऐश्वर्य से युक्त परमात्मा के **(सवे)** जगदूप ऐश्वर्य्य में **(विश्वा)** सम्पूर्ण **(वामानि)** संभोग करने योग्य धनों को **(धीमहि)** धारण करें, वैसे आप लोग भी धारण करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विद्वान् जन इस ईश्वर से रचे हुए संसार में सृष्टिक्रम से विद्या के द्वारा कार्य्यों को सिद्ध करते हैं, वैसे ही अन्य जनों को भी चाहिये कि सिद्ध करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आ वि॒श्वदे॑वं॒ सत्प॑तिं सू॒क्तैर॒द्या वृ॑णीमहे। स॒त्यस॑वं सवि॒तार॑म्॥७॥

आ। विश्वऽदेवम्। सत्ऽपतिम्। सुऽउक्तैः। अद्य। वृणीमहे। सत्यऽसवम्। सवितारम्॥७॥

पदार्थः-(आ) समन्तात् **(विश्वदेवम्)** विश्वस्य प्रकाशकम् **(सत्पतिम्)** सतां प्रकृत्यादीनां सत्पुरुषाणां पतिं पालकम् **(सूक्तैः)** सुष्ठु सत्यैर्वचनैर्वेदोक्तैर्वा **(अद्या)** अद्य। अत्र **संहितायामिति** दीर्घः। **(वृणीमहे)** स्वीकुर्महे **(सत्यसवम्)** सत्योऽविनाशी सवः सामर्थ्ययोगो यस्य तम् **(सवितारम्)** सकलपदार्थनिर्मातारम्॥७॥

अन्वयः-हे मनुष्या! यथा वयमद्या सूक्तैर्विश्वदेवं सत्पतिं सत्यसवं सवितारं परमात्मानमाऽऽवृणीमहे तथा यूयमपि वृणुत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः परमेश्वरं विहाय कस्याप्यन्यस्याश्रयो नैव कर्त्तव्यः॥७॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(अद्या)** आज **(सूक्तैः)** उत्तम प्रकार कहे गये सत्य वचनों वा वेदोक्त वचनों से **(विश्वदेवम्)** संसार के प्रकाश करने और **(सत्पतिम्)** प्रकृति आदि पदार्थ और सत्पुरुषों के पालन करने वाले **(सत्यसवम्)** नहीं नाश होने वाला सामर्थ्ययोग्य जिसका उस **(सवितारम्)** सम्पूर्ण पदार्थों के बनाने वाले परमात्मा का **(आ, वृणीमहे)** स्वीकार करते हैं, वैसे आप लोग भी स्वीकार कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि परमेश्वर को छोड़कर किसी अन्य का आश्रय नहीं करें॥७॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्य कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

य इ॒मे उ॒भे अह॑नी पु॒र एत्यप्र॑युच्छन्। स्वा॒धीर्दे॒वः स॑वि॒ता॥८॥

यः। इ॒मे। उ॒भे इति॑। अह॑नी॒ इति॑। पु॒रः। एति॑। अप्र॑ऽयुच्छन्। सु॒ऽआ॒धीः। दे॒वः। स॒वि॒ता॥८॥

पदार्थः-(यः) **(इमे)** **(उभे)** **(अहनी)** रात्रिदिने **(पुरः)** **(एति)** प्राप्नोति **(अप्रयुच्छन्)** प्रमादमकुर्वन् **(स्वाधीः)** सुष्ठ्वाधीयते येन सः **(देवः)** द्योतमानः **(सविता)** सत्कर्मसु प्रेरकः॥८॥

अन्वयः-योऽप्रयुच्छन् मनुष्यो यथा स्वाधीर्देवः सविता सत्ये वर्त्तते तथेमे उभे अहनी सत्येन पुर एति स एव भाग्यशाली भवति॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा परमेश्वरः स्वकीयान्नियमान् यथावद्रक्षति तथैव मनुष्या अपि सुनियमान् यथावद्रक्षन्तु॥८॥

पदार्थः-(यः) जो **(अप्रयुच्छन्)** प्रमाद को नहीं करता हुआ मनुष्य जैसे **(स्वाधीः)** उत्तम प्रकार स्थापन किया जाता है जिससे वह **(देवः)** प्रकाशमान **(सविता)** श्रेष्ठ कर्म्मों में प्रेरणा करने वाला सत्य में वर्त्तमान है, वैसे **(इमे)** इन **(उभे)** दोनों **(अहनी)** रात्रि और दिनों को सत्य से **(पुरः)** आगे **(एति)** प्राप्त होता है, वही भाग्यशाली होता है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे परमेश्वर अपने नियमों की यथायोग्य रक्षा करता है, वैसे ही मनुष्य भी श्रेष्ठ नियमों की यथावत् रक्षा करें॥८॥

मनुष्यैः कः परमगुरुर्मन्यत इत्याह॥

मनुष्यों से कौन परम गुरु माना जाता है, इस विषय को कहते है॥

य इ॒मा विश्वा॑ जा॒तान्या॑श्रा॒वय॑ति॒ श्लोके॑न। प्र च॑ सु॒वाति॑ सवि॒ता॥९॥२६॥

यः। इ॒मा। विश्वा॑। जा॒तानि॑। आ॒ऽश्रव॑यति। श्लोके॑न। प्र। च॒। सु॒वाति॑। स॒वि॒ता॥९॥

पदार्थः-(यः) (इमा) इमानि **(विश्वा)** सर्वाणि प्रज्ञानानि **(जातानि) (आश्रावयति) (श्लोकेन)** वाचा। **श्लोक इति वाङ्नामसु पठितम्।** (निघं०१.११) **(प्र) (च) (सुवाति)** प्रेरयेत् **(सविता)** प्रेरकः॥९॥

अन्वयः-हे मनुष्या! यः श्लोकेनेमा विश्वा जातान्याश्रावयति स च सविताऽस्मान् प्र सुवाति॥९॥

भावार्थः-हे मनुष्या! यो जगदीश्वरो वेदद्वारा मनुष्येभ्यः सर्वा विद्या उपदिशति स एव परमगुरुर्मन्तव्यः॥९॥

अत्रेश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्व्यशीतितमं सूक्तं षड्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(श्लोकेन)** वाणी से **(इमा)** इन **(विश्वा)** सम्पूर्ण प्रज्ञानों और **(जातानि)** उत्पन्न हुओं को **(आश्रावयति)** सब प्रकार से सुनाता है वह **(च)** और **(सविता)** प्रेरणा करने वाला हम लोगों को **(प्र, सुवाति)** प्रेरणा करे॥९॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर वेद के द्वारा मनुष्यों के लिये सम्पूर्ण विद्याओं का उपदेश करता है, वही परमगुरु मानने योग्य है॥९॥

इस सूक्त में ईश्वर और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये॥

यह बयासीवां सूक्त और छब्बीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य त्र्यशीतितमस्य सूक्तस्य अत्रिर्ऋषिः। पृथिवी देवता। १, ६ निचृत्त्रिष्टुप्। २ स्वराट् त्रिष्टुप्। ३ भुरिक्त्रिष्टुप्। ५ त्रिष्टुप्। ७ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ निचृज्जगती छन्दः। निषादः स्वरः। ८, १० भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ९ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मेघः कीदृशोऽस्तीत्याह॥

अब दश ऋचा वाले तिरासीवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मेघ कैसा है, इस विषय को कहते हैं॥

अच्छा॑ वद तवसं॑ गी॒र्भिरा॒भिः स्तु॒हि प॒र्जन्यं॒ नम॒सा वि॑वास।
कनि॑क्रदद् वृष॒भो जी॒रदा॑नू॒ रेतो॑ दधा॒त्योष॑धीषु॒ गर्भ॑म्॥ १॥

अच्छ॑। व॒द॒। त॒वस॑म्। गी॒ऽभिः। आ॒भिः। स्तु॒हि। प॒र्जन्य॑म्। नम॑सा। आ। वि॒वा॒स॒। कनि॑क्रदत्। वृ॒ष॒भः। जी॒रऽदा॑नुः। रेतः॑। दु॒धा॒ति॒। ओष॑धीषु। गर्भ॑म्॥ १॥

पदार्थः-(अच्छा) अत्र **संहितायामि**ति दीर्घः। **(वद)** **(तवसम्)** बलम् **(गीर्भिः)** वाग्भिः **(आभिः)** वर्त्तमानाभिः **(स्तुहि)** प्रशंस **(पर्जन्यम्)** मेघम् **(नमसा)** अन्नाद्येन **(आ)** **(विवास)** विवसति **(कनिक्रदत्)** शब्दयन् **(वृषभः)** बलीवर्द इव **(जीरदानुः)** यो जीवयति **(रेतः)** उदकम्। **रेत इत्युदकनामसु पठितम्।** (निघं०१.१२) **(दधाति)** **(ओषधीषु)** **(गर्भम्)**॥१॥

अन्वयः-हे विद्वन्! यो वृषभ इव जीरदानुः कनिक्रदन्नमसाऽऽविवासौषधीषु रेतो गर्भं दधाति तं पर्जन्यमाभिर्गीर्भिरच्छा वद तवसं च स्तुहि॥१॥

भावार्थः-मनुष्यैर्विद्वद्भ्यो मेघविद्या यथावद्विज्ञातव्या॥१॥

पदार्थः-हे विद्वान्! जो **(वृषभः)** थूहे वाले बैल के सदृश **(जीरदानुः)** जीवाने वाला **(कनिक्रदत्)** शब्द करता हुआ **(नमसा)** अन्न आदि के साथ **(आ, विवास)** सब ओर से बसता और **[(ओषधीषु)]** ओषधियों में **(रेतः)** जल रूप **(गर्भम्)** गर्भ को **(दधाति)** धारण करता है उस **(पर्जन्यम्)** मेघ को **(आभिः)** इन वर्त्तमान **(गीर्भिः)** वाणियों से **(अच्छा)** उत्तम प्रकार **(वद)** कहिये और **(तवसम्)** बल की **(स्तुहि)** प्रशंसा करिये॥१॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों से मेघविद्या का यथावत् विज्ञान करें॥१॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

वि वृ॒क्षान् ह॑न्त्यु॒त ह॑न्ति र॒क्षसो॒ विश्वं॑ बिभाय॒ भुव॑नं म॒हाव॑धात्।
उ॒ताना॑गा ईषते॒ वृष्ण्या॑वतो॒ यत्प॒र्जन्यः॑ स्त॒नय॒न् हन्ति॑ दु॒ष्कृत॑ः॥ २॥

वि। वृक्षान्। हन्ति। उत। हन्ति। रक्षसः। विश्वम्। बिभाय। भुवनम्। महाऽवधात्। उत। अनागाः। ईषते। वृष्ण्यऽवतः। यत्। पर्जन्यः। स्तनयन्। हन्ति। दुःऽकृतः॥ २॥

पदार्थः-(वि) (वृक्षान्) छेत्तुमर्हान् **(हन्ति) (उत)** अपि **(हन्ति) (रक्षसः)** दुष्टाचारान् **(विश्वम्) (बिभाय)** बिभेति **(भुवनम्)** उदकम्। **भुवनमित्युदकनामसु पठितम्।** (निघं०१.१२) **(महावधात्)** महतो हननात् **(उत) (अनागाः)** न विद्यत आगोऽपराधो यस्मिन् **(ईषते)** हिनस्ति **(वृष्ण्यावतः)** वृष्ण्यानि वर्षितुं योग्यान्यभ्राणि विद्यन्ते येषु तान् **(यत्)** यः **(पर्जन्यः) (स्तनयन्)** शब्दयन् **(हन्ति) (दुष्कृतः)** दुष्टाचारान्॥ २॥

अन्वयः-हे मनुष्या! यथा तक्षा वृक्षान् वि हन्त्युत न्यायकारी राजा येभ्यो विश्वं बिभाय तान् रक्षसो हन्ति यद्यः पर्जन्यः स्तनयन्महावधाद् भुवनं वर्षयति यथा चाऽनागा वृष्ण्यावत ईषत उत दुष्कृतो हन्ति तथैव मनुष्या वर्त्तन्ताम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः पालनीयान् पालयन्ति हन्तव्यान् घ्नन्ति ते राजसत्तावन्तो जायन्ते॥ २॥

पदार्थः-हे मनुष्यो! जैसे बढ़ई **(वृक्षान्)** काटने योग्य वृक्षों को **(वि, हन्ति)** विशेष कर के काटता है **(उत)** और न्यायकारी राजा जिनसे **(विश्वम्)** सम्पूर्ण संसार **(बिभाय)** भय करता है, उन **(रक्षसः)** दुष्ट आचरण वालों का **(हन्ति)** नाश करता है और **(यत्)** जो **(पर्जन्यः)** मेघ **(स्तनयन्)** शब्द करता हुआ **(महावधात्)** बड़े हनन से **(भुवनम्)** जल को वर्षाता है और जैसे **(अनागाः)** नहीं अपराध जिसमें वह **(वृष्ण्यावतः)** वर्षने योग्य मेघ जिनमें उन का **(ईषते)** नाश करता है **(उत)** और **(दुष्कृतः)** दुष्ट कर्मों के करने वालों का **(हन्ति)** नाश करता है, वैसा ही मनुष्य वर्ताव करें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य पालन करने योग्यों का पालन करते हैं और नाश करने योग्यों का नाश करते हैं, वे राजसत्ता से युक्त होते हैं॥ २॥

पुनर्मनुष्यैः किं वेदितव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान् कृणुते वर्ष्याँ३ अह।
दूरात् सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं नभः॥ ३॥

रथीऽइव। कशया। अश्वान्। अभिऽक्षिपन्। आविः। दूतान्। कृणुते। वर्ष्यान्। अह। दूरात्। सिंहस्य। स्तनथाः। उत्। ईरते। यत्। पर्जन्यः। कृणुते। वर्ष्यम्। नभः॥ ३॥

पदार्थः-(रथीव) बहवो रथा विद्यन्ते यस्य तद्वत् **(कशया)** ताडनार्थरज्वा **(अश्वान्)** तुरङ्गान् **(अभिक्षिपन्)** आभिमुख्ये प्रेरयन् **(आविः)** प्राकट्ये **(दूतान्) (कृणुते)** करोति **(वर्ष्यान्)** वर्षासु साधून्

(अह) विनिग्रहे **(दूरात्)** **(सिंहस्य)** **(स्तनथाः)** शब्दयेः **(उत्)** **(ईरते)** कम्पयन्ति गच्छन्ति वा **(यत्)** यः **(पर्जन्यः)** मेघः **(कृणुते)** **(वर्ष्यम्)** वर्षासु भवम् **(नभः)** अन्तरिक्षम्॥३॥

अन्वयः-हे विद्वन्! यद्यः पर्जन्यः कशयाऽश्वानभिक्षिपन् रथीव वर्ष्यान् दूतानाविष्कृणुतेऽह ते दूरात् सिंहस्येवोदीरते पर्जन्यो वर्ष्यन्नभः कृणुते तं त्वं स्तनथाः॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा सारथिरश्वान् यथेष्टं स्थानं नेतुं शक्नोति तथैव मेघो घनानीतस्ततो नयति॥३॥

पदार्थः-हे विद्वन्! **(यत्)** जो **(पर्जन्यः)** मेघ **(कशया)** मारने के लिये रस्सी अर्थात् कोड़े से **(अश्वान्)** घोड़ों को **(अभिक्षिपन्)** सन्मुख लाता हुआ **(रथीव)** बहुत रथ वाले के सदृश **(वर्ष्यान्)** वर्षाओं में श्रेष्ठ **(दूतान्)** दूतों को **(आवि, कृणुते)** प्रकट करता है **(अह)** परतन्त्र करने में वे **(दूरात्)** दूर से **(सिंहस्य)** सिंह के सदृश **(उत्, ईरते)** कम्पाते वा चलते हैं और पर्जन्य **(वर्ष्यम्)** वर्षाओं में हुए **(नभः)** अन्तरिक्ष को **(कृणुते)** करता अर्थात् प्रकट करता है, उसको आप वर्षाओं में हुए **(नभः)** अन्तरिक्ष को **(कृणुते)** करता अर्थात् प्रकट करता है, उसको आप **(स्तनथाः)** पुकारिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सारथी घोड़ों को यथेष्ट स्थान में ले जाने को समर्थ होता है, वैसे ही मेघ जलों को इधर-उधर ले जाता है॥३॥

पुनर्मनुष्यैः किं वेदितव्यमित्याह॥

फिर मनुष्यों को क्या जानना योग्य है, इस विषय को कहते हैं॥

प्र वाता॒ वान्ति॑ प॒तय॑न्ति वि॒द्युत॒ उदोष॑धी॒र्जिह॑ते॒ पिन्व॑ते॒ स्वः॑।
इरा॒ विश्व॑स्मै॒ भुव॑नाय जायते॒ यत्प॒र्जन्यः॑ पृथि॒वीं रे॒तसाव॑ति॥४॥

प्र। वाताः॑। वान्ति॑। प॒तय॑न्ति। वि॒ऽद्युतः॑। उत्। ओष॑धीः। जिह॑ते। पिन्व॑ते। स्व॑रिति॒ स्वः॑। इरा॑। विश्व॑स्मै। भुव॑नाय। जा॒यते॒। यत्। प॒र्जन्यः॑। पृ॒थि॒वीम्। रे॒तसा। अव॑ति॥४॥

पदार्थः-(प्र) प्रकर्षेण **(वाताः)** वायवः **(वान्ति)** गच्छन्ति **(पतयन्ति)** **(विद्युतः)** **(उत्)** **(ओषधीः)** **(जिहते)** प्राप्नुवन्ति **(पिन्वते)** सेवन्ते **(स्वः)** अन्तरिक्षम् **(इरा)** अन्नादिकम्। **इरेत्यन्ननामसु पठितम्।** (निघं० १। ७) **(विश्वस्मै)** सर्वस्मै **(भुवनाय)** **(जायते)** **(यत्)** यः **(पर्जन्यः)** पालनजनकः **(पृथिवीम्)** **(रेतसा)** जलेन **(अवति)** रक्षति॥४॥

अन्वयः-हे मनुष्या! यत्पर्जन्यो रेतसा पृथिवीमवति येन विश्वस्मै भुवनायेरा जायते घनाः स्वः पिन्वते येनौषधीरुज्जिहते यस्माद् विद्युतः पतयन्ति यत्र वाताः प्र वान्ति तं मेघं यथावद्यूयं विजानीत॥४॥

भावार्थः-मनुष्यैर्येन मेघेन सर्वस्य पालनं जायते तस्योन्नतिर्वृक्षप्रवापणेन वनरक्षणेन होमेन च संसाधनीया यतः सर्वस्य पालनं सुखेन जायेत॥४॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(पर्जन्यः)** पालनों को उत्पन्न करने वाला मेघ **(रेतसा)** जल से **(पृथिवीम्)** भूमि की **(अवति)** रक्षा करता है जिससे **(विश्वस्मै)** सम्पूर्ण **(भुवनाय)** भुवन के लिये **(इरा)** अन्न आदिक **(जायते)** उत्पन्न होता है और बादल **(स्वः)** अन्तरिक्ष का **(पिन्वते)** सेवन करते हैं और जिससे **(ओषधीः)** ओषधियों को **(उत्, जिहते)** उत्तमता से प्राप्त होते हैं जिससे **(विद्युतः)** बिजुलियां **(पतयन्ति)** पतन होती है, जहाँ **(वाताः)** पवन **(प्र)** अत्यन्त **(वान्ति)** चलते हैं, उस मेघ को यथावत् तुम विशेष जानो॥४॥

भावार्थः-मनुष्य लोगों को चाहिये कि जिस मेघ से सबका पालन होता है, उसकी वृद्धि वृक्षों के लगने, वनों की रक्षा करने और होम करने से सिद्ध करें, जिससे सब का पालन सुख से होवे॥४॥

पुनः स मेघः कीदृश इत्याह॥

फिर वह मेघ कैसा है, इस विषय को कहते हैं॥

यस्य॑ व्र॒ते पृ॑थि॒वी नन्न॑मीति॒ यस्य॑ व्र॒ते श॒फव॒ज्जर्भु॑रीति।

यस्य॑ व्र॒त ओष॑धीर्वि॒श्वरू॑पा॒: स न॑: पर्जन्य॒ मह्रि॒ शर्म॑ यच्छ॥५॥२७॥

यस्य॑। व्र॒ते। पृ॒थि॒वी। नन्न॑मीति। यस्य॑। व्र॒ते। श॒फऽव॑त्। जर्भु॑रीति। यस्य॑। व्र॒ते। ओष॑धीः। वि॒श्वऽरू॑पाः। सः। न॒ः। प॒र्ज॒न्य॒। महि॑। शर्म॑। य॒च्छ॒॥५॥

पदार्थः-(यस्य) (व्रते) कर्म्मणि **(पृथिवी) (नंनमीति)** भृशं नमति **(यस्य) (व्रते) (शफवत्)** शफेन तुल्यम् **(जर्भुरीति)** भृशं धरति **(यस्य) (व्रते) (ओषधीः)** सोमाद्याः **(विश्वरूपाः) (सः) (नः)** अस्मभ्यम् **(पर्जन्य)** पर्जन्यवद्वर्त्तमान **(महि)** महत् **(शर्म्म)** गृहम् **(यच्छ)**॥५॥

अन्वयः-हे पर्जन्य तद्वद्वर्त्तमान विद्वन्! यस्य मेघस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरीति यस्य व्रते विश्वरूपा ओषधीर्जायन्ते तद्विद्यया युक्तः स त्वं नो महि शर्म्म यच्छ॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि वर्षा न भवेयुस्तर्हि कस्यापि जीवनं न भवेत्॥५॥

पदार्थः-हे **(पर्जन्य)** मेघ के सदृश वर्तमान विद्वन्! **(यस्य)** जिस मेघ के **(व्रते)** कर्म्म में **(पृथिवी)** भूमि **(नंनमीति)** अत्यन्त नम्र होती और **(यस्य)** जिस मेघ के **(व्रते)** कर्म्म में **(शफवत्)** खुर के तुल्य **(जुर्भुरीति)** निरन्तर धारण करती है और **(यस्य)** जिस मेघ के **(व्रते)** कर्म में **(विश्वरूपाः)** अनेक प्रकार की **(ओषधीः)** सोमलता आदि ओषधियां उत्पन्न होती हैं, उस मेघ की विद्या से युक्त **(सः)** वह आप **(नः)** हम लोगों के लिये **(महि)** बड़े **(शर्म)** गृह को **(यच्छ)** दीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वृष्टियां न होवें तो किसी का भी जीवन न होवे॥५॥

पुनः सः मेघः कीदृश इत्याह॥

फिर वह मेघ कैसा है, इस विषय को कहते हैं॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः॥६॥

दिवः। नः। वृष्टिम्। मरुतः। ररीध्वम्। प्र। पिन्वत। वृष्णः। अश्वस्य। धाराः। अर्वाङ्। एतेन। स्तनयित्नुना। आ। इहि। अपः। निऽसिञ्चन्। असुरः। पिता। नः॥६॥

पदार्थः-(दिवः) सूर्य्यात् **(नः)** अस्मभ्यम् **(वृष्टिम्)** **(मरुतः)** वायुवद्वर्त्तमाना मनुष्याः **(ररीध्वम्)** दत्त **(प्र)** **(पिन्वत)** सिञ्चत **(वृष्णः)** वर्षकस्य **(अश्वस्य)** महतः। **अश्व इति महन्नामसु पठितम्।** (निघं०३.३) **(धाराः)** प्रवाहान् **(अर्वाङ्)** अधो वर्त्तमानः **(एतेन)** **(स्तनयित्नुना)** विद्युद्रूपेण **(आ)** **(इहि)** आगच्छन्ति। अत्र व्यत्ययः। **(अपः)** जलानि **(निषिञ्चन्)** नितरां सेचनं कुर्वन् **(असुरः)** मेघः। **असुर इति मेघनामसु पठितम्।** (निघं०१.१०) **(पिता)** जनक इव पालकः **(नः)** अस्माकम्॥६॥

अन्वयः-हे मरुतो! यूयं नो दिवो वृष्टिं ररीध्वं वृष्णोऽश्वस्य धाराः प्र पिन्वत योऽर्वाङ् वर्त्तमान एतेन स्तनयित्नुनाऽपो निषिञ्चन्नसुरो नः पितेव पालको मेघ एहि तं यूयं विजानीत॥६॥

भावार्थः-हे विद्वांसो! यैः कर्मभिर्वृष्टिरधिका भवेत्तानि कर्म्माणि सेवध्वम्॥६॥

पदार्थः-हे **(मरुतः)** वायुवद्वर्त्तमान मनुष्यो! आप लोग **(नः)** हम लोगों के लिये **(दिवः)** सूर्य्य से **(वृष्टिम्)** वृष्टि को **(ररीध्वम्)** दीजिये तथा **(वृष्णः)** वर्षने वाले **(अश्वस्य)** बड़े मेघ के **(धाराः)** प्रवाहों को **(प्र, पिन्वत)** सींचिये और जो **(अर्वाङ्)** नीचे वर्त्तमान और **(एतेन)** इस **(स्तनयित्नुना)** बिजुली रूप से **(अपः)** जलों को **(निषिञ्चन्)** अत्यन्त सेचन करता हुआ **(असुरः)** मेघ **(नः)** हम लोगों के **(पिता)** उत्पन्न करने वाले पिता के सदृश पालन करने वाला **(आ, इहि)** प्राप्त होता है, उसको आप लोग विशेष करके जनिये॥६॥

भावार्थः-हे विद्वानो! जिन कर्म्मों से वृष्टि अधिक होवे, उन कर्म्मों का सेवन कीजिये॥६॥

पुनः स मेघः किं करोतीत्याह॥

फिर वह मेघ क्या करता है, इस विषय को कहते हैं॥

अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन।
दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः॥७॥

अभि। क्रन्द। स्तनय। गर्भम्। आ। धाः। उदन्ऽवता। परि। दीय। रथेन। दृतिम्। सु। कर्ष। विऽसितम्। न्यञ्चम्। समाः। भवन्तु। उत्ऽवतः। निऽपादाः॥७॥

पदार्थः-(अभि) आभिमुख्ये **(क्रन्द)** क्रन्दति। अत्र सर्वत्र व्यत्ययः। **(स्तनय)** गर्जति **(गर्भम्)** **(आ)** **(धाः)** समन्ताद्दधाति **(उदन्वता)** बहूदकसहितेन **(परि)** सर्वतः **(दीया)** उपक्षयति। अत्र व्यत्ययेन परस्मैपदं, **द्व्यचोऽतस्तिङ** इति दीर्घश्च। **(रथेन)** रमणीयेन स्वरूपेण **(दृतिम्)** यो दृणाति तं दृतिरिव जलेन

पूर्णम् **(सु, कर्ष)** विलिखति **(विषितम्)** **(न्यञ्चम्)** यो निश्चितमञ्चति तम् **(समाः)** वर्षाणि **(भवन्तु)** **(उद्वतः)** ऊर्ध्वदेशस्थाः **(निपादाः)** निश्चिता निम्ना वा पादा अंशा येषान्ते॥७॥

अन्वयः-हे मनुष्या! यो मेघो गर्भमाऽऽधा उदन्वता रथेनाऽभि क्रन्द स्तनय दृतिं सु कर्ष दुःखानि परि दीया विषितं न्यञ्चं सु कर्ष येनोद्वतो निपादाः समा भवन्तु तं विजानीत॥७॥

भावार्थः-यो हि जलेन विश्वं पुष्यति दुःखं नाशयति फलानि जनयति स मेघो विश्वम्भरोऽस्तीति वेद्यम्॥७॥

पदार्थः-हे मनुष्यो! जो मेघ **(गर्भम्)** गर्भ को **(आ, धाः)** चारों ओर से धारण करता और **(उदन्वता)** बहुत जल के सहित **(रथेन)** सुन्दर स्वरूप से **(अभि)** सम्मुख **(क्रन्द)** शब्द करता और **(स्तनय)** गर्जता है **(दृतिम्)** फाड़ने वाले के सदृश जल से पूर्ण को **(सु, कर्ष)** विशेष करके खोदता और दुःखों का **(परि)** सब प्रकार से **(दीया)** नाश करता और **(विषितम्)** बंधे **(न्यञ्चम्)** निश्चित सेवा करते हुए को विशेष करके लिखता अर्थात् चेष्टा में लाता है तथा जिससे हम लोगों के **(उद्वतः)** ऊर्ध्वस्थान में वर्त्तमान **(निपादाः)** निश्चित वा नाचे हैं अंश जिनके ऐसे **(समाः)** वर्ष **(भवन्तु)** होवें, उसको जानिये॥७॥

भावार्थः-जो निश्चय[पूर्वक] जल से संसार को पुष्ट करता है और दुःख का नाश करता तथा फलों को उत्पन्न करता है, वह मेघ विश्वंभर है, ऐसा जानना चाहिये॥७॥

अथ मेघनिमित्तानि कानि सन्तीत्याह॥

अब मेघनिमित्त कौन हैं, इस विषय को कहते हैं॥

महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात्।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः॥८॥

महान्तम्। कोशम्। उत्। अचा। नि। सिञ्च। स्यन्दन्ताम्। कुल्याः। विऽसिताः। पुरस्तात्। घृतेन। द्यावापृथिवी इति। वि। उन्धि। सुऽप्रपानम्। भवतु। अघ्न्याभ्यः॥८॥

पदार्थः-(महान्तम्) महत्परिमाणम् **(कोशम्)** धनादीनां कोश इव जलेन पूर्णं मेघम्। **कोश इति मेघनामसु पठितम्।** (निघं०१.१०) **(उत्)** **(अचा)** ऊर्ध्वं गच्छति **(नि)** नितराम् **(सिञ्च)** सिञ्चति। अत्र सर्वत्र व्यत्ययः। **(स्यन्दन्ताम्)** प्रस्रवन्तु **(कुल्याः)** निर्म्मिता जलगमनमार्गाः **(विषिताः)** व्याप्ताः **(पुरस्तात्)** **(घृतेन)** जलेन। **घृतमित्युदकनामसु पठितम्।** (निघं०१.१२) **(द्यावापृथिवी)** भूम्यन्तरिक्षे **(वि)** **(उन्धि)** विशेषेणोन्दयति क्लेदयति **(सुप्रपाणम्)** सुष्ठु प्रकर्षेण पिबन्ति यस्मिन् स जलाशयः **(भवतु)** **(अघ्न्याभ्यः)** गोभ्यः॥८॥

अन्वयः-हे मनुष्या! यः सूर्य्यो महान्तं कोशमुदचा येन पृथिवीं नि षिञ्च पुरस्ताद्विषिताः कुल्याः स्यन्दन्तां यो घृतेन द्यावापृथिवी व्युन्धि सोऽघ्न्याभ्यः सुप्रपाणं भवत्विति वित्त॥८॥

भावार्थः-हे मनुष्या! या विद्युत् सूर्य्यो वायुश्च मेघनिमित्तानि सन्ति तानि यथवत्प्रयोजयत यतो वर्षणेन गवादीनां यथावत् पालनं स्यात्॥८॥

पदार्थः-हे मनुष्यो! जो सूर्य्य **(महान्तम्)** बड़े परिमाण वाले **(कोशम्)** घनादिकों के कोश के समान जल से परिपूर्ण मेघ को **(उत्)** **(अचा)** ऊपर प्राप्त होता है और जिससे पृथिवी को **(नि, सिञ्च)** निरन्तर सींचता है और **(पुरस्तात्)** प्रथम **(विषिताः)** व्याप्त **(कुल्याः)** रचे गये जल के निकलने के मार्ग **(स्यन्दन्ताम्)** बहें और जो **(घृतेन)** जल से **(द्यावापृथिवी)** पृथिवी और अन्तरिक्ष को **(वि, उन्धि)** अच्छे प्रकार गीला करता है वह **(अघ्न्याभ्यः)** गौओं के लिये **(सुप्रपाणम्)** उत्तम प्रकार प्रकर्षता से पीते हैं जिसमें ऐसा जलाशय **(भवतु)** हो, यह जानो॥८॥

भावार्थः-हे मनुष्यो! जो बिजुली, सूर्य्य और वायु मेघ के कारण हैं, उनको यथायोग्य प्रयुक्त कीजिये जिससे वृष्टि द्वारा गौ आदि पशुओं का यथावत् पालन होवे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यत्पर्जन्य कनिक्रदत् स्तनयन् हंसि दुष्कृतः।
प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि॥९॥

यत्। पर्जन्य। कनिक्रदत्। स्तनयन्। हंसि। दुःऽकृतः। प्रति। इदम्। विश्वम्। मोदते। यत्। किम्। च। पृथिव्याम्। अधि॥९॥

पदार्थः-(यत्) यः **(पर्जन्य)** पर्जन्यो मेघः **(कनिक्रदत्)** भृशं शब्दयन् **(स्तनयन्)** गर्जनं कुर्वन् **(हंसि)** अत्र पुरुषव्यत्ययः। **(दुष्कृतः)** ये दुःखेन कुर्वन्ति तान् **(प्रति)** **(इदम्)** वर्त्तमानम् **(विश्वम्)** सर्वं जगत् **(मोदते)** **(यत्)** **(किम्)** **(च)** **(पृथिव्याम्)** **(अधि)** उपरि॥९॥

अन्वयः-हे मनुष्या! यद्यः पर्जन्य कनिक्रदत् स्तनयन् दुष्कृतो हंसि यत्किं चेदं पृथिव्यामधि विश्वं वर्त्तते तत्सर्वं येन मेघेन प्रति मोदते स महानुपकार्यस्ति॥९॥

भावार्थः-मेघेनैव सर्वाणि भूतान्यानन्दन्ति तस्मादिदं मेघनिर्माणाख्यं कर्म परमेश्वरस्य धन्यवादार्हमस्तीति सर्वे विजानन्तु॥९॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(पर्जन्य)** मेघ **(कनिक्रदत्)** अत्यन्त शब्द करता तथा **(स्तनयन्)** गर्जन करता हुआ **(दुष्कृतः)** दुःख से करने वालों का **(हंसि)** नाश करता है **(यत्)** जो **(किम्)** कुछ **(च)** भी **(इदम्)** यह वर्त्तमान **(पृथिव्याम्)** पृथिवी **(अधि)** पर **(विश्वम्)** सम्पूर्ण जगत् वर्त्तमान है वह जिस मेघ से **(प्रति, मोदते)** आनन्दित होता है, वह बड़ा उपकारी है॥९॥

भावार्थः-मेघ से ही सम्पूर्ण प्राणी आनन्दित होते हैं, इससे यह मेघ को बनानारूप कर्म्म परमेश्वर का धन्यवाद के योग्य है, यह सब लोग जानो॥९॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ।

अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम्॥ १०॥ २८॥

अवर्षीः। वर्षम्। उत्। ऊँ इति। सु। गृभाय। अकः। धन्वानि। अतिऽएतवै। ऊँ इति। अजीजनः। ओषधीः। भोजनाय। कम्। उत। प्रऽजाभ्यः। अविदः। मनीषाम्॥ १०॥

पदार्थः-(अवर्षीः) वर्षयति **(वर्षम्)** **(उत्)** **(उ)** **(सु)** शोभने **(गृभाय)** गृहाण **(अकः)** कुर्याः **(धन्वानि)** अविद्यमानोदकादिदेशान् **(अत्येतवै)** एतुं प्राप्तुम् **(उ)** **(अजीजनः)** जनयः **(ओषधीः)** सोमाद्याः **(भोजनाय)** **(कम्)** **(उत)** **(प्रजाभ्यः)** **(अविदः)** वेत्सि **(मनीषाम्)** प्रज्ञाम्॥१०॥

अन्वयः-हे विद्वन् वैद्य! यथा सूर्य्यो वर्षमवर्षीस्तथा त्वमुद् गृभाय धन्वान्यत्येतवै स्वकः। उ ओषधीर्भोजनायाऽजीजनः। उत प्रजाभ्यः कमविद उ मनीषाम्॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा जगदीश्वरो वर्षाभ्यः प्रजाहितं जनयति तथैव धार्मिको राजा प्रजाभ्यः सुखमध्यापकश्च प्रज्ञां जनयेदिति॥१०॥

अत्र पर्जन्यविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्र्यशीतितमं सूक्तमष्टाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन् वैद्य! जैसे सूर्य्य **(वर्षम्)** वृष्टि को **(अवर्षीः)** वर्षाता है, वैसे आप **(उत्, गृभाय)** उत्कृष्टता से ग्रहण कीजिये तथा **(धन्वानि)** जल आदि से रहित देशों को **(अत्येतवै)** प्राप्त होने के लिये **(सु)** उत्तम प्रकार **(अकः)** करिये **(उ)** और **(ओषधीः)** सोमलता आदि ओषधियों को **(भोजनाय)** भोजन के लिये **(अजीजनः)** उत्पन्न कीजिये **(उत)** और भी **(प्रजाभ्यः)** प्रजाओं के लिये **(कम्)** किसको **(अविदः)** जानते हो **(उ)** क्या **(मनीषाम्)** बुद्धि को॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे जगदीश्वर वर्षाओं से प्रजा के हित को सिद्ध करता है, वैसे ही धार्मिक राजा प्रजाओं के लिये सुख और अध्यापक बुद्धि को उत्पन्न करे॥१०॥

इस सूक्त में मेघ और विद्वान् के गुण-वर्णन करने से इस सूक्त के अर्थ की इस से पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह तिरासीवां सूक्त और अट्ठाईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ त्र्यृचस्य चतुरशीतितमस्य सूक्तस्याऽत्रिर्ऋषिः पृथिवी देवता। १, ३ निचृदनुष्टुप् छन्दः। २ विराडनुष्टुप् छन्दः। गान्धारः स्वरः।

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब तीन ऋचा वाले चौरासीवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि।

प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि॥ १॥

बट्। इत्था। पर्वतानाम्। खिद्रम्। बिभर्षि। पृथिवि। प्र। या। भूमिम्। प्रवत्वति। मह्ना। जिनोषि। महिनि॥ १॥

पदार्थः-(बट्) सत्यम्। **बडिति सत्यनामसु पठितम्।** (निघं०३.१०) **(इत्था)** अनेन प्रकारेण **(पर्वतानाम्)** मेघानाम् **(खिद्रम्)** दैन्यम् **(बिभर्षि) (पृथिवी)** भूमिवद्वर्त्तमाने **(प्र) (या) (भूमिम्) (प्रवत्वति)** प्रवणदेशयुक्ते **(मह्ना)** महत्त्वेन **(जिनोषि) (महिनि)** पूज्ये॥ १॥

अन्वयः-हे प्रवत्वति महिनि पृथिवीव वर्त्तमाने! या त्वं पर्वतानां मह्ना भूमिं धरसीत्था बट् सत्यं यतो बिभर्षि खिद्रं प्र जिनोषि तस्मात् सत्कर्त्तव्याऽसि॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा भूमौ शैलाः स्थिरा वर्त्तन्ते तथा येषां हृदि धर्म्मादयः सद्व्यवहारा वर्त्तन्ते ते पूज्या जायन्ते॥ १॥

पदार्थः-हे **(प्रवत्वति)** अत्यन्त नीचे स्थान से युक्त **(महिनि)** आदर करने योग्य **(पृथिवि)** भूमि के सदृश वर्त्तमान! **(या)** जो तुम **(पर्वतानाम्)** मेघों के **(मह्ना)** महत्त्व से **(भूमिम्)** भूमि को धारण करती **(इत्था)** इस प्रकार से **(बट्)** सत्य को जिस कारण **(बिभर्षि)** धारण करती हो तथा **(खिद्रम्)** दीनता को **(प्र, जिनोषि)** विशेष करके नष्ट करती हो, इससे सत्कार करने योग्य हो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे भूमि पर पर्वत स्थिर होकर वर्त्तमान हैं, वैसे जिनके हृदय में धर्म आदि श्रेष्ठ व्यवहार हैं, वे आदर करने योग्य होते हैं॥ १॥

पुनः स्त्री कीदृशी भवेदित्याह॥

फिर स्त्री कैसी हो, इस विषय को कहते हैं॥

स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्युक्तुभिः।

प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि॥ २॥

स्तोमासः। त्वा। विऽचारिणि। प्रति। स्तोभन्ति। अक्तुऽभिः। प्र। या। वाजम्। न। हेषन्तम्। पेरुम्। अस्यसि। अर्जुनि॥ २॥

पदार्थः-(स्तोमासः) स्तुतिकर्त्तारः **(त्वा)** त्वाम् **(विचारिणि)** विचारितुं शीलं यस्यास्तत्सम्बुद्धौ **(प्रति) (स्तोभन्ति)** स्तुवन्ति **(अक्तुभिः)** रात्रिभिः **(प्र) (या) (वाजम्)** वेगम् **(न)** इव **(हेषन्तम्)** शब्दं कुर्वन्तम् **(पेरुम्)** पूरकम् **(अस्यसि)** प्रक्षिपसि **(अर्जुनि)** उषर्वद्वर्त्तमाने॥२॥

अन्वयः-हे अर्जुनि विचारिणि! या त्वं वाजं न हेषन्तं पेरुं प्राऽस्यसि तां त्वा स्तोमासोऽक्तुभिः प्रति ष्टोभन्ति॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा विद्वांसः स्तुत्यान् स्तुवन्ति तथैव विदुषी स्त्री प्रशंसनीयं प्रशंसति॥२॥

पदार्थः-हे **(अर्जुनि)** उषा के समान वर्त्तमान **(विचारिणि)** विचार करने वाली स्त्री! **(या)** जो तू **(वाजम्)** वेग के **(न)** समान **(हेषन्तम्)** शब्द करते हुए **(पेरुम्)** पूर्ण करने वाले को **(प्र, अस्यसि)** फेंकती है उस **(त्वा)** तेरी **(स्तोमासः)** स्तुति करने वाले जन **(अक्तुभिः)** रात्रियों से **(प्रति, स्तोभन्ति)** सब प्रकार स्तुति करते हैं॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे विद्वान् जन स्तुति करने योग्य जनों की स्तुति करते हैं, वैसे ही विद्यायुक्त स्त्री प्रशंसा करने योग्य की प्रशंसा करती है॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

दृ॒ळ्हा चि॒द्या वन॒स्पती॑न् क्ष्म॒या दर्ध॒र्ष्योज॑सा।
यत्ते॑ अ॒भ्रस्य॑ वि॒द्युतो॑ दि॒वो वर्ष॑न्ति वृ॒ष्टय॑: ॥ ३॥ २९॥

दृ॒ळ्हा। चि॒त्। या। वन॒स्पती॑न्। क्ष्म॒या। दर्ध॑र्षि। ओज॑सा। यत्। ते॒। अ॒भ्रस्य॑। वि॒ऽद्युत॑:। दि॒व:। वर्ष॑न्ति। वृ॒ष्टय॑:॥ ३॥

पदार्थः-(दृळ्हा) (चित्) (या) (वनस्पतीन्) (क्ष्मया) पृथिव्या **(दर्धर्षि)** भृशं दधासि **(ओजसा) (यत्)** या **(ते)** तव **(अभ्रस्य)** घनस्य **(विद्युतः) (दिवः)** दिव्याः **(वर्षन्ति) (वृष्टयः)**॥३॥

अन्वयः-हे स्त्रि! या दृळ्हा त्वं क्ष्मया वनस्पतीन् दर्धर्षि यद्याश्चित्तेऽभ्रस्य दिवो विद्युतो वृष्टयो वर्षन्ति तास्त्वमोजसा धर॥३॥

भावार्थः-या स्त्री पृथिवीवत् क्षमान्विता पुत्रपौत्रादियुक्ता भवति सा वृष्टिवत्सुखवर्षिका भवतीति॥३॥

अत्र मेघविद्वत्स्त्रीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुरशीतितमं सूक्तमेकोनत्रिंशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे स्त्रि! **(या)** जो **(दृळ्हा)** दृढ़ तुम **(क्ष्मया)** पृथिवी से **(वनस्पतीन्)** वृक्षादिकों को **(दर्धर्षि)** अत्यन्त धारण करती हो और **(यत्)** जो **(चित्)** निश्चित **(ते)** आप के **(अभ्रस्य)** घन की

(दिवः) अन्तरिक्ष में हुई **(विद्युतः)** बिजुली और **(वृष्टयः)** वर्षायें **(वर्षन्ति)** वर्षती हैं, उनको तुम **(ओजसा)** बल से धारण करो॥३॥

भावार्थः-जो स्त्री पृथिवी के सदृश क्षमा से युक्त और पुत्र-पौत्रादि से युक्त होती है, वह वृष्टि के सदृश सुखों को वर्षाने वाली होती है॥३॥

इस सूक्त में मेघ, विद्वान् और स्त्री के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जानानी चाहिये॥

यह चौरासीवां सूक्त और उनतीसवां वर्ग्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य पञ्चाशीतितमस्य सूक्तस्य अत्रिर्ऋषिः। वरुणो देवता। १, २ विराड्त्रिष्टुप्। ३, ४, ६, ८ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७ ब्राह्म्युष्णिक् छन्दः ऋषभः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब आठ ऋचा वाले पचासीवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

प्र स॒म्राजे॑ बृ॒हदर्चा॑ गभी॒रं ब्रह्म॑ प्रि॒यं वरु॑णाय श्रु॒ताय॑।
वि यो ज॒घान॑ शमि॒तेव॒ चर्मोप॒स्तिरे॑ पृथि॒वीं सूर्या॑य॥ १॥

प्र। स॒म्ऽराजे॑। बृ॒हत्। अर्च॑। ग॒भी॒रम्। ब्रह्म॑। प्रि॒यम्। वरु॑णाय। श्रु॒ताय॑। वि। यः। ज॒घान॑। श॒मि॒ताऽइ॑व। चर्म॑। उ॒प॒ऽस्तिरे॑। पृ॒थि॒वीम्। सूर्या॑य॥ १॥

पदार्थः-(प्र) (सम्राजे) यः सम्यग्राजते तस्मै **(बृहत्)** महत् **(अर्चा)** सत्कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(गभीरम्)** अगाधम् **(ब्रह्म)** धनमन्नं वा **(प्रियम्)** यत्पृणाति **(वरुणाय)** श्रेष्ठाय **(श्रुताय)** विषिद्धकीर्तये **(वि) (यः) (जघान)** हन्ति **(शमितेव)** यथा यज्ञमयः **(चर्म) (उपस्तिरे)** आस्तरणे **(पृथिवीम्) (सूर्य्याय)** सवित्रे॥ १॥

अन्वयः-हे मनुष्य! यः सवितेव दुष्टान् वि जघान सूर्य्यायोपस्तिरे चर्म पृथिवीं शमितेव प्राप्नोति तथा त्वं वरुणाय श्रुताय सम्राजे बृहद्गभीरं प्रियं ब्रह्म प्रार्चा॥ १॥

भावार्थः-ये मनुष्या यजमानवद्राजानं सुखयन्ति ते महदैश्वर्य्यं लभन्ते॥ १॥

पदार्थः-हे मनुष्य! **(यः)** जो रचने वाले के सदृश दुष्टों का **(वि, जघान)** नाश करता और **(सूर्य्याय)** रचने वाले के लिये **(उपस्तिरे)** बिछौने पर **(चर्म)** चमड़े और **(पृथिवीम्)** पृथिवी को **(शमितेव)** जैसे यज्ञमय व्यवहार प्राप्त होता है, वैसे आप **(वरुणाय)** श्रेष्ठ **(श्रुताय)** विशेष करके सिद्ध यश वाले तथा **(सम्राजे)** उत्तम प्रकार शोभित के लिये **(बृहत्)** बड़े **(गभीरम्)** थाहरहित **(प्रियम्)** जो प्रसन्न करता उस **(ब्रह्म)** धन वा अन्न का **(प्र, अर्चा)** सत्कार करो॥ १॥

भावार्थः-जो मनुष्य यजमान के सदृश राजा को सुखी करते हैं, वे बड़े ऐश्वर्य्य को प्राप्त होते हैं॥ १॥

पुनस्स परमेश्वरः किं कृतवानित्याह॥

फिर उस परमेश्वर ने क्या किया इस विषय को कहते हैं॥

वने॑षु व्य१न्तरि॑क्षं तता॒न वाज॒मर्वत्सु॒ पय॑ उ॒स्रिया॑सु।

हृत्सु क्रतुं॑ वरु॑णो अ॒प्स्व१॑ग्निं दि॒वि सूर्य॑मदधा॒त्सोम॒मद्रौ॑॥ २॥

वने॑षु। वि। अ॒न्तरि॑क्षम्। त॒ता॒न॒। वाज॑म्। अर्व॑त्ऽसु। पयः॑। उ॒स्रिया॑सु। हृ॒त्ऽसु। क्रतु॑म्। वरु॑णः। अ॒प्ऽसु। अ॒ग्निम्। दि॒वि। सूर्य॑म्। अ॒द॒धा॒त्। सोम॑म्। अद्रौ॑॥ २॥

पदार्थः-(वनेषु) किरणेषु जङ्गलेषु वा **(वि)** **(अन्तरिक्षम्)** जलम् **(ततान)** तनोति **(वाजम्)** वेगम् **(अर्वत्सु)** अश्वेषु **(पयः)** उदकं रसं वा **(उस्रियासु)** पृथिवीषु **(हृत्सु)** हृदयेषु **(क्रतुम्)** प्रज्ञानम् **(वरुणः)** श्रेष्ठः **(अप्सु)** आकाशप्रदेशेषु **(अग्निम्)** पावकम् **(दिवि)** प्रकाशे **(सूर्य्यम्)** **(अदधात्)** दधाति **(सोमम्)** रसम् **(अद्रौ)** मेघे॥ २॥

अन्वयः-हे मनुष्या! यो जगदीश्वरो वनेष्वन्तरिक्षमर्वत्सु वाजमुस्रियासु पयो हृत्सु क्रतुमप्स्वग्निं दिवि सूर्य्यमद्रौ सोममदधात्स वरुणः सर्वं जगद्वि ततान॥ २॥

भावार्थः-हे विद्वांसो! येन जगदीश्वरेण सर्वं जगद् विस्तारितं तमेव सततं ध्यायन्तु॥ २॥

पदार्थः-हे मनुष्यो! जो जगदीश्वर **(वनेषु)** किरणों वा जंगलों में **(अन्तरिक्षम्)** जल को **(अर्वत्सु)** घोड़ों में **(वाजम्)** वेग को और **(उस्रियासु)** पृथिवियों में **(पयः)** जल वा रस को **(हृत्सु)** हृदयों में **(क्रतुम्)** विशेष ज्ञान को **(अप्सु)** आकाश प्रदेशों में **(अग्निम्)** अग्नि को **(दिवि)** प्रकाश में **(सूर्य्यम्)** सूर्य्य को **(अद्रौ)** मेघ में **(सोमम्)** रस को **(अदधात्)** धारण करता है वह **(वरुणः)** श्रेष्ठ परमात्मा सम्पूर्ण जगत् को **(वि, ततान)** विस्तृत करता है॥ २॥

भावार्थः-हे विद्वानो! जिस जगदीश्वर ने सम्पूर्ण जगत् को विस्तृत किया, उसी का निरन्तर ध्यान करो॥ २॥

पुनरीश्वरः किं करोतीत्याह॥

फिर ईश्वर क्या करता है, इस विषय को कहते हैं॥

नी॒चीन॑बारं॒ वरु॑ण॒: कव॑न्धं॒ प्र स॑सर्ज॒ रोद॑सी अ॒न्तरि॑क्षम्।
तेन॒ विश्व॑स्य॒ भुव॑नस्य॒ राजा॒ यव॒ं न वृ॒ष्टिर्व्यु॑नत्ति॒ भूम॑॥ ३॥

नी॒चीन॑ऽबारम्। वरु॑णः। कव॑न्धम्। प्र। स॒स॒र्ज॒। रोद॑सी॒ इति॑। अ॒न्तरि॑क्षम्। तेन॑। विश्व॑स्य। भुव॑नस्य। राजा॑। यव॑म्। न। वृ॒ष्टिः। वि। उ॒न॒त्ति॒। भूम॑॥ ३॥

पदार्थः-(नीचीनबारम्) यो नीचप्रदेशे वृष्टिं करोति तम् **(वरुणः)** परमेश्वरः **(कवन्धम्)** मेघम् **(प्र)** **(ससर्ज)** सृजति **(रोदसी)** द्यावापृथिव्यौ **(अन्तरिक्षम्)** जलम् **(तेन)** **(विश्वस्य)** सर्वस्य **(भुवनस्य)** ब्रह्माण्डस्य **(राजा)** प्रकाशकः **(यवम्)** यवादिधान्यम् **(न)** इव **(वृष्टिः)** **(वि)** **(उनत्ति)** क्लेदयति **(भूम)** भवेम॥ ३॥

अन्वयः-हे मनुष्या! यो वरुणो नीचीनबारं कवन्धं रोदसी अन्तरिक्षं प्र ससर्ज विश्वस्य भुवनस्य राजा वृष्टिर्यवं न व्युनत्ति तेन सह वयं सुखिनो भूम॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यूयं जगत्स्रष्टारं जगदीश्वरमुपास्य राजानो भूत्वा शस्यादि मेघवत्प्रजाः पालयत॥३॥

पदार्थः-हे मनुष्यो! जो **(वरुणः)** श्रेष्ठ परमेश्वर **(नीचीनबारम्)** नीचे के स्थानों में वृष्टि करने वाले **(कवन्धम्)** मेघ को और **(रोदसी)** अन्तरिक्ष और पृथिवी तथा **(अन्तरिक्षम्)** जल को **(प्र, ससर्ज)** उत्तमता से उत्पन्न करता है और **(विश्वस्य)** सम्पूर्ण **(भुवनस्य)** ब्रह्माण्ड का **(राजा)** प्रकाशक परमात्मा **(वृष्टिः)** वृष्टि **(यवम्)** यव आदि धान्य को **(न)** जैसे वैसे **(वि, उनत्ति)** विशेष करके गीला करता है **(तेन)** उससे हम लोग सुखी **(भूम)** होवें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! आप लोग जगत् के रचने वाले जगदीश्वर की उपासना करके और राजा होकर जैसे धान्य आदि का मेघ वैसे प्रजाओं का पालन कीजिये॥३॥

अथ राजानः कथं वर्त्तेरन्नित्याह॥

अब राजाजन कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित्।
समभ्रेण वसत पर्वतासस्तविषीयन्तः श्रथयन्त वीराः॥४॥

उनत्ति। भूमिम्। पृथिवीम्। उत। द्याम्। यदा। दुग्धम्। वरुणः। वष्टि। आत्। इत्। सम्। अभ्रेण। वसत। पर्वतासः। तविषीऽयन्तः। श्रथयन्त। वीराः॥४॥

पदार्थः-**(उनत्ति)** आर्द्रीकरोति **(भूमिम्)** **(पृथिवीम्)** विस्तीर्णम् **(उत)** **(द्याम्)** प्रकाशम् **(यदा)** **(दुग्धम्)** **(वरुणः)** वायुरिव राजा **(वष्टि)** कामयते **(आत्)** **(इत्)** एव **(सम्)** **(अभ्रेण)** मेघेन। **अभ्र इति मेघनामसु पठितम्।** (निघं०१.१०) **(वसत)** **(पर्वतासः)** मेघाः **(तविषीयन्तः)** सेनां कामयमानाः **(श्रथयन्त)** हिंसत **(वीराः)**॥४॥

अन्वयः-हे राजन्! यदा वरुणेऽभ्रेण पृथिवीं भूमिमुत द्यां समुनत्त्यादिद्वरुणो दुग्धं वष्टि। हे तविषीयन्तो वीरा! यूयं पर्वतास इवात्र वसत श्रथयन्त॥४॥

भावार्थः-त एव राजानः श्रेष्ठाः सन्ति ये प्रजाहितं कामयन्ते यथा मेघाः सर्वेषां सुखानि वर्षयन्ति तथैव नृपाः प्रजानां कामानलङ्कुर्य्युः॥४॥

पदार्थः-हे राजन्! **(यदा)** जब **(वरुणः)** वायु के सदृश राजा **(अभ्रेण)** मेघ से **(पृथिवीम्)** विस्तीर्ण **(भूमिम्)** भूमि को और **(उत)** भी **(द्याम्)** प्रकाश को **(सम्, उनत्ति)** गीला करता है **(आत्)** उसके अनन्तर **(इत्)** ही वायु के सदृश राजा **(दुग्धम्)** दुग्ध की **(वृष्टि)** कामना करता है और हे **(तविषीयन्तः)** सेना की कामना करते हुए **(वीराः)** शूरवीरो! आप लोग **(पर्वतासः)** मेघों के सदृश यहाँ **(वसत)** वास करिये और **(श्रथयन्त)** अर्थात् शत्रुओं का नाश करिये॥४॥

भावार्थः-वे ही राजा श्रेष्ठ हैं, जो प्रजा के हित की कामना करते हैं और जैसे मेघ सब के सुखों की वृष्टि करते हैं, वैसे ही राजा लोग प्रजाओं की कामनाओं को पूर्ण करें॥४॥

अथ विद्वदीश्वरौ किं कुरुत इत्याह॥

अब विद्वान् और ईश्वर क्या करते हैं, इस विषय को कहते हैं॥

इ॒माम॑ू ष्वा॑सु॒रस्य॑ श्रु॒तस्य॑ म॒हीं मा॒यां वरु॑णस्य॒ प्र वो॑चम्।
मानें॑नेव॒ तस्थि॒वाँ अ॒न्तरि॑क्षे॒ वि यो म॒मे पृ॑थि॒वीं सूर्ये॑ण॥५॥३०॥

इ॒माम्। ऊँ॒ इति॑। सु। आ॒सु॒रस्य॑। श्रु॒तस्य॑। म॒हीम्। मा॒याम्। वरु॑णस्य। प्र। वो॒च॒म्। मानें॑नऽइव। त॒स्थि॒ऽवान्। अ॒न्तरि॑क्षे। वि। यः। म॒मे। पृ॒थि॒वीम्। सूर्ये॑ण॥५॥

पदार्थः-**(इमाम्)** **(उ)** **(सु)** **(आसुरस्य)** मेघभवस्य **(श्रुतस्य)** **(महीम्)** पूज्यां वाणीम्। **महीति वाङ्नामसु पठितम्।** (निघं०१.११) **(मायाम्)** प्रज्ञाम् **(वरुणस्य)** श्रेष्ठस्य **(प्र)** **(वोचम्)** उपदिशेयम् **(मानेनेव)** सत्कारेणेव **(तस्थिवान्)** यस्तिष्ठति **(अन्तरिक्षे)** आकाशे **(वि)** **(यः)** **(ममे)** सृजति **(पृथिवीम्)** **(सूर्य्येण)** सवित्रा सह॥५॥

अन्वयः-हे मनुष्या! यथाहमिमां श्रुतस्याऽऽसुरस्य वरुणस्य महीं मायां युष्मदर्थं सु प्र वोचमु यस्तस्थिवान् माननेनेवान्तरिक्षे सूर्य्येण सह पृथिवीं वि ममे तमीश्वरं वि जानीत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो मेघविद्याविदो वाणीं प्रज्ञां च प्रशंसति यश्च परमेश्वरो सर्वं जगद्रचयति तौ सदा सत्कुरुत॥५॥

पदार्थः-हे मनुष्यो! जैसे मैं **(इमाम्)** इस **(श्रुतस्य)** सुने गये **(आसुरस्य)** मेघ में उत्पन्न हुए और **(वरुणस्य)** श्रेष्ठ की **(महीम्)** आदर करने योग्य वाणी और **(मायाम्)** बुद्धि का आप लोगों के लिये **(सु, प्र, वोचम्)** उत्तम प्रकार उपदेश करूं **(उ)** और **(यः)** जो **(तस्थिवान्)** ठहरने वाला **(मानेनेव)** सत्कार से जैसे वैसे **(अन्तरिक्षे)** आकाश में **(सूर्य्येण)** सूर्य्य के साथ **(पृथिवीम्)** पृथिवी को **(वि,ममे)** विस्तारता है, उसको ईश्वर जानो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो मेघ की विद्या के जानने वाले की वाणी और बुद्धि की प्रशंसा करता है और जो परमेश्वर सम्पूर्ण जगत् को रचता है, उन दोनों का सदा सत्कार करो॥५॥

पुनर्मनुष्याः किङ्कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

इ॒माम॑ू नु कु॒वित्स॒मस्य मा॒यां म॒हीं दे॒वस्य॒ नकि॒रा द॑धर्ष।
एकं॒ यदु॒द्ना न पृ॒णन्त्येनी॑रासि॒ञ्चन्ती॑र॒वन॑यः समु॒द्रम्॥६॥

इ॒माम्। ऊँ इति॑। नु। क॒विऽत॑मस्य। मा॒याम्। म॒हीम्। दे॒वस्य॑। नकिः॑। आ। द॒धर्ष॒। एक॑म्। यत्। उ॒द्ऽना। न। पृ॒णन्ति॑। एनीः॑। आ॒ऽअसि॒ञ्चन्तीः॑। अ॒वन॑यः। स॒मु॒द्रम्॥६॥

पदार्थः-(इमाम्) (उ) (नु) (कवितमस्य) अतिशयेन कवेः **(मायाम्)** मेघाम् **(महीम्)** वाणीम् **(देवस्य) (नकिः) (आ) (दधर्ष)** आधृष्णोति **(एकम्) (यत्)** याः **(उद्ना)**[३] उदकेन **(न)** इव **(पृणन्ति)** पूरयन्ति **(एनीः)** एन्यो मृगस्त्रिय इव धावन्त्यः **(आसिञ्चन्तीः)** समन्तात् सिञ्चन्त्यः **(अवनयः)** अवन्ति यास्ता नद्यः। **अवनय इति नदीनामसु पठितम्।** (निघं०१.१३) **(समुद्रम्)** सागरम्॥६॥

अन्वयः-हे मनुष्या! य इमां कवितमस्य देवस्य मायामु महीं कोऽपि नु नकिराऽऽदधर्ष यद्या उद्ना नैनीरासिञ्चन्तीरवनय एकं समुद्रं पृणन्ति ता यूयं यथावद्विजानीत॥६॥

भावार्थः-ये मनुष्या महाविदुषां सकाशान्महतीं प्रज्ञां वाचं च प्राप्यान्यान् प्रापयन्ति त एव जगति धन्याः सन्ति॥६॥

पदार्थः-हे मनुष्यो! जो **(इमाम्)** इस **(कवितमस्य)** अतिशय कविजन **(देवस्य)** विद्वान् की **(मायाम्)** बुद्धि को **(उ)** और **(महीम्)** वाणी को कोई भी **(नु)** शीघ्र **(नकिः)** नहीं **(आ, दधर्ष)** दबाता है और **(यत्)** जो **(उद्ना)** जल से **(न)** जैसे वैसे **(एनीः)** हरिणियों के सदृश दौड़तीं और **(आसिञ्चन्तीः)** चारों और सींचती हुईं **(अवनयः)** रक्षा करने वाली नदियां **(एकम्)** एक **(समुद्रम्)** समुद्र को **(पृणन्ति)** पूर्ण करती हैं, उनको आप लोग यथावत् जानिये॥६॥

भावार्थः-जो मनुष्य बड़े विद्वानों के समीप से बड़ी बुद्धि और वाणी को प्राप्त होकर अन्यों के लिये प्राप्त कराते हैं, वे ही संसार में धन्य होते हैं॥६॥

मनुष्यैः प्रमादात् कस्यापि प्रमादं कृत्वा सद्य एव निवारणीयः॥

मनुष्यों को चाहिये कि प्रमाद से किसी के प्रमाद को करके शीघ्र निवृत्त करावें॥

अ॒र्य॒म्यं॑ वरुण मि॒त्र्यं॑ वा॒ सखा॑यं वा॒ सद॒मिद् भ्रात॑रं वा।

वे॒शं वा॒ नित्यं॑ वरु॒णार॑णं वा॒ यत्सी॒मागॅश्च॒कृमा शि॒श्रथ॒स्तत्॥७॥

अ॒र्य॒म्य॑म्। व॒रु॒ण॒। मि॒त्र्य॑म्। वा॒। सखा॑यम्। वा॒। सद॑म्। इत्। भ्रात॑रम्। वा॒। वे॒शम्। वा॒। नित्य॑म्। व॒रु॒ण॒। अर॑णम्। वा॒। यत्। सी॒म। आग॑ः। च॒कृ॒म। शि॒श्रथ॑ः। तत्॥७॥

पदार्थः-(अर्य्यम्यम्) अर्य्यमसु न्यायाधीशेषु भवम् **(वरुण)** श्रेष्ठ विद्वन् **(मित्र्यम्)** मित्रेषु भवम् **(वा) (सखायम्) (वा) (सदम्)** सीदन्ति यस्मिंस्तद्गृहम् **(इत्)** एव **(भ्रातरम्) (वा) (वेशम्)** यो विशति तम् **(वा) (नित्यम्) (वरुण) (अरणम्)** उदकम् **(वा)** अथवा **(यत्) (सीम्)** सर्वतः **(आगः)** अपराधम् **(चकृमा)** कुर्य्याम **(शिश्रथः)** प्रयतस्व हिन्धि वा **(तत्)**॥७॥

---

३. अन्यत्र भाष्येषु 'उद्गा' उपलभ्यते।

अन्वयः-हे वरुण! अर्य्यम्यं मित्र्यं वा सखायं सदमिद् वा भ्रातरं वा वेशं वा हे वरुण! नित्यमरणं वा सीं यदागो वयं चकृमा तत्सर्वं त्वं शिश्रथः॥७॥

भावार्थः-हे विद्वांसोऽज्ञानात्प्रमादाद्वा श्रेष्ठेषु पुरुषेषु वयं यद् प्रमादं कुर्य्याम तत्सर्वं भवन्तो निवारयन्तु॥७॥

पदार्थः-हे **(वरुण)** श्रेष्ठ विद्वन्! **(अर्य्यम्यम्)** न्यायधीशों में हुए और **(मित्र्याम्)** मित्रों में हुए **(वा)** अथवा **(सखायम्)** मित्र और **(सदम्)** स्थित होते हैं जिसमें उस गृह **(इत्)** ही **(वा)** वा **(भ्रातरम्)** भ्राता **(वा)** अथवा **(वेशम्)** प्रविष्ट होने वाले को **(वा)** अथवा हे **(वरुण)** श्रेष्ठ विद्वन्! **(नित्यम्)** नित्य **(अरणम्)** जल को **(वा)** वा **(सीम्)** सब ओर से **(यत्)** जिस **(आगः)** अपराध को हम लोग **(चकृमा)** करें **(तत्)** उस सबका आप **(शिश्रथः)** प्रयत्न करिये वा नाश करिये॥७॥

भावार्थः-हे विद्वान् जनो! अज्ञान वा प्रमाद से श्रेष्ठ पुरुषों से हम लोग जो प्रमाद करें, उस सम्पूर्ण को आप निवृत्त कीजिये॥७॥

के मनुष्याः सत्कर्त्तव्यास्तिरस्करणीयाश्चेत्याह॥

कौन से मनुष्य सत्कार और कौन तिरस्कार करने योग्य हैं, इस विषय को कहते हैं॥

कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः॥८॥३१॥

कितवासः। यत्। रिरिपुः। न। दीवि। यत्। वा। घ। सत्यम्। उत। यत्। न। विद्म। सर्वा। ता। वि। स्य। शिथिराऽइव। देव। अध। ते। स्याम। वरुण। प्रियासः॥८॥

पदार्थः-(**कितवासः**) द्यूतकाराः (**यत्**) ये (**रिरिपुः**) आरोपयन्ति (**न**) निषेधे (**दीवि**) द्यूतकर्म्मणि (**यत्**) (**वा**) (**घा**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**सत्यम्**) सत्सु साधुम् (**उत**) (**यत्**) (**न**) (**विद्म**) (**सर्वा**) सर्वाणि (**ता**) तानि (**वि**) (**स्य**) अन्तं कुरु (**शिथिरेव**) यथा शिथिलाः (**देव**) विद्वन् (**अधा**) अत्र **निपातस्य चे**ति दीर्घः। (**ते**) तव (**स्याम**) (**वरुण**) (**प्रियासः**) प्रसन्नाः॥८॥

अन्वयः-हे वरुण देव! यद्ये कितवासो दीवि न रिरिपुर्यद्वा सत्यमुत न विद्म यद् घा न विद्म ता सर्वा शिथिरेव त्वं विष्य यतोऽधा वयं ते प्रियासः स्याम॥८॥

भावार्थः-हे मनुष्या! ये छलिनो मनुष्या द्यूतादिकर्म्म कुर्य्युस्ते ताडनीया ये च सत्यमाचरणं कुर्य्युस्ते सत्कर्त्तव्या इति॥८॥

अत्र राजेश्वरमेघविद्वद्गुणकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चाशीतितमं सूक्तमेकत्रिंशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(वरुण)** श्रेष्ठ **(देव)** विद्वन्! **(यत्)** जो **(कितवासः)** जुआ करने वाले **(दीवि)** जुआरूप कर्म्म में **(न)** नहीं **(रिरिपुः)** आरोपित करते हैं **(वा)** अथवा **(यत्)** जिस **(सत्यम्)** श्रेष्ठों में श्रेष्ठ

को **(उत)** तर्क वितर्क से **(न)** न **(विद्म)** जानें और **(यत्)** जिसे **(घा)** ही नहीं जानें **(ता)** उन **(सर्वा)** सम्पूर्णों को **(शिथिरेव)** जैसे शिथिल वैसे आप **(वि, स्य)** अन्त करिये जिससे **(अधा)** इसके अनन्तर हम लोग **(ते)** आपके **(प्रियासः)** प्रसन्न प्यारे **(स्याम)** होवें॥८॥

भावार्थः-हे मनुष्यो! जो छली मनुष्य जुआ आदि कर्म्म करें वे ताड़ना करने योग्य और जो सत्य आचरण करें वे सत्कार करने योग्य हैं॥८॥

इस सूक्त में राजा, ईश्वर, मेघ और विद्वान् के गुण [और] कर्म [का] वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पच्चासीवां सूक्त और एकतीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य षडशीतितमस्य सूक्तस्य अत्रिर्ऋषिः। इन्द्राग्नी देवते। १, ४, ५ स्वराडुष्णिक् छन्दः। ऋषभः स्वरः। २, ३ विराडनुष्टुप् छन्दः। ६ विराट्पूर्वानुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ विद्वांसः किं कुर्वन्तीत्याह॥

अब छः ऋचा वाले छियासीवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् जन क्या करते हैं, इस विषय को कहते हैं॥

इन्द्राग्नी यमवथ उभा वाजेषु मर्त्यम्।
दृळ्हा चित्स प्र भेदति द्युम्ना वाणीरिव त्रितः॥ १॥

इन्द्राग्नी इति। यम्। अवथः। उभा। वाजेषु। मर्त्यम्। दृळ्हा। चित्। सः। प्र। भेदति। द्युम्ना। वाणीःऽइव। त्रितः॥ १॥

पदार्थः-(इन्द्राग्नी) वायुविद्युताविवाध्यापकोपदेशकौ **(यम्)** **(अवथः)** रक्षथः **(उभा)** **(वाजेषु)** स- ामेषु **(मर्त्यम्)** मनुष्यम् **(दृळ्हा)** स्थिराणि **(चित्)** अपि **(सः)** **(प्र)** **(भेदति)** भिनत्ति **(द्युम्ना)** धनानि यशांसि वा **(वाणीरिव)** **(त्रितः)** त्रिभ्योऽध्यापनोपदेशनरक्षणेभ्यः॥ १॥

अन्वयः-हे इन्द्राग्नी इवाऽध्यापकोपदेशकौ! युवामुभा वाजेषु यं मर्त्यमवथः स चित्त्रितो वाणीरिव दृळ्हा द्युम्ना प्र भेदति॥ १॥

भावार्थः-यत्र धार्मिका विद्वांसः शूरा बलिष्ठाः शिक्षकाश्च सन्ति तत्र कोऽपि न दुःखं प्राप्नोतीति॥ १॥

पदार्थः-हे **(इन्द्राग्नी)** वायु और बिजुली के सदृश अध्यापक और उपदेशको! तुम **(उभा)** दोनों **(वाजेषु)** संग्रामों में **(यम्)** जिस **(मर्त्यम्)** मनुष्य की **(अवथः)** रक्षा करते हो **(सः)** वह **(चित्)** भी **(त्रितः)** तीन अर्थात् अध्यापन, उपदेशन और रक्षण से **(वाणीरिव)** जैसे वाणियों का वैसे **(दृळ्हा)** स्थिर **(द्युम्ना)** धनों वा यशों का **(प्र, भेदति)** अत्यन्त भेद करता है॥ १॥

भावार्थः-जहाँ धार्मिक, विद्वान्, शूरवीर, बलिष्ठ और शिक्षक हैं, वहाँ पर कोई भी नहीं दुःख को प्राप्त होता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

या पृतनासु दुष्टरा या वाजेषु श्रवाय्या।
या पञ्च चर्षणीरभीन्द्राग्नी ता हवामहे॥ २॥

या। पृतनासु। दुस्तरा। या। वाजेषु। श्रवाय्या। या। पञ्च। चर्षणीः। अभि। इन्द्राग्नी इति। ता। हवामहे॥ २॥

पदार्थः-(या) यौ सेनाशिक्षकयोधयितारौ **(पृतनासु)** सेनासु **(दुष्टरा)** दुःखेन तरितुमुल्लङ्घयितुं योग्यौ **(या) (वाजेषु)** अन्नादिषु स-ामेषु वा **(श्रवाय्या)** प्रशंसनीयौ **(या) (पञ्च) (चर्षणीः)** प्राणान् मनुष्यान् वा **(अभि)** अभिमुख्ये **(इन्द्राग्नी)** वायुविद्युताविव **(ता)** तौ **(हवामहे)** स्वीकुर्य्याम प्रशंसेम वा॥२॥

अन्वयः-हे इन्द्राग्नी वायुविद्युद्वर्त्तमानौ सेनापत्यध्यक्षौ! या पृतनासु दुष्टरा या वाजेषु श्रवाय्या या पञ्च चर्षणीरभि रक्षतस्ता वयं हवामहे॥२॥

भावार्थः-नरेशसेनापतिभ्यां सुपरीक्ष्य सेनायामध्यक्षा भृत्याः संरक्षणीया यतस्सर्वदा विजयः सम्भवेत्॥२॥

पदार्थः-हे **(इन्द्राग्नी)** वायु और बिजुली के समान वर्त्तमान सेनापति और अध्यक्ष! **(या)** जो सेना के शिक्षक और लड़ाने वाले **(पृतनासु)** सेनाओं में **(दुष्टरा)** दुःख से उल्लंघन करने योग्य **(या)** जो **(वाजेषु)** अन्नादिकों वा संग्रामों में **(श्रवाय्या)** प्रशंसा करने योग्य **(या)** जो **(पञ्च)** पांच **(चर्षणीः)** प्राणों वा मनुष्यों को **(अभि)** सम्मुख रक्षा करते हैं **(ता)** उन दोनों को हम लोग **(हवामहे)** स्वीकार करें वा प्रशंसा करें॥२॥

भावार्थः-राजा और सेनापति को चाहिये कि उत्तम प्रकार परीक्षा करके सेना के अध्यक्ष भृत्यों को रक्खें, जिससे सर्वदा विजय होवे॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तयो॒रिद॑म॒वच्छव॑स्ति॒ग्मा दि॒द्यु॒न्म॒घोनो॑:।
प्रति॒ दु॒णा॒ गभ॑स्त्यो॒र्गवां॑ वृ॒त्र॒घ्न ए॑षते॥३॥

तयो॑:। इत्। अम॑ऽवत्। शव॑:। ति॒ग्मा। दि॒द्यु॒त्। म॒घोनो॑:। प्रति॑। दु॒णा॑। गभ॑स्त्यो:। गवा॑म्। वृ॒त्र॒ऽघ्ने। आ। ई॒ष॒ते॥३॥

पदार्थः-(तयोः) पूर्वोक्तयोः सेनापत्यध्यक्षयोः **(इत्)** एव **(अमवत्)** गृहवत् **(शवः)** बलम् **(तिग्मा)** तीव्रा **(दिद्युत्) (मघोनोः)** बहुधनयुक्तयोः **(प्रति) (दुणा)** गन्तारौ **(गभस्त्योः)** भुजयोः **(गवाम्)** किरणानाम् **(वृत्रघ्ने)** मेघहन्त्रे **(आ) (ईषते)** हिनस्ति॥३॥

अन्वयः-हे मनुष्या! यथा सूर्य्यो वृत्रघ्ने गवामेषते यौ दुणा वर्त्तेते तयोरिन्मघोनोर्गभस्त्यो-रमवच्छवस्तिग्मा दिद्युद्वर्त्तते तथा तां यूयं प्रति गृह्णीत॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजपुरुषा! यथा सूर्य्यो मेघं हत्वा प्रजाः पालयति तथैव यूयं दुष्टान् हत्वा प्रजाः सततं रक्षत॥३॥

पदार्थः-हे मनुष्यो! जैसे सूर्य्य **(वृत्रघ्ने)** मेघ के नाश करने वाले के लिये **(गवाम्)** किरणों का **(आ, ईषते)** सब प्रकार नाश करता है और जो दोनों **(द्रुणा)** चलने वाले वर्त्तमान हैं **(तयोः, इत्)** उन्हीं सेनापति और सेनाध्यक्ष और **(मघोनोः)** बहुत धन से युक्त **(गभस्त्योः)** भुजाओं के **(अमवत्)** गृह के सदृश **(शवः)** बलयुक्त **(तिग्मा)** तीव्र **(दिद्युत्)** बिजुली है, वैसे उसको आप लोग **(प्रति)** ग्रहण करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजपुरुषो! जैसे सूर्य्य मेघ का नाश करके प्रजाओं का पालन करता है, वैसे ही आप लोग दुष्टों का नाश करके प्रजाओं की निरन्तर रक्षा कीजिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता वामेषे रथानामिन्द्राग्नी हवामहे।

पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा॥४॥

ता। वाम्। एषे। रथानाम्। इन्द्राग्नी इति। हवामहे। पती इति। तुरस्य। राधसः। विद्वांसा। गिर्वणःऽतमा॥४॥

पदार्थः-(**ता**) तौ **(वाम्)** युवाम् **(एषे)** एतुम् **(रथानाम्)** **(इन्द्राग्नी)** वायुविद्युतौ **(हवामहे)** प्राप्तुमिच्छेम **(पती)** पालकौ **(तुरस्य)** शीघ्रं सुखकरस्य **(राधसः)** धनस्य **(विद्वांसा)** विद्यायुक्तौ **(गिर्वणस्तमा)** अतिशयेन सुशिक्षितां वाचं सेवमानौ॥४॥

अन्वयः-हे मनुष्या! यौ रथानां तुरस्य राधसः पती गिर्वणस्तमा विद्वांसेन्द्राग्नी वामेषे वयं हवामहे ता यूयमपि प्राप्नुत॥४॥

भावार्थः-मनुष्यैर्वायुविद्युद्वच्छुभगुणव्यापिनां विदुषां सङ्गेन विद्याशिक्षे प्राप्य प्रजासु मित्रवद्वर्त्तितव्यम्॥४॥

पदार्थः-हे मनुष्यो! जो **(रथानाम्)** वाहनों और **(तुरस्य)** शीघ्र सुखकारक **(राधसः)** धन के **(पती)** पालन करने वाले **(गिर्वणस्तमा)** अतिशय उत्तम प्रकार शिक्षित वाणी का सेवन करते हुए **(विद्वांसा)** विद्या से युक्त **(इन्द्राग्नी)** वायु और बिजुली **(वाम्)** और आप दोनों को **(एषे)** प्राप्त होने के लिये हम लोग **(हवामहे)** प्राप्त होने की इच्छा करें **(ता)** उन दोनों को आप लोग भी प्राप्त होओ॥४॥

भावार्थः-मनुष्यों को चाहिये कि वायु और बिजुली के सदृश श्रेष्ठ गुणों से व्याप्त विद्वानों के सङ्ग से विद्या और शिक्षा को प्राप्त होकर प्रजाओं में मित्र के सदृश वर्त्ताव करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता वृधन्तावनु द्यून् मर्ताय देवावदभा।

अर्हन्ता चित्पुरो दधेंऽशेव देवावर्वते॥५॥

ता। वृधन्तौ। अनु। द्यून्। मर्ताय। देवौ। अदभा। अर्हन्ता। चित्। पुरः। दधे। अंशाऽइव। देवौ। अर्वते॥५॥

पदार्थः-(ता) तौ **(वृधन्तौ)** वर्धमानौ वर्धयन्तौ वा **(अनु)** **(द्यून्)** दिनान्यनु **(मर्त्ताय)** मनुष्याय **(देवौ)** दातारौ **(अदभा)** अहिंसकौ **(अर्हन्ता)** पूज्यौ **(चित्)** **(पुरः)** **(दधे)** **(अंशेव)** भागमिव **(देवौ)** देदीप्यमानौ **(अर्वते)** विज्ञानाय॥५॥

अन्वयः-हे मनुष्या! यावंशेव सत्कर्त्तव्यौ मर्त्तायाऽनु द्यून् वृधन्तावदभाऽर्हन्ता देवावहं पुरो दधे यौ देवौ चिदर्वते वर्त्तेते ता यूयं सत्कुरुत॥५॥

भावार्थः-ये मनुष्या अहर्निशं मनुष्यहिताय प्रयतन्ते त एव सर्वैः पूज्या वर्त्तन्ते॥५॥

पदार्थः-हे मनुष्यो! जो **(अंशेव)** भाग के सदृश सत्कार करने योग्य **(मर्त्ताय)** मनुष्य के लिये **(अनु, द्यून्)** प्रतिदिन **(वृधन्तौ)** बढ़ते वा बढ़ाते हुए **(अदभा)** नहीं हिंसा करने वाले **(अर्हन्ता)** आदर करने योग्य **(देवौ)** देने वाले को मैं **(पुरः)** आगे **(दधे)** धारण करता हूँ और जो **(देवौ)** प्रकाशमान दोनों **(चित्)** भी **(अर्वते)** विज्ञान के लिये वर्त्तमान हैं **(ता)** उन दोनों का आप लोग सत्कार करें॥५॥

भावार्थः-जो मनुष्य दिनरात्रि मनुष्यों के हित के लिये प्रयत्न करते हैं, वे ही सब से आदर करने योग्य हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एवेन्द्राग्निभ्यामहा वि हव्यं शूष्यं घृतं न पूतमद्रिभिः।

ता सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतम्॥६॥३२॥

एव। इन्द्राग्निऽभ्याम्। अहा। वि। हव्यम्। शूष्यम्। घृतम्। न। पूतम्। अद्रिऽभिः। ता। सूरिषु। श्रवः। बृहत्। रयिम्। गृणत्ऽसु। दिधृतम्। इषम्। गृणत्ऽसु। दिधृतम्॥६॥

पदार्थः-(एव) **(इन्द्राग्निभ्याम्)** सूर्य्याग्निभ्याम् **(अहा)** अहानि **(वि)** **(हव्यम्)** हव्यं ग्रहीतुमर्हम् **(शूष्यम्)** शूषे बले भवम् **(घृतम्)** आज्यम् **(न)** इव **(पूतम्)** पवित्रम् **(अद्रिभिः)** मेघैः **(ता)** तौ **(सूरिषु)** विद्वत्सु **(श्रवः)** अन्नम् **(बृहत्)** महत् **(रयिम्)** **(गृणत्सु)** स्तुवत्सु **(दिधृतम्)** धरतम् **(इषम्)** विज्ञानम् **(गृणत्सु)** **(दिधृतम्)**॥६॥

अन्वयः-हे मनुष्या! याभ्यामिन्द्राग्निभ्यामहाऽद्रिभिर्घृतन्न पूतं हव्यं शूष्यं श्रवो जायते गृणत्सु सूरिषु बृहद्रयिं यौ दिधृतं सूरिषु गृणत्स्विषं वि दिधृतं ता एव यथावद्वेदितव्यौ॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यदि विद्वत्सु यूयं निवसतः तर्हि विद्युन्मेघादिविद्यां विजानीत॥६॥

अत्रेन्द्राग्निविद्युद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षडशीतितमं सूक्तं द्वात्रिंशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जिन (**इन्द्राग्निभ्याम्**) सूर्य्य और अग्नि से (**अहा**) दिनों को और (**अद्रिभिः**) मेघों से (**घृतम्**) घृत जैसे (**न**) वैसे (**पूतम्**) पवित्र (**हव्यम्**) ग्रहण करने योग्य (**शूष्यम्**) बल में उत्पन्न (**श्रवः**) अन्न होता है तथा (**गृणत्सु**) प्रशंसा करते हुए (**सूरिषु**) विद्वानों में (**बृहत्**) बड़े (**रयिम्**) धन को जो दोनों (**दिधृतम्**) धारण करें तथा (**गृणत्सु**) स्तुति करते हुए विद्वानों में (**इषम्**) विज्ञान को (**वि, दिधृतम्**) विशेष धारण करें (**ता**) वे दोनों (**एव**) ही यथावत् जानने के योग्य हैं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्वानों में आप लोग निवास करें तो बिजुली और मेघ आदि की विद्या को जानें॥६॥

इस सूक्त में इन्द्र, अग्नि और बिजुली के गुण-वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह छियासीवां सूक्त और बत्तीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य सप्ताऽशीतितमस्य सूक्तस्य एवयामरुदात्रेय ऋषिः। मरुतो देवताः। १ अतिजगती। २, ५, ८, ९ स्वराड्जगती। ३, ६, ७ भुरिग्जगती। ४ निचृदतिजगती छन्दः। निषादः स्वरः॥

अथ मनुष्यान् कथं किं प्राप्नोतीत्याह॥

अब नव ऋचा वाले सत्तासीवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को कैसे क्या प्राप्त होता है, इस विषय को कहते हैं॥

प्र वो॑ म॒हे म॒तयो॑ यन्तु॒ विष्णा॑वे म॒रुत्व॑ते गिरि॒जा ए॑व॒याम॑रुत्।
प्र शर्धा॑य॒ प्रय॑ज्यवे सुखा॒दये॑ त॒वसे॑ भ॒न्ददि॑ष्टये॒ धुनि॑व्रताय॒ शव॑से॥ १॥

प्र। व॒ः। म॒हे। म॒तय॑ः। य॒न्तु॒। विष्णा॑वे। म॒रुत्व॑ते। गि॒रि॒ऽजाः। ए॒व॒या॒म॑रुत्। प्र। शर्धा॑य। प्रऽय॑ज्यवे। सु॒ऽख॒दये॑। त॒वसे॑। भ॒न्दत्ऽइ॑ष्टये। धुनि॑ऽव्रताय। शव॑से॥ १॥

पदार्थः-(प्र) (वः) युष्मान् **(महे)** महते **(मतयः)** मनुष्या बुद्धयो वा **(यन्तु)** प्राप्नुवन्तु **(विष्णवे)** व्यापकाय **(मरुत्वते)** प्रशंसिता मनुष्या यस्मिँस्तस्मै **(गिरिजाः)** ये गिरौ मेघे जाताः **(एवयामरुत्)** य एवान् प्रापकान् यान्ति तेषां यो मरुन्मनुष्यः **(प्र) (शर्धाय)** बलाय **(प्रयज्यवे)** प्रयजन्ति येन तस्मै **(सुखादये)** यस्सुष्ठु खादति तस्मै **(तवसे)** बलिष्ठाय **(भन्ददिष्टये)** कल्याणसुखसङ्गतये **(धुनिव्रताय)** धुनानि कम्पितानि व्रतानि यस्य तस्मै **(शवसे)** बलाय॥ १॥

अन्वयः-हे मनुष्या! यथा मरुत्वते महे विष्णवे विद्यद्रूपाग्नये गिरिजा यन्ति तथा वो मतयः प्र यन्तु यथैवयामरुच्छर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे प्र भवति तथा यूयमप्येतस्मै प्र भवत॥ १॥

भावार्थः-यथा विद्युद्रूपाग्निं मेघोत्पन्ना गर्जनादिप्रभावा गच्छन्ति यतोऽग्नीवायुसाध्यास्ते तथा धीमतः पुरुषानन्ये सम्प्राप्नुवन्ति गुणप्रापको गुणिनमन्विच्छत्यत्युत्तमं बलं चाप्नोति॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(मरुत्वते)** प्रशंसित मनुष्य जिसमें उस **(महे)** बड़े **(विष्णवे)** व्यापक बिजुलीरूप अग्नि के लिये **(गिरिजाः)** मेघ में उत्पन्न हुए प्राप्त होते हैं, वैसे **(वः)** आप लोगों को **(मतयः)** मनुष्य वा बुद्धियां **(प्र, यन्तु)** प्राप्त होवें और जैसे **(एवयामरुत्)** प्राप्त कराने वालों को प्राप्त होने वालों का मनुष्य **(शर्धाय)** बल के और **(प्रयज्यवे)** अत्यन्त यजन करते हैं जिससे उस **(सुखादये)** उत्तम प्रकार खाने वाले **(तवसे)** बलिष्ठ के लिये तथा **(भन्ददिष्टये)** कल्याण और सुख की संगति के लिये **(धुनिव्रताय)** और कंपित व्रत जिसका उस **(शवसे)** बल के लिये **(प्र)** समर्थ होता है, वैसे आप लोग भी इसके लिये समर्थ हूजिये॥ १॥

भावार्थः-जैसे बिजुलीरूप अग्नि को मेघोत्पन्न गर्जनादि प्रभाव प्राप्त होते हैं, क्योंकि वे गर्जनादि प्रभाव अग्नि और वायु से सिद्ध होने योग्य हैं, वैसे बुद्धिमान् पुरुषों को अन्य पुरुष प्राप्त होते हैं। और गुण प्राप्त कराने वाला पुरुष गुणी पुरुष को ढूंढता है और अति उत्तम बल को भी प्राप्त होता है॥१॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एवयामरुत्।

क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः॥२॥

प्र। ये। जाताः। महिना। ये। च। नु। स्वयम्। प्र। विद्मना। ब्रुवते। एवयामरुत्। क्रत्वा। तत्। वः। मरुतः। न। आऽधृषे। शवः। दाना। मह्ना। तत्। एषाम्। अधृष्टासः। न। अद्रयः॥२॥

पदार्थः-(**प्र**) (**ये**) (**जाताः**) उत्पन्नाः (**महिना**) महत्त्वेन (**ये**) (**च**) (**नु**) सद्यः (**स्वयम्**) (**प्र**) (**विद्मना**) विज्ञानेन (**ब्रुवते**) उपदिशन्ति (**एवयामरुत्**) विज्ञानवान् मनुष्यः (**क्रत्वा**) प्रज्ञया कर्मणा वा (**तत्**) (**वः**) युष्माकम् (**मरुतः**) मनुष्याः (**न**) निषेधे (**आधृषे**) आधर्षितुम् (**शवः**) बलम् (**दाना**) दानेन (**मह्ना**) महत्त्वेन (**तत्**) (**एषाम्**) (**अधृष्टासः**) अप्रगल्भाः (**न**) इव (**अद्रयः**) मेघाः॥२॥

अन्वयः-हे मरुतो! मनुष्या ये महिना जाता ये विद्मना प्र ब्रुवते ये च स्वयं नु प्र ब्रुवते एवयामरुदहं क्रत्वा तेषां वस्तच्छवो दाना मह्ना वा नाऽऽधृषे प्र भवामि। अद्रयो नाऽधृष्टासो यदेषां शवोऽस्ति तन्नाऽऽधृषे प्र भवामि॥२॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सर्वेषामुपकारं कृत्वा प्राणवत्प्रिया भवन्ति त एव जगदुपकारका भवन्ति॥२॥

पदार्थः-हे (**मरुतः**) मनुष्यो! (**ये**) जो (**महिना**) महत्त्व से (**जाताः**) उत्पन्न हुए तथा (**ये**) जो (**विद्मना**) विज्ञान से (**प्र, ब्रुवते**) उपदेश देते हैं (**च**) और जो (**स्वयम्**) अपने से (**नु**) शीघ्र (**प्र**) विशेष करके उपदेश देते हैं और (**एवयामरुत्**) विज्ञान वाला मनुष्य मैं (**क्रत्वा**) बुद्धि वा कर्म्म से उन (**वः**) आप लोगों के (**तत्**) उस (**शवः**) बल को (**दाना**) देने से वा (**मह्ना**) महत्त्व से (**न**) नहीं (**आधृषे**) दबाने को समर्थ होता हूं तथा (**अद्रयः**) मेघों के (**न**) समान (**अधृष्टासः**) नहीं धर्षण किये गये जो (**एषाम्**) इनका बल है (**तत्**) उसको नहीं दबाने को समर्थ होता हूं॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सब के उपकार को करके प्राणवत् प्रिय होते हैं, वे ही जगत् के उपकार करने वाले होते हैं॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्वः एवयामरुत्।

न येषामिरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यन्द्रासो धुनीनाम्॥ ३॥

प्र। ये। दिवः। बृहतः। शृण्विरे। गिरा। सुऽशुक्वानः। सुऽभ्वः। एवयामरुत्। न। येषाम्। इरी। सधऽस्थे। ईष्टे। आ। अग्नयः। न। स्वऽविद्युतः। प्र। स्यन्द्रासः। धुनीनाम्॥ ३॥

पदार्थः-(प्र) (ये) (दिवः) कामयमानान् विद्युदादीन् वा **(बृहतः)** महतः **(शृण्विरे)** शृण्वन्ति **(गिरा)** वाण्या **(सुशुक्वानः)** सुष्ठु शुद्धाः **(सुभ्वः)** ये शोभने धर्म्ये व्यवहारे भवन्ति **(एवयामरुत्) (न)** निषेधे **(येषाम्) (इरी)** प्रेरकः **(सधस्थे)** समानस्थे **(ईष्टे)** ईशनं करोति **(आ)** समन्तात् **(अग्नयः)** पावकाः **(न)** इव **(स्वविद्युतः)** स्वेन रूपेण व्याप्तः **(प्र) (स्यन्द्रासः)** प्रस्रवन्तः प्रस्रावयन्तो वा **(धुनीनाम्)** कम्पनक्रियावतीनाम् भूम्यादीनाम्॥ ३॥

अन्वयः-हे मनुष्या! ये सुशुक्वानः सुभ्वो दिवः स्वविद्युतो धुनीनां स्यन्द्रासोऽग्नयो न गिरा बृहतः प्र शृण्विरे येषामेवयामरुदिरी सधस्थे न प्रेष्टे तान् यूयमा विजानीत॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये विद्याकामा महतीर्विद्याः प्राप्य विद्युदादिपदार्थान् स्वाधीनान् कुर्वन्ति ते एव सिद्धेच्छा जायन्ते॥ ३॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(सुशुक्वानः)** उत्तम प्रकार शुद्ध **(सुभ्वः)** और सुन्दर धर्मयुक्त व्यवहार में होने वाले **(दिवः)** कामना करते हुओं वा बिजुली आदिकों को जैसे **(स्वविद्युतः)** अपने स्वरूप से व्याप्त और **(धुनीनाम्)** कम्पन क्रिया से युक्त भूमि आदिकों के **(स्यन्द्रासः)** पिघलते हुए वा पिघलाते हुए **(अग्नयः)** अग्नियां **(न)** वैसे **(गिरा)** वाणी से **(बृहतः)** बड़े **(प्र, शृण्विरे)** सुनते हैं और **(येषाम्)** जिनका **(एवयामरुत्)** विज्ञान वाला मनुष्य **(इरी)** प्रेरणा करने वाला **(सधस्थे)** समान स्थान में **(न)** जैसे वैसे **(प्र, ईष्टे)** स्वामी होता है, उनको आप लोग **(आ)** अच्छे प्रकार जानिये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्या की कामना करने वाले जन बड़ी विद्याओं को प्राप्त होकर बिजुली आदि पदार्थों को स्वाधीन करते हैं, वे ही सिद्ध इच्छा वाले होते हैं॥ ३॥

अथेश्वरोपासनविषयमाह॥

अब ईश्वर के उपासनाविषय को कहते हैं॥

स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत्।

यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः॥ ४॥

सः। चक्रमे। महतः। निः। उरुऽक्रमः। समानस्मात्। सदसः। एवयामरुत्। यदा। अयुक्त। त्मना। स्वात्। अधि। स्नुऽभिः। विऽस्पर्धसः। विऽमहसः। जिगाति। शेऽवृधः। नृऽभिः॥ ४॥

पदार्थः-(सः) (चक्रमे) क्रमते **(महतः) (निः)** नितराम् **(उरुक्रमः)** उरवो बहवः क्रमा यस्य **(समानस्मात्)** तुल्यात् **(सदसः)** गृहात् **(एवयामरुत्) (यदा) (अयुक्त)** युङ्क्ते **(त्मना)** आत्मना

(स्वात्) **(अधि)** **(स्नुभिः)** पवित्रैर्गुणैः **(विष्पर्धसः)** ये विशेषेण स्पर्धन्ते तान् **(विमहसः)** विशेषेण महागुणविशिष्टान् **(जिगाति)** गच्छति **(शेवृधः)** सुखवर्धकान् **(नृभिः)** नेतृभिः॥४॥

अन्वयः-हे मनुष्या! य एवयामरुदुरुक्रमः समानस्मान्महतः सदसो निश्चक्रमे तं यस्त्मना यदाऽयुक्त स्नुभिर्नृभिश्च सह वर्तमानः स्वाद् विष्पर्धसो विमहसः शेवृधोऽधि जिगाति स परमेश्वर उपासनीयो योगी च सेवनीयः॥४॥

भावार्थः-ये मनुष्या विदुषः सकाशात् परमेश्वरयोगमभ्यस्यन्ति ते सुखधरा जायन्ते॥४॥

पदार्थः-हे मनुष्यो! जो **(एवयामरुत्)** विज्ञान वाला मनुष्य **(उरुक्रमः)** जो बहुत क्रम वाला **(समानस्मात्)** तुल्य **(महतः)** बड़े **(सदसः)** गृह से **(निः)** निरन्तर **(चक्रमे)** क्रमण करता है उसको जो **(त्मना)** आत्मा से **(यदा)** जब **(अयुक्त)** युक्त होता है **(स्नुभिः)** तथा पवित्र गुणों और **(नृभिः)** नायकों के साथ वर्त्तमान **(स्वात्)** अपने से **(विष्पर्धसः)** विशेष करके स्पर्द्धा करने वाले **(विमहसः)** विशेष करके बड़े गुणों से विशिष्ट और **(शेवृधः)** सुख के बढ़ाने वालों को **(अधि, जिगाति)** प्राप्त होता है **(सः)** वह परमेश्वर उपासना करने योग्य और योगीजन सेवन करने योग्य है॥४॥

भावार्थः-जो मनुष्य विद्वान् पुरुष के द्वारा परमेश्वर के योग का अभ्यास करते हैं, वे सुख के धारण करने वाले होते हैं॥४॥

पुनर्विद्वांसो राजजनाः कीदृशा भवन्तीत्याह॥

फिर विद्वान् राजाजन कैसे होते हैं, इस विषय को कहते हैं॥

स्व॒नो न वोऽम॑वान् रेजय॒द् वृषा॑ त्वे॒षो य॒यिस्त॑वि॒ष ए॑व॒याम॑रुत्।

येना॒ सह॑न्त ऋ॒ञ्जत॒ स्वरो॑चिष॒: स्थार॑श्मानो हिर॒ण्यया॑: स्वायु॒धास॑ इ॒ष्मिण॑:॥५॥३३॥

स्व॒नः। न। व॒ः। अम॑ऽवान्। रे॒ज॒य॒त्। वृषा॑। त्वे॒षः। य॒यिः। त॒वि॒षः। ए॒व॒याम॑रुत्। येन॑। सह॑न्तः। ऋ॒ञ्जत॑। स्वऽरो॑चिषः। स्थाः॑ऽर॑श्मानः। हि॒र॒ण्यया॑ः। सु॒ऽआ॒यु॒धास॑ः। इ॒ष्मिण॑ः॥५॥

पदार्थः-(**स्वनः**) शब्दः **(न)** इव **(वः)** युष्माकम् **(अमवान्)** गृहवन् **(रेजयत्)** कम्पयते **(वृषा)** बलिष्ठः **(त्वेषः)** दीप्तिमान् **(ययिः)** याता **(तविषः)** बलात् **(एवयामरुत्)** **(येना)** अत्र **संहितायामिति** दीर्घः। **(सहन्तः)** सोढारः **(ऋञ्जत)** प्रसाध्नुत **(स्वरोचिषः)** स्वयं रोची रोचनमेषान्ते **(स्थारश्मानः)** स्थिरा रश्मानः किरणा इव व्यवहारा येषान्ते **(हिरण्ययाः)** तेजोमयाः **(स्वायुधासः)** स्वकीयान्यायुधानि येषान्ते **(इष्मिणः)** बहुविधमिष्मेच्छा येषान्ते॥५॥

अन्वयः-हे मनुष्या! स वः स्वनो नाऽमवान् वृषा त्वेषस्तविषो ययिरेवयामरुत् व्यवहारान् रेजयत् येना सहन्तः स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणो जना यूयं स्वप्रयोजनान्यृञ्जत॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये प्रकाशितधर्म्यव्यवहारा शमदमान्वितास्तेजस्विनो बलिष्ठा युद्धविद्याकुशलाः स्युस्त एव विजयिनो भवन्ति॥५॥

पदार्थः-हे मनुष्यो! वह **(वः)** आप लोगों के मध्य में **(स्वनः)** शब्द के **(न)** समान **(अमवान्)** गृह वाला **(वृषा)** बलिष्ठ और **(त्वेषः)** प्रकाशवान् **(तविषः)** बल से **(यियिः)** प्राप्त होने वाला **(एवयामरुत्)** बुद्धिमान् मनुष्य व्यवहारों को **(रेजयत्)** कंपित कराता है **(येना)** जिस पुरुष से **(सहन्तः)** सहन करने वाले **(स्वरोचिषः)** अपने से प्रकाश जिनका ऐसे और **(स्थारश्मानः)** स्थिर किरणों के सदृश व्यवहार जिनके तथा **(हिरण्ययाः)** तेजस्वरूप **(स्वायुधासः)** अपने आयुधों वाले और **(इष्मिणः)** बहुत प्रकार की इच्छा वाले जन आप लोग अपने प्रयोजनों को **(ऋञ्जत)** सिद्ध करें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो प्रकाशित धर्म्मयुक्त व्यवहार वाले तथा शम, दम आदि से युक्त, तेजस्वी, बल वाले और युद्धविद्या में कुशल होवें, वे ही विजयी होते हैं॥५॥

अथ विद्वद्भिः कान्निवार्य के सत्कर्त्तव्या इत्याह॥

अब विद्वानों को किनका निवारण करके किनका सत्कार करना चाहिये, इस विषय को कहते हैं॥

अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत्।
स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शुशुक्वांसो नाग्नयः॥६॥

अपारः। वः। महिमा। वृद्धऽशवसः। त्वेषम्। शवः। अवतु। एवयामरुत्। स्थातारः। हि। प्रऽसितौ। सम्ऽदृशिः। स्थन। ते। नः। उरुष्यत। निदः। शुशुक्वांसः। न। अग्नयः॥६॥

पदार्थः-**(अपारः)** पाररहितः **(वः)** युष्माकम् **(महिमा)** **(वृद्धशवसः)** वृद्धं शवो बलं येषां तत्सम्बुद्धौ **(त्वेषम्)** प्रकाशितम् **(शवः)** बलम् **(अवतु)** **(एवयामरुत्)** **(स्थातारः)** ये तिष्ठन्ति **(हि)** यतः **(प्रसितौ)** प्रकृष्टे बन्धने **(संदृशि)** समानदर्शने **(स्थन)** तिष्ठत **(ते)** **(नः)** अस्मान् **(उरुष्यता)** सेवध्वम्। अत्र **संहितायामिति** दीर्घः। **(निदः)** ये निन्दन्ति **(शुशुक्वांसः)** शोकयुक्ताः **(न)** इव **(अग्नयः)** पावकाः॥६॥

अन्वयः-हे वृद्धशवसः स्थातारोऽग्नयो न वो योऽपारो महिमैवयामरुत्त्वेषं शवश्चावतु हि प्रसितौ निदः शुशुक्वांसः सन्तु ते यूयं संदृशि स्थन नोऽस्मानुरुष्यता॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये निन्दका अर्थान्मिथ्यावादिनः स्युस्तान् सदा बन्धने प्रवेशयत। ये च महाशयाः परोपकारिणः स्तावकाः सत्यवादिनः स्युस्तान् सर्वदा सत्कुरुत॥६॥

पदार्थः-हे **(वृद्धशवसः)** बढ़े हुए बल वालो! **(स्थातारः)** स्थित होने वाले **(अग्नयः)** अग्नियां **(न)** जैसे वैसे **(वः)** आप लोगों का जो **(अपारः)** अपार **(महिमा)** बड़प्पन और **(एवयामरुत्)** बुद्धिमान् मनुष्य **(त्वेषम्)** प्रकाशित **(शवः)** बल की **(अवतु)** रक्षा करे **(हि)** जिससे कि **(प्रसितौ)** प्रकृष्ट बन्धन के रहने पर **(निदः)** निन्दा करने वाले **(शुशुक्वांसः)** शोक से युक्त होवें **(ते)** वे आप लोग **(संदृशि)** तुल्य दर्शन में **(स्थन)** स्थित हूजिये और **(नः)** हम लोगों का **(उरुष्यता)** सेवन करिये॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो निन्दक अर्थात् मिथ्यावादी होवें, उनको सदा बन्धन में प्रविष्ट करिये और जो महाशय, परोपकारी स्तुति करने और सत्य बोलने वाले होवें, उनका सदा सत्कार करिये॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्वेवयामरुत्।

दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धांस्यद्भुतैनसाम्॥७॥

ते। रुद्रासः। सुऽमखाः। अग्नयः। यथा। तुविऽद्युम्नाः। अवन्तु। एवयामरुत्। दीर्घम्। पृथु। पप्रथे। सद्म। पार्थिवम्। येषाम्। अज्मेषु। आ। महः। शर्धांसि। अद्भुतऽएनसाम्॥७॥

पदार्थः-(**ते**) (**रुद्रासः**) मध्यमा विद्वांसः (**सुमखाः**) शोभनन्यायाचरणयज्ञानुष्ठातारः (**अग्नयः**) अग्निवद्वर्त्तमानाः (**यथा**) येन प्रकारेण (**तुविद्युम्नाः**) बहुधनयशोन्विताः (**अवन्तु**) (**एवयामरुत्**) (**दीर्घम्**) (**पृथु**) विस्तीर्णं प्रख्यातं वा (**पप्रथे**) प्रख्यापयति (**सद्म**) सीदन्ति यस्मिन् (**पार्थिवम्**) पृथिव्यां विदितम् (**येषाम्**) (**अज्मेषु**) अजन्ति गच्छन्ति येषु स-ामेषु (**आ**) (**महः**) (**शर्धांसि**) बलानि (**अद्भुतैनसाम्**) अद्भुतानि महान्त्येनांसि पापानि येषान्ते॥७॥

अन्वयः-हे मनुष्या! ते सुमखा रुद्रासो यथाऽग्नयस्तुविद्युम्ना अस्मानवन्तु येषामद्भुतैनसामज्मेषु शर्धांसि महो दीर्घं पृथु पार्थिवं सद्मैवयामरुदाऽऽपप्रथे॥७॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या अग्निवत्पापप्रणाशकाः सत्यप्रकाशकाः दुष्टानां रोदयितारः श्रेष्ठानां पालकाः सन्ति त एवातुलकीर्त्तयो भवन्ति॥७॥

पदार्थः-हे मनुष्यो! (**ते**) वे (**सुमखाः**) सुन्दर न्यायाचरण और यज्ञ के करने वाले (**रुद्रासः**) मध्यम विद्वान् जन (**यथा**) जैसे (**अग्नयः**) अग्नि के सदृश वर्त्तमान (**तुविद्युम्नाः**) बहुत धन और यश से युक्त हुए हम लोगों की (**अवन्तु**) रक्षा करें (**येषाम्**) जिन (**अद्भुतैनसाम्**) अद्भुत बड़े पाप वालों के (**अज्मेषु**) संग्रामों में (**शर्धांसि**) बलों और (**महः**) बड़े (**दीर्घम्**) लम्बे (**पृथु**) विस्तृत वा प्रसिद्ध (**पार्थिवम्**) पृथिवी में विदित (**सद्म**) ठहरते हैं जिसमें उस स्थान को (**एवयामरुत्**) बुद्धिमान् पुरुष (**आ, प्रपथे**) अच्छे प्रकार प्रसिद्ध करता है॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य अग्नि के सदृश पाप के नाश करने, सत्य के प्रकाश करने और दुष्टों के रुलाने वाले, श्रेष्ठों के पालक हैं, वे ही अधिक कीर्त्ति वाले होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत्।

विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो३ न दंसनाप द्वेषांसि सनुतः॥८॥

अद्वेषः। नः। मरुतः। गातुम्। आ। इतन। श्रोत। हवम्। जरितुः। एवयामरुत्। विष्णोः। महः। समन्यवः। युयोतन। स्मत्। रथ्यः। न। दंसना। अप। द्वेषांसि। सनुतरिति॥८॥

पदार्थः-(अद्वेषः) द्वेषरहितान् **(नः)** अस्माकम् **(मरुतः)** मानवाः **(गातुम्)** पृथिवीम् **(आ) (इतन)** प्राप्नुत **(श्रोता)** शृणुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(हवम्)** प्रशंसनीयं व्यवहारम् **(जरितुः)** स्तुत्यस्य **(एवयामरुत्) (विष्णोः)** व्यापकस्य **(महः)** महत्त्वम् **(समन्यवः)** समानो मन्युः क्रोधो येषां ते **(युयोतन)** संयोजयत **(स्मत्)** एव **(रथ्यः)** रथेषु साधवः **(न)** इव **(दंसना)** कर्म्माणि **(अप)** दूरीकरणे **(द्वेषांसि)** द्वेषयुक्तानि कर्म्माणि **(सनुतः)** सनातनान्॥८॥

अन्वयः-हे समन्यवो मरुतो! यूयमेवयामरुदिव नोऽद्वेषः कुरुत गातुमेतन नो हवं श्रोता जरितुर्विष्णोर्महः स्मद्युयोतन रथ्यो न सनुतर्दंसनाऽप द्वेषांसि युयोतन॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांस उपदेशका मनुष्यान् द्वेषादिदोषरहितान् कुर्वन्ति ते व्यापकस्येश्वरस्य पदं प्राप्नुवन्ति॥८॥

पदार्थः-हे **(समन्यवः)** समान क्रोध वाले **(मरुतः)** मनुष्यो! आप लोग **(एवयामरुत्)** बुद्धिमान् मनुष्य के सदृश **(नः)** हम लोगों को **(अद्वेषः)** द्वेष से रहित करिये। और **(गातुम्)** पृथिवी को **(आ, इतन)** प्राप्त हूजिये तथा हम लोगों के **(हवम्)** श्रेष्ठ व्यवहार को **(श्रोता)** सुनिये **(जरितुः)** स्तुति करने योग्य **(विष्णोः)** व्यापक के **(महः)** महत्त्व को **(स्मत्)** ही **(युयोतन)** संयुक्त कीजिये और **(रथ्यः)** वाहनों के चलाने में कुशलों के **(न)** सदृश **(सनुतः)** सनातन **(दंसना)** कर्म्मों को और **(अप)** दूरीकरण के निमित्त **(द्वेषांसि)** द्वेषयुक्त कर्मों को संयुक्त कीजिये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् और उपदेशक जन मनुष्यों को द्वेष आदि दोष से रहित करते हैं, वे व्यापक ईश्वर के पद को प्राप्त होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

गन्ता नो यज्ञं यज्ञियाः सुशमि श्रोता हवमरक्ष एवयामरुत्।
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य
प्रचेतसः स्यात दुर्धर्तवो निदः॥६॥३४॥६॥५॥

गन्त। नः। यज्ञम्। यज्ञियाः। सुऽशमि। श्रोत। हवम्। अरक्षः। एवयामरुत्। ज्येष्ठासः। न। पर्वतासः। विऽओमानि। यूयम्। तस्य। प्रऽचेतसः। स्यात। दुःऽधर्तवः। निदः॥९॥

पदार्थः-(गन्ता) प्राप्नुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मानस्माकं वा **(यज्ञम्)** सत्यजनकं व्यवहारं **(यज्ञियाः)** यज्ञं सम्पादितुमर्हाः **(सुशमि)** शोभनं कर्म्म **(श्रोता)** शृणुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(हवम्)** पठनपरीक्षाख्यम् **(अरक्षः)** अरक्षणीयम् **(एवयामरुत्) (ज्येष्ठासः)** विद्यावयोवृद्धाः प्रशस्तवाचः **(न)** इव **(पर्वतासः)** मेघाः **(व्योमनि)** व्योमवद्व्यापके परमेश्वरे **(यूयम्) (तस्य) (प्रचेतसः)** प्रज्ञापकाः **(स्यात) (दुर्धर्त्तवः)** दुःखेन धर्त्तारः **(निदः)** निन्दकाः॥९॥

अन्वयः-हे यज्ञियाः! यूयमेवयामरुदिव नोऽस्मानस्माकं यज्ञञ्च गन्ता, सुशमि हवं श्रोताऽरक्षो निवारयत व्योमनि पर्वतासो न ज्येष्ठासो भवत यो व्योमवद्व्यापक ईश्वरोऽस्ति तस्य प्रचेतसः स्यात ते दुर्धर्त्तवो निदः सन्ति तेषां निवारकाः स्यात॥९॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! यूयं विद्याप्रचारव्यवहारप्रचारेण धर्म्याणि कर्म्माणि कृत्वाऽन्यैः कारयत, निन्दादिदोषेभ्यश्च मनुष्यान् पृथक्कृत्य परमेश्वरे प्रवर्त्तयत स्वयमप्येवं भवतेति॥९॥

अत्र मरुद्विद्वद्परमेश्वरोपासनावर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाविभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये सप्ताशीतितमं सूक्तं चतुस्त्रिंशो वर्गः पञ्चमे मण्डले षष्ठोऽनुवाकः पञ्चमं मण्डलञ्च समाप्तम्॥

पदार्थः-हे **(यज्ञियाः)** यज्ञ करने योग्य **(यूयम्)** आप लोगो **(एवयामरुत्)** बुद्धिमान् मनुष्य के सदृश **(नः)** हम लोगों को वा हम लोगों के **(यज्ञम्)** सत्य को प्रकट करने वाले व्यवहार को **(गन्ता)** प्राप्त हूजिये और **(सुशमि)** श्रेष्ठ कर्म्म और **(हवम्)** पठन की परीक्षा नामक कर्म्म को **(श्रोता)** सुनिये तथा **(अरक्षः)** नहीं रक्षा करने योग्य का निवारण करिये और **(व्योमनि)** आकाश के सदृश व्यापक परमेश्वर में **(पर्वतासः)** मेघ **(न)** जैसे वैसे **(ज्येष्ठासः)** विद्या और अवस्था से वृद्ध और प्रशंसायुक्त वाणी वाले हूजिये और जो आकाश के सदृश व्यापक ईश्वर है **(तस्य)** उसके **(प्रचेतसः)** जनाने वाले **(स्यात)** हूजिये और जो **(दुर्धर्तवः)** दुःख से धारण करने वाले **(निदः)** निन्दक जन हैं, उनके निवारण करने वाले हूजिये॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान् जनो! आप लोग विद्या के प्रचारनामक व्यवहार के प्रचार से धर्मसम्बन्धी कार्यों को करके अन्यों से भी कराओ और निन्दा आदि दोषों से मनुष्यों को पृथक् करके परमेश्वर की ओर प्रवृत्त करो और स्वयं भी ऐसे होओ॥९॥

इस सूक्त में वायु, विद्वान् और परमेश्वर की उपासना का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह श्रीमत्परमहंसपरिव्राजकाचार्य्य श्रीमद्विरजानन्द सरस्वती स्वामी जी के शिष्य श्रीमद्दयानन्द सरस्वती स्वामी विरचित संस्कृतार्य्यभाषाविभूषित सुप्रमाणयुक्त ऋग्वेदभाष्य में सतासीवां सूक्त चौंतीसवां वर्ग तथा पञ्चम मण्डल में छठा अनुवाक और पञ्चम मण्डल भी समाप्त हुआ॥

॥ओ३म्॥

अथ षष्ठं मण्डलम्॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ त्रयोदशर्चस्य प्रथमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ७, १३ भुरिक्पङ्क्तिः। २ स्वराट्पङ्क्तिः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ४, ६९, ११, १२ निचृत्त्रिष्टुप्। ८, १० त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वानग्निरिव किं कुर्य्यादित्याह॥

अब छठे मण्डल में तेरह ऋचा वाले प्रथम सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् जन अग्नि के सदृश क्या-क्या करें? इस विषय को अगले मन्त्र में कहते हैं॥

त्वं ह्य॑ग्ने प्रथ॒मो म॒नोता॒स्या धि॒यो अभ॑वो दस्म॒ होता॑।
त्वं सी॑ वृषन्नकृणोर्दु॒ष्टरी॑तु॒ सहो॒ विश्व॑स्मै॒ सह॑से॒ सह॑ध्यै॥ १॥

त्वम्। हि। अ॒ग्ने॒। प्र॒थ॒मः। म॒नोता॑। अ॒स्याः। धि॒यः। अभ॑वः। द॒स्म॒। होता॑। त्वम्। सी॒म्। वृ॒ष॒न्। अ॒कृ॒णोः॒। दु॒स्तरी॑तु। सहः॑। विश्व॑स्मै। सह॑से। सह॑ध्यै॥ १॥

पदार्थः-(त्वम्) (हि) (अग्ने) अग्निरिव वर्त्तमान **(प्रथमः)** आदिमः **(मनोता)** मनोवद्गन्ता **(अस्याः) (धियः)** प्रज्ञायाः **(अभवः)** भवसि **(दस्म)** दुःखोपक्षयितः **(होता)** दाता **(त्वम्) (सीम्)** सर्वतः **(वृषन्)** वीर्यसेक्तः **(अकृणोः) (दुष्टरीतु)** दुःखेन तरीतुमुल्लङ्घयितुं योग्यम् **(सहः)** यस्सहते **(विश्वस्मै)** सर्वस्मै **(सहसे)** बलाय **(सहध्यै)** सोढुम्॥ १॥

अन्वयः-हे अग्ने दस्म विद्वन्! यथा प्रथमो मनोता होता संस्त्वं ह्यस्या धियो वृद्धिं कुर्वन् सुख्यभवः। हे वृषँस्त्वं सीं विश्वस्मै सहः सहसे सहध्यै दुष्टरीत्वकृणोस्तथा विद्युदग्निः करोति॥ १॥

भावार्थः-ये विद्वांसो मूर्खैः कृतानपराधान् सोढ्वा सर्वेषां सुखाय प्रयतन्ते त एव सर्वेषां हितकारिणः सन्ति॥ १॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्वी **(दस्म)** दुःख के नाश करने वाले विद्वान् जन जैसे **(प्रथमः)** आदिम **(मनोता)** मन के समान जाने वाले और **(होता)** दान करने वाले हुए **(त्वम्)** आप **(हि)** निश्चय से **(अस्याः)** इस **(धियः)** बुद्धि की वृद्धि करते हुए सुखयुक्त **(अभवः)** होते हो। और हे **(वृषन्)** वीर्य्य के सींचने वाले **(त्वम्)** आप **(सीम्)** सब ओर से **(विश्वस्मै)** सम्पूर्ण प्राणियों के लिये **(सहः)** सहनशील **(सहसे)** बल के लिये **(सहध्यै)** सहने का **(दुष्टरीतु)** दुःख से उल्लंघन करने योग्य **(अकृणोः)** करते हो, वैसे बिजुलीरूप अग्नि करता है॥ १॥

भावार्थः-जो विद्वान् जन मूर्ख लोगों से किये हुए अपराधों को सहकर सम्पूर्ण जनों के सुख के लिये प्रयत्न करते हैं, वही सब के हितकारी होते हैं॥१॥

मनुष्याः कथं विद्यां प्राप्नुयुरित्याह॥

मनुष्य किस रीति से विद्या को प्राप्त होवें, इस विषय को कहते हैं॥

अधा॒ होता॒ न्य॑सीदो॒ यजी॑या॒निळस्प॒द इ॒षय॒न्नीड्य॒ः सन्।
तं त्वा॒ नर॑ः प्रथ॒मं दे॑व॒यन्तो॑ म॒हो रा॒ये चि॒तय॑न्तो॒ अनु॑ ग्मन्॥२॥

अध॑। होता॑। नि। अ॒सी॒द॒ः। यजी॑यान्। इ॒ळः। प॒दे। इ॒षय॑न्। ईड्य॑ः। सन्। तम्। त्वा॒। नर॑ः। प्र॒थ॒मम्। दे॒व॒ऽयन्त॑ः। म॒हः। रा॒ये। चि॒तय॑न्तः। अनु॑। ग्म॒न्॥२॥

पदार्थः-(**अधा**) आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। (**होता**) आदाता (**नि**) (**असीदः**) तिष्ठेः (**यजीयान्**) अतिशयेन यष्टा (**इळः**) पृथिव्या वाचो वा (**पदे**) (**इषयन्**) प्रापयन् (**ईड्यः**) स्तोतुमर्हः (**सन्**) (**तम्**) (**त्वा**) त्वाम् (**नरः**) मनुष्याः (**प्रथमम्**) आदिमम् (**देवयन्तः**) कामयमानाः (**महः**) महते (**राये**) धनाय (**चितयन्तः**) ज्ञापयन्तः (**अनु**) (**ग्मन्**) अनुगच्छन्ति॥२॥

अन्वयः-हे विद्वन्! यथा होता यजीयानिषयन्नीड्यः सन्नग्निरिळस्पदे वर्त्तते तथा भूत्वा त्वं न्यसीदः। यथा देवयन्तश्चितयन्तो नरः प्रथममग्निमनु ग्मँस्तथाऽधा महो राये तं त्वैतेऽनुगच्छन्तु॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विदुषः कामयित्वाऽग्न्यादिविद्यां जिघृक्षन्ति ते विज्ञानवन्तो जायन्ते॥२॥

पदार्थः-हे विद्वन्! जिस प्रकार से (**होता**) ग्रहण करने और (**यजीयान्**) अत्यन्त यज्ञ करने वाला पुरुष (**इषयन्**) प्राप्त कराता और (**ईड्यः**) स्तुति करने योग्य (**सन्**) होता हुआ अग्नि (**इळः**) पृथिवी वा वाणी के (**पदे**) स्थान में वर्त्तमान है, वैसे होकर आप (**नि, असीदः**) निरन्तर स्थिर हूजिये और जैसे (**देवयन्तः**) कामना करते और (**चितयन्तः**) जनाते हुए (**नरः**) मनुष्य (**प्रथमम्**) आदिम अग्नि को (**अनु, ग्मन्**) पश्चात् चलते हैं, वैसे (**अधा**) अनन्तर (**महः**) बड़े (**राये**) धन के लिये (**तम्**) उस (**त्वा**) आपको ये सब पश्चात् प्राप्त होवें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वानों की कामना करके अग्नि आदि की विद्या को ग्रहण करने की इच्छा करते हैं, वे विज्ञानयुक्त होते हैं॥२॥

पुनर्विद्वांसः किं जानीयुरित्याह॥

फिर विद्वान् जन क्या जानें, इस विषय को कहते हैं॥

वृ॒तेव॒ यन्ता॑ ब॒हुभि॑र्वस॒व्यै३॑स्त्वे र॒यिं जा॑गृ॒वांसो॒ अनु॑ ग्मन्।
रुश॑न्तम॒ग्निं द॑र्श॒तं बृ॒हन्तं॑ व॒पाव॑न्तं वि॒श्वहा॑ दीदि॒वांस॑म्॥३॥

वृताऽइव। यन्तम्। बहुऽभिः। वसव्यैः। त्वे इति। रयिम्। जागृऽवांसः। अनु। ग्मन्। रुशन्तम्। अग्निम्। दर्शतम्। बृहन्तम्। वपाऽवन्तम्। विश्वहा। दीदिऽवांसम्॥ ३॥

पदार्थः-(वृतेव) वर्त्तन्ते यस्मिँस्तेन मार्गेण **(यन्तम्)** गच्छतम् **(बहुभिः)** **(वसव्यैः)** वसुषु पृथिव्यादिषु भवैः पदार्थैः **(त्वे)** त्वयि **(रयिम्)** धनम् **(जागृवांसः)** जागरूकाः **(अनु)** **(ग्मन्)** अनुगच्छन्ति **(रुशन्तम्)** हिंसन्तम् **(अग्निम्)** विद्यादिरूपम् **(दर्शतम्)** दर्शकं द्रष्टव्यं वा **(बृहन्तम्)** महान्तम् **(वपावन्तम्)** बहूनि वपनाधिकरणानि विद्यन्ते यस्मिँस्तम् **(विश्वहा)** सर्वाणि दिनानि **(दीदिवांसम्)** प्रकाशमानं प्रकाशयन्तं वा॥ ३॥

अन्वयः-हे विद्वन्! जागृवांसो विद्वांसो यं बहुभिर्वसव्यैः सह वृतेव यन्तं रुशन्तं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसमग्निमनु ग्मन् यस्त्वे रयिं दधाति तं त्वमनुविद्धि॥ ३॥

भावार्थः-ये सततं सर्वत्र गच्छन्तं सर्वस्य प्रकाशकं सर्वेषु पदार्थेषु व्यापकं विच्छेदकं विद्युदादिस्वरूपं पावकं विदित्वा कार्य्येष्वनुनयन्ति ते पुष्कलां श्रियं लभन्ते॥ ३॥

पदार्थः-हे विद्वन्! **(जागृवांसः)** विद्या से जागृत विद्वान् जन जिसको **(बहुभिः)** बहुत **(वसव्यैः)** पृथिवी आदिकों में हुए पदार्थों के साथ **(वृतेव)** वर्त्तमान होते हैं जिसमें उस मार्ग से **(यन्तम्)** जाते **(रुशन्तम्)** हिंसा करते **(दर्शतम्)** देखने वाले वा देखने योग्य **(बृहन्तम्)** बड़े **(वपावन्तम्)** बहुत कार्य्यों के संस्कार जमाने के अधिकरण विद्यमान जिसमें उस **(विश्वहा)** सब दिनों वा सब दिनों की **(दीदिवांसम्)** प्रकाशमान वा प्रकाश करते हुए **(अग्निम्)** अग्नि के सदृश विद्यादिरूप के **(अनु ग्मन्)** पीछे चलते हैं और जो **(त्वे)** आप में **(रयिम्)** धन को धारण करे, उसको आप पश्चात् जानिये॥ ३॥

भावार्थः-जो निरन्तर सर्वत्र चलते हुए सब के प्रकाशक और सम्पूर्ण पदार्थों में व्यापक और पदार्थों के जलाने वाले बिजुली आदि स्वरूप अग्नि को जानकर कार्य्यों में उपयुक्त करते हैं, वे अत्यन्त लक्ष्मी को प्राप्त होते हैं॥ ३॥

पुनर्मनुष्यैः किं विज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम्।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ॥ ४॥

पदम्। देवस्य। नमसा। व्यन्तः। श्रवस्यवः। श्रवः। आपन्। अमृक्तम्। नामानि। चित्। दधिरे। यज्ञियानि। भद्रायाम्। ते। रणयन्त। सम्ऽदृष्टौ॥ ४॥

पदार्थः-(पदम्) प्रापणीयम् **(देवस्य)** सर्वेषु प्रकाशमानस्य **(नमसा)** अन्नादिना वज्रवच्छेदकत्वेन गुणेन वा **(व्यन्तः)** व्याप्तविद्याक्रियाः **(श्रवस्यवः)** आत्मनः श्रवोऽन्नमिच्छवः **(श्रवः)** पृथिव्यन्नादिकम् **(आपन्)** आप्नुवन्ति **(अमृक्तम्)** शुद्धिरहितम् **(नामानि)** जलानि संज्ञा वा **(चित्)** अपि **(दधिरे)** धरेयुः

(यज्ञियानि) यज्ञसिद्धयेऽर्हाणि **(भद्रायाम्)** कल्याणकर्याम् **(ते)** **(रणयन्त)** रमेरन् रमेयुर्वा **(सन्दृष्टौ)** सम्यग्दर्शने॥४॥

अन्वयः-हे विद्वांसो! व्यन्तः श्रवस्यवो भवन्तो नमसा सह वर्त्तमानस्य देवस्याग्नेः पदममृक्तं श्रव आपन्। अस्य देवस्य यज्ञियानि नामानि चिद्दधिरे ते भद्रायां सन्दृष्टौ रणयन्त॥४॥

भावार्थः-ये मनुष्या अग्न्यादिपदार्थस्य गुणकर्म्मस्वभावान् विदित्वा कार्य्याणि साध्नुवन्ति तेऽतुलमानन्दं प्राप्य सुखे रमन्ते॥४॥

पदार्थः-हे विद्वान् जनो! **(व्यन्तः)** व्याप्त हैं विद्या और क्रियायें जिनमें ऐसे और **(श्रवस्यवः)** अपने अन्न की इच्छा करने वाले आप लोग **(नमसा)** अन्न आदि वा वज्रवच्छेदकत्वगुण से **(देवस्य)** सब में प्रकाशमान अग्नि के **(पदम्)** प्राप्त होने योग्य **(अमृक्तम्)** शुद्धि से रहित **(श्रवः)** पृथिवी के अन्न आदि को **(आपन्)** प्राप्त होते हैं तथा इस सब में प्रकाशक के **(यज्ञियानि)** यज्ञ की सिद्धि के लिये योग्य **(नामानि)** जलों वा संज्ञाओं को **(चित्)** निश्चय से **(दधिरे)** धारण करें और **(ते)** वे **(भद्रायाम्)** कल्याणकारक **(सन्दृष्टौ)** उत्तम दर्शन में **(रणयन्त)** रमें वा रमण करावें॥४॥

भावार्थः-जो मनुष्य अग्नि आदि पदार्थों के गुण कर्म्म और स्वभावों को जान कर कार्यों को सिद्ध करते हैं, वे अतुल आनन्द को प्राप्त कर सुख के विषय में रमते हैं॥४॥

पुनर्मनुष्यैः कः प्रयोक्तव्य इत्याह॥

फिर मनुष्यों को क्या प्रयोग करना चाहिये, इस विषय को कहते हैं॥

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां रायः उभयासो जनानाम्।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमित्मानुषाणाम्॥५॥३५॥

त्वाम्। वर्धन्ति। क्षितयः। पृथिव्याम्। त्वाम्। रायः। उभयासः। जनानाम्। त्वम्। त्राता। तरणे। चेत्यः। भूः। पिता। माता। सदम्। इत्। मानुषाणाम्॥५॥

पदार्थः-**(त्वाम्)** तम् **(वर्धन्ति)** वर्धयन्ति। अत्र व्यत्ययेन परस्मैपदम् **(क्षितयः)** निवासन्तो मनुष्याः **(पृथिव्याम्)** भूमौ **(त्वाम्)** तम् **(रायः)** धनानि **(उभयासः)** **(जनानाम्)** **(त्वम्)** सः। अत्र सर्वत्र व्यत्ययः। **(त्राता)** रक्षकः **(तरणे)** दुःखादुद्धरणे **(चेत्यः)** चितिषु भवः **(भूः)** **(पिता)** पितेव पालकः **(माता)** मातेव मान्यप्रदः **(सदम्)** सीदन्ति यस्मिंस्तत् **(इत्)** एव **(मानुषाणाम्)** मनुष्याणाम्॥५॥

अन्वयः-हे मनुष्या! जनानामुभयासो विद्वांसोऽविद्वांसश्च क्षितयः पृथिव्यां रायस्त्वाञ्च वर्धन्ति त्वां सम्प्रयोजयन्ति त्वं तरणे त्राता चेत्यः पितेव मातेव मानुषाणां पालको भूः सदं व्याप्तस्तमित् सर्वे विजानन्तु॥५॥

भावार्थः-ये पृथिव्यादिषु स्थितं विद्युदग्निं सम्प्रयुञ्जते ते सर्वेषां सुखप्रदा जायन्ते॥५॥

पदार्थः-हे मनुष्यो! **(जनानाम्)** मनुष्यों के **(उभयासः)** दोनों प्रकार के अर्थात् विद्वान् और अविद्वान् जन और **(क्षितयः)** निवास वाले मनुष्य **(पृथिव्याम्)** भूमि में **(रायः)** धनों की और **(त्वाम्)** आपकी **(वर्धन्ति)** वृद्धि करते हैं और **(त्वाम्)** उन आपको उत्तम प्रकार प्रयुक्त करते हैं **(त्वम्)** वह आप

(तरणे) दुःखों से उद्धार के निमित्त **(त्राता)** रक्षा करने वाले **(चेत्यः)** चयन समूहों में हुए **(पिता)** पिता के सदृश पालनकर्त्ता और **(माता)** माता के सदृश आदर करने वाले **(मानुषाणाम्)** मनुष्यों के पालक **(भूः)** होओ और **(सदम्)** स्थिर होते हैं, जिसमें उस गृह को व्याप्त हुए उन आपको **(इत्)** ही सब लोग विशेष करके जानें॥५॥

भावार्थः-जो पृथिवी आदिकों में वर्त्तमान बिजुलीरूप अग्नि का उत्तम प्रकार प्रयोग करते हैं, वे सब के सुख देने वाले होते हैं॥५॥

पुनर्मनुष्यैः कः सेवनीय इत्याह॥

फिर मनुष्यों को किसकी सेवा करनी चाहिये, इस विषय को कहते हैं॥

सपर्येण्य स प्रियो विक्ष्वग्निर्होता मन्द्रो नि षसादा यजीयान्।
तं त्वा वयं दम आ दीदिवांसमुपज्रुबाधो नमसा सदेम॥६॥

सपर्येण्यः। सः। प्रियः। विक्षु। अग्निः। होता। मन्द्रः। नि। ससादा। यजीयान्। तम्। त्वा। वयम्। दमे। आ। दीदिऽवांसम्। उप। ज्रुऽबाधः। नमसा। सदेम॥६॥

पदार्थः-**(सपर्य्येण्यः)** सेवितुमर्हः **(सः)** **(प्रियः)** कमनीयः **(विक्षु)** प्रजासु **(अग्निः)** पावकः **(होता)** आदाता **(मन्द्रः)** आनन्दप्रदः **(नि)** नितराम् **(ससादा)** निषीदति। अत्र **संहितायामिति** दीर्घः। **(यजीयान्)** अतिशयेन यष्टा **(तम्)** **(त्वा)** त्वाम् **(वयम्)** **(दमे)** गृहे **(आ)** **(दीदिवांसम्)** प्रकाशमानम् **(उप)** **(ज्रुबाधः)** जानुनी बाधमानाः **(नमसा)** सत्कारेणान्नादिना वा **(सदेम)** सीदेम॥६॥

अन्वयः-हे विद्वन्! यो विक्षु सपर्य्येण्यः प्रियो होता मन्द्रो यजीयानग्निर्नि षसादा येन त्वया स प्रयुज्यते तं दमे दीदिवांसं त्वा ज्रुबाधो वयं नमसोपाऽऽसदेम॥६॥

भावार्थः-येऽग्न्यादिविद्यां जानन्ति ते सुखमाप्नुवन्ति॥६॥

पदार्थः-हे विद्वान्! जो **(विक्षु)** प्रजाओं में **(सपर्य्येण्यः)** सेवा करने योग्य और **(प्रियः)** कामना करने योग्य अर्थात् सुन्दर **(होता)** ग्रहण करने और **(मन्द्रः)** आनन्द देने वाला **(यजीयान्)** अतिशय यज्ञकर्त्ता **(अग्निः)** अग्नि **(नि)** अत्यन्त **(ससादा)** स्थित होता है जिन आप से **(सः)** वह प्रयोग किया जाता है **(तम्)** उस **(दमे)** गृह में **(दीदिवांसम्)** प्रकाशमान **(त्वा)** आपको **(ज्रुबाधः)** जंघाओं को बाधते हुए **(वयम्)** हम लोग **(नमसा)** सत्कार वा अन्न आदि से **(उप, आ, सदेम)** समीप होवें॥६॥

भावार्थः-जो अग्नि आदि की विद्या को जानते हैं, वे सुख को प्राप्त होते हैं॥६॥

पुनर्मनुष्यैः कीदृशैर्भूत्वा किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को कैसे होकर क्या करना चाहिये, इस विषय को कहते हैं॥

तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन॥७॥

तम्। त्वा। वयम्। सुऽध्यः। नव्यम्। अग्ने। सुम्नऽयवः। ईमहे। देवऽयन्तः। त्वम्। विशः। अनयः। दीद्यानः। दिवः। अग्ने। बृहता। रोचनेन॥७॥

पदार्थः-(तम्) (त्वा) त्वाम् **(वयम्) (सुध्यः)** शोभना धियो येषान्ते **(नव्यम्)** नवीनेषु पदार्थेषु भवम् **(अग्ने)** अग्निरिव वर्त्तमान विद्वन् **(सुम्नायवः)** आत्मनस्सुम्नं सुखमिच्छवः **(ईमहे)** व्याप्नुयाम **(देवयन्तः)** कामयमानाः **(त्वम्) (विशः)** प्रजाः **(अनयः)** नयसि **(दीद्यानः)** देदीप्यमानः **(दिवः)** कमनीयान् पदार्थान् **(अग्ने)** पावक इव विद्याप्रकाशित **(बृहता)** महता **(रोचनेन)** प्रकाशेन॥७॥

अन्वयः-हे अग्ने विद्वन्! यथा सुध्यः सुम्नायवो देवयन्तो वयं तं नव्यमग्निमीमहे तथा त्वा प्राप्नुयाम। हे अग्ने! यथा सूर्यो बृहता रोचनेन दीद्यानो दिवो विशोऽनयस्तथा त्वमेतान्नय॥७॥

भावार्थः-अत्र वाचकलुप्तोमालङ्कारः। ये विद्वद्वदग्निमनुचरन्ति ते कृतकार्य्या जायन्ते॥७॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान विद्वन्! जैसे **(सुध्यः)** उत्तम बुद्धियुक्त **(सुम्नायवः)** अपने सुख की इच्छा करने वाले **(देवयन्तः)** कामना करते हुए **(वयम्)** हम लोग **(तम्)** उस **(नव्यम्)** नवीन पदार्थों में हुए अग्नि को **(ईमहे)** व्याप्त होवें, वैसे **(त्वा)** आपको प्राप्त होवें और हे **(अग्ने)** अग्नि के सदृश विद्या से प्रकाशित! जैसे सूर्य्य **(बृहता)** बड़े **(रोचनेन)** प्रकाश से **(दीद्यानः)** प्रकाशित होता हुआ **(दिवः)** कामना करने के योग्य पदार्थों को **(विशः)** प्रजाओं को **(अनयः)** पहुँचाता है, वैसे **(त्वम्)** आप इनको प्राप्त कराइये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् जनों के सदृश अग्नि का अनुचरण करते हैं, वे कृतकार्य्य होते हैं॥७॥

पुनर्मनुष्याः किं प्राप्नुयुरित्याह॥

फिर मनुष्य किस को प्राप्त होवें, इस विषय को कहते हैं॥

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम्।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम्॥८॥

विशाम्। कविम्। विश्पतिम्। शश्वतीनाम्। निऽतोशनम्। वृषभम्। चर्षणीनाम्। प्रेतिऽइषणिम्। इषयन्तम्। पावकम्। राजन्तम्। अग्निम्। यजतम्। रयीणाम्॥८॥

पदार्थः-(विशाम्) प्रजानाम् **(कविम्)** क्रान्तदर्शनम् **(विश्पतिम्)** प्रजापालकम् **(शश्वतीनाम्)** अनादिभूतानाम् **(नितोशनम्)** पदार्थानां हिंसकम् **(वृषभम्)** बलिष्ठम् **(चर्षणीनाम्)** मनुष्याणाम् **(प्रेतीषणिम्)** प्रकर्षेण प्राप्तानामेषितारम् **(इषयन्तम्)** प्रापयन्तम् **(पावकम्) (राजन्तम्) (अग्निम्) (यजतम्)** सङ्गन्तव्यम् **(रयीणाम्)** धनानाम्॥८॥

अन्वयः-हे मनुष्या! यथा वयं शश्वतीनां विशां मध्ये कविं विश्पतिं नितोशनं वृषभं चर्षणीनां रयीणां प्रेतीषणिमिषयन्तं यजतं राजन्तं पावकमग्निं सम्प्रयुञ्ज्महि तथा यूयमपि सम्प्रयुङ्ध्वम्॥८॥

भावार्थः-ये मनुष्या अग्निं शरीरवत्सेवन्ते ते प्रजापतयो जायन्ते॥८॥

पदार्थः-हे मनुष्यो! जैसे हम लोग **(शश्वतीनाम्)** अनादिभूत **(विशाम्)** प्रजाओं के मध्य में **(कविम्)** तेजयुक्त दर्शन जिसका ऐसे **(विश्पतिम्)** प्रजा के पालने वाले **(नितोशनम्)** पदार्थों के नाश करने वाले **(वृषभम्)** बलिष्ठ और **(चर्षणीनाम्)** मनुष्यों और **(रयीणाम्)** धनों और **(प्रेतीषणिम्)** अच्छे प्रकार से प्राप्त हुओं को प्राप्त होने वाले **(इषयन्तम्)** प्राप्त कराते हुए और **(यजतम्)** प्राप्त होने योग्य **(राजन्तम्)** प्रकाशित होते हुए **(पावकम्)** पवित्र करने वाले **(अग्निम्)** अग्नि को उत्तम प्रकार कार्य्यों में युक्त करें, वैसे आप लोग भी संप्रयुक्त करो॥८॥

भावार्थः-जो मनुष्य अग्नि का शरीर के सदृश सेवन करते हैं, वे प्रजा के स्वामी होते हैं॥८॥

पुनः सोऽग्निः कीदृश इत्याह॥

फिर वह अग्नि कैसा है, इस विषय को कहते हैं॥

सो अ॑ग्न ईजे शश॒मे च॒ मर्तो॒ यस्त॒ आन॑ट् स॒मिधा॑ ह॒व्यदा॑तिम्।
य आहु॑तिं॒ परि॒ वेदा॒ नमो॑भि॒र्विश्वेत्स वा॒मा द॑धते॒ त्वोत॑:॥९॥

सः। अ॒ग्ने॒। ई॒जे॒। श॒श॒मे। च॒। मर्तः॑। यः। ते॒। आन॑ट्। स॒म्ऽइधा॑। ह॒व्यऽदा॑तिम्। यः। आऽहु॑तिम्। परि॑। वेद॑। नमः॑ऽभिः। विश्वा॑। इत्। सः। वा॒मा। द॒धते॒। त्वाऽऊ॑तः॥९॥

पदार्थः-**(सः)** **(अग्ने)** पावकवद्वर्त्तमान विद्वन् **(ईजे)** सङ्गच्छ **(शशमे)** प्रशंसामि। **शशमान इति अर्चतिकर्म्मा** (निघं०३.१४) **(च)** **(मर्त्तः)** मनुष्य **(यः)** **(ते)** तव **(आनट्)** व्याप्नोति **(समिधा)** **(हव्यदातिम्)** यो हव्यानि ददाति तम् **(यः)** **(आहुतिम्)** या समन्ताद्धूयते ताम् **(परि)** सर्वतः **(वेदा)** जानाति। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नमोभिः)** अन्नादिभिः **(सत्कारैर्वा)** **(विश्वा)** सर्वाणि **(इत्)** एव **(सः)** **(वामा)** प्रशस्यानि कर्म्माणि **(दधते)** **(त्वोतः)** त्वया रक्षितः॥९॥

अन्वयः-हे अग्ने विद्वन्! ते यो मर्त्तः समिधा हव्यदातिमानट् तद्वेत्ता सोऽहं तमीजे शशमे च। य आहुतिं परि वेदा स त्वोतो नमोभिर्विश्वा वामेद्दधते॥९॥

भावार्थः-हे मनुष्या! यः प्रशंसितकार्य्यकगोऽग्निरसति तं विजानीत॥९॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश वर्त्तमान विद्वन्! **(ते)** आप का **(यः)** जो **(मर्त्तः)** मनुष्य **(समिधा)** समिध् से **(हव्यदातिम्)** हवन करने योग्य वस्तुओं के देने वाले को **(आनट्)** व्याप्त होता है उसको जानने वाला **(सः)** वह मैं उसको **(ईजे)** उत्तम प्रकार प्राप्त होता और **(शशमे)** प्रशंसा करता हूँ **(च)** और **(यः)** जो **(आहुतिम्)** आहुति को अर्थात् जो चारों ओर होमी जाती उस सामग्री को **(परि)** सब प्रकार से **(वेदा)** जानता है **(सः)** वह **(त्वोतः)** आप से रक्षित हुआ **(नमोभिः)** अन्न आदिकों वा सत्कारों से **(विश्वा)** सम्पूर्ण **(वामा)** प्रशंसा करने योग्य कर्म्मों को **(इत्)** ही **(दधते)** धारण करता है॥९॥

भावार्थः-हे मनुष्यो! जो प्रशंसित कार्य्यों का करने वाला अग्नि है, उसको विशेष कर जानिये॥९॥

ये पदार्थविद्याप्राप्तये प्रयतन्ते ते भाग्यशालिनो जायन्त इत्याह॥

जो पदार्थविद्याप्राप्ति के लिये प्रयत्न करते हैं, वे भाग्यशाली होते हैं,
इस विषय को कहते हैं॥

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम॥१०॥

अस्मै। ऊँ इति। ते। महि। महे। विधेम। नमः।भिः। अग्ने। सम्।इधा। उत। हव्यैः। वेदी। सूनो इति। सहसः। गीः।भिः। उक्थैः। आ। ते। भद्रायाम्। सुमतौ। यतेम॥१०॥

पदार्थः-(**अस्मै**) (उ) (**ते**) तुभ्यम् (**महि**) महत् (**महे**) महते (**विधेम**) सत्कुर्य्याम (**नमोभिः**) अन्नादिभिः (**अग्ने**) विद्वन् (**समिधा**) इन्धनादिनेव विद्यया (**उत**) अपि (**हव्यैः**) अत्तुमर्हैः (**वेदी**) विदन्ति सुखानि यस्यां सा (**सूनो**) अपत्य (**सहसः**) बलवतः (**गीर्भिः**) वाग्भिः (**उक्थैः**) कीर्त्तनीयैर्वचनैः (**आ**) (**ते**) तव (**भद्रायाम्**) (**सुमतौ**) उत्तमायां प्रज्ञायाम् (**यतेम**) प्रयत्नं कुर्य्याम॥१०॥

अन्वयः-हे सहसः सूनोऽग्ने! यथा समिधा नमोभिर्विश्वा वामा ये दधते य आहुतिं दृष्ट्वा परिवेद। या वेदी भवति तां गीर्भिरुक्थैर्हव्यैरस्मै महे ते मह्याविधेम ताभिर्वाग्भिस्सहिता यूयमु उत वयं च ते भद्रायां सुमतौ यतेम॥१०॥

भावार्थः-हे मनुष्या! युष्माभिरस्मै प्राणिसमुदायाय सामग्र्या यज्ञो विधेयः॥१०॥

पदार्थः-हे (**सहसः**) बलवान् के (**सूनो**) पुत्र (**अग्ने**) विद्वज्जन! जैसे (**समिधा**) ईंधन आदि के सदृश विद्या और (**नमोभिः**) अन्न आदिकों से संपूर्ण स्त्रियों को जो धारण करते हैं और जो आहुति को देखकर जानता है और जो (**वेदी**) जानते हैं सुखों को जिसमें वह होती है, उसका (**गीर्भिः**) वाणियों और (**उक्थैः**) कीर्त्तन करने योग्य वचनों से और (**हव्यैः**) भोजन करने योग्य पदार्थों से (**अस्मै**) इस (**महे**) बड़े (**ते**) आपके लिये (**महि**) बहुत (**आ**) सब प्रकार से (**विधेम**) सत्कार करें, उन वाणियों के सहित आप लोग (उ) भी (**उत**) और हम भी (**ते**) आपकी (**भद्रायाम्**) कल्याणकारिणी (**सुमतौ**) उत्तम बुद्धि में (**यतेम**) प्रयत्न करें॥१०॥

भावार्थः-हे मनुष्यो! आप लोग इस प्राणियों के समुदाय के लिये सामग्री से यज्ञ करें॥१०॥

पुनर्मनुष्याः किं प्राप्नुयुरित्याह॥

फिर मनुष्य किस को प्राप्त होवें, इस विषय को कहते हैं॥

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यैस्तरुत्रः।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि॥११॥

आ। यः। ततन्थ। रोदसी इति। वि। भासा। श्रवःऽभिः। च। श्रवस्यः। तरुत्रः। बृहत्ऽभिः। वाजैः। स्थविरेभिः। अस्मे इति। रेवत्ऽभिः। अग्ने। विऽतरम्। वि। भाहि॥ ११॥

पदार्थः-(आ) (**यः**) (**ततन्थ**) विस्तृणोति (**रोदसी**) द्यावापृथिव्यौ (**वि**) (**भासा**) दीप्त्या (**श्रवोभिः**) श्रवणाद्यैरन्नादिभिर्वा (**च**) (**श्रवस्यः**) श्रोतुमर्हः (**तरुत्रः**) दुःखात्तारकः (**बृहद्भिः**) महद्भिः (**वाजैः**) स-ामैः सह वर्त्तमानैः (**स्थविरेभिः**) स्थूलैः (**अस्मै**) (**रेवद्भिः**) बहुधनयुक्तैः (**अग्ने**) विद्वन् (**वितरम्**) विविधतया तरन्ति येन तम् (**वि**) (**भाहि**)॥ ११॥

अन्वयः-हे अग्ने विद्वन्! योऽग्निर्भासा श्रवोभिश्च श्रवस्यस्तरुत्रो बृहद्भिः स्थविरेभिर्वाजै रेवद्भिः सह रोदसी व्या ततन्थाऽस्मे तं वितरं वि भाहि॥ ११॥

भावार्थः-यदि विद्वांसः सुविद्ययाऽग्नेः प्रभावं विजानीयुस्तर्हि विस्मयं प्राप्य चकिता जायेरन्॥ ११॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**यः**) जो अग्नि (**भासा**) प्रकाश से और (**श्रवोभिः**) श्रवण आदि वा अन्न आदि से (**च**) भी (**श्रवस्यः**) सुनने के योग्य और (**तरुत्रः**) दुःख से पार करने वाला (**बृहद्भिः**) बड़े और (**स्थविरेभिः**) स्थूल अर्थात् भारी (**वाजैः**) संग्रामों के सहित वर्त्तमान (**रेवद्भिः**) बहुत धनों से युक्त जनों के साथ (**रोदसी**) द्यावापृथिवी को (**वि, आ, ततन्थ**) विशेष कर सब प्रकार विस्तार करता है तथा (**अस्मे**) हम लोगों के लिये उस (**वितरम्**) वितर अर्थात् विविध प्रकार से तरते हैं जिससे उसको (**वि, भाहि**) उत्तम प्रकार प्रकाशित कीजिये॥ ११॥

भावार्थः-जो विद्वान् जन उत्तम विद्या से अग्नि के प्रभाव को जानें तो विस्मय को प्राप्त होकर चकित होवें॥ ११॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वज्जन क्या करें, इस विषय को कहते हैं॥

नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु॥ १२॥

नृऽवत्। वसो इति। सदम्। इत्। धेहि। अस्मे इति। भूरि। तोकाय। तनयाय। पश्वः। पूर्वीः। इषः। बृहतीः। आरेऽअघाः। अस्मे इति। भद्रा। सौश्रवसानि। सन्तु॥ १२॥

पदार्थः-(नृवत्) मनुष्यवत् (**वसो**) यो वसति तत्सम्बुद्धौ (**सदम्**) सीदन्ति यस्मिंस्तत् (**इत्**) एव (**धेहि**) (**अस्मे**) अस्मासु (**भूरि**) (**तोकाय**) (**तनयाय**) (**पश्वः**) पशून् गवादीन् (**पूर्वीः**) प्राचीनाः (**इषः**) अन्नादिसामग्री (**बृहतीः**) महतीः (**आरेअघाः**) आरे दूरेऽघानि पापानि यासान्ताः (**अस्मे**) अस्मभ्यम् (**भद्रा**) भद्राणि कल्याणकराणि (**सौश्रवसानि**) सुश्रवसि संस्कृतेऽन्ने भवानि (**सन्तु**)॥ १२॥

अन्वयः-हे वसो विद्वन्! त्वमस्मे तोकाय तनयाय पश्वस्सदं बृहतीः पूर्वीरारेऽघा इषश्च भूरि धेहि। यतोऽस्मे इन्नृवद्भद्रा सौश्रवसानि सन्तु॥ १२॥

भावार्थः-अत्रोपमालङ्कारः। त एव विद्वांसो ये मातापितृवज्जगज्जनेभ्यो हितानि वस्तूनि ददति॥१२॥

पदार्थः-हे **(वसो)** वसने वाले विद्वज्जन! आप **(अस्मे)** हम लोगों में **(तोकाय)** कन्या और **(तनयाय)** पुत्र के लिये **(पश्वः)** पशु गौ आदि को तथा **(सदम्)** वर्त्तमान होते हैं जिसमें उस गृह और **(बृहतीः)** बड़ी **(पूर्वीः)** प्राचीन **(आरेअघाः)** दूर पाप जिनके उन **(इषः)** अन्न आदि सामग्रियों को **(भूरि)** बहुत **(धेहि)** धारण करिये जिससे **(अस्मे)** हम लोगों के लिये **(इत्)** ही **(नृवत्)** मनुष्यों के सदृश **(भद्रा)** कल्याणकारक **(सौश्रवसानि)** उत्तम प्रकार संस्कार से युक्त अन्न में हुए पदार्थ **(सन्तु)** हों॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वे ही विद्वान् हैं, जो मातापिताओं के समान सांसारिक जनों के लिये हितकारक वस्तुओं को देते हैं॥१२॥

अथेश्वरवत्प्रजापालनविषयमाह॥

अब ईश्वर के तुल्य प्रजापालन विषय को कहते हैं॥

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम्।

पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे॥ १३॥ ३६॥ ४॥

पुरूणि। अग्ने। पुरुधा। त्वाऽया। वसूनि। राजन्। वसुता। ते। अश्याम्। पुरूणि। हि। त्वे इति। पुरुऽवार। सन्ति। अग्ने। वसु। विधते। राजनि। त्वे इति॥ १३॥ ३६॥ ४॥

पदार्थः-**(पुरूणि)** बहूनि **(अग्ने)** विद्वन् **(पुरुधा)** बहुभिः प्रकारैर्धारितानि **(त्वाया)** त्वया सह **(वसूनि)** द्रव्याणि **(राजन्)** विद्याविनयाभ्यां प्रकाशमान **(वसुता)** वसूनां द्रव्याणां भावः **(ते)** तव **(अश्याम्)** प्राप्नुयाम् **(पुरूणि)** बहूनि **(हि)** खलु **(त्वे)** त्वयि **(पुरुवार)** बहुभिर्वरणीय **(सन्ति)** **(अग्ने)** विद्याविनयाभ्यां प्रकाशमान **(वसु)** द्रव्यम् **(विधते)** विधानं कुर्वते **(राजनि)** **(त्वे)** त्वयि॥१३॥

अन्वयः-हे अग्ने राजन्! ते या वसुता तत्रस्थानि पुरूणि पुरुधा वसूनि त्वाया सहाऽहमश्याम्। हे पुरुवाराग्ने! हि त्वे पुरूणि वसूनि सन्ति राजनि त्वे सति विधते कल्याणं जायते स त्वमस्माकं राजा भव॥१३॥

भावार्थः-त एव राजान उत्तमाः सन्ति ये परमेश्वरवत्पक्षपातं विहाय पुत्रवत्प्रजाः पालयन्ति ता एव प्रजाः श्रेष्ठाः सन्ति या राजेश्वरभक्ता वर्त्तन्त इति॥१३॥

अत्राग्निविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

अस्मिन्नध्याये मित्रावरुणाश्विसवितृमरुदग्न्यादिगुणवर्णनादेतदध्यायोक्तर्थस्य पूर्वाध्यायार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृताऽऽर्य्याभाषाविभूषित ऋग्वेदभाष्ये चतुर्थाष्टके चतुर्थोऽध्यायः षट्त्रिंशो वर्गश्च षष्ठे मण्डले प्रथमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(राजन्)** विद्या और विनय से प्रकाशमान **(ते)** आपके समीप जो **(वसुता)** द्रव्यों का होना उसमें वर्त्तमान **(पुरूणि)** बहुत और **(पुरुधा)** बहुत प्रकारों से धारण किये हुए

(वसूनि) द्रव्यों को **(त्वाया)** आपके साथ मैं **(अश्याम्)** प्राप्त होऊँ और हे **(पुरुवार)** बहुतों से स्वीकार करने योग्य **(अग्ने)** विद्या और विनय से प्रकाशमान **(हि)** निश्चय से **(त्वे)** आप में **(पुरूणि)** बहुत द्रव्य **(सन्ति)** हैं **(राजनि)** राजा **(त्वे)** आपके होने पर **(वसु)** द्रव्य का **(विधते)** विधान करने वाले के लिये कल्याण होता है, वह आप हमारे राजा हूजिये॥१३॥

भावार्थः-वे ही राजा उत्तम हैं जो परमेश्वर के सदृश पक्षपात का त्याग करके पुत्र के सदृश प्रजाओं का पालन करते हैं और वे ही प्रजाजन श्रेष्ठ होते हैं जो राजा और ईश्वर के भक्त हैं॥१३॥

इस सूक्त में अग्नि, विद्वान् और ईश्वर के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

इस अध्याय में मित्रावरुणा, अश्वि सूर्य, वायु और अग्नि आदि के गुणवर्णन करने से इस अध्याय में कहे हुए अर्थ की इससे पूर्व अध्याय के अर्थ के साथ संगति जाननी चाहिये॥

यह श्रीमत्परहंसपरिव्राजकाचार्य श्रीमद्विरजानन्द सरस्वती स्वामी जी के शिष्य श्रीमद्दयानन्द सरस्वती स्वामिविरचित संस्कृतार्य्यभाषाविभूषित ऋग्वेदभाष्य में चतुर्थ अष्टक में चतुर्थ अध्याय, छत्तीसवां वर्ग और छठे मण्डल में प्रथम सूक्त भी समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चमोऽध्यायः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथैकादशर्चस्य द्वितीयस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ९ भुरिगुष्णिक्। २ स्वराडुष्णिक्। ७ निचृदुष्णिक्। ८ उष्णिक् छन्दः। ऋषभः स्वरः। ३, ४ अनुष्टुप्। ५, ६, १० निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। ११ भुरिगतिजगती छन्दः। निषादः स्वरः॥

अथाग्निः कीदृशोऽस्तीत्याह॥

अभ पञ्चमाध्याय का आरम्भ है और छठे मण्डल में ग्यारह ऋचावाले दूसरे सूक्त का आरम्भ किया जाता है, उसके प्रथम मन्त्र में अग्नि कैसा होता है, इस विषय को कहते हैं॥

त्वं हि क्षैत॑वद्यशोऽग्ने॑ मि॒त्रो न पत्य॑से।
त्वं वि॑चर्षणे॒ श्रवो॒ वसो॑ पुष्टिं॒ न पु॑ष्यसि॥ १॥

त्वम्। हि। क्षैत॑ऽवत्। यशः॑। अग्ने॑। मि॒त्रः। न। पत्य॑से। त्वम्। वि॒ऽच॒र्ष॒णे॒। श्रवः॑। वसो॒ इति॑। पु॒ष्टिम्। न। पु॒ष्य॒सि॒॥ १॥

पदार्थः-(**त्वम्**) (**हि**) यतः (**क्षैतवत्**) क्षितौ भववत् (**यशः**) धनमन्नं कीर्तिं वा (**अग्ने**) पावक इव वर्त्तमान (**मित्रः**) सखा (**न**) इव (**पत्यसे**) पतिरिवाचरसि (**त्वम्**) (**विचर्षणे**) प्रकाशक (**श्रवः**) अन्नं श्रवणं वा (**वसो**) वासयितः (**पुष्टिम्**) धातुसाम्याद् बलादियोगम् (**न**) इव (**पुष्यसि**)॥१॥

अन्वयः-हे विचर्षणेऽग्ने! हि त्वं क्षैतवद्यशो मित्रो न पत्यसे। हे वसो! त्वं पुष्टिं न श्रवः पुष्यसि तस्मात्सुखी भवसि॥१॥

भावार्थः-अत्रोपमालङ्कारः। यथा पार्थिवानि शुष्कानि वस्तूनि नीरसानि भवन्ति तथाऽविद्वांसोऽधार्मिका निष्ठुरा जायन्ते॥१॥

पदार्थः-हे (**विचर्षणे**) प्रकाश करते वाले (**अग्ने**) अग्नि के सदृश वर्त्तमान! (**हि**) जिस कारण (**त्वम्**) आप (**क्षैतवत्**) पृथिवी में हुए के समान (**यशः**) धन अन्न वा कीर्त्ति को (**मित्रः**) मित्र (**न**) जैसे वैसे (**पत्यसे**) पति के सदृश आचरण करते हो ओर हे (**वसो**) वसाने वाले! (**त्वम्**) आप (**पुष्टिम्**) धातु के साम्य से बल आदि के योग को (**न**) जैसे वैसे (**श्रवः**) अन्न वा श्रवण का (**पुष्यसि**) पालन करते हो, इससे सुखी होते हो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पृथिवी में उत्पन्न हुए शुष्क वस्तु रस से रहित होते हैं, वैसे विद्यारहित और धर्म्मरहित जन दयारहित और कोमलतारहित होते हैं॥२॥

विद्वद्भिरत्र कथं वर्त्तिततव्यमित्याह॥

विद्वानों को इस संसार में कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते।

त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः॥ २॥

त्वाम्। हि। स्म। चर्षणयः। यज्ञेभिः। गीःऽभिः। ईळते। त्वाम्। वाजी। याति। अवृकः। रजःऽतूः। विश्वऽचर्षणिः॥ २॥

पदार्थः-(त्वाम्) (**हि**) यतः (**स्मा**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**चर्षणयः**) मनुष्याः (**यज्ञेभिः**) अध्ययनाध्यापनादिभिः (**गीर्भिः**) वाग्भिः (**ईळते**) स्तुवन्ति (**त्वाम्**) (**वाजी**) वेगवान् (**याति**) (**अवृकः**) चोरादिसङ्गरहितः (**रजस्तूः**) यो रजांसि लोकान् वर्धयति (**विश्वचर्षणिः**) विश्वे चर्षणयो मननशीला मनुष्या यस्य सः॥ २॥

अन्वयः-हे विद्वन्! ये चर्षणयो यज्ञेभिर्गीर्भिस्त्वां हीळते स्मा रजस्तूर्विश्वचर्षणिरवृको वाजी त्वां याति॥ २॥

भावार्थः-ये मनुष्या यं विद्वांसं सेवन्ते स तान् विद्यां प्रदद्यात्॥ २॥

पदार्थः-हे विद्वन्! जो (**चर्षणयः**) मनुष्य (**यज्ञेभिः**) अध्ययन-अध्यापन आदिकों और (**गीर्भिः**) वाणियों से (**त्वाम्**) आपकी (**हि**) निश्चित (**ईळते**) स्तुति करते (**स्मा**) ही हैं (**रजस्तूः**) लोकों का बढ़ाने वाला (**विश्वचर्षणिः**) सम्पूर्ण विचारशील मनुष्य जिसके वह (**अवृकः**) चोर आदिकों के संग से रहित (**वाजी**) वेग से युक्त हुआ (**त्वाम्**) आपको (**याति**) प्राप्त होता है॥ २॥

भावार्थः-जो मनुष्य जिस विद्वान् का सेवन करते हैं, वह उनके लिये विद्या देवे॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते।

यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे॥ ३॥

सऽजोषः। त्वा। दिवः। नरः। यज्ञस्य। केतुम्। इन्धते। यत्। ह। स्यः। मानुषः। जनः। सुम्नऽयुः। जुह्वे। अध्वरे॥ ३॥

पदार्थः-(सजोषः) समानप्रीतिसेविनः (**त्वा**) त्वाम् (**दिवः**) सत्यं कामयमानाः (**नरः**) नेतारः (**यज्ञस्य**) न्यायव्यवहारस्य (**केतुम्**) प्रज्ञाम् (**इन्धते**) प्रकाशन्ते (**यत्**) यतः (**ह**) खलु (**स्यः**) सः (**मानुषः**) मननशीलः (**जनः**) प्रसिद्धः (**सुम्नायुः**) सुखं कामुकः (**जुह्वे**) स्पर्द्धे (**अध्वरे**) अहिंसामये॥ ३॥

अन्वयः-हे विद्वन्! सजोषो दिवो नरो यज्ञस्य केतुं त्वा त्वामिन्धते यद्ध स्यो मानुषः सुम्नायुर्जनस्त्वमध्वरे वर्त्तसे तमहं जुह्वे॥३॥

भावार्थः-तस्यैव सङ्गो मनुष्यैः कर्त्तव्यो यं धार्म्मिका विद्वांसः प्रशंसेयुः॥३॥

पदार्थः-हे विद्वान्! **(सजोषः)** तुल्य प्रीति के सेवन करने वाले **(दिवः)** सत्य की कामना करते हुए **(नरः)** नायक जन **(यज्ञस्य)** न्यायव्यवहार की **(केतुम्)** बुद्धि को और **(त्वा)** आपको **(इन्धते)** प्रकाशित करते हैं और **(यत्)** जिससे **(ह)** निश्चय करके **(स्यः)** वह **(मानुषः)** विचारशील और **(सुम्नायुः)** सुख की कामना करने वाले **(जनः)** प्रसिद्ध मनुष्य आप **(अध्वरे)** अहिंसारूप में वर्त्तमान होते हो, उसकी मैं **(जुह्वे)** स्पर्द्धा करता हूँ॥३॥

भावार्थः-उसी का संग मनुष्यों को करना चाहिये, जिसकी धार्मिक विद्वान् जन प्रशंसा करें॥३॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते।

ऊती ष बृहतो दिवो द्विषो अंहो न तरति॥४॥

ऋधत्। यः। ते। सुऽदानवे। धिया। मर्तः। शशमते। ऊती। सः। बृहतः। दिवः। द्विषः। अंहः। न। तरति॥४॥

पदार्थः-**(ऋधत्)** ऋध्नुयात् समर्द्धयेत् **(यः)** **(ते)** तुभ्यम् **(सुदानवे)** उत्तमदानकर्त्रे **(धिया)** प्रज्ञया **(मर्त्तः)** मनुष्यः **(शशमते)** शाम्येत् **(ऊती)** ऊत्या रक्षादिकर्म्मणा **(सः)** **(बृहतः)** **(दिवः)** कामयमानान् **(द्विषः)** शत्रोः **(अंहः)** अपराधः **(न)** इव **(तरति)**॥४॥

अन्वयः-हे विद्वन्! यो मर्त्तो धिया सुदानवे त ऋधच्छशमते स ऊती बृहतो दिवो द्विषोंऽहो न तरति॥४॥

भावार्थः-ये मनुष्या धर्म्मात्मभ्यः सुखप्रदाः स्युस्ते यथा धार्मिकाः पापं त्यजन्ति तथैव शत्रूनुल्लङ्घयन्ति॥४॥

पदार्थः-हे विद्वन्! **(यः)** जो **(मर्त्तः)** मनुष्य **(धिया)** बुद्धि से **(सुदानवे)** उत्तम दान करने वाले **(ते)** आपके लिये **(ऋधत्)** उत्तम प्रकार ऋद्धि करे तथा **(शशमते)** शान्त हो **(सः)** वह **(ऊती)** रक्षण आदि कर्म्म से **(बृहतः)** बड़े **(दिवः)** कामना करते हुओं के **(द्विषः)** शत्रु का **(अंहः)** अपराध **(न)** जैसे वैसे **(तरति)** पार होता है॥४॥

भावार्थः-जो मनुष्य धर्मात्मा जनों के लिये सुख देने वाले होवें, वे जैसे धार्मिक जन पाप का नाश करते हैं, वैसे ही शत्रुओं का उल्लघंन करते हैं॥४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत्।

वयावन्तं स पुष्यति क्षयमग्ने शतायुषम्॥५॥१॥

सम्ऽइधा। यः। ते। आऽहुतिम्। निऽशितिम्। मर्त्यः। नशत्। वयाऽवन्तम्। सः। पुष्यति। क्षयम्। अग्ने। शतऽआयुषम्॥५॥१॥

पदार्थः-(समिधा) प्रदीपिकया **(यः)** **(ते)** तुभ्यम् **(आहुतिम्)** **(निशितिम्)** तीक्ष्णाम् **(मर्त्यः)** मनुष्यः **(नशत्)** व्याप्नोति। **नशदिति व्याप्तिकर्म्मा।** (निघं०२.१८) **(वयावन्तम्)** बहुपदार्थयुक्तम् **(सः)** **(पुष्यति)** **(क्षयम्)** गृहम् **(अग्ने)** विद्वन् **(शतायुषम्)** शतवर्षजीविनम्॥५॥

अन्वयः-हे अग्ने! यो मर्त्यः समिधा ते निशितिमाहुतिं नशत् स वयावन्तं क्षयं शतायुषं प्राप्य पुष्यति॥५॥

भावार्थः-ये मनुष्या विद्वत्सेवया शुभगुणकर्मस्वभावान् प्राप्नुवन्ति ते वृद्धसुखा चिरञ्जीविनः सुन्दरगृहाश्च भूत्वा शरीरात्मभ्यां पुष्टा जायन्ते॥५॥

पदार्थः-हे **(अग्ने)** विद्वन् जन! **(यः)** जो **(मर्त्यः)** मनुष्य **(समिधा)** अग्नि को प्रदीप्त करने वाले वस्तु से **(ते)** आपके लिये **(निशितिम्)** तीक्ष्ण अतितीव्र **(आहुतिम्)** आहुति को **(नशत्)** व्याप्त होता है **(सः)** वह **(वयावन्तम्)** बहुत पदार्थों से युक्त **(क्षयम्)** और गृह **(शतायुषम्)** सौ वर्ष पर्य्यन्त जीवनेवाले को प्राप्त होकर **(पुष्यति)** पुष्ट होता है॥५॥

भावार्थः-जो मनुष्य विद्वानों की सेवा से उत्तम गुण, कर्म्म और स्वभाववालों को प्राप्त होते हैं, वे सुख की वृद्धि और अतिकाल पर्य्यन्त जीवन से युक्त और अच्छे गृहों वाले होकर शरीर और आत्मा से पुष्ट होते हैं॥५॥

पुनः सोऽग्निः कीदृश इत्याह॥

फिर वह अग्नि कैसा है, इस विषय को कहते हैं॥

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः।

सूरो न हि द्युता त्वं कृपा पावक रोचसे॥६॥

त्वेषः। ते। धूमः। ऋण्वति। दिवि। सन्। शुक्रः। आऽततः। सूरः। न। हि। द्युता। त्वम्। कृपा। पावक। रोचसे॥६॥

पदार्थः-(त्वेषः) प्रदीप्तः **(ते)** तस्य। अत्र पुरुषव्यत्ययः। **(धूमः)** **(ऋण्वति)** गच्छति। **ऋण्वतीति गतिकर्मा**। (निघं०२.४) **(दिवि)** प्रकाशे **(सन्)** वर्त्तमानः **(शुक्रः)** शुद्धिकरः **(आततः)** व्याप्तः **(सूरः)** सूर्यः **(न)** इव **(हि)** एव **(द्युता)** प्रकाशेन **(त्वम्)** **(कृपा)** कृपया **(पावक)** पावक इव वर्त्तमान **(रोचसे)** प्रकाशसे॥६॥

अन्वयः-हे मनुष्या! यथा ते सूरो न त्वेषो धूमः शुक्र आततः सन् दिव्यृण्वति तथा हि त्वं द्युता कृपा पावक इव वर्त्तमानः सन् रोचसे॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे विद्वांसो! यस्याग्नेर्धूमेन वाय्वादयः पदार्थाः शुद्धा जायन्ते यत् सूर्य्यादेः कारणमस्ति तद्विद्यां प्राप्य शुभगुणेषु भवन्तः प्रकाशन्ताम्॥६॥

पदार्थः-हे मनुष्यो! जैसे **(ते)** उसका **(सूरः)** सूर्य्य **(न)** जैसे वैसे **(त्वेषः)** प्रदीप्त **(धूमः)** धूम **(शुक्रः)** शुद्धि का करने वाला **(आततः)** व्याप्त **(सन्)** होता हुआ **(दिवि)** प्रकाश में **(ऋण्वति)** चलता है, वैसे **(हि)** ही **(त्वम्)** आप **(द्युता)** प्रकाश और **(कृपा)** कृपा से **(पावक)** अग्नि के सदृश वर्त्तमान हुए **(रोचसे)** प्रकाशित होते हो॥६॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे विद्वान् जनो! जिस अग्नि के धूम से वायु आदि पदार्थ शुद्ध होते हैं और जो सूर्य्य आदि का कारण है, उसकी विद्या को प्राप्त होकर उत्तम गुणों में आप लोग प्रकाशित हूजिये॥६॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अधा॒ हि वि॒क्ष्वीड्योऽसि॑ प्रि॒यो नो॒ अति॑थिः।

र॒ण्वः पु॒रीव॒ जूर्यः॑ सू॒नुर्न त्र॑य॒याय्यः॑॥७॥

अध॑। हि। वि॒क्षु। ईड्यः॑। असि॑। प्रि॒यः। नः॒। अति॑थिः। र॒ण्वः। पु॒रिऽइ॑व। जूर्यः॑। सू॒नुः। न। त्र॒य॒याय्यः॑॥७॥

पदार्थः-**(अधा)** अथ। अथ **निपातस्य चे**ति दीर्घः। **(हि)** यतः **(विक्षु)** प्रजासु **(ईड्यः)** स्तोतुमर्हः **(असि)** **(प्रियः)** कमनीयः **(नः)** अस्माकम् **(अतिथिः)** अनियततिथिः **(रण्वः)** रममाणः **(पुरीव)** यथा रमणीया नगरी **(जूर्य्यः)** जीर्णः **(सूनुः)** अपत्यम् **(न)** इव **(त्रययाय्यः)** यस्त्रयं रक्षकं याति प्राप्नोति सः॥७॥

अन्वयः-हे विद्वन्! हि त्वं विक्ष्वीड्यो नः प्रियः पुरीव रण्वो जूर्य्यस्त्रययाय्यः सूनुर्नाऽतिथिरसि तस्मादधा सत्कर्त्तव्योऽसि॥७॥

भावार्थः-अत्रोपमालङ्कारः। यथाऽतिथयः प्रजाजनैः सत्कर्त्तव्याः सन्ति यथात्र मातापितृभ्यां सन्तानाः पालनीया भवन्ति तथाहि धार्मिका विद्वांसोऽर्चनीया भवन्ति॥७॥

पदार्थः-हे विद्वन्! **(हि)** जिस कारण से आप **(विक्षु)** प्रजाओं में **(ईड्यः)** स्तुति करने के योग्य और **(नः)** हम लोगों के **(प्रियः)** कामना करने योग्य **(पुरीव)** रमणीयपुरी के समान **(रण्वः)** रमण करता हुआ **(जूर्य्यः)** जीर्ण **(त्रययाय्यः)** रक्षक को प्राप्त होने वाला **(सूनुः)** सन्तान **(न)** जैसे वैसे **(अतिथिः)** नहीं नियत तिथि जिसकी ऐसे **(असि)** हो, तिससे **(अधा)** इसके अनन्तर सत्कार करने योग्य हो॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे अतिथिजन प्रजाजनों से सत्कार करने योग्य होते और जैसे यहाँ माता और पिता से सन्तान पालन करने योग्य होते हैं, वैसे ही धार्म्मिक विद्वान् जन सत्कार करने योग्य होते हैं॥७॥

पुनर्विदुषा किं कर्त्तव्यमित्याह॥

फिर विद्वान् को क्या करना चाहिये विषय को कहते हैं॥

क्रत्वा॒ हि द्रोणे॑ अ॒ज्यसेऽग्ने॑ वा॒जी न कृत्व्यः॑।
परि॑ज्मेव स्व॒धा गयोऽत्यो॒ न ह्वार्यः शिशुः॑॥८॥

क्रत्वा॑। हि। द्रोणे॑। अ॒ज्यसे॑। अग्ने॑। वा॒जी। न। कृत्व्यः॑। परिज्मा॑ऽइव। स्व॒धा। गयः॑। अत्यः॑। न। ह्वार्यः॑। शिशुः॑॥८॥

पदार्थः-(**क्रत्वा**) प्रज्ञया कर्म्मणा वा (**हि**) यतः (**द्रोणे**) गन्तव्ये मार्गे (**अज्यसे**) गम्यसे (**अग्ने**) पावक इव वर्त्तमान (**वाजी**) वेगवान् (**न**) इव (**कृत्व्यः**) करणीयं कर्म्म। **कृत्वीति कर्मनाम।** (निघं०२.१) (**परिज्मेव**) यः परितः सर्वतो गच्छति स वायुः (**स्वधा**) अन्नम् (**गयः**) गृहम् (**अत्यः**) अतति व्याप्नोत्यध्वानम् (**न**) इव (**ह्वार्य्यः**) कुटिलं मार्गं गन्तुं योग्यः (**शिशुः**) बालकः॥८॥

अन्वयः-हे अग्ने! त्वं हि क्रत्वा वाजी न कृत्व्यः परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुर्द्रोणेऽज्यसे तस्मात् कृतकृत्योऽसि॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसः सर्वाज्ञजनेभ्यो बुद्धिं प्रदाय सन्मार्गं नयन्ति मातापितरौ बालमिव शिक्षयन्ति त अन्नादिना सत्कर्त्तव्या भवन्ति॥८॥

पदार्थः-हे (**अग्ने**) अग्नि के सदृश वर्त्तमान प्रतापी जन आप (**हि**) जिस कारण (**क्रत्वा**) बुद्धि वा कर्म से (**वाजी**) वेग से युक्त (**न**) जैसे वैसे (**कृत्व्यः**) करने योग्य कर्म्म को (**परिज्मेव**) सब ओर जाने वाला वह वायु (**स्वधा**) अन्न (**गयः**) गृह और (**अत्यः**) मार्ग को व्याप्त होने वाला (**न**) जैसे वैसे (**ह्वार्य्यः**) कुटिल मार्ग में जाने योग्य (**शिशुः**) बालक (**द्रोणे**) जाने योग्य मार्ग में (**अज्यसे**) प्राप्त किये जाते हो, इस कारण से कृतकृत्य हो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन सम्पूर्ण अज्ञ जनों के लिये बुद्धि देकर श्रेष्ठ मार्ग में प्राप्त कराते हैं और माता-पिता बालक को जैसे वैसे शिक्षा करते हैं, वे अन्न आदि से सत्कार करने योग्य होते हैं॥८॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

त्वं त्या चि॒दच्यु॒ताग्ने॑ प॒शुर्न यव॑से।
धामा॑ ह॒ यत्ते॑ अजर॒ वना॑ वृ॒श्चन्ति॒ शिक्व॑सः॥९॥

त्वम्। त्या। चित्। अच्युता। अग्ने। पशुः। न। यवसे। धामा। ह। यत्। ते। अजर। वना। वृश्चन्ति। शिक्वसः॥ ९॥

पदार्थः-(**त्वम्**) (**त्या**) तानि (**चित्**) अपि (**अच्युता**) नाशरहितानि (**अग्ने**) विद्वन् (**पशुः**) गवादिः (**न**) इव (**यवसे**) बुसाद्याय (**धामा**) धामानि। अत्र **संहितायामिति** दीर्घः। (**ह**) किल (**यत्**) यस्य (**ते**) तव (**अजर**) जरारोगरहित (**वना**) वनानि जङ्गलानि (**वृश्चन्ति**) छिन्दन्ति (**शिक्वसः**) प्रकाशमानस्य॥ ९॥

अन्वयः-हे अजराऽग्ने! यद्यस्य शिक्वसस्ते गुणा वना किरणा इव दोषान् वृश्चन्ति त्या चिदच्युता धामा यवसे पशुर्न त्वं ह प्राप्नुहि॥ ९॥

भावार्थः-अत्रोपमालङ्कारः। यानध्यापकान् गा वत्सा इव प्राप्य दुग्धमिव विद्यां गृह्णन्ति ये विद्वांसोऽग्निरिव दोषान् दहन्ति ते जगत्कल्याणकरा भवन्ति॥ ९॥

पदार्थः-हे (**अजर**) जरारूप रोग से रहित (**अग्ने**) विद्वन्! (**यत्**) जिन (**शिक्वसः**) प्रकाशमान (**ते**) आपके गुण (**वना**) जङ्गलों को जैसे किरण, वैसे दोषों को (**वृश्चन्ति**) काटते हैं और (**त्या, चित्**) उन्हीं (**अच्युता**) नाश से रहित (**धामा**) स्थानों को (**यवसे**) भूसे आदि के लिये (**पशुः**) गौ आदि पशु (**न**) जैसे वैसे (**त्वम्**) आप (**ह**) निश्चय प्राप्त होते हो॥ ९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिन अध्यापकों को गौओं को जैसे बछड़े प्राप्त होकर दुग्ध के सदृश विद्या को ग्रहण करते हैं और जो विद्वान् जन अग्नि के सदृश दोषों का नाश करते हैं, वे संसार के कल्याण करने वाले होते हैं॥ ९॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्तना चाहिये, इस विषय को कहते हैं॥

वेषि ह्यध्वरीयतामग्ने होता दमे विशाम्।
समृधो विश्पते कृणु जुषस्व हव्यमङ्गिरः॥ १०॥

वेषि। हि। अध्वरिऽयताम्। अग्ने। होता। दमे। विशाम्। सम्ऽऋधः। विश्पते। कृणु। जुषस्व। हव्यम्। अङ्गिरः॥ १०॥

पदार्थः-(**वेषि**) व्याप्नोषि (**हि**) यतः (**अध्वरीयताम्**) आत्मनोऽध्वरमिच्छताम् (**अग्ने**) पावक इव विद्वन् (**होता**) दाता (**दमे**) गृहे (**विशाम्**) प्रजानाम् (**समृधः**) सम्यगृद्धिमन्तः (**विश्पते**) प्रजास्वामिन् (**कृणु**) कुरु (**जुषस्व**) (**हव्यम्**) प्रासुं गृहीतुमर्हम् (**अङ्गिरः**) अङ्गानां मध्ये रसरूप॥ १०॥

अन्वयः-हे अङ्गिरोऽग्ने विश्पते विद्वन्! यो हि होता त्वमध्वरीयतां विशां दमे वेषि स त्वं समृधः कृणु हव्यं जुषस्व॥ १०॥

भावार्थः-हे मनुष्या! यथाग्निर्ऋत्विजां प्रजानां च कार्य्याणि साध्नोति तथैव विद्वांसः सर्वेषां प्रयोजनानि निष्पादयन्ति॥ १०॥

पदार्थः-हे **(अङ्गिरः)** अङ्गों के मध्य में रसरूप **(अग्ने)** अग्नि के सदृश तेजस्वी **(विश्पते)** प्रजा के स्वामिन् विद्वन्! जो **(हि)** जिस कारण से **(होता)** दाता आप **(अध्वरीयताम्)** अपने अध्वर की इच्छा करते हुए **(विशाम्)** प्रजाजनों के **(दमे)** गृह में **(वेषि)** व्याप्त होते हो वह आप **(समृधः)** उत्तम प्रकार से ऋद्धिवाले **(कृणु)** करिये और **(हव्यम्)** ग्रहण करने योग्य का **(जुषस्व)** सेवन करिये॥१०॥

भावार्थः-हे मनुष्यो! जैसे अग्नि यज्ञ करने वालों और प्रजाओं के कार्य्यों को सिद्ध करता है, वैसे ही विद्वान् जन सब के प्रयोजनों को सिद्ध करते हैं॥१०॥

अथ विद्वद्विषयमाह॥

अब विद्वानों के विषय को कहते हैं॥

अच्छा॑ नो मित्रमहो देव दे॒वानग्ने॒ वोचः॑ सुम॒तिं रोद॑स्योः। वी॒हि स्व॒स्तिं सु॑क्षि॒तिं दि॒वो नॄन् द्विषो अंहां॑सि दुरि॒ता त॑रेम॒ ता त॑रेम॒ तवा॑वसा तरेम॥११॥२॥

अच्छ॑। न॒ः। मि॒त्र॒ऽम॒ह॒ः। दे॒व॒। दे॒वान्। अग्ने॑। वोचः॑। सु॒ऽम॒तिम्। रोद॑स्योः। वी॒हि। स्व॒स्तिम्। सु॒ऽक्षि॒तिम्। दि॒वः। नॄन्। द्विषः। अंहां॑सि। दुः॒ऽइ॒ता। त॒रे॒म॒। ता। त॒रे॒म॒। तवा॑। अव॑सा। त॒रे॒म॒॥११॥

पदार्थः-**(अच्छा)** सम्यक्। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्माकम् **(मित्रमहः)** मित्रं सखा महः पूजनीयो यस्य तत्सम्बुद्धौ **(देव)** दातः **(देवान्)** विदुषो दातॄन् **(अग्ने)** अग्निरिव वर्त्तमान **(वोचः)** उपदिशेः **(सुमतिम्)** श्रेष्ठां प्रज्ञाम् **(रोदस्योः)** द्यावापृथिव्योर्मध्ये **(वीहि)** व्याप्नुहि **(स्वस्तिम्)** सुखं शान्तिं वा **(सुक्षितिम्)** शोभनां पृथिवीं सुनिवासं वा **(दिवः)** कामयमानान् **(नॄन्)** नायकान् **(द्विषः)** द्वेष्टॄन् **(अंहांसि)** पापानि **(दुरिता)** दुःखस्य प्रापकाणि **(तरेम)** उल्लङ्घयेम **(ता)** तानि **(तरेम)** **(तव)** **(अवसा)** रक्षणाद्येन **(तरेम)**॥११॥

अन्वयः-हे मित्रमहो देवाग्ने! त्वं नो देवान् रोदस्योः सुमतिमच्छा वोचो येन स्वस्तिं सुक्षितिं दिवो नॄन् वीहि द्विषो जहि दुरितांऽहांसि वयं तरेम वा तरेम तवावसा तरेम॥११॥

भावार्थः-मनुष्यैर्विदुषः सङ्गत्य बलं प्राप्य शत्रून् विजित्य दुःखसागरात् तरणीयमिति॥११॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीयं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(मित्रमहः)** मित्र आदर करने योग्य जिसके ऐसे **(देव)** दान करनेवाले **(अग्ने)** अग्नि के सदृश वर्त्तमान जन! आप **(नः)** हम लोगों के **(देवान्)** विद्वान् दाता जनों को **(रोदस्योः)** अन्तरिक्ष और पृथिवी के मध्य में **(सुमतिम्)** श्रेष्ठ बुद्धि का **(अच्छा)** उत्तम प्रकार **(वोचः)** उपदेश करें जिस कारण से **(स्वस्तिम्)** सुख वा शान्ति तथा **(सुक्षितिम्)** उत्तम पृथिवी वा उत्तम निवास को **(दिवः)** कामना करते हुए और **(नॄन्)** नायक जनों को **(वीहि)** व्याप्त हूजिये और **(द्विषः)** द्वेष करने वालों का

त्याग करो तथा **(दुरिता)** दु:ख के प्राप्त कराने वाले **(अंहासि)** पापों के हम लोग **(तरेम)** पार होवें **(ता)** उनको **(तरेम)** फिर भी पार हों और **(तव)** आपके **(अवसा)** रक्षण आदि से **(तरेम)** पार होवें॥११॥

भावार्थ:-मनुष्यों को चाहिये कि विद्वानों को मिल कर और बल को प्राप्त होकर शत्रुओं को जीत कर दु:खरूप सागर से पार हों॥११॥

इस सूक्त में अग्नि और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह द्वितीय सूक्त और द्वितीय वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य तृतीयस्य सूक्तस्य भारद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ३, ४ त्रिष्टुप्। २, ५, ६, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ८ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

अब आठ ऋचावाले तीसरे सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

अग्ने॒ स क्षे॑षदृ॒तपा ऋ॒तेजा॒ उ॒रु ज्योति॑र्नशते देव॒युष्टे॑।
यं त्वं मि॒त्रेण॒ वरु॑णः स॒जोषा॒ देव॒ पासि॒ त्यज॑सा॒ मर्त॑मꣳहः॥ १॥

अग्ने॑। सः। क्षे॒ष॒त्। ऋ॒त॒ऽपाः। ऋ॒ते॒ऽजाः। उ॒रु। ज्योतिः॑। न॒श॒ते॒। दे॒व॒ऽयुः। ते॒। यम्। त्वम्। मि॒त्रेण॑। वरु॑णः। स॒ऽजोषाः॑। देव॑। पासि॑। त्यज॑सा। मर्त॑म्। अꣳहः॑॥ १॥

पदार्थः-(**अग्ने**) विद्युदिव तेजस्विन् विद्वन् (**सः**) (**क्षेषत्**) निवसति (**ऋतपाः**) य ऋतं सत्यं पाति (**ऋतेजाः**) य ऋते सत्ये जायते (**उरु**) बहु (**ज्योतिः**) प्रकाशम् (**नशते**) प्राप्नोति (**देवयुः**) देवान् कामयमानः (**ते**) तव (**यम्**) (**त्वम्**) (**मित्रेण**) सख्या (**वरुणः**) वरः (**सजोषाः**) समानप्रीतिसेवी (**देव**) सुखप्रदातः (**पासि**) रक्षसि (**त्यजसा**) त्यागेन (**मर्त्तम्**) मनुष्यम् (**अंहः**) पापम्। अपराधरूपम्॥ १॥

अन्वयः-हे देवाग्ने! यथर्तपा ऋतेजाः सूर्य उरु ज्योतिर्नशते तथा देवयुस्संस्ते मित्रेण सहितो वरुणः सजोषा वर्त्तते यमंहो मर्त्तं त्वं त्यजसा पासि स पुण्यात्मा सन् क्षेषत्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेश्वरेण सृष्टः सूर्य्यः सर्वं जगत् प्रकाशयति तथैव विदुषां सङ्गेन जाता विद्वांसो सर्वेषामात्मनः प्रकाशयन्ति यथा सूर्य्यस्तमो हत्वा दिनं जनयति तथैव जातविद्यो धार्मिको विद्वानविद्यां हत्वा विद्यां प्रकटयति॥ १॥

पदार्थः-हे (**देव**) सुख के देने वाले (**अग्ने**)बिजुली के सदृश तेजस्वी विद्वान् जैसे (**ऋतपाः**) सत्य का पालन करने और (**ऋतेजाः**) सत्य में प्रकट होने वाला सूर्य्य (**उरु**) बड़े (**ज्योतिः**) प्रकाश को (**नशते**) प्राप्त होता है, वैसे (**देवयुः**) विद्वानों की कामना करता हुआ (**ते**) आपके (**मित्रेण**) मित्र के सहित (**वरुणः**) श्रेष्ठ (**सजोषाः**) तुल्य प्रीति का सेवन करने वाला वर्त्तमान है और (**यम्**) जिस (**अंहः**) अपराधी (**मर्त्तम्**) मनुष्य की (**त्वम्**) आप (**त्यजसा**) त्याग से (**पासि**) रक्षा करते हो (**सः**) वह पुण्यात्मा होता हुआ (**क्षेषत्**) निवास करता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे ईश्वर से रचा गया सूर्य्य सम्पूर्ण जगत् को प्रकाशित करता है वैसे ही विद्वानों के संग से हुए विद्वान् सब के आत्माओं को प्रकाशित करते हैं और जैसे सूर्य्य अन्धकार का नाश करके दिन को प्रकट करता है, वैसे ही विद्या को प्राप्त हुआ धार्मिक विद्वान् अविद्या का नाश करके विद्या को प्रकट करता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ईजे यज्ञेभिः शशमे शमीभिर्ऋधद्वारायाग्नये ददाश।

एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः॥ २॥

ईजे। यज्ञेभिः। शशमे। शमीभिः। ऋधत्ऽवाराय। अग्नये। ददाश। एव। चन। तम्। यशसाम्। अजुष्टिः। न। अंहः। मर्तम्। नशते। न। प्रऽदृप्तिः॥ २॥

पदार्थः-(**ईजे**) सङ्गच्छते (**यज्ञेभिः**) विद्वत्सेवासत्यभाषणादिभिः (**शशमे**) शाम्यति (**शमीभिः**) शुभैः कर्मभिः (**ऋधद्वाराय**) ऋधत्संवर्धकः सत्यो वारस्स्वीकरणीयो व्यवहारो यस्य तस्मै (**अग्नये**) अग्निरिव वर्त्तमानाय सुपात्राय (**ददाश**) ददाति (**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**चन**) अपि (**तम्**) (**यशसाम्**) धनानामन्नानां वा (**अजुष्टिः**) असेवनम् (**न**) इव (**अंहः**) अपराधः पापम् (**मर्त्तम्**) मनुष्यम् (**नशते**) प्राप्नोति (**न**) निषेधे (**प्रदृप्तिः**) प्रकृष्टो मोहः॥ २॥

अन्वयः-यो विद्वान् यज्ञेभिरीजे शमीभिः शशमे। ऋधद्वारायाऽग्नये ददाश तमेवा चन मर्त्तं यशसामजुष्टिर्नांहो न नशते प्रदृप्तिः प्राप्नोति॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये सत्यभाषणादिधर्मानुष्ठाना योगिनोऽभयदातारः सन्ति ते पापं मोहं च त्यक्त्वा विज्ञानं प्राप्य सुखिनो भवन्ति॥ २॥

पदार्थः-जो विद्वान् (**यज्ञेभिः**) विद्वानों की सेवा और सत्य भाषण आदिकों के साथ (**ईजे**) उत्तम प्रकार मिलता है और (**शमीभिः**) शुभ कर्म्मों से (**शशमे**) शान्त होता है (**ऋधद्वाराय**) उत्तम प्रकार बढ़ाने वाला सत्य स्वीकार करने योग्य व्यवहार जिसका उस (**अग्नये**) अग्नि के सदृश वर्त्तमान सुपात्र के लिये (**ददाश**) देता है (**तम्**) उसको (**एवा**) ही (**चन**) निश्चय से (**मर्त्तम्**) मनुष्य को और (**यशसाम्**) धनों वा अन्नों का (**अजुष्टिः**) असेवन (**न**) जैसे वैसे (**अंहः**) अपराध (**न**) नहीं (**नशते**) प्राप्त होता है और (**प्रदृप्तिः**) अत्यन्त मोह प्राप्त होता है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो सत्यभाषण आदि धर्म्म के अनुष्ठान करने वाले योगी अभय देने वाले हैं, वे पाप और मोह का त्याग करके विज्ञान को प्राप्त होकर सुखी होते हैं॥ २॥

पुनर्विदुषां बुद्धिः कीदृशी भवतीत्याह॥

फिर विद्वानों को बुद्धि कैसी होती है, इस विषय को कहते हैं॥

सूरो न यस्य दृशातिरेरेपा भीमा यदेति शुचतस्त आ धीः।

हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः॥ ३॥

सूरः। न। यस्य। दृशाति। अरेपाः। भीमा। यत्। एति। शुचतः। ते। आ। धीः। हेषस्वतः। शुरुधः। न। अयम्। अक्तोः। कुत्र। चित्। रण्वः। वसतिः। वनेऽजाः॥ ३॥

पदार्थः-(सूरः) सूर्य्यः **(न)** इव **(यस्य) (दृशातिः)** दर्शनम् **(अरेपाः)** निष्पापः **(भीमा)** भयङ्करीः **(यत्)** या **(एति)** प्राप्नोति **(शुचतः)** शोकातुरस्य **(ते) (आ) (धीः)** प्रज्ञाः **(हेषस्वतः)** हेषाः प्रसिद्धाः शब्दा विद्यन्ते यस्य तस्य **(शुरुधः)** यः शुरुमन्धकारहिंसकं तेजो दधाति स सूर्य्यः **(न)** इव **(अयम्) (अक्तोः)** रात्रेः **(कुत्रा) (चित्)** अपि **(रण्वः)** रमणीयः **(वसतिः)** यो निवसति सः **(वनेजाः)** किरणसमुदाये जायते सः॥३॥

अन्वयः-हे विद्वन्! यस्य हेषस्वतः शुचतस्ते यद्या दृशतिररेपा भीमा धीस्सूरो न आ एति तस्याऽयं शुरुधोऽक्तोर्निवर्त्तको न कुत्रा चिद्रण्वो वनेजा वसतिर्वत्तते तं वयं सेवेमहि॥३॥

भावार्थः-अत्रोपमालङ्कारः। यस्य विदुषः सूर्य्यस्य ज्योतिरिव वा विद्युदिव प्रज्ञा वर्त्तते स एव समग्रं यावद्योग्यं तावद्विज्ञानं प्राप्नोति॥३॥

पदार्थः-हे विद्वन्! **(यस्य)** जिन **(हेषस्वतः)** प्रसिद्ध शब्द विद्यमान जिसके उन **(शुचतः)** शोक से व्याकुल **(ते)** आपका **(यत्)** जो **(दृशातिः)** दर्शन और **(अरेपाः)** पाप से रहित और **(भीमा)** भयकारक **(धीः)** बुद्धि **(सूरः)** सूर्य्य के **(न)** जैसे वैसे **(आ, एति)** प्राप्त होती है उसका **(अयम्)** यह **(शुरुधः)** अन्धकार को नाश करने वाले तेज का धारण करने वाला सूर्य्य **(अक्तोः)** रात्रि का दूर करने वाला **(न)** जैसे वैसे **(कुत्रा) (चित्)** कहीं भी **(रण्वः)** सुन्दर **(वनेजाः)** किरणों के समुदाय में उत्पन्न होने और **(वसतिः)** निवास करने वाला वर्त्तमान है, उसकी हम लोग सेवा करें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस विद्वान् की सूर्य्य की ज्योति वा बिजुली के सदृश बुद्धि है, वही सम्पूर्ण, जितना योग्य उतने, विज्ञान को प्राप्त होता है॥३॥

पुनर्विद्वद्भिः कथं वर्त्तितव्यमित्याह॥

फिर विद्वानों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा।

विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत्॥४॥

तिग्मम्। चित्। एम। महि। वर्पः। अस्य। भसत्। अश्वः। न। यमसानः। आसा। विऽजेहमानः। परशुः। न। जिह्वाम्। द्रविः। न। द्रवयति। दारु। धक्षत्॥५॥

पदार्थः-(तिग्मम्) तीव्रम् **(चित्)** अपि **(एम)** प्राप्नुयाम **(महि)** महत् **(वर्पः)** रूपम् **(अस्य)** विदुषः **(भसत्)** भासयति **(अश्वः)** आशुगन्ता तुरङ्गः **(न)** इव **(यमसानः)** नियन्ता सन् **(आसा)** आस्येन। **(विजेहमानः)** शब्दायमानः **(परशुः)** कुठारः **(न)** इव **(जिह्वाम्)** वाणीम् **(द्रविः)** द्रवीभूत्वोच्चारणक्रिया **(न)** इव **(द्रावयति) (दारु)** काष्ठम् **(धक्षत्)**॥४॥

अन्वयः-हे मनुष्या! यस्यास्य तिग्मं महि वर्पो यमसानो विजेहमानोऽश्वो नाऽऽसा भसत् परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् तं चिद्वयमेम॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वन्! यथा सुशिक्षितोऽश्वो जनं मार्गं नयति तथा धर्म्मपथमस्मान्नय। यथा तक्षा परशुना काष्ठं छिनत्ति तथास्माकं दोषाञ्छिन्धि यथा तालुज आर्द्रो रसो जिह्वां प्राप्नोति तथा विद्यारसं प्रापय। यथाग्निः काष्ठानि दहति तथैवास्माकं दुर्व्यसनानि दह॥४॥

पदार्थः-हे मनुष्यो! जिस **(अस्य)** इस विद्वान् के **(तिग्मम्)** तीव्र **(महि)** बड़े **(वर्पः)** रूप का **(यमसानः)** नियम करता और **(विजेहमानः)** शब्द करता हुआ **(अश्वः)** शीघ्र चलने वाला घोड़ा **(न)** जैसे वैसे **(आसा)** मुख से **(भसत्)** प्रकाशित करता है और **(परशुः)** कुठार **(न)** जैसे वैसे **(जिह्वाम्)** वाणी को **(द्रविः)** द्रवी होकर उच्चारण की क्रिया **(न)** जैसे वैसे **(द्रावयति)** गीला करता है और **(दारु)** काष्ठ को **(धक्षत्)** जलावे उसको **(चित्)** निश्चय से हम लोग **(एम)** प्राप्त होवें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वन्! जैसे उत्तम प्रकार से शिक्षित घोड़ा मनुष्य को मार्ग में पहुंचाता है, वैसे धर्ममार्ग को हम लोगों को पहुंचाइये और जैसे बढ़ई परशु से काष्ठ को काटता है, वैसे हम लोगों के दोषों को काटिये और जैसे तालु से उत्पन्न आर्द्ररस जिह्वा को प्राप्त होता है, वैसे विद्या के रस को प्राप्त कराइये तथा जैसे अग्नि काष्ठों को जलाता है, वैसे ही हमारे दुर्व्यसनों को जलाइये॥४॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

स इदस्तेव प्रति धादसिष्यच्छिशीत तेजोऽयसो न धाराम्।
चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः॥५॥३॥

सः। इत्। अस्ताऽइव। प्रति। धात्। असिष्यन्। शिशीत। तेजः। अयसः। न। धाराम्। चित्रऽध्रजतिः। अरतिः। यः। अक्तोः। वेः। न। द्रुऽसद्वा। रघुपत्मऽजंहाः॥५॥३॥

पदार्थः-**(सः)** अग्निः **(इत्)** एव **(अस्तेव)** प्रक्षेप्ता इव **(प्रति)** **(धात्)** दधाति **(असिष्यन्)** बन्धनमप्राप्नुवन् **(शिशीत)** तीक्ष्णीकरोति **(तेजः)** **(अयसः)** सुवर्णस्य **(न)** इव **(धाराम्)** वाचम्। **(चित्रध्रजतिः)** विचित्रगतिः **(अरतिः)** अरमणः **(यः)** **(अक्तोः)** रात्रेः **(वेः)** पक्षिणः **(न)** इव **(द्रुषद्वा)** यो द्रुषद्द्रवीभूतादिषु पदार्थेषु सीदति **(रघुपत्मजंहाः)** यो लघुपतनं जहाति सः॥५॥

अन्वयः-हे मनुष्या! यश्चित्रध्रजतिररतिरक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहा इत्तज्ञायते। सोऽस्तेवासिष्यन्नयसो न तेजो धारां प्रतिधात् स इत्तेजः शिशीत॥५॥

भावार्थः-अत्रोपमालङ्कारः। यदि मनुष्या अग्निं बद्ध्वा तीक्ष्णीकृत्य युद्धादिकार्येषु प्रयुञ्जते तर्हि पक्षिवदाकाशे गन्तुं शक्नुयुः॥५॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(चित्रध्रजतिः)** विचित्र गमन वाला **(अरतिः)** नहीं रमण करता हुआ **(अक्तोः)** रात्रि से और **(वेः)** पक्षी से **(न)** जैसे वैसे **(द्रुषद्वा)** द्रवीभूत आदि पदार्थों में स्थित होने और **(रघुपत्मजंहाः)** लघुपतन का त्याग करने वाला ही प्रकट होता है **(सः)** वह अग्नि **(अस्तेव)** फूँकने

वाले के सदृश (**असिष्यन्**) बन्धन को नहीं प्राप्त होता हुआ (**अयसः**) सुवर्ण के (**न**) जैसे (**तेजः**) तेज को वैसे (**धाराम्**) वाणी को (**प्रति, धात्**) धारण करता है, वह (**इत्**) ही तेज को (**शिशीत**) तीक्ष्ण करता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य अग्नि को बांध और तीक्ष्ण करके युद्ध आदि कार्य्यों में प्रयुक्त करते हैं तो पक्षि के सदृश आकाश में जाने को समर्थ होवें॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः।

नक्तं य ईमरुषो यो दिवा नृनमर्त्यो अरुषो यो दिवा नृन्॥६॥

सः। ईम्। रेभः। न। प्रति। वस्ते। उस्राः। शोचिषा। ररपीति। मित्रऽमहाः। नक्तम्। यः। ईम्। अरुषः। यः। दिवा। नृन्। अमर्त्यः। अरुषः। यः। दिवा। नृन्॥६॥

पदार्थः-(**सः**) (**ईम्**) उदकम् (**रेभः**) पूजनीयो विद्वान् विदुषां सत्कर्त्ता वा। **रेभतीत्यर्चतिकर्म्मा।** (निघं०३.१४) (**न**) इव (**प्रति**) (**वस्ते**) आच्छादयति (**उस्राः**) किरणान् (**शोचिषा**) दीप्त्या सह (**रारपीति**) भृशं शब्दयति (**मित्रमहाः**) यो मित्राणि पूजयति (**नक्तम्**) रात्रिम् (**यः**) (**ईम्**) सर्वतः (**अरुषः**) रक्तगुणविशिष्टः (**यः**) (**दिवा**) कामनया (**नॄन्**) नायकान् (**अमर्त्यः**) स्वरूपेण मृत्युरहितः (**अरुषः**) योऽरुष्षु मर्मसु सीदति सः (**यः**) (**दिवा**) कामनया प्रीत्या सह वा (**नॄन्**) नेतॄन्॥६॥

अन्वयः-योऽरुषो नक्तमीं योऽमर्त्यो दिवा नॄन् योऽरुषो दिवा नॄन् सङ्गच्छते स ईं रेभो न शोचिषोस्राः प्रति वस्ते मित्रमहा रारपीति॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्यो जलमाकृष्य वर्षयित्वा प्राणिभ्यः सुखं ददाति तथा विद्वान् गुणानाकृष्य प्रदाय सर्वान् जिज्ञासून् सुखयति॥६॥

पदार्थः-(**यः**) जो (**अरुषः**) रक्तगुण के सहित वर्त्तमान (**नक्तम्**) रात्रि को (**ईम्**) सब ओर से (**यः**) जो (**अमर्त्यः**) अपने रूप से मृत्युरहित (**दिवा**) कामना से (**नॄन्**) नायक मनुष्यों को (**यः**) जो (**अरुषः**) मर्मस्थलों में वर्त्तमान हुआ (**दिवा**) कामना वा प्रीति के साथ (**नॄन्**) नायक जनों के साथ मिलता है (**सः**) वह (**ईम्**) जल और (**रेभः**) आदर करने योग्य विद्वान् वा विद्वानों का सत्कार करने वाला (**न**) जैसे वैसे (**शोचिषा**) दीप्ति के सहित वर्त्तमान (**उस्राः**) किरणों को (**प्रति, वस्ते**) आच्छादित करता है और (**मित्रमहाः**) मित्रों का आदर करने वाला (**रारपीति**) अत्यन्त शब्द करता है॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य जल का आकर्षण कर और उस जल को वर्षाय के प्राणियों के लिये सुख देता है, वैसे विद्वान् पुरुष गुणों का आकर्षण कर और गुणों को दे करके सब जिज्ञासु जनों को सुख देता है॥६॥

पुनः स कीदृश इत्याह॥

फिर वह कैसा है, इस विषय को कहते हैं॥

दि॒वो न यस्य॑ वि॒धत॒तो नवी॑नो॒द् वृषा॑ रु॒क्ष ओष॑धीषु नूनोत्।

घृणा॒ न यो ध्रज॑सा॒ पत्म॑ना॒ यन्ना रोद॑सी॒ वसु॑ना॒ दं सु॒पत्नी॑॥७॥

दि॒वः। न। यस्य॑। वि॒ध॒तः। नवी॑नोत्। वृषा॑। रु॒क्षः। ओष॑धीषु। नू॒नो॒त्। घृणा॑। न। यः। ध्रज॑सा। पत्म॑ना। यन्। आ। रोद॑सी॒ इति॑। वसु॑ना। दम्। सु॒पत्नी॒ इति॑ सु॒ऽपत्नी॑॥७॥

पदार्थः-(दिवः) प्रकाशस्य **(न)** इव **(यस्य)** वैद्यस्य **(विधतः)** विधानं कुर्वतः **(नवीनोत्)** भृशं स्तुतीभवति **(वृषा)** बलिष्ठः **(रुक्षः)** तेजस्वी **(ओषधीषु) (नूनोत्)** भृशं स्तौति **(घृणा)** दीप्तिः **(न)** इव **(यः) (ध्रजसा)** गमनेन **(पत्मना)** उद्गमनेन **(यन्)** य एति **(आ)** समन्तात् **(रोदसी)** द्यावापृथिव्यौ **(वसुना)** धनेन **(दम्)** यो दमयति तम् **(सुपत्नी)** शोभनः पतिर्ययोस्ते॥७॥

अन्वयः-यस्य दिवो न विधतो वृषा रुक्षो नवीनोदोषधीषु नूनोद्यो घृणा न ध्रजसा पत्मना वसुना सुपत्नी रोदसी यन्दमाऽऽनूनोत् सोऽग्निः सर्वैर्वेदितव्यः॥७॥

भावार्थः-अत्रोपमालङ्कारः। योऽग्निः पृथिव्यादिषु पूर्णो घर्षणादिना प्रकाश्येत स मनुष्याणामनेकविधकार्य्यकारी भवति॥७॥

पदार्थः-(यस्य) जिस वैद्य के **(दिवः)** प्रकाश का **(न)** जैसे वैसे **(विधतः)** विधान करते हुए का **(वृषा)** बलिष्ठ **(रुक्षः)** तेजस्वी जन **(नवीनोत्)** अत्यन्त स्तुति युक्त होता है तथा **(ओषधीषु)** ओषधियों के निमित्त **(नूनोत्)** अत्यन्त स्तुति करता है और **(यः)** जो **(घृणा)** दीप्ति **(न)** जैसे वैसे **(ध्रजसा)** गमन और **(पत्मना)** उद्गमन से **(वसुना)** और धन से **(सुपत्नी)** सुन्दर स्वामी वाली **(रोदसी)** अन्तरिक्ष और पृथिवी को **(यन्)** प्राप्त होने वाला वह **(दम्)** इन्द्रियों के निग्रह करने वाले की **(आ)** सब ओर से अत्यन्त स्तुति करता है, वह अग्नि सब से जानने के योग्य है॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अग्नि पृथिवी आदिकों में पूर्ण हुआ घिसने आदि से प्रकाशित होवे, वह मनुष्यों के अनेक प्रकार के कार्य्यों को करने वाला होता है॥७॥

अथ कीदृशो नरो राजा भवितुं योग्यः स्यादित्याह॥

अब कैसा मनुष्य राजा होने के योग्य है, इस विषय को कहते हैं॥

धायो॑भिर्वा॒ यो युज्ये॑भिर॒र्कैर्वि॒द्युन्न द॑विद्यो॒त्स्वे॒भिः शुष्मै॑:।

शर्धो॑ वा॒ यो म॒रुता॑ं त॒तक्ष॑ ऋ॒भुर्न त्वे॒षो र॑भसा॒नो अ॑द्यौत्॥८॥४॥

धाय॑ःऽभिः। वा॒। यः। युज्ये॑भिः। अ॒र्कैः। वि॒ऽद्युत्। न। द॒वि॒द्यो॒त्। स्वे॒भिः। शुष्मै॑:। शर्धः॑। वा॒। यः। म॒रुता॑म्। त॒तक्ष॑। ऋ॒भुः। न। त्वे॒षः। र॒भ॒सा॒नः। अ॒द्यौ॒त्॥८॥४॥

पदार्थः-(धायोभिः) धारकैर्गुणैर्वा **(वा) (यः) (युज्येभिः)** योक्तव्यैः **(अर्कैः)** अर्चनीयैस्सत्कारहेतुभिः **(विद्युत्) (न)** इव **(दविद्योत्)** प्रकाशते **(स्वेभिः)** स्वकीयैः **(शुष्मैः)** बलैः **(शर्धः)** बलम् **(वा) (यः) (मरुताम्)** मनुष्याणाम् **(ततक्ष)** तीक्ष्णीकरोति **(ऋभुः)** मेधावी **(न)** इव **(त्वेषः)** देदीप्यमानः **(रभसानः)** वेगवान् **(अद्यौत्)** प्रकाशते॥८॥

अन्वयः-हे विद्वन्! यो धायोभिर्युज्येभिः स्वेभिः शुष्मैर्गुणैर्वा विद्युन्न स्वेभिरर्कैर्दविद्योद्यो वा मरुतां शर्ध ऋभुर्न ततक्ष त्वेषो रभसानो नाद्यौत्स एव राजा संस्थापनीयः॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यो विद्युद्वत्प्रतापी बलिष्ठः संयोग-वियोगविद्यायां विचक्षणो मेधावी विद्वान् धर्म्मात्मा जितेन्द्रियः पितृवत्प्रजापालनप्रियः क्षत्रियः स्यात्स एव राजा भवितुमर्हेत्॥८॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! **(यः)** जो **(धायोभिः)** धारण करने वालों वा गुणों से और **(युज्येभिः)** युक्त करने योग्य **(स्वेभिः)** अपने **(शुष्मैः)** बलों और गुणों से **(वा)** वा **(विद्युत्)** बिजुली **(न)** जैसे वैसे **(स्वेभिः)** अपने **(अर्कैः)** सत्कारों योग्य कारणों से **(दविद्योत्)** प्रकाशित होता है **(यः)** जो **(वा)** वा **(मरुताम्)** मनुष्यों के **(शर्धः)** बल को **(ऋभुः)** बुद्धिमान् जन **(न)** जैसे वैसे **(ततक्ष)** तीक्ष्ण करता है तथा **(त्वेषः)** प्रकाशयुक्त और **(रभसानः)** वेगयुक्त जैसे **(अद्यौत्)** प्रकाशित होता है, वही राजा संस्थापित करने योग्य है॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो बिजुली के सदृश प्रतापी, बलवान्, पदार्थों के संयोग और वियोग की विद्या में चतुर, बुद्धिमान्, विद्वान्, धर्मात्मा, इन्द्रियों को जीतने वाला और प्रजापालनप्रिय क्षत्रिय होवे, वही राजा होने के योग्य होवे॥८॥

इस सूक्त में अग्नि और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तीसरा सूक्त और चौथा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य चतुर्थस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १ त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ५, ७ भुरिक्पङ्क्तिः। ६ स्वराट्पङ्क्ति। ३, ४ निचृत्पङ्क्तिः। ८ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब आठ ऋचा वाले चौथे सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

यथा॑ होत॒र्मनु॑षो दे॒वता॑ता य॒ज्ञेभि॑: सूनो सहसो॒ यजा॑सि।
ए॒वा नो॑ अ॒द्य स॑म॒ना स॑मा॒नानु॒शन्न॑ग्न उश॒तो य॑क्षि दे॒वान्॥ १॥

यथा॑। होत॒:। मनु॑ष:। दे॒वऽता॑ता। य॒ज्ञेभि॑:। सू॒नो॒ इति॑। सह॒स॒:। यजा॑सि। ए॒व। न॒:। अ॒द्य। स॒म॒ना। स॒मा॒नान्। उ॒शन्। अ॒ग्ने॒। उ॒श॒त:। य॒क्षि॒। दे॒वान्॥ १॥

पदार्थः-(यथा) (होतः) दातः **(मनुषः)** मनुष्यः **(देवताता)** दिव्ये यज्ञे **(यज्ञेभिः)** सङ्गतैः साधनोपसाधनैः **(सूनो)** अपत्य **(सहसः)** बलिष्ठस्य **(यजासि)** यजेत् **(एवा)** अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्मान् **(अद्य) (समना)** स-ामे। विभक्तेराकारादेशः। **समनमिति स-ामनाम।** (निघं०२.१७) **(समानान्)** सदृशान् **(उशन्)** कामयमान **(अग्ने)** अग्निरिव विद्वन् **(उशतः)** कामयमानान् **(यक्षि)** सङ्गच्छस्व **(देवान्)** विदुषः॥१॥

अन्वयः-हे सहसः सूनो होतरुशन्नग्ने! यथा मनुषो यज्ञेभिर्देवताता यजासि तथा त्वमद्य समानानुशतो नोऽस्मान् देवान् समनैवा यक्षि॥१॥

भावार्थः-अत्रोपमालङ्कारः। यथा विद्वांस ऋत्विजः साङ्गोपाङ्गैः साधनैर्यज्ञमलङ्कुर्वन्ति तथैव शूरवीरैर्बलिष्ठैर्योद्धृभिर्विद्वद्भी राजानः स-ामं विजयेरन्॥१॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** सन्तान और **(होतः)** दान करने वाले **(उशन्)** कामना करते हुए **(अग्ने)** अग्नि के समान विद्वन्! **(यथा)** जैसे **(मनुषः)** मनुष्य आप **(यज्ञेभिः)** मिले हुए साधनों और उपसाधनों से **(देवताता)** श्रेष्ठ यज्ञ में **(यजासि)** यजन करें, वैसे आप **(अद्य)** इस समय **(समानान्)** सदृशों और **(उशतः)** कामना करते हुए **(नः)** हम **(देवान्)** विद्वानों को **(समना)** संग्राम में **(एवा)** ही **(यक्षि)** उत्तम प्रकार मिलिये॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे विद्वान् यज्ञ के करने वाले जन अंग और उपांगों के सहित साधनों से यज्ञ को शोभित करते हैं, वैसे ही शूरवीर बलवान् योद्धा और विद्वान् जनों से राजा संग्राम को जीतें॥१॥

पुनर्जगदीश्वरः कीदृशोऽस्तीत्याह॥

फिर जगदीश्वर कैसा है, इस विषय को कहते हैं॥

स नो॑ वि॒भावा॑ चक्षणि॒र्न वस्तो॑र॒ग्निर्व॒न्दारु॒ वेद्य॒श्चनो॑ धात्।
वि॒श्वायु॒र्यो अ॒मृतो॒ मर्त्ये॑षू॒षर्भु॒द् भूद॑ति॒थिर्जा॒तवे॑दाः॥ २॥

सः। नः। वि॒भाऽवा॑। चक्षणिः। न। वस्तोः। अ॒ग्निः। व॒न्दारु॑। वेद्यः। चनः। धा॒त्। वि॒श्वऽआ॑युः। यः। अ॒मृतः॑। म॒र्त्ये॑षु। उ॒ष॒ःऽभुत्। भूत्। अति॑थिः। जा॒तऽवे॑दाः॥ २॥

पदार्थः-(सः) परमेश्वरः **(नः)** अस्माकम् **(विभावा)** विशेषभानवान् **(चक्षणिः)** प्रकाशकः सूर्यः **(न)** इव **(वस्तोः)** दिनम् **(अग्निः)** पावक इव स्वप्रकाशः **(वन्दारु)** प्रशंसनीयम् **(वेद्यः)** वेदितुं योग्यः **(चनः)** अन्नादिकम् **(धात्)** दधाति **(विश्वायुः)** पूर्णायुः **(यः)** **(अमृतः)** नाशरहितः **(मर्त्येषु)** मरणधर्मेषु **(उषर्भुत्)** य उषसि बुध्यते **(भूत्)** भवेत् **(अतिथिः)** अविद्यमानतिथिः **(जातवेदाः)** यो जातेषु विद्यते जातान् सर्वान् वेत्ति वा॥ २॥

अन्वयः-हे मनुष्या! यो वस्तोश्चक्षणिरग्निर्न नो विभावो वेद्यो विश्वायुर्मर्त्येष्वमृत उषर्भुदतिथिरिव जातवेदा वन्दारु चनो धात्स नो मङ्गलकरो भूत्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यो जगदीश्वरः सूर्य्यवत्स्वप्रकाशो वेदितुं योग्योऽजरामरोऽतिथिरिव सत्कर्त्तव्यः सर्वत्र व्याप्तोऽस्ति तं सर्वे उपासीरन्॥ २॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(वस्तोः)** दिन और **(चक्षणिः)** प्रकाशक सूर्य और **(अग्निः)** अग्नि के सदृश स्वयं प्रकाशयुक्त **(न)** जैसे वैसे **(नः)** हम लोगों के बीच **(विभावा)** अत्यन्त प्रकाश वाला और **(वेद्यः)** जानने योग्य **(विश्वायुः)** पूर्णावस्था वाला **(मर्त्येषु)** मरणधर्मयुक्त मनुष्यों में **(अमृतः)** नाशरहित और **(उषर्भुत्)** प्रातःकाल में जाना जाता है ऐसा और **(अतिथिः)** जिसके प्राप्त होने की कोई तिथि विद्यमान नहीं उसके समान वर्त्तमान और **(अतिथिः)** जिसके प्राप्त होने की कोई तिथि विद्यमान नहीं उसके समान वर्त्तमान और **(जातवेदाः)** उत्पन्न हुओं में विद्यमान वा उत्पन्न हुए पदार्थों को जानने वाला **(वन्दारु)** प्रशंसा करने योग्य **(चनः)** अन्न आदि को **(धात्)** धारण करता है **(सः)** वह परमेश्वर हम लोगों का मङ्गल करने वाला **(भूत्)** हो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो जगदीश्वर सूर्य्य के सदृश अपने से प्रकाशित, जानने योग्य, अजर, अमर, अतिथि के सदृश सत्कार करने योग्य और सर्वत्र व्याप्त है, उसकी सब उपासना करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

द्यावो॒ न यस्य॑ प॒नय॒न्त्यभ्वं॑ भासां॑सि वस्ते॒ सूर्यो॑ न शु॒क्रः।
वि य इ॒नोत्य॒जरः॑ पाव॒कोऽश्नस्य॑ चिच्छिश्नथत्पू॒र्व्याणि॑॥ ३॥

द्याव॑:। न। यस्य॑। प॒नय॑न्ति। अभ्व॑म्। भासां॑सि। व॒स्ते॒। सूर्य॑:। न। शु॒क्र:। वि। य:। इ॒नोति॑। अ॒जर॑:। पा॒व॒क:। अश्न॑स्य। चि॒त्। शि॒श्न॒थ॒त्। पू॒र्व्याणि॑॥ ३॥

पदार्थ:-(द्याव:) कामयमाना विद्वांस: **(न)** इव **(यस्य)** परमेश्वरस्य **(पनयन्ति)** स्तावयन्ति **(अभ्वम्)** महान्तं महिमानम् **(भासांसि)** प्रकाशान् **(वस्ते)** आच्छादयति **(सूर्य्य:)** **(न)** इव **(शुक्र:)** **(वि)** विशेषेण **(य:)** **(इनोति)** प्राप्नोति। **इन्वतिर्व्याप्तिकर्म्मा।** (निघं०२.१८) **(अजर:)** जरादोषरहित: **(पावक:)** पवित्र: पवित्रकर्त्ता वा **(अश्नस्य)** व्यापकस्य **(चित्)** **(शिश्नथत्)** प्रलयं करोति **(पूर्व्याणि)** पूर्वनिर्म्मितानि वस्तूनि॥ ३॥

अन्वय:-हे मनुष्या! द्यावो न जना यस्याऽभ्वं पनयन्ति सूर्य्यो न शुक्र: सन् भासांसि वस्ते योऽजर: पावको वीनोत्यश्नस्य मध्ये पूर्व्याणि चिच्छिश्नथत् स एव जगदीश्वरी ज्ञेयोऽस्ति॥ ३॥

भावार्थ:-हे मनुष्या! य: परमेश्वर: प्रकाशकानां प्रकाशको नित्यानां नित्यश्चेतनानां चेतनोऽस्ति तमेव भजत॥ ३॥

पदार्थ:-हे मनुष्यो! **(द्याव:)** कामना करते हुए विद्वान् जन **(न)** जैसे वैसे जन **(यस्य)** जिस परमेश्वर की **(अभ्वम्)** बड़ी महिमा की **(पनयन्ति)** स्तुति कराते हैं और **(सूर्य्य:)** सूर्य्य **(न)** जैसे वैसे **(शुक्र:)** शुद्ध, पवित्र वा बलिष्ठ जन **(भासांसि)** तेजों को **(वस्ते)** आच्छादित करता है और **(य:)** जो **(अजर:)** जरादोष से रहित **(पावक:)** पवित्र और सब को पवित्र करने वाला **(वि, इनोति)** विशेष व्याप्त होता है और **(अश्नस्य)** व्यापक के मध्य में **(पूर्व्याणि)** पहिले निर्मित वस्तुओं का **(चित्)** भी **(शिश्नथत्)** प्रलय करता है, वही जगदीश्वर जानने योग्य है॥ ३॥

भावार्थ:-हे मनुष्यो! जो परमेश्वर प्रकाशकों का प्रकाशक, नित्यों का नित्य और चेतनों का चेतन है, उसी का भजन करो॥ ३॥

पुनर्मनुष्यै: किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

व॒द्मा हि सू॑नो॒ अस्य॒द्मसद्मा॑ चक्रे॒ अ॒ग्निर्ज॒नुषाज्मान्न॑म्।
स त्वं न॑ ऊर्जसन॒ ऊर्जं॑ धा॒ राजे॑व जेरवृ॒के क्षे॑ष्यन्तः॥ ४॥

व॒द्मा। हि। सू॒नो॒ इति॑। असि॑। अ॒द्म॒ऽसद्मा॑। च॒क्रे॒। अ॒ग्नि:। ज॒नुषा॑। अज्म॑। अन्न॑म्। स:। त्वम्। न॒:। ऊ॒र्ज॒ऽस॒ने॒। ऊर्ज॑म्। धा॒:। राजा॑ऽइव। जे॒:। अ॒वृ॒के। क्षे॒षि॒। अ॒न्तरिति॑॥ ४॥

पदार्थ:-(वद्मा) यो वदति **(हि)** **(सूनो)** यत्सूते सकलं जगत् तत्सम्बुद्धौ **(असि)** **(अद्मसद्मा)** यो अद्येषु भोक्तव्येषु सीदति **(चक्रे)** करोति **(अग्नि:)** पावक: **(जनुषा)** जन्मना **(अज्म)** प्राप्तव्यम् **(अन्नम्)** अत्तव्यम् **(स:)** **(त्वम्)** **(न:)** अस्मान् **(ऊर्जसने)** पराक्रमस्य प्रक्षेपणे **(ऊर्जम्)** पराक्रमम् **(धा:)** धेहि **(राजेव)** प्रकाशमानो नृपइव **(जे:)** जये: **(अवृके)** अचोरे **(क्षेषि)** निवसे: **(अन्त:)** मध्ये॥ ४॥

अन्वयः-हे सूनो! वद्याऽद्यसद्वाग्निर्जनुषाऽज्मान्नं प्राप्तवानसि शुद्धं चक्रे स हि त्वं न ऊर्जसने राजेवोर्जं धा अवृकेऽन्तर्जेः क्षेषि च॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये विद्वांसस्त ईश्वरवत्पक्षपातरहिता धर्म्मे निवसन्तः परमेश्वरं भजन्तु॥४॥

पदार्थः-हे **(सूनो)** सम्पूर्ण जगत् के रचने वाले! **(वद्या)** कहने और **(अद्यसद्वा)** भोग्य पदार्थों में प्राप्त रहने वाले **(अग्निः)** पवित्र **(जनुषा)** जन्म से **(अज्म)** प्राप्त होने और **(अन्नम्)** खाने योग्य पदार्थ को प्राप्त हुए **(असि)** हो और शुद्ध **(चक्रे)** करते हो **(सः)** वह **(हि)** निश्चय से **(त्वम्)** आप **(नः)** हम लोगों के लिये **(ऊर्जसने)** पराक्रम के प्रक्षेपण में **(राजेव)** जैसे प्रकाशमान राजा, वैसे **(ऊर्जम्)** पराक्रम को **(धाः)** धारण करिये **(अवृके)** चोर से रहित के **(अन्तः)** मध्य में **(जेः)** जीतिये और **(क्षेषि)** निवास करिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यो! जो विद्वान् जन हैं, वे ईश्वर के सदृश पक्षपात से रहित और धर्म्ममार्ग में निवास करते हुए परमेश्वर का भजन करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

नितिक्ति॒ यो वा॑र॒णमन्न॒मत्ति॑ वा॒युर्न राष्ट्र्यर्ये॒त्य॒क्तून्।

तु॒र्याम॒ यस्त॑ आ॒दिशा॒मरा॑ती॒रत्यो॒ न ह्रुत॒ः पत॑तः परि॒ह्रुत्॥५॥५॥

निऽतिक्ति। यः। वा॒र॒णम्। अन्न॑म्। अत्ति॑। वा॒युः। न। राष्ट्री॑। अ॒र्ति॑। ए॒ति॒। अ॒क्तून्। तु॒र्याम॑। यः। ते॒। आ॒ऽदिशा॑म्। अरा॑तीः। अत्यः॑। न। ह्रुत॑ः। पत॑तः। प॒रि॒ऽह्रुत्॥५॥५॥

पदार्थः-**(नितिक्ति)** यन्नितरां तीव्रीकृतम् **(यः)** **(वारणम्)** वरणीयम् **(अन्नम्)** अत्तव्यम् **(अत्ति)** भक्षयति **(वायुः)** यो वाति सः **(न)** इव **(राष्ट्री)** ईश्वरः। **राष्ट्रीतीश्वरनाम।** (निघं०२.२२) **(अति)** व्याप्तिम् **(एति)** गच्छति **(अक्तून्)** प्रसिद्धान् पदार्थान् **(तुर्याम)** हिंसेम **(यः)** **(ते)** **(आदिशाम्)** समन्ताद् दीयमानानाम् **(अरातीः)** शत्रून् **(अत्यः)** अतति व्याप्नोत्यध्वानमित्यत्योऽश्वः **(न)** इव **(ह्रुतः)** कुटिलत्वं गतः **(पततः)** पतनशीलस्य **(परिह्रुत्)** यः परितः सर्वतो ह्वरति कुटिलां गतिं गच्छति॥५॥

अन्वयः-हे मनुष्या! यो विद्वान्नितिक्ति वारणमन्नमत्ति वायुर्नाक्तून्नत्येति यः पततस्ते ह्रुतोऽत्यो न परिह्रुदस्ति यस्य वयमादिशामरातीस्तुर्याम राष्ट्रीव न्याये वर्त्तेमहि तं वयं सेवेमहि॥५॥

भावार्थः-हे मनुष्या! यः शुद्धं भोज्यं पेयं च सेवते वायुवद्बलिष्ठ ईश्वरवत्पक्षपातरहितो न्यायाद् वक्रतां गतान् परिहन्ता भवेत्तमेव राजानं मन्यध्वम्॥५॥

पदार्थः-हे मनुष्यो! **(यः)** जो विद्वान् **(नितिक्ति)** अत्यन्त तीक्ष्ण किये **(वारणम्)** स्वीकार करने और **(अन्नम्)** खाने योग्य पदार्थ को **(अत्ति)** भक्षण करता और **(वायुः)** पवन **(न)** जैसे **(अक्तून्)**

प्रसिद्ध पदार्थों को **(अति, एति)** व्याप्त होता है और **(यः)** जो **(पततः)** पतनशील **(ते)** आप का **(ह्रुतः)** कुटिलता को प्राप्त हुआ **(अत्यः)** मार्ग को व्याप्त हुए घोड़े के **(न)** समान **(परिह्रुत्)** सब ओर से कुटिल गमन करने वाला है और जिसके हम लोग **(आदिशाम्)** सब प्रकार से दिये हुओं के **(अरातीः)** शत्रुओं का **(तुर्याम)** नाश करें और **(राष्ट्री)** ईश्वर जैसे वैसे न्याय में वर्त्ताव करें, उसका हम लोग सेवन करें॥५॥

भावार्थः-हे मनुष्यो! जो शुद्ध खाने और पीने योग्य पदार्थ का सेवन करता है, वायु के सदृश बलिष्ठ और ईश्वर के सदृश पक्षपात से रहित होकर न्याय की अपेक्षा से विपरीत दशा को प्राप्त हुओं का मारने वाला हो, उसी को राजा मानो॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ सूर्यो॑ न भा॑नु॒मद्भि॑र॒र्कैर॑ग्ने॑ त॒तन्थ॒ रोद॑सी॒ वि भा॒सा।
चि॒त्रो न॑॑य॒त्परि॒ तमा॑॑स्य॒क्तः शो॒चिषा॒ पत्म॑न्नौशि॒जो न दीय॑न्॥६॥

आ। सूर्यः॑। न। भा॒नु॒मत्ऽभिः॑। अ॒र्कैः। अग्ने॑। त॒तन्थ॑। रोद॑सी॒ इति॑। वि। भा॒सा। चि॒त्रः। न॒य॒त्। परि॑। तमा॑॑सि। अ॒क्तः। शो॒चिषा॑। पत्म॑न्। औ॒शि॒जः। न। दीय॑न्॥६॥

पदार्थः-**(आ)** समन्तात् **(सूर्यः)** सविता **(न)** इव **(भानुमद्भिः)** बहवो भानवः किरणा विद्यन्ते येषु तैः **(अर्कैः)** वज्रवच्छेदकैः। **अर्क इति वज्रनाम।** (निघं०२.२०) **(अग्ने)** पावकवद्वर्त्तमान **(ततन्थ)** तनोसि **(रोदसी)** द्यावापृथिव्यौ **(वि)** **(भासा)** प्रकाशेन **(चित्रः)** नानावर्णोऽद्भुतः **(नयत्)** नयति **(परि)** सर्वतः **(तमांसि)** **(अक्तः)** प्रसिद्धः **(शोचिषा)** प्रकाशेन **(पत्मन्)** पतन्ति गच्छन्ति यस्मिन् मार्गे तस्मिन् **(औशिजः)** कामयमानस्य पुत्रः **(न)** **(दीयन्)** गच्छन्। **दीयतीति गतिकर्म्मा।** (निघ०२.१४)॥६॥

अन्वयः-हे अग्ने! त्वं भानुमद्भिर्कैः सूर्य्यो न भासा वि ततन्थ यथा चित्रस्सविता रोदसी प्रकाशयञ्छोचिषाक्तः संस्तमांसि परि णयत् तथा पत्मन् दीयन्नौशिजौ न सत्ये मार्गे गच्छंस्त्वं धर्ममाततन्थ॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्यः स्वप्रकाशेन सन्निहितान् पदार्थान् प्रकाश्य रात्रिं निवर्त्तयति तथैव शुभान् गुणान् प्रदीप्याज्ञानान्धकारं निवारयत॥६॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्त्तमान आप **(भानुमद्भिः)** बहुत प्रकाश वाले **(अर्कैः)** वज्र के सदृश छेदक किरणों से **(सूर्यः)** सूर्य्य के **(न)** जैसे वैसे **(भासा)** प्रकाश से **(वि, ततन्थ)** अत्यन्त विस्तारयुक्त करते हो और जैसे **(चित्रः)** अनेक प्रकार के वर्णों से अद्भुत सूर्य्य **(रोदसी)** अन्तरिक्ष और पृथिवी को प्रकाशित करता और **(शोचिषा)** प्रकाश से **(अक्तः)** प्रसिद्ध हुआ **(तमांसि)** अन्धकारों को **(परि)** सब ओर से **(नयत्)** दूर करता है, वैसे **(पत्मन्)** चलते हैं जन जिसमें उस मार्ग में **(दीयन्)** चलते हुए **(औशिजः)** कामना करते हुए के पुत्र के **(न)** समान सत्य मार्ग में चलते हुए आप धर्म कर्म का **(आ)** सब प्रकार से विस्तार करें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य अपने प्रकाश से समीप में वर्त्तमान पदार्थों को प्रकाशित करके रात्रि का निवारण करता है, वैसे ही उत्तम गुणों को प्रकाशित करके अज्ञानान्धकार का निवारण करिये॥६॥

अन्नादिदानाः प्रशंसनीयाः स्युरित्याह॥

अन्नादि देने वाले प्रशंसनीय होते हैं, इस विषय को कहते हैं॥

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः॥७॥

त्वाम्। हि। मन्द्रऽतमम्। अर्कऽशोकैः। ववृमहे। महि। नः। श्रोषि। अग्ने। इन्द्रम्। न। त्वा। शवसा। देवता। वायुम्। पृणन्ति। राधसा। नृऽतमाः॥७॥

पदार्थः-(**त्वाम्**) (**हि**) यतः (**मन्द्रतमम्**) अतिशयेनानन्दकरम् (**अर्कशोकैः**) अन्नादीनां शोधनैः (**ववृमहे**) स्वीकुर्म्महे (**महि**) महत् (**नः**) अस्माकम् (**श्रोषि**) शृणोषि (**अग्ने**) पावक इव वर्त्तमान (**इन्द्रम्**) विद्युतम् (**न**) इव (**त्वा**) त्वाम् (**शवसा**) बलेन (**देवता**) जगदीश्वरः (**वायुम्**) प्राणादिकम् (**पृणन्ति**) सुखयन्ति (**राधसा**) धनेन (**नृतमाः**) अतिशयेन नायकाः॥७॥

अन्वयः-हे अग्ने! यस्त्वं नो महि वचः श्रोषि तमर्कशोकैर्मन्द्रतमं त्वां वयं ववृमहे। हे नृतमा! भवन्तो हि यथा देवता सर्वं जगत्पृणाति तथा शवसा राधसा वायुं पृणान्ति तं त्वेन्द्रं न वयं ववृमहे॥७॥

भावार्थः-अत्रोपमालङ्कारः। येऽन्नादिभिः परमानन्दप्रदातारो नरेषूत्तमाः सर्वं जगद्बोधयन्ति ते सत्कर्त्तव्या भवन्ति॥७॥

पदार्थः-हे (**अग्ने**) अग्नि के समान वर्त्तमान जो आप (**नः**) हम लोगों के (**महि**) बड़े वचन को (**श्रोषि**) सुनते हैं उन (**अर्कशोकैः**) अन्न आदिकों के शोधनों से (**मन्द्रतमम्**) अत्यन्त आनन्द देने वाले (**त्वाम्**) आप का हम लोग (**ववृमहे**) स्वीकार करते हैं और हे (**नृतमाः**) अत्यन्त अग्रणी जनो! आप लोग (**हि**) जिस कारण से जैसे (**देवता**) जगदीश्वर सम्पूर्ण जगत् को प्रसन्न करता है, वैसे (**शवसा**) बल और (**राधसा**) धन से (**वायुम्**) प्राण आदि को (**पृणन्ति**) सुखी करते हैं उन (**त्वा**) आपको (**इन्द्रम्**) बिजुली को (**न**) जैसे वैसे हम लोग स्वीकार करते हैं॥७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अन्नादिकों से अत्यन्त आनन्द देनेवाले, मनुष्यों में उत्तम मनुष्य, सम्पूर्ण संसार को उत्तम बुद्धियुक्त करते हैं, वे सत्कार करने के योग्य होते हैं॥७॥

अथ विद्वद्गुणानाह॥

अब विद्वानों के गुणों को कहते हैं॥

नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः॥८॥६॥

नु। नः। अग्ने। अवृकेभिः। स्वस्ति। वेषि। रायः। पथिऽभिः। पर्षि। अंहः। ता। सूरिऽभ्यः। गृणते। रासि। सुम्नम्। मदेम। शतऽहिमाः। सुऽवीराः॥८॥६॥

पदार्थः-(नू) सद्यः **(नः)** अस्मान् **(अग्ने)** विद्वन् **(अवृकेभिः)** अचोरैः सह **(स्वस्ति)** सुखम् **(वेषि)** व्याप्नोषि **(रायः)** धनानि **(पथिभिः)** सुमार्गैः **(पर्षि)** पालयसि **(अंहः)** अपराधम् **(ता)** तानि **(सूरिभ्यः)** विद्वद्भ्यः **(गृणते)** स्तुतिं कुर्वते **(रासि)** ददासि **(सुम्नम्)** सुखम् **(मदेम)** आनन्देम **(शतहिमाः)** यावच्छतं वर्षाणि तावत् **(सुवीराः)** शोभनाश्च ते वीराश्च॥८॥

अन्वयः-हे अग्ने! यस्त्वमवृकेभिर्नः स्वस्ति वेषि पथिभी रायो नू पर्षि सूरिभ्यो गृणते च सुम्नं रासि। अंहो दूरीकरोषि तेन सह ता प्राप्य शतहिमाः सुवीरा वयं मदेम॥८॥

भावार्थः-हे मनुष्याश्चौर्यं चोरसङ्गममन्यायात् पापाचरणं च विहाय सुखं प्राप्य शतायुषो भवेतेति॥८॥

अत्राग्नीश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्थं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** विद्वन्! जो आप **(अवृकेभिः)** चोरों से भिन्न जनों के साथ **(नः)** हम लोगों को **(स्वस्ति)** सुख **(वेषि)** व्याप्त करते हो तथा **(पथिभिः)** उत्तम मार्गों से **(रायः)** धनों को **(नू)** शीघ्र **(पर्षि)** पालन करते हो और **(सूरिभ्यः)** विद्वानों के लिये और **(गृणते)** स्तुति करते हुए के लिये **(सुम्नम्)** सुख को **(रासि)** देते हो तथा **(अंहः)** अपराध को दूर करते हो उन आपके साथ **(ता)** उक्त पदार्थों को प्राप्त होकर **(शतहिमाः)** सौ वर्ष पर्य्यन्त **(सुवीराः)** श्रेष्ठ वीर हम लोग **(मदेम)** आनन्द करें॥८॥

भावार्थः-हे मनुष्यो! चोरी और चोर के संग और अन्याय से पाप के आचरण का त्याग करके सुख को प्राप्त होकर सौ वर्ष युक्त होओ॥८॥

इस सूक्त में अग्नि, ईश्वर और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के साथ संगति जाननी चाहिये॥

यह चौथा सूक्त और छठा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य पञ्चमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ४ त्रिष्टुप्। २, ६, ७ निचृत्त्रिष्टुप्। ५ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैः किं ग्राह्यमित्याह॥

अब सात ऋचा वाले पांचवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या ग्रहण करना चाहिये, इस विषय को कहते हैं॥

हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम्।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक्॥ १॥

हुवे। वः। सूनुम्। सहसः। युवानम्। अद्रोघऽवाचम्। मतिऽभिः। यविष्ठम्। यः। इन्वति। द्रविणानि। प्रऽचेताः। विश्वऽवाराणि। पुरुऽवारः। अध्रुक्॥ १॥

पदार्थः-(हुवे) आदद्मि **(वः)** युष्मभ्यम् **(सूनुम्)** अपत्यम् **(सहसः)** बलस्य **(युवानम्)** प्राप्तयौवनम् **(अद्रोघवाचम्)** अद्रोघा द्रोहरहिता वाग्यस्य तम् **(मतिभिः)** मनुष्यैः प्रज्ञाभिर्वा **(यविष्ठम्)** अतिशयेन युवानम् **(यः)** **(इन्वति)** व्याप्नोति **(द्रविणानि)** द्रव्याणि **(प्रचेताः)** प्रकृष्टं चेतः प्रज्ञा यस्य सः **(विश्ववाराणि)** विश्वैः सर्वैर्वरणीयानि **(पुरुवारः)** बहुभिर्वृतः स्वीकृतः **(अध्रुक्)** यो न द्रुह्यति॥ १॥

अन्वयः-हे मनुष्या! यः प्रचेताः पुरुवारोऽध्रुग् विश्ववाराणि द्रविणानीन्वति तं मतिभिः सह वर्त्तमानं सहसः सूनुं युवानमद्रोघवाचं यविष्ठं वो हुवे॥ १॥

भावार्थः-हे मनुष्या! युष्माभिर्ये पक्षपातरहितवादा द्रोहरहिता बुद्धिमतां सङ्गसेविनो बहुभिर्विद्वद्भिः पूजिता ब्रह्मचर्य्येण पूर्णयुवावस्था विद्वांसः स्युस्तेषामेवोपदेशो ग्रहीतव्यः॥ १॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(प्रचेताः)** उत्तम बुद्धियुक्त **(पुरुवारः)** बहुतों से स्वीकार किया गया **(अध्रुक्)** नहीं द्रोह करने वाला जन **(विश्ववाराणि)** सम्पूर्ण जनों से स्वीकार करने योग्य **(द्रविणानि)** द्रव्यों को **(इन्वति)** व्याप्त होता है उस **(मतिभिः)** मनुष्यों वा बुद्धियों के सहित वर्त्तमान **(सहसः)** बल के **(सूनुम्)** सन्तान **(युवानम्)** युवावस्था को प्राप्त **(अद्रोघवाचम्)** द्रोहरहित वाणी जिसकी ऐसे **(यविष्ठम्)** अतिशय युवावस्था को प्राप्त हुए को **(वः)** आप लोगों के लिये मैं **(हुवे)** ग्रहण करता हूँ॥ १॥

भावार्थः-हे मनुष्यो! आप लोगों को चाहिये कि जो पक्षपात से रहित वादयुक्त, द्रोह से रहित और बुद्धिमानों के संग का सेवन करने वाले और बहुत विद्वानों से आदर किये गये और और ब्रह्मचर्य्य से पूर्ण युवावस्था वाले विद्वान् हों, उन्हीं का उपदेश ग्रहण करें॥ १॥

मनुष्यैः कस्मिन् सति किं प्राप्तव्यमित्याह॥

मनुष्यों को किसके होने पर क्या प्राप्त होना चाहिये, इस विषय को कहते हैं॥

त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके॥ २॥

त्वे इति। वसूनि। पुरुऽअनीक। होतरिति। दोषा। वस्तोः। आ। ईरिरे। यज्ञियासः। क्षामऽइव। विश्वा। भुवनानि। यस्मिन्। सम्। सौभगानि। दधिरे। पावके॥ २॥

पदार्थः-(त्वे) त्वयि रक्षके **(वसूनि)** धनानि **(पुर्वणीक)** पुरूण्यनेकानि सैन्यानि यस्य तत्सम्बुद्धौ **(होतः)** दातः **(दोषा)** रात्रौ **(वस्तोः)** दिने **(आ, ईरिरे)** प्रेरयन्ति **(यज्ञियासः)** यज्ञानुष्ठानं कर्तुं योग्याः **(क्षामेव)** यथा पृथिवी **(विश्वा)** सर्वाणि **(भुवनानि)** लोकजातानि भूताधिकरणानि **(यस्मिन्) (सम्) (सौभगानि)** श्रेष्ठानामैश्वर्य्याणां भावान् **(दधिरे)** धरन्ति **(पावके)** वह्निरिव पवित्रस्तस्मिन्॥ २॥

अन्वयः-हे पुर्वणीक होतर्भूपते! यस्मिन् पावके त्वे रक्षके सति यज्ञियासो दोषा वस्तोः क्षामेव विश्वा भुवनानि वसून्येरिरे सौभगानि सं दधिरे तं वयं सत्कुर्याम॥ २॥

भावार्थः-राजनि रक्षके सत्येव प्रजाजनाः प्रतिदिनं वर्धन्त ऐश्वर्यं लब्ध्वा सुखिनो भवन्ति॥ २॥

पदार्थः-हे **(पुर्वणीक)** अनेक सेनाओं से युक्त **(होतः)** दान करने वाले राजन्! **(यस्मिन्)** जिन **(पावके)** अग्नि के सदृश पवित्र **(त्वे)** आपके रक्षक रहने पर **(यज्ञियासः)** यज्ञ के अनुष्ठान करने के योग्य प्रजाजन **(दोषा)** रात्रि में और **(वस्तोः)** दिन में **(क्षामेव)** जैसे पृथिवी, वैसे **(विश्वा)** सम्पूर्ण **(भुवनानि)** लोकों में प्रकट और पञ्चभूत अधिकरण जिनके उन प्राणियों की और **(वसूनि)** धनों को **(आ, ईरिरे)** प्रेरणा करते और **(सौभगानि)** श्रेष्ठ ऐश्वर्य्यों के भावों को **(सम्, दधिरे)** सम्यक् धारण करते हैं, उनका हम लोग सत्कार करें॥ २॥

भावार्थः-राजा के रक्षक रहने पर ही प्रजाजन प्रतिदिन वृद्धि को प्राप्त होते और ऐश्वर्य्य को प्राप्त होकर सुखयुक्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम्।
अतः इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि॥ ३॥

त्वम्। विक्षु। प्रऽदिवः। सीदः। आसु। क्रत्वा। रथीः। अभवः। वार्याणाम्। अतः। इनोषि। विधते। चिकित्वः। वि। आनुषक्। जातऽवेदः। वसूनि॥ ३॥

पदार्थः-(त्वम्) (विक्षु) प्रजासु **(प्रदिवः)** प्रकृष्टस्य प्रकाशस्य मध्ये **(सीदः)** सीद **(आसु) (क्रत्वा)** प्रज्ञया **(रथीः)** बहुरथवान् **(अभवः)** भवसि **(वार्य्याणाम्)** स्वीकर्त्तुमर्हाणाम् **(अतः)** अस्मात्

(इनोषि) प्रेरयसि **(विधते)** सत्कर्त्रे **(चिकित्वः)** शुद्धबहुप्रज्ञायुक्त **(वि)** **(आनुषक्)** योऽनुसजति **(जातवेदः)** उत्पन्नविज्ञान **(वसूनि)** धनानि॥३॥

अन्वयः-हे चिकित्वो जातवेदो राजन्! यतस्त्वमानुषक् सन् वसूनि विधते वीनोषी। आसु विक्षु क्रत्वा वार्य्याणां रथीरभवोऽतः प्रदिवस्सीदः॥३॥

भावार्थः-स एव राजा भवितुमर्हेद्यो राजविद्यां यथावद्विजानीयात्॥३॥

पदार्थः-हे **(चिकित्वः)** शुद्ध बहुत बुद्धि से युक्त और **(जातवेदः)** उत्पन्न हुआ विज्ञान जिनको ऐसे हे राजन्! जिस कारण **(त्वम्)** आप **(आनुषक्)** संग करने वाले होते हुए **(वसूनि)** धनों की **(विधते)** सत्कार करने वाले के लिये **(वि, इनोषि)** प्रेरणा करते हो और **(आसु)** इन **(विक्षु)** प्रजाओं में **(क्रत्वा)** बुद्धि से **(वार्य्याणाम्)** स्वीकार करने योग्यों के **(रथीः)** बहुत रथों वाले **(अभवः)** होते हो **(अतः)** इस कारण से **(प्रदिवः)** उत्तम प्रकाश के मध्य में **(सीदः)** स्थित होइये॥३॥

भावार्थः-वही राजा होने के योग्य होवे, जो राजविद्या को अच्छे प्रकार जाने॥३॥

पुनर्म्मनुष्यै किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात्।
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान्॥४॥

यः। नः। सनुत्यः। अभिऽदासत्। अग्ने। यः। अन्तरः। मित्रऽमहः। वनुष्यात्। तम्। अजरेभिः। वृषऽभिः। तव। स्वैः। तपः। तपिष्ठ। तपसा। तपस्वान्॥४॥

पदार्थः-**(यः)** **(नः)** अस्मान् **(सनुत्यः)** निर्णितान्तर्हितेषु सिद्धान्तेषु भवः साधुर्वा। **सनुतरिति निर्णितान्तर्हितनाम।** (निघं०३.२५) **(अभिदासत्)** अभिक्षियति **(अग्ने)** विद्वन् **(यः)** **(अन्तरः)** भिन्नः **(मित्रमहः)** महान्ति मित्राणि यस्य तत्सम्बुद्धौ **(वनुष्यात्)** याचेत **(तम्)** **(अजरेभिः)** जरारहितैः **(वृषभिः)** बलिष्ठैर्युवभिः **(तव)** **(स्वैः)** स्वकीयैः **(तपा)** तापय तपस्वी भव वा **(तपिष्ठ)** अतिशयेन तप्त **(तपसा)** ब्रह्मचर्य्यप्राणायामादिकर्म्मणा **(तपस्वान्)** बहुतपोयुक्तः॥४॥

अन्वयः-हे तपिष्ठ मित्रमहोऽग्ने! यः सनुत्यो नोऽभिदासद्योऽन्तरो नो वनुष्यात् तमजरेभिर्वृषभिस्तव स्वैः सह तपा तपसा तपस्वान्॥४॥

भावार्थः-हे मनुष्या! यो युष्मान् याचेत तस्मै सुपात्राय यथाशक्ति देयम्। यश्च पीडयेत्तं पीडयत तपस्विनो भूत्वा धर्म्ममेवाचरत॥४॥

पदार्थः-हे **(तपिष्ठ)** अत्यन्त तप करने वाले और **(मित्रमहः)** बड़े मित्रों से युक्त **(अग्ने)** विद्वन्! **(यः)** जो **(सनुत्यः)** निश्चित अन्तर्हित अर्थात् मध्य के सिद्धान्तों में प्रकट हुआ अथवा श्रेष्ठ **(नः)** हम लोगों का **(अभिदासत्)** चारों ओर से नाश करता है और **(यः)** जो **(अन्तरः)** भिन्न हम लोगों से

(वनुष्यात्) याचना करे **(तम्)** उसको **(अजरेभिः)** वृद्धावस्था से रहित **(वृषभिः)** बलिष्ठ युवा **(तव)** आपके **(स्वैः)** अपने जनों के साथ **(तपा)** तपयुक्त करो वा तपस्वी होओ। और **(तपसा)** ब्रह्मचर्य और प्राणायामादि कर्म्म से **(तपस्वान्)** बहुत तपयुक्त हूजिये॥४॥

भावार्थः-हे मनुष्यो! जो आप लोगों से याचना करे, उस सुपात्र के लिये यथाशक्ति दान करिये और जो पीड़ा देवे उसको पीड़ित करो और तपस्वी होकर धर्म का ही आचरण करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यस्ते॑ य॒ज्ञेन॑ स॒मिधा॒ य उ॒क्थैर्र्के॑भिः सूनो सहसो॒ ददा॑शत्।
स मर्त्ये॑ष्वमृत॒ प्रचे॑ता रा॒या द्यु॒म्नेन॒ श्रव॑सा॒ वि भा॑ति॥५॥

यः। ते॒। य॒ज्ञेन॑। स॒म्ऽइ॒धा॑। यः। उ॒क्थैः। अ॒र्के॑भिः। सू॒नो॒ इति॑। स॒हः॒स॒ः। ददा॑शत्। सः। मर्त्ये॑षु। अ॒मृ॒त॒। प्रऽचे॑ताः। रा॒या। द्यु॒म्नेन॑। श्रव॑सा। वि। भा॒ति॒॥५॥

पदार्थः-**(यः)** **(ते)** तुभ्यम् **(यज्ञेन)** विद्वत्सत्काराख्येन **(समिधा)** सत्यप्रकाशकेनेन्धनेन वा **(यः)** **(उक्थैः)** वक्तुमर्हैः **(अर्केभिः)** अर्चनीयैः **(सूनो)** अपत्य **(सहसः)** बलवतः **(ददशत्)** ददाति **(सः)** **(मर्त्येषु)** मनुष्येषु **(अमृत)** मरणधर्मरहित **(प्रचेताः)** प्रकृष्टं चेतो विज्ञानं यस्य **(राया)** धनेन **(द्युम्नेन)** यशसा **(श्रवसा)** अन्नेन श्रवणेन वा **(वि)** **(भाति)**॥५॥

अन्वयः-हे सहसः सूनोऽमृत! यो यज्ञेन समिधा योऽर्केभिरुक्थैस्ते ददाशत् स मर्त्येषु प्रचेता राया द्युम्नेन श्रवसा वि भातीति विजानीहि॥५॥

भावार्थः-ये प्रशस्तैः कर्म्मभिर्गुणैः सहिता अत्र प्रयतन्ते ते विद्यायशोधनयुक्ता भूत्वा जगति प्रख्यायन्ते॥५॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** पुत्र और **(अमृत)** मरणधर्म्म से रहित! **(यः)** जो **(यज्ञेन)** विद्वानों के सत्कारनामक यज्ञ और **(समिधा)** सत्य के प्रकाशक वा ईंधन से तथा **(यः)** जो **(अर्केभिः)** आदर करने योग्य और **(उक्थैः)** कहने के योग्य पदार्थों से **(ते)** आपके लिये **(ददाशत्)** देता है **(सः)** वह **(मर्त्येषु)** मनुष्यों में **(प्रचेताः)** उत्तम ज्ञानवान् **(राया)** धन **(द्युम्नेन)** यश और **(श्रवसा)** अन्न वा श्रवण से **(वि, भाति)** प्रकाशित होता है, इस प्रकार विशेष करके जानो॥५॥

भावार्थः-जो प्रशंसित कर्म्म और गुणों के सहित जन इस संसार में प्रयत्न करते हैं, वे विद्या, यश और धन से युक्त होकर संसार में प्रसिद्ध होते हैं॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

स तत्कृ॑धीषि॒तस्तूय॑मग्ने॒ स्पृधो॑ बाधस्व॒ सह॑सा॒ सह॑स्वान्।

यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म॥६॥

सः। तत्। कृधि। इषितः। तूयम्। अग्ने। स्पृधः। बाधस्व। सहसा। सहस्वान्। यत्। शस्यसे। द्युऽभिः। अक्तः। वचःऽभिः। तत्। जुषस्व। जरितुः। घोषि। मन्म॥६॥

पदार्थः-(सः) (तत्) (कृधि) कुरु **(इषितः)** प्रेरितः **(तूयम्)** क्षिप्रम्। **तूयमिति क्षिप्रनाम**। (निघं०२.१५) **(अग्ने)** अग्निरिव प्रतापवन् **(स्पृधः)** स्पर्धन्ते यासु ताः स-ामसेनाः **(बाधस्व) (सहसा)** बलेन **(सहस्वान्)** सहनकर्त्ता **(यत्)** यः **(शस्यसे)** स्तूयसे **(द्युभिः)** द्योतमानैर्दिनैः **(अक्तः)** रात्रिः **(वचोभि)** वचनैः **(तत्) (जुषस्व)** सेवस्व **(जरितुः)** स्तावकस्य **(घोषि)** घोषो यस्मिन्नस्ति तत् **(मन्म)** विज्ञानम्॥६॥

अन्वयः-हे अग्ने! यद्यस्त्वं द्युभिरक्त इव शस्यसे स त्वं यद् वचोभिर्जरितुर्घोषि मन्मास्ति तज्जुषस्व। सः सहस्वांस्त्वं सहसा स्पृधो बाधस्व तूयमिषितः संस्तत्कृधि॥६॥

भावार्थः-ये विद्वदीश्वरप्रेरिताः सद्य आलस्यं विहायाऽहर्निशं धर्म्मार्थमोक्षसिद्धये प्रयतन्ते ते योग्या भूत्वा दुःखानि बाधन्ते॥६॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश प्रतापयुक्त **(यत्)** जो आप **(द्युभिः)** प्रकाशमान दिनों से **(अक्तः)** रात्रि जैसे वैसे **(शस्यसे)** स्तुति किये जाते हो वह आप **(वचोभिः)** वचनों से **(जरितुः)** स्तुति करने वाले का **(घोषि)** वाणी जिसमें ऐसा **(मन्म)** विज्ञान है **(तत्)** उसका **(जुषस्व)** सेवन करो **(सः)** वह **(सहस्वान्)** सहन करने वाले आप **(सहसा)** बल से **(स्पृधः)** स्पर्धा करते हैं जिनमें उन सङ्ग्राम सेनाओं की **(बाधस्व)** बाधा करते हो तथा **(तूयम्)** शीघ्र **(इषितः)** प्रेरित हुए **(तत्)** उसको **(कृधि)** करो॥६॥

भावार्थः-जो विद्वान् और ईश्वर से प्रेरित हुए शीघ्र आलस्य का त्याग करके दिन रात्रि धर्म्म, अर्थ और मोक्ष की सिद्धि के लिये प्रयत्न करते हैं, वे योग्य होकर दुःखों को बाधित करते हैं॥६॥

मनुष्यैः कस्य सङ्गेन किं कर्त्तव्यमित्याह॥

मनुष्यों को किसके संग से क्या करना चाहिये, इस विषय को कहते हैं॥

अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम्।

अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते॥७॥७॥

अश्याम। तम्। कामम्। अग्ने। तव। ऊती। अश्याम। रयिम्। रयिऽवः। सुऽवीरम्। अश्याम। वाजम्। अभि। वाजयन्तः। अश्याम। द्युम्नम्। अजरम्। अजरम्। ते॥७॥

पदार्थः-(अश्याम) प्राप्नुयाम **(तम्) (कामम्)** इच्छाम् **(अग्ने)** विद्वन् राजन् **(तव) (ऊती)** रक्षणाद्येन कर्मणा **(अश्याम्)** प्राप्नुयाम **(रयिम्)** श्रियम् **(रयिवः)** बहुधनयुक्त **(सुवीरम्)**

उत्तमवीरप्रापकम् **(अश्याम)** **(वाजम्)** अन्नादिकम् **(अभि)** आभिमुख्ये **(वाजयन्तः)** विज्ञापयन्तः **(अश्याम)** **(द्युम्नम्)** यशो धनं वा **(अजर)** **(अजरम्)** जरारहितम् **(ते)** तव॥७॥

अन्वयः-हे अजर रयिवोऽग्ने! तवोती वयं तं काममश्याम सुवीरं रयिमश्याम वाजयन्तो वयं वाजमभ्यश्याम तेऽजरं द्युम्नमश्याम॥७॥

भावार्थः-मनुष्यैरिदमेषितव्यं वयमाप्तस्योपदेशेनेच्छासिद्धिं पुष्कलं धनं वीरपुरुषानविनाशियशश्चाप्नुयामेति॥७॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चमं सूक्तं सप्तमो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(अजर)** वृद्धावस्थारहित **(रयिवः)** बहुत धन और **(अग्ने)** विद्या से युक्त राजन्! **(तव)** आपके **(ऊती)** रक्षण आदि कर्म्म से हम लोग **(तम्)** उस **(कामम्)** मनोरथ को **(अश्याम)** प्राप्त होवें और **(सुवीरम्)** उत्तम वीरों की प्राप्ति करने वाले **(रयिम्)** धन को **(अश्याम)** प्राप्त होवें तथा **(वाजयन्तः)** जानते हुए हम लोग **(वाजम्)** अन्न आदि को **(अभि)** सन्मुख **(अश्याम)** प्राप्त होवें और **(ते)** आपके **(अजरम्)** जीर्ण होने से रहित **(द्युम्नम्)** यश वा धन को **(अश्याम)** प्राप्त होवें॥७॥

भावार्थः-मनुष्यों को ऐसी इच्छा करनी चाहिये कि हम लोग यथार्थ वक्ता जन के उपदेश से इच्छा की सिद्धि, बहुत धन, वीर पुरुषों और नहीं नष्ट होने वाले यश को प्राप्त होवें॥७॥

इस सूक्त में अग्नि और विद्वान् के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पाँचवां सूक्त और सातवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य षष्ठस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, २, ३, ४, ५, ६ निचृत्त्रिष्टुप्। ७ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनष्यैस्सन्तानः कथमुत्पादनीय इत्याह॥

अब सात ऋचा वाले छठे सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब मनुष्यों को सन्तान किस प्रकार करना चाहिये, इस विषय को कहते हैं॥

प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमवं इच्छमानः।
वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्यं जिगाति॥ १॥

प्र। नव्यसा। सहसः। सूनुम्। अच्छ। यज्ञेन। गातुम्। अवः। इच्छमानः। वृश्चत्ऽवनम्। कृष्णऽयामम्। रुशन्तम्। वीती। होतारम्। दिव्यम्। जिगाति॥ १॥

पदार्थः-(**प्र**) (**नव्यसा**) अतिशयेन नवीनेन (**सहसः**) बलवतः (**सूनुम्**) अपत्यम् (**अच्छा**) सम्यक्। अत्र **संहितायामिति** दीर्घः। (**यज्ञेन**) सङ्गतिमयेन (**गातुम्**) पृथिवीम् (**अवः**) रक्षणम् (**इच्छमानः**) अत्र व्यत्ययेनात्मनेपदम्। (**वृश्चद्वनम्**) वृश्चच्छिन्दद् वनं यस्मिन् (**कृष्णयामम्**) कृष्णा कर्षिता यामा येन तम् (**रुशन्तम्**) हिंसन्तम् (**वीती**) वीत्या व्याप्त्या (**होतारम्**) दातारम् (**दिव्यम्**) शुद्धेषु व्यवहारेषु भवम् (**जिगाति**) गच्छति॥ १॥

अन्वयः-हे मनुष्या! यज्ञेन गातुमव इच्छमानो नव्यसा सहसः सूनुं कृष्णयामं रुशन्तं वृश्चद्वनमिव वीती होतारं दिव्यमच्छा प्र जिगाति॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं ब्रह्मचर्य्येण बलिष्ठा भूत्वा सन्तानान् जनयत यतोऽरोगाणि बलवन्ति सुशीलान्यपत्यानि भूत्वा युष्मान् सुखयेयुः॥ १॥

पदार्थः-हे मनुष्यो! (**यज्ञेन**) संगतिरूप यज्ञ से (**गातुम्**) पृथिवी और (**अवः**) रक्षण की (**इच्छमानः**) इच्छा करता हुआ (**नव्यसा**) अत्यन्त नवीन व्यवहार से (**सहसः**) बलवान् के (**सूनुम्**) सन्तान को और (**कृष्णयामम्**) आकर्षित किया मार्ग जिससे ऐसे (**रुशन्तम्**) हिंसा करते हुए (**वृश्चद्वनम्**) काटता है वन जिसमें उसके समान (**वीती**) व्याप्ति से (**होतारम्**) देने वाले (**दिव्यम्**) शुद्धव्यवहारों में प्रकट हुए को (**अच्छ**) अच्छे प्रकार (**प्र, जिगाति**) प्राप्त होता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग ब्रह्मचर्य्य से बलिष्ठ होकर सन्तानों को उत्पन्न करो जिससे रोगरहित, बलयुक्त और उत्तम स्वभावयुक्त सन्तान होकर आप लोगों को निरन्तर सुखयुक्त करें॥ १॥

पुनः सोऽग्निः कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को कहते हैं॥

स श्वि॑तानस्तन्य॒तू रो॑चन॒स्था अ॒जरे॑भि॒र्नान॑दद्भि॒र्यवि॑ष्ठः।

यः पा॑व॒कः पु॑रु॒तमः॑ पु॒रूणि॑ पृ॒थून्य॒ग्निर॑नु॒याति॒ भर्व॑न्॥ २॥

सः। श्वि॒ता॒नः। त॒न्य॒तुः। रो॒च॒न॒ऽस्थाः। अ॒जरे॑भिः। नान॑दत्ऽभिः। यवि॑ष्ठः। यः। पा॒व॒कः। पु॒रु॒ऽतमः॑। पु॒रूणि॑। पृ॒थूनि॑। अ॒ग्निः। अ॒नु॒ऽयाति॑। भर्व॑न्॥ २॥

पदार्थः-(सः) (**श्वितानः**) शुभ्रवर्णः (**तन्यतुः**) विद्युतः (**रोचनस्थाः**) रोचने दीपने तिष्ठतीति (**अजरेभिः**) जरादिरोगरहितैः (**नानदद्भिः**) भृशं शब्दायमानैः (**यविष्ठः**) अतिशयेन युवावस्थः (**यः**) (**पावकः**) (**पुरुतमः**) (**पुरूणि**) बहूनि (**पृथूनि**) विस्तीर्णानि (**अग्निः**) पावकः (**अनुयाति**) अनुगच्छति (**भर्वन्**) भर्जनं दहनं कुर्वन्॥ २॥

अन्वयः-हे मनुष्या! यो यविष्ठ इव बलिष्ठः पावकः पुरुतमः श्वितानोऽजरेभिर्नानदद्भिस्तन्यतू रोचनस्था अग्निर्भर्वन् सन्पुरूणि पृथून्यनुयाति स युष्माभिः सम्प्रयोक्तव्यः॥ २॥

भावार्थः-हे विद्वन्! यदि साङ्गोपाङ्गतो विद्युद्विद्यां जानीयास्तर्हि बहूनि सुखानि लभस्व॥ २॥

पदार्थः-हे मनुष्यो (**यः**) जो (**यविष्ठः**) अत्यन्त युवावस्था से युक्त जैसे वैसे अत्यन्त बली (**पावकः**) पवित्र और पवित्र करने वाला (**पुरुतमः**) अतीव बहुरूप (**श्वितानः**) शुभ्रवर्ण (**अजरेभिः**) जीर्णपन आदि रोगरहित (**नानदद्भिः**) निरन्तर गर्जनाओं से (**तन्यतुः**) बिजुलीरूप (**रोचनस्थाः**) दीपन में स्थिर (**अग्निः**) अग्नि (**भर्वन्**) दहन करता हुआ (**पुरूणि**) बहुत (**पृथूनि**) विस्तीर्णों के (**अनुयाति**) पश्चात् जाता है (**सः**) वह आप लोगों को उत्तम प्रकार प्रयोग करने योग्य है॥ २॥

भावार्थः-हे विद्वन्! जो आप अंग और उपांग के सहित बिजुली की विद्या को जानें तो बहुत सुख को प्राप्त होवें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वि ते॒ विष्व॒ग्वात॑जूतासो अग्ने॒ भामा॑सः शु॒चे॒ शु॒चय॑श्चरन्ति।

तु॒वि॒म्र॒क्षासो॑ दि॒व्या नव॑ग्वा॒ वना॑ वनन्ति धृ॒ष॒ता रु॒जन्तः॑॥ ३॥

वि। ते॒। विष्व॑क्। वात॑ऽजूतासः। अ॒ग्ने॒। भामा॑सः। शु॒चे॒। शु॒चय॑ः। च॒र॒न्ति॒। तु॒वि॒ऽम्र॒क्षास॑ः। दि॒व्याः। नव॑ऽग्वाः। वना॑। व॒न॒न्ति॒। धृ॒ष॒ता। रु॒जन्तः॑॥ ३॥

पदार्थः-(वि) विशेषेण (**ते**) तव (**विष्वक्**) यो विष्वक् सर्वमञ्चति (**वातजूतासः**) वायुरिव वेगवन्तः (**अग्ने**) विद्वन् (**भामासः**) क्रोधाः (**शुचे**) पवित्र (**शुचयः**) पवित्राः (**चरन्ति**) गच्छन्ति (**तुविम्रक्षासः**) बहूभिः सह सङ्गताः (**दिव्याः**) दिवि भवाः (**नवग्वाः**) नवीनगतयः (**वना**) सम्भजनीयानि (**वनन्ति**) संसेवन्ते (**धृषता**) प्रगल्भतया (**रुजन्तः**) शत्रून् भग्नान् कुर्वन्तः॥ ३॥

अन्वयः-हे शुचेऽग्ने! ते ये विष्वग्वातजूतासो भामासः शुचयो वि चरन्ति तुविम्रक्षासो दिव्या नवग्वा धृषता रुजन्तो वना वनन्ति ते पवित्रा जायन्ते॥३॥

भावार्थः-हे मनुष्या! ये विद्युद्वत्पवित्रा दुष्टेषु क्रोधकराः श्रेष्ठैः सह सङ्गन्तारो नूतनां नूतनां विद्यां प्राप्नुवन्तः स्युस्ते सर्वत्र विचरन्तः सन्तोऽन्यान् विज्ञापयेयुः॥३॥

पदार्थः-हे **(शुचे)** पवित्र **(अग्ने)** विद्वन्! **(ते)** आपके जो **(विष्वक्)** सब का आदर करने वाला और **(वाजूतासः)** वायु के सदृश वेगयुक्त **(भामासः)** क्रोध **(शुचयः)** पवित्र **(वि, चरन्ति)** विशेष करके चलते हैं **(तुविम्राक्षासः)** बहुतों के साथ मिले हुए **(दिव्याः)** अन्तरिक्ष में हुए **(नवग्वाः)** नवीन गमन वाले **(धृषता)** प्रगल्भता से **(रुजन्तः)** शत्रुओं को भग्न करते हुए **(वना)** आदर करने योग्य पदार्थों का **(वनन्ति)** उत्तम प्रकार सेवन करते हैं, वे पवित्र होते हैं॥३॥

भावार्थः-हे मनुष्यो! जो बिजुली के सदृश पवित्र, दुष्टों में क्रोध करने वाले, श्रेष्ठों के साथ मेल करने और नवीन विद्या को प्राप्त होने वाले होवें, वे सब स्थानों में विचरते हुए अन्यों को जनावें॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ये ते॑ शु॒क्रासः॒ शुच॑यः शुचिष्म॒ क्षां वप॑न्ति॒ विषि॑तासो॒ अश्वाः॑।
अध॑ भ्र॒मस्त॑ उर्वि॒या वि भा॑ति या॒तय॑मानो॒ अधि॒ सानु॒ पृश्नेः॑॥४॥

ये। ते॒। शु॒क्रासः॑। शुच॑यः। शु॒चि॒ष्म॒। क्षाम्। वप॑न्ति। विऽसि॑तासः। अश्वाः॑। अध॑। भ्र॒मः। ते॒। उ॒र्वि॒या। वि। भा॒ति॒। या॒तय॑मानः। अधि॑। सानु॑। पृश्नेः॑॥४॥

पदार्थः-**(ये)** **(ते)** तव **(शुक्रासः)** वीर्यवन्तः **(शुचयः)** पवित्राः **(शुचिष्मः)** दीप्तिमन् **(क्षाम्)** भूमिम् **(वपन्ति)** **(विषितासः)** व्याप्ताः **(अश्वाः)** आशुगामिनः **(अध)** **(भ्रमः)** भ्रमणम् **(ते)** तव **(उर्विया)** बहुरूपया दीप्त्या **(वि)** **(भाति)** **(यातयमानः)** दण्डं प्रयच्छन् **(अधि)** **(सानु)** विभागे **(पृश्नेः)** अन्तरिक्षस्य मध्ये॥४॥

अन्वयः-हे शुचिष्मोऽग्ने विद्वन्! ये ते शुक्रासः शुचयो विषितासोऽश्वाः क्षां वपन्ति। अध ते यातयमानो भ्रम उर्विया पृश्नेरधि सानु वि भाति तान् सर्वांस्त्वं सुशिक्षय॥४॥

भावार्थः-मनुष्यैः स्वसमीपे पवित्रा आप्ताः पुरुषाः सदैव रक्षणीयाः, स्वयं वा तत्सङ्गं कुर्य्युः॥४॥

पदार्थः-हे **(शुचिष्मः)** प्रकाशयुक्त विद्वान्! **(ये)** जो **(ते)** आपके **(शुक्रासः)** पराक्रमयुक्त **(शुचयः)** पवित्र **(विषितासः)** व्याप्त **(अश्वाः)** शीघ्र चलने वाले **(क्षाम्)** भूमि को **(वपन्ति)** बोते हैं **(अध)** इसके अनन्तर **(ते)** आप का **(यातयमानः)** दण्ड देता हुआ **(भ्रमः)** भ्रमण **(उर्विया)** बहुत प्रकार के प्रकाश से **(पृश्नेः)** अन्तरिक्ष के मध्य में **(अधि)** ऊपर के **(सानु)** विभाग में **(वि, भाति)** विशेष शोभित होता है, उन सब को आप उत्तम प्रकार शिक्षा दीजिये॥४॥

भावार्थः-मनुष्यों को चाहिये कि अपने समीप में पवित्र और यथार्थ वक्ता पुरुषों की सदा रक्षा करें अथवा आप भी उनका संग करें॥४॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अध॑ जि॒ह्वा पा॑पतीति॒ प्र वृष्णो॑ गोषु॒युधो॒ नाश॑नि॑: सृजा॒ना।
शूर॑स्येव॒ प्रसि॑तिः क्षा॒तिर॒ग्नेर्दु॒र्वर्तु॑र्भी॒मो द॑यते॒ वना॑नि॥५॥

अध॑। जि॒ह्वा। पा॒प॒ती॒ति॒। प्र। वृष्ण॑:। गो॒षु॒ऽयु॒ध॑:। न। अ॒श॑नि॑:। सृ॒जा॒ना:। शूर॑स्यऽइव। प्रऽसि॑ति:। क्षा॒ति:। अ॒ग्ने:। दु॒ऽव॑र्तु॑:। भी॒म:। द॒य॒ते॒। वना॑नि॥५॥

पदार्थः-(**अध**) आनन्तर्य्ये (**जिह्वा**) वाणी (**पापतीति**) प्रकर्षेण पुनः पुनः पतति गच्छन्ति (**प्र**) (**वृष्णः**) बलिष्ठान् (**गोषुयुधः**) ये गोषु युध्यन्ते तान् (**न**) निषेधे (**अशनिः**) विद्युत् (**सृजाना**) निष्पादिता (**शूरस्येव**) (**प्रसितिः**) प्रकृष्टं बन्धनम् (**क्षातिः**) क्षयः (**अग्नेः**) पावकवत्प्रकाशमानस्य (**दुर्वर्त्तुः**) दुःखेन वर्त्तमानयुक्तस्य (**भीमः**) भयङ्करः (**दयते**) हिनस्ति (**वनानि**)॥५॥

अन्वयः-हे विद्वन्! गोषुयुधो वृष्णो जिह्वा न पापतीत्यधाऽशनिरिव सृजाना शूरस्येवाऽग्नेर्दुर्वर्त्तुः प्रसितिः क्षातिर्भीमो वनानि प्र दयते॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्या धर्मात् पतिता न भूत्वा धार्मिकेषु शान्ता दुष्टेष्वग्निरिव भयङ्करा जायन्ते त एव बलवन्तो गण्यन्ते॥५॥

पदार्थः-हे विद्वान्! (**गोषुयुधः**) वाणियों में युद्ध करने वाले (**वृष्णः**) बलिष्ठों को (**जिह्वा**) वाणी (**न**) नहीं (**पापतीति**) अत्यन्त वारवार प्राप्त होती है (**अध**) इसके अनन्तर (**अशनिः**) बिजुली जैसे वैसे (**सृजाना**) उत्पन्न किया गया (**शूरस्येव**) शूरवीर के सदृश (**अग्नेः**) अग्नि के समान प्रकाशमान (**दुर्वर्त्तुः**) दुःख के साथ वर्त्तमान से युक्त का (**प्रसितिः**) प्रकृष्ट बन्धन (**क्षातिः**) और नाश (**भीमः**) भयंकर हुआ (**वनानि**) वनों को (**प्र, दयते**) नष्ट करता है॥५॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य धर्म्म से पतित न होकर धार्म्मिकों में शान्त और दुष्टों में अग्नि के सदृश भयंकर होते हैं, वे ही बलवान् गिने जाते हैं॥५॥

मनुष्यैः किंवत् किं कर्त्तव्यमित्याह॥

मनुष्यों को किस के सदृश क्या करना चाहिये, इस विषय को कहते हैं॥

आ भा॒नुना॒ पार्थि॑वानि॒ ज्रयां॑सि म॒हस्तो॒दस्य॑ धृष॒ता त॑तन्थ।
स बा॑धस्वाप॑ भ॒या सहो॑भि॒: स्पृधो॑ वनु॒ष्यन् व॒नुषो॒ नि जू॑र्व॥६॥

आ। भा॒नुना॑। पार्थि॑वानि। ज्रयां॑सि। म॒ह:। तो॒दस्य॑। धृ॒ष॒ता। त॒त॒न्थ॒। स:। बा॒ध॒स्व॒। अप॑। भ॒या। सह॑:ऽभि:। स्पृ॑ध:। व॒नु॒ष्य॒न्। व॒नुष॑:। नि। जू॒र्व॒॥६॥

पदार्थः-(आ) समन्तात् **(भानुना)** किरणेन **(पार्थिवानि)** पृथिव्यां विदितानि कार्य्याणि पृथिव्यादिकृतानि वा **(ज्रयांसि)** ज्ञातव्यानि। **ज्रयतीति गतिकर्म्मा।** (निघं०२.१४) **(महः)** महांसि **(तोदस्य)** प्रेरणस्य **(धृषता)** प्रगल्भेन **(ततन्थ)** विस्तृणोषि **(सः)** **(बाधस्व)** **(अप)** **(भया)** भयानि **(सहोभिः)** बलैः **(स्पृधः)** स-ामान् **(वनुष्यन्)** सेवयन् **(वनुषः)** सेवनीयान् **(नि)** **(जूर्व)** हिन्धि॥६॥

अन्वयः-हे विद्वन् राजन्! यथा भानुना तोदस्य धृषता महः पार्थिवानि ज्रयांस्याऽततन्थ तथा स त्वं सहोभिर्भयाऽप बाधस्व वनुषो वनुष्यन् स्पृधो नि जूर्व॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये प्रेम्णा सखायो भूत्वा सूर्य्यस्तम इव भयानि निःसार्य्य स-ामाज्नयन्ति ते प्रतिष्ठिता भवन्ति॥६॥

पदार्थः-हे विद्वन् राजन्! जैसे आप **(भानुना)** किरण से **(तोदस्य)** प्रेरण के **(धृषता)** ढीठ से **(महः)** बड़े **(पार्थिवानि)** पृथिवी में विदित कार्य्य वा पृथिवी आदि से कृत **(ज्रयांसि)** जानने योग्यों का **(आ)** चारों ओर से **(ततन्थ)** विस्तार करते हैं, वैसे **(सः)** वह आप **(सहोभिः)** बलों से **(भया)** भयों की **(अप, बाधस्व)** अतीव बाधा करो और **(वनुषः)** सेवन करने योग्यों का **(वनुष्यन्)** सेवन कराते हुए **(स्पृधः)** संग्रामों का **(नि, जूर्व)** नाश करिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो प्रेम से मित्र होकर जैसे सूर्य्य अन्धकार को, वैसे भयों को दूर करके संग्रामों को जीतते हैं, वे प्रतिष्ठित होते हैं॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम्।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व॥७॥८॥

सः। चित्र। चित्रम्। चितयन्तम्। अस्मे इति। चित्रक्षत्र। चित्रऽतमम्। वयःऽधाम्। चन्द्रम्। रयिम्। पुरुऽवीरम्। बृहन्तम्। चन्द्र। चन्द्राऽभिः। गृणते। युवस्व॥७॥८॥

पदार्थः-(सः) **(चित्र)** अद्भुतगुणकर्म्मस्वभाव **(चित्रम्)** आश्चर्य्यभूतम् **(चितयन्तम्)** ज्ञापयन्तम् **(अस्मे)** अस्मभ्यम् **(चित्रक्षत्र)** चित्रमद्भुतं क्षत्रं राज्यं धनं वा यस्य **(चित्रतमम्)** अत्यन्ताश्चर्य्ययुक्तं रूपम् **(वयोधाम्)** यो वयो जीवनं दधाति **[(चन्द्रम्)** **(रयिम्)** **(पुरुवीरम्)** बहुवीरप्रदम् **(बृहन्तम्)** महान्तम् **(चन्द्र)** आह्लादकारक **(चन्द्राभिः)** आनन्दधनकरीभिः प्रजाभिः **(गृणते)** स्तौति **(युवस्व)** संयोजय॥७॥

अन्वयः-हे चित्र चित्रक्षत्र चन्द्र! यथा स विद्वान् चन्द्राभिरस्मे चित्रं चन्द्रं चितयन्तं चित्रतमं वयोधां बृहन्तं पुरुवीरं रयिं गृणते तं त्वं युवस्व॥७॥

भावार्थः-ये मनुष्या अद्भुगुणकर्म्मस्वभावान् स्वीकृत्यान्यान् ग्राहयित्वा धनाढ्यान् कारयन्ति तेऽद्भुतस्तुतयो भवन्तीति॥७॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्ठं सूक्तमष्टमो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(चित्र)** अद्भुत गुण कर्म्म और स्वभाव वाले **(चित्रक्षत्र)** अद्भुत राज्य वा धन से युक्त **(चन्द्र)** आह्लादकारक! जैसे **(सः)** वह विद्वान् **(चन्द्राभिः)** आनन्द और धन करने वाली प्रजाओं से **(अस्मे)** हम लोगों के लिये **(चित्रम्)** आश्चर्यभूत **(चन्द्रम्)** आनन्द देने वाले सुवर्ण आदि को **(चितयन्तम्)** जनाते हुए तथा **(चित्रतमम्)** अत्यन्त आश्चर्य्ययुक्त रूप और **(वयोधाम्)** जीवन के धारण करने और **(बृहन्तम्)** बड़े **(पुरुवीरम्)** बहुत वीरों के देने वाले **(रयिम्)** धन की **(गृणते)** स्तुति करता है, उसको आप **(युवस्व)** उत्तम प्रकार युक्त करिये॥७॥

भावार्थः-जो मनुष्य अद्भुत गुण, कर्म्म और स्वभावों का स्वीकार करके तथा अन्य जनों को ग्रहण कराय के धनाढ्य कराते हैं, वे अद्भुत स्तुति वाले होते हैं॥७॥

इस सूक्त में अग्नि तथा विद्वान् के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छठा सूक्त और आठवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य सप्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। वैश्वानरो देवता। १ त्रिष्टुप्। २ निचृत्त्रिष्टुप्। ७ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ निचृत्पङ्क्तिः। ४ स्वराट् पङ्क्तिः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ६ जगती छन्दः। निषादः स्वरः॥

अथ मनुष्यैः कीदृशोऽग्निर्वेदितव्य इत्याह॥

अब सात ऋचावाले सातवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को कैसा अग्नि जानना चाहिये, इस विषय को कहते हैं॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥ १॥

मूर्धानम्। दिवः। अरतिम्। पृथिव्याः। वैश्वानरम्। ऋते। आ। जातम्। अग्निम्। कविम्। सम्ऽराजम्। अतिथिम्। जनानाम्। आसन्। आ। पात्रम्। जनयन्त। देवाः॥ १॥

पदार्थः-(मूर्द्धानम्) सर्वोपरि विराजमानम् **(दिवः)** प्रकाशस्य सूर्य्यस्य वा **(अरतिम्)** प्राप्तिम् **(पृथिव्याः) (वैश्वानरम्)** विश्वेषु नरेषु नायकम् **(ऋते)** सत्ये **(आ) (जातम्)** प्रसिद्धम् **(अग्निम्)** अग्निमिव वर्त्तमानम् **(कविम्)** क्रान्तप्रज्ञं विद्वांसं वा **(सम्राजम्)** भूगोलस्य राजानम् **(अतिथिम्)** पूजनीयम् **(जनानाम्)** मनुष्याणाम् **(आसन्)** सन्ति **(आ) (पात्रम्)** यः पतिस्तम् **(जनयन्त) (देवाः)** विद्वांसः॥ १॥

अन्वयः-हे मनुष्या! ये देवा दिवो मूर्द्धानं पृथिव्या अरतिमृते जातं कविं सम्राजं जनानामतिथिं पात्रं वैश्वानरमग्निमाऽऽजनयन्त ते सुखिन आऽऽसन्॥ १॥

भावार्थः-ये मनुष्याः परमात्मवन्न्यायकारिणो भूत्वा वह्निरिव विद्याविनयप्रकाशिताः सम्राज्यं प्राप्नुवन्ति ते सर्वान् सुखयितुमर्हन्ति॥ १॥

पदार्थः-हे मनुष्यो! जो **(देवाः)** विद्वान् जन **(दिवः)** प्रकाश वा सूर्य्य के **(मूर्द्धानम्)** सर्वोपरि विराजमान **(पृथिव्याः)** पृथिवी की **(अरतिम्)** प्राप्ति को **(ऋते)** सत्य में **(जातम्)** प्रसिद्ध **(कविम्)** स्वच्छ बुद्धियुक्त वा विद्वान् **(सम्राजम्)** भूगोल के राजा **(जनानाम्)** मनुष्यों के **(अतिथिम्)** आदर करने योग्य **(पात्रम्)** पालन करने वाले **(वैश्वानरम्)** सम्पूर्ण मनुष्यों में अग्रणी **(अग्निम्)** अग्नि के सदृश वर्त्तमान को **(आ, जनयन्त)** प्रकट करते हैं, वे सुखी **(आ, आसन्)** अच्छे प्रकार हैं॥ १॥

भावार्थः-जो मनुष्य परमात्मा के सदृश न्यायकारी होकर तथा अग्नि के सदृश विद्या और विनय से प्रकाशित हुए चकवर्त्तित्व को प्राप्त होते हैं, वे सुख देने को योग्य होते हैं॥ १॥

पुनस्तमेवाग्निविषयमाह॥

फिर उसी अग्नि के विषय को कहते हैं॥

नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त।

वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः॥ २॥

नाभिम्। यज्ञानाम्। सदनम्। रयीणाम्। महाम्। आऽहावम्। अभि। सम्। नवन्त। वैश्वानरम्। रथ्यम्। अध्वराणाम्। यज्ञस्य। केतुम्। जनयन्त। देवाः॥ २॥

पदार्थः-(नाभिम्) मध्यभागम् **(यज्ञानाम्)** सत्यक्रियामयानाम् **(सदनम्)** स्थानम् **(रयीणाम्)** धनानाम् **(महाम्)** महताम् **(आहावम्)** समन्तात् स्पर्द्धनीयम् **(अभि)** आभिमुख्ये **(सम्)** **(नवन्त)** स्तुवन्ति **(वैश्वानरम्)** विश्वस्मिन् राजमानम् **(रथ्यम्)** रथं वोढुमर्हम् **(अध्वराणाम्)** अहिंसनीयानाम् **(यज्ञस्य)** सङ्गन्तव्यस्य **(केतुम्)** प्रज्ञापकम् **(जनयन्त)** जनयन्ति **(देवाः)** विद्वांसः॥ २॥

अन्वयः-हे मनुष्या! देवा यं यज्ञानां नाभिं महाँ रयीणां सदनमाहावं वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं सं जनयन्त नवन्त तं यूयमभि प्रशंसत॥ २॥

भावार्थः-ये मनुष्याः सर्वतो व्याप्तं सर्वकार्य्यसिद्धिकरमग्निं विज्ञाय यानानि जनयन्ते ते कार्यसिद्धिं लभन्ते॥ २॥

पदार्थः-हे मनुष्यो! **(देवाः)** विद्वान् जन जिस **(यज्ञानाम्)** सत्यक्रियामय यज्ञों के **(नाभिम्)** बीच के भाग को और **(महाम्)** महान् **(रयीणाम्)** धनों के **(सदनम्)** स्थान और **(आहावम्)** चारों ओर से स्पर्द्धा करने योग्य **(वैश्वानरम्)** सर्वत्र प्रकाशमान **(रथ्यम्)** रथ को बहाने के योग्य **(अध्वराणाम्)** नहीं नष्ट करने योग्यों के **(यज्ञस्य)** प्राप्त होने योग्य व्यवहार के **(केतुम्)** जनाने वाले को **(सम्, जनयन्त)** अच्छे प्रकार प्रकट करते हैं और **(नवन्त)** स्तुति करते हैं उसकी आप लोग **(अभि)** सम्मुख प्रशंसा करिये॥ २॥

भावार्थः-जो मनुष्य सर्वत्र व्याप्त और सम्पूर्ण कार्य्यों की सिद्धि के करने वाले अग्नि को अच्छे प्रकार जान कर वाहनों को प्रकट करते हैं, वे कार्य्यसिद्धि को प्राप्त होते हैं॥ २॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन्स्पृहयाय्याणि॥ ३॥

त्वत्। विप्रः। जायते। वाजी। अग्ने। त्वत्। वीरासः। अभिमातिऽसहः। वैश्वानर। त्वम्। अस्मासु। धेहि। वसूनि। राजन्। स्पृहयाय्याणि॥ ३॥

पदार्थः-(त्वत्) तव सकाशात् **(विप्रः)** मेधावी **(जायते)** **(वाजी)** वेगवान् **(अग्ने)** पावकवत्प्रतापिन् विद्वन् **(त्वत्)** **(वीरासः)** शूरवीराः **(अभिमातिषाहः)** येऽभिमात्याऽभिमानेन युक्ताञ्छत्रून् सहन्ते **(वैश्वानर)** विश्वेषु नरेषु नायक **(त्वम्)** **(अस्मासु)** **(धेहि)** **(वसूनि)** **(राजन्)** **(स्पृहयाय्याणि)** स्पृहणीयानि॥ ३॥

अन्वयः-हे वैश्वानराऽग्ने राजन्! यस्मात् त्वद्विप्रो वाजी जायते त्वदभिमातिषाहो वीरासो जायन्ते ततस्त्वमस्मासु स्पृहयाय्याणि वसूनि धेहि॥३॥

भावार्थः-स एव राजा भवितुं योग्यो यस्य सङ्गेन दुष्टा अपि श्रेष्ठाः कातरा अपि शूरवीराः कृपणा अपि दातारो भवन्ति॥३॥

पदार्थः-हे **(वैश्वानर)** संपूर्ण जनों में अग्रणी **(अग्ने)** अग्नि के सदृश प्रतापी विद्वन् **(राजन्)** राजन्! जिस कारण से **(त्वत्)** आपके समीप से **(विप्रः)** बुद्धिमान् **(वाजी)** वेगयुक्त **(जायते)** होता है और **(त्वत्)** आपके समीप से **(अभिमातिषाहः)** अभिमानयुक्त शत्रुओं के सहने वाले **(वीरासः)** शूरवीर जन प्रकट होते हैं इससे **(त्वम्)** आप **(अस्मासु)** हम लोगों में **(स्पृहयाय्याणि)** इच्छा के विषय होने योग्य **(वसूनि)** धनों को **(धेहि)** धारण करिये॥३॥

भावार्थः-वही राजा होने को योग्य है जिसके संग दुष्ट जन भी श्रेष्ठ, कायर भी शूरवीर और कृपण भी दाता होते हैं॥३॥

अथ द्वितीयजन्मविषयमाह॥

अब द्वितीय जन्म के विषय को कहते हैं॥

त्वां विश्वे॑ अमृत॒ जाय॑मानं॒ शिशु॑ं न दे॒वा अ॒भि सं न॑वन्ते।
तव॒ क्रतु॑भिरमृत॒त्वमा॑य॒न् वैश्वा॑नर॒ यत्पि॒त्रोरदी॑दे॒ः॥४॥

त्वाम्। विश्वे॑। अ॒मृ॒त॒। जाय॑मानम्। शिशु॑म्। न। दे॒वाः॒। अ॒भि। सम्। न॒व॒न्ते॒। तव॑। क्रतु॑ऽभिः। अ॒मृ॒त॒ऽत्वम्। आ॒य॒न्। वैश्वा॑नर। यत्। पि॒त्रोः॒। अदी॑दे॒ः॥४॥

पदार्थः-**(त्वाम्)** **(विश्वे)** सर्वे **(अमृत)** मरणधर्म्मरहित **(जायमानम्)** उत्पद्यमानम् **(शिशुम्)** बालकम् **(न)** इव **(देवाः)** विद्वांसः **(अभि)** **(सम्)** सम्यक् **(नवन्ते)** स्तुवन्ति **(तव)** **(क्रतुभिः)** प्रज्ञाकर्म्मभिः **(अमृतत्वम्)** मोक्षस्य भावम् **(आयन्)** प्राप्नुवन्ति **(वैश्वानर)** यो विश्वान्नरान् धर्मकार्य्येषु नयति तत्सम्बुद्धौ **(यत्)** यः **(पित्रोः)** मातपित्रोरिव विद्याऽऽचार्ययोः **(अदीदेः)** प्रकाशयेः॥४॥

अन्वयः-हे वैश्वानराऽमृताऽत्त विद्वन्! यं त्वां शिशुं न जायमानं विश्वे देवा अभि सन्नवन्ते यस्य तव क्रतुभिर्मनुष्या अमृतत्वमायन् यत्त्वं पित्रोरदीदेः स त्वं धन्योऽसि॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या मातापितृभ्यां जन्म प्राप्याऽष्टमं वर्षमारभ्याऽऽचार्य्याद्विद्याग्रहणेन द्वितीयं जन्म प्राप्नुवन्ति ते स्तुत्याः सन्तो धर्म्मार्थकाममोक्षान् साद्धुं शक्नुवन्ति॥४॥

पदार्थः-हे **(वैश्वानर)** संपूर्ण जनों को धर्म्म के कार्य्यों में ले चलने वाले **(अमृत)** मरणधर्म्म से रहित यथार्थवक्ता विद्वान्! जिन **(त्वाम्)** आपको **(शिशुम्)** बालक को **(न)** जैसे वैसे **(जायमानम्)** उत्पन्न हुए को **(विश्वे)** सम्पूर्ण **(देवाः)** विद्वान् जन **(अभि)** सब ओर से **(सम्)** उत्तम प्रकार **(नवन्ते)** स्तुति करते हैं और जिन **(तव)** आपके **(क्रतुभिः)** बुद्धि के कर्म्मों से मनुष्य लोग **(अमृतत्वम्)** मोक्षपन

को **(आयन्)** प्राप्त होते हैं और **(यत्)** जो आप **(पित्रोः)** माता और पिता के सदृश विद्या और आचार्य्य के **(अदीदेः)** प्रकाशक हो, वह आप धन्य हो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य माता और पिता से जन्म को प्राप्त होकर आठवें वर्ष से प्रारम्भ करके आचार्य से विद्या के ग्रहण से द्वितीय जन्म को प्राप्त होते हैं, वे स्तुति करने योग्य हुए धर्म, अर्थ, काम और मोक्ष को सिद्ध करने को समर्थ होते हैं॥४॥

पुनर्मनुष्यैः किं प्रापणीयमित्याह॥

फिर मनुष्यों को क्या प्राप्त कराना चाहिये, इस विषय को कहते हैं॥

वैश्वा॑नर॒ तव॒ तानि॑ व्र॒तानि॑ म॒हान्य॑ग्ने॒ नकि॒रा द॑धर्ष।
यज्जाय॑मानः पि॒त्रोरु॒पस्थेऽवि॑न्दः के॒तुं व॒युने॒ष्वह्ना॑म्॥५॥

वैश्वा॑नर। तव॑। तानि॑। व्र॒तानि॑। म॒हानि॑। अ॒ग्ने॒। नकिः॑। आ। द॒ध॒र्ष॒। यत्। जाय॑मानः। पि॒त्रोः। उ॒पऽस्थे॑। अवि॑न्दः। के॒तुम्। व॒युने॑षु। अह्ना॑म्॥५॥

पदार्थः-**(वैश्वानर)** विश्वस्मिन् विद्याधर्म्मप्रकाशनेन नायक **(तव)** **(तानि)** ब्रह्मचर्य्यविद्याग्रहणसत्यभाषणादीनि **(व्रतानि)** कर्म्माणि **(महानि)** महान्ति **(अग्ने)** पावकवत्प्रकाशात्मन् **(नकिः)** निषेधे **(आ)** **(दधर्ष)** तिरस्कुर्य्यात् **(यत्)** यः **(जायमानः)** **(पित्रोः)** जनकयोरिव विद्याऽऽचार्य्ययोः **(उपस्थे)** समीपे **(अविन्दः)** विन्दसि प्राप्नोषि **(केतुम्)** प्रज्ञाम् **(वयुनेषु)** पृथिवीमारभ्य परमेश्वरपर्य्यन्तानां विज्ञानेषु **(अह्नाम्)** दिनानां मध्ये॥५॥

अन्वयः-हे वैश्वानराऽग्ने! यद्यस्त्वं पित्रोरुपस्थे जायमानोऽह्नां वयुनेषु केतुमविन्दस्तमस्य तव तानि महानि व्रतानि कोऽपि नकिराऽऽदधर्ष॥५॥

भावार्थः-यदि मनुष्या द्वितीयं विद्याजन्म प्राप्नुयुस्तर्हि तेषामामोघानि कर्म्माणि भवन्तीति वेद्यम्॥५॥

पदार्थः-हे **(वैश्वानर)** सम्पूर्ण संसार में विद्या और धर्म्म के प्रकाश से अग्रणी **(अग्ने)** अग्नि के सदृश प्रकाशस्वरूप **(यत्)** जो आप **(पित्रोः)** माता-पिता के सदृश विद्या और आचार्य्य के **(उपस्थे)** समीप में **(जायमानः)** प्रकट हुआ **(अह्नाम्)** दिनों के मध्य में **(वयुनेषु)** पृथिवी से लेकर परमेश्वर पर्य्यन्त पदार्थों के विज्ञानों में **(केतुम्)** बुद्धि को **(अविन्दः)** प्राप्त होते हो उन **(तव)** आपके **(तानि)** उक्त ब्रह्मचर्य्य, विद्याग्रहण, सत्यभाषण आदि **(महानि)** बड़े **(व्रतानि)** कर्म्मों को कोई भी **(नकिः)** नहीं **(आ, दधर्ष)** तिरस्कार करे॥५॥

भावार्थः-जो मनुष्य दूसरे विद्यारूप जन्म को प्राप्त होवें, तो उनके सफल कर्म्म होते हैं, ऐसा जानना चाहिये॥५॥

पुनर्मनुष्यैः किं वेदितव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना।
तस्येदु विश्वा भुवनाधि मूर्धनि वयाइव रुरुहुः सप्त विस्रुहः॥६॥

वैश्वानरस्य। विऽमितानि। चक्षसा। सानूनि। दिवः। अमृतस्य। केतुना। तस्य। इत्। ऊँ इति। विश्वा। भुवना। अधि। मूर्धनि। वयाःऽइव। रुरुहुः। सप्त। विऽस्रुहः॥६॥

पदार्थः-(वैश्वानरस्य) विश्वेषु नरेषु विद्याविनयाभ्यां प्रकाशमानस्य **(विमितानि)** विशेषेण परिमितानि **(चक्षसा)** प्रज्ञानेन **(सानूनि)** प्रान्तदेशान् **(दिवः)** प्रकाशमानस्य **(अमृतस्य)** नाशरहितस्य **(केतुना)** प्रज्ञया **(तस्य)** **(इत्)** एव **(उ)** **(विश्वा)** सर्वाणि **(भुवना)** भुवनानि लोकाः **(अधि)** **(मूर्द्धनि)** **(वयाइव)** पक्षिण इव **(रुरुहुः)** प्रादुर्भवन्ति **(सप्त)** सप्तविधाः **(विस्रुहः)** विसरन्ति विशेषेण गच्छन्ति॥६॥

अन्वयः-हे मनुष्या! यस्य वैश्वानरस्य चक्षसा विमितानि सानूनि दिवोऽमृतस्य केतुना विश्वा भुवना सप्त विस्रुहो मूर्द्धनि वयाइवाऽधि रुरुहुस्तस्येदु सङ्गं कुरुत॥६॥

भावार्थः-अत्रोपमालङ्कारः। यो विद्वान् जगदीश्वरनिर्मितान् पक्षिवदन्तरिक्षे चलतो लोकानेतेषां गतिं च विजानीयात् स विदुषां मूर्द्धेव प्रशंसनीयो जायते॥६॥

पदार्थः-हे मनुष्यो! जिस **(वैश्वानरस्य)** संपूर्ण नरों में विद्या और विनय से प्रकाशमान के **(चक्षसा)** प्रज्ञान से **(विमितानि)** विशेष करके परिमित **(सानूनि)** प्रान्त स्थानों को **(दिवः)** प्रकाशमान **(अमृतस्य)** नाश से रहित की **(केतुना)** बुद्धि से **(विश्वा)** सम्पूर्ण **(भुवना)** लोक **(सप्त)** सात प्रकार के **(विस्रुहः)** विशेष करके सरकते जाते और **(मूर्द्धनि)** शिर पर अर्थात् ऊपर **(वयाइव)** पक्षियों के सदृश **(अधि)** अधिकतर **(रुरुहुः)** प्रकट होते हैं **(तस्य)** उसका **(इत्)** ही **(उ)** तर्क-वितर्क से संग करो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन परमेश्वर से रचे गए, पक्षियों सदृश अन्तरिक्ष में चलते हुए लोकों और उनकी गति को बुद्धि से विशेष करके जाने, वह विद्वानों के मस्तक के सदृश प्रशंसा करने योग्य होता है॥६॥

पुनर्जगदीश्वरः कीदृशोऽस्तीत्याह॥

फिर जगदीश्वर कैसा है, इस विषय को कहते हैं॥

वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता॥७॥९॥

विः। यः। रजांसि। अमिमीत। सुऽक्रतुः। वैश्वानरः। वि। दिवः। रोचना। कविः। परि। यः। विश्वा। भुवनानि। पप्रथे। अदब्धः। गोपाः। अमृतस्य। रक्षिता॥७॥९॥

पदार्थः-(वि) विशेषेण **(यः)** जगदीश्वरः **(रजांसि) (अमिमीत)** निर्मिमीते **(सुक्रतुः)** शोभनानि प्रज्ञानानि कर्म्माणि यस्य सः **(वैश्वानरः) (वि) (दिवः)** प्रकाशमानस्य सूर्य्यस्य **(रोचना)** रोचनानि प्रदीपनानि **(कविः)** क्रान्तप्रज्ञः **(परि)** सर्वतः **(यः) (विश्वा)** अखिलानि **(भुवनानि) (पप्रथे)** प्रथयति विस्तृणाति **(अदब्धः)** अहिंसनीयः **(गोपाः)** पालकः **(अमृतस्य)** मोक्षस्य **(रक्षिता)**॥७॥

अन्वयः-हे विद्वांसो! यो वैश्वानरः सुक्रतुः कविरीश्वरो दिवो रोचना रजांसि व्यमिमीत यो विश्वा भुवनानि परि पप्रथे सोऽमृतस्य गोपा अदब्धो रक्षिता व्यमिमीत॥७॥

भावार्थः-हे मनुष्या! येन जगदीश्वरेण सर्वे लोका निर्मिता यः सर्वेषां रक्षिताऽस्ति तं सर्वे उपासीरन्निति॥७॥

अत्र वैश्वानरविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् जनो! **(यः)** जो जगदीश्वर **(वैश्वानरः)** सम्पूर्ण मनुष्यों का हित करने वाला **(सुक्रतुः)** उत्तम कर्म जिसके वह **(कविः)** उत्तम बुद्धि वाला ईश्वर **(दिवः)** प्रकाशमान सूर्य्य के **(रोचना)** प्रकाशरूप **(रजांसि)** लोकों को **(वि)** विशेष करके **(अमिमीत)** निर्मित करता तथा **(यः)** जो **(विश्वा)** सम्पूर्ण **(भुवनानि)** भुवनों को **(परि)** सब ओर से **(पप्रथे)** विस्तारयुक्त करता है वह **(अमृतस्य)** मोक्ष का **(गोपाः)** पालन करने वाला **(अदब्धः)** अहिंसनीय और **(रक्षिता)** रक्षा करने वाला **(वि)** विशेष करके निर्माण करता है॥७॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर ने सम्पूर्ण लोक निर्मित किये हैं तथा जो सब का रक्षक है, उसकी सब उपासना करें॥७॥

इस सूक्त में सब के हित करने वाला, विद्वान् और ईश्वर के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सातवाँ सूक्त और नवमा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्याष्टमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। वैश्वानरो देवता। १, ४ जगती। ६ विराड्जगती छन्दः। निषादः स्वरः। २, ३, ५ भुरिक्त्रिष्टुप्। ७ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः किं विज्ञाय किमुपदेष्टव्यमित्याह॥

अब सात ऋचावाले आठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब मनुष्यों को क्या जान कर क्या उपदेश करना चाहिये, इस विषय को कहते हैं॥

पृक्षस्य॒ वृष्णो॑ अरु॒षस्य॒ नू सहः॒ प्र नु वो॑चं वि॒दथा॑ जा॒तवे॑दसः।
वै॒श्वा॒न॒राय॑ म॒तिर्नव्य॑सी॒ शुचिः॒ सोम॑इव पवते॒ चारु॑र॒ग्नये॑॥ १॥

पृ॒क्षस्य॑। वृ॒ष्णः॑। अ॒रु॒षस्य॑। नु। सहः॑। प्र। नु। वो॒च॒म्। वि॒दथा॑। जा॒तऽवे॑दसः। वै॒श्वा॒न॒राय॑। म॒तिः। नव्य॑सी। शुचिः॑। सोमः॑ऽइव। प॒व॒ते॒। चारुः॑। अ॒ग्नये॑॥ १॥

पदार्थः-(पृक्षस्य) सर्वत्र सम्बद्धस्य सम्पृक्तस्य **(वृष्णः)** सेचकस्य **(अरुषस्य)** अहिंसकस्य **(नूः)** सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(सहः)** बलम् **(प्र)** **(नु)** क्षिप्रम् **(वोचम्)** उपदिशेयम् **(विदथा)** विज्ञानानि **(जातवेदसः)** जातेषु विद्यमानस्य **(वैश्वानराय)** सर्वस्य विश्वस्य प्रकाशकाय **(मतिः)** प्रज्ञा **(नव्यसी)** अतिशयेन नवीना **(शुचिः)** पवित्रा **(सोमइव)** सोमलतेव **(पवते)** पवित्रा भवति **(चारुः)** सुन्दरा **(अग्नये)** विदुषे॥१॥

अन्वयः-हे मनुष्या! यस्य पृक्षस्यारुषस्य वृष्णो जातवेदसः सहो नू प्र वोचं विदथा नु प्रवोचं यस्य सोमइव नव्यसी शुचिश्चारुर्मतिः पवते तस्मै वैश्वानरायाऽग्नये प्रज्ञां धरेयम्॥१॥

भावार्थः-अत्रोपमालङ्कारः। येषां मनुष्याणां सोमौषधिवत्पवित्रकरी प्रज्ञाऽतुलं बलमग्निविद्या च भवति त एवाऽऽनन्दन्ति॥१॥

पदार्थः-हे मनुष्यो! जिस **(पृक्षस्य)** सर्वत्र सम्बद्ध अर्थात् संयुक्त **(अरुषस्य)** नहीं हिंसा करने और **(वृष्णः)** सेचन करनेवाले **(जातवेदसः)** उत्पन्न हुओं में विद्यमान के **(सहः)** बल का **(नु)** शीघ्र **(प्र, वोचम्)** उपदेश देऊँ और **(विदथा)** विज्ञानों का **(नू)** शीघ्र उपदेश देऊँ और जिसकी **(सोमइव)** सोमलता जैसे वैसे **(नव्यसी)** अत्यन्त नवीन **(शुचिः)** पवित्र **(चारुः)** सुन्दर **(मतिः)** बुद्धि **(पवते)** पवित्र होती है उस **(वैश्वानराय)** सम्पूर्ण विश्व के प्रकाशक **(अग्नये)** विद्वान् जन के लिये बुद्धि को धारण करूँ॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिन मनुष्यों की सोमलतारूप ओषधि के सदृश पवित्र करने वाली बुद्धि, अतुल बल और अग्निविद्या होती है, वे ही आनन्दित होते हैं॥१॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत।
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत्॥ २॥

सः। जायमानः। परमे। विऽओमनि। व्रतानि। अग्निः। व्रतऽपाः। अरक्षत। वि। अन्तरिक्षम्। अमिमीत। सुऽक्रतुः। वैश्वानरः। महिना। नाकम्। अस्पृशत्॥ २॥

पदार्थः-(सः) सूर्य्यरूपेण **(जायमानः)** उत्पद्यमानः **(परमे)** प्रकृष्टे **(व्योमनि)** व्योमवद्व्यापके **(व्रतानि)** सत्यभाषणादीनि कर्म्माणि **(अग्निः)** पावकः **(व्रतपाः)** यो व्रतानि कर्म्माणि रक्षति सः **(अरक्षत)** रक्षति **(वि)** **(अन्तरिक्षम्)** उदकम् **(अमिमीत)** रचयति **(सुक्रतुः)** शोभनकर्म्मा **(वैश्वानरः)** विश्वेषु नरेषु प्रकाशमानः **(महिना)** महत्त्वेन **(नाकम्)** अविद्यमानदुःखम् **(अस्पृशत्)** स्पृशति॥ २॥

अन्वयः-हे विद्वांसो! युष्माभिर्यो व्रतपा अग्निः परमे व्योमनि जायमानो व्रतान्यरक्षतान्तरिक्षं व्यमिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् स वेदितव्यः॥ २॥

भावार्थः-हे मनुष्या! येन परमेश्वरेण स्वस्मिन् सूर्य्यादिलोकनिर्म्माणेन सर्वेषामुपकारः कृतस्तस्य सत्यानि कर्म्माण्यनुष्ठायोपासनां कुर्वन्तु॥ २॥

पदार्थः-हे विद्वान् जनो! आप लोगों को जो **(व्रतपाः)** कर्म्मों की रक्षा करने वाला **(अग्निः)** अग्नि **(परमे)** श्रेष्ठ और **(व्योमनि)** आकाश के सदृश व्यापक परमेश्वर में **(जायमानः)** उत्पन्न होता हुआ **(व्रतानि)** सत्यभाषण आदि कर्म्मों की **(अरक्षत)** रक्षा करता तथा **(अन्तरिक्षम्)** जल की **(वि)** विशेष करके **(अमिमीत)** रक्षा करता और **(सुक्रतुः)** अच्छे कर्म्मोंवाला **(वैश्वानरः)** सम्पूर्ण मनुष्यों में प्रकाशमान होता हुआ **(महिना)** महत्त्व से **(नाकम्)** दुःखरहित का **(अस्पृशत्)** स्पर्श करता है **(सः)** वह जानने योग्य है॥ २॥

भावार्थः-हे मनुष्यो! जिस परमेश्वर ने अपने में सूर्य्य आदि लोकों के निर्म्माण से सब का उपकार किया, उसके सत्य कर्म्मों का अनुष्ठान करके उपासना करो अर्थात् उसी का भजन करो॥ २॥

पुनः सूर्य्यः कीदृशोऽस्तीत्याह॥

फिर सूर्य्य कैसा है, इस विषय को कहते हैं॥

व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदक्रणोज्ज्योतिषा तमः।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम्॥ ३॥

वि। अस्तभ्नात्। रोदसी इति। मित्रः। अद्भुतः। अन्तःऽवावत्। अकृणोत्। ज्योतिषा। तमः। वि। चर्मणी इवेति चर्मणीऽइव। धिषणे इति। अवर्तयत्। वैश्वानरः। विश्वम्। अधत्त। वृष्ण्यम्॥ ३॥

पदार्थः-(वि) **(अस्तभ्नात्)** स्तभ्नाति धरति **(रोदसी)** द्यावापृथिव्यौ **(मित्रः)** सर्वस्य सुहृदिव **(अद्भुतः)** आश्चर्य्यगुणकर्म्मस्वभावः **(अन्तर्वावत्)** यो अन्तर्भृशं वाति गच्छति **(अकृणोत्)** करोति

(ज्योतिषा) प्रकाशेन **(तमः)** रात्रिम् **(वि)** **(चर्म्मणीव)** यथा चर्म्मणि लोमानि धृतानि **(धिषणे)** सर्वस्य धारिके **(अवर्त्तयत्)** वर्त्तयति **(वैश्वानरः)** विश्वेषु नरेषु विराजमानः **(विश्वम्)** सर्वं जगत् **(अधत्त)** धरति **(वृष्ण्यम्)** वृषसु भवं साधुं वा॥३॥

अन्वयः-हे मनुष्या! योऽद्भुतो मित्रो वैश्वानरः सूर्यो रोदसी व्यस्तभ्नाज्ज्योतिषा तमोऽकृणोदन्तर्वावच्चर्म्मणीव धिषणे व्यवर्त्तयद् वृष्ण्यं विश्वमधत्त तं यूयं सम्प्रयुङ्ध्वम्॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यो जगदीश्वरनिर्मितोऽयं सूर्यश्चर्मलोमानीवाऽऽकर्षणेन लोकान् धरति नियमेन चालयति स्वयं चलति स एव जगदुपकाराय प्रभवति॥३॥

पदार्थः-हे मनुष्यो! जो **(अद्भुतः)** आश्चर्यजनक गुण, कर्म और स्वभाववाला **(मित्रः)** सब के मित्र के समान वर्त्तमान **(वैश्वानरः)** संपूर्ण मनुष्यों में विराजमान सूर्य्य **(रोदसी)** अन्तरिक्ष और पृथिवी को **(वि, अस्तभ्नात्)** धारण करता तथा **(ज्योतिषा)** प्रकाश से **(तमः)** रात्रि को **(अकृणोत्)** करता **(अन्तर्वावत्)** अन्तः अर्थात् ब्रह्माण्ड के भीतर अत्यन्त चलता **(चर्म्मणीव)** जैसे चर्म में रोम धारण किये गये, वैसे **(धिषणे)** सब के धारण करने वालियों को **(वि, अवर्त्तयत्)** विशेष करके वर्ताता **(वृष्ण्यम्)** वृषों में उत्पन्न वा श्रेष्ठ **(विश्वम्)** सम्पूर्ण जगत् को **(अधत्त)** धारण करता है, उसको तुम लोग प्रयोग करो॥३॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं।[१] हे मनुष्यो! जो जगदीश्वर से बनाया गया यह सूर्य्य चर्म्म रोगों को, वैसे आकर्षण से लोकों को धारण करता है तथा नियम से चलाता और चलता है, वही जगत् के उपकार के लिये समर्थ होता है॥३॥

पुनः स वायुः कीदृशः किं करोतीत्याह॥

फिर वह वायु कैसा है और क्या करता है, इस विषय को कहते हैं॥

अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम्।
आ द्यूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः॥४॥

अपाम्। उपऽस्थे। महिषाः। अगृभ्णत। विशः। राजानम्। उप। तस्थुः। ऋग्मियम्। आ। द्यूतः। अग्निम्। अभरत्। विवस्वतः। वैश्वानरम्। मातरिश्वा। परावतः॥४॥

पदार्थः-**(अपाम्)** प्राणानां जलानां वा **(उपस्थे)** समीपे **(महिषाः)** महान्तः **(अगृभ्णत)** गृह्णन्ति **(विशः)** **(राजानम्)** राजानमिव सूर्य्यम् **(उप)** **(तस्थुः)** तिष्ठन्ति **(ऋग्मियम्)** य ऋग्भिर्मीयते तम् **(आ)** समन्तात् **(द्यूतः)** यो दुनोति परितापयति सः **(अग्निम्)** पावकम् **(अभरत्)** भरति **(विवस्वतः)** सूर्य्यस्य

---

१. संस्कृत भावार्थ में केवल उपमालङ्कार दिया है।

(वैश्वानरम्) विश्वस्मिन् प्रकाशमानम् **(मातरिश्वा)** यो मातर्य्यन्तरिक्षे शेते सः वायुः **(परावतः)** दूरे स्थितस्य॥४॥

अन्वयः-हे विद्वांसो! यो दूतो मातरिश्वा परावतो विवस्वतो वैश्वानरमग्निमभरद् यमृग्मियं राजानं विश उपाऽऽतस्थुरिव सूर्य्यमुपतिष्ठति यमपामुपस्थे वर्त्तमानं महिषा अगृभ्णत तं वायुं यूयं विजानीत॥४॥

भावार्थः-यथा वार्युदूरस्थस्याऽपि सूर्य्यस्य तेजो बिभर्त्ति तथोत्तमो राजा दूरस्था अपि प्रजां बिभृयात्॥४॥

पदार्थः-हे विद्वान् जनो! जो **(दूतः)** सन्तापित कराने वाला **(मातरिश्वा)** अन्तरिक्ष में शयन करने वाला वायु **(परावतः)** दूर स्थित **(विवस्वतः)** सूर्य्य के **(वैश्वानरम्)** सर्वत्र प्रकाशमान **(अग्निम्)** अग्नि को **(अभरत्)** धारण करता और जिस **(ऋग्मियम्)** ऋचाओं द्वारा प्रमाण किया जाता उस **(राजानम्)** जैसे राजा का, वैसे सूर्य को **(विशः)** प्रजायें **(उप)** समीप में **(आ)** चारों ओर से **(तस्थुः)** प्राप्त होती हैं, वैसे सूर्य्य उपस्थित होता है और जिस **(अपाम्)** प्राणों वा जलों के **(उपस्थे)** समीप में वर्त्तमान का **(महिषाः)** बड़े जन **(अगृभ्णत)** ग्रहण करते हैं, उस वायु को आप लोग जानिये॥४॥

भावार्थः-जैसे वायु दूर वर्त्तमान भी सूर्य्य के तेज को धारण करता है, वैसे उत्तम राजा दूर स्थित भी प्रजाओं का पोषण करे॥४॥

पुनर्नृपः किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीम्।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा॥५॥

युगेऽयुगे। विदथ्यम्। गृणत्ऽभ्यः। अग्ने। रयिम्। यशसम्। धेहि। नव्यसीम्। पव्याऽइव। राजन्। अघऽशंसम्। अजर। नीचा। नि। वृश्च। वनिनम्। न। तेजसा॥५॥

पदार्थः-**(युगेयुगे)** वर्षे वर्षे वर्षसमुदाये वर्षसमुदाये वा **(विदथ्यम्)** विदथेषु स-ामविज्ञानादिषु भवम् **(गृणद्भ्यः)** स्तुवद्भ्यः **(अग्ने)** **(रयिम्)** धनम् **(यशसम्)** कीर्तिमन्नं वा **(धेहि)** **(नव्यसीम्)** अतिशयेन नूतनां विद्यां क्रियां वा **(पव्येव)** वज्रेणेव **(राजन्)** **(अघशंसम्)** स्तेनम् **(अजर)** जरादोषरहित **(नीचा)** नीचम् **(नि)** नितराम् **(वृश्च)** छिन्धि **(वनिनम्)** वनानि किरणा विद्यन्ते यस्मिंस्तत् **(न)** इव **(तेजसा)**॥५॥

अन्वयः-हे अजर राजन्नग्ने! त्वं तेजसा वनिनं न शूरः पव्येव नीचाऽघशंसं नि वृश्च गृणद्भ्यो युगेयुगे विदथ्यं रयिं यशसं नव्यसीं च धेहि॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्य्यो किरणसंयुक्तं मेघं छिनत्ति यथा वज्रो विदारणीयं विदृणाति तथा राजा स्तेनादीन् दुष्टान् छित्त्वा भित्त्वा धार्मिकेभ्यो धनाद्यैश्वर्य्यं दधातु॥५॥

पदार्थः-हे **(अजर)** वृद्धावस्थारूप दोष से रहित **(राजन्)** प्रकाशमान **(अग्ने)** अग्नि के सदृश वर्त्तमान! आप **(तेजसा)** तेज से **(वनिनम्)** किरण विद्यमान जिसमें उसको **(न)** जैसे वैसे वा शूरवीर जन **(पव्येव)** वज्र से जैसे **(नीचा)** नीच को वैसे **(अघशंसम्)** चोर को **(नि)** अत्यन्त **(वृश्च)** काटो और **(गृणद्भ्यः)** स्तुति करने वालों के लिये **(युगेयुगे)** वर्ष-वर्ष वा वर्षसमुदाय वर्षसमुदाय में **(विदथ्यम्)** संग्राम और विज्ञानादिकों में **(रयिम्)** धन **(यशसम्)** कीर्ति वा अन्न को और **(नव्यसीम्)** अतिशय नवीन विद्या वा क्रिया को **(धेहि)** धारण करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य्य किरणों से संयुक्त मेघ का नाश करता है और जैसे वज्र विदारण करने योग्य पदार्थ को विदारण करता, वैसे राजा चोर आदि दुष्ट जनों का छेदन करके धार्मिक जनों के लिये धन आदि ऐश्वर्य्य को धारण करे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम्।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः॥६॥

अस्माकम्। अग्ने। मघवत्ऽसु। धारय। अनामि। क्षत्रम्। अजरम्। सुऽवीर्यम्। वयम्। जयेम। शतिनम्। सहस्रिणम्। वैश्वानर। वाजम्। अग्ने। तव। ऊतिऽभिः॥६॥

पदार्थः-**(अस्माकम्)** **(अग्ने)** अग्निरिव विद्वन् राजन् **(मघवत्सु)** बहुधनयुक्तेषु प्रजाजनेषु **(धारय)** **(अनामि)** नम्येत **(क्षत्रम्)** राष्ट्रं धनं वा **(अजरम्)** नाशरहितम् **(सुवीर्य्यम्)** उत्तमं बलम् **(वयम्)** **(जयेम)** **(शतिनम्)** शतधा योद्धृसेनासहितम् **(सहस्रिणम्)** सहस्रैर्योद्धृभिः संयुक्तम् **(वैश्वानर)** विश्वस्य नायक **(वाजम्)** स-ामम् **(अग्ने)** तेजस्विन् **(तव)** **(ऊतिभिः)** रक्षाभिः सह॥६॥

अन्वयः-हे वैश्वानराऽग्ने विद्वन् राजन्! वयं तवोतिभिः सह शतिनं सहस्रिणं वाजं जयेम। हे अग्ने! यथाऽस्माकं मघवत्सु सुवीर्य्यमजरं क्षत्रमनामि तथा धारय॥६॥

भावार्थः-यदि राजा सेनाध्यक्षा धार्म्मिका विद्वांसो न्यायकारिणो जितेन्द्रियाः स्युस्तर्हि तेषां सर्वत्र विजयो भवति॥६॥

पदार्थः-हे **(वैश्वानर)** संसार के अग्रणी **(अग्ने)** अग्नि के सदृश विद्वन् राजन्! **(वयम्)** हम लोग **(तव)** आपकी **(ऊतिभिः)** रक्षा आदि के साथ **(शतिनम्)** सैकड़ों प्रकार से योद्धाओं से और **(सहस्रिणम्)** सहस्रों योद्धाओं से संयुक्त **(वाजम्)** संग्राम को **(जयेम)** जीतें। तथा हे **(अग्ने)** तेजस्विन्! जैसे **(अस्माकम्)** हम लोगों के **(मघवत्सु)** बहुत धनों से युक्त प्रजाजनों में **(सुवीर्य्यम्)** उत्तम बल **(अजरम्)** नाशरहित **(क्षत्रम्)** राज्य वा धन **(अनामि)** नम्र होवे वैसा **(धारय)** धारण करो॥६॥

भावार्थः-जो राजा और सेना के अध्यक्ष धार्मिक, विद्वान्, न्यायकारी और जितेन्द्रिय हों तो उनका सर्वत्र विजय होता है॥६॥

पुना राजादिजनैः किं कर्त्तव्यमित्याह॥

फिर राजा आदि जनों को क्या करना चाहिये, इस विषय को कहते हैं॥

अद॑ब्धेभि॒स्तव॑ गो॒पाभि॑रिष्टे॒ऽस्माकं॑ पाहि त्रिषधस्थ सू॒रीन्।
रक्षा॑ च नो द॒दुषां॒ शर्धो॑ अग्ने॒ वैश्वा॑नर॒ प्र च तारी॒: स्तवा॑न:॥७॥१०॥

अद॑ब्धेभिः। तव॑। गो॒पाभि॑:। इ॒ष्टे॒। अ॒स्माक॑म्। पा॒हि॒। त्रि॒ऽस॒ध॒स्थ॒। सू॒रीन्। रक्ष॑। च॒। नः॒। द॒दुषा॑म्। शर्धः॑। अ॒ग्ने॒। वैश्वा॑नर। प्र। च॒। ता॒री॒:। स्तवा॑नः॥७॥

पदार्थः-(**अदब्धेभिः**) अहिंसकैः (**तव**) (**गोपाभिः**) रक्षाभिः (**इष्टे**) सङ्गन्तव्ये (**अस्माकम्**) (**पाहि**) (**त्रिषधस्थ**) त्रिषु समानस्थानेषु वर्त्तमान (**सूरीन्**) विदुषः (**रक्षा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**च**) (**नः**) अस्मान् (**ददुषाम्**) दातॄणाम् (**शर्धः**) बलम् (**अग्ने**) (**वैश्वानर**) विद्याविनयप्रकाशमान (**प्र**) (**च**) (**तारीः**) तारय (**स्तवानः**) प्रशंसन्॥७॥

अन्वयः-हे त्रिषधस्थेष्टे वैश्वानराग्ने! स्तवानस्त्वमदब्धेभिर्गोपाभिर्नोऽस्मान् सूरीन् पाहि। अस्माकं सम्बन्धिनश्च रक्षा यतस्तव ददुषामस्माकं च शर्धो वर्धेत। अस्माभिः सह त्वं शत्रून् प्र तारीरुल्लङ्घय॥७॥

भावार्थः-हे राजजन! यथा सूर्य्य उपर्यधोमध्यस्थांल्लोकान् प्रकाशयति तथाविधं प्रजाजनांस्त्वं सर्वतो रक्ष। यथाऽत्र राज्ये विद्वांसो वर्धेरंस्तथा विधानं विधेहि॥७॥

अत्र वैश्वानरविद्वत्सूर्य्यराजादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे (**त्रिषधस्थ**) तीन तुल्य स्थानों में वर्त्तमान (**इष्टे**) मेल करने योग्य (**वैश्वानर**) विद्या और विनय से प्रकाशमान (**अग्ने**) अग्नि के समान वर्त्तमान! (**स्तवानः**) प्रशंसा करते हुए आप (**अदब्धेभिः**) अहिंसक जनों से (**गोपाभिः**) रक्षाओं के द्वारा (**नः**) हम लोगों **[**के**]** (**सूरीन्**) विद्वानों का (**पाहि**) पालन करिये और (**अस्माकम्**) हम लोगों के सम्बन्धियों की (**च**) भी (**रक्षा**) रक्षा करिये तथा (**तव**) आपका और (**ददुषाम्**) देने वालों का (**च**) और हमारा (**शर्धः**) बल बढ़े और हम लोगों के साथ आप शत्रुओं का (**प्र, तारीः**) उल्लंघन करो॥७॥

भावार्थः-हे राजजन! जैसे सूर्य्य ऊपर, नीचे और मध्यस्थ लोकों को प्रकाशित करता है, वैसे ही प्रजाजनों की आप सब प्रकार से रक्षा कीजिये और जैसे इस राज्य में विद्वान् बढ़ें, वैसे कार्य करिये॥७॥

इस सूक्त में विद्या और विनय से प्रकाशमान, विद्वान्, सूर्य्य और राजा आदि के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह आठवाँ सूक्त और दशवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य नवमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। वैश्वानरो देवता। १ विराट् त्रिष्टुप्। ५ निचृत्त्रिष्टुप्। ६ त्रिष्टुप्छन्दः। धैवतः स्वरः। २, ३ भुरिक् पङ्क्तिः। ४ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७ भुरिगार्चीजगतीछन्दः। निषादः स्वरः॥

अथ राजप्रजे परस्परं कथं वर्त्तेयातामित्याह॥

अब सात ऋचावाले नवम सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा प्रजा परस्पर कैसे वर्त्ताव करें, इस विषय को कहते हैं॥

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि॥ १॥

अहरिति। च। कृष्णम्। अहः। अर्जुनम्। च। वि। वर्तेते इति। रजसी इति। वेद्याभिः। वैश्वानरः। जायमानः। न। राजा। अव। अतिरत्। ज्योतिषा। अग्निः। तमांसि॥ १॥

पदार्थः-(अहः) दिनम् **(च)** **(कृष्णम्)** रात्रिः **(अहः)** व्याप्तिशीलम् **(अर्जुनम्)** ऋजुगत्यादिगुणम् **(च)** **(वि)** विरोधे **(वर्त्तेते)** **(रजसी)** रात्र्यहनी **(वेद्याभिः)** वेदितव्याभिः **(वैश्वानरः)** विश्वस्मिन् नरे नेतव्ये प्रकाशमानः **(जायमानः)** उत्पद्यमानः **(न)** इव **(राजा)** **(अव)** **(अतिरत्)** तरति **(ज्योतिषा)** प्रकाशेन **(अग्निः)** **(तमांसि)** रात्रीः॥ १॥

अन्वयः-हे मनुष्या! अहः कृष्णं चाऽहरर्जुनं च रजसी वेद्याभिस्सह वि वर्त्तेते राजा न जायमानो वैश्वानरोऽग्निर्ज्योतिषा तमांस्यवातिरत्॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा रात्रिदिने संयुक्ते वर्त्तेते तथैव राजप्रजे अनुकूले भवेतां यथा सूर्य्यः प्रकाशेनाऽन्धकारं निवर्त्तयति तथैव राजा विद्याविनयप्रकाशेनाऽन्धकारं निवर्त्तयेत्॥ १॥

पदार्थः-हे मनुष्यो **(अहः)** दिन **(कृष्णम्)** रात्रि **(च)** और **(अहः)** व्याप्तिशील **(अर्जुनम्)** सरलगमन आदि गुणों को **(च)** भी **(रजसी)** रात्रिदिन **(वेद्याभिः)** जानने योग्यों के साथ **(वि, वर्त्तेते)** विविध प्रकार वर्त्तते हैं और **(राजा)** राजा के **(न)** समान **(जायमानः)** उत्पन्न हुआ **(वैश्वानरः)** सम्पूर्ण करने योग्य कामों में प्रकाशमान **(अग्निः)** अग्नि **(ज्योतिषा)** प्रकाश से **(तमांसि)** रात्रियों का **(अव, अतिरत्)** उल्लङ्घन करता है॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे रात्रिदिन संयुक्त हैं, वैसे ही राजा और प्रजा अनुकूल हों और जैसे सूर्य्य प्रकाश से अन्धकार को निवृत्त करता है, वैसे ही राजा विद्या और विनय के प्रकाश से अविद्यारूप अन्धकार को निवृत्त करे॥ १॥

अथाऽपत्यं कस्य भवतीत्याह॥

अब अपत्य किसका होता है, इस विषय को कहते हैं॥

नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः।

कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा॥ २॥

नः। अहम्। तन्तुम्। नः। वि। जानामि। ओतुम्। नः। यम्। वयन्ति। सम्ऽअरे। अतमानाः। कस्य। स्वित्। पुत्रः। इह। वक्त्वानि। परः। वदाति। अवरेण। पित्रा॥ २॥

पदार्थः-(**न**) (**अहम्**) (**तन्तुम्**) विस्तारम् (**न**) इव (**वि**) (**जानामि**) (**ओतुम्**) रचयितुम् (**न**) (**यम्**) (**वयन्ति**) व्याप्नुवन्ति (**समरे**) स-ामे (**अतमानाः**) अतन्तः। अत्र व्यत्ययेनात्मनेपदम् (**कस्य**) (**स्वित्**) (**पुत्रः**) पवित्रः सुखप्रदो वा (**इह**) (**वक्त्वानि**) वक्तुं योग्यानि (**परः**) (**वदाति**) वदेत् (**अवरेण**) द्वितीयेन (**पित्रा**) पालकेनाऽऽचार्य्येण वा॥ २॥

अन्वयः-हे विद्वांसो! यं समरेऽतमाना न वयन्ति। अयमिह कस्य स्वित्पुत्रः परोऽवरेण पित्रा सह वक्त्वानि वदाति यमतमानाः समरे न वयन्ति तं तन्तुमोतुं चाहन्न वि जानामि॥ २॥

भावार्थः-विदुषामयं सिद्धान्तोऽस्ति योऽयं द्वाभ्यां जायते यस्य द्वे मातरौ द्वौ च पितरौ वर्तेते स कस्य पुत्र इति वयं न विजानीमः। अत्रायं सिद्धान्तो यथोत्पादकयोः पुत्रोऽस्ति तथाऽऽचार्यविद्ययोरपि द्विजो वर्त्तत इति सर्वे विजानन्तु॥ २॥

पदार्थः-हे विद्वान् जनो! (**यम्**) जिसको (**समरे**) संग्राम में (**अतमानाः**) घूमते हुए जन (**न**) जैसे वैसे (**वयन्ति**) व्याप्त होते हैं, यह (**इह**) यहाँ (**कस्य**) किसका (**स्वित्**) भी (**पुत्रः**) पवित्र और सुख देने वाला है (**परः**) अन्य (**अवरेण**) द्वितीय (**पित्रा**) पालक वा आचार्य के साथ (**वक्त्वानि**) कहने के योग्यों को (**वदाति**) कहे और जिसको घूमते हुए जन स-ाम में (**न**) नहीं व्याप्त होते हैं, उस (**तन्तुम्**) विस्तार को (**ओतुम्**) रचने को (**अहम्**) मैं (**न**) नहीं (**वि**) विशेष करके (**जानामि**) जानता हूँ॥ २॥

भावार्थः-विद्वानों का यह सिद्धान्त है कि जो दो से उत्पन्न होता है, जिसके दो माता और दो पिता हैं, वह किसका पुत्र है, यह हम लोग नहीं जानते हैं, ऐसा प्रश्न है। इस में सिद्धान्त यह है कि जैसे उत्पन्न करने वाले माता पिता का पुत्र है, वैसे ही आचार्य और विद्या का भी वह द्विज पुत्र है, ऐसा सब लोग जानो॥ २॥

पुनरपत्यविषमाह॥

फिर अपत्य विषय को कहते हैं॥

स इत्तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति।

य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन्॥ ३॥

सः। इत्। तन्तुम्। सः। वि। जानाति। ओतुम्। सः। वक्त्वानि। ऋतुऽथा। वदाति। यः। ईम्। चिकेतत्। अमृतस्य। गोपाः। अवः। चरन्। परः। अन्येन। पश्यन्॥ ३॥

पदार्थः-(सः) (इत्) एव **(तन्तुम्)** कारणम् **(सः) (वि) (जानाति) (ओतुम्)** रक्षकम् **(सः) (वक्त्वानि)** वक्तव्यानि **(ऋतुथा)** ऋतुष्विव **(वदाति)** वदेत् **(यः) (ईम्)** उदकमिव शुक्रम् **(चिकेतत्)** विजानाति **(अमृतस्य)** नित्यस्य पदार्थस्य **(गोपाः)** रक्षकः **(अवः)** अधस्तात् **(चरन्) (परः)** उपरिष्ठो द्वितीयः **(अन्येन) (पश्यन्)** समीक्षमाणः॥३॥

अन्वयः-हे मनुष्या! योऽमृतस्य गोपा अन्येन पश्यन्नवः परश्चरन्नीं चिकेतत्स इत्तन्तुं स ओतुं वि जानाति स ऋतुथा वक्त्वानि वदाति॥३॥

भावार्थः-ये ब्रह्मचर्य्येणाप्तेभ्यो विद्याशिक्षे प्राप्नुवन्ति त एवास्य जगतः पूर्णं कारणं ज्ञातुं ज्ञापयितुञ्च शक्नुवन्ति॥३॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(अमृतस्य)** नित्य पदार्थ का **(गोपाः)** रक्षक **(अन्येन)** अन्य से **(पश्यन्)** देखता हुआ **(अवः)** नीचे **(परः)** ऊपर स्थित दूसरा **(चरन्)** चलाता हुआ **(ईम्)** जल के सदृश शुक्र को **(चिकेतत्)** जानता है **(सः, इत्)** वही **(तन्तुम्)** कारण को **(सः)** वह **(ओतुम्)** रक्षक को **(वि, जानाति)** विशेष करके जानता है **(सः)** वह **(ऋतुथा)** जैसे काल-काल में, वैसे **(वक्त्वानि)** कथन करने योग्यों को **(वदाति)** कहे॥३॥

भावार्थः-जो ब्रह्मचर्य्य के द्वारा यथार्थवक्ताओं से विद्या और शिक्षा को प्राप्त होते हैं, वे ही इस जगत् के पूर्ण कारण के पूर्ण कारण को जानने को समर्थ होते हैं॥३॥

अथास्मिन् देहे द्वौ जीवात्मपरमात्मानौ वर्तेते इत्याह॥

अब इस देह में दो जीवात्मा और परमात्मा वर्त्तमान हैं,
इस विषय को कहते हैं॥

अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः॥४॥

अयम्। होता। प्रथमः। पश्यत। इमम्। इदम्। ज्योतिः। अमृतम्। मर्त्येषु। अयम्। सः। जज्ञे। ध्रुवः। आ। निऽसत्तः। अमर्त्यः। तन्वा। वर्धमानः॥४॥

पदार्थः-(अयम्) (होता) दाता ग्रहीता वा **(प्रथमः)** आदिमः **(पश्यत) (इमम्) (इदम्)** प्रत्यक्षम् **(ज्योतिः)** सूर्य्य इव स्वप्रकाशं चेतनं परमात्मानम् **(अमृतम्)** नाशरहितम् **(मर्त्येषु)** मरणधर्मेषु शरीरेषु **(अयम्) (सः) (जज्ञे)** जायते **(ध्रुवः)** निश्चलो दृढः **(आ) (निषत्तः)** निषण्णः **(अमर्त्यः)** मरणधर्मरहितः **(तन्वा)** शरीरेण **(वर्धमानः)** यो वर्धते सः॥४॥

अन्वयः-हे विद्वांसो! यो ध्रुवो निषत्तः प्रथमो होताऽयं मर्त्येष्विदममृतं ज्योतिः परमात्मास्ति तमिमं पश्यत योऽयममर्त्यस्तन्वा वर्धमाना आ जज्ञे स जीवोऽस्तीति पश्यत॥४॥

भावार्थः-हे मनुष्या! अस्मिञ्छरीरे द्वौ चेतनौ नित्यौ जीवात्मपरमात्मानौ वर्त्तेते तयोरेकोऽल्पोऽल्पज्ञोऽल्पदेशस्थो जीवः शरीरं धृत्वा जायते वर्धते परिणमते चाऽपक्षीयते पापपुण्यफलं च भुङ्क्ते अपरः परमेश्वरो ध्रुवः सर्वज्ञः कर्म्मफलसम्बन्धरहितोऽस्तीति निश्चिनुत॥४॥

पदार्थः-हे विद्वान् जनो! जो **(ध्रुवः)** निश्चल दृढ़ **(निषत्तः)** स्थित **(प्रथमः)** पहिला **(होता)** देने वा ग्रहण करने वाला **(अयम्)** यह और **(मर्त्येषु)** मरणधर्म्मयुक्त शरीरों में **(इदम्)** इस प्रत्यक्ष **(अमृतम्)** नाश से रहित **(ज्योतिः)** सूर्य्य के सदृश अपने से प्रकाशित चेतन परमात्मा है उस **(इमम्)** इस को **(पश्यत)** देखिये और जो **(अयम्)** यह **(अमर्त्यः)** मरणधर्म्म से रहित **(तन्वा)** शरीर से **(वर्धमानः)** बढ़ता हुआ **(आ)** चारों ओर से **(जज्ञे)** प्रकट होता है **(सः)** वह जीव है, ऐसा देखो॥४॥

भावार्थः-हे मनुष्यो! इस शरीर में दो चेतन नित्य हुए जीवात्मा और परमात्मा वर्त्तमान हैं। उन दोनों में एक अल्प, और अल्पदेशस्थ जीव है, वह शरीर को धारण करके प्रकट होता, वृद्धि को प्राप्त होता और परिणाम को प्राप्त होता तथा हीन दशा को प्राप्त होता, पाप और पुण्य के फल का भोग करता है। द्वितीय परमेश्वर ध्रुव, निश्चल, सर्वज्ञ, कर्म्मफल के सम्बन्ध से रहित है, ऐसा तुम लोग निश्चय करो॥४॥

अस्मिञ्छरीरे किं किं विज्ञेयमित्याह॥

इस शरीर में क्या-क्या जानने योग्य है, इस विषय को कहते हैं॥

ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु॥५॥

ध्रुवम्। ज्योतिः। निऽहितम्। दृशये। कम्। मनः। जविष्ठम्। पतयत्ऽसु। अन्तरिति। विश्वे। देवाः। सऽमनसः। सऽकेताः। एकम्। क्रतुम्। अभि। वि। यन्ति। साधु॥५॥

पदार्थः-**(ध्रुवम्)** निश्चलम् **(ज्योतिः)** स्वप्रकाशं सर्वप्रकाशकं वा **(निहितम्)** स्थितम् **(दृशये)** दर्शनाय **(कम्)** सुखस्वरूपम् **(मनः)** अन्तःकरणवृत्तिः **(जविष्ठम्)** वेगवत्तमम् **(पतयत्सु)** पतिरिवाचरत्सु **(अन्तः)** आभ्यन्तरे **(विश्वे)** सर्वे **(देवाः)** स्वस्वविषयप्रकाशकानि श्रोत्रादीनीन्द्रियाणि **(समनसः)** समानं सहकारि साधनं मनो येषान्ते **(सकेताः)** समानं केतः प्रज्ञा येषान्ते **(एकम्)** असहायम् **(क्रतुम्)** जीवस्य प्रज्ञानम् **(अभि)** आभिमुख्ये **(वि)** **(यन्ति)** प्राप्नुवन्ति **(साधु)**॥५॥

अन्वयः-हे मनुष्या! यद्दृशये ध्रुवं निहितं कं ज्योतिर्ब्रह्मास्ति तदाधारे यज्जविष्ठं पतयत्स्वन्तर्वर्त्तमानं मनोऽस्ति तदाश्रयेण समनसः सकेता विश्वे देवा एकं क्रतुं साध्वभि वि यन्तीति यूयं विजानीत॥५॥

भावार्थः-हे मनुष्या! अस्मिञ्छरीरे सच्चिदानन्दलक्षणं स्वप्रकाशं ब्रह्म द्वितीयो जीवस्तृतीयं मनश्चतुर्थानीन्द्रियाणि पञ्चमाः प्राणाः षष्ठं शरीरञ्च वर्त्तत एवं सति सर्वे व्यवहाराः सिद्धा जायन्ते येषां मध्यात्सर्वाधार ईश्वरो देहान्तःकरणप्राणेन्द्रियधर्त्ता जीवादीनामधिष्ठानं शरीरमिति विजानीत॥५॥

पदार्थः-हे मनुष्यो! जो **(दृशये)** दर्शन के लिये **(ध्रुवम्)** निश्चल **(निहितम्)** स्थित **(कम्)** सुखस्वरूप **(ज्योतिः)** अपने से प्रकाशित और सब का प्रकाशक ब्रह्म है, उसके आधार में जो **(जविष्ठम्)** अतिवेगयुक्त **(पतयत्सु)** पति सदृश के आचरण करते हुओं में **(अन्तः)** मध्य में वर्त्तमान **(मनः)** अन्तःकरण का व्यापार है, उसके आश्रय से **(समनसः)** सहकारि साधन मन जिनका और **(सकेताः)** तुल्य बुद्धि जिनकी वे **(विश्वे)** संपूर्ण **(देवाः)** अपने अपने विषयों को प्रकाशित करने वाली श्रोत्र आदि इन्द्रियाँ **(एकम्)** सहायरहित **(ऋतुम्)** जीव के प्रज्ञान को **(साधु)** उत्तम प्रकार **(अभि)** सन्मुख **(वि)** विशेष करके **(यन्ति)** प्राप्त होते हैं, यह आप लोग जानो॥५॥

भावार्थः-हे मनुष्यो! इस शरीर में सच्चिदानन्दस्वरूप अपने से प्रकाशित ब्रह्म, द्वितीय जीव, तृतीय मन, चौथी इन्द्रियाँ, पांचवें प्राण, छठा शरीर वर्त्तमान है, ऐसा होने पर सम्पूर्ण व्यवहार सिद्ध होते हैं। जिनके मध्य से सब का आधार ईश्वर, देह, अन्तःकरण प्राण और इन्द्रियों का धारण करने वाला और जीवादिकों का अधिष्ठान शरीर है, यह जानो॥५॥

अथ मनुष्यशरीरे किं किं विज्ञातव्यमित्याह॥

अब मनुष्य के शरीर में क्या-क्या जानने योग्य है, इस विषय को कहते हैं॥

वि मे॒ कर्णा॑ पतयतो॒ वि चक्षु॒र्वी३॒॑दं ज्योति॒र्हृद॑य॒ आहि॑तं॒ यत्।
वि मे॒ मन॑श्चरति दू॒रआ॑धी॒: किं स्वि॑द्वक्ष्यामि॒ किमु॒ नू म॑निष्ये॥६॥

वि। मे॒। कर्णा॑। पत॒यत॒:। वि। चक्षु॑:। वि। इ॒दम्। ज्योति॑:। हृद॑ये। आऽहि॑तम्। यत्। वि। मे॒। मन॑:। च॒र॒ति॒। दू॒रेऽआ॑धी:। किम्। स्वि॒त्। व॒क्ष्यामि॑। किम्। ऊँ॒ इति॑। नु। म॒नि॒ष्ये॒॥६॥

पदार्थः-(**वि**) (**मे**) मम (**कर्णा**) कर्णौ (**पतयतः**) पतिरिवाऽऽचरतः (**वि**) (**चक्षुः**) चष्टे येन तच्चक्षुः (**वि**) (**इदम्**) (**ज्योतिः**) प्रकाशकम् (**हृदये**) (**आहितम्**) स्थितम् (**यत्**) (**वि**) (**मे**) मम (**मनः**) अन्तःकरणम् (**चरति**) गच्छति (**दूरआधीः**) दूरस्थानां पदार्थानां समन्ताच्चिन्तकम् (**किम्**) (**स्वित्**) अपि (**वक्ष्यामि**) (**किम्**) (**उ**) (**नू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**मनिष्ये**) विचारं करिष्ये॥६॥

अन्वयः-हे विद्वांसो! यद्यौ मे कर्णा वि पतयतो यन्मे चक्षुर्वि चरति यन्मे हृदय इदमाहितं ज्योतिर्वि चरति यन्मे दूरआधीर्मनो वि चरति येन तदहं किं स्विद्वक्ष्यामि किमु नू मनिष्य इति विचारयामि तत्सर्वं यूयं विज्ञापयत॥६॥

भावार्थः-हे विद्वांसो! योऽहं यानि च मम साधनानि तत्सर्वं मां बोधयत॥६॥

पदार्थः-हे विद्वान् जनो! **(यत्)** जो **(मे)** मेरे **(कर्णा)** श्रोत्र **(वि)** विशेष करके **(पतयतः)** स्वामी के सदृश आचरण करते हुए और जो मेरा **(चक्षुः)** देखने की चेष्टा करता है जिससे वह चक्षु **(वि)** विशेष करके **(चरति)** चलता है और जो **(मे)** मेरे **(हृदये)** हृदय में **(इदम्)** यह **(आहितम्)** स्थित **(ज्योतिः)** प्रकाशक **(वि)** विशेष करके चलाता है और जो मेरा **(दूर आधीः)** दूरस्थ पदार्थों का सब प्रकार से

चिन्तक (**मनः**) अन्तःकरण (**वि**) विशेष करके चलता है, जिससे उसको मैं (**किम्**) क्या (**स्वित्**) भी (**वक्ष्यामि**) कहूँगा और (**किम्**) क्या (**उ**) और (**नू**) शीघ्र (**मनिष्ये**) विचार करूँगा यह विचारता हूँ, उस सब को आप लोग जनाइये॥६॥

भावार्थः-हे विद्वान् जनो! मैं और जो मेरे साधन हैं, उस सब व्यवहार को मेरे लिये जनाइये॥६॥

मनुष्यैः कस्माद्भीत्वा पापाचरणं नाचरणीयमित्याह॥

मनुष्यों को किससे डर कर पापाचरण का आचरण न करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

विश्वे॑ दे॒वा अ॑नमस्यन् भिया॒नास्त्वाम॑ग्ने॒ तम॑सि तस्थि॒वांस॑म्।
वै॒श्वा॒न॒रोऽव॑तूत॒ये नोऽम॑र्त्योऽवतू॒तये॑ नः॥७॥ ११॥

विश्वे॑। दे॒वाः॒। अ॒न॒म॒स्य॒न्। भि॒या॒नाः॒। त्वाम्। अ॒ग्ने॒। तम॑सि। त॒स्थि॒ऽवांस॑म्। वै॒श्वा॒न॒रः॒। अ॒व॒तु॒। ऊ॒तये॑। नः॒। अम॑र्त्यः॒। अ॒व॒तु॒। ऊ॒तये॑। नः॒॥७॥

पदार्थः-(**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**अनमस्यन्**) प्रह्वीभूता भवन्ति (**भियानाः**) भयं प्राप्ताः (**त्वाम्**) परमात्माननिव विद्युद्युक्तं प्राणमिव परमात्मनम् (**अग्ने**) पावकेश्वर (**तमसि**) अन्धकारे (**तस्थिवांसम्**) प्रतिष्ठन्तम् (**वैश्वानरः**) विश्वस्य संसारस्य प्रकाशकः (**अवतु**) रक्षतु (**ऊतये**) रक्षणाद्याय (**नः**) अस्मान् (**अमर्त्यः**) मृत्युधर्मरहितः (**अवतु**) (**ऊतये**) (**नः**) अस्मान्॥७॥

अन्वयः-हे अग्ने! परमात्मँस्तमसि तस्थिवांसं त्वां पृथिव्यादय इव विश्वे देवा भियाना अनमस्यन्त्स वैश्वानरोऽमर्त्यो भवानूतये नोऽस्मानवतूतये नोऽस्मानवतु॥७॥

भावार्थः-हे मनुष्या! यथा प्राणविद्युतौ प्राप्य सर्वेषां पृथिव्यादीनां स्थितिर्वर्त्तते यथाग्नेः सर्वे प्राणिनो बिभ्यति तथैव सर्वव्यापिनं सर्वान्तर्यामिणं परमात्मानं मत्वा पापाचरणाद्विद्वांसो बिभ्यतीति सर्वेऽस्माद् बिभ्यत्विति॥७॥

अत्राऽहोरात्र्यपत्यजीवपरमात्मादीनां स्थितिवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति नवमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) प्रकाशक परमात्मन्! (**तमसि**) अन्धकार में (**तस्थिवांसम्**) स्थित (**त्वाम्**) परमात्मा के सदृश बिजुली से युक्त को वा प्राण के सदृश परमात्मा को जैसे पृथिवी आदि, वैसे (**विश्वे**) सम्पूर्ण (**देवाः**) विद्वान् जन (**भियानाः**) भय को प्राप्त हुए (**अनमस्यन्**) नम्र होते हैं वह (**वैश्वानरः**) सम्पूर्ण संसार के प्रकाशक (**अमर्त्यः**) मृत्यु धर्म से रहित आप (**ऊतये**) रक्षा आदि के लिये (**नः**) हम लोगों की (**अवतु**) रक्षा कीजिये और (**ऊतये**) रक्षा आदि के लिये (**नः**) हम लोगों की (**अवतु**) रक्षा कीजिये॥७॥

भावार्थः-हे मनुष्यो! जैसे प्राण और बिजुली को प्राप्त होकर सम्पूर्ण पृथिवी आदिकों की स्थिति है और जैसे अग्नि से सम्पूर्ण प्राणी डरते हैं, वैसे ही सर्वत्र व्यापी और सब के अन्तर्यामी परमात्मा को मान के पाप के आचरण से विद्वान् जन डरते हैं, इस निमित्त से सब जन इससे डरें॥७॥

इस सूक्त में दिनरात्रि, अपत्य, जीव, परमात्मादिकों की स्थिति का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह नवम सूक्त और ग्यारहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तर्चस्य दशमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १ त्रिष्टुप्। २, ३, ६ निचृत्त्रिष्टुप्। ५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ आर्षी पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७ प्राजापत्या बृहती छन्दः। मध्यमः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम्।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः॥ १॥

पुरः। वः। मन्द्रम्। दिव्यम्। सुऽवृक्तिम्। प्रऽयति। यज्ञे। अग्निम्। अध्वरे। दधिध्वम्। पुरः। उक्थेभिः। सः। हि। नः। विभाऽवा। सुऽअध्वरा। करति। जातऽवेदाः॥ १॥

पदार्थः-(पुरः) पुरस्तात् **(वः)** युष्माकम् **(मन्द्रम्)** आनन्दप्रदं प्रशंसनीयं वा **(दिव्यम्)** शुद्धम् **(सुवृक्तिम्)** सुष्ठु व्रजन्ति येन तम् **(प्रयति)** प्रयत्नसाध्ये **(यज्ञे)** सङ्गतिमये **(अग्निम्)** विद्युदादिस्वरूपम् **(अध्वरे)** अहिंसनीये **(दधिध्वम्)** **(पुरः)** पुरस्तात् **(उक्थेभिः)** वक्तुमर्हैः **(सः)** **(हि)** यतः **(नः)** अस्मान् **(विभावा)** विशेषेण प्रकाशकः **(स्वध्वरा)** सुष्ठु अहिंसादिधर्मयुक्तान् **(करति)** कुर्य्यात् **(जातवेदाः)** यो जातान् सर्वान् वेत्ति सः॥ १॥

अन्वयः-हे मनुष्या! यूयं वः प्रयत्यध्वरे यज्ञ उक्थेभिः पुरो मन्द्रं दिव्यं सुवृक्तिमग्निं दधिध्वं यो हि विभावा जातवेदा नोऽस्मान् पुरः स्वध्वरा करति स ह्यस्माभिः सत्कर्तव्योऽस्ति॥ १॥

भावार्थः-हे मनुष्या! यथर्त्विजो यज्ञेऽग्निं पुरस्तात् संस्थाप्य तत्राहुतिं दत्त्वा जगदुपकुर्वन्ति तथैवात्मनः पुरः परमात्मानं संस्थाप्य तत्र मनआदीनि हुत्वा साक्षात्कृत्य तदुपदेशेन जगदुपकारं कुर्वन्तु॥ १॥

पदार्थः-हे मनुष्यो! आप लोग **(वः)** आप लोगों के **(प्रयति)** प्रयत्न से साध्य **(अध्वरे)** अहिंसनीय **(यज्ञे)** सङ्गतिस्वरूप यज्ञ में **(उक्थेभिः)** कहने के योग्यों से **(पुरः)** प्रथम **(मन्द्रम्)** आनन्द देनेवाले वा प्रशंसनीय **(दिव्यम्)** शुद्ध **(सुवृक्तिम्)** उत्तम प्रकार चलते हैं जिससे उस **(अग्निम्)** विद्युदादिस्वरूप अग्नि को **(दधिध्वम्)** धारण करिये और जो **(हि)** निश्चय करके **(विभावा)** विशेष करके प्रकाशक **(जातवेदाः)** प्रकट हुओं को जाननेवाला **(नः)** हम लोगों को **(पुरः)** प्रथम **(स्वध्वरा)** उत्तम प्रकार अहिंसा आदि धर्मों से युक्त **(करति)** करे **(सः)** वही हम लोगों से सत्कार करने योग्य है॥ १॥

भावार्थः-हे मनुष्यो! जैसे यज्ञ करने वाले यज्ञ में अग्नि को प्रथम उत्तम प्रकार स्थापित करके उस अग्नि में आहुति देकर संसार का उपकार करते हैं, वैसे ही आत्मा के आगे परमात्मा को संस्थापित करके वहाँ मन आदि का हवन करके और प्रत्यक्ष करके उसके उपदेश से जगत् का उपकार करो॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तमु॑ द्यु॒मः पु॑र्वणीक होत॒रग्ने॑ अ॒ग्निभि॒र्मनु॑ष इधा॒नः।

स्तोमं॒ यम॑स्मै म॒मते॑व शू॒षं घृ॒तं न शुचि॑ म॒तय॑: पवन्ते॥ २॥

तम्। ऊँ॒ इति॑। द्यु॒ऽम॒:। पु॒रु॒ऽअ॒नी॒क। हो॒त॒:। अग्ने॑। अ॒ग्निऽभि॑:। मनु॑ष:। इ॒धा॒न:। स्तोम॑म्। यम्। अ॒स्मै॒। म॒मता॑ऽइव। शू॒षम्। घृ॒तम्। न। शुचि॑। म॒तय॑:। प॒व॒न्ते॒॥ २॥

पदार्थ:-(तम्) अग्निम् **(उ)** **(द्युम:)** प्रकाशवान् **(पुर्वणीक)** बहूनां सम्भाजक **(होत:)** धात: **(अग्ने)** अग्निरिव विद्वन् **(अग्निभि:)** पावकै: **(मनुष:)** मनुष्यान् **(इधान:)** दीपयन् **(स्तोमम्)** प्रशंसाम् **(यम्)** **(अस्मै)** **(ममतेव)** **(शूष्म)** बलम् **(घृतम्)** **(न)** इव **(शुचि)** **(मतय:)** मनुष्या: **(पवन्ते)**॥ २॥

अन्वय:-हे पुर्वणीक द्युमो होतरग्ने! मनुष इधानस्त्वं मतयश्च ममतेवऽग्निभिरस्मै शुचि घृतं शूषं न यं पवन्ते तमु स्तोमं शृणु॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। मनुष्या येन पदार्थान् सेधयन्ति सोऽग्नि: सर्वै: कार्य्यसाधको वेदितव्य:॥ २॥

पदार्थ:-हे **(पुर्वणीक)** बहुतों को संविभाग करने और **(द्युम:)** प्रकाशवान् **(होत:)** धारण करने वाले **(अग्ने)** अग्नि के सदृश विद्वन्! **(मनुष:)** मनुष्यों को **(इधान:)** प्रकाशित करते हुए आप और **(मतय:)** मननशील अन्य मनुष्य **(ममतेव)** ममता के समान **(अग्निभि:)** अग्नियों से **(अस्मै)** इसके लिये **(शुचि)** पवित्र **(घृतम्)** घृत वा **(शूषम्)** बल के **(न)** समान **(यम्)** जिसको **(पवन्ते)** पवित्र करते हैं **(तम्, उ)** उसी अग्नि की **(स्तोमम्)** प्रशंसा को सुनिये॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। मनुष्य जिससे पदार्थों को सिद्ध करते हैं, वह कार्य्यसाधक अग्नि सब को जानने योग्य है॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

पी॒पाय॒ स: श्रव॑सा॒ मर्त्ये॑षु॒ यो अ॒ग्नये॑ द॒दाश॒ विप्र॑ उ॒क्थै:।

चि॒त्राभि॒स्तमू॒तिभि॑श्चि॒त्रशो॑चिर्व्र॒जस्य॑ साता गो॒मतो॑ दधाति॥ ३॥

पी॒पाय॑। स:। श्रव॑सा। मर्त्ये॑षु। य:। अ॒ग्नये॑। द॒दाश॑। विप्र॑:। उ॒क्थै:। चि॒त्राभि॑:। तम्। ऊ॒तिऽभि॑:। चि॒त्रऽशो॑चि:। व्र॒जस्य॑। सा॒ता। गोऽम॑त:। दु॒धा॒ति॒॥ ३॥

पदार्थ:-(पीपाय) वर्धयति **(स:)** **(श्रवसा)** अन्नाद्येन **(मर्त्येषु)** मनुष्यादिषु **(य:)** **(अग्नये)** **(ददाश)** ददाति **(विप्र:)** मेधावी **(उक्थै:)** प्रशंसितै: कर्म्मभि: **(चित्राभि:)** अद्भुताभि: **(तम्)** **(ऊतिभि:)**

रक्षादिभिः **(चित्रशोचिः)** चित्रं विविधं शोचिः प्रकाशो यस्य सः **(व्रजस्य)** व्रजन्ति घना यस्मिंस्तस्य मेघस्य **(साता)** स- ामेण **(गोमतः)** अतिशयितस्तोता **(दधाति)**॥३॥

अन्वयः-हे विद्वांसो! यो गोमतश्चित्रशोचिर्विप्र उक्थैश्चित्राभिरूतिभिश्च मर्त्येष्वग्नये श्रवसा पीपाय ददाश स व्रजस्य साता दधाति तं यूयं विजानीत॥३॥

भावार्थः-हे मनुष्या! यस्मिन्नग्नावद्भुता गुणकर्म्मस्वभावाः सन्ति तं यथावद्विदित्वा सम्प्रयुङ्ध्वम्॥३॥

पदार्थः-हे विद्वान् जनो! **(यः)** जो **(गोमतः)** अतिशय स्तुति करनेवाला और **(चित्रशोचिः)** अनेक प्रकार का प्रकाश जिसका ऐसा **(विप्रः)** बुद्धिमान् **(उक्थैः)** प्रशंसित कर्मों और **(चित्राभिः)** अद्भुत **(ऊतिभिः)** रक्षादिकों से **(मर्त्येषु)** मनुष्य आदिकों में **(अग्नये)** अग्नि के लिये **(श्रवसा)** अन्नादि से **(पीपाय)** बढ़ाता और **(ददाश)** देता है **(सः)** वह **(व्रजस्य)** चलते हैं सघन जल जिसमें उस मेघ के **(साता)** संग्राम से **(दधाति)** धारण करता है **(तम्)** उसको आप लोग जानिये॥३॥

भावार्थः-हे मनुष्यो! जिस अग्नि में अद्भुत गुण, कर्म्म, स्वभाव हैं, उसको अच्छे प्रकार जान कर संप्रयोग करो अर्थात् काम में लाओ॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा।

अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः॥४॥

आ। यः। पप्रौ। जायमानः। उर्वी इति। दूरेऽदृशा। भासा। कृष्णऽअध्वा। अध। बहु। चित्। तमः। ऊर्म्यायाः। तिरः। शोचिषा। ददृशे। पावकः॥४॥

पदार्थः-**(आ)** समन्तात् **(यः)** **(पप्रौ)** व्याप्नोति **(जायमानः)** प्रकटः सन् **(ऊर्वी)** द्यावापृथिव्यौ **(दूरेदृशा)** यया दूरे पश्यन्ति तया **(भासा)** दीप्त्या **(कृष्णाध्वा)** कृष्णः कर्षितोऽध्वा मार्गो येन **(अध)** आनन्तर्ये **(बहु)** **(चित्)** अपि **(तमः)** अन्धकारः **(ऊर्म्यायाः)** रात्र्याः। **ऊर्म्येति रात्रिनाम।** (निघं०१.७) **(तिरः)** तिरोभावे **(शोचिषा)** प्रकाशेन **(ददृशे)** दृश्यते **(पावकः)** पवित्रकर्त्ता॥४॥

अन्वयः-हे मनुष्या! यो जायमानो कृष्णाध्वा दूरेदृशा भासोर्वी आ पप्रावध ऊर्म्याया बहु चित्तमः शोचिषा तिरस्करोति पावक सन् ददृशे तं यूयं विजानीत॥४॥

भावार्थः-मनुष्यैरवश्यं विद्युदग्निर्वेदितव्यः॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(जायमानः)** प्रकट हुआ **(कृष्णाध्वा)** कर्षित किया अर्थात् जिसे हल से जोतें, वैसे पहियों से सतीरा मार्ग जिसने वह **(दूरेदृशा)** जिससे दूर देखते हैं उस **(भासा)** प्रकाश से **(उर्वी)** अन्तरिक्ष और पृथिवी को **(आ)** चारों ओर से **(पप्रौ)** व्याप्त होता है और **(अध)** इसके अनन्तर **(ऊर्म्यायाः)** रात्रि का **(बहु)** बहुत **(चित्)** भी **(तमः)** अन्धकार **(शोचिषा)** प्रकाश से **(तिरः)** तिरस्कार करता है और **(पावकः)** पवित्रकर्त्ता हुआ **(ददृशे)** देखा जाता है, उसको आप लोग जानिये॥४॥

भावार्थः-मनुष्यों को चाहिये कि अवश्य बिजुलीरूप अग्नि को जानें॥४॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

नू नश्चित्र पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि।

ये राधसा श्रवसा चात्यन्यान्त्सुवीर्येभिश्चाभि सन्ति जनान्॥५॥

नु। नः। चित्रम्। पुरुऽवाजाभिः। ऊती। अग्ने। रयिम्। मघवत्ऽभ्यः। च। धेहि। ये। राधसा। श्रवसा। च। अति। अन्यान्। सुऽवीर्येभिः। च। अभि। सन्ति। जनान्॥५॥

पदार्थः-(**नू**) सद्यः (**नः**) अस्मभ्यम् (**चित्रम्**) अद्भुतम् (**पुरुवाजाभिः**) बहुज्ञानपुरुषार्थयुक्ताभिः (**ऊती**) रक्षादिक्रियाभिः (**अग्ने**) आप्तविद्वन् (**रयिम्**) धनम् (**मघवद्भ्यः**) धनाढ्येभ्यः (**च**) (**धेहि**) (**ये**) (**राधसा**) धनेन (**श्रवसा**) अन्नादिना (**च**) (**अति**) (**अन्यान्**) (**सुवीर्य्येभिः**) सुष्ठु वीर्य्यं बलं पराक्रमो वा येषान्तैः (**च**) (**अभि**) आभिमुख्ये (**सन्ति**) (**जनान्**) मनुष्यान्॥५॥

अन्वयः-हे अग्ने! त्वं पुरुवाजाभिरूती नो मघवद्भ्यश्च चित्रं रयिं नू धेहि ये सुवीर्य्येभिः राधसा श्रवसा चान्याञ्जनान्दधमाना अभि सन्ति तेऽति प्रतिष्ठां च लभन्ते॥५॥

भावार्थः-हे मनुष्या! ये युष्मभ्यं विद्यां श्रियं च दधति तेषां यूयमतिप्रतिष्ठां कुरुत॥५॥

पदार्थः-हे (**अग्ने**) यथार्थवक्ता विद्वन्! आप (**पुरुवाजाभिः**) बहुत ज्ञान और पुरुषार्थ से युक्त (**ऊती**) रक्षा आदि क्रियाओं से (**नः**) हम लोगों और (**मघवद्भ्यः**) धन से युक्त जनों के लिये (**च**) भी (**चित्रम्**) अद्भुत (**रयिम्**) धन को (**नू**) शीघ्र (**धेहि**) धारण कीजिये (**ये**) जो (**सुवीर्य्येभिः**) श्रेष्ठ बल वा पराक्रम जिनके उन और (**राधसा**) धन और (**श्रवसा**) अन्न आदि से (**च**) भी (**अन्यान्**) अन्य (**जनान्**) मनुष्यों को धारण करते हुए (**अभि**) सन्मुख (**सन्ति**) हैं, वे (**अति**) अत्यन्त प्रतिष्ठा को (**च**) भी प्राप्त होते हैं॥५॥

भावार्थः-हे मनुष्यो! जो आप लोगों के लिये विद्या और लक्ष्मी को धारण करते हैं, उनकी आप लोग अत्यन्त प्रतिष्ठा करो॥५॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान्।

भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ॥६॥

इमम्। यज्ञम्। चनः। धाः। अग्ने। उशन्। यम्। ते। आसानः। जुहुते। हविष्मान्। भरत्ऽवाजेषु। दधिषे। सुऽवृक्तिम्। अवीः। वाजस्य। गध्यस्य। सातौ॥६॥

पदार्थः-(इमम्) (**यज्ञम्**) परोपकाराख्यम् (**चनः**) अन्नादिकम् (**धाः**) धेहि (**अग्ने**) पुरुषार्थिन् विद्वन् (**उशन्**) कामयमानः (**यम्**) (**ते**) तव (**आसानः**) आसीनः (**जुहुते**) जुहोति (**हविष्मान्**) बहूनि हवींषि दातव्यानि भोक्तव्यानि विद्यन्ते येषु (**भरद्वाजेषु**) ये वाजानन्नादीन् भरन्ति तेषु (**दधिषे**) (**सुवृक्तिम्**) सुष्ठु व्रजन्ति यस्मिन्मार्गे तम् (**अवीः**) रक्षेः (**वाजस्य**) विज्ञानादेः (**गध्यस्य**) अभिकाङ्क्षितुं योग्यस्य (**सातौ**) स- ामे॥६॥

अन्वयः-हे अग्ने! त्वं यं यज्ञमुशञ्चनो धा आसानो हविष्मान्त्सम्भवाञ्जुहुत इमं गध्यस्य वाजस्य सातावबीर्भरद्वाजेषु सुवृक्तिं दधिषे तस्य ते सर्वं सुखं सुगमं जायेत॥६॥

भावार्थः-ये परोपकारं कुर्वन्ति तेषामेवाभीष्टा स्वार्थसिद्धिर्जायते॥६॥

पदार्थः-हे (**अग्ने**) पुरुषार्थी विद्वन्! आप (**यम्**) जिस (**यज्ञम्**) परोपकार नामक यज्ञ की (**उशन्**) कामना करते हुए (**चनः**) अन्न आदि को (**धाः**) धारण करें और (**आसानः**) बैठे हुए (**हविष्मान्**) बहुत देने और भोग करने योग्य पदार्थ जिनमें वह आप (**जुहुते**) हवन करते हैं (**इमम्**) इसकी (**गध्यस्य**) अभिकांक्षा करने योग्य (**वाजस्य**) विज्ञान आदि के (**सातौ**) संग्राम में (**अवीः**) रक्षा कीजिये और (**भरद्वाजेषु**) अन्न आदि को धारण करने वालों में (**सुवृक्तिम्**) उत्तम प्रकार चलते हैं जिसमें उस मार्ग को (**दधिषे**) धारण कीजिये उन (**ते**) आपका सम्पूर्ण सुख सुगम होजाये॥६॥

भावार्थः-जो परोपकार करते हैं, उनको ही अभीष्ट स्वार्थसिद्धि होती है॥६॥

पुनर्विद्वद्विषयमाह॥

फिर विद्वद्विषय को कहते हैं॥

वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः॥७॥१२॥

वि। द्वेषांसि। इनुहि। वर्धय। इळाम्। मदेम। शतऽहिमाः। सुऽवीराः॥७॥

पदार्थः-(**वि**) विशेषे (**द्वेषांसि**) द्वेषयुक्तानि कर्म्माणि (**इनुहि**) व्याप्नुहि (**वर्धय**) (**इळाम्**) वाचमन्नं वा (**मदेम**) आनन्देम (**शतहिमाः**) शतं वर्षाणि (**सुवीराः**) शोभना वीरा येषान्ते॥७॥

अन्वयः-हे अग्ने! विद्वंस्त्वं द्वेषांसि त्यज त्याजयेळा वीनुहि। अस्मान् वर्धय यतो वयं शतहिमाः सुवीराः सन्तो मदेम॥७॥

भावार्थः-विद्वद्भिस्तत्कर्म्म कर्त्तव्यं कारयितव्यं च येन मनुष्याणां दोषनिवृत्तिर्बुद्धिबलायूंषि च वर्धेरन्॥७॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति दशमं सूक्तं द्वादशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे अग्नि के समान परोपकारसाधक विद्वन्! आप **(द्वेषांसि)** द्वेष से युक्त कर्म्मों का त्याग करिये कराइये और **(इळाम्)** वाणी वा अन्न को **(वि)** विशेष करके **(इनुहि)** व्याप्त होओ और हम लोगों की **(वर्धय)** वृद्धि कीजिये जिससे हम लोग **(शतहिमाः)** सौ वर्ष पर्यन्त **(सुवीराः)** अच्छे वीर पुरुषों से युक्त होकर **(मदेम)** आनन्द करें॥७॥

भावार्थः-विद्वानों को चाहिये कि वह कर्म्म करें और करावें, जिससे मनुष्यों के दोषों की निवृत्ति और बुद्धि, बल तथा अवस्था की वृद्धि होवे॥७॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह दशवां सूक्त और बारहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्यैकादशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ३, ५ निचृत्त्रिष्टुप्। ४, ६ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

अब छः ऋचावाले ग्यारवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति।
आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः॥ १॥

यजस्व। होतः। इषितः। यजीयान्। अग्ने। बाधः। मरुताम्। न। प्रऽयुक्ति। आ। नः। मित्रावरुणा। नासत्या। द्यावा। होत्राय। पृथिवी इति। ववृत्याः॥ १॥

पदार्थः-(यजस्व) सङ्गमय **(होतः)** दातः **(इषितः)** प्रेरितः **(यजीयान्)** अतिशयेन यष्टा **(अग्ने)** अग्निरिव विद्वन् **(बाधः)** निरोधः **(मरुताम्)** वायूनामिव मनुष्याणाम् **(न)** इव **(प्रयुक्ति)** प्रयुञ्जते यस्मिंस्तत् कर्म्म **(आ)** **(नः)** अस्मान् **(मित्रावरुणा)** प्राणोदानाविवाऽध्यापकोपदेशकौ **(नासत्या)** अविद्यमानासत्याचरणौ **(द्यावा)** **(होत्राय)** आदानाय दानाय वा **(पृथिवी)** **(ववृत्याः)** वर्त्तयेः॥ १॥

अन्वयः-हे होतरग्ने! यजीयानिषितस्त्वं यथा नासत्या मित्रावरुणा होत्राय द्यावा पृथिवी सङ्गमयतस्तथा नोऽस्मान् प्रयुक्ति आ ववृत्या मरुतां बाधो न वर्त्तमानं दिनं निवर्त्य यजस्व॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसः प्राणोदानवत् प्रियाः पुरुषार्थिनश्च भवन्ति ते सर्वार्थं सुखं सङ्गमयितुमर्हन्ति॥ १॥

पदार्थः-हे **(होतः)** दाता और **(अग्ने)** अग्नि के समान तेजस्वी विद्वज्जन! **(यजीयान्)** अतिशय यज्ञ करने वाले **(इषितः)** प्रेरणा लिये गये जैसे **(नासत्या)** असत्य आचरण से रहित **(मित्रावरुणा)** प्राण और उदान वायु के समान अध्यापक और उपदेशक जन **(होत्राय)** ग्रहण करने और देने वाले के लिये **(द्यावा)** अन्तरिक्ष और **(पृथिवी)** पृथिवी मिलाते हैं, वैसे **(नः)** हम लोगों को **(प्रयुक्ति)** प्रयोग करते हैं पदार्थों का जिसमें वह कर्म्म **(आ)** सब प्रकार से **(ववृत्याः)** प्रवृत्त कराइये और **(मरुताम्)** वायु के सदृश मनुष्यों की **(बाधः)** रुकावट **(न)** जैसे वैसे वर्तमान दिन को निवृत्त कर **(यजस्व)** उत्तम प्रकार मिलाइये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् जन प्राण और उदान वायु के सदृश प्रिय और पुरुषार्थी होते हैं, वे सब के लिये सुख प्राप्त कराने योग्य होते हैं॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वं होता॑ म॒न्द्रत॑मो नो अ॒ध्रुग॒न्तर्दे॒वो वि॒दथा॒ मर्त्ये॑षु।

पा॒व॒कया॑ जु॒ह्वा३॑ वह्नि॑रा॒साग्ने॒ यज॑स्व त॒न्व॑१॑ तव॒ स्वाम्॥ २॥

त्वम्। होता॑। म॒न्द्र॒ऽत॑मः। न॒ः। अ॒ध्रुक्। अ॒न्तः। दे॒वः। वि॒दथा॑। मर्त्ये॑षु। पा॒व॒कया॑। जु॒ह्वा॑। वह्निः॑। आ॒सा। अग्ने॑। यज॑स्व। त॒न्व॑म्। तव॑। स्वाम्॥ २॥

पदार्थः-(त्वम्) (होता) दाता **(मन्द्रतमः)** अतिशयेनानन्दयिता **(नः)** अस्मान् **(अध्रुक्)** यः कञ्चिन्न द्रोग्धि **(अन्तः)** मध्ये **(देवः)** देदीप्यमानः **(विदथा)** विदथे यज्ञे **(मर्त्येषु)** मनुष्येषु **(पावकया)** पवित्रकारिकया ज्वालया **(जुह्वा)** जुहोति गृह्णाति ददाति वा यया **(वह्निः)** वोढा **(आसा)** मुखेनेव **(अग्ने)** अग्निरिव परोपकारिन् **(यजस्व)** सङ्गच्छस्व **(तन्वम्) (तव) (स्वाम्)** स्वकीयाम्॥ २॥

अन्वयः-हे अग्ने विद्वन्! यथा मन्द्रतमो होता विदथाऽन्तर्देवो वह्निरासेव पावकया जुह्वा नस्तव स्वां तन्वं सङ्गमयति तथा त्वं मर्त्येष्वध्रुक्सन्नस्मानस्माकं शरीराणि च यजस्व॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा विद्युत्सूर्यभौमरूपेणाग्निः सर्वजगदुपकरोति तथैव विद्वांसो जगदानन्दयन्ति॥ २॥

पदार्थः-हे **(अग्ने)** अग्नि के समान परोपकार के सहित वर्त्तमान विद्वन् जन! जैसे **(मन्द्रतमः)** अतिशय आनन्द कराने वाले **(होता)** दाताजन **(विदथा)** यज्ञ के **(अन्तः)** मध्य में **(देवः)** प्रकाशमान **(वह्निः)** धारण करने वाला अग्नि **(आसा)** मुख के सदृश **(पावकया)** पवित्र करने वाली ज्वाला से **(जुह्वा)** ग्रहण करता वा देता जिससे उससे **(नः)** हम लोगों को और **(तव)** आपके सम्बन्ध में **(स्वाम्)** अपने **(तन्वम्)** शरीर को मिलाता है, वैसे **(त्वम्)** आप **(मर्त्येषु)** मनुष्यों में **(अध्रुक्)** किसी से न द्रोह करने वाले होते हुए हम लोगों वा हम लोगों के शरीरों को **(यजस्व)** उत्तम प्रकार मिलिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे बिजुली, सूर्य्य और भूमि में हुए तेजस्वी पदार्थों के रूप से अग्नि सम्पूर्ण जगत् का उपकार करता है, वैसे ही विद्वान् जन जगत् को आनन्दित करते हैं॥ २॥

पुनस्ते कीदृशा भूत्वा किं कुर्युरित्याह॥

फिर वे कैसे होकर क्या करें, इस विषय को कहते हैं॥

धन्या॑ चि॒द्धि त्वे धि॒षणा॒ वष्टि॒ प्र दे॒वाञ्जन्म॑ गृण॒ते यज॑ध्यै।

वेपि॑ष्ठो अङ्गि॑रसां॒ यद्ध॒ विप्रो॒ मधु॑च्छ॒न्दो भन॑ति रे॒भ इ॒ष्टौ॥ ३॥

धन्या॑। चि॒त्। हि। त्वे इति॑। धि॒षणा॑। वष्टि॑। प्र। दे॒वान्। जन्म॑। गृ॒ण॒ते। यज॑ध्यै। वेपि॑ष्ठः। अङ्गि॑रसाम्। यत्। ह॒। विप्रः॑। मधु॑। छ॒न्दः॑। भन॑ति। रे॒भः॑। इ॒ष्टौ॥ ३॥

पदार्थः-(धन्या) धनं लब्धा **(चित्)** अपि **(हि)** **(त्वे)** त्वयि **(धिषणा)** प्रज्ञा द्यौः पृथिवी वा **(वष्टि)** कामयते **(प्र)** **(देवान्)** विदुषः **(जन्म)** **(गृणते)** स्तुवन्ति **(यजध्यै)** यष्टुं सङ्गन्तुम् **(वेपिष्ठः)** अतिशयेन कम्पकः **(अङ्गिरसाम्)** प्राणानामिव विदुषाम् **(यत्)** यः **(ह)** किल **(विप्रः)** मेधावी **(मधु)** माधुर्य्यगुणोपेतं विज्ञानम् **(छन्दः)** स्वातन्त्र्यम् **(भनति)** वदति **(रेभः)** स्तोता **(इष्टौ)** विज्ञानवर्धके यज्ञे॥३॥

अन्वयः-हे विद्वन्! या हि त्वे धन्या धिषणा देवान् प्र वष्टि तेषामङ्गिरसां जन्म यजध्यै ये गृणते यद्ध वेपिष्ठो विप्रो रेभ इष्टौ **[**मधुच्छन्दः**]** भनति तांश्चित् सर्वान् वयं गृह्णीयाम्॥३॥

भावार्थः-ये प्रज्ञया विद्वत्सङ्गेन विद्या कामयन्तेऽन्यानुपदिशन्ति च ते धन्याः सन्ति॥३॥

पदार्थः-हे विद्वन्! जो **(हि)** निश्चित **(त्वे)** आपके रहते **(धन्या)** धन को प्राप्त हुई **(धिषणा)** बुद्धि, अन्तरिक्ष वा पृथिवी **(देवान्)** विद्वानों की **(प्र, वष्टि)** कामना करती है उन **(अङ्गिरसाम्)** प्राणों के सदृश विद्वनों के **(जन्म)** जन्म को **(यजध्यै)** उत्तम प्रकार प्राप्त होने को जो **(गृणते)** स्तुति करते हैं और **(यत्)** जो **(ह)** निश्चित **(वेपिष्ठः)** अतिशय कम्पानेवाला **(विप्रः)** बुद्धिमान् **(रेभः)** स्तुतिकर्त्ता **(इष्टौ)** विज्ञान के बढ़ाने वाले यज्ञ में **(मधु)** माधुर्य गुण से युक्त विज्ञान और **(छन्दः)** स्वतन्त्रता को **(भनति)** कहता है **(चित्)** उन्हीं सब को हम लोग ग्रहण करें॥३॥

भावार्थः-जो बुद्धि और विद्वानों के सङ्ग से विद्या की कामना करते और अन्यों को उपदेश देते हैं, वे धन्य हैं॥२॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् जन कैसे हों, इस विषय को कहते हैं॥

अदि॑द्युत॒त् स्वपा॑को वि॒भावाग्ने॒ यज॑स्व॒ रोद॑सी उरू॒ची।

आ॒युं न यं नम॑सा रा॒तह॑व्या अ॒ञ्जन्ति॑ सु॒प्र॒यस॑ं पञ्च॒ जना॑:॥४॥

अदि॑द्युतत्। सु। अपा॑कः। वि॒ऽभावा॑। अग्ने॑। यज॑स्व। रोद॑सी॒ इति॑। उ॒रु॒ची॒ इति॑। आ॒युम्। न। यम्। नम॑सा। रा॒तऽह॑व्याः। अ॒ञ्जन्ति॑। सु॒ऽप्र॒यस॑म्। पञ्च॑। जना॑:॥४॥

पदार्थः-(अदिद्युतत्) द्योतते **(सु)** शोभने **(अपाकः)** अपरिपक्वः **(विभावा)** विशेषदीप्तिमान् **(अग्ने)** पावकवद्वर्त्तमान विद्वन् **(यजस्व)** सङ्गच्छस्व **(रोदसी)** भूमिप्रकाशौ **(उरूची)** ये बहून्यञ्चतस्ते **(आयुम्)** जीवनम् **(न)** इव **(यम्)** **(नमसा)** अन्नाद्येन **(रातहव्याः)** दत्ता दातव्याः **(अञ्जन्ति)** सुप्रकटयन्ति **(सुप्रयसम्)** सुष्ठु प्रयत्नवन्तम् **(पञ्च)** **(जनाः)** प्राणा इव वर्त्तमानाः॥५॥

अन्वयः-हे अग्ने! रातहव्याः पञ्च जना नमसा यं सुप्रयसमञ्जन्ति स स्वपाको विभावाऽऽयुन्नादिद्युतदेवं त्वमुरूची रोदसी यजस्व॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा पञ्च प्राणाः शरीरं धरन्ति तथैव युक्ताहारविहाराः शरीरं चिरं रक्षन्ति तथैव विद्वदुपदेशा विद्यां चिरं स्थायिनीं कुर्वन्ति॥४॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्तमान विद्वज्ञन! **(रातहव्याः)** दिये गये देने योग्य **(पञ्च)** पांच **(जनाः)** प्राणों के सदृश वर्त्तमान जन **(नमसा)** अन्न आदि से **(यम्)** जिस **(सुप्रयसम्)** उत्तम प्रकार प्रयत्न करने वाले को **(अञ्जन्ति)** अच्छे प्रकार प्रकट करते हैं वह **(सु)** उत्तम प्रकार **(अपाकः)** नहीं परिपक्व **(विभावा)** अत्यन्त दीप्तिमान् जन **(आयुम्)** जीवन को **(न)** जैसे वैसे **(अदिद्युतत्)** प्रकाशित होता है, इस प्रकार आप **(उरूची)** बहुतों को प्राप्त होने वाले **(रोदसी)** अन्तरिक्ष और पृथिवी को **(यजस्व)** उत्तम प्रकार प्राप्त हों॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस प्रकार से पांच प्राण शरीर को धारण करते हैं, वैसे ही नियमित आहार और विहार करने वाले जन शरीर की अति कालपर्य्यन्त रक्षा करते हैं, वैसे ही विद्वानों के उपदेश विद्या को अतिकाल पर्य्यन्त स्थिर होने वाली करते हैं॥४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

वृ॒ञ्जे ह॒ यन्नम॑सा ब॒र्हिर॒ग्नावया॑मि स्रु॒ग्घृ॒तव॑ती सुवृ॒क्तिः।
अम्य॑क्षि॒ सद्म॒ सद॑ने पृथि॒व्या अश्रा॑यि य॒ज्ञः सूर्ये॒ न चक्षुः॥५॥

वृ॒ञ्जे। ह॒। यत्। नम॑सा। ब॒र्हिः। अ॒ग्नौ। अया॑मि। स्रुक्। घृ॒तऽव॑ती। सु॒ऽवृ॒क्तिः। अम्य॑क्षि। सद्म॑। सद॑ने। पृ॒थि॒व्याः। अश्रा॑यि। य॒ज्ञः। सूर्ये॑। न। चक्षुः॥५॥

पदार्थः-(**वृञ्जे**) त्यजामि (**ह**) किल (**यत्**) (**नमसा**) अन्नादिना (**बर्हिः**) घृतम् (**अग्नौ**) पावके (**अयामि**) प्राप्नोमि (**स्रुक्**) या स्रवति सा (**घृतवती**) बहूदकयुक्ता नदी (**सुवृक्तिः**) सुष्ठु व्रजन्ति यस्यां सा (**अम्यक्षि**) गच्छति (**सद्म**) सीदन्ति यस्मिंस्तत् (**सदने**) स्थाने (**पृथिव्याः**) भूमेः (**अश्रायि**) आश्रयति (**यज्ञः**) सङ्गन्तव्यः (**सूर्य्ये**) (**न**) इव (**चक्षुः**) नेत्रम्॥५॥

अन्वयः-हे विद्वांसोऽहं नमसाऽग्नौ यद्बर्हिर्हं वृञ्जे या सुवृक्तिर्घृतवती स्रुगम्यक्षि तामयामि यो यज्ञः सूर्य्ये चक्षुर्न पृथिव्याः सदने सद्म अश्रायि तं सर्वेऽनुतिष्ठन्तु॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा होतारोऽग्नौ स्रुचा घृतं त्यजन्ति तथा विद्वांसोऽन्यबुद्धौ विद्यां त्यजन्तु यथा सूर्य्यप्रकाशे चक्षुर्व्याप्नोति तथैव हुतं द्रव्यमन्तरिक्षे व्याप्नोति॥५॥

पदार्थः-हे विद्वानो! मैं **(नमसा)** अन्न आदि से **(अग्नौ)** अग्नि में **(यत्)** जिस **(बर्हिः)** घृत का **(ह)** निश्चय करके **(वृञ्जे)** त्याग करता हूँ और जो **(सुवृक्तिः)** सुवृक्ति अर्थात् उत्तम प्रकार चलते हैं जिसमें वह **(घृतवती)** बहुत जल से युक्त नदी **(स्रुक्)** बहने वाली **(अम्यक्षि)** चलती है उसको **(अयामि)** प्राप्त होता हूँ और जो **(यज्ञः)** प्राप्त होने योग्य यज्ञ **(सूर्य्ये)** सूर्य्य में **(चक्षुः)** नेत्र **(न)** जैसे वैसे **(पृथिव्याः)** पृथिवी के **(सदने)** स्थान में **(सद्म)** रहने का स्थान अर्थात् गृह का **(अश्रायि)** आश्रयण करता है, उसका सब लोग अनुष्ठान करो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे हवन करने वाले जन अग्नि में स्रुवा से घृत छोड़ते हैं, वैसे विद्वान् जन अन्य की बुद्धि में विद्या को छोड़ें और जैसे सूर्य्य के प्रकाश में नेत्र व्याप्त होता है, वैसे ही हवन किया गया द्रव्य अन्तरिक्ष मे व्याप्त होता है॥५॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः।

रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः॥६॥१३॥

दशस्य। नः। पुरुऽअनीक। होतः। देवेभिः। अग्ने। अग्निऽभिः। इधानः। रायः। सूनो इति। सहसः। ववसानाः। अति। स्रसेम। वृजनम्। न। अंहः॥६॥

पदार्थः-(**दशस्या**) दाशति ददति येन तद्दशस्तदात्मानमिच्छ। अत्र **संहितायामि**ति दीर्घः। (**नः**) अस्मान् (**पुर्वणीक**) पुरूण्यनीकानि सैन्यानि यस्य तत्सम्बुद्धौ (**होतः**) दातः (**देवेभिः**) देदीप्यमानैः (**अग्ने**) पावक इव राजन् (**अग्निभिः**) अग्निवद्वर्त्तमानैर्वीरैः (**इधानः**) देदीप्यमानः (**रायः**) धनानि (**सूनो**) सन्तान (**सहसः**) बलवतः (**वावसानाः**) आच्छाद्यमानाः (**अति**) (**स्रसेम**) गच्छेम (**वृजनम्**) वर्जनीयं बलम् (**न**) इव (**अंहः**) अपराधं पापं वा॥६॥

अन्वयः-हे पुर्वणीक होतः सहसः सूनोऽग्ने! देवेभिरग्निभिरिधानोऽग्निरिव त्वं नो रायो दशस्या यतो वावसाना वयं वृजनं नांऽहोऽति स्रसेम॥६॥

भावार्थः-हे मनुष्या! यथाग्निरिन्धनैर्वर्धते तथा यूयं पुरुषार्थेन वर्धध्वं यथा मनुष्याः शत्रुं सद्यस्त्यजन्ति तथाऽन्यायाचरणं पापं क्षिप्रं त्यजतेति॥६॥

अत्राग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकादशं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**पुर्वणीक**) अनेक सेनाओं से युक्त (**होतः**) दान करने वाले (**सहसः**) बलवान् के (**सूनो**) सन्तान (**अग्ने**) अग्नि के समान वर्त्तमान राजन्! (**देवेभिः**) निरन्तर प्रकाशमान (**अग्निभिः**) अग्नि के समान वर्त्तमान वीरजनों से (**इधानः**) प्रकाशमान अग्नि जैसे वैसे आप (**नः**) हम लोगों के लिये (**रायः**) धनों को (**दशस्या**) देते हैं जिससे वह दशस् है उस अपने की इच्छा करिये, जिससे (**वावसानाः**) ढाँपे गये हम लोग (**वृजनम्**) वर्जने योग्य बल को (**न**) जैसे वैसे (**अंहः**) अपराध को (**अति**) (**स्रसेम**) अतिक्रमण करें॥६॥

भावार्थः-हे मनुष्यो! जैसे अग्नि इन्धनों से बढ़ता है, वैसे आप लोग पुरुषार्थ से बढ़िये और जैसे मनुष्य शत्रु का शीघ्र त्याग करते हैं, वैसे अन्यायाचरणरूप पाप का शीघ्र त्याग करो॥६॥

इस सूक्त में अग्नि और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह ग्यारहवाँ सूक्त और तेरहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य द्वादशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १ त्रिष्टुप्। २ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक्पङ्क्तिः। ४, ६ निचृत्पङ्क्तिः। ५ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब छः ऋचावाले बारहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

मध्ये॒ होता॑ दुरो॒णे ब॒र्हिषो॒ राळ॒ग्निस्तो॒दस्य॒ रोद॑सी॒ यज॑ध्यै।
अ॒यं स सू॒नुः सह॑स ऋ॒तावा॑ दू॒रात्सूर्यो॒ न शो॒चिषा॑ ततान॥ १॥

मध्ये॑। होता॑। दु॒रो॒णे। ब॒र्हिषः॑। राट्। अ॒ग्निः। तो॒दस्य॑। रोद॑सी॒ इति॑। यज॑ध्यै। अ॒यम्। सः। सू॒नुः। सह॑सः। ऋ॒तऽवा॑। दू॒रात्। सूर्यः॑। न। शो॒चि॒षा। त॒ता॒न॒॥ १॥

पदार्थः-(मध्ये) (होता) (दुरोणे) गृहे **(बर्हिषः)** अवकाशस्य **(राट्)** यो राजते **(अग्निः)** पावकः **(तोदस्य)** व्यथायाः **(रोदसी)** द्यावापृथिव्यौ **(यजध्यै)** यष्टुं सङ्गन्तुम् **(अयम्) (सः) (सूनुः)** अपत्यम् **(सहसः)** सहनशीलस्य **(ऋतावा)** य ऋतं सत्यं वनुते याचते सः **(दूरात्) (सूर्य्यः) (न)** इव **(शोचिषा)** प्रकाशेन **(ततान)** विस्तृणोति॥ १॥

अन्वयः-हे मनुष्या! यथा दुरोणे बर्हिषो मध्ये होता तोदस्य राळग्नी रोदसी यजध्यै ततान तथा सोऽयं सहसः सूनुर्ऋतावा दूराच्छोचिषा सूर्यो न विद्याप्रकाशं ततान॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये कर्म्मठाः सूर्य्यवत्सुकर्म्मप्रकाशकाः स्युस्ते सर्वेषां सुखानि वर्धयितुं शक्नुवन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे **(दुरोणे)** गृह में **(बर्हिषः)** अवकाश के **(मध्य)** मध्य में **(होता)** आदान वा ग्रहण करने वाला **(तोदस्य)** व्यथा के सम्बन्ध में **(राट्)** प्रकाशमान **(अग्निः)** अग्नि **(रोदसी)** अन्तरिक्ष और पृथिवी को **(यजध्यै)** मिलने को **(ततान)** विस्तृत करता है, वैसे **(सः)** सो **(अयम्)** यह **(सहसः)** सहनशील का **(सूनुः)** अपत्य **(ऋतावा)** सत्य की याचना करने वाला **(दूरात्)** दूर से **(शोचिषा)** प्रकाश से **(सूर्य्यः)** सूर्य्य **(न)** जैसे वैसे विद्या के प्रकाश को विस्तृत करता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वेदविहित यज्ञ आदि कर्म्मों के करने वाले जन सूर्य्य के सदृश उत्तम कर्म्मों के प्रकाशक होवें, वे सब के सुख बढ़ाने को समर्थ हो सकते हैं॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ यस्मि॒न् त्वे स्वपा॑के यजत्र॒ यक्षद्रा॑जन्त्सु॒वर्ता॑तेव॒ नु द्यौः।

त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै॥ २॥

आ। यस्मिन्। त्वे इति। सु। अपाके। यजत्र। यक्षत्। राजन्। सर्वतातेऽइव। नु। द्यौः। त्रिऽसधस्थः। ततरुषः। न। जंहः। हव्या। मघानि। मानुषा। यजध्यै॥ २॥

पदार्थः-(**आ**) समन्तात् (**यस्मिन्**) (**त्वे**) त्वयि (**सु**) (**अपाके**) अपरिपक्वे (**यजत्र**) सङ्गन्तुमर्ह (**यक्षत्**) यजेत् (**राजन्**) (**सर्वतातेव**) सर्वेषां वर्धको यज्ञ इव (**नु**) सद्यः (**द्यौः**) विद्युदादिप्रकाशः (**त्रिषधस्थः**) त्रिषु भूम्यन्तरिक्षसूर्य्यलोकेषु त्रिविधेषु समानस्थानेषु वर्त्तमानः (**ततरुषः**) तारकः (**न**) इव (**जंहः**) सद्यो गन्ता (**हव्या**) आदातुं दातुमर्हाणि (**मघानि**) धनानि (**मानुषा**) मनुष्याणामिमानि (**यजध्यै**) सङ्गन्तुम्॥ २॥

अन्वयः-हे यजत्र राजन्! यस्मिन्नपाके त्वे सर्वतातेव द्यौः स्वाऽऽयक्षत् स भवान्नु त्रिषधस्थस्ततरुषो जंहो न हव्या मानुषा मघानि यजध्यै यक्षत्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यत्र सूर्य्यवद्राजा प्रतापी भवति तत्र सर्वाणि सुखानि जायन्ते॥ २॥

पदार्थः-हे (**यजत्र**) मेल करने योग्य (**राजन्**) राजा! (**यस्मिन्**) जिन (**अपाके**) बुद्धि के परिपाक अर्थात् पूर्णता से रहित (**त्वे**) आप में (**सर्वतातेव**) सब की वृद्धि करने वाला यज्ञ जैसे वैसे (**द्यौः**) बिजुली आदि का प्रकाश (**सु**) उत्तम प्रकार (**आ, यक्षत्**) सब ओर से मेल करे वह आप (**नु**) शीघ्र (**त्रिषधस्थः**) तीन पृथिवी, अन्तरिक्ष और सूर्य्यलोक में तुल्य स्थान में वर्त्तमान (**ततरुषः**) तारने और (**जंहः**) शीघ्र चलने वाला (**न**) जैसे वैसे (**हव्या**) देने और ग्रहण करने योग्य (**मानुषा**) मनुष्य सम्बन्धी (**मघानि**) धनों को (**यजध्यै**) प्राप्त होने को यजन कीजिये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जहाँ सूर्य्य के सदृश प्रतापी राजा होता है, वहाँ सम्पूर्ण सुख होते हैं॥ २॥

पुना राजा कीदृशो भवेदित्याह॥

फिर राजा कैसा होवे, इस विषय को कहते हैं॥

तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत्।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु॥ ३॥

तेजिष्ठा। यस्य। अरतिः। वनेऽराट्। तोदः। अध्वन्। न। वृधसानः। अद्यौत्। अद्रोघः। न। द्रविता। चेतति। त्मन्। अमर्त्यः। अवर्त्रः। ओषधीषु॥ ३॥

पदार्थः-(**तेजिष्ठा**) अतिशयेन तेजस्विनी (**यस्य**) अग्नेरिव राज्ञः (**अरतिः**) प्राप्तिः (**वनेराट्**) या वने सेवनीये किरणे वा राजते (**तोदः**) व्यथनम् (**अध्वन्**) अध्वनि (**न**) इव (**वृधसानः**) वर्धमानः (**अद्यौत्**) द्योतते (**अद्रोघः**) द्रोहरहितः (**न**) इव (**द्रविता**) गन्ता (**चेतति**) सञ्ज्ञापयति (**त्मन्**) आत्मनि (**अमर्त्यः**) मरणधर्म्मरहितः (**अवर्त्रः**) अनिवारणीयः (**ओषधीषु**) सोमलतादिषु॥ ३॥

अन्वयः-हे मनुष्या! यस्याग्नेस्तेजिष्ठाऽरतिर्वनरेराडध्वन् वृधसानस्तोदो नाद्यौत् सोऽद्रोघो न द्रविता त्मन्नमर्त्योऽवर्त्र ओषधीषु चेतति॥३॥

भावार्थः-अत्रोपमालङ्कारः। यस्य तेजस्विनी प्रकृतिः प्रेरणा च भवेत् स द्रोहरहितः सन्नौषधानि दुःखमिव सर्वस्य दुःखं निवारयति स एव कृतकृत्यो भवति॥३॥

पदार्थः-हे मनुष्यो! **(यस्य)** जिस अग्नि के सदृश राजा की **(तेजिष्ठा)** अतिशय तेजस्विनी **(अरतिः)** प्राप्ति **(वनेराट्)** सेवन करने योग्य वा किरण में शोभित होने वाली **(अध्वन्)** मार्ग में **(वृधसानः)** बढ़ती हुई **(तोदः)** पीड़ा **(न)** जैसे वैसे **(अद्यौत्)** प्रकाशित होती हैं वह **(अद्रोघः)** द्रोह से रहित **(न)** जैसे वैसे **(द्रविता)** चलने वाला **(त्मन्)** आत्मा में **(अमर्त्यः)** मरणधर्म्म से रहित **(अवर्त्रः)** नहीं निवारण करने योग्य **(ओषधीषु)** सोमलता आदि ओषधियों में **(चेतति)** जनाता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिस राजा की तेजस्विनी प्रकृति और प्रेरणा होवे वह द्रोहरहित हुआ जैसे ओषधियाँ दुःख को, वैसे सब के दुःख का निवारण करता है, वही कृतकृत्य होता है॥३॥

पुनर्विद्वद्भिः कथं वर्त्तितव्यमित्याह॥

फिर विद्वानों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः।
द्रुवन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः॥४॥

सः। अस्माकेभिः। एतरिः। न। शूषैः। अग्निः। स्तवे। दमे। आ। जातऽवेदाः। द्रुऽअन्नः। वन्वन्। क्रत्वा। न। अर्वा। उस्रः। पिताऽइव। जारयायि। यज्ञैः॥४॥

पदार्थः-**(सः)** राजा **(अस्माकेभिः)** अस्माभिः सह **(एतरी)** प्राप्तव्ये **(न)** इव **(शूषैः)** बलादिभिः **(अग्निः)** पावक इव **(स्तवे)** प्रशंसनीये **(दमे)** गृहे **(आ)** **(जातवेदाः)** यो जातानि वेद **(द्रुवन्नः)** द्रु द्रवीभूतमन्नं यस्मात् **(वन्वन्)** सम्भजन् **(क्रत्वा)** प्रज्ञया कर्मणा वा **(न)** इव **(अर्वा)** वाजी **(उस्रः)** गाः **(पितेव)** जनक इव **(जारयायि)** जारं जरावस्थां यातुं शीलं यस्य तच्छरीरम् **(यज्ञैः)** विद्वत्सेवादिभिः॥४॥

अन्वयः-हे मनुष्या! यथाऽस्माकेभिस्सह द्रुवन्नो जारयायि वन्वन् पितेवाऽर्वा न क्रत्वोस्रः सेवते तथा यज्ञैः शूषैः सहाग्निर्जातवेदाः स्तवे दम एतरी नाऽऽप्नोति सोऽस्माभिस्सेवनीयः॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा प्रशंसनीये गृहे सुखेन निवासो भवति तथैव पितृवत्पालके राजनि प्रजा सुखं वसति यथा प्रज्ञया जितेन्द्रियो भूत्वा पृथिवीराज्यं प्राप्याऽनाथान् रक्षति तथैव विद्वद्भिः सत्योपदेशेन सर्वं जगद्रक्षणीयम्॥४॥

पदार्थः-हे मनुष्यो! जैसे **(अस्माकेभिः)** हम लोगों के साथ **(द्रुवन्नः)** द्रवीभूत अन्न जिससे वह **(जारयायि)** वृद्धावस्था को प्राप्त होने का स्वभाव जिसका उस शरीर का **(वन्वन्)** सेवन करता हुआ

(पितेव) जैसे पिता, वैसे **(अर्वा)** घोड़ा **(न)** जैसे वैसे **(क्रत्वा)** बुद्धि वा कर्म्म से **(उस्रः)** गौओं का सेवन करता है, वैसे **(यज्ञैः)** विद्वानों की सेवा आदि **(शूषैः)** बल आदिकों के साथ **(अग्निः)** अग्नि के समान **(जातवेदाः)** प्रकट हुओं को जानने वाला **(स्तवे)** प्रशंसा करने योग्य **(दमे)** गृह में और **(एतरी)** प्राप्त होने योग्य में **(न)** जैसे वैसे **(आ)** प्राप्त होता है **(सः)** वह राजा हम लोगों से सेवन करने योग्य है॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्रशंसा करने योग्य गृह में सुख से निवास होता है, वैसे ही पिता के सदृश पालन करने वाले राजा के होने पर प्रजा सुखपूर्वक निवास करती है और जैसे बुद्धि से जितेन्द्रिय होकर और पृथिवी के राज्य को प्राप्त होकर अनाथों की रक्षा करता है, वैसे ही विद्वानों को चाहिये कि सत्य उपदेश से सब जगत् की रक्षा करें॥४॥

अथ कीदृशी विद्युदस्तीत्याह॥

अब कैसी बिजुली है, इस विषय को कहते हैं॥

अधा॑ स्मास्य पनयन्ति॒ भासो॒ वृथा॒ यत्तक्षा॑दनु॒याति॑ पृ॒थ्वीम्।
स॒द्यो यः स्य॒न्द्रो विषि॑तो॒ धवी॑या॒नृणो॒ न ता॒युर॒ति धन्वा॑ राट्॥५॥

अध॑। स्म॒। अ॒स्य॒। प॒न॒य॒न्ति॒। भासः॑। वृथा॑। यत्। तक्षा॑त्। अ॒नु॒ऽयाति॑। पृ॒थ्वीम्। स॒द्यः। यः। स्य॒न्द्रः। विऽसि॑तः। धवी॑यान्। ऋ॒णः। न। ता॒युः। अति॑। धन्व॑। रा॒ट्॥५॥

पदार्थः-(**अध**) अनन्तरम् (**स्म**) एव (**अस्य**) राज्ञः (**पनयन्ति**) स्तुवन्ति (**भासः**) दीप्तीः (**वृथा**) (**यत्**) याः (**तक्षत्**) तनूकरोति (**अनुयाति**) अनुगच्छति (**पृथ्वीम्**) भूमिम् (**सद्यः**) (**यः**) (**स्यन्द्रः**) प्रस्रावकः (**विषितः**) व्याप्तः (**धवीयान्**) अतिशयेन कम्पकः (**ऋणः**) प्रापकः (**न**) इव (**तायुः**) स्तेनः। **तायुरिति स्तेननाम।** (निघं०३.२४) (**अति**) (**धन्वा**) धनुर्वेदम् (**राट्**) यो राजते॥५॥

अन्वयः-हे विद्वांसो! यः स्यन्द्रो विषितः धवीयान् वृथर्णस्तायुर्न वर्त्तमानोऽग्निर्यद्या भासस्तक्षत्पृथ्वीं सद्योऽनुयात्यध स्मास्य गुणान् विद्वांसः पनयन्ति तं विदित्वा तस्य विद्यां प्राप्य राडति धन्वाऽनुजानाति॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! यदि भवन्तो विद्युद्विद्यां विज्ञाय यन्त्रैर्घर्षयित्वैनामुत्पाद्यैतया सह मनुष्यादीन् योजयेयुस्तर्हीयमतिकम्पिका वेगवती स्यात्। यदि काचाभ्रपटलान्तर्मनुष्यं पृथक्कारयेयुस्तर्हीयं क्षिप्रं भूमिं गच्छति सेयं सर्वत्र व्याप्ता प्रशंसनीयगुणास्ति यया राजानः शत्रून् सहजतया जित्वा श्रीमन्तो जायन्ते॥५॥

पदार्थः-हे विद्वान् जनो! **(यः)** जो **(स्यन्द्रः)** बहानेवाला **(विषितः)** व्याप्त **(धवीयान्)** अतिशय कम्पाने और **(वृथा)** व्यर्थ **(ऋणः)** प्राप्त कराने वाला **(तायुः)** चोर **(न)** जैसे वैसे वर्त्तमान अग्नि **(यत्)** जिन **(भासः)** प्रकाशों को **(तक्षत्)** सूक्ष्म करता है **(पृथ्वीम्)** पृथिवी के **(सद्यः)** शीघ्र **(अनुयाति)** पीछे चलता है **(अध)** इसके अनन्तर **(स्म)** ही **(अस्य)** इस राजा के गुणों की विद्वान् जन **(पनयन्ति)** स्तुति करते हैं, उसको जान कर और उसकी विद्या को प्राप्त होकर **(राट्)** राजा **(अति, धन्वा)** धनुर्वेद का अत्यन्त जाननेवाला होता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान् जनो! जो आप लोग बिजुली की विद्या को जानकर यन्त्रों से घर्षित कर इस को उत्पन्न करके इस बिजुली के साथ मनुष्य आदिकों को युक्त करें तो यह अति कम्पानेवाली और वेगवती होवे और स्वच्छ काच के स्वभ्र पट्टे के अन्तर्गत मनुष्य को अलग करावें तो यह बिजुली शीघ्र भूमि में प्राप्त होती हैं, सो यह सर्वत्र व्याप्त और प्रशंसा करने योग्य गुणवाली है, जिससे राजा लोग शत्रुओं को सहज से जीतकर धनवान् होते हैं॥५॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे होवें, इस विषय को कहते हैं॥

स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः॥६॥१४॥

सः। त्वम्। नः। अर्वन्। निदायाः। विश्वेभिः। अग्ने। अग्निऽभिः। इधानः। वेषि। रायः। वि। यासि। दुच्छुनाः। मदेम। शतऽहिमाः। सुऽवीराः॥६॥

पदार्थः-(**सः**) (**त्वम्**) (**नः**) अस्मान् (**अर्वन्**) अश्वेव **[**अश्व इव**]** शीघ्रं गमयन् (**निदायाः**) निन्दिकायाः प्रजायाः (**विश्वेभिः**) समग्रैः (**अग्ने**) पावक इव प्रतापिन् (**अग्निभिः**) विद्युदादिभिः (**इधानः**) देदीप्यमानः (**वेषि**) व्याप्नोषि (**रायः**) धनानि (**वि**) (**यासि**) प्राप्नोषि (**दुच्छुनाः**) दुष्टः श्वेव वर्त्तमानाः सेनाः (**मदेम**) हर्षेम (**शतहिमाः**) शतं हिमानि येषान्ते (**सुवीराः**) शोभनाश्च ते वीराः॥६॥

अन्वयः-हे अर्वन्नग्ने! यतस्त्वं विश्वेभिरग्निभिरिधानो नो निदाया रायो वेषि दुच्छुना वि यासि स त्वं वयं च शतहिमाः सुवीरा मदेम॥६॥

भावार्थः-मनुष्यैः समग्रैरग्न्यादिभिः पदार्थैः कार्य्याणि संसाध्य या न्यायाज्ञा विरुद्धाः प्रजास्ता दण्डयित्वा शान्ताः सम्पादनीया एवं हि न्यायाचरणेन सर्वे शतायुषो भवन्ति॥६॥

अत्र विद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वादशं सूक्तं चतुर्दशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे (**अर्वन्**) घोड़े की सदृश शीघ्र चलाते हुए (**अग्ने**) अग्नि के सदृश प्रतापी जिस कारण से (**त्वम्**) आप (**विश्वेभिः**) सम्पूर्ण (**अग्निभिः**) बिजुली आदिकों से (**इधानः**) निरन्तर प्रकाशमान (**नः**) हम लोगों की (**निदायाः**) निन्दा करते हुए प्रजाजन के (**रायः**) धनों को (**वेषि**) व्याप्त होते हो और (**दुच्छुनाः**) दुष्ट श्वा के सदृश वर्त्तमान सेनाओं को (**वि, यासि**) विशेष प्राप्त होते हो (**सः**) वह आप और हम लोग (**शतहिमाः**) सौ हिम वर्ष जिनके वे (**सुवीराः**) सुन्दर वीर जन (**मदेम**) हर्षित होवें॥६॥

भावार्थः-मनुष्यों को चाहिये कि सम्पूर्ण अग्नि आदि पदार्थों से कार्य्यों को सिद्ध करके जो न्याय की आज्ञा से विरुद्ध प्रजाजन हैं, उनको ताड़न करके शान्त सम्पादित करें, क्योंकि इस प्रकार न्याय के आचरण से सम्पूर्ण जन सौ वर्ष युक्त होते हैं॥६॥

इस सूक्त में विद्वान्, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बारहवाँ सूक्त और चौदहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य त्रयोदशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १ पङ्क्तिः। २ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ४ विराट्त्रिष्टुप्। ५, ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्नृपात् किं प्राप्नोतीत्याह॥

फिर राजा से क्या प्राप्त होता है, इस विषय को कहते हैं॥

त्वद्विश्वा॑ सुभग॒ सौभ॑गान्यग्ने॒ वि य॑न्ति व॒निनो॒ न व॒याः।
श्रु॒ष्टी र॒यिर्वाजो॑ वृत्र॒तूर्ये॑ दि॒वो वृ॒ष्टिरीड्यो॑ री॒तिर॒पाम्॥ १॥

त्वत्। विश्वा॑। सु॒ऽभ॒ग॒। सौभ॑गानि। अग्ने॑। वि। य॒न्ति॒। व॒निन॑ः। न। व॒याः। श्रु॒ष्टी। र॒यिः। वाज॑ः। वृ॒त्र॒ऽतूर्ये। दि॒वः। वृ॒ष्टि। ईड्य॑ः। री॒तिः। अ॒पाम्॥ १॥

पदार्थः-(**त्वत्**) (**विश्वा**) सर्वाणि (**सुभग**) शोभनैश्वर्य्य (**सौभगानि**) सुभगानामैश्वर्य्याणां भावान् (**अग्ने**) वह्निरिव विद्वन् (**वि**) (**यन्ति**) प्राप्नुवन्ति (**वनिनः**) वनसम्बन्धिनः (**न**) इव (**वयाः**) पक्षिणः (**श्रुष्टी**) क्षिप्रम्। अत्र **संहितायामि**ति दीर्घः। (**रयिः**) धनम् (**वाजः**) अन्नम् (**वृत्रतूर्य्ये**) वृत्रस्य मेघस्य तूर्य्यं हननं यत्र तद्वर्त्तमाने स- ामे (**दिवः**) अन्तरिक्षात् (**वृष्टिः**) (**ईड्यः**) स्तोतुमर्हः (**रीतिः**) श्लिष्टो गन्ता गमयिता वा (**अपाम्**) जलानाम्॥ १॥

अन्वयः-हे सुभगाऽग्ने राजन्! वनिनो वया न जनास्त्वद्विश्वा सौभगानि वि यन्ति वृत्रतूर्य्ये दिवोऽपां वृष्टिरिव रीतिरीड्यो रयिर्वाजश्च श्रुष्टी यन्ति तस्माद्भवान्त्सत्कर्त्तव्यो भवति॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्योऽन्तरिक्षाद् वृष्टिं कृत्वा सर्वं जगत् तर्पयति तथैव राजा न्याययुक्तात्पुरुषार्थादैश्वर्याणि वर्धयित्वा प्रजाः सततं तर्पयेत्॥ १॥

पदार्थः-हे (**सुभग**) सुन्दर ऐश्वर्य्यवाले (**अग्ने**) अग्नि के सदृश विद्वज्जन वा राजन्! (**वनिनः**) वनसम्बन्धी (**वयाः**) पक्षी (**न**) जैसे वैसे जन (**त्वत्**) आप से (**विश्वा**) सम्पूर्ण (**सौभगानि**) ऐश्वर्यों के भावों को (**वि, यन्ति**) विशेष कर प्राप्त होते हैं (**वृत्रतूर्य्ये**) मेघ का हनन जिसमें उसके सदृश वर्त्तमान संग्राम में (**दिवः**) अन्तरिक्ष से (**अपाम्**) जलो की (**वृष्टिः**) वृष्टि के सदृश (**रीतिः**) श्लिष्ट जानने वा प्रकाश कराने वाला (**ईड्यः**) स्तुति करने योग्य (**रयिः**) धन और (**वाजः**) अन्न (**श्रुष्टी**) शीघ्र प्राप्त होते हैं, इससे आप सत्कार करने योग्य हैं॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य्य अन्तरिक्ष से वृष्टि करके सम्पूर्ण जगत् को तृप्त करता है, वैसे ही राजा न्याय से युक्त पुरुषार्थ से ऐश्वर्य्यों को बढ़ा कर प्रजाओं को निरन्तर तृप्त करे॥ १॥

पुनर्विद्वद्भिरत्र कथं वर्त्तितव्यमित्याह॥

फिर विद्वानों को इस संसार में कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

त्वं भगो॑ न॒ आ हि रत्न॑मि॒षे परि॑ज्मेव क्षयसि द्र॒स्मव॑र्चाः।
अग्ने॑ मि॒त्रो न बृ॑ह॒त ऋ॒तस्यासि॑ क्षत्ता वा॒मस्य॑ देव॒ भूरे॑ः॥ २॥

त्वम्। भगः॑। न॒ः। आ। हि। रत्न॑म्। इ॒षे। परि॑ज्माऽइव। क्षयसि। द्र॒स्मऽव॑र्चाः। अग्ने॑। मि॒त्रः। न। बृ॒ह॒तः। ऋ॒तस्य॑। असि॑। क्षत्ता। वा॒मस्य॑। दे॒व॒। भूरे॑ः॥ २॥

पदार्थः-(त्वम्) (भगः) भजनीयैश्वर्यः **(नः)** अस्मान् **(आ) (हि) (रत्नम्)** धनम् **(इषे)** प्राप्तुम् **(परिज्मेव)** परितः सर्वन्तो गन्ता वायुरिव **(क्षयसि)** निवससि निवासयसि वा **(दस्मवर्चाः)** दस्ममुपक्षयितं निवासयितं निवासितं वर्चो दीप्तिर्येन सः **(अग्ने)** पावक इव वर्त्तमान **(मित्रः)** सखा **(न)** इव **(बृहतः)** महतः **(ऋतस्य)** सत्यस्योदकस्य वा **(असि) (क्षत्ता)** छेदकः **(वामस्य)** प्रशस्यस्य **(देव)** दातर्विद्वन् **(भूरेः)** बहोः॥ २॥

अन्वयः-हे देवाग्ने! यतस्त्वं मित्रो न बृहतो वामस्य भूरेर्ऋतस्य क्षत्ताऽसि तस्माद्दस्मवर्चाः स त्वं परिज्मेव भगः सन् नो हि रत्नमिष आ क्षयसि तस्मान्माननीयोऽसि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसः प्राणवद्धनैश्वर्य्यशोभां दधति ते मित्रवद्वर्त्तित्वा सर्वान्त्सुखयन्तु॥ २॥

पदार्थः-हे **(देव)** देने वाले **(अग्ने)** अग्नि के समान वर्त्तमान विद्वन्! जिस कारण से **(त्वम्)** आप **(मित्रः) (न)** जैसे वैसे **(बृहतः)** बड़े **(वामस्य)** श्रेष्ठ **(भूरेः)** बहुत **(ऋतस्य)** सत्य वा जल के **(क्षत्ता)** छेदक **(असि)** हैं, इस कारण से **(दस्मवर्चाः)** उपक्षयित अर्थात् निवास कराई वा निवास की कान्ति जिन्होंने तथा **(परिज्मेव)** जो सब ओर से चलने वाले वायु के सदृश **(भगः)** सेवन करने योग्य ऐश्वर्य्य जिनका ऐसे हुए **(नः)** हम लोगों को **(हि)** जिस कारण से **(रत्नम्)** धन को **(इषे)** प्राप्त होने को **(आ)** सब ओर से **(क्षयसि)** निवास करते वा निवास कराते हो, इस कारण आदर करने योग्य हो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् जन प्राणों के सदृश धन और ऐश्वर्य्य की शोभा को धारण करते हैं, वे मित्र के सदृश वर्त्ताव करके सब को सुखी करें॥ २॥

पुनर्विद्वांसः कथं वर्त्तेरन्नित्याह॥

फिर विद्वान् जन कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

स सत्प॑ति॒ः शव॑सा हन्ति वृ॒त्रमग्ने॒ विप्रो॒ वि पणे॑र्भर्ति॒ वाज॑म्।
यं त्वं प्र॑चेत ऋतजात रा॒या स॒जोषा॒ नप्त्रा॒पां हि॒नोषि॑॥ ३॥

सः। सत्ऽप॑तिः। शव॑सा। ह॒न्ति॒। वृ॒त्रम्। अग्ने॑। विप्रः॑। वि। प॒णेः॑। भ॒र्ति॒। वाज॑म्। यम्। त्वम्। प्र॒ऽचे॒तः॒। ऋ॒तऽजा॑त। रा॒या। स॒जोषा॑ः। नप्त्रा॑। अ॒पाम्। हि॒नोषि॑॥ ३॥

पदार्थः-(सः) (सत्पतिः) सत उदकस्य पालकः। **सदित्युदकनाम।** (निघं०१.१२) **(शवसा)** बलेन **(हन्ति) (वृत्रम्)** मेघम् **(अग्ने)** प्रकाशस्वरूप **(विप्रः)** मेधावी **(वि) (पणेः)** व्यवहर्त्तुः **(भर्त्ति)** दधाति **(वाजम्)** अन्नं विज्ञानं वा **(यम्) (त्वम्) (प्रचेतः)** प्रकृष्टविज्ञान **(ऋतजात)** य ऋते सत्ये जायते तत्सम्बुद्धौ **(राया)** धनेन **(सजोषाः)** समानप्रीतिसेवी **(नप्त्रा)** यो न पतति तेन **(अपाम्)** जलानाम् **(हिनोषि)** वर्धयसि॥३॥

अन्वयः-हे ऋतजात प्रचेतरग्ने! विप्रस्त्वं यथा सत्पतिः सूर्य्यः शवसा वृत्रं हन्ति पणेर्वाजं वि भर्ति तथा यं त्वं सजोषा रायाऽपां नप्त्रा सह हिनोषि सोऽयं सर्वतो वर्धते॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मेधाविनः सूर्य्यवद्विद्यां प्रकाश्याविद्यां घ्नन्ति तेऽतुलं सुखं लभन्ते॥३॥

पदार्थः-हे **(ऋतजात)** सत्य में प्रकट होने वाले **(प्रचेतः)** अच्छे ज्ञान से युक्त **(अग्ने)** प्रकाशस्वरूप **(विप्रः)** बुद्धिमान् जन **(त्वम्)** आप जैसे **(सत्पतिः)** जल का पालक सूर्य्य **(शवसा)** बल से **(वृत्रम्)** मेघ का **(हन्ति)** नाश करता है और **(पणेः)** व्यवहारकर्त्ता के **(वाजम्)** अन्न वा विज्ञान को **(वि, भर्ति)** विशेष कर धारण करता है, वैसे **(यम्)** जिसको **(सजोषाः)** तुल्य प्रीति से सेवन करने वाले आप **(राया)** धन से **(अपाम्)** जलों के **(नप्त्रा)** नहीं गिरने वाले के साथ **(हिनोषि)** वृद्धि करे हो **(सः)** सो यह सब प्रकार से वृद्धि को प्राप्त होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बुद्धिमान् जन सूर्य्य के सदृश विद्या को प्रकाशित करके अविद्या का नाश करते हैं, वे अतुल सुख को प्राप्त होते हैं॥३॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

यस्ते॑ सूनो सहसो गी॒र्भिरु॒क्थैर्य॒ज्ञैर्मर्तो॒ निशि॑तिं वे॒द्यान॑ट्।
विश्वं॒ स दे॑व॒ प्रति॒ वार॑मग्ने ध॒त्ते धा॒न्यं॑ पत्य॑ते वस॒व्यैः॥४॥

यः। ते॒। सू॒नो॒ इति॑। स॒हस॒ः। गी॒ःऽभिः। उ॒क्थैः। य॒ज्ञैः। मर्तः॑। निऽशि॑तिम्। वे॒द्या। आन॑ट्। विश्व॑म्। सः। दे॒व॒। प्रति॑। वा॒। अर॑म्। अ॒ग्ने॒। ध॒त्ते। धा॒न्य॑म्। पत्य॑ते। व॒स॒व्यैः॥४॥

पदार्थः-(यः) (ते) तव **(सूनो) (सहसः)** बलिष्ठस्य **(गीर्भिः)** वाग्भिः **(उक्थैः)** वक्तुमर्हैर्वेदितव्यैर्वेदवचनैः **(यज्ञैः)** विद्वत्सत्कारादिभिः **(मर्त्तः)** मनुष्यः **(निशितिम्)** नितरां तीक्ष्णम् **(वेद्या)** सुखप्रापिकया **(आनट्)** व्याप्नोति **(विश्वम्)** समग्रम् **(सः)** सुख प्रदाता **(देव) (प्रति) (वा) (अरम्)** अलम् **(अग्ने)** अग्निवद्वर्त्तमान विद्वन् **(धत्ते) (धान्यम्) (पत्यते)** पतिरिवाचरति **(वसव्यैः)** वसुषु धनेषु भवैः॥४॥

अन्वयः-हे सहसस्सूनो देवाग्ने! ते यो मर्त्तो गीर्भिरुक्थैर्वेद्या निशितिमानद् वसव्यैर्यज्ञैर्विश्वं धान्यं वारं प्रति धत्ते पत्यते स त्वया सङ्गन्तव्यः॥४॥

भावार्थः-हे मनुष्याः ! पूर्णेन ब्रह्मचर्य्येण शरीरात्मबलमलं कृत्वा सन्तानोत्पत्तिं कुरुत॥४॥

पदार्थः-हे **(सहसः)** बलिष्ठ के **(सूनोः)** पुत्र **(देव)** दीप्तिमान् **(अग्ने)** अग्नि के समान वर्त्तमान विद्वन्! **(ते)** आप का **(यः)** जो **(मर्त्तः)** मनुष्य **(गीर्भिः)** वाणियों और **(उक्थैः)** कहने और जानने योग्य वेद के वचनों से और **(वेद्या)** सुख को प्राप्त कराने वाली वेदी से **(निशितिम्)** निरन्तर तीक्ष्णता के साथ **(आनट्)** व्याप्त होता है **(वसव्यैः)** धनों में प्रकट हुए पदार्थों के साथ **(यज्ञैः)** विद्वानों के सत्कारादिकों से **(विश्वम्)** समग्र पदार्थ को **(धान्यम्)** धान्य को **(वा)** वा **(अरम्)** पूर्ण **(प्रति, धत्ते)** धारण करता और **(पत्यते)** स्वामी के सदृश आचरण करता है **(सः)** वह आप से मेल करने योग्य है॥४॥

भावार्थः-हे मनुष्यो! पूर्ण ब्रह्मचर्य्य से शरीर और आत्मा के बल को पूर्ण करके सन्तानों की उत्पत्ति करो॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये॥५॥

ता। नृऽभ्यः। आ। सौश्रवसा। सुऽवीरा। अग्ने। सूनो इति। सहसः। पुष्यसे। धाः। कृणोषि। यत्। शवसा। भूरि। पश्वः। वयः। वृकाय। अरये। जसुरये॥५॥

पदार्थः-**(ता)** तानि **(नृभ्यः)** नायकेभ्यः **(आ)** **(सौश्रवसा)** सुश्रवसा विदुषा निर्वृत्तानि **(सुवीरा)** शोभना वीरा येभ्यस्तानि **(अग्ने)** पावकवद्वर्त्तमान **(सूनो)** बलवन् **(सहसः)** बलस्य **(पुष्यसे)** पुष्टये **(धाः)** दधासि **(कृणोषि)** **(यत्)** येन **(शवसा)** बलेन **(भूरि)** **(पश्वः)** पशोः **(वयः)** जीवनम् **(वृकाय)** वृकवद्वर्त्तमानाय **(अरये)** शत्रवे **(जसुरये)** हिंसकाय॥५॥

अन्वयः-हे सहसस्सूनोऽग्ने! त्वं यच्छवसा पुष्यसे नृभ्यस्सुवीरा ता सौश्रवसाऽऽधः पश्वो भूरि वयो कृणोषि जसुरये वृकायाऽरये दण्डं ददासि तस्मात्त्वं न्यायकार्य्यसि॥५॥

भावार्थः-यो नृपो दुष्टान् चोरादीन्निवार्य्य प्रजाः पुष्टाः करोति स सर्वहितैषी वर्त्तते॥५॥

पदार्थः-हे **(सहसः)** बल के सम्बन्ध में **(सूनो)** बलवान् सन्तान **(अग्ने)** अग्नि के समान वर्त्तमान आप **(यत्)** जिस **(शवसा)** बल से **(पुष्यसे)** पुष्टि के लिये **(नृभ्यः)** नायक जनों से **(सुवीरा)** सुन्दर वीर जिनके लिये **(ता)** उन **(सौश्रवसा)** विद्वान् से सिद्ध किये नये कर्म्मों को **(आ, धाः)** धारण करते **(पश्वः)** पशु के **(भूरि)** बड़े **(वयः)** जीवन को **(कृणोषि)** करते हो और **(जसुरये)** हिंसा करने वाले **(वृकाय)** वृक के सदृश वर्त्तमान **(अरये)** शत्रु के लिये दण्ड देते हो, इस कारण से आप न्यायकारी हो॥५॥

भावार्थः-जो राजा दुष्ट चोरादिकों का निवारण करके प्रजाओं को पुष्ट करता है, वह सब का हितैषी होता है॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

व॒द्मा सू॒नो सहसो नो॒ विहा॑या॒ अग्ने॑ तो॒कं तन॑यं वा॒जिनो॑ दाः।
विश्वा॑भिर्गी॒र्भिर॒भि पू॒र्तिम॑श्यां॒ मदे॑म श॒तहि॑माः सु॒वीरा॑:॥६॥१५॥

व॒द्मा। सू॒नो॒ इति॑। सह॑सः। नः॒। विऽहा॑याः। अग्ने॑। तो॒कम्। तन॑यम्। वा॒जिन॑:। दा॒:। विश्वा॑भिः। गी॒:ऽभिः। अ॒भि। पू॒र्तिम्। अ॒श्या॒म्। मदे॑म। श॒तऽहि॑माः। सु॒ऽवीरा॑:॥६॥

पदार्थः-(**वद्मा**) सत्यहितोपदेष्टा (**सूनो**) अपत्य (**सहसः**) बलिष्ठस्य (**नः**) (**विहायाः**) महान्। **विहायेति महन्नाम।** (निघं०३.३) (**अग्ने**) पावकवद्विद्वन् (**तोकम्**) वर्धकम् (**तनयम्**) सुखविस्तारकमपत्यम् (**वाजिनः**) अन्नादियुक्तस्य (**दाः**) देहि (**विश्वाभिः**) समग्राभिः (**गीर्भिः**) वाग्भिः (**अभि**) सर्वतः (**पूर्त्तिम्**) (**अश्याम्**) प्राप्नुयाम् (**मदेम**) आनन्देम (**शतहिमाः**) शतायुषः (**सुवीराः**) उत्तमवीरवन्तः॥६॥

अन्वयः-हे सहसस्सूनोऽग्ने! विहाया वद्मा त्वं नो विश्वाभिर्गीर्भिर्वाजिनस्तोकं तनयं दाः। येनाहं पूर्तिमश्यां यतो वयं शतहिमाः सुवीरा अभि मदेम॥६॥

भावार्थः-हे विद्वांसोऽध्यापनोपदेशाभ्यां सर्वेषां गृहस्थानां पुत्रान् पुत्रीश्च सुशिक्ष्य विद्यया सुखयुक्तान् कुर्वन्तु येन दीर्घायुषो भूत्वैतेऽप्येवमेवाऽऽचरेयुरिति॥६॥

अत्राग्निविद्वद्राजगुणवर्णनादेतर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोदशं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**सहसः**) बलिष्ठ के (**सूनो**) सन्तान (**अग्ने**) अग्नि के सदृश विद्वन्! (**विहायाः**) बड़े (**वद्मा**) सत्य हित के उपदेष्टा आप (**नः**) हम को (**विश्वाभिः**) संपूर्ण (**गीर्भिः**) वाणियों से (**वाजिनः**) अन्न आदि युक्त के (**तोकम्**) वृद्धि करने और (**तनयम्**) सुख के बढ़ाने वाले के अपत्य को (**दाः**) दीजिये जिससे मैं (**पूर्तिम्**) पूर्णता को (**अश्याम्**) प्राप्त होऊँ और जिससे हम लोग (**शतहिमाः**) सौ वर्ष की अवस्था युक्त (**सुवीराः**) उत्तम वीरों वाले (**अभि, मदेम**) सब ओर से आनन्द करें॥६॥

भावार्थः-हे विद्वान् जनो! आप अध्यापन और उपदेश से सम्पूर्ण गृहस्थों के पुत्र और पुत्रियों को उत्तम प्रकार शिक्षित करके विद्या से सुखयुक्त करो, जिससे दीर्घ अवस्थावाले होकर ये सन्तान भी ऐसा ही आचरण करें॥६॥

इस सूक्त में अग्नि, विद्वान् और राजा के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेरहवाँ सूक्त और पन्द्रहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य चतुर्दशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ३ भुरिगुष्णिक् छन्दः। ऋषभः स्वरः। २ निचृदनुष्टुप्। ४ अनुष्टुप्। ५ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ६ भुरिगतिजगती छन्दः। निषादः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अबः छः ऋचावाले चौदहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अग्ना यो मर्त्यो दुवो धियं जुजोषधीतिभिः।
भसन्नु ष प्र पूर्व्य इषं वुरीतावसे॥ १॥

अग्नाः यः। मर्त्यः। दुवः। धियम्। जुजोषः। धीतिऽभिः। भसत्। नु। सः। प्र। पूर्व्यः। इषम्। वुरीत। अवसे॥ १॥

पदार्थः-(अग्ना) अग्नौ **(यः)** **(मर्त्यः)** मनुष्यः **(दुवः)** परिचरणम् **(धियम्)** प्रज्ञां कर्म वा **(जुजोष)** **(धीतिभिः)** अङ्गुल्याद्यवयैः **(भसत्)** प्रकाशेत **(नु)** सद्यः **(सः)** **(प्र)** **(पूर्व्यः)** पूर्वैर्निष्पादितः **(इषम्)** अन्नं विज्ञानं वा **(वुरीत)** स्वीकुर्य्यात् **(अवसे)** रक्षणाद्याय॥ १॥

अन्वयः-हे विद्वांसो! यो मर्त्यो धीतिभिरग्ना दुवो धियं जुजोषाऽवसे पूर्व्यः प्र भसदिषं नु वुरीत स भाग्यशाली भवति॥ १॥

भावार्थः-ये मनुष्या आलस्यादिदोषान् विहाय धर्मेण पुरुषार्थं कुर्वन्ति ते सर्वमिष्टं सुखं लभन्ते॥ १॥

पदार्थः-हे विद्वान् जनो! **(यः)** जो **(मर्त्यः)** मनुष्य **(धीतिभिः)** अंगुली आदि अवयवों से **(अग्ना)** अग्नि में **(दुवः)** सेवन और **(धियम्)** बुद्धि वा कर्म्म का **(जुजोष)** सेवन करता है और **(अवसे)** रक्षण आदि के लिये **(पूर्व्यः)** पूर्वजनों से प्रकाशित किया गया **(प्र, भसत्)** प्रकाशित होवे और **(इषम्)** अन्न वा विज्ञान की **(नु)** शीघ्र **(वुरीत)** स्वीकार करे **(सः)** वह भाग्यशाली होता है॥ १॥

भावार्थः-जो मनुष्य आलस्य आदि दोषों का त्याग कर धर्म्म से पुरुषार्थ करते हैं, वे सम्पूर्ण इष्ट सुख को प्राप्त होते हैं॥ १॥

अथ मनुष्याः किं कुर्वन्तीत्याह॥

अब मनुष्या क्या करते हैं, इस विषय को कहते हैं॥

अग्निरिद्धि प्रचेता अग्निर्वेधस्तमः ऋषिः।
अग्निं होतारमीळते यज्ञेषु मनुषो विशः॥ २॥

अ॒ग्निः। इत्। हि। प्रऽचे॑ताः। अ॒ग्निः। वे॒धःऽत॑मः। ऋषिः॑। अ॒ग्निम्। होता॑रम्। ई॒ळ॒ते॒। य॒ज्ञेषु॑। मनु॑षः। विशः॑॥ २॥

पदार्थः-(अग्निः) विद्युदिव **(इत्)** एव **(हि)** **(प्रचेताः)** प्रज्ञापकः **(अग्नि)** पवित्रः **(वेधस्तमः)** विद्वत्तमः **(ऋषिः)** मन्त्रार्थवेत्ता **(अग्निम्)** परमात्मानम् **(होतारम्)** सर्वस्य धर्त्तारं दातारं वा **(ईळते)** स्तुवन्ति **(यज्ञेषु)** सन्ध्योपासनादिषु सत्कर्मसु **(मनुषः)** मननशीलाः **(विशः)** मनुष्याः। **विश इति मनुष्यनाम।** (निघं०२.३)॥ २॥

अन्वयः-हे मनुष्या! यं होतारमग्निं प्रचेता अग्निर्वेधस्तमोऽग्निर्ऋषिर्मनुषो विशश्च यज्ञेष्वीळते तमिद्धि यूयं प्रशंसत॥ २॥

भावार्थः-हे मनुष्या! सर्वेषां युष्माकं परमेश्वर एव स्तोतव्यो मन्तव्यो निदिध्यासितव्य उपासनीयोऽस्तीति सर्वे निश्चिन्वन्तु॥ २॥

पदार्थः-हे मनुष्यो! जिस **(होतारम्)** सब को धारण करने वा देनेवाले **(अग्निम्)** परमात्मा को **(प्रचेताः)** जानने वाला **(अग्निः)** बिजुली जैसे वैसे **(वेधस्तमः)** अतीव विद्वान् **(अग्निः)** पवित्र **(ऋषिः)** मन्त्र और अर्थों को जानने वाला और **(मनुषः)** विचार करने वाले **(विशः)** मनुष्य **(यज्ञेषु)** सन्ध्योपासन आदि श्रेष्ठ कर्म्मों में **(ईळते)** स्तुति करते हैं उस **(इत्)** ही की **(हि)** निश्चित आप लोग प्रशंसा करो॥ २॥

भावार्थः-हे मनुष्यो! सब आप लोगों का परमेश्वर ही स्तुति करने, मानने, हृदय में धारण करने और उपासना करने योग्य है, ऐसा सब लोग निश्चय करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

नाना॒ ह्य१॒॑ग्नेऽव॑से॒ स्पर्ध॑न्ते॒ रायो॑ अ॒र्यः।
तूर्व॑न्तो॒ दस्यु॑मा॒यवो॑ व्र॒तैः सीक्ष॑न्तो अव्र॒तम्॥ ३॥

नाना॑। हि। अ॒ग्ने॒। अव॑से। स्पर्ध॑न्ते। रायः॑। अ॒र्यः। तूर्व॑न्तः। दस्यु॑म्। आ॒यवः॑। व्र॒तैः। सीक्ष॑न्तः। अ॒व्र॒तम्॥ ३॥

पदार्थः-(नाना) अनेके **(हि)** खलु **(अग्ने)** विद्वन् **(अवसे)** रक्षणाद्याय **(स्पर्धन्ते)** परोत्कर्षं न सहन्ते **(रायः)** धनस्य **(अर्य्यः)** स्वामी **(तूर्वन्तः)** हिंसन्तः **(दस्युम्)** दुष्टम् **(आयवः)** मनुष्याः **(व्रतैः)** कर्मभिः **(सीक्षन्तः)** सोढुमिच्छन्तः **(अव्रतम्)** धर्म्यकर्म्मरहितम्॥ ३॥

अन्वयः-हे अग्ने! ये हि नानाऽव्रतं दस्युं तूर्वन्तो व्रतैः सीक्षन्त आयवोऽवसे स्पर्धन्ते तान् रायोऽर्य्यः स्वामी सत्कुर्य्यात्॥ ३॥

भावार्थः-ये दुष्टानां निवारणे प्रयतन्ते ते मनुष्याः श्रीपतयो भवन्ति॥ ३॥

पदार्थः-हे **(अग्ने)** विद्वन्! जो **(हि)** निश्चय **(नाना)** अनेक **(अव्रतम्)** धर्म्मयुक्त कर्म्म से रहित **(दस्युम्)** दुष्ट जन की **(तूर्वन्तः)** हिंसा करते और **(व्रतैः)** कर्म्मों से **(सीक्षन्तः)** सहने की इच्छा करते हुए **(आयवः)** मनुष्य **(अवसे)** रक्षण आदि के लिये **(स्पर्धन्ते)** दूसरे की बड़ाई को नहीं सहते हैं, उनके **(रायः)** धन का **(अर्य्यः)** स्वामी सत्कार करे॥३॥

भावार्थः-जो दुष्टों के निवारण में प्रयत्न करते हैं, वे मनुष्य धनवान् होते हैं॥३॥

पुनरुत्तमो मनुष्यः किं करोतीत्याह॥

फिर उत्तम मनुष्य क्या करता है, इस विषय को कहते हैं॥

अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम्।

यस्य त्रसन्ति शवसः सञ्चक्षि शत्रवो भिया॥४॥

अग्निः। अप्साम्। ऋतिऽसहम्। वीरम्। ददाति। सत्ऽपतिम्। यस्य। त्रसन्ति। शवसः। सम्ऽचक्षि। शत्रवः। भिया॥४॥

पदार्थः-(**अग्निः**) महाबलिष्ठो वीरपुरुषः **(अप्साम्)** सत्कर्म्मणां विभक्तारम् **(ऋतीषहम्)** य ऋतीन् परपदार्थप्रापकाञ्छत्रून्त्सहते। अत्र **संहितायामि**ति दीर्घः। **(वीरम्)** शूरपुरुषम् **(ददाति)** **(सत्पतिम्)** सतां पालकम् **(यस्य)** **(त्रसन्ति)** उद्विजन्ति **(शवसः)** बलात् **(सञ्चक्षि)** समक्षे **(शत्रवः)** **(भिया)** भयेन॥४॥

अन्वयः-हे मनुष्या! यस्य शवसः सञ्चक्षि भिया शत्रवस्त्रसन्ति सोऽग्निरप्सामृतीषहं सत्पतिं वीरं ददाति॥४॥

भावार्थः-ये ब्रह्मचारिणो जितेन्द्रिया विद्वांसो भूत्वा शरीरात्मसामर्थ्यं नापनयन्ति तेभ्योऽरयो भीत्वा पलायन्तेऽथवा वशमाप्नुवन्ति॥४॥

पदार्थः-हे मनुष्यो! **(यस्य)** जिसके **(शवसः)** बल से **(सञ्चक्षि)** सम्मुख **(भिया)** भय से **(शत्रवः)** शत्रुजन **(त्रसन्ति)** व्याकुल होते हैं वह **(अग्निः)** बड़ा बलिष्ठ वीर पुरुष **(अप्साम्)** श्रेष्ठ कर्म्मों के विभाग करने और **(ऋतीषहम्)** दूसरे के पदार्थों के प्राप्त कराने वाले शत्रुओं को सहनकर्त्ता **(सत्पतिम्)** श्रेष्ठों के पालक **(वीरम्)** वीर पुरुष को **(ददाति)** देता है॥४॥

भावार्थः-जो ब्रह्मचारी जितेन्द्रिय और विद्वान् होकर शरीर और आत्मा के सामर्थ्य को नहीं दूर करते हैं, उनसे शत्रुजन डर के भागते हैं अथवा वश को प्राप्त होते हैं॥४॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति।

सहावा यस्यावृतो रयिर्वाजेष्ववृतः॥५॥

अ॒ग्निः। हि। वि॒द्मना॑। नि॒दः। दे॒वः। मर्त॑म्। उ॒रु॒ष्यति॑। स॒हऽवा॑। यस्य॑। अवृ॑तः। र॒यिः। वाजे॑षु। अवृ॑तः॥५॥

पदार्थः-(अग्निः) पावक इव पवित्रोपचितो मुनिः **(हि)** यतः **(विद्मना)** ज्ञानेन **(निदः)** निन्दकान् **(देवः)** देदीप्यमानः **(मर्त्तम्)** मनुष्यम् **(उरुष्यति)** सेवते **(सहावा)** यः सहते सः **(यस्य)** **(अवृतः)** अस्वीकृतः **(रयिः)** धनम् **(वाजेषु)** स-ामेषु **(अवृतः)** अनाच्छादितः॥५॥

अन्वयः-हे मनुष्या! योऽवृतस्सहावा देवोऽग्निर्मर्त्तमुरुष्यति तं हि विद्मना विजानन्तु यस्य वाजेष्ववृतो रयिर्भवति तेन निदो निवारयन्तु॥५॥

भावार्थः-सर्वान् पदार्थान्त्सवन्तीं विद्युतं मनुष्या जानन्तु यद्विज्ञानेनाग्नेयादीन्यस्त्राणि सिद्ध्यन्ति तत्सर्वदाऽन्विष्यध्वम्॥५॥

पदार्थः-हे मनुष्यो! जो **(अवृतः)** नहीं स्वीकार किया गया **(सहावा)** सहने वाला **(देवः)** निरन्तर प्रकाशमान **(अग्निः)** अग्नि के सदृश पवित्रों से बढ़ा हुआ मुनि **(मर्त्तम्)** मनुष्य को **(उरुष्यति)** सेवता है उसको **(हि)** जिससे **(विद्मना)** ज्ञान से विशेष करके जानें और **(यस्य)** जिसके **(वाजेषु)** स-ामों में **(अवृतः)** नहीं आच्छादित किया गया **(रयिः)** धन होता है, उससे **(निदः)** निन्दा करने वालों का निवारण कीजिये॥५॥

भावार्थः-सब पदार्थों को उत्पन्न करती हुई बिजुली को मनुष्य जानें, जिस विज्ञान से आग्नेयादि नामक अस्त्र सिद्ध होते हैं, उसका सब काल में खोज करो॥५॥

पुनर्विद्वद्भिः प्रत्यहं किं करणीयमित्याह॥

फिर विद्वानों को प्रतिदिन क्या करना चाहिये, इस विषय को कहते हैं॥

अच्छा॑ नो मित्रमहो देव दे॒वानग्ने॒ वोचः॑ सुम॒तिं रोद॑स्योः। वी॒हि स्व॒स्तिं सु॒क्षि॒तिं दि॒वो नॄन् द्विषो॒ अंहां॑सि दुरि॒ता त॑रेम॒ ता त॑रेम॒ तवा॑वसा तरेम॥६॥१६॥

अच्छ॑। नः॒। मि॒त्र॒ऽम॒हः॒। दे॒व॒। दे॒वान्। अग्ने॑। वोचः॑। सु॒ऽम॒तिम्। रोद॑स्योः। वी॒हि। स्व॒स्तिम्। सु॒ऽक्षि॒तिम्। दि॒वः। नॄन्। द्विषः॑। अंहां॑सि। दुः॒ऽइ॒ता। त॒रे॒म॒। ता। त॒रे॒म॒। तव॑। अव॑सा। त॒रे॒म॒॥६॥

पदार्थः-(अच्छा) सम्यक्। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मान् **(मित्रमहः)** मित्रैः पूजनीय **(देव)** सुखदातः **(देवान्)** विदुषः **(अग्ने)** पावक इव प्रकाशमान विद्वन् **(वोचः)** ब्रूहि **(सुमतिम्)** शोभनां प्रज्ञाम् **(रोदस्योः)** अग्निपृथिव्योः **(वीहि)** व्याप्नुहि **(स्वस्तिम्)** सुखम् **(सुक्षितिम्)** शोभना क्षितिर्भूमियस्यां ताम् **(दिवः)** कामयामानान् **(नॄन्)** मनुष्यान् **(द्विषः)** द्वेष्टॄन् **(अंहांसि)** पापानि **(दुरिता)** दुष्टाचरणानि दुर्व्यसनानि **(तरेम)** उल्लङ्घेम **(ता)** तानि निन्दादीनि **(तरेम)** **(तव)** **(अवसा)** रक्षणाद्येन **(तरेम)**॥६॥

अन्वयः-हे मित्रमहो देवाऽग्ने! त्वं नो देवान् रोदस्योः सुमतिमच्छा वोचः सुक्षितिं स्वस्तिं वीहि दिवो नॄन् पदार्थविद्यां ब्रूहि यतस्तवाऽवसा द्विषोंऽहांसि दुरिता तरेम ता तरेम कुसङ्गदोषांश्च तरेम॥६॥

भावार्थः-हे विद्वांसो! यावतीं विद्यां यूयं प्राप्नुयात तावतीमन्येभ्यो यथावदुपदिशत सत्योपदेशेन मनुष्याणां दुर्व्यसनानि दूरीकुरुत स्वयमधर्म्माचरणात् पृथग्वर्त्तध्वं सत्सङ्गेन पुरुषार्थेन च शुद्धा भूत्वा दुःखानि तीर्त्वा सुखमाप्नुतेति॥६॥

अत्राऽग्निविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्दशं सूक्तं षोडशो वर्ग्गश्च समाप्तः॥

पदार्थः-हे **(मित्रमहः)** मित्रों से आदर करने योग्य **(देव)** सुख के देनेवाले **(अग्ने)** अग्नि के सदृश विद्या के प्रकाश से युक्त विद्वन्! आप **(नः)** हम लोगों **(देवान्)** विद्वानों को तथा **(रोदस्योः)** अग्नि और पृथिवी सम्बन्धिनी **(सुमतिम्)** उत्तम बुद्धि को **(अच्छा)** उत्तम प्रकार **(वोचः)** कहिये **(सुक्षितिम्)** उत्तम भूमि जिसमें उस **(स्वस्तिम्)** सुख को **(वीहि)** प्राप्त हूजिये और **(दिवः)** कामना करते हुए **(नॄन्)** मनुष्यों से पदार्थविद्या को कहिये जिससे **(तव)** आपके **(अवसा)** रक्षण आदि से **(द्विषः)** द्वेष से युक्त जनों **(अंहांसि)** पापों और **(दुरिता)** दुष्ट आचरणों दुर्व्यसनों का **(तरेम)** उल्लङ्घन करें तथा **(ता)** उन निन्दादिकों का **(तरेम)** उल्लंघन करें और कुसङ्ग से हुए दोषों का **(तरेम)** उल्लङ्घन करें॥६॥

भावार्थः-हे विद्वान् जनो! जितनी विद्या को आप लोग प्राप्त होओ उतनी का अन्य जनों के लिये यथावत् उपदेश करो और सत्य उपदेश से मनुष्यों के दुष्ट व्यसनों को दूर करो और आप अधर्म्म के आचरण से पृथक् वर्त्ताव करो और सत्संग तथा पुरुषार्थ से शुद्ध होकर दुःखों से पार होकर सुख को प्राप्त होओ॥६॥

इस सूक्त में अग्नि और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौदहवाँ सूक्त और सोलहवाँ वर्ग्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकोनविंशत्यृचस्य पञ्चदशस्य सूक्तस्य भरद्वाजो बार्हस्पत्यो वीतहव्यो वा ऋषिः।
अग्निर्देवता। १, ८ विराड्जगती छन्दः। २, ५, ९ निचृज्जगती। ३ निचृदतिजगती। ७ जगती।
निषादः स्वरः। ४, १४ भुरिक् त्रिष्टुप्। १०, ११, १६ निचृत् त्रिष्टुप्। १३ विराट् त्रिष्टुप्। १९
त्रिष्टुप्। धैवतः स्वरः। ६ निचृदतिशक्वरी छन्दः। १२ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १५
ब्राह्मी बृहती छन्दः। मध्यमः स्वरः। १७ विराडनुष्टुप्। १८ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मनुष्यैः किं वेदितव्यमित्याह॥

अब उन्नीस ऋचावाले सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

इ॒मम्मू षु वो॒ अ॒तिथिमुष॒र्बुधं॒ वि॒श्वासां वि॒शां पति॑मृञ्जसे गि॒रा।
वेतीद्दि॒वो ज॒नुषा॒ कच्चि॒दा शुचि॒र्ज्योक् चि॑दत्ति॒ गर्भो॒ यदच्यु॑तम्॥ १॥

इ॒मम्। ऊँ इति॑। सु। व॒रिति॑। अति॑थिम्। उ॒ष॒रिति॑ उ॒ऽबुध॑म्। विश्वा॑साम्। वि॒शाम्। पति॑म्। ऋ॒ञ्ज॒से॒। गि॒रा। वेति॑। इत्। दि॒वः। ज॒नुषा॑। कत्। चि॒त्। आ। शुचिः॑। ज्योक्। चि॒त्। अ॒त्ति॒। गर्भः॑। यत्। अच्यु॑तम्॥ १॥

पदार्थः-(इमम्) (उ) वितर्के **(सु)** शोभने **(वः)** युष्माकम् **(अतिथिम्)** अतिथिमिव वर्त्तमानम् **(उषर्बुधम्)** य उषसि बोधयति तम् **(विश्वासाम्)** सर्वासाम् **(विशाम्)** मनुष्यादिप्रजानाम् **(पतिम्)** पालकम् **(ऋञ्जसे)** प्रसाध्नोषि **(गिरा)** वाचा **(वेति)** व्याप्नोति **(इत्)** एव **(दिवः)** दिवसस्य पदार्थबोधस्य **(जनुषा)** जन्मना **(कत्)** कदापि **(चित्)** अपि **(आ)** **(शुचिः)** पवित्रः **(ज्योक्)** निरन्तरम् **(चित्)** अपि **(अत्ति)** भुङ्क्ते **(गर्भः)** अन्तःस्थ **(यत्)** **(अच्युतम्)** नाशरहितम्॥ १॥

अन्वयः-हे विद्वन्! यतस्त्वमिमं विश्वासां विशां पतिमतिथिमुषर्बुधमृञ्जसे गर्भ इव य उ दिवो जनुषा सु वेतीत् कच्चिद्यच्छुचिरच्युतं वस्तु ज्योगत्ति वो गिरा चिदाऽऽजानाति स विद्वान् भवति॥ १॥

भावार्थः-हे मनुष्या! यथाऽतिथिः पूजनीयोऽस्ति तथैव पदार्थविद्यावित्सत्कर्त्तव्योऽस्ति ये सर्वान्तःस्थं नित्यं विद्युज्ज्योतिर्जानन्ति तेऽभीप्सितं सुखं लभन्ते॥ १॥

पदार्थः-हे विद्वन्! जिस कारण से आप **(इमम्)** इस **(विश्वासाम्)** सम्पूर्ण **(विशाम्)** मनुष्य आदि प्रजाओं के **(पतिम्)** पालक **(अतिथिम्)** अतिथि के समान वर्त्तमान **(उषर्बुधम्)** प्रातःकाल में जगानेवाले को **(ऋञ्जसे)** सिद्ध करते हैं **(गर्भः)** अन्तःस्थ के समान जो **(उ)** तर्कनासहित **(दिवः)** पदार्थबोध की **(जनुषा)** उत्पत्ति से **(सु, वेति)** अच्छे प्रकार व्याप्त होता **(इत्)** ही है तथा **(कत्)** कभी **(चित्)** भी **(यत्)** जो **(शुचिः)** पवित्र **(अच्युतम्)** नाश से रहित वस्तु को **(ज्योक्)** निरन्तर **(अत्ति)** भोगता है और **(वः)** आप लोगों की **(गिरा)** वाणी से **(चित्)** निश्चित **(आ)** आज्ञा करता है, वह विद्वान् होता है॥ १॥

भावार्थः-हे मनुष्यो! जैसे अतिथि सत्कार करने योग्य है, वैसे ही पदार्थविद्या का जानने वाला सत्कार करने योग्य है, जो सब के अन्तःस्थ नित्य बिजुली की ज्योति को जानते हैं, वे अभीप्सित सुख को प्राप्त होते हैं॥१॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम्।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे॥२॥

मित्रम्। न। यम्। सुऽधितम्। भृगवः। दधुः। वनस्पतौ। ईड्यम्। ऊर्ध्वऽशोचिषम्। सः। त्वम्। सुःऽप्रीतः। वीतऽहव्ये। अद्भुत। प्रशस्तिऽभिः। महयसे। दिवेऽदिवे॥२॥

पदार्थः-(**मित्रम्**) सखायम् (**न**) इव (**यम्**) (**सुधितम्**) सुष्ठु स्थितम् (**भृगवः**) विद्वांसो मनुष्याः (**दधुः**) दधति (**वनस्पतौ**) वनानां किरणानां पालके सूर्य्ये (**ईड्यम्**) उत्तमैर्गुणैः प्रशंसनीयम् (**ऊर्ध्वशोचिषम्**) ऊर्ध्वज्वालम् (**सः**) (**त्वम्**) (**सुप्रीतः**) सुष्ठु प्रसन्नः (**वीतहव्ये**) वीतं व्याप्तं ग्रहीतव्यं वस्तु येन तस्मिन् (**अद्भुत**) महाशय। **अद्भुतमिति महन्नाम।** (निघं०३.३) (**प्रशस्तिभिः**) प्रशंसनीयाभिर्धर्म्याभिः क्रियाभिः (**महयसे**) सत्क्रियसे (**दिवेदिवे**) प्रतिदिनम्॥२॥

अन्वयः-हे अद्भुत! यं मित्रं न सुधितं वनस्पतावीड्यमूर्ध्वशोचिषं भृगवो दधुः स त्वं प्रशस्तिभिर्दिवेदिवे सुप्रीतः सन् वीतहव्ये महयसे तस्मात्सेवनीयोऽसि॥२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सखा कार्य्याणि साध्नोति तथैवाग्निः सुसम्प्रयुक्तः कार्य्याणि साध्नोति॥२॥

पदार्थः-हे (**अद्भुत**) महाशय! (**यम्**) जिस (**मित्रम्**) मित्र को (**न**) जैसे वैसे (**सुधितम्**) उत्तम प्रकार स्थित को (**वनस्पतौ**) किरणों के पालक सूर्य्य में (**ईड्यम्**) उत्तम गुणों से प्रशंसा करने योग्य (**ऊर्ध्वशोचिषम्**) ऊपर को ज्वाला जिसकी उसको (**भृगवः**) विद्वान् मनुष्य (**दधुः**) धारण करते हैं (**सः**) वह (**त्वम्**) आप (**प्रशस्तिभिः**) प्रशंसा करने योग्य धर्म्मयुक्त क्रियाओं से (**दिवेदिवे**) प्रतिदिन (**सुप्रीतः**) उत्तम प्रकार प्रसन्न हुए (**वीतहव्ये**) व्याप्त हुआ ग्रहण करने योग्य वस्तु जिससे उसमें (**महयसे**) सत्कार किये जाते हो, इससे सेवन करने योग्य हो॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे मित्र कार्य्यों को सिद्ध करता है, वैसे ही अग्नि उत्तम प्रकार प्रयोग किया कार्य्यों को सिद्ध करता है॥२॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे होवैं, इस विषय को कहते हैं॥

स त्वं दक्षस्यावृको वृधो भरर्यः परस्यान्तरस्य तरुषः।

रा॒यः सू॑नो सहसो॒ मर्त्ये॑ष्वा छ॒र्दिर्य॑च्छ वी॒तह॑व्याय स॒प्रथो॑ भ॒रद्वा॑जाय स॒प्रथ॑ः॥ ३॥

सः। त्वम्। दक्ष॑स्य। अ॒वृ॒कः। वृ॒धः। भूः। अ॒र्यः। पर॑स्य। अन्त॑रस्य। तरु॑षः। रा॒यः। सू॒नो॒ इति॑। स॒हस॒ः। मर्त्ये॑षु। आ। छ॒र्दिः। य॒च्छ॒। वी॒तऽह॑व्याय। स॒ऽप्रथ॑ः। भ॒रत्ऽवा॑जाय। स॒ऽप्रथ॑ः॥ ३॥

पदार्थः-(सः) (त्वम्) (दक्षस्य) बलस्य **(अवृकः)** अस्तेनः **(वृधः)** वर्धकः **(भूः)** भवेः **(अर्य्यः)** स्वामी **(परस्य)** प्रकृष्टस्य **(अन्तरस्य)** भिन्नस्य **(तरुषः)** तारकस्य **(रायः)** धनस्य **(सूनो)** अपत्य **(सहसः)** बलवतः **(मर्त्येषु)** मनुष्येषु **(आ)** समन्तात् **(छर्दिः)** गृहम् **(यच्छ)** देहि **(वीतहव्याय)** प्राप्तप्राप्तव्याय **(सप्रथः)** समानप्रख्यातिः **(भरद्वाजाय)** धृतविज्ञानाय **(सप्रथः)** विस्तृतविज्ञानेन सहितः॥ ३॥

अन्वयः-हे सहसस्सूनो! यस्त्वं दक्षस्यावृको वृधः परस्यान्तरस्य तरुषो रायोऽर्यो मर्त्येषु सप्रथो वीतहव्याय भरद्वाजाय दाता भूः स सप्रथस्त्वं छर्दिराऽऽयच्छ॥ ३॥

भावार्थः-यदि मनुष्याः सर्वतो बलं वर्धयेयुस्तर्हि श्रीमन्तः कथं न स्युः॥ ३॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** सन्तान! जो **(त्वम्)** आप **(दक्षस्य)** बल के **(अवृकः)** नहीं चोर **(वृधः)** बढ़ाने वाले **(परस्य)** अत्यन्त **(अन्तरस्य)** भिन्न **(तरुषः)** तारने वाले **(रायः)** धन के **(अर्यः)** स्वामी **(मर्त्येषु)** मनुष्यों में **(सप्रथः)** तुल्य प्रसिद्धि वाले **(वीतहव्याय)** प्राप्त हुआ प्राप्त होने योग्य जिसको उस **(भरद्वाजाय)** धारण किया विज्ञान जिसने उसके लिये दाता **(भूः)** होओ **(सः)** वह **(सप्रथः)** विस्तृत विज्ञान के सहित आप **(छर्दिः)** गृह को **(आ, यच्छ)** आदान कीजिये अर्थात् लीजिये॥ ३॥

भावार्थः-जो मनुष्य सब प्रकार से बल के वृद्धि करें तो लक्ष्मीयुक्त कैसे न हों॥ ३॥

पुनर्मनुष्यैः किं ज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

द्यु॒ता॒नं वो॒ अति॑थिं॒ स्व॑र्णरमग्निं होता॑रं मनु॒षः स्वध्व॑रम्।
विप्रं॑ न द्यु॒क्षव॑चसं सुवृ॒क्तिभि॑र्हव्य॒वाह॑मर॒तिं दे॒वमृ॑ञ्जसे॥ ४॥

द्यु॒ता॒नम्। व॒ः। अति॑थिम्। स्व॑ःऽनरम्। अ॒ग्निम्। होता॑रम्। मनु॑षः। सु॒ऽअ॒ध्व॒रम्। विप्र॑म्। न। द्यु॒क्षऽव॑चसम्। सु॒वृ॒क्तिऽभि॑ः। ह॒व्य॒ऽवाह॑म्। अ॒र॒तिम्। दे॒वम्। ऋ॒ञ्ज॒से॒॥ ४॥

पदार्थः-(द्युतानम्) सत्यार्थद्योतकम् **(वः)** युष्माकम् **(अतिथिम्)** अतिथिमिव **(स्वर्णरम्)** यः स्वः सुखं नयति तम् **(अग्निम्)** पावकम् **(होतारम्)** आदातारम् **(मनुषः)** मनुष्यस्य **(स्वध्वरम्)** सुष्ठ्वध्वरा यस्मात्तम् **(विप्रम्)** मेधाविनम् **(न)** इव **(द्युक्षवचसम्)** द्योतकवचनस्य प्रकाशकम् **(सुवृक्तिभिः)** सुष्ठु व्रजन्ति याभिः क्रियाभिस्ताभिस्सहितम् **(हव्यवाहम्)** धर्त्तव्यवाहकम् **(अरतिम्)** प्रापकम् **(देवम्)** द्योतमानम् **(ऋञ्जसे)** प्रसाध्नोषि॥ ४॥

अन्वयः-हे विद्वन्! यस्त्वं वो युष्माकमतिथिमिव द्युतानं स्वर्णरं मनुषो होतारं स्वध्वरमग्निं सुवृक्तिभिर्न द्युक्षवचसं हव्यवाहमरतिं देवं विप्रं न ऋञ्जसे तं वयं सत्कुर्य्याम॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा विपश्चिद्यथायोग्यानि कार्य्याणि कर्तुं शक्नोति तथैव युक्त्या सम्प्रयुक्तोऽग्निः सर्वं व्यापारं साद्धुं शक्नोति॥४॥

पदार्थः-हे विद्वन्! जो आप **(वः)** आप लोगों के **(अतिथिम्)** अतिथि के समान **(द्युतानम्)** सत्यार्थ के प्रकाशक **(स्वर्णरम्)** सुख को प्राप्त कराने और **(मनुषः)** मनुष्य के **(होतारम्)** ग्रहण करने वाले **(स्वध्वरम्)** उत्तम प्रकार यज्ञ जिससे उस **(अग्निम्)** अग्नि को **(सुवृक्तिभिः)** अच्छे प्रकार चलते हैं जिन क्रियाओं से उनके सहित जैसे वैसे **(द्युक्षवचसम्)** द्योतकवचन के प्रकाशक **(हव्यवाहम्)** धारण करने योग्य को वहन करने और **(अरतिम्)** प्राप्ति कराने वाले **(देवम्)** प्रकाशमान **(विप्रम्)** बुद्धिमान् को **(न)** जैसे वैसे **(ऋञ्जसे)** सिद्ध करते हो उसका हम लोग सत्कार करें॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे बुद्धिमान् जन यथायोग्य कर्म्मों को करने को समर्थ होता है, वैसे ही युक्ति से अच्छे प्रकार प्रयोग किया अग्नि सम्पूर्ण व्यापार सिद्ध करने को समर्थ होता है॥४॥

पुनर्मनुष्यैः किं प्रकाशनीयमित्याह॥

फिर मनुष्यों को क्या प्रकाशित करना चाहिये, इस विषय को कहते हैं॥

पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः॥५॥१७॥

पावकया। यः। चितयन्त्या। कृपा। क्षामन्। रुरुचे। उषसः। न। भानुना। तूर्वन्। न। यामन्। एतशस्य। नु। रणे। आ। यः। घृणे। न। ततृषाणः। अजरः॥५॥

पदार्थः-**(पावकया)** पावकस्य क्रियया **(यः)** **(चितयन्त्या)** ज्ञापयन्त्या **(कृपा)** कृपया **(क्षामन्)** पृथिव्याम् **(रुरुचे)** प्रदीप्यते **(उषसः)** प्रभातवेला **(न)** इव **(भानुना)** किरणेन **(तूर्वन्)** हिंसन् **(न)** इव **(यामन्)** यान्ति यस्मिंस्तस्मिन्मार्गे **(एतशस्य)** अश्वस्य **(नू)** सद्यः **(रणे)** संग्रामे **(आ)** **(यः)** **(घृणे)** प्रदीप्ते **(न)** इव **(ततृषाणः)** तृषातुरः **(अजरः)** जरारहितः॥५॥

अन्वयः-हे मनुष्या! यो भानुनोषसो न पावकया चितयन्त्या कृपा क्षामन् रुरुचे घृणे न रणे ततृषाणोऽजरो यो यामन्नेतशस्य प्रेरकस्तूर्वन्न न्वाऽऽरुरुचे सः सेवनीयोऽस्ति॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यकिरणा उषसं प्रकाशन्ते तथैव विद्वांसः सर्वान्तःकरणानि प्रकाशयेयुः॥५॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(भानुना)** किरण से **(उषसः)** प्रभातवेला **(न)** जैसे वैसे **(पावकया)** अग्नि की क्रिया से और **(चितयन्त्या)** जनाती हुई **(कृपा)** कृपा से **(क्षामन्)** पृथिवी में **(रुरुचे)** प्रकाशित किया जाता है **(घृणे)** प्रदीप्त में **(न)** जैसे वैसे **(रणे)** संग्राम में **(ततृषाणः)** पिपासा से

व्याकुल (**अजरः**) जरा से रहित (**यः**) जो (**यामन्**) चलते हैं जिसमें उस मार्ग में (**एतशस्य**) घोड़े का चलाने वाला (**तूर्वन्**) हिंसन करता हुआ (**न**) जैसे वैसे (**नू**) शीघ्र (**आ**) प्रकाशित होता है, वह सेवा करने योग्य है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य के किरण प्रातःकाल को प्रकाशित करते हैं, वैसे ही विद्वान् जन सब के अन्तः करणों को प्रकाशित करें॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि। उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः॥६॥

अग्निम्ऽअग्निम्। वः। सम्ऽइधा। दुवस्यत। प्रियम्ऽप्रियम्। वः। अतिथिम्। गृणीषणि। उप। वः। गीःऽभिः। अमृतम्। विवासत। देवः। देवेषु। वनते। हि। वार्यम्। देवः। देवेषुः वनते। हि। नः। दुवः॥६॥

पदार्थः-(**अग्निमग्निम्**) प्रत्यग्निम् (**वः**) युष्माकम् (**समिधा**) इन्धनैः। (**दुवस्यत**) परिचरत (**प्रियम्प्रियम्**) कमनीयं कमनीयम् (**वः**) युष्माकम् (**अतिथिम्**) (**गृणीषणि**) स्तोतव्ये व्यवहारे (**उप**) (**वः**) युष्मान् (**गीर्भिः**) वाग्भिः (**अमृतम्**) कारणरूपेण नाशरहितम् (**विवासत**) परिचरत। **विवासतीति परिचरणकर्म्मा।** (निघं०३.५) (**देवः**) द्योतमानः (**देवेषु**) दिव्यगुणेषु (**वनते**) सम्भजति (**हि**) (**वार्य्यम्**) वरणीयं व्यवहारम् (**देवः**) दाता (**देवेषु**) पितृषु विद्वत्सु (**वनते**) सम्भजते (**हि**) खलु (**नः**) अस्मभ्यम् (**दुवः**) परिचरणम्॥६॥

अन्वयः-हे मनुष्या! यो गृणीषणि समिधा वोऽग्निमग्निं वः प्रियम्प्रियमतिथिमुप वनते हि यो देवेषु देवो गीर्भिर्वो वार्य्यममृतं सेवते यो हि देवेषु देवो नो दुवो वनते तं दुवस्यत तं विवासत॥६॥

भावार्थः-हे मनुष्या! यूयं विद्वांसमिवाग्निं सङ्गमयत यतोऽभीष्टं कार्यं सिद्ध्येत्॥६॥

पदार्थः-हे मनुष्यो! जो (**गृणीषणि**) स्तुति करने योग्य व्यवहार में (**समिधा**) इन्धनों से (**वः**) आप लोगों के (**अग्निमग्निम्**) अग्नि अग्नि का और (**वः**) आप लोगों के (**प्रियम्प्रियम्**) कामना करने योग्य कामना करने योग्य (**अतिथिम्**) अतिथि का (**उप, वनते**) समीप में सेवन करता (**हि**) ही है और जो (**देवेषु**) श्रेष्ठ गुणयुक्तों में (**देवः**) प्रकाशमान (**गीर्भिः**) वाणियों से (**वः**) आप लोगों को (**वार्यम्**) स्वीकार करने योग्य व्यवहार (**अमृतम्**) कारणरूप से नाशरहित का सेवन करता है और जो (**हि**) निश्चित (**देवेषु**) पितृरूप विद्वानों में (**देवः**) दाता जन (**नः**) हम लोगों के लिये (**दुवः**) सेवन को (**वनते**) स्वीकार करता है उसका (**दुवस्यत**) सेवन करो उसका (**विवासत**) सेवन करो॥६॥

भावार्थः-हे मनुष्यो! आप लोग जैसे विद्वान् का, वैसे अग्नि का भी मेल करावें, जिससे अभीष्ट कार्य्य सिद्ध होवे॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

समि॑द्धम॒ग्निं स॒मिधा॑ गि॒रा गृ॑णे॒ शुचिं॑ पाव॒कं पु॒रो अ॑ध्व॒रे ध्रु॒वम्।
विप्रं॒ होता॑रं पुरु॒वार॑म॒द्रुहं॑ क॒विं सु॒म्नैरी॑महे जा॒तवे॑दसम्॥७॥

सम्ऽइ॑द्धम्। अ॒ग्निम्। स॒म्ऽइधा॑। गि॒रा। गृ॒णे॒। शुचि॑म्। पा॒व॒कम्। पु॒रः। अ॒ध्व॒रे। ध्रु॒वम्। विप्र॑म्। होता॑रम्। पु॒रु॒ऽवार॑म्। अ॒द्रु॒ह॑म्। क॒विम्। सु॒म्नैः। ई॒म॒हे॒। जा॒तऽवे॑दसम्॥७॥

पदार्थः-(समिद्धम्) देदीप्यमानम् **(अग्निम्) (समिधा)** इन्धनेनेव **(गिरा)** वाण्या **(गृणे) (शुचिम्)** पवित्रम् **(पावकम्)** पवित्रकर्त्तारम् **(पुरः)** पुरस्तात् **(अध्वरे)** अहिंसामये यज्ञे **(ध्रुवम्)** निश्चलम् **(विप्रम्)** विद्याविनयाभयां धीमन्तम् **(होतारम्) (पुरुवारम्)** पुरुभिर्बहुभिर्विद्वद्भिः सत्कृतम् **(अद्रुहम्)** द्रोहरहितम् **(कविम्)** पूर्णविद्यम् **(सुम्नैः)** सुखैः **(ईमहे)** याचामहे **(जातवेदसम्)** जातविद्यम्॥७॥

अन्वयः-हे मनुष्याः! समिधा समिद्धमग्निमिव वर्त्तमानमध्वरे ध्रुवं शुचिं पावकं होतारं पुरुवारमद्रुहं जातवेदसं विप्रं गिरा पुरो गृणे कविमिव सुम्नैर्वयमीमहे तथा यूयमपि याचध्वम्॥७॥

भावार्थः-हे मनुष्या! यूयं सत्यप्रकाशकेभ्यो विद्वद्भ्यो विद्यां याचध्वम्, एतां प्राप्यान्येभ्यो दत्त॥७॥

पदार्थः-हे मनुष्यो! **(समिधा)** इन्धन के समान पदार्थ से **(समिद्धम्)** प्रकाशित हुए **(अग्निम्)** अग्नि को जैसे वैसे वर्त्तमान को **(अध्वरे)** अहिंसारूप यज्ञ में **(ध्रुवम्)** बहुत विद्वानों से सत्कार किये गये **(अद्रुहम्)** द्रोह से रहित **(जातवेदसम्)** प्रकट हुई विद्या जिसकी ऐसे **(विप्रम्)** विद्या और विनय से बुद्धिमान् को **(गिरा)** वाणी से **(पुरः)** आगे **(गृणे)** स्तुति करता हूँ **(कविम्)** पूर्ण विद्या से युक्त को जैसे वैसे **(सुम्नैः)** सुखों से हम लोग **(ईमहे)** याचना करें, वैसे आप लोग भी याचना करो॥७॥

भावार्थः-हे मनुष्यो! आप लोग सत्य के प्रकाशक विद्वानों से विद्या की याचना करो तथा इस विद्या को प्राप्त होकर अन्यों को देओ॥७॥

मनुष्यैः क उपासनीय इत्याह॥

मनुष्यों से **[**=को**]** किसकी उपासना करने योग्य है, इस विषय को कहते हैं॥

त्वां दू॒तम॑ग्ने अ॒मृतं॑ यु॒गेयु॑गे हव्य॒वाह॑ं द॒धिरे॑ पा॒युमी॑ड्य॑म्।
दे॒वास॑श्च॒ मर्ता॑सश्च॒ जागृ॑विं वि॒भुं वि॒श्पति॑ं नम॑सा॒ नि षे॑दिरे॥८॥

त्वाम्। दू॒तम्। अ॒ग्ने॒। अ॒मृत॑म्। यु॒गेऽयु॑गे। ह॒व्य॒ऽवाह॑म्। द॒धि॒रे॒। पा॒युम्। ई॒ड्य॑म्। दे॒वास॑ः। च॒। मर्ता॑सः। च॒। जाग्रृ॑विम्। वि॒ऽभुम्। वि॒श्पति॑म्। नम॑सा। नि। से॒दि॒रे॒॥८॥

पदार्थः-(त्वाम्) (दूतम्) यो दुःखानि दुनोति दूरीकरोति तम् **(अग्ने)** अग्निरिव स्वप्रकाशमान **(अमृतम्)** नाशरहितम् **(युगेयुगे)** वर्षे वर्षे सत्ययुगादौ वा **(हव्यवाहम्)** यो हव्यान्यादातुमर्हाणि वहति तत् **(दधिरे) (पायुम्)** पालकम् **(ईड्यम्)** स्तोतुमर्हम् **(देवासः)** विद्वांसः **(च)** योगिनः **(मर्त्तासः)**

मरणधर्माण: **(च)** **(जागृविम्)** सदा जागरूकम् **(विभुम्)** व्यापकम् **(विश्पतिम्)** मनुष्यादिप्रजापालकम् **(नमसा)** **(नि)** **(सेदिरे)** निषीदन्ति॥८॥

अन्वय:-हे अग्ने भगवन्! युगेयुगे यं हव्यवाहमीड्यं पायुं विश्पतिं जागृविममृतं दूतं विभुं परमात्मानं त्वां देवासश्च मर्त्तासश्च नमसा दधिरे नि षेदिरे तं वयं दधीमहि तस्मिन्निषीदेम॥८॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यूयं प्रत्यहं सर्वव्यापिनं न्यायेशं दयालुं सर्वधन्यवादार्हं परमात्मानमेवोपासीध्वम्॥८॥

पदार्थ:-हे **(अग्ने)** अग्नि के सदृश स्वयं प्रकाशमान भगवन्! **(युगेयुगे)** वर्ष वर्ष वा सत्ययुग आदि में जिस **(हव्यवाहम्)** ग्रहण करने योग्य पदार्थों को धारण करने वाले **(ईड्यम्)** स्तुति करने योग्य **(पायुम्)** पालन करने वाले **(विश्पतिम्)** मनुष्य आदि प्रजाओं के पालक **(जागृविम्)** सदा जागने वाले **(अमृतम्)** नाश से रहित **(दूतम्)** दु:खों के दूर करने वाले **(विभुम्)** व्यापक परमात्मा **(त्वाम्)** आपको **(देवास:)** विद्वान् **(च)** और योगी **(मर्त्तास:)** मरण धर्म्मवाले **(च)** भी **(नमसा)** सत्कार से **(दधिरे)** धारण और योगी **(मर्त्तास:)** मरण धर्म्मवाले **(च)** भी **(नमसा)** सत्कार से **(दधिरे)** धारण करें **(नि, सेदिरे)** स्थित होते हैं, उसको हम लोग धारण करें तथा उसमें स्थित होवें॥८॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग प्रतिदिन सर्वव्यापी, न्यायेश, दयालु, सब धन्यवादों के योग्य, परमात्मा ही की उपासना करो॥८॥

पुन: स ईश्वर उपासित: किं करोतीत्याह॥

फिर वह उपासित ईश्वर क्या करता है, इस विषय को कहते हैं॥

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथ: शिवो भव॥९॥

विऽभूषन्। अग्ने। उभयान्। अनु। व्रता। दूत:। देवानाम्। रजसी इति। सम्। ईयसे। यत्। ते। धीतिम्। सुऽमतिम्। आऽवृणीमहे। अध। स्म। न:। त्रिऽवरूथ:। शिव:। भव॥९॥

पदार्थ:-**(विभूषन्)** अलं कुर्वन् **(अग्ने)** सर्वदु:खदाहक परमेश्वर **(उभयान्)** विद्वदविद्वन्मनुष्यान् **(अनु)** **(व्रता)** कर्म्माणि **(दूत:)** यो दोषान् दुनोति दूरीकरोति धर्म्मार्थमोक्षान् प्रापयति वा **(देवानाम्)** विदुषाम् **(रजसी)** द्यावापृथिव्यौ **(सम्)** **(ईयसे)** व्याप्नोषि **(यत्)** यस्य **(ते)** तव **(धीतिम्)** धारणां धियं वा **(सुमतिम्)** शोभनां प्रज्ञाम्। **(आवृणीमहे)** स्वीकुर्महे **(अध)** अथ **(स्मा)** एव। अत्र **निपातस्य च**ेति दीर्घ:। **(न:)** अस्मभ्यम् **(त्रिवरूथ:)** त्रीण्युत्तममध्यमनिकृष्टानि वरूथा गृहाणीव निवासस्थानानि यस्य स:। **(शिव:)** मङ्गलकारी **(भव)**॥९॥

अन्वय:-हे अग्ने! यस्त्वं रजसी देवानां दूत: सन् व्रता विभूषन्नुभयान् मनुष्याननु विभूषन् रजसी समीयसे यत्ते धीतिं सुमतिं वयमावृणीमहे सोऽध त्रिवरूथस्त्वं न: शिव: स्मा भव॥९॥

भावार्थः-ये मनुष्या जगत्स्रष्टुरीश्वरस्याज्ञामनुवर्त्तन्ते तस्य गुणकर्म्मस्वभावैः सदृशान्त्स्वगुणकर्म्मस्वभावान् कुर्वन्ति तान् स दूत इव सर्वविद्यासमाचारं बोधयन् सहजतया मुक्तिपदं नयति तस्मात् सर्वदेवाऽयमुपासनीयोऽस्ति॥९॥

पदार्थः-हे **(अग्ने)** सम्पूर्ण दुःखों को जलाने अर्थात् दूर करने वाले परमेश्वर! जो आप **(रजसी)** अन्तरिक्ष और पृथिवी को **(देवानाम्)** विद्वानों के **(दूतः)** दोषों को दूर करने अथवा धर्म्म, अर्थ और मोक्ष को प्राप्त करानेवाले होते हुए **(व्रता)** कर्मों को **(विभूषन्)** शोभित करते और **(उभयान्)** विद्वान् और अविद्वान् मनुष्यों को **(अनु)** पीछे शोभित करते हुए अन्तरिक्ष और पृथिवी को **(सम्, ईयसे)** व्याप्त होते हैं और **(यत्)** जिस **(ते)** आपकी **(धीतिम्)** धारणा वा बुद्धि को **(सुमतिम्)** श्रेष्ठ बुद्धि को हम लोग **(आवृणीमहे)** स्वीकार करें वह **(अध)** इसके अनन्तर **(त्रिवरूथः)** तीन उत्तम, मध्यम, निकृष्ट गृहों के सदृश निवासस्थान वाले आप **(नः)** हम लोगो के लिये **(शिवः)** कल्याणकारी **(स्मा)** ही **(भव)** हूजिये॥९॥

भावार्थः-जो मनुष्य जगत् के रचनेवाले ईश्वर की आज्ञा के अनुकूल वर्त्ताव करते हैं तथा उसके गुण, कर्म्म और स्वभावों के सदृश अपने गुण, कर्म्म और स्वभावों को करते हैं, उनको वह जैसे दूत, वैसे सब विद्या के समाचार को जनाता हुआ सहज से मुक्ति के पद को प्राप्त कराता है, इससे सब काल में ही इसकी उपासना करनी चाहिये॥९॥

पुनस्तज्ज्ञानोपासने आवश्यके भवत इत्याह॥

फिर उसका ज्ञान और उपासना आवश्यक है, इस विषय को कहते हैं॥

तं सुप्रतीकं सुदृशं स्वञ्जमविद्वांसो विदुष्टरं सपेम।
स यक्षद्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत्॥१०॥१८॥

तम्। सुऽप्रतीकम्। सुऽदृशम्। सुऽअञ्जम्। अविद्वांसः। विदुःऽतरम्। सपेम। सः। यक्षत्। विश्वा। वयुनानि। विद्वान्। प्र। हव्यम्। अग्निः। अमृतेषु। वोचत्॥१०॥

पदार्थः-**(तम्)** **(सुप्रतीकम्)** शोभनानि प्रतीकानि कृतानि येन तम् **(सुदृशम्)** योगाभ्यासेन द्रष्टुं योग्यं सुष्ठु दर्शकं वा **(स्वञ्जम्)** यः सुष्ठ्वञ्जति जानाति प्रापयति वा तम् **(अविद्वांसः)** **(विदुष्टरम्)** अतिशयितमीश्वरम् **(सपेम)** आक्रुश्येम **(सः)** **(यक्षत्)** सङ्गमयेत् **(विश्वा)** सर्वाणि **(वयुनानि)** प्रज्ञानानि **(विद्वान्)** आविर्विद्यः **(प्र)** **(हव्यम्)** दातुमर्हं विज्ञानम् **(अग्निः)** अग्निरिव प्रकाशमानः **(अमृतेषु)** नाशरहितेषु कारणजीवेषु **(वोचत्)** वक्ति॥१०॥

अन्वयः-हे मनुष्या! येऽविद्वांसस्तं सुप्रतीकं सुदृशं स्वञ्जं विदुष्टरं न विजानन्ति नोपासन्ते तान् वयं सपेम। यो विद्वानग्निर्विश्वा वयुनान्यमृतेषु हव्यञ्च प्र वोचत् सोऽस्मान् यक्षत्॥१०॥

भावार्थः-ये परमात्मानं नो जानन्ति तदाज्ञानुकूलं नाचरन्ति तान् धिग्धिग्ये च तमुपासते ते धन्याः। योऽस्मान् वेदद्वारा सर्वाणि विज्ञानान्युपदिशति तमेव वयं सर्व उपासीमहि॥१०॥

पदार्थः-हे मनुष्यो! जो **(अविद्वांसः)** विद्या से रहित जन **(तम्)** उस **(सुप्रतीकम्)** सुन्दर कर्म्म किये जिसने तथा **(सुदृशम्)** योगाभ्यास से देखने योग्य वा उत्तम प्रकार दिखाने और **(स्वञ्चम्)** अच्छे प्रकार जानने वा प्राप्त करानेवाले **(विदुष्टरम्)** अत्यन्त विद्वान् ईश्वर को नहीं विशेष करके जानते और न उपासना करते हैं उनको हम लोग **(सपेम)** शाप देते हैं और जो **(विद्वान्)** प्रकट विद्याओं से युक्त **(अग्निः)** अग्नि के समान स्वयं प्रकाशित हुआ **(विश्वा)** सम्पूर्ण **(वयुनानि)** प्रज्ञानों और **(अमृतेषु)** नाशरहित कारण जीवों में **(हव्यम्)** देने योग्य विज्ञान को **(प्र, वोचत्)** अत्यन्त कहता है **(सः)** वह हम लोगों को **(यक्षत्)** प्राप्त करावे॥१०॥

भावार्थः-जो परमात्मा को नहीं जानते और उसकी आज्ञा के अनुकूल आचरण नहीं करते हैं, उनको धिक् है धिक् है और जो उसकी उपासना करते हैं, वे धन्य हैं। और जो हम लोगों के लिये वेदद्वारा सम्पूर्ण विज्ञानों का उपदेश देता है, उसी की हम सब लोग उपासना करें॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम्।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया॥११॥

तम्। अग्ने। पासि। उत। तम्। पिपर्षि। यः। ते। आनट्। कवये। शूर। धीतिम्। यज्ञस्य। वा। निऽशितिम्। वा। उत्ऽइतिम्। वा। तम्। इत्। पृणक्षि। शवसा। उत। राया॥११॥

पदार्थः-(**तम्**) (**अग्ने**) अविद्यान्धकारविनाशक (**पासि**) रक्षसि (**उत**) अपि (**तम्**) (**पिपर्षि**) पालयसि सद्गुणैः पूरयसि वा (**यः**) (**ते**) तव (**आनट्**) व्याप्नोति (**कवये**) विदुषे (**शूर**) निर्भय दुष्टदोषविनाशक (**धीतिम्**) धारणाम् (**यज्ञस्य**) (**वा**) (**निशितिम्**) नितरां तीक्ष्णताम् (**वा**) (**उदितिम्**) उदयम् (**वा**) (**तम्**) (**इत्**) एव (**पृणक्षि**) सम्बध्नासि (**शवसा**) बलेन (**उत**) अपि (**राया**) धनेन॥११॥

अन्वयः-हे शूराग्ने! यस्त आज्ञामानट् तस्मै कवये धीतिं ददासि तं पास्युत तं पिपर्षि वा यज्ञस्य निशितिम् **[**उदितिम्**]** वा पृणक्षि तं वा शवसोत राया सह पृणक्षि स इद्भवानुपास्योऽस्ति॥११॥

भावार्थः-ये सत्यभावेन जगदीश्वरमुपासते तानीश्वरः सर्वतः संरक्ष्य धर्म्यगुणकर्म्मस्वभावेषु प्रेरयित्वा शरीरात्मबलं प्रदाय मोक्षं नयति॥११॥

पदार्थः-हे **(शूर)** भयरहित दुष्ट दोषों के विनाश करने और **(अग्ने)** अविद्यारूप अन्धकार के नाश करने वाले **(यः)** जो **(ते)** आपकी आज्ञा को **(आनट्)** व्याप्त होता है उस **(कवये)** विद्वान् के लिये **(धीतिम्)** धारणा को देते हो **(तम्)** उसकी **(पासि)** रक्षा करते हो **(उत)** और **(तम्)** उसकी **(पिपर्षि)** पालना करते वा श्रेष्ठ गुणों से पूरित करते हो **(वा)** वा **(यज्ञस्य)** यज्ञ की **(निशितिम्)** अत्यन्त तीक्ष्णता

का वा **(उदितिम्)** उदय का **(वा)** वा **(पृणक्षि)** सम्बन्ध करते हो **(तम्)** उसका **(वा)** वा **(शवसा)** बल से **(उत)** और **(राया)** धन से भी सम्बन्ध करते हो वह **(इत्)** ही आप उपासना करने योग्य हैं॥११॥

भावार्थः-जो सत्यभाव से जगदीश्वर की उपासना करते हैं, उनकी ईश्वर सब प्रकार से रक्षा कर धर्म्मयुक्त गुण, कर्म और स्वभावों में प्रेरणा कर तथा शरीर और आत्मा का बल अच्छे प्रकार देकर मोक्ष को प्राप्त कराता है॥११॥

पुनरीश्वरः किमर्थमुपासनीय इत्याह॥

फिर ईश्वर किस निमित्त उपासना करने योग्य है, इस विषय को कहते हैं॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥१२॥

त्वम्। अग्ने। वनुष्यतः। नि। पाहि। त्वम्। ऊँ इति। नः। सहसाऽवन्। अवद्यात्। सम्। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सम्। रयिः। स्पृहयाय्यः। सहस्री॥१२॥

पदार्थः-**(त्वम्)** **(अग्ने)** शुभगुणप्रदातः **(वनुष्यतः)** याचमानान् **(नि)** **(पाहि)** नित्यं रक्ष **(त्वम्)** **(उ)** **(नः)** अस्मान् **(सहसावन्)** अमितबलयुक्त **(अवद्यात्)** निन्द्याचरणात् **(सम्)** **(त्वा)** त्वाम् **(ध्वस्मन्वत्)** ध्वंसवन् **(अभि)** **(एतु)** प्राप्नोतु **(पाथः)** अन्नादिकम् **(सम्)** **(रयिः)** श्रीः **(स्पृहयाय्यः)** **(सहस्री)** सहस्रं सर्वं सुखमस्मिन्निति सः॥१२॥

अन्वयः-हे सहसावन्नग्ने! त्वं वनुष्यतो नोऽस्मानवद्यात्त्वं नि पाहि यः स्पृहयाय्यः सहस्री रयिर्यद्ध्वस्मन्वत् पाथश्चाऽस्मान्त्समभ्येतु तद्वन्तो वयमु त्वा त्वां समुपास्महि॥१२॥

भावार्थः-हे मनुष्या! यो धर्मेण याचितो जगदीश्वरोऽधर्म्माचरणात् पृथक्कृत्य धर्मं प्रापयति यो ह्यनित्यमपि सुखं प्रयच्छति तमेव रक्षकं सर्वैश्वर्य्यप्रदमिष्टदेवं विजानीत॥१२॥

पदार्थः-हे **(सहसावन्)** अत्यन्त बलयुक्त **(अग्ने)** श्रेष्ठ गुणों के देनेवाले **(त्वम्)** आप **(वनुष्यतः)** याचना करते हुए **(नः)** हम लोगों की **(अवद्यात्)** निन्द्य आचरण से **(त्वम्)** आप **(नि, पाहि)** नित्य रक्षा करिये और जो **(स्पृहयाय्यः)** स्पृहा कराने योग्य **(सहस्री)** सम्पूर्ण सुख जिसमें वह **(रयिः)** धन और जो **(ध्वस्मन्वत्)** नाशवाला **(पाथः)** अन्न आदि हम लोगों को **(सम्, अभि, एतु)** उत्तम प्रकार प्राप्त हो, उससे युक्त हम लोग **(उ)** भी **(त्वा)** आपको **(सम्)** अच्छे प्रकार उपासना करें॥१२॥

भावार्थः-हे मनुष्यो! जो धर्म्म से याचना किया गया जगदीश्वर अधर्म के आचरण से अलग करके धर्म्म को प्राप्त कराता है और जो अनित्य सुख को भी देता है, उसी को रक्षक, सब ऐश्वर्य्य देनेवाला तथा इष्ट देव जानो॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।

देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा॥ १३॥

अग्निः। होता। गृहऽपतिः। सः। राजा। विश्वा। वेद। जनिमा। जातऽवेदाः। देवानाम्। उत। यः। मर्त्यानाम्। यजिष्ठः। सः। प्र। यजताम्। ऋतऽवा॥ १३॥

पदार्थः-(अग्निः) सर्वप्रकाशकः **(होता)** धर्त्ता **(गृहपतिः)** गृहस्य पालक इव ब्रह्माण्डस्य प्रबन्धकर्त्ता **(सः)** **(राजा)** सर्वेषां न्यायकर्त्ता **(विश्वा)** सर्वाणि **(वेद)** जानाति **(जनिमा)** जन्मानि **(जातवेदाः)** यो जातान्त्सर्वान् वेत्ति सः **(देवानाम्)** दिव्यानां पदार्थानां विदुषां वा मध्ये **(उत)** अपि **(यः)** **(मर्त्यानाम्)** सङ्गमयतु **(ऋतावा)** सत्यासत्ययोर्विभाजकः॥ १३॥

अन्वयः-हे विद्वांसो! यो गृहपतिरिव होता जातवेदाः सर्वस्य राजा ऋतावा यजिष्ठोऽग्निर्देवानामुत मर्त्यानां विश्वा जनिमा वेद सोऽस्मान् प्र यजतां सोऽस्माकं राजास्त्विति वयं निश्चिनुमस्तथा यूयमप्यवगच्छत॥ १३॥

भावार्थः-हे मनुष्या! योऽखिलस्य जगतो जीवानां च कर्म्माणि विदित्वा फलानि प्रयच्छति स एव सत्यो राजास्तीति वेदितव्यम्॥ १३॥

पदार्थः-हे विद्वानो! **(यः)** जो **(गृहपतिः)** गृह का पालक जैसे वैसे ब्रह्माण्ड का प्रबन्ध करने **(होता)** धारण करने तथा **(जातवेदाः)** प्रकट हुए पदार्थों को जाननेवाला और सब का **(राजा)** न्याय करने तथा **(ऋतावा)** सत्य और असत्य का विभाग करने **(यजिष्ठः)** अतिशय यज्ञ करने वा पदार्थों का मेल करनेवाला **(अग्निः)** सब का प्रकाशक **(देवानाम्)** दिव्य पदार्थों वा विद्वानों के मध्य में **(उत)** **(मर्त्यानाम्)** मनुष्यों के **(विश्वा)** सम्पूर्ण **(जनिमा)** जन्मों को **(वेद)** जानता है **(सः)** वह हम लोगों को **(प्र, यजताम्)** अत्यन्त प्राप्त करावे **(सः)** वह हम लोगों का राजा होवे, ऐसा हम लोग निश्चय करते हैं, वैसे आप लोग भी जानो॥ १३॥

भावार्थः-हे मनुष्यो! जो सम्पूर्ण जगत् और जीवों के कर्म्मों को जानकर फलों को देता है, वही सत्य राजा है, ऐसा जानना चाहिये॥ १३॥

पुनः स जगदीश्वरः कीदृशोऽस्तीत्याह॥

फिर वह जगदीश्वर कैसा है, इस विषय को कहते हैं॥

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्टवं हि यज्वा।

ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य॥ १४॥

अग्ने। यत्। अद्य। विशः। अध्वरस्य। होतरिति। पावकऽशोचे। वेः। त्वम्। हि। यज्वा। ऋता। यजासि। महिना। वि। यत्। भूः। हव्या। वह। यविष्ठ। या। ते। अद्य॥ १४॥

पदार्थः-(अग्ने) सर्वप्रजापीडानिवारक **(यत्)** यः **(अद्य)** इदानीम् **(विशः)** मनुष्यादिप्रजायाः **(अध्वरस्य)** अहिंसामयस्य **(होतः)** दातः **(पावकशोचे)** पवित्र प्रकाशक **(वेः)** विहगस्य पक्षिण इव **(त्वम्) (हि) (यज्वा)** सङ्गन्ता **(ऋता)** ऋते सत्यसुखप्रापके यज्ञे **(यजासि)** यजेः **(महिना)** महिम्ना **(वि) (यत्)** यः **(भूः)** भवेः **(हव्या)** दातुमर्हाणि **(वह) (यविष्ठ)** अतिशयेन सङ्गमयिता विभाजको वा **(या)** यानि **(वस्तूनि) (ते)** तव **(अद्य)**॥१४॥

अन्वयः-हे पावकशोचे होतर्यविष्ठाग्ने! यद्यो यज्वा त्वं ह्यद्य विशो वेरध्वरस्यर्त्ता यजासि यद्यस्त्वं महिना वि भूर्या ते वर्त्तमानेऽद्य सन्ति तानि हव्याऽस्मदर्थं वह॥१४॥

भावार्थः-हे मनुष्या! यः सर्वां सृष्टिं सङ्गतां करोति यो विभुरहिंसादिधर्म्मस्याऽनुष्ठानायाऽऽज्ञां ददाति स हि सर्वैरुपास्योऽस्तीति॥१४॥

पदार्थः-हे **(पावकशोचे)** पवित्र प्रकाश और **(होतः)** दान करने तथा **(यविष्ठ)** अतिशय मिलाने वा विभाग कराने और **(अग्ने)** सम्पूर्ण प्रजा की पीड़ाओं के दूर करनेवाले **(यत्)** जो **(यज्वा)** मेल करनेवाले **(त्वम्)** आप **(हि)** निश्चय से **(अद्य)** इस समय **(विशः)** मनुष्य आदि प्रजा के **(वेः)** आकाशगन्ता पक्षी के समान **(अध्वरस्य)** अहिंसामय के **(ऋता)** सत्य सुख के प्राप्त करानेवाले यज्ञ में **(यजासि)** यजन करते हो **(यत्)** जो आप **(महिना)** महत्त्व से **(वि)** विशेष करके **(भूः)** होवें और **(या)** जो वस्तुएँ **(ते)** आपके वर्त्तमान में **(अद्य)** इस समय हैं उन **(हव्या)** देने योग्यों को हम लोगों के लिये **(वह)** प्राप्त करिये॥१४॥

भावार्थः-हे मनुष्यो! जो सम्पूर्ण सृष्टि को एकत्रित करता है और जो व्यापक अहिंसा आदि धर्म्म के अनुष्ठान के लिये आज्ञा देता है, वह ही सब से उपासना करने योग्य है॥१४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै। अवा नो मघवन् वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम॥१५॥१९॥

अभि। प्रयांसि। सुऽधितानि। हि। ख्यः। नि। त्वा। दधीत। रोदसी इति। यजध्यै। अव। नः। मघऽवन्। वाजऽसातौ। अग्ने। विश्वानि। दुऽइता। तरेम। ता। तरेम। तव। अवसा तरेम॥१५॥

पदार्थः-(अभि) (प्रयांसि) कमनीयान्यन्नादीनि वस्तूनि **(सुधितानि)** सुष्ठु तृप्तिकराणि **(हि) (ख्यः)** प्रकथयसि **(नि) (त्वा) (दधीत)** धरेत् **(रोदसी)** द्यावापृथिव्यौ **(यजध्यै)** सङ्गन्तुम् **(अवा)** अत्र **निपातस्य चे**ति दीर्घः। **(नः)** अस्मान् **(मघवन्)** परमपूजितधनयुक्त **(वाजसातौ)** स-ामे **(अग्ने)** अतितेजस्विन् **(विश्वानि)** सर्वाणि **(दुरिता)** दुःखस्य प्रापकाणि पापानि **(तरेम)** उल्लङ्घेमहि **(ता)** तानि **(तरेम)** दुःखसागरस्य पारं गच्छेम **(तव) (अवसा)** रक्षणादिना **(तरेम)** सर्वान् दोषाँस्त्यजेम॥१५॥

अन्वय:-हे मघवन्नग्ने! यो भवान् सुधितानि प्रयांसि हि निदधीत त्वं विज्ञानान्यभि ख्यो भवान् यजध्यै रोदसी दधीत वाजसातौ नोऽस्मानवा यं त्वाऽऽश्रित्य वयं ता विश्वानि दुरिता तरेम तवावसा दु:खात् तरेम सततं तरेम॥१५॥

भावार्थ:-हे मनुष्या! योऽन्नपानादीनि जीवनहितानि विदधात्यन्तर्य्यमितया सत्यमुपदिशति तदाश्रयेणैव सर्वेभ्यो दु:खेभ्य: पारं गच्छत॥१५॥

पदार्थ:-हे **(मघवन्)** अत्यन्त श्रेष्ठ धन से युक्त **(अग्ने)** अतितेजस्वी जो आप **(सुधितानि)** उत्तम प्रकार तृप्ति करनेवाले **(प्रयांसि)** कामना करने योग्य अन्न आदि वस्तुओं को **(हि)** निश्चित **(नि, दधीत)** अच्छे प्रकार धारण करें और आप विज्ञानों को **(अभि, ख्य:)** सम्मुख कहते हो और आप **(यजध्यै)** मेल करने को **(रोदसी)** अन्तरिक्ष और पृथिवी को धारण करिये तथा **(वाजसातौ)** संग्राम में **(न:)** हम लोगों की **(अवा)** रक्षा करिये जिन **(त्वा)** आप का आश्रय करके हम लोग **(ता)** उन **(विश्वानि)** सम्पूर्ण **(दुरिता)** दु:ख के प्राप्त कराने वाले पापों का **(तरेम)** उल्लंघन करें **(तव)** आपके **(अवसा)** रक्षण आदि से **(तरेम)** दु:खसागर के पार जावें और निरन्तर **(तरेम)** सम्पूर्ण दोषों का त्याग करें॥१५॥

भावार्थ:-हे मनुष्यो! जो अन्न और पानादिक जीवन के हितकारक पदार्थों को धारण करता अन्तर्यामी होने से सत्य का उपदेश करता, उसके आश्रय से ही सम्पूर्ण दु:खों के पार प्राप्त होओ॥१५॥

पुनर्मनुष्यै: किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अग्ने॒ विश्वे॑भि: स्वनीक दे॒वैरू॒र्णाव॑न्तं प्रथ॒म: सी॑द॒ योनि॑म्।
कु॒ला॒यिन॑ं घृ॒तव॑न्तं सवि॒त्रे य॒ज्ञं न॑य॒ यज॑मानाय सा॒धु॥ १६॥

अग्ने॑। विश्वे॑भि:। सु॒ऽअ॒नी॒क॒। दे॒वै:। ऊ॒र्णाऽव॑न्तम्। प्र॒थ॒म:। सी॒द॒। योनि॑म्। कु॒ला॒यिन॑म्। घृ॒तऽव॑न्तम्। स॒वि॒त्रे। य॒ज्ञम्। न॒य॒। यज॑मानाय। सा॒धु॥ १६॥

पदार्थ:-(**अग्ने**) विद्वन् **(विश्वेभि:)** सर्वै: **(स्वनीक)** शोभनान्यनीकानि सैन्यानि यस्य तत्सम्बुद्धौ **(देवै:)** विद्वद्भिर्वीरैर्वा **(ऊर्णावन्तम्)** बहूर्णादिवस्त्रयुक्तम् **(प्रथम:)** प्रख्यात: **(सीद)** **(योनिम्)** गृहम् **(कुलायिनम्)** गृहादिसामग्रीयुक्तम् **(घृतवन्तम्)** बहुघृतादिवन्तम् **(सवित्रे)** जगदुत्पादकाय **(यज्ञम्)** सङ्गतिमयं व्यवहारम् **(नय)** प्रापय **(यजमानाय)** सङ्गतिकरणविद्याविदे **(साधु)**॥१६॥

अन्वय:-हे स्वनीकाग्ने राजन्! प्रथमस्त्वं विश्वेभिर्देवैस्सहोर्णावन्तं योनिं सीद सवित्रे यजमानाय कुलायिनं घृतवन्तं यज्ञं साधु नय॥१६॥

भावार्थ:-हे विद्वांसो! राजजना यूयं विद्वत्सहायेन न्यायगृहेषु स्थित्वा न्यायं कुरुत सर्वान् मनुष्यान् न्यायपथं नयत येन सर्वे सन्मार्गस्था: सन्त: परोपकारिण: स्यु:॥१६॥

पदार्थः-हे **(स्वनीक)** सुन्दर सेना वाले **(अग्ने)** विद्वन् राजन् **(प्रथमः)** प्रसिद्ध आप **(विश्वेभिः)** सम्पूर्ण **(देवैः)** विद्वानों वा वीर पुरुषों के साथ **(ऊर्णावन्तम्)** बहुत ऊर्णा के वस्त्रों से युक्त **(योनिम्)** गृह में **(सीद)** वर्त्तमान हो **(सवित्रे)** संसार को उत्पन्न करने और **(यजमानाय)** पदार्थों के मिलानेरूप विद्या को जानने वाले के लिये **(कुलायिनम्)** गृह आदि सामग्री से और **(घृतवन्तम्)** बहुत घृत आदि पदार्थों से युक्त **(यज्ञम्)** संगतिस्वरूप व्यवहार को साधु उत्तम प्रकार **(नय)** प्राप्त कराइये॥१६॥

भावार्थः-हे विद्यायुक्त राजजनो! आप लोग विद्वानों के सहाय से न्याय के गृहों में ठहर के न्याय करिये और सब मनुष्यों को न्यायमार्ग पर चलाइये, जिससे सब श्रेष्ठ मार्ग में स्थित होकर परोपकारी होवें॥१६॥

पुनर्विद्युतं कस्मान्निस्सारयेयुरित्याह॥

फिर बिजुली को किससे निकालें, इस विषय को कहते हैं॥

इ॒ममु॒ त्यमथ॑र्व॒वदु॒ग्निं म॑न्थन्ति वे॒धस॑:।
यमड्कू॑यन्त॒मान॑य॒न्नमू॑रं श्या॒व्या॑भ्य:॥ १७॥

इ॒मम्। ऊँ॒ इति॑। त्यम्। अ॒थ॒र्व॒ऽवत्। अ॒ग्निम्। म॒न्थ॒न्ति॒। वे॒धस॑:। यम्। अ॒ड्कू॒ऽयन्त॑म्। आ। अन॑यन्। अमू॑रम्। श्या॒व्या॑भ्य:॥ १७॥

पदार्थः-**(इमम्)** प्रत्यक्षम् **(उ)** **(त्यम्)** परोक्षम् **(अथर्ववत्)** यथाऽथर्ववेदे मन्थनं विहितम् **(अग्निम्)** विद्युतम् **(मन्थन्ति)** **(वेधसः)** मेधाविनो विपश्चितः **(यम्)** **(अड्कूयन्तम्)** यस्मिन्नड्कूनि प्रसिद्धानि चिह्नानि प्राप्नुवन्ति। अत्र **संहितायामिति** दीर्घः। **(आ)** **(अनयन्)** नयन्ति **(अमूरम्)** अमूढम् **(श्याव्याभ्यः)** श्यावीषु रात्रिषु भवाभ्यः क्रियाभ्यः। **श्यावीति रात्रिनाम।** (निघं०१.७)॥१७॥

अन्वयः-हे मनुष्या! वेधसः श्याव्याभ्यो यमड्कूयन्तमिममु त्यमग्निमथर्ववदमूरं मन्थन्ति कार्य्यसिद्धिमाऽऽनयंस्त यूयमपि मथित्वा कार्य्याणि साध्नुत॥१७॥

भावार्थः-ये विद्वांसो भूम्यन्तरिक्षवाय्वाकाशसूर्य्यादिभ्यो मथित्वा विद्युतं निःसारयन्ति तेऽनेकानि कार्य्याण्यलङ्कर्तुं शक्नुवन्ति॥१७॥

पदार्थः-हे मनुष्यो! **(वेधसः)** बुद्धिमान् विद्वान् जन **(श्याव्याभ्यः)** रात्रियों में हुई क्रियाओं से **(यम्)** जिस **(अड्कूयन्तम्)** प्रसिद्ध चिह्न प्राप्त होते जिसमें **(इमम्)** इस **(उ)** और **(त्यम्)** जो नहीं प्रत्यक्ष हुआ उस **(अग्निम्)** बिजुलीरूप अग्नि का **(अथर्ववत्)** जैसा अथर्ववेद में मन्थन कहा है, वैसे **(अमूरम्)** मूढ़ से भिन्न का **(मन्थन्ति)** मन्थन करते और कार्य्य की सिद्धि को **(आ, अनयन्)** अच्छे प्रकार प्राप्त करते हैं, उसका आप लोग भी मन्थन करके कार्य्यों को सिद्ध करिये॥१७॥

भावार्थः-जो विद्वान् जन भूमि, अन्तरिक्ष, वायु, आकाश और सूर्य्य आदि से मन्थन करके बिजुली को निकालते हैं, वे अनेक कार्य्यों के सिद्ध करने को समर्थ होते हैं॥१७॥

मनुष्यैः सृष्टेः कः क उपकारो ग्रहीतव्य इत्याह॥

मनुष्यों को सृष्टि से कौन-कौन उपकार ग्रहण करना चाहिये, इस विषय को कहते हैं॥

जनिष्वा देववीतये सर्वताता स्वस्तये।

आ देवान् वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः॥ १८॥

जनिष्व। देवऽवीतये। सर्वऽताता। स्वस्तये। आ। देवान्। वक्षि। अमृतान्। ऋतऽवृधः। यज्ञम्। देवेषु। पिस्पृशः॥ १८॥

पदार्थः-(जनिष्वा) जनय। अत्र **संहितायामिति** दीर्घः। **(देववीतये)** दिव्यगुणप्राप्तये **(सर्वताता)** सर्वसुखकरे शिल्पमये यज्ञे **(स्वस्तये)** सुखलब्धये **(आ) (देवान्)** दिव्यान् गुणान् भोगान् वा **(वक्षि)** वह **(अमृतान्)** नाशरहितान् **(ऋतावृधः)** सत्यव्यवहारवर्धकान् **(यज्ञम्)** सुखप्रदम् **(देवेषु)** विद्वत्सु **(पिस्पृशः)** स्पर्शय॥ १८॥

अन्वयः-हे विद्वंस्त्वं देववीतये स्वस्तये सर्वताताऽमृतानृतावृधो देवानाऽऽवक्षि देवेषु यज्ञं पिस्पृशोऽनेन सुखानि जनिष्वा॥ १८॥

भावार्थः-विद्वद्भिः सृष्टिस्थपदार्थेभ्यो विद्यया दिव्यान् भोगान् प्राप्य स्वार्थं बहुविधं सुखं जननीयम्॥ १८॥

पदार्थः-हे विद्वन्! आप **(देववीतये)** श्रेष्ठ गुणों की प्राप्ति के लिये और **(स्वस्तये)** सुख की प्राप्ति के लिये **(सर्वताता)** सम्पूर्ण सुख के करने वाले शिल्प=कारीगरीरूप यज्ञ में **(अमृतान्)** नाशरहित **(ऋतावृधः)** सत्यव्यवहार के बढ़ाने वाले **(देवान्)** श्रेष्ठ गुणों वा भोगों को **(आ, वक्षि)** प्राप्त कराइये और **(देवेषु)** विद्वानों में **(यज्ञम्)** सुख के देनेवाले यज्ञ का **(पिस्पृशः)** स्पर्श कराइये, इससे सुखों को **(जनिष्वा)** प्रकट कीजिये॥ १८॥

भावार्थः-विद्वानों को चाहिये कि सृष्टि में वर्त्तमान पदार्थों से विद्या के द्वारा श्रेष्ठ भोगों को प्राप्त होकर अपने लिये अनेक प्रकार के सुख को उत्पन्न करें॥ १८॥

पुनर्गृहस्थैः कथं प्रयतितव्यमित्याह॥

फिर गृहस्थों को कैसा प्रयत्न करना चाहिये, इस विषय को कहते हैं॥

वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम्।

अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि॥ १९॥ २०॥ १॥

वयम्। ऊँ इति। त्वा। गृहऽपते। जनानाम्। अग्ने। अकर्म। सम्ऽइधा। बृहन्तम्। अस्थूरि। नः। गार्हऽपत्यानि। सन्तु। तिग्मेन। नः। तेजसा। सम्। शिशाधि॥ १९॥

पदार्थः-(वयम्) (उ) (त्वा) त्वाम् **(गृहपते)** गृहस्य पालक **(जनानाम्)** मनुष्याणां मध्ये **(अग्ने)** अग्निवद्वर्त्तमान **(अकर्म्म)** कुर्य्याम **(समिधा)** प्रदीपकेन साधनेन **(बृहन्तम्)** महान्तम् **(अस्थूरि)** अस्थिरं

यानम् **(नः)** अस्माकम् **(गार्हपत्यानि)** गृहपतिना संयुक्तानि कर्म्माणि **(सन्तु)** **(तिग्मेन)** तीव्रेण **(नः)** अस्मान् **(तेजसा)** **(सम्)** **(शिशाधि)** सम्यक्तया शिक्षय॥१९॥

अन्वयः-हे गृहपतेऽग्ने! वयं जनानां मध्ये त्वाऽऽश्रित्य समिधाऽग्निं बृहन्तमकर्म्म। उ नोऽस्थूरि गार्हपत्यानि च यथा सिद्धानि सन्तु तथा तिग्मेन तेजसा त्वं नः सं शिशाधि॥१९॥

भावार्थः-हे गृहस्था जना! यूयमालस्यं विहाय सृष्टिक्रमेण विद्योन्नतिं कृत्वाऽन्यान् विद्यार्थिनो विद्यां ग्राहयत येन सर्वाणि सुखानि वर्धेरन्निति॥१९॥

अत्राऽग्निविद्वद्दीश्वरगृहस्थकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चदशं सूक्तं विंशो वर्गः षष्ठे मण्डले प्रथमोऽनुवाकश्च समाप्तः॥

पदार्थः-हे **(गृहपते)** गृहस्थों के पालन करने वाले **(अग्ने)** अग्नि के समान वर्त्तमान **(वयम्)** हम लोग **(जनानाम्)** मनुष्यों के मध्य में **(त्वा)** आपका आश्रय करके **(समिधा)** प्रदीपक साधन से अग्नि को **(बृहन्तम्)** बड़ा **(अकर्म्म)** करें **(उ)** और **(नः)** हम लोगों का **(अस्थूरि)** चलनेवाला वाहन और **(गार्हपत्यानि)** गृहपति से संयुक्त कर्म्म जिस प्रकार से सिद्ध **(सन्तु)** हों उस प्रकार से **(तिग्मेन)** तीव्र **(तेजसा)** तेज से आप **(नः)** हम लोगों को **(सम्, शिशाधि)** उत्तम प्रकार शिक्षा दीजिये॥१९॥

भावार्थः-हे गृहस्थजनो! आप लोग आलस्य का त्याग करके सृष्टिक्रम से विद्या की उन्नति करके अन्य विद्यार्थियों को विद्या ग्रहण कराइये, जिससे सब सुख बढ़े॥१९॥

इस सूक्त में अग्नि, विद्वान्, ईश्वर और गृहस्थ के कार्य्यों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पन्द्रहवाँ सूक्त बीसवां वर्ग और छठे मण्डल का पहिला अनुवाक समाप्त हुआ॥

॥ओ३म्॥

अथाष्टचत्वारिंशत्तमस्य षोडशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अग्निर्देवता। १, ६, ७ आर्ची उष्णिक्छन्दः। ऋषभः स्वरः। २, ३, ४, ५, ९, ११, १३, १४, १५, १७, १८, २१, २४, २५, २८, ३१, ३२, ४०, ४३, ४५ निचृद्गायत्री। ८, १०, १९, २०, २२, २३, २९, ३४, ३५, ३६, ३७, ३८, ३९, ४१, गायत्री। २६, ३० विराड्गायत्रीछन्दः। षड्जः स्वरः। १२, १६, ३३, ४२, ४४ साम्नीत्रिष्टुप्। २७ आर्चीपङ्क्तिः। ४६ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४७, ४८ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ विद्वान् किं कुर्य्यादित्याह॥

अब अड़तालीस ऋचावाले सोलहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब विद्वान् क्या करे, इस विषय को कहते हैं॥

त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने॥ १॥

त्वम्। अग्ने। यज्ञानाम्। होता। विश्वेषाम्। हितः। देवेभिः। मानुषे। जने॥ १॥

पदार्थः-(त्वम्) (अग्ने) जगदीश्वर **(यज्ञानाम्)** सङ्गन्तव्यानां व्यवहाराणाम् **(होता)** दाता **(विश्वेषाम्)** सर्वेषाम् **(हितः)** हितकारी **(देवेभिः)** विद्वद्भिः सह **(मानुषे)** मनुष्याणामस्मिन् **(जने)** मनुष्ये॥ १॥

अन्वयः-हे अग्ने! यतस्त्वं यज्ञानां होता विश्वेषां हितोऽसि तस्माद्देवेभिर्मानुषे जने प्रेरको भव॥ १॥

भावार्थः-हे विद्वांसो! यथेश्वरः सर्वेषां हितकारी सकलसुखदाता विद्वत्सङ्गेन ज्ञातव्योऽस्ति तथा यूयमप्यनुतिष्ठत॥ १॥

पदार्थः-हे **(अग्ने)** जगदीश्वर! जिस कारण से **(त्वम्)** आप **(यज्ञानाम्)** प्राप्त होने योग्य व्यवहारों के **(होता)** देने वाले और **(विश्वेषाम्)** सब के **(हितः)** हितकारी हो इससे **(देवेभिः)** विद्वानों के साथ **(मानुषे)** मनुष्य-सम्बन्धी **(जने)** मनुष्य में प्रेरणा करने वाले होओ॥ १॥

भावार्थः-हे विद्वानो! जैसे ईश्वर सब का हितकारी और सम्पूर्ण सुखों का देनेवाला तथा विद्वानों के संग से जानने योग्य है, वैसे आप लोग भी अनुष्ठान करो॥ १॥

पुनर्विद्वान् किं कुर्य्यादित्याह॥

फिर विद्वान् क्या करें, इस विषय को कहते हैं॥

स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः। आ देवान् वक्षि यक्षि च॥ २॥

सः। नः। मन्द्राभिः। अध्वरे। जिह्वाभिः। यज। इति। महः। आ। देवान्। वक्षि। यक्षि। च॥ २॥

पदार्थः-(सः) (नः) अस्मान् **(मन्द्राभिः)** आनन्दकारिकाभिः **(अध्वरे)** सर्वथाऽनुष्ठातव्ये धर्म्ये व्यवहारे **(जिह्वाभिः)** विद्याविनययुक्ताभिर्वाग्भिः। **जिह्वेति वाङ्नाम।** (निघं०१.१२) **(यजा)** सङ्गमय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(महः)** महतः सत्कर्त्तव्यान् वा **(आ) (देवान्)** दिव्यान् गुणान् विदुषो वा **(वक्षि)** वह **(यक्षि)** सङ्गमय **(च)**॥२॥

अन्वयः-हे विद्वन्नग्ने! स त्वमध्वरे मन्द्राभिर्जिह्वाभिर्नोऽस्मान् यजा। महो देवानाऽऽवक्षि सर्वान् यक्षि च॥२॥

भावार्थः-विद्वांसो विद्याप्राप्तये सर्वान् सदोपदिशेयुर्येन प्राप्तदिव्यगुणा मनुष्या भवेयुः॥२॥

पदार्थः-हे विद्वन्! अग्नि के सदृश तेजस्वी **(सः)** वह आप **(अध्वरे)** सब प्रकार अनुष्ठान करने योग्य धर्म्मयुक्त व्यवहार में **(मन्द्राभिः)** आनन्द करने वाली **(जिह्वाभिः)** विद्या और विनय से युक्त वाणियों से **(नः)** हम लोगों को **(यजा)** प्राप्त कराइये और **(महः)** बड़े अथवा सत्कार करने योग्यों को और **(देवान्)** श्रेष्ठ गुणों वा विद्वानों को **(आ, वक्षि)** प्राप्त कराइये और सब को **(यक्षि, च)** भी प्राप्त कराइये॥२॥

भावार्थः-विद्वान् जन विद्या की प्राप्ति के लिये सब को सदा उपदेश देवें, जिससे श्रेष्ठ गुणों वाले मनुष्य होवें॥२॥

क उपदेशं कर्त्तुमर्हेदित्याह॥

कौन उपदेश करने योग्य होवे, इस विषय को कहते हैं॥

वेत्था॒ हि वे॑धो॒ अध्व॑नः प॒थश्च॑ दे॒वाञ्ज॑सा। अग्ने॑ य॒ज्ञेषु॑ सुक्रतो॥३॥

वेत्थ॑। हि। वे॒ध॒:। अध्व॑नः। प॒थः। च॒। दे॒व॒। अञ्ज॑सा। अग्ने॑। य॒ज्ञेषु॑। सु॒क्र॒तो॒ इति॑ सुऽक्रतो॥३॥

पदार्थः-(वेत्था) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(हि)** यतः **(वेधः)** मेधाविन् **(अध्वनः)** मार्गान् **(पथः) (च) (देव)** विज्ञानप्रद **(अञ्जसा)** स्वच्छन्देन वेगवत्त्वेन **(अग्ने)** प्रकाशात्मन् **(यज्ञेषु)** विद्याधर्म्मप्रचाराख्येषु व्यवहारेषु **(सुक्रतो)** सुष्ठुप्रज्ञ उत्तमकर्म्मन् वा॥३॥

अन्वयः-हे सुक्रतो देव वेधोऽग्ने! हि त्वं यज्ञेष्वञ्जसाऽध्वनः पथश्च वेत्था तस्मादस्मान् वेदय॥३॥

भावार्थः-अस्मिन्त्संसारे ये धर्मार्थकाममोक्षमार्गाज्ञानीयुस्त एवान्यानुपदिशेयुर्नेतरेऽज्ञा जनाः॥३॥

पदार्थः-हे **(सुक्रतो)** उत्तम ज्ञान वा उत्तम कर्म्मयुक्त **(देव)** विज्ञान के देने वाले **(वेधः)** मेधावी **(अग्ने)** प्रकाशात्मा! **(हि)** जिससे आप **(यज्ञेषु)** विद्या और धर्म के प्रचार नामक व्यवहारों में **(अञ्जसा)** स्वतन्त्रतायुक्त वेगवालेपन से **(अध्वनः)** मार्गों को और **(पथः)** मार्गों को **(च)** भी **(वेत्था)** जानते हो इससे हम लोगों को जनाइये॥३॥

भावार्थः-इस संसार में जो मनुष्य धर्म्म, अर्थ, काम और मोक्ष के मार्गों को जानें, वे ही अन्यों को भी उपदेश देवें, न कि इतर अज्ञ जन॥३॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

त्वामी॑ळे॒ अध॑ द्वि॒ता भर॑तो वा॒जिभि॑: शु॒नम्। ई॒जे य॒ज्ञेषु॑ य॒ज्ञिय॑म्॥४॥

त्वाम्। ई॒ळे॒। अध॑। द्वि॒ता। भर॑तः। वा॒जिऽभि॑:। शु॒नम्। ई॒जे॒। य॒ज्ञेषु॑। य॒ज्ञिय॑म्॥४॥

पदार्थ:-(त्वाम्) विद्वांसम् **(ईळे)** प्रशंसामि **(अध)** आनन्तर्य्ये **(द्विता)** द्वयोरध्यापकाध्येत्रोरुपदेष्टृपदेश्ययोर्भाव: **(भरत:)** धर्ता पोषक: **(वाजिभि:)** विज्ञानादिभि: **(शुनम्)** सुखम् **(ईजे)** यजामि **(यज्ञेषु)** सङ्गतिमयेषु **(यज्ञियम्)** यज्ञं कर्त्तुमर्हम्॥४॥

अन्वय:-हे विद्वन्! यथाऽहं यज्ञेषु यज्ञियं त्वामीळेऽध द्विता भरतोऽहं वाजिभि: शुनमीजे तथा त्वं यज॥४॥

भावार्थ:-विद्वद्भि: परस्परैर्विद्योन्नतिं विधायाऽन्येभ्यो ग्राहयितव्या॥४॥

पदार्थ:-हे विद्वन्! जैसे मैं **(यज्ञेषु)** समागमरूप यज्ञों में **(यज्ञियम्)** यज्ञ करने योग्य **(त्वाम्)** आप विद्वान् की **(ईळे)** प्रशंसा करता हूँ **(अध)** इसके अनन्तर **(द्विता)** दो पढ़ाने और पढ़ने वाले वा उपदेश करने वा उपदेश पाने योग्यों का **(भरत:)** धारण और पोषण करने वाला मैं **(वाजिभि:)** विज्ञानादिकों से **(शुनम्)** सुख की **(ईजे)** सङ्गति करता हूँ, वैसे आप सङ्गति कीजिये॥४॥

भावार्थ:-विद्वानों को चाहिये कि परस्पर विद्या की उन्नति करके अन्यों को ग्रहण करावें॥४॥

मनुष्या: कं सत्कुर्युरित्याह॥

मनुष्य किसका सत्कार करें, इस विषय को कहते हैं॥

त्वमि॒मा वार्या॑ पु॒रु दिवो॑दासाय सुन्व॒ते। भर॒द्वाजा॑य दा॒शुषे॑॥५॥२१॥

त्वम्। इ॒मा। वार्या॑। पु॒रु। दिव॑:ऽदासाय। सु॒न्व॒ते। भर॑त्ऽवाजाय। दा॒शुषे॑॥५॥

पदार्थ:-(त्वम्) (इमा) इमानि **(वार्य्या)** वार्य्याणि स्वीकर्त्तुमर्हाणि **(पुरु)** बहूनि **(दिवोदासाय)** कमनीयस्य पदार्थस्य दात्रे **(सुन्वते)** सोमौषध्यादिसिद्धिसम्पादकाय **(भरद्वाजाय)** धृतविज्ञानाय **(दाशुषे)** विज्ञानस्य दात्रे॥५॥

अन्वय:-हे विद्वन्! यतस्त्वं दिवोदासाय सुन्वते भरद्वाजाय दाशुष इमा पुरु वार्य्या ददासि तस्मात् प्रशंसनीयोऽसि॥५॥

भावार्थ:-मनुष्यैस्सत्योपदेशका विद्याप्रचारकाश्च सदैव सत्कर्त्तव्या नेतरे॥५॥

पदार्थ:-हे विद्वन्! जिस कारण से **(त्वम्)** आप **(दिवोदासाय)** कामना करने योग्य पदार्थ के देने और **(सुन्वते)** सोमलतारूप ओषधि आदि की सिद्धि करने वाले और **(भरद्वाजाय)** धारण किया विज्ञान जिसने उसके और **(दाशुषे)** विज्ञान के देने वाले के लिये **(इमा)** इन **(पुरु)** बहुत **(वार्य्या)** स्वीकार करने योग्यों को देते हो, इससे प्रशंसा करने योग्य हो॥५॥

भावार्थः-मनुष्यों को चाहिये कि सत्य के उपदेशकों और विद्या के प्रचारकों का सदा ही सत्कार करें, अन्य जनों का नहीं॥५॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

त्वं दूतो अमर्त्य आ वहा दैव्यं जनम्। शृण्वन् विप्रस्य सुष्टुतिम्॥६॥

त्वम्। दूतः। अमर्त्यः। आ। वह। दैव्यम्। जनम्। शृण्वन्। विप्रस्य। सुऽस्तुतिम्॥६॥

पदार्थः-(**त्वम्**) (**दूतः**) सर्वपदार्थविद्यासमाचारप्रज्ञापकः (**अमर्त्यः**) साधारणमनुष्यस्वभावविरुद्धः (**आ**) (**वहा**) समन्तात्प्रापय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः (**दैव्यम्**) देवैः सम्पादितं विद्वांसम् (**जनम्**) प्रसिद्धम् (**शृण्वन्**) (**विप्रस्य**) मेधाविनः (**सुष्टुतिम्**) शोभनां प्रशंसाम्॥६॥

अन्वयः-हे विद्वनमर्त्यो दूतस्त्वं विप्रस्य सुष्टुतिं शृण्वन् दैव्यं जनमाऽऽवहा॥६॥

भावार्थः-हे परीक्षका! यूयं पक्षपातं विहाय विद्यार्थिनां यथावत्परीक्षां कृत्वा विदुषः सम्पादयत॥६॥

पदार्थः-हे विद्वन्! (**अमर्त्यः**) साधारण मनुष्यों के स्वभाव से विरुद्ध (**दूतः**) सम्पूर्ण पदार्थविद्याओं के समाचार के जनाने वाले (**त्वम्**) आप (**विप्रस्य**) बुद्धिमान् की (**सुष्टुतिम्**) सुन्दर प्रशंसा को (**शृण्वन्**) सुनते हुए (**दैव्यम्**) विद्वानों से सिद्ध किये गये विद्वान् (**जनम्**) जन को (**आ, वहा**) सब प्रकार से प्राप्त कराइये॥६॥

भावार्थः-हे परीक्षा करने वाले! आप लोग पक्षपात का त्याग करके विद्यार्थियों की यथावत् परीक्षा करके विद्यायुक्त कीजिये॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

त्वामग्ने स्वाध्यो३ मर्तासो देववीतये। यज्ञेषु देवमीळते॥७॥

त्वाम्। अग्ने। सुऽआध्यः। मर्तासः। देवऽवीतये। यज्ञेषु। देवम्। ईळते॥७॥

पदार्थः-(**त्वाम्**) पूर्णविद्यमाप्तम् (**अग्ने**) विद्याविनयाभ्यां प्रकाशात्मन् (**स्वाध्यः**) ये सुष्ठु समन्ताद् ध्यायन्ति (**मर्त्तासः**) मनुष्याः (**देववीतये**) विद्यादिदिव्यगुणप्राप्तये (**यज्ञेषु**) अध्यापनाध्ययनोपदेशाख्येषु व्यवहारेषु (**देवम्**) विज्ञानप्रदम् (**ईळते**) स्तुवन्ति॥७॥

अन्वयः-हे अग्ने विद्वन्! यथा स्वाध्यो मर्त्तासो देववीतये यज्ञेषु त्वां देवमीळते तथा वयं प्रशंसेम॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्यार्थिभिर्विद्याप्राप्तये विद्वांसः सेवनीयाः। यथा सृष्टिपदार्थेष्वग्निः प्रशंसितोऽस्ति तथैव मनुष्येषु धार्मिका विद्वांसः सन्तीति वेद्यम्॥७॥

पदार्थः-हे (**अग्ने**) विद्या और विनय से प्रकाशात्मा विद्वन्! जैसे (**स्वाध्यः**) उत्तम प्रकार चारों ओर से ध्यान करने वाले (**मर्त्तासः**) मनुष्य (**देववीतये**) विद्या आदि श्रेष्ठ गुणों की प्राप्ति के लिये (**यज्ञेषु**)

पढ़ाने पढ़ने और उपदेश नामक व्यवहारों में **(त्वाम्)** पूर्ण विद्यायुक्त यथार्थवक्ता आप **(देवम्)** विज्ञान के देने वाले की **(ईळते)** स्तुति करते हैं, उस प्रकार से हम लोग प्रशंसा करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्यार्थियों को चाहिये कि विद्या की प्राप्ति के लिये विद्वानों का सेवन करें और जैसे सृष्टि के पदार्थों में अग्नि प्रशंसित है, वैसे ही मनुष्यों में धार्मिक विद्वान् हैं, यह जानना चाहिये॥७॥

पुनरध्यापकाऽध्येतारः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर अध्यापक और पढ़नेवाले परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

तव॒ प्र य॑क्षि सं॒दृश॑मु॒त क्रतुं॑ सु॒दान॑वः। विश्वे॑ जुषन्त का॒मिन॑ः॥८॥

तव॑। प्र। य॒क्षि॒। स॒म्ऽदृश॑म्। उ॒त। क्रतु॑म्। सु॒ऽदान॑वः। विश्वे॑। जु॒ष॒न्त॒। का॒मिन॑ः॥८॥

पदार्थः-(**तव**) विदुषः (**प्र**) (**यक्षि**) यज सङ्गमय (**सन्दशम्**) सम्यग्दर्शनम् (**उत**) (**क्रतुम्**) प्रज्ञां कर्म्म वा (**सुदानवः**) शोभनदानाः (**विश्वे**) सर्वे (**जुषन्त**) सेवन्ते (**कामिनः**) कामयितुं शीलाः॥८॥

अन्वयः-हे विद्वन्! ये सुदानवो विश्वे कामिनो जनास्तव सन्दृशमुत क्रतुं जुषन्त तांस्त्वं तद्दानेन प्र यक्षि॥८॥

भावार्थः-हे विद्वांसो! यथा विद्याकामा भवतः कामयन्ते तथैव भवन्तो विद्यार्थिनः कामयन्ताम्॥८॥

पदार्थः-हे विद्वन्! जो (**सुदानवः**) श्रेष्ठ दान के दाता (**विश्वे**) सब (**कामिनः**) कामना करने वाले जन (**तव**) विद्वान् आपके (**सन्दृशम्**) अच्छे दर्शन (**उत**) और (**क्रतुम्**) बुद्धि वा कर्म्म का (**जुषन्तु**) सेवन करते हैं, उन का आप उसके दान से (**प्र, यक्षि**) मेल कराइये॥८॥

भावार्थः-हे विद्वानो! जैसे विद्या की कामना करने वाले आप लोगों की कामना करते हैं, वैसे ही आप लोग विद्यार्थियों की कामना करो॥८॥

पुना राजा प्रजासु कथं वर्तेतेत्याह॥

फिर राजा प्रजाओं में कैसे वर्त्ताव करे, इस विषय को कहते हैं॥

त्वं होता॒ मनु॑र्हितो॒ वह्नि॒रासा॒ वि॒दुष्ट॑रः। अग्ने॒ यक्षि॑ दि॒वो विश॑ः॥९॥

त्वम्। होता॑। मनु॑ः॒ऽहितः। वह्नि॑ः। आ॒सा। वि॒दुः॒ऽत॑रः। अग्ने॑। यक्षि॑। दि॒वः। विश॑ः॥९॥

पदार्थः-(**त्वम्**) (**होता**) दाता (**मनुर्हितः**) मनुष्याणां हितकारी (**वह्निः**) वोढा पावक इव (**आसा**) मुखेन (**विदुष्टरः**) विज्ञानवत्तमः (**अग्ने**) विपश्चित् (**यक्षि**) यज सुखं सङ्गमय (**दिवः**) कामयमानाः (**विशः**) प्रजाः॥९॥

अन्वयः-हे अग्ने राजन्! वह्निरिव होता मनुर्हितो विदुष्टरस्त्वमासा दिवो विशो यक्षि॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे प्रजाजना! यथा पार्थिवो युष्मान् कामयते सुखं दातुमिच्छति तथा यूयमपि तं कामयित्वा तस्मै सततं सुखं प्रयच्छत॥९॥

पदार्थः-हे **(अग्ने)** विद्वन्! राजन् **(वह्निः)** प्राप्त करने वाला अग्नि जैसे वैसे **(होता)** दाता **(मनुर्हितः)** मनुष्यों के हितकारी **(विदुष्टरः)** अत्यन्त विज्ञानवाले **(त्वम्)** आप **(आसा)** मुख से **(दिवः)** कामना करती हुई **(विशः)** प्रजाओं को **(यक्षि)** सुखयुक्त करिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे प्रजाजनो! जैसे राजा आप लोगों की कामना करता और सुख देने की इच्छा करता है, वैसे आप लोग भी उस राजा की कामना करके उसके लिये निरन्तर सुख दीजिये॥९॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि॥१०॥२२॥

अग्ने। आ। याहि। वीतये। गृणानः। हव्यऽदातये। नि। होता। सत्सि। बर्हिषि॥१०॥

पदार्थः-(**अग्ने**) विद्वन् (**आ**) (**याहि**) आगच्छ (**वीतये**) विद्यादिशुभगुणव्याप्तये (**गृणानः**) स्तुवन् (**हव्यदातये**) दातव्यदानाय (**नि**) (**होता**) दाता (**सत्सि**) समवैषि (**बर्हिषि**) उत्तमायां सभायाम्॥१०॥

अन्वयः-हे अग्ने! यतस्त्वं गृणानो होता बर्हिषि वीतये हव्यदातये निषत्सि तस्मादस्माकं समिधमाऽऽयाहि॥१०॥

भावार्थः-यत्र विद्वांसो विद्यावृद्धिं चिकीर्षन्ति तत्र सर्वे सुखिनो भवन्ति॥१०॥

पदार्थः-हे **(अग्ने)** विद्वन्! जिस कारण से आप **(गृणानः)** स्तुति करते हुए **(होता)** दाता **(बर्हिषि)** उत्तम सभा में **(वीतये)** विद्या आदि श्रेष्ठ गुणों की व्याप्ति के लिये और **(हव्यदातये)** देने योग्य के दान के लिये **(नि, सत्सि)** उत्तम प्रकार जानते हो इससे **[**हम**]** लोगों की उत्तम दीप्ति को **(आ, याहि)** सब प्रकार प्राप्त होओ॥१०॥

भावार्थः-जहाँ विद्वान् जन विद्या की वृद्धि करने की इच्छा करते हैं, वहाँ सब सुखी होते हैं॥१०॥

पुनर्मनुष्याः परस्परं किं कुर्य्युरित्याह॥

फिर मनुष्य परस्पर क्या करें, इस विषय को कहते हैं॥

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य॥११॥

तम्। त्वा। समित्ऽभिः। अङ्गिरः। घृतेन। वर्धयामसि। बृहत्। शोच। यविष्ठ्य॥११॥

पदार्थः-(**तम्**) (**त्वा**) त्वाम् (**समिद्भिः**) सम्यक्प्रदीपकैः (**अङ्गिरः**) विद्युदिव वर्त्तमान (**घृतेन**) आज्येन (**वर्धयामसि**) वर्धयामः (**बृहत्**) महत् (**शोचा**) विचारय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**यविष्ठ्य**) अतिशयेन युवसु साधो॥११॥

अन्वयः-हे यविष्ठयाङ्गिरो! यथर्त्विजः समिद्भिर्घृतेनाग्निं वर्धयन्ति तथा ज्ञानकारणोपदेशेन तं त्वा वयं वर्धयामसि त्वं बृहच्छोचा॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजादयो जना घृतेनाग्निमिव शिक्षासत्काराभ्यां शूरान् वर्धयन्ति ते सदा विजयमाप्नुवन्ति॥११॥

पदार्थः-हे **(यविष्ठ्य)** अत्यन्त युवा जनों में साधु **(अङ्गिरः)** बिजुली के समान वर्त्तमान! जैसे यज्ञ करनेवाले जन **(समिद्भिः)** उत्तम प्रकार प्रकाशक समिधरूप काष्ठों और **(घृतेन)** घृत से अग्नि की वृद्धि करते हैं, वैसे ज्ञान के कारण उपदेश से **(तम्)** उन **(त्वा)** आपकी हम लोग **(वर्धयामसि)** वृद्धि करते हैं और आप **(बृहत्)** बहुत **(शोचा)** विचारिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार हैं। जो राजा आदि जन जैसे घृत से अग्नि की, वैसे शिक्षा और सत्कार से शूर जनों की वृद्धि करते हैं, वे सदा विजय को प्राप्त होते हैं॥११॥

पुनर्मनुष्यैः परस्परं कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को परस्पर कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

स नः पृथु श्रवाय्यमच्छा देव विवासति। बृहदग्ने सुवीर्यम्॥१२॥

सः। नः। पृथु। श्रवाय्यम्। अच्छ। देव। विवासति। बृहत्। अग्ने। सुऽवीर्यम्॥१२॥

पदार्थः-(**सः**) (**नः**) अस्मभ्यम् (**पृथु**) विस्तीर्णम् (**श्रवाय्यम्**) श्रोतुमर्हम् (**अच्छा**) अत्र **संहितायामि**ति दीर्घः। (**देव**) विद्यादातः (**विवाससि**) परिचरसि (**बृहत्**) (**अग्ने**) अग्निरिव कार्य्यसाधक (**सुवीर्य्यम्**) सुबलम्॥१२॥

अन्वयः-हे देवोऽग्नेऽग्निरिव यतस्त्वं नः पृथु श्रवाय्यं बृहत्सुवीर्य्यमच्छा विवाससि तस्मात् स त्वं सत्कर्त्तव्योऽसि॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये यस्योपकारं कुर्वन्ति ते तस्य सत्कर्त्तव्या भवन्ति॥१२॥

पदार्थः-हे **(देव)** विद्या के देने वाले **(अग्ने)** अग्नि के समान कार्य्य के साधक! जैसे अग्नि वैसे जिस कारण से आप **(नः)** हम लोगों के लिये **(पृथु)** विस्तारयुक्त **(श्रवाय्यम्)** सुनने योग्य **(बृहत्)** बड़े **(सुवीर्य्यम्)** श्रेष्ठ बलयुक्त **(अच्छा)** अच्छे प्रकार **(विवाससि)** सेवा करते हो इससे **(सः)** वह आप सत्कार करने योग्य हो॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो जिसका उपकार करते हैं, वे उनके सत्कार करने योग्य होते हैं॥१२॥

मनुष्यैः कस्मात्कस्माद्विद्युत्स- ाह्येत्याह॥

मनुष्य किस-किससे बिजुली का ग्रहण करें, इस विषय को कहते हैं॥

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः॥१३॥

त्वाम्। अग्ने। पुष्करात्। अधि। अथर्वा। निः। अमन्थत। मूर्ध्नः। विश्वस्य। वाघतः॥ १३॥

पदार्थः-(त्वाम्) (अग्ने) (पुष्करात्) अन्तरिक्षात् **(अधि)** उपरि **(अथर्वा)** अहिंसकः **(निः) (अमन्थत)** मन्थन्ति **(मूर्ध्नः)** उपरि वर्त्तमानस्य **(विश्वस्य)** सर्वस्य जगतः **(वाघतः)** मेधाविनः॥ १३॥

अन्वयः-हे अग्ने विद्वन्! यथा वाघतो विश्वस्य मूर्ध्नः पुष्करादध्यग्निं निरमन्थत तथाऽथर्वाऽहं त्वां प्रदीपयामि॥ १३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा पदार्थविद्याविदो जनाः सूर्य्यादेः सकाशाद् विद्युतं गृहीत्वा कार्य्याणि साध्नुवन्ति तथैव यूयमपि साध्नुत॥ १३॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्त्तमान विद्वन्! जैसे **(वाघतः)** बुद्धिमान् जन **(विश्वस्य)** सम्पूर्ण जगत् के **(मूर्ध्नः)** ऊपर वर्त्तमान के **(पुष्करात्)** अन्तरिक्ष से **(अधि)** ऊपर अग्नि को **(निः, अमन्थत)** मथते हैं, वैसे **(अथर्वा)** अहिंसक मैं **(त्वाम्)** आपको प्रकाशित करता हूँ॥ १३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् जनो! जैसे पदार्थविद्या के जाननेवाले जन सूर्य्य आदि के समीप से बिजुली को ग्रहण करके कार्य्यों को सिद्ध करते हैं, वैसे ही आप लोग भी सिद्ध करो॥ १३॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

तमु त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरंदरम्॥ १४॥

तम्। ऊँ इति। त्वा। दध्यङ्। ऋषिः। पुत्रः। ईधे। अथर्वणः। वृत्रऽहनम्। पुरम्ऽदरम्॥ १४॥

पदार्थः-(तम्) (उ) (त्वा) त्वाम् **(दध्यङ्)** यो धारकान् विदुषोऽञ्चति प्राप्नोति **(ऋषिः)** मन्त्रार्थवेत्ता **(पुत्रः)** तनयः **(ईधे)** प्रदीपयति **(अथर्वणः)** अहिंसकस्य **(वृत्रहणम्)** मेघहन्तारम् **(पुरन्दरम्)** यो मेघस्य पुराणि दृणाति॥ १४॥

अन्वयः-हे विद्वन् राजंस्तमु वृत्रहणं पुरन्दरं सूर्य्यमिव त्वाऽथर्वणः पुत्रो दध्यङ् ऋषिरीधे तथा त्वं मां कुरु॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथेश्वरेण प्रकाशमयः सकलोपकारकः सूर्यो निर्मितस्तत्था विद्यया प्रकाशिताञ्जनान् विदुषः सम्पादयन्तु॥ १४॥

पदार्थः-हे विद्वन् राजन् **(तम्, उ)** उन्हीं **(वृत्रहणम्)** मेघों के नाश करनेवाले **(पुरन्दरम्)** मेघों के पुरों को नाश करनेवाले सूर्य्य को जैसे वैसे **(त्वा)** आपको **(अथर्वणः)** नहीं हिंसा करनेवाले का **(पुत्रः)** पुत्र **(दध्यङ्)** धारण करनेवाले विद्वानों को प्राप्त होने और **(ऋषिः)** मन्त्र और अर्थ जानने वाला **(ईधे)** प्रदीप्त करता है, वैसे आप मुझ को करिये॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् जनो! जैसे ईश्वर ने प्रकाशस्वरूप और सम्पूर्ण जगत् का उपकारक सूर्य्य रचा है, वैसे विद्या से प्रकाशित जनों को विद्वान् करो॥ १४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तमु॑ त्वा॑ पा॒थ्यो वृषा॒ समी॑धे दस्यु॒हन्त॑मम्। ध॒न॒ञ्ज॒यं रणे॑रणे॥ १५॥ २३॥

तम्। ऊँ॒ इति॑। त्वा॒। पा॒थ्यः। वृषा॑। सम्। ई॒धे॒। द॒स्यु॒हन्ऽत॑मम्। ध॒न॒म्ऽज॒यम्। रणे॑ऽरणे॥ १५॥

पदार्थः-(तम्) (उ) (त्वा) त्वाम् **(पाथ्यः)** पथिषु भवः **(वृषा)** वर्षकस्सूर्य्य इव वीर्य्यसेचकः **(सम्) (ईधे)** प्रापयति **(दस्युहन्तमम्)** यो दस्यूनतिशयेन हन्ति तम् **(धनञ्जयम्)** धनं जयति तम् **(रणेरणे)** स- ामे स- ामे॥ १५॥

अन्वयः-हे मनुष्या! यथा पाथ्यो वृषा दस्युहन्तमं रणेरणे धनञ्जयं तं त्वा समीधे तथा त्वं मामु समीधय॥ १५॥

भावार्थः-हे मनुष्या! यदि यूयं विद्युद्विद्यां प्राप्य युध्यध्वं तर्हि युष्माकं बहूधनैश्वर्य्यप्रदोऽहं विद्युदादिना विजयं कारयेयम्॥ १५॥

पदार्थः-हे मनुष्यो! जैसे **(पाथ्यः)** मार्गों में हुए **(वृषा)** वर्षानेवाले सूर्य्य के समान वीर्य्य का सींचने वाला **(दस्युहन्तमम्)** डाकुओं को अतिशय मारने वाले **(रणेरणे)** प्रत्येक संग्राम में **(धनञ्जयम्)** धन को जीते **(तम्)** उन **(त्वा)** आपको **(सम्, ईधे)** प्राप्त कराता है, वैसे आप मुझे को **(उ)** भी प्राप्त कराइये॥ १५॥

भावार्थः-हे मनुष्यो! यदि आप लोग बिजुली की विद्या को प्राप्त होकर युद्ध करो तो आप लोगों का बहुत धन और ऐश्वर्य्यों का देने वाला मैं बिजुली आदि से विजय कराऊँ॥ १५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

एह्यू॒ षु ब्रवा॑णि॒ तेऽग्न॒ इत्थे॑त॒रा गिर॑:। एभि॑र्वर्धा॒स॒ इन्दु॑भिः॥ १६॥

आ। इ॒हि॒। ऊँ॒ इति॑। सु। ब्रवा॑णि। ते॒। अग्ने॑। इ॒त्था। इ॒त॒राः। गिर॑:। एभिः। व॒र्धा॒से॒। इन्दु॑ऽभिः॥ १६॥

पदार्थः-(आ) (इहि) आगच्छ **(उ) (सु) (ब्रवाणि)** उपदिशानि **(ते)** तव **(अग्ने)** विद्वन् **(इत्था)** अनेन प्रकारेण **(इतराः)** अर्वाचीनाः **(गिरः)** वाचः **(एभिः) (वर्धासे)** वर्द्धसे **(इन्दुभिः)** सोमलताभिश्चन्द्रकिरणैर्वा॥ १६॥

अन्वयः-हे अग्ने! यैरेभिरिन्दुभिस्त्वं वर्धासे तैरेहीत्थेतरास्ते गिरस्सु ब्रवाणि त्वमु शृणु॥ १६॥

भावार्थः-ये मनुष्या वयं विद्या अधीत्य सर्वानुपदिशेमेतीच्छन्ति तेऽस्मान् प्राप्नुवन्तु॥ १६॥

पदार्थः-हे **(अग्ने)** विद्वन् जन **(एभिः)** इन **(इन्दुभिः)** सोमलताओं वा चन्द्रकिरणों से आप **(वर्धासे)** वृद्धि को प्राप्त होते हो उनसे **(आ, इहि)** प्राप्त हूजिये **(इत्था)** इस प्रकार से **(इतराः)** पीछे की

(ते) आपकी **(गिरः)** वाणियों को **(सु, ब्रवाणि)** उत्तम प्रकार उपदेश करूं और आप **(उ)** तर्क वितर्क से सुनें॥१६॥

भावार्थः-जो मनुष्य, हम लोग विद्याओं को पढ़कर सब को उपदेश देवें, इस प्रकार इच्छा करते हैं, वे हम लोगों को प्राप्त होवें॥१६॥

मनुष्यैः कुत्र मनो धेयमित्याह॥

मनुष्यों को कहाँ मन स्थित करना चाहिये, इस विषय को कहते हैं॥

यत्र क्व॑ च ते॒ मनो॒ दक्षं॑ दधस॒ उत्त॑रम्। तत्रा॒ सद॑: कृणवसे॥ १७॥

यत्र॑। क्व॑। च॒। ते॒। मन॑:। दक्ष॑म्। दु॒ध॒से॒। उत्ऽत॑रम्। तत्र॑। सद॑:। कृ॒ण॒व॒से॒॥ १७॥

पदार्थः-(**यत्र**) (**क्व**) कस्मिन् (**च**) (**ते**) तव (**मनः**) मननात्मकं चित्तम् (**दक्षम्**) बलम् (**दधसे**) (**उत्तरम्**) उत्तरन्ति येन तत् (**तत्रा**)। अत्र **ऋचि तुनुघे**ति दीर्घः। (**सदः**) सीदन्ति यस्मिंस्तत् (**कृणवसे**) करोषि॥१७॥

अन्वयः-हे विद्वन्! यत्र ते मन उत्तरं दक्षं च त्वं दधसे तत्रा सदः कृणवसे क्व वससीत्युत्तराणि वद॥१७॥

भावार्थः-हे मनुष्या! यत्र जगदीश्वरे योगाभ्यासे वा युष्माकमन्तःकरणं पवित्रं भूत्वा कार्य्यसिद्धिं करोति तत्रैव यूयमपि प्रवर्त्तध्वम्॥१७॥

पदार्थः-हे विद्वन्! (**यत्र**) जहाँ (**ते**) आप का (**मनः**) विचारात्मक चित्त है और (**उत्तरम्**) पार होते हैं जिससे उस (**दक्षम्**) बल को (**च**) भी आप (**दधसे**) धारण करते हो (**तत्र**) वहाँ (**सदः**) स्थित होते हैं, जिसमें उसको (**कृणवसे**) करते हो तथा (**क्व**) कहाँ निवास करते हो, इस का उत्तर कहिये॥१७॥

भावार्थः-हे मनुष्यो! जहाँ जगदीश्वर वा योगाभ्यास में आप लोगों का अन्तःकरण पवित्र होकर कार्य्य की सिद्धि को करता है, वहाँ ही आप लोग भी प्रवृत्ति करिये॥१७॥

मनुष्याणां कथमिच्छा सिध्यतीत्याह॥

मनुष्यों की किस प्रकार से इच्छा सिद्ध होती है, इस विषय को कहते हैं॥

न॒हि ते॑ पू॒र्तमक्षि॑पद्भुव॒न्नेमानां॑ वसो। अथा॒ दुवो॑ वनवसे॥ १८॥

न॒हि। ते॒। पू॒र्तम्। अक्षि॑ऽपत्। भु॒व॒त्। नेमा॑ना॒म्। व॒सो॒ इति॑। अथ॑। दुव॑:। व॒न॒व॒से॒॥ १८॥

पदार्थः-(**नहि**) निषेधे (**ते**) तव (**पूर्त्तम्**) पूर्त्तिकरम् (**अक्षिपत्**) क्षिपति (**भुवत्**) भवेत् (**नेमानाम्**) अन्नानाम्। **नेम इत्यन्ननाम।** (निघं०२.७) (**वसो**) वासयितः (**अथा**) अत्र **निपातस्य चे**ति दीर्घः। (**दुवः**) परिचरणम् (**वनवसे**) सम्भज॥१८॥

अन्वयः-हे वसो! ते नेमानां पूर्त्तं कश्चिदपि नह्यक्षिपत्। नहि भुवत्तस्मादथा दुवो वनवसे॥१८॥

भावार्थः-ये मनुष्याः सत्याचारं कुर्वन्ति तेषां कामपूर्तिं कदापि न हन्यते॥१८॥

पदार्थः-हे **(वसो)** वसाने वाले **(ते)** आपके **(नेमानाम्)** अन्नों के **(पूर्त्तम्)** पूर्ण करने वाले को मैं भी **(नहि)** नहीं **(अक्षिपत्)** फेंकता और नहीं **(भुवत्)** होवे, इससे **(अथा)** इसके अनन्तर **(दुवः)** सेवा को **(वनवसे)** स्वीकार करिये॥१८॥

भावार्थः-जो मनुष्य सत्य आचरण को करते हैं, उनकी कामना की पूर्ति कभी भी नहीं नष्ट की जाती है॥१८॥

अथाग्निः कीदृशोऽस्तीत्याह॥

अब अग्नि कैसा है, इस विषय को कहते हैं॥

आग्निरगामि भारतो वृत्रहा पुरुचेतनः। दिवोदासस्य सत्पतिः॥१९॥

आ। अग्निः। अगामि। भारतः। वृत्रऽहा। पुरुऽचेतनः। दिवः।ऽदासस्य। सत्ऽपतिः॥१९॥

पदार्थः-**(आ)** समन्तात् **(अग्निः)** अग्निरिव तेजस्वी **(अगामि)** गम्यते **(भारतः)** धर्ता पोषको वा **(वृत्रहा)** यो वृत्रं हन्ति सः **(पुरुचेतनः)** बहवश्चेतना यस्मिन् **(दिवोदासस्य)** प्रकाशदातुः **(सत्पतिः)**॥१९॥

अन्वयः-हे विद्वांसो! यो दिवोदासस्य भारतो वृत्रहा पुरुचेतनः सत्पतिरग्निः सूर्य्य आऽगामि तं वयं सेवेमहि॥१९॥

भावार्थः-यथाऽस्मिन् देहे साधनोपसाधनैः सहितो जीवो बहूनि कर्म्माणि करोति तथैव विद्वानखिलानि कर्म्माणि साध्नोति॥१९॥

पदार्थः-हे विद्वान् जनो! जो **(दिवोदासस्य)** प्रकाश के देनेवाले का **(भारतः)** धारण करने वा पोषण करने और **(वृत्रहा)** मेघ को नाश करने वाला **(पुरुचेतनः)** बहुत चेतन जिसमें वह **(सत्पतिः)** श्रेष्ठ स्वामी **(अग्निः)** अग्नि के सदृश तेजस्वी सूर्य्य **(आ, अगामि)** प्राप्त किया जाता है, उसका हम लोग सेवन करें॥१९॥

भावार्थः-जैसे इस देह में साधन और उपसाधनों के सहित जीव बहुत कर्म्मों को करता है, वैसे ही विद्वान् सम्पूर्ण कर्म्मों को सिद्ध करता है॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना। वन्वन्नवातो अस्तृतः॥२०॥२४॥

सः। हि। विश्वा। अति। पार्थिवा। रयिम्। दाशत्। महिऽत्वना। वन्वन्। अवातः। अस्तृतः॥२०॥

पदार्थः-(सः) (हि) (विश्वा) सर्वाणि **(अति) (पार्थिवा)** पृथिव्यां विदितानि वस्तूनि **(रयिम्)** धनम् **(दाशत्) (महित्वना)** महत्त्वेन **(वन्वन्)** सम्भजन् **(अवातः)** वायुवर्जितः **(अस्तृतः)** अहिंसितः॥ २०॥

अन्वयः-हे मनुष्या! योऽस्तृतोऽवातो महित्वना वन्वन्नग्निर्विश्वा पार्थिवा रयिमति दाशत्स हि सर्वैर्वेदितव्योऽस्ति॥ २०॥

भावार्थः-हे मनुष्या! योऽग्निर्बहु सुखं ददाति सः कथन्न सेव्येत॥ २०॥

पदार्थः-हे मनुष्यो! जो **(अस्तृतः)** नहीं हिंसित **(अवातः)** पवन से वर्जित **(महित्वना)** महत्त्व से **(वन्वन्)** सेवन करता हुआ अग्नि **(विश्वा)** सम्पूर्ण **(पार्थिवा)** पृथिवी में विदित वस्तुओं और **(रयिम्)** धन को **(अति, दाशत्)** अत्यन्त देता है **(सः, हि)** वह सब लोगों से जानने योग्य है॥ २०॥

भावार्थः-हे मनुष्यो! जो अग्नि बहुत सुख को देता है, उसका क्यों नहीं सेवन किया जावे॥ २०॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

स प्र॑त्न॒वन्नवी॑य॒साग्ने॑ द्यु॒म्नेन॑ सं॒यता॑। बृ॒हत्त॑तन्थ भा॒नुना॑॥ २१॥

सः। प्र॒त्न॒ऽवत्। नवी॑यसा। अग्ने॑। द्यु॒म्नेन॑। स॒म्ऽयता॑। बृ॒हत्। त॒त॒न्थ॒। भा॒नुना॑॥ २१॥

पदार्थः-(सः) (प्रत्नवत्) प्राचीनवत् **(नवीयसा)** अतिशयेन नवीनेन **(अग्ने)** अग्निरिव विद्वन् **(द्युम्नेन)** धनेन यशसा वा **(संयता)** संयच्छन्ति येन तेन **(बृहत)** महत् **(ततन्थ)** तनोति **(भानुना)** किरणेन॥ २१॥

अन्वयः-हे अग्ने! यथा सूर्य्यो भानुना प्रत्नवद्बृहत्ततन्थ तथा स त्वं नवीयसा संयता द्युम्नेनास्मांस्तनु॥ २१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्य्यवद्यशस्विनो भवन्ति ते नूतनां प्रतिष्ठां लभन्ते॥ २१॥

पदार्थः-हे **(अग्ने)** अग्नि के समान तेजस्वी विद्वन्! जैसे सूर्य्य **(भानुना)** किरण से **(प्रत्नवत्)** प्राचीन के सदृश **(बृहत्)** बड़े को **(ततन्थ)** विस्तृत करता है, वैसे **(सः)** वह आप **(नवीयसा)** अत्यन्त नवीन **(संयता)** उत्तम प्रकार देते हैं जिससे उस **(द्युम्नेन)** धन वा यश से हम लोगों को विस्तृत करो॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य्य के सदृश यशस्वी होते हैं, वे नवीन-नवीन प्रतिष्ठा को प्राप्त होते हैं॥ २१॥

मनुष्यैः कथं वर्त्तितव्यमित्याह॥

मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

प्र वः॑ सखायो अ॒ग्नये॒ स्तोमं॑ य॒ज्ञं च॑ धृष्णु॒या। अर्च॑ गायं च वे॒धसे॑॥ २२॥

प्र। व॒:। स॒खा॒य॒:। अ॒ग्नये॑। स्तोम॑म्। य॒ज्ञम्। च॒। धृ॒ष्णु॒ऽया। अर्च॑। गा॒य॑। च॒। वे॒धसे॑॥ २२॥

पदार्थ:-(प्र) (व:) युष्माकम् **(सखाय:) (अग्नये)** अग्निवद्वर्त्तमानाय। अत्र तादर्थ्ये चतुर्थी। **(स्तोमम्)** स्तुतिम् **(यज्ञम्)** सत्यं व्यवहारम् **(च) (धृष्णुया)** दृढत्वेन **(अर्च)** सत्कुरु **(गाय)** प्रशंस **(च) (वेधसे)** मेधाविने॥ २२॥

अन्वय:-हे सखायो! यो: व: स्तोमं यज्ञं च निष्पादयति तं यूयं सत्कुरुत। हे विद्वन्! यस्त्वयि मित्रवद्वर्त्तते तस्मै वेधसेऽग्नये त्वं धृष्णुया प्रार्च गाय च॥ २२॥

भावार्थ:-सूर्य्य एव यज्ञफलावाप्तिसाधकोऽस्ति तथाऽऽप्ता धर्म्मात्मान: परोपकारकुशला भवन्तीति विज्ञाय जगति वर्त्तेत॥ २२॥

पदार्थ:-हे **(सखाय:)** मित्रो! जो **(व:)** आप लोगों की **(स्तोमम्)** स्तुति और **(यज्ञम्)** सत्य व्यवहार को **(च)** भी उत्पन्न करता है, उसका आप लोग सत्कार करो और हे विद्वन्! जो आप में जैसे मित्र, वैसे वर्त्तता है उस **(वेधसे)** बुद्धिमान् **(अग्नये)** अग्नि के समान वर्त्तमान के लिये आप **(धृष्णुया)** दृढ़ता के साथ **(प्र, अर्च)** अच्छे प्रकार सत्कार करिये **(गाय, च)** और प्रशंसा करिये॥ २२॥

भावार्थ:-सूर्य्य ही यज्ञफलों की प्राप्ति का साधक है, वैसे यथार्थ कहने और करनेवाले धर्म्मात्मा जन परोपकार में कुशल होते हैं, ऐसा जानकर संसार में वर्त्ताव करे॥ २२॥

पुन: सोऽग्नि: कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को कहते हैं॥

स हि यो मानु॑षा यु॒गा सीद॒द्धोता॑ क॒विक्र॑तु:। दू॒तश्च॑ हव्य॒वाह॑न:॥ २३॥

स:। हि। य:। मानु॑षा। यु॒गा। सीद॑त्। होता॑। क॒विऽक्र॑तु:। दू॒त:। च॒। ह॒व्य॒ऽवाह॑न:॥ २३॥

पदार्थ:-(स:) (हि) यत: **(य:) (मानुषा)** मनुष्यसम्बन्धीनि **(युगा)** युगानि वर्षाणि वर्षसमुदितानि वा **(सीदत्)** सीदति **(होता)** दाता **(कविक्रतु:)** महान् विद्वान् **(दूत:) (च) (हव्यवाहन:)** यो हव्यानि हुतानि द्रव्याणि वहति॥ २३॥

अन्वय:-यो हव्यवाहनो दूतश्चाग्निर्मानुषा युगा सीदत् स हि होता कविक्रतुरिव कार्य्यसाधको भवति॥ २३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। योऽग्निर्धार्मिकविद्वत्कार्य्यकरो भवति स हि विद्वद्भि: कार्य्यसिद्धये सम्प्रयोक्तव्य:॥ २३॥

पदार्थ:-(य:) जो **(हव्यवाहन:)** हनव किये गये द्रव्यों को प्राप्त कराने पहुँचाने वाला और **(दूत:)** दूतवत् वर्त्तमान **(च)** भी अग्नि **(मानुषा)** मनुष्य-सम्बन्धी **(युगा)** वर्ष वा वर्षसमुदायों को **(सीदत्)** प्राप्त होती है **(स:) (हि)** वही **(होता)** दाता **(कविक्रतु:)** बड़ा विद्वान् जैसे वैसे कार्य का साधक होता है॥ २३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अग्नि धार्मिक और विद्वानों के कार्य्यों का करने वाला होता है, उसको विद्वान् जन कार्य्यों की सिद्धि के लिये सम्प्रयुक्त करें॥ २३॥

पुनर्मनुष्यै किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहेत हैं॥

ता राजा॑ना शुचिव्रतादि॒त्यान् मारु॑तं ग॒णम्। वसो॒ यक्षी॒ह रोद॑सी॥ २४॥

ता। राजा॑ना। शुचि॑ऽव्रता। आ॒दि॒त्यान्। मारु॑तम्। ग॒णम्। वसो॒ इति॑। यक्षि॑। इ॒ह। रोद॑सी॒ इति॑॥ २४॥

पदार्थः-(**ता**) तौ मित्रद्वर्त्तमानौ (**राजाना**) प्रकाशमानौ (**शुचिव्रता**) पवित्रकर्म्माणौ (**आदित्यान्**) द्वादश मासान् (**मारुतम्**) मरुतां मनुष्याणामिमम् (**गणम्**) समूहम् (**वसो**) शुभगुणवासयितः (**यक्षि**) सङ्गमय (**इह**) अस्मिन् संसारे (**रोदसी**) द्यावापृथिव्यौ॥ २४॥

अन्वयः-हे वसो! त्वमिह ता शुचिव्रता राजानाऽऽदित्यान् मारुतं गणं रोदसी च यक्षि॥ २४॥

भावार्थः-ये मनुष्या अध्यापकाऽध्येत्रादीन् सेवित्वा पदार्थविद्यां गृह्णन्ति ते सुखिनो भवन्ति॥ २४॥

पदार्थः-हे (**वसो**) श्रेष्ठ गुणों के वसाने वाले! आप (**इह**) इस संसार में (**ता**) उन दोनों मित्र के सदृश वर्त्तमान (**शुचिव्रता**) पवित्र कर्म्मवाले (**राजाना**) प्रकाशमान हुए तथा (**आदित्यान्**) बारह महीनों और (**मारुतम्**) मनुष्य सम्बन्धी इस (**गणम्**) समहू को (**रोदसी**) अन्तरिक्ष और पृथिवी को (**यक्षि**) उत्तम प्रकार प्राप्त कराइये॥ २४॥

भावार्थः-जो मनुष्य पढ़ाने और पढ़ने वाले आदिकों की सेवा करके पदार्थविद्या को ग्रहण करते हैं, वे सुखी होते हैं॥ २४॥

उत्तमस्य व्यवहारः सङ्गो वा निष्फलो न भवतीत्याह॥

उत्तम जन का व्यवहार वा सङ्ग निष्फल नहीं होता, इस विषय को कहते हैं॥

वस्वी॑ ते अग्ने॒ संदृ॑ष्टिरिषय॒ते मर्त्याय। ऊर्जो॑ नपादमृ॒तस्य॥ २५॥ २५॥

वस्वी॑। ते॒। अ॒ग्ने॒। सम्ऽदृ॑ष्टिः। इ॒ष॒ऽय॒ते। मर्त्याय। ऊर्जः॑। न॒पा॒त्। अ॒मृ॒तस्य॥ २५॥

पदार्थः-(**वस्वी**) पृथिव्यादिवसुसम्बन्धिनी (**ते**) तव (**अग्ने**) पावक इव (**सन्दृष्टिः**) सम्यक् पश्यन्ति यथा सा (**इषयते**) इषमन्नं विज्ञान वां कामयमानाय (**मर्त्याय**) मनुष्याय (**ऊर्जः**) बलादियुक्तस्य (**नपात्**) या न पतति (**अमृतस्य**) नाशरहितस्य॥ २५॥

अन्वयः-हे अग्ने! ते वस्वी सन्दृष्टिरिषयते मर्त्यायाऽमृतस्योर्जो नपाद्भवति॥ २५॥

भावार्थः-यस्य विदुषो विद्यादर्शनं निष्फलं न जायते, यस्मादधीत्य विद्वांसो भवन्ति तं सदा सत्कुरुत॥ २५॥

पदार्थः-हे (**अग्ने**) अग्नि के समान वर्त्तमान (**ते**) आपकी (**वस्वी**) पृथिवी आदि वसुसम्बन्धिनी (**सन्दृष्टिः**) उत्तम प्रकार देखते जिससे वह दृष्टि (**इषयते**) अन्न वा विज्ञान की कामना करते हुए (**मर्त्याय**)

मनुष्य के लिये **(अमृतस्य)** नाशरहित और **(ऊर्जः)** बल आदि युक्त की **(नपात्)** नहीं गिरने वाली होती है॥ २५॥

भावार्थः-जिस विद्वान् का विद्यादर्शन-विद्या निष्फल नहीं होता और जिससे पढ़कर विद्यार्थी जन विद्वान् होते हैं, उसका सदा सत्कार करो॥ २५॥

पुनर्विदुषा किं कर्त्तव्यमित्याह॥

फिर विद्वान् को क्या करना चाहिये, इस विषय को कहते हैं॥

क्रत्वा॒ दा अ॑स्तु॒ श्रेष्ठो॒ऽद्य त्वा॑ व॒न्वन् सु॒रेक्णा॑ः। मर्त॑ आनाश सुवृ॒क्तिम्॥ २६॥

क्रत्वा॑। दाः। अ॒स्तु॒। श्रेष्ठ॑ः। अ॒द्य। त्वा॒। व॒न्वन्। सु॒ऽरेक्णा॑ः। मर्त॑ः। आ॒ना॒श॒। सु॒ऽवृ॒क्तिम्॥ २६॥

पदार्थः-**(क्रत्वा)** प्रज्ञया कर्म्मणा वा **(दाः)** यो ददाति **(अस्तु)** **(श्रेष्ठः)** धर्म्यगुणकर्म्मस्वभावातिशययुक्तः **(अद्य)** **(त्वा)** त्वाम् **(वन्वन्)** सम्भजन् **(सुरेक्णाः)** शोभनं रेक्णः धनं यस्य सः। **रेक्ण इति धननाम।** (निघं०२.१०) **(मर्त्तः)** मनुष्यः **(आनाश)** व्याप्नुयात् **(सुवृक्तिम्)** सुष्ठु व्रजन्ति दुःखानि यया ताम्॥ २६॥

अन्वयः-श्रेष्ठः सुरेक्णा मर्त्तोऽद्य क्रत्वा सुवृक्तिमानाश त्वा वन्वन् सुख्यस्तु त्वं विद्यां दाः॥ २६॥

भावार्थः-त एवोत्तमा गणनीया ये विज्ञानं प्रयच्छन्ति॥ २६॥

पदार्थः-**(श्रेष्ठः)** धर्मयुक्त गुण कर्म्म और स्वभाव से अतिशय युक्त **(सुरेक्णाः)** सुन्दर धन वाला **(मर्त्तः)** मनुष्य **(अद्य)** आज **(क्रत्वा)** बुद्धि वा कर्म्म से **(सुवृक्तिम्)** उत्तम प्रकार जाते हैं, दुःख जिसके द्वार उसको **(आनाश)** व्याप्त हो और **(त्वा)** आप का **(वन्वन्)** सेवन करता हुआ सुखी **(अस्तु)** हो और आप विद्या के **(दाः)** देनेवाले होओ॥ २६॥

भावार्थः-वे ही उत्तम जन गणनीय हैं, जो विज्ञान को देते हैं॥ २६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिए, इस विषय को कहते हैं॥

ते त॑ अग्ने॒ त्वोता॑ इ॒षय॑न्तो॒ विश्व॒मायु॑ः।
तर॑न्तो अ॒र्यो अरा॑तीर्व॒न्वन्तो॑ अ॒र्यो अरा॑तीः॥ २७॥

ते। ते॒। अ॒ग्ने॒। त्वाऽऊ॑ताः। इ॒षय॑न्तः। विश्व॑म्। आयु॑ः। तर॑न्तः। अ॒र्यः। अरा॑तीः। व॒न्वन्त॑ः। अ॒र्यः। अरा॑तीः॥ २७॥

पदार्थः-**(ते)** **(ते)** तव **(अग्ने)** अग्निरिव विद्यया प्रकाशमान **(त्वोताः)** त्वया रक्षिताः **(इषयन्तः)** इषमन्नं कामयमानाः **(विश्वम्)** सर्वम् **(आयुः)** जीवनम् **(तरन्तः)** उल्लङ्घयन्तः **(अर्य्यः)** स्वामी **(अरातीः)** न विद्यते रातिर्दानं येषु तान् कृपणान् विरोधिनः **(वन्वन्तः)** विभजन्तः **(अर्य्यः)** **(अरातीः)**॥ २७॥

अन्वयः-हे अग्ने! यस्तेऽर्य आज्ञापयेत्तत्त्वं कुरु। ये च त्वोता इषयन्तो विश्वमायुस्तरन्तोऽरातीर्वन्वतोऽरातीर्विजयन्ते ते तव सम्बन्धिनः सन्तु त्वमेषामर्य्यो भव॥२७॥

भावार्थः-ये ब्रह्मचर्य्यादिना रोगन्निवार्य्य चिरञ्जीविनः स्युस्ते धार्मिकाः सर्वकार्य्येष्वध्यक्षा भवन्तु॥२७॥

पदार्थः-हे **(अग्ने)** अग्नि के समान विद्या से प्रकाशमान! जो **(ते)** आप का **(अर्य्यः)** स्वामी आज्ञा देवे उसको आप करिये और जो **(त्वोताः)** आप से रक्षित **(इषयन्तः)** अन्न की कामना करते और **(विश्वम्)** सम्पूर्ण **(आयुः)** जीवन के **(तरन्तः)** पार होते हुए **(अरातीः)** नहीं विद्यमान दान जिनमें उन कृपण विरोधियों का **(वन्वन्तः)** विभाग करते हुए तथा **(अरातीः)** जिनमें दान नहीं उन शत्रुओं को विशेष करके जीतते हैं, वे **(ते)** आपके सम्बन्धी होवें, आप इनके **(अर्य्यः)** स्वामी होओ॥२७॥

भावार्थः-जो ब्रह्मचर्य आदि से रोगों को दूर करके चिरञ्जीवी होवें, वे धार्मिक सम्पूर्ण कार्य्यों में अध्यक्ष हों॥२७॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम्। अग्निर्नो वनते रयिम्॥२८॥

अग्निः। तिग्मेन। शोचिषा। यासत्। विश्वम्। नि। अत्रिणम्। अग्निः। नः। वनते। रयिम्॥२८॥

पदार्थः-(**अग्निः**) पावकः **(तिग्मेन)** तीव्रेण **(शोचिषा)** ज्योतिषा **(यासत्)** प्रयतेत **(विश्वम्)** समग्रम् **(नि)** **(अत्रिणम्)** शत्रुम् **(अग्निः)** पावक इव **(नः)** अस्मभ्यम् **(वनते)** सम्भजति **(रयिम्)** द्रव्यम्॥१८॥

अन्वयः-हे राजन्! यथाऽग्निस्तिग्मेन शोचिषा प्राप्तं वस्तु वहति तथा यो विश्वमत्रिणं नि यासत्तथा च योऽग्निर्नो रयिं वनते तमध्यक्षं कुरु॥२८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राज्ञाऽधिकारिस्थापने प्रजासम्मतिरपि ग्राह्यैवं सति कदाप्युपद्रवो न जायते॥२८॥

पदार्थः-हे राजन्! जैसे **(अग्निः)** अग्नि **(तिग्मेन)** तीव्र **(शोचिषा)** प्रकाश से प्राप्त हुए वस्तु को जलाता है, वैसे जो **(विश्वम्)** सम्पूर्ण **(अत्रिणम्)** शत्रु के प्रति **(नि यासत्)** प्रयत्न करे और वैसे जो **(अग्निः)** अग्नि के सदृश **(नः)** हम लोगों के लिये **(रयिम्)** द्रव्य का **(वनते)** सेवन करता है, उसको अध्यक्ष करिये॥२८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा को चाहिये कि अधिकारियों के नियत करने में प्रजा की सम्मति भी ग्रहण करे, ऐसा होने पर कभी भी उपद्रव नहीं होता है॥२८॥

पुना राज्ञं किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

सुवीरं रयिमा भर जातवेदो विचर्षणे। जहि रक्षांसि सुक्रतो॥२९॥

सुऽवीर॑म्। र॒यिम्। आ। भ॒र॒। जात॑ऽवेदः। विऽच॑र्षणे। ज॒हि। रक्षा॑ꣳसि। सु॒क्र॒तो॒ इति॑ सुऽक्रतो॥ २९॥

पदार्थः-(सुवीरम्) शोभना वीरा येन भवन्ति तम् **(रयिम्)** धनम् **(आ)** **(भर)** **(जातवेदः)** जातप्रज्ञानबल **(विचर्षणे)** तेजस्विन् **(जहि)** **(रक्षांसि)** दुष्टाचारान् **(सुक्रतो)** सुष्ठु प्रज्ञाकर्म्मयुक्त॥ २९॥

अन्वयः-हे जातवेदो विचर्षणे सुक्रतो! राजँस्त्वं सुवीरं रयिमाऽऽभर रक्षांसि जहि॥ २९॥

भावार्थः-राज्ञा सदैव धनादिना धार्मिका विपश्चितः क्षत्रियकुलोद्भवा वीरा संरक्ष्य दुष्टाः सदा तिरस्करणीयाः॥ २९॥

पदार्थः-हे **(जातवेदः)** उत्पन्न हुआ प्रज्ञानबल जिनके उन **(विचर्षणे)** तेजस्वी तथा **(सुक्रतो)** उत्तम बुद्धि और कर्म्म से युक्त राजन्! आप **(सुवीरम्)** सुन्दर वीर जिससे होते हैं उस **(रयिम्)** धन को **(आ, भर)** सब ओर से धारण करिये और **(रक्षांसि)** दुष्टाचारियों को **(जहि)** नष्ट करिये॥ २९॥

भावार्थः-राजा को चाहिये कि सदा ही धन आदि से धार्मिक विद्वान् और क्षत्रिय कुल में हुए वीरों की उत्तम प्रकार रक्षा करे और दुष्टों का सदा तिरस्कार करे॥ २९॥

पुना राजविद्वद्भ्यां किं कर्त्तव्यमित्याह॥

फिर राजा और विद्वान् क्या करें, इस विषय को कहते हैं॥

त्वं नः॑ पाह्यꣳह॒सो॒ जात॑वेदो अघाय॒तः। रक्षा॑ णो ब्रह्मणस्कवे॥ ३०॥ २६॥

त्वम्। न॒ः। पा॒हि॒। अꣳह॑सः। जात॑ऽवेदः। अ॒घा॒ऽय॒तः। रक्ष॑। न॒ः। ब्र॒ह्म॒ण॒ः। क॒वे॒॥ ३०॥

पदार्थः-(त्वम्) **(नः)** अस्मान् **(पाहि)** **(अंहसः)** अधर्माचरणात् **(जातवेदः)** जातविद्य **(अघायतः)** आत्मनोऽघमाचरतः **(रक्षा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मान् **(ब्रह्मणः)** वेदस्य **(कवे)** वक्तः॥ ३०॥

अन्वयः-हे जातवेदो ब्रह्मणस्कवे! त्वं नोंऽहसः पाहि नोऽघायतो रक्षा॥ ३०॥

भावार्थः-हे राजन् विद्वन् वा! युवामस्मानधर्माचरणादधर्म्ममाचरतश्च पृथग्रक्ष्य सुखं वर्धयतम्॥ ३०॥

पदार्थः-हे **(जातवेदः)** विद्या से युक्त **(ब्रह्मणः)** वेद के **(कवे)** कहने वाले! **(त्वम्)** आप **(नः)** हम लोगों की **(अंहसः)** अधर्माचरण से **(पाहि)** रक्षा कीजिये और **(नः)** हम लोगों की **(अघायतः)** अपने पाप करते हुए से **(रक्षा)** रक्षा कीजिये॥ ३०॥

भावार्थः-हे राजन् वा विद्वन्! आप दोनों हम लोगों का अधर्म्माचरण और अधर्म्म का आचरण करते हुए से अलग करके सुख को बढ़ाइये॥ ३०॥

पुनर्न्यायाधीशः किं कुर्य्यादित्याह॥

फिर न्यायाधीश क्या करे, इस विषय को कहते हैं॥

यो नो॑ अग्ने दु॒रेव॒ आ मर्तो॑ व॒धाय॒ दाश॑ति। तस्मा॑न्नः पा॒ह्यꣳह॑सः॥ ३१॥

यः। न॒ः। अ॒ग्ने॒। दु॒ःऽए॑वः। आ। मर्तः॑। व॒धाय॑। दाश॑ति। तस्मा॑त्। न॒ः। पा॒हि॒। अꣳह॑सः॥ ३१॥

पदार्थः-(यः) (**नः**) अस्मान् (**अग्ने**) न्यायाधीश (**दुरेवः**) दुष्टाचरणम् (**आ**) (**मर्त्तः**) मनुष्यः (**वधाय**) हननाय (**दाशति**) ददाति (**तस्मात्**) (**नः**) अस्मान् (**पाहि**) (**अंहसः**) अधर्माचरणम्॥३१॥

अन्वयः-हे अग्ने! यो मर्त्तो नो वधाय दुरेवो दाशति तस्मादंहसो न आ पाहि॥३१॥

भावार्थः-हे न्यायाधीश! ये विना कृतेनाऽपराधं स्थापयन्ति तेभ्यः तीव्रं दण्डं देहि॥३१॥

पदार्थः-हे (**अग्ने**) न्यायाधीश (**यः**) जो (**मर्त्तः**) मनुष्य (**नः**) हम लोगों को (**वधाय**) मारने के लिये (**दुरेवः**) दुष्ट आचरण को (**दाशति**) देता है (**तस्मात्**) उस (**अंहसः**) अधर्म्माचरण से (**नः**) हम लोगों की (**आ, पाहि**) रक्षा कीजिये॥३१॥

भावार्थः-हे न्यायाधीश! जो करने के विना अपराध को स्थापित करते हैं, उनके लिये तीव्र दण्ड को दीजिये॥३१॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम्। मर्तो यो नो जिघांसति॥३२॥

त्वम्। तम्। देव। जिह्वया। परि। बाधस्व। दुःऽकृतम्। मर्तः। यः। नः। जिघांसति॥३२॥

पदार्थः-(त्वम्) (**तम्**) (**देव**) विद्वन् न्यायेश (**जिह्वया**) वाचा (**परि**) सर्वतः (**बाधस्व**) (**दुष्कृतम्**) यो दुष्टं कर्म करोति तम् (**मर्त्तः**) मनुष्यः (**यः**) (**नः**) अस्मान् (**जिघांसति**) हन्तुमिच्छति॥३२॥

अन्वयः-हे देव! त्वं यो मर्त्तो नो जिघांसति तं दुष्कृतं जिह्वया परि बाधस्व॥३२॥

भावार्थः-हे राजन् विद्वन् वा! यो न्यायधर्म्मं विहाय पक्षपातेनाधर्म्मं करोति तं सद्यो भृशं दण्डय॥३२॥

पदार्थः-हे (**देव**) विद्यायुक्त न्यायाधीश! (**त्वम्**) आप (**यः**) जो (**मर्त्तः**) मनुष्य (**नः**) हम लोगों की (**जिघांसति**) मारने की इच्छा करता है (**तम्**) उस (**दुष्कृतम्**) दुष्ट कर्म्म करने वाले को (**जिह्वया**) वाणी से (**परि**) सब ओर से (**बाधस्व**) पीड़ित करिये॥३२॥

भावार्थः-हे राजन् वा विद्वन्! जो न्यायधर्म का त्याग करके पक्षपात से अधर्म्म करता है, उसको शीघ्र निरन्तर दण्ड दीजिये॥३२॥

पुन राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य। अग्ने वरेण्यं वसु॥३३॥

भरत्ऽवाजाय। सऽप्रथः। शर्म। यच्छ। सहन्त्य। अग्ने। वरेण्यम्। वसु॥३३॥

पदार्थः-(भरद्वाजाय) धृतविज्ञानाऽन्नाय (**सप्रथः**) प्रख्यात्या सह वर्त्तमानः (**शर्म**) गृहम् (**यच्छ**) देहि (**सहन्त्य**) सहन्तेषु शान्तेषु भव (**अग्ने**) दातः (**वरेण्यम्**) स्वीकर्त्तुमर्हम् (**वसु**) द्रव्यम्॥३३॥

अन्वयः-हे सहन्त्यग्ने! त्वं भरद्वाजाय सप्रथः शर्म्म वरेण्यं वसु च यच्छ॥३३॥

भावार्थः-हे सद्गृहस्थ! त्वं सदैव सुपात्राय धार्मिकाय जनाय दानं देहि॥३३॥

पदार्थः-हे **(सहन्त्य)** शान्त जनों में हुए **(अग्ने)** दाता जन! आप **(भरद्वाजाय)** विज्ञान और अन्न को धारण किये हुए जन के लिये **(सप्रथः)** प्रसिद्धि के सहित वर्त्तमान **(शर्म)** गृह को और **(वरेण्यम्)** स्वीकार करने योग्य **(वसु)** द्रव्य को **(यच्छ)** दीजिये॥३३॥

भावार्थः-हे श्रेष्ठ गृहस्थ! आप सदा ही सुपात्र धार्मिकजन के लिये दान दीजिये॥३३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः॥३४॥

अग्निः। वृत्राणि। जङ्घनत्। द्रविणस्युः। विपन्यया। सम्ऽइद्धः। शुक्रः। आऽहुतः॥३४॥

पदार्थः-**(अग्निः)** विद्युत् **(वृत्राणि)** धनानि। **वृत्रमिति धननाम।** (निघं०२.१०) **(जङ्घनत्)** भृशं हन्ति प्राप्नोति **(द्रविणस्युः)** आत्मनो द्रविणमिच्छुः **(विपन्यया)** विशिष्टोद्यमेन **(समिद्धः)** प्रदीप्तः **(शुक्रः)** आशुकारी **(आहुतः)** समन्तात् कृतसत्कारः॥३४॥

अन्वयः-हे विद्वन्नुद्यमिन्! यथा शुक्रः समिद्धोऽग्निर्वृत्राणि जङ्घनत् तथा द्रविणस्युराहुतस्त्वं विपन्यया वृत्राणि प्राप्नुहि॥३४॥

भावार्थः-ये सततमुद्यमं कुर्वन्ति ते दारिद्र्यं घ्नन्ति॥३४॥

पदार्थः-हे विद्वन्! उद्योगवाले जैसे **(शुक्रः)** शीघ्रकारिणी **(समिद्धः)** प्रदीप्त **(अग्निः)** बिजुली **(वृत्राणि)** धनों को **(जङ्घनत्)** अत्यन्त प्राप्त होती है, वैसे **(द्रविणस्युः)** अपने धन की इच्छा करने वाले **(आहुतः)** सब प्रकार सत्कार को प्राप्त आप **(विपन्यया)** विशिष्ट उद्यम से धनों को प्राप्त होओ॥३४॥

भावार्थः-जो निरन्तर उद्यम करते वे दारिद्र्य का नाश करते हैं॥३४॥

पुनरीश्वरः कीदृशोऽस्तीत्याह॥

फिर ईश्वर कैसा है, इस विषय को कहते हैं॥

गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे। सीदन्नृतस्य योनिमा॥३५॥२७॥

गर्भे। मातुः। पितुः। पिता। विऽदिद्युतानः। अक्षरे। सीदन्। ऋतस्य। योनिम्। आ॥३५॥

पदार्थः-**(गर्भे)** आभ्यन्तरे **(मातुः)** जनन्या इव भूमेः **(पितुः)** जनक इव सवितुः **(पिता)** पालकः **(विदिद्युतानः)** विशेषेण प्रकाशमानः **(अक्षरे)** अविनाशिनि स्वरूपे कारणे जीवे वा **(सीदन्)** **(ऋतस्य)** सत्यस्य **(योनिम्)** गृहम् **(आ)** समन्तात्॥३५॥

अन्वयः-हे विद्वांसो! योऽक्षर ऋतस्य योनिमाऽऽसीदन्मातुः पितुश्च पिता गर्भे विदिद्युतानोऽस्ति तं सर्वस्य विश्वस्य जनकं विजानन्तु॥३५॥

भावार्थः-हे मनुष्या! यो जनकानां जनकः प्रकाशकानां प्रकाशकोऽस्ति तं सर्वं उपासीरन्॥३५॥

पदार्थः-हे विद्वान् जनो! जो **(अक्षरे)** नहीं नाश होने वाले अपने रूप, कारण वा जीव में **(ऋतस्य)** सत्य के **(योनिम्)** गृह को **(आ)** सब ओर से **(सीदन्)** प्राप्त होता हुआ **(मातुः)** माता का जैसै, वैसे भूमि का और **(पितुः)** पिता का जैसै सूर्य्य का **(पिता)** पालक और **(गर्भे)** गर्भ में **(विदिद्युतानः)** विशेष करके प्रकाशमान है, उसको सम्पूर्ण संसार का जनक जानो॥३५॥

भावार्थः-हे मनुष्यो! जो उत्पन्न करने वालों का उत्पादक, प्रकाशकों का प्रकाशक है, उसकी सब लोग उपासना करें॥३५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

ब्रह्म॑ प्र॒जाव॒दा भ॑र॒ जात॑वेदो॒ विच॑र्षणे। अग्ने॒ यद्दी॒दय॑द्दि॒वि॥३६॥

ब्रह्म॑। प्र॒जाऽव॑त्। आ। भ॒र॒। जात॑ऽवेदः। विऽच॑र्षणे। अग्ने॑। यत्। दी॒द॑यत्। दि॒वि॥२६॥

पदार्थः-**(ब्रह्म)** धनमन्नं वा **(प्रजावत्)** प्रजा विद्यन्ते यस्मिंस्तत् **(आ)** **(भर)** **(जातवेदः)** जातवित्त **(विचर्षणे)** विचक्षण **(अग्ने)** अग्निरिव गृहस्थ **(यत्)** ज्योतिः **(दीदयत्)** द्योतयति **(दिवि)** प्रकाशे॥३६॥

अन्वयः-हे जातवेदो विचर्षणेऽग्ने! यद्दिवि दीदयत् तेन प्रजावद् ब्रह्माऽऽभर॥३६॥

भावार्थः-हे मनुष्या! यदग्नौ यत्सूर्य्ये यद्विद्युति च तेजोऽस्ति तद्विज्ञानेन धनधान्यमुन्नेयम्॥६॥

पदार्थः-हे **(जातवेदः)** धन से युक्त **(विचर्षणे)** बुद्धिमान् **(अग्ने)** अग्नि के समान गृहस्थ! **(यत्)** जो ज्योति **(दिवि)** प्रकाश में **(दीदयत्)** प्रकाशित करती है, उससे **(प्रजावत्)** प्रजा में विद्यमान जिसमें उस **(ब्रह्म)** धन वा अन्न को **(आ, भर)** सब प्रकार से धारण वा पोषण करिये॥३६॥

भावार्थः-हे मनुष्यो! जो अग्नि में, जो सूर्य्य में और जो बिजुली में तेज है, उसके विज्ञान से धन और धान्य की उन्नति करिये॥३६॥

मनुष्यैः कीदृशी वाक् प्रयोक्तव्येत्याह॥

मनुष्य कैसे वाणी को प्रयुक्त करें, इस विषय को कहते हैं॥

उप॑ त्वा॒ र॒ण्वसं॑दृशं॒ प्रय॑स्वन्तः सहस्कृत। अग्ने॑ ससृ॒ज्महे॒ गिरः॑॥३७॥

उप॑। त्वा॒। र॒ण्वऽसं॑दृशम्। प्रय॑स्वन्तः। स॒हः॒ऽकृ॒त॒। अग्ने॑। ससृ॒ज्महे॑। गिरः॑॥३७॥

पदार्थः-**(उप)** **(त्वा)** त्वाम् **(रण्वसन्दृशम्)** रमणीयसदृशम् **(प्रयस्वन्तः)** प्रयतमानाः **(सहस्कृत)** यः सहसा करोति तत्सम्बुद्धौ **(अग्ने)** पावक इव विद्वान् **(ससृज्महे)** भृशं सृजेम **(गिरः)** वाचः॥३७॥

अन्वयः-हे सहस्कृताग्ने! प्रयस्वन्तो वयं या गिरः ससृज्महे ताभी रण्वसन्दृशं त्वोप ससृज्महे॥३७॥

भावार्थः-मनुष्यैर्यथा स्वार्थप्रिया वाग्घृद्या भवति तथैवान्यार्थापि वेद्या॥३७॥

पदार्थः-हे **(सहस्कृत)** सहसा कार्य्यकर्ता **(अग्ने)** अग्नि के सदृश तेजस्वी विद्वन्! **(प्रयस्वन्तः)** प्रयत्न करते हुए हम लोग जिन **(गिरः)** वाणियों को **(ससृज्महे)** अत्यन्त प्रकट करें उनसे **(रण्वसन्दृशम्)** रमणीय के तुल्य **(त्वा)** आपको **(उप)** समीप में अत्यन्त प्रकट करें॥३७॥

भावार्थः-मनुष्यों को चाहिये कि जैसे अपने प्रयोजन की प्रिय वाणी हृदय को प्रिय होती है, वैसे अन्य जनों के प्रयोजन को भी समझें॥३७॥

पुनर्मनुष्यैः किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या प्राप्त करने योग्य है, इस विषय को कहते हैं॥

उप॑ छा॒यामि॑व॒ घृणे॒रग॑न्म॒ शर्म॑ ते व॒यम्। अग्ने॒ हिर॑ण्यसंदृशः॥३८॥

उप॑। छा॒याम्ऽइ॑व। घृणेः॑। अग॑न्म। शर्म॑। ते॒। व॒यम्। अग्ने॑। हिर॑ण्यऽसंदृशः॥३८॥

पदार्थः-**(उप)** **(छायामिव)** **(घृणेः)** प्रदीप्तात्सूर्य्यात् **(अगन्म)** प्राप्नुयाम **(शर्म)** गृहम् **(ते)** तव **(वयम्)** **(अग्ने)** विद्वन् **(हिरण्यसन्दृशः)** हिरण्यं तेज इव सन्दृक् समानं दर्शनं येषान्ते॥३८॥

अन्वयः-हे अग्ने! ते तव घृणेश्छायामिव शर्म हिरण्यसन्दृशो वयमुपाऽगन्म॥३८॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वन्! वयं सर्वर्त्तुकं सूर्य्यमिव प्रकाशमानं तव गृहं प्राप्य छायामिव सेवेमहि॥३८॥

पदार्थः-हे **(अग्ने)** विद्वन्! **(ते)** आपके **(घृणेः)** प्रदीप्त सूर्य्य से **(छायामिव)** छाया को जैसे वैसे **(शर्म)** गृह को **(हिरण्यसन्दृशः)** तेज के सदृश समान दर्शन जिनका ऐसे **(वयम्)** हम लोग **(उप)** समीप **(अगन्म)** प्राप्त होवें॥३८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वन्! हम लोग सब ऋतुओं में हुए सूर्य्य को जैसे वैसे प्रकाशमान आपके गृह को प्राप्त होकर छाया के सदृश सेवन करें॥३८॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

य उ॒ग्रइ॑व शर्य॒हा ति॒ग्मशृ॑ङ्गो॒ न वंस॑गः। अग्ने॒ पुरो॑ रु॒रोजि॑थ॥३९॥

यः। उ॒ग्रःऽइ॑व। श॒र्य॒ऽहा। ति॒ग्मऽशृ॑ङ्गः। न। वंस॑गः। अग्ने॑। पुरः॑। रु॒रोजि॑थ॥३९॥

पदार्थः-**(यः)** **(उग्रइव)** तेजस्वीव **(शर्यहा)** हन्तव्यहन्ता **(तिग्मशृङ्गः)** तिग्मानि तीव्राणि शृङ्गाणीव किरणा यस्य सूर्य्यस्य सः **(न)** **(वंसगः)** यो वंसं सम्भजनीयं व्यवहारं गच्छति सः **(अग्ने)** **(पुरः)** पुरस्तात् **(रुरोजिथ)** भनक्षि॥३९॥

अन्वयः-हे अग्ने यस्त्वं वंसगः शर्यहा तिग्मशृङ्गो न शत्रूणां पुर उग्रइव रुरोजिथ तं वयं सत्कुर्याम॥३९॥

भावार्थः-अत्रोपमालङ्कारः। ये राजादयोऽधिकारिणः सूर्य्य इव तेजस्विनस्स्युस्ते शत्रून् विजेतुं शक्नुयुः॥३९॥

पदार्थः-हे **(अग्ने)** अग्नि के सदृश तेजस्वी **(यः)** जो आप **(वंसगः)** सेवन करने योग्य व्यवहार को प्राप्त होने और **(शर्यहा)** मारने योग्य को मारने वाले **(तिग्मशृङ्गः)** तीव्र शृङ्गों के सदृश किरणों वाले सूर्य्य के **(न)** समान शत्रुओं के **(पुरः)** आगे **(उग्रइव)** तेजस्वी जन जैसे वैसे **(रुरोजिथ)** भग्न करते हो, उन आप का हम लोग सत्कार करें॥३९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा आदि अधिकारी जन सूर्य्य जैसे वैसे तेजस्वी होवें, वे शत्रुओं के जीतने को समर्थ होवें॥३९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति। विशामग्निं स्वध्वरम्॥४०॥२८॥

आ। यम्। हस्ते। न। खादिनम्। शिशुम्। जातम्। न। बिभ्रति। विशाम्। अग्निम्। सुऽअध्वरम्॥४०॥

पदार्थः-**(आ)** समन्तात् **(यम्)** **(हस्ते)** **(न)** इव **(खादिनम्)** खादितुं भक्षयितुं शीलम् **(शिशुम्)** बालम् **(जातम्)** उत्पन्नम् **(न)** इव **(बिभ्रति)** भरन्ति **(विशाम्)** मनुष्यादिप्रजानाम् **(अग्निम्)** प्रकाशमानम् **(स्वध्वरम्)** शोभना अध्वरा यस्मात्तम्॥४०॥

अन्वयः-ये यं हस्ते खादिनं न जातं शिशुं न विशां स्वध्वरमग्निमाऽऽबिभ्रति ते तेन कृतकृत्या जायन्ते॥४०॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये हस्तामलकवत् क्रोडे शिशुमिवाग्निविद्यां जानन्ति ते प्रजापतयो भवन्ति॥४०॥

पदार्थः-जो **(यम्)** जिसको **(हस्ते)** हाथ में **(खादिनम्)** भक्षण करने वाले के **(न)** समान और **(जातम्)** उत्पन्न हुए **(शिशुम्)** बालक के **(न)** समान **(विशाम्)** मनुष्यादि प्रजाओं के **(स्वध्वरम्)** सुन्दर यज्ञ जिससे हों उस **(अग्निम्)** प्रकाशमान अग्नि को **(आ, बिभ्रति)** सब ओर से धारण करते हैं, वे उससे कृतकृत्य होते हैं॥४०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो हाथ में आँवले को जैसे वैसे, गोदी में लड़के को जैसे वैसे अग्निविद्या को जानते हैं, वे प्रजा के स्वामी होते हैं॥४०॥

पुनर्मनुष्यैः किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या प्राप्त करने योग्य है, इस विषय को कहते हैं॥

प्र देवं देववीतये भरता वसुवित्तमम्। आ स्वे योनौ नि षीदतु॥४१॥

प्र। देवम्। देवऽवीतये। भरत। वसुवित्ऽतमम्। आ। स्वे। योनौ। नि। सीदतु॥४१॥

पदार्थः-(प्र) (देवम्) दातारम् **(देववीतये)** दिव्यगुणप्राप्तये **(भरता)** धरत हरत वा **(वसुवित्तमम्)** अतिशयेन वसु वेत्ति तम् **(आ) (स्वे)** स्वकीये **(योनौ)** गृहे **(नि) (सीदतु)**॥४१॥

अन्वयः-हे विद्वांसो! यूयं देववीतये वसुवित्तमं देवं स्वे योनौ प्राऽऽभरता येन मनुष्यः सुखेन निषीदतु॥४१॥

भावार्थः-हे मनुष्या! भवन्तो दिव्यगुणप्राप्तयेऽग्न्यादिपदार्थान् विजानन्तु॥४१॥

पदार्थः-हे विद्वान् जनो! आप लोग **(देववीतये)** श्रेष्ठ गुणों की प्राप्ति के लिये **(वसुवित्तमम्)** अतिशय धन को जानने और **(देवम्)** देने वाले को **(स्वे)** अपने **(योनौ)** गृह में **(प्र, आ, भरता)** उत्तमता से अच्छे प्रकार धारण करिये वा हरिये, जिससे मनुष्य सुख से **(नि, षीदतु)** निरन्तर स्थिर होवे॥४१॥

भावार्थः-हे मनुष्यो! आप श्रेष्ठ गुणों की प्राप्ति के लिये अग्नि आदि पदार्थों को जानिये॥४१॥

विद्वद्भिः सद्गृहस्थाः सत्कर्त्तव्या इत्याह॥

विद्वानों को चाहिये कि श्रेष्ठ गृहस्थों का सत्कार करें, इस विषय को कहते हैं॥

आ जातं जातवेदसि प्रियं शिशीतातिथिम्। स्योन आ गृहपतिम्॥४२॥

आ। जातम्। जातऽवेदसि। प्रियम्। शिशीत। अतिथिम्। स्योने। आ। गृहऽपतिम्॥४२॥

पदार्थः-(आ) (जातम्) प्रसिद्धम् **(जातवेदसि)** जातविद्ये **(प्रियम्)** कमनीयम् **(शिशीत)** तीक्ष्णीकुरुत **(अतिथिम्)** अतिथिवद्वर्त्तमानम् **(स्योने)** सुखे **(आ) (गृहपतिम्)** गृहस्वामिनम्॥४२॥

अन्वयः-हे विद्वांसो! जातवेदस्याऽऽजातं प्रियमतिथिमिव स्योने गृहपतिमा शिशीत॥४२॥

भावार्थः-ये व्याप्तां विद्युतं प्रज्वालयन्ति ते सर्वत्र विजयादिकमाप्नुवन्ति॥४२॥

पदार्थः-हे विद्वान् जनो! **(जातवेदसि)** प्राप्त हुई विद्या जिसमें उसमें **(आ, जातम्)** अच्छे प्रकार प्रसिद्ध **(प्रियम्)** प्रिय **(अतिथिम्)** अतिथि के समान वर्त्तमान को **(स्योने)** सुख में **(गृहपतिम्)** गृह के स्वामी को **(आ, शिशीत)** अच्छे प्रकार तीक्ष्ण करिये॥४२॥

भावार्थः-जो व्याप्त बिजली को प्रज्वलित कराते हैं, वे सब स्थानों में विजय आदि को प्राप्त होते हैं॥४२॥

पुनस्तमेव विषयमाह॥

फिर उसी को कहते हैं॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः। अरं वहन्ति मन्यवे॥४३॥

अग्ने। युक्ष्वा। हि। ये। तव। अश्वासः। देव। साधवः। अरम्। वहन्ति। मन्यवे॥४३॥

पदार्थः-(अग्ने) शिल्पविद्याविद्विद्वन् **(युक्ष्वा)** संयोजय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(हि) (ये) (तव) (अश्वासः)** वेगादयो गुणाः **(देव)** दिव्यसुखप्रद **(साधवः)** साधुगतयः **(अरम्)** अलम् **(वहन्ति)** प्राप्नुवन्ति **(मन्यवे)** क्रोधाय॥४३॥

अन्वयः-हे देवाग्ने! ये साधवस्तवाश्वासो मन्यवेऽरं वहन्ति तान् हि त्वं यानेषु युक्ष्वा॥४३॥

भावार्थः-ये विद्वांसोऽग्न्यादियोजनं यानेषु कुर्वन्ति ते पूर्णकामा भवन्ति॥४३॥

पदार्थः-हे **(देव)** श्रेष्ठ सुख के देने और **(अग्ने)** शिल्प क्रिया की कुशलता को जानने वाले विद्वन्! **(ये)** जो **(साधवः)** श्रेष्ठ गमन वाले **(तव)** आपके **(अश्वासः)** वेग आदि गुण **(मन्यवे)** क्रोध के लिये **(अरम्)** समर्थ को **(वहन्ति)** प्राप्त होते हैं उनको **(हि)** ही आप वाहनों में **(युक्ष्वा)** संयुक्त करिये॥४३॥

भावार्थः-जो विद्वान् जन अग्नि आदि का योजन वाहनों में करते हैं, वे पूर्ण मनोरथ वाले होते हैं॥४३॥

मनुष्यैः केषां सत्कारः कर्त्तव्य इत्याह॥

मनुष्यों को किसका सत्कार करना चाहिये, इस विषय को कहते हैं॥

अच्छा॑ नो या॒ह्या व॑हा॒भि प्रयां॑सि वी॒तये॑। आ दे॒वान्त्सोम॑पीतये॥४४॥

अच्छा॑। न॒ः। या॒हि॒। आ। व॒ह॒। अ॒भि। प्रयां॑सि। वी॒तये॑। आ। दे॒वान्। सोम्ऽपीतये॥४४॥

पदार्थः-(अच्छा) अत्र **संहितायामि**ति दीर्घः। **(नः)** अस्मान् **(याहि)** प्राप्नुहि **(आ) (वह)** प्राप्नुहि **(अभि) (प्रयांसि)** प्रियतमानि **(वीतये)** ज्ञानाय **(आ)** समन्तात् **(देवान्)** विदुषः **(सोमपीतये)** सोमस्य पानाय॥४४॥

अन्वयः-हे विद्वंस्त्वन्नोऽच्छा सोमपीतय आ याहि। प्रयांस्यभ्याऽऽवह वीतये देवानाऽऽयाहि॥४४॥

भावार्थः-मनुष्यैः सत्काराय विदुषामाह्वानं कर्त्तव्यम्॥४४॥

पदार्थः-हे विद्वन्! आप **(नः)** हम लोगों को **(अच्छा)** उत्तम प्रकार **(सोमपीतये)** सोमलातारूप ओषधि के रस के पान के लिये **(आ, याहि)** सब ओर से प्राप्त होओ और **(प्रयांसि)** अत्यन्त प्रिय वस्तुओं को **(अभि)** चारों ओर से **(आ)** सब प्रकार **(वह)** प्राप्त होओ और **(वीतये)** ज्ञान के लिये **(देवान्)** विद्वानों को सब ओर से प्राप्त होओ॥४४॥

भावार्थः-मनुष्यों को चाहिये कि सत्कार के लिये विद्वानों का आह्वान करें॥४४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

उद॑ग्ने भारत द्यु॒मदज॑स्रेण॒ दवि॑द्युतत्। शोचा॒ वि भा॑ह्यजर॥४५॥२९॥

उत्। अ॒ग्ने॒। भा॒र॒त॒। द्यु॒ऽमत्। अज॑स्रेण। दवि॑द्युतत्। शोच॑। वि। भा॒हि॒। अ॒जर॒॥४५॥

पदार्थः-(उत्) (अग्ने) विद्वन् **(भारत)** धर्त्तः **(द्युमत्)** प्रकाशवत् **(अजस्रेण)** निरन्तरेण **(दविद्युतत्)** द्योतयति **(शोचा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(वि) (भाहि) (अजर)** जरादोषरहित॥४५॥

अन्वयः-हे भारताजराग्ने! भवानजस्रेण द्युमद्दविद्युतत् तदर्थं त्वमुच्छोचा वि भाहि॥४५॥

भावार्थः-यथा ब्रह्माण्डे सूर्य्यः सततं प्रकाशते तथैव विद्वांसः सत्यव्यवहारे प्रकाशयन्ताम्॥४५॥

पदार्थः-हे **(भारत)** धारण करने वाले **(अजर)** जरा दोष से रहित **(अग्ने)** विद्वन्! आप **(अजस्रेण)** निरन्तर **(द्युमतु)** प्रकाश वाले को **(दविद्युतत्)** प्रकाशित करते हो, उसके लिये आप **(उत्, शोचा)** अत्यन्त प्रकाशित हूजिये और **(वि, भाहि)** विशेष करके प्रकाशित करिये॥४५॥

भावार्थः-जैसे ब्रह्माण्ड में सूर्य्य निरन्तर प्रकाशित होता है, वैसे ही विद्वान् जन सत्य व्यवहार में प्रकाशित हों॥४५॥

मनुष्यैः क उपासनीय इत्याह॥

मनुष्यों को किस की उपासता करनी चाहिये, इस विषय को कहते हैं॥

वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्।
होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसाऽऽविवासेत्॥४६॥

वीती। यः। देवम्। मर्तः। दुवस्येत्। अग्निम्। ईळीत। अध्वरे। हविष्मान्। होतारम्। सत्यऽयजम्। रोदस्योः। उत्तानऽहस्तः। नमसा। आ। विवासेत्॥४६॥

पदार्थः-(वीती) कामनया **(यः) (देवम्)** कमनीयम् **(मर्त्तः)** मनुष्यः **(दुवस्येत्)** सेवेत **(अग्निम्)** पावकमिव स्वप्रकाशं परमात्मानम् **(ईळीत)** प्रशंसत **(अध्वरे)** अहिंसादिलक्षणे योगे **(हविष्मान्)** बहूनि हवींषि दानानि विद्यन्ते यस्य सः **(होतारम्)** दातारम् **(सत्ययजम्)** यस्सत्यं यजति सङ्गमयति तम् **(रोदस्योः)** द्यावापृथिव्योः **(उत्तानहस्तः)** उत्तानावुपरिस्थौ हस्तौ यस्य सः **(नमसा)** सत्कारेण **(आ)** समन्तात् **(विवासेत्)** सेवेत॥४६॥

अन्वयः-हे विद्वांसो! यो हविष्मानुत्तानहस्तो मर्त्तो वीत्यध्वरे यं होतारं सत्ययजं देवमग्निं दुवस्येत् रोदस्योर्नमसाऽऽविवासेत् तद्वत्तं परमात्मानं यूयमीळीत॥४६॥

भावार्थः-हे मनुष्या! यं जगदीश्वरं योगिन उपासते तं यूयमप्युपाध्वम्॥४६॥

पदार्थः-हे विद्वान् जनो! **(यः)** जो **(हविष्मान्)** बहुत दान करने वाला **(उत्तानहस्तः)** ऊपर स्थित हाथ जिसके ऐसा **(मर्त्तः)** मनुष्य **(वीती)** कामना से **(अध्वरे)** अहिंसा आदि लक्षण युक्त योग में जिस **(होतारम्)** दान करने वाले **(सत्ययजम्)** सत्य प्राप्त कराने वाले **(देवम्)** मनोहर **(अग्निम्)** अग्नि के सदृश स्वयं प्रकाशित परमात्मा का **(दुवस्येत्)** सेवन करे और **(रोदस्योः)** अन्तरिक्ष और पृथिवी के

(नमसा) सत्कार से **(आ, विवासेत्)** अच्छे प्रकार सेवन करे, उस परमात्मा की आप लोग **(ईळीत)** प्रशंसा करो॥४६॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर की योगी जन उपासना करते हैं, उसकी आप लोग भी उपासना करो॥४६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ ते॑ अग्न ऋ॒चा ह॒विर्हृ॒दा त॒ष्टं भ॑रामसि।

ते ते॑ भवन्तूक्षणऽ ऋष॒भासो॑ व॒शा उ॒त॥४७॥

आ। ते॒। अ॒ग्ने॒। ऋ॒चा। ह॒विः। हृ॒दा। त॒ष्टम्। भ॒रा॒म॒सि॒ ते। ते॒। भ॒व॒न्तु॒। उ॒क्षणः॑। ऋ॒ष॒भासः॑। व॒शाः। उ॒त॥४७॥

पदार्थः-**(आ)** समन्तात् **(ते)** तव **(अग्ने)** जगदीश्वर **(ऋचा)** प्रशंसया ऋग्वेदादिना **(हविः)** अन्तःकरणम् **(हृदा)** हृदयेन **(तष्टम्)** तीक्ष्णं शोधितम् **(भरामसि)** भरामः **(ते)** **(ते)** तव **(भवन्तु)** **(उक्षणः)** सेचकाः **(ऋषभासः)** उत्तमाः **(वशाः)** कामयमानाः **(उत)**॥४७॥

अन्वयः-हे अग्ने! यस्य ते तव हविस्तष्टं स्वरूपं वयमृचा हृदाऽऽभरामसि ते कृपयाऽस्माकं ते सम्बन्धिन उक्षण ऋषभास उत वशा भवन्तु॥४७॥

भावार्थः-ये सत्यभावेनान्तःकरणेन जगदीश्वराज्ञां सेवन्ते ते सर्वथोत्कृष्टा भवन्ति॥४७॥

पदार्थः-हे **(अग्ने)** जगदीश्वर! जिन **(ते)** आपके **(हविः)** अन्तःकरण और **(तष्टम्)** अत्यन्त शुद्ध किये गये स्वरूप को हम लोग **(ऋचा)** प्रशंसारूप ऋग्वेद आदि से और **(हृदा)** हृदय से **(आ, भरामसि)** अच्छे प्रकार पोषण करते हैं उन **(ते)** आपकी कृपा से हमारे और **(ते)** आपके संबन्धी **(उक्षणः)** सेचन करने वाले **(ऋषभासः)** उत्तम **(उत)** भी **(वशाः)** कामना करते हुए **(भवन्तु)** होवें॥४७॥

भावार्थः-जो सत्यभाव से और अन्तःकरण से जगदीश्वर की आज्ञा का सेवन करते हैं, वे सब प्रकार से उत्कृष्ट होते हैं॥४७॥

अथेश्वरविषयमाह॥

अब ईश्वरविषय को कहते हैं॥

अ॒ग्निं दे॒वासो॑ अग्रि॒यमि॒न्धते॑ वृत्र॒हन्त॑मम्।

येना॒ वसू॒न्याभृ॑ता तृ॒ळ्हा रक्षा॑ꣳसि वा॒जिना॑॥४८॥३०॥५॥

अ॒ग्निम्। दे॒वासः॑। अ॒ग्रि॒यम्। इ॒न्धते॑। वृ॒त्र॒हन्ऽत॑मम्। येन॑। वसू॑नि। आऽभृ॑ता। तृ॒ळ्हा। रक्षा॑ꣳसि। वा॒जिना॑॥४८॥

पदार्थः-(अग्निम्) पावकम् **(देवासः)** विद्वांसः **(अग्रियम्)** अग्रे भवम् **(इन्धते)** प्रकाशयन्ति **(वृत्रहन्तमम्)** यो वृत्रं मेघं हन्ति तमतिशयितम् **(येना)** अत्र **संहितायामि**ति दीर्घः। **(वसूनि)** धनानि **(आभृता)** समन्ताद्धृतानि **(तृळ्हा)** हिंसितानि **(रक्षांसि)** दुष्टाञ्जनान् **(वाजिना)** वेगेन विज्ञानेन वा॥४८॥

अन्वयः-हे मनुष्या! यथा देवासो वृत्रहन्तममग्रियमग्निमिन्धते येन वाजिनाऽऽभृता वसूनीन्धते रक्षांसि तृळ्हा कुर्वन्ति तथा दोषान् हत्वा परमात्मानं प्रकाशयन्त्येवं यूयमपि कुरुत॥४८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथर्त्विजो यज्ञे वेद्यामग्निं प्रज्वाल्य हविः प्रक्षिप्य जगदुपकुर्वन्ति तथैव योगयुक्ताः सन्न्यासिनः परमात्मानं सर्वेषां हृदयेऽभिप्रकाश्य दोषान्नाशयन्तीति॥४८॥

अत्राग्निविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

अस्मिन्नध्यायेऽग्निविश्वेदेवसूर्येन्द्रवैश्वानरमरुद्यज्ञराजधर्म्मविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वाध्यायार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण परमविदुषा श्रीमद्दयानन्दसरस्वतीस्वामिना विरचित ऋग्वेदभाष्ये चतुर्थेऽष्टके पञ्चमोऽध्यायस्त्रिंशो वर्गः षष्ठे मण्डले षोडशं सूक्तञ्च समाप्तम्॥

पदार्थः-हे मनुष्यो! जैसे **(देवासः)** विद्वान् जन **(वृत्रहन्तमम्)** मेघ के अत्यन्त नाश करने वाले और **(अग्रियम्)** आगे प्रकट हुए **(अग्निम्)** अग्नि को **(इन्धते)** प्रकाशित करते हैं और **(येन)** जिन **(वाजिना)** वेग वा विज्ञान से **(आभृता)** चारों ओर से धारण किये गये **(वसूनि)** धनों को प्रकाशित करते हैं और **(रक्षांसि)** दुष्ट जनों को **(तृळ्हा)** हिंसित करते हैं, वैसे ही दोषों का नाश करके परमात्मा को प्रकाशित करते हैं, इस प्रकार आप लोग भी करो॥४८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे यज्ञ करने वाले जन यज्ञ में वेदी पर अग्नि को प्रज्वलित करके हवन की सामग्री छोड़ के संसार का उपकार करते हैं, वैसे ही योग से युक्त संन्यासी जन परमात्मा को सब के हृदय मे अच्छे प्रकार प्रकाशित करके दोषों का नाश करते हैं॥४८॥

इस सूक्त में अग्नि, विद्वान् और ईश्वर के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

इस अध्याय में अग्नि, विश्वेदेव, सूर्य्य, इन्द्र, वैश्वानर, वायु, यज्ञ, राजधर्म्म, विद्वान् और ईश्वर के गुणवर्णन करने से इस अध्याय के अर्थ की इससे पूर्व अध्याय के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्विरजानन्दसरस्वती स्वामी जी के शिष्य परम विद्वान् श्रीमद्दयानन्द सरस्वती स्वामी से रचे गये ऋग्वेदभाष्य में चतुर्थ अष्टक में पाँचवाँ अध्याय, तीसवाँ वर्ग और छठे मण्डल में सोलहवाँ सूक्त भी समाप्त हुआ॥

॥ओ३म्॥

अथ षष्ठाध्यायारम्भः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथ पञ्चदशर्चस्य सप्तदशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, २,३, ४, ११ त्रिष्टुप्। ५, ६,८ विराट्त्रिष्टुप्। ७, ९, १०, १२, १४ निचृत्त्रिष्टुप्छन्दः। धैवतः स्वरः। १३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १५ आर्च्युष्णिक् छन्दः। ऋषभः स्वरः॥

पुनर्म्मनुष्यैः किं कर्त्तव्यमित्याह॥

अब चतुर्थ अष्टक में छठे अध्याय और छठे मण्डल में पन्द्रह ऋचा वाले सत्रहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

पिबा॒ सोम॑म॒भि यमु॒ग्र तर्दः॑ ऊ॒र्वं गव्यं॒ महि॑ गृणा॒न इ॑न्द्र।
वि यो धृ॒ष्णो॒ वधि॑षो वज्रहस्त॒ विश्वा॑ वृ॒त्रम॑मि॒त्रिया॒ शवो॑भिः॥ १॥

पिब॑। सोम॑म्। अ॒भि। यम्। उ॒ग्र॒। तर्दः॑। ऊ॒र्वम्। गव्य॑म्। महि॑। गृ॒णा॒नः। इ॒न्द्र॒। वि। यः। धृ॒ष्णो॒ इति॑। वधि॑षः। व॒ज्र॒ऽह॒स्त॒। विश्वा॑। वृ॒त्रम्। अ॒मि॒त्रिया॑। शव॑ः॑ऽभिः॥ १॥

पदार्थः-(पिबा) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः **(सोमम्)** महौषधिरसम् **(अभि)** **(यम्)** **(उग्र)** तेजस्विन् **(तर्दः)** **(ऊर्वम्)** हिंस्यम् **(गव्यम्)** गवामिदम् **(महि)** महत् **(गृणानः)** स्तुवन् **(इन्द्र)** परमैश्वर्यमिच्छो **(वि)** **(यः)** **(धृष्णो)** प्रगल्भ **(वधिषः)** हन्याः **(वज्रहस्त)** शस्त्रपाणे **(विश्वा)** सर्वाणि **(वृत्रम्)** मेघम् **(अमित्रिया)** अमित्राणि **(शवोभिः)** बलैः॥ १॥

अन्वयः-हे वज्रहस्त धृष्णो इन्द्र! यः शवोभिर्वृत्रं सूर्य्य इव विश्वाऽमित्रिया त्वं वि वधिषः। हे उग्र! महि गव्यं गृणानो यमूर्वमभि तर्दस्तत्सम्बन्धे स त्वं सोमं पिबा॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या ब्रह्मचर्य्येण विद्यया सत्कर्म्मणा दुष्टान्निवार्य्य श्रेष्ठान् स्वीकुर्वन्ति ते शत्रून् घ्नन्ति॥ १॥

पदार्थः-हे **(व्रजहस्त)** शस्त्र है हस्त में जिनके ऐसे **(धृष्णो)** अत्यन्त दृढ़ **(इन्द्र)** अत्यन्त ऐश्वर्य की इच्छा करने वाले! **(यः)** जो **(शवोभिः)** बलों से **(वृत्रम्)** मेघों को सूर्य्य जैसे वैसे **(विश्वा)** सम्पूर्ण **(अमित्रिया)** शत्रुओं को आप **(वि)** विशेष करके **(वधिषः)** नाश करिये और हे **(उग्र)** तेजस्विन् **(महि)** बड़े **(गव्यम्)** गौओं के घृत की **(गृणानः)** स्तुति करते हुए **(यम्)** जिस **(ऊर्वम्)** हिंसा करने योग्य की **(अभि)** **(तर्दः)** हिंसा करिये, उसके सम्बन्ध में वह आप **(सोमम्)** महौषधि के रस **(पिबा)** पीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य ब्रह्मचर्य्य, विद्या और सत्कर्म्म से दुष्टों को दूर करके श्रेष्ठों को स्वीकार करते हैं, वे शत्रुओं का नाश करते हैं॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान् वृषभो यो मतीनाम्।
यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान्॥२॥

सः। ईम्। पाहि। यः। ऋजीषी। तरुत्रः। यः। शिप्रऽवान्। वृषभः। यः। मतीनाम्। यः। गोत्रऽभित्। वज्रऽभृत्। यः। हरिऽस्थाः। सः। इन्द्र। चित्रान्। अभि। तृन्धि। वाजान्॥२॥

पदार्थः-(**सः**) (**ईम्**) प्राप्तं वस्तु (**पाहि**) (**यः**) (**ऋजीषी**) सरलस्वभावः (**तरुत्रः**) सर्वदुःखादुत्तीर्णः (**यः**) (**शिप्रवान्**) शिप्रे सुन्दरे हनुनासिके विद्यते यस्य (**वृषभः**) बलिष्ठः (**यः**) (**मतीनाम्**) मनुष्याणाम् (**यः**) (**गोत्रभित्**) यो गोत्रं भिनत्ति (**वज्रभृत्**) यो वज्रं बिभर्त्ति (**यः**) (**हरिष्ठाः**) अतिशयेन हर्त्ता (**सः**) (**इन्द्र**) दुष्टविदारक (**चित्रान्**) अद्भुतान् (**अभि**) (**तृन्धि**) हिन्धि (**वाजान्**) हिंसकान्॥२॥

अन्वयः-हे इन्द्र! य ऋजीषी तरुत्रस्त्वमसि स ईं पाहि यः शिप्रवान् वृषभो यो मतीनां वृषभो यो वज्रभृद् गोत्रभिदसि यो हरिष्ठा असि स त्वं चित्रान् वाजानभि तृन्धि॥२॥

भावार्थः-हे राजन्! ये प्रजारक्षका दुष्टहिंसका जनाः स्युस्ताँस्त्वं सत्कुर्य्याः॥२॥

पदार्थः-हे (**इन्द्र**) दुष्टों के विदीर्ण करने वाले! (**यः**) जो (**ऋजीषी**) सरलस्वभाव (**तरुत्रः**) सम्पूर्ण दुःख से उत्तीर्ण हुए आप हैं (**सः**) वह आप (**ईम्**) प्राप्त वस्तु का (**पाहि**) पालन करिये और (**यः**) जो (**शिप्रवान्**) सुन्दर ठुड्डी और नासिका वाले (**वृषभः**) बलिष्ठ और (**यः**) जो (**मतीनाम्**) मनुष्यों के मध्य में बलिष्ठ (**यः**) जो (**वज्रभृत्**) वज्र को धारण करने वाले (**गोत्रभित्**) गोत्र के नाश करने वाले हैं (**यः**) जो (**हरिष्ठाः**) अतिशय हरने वाले हैं (**सः**) वह आप (**चित्रान्**) अद्भुत (**वाजान्**) हिंसकों का (**अभि, तृन्धि**) सब ओर से नाश करिये॥२॥

भावार्थः-हे राजन्! जो प्रजा के रक्षक, दुष्टों के हिंसक जन होवें, उनका आप सत्कार करिये॥२॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

एवा पाहि प्रत्यथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि॥३॥

एव। पाहि। प्रत्नऽथा। मन्दतु। त्वा। श्रुधि। ब्रह्म। ववृधस्व। उत। गीःऽभिः। आविः। सूर्यम्। कृणुहि। पीपिहि। इषः। जहि। शत्रून्। अभि। गाः। इन्द्र। तृन्धि॥ ३॥

पदार्थः-(एवा) अत्र **निपातस्य चे**ति दीर्घः। **(पाहि) (प्रत्नथा)** प्रत्नः प्राचीन इव **(मन्दतु)** प्रशंसतु **(त्वा)** त्वाम् **(श्रुधि)** शृणु **(ब्रह्म)** वेदम् **(वावृधस्व)** वृद्धो भव **(उत)** अपि **(गीर्भिः) (आविः)** प्राकट्ये **(सूर्य्यम्)** परमेश्वरम् **(कृणुहि)** कुरु **(पीपिहि)** पिब **(इषः)** अन्नम् **(जहि) (शत्रून्) (अभि) (गाः)** पृथिवीः **(इन्द्र)** दुष्टविदारक **(तृन्धि)** हिन्धि॥ ३॥

अन्वयः-हे इन्द्र! प्रत्नथा त्वं ब्रह्म पाहि यद्ब्रह्म त्वा मन्दतु यत्त्वं श्रुधि तेन वावृधस्वोत गीर्भिः सूर्य्यमाविष्कृणुहीषः पीपीहि शत्रूनभि तृन्धि दोषान् जहि गा एवा प्राप्नुहि॥ ३॥

भावार्थः-ये श्रद्धया परमेश्वरमुपास्य विद्यार्थिनां परीक्षां कुर्वन्ति ते जगत्प्रिया भवन्ति॥ ३॥

पदार्थः-हे **(इन्द्र)** दुष्टों के नाश करने वाले! **(प्रत्नथा)** प्राचीन जन जैसे वैसे आप **(ब्रह्म)** वेद की **(पाहि)** रक्षा कीजिये और जो वेद **(त्वा)** आपकी **(मन्दतु)** प्रशंसा करे, उसको आप **(श्रुधि)** सुनिये उससे **(वावृधस्व)** बढ़िये और **(उत)** भी **(गीर्भिः)** वाणियों से **(सूर्य्यम्)** परमेश्वर का **(आविः)** प्राकट्य **(कृणुहि)** करिये तथा **(इषः)** अन्न का **(पीपिहि)** पान करिये और **(शत्रून्)** शत्रुओं का **(अभि, तृन्धि)** सब प्रकार से नाश करिये और दोषों का **(जहि)** त्याग करिये और **(गाः)** पृथिवियों को **(एवा)** ही प्राप्त हूजिये॥ ३॥

भावार्थः-जो श्रद्धा से परमेश्वर की उपासना करके विद्यार्थियों की परीक्षा करते हैं, वे जगत् के प्रिय होते हैं॥ ३॥

पुना राजप्रजाजनाः परस्परं कथं वर्त्तेयुरित्याह॥

फिर राजा और प्रजा जन परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम्।
महामनूनं तवसं विभूतिं मत्सरासो जर्हषन्त प्रसाहम्॥ ४॥

ते। त्वा। मदाः। बृहत्। इन्द्र। स्वधाऽवः। इमे। पीताः। उक्षयन्त। द्युऽमन्तम्। महाम्। अनूनम्। तवसम्। विऽभूतिम्। मत्सरासः। जर्हषन्त। प्रऽसहम्॥ ४॥

पदार्थः-(ते) (त्वा) त्वाम् **(मदाः)** हर्षाः **(बृहत्)** महत् **(इन्द्र)** ऐश्वर्ययुक्त **(स्वधावः)** स्वधा बह्वन्नं विद्यते यस्य तत् सम्बुद्धौ **(इमे) (पीताः) (उक्षयन्त)** सिञ्चन्ति **(द्युमन्तम्)** बहुकामयुक्तम् **(महाम्)** महान्तम् **(अनूनम्)** ऊनतारहितम् **(तवसम्)** बलिष्ठम् **(विभूतिम्)** महदैश्वर्य्यम् **(मत्सरासः)** आनन्दन्तः सन्तः **(जर्हषन्त)** भृशं हृष्यन्तु **(प्रसाहम्)** प्रकर्षेण सोढारम्। अत्र **संहितायामि**ति दीर्घः॥ ४॥

अन्वयः-हे स्वधाव इन्द्र! य इमे पीता मदा मत्सरासो द्युमन्तं महामनूनं तवसं विभूतिं प्रसाहं बृहदुक्षयन्त जर्हषन्त ते त्वा सत्कुर्वन्तु॥ ४॥

भावार्थः-यान् सज्जनान् राजानः सत्कुर्य्युस्ते राज्ञः प्रसादयेयुः॥४॥

पदार्थः-हे **(स्वधावः)** बहुत अन्न से युक्त और **(इन्द्र)** ऐश्वर्य्ययुक्त! जो **(इमे)** ये **(पीताः)** पान किये गये **(मदाः)** आनन्द और **(मत्सरासः)** आनन्द करते हुए जन **(द्युमन्तम्)** बहुत मनोरथों से युक्त **(महाम्)** बड़े **(अनूनम्)** न्यूनता से रहित **(तवसम्)** बलिष्ठ **(विभूतिम्)** बड़े ऐश्वर्य्य से युक्त **(प्रसाहम्)** अत्यन्त सहने वाले को **(बृहत्)** बहुत **(उक्षयन्त)** सेचन करते हैं और **(जर्हषन्त)** अत्यन्त प्रसन्न हों **(ते)** वे **(त्वा)** आप का सत्कार करें॥४॥

भावार्थः-जिन सज्जनों का राजा सत्कार करें, वे राजाओं को भी प्रसन्न करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप दृळ्हानि दर्द्रत्।
महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस्परि स्वात्॥५॥१॥

येभिः। सूर्यम्। उषसम्। मन्दसानः। अवासयः। अप। दृळ्हानि। दर्द्रत्। महाम्। अद्रिम्। परि। गाः। इन्द्र। सन्तम्। नुत्थाः। अच्युतम्। सदसः। परि। स्वात्॥५॥१॥

पदार्थः-**(येभिः)** **(सूर्य्यम्)** **(उषसम्)** प्रभातम् **(मन्दसानः)** कामयमानः **(अवासयः)** वासयेः **(अप)** **(दृळ्हानि)** **(दर्द्रत्)** दृणीहि **(महाम्)** महान्तम् **(अद्रिम्)** मेघम् **(परि)** सर्वतः **(गाः)** पृथिवीः **(इन्द्र)** परमैश्वर्य्ययुक्त राजन् **(सन्तम्)** वर्त्तमानम् **(नुत्थाः)** प्रेरयेः **(अच्युतम्)** नाशरहितम् **(सदसः)** सभायाः **(परि)** **(स्वात्)** स्वकीयात्॥५॥

अन्वयः-हे इन्द्र! मन्दसानस्त्वं येभिस्सूर्य्यमुषसमिव गाः पर्यवासयः। दृळ्हान्यपदर्द्रत् तेभिर्महामद्रिमिव सन्तमच्युतं स्वात् सदसः परि नुत्थाः॥५॥

भावार्थः-स एव राजा श्रेष्ठो भवति यो दुष्टान् विदार्य्य श्रेष्ठानां सभया सर्वाः प्रजाः शास्ति॥५॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य से युक्त राजन्! **(मन्दसानः)** कामना करते हुए आप **(येभिः)** जिन से **(सूर्य्यम्)** सूर्य्य और **(उषसम्)** प्रातर्वेला को जैसे वैसे **(गाः)** पृथिवियों को **(परि, अवासयः)** सब प्रकार बसाइये तथा **(दृळ्हानि)** दृढ़ पदार्थों को **(अप, दर्द्रत्)** पुष्ट करिये उनसे **(महाम्)** बड़े **(अद्रिम्)** मेघ के समान **(सन्तम्)** वर्त्तमान **(अच्युतम्)** नाश से रहित को **(स्वात्)** अपने से **(सदसः)** सभा से **(परि)** चारों ओर **(नुत्थाः)** प्रेरित करिये॥५॥

भावार्थः-वही राजा श्रेष्ठ होता है, जो दुष्टों को विदीर्ण करके श्रेष्ठों की सभा से सम्पूर्ण प्रजाओं का शासन करता है॥५॥

पुनर्म्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

तव॒ क्रत्वा॒ तव॒ तद्दंसनाभिरामासु॑ प॒क्वं शच्या॒ नि दी॑धः।

और्णो॑र्दुर॒ उस्रिया॑भ्यो॒ वि दृ॒ळ्होदू॒र्वाद्गा अ॑सृजो॒ अङ्गि॑रस्वान्॥६॥

तव॑। क्रत्वा॑। तव॑। तत्। दं॒सना॑भिः। आ॒मासु॑। प॒क्वम्। शच्या॑। नि। दी॒ध॒रि॒ति॑ दीधः। और्णोः॑। दुरः॑। उ॒स्रिया॑भ्यः। वि। दृ॒ळ्हा। उत्। ऊ॒र्वात्। गाः॑। अ॒सृ॒ज॒रित्य॑सृजः। अङ्गि॑रस्वान्॥६॥

पदार्थः-(तव) (**क्रत्वा**) प्रज्ञया (**तव**) (**तत्**) (**दंसनाभिः**) कर्म्मभिः (**आमासु**) अपरिपक्वासु (**पक्वम्**) सुसंस्कृतम् (**शच्या**) प्रज्ञया प्रजया वा (**नि**) (**दीधः**) धारयसि (**और्णोः**) आच्छादयतु (**दुरः**) गृहद्वाराणि (**उस्रियाभ्यः**) किरणेभ्यः (**वि**) (**दृळ्हा**) दृढानि (**उत्**) (**ऊर्वात्**) हिंसनात् (**गाः**) भूमीः (**असृजः**) सृजेत् (**अङ्गिरस्वान्**) अङ्गिरसो बहुविधाः प्राणा विद्यन्ते यस्मिन्॥६॥

अन्वयः-हे विद्वंस्तव क्रत्वा तव दंसनाभिर्वयमामासु तत्पक्वं विज्ञानं प्राप्नुयाम त्वमेतच्छच्या नि दीधः। य उस्रियाभ्यो दुर और्णोरूवीद् गा उदसृजोऽङ्गिरस्वान् दृळ्हा व्यसृजस्तं वयं सत्कुर्याम॥६॥

भावार्थः-ये मनुष्या विद्वद्भ्यः शिक्षां प्राप्य सर्वान्त्सत्कुर्वन्ति ते राज्यं प्राप्य सूर्य्यवत्प्रकाशन्ते॥६॥

पदार्थः-हे विद्वन्! (**तव**) आपकी (**क्रत्वा**) बुद्धि से और (**तव**) आपके (**दंसनाभिः**) कर्म्मों से हम लोग (**आमासु**) नहीं पाकदशा को प्राप्त हुओं में (**तत्**) उस (**पक्वम्**) उत्तम प्रकार संस्कारयुक्त विज्ञान को प्राप्त होवें और आप इस को (**शच्या**) बुद्धि वा प्रजा से (**नि, दीधः**) धारण कराते हो और जो (**उस्रियाभ्यः**) किरणों से (**दुरः**) गृहद्वारों को (**और्णोः**) आच्छादित करे तथा (**ऊर्वात्**) हिंसन से (**गाः**) भूमियों को (**उत्, असृजः**) अच्छे प्रकार रचे और (**अङ्गिरस्वान्**) बहुत प्रकार के प्राण विद्यमान जिसमें वह (**दृळ्हा**) दृढ़ों को (**वि**) विशेष करके रचे उसका हम लोग सत्कार करें॥६॥

भावार्थः-जो मनुष्य विद्वानों से शिक्षा को प्राप्त होकर सब का सत्कार करते हैं, वे राज्य को प्राप्त होकर सूर्य्य के सदृश प्रकाशित होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

प॒प्राथ॒ क्षां महि॒ दंसो॒ व्यु१॑र्वीमुप॒ द्यामृ॒ष्वो बृ॒हदि॑न्द्र॒ स्तभायः।

अधा॑रयो॒ रोद॑सी दे॒वपु॑त्रे प्र॒त्ने मा॒तरा॑ य॒ह्वी ऋ॒तस्य॑॥७॥

प॒प्राथ॑। क्षाम्। महि॑। दंसः॑। वि। उ॒र्वीम्। उप॑। द्याम्। ऋ॒ष्वः। बृ॒हत्। इ॒न्द्र॒। स्त॒भा॒यः॒। अधा॑रयः। रोद॑सी॒ इति॑। दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे। प्र॒त्ने इति॑। मा॒तरा॑। य॒ह्वी इति॑। ऋ॒तस्य॑॥७॥

पदार्थः-(पप्राथ) प्राति पूरयति (**क्षाम्**) भूमिम् (**महि**) महत् (**दंसः**) कर्म्म (**वि**) (**उर्वीम्**) विस्तृताम् (**उप**) (**द्याम्**) प्रकाशम् (**ऋष्वः**) महान् (**बृहत्**) (**इन्द्र**) सूर्य इवैश्वर्य्यकारक (**स्तभायः**) स्तभ्नाति (**अधारयः**) धारयसि (**रोदसी**) भूमिसूर्य्यलोकौ (**देवपुत्रे**) देवानां विदुषां पुत्र इव वर्त्तमाने (**प्रत्ने**) पुरातन्यौ (**मातरा**) मातृवन्मान्यकर्त्र्यौ (**यह्वी**) महत्यौ (**ऋतस्य**) सत्यस्य कारणस्य सकाशात्॥७॥

अन्वयः-हे इन्द्र! यथा सूर्य्यो महि दंस उर्वी क्षां द्याञ्च व्युप पप्राथ ऋष्वः सन् बृहत् स्तभायस्तथा त्वं प्राहि यथायं सूर्य्य ऋतस्य जाते देवपुत्रे प्रत्ने मातरा यह्वी रोदसी धारयति तथा त्वमधारयः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यो भूगोलान् धृत्वा पितृवत्सर्वाः प्रजाः पालयति तथैव यूयमत्र वर्त्तध्वम्॥७॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के सदृश ऐश्वर्य्य करने वाले! जैसे सूर्य्य **(महि)** बड़े **(दंसः)** कर्म्म को **(उर्वीम्)** विस्तृत **(क्षाम्)** भूमि को और **(द्याम्)** प्रकाश को **(वि, उप, पप्राथ)** विशेष कर समीप में पूरित करता है और **(ऋष्वः)** बड़ा महात्मा जन **(बृहत्)** बड़े को **(स्तभाय)** स्तम्भित करता है, वैसे आप पूरित कीजिये और जैसे यह सूर्य्य **(ऋतस्य)** सत्य कारण के समीप से प्रकट हुए **(देवपुत्रे)** विद्वानों के पुत्र के समान वर्त्तमान **(प्रत्ने)** प्राचीन **(मातरा)** माता के सदृश आदर करने वाले **(यह्वी)** बड़े **(रोदसी)** भूमि और सूर्य्य लोक को धारण करता है, वैसे आप **(अधारयः)** धारण करते हो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य भूगोलों को धारण करके पिता के सदृश सम्पूर्ण प्रजाओं का पालन करता है, वैसे ही आप लोग यहाँ वर्त्ताव करो॥७॥

पुनर्मनुष्यैः क उपास्य इत्याह॥

फिर मनुष्यों को कौन उपासना करने योग्य है, इस विषय को कहते हैं॥

अध॑ त्वा॒ विश्वे॑ पु॒र इ॑न्द्र दे॒वा एक॑ त॒वसं॑ दधि॒रे भरा॑य।
अदे॑वो॒ यदु॒भ्यौहि॑ष्ट दे॒वान् स्व॑र्षाता वृणत॒ इन्द्र॒मत्र॑॥८॥

अध॑। त्वा॒। विश्वे॑। पु॒रः। इ॒न्द्र॒। दे॒वाः। एक॑म्। त॒वस॑म्। द॒धि॒रे॒। भरा॑य। अदे॑वः। यत्। अ॒भि। औहि॑ष्ट। दे॒वान्। स्व॑रिति॒ स्वः॑। ऽसाता। वृ॒ण॒ते॒। इन्द्र॑म्। अत्र॑॥८॥

पदार्थः-**(अध)** अथ **(त्वा)** त्वाम् **(विश्वे)** सर्वे **(पुरः)** पुरस्तात् **(इन्द्र)** परमैश्वर्य्यप्रदेश्वर **(देवाः)** विद्वांसः **(एकम्)** अद्वितीयम् **(तवसम्)** बलादिवर्धकम् **(दधिरे)** दधाति **(भराय)** पालनाय **(अदेवः)** प्रकाशरहितः **(यत्)** **(अभि)** आभिमुख्ये **(औहिष्ट)** वितर्कयति **(देवान्)** विदुषः **(स्वर्षाता)** सुखानां विभाजकः **(वृणते)** स्वीकुर्वन्ति **(इन्द्रम्)** परमैश्वर्य्यम् **(अत्र)** अस्मिञ्जगति॥८॥

अन्वयः-हे इन्द्र जगदीश्वर! ये विश्वे देवा भराय त्वैकं तवसं पुरो दधिरे तांस्त्वं विज्ञानेन दधासि यद्यो देवो यद्यः स्वर्षाता अदेवो देवानभ्यौहिष्ट सञ्ज्ञानं नाप्नोति। येऽत्रेन्द्रं वृणते तेऽध सर्वमानन्दं लभन्ते॥८॥

भावार्थः-ये मनुष्याः परमात्मानमेवोपासते ते परमैश्वर्य्यं लभन्ते यो हि विद्याहीनो भूत्वा विद्वद्भिः सह कुतर्कयति स किमप्यत्र नाप्नोति॥८॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देने वाले स्वामिन् जगदीश्वर! जो **(विश्वे)** सम्पूर्ण **(देवाः)** विद्वान् जन **(भराय)** पालन के लिये **(त्वा)** आप **(एकम्)** जिनके समान दूसरा नहीं उन **(तवसम्)** बल आदि के बढ़ाने वाले को **(पुरः)** आगे **(दधिरे)** धारण करते हैं उनको आप विज्ञान से धारण करते हो

और **(यत्)** जो विद्वान् जन और जो **(स्वर्षाताः)** सुखों का विभाग करने वाला **(अदेवः)** प्रकाश से रहित **(देवान्)** विद्वानों के **(अभि)** सम्मुख **(औहिष्ट)** विशेष करके तर्कित करता और सज्ज्ञान को नहीं प्राप्त होता है और जो **(अत्र)** इस संसार में **(इन्द्रम्)** अत्यन्त ऐश्वर्य्ययुक्त का **(वृणते)** स्वीकार करते हैं, वे **(अध)** इसके अनन्तर सम्पूर्ण आनन्द को प्राप्त होते हैं॥८॥

भावार्थः-जो मनुष्य परमात्मा ही की उपासना करते हैं, वे अत्यन्त ऐश्वर्य्य को प्राप्त होते हैं और जो विद्या से हीन होकर विद्वानों के साथ कुतर्क करता है, वह कुछ भी यहाँ नहीं पाता है॥८॥

पुनर्म्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

अध॒ द्यौश्चि॑त्ते अप॒ सा नु वज्रा॑द् द्वि॒ता॑नमद्भि॒यसा॒ स्वस्य॑ म॒न्योः।
अहिं॒ यदिन्द्रो॑ अ॒भ्योह॑सा॒नं नि चि॑द्वि॒श्वायु॑: श॒यथे॑ ज॒घान॑॥९॥

अध॑। द्यौः। चि॒त्। ते॒। अप॑। सा। नु। वज्रा॑त्। द्वि॒ता। अ॒न॒म॒त्। भि॒यसा॑। स्वस्य॑। म॒न्योः। अहि॑म्। यत्। इन्द्रः॑। अ॒भि। ओह॑सानम्। नि। चि॒त्। वि॒श्वऽआ॑युः। श॒यथे॑। ज॒घान॑॥९॥

पदार्थः-(**अध**) अथ (**द्यौः**) कामयमाना (**चित्**) अपि (**ते**) तव (**अप**) (**सा**) (**नु**) (**वज्रात्**) विद्युत्प्रहारात् (**द्विता**) द्वयोर्भावः (**अनमत्**) नमति (**भियसा**) भयेन (**स्वस्य**) (**मन्योः**) क्रोधात् (**अहिम्**) मेघम् (**यत्**) यः (**इन्द्रः**) सूर्य्यः (**अभि**) (**ओहसानम्**) तर्कगम्यम् (**नि**) (**चित्**) अपि (**विश्वायुः**) समग्रायुः (**शयथे**) (**जघाने**) हन्ति॥९॥

अन्वयः-हे मनुष्या! यद्य इन्द्र ओहसानामहिमभि जघानेव यश्चिद्विश्वायुर्नि शयथेऽध या द्यौश्चिद्वज्राद्भियसा द्विताऽनमत् तथा हे विद्वन्! स्वस्य मन्योः सा नु ते दुःखमप सारयतु॥९॥

भावार्थः-हे मनुष्या! यूयं सूर्य्यमेघवद्वर्त्तित्वा परस्परं पालनं कुरुत॥९॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**इन्द्रः**) सूर्य्य (**ओहसानम्**) तर्क से जानने योग्य (**अहिम्**) मेघ का (**अभि**) सब ओर से (**जघान**) नाश करता है, वैसे जो (**चित्**) कोई (**विश्वायुः**) सम्पूर्ण अवस्था से युक्त (**नि**) निरन्तर (**शयथे**) शयन करता है (**अध**) इसके अनन्तर जो (**द्यौः**) कामना करती हुई (**चित्**) भी (**वज्रात्**) बिजुली के प्रहार से (**भियसा**) भय से (**द्विता**) दो प्रकार (**अनमत्**) नमती है, वैसे हे विद्वन्! (**स्वस्य**) अपने (**मन्योः**) क्रोध से (**सा**) वह (**नु**) निश्चय से (**ते**) आपका दुःख (**अप**) दूर करे॥९॥

भावार्थः-हे मनुष्या! आप लोग सूर्य्य और मेघ सदृश वर्त्ताव करके परस्पर पालन करो॥९॥

अथ राजपुरुषाः कथं वर्त्तेरन्नित्याह॥

अब राजपुरुष कैसा वर्त्ताव करें, इस विषय को अगले मन्त्र में कहते हैं॥

अध॒ त्वष्टा॑ ते म॒ह उ॑ग्र॒ वज्रं॑ स॒हस्र॑भृष्टिं ववृतच्छ॒ताश्रि॑म्।
निका॑ममर॒मण॑सं॒ येन॑ नव॑न्त॒महिं॒ सं पि॑णगृजीषिन्॥१०॥२॥

अध॑। त्वष्टा॑। ते॒। म॒हः। उ॒ग्र॒। वज्र॑म्। स॒हस्र॑ऽभृष्टिम्। व॒वृ॒तत्। श॒तऽअ॑श्रिम्। नि॒ऽका॑मम्। अ॒रऽम॑नसम्। येन॑। नव॑न्तम्। अहि॑म्। सम्। पि॒ण॒क्। ऋ॒जी॒षि॒न्॥ १०॥

पदार्थः-(अध) आनन्तर्य्ये **(त्वष्टा)** छेदकः **(ते)** तव **(महः)** महान्तम् **(उग्र)** तेजस्विन् **(वज्रम्)** शस्त्रविशेषम् **(सहस्रभृष्टिम्)** सहस्राणां भृज्जकं छेदकम् **(ववृतत्)** वर्त्तते **(शताश्रिम्)** यः शतान्याश्रयति तम् **(निकामम्)** यो नित्यं कम्यते तम् **(अरमणसम्)** यस्मिन्न रमन्ते शत्रवस्तम् **(येन)** **(नवन्तम्)** स्तुवन्तं नम्रमिव **(अहिम्)** मेघम् **(सम्)** **(पिणक्)** पिनष्टि **(ऋजीषिन्)** ऋजीषि सरलत्वं यस्यास्ति तत्सम्बुद्धौ॥ १०॥

अन्वयः-हे ऋजीषिन्नुग्र! ते हस्ते महः सहस्रभृष्टिं शताश्रिं निकाममरमणसं वज्रं धारयाम्यध येन त्वष्टा भवान्नवन्तमहिं सूर्य्य इव सम्पिणक् ववृतत् तं वयमपि धरेम॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे वीरपुरुषा यथा धनुर्वेदविदो वीरपुरुषाः शस्त्राणि धरेयुस्तथा यूयमपि धरत॥ १०॥

पदार्थः-हे **(ऋजीषिन्)** सरल स्वाभाव वाले **(उग्र)** तेजस्विन् **(ते)** आपके हस्त में **(महः)** बड़े **(सहस्रभृष्टिम्)** हजारों का छेदन करने और **(शताश्रिम्)** सैकड़ों का आश्रयण करने वाले और **(निकामम्)** नित्य कामना किये जाते **(अरमणसम्)** जिसमें नहीं रमते हैं शत्रु उस **(वज्रम्)** शस्त्रविशेष को धारण कराता हूँ **(अध)** इसके अनन्तर **(येन)** जिससे **(त्वष्टा)** छेदन करने वाले आप **(नवन्तम्)** स्तुति करते हुए नम्र के सदृश को **(अहिम्)** मेघ को जैसे सूर्य्य, वैसे **(सम्, पिणक्)** अच्छे प्रकार पीसते हैं तथा **(ववृतत्)** वर्त्ताव करते हैं, उन आपको हम लोग भी धारण करें॥ १०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार हैं। हे वीरपुरुषो! जैसे धनुर्वेद के जानने वाले वीरपुरुष शस्त्रों को धारण करें, वैसे आप लोग भी धारण करो॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वर्धा॒न् यं विश्वे॑ म॒रुत॑: स॒जोषा॒: पच॑च्छ॒तं म॑हि॒षाँ इ॑न्द्र॒ तुभ्य॑म्।
पू॒षा विष्णु॒स्त्रीणि॒ सरां॑सि धावन् वृ॒त्र॒हणं॑ मदि॒रमं॑शु॒मस्मै॥ ११॥

वर्धा॑न्। यम्। विश्वे॑। म॒रुत॑:। स॒ऽजोषा॑:। पच॑त्। श॒तम्। म॒हि॒षान्। इ॒न्द्र॒। तुभ्य॑म्। पू॒षा। विष्णु॑:। त्रीणि॑। सरां॑सि। धा॒व॒न्। वृ॒त्र॒ऽहन॑म्। म॒दि॒रम्। अं॒शुम्। अ॒स्मै॥ ११॥

पदार्थः-(वर्धान्) वर्धयेरन् **(यम्)** **(विश्वे)** सर्वे **(मरुतः)** मनुष्याः **(सजोषाः)** समानप्रीतिसेविनः **(पचत्)** पचेत् **(शतम्)** शतसङ्ख्याकान् **(महिषान्)** महतः। **महिष इति महन्नाम।** (निघं०३.३) **(इन्द्र)** सूर्य्य इव वर्त्तमान राजन् **(तुभ्यम्)** **(पूषा)** पुष्टिकर्त्ता **(विष्णुः)** व्यापको विद्युद्रूपः **(त्रीणि)** **(सरांसि)**

सरन्ति येषु तान्यन्तरिक्षादीनि **(धावन्)** धावन् सन् **(वृत्रहणम्)** यो वृत्रं मेघं सूर्य्य इव शत्रून् हन्ति **(मदिरम्)** हर्षकरम् **(अंशुम्)** विभक्तम् **(अस्मै)**॥११॥

अन्वयः-हे इन्द्र! सजोषा विश्वे मरुतो यं त्वां वर्धान् यः पूषा धावन् विष्णुस्त्रीणि सरांसि व्याप्नोति तथा धावन्नस्मै मदिरमंशुं वृत्रहणमिव शत्रून् हन्ति यस्तुभ्यं शतं महिषान् ददाति यश्च परोकारार्थं पचत्तं यूयं विजानीत॥११॥

भावार्थः-यथा प्रजाजना राजानं राज्यं च वर्धयेयुस्तथा राजैतान् सततं वर्धयेत्॥११॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के समान वर्त्तमान राजन्! **(सजोषाः)** तुल्य प्रीति के सेवने वाले **(विश्वे)** सम्पूर्ण **(मरुतः)** मनुष्य **(यम्)** जिन आपकी **(वर्धान्)** वृद्धि करें और जो **(पूषा)** पुष्टि करने वाला **(धावन्)** दौड़ता हुआ **(विष्णुः)** व्यापक बिजुलीरूप **(त्रीणि)** तीन **(सरांसि)** चलते हैं जिनमें उन अन्तरिक्ष आदिकों को व्याप्त होता है, वैसे दौड़ते हुए **(अस्मै)** इसके लिये **(मदिरम्)** आनन्द करने वाले **(अंशुम्)** विभक्त **(वृत्रहणम्)** मेघ को जैसे सूर्य्य, वैसे शत्रुओं का मारता है और जो **(तुभ्यम्)** आपके लिये **(शतम्)** सौ **(महिषान्)** बड़े पदार्थों को देता है और जो परोपकार के लिये **(पचत्)** पाक करे, उसको आप लोग जानिये॥११॥

भावार्थः-जैसे प्रजाजन राजा और राज्य को बढ़ावें, वैसे राजा इनकी निरन्तर वृद्धि करे॥११॥

अब राजादयः किं कुर्य्युरित्याह॥

अब राजा आदि क्या करें, इस विषय को कहते हैं॥

आ क्षोदो॒ महि॑ वृ॒तं न॒दीना॑ं परि॑ष्ठितमसृज ऊ॒र्मिम॒पाम्।
तासा॒मनु॑ प्र॒वत॑ इन्द्र॒ पन्था॑ं प्रा॑र्दयो॒ नीची॒॑रप॑सः॒ समु॒द्रम्॥ १२॥

आ। क्षोदः॑। महि॑। वृ॒तम्। न॒दीना॑म्। परि॑ऽस्थितम्। अ॒सृ॒जः॒। ऊ॒र्मिम्। अ॒पाम्। तासा॑म्। अनु॑। प्र॒ऽवतः॑। इ॒न्द्र॒। पन्था॑म्। प्र। आ॒र्द॒यः॒। नीची॒॑रिति॑। अ॒पसः॑। स॒मु॒द्रम्॥ १२॥

पदार्थः-**(आ)** **(क्षोदः)** उदकम्। **क्षोद इत्युदकनाम**। (निघं०१.१२) **(महि)** महत् **(वृतम्)** स्वीकृतम् **(नदीनाम्)** **(परिष्ठितम्)** परितः सर्वतः स्थितम् **(असृजः)** सृजति **(ऊर्मिम्)** तरङ्गम् **(अपाम्)** जलानाम् **(तासाम्)** **(अनु)** **(प्रवतः)** निम्नोद्देशात् **(इन्द्र)** सूर्य्य इव राजन् **(पन्थाम्)** **(प्र)** **(आर्दय)** आर्दयति नयति **(नीचीः)** निम्ने देशे वर्त्तमानाः भूमीः **(अपसः)** कर्म्मणः **(समुद्रम्)** अन्तरिक्षं महोदधिं वा॥१२॥

अन्वयः-हे इन्द्र! यथा सूर्य्यो नदीनां महि वृतं परिष्ठितं क्षोदोऽपामूर्मिं चाऽसृजस्तासां प्रवतोऽनु पन्थामपसो नीचीः समुद्रं प्राऽऽर्दयस्तथा त्वं सेनां प्रजां च सुखं नीत्वा शत्रूनधोगतिं नय॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजादयो जनाः सूर्यवद्वर्त्तन्ते ते प्रजापालनं शत्रुनिवारणं च कर्तुं शक्नुवन्ति॥१२॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के समान वर्त्तमान राजन्! जैसे सूर्य्य **(नदीनाम्)** नदियों के **(महि)** बड़े **(वृतम्)** स्वीकार किये गये **(परिष्ठितम्)** सब ओर से वर्त्तमान **(क्षोदः)** जल की और **(अपाम्)** जलों की **(ऊर्मिम्)** तरंग को **(असृजः)** उत्पन्न करता **(तासाम्)** उनके **(प्रवतः)** नीचे स्थान से **(अनु)** पश्चात् **(पन्थाम्)** मार्ग को **(अपसः)** कर्म्म की **(नीचीः)** निचली भूमियों को और **(समुद्रम्)** अन्तरिक्ष वा बड़े समुद्र को **(प्र, आ, आर्दयः)** प्राप्त कराता है, वैसे आप सेना और प्रजा को सुख प्राप्त करा के शत्रुओं को नीची दशा को प्राप्त कराइये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा आदि जन सूर्य्य के सदृश वर्त्तमान हैं, वे प्रजापालन और शत्रु के निवारण करने को समर्थ होते हैं॥१२॥

पुना राजप्रजाजनाः कथं वर्त्तेयुरित्याह॥

फिर राजा और प्रजाजन कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम्।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात्॥१३॥

एव। ता। विश्वा। चकृऽवांसम्। इन्द्रम्। महाम्। उग्रम्। अजुर्यम्। सहःऽदाम्। सुऽवीरम्। त्वा। सुऽआयुधम्। सुऽवज्रम्। आ। ब्रह्म। नव्यम्। अवसे। ववृत्यात्॥१३॥

पदार्थः-**(एवा)** **(ता)** तानि **(विश्वा)** सर्वाणि **(चकृवांसम्)** कुर्वन्तम् **(इन्द्रम्)** परमैश्वर्य्यवन्तं शत्रुविदारकं वा **(महाम्)** महान्तम् **(उग्रम्)** तेजस्विनम् **(अजुर्य्यम्)** अजीर्णम् **(सहोदाम्)** बलप्रदम् **(सुवीरम्)** उत्तमवीरावृतम् **(त्वा)** त्वाम् **(स्वायुधम्)** उत्तमायुधप्रक्षेपकुशलम् **(सुवज्रम्)** प्रशस्तवज्रास्त्रचालनसमर्थम् **(आ)** **(ब्रह्म)** महद्धनमन्नं वा **(नव्यम्)** नवेषु भवम् **(अवसे)** रक्षणाद्याय **(ववृत्यात्)** वर्त्तयेत्॥१३॥

अन्वयः-हे राजन्! यस्ता विश्वा चकृवांसं महामुग्रमजुर्य्यं सहोदां स्वायुधं सुवज्रं सुवीरमिन्द्रं त्वैवाऽवसे न्यायकरणायाऽऽववृत्यात् स नव्यं ब्रह्म वर्धयितुं शक्नुयात्॥१३॥

भावार्थः-पितृवत्प्रजापालकं धनुर्वेदराजनीतियुद्धविद्याकुशलं राजानं सर्वे वर्धयन्तु तथैतानयं राजा सततं वर्धयेत्॥१३॥

पदार्थः-हे राजन्! जो **(ता)** उन **(विश्वा)** सम्पूर्णों को और **(चकृवांसम्)** करते हुए **(महाम्)** बड़े **(उग्रम्)** तेजस्वी **(अजुर्य्यम्)** नहीं जीर्ण हुए **(सहोदाम्)** बल के देनेवाले **(स्वायुधम्)** उत्तम शस्त्र के चलाने में चतुर **(सुवज्रम्)** प्रशस्त वज्ररूप अस्त्र के चलाने में समर्थ **(सुवीरम्)** उत्तम वीरों से युक्त **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य वाले शत्रु के नाशक **(त्वा)** आपको **(एवा)** ही **(अवसे)** रक्षण आदि के लिये और न्याय करने के लिये **(आ, ववृत्यात्)** सब ओर से वर्त्ताव करे वह **(नव्यम्)** नवीनों में हुए **(ब्रह्म)** बड़े धन वा अन्न को बढ़ाने को समर्थ होवे॥१३॥

भावार्थः-पिता के सदृश प्रजाओं के पालन, धनुर्वेद, राजनीति और युद्धविद्या में कुशल राजा की सब लोग वृद्धि करें और इन लोगों की यह राजा निरन्तर वृद्धि करे॥१३॥

पुनर्नृपेण किं कर्त्तव्यमित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

स नो॒ वाजा॑य॒ श्रव॑स इ॒षे च॑ रा॒ये धे॑हि द्यु॒मत॑ इन्द्र॒ विप्रा॑न्।
भ॒रद्वा॑जे नृ॒वत॑ इन्द्र सू॒रीन् दि॒वि च॑ स्मैधि॒ पार्ये॑ न इन्द्र॥ १४॥

सः। नः। वाजा॑य। श्रव॑से। इ॒षे। च॒। रा॒ये। धे॒हि॒। द्यु॒ऽमत॑ः। इ॒न्द्र॒। विप्रा॑न्। भ॒रत्ऽवा॑जे। नृ॒ऽवत॑ः। इ॒न्द्र॒। सू॒रीन्। दि॒वि। च॒। स्म॒। ए॒धि॒। पार्ये॑। नः। इ॒न्द्र॒॥ १४॥

पदार्थः-(**सः**) राजा (**नः**) अस्मान् (**वाजाय**) वेगाय विज्ञानाय वा (**श्रवसे**) श्रवणाय (**इषे**) अन्नाय (**च**) (**राये**) धनाय (**धेहि**) (**द्युमतः**) विज्ञानप्रकाशयुक्तान् (**इन्द्र**) परमैश्वर्य्यप्रापक (**विप्रान्**) मेधाविनो विपश्चितः (**भरद्वाजे**) राज्यस्य पोषके पालके वा व्यवहारे (**नृवतः**) प्रशस्तजनयुक्तान् (**इन्द्र**) दुःखदारिद्र्यविनाशक (**सूरीन्**) विदुषः (**दिवि**) कमनीये न्यायप्रकाशे (**च**) (**स्म**) एव (**एधि**) भव (**पार्य्ये**) पारयितव्ये (**नः**) अस्माकम् (**इन्द्र**) विद्यैश्वर्य्यवर्धक॥१४॥

अन्वयः-हे इन्द्र! स त्वं द्युमतो नो विप्रान् वाजाय श्रवस इषे राये च धेहि, हे इन्द्र! त्वं नृवतोऽस्मान्त्सूरीन् भरद्वाजे दिवि च धेहि। हे इन्द्र! त्वं पार्य्ये च नोऽस्माकं वर्धकः स्मैधि॥१४॥

भावार्थः-राज्ञां योग्यमस्ति सर्वेष्वधिकारेषु सर्वविद्याकुशलान् धार्मिकान् कुलीनान् राजभक्तान् संस्थाप्य सर्वतो राज्योन्नतिं विदध्युः॥१४॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के प्राप्त कराने वाले! (**सः**) वह राजा आप (**द्युमतः**) विज्ञान के प्रकाश से युक्त (**नः**) हम लोगों (**विप्रान्**) बुद्धिमान् विद्वानों को (**वाजाय**) वेग वा विज्ञान के लिये (**श्रवसे**) श्रवण के लिये (**इषे**) अन्न के लिये और (**राये**) धन के लिये (**च**) भी (**धेहि**) धारण करिये और हे (**इन्द्र**) दुःख और दारिद्र्य के विनाशक! आप (**नृवतः**) अच्छे मनुष्यों से युक्त हम (**सूरीन्**) विद्वानों को (**भरद्वाजे**) राज्य के पुष्ट करने वा पालन करने वाले व्यवहार में और (**दिवि**) सुन्दर न्याय के प्रकाश में (**च**) भी धारण करिये और हे (**इन्द्र**) विद्या और ऐश्वर्य के बढ़ाने वाले! आप (**पार्य्ये**) पार करने योग्य में भी (**नः**) हम लोगों के बढ़ाने वाले (**स्म**) ही (**एधि**) होओ॥१४॥

भावार्थः-राजाओं को योग्य है कि सम्पूर्ण अधिकारों में सम्पूर्ण विद्याओं में चतुर, धार्म्मिक, कुलीन और राजभक्तों को संस्थापित करके सब प्रकार से राज्य की उन्नति करें॥१४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अ॒या वाज॑ꣳ देव॒हि॑तं सनेम॒ मद॑ेम श॒तहि॑माः सु॒वीरा॑ः॥ १५॥ ३॥

अया॑। वाज॑म्। दे॒व॒ऽहि॑तम्। स॒ने॒म॒। मदे॑म। श॒त॒ऽहि॑माः। सु॒ऽवी॒राः॑॥१५॥

पदार्थः-(अया) अनया नीत्या **(वाजम्)** विज्ञानम् **(देवहितम्)** देवेभ्यो हितकारिणम् **(सनेम)** विभजेम **(मदेम)** आनन्देम **(शतहिमाः)** शतवर्षजीविनः **(सुवीराः)** उत्तमवीरयुक्ताः॥१५॥

अन्वयः-हे राजन्! यथा शतहिमाः सुवीराः सन्तो वयं देवहितं वाजं सनेम मदेम॥१५॥

भावार्थः-राज्ञा विद्वत्सङ्गो विनयेन राज्यपालनायोत्तमवीरा अधिकर्त्तव्या॥१५॥

अत्राग्निविद्वद्राजामात्यप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तदशं सूक्तं तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे राजन्! **(अया)** इस नीति से **(शतहिमाः)** सौ वर्ष पर्य्यन्त जीवने वाले **(सुवीराः)** उत्तम वीर जनों से युक्त हुए हम लोग **(देवहितम्)** विद्वानों के लिये हितकारी **(वाजम्)** विज्ञान का **(सनेम)** विभाग करें और **(मदेम)** आनन्द करें॥१५॥

भावार्थः-राजा को चाहिये कि विद्वानों का संग और विनय से राज्यपालन के लिये उत्तम वीर जनों को अधिकृत करें॥१५॥

इस सूक्त में अग्नि, विद्वान्, राजा, मन्त्री और प्रजा के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह सत्रहवां सूक्त और तीसरा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्याष्टादशस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ४,९, १४ निचृत्त्रिष्टुप्। २, ८, ११, १३ त्रिष्टुप्। ७, १० विराट्त्रिष्टुप्। १२ भुरिक्त्रिष्टुप्छन्दः। धैवतः स्वरः। ३, १५ भुरिक्पङ्क्तिः। ५ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः ६ ब्राह्म्युष्णिक्छन्दः। ऋषभः स्वरः॥

पुना राजा किं कुर्य्यादित्याह॥

अब पन्द्रह ऋचा वाले अठारहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर राजा क्या करे, इस विषय को कहते हैं॥

तमु॑ ष्टुहि॒ यो अ॒भिभू॑त्योजा व॒न्वन्नवा॑तः पुरुहू॒त इन्द्रः॑।
अषा॑ळ्हमु॒ग्रं सह॑मानमा॒भिर्गी॒र्भिर्वर्ध वृष॒भम् च॑र्षणी॒नाम्॥ १॥

तम्। ऊँ॒ इति॑। स्तु॒हि॒। यः। अ॒भिभू॑तिऽओजाः। व॒न्वन्। अवा॑तः। पु॒रु॒ऽहू॒तः। इन्द्रः॑। अषा॑ळ्हम्। उ॒ग्रम्। सह॑मानम्। आ॒भिः। गी॒:ऽभिः। व॒र्ध॒। वृ॒ष॒भम्। च॒र्ष॒णी॒नाम्॥ १॥

पदार्थः-(तम्) (उ) (स्तुहि) (यः) (अभिभूत्योजाः) अभिभूतये शत्रूणां पराभवायौजः पराक्रमो यस्य सः **(वन्वन्)** विभजन् **(अवातः)** अहिंसितः **(पुरुहूतः)** बहुभिः प्रशंसितः **(इन्द्रः)** दुःखविदारकः **(अषाळ्हम्)** असोढव्यम् **(उग्रम्)** तीव्रस्वभावम् **(सहमानम्)** शत्रूणां वेगस्य सोढारम् **(आभिः) (गीभिः)** वाग्भिः **(वर्ध)** वर्धस्व। अत्र व्यत्ययेन परस्मैपदम्। **(वृषभम्)** अतिश्रेष्ठम् **(चर्षणीनाम्)** मनुष्याणाम्॥१॥

अन्वयः-हे राजन्! योऽभिभूत्योजा अवातः पुरुहूतो वन्वन्निन्द्रोऽस्ति तमषाळ्हमुग्रं चर्षणीनां वृषभं सहमानमाभिर्गीभिः स्तुह्यु तेन वर्धा॥१॥

भावार्थः-हे राजंस्त्वं सदा स्तोतव्यं स्तुहि निन्दनीयं निन्द सत्कर्त्तव्यं सत्कुरु दण्डनीयं दण्डय॥१॥

पदार्थः-हे राजन्! **(यः)** जो **(अभिभूत्योजाः)** अभिभव अर्थात् शत्रुओं के पराजय करने के लिये पराक्रम से युक्त **(अवातः)** नहीं हिंसित **(पुरुहूतः)** बहुतों से प्रशंसित **(वन्वन्)** विभाग करता हुआ **(इन्द्रः)** दुःख को विदीर्ण करनेवाला है **(तम्)** उस **(अषाळ्हम्)** नहीं सहने योग्य **(उग्रम्)** तीव्र स्वभाववाले और **(चर्षणीनाम्)** मनुष्यों में **(वृषभम्)** अतिश्रेष्ठ और **(सहमानम्)** शत्रुओं के वेग को सहने वाले की **(आभिः)** इन **(गीर्भिः)** वाणियों से **(स्तुहि)** स्तुति करिये **(उ)** और उससे **(वर्ध)** वृद्धि को प्राप्त हूजिये॥१॥

भावार्थः-हे राजन्! आप सदा स्तुति करने योग्य की स्तुति करिये, निन्दा करने योग्य की निन्दा करिये तथा सत्कार करने योग्य का सत्कार करिये और दण्ड देने योग्य को दण्ड दीजिये॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी।
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत् सहावा॥ २॥

सः। युध्मः। सत्वा। खजऽकृत्। समत्ऽवा। तुविऽम्रक्षः। नदनुऽमान्। ऋजीषी। बृहत्ऽरेणुः। च्यवनः। मानुषीणाम्। एकः। कृष्टीनाम्। अभवत्। सहऽवा॥ २॥

पदार्थः-(सः) (**युध्मः**) योद्धा (**सत्वा**) बलवान् (**खजकृत्**) यः खजं स-ामं करोति। **खज इति स-ामनाम।** (निघं०१.१७) (**समद्वा**) सम्यगत्ति स्वादुः भुङ्क्ते सः (**तुविम्रक्षः**) बहुस्नेहः (**नदनुमान्**) नदनवो बहवः शब्दा विद्यन्ते यस्मिँत्सः (**ऋजीषी**) ऋजुगामी (**बृहद्रेणुः**) बृहन्तो रेणवो यस्मिँत्सः (**च्यवनः**) गन्ता (**मानुषीणाम्**) मनुष्यसम्बन्धिनीनां सेनानाम् (**एकः**) असहायः (**कृष्टीनाम्**) मनुष्याणाम् (**अभवत्**) भवेत् (**सहावा**) सहनकर्त्ता॥ २॥

अन्वयः-हे राजन्! यो युध्मः सत्वा समद्वा तुविम्रक्षो नदनुमानृजीषी बृहद्रेणुश्च्यवनो मानुषीणां कृष्टीनामेकस्सहावा खजकृद्वीरोऽभवत् स एव त्वया राज्यरक्षणाय नियोक्तव्यः॥ २॥

भावार्थः-राज्ञा राजकर्म्मचारी सम्परीक्ष्य राज्यव्यवहारे नियोक्तव्यः येन प्रजायाः सुखं वर्धेत॥ २॥

पदार्थः-हे राजन्! जो (**युध्मः**) युद्ध करने वाला (**सत्वा**) बलवान् (**समद्वा**) अच्छे प्रकार स्वादु भोजन करने वाला (**तुविम्रक्षः**) बहुत स्नेहयुक्त (**नदनुमान्**) बहुत शब्द विद्यमान जिसमें ऐसा और (**ऋजीषी**) सरल चलने वाला (**बृहद्रेणुः**) बड़ी धूलि जिसमें वह (**च्यवनः**) जानेवाला (**मानुषीणाम्**) मनुषीष्यसम्बन्धिनी सेनाओं (**कृष्टीनाम्**) मनुष्यों के मध्य में (**एकः**) सहायरहित (**सहावा**) सहनशील (**खजकृत्**) संग्राम करने वाला वीर (**अभवत्**) होवे (**सः**) वही आप से राज्य की रक्षा के निमित्त नियुक्त करने योग्य है॥ २॥

भावार्थः-राजा को चाहिये कि राजकर्म्मचारी को उत्तम प्रकार परीक्षा करके राज्य व्यवहार में नियुक्त करे, जिससे प्रजा के सुख की वृद्धि हो॥ २॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

त्वं ह नु त्यददमयो दस्यूँरेकः कृष्टीरवनोरार्याय।
अस्ति स्विन्नु वीर्यꣳ तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः॥ ३॥

त्वम्। ह। नु। त्यत्। अदमयः। दस्यून्। एकः। कृष्टीः। अवनोः। आर्याय। अस्ति। स्वित्। नु। वीर्यम्। तत्। ते। इन्द्र। न। स्वित्। अस्ति। तत्। ऋतुऽथा। वि। वोचः॥ ३॥

पदार्थः-(त्वम्) (**ह**) किल (**नु**) सद्यः (**त्यत्**) तत् (**अदमयः**) दमय (**दस्यून्**) दुष्टान् चोरान् (**एकः**) असहायः (**कृष्टीः**) मनुष्यान् (**अवनोः**) सम्भज (**आर्य्याय**) द्विजाय (**अस्ति**) (**स्वित्**) (**नु**) सद्यः

(वीर्य्यम्) बलम् **(तत्)** **(ते)** तव **(इन्द्र)** राजन् **(न)** निषेधे **(स्वित्)** अपि **(अस्ति)** **(तत्)** **(ऋतुथा)** ऋतुरिव **(वि)** **(वोचः)**॥३॥

अन्वयः-हे इन्द्र राजन्! यत्ते वीर्य्यमस्ति स्विन्नु यन्नास्ति स्विदृतुथा यद्वि वोचस्तत्त्वमवनोस्तन्ममास्तु दस्यूनेकः सन्नदमयः स त्वं ह कृष्टीरार्य्याय न्ववनोस्त्यद्वयप्येवं कुर्य्याम॥३॥

भावार्थः-राज्ञामिदं मुख्यं कर्म्मास्ति यत्सर्वान् दस्यून् निवार्य्य प्रजापालनं कुर्य्युः॥३॥

पदार्थः-हे **(इन्द्र)** राजन्! जो **(ते)** आप का **(वीर्य्यम्)** बल **(अस्ति)** है **(स्वित्)** क्या? **(नु)** शीघ्र जो **(न)** नहीं **(अस्ति)** है और **(स्वित्)** भी **(ऋतुथा)** ऋतु जैसे वैसे जो **(वि, वोचः)** कहते हो **(तत्)** उसका **(त्वम्)** आप **(अवनोः)** सेवन करिये **(तत्)** वह मेरा हो और **(दस्यून्)** दुष्ट चोरों को **(एकः)** सहायरहित हुए आप **(अदमयः)** दमन करिये वह आप **(ह)** निश्चय **(कृष्टीः)** मनुष्यों को **(आर्य्याय)** द्विज के लिये **(नु)** शीघ्र उत्तम प्रकार सेवन करिये **(त्यत्)** उसको हम लोग भी ऐसे करें॥३॥

भावार्थः-राजाओं का यह मुख्य कर्म्म है कि सम्पूर्ण दुष्ट चोरों का निवारण करके प्रजाओं का पालन करें॥३॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को अगले मन्त्र में कहते हैं॥

सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य।

उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव॥४॥

सत्। इत्। हि। ते। तुविऽजातस्य। मन्ये। सहः। सहिष्ठ। तुरतः। तुरस्य। उग्रम्। उग्रस्य। तवसः। तवीयः। अरध्रस्य। रध्रऽतुरः। बभूव॥४॥

पदार्थः-**(सत्)** **(इत्)** एव **(हि)** निश्चयेन **(ते)** तव **(तुविजातस्य)** बहुषु प्रसिद्धस्य **(मन्ये)** **(सहः)** बलम् **(सहिष्ठ)** अतिशयेन सोढः **(तुरतः)** सद्यः कर्त्तुः **(तुरस्य)** सद्योऽनुष्ठातुः **(उग्रम्)** तीव्रम् **(उग्रस्य)** तीव्रस्य **(तवसः)** बलात् **(तवीयः)** अतिशयेन बलम् **(अरध्रस्य)** अहिंसकस्य **(रध्रतुरः)** हिंसकहिंसकः **(बभूव)** भवेत्॥४॥

अन्वयः-हे सहिष्ठ! तुविजातस्य यस्य ते यद्धि सहस्तत्सदहं मन्ये तुरतस्तुरस्योग्रस्यारध्रस्य तवस उग्रं तवीयोऽहं मन्ये स भवान् रध्रतुर इद्बभूव॥४॥

भावार्थः-सर्वैर्मनुष्यैः यस्मिन् यादृशा गुणकर्म्मस्वभावाः स्युस्तादृशा एव मन्तव्याः॥४॥

पदार्थः-हे **(सहिष्ठ)** अतिशय सहने वाले **(तुविजातस्य)** बहुतों में प्रसिद्ध जिन **(ते)** आप का जो **(हि)** निश्चित **(सहः)** बल है उसको **(सत्)** नित्य होने वाला पदार्थ मैं **(मन्ये)** मानता हूँ तथा **(तुरतः)** शीघ्र करने वाले **(तुरस्य)** शीघ्र आरम्भ करने वाले **(उग्रस्य)** तीव्र और **(अरध्रस्य)** नहीं हिंसा करने वाले के **(तवसः)** बल से **(उग्रम्)** तीव्र **(तवीयः)** अतिशय बल को मैं मानता हूँ वह आप **(रध्रतुरः)** हिंसकों के हिंसक **(इत्)** ही **(बभूव)** होवें॥४॥

भावार्थः-सब मनुष्यों को चाहिये कि जिसमें जैसे गुण, कर्म्म और स्वभाव होवें, वैसे ही मानें॥४॥

पुनर्मनुष्यैः परस्परं कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को परस्पर कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः।
हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः॥५॥४॥

तत्। नः। प्रत्नम्। सख्यम्। अस्तु। युष्मे इति। इत्था। वदत्ऽभिः। वलम्। अङ्गिरःऽभिः। हन्। अच्युतऽच्युत्। दस्म। इषयन्तम्। ऋणोः। पुरः। वि। दुरः। अस्य। विश्वाः॥५॥

पदार्थः-(**तत्**) (**नः**) अस्माकम् (**प्रत्नम्**) पुरातनम् (**सख्यम्**) सखीनां कर्म्म (**अस्तु**) (**युष्मे**) युष्माकम् (**इत्था**) अस्मादिव (**वदद्भिः**) (**बलम्**) मेघम्। **बल इति मेघनाम**। (निघं०१.१०) (**अङ्गिरोभिः**) वायुभिः (**हन्**) हन्ति (**अच्युतच्युत्**) योऽच्युतमचलन्तं च्यावयति (**दस्म**) दुःखोपक्षयितः (**इषयन्तम्**) प्राप्नुवन्तं गच्छन्तं वा (**ऋणोः**) प्रसाध्नुयाः (**पुरः**) (**वि**) (**दुरः**) द्वाराणि (**अस्य**) जगतः (**विश्वाः**) सर्वाः॥५॥

अन्वयः-हे न्यायकारिणो राजादयो जना युष्माभिः सह नोऽस्माकं यथा यत्प्रत्नं सख्यमस्त्वित्था युष्मे वदद्भिः सहास्माकं सख्यमस्तु। यथाऽङ्गिरोभिस्सहाऽच्युतच्युत्सूर्य्यो वलं हंस्तथा हे दस्मेषयन्तं त्वमृणोर्यथास्य जगतो दुरः सविता प्रकाशयति तथा त्वं विश्वाः पुरो वृणोः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैर्य्यावच्छक्यं तावदुत्तमैः सह मित्रतैव कार्य्या, सा कदाचिन्न नश्येदेवं प्रयतितव्यं यथा च सूर्य्यः सर्वं प्रकाशयति तथा राजा न्यायेन सर्वं राज्यं प्रकाशयेत्॥५॥

पदार्थः-हे न्यायकारी राजा आदि जनो! आप लोगों के साथ (**नः**) हम लोगों की जैसे (**तत्**) वह (**प्रत्नम्**) प्राचीन (**सख्यम्**) मित्रता (**अस्तु**) हो (**इत्था**) इससे जैसे (**युष्मे**) आप लोगों के (**वदद्भिः**) कहते हुओं के साथ हम लोगों की मित्रता हो और जैसे (**अङ्गिरोभिः**) पवनों के साथ (**अच्युतच्युत्**) नहीं चञ्चल अर्थात् स्थिर को चञ्चल करने वाला सूर्य्य (**वलम्**) मेघ का (**हन्**) नाश करता है, वैसे हे (**दस्म**) दुःख के नाश करने वाले (**इषयन्तम्**) प्राप्त हुए वा जाते हुए को आप (**ऋणोः**) सिद्ध करिये और जैसे (**अस्य**) इस जगत् के (**दुरः**) द्वारों को सूर्य्य प्रकाशित करता है, वैसे आप (**विश्वाः**) सम्पूर्ण (**पुरः**) नगरियों को (**वि**) विशेष करके सिद्ध करिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि यथाशक्ति उत्तमों के साथ मित्रता ही करें, वह कभी नष्ट न होवे, ऐसा प्रयत्न करें और जैसे सूर्य्य सब को प्रकाशित करता है, वैसे राजा न्याय से सम्पूर्ण राज्य को प्रकाशित करे॥५॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये।

स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु॥६॥

सः। हि। धीभिः। हव्यः। अस्ति। उग्रः। ईशानऽकृत्। महति। वृत्रऽतूर्ये। सः। तोकऽसाता। तनये। सः। वज्री। वितन्तसाय्यः। अभवत्। समत्ऽसु॥६॥

पदार्थः-(सः) (हि) (धीभिः) प्रज्ञाभिर्बुद्धिभिर्वा **(हव्यः)** आदातुमर्हः **(अस्ति) (उग्रः)** तेजस्वी **(ईशानकृत्)** य ईशानानीशनशीलान् पुरुषार्थिनः करोति **(महति) (वृत्रतूर्य्ये)** स-ामे **(सः) (तोकसाता)** तोकानामपत्यानां विभाजने **(तनये)** पुत्राय **(सः) (वज्री)** शस्त्रबाहुः **(वितन्तसाय्यः)** भृशं विस्तारणीयः **(अभवत्)** भवति **(समत्सु)** संग्रामेषु॥६॥

अन्वयः-हे राजन्! यथा स धीभिर्हव्यो महति वृत्रतूर्य्ये ईशानकृदस्ति स तोकसाता तनय उग्रः स हि वितन्तसाय्यो वज्री समत्स्वभवत् तथा त्वं विधेहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राज्ञा सर्वे राजकर्म्मचारिणो योग्याः सम्पादनीया यतः सर्वदा विजयः स्यात्॥६॥

पदार्थः-हे राजन्! जैसे **(सः)** वह **(धीभिः)** ज्ञान व बुद्धियों से **(हव्यः)** ग्रहण करने योग्य **(महति)** बड़े **(वृत्रतूर्य्ये)** संग्राम में **(ईशानकृत्)** ईश्वरता करने वालों को पुरुषार्थी करने वाला **(अस्ति)** है और **(सः)** वह **(तोकसाता)** सन्तानों के विभाग होने में **(तनये)** पुत्र के लिये **(उग्रः)** तेजस्वी और **(सः)** वह **(हि)** ही **(वितन्तसाय्यः)** अत्यन्त विस्तार करने योग्य **(वज्री)** शस्त्र हैं बाहुओं में जिसके ऐसा **(समत्सु)** संग्रामों में **(अभवत्)** होता है, वैसे आप करिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा को चाहिये कि सब कर्म्मचारियों को योग सिद्ध करे, जिससे सर्वदा विजय होवे॥६॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्यो करना चाहिये, इस विषय को कहते हैं॥

स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे।

स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः॥७॥

सः। मज्मना। जनिम। मानुषाणाम्। अमर्त्येन। नाम्ना। अति। प्र। सर्स्रे। सः। द्युम्नेन। सः। शवसा। उत। राया। सः। वीर्येण। नृऽतमः। सम्ऽओकाः॥७॥

पदार्थः-(सः) (मज्मना) बलेन **(जनिम)** जन्म प्रादुर्भावम् **(मानुषाणाम्)** मनुष्याणाम् **(अमर्त्येन)** मरणधर्म्मरहितेन कारणेन **(नाम्ना)** सञ्ज्ञया **(अति) (प्र) (सर्स्रे)** प्राप्नोति **(सः) (द्युम्नेन)** धनेन यशसा

वा **(सः)** **(शवसा)** विशिष्टेन बलेन **(उत)** अपि **(राया)** धनेन **(सः)** **(वीर्य्येण)** पराक्रमेण **(नृतमः)** नृणां मध्येऽतिशयेनोत्तमः **(समोकाः)** एकस्थानः॥७॥

अन्वयः-हे राजन्! यथाऽयं भृत्यो मज्मना स द्युम्नेन स शवसा स रायोत स वीर्य्येण मानुषाणाममर्त्येन नाम्ना जनिम प्रादुर्भावमति प्र सर्त्से सः समोका नृतमः स्यात्तथा विधेहि॥७॥

भावार्थः-राज्ञा तथा प्रजा राजजनाश्च प्रसिद्धिं बलं धनं कीर्तिं पराक्रमञ्च प्राप्नुयुस्तथा प्रयतितव्यम्॥७॥

पदार्थः-हे राजन्! जैसे यह सेवक **(मज्मना)** बल से **(सः)** वह **(द्युम्नेन)** धन वा यश से **(सः)** वह **(शवसा)** विशेष बल से **(सः)** वह **(राया)** धन से और **(उत)** भी **(सः)** वह **(वीर्य्येण)** पराक्रम से **(मानुषाणाम्)** मनुष्यों के **(अमर्त्येन)** मरणधर्म्म से रहित कारण से और **(नाम्ना)** संज्ञा से **(जनिम)** जन्म अर्थात् प्रकट होने को **(अति, प्र, सर्त्से)** अत्यन्त प्राप्त होता है वह **(समोकाः)** एक स्थान वाला **(नृतमः)** मनुष्यों के मध्य में अतिशय उत्तम होवे, वैसे आप करिये॥७॥

भावार्थः-राजा को चाहिये कि जैसे प्रजा और राजा के जन प्रसिद्धि, बल, धन, यश और पराक्रम को प्राप्त होवें, वैसे प्रयत्न करें॥७॥

पुनर्मनुष्याः कथं वर्त्तेयुरित्याह॥

फिर मनुष्य कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

स या न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरि धुनिं च।
वृणक् पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित्॥८॥

सः। यः। न। मुहे। न। मिथु। जनः। भूत्। सुमन्तुऽनामा। चुमुरिम्। धुनिम्। च। वृणक्। पिप्रुम्। शम्बरम्। शुष्णम्। इन्द्रः। पुराम्। च्यौत्नाय। शयथाय। नु। चित्॥८॥

पदार्थः-**(सः)** **(यः)** **(न)** निषेधे **(मुहे)** मुग्धो भवति **(न)** **(मिथू)** परस्परम् **(जनः)** मनुष्यः **(भूत्)** भवति **(सुमन्तुनामा)** सुष्ठु मन्तु मन्तव्यं ज्ञातव्यं नाम यस्य **(चुमुरिम्)** अत्तारम् **(धुनिम्)** ध्वनितारम् **(च)** **(वृणक्)** छिनत्ति **(पिप्रुम्)** व्यापनशीलम् **(शम्बरम्)** शं सुखं वृणोति येन तं मेघम् **(शुष्णम्)** शोषकम् **(इन्द्रः)** सूर्य्यः **(पुराम्)** पूर्णानां धनानाम् **(च्यौत्नाय)** च्यवनाय गमनाय **(शयथाय)** शयनाय **(नू)** सद्यः **(चित्)** अपि॥८॥

अन्वयः-हे विद्वन्! यथेन्द्रश्चुमुरिं पिप्रुं धुनिं शुष्णं शम्बरं मेघं पुरां च्यौत्नाय शयथाय नू वृणक् तथा च यः सुमन्तुनामा जनो न मुहे न मिथू भूत्स चित्सत्कर्त्तव्योऽस्ति॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यो मेघं निर्माय वर्षयित्वा बद्धो न भवति तथैव मनुष्या धर्म्याणि कार्य्याणि कृत्वा सज्जनैः सह वर्त्तित्वा मोहिता न भवन्ति किन्तु सुखिनो भवन्ति॥८॥

पदार्थः-हे विद्वन्! जैसे **(इन्द्रः)** सूर्य्य **(चुमुरिम्)** भोजन करने **(प्रिपुम्)** व्याप्त होने **(धुनिम्)** शब्द करने **(शुष्णम्)** सुखाने और **(शम्बरम्)** सुख को स्वीकार कराने वाले मेघ को **(पुराम्)** पूर्ण धनों

के **(च्यौत्नाय)** गमन और **(शयथाय)** शयन के लिये **(नू)** शीघ्र **(वृणक्)** काटता है, वैसे **(च)** और **(यः)** जो **(सुमन्तुनामा)** उत्तम प्रकार जानने योग्य नाम जिसका वह **(जनः)** मनुष्य **(न)** नहीं **(मुहे)** मोह को प्राप्त होता और **(न)** न **(मिथू)** परस्पर **(भूत्)** होता है **(सः)** वह **(चित्)** भी सत्कार करने योग्य है॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य मेघ का निर्म्माण करके और वर्षाय के **[**=बरसा कर**]** बद्ध नहीं होता है, वैसे ही मनुष्य धर्म्मयुक्त कार्य्यों को करके सज्जनों के साथ वर्त्ताव करके मोहित नहीं होते, किन्तु सुखी होते हैं॥८॥

पुना राजजनाः किं कुर्य्युरित्याह॥

फिर राजजन क्या करें, इस विषय को कहते हैं॥

उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः॥९॥

उत्ऽअवता। त्वक्षसा। पन्यसा। च। वृत्रऽहत्याय। रथम्। इन्द्र। तिष्ठ। धिष्व। वज्रम्। हस्ते। आ। दक्षिणऽत्रा। अभि। प्र। मन्द। पुरुऽदत्र। मायाः॥९॥

पदार्थः-(**उदावता**) ऊर्ध्वगमनेन (**त्वक्षसा**) सूक्ष्मीकरणेन (**पन्यसा**) शुद्धेन व्यवहारेण (**च**) (**वृत्रहत्याय**) संग्रामाय (**रथम्**) (**इन्द्र**) राजन् (**तिष्ठ**) (**धिष्व**) धरस्व (**वज्रम्**) शस्त्रास्त्रम् (**हस्ते**) (**आ**) समन्तात् (**दक्षिणत्रा**) दक्षिणे (**अभि**) (**प्र**) (**मन्द**) प्रशंसय (**पुरुदत्र**) बहुदानकृत् (**मायाः**) प्रज्ञाः॥९॥

अन्वयः-हे पुरुदत्रेन्द्र! त्वमुदावता पन्यसा त्वक्षसा वृत्रहत्याय रथमाऽऽतिष्ठ दक्षिणत्रा हस्ते वज्रं धिष्व। मायाश्च प्राप्याभि प्र मन्द॥९॥

भावार्थः-य उत्कृष्टतया सकलविषयाः प्रज्ञाः प्राप्य शास्त्राऽस्त्राणि धृत्वा युद्धाय गच्छन्ति ते विजयं प्राप्नुवन्ति॥९॥

पदार्थः-हे **(पुरुदत्र)** बहुत दान करने वाले **(इन्द्र)** राजन्! आप **(उदावता)** ऊर्ध्व गमन और **(पन्यसा)** शुद्ध व्यवहार तथा **(त्वक्षसा)** सूक्ष्मीकरण से **(वृत्रहत्याय)** संग्राम के लिये **(रथम्)** रथ पर **(आ)** सब प्रकार से **(तिष्ठ)** स्थित हो और **(दक्षिणत्रा)** दाहिने **(हस्ते)** हाथ में **(वज्रम्)** शस्त्र और अस्त्र को **(धिष्व)** धारण करिये **(मायाः)** बुद्धियों को **(च)** और प्राप्त होकर **(अभि, प्र, मन्द)** सब प्रकार से प्रशंसा करिये॥९॥

भावार्थः-जो उत्कृष्टता से सम्पूर्ण विषयों को जानने वाली बुद्धियों को प्राप्त होकर शस्त्र और अस्त्रों को धारण करके युद्ध के लिये जाते हैं, वे विजय को प्राप्त होते हैं॥९॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा।

गम्भीरयऽ ऋष्वया यो रुरोजाध्वानयद् दुरिता दम्भयच्च॥ १०॥ ५॥

अग्निः। न। शुष्कम्। वनम्। इन्द्र। हेतिः। रक्षः। नि। धक्षि। अशनिः। न। भीमा। गम्भीरया। ऋष्वया। यः। रुरोज। अध्वनयत्। दुःऽइता। दम्भयत्। च॥ १०॥

पदार्थः-(अग्निः) पावकः **(न)** इव **(शुष्कम्)** **(वनम्)** जङ्गलम् **(इन्द्र)** दुष्टताविदारक **(हेतिः)** वज्रः **(रक्षः)** दुष्टं जनम् **(नि)** नितराम् **(धक्षि)** दहसि **(अशनिः)** स्तनयित्नुः **(न)** इव **(भीमा)** बिभेति यस्याः सा **(गम्भीरया)** अगाधबलया **(ऋष्वया)** महत्या **(यः)** **(रुरोज)** शत्रून् रुजति **(अध्वानयत्)** धुनयति **(दुरिता)** दुष्टाचरणानि **(दम्भयत्)** दम्भयति हिंसयति **(च)**॥ १०॥

अन्वयः-हे इन्द्र राजन्! योऽग्निर्यथा शुष्कं वनं न रक्षो धक्षि यस्य ते हेतिरशनिर्न भीमा सेनास्ति तया भवान् ऋष्वया गम्भीरया शत्रून् रुरोज तमध्वानयद् दुरिता च दम्भयत् तेन यतो रक्षो नि धक्षि तस्मादपराजितोऽसि॥ १०॥

भावार्थः-अत्रोपमालङ्कारः। हे राजादयो जना! यथाग्निर्ज्वालया शुष्कमार्द्रमपि वनं दहति तथा सुशिक्षितया महत्या सेनया शत्रूणां भयं कुर्य्यात् दुष्टाञ्छत्रून् दहत॥ १०॥

पदार्थः-हे **(इन्द्र)** दुष्टता के नाशक राजन्! **(यः)** जो **(अग्निः)** अग्नि जैसे **(शुष्कम्)** सूखे **(वनम्)** वन को **(न)** वैसे **(रक्षः)** दुष्ट जन को **(धक्षि)** जलाते हो और जिन आपका **(हेतिः)** वज्र **(अशनिः)** बिजुली **(न)** जैसे वैसे **(भीमा)** जिनसे जन भय करते वह सेना है उस **(ऋष्वया)** बड़ी **(गम्भीरया)** अथाह बलयुक्त सेना से आप शत्रुओं को **(रुरोज)** रोगयुक्त करते हो उसको **(अध्वानयत्)** कंपाते हो और **(दुरिता)** दुष्ट आचरणों को **(च)** भी **(दम्भयत्)** नष्ट करते हो उससे जिस कारण दुष्टजन को **(नि)** अत्यन्त जलाते हो, इससे अपराजित हो॥ १०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजा आदि जनो! जैसे अग्नि ज्वाला से सूखे और गीले भी वन को जलाता है, वैसे उत्तम प्रकार शिक्षित तथा बड़ी सेना से शत्रुओं को भय करिये और शत्रुओं को जलाइये॥ १०॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक्।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः॥ ११॥

आ। सहस्रम्। पथिऽभिः। इन्द्र। राया। तुविऽद्युम्न। तुविऽवाजेभिः। अर्वाक्। याहि। सूनो इति। सहसः। यस्य। नु। चित्। अदेवः। ईशे। पुरुऽहूत। योतोः॥ ११॥

पदार्थः-(आ) समन्तात् **(सहस्रम्)** असंख्यातम् **(पथिभिः)** मार्गैः **(इन्द्र)** **(राया)** धनेन **(तुविद्युम्न)** बहुप्रशंस **(तुविवाजेभिः)** बहुवेगैर्बहुस- ामैर्वा **(अर्वाक्)** पश्चात् **(याहि)** गच्छ **(सूनो)** अपत्य

(सहसः) बलवतः **(यस्य)** **(नू)** सद्यः **(चित्)** अपि **(अदेवः)** अविद्वान् **(ईशे)** ईष्टे **(पुरुहूत)** बहुभिः कृताह्वान **(योतोः)** मिश्रिताऽमिश्रितकर्त्तुः॥११॥

अन्वयः-हे तुविद्युम्न पुरुहूत सहसः सूनो इन्द्र! त्वं पथिभी राया तुविवाजेभिस्सहार्वाक् सहस्रमाऽऽयाहि यस्य योतोश्चिददेव ईशे तन्नू प्राप्नुहि॥११॥

भावार्थः-हे राजँस्त्वं विद्याविनयमार्गेण प्रजाः पितृवत्पालयित्वा यशस्वी भूत्वा सत्याऽसत्ययोर्यथावन्निर्णयं कुरु॥११॥

पदार्थः-हे **(तुविद्युम्न)** बहुत प्रशंसा से युक्त **(पुरुहूत)** बहुतों से आह्वान किये गये **(सहसः)** बलवान् के **(सूनो)** पुत्र **(इन्द्र)** दुष्टता के नाशक राजन्! आप **(पथिभिः)** मार्गों **(राया)** धन और **(तुविवाजेभिः)** बहुत वेग वा बहुत संग्रामों के साथ **(अर्वाक्)** पीछे से **(सहस्रम्)** अनेकों को **(आ)** सब ओर से **(याहि)** प्राप्त हूजिये और **(यस्य)** जिस **(योतोः)** मिश्रित और अमिश्रित करने वाले का **(चित्)** भी **(अदेवः)** विद्वान् से भिन्न जन **(ईशे)** इच्छा करता है, उसको **(नू)** शीघ्र प्राप्त होओ॥११॥

भावार्थः-हे राजन्! आप विद्या और विनय के मार्ग से प्रजाओं का पिता के सदृश पालन करके यशस्वी होकर सत्य और असत्य का यथावत् निर्णय करिये॥११॥

पुनः कोऽजातशत्रुर्भवतीत्याह॥

फिर कौन **[**अजात**]**शत्रुवाला होता है, इस विषय को कहते हैं॥

प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः॥१२॥

प्र। तुविऽद्युम्नस्य। स्थविरस्य। घृष्वेः। दिवः। ररप्शे। महिमा। पृथिव्याः। न। अस्य। शत्रुः। न। प्रतिऽमानम्। अस्ति। न। प्रतिऽस्थिः। पुरुऽमायस्य। सह्योः॥१२॥

पदार्थः-**(प्र)** **(तुविद्युम्नस्य)** बहुप्रशंसाधनस्य **(स्थविरस्य)** विद्यया वयसा च वृद्धस्य **(घृष्वेः)** घर्षकस्य **(दिवः)** कमनीयस्य **(ररप्शे)** अतिरिणक्ति **(महिमा)** **(पृथिव्याः)** भूमेः **(न)** **(अस्य)** **(शत्रुः)** **(न)** **(प्रतिमानम्)** परिमाणं सादृश्ये वा **(अस्ति)** **(न)** **(प्रतिष्ठिः)** प्रतिष्ठितः प्रतिष्ठावान् **(पुरुमायस्य)** बहुशुभकर्मप्रज्ञस्य **(सह्योः)** सहनशीलस्य॥१२॥

अन्वयः-हे मनुष्या! यस्य तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवः पुरुमायस्य सह्योर्महिमा पृथिव्याः प्र ररप्शेऽस्य न शत्रुर्न प्रतिमानं न प्रतिष्ठिश्चास्ति॥१२॥

भावार्थः-ये विद्यावृद्धा अमितप्रशंसामहिमानः सत्यं कामयमाना बहुप्रज्ञाः शमदमादिगुणान्विताः स्युस्तेषां कोऽपि शत्रुः सदृशः प्रतिष्ठितो वा न जायते॥१२॥

पदार्थः-हे मनुष्यो! जिस **(तुविद्युम्नस्य)** बहुत प्रशंसारूप धन से युक्त **(स्थविरस्य)** विद्या और अवस्था से वृद्ध **(घृष्वेः)** दुष्टों के घिसनेवाले **(दिवः)** सुन्दर **(पुरुमायस्य)** बहुत श्रेष्ठ कर्म्मों में बुद्धि जिसकी उस **(सह्योः)** सहनशील का **(महिमा)** महत्त्व **(पृथिव्याः)** भूमि से **(प्र, ररप्शे)** अलग फैलता है

(अस्य) इसका **(न)** न **(शत्रुः)** वैरी **(न)** न **(प्रतिमानम्)** मान वा सादृश्य और **(न)** न **(प्रतिष्ठिः)** प्रतिष्ठित **(अस्ति)** है॥१२॥

भावार्थः-जो विद्या में वृद्ध, अमित प्रशंसा और महिमा वाले, सत्य की कामना करते हुए, बहुत बुद्धिमान् और शम, दम आदि गुणों से युक्त होवें, उनका कोई भी न शत्रु, न बराबर और न उनसे अधिक प्रतिष्ठित होता है॥१२॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

प्र तत्ते॑ अ॒द्या कर॑णं कृ॒तं भू॒त् कुत्सं॒ यदा॒युम॑तिथि॒ग्वम॑स्मै।
पु॒रू स॒हस्रा नि शि॑शा अ॒भि क्षामुत्तूर्व॑याणं धृष॒ता निने॑य॥१३॥

प्र। तत्। ते॒। अ॒द्य। कर॑णम्। कृ॒तम्। भू॒त्। कुत्स॑म्। यत्। आ॒यु॒म्। अ॒ति॒थि॒ऽग्वम्। अ॒स्मै॒। पु॒रु। स॒हस्रा॑। नि। शि॒शा॒रिति॑शिशाः। अ॒भि। क्षाम्। उत्। तूर्व॑याणम्। धृ॒ष॒ता। नि॒ने॒थ॒॥१३॥

पदार्थः-**(प्र)** **(तत्)** **(ते)** तव **(अद्या)** अत्र **निपातस्य चे**ति दीर्घः। **(करणम्)** साधनम् **(कृतम्)** **(भूत्)** भवेत् **(कुत्सम्)** वज्रमिव दृढम् **(यत्)** **(आयुम्)** जीवनम् **(अतिथिग्वम्)** योऽतिथीन् गच्छति तम् **(अस्मै)** **(पुरू)** बहूनि **(सहस्रा)** सहस्राणि **(नि)** **(शिशाः)** शिक्षय **(अभि)** **(क्षाम्)** पृथिवीम् **(उत्)** **(तूर्वयाणम्)** तूर्वं शीघ्रगामि यानं यस्यास्ताम् **(धृषता)** दृढत्वेन **(निनेथ)** नय॥१३॥

अन्वयः-हे राजन्! यत्कुत्समतिथिग्वमायुमस्मै त्वमुन्निनेथ येन धृषता तूर्वयाणं क्षां पुरू सहस्राऽभि नि शिशास्तत्तेऽद्या करणं कृतं प्र भूत्॥१३॥

भावार्थः-यत्र राजादयो जना दीर्घायुषोऽतिथिसेवकाः पक्षपातं विहाय प्रजापालकाः सन्ति तत्र सर्वाणि कार्य्याणि सिद्धानि जायन्ते॥१३॥

पदार्थः-हे राजन्! **(यत्)** जिस **(कुत्सम्)** वज्र के सदृश दृढ़ **(अतिथिग्वम्)** अतिथियों को प्राप्त होने वाले **(आयुम्)** जीवन को **(अस्मै)** इसके लिये आप **(उत्)** **(निनेथ)** उन्नति प्राप्त करिये जिस **(धृषता)** दृढ़त्व से **(तूर्वयाणम्)** शीघ्रगामी वाहन जिसका उस **(क्षाम्)** पृथिवी को **(पुरू)** बहुत **(सहस्रा)** हजारों की **(अभि)** चारों ओर से **(नि, शिशाः)** शिक्षा दीजिये **(तत्)** वह **(ते)** आप का **(अद्या)** आज **(करणम्)** साधन **(कृतम्)** किया गया **(प्र, भूत्)** होवे॥१३॥

भावार्थः-जहाँ राजा आदि जन अधिक अवस्था वाले अतिथि जनों के सेवक, पक्षपात का त्याग करके प्रजा के पालक हैं, वहाँ सम्पूर्ण कार्य्य सिद्ध होते हैं॥१३॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

अनु॒ त्वाहि॑घ्ने॒ अध॑ देव दे॒वा मद॒न् विश्वे॑ कु॒वित॑मं कवी॒नाम्।

करो॒ यत्र॒ वरि॑वो बाधि॒ताय॑ दि॒वे जना॑य त॒न्वे॑ गृणा॒नः॥ १४॥

अनु॑। त्वा॒। अहि॑ऽघ्ने। अध॑। दे॒व॒। दे॒वाः। मद॑न्। विश्वे॑। क॒विऽत॑मम्। क॒वी॒नाम्। करः॑। यत्र॑। वरि॑वः। बा॒धि॒ताय॑। दि॒वे। जना॑य॥ त॒न्वे॑। गृ॒णा॒नः॥ १४॥

पदार्थः-(अनु) (त्वा) त्वाम् **(अहिघ्ने)** योऽहिं हन्ति तस्मै सूर्य्याय **(अध)** अथ **(देव)** विद्वन् **(देवाः)** विद्वांसः **(मदन्)** आनन्दयन्ति **(विश्वे)** सर्वे **(कवितमम्)** अतिशयेन विद्वांसम् **(कवीनाम्)** विदुषाम् **(करः)** यः करोति सः **(यत्र) (वरिवः)** परिचरणम् **(बाधिताय)** विलोडिताय **(दिवे)** कामयमानाय **(जनाय) (तन्वे)** शरीराय **(गृणानः)** स्तुवन्॥ १४॥

अन्वयः-हे देव! यत्र बाधिताय दिवे जनाय तन्वो वरिवो गृणानः करोऽस्ति तत्राहिघ्ने सूर्य्यायेव यं कवीनां कवितमं त्वा विश्वे देवा अनु मदन् तं त्वामाश्रित्याध सततं वयं सुखिनः स्याम॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या उत्तमानाप्तान् विदुषः संसेव्य विद्याः प्राप्यान्यान् बोधयन्ति ते मोदिता अनुजायन्ते॥ १४॥

पदार्थः-हे **(देव)** विद्वन्! **(यत्र)** जहाँ **(बाधिताय)** विलोडित हुए **(दिवे)** कामना करते हुए **(जनाय)** जन के और **(तन्वे)** शरीर के लिये **(वरिवः)** सेवन की **(गृणानः)** स्तुति करता हुआ जन **(करः)** कार्य्यों को करने वाला है वहाँ **(अहिघ्ने)** मेघ को नष्ट करने वाले सूर्य के लिये जैसे वैसे जिस **(कवीनाम्)** विद्वानों के मध्य में **(कवितमम्)** अत्यन्त विद्वान् **(त्वा)** आपको **(विश्वे)** सब **(देवाः)** विद्वान् जन **(अनु, मदन्)** आनन्दित करते हैं, उन आप का आश्रयण करके **(अध)** इसके अनन्तर निरन्तर हम लोग सुखी होवें॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य उत्तम, यथार्थवक्ता, विद्वानों का उत्तम प्रकार सेवन कर विद्याओं को प्राप्त होकर अन्यों को जानते हैं, वे प्रसन्न होते हैं॥ १४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

अनु॒ द्यावा॑पृथि॒वी तत्त॒ ओजोऽम॑र्त्या जिहत इन्द्र दे॒वाः।

कृ॒ष्वा कृ॑त्नो॒ अकृ॑तं॒ यत्ते॒ अस्त्युक्थं नवी॑यो जनयस्व य॒ज्ञैः॥ १५॥ ६॥

अनु॑। द्यावा॑पृथि॒वी इति॑। तत्। ते॒। ओजः॑। अम॑र्त्याः। जि॒ह॒ते॒। इ॒न्द्र॒। दे॒वाः। कृ॒ष्व। कृ॒त्नो॒ इति॑। अकृ॑तम्। यत्। ते॒। अस्ति॑। उ॒क्थम्। नवी॑यः। ज॒न॒य॒स्व॒। य॒ज्ञैः॥ १५॥

पदार्थः-(अनु) (द्यावापृथिवी) भूमिसूर्य्यौ **(तत्) (ते)** तव **(ओजः)** पराक्रमम् **(अमर्त्याः)** साधारणमनुष्यस्वभावाद्विलक्षणाः **(जिहते)** प्राप्नुवन्ति **(इन्द्र)** राजन् **(देवाः) (कृष्व)** कुरुष्व। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(कृत्नो)** कर्त्तः **(अकृतम्)** अक्रियमाणं कर्म्म **(यत्) (ते)** तव **(अस्ति) (उक्थम्)** वक्तुमर्हम् **(नवीयः)** अतिशयेन नूतनं वचनम् **(जनयस्व) (यज्ञैः)** सङ्गतिमयैर्व्यवहारैः॥ १५॥

अन्वय:-हे कृत्नो इन्द्र! ते तव सकाशाद्येऽमर्त्या देवा यदकृतं नवीय उक्थमस्ति तत्ते जिहते द्यावापृथिवी अनु जिहते तास्त्वं यज्ञैर्जनयस्वोज: कृष्वा॥१५॥

भावार्थ:-हे मनुष्या! यूयं भूमिविद्युदादिविद्यया नवीनं नवीनं कार्यं साध्नुतेति॥१५॥

अत्रेन्द्रविद्वद्राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टादशं सूक्तं षष्ठो वर्गश्च समाप्त:॥

पदार्थ:-हे **(कृत्नो)** करने वाले **(इन्द्र)** राजन्! **(ते)** आपके समीप से जो **(अमर्त्या:)** साधारण मनुष्यों के स्वभाव से विलक्षण स्वभाव वाले **(देवा:)** विद्वान् जन **(यत्)** जो **(अकृतम्)** नहीं किया गया कर्म और **(नवीय:)** अतिशय नवीन वचन **(उक्थम्)** कहने योग्य **(अस्ति)** है **(तत्)** उस **(ते)** आपके वचन को **(जिहते)** प्राप्त होते और **(द्यावापृथिवी)** भूमि और सूर्य को **(अनु)** पश्चात् प्राप्त होते हैं उनको आप **(यज्ञै:)** मेल करनेरूप व्यवहारों से **(जनयस्व)** प्रकट कीजिये और **(ओज:)** पराक्रम को **(कृष्वा)** करिये॥१५॥

भावार्थ:-हे मनुष्यो! आप लोग भूमि और बिजुली आदि की विद्या से नवीन-नवीन कार्य को सिद्ध करिये॥१५॥

इस सूक्त में इन्द्र, विद्वान् और राजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अठाहरहवाँ सूक्त और छठा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ त्रयोदशर्चस्यैकोनविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ३, १३ भुरिक्पङ्क्तिः। ९ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४, ५, ६, ७ निचृत्त्रिष्टुप्। १०, ११, १२ विराट्त्रिष्टुप् छन्दः। ८ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सूर्यः कीदृशोऽस्तीत्याह॥

अब तेरह ऋचावाले उन्नीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब सूर्य कैसा है, इस विषय को कहते हैं॥

म॒हाँ इन्द्रो॑ नृ॒वदा च॑र्षणि॒प्रा उ॒त द्वि॒बर्हा॑ अमि॒नः सहो॑भिः।
अ॒स्म॒द्र्य॑ग्वावृधे वी॒र्याय॒ोरुः पृ॒थुः सु॒कृ॑तः कृ॒तृभि॑र्भूत्॥ १॥

म॒हान्। इन्द्रः॑। नृ॒ऽवत्। आ। च॒र्ष॒णि॒ऽप्राः। उ॒त। द्वि॒ऽबर्हाः॑। अ॒मि॒नः। सहः॑ऽभिः। अ॒स्म॒द्र्य॑क्। व॒वृ॒धे॒। वी॒र्या॑य। उ॒रुः। पृ॒थुः। सुऽकृतः। कृ॒तृऽभिः। भूत्॥ १॥

पदार्थः-(महान्) (इन्द्रः) सूर्यः **(नृवत्)** मनुष्यवत् **(आ) (चर्षणिप्राः)** यश्चर्षणिषु मनुष्येषु विद्युद्रूपेण व्याप्नोति **(उत) (द्विबर्हाः)** योऽन्तरिक्षवायुभ्यां द्वाभ्यां वर्धते **(अमिनः)** अहिंसकः **(सहोभिः)** बलैः **(अस्मद्र्यक्)** अस्माकं सम्मुखीभूतः **(वावृधे)** वर्धते **(वीर्याय)** पराक्रमाय **(उरूः)** बहुः **(पृथुः)** विस्तीर्णः **(सुकृतः)** सुष्ठु उत्पादितः **(कर्तृभिः)** कर्मकारकैः **(भूत्)** भवेत्॥ १॥

अन्वयः-हे मनुष्या! यो महानिन्द्रश्चर्षणिप्रा उत द्विबर्हा अमिनोऽस्मद्र्यगुरुः पृथुः सुकृतो भूत् सहोभिः कर्तृभिस्सह वीर्याय नृवदा वावृधे तं विज्ञायेष्टसिद्धिं कुरुत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यथा सखा सख्या सह कार्यसिद्धये प्रयतते तथैवेश्वरनिर्मिता विद्युत्सूर्यो वा सर्वेषां कर्मकारिणां सहयोगी वर्तते॥ १॥

पदार्थः-हे मनुष्यो! जो **(महान्)** बड़ा **(इन्द्रः)** सूर्य **(चर्षणिप्राः)** मनुष्यों में बिजुली रूप में व्याप्त होने **(उत)** और **(द्विबर्हाः)** अन्तरिक्ष और वायु से बढ़ने और **(अमिनः)** नहीं हिंसा करने वाला **(अस्मद्र्यक्)** हम लोगों के सम्मुख हुआ **(उरुः)** बहुत **(पृथुः)** विस्तीर्ण **(सुकृतः)** उत्तम प्रकार उत्पन्न किया गया **(भूत्)** हो तथा **(सहोभिः)** बलों और **(कर्तृभिः)** कर्म करने वालों के साथ **(वीर्याय)** पराक्रम के लिये **(नृवत्)** मनुष्य जैसे वैसे **(आ, वावृधे)** सब ओर से बढ़ता है, उसको जान कर इष्टसिद्धि करिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मित्र-मित्र के साथ कार्य की सिद्धि के निमित्त प्रयत्न करता है, वैसे ही ईश्वर से निर्मित बिजुली वा सूर्य सम्पूर्ण कर्मकारियों का सहयोगी होता है॥ १॥

मनुष्यैः कथमुन्नतिः कार्येत्याह॥

मनुष्यों को किस प्रकार से उन्नति करनी चाहिये, इस विषय को कहते हैं॥

इन्द्र॑मेव धि॒षणा॑ सा॒तये॑ धाद् बृ॒हन्त॑मृ॒ष्वम॒जरं॒ युवा॑नम्।
अषा॑ळ्हेन॒ शव॑सा शूशु॒वांसं॑ स॒द्यश्चि॒द्यो वा॑वृ॒धे असा॑मि॥ २॥

इन्द्र॑म्। ए॒व। धि॒षणा॑। सा॒तये॑। धा॒त्। बृ॒हन्त॑म्। ऋ॒ष्वम्। अ॒जर॑म्। युवा॑नम्। अषा॑ळ्हेन। शव॑सा। शूशु॒ऽवांस॑म्। स॒द्यः। चि॒त्। यः। व॒वृ॒धे। असा॑मि॥ २॥

पदार्थः-(इन्द्रम्) सूर्यमिव परमैश्वर्यवन्तम् **(एव)** **(धिषणा)** प्रज्ञया कर्मणा वा **(सातये)** संविभागाय **(धात्)** दधाति **(बृहन्तम्)** पृथिव्याः सकाशादतिविस्तीर्णम् **(ऋष्वम्)** गन्तारम् **(अजरम्)** जरारहितम् **(युवानम्)** **(अषाळ्हेन)** शत्रुभिरसोढव्येन **(शवसा)** **(शूशुवांसम्)** व्याप्नुवन्तम् **(सद्यः)** **(चित्)** **(यः)** **(वावृधे)** वर्धते **(असामि)** अनल्पम्॥ २॥

अन्वयः-यो धिषणा सातये बृहन्तमृष्वमजरं युवानमिवाषाळ्हेन शवसा शूशुवांसमिन्द्रं धात् स एव सद्योऽसामि चित् वावृधे॥ २॥

भावार्थः-यथा महन्मित्रं प्राप्य मनुष्या वर्धन्ते तथैव विद्युद्विद्यां लब्ध्वाऽतुलां वृद्धिं प्राप्नुवन्ति॥ २॥

पदार्थः-(यः) जो **(धिषणा)** बुद्धि वा कर्म से **(सातये)** संविभाग के लिये **(बृहन्तम्)** पृथिवी के समीप से अतिविस्तीर्ण **(ऋष्वम्)** जाने वाले **(अजरम्)** वृद्धावस्था से रहित **(युवानम्)** युवाजन को जैसे वैसे **(अषाळ्हेन)** शत्रुओं से नहीं सहने योग्य **(शवसा)** बल से **(शूशुवांसम्)** व्याप्तिमान् **(इन्द्रम्)** सूर्य के सदृश अत्यन्त ऐश्वर्य वाले को **(धात्)** धारण करता है वह **(एव)** ही **(सद्यः)** शीघ्र **(असामि)** अत्यन्त **(चित्)** निश्चित **(वावृधे)** वृद्धि की प्राप्त होता है॥ २॥

भावार्थः-जैसे बड़े मित्र को प्राप्त होकर मनुष्य वृद्धि को प्राप्त होते हैं, वैसे ही बिजुली की विद्या को प्राप्त होकर अतुल वृद्धि को प्राप्त होते हैं॥ २॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

पृ॒थू क॒रस्ना॑ बहु॒ला गभ॑स्ती अस्म॒द्र्य॑ङ्क् सं मि॑मीहि श्रवा॑ꣳसि।
यू॒थेव॑ प॒श्वः प॑शु॒पा दम॑ूना॒ अस्माँ॑ इ॑न्द्राभ्या व॑वृत्स्वा॒जौ॥ ३॥

पृ॒थू इति॑। क॒रस्ना॑। ब॒हु॒ला। गभ॑स्ती॒ इति॑। अ॒स्म॒द्र्य॑क्। सम्। मि॒मी॒हि॒। श्रवा॑ꣳसि। यू॒थाऽइ॑व। प॒श्वः। प॒शु॒ऽपाः। दम॑ूनाः। अ॒स्मान्। इ॒न्द्र॒। अ॒भि। आ। व॒वृ॒त्स्व॒। आ॒जौ॥ ३॥

पदार्थः-(पृथू) विस्तीर्णौ **(करस्ना)** यौ करान् कर्त्तॄन् स्नापयतश्शोधयतस्तौ **(बहुला)** याभ्यां बहूँल्लाति तौ **(गभस्ती)** हस्तौ। **गभस्ती इति बाहुनाम।** (निघं०२.४) **(अस्मद्र्यक्)** योऽस्मानञ्चति सः **(सम्)** **(मिमीहि)** मन्यस्व **(श्रवांसि)** अन्नानि श्रवणानि वा **(यूथेव)** समूह इव **(पश्वः)** पशोः **(पशुपाः)** यः पशून् पाति **(दमूनाः)** दमनशीलः **(अस्मान्)** **(इन्द्र)** परमैश्वर्यप्रद न्यायेश **(अभि)** **(आ)** **(ववृत्स्व)** अभ्यावर्तस्व **(आजौ)** संग्रामे॥ ३॥

अन्वयः-हे इन्द्र! यौ ते पृथू करस्ना बहुला गभस्ती वर्तेते ताभ्यां पशुपाः पश्वो यूथेवाऽस्मद्र्यक् सञ्छवांसि सं मिमीहि। दमूनाः सनाजावस्मानभ्याऽऽववृत्स्व॥३॥

भावार्थःअत्रोपमालङ्कारः। त एव श्रीमन्तो य आलस्यं विहाय सदा सत्कर्मणे प्रयतन्ते यथा पशुपालाः पशून् पालयित्वा समृद्धा भवन्ति तथैव पुरुषार्थिनो जना दारिद्र्यं विनाश्य श्रीपतयो जायन्ते॥३॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य के देनवाले और न्याय के ईश! जो आपके **(पृथू)** विस्तीर्ण **(करस्ना)** जो करने वालों को शुद्ध करने वाले **(बहुला)** जिन से बहुतों को ग्रहण करते वे **(गभस्ती)** दोनों हाथ वर्त्तमान हैं उन दोनों से **(पशुपाः)** पशुओं के रखने वाले **(पश्वः)** पशु के **(यूथेव)** समूह जैसे वैसे **(अस्मद्र्यक्)** हम लोगों की सेवा करने वाले होते हुए **(श्रवांसि)** अन्नों वा श्रवणों का **(सम्, मिमीहि)** उत्तम प्रकार ग्रहण करिये और **(दमूनाः)** इन्द्रियों का निग्रह करने वाले हुए **(आजौ)** स-ाम में **(अस्मान्)** हम लोगों के **(अभि)** चारों ओर से **(आ, ववृत्स्व)** अच्छे प्रकार वर्ताव करिये॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वे ही लक्ष्मीवान् होते हैं, जो आलस्य का त्याग करके सदा सत्कर्म के लिये प्रयत्न करते हैं और जैसे पशुओं के पालने वाले पशुओं का पालन करके समृद्ध अर्थात् धनवान् होते हैं, वैसे ही पुरुषार्थी जन दारिद्र्य का विनाश करके धन के स्वामी होते हैं॥३॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे होवें, इस विषय को कहत हैं॥

तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम।
यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः॥४॥

तम्। वः। इन्द्रम्। चतिनम्। अस्य। शाकैः। इह। नूनम्। वाजऽयन्तः। हुवेम। यथा। चित्। पूर्वे। जरितारः। आसुः। अनेद्याः। अनवद्याः। अरिष्टाः॥४॥

पदार्थः-**(तम्)** **(वः)** युष्मान् **(इन्द्रम्)** परमैश्वर्यप्रदम् **(चतिनम्)** आनन्दप्रदम् **(अस्य)** **(शाकैः)** शक्तिविशेषैः **(इह)** अस्मिन् संसारे **(नूनम्)** निश्चितम् **(वाजयन्तः)** ज्ञापयन्तः **(हुवेम)** **(यथा)** **(चित्)** **(पूर्वे)** आदिमाः **(जरितारः)** स्तावकाः **(आसुः)** भवन्ति **(अनेद्याः)** अनिन्दनीयाः **(अनवद्याः)** प्रशंसनीयाः **(अरिष्टाः)** अहिंसिताः॥४॥

अन्वयः-हे मनुष्या! यथेह पूर्वेऽनेद्या अनवद्या अरिष्टा जरितार आसुस्तथा चिदस्य शाकैस्तं चतिनमिन्द्रं वो नूनं वाजयन्तो वयं हुवेम॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा प्रशंसनीया आप्ताः पुरुषा धर्म्येषु कर्मसु वर्त्तित्वा कृतकृत्या भवन्ति तथैव वर्त्तित्वा सर्वे मनुष्या कृतकार्या भवन्तु॥४॥

पदार्थः-हे मनुष्यो! **(यथा)** जैसे **(इह)** इस संसार में **(पूर्वे)** प्राचीन **(अनेद्याः)** नहीं करने योग्य **(अनवद्याः)** प्रशंसनीय **(अरिष्टाः)** नहीं हिंसित **(जरितारः)** स्तुति करने वाले **(आसुः)** होते हैं, वैसे **(चित्)** भी **(अस्य)** इसके **(शाकैः)** सामर्थ्यविशेषों से **(तम्)** उस **(चतिनम्)** आनन्द और **(इन्द्रम्)**

अत्यन्त ऐश्वर्य्य के देने वाले को तथा **(वः)** तुम लोगों को **(नूनम्)** **(वाजयन्तः)** जनाते हुए हम लोग **(हुवेम)** ग्रहण करें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे प्रशंसा करने योग्य यथार्थवक्ता पुरुष धर्मयुक्त कर्मों में वर्ताव करके कृतकृत्य होते हैं, वैसे ही वर्ताव करके सब मनुष्य कृतकार्य होवें॥४॥

पुनर्मनुष्यैः कथं भवितव्यमित्याह॥

फिर मनुष्यों को कैसा होना चाहिये, इस विषय को कहते हैं॥

धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः।
सं जग्मिरे पथ्या३ रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः॥५॥७॥

धृतऽव्रतः। धनऽदाः। सोमऽवृद्धः। सः। हि। वामस्य। वसुनः। पुरुऽक्षुः। सम्। जग्मिरे। पथ्याः। रायः। अस्मिन्। समुद्रे। न। सिन्धवः। यादमानाः॥५॥

पदार्थः-**(धृतव्रतः)** धृतानि व्रतानि कर्म्माणि येन **(धनदाः)** यो धनं ददाति **(सोमवृद्धः)** सोमेनैश्वर्येणौषध्या वा प्रवृद्धः **(सः)** **(हि)** यतः **(वामस्य)** प्रशस्यस्य **(वसुनः)** धनस्य **(पुरुक्षुः)** पुरूणि बहून्यन्नानि यस्य सः **(सम्)** **(जग्मिरे)** सङ्गच्छन्ते **(पथ्याः)** पथि साधवः **(रायः)** श्रियः **(अस्मिन्)** **(समुद्रे)** सागरे **(न)** इव **(सिन्धवः)** नद्यः **(यादमानः)** अभिगच्छन्त्यः॥५॥

अन्वयः-हे विद्वांसो! यमस्मिन् व्यवहारे यादमानाः सिन्धवः समुद्रे न पथ्या रायः सं जग्मिरे स हि धृतव्रतः सोमवृद्धो धनदाः पुरुक्षुर्वामस्य वसुनः प्रभुर्भवति॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा नद्यो वेगेन समुद्रं प्राप्य स्थिरा भवन्ति तथैव धार्मिकमुद्योगिनं श्रियं सेवन्ते॥५॥

पदार्थः-हे विद्वानो! जिसको **(अस्मिन्)** इस व्यवहार में **(यादमानाः)** चारों ओर से जाती हुई **(सिन्धवः)** नदियाँ **(समुद्रे)** समुद्र में **(न)** जैसे वैसे **(पथ्याः)** मार्ग में श्रेष्ठ **(रायः)** धन **(सम्, जग्मिरे)** प्राप्त होते हैं **(सः, हि)** वही **(धृतव्रतः)** धारण किये कर्म जिसने वह **(सोमवृद्धः)** ऐश्वर्य वा ओषधि से बढ़ा हुआ **(धनदाः)** धन का देने वाला **(पुरुक्षुः)** बहुत अन्न से युक्त **(वामस्य)** प्रशंसा करने योग्य **(वसुनः)** धन का स्वामी होता है॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे नदियाँ वेग से समुद्र को प्राप्त होकर स्थिर होती हैं, वैसे ही धार्मिक तथा उद्योगी पुरुष की लक्ष्मी सेवा करती हैं॥५॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम्।
विश्वा द्युम्ना वृण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै॥६॥

शविष्ठम्। नः। आ। भर। शूर। शवः। ओजिष्ठम्। ओजः। अभिऽभूते। उग्रम्। विश्वा। द्युम्ना। वृष्ण्या। मानुषाणाम्। अस्मभ्यम्। दाः। हरिऽवः। मादयध्यै॥ ६॥

पदार्थः-(शविष्ठम्) अतिशयेन बलिष्ठम् **(नः)** अस्मान् **(आ)** **(भर)** धर **(शूर)** निर्भय **(शवः)** बलम् **(ओजिष्ठम्)** अतिशयेन पराक्रमयुक्तम् **(ओजः)** प्राणधारणम् **(अभिभूते)** दुष्टानामभिभवकर्त्तः **(उग्रम्)** तीव्रम् **(विश्वा)** सर्वाणि **(द्युम्ना)** द्योतमानानि यशांसि धनानि वा **(वृष्ण्या)** वृषभ्यो हितानि **(मानुषाणाम्)** मनुष्यजातिस्थानाम् **(अस्मभ्यम्)** **(दाः)** देहि **(हरिवः)** प्रशस्ता हरयो मनुष्या विद्यन्ते यस्य तत्सम्बुद्धौ **(मादयध्यै)** मादयितुम्॥ ६॥

अन्वयः-हे हरिवः शूराऽभिभूते! त्वं नः शविष्ठमुग्रमोज ओजिष्ठं शव आ भराऽनेन मानुषाणां विश्वा वृष्ण्या द्युम्नाऽस्मभ्यं मादयध्यै दाः॥ ६॥

भावार्थः-हे राजंस्त्वं राज्यपालनार्हान् गुणान् धृत्वा न्यायेन राज्यं पालय॥ ६॥

पदार्थः-हे **(हरिवः)** प्रशंसनीय मनुष्यों वाले **(शूर)** भयरहित **(अभिभूते)** दुष्टों के अभिभव करने वाले! आप **(नः)** हम लोगों को और **(शविष्ठम्)** अतिशय बलिष्ठ **(उग्रम्)** तीव्र **(ओजः)** प्राणधारण को और **(ओजिष्ठम्)** अत्यन्त पराक्रमयुक्त **(शवः)** बल को **(आ, भर)** सब प्रकार से धारण करो और इससे **(मानुषाणाम्)** मनुष्य जाति में वर्त्तमानों के सम्बन्ध में **(विश्वा)** सम्पूर्ण **(वृष्ण्या)** उत्तम जनों के लिये हितकारक **(द्युम्ना)** प्रकाशित यशों वा धनों को **(अस्मभ्यम्)** हम लोगों के लिये **(मादयध्यै)** आनन्द देने को **(दाः)** दीजिये॥ ६॥

भावार्थः-हे राजन्! आप राज्य के पालने योग्य गुणों को धारण करके न्याय से राज्य का पालन करिये॥ ६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम्।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः॥ ७॥

यः। ते। मदः। पृतनाषाट्। अमृध्रः। इन्द्र। तम्। नः। आ। भर। शूशुऽवांसम्। येन। तोकस्य। तनयस्य। सातौ। मंसीमहि। जिगीवांसः। त्वाऽऊताः॥ ७॥

पदार्थः-(यः) **(ते)** तव **(मदः)** अतिहर्षः **(पृतनाषाट्)** यः पृतनाः सेनाः सहते सः **(अमृध्रः)** अहिंस्रः **(इन्द्र)** राजन् **(तम्)** **(नः)** अस्मभ्यम् **(आ)** **(भर)** **(शूशवांसम्)** शुभगुणव्यापिनम् **(येन)** **(तोकस्य)** अपत्यस्य **(तनयस्य)** सुकुमारस्य **(सातौ)** संविभागे **(मंसीमहि)** विजानीयाम **(जिगीवांसः)** जेतुं शीलाः **(त्वोताः)** त्वया रक्षिताः॥ ७॥

अन्वयः-हे इन्द्र राजन्! ते योऽमृध्रः पृतनाषाण्मदोऽस्ति येन जिगीवांसस्त्वोता वयं तोकस्य तनयस्य सातौ रक्षां विद्यादानं च मंसीमहि त्वं तं शूशुवांसं न आ भर॥ ७॥

भावार्थः-हे प्रजाजना! राजानं प्रत्येवं ब्रुवन्तु नोऽस्माकं सन्ताना यथा सुशिक्षिताः स्युस्तथा नियमान् विधेहि यतो विजयानन्दौ वर्धेयाताम्॥७॥

पदार्थः-हे **(इन्द्र)** राजन् **(ते)** आप का **(यः)** जो **(अमृध्रः)** नहीं हिंसा करने और **(पृतनाषाट्)** सेनाओं को सहनेवाला **(मदः)** आनन्द है **(येन)** जिससे **(जिगीवांसः)** जीतनेवाले **(त्वोताः)** आप से रक्षित हम लोग **(तोकस्य)** सन्तान **(तनयस्य)** सुकुमार के **(सातौ)** संविभाग में रक्षा और विद्यावान् को **(मंसीमहि)** जानें और आप **(तम्)** उस **(शूशुवांसम्)** श्रेष्ठ गुणों से व्याप्त को **(नः)** हम लोगों के लिये **(आ, भर)** सब प्रकार से धारण करिये॥७॥

भावार्थः-हे प्रजाजनो! आप लोग राजा के प्रति यह कहो कि हम लोगों के सन्तान जिस प्रकार उत्तम शिक्षित हों, वैसे नियमों को करिये जिससे विजय और आनन्द बढ़े॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ नो॑ भर॒ वृष॑णं॒ शुष्म॑मिन्द्र॒ धन॒स्पृतं॑ शूशु॒वांस॑ सु॒दक्ष॑म्।

येन॒ वंसा॑म॒ पृत॑नासु॒ शत्रू॒न् तवो॒तिभि॑रु॒त जा॒मींरजा॑मीन्॥८॥

आ। नः। भर। वृषणम्। शुष्मम्। इन्द्र। धनऽस्पृतम्। शूशुऽवांसम्। सुऽदक्षम्। येन। वंसाम। पृतनासु। शत्रून्। तव। ऊतिऽभिः। उत। जामीन्। अजामीन्॥८॥

पदार्थः-**(आ)** समन्तात् **(नः)** अस्मभ्यम् **(भर)** धर **(वृषणम्)** शत्रुसामर्थ्यप्रतिबन्धकम् **(शुष्मम्)** बलम् **(इन्द्र)** दुष्टबलविदारक **(धनस्पृतम्)** धनं स्पृणन्ति येन तम् **(शूशुवांसम्)** शुभगुणव्यापिनम् **(सुदक्षम्)** उत्तमबलचातुर्यम् **(येन)** **(वंसाम)** विभजेम **(पृतनासु)** मनुष्यसेनासु **(शत्रून्)** **(तव)** **(ऊतिभिः)** रक्षादिभिः **(उत)** **(जामीन्)** सम्बन्धिनो बन्ध्वादीन् **(अजामीन्)** असम्बन्धिनो दुष्टान्॥८॥

अन्वयः-हे इन्द्र! त्वं नो वृषणं शुष्मं धनस्पृतं शूशुवांसं सुदक्षमाऽऽभर। येन वयं तवोतिभिर्जामीनुताप्यजामीञ्छत्रून् पृतनासु वंसाम॥८॥

भावार्थः-राजभिरेवं प्रयत्नो विधेयो येन मित्राणि शत्रवश्च विभक्ता भवेयुस्तथैवं बलं विधेयं येन शत्रवो विलीयेरन्॥८॥

पदार्थः-हे **(इन्द्र)** दुष्टों के बल नाशक! आप **(नः)** हम लोगों के लिये **(वृषणम्)** शत्रुओं के सामर्थ्य को रोकने वाली **(शुष्मम्)** सेना और **(धनस्पृतम्)** धन को पूरण करते जिससे उस **(शूशुवांसम्)** शुभगुणव्यापिनी **(सुदक्षम्)** उत्तम बल की चतुराई को **(आ)** सब ओर से **(भर)** धारण करिये **(येन)** जिससे हम लोग **(तव)** आपके **(ऊतिभिः)** रक्षण आदिकों से **(जामीन्)** सम्बन्धी बन्धु आदिकों का **(उत)** और **(अजामीन्)** असम्बन्धी दुष्ट **(शत्रून्)** शत्रुओं का **(पृतनासु)** मनुष्यों की सेनाओं में **(वंसाम)** विभाग करें॥८॥

भावार्थः-राजाओं को चाहिये कि ऐसा प्रयत्न करें जिससे मित्र और शत्रु पृथक्-पृथक् प्रतीत होवें और वैसी ही सेना रखनी चाहिये जिससे शत्रु नष्ट होवें॥८॥

पुनस्सर्वैर्जनैः किं कर्त्तव्यमित्याह॥

फिर सम्पूर्ण जनों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात्।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे॥९॥

आ। ते। शुष्मः। वृषभः। एतु। पश्चात्। आ। उत्तरात्। अधरात्। आ। पुरस्तात्। आ। विश्वतः। अभि। सम्। एतु। अर्वाङ्। इन्द्र। द्युम्नम्। स्वः।ऽवत्। धेहि। अस्मे इति॥९॥

पदार्थः-(**आ**) समन्तात् (**ते**) तव (**शुष्मः**) उत्तमबलः (**वृषभः**) बलिष्ठः (**एतु**) प्राप्नोतु (**पश्चात्**) (**आ**) (**उत्तरात्**) (**अधरात्**) (**आ**) (**पुरस्तात्**) (**आ**) (**विश्वतः**) सर्वतः (**अभि**) (**सम्**) (**एतु**) प्राप्नोतु (**अर्वाङ्**) योऽर्वागञ्चति (**इन्द्र**) परमैश्वर्यकारक (**द्युम्नम्**) प्रकाशमयं यशोधनं वा (**स्वर्वत्**) स्वर्बहुविधं सुखं विद्यते यस्मिंस्तत् (**धेहि**) (**अस्मे**) अस्मभ्यम्॥९॥

अन्वयः-हे इन्द्र! यथास्मे पश्चात् स्वर्वद् द्युम्नमेतूत्तरात् स्वर्वद् द्युम्नमैतु। अधरात् स्वर्वद् द्युम्नमैतु विश्वतो द्युम्नमाभ्येतु, अर्वाङ् स्वर्वद् द्युम्नं समेतु पुरस्तात् स्वर्वद् द्युम्नं समेतु तथा ते शुष्मो वृषभ ऐतु। त्वमस्मभ्यमेतद्धेहि॥९॥

भावार्थः-हे राजप्रजाजना यथा सर्वाभ्यो दिग्भ्यस्सर्वान्त्सुखकीर्ती प्राप्नुयातां तथा यत्नमातिष्ठत॥९॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य के करने वाले! जैसे (**अस्मे**) हम लोगों के लिये (**पश्चात्**) पीछे से (**स्वर्वत्**) बहुत प्रकार सुख विद्यमान जिसमें उस (**द्युम्नम्**) प्रकाशस्वरूप यश वा धन को (**एतु**) प्राप्त हूजिये और (**उत्तरात्**) बाईं ओर से बहुत प्रकार सुख जिसमें उस प्रकाशस्वरूप यश वा धन को (**आ**) सब ओर से प्राप्त हूजिये और (**अधरात्**) नीचे से बहुविध सुखवाले प्रकाशस्वरूप यश वा धन को (**आ**) सब ओर से प्राप्त हूजिये तथा (**विश्वतः**) सब ओर से प्रकाशस्वरूप यश वा धन के (**आ**) सब प्रकार से (**अभि, एतु**) सम्मुख हूजिये और (**अर्वाङ्**) नीचे से बहुत सुखवाले सम्पूर्ण प्रकाशस्वरूप यश वा धन को (**सम्**) उत्तम प्रकार प्राप्त हूजिये तथा (**पुरस्तात्**) आगे से बहुत प्रकार सुख जिसमें उस प्रकाशस्वरूप यश वा धन को अच्छे प्रकार प्राप्त हूजिये, वैसे (**ते**) आप का (**शुष्मः**) उत्तम बलयुक्त (**वृषभः**) बलिष्ठ (**आ**) सब ओर से प्राप्त होवे और आप हम लोगों के लिये इसको (**धेहि**) धारण करिये॥९॥

भावार्थः-हे राजा और प्रजाजनो! जैसे सब दिशाओं से सम्पूर्ण जनों को सुख और यश प्राप्त होवें, वैसे यत्न का अनुष्ठान करिये॥९॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः।

ईक्षे हि वस्व उभयस्य राजन् धा रत्नं महि स्थूरं बृहन्तम्॥ १०॥

नृऽवत्। ते। इन्द्र। नृऽतमाभिः। ऊती। वंसीमहि। वामम्। श्रोमतेभिः। ईक्षे। हि। वस्वः। उभयस्य। राजन्। धाः। रत्नम्। महि। स्थूरम्। बृहन्तम्॥ १०॥

पदार्थः-(नृवत्) नृभिस्तुल्यम् **(ते)** तव **(इन्द्र)** परमैश्वर्यप्रद **(नृतमाभिः)** अत्युत्तमा नरो विद्यन्ते यासु ताभिः **(ऊती)** रक्षादिभिः **(वंसीमहि)** विभजेम **(वामम्)** प्रशस्यं कर्म **(श्रोमतेभिः)** श्रावणीयैर्वचनैः **(ईक्षे)** पश्यामि **(हि)** यतः **(वस्वः)** धनस्य **(उभयस्य)** राजप्रजास्थस्य **(राजन्)** विद्याविनायाभ्यां प्रकाशमान **(धाः)** धेहि **(रत्नम्)** रमणीयं धनम् **(महि)** महत्पूजनीयम् **(स्थूरम्)** स्थिरम् **(बृहन्तम्)** महान्तम्॥ १०॥

अन्वयः-हे इन्द्र राजन्! यथा वयं ते नृतमाभिरूती नृवद्वामं वंसीमहि श्रोमतेभिरुभयस्य वस्व ईक्षे तथा त्वं बृहन्तम्महि स्थूरं रत्नं हि धाः॥ १०॥

भावार्थः-अत्रोपमालङ्कारः। राजप्रजाननै राज्ञा च प्रयत्नैः प्रशंसिता विद्या महती श्रीश्च सततं वर्धनीया॥ १०॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य के देने वाले **(राजन्)** विद्या और विनय से प्रकाशमान! जैसे हम लोग **(ते)** आपके **(नृतमाभिः)** अति उत्तम मनुष्य विद्यमान जिनमें उन **(ऊती)** रक्षण आदिकों से **(नृवत्)** मनुष्यों के तुल्य **(वामम्)** प्रशंसा करने योग्य कर्म का **(वंसीमहि)** विभाग करें और **(श्रोमतेभिः)** सुनाने योग्य वचनों से **(उभयस्य)** दोनों राजा और प्रजा में वर्त्तमान **(वस्वः)** धन का मैं **(ईक्षे)** दर्शन करता हूँ, वैसे आप **(बृहन्तम्)** बड़े **(महि)** आदर करने योग्य **(स्थूरम्)** स्थिर **(रत्नम्)** सुन्दर धन को **(हि)** ही **(धाः)** धारण करिये॥ १०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजजनों तथा प्रजाजनों और राजा को चाहिये कि प्रशस्तों से प्रशंसित विद्या और बहुत धन की निरन्तर वृद्धि करें॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्।

विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥ ११॥

मरुत्वन्तम्। वृषभम्। वावृधानम्। अकवऽअरिम्। दिव्यम्। शासम्। इन्द्रम्। विश्वऽसहम्। अवसे। नूतनाय। उग्रम्। सहःऽदाम्। इह। तम्। हुवेम॥ ११॥

पदार्थः-(मरुत्वन्तम्) प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्य तम् **(वृषभम्)** अत्युत्तमं पूर्णबलम् **(वावृधानम्)** अतिवर्धमानम् **(अकवारिम्)** न विद्यन्ते कवा शब्दायमाना अरयो यस्य तम् **(दिव्यम्)**

कमनीयम् (**शासम्**) पक्षपातं विहाय शासनकर्तारम् (**इन्द्रम्**) शरीरात्मराजश्रिया सुशुम्भमानम् (**विश्वासाहम्**) यो विश्वं समग्रं कष्टं सहते तम् (**अवसे**) रक्षणाद्याय (**नूतनाय**) नवीनाय (**उग्रम्**) तेजस्विनम् (**सहोदाम्**) बलप्रदम् (**हि**) अस्मिन् राज्यकर्मणि (**तम्**) (**हुवेम**) स्वीकुर्याम॥११॥

अन्वयः-हे मनुष्या! वयमिह यं नूतनायाऽवसे मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासं विश्वासाहमुग्रं सहोदामिन्द्रं हुवेम तं यूयमप्याह्वयत॥११॥

भावार्थः-राजप्रजाजनैः सर्वेषां रक्षणाय सर्वेभ्य उत्तमगुणकर्मस्वभावो राजा मन्तव्यः स च राजा सर्वेषां सम्मत्या सत्यं न्यायं सततं कुर्यात्॥११॥

पदार्थः-हे मनुष्यो! हम लोग (**इह**) इस राज्यकर्म में जिसको (**नूतनाय**) नवीन (**अवसे**) रक्षण आदि के लिये (**मरुत्वन्तम्**) श्रेष्ठ मनुष्य विद्यमान जिसके उस (**वृषभम्**) अतिश्रेष्ठ पूर्ण बल वाले (**वावृधानम्**) अत्यन्त वृद्धि को प्राप्त होते हुए (**अकवारिम्**) नहीं विद्यमान हैं शब्द करते हुए शत्रु जिसके उस (**दिव्यम्**) सुन्दर (**शासम्**) पक्षपात का त्याग करके शासन करने वाले (**विश्वासाहम्**) सम्पूर्ण कष्ट को सहने वाले (**उग्रम्**) तेजस्वी (**सहोदाम्**) बल देने वाले (**इन्द्रम्**) शरीर, आत्मा और राजशोभा से अत्यन्त शोभित का (**हुवेम**) हम स्वीकार करें (**तम्**) उसका आप लोग भी आह्वान कर स्वीकार कीजिये॥११॥

भावार्थः-राजजनों और प्रजाजनों को चाहिये कि सब के रक्षण के लिये सब से उत्तम गुण, कर्म और स्वभाव वाले राजा को स्वीकार करें और वह राजा सब की सम्मति से सत्य, न्याय का निरन्तर आचरण करे॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

जनं॑ वज्रि॒न् महि॑ चि॒न्मन्य॑मानमे॒भ्यो नृभ्यो॑ रन्धया॒ येष्वस्मि॑।
अधा॒ हि त्वा॑ पृथि॒व्यां शूर॑सातौ॒ हवा॑महे॒ तन॑ये॒ गोष्व॒प्सु॥१२॥

जन॑म्। व॒ज्रि॒न्। महि॑। चि॒त्। मन्य॑मानम्। ए॒भ्यः। नृऽभ्यः॑। र॒न्ध॒य॒। येषु॑। अस्मि॑। अध॑। हि। त्वा॒। पृ॒थि॒व्याम्। शूर॑ऽसातौ। हवा॑महे। तन॑ये। गोषु॑। अ॒प्ऽसु॥१२॥

पदार्थः-(**जनम्**) (**वज्रिन्**) प्रशस्तशस्त्रास्त्रधारिन् (**महि**) महान्तम् (**चित्**) अपि (**मन्यमानम्**) अभिमानिनम् (**एभ्यः**) (**नृभ्यः**) सुशिक्षितेभ्यो नायकेभ्यः (**रन्धया**) हिंसय। अत्र **संहितायामिति** दीर्घः। (**येषु**) (**अस्मि**) (**अधा**) अत्र **निपातस्य चेति** दीर्घः। (**हि**) यतः (**त्वा**) त्वाम् (**पृथिव्याम्**) विस्तीर्णायां भूमौ (**शूरसातौ**) शूराः सनन्ति विभजन्ति यस्मिन्त्संग्रामे तस्मिन् (**हवामहे**) आदद्महि (**तनये**) अपत्याय (**गोषु**) पृथिवीषु धनेषु वा (**अप्सु**) जलेषु प्राणेषु वा॥१२॥

अन्वयः-हे वज्रिन् राजंस्त्वमेभ्यो नृभ्यस्तं महि मन्यमानं जनं रन्धयाऽधा येषु शूरसातावहमस्मि तं रक्षा, हि पृथिव्यां गोष्वप्सु तनये यं त्वा हवामहे स त्वं चिदस्मान्त्सत्कुरु॥१२॥

भावार्थः-हे राजजना यो मिथ्याभिमानी सत्पुरुषान् पीडयेत्तं दण्डयत, युद्धविद्यया सर्वेषां रक्षणं विधत्त यतो भूमौ युष्माकं प्रशंसा प्रसिद्धा भवेत्॥१२॥

पदार्थः-हे **(वज्रिन्)** अच्छे शस्त्र और अस्त्र के धारण करने वाले राजन्! आप **(एभ्यः)** इन **(नृभ्यः)** उत्तम प्रकार शिक्षित अग्रणी मनुष्यों के लिये उस **(महि)** महान् **(मन्यमानम्)** अभिमान करने वाले **(जनम्)** मनुष्य का **(रन्धया)** नाश करिये और **(अधा)** इसके अनन्तर **(येषु)** जिनके निमित्त **(शूरसातौ)** शूरवीर विभक्त होते हैं जिस संग्राम में उसमें **(अस्मि)** हूँ उसकी रक्षा कीजिये **(हि)** जिससे **(पृथिव्याम्)** विस्तीर्ण भूमि में **(गोषु)** पृथिवियों वा धनों में और **(अप्सु)** जलों वा प्राणों में **(तनये)** सन्तान के लिये जिन **(त्वा)** आपको **(हवामहे)** स्वीकार करते हैं, वह आप **(चित्)** भी हम लोगों का सत्कार कीजिये॥१२॥

भावार्थः-हे राजसम्बन्धी जनो! जो मिथ्या अभिमान करने वाला जन श्रेष्ठ पुरुषों को पीड़ा देवे, उसको दण्ड दीजिये और युद्धविद्या से सम्पूर्ण जनों का रक्षण करिये, जिससे भूमि में आप लोगों की प्रशंसा प्रसिद्ध होवे॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

व॒यं त॑ ए॒भिः पु॑रुहूत स॒ख्यैः शत्रो॑:शत्रो॒रुत्त॑र॒ इत्स्या॑म।

घ्नन्तो॑ वृ॒त्राण्यु॒भया॑नि शूर रा॒या म॑देम बृ॒हता॒ त्वोता॑:॥१३॥८॥

व॒यम्। ते॒। ए॒भिः। पु॒रु॒ऽहू॒त॒। स॒ख्यैः। शत्रोः॑ऽशत्रोः। उत्ऽत॑रे। इत्। स्या॒म॒। घ्नन्तः॑। वृ॒त्राणि॑। उ॒भया॑नि। शू॒र॒। रा॒या। म॒दे॒म॒। बृ॒हता॑। त्वाऽऊ॑ताः॥१३॥८॥

पदार्थः-**(वयम्)** **(ते)** तव **(एभिः)** वर्तमानैः पूर्वोक्तैरुत्तरप्रतिपादितैः **(पुरुहूत)** बहुभिः प्रशंसित **(सख्यैः)** मित्रकर्मभिः **(शत्रोःशत्रोः)** **(उत्तरे)** विजयानन्तरसमये **(इत्)** एव **(स्याम)** **(घ्नन्तः)** **(वृत्राणि)** धनानि **(उभयानि)** राजप्रजास्थानि **(शूर)** **(राया)** राज्यश्रिया **(मदेम)** आनन्देम **(बृहता)** महता **(त्वोताः)** त्वया पालिताः॥१३॥

अन्वयः-हे पुरुहूत शूर राजन्! वयं त एभिः सख्यैः शत्रोःशत्रोः सेना घ्नन्त उत्तरे स्यामोभयानि वृत्राणि लब्ध्वा तव बृहता राया त्वोताः सन्त इन्मदेम॥१३॥

भावार्थः-यदि राजा राजप्रजाजनाश्च सुहृद्वत् स्युस्तर्हि सर्वाञ्छत्रून् विजित्य महत्या राजश्रिया प्रकाशेरन्निति॥१३॥

अत्रेन्द्रराजप्रजाजनकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनविंशं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः–हे **(पुरुहूत)** बहुतों से प्रशंसित **(शूर)** वीर राजन्! **(वयम्)** हम लोग **(ते)** आपके **(एभिः)** इन वर्त्तमान, पहिले कहे गये और उत्तरों से प्रतिपादित **(सख्यैः)** मित्र के कर्मों से **(शत्रोःशत्रोः)** शत्रु–शत्रु की सेनाओं का **(घ्नन्तः)** नाश करते हुए **(उत्तरे)** विजय के अनन्तर समय में **(स्याम)** प्रकट होवें और **(उभयानि)** राजा और प्रजाजन में वर्त्तमान **(वृत्राणि)** धनों को प्राप्त होकर आपकी **(बृहता)** बड़ी **(राया)** राज्यलक्ष्मी से तथा **(त्वोताः)** आप से पालना किये हुए **(इत्)** ही **(मदेम)** आनन्द को प्राप्त होवें॥१३॥

भावार्थः-जो राजा और राजप्रजाजन मित्र के सदृश होवें तो सम्पूर्ण शत्रुओं को जीत कर बड़ी राज्यलक्ष्मी से प्रकाशित होवें॥१३॥

इस सूक्त में इन्द्र, राजा और प्रजाजनों के कृत्य वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उन्नीसवाँ सूक्त और आठवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ त्रयोदशर्चस्य विंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, १०, १३ स्वराट्पङ्क्तिः। २, ३,७, १२ पङ्क्तिः। ४, ६ भुगिक्पङ्क्तिः। ११ निचृत्पङ्क्तिः। पञ्चमः स्वरः। ५, ८,९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः किमेष्टव्यमित्याह॥

अब तेरह ऋचावाले बीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब मनुष्यों को किसकी इच्छा करनी चाहिये, इस विषय को कहते हैं॥

द्यौर्न य इ॑न्द्रा॒भि भूमा॒र्यस्त॒स्थौ र॒यिः शव॑सा पृ॒त्सु जना॑न्।
तं नः॑ स॒हस्र॑भरमुर्वरा॒सां द॒द्धि सू॑नो स॒हसो॑ वृत्र॒तुर॑म्॥ १॥

द्यौः। न। यः। इ॒न्द्र॒। अ॒भि। भूम॑। अ॒र्यः। त॒स्थौ। र॒यिः। शव॑सा। पृ॒त्ऽसु। जना॑न्। तम्। नः॒। स॒हस्र॑ऽभरम्। उ॒र्व॒रा॒ऽसाम्। द॒द्धि। सू॒नो॒ इति॑। स॒ह॒सः॒। वृ॒त्र॒ऽतुर॑म्॥ १॥

पदार्थः-(द्यौः) विद्युत् सूर्यो वा **(न)** इव **(यः)** **(इन्द्र)** परमपूजित धनयुक्त **(अभि)** आभिमुख्ये **(भूम)** भवेम **(अर्यः)** स्वामी **(तस्थौ)** तिष्ठेत् **(रयिः)** धनम् **(शवसा)** बलेन **(पृत्सु)** स-ामेषु **(जनान्)** **(तम्)** **(नः)** अस्मभ्यम् **(सहस्रभरम्)** यः सहस्रमसङ्ख्यं बिभर्त्ति तम् **(उर्वरासाम्)** बहुश्रेष्ठानां भूमीनाम् **(दद्धि)** देहि **(सूनो)** सत्पुत्र **(सहसः)** बलात् **(वृत्रतुरम्)** वृत्रानिव शत्रूंस्तुर्वति हिनस्ति येन तम्॥ १॥

अन्वयः-हे सहसः सूनो इन्द्र! यो द्यौर्न रयिरस्त्यस्यार्यः शवसा पृत्सु जनानभि तस्थौ तं सहस्रभरं वृत्रतुरमुर्वरासां मध्ये श्रेष्ठं विजयं नो दद्धि येन वयं श्रीमन्तो भूम॥ १॥

भावार्थः-अत्रोपमालङ्कारः ये मनुष्या विद्युद्वत्पराक्रमिणोऽर्कवद्दीप्तिमन्तः स-ामेषु साहसिकाः स्युस्ते विजयवन्तो भवेयुः॥ १॥

पदार्थः-हे **(सहसः)** बल से **(सूनो)** श्रेष्ठ पुत्र **(इन्द्र)** अत्यन्त श्रेष्ठ धन से युक्त! **(यः)** जो **(द्यौः)** बिजुली वा सूर्य के **(न)** समान प्रकाशित **(रयिः)** धन है इस का **(अर्यः)** स्वामी **(शवसा)** बल से **(पृत्सु)** सङ्ग्रामों में **(जनान्)** मनुष्यों के प्रति **(अभि)** सम्मुख **(तस्थौ)** वर्त्तमान होवे **(तम्)** उस **(सहस्रभरम्)** असंख्य को धारण करने वाले **(वृत्रतुरम्)** जैसे मेघों को, वैसे शत्रुओं को नाश करता है जिससे उस तथा **(उर्वरासाम्)** बहुत श्रेष्ठ भूमियों में श्रेष्ठ विजय को **(नः)** हम लोगों के लिये **(दद्धि)** दीजिये जिससे हम लोग लक्ष्मीवान् **(भूम)** होवें॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य बिजुली के सदृश पराक्रमी और सूर्य के सदृश प्रतापयुक्त हुए स-ामों में साहसिक होवें, वे विजयवान् होवें॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

दि॒वो न तुभ्य॒मन्वि॑न्द्र स॒त्रासू॒र्यं॑ दे॒वेभि॑र्धायि॒ विश्व॑म्।

अहिं॒ यद्वृ॒त्रम॒पो व॑व्रि॒वांसं॒ हन्नृ॑जीषि॒न् विष्णु॑ना सचा॒नः॥ २॥

दि॒वः। न। तुभ्य॑म्। अनु॑। इ॒न्द्र॒। स॒त्रा। अ॒सु॒र्य॑म्। दे॒वेभिः॑। धा॒यि॒। विश्व॑म्। अहि॑म्। यत्। वृ॒त्रम्। अ॒पः। व॒व्रि॒ऽवांस॑म्। हन्। ऋ॒जी॒षि॒न्। विष्णु॑ना। स॒चा॒नः॥ २॥

पदार्थः-(दिवः) कामयमानाः **(न)** इव **(तुभ्यम्) (अनु) (इन्द्र)** राजन् **(सत्रा)** सत्येन **(असुर्यम्)** असुराणां मूढानां पापिनामिदमैश्वर्यम् **(देवेभिः) (धायि)** ध्रियते **(विश्वम्)** समग्रम् **(अहिम्)** मेघम् **(यत्)** यम् **(वृत्रम्)** आच्छादकम् **(अपः)** जलानि **(वव्रिवांसम्) (हन्)** हन्ति **(ऋजीषिन्)** ऋजुधर्मयुक्त **(विष्णुना)** व्यापकेन जगदीश्वरेण विद्युता वा **(सचानः)** समवेतः॥ २॥

अन्वयः-हे ऋजीषिन्निन्द्र! यथा सूर्य्यो विष्णुना सचानो यद्यमपो वव्रिवांसं वृत्रमहिं हंस्तथा देवेभिस्तुभ्यं सत्रा दिवो न विश्वमसुर्यमनु धायि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्य्योऽष्टसु मासेषु जलरसाननुकर्ष्य चातुर्मास्ये वर्षयति तथैव राजाऽष्टसु मासेषु करान् गृहीत्वाऽभयवृष्टिं कृत्वा प्रजां पालयेत्॥ २॥

पदार्थः-हे **(ऋजीषिन्)** सरल धर्म से युक्त **(इन्द्र)** राजन्! जैसे सूर्य **(विष्णुना)** व्यापक जगदीश्वर वा बिजुली से **(सचानः)** मिलने वाला **(यत्)** जिसको **(अपः)** जलों के **(वव्रिवांसम्)** विभाग करते हुए **(वृत्रम्)** आच्छादन करने वाले **(अहिम्)** मेघ को **(हन्)** नाश करता है, वैसे **(देवेभिः)** विद्वानों से **(तुभ्यम्)** आपके लिये **(सत्रा)** सत्य से **(दिवः)** कामना करते हुए **(न)** जैसे वैसे **(विश्वम्)** सम्पूर्ण **(असुर्यम्)** मूर्ख पापी जनों का ऐश्वर्य **(अनु, धायि)** पीछे धारण किया जाता है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य आठ महीने में जल के रसों को आकर्षण के द्वारा हरण करके चातुर्मास्य में वर्षाता है, वैसे ही राजा आठ महीने करों को ग्रहण कर अभय की वृष्टि करके प्रजा का पालन करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तूर्व॒न्नोजी॑यान् त॒वस॒स्तवी॑यान् कृ॒तब्र॑ह्मेन्द्रो॑ वृ॒द्धम॑हाः।

राजा॑भव॒न् मधु॑नः सो॒म्यस्य॒ विश्वा॑सां॒ यत्पु॒रां द॒र्तुमाव॑त्॥ ३॥

तूर्व॑न्। ओजी॑यान्। त॒वसः॑। तवी॑यान्। कृ॒तऽब्र॑ह्मा। इन्द्रः॑। वृ॒द्धऽम॑हाः। राजा॑। अ॒भ॒व॒त्। मधु॑नः। सो॒म्यस्य॑। विश्वा॑साम्। यत्। पु॒राम्। द॒र्तुम्। आव॑त्॥ ३॥

पदार्थः-(तूर्वन्) हिंसन् **(ओजीयान्)** अतिशयेन पराक्रमी **(तवसः)** बलस्य **(तवीयान्)** अतिशयेन प्रशंसितः **(कृतब्रह्मा)** कृतं ब्रह्म धनमन्नं वा येन सः **(इन्द्रः)** ऐश्वर्यवर्द्धकः **(वृद्धमहाः)** वृद्धा महान्तः सहाया यस्य सः **(राजा)** प्रकाशमानः **(अभवत्)** भवेत् **(मधुनः)** मधुरादिगुणयुक्तस्य **(सोम्यस्य)** सोमेषु

रसादिषु भवस्य **(विश्वासाम्)** सर्वासाम् **(यत्)** **(पुराम्)** नगरीणाम् **(दर्त्नुम्)** विदारकम् **(आवत्)** रक्षेत्॥३॥

अन्वयः-हे मनुष्या! यद्यः शत्रूँस्तूर्वन्नोजीयांस्तवसस्तवीयान् कृतब्रह्मा वृद्धमहा इन्द्रो राजाऽभवत् सोम्यस्य मधुनो विश्वासां पुरां दर्त्नुमावत् तमेव राजानं कुरुध्वम्॥३॥

भावार्थः-हे मनुष्या! यः पराक्रमी बलिनां बली विदुषां विद्वान् वृद्धानां वृद्धो विजयमानानां भृत्यानां सत्कर्त्ता स्यात्तमेव राज्येऽभिषिक्तं कृत्वा सुखिनो भवत॥३॥

पदार्थः-हे मनुष्यो! **(यत्)** जो शत्रुओं का **(तूर्वन्)** नाश करता हुआ **(ओजीयान्)** अतिशय पराक्रमयुक्त जन **(तवसः)** बल का **(तवीयान्)** अत्यन्त प्रशंसित **(कृतब्रह्मा)** किया धन वा अन्न जिसने वह **(वृद्धमहाः)** बड़े सहायक जिसके ऐसा **(इन्द्रः)** ऐश्वर्य का बढ़ाने वाला **(राजा)** प्रकाशमान राजा **(अभवत्)** होवे और **(सोम्यस्य)** रस आदिकों में हुए **(मधुनः)** मधुर आदि गुणों से युक्त के और **(विश्वासाम्)** सम्पूर्ण **(पुराम्)** नगरियों के **(दर्त्नुम्)** नाश करने वाले की **(आवत्)** रक्षा करे, उसी को राजा करिये॥३॥

भावार्थः-हे मनुष्यो! जो पराक्रमी, बली जनों में बली, विद्वानों में विद्वान्, वृद्ध जनों में वृद्ध और जीतते हुए भृत्यों का सत्कार करने वाला होवे, उसी का राज्य में अभिषिक्त करके सुखी हूजिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

शतैरपद्रन् पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ।

वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत् किं चन प्र॥४॥

शतैः। अपद्रन्। पणयः। इन्द्र। अत्र। दशऽओणये। कवये। अर्कऽसातौ। वधैः। शुष्णस्य। अशुषस्य। मायाः। पित्वः। न। अरिरेचीत्। किम्। चन। प्र॥४॥

पदार्थः-**(शतैः)** शतसङ्ख्याकैरसंख्यैर्वा **(अपद्रन्)** अपद्रवन्ति **(पणयः)** व्यवहारज्ञाः **(इन्द्र)** अन्नदाता राजन् **(अत्र)** अस्मिन् राजव्यवहारे **(दशोणये)** दशोनयः परिहाणानि यस्मात्तस्मै **(कवये)** विपश्चिते **(अर्कसातौ)** अन्नादिविभागे। **अर्क इत्यन्ननाम।** (निघं०२.७) **(वधैः)** हननैः **(शुष्णस्य)** बलिष्ठस्य **(अशुषस्य)** शोषणरहितस्य **(मायाः)** प्रज्ञाः **(पित्वः)** अन्नादिकम् **(न)** **(अरिरेचीत्)** रिणक्ति **(किम्)** **(चन)** **(प्र)**॥४॥

अन्वयः-हे इन्द्र! त्वं ये पणयश्शतैर्वधैरत्रापद्रन्नर्कसातौ दशोणये कवये या अशुषस्य शुष्णस्य मायाः पित्वः किञ्चन न प्रारिरेचीत् ताः सत्कुर्याः॥४॥

भावार्थः-हे मनुष्या! ये धर्मपथं विहायोत्पथं चलन्ति तान् राजा नित्यं दण्डयेत् ये च दशेन्द्रियैरधर्मं विहाय धर्ममाचरन्ति तान् सततं सत्कुर्यात्॥४॥

पदार्थः-हे **(इन्द्र)** देनेवाले राजन्! आप जो **(पणयः)** व्यवहारों के जाननेवाले **(शतैः)** सौ सङ्ख्या से परिमित वा असङ्ख्य **(वधैः)** वधों से **(अत्र)** इस राजव्यवहार में **(अपद्रन्)** नहीं द्रवित होते हैं और **(अर्कसातौ)** अन्न आदि के विभाग में **(दशोणये)** दश न्यून जिससे उस **(कवये)** विद्वान् के लिये **(अशुषस्य)** शोषण से रहित **(शुष्णस्य)** बलिष्ठ की **(मायाः)** बुद्धियों को **(पित्वः)** अन्न आदि **(किम्, चन)** कुछ भी **(न)** नहीं **(प्र, अरिरेचीत्)** अच्छे प्रकार अलग करता है, उनका सत्कार करिये अर्थात् प्रशंसा करिये॥४॥

भावार्थः-हे मनुष्यो! जो धर्ममार्ग का त्याग करके उन्मार्ग में चलते हैं, उनको राजा नित्य दण्ड देवे और दो दश इन्द्रियों से अधर्म का त्याग करके धर्म का आचरण करते हैं, उन का निरन्तर सत्कार करे॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

म॒हो द्रु॒हो अप॑ वि॒श्वायु॑ धायि॒ वज्र॑स्य॒ यत्पत॑ने॒ पादि॒ शुष्ण॑ः।
उ॒रु ष स॒रथं॑ सार॑थये क॒रिन्द्रः॒ कुत्सा॑य॒ सूर्य॑स्य सा॒तौ॥५॥९॥

म॒हः। द्रु॒हः। अप॑। वि॒श्वऽआ॑यु। धा॒यि॒। वज्र॑स्य। यत्। पत॑ने। पादि॑। शुष्ण॑ः। उ॒रु। सः। स॒ऽरथ॑म्। सार॑थये। क॒ः। इन्द्रः॑। कुत्सा॑य। सूर्य॑स्य। सा॒तौ॥५॥

पदार्थः-**(महः)** महत् **(द्रुहः)** द्रोग्धॄन् **(अप)** **(विश्वायु)** सर्वं जीवनम् **(धायि)** **(वज्रस्य)** शस्त्रास्त्रविशेषस्य **(यत्)** **(पतने)** **(पादि)** पाद्येत **(शुष्णः)** बलिष्ठस्य **(उरु)** बहु **(सः)** **(सरथम्)** रथेन सह वर्त्तमानम् **(सारथये)** रथचालकाय **(कः)** कुर्यात् **(इन्द्रः)** शस्त्रविदारक सेनेशः **(कुत्साय)** वज्रप्रहाराय। **कुत्स इति वज्रनाम।** (निघं०२.२०) **(सूर्य्यस्य)** सवितुः **(सातौ)** संविभागे॥५॥

अन्वयः-हे राजन्! त्वया वज्रस्य पतने यो द्रुहोऽप पादि येन महो विश्वायु धायि यद्य इन्द्रः सारथये सरथं सूर्यस्य सातौ कुत्सायोरु कः स शुष्णः सत्कर्त्तव्यः॥५॥

भावार्थः-राज्ञा द्रोहादिदोषान्निवार्य ब्रह्मचर्यादिना सर्वान् चिरायुषः सम्पाद्य रथादीन् सेनाङ्गान्त्सूर्यवत् प्रकाशितान् कृत्वा सत्यासत्ययोर्विभागेन प्रजाः पालयितव्याः॥५॥

पदार्थः-हे राजन्! आप से **(वज्रस्य)** शस्त्र और अस्त्र विशेष के **(पतने)** गिरने में जो **(द्रुहः)** द्रोह करने वालों को **(अप, पादि)** दूर करे जिससे **(महः)** अत्यन्त **(विश्वायु)** सम्पूर्ण जीवन **(धायि)** धारण किया जाये और **(यत्)** जो **(इन्द्रः)** शत्रुओं का नाशक सेना का स्वामी **(सारथये)** वाहन चलाने वाले के लिये **(सरथम्)** वाहन के सहित वर्त्तमान को **(सूर्यस्य)** सूर्य के **(सातौ)** उत्तम प्रकार विभाग में **(कुत्साय)** वज्र के प्रहार के लिये **(उरु)** बहुत **(कः)** करे **(सः)** वह **(शुष्णः)** बलिष्ठ का सम्बन्धी सत्कार करने योग्य है॥५॥

भावार्थः-राजा को चाहिये कि द्रोह आदि दोषों का त्याग करके ब्रह्मचर्य आदि से सम्पूर्ण जनों को अधिक अवस्था वाले करके, रथ आदि सेना के अङ्गों को सूर्य के तुल्य प्रकाशित करके, सत्य और असत्य के विभाग से प्रजाओं का पालन करे॥५॥

पुना राज्ञा किं निषेधनीयमित्याह॥

फिर राजा को किसका निषेध करना चाहिये, इस विषय को कहते हैं॥

प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन्।
प्रावन्नमीं साय्यं ससन्तं पृणग् राया समिषा सं स्वस्ति॥६॥

प्र। श्येनः। न। मदिरम्। अंशुम्। अस्मै। शिरः। दासस्य। नमुचेः। मथायन्। प्र। आवत्। नमीम्। साय्यम्। ससन्तम्। पृणक्। राया। सम्। इषा। सम्। स्वस्ति॥६॥

पदार्थः-(**प्र**) (**श्येनः**) इव (**मदिरम्**) मादकं द्रव्यम् (**अंशुम्**) वैद्यकविद्यारीत्या विभक्तम् (**अस्मै**) (**शिरः**) मस्तकम् (**दासस्य**) सेवकस्य (**नमुचेः**) यो नमुञ्चति तस्य (**मथायन्**) (**प्र**) (**आवत्**) रक्षेत् (**नमीम्**) नम्रम् (**साय्यम्**) कर्मान्तकारिणम् (**ससन्तम्**) शयानम् (**पृणक्**) पृणक्ति (**राया**) धनेन (**सम्**) (**इषा**) अन्नादिना (**सम्**) (**स्वस्ति**) सुखम्॥६॥

अन्वयः-यो राजा मदिरमंशुं सेवमानस्य नमुचेर्दासस्य शिरः श्येनो न प्र मथायन्नस्मै कठिनं शिष्यन्नमीं साय्यं ससन्तं कृत्वा प्राऽऽवत्। राया स्वस्ति सम्पृणगिषा स्वस्ति सम्पृणक् स सम्राड् भवितुमर्हेत्॥६॥

भावार्थः-अत्रोपमालङ्कारः। राज्ञामिदमुचितं कर्मास्ति ये मादकद्रव्यं सेवेरँस्तान् भृशं दण्डयित्वा यथायोग्यसत्कारेणऽप्रमादिनः सत्कुर्य्युस्ते साम्राज्यं कर्तुमर्हेयुः॥६॥

पदार्थः-जो राजा (**मदिरम्**) मादक द्रव्य और (**अंशुम्**) वैद्यकविद्या की रीति से विभाग किये गये का सेवन करते हुए और (**नमुचेः**) नहीं त्याग करने वाले (**दासस्य**) सेवक के (**शिरः**) मस्तक को (**श्येनः**) बाज पक्षी (**न**) जैसे वैसे (**प्र, मथायन्**) अत्यन्त मथन करता हुआ (**अस्मै**) इसके लिये कठिन शिष्य को (**नमीम्**) नम्र (**साय्यम्**) कर्म के अन्त करने वाले को (**ससन्तम्**) सोते हुए को करके (**प्र, आवत्**) रक्षा करे और (**राया**) धन से (**स्वस्ति**) सुख को (**सम्, पृणक्**) उत्तम प्रकार पूर्ण करता है तथा (**इषा**) अन्न आदि से सुख को (**सम्**) अच्छे प्रकार पूर्ण करता है, वह सम्राट् होने के योग्य होवे॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजाओं का यह उचित कर्म है कि जो मादक द्रव्य का सेवन करें उनको अत्यन्त दण्ड देके, यथायोग्य सत्कार से अप्रमादियों का सत्कार करें, वे साम्राज्य करने को योग्य होवें॥६॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

वि पिप्रोरहिमायस्य दृळहाः पुरो वज्रिञ्छवसा न दर्दः।

सुदा॑मन् तद् रेक्णो॑ अप्रमृ॒ष्यमृ॒जिश्वा॑ने दा॒त्रं दा॒शुषे॑ दाः॥७॥

वि। पिप्रो॑:। अहि॑ऽमायस्य। दृ॒ळ्हाः। पुर॑:। व॒ज्रिन्। शवसा। न। दु॒र्दरि॑ति॑ दर्दः। सुऽदा॑मन्। तत्। रेक्ण॑:। अ॒प्र॒ऽमृ॒ष्यम्। ऋ॒जिश्वा॑ने। दा॒त्रम्। दा॒शुषे॑। दा॒:॥७॥

पदार्थः-(वि) (पिप्रोः) व्यापकस्य **(अहिमायस्य)** अहेर्मेघस्य मायाच्छादनमिव कापट्यं यस्य तस्य **(दृळ्हाः) (पुरः)** नगरीः **(वज्रिन्)** शस्त्रास्त्रभृत् **(शवसा)** बलेन **(न)** निषेधे **(दर्दः)** विदारयेः **(सुदामन्)** सुष्ठु दातः **(तत्) (रेक्णः)** धनम् **(अप्रमृष्यम्)** अप्रसह्यम् **(ऋजिश्वने)** ऋज्वादिगुणवर्धकाय **(दात्रम्)** दानम् **(दाशुषे)** दातुं योग्याय **(दाः)** देहि॥७॥

अन्वयः-हे वज्रिन्त्सुदामन् राजँस्त्वमहिमायस्य पिप्रोर्दृळ्हाः पुरः शवसा न वि दर्दः। यदप्रमृष्यं दात्रमृजिश्वने दाशुषे दास्तद्रेक्णोऽस्मभ्यमपि देहि॥७॥

भावार्थः-राज्ञा छलादिकं विहाय स्वकीयानि नगराणि दृढानि निर्माय कदाचिच्छेदनं नैव कार्यं सुपात्राय दानं देयं कुपात्रश्च तिरस्करणीयः॥७॥

पदार्थः-हे **(वज्रिन्)** शस्त्र और अस्त्रों को धारण करनेवाले **(सुदामन्)** उत्तम प्रकार से दाता राजन्! आप **(अहिमायस्य)** मेघ का ढाँप लेना जैसे वैसे कपटता जिसकी उस **(पिप्रोः)** व्यापक की **(दृळ्हाः)** दृढ़ **(पुरः)** नगरियों को **(शवसा)** बल से **(न)** नहीं **(वि, दर्दः)** विशेष नष्ट कीजिये और जो **(अप्रमृष्यम्)** नहीं सहने योग्य **(दात्रम्)** दान को **(ऋजिश्वने)** सरलता आदि गुणों के बढ़ानेवाले **(दाशुषे)** दान देने योग्य पुरुष के लिये **(दाः)** दीजिये **(तत्)** उस **(रेक्णः)** धनदान को हम लोगों के लिये भी दीजिये॥७॥

भावार्थः-राजा को चाहिये कि छल आदि का त्याग कर और अपने नगरों को दृढ़ करके कभी छेदन न करे और सुपात्र के लिये दान दे और कुपात्र का तिरस्कार करे॥७॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

स वे॑त॒सुं दश॑मायं॒ दशो॑णिं तूतु॒जि॒मिन्द्रः॑ स्वभि॒ष्टिसु॑म्नः।

आ तु॒ग्रं शश्वदि॒भं द्योत॑नाय मा॒तुर्न सी॒मपु॑ सृजा दृ॒यध्यै॑॥८॥

सः। वे॒त॒सुम्। दश॑ऽमायम्। दश॑ऽओणिम्। तूतु॑जिम्। इन्द्रः॑। स्व॒भि॒ष्टिऽसु॑म्नः। आ। तु॒ग्र॑म्। शश्व॑त्। इ॒भ॑म्। द्योत॑नाय। मा॒तुः। न। सी॒म्। उप॑। सृ॒ज॒। दृ॒यध्यै॑॥८॥

पदार्थः-(सः) व्यापनशीलम् **(दशमायम्)** दशङ्गुलय इव माया मानं यस्य तम् **(दशोणिम्)** दशधोणिः परिहाणं यस्य तम् **(तूतुजिम्)** बलवन्तम् **(इन्द्रः)** परमैश्वर्यो राजा **(स्वभिष्टिसुम्नः)** सुष्ठु अभिष्टि सुम्नं सुखं यस्य यस्माद्वा **(आ) (तुग्रम्)** आदातारम् **(शश्वत्)** निरन्तरम् **(इभम्)** हस्तिनमिव

(द्योतनाय) प्रकाशनाय **(मातुः)** जनन्याः **(न)** इव **(सीम्)** सर्वतः **(उप)** **(सृजा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(इयध्यै)** एतुं प्रापुम्॥८॥

अन्वयः-हे राजन्! यः स्वभिष्टुसुम्न इन्द्रस्स त्वं द्योतनाय वेतसुं दशमायं दशोणिं तूतुजिं तुग्रमिभमियध्यै मातुर्न सीं शश्वदोप सृजा॥८॥

भावार्थः-स एव राजा श्रीमान् भवेद्यो दशोन्द्रियैरुत्तमं कर्मविज्ञानं वर्धयित्वाऽभीष्टसुखं सततमुन्नयेन् मातृवत्प्रजाः पालयेत्॥८॥

पदार्थः-हे राजन्! जो **(स्वभिष्टिसुम्नः)** उत्तम प्रकार अभीष्ट सुखवाले **(इन्द्रः)** अत्यन्त ऐश्वर्ययुक्त राजा **(सः)** वह आप **(द्योतनाय)** प्रकाश के लिये **(वेतसुम्)** व्यापनशील **(दशमायम्)** दश अंगुलियों के तुल्य प्रमाण जिसका उस **(दशोणिम्)** दश प्रकार से परित्याग जिसका और **(तूतुजिम्)** बल से युक्त **(तुग्रम्)** ग्रहण करने वाले **(इभम्)** हाथी को **(इयध्यै)** प्राप्त होने के लिये **(मातुः)** माता से **(नः)** जैसे वैसे **(सीम्)** सब ओर से **(शश्वत्)** निरन्तर **(आ, उप, सृजा)** समीप प्रकट कीजिये॥८॥

भावार्थः-वही राजा धनवान् होवे कि जो दश इन्द्रियों से उत्तम कर्म और विज्ञान को बढ़ा के अभीष्ट सुख की निरन्तर उन्नति करे और माता के सदृश प्रजाओं का पालन करे॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ।

तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम्॥९॥

सः। ईम्। स्पृधः। वनते। अप्रतिऽइतः। बिभ्रत्। वज्रम्। वृत्रऽहनम्। गभस्तौ। तिष्ठत्। हरी इति। अधि। अस्ताऽइव। गर्ते। वचःऽयुजा। वहतः। इन्द्रम्। ऋष्वम्॥९॥

पदार्थः-**(सः)** **(ईम्)** जलम् **(स्पृधः)** स्पर्द्धन्ते येषु तान् **(वनते)** सम्भजति **(अप्रतीतः)** शत्रुभिरज्ञातः **(बिभ्रत्)** धरन् **(वज्रम्)** **(वृत्रहणम्)** येन वृत्रं हन्ति तत् **(गभस्तौ)** किरणे **(तिष्ठत्)** तिष्ठति **(हरी)** अश्वाविव धारणाकर्षणे **(अधि)** **(अस्तेव)** प्रेरकः सारथिरिव **(गर्ते)** गृहे। **गर्त इति गृहनाम।** (निघं०३.४) **(वचोयुजा)** यौ वचसा युङ्क्तस्तौ **(वहतः)** **(इन्द्रम्)** विद्युतमिव राजानम् **(ऋष्वम्)** महान्तम्॥९॥

अन्वयः-स इन्द्रो वृत्रहणं वज्रं गभस्तौ सूर्य इव बिभ्रदप्रतीतः स्पृध ईं वनते हरी अस्तेव गर्तेऽधि तिष्ठत् तथा त्वं यौ वचोयुजा ऋष्वमिन्द्रं वहतस्तौ यानेषु युङ्क्ष्व॥९॥

भावार्थः-राजा सदैव स्वमन्त्रं गोपयेद् यदा कार्यं सिद्धेत् तदैव जना प्रसिद्धं जानीयुः शस्त्राणि धृत्वा सेनाः सुशिक्ष्य महदैश्वर्यं प्राप्नुयात्॥९॥

पदार्थः-(सः) वह प्रताप से युक्त राजा **(वृत्रहणम्)** जिससे मेघ का नाश करता है उस **(वज्रम्)** वज्र को **(गभस्तौ)** किरण में सूर्य जैसे **(बिभ्रत्)** धारण करता हुआ **(अप्रतीतः)** शत्रुओं से नहीं जाना गया **(स्पृधः)** स्पर्द्धा करते हैं जिनमें उनका और **(ईम्)** जल का **(वनते)** सेवन करता है और **(हरी)** घोड़े जैसे धारण और आकर्षण को, वैसे वा **(अस्तेव)** प्रेरणा करने वाला सारथि जैसे वैसे **(गर्ते)** गृह में **(अधि, तिष्ठत्)** स्थित होता है, वैसे आप जो **(वचोयुजा)** वचन से युक्त करते वे दोनों **(ऋष्वम्)** बड़े **(इन्द्रम्)** बिजुली के सदृश राजा को **(वहतः)** पहुँचाते हैं, उनको वाहनों में युक्त करिये॥९॥

भावार्थः-राजा सदा ही अपने विचार को छिपावे, जब कार्य सिद्ध होवे तभी लोग प्रकट जानें और शस्त्रों को धारण कर सेनाओं को उत्तम प्रकार शिक्षा देकर बड़े ऐश्वर्य को प्राप्त होवे॥९॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः।
सप्त यत्पुरः शर्म शारदीर्दर्द्धन् दासीः पुरुकुत्साय शिक्षन्॥ १०॥

सनेम। ते। अवसा। नव्यः। इन्द्र। प्र। पूरवः। स्तवन्ते। एना। यज्ञैः। सप्त। यत्। पुरः। शर्म। शारदीः। दर्त्। हन्। दासीः। पुरुऽकुत्साय। शिक्षन्॥ १०॥

पदार्थः-(सनेम) विभजेम **(ते)** तव **(अवसा)** रक्षणादिना **(नव्यः)** नवीनेषु भवः **(इन्द्र)** परमैश्वर्यसुखप्रद **(प्र)** **(पूरवः)** मनुष्याः **(स्तवन्ते)** **(एना)** एनेन **(यज्ञैः)** सद्व्यवहारमयैः **(सप्त)** **(यत्)** यः **(पुरः)** नगरीः **(शर्म)** गृहम् **(शारदीः)** शरदि भवाः **(दर्त्)** विदृणाति **(हन्)** हन्ति **(दासीः)** सेविकाः **(पुरुकुत्साय)** बहुशस्त्राय **(शिक्षन्)**॥१०॥

अन्वयः-हे इन्द्र! तेऽवसा वयं सप्त पुरः सनेम यथा पूरव एनाऽवसा यज्ञैः स्तवन्ते तेन नव्यस्त्वं तैः स्तुहि यद्यः शर्म शारदीर्दासीः प्राप्य पुरुकुत्साय शिक्षन् सन् दुःखानि प्र दर्त्, शत्रून् हन्त्स सर्वैः सत्कर्तव्यः॥१०॥

भावार्थः-हे मनुष्या! यथा राजा विनयेन वर्तते तथैव सर्वे वर्त्तन्ताम्, पुरुषार्थेन सुन्दराणि पुराणि च निर्माय तेषु सर्वर्त्तु सुप्रखदेषु निवसन्तो दुःखानि दूरे प्रक्षिपन्तु॥१०॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य और सुख के देने वाले! **(ते)** आपके **(अवसा)** रक्षण आदि से हम लोग **(सप्त)** सात **(पुरः)** नगरियों का **(सनेम)** विभाग करें और जैसे **(पूरवः)** मनुष्य **(एना)** इस **(अवसा)** रक्षण आदि से और **(यज्ञैः)** श्रेष्ठ व्यवहाररूप यज्ञों से **(स्तवन्ते)** स्तुति करते हैं इससे **(नव्यः)** नवीनों में हुए आप उनसे स्तुति करिये और **(यत्)** जो **(शर्म)** गृह और **(शारदीः)** शरत्काल में हुई **(दासीः)** सेविकाओं को प्राप्त होके **(पुरुकुत्साय)** बहुत शस्त्र वाले के लिये **(शिक्षन्)** शिक्षा देता हुआ दुःखों को **(प्र, दर्त्)** नष्ट करता है और शत्रुओं को **(हन्)** मारता है, वह सब से सत्कार करने योग्य है॥१०॥

भावार्थः-हे मनुष्यो! जैसे राजा विनय से वर्त्तमान है, वैसे ही सब वर्त्तमान होवें और पुरुषार्थ से सुन्दर पुरों का निर्माण करके उन सब ऋतुओं में सुख देनेवालों में निवास करते हुए दुःखों को दूर फेंकें॥१०॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय।
परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम्॥११॥

त्वम्। वृधः। इन्द्र। पूर्व्यः। भूः। वरिवस्यन्। उशने। काव्याय। परा। नवऽवास्त्वम्। अनुऽदेयम्। महे। पित्रे। ददाथ। स्वम्। नपातम्॥११॥

पदार्थः-(त्वम्) (वृधः) वर्धकान् **(इन्द्र)** विद्यैश्वर्ययुक्त **(पूर्व्यः)** पूर्वैः कृतो विद्वान् **(भूः)** भवेः **(वरिवस्यन्)** सेवमानः **(उशने)** कामयमानाय **(काव्याय)** कविभिः सुशिक्षिताय **(परा) (नववास्त्वम्)** नवीनं निवासम् **(अनुदेयम्)** अनुदातुं योग्यम् **(महे)** महते **(पित्रे)** पालकाय **(ददाथ)** देहि **(स्वम्)** स्वकीयम् **(नपातम्)** पातरहितम्॥११॥

अन्वयः-हे इन्द्र! पूर्व्यस्त्वं वृधो वरिवस्यन्नुशने काव्याय दाता भूः स्वं नपातमनुदेयं नववास्त्वं महे पित्रे ददाथ न पराऽऽददाथ॥११॥

भावार्थः-यो राजा सर्वेषां यथायोग्यं सत्कारं करोति स पितृवद् भवति॥११॥

पदार्थः-हे **(इन्द्रः)** विद्या और ऐश्वर्य से युक्त **(पूर्व्यः)** प्राचीन से किये गये विद्वान् **(त्वम्)** आप **(वृधः)** वृद्धि करने वालों की **(वरिवस्यन्)** सेवा करते हुए **(उशने)** कामना करते हुए **(काव्याय)** विद्वानों से उत्तम प्रकार शिक्षित के लिये दाता **(भूः)** हूजिये **(स्वम्)** अपने **(नपातम्)** पतन से रहित **(अनुदेयम्)** पश्चात् देने योग्य **(नववास्त्वम्)** नवीन निवास को **(महे)** बड़े **(पित्रे)** पालन करने वाले के लिये **(ददाथ)** दीजिये और नहीं **(परा)** पीछे लीजिये अर्थात् न लौटाइये॥११॥

भावार्थः-जो राजा सब का यथायोग्य सत्कार करता है, वह पिता के तुल्य होता है॥११॥

पुनः स किं कुर्यादित्याह॥

फिर वह क्या करे, इस विषय को कहते हैं॥

त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति॥१२॥

त्वम्। धुनिः। इन्द्र। धुनिऽमतीः। ऋणोः। अपः। सीराः। न। स्रवन्तीः। प्र। यत्। समुद्रम्। अति। शूर। पर्षि। पारय। तुर्वशम्। यदुम्। स्वस्ति॥१२॥

पदार्थः-(त्वम्) (धुनिः) शत्रूणां कम्पकः **(इन्द्र)** सर्वपालक **(धुनिमतीः)** शब्दायमानाः प्रजाः **(ऋणोः)** प्रसाध्नुयाः **(अपः)** जलानि **(सीराः)** नाड्यः **(न)** इव **(स्रवन्तीः)** नद्यः **(प्र) (यत्)** यः **(समुद्रम्)** सागरमन्तरिक्षं वा **(अति) (शूर) (पर्षि)** पालयसि **(पारया)** दुःखात् परं देशं गमय **(तुर्वशम्)** सद्यो वशगमनम् **(यदुम्)** यत्नशीलं मनुष्यम् **(स्वस्ति)** सुखम्॥१२॥

अन्वयः-हे इन्द्र! धुनिस्त्वं धुनिमतीः सीरा अपः स्रवन्तीः समुद्रं न स्वस्त्यृणोः। हे शूर! यद् यस्त्वं तुर्वशं यदुं प्रति पर्षि स त्वमस्मान् पारया॥१२॥

भावार्थः-अत्रोपमालङ्कारः। हे राजंस्त्वं मङ्गलसुखशब्दयुक्ता आनन्दिताः प्रजाः कुर्या यथा नद्यः समुद्रं प्राप्य स्थिरा भवन्ति तथा प्रजा भवन्तं प्राप्य निश्चलाः स्युरेवं कुर्याः॥१२॥

पदार्थः-हे **(इन्द्र)** सब के पालन करने वाले **(धुनिः)** शत्रुओं के कम्पाने वाले **(त्वम्)** आप **(धुनिमतीः)** शब्द करती हुई प्रजायें **(सीराः)** नाडियाँ तथा **(अपः)** जल और **(स्रवन्तीः)** नदियाँ **(समुद्रम्)** समुद्र वा अन्तरिक्ष को **(न)** जैसे **(स्वस्ति)** सुख को **(ऋणोः)** प्रसिद्ध कीजिये और हे **(शूर)** वीर! **(यत्)** जो आप **(तुर्वशम्)** शीघ्र वश को प्राप्त होनेवाले **(यदुम्)** यत्नशील मनुष्य का **(प्र, अति पर्षि)** प्रसिद्ध अत्यन्त पालन करते हो, वह आप हम लोगों को **(पारया)** दुःख से पार कीजिये॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! आप मङ्गल और सुख के देने वाले शब्दों से युक्त और आनन्दित प्रजाओं को करें, जैसे नदियाँ समुद्र को प्राप्त होकर स्थिर होती हैं, वैसे प्रजायें आपको प्राप्त होकर निश्चल होवें, ऐसा करिये॥१२॥

पुनः स किं कुर्यादित्याह॥

फिर वह क्या करे, इस विषय को कहते हैं॥

तवं ह॒ त्यदि॑न्द्र॒ विश्व॑मा॒जौ स॒स्तो धुनी॒चुमु॑री॒ या ह॒ सिष्व॑प्।
दी॒दय॒दित्तुभ्यं॒ सोमे॑भिः सु॒न्वन् द॒भीति॑रि॒ध्मभृ॑तिः प॒क्थ्य॑र्कैः॥ १३॥ १०॥

तव॑। ह॒। त्यत्। इ॒न्द्र॒। विश्व॑म्। आ॒जौ। स॒स्तः। धुनी॒चुमु॑री॒ इति॑। या। ह॒। सिस्व॑प्। दी॒दय॑त्। इत्। तुभ्य॑म्। सोमे॑भिः। सु॒न्वन्। द॒भीति॑ः। इ॒ध्मऽभृ॑तिः। प॒क्थी। अ॒र्कैः॥ १३॥

पदार्थः-(तव) (ह) किल **(त्यत्)** तत् **(इन्द्र)** सुखधर्तः **(विश्वम्)** समग्रम् **(आजौ)** स-ामे **(सस्तः)** श्यानः **(धुनीचुमुरी)** ध्वनिः शब्दश्चमुरिर्भोगश्च तौ **(या)** यौ **(ह) (सिष्वप्)** स्वपन् **(दीदयत्)** प्रकाशयति **(इत्)** एव **(तुभ्यम्) (सोमेभिः)** ऐश्वर्यौषध्यादिभिः **(सुन्वत्)** निष्पादयन् **(दभीतिः)** हिंसकः **(इध्मभृतिः)** इध्मानां धारकः **(पक्थी)** पाचकः **(अर्कैः)** अन्नैः॥१३॥

अन्वयः-हे इन्द्र! तव या धुनीचुमुरी आजौ विश्वं पालयतो यः सस्तो ह सिष्वब् दीदयद्यो दभीतिरिध्मभृतिः पक्थ्यर्कैः सोमेभिः सुन्वँस्तुभ्यमित् सुखं प्रयच्छेत्त्यद्ध तान्त्सर्वान्त्सदा सत्कुर्याः॥१३॥

भावार्थः-हे राजँस्त्वं वावदूकान् भोक्तॄन् वीराञ्जनान् सत्कृत्य सेनाः प्रबलाः कुर्याः॥१३॥

अत्रेन्द्रविद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति विंशतितमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** सुख के धारण करने वाले **(तव)** आपके **(या)** जो **(धुनीचुमुरी)** शब्द और भोग **(आजौ)** संग्राम में **(विश्वम्)** सम्पूर्ण का पालन करते हैं ओर जो **(सस्तः)** शयन करता हुआ **(ह)** निश्चय से **(सिष्वप्)** सोता हुआ **(दीदयत्)** प्रकाश करता है और जो **(दभीतिः)** हिंसा करने और **(इध्मभृतिः)** काष्ठ का धारण करने वाला **(पक्थी)** पाचक **(अर्कैः)** अन्नों से और **(सोमेभिः)** ऐश्वर्य और ओषधि आदिकों से **(सुन्वन्)** उत्पन्न करता हुआ **(तुभ्यम्)** आपके लिये **(इत्)** ही सुख को देवे **(त्यत्)** उसको **(ह)** निश्चय से और उन सबों को सदा सत्कार करिये॥१३॥

भावार्थः-हे राजन्! आप बहुत बोलनेवाले, भोक्ता, वीर जनों का सत्कार करके सेनाओं को प्रबल करिये॥१३॥

इस सूक्त में इन्द्र, विद्वान्, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बीसवाँ सूक्त और दशवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ द्वादशर्चस्यैकविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, २,९, १०, १२ विराट् त्रिष्टुप्। ४, ५, ११ त्रिष्टुप्। ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ भुरिक्पङ्क्तिः। ६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ८ स्वराड् बृहतीच्छन्दः। मध्यमः स्वरः॥

पुनस्तं राजानं किमर्थमाश्रयेरन्नित्याह॥

अब बारह ऋचावाले इक्कीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर उस राजा का किस अर्थ आश्रय करें, इस विषय को कहते हैं॥

इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या॥ १॥

इमाः। ऊँ इति। त्वा। पुरुऽतमस्य। कारोः। हव्यम्। वीर। हव्याः। हवन्ते। धियः। रथेऽस्थाम्। अजरम्। नवीयः। रयिः। विऽभूतिः। ईयते। वचस्या॥ १॥

पदार्थः-(इमाः) वर्तमानाः प्रजाः **(उ)** **(त्वा)** त्वाम् **(पुरुतमस्य)** अतिशयेन बहुगुणस्य **(कारोः)** शिल्पिनः **(हव्यम्)** दातुमर्हम् **(वीर)** निर्भय **(हव्याः)** दातुं योग्याः **(हवन्ते)** आददति **(धियः)** प्रज्ञाः **(रथेष्ठाम्)** यो रथे तिष्ठति **(अजरम्)** जरारहितं शरीरम् **(नवीयः)** अतिशयेन नवीनम् **(रयिः)** श्रीः **(विभूतिः)** ऐश्वर्यम् **(ईयते)** प्राप्नोति **(वचस्या)** वचसि भवा॥१॥

अन्वयः-हे वीर! ये पुरुतमस्य कारोर्हव्यं हवन्ते या इमा हव्या धियो रथेष्ठां नवीयोऽजरं रयिर्वचस्या विभूतिरीयते ताभिर्युक्तं त्वा उ वयं सत्कुर्याम॥१॥

भावार्थः-यः पुरुषः प्रशंसनीयां बुद्धिं स्वीकृत्य तया जरारोगरहितां पुष्कलां श्रियमैश्वर्यं चाप्नोति तस्य शिल्पिप्रियस्य राज्ञः सत्कारः कर्त्तव्यः॥१॥

पदार्थः-हे **(वीर)** भय से रहित जो **(पुरुतमस्य)** अतिशय बहुत गुणों से विशिष्ट **(कारोः)** कारीगर के **(हव्यम्)** देने योग्य को **(हवन्ते)** ग्रहण करते हैं और जो **(इमाः)** ये वर्त्तमान प्रजायें **(हव्याः)** देने योग्य **(धियः)** बुद्धियों को और जो **(रथेष्ठाम्)** रथ में स्थित होने वाले **(नवीयः)** अतिशय नवीन **(अजरम्)** वृद्धावस्था से रहित शरीर को **(रयिः)** धन और **(वचस्या)** वचन में हुआ **(विभूतिः)** ऐश्वर्य **(ईयते)** प्राप्त होता है, उनसे युक्त **(त्वा)** आपका **(उ)** तर्क-वितर्क से हम लोग सत्कार करें॥१॥

भावार्थः-जो पुरुष प्रशंसा करने योग्य बुद्धि को स्वीकार करके उससे वृद्धावस्था और रोग से रहित अत्यन्त लक्ष्मी और ऐश्वर्य को प्राप्त होता है, उस शिल्पीजनप्रिय राजा का सत्कार करना चाहिये॥१॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तमु॑ स्तुष॒ इन्द्रं॒ यो विदा॑नो॒ गिर्वा॑हसं गी॒र्भिर्य॒ज्ञवृ॑द्धम्।
यस्य॒ दिव॒मति॑ म॒ह्ना पृ॑थि॒व्याः पु॑रुमा॒यस्य॑ रिरि॒चे म॑हि॒त्वम्॥ २॥

तम्। ऊँ इति॑। स्तु॒षे॒। इन्द्र॑म्। यः। विदा॑नः। गिर्वा॑हसम्। गी॒:ऽभिः। य॒ज्ञऽवृ॑द्धम्। यस्य॑। दिव॑म्। अति॑। म॒ह्ना। पृ॒थि॒व्याः। पु॒रु॒ऽमा॒यस्य॑। रि॒रि॒चे। म॒हि॒ऽत्वम्॥ २॥

पदार्थः-(तम्) (उ) **(स्तुषे)** प्रशंससि **(इन्द्रम्)** परमैश्वर्यप्रदम् **(यः)** **(विदानः)** जानन् **(गिर्वाहसम्)** सुशिक्षितवाक्प्रापकम् **(गीर्भिः)** वाग्भिः **(यज्ञवृद्धम्)** यज्ञे पूज्यं विद्वांसम् **(यस्य)** **(दिवम्)** कामयमानम् **(अति)** **(मह्ना)** महत्त्वेन **(पृथिव्याः)** **(पुरुमायस्य)** बहुकपटस्य दुष्टस्य **(रिरिचे)** अतिरिणक्ति **(महित्वम्)** महिमानम्॥ २॥

अन्वयः-हे राजन्! यो विदानो गीर्भिर्गिर्वाहसं यज्ञवृद्धं दिवमिन्द्रं लब्ध्वा पृथिव्या यस्य पुरुमायस्य मह्ना महित्वमति रिरिचे यं त्वमु स्तुषे तं वयं स्वीकुर्याम॥ २॥

भावार्थः-ये मनुष्याः परमैश्वर्यवर्धकं सूर्यमिव प्रकाशमानं राजानं सत्यमुपदिशेयुस्ते महिमानं प्राप्य दुःखाऽतिरिक्ता जायन्ते॥ २॥

पदार्थः-हे राजन्! **(यः)** जो **(विदानः)** जानता हुआ **(गीर्भिः)** वाणियों से **(गिर्वाहसम्)** उत्तम प्रकार शिक्षित वाणी के प्राप्त कराने वाले **(यज्ञवृद्धम्)** यज्ञ में आदर करने योग्य विद्वान् और **(दिवम्)** कामना करते हुए **(इन्द्रम्)** परमैश्वर्य्यप्रद जन को प्राप्त होकर **(पृथिव्याः)** पृथिवी और **(यस्य)** जिस **(पुरुमायस्य)** बहुत कपट से युक्त दुष्ट जन की **(मह्ना)** महिमा से **(महित्वम्)** महिमा को **(अति, रिरिचे)** बढ़ाता है और जिसकी आप **(उ)** तर्क-वितर्क से **(स्तुषे)** प्रशंसा करते हो **(तम्)** उस जन को हम लोग स्वीकार करें॥ २॥

भावार्थः-जो मनुष्य अत्यन्त ऐश्वर्य के बढ़ानेवाले सूर्य के सदृश प्रकाशमान राजा को सत्य का उपदेश करें, वे महिमा को प्राप्त होकर दुःख से अतिरिक्त होते हैं॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स इत्तमो॑ऽवयु॒नं त॑त॒न्वत् सूर्ये॑ण व॒युन॑वच्चकार।
क॒दा ते॒ मर्ता॑ अ॒मृत॑स्य॒ धामेय॑क्षन्तो॒ न मि॑नन्ति स्वधावः॥ ३॥

सः। इत्। तमः। अ॒व॒युन॑म्। त॒त॒न्वत्। सूर्ये॑ण। व॒युन॑ऽवत्। च॒का॒र॒। क॒दा। ते॒। मर्ताः॑। अ॒मृत॑स्य। धाम॑। इय॑क्षन्तः। न। मि॒न॒न्ति॒। स्व॒धा॒ऽवः॥ ३॥

पदार्थः-(सः) **(इत्)** एव **(तमः)** रात्रिः **(अवयुनम्)** अज्ञानमन्धकाररूपम् **(ततन्वत्)** विस्तृणन्। तनुधातोः शतृप्रत्यये **बहुलं छन्दसि।** (अ०२.४.७६) अनेन बहुलं शपः श्लुः **(सूर्येण)** **(वयुनवत्)** प्रज्ञावत् **(चकार)** करोति **(कदा)** **(ते)** **(मर्त्ताः)** मनुष्याः **(अमृतस्य)** मरणरहितस्य जगदीश्वरस्य **(धाम)**

दधाति येन तत् **(इयक्षन्तः)** यष्टुं सङ्गमयितुमिच्छन्तः **(न)** निषेधे **(मिनन्ति)** हिंसन्ति **(स्वधावः)** बह्वन्नयुक्त॥३॥

अन्वयः-हे जगदीश्वर! यो भवान्त्सूर्येण तम इव ज्ञानप्रकाशेनावयुनं नष्टं चकार वयुनवत्प्रज्ञां ततन्वदस्ति स इत्सेवनीयः। हे स्वधावो मर्त्ता! अमृतस्य ते धामेयक्षन्तः कदा न मिनन्ति॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या अहिंसाधर्मं स्वीकृत्य विज्ञानं वर्धयित्वा परमेश्वरप्राप्तिं चिकीर्षन्ति ते विस्तीर्णं सुखं लभन्ते॥३॥

पदार्थः-हे जगदीश्वर! जो आप **(सूर्येण)** सूर्य से **(तमः)** रात्रि जैसे वैसे ज्ञानप्रकाश से **(अवयुनम्)** अज्ञानान्धकार को नष्ट **(चकार)** करते हैं और **(वयुनवत्)** बुद्धि के सदृश और बुद्धि का **(ततन्वत्)** विस्तार करते हुए हैं **(सः)** **(इत्)** वही सेवा करने योग्य हैं। हे **(स्वधावः)** बहुत अन्न से युक्त **(मर्त्ताः)** मनुष्य! **(अमृतस्य)** मरणरहित जगदीश्वर के **(ते)** आपके सम्बन्ध में **(धाम)** धारण करते जिससे उसको **(इयक्षन्तः)** मिलाने की इच्छा करते हुए **(कदा)** कब **(न)** नहीं **(मिनन्ति)** नष्ट करते हैं अर्थात् दोष के कारण को दूर करते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य अहिंसा धर्म को स्वीकार कर और विज्ञान बढ़ाय के परमेश्वर की प्राप्ति की चिकीर्षा करते हैं, वे विस्तीर्ण सुख को प्राप्त होते हैं॥३॥

पुनर्विदुषः प्रति किं प्रष्टव्यमित्याह॥

फिर मनुष्यों को विद्वानों के प्रति क्या-क्या पूँछना चाहिये, इस विषय को कहते हैं॥

यस्ता चकार स कुह स्विदिन्द्रः कमा जन चरति कासु विक्षु।
कस्ते यज्ञो मनसे शं वराय को अर्क इन्द्र कतमः स होता॥४॥

यः। ता। चकार। सः। कुह। स्वित्। इन्द्रः। कम्। आ। जनम्। चरति। कासु। विक्षु। कः। ते। यज्ञः। मनसे। शम्। वराय। कः। अर्कः। इन्द्र। कतमः। सः। होता॥४॥

पदार्थः-(**यः**) (**ता**) तानि (**चकार**) करोति (**सः**) (**कुह**) (**स्वित्**) अपि (**इन्द्रः**) परमैश्वर्यकर्ता (**कम्**) सुखम् (**आ**) (**जनम्**) (**चरति**) (**कासु**) (**विक्ष**) प्रजासु (**कः**) (**ते**) तव (**यज्ञः**) सङ्गतिमयः (**मनसे**) मननशीलाय (**शम्**) सुखम् (**वराय**) श्रेष्ठाय (**कः**) (**अर्कः**) अर्चनीयः (**इन्द्र**) दुःखविदारक (**कतमः**) (**सः**) (**होता**) दाता॥४॥

अन्वयः-हे इन्द्र! य इन्द्रः कुह स्वित्ता चकार कासु विक्षु स कं जनमाऽऽचरति ते वराय मनसे को यज्ञः शं चकार कोऽर्कः कतमः स होता भवतीत्युत्तराणि वद॥४॥

भावार्थः-हे विद्वांस्तानि प्रज्ञावर्धनानि कः कर्तुं शक्नुयादुपकाराय प्रज्ञासु कश्चरति कः पूजनीयः कश्च दाता भवतीति समाधानानि वद॥४॥

पदार्थः-हे **(इन्द्र)** दुःखविदारक विद्वान्! **(यः)** जो **(इन्द्रः)** अत्यन्त ऐश्वर्य का करने वाला **(कुह)** **(स्वित्)** कहीं **(ता)** उनको **(चकार)** करता है और **(कासु)** किन **(विक्षु)** प्रजाओं में **(सः)** वह **(कम्)**

सुख को और **(जनम्)** मनुष्य को **(आ, चरति)** आचरण करता अर्थात् प्राप्त होता है और **(ते)** आपके **(वराय)** श्रेष्ठ **(मनसे)** विचारशील चित्त के लिये **(कः)** कौन **(यज्ञः)** मेल करना रूप यज्ञ **(शम्)** सुख को करता है और **(कः)** कौन **(अर्कः)** आदर करने योग्य और **(कतमः)** कौनसा **(सः)** वह **(होता)** दाता होता है, इनके उत्तरों को कहिये॥४॥

भावार्थः-हे विद्वान्! उन बुद्धि की वृद्धियों को कौन कर सके, उपकार के लिये बुद्धियों में कौन चलता है, कौन आदर करने योग्य और कौन दाता होता है, इन प्रश्नों के समाधानों को कहिये॥४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

इ॒दा हि ते॒ वेवि॑षतः पु॒रा॒जा प्र॒त्नास॑ आ॒सुः पु॑रुकृत्सखा॒यः।
ये म॑ध्य॒मास॑ उ॒त नू॒तना॑स उ॒ताव॒मस्य॑ पुरुहूत बोधि॥५॥११॥

इ॒दा। हि। ते॒। वेवि॑षतः। पु॒रा॒ऽजाः। प्र॒त्नास॑ः। आ॒सुः। पु॒रु॒ऽकृ॒त्। सखा॑यः। ये। म॒ध्य॒मास॑ः। उ॒त। नू॒तना॑सः। उ॒त। अ॒व॒मस्य॑। पु॒रु॒ऽहू॒त॒। बो॒धि॒॥५॥

पदार्थः-(**इदा**) इदानीम् (**हि**) (**ते**) तव (**वेविषतः**) व्याप्नुवतः (**पुराजाः**) ये पूर्वं जाता (**प्रत्नासः**) प्राचीनाः (**आसुः**) सन्ति (**पुरुकृत्**) बहुकृत् (**सखायः**) सुहृदः (**ये**) (**मध्यमासः**) मध्ये भवाः (**उत**) अपि (**नूतनासः**) नवीनाः (**उत**) (**अवमस्य**) अर्वाचीनस्य (**पुरुहूत**) बहुभिः कृतप्रशंस (**बोधि**) बोधय॥५॥

अन्वयः-हे पुरुहुत पुरुकृद् बहुकृदिन्द्र राजन्! ये हि पुराजाः प्रत्नासो मध्यमास उत नूतनासस्ते सखाय आसुस्तानिदा वेविषत उतावमस्य सम्बन्धिनस्त्वं बोधि॥५॥

भावार्थः-हे मनुष्या! ये युष्माभिः सह मैत्रीमाचरन्ति ते वृद्धा वृद्धतरा मध्यमा उतापि तुल्यवयसः स्युस्तेषु सख्यं ध्रुवं रक्षेयुरेवं सति ध्रुवो राज्याभ्युदयो भवति। इदमेव पूर्वमन्त्रप्रश्नानामुत्तरम्॥५॥

पदार्थः-हे (**पुरुहूत**) बहुतों से प्रशंसा किये गये (**पुरुकृत्**) बहुतों को करने वाले प्रतापयुक्त राजन्! (**ये**) जो (**हि**) निश्चित (**पुराजाः**) पूर्व प्रकट हुए (**प्रत्नासः**) प्राचीन (**मध्यमासः**) मध्य अवस्था में हुए और (**उत**) भी (**नूतनासः**) नवीन (**ते**) आपके (**सखायः**) मित्र (**आसुः**) हैं उनको (**इदा**) इस समय तथा (**वेविषतः**) व्याप्त हुए और (**उत**) भी (**अवमस्य**) आधुनिक के सम्बन्धियों को आप (**बोधि**) चेतन करिये॥५॥

भावार्थः-हे मनुष्यो! जो आप लोगों के साथ मैत्री का आचरण करते हैं, वे वृद्ध, वृद्धतर तथा मध्यम और भी तुल्य अवस्थावाले, होवें उन में मित्रता की निश्चय रक्षा करिये, ऐसा होने पर निश्चित राज्य की वृद्धि होती है, यह ही पूर्वमन्त्र में कहे हुए प्रश्नों का उत्तर है॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तं पृच्छन्तोऽवरासः परांणि प्रत्ना तं इन्द्र श्रुत्यानु येमुः।
अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महान्तम्॥ ६॥

तम्। पृच्छन्तः। अवरासः। परांणि। प्रत्ना। ते। इन्द्र। श्रुत्या। अनु। येमुः। अर्चामसि। वीर। ब्रह्मऽवाहः। यात्। एव। विद्म। तात्। त्वा। महान्तम्॥ ६॥

पदार्थः-(तम्) (पृच्छन्तः) (अवरासः) अर्वाचीना जिज्ञासवः **(पराणि)** उत्तरकालस्थानि **(प्रत्ना)** पूर्वकालीनि **(ते)** तव **(इन्द्र)** विद्वन् **(श्रुत्या)** श्रुतौ भवानि **(अनु) (येमुः)** नियच्छन्ति **(अर्चामसि)** अर्चामः सत्कुर्मः **(वीर)** शौर्यादिगुणोपेत **(ब्रह्मवाहः)** ये ब्रह्म धनं धान्यं प्रापयन्ति ते **(यात्)** यावन्ति। अत्र **छान्दसो वर्णलोपो वे**ति वलोपः **शेश्छन्दसि बहुलमि**ति शेर्लोपः। **(एव) (विद्म)** जानीयाम **(तात्)** तावन्ति **(त्वा)** त्वाम् **(महान्तम्)** महाशयम्॥ ६॥

अन्वयः-हे वीरेन्द्र! येऽवरासस्तं महान्तं त्वा पृच्छन्तस्ते पराणि प्रत्ना श्रुत्याऽनु येमुस्तान् वयमर्चामसि। हे ब्रह्मवाहो विद्वांसो! वयं याद्विद्म तादेव यूयं विजानीत॥ ६॥

भावार्थः-हे मनुष्या! युष्माभिर्मित्रत्वेन मिलित्वा पूर्वापराणि विज्ञानानि प्राप्य पुष्कलं सुखं प्राप्तव्यम्॥ ६॥

पदार्थः-हे **(वीर)** शूरता आदि गुणों से युक्त **(इन्द्र)** विद्वन्! जो **(अवरासः)** आधुनिक जिज्ञासु अर्थात् ब्रह्म को जानने की इच्छा करने वाले जन **(तम्)** उन **(महान्तम्)** महाशय **(त्वा)** आपको **(पृच्छन्तः)** पूंछते हुए हैं **(ते)** वे **(पराणि)** उत्तरकाल में वर्त्तमान और **(प्रत्ना)** पूर्वकाल में स्थित **(श्रुत्या)** वेद में प्रतिपादित विषयों को **(अनु, येमुः)** अनुकूल नियम में लाते हैं, उनका हम लोग **(अर्चामसि)** सत्कार करते हैं और हे **(ब्रह्मवाहः)** धन और धान्य को प्राप्त कराने वाले विद्वान्! हम लोग **(यात्)** जितनों को **(विद्म)** जानें **(तात्)** उतनों **(एव)** ही को आप लोग जानिये॥ ६॥

भावार्थः-हे मनुष्यो! आप लोगों को मित्रतापूर्वक मेल कर तथा पूर्व और पर विज्ञानों को प्राप्त होकर अत्यन्त सुख को प्राप्त होना चाहिये॥ ६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ।
तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व॥ ७॥

अभि। त्वा। पाजः। रक्षसः। वि। तस्थे। महि। जज्ञानम्। अभि। तत्। सु। तिष्ठ। तव। प्रत्नेन। युज्येन। सख्या। वज्रेण। धृष्णो इति। अप। ता। नुदस्व॥ ७॥

पदार्थः-(अभि) आभिमुख्ये **(त्वा)** त्वाम् **(पाजः)** बलम् **(रक्षसः)** दुष्टान् मनुष्यान् **(वि) (तस्थे)** वितिष्ठते **(महि)** महत् **(जज्ञानम्)** सुखजनकम् **(अभि) (तत्) (सु) (तिष्ठ) (तव) (प्रत्नेन)** प्राचीनेन **(युज्येन)** योक्तुमर्हेण **(सख्या)** मित्रेण **(वज्रेण)** शस्त्रास्त्रसमूहेन **(धृष्णो)** दृढ **(अप) (ता)** तानि शत्रूणां सैन्यानि **(नुदस्व)** दूरीकुरु॥७॥

अन्वयः-हे धृष्णो राजँस्तव यन्महि जज्ञानं पाजो रक्षसोऽभि वि तस्थे तत्त्वा प्राप्नोतु तत्वमभि सु तिष्ठ तेन प्रत्नेन युज्येन सख्या वज्रेण त्वं ता अप नुदस्व॥७॥

भावार्थः-हे राजजन! ये राजपुरुषा दुष्टेभ्यो दण्डं ददति श्रेष्ठानां पालनं कुर्वन्ति तांस्त्वं सत्कुर्याः॥७॥

पदार्थः-हे **(धृष्णो)** दृढ़ राजन्! **(तव)** आपका जो **(महि)** बड़ा **(जज्ञानम्)** सुखजनक **(पाजः)** बल **(रक्षसः)** दुष्ट मनुष्यों के **(अभि, वि, तस्थे)** सम्मुख विशेषकर स्थित होता है **(तत्)** वह **(त्वा)** आपको प्राप्त होवे और आप उसके **(अभि, सु तिष्ठ)** सम्मुख स्थित हूजिये उस **(प्रत्नेन)** प्राचीन **(युज्यते)** युक्त करने के योग्य **(सख्या)** मित्र और **(वज्रेण)** शस्त्र और अस्त्रों के समूह से आप **(ता)** उन शत्रुसेनाओं को **(अप, नुदस्व)** दूर करिये॥७॥

भावार्थः-हे राजजन! जो राजपुरुष दुष्टों के लिये दण्ड देते और श्रेष्ठों को पालन करते हैं, उनका आप सत्कार करिये॥७॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः।
त्वं ह्या३पिः प्रदिवि पितॄणां शश्वद् बभूथ सुहव एष्टौ॥८॥

सः। तु। श्रुधि। इन्द्र। नूतनस्य। ब्रह्मण्यतः। वीर। कारुऽधायः। त्वम्। हि। आपिः। प्रऽदिवि। पितॄणाम्। शश्वत्। बभूथ। सुऽहवः। आऽइष्टौ॥८॥

पदार्थः-(सः) (तु) **(श्रुधि)** **(इन्द्र)** न्यायेश विद्वन् **(नूतनस्य)** **(ब्रह्मण्यतः)** ब्रह्म धनं प्रासुमिच्छतः **(वीर)** दुष्टानां विनाशक **(कारुधायः)** कारूणां विदुषां धर्तः **(त्वम्)** **(हि)** खलु **(आपिः)** यः प्राप्नोति **(प्रदिवि)** प्रकृष्टायां कामनायाम् **(पितॄणाम्)** पालकानाम् **(शश्वत्)** निरन्तरम् **(बभूथ)** भवेः **(सुहवः)** सुष्ठु ज्ञानविज्ञानः **(एष्टौ)** समन्ताद् यज्ञक्रियायाम्॥८॥

अन्वयः-हे वीर कारुधाय इन्द्र! त्वं नूतनस्यैष्टौ सुहवः शश्वद् बभूथ स त्वं तु हि पितॄणां प्रदिव्यापिः सन् ब्रह्मण्यतः सत्कुरु तेषां वचांसि श्रुधि॥८॥

भावार्थः-स एवोत्तमो विद्वान् यो ज्ञानवृद्धेभ्यो विद्यावचांसि श्रुत्वोत्तमाञ्छिल्पिनो रक्षित्वा सदेष्टसुखी भवति॥८॥

पदार्थः-हे **(वीर)** दुष्टों के नाश करने और **(कारुधायः)** शिल्पी विद्वानों के धारण करने वाले **(इन्द्र)** न्याय के स्वामी विद्वन्! **(त्वम्)** आप **(नूतनस्य)** नवीन की **(एष्टौ)** सब प्रकार से यज्ञक्रिया में **(सुहवः)** उत्तम प्रकार ज्ञान और विज्ञान वाले **(शश्वत्)** निरन्तर **(बभूथ)** हूजिये **(सः)** वह आप **(तु)** तो **(हि)** निश्चय से **(पितृणाम्)** पितृओं अर्थात् पालकों की **(प्रदिवि)** प्रकृष्ट कामना में **(आपिः)** व्याप्त होने वाले हुए **(ब्रह्मण्यतः)** धन प्राप्ति की इच्छा करने हुओं का सत्कार करिये और उनके वचनों को **(श्रुधि)** सुनिये॥८॥

भावार्थः-वही उत्तम विद्वान् है जो ज्ञानवृद्ध जनों से विद्यासम्बन्धी वचनों को सुन के उत्तम शिल्पजनों की रक्षा करके सदा अपेक्षित पदार्थ की प्राप्ति से सुखी होता है॥८॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

प्रोतये॒ वरु॑णं मि॒त्रमिन्द्रं॑ म॒रुत॑: कृ॒ष्वाव॑से नो अ॒द्य।

प्र पू॒षणं॒ विष्णु॑म॒ग्निं पुरं॑धिं सवि॒तार॒मोष॑धी॒: पर्व॑तांश्च॥९॥

प्र। ऊ॒तये। वरु॑णम्। मि॒त्रम्। इन्द्र॑म्। म॒रुत॑:। कृ॒ष्व॒। अव॑से। न॒:। अ॒द्य। प्र। पू॒षण॑म्। विष्णु॑म्। अ॒ग्निम्। पुर॑न्धिम्। स॒वि॒तार॑म्। ओष॑धीः। पर्व॑तान्। च॒॥९॥

पदार्थः-**(प्र)** **(ऊतये)** रक्षाद्याय **(वरुणम्)** उदानम् **(मित्रम्)** प्राणम् **(इन्द्रम्)** विद्युतम् **(मरुतः)** वायून् **(कृष्व)** कुरु **(अवसे)** ज्ञानाद्याय **(नः)** अस्मान् **(अद्य)** **(प्र)** **(पूषणम्)** पोषकं समानम् **(विष्णुम्)** व्यापकं व्यानं धनञ्जयं वा हिरण्यगर्भम् **(अग्निम्)** प्रसिद्धम् **(पुरन्धिम्)** सर्वधरं सूत्रात्मानम् **(सवितारम्)** सूर्यमण्डलम् **(ओषधीः)** सोमाद्याः **(पर्वतान्)** मेघान् **(च)** शैलान् वा॥९॥

अन्वयः-हे विद्वँस्त्वमद्य न ऊतये वरुणं मित्रमिन्द्रं मरुतः प्र कृष्वावसे पूषणं विष्णुमग्निं पुरन्धिं सवितारमोषधीः पर्वतांश्च प्र कृष्व॥९॥

भावार्थः-हे विद्वांसो जना! अस्मदर्थं यथा पृथिव्यादयः पदार्थाः सुखकराः स्युस्तथा विधत्त॥९॥

पदार्थः-हे विद्वन्! आप **(अद्य)** इस समय **(नः)** हम लोगों को **(ऊतये)** रक्षा आदि के लिये **(वरुणम्)** उदान और **(मित्रम्)** प्राण वायु **(इन्द्रम्)** बिजुली को **(मरुतः)** पवनों को **(प्र, कृष्व)** अच्छे प्रकार करिये और **(अवसे)** ज्ञान आदि के लिये **(पूषणम्)** पुष्टि करने वाले समान वायु **(विष्णुम्)** व्यापक व्यान और धनञ्जय वायु को वा हिरण्गर्भ परमात्मा को और **(अग्निम्)** प्रसिद्ध अग्नि **(पुरन्धिम्)** सब को धारण करनेवाले सूत्रात्मा **(सवितारम्)** सूर्यमण्डल **(ओषधीः)** सोमलता आदि ओषधियों और **(पर्वतान्, च)** मेघों वा पर्वतों को **(प्र)** अच्छे प्रकार करिये॥९॥

भावार्थः-हे विद्वान् जनो! हम लोगों के लिये जैसे पृथिवी आदि पदार्थ सुखकारक होवें, वैसे करिये॥९॥

पुनर्मनुष्यैः क उपासनीय इत्याह॥

फिर मनुष्यों को किसकी उपासना करनी चाहिये, इस विषय को कहते हैं॥

इ॒म उ॑ त्वा पुरुशाक प्रयज्यो जरि॒तारो॑ अ॒भ्यर्चन्त्य॒र्कैः।
श्रु॒धी हव॒मा हु॑व॒तो हु॑वा॒नो न त्वावाँ॑ अ॒न्यो अ॑मृत॒ त्वद॑स्ति॥ १०॥

इ॒मे। ऊँ॒ इति॑। त्वा॒। पु॒रु॒ऽशा॒क॒। प्र॒य॒ज्यो॒ इति॑ प्रऽयज्यो। ज॒रि॒तारः॑। अ॒भि। अ॒र्चन्ति॒। अ॒र्कैः। श्रु॒धि। हव॑म्। आ। हु॒व॒तः॒। हु॒वा॒नः॒। न। त्वाऽवा॑न्। अ॒न्यः॒। अ॒मृ॒त॒। त्वत्। अ॒स्ति॥ १०॥

पदार्थः-(इमे) (उ) **(त्वा)** त्वाम् **(पुरुशाक)** बहुशक्ते **(प्रयज्यो)** यो यत्नेन यष्टुं सङ्गन्तुं योग्यस्तत्सम्बुद्धौ **(जरितारः)** विद्यालाभस्तोतारः **(अभि) (अर्चन्ति)** सत्कुर्वन्ति **(अर्कैः)** सत्करणैः **(श्रुधी)** शृणु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(हवम्)** उच्चारितशब्दम् **(आ) (हुवतः)** स्तुवतः **(हुवानः)** स्तुवन् **(न)** निषेधे **(त्वावान्)** त्वया सदृशः **(अन्यः)** इतरः **(अमृत)** नाशरहित **(त्वत्)** तव सकाशात् **(अस्ति)**॥ १०॥

अन्वयः-हे प्रयज्यो पुरुशाक परमेश्वर! य इमे जरितारोऽर्कैस्त्वाऽभ्यर्चन्ति, हे अमृत! यतस्त्वत् त्वावानन्यो नास्ति स त्वं हुवानस्तान् हुवतो हवमाऽश्रुधी उ ताननुगृहाण॥ १०॥

भावार्थः-हे मनुष्या! यथा विद्वांसः परमात्मानं स्तुत्वा प्रार्थ्योपासते तथा यूयमप्युपाध्वं तत्सदृशस्तदधिको वा कोऽपि नास्तीति विजानीत॥ १०॥

पदार्थः-हे **(प्रयज्यो)** यत्न से मेल करने को योग्य **(पुरुशाक)** बहुत सामर्थ्य से युक्त परमेश्वर! जो **(इमे)** ये **(जरितारः)** विद्या के लाभ की स्तुति करने वाले जन **(अर्कैः)** सत्कारों से **(त्वा)** आपको **(अभि, अर्चन्ति)** सब ओर से सत्कार करते हैं। हे **(अमृत)** नाशरहित! जिन **(त्वत्)** आप से **(त्वावान्)** आपके सदृश **(अन्यः)** अन्य दूसरा **(न)** नहीं **(अस्ति)** है वह **(हुवानः)** प्रशंसा करते हुए आप उन **(हुवतः)** स्तुति करते हुओं को और **(हवम्)** उच्चारित शब्द को **(आ)** सब प्रकार **(श्रुधि)** सुनिये **(उ)** और उन को स्वीकार करिये॥ १०॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् जन परमात्मा की स्तुति और प्रार्थना करके उपासना करते हैं, वैसे आप भी उपासना करो और उसके सदृश वा उससे अधिक कोई भी नहीं है, ऐसा जानो॥ १०॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

नू म॒ आ वाच॒मुप॑ याहि वि॒द्वान् विश्वे॑भिः सूनो सहसो॒ यजत्रैः।
ये अ॑ग्निजि॒ह्वा ऋ॒तसाप॑ आ॒सुर्ये मनु॑ं च॒क्रुरु॑प॒रं दसा॑य॥ ११॥

नु। मे॒। आ। वाच॑म्। उप॑। या॒हि॒। वि॒द्वान्। विश्वे॑भिः। सू॒नो॒ इति॑। स॒ह॒स॒ः। यज॑त्रैः। ये। अ॒ग्नि॒ऽजि॒ह्वाः। ऋ॒तऽसाप॑ः। आ॒सुः। ये। मनु॑म्। च॒क्रुः। उप॑रम्। दसा॑य॥ ११॥

पदार्थः-(नु) सद्यः **(मे)** मम **(आ)** समन्तात् **(वाचम्)** उपदेशम् **(उप) (याहि)** प्राप्नुहि **(विद्वान्) (विश्वेभिः)** सर्वैः **(सूनो)** अपत्य **(सहसः)** बलवतः **(यजत्रैः)** सङ्गन्तुमर्हैः **(ये) (अग्निजिह्वाः)** अग्निरिव तीव्रा प्रज्वलिता जिह्वा येषां ते **(ऋतसापः)** य ऋतेन सत्येन सपन्ति **(आसुः)** भवन्ति **(ये) (मनुम्)** मननशीलं मनुष्यम् **(चक्रुः)** कुर्वन्ति **(उपरम्)** मेघमिव **(दसाय)** शत्रूणामुपक्षयाय॥११॥

अन्वयः-हे सहसः सूनो विद्वांस्त्वं मे वाचमुपाऽऽयाहि येऽग्निजिह्वा ऋतसाप आसुस्तैर्विश्वेभिर्यजत्रैस्सह नु मदीयं वचनमुपायाहि। य उपरमिव दसाय मनुं चक्रुस्तान्सदा सत्कुर्याः॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्याः सदैव सत्यवादिनो विदुषः सङ्गच्छेरन् प्रतिज्ञया च सत्यमाचरेयुः॥११॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** सन्तान **(विद्वान्)** विद्यायुक्त जन! आप **(मे)** मेरी **(वाचम्)** वाणी को **(उप, आ, याहि)** अच्छे प्रकार प्राप्त हूजिये और **(ये)** जो **(अग्निजिह्वाः)** अग्नि के समान तीव्र प्रज्वलित जिह्वा जिन की **(ऋतसापः)** सत्य से युक्त होने वाले **(आसुः)** होते हैं जिन **(विश्वेभिः)** सम्पूर्ण **(यजत्रैः)** मिलने योग्यों के साथ **(नु)** शीघ्र मेरे उपदेश को प्राप्त हूजिये और **(ये)** जो **(उपरम्)** मेघ को जैसे वैसे **(दसाय)** शत्रुओं के नाश होने के लिये **(मनुम्)** विचारशील मनुष्य को **(चक्रुः)** करते हैं, उनका सदा सत्कार करिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य सदा ही सत्यवादी विद्वानों को उत्तम प्रकार मिलें और प्रतिज्ञा से सत्य का आचरण करें॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स नो॑ बोधि पुरए॒ता सु॒गेषू॒त दु॒र्गेषु॑ पथि॒कृद्वि॒दान॑:।
ये अश्र॑मास उ॒रवो॒ वह॑िष्ठा॒स्तेभि॑र्न इन्द्रा॒भि व॑क्षि॒ वाज॑म्॥ १२॥ १२॥

सः। नः। बो॒धि॒। पु॒रः॒ऽए॒ता। सु॒ऽगेषु॑। उ॒त। दु॒ःऽगेषु॑। प॒थि॒ऽकृत्। वि॒दा॒नः। ये। अश्र॑मासः। उ॒रवः॑। वह॑िष्ठाः। तेभिः॑। नः॒। इ॒न्द्र॒। अ॒भि। व॒क्षि॒। वाज॑म्॥ १२॥

पदार्थः-(सः) (नः) अस्मानस्माकं वा **(बोधि) (पुरएता)** यः पुर एति गच्छति सः **(सुगेषु)** सुगमेषु व्यवहारेषु **(उत)** अपि **(दुर्गेषु)** दुःखेन गन्तुं योग्येषु **(पथिकृत्)** यः पन्थानं करोति **(विदानः)** विजानन् **(ये) (अश्रमासः)** श्रमरहिताः **(उरवः)** बहवः **(वहिष्ठाः)** अतिशयेन वोढारः **(तेभिः)** तैः **(नः)** अस्मान् **(इन्द्र)** सुखैश्वर्यप्रापक **(अभि) (वक्षि)** प्रापय **(वाजम्)** विज्ञानम्॥१२॥

अन्वयः-हे इन्द्र! स त्वं पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानो नोऽस्मान् बोधि। य अश्रमास उरवो वहिष्ठाः सन्ति तेभिस्सह नो वाजमभि वक्षि॥१२॥

भावार्थः-स एवास्ति विद्वान्त्सर्वेषां मङ्गलकारी यः स्वयं धर्ममार्गं गत्वाऽन्यान् धर्ममार्गगन्तॄन् कुर्यात् यः सदा सत्सङ्गं करोति स एव सर्वेभ्य उत्तमो भूत्वा विज्ञानं दातुमर्हतीति॥१२॥

अत्रेन्द्रविद्वद्दीश्वरराजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकविंशतितमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** सुख और ऐश्वर्य के प्राप्त करानेवाले **(सः)** वह आप **(पुरएता)** अग्रगामी **(सुगेषु)** सुगम व्यवहारों में **(उन)** और **(दुर्गेषु)** दुःख से प्राप्त होने योग्यों में **(पथिकृत्)** मार्ग के करने वाले **(विदानः)** जानते हुए **(नः)** हम लोगों को **(बोधि)** जानें और **(ये)** जो **(अश्रमासः)** थकावट से रहित **(उरवः)** बहुत **(वहिष्ठाः)** अतिशय पहुँचाने वाले हैं **(तेभिः)** उनके साथ **(नः)** हम लोगों के वा हम लोगों के लिये **(वाजम्)** विज्ञान को **(अभि, वक्षि)** प्राप्त कराइये॥१२॥

भावार्थः-वही विद्वान् है जो सबका मङ्गलकारी, स्वयं धर्ममार्ग को प्राप्त होकर औरों को धर्ममार्ग में चलनेवाले करे, जो सदा सत्संग करता है, वही सब से उत्तम होकर विज्ञान देने को योग्य होता है॥१२॥

इस सूक्त में इन्द्र, विद्वान्, ईश्वर और राजा के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सगति जाननी चाहिये॥

यह इक्कीसवाँ सूक्त और बारहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्य द्वाविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ७ भुरिक्पङ्क्तिः। ३ स्वराट् पङ्क्तिः। १० पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४, ५ त्रिष्टुप्। ६, ८ विराट्त्रिष्टुप्। ९, ११ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः क उपासनीय इत्याह॥

अब ग्यारह ऋचावाले बाईसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब मनुष्यों को किसकी उपासना करनी चाहिये, इस विषय को कहते हैं॥

य एकु इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान्॥ १॥

यः। एकः। इत्। हव्यः। चर्षणीनाम्। इन्द्रम्। तम्। गीःऽभिः। अभि। अर्चे। आभिः। यः। पत्यते। वृषभः। वृष्ण्यऽवान्। सत्यः। सत्वा। पुरुऽमायः। सहस्वान्॥ १॥

पदार्थः-(यः) (एकः) (इत्) एव **(हव्यः)** स्तोतुमादातुमर्हः **(चर्षणीनाम्)** मनुष्याणाम् **(इन्द्रम्)** परमैश्वर्यप्रदम् **(तम्) (गीर्भिः) (अभि) (अर्चे)** सत्करोमि **(आभिः) (यः) (पत्यते)** पतिरिवाचरति **(वृषभः)** श्रेष्ठः **(वृष्ण्यावान्)** बलादिबहुप्रिययुक्तः **(सत्यः)** त्रैकाल्याबाध्यः **(सत्वा)** सर्वत्र स्थितः **(पुरुमायः)** बहूनां निर्माता **(सहस्वान्)** अत्यन्तबलयुक्त॥ १॥

अन्वयः-हे मनुष्या! यश्चर्षणीनामेक इद्धव्योऽस्ति तमिन्द्रमाभिर्गीर्भिरहमभ्यर्चे। यो वृषभो वृष्ण्यावान् सत्यः सत्वा पुरुमायः सहस्वान् पत्यते तमभ्यर्चे तं परमेश्वरं यूयमभ्यर्चत॥ १॥

भावार्थः-हे मनुष्या! योऽद्वितीयः सर्वोत्कृष्टः सच्चिदानन्दस्वरूपो न्यायकारी सर्वस्वामी वर्तते तं विहायाऽन्यस्योपासनं कदापि मा कुरुत॥ १॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(चर्षणीनाम्)** मनुष्यों के मध्य में **(एकः)** अकेला **(इत्)** ही **(हव्यः)** स्तुति करने और ग्रहण करने योग्य है **(तम्)** उस **(इन्द्रम्)** ऐश्वर्य को देने वाले का **(आभिः)** इन **(गीर्भिः)** वाणियों से मैं **(अभि, अर्चे)** सब प्रकार से सत्कार करता हूँ और **(यः)** जो **(वृषभः)** श्रेष्ठ **(वृष्ण्यावान्)** बल आदि बहुत प्रियगुणों से युक्त **(सत्यः)** तीनों कालों में अबाध्य **(सत्वा)** सर्वत्र स्थित **(पुरुमायः)** बहुतों को रचने वाला **(सहस्वान्)** अत्यन्त बल से युक्त हुआ **(पत्यते)** स्वामी के सदृश आचरण करता है, उसका सत्कार करता हूँ, उस परमेश्वर का आप लोग सत्कार करिये॥ १॥

भावार्थः-हे मनुष्यो! जो अद्वितीय, सब से उत्तम, सच्चिदानन्दस्वरूप, न्यायकारी और सब का स्वामी है, उसका त्याग करके अन्य की उपासना कभी न करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तमु॑ नः॒ पूर्वे॑ पि॒तरो॒ नव॑ग्वाः स॒प्त विप्रा॑सो अ॒भि वा॒जय॑न्तः।
न॒क्ष॒द्दा॒भं त॒तुरिं॒ पर्व॑तेष्ठामद्रो॒घवा॑चं म॒तिभि॒: शवि॑ष्ठम्॥ २॥

तम्। ऊँ इति॑। न॒:। पूर्वे॑। पि॒तर॑:। नव॑ऽग्वा:। स॒प्त। विप्रा॑स:। अ॒भि। वा॒जय॑न्त:। न॒क्ष॒त्ऽदा॒भम्। त॒तुरि॑म्। पर्व॑ते॒ऽस्थाम्। अद्रो॑घऽवाचम्। म॒ति॒ऽभि॑:। शवि॑ष्ठम्॥ २॥

पदार्थ:-(तम्) (उ) **(न:)** अस्माकम् **(पूर्वे)** **(पितर:)** **(नवग्वा:)** नवीनगतय: **(सप्त)** सप्तसङ्ख्याका: पञ्चप्राणमनोबुद्धयश्चेव **(विप्रास:)** मेधाविन: **(अभि)** आभिमुख्ये **(वाजयन्त:)** ज्ञापयन्त: **(नक्षद्दाभम्)** नक्षतानां प्राप्तानां दोषाणां हिंसितारम् **(ततुरिम्)** दु:खात्तारयितारम् **(पर्वतेष्ठाम्)** पर्वते मेघे स्थितां विद्युतमिव शुद्धस्वरूपम् **(अद्रोघवाचम्)** द्रोहरहिता वाग्यस्य तम् **(मतिभि:)** मननशीलैर्मनुष्यै: **(शविष्ठम्)** अतिशयेन बलयुक्तम्॥ २॥

अन्वय:-हे मनुष्या! यं नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं शविष्ठं परमात्मानं न: पूर्वे नवग्वा विप्रास: सप्तेव पितरोऽभिवाजयन्त उपदिशन्ति तमु यूयमुपाध्वम्। मतिभिरयमेव सेवनीय:॥ २॥

भावार्थ:-हे मनुष्या! यूयं, योगिनो यं योगेनोपासते तमेव योगाभ्यासेन ध्यायत॥ २॥

पदार्थ:-हे मनुष्यो! जिस **(नक्षद्दाभम्)** प्राप्त दोषों के नाश करने और **(ततुरिम्)** दु:ख से पार करने वाले **(पर्वतेष्ठाम्)** मेघ में वर्त्तमान बिजुली के समान शुद्धस्वरूप और **(अद्रोघवाचम्)** द्रोहरहित वाणी वाले **(शविष्ठम्)** अत्यन्त बल से युक्त परमात्मा का **(न:)** हम लोगों के **(पूर्वे)** पहिले **(नवग्वा:)** नवीन गमन करने वाले **(विप्रास:)** बुद्धिमान् और **(सप्त)** सात संख्या से युक्त अर्थात् पाँच प्राण और मन बुद्धि इनके सदृश वर्त्तमान **(पितर:)** पितृजन **(अभि)** सम्मुख **(वाजयन्त:)** बुद्धि को देते हुए उपदेश देते हैं **(तम्)** उसकी **(उ)** और आप लोग उपासना करो और **(मतिभि:)** मननशील मनुष्यों से यही सेवा करने योग्य है॥ २॥

भावार्थ:-हे मनुष्यो! तुम, जिसकी योगीजन योग से उपासना करते हैं, उसी का योगाभ्यास से ध्यान करो॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

तमी॑म॒ह इन्द्र॑मस्य रा॒य: पु॑रु॒वीर॑स्य नृ॒वत॑: पुरु॒क्षो:।
यो अस्कृ॑धोयु॒रज॑र॒: स्व॑र्वा॒न् तमा भ॑र हरिवो मादु॒यध्यै॑॥ ३॥

तम्। ई॒म॒हे॒। इन्द्र॑म्। अ॒स्य॒। रा॒य॒:। पु॒रु॒ऽवीर॑स्य। नृ॒ऽवत॑:। पु॒रु॒ऽक्षो:। य:। अस्कृ॑धोयु:। अ॒जर॑:। स्व॑:ऽवान्। तम्। आ। भ॒र॒। ह॒रि॒ऽव॒:। मा॒दु॒यध्यै॑॥ ३॥

पदार्थ:-(तम्) (ईमहे) याचामहे **(इन्द्रम्)** परमैश्वर्यप्रदम् **(अस्य)** **(राय:)** धनस्य **(पुरुवीरस्य)** बहुवीरप्रापकस्य **(नृवत:)** प्रशस्ता नरो विद्यन्ते यस्मिंस्तस्य **(पुरुक्षो:)** बहुध्यानयुक्तस्य **(य:)**

(अस्कृधोयुः) अपरिच्छिन्नः **(अजरः)** जरादिरोगरहितः **(स्ववान्)** बहु सुखं विद्यते यस्मिन्तसः **(तम्)** **(आ)** **(भर)** समन्ताद्धर **(हरिवः)** प्रशस्ता हरयो मनुष्या विद्यन्ते यस्य तत्सम्बुद्धौ **(मादयध्यै)** मादयितुमानन्दयितुम्॥३॥

अन्वयः-हे हरिवो विद्वान्! योऽस्कृधोयुरजरः स्ववान् वर्त्तते तं मादयध्यै आ भर तमस्य पुरुवीरस्य नृवतः पुरुक्षो राय इन्द्रं वयमीमहे॥३॥

भावार्थः-सर्वे मनुष्या विज्ञानादिप्राप्तये परमात्मानमेव याचन्ताम्॥३॥

पदार्थः-हे **(हरिवः)** अच्छे मनुष्यों के सहित वर्त्तमान विद्वान्! **(यः)** जो **(अस्कृधोयुः)** व्यापक **(अजरः)** जरा आदि रोग से रहित **(स्ववान्)** बहुत सुख विद्यमान जिसमें वह वर्त्तमान है **(तम्)** उसको **(मादयध्यै)** आनन्दित करने के लिये **(आ, भर)** सब प्रकार से धारण करिये और **(तम्)** उसको **(अस्य)** इस **(पुरुवीरस्य)** बहुत वीरों को प्राप्त कराने वाले **(नृवतः)** अच्छे मनुष्य विद्यमान जिसमें उस **(पुरुक्षोः)** बहुत ध्यान से युक्त **(रायः)** धन के **(इन्द्रम्)** अत्यन्त ऐश्वर्य के देने वाले की हम लोग **(ईमहे)** याचना करते हैं॥३॥

भावार्थः-सब मनुष्य विज्ञान आदि की प्राप्ति के लिये परमात्मा से ही याचना करें॥३॥

पुनर्विद्वान् किं कुर्यादित्याह॥

फिर विद्वान् क्या करे, इस विषय को कहते हैं॥

तन्नो॒ वि वो॑चो॒ यदि॑ ते पु॒रा चि॑ज्जरि॒तार॑ आनॅशुः सु॒म्नमि॑न्द्र।
कस्ते॑ भा॒गः किं वयो॑ दुध्र खिद्रः पुरु॑हूत पुरूवसोऽसुर॒घ्नः॥४॥

तत्। नः। वि। वोचः। यदि। ते। पुरा। चित्। जरितारः। आनशुः। सुम्नम्। इन्द्र। कः। ते। भागः। किम्। वयः। दुध्र। खिद्रः। पुरुहूत। पुरुवसो इति पुरुऽवसो। असुरऽघ्नः॥४॥

पदार्थः-(तत्) **(नः)** अस्मान् **(वि)** **(वोचः)** अवोचो वदेः **(यदि)** **(ते)** **(पुरा)** **(चित्)** अपि **(जरितारः)** विद्यागुणस्तावकाः **(आनशुः)** अश्नन्ति **(सुम्नम्)** सुखम् **(इन्द्र)** विद्योपदेशकर्त्तः **(कः)** **(ते)** तव **(भागः)** **(किम्)** **(वयः)** जीवनम् **(दुध्र)** दुःखेन धर्तुं योग्य **(खिद्रः)** दीनः **(पुरुहूत)** बहुभिः सत्कृत **(पुरूवसो)** बहुधन **(असुरघ्नः)** दुष्टकर्मकारिणां हन्ता॥४॥

अन्वयः-हे दुध्र पुरुहूत पुरूवसो इन्द्र! यदि त्वं नस्तद्वि वोचो यच्चित्ते पुरा जरितारः सुम्नमानशुस्ते कोऽसुरघ्नो भागः खिद्रः किं वयोऽस्तीति त्वं वोचः॥४॥

भावार्थः-हे विद्वन्! त्वया तद्विज्ञानमस्मभ्यं देयं येन विद्वांस आनन्दन्ति॥४॥

पदार्थः-हे **(दुध्र)** दुःख से धारण करने योग्य और **(पुरुहूत)** बहुतों से सत्कार किये गये **(पुरूवसो)** बहुत धनों से युक्त **(इन्द्र)** विद्या और गुणों की स्तुति करने वाले! **(यदि)** जो आप **(नः)** हम लोगों के लिये **(तत्)** उसको **(वि, वोचः)** विशेष कहिये जिसको **(चित्)** निश्चित **(ते)** आपके **(पुरा)** पहिले भी **(जरितारः)** विद्या और गुणों की स्तुति करने वाले **(सुम्नम्)** सुख का **(आनशुः)** भोग करते हैं

(ते) आपका **(कः)** कौन **(असुरघ्नः)** दुष्ट कर्मकारियों का नाश करने वाला **(भागः)** अंश **(खिद्रः)** दीन और **(किम्)** कौन **(वयः)** जीवन है, इसको आप कहिये॥४॥

भावार्थः-हे विद्वन्! आपको वह विज्ञान हम लोगों के लिये देने योग्य है, जिससे विद्वान् जन आनन्द करते हैं॥४॥

पुनः स्त्री कीदृशं पतिं गृह्णीयादित्याह॥

फिर स्त्री कैसे पति का ग्रहण करे, इस विषय को कहते हैं॥

तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्वरी यस्य नू गीः।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ॥५॥१३॥

तम्। पृच्छन्ती। वज्रऽहस्तम्। रथऽस्थाम्। इन्द्रम्। वेपी। वक्वरी। यस्य। नु। गीः। तुविऽग्राभम्। रभःऽदाम्। गातुम्। इषे। नक्षते। तुम्रम्। अच्छ॥५॥

पदार्थः-(**तम्**) (**पृच्छन्ती**) (**वज्रहस्तम्**) शस्त्राऽस्त्रपाणिम् (**रथेष्ठाम्**) रथे तिष्ठन्तम् (**इन्द्रम्**) परमैश्वर्यवन्तं पुरुषम् (**वेपी**) धीमती (**वक्वरी**) वचशक्तिमती (**यस्य**) (**नू**) (**गीः**) वाक् (**तुविग्राभम्**) बहूनां ग्रहीतारम् (**तुविकूर्मिम्**) बहुकर्माणम् (**रभोदाम्**) वेगयुक्तबलस्य दातारम् (**गातुम्**) भूमिम् (**इषे**) अन्नाद्याय (**नक्षते**) प्राप्नोति। **नक्षतिर्गतिकर्मा।** (निघं०२.१४) (**तुम्रम्**) ग्लातारम् (**अच्छ**)॥५॥

अन्वयः-हे मनुष्या! यस्येषे गीस्तुविग्राभं तुविकूर्मिं रभोदां तुम्रं गातुमच्छा नक्षते तं वज्रहस्तं रथेष्ठामिन्द्रं पृच्छन्ती वेपी वक्वरी नू स्यात्तं वयमप्याश्रयेम॥५॥

भावार्थः-कन्यया सर्वा वार्ताः पृष्ट्वा हृद्यः पतिः स्वीकर्त्तव्यः॥५॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिसके (**इषे**) अन्न आदि के लिये (**गीः**) वाणी (**तुविग्राभम्**) बहुतों को ग्रहण करने (**तुविकूर्मिम्**) बहुत कामों के करने और (**रभोदाम्**) वेग से युक्त बल के देनेवाले (**तुम्रम्**) ग्लानि से युक्त जन को और (**गातुम्**) भूमि को (**अच्छ**) अच्छे प्रकार (**नक्षते**) प्राप्त होती है (**तम्**) उस (**वज्रहस्तम्**) शस्त्र और अस्त्रों से युक्त हाथों वाले (**रथेष्ठाम्**) रथ में स्थित होते हुए (**इन्द्रम्**) अत्यन्त ऐश्वर्य्यवान् पुरुष को (**पृच्छन्ती**) पूँछती हेई (**वेपी**) बुद्धिवाली और (**वक्वरी**) वचन-शक्ति वाली स्त्री (**नू**) निश्चय होवे, उसका हम लोग भी आश्रयण करें॥५॥

भावार्थः-कन्या को चाहिये कि सब बातों को पूँछ कर हृदयप्रिय पति को स्वीकार करे॥५॥

पुनर्दम्पती परस्परं कथं वर्तेयातामित्याह॥

फिर स्त्री और पुरुष परस्पर कैसे वर्ताव करें, इस विषय को कहते हैं॥

अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन।
अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन्॥६॥

अ॒या। ह॒। त्यम्। मा॒यया॑। वा॒वृ॒धा॒नम्। म॒नः॒ऽजु॒वा॑। स्व॒ऽत॒वः॒। पर्व॑तेन। अच्यु॑ता। चि॒त्। वी॒ळि॒ता। सु॒ऽओ॒जः॒। रु॒जः॒। वि। दृ॒ळ्हा। धृ॒ष॒ता। वि॒ऽर॒प्शि॒न्॥६॥

पदार्थः-(अया) अनया **(ह)** किल **(त्यम्)** तं पतिम् **(मायया)** प्रज्ञया **(वावृधानम्)** वर्धमानम् **(मनोजुवा)** मनोवद्वेगेन **(स्वतवः)** स्वकीयं तवो बलं यस्य तत्सम्बुद्धौ **(पर्वतेन)** मेघेन **(अच्युता)** अविनाशिना **(चित्)** अपि **(वीळिता)** स्तुतानि **(स्वोजः)** सुष्ठु पराक्रमो यस्य तत्सम्बुद्धौ **(रुजः)** रोगान् **(वि)** **(दृळ्हा)** दृढानि **(धृषता)** प्रागल्भेन **(विरप्शिन्)** महागुणयुक्त॥६॥

अन्वयः-हे स्वतवो विरप्शिन् स्वोज इन्द्र! त्वमया माययेवं स्त्रिया रमस्व सा वावृधानं त्यं प्राप्य मनोजुवा पर्वतेन विद्युदिव रमताम्। द्वौ धृषता रुजो हत्वा हाऽच्युता वीळिता वि दृळ्हा चित्कर्माणि कुरुताम्॥६॥

भावार्थः-हे स्त्रीपुरुषौ! द्वौ प्रेम्णा मिलित्वा गृहाश्रमकृत्येषु हर्षेण रोगनिवारणेन प्रीत्या सङ्गत्य सुसन्तानाञ्जनयेताम्॥६॥

पदार्थः-हे **(स्वतवः)** अपना बल जिसके ऐसे **(विरप्शिन्)** महागुणों से युक्त **(स्वोजः)** उत्तम पराक्रमयुक्त प्रतापी आप **(अया)** इस **(मायया)** बुद्धि से जैसे वैसे स्त्री से रमण करिये वह स्त्री **(वावृधानम्)** बढ़े हुए **(त्यम्)** उस पति को प्राप्त होकर **(मनोजुवा)** मन के सदृश वेगयुक्त **(पर्वतेन)** मेघ से बिजुली जैसे वैसे रमण करे और ये दोनों **(धृषता)** ढीठपन से **(रुजः)** रोगों का नाश करके **(ह)** निश्चय से युक्त **(अच्युता)** अविनाशी से **(वीळिता)** स्तुतिरूप **(वि)** विशेष करके **(दृळ्हा)** दृढ़ **(चिद्)** भी कर्म्मों को करें॥६॥

भावार्थः-हे स्त्री पुरुषो! आप दोनों प्रेम से मिल के गृहाश्रम के कृत्यों में हर्ष से रोग निवृत्ति तथा प्रीति से मेल करके सन्तानों को उत्पन्न करो॥६॥

पुनर्मनुष्यैः को नित्यं ध्येय इत्याह॥

फिर मनुष्यों को किसका नित्य ध्यान करना चाहिये, इस विषय को कहते हैं॥

तं वो॑ धि॒या नव्य॑स्या॒ शवि॑ष्ठं प्र॒त्नं प्र॑त्न॒वत् प॑रितंस॒यध्यै॑।
स नो॑ वक्षदनिमा॒नः सु॒वह्वे॑न्द्रो॒ विश्वा॒न्यति॑ दु॒र्गहा॑णि॥७॥

तम्। वः। धि॒या। नव्य॑स्या। शवि॑ष्ठम्। प्र॒त्नम्। प्र॒त्न॒ऽव॒त्। प॒रि॒ऽत॒ं॒स॒यध्यै॑। सः। नः। व॒क्ष॒त्। अ॒नि॒ऽमा॒नः। सु॒ऽवह्वा॑। इन्द्रः॑। विश्वा॑नि। अति॑। दुः॒ऽगहा॑नि॥७॥

पदार्थः-(तम्) **(वः)** युष्मान् **(धिया)** प्रज्ञया कर्मणा वा **(नव्यस्या)** अतिशयेन नूतनया **(शविष्ठम्)** अतिशयेन बलिष्ठम् **(प्रत्नम्)** पुरातनम् **(प्रत्नवत्)** प्राचीनवत् **(परितंसयध्यै)** सर्वतः भूषयितुम् **(सः)** **(नः)** अस्मान् **(वक्षत्)** वहत् प्रापयेत् **(अनिमानः)** अपरिमाणः **(सुवह्वा)** सुष्ठु वोढा **(इन्द्रः)** परमैश्वर्यवान् **(विश्वानि)** सर्वाणि **(अति)** **(दुर्गहाणि)** यानि दुर्गाणि दुःखेन गन्तुं योग्यानि घ्नन्ति तानि धर्म्याणि कर्माणि॥७॥

अन्वय:-हे मनुष्या! योऽनिमानः सुवह्मेन्द्रो जगदीश्वरो नव्यस्या धिया वो नोऽस्मान् विश्वानि दुर्गहाणि परितंसयध्यै अति वक्षत्तं शविष्ठं प्रत्नं प्रत्नवन्मत्वा वयं सेवेमहि स चाऽस्माकं गुरुः स्यात्॥७॥

भावार्थ:-हे मनुष्या! यः परमात्मा सर्वेषामस्माकं सर्वाणि दुःखानि प्रज्ञादानेन निवार्याऽधर्माचरणात् सङ्कोचयति तं परमात्मानमात्मना सततं ध्यायत॥७॥

पदार्थ:-हे मनुष्यो! जो (**अनिमानः**) परिमाण से रहित (**सुवह्मा**) उत्तम प्रकार चलाने वाला (**इन्द्रः**) अत्यन्त ऐश्वर्य से युक्त जगदीश्वर (**नव्यस्या**) अतिशय नवीन (**धिया**) बुद्धि वा कर्म से (**वः**) आप लोगों और (**नः**) हम लोगों के लिये (**विश्वानि**) सम्पूर्ण (**दुर्गहाणि**) दुःख से प्राप्त होने योग्यों को नाश करने वाले धर्मयुक्त कर्मों को (**परितंसयध्यै**) चारों ओर से सुशोभा करने के लिये (**अति, वक्षत्**) अत्यन्त प्राप्त करावे (**तम्**) उस (**शविष्ठम्**) अत्यन्त बलवान् (**प्रत्नम्**) पुरातन को (**प्रत्नवत्**) प्राचीन के सदृश मान कर हम लोग सेवा करें और (**सः**) वह भी हम लोग का गुरु हो॥७॥

भावार्थ:-हे मनुष्यो! जो परमात्मा हम सब लोगों के सम्पूर्ण दुःखों को बुद्धिदान से दूर करके अधर्माचरण से संकोचित करता है, उस परमात्मा का आत्मा से निरन्तर ध्यान करो॥७॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वान् जनों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ जनाय दुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा।
तपा वृषन् विश्वतः शोचिषा तान् ब्रह्मद्विषे शोचय क्षामपश्च॥८॥

आ। जनाय। दुह्वणे। पार्थिवानि। दिव्यानि। दीपयः। अन्तरिक्षा। तप। वृषन्। विश्वतः। शोचिषा। तान्। ब्रह्मऽद्विषे। शोचय। क्षाम्। अपः। च॥८॥

पदार्थ:-(**आ**) (**जनाय**) (**दुह्वणे**) द्रोग्ध्रे (**पार्थिवानि**) पृथिव्यां भवानि (**दिव्यानि**) दिव्यगुणकर्मस्वभावानि वस्तूनि (**दीपयः**) प्रकाशय (**अन्तरिक्षा**) अन्तरिक्षेण सहचराणि (**तपा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वृषन्**) बलिष्ठ (**विश्वतः**) सर्वतः (**शोचिषा**) प्रकाशेन (**तान्**) (**ब्रह्मद्विषे**) यो ब्रह्मेश्वरं वेदं वा द्वेष्टि तस्मै (**शोचय**) शोकं प्रापय (**क्षाम्**) पृथिवीम् (**अपः**) जलानि (**च**)॥८॥

अन्वय:-हे वृषन् विद्वन्! त्वं शोचिषा विश्वतो दिव्यान्यन्तरिक्षा पार्थिवान्याऽऽदीपयः। ब्रह्मद्विषे दुह्वणे जनाय विश्वतस्तपा, ये सज्जनान् परितापयन्ति ताञ्छोचय क्षामपश्च दीपयः॥८॥

भावार्थ:-हे विद्वांसो! यूयं पृथिव्यादीन् पदार्थान् विदित्वाऽन्यान् वेदयत। दुष्टाञ्जनानुपदेशेन पवित्रीकुरुत॥८॥

पदार्थ:-हे (**वृषन्**) बलिष्ठ विद्वन्! आप (**शोचिषा**) प्रकाश से (**विश्वतः**) सब ओर से (**दिव्यानि**) श्रेष्ठ गुण, कर्म और स्वभाव वाले वस्तुओं (**अन्तरिक्षा**) अन्तरिक्ष के सहचारी (**पार्थिवानि**) पृथिवी में हुए पदार्थों को (**आ, दीपयः**) सब प्रकार से प्रकाशित कीजिये और (**ब्रह्मद्विषे**) ईश्वर वा वेद से द्वेष करने

वाले और **(द्रुह्वणे)** द्रोह करने वाले **(जनाय)** जन के लिये सब प्रकार से **(तपा)** सन्ताप करिये और जो सज्जनों को सन्तापयुक्त करते हैं **(तान्)** उनको **(शोचय)** शोक कराइये तथा **(क्षाम्)** पृथिवी को **(अपः, च)** और जलों को प्रकाशित करिये॥८॥

भावार्थः-हे विद्वान् जनो! आप लोग पृथिवी आदि पदार्थों को जानकर अन्यों को जनाइये और दुष्ट जनों को उपदेश से पवित्र करिये॥८॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

भुवो॒ जन॑स्य दि॒व्यस्य॒ राजा॒ पार्थि॑वस्य॒ जग॑तस्त्वेषसंदृक्।
धि॒ष्व वज्रं॒ दक्षि॑ण इन्द्र॒ हस्ते॒ विश्वा॑ अजुर्य दयसे॒ वि मा॒याः॥९॥

भुवः॑। जन॑स्य। दि॒व्यस्य॑। राजा॑। पार्थि॑वस्य। जग॑तः। त्वे॒ष॒ऽसं॒दृक्। धि॒ष्व। वज्र॑म्। दक्षि॑णे। इ॒न्द्र॒। हस्ते॑। विश्वा॑। अ॒जु॒र्य॒। द॒य॒से॒। वि। मा॒याः॥९॥

पदार्थः-**(भुवः)** पृथिव्याः **(जनस्य)** मनुष्यस्य **(दिव्यस्य)** शुद्धस्य कमनीयस्य **(राजा)** **(पार्थिवस्य)** पृथिव्यां भवस्य **(जगतः)** संसारस्य **(त्वेषसन्दृक्)** यस्त्वेषं न्यायप्रकाशं सम्पश्यति दर्शयति वा **(धिष्व)** धर **(वज्रम्)** शस्त्रास्त्रम् **(दक्षिणे)** **(इन्द्र)** परमेश्वर्यप्रद **(हस्ते)** **(विश्वाः)** समग्राः **(अजुर्य)** अजीर्ण **(दयसे)** देहि **(वि)** **(मायाः)** प्रज्ञाः॥९॥

अन्वयः-हे अजुर्येन्द्र! राजा त्वं भुवः पार्थिवस्य जगतो दिव्यस्य जनस्य त्वेषसन्दृक् सन् दक्षिणे हस्ते वज्रं धिष्व। विश्वा माया वि दयसे॥९॥

भावार्थः-स एव राजोत्तमोऽस्ति यो न्यायशीलो धार्मिको जितेन्द्रियो भूत्वा सर्वं जगत् पितृवत्सम्पाल्य समग्रा विद्याः प्रददाति॥९॥

पदार्थः-हे **(अजुर्य)** जीर्ण अवस्था से रहित **(इन्द्र)** अत्यन्त ऐश्वर्य के देने वाले **(राजा)** प्रकाशमान आप **(भुवः)** पृथिवी और **(पार्थिवस्य)** पृथिवी में हुए **(जगतः)** संसार और **(दिव्यस्य)** शुद्ध कामना करने योग्य सुन्दर **(जनस्य)** मनुष्य के **(त्वेषसन्दृक्)** न्यायप्रकाश को देखने वाले होते हुए **(दक्षिणे)** दाहिने **(हस्ते)** हाथ में **(वज्रम्)** शस्त्र और अस्त्र को **(धिष्व)** धारण करिये और **(विश्वाः)** सम्पूर्ण **(मायाः)** बुद्धियों को **(वि, दयसे)** विशेष करके दीजिये॥९॥

भावार्थः-वही राजा उत्तम है जो न्यायशील, धार्मिक, जितेन्द्रिय होकर सम्पूर्ण जगत् का पिता के समान पालन करके सम्पूर्ण विद्याओं को अच्छे प्रकार देता है॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ सं॒यत॑मिन्द्र णः स्व॒स्तिं शं॑त्रु॒तूर्या॑य बृह॒तीममृ॑ध्राम्।

यया॒ दासा॒न्यार्या॑णि वृ॒त्राकरो॑ वज्रिन्त्सु॒तका॒ नाहु॑षाणि॥ १०॥

आ। स॒म्ऽयत॑म्। इ॒न्द्र॒। न॒:। स्व॒स्तिम्। शत्रु॒ऽतूर्या॑य। बृ॒ह॒तीम्। अमृ॑ध्राम्। यया॑। दासा॑नि। आर्या॑णि। वृ॒त्रा। कर॑:। व॒ज्रि॒न्। सु॒ऽतुका॑। नाहु॑षाणि॥ १०॥

पदार्थ:-(आ) समन्तात् **(संयतम्)** कृतसंयमम् **(इन्द्र)** परमैश्वर्यकारक **(न:)** अस्मभ्यम् **(स्वस्तिम्)** सुखम् **(शत्रुतूर्याय)** शत्रूणां हिंसनाय **(बृहतीम्)** महतीम् **(अमृध्राम्)** अहिंसिकाम् **(यया) (दासानि)** दासकुलानि **(आर्याणि)** द्विजकुलानि **(वृत्रा)** धनानि **(कर:)** करोति **(वज्रिन्)** शस्त्रास्त्रभृत् **(सुतुका)** सुष्ठु वर्धकानि **(नाहुषाणि)** मनुष्यसम्बन्धीनि॥ १०॥

अन्वय:-हे वज्रिन्निन्द्र! त्वं यया दासान्यार्याणि सुतुका नाहुषाणि वृत्राऽऽकरस्ताममृध्रां बृहतीं सेनां शत्रुतूर्याय कुर्यास्तया न: संयतं स्वस्तिं कुर्या:॥ १०॥

भावार्थ:-हे राजंस्त्वं सत्यविद्यादानोपदेशाभ्यां शूद्रकुलोत्पन्नानपि द्विजान् कुर्या: सर्वत ऐश्वर्यं प्रापय्य शत्रून्निवार्य सुखं वर्धय॥ १०॥

पदार्थ:-हे **(वज्रिन्)** शस्त्र और अस्त्र के धारण करने वाले **(इन्द्र)** अत्यन्त ऐश्वर्य के करने वाले! आप **(यया)** जिससे **(दासानि)** शूद्र के कुलों को **(आर्याणि)** द्विजकुल और **(सुतुका)** उत्तम प्रकार बढ़ने वाले **(नाहुषाणि)** मनुष्यसम्बन्धी **(वृत्रा)** धनों को **(आ)** सब प्रकार **(कर:)** करती हैं उस **(अमृध्राम्)** नहीं हिंसा करने वाली **(बृहतीम्)** बड़ी सेना को **(शत्रुतूर्याय)** शत्रुओं के नाश के लिये करिये और उससे **(न:)** हम लोगों के लिये **(संयतम्)** किया है संयम जिसके निमित्त उस **(स्वस्तिम्)** सुख को करिये॥ १०॥

भावार्थ:-हे राजन्! आप सत्यविद्या के दान और उपदेश से शूद्र के कुल में उत्पन्न हुओं को भी द्विज करिये और सब प्रकार से ऐश्वर्य को प्राप्त कराय तथा शत्रुओं का निवारण करके सुख की वृद्धि कीजिये॥ १०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स नो॑ नि॒युद्भि॑: पुरुहूत वेधो वि॒श्ववा॑राभि॒रा ग॑हि प्रयज्यो।
न या अदे॑वो॒ वर॑ते॒ न दे॒व आभि॑र्याहि॒ तूय॒मा म॑द्र्य॒द्रिक्॥ ११॥ १४॥

स:। न॒:। नि॒युत्ऽभि॑:। पु॒रु॒ऽहू॒त॒। वे॒ध॒:। वि॒श्वऽवा॑राभि:। आ। ग॒हि॒। प्र॒ऽय॒ज्यो॒ इति॑ प्रऽयज्यो। न। या:। अदे॑व:। व॑रते। न। दे॒व:। आ। आ॒भि॒:। या॒हि॒। तूय॑म्। आ। म॒द्र्य॒द्रिक्॥ ११॥

पदार्थ:-(स:) (न:) अस्मान् **(नियुद्भि:)** निश्चिद्गतिभिरश्वैरिव **(पुरुहूत)** बहुभि: पूजित **(वेध:)** मेधाविन् **(विश्ववाराभि:)** सर्वै: स्वीकरणीयाभिर्गतिभि: **(आ) (गहि)** आगच्छ **(प्रयज्यो)** प्रकर्षेण

यज्ञकर्त्तः **(न)** निषेधे **(याः)** **(अदेवः)** अविद्वान् **(वरते)** स्वीकरोति **(न)** **(देवः)** विद्वान् **(आ)** **(आभिः)** **(याहि)** **(तूयम्)** तूर्णम् **(आ)** **(मद्र्यादृिक्)** मदभिमुखः॥११॥

अन्वयः-हे प्रयज्यो पुरुहूत वेधः! स त्वं देवो न विश्ववाराभिराभिर्नियुद्भिर्न आ गहि या रीतिरदेवो नाऽऽवरते मद्र्यद्रिक् सँस त्वं तूयमायाहि॥११॥

भावार्थः-या रीतिर्विदुषां भवति तामविद्वांसो न स्वीकुर्वन्ति तस्माद्विदुषामविदुषां च पृथक् प्रस्थानमस्तीति वेद्यम्॥११॥

अत्रेन्द्रविद्वद्दीश्वरराजप्रजाधर्मवर्णनादेतर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशतितमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे **(प्रयज्यो)** अत्यन्त यज्ञ करने वाले **(पुरुहूत)** बहुतों से आदर किये गये **(वेधः)** बुद्धियुक्त **(सः)** वह आप **(देवः)** विद्वान् के **(न)** समान **(विश्ववाराभिः)** सब से स्वीकार करने योग्य गमनों से और **(आभिः)** इन **(नियुद्भिः)** निश्चित गमनवाले घोड़ों से जैसे वैसे **(नः)** हम लोगों को **(आ, गहि)** प्राप्त हूजिये और **(याः)** जिन रीतियों को **(अदेवः)** विद्वान् जन से भिन्न **(न)** नहीं **(आ, वरते)** अच्छे प्रकार स्वीकार करता है **(मद्र्यद्रिक्)** मेरे सन्मुख हुए आप **(तूयम्)** शीघ्र **(आ, याहि)** प्राप्त हूजिये॥११॥

भावार्थः-जो रीति विद्वानों की है उसको अविद्वान् जन नहीं स्वीकार करते हैं, इससे विद्वानों और अविद्वानों का पृथक् प्रस्थान है, यह जानना चाहिये॥११॥

इस सूक्त में इन्द्र, विद्वान्, ईश्वर, राजा और प्रजा के धर्म का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बाईसवाँ सूक्त और चौदहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य त्रयोविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ३, ८, ९ निचृत्त्रिष्टुप्। ५, ६, १० त्रिष्टुप्। ७ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेन्द्रविषयमाह॥

अब दश ऋचावाले तेईसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में इन्द्रविषय को कहते हैं॥

सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे।
यद्वा युक्ताभ्यां मघवन् हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि॥ १॥

सुते। इत्। त्वम्। निऽमिश्लः। इन्द्र। सोमे। स्तोमे। ब्रह्मणि। शस्यमाने। उक्थे। यत्। वा। युक्ताभ्याम्। मघऽवन्। हरिऽभ्याम्। बिभ्रत्। वज्रम्। बाह्वोः। इन्द्र। यासि॥ १॥

पदार्थः-(सुते) निष्पन्ने **(इत्)** एव **(त्वम्)** **(निमिश्लः)** नितरां मिश्रः **(इन्द्र)** शत्रुविदारक **(सोमे)** ऐश्वर्ये **(स्तोमे)** प्रशंसायाम् **(ब्रह्मणि)** धने **(शस्यमाने)** प्रशंसनीये **(उक्थे)** श्रोतुं वक्तुमर्हे वा **(यत्)** यः **(वा)** **(युक्ताभ्याम्)** **(मघवन्)** बहुधनयुक्त **(हरिभ्याम्)** हरणशीलाभ्यां मनुष्याभ्याम् **(बिभ्रत्)** धरन् **(वज्रम्)** **(बाह्वोः)** भुजयोः **(इन्द्र)** परमैश्वर्यप्रद **(यासि)** गच्छसि॥ १॥

अन्वयः-हे इन्द्र! यस्त्वं स्तोमे ब्रह्मणि निमिश्लः सोमे सुते शस्यमान उक्थे युक्ताभ्यां हरिभ्यां बाह्वोर्वज्रं बिभ्रद् यासि यद्वा हे मघवन्निन्द्र! त्वमायासि स त्वमित् सत्कर्त्तव्योऽसि॥ १॥

भावार्थः-ये राजानोऽप्रमाद्यन्तः पितृवत्प्रजाः पालयन्तः शस्त्रभृतः सन्तो दुष्टान्निवारयन्तः सन्ति तेषां राज्यं स्थिरं भवति॥ १॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के नाशक! जो **(त्वम्)** आप **(स्तोमे)** प्रशंसा के निमित्त **(ब्रह्मणि)** धन में **(निमिश्लः)** अत्यन्त मिले हुए **(सोमे)** ऐश्वर्य के **(सुते)** उत्पन्न होने पर **(शस्यमाने)** प्रशंसा करने योग्य और **(उक्थे)** सुनने वा कहने योग्य में **(युक्ताभ्याम्)** जुड़े हुए **(हरिभ्याम्)** हरणशील मनुष्यों से **(बाह्वोः)** भुजाओं में **(वज्रम्)** वज्र को **(बिभ्रत्)** धारण करते हुए **(यासि)** जाते हो और **(यत्)** जो **(वा)** वा हे **(मघवन्)** बहुत धनों से युक्त **(इन्द्र)** परमश्वर्य्यप्रद! आप प्राप्त होते हैं, वह आप **(इत्)** ही सत्कार करने योग्य हैं॥ १॥

भावार्थः-जो राजा नहीं प्रमाद करते, पिता के सदृश प्रजाओं का पालन करते और शस्त्रों को धारण करते हुए तथा दुष्टों का निवारण करते हुए हैं, उनका राज्य स्थिर होता है॥ १॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ।

यद्वा दक्षस्य बिभ्युषो अबिभ्युदरन्धयः शर्धत इन्द्र दस्यून्॥ २॥

यत्। वा। दिवि। पार्ये। सुस्विम्। इन्द्र। वृत्रऽहत्ये। अवसि। शूरऽसातौ। यत्। वा। दक्षस्य। बिभ्युषः। अबिभ्यत्। अरन्धयः। शर्धतः। इन्द्र। दस्यून्॥ २॥

पदार्थः-(यत्) (वा) विकल्पे **(दिवि)** कमनीये **(पार्ये)** पारभवे **(सुष्विम्)** सुष्ठु सोतारम् **(इन्द्र)** दुष्टविदारक **(वृत्रहत्ये)** मेघस्य हननमिव **(अवसि)** रक्षसि **(शूरसातौ)** शूरैर्विभक्तव्ये स-ामे **(यत्)** यः **(वा) (दक्षस्य)** बलयुक्तस्य **(बिभ्युषः)** यो बिभेति तस्य **(अबिभ्यत्)** बिभेति **(अरन्धयः)** हिंसय **(शर्धतः)** बलतः **(इन्द्र) (दस्यून्)** बलात् परस्वाऽऽदातॄन्॥ २॥

अन्वयः-हे इन्द्र! यद्यस्त्वं पार्ये दिवि वृत्रहत्ये वा शूरसातौ सुष्विमवसि यद्यो वा भवान् दक्षस्य बिभ्युषोऽबिभ्यत् स त्वं हे इन्द्र! शर्धतो दस्यूनरन्धयः॥ २॥

भावार्थः-स एव राजा भवितुमर्हेद्यो युद्धे स्वसेनां संरक्षेच्छत्रूंस्तेनांश्च हन्यात्॥ २॥

पदार्थः-हे **(इन्द्र)** दुष्ट जनों के नाश करने वाले **(यत्)** जो आप **(पार्ये)** पार में हुए **(दिवि)** कामना करने योग्य के निमित्त **(वृत्रहत्ये)** मेघ के हनन **(वा)** वा **(शूरसातौ)** शूर जनों से विभाग करने योग्य संग्राम में **(सुष्विम्)** उत्तम प्रकार उत्पन्न करने वाले की **(अवसि)** रक्षा करते हो और **(यत्)** जो **(वा)** वा आप **(दक्षस्य)** बली **(बिभ्युषः)** भय करने वाले का **(अबिभ्यत्)** भय करते हैं वह आप हे **(इन्द्र)** प्रतापी जन **(शर्धतः)** बलयुक्त से **(दस्यून्)** हठ से दूसरे के पदार्थ ग्रहण करने वालों का **(अरन्धयः)** नाश करिये॥ २॥

भावार्थः-वही राजा होने को योग्य होवे कि जो युद्ध में अपनी सेना की रक्षा करे और शत्रु तथा चोरों का नाश करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

पाता सुतमिन्द्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती।
कर्ता वीराय सुष्वये उ लोकं दाता वसु स्तुवते कीरये चित्॥ ३॥

पाता। सुतम्। इन्द्रः। अस्तु। सोमम्। प्रऽनेनीः। उग्रः। जरितारम्। ऊती। कर्ता। वीराय। सुस्वये। ऊँ इति। लोकम्। दाता। वसु। स्तुवते। कीरये। चित्॥ ३॥

पदार्थः-(पाता) रक्षकः **(सुतम्)** निष्पादितम् **(इन्द्रः)** ऐश्वर्यकारी राजा **(अस्तु) (सोमम्)** सोमलताद्योषध्यादिरसम् **(प्रणेनीः)** प्रकर्षेण न्यायकृत् **(उग्रः)** तेजस्वी **(जरितारम्)** स्तोतारम् **(ऊती)** ऊत्या रक्षणादिक्रियया **(कर्त्ता) (वीराय) (सुष्वये)** सुष्ठ्वभिषोत्रे **(उ) (लोकम्) (दाता) (वसु) (स्तुवते) (कीरये)** स्तावकाय **(चित्)** अपि॥ ३॥

अन्वयः-हे मनुष्या! य ऊती प्रणेनीः पातोग्र इन्द्रस्सुतं सोमं जरितारं करोति स नो राजास्तु। य उ वीराय सुष्वये स्तुवते कीरये दाता कर्त्ता लोकं वसु चित् करोति सोऽस्माकमधिष्ठाताऽस्तु॥३॥

भावार्थः-हे मनुष्या! तमेव राजानं मन्यध्वं यः सर्वशास्त्रावित् पुरुषार्थी धार्मिको जितेन्द्रियो भवेत्॥३॥

पदार्थः-हे मनुष्यो! जो **(ऊती)** रक्षण आदि क्रिया से **(प्रणेनीः)** अत्यन्त न्याय करने और **(पाता)** रक्षा करने वाला **(उग्रः)** तेजस्वी **(इन्द्रः)** ऐश्वर्यकारी राजा **(सुतम्)** उत्पन्न किये गये **(सोमम्)** सोमलता आदि ओषधियों के रस को और **(जरितारम्)** स्तुति करने वाले को करता है, वह हम लोगों का राजा हो और जो **(उ)** तर्क-वितर्क से **(वीराय)** पराक्रमयुक्त **(सुष्वये)** उत्तम प्रकार अच्छे पदार्थों के उत्पन्न करने वाले **(स्तुवते)** स्तुति करते हुए **(कीरये)** स्तुति करनेवाले के लिये **(दाता)** दाता और **(कर्ता)** कार्य करने वाला **(लोकम्)** लोक को **(वसु)** और धन को **(चित्)** भी करता है, वह हम लोगों का अग्रणी **(अस्तु)** हो॥३॥

भावार्थः-हे मनुष्यो! उसी को राजा मानो, जो सम्पूर्ण शास्त्रों का जानने वाला, पुरुषार्थी, धार्मिक और इन्द्रियों को वश में रखने वाला होवे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः॥४॥

गन्ता। इयन्ति। सवना। हरिऽभ्याम्। बभ्रिः। वज्रम्। पपिः। सोमम्। ददिः। गाः। कर्ता। वीरम्। नर्यम्। सर्वऽवीरम्। श्रोता। हवम्। गृणतः। स्तोमऽवाहाः॥४॥

पदार्थः-**(गन्ता)** **(इयान्ति)** एतावन्ति। अत्र **संहितायामिति** दीर्घः। **(सवना)** सवनान्यैश्वर्यकारकाणि कर्माणि **(हरिभ्याम्)** अध्यापकोपदेशकाभ्यां मनुष्याभ्यां सह **(बभ्रिः)** भर्त्ता धर्त्ता वा **(वज्रम्)** **(पपिः)** पाता **(सोमम्)** **(ददिः)** दाता **(गाः)** **(कर्त्ता)** **(वीरम्)** **(नर्यम्)** नृषु श्रेष्ठम् **(सर्ववीरम्)** सर्वे वीरा यस्मात्तम् **(श्रोता)** **(हवम्)** प्रशंसनीयम् **(गृणतः)** स्तुवतः **(स्तोमवाहाः)** ये स्तोमान् वहन्ति॥४॥

अन्वयः-हे स्तोमवाहा मनुष्या! यो हरिभ्यामियान्ति सवना गन्ता वज्रं बभ्रिः सोमं पपिर्गा ददिर्गृणतो हवं श्रोता सर्ववीरं नर्यं वीरं कर्त्ता भवेत्तं राजानं मन्यध्वम्॥४॥

भावार्थः-हे मनुष्या! यः सर्वेषु राजकर्मसु कुशलः स्यात्तं नृपं कृत्वा न्यायेन राज्यं पालयत॥४॥

पदार्थः-हे **(स्तोमवाहाः)** समूहों को धारण करने वाले मनुष्यो! जो **(हरिभ्याम्)** अध्यापक और उपदेशक मनुष्यों के साथ **(इयान्ति)** इतने **(सवना)** ऐश्वर्यकारक कर्म्मों को **(गन्ता)** प्राप्त होने वाला **(वज्रम्)** अस्त्रविशेष को **(बभ्रिः)** पुष्ट करने वा धारण करने तथा **(सोमम्)** सोमलता के रस का **(पपिः)**

पान करने और **(गाः)** गौओं को **(ददिः)** देने वाला **(गृणतः)** स्तुति करते हुओं को और **(हवम्)** प्रशंसा करने योग्य को **(श्रोता)** सुनने वाला **(सर्ववीरम्)** सम्पूर्ण वीर जिससे उस **(नर्यम्)** मनुष्यों में श्रेष्ठ **(वीरम्)** वीरजन को **(कर्त्ता)** करने वाला होवे, उसको राजा मानो॥४॥

भावार्थः-हे मनुष्यो! जो सम्पूर्ण राजकर्मों में निपुण हो, उसको राजा करके न्याय से राज्य का पालन करो॥४॥

पुनर्मनुष्यैः परस्परं कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को परस्पर कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अस्मै॑ व॒यं यद्ध॒वान॒ तद्वि॑विष्म॒ इन्द्रा॑य यो नः॑ प्र॒दिवो॑ अप॒स्कः।
सु॒ते सोमे॑ स्तु॒मसि शंस॑दु॒क्थेन्द्रा॑य॒ ब्रह्म॒ वर्ध॑नं॒ यथास॑त्॥५॥१५॥

अस्मै॑। व॒यम्। यत्। व॒वान॑। तत्। वि॒व॒ष्मः॒। इन्द्रा॑य। यः। नः॒। प्र॒ऽदिवः॑। अप॑ः। क॒रिति॑ कः। सु॒ते। सोमे॑। स्तु॒मसि॑। शंस॑त्। उ॒क्था। इन्द्रा॑य। ब्रह्म॑। वर्ध॑नम्। यथा॑। अस॑त्॥५॥

पदार्थः-(**अस्मै**) पूर्वमन्त्रोक्ताय **(वयम्)** **(यत्)** **(वावान)** वनते। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम् **(तत्)** **(विविष्मः)** व्याप्नुमः **(इन्द्राय)** ऐश्वर्याय **(यः)** **(नः)** अस्मान् **(प्रदिवः)** प्रकर्षेण कामयमानान् **(अपः)** कर्म **(कः)** करोति **(सुते)** निष्पादिते **(सोमे)** ऐश्वर्ये **(स्तुमसि)** स्तुमः **(शंसत्)** शंसेत् **(उक्था)** प्रशंसनीयानि कर्माणि **(इन्द्राय)** परमैश्वर्याय **(ब्रह्म)** धनम् **(वर्धनम्)** वर्धते येन **(यथा)** **(असत्)** भवेत्॥५॥

अन्वयः-हे मनुष्या! यः प्रदिवो नोऽपस्क इन्द्रायोक्था शंसद्यथा ब्रह्म वर्धनमसदस्मा इन्द्राय वयं यद्विविष्मस्तद्यो वावान तथा तं सुते सोमे वयं स्तुमसि॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये धनवत्सर्ववर्धकाः सन्ति ते परमैश्वर्यं लब्ध्वा प्रयतन्ते॥५॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(प्रदिवः)** अत्यन्तपन से कामना करते हुओं **(नः)** हम लोगों और **(अपः)** कर्म को **(कः)** करता है और **(इन्द्राय)** अत्यन्त ऐश्वर्ययुक्त जन के लिये **(उक्था)** प्रशंसा करने योग्य कर्मों को **(शंसत्)** कहे और **(यथा)** जैसे **(ब्रह्म)** धन **(वर्धनम्)** बढ़ता है जिससे वह **(असत्)** होवे और **(अस्मै)** पूर्व मन्त्र में कहे हुए **(इन्द्राय)** ऐश्वर्य के लिये **(वयम्)** हम लोग **(यत्)** जिसको **(विविष्मः)** व्याप्त होते हैं **(तत्)** उसका जो **(वावान)** उत्तम प्रकार सेवन करता है, वैसे उसकी **(सुते)** उत्पन्न किये गये **(सोम)** ऐश्वर्य में हम लोग **(स्तुमसि)** स्तुति करते हैं॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो धन के सदृश सब के बढ़ानेवाले हैं, वे अत्यन्त ऐश्वर्य को प्राप्त होकर प्रयत्न करते हैं॥५॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः।

सुते सोमे सुतपाः शंतमानि रान्द्र्या क्रियास्म वक्षणानि यज्ञैः॥६॥

ब्रह्माणि। हि। चकृषे। वर्धनानि। तावत्। ते। इन्द्र। मतिऽभिः। विविष्मः। सुते। सोमे। सुतऽपाः। शम्ऽतमानि। रान्द्र्या। क्रियास्म। वक्षणानि। यज्ञैः॥६॥

पदार्थः-(ब्रह्माणि) धनानि **(हि)** करोषि **(वर्धनानि)** वृद्धिकराणि **(तावत्)** **(ते)** तुभ्यम् **(इन्द्र)** **(मतिभिः)** उत्तमैर्मनुष्यैः सह **(विविष्मः)** व्याप्नुमः **(सुते)** **(सोमे)** ऐश्वर्ये **(सुतपाः)** यः सुतान् पदार्थान् पाति **(शन्तमानि)** अतिशयेन सुखकराणि **(रान्द्र्या)** रान्द्र्याणि रन्तुं योग्यानि **(क्रियास्म)** **(वक्षणानि)** प्रापकाणि **(यज्ञैः)** धनप्रापकैर्व्यवहारैः॥६॥

अन्वयः-हे इन्द्र! यावन्ति वर्धनानि ब्रह्माणि त्वं चकृषे तावत्ते मतिभिस्सहिता वयं विविष्मः। सुतपा हि वयञ्च सुते सोमे यज्ञैः शन्तमानि रान्द्र्या वक्षणानि क्रियास्म॥६॥

भावार्थः-मनुष्यैरुत्तमाचरणं दृष्ट्वा तादृशमेवाऽऽचरणीयम्। सर्वैर्मिलित्वैश्वर्यं प्राप्य न्यायेन प्रजा रक्षणीया॥६॥

पदार्थः-हे **(इन्द्र)** प्रतापयुक्त! जितने **(वर्धनानि)** वृद्धि करने वाले **(ब्रह्माणि)** धनों को आप **(चकृषे)** करते हो **(तावत्)** उतने **(ते)** आपके लिये **(मतिभिः)** उत्तम मनुष्यों के साथ हम लोग **(विविष्मः)** व्याप्त होवें तथा **(सुतपाः)** पदार्थों की रक्षा करने वाला तथा **(हि)** निश्चय कर हम लोग **(सुते)** उत्पन्न हुए **(सोमे)** ऐश्वर्य में **(यज्ञैः)** धनप्रापक व्यवहारों से निश्चय कर **(शन्तमानि)** अत्यन्त सुखकारक **(रान्द्र्या)** रमण करने योग्यों को **(वक्षणानि)** प्राप्त कराने वाले **(क्रियास्म)** करें॥६॥

भावार्थः-मनुष्यों को चाहिये कि उत्तम आचरण को देख के वैसा ही आचरण करें और सब मिल के ऐश्वर्य को प्राप्त होकर न्याय से प्रजा की रक्षा करें॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स नो बोधि पुरोळाशं ररांणः पिबा तु सोमं गोऋजीकमिन्द्र।

एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम्॥७॥

सः। नः। बोधि। पुरोळाशम्। ररांणः। पिब। तु। सोमम्। गोऽऋजीकम्। इन्द्र। आ। इदम्। बर्हिः। यजमानस्य। सीद। उरुम्। कृधि। त्वाऽयतः। ऊँ इति। लोकम्॥७॥

पदार्थः-(सः) **(नः)** अस्मान् **(बोधि)** बुध्यस्व **(पुरोळाशम्)** सुसंस्कृतमन्नम् **(रराणः)** ददन् **(पिबा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(तु)** **(सोमम्)** महौषधिरसम् **(गोऋजीकम्)** गाव इन्द्रियाणि ऋजीकानि सरलानि येन तम् **(इन्द्र)** ऐश्वर्य्यधर्त्तः **(आ)** **(इदम्)** **(बर्हिः)** उत्तमासनम् **(यजमानस्य)** **(सीद)** **(उरुम्)** बहुम् **(कृधि)** **(त्वायतः)** त्वां कामयमानान् **(उ)** **(लोकम्)** द्रष्टव्यम्॥७॥

अन्वयः-हे इन्द्र! स त्वं पुरोळाशं रराणो गोऋजीकं सोमं पिबा **[नो]** बोधि यजमानस्येदं बर्हिरासीदोरुं लोकमु त्वायतस्तु कृधि॥७॥

भावार्थः-ये रोगहराणि भोजनानि पानानि च ददति परोपकारं कुर्वन्ति तेऽत्र प्रशंसनीयाः सन्ति॥७॥

पदार्थः-हे **(इन्द्र)** ऐश्वर्य के धारण करने वाले **(सः)** वह आप **(पुरोळाशम्)** उत्तम प्रकार संस्कारयुक्त अन्न को **(रराणः)** देते हुए **(गोऋजीकम्)** इन्द्रिय सरल जिससे उस **(सोमम्)** बड़ी ओषधियों के रस को **(पिबा)** पीजिये और **(नः)** हम लोगों को **(बोधि)** जानिये और **(यजमानस्य)** यजमान के **(इदम्)** इस **(बर्हिः)** उत्तम आसन पर **(आ, सीद)** सब प्रकार से विराजिये तथा **(उरुम्)** बहुत **(लोकम्)** देखने योग्य को **(उ)** और **(त्वायतः)** आपकी कामना करते हुओं को **(तु)** तो **(कृधि)** करिये॥७॥

भावार्थः-जो लोग रोग के हरनेवाले भोजनों और जलपानादि को देते हैं और परोपकार करते हैं, वे प्रशंसा करने योग्य हैं॥७॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञासइमे अश्नुवन्तु।

प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः॥८॥

सः। मन्दस्व। हि। अनु। जोषम्। उग्र। प्र। त्वा। यज्ञासः। इमे। अश्नुवन्तु। प्र। इमे। हवासः। पुरुऽहूतम्। अस्मे इति। आ। त्वा। इयम्। धीः। अवसे। इन्द्र। यम्याः॥८॥

पदार्थः-**(सः)** **(मन्दस्वा)** आनन्द। अत्र **संहितायामि**ति दीर्घः। **(हि)** यतः **(अनु)** **(जोषम्)** प्रीतिम् **(उग्र)** तेजस्विन् **(प्र)** **(त्वा)** त्वाम् **(यज्ञासः)** सर्वे धर्म्या व्यवहाराः **(इमे)** **(अश्नुवन्तु)** प्राप्नुवन्तु **(प्र)** **(इमे)** **(हवासः)** दानाऽऽदानाऽदनाख्याः **(पुरुहूतम्)** बहुभिः प्रशंसितम् **(अस्मे)** अस्माकमस्मासु वा **(आ)** समन्तात् **(त्वा)** त्वाम् **(इयम्)** **(धीः)** **(अवसे)** **(इन्द्रः)** विद्याक्रियाकुशल **(यम्याः)**॥८॥

अन्वयः-हे उग्रेन्द्र! ययेमे यज्ञासस्त्वाऽश्नुवन्तु य इमे हवासः पुरुहूतं त्वा प्राश्नुवन्तु सेयं धीरस्मे अवसेऽस्तु त्वं तामा यम्याः। अस्मासु प्र यम्यास्तैर्हि जोषमनु स त्वं मन्दस्वा॥८॥

भावार्थः-हे मनुष्या! यैः कर्मभिर्येया च प्रज्ञया विज्ञानानन्दौ वर्धेते तानि यूयमुन्नयत॥८॥

पदार्थः-हे **(उग्र)** तेजस्विन् **(इन्द्र)** विद्या और क्रिया में कुशल! जिस बुद्धि से **(इमे)** ये **(यज्ञासः)** सम्पूर्ण धर्मयुक्त व्यवहार **(त्वा)** आपको **(अश्नुवन्तु)** प्राप्त हों और जो **(इमे)** ये **(हवासः)** दान, आदान और अदन नामक अर्थात् देना, लेना, खाना **(पुरुहूतम्)** बहुतों से प्रशंसितम् **(त्वा)** आपको **(प्र)** प्राप्त हों सो **(इयम्)** यह **(धीः)** बुद्धि **(अस्मे)** हम लोगों की वा हम लोगों में **(अवसे)** रक्षा के लिये हो आप उसको **(आ, यम्याः)** अच्छे प्रकार विस्तारिये तथा हम लोगों में **(प्र)** अच्छे प्रकार दीजिये

उनके साथ **(हि)** जिससे **(जोषम्)** प्रीति को **(अनु)** अनुकूल **(सः)** वह आप **(मन्दस्वा)** आनन्द करिये॥८॥

भावार्थः-हे मनुष्यो! जिन कर्मों और जिस बुद्धि से विज्ञान और आनन्द बढ़ते हैं, उनकी आप लोग वृद्धि करिये॥८॥

पुनर्मनुष्यैः कथं वर्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम्।
कुवित्तस्मा असति नो भरायं न सुष्विमिन्द्रोऽवसे मृधाति॥९॥

तम्। वः। सखायः। सम्। यथा। सुतेषु। सोमेभिः। ईम्। पृणत। भोजम्। इन्द्रम्। कुवित्। तस्मै। असति। नः। भराय। न। सुष्विम्। इन्द्रः। अवसे। मृधाति॥९॥

पदार्थः-**(तम्)** **(वः)** युष्माकम् **(सखायः)** सुहृदः **(सम्)** **(यथा)** **(सुतेषु)** निष्पन्नेषु **(सोमेभिः)** ऐश्वर्यप्रेरणादिक्रियाभिः **(ईम्)** उदकेन **(पृणता)** सुखयत। अत्र **संहितायामिति** दीर्घः। **(भोजम्)** पालकम् **(इन्द्रम्)** शत्रुविनाशकं राजानम् **(कुवित्)** महत् **(तस्मै)** **(असति)** भवेत् **(नः)** अस्माकम् **(भराय)** पालनाय **(न)** निषेधे **(सुष्विम्)** सोतारमैश्वर्यकारकम् **(इन्द्रः)** राजा **(अवसे)** रक्षणाद्याय **(मृधाति)** हिंस्यात्॥९॥

अन्वयः-हे सखायो! यथा सोमेभिः सुतेषु वो नश्च भरायावसे य इन्द्रो न मृधाति तं भोजं सुष्विमिन्द्रं यूयं सं पृणता तस्मा ईं कुविदसति॥९॥

भावार्थः-ये मनुष्या रागद्वेषौ विहाय परस्परं रक्षणं विदधति ते महत्सुखमाप्नुवन्ति॥९॥

पदार्थः-हे **(सखायः)** मित्र जनो! **(यथा)** जैसे **(सोमेभिः)** ऐश्वर्य की प्रेरणा आदि क्रियाओं से **(सुतेषु)** उत्पन्न हुओं में **(वः)** आप लोग और **(नः)** हम लोगों के **(भराय)** पालन के लिये **(अवसे)** रक्षण आदि के लिये जो **(इन्द्रः)** राजा **(न)** नहीं **(मृधाति)** हिंसा करे **(तम्)** उस **(भोजम्)** पालन करने वाले **(सुष्विम्)** उत्पन्न करने वा ऐश्वर्य्य करने वाले **(इन्द्रम्)** शत्रु के विनाश करने वाले राजा को आप लोग **(सम्, पृणता)** उत्तम प्रकार सुखी करिये **(तस्मै)** उसके लिये **(ईम्)** जल से **(कुवित्)** बड़ा **(असति)** होवे॥९॥

भावार्थः-जो मनुष्य राग और द्वेष का त्याग करके परस्पर रक्षण करते हैं, वे सुख को प्राप्त होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः।

अस॒द्यथा॑ जरि॒त्र उ॒त सू॒रिरिन्द्रो॑ रा॒यो वि॒श्ववा॑रस्य दा॒ता॥ १०॥ १६॥ २॥

ए॒व। इत्। इन्द्रः॑। सु॒ते। अ॒स्ता॒वि॒। सोमे॑। भ॒रत्ऽवाजे॑षु। क्षय॑त्। इत्। म॒घोन॑ः। अस॑त्। यथा॑। ज॒रि॒त्रे। उ॒त। सू॒रिः। इन्द्रः॑। रा॒यः। वि॒श्वऽवा॑रस्य। दा॒ता॥ १०॥

पदार्थः-(एव) (**इत्**) अपि (**इन्द्रः**) परमैश्वर्यः (**सुते**) निष्पन्नेऽस्मिञ्जगति (**अस्तावि**) स्तूयते (**सोमे**) ऐश्वर्ये (**भरद्वाजेषु**) धृतविज्ञानेषु (**क्षयत्**) निवसेत् (**इत्**) अपि (**मघोनः**) धनाढ्यान् (**असत्**) भवेत् (**यथा**) (**जरित्रे**) स्तावकाय (**उत**) अपि (**सूरिः**) विद्वान् (**इन्द्रः**) (**रायः**) धनस्य (**विश्ववारस्य**) विश्वे सर्वे वारा स्वीकारा यस्मिंस्तस्य (**दाता**)॥ १०॥

अन्वयः-हे मनुष्या! यथेन्द्रः सुते सोम इद्भरद्वाजेष्वस्तावि यथा सूरिरिन्द्रो जरित्रे विश्ववारस्य रायो दातोत क्षयदिन्मघोनो रक्षमाणोऽस्ति स इदेव तथा सुख्यसत्॥ १०॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या अस्मिञ्जगति धर्म्याणि कर्माणि कुर्वन्ति ते सर्वदा स्तूयन्ते यथा दानं प्रियकारकं भवति तथा ह्यादानं न भवतीति॥ १०॥

अत्रेन्द्रविद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदभाष्ये षष्ठे मण्डले द्वितीयोऽनुवाकस्त्रयोविंशं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो (**यथा**) जैसे (**इन्द्रः**) अत्यन्त ऐश्वर्य वाला जन (**सुते**) उत्पन्न हुए इस संसार में (**सोमे**) ऐश्वर्य में (**इत्**) निश्चय (**भरद्वाजेषु**) विज्ञान को धारण किए हुओं में (**अस्तावि**) स्तुति किया जाता है और जैसे (**सूरिः**) विद्वान् और (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त जन (**जरित्रे**) स्तुति करने वाले जन के लिये (**विश्ववारस्य**) सम्पूर्ण स्वीकार जिसमें उस (**रायः**) धन का (**दाता**) देने वाला (**उत**) निश्चय से (**क्षयत्**) निवास करे और (**इत्**) निश्चय कर (**मघोनः**) धन से युक्त जनों की रक्षा करता हुआ हो वह (**एव**) ही उस प्रकार का सुखी (**असत्**) होवे॥ १०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य इस संसार में धर्मयुक्त कर्म्म करते हैं, वे सर्वदा स्तुति किये जाते हैं, जैसा देना प्रियकारक होता है, वैसा लेना नहीं प्रियकारक होता है॥ १०॥

इस सूक्त में इन्द्र, विद्वान्, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ऋग्वेदभाष्य में छठें मण्डल में दूसरा अनुवाक, तेईसवाँ सूक्त और सोलहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य चतुर्विंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, २ भुरिक् पङ्क्तिः। ३, ५, ९ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४, ७ निचृत्त्रिष्टुप्। ८ त्रिष्टुप्। ६, १० विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राज्ञा किं कर्त्तव्यमित्याह॥

अब दश ऋचावाले चौबीसवें सूक्त का प्रारम्भ किया जाता है, उसके प्रथम मन्त्र में अब राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

वृषा मदु इन्द्रे श्लोकऽउक्था सचा सोमेषु सुतपा ऋजीषी।
अर्चत्र्योऽ मघवा नृभ्यऽउक्थैर्द्युक्षो राजा गिरामक्षितोतिः॥ १॥

वृषाऽ। मदः। इन्द्रे। श्लोकः। उक्था। सचाऽ। सोमेषु। सुतऽपाः। ऋजीषी। अर्चत्र्यः। मघऽवाऽ। नृभ्यः। उक्थैः। द्युक्षः। राजाऽ। गिराम्। अक्षितऽऊतिः॥ १॥

पदार्थः-(वृषा) बलिष्ठः **(मदः)** आनन्दितः **(इन्द्रे)** ऐश्वर्यवति **(श्लोकः)** वाक् **(उक्था)** प्रशंसितानि कर्माणि **(सचा)** समवेताः **(सोमेषु)** ऐश्वर्येषु **(सुतपाः)** सुष्ठु तपस्वी **(ऋजीषी)** सरलगुणकर्मस्वभावः **(अर्चत्र्यः)** सत्कारं कुर्वत्यः प्रजाः **(मघवा)** न्यायोपार्जितधनः **(नृभ्यः)** मनुष्येभ्यः **(उक्थैः)** प्रशंसनीयैः कर्मभिः **(द्युक्षः)** द्युतिमान् **(राजा)** **(गिराम्)** न्यायविद्यायुक्तानां वाचाम् **(अक्षितोतिः)** नित्यरक्षः॥१॥

अन्वयः-हे मनुष्या! य इन्द्रे श्लोको वृषा मदः सचा सुतपा ऋजीषी मघवाक्षितोतिः द्युक्षा राजोक्थैः सोमेषूक्था गिरां नृभ्यो या अर्चत्र्यः प्रजास्तासां श्रोता भवेत् स एव राज्यं कर्तुमर्हेदिति विजानीत॥१॥

भावार्थः-हे मनुष्या! य उत्तमानि कर्माणि कृत्वा सत्यवादी जितेन्द्रियः पितृवत्प्रजापालको वर्तेत स एव सर्वत्र प्रकाशितकीर्तिर्भवेत्॥१॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रे)** ऐश्वर्य्यवान् पदार्थ में **(श्लोकः)** वाणी **(वृषा)** बलिष्ठ **(मदः)** आनन्दित **(सचा)** मेल किये हुए **(सुतपाः)** अच्छा तपस्वी **(ऋजीषी)** सरल गुण, कर्म स्वभाव वाला **(मघवा)** न्याय से इकट्ठे किये हुए धन से युक्त **(अक्षितोतिः)** नित्य रक्षित **(द्युक्षः)** दीप्तिमान् **(राजा)** प्रकाश करता हुआ **(उक्थैः)** प्रशंसनीय कर्म्मों से **(सोमेषु)** ऐश्वर्य्यों में **(उक्था)** प्रशंसित कर्मों को **(गिराम्)** न्याय और विद्यायुक्त वाणियों के संबन्ध में **(नृभ्यः)** मनुष्यों के किये जो **(अर्चत्र्यः)** सत्कार करती हुई प्रजा हैं, उनका सुनने वाला हो, वही राज्य करने योग्य हो, यह जानो॥१॥

भावार्थः-हे मनुष्यो! जो उत्तम कामों को करके सत्यवादी, इन्द्रियों को जीतने वाला, पिता के समान प्रजापालक वर्त्तमान हो, वही सर्वत्र प्रकाशित कीर्त्ति वाला हो॥१॥

पुना राज्ञा प्रजाजनैश्च किं कर्त्तव्यमित्याह॥

फिर राजा और प्रजाजनों को क्या करना चाहिये, इस विषय को कहते हैं॥

ततुरिर्वीरो नर्यो विचेता: श्रोता हवं गृणत उर्व्यूति:।
वसु शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम्॥ २॥

ततुरि:। वीर:। नर्य:। विऽचेता:। श्रोता। हवम्। गृणत:। उर्विऽऊति:। वसु:। शंस:। नराम्। कारुऽधाया:। वाजी। स्तुत:। विदथे। दाति। वाजम्॥ २॥

पदार्थ:-(ततुरि:) शत्रूणां हिंसक: **(वीर:)** शौर्यादिगुणोपेत: **(नर्य:)** नृषु साधु: **(विचेता:)** विविधप्रज्ञ: **(श्रोता)** विवादानां वचनानां श्रवणकर्त्ता **(हवम्)** प्रशंसनीयं व्यवहारम् **(गृणत:)** प्रशंसकान् **(उर्व्यूति:)** ऊर्व्या: पृथिव्या ऊती रक्षा येन स: **(वसु:)** वासयिता **(शंस:)** प्रशंसक: **(नराम्)** नराणां नायक: **(कारुधाया:)** कारवो ध्रियन्ते येन स: **(वाजी)** विज्ञानवान् **(स्तुत:)** प्रशंसित: **(विदथे)** स-ामे **(दाति)** ददाति **(वाजम्)** विज्ञानम्॥ २॥

अन्वय:-हे मनुष्या! यस्ततुरिर्वीरो नर्यो विचेता हवं गृणतश्श्रोतोर्व्यूतिर्नरां वसु: शंस: कारुधाया वाजी स्तुतो विदथे वाजं दाति तं यूयं सेवध्वम्॥ २॥

भावार्थ:-हे मनुष्या! यूयं यो नरोत्तमोऽधिकबलप्रज्ञो यथार्थस्य श्रोता स-ामे युद्धविद्याप्रदोऽस्ति तमेव सदा सत्कुरुत॥ २॥

पदार्थ:-हे मनुष्यो! जो **(ततुरि:)** शत्रुओं का मारने वाला **(वीर:)** वीरता आदि गुणों से युक्त **(नर्य:)** मनुष्यों में श्रेष्ठ **(विचेता:)** अनेक प्रकार की बुद्धि वाला और **(हवम्)** प्रशंसा करने योग्य व्यवहार की **(गृणत:)** प्रशंसा करते हुओं के **(श्रोता)** विवादविषयक वचनों का सुनने वाला **(उर्व्यूति:)** पृथिवी की रक्षा जिससे **(नराम्)** मनुष्यों का अग्रणी **(वसु:)** वास कराने और **(शंस:)** प्रशंसा करने वाला **(कारुधाया:)** कारीगर धारण किये जाते जिससे वह **(वाजी)** विज्ञान वाला **(स्तुत:)** प्रशंसित हुआ **(विदथे)** संग्राम में **(वाजम्)** विज्ञान को **(दाति)** देता है, उसकी आप लोग सेवा करो॥ २॥

भावार्थ:-हे मनुष्यो! तुम लोग जो मनुष्यों में उत्तम, अधिक बल और बुद्धि युक्त, यथार्थ का सुनने वाला तथा संग्राम में युद्धविद्या का देने वाला है, उस ही का सदा सत्कार करो॥ २॥

पुन: सूर्यपृथिव्यो: कीदृशं वर्त्तमानमस्तीत्याह॥

फिर सूर्य और पृथिवी का कैसा वर्त्ताव है, इस विषय को अगले मन्त्र में कहते हैं॥

अक्षो न चक्र्यो: शूर बृहन्प्र ते मह्ना रिरिचे रोदस्यो:।
वृक्षस्य नु ते पुरुहूत वया व्यू३तयो रुरुहुरिन्द्र पूर्वी:॥ ३॥

अक्ष:। न। चक्र्यो:। शूर। बृहन्। प्र। ते। मह्ना। रिरिचे। रोदस्यो:। वृक्षस्य। नु। ते। पुरुऽहूत। वया:। वि। ऊतय:। रुरुहु:। इन्द्र। पूर्वी:॥ ३॥

पदार्थः-(अक्षः) (न) इव **(चक्र्योः) (शूर) (बृहन्)** महान् **(प्र) (ते)** तव **(महा)** महत्त्वेन महिम्ना **(रिरिचे)** अतिरिणक्ति **(रोदस्योः)** द्यावापृथिव्योः **(वृक्षस्य) (नु) (ते)** तव **(पुरुहूत)** बहुभिः पूजित **(वयाः) (वि) (ऊतयः)** रक्षणाद्याः क्रियाः **(रुरुहुः)** प्रादुर्भवेयुः **(इन्द्र)** राजन् **(पूर्वीः)** प्राचीनाः॥३॥

अन्वयः-हे शूर पुरुहूतेन्द्र! यथा ते महा रोदस्योर्मध्ये पूर्वीर्व्यूतयश्चक्र्योरक्षो न प्र रुरुहुः। हे बृहन्! वृक्षस्य नु ते वया रिरिचे तं सर्वे जानन्तु॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा चक्राणां धर्त्र्यो धुरो वृक्षस्य शाखा इव वर्धन्तेऽन्तरिक्षे तिष्ठन्ति तथा सूर्याभितः सर्वे भूगोला भ्रमन्ति तथैव न्यायस्य मार्गेण प्रजाश्चलन्ति॥३॥

पदार्थः-हे **(शूर)** वीर पुरुष **(पुरुहूत)** बहुतों से आदर किये गये **(इन्द्र)** राजन्! जैसे **(ते)** आपके **(महा)** महत्त्व से **(रोदस्योः)** अन्तरिक्ष और पृथिवी के मध्य में **(पूर्वीः)** प्राचीन **(वि, ऊतयः)** विविध रक्षण आदि क्रियायें **(चक्र्योः)** पहियों की **(अक्षः)** धुरी के **(न)** समान **(प्र, रुरुहुः)** अच्छे प्रकार प्रकट होवें और हे **(बृहन्)** महान् **(वृक्षस्य)** वृक्ष की बढ़वार **(नु)** जैसे वैसे **(ते)** आपकी **(वयः)** अवस्था **(रिरिचे)** प्रकट होती है, उसको सब लोग जानें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे पहियों की धारण करने वाली धुरी वृक्ष की शाखाओं के समान बढ़ती है और अन्तरिक्ष में स्थित होती हैं, वैसे सूर्य के चारों ओर सम्पूर्ण भूगोल घूमते हैं और वैसे ही न्याय के मार्ग से प्रजायें चलती हैं॥३॥

पुना राज्ञा प्रजाभिश्च कथं वर्तितव्यमित्याह॥

फिर राजा और प्रजा को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः सञ्चरणीः।

वत्सानां न तन्तयस्त इन्द्र दामन्वन्तो अदामानः सुदामन्॥४॥

शचीऽवतः। ते। पुरुऽशाक। शाकाः। गवाम्ऽइव। स्रुतयः। सम्ऽचरणीः। वत्सानाम्। न। तन्तयः। ते। इन्द्र। दामन्ऽवन्तः। अदामानः। सुऽदामन्॥४॥

पदार्थः-(शचीवतः) प्रज्ञाप्रजायुक्तस्य **(ते)** तव **(पुरुशाक)** बहुशक्त **(शाकाः)** शक्तिमत्यः **(गवामिव) (स्रुतयः)** स्रुवन्त्यः **(सञ्चरणीः)** याः सम्यक् चरन्ति ता भूमयः **(वत्सानाम्) (न)** इव **(तन्तयः)** विस्तीर्णाः **(ते)** तव **(इन्द्र)** दुःखविदारक **(दामन्वन्तः)** बहुबन्धनाः **(अदामानः)** निर्बन्धनाः **(सुदामन्)** सुनियमबद्ध॥४॥

अन्वयः-हे पुरुशाकेन्द्र! शचीवतस्ते गवामिव स्रुतयः सञ्चरणीः शाका वत्सानां तन्तयो न ते प्रजाः सन्ति। हे सुदामन्! ये दामन्वन्तः स्युस्तेऽदामानस्त्वया कार्याः॥४॥

भावार्थः-अत्रोपमालङ्कारः। त एव राजानः प्रशंसितप्रभावा भवन्ति येऽन्यायपीडादिबन्धनात् प्रजा विमोच्य धर्मपथे प्रचालयन्ति यथा वत्सानां वर्धिका गावो भवन्ति तथैव प्रजानां वर्धका राजपुरुषाः स्युः॥४॥

पदार्थः-हे **(पुरुशाक)** बहुत सामर्थ्यवान् **(इन्द्र)** दुःख के नाश करने वाले! **(शचीवतः)** बुद्धि और प्रजा से युक्त **(ते)** आपकी **(गवामिव, स्रुतयः)** गौओं की गतियों के सदृश **(सञ्चरणीः)** अच्छे प्रकार चलने वाली भूमियाँ **(शाकाः)** और सामर्थ्य वाली **(वत्सानाम्)** बछड़ों की **(तन्तयः)** विस्तृत पङ्क्तियों के **(न)** सदृश **(ते)** आपकी प्रजा हैं। हे **(सुदामन्)** अच्छे नियमों में बँधे हुए! जो **(दामन्वन्तः)** बहुत बन्धनों वाले होवें वे आप से **(अदामानः)** बन्धनरहित करने योग्य हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वे ही राजाजन प्रशंसित प्रतापवाले होते हैं जो अन्याय और पीड़ा आदि के बन्धन से प्रजाओं को छुड़ा कर धर्ममार्ग में चलाते हैं और जैसे बछड़ों की बढ़ाने वाली गौ होती हैं, वैसे ही प्रजा के बढ़ानेवाले राजपुरुष हों॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः।
मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति॥५॥१७॥

अन्यत्। अद्य। कर्वरम्। अन्यत्। ऊँ इति। श्वः। असत्। च। सत्। मुहुः। आऽचक्रिः। इन्द्रः। मित्रः। नः। अत्र। वरुणः। च। पूषा। अर्यः। वशस्य। पर्िऽएता। अस्ति॥५॥

पदार्थः-(**अन्यत्**) (**अद्य**) (**कर्वरम्**) कर्त्तव्यं कर्म (**अन्यत्**) (**उ**) (**श्वः**) आगामिनि दिने (**असत्**) भवेत् (**च**) (**सत्**) (**मुहुः**) वारंवारम् (**आचक्रिः**) समन्तात् कर्त्ता (**इन्द्रः**) राजा (**मित्रः**) (**नः**) अस्माकम् (**अत्र**) (**वरुणः**) श्रेष्ठः (**च**) (**पूषा**) पुष्टिकर्त्ता (**अर्यः**) स्वामी (**वशस्य**) वशवर्तिनः (**पर्येता**) सर्वतः प्राप्तः (**अस्ति**)॥५॥

अन्वयः-य इन्द्रो राजाऽद्यान्यदु श्वोऽन्यत् कर्वरमाचक्रिस्सन्मुहुरसत् स चात्र नो मित्रो वरुणः पूषाऽर्य्यश्च वशस्य पर्येतास्ति सोऽलंसुखो भवति॥५॥

भावार्थः-हे मनुष्या! यो राजा प्रतिदिनं पुनः पुनः सत्कर्माचरति स सर्वेषां न्यायकरणे पक्षपातं विहाय मित्रवद्भवति सर्वे चास्य वशे भवन्ति॥५॥

पदार्थः-जो **(इन्द्रः)** राजा **(अद्य)** आज **(अन्यत्)** अन्य **(उ)** और **(श्वः)** आने वाले दिन में **(अन्यत्)** अन्य **(कर्वरम्)** करने योग्य कर्म को **(आचक्रिः)** सब प्रकार से करने वाला **(सत्)** हुआ **(मुहुः)** वारंवार **(असत्)** होवे वह **(च)** और **(अत्र)** इस संसार में **(नः)** हम लोगों का **(मित्रः)** मित्र **(वरुणः)** श्रेष्ठ **(पूषा)** पुष्टि करने वाला **(अर्यः)** स्वामी **(च)** और **(वशस्य)** वशवर्ती का **(पर्येता)** सब ओर से प्राप्तजन **(अस्ति)** है, वह पूर्ण सुख वाला होता है॥५॥

भावार्थः-हे मनुष्यो! जो राजा प्रतिदिन बारबार सत्य कर्म का आचरण करता है, वह सब के न्याय करने में पक्षपात का त्याग करके मित्र के सदृश होता है और सब इसके वश में होते हैं॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वि त्वदापो॒ न पर्व॑तस्य पृ॒ष्ठादु॒क्थेभि॑रिन्द्रानयन्त य॒ज्ञैः।
तं त्वा॒भिः सु॑ष्टु॒तिभि॑र्वा॒जय॑न्त आ॒जिं न ज॑ग्मुर्गि॒र्वाहो॒ अश्वा॑ः॥६॥

वि। त्वत्। आपः॑। न। पर्व॑तस्य। पृ॒ष्ठात्। उ॒क्थेभि॑ः। इ॒न्द्र॒। अ॒न॒य॒न्त॒। य॒ज्ञैः। तम्। त्वा॒। आ॒भिः। सु॒स्तु॒तिऽभि॑ः। वा॒जय॑न्तः। आ॒जिम्। न। ज॒ग्मुः॒। गि॒र्वा॒हः॒। अश्वा॑ः॥६॥

पदार्थः-(**वि**) विशेषे (**त्वत्**) (**आपः**) जलानि (**न**) इव (**पर्वतस्य**) शैलस्य (**पृष्ठात्**) (**उक्थेभिः**) प्रशंसनीयैः कर्मभिः (**इन्द्र**) राजन् (**अनयन्त**) नयन्ति (**यज्ञैः**) सत्कर्मानुष्ठानैः (**तम्**) (**त्वा**) त्वाम् (**आभिः**) प्रत्यक्षाभिः (**सुष्टुतिभिः**) (**वाजयन्तः**) हर्षयन्तः (**आजिम्**) स-ामम् (**न**) इव (**जग्मुः**) गच्छेयुः (**गिर्वाहः**) ये गिरो वहन्ति प्रापयन्ति ते (**अश्वाः**) महान्तो विद्वांसः। **अश्व इति महन्नामसु पठितम्।** (निघं०१.१४)॥६॥

अन्वयः-हे इन्द्र! ये त्वद्रक्षिताः पर्वतस्य पृष्ठादापो नोक्थेभिर्यज्ञैर्यं त्वा गिर्वाहोऽश्वा व्यनयन्त तं त्वामाभिस्सुष्टुतिभिर्वाजयन्तः शूरा आजिन्न जग्मुः॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यथा पर्वतोपरिष्टाज्जलं सद्यो गत्वा जलाशयं प्राप्नोति तथा ये भवत्प्रजाहितैषिणो भवन्तं प्राप्नुवन्ति तैस्सहित एव सदोन्नतो भवेः॥६॥

पदार्थः-हे (**इन्द्र**) राजन्! जो (**त्वत्**) आप से रक्षित हुए (**पर्वतस्य**) पर्वत के (**पृष्ठात्**) पीठ से (**आपः**) जल (**न**) जैसे वैसे (**उक्थेभिः**) प्रशंसा करने योग्य कर्मों के अनुष्ठानों से और (**यज्ञैः**) अच्छे कर्मों के अनुष्ठानों से जिन (**त्वा**) आपको (**गिर्वाहः**) वाणियों के प्राप्त कराने वाले (**अश्वाः**) बड़े विद्वान् जन (**वि**) विशेष करके (**अनयन्त**) पहुँचाते हैं (**तम्**) उन आपको (**आभिः**) इन प्रत्यक्ष (**सुष्टुतिभिः**) उत्तम स्तुतियों से (**वाजयन्तः**) प्रसन्न कराते हुए शूरवीर जन (**आजिम्**) स-ाम को (**न**) जैसे वैसे (**जग्मुः**) प्राप्त होवें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जैसे पर्वत के ऊपर वर्त्तमान जल शीघ्र जाकर जलाशय को प्राप्त होता है, वैसे जो आपकी प्रजाओं के हित के चाहने वाले जन आपको प्राप्त होते हैं, उनके सहित ही आप सदा उन्नत हूजिये॥६॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

न यं ज॑र॒न्ति श॒रदो॒ न मासा॒ न द्याव॒ इन्द्र॑मवकृ॒र्शय॑न्ति।

वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना॥७॥

न। यम्। जरन्ति। शरदः। न। मासाः। न। द्यावः। इन्द्रम्। अवऽकर्शयन्ति। वृद्धस्य। चित्। वर्धताम्। अस्य। तनूः। स्तोमेभिः। उक्थैः। च। शस्यमाना॥७॥

पदार्थः-(न) निषेधे **(यम्)** **(जरन्ति)** जीर्णं कुर्वन्ति **(शरदः)** शरदाद्या ऋतवः **(न)** **(मासाः)** चैत्राद्याः **(न)** **(द्यावः)** सूर्यादयः **(इन्द्रम्)** परमात्मानम् **(अवकर्शयन्ति)** कृशं कर्तुं शक्नुवन्ति **(वृद्धस्य)** **(चित्)** अपि **(वर्धताम्)** **(अस्य)** जीवस्य **(तनूः)** शरीरम् **(स्तोमेभिः)** स्तुत्यैः **(उक्थैः)** वक्तुमर्हैः **(च)** **(शस्यमाना)** स्तवनीया॥७॥

अन्वयः-हे विद्वांसो! यस्यास्य वृद्धस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना चिद्वर्धतां यमिन्द्रं परमात्मानं शरदो न जरन्ति मासा न जरन्ति द्यावो नाऽवकर्शयन्ति तं विद्वांसं परमात्मानं च यूयं सेवध्वम्॥७॥

भावार्थः-स एव विद्वान् वृद्धो भूत्वा वर्धते यः सर्वान्त्सुप्रज्ञान् सुशीलान् धर्माचारान् करोति ये निर्विकारं जन्मरणजरादिदोषरहितं परमात्मानमुपासते ते प्रशंसनीया जायन्ते॥७॥

पदार्थः-हे विद्वान् जनो! जिस **(अस्य)** इस जीव **(वृद्धस्य)** वृद्ध विद्वान् का **(तनूः)** शरीर **(स्तोमेभिः)** स्तुति करने के योग्यों और इन **(उक्थैः)** कहने के योग्य पदार्थों से **(च)** भी **(शस्यमाना)** प्रशंसा करने योग्य **(चित्)** भी **(वर्धताम्)** बढ़े और **(यम्)** जिस **(इन्द्रम्)** परमात्मा को **(शरदः)** शरद् आदि ऋतुयें **(न)** नहीं **(जरन्ति)** जीर्ण करती हैं और **(मासाः)** चैत्र आदि महीने **(न)** नहीं जीर्ण करते हैं तथा **(द्यावः)** सूर्य आदि **(न)** नहीं **(अवकर्शयन्ति)** दुर्बल कर सकते हैं, उस विद्वान् और परमात्मा का आप लोग सेवन करिये॥७॥

भावार्थः-वही विद्वान् वृद्ध होकर वृद्धि को प्राप्त होता है जो सब को अच्छे, बुद्धिमान्, सुशील तथा धर्म्माचरण करने वाला करता है और जो निर्विकार और जन्म, मरण, बुढ़ापा आदि दोषों से रहित परमात्मा की उपासना करते हैं, वे प्रशंसा करने योग्य होते हैं॥७॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान्।
अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद्भवति गाधमस्मै॥८॥

न। वीळवे। नमते। न। स्थिराय। न। शर्धते। दस्युऽजूताय स्तवान्। अज्राः। इन्द्रस्य। गिरयः। चित्। ऋष्वाः। गम्भीरे। चित्। भवति। गाधम्। अस्मै॥८॥

पदार्थः-(न) निषेधे **(वीळवे)** प्रशंसनीयाय बलाय **(नमते)** **(न)** **(स्थिराय)** **(न)** **(शर्धते)** बलाय **(दस्युजूताय)** दुष्टसङ्गाय **(स्तवान्)** स्तुयात् **(अज्राः)** प्रक्षेप्तारः **(इन्द्रस्य)** विद्युतः **(गिरयः)** मेघाः **(चित्)** इव **(ऋष्वाः)** महान्तः **(गम्भीरे)** **(चित्)** अपि **(भवति)** **(गाधम्)** गृहीतपरिमाणम् **(अस्मै)**॥८॥

अन्वयः-हे विद्वांसो! यो दस्युजूताय वीळवे न नमते स्थिराय न नमते शर्धते न स्तवान् यस्य चिदिन्द्रस्य ऋष्वा अज्रा गिरयश्चिदस्मै गाधं गम्भीरे चिद् भवति तं प्रशंसत॥८॥

भावार्थः-यथा विद्युतोऽगाधगुणाः सन्ति तथैव परमात्मनोऽसङ्ख्यगुणा वर्तन्ते ये तं परमात्मानमाप्तांश्च विहाय दुष्टसङ्गतिं कुर्वन्ति ते सर्वदा दुःखिनो जायन्ते॥८॥

पदार्थः-हे विद्वानो! जो **(दस्युजूताय)** दुष्टों के सङ्ग के लिये **(वीळवे)** प्रशंसा करने योग्य बल के लिये **(न)** नहीं **(नमते)** नम्र होता **(स्थिराय)** स्थिर गम्भीर पुरुष के लिये **(न)** नहीं नम्र होता तथा **(शर्द्धते)** बल के लिये **(न)** नहीं **(स्तवान्)** स्तुति करे जिस **(इन्द्रस्य)** बिजुली के **(ऋष्वाः)** बड़े **(अज्राः)** फेंकने वाले गुण **(गिरयः)** मेघों के **(चित्)** सदृश हैं **(अस्मै)** इसके लिये **(गाधम्)** ग्रहण किया परिमाण **(गम्भीरे)** गुरुपन में **(चित्)** भी **(भवति)** होता है, उसकी प्रशंसा करिये॥८॥

भावार्थः-जैसे बिजुलियाँ अथाह गुण वाली हैं, वैसे ही परमात्मा के असङ्ख्य गुण हैं और जो परमात्मा और यथार्थवक्ता जनों को त्याग करके दुष्टों का संग करते हैं, वे सब काल में दुःखी होते हैं॥८॥

पुनस्तमेव विषयमाह॥

फिर उस ही विषय को अगले मन्त्र में कहते हैं॥

गम्भीरेण न उरुणामत्रिन् प्रेषो यन्धि सुतपावन् वाजान्।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम्॥९॥

गम्भीरेण। नः। उरुणा। अमत्रिन्। प्र। इषः। यन्धि। सुतऽपावन्। वाजान्। स्थाः। ऊँ इति। सु। ऊर्ध्वः। ऊती। अरिषण्यन्। अक्तोः। विऽउष्टौ। परिऽतक्म्यायाम्॥९॥

पदार्थः-**(गम्भीरेण)** अगाधेन **(नः)** अस्मभ्यम् **(उरुणा)** बहुना **(अमत्रिन्)** बहुबलयुक्त **(प्र)** **(इषः)** अन्नादीन् **(यन्धि)** नियच्छ **(सुतपावन्)** यः सुतान्निष्पन्नान् पदार्थान् पुनाति **(वाजान्)** विज्ञानादीनि **(स्थाः)** तिष्ठेः **(उ)** **(सु)** **(ऊर्ध्वः)** **(ऊती)** रक्षणाद्यायाः **(अरिषण्यन्)** अहिंसयन् **(अक्तोः)** रात्रेः **(व्युष्टौ)** प्रभाते **(परितक्म्यायाम्)** निशि॥९॥

अन्वयः-हे अमत्रिन्त्सुतपावंस्त्वं गम्भीरेणोरुणा न इषो यन्धि। उ ऊती उर्ध्वोऽरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायां वाजान् सु प्र स्थाः॥९॥

भावार्थः-ये यमनियमान्विताः कार्यसिद्धयेऽहर्निश प्रयत्नमातिष्ठेयुस्त उत्कृष्टा जायन्ते॥९॥

पदार्थः-हे **(अमत्रिन्)** बहुत बल से युक्त और **(सुतपावन्)** उत्पन्न पदार्थों के पवित्र करने वाले आप **(गम्भीरेण)** गम्भीर और **(उरुणा)** बहुत से **(नः)** हम लोगों को **(इषः)** अन्न आदिक **(यन्धि)** दीजिये **(उ)** और **(ऊती)** रक्षण आदि क्रिया से **(ऊर्ध्वः)** ऊपर वर्तमान **(अरिषण्यन्)** नहीं हिंसा करते

हुए **(अक्तोः)** रात्रि से **(व्युष्टौ)** प्रभातकाल में और **(परितक्म्यायाम्)** रात्रि में **(वाजान्)** विज्ञान आदिकों को **(सु, प्र)** अति उत्तम प्रकार **(स्थाः)** स्थित हूजिये॥९॥

भावार्थः-जो यम और नियमों से युक्त हुए कार्य की सिद्धि के लिये दिन-रात्रि प्रयत्न करें, वे उत्तम होते हैं॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः॥ १०॥ १८॥

सचस्व। नायम्। अवसे। अभीके। इतः। वा। तम्। इन्द्र। पाहि। रिषः। अमा। च। एनम्। अरण्ये। पाहि। रिषः। मदेम। शतऽहिमाः। सुऽवीराः॥ १०॥

पदार्थः-**(सचस्व)** प्राप्नुहि **(नायम्)** न्यायम् **(अवसे)** रक्षणाद्याय **(अभीके)** समीपे **(इतः)** **(वा)** **(तम्)** **(इन्द्र)** राजन् विद्वन् वा **(पाहि)** **(रिषः)** हिंसकात् **(अमा)** गृहे **(च)** **(एनम्)** **(अरण्ये)** **(पाहि)** **(रिषः)** दुष्टाचारात् **(मदेम)** आनन्देम **(शतहिमाः)** शतं वर्षाणि यावत् **(सुवीराः)** शोभना वीरा येषान्ते॥१०॥

अन्वयः-हे इन्द्र! त्वमवसेऽभीके नायं सचस्व, इतो वा रिषः पाह्येनममाऽरण्ये पाहि रिषश्च यतः सुवीरा वयं शतहिमा मदेम॥१०॥

भावार्थः-ये विद्वांसः सन्ति ते दूरे समीपे वा स्थिता न्यायाचरणयोगाभ्यासाभ्यां वर्द्धितप्रज्ञाः सन्तः वसतिषु जङ्गलेषु च पुरुषार्थेन प्रजा रक्षन्त्विति॥१०॥

अत्रेन्द्रविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्विंशतितमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** राजन् वा विद्वान्! आप **(अवसे)** रक्षण आदि के लिये **(अभीके)** समीप में **(नायम्)** न्याय को **(सचस्व)** प्राप्त हूजिये **(इतः)** यहाँ से **(वा)** वा **(रिषः)** हिंसा करने वाले से **(पाहि)** रक्षा कीजिये और **(एनम्)** इसकी **(अमा)** गृह में और **(अरण्ये)** वन में **(पाहि)** रक्षा कीजिये **(रिषः, च)** और दुष्ट आचरण से भी, जिससे **(सुवीराः)** सुन्दर वीर जिनके ऐसे हम लोग **(शतहिमाः)** सौ वर्ष पर्यन्त **(मदेम)** आनन्द करें॥१०॥

भावार्थः-जो विद्वान् जन हैं, वे दूर वा समीप में वर्त्तमान हुए न्यायचरण और योगाभ्यास से बुद्धि को बढ़ाये हुए बस्ती और जङ्गलों में पुरुषार्थ से प्रजाजनों की रक्षा करें॥१०॥

इस सूक्त में राजा, विद्वान् और ईश्वर के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौबीसावाँ सूक्त और अठारहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ नवर्चस्य पञ्चविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ५ पङ्क्तिः। ३ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ७, ८, ९ निचृत्त्रिष्टुप्। ४, ६ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा किं कुर्यादित्याह॥

अब नव ऋचा वाले पच्चीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अब राजा क्या करे, इस विषय को कहते हैं॥

या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र॥ १॥

या। ते। ऊतिः। अवमा। या। परमा। या। मध्यमा। इन्द्र। शुष्मिन्। अस्ति। ताभिः। ऊँ इति। सु। वृत्रऽहत्ये। अवीः। नः। एभिः। च। वाजैः। महान्। नः। उग्र॥ १॥

पदार्थः-(या) (ते) तव **(ऊतिः)** रक्षा **(अवमा)** निकृष्टा **(या) (परमा)** उत्कृष्टा **(या) (मध्यमा) (इन्द्र)** न्यायाधीश राजन् **(शुष्मिन्)** प्रशंसितबलयुक्त **(अस्ति) (ताभिः) (ऊ) (सु) (वृत्रहत्ये)** मेघस्य हत्येव हननं यस्मिन्त्स- ामे **(अवीः)** रक्षेः **(नः)** अस्मान् **(एभिः) (च) (वाजैः)** वेगादिभिः शुभैर्गुणैः **(महान्) (नः)** अस्मान् **(उग्र)** तेजस्विन्॥ १॥

अन्वयः-हे शुष्मिन्नुग्रेन्द्र! ते याऽवमा या मध्यमा या परमोतिरस्ति ताभिर्वृत्रहत्ये नः स्ववीरू एभिर्वाजैश्च महान्त्सन्नोऽवीः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यदि त्वं प्रजाः सर्वथा रक्षेस्तर्हि प्रजा अपि त्वां सर्वतो रक्षिष्यन्ति॥ १॥

पदार्थः-हे **(शुष्मिन्)** प्रशंसित बल से युक्त **(उग्र)** तेजस्विन् **(इन्द्र)** न्यायाधीश राजन्! **(ते)** आपकी **(या)** जो **(अवमा)** निकृष्ट-खराब और **(या)** जो **(मध्यमा)** मध्यम और **(या)** जो **(परमा)** उत्तम **(ऊतिः)** रक्षा **(अस्ति)** है **(ताभिः)** उनसे **(वृत्रहत्ये)** मेघ के नाश के समान नाश जिसमें उस स- ाम में **(नः)** हम लोगों की **(सु)** उत्तम प्रकार **(अवीः)** रक्षा कीजिये **(ऊ)** और **(एभिः)** इन **(वाजैः)** वेग आदि उत्तम गुणों से **(च)** भी **(महान्)** बड़े हुए **(नः)** हम लोगों की रक्षा कीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो आप प्रजाओं की सब प्रकार से रक्षा करें तो प्रजा भी आपकी सब प्रकार से रक्षा करेगी॥ १॥

पुनः सेनेशः किं कुर्यादित्याह॥

फिर सेना का स्वामी क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र।

आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः॥ २॥

आभिः स्पृधः। मिथतीः। अरिषण्यन्। अमित्रस्य। व्यथय। मन्युम्। इन्द्र। आभिः। विश्वाः। अभिऽयुजः। विषूचीः। आर्याय। विशः। अव। तारीः। दासीः॥ २॥

पदार्थः-(आभिः) रक्षाभिस्सेनाभिर्वा **(स्पृधः)** स-ामान् **(मिथतीः)** शत्रुसेनाः हिंसन्तीः **(अरिषण्यन्)** अहिंसन् **(अमित्रस्य)** शत्रोः **(व्यथया)** पीडय। अत्र **संहितायामि**ति दीर्घः। **(मन्युम्)** क्रोधम् **(इन्द्र)** सेनाध्यक्ष **(आभिः)** रक्षाभिः सेनाभिर्वा **(विश्वाः)** समग्राः **(अभियुजः)** या अभियुञ्जते ताः **(विषूचीः)** व्याप्नुवतीः **(आर्याय)** उत्तमाय जनाय **(विशः)** प्रजाः **(अव) (तारीः)** दुःखात्तारय **(दासीः)** सेविकाः॥ २॥

अन्वयः-हे इन्द्र सेनेश! त्वमाभिर्मिथतीः स्पृधोऽरिषण्यन्नमित्रस्य सेना मन्युं कृत्वा व्यथया। आभिरार्याय विश्वा अभियुजो विषूचीर्दासीर्विशोऽवतारीः॥ २॥

भावार्थः-त एव सेनाध्यक्षाः सत्कर्तव्या ये स्वसेनाः सुशिक्ष्य संरक्ष्य सत्कृत्य युद्धविद्यायां कुशलीकृत्य दस्यूनन्यायकारिणः शत्रूँश्च निवार्य भद्राः प्रजाः सततं रक्षेयुः॥ २॥

पदार्थः-हे **(इन्द्र)** सेना के स्वामी आप **(आभिः)** इन रक्षाओं वा सेनाओं से **(मिथतीः)** शत्रुओं की सेनाओं का नाश करते हुए **(स्पृधः)** संग्रामों की **(अरिषण्यन्)** नहीं हिंसा करते हुए **(अमित्रस्य)** शत्रु की सेनाओं को **(मन्युम्)** क्रोध करके **(व्यथया)** पीड़ा दीजिये और **(आभिः)** इन रक्षा और सेनाओं से **(आर्याय)** उत्तम जन के लिये **(विश्वाः)** सम्पूर्ण **(अभियुजः)** अभियुक्त होने और **(विषूचीः)** व्याप्त होने वाली **(दासीः)** सेविकाओं को और **(विशः)** प्रजाओं को **(अव, तारीः)** दुःख से पार करिये॥ २॥

भावार्थः-वे ही सेना के स्वामी सत्कार करने योग्य हैं, जो अपनी सेना को उत्तम प्रकार शिक्षा दें तथा उत्तम प्रकार रक्षा कर और सत्कार करके युद्धविद्या में चतुर करके डाकुओं और अन्यायकारी शत्रुओं को निवारण करके अच्छी प्रजाओं की निरन्तर रक्षा करें॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इन्द्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे।
त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः॥ ३॥

इन्द्र। जामयः। उत। ये। अजामयः। अर्वाचीनासः। वनुषः। युयुज्रे। त्वम्। एषाम्। विथुरा। शवांसि। जहि। वृष्ण्यानि। कृणुहि। पराचः॥ ३॥

पदार्थः-(इन्द्र) सेनेश **(जामयः)** पतिव्रता भार्या इव **(उत)** अपि **(ये) (अजामयः)** सपत्न्य इव शत्रवः **(अर्वाचीनासः)** इदानीन्तनाः **(वनुषः)** संविभाजकान् **(युयुज्रे)** युञ्जन्ति **(त्वम्) (एषाम्) (विथुरा)**

व्यथकानि **(शवांसि)** बलानि **(जहि)** **(वृष्ण्यानि)** बलिष्ठानि **(कृणुही)** अत्र **संहितायामि**ति दीर्घः। **(पराचः)** पराङ्मुखान्॥३॥

अन्वयः-हे इन्द्र! त्वं येऽर्वाचीनासो जामय इवोताजामयो वनुषो युयुज्र एषां शत्रूणां विथुरा शवांसि त्वं जहि स्वसैन्यानि वृष्ण्यानि कृणुही शत्रून् पराचश्च॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव सचिवा उत्तमा ये धार्मिकीः प्रजाः पुत्रवद्रक्षन्ति दुष्टांश्च दण्डयन्ति स्वसैन्यानि वर्धयित्वा शत्रुसेनां पराजयन्ति॥३॥

पदार्थः-हे **(इन्द्र)** सेना के स्वामी **(त्वम्)** आप **(ये)** जो **(अर्वाचीनासः)** इस काल में हुए **(जामयः)** पतिव्रता स्त्रियों के सदृश और **(उत)** भी **(अजामयः)** सौतियाँ जैसे वैसे शत्रु जन **(वनुषः)** संविभाग करने वालों को **(युयुज्रे)** युक्त होते अर्थात् मिलते हैं **(एषाम्)** इन शत्रुओं की **(विथुरा)** पीड़ा देने वाली **(शवांसि)** सेनाओं को **(त्वम्)** आप **(जहि)** नष्ट कीजिये और अपनी सेनाओं को **(वृष्ण्यानि)** बलिष्ठ **(कृणुही)** करिये और शत्रुओं को **(पराचः)** पराङ्मुख कीजिये अर्थात् हटाइये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही मन्त्री उत्तम हैं, जो धार्मिक प्रजाओं की पुत्र के सदृश रक्षा करते हैं और दुष्टों को दण्ड देते हैं और अपनी सेनाओं को बढ़ाय के शत्रुओं की सेना को पराजित करते हैं॥३॥

पुना राजामात्याश्च किं कुर्युरित्याह॥

फिर राजा और मन्त्रीजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

शूरो॑ वा॒ शूर॑ वनते॒ शरीरै॒स्तनू॒रुचा॒ तरु॑षि॒ यत्कृ॒ण्वैते॑।
तो॒के वा॒ गोषु॒ तन॑ये॒ यदप्सु॒ वि क्रन्द॑सी उ॒र्वरा॑सु॒ ब्रवै॑ते॥४॥

शूरः॑। वा॒। शूर॑म्। व॒नते॒। शरीरैः॑। त॒नू॒ऽरुचा॑। तरु॑षि। यत्। कृ॒ण्वैते॒ इति॑। तो॒के। वा॒। गोषु॑। तन॑ये। यत्। अ॒प्ऽसु। वि। क्रन्द॑सी॒ इति॑। उ॒र्वरा॑सु। ब्रवै॑ते॒ इति॑॥४॥

पदार्थः-**(शूरः)** **(वा)** **(शूरम्)** **(वनते)** सम्भजति **(शरीरैः)** **(तनूरुचा)** या तनूषु रुक् प्रीतिस्तया **(तरुषि)** दुःखात्तारके स-ामे **(यत्)** **(कृण्वैते)** कुर्याताम् **(तोके)** सद्यो जातेऽपत्ये **(वा)** **(गोषु)** वाणीषु **(तनये)** सुकुमारे **(यत्)** **(अप्सु)** जलेषु **(वि)** **(क्रन्दसी)** क्रन्दमानौ विक्रोशन्तौ **(उर्वरासु)** पृथिव्यादिनिमित्तेषु **(ब्रवैते)** ब्रूयाताम्॥४॥

अन्वयः-हे राजजना! यथा शूरस्तनूरुचा शरीरैस्तरुषि शूरं वनते वा द्वौ यत्कृण्वैते क्रन्दसी सन्तौ यत्तोके तनय उर्वरासु गोषु वाप्सु वि ब्रवैते तथा यूयमपि भवत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा स-ामे शूराः शूरान् विभज्य युध्यन्ति तथैव राजाऽमात्यांश्च श्रेष्ठानधमांश्च विभज्याऽधिकारेषु नियोज्याज्ञायेद्यथा कृषिविद्यया कृषीवलान् बोधयेत् तथैव स्वसन्तानान् सुशिक्षया विद्याग्रहणाय ब्रह्मचर्ये प्रवर्त्तयेत्॥४॥

पदार्थः-हे राजजनो! जैसे **(शूरः)** शूरवीर पुरुष **(तनूरुचा)** शरीरों में हुई प्रीति से और **(शरीरैः)** शरीरों से **(तरुषि)** दुःख से पार करने वाले स-ाम में **(शूरम्)** शूरवीर जन का **(वनते)** आदर करता है **(वा)** वा दोनों **(यत्)** जिसको **(कृण्वैते)** करें और **(क्रन्दसी)** क्रोशते हुए **(यत्)** जो **(तोके)** शीघ्र उत्पन्न हुए **(तनये)** सुकुमार बालक के होने पर **(उर्वरासु)** पृथिवी आदि के कारणों में **(गोषु)** वाणियों में **(वा)** अथवा **(अप्सु)** जलों में **(वि, ब्रवैते)** कहें, वैसे आप लोग भी हूजिये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे स-ाम में शूरजन शूरवीरों का विभाग करके युद्ध करते हैं, वैसे ही राजा और अमात्य श्रेष्ठ और अधमों का विभाग करके अधिकारों में युक्त करके आज्ञा देवें और जैसे खेती की विद्या से खेतीहारों को जनावें, वैसे ही अपने सन्तानों को उत्तम शिक्षा से विद्या ग्रहण के लिये ब्रह्मचर्य में प्रवृत्त करावें॥४॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध।
इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि॥५॥१९॥

नहि। त्वा। शूरः। न। तुरः। न। धृष्णुः। न। त्वा। योधः। मन्यमानः। युयोध। इन्द्र। नकिः। त्वा। प्रति। अस्ति। एषाम्। विश्वा। जातानि। अभि। असि। तानि॥५॥

पदार्थः-**(नहि)** निषेधे **(त्वा)** त्वाम् **(शूरः)** **(न)** **(तुरः)** हिंसकः शीघ्रकारी **(न)** **(धृष्णुः)** धृष्टः **(न)** **(त्वा)** त्वाम् **(योधः)** युद्धकर्ता **(मन्यमानः)** अभिमानी सन् **(युयोध)** युद्ध्येत् **(इन्द्र)** सेनापते **(नकिः)** निषेधे **(त्वा)** त्वाम् **(प्रति)** **(अस्ति)** **(एषाम्)** **(विश्वा)** सर्वाणि **(जातानि)** प्रसिद्धानि **(अभि)** **(असि)** **(तानि)**॥५॥

अन्वयः-हे इन्द्र! यथा त्वा मन्यमानश्शूरो त्वा नहि युयोध न तुरो न धृष्णुर्न योधो त्वाभि युयोध त्वा प्रति कोऽपि नकिरस्ति एषां यानि विश्वा जातानि बलादीनि सन्ति यतस्तानि त्वं जित्वा विजयमानोऽसि तस्मात् प्रशंसां लभसे॥५॥

भावार्थः-राज्ञा राजपुरुषैर्विशेषतः सेनाजनैरीदृशं बलं विज्ञानं च वर्त्तनीयं येन कोऽपि योद्धुं नेच्छेत्॥५॥

पदार्थः-हे **(इन्द्र)** सेना के स्वामिन्! जैसे **(त्वा)** आपको **(मन्यमानः)** मानता हुआ **(शूरः)** शूरवीर जन **(त्वा)** आपसे **(नहि)** नहीं **(युयोध)** युद्ध करता और **(न)** न **(तुरः)** हिंसा वा शीघ्र करने वाला **(न)** न **(धृष्णुः)** ढीठ **(न)** और न **(योधः)** प्रतियोधा **(त्वा)** आपसे **(अभि)** सब प्रकार से युद्ध करता है, किन्तु आपके **(प्रति)** प्रति कोई भी **(नकिः)** नहीं **(अस्ति)** है और **(एषाम्)** इन की जो **(विश्वा)** सम्पूर्ण **(जातानि)** प्रसिद्ध सेना हैं, जिस कारण **(तानि)** उनको आप जीत कर जीतते हुए **(असि)** हैं, इससे प्रशंसा को प्राप्त होते हैं॥५॥

भावार्थः-राजा और राजपुरुषों को चाहिए कि विशेष करके सेनाजनों से ऐसा पराक्रम और विज्ञान बढ़ावें, जिससे कोई भी युद्ध करने की इच्छा न करे॥५॥

पुनस्स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवन्ते।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते॥६॥

सः। पत्यते। उभयोः। नृम्णम्। अयोः। यदि। वेधसः। सम्ऽइथे। हवन्ते। वृत्रे। वा। महः। नृऽवति। क्षये। वा। व्यचस्वन्ता। यदि। वितन्तसैते इति॥६॥

पदार्थः-(सः) (पत्यते) पतिरिवाचरति **(उभयोः)** द्वयोः प्रजासेनयोः **(नृम्णम्)** नरा रमन्ते यस्मिंस्तद्धनम् **(अयोः)** वियोजय संयोजय वा **(यदी)** अत्र **निपातस्य चे**ति दीर्घः। **(वेधसः)** मेधाविनः **(समिथे)** स-ामे। **समिथ इति स-ामनामसु पठितम्।** (निघं०२.१७) **(हवन्ते)** स्पर्द्धन्ते **(वृत्रे)** धने **(वा) (महः)** महति **(नृवति)** प्रशंसिता नरा विद्यन्ते यस्मिंस्तस्मिन् **(क्षये)** गृहे **(वा) (व्यचस्वन्ता)** व्याप्नुवन्तौ **(यदि) (वितन्तसैते)** भृशं युध्येताम्॥६॥

अन्वयः-हे राजन्! यो भवानुभयोर्मध्ये पत्यते स त्वं यदी नृम्णमयोः शूरवीरो वृत्रे वा महो नृवति क्षये व्यचस्वन्ता सन्तौ वितन्तसैते तर्ह्युभयोर्मध्य इतरो विजयमाप्नुयात्। यदि वा ये वेधसः समिथे हवन्ते तेऽवश्यं विजयमाप्नुवन्ति॥६॥

भावार्थः-यो राजा पक्षपातं विहाय शत्रुमित्रयोः सत्यं न्यायं करोति सर्वेष्वधिकारेषु धार्मिकान् धीमतो रक्षति सर्वथा सेनायां कुलीनान् दृढान् राजभक्तान्नियोजयति स एव सर्वदा विजयी भवति॥६॥

पदार्थः-हे राजन्! जो आप **(उभयोः)** दोनों अर्थात् प्रजा और सेना के मध्य में **(पत्यते)** स्वामी के सदृश आचरण करते हो **(सः)** वह आप **(यदी)** यदि **(नृम्णम्)** मनुष्य रमते हैं जिसमें उस धन को **(अयोः)** मिलावें वा अलग करें और **[**शूरवीर**] (वृत्रे)** धन **(वा)** वा **(महः)** बड़े **(नृवति)** प्रशंसायुक्त नर विद्यमान जिसमें उस **(क्षये)** गृह में **(व्यचस्वन्ता)** व्याप्त होने वाले **[**होते हुए**] (वितन्तसैते)** अत्यन्त युद्ध करें तो दोनों अर्थात् प्रजा और सेना के मध्य में एक विजय को प्राप्त होवे और **(यदि, वा)** अथवा जो **(वेधसः)** बुद्धिमान् के **(समिथे)** स-ाम में **(हवन्ते)** स्पर्द्धा करते हैं, वे अवश्य विजय को प्राप्त होते हैं॥६॥

भावार्थः-जो राजा पक्षपात का त्याग करके शत्रु और मित्र का सत्य न्याय करता है और सब अधिकारों में धार्मिक, बुद्धिमानों जनों को रखता है और सब प्रकार से सेना में कुलीन, दृढ़ राजभक्तों को नियुक्त करता है, वही सर्वदा विजयी होता है॥६॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

अध॑ स्मा ते चर्ष॒णयो॒ यदेज॒ानिन्द्र॑ त्रा॒तोत भ॑वा वरू॒ता।

अ॒स्माका॑सो॒ ये नृत॑मासो अ॒र्य इन्द्र॑ सू॒रयो॑ दधि॒रे पु॒रो न॑:॥७॥

अध॑। स्म। ते॒। च॒र्ष॒णय॑:। यत्। एजा॑न्। इन्द्र॑। त्रा॒ता। उ॒त। भ॒व॒। व॒रू॒ता। अ॒स्माका॑स:। ये। नृऽत॑मास:। अ॒र्य:। इन्द्र॑। सू॒रय॑:। दु॒धि॒रे। पु॒र:। न॒:॥७॥

पदार्थ:-(अध) अनन्तरम् **(स्मा)** एव। अत्र **निपातस्य चे**ति दीर्घ:। **(ते)** तव **(चर्षणय:)** सर्वव्यवहारविचक्षणा मनुष्या: **(यत्) (एजान्)** भीरून् कम्पकान् **(इन्द्र)** परमैश्वर्यप्रद राजन् **(त्राता)** रक्षक: **(उत)** अपि **(भव)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घ:। **(वरूता)** श्रेष्ठ: **(अस्माकास:)** अस्मदीया: **(ये) (नृतमास:)** अतिशयेन नायका: **(अर्य:)** ईश्वरो वा स्वामी **(इन्द्र)** दुष्टानां विदारक **(सूरय:)** विपश्चित: **(दधिरे)** दधतु **(पुर:)** नगराणि **(न:)** अस्माकम्॥७॥

अन्वय:-हे इन्द्र! ये तेऽस्माकासो नृतमास: सूरयश्चर्षणयो न: पुरो दधिरे तेषामर्य: सन्नध त्राता भव। हे इन्द्र! यत्त्वमेजान् कुर्या उत वरूता स्मा भव॥७॥

भावार्थ:-हे राजन्! विश्वस्तान् कुलीनान् मूलराज्ये भवानस्य राष्ट्रस्य सेनायाश्च मध्ये रक्षायै युञ्जीया: तेषां रक्षां सततं कुर्या:॥७॥

पदार्थ:-हे **(इन्द्र)** अत्यन्त ऐश्वर्य के देने वाले राजन्! **(ये)** जो **(ते)** आपके **(अस्माकास:)** हमारे **(नृतमास:)** अतिशय मुखिया और **(सूरय:)** विद्वान् जन **(चर्षणय:)** सम्पूर्ण व्यवहारों में चतुर मनुष्य **(न:)** हम लोगों के **(पुर:)** नगरों को **(दधिरे)** धारण करें और उनके **(अर्य:)** स्वामी होते हुए **(अध)** अनन्तर **(त्राता)** रक्षा करने वाले **(भव)** हूजिये ओर हे **(इन्द्र)** दुष्टों के नाश करने वाले! **(यत्)** जिससे आप **(एजान्)** भयभीतों को कम्पाने वाले करिये और **(उत)** भी **(वरूता)** श्रेष्ठ **(स्मा)** ही हूजिये॥७॥

भावार्थ:-हे राजन्! विश्वासयुक्त, कुलीन, मुख्य राज्य में हुए जनों को इस राज्य और सेना के मध्य में रक्षा के निमित्त नियुक्त करिये और उनकी रक्षा निरन्तर करिये॥७॥

पुन: स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

अनु॑ ते दायि म॒ह इ॑न्द्रि॒याय॑ स॒त्रा ते॒ विश्व॒मनु॑ वृत्र॒हत्ये॑।

अनु॑ क्ष॒त्रमनु॒ सहो॑ यज॒त्रेन्द्र॑ दे॒वेभि॒रनु॑ ते नृ॒षह्ये॑॥८॥

अनु॑। ते॒। दा॒यि॒। म॒हे। इ॒न्द्रि॒याय॑। सत्रा॒। ते॒। विश्व॑म्। अनु॑। वृ॒त्र॒ऽहत्ये॑। अनु॑। क्ष॒त्रम्। अनु॑। सह॑:। य॒ज॒त्र॒। इन्द्र॑। दे॒वेभि॑:। अनु॑। ते॒। नृ॒ऽसह्ये॑॥८॥

पदार्थ:-(अनु) (ते) तव **(दायि)** दीयते **(महे)** महत् **(इन्द्रियाय)** धनाय **(सत्रा)** सत्येन **(ते)** तव **(विश्वम्)** सर्वं जगत् **(अनु) (वृत्रहत्ये)** मेघहननमिव स- ामे **(अनु) (क्षत्रम्)** राज्यं धनं वा **(अनु) (सह:)**

बलम् **(यजत्र)** पूजनीयतम **(इन्द्र)** शत्रुविदारक राजन् **(देवेभिः)** विद्वद्भिः सह **(अनु)** **(ते)** तव **(नृषह्ये)** नृभिः सोढव्ये स-ामे॥८॥

अन्वयः-हे यजत्रेन्द्र! त्वया नृषह्ये देवेभिस्सह महेऽनुदायि त इन्द्रियाय ते सत्रा विश्वमनु दायि वृत्रहत्ये क्षत्रमनुदायि सहोऽनुदायि ते नृषह्ये सुखमनुदायि॥८॥

भावार्थः-हे राजन्य! त्वमुत्तमानि कर्माणि कुर्यास्तैरनुकूलः संस्तान् धनादिभिः सततं सत्कुर्याः सदैव सत्योपदेशकानां विदुषां सङ्गेनाऽखिलां राजविद्यां विज्ञाय सततं प्रचारय॥८॥

पदार्थः-हे **(यजत्र)** अत्यन्त श्रेष्ठ **(इन्द्र)** शत्रुओं के नाश करने वाले राजन्! आपको चाहिये कि **(नृषह्ये)** मनुष्यों से सहने योग्य संग्राम में **(देवेभिः)** विद्वानों के साथ **(महे)** बृहत् को **(अनु, दायि)** देवें और **(ते)** आपके **(इन्द्रियाय)** धन के लिये **(ते)** आपके **(सत्रा)** सत्य से **(विश्वम्)** सम्पूर्ण जगत् को **(अनु)** पश्चात् देवें और **(वृत्रहत्ये)** मेघ के नाश करने के समान स-ाम में **(क्षत्रम्)** राज्य वा धन को **(अनु)** पश्चात् देवें और **(सहः)** बल को **(अनु)** पश्चात् देवें और **(ते)** आपके मनुष्यों से सहने योग्य स-ाम में सुख को **(अनु)** पश्चात् देवें॥८॥

भावार्थः-हे क्षत्रियकुल में उत्पन्न हुए जन! आप उत्तम कर्मों को करिये और उनके साथ अनुकूल हुए उनका धन आदि से निरन्तर सत्कार करिये और सदा ही सत्य के उपदेशक विद्वानों के सङ्ग से सम्पूर्ण राजविद्या को जानकर निरन्तर प्रचार करिये॥८॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

एवा नः स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः।

विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम्॥९॥२०॥

एव। नः। स्पृधः। सम्। अज। समत्ऽसु। इन्द्र। ररन्धि। मिथतीः। अदेवीः। विद्याम। वस्तोः। अवसा। गृणन्तः। भरत्ऽवाजाः। उत। ते। इन्द्र। नूनम्॥९॥

पदार्थः-(**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मान् (**स्पृधः**) स्पर्द्धमानान् (**सम्**) (**अजा**) विज्ञापय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**समत्सु**) स-ामेषु (**इन्द्र**) शत्रुबलविदारक (**रारन्धि**) रन्धय हिंधि। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्। (**मिथतीः**) हिंसतीः (**अदेवीः**) अदिव्याः (**विद्याम**) (**वस्तोः**) दिवसस्य मध्ये (**अवसा**) रक्षणादिना (**गृणन्तः**) स्तुवन्तः (**भरद्वाजाः**) धृतशुद्धविज्ञानाः (**उत**) (**ते**) तव (**इन्द्र**) सर्वसुखप्रद (**नूनम्**) निश्चयेन॥९॥

अन्वयः-हे इन्द्र! त्वं स्पृधो नोऽस्मान्त्समत्स्वेवा समजाऽदेवीर्मिथतीः शत्रुसेनाः समत्सु रारन्धि। हे इन्द्र! येन ते तवाऽवसा वस्तोर्नूनं गृणन्त उत भरद्वाजा वयं विजयं विद्याम॥९॥

भावार्थः-यो राजा सुभटान् वीरान् पुरस्तादेव सुशिक्ष्य युद्धेषु प्रेरयति तं सर्वथा रक्षकं सर्वे शूरा आश्रयन्तीति॥९॥

अत्रेन्द्रशूरवीरसेनापतिराजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चविंशतितमं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** सम्पूर्ण सुखों के देने वाले! आप **(स्पृधः)** ईर्ष्या करते हुए **(नः)** हम लोगों को **(समत्सु)** संग्रामों में **(एवा)** ही **(सम्, अजा)** विशेष करके जनाइये और **(अदेवीः)** श्रेष्ठ गुणों से नहीं विशिष्ट **(मिथतीः)** नाश करती हुई शत्रुओं की सेनाओं को स- ामों में **(रारन्धि)** नष्ट करिये और हे **(इन्द्र)** शत्रुओं के बल को दूर करने वाले! **(ते)** आपकी **(अवसा)** रक्षा आदि से **(वस्तोः)** दिन के मध्य में **(नूनम्)** निश्चय से **(गृणन्तः)** स्तुति करते हुए **(उत)** भी **(भरद्वाजाः)** शुद्ध विज्ञान को धारण किये हुए हम लोग विजय को **(विद्याम)** जानें॥९॥

भावार्थः-जो राजा अच्छे योद्धा वीरों को प्रथम ही उत्तम प्रकार शिक्षा देकर युद्धों में प्रेरणा करता है, उस सब प्रकार से रक्षा करने वाले राजा का सब शूरवीर जन आश्रय करते **[**है**]**॥९॥

इस सूक्त में इन्द्र, शूरवीर, सेनापति और राजा के कृत्य का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह पच्चीसवाँ सूक्त और बीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य षड्विंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १ पङ्क्तिः। २, ४, ६ भुरिक्पङ्क्तिः। ३ निचृत्पङ्क्तिः। ५ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७ त्रिष्टुप्। ८ निचृत् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा प्रजाजनाः परस्परं कथं वर्तेरन्नित्याह॥

अब आठ ऋचावाले छब्बीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा और प्रजाजन परस्पर कैसा बर्ताव करें, इस विषय को अगले मन्त्र में कहते हैं॥

श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः।
सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन् दाः॥ १॥

श्रुधि। नः। इन्द्र। ह्वयामसि। त्वा। महः। वाजस्य। सातौ। वावृषाणाः। सम्। यत्। विशः। अयन्त। शूरसातौ। उग्रम्। नः। अवः। पार्ये। अहन्। दाः॥ १॥

पदार्थः-(**श्रुधि**) शृणु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) राजन् (**ह्वयामसि**) प्रज्ञापयेम (**त्वा**) (**महः**) महतः (**वाजस्य**) वेगादिगुणयुक्तस्य (**सातौ**) शूराणां सातिर्विभागो यस्मिंस्तस्मिन्त्संग्रामे (**वावृषाणाः**) वृषं बलं कुर्वाणाः। अत्र **तुजादीनामि**त्यभ्यासदीर्घः। (**सम्**) (**यत्**) यतः (**विशः**) मनुष्यादिप्रजाः (**अयन्त**) प्राप्नुवन्ति (**शूरसातौ**) शूराणां सातिर्विभागो यस्मिंस्तस्मिन्त्संग्रामे (**उग्रम्**) तेजस्विनम् (**नः**) अस्मभ्यम् (**अवः**) रक्षणम् (**पार्ये**) पालयितव्ये (**अहन्**) दिने (**दाः**) देहि॥ १॥

अन्वयः-हे इन्द्र! वावृषाणा विशो वयं महो वाजस्य सातौ यत्त्वा ह्वयामसि तत्त्वं नो वचांसि श्रुधी ये शूरसातौ नः समयन्त तत्र पार्येऽहन्नुग्रमवो दाः॥ १॥

भावार्थः-राज्ञामिदमतिसमुचितमस्ति यत्प्रजा ब्रूयात् तद्ध्यानेन शृणुयुः। यतो राजप्रजाजनानां विरोधो न स्यात् प्रत्यहं सुखं वर्धेत॥ १॥

पदार्थः-हे (**इन्द्र**) राजन्! (**वावृषाणाः**) बल को करते हुए (**विशः**) मनुष्य आदि प्रजा हम लोग (**महः**) बड़े (**वाजस्य**) वेग आदि गुणों से युक्त के (**सातौ**) शूरों का विभाग जिसमें उस संग्राम में (**यत्**) जिससे (**त्वा**) आपको (**ह्वयामसि**) जनावें, जिससे आप (**नः**) हम लोगों के लिये वचनों को (**श्रुधी**) सुनिये और जो (**शूरसातौ**) शूरों का विभाग जिसमें उस संग्राम में (**नः**) हम लोगों को (**सम्, अयन्त**) प्राप्त होते हैं, उस (**पार्ये**) पालन करने योग्य (**अहन्**) दिन में (**उग्रम्**) तेजस्वी को (**अवः**) रक्षण (**दाः**) दीजिये॥ १॥

भावार्थः-राजाओं को यह अतियोग्य है कि **[**जो**]** प्रजा कहे उसको ध्यान से सुनें, जिससे राजा और प्रजाजनों का विरोध न होवे और प्रतिदिन सुख बढ़े॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ।

त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन्॥ २॥

त्वाम्। वाजी। हवते। वाजिनेयः। महः। वाजस्य। गध्यस्य। सातौ। त्वाम्। वृत्रेषु। इन्द्र। सत्ऽपतिम्। तरुत्रम्। त्वाम्। चष्टे। मुष्टिऽहा। गोषु। युध्यन्॥ २॥

पदार्थः-(त्वाम्) राजानम् **(वाजी)** वेगवान् ज्ञानी जनः **(हवते)** श्रावयेत् **(वाजिनेयः)** वाजिन्या ज्ञानवत्या अपत्यम् **(महः)** महान्तम् **(वाजस्य)** विज्ञानस्य **(गध्यस्य)** सर्वैः प्राप्तुं योग्यस्य **(सातौ)** संविभागे **(त्वाम्) (वृत्रेषु)** धनेषु **(इन्द्र)** दुष्टानां विनाशक **(सत्पतिम्)** सतां पात्रम् **(तरुत्रम्)** तारकम् **(त्वाम्) (चष्टे)** कथयामि **(मुष्टिहा)** यो मुष्ट्या हन्ति **(गोषु)** प्राप्तव्यासु भूमिषु **(युध्यन्)**॥ २॥

अन्वयः-हे इन्द्र! यथा वाजिनेयो वाजी गध्यस्य वाजस्य सातौ त्वां हवते तथा वृत्रेषु सत्पतिं त्वां महश्चष्टे गोषु युध्यन् मुष्टिहा घ्नन् वृत्रेषु त्वां तरुत्रं चष्टे॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यत्र प्रजाजना त्वामुपस्थातुमिच्छन्ति तत्र तत्र त्वमुपस्थितो भव॥ २॥

पदार्थः-हे **(इन्द्र)** दुष्टों के नाश करने वाले जैसे **(वाजिनेयः)** ज्ञानवती की सन्तान और **(वाजी)** वेगयुक्त ज्ञानीजन **(गध्यस्य)** सबसे प्राप्त होने योग्य **(वाजस्य)** विज्ञान के **(सातौ)** उत्तम प्रकार विभाग में **(त्वाम्)** आपको **(हवते)** सुनावे, वैसे **(वृत्रेषु)** धनों में **(सत्पतिम्)** श्रेष्ठों के पालन करने वाले **(त्वाम्)** आपको मैं **(महः)** बड़ा **(चष्टे)** कहता हूँ और **(गोषु)** प्राप्त होने योग्य भूमियों में **(युध्यन्)** युद्ध करता हुआ **(मुष्टिहा)** मुष्टि से मारने वाला मारता हुआ **[(वृत्रेषु)]** धनों में **(त्वाम्)** आपको मैं **(तरुत्रम्)** पार करने वाला कहता हूँ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जहाँ-जहाँ प्रजाजन आपको प्राप्त होने की इच्छा करते हैं, वहाँ-वहाँ आप उपस्थित हूजिये॥ २॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क्।

त्वं शिरो अमर्मणः परोहन्नतिथिग्वाय शंस्यं करिष्यन्॥ ३॥

त्वम्। कविम्। चोदयः। अर्कऽसातौ। त्वम्। कुत्साय। शुष्णम्। दाशुषे। वर्क्। त्वम्। शिरः। अमर्मणः। परा। अहन्। अतिथिऽग्वाय। शंस्यम्। करिष्यन्॥ ३॥

पदार्थः-(त्वम्) (कविम्) विद्वांसम् **(चोदयः)** प्रेरय **(अर्कसातौ)** अन्नादिविभागे **(त्वम्) (कुत्साय)** वज्राय **(शुष्णम्)** बलम् **(दाशुषे)** दात्रे **(वर्क्)** छिनत्सि **(त्वम्) (शिरः) (अमर्मणः)**

अविद्यमानानि मर्माणि यस्मिँस्तस्य **(परा)** **(अहन्)** दूरीकुर्याः **(अतिथिग्वाय)** योऽतिथीनागच्छति तस्मै **(शंस्यम्)** प्रशंसनीयं कर्म **(करिष्यन्)**॥३॥

अन्वयः-हे इन्द्र राजँस्त्वमर्कसातौ कविं चोदयस्त्वं कुत्साय दाशुषे च शुष्णं वर्क् त्वममर्मणः शिरः पराऽहन्, अतिथिग्वाय शंस्यं करिष्यन् वर्तसे तस्मात् सत्कर्तव्योऽसि॥३॥

भावार्थः-राजा विद्याविनयादिशुभगुणान् राजकार्येषु योजयेत्, उन्नतिञ्च करिष्यन् विद्यादीनां दाता भूत्वा प्रशंसां प्राप्नुयात्॥३॥

पदार्थः-हे तेजस्वि राजन्! **(त्वम्)** आप **(अर्कसातौ)** अन्न आदि के विभाग में **(कविम्)** विद्वान् की **(चोदयः)** प्रेरणा करिये और **(त्वम्)** आप **(कुत्साय)** वज्र के लिये और **(दाशुषे)** दान करने वाले के लिये **(शुष्णम्)** बल को **(वर्क्)** काटते हो और **(त्वम्)** आप **(अमर्मणः)** नहीं विद्यमान मर्म जिसमें उसके **(शिरः)** शिर को **(परा, अहन्)** दूर करिये और **(अतिथिग्वाय)** अतिथियों को प्राप्त होने वाले के लिये **(शंस्यम्)** प्रशंसा करने योग्य कर्म को **(करिष्यन्)** करते हुए वर्तमान हो, इससे आप सत्कार करने योग्य हो॥३॥

भावार्थः-राजा विद्या और विनय आदि श्रेष्ठ गुणों से युक्त जनों को राजकार्यों में युक्त करे और उन्नति को करता हुआ विद्या आदि का दाता होकर प्रशंसा को प्राप्त होवे॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं रथं॑ प्र भ॑रो यो॒धमृ॒ष्वमावो॒ युध्य॑न्तं वृष॒भं दश॑द्युम्।
त्वं तुग्र॑ वेत॒सवे॒ सचा॑हन् त्वं तुजिं॑ गृ॒णन्त॑मिन्द्र तूतोः॥४॥

त्वम्। रथ॑म्। प्र। भ॒रः॑। यो॒धम्। ऋ॒ष्वम्। आव॑ः। युध्य॑न्तम्। वृ॒ष॒भम्। दश॑ऽद्युम्। त्वम्। तुग्र॑म्। वे॒त॒सवे॑। सचा॑। अ॒हन्। त्वम्। तुजि॑म्। गृ॒णन्त॑म्। इ॒न्द्र॒। तू॒तो॒रिति॑ तूतोः॥४॥

पदार्थः-**(त्वम्)** **(रथम्)** रमणीयं यानम् **(प्र)** **(भरः)** धर **(योधम्)** युद्धकर्तारम् **(ऋष्वम्)** महान्तम् **(आवः)** रक्ष **(युध्यन्तम्)** **(वृषभम्)** बलिष्ठम् **(दशद्युम्)** दशभिरङ्गुलिभिः प्रकाशप्रदम् **(त्वम्)** **(तुग्रम्)** तेजस्विनम् **(वेतसवे)** व्याप्तैश्वर्ये **(सचा)** सम्बन्धेन **(अहन्)** **(त्वम्)** **(तुजिम्)** बलिष्ठम् **(गृणन्तम्)** स्तुवन्तम् **(इन्द्र)** सेनाध्यक्ष **(तूतोः)** वर्धय॥४॥

अन्वयः-हे इन्द्र! त्वं रथं प्र भरो वृषभं दशद्युं योधं युध्यन्तमृष्वमावस्त्वं वेतसवे सचा तुग्रमहंस्त्वं गृणन्तं तुजिं तूतोः॥४॥

भावार्थः-यो राजा रथं युद्धकुशलान् वीराँश्च वर्धयति स महत्सुखमाप्नोति॥२॥

पदार्थः-हे **(इन्द्र)** सेना के स्वामिन्! **(त्वम्)** आप **(रथम्)** सुन्दर वाहन को **(प्र, भरः)** धारण करिये तथा **(वृषभम्)** बलिष्ठ **(दशद्युम्)** दश अंगुलियों से प्रकाश देने वाले और **(योधम्)** युद्ध करने

वाले से (**युध्यन्तम्**) युद्ध करते हुए (**ऋष्वम्**) बड़े की (**आवः**) रक्षा करिये और (**त्वम्**) आप (**वेतसवे**) व्याप्त ऐश्वर्य वाले में (**सचा**) सम्बन्ध से (**तुग्रम्**) तेजस्वी को (**अहन्**) दूर करिये और (**त्वम्**) आप (**गृणन्तम्**) स्तुति करते हुए (**तुजिम्**) बलिष्ठ को (**तूतोः**) बढ़ाइये॥४॥

भावार्थः-जो राजा रथ और युद्धकुशल वीरों को बढ़ाता है, वह अत्यन्त सुख को प्राप्त होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि।
अव गिरेर्दासꣳ शम्बरं हन् प्रावो दिवोदासं चित्राभिरूती॥५॥२१॥

त्वम्। तत्। उक्थम्। इन्द्र। बर्हणा। करितिं कः। प्र। यत्। शता। सहस्रा। शूर। दर्षि। अव। गिरेः। दासम्। शम्बरम्। हन्। प्र। आवः। दिवः।ऽदासम्। चित्राभिः। ऊती॥५॥

पदार्थः-(**त्वम्**) (**तत्**) (**उक्थम्**) प्रशंसनीयं वचनम् (**इन्द्र**) सुखप्रद (**बर्हणा**) वर्धनेन (**कः**) कुर्याः (**प्र**) (**यत्**) यतः (**शता**) शतानि (**सहस्रा**) सहस्राणि (**शूर**) शत्रूणां हिंसक (**दर्षि**) विदृणासि (**अव**) (**गिरेः**) मेघस्य (**दासम्**) सेवकम् (**शम्बरम्**) शङ्करम् (**हन्**) हंसि (**प्र**) (**आवः**) रक्ष (**दिवोदासम्**) प्रकाशवज्ञातदानशीलम् (**चित्राभिः**) अद्भुताभिः (**ऊती**) रक्षाभिः॥५॥

अन्वयः-हे इन्द्र राजन्! यद्यतस्त्वं चित्राभिरूती तदुक्थं बर्हणा कः। हे शूर! शता सहस्रा प्र दर्षि गिरेर्दासं शम्बरमव हन्त्सूर्य इव हंसि तथा दिवोदासं प्रावः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! भवान्त्सर्वदा प्रजावर्धनं दुष्टनिक्रन्दनं विद्वत्सेवां च करोतु यतोऽसङ्ख्यं सुखं स्यात्॥५॥

पदार्थः-हे (**इन्द्र**) सुख के देने वाले राजन्! (**यत्**) जिससे (**त्वम्**) आप (**चित्राभिः**) अद्भुत (**ऊती**) रक्षाओं से (**तत्**) उस (**उक्थम्**) प्रशंसनीय वचन को (**बर्हणा**) बढ़ने से (**कः**) करें और हे (**शूर**) शत्रुओं के नाश करने वाले! (**शता**) सैकड़ों और (**सहस्रा**) हजारों का (**प्र, दर्षि**) नाश करते हो और (**गिरेः**) मेघ के (**दासम्**) सेवक और (**शम्बरम्**) कल्याण करने वाले का (**अव, हन्**) और सूर्य जैसे वैसे नाश करते हो वह आप (**दिवोदासम्**) प्रकाश के समान उत्पन्न दानशील अर्थात् दान देने वाले की (**प्र, आवः**) रक्षा करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! आप सर्वदा प्रजा की वृद्धि, दुष्टों का नाश और विद्वानों की सेवा करो, जिससे असङ्ख्य सुख होवे॥५॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं श्रद्धाभिर्मन्दसानः सोमैर्दुभीतये चुमुरिमिन्द्र सिष्वप्।

त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा शच्या सचाहन्॥६॥

त्वम्। श्रद्धाभिः। मन्दसानः। सोमैः। दुभीतये। चुमुरिम्। इन्द्र। सिस्वप्। त्वम्। रजिम्। पिठीनसे। दशस्यन्। षष्टिम्। सहस्रा। शच्या। सचा। अहन्॥६॥

पदार्थः-(**त्वम्**) (**श्रद्धाभिः**) सत्यस्य धारणाभिः (**मन्दसानः**) आनन्दन् (**सोमैः**) ऐश्वर्यैः (**दभीतये**) दुःखहिंसनाय (**चुमुरिम्**) अत्तारम् (**इन्द्र**) राजन् (**सिष्वप्**) स्वापय (**त्वम्**) (**रजिम्**) (**पिठीनसे**) पिठीव नासिका यस्य तस्मै (**दशस्यन्**) प्रयच्छन् (**षष्टिम्**) (**सहस्रा**) सहस्राणि (**शच्या**) प्रज्ञया कर्मणा वा (**सचा**) (**अहन्**) हन्ति॥६॥

अन्वयः-हे इन्द्र राजँस्त्वं श्रद्धाभिः सोमैर्मन्दसानो दभीतये चुमुरिं सिष्वप् त्वं शच्या सचा पिठीनसे रजिं षष्टिं सहस्रा दशस्यन् यथा सूर्य्यो मेघमहँस्तथा शत्रून् जहि॥६॥

भावार्थः-हे राजन्त्सदैव पूर्णप्रीत्या न्यायेन च प्रजापालनं कुर्य्याः सहस्राणि धार्मिकान् विदुषोऽधिकारेषु संस्थाप्य कीर्तिं वर्धय॥६॥

पदार्थः-हे (**इन्द्र**) राजन्! (**त्वम्**) आप (**श्रद्धाभिः**) सत्य की धारणाओं से और (**सोमैः**) ऐश्वर्यों से (**मन्दसानः**) आनन्द करते हुए (**दभीतये**) दुःख के नाश के लिये (**चुमुरिम्**) भोजन करने वाले को (**सिष्वप्**) सुलाइये और (**त्वम्**) आप (**शच्या**) बुद्धि वा कर्म के (**सचा**) साथ (**पिठीनसे**) पिठी के सदृश नासिका जिसकी उसके लिये (**रजिम्**) पङ्क्ति (**षष्टिम्**) साठ (**सहस्रा**) हजार (**दशस्यन्**) देता हुआ जैसे सूर्य मेघ का (**अहन्**) नाश करता है, वैसे शत्रुओं का हनन कीजिये॥६॥

भावार्थः-हे राजन्! सदा ही पूर्ण प्रीति और न्याय से प्रजापालन करो और हजारों धार्मिक विद्वानों को अधिकारों में स्थापित करके यश बढ़ाओ॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अहं चन तत्सूरिभिरानश्यां तव ज्यायः इन्द्र सुम्नमोजः।

त्वया यत्स्तवन्ते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ॥७॥

अहम्। चन। तत्। सूरिऽभिः। आनश्याम्। तव। ज्यायः। इन्द्र। सुम्नम्। ओजः। त्वया। यत्। स्तवन्ते। सधऽवीर। वीराः। त्रिऽवरूथेन। नहुषा। शविष्ठ॥७॥

पदार्थः-(**अहन्**) (**चन**) अपि (**तत्**) (**सूरिभिः**) विद्वद्भिः सह (**आनश्याम्**) प्राप्नुयाम् (**तव**) (**ज्यायः**) प्रशस्यम् (**इन्द्र**) सुखप्रद (**सुम्नम्**) सुखम् (**ओजः**) पराक्रमः (**त्वया**) (**यत्**) (**स्तवन्ते**) प्रशंसन्ति (**सधवीर**) समानस्थाने वर्त्तमान वीरपुरुष (**वीराः**) (**त्रिवरूथेन**) त्रीणि त्रिविधानि शीतोष्णवर्षासुखकराणि वरूथानि गृहाणि यस्य तेन (**नहुषा**) मनुष्याः (**शविष्ठ**) बलिष्ठ॥७॥

अन्वयः-हे शविष्ठ सधवीरेन्द्र! वीरा नहुषा विद्वांसो यत्स्तवन्ते तत्त्रिवरूथेन त्वया सूरिभिश्च सहाऽहमानश्यां चनाऽपि तव यज्ज्यायः सुम्नमोजोऽस्ति तदानश्याम्॥७॥

भावार्थः-ये विदुषां सङ्गेन पुरुषार्थिनो भूत्वा प्रशंसनीयं धर्म्यं कर्म कुर्वन्ति ते बलिनो भूत्वोत्तमं सुखं लभन्ते॥७॥

पदार्थः-हे **(शविष्ठ)** बलिष्ठ और **(सधवीर)** तुल्य स्थान में वर्त्तमान वीर जन **(इन्द्र)** सुख के देने वाले! **(वीराः)** वीर **(नहुषा)** मनुष्य विद्वान् **(यत्)** जिसकी **(स्तवन्ते)** प्रशंसा करते हैं **(तत्)** उसको **(त्रिवरूथेन)** तीन प्रकार के शीत, उष्ण और वर्षा में सुखकारक गृह जिनके उन **(त्वया)** आपके और **(सूरिभिः)** विद्वानों के साथ **(अहम्)** मैं **(आनश्याम्)** प्राप्त होऊँ और **(चन)** भी **(तव)** आपका जो **(ज्यायः)** प्रशंसा करने योग्य **(सुम्नम्)** सुख और **(ओजः)** पराक्रम है, उसको प्राप्त होऊँ॥७॥

भावार्थः-जो विद्वानों के सङ्ग से पुरुषार्थी होकर प्रशंसा करने योग्य, धर्मयुक्त कर्म को करते हैं, वे बली होकर उत्तम सुख को प्राप्त होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

व॒यं ते॑ अ॒स्यामि॑न्द्र द्यु॒म्नहू॑तौ॒ सखा॑यः स्याम महि॒न॒ प्रेष्ठा॑:।
प्रा॒तर्द॑निः क्षत्र॒श्रीर॑स्तु श्रेष्ठो॑ घ॒ने वृ॒त्राणा॑ं स॒नये॒ धना॑नाम्॥८॥२२॥

व॒यम्। ते॒। अ॒स्याम्। इ॒न्द्र॒। द्यु॒म्नऽहू॑तौ। सखा॑यः। स्या॒म॒। म॒हि॒न॒। प्रेष्ठा॑:। प्रा॒तर्द॑निः। क्ष॒त्र॒ऽश्रीः। अ॒स्तु॒। श्रेष्ठ॑:। घ॒ने। वृ॒त्राणा॑म्। स॒नये॑। धना॑नाम्॥८॥

पदार्थः-(**वयम्**) (**ते**) तव (**अस्याम्**) (**इन्द्र**) सर्वसुखप्रद (**द्युम्नहूतौ**) द्युम्नेन धनेन यशसा वा हूतिराह्वानं यस्यां तस्याम् (**सखायः**) (**स्याम**) (**महिन**) महत्तम (**प्रेष्ठाः**) अतिशयेन प्रियाः (**प्रातर्दनिः**) प्रातःकाले दनिर्दानं यस्य (**क्षत्रश्रीः**) राज्यलक्ष्मीः (**अस्तु**) (**श्रेष्ठः**) अतिशयेन प्रशस्तः (**घने**) हनने (**वृत्राणाम्**) धर्मावरकाणाम् (**सनये**) विभागाय (**धनानाम्**)॥८॥

अन्वयः-हे महिनेन्द्र! वयं तेऽस्यां द्युम्नहूतौ प्रेष्ठाः सखायः स्याम। भवान् प्रातर्दनिर्वृत्राणां घने धनानां सनये श्रेष्ठः क्षत्रश्रीरस्तु॥८॥

भावार्थः-यो राजा गुणग्राही पुरुषार्थी श्रेष्ठानां पालको दुष्टानां निवर्त्तकः सर्वस्य मित्रं स्यात्तेन सह सङ्गनैः सख्यं विधेयमिति॥८॥

अत्रेन्द्रपरीक्षकसभ्यराजप्रजाकृत्यर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षड्विंशं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(महिन)** बड़े श्रेष्ठ **(इन्द्र)** सब के सुख देने वाले! **(वयम्)** हम लोग **(ते)** आपकी **(अस्याम्)** इस **(द्युम्नहूतौ)** धन वा यश से आह्वान जिसमें उसमें **(प्रेष्ठाः)** अतिशय प्रिय **(सखायः)** मित्र **(स्याम)** होवें और आप **(प्रातर्दनिः)** प्रातःकाल में देना जिनका वह **(वृत्राणाम्)** धर्म के आवरण करने

वालों के **(घने)** नाश करने में **(धनानाम्)** धनों के **(सनये)** विभाग के लिये **(श्रेष्ठः)** अत्यन्त प्रशंसनीय **(क्षत्रश्रीः)** राज्यलक्ष्मीवान् **(अस्तु)** होवें॥८॥

भावार्थः-जो राजा गुणग्राही, पुरुषार्थी, श्रेष्ठ जनों का पालन करने और दुष्ट जनों का निवारण करने वाला तथा सबका मित्र होवे, उसके साथ सज्जनों को चाहिये कि मित्रता करें॥८॥

इस सूक्त में इन्द्र, परीक्षक, श्रेष्ठ, राजा और प्रजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह छब्बीसवाँ सूक्त और बाईसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्य सप्तविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। १-७ इन्द्रः। ८ अभ्यावर्त्तिनश्चायमानस्य दानस्तुतिर्देवता। १, २ स्वराट् पङ्क्तिःछन्दः। पञ्चमः स्वरः। ३, ४ निचृत्त्रिष्टुप्। ५, ७, ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ६ ब्राह्मी उष्णिक् छन्दः।

अथात्र प्रश्नानाह॥

अब आठ ऋचावाले सत्ताईसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में प्रश्नों को कहते हैं॥

किमꣳस्य॒ मदे॒ किम्वꣳस्य पी॒ताविन्द्रः॒ किमꣳस्य॒ स॒ख्ये च॑कार।
रणा॑ वा॒ ये नि॒षदि॒ किं ते अ॑ꣳस्य पु॒रा वि॑विद्रे॒ किमु॒ नूत॑नासः॥ १॥

किम्। अ॒स्य॒। मदे॑। किम्। ऊँ॒ इति॑। अ॒स्य॒। पी॒तौ। इन्द्रः॑। किम्। अ॒स्य॒। स॒ख्ये। च॒का॒र॒। रणा॑ः। वा॒। ये। नि॒ऽसदि॑। किम्। ते। अ॒स्य॒। पु॒रा। वि॒वि॒द्रे॒। किम्। ऊँ॒ इति॑। नूत॑नासः॥ १॥

पदार्थः-(**किम्**) (**अस्य**) (**मदे**) आनन्दे (**किम्**) (उ) (**अस्य**) (**पीतौ**) (**इन्द्रः**) दुःखविदारकः (**किम्**) (**अस्य**) (**सख्ये**) मित्रत्वे (**चकार**) (**रणाः**) रममाणाः (**वा**) (**ये**) (**निषदि**) (**किम्**) (**ते**) (**अस्य**) (**पुरा**) (**विविद्रे**) विदन्ति (**किम्**) (उ) (**नूतनासः**)॥ १॥

अन्वयः-हे वैद्यराजेन्द्रोऽस्य मदे किं चकार। अस्य पीतौ किमु चकारास्य सख्ये किं चकार ये वा निषदि रणा अस्य पुरा किं विविद्रे किमु नूतनासो विविद्रे ते किमनुतिष्ठन्ति॥ १॥

भावार्थः-अत्र सोमलतादिरसपानविषयाः प्रश्नाः सन्ति तेषामुत्तराण्युत्तरस्मिन् मन्त्रे ज्ञेयानि॥ १॥

पदार्थः-हे वैद्यराज! (**इन्द्रः**) दुःख के नाश करने वाले ने (**अस्य**) इसके (**मदे**) आनन्द में (**किम्**) क्या (**चकार**) किया (**अस्य**) इसके (**पीतौ**) पान करने में (**किम्**) क्या (उ) ही किया (**अस्य**) इसके (**सख्ये**) मित्रपने में क्या किया और (**ये**) जो (**वा**) वा (**निषदि**) बैठते हैं जिसमें उस गृह में (**रणाः**) रमते हुए (**अस्य**) इसके (**पुरा**) सम्मुख (**किम्**) क्या (**विविद्रे**) जानते हैं और (**किम्**) क्या (उ) और (**नूतनासः**) नवीन जन जानते हैं (**ते**) वे (**किम्**) क्या अनुष्ठान करते हैं॥ १॥

भावार्थः-इस मन्त्र में सोमलता आदि के रस के पानविषयक प्रश्न हैं, उनके उत्तर अगले मन्त्र में जानने चाहिये॥ १॥

अथ किं किं द्रव्यं सेवनीयमित्याह॥

अब किस किस द्रव्य का सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

सदꣳस्य॒ मदे॒ सद्वꣳस्य पी॒ताविन्द्रः॒ सदꣳस्य॒ स॒ख्ये च॑कार।
रणा॑ वा॒ ये नि॒षदि॒ सत्ते अ॑ꣳस्य पु॒रा वि॑विद्रे॒ सदु॒ नूत॑नासः॥ २॥

सत्। अस्य। मदे। सत्। ऊँ इति। अस्य। पीतौ। इन्द्रः। सत्। अस्य। सख्ये। चकार। रणाः। वा। ये। निऽसदि। सत्। ते। अस्य। पुरा। विविद्रे। सत्। ऊँ इति। नूतनासः॥ २॥

पदार्थः-(**सत्**) प्रमादरहितं सत्यं ज्ञानम् (**अस्य**) सोमलतादिमहौषधिगणस्य (**मदे**) आनन्दे (**सत्**) यथार्थम् (उ) (**अस्य**) (**पीतौ**) पाने (**इन्द्रः**) पूर्णविद्यो वैद्यः (**सत्**) (**अस्य**) (**सख्ये**) (**चकार**) (**रणाः**) रममाणाः (**वा**) (**ये**) (**निषदि**) निषीदन्ति यस्मिंस्तस्मिन् गृहे (**सत्**) (**ते**) (**अस्य**) (**पुरा**) (**विविद्रे**) लभन्ते (**सत्**) (उ) (**नूतनासः**)॥ २॥

अन्वयः-हे जिज्ञासवः! इन्द्रोऽस्य मदे सच्चकार। अस्य पीतौ सदु चकार। अस्य सख्ये सच्चकार। ये वा निषदि रणाः सन्तोऽस्य सद्विविद्रे ते पुरा नूतनासः सदु विविद्रे॥ २॥

भावार्थः-मनुष्यैर्मादकद्रव्यसेवनं विहाय सर्वदा बुद्धिबलायुःपराक्रमवर्धकानि सेव्यन्तां येन सदैव सुखं वर्द्धेत॥ २॥

पदार्थः-हे जिज्ञासु जनो! (**इन्द्रः**) पूर्ण विद्यावला वैद्य (**अस्य**) इस सोमलता आदि बड़ी ओषधि समूह के (**मदे**) आनन्द में (**सत्**) प्रमाद से रहित सत्य ज्ञान (**चकार**) करे और (**अस्य**) इसके (**पीतौ**) पान करने में (**सत्**) प्रमाद से रहित सत्य ज्ञान को (उ) भी करे और (**अस्य**) इसके (**सख्ये**) मित्रपने में (**सत्**) प्रमादरहित सत्य ज्ञान को करे (**ये, वा**) अथवा जो (**निषदि**) बैठते हैं जिसमें उस गृह अर्थात् बैठक में (**रणाः**) रमते हुए (**अस्य**) इसके (**सत्**) प्रमादरहित सत्य ज्ञान को (**विविद्रे**) प्राप्त होते हैं (**ते**) वे (**पुरा**) पहिले (**नूतनासः**) नवीन जन (**सत्**) प्रमादरहित सत्य ज्ञान को (उ) ही प्राप्त होते हैं॥ २॥

भावार्थः-मनुष्य लोग मादक द्रव्य के सेवन का त्याग करके सर्वदा बुद्धि, बल, आयु और पराक्रम के बढ़ाने वालों का सेवन करें, जिससे सदा ही सुख बढ़े॥ २॥

पुनर्मनुष्यैः किं ध्येयमित्याह॥

फिर मनुष्यों को किसका ध्यान करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

नहि नु ते महिमनः समस्य न मघवन्मघवत्त्वस्य विद्म।
न राधसोराधसो नूतनस्येन्द्र नकिर्ददृश इन्द्रियं ते॥ ३॥

नहि। नु। ते। महिमनः। समस्य। न। मघऽवन्। मघवत्ऽत्वस्य। विद्म। न। राधसःऽराधसः। नूतनस्य। इन्द्र। नकिः। ददृशे। इन्द्रियम्। ते॥ ३॥

पदार्थः-(**नहि**) (**नु**) (**ते**) (**महिमनः**) (**समस्य**) तुल्यस्य (**न**) (**मघवन्**) न्यायोपार्जितधनयुक्त (**मघवत्त्वस्य**) बहुधनयुक्तानां भावस्य (**विद्म**) विजानीयाम (**न**) (**राधसोराधसः**) धनस्य धनस्य (**नूतनस्य**) नवीनस्य (**इन्द्र**) परमैश्वर्यप्रदेश्वर (**नकिः**) (**ददृशे**) दृश्यते (**इन्द्रियम्**) (**ते**) तव॥ ३॥

अन्वयः-हे मघवन्निन्द्र! यस्य ते महिमनः समस्य कश्चिन्नु नहि ददृशे वयं मघवत्त्वस्य तुल्यं किंचिदपि न विद्म नूतनस्य राधसोराधसः समः नकिर्ददृशे ते तवेन्द्रियं न ददृशे तस्योपासनं वयं कुर्वीमहि॥ ३॥

भावार्थः-हे मनुष्या! यस्य महिम्नः समो महिमैश्वर्यसामर्थ्येन समं सामर्थ्यमाकृतिश्च न विद्यते तमेव सर्वव्यापकं सर्वान्तर्यामिनं जगदीश्वरं सततं ध्यायत॥३॥

पदार्थः-हे **(मघवन्)** न्याय से इक्ट्ठे किये हुए धन से युक्त **(इन्द्र)** अत्यन्त ऐश्वर्य के देने वाले! जिन **(ते)** आपकी **(महिमनः)** महिमा का और **(समस्य)** तुल्यता का कोई **(नु)** भी **(नहि)** नहीं **(ददृशे)** देखा जाता है तथा हम लोग **(मघवत्त्वस्य)** बहुत धन से युक्तपने के तुल्य कुछ भी **(न)** नहीं **(विद्म)** जानें और **(नूतनस्य)** नवीन **(राधसोराधसः)** धन-धन के तुल्य **(नकिः)** नहीं देखा जाता है और **(ते)** आपका **(इन्द्रियम्)** इन्द्रिय **(न)** नहीं देखा जाता है, उनकी उपासना को हम लोग करें॥३॥

भावार्थः-हे मनुष्यो! जिसकी महिमा के समान महिमा, ऐश्वर्यसामर्थ्य के समान सामर्थ्य और स्वरूप नहीं विद्यमान है, उसी सर्वव्यापक, सर्वान्तर्यामी, जगदीश्वर का निरन्तर ध्यान करो॥३॥

पुनाराजप्रजाः कथं वर्तेरन्नित्याह॥

फिर राजा और प्रजा को कैसा वर्त्ताव करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

एतत्त्यत्त इन्द्रियमचेति येनावधीर्वरशिखस्य शेषः।
वज्रस्य यत्ते निहतस्य शुष्मात् स्वनाच्चिदिन्द्र परमो ददारः॥४॥

एतत्। त्यत्। ते। इन्द्रियम्। अचेति। येन। अवधीः। वरऽशिखस्य। शेषः। वज्रस्य। यत्। ते। निऽहतस्य। शुष्मात्। स्वनात्। चित्। इन्द्र। परमः। ददारः॥४॥

पदार्थः-(**एतत्**) (**त्यत्**) तत् (**ते**) तव (**इन्द्रियम्**) (**अचेति**) चेतयति (**येन**) (**अवधीः**) हन्यात् (**वरशिखस्य**) वरा श्रेष्ठा शिखा यस्य तस्य (**शेषः**) (**वज्रस्य**) विद्युतः (**यत्**) (**ते**) तव (**निहतस्य**) निपतितस्य (**शुष्मात्**) बलाच्छोषणात् (**स्वनात्**) शब्दात् (**चित्**) इव (**इन्द्र**) सूर्य इव राजन् (**परमः**) श्रेष्ठः (**ददार**) विदृणाति॥४॥

अन्वयः-हे इन्द्र! परमो भवान् यद्ददार त्यदेतत्ते वज्रस्य सकाशान्निहतस्येन्द्रियमचेति येन वरशिखस्य ते शेषस्त्वमवधीर्विद्युच्चिच्छुष्मात् स्वनाद्बिभयति तथैव त्वं दुष्टान्त्सभयान् कुर्याः॥४॥

भावार्थः-अत्रोपमालङ्कारः। यो राजा विद्युद्वत्पराक्रमी विज्ञानवर्धको न्यायव्यवहारे सूर्यवत्प्रकाशते स एव राजशिरोमणिर्विज्ञेयः॥४॥

पदार्थः-हे **(इन्द्र)** सूर्य के समान राजन्! **(परमः)** श्रेष्ठ आप **(यत्)** जिसको **(ददार)** विदीर्ण करते हैं **(त्यत्)** उस **(एतत्)** इसको **(ते)** आपकी **(वज्रस्य)** बिजुली के समीप से **(निहतस्य)** गिराये गए का **(इन्द्रियम्)** मन **(अचेति)** जनाता है **(येन)** जिससे **(वरशिखस्य)** श्रेष्ठ शिखा वाले **(ते)** आपका **(शेषः)** शेष है और आप **(अवधीः)** नाश करें और बिजुली **(चित्)** जैसे **(शुष्मात्)** बल और शोषण से **(स्वनात्)** शब्द से भय देती है, वैसे ही आप दुष्टों को भयभीत करिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजा बिजुली के समान पराक्रमी, विज्ञान को बढ़ाने वाला, न्याय के व्यवहार में सूर्य के सदृश प्रकाशित होता है, वही राजाओं में शिरोमणि समझना चाहिए॥४॥

पुनः स कीदृश इत्याह॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

वधीदिन्द्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन्।
वृचीवतो यद्धरियूपीयायां हन् पूर्वे अर्धे भियसापरो दर्त्॥५॥२३॥

वधीत्। इन्द्रः। वरऽशिखस्य। शेषः। अभिऽआवर्तिने। चायमानाय। शिक्षन्। वृचीवतः। यत्। हरिऽयूपीयायाम्। हन्। पूर्वे। अर्धे। भियसा। अपरः। दर्त्॥५॥

पदार्थः-(**वधीत्**) हन्यात् (**इन्द्रः**) (**वरशिखस्य**) वरा शिखा यस्य तद्वत् मेघस्य (**शेषः**) यः शिष्यते (**अभ्यावर्त्तिने**) अभ्यावर्तितुं शीलं यस्य तस्मै (**चायमानाय**) सत्कर्त्रे (**शिक्षन्**) विद्यां ददन् (**वृचीवतः**) वृचिरविद्याछेदनं प्रशस्तं यस्य तस्य (**यत्**) यः (**हरियूपीयायाम्**) हरीन् मुनीनिच्छतां पीयायां पानक्रियायाम् (**हन्**) हन्ति (**पूर्वे**) सम्मुखे (**अर्द्धे**) (**भियसा**) भयेन (**अपरः**) (**दर्त्**) दृणाति॥५॥

अन्वयः-हे मनुष्या! यद्यः शेष इन्द्रस्सूर्यो वृचीवतो वरशिखस्याऽभ्यावर्त्तिन इव चायमानाय शिक्षन् भियसा हरियूपीयायां पूर्वेऽर्द्धे हन् वधीत्, अपरो विद्युदग्निस्तं दर्त् दृणाति तथा वर्त्तमानमुपदेशकं वयं सत्कुर्याम॥५॥

भावार्थः-ये मनुष्याः पूर्वे वयसि विद्वद्भ्यो विद्यां गृहीत्वा दुर्व्यसनानि हत्वा सुशीला भवन्ति तेऽधर्माचरणाद् बिभ्यति॥५॥

पदार्थः-हे मनुष्यो! (**यत्**) जो (**शेषः**) अवशिष्ट (**इन्द्रः**) सूर्य (**वृचीवतः**) अविद्या का छेदन प्रशंसित जिसके उस (**वरशिखस्य**) श्रेष्ठ शिखा वाले के समान मेघ के (**अभ्यावर्त्तिने**) चारों ओर घूमनेवाले के लिये जैसे वैसे (**चायमानाय**) सत्कार करने वाले के लिये (**शिक्षन्**) विद्या देता हुआ (**भियसा**) भय से (**हरियूपीयायाम्**) विचारशील मनुष्यों की इच्छा करते हुओं की पान क्रिया में (**पूर्वे**) सन्मुख (**अर्द्धे**) अर्द्धभाग में (**हन्**) नाश करता वा (**वधीत्**) नाश करे (**अपरः**) अन्य बिजुलीरूप अग्नि उसको (**दर्त्**) विदीर्ण करता है, वैसे वर्त्तमान उपदेश का हम लोग सत्कार करें॥५॥

भावार्थः-जो मनुष्य पूर्व अवस्था में विद्वानों से विद्या ग्रहण करके बुरे व्यसनों का त्याग करके उत्तमस्वभावयुक्त होते हैं, वे अधर्माचरण से डरते हैं॥५॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

त्रिंशच्छतं वर्मिणं इन्द्र साकं युव्यावत्यां पुरुहूत श्रवस्या।

वृ॒चीव॑न्त॒: शर॑वे॒ पत्य॑माना॒: पात्रा॑ भिन्दा॒ना न्य॒र्थान्या॑यन्॥६॥

त्रिं॒श॒त्ऽश॒तम्। व॒र्मि॒ण॑:। इ॒न्द्र॒। सा॒कम्। य॒व्याऽव॑त्याम्। पु॒रु॒ऽहू॒त॒। श्र॒व॒स्या॒। वृ॒चीव॑न्त:। शर॑वे। पत्य॑माना:। पात्रा। भि॒न्दा॒ना:। नि॒ऽअ॒र्थानि॑। आ॒य॒न्॥६॥

पदार्थ:-(**त्रिंशच्छतम्**) त्रिंशच्छतानि यस्मिन् (**वर्मिण:**) कवचिन: (**इन्द्र**) सेनेश (**साकम्**) (**यव्यावत्याम्**) यवे भवा यव्या: पाका विद्यन्ते यस्यां सेनायाम् (**पुरुहूत**) बहुभि: स्तुत (**श्रवस्या**) श्रवस्यन्ते भवानि (**वृचीवन्त:**) रोगाच्छादितवन्त: (**शरवे**) हिंसनाय (**पत्यमाना:**) पतिरिवाचरन्त: (**पात्रा**) शत्रूणां यानानि (**भिन्दाना:**) विदृणन्त: (**न्यर्थानि**) निश्चिता अर्था येषु प्रयोजनेषु तानि (**आयन्**) प्राप्नुवन्ति॥६॥

अन्वय:-हे पुरुहूतेन्द्र! ये त्रिंशच्छतं वर्मिणो वृचीवन्त: शरवे पात्रा भिन्दाना: पत्यमाना: साकं व्यव्यावत्यां सर्वे श्रवस्या न्यर्थान्यायँस्तांस्त्वं सत्कुरु॥६॥

भावार्थ:-हे राजन्! ये वीरपुरुषा राजविद्याकुशला दृढारम्भप्रयोजना: सिद्धवसना: स्युस्ते भवता सेनायां सत्कृत्य रक्षितव्या:॥६॥

पदार्थ:-(**पुरुहूत**) बहुतों से स्तुति किये गये (**इन्द्र**) सेना के स्वामिन्! (**त्रिंशच्छतम्**) तीस सैकड़े (**वर्मिण:**) कवच को धारण किये हुए (**वृचीवन्त:**) रोग से आच्छादित करते हुए (**शरवे**) हिंसन के लिये (**पात्रा**) शत्रुओं के वाहनों को (**भिन्दाना:**) विदीर्ण करते और (**पत्यमाना:**) पति के सदृश आचरण करते हुए (**साकम्**) साथ (**यव्यावत्याम्**) यवों से बने पदार्थों के पाक जिसमें उस सेना में सब लोग (**श्रवस्या**) अन्त में होने वाले (**न्यर्थानि**) निश्चित अर्थ जिनमें उन प्रयोजनों को नहीं (**आयन्**) प्राप्त होते हैं, उनका आप सत्कार करिये॥६॥

भावार्थ:-हे राजन्! जो वीरपुरुष, राजविद्या में निपुण, कार्यों के आरम्भ में दृढ़प्रयोजन सिद्धवस्त्रों वाले होवें, वे आपसे सेना में सत्कारपूर्वक रखने योग्य हैं॥६॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

यस्य॒ गावा॑वरु॒षा सू॑यव॒स्यू अ॒न्तरू॒ षु चर॑तो॒ रेरि॑हाणा।

स सृ॒ञ्ज॑याय तु॒र्वशं॒ परा॑दाद् वृ॒चीव॑तो दैववा॒ताय॒ शिक्ष॑न्॥७॥

यस्य॑। गावौ॑। अ॒रु॒षा। सु॒य॒व॒स्यू इति॑ सु॒ऽय॒व॒स्यू। अ॒न्त:। ऊँ॒ इति॑। सु। चर॑त:। रेरि॑हाणा। स:। सृ॒ञ्ज॑याय। तु॒र्वश॑म्। परा॑। अ॒दा॒त्। वृ॒चीव॑त:। दै॒व॒ऽवा॒ताय॑। शिक्ष॑न्॥७॥

पदार्थ:-(**यस्य**) (**गावौ**) गावौ किरणाविव सेनाराजनीती (**अरुषा**) आरक्ते (**सूयवस्यू**) आत्मनस्सुयवसानिच्छू (**अन्त:**) मध्ये (**उ**) (**सु**) (**चरत:**) (**रेरिहाणा**) आस्वादयन्त्यौ (**स:**) स:

(सृञ्जयाय) उत्पादनाय **(तुर्वशम्)** मनुष्यम् **(परा)** **(अदात्)** दूरी कुर्यात् **(वृचीवतः)** छेदनवतः **(दैववाताय)** दिव्यवायुविज्ञानाय **(शिक्षन्)**॥७॥

अन्वयः-हे राजन्! यस्याऽरुषा सूयवस्यू रेरिहाणा गावाविव सेनानीती प्रजाया अन्तः सु चरतः स दैववाताय सृञ्जयाय वृचीवतस्तुर्वशं च शिक्षन्नु दुरितं पराऽदादखण्डितं राज्यं प्राप्नुयात्॥७॥

भावार्थः-यो राजा नीतिसेने उन्नयति सोऽखण्डितं राज्यं प्राप्नोति॥७॥

पदार्थः-हे राजन्! **(यस्य)** जिसके **(अरुषा)** चारों ओर से रक्त **(सूयवस्यू)** अपने उत्तम यवों की इच्छा करती और **(रेरिहाणा)** आस्वादन करती हुई **(गावौ)** किरणों के सदृश सेना और राजनीति प्रजा के **(अन्तः)** मध्य में **(सु, चरतः)** उत्तम प्रकार चलती हैं **(सः)** वह **(दैववाताय)** श्रेष्ठ वायु के विज्ञान और **(सृञ्जयाय)** उत्पादन के लिये **(वृचीवतः)** छेदन वाले के **(तुर्वशम्)** मनुष्य को **(शिक्षन्)** शिक्षा देता **(उ)** और दुर्गुण को **(परा, अदात्)** दूर करे और अखण्डित राज्य को प्राप्त होवे॥७॥

भावार्थः-जो राजा नीति और सेना की वृद्धि करता है, वह अखण्डित राज्य को प्राप्त होता है॥७॥

पुना राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

द्व्यॉं अग्ने रथिनो विंशतिं गा वधूमन्तो मघवा मह्यं सम्राट्।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम्॥८॥२४॥

द्व्यान्। अग्ने। रथिनः। विंशतिम्। गाः। वधूऽमन्तः। मघऽवा। मह्यम्। सम्ऽराट्। अभिऽआवर्ती। चायमानः। ददाति। दुःऽनशा। इयम्। दक्षिणा। पार्थवानाम्॥८॥

पदार्थः-**(द्व्यान्)** प्रजासेनाजनान् **(अग्ने)** **(रथिनः)** प्रशस्ता रथा येषां सन्ति ते **(विंशतिम्)** **(गाः)** धेनूरिव **(वधूमन्तः)** प्रशस्ता वध्वो विद्यन्ते येषान्ते **(मघवा)** प्रशस्तधनवान् **(मह्यम्)** **(सम्राट्)** यः सम्यग्राजते **(अभ्यावर्ती)** यो विजेतुमभ्यावर्त्तते सः **(चायमानः)** पूज्यमानः **(ददाति)** **(दूणाशा)** दुर्लभो नाशो यस्याः सा **(इयम्)** **(दक्षिणा)** **(पार्थवानाम्)** पृथौ विस्तीर्णायां विद्यायां भवानां राज्ञाम्॥८॥

अन्वयः-हे अग्ने! ये वधूमन्तो रथिनस्स्युर्यान् द्व्यान् मघवा सम्राडभ्यावर्त्ती चायमानो भवान् विंशतिं गा ददाति स त्वं मह्यं या पार्थवानामियं दूणाशा दक्षिणा भवता दत्तास्ति तया तान् प्रीणीहि॥८॥

भावार्थः-यो राजा कुलीनान् विद्याव्यवहारविचक्षणान् धार्मिकान् राजप्रजाजनानभयान् करोति सोऽतुलां प्रतिष्ठां प्राप्नोतीति॥८॥

अत्रेन्द्रेश्वराजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तविंशतितमं सूक्तं चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्त्तमान! जो **(वधूमन्तः)** अच्छी श्रेष्ठ वधुयें और **(रथिनः)** श्रेष्ठ रथों वाले होवें जिन **(द्वयान्)** प्रजा और सेना के जनों को **(मघवा)** प्रशंसित धन वाले **(सम्राट्)** उत्तम प्रकार से शोभित और **(अभ्यावर्ती)** जीतने को चारों ओर से वर्त्तमान **(चायमानः)** आदर किये गये आप **(विंशतिम्)** बीस **(गाः)** गौओं को जैसे वैसे **(ददाति)** देते वह आप **(मह्यम्)** मेरे लिये जो **(पार्थवानाम्)** राजाओं की **(इयम्)** यह **(दूणाशा)** दुर्लभ नाश जिसका ऐसी **(दक्षिणा)** दक्षिणा आपसे दी गई है, उससे उनको प्रसन्न करिये॥८॥

भावार्थः-जो राजा कुलीन, विद्या और व्यवहार में निपुण, धार्मिक राजा और प्रजाजनों को भय रहित करता है वह अतुल प्रतिष्ठा को प्राप्त होता है॥८॥

इस सूक्त में इन्द्र, ईश्वर, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्ताईसवां सूक्त और चौबीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्याष्टविंशतितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। १, ३-८ गावः। २, ८ गाव इन्द्रो वा देवता। १, ७ निचृत्त्रिष्टुप्। २ स्वराट्त्रिष्टुप्। ५, ६ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ४ जगती छन्दः। निषादः स्वरः। ८ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः।

अथ मनुष्याः किरणगुणान् विजानीयुरित्याह॥

अब मनुष्य किरणों के गुणों को जानें इस विषय को अगले मन्त्र में कहते हैं॥

आ गावो॑ अग्मन्नुत भ॒द्रमक्र॑न्त्सीद॑न्तु गो॒ष्ठे र॑णय॑न्त्व॒स्मे।
प्र॒जाव॑तीः पुरु॒रूपा॑ इ॒ह स्यु॒रिन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः॥ १॥

आ। गाव॑ः। अ॒ग्म॒न्। उ॒त। भ॒द्रम्। अ॒क्र॒न्। सीद॑न्तु। गो॒ऽस्थे। र॒ण॒य॑न्तु। अ॒स्मे॒ इति॑। प्र॒जाऽव॑तीः। पु॒रु॒ऽरूपा॑ः। इ॒ह। स्यु॒ः। इन्द्रा॑य। पू॒र्वीः। उ॒षस॑ः। दुहा॑नाः॥ १॥

पदार्थः-(**आ**) समन्तात् (**गावः**) किरणाः (**अग्मन्**) आगच्छन्ति (**उत**) (**भद्रम्**) कल्याणम् (**अक्रन्**) कुर्वन्ति (**सीदन्तु**) प्राप्नुवन्तु (**गोष्ठे**) गावस्तिष्ठन्ति यस्मिंत्स्थले (**रणयन्तु**) शब्दयन्तु (**अस्मे**) अस्मभ्यम् (**प्रजावतीः**) बहुप्रजाः विद्यन्ते यासु ताः (**पुरुरूपाः**) बहुरूपाः (**इह**) (**स्युः**) (**इन्द्राय**) परमैश्वर्याय (**पूर्वीः**) प्राचीनाः (**उषसः**) प्रभातवेलाः (**दुहानाः**) काममलंकुर्वाणाः॥ १॥

अन्वयः-हे मनुष्या! यथेहाऽस्मे गाव आऽग्मन्नुत रणयन्तु भद्रमक्रंस्ता गोष्ठे सीदन्तु, यथा पुरुरूपाः पूर्वीर्दुहाना उषस इन्द्राय प्रजावतीः स्युस्तथा युष्मभ्यमपि भवन्तु॥ १॥

भावार्थः-यदि वृक्षारोपणसुगन्धादियुक्तहोमधूमेन वायुकिरणाञ्छुन्धेयुस्तर्ह्येते सर्वान्त्सुखयन्ति॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**इह**) यहाँ (**अस्मे**) हम लोगों के लिये (**गावः**) किरणें (**आ, अग्मन्**) प्राप्त होती हैं (**उत**) और (**रणयन्तु**) शब्द करावें तथा (**भद्रम्**) कल्याण को (**अक्रन्**) करती हैं, वे (**गोष्ठे**) गौओं के बैठने के स्थान में (**सीदन्तु**) प्राप्त हों और जैसे (**पुरुरूपाः**) बहुत रूपवाली (**पूर्वीः**) प्राचीन (**दुहानाः**) मनोरथ को पूर्ण करती हुई (**उषसः**) प्रभात वेलाएं (**इन्द्राय**) अत्यन्त ऐश्वर्य से युक्त के लिये (**प्रजावतीः**) बहुत प्रजाओं वाली (**स्युः**) होवें, वैसे आप लोगों के लिये भी हों॥ १॥

भावार्थः-जो वृक्षों के लगाने और सुगन्ध आदि से युक्त धूम से पवन के किरणों को शुद्ध करें तो ये सब को सुखयुक्त करते हैं॥ १॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॒ यज्व॑ने पृण॒ते च॑ शिक्ष॒त्युपेद्द॑दाति॒ न स्वं मु॑षायति।
भूयो॑भूयो र॒यिमिद॑स्य व॒र्धय॒न्नभि॑न्ने खि॒ल्ये नि द॑धाति देव॒युम्॥ २॥

इन्द्रः। यज्वने। पृणते। च। शिक्षति। उप। इत्। ददाति। न। स्वम्। मुषायति। भूयःऽभूयः। रयिम्। इत्। अस्य। वर्धयन्। अभिन्ने। खिल्ये। नि। दधाति। देवऽयुम्॥ २॥

पदार्थः-(**इन्द्रः**) राजा (**यज्वने**) यज्ञस्य कर्त्रे (**पृणते**) सुखयते (**च**) (**शिक्षति**) विद्यां ददाति। अत्र व्यत्ययेन परस्मैपदम् (**उप**) (**इत्**) (**ददाति**) (**न**) निषेधे (**स्वम्**) स्वकीयं बोधम् (**मुषायति**) चोरयति (**भूयोभूयः**) (**रयिम्**) विद्याधनम् (**इत्**) एव (**अस्य**) संसारस्य मध्ये (**वर्धयन्**) (**अभिन्ने**) एकीभूते व्यवहारे (**खिल्ये**) खण्डेषु भवे (**नि**) (**दधाति**) (**देवयुम्**) देवान् विदुषः कामयमानं विद्वांसम्॥ २॥

अन्वयः-हे मनुष्या! य इन्द्रोऽस्य संसारस्य मध्ये रयिमिद् वर्धयन्नभिन्ने खिल्ये च देवयुं भूयोभूयो नि दधाति स्वं न मुषायति यज्वन उपशिक्षति पृणते च ददाति स इदेव सर्वान् वर्धयितुं शक्नोति॥ २॥

भावार्थः-त एव विद्वांस आप्ताः सन्ति ये निष्कपटत्वेन पुनः पुनः प्रतिदिनं विद्यानिधिं योग्याय ददति॥ २॥

पदार्थः-हे मनुष्यो! जो (**इन्द्रः**) राजा (**अस्य**) इस संसार के मध्य में (**रयिम्**) विद्यारूप धन को (**इत्**) (**वर्धयन्**) बढ़ाता हुआ (**अभिन्ने**) इकट्ठे हुए व्यवहार में और (**खिल्ये**) टुकड़ों में हुए के बीच (**च**) भी (**देवयुम्**) विद्वानों की कामना करते हुए विद्वान् को (**भूयोभूयः**) वारंवार (**नि, दधाति**) निरन्तर धारण करता है और (**स्वम्**) अपने ज्ञान को (**न**) नहीं (**मुषायति**) चुराता है और (**यज्वने**) यज्ञ के करने वाले के लिये (**उप, शिक्षति**) विद्या देता है और (**पृणते**) सुखयुक्त करता है (**च**) और (**ददाति**) देता है, वह (**इत्**) ही सबको बढ़ा सकता है॥ २॥

भावार्थः-वे ही विद्वान् यथार्थवक्ता हैं जो निष्कपटता से वार-वार प्रतिदिन विद्याकोश को योग्य के लिये देते हैं॥ २॥

अथ किमुत्तमं दानमित्याह॥

अब कौन उत्तम दान है, इस विषय को अगले मन्त्र में कहते हैं॥

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति।
देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिस्सह॥ ३॥

नः। ताः। नशन्ति। नः। दुभाति। तस्करः। नः। आसाम। आमित्रः। व्यथिः। आ। दधर्षति। देवान्। च। याभिः। यजते। ददाति। च। ज्योक्। इत्। ताभिः। सचते। गोऽपतिः। सह॥ ३॥

पदार्थः-(**नः**) निषेधे (**ताः**) विद्याः (**नशन्ति**) (**नः**) (**दभाति**) हिनस्ति (**तस्करः**) चोरः (**नः**) (**आसाम्**) विद्यानाम् (**आमित्रः**) शत्रुः (**व्यथिः**) व्यथा (**आ**) (**दधर्षति**) तिरस्करोति (**देवान्**) विदुषः (**च**) (**याभिः**) विद्याभिः (**यजते**) (**ददाति**) (**च**) (**ज्योक्**) निरन्तरम् (**इत्**) एव (**ताभिः**) विद्याभिः (**सचते**) समवैति (**गोपतिः**) गवां स्वामी (**सह**)॥ ३॥

अन्वयः-हे मनुष्या! याभिर्यजमानो देवान् यजते ददाति च ज्योगित्ताभिस्सह गोपतिः सचते नासामामित्रो व्यथिश्चाऽऽदधर्षति ता न नशन्ति तस्करो ता न दभाति ता यूयं ब्रह्मचर्यादिना गृह्णीत॥ ३॥

भावार्थः-हे मनुष्याः सर्वेभ्योऽधिकसुखकरमविनाशि सततं वर्धमानं चोरादिभिर्हर्तुमनर्हं विद्यादानमेवास्तीति विजानीत॥३॥

पदार्थः-हे मनुष्यो! **(याभिः)** जिन विद्याओं से यजमान **(देवान्)** विद्वानों को **(यजते)** मिलता और **(ददाति)** देता **(च)** भी है तथा **(ज्योक्)** निरन्तर **(इत्)** ही **(ताभिः)** उन विद्याओं के **(सह)** साथ **(गोपतिः)** गौओं का स्वामी **(सचते)** मिलता है **(न)** न **(आसाम्)** इनका **(आमित्रः)** शत्रु और **(व्यथिः)** पीड़ा **(च)** भी **(आ, दधर्षति)** तिरस्कार करती है **(ताः)** वे विद्याएं **(न)** नहीं **(नशन्ति)** नष्ट होती हैं तथा **(तस्करः)** चोर उनका **(न)** नहीं **(दभाति)** नाश करता है, उन विद्याओं को आप लोग ब्रह्मचर्यादि से ग्रहण करिये॥३॥

भावार्थः-हे मनुष्यो! सब के लिये अधिक सुख करने, नहीं नष्ट होने और निरन्तर बढ़ने वाले और चोर आदिकों से हरने के अयोग्य विद्यादान ही है, यह जानो॥३॥

सा विद्या कं प्राप्नोति कं न प्राप्नोतीत्याह॥

वह विद्या किस को प्राप्त होती और किस को नहीं प्राप्त होती है, इस विषय को अगले मन्त्र में कहते हैं॥

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः॥४॥

न। ताः। अर्वा। रेणुऽककाटाः। अश्नुते। न। संस्कृतऽत्रम्। उप। यन्ति। ताः। अभि। उरुऽगायम्। अभयम्। तस्य। ताः। अनु। गावः। मर्तस्य। वि। चरन्ति। यज्वनः॥४॥

पदार्थः-**(न)** निषेधे **(ताः)** **(अर्वा)** अश्व इव बुद्धिहीनो विषयासक्तः **(रेणुककाटः)** रेणुकाकूप इवान्धकारहृदयः **(अश्नुते)** प्राप्नोति **(न)** **(संकृतत्रम्)** यः संस्कृतं त्रायते रक्षति तम् **(उप)** **(यन्ति)** प्राप्नुवन्ति **(ताः)** **(अभि)** आभिमुख्ये **(उरुगायम्)** बहुभिः प्रशंसनीयम् **(अभयम्)** अविद्यमानं भयं यस्य यस्माद्वा **(तस्य)** **(ताः)** **(अनु)** **(गावः)** किरणा इव **(मर्त्तस्य)** मननशीलस्य नरस्य **(वि)** **(चरन्ति)** **(यज्वनः)** विदुषां सेवकस्य सङ्गच्छमानस्य॥४॥

अन्वयः-हे मनुष्यास्ता रेणुककाटोऽर्वा नाश्नुते मूढाः संस्कृतत्रं प्राप्य ता नाऽभ्युप यन्ति किन्तु ता उरुगायमभयं जनमभ्युपयन्ति ता गाव इव तस्य यज्वनो मर्त्तस्यानु वि चरन्ति विशेषेण प्राप्नुवन्ति॥४॥

भावार्थः-हे मनुष्या! येऽशुद्धाहाराविहारा लम्पटाः पिशुनाः कुसङ्गिनः सन्ति तान् विद्या कदाचिदपि नाप्नोति ये च पवित्राहारविहारा जितेन्द्रिया यथार्थवक्तारः सत्सङ्गिनः पुरुषार्थिनः सन्ति तान् विद्याऽभिगच्छतीति विजानीत॥४॥

पदार्थः-हे मनुष्यो! **(ताः)** उन विद्याओं को **(रेणुककाटः)** रेणुकाओं के कूप के समान अन्धकार हृदय वाला **(अर्वा)** घोड़े के समान बुद्धिहीन विषयासक्त जन **(न)** नहीं **(अश्नुते)** प्राप्त होता

है और मूढ़जन (**संस्कृत्रम्**) संस्कारयुक्त की रक्षा करने वाले को प्राप्त होकर (**ताः**) उनके (**न**) नहीं (**अभि**) सन्मुख (**उप, यन्ति**) समीप प्राप्त होते हैं, किन्तु वे (**उरुगायम्**) बहुतों से प्रशंसनीय (**अभयम्**) निर्भय जन के सम्मुख समीप प्राप्त होती हैं और (**ताः**) वे विद्यायें (**गावः**) किरणों के समान (**तस्य**) उस (**यज्वनः**) विद्वानों के सेवक और प्राप्त होते हुए (**मर्त्तस्य**) विचारशील मनुष्य के (**अनु, वि, चरन्ति**) पश्चात् चलती हैं तथा विशेष करके प्राप्त होती हैं॥४॥

भावार्थः-हे मनुष्यो! जो अशुद्ध व्यवहार और विहार करने वाले, लम्पट, चुगुल और कुसङ्गी हैं, उनको विद्या कभी नहीं प्राप्त होती है और जो पवित्र आहार और विहार करने वाले, जितेन्द्रिय, यथार्थवक्ता, सत्सङ्गी, पुरुषार्थी हैं, उनको विद्या प्राप्त होती है, ऐसा जानिये॥४॥

मनुष्यैरवश्यं विद्याप्राप्तीच्छा कार्य्येत्याह॥

मनुष्यों को चाहिये कि अवश्य विद्या की इच्छा करें, इस विषय को अगले मन्त्र में कहते हैं॥

गावो॒ भगो॒ गाव॒ इन्द्रो॑ मे अच्छा॒न् गाव॒: सोम॑स्य प्रथ॒मस्य॑ भ॒क्षः।
इ॒मा या गाव॒: स ज॑नास॒ इन्द्रं॑ इ॒च्छामीद् धृ॒दा मन॑सा चि॒दिन्द्र॑म्॥५॥

गाव॑:। भग॑:। गाव॑:। इन्द्र॑:। मे॒। अ॒च्छा॒न्। गाव॑:। सोम॑स्य। प्र॒थ॒मस्य॑। भ॒क्षः। इ॒माः। याः। गाव॑:। सः। ज॒ना॒स॒:। इन्द्र॑:। इ॒च्छामि॑। इत्। हृ॒दा। मन॑सा। चि॒त्। इन्द्र॑म्॥५॥

पदार्थः-(**गावः**) किरणा इव (**भगः**) ऐश्वर्यमिच्छुः (**गावः**) सुशिक्षिता वाचः (**इन्द्रः**) विद्यैश्वर्ययुक्तः (**मे**) मम (**अच्छान्**) यच्छन्तु प्रददतु। अत्र **छान्दसो वर्णलोपो वे**ति यलोपः (**गावः**) धेनवः (**सोमस्य**) ऐश्वर्यस्य (**प्रथमस्य**) आदिमस्य (**भक्षः**) सेवनीयः (**इमाः**) (**याः**) (**गावः**) वाचः (**सः**) (**जनासः**) विद्वांसः (**इन्द्रः**) (**इच्छामि**) (**इत्**) एव (**हृदा**) आत्मना (**मनसा**) विज्ञानेन (**चित्**) अपि (**इन्द्रम्**)॥५॥

अन्वयः-हे जनासो विद्वांसो! यथा प्रथमस्य सोमस्य सेवमाना गावो वत्सान् दुग्धं प्रयच्छन्ति तथा गावो जना भगो गाव इन्द्रो भक्षश्च मेऽच्छान् या इमा गावो यस्य सन्ति स इन्द्रो मां शिक्षतु। अहं हृदा मनसा चिदिन्द्रमिदिच्छामि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या आत्मनाऽन्तःकरणेन च विद्यां प्राप्तुमिच्छन्ति ते सर्वं सुखमश्नुवते॥५॥

पदार्थः-हे (**जनासः**) विद्वान् मनुष्यो! जैसे (**प्रथमस्य**) पहिले (**सोमस्य**) ऐश्वर्य की सेवने वाली (**गावः**) गौएं बछड़ों को दूध देती हैं, वैसे (**गावः**) किरणों के समान जन और (**भगः**) ऐश्वर्य की इच्छा करने वाला (**गावः**) उत्तम प्रकार शिक्षित वाणियों को और (**इन्द्रः**) विद्या और ऐश्वर्य से युक्त (**भक्षः**) सेवा करने योग्य जन (**मे**) मेरे लिये (**अच्छान्**) देवें और (**याः**) जो (**इमाः**) ये (**गावः**) वाणियां जिसकी हैं (**सः**) वह (**इन्द्रः**) विद्या और ऐश्वर्य से युक्त मुझ को शिक्षा देवे और मैं (**हृदा**) आत्मा तथा (**मनसा**) विज्ञान से (**चित्**) भी (**इन्द्रम्**) ऐश्वर्ययुक्त जन की (**इत्**) ही (**इच्छामि**) इच्छा करता हूं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य आत्मा और अन्तःकरण से विद्या की प्राप्ति की इच्छा करते हैं, वे सब सुख का भोग करते हैं॥५॥

पुनर्मनुष्यैः किमवश्यं कर्त्तव्यमित्याह॥

फिर मनुष्यों का क्या अवश्य कर्त्तव्य है, इस विषय को अगले मन्त्र में कहते हैं॥

यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम्।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु॥६॥

यूयम्। गावः। मेदयथ। कृशम्। चित्। अश्रीरम्। चित्। कृणुथ। सुऽप्रतीकम्। भद्रम्। गृहम्। कृणुथ। भद्रऽवाचः। बृहत्। वः। वयः। उच्यते। सभासु॥६॥

पदार्थः-(**यूयम्**) (**गावः**) वाचः (**मेदयथा**) स्नेहयथ स्निग्धा मधुराः कुरुत। अत्र **संहितायामिति** दीर्घः। (**कृशम्**) क्षीणम् (**चित्**) (**अश्रीरम्**) अश्लीलममङ्गलमधर्माचरणम् (**चित्**) अपि (**कृणुथा**) कुरुथ। अत्रापि **संहितायामिति** दीर्घः। (**सुप्रतीकम्**) शोभनानि प्रतीकानि प्रतीतिकराणि द्वारादीनि यस्मिंस्तम् (**भद्रम्**) भन्दनीयं कल्याणकरं शुद्धवायूदकवृक्षम् (**गृहम्**) (**कृणुथ**) (**भद्रवाचः**) या भद्राः कल्याणकर्यः सत्यभाषणान्विता वाचश्च ताः (**बृहत्**) महत् (**वः**) युष्माकम् (**वयः**) जीवनम् (**उच्यते**) (**सभासु**) आप्तैर्विद्वद्भिः प्रकाशमानासु॥६॥

अन्वयः-हे विद्वांसो! यूयं या गावस्ता मेदयथा चिदश्रीरं कृशं कृणुथा चिदपि सुप्रतीकं भद्रं गृहं कृणुथ सभासु भद्रवाचो वरथ यद्वो बृहद्वय उच्यते तत्कृणुथ॥६॥

भावार्थः-हे मनुष्याः कोमलां सत्यां धर्म्यां वाचं सर्वर्त्तुसुखकरं गृहं सभां दीर्घमायुश्च कुर्वन्ति ते जगति कल्याणकरा भवन्ति॥६॥

पदार्थः-हे विद्वानो! (**यूयम्**) आप लोग जो (**गावः**) वाणियां हैं उनको (**मेदयथा**) मधुर करिये (**चित्**) और (**अश्रीरम्**) अमङ्गलस्वरूप और अधर्माचरण करने वाले को (**कृशम्**) क्षीण (**कृणुथा**) करिये और (**चित्**) भी (**सुप्रतीकम्**) उत्तम प्रतीति कराने वाले द्वार आदि जिसमें उस (**भद्रम्**) कल्याण करने शुद्ध वायु जल और वृक्ष वाले (**गृहम्**) गृह को (**कृणुथ**) करिये और (**सभासु**) आप्त विद्वानों से प्रकाशमान सभाओं में (**भद्रवाचः**) जो कल्याण करने वाली सत्यभाषण से युक्त वाणियां उनको स्वीकार करिये और जो (**वः**) आप लोगों का (**बृहत्**) बड़ा (**वयः**) जीवन (**उच्यते**) कहा जाता है, उसको करिये॥६॥

भावार्थः-जो मनुष्य कोमल, सत्य, धर्मयुक्त वाणी तथा सर्व ऋतुओं में सुख करने वाले घर को, सभा को और अधिक अवस्था को करते हैं, वे संसार में कल्याण करने वाले होते हैं॥६॥

अथ प्रजाः कथं पालेयदित्याह॥

अब प्रजाओं का कैसे पालन करे, इस विषय को अगले मन्त्र में कहते हैं॥

प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः।
मा वः स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः॥७॥

प्रजाऽवतीः। सुऽयवसम्। रिशन्तीः। शुद्धाः। अपः। सुऽप्रपाने। पिबन्तीः। मा। वः। स्तेनः। ईशत। मा। अघऽशंसः। परि। वः। हेतिः। रुद्रस्य। वृज्याः॥७॥

पदार्थः-(**प्रजावतीः**) प्रशस्ताः प्रजा विद्यन्ते यासान्ताः (**सूयवसम्**) शोभनं घासादिकम्। अत्रा**न्येषामपी**त्युकारदैर्घ्यम्। (**रिशन्तीः**) भक्षयन्तीः (**शुद्धाः**) निर्मलाः (**अपः**) जलानि (**सुप्रपाणे**) सुन्दरे जलपानस्थाने (**पिबन्तीः**) (**मा**) (**वः**) युष्माकम् (**स्तेनः**) चोरः (**ईशत**) हनने समर्थो भवेत् (**मा**) (**अघशंसः**) हिंस्रः पापकृत् (**परि**) सर्वतः (**वः**) युष्माकम् (**हेतिः**) वज्रम् (**रुद्रस्य**) रौद्रकर्मकर्त्तुः (**वृज्याः**) वृणक्तु॥७॥

अन्वयः-हे राजन्! यथा गोपः सूयवसं रिशन्तीः सुप्रपाणे शुद्ध अपः पिबन्तीः प्रजावतीर्गाः पालयति तथा त्वं प्रजाः पालय यथा वः प्रजाः स्तेनोऽघशंसश्च मेशत तथा वो रुद्रस्य हेतिरेतान्मा परि वृज्याः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये पितृवत्प्रजाः पालयन्ति शुद्धाऽहारविहाराश्च कृत्वा पुरुषार्थयन्ति स्तेनादीन् दुष्टाञ्छिन्दन्ति ते राजामात्यभृत्याः प्रशंसनीया भवन्ति॥७॥

पदार्थः-हे राजन्! जैसे गौवों का पालन करने वाला (**सूयवसम्**) सुन्दर घास आदि को (**रिशन्तीः**) भक्षण करती हुई (**सुप्रपाणे**) सुन्दर जलपान के स्थान में (**शुद्धाः**) निर्मल (**अपः**) जलों को (**पिबन्तीः**) पीती हुई (**प्रजावतीः**) श्रेष्ठ सन्तान वाली गौवों का पालन करता है, वैसे आप प्रजाओं का पालन करिये और जैसे (**वः**) आप लोगों की प्रजाओं को (**स्तेनः**) चोर और (**अघशंसः**) पाप करने वाला डाकू (**मा**) नहीं (**ईशत**) मारने में समर्थ होवे, वैसे (**वः**) आप लोगों के सम्बन्ध में (**रुद्रस्य**) रौद्र कर्म के करने वाले का (**हेतिः**) वज्र इनको (**मा**) मत (**परि, वृज्याः**) परिवर्जन करे॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पिता के सदृश प्रजाओं का पालन करते और शुद्ध भोजन और विहार वाली करके पुरुषार्थ करते और चोर आदि दुष्टों का छेदन करते हैं, वे राजा, अमात्य और भृत्य प्रशंसा करने योग्य होते हैं॥७॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

उपेदमुपपर्चनमासु गोषूप पृच्यताम्।
उप ऋषभस्य रेतस्युपेन्द्र तवा वीर्ये॥८॥२५॥६॥

उप। इदम्। उपऽपर्चनम्। आसु। गोषु। उप। पृच्यताम्। उप। ऋषभस्य। रेतसि। उप। इन्द्र। तव। वीर्ये॥८॥

पदार्थः-**(उप) (इदम्) (उपपर्चनम्)** उपसम्बन्धः **(आसु) (गोषु)** पृथिवीषु वाक्षु वा **(उप) (पृच्यताम्)** सम्बध्यताम् **(उप) (ऋषभस्य)** श्रेष्ठस्य **(रेतसि)** वीर्ये **(उप) (इन्द्र)** परमैश्वर्यकारक **(तव) (वीर्ये)** पराक्रमे॥८॥

अन्वयः-हे इन्द्र! ऋषभस्य तव वीर्ये प्रजाभिरुप पृच्यताम् रेतसि च त्वयोप पृच्यतामासु गोषूयपर्चनमुप पृच्यतामिदं राजनयमुप पृच्यताम्॥८॥

भावार्थः-ये राजादयो मनुष्या विद्वांसो भूत्वा सभायां परस्परस्यैकां सम्मतिं कृत्वा विरोधविनाशेनैकतायां प्रयतन्ते तेऽखण्डितसामर्थ्या जायन्त इति॥८॥

अत्र गवेन्द्रविद्याप्रजाराजधर्म वर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

अस्मिन्नध्याय इन्द्रसोमसूर्य्योषाराज्यविश्वेदेवयोधृमित्रत्वजगदीश्वराग्निद्यावापृथिवीराजप्रजामरुच्छिल्पि-न्यायेशोपदेशकवाग्विद्यागुणवर्णनादेतदर्थस्य पूर्वाध्यायार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां महाविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते सुप्रमाणयुक्त ऋग्वेदभाष्ये चतुर्थाष्टके षष्ठोऽध्यायः पञ्चविंशो वर्गः, षष्ठे मण्डलेऽष्टाविंशं सूक्तं च समाप्तम्॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य के करने वाले **(ऋषभस्य)** श्रेष्ठ **(तव)** आपके **(वीर्ये)** पराक्रम में प्रजाओं के साथ **(उप, पृच्यताम्)** सम्बन्ध करिये तथा **(रेतसि)** पराक्रम में आपको **(उप)** सम्बन्ध करना चाहिये और **(आसु)** इन **(गोषु)** पृथिवियों वा वाणियों में **(उपपर्चनम्)** समीप सम्बन्ध **(उप)** सम्बन्ध करना चाहिये और **(इदम्)** इस राजनीति का **(उप)** सम्बन्ध करना चाहिये॥८॥

भावार्थः-जो राजा आदि मनुष्य विद्वान् होकर सभा में परस्पर की एक सम्मति करके विरोध के नाश करने से एकता में प्रयत्न करते हैं, वे अखण्डित सामर्थ्यवाले होते हैं॥८॥

इस सूक्त में गो, इन्द्र, विद्या, प्रजा और राजा के धर्म का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

इस अध्याय में इन्द्र, सोम, सूर्य, प्रातःकाल, राज्य, विश्वेदेव, योधा, मित्रत्व, जगदीश्वर, अग्नि, अन्तरिक्ष, पृथिवी, राजा, प्रजा, पवन, कारीगर, न्यायेश, उपदेशक, वाणी और विद्या के गुणवर्णन करने से इस अध्याय के अर्थ की इससे पूर्व अध्याय के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह श्रीमन्परमहंस परिव्राजकाचार्य विरजानन्द सरस्वती स्वामी जी के शिष्य श्रीमान् दयानन्द सरस्वती स्वामी से रचित उत्तम प्रमाणों से युक्त, ऋग्वेदभाष्य के चतुर्थ अष्टक में छठा अध्याय, पच्चीसवां वर्ग और छठे मण्डल में अट्ठाईसवां सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथ षडर्चस्यैकोनत्रिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ३, ५, निचृत्त्रिष्टुप्। ४ त्रिष्टुप् छन्दः। धैवतः स्वरः। २ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ६ ब्राह्मी उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ मनुष्यैः कथं वर्त्तितव्यमित्याह॥

अब छः ऋचा वाले उनतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

इन्द्रं॑ वो॒ नरः॑ स॒ख्याय॑ सेपु॒र्महो॒ यन्तः॑ सु॒म॒तये॑ चका॒नाः।
म॒हो हि दा॒ता वज्र॑हस्तो॒ अस्ति॑ म॒हामु॑ र॒ण्वमव॑से यजध्वम्॥ १॥

इन्द्र॑म्। व॒ः। नरः॑। स॒ख्याय॑। से॒पुः॒। म॒हः। यन्तः॑। सु॒ऽम॒तये॑। च॒का॒नाः। म॒हः। हि। दा॒ता। वज्र॑ऽहस्तः। अस्ति॑। म॒हाम्। ऊँ॒ इति॑। र॒ण्वम्। अव॑से। य॒ज॒ध्व॒म्॥ १॥

पदार्थः-(**इन्द्रम्**) (**वः**) युष्माकम् (**नरः**) नायकाः (**सख्याय**) मित्रभावाय (**सेपुः**) शपथं कुर्युः (**महः**) महद्विज्ञानम् (**यन्तः**) (**सुमतये**) उत्तमप्रज्ञायै (**चकानाः**) कामयमानाः (**महः**) महतो विज्ञानस्य (**हि**) यतः (**दाता**) (**वज्रहस्तः**) शस्त्रास्त्रपाणिः (**अस्ति**) (**महाम्**) महान्तं महाशयं सर्वाध्यक्षम् (**उ**) (**रण्वम्**) रमणीयमुपदेशकम् (**अवसे**) रक्षणाद्याय (**यजध्वम्**) सङ्गच्छध्वं सत्कुरुत॥ १॥

अन्वयः-हे नरो! ये महो यन्तः सुमतये चकाना वः सख्यायेन्द्रं सेपुर्हि यो महो दाता वज्रहस्तोऽस्ति तं रण्वं महामु अवसे रण्वं यजध्वम्॥ १॥

भावार्थः-हे मनुष्या! ये युष्माकं मित्रत्वाय दृढं शपथं कृत्वा तनुमनोधनैरुपकाराय यतन्ते तान् यूयं सर्वदा सत्कुरुत तैः सह सखित्वे वर्त्तध्वम्॥ १॥

पदार्थः-हे (**नरः**) नायक जनो! जो (**महः**) बड़े विज्ञान को (**यन्तः**) प्राप्त होते और (**सुमतये**) उत्तम बुद्धि के लिये (**चकानाः**) कामना करते हुए (**वः**) आप लोगों के (**सख्याय**) मित्रपने के लिये (**इन्द्रम्**) ऐश्वर्य के करने वाले को (**सेपुः**) शपथ करते हैं तथा (**हि**) जिस कारण जो (**महः**) बड़े विज्ञान का (**दाता**) देने वाले और (**वज्रहस्तः**) शस्त्र और अस्त्रों से युक्त हाथों वाला (**अस्ति**) है उस (**रण्वम्**) रमणीय उपदेशक (**महाम्**) महान् महाशय सर्वाध्यक्ष का (**उ**) ही (**अवसे**) रक्षण आदि के लिये (**यजध्वम्**) मिलिये वा सत्कार करिये॥ १॥

भावार्थः-हे मनुष्यो! जो आप लोगों के साथ मित्रत्व के लिये दृढ़ शपथ करके तन, मन और धनों से उपकार के लिये प्रयत्न करते हैं, उनका आप लोग सर्वदा सत्कार करिये तथा इनके साथ मित्रपन में बर्ताव करिये॥ १॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

आ यस्मिन् हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठाः।
आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः॥ २॥

आ। यस्मिन्। हस्ते। नर्याः। मिमिक्षुः। आ। रथे। हिरण्यये। रथेऽस्थाः। आ। रश्मयः। गभस्त्योः। स्थूरयोः। आ। अध्वन्। अश्वासः। वृषणः। युजानाः॥ २॥

पदार्थः-(**आ**) समन्तात् (**यस्मिन्**) (**हस्ते**) (**नर्याः**) नृभ्यो हितानि (**मिमिक्षुः**) सिञ्चन्ति सम्बध्नन्ति (**आ**) (**रथे**) (**हिरण्यये**) तेजोमये (**रथेष्ठाः**) ये रथे तिष्ठन्ति ते (**आ**) (**रश्मयः**) किरणा इव (**गभस्त्योः**) बाह्वोर्मध्ये (**स्थूरयोः**) स्थूलयोः। अत्र वर्णव्यत्येन लस्य स्थाने रः। (**आ**) (**अध्वन्**) अध्वनि मार्गे (**अश्वासः**) अश्वा इव महान्तो विद्युदादयः पदार्थाः (**वृषणः**) बलिष्ठाः (**युजानाः**) युक्ताः॥ २॥

अन्वयः-हे मनुष्या! इन्द्रस्य यस्मिन् हस्ते रश्मय आ मिमिक्षुरिव नर्याः शस्त्रास्त्राणि यस्य हिरण्यये रथे रथेष्ठा रथे रथेष्ठा स्थूरयोर्गभस्त्योः शस्त्रास्त्राणि सन्ति यस्य यानेषु वृषणोऽश्वास आ युजाना अध्वन् यानान्या गमयन्ति ते सुखैर्जनाना मिमिक्षुः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा शस्त्राशस्त्रविदो वरान् धार्मिकाञ्छूरान् विमानादियाननिर्मातॄञ्छिल्पिनो विद्युदादिविद्याविदुषः सत्कृत्य रक्षति तस्यैव सूर्यरश्मय इव यशांसि प्रथन्ते॥ २॥

पदार्थः-हे मनुष्यो! ऐश्वर्य करने वाले के (**यस्मिन्**) जिस (**हस्ते**) हस्त में (**रश्मयः**) किरणों के समान (**आ**) सब ओर से (**मिमिक्षुः**) सिञ्चन करते सम्बन्ध करते हैं तथा (**नर्याः**) मनुष्यों के लिये हितकारक शस्त्र और अस्त्र जिसके (**हिरण्यये**) तेज के विकार से बने हुए (**रथे**) रथ में और (**रथेष्ठाः**) रथ पर स्थित होने वाले जन और (**स्थूरयोः**) स्थूल (**गभस्त्योः**) बाहुओं के मध्य में शस्त्र और अस्त्र हैं तथा जिसके वाहनों में (**वृषणः**) बलिष्ठ (**अश्वासः**) घोड़ों के समान बड़े बिजुली आदि पदार्थ (**आ**) सब ओर से (**युजानाः**) युक्त (**अध्वन्**) मार्ग में यानों को (**आ**) लाते हैं, वे सुखों से जनों का (**आ**) अच्छे प्रकार सम्बन्ध करते हैं॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा शस्त्र और अस्त्र के जानने वाले, श्रेष्ठ धार्मिक, शूर तथा विमान आदि वाहनों के बनाने वाले शिल्पियों और बिजुली आदि की विद्या को जानने वाले विद्वानों का सत्कार करके रक्षा करता है, उसी के सूर्य के किरणों के समान यश बढ़ते हैं॥ २॥

पुनः स राजा कीदृश इत्याह॥

फिर वह राजा कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान्।
वसानो अत्कं सुरभिं दृशे कं स्वर्ण नृतविषिरो बभूथ॥ ३॥

श्रिये। ते। पादा। दुवः। आ। मिमिक्षुः। धृष्णुः। वज्री। शवसा। दक्षिणऽवान्। वसानः। अत्कम्। सुरभिम्। दृशे। कम्। स्वः। न। नृतो इति। इषिरः। बभूथ॥ ३॥

पदार्थः-(**श्रिये**) लक्ष्म्यै (**ते**) तव (**पादा**) पादौ (**दुवः**) कार्यसेवनम् (**आ**) (**मिमिक्षुः**) आसिञ्चतः (**धृष्णुः**) प्रगल्भः (**वज्री**) शस्त्रास्त्रधारी (**शवसा**) बलेन (**दक्षिणावान्**) प्रशस्ता दक्षिणा विद्यते यस्य सः (**वसानः**) धारयन् (**अत्कम्**) व्याप्तशीलं वस्त्रम् (**सुरभिम्**) सुगन्धम् (**दृशे**) द्रष्टुम् (**कम्**) सुखकरं सुन्दरम् (**स्वः**) सुखम् (**न**) इव (**नृतो**) नेतः (**इषिरः**) ज्ञानवान् (**बभूथ**) भवेः॥ ३॥

अन्वयः-हे नृतो! यस्य ते पादा दुवः श्रिय आ मिमिक्षुः शवसा धृष्णुर्वज्री दक्षिणावान् दृशे कं सुरभिमत्कं वसानः स्वर्ण इषिरो यस्त्वं बभूथ तं त्वा वयं सेवेमहि॥ ३॥

भावार्थः-हे राजन्! यस्य तावश्रयेण पुष्कलश्रीर्घासाच्छादनयानानि सुखं प्रतिष्ठा च प्राप्नोति सोऽस्माभिर्भवान् कथन्न सेव्यते॥ ३॥

पदार्थः-हे (**नृतो**) नायक अग्रणी जन जिन (**ते**) आपके (**पादा**) पाद (**दुवः**) कार्य सेवन को (**श्रिये**) लक्ष्मी के लिये (**आ, मिमिक्षुः**) चारों ओर सींचते हैं और (**शवसा**) बल से (**धृष्णुः**) ढीठ (**वज्री**) शस्त्र और अस्त्रों को धारण करने वाले (**दक्षिणावान्**) उत्तम दक्षिणावान् (**दृशे**) देखने के लिये (**कम्**) सुख करने वाले सुन्दर (**सुरभिम्**) सुगन्ध को और (**अत्कम्**) व्याप्तिशील वस्त्र को (**वसानः**) धारण करते हुए (**स्वः**) सुख को (**न**) जैसे (**इषिरः**) ज्ञानवान्, वैसे जो आप (**बभूथ**) प्रसिद्ध हो, उन आपकी हम लोग सेवा करें॥ ३॥

भावार्थः-हे राजन्! जिन आपके आश्रय से अत्यन्त लक्ष्मी, घास, ओढ़ना, वाहन, सुख और प्रतिष्ठा प्राप्त होती है, वह आप हम लोगों से कैसे नहीं सेवन करने योग्य हैं॥ ३॥

पुनः स कीदृशो भवेदित्याह॥

फिर वह कैसा होवे, इस विषय को अगले मन्त्र में कहते हैं॥

स सोम आमिश्लतमः सुतो भूद्यस्मिन् पक्तिः पच्यते सन्ति धानाः।
इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः॥ ४॥

सः। सोमः। आमिश्लऽतमः। सुतः। भूत्। यस्मिन्। पक्तिः। पच्यते। सन्ति। धानाः। इन्द्रम्। नरः। स्तुवन्तः। ब्रह्मऽकाराः। उक्था। शंसन्तः। देववाततऽतमाः॥ ४॥

पदार्थः-(**सः**) (**सोमः**) ऐश्वर्ययोग ओषधिरसो वा (**आमिश्लतमः**) समन्तादतिशयेन मिश्रितः (**सुतः**) निष्पन्नः (**भूत्**) भवति (**यस्मिन्**) (**पक्तिः**) पाकः (**पच्यते**) (**सन्ति**) (**धानाः**) भ्रष्टान्यन्नानि (**इन्द्रम्**) (**नरः**) विद्वत्सु नायकाः (**स्तुवन्तः**) प्रशंसन्तः (**ब्रह्मकाराः**) ये ब्रह्म धनमन्नं वा कुर्वन्ति ते (**उक्था**) उक्तानि वक्तव्यानि (**शंसन्तः**) उपदिशन्तः (**देववाततमाः**) येऽतिशयेन देवान् विदुषः पदार्थान् वा प्राप्नुवन्ति ते॥ ४॥

अन्वयः-हे नरो! यस्मिन् राजनि पक्तिः पच्यते धानाः सन्त्यामिश्लतमः सुतः सोमो भूद्यमिन्द्रं स्तुवन्तो ब्रह्मकारा देववाततमा उक्था शंसन्तः सन्ति स भवानस्माकं राजा भवतु॥४॥

भावार्थः-यदि स धार्मिको राजा न स्यात्तर्हि सर्वे व्यवहारा विलुप्येरन्। यस्मिन्त्सति धनधान्यैश्वर्यं दधति ता धार्मिक्यः प्रजाः सन्ति॥४॥

पदार्थः-हे **(नरः)** विद्वानों में अग्रणी जनो! **(यस्मिन्)** जिस राजा के होने पर **(पक्तिः)** पाक **(पच्यते)** पकाया जाता है **(धानाः)** भूंजे हुए अन्न हैं **(आमिश्लतमः)** चारों ओर से अत्यन्त मिला हुआ **(सुतः)** उत्पन्न **(सोमः)** ऐश्वर्य का योग वा ओषधि का रस **(भूत्)** होता है और जिस **(इन्द्रम्)** ऐश्वर्यकारक की **(स्तुवन्तः)** प्रशंसा करते हुए **(ब्रह्मकाराः)** धन वा अन्न को करने वाले **(देववाततमाः)** अतिशय विद्वानों वा पदार्थों को प्राप्त होने वाले **(उक्था)** कहने योग्य वचनों का **(शंसन्तः)** उपदेश देते हुए **(सन्ति)** हैं **(सः)** वह आप हम लोगों के राजा हूजिये॥४॥

भावार्थः-जो वह धार्मिक राजा न होवे तो सब व्यवहार लोप होवें। जिसके होने पर धन-धान्य और ऐश्वर्य को धारण करती हैं, वे धर्मयुक्त प्रजायें होती हैं॥४॥

अथेश्वरः कीदृशोऽस्तीत्याह॥

अब ईश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

न ते अन्तः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा।
आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती॥५॥

न। ते। अन्तः। शवसः। धायि। अस्य। वि। तु। बाबधे। रोदसी इति। महिऽत्वा। आ। ता। सूरिः। पृणति। तूतुजानः। यूथाऽइव। अप्ऽसु। सम्ऽईजमानः। ऊती॥५॥

पदार्थः-(**न**) निषेधे (**ते**) तवेश्वरस्य (**अन्तः**) सीमा (**शवसः**) बलस्य (**धायि**) ध्रियते (**अस्य**) (**वि**) (**तु**) (**बाबधे**) बध्नाति (**रोदसी**) द्यावापृथिव्यौ (**महित्वा**) महत्त्वेन (**आ**) (**ता**) तानि (**सूरिः**) विद्वान् (**पृणति**) सुखयति (**तूतुजानः**) क्षिप्रकारी (**यूथेव**) समूह इव (**अप्सु**) प्राणेषु जलेषु वा (**समीजमानः**) सम्यक्सङ्गच्छमानः (**ऊती**) ऊत्या रक्षणाद्यया क्रियया॥५॥

अन्वयः-हे जगदीश्वर! यस्याऽस्य ते शवसोऽन्तः केनापि न धायि यस्तु महित्वा रोदसी वि बाबधे यस्य ते ता ऊती समीजमानस्तूतुजानः सूरिरप्सु यूथेव सर्वाना पृणाति स भवानस्माभिरीड्योऽस्ति॥५॥

भावार्थः-हे मनुष्या! योऽनन्तगुणकर्मस्वभावः सर्वस्य प्रबन्धकर्तोपासितः सन्त्सुखप्रदातेश्वरोऽस्ति स एव सर्वैरुपासनीयः॥५॥

पदार्थः-हे जगदीश्वर! जिस **(अस्य)** इस **(ते)** आप ईश्वर के **(शवसः)** बल की **(अन्तः)** सीमा किसी से भी **(न)** नहीं **(धायि)** धारण की जाती है **(तु)** और जो **(महित्वा)** बड़प्पन से **(रोदसी)** अन्तरिक्ष और पृथिवी को **(वि, बाबधे)** बांधता है और जिन आपके **(ता)** उन कर्मों को **(ऊती)** रक्षण

आदि क्रिया से (**समीजमानëë**) उत्तम प्रकार मिलता हुआ (**तूतुजानः**) शीघ्र कार्य करने वाला (**सूरिः**) विद्वान् (**अप्सु**) प्राणों वा जलों में (**यूथेव**) समूह के सदृश सब को (**आ, पृणति**) सुखी करता है, वह आप लोगों से स्तुति करने योग्य है॥५॥

भावार्थः-हे मनुष्यो! जो अनन्त गुण, कर्म और स्वभावयुक्त और सब का प्रबन्ध करने वाला, उपासना किया हुआ सुख का देने वाला ईश्वर है, वही सब से उपासना करने योग्य है॥५॥

अथेश्वरत्वे राजविषयमाह॥

अब ईश्वरत्व में राजविषय को अगले मन्त्र में कहते हैं॥

एवेदिन्द्रः सुहव ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून॥६॥१॥

एव। इत्। इन्द्रः। सुऽहवः। ऋष्वः। अस्तु। ऊती। अनूती। हिरिऽशिप्रः। सत्वा। एव। हि। जातः। असमातिऽओजाः। पुरु। च। वृत्रा। हनति। नि। दस्यून्॥६॥१॥

पदार्थः-(**एव**) (**इत्**) अपि (**इन्द्रः**) ईश्वरोपासको राजा (**सुहवः**) शोभन इव आह्वानं यस्य (**ऋष्वः**) महान् (**अस्तु**) (**ऊती**) रक्षया (**अनूती**) अरक्षया (**हिरिशिप्रः**) हिरी हरिते शिप्रे हनुनासिके यस्य सः (**सत्वा**) यः सीदति स पुरुषार्थी (**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**हि**) खलु (**जातः**) प्रसिद्ध (**असमात्योजाः**) असमाति अतुल्यमोजो यस्य सः (**पुरू**) बहु। अत्र **संहितायामि**ति दीर्घः। (**च**) (**वृत्रा**) धनानि (**हनति**) हन्ति (**नि**) नित्यम् (**दस्यून्**) दुष्टाँस्तेनान्॥६॥

अन्वयः-हे मनुष्या! यः सुहव ऋष्वो हिरिशिप्रस्सत्वेन्द्र ऊत्यनूती सुखकर्त्ता जातश्चाऽस्तु स एवेदानन्दप्रदो भवतु। यो ह्यसमात्योजाः पुरू वृत्रोन्नयति दस्यूँश्च नि हनति स एवा सम्राड् भवितुमर्हति॥६॥

भावार्थः-स एव महान् राजा यो नीतिज्ञान् रक्षित्वा धार्मिकीः प्रजाः सम्पाल्य स्तेनादीन् पापान्न गृह्णाति स एव सज्जनैः सेवनीयोऽस्ति॥६॥

अत्रेन्द्रसखित्वदातृयोध्रीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनत्रिंशत्तमं सूक्तं प्रथमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो जो (**सुहवः**) सुन्दर पुकारना जिसका ऐसा (**ऋष्वः**) बड़ा (**हिरिशिप्रः**) हरे रंग की ठुड्ढी और नासिका युक्त (**सत्वा**) परिश्रम से पुरुषार्थ करने और (**इन्द्रः**) ईश्वर की उपासना करने वाला राजा (**ऊती**) रक्षा वा (**अनूती**) अरक्षा से सुख करने वाला (**जातः, च**) और प्रसिद्ध (**अस्तु**) हो वह (**एव**) ही (**इत्**) निश्चय से आनन्द देने वाला होवे और जो (**हि**) निश्चय से (**असमात्योजाः**) नहीं

तुल्य पराक्रम जिसका वह **(पुरू)** बहुत **(वृत्रा)** धनों की वृद्धि करता है और **(दस्यून्)** दुष्ट चोरों का **(नि, हनति)** नित्य नाश करता है वह **(एवा)** ही चक्रवर्ती राजा होने के योग्य है॥६॥

भावार्थ:-वही बड़ा राजा है जो नीति के जानने वालों की रक्षा करके धर्मिष्ठ प्रजाओं का पालन करके चोर आदि पापियों को नहीं ग्रहण करता है, वही सज्जनों से सेवन करने योग्य है॥६॥

इस सूक्त में इन्द्र, मित्रपन, देने वाले और युद्ध करने वाले तथा ईश्वर के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनतीसवाँ सूक्त और पहिला वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य त्रिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ३ निचत्त्रिष्टुप्। २ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५ ब्राह्मी उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ राजा कीदृशो भवेदित्याह॥

अब पांच ऋचावाले तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा कैसा होवे, इस विषय को कहते हैं॥

भूय इद्वावृधे वीर्यायँ एको अजुर्यो दयते वसूनि।
प्र रिरिचे दिव इन्द्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे॥ १॥

भूयः। इत्। वावृधे। वीर्याय। एकः। अजुर्यः। दयते। वसूनि। प्र। रिरिचे। दिवः। इन्द्रः। पृथिव्याः। अर्धम्। इत्। अस्य। प्रति। रोदसी इति। उभे इति॥ १॥

पदार्थः-(**भूयः**) (**इत्**) एव (**वावृधे**) वर्धते (**वीर्याय**) पराक्रमाय (**एकः**) असहायः (**अजुर्यः**) अजीर्णो युवा (**दयते**) ददाति (**वसूनि**) धनानि (**प्र**) (**रिरिचे**) रिणक्त्यतिरिक्तो भवति (**दिवः**) प्रकाशमानात् पदार्थान्तरात् (**इन्द्रः**) सूर्य इव (**पृथिव्याः**) भूमेः (**अर्द्धम्**) भूगोलार्द्धम् (**इत्**) इव (**अस्य**) (**प्रति**) (**रोदसी**) द्यावापृथिव्यौ (**उभे**)॥ १॥

अन्वयः-हे मनुष्या! यथेन्द्रो दिवः पृथिव्याः अर्द्धमुभे रोदसी प्रत्यर्द्धं च प्रकाशते सर्वेभ्यः प्र रिरिचेऽश्येदेवाऽऽकर्षणेन सर्वे लोका वर्त्तन्ते तदिद्यो राजा वीर्याय भूयो वावृध एकोऽजुर्यः सन् वसूनि दयते स एव वरो जायते॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सूर्यवच्छुभगुणैः सुसहायैः सुसामग्र्या च प्रकाशमानो यशस्वी जायते यथा सूर्यः सर्वेषां भूगोलानां सम्मुखे स्थितानां भूगोलार्धानां प्रकाशं करोति तथैव न्यायाऽन्याययोर्मध्ये न्यायमेव प्रकाशयेत् सर्वेभ्य उभयं च दद्यात्॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**इन्द्रः**) सूर्य के समान वर्त्तमान जन (**दिवः**) प्रकाशमान पदार्थान्तर और (**पृथिव्याः**) भूमि से (**अर्द्धम्**) भूगोल का अर्द्ध भाग (**उभे**) दोनों (**रोदसी**) अन्तरिक्ष और पृथिवीभूगोल के (**प्रति**) प्रति अर्द्धभाग प्रकाशित होता है और सब से (**प्र, रिरिचे**) समर्थ होता है तथा (**अस्य**) इसके (**इत्**) ही आकर्षण से सम्पूर्ण लोक वर्त्तमान हैं उस (**इत्**) ही प्रकार से जो राजा (**वीर्याय**) पराक्रम के लिये (**भूयः**) फिर (**वावृधे**) बढ़ता और (**एकः**) सहायरहित (**अजुर्य्यः**) युवा हुआ (**वसूनि**) धनों को (**दयते**) देता है, वही श्रेष्ठ होता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सूर्य के समान श्रेष्ठ गुणों, श्रेष्ठ सहायों और उत्तम सामग्री से प्रकाशमान यशस्वी होता है और जैसे सूर्य सम्पूर्ण भूगोलों के सम्मुख स्थित

भूगोल के अर्द्धभागों का प्रकाश करता है, वैसे ही न्याय और अन्याय के बीच में से न्याय का ही प्रकाश करे और सब के लिये दोनों को देवे॥१॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को अगले मन्त्र में कहते हैं॥

अधा॑ मन्ये बृ॒हदसु॒र्यमस्य॒ यानि॑ दा॒धार॒ नकि॒रा मि॑नाति।
दि॒वेदि॑वे॒ सूर्यो॑ दर्श॒तो भू॒द्वि सद्मा॑न्यु॒र्विया सु॒क्रतु॑र्धात्॥२॥

अध॑। म॒न्ये॒। बृ॒हत्। अ॒सुर्य॑म्। अ॒स्य॒। यानि॑। दा॒धार॑। नकि॑ः। आ। मि॒ना॒ति॒। दि॒वेऽदि॑वे। सूर्यः॑। दृ॒श॒तः॑। भू॒त्। वि। सद्मा॑नि। उ॒र्विया॑। सु॒ऽक्रतुः॑। धा॒त्॥२॥

पदार्थः-(**अधा**) आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। (**मन्ये**) (**बृहत्**) महत् (**असुर्यम्**) असुरस्य मेघस्येदम् (**अस्य**) (**यानि**) वायुदलानि (**दाधार**) दधाति (**नकिः**) न (**आ**) (**मिनाति**) हिनस्ति (**दिवेदिवे**) प्रतिदिनम् (**सूर्यः**) सविता (**दर्शतः**) द्रष्टव्यः प्रष्टव्यो वा (**भूत्**) भवति (**वि**) (**सद्मानि**) स्थानानि (**उर्विया**) पृथिव्या सह (**सुक्रतुः**) शोभनकर्मा (**धात्**) दधाति॥२॥

अन्वयः-हे राजन्! यथा दर्शतः सुक्रतुः सूर्यो दिवेदिवे यदस्य बृहदसुर्यं यानि च दाधारैनं नकिरा मिनाति। उर्विया सह सद्मानि धात् तथा भवान् वि भूत्। अधैवम्भूतं त्वां राजानमहं मन्ये॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सविता प्रतिदिनं मेघं धृत्वा वर्षित्वा पृथिवीं तत्रस्थान् पदार्थांश्चाऽहिंसित्वा धरति तथैव राज्यं धृत्वा सुखं वर्षित्वा प्रजया सह न्यायकर्माणि राजा दधीत॥२॥

पदार्थः-हे राजन्! जैसे (**दर्शतः**) देखने वा पूछने योग्य (**सुक्रतुः**) शुभ कर्म करने वाला (**सूर्यः**) सूर्य (**दिवेदिवे**) प्रतिदिन जो (**अस्य**) इसके (**बृहत्**) बड़े (**असुर्यम्**) मेघ के सम्बन्धी का और (**यानि**) जिन वायुदलों का (**दाधार**) धारण करता है और इसको (**नकिः**) नहीं (**आ, मिनाति**) नष्ट करता है और (**उर्विया**) पृथिवी के साथ (**सद्मानि**) स्थानों को (**धात्**) धारण करता है, वैसे आप (**वि, भूत्**) होते हैं (**अधा**) इसके अनन्तर ऐसे हुए आपको राजा मैं (**मन्ये**) मानता हूँ॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य प्रतिदिन मेघ को धारण करके वर्षा के पृथिवी और पृथिवीस्थ पदार्थों के नाश नहीं करके धारण करता है, वैसे ही राज्य को धारण करके सुख को वर्षा के प्रजा के साथ न्यायकर्मों को राजा धारण करे॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒द्या चि॒न्नू चि॒त्तदपो॑ न॒दीना॑ं यदा॑भ्यो॒ अर॑दो गा॒तुमि॑न्द्र।
नि पर्व॑ता अद्म॒सदो॒ न से॑दु॒स्त्वया॑ दृ॒ळ्हानि॑ सु॒क्रतो॒ रजां॑सि॥३॥

अ॒द्य। चि॒त्। नु। चि॒त्। तत्। अप॑:। न॒दीना॑म्। यत्। आ॒भ्य॒:। अर॑द:। गा॒तुम्। इ॒न्द्र॒। नि। पर्व॑ता:। अ॒द्म॒ऽसद॑:। न। से॒दु॒:। त्वया॑। दृ॒ळ्हानि॑। सु॒ऽक्रतो॒ इति॑ सुऽक्रतो। रजां॑सि॥ ३॥

पदार्थ:-(**अद्या**) अत्र **संहितायामिति** दीर्घ:। (**चित्**) इव (**नू**) सद्य:। अत्र **ऋचि तुनुघेति** दीर्घ:। (**चित्**) अपि (**तत्**) तानि (**अप:**) जलानि (**नदीनाम्**) (**यत्**) (**आभ्य:**) नदीभ्य: (**अरद:**) विलिखत्याकर्षति (**गातुम्**) भूमिम् (**इन्द्र**) सूर्य इव वर्तमान (**नि**) (**पर्वता:**) मेघा: (**अद्मसद:**) येऽद्मस्वत्तव्येषु सीदन्ति (**न**) इव (**सेदु:**) सीदन्ति (**त्वया**) रक्षकेण पतिना सह (**दृळ्हानि**) धृतानि (**सुक्रतो**) सुष्ठुकर्मप्रज्ञ (**रजांसि**) लोकविशेषाणि॥ ३॥

अन्वय:-हे सुक्रतो इन्द्र! चित् सूर्यो गातुमरदो नदीनां सकाशादपोऽरदो यदाभ्योऽरदस्तच्चिद्वर्षति तथाऽद्या त्वं नू विधेहि। यथा सूर्येण रजांसि दृळ्हानि धृतानि तथाऽद्याऽद्मसद: पर्वता न त्वया प्रजा राजजनाश्च निषेदु:॥ ३॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे राजन्! यथा सूर्योऽखिलेभ्य: पदार्थेभ्योऽष्टौ मासान् रसं धृत्वा मेघमण्डले संस्थाप्य वर्षासु वर्षयित्वा प्रजा: सुखयति तथा त्वमष्टसु मासेषु प्रजाभ्य: करं हृत्वा चातुर्मास्ये दद्या:॥ ३॥

पदार्थ:-हे (**सुक्रतो**) श्रेष्ठ कर्मों को उत्तम प्रकार जानने वाले (**इन्द्र**) सूर्य के समान वर्त्तमान (**चित्**) जैसे सूर्य (**गातुम्**) भूमि का (**अरद:**) आकर्षण करता है तथा (**नदीनाम्**) नदियों के समीप से (**अप:**) जलों का आकर्षण करता है और (**यत्**) जो (**आभ्य:**) इन नदियों से खैंचता (**तत्**) वह (**चित्**) भी वर्षता है, वैसे (**अद्या:**) आज आप (**नू**) शीघ्र करिये और जैसे सूर्य से (**रजांसि**) लोकविशेष (**दृळ्हानि**) धारण किये गये, वैसे आज (**अद्मसद:**) उत्तम प्रकार खाने योग्य में स्थित होने वाले (**पर्वता:**) मेघ (**न**) जैसे वैसे (**त्वया**) रक्षक वा स्वामी आपसे प्रजा और राजजन (**नि, सेदु:**) स्थित होते हैं॥ ३॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे राजन्! जैसे सूर्य सम्पर्ण पदार्थों से आठ महीने रस धारण करके मेघमण्डल में स्थापित करके वर्षाओं में वर्षाके प्रजाओं को सुखी करता है, वैसे आप आठ मासों में प्रजाओं से कर लेकर वर्षाकाल में देवें॥ ३॥

पुनरीश्वर: कीदृशोऽस्तीत्याह॥

फिर ईश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

स॒त्यमित्तन्न त्वावाँ॑ अ॒न्यो अ॒स्तीन्द्र॑ दे॒वो न मर्त्यो॑ ज्यायान्।
अह॒न्नहिं॑ परि॒शया॑न॒मर्णोऽवा॑सृजो अ॒पो अच्छा॑ समु॒द्रम्॥ ४॥

स॒त्यम्। इत्। तत्। न। त्वाऽवा॑न्। अ॒न्य:। अ॒स्ति॒। इन्द्र॑। दे॒व:। न। मर्त्य:। ज्यायान्। अह॑न्। अहि॑म्। प॒रि॒ऽशया॑नम्। अर्ण॑:। अव॑। अ॒सृ॒ज॒:। अ॒प:। अच्छ॑। स॒मु॒द्रम्॥ ४॥

पदार्थः-(सत्यम्) सत्सु साधु **(इत्)** एव **(तत्) (न)** निषेधे **(त्वावान्)** त्वया सदृशः **(अन्यः)** भिन्नः **(अस्ति) (इन्द्र)** सूर्य्य इव स्वप्रकाशमान जगदीश्वर **(देवः)** विद्वान् प्रकाशमानो लोको वा **(न) (मर्त्यः) (ज्यायान्)** महान् **(अहन्)** हन्ति **(अहिम्)** व्याप्नुवन्तं मेघम् **(परिशयानम्)** सर्वतः शयानमिव **(अर्णः)** उदकम् **(अव) (असृजः)** सृजति **(अपः)** जलानि **(अच्छा)** सम्यक्। अत्र **संहितायामिति** दीर्घः। **(समुद्रम्)** सागरमन्तरिक्षं वा॥४॥

अन्वयः-हे इन्द्र! यतस्त्वया निर्मितस्सविता परिशयानमहिमहन्नर्णोऽपः समुद्रमच्छाऽवाऽसृजस्तस्मादन्यस्त्वावान् कोऽप्यन्यो ज्यायान्नास्ति न देवो न मर्त्यश्चास्तीति तत्सत्यमिदेवास्ति॥४॥

भावार्थः-हे मनुष्या! येन जगत्पालनायाकर्षको वृष्टिप्रकाशकरः सूर्यो निर्मितो मेघश्च तस्माज्जगदीश्वरेण तुल्यः कोऽपि नास्ति कुतोऽधिक इति तथ्यं विजानीत॥४॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के सदृश अपने से प्रकाशमान जगदीश्वर! जिससे आपसे बनाया गया सूर्य्य **(परिशायनम्)** चारों ओर से सोते हुए से **(अहिम्)** व्याप्त होने वाले मेघ का **(अहन्)** नाश करता है और **(अर्णः)** भ्रमर पड़ते जल वा अन्य **(अपः)** जलों और **(समुद्रम्)** सागर वा अन्तरिक्ष को **(अच्छा)** उत्तम प्रकार **(अव, असृजः)** उत्पन्न करता है, इससे **(अन्यः)** और **(त्वावान्)** आपके सदृश कोई भी दूसरा **(ज्यायान्)** बड़ा नहीं है **(न)** न **(देवः)** विद्वान् वा प्रकाशमान और **(न)** न **(मर्त्यः)** साधारण मनुष्य **(अस्ति)** है **(तत्)** वह **(सत्यम्)** श्रेष्ठों में श्रेष्ठ **(इत्)** ही है॥४॥

भावार्थः-हे मनुष्यो! जिस जगदीश्वर ने जगत् के पालन के लिये आकर्षण करने और वृष्टि तथा प्रकाश करने वाला सूर्य्य और मेघ बनाया, इस कारण से जगदीश्वर के तुल्य कोई भी नहीं है, फिर अधिक कहाँ से हो, यह सत्य जानिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वमपो वि दुरो विषूचीरिन्द्र दृळ्हमरुजः पर्वतस्य।
राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन् द्यामुषासम्॥५॥२॥

त्वम्। अपः। वि। दुरः। विषूचीः। इन्द्र। अरुजः। पर्वतस्य। राजा। अभव। जगतः। चर्षणीनाम्। साकम्। सूर्यम्। जनयन्। द्याम्। उषसम्॥५॥

पदार्थः-(त्वम्) (अपः) जलानि प्राणान् वा **(वि) (दुरः)** द्वाराणि **(विषूचीः)** व्याप्तानि **(इन्द्र)** परमैश्वर्यप्रद जगदीश्वर **(दृळ्हम्)** ध्रुवम् **(अरुजः)** रुज **(पर्वतस्य)** मेघस्य **(राजा) (अभवः)** भवसि **(जगतः)** संसारस्य **(चर्षणीनाम्)** मनुष्याणाम् **(साकम्)** सह **(सूर्य्यम्) (जनयन्)** उत्पादयन् **(द्याम्)** प्रकाशम् **(उषासम्)** दिनमुखं प्रभातम्॥५॥

अन्वयः-हे इन्द्र! यथा सूर्य्यः पर्वतस्य दृळ्हं रुजति विषूचीर्दुरः प्रकाशयन्नपो वि वर्षयति जगतश्चर्षणीनां राजा भवति तथा त्वं सूर्य्यं द्यामुषासं च जनयन्त्सर्वैः साकं व्याप्तः सन् दुःखमरुजो जगतश्चर्षणीनाञ्च राजाऽभवः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यः सूर्यादीनामुत्पादकः प्रकाशको धर्त्ता सर्वेषु व्याप्तो जगदीश्वरोऽस्ति तमात्मना सह सततमुपासीध्वमिति॥५॥

अत्रेन्द्रराजसूर्य्येश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिंशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देने वाले जगदीश्वर! जैसे सूर्य्य **(पर्वतस्य)** मेघ के **(दृळ्हम्)** दृढ़ भाग को भङ्ग करता और **(विषूचीः)** व्याप्त **(दुरः)** द्वारों को प्रकाशित करता हुआ **(अपः)** जलों वा प्राणों को **(वि)** विशेष कर वर्षाता है तथा **(जगतः)** संसार के **(चर्षणीनाम्)** मनुष्यों का **(राजा)** राजा होता है, वैसे **(त्वम्)** आप **(सूर्य्यम्)** सूर्य्य और **(द्याम्)** प्रकाश को और **(उषासम्)** दिन के मुख प्रभात को **(जनयन्)** उत्पन्न करते हुए सबके **(साकम्)** साथ व्याप्त हुए दुःख को **(अरुजः)** नष्ट कीजिये और संसार के मनुष्यों के राजा **(अभवः)** हूजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो सूर्य आदि का उत्पन्न करने वाला, प्रकाशक और धारण करने वाला तथा सम्पूर्ण पदार्थों में व्याप्त जगदीश्वर है उसकी आत्मा के साथ निरन्तर उपासना करो॥५॥

इस सूक्त में इन्द्र, राजा, सूर्य, और ईश्वर के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तीसवाँ सूक्त और दूसरा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकत्रिंशत्तमस्य सूक्तस्य सुहोत्र ऋषिः। इन्द्रो देवता। १ निचृत्त्रिष्टुप्। ५ त्रिष्टुप्छन्दः। धैवतः स्वरः। २ स्वराट् पङ्क्तिः। ३ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ४ निचृदतिजगती छन्दः। निषादः स्वरः॥

अथेश्वरः कीदृशोऽस्तीत्याह॥

अब पांच ऋचावाले इकतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में ईश्वर कैसा है, इस विषय को कहते हैं॥

अभूरेकौ रयिपते रयीणामा हस्तयोरधिथा इन्द्र कृष्टीः।
वि तोके अप्सु तनये च सूरेऽवोचन्त चर्षणयो विवाचः॥ १॥

अभूः। एकः। रयिऽपते। रयीणाम्। आ। हस्तयोः। अधिथाः। इन्द्र। कृष्टीः। वि। तोके। अप्ऽसु। तनये। च। सूरे। अवोचन्त। चर्षणयः। विऽवाचः॥ १॥

पदार्थः-(**अभूः**) भवेः (**एकः**) असहायः (**रयिपते**) धनस्वामिन् (**रयीणाम्**) द्रव्याणाम् (**आ**) (**हस्तयोः**) (**अधिथाः**) दध्याः (**इन्द्र**) ऐश्वर्यप्रद राजन् (**कृष्टीः**) मनुष्यादिप्रजाः (**वि**) (**तोके**) सद्यो जाते (**अप्सु**) प्राणेष्वन्तरिक्षे वा (**तनये**) ब्रह्मचारिणि कुमारे (**च**) (**सूरे**) सूर्ये (**अवोचन्त**) वदन्ति (**चर्षणयः**) मनुष्याः (**विवाचः**) विविधविद्याशिक्षायुक्ता वाचो येषान्ते॥ १॥

अन्वयः-हे रयीणां रयिपत इन्द्र! त्वं ये विवाचश्चर्षणयोऽप्सु तोके तनये च सूरे च विद्या व्यवोचन्त ताः कृष्टीर्हस्तयोरामलकमिवाऽधिथा एकस्सन् प्रजापालकोऽभूः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। परमेश्वरस्य स्वभावोऽस्ति ये सत्यमुपदिशन्ति तान्त्सदोत्साहाय्ये रक्षणे च दधात्यैश्वर्यं च प्रापयति यथा विनययुक्त एकोऽपि राजा राज्यं पालयितुं शक्नोति तथैव सर्वशक्तिमान् परमात्माऽखिलां सृष्टिं सदा रक्षति॥ १॥

पदार्थः-हे (**रयीणाम्**) द्रव्यों के बीच (**रयिपते**) धन के स्वामिन् (**इन्द्र**) ऐश्वर्य्य के देने वाले राजन्! आप जो (**विवाचः**) अनेक प्रकार की विद्या और शिक्षा से युक्त वाणियों वाले (**चर्षणयः**) मनुष्य (**अप्सु**) प्राणों वा अन्तरिक्ष तथा (**तोके**) शीघ्र उत्पन्न हुए सन्तान (**तनये, च**) और ब्रह्मचारी कुमार और (**सूरे**) सूर्य्य में विद्याओं को (**वि, अवोचन्त**) विशेष कहते हैं उन (**कृष्टीः**) मनुष्य आदि प्रजाओं को (**हस्तयोः**) हाथों में आंवले के सदृश (**आ, अधिथाः**) अच्छे प्रकार धारण करिये और (**एकः**) सहायरहित हुए प्रजा के पालन करने वाले (**अभूः**) हूजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। परमेश्वर का स्वभाव है कि जो सत्य का उपदेश देते हैं उनको सदा उत्साहित करता और रक्षा में धारण करता और ऐश्वर्य्य को प्राप्त कराता है और जैसे

विनय से युक्त एक भी राजा राज्यपालन करने को समर्थ होता है, वैसे ही सर्व शक्तिमान् परमात्मा सम्पूर्ण सृष्टि की सदा रक्षा करता है॥१॥

पुनर्मनुष्याः किं जानीयुरित्याह॥

फिर मनुष्य क्या जानें, इस विषय को कहते हैं॥

त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता च्च्यावयन्ते रजांसि।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते॥२॥

त्वत्। भिया। इन्द्र। पार्थिवानि। विश्वा। अच्युता। चित्। च्यवयन्ते। रजांसि। द्यावाक्षामा। पर्वतासः। वनानि। विश्वम्। दृळ्हम्। भयते। अज्मन्। आ। ते॥२॥

पदार्थः-(**त्वत्**) (**भिया**) (**इन्द्र**) विद्युदिव वर्त्तमान (**पार्थिवानि**) पृथिव्यां विदितानां जन्तुविशेषाणि (**विश्वा**) सर्वाणि (**अच्युता**) क्षयरहितानि (**चित्**) (**च्यावयन्ते**) गमयन्ति (**रजांसि**) लोकान् (**द्यावाक्षामा**) द्यावापृथिव्यौ (**पर्वतासः**) शैलाः (**वनानि**) जङ्गलानि (**विश्वम्**) सर्वं जगत् (**दृळ्हम्**) (**भयते**) (**अज्मन्**) मार्गे (**आ**) (**ते**) तव॥२॥

अन्वयः-हे इन्द्र! ते भिया विश्वाच्युता पार्थिवानि रजांसि चित् च्यावयन्ते यथा सूर्येण द्यावाक्षामा पर्वतासो वनानि विश्वञ्च तथा त्वद्दृळ्हमज्मन्नाऽऽभयते॥२॥

भावार्थः-हे मनुष्या! यथा न्यायकारिणो वीरपुरुषात् कातरा बिभ्यति तथैव विद्युतः सर्वे प्राणिनो बिभ्यति॥२॥

पदार्थः-हे (**इन्द्र**) बिजुली के सदृश वर्त्तमान (**ते**) आपके (**भिया**) भय से (**विश्वा**) सम्पूर्ण (**अच्युता**) नाश से रहित (**पार्थिवानि**) पृथिवी में विदित जन्तु विशेष (**रजांसि**) लोकों को (**चित्**) निश्चित (**च्यावयन्ते**) चलाते हैं तथा जैसे सूर्य्य से (**द्यावाक्षामा**) अन्तरिक्ष और पृथिवी तथा (**पर्वतासः**) पर्वत और (**वनानि**) जंगल (**विश्वम्**) सम्पूर्ण जगत् को चलाते हैं, वैसे (**त्वत्**) आपसे (**दृळ्हम्**) दृढ़ विश्व (**अज्मन्**) मार्ग में (**आ, भयते**) अच्छे प्रकार भय करता है॥२॥

भावार्थः-हे मनुष्यो! जैसे न्यायकारी वीरपुरुष से कायर जन डरते हैं, वैसे ही बिजुली से सब प्राणी डरते हैं॥२॥

पुना राज्ञा किं कर्त्तव्यमित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

त्वं कुत्सेनाभि शुष्णमिन्द्राशुषं युध्य कुयवं गविष्टौ।
दशप्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवेः रपांसि॥३॥

त्वम्। कुत्सेन। अभि। शुष्णम्। इन्द्र। अशुषम्। युध्य। कुयवम्। गोऽइष्टौ। दश। प्रऽपित्वे। अध। सूर्यस्य। मुषायः। चक्रम्। अविवेः। रपांसि॥३॥

पदार्थः-(**त्वम्**) (**कुत्सेन**) वज्रेण (**अभि**) (**शुष्णम्**) बलम् (**इन्द्र**) परमैश्वर्यप्रद राजन् (**अशुषम्**) अशुष्कम् (**युध्य**) (**कुयवम्**) कुत्सिता यवा यस्मिंस्तत् (**गविष्टौ**) किरणसमागमे (**दश**) (**प्रपित्वे**) प्राप्तौ (**अध**) (**सूर्यस्य**) (**मुषायः**) चोरय (**चक्रम्**) चक्रमिव (**अविवेः**) व्याप्नुहि (**रपांसि**) हिंसनानि॥३॥

अन्वयः-हे इन्द्र! त्वं शुष्णमशुषं कुत्सेन गविष्टौ कुयवमभि युध्याध प्रपित्वे दश रपांसि मुषायः सूर्यस्य चक्रमविवेः॥३॥

भावार्थः-हे राजंस्त्वमधर्मिणा शत्रुणा सहैव युध्यस्व न धर्मात्मना, एवं कृते यथा सूर्यस्याऽभितो भूगोलाश्चकवद् भ्रमन्ति तथैव प्रजाजनास्त्वां दृष्ट्वा पुरुषार्थेन प्रचलिष्यन्ति॥३॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के देने वाले राजन्! (**त्वम्**) आप (**शुष्णम्**) बल और (**अशुषम्**) शुष्करहित को (**कुत्सेन**) वज्र से (**गविष्टौ**) किरणों के समागम में (**कुयवम्**) कुत्सित यव जिसमें उसको (**अभि, युध्य**) अभियोधन करो (**अध**) इसके अनन्तर (**प्रपित्वे**) प्राप्ति में (**दश**) दश (**रपांसि**) हिंसनों को (**मुषायः**) चुराओ और (**सूर्यस्य**) सूर्य्य के (**चक्रम्**) चक्र को (**अविवेः**) व्याप्त होओ॥३॥

भावार्थः-हे राजन्! आप अधर्मी शत्रु के साथ ही युद्ध करिये, धर्मात्मा के साथ न करिये, ऐसा करने पर जिस प्रकार सूर्य्य के चारों ओर भूगोल चक्र के समान घूमते हैं, वैसे ही प्रजाजन आपको देखकर पुरुषार्थ से चलेंगे॥३॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

त्वं श॒तान्यव॒ शम्ब॑रस्य॒ पुरो॑ जघन्थाप्र॒तीनि॒ दस्यो॑:।
अशि॑क्षो॒ यत्र॒ शच्या॑ शचीव॒ो दिवो॑दासाय सुन्व॒ते सु॑तक्रे भ॒रद्वा॑जाय गृण॒ते वसू॑नि॥४॥

त्वम्। श॒तानि॑। अव॑। शम्ब॑रस्य। पु॑रः। ज॒घ॒न्थ॒। अ॒प्र॒तीनि॑। दस्यो॑:। अशि॑क्षः। यत्र॑। शच्या॑। श॒ची॒ऽव॒:। दिव॑:ऽदासाय। सु॒न्व॒ते। सु॒त॒ऽक्रे॒। भ॒रत्ऽवा॑जाय। गृ॒ण॒ते। वसू॑नि॥४॥

पदार्थः-(**त्वम्**) (**शतानि**) (**अव**) (**शम्बरस्य**) मेघस्येव शत्रोः (**पुरः**) पुराणि (**जघन्थ**) हंसि (**अप्रतीनि**) अप्रतीतान्यपि (**दस्योः**) परद्रव्यापहारकस्य दुष्टस्य (**अशिक्षः**) शिक्षय (**यत्र**) (**शच्या**) सुशिक्षितया वाचोत्तमेन कर्मणा वा (**शचीवः**) शची प्रशस्ता प्रज्ञा विद्यते यस्य सः (**दिवोदासाय**) विज्ञानस्य दात्रे (**सुन्वते**) सारनिष्पादकाय (**सुतक्रे**) सुष्ठुप्रसन्न (**भरद्वाजाय**) विज्ञानधर्त्रे (**गृणते**) स्तुवते (**वसूनि**) द्रव्याणि॥४॥

अन्वयः-हे शचीवः सुतक्र इन्द्र! राजँस्त्वं यथा सूर्यः शम्बरस्य शतानि पुरोऽव जघन्थ तथा दस्योरप्रतीनि शतानि पुरो जघन्थ शच्यैतानशिक्षो यत्र दिवोदासाय सुन्वते गृणते भरद्वाजाय वसूनि दद्यास्तत्रैतेन विद्याप्रचारं कारय॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सूर्य्यवन्न्यायप्रकाशको मेघवद्विद्यादिप्रचाराय पुष्कलधनदाता भवति स एव विजयमाप्नोति॥४॥

पदार्थः-हे **(शचीवः)** उत्तम बुद्धि वाले **(सुतक्रे)** उत्तम प्रकार प्रसन्न अत्यन्त ऐश्वर्य के देने वाले राजन्! **(त्वम्)** आप जैसे सूर्य्य **(शम्बरस्य)** मेघ के समान शत्रु के **(शतानि)** सैकड़ों **(पुरः)** नगरों का **(अव, जघन्थ)** नाश करते हो, वैसे **(दस्योः)** दूसरे के द्रव्य चुराने वाले दुष्टजन के **(अप्रतीनि)** नहीं जाने गये भी सैकड़ों नगरों का नाश करिये और **(शच्या)** उत्तमशिक्षायुक्त वाणी वा उत्तम कर्म्म से इनको **(अशिक्षः)** शिक्षा दीजिये और **(यत्र)** जहाँ **(दिवोदासाय)** विज्ञान के देने तथा **(सुन्वते)** सार के निकालने वाले **(गृणते)** स्तुति करते हुए **(भरद्वाजाय)** विज्ञान के धारण करने वाले के लिये **(वसूनि)** द्रव्यों को दीजिये वहाँ इससे विद्या का प्रचार कराइये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सूर्य्य के सदृश न्याय का प्रकाश करने वाला और मेघ के सदृश विद्या आदि के प्रचार के लिये बहुत धन का देने वाला होता है, वही सर्वत्र विजय को प्राप्त होता है॥४॥

पुनस्स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

स सत्यसत्वन् महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम्।
याहि प्रपथिन्नवसोप मद्रिक् प्र च श्रुत श्रावय चर्षणिभ्यः॥५॥३॥

सः। सत्यऽसत्वन्। महते। रणाय। रथम्। आ। तिष्ठ। तुविऽनृम्ण। भीमम्। याहि। प्रऽपथिन्। अवसा। उप। मद्रिक्। प्र। च श्रुत। श्रावय। चर्षणिऽभ्यः॥५॥

पदार्थः-**(सः)** **(सत्यसत्वन्)** सत्यानि सत्वान्यन्तःकरणादीनि यस्य तत्सम्बुद्धौ **(महते)** **(रणाय)** स-ामाय **(रथम्)** रमणीयं यानम् **(आ)** **(तिष्ठ)** **(तुविनृम्ण)** बहुधनयुक्त **(भीमम्)** भयङ्करम् **(याहि)** **(प्रपथिन्)** प्रकृष्टः पन्था विद्यते यस्य तत्सम्बुद्धौ **(अवसा)** रक्षणादिना **(उप)** **(मद्रिक्)** यो मामञ्चति मदभिमुखः **(प्र)** **(च)** **(श्रुत)** शृणु **(श्रावय)** **(चर्षणिभ्यः)** मनुष्येभ्यः॥५॥

अन्वयः-हे सत्यसत्वन् प्रपथिंस्तुविनृम्ण! स त्वं महते रणाय रथमा तिष्ठाऽवसा भीमं स-ाममुप याहि मद्रिक् सन् विद्वद्भ्यः श्रुत चर्षणिभ्यश्च प्र श्रावय॥५॥

भावार्थः-यो राजा सत्यवादिभ्यो राजनीतिकृत्यं श्रुत्वाऽन्येभ्यः श्रावयित्वा शुद्धात्मा सन्त्सर्वस्य रक्षणाय दुष्टपराजयं करोति स एवातुलश्रीको भवतीति॥५॥

अत्रेन्द्रराजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकत्रिंशत्तमं सूक्त तृतीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(सत्यसत्वन्)** शुद्ध अन्तःकरण आदि इन्द्रियों युक्त **(प्रपथिन्)** उत्तम मार्ग वाले और **(तुविनृम्ण)** बहुत धन से युक्त **(सः)** वह आप **(महते)** बड़े **(रणाय)** स-ाम के लिये **(रथम्)** सुन्दर

वाहन पर **(आ, तिष्ठ)** स्थित हूजिये और **(अवसा)** रक्षण आदि से **(भीमम्)** भयङ्कर स-ाम को **(उप, याहि)** प्राप्त हूजिये तथा **(मद्रिक्)** मेरे सम्मुख हुए विद्वानों से **(श्रुत)** सुनिये **(चर्षणिभ्यः, च)** और मनुष्यों के लिये **(प्र, श्रावय)** सुनाइये॥५॥

भावार्थः-जो राजा सत्यवादियों से राजनीति के कृत्य को सुनकर अन्यों को सुना कर शुद्धचित्त वाला सब के रक्षण के लिये दुष्टों का पराजय करता है, वही बहुत लक्ष्मी वाला होता है॥५॥

इस सूक्त में इन्द्र और राजा के कृत्य का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकतीसवाँ सूक्त और तृतीय वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य द्वात्रिंशत्तमस्य सूक्तस्य सुहोत्र ऋषिः। इन्द्रो देवता। १ भुरिक्पङ्क्तिः। २ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ५ त्रिष्टुप्। ४ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वांसः किं कुर्युरित्याह॥

अब पाँच ऋचावाले बत्तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् जन क्या करें, इस विषय को कहते हैं॥

अपू॑र्व्या पुरु॒तमा॑न्यस्मै म॒हे वी॒राय॑ त॒वसे॑ तु॒राय॑।
वि॒र॒प्शिने॑ व॒ज्रिणे॒ शंत॑मानि॒ वचां॑स्या॒सा स्थवि॑राय तक्षम्॥ १॥

अपू॑र्व्या। पुरु॒ऽतमा॑नि। अ॒स्मै॒। म॒हे। वी॒राय॑। त॒वसे॑। तु॒राय॑। वि॒ऽर॒प्शिने॑। व॒ज्रिणे॑। शम्ऽत॑मानि। वचां॑सि। आ॒सा। स्थवि॑राय। त॒क्ष॒म्॥ १॥

पदार्थः-(**अपूर्व्या**) न विद्यते पूर्वो यस्मात् सोऽपूर्वस्तत्र भवानि (**पुरुतमानि**) अतिशयेन बहूनि (**अस्मै**) (**महे**) महते (**वीराय**) बलपराक्रमविद्यायुक्ताय (**तवसे**) बलाय (**तुराय**) क्षिप्रं कारिणे (**विरप्शिने**) प्रशंसिताय (**वज्रिणे**) प्रशस्तशस्त्रास्त्रयुक्ताय (**शन्तमानि**) अतिशयेन कल्याणकराणि (**वचांसि**) वचनानि (**आसा**) मुखेन (**स्थविराय**) वृद्धाय (**तक्षम्**) उपदिशेयम्॥१॥

अन्वयः-हे मनुष्या! यथाऽहमासाऽस्मै महे वीराय तवसे तुराय विरप्शिने वज्रिणे स्थविरायाऽपूर्व्या पुरुतमानि शन्तमानि वचांसि तक्षं तथा यूयमप्यन्यानुपदिशत॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वद्भिः सदैव सर्वेभ्यः सत्योपदेशः कर्त्तव्यः येनातुलं सुखं जायेत॥१॥

पदार्थः-हे मनुष्यो! जैसे मैं (**आसा**) मुख से (**अस्मै**) इस (**महे**) बड़े (**वीराय**) बल पराक्रम तथा विद्यायुक्त के लिये और (**तवसे**) बल के लिये (**तुराय**) शीघ्र कार्य करने वाले तथा (**विरप्शिने**) प्रशंसित (**वज्रिणे**) प्रशंसित शस्त्र और अस्त्रों से युक्त (**स्थविराय**) वृद्धजन के लिये (**अपूर्व्या**) नहीं विद्यमान हैं पूर्व जिससे उसमें हुए (**पुरुतमानि**) अतिशय बहुत (**शन्तमानि**) अतीव कल्याण करने वाले (**वचांसि**) वचनों का (**तक्षम्**) उपदेश करूं, वैसे आप लोग भी अन्यों को उपदेश दीजिये॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों को चाहिये कि सदा ही सब के लिये सत्य उपदेश करना चाहिये, जिससे अतुल सुख होवे॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स मा॒तरा॒ सूर्येणा कवी॒नामवा॑सयद् रु॒जदद्रिं॑ गृणा॒नः।

स्वा॒धीभि॒र्ऋक्व॑भिर्वावशा॒न उदु॒स्रिया॑णामसृजन्नि॒दान॑म्॥ २॥

सः। मा॒तरा॑। सूर्येण। क॒वी॒नाम्। अवा॑सयत्। रुजत्। अद्रिम्। गृ॒णा॒नः। सु॒ऽआ॒धीभिः॑। ऋक्व॑ऽभिः। वा॒व॒शा॒नः। उत्। उ॒स्रिया॑णाम्। अ॒सृ॒ज॒त्। नि॒ऽदा॑नम्॥ २॥

पदार्थः-(**सः**) (**मातरा**) मातापितरौ (**सूर्येण**) सवित्रा। अत्र **संहितायामि**ति दीर्घः। (**कवीनाम्**) विदुषाम् (**अवासयत्**) वासयति (**रुजत्**) रुजति (**अद्रिम्**) मेघम् (**गृणानः**) स्तुवन् (**स्वाधीभिः**) शोभना आधयस्सन्ति यासां ताभिर्नीतिभिः (**ऋक्वभिः**) प्रशंसनीयैः (**वावशानः**) कामयमानः (**उत्**) अपि (**उस्रियाणाम्**) किरणानामिव (**असृजत्**) सृजति (**निदानम्**) निश्चयम्॥ २॥

अन्वयः-हे मनुष्या! यथा सूर्येणा सहितो विद्युदग्निरद्रिं रुजत् कवीनां च मातराऽवासयत् तथैव स्वाधीभिर्ऋक्वभिस्सह गृणानो वावशानो यथा सवितोस्रियाणां निदानमिव निदानमुदसृजत् स राजा सर्वैः सत्कर्त्तव्यः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा सूर्यो रश्मिभिः सर्वं प्रकाशयति तथैव विनयादीभिः सर्वं राज्यं प्रकाशय यथा सत्पुत्रा मातापितरौ सेवन्ते तथैव राजधर्मं सेवस्व॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**सूर्येण**) सूर्य्य के सहित बिजुलीरूप अग्नि (**अद्रिम्**) मेघ को (**रुजत्**) स्थिर करता और (**कवीनाम्**) विद्वानों के (**मातरा**) माता-पिता को (**अवासयत्**) वसाता है, वैसे ही जो राजा (**स्वाधीभिः**) सुन्दर स्थान जिनके उन नीतियों और (**ऋक्वभिः**) प्रशंसा के योग्य व्यवहारों के साथ (**गृणानः**) स्तुति करता और (**वावशानः**) कामना करता हुआ जैसे सूर्य्य (**उस्रियाणाम्**) किरणों के (**निदानम्**) निश्चय को, वैसे निश्चय को (**उत्, असृजत्**) उत्पन्न करता है (**स**) वह राजा सब से सत्कार करने योग्य है॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे सूर्य्य किरणों से सबको प्रकाशित करता है, वैसे ही विनय आदिकों से सम्पूर्ण राज्य को प्रकाशित करिये और जैसे श्रेष्ठ पुत्र माता-पिता की सेवा करते हैं, वैसे ही राजधर्म का सेवन करिये॥ २॥

राजा कीदृशैः सह मित्रतां कुर्य्यादित्याह॥

राजा कैसे जनों के साथ मित्रता करे, इस विषय को कहते हैं॥

स वह्नि॑भि॒र्ऋक्व॑भि॒र्गोषु॒ शश्व॑न्मि॒तज्ञु॑भिः पुरु॒कृत्वा॑ जिगाय।
पुरः॑ पुरो॒हा सखि॑भिः सखी॒यन् दृ॒ळ्हा रु॑रोज क॒विभि॑: क॒विः सन्॥ ३॥

सः। वह्नि॑ऽभिः। ऋक्व॑ऽभिः। गोषु॑। शश्व॑त्। मि॒त॒ज्ञु॑ऽभिः। पु॒रु॒ऽकृत्वा॑। जि॒गा॒य॒। पुरः॑। पु॒रः॒ऽहा। सखि॑ऽभिः। सखि॒ऽयन्। दृ॒ळ्हा। रु॒रो॒ज॒। क॒विऽभिः॑। क॒विः। सन्॥ ३॥

पदार्थः-(**सः**) (**वह्निभिः**) वोढृभिः (**ऋक्वभिः**) प्रशंसितैः (**गोषु**) सुशिक्षितासु वाक्षु (**शश्वत्**) निरन्तरम् (**मितज्ञुभिः**) सङ्कुचितजानुभिरासीनैर्विद्वद्भिः (**पुरुकृत्वा**) (**जिगाय**) जयति (**पुरः**) शत्रूणां

नगराणि (**पुरोहा**) पुराणां हन्ता (**सखिभिः**) मित्रैः (**सखीयन्**) सखेवाचरन् (**दृळ्हाः**) निष्कम्पाः (**रुरोज**) रुजति भनक्ति (**कविभिः**) विपश्चिद्भिः (**कविः**) विद्वान् (**सन्**)॥३॥

अन्वयः-हे सज्जना! यो मितज्ञुभिर्ऋक्वभिर्वह्निभिः कविभिः कविः सन् सखिभिः सखीयन् सन् पुरोहा दृळ्हाः पुरो रुरोज गोषु शश्वत् पुरुकृत्वा शत्रून् जिगाय स एव युष्माभिर्मन्तव्यः॥३॥

भावार्थः-ये मनुष्याः प्रशंसितैर्बलिष्ठैर्मितभाषिभिर्विद्वद्भिर्मित्रैस्सह मैत्रीं कृत्वा राज्यं प्राप्य दुष्टान् हत्वा धार्मिकान् रक्षन्ति ते कृतकृत्या भवन्ति॥३॥

पदार्थः-हे सज्जनो! जो (**मितज्ञुभिः**) सङ्कुचित जांघ वाले बैठे हुए विद्वानों और (**ऋक्वभिः**) प्रशंसित (**वह्निभिः**) धारण करने वाले (**कविभिः**) विद्वानों से (**कविः**) विद्वान् (**सन्**) हुआ और (**सखिभिः**) मित्रों से (**सखीयन्**) मित्र के सदृश आचरण करता हुआ (**पुरोहा**) नगरों का नाश करने वाला (**दृळ्हाः**) कम्पन क्रिया से रहित (**पुरः**) शत्रुओं के नगरों का (**रुरोज**) भङ्ग करता है और (**गोषु**) उत्तम प्रकार शिक्षित वाणियों में (**शश्वत्**) निरन्तर (**पुरुकृत्वा**) बहुत करके शत्रुओं को (**जिगाय**) जीतता है (**सः**) वही आप लोगों से मानने योग्य है॥३॥

भावार्थः-जो मनुष्य प्रशंसित, बलिष्ठ, थोड़े बोलने वाले, विद्वान् मित्रों के साथ मित्रता कर राज्य को प्राप्त होकर दुष्टों का नाश करके धार्मिकों की रक्षा करते हैं, वे कृतकृत्य होते हैं॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः।
पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि॥४॥

सः। नीव्याभिः। जरितारम्। अच्छ। महः। वाजेभिः। महद्भिः। च। शुष्मैः। पुरुवीराभिः। वृषभ। क्षितीनाम्। आ। गिर्वणः। सुविताय। प्र। याहि॥४॥

पदार्थः-(**सः**) (**नीव्याभिः**) नीविषु प्रापणीयेषु भवाभिः (**जरितारम्**) स्तावकम् (**अच्छा**) अत्र **संहितायामि**ति दीर्घः। (**महः**) महान्तम् (**वाजेभिः**) वेगविज्ञानादिगुणवद्भिः (**महद्भिः**) महाशयैः (**च**) (**शुष्मैः**) प्रशंसितबलैः (**पुरुवीराभिः**) पुरवो बहवो वीरा यासु सेनासु ताभिः (**वृषभ**) बलिष्ठ (**क्षितीनाम्**) मनुष्याणाम् (**आ**) (**गिर्वणः**) य उत्तमाभिर्वाग्भिः सेव्यते तत्सम्बुद्धौ (**सुविताय**) प्रेरणाय (**प्र**) (**याहि**) प्रयाणं कुरु॥४॥

अन्वयः-हे वृषभ गिर्वण इन्द्र राजन्त्स त्वं नीव्याभिर्वाजेभिर्महद्भिः शुष्मैर्युक्ताभिः पुरुवीराभिः सेनाभिस्सह क्षितीनां सुविताय प्राऽऽयाहि महो जरितारं चाऽच्छा याहि॥४॥

भावार्थः-यो मनुष्यो धार्मिकाणां बलिष्ठानां सुशिक्षितानां सेनाभिर्विजयाय प्रयतेत स ध्रुवं विजयमाप्नुयात्॥४॥

पदार्थः-हे **(वृषभ)** बलयुक्त **(गिर्वणः)** उत्तम वाणियों से सेवा किये गये अत्यन्त ऐश्वर्य्य के करने वाले राजन्! **(सः)** वह आप **(नीव्याभिः)** प्राप्त कराने योग्य पदार्थों में होने वाली तथा **(वाजेभिः)** वेग और विज्ञान आदि गुण वालों तथा **(महद्भिः)** महाशयों और **(शुष्मैः)** प्रशंसित बल वालों से युक्त **(पुरुवीराभिः)** बहुत वीर जिनमें उन सेनाओं के साथ **(क्षितीनाम्)** मनुष्यों की **(सुविताय)** प्रेरणा के लिये **(प्र, आ, याहि)** अच्छे प्रकार यात्रा करिये और **(महः)** बड़े **(जरितारम्, च)** और स्तुति वाले को **(अच्छा)** उत्तम प्रकार प्राप्त हूजिये॥४॥

भावार्थः-जो मनुष्य धार्मिक, बलिष्ठ और उत्तम प्रकार से शिक्षित पुरुषों की सेनाओं से विजय के लिये प्रयत्न करे, वह निश्चय कर विजय को प्राप्त होवे॥४॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

स सर्गेणꣳ शवसा तꣳक्तो अत्यैꣳरप इन्द्रोꣳ दक्षिणꣳतस्तुꣳराषाट्।
इꣳत्था सꣳजानाꣳ अनꣳपावृꣳदर्थं दिꣳवेदिꣳवे विविषुरप्रमृꣳष्यम्॥५॥४॥

सः। सर्गेण। शवसा। तक्तः। अत्यैः। अपः। इन्द्रः। दक्षिणतः। तुराषाट्। इत्था। सृजानाः। अनपऽवृत्। अर्थम्। दिवेऽदिवे। विविषुः। अप्रऽमृष्यम्॥५॥

पदार्थः-**(सः)** संसर्जनीयेन **(शवसा)** बलेन **(तक्तः)** प्रसन्नः **(अत्यैः)** अश्वैरिव वेगवद्भिः **(अपः)** जलानि **(इन्द्रः)** परमैश्वर्यप्रदः **(दक्षिणतः)** दक्षिणपार्श्वात् **(तुराषाट्)** यस्तुरान् हिंसकान्त्सहते **(इत्था)** अस्माद्धेतोः **(सृजानाः)** सुशिक्षिताः **(अनपावृत्)** यो नापवृणोति **(अर्थम्)** द्रव्यम् **(दिवेदिवे)** प्रतिदिनम् **(विविषुः)** व्याप्नुवन्ति **(अप्रमृष्यम्)** अविचारणीयम्॥५॥

अन्वयः-हे राजन्! स त्वं यथा सूर्योऽपः सृजति तथा तक्त इन्द्रोऽत्यैर्दक्षिणतः सर्गेण शवसा तुराषाडनपावृत् सन् दिवेदिवेऽप्रमृष्यमर्थमा स्वीकुरु यथा सृजानाः कृत्यं विविषुरित्था कर्त्तव्यानि कर्माणि प्रविश॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो मनुष्योऽधर्मेण कर्त्तव्यमनर्थं न करोति स सूर्य्यवत्प्रकाशितकीर्तिर्भवति यथाऽऽदित्यो वृष्टिं कृत्वा सर्वान् हर्षयति तथैव राजा शुभगुणान् वर्षयित्वा सर्वानानन्दयेदिति॥५॥

अत्रेन्द्रविद्वद्राजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वात्रिंशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे राजन् **(सः)** वह आप जैसे सूर्य्य **(अपः)** जलों को प्रकट करता है, वैसे **(तक्तः)** प्रसन्न **(इन्द्रः)** अत्यन्त ऐश्वर्य के देने वाले **(अत्यैः)** घोड़ों के समान वेग वाले पदार्थों से और **(दक्षिणतः)** दहिने पसवाड़े से **(सर्गेण)** उत्तम प्रकार प्रकट करने योग्य **(शवसा)** बल से **(तुराषाट्)** हिंसकों को सहने

वाले तथा **(अनपावृत्)** असत्य को नहीं स्वीकार करने वाले हुए आप **(दिवेदिवे)** प्रतिदिन **(अप्रमृष्यम्)** नहीं विचारने योग्य **(अर्थम्)** द्रव्य को सब ओर से स्वीकार करिये और जैसे **(सृजानाः)** उत्तम प्रकार शिक्षित जन कृत्य को **(विविषुः)** व्याप्त होते हैं **(इत्था)** इस हेतु से कर्त्तव्य कर्म्मों में प्रविष्ट हूजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य अधर्म्म से करने योग्य अनर्थ को नहीं करता है, वह सूर्य्य के सदृश प्रकाशित यश वाला होता है और जैसे सूर्य्य वृष्टि करके सब को हर्षित करता, वैसे ही राजा शुभगुणों की वर्षा करके सब को आनन्दित करे॥५॥

इस सूक्त में इन्द्र, विद्वान् और राजा के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बत्तीसवां सूक्त और चौथा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य त्रयस्त्रिंशत्तमस्य सूक्तस्य शुनहोत्र ऋषिः। इन्द्रो देवता। १, २, ३ निचृत्पङ्क्तिः। ४ भुरिक्पङ्क्तिः। ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ नृपः किं कृत्वा किं कारयेदित्याह॥

अब पाँच ऋचावाले तेंतीसवें सूक्त का प्रारम्भ किया जाता है उसके प्रथम मन्त्र में राजा क्या करके क्या करावे, इस विषय को कहते हैं॥

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान्।
सौवश्व्यं यो वनवत् स्वश्वो वृत्रा समत्सु सासहदमित्रान्॥ १॥

यः। ओजिष्ठः। इन्द्र। तम्। सु। नः। दाः। मदः। वृषन्। सुऽअभिष्टिः। दास्वान्। सौवश्व्यम्। यः। वनवत्। सुऽअश्वः। वृत्रा। समत्ऽसु। सासहत्। अमित्रान्॥ १॥

पदार्थः-(**यः**) (**ओजिष्ठः**) अतिशयेन बली (**इन्द्र**) ऐश्वर्यप्रद (**तम्**) (**सु**) (**नः**) (**अस्मभ्यम्**) (**दाः**) देहि (**मदः**) हर्षितः (**वृषन्**) तेजस्विन् (**स्वभिष्टिः**) सुष्ठ्वभिनता सङ्गतिर्यस्य सः (**दास्वान्**) दाता (**सौवश्व्यम्**) शोभनेष्वश्वेषु महत्सु पदार्थेषु वा भवम् (**यः**) (**वनवत्**) याचते (**स्वश्वः**) शोभना अश्वा यस्य सः (**वृत्रा**) धनानि (**समत्सु**) स-ामेषु (**सासहत्**) भृशं सहते (**अमित्रान्**) शत्रून्॥१॥

अन्वयः-हे वृषन्निन्द्र! य ओजिष्ठो मदः स्वभिष्टिर्दास्वान् स त्वं नः सौवश्व्यं सु दाः। यः स्वश्वः सन् वृत्रा वनवत् समत्स्वमित्रान्त्सासहत् तं वयं सत्कुर्याम॥१॥

भावार्थः-योऽभयदाता स-ामेषु विजेता स्वं बलमहर्निशं वर्धयति स एव सर्वान् सुखयितुमर्हति॥१॥

पदार्थः-हे (**वृषन्**) तेजस्वी (**इन्द्र**) ऐश्वर्य्य के देने वाले (**यः**) जो (**ओजिष्ठः**) अतिशय बली (**मदः**) हर्षित हुए (**स्वभिष्टिः**) अच्छी सङ्गति वाले (**दास्वान्**) दाता वह आप (**नः**) हम लोगों के लिये (**सौवश्व्यम्**) सुन्दर घोड़ों और बड़े पदार्थों में हुए को (**सु**) उत्तम प्रकार (**दाः**) दीजिये और (**यः**) जो (**स्वश्वः**) अच्छे घोड़ों वाला हुआ (**वृत्रा**) धनों की (**वनवत्**) याचना करता है तथा (**समत्सु**) संग्रामों में (**अमित्रान्**) शत्रुओं को (**सासहत्**) अत्यन्त सहता है (**तम्**) उसका हम लोग सत्कार करें॥१॥

भावार्थः-जो अभय देने वाला और स-ामों में जीतने वाला तथा दिन-रात अपने बल को बढ़ाता है, वही सब को सुखी करने को योग्य है॥१॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वां हीन्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ।
त्वं विप्रेभिर्वि पणीरँशायस्त्वोत इत्सनिता वाजमर्वा॥ २॥

त्वाम्। हि। इन्द्र। अवसे। विऽवाचः। हवन्ते। चर्षणयः। शूरऽसातौ। त्वम्। विप्रेभिः। वि। पणीन्। अशायः। त्वाऽऊतः। इत्। सनिता। वाजम्। अर्वा॥ २॥

पदार्थः-(**त्वाम्**) (**हि**) यतः (**इन्द्र**) दुःखविदारक राजन् (**अवसे**) रक्षणाद्याय (**विवाचः**) विविधविद्यायुक्ता वाचो येषान्ते (**हवन्ते**) स्तुवन्ति (**चर्षणयः**) विद्वांसः (**शूरसातौ**) शूराणां विभागरूपे स-ामे (**त्वम्**) (**विप्रेभिः**) मेधाविभिः (**वि**) (**पणीन्**) प्रशंसितान् (**अशायः**) शायय (**त्वोतः**) त्वया रक्षितः (**इत्**) एव (**सनिता**) विभाजकः (**वाजम्**) विज्ञानम् (**अर्वा**) अश्व इव शुभगुणग्रहणे वेगवान्॥ २॥

अन्वयः-हे इन्द्र! यो ह्यर्वेव सनिता त्वोतो वाजमाप्नोति तेन सहितस्त्वं विप्रेभिः पणीन् व्यशायस्तमित्त्वामवसे शूरसातौ विवाचश्चर्षणयो हवन्ते॥ २॥

भावार्थः-यदि राजा धार्मिकैर्विद्वद्भिः सह राज्यपालनं कुर्यात्तर्हि तं को न प्रशंसेत्॥ २॥

पदार्थः-हे (**इन्द्र**) दुःख के नाश करने वाले राजन्! जो (**हि**) जिससे (**अर्वा**) घोड़े के समान श्रेष्ठ गुणों के ग्रहण करने वाले वेग वाले (**सनिता**) विभाग करने वाले (**त्वोतः**) आप से रक्षित जन (**वाजम्**) विज्ञान को प्राप्त होता है, उसके सहित (**त्वम्**) आप (**विप्रेभिः**) मेधावी जनों के साथ (**पणीन्**) प्रशंसितों को (**वि, अशायः**) सुलाइये उस (**इत्**) ही (**त्वाम्**) आपकी (**अवसे**) रक्षा आदि के लिये (**शूरसातौ**) शूरवीर जनों के विभागरूप स-ाम में (**विवाचः**) अनेक प्रकार की विद्या से युक्त वाणियों वाले (**चर्षणयः**) विद्वान् जन (**हवन्ते**) स्तुति करते हैं॥ २॥

भावार्थः-जो राजा धार्मिक विद्वानों के साथ राज्य का पालन करे तो उसकी कौन नहीं प्रशंसा करे॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

त्वं ताँ इन्द्रोभयाँ अमित्रान् दासा वृत्राण्यार्या च शूर।
वधीर्वनैव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम॥ ३॥

त्वम्। तान्। इन्द्र। उभयान्। अमित्रान्। दासा। वृत्राणि। आर्या। च। शूर। वधीः। वनाऽइव। सुऽधितेभिः। अत्कैः। आ। पृत्ऽसु। दर्षि। नृणाम्। नृऽतम॥ ३॥

पदार्थः-(**त्वम्**) (**तान्**) (**इन्द्र**) राजन् (**उभयान्**) द्विविधान् (**अमित्रान्**) दुष्टान्त्सर्वपीडकान् (**दासा**) दातव्यानि (**वृत्राणि**) धनानि (**आर्या**) धर्मिष्ठानुत्तमान् जनान् (**च**) (**शूर**) तुष्टानां हिंसक (**वधीः**) हन्याः (**वनेव**) अग्निर्वनानीव (**सुधितेभिः**) सुष्ठुतृतैः (**अत्कैः**) अश्वैः (**आ**) (**पृत्सु**) स-ामेषु (**दर्षि**) विदारयसि (**नृणाम्**) नायकानां मध्ये (**नृतम**) अतिशयेन नायक॥ ३॥

अन्वयः-हे नृणां नृतम शूरेन्द्र! त्वं तानमित्रानार्या चोभयान् विभज्याऽमित्रान् पृत्सु वनेव वधीः सुधितेभिरत्कैरा दर्ष्यार्या च रक्षसि दासा वृत्राण्याप्नोषि तस्माद्विवेक्ष्यसि॥ ३॥

भावार्थः-यो राजोत्तमाननुत्तमान् धार्मिकानधार्मिकांश्च समीक्षया विभज्योत्तमान् रक्षति दुष्टान् दण्डयति स एव सर्वमैश्वर्यमाप्नोति॥३॥

पदार्थः-हे **(नृणाम्)** मुखियाजनों में **(नृतम)** अत्यन्त मुखिया **(शूर)** दुष्टों के नाशक **(इन्द्र)** राजन्! **(त्वम्)** आप **(तान्)** उन **(अमित्रान्)** दुष्ट सब को पीड़ा देने वाले और **(आर्या)** धर्मिष्ठ उत्तम जनों को **(च)** और **(उभयान्)** दो प्रकार के विभाग करके दुष्ट और पीड़ा देने वालों का **(पृत्सु)** स-ामों में **(वनेव)** अग्नि जैसे वनों का, वैसे **(वधीः)** नाश करिये और **(सुधितेभिः)** उत्तम प्रकार से तृप्त किये गये **(अत्कैः)** घोड़ों से **(आ, दर्षि)** विदीर्ण करते हो और धर्म्मिष्ठ उत्तम जनों की रक्षा करते हो तथा **(दासा)** देने योग्य **(वृत्राणि)** धनों को प्राप्त होते हो, इससे विवेकी हो॥३॥

भावार्थः-जो राजा उत्तम, अनुत्तम, धार्मिक और अधार्मिकों का परीक्षा से विभाग करके उत्तमों की रक्षा करता और दुष्टों को दण्ड देता है, वही सम्पूर्ण ऐश्वर्य्य को प्राप्त होता है॥३॥

पुनः स कीदृशः स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को कहते हैं॥

स त्वं न॑ इन्द्राक॑वाभिरू॒ती सखा॑ वि॒श्वायु॑रवि॒ता वृ॒धे भू॑ः।
स्व॑र्षा॒ता यद्ध्वया॑मसि त्वा॒ युध्य॑न्तो ने॒मधि॑ता पृ॒त्सु शू॑र॥४॥

सः। त्वम्। नः। इन्द्र। अक॑वाभिः। ऊ॒ती। सखा॑। वि॒श्वऽआयुः॑। अ॒वि॒ता। वृ॒धे। भूः। स्वः॑ऽसाता। यत्। ह्वया॑मसि। त्वा॒। युध्य॑न्तः। ने॒मऽधि॑ता। पृ॒त्ऽसु। शू॒र॥४॥

पदार्थः-(**सः**) राजा **(त्वम्)** **(नः)** अस्माकम् **(इन्द्र)** सुखप्रद **(अकवाभिः)** अनिन्दितृभिः **(ऊती)** रक्षाभिः **(सखा)** सुहृद् **(विश्वायुः)** सर्वायुः **(अविता)** रक्षकः **(वृधे)** वृद्धये **(भूः)** भवेः **(स्वर्षाता)** सुखस्य दाता **(यत्)** यः **(ह्वयामसि)** आह्वयेम **(त्वा)** **(युध्यन्तः)** **(नेमधिता)** धार्मिकाऽधार्मिकयोर्मध्ये धार्मिकाणां ग्रहीतारः **(पृत्सु)** स-ामेषु सेनासु वा **(शूर)** शत्रूणां हिंसक॥४॥

अन्वयः-हे शूरेन्द्र! यद्यस्त्वमकवाभिरूती नः सखा विश्वायुरविता वृधे भूः स त्वं स्वर्षाता सन् विजेता भूस्तं त्वा नेमधिता पृत्सु युध्यन्तो वयं ह्वयामसि॥४॥

भावार्थः-हे राजन्! यथा सखा सख्ये प्रियमाचरति तथैव प्रजायै हितमाचर यत्र यत्र प्रजास्त्वामाह्वयेयुस्तत्र तत्रोपस्थितो भव शत्रुविजये च प्रयतस्व॥४॥

पदार्थः-हे **(शूर)** शूरवीर शत्रुजनों के नाश करने और **(इन्द्र)** सुख के देने वाले! **(यत्)** जो **(त्वम्)** आप **(अकवाभिः)** नहीं निन्दा करने वालों और **(ऊती)** रक्षाओं से **(नः)** हमारे **(सखा)** मित्र **(विश्वायुः)** सम्पूर्ण अवस्था से युक्त **(अविता)** रक्षक **(वृधे)** वृद्धि के लिये **(भूः)** होवें **(सः)** वह आप **(स्वर्षाता)** सुख के देने वाले हुए जीतने वाले हूजिये उन **(त्वा)** आपको **(नेमधिता)** धार्मिक और

अधार्मिक के मध्य में धार्मिकों के ग्रहण करने वाले **(पृत्सु)** स- ामों वा सेनाओं से **(युध्यन्तः)** युद्ध करते हुए हम लोग **(ह्वयामसि)** पुकारें॥४॥

भावार्थः-हे राजन्! जैसे मित्र मित्र के लिये प्रिय आचरण करता है, वैसे ही प्रजा के लिये हित धारण करिये और जहाँ-जहाँ प्रजायें पुकारें वहाँ-वहाँ उपस्थित हूजिये और शत्रुओं के जीतने में प्रयत्न करिये॥४॥

पुनः स राजा कथं वर्तेत इत्याह॥

फिर वह राजा कैसा वर्त्ताव करे, इस विषय को कहते हैं॥

नूनं न इन्द्रापरायं च स्या भवा मृळीक उत नो अभिष्टौ।
इत्था गृणन्तो महिनस्य शर्मन् दिवि ष्याम पार्ये गोषतमाः॥५॥५॥

नूनम्। नः। इन्द्र। अपरायं। च। स्याः। भवं। मृळीकः। उत। नः। अभिष्टौ। इत्था। गृणन्तः। महिनस्य। शर्मन्। दिवि। स्याम। पार्ये। गोसऽतमाः॥५॥

पदार्थः-(**नूनम्**) निश्चितम् **(नः)** अस्माकम् **(इन्द्र)** दुःखविदारक **(अपराय)** अन्यस्मै **(च)** **(स्याः)** भूयाः **(भवा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मृळीकः)** सुखकर्त्ता **(उत)** अपि **(नः)** अस्माकम् **(अभिष्टौ)** इच्छितसुखे **(इत्था)** अस्मात्कारणात् **(गृणन्तः)** स्तुवन्तः **(महिनस्य)** महतः **(शर्मन्)** शर्मणि गृहे **(दिवि)** कमनीये **(स्याम)** भवेम **(पार्ये)** पूरयितव्ये **(गोषतमाः)** ये गा वाचः सनन्ति सेवन्ते ततोऽतिशयिताः॥५॥

अन्वयः-हे इन्द्र! त्वां नो मृळीको भवा, उतापराय नूनं मृळीकः स्या नोऽभिष्टौ च प्रवृत्तो भवेत्था गृणन्तो गोषतमा वयं महिनस्य ते पार्ये दिवि शर्मन्त्स्याम॥५॥

भावार्थः-यदि राजा स्वस्य परस्य वा पक्षपात्यभूत्वा प्रजारक्षणे यत्नवान् भवेत्तर्हि सर्वाः प्रजाः प्रेमास्पदबद्धाः सत्यो राजानमहर्निशं स्तूयुरिति॥५॥

अत्रेन्द्रराजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयस्त्रिंशत्तमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** दुःखों के नाश करने वाले आप **(नः)** हम लोगों के **(मृळीकः)** सुखकारक **(भवा)** हूजिये और **(उत)** भी **(अपराय)** अन्य के लिये **(नूनम्)** निश्चय कर सुखकारक **(स्याः)** हूजिये और **(नः)** हम लोगों के **(अभिष्टौ)** अपेक्षित सुख में **(च)** भी प्रवृत्त हूजिये **(इत्था)** इस कारण से

(गृणन्तः) स्तुति करते हुए **(गोषतमाः)** वाणियों को अत्यन्त सेवने वाले हम लोग **(महिनस्य)** बड़े आपके **(पार्ये)** पूर्ण करने और **(दिवि)** कामना करने योग्य **(शर्मन्)** गृह में **(स्याम)** होवें॥५॥

भावार्थः-जो राजा अपने और दूसरे का पक्षपाती न होकर प्रजा के रक्षण में यत्न करने वाला होवे तो सम्पूर्ण प्रजा प्रेम के स्थान में बँधी हुई होकर राजा की दिन-रात स्तुति करे॥५॥

इस सूक्त में इन्द्र, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तेंतीसवाँ सूक्त और पाँचवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य चतुस्त्रिंशत्तमस्य सूक्तस्य शुनहोत्र ऋषिः। इन्द्रो देवता। भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४ विराट् त्रिष्टुप्। ३ त्रिष्टुप्। ५ निचृत्त्रिष्टुप् छन्द। धैवतः स्वरः॥

अथ राजा किं कुर्यादित्याह॥

अब पाँच ऋचावाले चौंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा क्या करे, इस विषय को कहते हैं॥

सं च॒ त्वे ज॒ग्मुर्गिर॑ इन्द्र॒ पूर्वी॑र्वि च॒ त्वद्यन्ति॒ वि॒भ्वो॑ मनी॒षाः।
पु॒रा नू॒नं च॑ स्तु॒तय॒ ऋषी॑णां पस्पृ॒ध्र इ॒न्द्रे॒ अध्यु॑क्था॒र्का॥ १॥

सम्। च॒। त्वे॒ इति॑। ज॒ग्मुः। गिरः॑। इ॒न्द्र॒। पूर्वीः॑। वि। च॒। त्वत्। य॒न्ति॒। वि॒ऽभ्वः॑। म॒नी॒षाः। पु॒रा। नू॒नम्। च॒। स्तु॒तयः॑। ऋषी॑णाम्। प॒स्पृ॒ध्रे॒। इन्द्रे॑। अधि॑। उ॒क्थ॒ऽअ॒र्का॥ १॥

पदार्थः-(**सम्**) सम्यक् (**च**) (**त्वे**) केचित् (**जग्मुः**) गच्छन्ति (**गिरः**) सुशिक्षितवाचः (**इन्द्र**) विद्याप्रद (**पूर्वीः**) प्राचीनाः सनातनीः (**वि**) (**च**) (**त्वत्**) तव सकाशात् (**यन्ति**) प्राप्नुवन्ति (**विभ्वः**) विभवो व्याप्तशुभगुणाः (**मनीषाः**) मनस ईषिणो गमनकर्त्तारः (**पुरा**) (**नूनम्**) निश्चयेन (**च**) (**स्तुतयः**) प्रशंसाः (**ऋषीणाम्**) वेदमन्त्रार्थविदां यथार्थमुपदेष्टृणाम् (**पस्पृध्रे**) स्पर्द्धन्ते (**इन्द्रे**) परमैश्वर्ये (**अधि**) (**उक्थार्का**) उक्थानि प्रशंसितानि वचनान्यर्काणि पूजनीयानि च॥१॥

अन्वयः-हे इन्द्र! ये त्वे त्वत् पूर्वीर्गिरश्च यन्ति शुभैश्च गुणैः सं जग्मुर्विभ्वो मनीषाः सन्तः परस्परं वि यन्ति। ऋषीणां पुरा स्तुतयश्च नूनं पस्पृध्रे, इन्द्र उक्थार्काऽधि पस्पृध्रे ते सुखमाप्नुवन्ति॥१॥

भावार्थः-हे राजन्नस्मिन्त्संसारे केचिद्योग्याः केचिदनर्हा जना भवन्ति तेषां मध्यात् प्रशंसनीयैः सज्जनैस्सह सन्धिं कृत्वा सुसहायः सन् धर्म्मेण राज्यपालनं सततं विधेहि॥१॥

पदार्थः-हे (**इन्द्र**) विद्या के देने वाले जो (**त्वे**) कोई (**त्वत्**) आपके समीप से (**पूर्वीः**) प्राचीन (**गिरः**) उत्तम प्रकार शिक्षित वाणियों को (**च**) भी (**यन्ति**) प्राप्त होते हैं (**च**) और श्रेष्ठ गुणों से (**सम्**) उत्तम प्रकार (**जग्मुः**) मिलते हैं तथा (**विभ्वः**) श्रेष्ठ गुणों से व्याप्त (**मनीषाः**) गमन करने वाले हुए परस्पर (**वि**) विशेष करके प्राप्त होते हैं और (**ऋषीणाम्**) वेद के मन्त्रों के अर्थ जानने वालों और यथार्थ उपदेश करने वालों के (**पुरा**) आगे (**स्तुतयः, च**) प्रशंसाओं की भी (**नूनम्**) निश्चय से (**पस्पृध्रे**) स्पर्द्धा करते हैं और (**इन्द्रे**) अत्यन्त ऐश्वर्य्य देने वाले के लिये (**उक्थार्का**) प्रशंसित और आदर करने योग्य वचनों की (**अधि**) अधिक स्पर्धा करते हैं, वे सुख को प्राप्त होते हैं॥१॥

भावार्थः-हे राजन्! इस संसार में कोई योग्य, कोई अयोग्य जन होते हैं, उनमें प्रशंसा करने योग्य सज्जनों के साथ मेल करके उत्तम सहाय वाले हुए धर्म्म से राज्यपालन निरन्तर करिये॥१॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः।
रथो न महे शवसे युजानो३स्माभिरिन्द्रो अनुमाद्यो भूत्॥ २॥

पुरुऽहूतः। यः। पुरुऽगूर्तः। ऋभ्वा। एकः। पुरुऽप्रशस्तः। अस्ति। यज्ञैः। रथः। न। महे। शवसे। युजानः। अस्माभिः। इन्द्रः। अनुमाद्यः। भूत्॥ २॥

पदार्थः-(**पुरुहूतः**) बहुभिः सत्कृतः (**यः**) (**पुरुगूर्त्तः**) बहुभिरुद्यमितः कृतपुरुषार्थकः (**ऋभ्वा**) महता मेधाविना (**एकः**) असहायः (**पुरुप्रशस्तः**) बहुषूत्तमः (**अस्ति**) (**यज्ञैः**) विद्वत्सत्कारसङ्गदानैः (**रथः**) विमानादियानम् (**न**) इव (**महे**) महते (**शवसे**) बलाय (**युजानः**) (**अस्माभिः**) (**इन्द्रः**) परमैश्वर्यदाता (**अनुमाद्यः**) अनुहर्षितुं योग्यः (**भूत्**) भवेत्॥ २॥

अन्वयः-हे विद्वांसो! यः पुरुहूतः पुरुगूर्त्तः पुरुप्रशस्त एको रथो न महे शवसे यज्ञैर्ऋभ्वा युजान इन्द्रोऽस्माभिस्सहाऽनुमाद्यो भूत् सोऽस्माकं हर्षकोऽस्ति तं राजानं यूयमपि मन्यध्वम्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथाश्वैरग्न्यादिभिश्च युक्तो रथोऽभीष्टानि कार्याणि करोति, तथैव सुसहायो राजा राज्यकार्याण्यलङ्कर्त्तुं शक्नोति॥ २॥

पदार्थः-हे विद्वज्जनो! (**यः**) जो (**पुरुहूतः**) बहुतों से सत्कार किया गया (**पुरुगूर्त्तः**) बहुतों से उत्तम कराया गया (**पुरुप्रशस्तः**) बहुतों में उत्तम (**एकः**) सहायरहित (**रथः**) विमान आदि वाहन (**न**) जैसे वैसे (**महे**) बड़े (**शवसे**) बल के लिये (**यज्ञैः**) विद्वानों के सत्कार और सङ्ग तथा दोनों से और (**ऋभ्वा**) बड़े बुद्धिमान् से (**युजानः**) युक्त हुआ (**इन्द्रः**) अत्यन्त ऐश्वर्य्य का देने वाला (**अस्माभिः**) हम लोगों के साथ (**अनुमाद्यः**) पीछे से प्रसन्न होने योग्य (**भूत्**) होवे, वह हम लोगों का आनन्दकारक (**अस्ति**) है, उस राजा को आप लोग भी मानिये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे घोड़ों और अग्नि आदिकों से युक्त रथ अभीष्ट कार्य्यों को करता है, वैसे ही उत्तम सहायों के सहित राजा राज्य के कार्य्यों को पूर्ण करने को समर्थ होता है॥ २॥

पुनः स राजा कीदृशो भवतीत्याह॥

फिर वह राजा कैसा होता है, इस विषय को कहते हैं॥

न यं हिंसन्ति धीतयो न वाणीरिन्द्रं नक्षन्तीदभि वर्धयन्तीः।
यदिं स्तोतारः शतं यत्सहस्रं गृणन्ति गिर्वणसं शं तदस्मै॥ ३॥

नः। यम्। हिंसन्ति। धीतयः। नः। वाणीः। इन्द्रम्। नक्षन्ति। इत्। अभि। वर्धयन्तीः। यदिं। स्तोतारः। शतम्। यत्। सहस्रम्। गृणन्ति। गिर्वणसम्। शम्। तत्। अस्मै॥ ३॥

पदार्थः-(**न**) निषेधे (**यम्**) (**हिंसन्ति**) (**धीतयः**) अङ्गुलयः (**न**) (**वाणीः**) (**इन्द्रम्**) पूर्णविद्यं परमैश्वर्य्यं राजानम् (**नक्षन्ति**) गच्छन्ति प्राप्नुवन्ति। **नक्षतीति गतिकर्मा।** (निघं०२.१४) (**इत्**) एव (**अभि**) (**वर्धयन्तीः**) उन्नयन्त्यः (**यदि**) (**स्तोतारः**) (**शतम्**) (**यत्**) (**सहस्रम्**) असंख्यम् (**गृणन्ति**) स्तुवन्ति (**गिर्वणम्**) यो गीर्भिर्वनति संभजति वनुते याचते वा तम् (**शम्**) सुखम् (**तत्**) (**अस्मै**) स्तोत्रे॥३॥

अन्वयः-हे विद्वांसो! यमिन्द्रमिद् धीतयो न हिंसन्ति यमिन्द्रं वाणीर्न हिंसन्ति यमिन्द्रं वर्धयन्तीर्धीतयो वाणीश्चाभि नक्षन्ति यदि तं गिर्वणसमिन्द्रं स्तोतारो गृणन्ति तर्हि यदस्मै शतं सहस्रं शं प्राप्नोति तदस्मानपि प्राप्नोतु॥३॥

भावार्थः-हे मनुष्या! यं शत्रुकृता विरुद्धाः क्रिया निन्दिता वाचश्च न व्यथयन्ति तं हर्षशोकरहितं राजानमतुलं सुखं प्राप्नोति॥३॥

पदार्थः-हे विद्वानो! (**यम्**) जिस (**इन्द्रम्**) पूर्ण विद्या वाले और अत्यन्त ऐश्वर्य्य वाले राजा को (**इत्**) ही (**धीतयः**) अङ्गुलियाँ (**न**) नहीं (**हिंसन्ति**) नष्ट करती हैं और जिस पूर्णविद्या और अत्यन्त ऐश्वर्य्य वाले राजा को (**वाणीः**) वाणियाँ (**न**) नहीं नष्ट करती हैं और जिस पूर्ण विद्यावाले और अत्यन्त ऐश्वर्य्ययुक्त राजा को (**वर्धयन्तीः**) बढ़ाती हुई अङ्गुलियाँ और वाणियाँ (**अभि, नक्षन्ति**) प्राप्त होती हैं और (**यदि**) जो उस (**गिर्वणसम्**) वाणियों से सेवा करने और मांगने वाले पूर्ण विद्या और अत्यन्त ऐश्वर्य्ययुक्त राजा की (**स्तोतारः**) स्तुति करने वाले जन (**गृणन्ति**) स्तुति करते हैं तो (**यत्**) जो (**अस्मै**) इस स्तुति करने वाले के लिये (**शतम्**) सैकड़ों और (**सहस्रम्**) असंख्य प्रकार का (**शम्**) सुख प्राप्त होता है (**तत्**) वह हम लोगों को भी प्राप्त हो॥३॥

भावार्थः-हे मनुष्यो! जिसको शत्रु से की हुई विरुद्ध क्रियायें और निन्दित वाणियाँ नहीं पीड़ित करती हैं, उस हर्ष और शोक से सहित राजा को अतुल सुख प्राप्त होता है॥३॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

अस्मा॑ एतद्दिव्य१॑र्चेव॑ मा॒सा मि॑मिक्ष इन्द्रे॒ न्य॑याम्ि॒ सोम॑ः।
जन॒ं न धन्व॑न्न॒भि सं यदाप॑ः स॒त्रा वा॑वृधु॒र्हव॑नानि य॒ज्ञैः॥४॥

अस्मै॑। ए॒तत्। दि॒वि। अ॒र्चाऽइ॑व। मा॒सा। मि॒मि॒क्षः॒। इन्द्रे॑। नि। अ॒या॒मि॒। सोम॑ः। जन॑म्। न। धन्व॑न्। अ॒भि। सम्। यत्। आप॑ः। स॒त्रा। व॒वृ॒धुः॒। हव॑नानि। य॒ज्ञैः॥४॥

पदार्थः-(**अस्मै**) (**एतत्**) (**दिवि**) कमनीये शुद्धे व्यवहारे (**अर्चेव**) सत्क्रियेव (**मासा**) चैत्राद्याः (**मिमिक्षः**) संसिञ्च (**इन्द्रे**) दुष्टविदारके राजनि (**नि**) नितराम् (**अयामि**) प्राप्नोमि (**सोमः**) यः सुनोति सः (**जनम्**) (**न**) इव (**धन्वन्**) बालुकायुक्ते स्थले (**अभि**) (**सम्**) (**यत्**) यानि (**आपः**) जलानि (**सत्रा**) सत्येन कारणेन (**वावृधुः**) वर्धन्ते। अत्र व्यत्ययेन परस्मैपदम्। (**हवनानि**) दानादीनि कर्माणि (**यज्ञैः**) विद्वत्सत्क्रियाभिः॥४॥

अन्वय:-हे विद्वन्! यस्मिन् दिवीन्द्रे मासा वावृधुर्यज्ञैरर्चेव सत्रा यद्धवनानि वावृधुर्धन्वन्नापो जनं न समभि वावृधुरेतदस्मै सोमोऽहं यथा न्ययामि तथा त्वमेनं मिमिक्ष:॥४॥

भावार्थ:-अत्रोपमालङ्कार:। हे मनुष्या! यथा सत्कर्त्तव्यस्य सत्कारो निर्जलदेशे भवस्योदकप्राप्ति: सुखकारिणी भवति तथैव यज्ञानुष्ठानं दिव्यमैश्वर्यं च सर्वेषामानन्दकरे भवत:॥४॥

पदार्थ:-हे विद्वन्! जिस **(दिवि)** सुन्दर शुद्ध व्यवहार में **(इन्द्रे)** दुष्टों के नाश करने वाले राजा के होने पर **(मासा)** चैत्र आदि महीने **(वावृधु:)** बढ़ते हैं और **(यज्ञै:)** विद्वानों के सत्कारों से **(अर्चेव)** सत्क्रिया के समान **(सत्रा)** सत्य कारण से **(यत्)** जो **(हवनानि)** दान आदि कर्म्म बढ़ते हैं तथा **(धन्वन्)** बालुका से युक्त स्थान में **(आप:)** जल **(जनम्)** मनुष्य को **(न)** जैसे वैसे **(सम्, अभि)** उत्तम प्रकार चारों ओर से बढ़ते हैं **(एतत्)** यह **(अस्मै)** इसके लिये **(सोम:)** उत्पन्न करने वाला मैं जैसे **(नि, अयामि)** निरन्तर प्राप्त होता हूँ, वैसे आप इसको **(मिमिक्ष:)** सींचिये॥४॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सत्कार करने योग्य का सत्कार और निर्जल स्थान में हुए को जल का मिलना सुखकारक होता है, वैसे ही यज्ञ का अनुष्ठान और श्रेष्ठ ऐश्वर्य्य सब के आनन्दकारक होते हैं॥४॥

पुनर्विद्वद्भि: कथं वर्त्तितव्यमित्याह॥

फिर विद्वानों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अस्मा॑ एतन्मह्या॑ङ्गू॒षम॑स्मा॒ इन्द्रा॑य स्तो॒त्रं म॒तिभि॑रवाचि।
अस॒द्यथा॑ मह॒ति वृ॑त्र॒तूर्ये॒ इन्द्रो॑ वि॒श्वायु॑रवि॒ता वृ॒धश्च॑॥५॥६॥

अस्मै॑। एत॒त्। मह्या॑। आङ्गू॒षम्। अ॒स्मै॒। इन्द्रा॑य। स्तो॒त्रम्। म॒तिऽभि॑:। अ॒वा॒चि॒। अस॑त्। यथा॑। म॒ह॒ति। वृ॒त्र॒ऽतूर्ये॑। इन्द्र॑:। वि॒श्वऽआ॑यु:। अ॒वि॒ता। वृ॒ध:। च॒॥५॥

पदार्थ:-**(अस्मै)** **(एतत्)** **(महि)** महत् **(आङ्गूषम्)** प्राप्तव्यम् **(अस्मै)** **(इन्द्राय)** ऐश्वर्यकराय राज्ञे **(स्तोत्रम्)** स्तुवन्ति येन तत् **(मतिभि:)** मननशीलैर्मनुष्यै: **(अवाचि)** उच्यते **(असत्)** भवेत् **(यथा)** **(महति)** **(वृत्रतूर्ये)** स- ामे **(इन्द्र:)** शत्रूणां विदारको योद्धा **(विश्वायु:)** पूर्णायु: **(अविता)** रक्षक: **(वृध:)** वर्धक: **(च)**॥५॥

अन्वय:-हे मनुष्या! यथा मतिभिरस्मा उपदेशकायैतन्मह्याङ्गूषं स्तोत्रमवाचि यथाऽस्मा इन्द्रायैतन्मह्याङ्गूषं स्तोत्रमवाचि यथेन्द्रो महति वृत्रतूर्ये वृधोऽविता विश्वायुश्चासत्तथा युष्माभिरप्यनुष्ठेयम्॥५॥

भावार्थ:-येऽविद्वांस: स्युस्ते विद्वदनुकरणेन स्वकीयवर्त्तमानमुत्तमं कुर्य्युरिति॥५॥

अत्रेन्द्रराजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुस्त्रिंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्त:॥

पदार्थः-हे मनुष्यो! **(यथा)** जैसे **(मतिभिः)** विचारशील मनुष्यों से **(अस्मै)** इस उपदेशक के लिये **(एतत्)** यह **(महि)** बड़ा **(आङ्गूषम्)** प्राप्त होने योग्य **(स्तोत्रम्)** स्तोत्र **(अवाचि)** कहा जाता है और जैसे **(अस्मै)** इस **(इन्द्राय)** ऐश्वर्य्य के करने वाले राजा के लिये यह बड़ा प्राप्त होने योग्य स्तोत्र कहा जाता है और जैसे **(इन्द्रः)** शत्रुओं का नाश करने वाला योद्धा **(महति)** बड़े **(वृत्रतूर्ये)** स-ाम में **(वृधः)** बढ़ाने और **(अविता)** रक्षा करने वाला **(विश्वायुः च)** और पूर्ण अवस्थायुक्त **(असत्)** होवे, वैसे आप लोगों को भी करना चाहिये॥५॥

भावार्थः-जो अविद्वान् हों, वे विद्वानों के अनुकरण से अपना वर्त्ताव उत्तम करें॥५॥

इस सूक्त में इन्द्र, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौंतीसवाँ सूक्त और छठा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य पञ्चत्रिंशत्तमस्य सूक्तस्य नर ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। ३ निचृत्त्रिष्टुप्। ४, ५ त्रिष्टुप् छन्दः। धैवतःस्वरः। २ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजानं प्रति कथमुपदिशेयुरित्याह॥

अब पाँच ऋचावाले पैंतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा के प्रति कैसा उपदेश करें, इस विषय को कहते हैं॥

कदा भुवन् रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः।
कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः॥ १॥

कदा। भुवन्। रथऽक्षयाणि। ब्रह्म। कदा। स्तोत्रे। सहस्रऽपोष्यम्। दाः। कदा। स्तोमम्। वासयः। अस्य। राया। कदा। धियः। करसि। वाजऽरत्नाः॥ १॥

पदार्थः-(**कदा**) (**भुवन्**) भवन्ति (**रथक्षयाणि**) रथस्य निवासरूपाणि गृहाणि (**ब्रह्म**) धनम् (**कदा**) (**स्तोत्रे**) प्रशंसासाधने (**सहस्रपोष्यम्**) असङ्ख्यैः पोषणीयम् (**दाः**) दद्याः (**कदा**) (**स्तोमम्**) प्रशंसाम् (**वासयः**) वासयेः (**अस्य**) (**राया**) धनेन (**कदा**) (**धियः**) प्रज्ञा उत्तमानि कर्माणि वा (**करसि**) कुर्याः (**वाजरत्नाः**) धनधान्योन्नतिकरीः॥ १॥

अन्वयः-हे राजँस्त्वं कदा रथक्षयाणि भुवन् कदा स्तोत्रे सहस्रपोष्यं ब्रह्म दाः। कदास्य राया स्तोमं वासयः कदा वाजरत्ना धियः करसि॥ १॥

भावार्थः-सर्वे सभ्या विद्वांस उपदेशकाश्च राजानं प्रत्येवं ब्रूयुर्भवान् कदा सेनाङ्गानि पुष्टिकरमैश्वर्य्यमुत्तमाः प्रज्ञाश्च करिष्यतीति॥ १॥

पदार्थः-हे राजन्! आपके (**कदा**) कब (**रथक्षयाणि**) वाहन के रहने के स्थान (**भुवन्**) होते हैं और (**कदा**) कब (**स्तोत्रे**) प्रशंसा के साधन में (**सहस्रपोष्यम्**) असङ्ख्य जनों के पुष्ट करने योग्य (**ब्रह्म**) धन को (**दाः**) दीजिये और (**कदा**) कब (**अस्य**) इसके (**राया**) धन से (**स्तोमम्**) प्रशंसा को (**वासयः**) बसाइये और आप (**कदा**) कब (**वाजरत्नाः**) धन और धान्य की बढ़ाने वाली (**धियः**) उत्तम बुद्धियों वा उत्तम कर्म्मों को (**करसि**) करें॥ १॥

भावार्थः-सब सभा में बैठने वाले, विद्वान् जन और उपदेशक जन राजा से यह कहें कि आप कब सेना के अङ्गों और पुष्टि करने वाले ऐश्वर्य्य और उत्तम बुद्धियों को करेंगे॥ १॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

कहि स्वित्तदिन्द्र यन्नभिर्नॄन् वीरैर्वीरान्नीळयासे जयाजीन्।

त्रिधातु गा अधि जयासि गोष्विन्द्र द्युम्नं स्वर्वद्धेह्यस्मे॥ २॥

कर्हि। स्वित्। तत्। इन्द्र। यत्। नृऽभिः। नॄन्। वीरैः। वीरान्। नीळयासे। जय। आजीन्। त्रिऽधातु। गाः। अधि। जयासि। गोषु। इन्द्र। द्युम्नम्। स्वःऽवत्। धेहि। अस्मे इति॥ २॥

पदार्थः-(**कर्हि**) कस्मिन् समये (**स्वित्**) प्रश्ने (**तत्**) (**इन्द्र**) सेनाधारक (**यत्**) (**नृभिः**) उत्तमैर्नरैः (**नॄन्**) प्रशस्तान्नरान् (**वीरैः**) शौर्यबलादियुक्तैः (**वीरान्**) धृष्टत्वादिगुणयुक्तान् (**नीळयासे**) प्रशंसय (**जय**) (**आजीन्**) स-ामान् (**त्रिधातु**) सुवर्णरजतताम्राणि त्रयो धातवो विद्यन्ते यस्मिंस्तत् (**गाः**) पृथिवीः (**अधि**) (**जयासि**) जय (**गोषु**) पृथिवीषु (**इन्द्र**) प्रतापिन् सेनेश (**द्युम्नम्**) धनं यशो वा (**स्वर्वत्**) बहुसुखयुक्तम् (**धेहि**) (**अस्मे**) अस्मासु॥ २॥

अन्वयः-हे इन्द्र! त्वं कर्हि स्विद्वीरैर्नृभिर्वीरान्नॄन् नीळयासे गाः कर्ह्यधि जयसि। हे इन्द्र! त्वं गोष्वस्मे यत्स्वर्वत् त्रिधातु द्युम्नमस्ति तदस्मे धेहि एवं विधाऽऽजीन् जय॥ २॥

भावार्थः-हे राजँस्त्वं विद्वद्भिः सह विदुषः शूरैः सह शूरान् सङ्गृह्य स-ामान् जित्वा पृथिवीराज्यं प्राप्य न्यायाचरणेन प्रजाः पालयित्वा महद्यशो धनं च वर्धय॥ २॥

पदार्थः-हे (**इन्द्र**) सेना के धारण करने वाले! आप (**कर्हि**) किस समय में (**स्वित्**) कहिये (**वीरैः**) शूरता और बल आदि से युक्त (**नृभिः**) उत्तम मनुष्यों से (**वीरान्**) धृष्टता आदि गुणों से युक्त (**नॄन्**) श्रेष्ठ मनुष्यों को (**नीळयासे**) प्रशंसा कीजिये और (**गाः**) पृथिवियों को कब (**अधि**) (**जयासि**) जीतिये और हे (**इन्द्र**) प्रतापी तथा सेना के धारण करने वाले! आप (**गोषु**) पृथिवियों में और (**अस्मे**) हम लोगों में (**यत्**) जो (**स्वर्वत्**) बहुत सुख से युक्त (**त्रिधातु**) सोना, चाँदी और ताँबा ये तीन धातु जिसमें ऐसा (**द्युम्नम्**) धन वा यश है (**तत्**) उसको हम लोगों में (**धेहि**) धारण करिये सो ऐसा करके (**आजीन्**) स-ामों को (**जय**) जीतिये॥ २॥

भावार्थः-हे राजन्! आप विद्वानों के साथ विद्वानों का तथा शूरवीर जनों के साथ शूरवीरों का अच्छे प्रकार ग्रहण करके तथा स-ामों को जीत कर और पृथिवी के राज्य को प्राप्त कर न्यायाचरण से प्रजाओं का पालन करके बड़े यश वा धन को बढ़ाइये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

कर्हि स्वित्तदिन्द्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ।

कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः॥ ३॥

कर्हि। स्वित्। तत्। इन्द्र। यत्। जरित्रे। विश्वऽप्सु। ब्रह्म। कृणवः। शविष्ठ। कदा। धियः। न। निऽयुतः। युवासे। कदा। गोऽमघा। हवनानि। गच्छाः॥ ३॥

पदार्थः-(**कर्हि**) कदा (**स्वित्**) प्रश्ने (**तत्**) (**इन्द्र**) विद्यैश्वर्ययुक्त राजन् (**यत्**) (**जरित्रे**) स्तावकाय (**विश्वप्सु**) विविधरूपम् (**ब्रह्म**) धनम् (**कृणवः**) कुर्याः (**शविष्ठ**) अतिशयेन बलिन् (**कदा**) (**धियः**) प्रज्ञाः (**न**) इव (**नियुतः**) नितरां शुभगुणयुक्तः (**युवासे**) मिश्रय (**कदा**) (**गोमघा**) पृथिवीराज्येन सत्कृतानि धनानि (**हवनानि**) ग्रहीतव्यानि (**गच्छाः**) प्राप्नुयाः॥३॥

अन्वयः-हे शविष्ठेन्द्र! त्वं कर्हि स्विज्जरित्रे यद्विश्वप्सु ब्रह्म कृणवस्तदस्मै वयमपि कुर्याम नियुतो न धियः कदा युवासे गोमघा हवनानि कदा गच्छाः॥३॥

भावार्थः-हे राजँस्त्वमखिलं धनं पूर्णा धिय उत्तमाः क्रियाश्च कदा करिष्यस्यर्थात् सद्य एतानि कुर्विति॥३॥

पदार्थः-हे (**शविष्ठ**) अतिशय बली (**इन्द्र**) विद्या और ऐश्वर्य्य से युक्त राजन्! आप (**कर्हि**) कब (**स्वित्**) कहिये! (**जरित्रे**) स्तुति करने वाले के लिये (**यत्**) जो (**विश्वप्सु**) अनेक रूप (**ब्रह्म**) धन (**कृणवः**) करेंगे (**तत्**) उसको इसके लिये हम लोग भी करें तथा (**नियुतः**) अत्यन्त श्रेष्ठ गुणों से युक्त (**न**) जैसे वैसे (**धियः**) बुद्धियों को (**कदा**) कब (**युवासे**) मिलाइयेगा और (**गोमघा**) पृथिवी के राज्य से सत्कृत धनों तथा (**हवनानि**) ग्रहण करने योग्यों को (**कदा**) कब (**गच्छाः**) प्राप्त हूजियेगा॥३॥

भावार्थः-हे राजन्! आप सम्पूर्ण धन, पूर्ण बुद्धियाँ और उत्तम क्रियाओं को कब करियेगा? अर्थात् शीघ्र इनको करिये॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः।
पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः॥४॥

सः। गोऽमघाः। जरित्रे। अश्वऽचन्द्राः। वाजऽश्रवसः। अधि। धेहि। पृक्षः। पीपिहि। इषः। सुऽदुघाम्। इन्द्र। धेनुम्। भरत्ऽवाजेषु। सुऽरुचः। रुरुच्याः॥४॥

पदार्थः-(**सः**) (**गोमघाः**) भूमिराज्यधनाः (**जरित्रे**) विद्यागुणप्रकाशकाय (**अश्वश्चन्द्राः**) अश्वाश्चन्द्राणि सुवर्णानि येषान्ते (**वाजश्रवसः**) वाजोन्नं विद्याश्रवणं च पूर्णं येषान्ते (**अधि**) (**धेहि**) (**पृक्षः**) सम्पर्चनीयाः (**पीपिहि**) पिब (**इषः**) प्राप्तव्यान् रसान् (**सुदुघाम्**) सुष्ठुकामपूर्णकर्त्रीम् (**इन्द्र**) विद्यैश्वर्यप्रद (**धेनुम्**) विद्याशिक्षायुक्तां वाचम् (**भरद्वाजेषु**) धृतविज्ञानेषु विद्वत्सु (**सुरुचः**) शोभना रुग् रुचिः प्रीतिर्येषां तान् (**रुरुच्याः**) रुचितान् कुर्य्याः॥४॥

अन्वयः-हे इन्द्र राजन्त्स त्वं जरित्रे ये गोमघा अश्वश्चन्द्रा वाजश्रवसः पृक्षस्तानस्मास्वधि धेहि। इषः पीपिहि भरद्वाजेषु सुदुघां धेनुं सुरुचश्च रुरुच्याः॥४॥

भावार्थः-हे राजन्! स्वप्रजासु पूर्णां विद्यामखिलं धनं धृत्वा शरीरारोग्यं वर्धयित्वा धर्म्मे रुचिं कुर्य्याः॥४॥

पदार्थः-हे **(इन्द्र)** विद्या और ऐश्वर्य्य के देनेवाले राजन्! **(सः)** वह आप **(जरित्रे)** विद्या और गुण के प्रकाश करने वाले के लिये जो **(गोमघाः)** पृथिवी के राज्यरूप धन वाले **(अश्वश्चन्द्राः)** घोड़े हैं सुवर्ण जिनके वे **(वाजश्रवसः)** अन्न और विद्याश्रवण युक्त **(पृक्षः)** सम्बन्ध करने योग्य हैं उनको हम लोगों में **(अधि, धेहि)** धारण करिये और **(इषः)** प्राप्त होने योग्य रसों को **(पीपिहि)** पीजिये और **(भरद्वाजेषु)** धारण किया विज्ञान जिन्होंने उन विद्वानों में **(सुदुघाम्)** उत्तम प्रकार कामना पूर्ण करने वाली **(धेनुम्)** विद्या और शिक्षा से युक्त वाणी को **(सुरुचः)** तथा उत्तम प्रीति वालों को **(रुरुच्याः)** प्रीतियुक्त करिये॥४॥

भावार्थः-हे राजन्! अपनी प्रजाओं में पूर्ण विद्या और सम्पूर्ण धन को धारण कर और शरीर के आरोग्यपन को बढ़ा के धर्म्म में रुचि करिये॥४॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे।
मा निररं शुक्रदुघस्य धेनोराङ्गिरसान् ब्रह्मणा विप्र जिन्व॥५॥७॥

तम्। आ। नूनम्। वृजनम्। अन्यथा। चित्। शूरः। यत्। शक्र। वि। दुरः। गृणीषे। मा निः। अरम्। शुक्रऽदुघस्य। धेनोः। आङ्गिरसान्। ब्रह्मणा। विप्र। जिन्व॥५॥

पदार्थः-**(तम्)** **(आ)** **(नूनम्)** निश्चितम् **(वृजनम्)** व्रजन्ति येन यस्मिन् वा **(अन्यथा)** **(चित्)** अपि **(शूरः)** निर्भयः शत्रुहन्ता **(यत्)** **(शक्र)** शक्तिमन् **(वि)** **(दुरः)** द्वाराणि **(गृणीषे)** प्रशंससि **(मा)** **(निः)** नितराम् **(अरम्)** अलम् **(शुक्रदुघस्य)** आशुपूर्तिकर्त्र्याः **(धेनोः)** वाचः **(आङ्गिरसान्)** अङ्गिरःसु प्राणेषु साधून् **(ब्रह्मणा)** महता धनेनान्नेन वा **(विप्र)** मेधाविन् **(जिन्व)** प्रीणीहि॥५॥

अन्वयः-हे विप्रशक्रेन्द्र! यद् वृजनं नूनमाऽऽगृणीषे तञ्चिन्निर्गृणीषे शूरस्त्वं दुरो जिन्व। शुक्रदुघस्य धेनोश्चाङ्गिरसान् ब्रह्मणाऽरं वि जिन्व। कदाचिदन्यथा मा कुर्याः॥५॥

भावार्थः-ये राजादयो जनाः प्रजाः सुखेनालङ्कृत्यान्यायादन्यथाचरणं न कुर्वन्ति ते समग्रैश्वर्येण युक्ता जायन्ते॥५॥

अत्रेन्द्रविद्वद्राजप्रजागुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चत्रिंशत्तमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हे **(विप्र)** बुद्धिमान् जन **(शक्र)** सामर्थ्य और अत्यन्त ऐश्वर्य से युक्तराजन् **(यत्)** जो **(वृजनम्)** चलते हैं जिससे वा जिसमें उनकी **(नूनम्)** निश्चित **(आ, गृणीषे)** प्रशंसा करते हो **(तम्)** उसकी **(चित्)** भी **(निः)** निरन्तर प्रशंसा करते हो और **(शूरः)** भयरहित और शत्रुओं के मारने वाले

आप **(दुरः)** द्वारों को **(जिन्व)** पुष्ट करिये तथा **(शुक्रदुघस्य)** शीघ्र पूर्ण करने वाली **(धेनोः)** वाणी के **(आङ्गिरसान्)** प्राणों में श्रेष्ठों को **(ब्रह्मणा)** बड़े धन वा अन्न से **(अरम्)** अच्छे प्रकार से **(वि)** प्रसन्न कीजिये और कभी **(अन्यथा)** अन्यथा **(मा)** न करिये॥५॥

भावार्थः-जो राजा आदि जन प्रजाओं को सुख से शोभित कर अन्याय से अन्यथा आचरण नहीं करते, वे सम्पूर्ण ऐश्वर्य्य से युक्त होते हैं॥५॥

इस सूक्त में इन्द्र, विद्वान्, राजा और प्रजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैतीसवां सूक्त और सातवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य षट्त्रिंशत्तमस्य सूक्तस्य नर ऋषिः। इन्द्रो देवता। १ निचृत्त्रिष्टुप्। धैवतः स्वरः।
२, ५ भुरिक् पङ्क्तिः। ३, ४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजा कीदृशो भूत्वा किं धरेदित्याह॥

अब पाँच ऋचावाले छत्तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा कैसा होकर क्या धारण करे, इस विषय को कहते हैं॥

सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः।
सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यम्॥ १॥

सत्रा। मदासः। तव। विश्वऽजन्याः। सत्रा। रायः। अध। ये। पार्थिवासः। सत्रा। वाजानाम्। अभवः। विऽभक्ता। यत्। देवेषु। धारयथाः। असुर्यम्॥ १॥

पदार्थः-(**सत्रा**) सत्याः (**मदासः**) आनन्दकाः (**तव**) (**विश्वजन्या**) विश्वानि जन्यानि सुखानि येषु ते (**सत्रा**) सत्यानि (**रायः**) धनानि (**अध**) अथ (**ये**) (**पार्थिवासः**) पृथिव्यां विदिताः (**सत्रा**) सत्याः (**वाजानाम्**) अन्नादीनाम् (**अभवः**) भव (**विभक्ता**) विभागं प्राप्ताः (**यत्**) (**देवेषु**) विद्वत्सु (**धारयथाः**) (**असुर्यम्**) असुरेष्वविद्वत्सु भवम्॥ १॥

अन्वयः-हे राजन्! तव ये विश्वजन्याः सत्रा मदासस्सत्रा रायस्सत्रा पार्थिवासो वाजानां सत्रा विभक्ता सन्ति तेषां त्वं धारकोऽभवोऽध यद्देवेष्वसुर्यमस्ति तद्धारयथाः॥ १॥

भावार्थः-हे मनुष्या! येऽत्र बुद्ध्यानन्दवर्धका विद्याधनादियोगाः विद्वत्सङ्गाः सन्ति तान् धृत्वा सत्याऽसत्योर्विभाजका भवन्तु॥ १॥

पदार्थः-हे राजन्! (**तव**) आपके (**ये**) जो (**विश्वजन्याः**) सम्पूर्ण जन्य सुख जिनमें वे (**सत्रा**) सत्य (**मदासः**) आनन्द देने वाले और (**सत्रा**) सत्य (**रायः**) धन (**सत्रा**) सत्य (**पार्थिवासः**) पृथिवी में विदित और (**वाजानाम्**) अन्न आदिकों के सत्य (**विभक्ता**) विभागों को प्राप्त हुए हैं उनके आप धारण करने वाले (**अभवः**) हूजिये (**अध**) इसके अनन्तर (**यत्**) जो (**देवेषु**) विद्वानों में (**असुर्यम्**) अविद्वानों में हुआ है उसको (**धारयथाः**) धारण कराइये॥ १॥

भावार्थः-हे मनुष्यो! जो इस संसार में बुद्धि और आनन्द के बढ़ानेवाले, विद्या और धनादि से युक्त और विद्वानों के साथ सत्सङ्ग करने वाले हैं, उनको धारण करके सत्य और असत्य के विभाग करने वाले हूजिये॥ १॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय।

स्यू॒मगृ॑भे दु॒धये॑ऽर्व॒ते च॒ क्रतुं॑ वृञ्जन्त्यपि॑ वृत्र॒हत्ये॑॥ २॥

अनु॑। प्र। ये॒जे॒। जन॑:। ओज॑:। अ॒स्य॒। स॒त्रा। दु॒धि॒रे॒। अनु॑। वी॒र्या॑य। स्यू॒म॒ऽगृ॒भे॑। दु॒धये॑। अ॒र्व॒ते॑। च॒। क्रतु॑म्। वृ॒ञ्ज॒न्ति॒। अपि॑। वृ॒त्र॒ऽह॒त्ये॑॥ २॥

पदार्थ:-(**अनु**) (**प्र**) (**येजे**) यजति (**जन:**) (**ओज:**) बलम् (**अस्य**) संसारस्य मध्ये (**सत्रा**) सत्यम् (**दधिरे**) दधति (**अनु**) (**वीर्याय**) पराक्रमाय (**स्यूमगृभे**) स्यूमाननुस्यूनान् गृह्णाति तस्मै (**दुधये**) हिंसकाय (**अर्वते**) प्राप्ताय (**च**) (**क्रतुम्**) प्रज्ञाम् (**वृञ्जन्ति**) त्यजन्ति। अत्र व्यत्ययेन परस्मैपदम् (**अपि**) (**वृत्रहत्ये**) स- ामे॥ २॥

अन्वय:-हे राजन्! यो जनो यथा शूरवीरा अस्य सत्रौजो दधिरे वृत्रहत्ये स्यूमगृभे वीर्याय क्रतुमनु दधिरे दुधयेऽर्वते च क्रतुमपि वृञ्जन्ति तथाऽनु प्र येजे तं तांश्च त्वं गृहाण हिंसकान् वर्जय॥ २॥

भावार्थ:-ये मनुष्या न्यायदयाभ्यां युक्तां प्रज्ञां धृत्वा धर्म्याणि कर्माणि कृत्वा दुष्टतां निवार्य युद्धे विजयं प्राप्य सत्सङ्गतिं कुर्वन्ति ते प्रत्यहं बुद्धिं वर्धयितुं शक्नुवन्ति॥ २॥

पदार्थ:-हे राजन्! जो (**जन:**) मनुष्य जैसे शूरवीर जन (**अस्य**) इस संसार के मध्य में (**सत्रा**) सत्य (**ओज:**) बल को (**दधिरे**) धारण करते हैं और (**वृत्रहत्ये**) स- ाम में (**स्यूमगृभे**) एक दूसरे को मिले हुए के ग्रहण करने वाले (**वीर्याय**) पराक्रम के लिये (**क्रतुम्**) बुद्धि को (**अनु**) पीछे धारण करते हैं (**च**) और (**दुधये**) मारने वाले (**अर्वते**) प्राप्त हुए के लिये बुद्धि का (**अपि**) भी (**वृञ्जन्ति**) त्याग करते हैं, वैसे (**अनु, प्र, येजे**) यज्ञ करता है, उसको और उनको आप ग्रहण करिये और हिंसकों को वर्जिये॥ २॥

भावार्थ:-जो मनुष्य न्याय और दया से युक्त बुद्धि को धारण कर, धर्म्मयुक्त कर्म्मों को कर, दुष्टता को दूर कर और युद्ध में विजय प्राप्त करके श्रेष्ठों की सङ्गति करते हैं, वे दिनरात्रि बुद्धि को बढ़ा सकते हैं॥ २॥

पुनस्तमुत्तमं जनं किमाप्नोतीत्याह॥

फिर उस उत्तम मनुष्यों को क्या प्राप्त होता है, इस विषय को कहते हैं॥

तं स॒ध्रीची॑रू॒तयो॒ वृष्ण्या॑नि॒ पौंस्या॑नि॒ नि॒युत॑: सश्चु॒रिन्द्र॑म्।
स॒मु॒द्रं न सिन्ध॑व उ॒क्थशु॑ष्मा उरु॒व्यच॑सं॒ गिर॒ आ वि॑शन्ति॥ ३॥

तम्। स॒ध्रीची॑:। ऊ॒तय॑:। वृष्ण्या॑नि। पौंस्या॑नि। नि॒ऽयुत॑:। स॒श्चु॒:। इन्द्र॑म्। स॒मु॒द्रम्। न। सिन्ध॑व:। उ॒क्थऽशु॑ष्मा:। उ॒रु॒ऽव्यच॑सम्। गिर॑:। आ। वि॒श॒न्ति॒॥ ३॥

पदार्थ:-(**तम्**) (**सध्रीची:**) या: सहाऽञ्चन्ति (**ऊतय:**) रक्षाद्या: क्रिया: (**वृष्ण्यानि**) दुष्टशक्तिनिरोधकानि (**पौंस्यानि**) वचनानि (**नियुत:**) वायोर्निश्चिता गतय इव क्रिया: (**सश्चु:**) प्राप्नुयु:। **सश्चतीति गतिकर्मा।** (निघं०२.१४) (**इन्द्रम्**) सत्यं धर्म्मं न्यायं यो दधाति तम् (**समुद्रम्**) (**न**) इव

(सिन्धवः) नद्यः **(उक्थशुष्माः)** उक्थान्युक्तानि शुष्माणि बलानि याभिस्ताः **(उरुव्यचसम्)** बहुषु सद्गुणेषु व्यापकम् **(गिरः)** वाचः **(आ) (विशन्ति)** समन्तात् प्राप्नुवन्ति॥३॥

अन्वयः-हे विद्वांसो! यमुरुव्यचसमिन्द्रमुक्थशुष्मा गिरः समुद्रं सिन्धवो नाऽऽविशन्ति तं सध्रीचीर्नियुत ऊतयो वृष्ण्यानि पौंस्यानि च सश्चुः॥३॥

भावार्थः-अत्रोपमालङ्कारः। यथा निम्नगाः सरितः सागरं सर्वतो गच्छन्ति तथैव धार्मिकं राजानं सर्वं बलं सर्वाः रक्षाः सुशिक्षिता वाचश्च प्राप्नुवन्ति॥३॥

पदार्थः-हे विद्वानो! जिस **(उरुव्यचसम्)** बहुत श्रेष्ठ गुणों में व्यापक **(इन्द्रम्)** सत्य धर्म और न्याय के धारण करनेवाले को **(उक्थशुष्माः)** कहे बल जिनसे वे **(गिरः)** वाणियां **(समुद्रम्)** समुद्र को **(सिन्धवः)** नदियाँ **(न)** जैसे वैसे **(आ, विशन्ति)** सब प्रकार से प्राप्त होती हैं **(तम्)** उसको **(सध्रीचीः)** एक साथ गमन करने वाली **(नियुतः)** वायु की निश्चित गतियों के समान क्रिया और **(ऊतयः)** रक्षण आदि क्रियायें **(वृष्ण्यानि)** दुष्टों के सामर्थ्य को रोकने वाले **(पौंस्यानि)** वचन भी **(सश्चुः)** प्राप्त होवें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे नीचे चलने वाली नदियाँ समुद्र को सब ओर से प्राप्त होती हैं, वैसे ही धार्मिक राजा को सम्पूर्ण बल, सब रक्षायें और उत्तम प्रकार शिक्षित वाणियाँ भी प्राप्त होती हैं॥३॥

पुना राजा कीदृशो भवेदित्याह॥

फिर राजा कैसा होवे, इस विषय को कहते हैं॥

स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः।
पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा॥४॥

सः। रायः। खाम्। उप। सृज। गृणानः। पुरुऽचन्द्रस्य। त्वम्। इन्द्र। वस्वः। पतिः। बभूथ। असमः। जनानाम्। एकः। विश्वस्य। भुवनस्य। राजा॥४॥

पदार्थः-**(सः) (रायः)** श्रियः **(खाम्)**। **खेति नदीनाम।** (निघं०१.१३) **(उप) (सृजा)** निर्मिमीहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(गृणानः)** स्तुवन् **(पुरुश्चन्द्रस्य)** बहु चन्द्रं सुवर्णं यस्मिंस्तस्य **(त्वम्) (इन्द्र)** धनेश **(वस्वः)** धनस्य **(पतिः)** स्वामी **(बभूथ)** भव **(असमः)** नान्यः समः सदृशो यस्य **(जनानाम्)** धार्मिकाणां मनुष्याणाम् **(एकः)** असहायः **(विश्वस्य)** सम्पूर्णस्य **(भुवनस्य)** संसारस्य **(राजा)** प्रकाशमानः॥४॥

अन्वयः-हे इन्द्र राजन्! यथा विश्वस्य भुवनस्येश्वरोऽसमः स एको राजास्ति तथा त्वं जनानां पुरुश्चन्द्रस्य रायो वस्वः पतिर्बभूथ गृणानस्त्वं खामिव धनस्य कोशमुप सृजा॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजानो! यथेश्वरः पक्षपातं विहाय सर्वस्य न्यायेन पालकोऽस्ति तथैव भूत्वा यूयं धनस्वामिनो भवत॥४॥

पदार्थः-हे **(इन्द्र)** धन के स्वामिन् राजन्! जैसे **(विश्वस्य)** सम्पूर्ण **(भुवनस्य)** संसार का स्वामी **(असमः)** जिसके समान और नहीं **(सः)** वह **(एकः)** सहायरहित **(राजा)** प्रकाशमान राजा है, वैसे आप **(जनानाम्)** धार्मिक मनुष्यों और **(पुरुश्चन्द्रस्य)** बहुत सुवर्ण जिसमें उसके **(रायः)** लक्ष्मी के **(वस्वः)** धन के **(पतिः)** स्वामी **(बभूथ)** हूजिये और **(गृणानः)** स्तुति करते हुए **(त्वम्)** आप **(खाम्)** नदी के समान धन के कोश को **(उपसृजा)** बनाइये॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा लोगो! जैसे ईश्वर पक्षपात का त्याग करके सब का न्याय से पालन करने वाला है, वैसे ही होकर आप लोग धन के स्वामी हूजिये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः॥५॥८॥

सः। तु। श्रुधि। श्रुत्या। यः। दुवः३युः। द्यौः। न। भूम। अभि। रायः। अर्यः। असः। यथा। नः। शवसा। चकानः। युगेऽयुगे। वयसा। चेकितानः॥५॥

पदार्थः-**(सः)** **(तु)** **(श्रुधि)** शृणु **(श्रुत्या)** श्रवणेन **(यः)** **(दुवोयुः)** परिचरणं कामयमानः **(द्यौः)** प्रकाशः **(न)** इव **(भूम)** भवेम **(अभि)** **(रायः)** धनानि **(अर्यः)** स्वामी **(असः)** भवेत् **(यथा)** **(नः)** अस्माकम् **(शवसा)** बलेन **(चकानः)** कामयमानः **(युगेयुगे)** प्रतिवर्षम् **(वयसा)** आयुषा **(चेकितानः)** विजानन्॥५॥

अन्वयः-हे इन्द्र! यो द्यौर्न दुवोयुरर्यः शवसा चकानो युगेयुगे वयसा चेकितानः श्रुत्या यथा नः समाचारं शृणोति यथा सोऽसो रायः प्राप्ता वयं द्यौर्न भूम तथा तु त्वं सर्वेषां वार्तामभि श्रुधि॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा परीक्षको विद्यार्थिनामध्ययनपरीक्षां कृत्वा विदुषः सम्पादयति तथैव राजा यथार्थं न्यायं कृत्वा प्रजा रञ्जयेदिति॥५॥

अत्रेन्द्रविद्वद्राजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्त्रिंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे ऐश्वर्य से युक्त! **(यः)** जो **(द्यौः)** प्रकाश **(न)** जैसे वैसे **(दुवोयुः)** सेवा की कामना करता हुआ **(अर्यः)** स्वामी **(शवसा)** बल से **(चकानः)** कामना करता हुआ **(युगेयुगे)** प्रतिवर्ष **(वयसा)** अवस्था में **(चेकितानः)** जानता हुआ **(श्रुत्या)** श्रवण से **(यथा)** जैसे **(नः)** हम लोगों के समाचार को सुनता है और जैसे **(सः)** वह **(असः)** हो तथा **(रायः)** धनों को प्राप्त हुए हम लोग प्रकाश जैसे वैसे **(भूम)** होवें, वैसे **(तु)** तो आप सब की बात को **(अभि, श्रुधि)** सुनें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे परीक्षक विद्यार्थियों के अध्ययन की परीक्षा करके विद्वान् करता है, वैसे ही राजा यथार्थ न्याय को करके प्रजाओं को प्रसन्न करे॥५॥

इस सूक्त में इन्द्र, विद्वान् और राजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छत्तीसवाँ सूक्त आठवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य सप्तत्रिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ४, ५ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ निचृत्पङ्क्तिः। ३ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्याः किं कुर्युरित्याह॥

अब पाँच ऋचावाले सैंतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्य क्या करें, इस विषय को कहते हैं॥

अ॒र्वाग् रथं॑ वि॒श्ववा॑रं त उ॒ग्रेन्द्र॑ यु॒क्तास॒ो हर॑यो वहन्तु।
की॒रिश्चि॒द्धि त्वा॒ हव॑ते॒ स्व॑र्वान्नृधी॒महि॑ सध॒मादस्ते अ॒द्य॥ १॥

अ॒र्वाक्। रथ॑म्। वि॒श्वऽवा॑रम्। ते। उ॒ग्र। इन्द्र॑। यु॒क्तास॑ः। हर॑यः। व॒ह॒न्तु॒। की॒रिः। चि॒त्। हि। त्वा॒। हव॑ते। स्व॑ः॒ऽवान्। ऋ॒धी॒महि॑। स॒ध॒ऽमाद॑ः। ते॒। अ॒द्य॥ १॥

पदार्थः-(**अर्वाक्**) पश्चात् (**रथम्**) रमणीयं यानम् (**विश्ववारम्**) यो विश्वं सर्वं सुखं करोति तम् (**ते**) तव (**उग्र**) तेजस्विन् (**इन्द्र**) प्रजापते (**युक्तासः**) नियोजिताः (**हरयः**) अश्वा इव शिल्पिनो मनुष्याः (**वहन्तु**) प्रापयन्तु (**कीरिः**) स्तोता विद्वान् (**चित्**) अपि (**हि**) (**त्वा**) त्वाम् (**हवते**) आह्वयति (**स्वर्वान्**) स्वर्बहु सुखं विद्यते यस्य सः (**ऋधीमहि**) समृद्धा भवेम (**सधमादः**) समानस्थानाः (**ते**) तव (**अद्य**) अधुना॥ १॥

अन्वयः-हे उग्रेन्द्र! ये युक्तासो हरयस्ते विश्ववारं रथं वहन्तु यः स्वर्वान् कीरिर्हि त्वा हवते तैस्सधमादो वयं चिदृधीमहि। यस्य तेऽर्वागद्य ये सुखं वहन्ति ते चिदद्य सुखैर्भूषिता जायन्ते॥ १॥

भावार्थः-यो राजा धार्मिकाननुकूलान् जनान्त्सत्करोति तं सर्वे धर्मिष्ठा विद्वांसः सदा सेवन्ते॥ १॥

पदार्थः-हे (**उग्र**) तेजस्विन् (**इन्द्र**) प्रजा के स्वामिन्! जो (**युक्तासः**) नियुक्त किये गये (**हरयः**) घोड़ों के तुल्य शिल्पी मनुष्य (**ते**) आपके (**विश्ववारम्**) सम्पूर्ण सुख स्वीकार करने वाले (**रथम्**) सुन्दर वाहन को (**वहन्तु**) प्राप्त करावें और जो (**स्वर्वान्**) बहुत सुख विद्यमान जिसमें वह (**कीरिः**) स्तुति करने वाला विद्वान् (**हि**) ही (**त्वा**) आपको (**हवते**) पुकारता है उनके (**सधमादः**) तुल्य स्थान वाले हम लोग (**ऋधीमहि**) समृद्ध होवें। और जिन (**ते**) आपके (**अर्वाक्**) पीछे (**अद्य**) इस समय जो सुख को प्राप्त होते हैं, वे (**चित्**) भी इस समय सुखों से भूषित होते हैं॥ १॥

भावार्थः-जो राजा धार्मिक और अनुकूल मनुष्यों को सत्कार करता है, उसकी सब धर्मिष्ठ विद्वान् सदा सेवा करते हैं॥ १॥

पुनर्मनुष्याः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

प्रो द्रोणे॒ हर॑यः कर्मा॒ग्मन् पु॒ना॒नास॒ ऋज्य॑न्तो अभूवन्।

इन्द्रो॑ नो अ॒स्य पू॒र्व्यः प॑पी॒याद् द्यु॒क्षो मद॑स्य सो॒म्यस्य॒ राजा॑॥ २॥

प्रो इति॑। द्रोणे॑। हर॑यः। कर्म॑। अ॒ग्म॒न्। पु॒ना॒नास॑ः। ऋ॒ज्य॑न्तः। अ॒भू॒व॒न्। इन्द्रः॑। नः॒। अ॒स्य। पू॒र्व्यः। प॒पी॒या॒त्। द्यु॒क्षः। मद॑स्य। सो॒म्यस्य॑। राजा॑॥ २॥

पदार्थः-(**प्रो**) प्रकर्षे (**द्रोणे**) परिमाणे (**हरयः**) मनुष्याः (**कर्म**) (**अग्मन्**) प्राप्नुवन्ति (**पुनानासः**) पवित्राः। (**ऋज्यन्तः**) ऋजुरिवाचरन्तः (**अभूवन्**) प्रसिद्धा भवन्ति (**इन्द्रः**) परमैश्वर्यः (**नः**) अस्माकम् (**अस्य**) (**पूर्व्यः**) पूर्वैर्निष्पादितः (**पपीयात्**) वर्धेत (**द्युक्षः**) द्यौरिव क्षा भूमिर्यस्य (**मदस्य**) आनन्दस्य (**सोम्यस्य**) सोम ऐश्वर्ये भवस्य (**राजा**) प्रकाशमानः॥ २॥

अन्वयः-य इन्द्रोऽस्य सोम्यस्य मदस्य द्युक्षः पपीयात् पूर्व्यो नो राजा भवेद्ये पुनानास ऋज्यन्तो हरयो द्रोणे कर्म प्रो अग्मन्नभूवँस्तेऽन्यानपि पवित्रयन्ति॥ २॥

भावार्थः-ये राजादयः सभ्याः स्वयं पवित्राः सुशीलाः सरला भूत्वा शुभानि कर्माणि कृत्वा न्यायेनाऽस्मान् रक्षन्ति तेऽस्माभिः सत्कर्त्तव्याः सन्ति॥ २॥

पदार्थः-जो (**इन्द्रः**) अत्यन्त ऐश्वर्य्य वाला (**अस्य**) इस (**सोम्यस्य**) ऐश्वर्य्य में हुए (**मदस्य**) आनन्द का (**द्युक्षः**) अन्तरिक्ष के सदृश भूमि जिसकी वह (**पपीयात्**) बढ़े और (**पूर्व्यः**) पूर्वजनों से उत्पन्न किया गया (**नः**) हम लोगों का (**राजा**) प्रकाशमान राजा होवे और जो (**पुनानासः**) पवित्र (**ऋज्यन्तः**) सरल के सदृश आचरण करते हुए (**हरयः**) मनुष्य (**द्रोणे**) परिमाण में (**कर्म**) कर्म्म को (**प्रो**) अच्छे प्रकार (**अग्मन्**) प्राप्त होते हैं और (**अभूवन्**) प्रसिद्ध होते हैं, वे अन्यों को भी पवित्र करते हैं॥ २॥

भावार्थः-जो राजा आदि श्रेष्ठ जन स्वयं पवित्र और श्रेष्ठ स्वभाव वाले और सरल होकर श्रेष्ठ कर्म्मों को करके न्याय से हम लोगों की रक्षा करते हैं, वे हम लोगों से सत्कार करने योग्य हैं॥ २॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्या क्या करें, इस विषय को कहते हैं॥

आ॒स॒स्रा॒णास॑ः शवसा॒नमच्छेन्द्रं॑ सु॒च॒क्रे र॒थ्या॑सो॒ अश्वा॑ः।

अ॒भि श्रव॒ ऋज्य॑न्तो वहेयु॒र्नू चि॒न्नु वा॒योर॒मृतं॒ वि द॑स्येत्॥ ३॥

आ॒ऽस॒स्रा॒णास॑ः। श॒व॒सा॒नम्। अच्छ॑। इन्द्र॑म्। सु॒ऽच॒क्रे। र॒थ्या॑सः। अश्वा॑ः। अ॒भि। श्रव॑ः। ऋज्य॑न्तः। व॒हे॒यु॒ः। नु। चि॒त्। नु। वा॒योः। अ॒मृत॑म्। वि। द॒स्ये॒त्॥ ३॥

पदार्थः-(**आसस्राणासः**) समन्तादृतिमन्तः (**शवसानम्**) बलवन्तम् (**अच्छ**) (**इन्द्रम्**) राजानम् (**सुचक्रे**) शोभनं करोति (**रथ्यासः**) रथेषु साधवः (**अश्वाः**) तुरङ्गाः (**अभि**) सर्वतः (**श्रवः**) ये शृण्वन्ति ते (**ऋज्यन्तः**) ऋजुरिवाचरन्तः (**वहेयुः**) प्राप्नुवन्तु (**नू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**चित्**) अपि (**नु**) क्षिप्रम् (**वायोः**) पवनस्य (**अमृतस्य**) नाशरहितं स्वरूपम् (**वि**) (**दस्येत्**) उपक्षाययेत्॥ ३॥

अन्वयः-य आसस्त्राणासः रथ्यासोऽश्वा इवाऽभि श्रव ऋज्यन्तो विद्वांसः शवसानमिन्द्रन्नू वहेयुर्यश्चिदेतानच्छ सुचक्रे स वायोरमृतं प्राप्य दुःखानि नु वि दस्येत्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे प्रजाजना! यथा राजा युष्मान् वर्धयेत्तथा यूयमप्येनं वर्धयत, सर्वे योगाभ्यासं कृत्वा प्राणस्थं परमात्मानं विदित्वा दुःखानि दहन्तु॥३॥

पदार्थः-जो (**आसस्त्राणासः**) चारों ओर से गमन करने वाले (**रथ्यासः**) वाहनों में श्रेष्ठ (**अश्वाः**) घोड़े जैसे वैसे (**अभि, श्रवः**) चारों ओर से सुनने वाले (**ऋज्यन्तः**) सरल के समान आचरण करते हुए विद्वान् जन (**शवसानम्**) बलयुक्त (**इन्द्रम्**) राजा को (**नू**) शीघ्र (**वहेयुः**) प्राप्त होवें और जो (**चित्**) भी इन को (**अच्छ**) अच्छे प्रकार (**सुचक्रे**) सुन्दर करता है वह (**वायोः**) पवन के (**अमृतम्**) नाशरहित स्वरूप को प्राप्त होकर दुखों की (**नु**) शीघ्र ही (**वि, दस्येत्**) उपेक्षा करे॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे प्रजाजनो! जैसे राजा आप लोगों की वृद्धि करे, वैसे आप लोग भी इसकी वृद्धि करिये और सब योगाभ्यास करके प्राणों में वर्त्तमान परमात्मा को जान कर दुःखों का नाश करो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

वरिष्ठो अस्य दक्षिणामियर्तीन्द्रो मघोनां तुविकूर्मितमः।

ययां वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन्॥४॥

वरिष्ठः। अस्य। दक्षिणाम्। इयर्ति। इन्द्रः। मघोनाम्। तुविकूर्मिऽतमः। ययां। वज्रिऽवः। परिऽयासि। अंहः। मघा। च। धृष्णो इति। दयसे। वि। सूरीन्॥४॥

पदार्थः-(**वरिष्ठः**) अतिशयेन वरिता (**अस्य**) राज्यस्य (**दक्षिणाम्**) वर्द्धिकाम् (**इयर्ति**) प्राप्नोति (**इन्द्रः**) राजा (**मघोनाम्**) बहुधनयुक्तानाम् (**तुविकूर्मितमः**) अतिशयेन बहुकर्त्ता (**ययां**) दक्षिणया (**वज्रिवः**) प्रशस्तशस्त्राऽस्त्रयुक्त (**परियासि**) सर्वतः परित्यजसि (**अंहः**) अपराधम् (**मघा**) धनानि (**च**) (**धृष्णो**) दृढोत्साह (**दयसे**) ददासि (**वि**) (**सूरीन्**) विदुषः॥४॥

अन्वयः-हे वज्रिवो धृष्णो! यया त्वमंहः परियासि सूरीन् मघा च वि दयसे तामस्य मघोनां दक्षिणां तुविकूर्मितमो वरिष्ठ इन्द्रः सन् भवानियर्ति तस्मात् सत्कर्त्तव्योऽस्ति॥४॥

भावार्थः-स एव राजा स्थिरं राज्यं कर्त्तुमर्हति यो विदुषां धार्मिकाणां चोपरि दयां करोति दुर्व्यसनानि जहाति पुरुषार्थी भूत्वा चारचक्षुः सन् प्रजापालने यत्नवान् भवति॥४॥

पदार्थः-हे (**वज्रिवः**) प्रशंसित शस्त्र और अस्त्र से तथा (**धृष्णो**) दृढ़ उत्साह से युक्त! (**ययां**) जिस दक्षिणा से आप (**अंहः**) अपराध का (**परियासि**) सब प्रकार से परित्याग करते हो (**सूरीन्**) विद्वानों (**मघा, च**) और धनों को (**वि**) विशेष करके (**दयसे**) देते हो उस (**अस्य**) इस राज्य के (**मघोनाम्**)

बहुत धनों से युक्तों की **(दक्षिणाम्)** बढ़ाने वाली दक्षिणा को **(तुविकूर्मितमः)** अत्यन्त बहुत करने और **(वरिष्ठः)** अत्यन्त स्वीकार करने वाले **(इन्द्रः)** राजा हुए आप **(इयर्त्ति)** प्राप्त होते हैं, इससे सत्कार करने योग्य हैं॥४॥

भावार्थः-वही राजा स्थिर राज्य करने योग्य है जो विद्वानों और धार्मिक जनों पर दया करता और दुष्ट व्यसनों का त्याग करता है तथा पुरुषार्थी होकर दूतरूप चक्षु वाला हुआ प्रजा के पालन में यत्न वाला होता है॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

इन्द्रो॒ वाज॑स्य॒ स्थवि॑रस्य दा॒तेन्द्रो॑ गी॒र्भिर्व॑र्धतां वृ॒द्धम॑हाः।
इन्द्रो॑ वृ॒त्रं हनि॑ष्ठो अस्तु॒ सत्वा ता सू॒रिः पृ॑णति॒ तूतु॑जानः॥५॥९॥

इन्द्रः॑। वाज॑स्य। स्थवि॑रस्य। दा॒ता। इन्द्रः॑। गी॒ःऽभिः॑। व॒र्ध॒ता॒म्। वृ॒द्धऽम॑हाः। इन्द्रः॑। वृ॒त्रम्। हनि॑ष्ठः। अ॒स्तु॒। सत्वा। आ। ता। सू॒रिः॑। पृ॒ण॒ति॒। तूतु॑जानः॥५॥

पदार्थः-(**इन्द्रः**) राजा **(वाजस्य)** अन्नादेः **(स्थविरस्य)** स्थूलस्य **(दाता)** **(इन्द्रः)** विद्यैश्वर्य्ययुक्तः **(गीर्भिः)** वाग्भिः **(वर्धताम्)** **(वृद्धमहाः)** वृद्धैः पूजितः **(इन्द्रः)** सूर्य्यः **(वृत्रम्)** मेघमिव **(हनिष्ठः)** अतिशयेन हन्ता **(अस्तु)** **(सत्वा)** सत्वगुणोपेतः **(आ)** **(ता)** तानि धनानि **(सूरिः)** विद्वान् **(पृणति)** सुखयति **(तूतुजानः)** सद्यः कर्त्ता॥५॥

अन्वयः-हे मनुष्या! य इन्द्रः स्थविरस्य वाजस्य दाता य इन्द्रो गीर्भिर्वर्धतां वृद्धमहा इन्द्रो वृत्रमिव शत्रूणां हनिष्ठोऽस्तु यस्तूतुजानः सत्वा सूरिस्ताऽऽपृणति तं सर्वे यूयं सत्कुरुत॥५॥

भावार्थः-हे मनुष्या! योऽभयस्य दाता विद्यावृद्धाप्तानां सेवको दुष्टानां हन्ता क्षिप्रकारी विद्वान् मनुष्यो भवेत्तमेव यूयं राजानं मन्यध्वमिति॥५॥

अत्रेन्द्रराजप्रजाकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तत्रिंशत्तमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** विद्या और ऐश्वर्य्य से युक्त और **(स्थविरस्य)** स्थूल **(वाजस्य)** अन्न आदि का **(दाता)** देने वाला और जो **(इन्द्रः)** विद्या और ऐश्वर्य्य से युक्त राजा **(गीर्भिः)** वाणियों से **(वर्धताम्)** बड़े और **(वृद्धमहाः)** वृद्धों से सत्कार किया **(इन्द्रः)** सूर्य्य **(वृत्रम्)** मेघ का जैसे वैसे शत्रुओं का **(हनिष्ठः)** अत्यन्त मारने वाला **(अस्तु)** हो और जो **(तूतुजानः)** शीघ्र करने वाला **(सत्वा)** सतोगुण से

युक्त **(सूरिः)** विद्वान् **(ता)** उन धनों को **(आ, पृणति)** अच्छे प्रकार सुखयुक्त करता है, उसका तुम सब लोग सत्कार करो॥५॥

भावार्थः-हे मनुष्यो! जो अभय का देने वाला, विद्या में वृद्धों और आप्तों का सेवक, दुष्टों का मारने वाला, शीघ्रकर्त्ता, विद्वान् मनुष्य हो उसी को तुम लोग राजा मानो॥५॥

इस सूक्त में इन्द्र, राजा और प्रजा के कर्म्मों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सैंतीसवां सूक्त और नवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्याष्टत्रिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, २,३, ५ निचृत्त्रिष्टुप्। ४ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः कीदृशो विद्वान्त्सेवनीय इत्याह॥

अब पाँच ऋचावाले अड़तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को कैसे विद्वान् की सेवा करनी चाहिये, इस विषय को कहते हैं॥

अपा॑दि॒त उदु॑ नश्चि॒त्रत॑मो म॒हीं भ॑र्षद् द्यु॒मती॒मिन्द्र॑हूतिम्।
पन्य॑सीं धी॒तिं दैव्य॑स्य॒ याम॒न् जन॑स्य रा॒तिं व॑नते सु॒दानु॑:॥ १॥

अपा॑त्। इ॒तः। उत्। ऊँ॒ इति॑। नः॒। चि॒त्रऽत॑मः। म॒हीम्। भ॒र्ष॒त्। द्यु॒ऽमती॑म्। इन्द्र॑ऽहूतिम्। पन्य॑सीम्। धी॒तिम्। दैव्य॑स्य। याम॑न्। जन॑स्य। रा॒तिम्। व॒न॒ते॒। सु॒ऽदानु॑:॥ १॥

पदार्थः-(**अपात्**) अविद्यमानाः पादा यस्य सः (**इतः**) प्राप्तः (**उत्**) (**उ**) (**नः**) अस्माकम् (**चित्रतमः**) अतिशयेनाद्भुतगुणकर्मस्वभावः (**महीम्**) महतीं वाचम्। **महीति वाङ्नाम।** (निघं०१.११ (**भर्षत्**) बिभर्ति (**द्युमतीम्**) विद्याप्रकाशवतीम् (**इन्द्रहूतिम्**) परमैश्वर्य्यप्रकाशिकाम् (**पन्यसीम्**) प्रशंसनीयाम् (**धीतिम्**) धारणायुक्तां धियम् (**दैव्यस्य**) देवेषु दिव्यगुणेषु विद्वत्सु वा भवस्य (**यामन्**) यान्ति यस्मिन् मार्गे तस्मिन् (**जनस्य**) मनुष्यस्य (**रातिम्**) दानम् (**वनते**) सम्भजति (**सुदानुः**) शोभनदानः॥१॥

अन्वयः-योऽपादितश्चित्रतमस्सुदानुर्नो द्युमतीमिन्द्रहूतिं पन्यसीं दैव्यस्य जनस्य धीतिं महीं यामन् रातिमुद्भर्षदु वनते स विद्ववन्मङ्गलकारी भवति॥१॥

भावार्थः-हे मनुष्या! यस्याप्तस्य विदुषः सर्वेषामुपरि दया विद्यादानं निष्कपटता सुदृष्टिश्च वर्त्तते स एव सर्वैः सत्कर्त्तव्योऽस्ति॥१॥

पदार्थः-जो (**अपात्**) पैरों से रहित (**इतः**) प्राप्त हुआ (**चित्रतमः**) अत्यन्त अद्भुत गुण, कर्म्म और स्वभाव वाला (**सुदानुः**) उत्तम दान वाला (**नः**) हम लोगों के लिये (**द्युमतीम्**) विद्या के प्रकाश वाली (**इन्द्रहूतिम्**) अत्यन्त ऐश्वर्य्य की प्रकाशिका (**पन्यसीम्**) प्रशंसा करने योग्य (**दैव्यस्य**) श्रेष्ठ गुण अथवा विद्वानों में हुए (**जनस्य**) मनुष्य की (**धीतिम्**) धारणा से युक्त बुद्धि को और (**महीम्**) महती वाणी को तथा (**यामन्**) चलते हैं जिसमें उस मार्ग में (**रातिम्**) दान को (**उत्, भर्षत्**) धारण करता (**उ**) और (**वनते**) सेवन करता है, वह विद्वान् मङ्गल करने वाला होता है॥१॥

भावार्थः-हे मनुष्यो! जिस यथार्थवक्ता विद्वान् की सब के ऊपर दया, विद्यादान, निष्कपटता और उत्तम दृष्टि वर्त्तमान है, वही सब से सत्कार करने योग्य होता है॥१॥

पुनर्मनुष्याः किं गृहीत्वा सेवेयुरित्याह॥

फिर मनुष्य क्या ग्रहण करके सेवा करें, इस विषय को कहते हैं॥

दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः।

एयमेनं देवहूतिर्ववृत्यान्मद्र्यग्इन्द्रमियमृच्यमाना॥ २॥

दूरात्। चित्। आ। वसतः। अस्य। कर्णा। घोषात्। इन्द्रस्य। तन्यति। ब्रुवाणः। आ। इयम्। एनम्। देवऽहूतिः। ववृत्यात्। मद्र्यक्। इन्द्रम्। इयम्। ऋच्यमाना॥ २॥

पदार्थः-(**दूरात्**) (**चित्**) अपि (**आ**) समन्तात् (**वसतः**) निवसतः (**अस्य**) (**कर्णा**) श्रोत्रे (**घोषात्**) सुशिक्षिताया वाचः (**इन्द्रस्य**) राज्ञः (**तन्यति**) शब्दायते (**ब्रुवाणः**) उपदिशन् (**आ**) (**इयम्**) वाक् (**एनम्**) विद्वांसम् (**देवहूतिः**) देवैर्विद्वद्भिः प्रशंसिता (**ववृत्यात्**) वर्त्तयेत् (**मद्र्यक्**) मत्सदृशः (**इन्द्रम्**) परमैश्वर्यम् (**इयम्**) (**ऋच्यमाना**) स्तूयमाना॥ २॥

अन्वयः-हे मनुष्या! यस्यास्येन्द्रस्य दूराच्चिद्वसतः कर्णा घोषाद्य आतन्यति या देवहूतिरियमेनमिन्द्रमाऽऽववृत्यादियमृच्यमाना यश्च मद्र्यग् ब्रुवाणस्तं ववृत्यात् तं ताञ्च यूयं सेवध्वम्॥ २॥

भावार्थः-हे मनुष्या! यस्यात्मा श्रोत्रद्वारा विद्यातृप्तो भवेद्यं सर्वा विद्यायुक्ता वाक् प्राप्नुयात् तमेव संसेव्य पूर्णां विद्यां प्राप्नुत॥ २॥

पदार्थः-हे मनुष्यो! जिस (**अस्य**) इस (**इन्द्रस्य**) राजा के (**दूरात्**) दूर से (**चित्**) भी (**वसतः**) निवास करते हुए के (**कर्णा**) दोनों कान (**घोषात्**) उत्तम प्रकार शिक्षित वाणी से जो (**आ, तन्यति**) अच्छे प्रकार शब्दित करता है और जो (**देवहूतिः**) विद्वानों से प्रशंसा की गई (**इयम्**) यह वाणी (**एनम्**) इस (**इन्द्रम्**) ऐश्वर्य्य से युक्त विद्वान् को (**आ**) चारों से (**ववृत्यात्**) वर्त्तित करे और (**इयम्**) यह (**ऋच्यमाना**) स्तुति की गई और जो (**मद्र्यक्**) मुझ सरीका (**ब्रुवाणः**) उपदेश करता हुआ उसको वर्त्ते, उसकी और उसकी आप लोग सेवा करो॥ २॥

भावार्थः-हे मनुष्यो! जिसका आत्मा श्रोत्रों के द्वारा विद्या से तृप्त होवे और जिसको सम्पूर्ण विद्या से युक्त वाणी प्राप्त होवे, उसी का उत्तम प्रकार सेवन करके पूर्ण विद्या को प्राप्त हूजिये॥ २॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः।

ब्रह्मा च गिरो दधिरे समस्मिन् महांश्च स्तोमो अधि वर्धदिन्द्रे॥ ३॥

तम्। वः। धिया। परमया। पुराऽजाम्। अजरम्। इन्द्रम्। अभि। अनूषि। अर्कैः। ब्रह्मा। च। गिरः। दधिरे। सम्। अस्मिन्। महान्। च। स्तोमः। अधि। वर्धत्। इन्द्रे॥ ३॥

पदार्थः-(**तम्**) (**वः**) युष्माकम् (**धिया**) प्रज्ञया कर्मणा वा (**परमया**) अत्युत्कृष्टयाऽत्युत्कृष्टेन वा (**पुराजाम्**) पूर्वजातम् (**अजरम्**) हानिरहितम् (**इन्द्रम्**) विद्युतम् (**अभि**) (**अनूषि**) स्तौमि (**अर्कैः**) सूर्यैः

(ब्रह्मा) वेदम् **(च)** **(गिरः)** वेदवाचः **(दधिरे)** दधति **(सम्)** **(अस्मिन्)** **(महान्)** **(च)** **(स्तोमः)** श्लाध्यगुणकर्मस्वभावः **(अधि)** **(वर्धत्)** वर्धते। अत्र व्यत्ययेन परस्मैपदम् **(इन्द्रे)** परमैश्वर्ये॥३॥

अन्वयः-हे विद्वांसो! यथा यूयं ब्रह्मा वः परमया धिया तं पुराजामजरमिन्द्रञ्च प्रशंसत तथाऽकैंरहमेनमभ्यनूषि। यथाऽस्मिन्निन्द्रे च महाँ स्तोमोऽधि वर्धद्यथा च भवन्तो विदुषां य गिरः सं दधिरे तथा वयमनुष्ठेयाम॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विद्वदुपदेशपुरुषार्थाभ्यां विद्युदादिविद्यायुक्तां प्रज्ञां स्वीकुर्वन्ति तेऽत्र श्लाघनीया भवन्ति॥३॥

पदार्थः-हे विद्वानो! जैसे तुम **(ब्रह्मा)** वेद की और **(वः)** आप लोगों की **(परमया)** अत्यन्त उत्तम **(धिया)** बुद्धि वा कर्म से **(तम्)** उस **(पुराजाम्)** पहिले प्रकट हुए **(अजरम्)** जीर्ण होने से रहित **(इन्द्रम्)** बिजुली की भी प्रशंसा करो, वैसे **(अर्कैः)** सूर्य्यों से मैं इसकी **(अभि, अनूषि)** स्तुति करता हूँ और जैसे **(च)** भी **(अस्मिन्)** इस **(इन्द्रे)** अत्यन्त ऐश्वर्य्य में **(च)** भी **(महान्)** बड़ा **(स्तोमः)** प्रशंसा करने योग्य गुण कर्म्म, और स्वभाव वाला **(अधि, वर्धत्)** बढ़ता है और जैसे आप विद्वानों की **(गिरः)** वेदवाणियों को **(सम्)** **(दधिरे)** उत्तम प्रकार धारण करते हैं, वैसे हम लोग अनुष्ठान करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वानों के उपदेश और पुरुषार्थ से बिजुली आदि की विद्यायुक्त बुद्धि की स्वीकार करते हैं, वे यहाँ स्तुति करने योग्य होते हैं॥३॥

अथ मनुष्याः किं वर्धयेयुरित्याह॥

अब मनुष्य क्या बढ़ावें, इस विषय को कहते हैं॥

वर्धा॒द्यं य॒ज्ञ उ॒त सोम॒ इन्द्रं॑ वर्धा॒द् ब्रह्म॑ गिर॑ उ॒क्था च॒ मन्म॑।
वर्धा॑हैनमुषसो॒ याम॑न्नु॒क्तोर्वर्धा॒न् मासा॑: श॒रदो॒ द्याव॒ इन्द्र॑म्॥४॥

वर्धा॑त्। यम्। य॒ज्ञः। उ॒त। सोम॑:। इन्द्र॑म्। वर्धा॑त्। ब्रह्म॑। गिर॑:। उ॒क्था॑। च॒। मन्म॑। वर्ध॑। अह॑। ए॒नम्। उ॒षस॑:। याम॑न्। अ॒क्तोः। वर्धा॑न्। मासा॑:। श॒रद॑:। द्याव॑:। इ॒न्द्र॑म्॥४॥

पदार्थः-(**वर्धात्**) वर्धयेत् **(यम्)** **(यज्ञः)** सत्सङ्गत्यादिस्वरूपः **(उत)** अपि **(सोमः)** प्रेरको विद्वान् **(इन्द्रम्)** विद्युदादिविद्याम् **(वर्धात्)** **(ब्रह्म)** धनम् **(गिरः)** वाचः **(उक्था)** प्रशंसनीयानि वचांसि **(च)** **(मन्म)** विज्ञानादि **(वर्ध)** **(अह)** **(एनम्)** **(उषसः)** प्रभातात् **(यामन्)** यान्ति यस्मिंस्तस्मिन् मार्गे **(अक्तोः)** रात्रेः **(वर्धान्)** वर्धयेरन् **(मासाः)** **(शरदः)** ऋतवः **(द्यावः)** प्रकाशयुक्ता दिवसाः प्रकाशा वा **(इन्द्रम्)** परमैश्वर्यम्॥४॥

अन्वयः-हे मनुष्या! यमिन्द्रं यज्ञ उत सोमो वर्धाद् ब्रह्म वर्धादुक्था मन्म गिरश्च वर्धाहैनमुषसोऽक्तोर्यामन् मासाः शरदो द्यावश्चेन्द्रं वर्धान् तेऽस्मान् वर्धयन्तु॥४॥

भावार्थः-हे मनुष्या! यथा विद्वत्सत्कारसङ्गतिमयो व्यवहारो विद्युदादिविद्यां परमैश्वर्य्यं पुष्कलमायुश्च वर्धयति तथैव यूयं सर्वाञ्छुभान् व्यवहारानहर्निशं वर्धयत॥४॥

पदार्थः-हे मनुष्यो! **(यम्)** जिस **(इन्द्रम्)** बिजुली आदि की विद्या को **(यज्ञः)** श्रेष्ठों की सङ्गति आदि स्वरूप और **(उत)** भी **(सोमः)** प्रेरणा करने वाला विद्वान् **(वर्धात्)** बढ़ावे और **(ब्रह्म)** धन को **(वर्धात्)** बढ़ावे तथा **(उक्था)** प्रशंसा करने योग्य वचनों और **(मन्म)** विज्ञानों और **(गिरः)** वाणियों को **(च)** भी **(वर्ध)** बढ़ावे और **(अह)** इसके अनन्तर **(एनम्)** इस **(उषसः)** प्रभात से और **(अक्तोः)** रात्रि से **(यामन्)** चलते हैं जिसमें उस मार्ग में **(मासाः)** महीने **(शरदः)** ऋतुयें और **(द्यावः)** प्रकाशयुक्त दिन वा प्रकाश **(इन्द्रम्)** अत्यन्त ऐश्वर्य को **(वर्धान्)** बढ़ावें, वे हम लोगों को बढ़ावें॥४॥

भावार्थः-हे मनुष्यो! जैसे विद्वानों का सत्कार और सङ्गतिस्वरूप व्यवहार, बिजुली आदि की विद्या को तथा अत्यन्त ऐश्वर्य्य और पूर्ण आयु को बढ़ाता है, वैसे ही आप लोग सम्पूर्ण श्रेष्ठ व्यवहारों को दिनरात्रि बढ़ाइये॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय।
महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु॥५॥१०॥

एव। जज्ञानम्। सहसे। असामि। ववृधानम्। राधसे। च। श्रुताय। महाम्। उग्रम्। अवसे। विप्र। नूनम्। आ। विवासेम। वृत्रऽतूर्येषु॥५॥

पदार्थः-(**एवा**) निश्चये। अत्र **निपातस्य चे**ति दीर्घः। **(जज्ञानम्)** विद्याविनयेषु जायमानम् **(सहसे)** बलाय **(असामि)** अतुलम् **(वावृधानन्)** वर्धमानम् **(राधसे)** असंख्यधनाय **(च)** **(श्रुताय)** अखिलविद्यानां कृतश्रवणाय **(महाम्)** महान्तम् **(उग्रम्)** तेजस्विनम् **(अवसे)** रक्षणाद्याय **(विप्र)** मेधाविन् **(नूनम्)** निश्चितम् **(आ)** समन्तात् **(विवासेम)** नित्यं परिचरेम **(वृत्रतूर्येषु)** शत्रुहिंसनीयेषु स- ामेषु॥५॥

अन्वयः-हे विप्र! असामि सहसे जज्ञानं राधसे श्रुताय च वावृधानं वृत्रतूर्येष्ववसे महामुग्रं वयं नूनमाऽऽविवासेम तमेवा त्वमपि सेवस्व॥५॥

भावार्थः-यदा मनुष्याः सर्वेषु शुभगुणकर्मस्वभावेषु प्रतिष्ठितं शूरवीरं विद्वांसं संसेव्य विद्यां गृहीत्वा बलादिकं वर्धेयुस्तर्हि ते किमुत्तमं कार्य्यं न साध्नुयुरिति॥५॥

अत्रेन्द्रविद्वदुत्तमप्रज्ञावाग्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टत्रिंशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे **(विप्र)** बुद्धियुक्त **(असामि)** उपमारहित को **(सहसे)** बल के लिये **(जज्ञानम्)** विद्या और विनयों में प्रकट हुए को **(राधसे)** असंख्य धनयुक्त के लिये **(श्रुताय)** सम्पूर्ण विद्याओं का किया श्रवण जिसने उसके लिये **(च)** भी **(वावृधानम्)** बढ़ते हुए को **(वृत्रतूर्येषु)** शत्रुओं में हिंसा करने योग्य

संग्रामों में **(अवसे)** रक्षण आदि के लिये **(महाम्)** बड़े **(उग्रम्)** तेजस्वी को हम लोग **(नूनम्)** निश्चित **(आ)** सब प्रकार से **(विवासेम)** नित्य सेवा करें उस **(एवा)** ही की आप भी सेवा करो॥५॥

भावार्थः-जब मनुष्य सम्पूर्ण श्रेष्ठ गुण, कर्म्म और स्वभावों में वर्त्तमान शूरवीर विद्वान् की सेवा कर और विद्या को ग्रहण करके बल आदि को बढ़ावें तो वे कौन सा उत्तम कार्य्य न सिद्ध कर सकें॥५॥

इस सूक्त में इन्द्र, विद्वान्, उत्तम बुद्धि और वाणी के गुण वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये

यह अड़तीसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकोनचत्वारिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। २, ३ निचृत्त्रिष्टुप्। ५ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विदुषा किं कर्त्तव्यमित्याह॥

अब पाँच ऋचा वाले उनचालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् को क्या करना चाहिये, इस विषय को कहते हैं॥

मन्द्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः।
अपा नस्तस्य सचनस्य देवेषा युवस्य गृणते गोअग्राः॥ १॥

मन्द्रस्य। कवेः। दिव्यस्य। वह्नेः। विप्रऽमन्मनः। वचनस्य। मध्वः। अपाः। नः। तस्य। सचनस्य। देव। इषः। युवस्य। गृणते। गोऽअग्राः॥ १॥

पदार्थः-(**मन्द्रस्य**) आनन्दत आनन्दयतः (**कवेः**) विदुषः (**दिव्यस्य**) कमनीयास्विच्छासु साधोः (**वह्नेः**) सकलविद्यानां वोढुरग्नेरिव (**विप्रमन्मनः**) विप्रस्य मन्म विज्ञानं यस्मिँस्तस्य (**वचनस्य**) (**मध्वः**) माधुर्य्यादिगुणोपेतस्य (**अपाः**) पाहि (**नः**) अस्मभ्यम् (**तस्य**) (**सचनस्य**) समवेतस्य (**देव**) परमविद्वन् (**इषः**) अन्नादीनिच्छा वा (**युवस्व**) संयोजय (**गृणते**) स्तुवते (**गोअग्राः**) गौर्वागग्रा उत्तमा यासु ताः॥ १॥

अन्वयः-हे देव! त्वं वह्नेः कवेर्दिव्यस्य मन्द्रस्य विप्रमन्मनो मध्वो वचनस्य व्यवहारमपास्तस्य सचनस्य गृणते गोअग्रा इषश्च नो युवस्व॥ १॥

भावार्थः-हे विद्वँस्त्वमेव प्रयत्नं विधेहि यतोऽस्मान् दिव्यं सुखं दिव्यविद्या दिव्यमैश्वर्यं चाप्नुयात्॥ १॥

पदार्थः-हे (**देव**) अत्यन्त विद्वन्! आप (**वह्नेः**) सम्पूर्ण विद्याओं के धारण करने वाले अग्नि के सदृश (**कवेः**) विद्वान् और (**दिव्यस्य**) सुन्दर इच्छाओं में श्रेष्ठ (**मन्द्रस्य**) आनन्दित होते और आनन्दित करते हुए (**विप्रमन्मनः**) विद्वान् का विज्ञान जिसमें उस (**मध्वः**) माधुर्य आदि गुण से युक्त (**वचनस्य**) वचन के व्यवहार का (**अपाः**) पालन करिये और (**तस्य**) उस (**सचनस्य**) सम्बद्ध हुए की (**गृणते**) स्तुति करते हुए के लिये (**गोअग्राः**) वाणी उत्तम जिनमें उन (**इषः**) अन्न आदि वा इच्छाओं को (**नः**) हम लोगों के लिये (**युवस्व**) संयुक्त कीजिये॥ १॥

भावार्थः-हे विद्वन्! आप ऐसा प्रयत्न करिये जिससे हम लोगों को दिव्य सुख, दिव्य विद्या और दिव्य ऐश्वर्य्य प्राप्त होवे॥ १॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः।

रुजदरुग्णं वि वलस्य सानुं पणींर्वचोभिरभि योधदिन्द्रः॥ २॥

अयम्। उशानः। परि। अद्रिम्। उस्राः। ऋतधीतिऽभिः। ऋतऽयुक्। युजानः। रुजत्। अरुग्णम्। वि। वलस्य। सानुम्। पणीन्। वचःऽभिः। अभि। योधत्। इन्द्रः॥ २॥

पदार्थः-(**अयम्**) (**उशानः**) कामयमानः (**परि**) सर्वतः (**अद्रिम्**) मेघम् (**उस्राः**) किरणान् (**ऋतधीतिभिः**) जलधारकैर्गुणैः (**ऋतयुक्**) य ऋतेन सत्येन युनक्ति (**युजानः**) धारयन् (**रुजत्**) भनक्ति (**अरुग्णम्**) रोगरहितम् (**वि**) (**वलस्य**) मेघस्य। **वल इति मेघनाम।** (निघं०१.१०) (**सानुम्**) शिखराकारं घनम् (**पणीन्**) प्रशंसनीयान् व्यवहारान् (**वचोभिः**) वचनैः (**अभि**) (**योधत्**) युध्यते (**इन्द्रः**) सूर्य्यः॥ २॥

अन्वयः-हे विद्वन्! यथाऽयमृतधीतिभिरुस्रा युजान इन्द्रोऽद्रिं परि रुजद्वलस्य सानुं हन्तुमभि वि योधत् तथर्तयुगुशानो वचोभिरुत्तमं जनमरुग्णं पणींश्च साध्नुहि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा सूर्यः स्वरश्मिभिर्भूमेर्जलमाकृष्य धृत्वा मेघाकारं हत्वा पृथिव्यां निपात्य सर्वान् व्यवहारान्त्साध्नोति तथैव विद्वद्भ्यः शुभा विद्या आकृष्य धृत्वोत्तमेषु विद्यार्थिषु वर्षित्वाऽविद्यां हत्वा विज्ञानेन धर्मार्थकाममोक्षव्यवहारान्निष्पादयत॥ २॥

पदार्थः-हे विद्वन्! जैसे (**अयम्**) यह (**ऋतधीतिभिः**) जल के धारण करने वाले गुणों से (**उस्राः**) किरणों को (**युजानः**) धारण करता हुआ (**इन्द्रः**) सूर्य्य (**अद्रिम्**) मेघ को (**परि, रुजत्**) विभाग करता है और (**वलस्य**) मेघ के (**सानुम्**) शिखर के आकार मेघ को नाश करने को (**अभि, वि, योधत्**) सब ओर से विशेष कर युद्ध करता है, वैसे (**ऋतयुक्**) सत्य से युक्त होने वाला (**उशानः**) कामना करता हुआ (**वचोभिः**) वचनों से उत्तम जनों को (**अरुग्णम्**) रोगरहित और (**पणीन्**) प्रशंसा करने योग्य व्यवहारों को सिद्ध कीजिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् जनो! जैसे सूर्य्य अपनी किरणों से भूमि से जल का आकर्षण कर धारण कर और मेघ के आकार का नाश करके पृथिवी के ऊपर गिराय सम्पूर्ण व्यवहारों को सिद्ध करता है, वैसे ही विद्वानों से श्रेष्ठ विद्याओं का आकर्षण कर, धारण करके उत्तम विद्यार्थियों में वर्षाय और अविद्या का नाश करके विज्ञान से धर्म्म, अर्थ काम और मोक्ष के व्यवहारों को सिद्ध करो॥ २॥

पुनर्विद्वांसः कथं वर्त्तेरिन्नित्याह॥

फिर विद्वान् जन कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

अयं द्योतयदुषो व्यृक्तून् दोषा वस्तोः शरदः इन्दुरिन्द्र।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार॥ ३॥

अयम्। द्योतयत्। अद्युतः। वि। अक्तून्। दोषा। वस्तोः। शरदः। इन्दुः। इन्द्र। इमम्। केतुम्। अदधुः। नु। चित्। अह्नाम्। शुचिऽजन्मनः। उषसः। चकार॥ ३॥

पदार्थः-(**अयम्**) (**द्योतयत्**) प्रकाशयति (**अद्युतः**) अप्रकाशकान् भूम्यादीन् (**वि**) (**अक्तून्**) रात्रीः (**दोषा**) प्रभातवेलाः (**वस्तोः**) दिनम् (**शरदः**) शरदादीन् ऋतून् (**इन्दुः**) आर्द्रीकरः (**इन्द्र**) सूर्यवद्वर्त्तमान (**इमम्**) (**केतुम्**) प्रज्ञाम् (**अदधुः**) दधतु (**नू**) क्षिप्रम्। अत्र **ऋचि तुनुघे**ति चेति दीर्घः। (**चित्**) अपि (**अह्नाम्**) दिनानाम् (**शुचिजन्मनः**) शुचे रवेर्जन्म यस्यास्तस्याः (**उषसः**) प्रभातवेलायाः (**चकार**) करोति॥३॥

अन्वयः-हे विद्वन्! यथाऽयमिन्दुः सूर्योऽद्युतोऽक्तून् दोषा वस्तोः शरदो वि द्योतयदह्नां चिच्छुचिजन्मन उषसः प्रादुर्भावं चकार तथेमं केतुं द्योतय यथेमं प्रकाशमयं सूर्य्यमुषसोऽदधुस्तथा नू विद्याप्रकाशं धेहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यूयं यथा सूर्य्योऽन्येषाम्प्रकाशकानां भूम्यादीनां प्रकाशक आनन्दकरः पवित्रक्षणादीन्त्समयान्निर्निमीते तथा जनानामात्मनां प्रकाशकाः सन्तो विद्यावृद्धिकराणि कर्माणि निष्पादयत कर्माणि च प्रचारयत॥३॥

पदार्थः-हे (**इन्द्र**) सूर्य्य के सदृश वर्त्तमान विद्वन्! जैसे (**अयम्**) यह (**इन्दुः**) गीला करने वाला सूर्य्य (**अद्युतः**) नहीं प्रकाश करने वाले भूमि आदिकों को और (**अक्तून्**) रात्रियों को (**दोषा**) प्रभातकालों को (**वस्तोः**) दिन को (**शरदः**) शरद् आदि ऋतुओं को (**वि, द्योतयत्**) प्रकाशित करता है और (**अह्नाम्**) दिनों के (**चित्**) भी (**शुचिजन्मनः**) सूर्य्य से जन्म जिसका उस (**उषसः**) प्रभात वेला की प्रकटता को (**चकार**) करता है, वैसे (**इमम्**) इस (**केतुम्**) बुद्धि को प्रकाशित कीजिये और जैसे इस प्रकाशस्वरूप सूर्य्य को प्रभात वेलायें (**अदधुः**) धारण करें, वैसे (**नू**) शीघ्र विद्या के प्रकाश को धारण करिये॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् जनो! आप लोग जैसे सूर्य्य, अप्रकाशक भूमि आदि का प्रकाश करने और आनन्द करने वाला पवित्र क्षण आदि समयों का निर्म्माण करता है, वैसे मनुष्यों के आत्माओं के प्रकाशक हुए विद्या की वृद्धि करने वाले कर्म्मों को निष्पन्न कीजिये और कर्मों का प्रचार कराइये॥३॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर वह विद्वान् जन क्या करें, इस विषय को कहते हैं॥

अयं रोचयदुरुचो रुचानो३यं वासयद् व्यृ१तेन पूर्वीः।
अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः॥४॥

अयम्। रोचयत्। अरुचः। रुचानः। अयम्। वासयत्। वि। ऋतेन। पूर्वीः। अयम्। ईयते। ऋतयुक्ऽभिः। अश्वैः। स्वःऽविदा। नाभिना। चर्षणिऽप्राः॥४॥

पदार्थः-(**अयम्**) (**रोचयत्**) प्रकाशयति (**अरुचः**) प्रकाशरहिताँश्चन्द्रादीन् (**रुचानः**) प्रकाशयन् (**अयम्**) (**वासयत्**) (**वि**) (**ऋतेन**) जलेनेव सत्येन (**पूर्वीः**) प्रागुत्पन्नाः प्रजाः (**अयम्**) (**ईयते**) गच्छति (**ऋतयुग्भिः**) जलस्य योजकैः (**अश्वैः**) महद्भिराशुगामिभिः किरणैः (**स्वर्विदा**) स्वः सुखं विदन्ति येन तेन

(नाभिना) मध्याऽऽकर्षणादिबन्धनेन **(चर्षणिप्राः)** यो विद्यादिभिर्गुणैश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति॥४॥

अन्वयः-हे विद्वांसो! यथाऽयमरुचो रुचानः सूर्य्यः सर्वं जगद्रोचयत्, तथा विद्यया सर्वान् मनुष्यान् प्रकाशयत। यथायं सवितर्त्तेन पूर्वीर्वि वासयत्तथा सकलाः प्रजा सत्येन विज्ञानेन संयोजयत, यथायं रविर्ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः सन्नीयते तथा सत्ययोजकैर्महद्भिर्गुणैः सुखप्रदानेनात्माऽऽकर्षणेन वक्तृत्वेन श्रोतॄन् व्याप्नुवन्तो यत्र तत्र गच्छत॥४॥

भावार्थः-ये विद्वांसः सूर्य्यवत्प्रकाशात्मानो भूत्वाऽविद्यां विनाश्य जनान् विद्यया प्रकाशयन्ति सत्याचरणं प्रत्याकर्षन्ति ते धन्याः सन्ति॥४॥

पदार्थः-हे विद्वन् जनो! जैसे **(अयम्)** यह **(अरुचः)** प्रकाश से रहित चन्द्र आदिकों को **(रुचानः)** प्रकाशित करता हुआ सूर्य्य सम्पूर्ण जगत् को **(रोचयत्)** प्रकाशित करता है, वैसे विद्या से सब मनुष्यों को प्रकाशित करिये जैसे **(अयम्)** यह सूर्य्य **(ऋतेन)** जल के सदृश सत्य से **(पूर्वीः)** पहिले उत्पन्न हुए प्रजाओं को **(वि, वासयत्)** विशेष वसाता है, वैसे सम्पूर्ण प्रजाओं को सत्य विज्ञान से संयुक्त करिये और जैसे **(अयम्)** यह सूर्य्य **(ऋतयुग्भिः)** जल के युक्त करने वालों से **(अश्वैः)** महान् शीघ्रगामी किरणों और **(स्वर्विदा)** सुखको जानते हैं जिससे उस **(नाभिना)** मध्य के आकर्षण आदि बन्धन से **(चर्षणिप्राः)** विद्या आदि गुणों से मनुष्यों के प्रति व्याप्त होने वाला हुआ **(ईयते)** जाता है, वैसे सत्य के युक्त कराने वाले बड़े गुणों से सुख देने वाले आत्मा के आकर्षण से और वक्तृत्व से श्रोताओं को व्याप्त होते हुए जहाँ तहाँ जाइये॥४॥

भावार्थः-जो विद्वान् जन सूर्य्य के सदृश प्रकाशात्मा होकर और अविद्या का विनाश कर मनुष्यों को विद्या से प्रकाशित करते हैं और सत्य आचरण के प्रति आकर्षित करते हैं, वे धन्य हैं॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः।
अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि॥५॥११॥

नु। गृणानः। गृणते। प्रत्न। राजन्। इषः। पिन्व। वसुऽदेयाय। पूर्वीः। अपः। ओषधीः। अविषा। वनानि। गाः। अर्वतः। नॄन्। ऋचसे। रिरीहि॥५॥

पदार्थः-(**नू**) क्षिप्रम्। अत्र **ऋचि तुनुघे**ति चेति दीर्घः। **(गृणानः)** स्तुवन् **(गृणते)** स्तुवते **(प्रत्न)** प्राचीन दीर्घायुष्क **(राजन्)** विद्याविनयाभ्यां प्रकाशमान **(इषः)** अन्नादीन् **(पिन्व)** सेवस्व **(वसुदेयाय)** वसूनि द्रव्याणि देयानि येन तस्मै **(पूर्वीः)** पूर्णसुखान् **(अपः)** जलानि **(ओषधीः)** यवादीन् **(अविषा)** अविद्यमानं विषं येषु तानि **(वनानि)** जङ्गलानि **(गाः)** धेन्वादीन् **(अर्वतः)** अश्वादीन् **(नॄन्)** मनुष्यादीन् **(ऋचसे)** प्रशंसिताय कर्मणे **(रिरीहि)** याचस्व। **रिरीहीति याच्ञाकर्मा।** (निघं०३.१९)॥५॥

अन्वयः-हे राजन् प्रत्न! त्वं गृणते गृणानो वसुदेयाय पूर्वीरिष अप ओषधीरविषा वनानि गा अर्वतो नृनृचसे पिन्व नू रिरीहि॥५॥

भावार्थः-यो राजा सत्यवादी सत्यवक्तॄन् प्रीणाति विद्वद्भ्यो विद्याविनयौ प्राप्य सदैव प्रजासुखमिच्छति यज्ञेनोत्तमैः सुगन्धितफलपुष्पयुक्तैर्वृक्षैर्लतादिभिः सर्वान्त्सुखयन् जलौषधिवृक्षगोऽश्वमनुष्यसुखवृद्धये परमेश्वरं विदुषो वा याचते स चेहाऽमुत्राऽनन्तमानन्दं प्राप्नोतीति॥५॥

अत्रेन्द्रविद्वत्सूर्य्यराजगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥ इत्येकोनचत्वारिंशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(राजन्)** विद्या और विनय से प्रकाशमान **(प्रत्न)** प्राचीन तथा दीर्घ आयु युक्त आप **(गृणते)** स्तुति करते हुए के लिये **(गृणानः)** स्तुति करते हुए **(वसुदेयाय)** द्रव्य देने योग्य जिससे उसके लिये **(पूर्वीः)** पूर्ण सुख वाले **(इषः)** अन्न आदिकों को **(अपः)** जलों को **(ओषधीः)** यव आदिकों को **(अविषा)** नहीं विद्यमान विष जिनमें उन **(वनानि)** जंगलों को **(गाः)** धेनु आदिकों को **(अर्वतः)** अश्व आदिकों को और **(नॄन्)** मनुष्य आदिकों को **(ऋचसे)** प्रशंसित कर्म्म के लिये **(पिन्व)** सेवन करिये और **(नू)** शीघ्र **(रिरीहि)** याचना करिये॥५॥

भावार्थः-जो राजा सत्यवादी है और सत्य बोलने वालों को प्रसन्न करता है और विद्वानों से विद्या और विनय को प्राप्त होकर सदा ही प्रजा के सुख चाहता है तथा यज्ञ और उत्तम सुगन्धित फल पुष्प से युक्त वृक्षों से और लता आदिकों से सब को सुखयुक्त करता हुआ, जल, ओषधि वृक्ष, गौ, घोड़ा और मनुष्यों के सुख की वृद्धि के लिये परमेश्वर वा विद्वानों से याचना करता है, वही इस लोक और परलोक के अनन्त आनन्द को प्राप्त होता है॥५॥

इस सूक्त में इन्द्र, विद्वान्, सूर्य और राजा के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनचालीसवां सूक्त और ग्यारहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य चत्वारिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ३ विराट् त्रिष्टुप्। २ त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ भुरिक् पङ्क्तिः। ५ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः।

अथ राज्ञा किं कर्तव्यमित्याह॥

अब पाँच ऋचावाले चालीसवें सूक्त का प्रारम्भ किया जाता है, उसके प्रथम मन्त्र में राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

इन्द्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखाया।
उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः॥ १॥

इन्द्र। पिब। तुभ्यम्। सुतः। मदाय। अव। स्य। हरी इति। वि। मुचा। सखाया। उत। प्र। गाय। गणे। आ। निऽसद्य। अथ। यज्ञाय। गृणते। वयः। धाः॥ १॥

पदार्थः-(**इन्द्र**) राजन् (**पिब**) (**तुभ्यम्**) त्वदर्थम् (**सुतः**) निष्पादितः (**मदाय**) हर्षाय (**अव**) (**स्य**) निश्चिनुहि (**हरी**) संयुक्तावश्वाविव राजप्रजाजनौ (**वि**) (**मुचा**) यौ दुःखं विमुञ्चतस्तौ (**सखाया**) सुहृदौ सन्तौ (**उत**) (**प्र**) (**गाय**) स्तुहि (**गणे**) गणनीये विद्वत्सङ्घे (**आ**) (**निषद्य**) (**अथा**) अत्र **निपातस्य चे**ति दीर्घः। (**यज्ञाय**) यो यजति सत्येन सङ्गच्छते (**गृणते**) सत्यविद्याधर्मप्रशंसकाय (**वयः**) कमनीयमायुः (**धाः**) धेहि॥ १॥

अन्वयः-हे इन्द्र! यस्तुभ्यं मदाय सुतः सोमोऽस्ति तं पिब तेनाऽव स्योत हरी इव वि मुचा सखाया प्र गाय गणे निषद्याथा गृणते यज्ञाय वयश्चाऽऽधाः॥ १॥

भावार्थः-हे राजंस्त्वं सोमादिमहौषधिरसं पीत्वाऽरोगो भूत्वा सत्याऽसत्यं निर्णीय सर्वामित्राणि स्तुत्वा विद्वत्सभायां स्थित्वा सत्यं न्यायं प्रचार्य दीर्घब्रह्मचर्येण विद्याग्रहणाय सर्वा बालिका बालकांश्च प्रवर्त्य सर्वाः प्रजा दीर्घायुषः सम्पादय॥ १॥

पदार्थः-हे (**इन्द्र**) राजन्! जो (**तुभ्यम्**) आपके लिये (**मदाय**) हर्ष के अर्थ (**सुतः**) उत्पन्न किया गया सोमलता का रस है उसको (**पिब**) पीजिये उससे (**अव, स्य**) विनाश को अन्त करिये अर्थात् निश्चित रहिये और (**उत**) भी (**हरी**) संयुक्त घोड़ों के सदृश वर्त्तमान राजा और प्रजाजन (**वि, मुचा**) जो कि दुःख का त्याग करने वाले (**सखाया**) मित्र होते हुए हैं उनकी (**प्र, गाय**) स्तुति करिये और (**गणे**) गणना करने योग्य विद्वानों के समूह में (**निषद्य**) स्थित होकर (**अथा**) इसके अनन्तर (**गृणते**) सत्यविद्या और धर्म की प्रशंसा करने वाले के लिये तथा (**यज्ञाय**) सत्य से संयुक्त होने वाले के लिये (**वयः**) कामना करने योग्य अवस्था को (**आ**) सब प्रकार से (**धाः**) धारण कीजिये॥ १॥

भावार्थः-हे राजन्! आप सोमलता आदि बड़ी ओषधियों के रस का पान कर, रोगरहित होकर, सत्य और असत्य का निर्णय कर, सब मित्रों की स्तुति करके, विद्वानों की सभा में स्थित होकर और सत्य, न्याय का प्रचार करके, दीर्घ ब्रह्मचर्य्य से विद्याग्रहण के लिये सम्पूर्ण बालिका और बालकों को प्रवृत्त कराके सम्पूर्ण प्रजाओं को अधिक अवस्था वाली करिये॥१॥

अथ नरैः किं भोक्तव्यं किं च पेयमित्याह॥

अब मनुष्यों को क्या खाना और क्या पीना चाहिये, इस विषय को कहते हैं॥

अस्य॑ पिब॒ यस्य॑ जज्ञा॒न इ॑न्द्र॒ मदा॑य॒ क्रत्वे॒ अपि॑बो विरप्शिन्।
तमु॑ ते॒ गावो॒ नर॒ आपो॒ अद्रि॑रिन्दु॑ꣳ सम॑ह्यन् पी॒तये॒ सम॑स्मै॥२॥

अस्य॑। पि॒ब॒। यस्य॑। ज॒ज्ञा॒नः॒। इ॒न्द्र॒। मदा॑य। क्रत्वे॑। अपि॑बः। विऽर॒प्शि॒न्। तम्। ऊँ॒ इति॑। ते॒। गावः॑। नरः॑। आपः॑। अद्रिः॑। इन्दु॑म्। सम्। अ॒ह्य॒न्। पी॒तये॑। सम्। अ॒स्मै॒॥२॥

पदार्थः-(**अस्य**) (**पिब**) (**यस्य**) (**जज्ञानः**) जायमानः (**इन्द्र**) राजन् (**मदाय**) आनन्दप्रदाय (**क्रत्वे**) प्रज्ञानाय (**अपिबः**) (**विरप्शिन्**) महान् (**तम्**) (**उ**) (**ते**) तव (**गावः**) किरणा इव (**नरः**) नेतारः (**आपः**) जलानि (**अद्रिः**) मेघः (**इन्दुम्**) जलम् (**सम्**) (**अह्यन्**) व्याप्नुवन् (**पीतये**) पानाय (**सम्**) (**अस्मै**)॥२॥

अन्वयः-हे विरप्शिन्निन्द्र! यस्यास्य मदाय क्रत्वे रसमपिबस्तस्य रसं त्वं पुनर्जज्ञानः पिब। यस्य ते गावो नर आपोऽद्रिरिन्दुं तमु प्राप्नुवन्ति, अस्मै पीतये समह्यन्तसँस्त्वं सम्पिब॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! येन भुक्तेन पीतेन बुद्धिबले वर्धेयातां तं भुङ्क्ष्व पिब भोजय पायय च तस्य पानं मा कुर्या न कारयेर्येन बुद्धिभ्रंशः स्यात्॥२॥

पदार्थः-हे (**विरप्शिन्**) बड़े गुण से विशिष्ट (**इन्द्र**) राजन्! (**यस्य**) जिस (**अस्य**) इसके (**मदाय**) आनन्द देने वाले (**क्रत्वे**) प्रज्ञान के लिये रस को (**अपिबः**) पान किया उस रस को आप फिर (**जज्ञानः**) प्रसिद्ध होते हुए (**पिब**) पान करिये और जिन (**ते**) आपके (**गावः**) किरणों के सदृश (**नरः**) मनुष्य और (**आपः**) जल और (**अद्रिः**) मेघ (**इन्दुम्**) जल को जैसे वैसे (**तम्, उ**) उसको ही प्राप्त होते हैं और (**अस्मै**) इस (**पीतये**) पान के लिये (**सम्, अह्यन्**) अच्छे प्रकार व्याप्त होते हुए आप (**सम्**) उत्तम प्रकार पान करिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जिस भोजन और पान से बुद्धि और बल बढ़े उसका भोजन और उसका पान करिए और उसका भोजन और पान कराइये और उसका पान न करिये और न कराइये जिससे बुद्धिभ्रंश होवे॥२॥

पुना राजा राजजनाश्च किं कुर्युरित्याह॥

फिर राजा और राजा के जन क्या करें, इस विषय को कहते हैं॥

समि॑द्धे अ॒ग्नौ सु॒त इ॑न्द्र॒ सोम॒ आ त्वा॑ वहन्तु हर॑यो॒ वहि॑ष्ठाः।
त्वा॒य॒ता मन॑सा जोहवी॒मीन्द्रा या॑हि सुवि॒ताय॑ म॒हे न॑:॥ ३॥

सम्ऽइ॑द्धे। अ॒ग्नौ। सु॒ते। इ॒न्द्र॒। सोमे॑। आ। त्वा॒। व॒ह॒न्तु॒। हर॑यः। वहि॑ष्ठाः। त्वा॒ऽय॒ता। मन॑सा। जो॒ह॒वी॒मि॒। इन्द्र॑। आ। या॒हि॒। सु॒वि॒ताय॑। म॒हे। न॒:॥ ३॥

पदार्थः-(**समिद्धे**) सम्यक् प्रदीप्ते (**अग्नौ**) पावके (**सुते**) निष्पन्ने (**इन्द्र**) परमैश्वर्यप्रद (**सोमे**) उक्ते महौषधिरसे (**आ**) (**त्वा**) त्वाम् (**वहन्तु**) प्रापयन्तु (**हरयः**) अश्वा इव मनुष्याः (**वहिष्ठाः**) अतिशयेन वोढारः (**त्वायता**) त्वां प्राप्तेन (**मनसा**) विज्ञानेन (**जोहवीमि**) भृशमाह्वयामि (**इन्द्र**) दुःखदारिद्र्यविदारक (**आ**) (**याहि**) समन्तादागच्छ (**सुविताय**) प्रेरणायै (**महे**) महते (**नः**) अस्मान्॥ ३॥

अन्वयः-हे इन्द्र! वहिष्ठा हरयो समिद्धेऽग्नौ सुते सोमे त्वा त्वामाऽऽवहन्तु। हे इन्द्र! यं त्वायता मनसाऽहं त्वां जोहवीमि स त्वं महे सुविताय न आ याहि॥ ३॥

भावार्थः-हे राजन्! त्वमुत्तमैर्मनुष्यैस्सह वैद्यान् सुपरीक्ष्योत्तमान् रसानन्नानि च सम्पाद्य भुक्त्वैक्यमतं कृत्वा प्रजाजनान् रक्षित्वा महदैश्वर्यं प्राप्याऽस्मानपि श्रीमतः सम्पादय॥ ३॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के देने वाले (**वहिष्ठाः**) अतिशय प्राप्त कराने वाले (**हरयः**) घोड़ों के सदृश मनुष्य (**समिद्धे**) उत्तम प्रकार प्रदीप्त (**अग्नौ**) अग्नि में और (**सुते**) उत्पन्न हुए (**सोमे**) बड़ी औषधी के रस में (**त्वा**) आपको (**आ, वहन्तु**) सब प्रकार से प्राप्त करावें और हे (**इन्द्र**) दुःख दारिद्र्य के विदारने वाले! जिन (**त्वायता**) आपको प्राप्त हुए (**मनसा**) विज्ञान से मैं आपको (**जोहवीमि**) अत्यन्त पुकारता हूँ वह आप (**महे**) बड़ी (**सुविताय**) प्रेरणा के लिये (**नः**) हम लोगों को (**आ, याहि**) सब प्रकार से प्राप्त हूजिये॥ ३॥

भावार्थः-हे राजन्! आप उत्तम मनुष्यों के साथ वैद्यों की उत्तम प्रकार परीक्षा कर, उत्तम रसों और अन्नों को सम्पन्न कर उनका भोजन कर, एकमत कर और प्रजाजनों की रक्षा करके अत्यन्त ऐश्वर्य्य को प्राप्त होकर हम लोगों को भी धनयुक्त करिये॥ ३॥

पुना राजादिभिः किं कर्त्तव्यमित्याह॥

फिर राजा आदिकों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ या॑हि॒ शश्व॑दुश॒ता य॑या॒थेन्द्र॑ म॒हा मन॑सा सोम॒पेय॑म्।
उप॒ ब्रह्मा॑णि शृणव इ॒मा नोऽथा॑ ते य॒ज्ञस्त॒न्वे३॑ वयो॑ धात्॥ ४॥

आ। या॒हि॒। शश्व॑त्। उ॒श॒ता। य॒या॒थ॒। इन्द्र॑। म॒हा। मन॑सा। सो॒म॒ऽपेय॑म्। उप॑। ब्रह्मा॑णि। शृ॒ण॒वः॒। इ॒मा। नः॒। अथ॑। ते॒। य॒ज्ञः। त॒न्वे॑। वयः॑। धा॒त्॥ ४॥

पदार्थः-(**आ**) (**याहि**) आगच्छ (**शश्वत्**) निरन्तरम् (**उशता**) कामयमानेन विदुषा सह (**ययाथ**) गच्छ (**इन्द्र**) परमधनप्रद (**महा**) महता (**मनसा**) विज्ञानयुक्तेन चित्तेन (**सोमपेयम्**) सोमश्चासौ पेयश्च तम्

(उप) (ब्रह्माणि) धनानि वेदान् वा **(शृणवः)** शृणुयाः **(इमा)** इमानि **(नः)** अस्माकम् **(अथा)** अनन्तरम्। अत्र **निपातस्य चे**ति दीर्घः। **(यज्ञः)** सद्विद्याव्यवहारवर्धको व्यवहारः **(तन्वे)** शरीराय **(वयः)** जीवनम् **(धात्)** दधाति॥४॥

अन्वयः- हे इन्द्र! यो यज्ञो नस्ते च तन्वे वयो धात्तेनाथेमा ब्रह्माणि त्वं महा मनसोशता शृणवः शश्वद्ययाथ सोमपेयं पातुमुपायाहि॥४॥

भावार्थः-हे विद्वांसो राजादयो जना! यूयं विद्वद्भिः सह सङ्गत्य बुद्धिबलवर्द्धकावाहारविहारौ सदा कृत्वा परस्परं विचार्य्य ब्रह्मचर्यादिनाऽऽयुर्वर्द्धयत येन सर्वे महाशया आप्ता भवेयुः॥४॥

पदार्थः-हे **(इन्द्र)** अत्यन्त धन के देने वाले! जो **(यज्ञः)** सद्विद्या और व्यवहार को बढ़ाने वाला व्यवहार **(नः)** हम लोगों के और **(ते)** आपके **(तन्वे)** शरीर के लिये **(वयः)** जीवन को **(धात्)** धारण करता है उससे **(अथा)** इसके अनन्तर **(इमा)** इन **(ब्रह्माणि)** धनों को वेदों को आप **(महा)** बड़े **(मनसा)** विज्ञानयुक्त चित्त से **(उशता)** कामना करते हुए विद्वान् के साथ **(शृणवः)** सुनिये और **(शश्वत्)** निरन्तर **(ययाथ)** प्राप्त हूजिये तथा **(सोमपेयम्)** पीने योग्य सोमलता के रस को पीने के लिये **(उप, आ, याहि)** समीप प्राप्त हूजिये॥४॥

भावार्थः-हे विद्वान् राजा आदि जनो! आप लोग विद्वानों के साथ मेल कर, बुद्धि और बल के बढ़ाने वाले आहार और विहार को कर, परस्पर विचार करके ब्रह्मचर्य्य आदि से अवस्था को बढ़ावें, जिससे सब महाशय आप्त होवें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यदि॑न्द्र दि॒वि पार्ये॒ यदृ॒धग्यद्वा॒ स्वे सद॑ने॒ यत्र॒ वासि॑।
अतो॑ नो य॒ज्ञमव॑से नि॒युत्वा॑न् स॒जोषा॑: पाहि गिर्वणो म॒रुद्भि॑:॥५॥१२॥

यत्। इ॒न्द्र॒। दि॒वि। पार्ये॑। यत्। ऋ॒धक्। यत्। वा॒। स्वे। सद॑ने। यत्र॑। वा॒। असि॑। अतः॑। नः॒। य॒ज्ञम्। अव॑से। नि॒युत्वा॑न्। स॒ऽजोषाः॑। पा॒हि॒। गि॒र्व॒णः॒। म॒रुत्ऽभिः॑॥५॥

पदार्थः-**(यत्)** **(इन्द्र)** विद्वन् **(दिवि)** कमनीये **(पार्ये)** पालयितव्ये राज्ये **(यत्)** **(ऋधक्)** यथार्थम् **(यत्)** **(वा)** **(स्वे)** स्वकीये **(सदने)** स्थाने **(यत्र)** **(वा)** **(असि)** **(अतः)** **(नः)** अस्माकम् **(यज्ञम्)** सत्कर्त्तव्यं न्यायव्यवहारम् **(अवसे)** रक्षणाद्याय **(नियुत्वान्)** नियन्तेश्वर इव। **नियुत्वानितीश्वरनाम।** (निघं०२.२१) **(सजोषाः)** समानप्रीतिसेवी **(पाहि)** **(गिर्वणः)** सुशिक्षवाचा स्तुत **(मरुद्भिः)** उत्तमैर्मनुष्यैः॥५॥

अन्वयः-हे गिर्वण इन्द्र! यत्पार्ये दिवि यदृधग्यद्वा स्वे सदने यत्र वा त्वमसि। अतो नोऽवसे नियुत्वानिव सजोषाः सन्मरुद्भिः सह यज्ञं पाहि॥५॥

भावार्थः-हे राजंस्त्वया सदैव राष्ट्रसंरक्षणं सत्यप्रचारः स्वात्मवत्सर्वेषां ज्ञानमीश्वरवत्पक्षपातं विहाय महाशयैर्धार्मिकैः सभ्यैः सह प्रजापालनं सततं क्रियतामिति॥५॥

अत्रेन्द्रसोमौषधिराजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चत्वारिंशत्तमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे (**गिर्वणः**) उत्तम शिक्षित वाणी से स्तुति किये गये (**इन्द्र**) विद्वन्! (**यत्**) जो (**पार्ये**) पालन करने योग्य राज्य में (**दिवि**) कामना करने योग्य में (**यत्**) जो (**ऋधक्**) यथार्थ और (**यत्**) जो (**वा**) वा (**स्वे**) अपने (**सदने**) स्थान में (**यत्र**) जहाँ (**वा**) वा आप (**असि**) हो (**अतः**) इस कारण से (**नः**) हम लोगों के (**अवसे**) रक्षण आदि के लिये (**नियुत्वान्**) नियत करने वाले ईश्वर के सदृश (**सजोषाः**) तुल्य प्रीति के सेवन करने वाले हुए (**मरुद्भिः**) उत्तम मनुष्यों के साथ (**यज्ञम्**) सत्कार करने योग्य न्याय व्यवहार की (**पाहि**) रक्षा कीजिये॥५॥

भावार्थः-हे राजन्! आपको चाहिये कि सदा ही राज्य का उत्तम प्रकार रक्षण, सत्य का प्रचार और अपने सदृश सब का ज्ञान और ईश्वर के सदृश पक्षपात का त्याग करके महाशय धार्म्मिक श्रेष्ठ जनों के साथ प्रजा का पालन निरन्तर करें॥५॥

इस सूक्त में इन्द्र, सोम, ओषधि, राजा और प्रजा के कृत्य का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चालीसवाँ सूक्त और बारहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्यैकचत्वारिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। २, ३,४ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राज्ञा किं कर्त्तव्यमित्याह॥

अब पाँच ऋचावाले एकतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा को क्या करना चाहिये, इस विषय को कहते हैं॥

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः।
गावो न वज्रिन्त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम्॥ १॥

अहेळमानः। उप। याहि। यज्ञम्। तुभ्यम्। पवन्ते। इन्दवः। सुतासः। गावः। न। वज्रिन्। स्वम्। ओकः। अच्छ। इन्द्र। आ। गहि। प्रथमः। यज्ञियानाम्॥ १॥

पदार्थः-(**अहेळमानः**) सत्कृतः (**उप**) (**याहि**) समीपमागच्छ (**यज्ञम्**) आहारविहाराख्यम् (**तुभ्यम्**) (**पवन्ते**) पवित्रीकुर्वन्ति (**इन्दवः**) सोमलताद्युदकादीनि (**सुतासः**) निष्पादिताः (**गावः**) धेनवः (**न**) इव (**वज्रिन्**) शस्त्रास्त्रधारिन् (**स्वम्**) स्वकीयम् (**ओकः**) निवासस्थानम् (**अच्छ**) सम्यक् (**इन्द्र**) परमैश्वर्यप्रद (**आ**) (**गहि**) आगच्छ (**प्रथमः**) आदिमः (**यज्ञियानाम्**) यज्ञं सम्पालितुमर्हाणाम्॥ १॥

अन्वयः-हे वज्रिन्निन्द्र! यज्ञियानां प्रथमोऽहेळमानो यं यज्ञं तुभ्यं सुतास इन्दवः पवन्ते तमुप याहि गावो न स्वमाकोऽच्छागहि॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! प्रजाजनैरुत्तमगुणयोगात् सर्वतः सत्कृतः सन् राज्यपालनाख्यं व्यवहारं यथावत्प्राप्नुहि। यथा धेनवः स्ववत्सान्त्स्वकीयस्थानानि च प्राप्नुवन्ति तथा प्रजापालनाय विनयं याहि॥ १॥

पदार्थः-हे (**वज्रिन्**) शस्त्र और अस्त्र को धारण करने और (**इन्द्र**) अत्यन्त ऐश्वर्य्य के देने वाले (**यज्ञियानाम्**) यज्ञ का पालन करने के योग्यों का (**प्रथमः**) पहिला (**अहेळमानः**) सत्कार किया गया जिस (**यज्ञम्**) आहार-विहार नामक यज्ञ को (**तुभ्यम्**) आपके लिये और (**सुतासः**) उत्पन्न किये गये (**इन्दवः**) सोमलता आदि के जल (**पवन्ते**) पवित्र करते हैं उसके (**उप, याहि**) समीप आइये और (**गावः**) गौवें (**न**) जैसे (**स्वम्**) अपने (**ओकः**) निवासस्थान को वैसे (**अच्छ, आ, गहि**) अच्छे प्रकार सब ओर से प्राप्त हूजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! प्रजाजनों से उत्तम गुणों के योग के कारण सब से सत्कार किये गये राज्य-पालन नामक व्यवहार को यथावत् प्राप्त हूजिये और जैसे गौवें अपने बछड़े और स्थानों को प्राप्त होती हैं, वैसे प्रजा के पालन के लिये विनय को प्राप्त हूजिये॥ १॥

पुनस्ते किं कुर्य्युरित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

या ते॑ काकुत् सुकृ॑ता॒ या वरि॑ष्ठा॒ यया॒ शश्व॒त् पिब॑सि॒ मध्व॑ ऊ॒र्मिम्।
तया॑ पाहि॒ प्र ते॑ अध्व॒र्युर॑स्था॒त् सं ते॒ वज्रो॑ वर्ततामिन्द्र गो॒व्युः॥ २॥

या। ते॒। काकुत्। सुऽकृ॑ता। या। वरि॑ष्ठा। यया॑। शश्व॑त्। पिब॑सि। मध्व॑:। ऊ॒र्मिम्। तया॑। पा॒हि॒। प्र। ते॒। अ॒ध्व॒र्यु:। अ॒स्था॒त्। सम्। ते॒। वज्र॑:। व॒र्त॒ता॒म्। इ॒न्द्र॒। गो॒व्यु:॥ २॥

पदार्थः-(**या**) (**ते**) तव (**काकुत्**) सुशिक्षिता वाक्। काकुरिति वाङ्नाम। (निघं०१.११) (**सुकृता**) सत्यभाषणादिशुभक्रियायुक्ता (**या**) (**वरिष्ठा**) अतिशयेनोत्तमा (**यया**) (**शश्वत्**) निरन्तरम् (**पिबसि**) (**मध्वः**) मधुरादिगुणयुक्तस्य (**ऊर्मिम्**) तरङ्गमिव (**तया**) (**पाहि**) रक्ष (**प्र**) (**ते**) तव (**अध्वर्युः**) आत्मनोऽध्वरमहिंसाव्यवहारं कामयमानः (**अस्थात्**) तिष्ठति (**सम्**) (**ते**) तव (**वज्रः**) शस्त्रास्त्रसमूहः (**वर्त्तताम्**) (**इन्द्र**) धर्मधर (**गव्युः**) गां पृथिवीराज्यमिच्छुः॥ २॥

अन्वयः-हे इन्द्र नरेश! या सुकृता या वरिष्ठा काकुद्यया त्वमूर्मिमिव मध्वो रसं शश्वत् पिबसि यया तेऽध्वर्युः प्रास्थात्। ते वज्रो संवर्त्ततां तया गव्युः सन् सर्वाः प्रजाः पाहि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राजा राजसभ्याश्च सुसंस्कृता विद्यायुक्ताः सत्भाषणोज्ज्वलिता वाचः प्राप्य ताभिः प्रजापालनादीन् व्यवहारान्सततं संसाध्नुयुः॥ २॥

पदार्थः-हे (**इन्द्र**) धर्म्म के धारण करने वाले मनुष्यों के स्वामिन्! (**ते**) आपकी (**या**) जो (**सुकृता**) सत्य भाषण आदि उत्तम किया से युक्त और (**या**) जो (**वरिष्ठा**) अतिशय उत्तम (**काकुत्**) उत्तम प्रकार शिक्षा की गई वाणी (**यया**) जिससे आप (**ऊर्मिम्**) तरंग को जैसे वैसे (**मध्वः**) मधुर आदि गुणों से युक्त के रस को (**शश्वत्**) निरन्तर (**पिबसि**) पान करते हो और जिससे (**ते**) आपका (**अध्वर्युः**) अपने अहिंसारूप व्यवहार की कामना करते हुए अच्छे प्रकार से (**प्र, अस्थात्**) स्थित होते हो और जिससे (**ते**) आपका (**वज्रः**) शस्त्र और अस्त्रों का समूह (**सम्, वर्त्तताम्**) उत्तम प्रकार वर्त्तमान होवे (**तया**) उससे (**गव्युः**) पृथिवी राज्य की इच्छा करने वाले हुए सम्पूर्ण प्रजाओं का (**पाहि**) पालन करिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा और राजा के सभासद् उत्तम प्रकार संस्कार की विद्या से युक्त, सत्यभाषण से उज्ज्वलित वाणियों को प्राप्त होकर उनसे प्रजापालन आदि व्यवहारों को निरन्तर सिद्ध करें॥ २॥

पुनस्ते किं कुर्य्युरित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

ए॒ष द्रु॒प्सो वृ॑ष॒भो वि॒श्वरू॑प॒ इन्द्रा॑य॒ वृष्णे॒ सम॑कारि॒ सोम॑:।
ए॒तं पि॑ब हरिव: स्थातरुग्र॒ यस्येशि॑षे प्र॒दिवि॒ यस्ते॒ अन्न॑म्॥ ३॥

एषः। द्रप्सः। वृषभः। विश्वरूपः। इन्द्राय। वृष्णे। सम्। अकारि। सोमः। एतम्। पिब। हरिऽवः। स्थातः। उग्र। यस्य। ईशिषे। प्रऽदिवि। यः। ते। अन्नम्॥ ३॥

पदार्थः-(**एषः**) (**द्रप्सः**) दुष्टानां विमोहनम् (**वृषभः**) सुखवर्षकः (**विश्वरूपः**) विविधस्वरूपः (**इन्द्राय**) परमैश्वर्यप्रापणाय (**वृष्णे**) बलादिगुणकराय (**सम्**) (**अकारि**) क्रियते (**सोमः**) महौषधिजन्यो रसः (**एतम्**) (**पिब**) (**हरिवः**) प्रशस्तमनुष्ययुक्त (**स्थातः**) यस्तिष्ठति तत्सम्बुद्धौ (**उग्र**) तेजस्विन् (**यस्य**) (**ईशिषे**) ईश्वरो भवसि (**प्रदिवि**) प्रकर्षेण कमनीये व्यवहारे (**यः**) (**ते**) तव (**अन्नम्**) अत्तव्यम्॥ ३॥

अन्वयः- हे हरिवः स्थातरुग्र नृप! यस्य ते तवैष द्रप्सो वृषभो विश्वरूपः सोमो वृष्ण इन्द्राय समकारि यः प्रदिव्यन्नं प्रापयत्येतं त्वं पिबाऽस्येशिषे॥ ३॥

भावार्थः-यस्य राज्ञो विविधा उत्तमा प्रबन्धा उत्तमान्यौषधानि उत्तमाः सेना धार्मिका विद्वांसोऽधिकारिणः सन्ति स एव सर्वां प्रतिष्ठां लभते॥ ३॥

पदार्थः-हे (**हरिवः**) अच्छे मनुष्यों से युक्त (**स्थातः**) स्थित होने वाले (**उग्र**) तेजस्विन् राजन्! (**यस्य**) जिस (**ते**) आपका (**एषः**) यह (**द्रप्सः**) दुष्टों का विमोह करना (**वृषभः**) सुख का वर्षाने वाला (**विश्वरूपः**) अनेक प्रकार के स्वरूप वाला (**सोमः**) बड़ी-बड़ी ओषधियों से उत्पन्न हुआ रस (**वृष्णे**) बल आदि गुण के करने और (**इन्द्राय**) अत्यन्त ऐश्वर्य्य को प्राप्त कराने वाले के लिये (**सम्, अकारि**) किया जाता है (**यः**) जो (**प्रदिवि**) अच्छे प्रकार सुन्दर व्यवहार में (**अन्नम्**) भोजन करने योग्य पदार्थ को प्राप्त कराता (**एतम्**) इस का आप (**पिब**) पान करिये और इसके (**ईशिषे**) स्वामी हूजिये॥ ३॥

भावार्थः-जिस राजा के अनेक प्रकार के उत्तम प्रबन्ध, उत्तम ओषधियाँ, उत्तम सेना और धार्मिक विद्वान् अदिकारी हैं, वही सम्पूर्ण प्रतिष्ठा को प्राप्त होता है॥ ३॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्चिकितुषे रणाय।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व॥ ४॥

सुतः। सोमः। असुतात्। इन्द्र। वस्यान्। अयम्। श्रेयान्। चिकितुषे। रणाय। एतम्। तितिर्वः। उप। याहि। यज्ञम्। तेन। विश्वाः। तविषीः। आ। पृणस्व॥ ४॥

पदार्थः-(**सुतः**) निष्पादितः (**सोमः**) महैश्वर्ययोगः (**असुतात्**) अनुत्पादितात् (**इन्द्र**) परमैश्वर्ययुक्त (**वस्यान्**) अतिशयेन वासकर्त्ता (**अयम्**) (**श्रेयान्**) अतिशयेन श्रेयःप्राप्तः (**चिकितुषे**) चिकित्सितुं विचारयितुमिष्टाय (**रणाय**) स-ामाय (**एतम्**) (**तितिर्वः**) शत्रूणां बलं तरित उल्लङ्घयितः (**उप**) (**याहि**) (**यज्ञम्**) सुसङ्गमनीयम् (**तेन**) (**विश्वाः**) समग्राः (**तविषीः**) बलयुक्ताः सेनाः (**आ**) (**पृणस्व**) समन्तात् सुखय॥ ४॥

अन्वयः-हे तितिर्व इन्द्र! योऽयं चिकितुषे रणाय श्रेयान् वस्यानसुतात् सोमः सुतोऽस्ति, एतं यज्ञं त्वमुप याहि तेन विश्वास्तविषीरा पृणस्व॥४॥

भावार्थः-ये राजानः स्वल्पायापि स-ामाय महतीं सामग्रीं सञ्चिन्वन्ति ते शत्रून् विजयमानाः सन्तः सर्वाः प्रजाः सततं सुखयितुमर्हन्ति॥४॥

पदार्थः-हे **(तितिर्वः)** शत्रुओं के बल को उल्लङ्घन करने वाले **(इन्द्र)** अत्यन्त ऐश्वर्य्य से युक्त! जो **(अयम्)** यह **(चिकितुषे)** विचार करने को इष्ट **(रणाय)** स-ाम के लिये **(श्रेयान्)** अतिशय कल्याण को प्राप्त **(वस्यान्)** अतिशय वास करने वाला **(असुतात्)** नहीं उत्पन्न किये गये पदार्थों से **(सोमः)** बड़े ऐश्वर्य्यों का योग **(सुतः)** उत्पन्न किया गया है **(एतम्)** इस **(यज्ञम्)** उत्तम प्रकार प्राप्त होने योग्य के आप **(उप, याहि)** समीप प्राप्त हूजिये (**तेन**) उससे **(विश्वाः)** सम्पूर्ण **(तविषीः)** बलयुक्त सेनाओं को **(आ, पृणस्व)** सब प्रकार से सुखी करिये॥४॥

भावार्थः-जो राजा छोटे भी स-ाम के लिये बड़ी सामग्री को इकट्ठी करते हैं, वे शत्रुओं को जीतते हुए सम्पूर्ण प्रजाओं को निरन्तर सुखी करने के योग्य हैं॥४॥

पुनः स कीदृशः सन् किं कुर्य्यादित्याह॥

फिर वह कैसा हुआ क्या करे, इस विषय को कहते हैं॥

ह्वया॑मसि॒ त्वेन्द्र॑ याह्यर्वाङ॑रं॒ ते॒ सोम॑स्त॒न्वे॑ भवाति।

शत॑क्रतो मा॒दय॑स्वा सु॒तेषु॒ प्रास्माँ अ॑व॒ पृत॑नासु॒ प्र वि॒क्षु॥५॥१३॥

ह्वया॑मसि। त्वा॒। आ। इ॒न्द्र॒। या॒हि॒। अ॒र्वाङ्। अर॑म्। ते॒। सोम॑ः। त॒न्वे॑। भ॒वा॒ति॒। शत॑क्रतो॒ इति॒ शत॑ऽक्रतो। मा॒दय॑स्व। सु॒तेषु॑। प्र। अ॒स्मान्। अ॒व॒। पृत॑नासु। प्र। वि॒क्षु॥५॥

पदार्थः-(**ह्वयामसि**) आह्वयामः **(त्वा)** त्वाम् **(आ)** **(इन्द्र)** सर्वतो रक्षक **(याहि)** गच्छ **(अर्वाङ्)** योऽर्वाग् गच्छति सः **(अरम्)** अलम्। अत्र वर्णव्यत्ययेन लस्य स्थाने रः। **(ते)** तव **(सोमः)** महौषध्यादिरसः **(तन्वे)** शरीराय **(भवाति)** भवेत् **(शतक्रतो)** असंख्यप्रज्ञ उत्तमकर्मन् वा **(मादयस्वा)** आनन्दाऽऽनन्दय वा। अत्र **संहितायामिति** दीर्घः। **(सुतेषु)** निष्पन्नेष्वैश्वर्येषु **(प्र)** **(अस्मान्)** **(अव)** रक्ष **(पृतनासु)** मनुष्येषु सेनासु वा। **पृतना इति मनुष्यनाम।** (निघं०२.३) **(प्र)** **(विक्षु)** प्रजासु॥५॥

अन्वयः-हे शतक्रतो इन्द्र! ते तन्वे यस्सोमोऽर्वाङ् प्र भवाति तं त्वं याहि। यन्त्वा वयमाह्वयामसि स त्वं सुतेष्वस्मान् प्राव पृतनासु विक्ष्वरं मादयस्वा॥५॥

भावार्थः-यो राजा स्वैश्वर्येण सर्वाः प्रजा न्यायेन रक्षति स प्रशंसितश्चिरायुरानन्दित आनन्दयिता च भवतीति॥५॥

अत्रेन्द्रराजसोमगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकचत्वारिंशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(शतक्रतो)** असङ्ख्य बुद्धियुक्त तथा उत्तम कर्म्म करने और **(इन्द्र)** सब प्रकार से रक्षा करने वाले **(ते)** आपके **(तन्वे)** शरीर के लिये जो **(सोमः)** बड़ी ओषधि आदि का रस **(अर्वाङ्)** नीचे चलने वाला **(प्र, भवति)** प्रभाव को प्राप्त होता है उसको आप **(याहि)** प्राप्त हूजिये और जिन **(त्वा)** आपको हम लोग **(आ, ह्वयामसि)** पुकारते हैं वह आप **(सुतेषु)** उत्पन्न हुए ऐश्वर्य्यों में **(अस्मान्)** हम लोगों की **(प्र, अव)** उत्तम प्रकार रक्षा करो और **(पृतनासु)** मनुष्यों वा सेनाओं में और **(विक्षु)** प्रजाओं में **(अरम्)** अच्छे प्रकार **(मादयस्वा)** आनन्द करो वा आनन्द कराओ॥५॥

भावार्थः-जो राजा अपने ऐश्वर्य्य से सम्पूर्ण प्रजाओं की न्याय से रक्षा करता है वह प्रशंसित, अधिक अवस्था वाला और आनन्दयुक्त वा आनन्द कराने वाला भी होता है॥५॥

इस सूक्त में इन्द्र, राजा और सोम के रस का गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकतालीसवाँ सूक्त और तेरहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य द्विचत्वारिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १ स्वराडुष्णिक्छन्दः। ऋषभः स्वरः। २ निचृदनुष्टुप्। ३ अनुष्टुप्। भुरिगनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ राजप्रजाजनाः परस्परं कथं वर्त्तेरन्नित्याह॥

अब चार ऋचा वाले बयालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा और प्रजाजन परस्पर कैसा वर्त्ताव करे, इस विषय को कहते हैं॥

प्रत्यस्मै॑ पिपीषते॒ विश्वा॑नि वि॒दुषे॑ भर।
अ॒र॒म्ऽग॒माय॒ जग्म॒येऽप॑श्चाद्ध्व॒ने॒ नरे॑॥ १॥

प्रति॑। अ॒स्मै॒। पिपीष॑ते। विश्वा॑नि। वि॒दुषे॑। भ॒र॒। अ॒र॒म्ऽग॒माय॑। जग्म॑ये। अप॑श्चात्ऽदध्वने। नरे॑॥ १॥

पदार्थः-(**प्रति**) (**अस्मै**) (**पिपीषते**) पातुमिच्छवे (**विश्वानि**) सर्वाण्युत्तमानि वस्तूनि (**विदुषे**) आप्ताय विपश्चिते (**भर**) धर (**अरङ्गमाय**) यो विद्यायां अरं पारं गच्छति तस्मै (**जग्मये**) विज्ञानाधिक्याय (**अपश्चाद्ध्वने**) उत्तमेषु व्यवहारेष्वग्रगामिने (**नरे**) नायकाय॥१॥

अन्वयः-हे विद्वन् राजंस्त्वं जग्मयेऽपश्चाद्ध्वनेऽरङ्गमाय पिपीषते विदुषेऽस्मै नरे विश्वानि भराऽयमपि तुभ्यमेतानि प्रति भरतु॥१॥

भावार्थः-यो राजा विद्वदर्थे सर्वं धनं सामर्थ्यं वा धरति ये च विद्वांसो राजादिहिताय प्रयतन्ते ते सर्वदोन्नता जायन्ते॥१॥

पदार्थः-हे विद्वन्! आप (**जग्मये**) विज्ञान की अधिकता के लिये (**अपश्चाद्दध्वने**) उत्तम व्यवहारों में आगे चलने तथा (**अरङ्गमाय**) विद्या के पार जाने और (**पिपीषते**) पान करने की इच्छा करने वाले (**विदुषे**) यथार्थवक्ता विद्वान् के लिये और (**अस्मै**) इस (**नरे**) अग्रणी मनुष्य के लिये (**विश्वानि**) सम्पूर्ण उत्तम वस्तुओं को (**भर**) धारण करिये और यह भी आपके लिये इनको (**प्रति**) धारण करे॥१॥

भावार्थः-जो राजा विद्वानों के लिये सम्पूर्ण धन वा सामर्थ्य को धारण करता है और जो विद्वान् राजा आदि के हित के लिये प्रयत्न करते हैं, वे सर्वदा उन्नत होते हैं॥१॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

एमे॑नं प्र॒त्येत॒न॒ सोमे॑भिः सोम॒पात॑मम्।
अम॑त्रेभिर्ऋ॒जी॒षिण॒मिन्द्रं॑ सु॒तेभि॒रिन्दु॑भिः॥ २॥

आ। ईम्। एनम्। प्रतिऽएतन। सोमेभिः। सोमऽपातमम्। अमत्रेभिः। ऋजीषिणम्। इन्द्रम्। सुतेभिः। इन्दुऽभिः॥ २॥

पदार्थः-(**आ**) समन्तात् (**ईम्**) सर्वतः (**एनम्**) राजानम् (**प्रत्येतन**) प्रतीतिं कुरुत (**सोमेभिः**) ऐश्वर्यैरोषधिगणैर्वा (**सोमपातमम्**) अतिशयेन सोमपातारम् (**अमत्रेभिः**) उत्तमैः पात्रैः (**ऋजीषिणम्**) ऋजूनां सरलानां धार्मिकानां जनानामीषितुं शीलम् (**इन्द्रम्**) ऐश्वर्यप्रदम् (**सुतेभिः**) निष्पादितैः (**इन्दुभिः**) आनन्दकरैरुदकैः॥ २॥

अन्वयः-हे मनुष्या! यूयं सुतेभिः सोमेभिरिन्दुभिरमत्रेभिः सोमपातममृजीषिणमेनमिन्द्रमीमा प्रत्येतन॥ २॥

भावार्थः-हे राजप्रजाजना! यूयमासेषु राजादिविद्वत्सु च विश्वासं कुरुत ते च युष्मासु विश्वसेयुरेवमुभयत्राऽऽनन्दो वर्धेत॥ २॥

पदार्थः-हे मनुष्यो! आप लोग (**सुतेभिः**) उत्पन्न किये गये (**सोमेभिः**) ऐश्वर्य्यों वा ओषधियों के समूहों से (**इन्दुभिः**) आनन्दकारक जलों से तथा (**अमत्रेभिः**) उत्तम पात्रों से (**सोमपातमम्**) अतिशय सोमरस के पीने वाले (**ऋजीषिणम्**) सरल धार्मिक जनों की इच्छा करने के स्वभाव वाले (**एनम्**) इस (**इन्द्रम्**) ऐश्वर्य्य के देने वाले राजा की (**ईम्**) सब ओर से (**प्रत्येतन**) प्रतीति करिये॥ २॥

भावार्थः-हे राजा और प्रजाजनो! आप लोग यथार्थवक्ता तथा राजा आदि विद्वानों में विश्वास करिये और वे आप लोगों में विश्वास करें, इस प्रकार दोनों और आनन्द बढ़े॥ २॥

पुनस्ते परस्परं किं कुर्युरित्याह॥

फिर वे परस्पर क्या करें, इस विषय को कहते हैं॥

यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ।
वेदा विश्वस्य मेधिरो धृषत् तन्तमिदेषते॥ ३॥

यदि। सुतेभिः। इन्दुऽभिः। सोमेभिः। प्रतिऽभूषथ। वेद। विश्वस्य। मेधिरः। धृषत्। तम्ऽतम्। इत्। आ। ईषते॥ ३॥

पदार्थः-(**यदी**) अत्र **निपातस्य चे**ति दीर्घः। (**सुतेभिः**) निष्पादितैः (**इन्दुभिः**) आनन्दकरैः (**सोमेभिः**) ऐश्वर्यैः (**प्रतिभूषथ**) (**वेदा**) जानाति। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**विश्वस्य**) सर्वस्य राज्यस्य (**मेधिरः**) सङ्गन्ता (**धृषत्**) दुष्टानां धर्षकः (**तन्तम्**) (**इत्**) एव (**आ**) (**ईषते**) प्राप्नोति। **ईषतीति गतिकर्मा।** (निघं०२.१४)॥ ३॥

अन्वयः-हे विद्वांसो! यो यो विश्वस्य मेधिरो धृषदेषते राजव्यवहारं वेदा तन्तमिद्यदी सुतेभिरिन्दुभिस्सोमेभिर्यूयं प्रतिभूषथ तर्ह्ययमपि युष्मान् सम्भूषेत्॥ ३॥

भावार्थः-य उत्तमानुत्तमान् जनान्त्सत्कुर्वन्ति ते सर्वाञ्छुभैर्गुणैरलं कुर्वन्ति॥ ३॥

पदार्थः-हे विद्वान् जनो! जो जो **(विश्वस्य)** सम्पूर्ण राज्य का **(मेधिरः)** मेल करने और **(धृषत्)** दुष्टों का दबाने वाला **(आ, ईषते)** प्राप्त होता और राजा के व्यवहार को **(वेदा)** जानता है **(तन्तम्, इत्)** उसी उसको **(यदी)** जो **(सुतेभिः)** उत्पन्न किये **(इन्दुभिः)** आनन्दकारक **(सोमेभिः)** ऐश्वर्य्यों से आप लोग **(प्रतिभूषथ)** सुशोभित कीजिये तो यह भी आप लोगों को उत्तम प्रकार शोभित करे॥३॥

भावार्थः-जो उत्तम-उत्तम मनुष्यों का सत्कार करते हैं, वे सबको श्रेष्ठ गुणों से शोभित करते हैं॥३॥

पुनर्मनुष्यैः कथं वर्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम्।
कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत्॥४॥१४॥

अस्मैऽअस्मै। इत्। अन्धसः। अध्वर्यो इति। प्र। भर। सुतम्। कुवित्। समस्य। जेन्यस्य। शर्धतः। अभिऽशस्तेः। अव। ऽस्परत्॥४॥

पदार्थः-**(अस्माअस्मै)** **(इत्)** एव **(अन्धसः)** अन्नादेः **(अध्वर्यो)** अहिंसक **(प्र)** **(भरा)** धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(सुतम्)** निष्पादितम् **(कुवित्)** महत् **(समस्य)** तुल्यस्य **(जेन्यस्य)** जेतुं योग्यस्य **(शर्धतः)** बलस्य **(अभिशस्तेः)** अभितः प्रशंसितस्य **(अवस्परत्)** पालयति॥४॥

अन्वयः-हे अध्वर्यो! त्वमस्माअस्मा अन्धसः समस्य जेन्यस्य शर्धतोऽभिशस्तेः कुवित्सुतं प्र भरा तेनेदस्मान् भवानवस्परत्॥४॥

भावार्थः-ये विद्वांसः सर्वार्थं सर्वानुत्तमान् पदार्थान्त्समर्पयन्ति यावत्सामर्थ्यं धरन्ति तावत्सर्वं परेषां रक्षणाय कुर्वन्ति ते सर्वदा भाग्यशालिनो गणनीया इति॥४॥

अत्रेन्द्रराजविद्वत्प्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विचत्वारिंशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अध्वर्य्यो)** नहीं हिंसा करने वाले आप! **(अस्माअस्मै)** इस इसके लिये **(अन्धसः)** अन्न आदि के **(समस्य)** तुल्य **(जेन्यस्य)** जीतने योग्य **(शर्धतः)** बल के और **(अभिशस्तेः)** चारों ओर से प्रशंसित **(कुवित्)** महान् **(सुतम्)** उत्पन्न किये गये को **(प्र, भरा)** धारण करिये इससे **(इत्)** ही हम लोगों का आप **(अवस्परत्)** पालन करते हैं॥४॥

भावार्थः-जो विद्वान् सब के लिये सम्पूर्ण उत्तम पदार्थों को समर्पित करते हैं और जितने सामर्थ्य का धारण करते हैं, उतना सब औरों के रक्षण के लिये करते हैं, उन सब को भाग्यशाली गिनना चाहिये॥४॥ इस सूक्त में इन्द्र, राजा, विद्वान् और प्रजा के कृत्य का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बयालीसवाँ सूक्त और चौदहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य त्रिचत्वारिंशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रो देवता। १, २,३, ४ उष्णिक्छन्दः। ऋषभः स्वरः॥

अथ मनुष्याः किं कुर्य्युरित्याह॥

अब चार ऋचा वाले तैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्य क्या करें, इस विषय को कहते हैं॥

यस्य॒ त्यच्छम्ब॑रं॒ मदे॒ दिवो॑दासाय र॒न्धय॑ः।
अ॒यं स सोम॑ इन्द्र ते सु॒तः पिब॑॥ १॥

यस्य॑। त्यत्। शम्ब॑रम्। मदे॑। दिव॑ः॑दासाय। र॒न्धय॑ः। अ॒यम्। सः। सोम॑ः। इ॒न्द्र॒। ते॒। सु॒तः। पिब॑॥ १॥

पदार्थः-(**यस्य**) (**त्यत्**) तत् (**शम्बरम्**) मेघमिव (**मदे**) आनन्दकाय (**दिवोदासाय**) विज्ञानप्रदाय (**रन्धयः**) हिंसय (**अयम्**) (**सः**) (**सोमः**) बुद्धिबलवर्धको रसः (**इन्द्र**) परमैश्वर्यप्रापक (**ते**) तुभ्यम् (**सुतः**) निष्पादितः (**पिब**)॥ १॥

अन्वयः-हे इन्द्र! सोऽयं सोमस्ते सुतोऽस्ति तं त्वं पिब। शम्बरं सूर्य्य इव मदे दिवोदासाय दुःखप्रदं दुष्टं रन्धयः। यस्य कुकर्मानुष्ठान इच्छा भवेत् त्यत् तं रन्धयः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजादयो जना! यूयं धार्मिकाणां पीडकान् जनान् यथावद्दण्डयत वैद्यकशास्त्रोक्तरीत्या महौषधिरसं निष्पाद्य संसेव्यारोगा भूत्वा सर्वाः प्रजा अरोगाः कुरुत॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य्य के प्राप्त कराने वाले (**सः**) वह (**अयम्**) यह (**सोमः**) बुद्धि और बल का बढ़ाने वाला रस (**ते**) आपके लिये (**सुतः**) उत्पन्न किया गया है उसका आप (**पिब**) पान करिये और (**शम्बरम्**) मेघ को सूर्य्य जैसे वैसे (**मदे**) आनन्दकारक (**दिवोदासाय**) विज्ञान के देने वाले के लिये, दुःख के देने वाले दुष्ट का (**रन्धयः**) नाश करिये और (**यस्य**) जिसकी कुकर्म के अनुष्ठान में इच्छा होवे (**त्यत्**) उसका नाश करिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा आदि जनो! आप धार्म्मिक जनों को पीड़ा देने वाले मनुष्यों को यथावत् दण्ड दीजिये और वैद्यकशास्त्र में कही हुई रीति से बड़ी ओषधियों के रस को निकाल कर उसका सेवन कर रोगरहित होकर सम्पूर्ण प्रजाओं को रोगरहित करिये॥ १॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

यस्य॑ तीव्र॒सुत॑ं॒ मदं॒ मध्य॒मन्त॑ं च॒ रक्ष॑से।
अ॒यं स सोम॑ इन्द्र ते सु॒तः पिब॑॥ २॥

यस्य॑। ती॒व्र॒ऽसु॒त॑म्। मद॑म्। मध्य॑म्। अन्त॑म्। च॒। रक्ष॑से। अ॒यम्। सः। सोम॑ः। इ॒न्द्र॒। ते॒। सु॒तः। पिब॥ २॥

पदार्थः-(**यस्य**) (**तीव्रसुतम्**) तीव्रैस्तेजस्विभिः कर्मभिर्निष्पादितम् (**मदम्**) आनन्दकरम् (**मध्यम्**) मध्ये भवम् (**अन्तम्**) अवसानस्थम् (**च**) (**रक्षसे**) (**अयम्**) (**सः**) (**सोमः**) उत्तमौषधिरसः (**इन्द्र**) बलप्रद (**ते**) तुभ्यम् (**सुतः**) निष्पादितः (**पिब**)॥ २॥

अन्वयः-हे इन्द्र! त्वं यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे सोऽयं सोमस्ते सुतस्तं त्वं पिब॥ २॥

भावार्थः-हे विद्वन् राजँस्त्वं तादृशान्येवौषधानि प्रकटीकुरु यैः सर्वेषां सुखं वर्धेत॥ २॥

पदार्थः-हे (**इन्द्र**) बल के देने वाले (**यस्य**) जिसके (**तीव्रसुतम्**) तेजस्वियों से कर्म्मों द्वारा उत्पन्न किये (**मदम्**) आनन्द के देने वाले (**मध्यम्**) मध्य में हुए (**अन्तम्**) और अन्त में वर्त्तमान की (**च**) भी (**रक्षसे**) रक्षा करते हो (**सः**) वह (**अयम्**) यह (**सोमः**) उत्तम ओषधियों का रस (**ते**) आपके लिये (**सुतः**) उत्पन्न किया उसका आप (**पिब**) पान करिये॥ २॥

भावार्थः-हे विद्यायुक्त राजन्! आप वैसी ही ओषधियों को प्रकट करिये जिससे सब का सुख बढ़े॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहत हैं॥

यस्य॒ गा अ॒न्तरश्म॑नो॒ मदे॑ दृ॒ळ्हा अ॒वासृ॑जः।

अ॒यं स सोम॒ इन्द्र ते सु॒तः पिब॑॥ ३॥

यस्य॑। गाः। अ॒न्तः। अश्म॑नः। मदे॑। दृ॒ळ्हाः। अ॒व॒ऽअसृ॑जः। अ॒यम्। सः। सोम॑। इ॒न्द्र॒। ते॒। सु॒तः। पिब॑॥ ३॥

पदार्थः-(**यस्य**) (**गाः**) किरणान् (**अन्तः**) मध्ये (**अश्मनः**) मेघस्य (**मदे**) आनन्दाय (**दृळ्हाः**) ध्रुवान् (**अवासृजः**) अवसृजति (**अयम्**) (**सः**) (**सोमः**) रोगनाशकौषधिरसः (**इन्द्र**) सर्वरोगविदारक (**ते**) तुभ्यम् (**सुतः**) निर्मितः (**पिब**)॥ ३॥

अन्वयः-हे इन्द्र! यस्याश्मनोऽन्तर्दृळ्हा गा मदेऽवासृजस्तस्य सम्बन्धेन सोऽयं सोमस्ते सुतस्तं त्वं पिब॥ ३॥

भावार्थः-हे विद्वांसो! यस्य परमाणवो मेघमण्डलेऽपि स्थिता ओषधिभ्यस्तस्य निष्पादनं वैद्यकरीत्या कृत्वा तं सेवित्वाऽरोगा भवत॥ ३॥

पदार्थः-हे (**इन्द्र**) सम्पूर्ण रोगों के नाश करने वाले (**यस्य**) जिस (**अश्मनः**) मेघ के (**अन्तः**) मध्य में (**दृळ्हाः**) दृढ़ (**गाः**) किरणों को (**मदे**) आनन्द के लिये (**अवासृजः**) उत्पन्न करता है उसके

सम्बन्ध से **(सः)** वह **(अयम्)** यह **(सोमः)** रोगों को नाश करने वाला ओषधियों का रस **(ते)** आपके लिये **(सुतः)** निर्म्माण किया गया उसको आप **(पिब)** पीजिये॥३॥

भावार्थः-हे विद्वानो! जिनके परमाणु मेघमण्डल में भी वर्त्तमान हैं, ओषधियों से उसका निर्म्माण वैद्यक रीति से कर और उसका सेवन करके रोगरहित हूजिये॥३॥

पुनस्ते किं कुर्य्युरित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

यस्य॑ मन्दा॒नो अन्ध॑सो॒ माघो॑नं दधि॒षे शव॑ः।

अ॒यं स सोम॑ इन्द्र ते सु॒तः पिब॑॥४॥१५॥३॥

यस्य॑। म॒न्दा॒नः। अन्ध॑सः। माघो॑नम्। द॒धि॒षे। शव॑ः। अ॒यम्। सः। सोम॑ः। इ॒न्द्र॒। ते॒। सु॒तः। पिब॑॥४॥

पदार्थः-(**यस्य**) (**मन्दानः**) स्तुवन् आनन्दन् (**अन्धसः**) अन्नादेः (**माघोनम्**) बहुधनवन्तम् (**दधिषे**) धरसि (**शवः**) बलहेतुम् (**अयम्**) (**सः**) (**सोमः**) ऐश्वर्यकरो रसः (**इन्द्र**) वैद्यराज (**ते**) तुभ्यम् (**सुतः**) (**पिब**)॥४॥

अन्वयः-हे इन्द्र! यस्यान्धसो मन्दानस्त्वं माघोनं शवश्च दधिषे सोऽयं सोमस्ते सुतस्तं पिब॥४॥

भावार्थः-हे मनुष्या! येन बलबुद्धिसुखानि वर्धेरंस्तमेव रसमन्नं च सततं सेवध्वमिति॥४॥

अत्रेन्द्रसोमविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे षष्ठे मण्डले तृतीयोऽनुवाकस्त्रिचत्वारिंशत्तमं सूक्तं चतुर्थेष्टके सप्तमेऽध्याये पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) वैद्यराज! (**यस्य**) जिस (**अन्धसः**) अन्न आदि की (**मन्दानः**) स्तुति करते हुए आप (**माघोनम्**) बहुधनयुक्त को और (**शवः**) बल का हेतु उसको (**दधिषे**) धारण करते हो (**सः**) वह (**अयम्**) यह (**सोमः**) ऐश्वर्य करने वाला रस (**ते**) आपके लिये (**सुतः**) उत्पन्न किया गया उसको आप (**पिब**) पीजिये॥४॥

भावार्थः-हे मनुष्यो! जिससे बल, बुद्धि और सुख बढ़े, उसी रस और अन्न का निरन्तर सेवन करो॥४॥

इस सूक्त में इन्द्र, सोम और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जानी चाहिये॥

यह ऋग्वेद के छठे मण्डल में तृतीय अनुवाक, तेंतीसवाँ सूक्त और चौथे अष्टक में सातवें अध्याय में पन्द्रहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्विंशत्यृचस्य चतुश्चत्वारिंशत्तमस्य सूक्तस्य शंयुबार्हस्पत्य ऋषिः। इन्द्रो देवता। १, ३, ४ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः। २, ५ स्वराडुष्णिक्छन्दः। ऋषभः स्वरः। ६ आर्ची पङ्क्तिः। ७ भुरिक्पङ्क्तिः। ८ निचृत्पङ्क्तिः। ९, १२, १६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १०, ११, १३, २२ विराट्त्रिष्टुप्। १४, १५, १७, १८, २०, २४ निचृत्त्रिष्टुप्। १९, २१, २३ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजादिभिः किं कर्त्तव्यमित्याह॥

अब चौबीस ऋचा वाले चवालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा आदि को क्या करना चाहिये, इस विषय को कहते हैं॥

यो रयिवो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः॥ १॥

यः। रयिऽवः। रयिम्ऽतमः। यः। द्युम्नैः। द्युम्नवत्ऽतमः। सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः॥ १॥

पदार्थः-(**यः**) (**रयिवः**) प्रशस्ता रायो विद्यन्ते यस्य तत्सम्बुद्धौ (**रयिन्तमः**) अतिशयेन धनाढ्यः (**यः**) (**द्युम्नैः**) धनैर्यशोभिर्वा (**द्युम्नवत्तमः**) अतिशयेन यशोधनयुक्तः (**सोमः**) ऐश्वर्यम् (**सुतः**) निर्मितः (**सः**) (**इन्द्र**) धनन्धर (**ते**) तव (**अस्ति**) (**स्वधापते**) अन्नस्वामिन् (**मदः**) आनन्ददः॥१॥

अन्वयः-हे स्वधापते रयिव इन्द्र! यो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः सुतः सोमो मदस्तेऽस्ति स त्वया सत्कृत्या स्वीकर्त्तव्यः॥१॥

भावार्थः-हे राजादयो जना! युष्माभिः स्वकीयराज्ये बहवो धनाढ्या विद्वांसः सत्कृत्य रक्षणीया येन सततं श्रीर्वर्धेत॥१॥

पदार्थः-हे (**स्वधापते**) अन्न के स्वामिन् (**रयिवः**) अच्छे धनों वाले (**इन्द्र**) धन के धारण करने वाले! (**यः**) जो (**रयिन्तमः**) अत्यन्त धनाढ्य और (**यः**) जो (**द्युम्नैः**) धनों वा यशों से (**द्युम्नवत्तमः**) अत्यन्त यशोधन युक्त (**सुतः**) निर्म्माण किया गया (**सोमः**) ऐश्वर्य्य (**मदः**) आनन्द देने वाला (**ते**) आपका (**अस्ति**) है (**सः**) वह आपसे सत्कार करके स्वीकार करने योग्य है॥१॥

भावार्थः-हे राजा आदि जनो! आप लोगों को चाहिये कि अपने राज्य में बहुत धनाढ्य विद्वानों का सत्कार करके रक्षा करें, जिससे निरन्तर लक्ष्मी बढ़े॥१॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

यः शग्मस्तुविशग्म ते रायो दामा मतीनाम्।

सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः॥ २॥

यः। शग्मः। तुविऽशग्म। ते। रायः। दामा। मतीनाम्। सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः॥ २॥

पदार्थः-(**यः**) (**शग्मः**) शग्मं सुखं विद्यते यस्य सः। **अर्श आदिभ्योऽच्। शग्ममिति सुखनाम।** (निघं०३.६) (**तुविशग्म**) तुवि बहुविधानि शग्मानि सुखानि यस्य तत्सम्बुद्धौ (**ते**) तव (**रायः**) धनानि (**दामा**) दातुं योग्यः (**मतीनाम्**) मननशीलानाम् (**सोमः**) ऐश्वर्य्यसमूहः (**सुतः**) निष्पन्नः प्राप्तः (**सः**) (**इन्द्र**) महैश्वर्य्ययुक्त (**ते**) तव (**अस्ति**) (**स्वधापते**) अन्नादीनां स्वामिन् (**मदः**) आनन्दकरः॥ २॥

अन्वयः-हे तुविशग्म स्वधापत इन्द्र! यस्ते शग्मो रायो मतीनां दामा सुतो मदः सोमोऽस्ति स ते धर्मकीर्तिङ्करोतु॥ २॥

भावार्थः-ये मनुष्या धनाद्यैश्वर्येण धर्मविद्ये उन्नयन्ति त एव बहुसुखधना भवन्ति॥ २॥

पदार्थः-हे (**तुविशग्म**) अनेक प्रकार के सुखों वाले (**स्वधापते**) अन्न आदिकों के स्वामिन् (**इन्द्र**) अत्यन्त ऐश्वर्य्य से युक्त! (**यः**) जो (**ते**) आपका (**शग्मः**) सुखयुक्त (**रायः**) धनों को (**मतीनाम्**) विचारशीलों को (**दामा**) देने योग्य (**सुतः**) उत्पन्न किया गया (**मदः**) आनन्दकारक (**सोमः**) ऐश्वर्य्यों का समूह (**अस्ति**) है (**सः**) वह (**ते**) आपके धर्म्म की कीर्ति करने वाला हो॥ २॥

भावार्थः-जो मनुष्य धन आदि ऐश्वर्य्य से धर्म्म और विद्या की उन्नति करते हैं, वे ही बहुत सुख और धन वाले होते हैं॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः।

सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः॥ ३॥

येन। वृद्धः। न। शवसा। तुरः। न। स्वाभिः। ऊतिऽभिः। सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः॥ ३॥

पदार्थः-(**येन**) ऐश्वर्येण (**वृद्धः**) स्थविरः (**न**) इव (**शवसा**) बलेन (**तुरः**) हिंसकः (**न**) इव (**स्वाभिः**) स्वकीयाभिः (**ऊतिभिः**) रक्षाभिः (**सोमः**) ओषधिरसः (**सुतः**) निष्पादितः (**सः**) (**इन्द्र**) राजन् (**ते**) तव (**अस्ति**) (**स्वधापते**) स्वकीयपदार्थानां धर्त्तः (**मदः**) आनन्ददः॥ ३॥

अन्वयः-हे स्वधापत इन्द्र! त्वं येन शवसा वृद्धो न तुरो न स्वाभिरूतिभिर्मदः स सोमः सुतस्तेऽस्ति तं त्वं वर्धय॥ ३॥

भावार्थः-हे मनुष्या! येन पुरुषार्थेन विद्वांसो भूत्वा युवानोऽपि वृद्धा जायन्ते तं सततं संचिनुत॥३॥

पदार्थः-हे (**स्वधापते**) अपने पदार्थों के धारण करने वाले (**इन्द्र**) राजन्! आप (**येन**) जिस ऐश्वर्य से और (**शवसा**) बल से (**वृद्धः**) (**न**) जैसे वैसे वा (**तुरः**) हिंसक (**न**) जैसे वैसे (**स्वाभिः**) अपनी (**ऊतिभिः**) रक्षाओं से (**मदः**) आनन्द देने वाला (**सः**) वह (**सोमः**) ओषधियों का रस (**सुतः**) उत्पन्न किया गया (**ते**) आपका (**अस्ति**) है, उसकी आप वृद्धि कीजिये॥३॥

भावार्थः-हे मनुष्यो! जिस पुरुषार्थ से विद्वान् होकर युवा भी वृद्ध होते हैं, उसको निरन्तर सञ्चित कीजिये अर्थात् स- ह कीजिये॥३॥

पुनर्मनुष्यैः कः स्तोतव्योऽस्तीत्याह॥

फिर मनुष्यों को किसकी स्तुति करनी चाहिये, इस विषय को कहते हैं॥

त्यमु॑ वो॒ अप्र॑हणं गृणी॒षे शव॑स॒स्पति॑म्।

इन्द्रं॑ विश्वा॒साहं॒ नरं॒ मंहि॑ष्ठं वि॒श्वच॑र्षणिम्॥४॥

त्यम्। ऊँ इति॑। व॒रिति॑ वः। अप्र॑ऽहनम्। गृ॒णी॒षे। शव॑सः। पति॑म्। इन्द्र॑म्। वि॒श्व॒ऽसह॑म्। नर॑म्। मंहि॑ष्ठम्। वि॒श्व॒ऽच॑र्षणिम्॥४॥

पदार्थः-(**त्यम्**) तम् (**उ**) वितर्के (**वः**) युष्मान् (**अप्रहणम्**) योऽन्यायेन कञ्चिन्न प्रहन्ति (**गृणीषे**) स्तौमि। अत्र तिङ्व्यत्ययेनेट्स्थाने से। (**शवसः**) बलस्य सैन्यस्य (**पतिम्**) स्वामिनम् (**इन्द्रम्**) दुष्टाचारिशत्रुविनाशकम् (**विश्वासाहम्**) यो विश्वानि सर्वाणि शत्रुसैन्यानि सहते (**नरम्**) नेतारं नायकम् (**मंहिष्ठम्**) अतिशयेन महान्तम् (**विश्वचर्षणिम्**) विश्वचर्षणयो धार्मिका मनुष्या कार्यद्रष्टारो यस्य तम्॥४॥

अन्वयः-हे मनुष्या! अहं वस्त्यमु अप्रहणं शवसस्पतिं विश्वासाहं मंहिष्ठं विश्वचर्षणिं नरमिन्द्रं गृणीषे प्रशंसामि यं त्वं स्तौषि॥४॥

भावार्थः-हे मनुष्या! युष्माभिस्तस्य प्रशंसा कार्या यो नित्यं न्यायकारी सर्वसहो महाशयो युद्धादिराजकर्मसु निपुणो दुष्टविदारको दृढोत्साही नरः स्यात्॥४॥

पदार्थः-हे मनुष्यो! मैं (**वः**) आप लोगों और (**त्यम्**) उसको (**उ**) वितर्कपूर्वक (**अप्रहणम्**) अन्याय से नहीं किसी को मारने वाले (**शवसः**) सेना के (**पतिम्**) स्वामी (**विश्वासाहम्**) सम्पूर्ण शत्रुओं की सेनाओं को सहने वाले (**मंहिष्ठम्**) अत्यन्त महान् और (**विश्वचर्षणिम्**) धार्मिक मनुष्य काम देखने वाले जिसके उस (**नरम्**) अग्रणी (**इन्द्रम्**) दुष्टाचारी शत्रुओं के विनाशक मनुष्य की (**गृणीषे**) प्रशंसा करता हूँ, जिसकी आप स्तुति करते हो॥४॥

भावार्थः-हे मनुष्यो! आप लोगों को उसकी प्रशंसा करनी चाहिये जो नित्य न्यायकारी, सबका सहने वाला, महाशय, युद्ध आदि राजकर्म्मों में निपुण, दुष्टों का विदारक, दृढ़ उत्साही, मनुष्य होवे॥४॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

यं वर्धयन्तीद्गिरः पतिं तुरस्य राधसः।

तमिन्वस्य रोदसी देवी शुष्मं सपर्यतः॥५॥१६॥

यम्। वर्धयन्ति। इत्। गिरः। पतिम्। तुरस्य। राधसः। तम्। इत्। नु। अस्य। रोदसी इति। देवी इति। शुष्मम्। सपर्यतः॥५॥

पदार्थः-(**यम्**) (**वर्धयन्ति**) (**इत्**) एव (**गिरः**) सुशिक्षिता वाचः (**पतिम्**) स्वामिनम् (**तुरस्य**) दुःखहिंसकस्य (**राधसः**) धनस्य (**तम्**) (**इत्**) (**नु**) सद्यः (**अस्य**) (**रोदसी**) द्यावापृथिव्यौ (**देवी**) कमनीये देदीप्यमाने (**शुष्मम्**) बलम् (**सपर्यतः**) सेवेते॥५॥

अन्वयः-हे मनुष्या! यं तुरस्य राधसः पतिमिन्द्रमिद् गिरो वर्धयन्त्यस्य देवी रोदसी शुष्मन्नु सपर्यतस्तमिद्यूयं वर्धयित्वा सेवध्वम्॥५॥

भावार्थः-ये मनुष्याः शुभगुणकर्मस्वभावे वर्धमानं जनं वर्धयन्ति ते पञ्चतत्त्वमयं राज्यं भुञ्जते॥५॥

पदार्थः-हे मनुष्यो! (**यम्**) जिस (**तुरस्य**) दुःख के नाश करने वाले (**राधसः**) धन के (**पतिम्**) स्वामी, ऐश्वर्य्य से युक्त को (**इत्**) ही (**गिरः**) उत्तम प्रकार शिक्षित वाणियाँ (**वर्धयन्ति**) बढ़ाती हैं और (**अस्य**) इसके (**देवी**) सुन्दर प्रकाशमान (**रोदसी**) अन्तरिक्ष और पृथिवी (**शुष्मम्**) बल का (**नु**) शीघ्र (**सपर्यतः**) सेवन करते हैं (**तम्, इत्**) उसी की आप लोग वृद्धि करके सेवा करो॥५॥

भावार्थः-जो मनुष्य श्रेष्ठ गुण, कर्म्म और स्वभावों में वृद्धि को प्राप्त जन की वृद्धि करते हैं, वे पञ्चतत्त्वमय राज्य का भोग करते हैं॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि।

विपो न यस्योतयो वि यद्रोहन्ति सक्षितः॥६॥

तत्। वः। उक्थस्य। बर्हणा। इन्द्राय। उपऽस्तृणीषणि। विपः। न। यस्य। ऊतयः। वि। यत्। रोहन्ति। सऽक्षितः॥६॥

पदार्थः-(**तत्**) (**वः**) युष्माकम् (**उक्थस्य**) प्रशंसितस्य कर्मणः (**बर्हणा**) वर्धनेन (**इन्द्राय**) परमैश्वर्याय (**उपस्तृणीषणि**) उपाच्छादनीयम् (**विपः**) मेधावी। **विप इति मेधाविनाम।** (निघं०३.१५) (**न**) इव (**यस्य**) (**ऊतयः**) रक्षणादीनि कर्माणि (**वि**) विशेषेण (**यत्**) (**रोहन्ति**) (**सक्षितः**) समाननिवासाः॥६॥

अन्वयः-हे मनुष्या! यस्य सक्षित ऊतयो विपो न यद्विरोहन्ति तद्व उक्थस्य बर्हणेन्द्रोयोपस्तृणीषणि वयं वर्धयेम॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये विपश्चिद्वत्प्रजारक्षणेनैश्वर्य्यं वर्धयन्ति ते सर्वतो वर्धन्ते॥६॥

पदार्थः-हे मनुष्यो! **(यस्य)** जिसके **(सक्षितः)** तुल्य निवास और **(ऊतयः)** रक्षण आदि कर्म **(विपः)** बुद्धिमान् जन **(न)** जैसे वैसे **(यत्)** जिसको **(वि)** विशेष करके **(रोहन्ति)** जमाते हैं **(तत्)** उसको **(वः)** आप लोगों के **(उक्थस्य)** प्रशंसित कर्म्म के **(बर्हणा)** बढ़ाने से **(इन्द्राय)** अत्यन्त ऐश्वर्य्य के लिये **(उपस्तृणीषणि)** ढाँपने योग्य को हम लोग बढ़ावें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्वानों के सदृश प्रजा के रक्षण से ऐश्वर्य्य को बढ़ाते हैं, वे सब प्रकार से बढ़ते हैं॥६॥

पुना राजा किं कृत्वा किमनुतिष्ठेदित्याह॥

फिर राजा क्या करके क्या करे, इस विषय को कहते हैं॥

अविदद् दक्षं मित्रो नवीयान् पपानो देवभ्यो वस्यो अचैत्।
ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः॥७॥

अविदत्। दक्षम्। मित्रः। नवीयान्। पपानः। देवेभ्यः। वस्यः। अचैत्। ससऽवान्। स्तौलाभिः। धौतरीभिः। उरुष्या। पायुः। अभवत्। सखिऽभ्यः॥७॥

पदार्थः-(**अविदत्**) विन्दति **(दक्षम्)** बलम् **(मित्रः)** सर्वस्य सुहृत् **(नवीयान्)** अतिशयेन नूतनवयस्कः **(पपानः)** पालयन् **(देवेभ्यः)** विद्वद्भ्यः **(वस्यः)** अतिशयेन वासहेतुम् **(अचैत्)** चिनुयात् **(ससवान्)** प्रशस्तानि ससानि विद्यन्ते यस्य सः। **ससमित्यन्ननाम।** (निघं०२.७) **(स्तौलाभिः)** स्थूले भवानि। अत्र वर्णव्यत्ययेन थस्य स्थाने तः। **(धौतरीभिः)** शत्रूणां कम्पयित्रीभिः सेनाभिः **(उरुष्या)** रक्षेत् **(पायुः)** रक्षकः सन् **(अभवत्)** भवेत् **(सखिभ्यः)** मित्रेभ्यः॥७॥

अन्वयः-हे राजन्! यो नवीयान् पपानो मित्रस्ससवान् पायुः स्तौलाभिर्धौतरीभिर्देवेभ्यः सखिभ्यो वस्योऽचैदुरुष्या मित्रोऽभवत् सोऽतुलं दक्षमविदत्॥७॥

भावार्थः-हे मनुष्या! यः सर्वसुहृद्युवा धनधान्यादियुक्तः सर्वरक्षको महासेनो विद्वान् राजा भवेत्स एव धार्मिकरक्षणाय सत्यं बलं लभेत॥७॥

पदार्थः-हे राजन्! जो **(नवीयान्)** अतिशय थोड़ी अवस्था वाला **(पपानः)** पालन करता हुआ **(मित्रः)** सब का मित्र **(ससवान्)** अच्छे अन्न वाला **(पायुः)** रक्षक हुआ **(स्तौलाभिः)** स्थूल में हुई **(धौतरीभिः)** शत्रुओं को कम्पाने वाली सेनाओं से **(देवेभ्यः)** विद्वानों के और **(सखिभ्यः)** मित्रों के लिये **(वस्यः)** अत्यन्त वास का कारण **(अचैत्)** बटोरे और **(उरुष्या)** रक्षा करे और सब का मित्र **(अभवत्)** हो, वह अतुल **(दक्षम्)** बल को **(अविदत्)** पाता है॥७॥

भावार्थः-हे मनुष्यो! जो सब का मित्र, युवा, धन-धान्य आदि से युक्त, सब का रक्षक, बड़ी सेना वाला, विद्वान् राजा होवे, वही धार्म्मिकों के रक्षण के लिये सत्य बल को प्राप्त होवे॥७॥

मनुष्यैः कथं वर्त्तित्वा किं प्राप्य किं कर्त्तव्यमित्याह॥

अब मनुष्यों को कैसा वर्त्ताव करके क्या प्राप्त करके क्या करना चाहिये, इस विषय को कहते हैं॥

ऋ॒तस्य॑ प॒थि वे॒धा अ॑पायि श्रि॒ये मना॑सि दे॒वासो॑ अक्रन्।
दधा॑नो॒ नाम॑ म॒हो वचो॑भि॒र्वपु॑र्दृ॒शये॑ वे॒न्यो व्या॑वः॥८॥

ऋ॒तस्य॑। प॒थि। वे॒धाः। अ॒पा॒यि॒। श्रि॒ये। मना॑सि। दे॒वासः॑। अ॒क्र॒न्। दधा॑नः। नाम॑। म॒हः। वचः॑ऽभिः। वपुः॑। दृ॒शये॑। वे॒न्यः। वि। आ॒व॒रित्याव॑ः॥८॥

पदार्थः-(**ऋतस्य**) सत्यस्य (**पथि**) मार्गे (**वेधाः**) मेधावी (**अपायि**) पाति (**श्रिये**) (**मनांसि**) (**देवासः**) विद्वांसः (**अक्रन्**) कुर्वन्ति (**दधानः**) (**नाम**) प्रख्यातिम् (**महः**) कीर्त्तियोगान्महत् (**वचोभिः**) वचनैः (**वपुः**) सुरूपं शरीरम्। **वपुरिति रूपनाम।** (निघं०३.७) (**दृशये**) दर्शनाय (**वेन्यः**) कमनीयः (**वि**) (**आवः**) रक्षति॥८॥

अन्वयः-हे मनुष्या! यथा वेधा ऋतस्य पथि श्रियेऽपायि देवासो मनांस्यक्रन् वचोभिर्महो नाम दृशये वपुश्च दधानो वेन्यः सन् व्यावस्तथा यूयमपि प्रयतध्वम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैः सर्वदा धर्मपथि गत्वा धनोन्नतये मनांसि निश्चेतव्यानि तथा धनप्राप्तेन धनेनानाथपालनं विद्याधर्मवृद्धिमौषधदानं मार्गशुद्धिं च कृत्वा प्रशंसा सर्वासु दिक्षु प्रसारणीया॥८॥

पदार्थः-हे मनुष्यो! जैसे (**वेधाः**) बुद्धिमान् (**ऋतस्य**) सत्य के (**पथि**) मार्ग में (**श्रिये**) लक्ष्मी के लिये (**अपायि**) रक्षा करता है और (**देवासः**) विद्वान् जन (**मनांसि**) मनों को (**अक्रन्**) करते हैं और (**वचोभिः**) वचनों से (**महः**) कीर्ति के योग से बड़ी (**नाम**) प्रसिद्धि को (**दृशये**) दिखाने के लिये (**वपुः**) अच्छे रूप वाले शरीर को (**दधानः**) धारण करता (**वेन्यः**) सुन्दर होता और (**वि, आवः**) रक्षा करता है, वैसे आप लोग भी यत्न करो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को चाहिये कि सर्वदा धर्ममार्ग में चलकर धन की उन्नति के लिये मनों को निश्चित करें और धन से प्राप्त हुए धन से अनाथों का पालन, विद्या और धन की वृद्धि तथा औषधदान और मार्ग शुद्धि करके सब दिशाओं में प्रशंसा विस्तारें॥८॥

अथ राजप्रजाजनाः परस्परस्य हितं कथं कुर्य्युरित्याह॥

अब राजा और प्रजाजन का हित कैसे करें, इस विषय को कहते हैं॥

द्यु॒मत्त॑मं॒ दक्षं॑ धेह्य॒स्मे सेधा॒ जना॑नां पू॒र्वीर॑रा॒तीः।
वर्षी॑यो॒ वयः॑ कृणुहि॒ शची॑भि॒र्धन॑स्य सा॒तावस्मां अ॑विड्ढि॥९॥

द्यु॒मत्ऽत॑मम्। दक्ष॑म्। धे॒हि॒। अ॒स्मे॒ इति॑। सेध॑। जना॑नाम्। पू॒र्वीः। अरा॑तीः। वर्षी॑यः। वयः॑। कृ॒णु॒हि॒। शची॑भिः। धन॑स्य। सा॒तौ। अ॒स्मान्। अ॒वि॒ऽड्ढि॥९॥

पदार्थः-(**द्युमत्तमम्**) प्रशस्ता द्यौर्विद्याप्रकाशो विद्यते यस्य यस्मिंस्तदतिशयितम् (**दक्षम्**) बलम् (**धेहि**) (**अस्मे**) अस्मासु (**सेधा**) साध्नुहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**जनानाम्**) मनुष्याणाम् (**पूर्वीः**) प्राचीनाः (**अरातीः**) अदानक्रियाः (**वर्षीयः**) अतिशयेन श्रेष्ठम् (**वयः**) कमनीयमायुः (**कृणुहि**) (**शचीभिः**) प्रज्ञाभिः कर्मभिर्वा प्रजाभिः सह (**धनस्य**) (**सातौ**) संविभागे (**अस्मान्**) (**अविड्ढि**) प्रवेशय॥९॥

अन्वयः-हे राजन्! त्वं शचीभिरस्मे द्युमत्तमं दक्षं धेहि कार्य्यं सेधा जनानां पूर्वीररातीर्निवर्तय वर्षीयो वयः कृणुहि धनस्य सातावस्मानविड्ढि॥९॥

भावार्थः-प्रजाजनै राजैवं प्रार्थनीयो हे राजंस्त्वं यद्यस्मान् बलवत्तमान् कृपणतारहितान् ब्रह्मचर्य्यादिना दीर्घायुषः पुरुषार्थिनः सर्वतो रक्षयित्वाऽभयान् कृत्वा धर्मार्थकाममोक्षसाधने प्रवेशयेस्तर्हि भवन्तं वयं सर्वदा वर्धयेम॥९॥

पदार्थः-हे राजन्! आप (**शचीभिः**) बुद्धियों वा कर्मों वा प्रजाओं के साथ (**अस्मे**) हम लोगों में (**द्युमत्तमम्**) प्रशंसित अत्यन्त विद्या के प्रकाश से युक्त (**दक्षम्**) बल को (**धेहि**) धारण करिये और कार्य्य को (**सेधा**) सिद्ध कीजिये और (**जनानाम्**) मनुष्यों की (**पूर्वीः**) प्राचीन (**अरातीः**) नहीं दान करने की क्रियाओं को दूर कीजिये तथा (**वर्षीयः**) अतिशय श्रेष्ठ (**वयः**) सुन्दर अवस्था को (**कृणुहि**) करिये और (**धनस्य**) धन के (**सातौ**) संविभाग में (**अस्मान्**) हम लोगों का (**अविड्ढि**) प्रवेश कराइये॥९॥

भावार्थः-प्रजाजनों को राजा की ऐसी प्रार्थना करनी चाहिये कि हे राजन्! आप जो हम लोगों को बलयुक्त, कृपणता से रहित और ब्रह्मचर्य्य आदि से दीर्घ अवस्था वाले पुरुषार्थी और सब प्रकार से रक्षा करके भयरहित करके धर्म्म, अर्थ, काम और मोक्ष के साधन में प्रवेश कराइये तो आपकी हम लोग सर्वदा वृद्धि करें॥९॥

अथ राजप्रजाजनाः परस्परं कुत्र प्रेरययेयुरित्याह॥

अब राजा और प्रजाजन परस्पर कहाँ प्रेरणा करें, इस विषय को कहते हैं॥

इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः।
नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः॥१०॥१७॥

इन्द्र। तुभ्यम्। इत्। मघऽवन्। अभूम। वयम्। दात्रे। हरिऽवः। मा। वि। वेनः। नकिः। आपिः। ददृशे। मर्त्यऽत्रा। किम्। अङ्ग। रध्रऽचोदनम्। त्वा। आहुः॥१०॥

पदार्थः-(**इन्द्र**) पूर्णविद्य राजन् (**तुभ्यम्**) (**इत्**) एव (**मघवन्**) बहुधनयुक्त (**अभूम**) भवेम (**वयम्**) (**दात्रे**) दानकरणशीलाय (**हरिवः**) प्रशंसितमनुष्ययुक्त (**मा**) (**वि**) विरोधे (**वेनः**) कामयथाः (**नकिः**) निषेधे (**आपिः**) य आप्नोति सः (**ददृशे**) पश्यामि (**मर्त्यत्रा**) मर्त्येषु (**किम्**) (**अङ्ग**) अङ्गवद्वर्तमान (**रध्रचोदनम्**) धनस्य प्राप्तये प्रेरकम् (**त्वा**) (**आहुः**) कथयन्ति॥१०॥

अन्वय:-हे अङ्ग हरिवो मघवन्निन्द्र! दात्रे तुभ्यमिद्दातारो वयमभूम त्वमस्मान्मा वि वेन आपि: सन्नहं भवन्तं विरुद्धदृष्ट्या नकिर्ददृशे मर्त्यत्रा किमिच्छसि यतो रध्रचोदनं त्वा विद्वांस आहुस्तस्माद् वयं त्वाश्रयेम॥१०॥

भावार्थ:-हे राजप्रजाजना यथा यूयं परस्परस्मै धनादिना सुखदानेन सर्वान्त्सत्कर्मसु प्रेरयेत तथा मिलित्वा सत्यं न्यायपालनानुष्ठानं कुर्यात्॥१०॥

पदार्थ:-हे **(अङ्ग)** अङ्ग के तुल्य वर्त्तमान **(हरिव:)** प्रशंसित मनुष्यों से और **(मघवन्)** बहुत धनों से युक्त **(इन्द्र)** पूर्णविद्या वाले राजन्! **(दात्रे)** दान करने के स्वभाव वाले **(तुभ्यम्)** आपके लिये **(इत्)** ही देने वाले **(वयम्)** हम लोग **(अभूम)** होवें आप हम लोगों की **(मा)** मत **(वि, वेन:)** कामना करिये और **(आपि:)** व्याप्त होने वाला हुआ मैं आपको विरुद्ध दृष्टि से **(नकि:)** नहीं **(ददृशे)** देखता हूँ तथा **(मर्त्यत्रा)** मनुष्यों में आप **(किम्)** किस की इच्छा करते हो जिससे **(रध्रचोदनम्)** धन की प्राप्ति के लिये प्रेरणा करने वाले आपको विद्वान् जन **(आहु:)** कहते हैं, इससे हम लोग आपका आश्रयण करें॥१०॥

भावार्थ:-हे राजा और प्रजा जनो! जैसे आप लोग आपस के लिये धन आदि से और सुख दान से सबको श्रेष्ठ कर्म्मों में प्रेरणा करिये, वैसे मिल के सत्य, न्यायपालन का अनुष्ठान करिये॥१०॥

मनुष्यै: किमकृत्वा किमनुष्ठेयमित्याह॥

मनुष्यों को क्या नहीं करके क्या करना चाहिये, इस विषय को कहते हैं॥

मा जस्वने वृषभ नो ररीथा मा ते रेवत: सख्ये रिषाम।
पूर्वीष्ट इन्द्र नि:षिधो जनेषु जह्यसुष्वीन् प्र वृहापृणत:॥११॥

मा। जस्वने। वृषभ। न:। ररीथा। मा। ते। रेवत:। सख्ये। रिषाम। पूर्वी:। ते। इन्द्र। नि:ऽसिध:। जनेषु। जहि। असुस्वीन्। प्र। वृह। अपृणत:॥११॥

पदार्थ:-**(मा)** निषेधे **(जस्वने)** अन्यायेन परस्वप्रापकाय दुष्टाय राज्ञे। **जसतीति गतिकर्मा।** (निघं०२.१४) **(वृषभ)** बलिष्ठ **(न:)** अस्मान् **(ररीथा:)** दद्या: **(मा)** **(ते)** तव **(इन्द्र)** दु:खविदारक राजन् **(नि:षिध:)** नि:श्रेयसकर्य: क्रिया: **(जनेषु)** **(जहि)** **(असुष्वीन्)** अभिषवस्याकर्तॄन् **(प्र)** **(वृह)** पृथक्कुरु **(अपृणत:)** दु:खदातुर्दुर्जनात्॥११॥

अन्वय:-हे वृषभेन्द्र! त्वं जस्वने नोऽस्मान्मा ररीथा वयं ते रेवत: सख्ये मा रिषाम यास्ते जनेषु पूर्वीर्नि:षिधस्सन्ति ता ररीथा असुष्वीन् जह्यपृणतोऽस्मान् प्र वृह॥११॥

भावार्थ:-हे राजन्! येऽस्मान् पीडयेयुस्तदधीनान्मा कुर्य्या: श्रेयसि क्रिया: प्रापयेस्तथा वयमप्येतत्सर्वं त्वदर्थमनुतिष्ठेम, एवं सखायो भूत्वाऽभीष्टान् कामान्त्सर्वे वयं प्राप्नुयाम॥११॥

पदार्थ:-हे **(वृषभ)** बलयुक्त **(इन्द्र)** दु:खों के नाश करने वाले राजन्! आप **(जस्वने)** अन्याय से दूसरे के धन को अन्यत्र प्राप्त कराने वाले दुष्ट राजा के लिये **(न:)** हम लोगों को **(मा)** मत **(ररीथा:)**

दीजिये और हम लोग **(ते)** आप **(रेवतः)** बहुत धन वाले के **(सख्ये)** मित्रपने के लिये **(मा)** नहीं **(रिषाम)** क्रुद्ध होवें और जो **(ते)** आपके **(जनेषु)** मनुष्यों में **(पूर्वीः)** प्राचीन **(निःषिधः)** सुखकारक क्रियायें हैं उनको दीजिये **(असुष्वीन्)** उत्पत्ति के नहीं करने वालों का **(जहि)** त्याग करिये और **(अपृणतः)** दुःख के देने वाले दुर्जन से हम लोगों के **(प्र, वृह)** पृथक् करिये॥११॥

भावार्थः-हे राजन्! जो हम लोगों को पीड़ा देवें उनके आधीन मत करिये और कल्याण में क्रियाओं को प्राप्त कराइये, वैसे हम लोग भी इस सब को आपके लिये करें। इस प्रकार मित्र होकर अभीष्ट मनोरथों को सब हम लोग प्राप्त होवें॥११॥

पुनः स राजा किंवत्किं कुर्यादित्याह॥

फिर वह राजा किसके सदृश क्या करे, इस विषय को कहते हैं॥

उद॒भ्राणी॑व स्त॒नय॑न्नि॒यर्ती॑न्द्रो॒ राधां॑स्यश्व्या॑नि॒ गव्या॑।
त्वम॑सि प्र॒दिव॑: का॒रुधा॑या॒ मा त्वा॑दा॒मान॒ आ द॑भन् म॒घोन॑:॥ १२॥

उत्। अ॒भ्राणि॑ऽइव। स्त॒नय॑न्। इ॒यर्ति॑। इन्द्रः॑। राधां॑सि। अश्व्या॑नि। गव्या॑। त्वम्। अ॒सि॒। प्र॒ऽदिव॑:। का॒रुऽधा॑याः। मा। त्वा॒। अ॒दा॒मान॑:। आ। द॒भ॒न्। म॒घोन॑:॥ १२॥

पदार्थः-(**उद्**) अपि **(अभ्राणीव)** वायुदलानीव **(स्तनयन्)** शब्दयन् **(इयर्त्ति)** प्राप्नोति **(इन्द्रः)** विद्युदिव **(राधांसि)** सर्वसुखकराणि धनानि **(अश्व्यानि)** अश्वेषु हितानि **(गव्या)** गोषु हितानि **(त्वम्)** **(असि)** **(प्रदिवः)** प्रकर्षेण कमनीयान् **(कारुधायाः)** विदुषां शिल्पानां धारयिता **(मा)** निषेधे **(त्वा)** त्वाम् **(अदामानः)** अदातारः **(आ)** **(दभन्)** हिंसेयुः **(मघोनः)** धनाढ्यान्॥१२॥

अन्वयः-हे राजन्! यतः स्तनयन् कारुधाया इन्द्रोऽभ्राणीवाश्व्यानि गव्या राधांस्युदियर्त्ति प्रदिवो मघोनः स ग्रहीतास्ति यथाऽदामानस्त्वा मा आ दभन्मघोनो मा आदभंस्तथा त्वं यदि कृतवानसि तर्हि त्वयि को नतो भवति॥१२॥

भावार्थः-अत्रोपमालङ्कारः। यस्याभ्रघटावत्सेना बलवती विद्युद्वत्पराक्रमयुक्ता वर्त्तते येन सर्वे गुणिनः सङ्गृह्यन्ते स एव धनधान्यराज्यपश्वादीन् प्राप्नोति॥१२॥

पदार्थः-हे राजन्! जिससे **(स्तनयन्)** शब्द करता हुआ **(कारुधायाः)** विद्वान् शिल्पी जनों का धारण करने वाला **(इन्द्रः)** बिजुली के सदृश वा **(अभ्राणीव)** वायु के दलों के सदृश **(अश्व्यानि)** घोड़ों में हितकारक **(गव्या)** गौओं में हितकारक **(राधांसि)** सम्पूर्ण सुखों के करने वाले धनों को **(उत्)** भी **(इयर्त्ति)** प्राप्त होता है और **(प्रदिवः)** अत्यन्त सुन्दर **(मघोनः)** धन से युक्त जनों को वह ग्रहण करने वाला है और [जैसे] **(अदामानः)** आदाता जन **(त्वा)** आपकी **(मा)** मत **(आ, दभन्)** हिंसा करें और धन से युक्त जनों की मत हिंसा करें, वैसे **(त्वम्)** आप जो कर चुके **(असि)** हैं तो आप में कौन नम्र होता है॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिसकी मेघों की घटाओं के समान बलवती सेना, बिजुली के समान पराक्रमयुक्त वर्त्तमान है और जिससे सब गुणी स- ह किये जाते हैं; वही धन, धान्य, राज्य और पशु आदि पदार्थों को प्राप्त होता है॥१२॥

कोऽत्र राजा भवितुं योग्य इत्याह॥

कौन इस पृथिवी पर राजा होने के योग्य है, इस विषय को कहते हैं॥

अध्व॑र्यो वीर॒ प्र म॒हे सु॒ताना॒मिन्द्रा॑य भर॒ स ह्यस्य॒ राजा॑।
यः पू॒र्व्याभि॑रु॒त नू॒तना॒भिर्गी॒र्भिर्वा॑वृ॒धे गृ॑ण॒तामृषी॑णाम्॥ १३॥

अध्व॑र्यो॒ इति॑। वी॒र॒। प्र। म॒हे। सु॒ताना॑म्। इन्द्रा॑य। भ॒र॒। सः। हि। अ॒स्य॒। राजा॑। यः। पू॒र्व्याभिः॑। उ॒त। नू॒तना॑भिः। गी॒ऽभिः॑। व॒वृ॒धे। गृ॒ण॒ताम्। ऋषी॑णाम्॥ १३॥

पदार्थः-(**अध्वर्यो**) अहिंसक (**वीर**) दुष्टानां हिंसक (**प्र**) (**महे**) महते (**सुतानाम्**) निष्पन्नानां पदार्थानाम् (**इन्द्राय**) परमैश्वर्याय (**भर**) धर (**सः**) (**हि**) (**अस्य**) (**राजा**) (**यः**) (**पूर्व्याभिः**) पूर्वैः सेविताभिः (**उत**) अपि (**नूतनाभिः**) नवीनाभिर्वर्तमानाभिः (**गीर्भिः**) (**वावृधे**) वर्धते। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्। (**गृणताम्**) प्रशंसकानाम् (**ऋषीणाम्**) मन्त्रार्थविदाम्॥१३॥

अन्वयः-हे अध्वर्यो वीर! यो राजा गृणतामृषीणां पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे स ह्यस्य राष्ट्रस्य राजा भवितुं योग्यस्तथा त्वं सुतानां मह इन्द्रायैतान् प्र भर॥१३॥

भावार्थः-स एव राज्यं पालयितुं वर्धयितुं च शक्नोति य आप्तैस्सहितः सुशिक्षितो न्यायेशो भवत्स एव विद्वन् भवति यः शिष्टेभ्यो नित्यमुपदेशं शृणोति॥१३॥

पदार्थः-हे (**अध्वर्यो**) नहीं हिंसा करने वाले (**वीर**) दुष्टों की हिंसा करने वाले! (**यः**) जो (**राजा**) राजा (**गृणताम्**) प्रशंसा करने वाले (**ऋषीणाम्**) मन्त्रों के अर्थ जानने वालों की (**पूर्व्याभिः**) पूर्व जनों से सेवित (**उत**) भी (**नूतनाभिः**) नवीन वर्त्तमान (**गीर्भिः**) वाणियों से (**वावृधे**) वृद्धि को प्राप्त होता है (**सः, हि**) वही (**अस्य**) इस राज्य का राजा होने को योग्य हो, वैसे आप (**सुतानाम्**) उत्पन्न हुए पदार्थों के (**महे**) बड़े (**इन्द्राय**) अत्यन्त ऐश्वर्य्य के लिये इन को (**प्र, भर**) धारण करिये॥१३॥

भावार्थः-वही राज्य पालन करने और बढ़ाने को समर्थ होता है जो यथार्थवक्ताओं के सहित, उत्तम प्रकार शिक्षित और न्यायेश होवे और वही विद्वान् होता है, जो शिष्ट जनों से नित्य उपदेश सुनता है॥१३॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करे, इस विषय को कहते हैं॥

अ॒स्य मदे॑ पुरु॒ वर्पां॑सि वि॒द्वानिन्द्रो॑ वृ॒त्राण्यप्र॒ती ज॑घान।
तमु॒ प्र हो॑षि॒ मधु॑मन्तमस्मै॒ सोमं॑ वी॒राय॑ शि॒प्रिणे॒ पिब॑ध्यै॥ १४॥

अ॒स्य। मदे॑। पु॒रु। वर्पां॑सि। वि॒द्वान्। इन्द्रः॑। वृ॒त्राणि॑। अ॒प्र॒ति। ज॒घा॒न॒। तम्। ऊँ॒ इति॑। प्र। होषि॒। मधु॑ऽमन्तम्। अ॒स्मै॒। सोम॑म्। वी॒रा॒य॒। शि॒प्रिणे॑। पिब॑ध्यै॥ १४॥

पदार्थः-(**अस्य**) ओषधिगणस्य (**मदे**) आनन्दकरे रसे (**पुरु**) बहूनि (**वर्पांसि**) सुन्दराणि रूपाणि (**विद्वान्**) (**इन्द्रः**) सूर्य्यः (**वृत्राणि**) मेघान् इव (**अप्रती**) अप्रतीतानि। अत्र **संहितायामि**ति दीर्घः। (**जघान**) हन्ति (**तम्**) (**उ**) (**प्र**) (**होषि**) जुहोषि (**मधुमन्तम्**) मधुरादिगुणयुक्तद्रव्यसहितम् (**अस्मै**) (**सोमम्**) महौषधिरसम् (**वीराय**) निर्भयाय (**शिप्रिणे**) उत्तमहनुनासिकाय (**पिबध्यै**) पातुम्॥ १४॥

अन्वयः-यो विद्वान् यथेन्द्रः सूर्यो वृत्राणि जघान तथाऽस्य मदेऽप्रती पुरु वर्पांसि निर्माय स्वीकरोतु तमु मधुमन्तं सोममस्मै शिप्रिणे वीराय पिबध्यै त्वं प्र होषि तस्मात् सत्कर्तव्योऽसि॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवन्न्यायविजयप्रकाशका युक्ताहारविहारा महौषधिरसस्य पातारः सन्ति ते विविधरूपान् पदार्थान् प्राप्याऽस्मिञ्जगत्यानन्दन्ति॥ १४॥

पदार्थः-जो (**विद्वान्**) विद्यायुक्त, जैसे (**इन्द्रः**) सूर्य्य (**वृत्राणि**) मेघों का (**जघान**) नाश करता है, वैसे (**अस्य**) इस ओषधियों के समूह के (**मदे**) आनन्दकारक रस में (**अप्रती**) नहीं विश्वास किये गये (**पुरु**) बहुत (**वर्पांसि**) सुन्दर रूपों का निर्म्माण करके स्वीकार करे (**तम्**) उसके प्रति (**उ**) भी (**मधुमन्तम्**) मधुर आदि गुणों से युक्त द्रव्य के साथ (**सोमम्**) बड़ी ओषधियों के रस को (**अस्मै**) इस (**शिप्रिणे**) उत्तम ठुड्ढी और नासिका वाले (**वीराय**) भयरहित जन के लिये (**पिबध्यै**) पीने को आप (**प्र, होषि**) देते हो, इससे सत्कार करने योग्य हो॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य्य के सदृश न्याय और विजय के प्रकाशक, युक्त आहार और विहार वाले और महौषधियों के रस को पीने वाले हैं, वे अनेक प्रकार के पदार्थों को प्राप्त होकर इस जगत् में आनन्द करते हैं॥ १४॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

पाता॑ सु॒तमिन्द्रो॑ अस्तु॒ सोमं॒ हन्ता॑ वृ॒त्रं व॒ज्रेण॑ मन्दसा॒नः।
गन्ता॑ य॒ज्ञं प॑रा॒वत॑श्चि॒दच्छा॒ वसु॑र्धी॒नाम॑वि॒ता का॒रुधा॑यः॥ १५॥ १८॥

पाता॑। सु॒तम्। इन्द्रः॑। अ॒स्तु॒। सोम॑म्। हन्ता॑। वृ॒त्रम्। व॒ज्रेण॑। म॒न्द॒सा॒नः। गन्ता॑। य॒ज्ञम्। प॒रा॒ऽव॑तः। चि॒त्। अच्छ॑। वसुः॑। धी॒नाम्। अ॒वि॒ता। का॒रुऽधा॑यः॥ १५॥

पदार्थः-(**पाता**) पानकर्त्ता। अत्राविते॑ति विहाय सर्वत्र तृन् प्रत्ययः। (**सुतम्**) निष्पन्नम् (**इन्द्रः**) परमैश्वर्यप्रदः (**अस्तु**) (**सोमम्**) ओषधिरसम् (**हन्ता**) (**वृत्रम्**) मेघम् (**वज्रेण**) शस्त्राऽस्त्रसमूहेन (**मन्दसानः**) कामयमानः (**गन्ता**) (**यज्ञम्**) सत्क्रियामयं व्यवहारम् (**परावतः**) दूरदेशात् (**चित्**) अपि (**अच्छा**) (**वसुः**) वासयिता (**धीनाम्**) उत्तमानां। **धीरिति कर्मनाम।** (निघं०२.१) (**अविता**) रक्षकः (**कारुधायाः**) कारूणां शिल्पीनां धारकः॥ १५॥

अन्वयः-हे मनुष्या! य इन्द्रस्सुतं सोमं पाता वज्रेण मन्दसानो वृत्रं सूर्य इव शत्रून् हन्ता यज्ञं गन्ता परावतश्चित्कारुधाया वसुः सन् धीनामच्छाऽविता वर्त्तत इन्द्रोऽस्तु तं यूयं सततं सत्कुरुत॥१५॥

भावार्थः-ये राजादयो मनुष्या वैद्यकशास्त्रसम्पादितमोषधिरसं पिबन्ति शस्त्रास्त्रविद्यया दुष्टान्निवार्य न्यायप्रचाराख्यं प्रचार्य्य सत्कर्मानुष्ठातारः शिल्पविद्याविदः सङ्गृह्यालस्यं विहाय सत्कर्मसु प्रवर्त्तन्ते त एवात्र प्रशंसनीया भवन्ति॥१५॥

पदार्थः-हे मनुष्यो! जो **(इन्द्रः)** अत्यन्त ऐश्वर्य्य का देने वाला **(सुतम्)** उत्पन्न हुए **(सोमम्)** ओषधिरस को **(पाता)** पान करने वाला **(वज्रेण)** शस्त्र और अस्त्रों के समूह से **(मन्दसानः)** कामना करता हुआ **(वृत्रम्)** मेघ को सूर्य्य जैसे वैसे शत्रुओं को **(हन्ता)** मारने **(यज्ञम्)** श्रेष्ठ क्रियास्वरूप व्यवहार को **(गन्ता)** प्राप्त होने **(परावतः)** दूर देश से **(चित्)** भी **(कारुधायाः)** शिल्पी जनों का धारण करने वाला और **(वसुः)** बसाने वाला होता हुआ **(धीनाम्)** उत्तम कर्म्मों की **(अच्छा)** अच्छे प्रकार **(अविता)** रक्षा करने वाला है वह अत्यन्त ऐश्वर्य्य से युक्त **(अस्तु)** हो, उसका आप लोग निरन्तर सत्कार करो॥१५॥

भावार्थः-जो राजा आदि मनुष्य वैद्यकशास्त्र की रीति से उत्पन्न किये ओषधियों के रस को पीते हैं तथा शस्त्र और अस्त्र की विद्या से दुष्टों का निवारण करके न्यायप्रचार नामक कर्म्म का प्रचार करके सत्कर्म्म के करने और शिल्पविद्या के जानने वालों को स- ह करके आलस्य का त्याग करके श्रेष्ठ कर्म्मों में प्रवृत्त होते, वे ही यहाँ प्रशंसनीय होते हैं॥१५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि।

मत्सद्यथा सौमनसाय देवं व्यस्मद्द्वेषो युयवद् व्यंहः॥१६॥

इदम्। त्यत्। पात्रम्। इन्द्रऽपानम्। इन्द्रस्य। प्रियम्। अमृतम्। अपायि। मत्सत्। यथा। सौमनसाय। देवम्। वि। अस्मत्। द्वेषः। युयवत्। वि। अंहः॥१६॥

पदार्थः-**(इदम्)** **(त्यत्)** तत् **(पात्रम्)** पिबति पाति वा येन **(इन्द्रपानम्)** इन्द्रस्यौषधिरसस्यैश्वर्यस्य वा पानं रक्षणं वा **(इन्द्रस्य)** इन्द्रियस्वामिनो जीवस्य **(प्रियम्)** प्रीतिकरम् **(अमृतम्)** सुस्वादिष्ठम् **(अपायि)** पिबति **(मत्सत्)** आनन्दति **(यथा)** **(सौमनसाय)** सुमनसो भवाय **(देवम्)** दिव्यगुणकर्म **(वि)** **(अस्मत्)** **(द्वेषः)** द्वेषादियुक्तं कर्म शत्रुं वा **(युयवत्)** वियोजयति **(वि)** **(अंहः)** पापाचरणम्॥१६॥

अन्वयः-हे विद्वँस्त्वं सौमनसाय कश्चिद् यथेदं त्यदिन्द्रपानमिन्द्रस्य प्रियममृतं पात्रमपायि येन मत्सद्देवमपाय्यस्मद्द्वेषो वि युयवदस्मदंहो वि युयवत्तथाऽऽचर॥१६॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! येन मनसि प्रमादो द्वेषश्च न स्यात्तदेव पातव्यम्। यथा स्वात्मानं सर्वे रक्षन्ति तथैवाऽन्यान्त्सर्वान् रक्षन्तु॥१६॥

पदार्थः-हे विद्वन्! आप **(सौमनसाय)** अच्छे मन के होने के लिये **(यथा)** जैसे **(इदम्)** इस **(त्यत्)** उस **(इन्द्रपानम्)** ओषधियों के रस वा ऐश्वर्य्य के पान वा रक्षण को **(इन्द्रस्य)** इन्द्रियों के स्वामी जीव के **(प्रियम्)** प्रीतिकारक **(अमृतम्)** अच्छे प्रकार स्वादिष्ठ **(पात्रम्)** जिससे पान करता वा रक्षा करता है उसको **(अपायि)** पीता है। और जिससे **(मत्सत्)** आनन्दित होता है तथा **(देवम्)** श्रेष्ठ गुणकर्मयुक्त वस्तु का पान करता है और **(अस्मत्)** हम लोगों से **(द्वेषः)** द्वेष आदि से युक्त कर्म्म वा शत्रु को **(वि, युयवत्)** वियुक्त करता है और हम लोगों से **(अंहः)** पापाचरण को **(वि)** पृथक् करता है, वैसा आचरण करो॥१६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिससे मन में प्रमाद और द्वेष न होवे उसी का पान करना चाहिये और जैसे अपने आत्मा की सब रक्षा करते हैं, वैसे अन्य सबों की रक्षा करें॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

एना मन्दानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान्।
अभिषेणाँ अभ्या३देदिशानान् पराच इन्द्र प्र मृणा जही च॥१७॥

एना। मन्दानः। जहि। शूर। शत्रून्। जामिम्। अजामिम्। मघऽवन्। अमित्रान्। अभिऽसेनान्। अभि। आऽदेदिशानान्। पराचः। इन्द्र। प्र। मृण। जहि। च॥१७॥

पदार्थः-**(एना)** एनेन **(मन्दानः)** प्रकाशितः **(जहि)** **(शूर)** दुष्टानां हिंसक **(शत्रून्)** धर्मविरोधिनः **(जामिम्)** जामात्रादिकम् **(अजामिम्)** अन्यामसम्बन्धाम् **(मघवन्)** बहुधनयुक्त **(अमित्रान्)** मित्रभावरहितान् **(अभिषेणान्)** आभिमुख्या सेना येषां तान् **(अभि)** **(आदेदिशानान्)** भृशमाज्ञाकर्त्तॄन् **(पराचः)** पराङ्मुखान् **(इन्द्र)** दुष्टविदारक **(प्र)** **(मृणा)** बाधस्व। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(जही)** अत्रापि पूर्ववद्दीर्घः **(च)**॥१७॥

अन्वयः-हे शूर मघवन्निन्द्र! त्वमेना मन्दानः सन् जामिमजामिं शत्रूनमित्रान् जहि। अभिषेणानादेदिशानान् पराचोऽभि प्रमृणा। अविद्यादिदोषाँश्च जही॥१७४॥

भावार्थः-हे राजन्त्सेनापते! त्वं ब्रह्मचर्येण सोमपानादिना च स्वयमानन्दितः सन् वीरानानन्द्य सर्वाञ्छत्रून्विजयस्व॥१७॥

पदार्थः-हे **(शूर)** दुष्टों को मारने वाले **(मघवन्)** बहुत धनों से युक्त **(इन्द्र)** दुष्टों के विदारक! आप **(एना)** इससे **(मन्दानः)** प्रशंसित हुए **(जामिम्)** जवाँई आदि को **(अजामिम्)** दूसरी सम्बन्ध रहित को **(शत्रून्)** धर्म्म के विरोधियों **(अमित्रान्)** मित्रभाव रहित वैरियों का **(जहि)** त्याग करो **(अभिषेणान्)**

सन्मुख सेना जिनकी उन **(आदेदिशानान्)** अत्यन्त आज्ञा करने वाले **(पराचः)** पश्चिम की ओर अर्थात् पीछे मुख किये हुओं की **(अभि, प्र, मृणा)** बाधा करो **(च)** और अविद्या आदि दोषों का **(जही)** त्याग करो॥१७॥

भावार्थः-हे राजन् सेना के स्वामिन्! आप ब्रह्मचर्य और सोमलता के रस के पान आदि से स्वयं आनन्दित हुए वीरों को आनन्द देकर सम्पूर्ण शत्रुओं को जीतो॥१७॥

पुना राजप्रजाजनैः सततं किमनुष्ठेयमित्याह॥

फिर राजा और प्रजाजनों को निरन्तर क्या करना चाहिये, इस विषय को कहते हैं॥

आ॒सु ष्मा॑ णो मघवन्निन्द्र पृ॒त्स्व१॑स्मभ्यं॒ महि॒ वरि॑वः सु॒गं क॑:।
अ॒पां तो॒कस्य॒ तन॑यस्य जे॒ष इन्द्र॑ सू॒रीन् कृ॑णुहि स्मा॑ नो अ॒र्धम्॥१८॥

आ॒सु। स्म। न॒:। म॒घ॒ऽव॒न्। इ॒न्द्र॒। पृ॒त्ऽसु। अ॒स्मभ्य॑म्। महि॑। वरि॑वः। सु॒ऽगम्। कृ॒रिति॑ कः। अ॒पाम्। तो॒कस्य॑। तन॑यस्य। जे॒षे। इन्द्र॑। सू॒रीन्। कृ॒णु॒हि। स्म॒। न॒:। अ॒र्धम्॥१८॥

पदार्थः-(**आसु**) (**स्मा**) एव। अत्र **निपातस्य** दीर्घः। (**नः**) अस्मान् (**मघवन्**) महाधनयुक्त (**इन्द्र**) दुष्टानां विदारक (**पृत्सु**) वीरमनुष्यसेनासु (**अस्मभ्यम्**) (**महि**) महत् (**वरिवः**) सेवनम् (**सुगम्**) सुष्ठु गच्छन्ति यस्मिँस्तत् (**कः**) कुर्याः (**अपाम्**) प्राणानाम् (**तोकस्य**) सद्यो जातस्याऽपत्यस्य (**तनयस्य**) सुकुमारस्य (**जेषे**) जेतुम् (**इन्द्र**) सकलैश्वर्यप्रद (**सूरीन्**) युद्धविद्याकुशलान् विपश्चितः (**कृणुहि**) (**स्मा**) एव। अत्रापि **निपातस्य चे**ति दीर्घः। (**नः**) (**अर्धम्**) सुसमृद्धिम्॥१८॥

अन्वयः-हे मघवनिन्द्र! त्वमासु पृत्स्वस्मभ्यं महि सुगं वरिवः कः, नोऽस्मान्त्स्मा विजयिनः कः। हे इन्द्र! त्वमपां तोकस्य तनस्य बोधाय शत्रूञ्जेषे नोऽस्मान्त्सूरीनर्धं स्मा कृणुहि॥१८॥

भावार्थः-राजा तथा यत्नमातिष्ठेद् यथा स्वकीयाः सेनाः सुशिक्षिता विजयिन्यो बलवत्यो भवेयुः सर्वे बालकाः कन्याश्च ब्रह्मचर्येण विद्यायुक्ता भूत्वा समृद्धिं प्राप्ताः सत्यं न्यायं धर्मं सततं सेवेरन्॥१८॥

पदार्थः-हे (**मघवन्**) बहुत धन से युक्त (**इन्द्र**) दुष्टों के मारने वाले! आप (**आसु**) इन (**पृत्सु**) वीर मनुष्यों की सेनाओं में (**अस्मभ्यम्**) हम लोगों के लिये (**महि**) बड़े (**सुगम्**) उत्तम प्रकार चलते हैं जिसमें उस (**वरिवः**) सेवन को (**कः**) करें (**नः**) हम लोगों को (**स्मा**) ही विजयी करें ओर हे (**इन्द्र**) सम्पूर्ण ऐश्वर्य्यों के देने वाले! आप (**अपाम्**) प्राणों के (**तोकस्य**) शीघ्र उत्पन्न हुए अपत्य के और (**तनयस्य**) सुकुमार के बोध के लिये और शत्रुओं को (**जेषे**) जीतने के लिये (**नः**) हम लोगों को (**सूरीन्**) युद्धविद्या में कुशल विद्वान् और (**अर्धम्**) अच्छे प्रकार समृद्धि को (**स्मा**) ही (**कृणुहि**) करिये॥१८॥

भावार्थः-राजा वैसा यत्न करे जैसे अपनी सेनायें उत्तम प्रकार शिक्षित, जीतने वाली और बलयुक्त होवें और सम्पूर्ण बालक और कन्यायें ब्रह्मचर्य्य से विद्यायुक्त होकर समृद्धि को प्राप्त हुए सत्य, न्याय और धर्म का निरन्तर सेवन करें॥१८॥

पुना राजामात्याः कीदृशा भवेयुरित्याह॥

फिर राजा और मन्त्रीजन कैसे होवें, इस विषय को कहते हैं॥

आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः।
अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु॥१९॥

आ। त्वा। हरयः। वृषणः। युजानाः। वृषऽरथासः। वृषऽरश्मयः। अत्याः। अस्मत्राञ्चः। वृषणः। वज्रऽवाहः। वृष्णे। मदाय। सुऽयुजः। वहन्तु॥१९॥

पदार्थः-(**आ**) (**त्वा**) त्वाम् (**हरयः**) सुशिक्षिता अश्वा इव मनुष्याः (**वृषणः**) बलिष्ठाः (**युजानाः**) समाहितात्मानः (**वृषरथासः**) वृषा बलयुक्ता रथाः सेनाङ्गानि येषां ते (**वृषरश्मयः**) रश्मय इव विजयसुखवर्षकास्तेजस्विनः (**अत्याः**) सकलशुभगुणकर्मव्यापिनः (**अस्मत्राञ्च**) ये शत्रुभ्योऽस्माँस्त्रायन्ते तानञ्चन्ति प्राप्नुवन्ति ते (**वज्रवाहः**) शस्त्रास्त्रविद्यावोढारः (**वृष्णे**) बलकराय (**मदाय**) आनन्दाय (**सुयुजः**) ये सुष्ठु युञ्जते योजयन्ति वा (**वहन्तु**) प्राप्नुवन्तु प्रापयन्तु वा॥१९॥

अन्वयः-हे इन्द्र राजन्! यथा वृषणो युजाना वृषरथासो वृषरश्मयोऽत्या अस्मत्राञ्चो वृषणो वज्रवाहः सुयुजो हरयो वृष्णे मदाय त्वा वहन्तु तथैतांस्त्वं प्रीत्याऽऽवह॥१९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। राज्ञा सुपरीक्ष्योत्तमगुणकर्मस्वभावा जना राज्यकर्माधिकारेषु नियोजनीयाः स्वयमपि शभगुणकर्मस्वभावः स्यात्॥१९॥

पदार्थः-हे अत्यन्त ऐश्वर्य्य से युक्त राजन्! जैसे (**वृषणः**) बलयुक्त (**युजानाः**) जिनके सावधान आत्मा और (**वृषरथासः**) बलयुक्त सेना के अङ्ग जिनके वे (**वृषरश्मयः**) किरणों के सदृश विजय सुख के वर्षाने वाले तेजस्वी (**अत्याः**) सम्पूर्ण श्रेष्ठ गुण और कर्म्मों में व्यापी (**अस्मत्राञ्च**) शत्रुओं से हम लोगों की रक्षा करने वालों को प्राप्त होने और (**वृषणः**) शत्रुशक्ति के रोकने वाले (**वज्रवाहः**) शस्त्र और अस्त्रों की विद्या को धारण करने तथा (**सुयुजः**) उत्तम प्रकार युक्त होने वा युक्त कराने वाले (**हरयः**) उत्तम प्रकार शिक्षित घोड़ों के सदृश मनुष्य (**वृष्णे**) बलकारक (**मदाय**) आनन्द के लिये (**त्वा**) आपको (**वहन्तु**) प्राप्त हों वा प्राप्त करावें, वैसे इनको आप प्रीति से (**आ**) प्राप्त हूजिये॥१९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। राजा को चाहिये कि उत्तम प्रकार परीक्षा करके उत्तम गुण, कर्म्म और स्वभाव वाले मनुष्यों को राज्य कर्म्म के अधिकारों में नियुक्त करे तथा आप भी श्रेष्ठ गुण, कर्म्म और स्वभाव वाला होवे॥१९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ ते॑ वृष॒न् वृष॑णो॒ द्रोण॑मस्थुर्घृ॒तप्रु॑षो॒ नोर्म॑यो॒ मद॑न्तः।

इन्द्र॒ प्र तु॒भ्यं॒ वृष॑भिः सु॒ता॒नां॒ वृष्णे॑ भरन्ति वृष॒भाय॒ सोम॑म्॥ २०॥ १९॥

आ। ते॒। वृ॒ष॒न्। वृष॑णः। द्रोण॑म्। अ॒स्थुः॒। घृ॒त॒ऽप्रु॑षः। न। ऊ॒र्मयः॑। मद॑न्तः। इन्द्र॑। प्र। तु॒भ्य॒म्। वृष॑ऽभिः। सु॒ता॒ना॑म्। वृष्णे॑। भ॒र॒न्ति॒। वृ॒ष॒भाय॑। सोम॑म्॥ २०॥

पदार्थः-(**आ**) समन्तात् (**ते**) तव (**वृषन्**) बलयुक्त (**वृषणः**) बलिष्ठ (**द्रोणम्**) द्रवन्ति येन विमानादियानेन तत् (**अस्थुः**) आतिष्ठन्ति (**घृतप्रुषः**) ये घृतमुदकं प्रोषयन्ति पूरयन्ति ते (**न**) इव (**ऊर्मयः**) समुद्रादिजलतरङ्गाः (**मदन्तः**) आनन्दन्तः (**इन्द्र**) सकलैश्वर्यसम्पन्न (**प्र**) (**तुभ्यम्**) (**वृषभिः**) बलिष्ठैर्वैद्यैः (**सुतानाम्**) निष्पादितानाम् (**वृष्णे**) बलाय (**भरन्ति**) (**वृषभाय**) बलमिच्छुकाय (**सोमम्**) महौषधिरसम्॥ २०॥

अन्वयः-हे वृषन्निन्द्र! ये ते वृषणो घृतप्रुष ऊर्मयो न त्वां मदन्तो वृषभिः सुतानां सोमं वृष्णे वृषभाय तुभ्यं प्र भरन्ति द्रोणामास्थुस्तांस्त्वं प्रीणीहि॥ २०॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! ये सत्यभावेन तव राज्यस्य हितं चिकीर्षन्ति तांस्त्वं सुखिनो रक्षेर्यथा वायुना जलतरङ्गा उल्लसन्ति तथैव सत्सङ्गेन बुद्धयः समुल्लसन्तीति विद्धि॥ २०॥

पदार्थः-हे (**वृषन्**) बल से युक्त (**इन्द्र**) सम्पूर्ण ऐश्वर्य्यों से सम्पन्न! जो (**ते**) आपके (**वृषणः**) बलिष्ठ (**घृतप्रुषः**) जल को पूर्ण करने वाले (**ऊर्मयः**) समुद्र आदि के जल के तरंग (**न**) जैसे वैसे आपको (**मदन्तः**) आनन्द देते हुए (**वृषभिः**) बलिष्ठ वैद्यों से (**सुतानाम्**) उत्पन्न किये हुए (**सोमम्**) बड़ी ओषधियों के रस को (**वृष्णे**) बल के और (**वृषभाय**) बल की इच्छा करने वाले (**तुभ्यम्**) आपके लिये (**प्र, भरन्ति**) अच्छे प्रकार धारण करते हैं तथा (**द्रोणम्**) जाते हैं जिस विमान आदि वाहन से उस पर (**आ**) सब प्रकार से (**अस्थुः**) स्थित होते हैं, उनको आप प्रसन्न करिये॥ २०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जो सत्यभाव से आपके राज्य के हित करने की इच्छा करते हैं, उनको आप सुखी रखिये और जैसे वायु से जल के तरङ्ग हैं, वैसे ही सत्संग से बुद्धियाँ बढ़ती हैं, ऐसा जानो॥ २०॥

पुनः स राजा कीदृशः स्यादित्याह॥

फिर वह राजा कैसा होवे, इस विषय का कहते हैं॥

वृषा॑सि दि॒वो वृ॑ष॒भः पृ॑थि॒व्या वृषा॒ सिन्धू॑नां वृष॒भः स्तिया॑नाम्।

वृष्णे॑ त॒ इन्दु॑र्वृषभ पीपाय स्वा॒दू रसो॑ मधु॒पेयो॒ वरा॑य॥ २१॥

वृषा॑। अ॒सि॒। दि॒वः। वृ॒ष॒भः। पृ॒थि॒व्याः। वृषा॑। सिन्धू॑नाम्। वृ॒ष॒भः। स्तिया॑नाम्। वृष्णे॑। ते॒। इन्दुः॑। वृ॒ष॒भ॒। पी॒पा॒य॒। स्वा॒दुः। रसः॑। म॒धु॒ऽपेयः॑। वरा॑य॥ २१॥

पदार्थः-(**वृषा**) बलिष्ठः (**असि**) (**दिवः**) सूर्य्यस्य (**वृषभः**) बलिष्ठः श्रेष्ठश्च (**पृथिव्याः**) भूमेः (**वृषा**) वर्षकः (**सिन्धूनाम्**) नदीनां समुद्राणां वा (**वृषभः**) अत्यन्तं कर्ता (**स्तियानाम्**) संहतानां स्थावरजङ्गमानां प्राण्यप्राणिनाम् (**वृष्णे**) सुखवर्षकाय (**ते**) तुभ्यम् (**इन्दुः**) सोमः (**वृषभ**) शत्रुशक्तिबन्धक (**पीपाय**) पानाय (**स्वादुः**) स्वादुयुक्तः (**रसः**) (**मधुपेयः**) मधुना सह पातुं योग्यः (**वराय**) उत्तमाय॥ २१॥

अन्वयः-हे वृषभेन्द्र! यतस्त्वं दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषा स्तियानां वृषभोऽसि ते वराय वृष्णे पीपाय स्वादुरिन्दू रसो मधुपेयो रसोऽस्तु॥ २१॥

भावार्थः-हे राजन्! यदि त्वं विद्यद्भूमिनदीसमुद्रान्तरिक्षस्थावरजङ्गमानां पदार्थानां विद्योपयोगौ विजानीयास्तर्हि त्वां महानानन्दः प्राप्नुयात्॥ २१॥

पदार्थः-हे (**वृषभ**) शत्रुओं के सामर्थ्य के प्रतिबन्धक, ऐश्वर्य्य से युक्त जिससे आप (**दिवः**) सूर्य्य के (**वृषभः**) बलिष्ठ और श्रेष्ठ (**पृथिव्याः**) भूमि से (**वृषा**) वर्षाने वाले और (**सिन्धूनाम्**) नदियों वा समुद्रों के (**वृषा**) वर्षाने वाले और (**स्तियानाम्**) मिले हुए नहीं चलने और चलने वाले प्राणी और अप्राणियों के (**वृषभः**) अत्यन्त करने वाले (**असि**) हैं (**ते**) आप (**वराय**) उत्तम (**वृष्णे**) सुख के वर्षाने वाले के लिये (**पीपाय**) पान को (**स्वादुः**) स्वादु से युक्त (**इन्दुः**) सोमलता का (**रसः**) रस (**मधुपेयः**) सहत के साथ पीने योग्य हो॥ २१॥

भावार्थः-हे राजन्! जो आप बिजुली, भूमि, नदी, समुद्र, अन्तरिक्ष, स्थावर और जङ्गम पदार्थों की विद्या और उपयोग को जानिये तो आपको बड़ा आनन्द प्राप्त होवे॥ २१॥

पुनः स राजा कस्य सत्कारं कुर्यादित्याह॥

फिर वह राजा किसका सत्कार करे, इस विषय को कहते हैं॥

अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत्।
अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः॥ २२॥

अयम्। देवः। सहसा। जायमानः। इन्द्रेण। युजा। पणिम्। अस्तभायत्। अयम्। स्वस्य। पितुः। आयुधानि। इन्दुः। अमुष्णात्। अशिवस्य। मायाः॥ २२॥

पदार्थः-(**अयम्**) (**देवः**) दिव्यगुणः (**सहसा**) बलेन (**जायमानः**) उत्पद्यमानः (**इन्द्रेण**) परमैश्वर्येण (**युजा**) यो युङ्क्ते तेन राज्ञा (**पणिम्**) स्तुत्यं व्यवहारम् (**अस्तभायत्**) स्तभ्नाति स्थिरीकरोति (**अयम्**) (**स्वस्य**) (**पितुः**) जनकस्य (**आयुधानि**) शस्त्रास्त्राणि (**इन्दुः**) आनन्दकरः (**अमुष्णात्**) मुष्णाति चोरयति (**अशिवस्य**) अमङ्गलस्य (**मायाः**) प्रज्ञाः॥ २२॥

अन्वयः-हे राजन्! योऽयमिन्द्रेण युजा सहसा जायमानो देवो विद्वान् पणिमस्तभायद् योऽयमिन्दुः स्वस्य पितुरायुधान्यस्तभायदशिवस्य माया अमुष्णात्तं भवान् गुरुवत्सत्करोतु॥ २२॥

भावार्थः-हे राजन्! ये धर्म्यं व्यवहारं स्वयमाचर्य्य सर्वत्र प्रचारयन्ति युद्धविद्योपदेशकुशला अमङ्गलं सर्वतो विनाश्य भद्रं जनयन्ति ते त्वत्तः सत्कारं प्राप्नुवन्तु॥२२॥

पदार्थः-हे राजन्! जो **(अयम्)** यह **(इन्द्रेण)** अत्यन्त ऐश्वर्य से **(युजा)** युक्त होने वाले राजा से **(सहसा)** बल से **(जायमानः)** उत्पन्न हुआ **(देवः)** श्रेष्ठ गुण वाला विद्वान् **(पणिम्)** स्तुति करने योग्य व्यवहार को **(अस्तभायत्)** स्थिर करता है और जो **(अयम्)** यह **(इन्दुः)** आनन्दकारक **(स्वस्य)** अपने **(पितुः)** पिता के **(आयुधानि)** शस्त्र और अस्त्रों को स्थिर करता है और **(अशिवस्य)** अमङ्गल की **(मायाः)** बुद्धियों को **(अमुष्णात्)** चुराता है, उसका आप गुरु के सदृश सत्कार करिये॥२२॥

भावार्थः-हे राजन्! जो धर्म्मयुक्त व्यवहार को स्वयं करके सर्वत्र प्रचार करते हैं और युद्धविद्या में और उपदेश में कुशल हुए अमङ्गल का सब प्रकार नाश करके कल्याण को उत्पन्न करते हैं, वे आपसे सत्कार को प्राप्त हों॥२२॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् कैसे होवें, इस विषय को कहते हैं॥

अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळ्हम्॥२३॥

अयम्। अकृणोत्। उषसः। सुऽपत्नीः। अयम्। सूर्ये। अदधात्। ज्योतिः। अन्तरित्यन्तः। अयम्। त्रिऽधातु। दिवि। रोचनेषु। त्रितेषु। विन्दत्। अमृतम्। निऽगूळ्हम्॥२३॥

पदार्थः-(**अयम्**) सूर्य्यः (**अकृणोत्**) करोति (**उषसः**) (**सुपत्नीः**) शोभना भार्या इव (**अयम्**) परमात्मा (**सूर्य्ये**) सवितरि (**अदधात्**) दधाति (**ज्योतिः**) प्रकाशम् (**अन्तः**) मध्ये (**अयम्**) (**त्रिधातु**) सत्वरजस्तमोमयं जगत् (**दिवि**) प्रकाशे (**रोचनेषु**) प्रकाशमानेषु (**त्रितेषु**) प्रसिद्धविद्युत्सूर्येषु (**विन्दत्**) विन्दति (**अमृतम्**) नाशरहितम् (**निगूळ्हम्**) नितरां गुप्तमतीन्द्रियम्॥२३॥

अन्वयः-हे विद्वांसो! यथाऽयं उषसः सुपत्नीरकृणोत्तथैकपत्नीव्रता यूयं भवत यथाऽयमीश्वरः सूर्य्येऽन्तर्ज्योतिरदधात् तथात्मासु विद्याप्रकाशं धत्त यथाऽयं जगदीश्वरो दिवि त्रितेषु रोचनेष्वमृतं निगूळ्हं त्रिधात्वव्यक्तं विन्दत्तथा प्रकृत्यादिकं जगद्विजानीत॥२३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! येऽत्र जगति विवाहितैकस्त्रीव्रता विद्याऽविद्याप्रकाशकाः कार्य्यकारणात्मगुप्तपदार्थविद्यावेत्तारः स्युस्ते सूर्य्यवदीश्वरवदाप्तवन्मन्तव्याः स्युः॥२३॥

पदार्थः-हे विद्वान् जनो! जैसे **(अयम्)** यह सूर्य्य **(उषसः)** प्रातःकाल वेलाओं को **(सुपत्नीः)** सुन्दर भार्याओं के सदृश **(अकृणोत्)** करता है, वैसे एक स्त्री के ग्रहणरूप व्रतधारी आप लोग हों और जैसे **(अयम्)** यह परमात्मा **(सूर्य्ये)** सूर्य्य के **(अन्तः)** मध्य में **(ज्योतिः)** प्रकाश को **(अदधात्)** धारण करता है, वैसे आत्माओं में विद्या के प्रकाश को धारण करिये और जैसे **(अयम्)** यह ईश्वर **(दिवि)**

प्रकाश में (**त्रितेषु**) प्रसिद्ध **[=अग्नि]** बिजुली और सूर्य में (**रोचनेषु**) प्रकाशमानों में (**अमृतम्**) नाश से रहित (**निगूळ्हम्**) अत्यन्त गुप्त अतीन्द्रिय (**त्रिधातु**) सत्व, रज और तमः स्वरूप जगत् को (**विन्दत्**) प्राप्त होता है, वैसे प्रकृति आदि जगत् को जानिये॥ २३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो इस जगत् में विवाहित एक स्त्री के ग्रहणरूप व्रतधारी, विद्या और अविद्या के प्रकाशक, कार्य्य-कारण स्वरूप गुप्त पदार्थों की विद्या के जानने वाले होवें; वे सूर्य्य, ईश्वर और यथार्थवक्ता जन के सदृश मन्तव्य होवें॥ २३॥

विद्वांस ईश्वरवद्वर्त्तेरन्नित्याह॥

विद्वान् जन ईश्वर के सदृश वर्त्तमान करे, इस विषय को कहते हैं॥

अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक् सप्तरश्मिम्।
अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम्॥ २४॥ २०॥

अयम्। द्यावापृथिवी इति। वि। स्कभायत्। अयम्। रथम्। अयुनक। सप्तऽरश्मिम्। अयम्। गोषु। शच्या। पक्वम्। अन्तरित्यन्तः। सोमः। दाधार। दशऽयन्त्रम्। उत्सम्॥ २४॥

पदार्थः-(**अयम्**) (**द्यावापृथिवी**) प्रकाशभूमी (**वि**) विशेषेण (**स्कभायत्**) दधाति (**अयम्**) सर्वधर्त्तेश्वरः (**रथम्**) रमणीयसूर्यलोकम् (**अयुनक्**) युनक्ति (**सप्तरश्मिम्**) सप्तविधा विद्यारश्मयो यस्मिँस्तम् (**अयम्**) धराधरः परमात्मा (**गोषु**) पृथीवीषु धेन्वादिषु वा (**शच्या**) सत्येन कर्मणा (**पक्वम्**) (**अन्तः**) मध्ये (**सोमः**) यः सर्वं जगत् सूते सः (**दाधार**) दधाति। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्। (**दशयन्त्रम्**) सूक्ष्मस्थूलानि दशभूतानि यन्त्रितानि यस्मिँस्तत् (**उत्सम्**) कूपमिव जलेन क्लिन्नम्॥ २४॥

अन्वयः-हे विद्वांसो! यथाऽयमीश्वरो द्यावापृथिवी विष्कभायदयं सप्तरश्मिं रथमयुनगयं सोमः शच्या गोष्वन्तरुत्समिव दशयन्त्रं पक्वं दाधार तथा यूयमपि धरत॥ २४॥

भावार्थः-हे विद्वांसो! यः सूर्यवन्न्यायं पृथिवीवत् क्षमां सर्वस्य धारणं दुग्धादीन् रसान्त्सर्वं जगद्यथावन्निर्माय धरति तथा यूयमप्येतत् सर्वं धरतेति॥ २४॥

अत्रेन्द्रविद्वदीश्वरगुणकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुश्चत्वारिंशत्तमं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् जनो! जैसे (**अयम्**) यह ईश्वर (**द्यावापृथिवी**) प्रकाश और भूमि को (**वि**) विशेष करके (**स्कभायत्**) धारण करता है और (**अयम्**) यह सब को धारण करने वाला ईश्वर (**सप्तरश्मिम्**) सात प्रकार की विद्यारूप किरणें जिसमें उस (**रथम्**) सुन्दर सूर्य्यलोक को (**अयुनक्**) युक्त करता है और (**अयम्**) यह धारण और नहीं धारण करने वाला परमात्मा (**सोमः**) सब जगत् को उत्पन्न करने वाला (**शच्या**) सत्य कर्म्म से (**गोषु**) पृथिवियों वा धेनु आदि के (**अन्तः**) मध्य में (**उत्सम्**) कूप के सदृश जल से खेदित को जैसे वैसे (**दशयन्त्रम्**) सूक्ष्म और स्थूल दश प्रकार के भूत प्राणी यन्त्रित जिसमें उस (**पक्वम्**) पके हुए को (**दाधार**) धारण करता है, वैसे आप लोग भी धारण कीजिये॥ २४॥

भावार्थः-हे विद्वान् जनो! जो सूर्य्य के सदृश न्याय को, पृथिवी के सदृश क्षमा को, सब के धारण और दुग्ध आदि रसों को और सब जगत् को यथावत् निर्माण करके धारण करता है, वैसे आप लोग भी इस सब को धारण करिये॥२४॥

इस सूक्त में इन्द्र, विद्वान् और ईश्वर के गुण कर्मों के वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चवालीसवाँ सूक्त और बीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ त्रयस्त्रिंशदृचस्य पञ्चचत्वारिंशत्तमस्य सूक्तस्य शंयुबार्हस्पत्य ऋषिः। १-३० इन्द्रः। ३१-३३ बृबुस्तक्षा। १, २,३, ८, १४, २०-२४, २८, ३०, ३२ गायत्री। ४, ७, ९, १०, ११, १२, १३, १५-१९, २५, २६ निचृद्गायत्री। ५, ६, २७ विराड्गायत्री। २९ स्वराडार्ची गायत्री छन्दः। षड्जः स्वरः। ३१ आर्च्युष्णिक्छन्दः। ऋषभः स्वरः। ३३ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ राजा किं कुर्यादित्याह॥

अब तेंतीस ऋचा वाले पैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा क्या करे इस विषय को कहते हैं॥

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा॥ १॥

यः। आ। अनयत्। पराऽवतः। सुऽनीती। तुर्वशम्। यदुम्। इन्द्रः। सः। नः। युवा। सखा॥ १॥

पदार्थः-(**यः**) (**आ**) समन्तात् (**अनयत्**) (**परावतः**) दूरदेशादपि (**सुनीती**) शोभनेन न्यायेन (**तुर्वशम्**) हिंसकानां वशकरम् (**यदुम्**) प्रयतमानं नरम् (**इन्द्रः**) सर्वैश्वर्यप्रदो राजा (**सः**) (**नः**) अस्माकम् (**युवा**) शरीरात्मबलयुक्तः (**सखा**) मित्रम्॥१॥

अन्वयः-हे मनुष्या! यो युवेन्द्रः सुनीती परावतस्तुर्वशं यदुमाऽनयत् स नः सखा भवतु॥१॥

भावार्थः-हे मनुष्या! यूयं तेन राज्ञा सह मैत्रीं कुरुत यस्सत्यन्यायेन दूरदेशस्थमपि विद्याविनयपरोपकारकुशलमाप्तं नरं श्रुत्वा स्वसमीपमानयति तेन राज्ञा सह सुहृदः सन्तो वर्त्तध्वम्॥१॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**युवा**) शरीर और आत्मा के बल से युक्त (**इन्द्रः**) सम्पूर्ण ऐश्वर्य्यों का देने वाला राजा (**सुनीती**) सुन्दर न्याय से (**परावतः**) दूर देश से भी (**तुर्वशम्**) हिंसकों को वश में करने वाले (**यदुम्**) यत्न करते हुए मनुष्य को (**आ**) सब प्रकार से (**अनयत्**) प्राप्त करावे (**सः**) वह (**नः**) हम लोगों का (**सखा**) मित्र हो॥१॥

भावार्थः-हे मनुष्यो! तुम उस राजा के साथ मैत्री करो जो सत्य न्याय से दूर देश में स्थित भी विद्या, विनय और परोपकार में कुशल, श्रेष्ठ मनुष्य को सुनकर अपने समीप लाता है, उस राजा के साथ मित्र हुए वर्त्ताव करो॥१॥

पुन राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

अविप्रे चिद्वयो दधदनाशुना चिदर्वता। इन्द्रो जेता हितं धनम्॥ २॥

अविप्रे। चित्। वयः। दधत्। अनाशुना। चित्। अर्वता। इन्द्रः। जेता। हितम्। धनम्॥ २॥

पदार्थः-(**अविप्रे**) अमेधाविनि (**चित्**) अपि (**वयः**) कमनीयं जीवनं विज्ञानं वा (**दधत्**) दधाति (**अनाशुना**) अनश्वेनाचिरेण गन्त्रा (**चित्**) (**अर्वता**) अश्वेन (**इन्द्रः**) शत्रुविदारकः (**जेता**) जयशीलः (**हितम्**) सुखकारि (**धनम्**) द्रव्यम्॥२॥

अन्वयः-हे मनुष्या! य इन्द्रोऽविप्रे चिद्वयो दधदनाशुनाऽर्वता चिद्धितं धनं जेता दधत्स कीर्त्तिमान् जायते इति वेद्यम्॥२॥

भावार्थः-यो विद्वान् राजा बालकेष्वज्ञेषु चाध्यापनोपदेशप्रचारेण विद्यां दधाति स कीर्तिमान् भूत्वाऽसेनोऽपि राज्यं लभते॥२॥

पदार्थः-हे मनुष्यो! जो (**इन्द्रः**) शत्रुओं का नाश करने वाला (**अविप्रे**) बुद्धिरहित में (**चित्**) भी (**वयः**) सुन्दर जीवन वा विज्ञान को (**दधत्**) धारण करता है तथा (**अनाशुना**) घोड़े से रहित शीघ्र जाने वाले वाहन से (**अर्वता**) घोड़े से (**चित्**) भी (**हितम्**) सुखकारक (**धनम्**) द्रव्य को (**जेता**) जीतने वाला धारण करता है, वह यशस्वी होता है, यह जानना चाहिये॥२॥

भावार्थः-जो विद्वान् राजा बालकों और अज्ञों में अध्यापन और उपदेश के प्रचार से विद्या को धारण करता है, वह यशस्वी होकर विना सेना के भी राज्य को प्राप्त होता है॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

मही॑रस्य॒ प्रणी॑तयः॒ पूर्वी॒रुत॒ प्रश॑स्तयः। नास्य॑ क्षीयन्त ऊ॒तयः॑॥३॥

मही॑। अ॒स्य॒। प्रऽनी॑तयः। पूर्वीः॑। उ॒त। प्रऽश॑स्तयः। न। अ॒स्य॒। क्षी॒य॒न्ते॒। ऊ॒तयः॑॥३॥

पदार्थः-(**महीः**) महत्यः (**अस्य**) राज्ञः (**प्रणीतयः**) प्रकृष्टा नीतयः (**पूर्वीः**) प्राचीना वेदोदिताः (**उत**) (**प्रशस्तयः**) सत्कीर्त्तयः (**न**) निषेधे (**अस्य**) (**क्षीयन्ते**) (**ऊतयः**) रक्षणाद्याः क्रियाः॥३॥

अन्वयः- हे मनुष्या! अस्य राज्ञो महीरुत पूर्वीः प्रणीतय ऊतयः सन्त्यस्य प्रशस्तयो न क्षीयन्ते॥३॥

भावार्थः-ये राजानो नित्यं महतीं राजधर्मनीतिं धृत्वा पुत्रवत् प्रजाः पालयन्ति तेषामक्षया कीर्तिर्जायते॥३॥

पदार्थः-हे मनुष्यो! (**अस्य**) इस राजा की (**महीः**) बड़ी (**उत**) और (**पूर्वीः**) प्राचीन वेदों में कही हुई (**प्रणीतयः**) उत्तम नीति और (**ऊतयः**) रक्षण आदि क्रियायें हैं (**अस्य**) इसकी (**प्रशस्तयः**) श्रेष्ठ कीर्तियाँ (**न**) नहीं (**क्षीयन्ते**) क्षीण होती हैं॥३॥

भावार्थः- जो राजाजन नित्य बड़ी राजधर्म्मनीति को धारण करके पुत्र के सदृश प्रजाओं का पालन करते हैं, उनका नाशरहित यश होता है॥३॥

पुनर्मनुष्यैः कः सत्कर्त्तव्य इत्याह॥

फिर मनुष्यों को किसका सत्कार करना चाहिये, इस विषय को कहते हैं॥

सखा॑यो ब्रह्म॑वाहसेऽर्चत॒ प्र च॑ गायत। स हि नः॒ प्रम॑तिर्म॒ही॥४॥

सखा॑यः। ब्रह्म॑ऽवाहसे। अर्चत॑। प्र। च॒। गा॒य॒त॒। सः। हि। नः॒। प्रऽम॑तिः। म॒ही॥४॥

पदार्थः-(**सखायः**) सुहृदः (**ब्रह्मवाहसे**) वेदेश्वरविज्ञानप्रापणाय (**अर्चत**) सत्कुरुत (**प्र**) प्रकर्षे (**च**) (**गायत**) प्रशंसत (**सः**) जगदीश्वरः (**हि**) यतः (**नः**) अस्मभ्यम् (**प्रमतिः**) प्रकृष्टा प्रज्ञा (**मही**) महती वाक्॥४॥

अन्वयः- हे सखायो यूयं ब्रह्मवाहसे यं प्रार्चत गायत च येन नः प्रमतिर्मही च दीयते स हि परमात्मा विद्वांश्चाऽस्माभिरुपास्यः सेवनीयश्चास्ति॥४॥

भावार्थः-हे मनुष्या! यूयं परस्परं सुहृदो भूत्वा परमेश्वरं सर्वस्य कल्याणाय प्रवर्त्तमानमाप्तमुपदेशकं च सदैव सत्कुरुत यतोऽस्मानुत्तमा प्रज्ञा वाक् चाप्नुयात्॥४॥

पदार्थः-हे (**सखायः**) मित्रो! आप लोग (**ब्रह्मवाहसे**) वेद और ईश्वर के विज्ञान प्राप्त कराने के लिये जिसका (**प्र, अर्चत**) अत्यन्त सत्कार करो (**गायत, च**) और प्रशंसा करो जिससे (**नः**) हम लोगों के लिये (**प्रमतिः**) अच्छी बुद्धि (**मही**) और बड़ी वाणी दी जाती है (**सः, हि**) वही जगदीश्वर और विद्वान् हम लोगों से उपासना और सेवा करने योग्य है॥४॥

भावार्थः- हे मनुष्यो! आप लोग परस्पर मित्र होकर परमेश्वर और सब के कल्याण के लिये प्रवृत्त यथार्थवक्ता तथा उपदेशक का सदा ही सत्कार करो, जिससे हम लोगों को उत्तम बुद्धि और वाणी प्राप्त होवे॥४॥

पुना राज्ञाऽमात्यैश्च कथं वर्त्तितव्यमित्याह॥

फिर राजा और मन्त्रियों को कैसा वर्त्ताव करना चाहिये, इस विषय को कहते हैं॥

त्वमे॑कस्य वृत्रहन्नवि॒ता द्वयो॑रसि। उ॒तेदृ॒शे यथा॑ व॒यम्॥५॥२१॥

त्वम्। एक॑स्य। वृ॒त्र॒ह॒न्। अ॒वि॒ता। द्वयोः॑। अ॒सि॒। उ॒त। ई॒दृ॒शे। यथा॑। व॒यम्॥५॥

पदार्थः-(**त्वम्**) (**एकस्य**) असहायस्य (**वृत्रहन्**) यः सूर्यो वृत्रं हन्ति तद्वच्छत्रुहन्तः (**अविता**) रक्षकः (**द्वयोः**) राजप्रजाजनयोः (**असि**) (**उत**) (**ईदृशे**) ईदृग्व्यवहारे (**यथा**) (**वयम्**)॥५॥

अन्वयः-हे वृत्रहन् राजन्! यथा वयमीदृश एकस्योत द्वयो रक्षका भवामस्तथा यतस्त्वमविताऽसि तस्मात् सत्कर्त्तव्योऽसि॥५॥

भावार्थः-हे राजन्! यथा वयं पक्षपातं विहाय स्वकीयपरजनयोर्यथावन्न्यायं कुर्मस्तथैव भवान् करोतु। ईदृशे धर्म्ये वर्त्तमानानामस्माकं सदैवाभ्युदयनिःश्रेयसे भवतः॥५॥

पदार्थः-हे (**वृत्रहन्**) मेघ को नाश करने वाले सूर्य के समान शत्रुओं के मारने वाले राजन्! (**यथा**) जैसे (**वयम्**) हम लोग (**ईदृशे**) ऐसे व्यवहार में (**एकस्य**) सहायरहित के (**उत**) और (**द्वयोः**) राजा और प्रजाजनों के रक्षक होते हैं, वैसे जिससे (**त्वम्**) आप (**अविता**) रक्षक (**असि**) हो, इससे सत्कार करने योग्य हो॥५॥

भावार्थः- हे राजन्! जैसे हम लोग पक्षपात का त्याग करके अपने और अन्य जन का यथावत् न्याय करें, वैसे ही आप करिये। ऐसे धर्म्मयुक्त व्यवहार में वर्त्तमान हम लोगों की सदा ही वृद्धि और मोक्ष होते हैं॥५॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

नय॒सीद्व॒ति॒ द्विष॑: कृ॒णोष्यु॑क्थशं॒सिन॑:। नृभि॑: सु॒वीर॑: उच्यसे॥६॥

नय॑सि। इत्। ऊँ इति॑। अति॑। द्विष॑:। कृ॒णोषि॑:। उ॒क्थ॒ऽशं॒सिन॑:। नृऽभि॑:। सु॒ऽवीर॑:। उ॒च्य॒से॒॥६॥

पदार्थः-(**नयसि**) प्राप्नोषि प्रापयसि वा (**इत्**) एव (**उ**) (**अति**) (**द्विषः**) ये द्विषन्ति तान् (**कृणोषि**) (**उक्थशंसिनः**) वेदप्रकाशकरणशीलान् (**नृभिः**) नायकैः (**सुवीरः**) शोभना वीरा यस्य सः (**उच्यसे**)॥६॥

अन्वयः-हे राजन्! यतस्त्वं द्विष उक्थशंसिनः कृणोष्युपायमुल्लङ्घयित्वा धर्ममति नयस्यु नृभिः सुवीरः सर्वान् प्रत्युच्यसे तस्मादिन्माननीयोऽसि॥६॥

भावार्थः-हे राजन्! यदि भवान् विनयवान् विद्वान् भवेत्तर्हि वेदधर्मद्वेष्टृनपि वेदोक्तधर्मप्रियानुपदेशेन विनयेन वा कर्तुं शक्नोति॥६॥

पदार्थः-हे राजन्! जिससे आप (**द्विषः**) द्वेष करने वालों को (**उक्थसंसिनः**) वेद की प्रशंसा करने वाले को (**कृणोषि**) करते हो और उपाय का उल्लङ्घन करके धर्म्म को (**अति, नयसि**) अत्यन्त प्राप्त होते वा प्राप्त करते हो (**उ**) और (**नृभिः**) नायक अग्रणी मनुष्यों से (**सुवीरः**) श्रेष्ठ वीरों से युक्त हुए सब के प्रति (**उच्यते**) उपदेश किये जाते हो इससे (**इत्**) ही आदर करने योग्य हो॥६॥

भावार्थः-हे राजन्! जो आप नम्रतायुक्त, विद्वान् होवे तो वेद में कहे हुए धर्म्म से द्वेष करने वालों को भी उपदेश वा विनय से वेदोक्त धर्म्म में प्रीति करने वाले कर सकते हो॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

ब्र॒ह्माणं॒ ब्रह्म॑वाहसं गी॒र्भि: सखा॑यमृ॒ग्मिय॑म्। गां न दो॒हसे॑ हुवे॥७॥

ब्रह्मा॑णम्। ब्रह्म॑ऽवाहसम्। गी॒:ऽभि:। सखा॑यम्। ऋ॒ग्मिय॑म्। गाम्। न। दो॒हसे॑। हु॒वे॒॥७॥

पदार्थः-(**ब्रह्माणम्**) चतुर्वेदविदम् (**ब्रह्मवाहसम्**) वेदानां शब्दार्थसम्बन्धस्वराणां प्रापकम् (**गीर्भिः**) सुशिक्षिताभिर्मधुराभिः सत्याभिर्वाग्भिः (**सखायम्**) सर्वेषां मित्रम् (**ऋग्मियम्**) स्तुतिभिः स्तवनीयम् (**गाम्**) दुग्धदात्रीं धेनुम् (**न**) इव (**दोहसे**) दोग्धुम् (**हुवे**) आह्वयामि प्रशंसामि च॥७॥

अन्वयः-हे राजन्! यथाहं गीर्भिर्दोहसे गां न सखायमृग्मियं ब्रह्मवाहसं ब्रह्माणं हुवे तथैनं भवानाह्वयतु॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्वांसो वेदपारमाप्तं विद्वांसमाश्रित्य सभ्या विपश्चितो जायन्ते तथैतेषां सङ्गेन यूयमपि विद्वांसश्चतुरा वा भवत॥७॥

पदार्थः-हे राजन्! जैसे मैं **(गीर्भिः)** सुशिक्षायुक्त, मधुर, सत्यवाणियों से **(दोहसे)** दोहने पूरण करने को **(गाम्)** गौ के **(न)** समान **(सखायम्)** सब के मित्र **(ऋग्मियम्)** स्तुतियों से स्तुति करने योग्य **(ब्रह्मवाहसम्)** वेदों के शब्दार्थ सम्बन्ध और स्वरों के कराने वाले **(ब्रह्माणम्)** चतुर्वेदवेत्ता विद्वान् को **(हुवे)** बुलाता और उसकी प्रशंसा करता हूँ, वैसे इसको आप बुला और उसकी प्रशंसा करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन वेदपारगन्ता, आप्त, विद्वान् का आश्रय लेकर सभ्य विपश्चित् होते हैं, वैसे इनके सङ्ग से तुम भी विद्वान् वा चतुर होओ॥७॥

पुनः किं कृत्वा राजैश्वर्यं प्राप्नुयादित्याह॥

फिर क्या करके राजा ऐश्वर्य्य को प्राप्त होवे, इस विषय को कहते हैं॥

यस्य॒ विश्वा॑नि॒ हस्त॑योरू॒चुर्वसू॑नि॒ नि द्वि॒ता। वी॒रस्य॑ पृतना॒षहः॑॥८॥

यस्य॑। विश्वा॑नि। हस्त॑योः। ऊ॒चुः। वसू॑नि। नि। द्वि॒ता। वी॒रस्य॑। पृ॒त॒ना॒ऽसहः॑॥८॥

पदार्थः-**(यस्य)** राजादेर्विदुषः **(विश्वानि)** सर्वाणि **(हस्तयोः)** **(ऊचुः)** वदन्ति **(वसूनि)** द्रव्याणि **(नि)** निश्चितम् **(द्विता)** द्वयो राजप्रजयोरुपदेशकोपदेश्योर्वा भावः **(वीरस्य)** शत्रुबलमभिव्याप्तुं शीलस्य **(पृतनाषहः)** ये पृतनां शत्रुसेनां सहन्ते ते॥८॥

अन्वयः-हे विद्वांसो! यस्य वीरस्य हस्तयोर्विश्वानि वसूनि पृतनाषहो न्यूचुस्तेन सह द्विता रक्षताम्॥८॥

भावार्थः-यदि राजा विद्याविनयाभ्यां पुत्रवत्प्रजाः पालयेत्तर्हि सर्वमैश्वर्यमखिलं सुखं च तदधीनमेव भवेद्येनोत्तमानमात्यान् प्रशंसितां सेनां प्राप्य राजा प्रजाजनानां कल्याणं कर्तुं शक्नोति॥८॥

पदार्थः-हे विद्वान् जनो! **(यस्य)** जिस राजादि विद्वान् **(वीरस्य)** शत्रु के बल को दबाने वाले के **(हस्तयोः)** हाथों में **(विश्वानि)** सम्पूर्ण **(वसूनि)** द्रव्यों को **(पृतनाषहः)** शत्रुओं की सेना को सहने वाले **(नि)** निश्चित **(ऊचुः)** कहते हैं उसके साथ **(द्विता)** दोनों-राजा और प्रजा तथा उपदेश देने वाले और उपदेश देने योग्यपने की रक्षा करो॥८॥

भावार्थः-जो राजा विद्या और विनय से पुत्र के सदृश प्रजाओं की पालना करे तो सम्पूर्ण ऐश्वर्य्य और सम्पूर्ण सुख उसके आधीन ही होवे, जिससे उत्तम मन्त्री और प्रशंसित सेना को प्राप्त होकर राजा प्रजाजनों के कल्याण को कर सकता है॥८॥

पुनर्मनुष्याः किं निवार्य किं प्राप्नुयिरित्याह॥

फिर मनुष्य किसका निवारण करके किसको प्राप्त होवें, इस विषय को कहते हैं॥

वि दृ॒ळ्हानि॑ चिदद्रिवो॒ जना॑नां शचीपते। वृ॒ह मा॒या अ॑नानत॥९॥

वि। दृ॒ळ्हानि॑। चि॒त्। अ॒द्रि॒ऽव॒रः। जना॑नाम्। श॒ची॒ऽप॒ते॒। वृ॒ह। मा॒यारः। अ॒ना॒न॒त॒॥९॥

पदार्थः-(**वि**) (**दृळ्हानि**) निश्चितानि (**चित्**) अपि (**अद्रिवः**) मेघकरसूर्यवद्वर्त्तमान (**जनानाम्**) मनुष्याणाम् (**शचीपते**) प्रजास्वामिन् (**वृह**) उच्छिन्धि (**मायाः**) कपटानि (**अनानत**) शत्रूणां समीपे नम्रतारहित॥९॥

अन्वयः-हे अद्रिवोऽनानत शचीपते! त्वं माया वृह चिदपि जनानां दृळ्हानि सैन्यानि सम्पाद्य शत्रून् वि वृह॥९॥

भावार्थः-स एव राजाऽऽचार्योऽध्यापको वोत्तमः स्याद्यो छलादिदोषान्निवार्य्य मनुष्यान् धर्माचारान्तसततं कुर्यात्॥९॥

पदार्थः-हे (**अद्रिवः**) मेघों के करने वाले सूर्य्य के सदृश वर्त्तमान (**अनानत**) शत्रुओं के समीप में नम्रता से रहित (**शचीपते**) प्रजा के स्वामिन्! आप (**मायाः**) कपटों को (**वृह**) काटो और (**चित्**) भी (**जनानाम्**) मनुष्यों की (**दृळ्हानि**) निश्चित सेनाओं को करके शत्रुओं का (**वि**) विशेष करके नाश करिये॥९॥

भावार्थः-वह राजा, आचार्य्य वा अध्यापक उत्तम होवे, जो छल आदि दोषों का निवारण करके मनुष्यों को धर्म्म के आचरण से युक्त निरन्तर करे॥९॥

पुना राजप्रजाजनाः परस्परं कथं वर्तेयुरित्याह॥

फिर राजा और प्रजाजन परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

तमु॑ त्वा सत्य सोमपा॒ इन्द्र॑ वाजानां पते। अहू॑महि श्रव॒स्यव॑ः॥१०॥२२॥

तम्। ऊँ॒ इति॑। त्वा॒। स॒त्य॒। सो॒म॒ऽपा॒ः। इन्द्र॑। वा॒जा॒ना॒म्। प॒ते॒। अहू॑महि। श्र॒व॒स्यव॑ः॥१०॥

पदार्थः-(**तम्**) (**उ**) (**त्वा**) त्वाम् (**सत्य**) सत्सु साधो (**सोमपाः**) यः सोममैश्वर्यं पाति तत्सम्बुद्धौ (**इन्द्र**) परमैश्वर्यप्रद (**वाजानाम्**) विज्ञानान्नादीनाम् (**पते**) पालक स्वामिन् (**अहूमहि**) प्रशंसेम (**श्रवस्यवः**) य आत्मनः श्रवोऽन्नादिकमिच्छवः॥१०॥

अन्वयः-हे सत्य सोमपा वाजानां पत इन्द्र! श्रवस्यवो वयं त्वाऽहूमहि तथा तमु सर्व आह्वयन्तु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन् वा विद्वान्! भवाञ्छुभगुणकर्मस्वभावः प्रजापालनतत्परः सुशीलो जितेन्द्रियो यावद् भविष्यति तावद्वयं त्वां मंस्यामहे॥१०॥

पदार्थः-हे (**सत्य**) श्रेष्ठों में श्रेष्ठ (**सोमपाः**) ऐश्वर्य की रक्षा करने तथा (**वाजानाम्**) विज्ञान और अन्न आदिकों के (**पते**) पालने और (**इन्द्र**) अत्यन्त ऐश्वर्य के देने वाले! (**श्रवस्यवः**) अपने अन्न आदि की इच्छा करने वाले हम लोग (**त्वा**) आपकी (**अहूमहि**) प्रशंसा करें, वैसे (**तम्, उ**) उन्हीं को सब लोग पुकारें॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन् वा विद्वन्! आप श्रेष्ठ गुण, कर्म्म और स्वभाव से युक्त होकर प्रजा के पालन में तत्पर सुशील और इन्द्रियों के जीतने वाले जब तक होंगे तबतक हम लोग आपको मानेंगे॥१०॥

पुना राजप्रजाजनाः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

तमु॑ त्वा॒ यः पु॒रासि॑थ॒ यो वा॑ नू॒नं हि॒ते धने॑। हव्यः॒ स श्रु॑धी॒ हव॑म्॥११॥

तम्। ऊँ॒ इति॑। त्वा॒। यः। पु॒रा। आसि॑थ। यः। वा॒। नू॒नम्। हि॒ते। धने॑। हव्यः॑। सः। श्रु॒धि॒। हव॑म्॥११॥

पदार्थः-(**तम्**) (**उ**) (**त्वा**) त्वाम् (**यः**) (**पुरा**) प्रथमतः (**आसिथ**) (**यः**) (**वा**) (**नूनम्**) निश्चितम् (**हिते**) सुखकरे (**धने**) (**हव्यः**) आह्वयितुं योग्यः (**सः**) (**श्रुधी**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हवम्**) वार्त्ताम्॥११॥

अन्वयः-हे राजन्! यस्त्वं हिते धने पुराऽऽसिथ यो वा नूनं हिते धने हव्योऽसि तमु त्वा वयं श्रावयेम स त्वमस्माकं हवं श्रुधी॥११॥

भावार्थः-हे मनुष्या! यो राजा सर्वेषां हितमिच्छेत् सर्वान् धनैश्वर्य्ययुक्तान् करोति स सबलनिर्बलानां वार्त्ताः प्रीत्या श्रुत्वा यथार्थं न्यायं करोति तमेव सर्वे सततं सत्कुर्वन्तु॥११॥

पदार्थः-हे राजन्! (**यः**) जो आप (**हिते**) सुखकारक (**धने**) धन में (**पुरा**) प्रथम से (**आसिथ**) थे और (**यः**) जो (**वा**) वा (**नूनम्**) निश्चित सुखकारक धन में (**हव्यः**) पुकारने के योग्य हो (**तम्, उ**) उन्हीं (**त्वा**) आपको हम लोग सुनावें (**सः**) वह आप हम लोगों की (**हवम्**) बात को (**श्रुधी**) सुनिये॥११॥

भावार्थः-हे मनुष्यो! जो राजा सब के हित की इच्छा करे और सब को धन और ऐश्वर्य्य से युक्त करता है, वह बलिष्ठ और निर्बलों की बातों की प्रीति से सुन कर यथार्थ न्याय करता है, उसी का सब लोग निरन्तर सत्कार करें॥११॥

पुना राजादिभिः किं प्राप्य किं प्रापणीयमित्याह॥

फिर राजा आदिकों को क्या प्राप्त करके क्या प्राप्त करना चाहिये, इस विषय को कहते हैं॥

धी॒भिरर्व॑द्भिरर्व॑तो॒ वाजाँ॑ इन्द्र श्र॒वाय्या॑न्। त्वया॑ जेष्म हि॒तं धन॑म्॥१२॥

धी॒भिः। अर्व॑त्ऽभिः। अर्व॑तः। वाजा॑न्। इ॒न्द्र॒। श्र॒वाय्या॑न्। त्वया॑। जे॒ष्म॒। हि॒तम्। धन॑म्॥१२॥

पदार्थः-(**धीभिः**) प्रज्ञाभिः कर्मभिर्वा (**अर्वद्भिः**) अश्वैः (**अर्वतः**) अश्वानिव (**वाजान्**) वेगवतः (**इन्द्र**) शत्रुविदारक (**श्रवाय्यान्**) श्रोतुमिष्टान् (**त्वया**) स्वामिना सह (**जेष्म**) जयेम (**हितम्**) सुखकारकम् (**धनम्**)॥१२॥

अन्वयः-हे इन्द्र! यथा वयं धीभिरर्वद्भिर्वाजाञ्छ्रवाय्यानर्वतः प्राप्य त्वया सह हितं धनं जेष्म तथा भवानस्माभिः सह सुखेन वर्त्तताम्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदा राजादयो जना ऐकमत्यं विधायोत्तमानि सेनाङ्गानि सम्पाद्याऽन्यायकारिणो दुष्टाञ्जित्वा न्यायप्राप्तेन धनेन सर्वहितं कुर्युस्तदैव स्वहितसिद्धा जायेरन्॥१२॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के नाश करनेवाले! जैसे हम लोग **(धीभिः)** बुद्धियों वा कर्म्मों से **(अर्वद्भिः)** शब्द करते हुए घोड़ों से **(वाजान्)** वेगयुक्त **(श्रवाय्यान्)** सुनने को इष्ट **(अर्वतः)** घोड़ों के सदृश प्राप्त होकर **(त्वया)** आपके साथ **(हितम्)** सुखकारक **(धनम्)** धन को **(जेष्म)** जीतें, वैसे आप हम लोगों के साथ सुख से वर्त्ताव करो॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब राजा आदि जन एक सम्मति कर उत्तम सेना के अङ्गों को सम्पादन कर और अन्यायकारी दुष्टों को जीत कर न्याय से प्राप्त हुए धन से सब का हित करें, तभी अपने हित की सिद्धि से युक्त होवें॥१२॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते भरे वितन्तुसाय्यः॥१३॥

अभूः। ऊँ इति। वीर। गिर्वणः। महान्। इन्द्र। धने। हिते। भरे। वितन्तुसाय्यः॥१३॥

पदार्थः-(**अभूः**) भवेः **(उ)** **(वीर)** शौर्य्यादिगुणोपेत **(गिर्वणः)** यो गीर्भिर्वन्यते याच्यते तत्सम्बुद्धौ **(महान्)** महाशयः **(इन्द्र)** परमैश्वर्य्यप्रद **(धने)** **(हिते)** सुखकारके **(भरे)** स-ामे **(वितन्तसाय्यः)** यो वितन्तस्यतिविजयेऽस्ति सः॥१३॥

अन्वयः-हे गिर्वणो वीरेन्द्र! त्वा महान् वितन्तसाय्यः सन् हिते धन उ भरे विजेताऽभूः॥१३॥

भावार्थः-यदि राजा सर्वहितं प्रेप्सुः पुरुषज्ञानी कृतज्ञो योद्धृप्रियो भवेत्तस्य सदैव विजयेन प्रतिष्ठैश्वर्ये वर्धेयाताम्॥१३॥

पदार्थः-हे **(गिर्वणः)** वाणियों से याचना किये गये **(वीर)** शूरता आदि गुणों से युक्त **(इन्द्र)** अत्यन्त ऐश्वर्य्य के देने वाले! आप **(महान्)** महाशय **(वितन्तसाय्यः)** अत्यन्त विजय में होने वाले हुए **(हिते)** सुखकारक **(धने)** धन में **(उ)** और **(भरे)** स-ाम में जीतने वाले **(अभूः)** हूजिये॥१३॥

भावार्थः-जो राजा सब के हित के प्राप्त होने की इच्छा करता हुआ पुरुषों में ज्ञानी, किये हुए को जानने वाला और योद्धाओं का प्रिय होवे, उसके सदा ही विजय से प्रतिष्ठा और ऐश्वर्य्य बढ़े॥१३॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे इस विषयको कहते हैं॥

या त ऊतिरमित्रहन् मक्षूजवस्तमासति। तया नो हिनुही रथम्॥१४॥

या। ते। ऊतिः। अमित्रऽहन्। मक्षुजवःऽतमा। असति। तया। नः। हिनुहि। रथम्॥१४॥

पदार्थः-(**या**) (**ते**) तव (**ऊतिः**) रक्षाद्या क्रिया (**अमित्रहन्**) अरिहन् (**मक्षूजवस्तमा**) सद्योऽतिशयेन वेगयुक्ता (**असति**) भवेत् (**तया**) (**नः**) (**हिनुही**) वर्धय। अत्र **संहितायामि**ति दीर्घः। (**रथम्**) विमानादियानम्॥१४॥

अन्वयः-हे अमित्रहन्! या ते मक्षूजवस्तमोतिरसति तया नो रथं प्रापय्य हिनुही॥१४॥

भावार्थः-यो राजा वेगादिगुणयुक्तया रक्षया प्रजाः प्रसाद्योन्नयेत् स एव सततं वर्धेत॥१४॥

पदार्थः-हे (**अमित्रहन्**) शत्रुओं के मारने वाले (**या**) जो (**ते**) आपकी (**मक्षूजवस्तमा**) शीघ्र अतिशय वेग से युक्त (**ऊतिः**) रक्षा आदि क्रिया (**असति**) होवे (**तया**) उससे (**नः**) हम लोगों की (**रथम्**) विमान आदि वाहन को प्राप्त कराके (**हिनुही**) वृद्धि कीजिये॥१४॥

भावार्थः-जो राजा वेग आदि गुणों से युक्त रक्षा से प्रजाओं को प्रसन्न करके उन्नति करे, वही निरन्तर वृद्धि को प्राप्त होवे॥१४॥

पुनः स राजा केन किं जयेदित्याह॥

फिर वह राजा किससे किसको जीते, इस विषय को कहते हैं॥

स रथेन रथीतमोऽस्माकेनाभियुग्वना। जेषि जिष्णो हितं धनम्॥१५॥२३॥

सः। रथेन। रथिऽतमः। अस्माकेन। अभिऽयुग्वना। जेषि। जिष्णो इति। हितम्। धनम्॥१५॥

पदार्थः-(**सः**) (**रथेन**) (**रथीतमः**) बहवो रथा विद्यन्ते यस्य सोऽतिशयितः (**अस्माकेन**) अस्मदीयेन (**अभियुग्वना**) योऽभियुज्यते वन्यते विभज्यते तेन (**जेषि**) जयसि। अत्र शपो लुक्। (**जिष्णो**) जयशील (**हितम्**) प्रवृद्धम् (**धनम्**)॥१५॥

अन्वयः-हे जिष्णो! स रथीतमस्त्वमभियुग्वनाऽस्माकेन रथेन हितं धनं जेषि तस्मात् प्रशंसनीयो भवसि॥१५॥

भावार्थः-यो राजा प्रशंसनीयेन वाहनादिना बहु धनं जयति स प्रशंसनीयो भवति॥१५॥

पदार्थः-हे (**जिष्णो**) जीतने वाले (**सः**) वह (**रथीतमः**) अतिशय करके बहुत रथों वाले आप (**अभियुग्वना**) विभक्त होने वाले (**अस्माकेन**) हमारे (**रथेन**) वाहन से (**हितम्**) प्रवृद्ध (**धनम्**) धन को (**जेषि**) जीतते हो, इससे प्रशंसा करने योग्य होते हो॥१५॥

भावार्थः-जो राजा प्रशंसनीय वाहन आदि से बहुत धन को जीतता है, वह प्रशंसनीय होता है॥१५॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः। पतिर्जज्ञे वृषक्रतुः॥१६॥

यः। एकः। इत्। तम्। ऊँ इति। स्तुहि। कृष्टीनाम्। विऽचर्षणिः। पतिः। जज्ञे। वृषऽक्रतुः॥१६॥

पदार्थः-(**यः**) (**एकः**) असहायः (**इत्**) एव (**तम्**) वीरपुरुषम् (**उ**) (**स्तुहि**) प्रशंसय (**कृष्टीनाम्**) मनुष्याणाम् (**विचर्षणिः**) विचक्षणो द्रष्टा (**पतिः**) स्वामी (**जज्ञे**) जायते (**वृषक्रतुः**) वृषा बलवती क्रतुः प्रज्ञा यस्य सः॥१६॥

अन्वयः-हे मनुष्य! य एक इत्कृष्टीनां पतिर्विचर्षणिषर्वृषक्रतुर्जज्ञे तमु स्तुहि॥१६॥

भावार्थः-हे प्रजाजना योऽखिलविद्यः शुभगुणकर्मस्वभावः सततं न्यायेन प्रजापालनतत्परः स्यात्तमेव राजानं मन्यध्वं नेतरं क्षुद्राशयम्॥१६॥

पदार्थः-हे मनुष्य! (**यः**) जो (**एकः**) सहायरहित (**इत्**) ही (**कृष्टीनाम्**) मनुष्यों का (**पतिः**) स्वामी (**विचर्षणिः**) देखने वाला (**वृषक्रतुः**) बलयुक्त बुद्धि वाला (**जज्ञे**) होता है (**तम्**) उस वीर पुरुष की (**उ**) ही (**स्तुहि**) प्रशंसा करिये॥१६॥

भावार्थः-हे प्रजाजनो! जो सम्पूर्ण विद्या और श्रेष्ठ गुण, कर्म, स्वभाव वाला निरन्तर न्याय से प्रजाओं के पालन में तत्पर होवे, उसको राजा मानो, दूसरे क्षुद्राशय को नहीं॥१६॥

पुनः स राजा कीदृग्भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

यो गृणतामिदासिथापिरूती शिवः सखा। स त्वं न इन्द्र मृळय॥१७॥

यः। गृणताम्। इत्। आसिथ। आपिः। ऊती। शिवः। सखा। सः। त्वम्। नः। इन्द्र। मृळय॥१७॥

पदार्थः-(**यः**) (**गृणताम्**) प्रशंसकानाम् (**इत्**) एव (**आसिथ**) भवसि (**आपिः**) शुभगुणव्यापकः (**ऊती**) ऊत्या रक्षणादिक्रियया (**शिवः**) मङ्गलकारी (**सखा**) सुहृद् (**सः**) (**त्वम्**) (**नः**) अस्मानस्माकं वा (**इन्द्र**) दुःखविदारक (**मृळय**) सुखय ॥१७॥

अन्वयः-हे इन्द्र राजन्! यो गृणतां न आपिश्शिवः सखाऽऽसिथ स इत्त्वमूती नो मृळय॥१७॥

भावार्थः-हे राजन्! यदि त्वमजातशत्रुर्विश्वमित्रः सर्वस्य मङ्गलकारी प्रजासु भवेस्तर्हि सद्यो धर्मार्थकाममोक्षान् साध्नुयाः॥१७॥

पदार्थः-हे (**इन्द्र**) दुःखों के नाश करने वाले राजन्! (**यः**) जो (**गृणताम्**) प्रशंसा करने वाले (**नः**) हम लोगो के (**आपिः**) श्रेष्ठ गुणों से व्यापक (**शिवः**) मङ्गलकारी (**सखा**) मित्र (**आसिथ**) होते हो (**सः इत्**) वही (**त्वम्**) आप (**ऊती**) रक्षण आदि क्रिया से हम लोगों को (**मृळय**) सुखी करो॥१७॥

भावार्थः-हे राजन्! जो आप शत्रुरहित और संसार के मित्र, सब के मङ्गल करने वाले प्रजाओं में हूजिये तो शीघ्र धर्म्म, अर्थ, काम और मोक्ष को सिद्ध करिये॥१७॥

पुना राजादयः किं ध्यात्वां किं कुर्य्युरित्याह॥

फिर राजा आदि क्या ध्यान करके क्या करें, इस विषय को कहते हैं॥

धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः। सासह्यिष्ठा अभि स्पृधः॥१८॥

धि॒ष्व। वज्र॑म्। गभ॑स्त्योः। र॒क्षः॒ऽहत्या॑य। व॒ज्रि॒ऽव॒रिति॑ वज्रिऽवः। सा॒स॒ही॒ष्ठाः॒। अ॒भि। स्पृध॑रिति॑ स्पृधः॥ १८॥

पदार्थः-(**धिष्व**) धेहि (**वज्रम्**) शस्त्रास्त्रसमूहम् (**गभस्त्योः**) हस्तयोर्मध्ये (**रक्षोहत्याय**) दुष्टानां हननाय (**वज्रिवः**) प्रशस्तशस्त्रास्त्रप्रयोगकुशल (**सासहीष्ठाः**) भृशं सहेथाः (**अभि**) आभिमुख्ये (**स्पृधः**) स्पर्हणीयान्त्स- ामान्॥ १८॥

अन्वयः-हे वज्रिव इन्द्र राजंस्त्वं रक्षोहत्याय गभस्त्योर्वज्रं धिष्व स्पृधोऽभि सासहीष्ठाः॥ १८॥

भावार्थः-हे राजन्त्सेनाजना वा यूयं शस्त्रास्त्रप्रयोगेषु कुशला भूत्वा दस्य्वादीन् शत्रून् हत्वा सहनशीला भवत॥ १८॥

पदार्थः-हे (**वज्रिवः**) प्रशंसित शस्त्र और अस्त्रों के चलाने में चतुर और अत्यन्त ऐश्वर्य्य से युक्त राजन्! आप (**रक्षोहत्याय**) दुष्टों के मारने के लिये (**गभस्त्योः**) हाथों के मध्य में (**वज्रम्**) शस्त्र और अस्त्रों के समूह को (**धिष्व**) धारण करिये तथा (**स्पृधः**) स्पृहा करने योग्य स- ामों के (**अभि**) सन्मुख (**सासहीष्ठाः**) अत्यन्त सहिये॥ १८॥

भावार्थः-हे राजन् वा सेना के जनो! आप लोग शस्त्र और अस्त्रों के चलाने में चतुर होकर डाकू आदि शत्रुओं का नाश करके सहनशील हूजिये॥ १८॥

मनुष्याः कीदृशं जनं प्रशंसेयुरित्याह॥

मनुष्य कैसे जन की प्रशंसा करें, इस विषय को कहते हैं॥

प्र॒त्नं र॒यी॒णां युज॒ं सखा॑यं कीरि॒चोद॑नम्। ब्रह्म॑वाहस्तमं हुवे॥ १९॥

प्र॒त्नम्। र॒यी॒णाम्। युज॑म्। सखा॑यम्। की॒रि॒ऽचोद॑नम्। ब्रह्म॑वाह॒रिति॑ ब्रह्मऽवाहः॒ऽतमम्। हु॒वे॒॥ १९॥

पदार्थः-(**प्रत्नम्**) प्राचीनम् (**रयीणाम्**) धनानाम् (**युजम्**) योजकम् (**सखायम्**) सर्वसुहृदम् (**कीरिचोदनम्**) कीरीणां विद्यार्थिनां प्रेरकम् (**ब्रह्मवाहस्तमम्**) अतिशयेन वेदेश्वरविद्याप्रापकम् (**हुवे**) स्तौमि॥ १९॥

अन्वयः-हे मनुष्या! यथाऽहं रयीणां युजं कीरिचोदनं ब्रह्मवाहस्तमं प्रत्नं सखायं हुवे तथैनं यूयमपि प्रशंसत॥ १९॥

भावार्थः-ये सार्वजनहितसम्पादकं विद्वत्तमं सत्यग्रहणायाऽसत्यत्यागायऽध्यापनोपदेशाभ्यां प्रेरकं स्थिरमित्रं सत्कृत्य प्रशंसन्ति त एव गुणग्राहका भवन्ति॥ १९॥

पदार्थः-हे मनुष्यो! जैसे मैं (**रयीणाम्**) धनों के (**युजम्**) युक्त कराने वाले (**कीरिचोदनम्**) विद्यार्थियों के प्रेरक (**ब्रह्मवाहस्तमम्**) अतिशय वेद और ईश्वर की जो विद्या उसके प्राप्त कराने वाले (**प्रत्नम्**) प्राचीन (**सखायम्**) सब के मित्र की (**हुवे**) स्तुति करता हूँ, वैसे इसकी आप लोग भी प्रशंसा करो॥ १९॥

भावार्थः-जो सम्पूर्ण जनों के हितकारक, अत्यन्त विद्वान्, सत्य के ग्रहण और असत्य के त्याग के लिये अध्यापन और उपदेश से प्रेरणा करने वाले, स्थिर मित्र का सत्कार करके प्रशंसा करते हैं, वे ही गुणग्राहक होते हैं॥१९॥

पुनर्मनुष्यैः कीदृशो राजा कर्त्तव्य इत्याह॥

फिर मनुष्यों को कैसा राजा करना चाहिये, इस विषय को कहते हैं॥

स हि विश्वा॑नि॒ पार्थिवाँ॒ एको॒ वसू॑नि॒ पत्य॑ते। गिर्वणस्तमो॒ अध्रि॑गुः॥ २०॥ २४॥

सः। हि। विश्वा॑नि। पार्थि॑वा। एकः॑। वसू॑नि। पत्य॑ते। गिर्वणः॑ऽतमः। अध्रि॑ऽगुः॥ २०॥

पदार्थः-(**सः**) (**हि**) यतः (**विश्वानि**) (**पार्थिवा**) पृथिव्यां विदितानि (**एकः**) असहायः (**वसूनि**) द्रव्याणि (**पत्यते**) पतिरिवाचरति (**गिर्वणस्तमः**) अतिशयेन वाग्भिः प्रशंसनीयः (**अध्रिगुः**) सत्यगतिः॥२०॥

अन्वयः-हे मनुष्याः! स ह्येको गिर्वणस्तमोऽध्रिगू राजा विश्वानि पार्थिवा वसूनि पत्यतेऽतोऽस्माभिः सत्कर्तव्योऽस्ति॥२०॥

भावार्थः-हे मनुष्या! योऽद्वितीयबुद्धिविद्यः पृथिव्यादिपदार्थविद्यावित्प्रशंसनीयगुणकर्मस्वभावः सत्याचारी जनो भवेत्तमेव राजानं कुरुत॥२०॥

पदार्थः-हे मनुष्यो! (**सः**) वह (**हि**) जिससे (**एकः**) सहायरहित (**गिर्वणस्तमः**) अतिशयित वाणियों से प्रशंसा करने योग्य (**अध्रिगुः**) सत्यगमन वाला राजा (**विश्वानि**) समस्त (**पार्थिवा**) पृथिवी में जाने हुए (**वसूनि**) द्रव्यों को (**पत्यते**) स्वामी के सदृश आचरण करता है, इससे हम लोगों से सत्कार करने योग्य है॥२०॥

भावार्थः-हे मनुष्यो! जो विलक्षण बुद्धि और विद्या से युक्त, पृथिवी आदि पदार्थों की विद्या का जानने वाला, प्रशंसा करने योग्य गुण, कर्म, और स्वभावयुक्त और सत्य आचरण करने वाला जन होवे, उसी को राजा करो॥२०॥

पुना राजप्रजाजना परस्परं किमलङ्कुर्य्युरित्याह॥

फिर राजा और प्रजाजन परस्पर किसकी शोभा करें, इस विषय को कहते हैं॥

स नो॑ नि॒युद्भि॒रा पृ॑ण॒ काम॑ं वाजे॑भिर॒श्विभि॑ः। गोम॑द्भिर्गोपते धृषत्॥ २१॥

सः। नः॑। नि॒युत्ऽभि॑ः। आ। पृ॒ण॒। काम॑म्। वाजे॑भिः। अ॒श्विऽभि॑ः। गोम॑त्ऽभिः। गो॒ऽप॒ते॒। धृ॒षत्॥ २१॥

पदार्थः-(**सः**) (**नः**) अस्माकम् (**नियुद्भिः**) निश्चितहेतुभिः (**आ**) समन्तात् (**पृण**) पूरय (**कामम्**) (**वाजेभिः**) विज्ञानान्नादिकारिभिः (**अश्विभिः**) सूर्य्याचन्द्रमआदिभिः (**गोमद्भिः**) प्रशस्तभूमिधेनुवाग्युक्तैः (**गोपते**) गवां स्वामिन् (**धृषत्**) प्रगल्भः सन्॥२१॥

अन्वयः-हे गोपते! स धृषत्त्वं वाजेभिर्नियुद्भिर्गोमद्भिरश्विभिर्नः काममा पृण॥२१॥

भावार्थः-हे राजन्! यदि त्वमस्माकं कामनां पूरयेस्तर्हि वयमपि तवेच्छां पूरयेम॥१॥

पदार्थः-हे **(गोपते)** इन्द्रियों के स्वामिन्! **(सः)** वह **(धृषत्)** ढीठ, धर्षण करने वाले आप **(वाजेभिः)** विज्ञान और अन्न आदि के करने वाले **(नियुद्भिः)** निश्चित कारण तथा **(गोमद्भिः)** प्रशंसित भूमि, गौ और वाणी से युक्त **(अश्वभिः)** सूर्य्य और चन्द्रमा आदिकों से **(नः)** हम लोगों के **(कामम्)** मनोरथ की **(आ)** सब प्रकार से **(पृण)** पूर्त्ति करिये॥२१॥

भावार्थः-हे राजन्! जो आप हम लोगों के मनोरथ की पूर्त्ति करिये तो हम लोग भी आपकी इच्छा की पूर्त्ति करें॥२१॥

पुनर्मनुष्याः कस्मै किं कुर्य्युरित्याह॥

फिर मनुष्य किसके लिये क्या करें, इस विषय को कहते हैं॥

तद्वो॑ गाय सु॒ते सचा॑ पुरुहू॒ताय॒ सत्व॑ने। शं यद्गवे॒ न शा॒किने॑॥२२॥

तत्। वः। गा॒य॒। सु॒ते। सचा॑। पु॒रु॒ऽहू॒ताय॑। सत्व॑ने। शम्। यत्। गवे॑। न। शा॒किने॑॥२२॥

पदार्थः-**(तत्)** ते **(वः)** युष्मभ्यम् **(गाय)** स्तुहि **(सुते)** उत्पन्नेऽस्मिञ्जगति **(सचा)** समवेतेन सत्येन **(पुरुहूताय)** बहुभिः प्रशंसिताय **(सत्वने)** शुद्धान्तःकरणाय **(शम्)** **(यत्)** ये **(गवे)** स्तावकाय **(न)** इव **(शाकिने)** शक्तिमते॥२२॥

अन्वयः-हे मनुष्या! यद्वः प्रशंसन्ति तच्छाकिने गवे न सुते सचा पुरुहूताय सत्वने स्युस्तान् हे इन्द्र! त्वं शं गाय॥२॥

भावार्थः-अत्रोपमालङ्कारः। यथा सर्वविद्यापारगस्याऽध्यापनोपदेशेन कर्मणा सर्वेषां मङ्गलं वर्धते तथैवोत्तमेन राज्ञा प्रजासुखमुन्नतं भवति॥२२॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(वः)** आप लोगों के लिये प्रशंसा करते हैं **(तत्)** वे **(शाकिने)** सामर्थ्ययुक्त **(गवे)** स्तुति करने वाले के लिये **(न)** जैसे वैसे **(सुते)** उत्पन्न हुए इस संसार में **(सचा)** संयुक्त सत्य से **(पुरुहूताय)** बहुतों से प्रशंसित **(सत्वने)** शुद्ध अन्तःकरण वाले के लिये हों उनकी हे **(इन्द्र)** ऐश्वर्य्य से युक्त! आप **(शम्)** सुखपूर्वक **(गाय)** स्तुति कीजिये॥२२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सम्पूर्ण विद्याओं के पार जाने वाले के अध्यापन और उपदेशरूप कर्म्म से सब का मङ्गल बढ़ता है, वैसे ही उत्तम राजा से प्रजा का सुख उन्नत होता है॥२२॥

पुना राजप्रजाजनाः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर राजा प्रजाजन परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

न घा॒ वसु॒र्नि य॑मते दा॒नं वाज॑स्य॒ गोम॑तः। यत्सी॒मुप॒ श्रव॒द्गिर॑॥२३॥

न। घा॒। वसुः॑। नि। य॒म॒ते॒। दा॒नम्। वाज॑स्य। गोऽम॑तः। यत्। सी॒म्। उप॑। श्रव॑त्। गिर॑॥२३॥

पदार्थः-(**न**) निषेधे (**घा**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**वसुः**) वासयिता (**नि**) नितराम् (**यमते**) यच्छति ददाति (**दानम्**) (**वाजस्य**) विज्ञानस्य (**गोमतः**) प्रशस्तवाग्युक्तस्य (**यत्**) (**सीम्**) सर्वतः (**उप**) (**श्रवत्**) शृणुयात् (**गिरः**) वाचः॥२३॥

अन्वयः-यद्यो जनो गोमतो वाजस्य वसुर्दानं नि यमते गिरः सीमुप श्रवत्स न घा हन्यते॥२३॥

भावार्थः-यो मनुष्यो विद्याभयदाने ददाति सर्वेभ्यो विद्वद्भ्यः सत्यं शृणोति सोऽत्र जगति विघ्नैर्नैव हन्यते॥२३॥

पदार्थः-(**यत्**) जो जन (**गोमतः**) प्रशंसित वाणी से युक्त (**वाजस्य**) विज्ञान का (**वसुः**) वास दिलाने वाला (**दानम्**) दान को (**नि**) अत्यन्त (**यमते**) देता है (**गिरः**) वाणियों को (**सीम्**) सब प्रकार से (**उप, श्रवत्**) सुने वह (**न, घा**) नहीं मारा जाता है॥२३॥

भावार्थः-जो मनुष्य विद्या और अभयदान देता और सम्पूर्ण विद्वानों से सत्य सुनता है, वह इस संसार में विघ्नों से नहीं मारा जाता है॥२३॥

पुनः स राजा कीदृग्भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्। शचीभिरप नो वरत्॥२४॥

कुवित्ऽसस्य। प्र। हि। व्रजम्। गोऽमन्तम्। दस्युऽहा। गमत्। शचीभिः। अप। नः। वरत्॥२४॥

पदार्थः-(**कुवित्सस्य**) यः कुविन्महत्सनति विभजति तस्य (**प्र**) (**हि**) (**व्रजम्**) व्रजन्ति यस्मिंस्तम् (**गोमन्तम्**) प्रशस्ता गावो विद्यन्ते यस्मिँस्तम् (**दस्युहा**) दस्यून् दुष्टाञ्चोरान् हन्ति (**गमत्**) गच्छति (**शचीभिः**) प्रज्ञाभिः कर्म्मभिर्वा (**अप**) दूरीकरणे (**नः**) अस्मान् (**वरत्**) वृणुयात्॥२४॥

अन्वयः-यो दस्युहा राजा शचीभिः कुवित्सस्य गोमन्तं व्रजमप गमत्स हि नः प्र वरत्॥२४॥

भावार्थः-यो राजा दस्यून् दुष्टाञ्जनान् दूरीकृत्य न्यायव्यवहारप्रचारायोत्तमान् जनान्त्स्वीकरोति स महतोः सत्यासत्ययोर्विवेचको भवति॥२४॥

पदार्थः-जो (**दस्युहा**) दुष्ट चोरों को मारने वाला राजा (**शचीभिः**) बुद्धि वाले कर्मों से (**कुवित्सस्य**) अत्यन्त विभाग करने वाले के (**गोमन्तम्**) प्रशंसित गौवें विद्यमान और (**व्रजम्**) चलते हैं जिसमें उसकी (**अप, गमत्**) प्राप्त होता है वह (**हि**) ही (**नः**) हम लोगों को (**प्र, वरत्**) स्वीकार करे॥२४॥

भावार्थः-जो राजा दुष्टजनों को दूर करके न्याय व्यवहार के प्रचार के लिये उत्तम जनों का स्वीकार करता है, वह बड़े सत्य और असत्य का विचार करने वाला होता है॥३४॥

पुनर्धर्म्मात्मानं सर्वे प्रशंसन्त्वित्याह॥

फिर धर्म्मात्मा राजा की सब प्रशंसा करें, इस विषय को कहते हैं॥

इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः। इन्द्र वत्सं न मातरः॥ २५॥ २५॥

इमाः। ऊँ इति। त्वा। शतक्रतो इति शतऽक्रतो। अभि। प्र। नोनुवुः। गिरः। इन्द्र। वत्सम्। न। मातरः॥ २५॥

पदार्थः-(**इमाः**) प्रजाः (**उ**) वितर्के (**त्वा**) त्वाम् (**शतक्रतो**) अमितप्रज्ञ (**अभि**) (**प्र**) (**नोनुवुः**) भृशं प्रशंसेयुः (**गिरः**) वाचः (**इन्द्र**) प्रजापालनतत्पर (**वत्सम्**) (**न**) इव (**मातरः**) मान्यप्रदाः॥ २५॥

अन्वयः-हे शतक्रतो इन्द्र! वत्सं मातरो न य इमा गिरस्त्वा प्र णोनुवुस्ता उ त्वमभि स्तुहि॥ २५॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यथा गावो वात्सल्येन स्वान् वत्सान् प्रीणन्ति तथैव सुशिक्षिता वाचः सर्वानान्दयन्तीति विद्धि॥ २५॥

पदार्थः-हे (**शतक्रतो**) अथाह बुद्धि वाले (**इन्द्र**) प्रजाओं के पालन में तत्पर! (**वत्सम्**) बछड़े को (**मातरः**) आदर देने वाली माता (**न**) जैसे वैसे जो (**इमाः**) ये प्रजायें और (**गिरः**) वाणियाँ (**त्वा**) आपकी (**प्र, नोनुवुः**) अत्यन्त प्रशंसा करें उनकी (**उ**) वितर्क के साथ आप (**अभि**) सब प्रकार से स्तुति करिये॥ २५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जैसे गौवें प्रेम से अपने बछड़ों को प्रसन्न करती हैं, वैसे ही उत्तम प्रकार शिक्षित वाणियाँ सब को आनन्द देती हैं, ऐसा जानो॥ २५॥

केषां सख्यं न जीर्यत इत्याह॥

किन की मित्रता नहीं जीर्ण होती है, इस विषय को कहते हैं॥

दूणाशं सख्यं तव गौरसि वीर गव्यते। अश्वो अश्वायते भव॥ २६॥

दुःऽनशम्। सख्यम्। तव। गौः। असि। वीर। गव्यते। अश्वः। अश्वऽयते। भव॥ २६॥

पदार्थः-(**दूणाशम्**) दुर्ल्लभो नाशो यस्य तत् (**सख्यम्**) मित्रत्वम् (**तव**) (**गौः**) धेनुरिव (**असि**) (**वीर**) धैर्य्यादिगुणयुक्त (**गव्यते**) गौरिवाचरते (**अश्वः**) तुरङ्गः (**अश्वायते**) अश्वमिवाचरते (**भव**)॥ २६॥

अन्वयः-हे वीर राजन् विद्वन् वा! यस्त्वं गव्यते गौरिवाश्वायतेऽश्व इवासि यस्य तव प्रेमास्पदबद्धं दूणाशं सख्यमस्ति स त्वमस्माकं सुहृद्भव॥ २६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा गोषु वृषभो वडवास्वश्वः प्रीतः सदैव वर्त्तते तथैव सज्जनानां मित्रताऽविनाशिनी भवतीति सर्वे विजानन्तु॥ २६॥

पदार्थः-हे (**वीर**) धीरता आदि गुणों से युक्त राजन् वा विद्वान्! जो आप (**गव्यते**) गौ के सदृश आचरण करते हुए के लिये (**गौः**) गाय जैसे वैसे (**अश्वायते**) घोड़ों के सदृश आचरण करते हुए के लिये (**अश्वः**) घोड़ा जैसे वैसे (**असि**) हैं और जिन (**तव**) आपका प्रेम के आस्पद में बन्धा हुआ (**दूणाशम्**) दुर्लभ नाश जिसका वह (**सख्यम्**) मित्रपन है वह आप हम लोगों के मित्र (**भव**) हूजिये॥ २६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे गौओं में बैल और घोड़ियों में घोड़ा प्रसन्न सदा ही होता है, वैसे ही सज्जनों की मित्रता अविनाशिनी होती है, ऐसा सब लोग जानें॥ २६॥

पुनः स राजा कीदृग्भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः॥ २७॥

सः। मन्दस्व। हि। अन्धसः। राधसे। तन्वा। महे। न। स्तोतारम्। निदे। करः॥ २७॥

पदार्थः-(**सः**) (**मन्दस्वा**) आनन्दाऽऽनन्दय वा। अत्र **संहितायामि**ति दीर्घः। (**हि**) यतः (**अन्धसः**) अन्नादेः (**राधसे**) धनाय (**तन्वा**) शरीरेण (**महे**) महते (**न**) निषेधे (**स्तोतारम्**) (**निदे**) निन्दाकर्त्रे (**करः**) कुर्याः॥ २७॥

अन्वयः-हे विद्वन्! हि त्वं तन्वा महे राधसेऽन्धसो मन्दस्वा निदे स्तोतारं न करस्तस्मात् स भवाञ्जनप्रियोऽस्ति॥ २७॥

भावार्थः-हे राजप्रजाजना! यूयमन्नादिना सर्वानान्दयत। अनिन्द्यान्मा निन्दत। ऐश्वर्यवृद्धये सततं प्रयतध्वम्॥ २७॥

पदार्थः-हे विद्वन्! (**हि**) जिससे आप (**तन्वा**) शरीर से (**महे**) बड़े (**राधसे**) धन के लिये (**अन्धसः**) अन्न आदि से (**मन्दस्वा**) आनन्दित हूजिये वा आनन्दित करिये और (**निदे**) निन्दा करने वाले के लिये (**स्तोतारम्**) स्तुति करने वाले को (**न**) नहीं (**करः**) करिये इससे (**सः**) वह आप जनों को प्रिय हैं॥ २७॥

भावार्थः-हे राजा और प्रजाजनो! आप लोग अन्न आदि से सब को आनन्दित करिये और निन्दा न करने योग्यों की मत निन्दा करिये तथा ऐश्वर्य्य की वृद्धि के लिये निरन्तर प्रयत्न करिये॥ २७॥

अथ कस्मै क्व किं प्राप्नुयादित्याह॥

अब किसके लिये कहाँ प्राप्त होवे, इस विषय को कहते हैं॥

इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः। वत्सं गावो न धेनवः॥ २८॥

इमाः। ऊँ इति। त्वा। सुतेऽसुते। नक्षन्ते। गिर्वणः। गिरः। वत्सम्। गावः। न। धेनवः॥ २८॥

पदार्थः-(**इमाः**) (**उ**) (**त्वा**) त्वाम् (**सुतेसुते**) उत्पन्न उत्पन्ने जगति (**नक्षन्ते**) व्याप्नुवन्तु प्राप्नुवन्तु। (**गिर्वणः**) गीर्भिः प्रशंसनीय (**गिरः**) सुशिक्षिता वाचः (**वत्सम्**) (**गावः**) (**न**) इव (**धेनवः**) दुग्धदात्र्यः॥ २८॥

अन्वयः-हे गिर्वण! सुतेसुतेऽस्मिञ्जगतीमा गिरो वत्सं धेनवो गावो न त्वा नक्षन्ते ता उ अस्मानपि प्राप्नुवन्तु॥ २८॥

भावार्थः-अत्रोपमालङ्कारः। ये शुभाचरणाः सन्ति तान् गौः स्ववत्समिव सर्वा विद्या वाचः प्राप्नुवन्तु॥२८॥

पदार्थः-हे **(गिर्वणः)** वाणियों से प्रशंसा करने योग्य! **(सुतेसुते)** उत्पन्न-उत्पन्न हुए इस संसार में **(इमाः)** ये **(गिरः)** उत्तम प्रकार शिक्षित वाणियाँ **(वत्सम्)** बछड़े को **(धेनवः)** दुग्ध की देने वाली **(गावः)** गौवें **(न)** जैसे वैसे **(त्वा)** आपको **(नक्षन्ते)** व्याप्त हों, वे **(उ)** और हम लोगों को भी प्राप्त हों॥२८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो श्रेष्ठ आचरण करने वाले हैं, उनको गौ जैसे बछड़े को, वैसे सम्पूर्ण विद्या और वाणियाँ प्राप्त होती हैं॥२८॥

पुनः क उत्तम इत्याह॥

फिर कौन उत्तम है, इस विषय को कहते हैं॥

पुरूतमं पुरूणां स्तोतॄणां विवाचि। वाजेभिर्वाजयताम्॥२९॥

पुरूऽतमम्। पुरूणाम्। स्तोतॄणाम्। विऽवाचि। वाजेभिः। वाजऽयताम्॥२९॥

पदार्थः-**(पुरूतमम्)** अतिशयेन बहुविद्यम् **(पुरूणाम्)** बहूनाम् **(स्तोतॄणाम्)** विदुषाम् **(विवाचि)** विविधार्थसत्यार्थप्रकाशिका वाचो यस्मिन् व्यवहारे **(वाजेभिः)** अन्नादिभिः **(वाजयताम्)** प्रापयताम्॥२९॥

अन्वयः-हे मनुष्या! या गिरो वाजेभिर्वाजयतां पुरूणां स्तोतॄणां विवाचि पुरूतमं प्राप्नुवन्ति ता अस्मानपि प्राप्नुवन्तु॥२९॥

भावार्थः-त एव बहुषूत्तमाः सन्ति ये विद्याविनयधर्म्माचरणं प्राप्ताः सन्ति॥२९॥

पदार्थः-हे मनुष्यो! जो वाणियाँ **(वाजेभिः)** अन्न आदिकों से **(वाजयताम्)** प्राप्त कराने वाले **(पुरूणाम्)** बहुत **(स्तोतॄणाम्)** विद्वानों के **(विवाचि)** अनेक प्रकार की सत्य अर्थ को प्रकाश करने वाली वाणियाँ जिसमें उस व्यवहार में **(पुरूतमम्)** अतिशय बहुत विद्यायुक्त व्यवहार को प्राप्त होती हैं, वे हम लोगों को निश्चित प्राप्त हों॥२९॥

भावार्थः-वे ही बहुतों में उत्तम हैं जो विद्या, विनय और धर्म्माचरण को प्राप्त हुए हैं॥२९॥

राजा राजप्रजाजनाश्चैकमत्यं कुर्य्युरित्याह॥

राजा और प्रजाजन एकमति करें, इस विषय को कहते हैं॥

अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः। अस्मान् राये महे हिनु॥३०॥

अस्माकम्। इन्द्र। भूतु। ते। स्तोमः। वाहिष्ठः। अन्तमः। अस्मान्। राये। महे। हिनु॥३०॥

पदार्थः-**(अस्माकम्)** **(इन्द्र)** धनप्रद **(भूतु)** भवतु **(ते)** तव **(स्तोमः)** प्रशंसामयो व्यवहारः **(वाहिष्ठः)** अतिशयेन वोढा **(अन्तमः)** निकटस्थः **(अस्मान्)** **(राये)** **(महे)** **(हिनु)** वर्धयतु॥३०॥

अन्वयः-हे इन्द्रास्माकं वाहिष्ठोऽन्तमः स्तोमः ते वर्द्धको भूतु। यश्च तेऽन्तमो वाहिष्ठः स्तोमो भूतु सोऽस्मान् महे राये हिनु॥३०॥

भावार्थः-हे राजन्! यदैश्वर्यं तव तच्च प्रजाया यत्प्रजायास्तत्तवास्तु नैवं विना राजप्रजाजनानामुन्नतिः सम्भवति॥३०॥

पदार्थः-हे **(इन्द्र)** धन के देने वाले! **(अस्माकम्)** हम लोगों का **(वाहिष्ठः)** अतिशय धारण करने वाला **(अन्तमः)** समीप में वर्त्तमान **(स्तोमः)** प्रशंसास्वरूप व्यवहार **(ते)** आपका बढ़ाने वाला **(भूतु)** होवे और जो आपके समीप में वर्त्तमान अतिशय धारण करने वाला प्रशंसारूप व्यवहार हो वह **(अस्मान्)** हम लोगों को **(महे)** बड़े **(राये)** धन के लिये **(हिनु)** बढ़ावे॥३०॥

भावार्थः-हे राजन्! जो ऐश्वर्य्य आपका वह प्रजा का, और जो प्रजा का वह आपका हो ऐसा करने के विना राजा और प्रजा की उन्नति का नहीं सम्भव है॥३०॥

अथ व्यापारविषयमाह॥

अब व्यापार विषय को कहते हैं॥

अधि॑ बृ॒बुः प॑णी॒नां वर्षि॑ष्ठे मू॒र्धन्न॑स्थात्। उ॒रुः कक्षो॒ न गा॒ङ्ग्यः॥३१॥

अधि॑। बृ॒बुः। प॒णी॒नाम्। वर्षि॑ष्ठे। मू॒र्धन्। अ॒स्था॒त्। उ॒रुः। कक्षः॑। न। गा॒ङ्ग्यः॥३१॥

पदार्थः-(**अधि**) उपरि **(बृबुः)** छेत्ता **(पणीनाम्)** प्रशंसितानां व्यवहर्तृणाम् **(वर्षिष्ठे)** अतिशयेन वृद्धे **(मूर्द्धन्)** मूर्धनि **(अस्थात्)** तिष्ठति **(उरुः)** बहुः **(कक्षः)** क्रान्तस्तटादिः **(न)** इव **(गाङ्ग्यः)** यो गां गच्छति तस्या अदूरभवः॥३१॥

अन्वयः-हे मनुष्या! यः उरुः कक्षो गाङ्ग्यो न पणीनां वर्षिष्ठे मूर्द्धन् बृबुरध्यस्थात् स युष्माभिः कार्य्ये संप्रयोजनीयः॥३१॥

भावार्थः-अत्रोपमालङ्कारः। यथा भूमिषु गच्छन्त्याः सरितो मध्यस्थाः कक्षास्तटाश्च निकटे वर्त्तन्ते तथैव व्यापारिणां समीपे शिल्पिनो वर्त्तन्ताम्॥३१॥

पदार्थः-हे मनुष्यो! जो **(उरुः)** बहुत **(कक्षः)** जल का उल्लङ्घन करने बाला टापू वा तट आदि **(गाङ्ग्यः)** पृथिवी को प्राप्त होने वाली के समीप में वर्त्तमान **(न)** जैसे वैसे **(पणीनाम्)** प्रशंसा करने योग्य व्यवहार करने वालों के **(वर्षिष्ठे)** अतिशय वृद्ध **(मूर्द्धन्)** मस्तक में **(बृबुः)** काटने वाला **(अधि)** ऊपर **(अस्थात्)** स्थित होता है, वह आप लोगों से कार्य्य में उत्तम प्रकार संयुक्त करने योग्य है॥३१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पृथिवियों में जाती हुई नदी के मध्यस्थ टापू और तट समीप में वर्त्तमान हैं, वैसे ही व्यापारियों के समीप में शिल्पीजन वर्त्तमान होवें॥३१॥

सद्विद्यादिदानेन किं भवतीत्याह॥

श्रेष्ठ विद्या आदि के दान से क्या होता है, इस विषय को कहते हैं॥

यस्य॑ वा॒योरि॑व द्र॒वद्भ॒द्रा रा॒तिः स॑ह॒स्रिणी॑। स॒द्यो दा॒नाय॒ मंह॑ते॥ ३२॥

यस्य॑। वा॒योः॑ऽइ॑व। द्र॒वत्। भ॒द्रा। रा॒तिः॑। स॒ह॒स्रिणी॑। स॒द्यः॑। दा॒नाय॑। मंह॑ते॥ ३२॥

पदार्थः-(**यस्य**) (**वायोरिव**) (**द्रवत्**) द्रवति प्राप्नोति सद्यो गच्छति वा (**भद्रा**) मङ्गलकारिणी (**रातिः**) दानक्रिया (**सहस्रिणी**) असङ्ख्याः पदार्था दीयन्ते यस्यां सा (**सद्यः**) तूर्णम् (**दानाय**) (**मंहते**) वर्धते॥ ३२॥

अन्वयः-हे मनुष्या! यस्य सहस्रिणी भद्रा रातिर्वायोरिव द्रवत् स सद्यो दानाय मंहत इति वेद्यम्॥ ३२॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्यादिदानप्रिया जनाः स्युस्ते वायुरिव पूर्णमभीष्टं सुखं लभन्ते ये च शिल्पविद्यामुन्नयन्ति तेऽसङ्ख्यं धनं प्राप्नुवन्ति॥ ३२॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिसकी (**सहस्रिणी**) असङ्ख्य पदार्थ दिये जाते हैं जिसमें वह (**भद्रा**) मङ्गल करने वाली (**रातिः**) दान-क्रिया (**वायोरिव**) वायु के सदृश (**द्रवत्**) प्राप्त होती वा शीघ्र जाती है वह (**सद्यः**) शीघ्र (**दानाय**) दान के लिये (**मंहते**) बढ़ता है, ऐसा जानना चाहिये॥ ३२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्या आदि के दान में प्रिय जन होवें, वे वायु के सदृश पूर्ण अभीष्ट सुख को प्राप्त होते हैं और जो शिल्पविद्या की वृद्धि करते हैं, वे असङ्ख्य धन को प्राप्त होते हैं॥ ३२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

तत्सु नो॒ विश्वे॑ अ॒र्य आ सदा॑ गृणन्ति का॒रवः॑।

बृ॒बुं स॑हस्र॒दात॑मं सू॒रिं स॑हस्र॒दात॑मं सू॒रिं स॑हस्रसा॒तम॑म्॥ ३३॥ २६॥

तत्। सु। नः॑। विश्वे॑। अ॒र्यः॑। आ। सदा॑। गृ॒ण॒न्ति॒। का॒रवः॑। बृ॒बुम्। स॒ह॒स्र॒ऽदात॑मम्। सू॒रिम्। स॒ह॒स्र॒ऽसात॑मम्॥ ३३॥

पदार्थः-(**तत्**) (**सु**) (**नः**) अस्माकम् (**विश्वे**) सर्वे (**अर्यः**) स्वामी वैश्यो वा (**आ**) समन्तात् (**सदा**) (**गृणन्ति**) (**कारवः**) शिल्पिनः (**बृबुम्**) मुख्यं शिल्पिनम् (**सहस्रदातमम्**) अतिशयेनासङ्ख्यदातारम् (**सूरिम्**) विद्वांसम् (**सहस्रसातमम्**) असङ्ख्यानां पदार्थानामतिशयेन विभक्तारम्॥ ३३॥

अन्वयः-ये नो विश्वे कारवस्सहस्रदातमं बृबुं सहस्रसातमं सूरिं स्वा गृणन्ति ते तदतुल्यमैश्वर्य्यं सदा प्राप्नुवन्ति ये एषामर्यो भवेत्स एतान् सत्कृत्य संरक्षेत्॥ ३३॥

भावार्थः-ये क्रियाकुशलान् विदुषः शिल्पिनः प्रशंसन्ति तेऽसङ्ख्यं धनं प्राप्यासङ्ख्यं धनं दातुमर्हन्तीति॥३३॥

अत्र राजनीतिधनजेतृमित्रत्ववेदविदिन्द्रदातृशिल्पिकारुस्वामिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चचत्वारिंशत्तमं सूक्तं षट्विंशो वर्गश्च समाप्तः॥

पदार्थः-जो **(नः)** हम लोगों के **(विश्वे)** सब **(कारवः)** कारीगर जन **(सहस्रदातमम्)** अतिशय असङ्ख्य देने वाले **(बृबुम्)** मुख्य शिल्पी **(सहस्रासातमम्)** अतिशय असङ्ख्य पदार्थ बाँटने वाले **(सूरिम्)** विद्वान् को **(सु)** उत्तमता से **(आ)** सब प्रकार **(गृणन्ति)** स्वीकार करते हैं, वे **(तत्)** उस अतुल ऐश्वर्य्य को **(सदा)** सर्वकाल में प्राप्त होते हैं और जो इन में **(अर्यः)** स्वामी वा वैश्य होवे, वह इन का उत्तम प्रकार सत्कार कर रक्षा करे॥३३॥

भावार्थः-जो जन क्रिया में निपुण विद्वानों और कारीगरों की प्रशंसा करते हैं, वे असङ्ख्य धन को प्राप्त होकर असङ्ख्य धन देने योग्य होते हैं॥३३॥

इस सूक्त में राजनीति, धन के जीतने वाले, मित्रपन, वेद के जानने वाले, ऐश्वर्य्य से युक्त, दाता, कारीगर और स्वामी के कृत्य का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैंतालीसवाँ सूक्त और छब्बीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्दशर्चस्य षट्चत्वारिंशत्तमस्य सूक्तस्य शंयुर्बार्हस्पत्य ऋषिः। इन्द्रः प्रगाथं वा देवता। १ निचृदनुष्टुप्। ५, ७ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः। २ स्वराड्बृहती। ४, ८ भुरिग्बृहती। ९ विराड्बृहती। ११ निचृद्बृहती। ३, १३ बृहती छन्दः। मध्यमः स्वरः। ६ स्वराड् ब्राह्मी गायत्री छन्दः। षड्जः स्वरः। १० पङ्क्तिः। १२, १४ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ पुनः शिल्पविद्यामाह॥

अब चौदह ऋचा वाले छयालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर शिल्पविद्या को कहते हैं॥

त्वामिद्धि हवामहे साता वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥ १॥

त्वाम्। इत्। हि। हवामहे। साता। वाजस्य। कारवः। त्वाम्। वृत्रेषु। इन्द्र। सत्ऽपतिम्। नरः। त्वाम्। काष्ठासु। अर्वतः॥ १॥

पदार्थः-(**त्वाम्**) (**इत्**) एव (**हि**) (**हवामहे**) (**साता**) विभागे (**वाजस्य**) विज्ञानस्य (**कारवः**) कारकराः (**त्वाम्**) (**वृत्रेषु**) धनेषु (**इन्द्र**) (**सत्पतिम्**) सतां पालकम् (**नरः**) (**त्वाम्**) (**काष्ठासु**) दिक्षु (**अर्वतः**) अश्वानिव॥ १॥

अन्वयः-हे इन्द्र! कारवो नरो वयं त्वां हि वाजस्य साता हवामहे वृत्रेषु सत्पतिं त्वां हवामहेऽर्वतः सारथिरिव त्वां काष्ठास्विद्धवामहे॥ १॥

भावार्थः-हे धनाढ्य! यदि त्वमस्माकं सहायो भवेस्तर्हि त्वद्धनेन वयं शिल्पविद्ययाऽनेकान् पदार्थान् रचयित्वा त्वामधिकं धनाढ्यं कुर्याम॥ १॥

पदार्थः-हे (**इन्द्र**) अत्यन्त ऐश्वर्य से युक्त जन! (**कारवः**) कारीगर (**नरः**) जन हम लोग (**त्वाम्**) आपको (**हि**) ही (**वाजस्य**) विज्ञान के (**साता**) विभाग में (**हवामहे**) ग्रहण करें और (**वृत्रेषु**) धनों में (**सत्पतिम्**) श्रेष्ठों के पालने वाले (**त्वाम्**) आपको पुकारें तथा (**अर्वतः**) घोड़ों को जैसे सारथी, वैसे (**त्वाम्**) आपको (**काष्ठासु**) दिशाओं में (**इत्**) ही पुकारें॥ १॥

भावार्थः-हे धन से युक्त! जो आप हम लोगों के सहायक होवें तो आपके धन से हम लोग शिल्पविद्या से अनेक पदार्थों को रचकर आपको बड़ा धनी करें॥ १॥

पुनर्मनुष्याः शिल्पविद्यया किं लभन्त इत्याह॥

फिर मनुष्य शिल्पविद्या से क्या पाते हैं, इस विषय को कहते हैं॥

स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः।

गामश्वं॑ र॒थ्य॑मिन्द्र॒ सं कि॑र स॒त्रा वाज॒ं न ज॒ग्युषे॑॥

सः। त्वम्। न॒ः। चि॒त्र॒। व॒ज्र॒ऽह॒स्त॒। धृ॒ष्णु॒ऽया। म॒हः। स्त॒वा॒नः। अ॒द्रि॒ऽव॒ः। गाम्। अश्व॑म्। र॒थ्य॑म्। इ॒न्द्र॒। सम्। कि॒र॒। स॒त्रा। वाज॑म्। न। ज॒ग्युषे॑॥ २॥

पदार्थः-(**सः**) (**त्वम्**) (**नः**) अस्मभ्यम् (**चित्र**) अद्भुतविद्य (**वज्रहस्त**) शस्त्रास्त्रपाणे (**धृष्णुया**) दृढत्वेन प्रागल्भ्येन वा (**महः**) महत् (**स्तवानः**) प्रशंसन् (**अद्रिवः**) मेघयुक्तसूर्यवद्वर्तमान (**गाम्**) धेनुम् (**अश्वम्**) तुरङ्गम् (**रथ्यम्**) रथाय हितम् (**इन्द्र**) (**सम्**) (**किर**) विक्षिप (**सत्रा**) सत्येन विज्ञानेन (**वाजम्**) स-ामम् (**न**) इव (**जिग्युषे**) जेतुं शीलाय॥ २॥

अन्वयः-हे अद्रिवश्चित्र वज्रहस्तेन्द्र! स त्वं धृष्णुया महः स्तवानः सत्रा वाजं न जिग्युषे नोऽस्मभ्यं गां रथ्यमश्वं सङ्किर॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे राजादयो मनुष्या यथा जयशीला योद्धारः स-ामे विजयं प्राप्य धनं प्रतिष्ठां च लभन्ते तथैव शिल्पविद्याकुशला महदैश्वर्यं प्राप्नुवन्ति॥ २॥

पदार्थः-हे (**अद्रिवः**) मेघ से युक्त सूर्य्य के समान वर्त्तमान (**चित्र**) अद्भुत विद्या वाले (**वज्रहस्त**) हाथ में शस्त्र और अस्त्र को धारण किये हुए (**इन्द्र**) ऐश्वर्य्य से युक्त! (**सः**) वह (**त्वम्**) आप (**धृष्णुया**) निश्चयपने वा ढिठाई से (**महः**) बड़े की (**स्तवानः**) प्रशंसा करते हुए (**सत्रा**) सत्य विज्ञान से (**वाजम्**) स-ाम को (**न**) जैसे वैसे (**जिग्युषे**) जीतने वाले (**नः**) हम लोगों के लिये (**गाम्**) गौ को (**रथ्यम्**) और वाहन के लिये हितकारक (**अश्वम्**) घोड़ों को (**सम्, किर**) सङ्कीर्ण करो-इकट्ठा करो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजा आदि मनुष्यो! जैसे जीतने वाले योद्धा जन स-ाम में विजय को प्राप्त होकर धन और प्रतिष्ठा को प्राप्त होते हैं, वैसे ही शिल्पविद्या में चतुर जन बड़े ऐश्वर्य्य को प्राप्त होते हैं॥ २॥

पुनर्मनुष्याः स-ामे कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य स-ाम में कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

यः स॑त्रा॒हा विच॑र्षणि॒रिन्द्रं॑ तं हू॑महे व॒यम्।

सह॑स्रमुष्क॒ तुवि॑नृम्ण॒ सत्प॑ते॒ भवा॑ स॒मत्सु॑ नो वृ॒धे॥ ३॥

यः। स॒त्रा॒ऽहा। विऽच॑र्षणिः। इन्द्र॑म्। तम्। हू॒म॒हे॒। व॒यम्। सह॑स्रऽमुष्क। तुवि॑ऽनृम्ण। सत्ऽप॑ते। भव॑। स॒मत्ऽसु॑। न॒। वृ॒धे॥ ३॥

पदार्थः-(**यः**) (**सत्राहा**) सत्यदिनानि (**विचर्षणिः**) विद्वान् मनुष्यः (**इन्द्रम्**) ऐश्वर्य्ययुक्तम् (**तम्**) (**हूमहे**) प्रशंसामः (**वयम्**) (**सहस्रमुष्क**) असङ्ख्यवीर्य्य (**तुविनृम्ण**) बहुधन (**सत्पते**) सतां विदुषां पालक (**भवा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**समत्सु**) स-ामेषु (**नः**) अस्माकम् (**वृधे**) वर्धनाय॥ ३॥

अन्वयः-हे सहस्रमुष्क तुविनृम्ण सत्पत इन्द्र! यो विचर्षणिः सत्राहेन्द्रमाह्वयति तथा तं वयं हूमहे स त्वं समत्सु नो वृधे भवा॥३॥

भावार्थः-तमेव वयं प्रशंसामो यः प्रतिदिनमस्माकं रक्षो विधत्ते तमेव वयं स-ामे संरक्षेम॥३॥

पदार्थः-हे **(सहस्रमुष्क)** असङ्ख्य पराक्रम वाले **(तुविनृम्ण)** बहुत धनों से युक्त **(सत्पते)** विद्वानों के पालने वाले अत्यन्त ऐश्वर्य्य से युक्त **(यः)** जो **(विचर्षणिः)** विद्वान् मनुष्य **(सत्राहा)** सत्य दिनों में **(इन्द्रम्)** अत्यन्त ऐश्वर्य्य से युक्त को पुकारता है, वैसे **(तम्)** उसकी **(वयम्)** हम लोग **(हूमहे)** प्रशंसा करते हैं और आप **(समत्सु)** स-ामों में **(नः)** हम लोगों की **(वृधे)** वृद्धि के लिये **(भवा)** हूजिये॥३॥

भावार्थः-उसी की हम लोग प्रशंसा करते हैं, जो प्रतिदिन हम लोगों की रक्षा करता है और उसी की हम लोग स-ाम में रक्षा करें॥३॥

पुना राजप्रजाजनाः किं प्रतिजानीरन्नित्याह॥

फिर राजा और प्रजाजन किसकी प्रतिज्ञा करें, इस विषय को कहते हैं॥

बाधसे॒ जना॑न् वृष॒भेव॑ म॒न्युना॒ घृषौ॑ मी॒ळ्ह ऋ॑चीषम।
अ॒स्माक॑ं बोध्यवि॒ता म॑हाध॒ने त॒नूष्व॒प्सु सू॒र्ये॑॥४॥

बाधसे। जना॑न्। वृ॒ष॒भाऽइ॑व। म॒न्युना॑। घृषौ॑। मी॒ळ्हे। ऋ॒चीष॒म॒। अ॒स्माक॑म्। बो॒धि॒। अ॒वि॒ता। म॒हाऽध॒ने। त॒नूषु॑। अ॒प्ऽसु। सू॒र्ये॑॥४॥

पदार्थः-**(बाधसे)** **(जनान्)** **(वृषभेव)** बलिष्ठवृषभवत् **(मन्युना)** क्रोधेन **(घृषौ)** दुष्टानां घर्षणे **(मीळ्हे)** स-ामे **(ऋचीषम)** ऋचा तुल्यप्रशंसनीय **(अस्माकम्)** **(बोधि)** विज्ञापय **(अविता)** **(महाधने)** स-ामे **(तनूषु)** शरीरेषु **(अप्सु)** प्राणेषु **(सूर्ये)** सवितरि॥४॥

अन्वयः-हे ऋचीषमेन्द्र राजन्! ये मन्युना वृषभेव घृषौ मीळ्हे जनान् बाधन्ते यतस्त्वं तान् बाधसेऽस्माकं तनूष्वप्सु महाधनेऽविता सन्त्सूर्य्ये प्रकाश इवाऽस्मान् बोधि तस्माद्भवान् माननीयोऽस्ति॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! वयं दुष्टानां बाधनाय स-ामेऽस्मदीयानां रक्षणाय त्वां स्वीकुर्मस्त्वमस्मान्त्सत्यन्यायकृत्यानि सदैव बोधयेः॥४॥

पदार्थः-हे **(ऋचीषम)** ऋचा के सदृश प्रशंसा करने योग्य अत्यन्त ऐश्वर्य से युक्त राजन्! जो **(मन्युना)** क्रोध से **(वृषभेव)** बलयुक्त बैल जैसे वैसे **(घृषौ)** दुष्टों के घर्षण में **(मीळ्हे)** स-ाम में **(जनान्)** मनुष्यों की बाधा करते हैं, जिससे आप उनकी **(बाधसे)** बाधा करते हो और **(अस्माकम्)** हम लोगों के **(तनूषु)** शरीरों में और **(अप्सु)** प्राणों में **(महाधने)** स-ाम में **(अविता)** रक्षा करने वाले हुए **(सूर्ये)** सूर्य्य में प्रकाश जैसे वैसे हम लोगों को **(बोधि)** जनाइये इससे आप आदर करने योग्य हैं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! हम लोग दुष्टों के बाधने के लिये और स-ाम में अपने लोगों की रक्षा के लिये आपका स्वीकार करें तथा आप हम लोगों को सत्य न्यायकृत्य सदा ही जनाइये॥४॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पपुरि श्रवः।

येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः॥५॥२७॥

इन्द्र। ज्येष्ठम्। नः। आ। भर। ओजिष्ठम्। पपुरि। श्रवः। येन। इमे इति। चित्र। वज्रऽहस्त। रोदसी इति। आ। उभे इति। सुऽशिप्र। प्राः॥५॥

पदार्थः-(**इन्द्र**) शुभगुणानां धर्त्तः (**ज्येष्ठम्**) अतिशयेन प्रशस्तम् (**नः**) अस्मदर्थम् (**आ**) (**भर**) (**ओजिष्ठम्**) अतिशयेन बलप्रदम् (**पपुरि**) पालकं पुष्टिकरम् (**श्रवः**) अन्नं श्रवणं वा (**येन**) (**इमे**) (**चित्र**) अद्भुतगुणकर्मस्वभाव (**वज्रहस्त**) शस्त्रास्त्रपाणे (**रोदसी**) द्यावापृथिव्यौ (**आ**) समन्तात् (**उभे**) (**सुशिप्र**) सुशोभितहनुनासिक (**प्राः**) व्याप्नुयाः॥५॥

अन्वयः-हे सुशिप्र चित्र वज्रहस्तेन्द्र! त्वं ज्येष्ठमोजिष्ठं पपुरि श्रवो न आ भर येनोभे इमे रोदसी आ प्राः॥५॥

भावार्थः-हे राजन्! भवानीदृशान् गुणकर्म्मस्वभावान्त्स्वीकुर्याद्येन न्यायं भूमिं राज्यं सेनां विजयं च धर्तुं शक्नुयात्॥५॥

पदार्थः-हे (**सुशिप्र**) सुन्दर ठुड्ढी और नासिका युक्त (**चित्र**) अद्भुत गुण, कर्म्म और स्वभाव वाले (**वज्रहस्त**) शस्त्र और अस्त्र हाथ में जिसके ऐसे और (**इन्द्र**) श्रेष्ठ गुणों के धारण करने वाले! आप (**ज्येष्ठम्**) अतिशय प्रशंसित (**ओजिष्ठम्**) अतिशय बल के देने (**पपुरि**) पालन करने और पुष्टि करने वाले (**श्रवः**) अन्न वा श्रवण को (**नः**) हम लोगों के लिये (**आ, भर**) धारण करो (**येन**) जिससे (**उभे**) दोनों (**इमे**) इन (**रोदसी**) अन्तरिक्ष और पृथिवी को (**आ**) सब प्रकार से (**प्राः**) व्याप्त होओ॥५॥

भावार्थः-हे राजन्! आप ऐसे गुण, कर्म्म और स्वभाव का स्वीकर करें, जिससे न्याय, भूमि, राज्य, सेना और विजय को धारण करने को समर्थ होवें॥५॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

त्वामुग्रमवसे चर्षणीसहं राजन् देवेषु हूमहे।

विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्त्सुषहान् कृधि॥६॥

त्वाम्। उग्रम्। अवसे। चर्षणिऽसहम्। राजन्। देवेषु। हूमहे। विश्वा। सु। नः। विथुरा। पिब्दना। वसो इति। अमित्रान्। सुऽसहान्। कृधि॥६॥

पदार्थः-(**त्वाम्**) (**उग्रम्**) तेजस्विनम् (**अवसे**) रक्षणाद्याय (**चर्षणीसहम्**) शत्रुसेनायाः सोढारम् (**राजन्**) विद्याविनयाभ्यां प्रकाशमान (**देवेषु**) विद्वत्सु (**हूमहे**) आह्वयामः (**विश्वा**) सर्वाणि (**सु**) (**नः**) अस्माकम् (**विथुरा**) व्यथायुक्तानि (**पिब्दना**) पेष्टुमर्हाणि शत्रुसैन्यानि (**वसो**) सुखे वासयितः (**अमित्रान्**) शत्रून् (**सुसहान्**) सुखेन सोढुं योग्यान् (**कृधि**) कुरु॥६॥

अन्वयः-हे वसो राजन्! वयं विश्वा देवेष्ववस उग्रं चर्षणीसहं त्वां सु हूमहे त्वं नोऽमित्रान्त्सुसहान् कृधि पिब्दना विथुरा कृधि॥६॥

भावार्थः-यो राजाऽमात्यप्रजाजनानां सुखदुःखे स्वात्मवद् ज्ञात्वा यथा शत्रूणां पराभवः स्यात्तथाऽनुष्ठाता भवेत्तमेव सर्वे जनाः पितृवन्मन्येरन्॥६॥

पदार्थः-हे (**वसो**) सुख में वसाने वाले (**राजन्**) विद्या और विनय से प्रकाशमान! हम लोग (**विश्वा**) सम्पूर्ण कार्य्यों के प्रति और (**देवेषु**) विद्वानों में (**अवसे**) रक्षण आदि के लिये (**उग्रम्**) तेजस्वी और (**चर्षणीसहम्**) शत्रुओं की सेना के सहने वाले (**त्वाम्**) आपको (**सु, हूमहे**) [अच्छी प्रकार] पुकारें और आप (**नः**) हम लोगों के (**अमित्रान्**) शत्रुओं को (**सुसहान्**) सुख के सहने योग्य (**कृधि**) करिये और (**पिब्दना**) पीसने योग्य शत्रुसैन्यों को (**विथुरा**) व्यथायुक्त करिये॥६॥

भावार्थः-जो राजा मन्त्री और प्रजाजनों के सुख और दुःख को अपने सदृश जान कर जैसे शत्रुओं का पराभव होवे वैसा उपाय करने वाला होवे, उसी को सब लोग पिता के सदृश मानें॥६॥

पुना राज्ञा कुत्र किं धर्त्तव्यमित्याह॥

फिर राजा को कहाँ क्या धारण करना चाहिये, इस विषय को कहते हैं॥

यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु।
यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या॥७॥

यत्। इन्द्र। नाहुषीषु। आ। ओजः। नृम्णम्। च। कृष्टिषु। यत्। वा। पञ्च। क्षितीनाम्। द्युम्नम्। आ। भर। सत्रा। विश्वानि। पौंस्या॥७॥

पदार्थः-(**यत्**) (**इन्द्र**) प्रजाप्रियधर्त्तः (**नाहुषीषु**) नहुषाणां मनुष्याणामासु प्रजासु (**आ**) (**ओजः**) बलकरमन्त्रादिकम् (**नृम्णम्**) धनम् (**च**) (**कृष्टिषु**) मनुष्येषु (**यत्**) (**वा**) (**पञ्च**) पञ्चानां तत्त्वाख्यानाम् (**क्षितीनाम्**) राजसम्बन्धिनीनां भूमीनां मध्ये (**द्युम्नम्**) शुद्धं यशः (**आ**) (**भर**) (**सत्रा**) सत्यानि (**विश्वानि**) सर्वाणि (**पौंस्या**) पुरुषार्थजानि बलानि॥७॥

अन्वयः-हे इन्द्र! त्वं कृष्टिषु नाहुषीषु यदोजो नृम्णं च भवेत्तदाऽऽभर वा पञ्च क्षितीनां यद् द्युम्नमस्त्यथवा सत्रा विश्वानि पौंस्या वर्त्तन्ते तानि चाऽऽभर॥७॥

भावार्थः-हे राजन्! यदि भवान्त्सर्वाः प्रजा धनधान्यविद्यायुक्ताः कुर्यात्तर्हि पञ्चतत्त्वाख्यं राज्यं प्राप्य धवलं यशः प्राप्नुयात्॥७॥

पदार्थः-हे (**इन्द्र**) प्रजा के प्रिय को धारण करने वाले! आप (**कृष्टिषु**) मनुष्यों में और (**नाहुषीषु**) मनुष्यसम्बन्धी प्रजाओं में (**यत्**) जो (**ओजः**) बलकारक अन्न आदि (**नृम्णम्**) धन (**च**) और होवे उसको (**आ, भर**) धारण करिये (**वा**) वा (**पञ्च**) पांच तत्त्वों और (**क्षितीनाम्**) राजसम्बन्धिनी भूमियों के मध्य में (**यत्**) जो (**द्युम्नम्**) शुद्ध यश है अथवा (**सत्रा**) सत्य (**विश्वानि**) सम्पूर्ण (**पौंस्या**) पुरुषार्थ से उत्पन्न हुए बल वर्त्तमान हैं, उनको (**आ**) धारण करिये॥७॥

भावार्थः-हे राजन्! जो आप सम्पूर्ण प्रजाओं को धन-धान्य और विद्या से युक्त करिये तो पञ्चतत्त्वनामक राज्य को प्राप्त होकर धवलित यश को प्राप्त हूजिये॥७॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

यद्वा॑ तृ॒क्षौ म॑घवन् दु॒ह्यावा जने॒ यत्पू॒रौ कच्च॒ वृष्ण्य॑म्।
अ॒स्मभ्यं॒ तद्रि॑रीहि॒ सं नृषाह्येऽमित्रा॑न् पृ॒त्सु तु॒र्वणे॑॥८॥

यत्। वा॒। तृ॒क्षौ। म॒घऽव॒न्। दु॒ह्यौ। आ। जने॑। यत्। पू॒रौ। कत्। च॒। वृष्ण्य॑म्। अ॒स्मभ्य॑म्। तत्। रि॒री॒हि॒। सम्। नृ॒ऽसह्ये॑। अ॒मित्रा॑न्। पृ॒त्ऽसु। तु॒र्वणे॑॥८॥

पदार्थः-(**यत्**) (**वा**) (**तृक्षौ**) विद्याशुभगुणप्राप्ते (**मघवन्**) न्यायोपार्जितधन (**दुह्यौ**) द्रोग्धुं योग्ये (**आ**) (**जने**) मनुष्ये (**यत्**) (**पूरौ**) पूर्णबले (**कत्**) कदा (**च**) (**वृष्ण्यम्**) वृषसु हितं बलम् (**अस्मभ्यम्**) (**तत्**) (**रिरीहि**) प्रापय (**सम्**) (**नृषाह्ये**) नृभिस्सोढुं योग्ये स-ामे (**अमित्रान्**) शत्रून् (**पृत्सु**) सेनासु (**तुर्वणे**) हिंसनाय॥८॥

अन्वयः-हे मघवँस्त्वं तृक्षौ दुह्यौ जने यद्रिरीहि पूरौ जने यद्वृष्ण्यं रिरीहि तदस्मभ्यं च कत्प्रापयेः कदा वा चास्माकममित्रान् नृषाह्ये पृत्सु तुर्वणे समा रिरीहि॥८॥

भावार्थः-हे राजन्! यदा त्वमुत्तमेषु मनुष्येषु प्रतिष्ठां दुष्टेषु तिरस्कारं दध्यास्तदैव शत्रुविजयाय योग्यो भवेः॥८॥

पदार्थः-हे (**मघवन्**) न्याय से धन इकट्ठा करने वाले! आप (**तृक्षौ**) विद्या और श्रेष्ठ गुणों से प्राप्त (**दुह्यौ**) द्रोह करने योग्य (**जने**) मनुष्य में (**यत्**) जो (**रिरीहि**) प्राप्त कराइये और (**पूरौ**) पूर्ण बल वाले मनुष्य में (**यत्**) जो (**वृष्ण्यम्**) उत्तमों में हितकारक जो बल उसको प्राप्त कराइये (**तत्**) वह (**अस्मभ्यम्**) हम लोगों के लिये (**च**) और (**कत्**) कब प्राप्त कराइये और कब (**वा**) वा हम लोगों के (**अमित्रान्**) शत्रुओं को (**नृषाह्ये**) मनुष्यों से सहने योग्य स-ाम में (**पृत्सु**) सेनाओं में (**तुर्वणे**) हिंसन के लिये (**सम्**) अच्छे प्रकार (**आ**) सब ओर से प्राप्त कराइये॥८॥

भावार्थः-हे राजन्! जब आप उत्तम मनुष्यों में प्रतिष्ठा और दुष्टों में तिरस्कार धारण करें, तभी शत्रुओं के विजय के लिये योग्य होवें॥८॥

मनुष्याः कीदृशं गृहं निर्मिमीरन्नित्याह॥

मनुष्य कैसे गृह को बनावें, इस विषय को कहते हैं॥

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत्।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः॥९॥

इन्द्र। त्रिऽधातु। शरणम्। त्रिऽवरूथम्। स्वस्तिऽमत्। छर्दिः। यच्छ। मघवत्ऽभ्यः। च। मह्यम्। च। यवय। दिद्युम्। एभ्यः॥९॥

पदार्थः-(**इन्द्र**) (**त्रिधातु**) त्रयः सुवर्णरजतताम्रा धातवो यस्मिंस्तत् (**शरणम्**) आश्रयितुं योग्यम् (**त्रिवरूथम्**) शीतोष्णवर्षासूत्तमम् (**स्वस्तिमत्**) बहुसुखयुक्तम् (**छर्दिः**) गृहम् (**यच्छ**) गृहाण देहि वा (**मघवद्भ्यः**) बहुधनेभ्यः (**च**) (**मह्यम्**) धनाढ्याय (**च**) (**यावया**) संयोजय। अत्र **संहितायामि**ति दीर्घः। (**दिद्युम्**) सुप्रकाशम् (**एभ्यः**) वर्त्तमानेभ्यः॥९॥

अन्वयः-हे इन्द्र! त्वं त्रिधातु त्रिवरूथं शरणं स्वस्तिमच्छर्दिर्यच्छ येभ्यो मघवद्भ्यो मह्यं च यच्छैभ्यो दिद्युं च यावया॥९॥

भावार्थः-मनुष्यैर्यत्सर्वर्त्तुषु सुखकरं धनधान्ययुक्तं वृक्षपुष्पफलशुद्धवायूदकधार्मिकधनाढ्यसमन्वितं गृहं तन्निर्माय तत्र निवसनीयं यतः सर्वदाऽऽरोग्येन सुखं वर्धेत॥९॥

पदार्थः-हे (**इन्द्र**) ऐश्वर्य्यों से युक्त आप (**त्रिधातु**) तीन सुवर्ण, चाँदी और ताँबा ये धातु जिसमें उस (**त्रिवरूथम्**) शीत, उष्ण और वर्षा ऋतु में उत्तम (**शरणम्**) आश्रय करने योग्य (**स्वस्तिमत्**) बहुत सुख से युक्त (**छर्दिः**) गृह को (**यच्छ**) ग्रहण करिये वा दीजिये और जिन (**मघवद्भ्यः**) बहुत धन वालों के और (**मह्यम्**) मुझ धनयुक्त के लिये (**च**) भी ग्रहण करिये वा दीजिये (**एभ्यः**) इन वर्त्तमानों के लिये (**दिद्युम्**) सुप्रकाश को (**च**) भी (**यावया**) संयुक्त कराइये॥९॥

भावार्थः-मनुष्यों को चाहिये कि जो सब ऋतुओं में सुखकारक, धन धान्य से युक्त, वृक्ष, पुष्प, फल, शुद्ध वायु जल तथा धार्मिक और धनाढ्यों से युक्त गृह उसको बनाकर वहाँ निवास करें जिससे सर्वदा आरोग्य से सुख बढ़े॥९॥

पुनः स राजा केषां किं कुर्यादित्याह॥

फिर वह राजा किन को क्या करे, इस विषय को कहते हैं॥

ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया।
अधस्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव॥१०॥२८॥

ये। गव्यता। मनसा। शत्रुम्। आऽदभुः। अभिऽप्रघ्नन्ति। धृष्णुऽया। अध। स्म। नः। मघऽवन्। इन्द्र। गिर्वणः। तनूऽपाः। अन्तमः। भव॥ १०॥

पदार्थः-(**ये**) (**गव्यता**) गवा वाचेवाचरता (**मनसा**) (**शत्रुम्**) (**आदभुः**) समन्ताद्धिंसन्ति (**अभिप्रघ्नन्ति**) आभिमुख्ये प्रकर्षेण घ्नन्ति (**धृष्णुया**) प्रगल्भत्वादिना (**अध**) आनन्तर्ये (**स्मा**) एव। अत्र **निपातस्य च**इति दीर्घः। (**नः**) अस्माकम् (**मघवन्**) बहुधनयुक्त (**इन्द्र**) शत्रुविदारक (**गिर्वणः**) सुशिक्षिताभिर्वाग्भिः सेवित (**तनूपाः**) स्वस्यान्येषां च शरीराणां रक्षकः (**अन्तमः**) समीपस्थः (**भव**)॥१०॥

अन्वयः-हे गिर्वणो मघवन्निन्द्र! ये धृष्णुया गव्यता मनसा शत्रुमादभुरधास्य सेनामभिप्रघ्नन्ति तैस्सह स्मा नस्तनूपा अन्तमो भव॥१०॥

भावार्थः-हे राजन्! ये दस्व्यादिदुष्टानां शत्रूणां च निग्रहीतारः प्रजापालनतत्परा धार्मिकजनाः स्युस्तेषां विश्वासेन राज्यकृत्यादीन्यलङ्कुर्याः॥१०॥

पदार्थः-हे (**गिर्वणः**) उत्तम प्रकार शिक्षित वाणियों से सेवा किये गये (**मघवन्**) बहुत धन से युक्त (**इन्द्र**) शत्रुओं को नाश करने वाले! (**ये**) जो (**धृष्णुया**) ढीठपन आदि से (**गव्यता**) वाणी के सदृश आचरण करते हुए (**मनसा**) मन से (**शत्रुम्**) शत्रु का (**आदभुः**) सब प्रकार से नाश करते हैं (**अध**) इसके अनन्तर इसकी सेना का (**अभिप्रघ्नन्ति**) सन्मुख अत्यन्त नाश करते हैं, उनके साथ (**स्मा**) ही (**नः**) हम लोगों के (**तनूपाः**) अपने और अन्यों के शरीरों के रक्षक (**अन्तमः**) समीप में स्थित (**भव**) हूजिये॥१०॥

भावार्थः-हे राजन्! जो ठग आदि दुष्ट शत्रुओं के बाँधने वाले तथा प्रजाओं के पालन में तत्पर धार्मिक जन हों, उनके विश्वास से राज्य के कृत्यों को शोभित करिये॥१०॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

अध स्मा नो वृधे भवेन्द्र नायमवा युधि।
यदुन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस्तिग्ममूर्धानः॥ ११॥

अध। स्मा। नः। वृधे। भव। इन्द्र। नायम्। अव। युधि। यत्। अन्तरिक्षे। पतयन्ति। पर्णिनः। दिद्यवः। तिग्मऽमूर्धानः॥ ११॥

पदार्थः-(**अध**) आनन्तर्ये (**स्मा**) एव। अत्र **निपातस्य च**इति दीर्घः। (**नः**) अस्माकम् (**वृधे**) (**भव**) (**इन्द्र**) ऐश्वर्यवर्धक (**नायम्**) नेतुम् (**अवा**) रक्ष। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**युधि**) स-ामे (**यत्**) (**अन्तरिक्षे**) (**पतयन्ति**) गच्छन्ति (**पर्णिनः**) पक्षिणः (**दिद्यवः**) प्रकाशमानाः (**तिग्ममूर्द्धानः**) तिग्म उपरि वर्त्तमानाः॥११॥

अन्वयः-हे इन्द्र! यद्येऽन्तरिक्षे पर्णिन इव दिद्यवस्तिग्ममूर्द्धानो योद्धारो युधि पतयन्त्यध विजयं नायं प्रयतन्ते तैः सह नो वृधे भव युध्यस्मान् स्मा सततमवा॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! भवान् विमानादीनि यानानि संस्थाप्य पक्षिवदन्तरिक्षमार्गेण गमनागमने कृत्वोत्तमैः पुरुषैः सह विजयं प्राप्य सर्वोत्कृष्टो भव॥११॥

पदार्थः-हे **(इन्द्र)** ऐश्वर्य्य के बढ़ाने वाले सेना के स्वामी! **(यत्)** जो **(अन्तरिक्षे)** अन्तरिक्ष में **(पर्णिनः)** पक्षियों के समान **(दिद्यवः)** प्रकाशमान **(तिग्ममूर्द्धानः)** ऊपर वर्त्तमान योद्धा जन **(युधि)** सङ्ग्राम में **(पतयन्ति)** जाते हैं **(अध)** इसके अनन्तर विजय को **(नायम्)** प्राप्त करने का प्रयत्न करते हैं उनके साथ **(नः)** हम लोगों की **(वृधे)** वृद्धि के लिये **(भव)** प्रसिद्ध हूजिये और स- ाम में हम लोगों की **(स्मा)** ही निरन्तर **(अवा)** रक्षा कीजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! आप विमान आदि वाहनों को स्थापित कर पक्षियों के सदृश अन्तरिक्ष मार्ग से गमन और आगमन करके तथा उत्तम पुरुषों के साथ विजय को प्राप्त होकर सब से श्रेष्ठ हूजिये॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यत्र॒ शूरा॑सस्त॒न्वो॑ वितन्व॒ते प्रि॒या शर्म॑ पितृ॒णाम्।

अध॑ स्मा यच्छ त॒न्वे॒३॑ तने॑ च छ॒र्दिर॒चित्तं॑ या॒वय॒ द्वेष॑:॥१२॥

यत्र॑। शूरा॑सः। त॒न्वः॑। वि॒ऽत॒न्व॒ते। प्रि॒या। शर्म॑। पि॒तृ॒णाम्। अध॑। स्म॒। य॒च्छ॒। त॒न्वे॑। तने॑। च॒। छ॒र्दिः। अ॒चित्त॑म्। य॒वय॑। द्वेष॑:॥१२॥

पदार्थः-**(यत्र)** यस्मिन् युद्धे **(शूरासः)** **(तन्वः)** शरीराणि **(वितन्वते)** **(प्रिया)** प्रियाणि **(शर्म)** शर्माणि गृहाणि **(पितृणाम्)** जनकानां स्वामिनां वा **(अध)** **(स्मा)** एव अत्र **निपातस्य चे**ति दीर्घः। **(यच्छ)** गृहाण **(तन्वे)** शरीराय **(तने)** विस्तृते **(च)** **(छर्दिः)** गृहम् **(अचित्तम्)** चेतनरहितम् **(यावय)** वियोजय। अत्र **तुजादीनामि**त्यभ्यासदैर्घ्यम्। **(द्वेषः)** शत्रून्॥१२॥

अन्वयः-हे इन्द्र! यत्र शूरासः पितृणां तन्वो वितन्वते प्रिया शर्म वितन्वतेऽध तन्वे तने चाऽचित्तं छर्दिस्त्वं यच्छ तत्र द्वेषः स्म यावय॥१२॥

भावार्थः-हे राजन्! शूरवीरान् धार्मिकाञ्जनान्त्सत्कारपुरःसरं संरक्ष्य शत्रून्निवार्य्योत्तमेषु गृहेषु स्वामिभ्यः कमनीयान् भोगान् दत्त्वा स्वयशो विस्तृणीहि॥१२॥

पदार्थः-हे ऐश्वर्य्य के बढ़ाने वाले! **(यत्र)** जहाँ **(शूरासः)** युद्ध में चतुर जन **(पितृणाम्)** अपने पिता और स्वामियों के **(तन्वः)** शरीरों को **(वितन्वते)** बढ़ाते हैं और **(प्रिया)** प्रिय **(शर्म)** गृहों को बढ़ाते हैं **(अध)** इसके अनन्तर **(तन्वे)** शरीर के लिये **(तने)** बढ़े हुए व्यवहार में **(च)** भी **(अचित्तम्)** चेतनता

से रहित **(छर्दिः)** गृह को आप **(यच्छ)** ग्रहण करिये वहाँ **(द्वेषः)** शत्रुओं को **(स्म)** ही **(यावय)** पृथक् कराइये॥१२॥

भावार्थः-हे राजन्! शूरवीर धार्मिक जनों की सत्कारपूर्वक उत्तम प्रकार रक्षा कर शत्रुओं का निवारण कर उत्तम गृहों में पितरों और स्वामी जनों के लिये सुन्दर भोगों को देकर अपने यश का विस्तार करो॥१२॥

पुनर्मनुष्यैः कथं गमनादिकं कार्य्यमित्याह॥

फिर मनुष्यों को कैसे गमनादिक करना चाहिये, इस विषय को कहते हैं॥

यदिन्द्र सर्गे अर्वतश्चोदयासे महाधने।

असमने अध्वनि वृजिने पथि श्येनाँइव श्रवस्यतः॥१३॥

यत्। इन्द्र। सर्गे। अर्वतः। चोदयासे। महाऽधने। असमने। अध्वनि। वृजिने। पथि। श्येनान्ऽइव। श्रवस्यतः॥१३॥

पदार्थः-(**यत्**) यस्मिन् (**इन्द्र**) वीरशत्रुविदारक (**सर्गे**) संस्रष्टुमर्हे (**अर्वतः**) अश्वादीन् (**चोदयासे**) चोदय (**महाधने**) महान्ति धनानि यस्मात् तस्मिन् (**असमने**) अविद्यमानं समनं स-ामो यस्मिँस्तस्मिन् (**अध्वनि**) मार्गे (**वृजिने**) बले (**पथि**) (**श्येनानिव**) (**श्रवस्यतः**) आत्मनः श्रव इच्छतः॥१३॥

अन्वयः-हे इन्द्र! यद्यत्र सर्गे महाधनेऽसमने वृजिनेऽध्वनि पथि श्येनानिव श्रवस्यतोऽर्वतश्च चोदयासे तत्र ते दूरस्थमपि स्थानं निकटमिव स्यात्॥१३॥

भावार्थः-हे राजन्! युद्धमन्तरापि यदा यदा कार्यार्थं गमनं भवान् कुर्य्यात्तदा तदा सद्य एव गन्तव्यं, शैथिल्यं पद्भ्यां यानेन वा गमने नैव कार्यम्॥१३॥

पदार्थः-हे (**इन्द्र**) वीर शत्रुओं के नाश करने वाले (**यत्**) जहाँ (**सर्गे**) मिलने योग्य (**महाधने**) बड़े धन जिससे उस और (**असमने**) नहीं विद्यमान स-ाम जिसमें ऐसे (**वृजिने**) बलकारक (**अध्वनि**) मार्ग में और (**पथि**) आकाशमार्ग में (**श्येनाविव**) बाजों को जैसे वैसे (**श्रवस्यतः**) सुख की इच्छा करते हुए (**अर्वतः**) घोड़े आदि को (**चोदयासे**) प्रेरणा करिये, वहाँ आपका दूर भी स्थित स्थान निकटसा होवे॥१३॥

भावार्थः-हे राजन्! युद्ध के विना भी जब जब कार्य्य के लिये गमन आप करें तब तब शीघ्र ही जाना चाहिये और शिथिलता पैरों से वा वाहन से जाने में नहीं करनी चाहिये॥१३॥

पुनस्ते राजादयः किं कुर्य्युरित्याह॥

फिर वे राजा आदि क्या करें, इस विषय को कहते हैं॥

सिन्धूँरिव प्रवण आशुया यतो यदि क्लोशमनु ष्वणि।

आ ये वयो न वर्वृतत्यामिषि गृभीता बाह्वोर्गवि॥ १४॥ २९॥

सिन्धून्ऽइव। प्रवणे। आशुऽया। यतः। यदि। क्लोशम्। अनु। स्वनि। आ। ये। वयः। न। वर्वृतति। आमिषि। गृभीताः। बाह्वोः। गवि॥ १४॥

पदार्थः-(**सिन्धूनिव**) नदीरिव (**प्रवणे**) निम्नस्थाने (**आशुया**) आशुगैरश्वैः (**यतः**) यस्मात् (**यदि**) (**क्लोशम्**) क्रोशम् (**अनु**) (**स्वनि**) शब्दे (**आ**) (**ये**) (**वयः**) पक्षिणः (**न**) इव (**वर्वृतति**) भृशं गच्छति (**आमिषि**) मांसे दृष्टे सति (**गृभीताः**) गृहीताः (**बाह्वोः**) (**गवि**) पृथिव्याम्॥ १४॥

अन्वयः-हे राजन्! भवान् यदि प्रवणे सिन्धूनिवाशुया स्वन्यामिषि वयो न गवि क्लोशमनुवर्वृतति। बाह्वोर्गृभीता रश्मयः कला वा यथावच्चलन्ति तर्हि स्थानान्तरप्राप्तिर्दुर्लभा नास्ति ये यतो गच्छन्त्यागच्छन्ति तेऽप्येवमनुतिष्ठन्तु॥ १४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यूयं यथोदकमुच्चस्थानान् निम्नं देशं सद्यो गच्छति यथा वा श्येनादयः पक्षिणो मांसार्थं तूर्णं धावन्ति तथैव भूम्यन्तरिक्षे जले वा यानैः सद्यो गच्छतेति॥ १४॥

अत्र राजवीरस- ामगृहशूरवीरयानकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्चत्वारिंशत्तमं सूक्तमेकोनत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-हे राजन्! आप (**यदि**) जो (**प्रवणे**) नीचे के स्थान में (**सिन्धूनिव**) नदियों को जैसे वैसे (**आशुया**) शीघ्र चलने वाले घोड़ों से वा (**स्वनि**) शब्द के होने और (**आमिषि**) मांस के देखने पर (**वयः**) पक्षी (**नः**) जैसे वैसे (**गवि**) पृथिवी में (**क्लोशम्**) कोश को (**अनु, वर्वृतति**) अत्यन्त वा बारम्बार प्राप्त होते हैं वा (**बाह्वोः**) बाहुओं में (**गृभीताः**) ग्रहण की गई किरणों वा कलायें यथावत् जाती हैं तो दूसरे स्थान में प्राप्त होना दुर्लभ नहीं है (**ये**) जो (**यतः**) जहाँ से जाते (**आ**) आते हैं, वे भी ऐसा करें॥ १४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! तुम जैसे जल ऊँचे स्थान से नीचे के स्थान को शीघ्र जाता है और जैसे बाज आदि पक्षी माँस के लिये शीघ्र जाते हैं, वैसे भूमि, अन्तरिक्ष वा जल में वाहनों से शीघ्र जाओ॥ १४॥

इस सूक्त में राजा, वीर, स- ाम, गृह, शूरवीर और यान कृत्य के वर्णन से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति जाननी चाहिये॥

यह छयालीसवाँ सूक्त और उनतीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकत्रिंशदृचस्य सप्तचत्वारिंशत्तमस्य सूक्तस्य १-३१ गर्ग ऋषिः। १-५ सोमः। ६-१९, २१ इन्द्रः। २० लिङ्गोक्ता देवताः। २२-२५ प्रस्तोकस्य सर्ञ्जयस्य दानस्तुतिः। २६-२८ रथः। २९-३१ दुन्दुभिर्देवता॥ १, ३, ५, २१, २२, २८ निचृत्त्रिष्टुप्। ४, ८, ११ विराट् त्रिष्टुप्। ६, ७, १०, १५, १६, २० त्रिष्टुप्। १८, २९, ३० भुरिक्त्रिष्टुप्। २७ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ९, १२, १३, २६, ३१ भुरिक् पङ्क्तिः। १४, १७ स्वराट् पङ्क्तिः। २३ आर्चीपङ्क्तिश्छन्दः। पञ्चमः स्वरः। १९ बृहती छन्दः। मध्यमः स्वरः। २४, २५ विराड्गायत्री छन्दः। षड्जः स्वरः॥

अथ किं कृत्वा राजा शत्रुभिरसोढव्यः स्यादित्याह॥

अब एकतीस ऋचा वाले सैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में क्या करके राजा शत्रुओं से नहीं सहने योग्य होवे, इस विषय को कहते हैं॥

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम्।
उतो न्वस्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु॥ १॥

स्वादुः। किल। अयम्। मधुऽमान्। उत्। अयम्। तीव्रः। किल। अयम्। रसऽवान्। उत। अयम्। उतो इति। नु। अस्य। पपिऽवांसम्। इन्द्रम्। न। कः। चन। सहते। आऽहवेषु॥ १॥

पदार्थः-(स्वादुः) सुस्वादयुक्तः **(किलः)** निश्चये **(अयम्) (मधुमान्)** मधुरादिगुणयुक्तः **(उत) (अयम्) (तीव्रः)** तेजस्वी वेगवान् **(किल) (अयम्) (रसवान्)** महौषधिप्रशस्तरसप्रचुरः **(उत) (अयम्) (उतो) (नु)** क्षिप्रम् **(अस्य) (पपिवांसम्)** पिबन्तम् **(इन्द्रम्)** राजादिकं शूरवीरम् **(न)** निषेधे **(कः) (चन)** कश्चिदपि **(सहते) (आहवेषु)** सङ्ग्रामेषु॥१॥

अन्वयः-हे शूरवीरा! योऽयं स्वादुः किल उतायं मधुमान् किलाऽयं तीव्र उतायं रसवानोषधिसारोऽस्ति। अस्योतो पपिवांसमिन्द्रमाहवेषु नु कश्चन न सहते॥१॥

भावार्थः-ये ब्रह्मचर्य्यजितेन्द्रियत्वादियुक्ताऽऽहारविहारैः शरीरात्मबलयुक्ता भवन्ति तान् स-ामेषु सोढुं शत्रवो न शक्नुवन्ति॥१॥

पदार्थः-हे शूरवीर जनो! जो **(अयम्)** यह **(स्वादुः)** सुन्दर स्वाद से युक्त **(किल)** निश्चय करके **(उत)** और **(अयम्)** यह **(मधुमान्)** मधुरादि गुणों से युक्त **(किल)** निश्चय करके **(अयम्)** यह **(तीव्रः)** तेजस्वी और वेगयुक्त **(उत)** और **(अयम्)** यह **(रसवान्)** बड़ी ओषधि का प्रशंसित रसयुक्त सार है **(अस्य)** इसके **(उतो)** भी **(पपिवांसम्)** पीने वाले **(इन्द्रम्)** राजा आदि शूरवीर को **(आहवेषु)** स-ामों में **(नु)** शीघ्र **(कः) (चन)** कोई भी **(न)** नहीं **(सहते)** सहता है॥१॥

भावार्थः-जो ब्रह्मचर्य्य, जितेन्द्रियत्व और युक्त आहार-विहारों से शरीर और आत्मा के बल से युक्त होते हैं, उनको स-ामों में सहने को शत्रु समर्थ नहीं हो सकते हैं॥१॥

पुनर्मनुष्याः कं सेवित्वा किं कुर्य्युरित्याह॥

फिर मनुष्य किसका सेवन करके क्या करें, इस विषय को कहते हैं॥

अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममाद।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च देह्यो हन्॥२॥

अयम्। स्वादुः। इह। मदिष्ठः। आस। यस्य। इन्द्रः। वृत्रऽहत्ये। ममाद। पुरूणि। यः। च्यौत्ना। शम्बरस्य। वि। नवतिम्। नव। च। देह्यः। हन्॥२॥

पदार्थः-(**अयम्**) (**स्वादुः**) स्वादयुक्तः (**इह**) (**मदिष्ठः**) अतिशयेनानन्दप्रदः (**आस**) (**यस्य**) सूर्य्य इव प्रतापवान् (**वृत्रहत्ये**) स-ामे (**ममाद**) हर्षति (**पुरूणि**) बहूनि (**यः**) (**च्यौत्ना**) बलानि। **च्यौत्नमिति बलनाम।** (निघं०२.९) (**शम्बरस्य**) मेघस्य (**वि**) (**नवतिम्**) (**नव, च**) नवनवतिप्रकारा मेघगतयः (**देह्यः**) उपचेतुं योग्यः (**हन्**) हन्ति॥२॥

अन्वयः-य इन्द्रो राजा योऽयमिह स्वादुर्मदिष्ठ आस यस्य पानेन ममाद तत्पीत्वा यथा सूर्य्यः शम्बरस्य नव च नवतिं विहंस्तथा देह्यः सन् वृत्रहत्ये शत्रूणां पुरूणि च्यौत्ना हन्यात् स एव विजयी स्यात्॥२॥

भावार्थः-हे मनुष्या! भवन्तो यस्योत्तमः स्वादुर्यस्माद्बलबुद्धिपराक्रमा वर्धन्ते तत्सेवनेन शत्रूञ्जित्वा निष्कण्टकं राज्यं सेवन्ताम्॥२॥

पदार्थः-(**यः**) जो (**इन्द्रः**) सूर्य्य के सदृश प्रतापी राजा और जो (**अयम्**) यह (**इह**) संसार में (**स्वादुः**) अच्छे स्वाद से युक्त (**मदिष्ठः**) अतिशय आनन्द देने वाले (**आस**) होता और (**यस्य**) जिसके पान करने से (**ममाद**) प्रसन्न होता है, उसका पान करके जैसे सूर्य प्रतापयुक्त (**शम्बरस्य**) मेघ के (**नव, च**) नव (**नवतिम्**) नब्बे प्रकार मेघगतियों का (**वि, हन्**) नाश करता है, उस प्रकार से (**देह्यः**) वृद्धि करने के योग्य हुआ (**वृत्रहत्ये**) स-ाम में शत्रुओं की (**पुरूणि**) बहुत (**च्यौत्ना**) सेनाओं का नाश करे, वही विजयी होवे॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिसका उत्तम स्वाद और जिससे बल बुद्धि तथा पराक्रम बढ़ते हैं उसके सेवन से शत्रुओं को जीत कर निष्कण्टक राज्य का सेवन करो॥२॥

पुनः स सोमः किं करोतीत्याह॥

फिर वह सोम क्या करते है, इस विषय को कहते हैं॥

अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे॥३॥

अयम्। मे। पीतः। उत्। इयर्त्ति। वाचम्। अयम्। मनीषाम्। उशतीम्। अजीगरिति। अयम्। षट्। उर्वीः। अमिमीत। धीरः। न। याभ्यः। भुवनम्। कत्। चन। आरे॥ ३॥

पदार्थः-(**अयम्**) (**मे**) मम (**पीतः**) (**उत्**) (**इयर्त्ति**) उन्नयति (**वाचम्**) (**अयम्**) (**मनीषाम्**) प्रज्ञाम् (**उशतीम्**) कामयमानाम् (**अजीगः**) गच्छति प्राप्नोति (**अयम्**) (**षट्**) (**उर्वीः**) षड्विधा भूमीः (**अमिमीत**) (**धीरः**) ध्यानवान् मेधावी (**न**) (**याभ्यः**) (**भुवनम्**) (**कत्**) कदा (**चन**) अपि (**आरे**) दूरे समीपे वा॥ ३॥

अन्वयः- हे मनुष्या! यथायं पीतः सोमो मे वाचमुशतीं मनीषामुदियर्त्ति येनाऽयं जनः काममजीगः। येनायं षडुर्वीर्धीरो नामिमीत याभ्य आरे कच्चन भुवनमिमीत सोऽयं वैद्यकशास्त्ररीत्या निर्मातव्यः॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! येन पीतेन वाग्बुद्धितनु वर्धेत येन शास्त्राणि सङ्गृहीतानि स्युस्तस्यैव सेवनं कार्यं न च बुद्ध्यादिनाशकस्य॥ ३॥

पदार्थः-हे मनुष्यो! जैसे (**अयम्**) यह (**पीतः**) पान किया गया सोमलता का रस (**मे**) मेरी (**वाचम्**) वाणी को (**उशतीम्**) कामना करती हुई (**मनीषाम्**) बुद्धि को (**उत्, इयर्त्ति**) बढ़ाता है जिससे (**अयम्**) यह जन कामना को (**अजीगः**) प्राप्त होता है जिससे (**अयम्**) यह (**षट्**) छः प्रकार की (**उर्वीः**) भूमियों को (**धीरः**) ध्यान करने वाला बुद्धिमान् जन (**न**) जैसे (**अमिमीत**) निर्म्माण करता है और (**याभ्यः**) जिन से (**आरे**) दूर वा समीप में (**कत्**) कभी (**चन**) भी (**भुवनम्**) संसार को रचता है, यह वैद्यकशास्त्र की रीति से बनाने योग्य है॥ ३॥

भावार्थः- इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिस पिये हुए से वाणी, बुद्धि, शरीर बढ़े और जिससे श्रेष्ठ उत्तम प्रकार ग्रहण किये जायें, इसका ही सेवन करना चाहिये न कि बुद्धि आदिकों के नाश करने वाले का॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्वन्तरिक्षम्॥ ४॥

अयम्। सः। यः। वरिमाणम्। पृथिव्याः। वर्ष्माणम्। दिवः। अकृणोत्। अयम्। सः। अयम्। पीयूषम्। तिसृषु। प्रवत्ऽसु। सोमः। दाधार। उरु। अन्तरिक्षम्॥ ४॥

पदार्थः-(**अयम्**) (**सः**) (**यः**) (**वरिमाणम्**) वरस्य भावम् (**पृथिव्याः**) (**वर्ष्माणम्**) वर्षकम् (**दिवः**) सूर्य्यप्रकाशात् (**अकृणोत्**) करोति (**अयम्**) (**सः**) (**अयम्**) (**पीयूषम्**) (**तिसृषु**) भूम्यादिषु (**प्रवत्सु**) निम्नेषु (**सोमः**) (**दाधार**) धरति (**उरु**) बहु (**अन्तरिक्षम्**) अन्तरक्षयं कारणाख्यम्॥ ४॥

अन्वयः-हे मनुष्या! योऽयं सोमस्तिसृषु प्रवत्सु पीयूषं दाधार योऽयं पृथिव्या वरिमाणं दिवो वर्ष्माणमकृणोत् स सर्वैर्मनुष्यैः स- ाह्यो योऽयमुर्वन्तरिक्षं दाधार सोऽयं सर्वेषां सुखकरोऽस्ति॥४॥

भावार्थः-हे मनुष्या! यस्सोमो वायुना सह भूमिं किरणैस्सह सूर्य्यं दधाति तं सङ्गृह्य सेवित्वा सर्वेऽरोगा भवत॥४॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**अयम्**) यह (**सोमः**) सोमलता का रस (**तिसृषु**) तीन भूमि आदिकों (**प्रवत्सु**) नीचे के स्थलों में (**पीयूषम्**) अमृत को (**दाधार**) धारण करता है और जो (**अयम्**) यह (**पृथिव्याः**) पृथिवी से (**वरिमाणम्**) श्रेष्ठपने को और (**दिवः**) सूर्य्य के प्रकाश से (**वर्ष्माणम्**) वृष्टि करने वाले को (**अकृणोत्**) करता है (**सः**) वह सब मनुष्यों से उत्तम प्रकार ग्रहण करने योग्य और जो (**अयम्**) यह (**उरु**) बहुत (**अन्तरिक्षम्**) मध्य में नहीं नष्ट होने वाले को धारण करता है (**सः**) वह यह सब का सुख करने वाला है॥४॥

भावार्थः-हे मनुष्यो! जो सोमलतारूप ओषधि का रस वायु के साथ भूमि को, किरणों के साथ सूर्य्य को धारण करता है, उसको ग्रहण और सेवन करके सब रोगरहित होओ॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके।

अयं महान् महता स्कम्भनेनोद् द्यामस्तभ्नाद् वृषभो मरुत्वान्॥५॥३०॥

अयम्। विदत्। चित्रऽदृशीकम्। अर्णः। शुक्रऽसद्मनाम्। उषसाम्। अनीके। अयम्। महान्। महता। स्कम्भनेन। उत्। द्याम्। अस्तभ्नात्। वृषभः। मरुत्वान्॥५॥

पदार्थः-(**अयम्**) (**विदत्**) प्राप्नोति (**चित्रदृशीकम्**) आश्चर्य्यदर्शनम् (**अर्णः**) जलम् (**शुक्रसद्मनाम्**) शुद्धस्थानानाम् (**उषसाम्**) प्रभातवेलानाम् (**अनीके**) सैन्ये (**अयम्**) (**महान्**) (**महता**) (**स्कम्भनेन**) धारणेन (**उत्**) (**द्याम्**) (**अस्तभ्नात्**) स्तभ्नाति (**वृषभः**) वर्षकः (**मरुत्वान्**) मरुतो बहवो वायवो विद्यन्ते यस्मिन् सः॥५॥

अन्वयः-हे मनुष्या! यथायं वृषभो मरुत्वान्त्सूर्य्यः शुक्रसद्मनामुषसामनीके चित्रदृशीकमर्णो विदत्। योऽयं महान् महता स्कम्भनेन द्यामुदस्तभ्नात्तं कार्य्योपयोगिनं कुरुत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यूयं सूर्य्यवत्प्रातः समयमारभ्य प्रयत्नेन विद्याः प्रकाश्य सुखं लभध्वम्॥५॥

पदार्थः-हे मनुष्यो! जैसे (**अयम्**) यह (**वृषभः**) वृष्टि करने वाला (**मरुत्वान्**) बहुत वायु विद्यमान जिसमें ऐसा सूर्य्य (**शुक्रसद्मनाम्**) शुद्ध स्थानों और (**उषसाम्**) प्रभात वेलाओं की (**अनीके**) सेना में (**चित्रदृशीकम्**) आश्चर्य्ययुक्त दर्शन जिसका ऐसे (**अर्णः**) जल को (**विदत्**) प्राप्त होता है और जो

(अयम्) यह **(महान्)** बड़ा **(महता)** बड़े **(स्कम्भनेन)** धारण से **(द्याम्)** प्रकाश को **(उत्, अस्तभ्नात्)** ऊपर को उठाया है, उसको कार्य्य का उपयोगी करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् जनो! आप लोग सूर्य्य के सदृश प्रातःकाल से लेकर प्रयत्न से विद्याओं को प्रकाशित करके सुख को प्राप्त होओ॥५॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

धृषत्पिबा कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम्।
माध्यंदिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि॥६॥

धृषत्। पिब। कलशे। सोमम्। इन्द्र। वृत्रऽहा। शूर। सम्ऽअरे। वसूनाम्। माध्यंदिने। सवने। आ। वृषस्व। रयिऽस्थानः। रयिम्। अस्मासु। धेहि॥६॥

पदार्थः-(**धृषत्**) प्रगल्भः सन् **(पिब)** **(कलशे)** पात्रे **(सोमम्)** महौषधिरसम् **(इन्द्र)** सूर्यवद्वर्त्तमान सेनेश **(वृत्रहा)** यो वृत्रं हन्ति **(शूर)** निर्भय **(समरे)** स-ामे **(वसूनाम्)** पृथिव्यादीनां मध्यात् **(माध्यन्दिने)** मध्यं दिने भवे **(सवने)** प्रेरणे **(आ)** **(वृषस्व)** बलिष्ठो भव **(रयिस्थानः)** रायस्तिष्ठन्ति यस्मिन्त्सः **(रयिम्)** **(अस्मासु)** **(धेहि)**॥६॥

अन्वयः-हे शूरेन्द्र! यथा वृत्रहा माध्यन्दिने सवने वसूनां मध्याञ्जलमत्यन्तं पिबति तथा समरे धृषत् सन् कलशे सोमं पिब रयिस्थानस्सन्नावृषस्वाऽस्मासु रयिं धेहि॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यथा मध्याह्नस्थः सूर्यः सर्वं सन्निहितं जगत्प्रकाशयति तथा न्यायस्थस्सन् वादिप्रतिवादिनां जनानां व्यवस्थां कृत्वा राजनीत्या न्यायं प्रकाशय॥६॥

पदार्थः-हे **(शूर)** भय से रहित **(इन्द्र)** सूर्य्य के सदृश वर्त्तमान सेना के स्वामिन्! जैसे **(वृत्रहा)** मेघ का नाश करने वाला **(माध्यन्दिने)** मध्य दिन में की गई **(सवने)** प्रेरणा में **(वसूनाम्)** पृथिवी आदिकों के मध्य से जल को अत्यन्त पीता है, वैसे **(समरे)** स-ाम में **(धृषत्)** ढीठ हुए **(कलशे)** पात्र में **(सोमम्)** बड़ी ओषधियों के रस को **(पिब)** पीजिये और **(रयिस्थानः)** धनों से युक्त हुए **(आ, वृषस्व)** बलिष्ठ हूजिये और **(अस्मासु)** हम लोगों में **(रयिम्)** धन को **(धेहि)** धारण करिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जैसे मध्याह्न में वर्त्तमान सूर्य्य सम्पूर्ण समीप में वर्त्तमान जगत् को प्रकाशित करता है, वैसे न्याय में वर्त्तमान हुए आप वादी और प्रतिवादी जनों की व्यवस्था करके राजनीति से न्याय को प्रकाशित कीजिये॥६॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ।

भवा॑ सुपा॒रो अ॑तिपा॒रयो नो॒ भवा॒ सुनी॑तिरु॒त वा॒मनी॑तिः॥७॥

इन्द्र॑। प्र। न॒रः। पु॒र॒ए॒ताऽइ॑व। प॒श्य॒। प्र। न॒रः। न॒य॒। प्र॒ऽत॒रम्। वस्यः॑। अच्छ॑। भव॑। सु॒ऽपा॒रः। अ॒ति॒ऽपा॒र॒यः। न॒रः। भव॑। सुऽनी॑तिः। उ॒त। वा॒मऽनी॑तिः॥७॥

पदार्थः-(**इन्द्र**) दुष्टविनाशक राजन् (**प्र**) (**नः**) अस्माकम् (**पुरएतेव**) (**पश्य**) (**प्र**) (**नः**) अस्मान् (**नय**) (**प्रतरम्**) शत्रूणां बलोल्लङ्घनम् (**वस्यः**) वसीयोऽतिशयेन सुष्ठुधनम् (**अच्छ**) (**भवा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सुपारः**) शोभनः पारो यस्मात्सः (**अतिपारयः**) योऽत्यन्तं पारयति सः (**नः**) अस्माकम् (**भवा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सुनीतिः**) शोभना नीतिर्न्यायो यस्य सः (**उत**) (**वामनीतिः**) वामा प्रशंसिता नीतिर्यस्य सः॥७॥

अन्वयः-हे इन्द्र! त्वं पुरुएतेव नः प्र पश्य नः प्रतरमच्छ प्र णय नः प्रतरं वस्योऽच्छ प्रणय नः सुपारोऽतिपारयो भवा सुनीतिरुत वामनीतिर्भव॥७॥

भावार्थः-यो राजा मनुष्यपरीक्षकः सर्वेषां न्यायपथेनैश्वर्य्यप्रापको दुःखात्स- ामाच्च पारे गमयिता सदा धर्म्यनीतिर्भवेत्स एवात्र प्रशंसां लभेत॥७॥

पदार्थः-हे (**इन्द्र**) दुष्टों के नाश करने वाले राजन्! आप (**पुरएतेव**) आगे चलने वाले के सदृश (**नः**) हम लोगों को (**प्र, पश्य**) अच्छे प्रकार देखिये और (**नः**) हम लोगों के (**प्रतरम्**) शत्रुओं के बल के उल्लङ्घन को (**अच्छ**) अच्छे प्रकार (**प्र, नय**) प्राप्त करिये और (**नः**) हम लोगों के शत्रुओं के बल का उल्लङ्घन और (**वस्यः**) अतिशय धन को अच्छे प्रकार प्राप्त कराइये और हम लोगोंर का (**सुपारः**) सुन्दर पार जिनसे ऐसे (**अतिपारयः**) अत्यन्त पार करने वाले (**भवा**) हूजिये तथा (**सुनीतिः**) अच्छे न्याय वाले और (**उत**) भी (**वामनीतिः**) प्रशंसित नीति वाले (**भवा**) हूजिये॥७॥

भावार्थः-जो राजा मनुष्यों की परीक्षा लेने वाला और सब को न्याय मार्ग से ऐश्वर्य्य को प्राप्त कराने और दुःख और स- ाम से पार पहुँचाने वाला और सदा धर्मपूर्वक नीतियुक्त होवे, वही इस संसार में प्रशंसा को पावे॥७॥

राजा स्वाश्रयान् प्रति कथं वर्त्तेतित्याह॥

राजा अपने आश्रितों के प्रति कैसा वर्त्ताव करे, इस विषय को कहते हैं॥

उ॒रुं नो॑ लो॒कमनु॑ नेषि वि॒द्वान्त्स्व॑र्व॒ज्ज्योति॒रभ॑यं स्व॒स्ति।
ऋ॒ष्वा त॑ इन्द्र स्थवि॒रस्य बा॒हू उप॑ स्थेयाम शर॒णा बृ॒हन्ता॑॥८॥

उ॒रुम्। न॒रः। लो॒कम्। अनु॑। ने॒षि॒। वि॒द्वान्। स्वः॑ऽवत्। ज्योतिः॑। अभ॑यम्। स्व॒स्ति। ऋ॒ष्वा। ते॒। इ॒न्द्र॒। स्थवि॑रस्य। बा॒हू इति॑। उप॑। स्थे॒या॒म॒। श॒र॒णा। बृ॒हन्ता॑॥८॥

पदार्थः-(**उरुम्**) बहुम् (**नः**) अस्मान् (**लोकम्**) दर्शनमभ्युदयं वा (**अनु**) (**नेषि**) प्रापयसि (**विद्वान्**) (**स्वर्वत्**) बहुसुखयुक्तम् (**ज्योतिः**) ज्ञानप्रकाशम् (**अभयम्**) भयरहितम् (**स्वस्ति**) सुखम्

(ऋष्वा) ऋष्वौ महान्तौ **(ते)** तव **(इन्द्र)** न्यायप्रापक **(स्थविरस्य)** विद्याविनयाभ्यां वृद्धस्य **(बाहू)** बलवीर्याभ्यामुपेतौ भुजौ **(उप) (स्थेयाम)** तिष्ठेम **(शरणा)** शरणौ शत्रूणां हिंसकौ **(बृहन्ता)** महान्तौ॥८॥

अन्वयः-हे इन्द्र राजन्! यस्य स्थविरस्य ते शरणा बृहन्ता ऋष्वा बाहू वयमुपस्थेयाम स विद्वांस्त्वं यतो न उरुं स्वर्वज्ज्योतिरभयं स्वस्ति लोकमनु नेषि तस्मात्सदैवास्माभिः पूज्योऽसि॥८॥

भावार्थः-राज्ञा महता प्रयत्नेन स्वाधीनाः प्रजा विद्याऽभयसुखयुक्ताः कार्य्याः। येन सर्वाः प्रजा अनुकूलाः स्युः॥८॥

पदार्थः-हे **(इन्द्र)** न्याय को प्राप्त कराने वाले राजन्! जिस **(स्थविरस्य)** विद्या और विनय से वृद्ध **(ते)** आपके **(शरणा)** शत्रुओं के नाश करने वाले **(बृहन्ता)** बड़े **(ऋष्वौ)** श्रेष्ठ **(बाहू)** बल और वीर्य्य से युक्त भुजाओं को हम लोग **(उप, स्थेयाम)** प्राप्त होवें वह **(विद्वान्)** विद्वान् आप जिससे **(नः)** हम लोगों को **(उरुम्)** बहुत **(स्वर्वत्)** अत्यन्त सुख से युक्त **(ज्योतिः)** ज्ञान का प्रकाश और **(अभयम्)** भय से रहित **(स्वस्ति)** सुख **(लोकम्)** दर्शन वा वृद्धि को **(अनु, नेषि)** प्राप्त कराते हो, इससे हम लोगों से आदर करने योग्य हो॥८॥

भावार्थः-राजा बड़े प्रयत्न से अपने आधीन प्रजाओं को विद्या और अभय सुख से युक्त करे, जिससे सब प्रजा अनुकूल होवें॥८॥

पुनः स राजा कान् प्रति कथं वर्त्तेतित्याह॥

फिर वह राजा किन के प्रति कैसा वर्त्ताव करे, इस विषय को कहते हैं॥

वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा।

इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन् रायो अर्यः॥९॥

वरिष्ठे। नः। इन्द्र। वन्धुरे। धाः। वहिष्ठयोः। शतऽवन्। अश्वयोः। आ। इषम्। आ। वक्षि। इषाम्। वर्षिष्ठाम्। मा। नः। तारीत्। मघऽवन्। रायः। अर्यः॥९॥

पदार्थः-(**वरिष्ठे**) अतिशयेन वरे **(नः)** अस्मान् **(इन्द्र)** **(वन्धुरे)** प्रेमबन्धने **(धाः)** धेहि **(वहिष्ठयोः)** अतिशयेन वोढ्रोः **(शतावन्)** शतानि बलानि विद्यन्ते यस्य तत्सम्बुद्धौ **(अश्वयोः)** क्षिप्रं गमयित्रोः **(आ)** **(इषम्)** **(आ)** **(वक्षि)** आवह **(इषाम्)** अन्नादीनाम् **(वर्षिष्ठाम्)** अतिशयेन वृद्धाम् **(मा)** **(नः)** अस्मान् **(तारीत्)** तारयेः **(मघवन्)** बहुधनयुक्त **(रायः)** धनस्य **(अर्यः)** स्वामी॥९॥

अन्वयः-हे शतावन्मघवन्निन्द्र! रायोऽर्यस्त्वं वहिष्ठयोरश्वयोर्वरिष्ठे वन्धुरे रथेन न आ धाः। इषमावक्षि नो वर्षिष्ठामिषां मा तारीत्॥९॥

भावार्थः-प्रजासेनाजनैरेवं राजा प्रेरणीयो भवानस्मानुत्तमेषु यानेषु संस्थाप्य पुष्कलं धनं नयतु येनास्माकं वञ्चनं कदाचिज्जना मा कुर्य्युः॥९॥

पदार्थः-हे **(शतावन्)** सेनाओं से युक्त **(मघवन्)** बहुत धन वाले **(इन्द्र)** ऐश्वर्य्यवान् राजन्! **(रायः)** धन के **(अर्यः)** स्वामी आप **(वहिष्ठयोः)** अतिशय ले चलने वाले **(अश्वयोः)** शीघ्र पहुँचाने वालों के **(वरिष्ठे)** अतिशय श्रेष्ठ **(वन्धुरे)** प्रेम बन्धन में वाहन से **(नः)** हम लोगों को **(आ, धाः)** सब प्रकार से धारण करिये तथा **(इषम्)** अन्न को **(आ, वक्षि)** प्राप्त हूजिये और **(नः)** हम लोगों को **(वर्षिष्ठाम्)** अतिशय वृद्ध **(इषाम्)** अन्न आदिकों को **(मा)** नहीं **(तारीत्)** अलग करिये॥९॥

भावार्थः-प्रजा और सेना के जनों को चाहिये कि राजा को ऐसी प्रेरणा करें कि आप हम लोगों को उत्तम वाहनों में उत्तम प्रकार बैठाकर अधिक धन प्राप्त कराइये जिससे हम लोगों के वञ्चन को कभी मनुष्य न करें अर्थात् हम लोगों को कभी न ठगें॥९॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

इन्द्र॑ मृ॒ळ मह्यं॑ जी॒वातु॑मिच्छ चो॒दय॒ धियमय॑सो॒ न धारा॑म्।
यत्किञ्चा॒हं त्वा॒युरि॒दं वदा॑मि॒ तज्जु॑षस्व कृ॒धि मा॑ दे॒ववं॑न्तम्॥ १०॥ ३१॥

इन्द्र॑। मृ॒ळ। मह्य॑म्। जी॒वातु॑म्। इ॒च्छ॒। चो॒दय॑। धिय॑म्। अय॑सः। न। धारा॑म्। यत्। किम्। च॒। अ॒हम्। त्वा॒ऽयुः। इ॒दम्। वदा॑मि। तत्। जु॒ष॒स्व॒। कृ॒धि। मा॒। दे॒वऽव॑न्तम्॥ १०॥

पदार्थः-(**इन्द्र**) सर्वार्थस्य सुखस्य धर्त्तः **(मृळ)** सुखय **(मह्यम्)** **(जीवातुम्)** जीवनम् **(इच्छ)** **(चोदय)** **(धियम्)** प्रज्ञां धर्म्यं कर्म वा **(अयसः)** हिरण्यस्य। **अय इति हिरण्यनाम।** (निघं०१.२) **(न)** इव **(धाराम्)** प्रगल्भां वाचम् **(यत्)** **(किम्)** **(च)** **(अहम्)** **(त्वायुः)** त्वां कामयमानः **(इदम्)** **(वदामि)** **(तत्)** **(जुषस्व)** सेवस्व **(कृधि)** कुरु **(मा)** माम् **(देववन्तम्)** देवा विद्वांसो विद्यन्ते सम्बन्धे यस्य तम्॥१०॥

अन्वयः-हे इन्द्र! त्वं मा मां मृळ मह्यं जीवातुमिच्छाऽयसो न धियं धारां चोदय। त्वायुरहं यत्किञ्च वदामि तदिदं जुषस्व देववन्तं मां कृधि॥१०॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यथा सर्वे जना हिरण्यादिधनस्येच्छां कुर्वन्ति तथैव त्वं प्रजापालनेच्छां कुरु सर्वाः प्रजा यथा सुशिक्षितां वाचं प्रमामायुर्विद्वत्सङ्गं प्राप्नुयुस्तथा विधेहि॥१०॥

पदार्थः-हे **(इन्द्र)** सब के लिये सुख के धारण करने वाले आप **(मा)** मुझको **(मृळ)** सुखी करिये और **(मह्यम्)** मेरे लिये **(जीवातुम्)** जीवन की **(अच्छ)** इच्छा करिये और **(अयसः)** सुवर्ण के **(न)** समान **(धियम्)** बुद्धि वा धर्म्मयुक्त कर्म्म को और **(धाराम्)** प्रगल्भ वाणी को **(चोदय)** प्रेरणा करिये और **(त्वायुः)** आपकी कामना करता हुआ **(अहम्)** मैं **(यत्)** जो **(किम्)** कुछ **(भी)** **(वदामि)** कहता हूँ **(तत्)** उस **(इदम्)** इसको **(जुषस्व)** सेवन करिये और **(देववन्तम्)** विद्वान् जिसके सम्बन्ध में ऐसा मुझको **(कृधि)** करिये॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जैसे सब जन सुवर्ण आदि धन की इच्छा करते हैं, वैसे ही आप अपनी प्रजा के पालन की इच्छा करिये और सम्पूर्ण प्रजायें जैसे उत्तम प्रकार शिक्षित वाणी, यथार्थ ज्ञान, अवस्था और विद्वानों के सङ्ग को प्राप्त होवें, वैसे करिये॥१०॥

पुनः स राजा किं कुर्यात् प्रजाश्च तं किमर्थमाश्रयेरन्नित्याह॥

फिर वह राजा क्या करे और प्रजायें उसका किसलिये आश्रयण करें, इस विषय को कहते हैं॥

त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्रं॒ हवे॑हवे सु॒हव॒ं शूर॒मिन्द्र॑म्।
ह्वया॑मि श॒क्रं पु॑रुहू॒तमिन्द्र॑ं स्व॒स्ति नो॑ म॒घवा॑ धा॒त्विन्द्रः॑॥ ११॥

त्रा॒तार॑म्। इन्द्र॑म्। अ॒वि॒तार॑म्। इन्द्र॑म्। हवे॑ऽहवे। सु॒ऽहव॑म्। शूर॑म्। इन्द्र॑म्। ह्वया॑मि। श॒क्रम्। पु॒रु॒ऽहू॒तम्। इन्द्र॑म्। स्व॒स्ति। न॒ः। म॒घऽवा॑। धा॒तु॒। इन्द्रः॑॥ ११॥

पदार्थः-(**त्रातारम्**) पालकम् (**इन्द्रम्**) परमैश्वर्यवन्तम् (**अवितारम्**) ज्ञानादिप्रदम् (**इन्द्रम्**) अविद्यादुष्टजनविनाशकम् (**हवेहवे**) स-ामे स-ामे (**सुहवम्**) शोभनो हव आह्वानं स-ामो वा यस्य तम् (**शूरम्**) निर्भयत्वादिगुणोपेतम् (**इन्द्रम्**) सेनाधरम् (**ह्वयामि**) आह्वयामि (**शक्रम्**) शक्तिमन्तम् (**पुरुहूतम्**) बहुभिराहूतम् (**इन्द्रम्**) शुभगुणधरम् (**स्वस्ति**) सुखम् (**नः**) अस्मभ्यम् (**मघवा**) परमपूजितधनयुक्तः (**धातु**) दधातु (**इन्द्रः**) परमैश्वर्यः॥ ११॥

अन्वयः-हे मनुष्या! यो मघवेन्द्रो नः स्वस्ति धातु तं हवेहवे त्रातारमिन्द्रमवितारमिन्द्रं सुहवं शूरमिन्द्रं शक्रं पुरुहूतमिन्द्रं ह्वयामि तथैतं यूयमप्याह्वयत॥ ११॥

भावार्थः-ये मनुष्या यथा सर्वत्र सहायं परमेश्वरमाह्वयन्ति ते तथाभूतं राजानमपि सर्वत्राऽऽश्रयन्तु॥ ११॥

पदार्थः-हे मनुष्यो! जो (**मघवा**) अत्यन्त श्रेष्ठ धन से युक्त (**इन्द्रः**) अत्यन्त ऐश्वर्य्य वाला (**नः**) हम लोगों के लिये (**स्वस्ति**) सुख को (**धातु**) धारण करे उसको (**हवेहवे**) स-ाम स-ाम में (**त्रातारम्**) पालन करने वाले (**इन्द्रम्**) अत्यन्त ऐश्वर्य्य से युक्त (**अवितारम्**) ज्ञानादि के देने और (**इन्द्रम्**) अविद्या से दुष्ट जन के नाश करने वाले (**सुहवम्**) सुन्दर पुकारना वा स-ाम जिसका उस (**शूरम्**) निर्भयत्व आदि गुणों से युक्त (**इन्द्रम्**) श्रेष्ठ गुणों के धारण करने वाले (**शक्रम्**) समर्थ (**पुरुहूतम्**) बहुतों से पुकारे गये (**इन्द्रम्**) सेना के धारण करने वाले को (**ह्वयामि**) पुकारता हूँ, वैसे इसको आप लोग भी पुकारो॥ ११॥

भावार्थः-जो मनुष्य जैसे सर्वत्र सहायक परमेश्वर को पुकारते हैं, वे वैसे ही राजा का भी सर्वत्र आश्रयण करें॥ ११॥

पुनः स कीदृशो भवेत्तस्य रक्षा कैः कार्येत्याह॥

फिर वह कैसा हो और उसकी रक्षा कौन करें, इस विषय को कहते हैं॥

इन्द्र॑ः सु॒त्रामा॒ स्ववाँ॒ अवो॑भिः सुमृ॒ळी॒को भ॑वतु वि॒श्ववे॑दाः।
बाध॑ता॒ द्वेषो॒ अभ॑यं कृणोतु सु॒वीर्य॑स्य॒ पत॑यः स्याम॥ १२॥

इन्द्रः। सुऽत्रामा। स्वऽवान्। अवःऽभिः। सुऽमृळीकः। भवतु। विश्वऽवेदाः। बाधताम्। द्वेषः। अभयम्। कृणोतु। सुऽवीर्यस्य। पतयः। स्याम॥ १२॥

पदार्थः-(**इन्द्रः**) दुष्टताविदारको राजा (**सुत्रामा**) सुष्ठुरक्षकः (**स्ववान्**) बहवः स्वे विद्यन्ते यस्य सः (**अवोभिः**) रक्षणादिभिः (**सुमृळीकः**) सुष्ठु सुखकरः (**भवतु**) (**विश्ववेदाः**) यो विश्वं विज्ञानं वेत्ति (**बाधताम्**) निवारयतु (**द्वेषः**) द्वेषादिदोषयुक्तान् (**अभयम्**) भयराहित्यम् (**कृणोतु**) करोतु (**सुवीर्यस्य**) शोभनं वीर्यं पराक्रमो ब्रह्मचर्यं यस्य तस्य (**पतयः**) पालकाः स्वामिनः (**स्याम**)॥१२॥

अन्वयः-हे मनुष्या! यः सुत्रामा स्ववान् विश्ववेदा इन्द्रोऽवोभिरस्माकं सुमृळीको भवतु द्वेषो बाधतामभयं कृणोतु तस्य सुवीर्यस्य वयं पतयः स्याम तस्य रक्षका यूयमपि भवत॥१२॥

भावार्थः-हे मनुष्या! यो राजाऽखिलविद्यः कृतपूर्णब्रह्मचर्यो बहुमित्रः स्वात्मवच्छ्रेष्ठस्य रक्षको दुष्टस्य दण्डकृत्सर्वतो निर्भयतां करोति तस्य रक्षा सर्वैः सर्वथा कर्त्तव्या॥१२॥

पदार्थः-हे मनुष्यो! जो (**सुत्रामा**) उत्तम प्रकार रक्षा करने वाला (**स्ववान्**) बहुत अपने जन विद्यमान जिसके ऐसा (**विश्ववेदाः**) सम्पूर्ण विज्ञान को जानने वाला (**इन्द्रः**) दुष्टता का नाश करने वाला (**अवोभिः**) रक्षण आदि से हम लोगों का (**सुमृळीकः**) उत्तम प्रकार सुख करने वाला (**भवतु**) हो तथा (**द्वेषः**) आदि दोषों से युक्त जनों का (**बाधताम्**) निवारण करे और (**अभयम्**) निर्भयपन (**कृणोतु**) करे उस (**सुवीर्यस्य**) सुन्दर पराक्रम वा ब्रह्मचर्य्य वाले के हम लोग (**पतयः**) पालन करने वाले स्वामी (**स्याम**) होवें, उसके रक्षक आप लोग भी हूजिये॥१२॥

भावार्थः-हे मनुष्यो! जो राजा सम्पूर्ण विद्या और किये हुए पूर्ण ब्रह्मचर्य्य से युक्त बहुत मित्रों वाला और अपने सदृश श्रेष्ठ का रक्षक, दुष्टों को दण्ड देने वाला, सब प्रकार से निर्भयता करता है, उसकी रक्षा सब को चाहिये कि सब प्रकार से करें॥१२॥

पुना राजप्रजाजनाः कथं वर्त्तेरन्नित्याह॥

फिर राजा और प्रजाजन कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म।

स सु॒त्रामा॒ स्ववाँ॒ इन्द्रो॑ अ॒स्मे आ॒राच्चि॒द् द्वेष॑: सनु॒तर्यु॑योतु॥ १३॥

तस्य॑। व॒यम्। सु॒ऽम॒तौ। य॒ज्ञिय॑स्य। अपि॑। भ॒द्रे। सौ॒म॒न॒से। स्या॒म॒। सः। सु॒ऽत्रामा॑। स्वऽवा॑न्। इन्द्रः॑। अ॒स्मे॒ इति॑। आ॒रात्। चि॒त्। द्वेष॑ः। स॒नु॒तः। यु॒योतु॥ १३॥

पदार्थः-(**तस्य**) प्रतिपादितपूर्वस्य विद्याविनययुक्तस्य राज्ञः (**वयम्**) (**सुमतौ**) शोभनायां प्रज्ञायाम् (**यज्ञियस्य**) विद्वत्सेवासङ्गविद्यादानानि कर्तुमर्हस्य (**अपि**) (**भद्रे**) कल्याणकरे (**सौमनसे**) सुष्ठु धर्मयुक्ते मानसे व्यवहारे (**स्याम**) (**सः**) (**सुत्रामा**) सर्वेषां सम्यक्पालकः (**स्ववान्**) स्वकीयसामर्थ्ययुक्तः (**इन्द्रः**) विद्याप्रदः (**अस्मे**) अस्माकम् (**आरात्**) समीपाद् दूराद्वा (**चित्**) अपि (**द्वेषः**) धर्मद्वेष्टॄन् (**सनुतः**) सदैव (**युयोतु**) पृथक्करोतु॥१३॥

अन्वयः-हे मनुष्या! वयं तस्य यज्ञियस्य सुमतौ सौमनसे भद्रेऽपि निश्चयेन वर्त्तमानाः स्याम। यः स्ववानिन्द्रोऽस्मे सुत्रामा सन्नस्माकमाराद् दूराच्चिद् द्वेषः सनुतर्युयोतु सोऽस्माभिः सदैव सत्कर्त्तव्यः॥१३॥

भावार्थः-हे राजप्रजाजन यस्मिञ्छुद्धे न्याये शुभेषु गुणेषु च राजा वर्त्तेत तथैवात्र वयमपि वर्त्तेमहि, सर्वे मिलित्वा मनुष्येभ्यो दोषान् दूरीकृत्य गुणान् संयोज्य सर्वदा न्यायधर्मपालका भवेम॥१३॥

पदार्थः-हे मनुष्यो! **(वयम्)** हमलोग **(तस्य)** उस पहिले प्रतिपादन किये विद्या और विनय से युक्त राजा के और **(यज्ञियस्य)** विद्वानों की सेवा, सङ्ग और विद्या के दान करने के योग्य की **(सुमतौ)** सुन्दर बुद्धि में **(सौमनसे)** उत्तम धर्म से युक्त मानस व्यवहार में **(भद्रे)** कल्याण करने वाले में **(अपि)** भी निश्चय से वर्त्तमान **(स्याम)** होवें और जो **(स्ववान्)** अपने सामर्थ्य से युक्त **(इन्द्रः)** विद्या देने वाला **(अस्मे)** हम लोगों की **(सुत्रामा)** उत्तम प्रकार पालना करने वाला होता हुआ हम लोगों के **(आरात्)** समीप वा दूर से **(चित्)** भी **(द्वेषः)** धर्म से द्वेष करने वालों को **(सनुतः)** सदा ही **(युयोतु)** पृथक् करे **(सः)** वह हम लोगों से सदा सत्कार करने योग्य है॥१३॥

भावार्थः-हे राजा और प्रजाजनो! जिस शुद्ध, न्याय और श्रेष्ठ गुणों में राजा वर्त्ताव करे, वैसे इस विषय में हम लोग भी वर्त्ताव करें और सब मिलकर मनुष्यों से दोषों को दूर करके गुणों को संयुक्त करके सब काल में न्याय और धर्म्म के पालन करने वाले होवें॥१३॥

पुनस्तं राजानं के गुणा सेवन्त इत्याह॥

फिर उस राजा का कौन गुण सेवन करते हैं, इस विषय को कहते हैं॥

अव॒ त्वे इ॑न्द्र प्र॒वतो॒ नोर्मिर्गिरो॒ ब्रह्मा॑णि नि॒युतो॑ धवन्ते।

उ॒रू न राध॒: सव॑ना पु॒रूण्य॒पो गा व॑ज्रिन् युवसे॒ समिन्दू॑न्॥ १४॥

अव॑। त्वे इति॑। इ॒न्द्र॒। प्र॒ऽवतः॑। न। ऊ॒र्मिः॑। गिरः॑। ब्रह्मा॑णि। नि॒ऽयुतः॑। ध॒व॒न्ते॒। उ॒रु। न। राधः॑। सव॑ना। पु॒रूणि॑। अ॒पः॑। गाः॑। व॒ज्रि॒न्। यु॒व॒से॒। सम्। इन्दू॑न्॥ १४॥

पदार्थः-(**अव**) (**त्वे**) त्वयि (**इन्द्र**) राजन् (**प्रवतः**) नम्रान् (**न**) (**ऊर्मिः**) तरङ्गः (**गिरः**) सुवाचः (**ब्रह्माणि**) धनान्यन्नानि वा (**नियुतः**) निश्चितसत्यवादाः (**धवन्ते**) चालयन्ति (**उरू**) बहु (**न**) इव (**राधः**) धनानि (**सवना**) सवनानि प्रेरणानि (**पुरूणि**) बहूनि (**अपः**) जलानि (**गाः**) भूमीर्वाचो वा (**वज्रिन्**) शस्त्रास्त्रयुक्त (**युवसे**) संयोजयसि (**सम्**) (**इन्दून्**) आह्लादान्॥१४॥

अन्वयः-हे वज्रिन्निन्द्र! यस्त्वे नियुतो गिरो ब्रह्माणि प्रवत ऊर्मिर्नाऽव धवन्ते, उरू राधो न पुरूणि सवनाऽव धवन्ते यतोऽपो गा इन्दूँश्च संयुवसे तस्माद्भवाञ्छ्रेष्ठोऽस्ति॥१४॥

भावार्थः-अत्रोपमालङ्कारः। ये ब्रह्मचर्यादीनि शुभानि कर्माण्याचरन्ति तान्निम्नदेशं जलमिव पुरुषार्थिनं श्रीरिव सर्वा विद्याः सकलमैश्वर्य्यमखिलानन्दश्च प्राप्नुवन्ति॥१४॥

पदार्थः-हे **(वज्रिन्)** शस्त्र और अस्त्रों से युक्त **(इन्द्र)** राजन्! जो **(त्वे)** आप में **(नियुतः)** निश्चित सत्यवाद जिनमें ऐसी **(गिरः)** श्रेष्ठ वाणियाँ **(ब्रह्माणि)** धनों वा अन्नों को और **(प्रवतः)** निम्नों को **(ऊर्मिः)** लहर **(न)** जैसे वैसे **(अव, धवन्ते)** चलाती हैं और **(उरू)** बहुत **(राधः)** धनों को **(न)** जैसे वैसे **(पुरूणि)** बहुत **(सवना)** प्रेरणायें प्राप्त होती हैं और जिस कारण **(अपः)** जलों **(गाः)** भूमि वा वाणियों को और **(इन्दून्)** आनन्दों को **(सम्)** **(युवसे)** संयुक्त करते हो, इससे आप श्रेष्ठ हो॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो ब्रह्मचर्य्य आदि श्रेष्ठ कर्मों को करते हैं, उनको नीचे के स्थान को जल जैसे और पुरुषार्थी को लक्ष्मी जैसे वैसे सम्पूर्ण विद्या, सम्पूर्ण ऐश्वर्य और सम्पूर्ण आनन्द प्राप्त होते हैं॥१४॥

पुनः के कान् पृच्छेयुः समादध्युश्चेत्याह॥

फिर कौन किनसे पूछें और समाधान करें, इस विषय को कहते हैं॥

क ईं॑ स्तव॒त् कः पृ॑णा॒त्को य॑जाते॒ यदु॒ग्रमि॒न्म॒घवा॑ वि॒श्वहावे॑त्।
पादा॑विव प्र॒हर॑न्न॒न्यम॑न्यं कृ॒णोति॒ पूर्व॑मप॒रं शची॑भिः॥ १५॥ ३२॥

कः। ईम्। स्तवत्। कः। पृणात्। कः। यजाते। यत्। उग्रम्। इत्। मघऽवा। विश्वहा। अवेत्। पादौऽइव। प्रऽहरन्। अन्यम्ऽअन्यम्। कृणोति। पूर्वम्। अपरम्। शचीभिः॥ १५॥

पदार्थः-**(कः)** **(ईम्)** प्राप्तव्यं परमात्मानम्। **ईमिति पदनाम।** (निघं०४.२) **(स्तवत्)** स्तूयात् **(कः)** **(पृणात्)** पालयेत् **(कः)** **(यजाते)** **(यत्)** **(उग्रम्)** तेजस्विनम् **(इत्)** एव **(मघवा)** बहुधनः **(विश्वहा)** सर्वाणि दिनानि **(अवेत्)** रक्षेत् **(पादाविव)** चरणाविव **(प्रहरन्)** **(अन्यमन्यम्)** **(कृणोति)** **(पूर्वम्)** प्रथमम् **(अपरम्)** पश्चिमम् **(शचीभिः)** कर्मभिः॥१५॥

अन्वयः-हे विद्वांसोऽत्र क ईं स्तवत्कः सर्वं पृणात् कस्सत्यं यजाते यद्यो मघवा शचीभिर्विश्वहोग्रमिदवेत् पादाविवान्यमन्यं प्रहरन् पूर्वमपरं कृणोति॥१५॥

भावार्थः- अत्रोपमालङ्कारः। हे विद्वांसो! वयं युष्मान् पृच्छामोऽस्मिञ्जगति क ईश्वरं प्रशंसति कः सर्वं न्यायेन पृणाति कश्च विदुषः सत्करोतीत्येतेषां क्रमेणोत्तराणि- यो विद्यायोगधनः स सर्वदा परमेश्वरमेव स्तौति, यो न्यायकारी राजा पक्षपातं विहायाऽपराधिनं दण्डयति धार्मिकं सत्करोति स सर्वरक्षको, यश्च स्वयं विद्वान् गुणदोषज्ञो भवति, स एव विदुषः सत्कर्त्तुमर्हतीत्युत्तराणि॥१५॥

पदार्थः-हे विद्वान् जनो! इस संसार में **(कः)** कौन **(ईम्)** प्राप्त होने योग्य परमात्मा की **(स्तवत्)** स्तुति करे और **(कः)** कौन सबका **(पृणात्)** पालन करे **(कः)** कौन सत्य का **(यजाते)** यजन करे कि **(यत्)** जो **(मघवा)** बहुत धन वाला **(शचीभिः)** कर्म्मों से **(विश्वहा)** सब दिन **(उग्रम्)** तेजस्वी **(इत्)** ही की **(अवेत्)** रक्षा करे तथा **(पादाविव)** चरणों को जैसे वैसे **(अन्यमन्यम्)** दूसरे-दूसरे को **(प्रहरन्)** मारता हुआ **(पूर्वम्)** पहिले वाले को **(अपरम्)** पीछे **(कृणोति)** करता है॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान् जनो! हम लोग आप लोगों से पूछते हैं कि इस संसार में कौन ईश्वर की प्रशंसा करता, कौन सब का न्याय से पालन करता और कौन विद्वानों का सत्कार करता है, इन प्रश्नों का क्रम से उत्तर- जो विद्या के योग से धन से युक्त है, वह सर्वदा परमेश्वर ही की स्तुति करता है और जो न्यायकारी राजा पक्षपात का त्याग कर अपराधी को दण्ड देता और धार्मिक का सत्कार करता है वह सर्वरक्षक है और जो स्वयं विद्वान् गुण और दोषों का जानने वाला है, वही विद्वानों का सत्कार करने योग्य है, ये उत्तर हैं॥१५॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा होवे, इस विषय को कहते हैं॥

शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्॥१६॥

शृण्वे। वीरः। उग्रम्ऽउग्रम्। दमऽयन्। अन्यम्ऽअन्यम्। अतिऽनेनीयमानः। एधमानऽद्विट्। उभयस्य। राजा। चोष्कूयते। विशः। इन्द्रः। मनुष्यान्॥१६॥

पदार्थः-(**शृण्वे**) (**वीरः**) शौर्यादिगुणोपेतः (**उग्रमुग्रम्**) तेजस्विनं तेजस्विनम् (**दमायन्**) दमनं कुर्वन् (**अन्यमन्यम्**) भिन्नं भिन्नम् (**अतिनेनीयमानः**) भृशं न्यायव्यवस्थां प्रापयन् (**एधमानद्विट्**) यो वर्धमानान् वर्धमानान् द्वेष्टि सः (**उभयस्य**) राजप्रजाजनसमुदायस्य (**राजा**) न्यायविनयाभ्यां प्रकाशमानः (**चोष्कूयते**) भृशमाह्वयति (**विशः**) प्रजाः (**इन्द्रः**) विद्याविनयधरः (**मनुष्यान्**)॥१६॥

अन्वयः-हे अमात्या! यो वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमान एधमानद्विळुभयस्य राजेन्द्रो विशो मनुष्याञ्चोष्कूयते तमहं न्यायेशं शृण्वे॥१६॥

भावार्थः-हे मनुष्या! यो मनुष्यो दुष्टान्दुष्टाँस्ताडयञ्छ्रेष्ठान् सत्कुर्वन्नन्यस्य वृद्धिं दृष्ट्वा द्वेष्टॄन् दञ्डयन् प्रसन्नांश्च सत्कुर्वन् सर्वेषां वादिप्रतिवादिनां वचांसि यथावच्छ्रुत्वा सत्यं न्यायं करोति स एव राजा भवितुमर्हति॥१६॥

पदार्थः-हे मन्त्री जनो! जो (**वीरः**) शूरता आदि गुणों से युक्त जन (**उग्रमुग्रम्**) तेजस्वी तेजस्वी जन को (**दमायन्**) इन्द्रियों का निग्रह कराता हुआ और (**अन्यमन्यम्**) दूसरे दूसरे को (**अतिनेनीयमानः**) अत्यन्त न्याय की व्यवस्था को प्राप्त कराता हुआ (**एधमानद्विट्**) वृद्धि को प्राप्त होते हुओं से द्वेष करने वाला और (**उभयस्य**) राजा तथा प्रजाजन समुदाय का (**राजा**) न्याय और विनय से प्रकाशमान राजा (**इन्द्रः**) विद्या और विनय को धारण करने वाला (**विशः, मनुष्यान्**) प्रजाजनों को (**चोष्कूयते**) निरन्तर पुकारता है, उसको मैं न्यायेश (**शृण्वे**) सुनता हूँ॥१६॥

भावार्थः-हे मनुष्यो! जो मनुष्य दुष्टों-दुष्टों को ताड़न करता, श्रेष्ठों-श्रेष्ठों का सत्कार करता, अन्य की वृद्धि देख कर द्वेष करने वालों को दण्ड देता और प्रसन्नों का सत्कार करता हुआ सम्पूर्ण वादी और प्रतिवादी के वचनों को यथावत् सुन के सत्य न्याय को करता है, वही राजा होने के योग्य है॥१६॥

पुनः स राजा किमकृत्वा किं कुर्य्यादित्याह॥

फिर वह राजा क्या नहीं करके क्या करे, इस विषय को कहते हैं॥

परा॒ पूर्वे॑षां स॒ख्या वृ॑णक्ति॒ वि॒तर्तु॑राणो॒ अप॑रेभिरेति।

अना॑नुभूतीरवधून्वा॒नः पू॒र्वीरिन्द्रः॑ श॒रद॑स्तर्तरीति॥ १७॥

परा॑। पूर्वे॑षाम्। स॒ख्या। वृ॒ण॒क्ति॒। वि॒ऽत॒र्तु॒रा॒णः॒। अप॑रेभिः। ए॒ति॒। अना॑नुऽभूतीः। अ॒व॒ऽध॒न्वा॒नः॒। पू॒र्वीः। इन्द्रः॑। श॒रद॑ः। त॒र्त॒री॒ति॒॥ १७॥

पदार्थः-(**परा**) (**पूर्वेषाम्**) (**सख्या**) मित्रेण (**वृणक्ति**) त्यजति (**वितर्त्तुराणः**) विशेषेण भृशं हिंसन् (**अपरेभिः**) अन्यैः (**एति**) गच्छति (**अनानुभूतीः**) अनुभवरहितान्। अत्र**अन्येषामपी**ति दीर्घः। (**अवधून्वानः**) अर्वाक्कम्पयन् (**पूर्वीः**) प्राचीनाः (**इन्द्रः**) सूर्य्य इव राजा (**शरदः**) शरदाद्यृतून् (**तर्तरीति**) भृशं तरति॥१७॥

अन्वयः-यः सूर्य्य इवेन्द्रः पूर्वेषां सख्या वितर्तुराणोऽनानुभूतीरवधून्वानः परावृणक्त्यपरेभिस्सहैति सः सूर्य्यः पूर्वीः शरद इव संवत्सराँस्तर्तरीति॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा वृद्धानां सखित्वं हित्वा नीचान् सखीनाप्नोति स श्रेयसश्च्युतो भवति यश्चानभिज्ञान् सखीन् विहायाऽभिज्ञान् सुहृदः करोति स एव पूर्णमायुः सुखेन तरति॥१७॥

पदार्थः-जो सूर्य्य के सदृश (**इन्द्रः**) राजा (**पूर्वेषाम्**) पूर्वजनों के (**सख्या**) मित्र से (**वितर्त्तुराणः**) विशेष करके अत्यन्त हिंसा करता और (**अनानुभूतीः**) अनुभव से रहित जनों को (**अवधून्वानः**) नीचे को कम्पाता हुआ (**परा, वृणक्ति**) त्यागता है और (**अपरेभिः**) अन्यों के साथ (**एति**) जाता है वह जैसे सूर्य्य (**पूर्वीः**) प्राचीन (**शरदः**) शरद् आदि ऋतुओं को, वैसे वर्षों के (**तर्तरीति**) अत्यन्त पार होता है॥१७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा वृद्ध जनों के मित्रपन का त्याग करके नीच मित्रों को प्राप्त होता है, वह कल्याण से च्युत होता है और जो अनभिज्ञ मित्रों का त्याग करके अभिज्ञों को मित्र करता है, वही पूर्ण आयु भर सुख से पार होता है॥१७॥

पुनरयं जीवात्मा कीदृशो भवतीत्याह॥

फिर यह जीवात्मा कैसा होता है, इस विषय को कहते हैं॥

रू॒पंरू॑पं॒ प्रति॑रूपो बभूव॒ तद॑स्य रू॒पं प्र॑ति॒चक्ष॑णाय।

इन्द्रो॑ मा॒याभि॑: पुरु॒रूप॑ ईयते यु॒क्ता ह्य॑स्य॒ हर॑यः श॒ता दश॑॥ १८॥

रूपम्ऽरूपम्। प्रतिऽरूपः। बभूव। तत्। अस्य। रूपम्। प्रतिऽचक्षणाय। इन्द्रः। मायाभिः। पुरुऽरूपः। ईयते। युक्ताः। हि। अस्य। हरयः। शता। दश॥ १८॥

पदार्थः-(**रूपंरूपम्**) (**प्रतिरूपः**) तदाकारवर्तमानः (**बभूव**) भवति (**तत्**) (**अस्य**) जीवात्मनः (**रूपम्**) (**प्रतिचक्षणाय**) प्रत्यक्षकथनाय (**इन्द्रः**) जीवः (**मायाभिः**) प्रज्ञाभिः (**पुरुरूपः**) बहुशरीरधारणेन विविधरूपः (**ईयते**) (**युक्ताः**) (**हि**) खलु (**अस्य**) देहिनः (**हरयः**) अश्वा इवेन्द्रियाण्यन्तःकरणप्राणाः (**शता**) शतानि (**दश**)॥१८॥

अन्वयः-हे मनुष्या! य इन्द्रो मायाभिः प्रतिचक्षणाय रूपंरूपं प्रतिरूपो बभूव पुरुरूप ईयते तदस्य रूपमस्ति, यस्याऽस्य हि दश शता हरयो युक्ताः शरीरं वहन्ति तदस्य सामर्थ्यं वर्त्तते॥१८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्युत्पदार्थं पदार्थं प्रति तद्रूपा भवति तथैव जीवः शरीरं प्रति तत्स्वभावो जायते यदा बाह्यं विषयं द्रष्टुमिच्छति तदा तद्दृष्ट्वा तदाकारं ज्ञानमस्य जायते या अस्य शरीरे विद्युत्सहिता असङ्ख्या नाड्यः सन्ति ताभिरयं सर्वस्य शरीरस्य समाचारं जानाति॥१८॥

पदार्थः-हे मनुष्यो! जो (**इन्द्रः**) जीव (**मायाभिः**) बुद्धियों से (**प्रतिक्षणाय**) प्रत्यक्ष कथन के लिये (**रूपंरूपम्**) रूप-रूप के (**प्रतिरूपः**) प्रतिरूप अर्थात् उसके स्वरूप से वर्त्तमान (**बभूव**) होता है और (**पुरुरूपः**) बहुत शरीर धारण करने से अनेक प्रकार का (**ईयते**) पाया जाता है (**तत्**) वह (**अस्य**) इस शरीर का (**रूपम्**) रूप है और जिस (**अस्य**) इस जीवात्मा के (**हि**) निश्चय करके (**दश**) दश सङ्ख्या से विशिष्ट और (**शता**) सौ सङ्ख्या से विशिष्ट (**हरयः**) घोड़ों के समान इन्द्रिय अन्तःकरण और प्राण (**युक्ताः**) युक्त हुए शरीर को धारण करते हैं, वह इसका सामर्थ्य है॥१८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! बिजुली पदार्थ के प्रति तद्रूप होती है, वैसे ही जीव शरीर-शरीर के प्रति तत्स्वभाव वाला होता है और जब बाह्य विषय के देखने की इच्छा करता है, तब उसको देख के तत्स्वरूपज्ञान इस जीव को होता है और जो जीव के शरीर में बिजुली के सहित असङ्ख्य नाड़ी हैं, उन नाड़ियों से यह सब शरीर के समाचार को जानता है॥१८॥

पुनः स जीवोऽत्र देहे कथं वर्त्तेतित्याह॥

फिर वह जीव इस देह में कैसा वर्त्ताव करे, इस विषय को कहते हैं॥

युजानो हरिता रथे भूरि त्वष्टेह राजति।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु॥ १९॥

युजानः। हरिता। रथे। भूरि। त्वष्टा। इह। राजति। कः। विश्वाहा। द्विषतः। पक्षः। आसते। उत। आसीनेषु। सूरिषु॥ १९॥

पदार्थः-(**युजानः**) समादधानः (**हरिता**) हरणशीलावश्वौ (**रथे**) रमणीये यान इव शरीरे (**भूरि**) बहु (**त्वष्टा**) तनूकर्त्ता जीवः (**इह**) अस्मिञ्छरीरे (**राजति**) प्रकाशते (**कः**) (**विश्वाहा**) सर्वाण्यहानि

(द्विषतः) द्वेषयुक्तस्य **(पक्षः)** परिग्रहः **(आसते)** आस्ते। अत्र **बहुलं छन्दसी**त्येकवचनस्य बहुवचनम्। **(उत) (आसीनेषु)** स्थितेषु **(सूरिषु)** विद्वत्सु॥१९॥

अन्वयः-यथा कश्चिच्छारथी रथे हरिता युजानो भूरि राजति तता त्वष्टेह शरीरे राजति क इह विश्वाहा द्विषतः पक्ष आसते, उताप्यासीनेषु सूरिषु मूर्खाश्रयं कः करोति॥१९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! सदैव मूर्खाणां पक्षं विहाय विद्वत्पक्षे वर्त्तन्ताम्। यथा सुसारथिरश्वान् सन्नियम्य रथे योजयित्वा सुखेन गमनादिकार्य्यं साध्नोति तथा जितेन्द्रियो जीवः सर्वाणि स्वप्रयोजनानि साद्धुं शक्नोति यथा कश्चिद्दुष्टसारथिरश्वयुक्ते रथे स्थित्वा दुःखी भवति तथैवाऽजितेन्द्रियशरीरे स्थित्वा जीवो दुःखी जायते॥१९॥

पदार्थः-जैसे (**कः**) कोई भी सारथी **(रथे)** सुन्दर वाहन के सदृश शरीर में **(हरिता)** ले चलने वाले घोड़ों को **(युजानः)** जोड़ता हुआ **(भूरि)** बहुत **(राजति)** प्रकाशित होता है, वैसे **(त्वष्टा)** सूक्ष्म करने वाला जीव **(इह)** इस शरीर में **(राजति)** प्रकाशित होता है और **(कः)** कौन **(इह)** इस शरीर में **(विश्वाहा)** सब दिन **(द्विषतः)** द्वेष से युक्त का **(पक्षः)** ग्रहण करता **(आसते)** है और **(उत)** भी **(आसीनेषु)** स्थित **(सूरिषु)** विद्वानों में मूर्ख का आश्रय कौन करता है॥१९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! सदा ही मूर्खों का पक्ष त्याग के विद्वानों के पक्ष में वर्त्ताव करिये और जैसे अच्छा सारथी घोड़ों को अच्छे प्रकार [वश में करके] रथ में जोड़ कर सुख से गमन आदि कार्यों को सिद्ध करता है, वैसे जितेन्द्रिय जीव सम्पूर्ण अपने प्रयोजनों को सिद्ध कर सकता है और जैसे कोई दुष्ट सारथी घोड़ों से युक्त रथ में स्थित होकर दुःखी होता है, वैसे ही अजित इन्द्रियाँ जिसमें ऐसे शरीर में स्थित होकर जीव दुःखी होता है॥१९॥

पुनर्मनुष्याः कथमारोग्यं प्राप्नुयुरित्याह॥

फिर मनुष्य कैसे आरोग्य को प्राप्त होवें, इस विषय को कहते हैं॥

अ॒ग॒व्यू॒ति क्षेत्र॒मा ग॑न्म देवा उ॒र्वी स॒ती भूमि॑रंहू॒र॒णाभू॑त्।
बृह॑स्पते॒ प्र चि॑कित्सा॒ गवि॑ष्टावि॒त्था स॒ते ज॑रि॒त्र इ॑न्द्र॒ पन्था॑म्॥ २०॥ ३३॥

अ॒ग॒व्यू॒ति। क्षेत्र॑म्। आ। अ॒ग॒न्म॒। दे॒वाः॒। उ॒र्वी। स॒ती। भूमिः॑। अं॒हू॒र॒णा। अ॒भू॒त्। बृह॑स्पते। प्र। चि॒कि॒त्स॒। गोऽइ॑ष्टौ। इ॒त्था। स॒ते। ज॒रि॒त्रे। इ॒न्द्र॒। पन्था॑म्॥ २०॥

पदार्थः-(**अगव्यूति**) क्रोशद्वयपरिमाणरहितम् **(क्षेत्रम्)** क्षियन्ति निवसन्ति तं देशम् **(आ) (अगन्म)** समन्तात् प्राप्नुयाम **(देवाः)** विद्वांसः **(उर्वी)** बहुफलाद्युपेता **(सती)** वर्त्तमाना **(भूमिः)** पृथिवी **(अंहूरणा)** येंऽहयन्ति तेंऽहवो गन्तारस्तेषां रणः स-ामो यस्यां सा **(अभूत्)** भवति **(बृहस्पते)** बृहतां पालक **(प्र) (चिकित्सा)** यश्चिकित्सति रोगपरीक्षां करोति तत्संबुद्धौ। अत्र **संहितायामि**ति दीर्घः। **(गविष्टौ)** गौः सुशिक्षिताया वाचः सङ्गतौ **(इत्था)** अनेन प्रकोरणऽस्माद्धेतोर्वा **(सते) (जरित्रे)** स्तावकाय **(इन्द्र)** रोगदोषनिवारक **(पन्थाम्)** पन्थानम्॥२०॥

अन्वयः-हे बृहस्पते चिकित्सेन्द्र वैद्यराजंस्त्वत्सहायेन या उर्वी सत्यूंहरणा भूमिरभूद्यत्राऽगव्यूति क्षेत्रमभूतां देवा वयमागन्मेत्था गविष्टौ सते जरित्रे पन्थां प्रागन्म॥ २०॥

भावार्थः-हे मनुष्या! ये सद्वैद्याः स्युस्तन्मित्रतयारोगा दीर्घायुषो बलिष्ठा विद्वांसो भूत्वा भूमिराज्यं प्राप्य यत्र कुत्र विमानादियानैर्गत्वाऽऽगत्य विद्वन्मार्गमाश्रयन्तु॥ २०॥

पदार्थः-हे **(बृहस्पते)** बड़ों के पालन करने **(चिकित्सा)** रोगों की परीक्षा करने और **(इन्द्र)** रोग और दोषों के दूर करने वाले वैद्यराज! आपके सहाय से **(उर्वी)** बहुत फल आदि से युक्त **(सती)** वर्त्तमान **(अंहूरणा)** चलने वालों का स-ाम जिसमें वह **(भूमिः)** पृथिवी **(अभूत्)** होती है और जहाँ **(अगव्यूति)** दो कोश के परिमाण से रहित **(क्षेत्रम्)** निवास करते हैं जिस स्थान में ऐसा स्थान होता है उसको **(देवाः)** विद्वान् हम लोग **(आ, अगन्म)** सब प्रकार से प्राप्त होवें **(इत्था)** इस प्रकार से वा इस हेतु से **(गविष्टौ)** उत्तम प्रकार शिक्षितवाणी की सङ्गति में **(सते)** वर्त्तमान **(जरित्रे)** स्तुति करने वाले के लिये **(पन्थाम्)** मार्ग को **(प्र)** अच्छे प्रकार प्राप्त होवें॥ २०॥

भावार्थः-हे मनुष्यो! जो श्रेष्ठ वैद्य होवें उनके साथ मित्रता से रोग रहित, अधिक अवस्था वाले, बलिष्ठ, विद्वान् हो और भूमि के राज्य को प्राप्त होकर जहाँ कहीं विमान आदि वाहनों से जा-आ कर विद्वानों के मार्ग का आश्रयण करो॥ २०॥

पुनस्तौ राजप्रजाजनौ कथं वर्त्तेयातामित्याह॥

फिर वे राजा और प्रजाजन कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः।
अहन् दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शंबरं च॥ २१॥

दिवेऽदिवे। सऽदृशीः। अन्यम्। अर्धम्। कृष्णाः। असेधत्। अप। सद्मनः। जाः। अहन्। दासा। वृषभः। वस्नऽयन्ता। उदऽव्रजे। वर्चिनम्। शंबरम्। च॥ २१॥

पदार्थः-(**दिवेदिवे**) प्रतिदिनम् **(सदृशीः)** समानस्वरूपाः **(अन्यम्)** **(अर्द्धम्)** अर्द्धकम् **(कृष्णाः)** निकृष्टवर्णाः कर्षिता वा **(असेधत्)** सेधते **(अप)** **(सद्मनः)** सीदन्ति यस्मिँस्तस्य **(जाः)** जायमानः सूर्यः **(अहन्)** हन्ति **(दासा)** दासावुपक्षयितारौ **(वृषभः)** वृष्टिकरः **(वस्नयन्ता)** वस्नमिवाचरन्तौ राजप्रजाजनौ **(उदव्रजे)** उदकानि व्रजन्ति यस्मिँस्तस्मिन् **(वर्चिनम्)** देदीप्यमानम् **(शम्बरम्)** मेघम् **(च)**॥ २१॥

अन्वयः-हे मनुष्या! यथा जाः सूर्यो दिवेदिवे सदृशीः कृष्णा अन्यमर्धं चाऽसेधत् सद्मनोऽन्धकारमपासेधद् वृषभ उदव्रजे वर्चिनं शम्बरमहँस्तथा वस्नयन्ता दासा वर्त्तेयाताम्॥ २१॥

भावार्थः-हे मनुष्या! यथा सूर्यमेघौ सर्वां पृथिवीमाकृष्य प्रकाशजलयुक्तां कुरुतः। यथा सूर्योऽस्या अर्धं भाग प्रकाशयति वृष्टिं च करोत्यन्धकारं निवार्य्य सर्वान् सुखयति तथैव राजप्रजाजनौ सत्यमाकृष्याऽसत्यं त्यक्त्वाऽन्यायं निवार्य्य न्यायं प्रचार्य्य सद्विद्योपदेशवृष्टिं विधाय सर्वान् मनुष्यान् सुखयेताम्॥ २१॥

पदार्थः-हे मनुष्यो! जैसे **(जाः)** प्रकट हुआ सूर्य्य **(दिवेदिवे)** प्रतिदिन **(सदृशीः)** तुल्यस्वरूपयुक्त **(कृष्णाः)** खराब वर्ण वाली वा खोदी गई पृथिवियों और **(अन्यम्)** अन्य **(अर्द्धम्)** आधे को **(च)** भी **(असेधत्)** अलग करता है और **(सद्मनः)** निवास करते हैं जिसमें उस गृह के अन्धकार को **(अप)** अलग करता है तथा **(वृषभः)** वृष्टि करने वाला **(उदव्रजे)** जल जाते हैं जिसमें उसमें **(वर्चिनम्)** प्रकाशमान **(शम्बरम्)** मेघ का **(अहन्)** नाश करता है, वैसे **(वस्नयन्ता)** निवास करते हुए के समान आचरण करते हुए राजा और प्रजाजन **(दासा)** उपेक्षा करने वाले हुए वर्त्ताव करें॥ २१॥

भावार्थः-हे मनुष्यो! जैसे सूर्य और मेघ समस्त पृथिवी का आकर्षण कर प्रकाश और जलयुक्त करते हैं वा जैसे सूर्य इस पृथिवी के अर्द्धभाग को प्रकाशित करता और वर्षा को करता है तथा अन्धकार का निवारण कर सबको सुखी करता है, वैसे ही राजा और प्रजाजन सत्य को खैंच असत्य को त्याग कर अन्याय का निवारण कर न्याय का प्रचार कर और उत्तम विद्या के उपदेशों की वृष्टि कर सब मनुष्यों को सुखी करें॥ २१॥

पुनस्तौ राजप्रजाजनौ परस्परं कथं वर्तेयातामित्याह॥

फिर वे राजा और प्रजाजन परस्पर कैसा वर्त्ताव करें, इस विषय को कहते हैं॥

प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात्।
दिवोदासादतिथिग्वस्य राधः शांबरं वसु प्रत्यग्रभीष्म॥ २२॥

प्रऽस्तोकः। इत्। नु। राधसः। ते। इन्द्र। दश। कोशयीः। दश। वाजिनः। अदात्। दिवःऽदासात्। अतिथिऽग्वस्य। राधः। शांबरम्। वसु। प्रति। अग्रभीष्म॥ २२॥

पदार्थः-(**प्रस्तोकः**) यः प्रस्तौति **(इत्)** एव **(नु)** सद्यः **(राधसः)** धनस्य **(ते)** तव **(इन्द्र)** सूर्य इव परमैश्वर्ययुक्त **(दश)** **(कोशयीः)** याः कोशान् यान्ति ता भूमीः **(दश)** एतत्संख्याकाः **(वाजिनः)** बह्वन्नयुक्तस्य **(अदात्)** ददाति **(दिवोदासात्)** प्रकाशदातुः **(अतिथिग्वस्य)** योऽतिथीनागच्छति तस्य **(राधः)** **(शाम्बरम्)** शंबरे मेघे भवम् **(वसु)** जलाख्यं द्रव्यम् **(प्रति)** **(अग्रभीष्म)** गृह्णीयाम॥ २२॥

अन्वयः-हे इन्द्र! यस्ते वाजिनो राधसो दश कोशयीः प्रस्तोकोऽदात्। दशगुणं सम्पादयति यदतिथिग्वस्य दिवोदासात् प्राप्तं राधः शाम्बरं वसु च वयं प्रत्यग्रभीष्म तदिन्नु भवानस्मभ्यं प्रयच्छतु तदिन्नु वयं तुभ्यं दद्याम॥ २२॥

भावार्थः-हे राजन्! यस्ते राष्ट्रेऽसङ्ख्यधनप्रदो वृष्टिकरोऽतिथिसङ्गसेवनो जनो भवेत्तस्य रक्षां त्वं विधेहि। यदस्मान् धनं प्राप्नुयात्तत्तुभ्यं वयं दद्याम यत्त्वामीयात्तदस्मभ्यं देहि॥ २॥

पदार्थः-हे **(इन्द्र)** सूर्य्य के सदृश अत्यन्त ऐश्वर्य्य से युक्त! जो **(ते)** आपके **(वाजिनः)** बहुत अन्नों से युक्त **(राधसः)** धन की **(दश)** दश **(कोशयीः)** कोशों खजानों को प्राप्त होने वाली भूमियों की **(प्रस्तोकः)** स्तुति करने वाला **(अदात्)** देता है और **(दश)** दशगुनी सम्पादित करता और जिस **(अतिथिग्वस्य)** अतिथियों को प्राप्त होने वाले के **(दिवोदासात्)** प्रकाश देने वाले से प्राप्त हुए **(राधः)** धन को **(शाम्बरम्)** और मेघ में हुए **(वसु)** जल नामक द्रव्य को हम लोग **(प्रति, अग्रभीष्म)** ग्रहण करें उसको **(इत्)** ही **(नु)** शीघ्र आप हम लोगों के लिये दीजिये, उसको ही शीघ्र हम लोग आपके लिये देवें॥२२॥

भावार्थः-हे राजन्! जो आपके राज्य में असङ्ख्य धनों को देने, वृष्टि करने तथा अतिथियों के सङ्ग का सेवन करने वाला जन होवे, उसकी रक्षा को आप करिये और जो हम लोगों को धन प्राप्त होवे, उसको आपके लिये हम लोग देवें और जो आपको प्राप्त होवे उसको हम लोगों के लिये दीजिये॥२२॥

पुनरमात्या राज्ञः किं प्राप्नुयुरित्याह॥

फिर मन्त्रीजन राजा से क्या प्राप्त होवें, इस विषय को कहते हैं॥

दशाश्वान् दश कोशान् दश वस्त्राधिभोजना।
दशो हिरण्यपिण्डान् दिवोदासादसानिषम्॥२३॥

दश। अश्वान्। दश। कोशान्। दश। वस्त्रा। अधिऽभोजना। दशो इति। हिरण्यऽपिण्डान्। दिवःऽदासात्। असानिषम्॥२३॥

पदार्थः-**(दश)** एतत्सङ्ख्याकान् **(अश्वान्)** तुरङ्गादीन् **(दश)** **(कोशान्)** दशगुणधनपूर्णान् **(दश)** दशगुणानि **(वस्त्रा)** वस्त्राणि **(अधिभोजना)** अधिकानि भोजनानि **(दशो)** **(हिरण्यपिण्डान्)** सुवर्णादिसमूहान् **(दिवोदासात्)** कमनीयधनदातुः **(असानिषम्)** सम्भज्य प्राप्नुयाम्॥२३॥

अन्वयः-हे इन्द्र राजन्! दिवोदासात्त्वद्दशाऽश्वान् दश कोशान् दश वस्त्रा दशाऽधिभोजना दशो हिरण्यपिण्डांश्चाऽहमसानिषं प्राप्नुयाम्॥२३॥

भावार्थः-ये धार्मिकाः शूरवीराः शत्रूणां विजेतारो राजभक्ताः प्रजापालनतत्परा विद्वांसोऽमात्याः स्युस्तेऽश्वादीन् सर्वान् पदार्थान् दशगुणान् राजसकाशात् प्राप्नुयुरिति॥२३॥

पदार्थः-हे ऐश्वर्य्य से युक्त राजन्! **(दिवोदासात्)** सुन्दर धन के देने वाले आप से **(दश)** दश सङ्ख्या से युक्त **(अश्वान्)** घोड़ों और **(दश)** दश सङ्ख्या से युक्त **(कोशान्)** दशगुने धन से पूर्ण खजानों और **(दश)** दश प्रकार के **(वस्त्रा)** वस्त्रों को और दश प्रकार के **(अधिभोजना)** अधिक भोजनों को और **(दशो)** दश प्रकार के **(हिरण्यपिण्डान्)** सुवर्ण आदि समूहों को मैं **(असानिषम्)** संविभाग करके प्राप्त होऊँ॥२३॥

भावार्थः-जो धार्मिक, शूरवीर और शत्रुओं के जीतने वाले, राजभक्त और प्रजा के पालन में तत्पर विद्वान् मन्त्रीजन होवें, वे घोड़े आदि सम्पूर्ण पदार्थों को दशगुने राजा के समीप से प्राप्त होवें॥२३॥

पुनः स राजाऽधिकारं कस्मै दद्यादित्याह॥

फिर वह राजा अधिकार किसके लिये देवे, इस विषय को कहते हैं॥

दश॒ रथा॒न् प्रष्टि॑मतः श॒तं गा अथ॑र्वभ्यः। अ॒श्व॒थः पा॒यवे॑ऽदात्॥२४॥

दश॑। रथा॑न्। प्रष्टि॑ऽमतः। श॒तम्। गाः। अथ॑र्वऽभ्यः। अ॒श्व॒थः। पा॒यवे॑। अ॒दा॒त्॥२४॥

पदार्थः-(**दश**) (**रथान्**) (**प्रष्टिमतः**) प्रष्टयोऽनीप्सा विद्यन्ते येषु तान् (**शतम्**) (**गाः**) धेनूः (**अथर्वभ्यः**) अहिंसकेभ्यः (**अश्वथः**) योऽश्नुते सः (**पायवे**) पालनाय (**अदात्**) दद्यात्॥२४॥

अन्वयः-हे राजन् गृहस्थ वा! यथाऽश्वथो मेधावी पायवेऽथर्वभ्यः प्रष्टिमतो दश रथाञ्छतं गा अदात्तथा त्वमपि देहि॥२४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजादयो जनाः पालनार्हाय पशुरथादिरक्षणाऽधिकारं ददति ते सुसामग्रीयुक्ता भवन्ति॥२४॥

पदार्थः-हे राजन् वा गृहस्थ लोगो! जैसे (**अश्वथः**) भोजन करने वाला बुद्धिमान् जन (**पायवे**) पालन के लिये (**अथर्वभ्यः**) नहीं हिंसा करने वालों को (**प्रष्टिमतः**) नहीं इच्छा विद्यमान जिनमें उन (**दश**) सङ्ख्या से विशिष्ट (**रथान्**) वाहनों को और (**शतम्**) सौ (**गाः**) गौओं को (**अदात्**) देवे, वैसे आप भी दीजिये॥२४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा आदि जन पालन करने योग्य के लिये पशु रथ आदि के रक्षण के अधिकार को देते हैं, वे अच्छी सामग्री से युक्त होते हैं॥२४॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

महि॒ राधो॑ विश्वज॒न्यं॑ दधा॒नान् भ॒रद्वा॑जान्त्सार्ञ्जयो अ॒भ्य॑यष्ट॥२५॥३४॥

महि॑। राधः॑। विश्व॑ऽजन्यम्। दधा॑नान्। भ॒रत्ऽवा॑जान्। सा॒र्ञ्ज॒यः॒। अ॒भि। अ॒य॒ष्ट॒॥२५॥

पदार्थः-(**महि**) महत् (**राधः**) धनम् (**विश्वजन्यम्**) विश्वाञ्जनयितुं योग्यं विश्वसुखजनकं वा (**दधानान्**) धारकान् (**भरद्वाजान्**) ये वाजानन्नादीन् भरन्ति तान् (**सार्ञ्जयः**) यो विविधान्न्याययुक्तान् व्यवहारान् सृजति तस्यापत्यम् (**अभि**) आभिमुख्ये (**अयष्ट**) अभिसङ्गच्छेत॥२५॥

अन्वयः-य सार्ञ्जयो महि विश्वजन्यं राधो दधानान् भरद्वाजानभ्यष्ट स राजा सम्राट् स्यात्॥२५॥

भावार्थः-यो ब्रह्मचर्य्येण शरीरात्मानौ बलिष्ठौ कृत्वा सकलैश्वर्य्यमुन्नीयोत्तमान् पुरुषान् सङ्गृह्णाति स एव राजा राज्यमुन्नेतुमर्हेत्॥२५॥

पदार्थः-जो **(सार्ञ्जयः)** अनेक प्रकार के न्याययुक्त व्यवहारों को बनाने वाले का सन्तान **(महि)** बड़े **(विश्वजन्यम्)** संसार से वा सम्पूर्ण से उत्पन्न होने योग्य वा सम्पूर्ण सुख को उत्पन्न करने वाले **(राधः)** धन को **(दधानान्)** धारण करने वाले **(भरद्वाजान्)** अन्न आदि के धारणकर्त्ताओं के **(अभि, अयष्ट)** सन्मुख जावे, मेघावी वह राजा चक्रवर्ती होवे॥ २५॥

भावार्थः-जो ब्रह्मचर्य्य से शरीर और आत्मा को बलिष्ठ कर और सम्पूर्ण ऐश्वर्य्य को बढ़ाय के उत्तम पुरुषों को ग्रहण करता है, वही राजा राज्य के बढ़ाने के योग्य होवे॥ २५॥

पुनः स राजा कीदृशान् सुहृद इच्छेदित्याह॥

फिर वह राजा कैसे मित्रों की इच्छा करे, इस विषय को कहते हैं॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि॥ २६॥

वनस्पते। वीळुऽअङ्गः। हि। भूयाः। अस्मत्ऽसखा। प्रऽतरणः। सुऽवीरः। गोभिः। सम्ऽनद्धः। असि। वीळयस्व। आऽस्थाता। ते। जयतु। जेत्वानि॥ २६॥

पदार्थः-(**वनस्पते**) वनानां किरणानां पालकः सूर्य इव **(वीड्वङ्गः)** वीळूनि बलिष्ठान्यङ्गानि यस्य सः **(हि)** यतः **(भूयाः)** **(अस्मत्सखा)** अस्माकं मित्रम् **(प्रतरणः)** प्रतारकः **(सुवीरः)** सुष्ठु वीरयुक्तः **(गोभिः)** सुशिक्षिताभिर्वाग्भिः **(सन्नद्धः)** सम्यक् सन्नः **(असि)** **(वीळयस्व)** दृढान् कारय **(आस्थाता)** आस्थायुक्तः **(ते)** तव **(जयतु)** **(जेत्वानि)** जेतुं योग्यानि शत्रुसैन्यानि॥ २६॥

अन्वयः-हे वनस्पते! हि यतो वीड्वङ्गः प्रतरणः सुवीरो गोभिस्सह सन्नद्धस्त्वमसि तस्मादस्मत्सखा भूयाः। आस्थाता सन्नस्मान् वीळयस्व ते सेना जेत्वानि जयतु॥ २६॥

भावार्थः-मनुष्यैर्धार्मिकेन बलवता मित्रता कार्या येन सर्वदा विजयः स्यात्॥ २६॥

पदार्थः-हे **(वनस्पते)** किरणों के पालन करने वाले सूर्य्य के समान वर्त्तमान **(हि)** जिससे **(वीड्वङ्गः)** बलिष्ठ अङ्ग जिसके वह **(प्रतरणः)** पार करने वाले **(सुवीरः)** अच्छे प्रकार वीरों से युक्त **(गोभिः)** उत्तम प्रकार शिक्षित वाणियों के साथ **(सन्नद्धः)** अच्छे प्रकार तैयार हुए आप **(असि)** हो इससे **(अस्मत्सखा)** हम लोगों के मित्र **(भूयाः)** हूजिये और **(आस्थाता)** स्थिति से युक्त हुए हम लोगों को **(वीळयस्व)** दृढ़ कराइये **(ते)** आपकी सेना **(जेत्वानि)** जीतने योग्य शत्रुओं की सेनाओं को **(जयतु)** जीते॥ २६॥

भावार्थः-मनुष्यों को चाहिये कि धार्मिक बलवान् के साथ मित्रता करें, जिससे सर्वदा विजय हो॥ २६॥

पुनर्मनुष्यैः केभ्य उपकारा ग्राह्या इत्याह॥

फिर मनुष्यों को किन से उपकार ग्रहण करना चाहिये, इस विषय को कहते हैं॥

दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः।

अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज॥ २७॥

दिवः। पृथिव्याः। परि। ओजः। उत्ऽभृतम्। वनस्पतिऽभ्यः। परि। आऽभृतम्। सहः। अपाम्। ओज्मानम्। परि। गोभिः। आऽवृतम्। इन्द्रस्य। वज्रम्। हविषा। रथम्। यज॥ २७॥

पदार्थः-(**दिवः**) विद्युतस्सूर्याद्वा (**पृथिव्याः**) भूमेरन्तरिक्षाद्वा (**परि**) (**ओजः**) बलम् (**उद्भृतम्**) उत्कृष्टरीत्या धृतम् (**वनस्पतिभ्यः**) वटादिभ्यः (**परि**) सर्वतः (**आभृतम्**) आभिमुख्येन धृतम् (**सहः**) बलम् (**अपाम्**) जलानाम् (**ओज्मानम्**) बलकारिणम् (**परि**) सर्वतः (**गोभिः**) किरणैः (**आवृतम्**) आच्छादितम् (**इन्द्रस्य**) विद्युतः (**वज्रम्**) प्रहारम् (**हविषा**) सामग्र्या दानेन (**रथम्**) विमानादियानविशेषम् (**यज**) सङ्गच्छस्व॥ २७॥

अन्वयः-हे विद्वँस्त्वं दिवः पृथिव्या वनस्पतिभ्य ओज उद्भृतं सहः पर्याभृतं गोभिरपामोज्मानं पर्यावृतमिन्द्रस्य वज्रं रथं च हविषा परि यज॥ २७॥

भावार्थः-ये मनुष्याः सर्वतो बलं गृहीत्वा सूर्य्योऽपामोज्मानं मेघमिव सुखं वर्षयन्ति ते सर्वतः सत्कृता जायन्ते॥ २७॥

पदार्थः-हे विद्वन्! आप (**दिवः**) बिजुली से वा सूर्य्य से (**पृथिव्याः**) भूमि वा अन्तरिक्ष से (**वनस्पतिभ्यः**) वट आदि वनस्पतियों से (**ओजः**) बल (**उद्भृतम्**) उत्तम रीति से धारण किया गया वा (**सहः**) बल (**परि**) सब प्रकार से (**आभृतम्**) सन्मुख धारण किया गया और (**गोभिः**) किरणों से (**अपाम्**) जलों के (**ओज्मानम्**) बलकारी (**परि**) सब ओर से (**आवृतम्**) ढाँपे गये (**इन्द्रस्य**) बिजुली के (**वज्रम्**) प्रहार को और (**रथम्**) विमान आदि वाहन विशेष को (**हविषा**) सामग्री के दान से (**परि, यज**) उत्तम प्रकार प्राप्त हूजिये॥ २७॥

भावार्थः-जो मनुष्य सब ओर से बल को ग्रहण करके जलों के बलकारी मेघ को जैसे वैसे सुख को वर्षाते हैं, वे सब प्रकार से सत्कृत होते हैं॥ २७॥

पुना राज्ञा विद्युता किं साधनीयमित्याह॥

फिर राजा को बिजुली से क्या सिद्ध करना चाहिये, इस विषय को कहते हैं॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः।

सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय॥ २८॥

इन्द्रस्य। वज्रः। मरुताम्। अनीकम्। मित्रस्य। गर्भः। वरुणस्य। नाभिः। सः। इमाम्। नः। हव्यऽदातिम्। जुषाणः। देव। रथ। प्रति। हव्या। गृभाय॥ २८॥

पदार्थः-(**इन्द्रस्य**) विद्युतः (**वज्रः**) प्रहारः शब्दो वा (**मरुताम्**) मनुष्याणाम् (**अनीकम्**) सैन्यमिव (**मित्रस्य**) प्राणस्य (**गर्भः**) मध्यस्थः (**वरुणस्य**) श्रेष्ठस्य वायोः (**नाभिः**) बन्धनम् (**सः**) (**इमाम्**) (**नः**)

अस्माकम् **(हव्यदातिम्)** दातव्यदानक्रियाम् **(जुषाणः)** सेवमानः **(देव)** विद्वन् **(रथ)** रमणीय **(प्रति)** प्रतीतौ **(हव्या)** आदातुमर्हाणि **(गृभाय)** गृहाण॥२८॥

अन्वयः-हे देव रथ विद्वन् राजंस्त्वं यो मरुतामनीकमिवेन्द्रस्य वज्रो मित्रस्य गर्भो वरुणस्य नाभिरस्ति स न इमां हव्यदातिं जुषाणः सन् हव्या प्रति ददाति तं त्वं प्रति गृभाय॥२८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! विद्युदादिपदार्थैः सर्वमूर्त्तद्रव्यान्तःस्थैः कर्मभिर्युक्तां सेनां सम्पाद्य विजयेनालङ्कृता भवन्तु॥२८॥

पदार्थः-हे **(देव, रथ)** सुन्दर विद्वन् राजन्! आप जो **(मरुताम्)** मनुष्यों की **(अनीकम्)** सेना के सदृश **(इन्द्रस्य)** बिजुली की **(वज्रः)** धमक वा शब्द **(मित्रस्य)** प्राण के **(गर्भः)** मध्य में स्थित और **(वरुणस्य)** श्रेष्ठ वायु का **(नाभिः)** बन्धन है **(सः)** वह **(नः)** हम लोगों की **(इमाम्)** इस **(हव्यदातिम्)** देने योग्य दान की क्रिया को **(जुषाणः)** सेवन करता हुआ **(हव्या)** ग्रहण करने योग्यों को देता है, उसको आप **(प्रति, गृभाय)** प्रतीति से ग्रहण करिये॥२८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् जनो! बिजुली आदि पदार्थों और सम्पूर्ण मूर्त्त द्रव्यों के मध्य में वर्त्तमान कर्म्मों से युक्त सेना को करके विजय से शोभित हूजिये॥२८॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

उप॑ श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्।
स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद् दवी॑यो॒ अप॑ सेध॒ शत्रू॑न्॥२९॥

उप॑। श्वा॒स॒य॒। पृ॒थि॒वीम्। उ॒त। द्याम्। पु॒रु॒ऽत्रा। ते॒। म॒नु॒ता॒म्। विऽस्थि॑तम्। जग॑त्। सः। दु॒न्दु॒भे॒। सऽजूः। इन्द्रे॑ण। दे॒वैः। दू॒रात्। दवी॑यः। अप॑। से॒ध॒। शत्रू॑न्॥२९॥

पदार्थः-**(उप)** **(श्वासय)** प्राणय **(पृथिवीम्)** भूमिमन्तरिक्षं वा **(उत)** **(द्याम्)** सूर्य्यं विद्युतं वा **(पुरुत्रा)** पुरुषु पदार्थेषु भवान् **(ते)** तव **(मनुताम्)** विजानातु **(विष्ठितम्)** विशेषेण स्थितम् **(जगत्)** यद् गच्छति **(सः)** **(दुन्दुभे)** दुन्दुभिरिव गर्ज्जक **(सजूः)** संयुक्तः **(इन्द्रेण)** विद्युदस्त्रेण **(देवैः)** विद्वद्भिर्वीरैः **(दूरात्)** **(दवीयः)** अतिशयेन दूरम् **(अप)** **(सेध)** अप नय **(शत्रून्)**॥२९॥

अन्वयः-हे दुन्दुभे! यथा स जगदीश्वरः पृथिवीमुत द्यां विष्ठितं जगन्मनुतां तेन पुरुत्रेन्द्रेण देवैः सजूस्त्वं शत्रून् दूराद्दवीयोऽप सेध यस्ते कल्याणं मनुतां तमुपास्य सर्वानुपश्वासय॥२९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथेश्वरेण पृथिवीसूर्यादि सर्वं जगत्स्वसत्तया स्थापितं तथैव विद्युता मूर्तिमद्द्रव्याण्यभिव्याप्य प्रवर्त्यन्त, ईश्वरोपासनेन विद्युदादिप्रयोगेण दूरस्थानपि शत्रून् विजित्य सकलान् प्रजीवयत॥२९॥

पदार्थः-हे **(दुन्दुभे)** दुन्दुभि के सदृश गर्जने वाले! जैसे **(सः)** वह जगदीश्वर **(पृथिवी)** भूमि वा अन्तरिक्ष को और **(उत)** भी **(द्याम्)** सूर्य्य वा बिजुली को **(विष्ठितम्)** विशेष करके स्थित **(जगत्)** व्यतीत होने वाले संसार को **(मनुताम्)** जाने उस ज्ञान से **(पुरुत्रा)** सम्पूर्ण पदार्थों से हुए **(इन्द्रेण)** बिजुलीरूप अस्त्र से और **(देवैः)** विद्वान् वीरों से **(सजूः)** संयुक्त आप **(शत्रून्)** शत्रुओं को **(दूरात्)** दूर से **(दवीयः)** अति दूर **(अप, सेध)** हराइये और जो **(ते)** आपके कल्याण को जाने उसकी उपासना करके सब को **(उप, श्वासय)** समझाइये॥ २९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे ईश्वर ने पृथिवी और सूर्यादि सम्पूर्ण संसार को अपनी सत्ता से स्थापित किया, वैसे ही बिजुली सम्पूर्ण द्रव्यों में अभिव्याप्त होकर मध्य में प्रविष्ट है, ईश्वर की उपासना और बिजुली आदि के प्रयोगों से दूर पर स्थित भी शत्रुओं को जीत कर सब को जिलाओ॥ २९॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

आ क्रन्दय बलमोजो न आ धा निः ष्टनिहि दुरिता बाधमानः।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व॥ ३०॥

आ। क्रन्दय। बलम्। ओजः। नः। आ। धाः। निः। स्तनिहि। दुः।ऽइता। बाधमानः। अप। प्रोथ। दुन्दुभे। दुच्छुनाः। इतः। इन्द्रस्य। मुष्टिः। असि। वीळयस्व॥ ३०॥

पदार्थः-**(आ)** समन्तात् **(क्रन्दय)** रोदयाऽऽह्वय वा **(बलम्)** **(ओजः)** पराक्रमम् **(नः)** अस्मभ्यम् **(आ)** **(धाः)** धेहि **(निः)** नितराम् **(स्तनिहि)** शब्दय **(दुरिता)** दुष्टव्यसनानि **(बाधमानः)** **(अप)** **(प्रोथ)** जेतुं पर्याप्तो भव शत्रूनसमर्थान् कुरु **(दुन्दुभे)** दुन्दुभिरिव वर्त्तमान **(दुच्छुनाः)** दुष्टश्वान इव वर्त्तमानान् **(इतः)** अस्मात् **(इन्द्रस्य)** विद्युतः **(मुष्टिः)** मुष्टिवद्दुष्टानां हन्ता **(असि)** **(वीळयस्व)** बलयस्व॥ ३०॥

अन्वयः-हे दुन्दुभे! त्वं नो बलमोज आ धाः शत्रूनाक्रन्दयास्मान्निः ष्टनिहि दुरिता बाधमानो दुच्छुना इव वर्त्तमानाञ्छत्रूनप प्रोथ। यतस्त्वमिन्द्रस्य मुष्टिरसीतोऽस्मान् वीळयस्व॥ ३०॥

भावार्थः-हे राजंस्त्वमीदृशं बलं धरेर्येन दुर्व्यसनानि दुष्टाः शत्रवो नश्येयुः प्रजाः पोषयितुं शक्नुयाः॥ ३०॥

पदार्थः-**(दुन्दुभे)** दुन्दुभी के समान वर्त्तमान! आप **(नः)** हम लोगों के लिये **(बलम्)** सामर्थ्य को और **(ओजः)** पराक्रम को **(आ, धाः,)** धरिये और शत्रुओं को **(आ)** सब ओर से **(क्रन्दय)** रुलाइये और बुलाइये तथा हम लोगों को **(निः)** अत्यन्त **(स्तनिहि)** शब्द कराइये और **(दुरिता)** दुष्ट व्यसनों को **(बाधमानः)** नष्ट करते हुए **(दुच्छुनाः)** दुष्ट कुत्तों के समान वर्त्तमान शत्रुओं के **(अप, प्रोथ)** जीतने को

पर्याप्त हूजिये अर्थात् शत्रुओं को असमर्थ करिये जिससे आप **(इन्द्रस्य)** बिजुली की **(मुष्टिः)** मुष्टि के समान दुष्टों के मारने वाले **(असि)** हो **(इतः)** इससे हम लोगों को **(वीळयस्व)** बलयुक्त करिये॥ ३०॥

भावार्थः-हे राजन्! आप ऐसे बल को धारण करिये जिससे दुष्ट व्यसन, और दुष्ट शत्रु नष्ट होवें और प्रजाओं के पोषण करने को समर्थ होवें॥ ३०॥

पुना राजदयो जनाः किं कुर्य्युरित्याह॥

फिर राजा आदि जन क्या करें, इस विषय को कहते हैं॥

आमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु॥ ३१॥ ३५॥ ७॥

आ। अमूः। अज। प्रतिऽआवर्तय। इमाः। केतुऽमत्। दुन्दुभिः। वावदीति। सम्। अश्वऽपर्णाः। चरन्ति। नः। नरः। अस्माकम्। इन्द्र। रथिनः। जयन्तु॥ ३१॥

पदार्थः-**(आ)** **(अमूः)** इमाः शत्रुसेनाः **(अज)** समन्ताद् दूरे प्रक्षिप **(प्रत्यावर्त्तय)** **(इमाः)** स्वकीयाः **(केतुमत्)** प्रशस्तप्रज्ञायुक्तम् **(दुन्दुभिः)** **(वावदीति)** भृशं वदति **(सम्)** **(अश्वपर्णाः)** महान्तः पर्णाः पक्षा येषान्ते **(चरन्ति)** **(नः)** अस्मान् **(नरः)** नायकाः **(अस्माकम्)** **(इन्द्र)** शत्रुविदारक **(रथिनः)** प्रशस्ता रथा विद्यन्ते येषां ते **(जयन्तु)**॥ ३१॥

अन्वयः-हे इन्द्र राजँस्त्वं यथा दुन्दुभिः केतुमद्वावदीति तथेमा अश्वपर्णाः स्वसेनाः प्रत्यावर्त्तय ताभिरमूः शत्रुसेना दूर आज। येऽस्माकं रथिनो नरोऽस्माकं शत्रूञ्जयन्तु। ये विजयाय संचरन्ति ते नोऽस्मानलंकुर्वन्तु॥ ३१॥

भावार्थः-हे राजादयो जना यूयं दुन्दुभ्यादिवादित्रभूषिता हृष्टाः पुष्टाः सेनाः संरक्ष्याभिर्दूरस्थानपि शत्रून् विजित्य प्रजा धर्म्येण पालयतेति॥ ३१॥

अत्र सोमप्रश्नोत्तरविद्युद्राजप्रजासेनावादित्रकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

अस्मिन्नध्याय इन्द्रसोमेश्वरराजप्रजामेघसूर्य्यवीरसेनायानयज्ञमित्रैश्वर्य्यप्रज्ञाविद्युन्मेधावीवाक्सत्यबल-पराक्रमराजनीतिस- ामशत्रुजयादिगुणवर्णनादेतदध्यायस्य पूर्वाध्यायेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्विरजानन्दसरस्वतीस्वामिशिष्यश्रीमद्दयानन्दसरस्वतीस्वामिविरचिते सुप्रमाणयुक्त आर्य्यभाषाविभूषित ऋग्वेदभाष्ये चतुर्थाष्टके सप्तमोऽध्यायः, पञ्चविंशो वर्गः, षष्ठे मण्डले सप्तचत्वारिंशत्तमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(इन्द्र)** शत्रुओं के विदीर्ण करने वाले राजन्! आप जैसे **(दुन्दुभिः)** नगाड़ा **(केतुमत्)** प्रशंसा योग्य बुद्धियुक्त **(वावदीति)** निरन्तर बजाता, वैसे **(इमाः)** यह **(अश्वपर्णाः)** महान् पक्षों वाली

अपनी सेनाएँ **(प्रत्यावर्त्तय)** लौटाइये और उनसे **(अमूः)** यह शत्रुसेनाएँ दूर **(आ, अज)** फेंकिये जो **(अस्माकम्)** हमारे **(रथिनः)** प्रशंसित रथ वाले **(नरः)** नायक वीर हमारे शत्रुओं को **(जयन्तु)** जीतें और जो विजय के लिये **(सम्, चरन्ति)** सम्यक् विचरते हैं, वे **(नः)** हम लोगों को सुशोभित करें॥ ३१॥

भावार्थः-हे राजा आदि जनो! तुम लोग दुन्दुभि आदि वाजनों से भूषित, हर्ष वा पुष्टि से युक्त सेनाओं को अच्छे प्रकार रख कर इनसे दूरस्थ भी शत्रुओं को अच्छे प्रकार जीतकर प्रजाओं को धर्मयुक्त व्यवहार से पालन करो॥ ३१॥

इस सूक्त में सोम, प्रश्नोत्तर, बिजुली, राजा, प्रजा, सेना और वाजनों से भूषित कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

इस अध्याय में इन्द्र, सोम, ईश्वर, राजा, प्रजा, मेघ, सूर्य, वीर, सेना, यान, यज्ञ, मित्र, ऐश्वर्य्य, प्रज्ञा, बिजुली, बुद्धिमान्, वाणी, सत्य, बल, पराक्रम, राजनीति, स-ाम और शत्रुविजय आदि गुणों का वर्णन होने से इस अध्याय की पूर्वाध्याय के साथ सङ्गति जाननी चाहिये॥

यह श्रीमत्परमहंस परिव्राजकाचार्य श्रीमद् विरजानन्द सरस्वती स्वामी के शिष्य श्रीमद्दयानन्द सरस्वती स्वामिविरचित, सुप्रमाणयुक्त, आर्यभाषाविभूषित, ऋग्वेदभाष्य के चौथे अष्टक में सप्तम अध्याय पैंतीसवाँ वर्ग और छठे मण्डल में सैंतालीसवाँ सूक्त भी समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्थाष्टकेष्टमाध्यायारम्भः॥

ओ॑ विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ १॥

अथ द्वाविंशत्यृचस्याष्टचत्वारिंशत्तमस्य सूक्तस्य शंयुर्बार्हस्पत्य ऋषिः। तृणपाणिकं पृश्निसूक्तम्॥ १-१० अग्निः। ११, १२, २०, २१ मरुतः। १३-१५ मरुतो लिङ्गोक्ता देवता वा। १६-१९ पूषा। २२ पृश्निर्द्यावाभूमी वा॥ १, ४, ५, १४ बृहती। ३, १९ विराड्बृहती। १०, १२, १७ भुरिग्बृहती छन्दः। मध्यमः स्वरः। २ स्वराडार्ची जगती छन्दः। १५ निचृदतिजगती छन्दः। निषादः स्वरः। ६, २१ त्रिष्टुप्। ७ निचृत्त्रिष्टुप्। ८ भुरिक्त्रिष्टुप् छन्दः। धैवतः स्वरः। ९ भुरिगनुष्टुप्। २० स्वराडनुष्टुप्। २२ अनुष्टुप् छन्दः। गान्धारः स्वरः। ११, १६ उष्णिक्। १३, १८ निचृदुष्णिक्छन्दः। ऋषभः स्वरः॥

अथ विद्वद्भिः किं कर्त्तव्यमित्याह॥

अब चतुर्थाष्टक के अष्टमाध्याय का आरम्भ है, इसमें बाईस ऋचा वाले अड़तालीसवें सूक्त के प्रथम मन्त्र में विद्वानों को क्या करना चाहिये, इस विषय का वर्णन करते हैं॥

य॒ज्ञाय॑ज्ञा वो अ॒ग्नये॑ गि॒रागि॑रा च॒ दक्ष॑से।
प्रप्र॑ व॒यम॒मृतं॑ जा॒तवे॑दसं प्रि॒यं मि॒त्रं न शं॑सिषम्॥ १॥

य॒ज्ञाऽय॑ज्ञा। व॒ः। अ॒ग्नये॑। गि॒राऽगि॑रा। च॒। दक्ष॑से। प्रऽप्र॑। व॒यम्। अ॒मृत॑म्। जा॒तऽवे॑दसम्। प्रि॒यम्। मि॒त्रम्। न। शं॒सि॒षम्॥ १॥

पदार्थः-(**यज्ञायज्ञा**) यज्ञेयज्ञे (**वः**) युष्माकम् (**अग्नये**) पावकाय (**गिरागिरा**) वाचा वाचा (**च**) (**दक्षसे**) (**प्रप्र**) (**वयम्**) (**अमृतम्**) नाशरहितम् (**जातवेदसम्**) जातविद्यम् (**प्रियम्**) कमनीयम् (**मित्रम्**) सखायम् (**न**) इव (**शंसिषम्**)॥ १॥

अन्वयः-हे विद्वांसो! वो यज्ञायज्ञा गिरागिरा चाऽग्नये दक्षसे वयं प्रयेतम ह्यमृतं जातवेदसं प्रियं मित्रं न युष्मानहं यथा प्रप्र शंसिषं तथा यूयमप्यस्मान् प्रशंसत॥ १॥

भावार्थः-हे मनुष्या! यथा विद्वांसो युष्मासु प्रीतिं जनयेयुस्तथा यूयमप्यस्माकं कार्यसाधनाय प्रीतिं जनयत॥ १॥

पदार्थः-हे विद्वान् जनो! (**वः**) आपके (**यज्ञायज्ञा**) यज्ञ-यज्ञ में (**गिरागिरा, च**) और वाणी-वाणी से (**अग्नये**) अग्नि (**दक्षसे**) जो कि विलक्षण है उसके लिये (**वयम्**) हम लोग प्रयत्न करें। और (**अमृतम्**) नाश से रहित (**जातवेदसम्**) जातवेदस् अर्थात् जिससे विद्या उत्पन्न हुई ऐसे अग्नि (**प्रियम्**)

मनोहर **(मित्रम्)** मित्र के **(न)** समान तुम लोगों की मैं जैसे **(प्रप्र, शंसिषम्)** वार-वार प्रशंसा करूं, वैसे आप भी हम लोगों की प्रशंसा कीजिये॥१॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् जन आप लोगों की प्रीति उत्पन्न करें, वैसे आप भी हमारे कार्य साधने के लिये प्रीति उत्पन्न कीजिये॥१॥

पुना राजप्रजाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्तें, इस विषय को कहते हैं॥

ऊर्जो नपा॑तं॒ स हि॒नायम॑स्म॒युर्दाशे॑म ह॒व्यदा॑तये।

भुव॒द्वाजे॑ष्ववि॒ता भुव॑द् वृ॒ध उ॒त त्राता त॒नूना॑म्॥२॥

ऊ॒र्जः। नपा॑तम्। सः। हि॒न। अ॒यम्। अ॒स्म॒ऽयुः। दाशे॑म। ह॒व्यऽदा॑तये। भुव॑त्। वाजे॑षु। अ॒वि॒ता। भुव॑त्। वृ॒धः। उ॒त। त्रा॒ता। त॒नूना॑म्॥२॥

पदार्थः-(**ऊर्जः**) पराक्रमस्य **(नपातम्)** अपातयितारमनाशकम् **(सः)** **(हिन)** खलु **(अयम्)** **(अस्मयुः)** अस्मान् कामयमानः **(दाशेम)** दद्याम **(हव्यदातये)** दातव्यदानाय **(भुवत्)** भवेत् **(वाजेषु)** स-ामेषु **(अविता)** रक्षकः **(भुवत्)** भवेत् **(वृधः)** वृद्धिकरः **(उत)** **(त्राता)** पालकः **(तनूनाम्)** शरीराणाम्॥२॥

अन्वयः-हे मनुष्या! योऽयमस्मयुर्हव्यदातयेऽविता भुवद्वाजेष्ववितो भुवत् वृधो रक्षको भुवदुत तनूनां त्राता भुवत् तमूर्जो नपातं संरक्ष्य वयं सुखं दाशेम स हिनाऽस्मभ्यं सुखं दद्यात्॥२॥

भावार्थः-हे प्रजासेनाजना! यो राजा स-ामेऽस-ामे च सर्वेषां रक्षकः सततं भवेत्तदनुकूलं वर्त्तित्वा वयं तस्मै पुष्कलं सुखं दद्याम॥२॥

पदार्थः-हे मनुष्यो! जो **(अयम्)** यह **(अस्मयुः)** हम लोगों की कामना करने वाला तथा **(हव्यदातये)** देने योग्य दान के लिये **(अविता)** रक्षा करने वाला **(भुवत्)** होवे और **(वाजेषु)** स-ामों में रक्षा करने वाला **(भुवत्)** हो तथा **(वृधः)** वृद्धि करने वा रक्षा करने वाला हो **(उत)** और **(तनूनाम्)** शरीरों का **(त्राता)** पालन करने वाला हो उसको **(ऊर्जः)** पराक्रम के **(नपातम्)** न पातन कराने अर्थात् न विनाश कराने वाले की अच्छे प्रकार रक्षा कर हम सुख **(दाशेम)** देवें **(सः, हिन)** वही हमारे लिये सुख देवे॥२॥

भावार्थः-हे प्रजासेनाजनो! जो राजा स-ाम वा अस-ाम में सबकी रक्षा करने वाला निरन्तर हो, तनुकूल वर्ताव कर हम लोग उसके लिये पुष्कल सुख देवें॥२॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

वृषा॒ ह्य॑ग्ने अ॒जरो॑ म॒हान् वि॒भास्य॒र्चिषा॑।

अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि॥ ३॥

वृषा। हि। अग्ने। अजरः। महान्। विऽभासि। अर्चिषा। अजस्रेण। शोचिषा। शोशुचत्। शुचे। सुदीतिऽभिः। सु। दीदिहि॥ ३॥

पदार्थः-(**वृषा**) बलिष्ठः (**हि**) यतः (**अग्ने**) पावक इव वर्त्तमान (**अजरः**) जरारहितः (**महान्**) (**विभासि**) (**अर्चिषा**) सत्कारेण दीप्त्या वा (**अजस्रेण**) निरन्तरेण (**शोचिषा**) प्रकाशेन (**शोशुचत्**) भृशं पवित्रयन् (**शुचे**) विद्याविनयाभ्यां प्रकाशित (**सुदीतिभिः**) सुष्ठु दीप्तिभिः (**सु**) (**दीदिहि**) प्रकाशय॥ ३॥

अन्वयः-हे शुचेऽग्ने! हि यतो वृषाऽजरो महांस्त्वमजस्रेणार्चिषा शोचिषा सुदीतिभिः सर्वान् विभासि तस्मादस्मान् सु दीदिहि॥ ३॥

भावार्थः-हे राजंस्त्वया सततं विद्याविनयप्रकाशेन दुर्व्यसनक्षयेण प्रजाः सततं पालनीयाः॥ ३॥

पदार्थः-हे (**शुचे**) विद्या और विनय से प्रकाशित (**अग्ने**) पावक के समान वर्त्तमान! (**हि**) जिससे (**वृषा**) अत्यन्त बलवान् (**अजरः**) जरा अवस्था से रहित (**महान्**) बड़े आप (**अजस्रेण**) निरन्तर (**अर्चिषा**) सत्कार वा दीप्ति से (**शोचिषा**) वा प्रकाश से (**शोशुचत्**) निरन्तर पवित्र करते हुए (**सुदीतिभिः**) उत्तम दीप्तियों से सबको (**विभासि**) विशेषता से प्रकाशित करते हैं, इससे हम लोगों को (**सु, दीदिहि**) प्रकाशित कीजिये॥ ३॥

भावार्थः-हे राजन्! आपको चाहिये कि निरन्तर विद्या और विनय के प्रकाश से और दुष्ट व्यसनों के नाश से प्रजा की निरन्तर पालना करो॥ ३॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

महो देवान् यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना।

अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व॥ ४॥

महः। देवान्। यजसि। यक्षि। आनुषक्। तव। क्रत्वा। उत। दंसना। अर्वाचः। सीम्। कृणुहि। अग्ने। अवसे। रास्व। वाजा। उत। वंस्व॥ ४॥

पदार्थः-(**महः**) महतः (**देवान्**) विदुषः (**यजसि**) सङ्गच्छसे (**यक्षि**) यजसि (**आनुषक्**) आनुकूल्ये (**तव**) (**क्रत्वा**) प्रज्ञया (**उत**) अपि (**दंसना**) कर्माणि (**अर्वाचः**) येऽर्वागञ्चन्ति तान् (**सीम्**) सर्वतः (**कृणुहि**) (**अग्ने**) अग्निरिव वर्त्तमान राजन् (**अवसे**) (**रास्व**) देहि (**वाजा**) अन्नानि (**उत**) (**वंस्व**) सम्भज॥ ४॥

अन्वयः-हे अग्ने! त्वमर्वाचो महो देवान् यजसि। आनुषग्दंसना यक्षि तस्य तव क्रत्वा वयमेतान् यजेम। उताऽवसेऽस्मभ्यं रास्व सीं सुखं कृणुहि, उत वाजा वंस्व॥ ४॥

भावार्थः-ये मूर्खान् विदुषः सम्पादयन्ति ते महदनुकूलं सुखं प्राप्नुवन्ति॥ ४॥

पदार्थः-हे **(अग्ने)** अग्नि के समान वर्त्तमान राजन्! आप **(अर्वाचः)** जो प्राप्त होते उन **(महः)** महान् अत्युत्तम महात्मा **(देवान्)** विद्वान् जनों से **(यजसि)** सङ्गत होते हैं और **(आनुषक्)** अनुकूलता में **(दंसना)** कर्मों को **(यक्षि)** सङ्गत करते हैं उन **(तव)** आपकी **(क्रत्वा)** प्रज्ञा से हम लोग उनको सङ्गत करें **(उत)** और **(अवसे)** रक्षा के अर्थ हम लोगों के लिये **(रास्व)** दीजिये और **(सीम्)** सब ओर से सुख **(कृणुहि)** कीजिये **(उत)** और **(वाजा)** अन्नों का **(वंस्व)** सेवन कीजिये॥४॥

भावार्थः-जो मूर्खों को विद्वान् करते हैं, वे महत् अनुकूल सुख को प्राप्त होते हैं॥४॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

यमापो॑ अद्र॑यो॒ वना॒ गर्भं॑मृ॒तस्य॒ पिप्र॑ति।

सह॑सा॒ यो म॑थि॒तो जाय॑ते॒ नृभि॑: पृथि॒व्या अधि॒ सान॑वि॥५॥१॥

यम्। आप॑:। अद्र॑यः। वना॑। गर्भ॑म्। ऋ॒तस्य॑। पिप्र॑ति। सह॑सा। यः। म॒थि॒तः। जाय॑ते। नृऽभि॑:। पृ॒थि॒व्याः। अधि॑। सान॑वि॥५॥

पदार्थः-(**यम्**) (**आपः**) जलानि (**अद्रयः**) मेघाः (**वना**) किरणाः (**गर्भम्**) (**ऋतस्य**) जलस्य (**पिप्रति**) पूरयन्ति (**सहसा**) बलेन (**यः**) (**मथितः**) विलोडितः (**जायते**) (**नृभिः**) नायकैः (**पृथिव्याः**) (**अधि**) उपरि (**सानवि**) पर्वतस्य शिखरे॥५॥

अन्वयः-हे मनुष्या! यमृतस्य गर्भमापोऽद्रयो वना पिप्रति यो नृभिः सहसा मथितः पृथिव्या अधि सानवि जायते त यूयं सम्प्रयुङ्ध्वम्॥५॥

भावार्थः-हे मनुष्या! ये सर्वान्तःस्थमग्निं विद्वांसः प्राप्नुवन्ति मथित्वा प्रदीपयन्ति ते भूमिराज्येऽधिष्ठातारो जायन्ते॥५॥

पदार्थः-हे मनुष्यो! **(यम्)** जिस **(ऋतस्य)** जल के **(गर्भम्)** गर्भरूप संसार को **(आपः)** जल **(अद्रयः)** मेघ और **(वना)** किरण **(पिप्रति)** पूरण करते हैं और **(यः)** जो **(नृभिः)** नायक मनुष्यों से **(सहसा)** बल से **(मथितः)** मथा हुआ **(पृथिव्याः)** पृथिवी के **(अधि)** ऊपर **(सानवि)** पर्वत के शिखर पर **(जायते)** प्रसिद्ध होता है, उस अग्नि को तुम अच्छे प्रकार युक्त करो॥५॥

भावार्थः-हे मनुष्यो! जो सब में व्याप्त होकर रहने वाले अग्नि को विद्वान् जन प्राप्त होते और मथि के प्रदीप्त करते हैं, वे भूमि के राज्य करने में अधिष्ठाता होते हैं॥५॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

आ यः प॒प्रौ भा॒नुना॒ रोद॑सी उ॒भे धू॒मेन॑ धावते दि॒वि।

ति॒रस्तमो॑ दु॒दृश॒ ऊर्म्या॒स्वा शया॒वास्व॑रु॒षो वृषा श्या॒वा अ॑रु॒षो वृषा॑॥६॥

आ। यः। पप्रौ। भानुना। रोदसी इति। उभे इति। धूमेन। धावते। दिवि। तिरः। तमः। ददृशे। ऊर्म्यासु। आ। श्यावासु। अरुषः। वृषा। आ। श्यावाः। अरुषः। वृषा॥६॥

पदार्थः-**(आ)** **(यः)** **(पप्रौ)** व्याप्नोति **(भानुना)** किरणेन **(रोदसी)** द्यावापृथिव्यौ **(उभे)** **(धूमेन)** **(धावते)** **(दिवि)** अन्तरिक्षे **(तिरः)** तिरस्करणे **(तमः)** अन्धकारः **(ददृशे)** दृश्यते **(ऊर्म्यासु)** रात्रिषु। **ऊर्म्येति रात्रिनाम।** (निघं०१.७) **(आ)** **(श्यावासु)** कृष्णासु **(अरुषः)** आरक्तगुणः **(वृषा)** वर्षकः **(आ)** **(श्यावाः)** सवितुर्वेगवन्तः किरणाः। **श्यावा इति सवितुरादिष्टोपयोगिनः।** (निघं०१.१५) **(अरुषः)** **(वृषा)** वर्षकः॥६॥

अन्वयः-हे मनुष्या! यूयं यो भानुनोभे रोदसी आ पप्रौ धूमेन दिवि धावते श्यावासूर्म्यासु यत्तमस्तत्तिरस्कृत्याऽरुषो वृषा यस्य श्यावा अरुषो वृषा आ ददृशे तमाविजानीत॥६॥

भावार्थः-येन विद्युदग्निना भूमिसूर्यौ प्रदृश्येते यस्मादधिको वेगवान् कोऽपि नास्ति योऽन्धकारनिवर्त्तकोऽस्ति तं यूयं सम्प्रयुङ्ध्वम्॥६॥

पदार्थः-हे मनुष्यो! तुम **(यः)** जो **(भानुना)** किरण से **(उभे)** दोनों **(रोदसी)** द्यावापृथिवी को **(आ, पप्रौ)** व्याप्त होता और **(धूमेन)** धूम से **(दिवि)** अन्तरिक्ष में **(धावते)** दौड़ता है तथा **(श्यावासु)** काली **(ऊर्म्यासु)** रात्रियों में जो **(तमः)** अन्धकार उसको **(तिरः)** तिरस्कार कर **(अरुषः)** लाल रंग वाला **(वृषा)** वर्षा का निमित्त है और जिसकी **(श्यावाः)** वेगवती किरणें विद्यमान हैं जो **(अरुषः)** कुछ लाली लिये हुए है वह **(वृषा)** वर्षा करने वाला सूर्य्य **(आ, ददृशे)** अच्छे प्रकार देखा जाता है उसे **(आ)** अच्छे प्रकार जानो॥६॥

भावार्थः-जिस बिजुलीरूप आग से भूमि और सूर्य्य दिखाते हैं, जिससे अधिक वेगवान् कोई नहीं तथा जो अन्धकार की निवृत्ति करने वाला है, उसका अच्छे प्रकार प्रयोग करो॥६॥

पुनर्मनुष्यैः कथं वर्त्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्त्तना चाहिये, इस विषय को कहते हैं॥

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि॥७॥

बृहत्ऽभिः। अग्ने। अर्चिऽभिः। शुक्रेण। देव। शोचिषा। भरत्ऽवाजे। सम्ऽइधानः। यविष्ठ्य। रेवत्। नः। शुक्र। दीदिहि। द्युऽमत्। पावक। दीदिहि॥७॥

पदार्थः-**(बृहद्भिः)** महद्भिः **(अग्ने)** अग्निरिव वर्त्तमान **(अर्चिभिः)** तेजोभिः **(शुक्रेण)** शुद्धेन **(देव)** दातः **(शोचिषा)** न्यायप्रकाशेन **(भरद्वाजे)** विज्ञानादिधारके **(समिधानः)** देदीप्यमानः **(यविष्ठ्य)** अतिशयेन युवन् **(रेवत्)** प्रशस्तैश्वर्ययुक्तं धनम् **(नः)** अस्मभ्यम् **(शुक्र)** आशुकर्त्तः **(दीदिहि)** प्रकाशय **(द्युमत्)** प्रशस्तप्रकाशयुक्तम् **(पावक)** पवित्रकर्त्तः **(दीदिहि)** देहि॥७॥

अन्वयः-हे शुक्र पावक यविष्ठ्य देवाग्ने! यथा वह्निर्बृहद्भिरर्चिभिर्भरद्वाजे समिधानो नो द्युमद्रेवद्ददाति तथा शुक्रेण शोचिषैतद्दीदिहि, विद्याविनये च दीदिहि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसस्सूर्यवच्छुभेषु गुणेषु बलेन सुशीलत्वेन वा श्रियं प्राप्य प्रकाशन्ते ते सत्कर्त्तव्या भवन्ति॥७॥

पदार्थः-हे **(शुक्र)** शीघ्र कर्म करने **(पावक)** वा पवित्र करने **(यविष्ठ्य)** वा अतीव युवा अवस्था रखने वा **(देव)** देने वाले **(अग्ने)** अग्नि के समान वर्त्तमान विद्वन्! जैसे अग्नि **(बृहद्भिः)** महान् **(अर्चिभिः)** तेजों से **(भरद्वाजे)** विज्ञानादि के धारण करने वाले व्यवहार में **(समिधानः)** अच्छे प्रकार देदीप्यमान **(नः)** हमारे लिये **(द्युमत्)** प्रशस्त प्रकाश वा **(रेवत्)** प्रशस्त ऐश्वर्य्य से युक्त धन को देता है, वैसे **(शुक्रेण)** शुद्ध **(शोचिषा)** न्याय के प्रकाश से उसे **(दीदिहि)** प्रकाशित कीजिये, तथा विद्या और नम्रता **(दीदिहि)** दीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् जन सूर्य के समान शुभ गुणों में बल वा सुशीलता से लक्ष्मी को प्राप्त होकर प्रकाशित होते हैं, वे सत्कार करने योग्य हैं॥७॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को कहते हैं॥

विश्वा॑सां गृ॒हप॑तिर्वि॒शाम॑सि॒ त्वम॑ग्ने॒ मानु॑षीणाम्।
श॒तं पू॒र्भिर्य॑विष्ठ पा॒ह्यंह॑सः समे॒द्धार॑ं श॒तं हिमा॑ः स्तो॒तृभ्यो॒ ये च॒ दद॑ति॥८॥

विश्वा॑साम्। गृ॒हऽप॑तिः। वि॒शाम्। अ॒सि॒। त्वम्। अ॒ग्ने॒। मानु॑षीणाम्। श॒तम्। पू॒ःऽभिः। य॒वि॒ष्ठ॒। पा॒हि॒। अंह॑सः। स॒म्ऽए॒द्धार॑म्। श॒तम्। हिमा॑ः। स्तो॒तृऽभ्यः। ये। च॒। दद॑ति॥८॥

पदार्थः-(**विश्वासाम्**) सर्वासाम् **(गृहपतिः)** गृहस्य स्वामी **(विशाम्)** प्रजानाम् **(असि)** **(त्वम्)** **(अग्ने)** दुष्टानां दाहक **(मानुषीणाम्)** **(शतम्)** **(पूर्भिः)** नगरैः **(यविष्ठ)** शरीरात्मबलाभ्यां युक्त **(पाहि)** **(अंहसः)** दुष्टाचारात् **(समेद्धारम्)** सम्यक् प्रकाशकम् **(शतम्)** **(हिमाः)** वृद्धीर्हेमन्तानृतून् वा **(स्तोतृभ्यः)** विद्वद्भ्यः **(ये)** **(च)** सद्गुणान् **(ददति)**॥८॥

अन्वयः-हे यविष्ठाग्ने! ये स्तोतृभ्यः शतं हिमाः समेद्धारं ददति शुभान् गुणांश्च गृहीत्वा प्रयच्छन्ति तैस्सह युक्तानां विश्वासां मानुषीणां विशां यतस्त्वं गृहपतिरसि पूर्भिस्सहैतेभ्यः शतं ददाति तस्मादस्मानंहसः पाहि॥८॥

भावार्थः-हे राजन्! येऽत्र प्रजायां विद्याधर्मादिशुभगुणान् ग्राहयन्ति तांस्त्वं सततं सस्कुर्यास्ते भवन्तं च सत्कुर्युः॥८॥

पदार्थः-हे **(यविष्ठ)** शरीर और आत्मा के बल से युक्त **(अग्ने)** दुष्टों के दाह करने वाले! **(ये)** जो **(स्तोतृभ्यः)** स्तुति करने वाले विद्वानों से **(शतम्)** सौ **(हिमाः)** वृद्धि वा हेमन्त आदि ऋतुओं तक **(समेद्धारम्)** अच्छे प्रकार प्रकाश करने वाले को **(ददति)** देते **(च)** और शुभ गुणों को ग्रहण कर दूसरों

को देते हैं, उनके साथ युक्त (**विश्वासाम्**) समस्त (**मानुषीणाम्**) मनुष्य सम्बन्धी (**विशाम्**) प्रजाजनों के बीच जिससे (**त्वम्**) आप (**गृहपतिः**) धन के स्वामी (**असि**) हैं वा (**पूर्भिः**) नगरों के साथ इनके लिये (**शतम्**) सौ पदार्थ देते हैं, इस कारण हम लोगों की (**अंहसः**) दुष्ट आचरण से (**पाहि**) रक्षा करो॥८॥

भावार्थः-हे राजन्! जो इस प्रजा में विद्या और धर्म आदि शुभ गुणों को ग्रहण कराते हैं, उनका तुम निरन्तर सत्कार करो और वे आपका भी सत्कार करें॥८॥

पुनर्विद्वांसोऽपत्यानि कथं शिक्षेरन्नित्याह॥

फिर विद्वान् जन सन्तानों को कैसे शिक्षा दें, इस विषय को कहते हैं॥

त्वं नश्चित्र ऊत्या वसो राधांसि चोदय।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः॥९॥

त्वम्। नः। चित्रः। ऊत्या। वसो इति। राधांसि। चोदय। अस्य। रायः। त्वम्। अग्ने। रथीः। असि। विदाः। गाधम्। तुचे। तु। नः॥९॥

पदार्थः-(**त्वम्**) (**नः**) अस्माकम् (**चित्रः**) अद्भुतपुरुषार्थः (**ऊत्या**) रक्षया (**वसो**) वासयितः (**राधांसि**) समृद्धानि धनानि (**चोदय**) (**अस्य**) (**रायः**) धनस्य (**त्वम्**) (**अग्ने**) विद्युदिव पुरुषार्थिन् (**रथीः**) बहुप्रशंसितरथः (**असि**) (**विदाः**) विज्ञानवान् (**गाधम्**) विलोडनम् (**तुचे**) अपत्याय। **तुगित्यपत्यनाम।** (निघं०२.२) (**तु**) (**नः**) अस्माकम्॥९॥

अन्वयः-हे वसोऽग्ने! चित्रस्त्वमूत्या नो राधांसि रक्षाऽस्य रायश्चोदय यतस्त्वं विदा रथीरसि तस्मात्तु नस्तुचे गाधं चोदय॥९॥

भावार्थः-हे विद्वन्! भवान् यथैतेषामस्माकमपत्यानां प्रज्ञाविलोडनेन विद्याप्राप्तिः स्यात्तथाऽनुविधेहि। यथा पुरुषार्थी धनैश्वर्यं प्राप्तुं प्रेरयति तथैव भवाननुशिक्षताम्॥९॥

पदार्थः-हे (**वसो**) वास कराने वाले (**अग्ने**) बिजुली के समान पुरुषार्थी जन (**चित्रः**) अद्भुत पुरुषार्थ करने वाले (**त्वम्**) आप (**ऊत्या**) रक्षा से (**नः**) हम लोगों के (**राधांसि**) समृद्ध धनों की रक्षा करो तथा (**अस्य**) इसके (**रायः**) धन की (**चोदय**) प्रेरणा करो जिस कारण (**त्वम्**) आप (**विदाः**) विज्ञानवान् और (**रथीः**) बहुत प्रशंसायुक्त रथ वाले (**असि**) हैं इस कारण से (**तु**) फिर (**नः**) हम लोगों के (**तुचे**) सन्तान के लिये (**गाधम्**) बुद्धि विलोडने की प्रेरणा करो॥९॥

भावार्थः-हे विद्वन्! आप जैसे इन हमारे सन्तानों की बुद्धि के विलोडने से विद्या प्राप्ति हो, वैसे अनुविधान कीजिये तथा जैसे पुरुषार्थी जन धन और ऐश्वर्य की प्राप्ति के लिये प्रेरणा करता है, वैसे ही आप शिक्षा दीजिये॥९॥

पुनर्मनुष्यैः के सत्कर्त्तव्या इत्याह॥

फिर मनुष्यों को कौन सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

पर्षि॑ तो॒कं तन॑यं प॒र्तृभि॒ष्ट्वमद॑ब्धै॒रप्र॑युत्वभिः।

अग्ने॒ हेळां॑सि॒ दैव्या॑ युयोधि॒ नोऽदे॑वानि॒ ह्वरां॑सि च॥ १०॥ २॥

पर्षि॑। तो॒कम्। तन॑यम्। प॒र्तृऽभिः॑। त्वम्। अद॑ब्धैः। अप्र॑युत्वऽभिः। अग्ने॑। हेळां॑सि। दैव्या॑। यु॒यो॒धि॒। नः॒। अदे॑वानि। ह्वरां॑सि। च॥ १०॥

पदार्थः-(**पर्षि**) पालयसि (**तोकम्**) सद्योजातमपत्यम् (**तनयम्**) सुकुमारम् (**पर्तृभिः**) पालकैः (**त्वम्**) (**अदब्धैः**) अहिंसनैः (**अप्रयुत्वभिः**) अविभक्तैः (**अग्ने**) अध्यापक (**हेळांसि**) अनादररूपाणि (**दैव्या**) देवेषु प्रयुक्तानि (**युयोधि**) वियोजय (**नः**) अस्माकम् (**अदेवानि**) अशुद्धानि (**ह्वरांसि**) कुटिलानि कर्माणि (**च**)॥ १०॥

अन्वयः-हे अग्ने! यतस्त्वमप्रयुत्वभिरदब्धैः पर्तृभिर्नस्तोकं तनयं पर्षि। अदेवानि दैव्या हेळांसि ह्वरांसि च युयोधि तस्मात् सत्कर्तव्योऽसि॥ १०॥

भावार्थः-येऽध्यापकोपदेशका अध्यापनोपदेशाभ्यां शुभान् गुणान् ग्राहयित्वा सर्वेषां दोषान्निवारयन्ति त एव सर्वदा सत्कर्त्तव्या भवन्ति॥ १०॥

पदार्थः-हे (**अग्ने**) पढ़ाने वाला! जिस कारण (**त्वम्**) आप (**अप्रयुत्वभिः**) न मिले हुए अर्थात् अलग-अलग विद्यमान (**अदब्धैः**) हिंसारहित (**पर्तृभिः**) पालना करने वाले व्यवहारों से (**नः**) हमारे (**तोकम्**) शीघ्र उत्पन्न हुए सन्तान वा (**तनयम्**) सुन्दर कुमार की (**पर्षि**) पालना करते हो और (**अदेवानि**) अशुद्ध (**दैव्या**) विद्वानों में कहे गये (**हेळांसि**) अनादरों और (**ह्वरांसि**) कुटिल कर्मों को (**च**) भी (**युयोधि**) अलग करते हो, इससे सत्कार करने योग्य हो॥ १०॥

भावार्थः-जो अध्यापक वा उपदेशक पढ़ाने तथा उपदेश करने से शुभ गुणों को ग्रहण करा कर सब के दोषों का निवारण कराते हैं, वे ही सदा सत्कार करने योग्य होते हैं॥ १०॥

केऽत्र सुहृदः सन्तीत्याह॥

कौन इस संसार में मित्र हैं, इस विषय को कहते हैं॥

आ स॑खायः सब॒र्दुघां॑ धे॒नुम॑जध्व॒मुप॒ नव्य॑सा॒ वच॑ः। सृ॒जध्व॒मन॑पस्फुराम्॥

आ। स॒खा॒यः॒। स॒ब॒रऽदुघा॑म्। धे॒नुम्। अ॒ज॒ध्व॒म्। उप॑। नव्य॑सा। वचः॑। सृ॒जध्व॑म्। अन॑पऽस्फुरा॒म्॥ ११॥

पदार्थः-(**आ**) (**सखायः**) सुहृदः (**सबर्दुघाम्**) सर्वकामनाप्रपूरिकाम् (**धेनुम्**) वाचम्। **धेनुरिति वाङ्नाम।** (निघं०१.११) (**अजध्वम्**) प्राप्नुत (**उप**) (**नव्यसा**) अतिशयेन नवीनाध्यापनेनोपदेशेन वा (**वचः**) वचनम् (**सृजध्वम्**) विविधविद्यायुक्तं कुरुत (**अनपस्फुराम्**) निश्चलां दृढाम्॥ ११॥

अन्वयः-हे सखायो! यूयं नव्यसा सबर्दुघामनपस्फुरां धेनुमजध्वम्। वच उपाऽऽसृजध्वम्॥ ११॥

भावार्थः-ये सुहृदो भूत्वा सत्यां सुशिक्षितां वाचं विद्यां च विद्यार्थिनो ग्राहयन्ति ते जगच्छोधका भवन्ति॥ ११॥

पदार्थः-हे **(सखायः)** मित्रवर्गो! तुम **(नव्यसा)** अतीव नवीन पढ़ाने वा उपदेश करने से **(सबर्दुघाम्)** समस्त कामनाओं की पूर्ण करने वाली **(अनपस्फुराम्)** निश्चल दृढ़ **(धेनुम्)** वाणी को **(अजध्वम्)** प्राप्त करिये तथा **(वचः)** अर्थात् वचन को **(उप, आ, सृजध्वम्)** विविध प्रकार की विद्या से युक्त करो॥११॥

भावार्थः-जो सुहृद् होकर सत्य, सुन्दर शिक्षायुक्त वाणी और विद्या को विद्यार्थियों को ग्रहण कराते हैं, वे संसार के शुद्ध करने वाले होते हैं॥११॥

अथ मातरः सन्तानान् सदा शिक्षेरन्नित्याह॥

अब माता जन सन्तानों को सदा शिक्षा देवें, इस विषय को कहते हैं॥

या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत।
या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी॥१२॥

या। शर्धाय। मारुताय। स्वऽभानवे। श्रवः। अमृत्यु। धुक्षत। या। मृळीके। मरुताम्। तुराणाम्। या। सुम्नैः। एवऽयावरी॥१२॥

पदार्थः-(**या**) विद्यासुशिक्षायुक्ता- अध्यापिकोपदेशिका वा **(शर्धाय)** बलाय **(मारुताय)** मरुतां मनुष्याणामस्मै **(स्वभानवे)** स्वकीयप्रज्ञाप्रदीप्तये **(श्रवः)** श्रवणम् **(अमृत्यु)** अविद्यमानं मृत्युभयं यस्मिन् **(धुक्षत)** प्रपूरयेत् **(या)** विदुषी स्त्री **(मृळीके)** सुखकारके व्यवहारे **(मरुताम्)** मनुष्याणाम् **(तुराणाम्)** शीघ्रकारिणाम् **(या)** शिक्षिका **(सुम्नैः)** सुखैः **(एवयावरी)** दुःखनिवारिका॥१२॥

अन्वयः-हे विद्वांसो! या मारुताय स्वभानवे शर्धायामृत्यु श्रवो धुक्षत या मृळीके तुराणां मरुताममृत्यु श्रवो धुक्षत सुम्नैर्यैवयावरी सन्तानाञ्छिक्षितान् करोति सैवाऽत्र माननीया भवति॥१२॥

भावार्थः-ता एव स्त्रियो धन्याः सन्ति याः स्वापत्यानि विद्यासुशिक्षायुक्तानि कर्तुं कारयितुं च सततं प्रयतन्ते॥१२॥

पदार्थः-हे विद्वान् जनो! **(या)** जो विद्या और सुन्दरशिक्षायुक्त विद्या पढ़ाने वा उपदेश करने वाली **(मारुताय)** मनुष्यों के इस **(स्वभानवे)** अपनी विशेष बुद्धि के प्रकाश वा **(शर्धाय)** बल के लिये **(अमृत्यु)** जिसमें मृत्युभय विद्यमान नहीं उस **(श्रवः)** श्रवण को **(धुक्षत)** परिपूर्ण करे वा **(या)** जो विदुषी स्त्री **(मृळीके)** सुख करने वाले व्यवहार में **(तुराणाम्)** शीघ्रकारी **(मरुताम्)** मनुष्यों के बीच मृत्युभय जिसमें नहीं उस श्रवण को परिपूर्ण करे तथा **(सुम्नैः)** सुखों से **(या)** जो शिक्षा करने वा **(एवयावरी)** दुःख निवारण वाली सन्तानों की शिक्षा करती है, वही यहाँ मानने योग्य होती है॥१२॥

भावार्थः-वे ही स्त्रियाँ धन्य हैं, जो अपने सन्तानों को विद्या और सुन्दर शिक्षायुक्त करने व कराने को निरन्तर प्रयत्न करती हैं॥१२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

भरद्वाजायाव धुक्षत द्विता। धेनुं च विश्वदोहसमिषं च विश्वभोजसम्॥ १३॥

भरत्ऽवाजाय। अव। धुक्षत। द्विता। धेनुम्। च। विश्वऽदोहसम्। इषम्। च। विश्वऽभोजसम्॥ १३॥

पदार्थः-(**भरद्वाजाय**) धृतविज्ञानाय (**अव**) (**धुक्षत**) अलङ्कुरुते (**द्विता**) द्वयोर्भावः (**धेनुम्**) विद्यायुक्तां वाचम् (**च**) (**विश्वदोहसम्**) विश्वं सर्वविज्ञानान् दोग्धि यया ताम् (**इषम्**) अन्नं विज्ञानं वा (**च**) (**विश्वभोजसम्**) विश्वस्य समग्रस्य जनस्य पालकम्॥ १३॥

अन्वयः-या विदुषी माता भरद्वाजाय विश्वदोहसं धेनुमवधुक्षत विश्वभोजसमिषं चावधुक्षत सा द्विता चानया प्रचारिण्या क्रियया भवति॥ १३॥

भावार्थः-याः स्त्रियः सत्यभाषणान्वितां वाचं सर्वोत्तमां सत्यां विद्यां च सन्तानेभ्यः प्रयच्छन्ति ता एव देव्यो बहुमान्या भवन्ति॥ १३॥

पदार्थः-जो विदुषी माता (**भरद्वाजाय**) जिसने विज्ञान धारण किया उसके लिये (**विश्वदोहसम्**) जिससे समस्त विज्ञान को पूर्ण करती उस (**धेनुम्**) विद्या युक्त वाणी को (**अव, धुक्षत**) परिपूर्ण करती है और (**विश्वभोजसम्**) समस्त मनुष्यमात्र के पालक (**इषम्**) अन्न वा विज्ञान को (**च**) भी परिपूर्ण करती है वह (**द्विता**) दोनों विज्ञान वा अन्न की चेष्टा वाली (**च**) भी इस प्रचारिणी क्रिया से होती है॥ १३॥

भावार्थः-जो स्त्रीजन सत्यभाषणयुक्त वाणी और सर्वोत्तम सत्य विद्या को सन्तानों के लिये देती हैं, वे ही देवी विदुषी स्त्रियाँ बहुत मान करने के योग्य होती हैं॥ १३॥

पुनर्मनुष्याः कं प्रशंसेयुरित्याह॥

फिर मनुष्य किसकी प्रशंसा करें, इस विषय को कहते हैं॥

तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम्।
अर्यमणं न मन्द्रं सुप्रभोजसं विष्णुं न स्तुष आदिशे॥ १४॥

तम्। वः। इन्द्रम्। न। सुऽक्रतुम्। वरुणम्ऽइव। मायिनम्। अर्यमणम्। न। मन्द्रम्। सुप्रऽभोजसम्। विष्णुम्। न। स्तुषे। आऽआदिशे॥ १४॥

पदार्थः-(**तम्**) विद्वांसम् (**वः**) युष्मदर्थम् (**इन्द्रम्**) विद्युद्वत्तीव्रबुद्धिम् (**न**) इव (**सुक्रतुम्**) उत्तमप्रज्ञम् (**वरुणमिव**) पाशैर्बन्धकं व्याधमिव (**मायिनम्**) कुत्सितप्रज्ञम् (**अर्यमणम्**) न्यायेशम् (**न**) इव (**मन्द्रम्**) आनन्दप्रदम् (**सुप्रभोजसम्**) प्राप्तानां पालकं (**विष्णुम्**) व्यापकं जगदीश्वरम् (**न**) इव (**स्तुषे**) प्रशंससि (**आदिशे**) आज्ञापालनाय॥ १४॥

अन्वयः-हे विद्वंस्त्वं यममिमिन्द्रं न सुक्रतुं वरुणिव मायिनमर्यमणं न मन्द्रं विष्णुं सुप्रभोजसं स्तुषे तं व आदिशेऽहं प्रशंसामि॥ १४॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सूर्यवद्विद्याप्रकाशकं व्याधवद् दुष्टहिंसकमाप्तवन्न्यायकारिणमीश्वरवत्सर्वपालकं सत्योपदेष्टारं धर्मकारिणं नरं प्रशंसन्ति त एवाऽत्र परीक्षकाः सन्ति॥१४॥

पदार्थः-हे विद्वन्! आप जिस इस **(इन्द्रम्)** बिजुली के समान तीव्रबुद्धि के **(न)** समान **(सुक्रतुम्)** उत्तम बुद्धि वाले **(वरुणस्य)** वरुण के समान **(मायिनम्)** कुत्सित बुद्धि वाले वा **(अर्यमणम्)** न्यायाधिपति के **(न)** समान **(मन्द्रम्)** आनन्द देने वाले **(विष्णुम्)** व्यापक जगदीश्वर के **(न)** समान **(सृप्रभोजसम्)** प्राप्त हुए पदार्थों के पालने की **(स्तुषे)** प्रशंसा करते हैं **(तम्)** उसको **(वः)** तुम लोगों के लिये **(आदिशे)** आज्ञा पालन के अर्थ मैं उसकी प्रशंसा करता हूँ॥१४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सूर्य्य के समान विद्याप्रकाशक, व्याध के समान दुष्टों के मारने वाले, आप्त विद्वान् के समान न्याय के करने वाले, ईश्वर के समान सर्व के पालने वाले, सत्य के उपदेश करने वाले तथा धर्म करने वाले मनुष्य की प्रशंसा करते हैं, वे ही इस संसार में परीक्षा करने वाले होते हैं॥१४॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानोंको क्या करना चाहिये, इस विषय को कहते हैं॥

त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता।
सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळहा वसू करत्सुवेदा नो वसू करत्॥१५॥

त्वेषम्। शर्धः। न। मारुतम्। तुविऽस्वनि। अनर्वाणम्। पूषणम्। सम्। यथा। शता। सम्। सहस्रा। कारिषत्। चर्षणिऽभ्यः। आ। आविः। गूळहा। वसू। करत्। सुऽवेदा। नः। वसू। करत्॥१५॥

पदार्थः-(**त्वेषम्**) दीप्तिमत् (**शर्धः**) बलम् (**न**) इव (**मारुतम्**) मनुष्याणामिदम् (**तुविष्वणि**) बहुस्वनम् (**अनर्वाणम्**) अविद्यमानाश्वम् (**पूषणम्**) पुष्टिकरम् (**सम्**) (**यथा**) (**शता**) शतानि (**सम्**) सम्यक् (**सहस्रा**) सहस्राणि (**कारिषत्**) कुर्यात् (**चर्षणिभ्यः**) मनुष्येभ्यः (**आ**) समन्तात् (**आविः**) प्राकट्ये (**गूळहा**) गुप्तानि (**वसू**) धनानि। अत्र **संहितायामिति** दीर्घः। (**करत्**) कुर्यात् (**सुवेदा**) शोभनं विज्ञानं यस्य सः (**नः**) अस्मभ्यम् (**वसू**) विज्ञानानि धनानि वा (**करत्**) कुर्यात्॥१५॥

अन्वयः-हे विद्वांसो! यथा सुवेदा नस्त्वेषं तुविष्वणि मारुतं शर्धो नानर्वाणं पूषणं करत् यथा चर्षणिभ्यः शता सहस्रा गूळहा वस्वा सं कारिषद् गूळहा वस्वा समाविष्करत्तथैतानि यूयं कुरुत॥१५॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा विद्वांसो विज्ञानदानेन गुप्ता विद्या युष्मदर्थं प्रकटीकुर्वन्ति युष्माकं शरीरात्मबलं च वर्धयन्ति तथैतान् यूयं वर्धयत॥१५॥

पदार्थः-हे विद्वानो! **(यथा)** जैसे **(सुवेदा)** सुशोभित विज्ञान जिसका वह **(नः)** हम लोगों के लिये **(त्वेषम्)** दीप्तिमत् **(तुविष्वणि)** बहुत शब्दों वाले **(मारुतम्)** मनुष्य सम्बन्धी **(शर्धः)** बल के **(न)** समान **(अनर्वाणम्)** अविद्यमान हैं अश्व जिसमें उस पदार्थ को **(पूषणम्)** पुष्टि करने वाला **(करत्)** करे

वा जैसे **(चर्षणिभ्यः)** मनुष्यों के लिये **(शता)** सैकड़ों वा **(सहस्रा)** सहस्रों **(गूळ्हा)** गुप्त **(वसू)** धनों को **(आ, सम्, कारिषत्)** सब ओर अच्छे प्रकार सिद्ध करे और गुप्त **(वसू)** विज्ञान वा धनों को **(सम्, आविष्करत्)** प्रकट करे, वैसे इनको आप करें॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन विज्ञानदान से गुप्त विद्याओं को तुम्हारे लिये प्रकट करते हैं और आपके शारीरिक और आत्मिक बल को बढ़ाते हैं, वैसे इनको तुम बढ़ाओ॥१५॥

पुनर्मनुष्याः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य परस्पर कैसे वर्त्तें, इस विषय को कहते हैं॥

आ मा॑ पू॒ष॒न्नुप॑ द्र॒व॒ शंसि॑षं॒ नु ते॑ अपिक॒र्ण आ॑घृणे।
अ॒घा अ॒र्यो अरा॑तयः॥ १६॥ ३॥

आ। मा॒। पू॒ष॒न्। उप॑। द्र॒व॒। शंसि॑षम्। नु। ते॒। अ॒पि॒ऽक॒र्णे। आ॒घृ॒णे॒। अ॒घाः। अ॒र्यः। अरा॑तयः॥ १६॥

पदार्थः-(**आ**) समन्तात् (**मा**) माम् (**पूषन्**) पुष्टिकर्त्तः (**उप**) (**द्रव**) समीपमागच्छ (**शंसिषम्**) प्रशंसेयम् (**नु**) सद्यः (**ते**) तव (**अपिकर्णे**) आच्छादितश्रोत्रे (**आघृणे**) सर्वतो दीप्तिमान् (**अघाः**) हन्याः (**अर्यः**) स्वामी सन् (**अरातयः**) अदातारः॥१६॥

अन्वयः-हे पूषन्नाघृणे! यस्य तेऽपिकर्णेऽहं नु सत्यं शंसिषं सोऽर्यस्त्वमा मा मामुप द्रव य अरातयः स्युस्तान्नु अघाः॥१६॥

भावार्थः-हे पालनीय जन! त्वं रक्षार्थं मत्सन्निधिमागच्छाऽहञ्च सत्योपदेशेन विचक्षणं कुर्यां वयं सर्वे मिलित्वा दुष्टान् विनाशयेम॥१६॥

पदार्थः-हे (**पूषन्**) पुष्टि करने वाले (**आघृणे**) सब ओर से प्रकाशमान! जिन (**ते**) आपके (**अपिकर्णे**) ढंपे हुए कर्ण में मैं (**नु**) शीघ्र सत्य की (**शंसिषम्**) प्रशंसा करूं सो (**अर्यः**) स्वामी हुए आप (**आ**) सब ओर से (**मा**) मेरे (**उप, द्रव**) समीप आओ और जो (**अरातयः**) न देने वाले जन हों उन्हें शीघ्र (**अघाः**) हनिये अर्थात् मारिये॥१६॥

भावार्थः-हे पालनीय जन! आप रक्षा के लिये मेरे समीप आओ, मैं सत्योपदेश से तुम्हें विचक्षण करूँ तथा हम सब लोग मिल के दुष्टों का विनाश करें॥१६॥

मनुष्यैः किं न कर्त्तव्यमित्याह॥

मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

मा का॑कु॒बीर॒मुद् व॑ृहो॒ वन॒स्पति॒मश॑स्ती॒र्वि हि नी॑न॒शः।
मोत सू॒रो॒ अह॑ ए॒वा च॒न ग्री॒वा आ॒दध॑ते॒ वेः॥ १७॥

मा। काकंबीरम्। उत्। वृहः। वनस्पतिम्। अशस्तीः। वि। हि। नीनशः। मा। उत। सूरः। अहरिति। एव। चन। ग्रीवाः। आऽदधते। वेरिति। वेः॥१७॥

पदार्थः-(**मा**) निषेधे (**काकंबीरम्**) काकानां गोपकम् (**उत्**) (**वृहः**) उच्छेदयेः (**वनस्पतिम्**) वटादिकम् (**अशस्तीः**) अप्रशंसिताः (**वि**) (**हि**) खलु (**नीनशः**) भृशं नाशयेः (**मा**) (**उत**) (**सूरः**) सूर्यः (**अहः**) दिनम् (**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**चन**) अपि (**ग्रीवाः**) कण्ठान् (**आदधते**) समन्ताद् धरन्ति (**वेः**) पक्षिणः॥१७॥

अन्वयः-हे विद्वंस्त्वं काकंबीरं वनस्पतिं मोद्वृहोऽशस्तीर्हि वि नीनशः सूरोऽहरेवा यथा वेग्रींवाश्चनाऽऽदधते तथोतास्मान् मा पीडय॥१७॥

भावार्थः-केनापि मनुष्येण श्रेष्ठा वृक्षा वनस्पतयो वा नो हिंसनीया एतत्स्थान् दोषान्निवार्योत्तमाः सम्पादनीयाः, हे मनुष्य! यथा श्येनेन पक्षिणां ग्रीवा गृह्यन्ते तथा कञ्चिदपि मा दुःखय॥१७॥

पदार्थः-हे विद्वन्! आप (**काकंबीरम्**) कौओं की पुष्टि करने वाले (**वनस्पतिम्**) वट आदि वृक्ष को (**मा, उत, वृहः**) मत उच्छिन्न करो तथा (**अशस्तीः**) और अप्रशंसित (**हि**) ही कर्मों की (**वि, नीनशः**) विशेषता से निरन्तर नाश करो और (**सूरः**) सूर्य (**अहः, एवा**) दिन में ही जैसे (**वेः**) पक्षी के (**ग्रीवाः**) कण्ठों को (**चन**) निश्चय से (**आदधते**) अच्छे प्रकार धारण करते हैं, वैसे (**उत**) तो हम लोगों को (**मा**) मत पीड़ा देओ॥१७॥

भावार्थः-किसी मनुष्य को श्रेष्ठ वृक्ष वा वनस्पति न नष्ट करने चाहियें, किन्तु इनमें जो दोष हों, उनको निवारण करके इन्हें उत्तम सिद्ध करने चाहियें, हे मनुष्य! जैसे श्येन वाज पक्षी और पखेरूओं की गर्दनें पकड़ घोटता है, वैसे किसी को दुःख न देओ॥१७॥

केषां मित्रत्वं न नश्यतीत्याह॥

किन की मित्रता नहीं नष्ट होती है, इस विषय को कहते हैं॥

दृतेरिव तेऽवृकमस्तु सख्यम्। अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः॥१८॥

दृतेःऽइव। ते। अवृकम्। अस्तु। सख्यम्। अच्छिद्रस्य। दधन्ऽवतः। सुऽपूर्णस्य। दधन्ऽवतः॥१८॥

पदार्थः-(**दृतेरिव**) मेघस्येव। **दृतिरिति मेघनाम।** (निघं०१.१०) (**ते**) तव (**अवृकम्**) अचौर्यम् (**अस्तु**) (**सख्यम्**) मित्रत्वम् (**अच्छिद्रस्य**) अखण्डितस्य (**दधन्वतः**) दृढत्वेन धर्तुः (**सुपूर्णस्य**) सुष्ठ्वलंजातस्य (**दधन्वतः**) विद्याशुभगुणधर्त्तॄणां धारकस्य॥१८॥

अन्वयः-हे विद्वन्नच्छिद्रस्य दधन्वतो दृतेरिव सुपूर्णस्य दधन्वतस्तेऽवृकं सख्यमस्तु॥१८॥

भावार्थः-अत्रोपमालङ्कारः। यथा मेघभूम्योर्मित्रवद्व्यवहारोऽस्ति तथैव धार्मिकाणां विदुषां मित्रताऽजराऽमरा वर्त्तते॥१८॥

पदार्थः-हे विद्वन्! **(अच्छिद्रस्य)** अखण्डित और **(दधन्वतः)** दृढ़ता से धारण करने वालों को धारण करने वाले **(ते)** तुम्हारी **(अवृकम्)** चोरी से रहित **(सख्यम्)** मित्रता **(अस्तु)** हो॥१८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे मेघ और भूमि का मित्रवत् व्यवहार है, वैसे ही धार्मिक विद्वानों की मित्रता अजर-अमर वर्त्तमान है॥१८॥

मनुष्यैः कीदृशैर्भवतिव्यमित्याह॥

मनुष्यों को कैसा होना चाहिये, इस विषय को कहते हैं॥

परो हि मर्त्यैरसि समो देवैरुत श्रिया।

अभि ख्यः पूषन् पृतनासु नस्त्वमवा नूनं यथा पुरा॥१९॥

परः। हि। मर्त्यैः। असि। समः। देवैः। उत। श्रिया। अभि। ख्यः। पूषन्। पृतनासु। नः। त्वम्। अव। नूनम्। यथा। पुरा॥१९॥

पदार्थः-**(परः)** उत्कृष्टः **(हि)** यतः **(मर्त्यैः)** मनुष्यैः सह **(असि)** **(समः)** तुल्यः **(देवैः)** विद्वद्भिः **(उत)** अपि **(श्रिया)** लक्ष्म्या **(अभि)** **(ख्यः)** प्रकथयसि **(पूषन्)** पुष्टिकर्त्तः **(पृतनासु)** मनुष्यसेनासु **(नः)** अस्माकम् **(त्वम्)** **(अवा)** अत्र **निपातस्य चे**ति दीर्घः। **(नूनम्)** निश्चितम् **(यथा)** **(पुरा)**॥१९॥

अन्वयः-हे पूषन्! यथा हि पुरा त्वं नः पृतनास्वभि ख्यस्तथा नूनं मर्त्यैर्देवैरुत श्रिया सह परः समोऽस्यतोऽवा॥१९॥

भावार्थः-यो विद्वद्भिस्तुल्यः स विद्वान् यो मनुष्यैः सदृशः स मध्यमो य पशुभिस्सदृशः सोऽधमो मनुष्योऽस्तीति सर्वे जानन्तु॥१९॥

पदार्थः-हे **(पूषन्)** पुष्टि करने वाले! **(यथा)** जैसे **(हि)** जिस कारण **(पुरा)** पहिले **(त्वम्)** आप **(नः)** हमारी **(पृतनासु)** मनुष्य सेनाओं में **(अभि, ख्यः)** सब ओर से अच्छे प्रकार कथन करते हैं, वैसे **(नूनम्)** निश्चित **(मर्त्यैः)** साधारण मनुष्य वा **(देवैः)** विद्वान् **(उत)** और **(श्रिया)** लक्ष्मी के साथ **(परः)** उत्कृष्ट अत्युत्तम वा **(समः)** समान **(असि)** हैं इससे **(अवा)** रक्षा कीजिये॥१९॥

भावार्थः-जो विद्वानों के तुल्य है वह विद्वान्, जो मनुष्यों के तुल्य है वह मध्यम, और जो पशुओं के तुल्य है वह अधम मनुष्य है, इसको सब जानें॥१९॥

पुनर्मनुष्यैः कीदृशी नीतिर्धार्येत्याह॥

फिर मनुष्यों को कैसी नीति धारण करनी चाहिये, इस विषय को कहते हैं॥

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता।

देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः॥२०॥

वा॒मी। वा॒मस्य॑। धू॒त॒यः॒। प्र॒ऽनी॒तिः॒। अ॒स्तु॒। सू॒नृ॒ता॑। दे॒वस्य॑। वा॒। म॒रु॒तः॒। मर्त्य॑स्य। वा॒। ई॒जा॒नस्य॑। प्र॒ऽय॒ज्य॒वः॒॥ २०॥

पदार्थः-(**वामी**) बहुप्रशस्तकर्मा (**वामस्य**) प्रशस्यस्य (**धूतयः**) कंपयितारः (**प्रणीतिः**) प्रकृष्टा नीतिः (**अस्तु**) (**सूनृता**) सत्यभाषणादियुक्ता (**देवस्य**) विदुषः (**वा**) (**मरुतः**) मरणधर्मस्य (**मर्त्यस्य**) साधारणमनुष्यस्य (**वा**) (**ईजानस्य**) यज्ञकर्तुः (**प्रयज्यवः**) प्रकर्षेण यज्ञसम्पादकाः॥ २०॥

अन्वयः-हे धूतयः प्रयज्यवो! युष्मासु वामस्य वामी देवस्य वा मरुत ईजानस्य वा मर्त्यस्य सूनृता प्रणीतिरस्तु॥ २०॥

भावार्थः-आप्तो राजाऽमात्यानुपदिशेत् भवन्तो न्यायकारिणो धर्मात्मानो भूत्वा पुत्रवत्प्रजाः पालयन्त्विति॥ २०॥

पदार्थः-हे (**धूतयः**) कम्पन कराने वाले (**प्रयज्यवः**) उत्तमता से यज्ञसम्पादको! तुम में (**वामस्य**) प्रशंसा करने योग्य का सम्बन्धी (**वामी**) बहुत प्रशंसित कर्मकर्ता और (**देवस्य**) विद्वान् की (**वा**) वा (**मरुतः**) मरणधर्मा तथा (**ईजानस्य**) यज्ञकर्त्ता (**वा**) वा (**मर्त्यस्य**) साधारण मनुष्य की (**सूनृता**) सत्यभाषणादि युक्त (**प्रणीतिः**) उत्तम नीति (**अस्तु**) हो॥ २०॥

भावार्थः-आप्त राजा मन्त्रियों को उपदेश देवे कि-आप लोग न्यायकारी तथा धर्मात्मा होकर पुत्र के समान प्रजाजनों को पालें॥ २०॥

कस्य राज्ञः पुण्यकीर्त्तिर्जायत इत्याह॥

किस राजा की पुण्यरूप कीर्त्ति होती है, इस विषय को कहते हैं॥

स॒द्यश्चि॒द्यस्य॑ चर्कृ॒तिः परि॒ द्यां दे॒वो नैति॒ सूर्यः॑।
त्वे॒षं शवो॑ दधिरे॒ नाम॑ य॒ज्ञिय॑म॒रुतो॑ वृ॒त्र॒हं शवो॒ ज्येष्ठं॑ वृत्र॒हं॑ शवः॑॥ २१॥

स॒द्यः। चि॒त्। यस्य॑। च॒र्कृ॒तिः। परि॑। द्याम्। दे॒वः। न। एति॑। सूर्यः॑। त्वे॒षम्। शवः॑। द॒धि॒रे। नाम॑। य॒ज्ञिय॑म्। म॒रुतः॑। वृ॒त्र॒ऽहम्। शवः॑। ज्येष्ठ॑म्। वृ॒त्र॒ऽहम्। शवः॑॥ २१॥

पदार्थः-(**सद्यः**) (**चित्**) अपि (**यस्य**) (**चर्कृतिः**) भृशमुत्तमा क्रिया (**परि**) सर्वतः (**द्याम्**) प्रकाशम् (**देवः**) देदीप्यमानः (**न**) इव (**एति**) प्राप्नोति गच्छति वा (**सूर्यः**) सविता (**त्वेषम्**) देदीप्यमानम् (**शवः**) बलम् (**दधिरे**) दधति (**नाम**) संज्ञाम् (**यज्ञियम्**) यज्ञसम्पादकम् (**मरुतः**) मनुष्याः (**वृत्रहम्**) शत्रुनाशकम् (**शवः**) बलम् (**ज्येष्ठम्**) प्रवृद्धम् (**वृत्रहम्**) धनप्रापकम् (**शवः**) बलम्॥ २१॥

अन्वयः-यस्य राज्ञश्चर्कृतिर्देवः सूर्यो द्यां न सद्यो विनयं पर्य्येति यस्य मरुतस्त्वेषं नाम यज्ञियं शवो दधिरे वृत्रहं शवो ज्येष्ठं वृत्रहं शवश्चिद्दधिरे तस्य सर्वत्रैव विजयो सूर्य्यवत् कीर्तिः प्रसरति॥ २१॥

भावार्थः-यो राजा विद्याविनययुक्तः पुरुषार्थी दृढप्रतिज्ञो जितेन्द्रियो धार्मिकः सत्यवादी सन् धार्मिकान् विदुषोऽधिकारे संस्थाप्य पुत्रवत्प्रजाः पालयति तस्याऽत्र जगति सूर्य्यवत् कीर्तिः प्रसरति॥ २१॥

पदार्थः-(यस्य) जिस राजा की **(चर्कृतिः)** निरन्तर उत्तम क्रिया **(देवः)** देदीप्यमान **(सूर्यः)** सविता और **(द्याम्)** प्रकाश के **(न)** समान **(सद्यः)** शीघ्र विनय को **(परि, एति)** सब ओर से प्राप्त होती वा जिसके **(मरुतः)** प्रजा जन **(त्वेषम्)** देदीप्यमान **(नाम)** संज्ञा **(यज्ञियम्)** यज्ञ सम्पादक और **(शवः)** बल को **(दधिरे)** धारण करते हैं वा **(वृत्रहम्)** शत्रुओं के नाश करने वाले **(शवः)** बल वा **(ज्येष्ठम्)** प्रशंसित **(वृत्रहम्)** धन प्राप्त करने वाले **(शवः, चित्)** बल को भी धारण करते हैं, उसका सर्वत्र विजय होता है॥२१॥

भावार्थः-जो राजा विद्या और विनय से युक्त, पुरुषार्थी, दृढप्रतिज्ञा करने वाला, जितेन्द्रिय, धार्मिक, सत्यवादी होकर धार्म्मिक विद्वानों को अधिकार में संस्थापन कर पुत्र के समान प्रजाजनों को पालता है, उसकी इस जगत् में सूर्य्य के समान कीर्ति फैलती है॥२१॥

अथ प्रजाकृत्यमाह॥

अब प्रजा के कृत्य को कहते हैं॥

सकृद्ध द्यौरजायत सकृद्भूमिरजायत।

पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते॥२२॥४॥

सकृत्। ह। द्यौः। अजायत। सकृत्। भूमिः। अजायत। पृश्न्याः। दुग्धम्। सकृत्। पयः। तत्। अन्यः। न। अनु। जायते॥२२॥

पदार्थः-**(सकृत्)** एकवारम् **(ह)** खलु **(द्यौः)** सूर्यः **(अजायत)** जायते **(सकृत्)** एकवारम् **(भूमिः)** **(अजायत)** जायते **(पृश्न्याः)** अन्तरिक्षे भवाः सृष्टयः **(दुग्धम्)** **(सकृत्)** **(पयः)** उदकम् **(तत्)** तस्मात् **(अन्यः)** भिन्नः **(न)** **(अनु)** **(जायते)**॥२२॥

अन्वयः-हे मनुष्या! यथा ह द्यौः सकृदजायत भूमिः सकृदजायत पृश्न्याः सकृज्जायन्ते दुग्धं पयश्च सकृज्जायते तदन्यो नानु जायते तथैव यूयं विजानीत॥२२॥

भावार्थः-हे विद्वांसो! येनेश्वरेण सूर्यादिकं जगद्युगपदुत्पाद्यते स एतया सृष्ट्या सह न जायतेऽस्या भिन्नः सन् सर्वं सद्यो जनयति तमेव यूयं ध्यायतेति॥२२॥

अत्राग्निमरुत्पूषन्पृश्निसूर्य्यभूमिविद्वद्राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टचत्वारिंशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे **(ह)** निश्चय के साथ **(द्यौः)** सूर्य **(सकृत्)** एक वार **(अजायत)** उत्पन्न होता है तथा **(भूमिः)** भूमि **(सकृत्)** एक वार **(अजायत)** उत्पन्न होती है और **(पृश्न्याः)** अन्तरिक्ष में उत्पन्न होने वाली सृष्टियाँ **(सकृत्)** एक वार उत्पन्न होती हैं तथा **(दुग्धम्)** दूध और **(पयः)** जल एक वार उत्पन्न होता है **(तत्)** उससे **(अन्यः)** और **(न)** नहीं **(अनु, जायते)** अनुकरण करता, वैसे तुम जानो॥२२॥

भावार्थः-हे विद्वानो! जिस ईश्वर ने सूर्य आदि जगत् एक वार उत्पन्न किया वह इस सृष्टि के साथ नहीं उत्पन्न होता, किन्तु इस सृष्टि से भिन्न अर्थात् भेद को प्राप्त होकर सबको शीघ्र उत्पन्न करता है, उसी का ध्यान तुम लोग करो॥२२॥

इस सूक्त में अग्नि, मरुत्, पूषा, पृश्नि, सूर्य, भूमि, विद्वान्, राजा और प्रजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ ही इससे पूर्व सूक्त के अर्थ के साथ संङ्गति जाननी चाहिये॥

यह अड़तालीसवां सूक्त और चतुर्थ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्यैकोनपञ्चाशत्तमस्य सूक्तस्य ऋजिष्वा ऋषिः। विश्वेदेवा देवताः। १, ३,४, १०, ११ त्रिष्टुप्। ५, ६,९, १३ निचृत्त्रिष्टुप्। ८, १२ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। २, १४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७ ब्राह्म्युष्णिक् छन्दः। ऋषभः स्वरः। १५ अतिजगती छन्दः। निषादः स्वरः॥

अथ मनुष्याः किं कुर्य्युरित्याह॥

अब पन्द्रह ऋचावाले उनचासवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्य क्या करें, इस विषय को कहते हैं॥

स्तुषे जनं॑ सुव्र॒तं नव्य॑सीभिर्गी॒र्भिर्मि॒त्रावरु॑णा सुम्न॒यन्ता॑।
त आ ग॑मन्तु त इ॒ह श्रु॑वन्तु सुक्षत्रा॒सो॒ वरु॑णो मि॒त्रो अ॒ग्निः॥ १॥

स्तु॒षे। जन॑म्। सु॒ऽव्र॒तम्। नव्य॑सीभिः। गी॒ःऽभिः। मि॒त्राऽवरु॑णा। सु॒म्न॒ऽयन्ता॑। ते। आ। ग॒म॒न्तु॒। ते। इ॒ह। श्रु॒व॒न्तु॒। सु॒ऽक्ष॒त्रास॑ः। वरु॑णः। मि॒त्रः। अ॒ग्निः॥ १॥

पदार्थः-(**स्तुषे**) स्तौमि (**जनम्**) मनुष्यम् (**सुव्रतम्**) शोभनानि व्रतानि कर्माणि यस्य तम् (**नव्यसीभिः**) अतिशयेन नवीनाभिः (**गीर्भिः**) सद्यः सुशिक्षिताभिः वाग्भिः (**मित्रावरुणा**) प्राणोदानाविवाध्यापकोपदेशकौ (**सुम्नयन्ता**) सुखं प्रापयन्तौ (**ते**) (**आ**) (**गमन्तु**) आगच्छन्तु (**ते**) (**इह**) (**श्रुवन्तु**) शृण्वन्तु (**सुक्षत्रासः**) शोभनं क्षत्रं राष्ट्रं धनं वा येषान्ते (**वरुणः**) श्रेष्ठः (**मित्रः**) सखा (**अग्निः**) अग्निरिव तेजस्वी॥ १॥

अन्वयः-हे विद्वांसो! नव्यसीभिर्गीर्भिः सुव्रतं जनं सुम्नयन्ता मित्रावरुणा चाऽहं स्तुषे। ये मित्रो वरुणोऽग्निः सुक्षत्रासो वर्त्तन्ते ते इहाऽऽगमन्तु ते श्रुवन्तु॥ १॥

भावार्थः-हे मनुष्या! ये युष्मान्नवीनां नवीनां विद्यामुपदिशन्ति तानाहूय सङ्गत्य तेभ्यः श्रुत्वा विद्याः प्राप्नुत॥ १॥

पदार्थः-हे विद्वानो! (**नव्यसीभिः**) अतीव नवीन (**गीर्भिः**) शीघ्र सुशिक्षित वाणियों से (**सुव्रतम्**) जिसके शुभ व्रत अर्थात् कर्म हैं उस (**जनम्**) मनुष्य की और (**सुम्नयन्ता**) सुख प्राप्ति कराने वाले (**मित्रावरुणा**) प्राण और उदान के समान पढ़ाने और उपदेश करने वाले की मैं (**स्तुषे**) स्तुति करता हूँ तथा जो (**मित्रः**) मित्र (**वरुणः**) श्रेष्ठ (**अग्निः**) अग्नि के समान तेजस्वी और (**सुक्षत्रासः**) जिनका सुन्दर राज्य वा धन है ऐसे वर्त्तमान हैं (**ते**) वे (**इह**) यहाँ (**आ, गमन्तु**) आवें और (**ते**) वे (**श्रुवन्तु**) श्रवण करें॥ १॥

भावार्थः-हे मनुष्यो! जो तुमको नवीन-नवीन विद्या का उपदेश करते हैं, उनको बुलाकर वा उनसे मेलकर उनसे सुनकर विद्याओं को प्राप्त होओ॥ १॥

पुनर्मनुष्याः कं स्तूयुरित्याह॥

फिर मनुष्य किसकी स्तुति करें, इस विषय को कहते हैं॥

विशोविशꣳ ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः।

दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै॥ २॥

विशःऽविशः। ईड्यम्। अध्वरेषु अदृप्तऽक्रतुम्। अरतिम्। युवत्योः। दिवः। शिशुम्। सहसः। सूनुम्। अग्निम्। यज्ञस्य। केतुम्। अरुषम्। यजध्यै॥ २॥

पदार्थः-(**विशोविशः**) प्रजायाः प्रजाया मध्ये (**ईड्यम्**) स्तोतुमर्हम् (**अध्वरेषु**) अहिंसनीयेषु व्यवहारेषु (**अदृप्तक्रतुम्**) अमोहितप्रज्ञम् (**अरतिम्**) विषयेष्वरममाणम् (**युवत्योः**) युवावस्थां प्राप्तयोः स्त्रीपुरुषयोः (**दिवः**) कमनीयस्य (**शिशुम्**) बालकम् (**सहसः**) बलवतः (**सूनुम्**) (**अग्निम्**) पावकमिव वर्त्तमानम् (**यज्ञस्य**) (**केतुम्**) प्रज्ञापकम् (**अरुषम्**) आरक्तगुणम् (**यजध्यै**) यष्टुं सङ्गन्तुम्॥ २॥

अन्वयः-हे मनुष्या! अध्वरेषु विशोविशो मध्येऽरतिमदृप्तक्रतुमीड्यं युवत्योर्दिवः शिशुं सहसस्सूनुमग्निमिव वर्त्तमानमरुषं यज्ञस्य केतुं यजध्यै स्तुवन्तु॥ २॥

भावार्थः-हे मनुष्या! यो ब्रह्मचर्य्येण युवावस्थां प्राप्तयोः स्त्रीपुरुषयोरुत्तमाद् बलाज्जातोऽग्निरिव तेजस्वी भवेत्तमेव राजानमधिकारिणं वा कुरुत॥ २॥

पदार्थः-हे मनुष्यो! (**अध्वरेषु**) अहिंसनीय व्यवहारों में (**विशोविशः**) प्रजा-प्रजा के बीच (**अरतिम्**) विषयों में विना रमते हुए (**अदृप्तक्रतुम्**) जिसकी बुद्धि मोहित नहीं हुई उस (**ईड्यम्**) स्तुति करने योग्य (**युवत्योः**) युवावस्था को प्राप्त हुए स्त्री-पुरुष के (**दिवः**) मनोहर व्यवहारसम्बन्धी (**शिशुम्**) बालक की (**सहसः**) वा बलवान् के (**सूनुम्**) उस पुत्र की जो (**अग्निम्**) अग्नि के समान वर्त्तमान तथा (**अरुषम्**) कुछ लाल रंग युक्त और (**यज्ञस्य**) यज्ञादि कर्म का (**केतुम्**) अच्छे प्रकार समझाने वाला है (**यजध्यै**) सङ्ग करने के लिये स्तुति करो॥ २॥

भावार्थः-हे मनुष्यो! जो ब्रह्मचर्य्य से युवा अवस्था को प्राप्त स्त्री-पुरुषों के उत्तम बल से उत्पन्न, अग्नि के समान तेजस्वी हो, उसको राजा वा अधिकारी करो॥ २॥

अथ स्त्रीपुरुषौ कीदृशौ भूत्वा कथं वर्त्तेयातामित्याह॥

अब स्त्री-पुरुष कैसे होकर कैसे वर्त्ताव करें, इस विषय को कहते हैं॥

अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या।

मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने॥ ३॥

अरुषस्य। दुहितरा। विरूपे इति विऽरूपे। स्तृऽभिः। अन्या। पिपिशे। सूरः। अन्या। मिथः।ऽतुरा। विचरन्ती इति विऽचरन्ती। पावके इति। मन्म। श्रुतम्। नक्षतः। ऋच्यमाने इति॥ ३॥

पदार्थः-(**अरुषस्य**) आरक्तगुणस्याग्नेः (**दुहितरा**) कन्ये इव वर्त्तमाने (**विरूपे**) विविधरूपे विरुद्धरूपे वाऽहोरात्रे (**स्तृभिः**) नक्षत्रादिभिः (**अन्या**) द्वयोर्भिन्ना (**पिपिशे**) पिनष्ट्यवयव इव वर्त्तते (**सूरः**) सूर्य्यः (**अन्या**) दिनाख्या (**मिथस्तुरा**) मिथो हिंसके (**विचरन्ती**) विविधगत्या प्राप्नुवन्ती (**पावके**) पवित्रे (**मन्म**) विज्ञानम् (**श्रुतम्**) (**नक्षतः**) व्याप्नुतः (**ऋच्यमाने**) स्तूयमाने॥३॥

अन्वयः-हे स्त्रीपुरुषौ राजप्रजे वा! यथाऽरुषस्य विरूपे मिथस्तुरा विचरन्ती ऋच्यमाने पावके दुहितरेव वर्त्तते तयोरन्या रात्रिः स्तृभिः पिपिशेऽन्या सूरः किरणैः पिपिशे सर्वं जगन्नक्षतस्तथा संधितौ भूत्वा प्रीत्या श्रुतं मन्म युवां प्राप्नुयाताम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्य्यरूपस्याग्ने रात्रिदिने पुत्रीवद्वर्त्तेते तथा द्वे विलक्षणे सदा सम्बद्धे च भवतस्तथैव विचित्रवस्त्राभरणौ विविधविद्याढ्यौ प्रशंसितौ सन्तौ विद्याविज्ञानधर्म्मोन्नतिसम्बद्धप्रीती स्त्रीपुरुषौ भवेताम्॥३॥

पदार्थः-हे स्त्री पुरुषो वा राजा और प्रजाजनो! जैसे (**अरुषस्य**) कुछ लाल रंग वाले अग्नि के (**विरूपे**) विविधरूप वा विरुद्धस्वरूपयुक्त दिन और रात्रि (**मिथस्तुरा**) परस्पर हिंसा करने वाले (**विचरन्ती**) विविध गति से प्राप्त होते हुए (**ऋच्यमाने**) स्तूयमान (**पावके**) पवित्र (**दुहितरा**) कन्याओं के समान वर्तमान हैं उनमें (**अन्या**) और अर्थात् दोनों से अलग रात्रिरूप कन्या (**स्तृभिः**) नक्षत्रादिकों के साथ (**पिपिशे**) पीसती हुई अङ्ग के समान वर्त्तमान है (**अन्या**) और दिनरूप कन्या अर्थात् (**सूरः**) सूर्य्य किरणों से पीसती हुई वर्त्तमान है, वे दोनों समस्त जगत् को (**नक्षतः**) व्याप्त होते हैं, वैसे मिलकर प्रीति से (**श्रुतम्**) श्रवण वा (**मन्म**) विज्ञान को तुम दोनों प्राप्त होओ॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्यरूप अग्नि के रात्रि-दिन पुत्री के समान वर्त्तमान हैं तथा दोनों विलक्षण सदा सम्बन्ध करने वाले होते हैं, वैसे ही विचित्र वस्त्र और आभूषण वाले, विविध विद्यायुक्त और प्रशंसित होते हुए विद्या विज्ञान और धर्मोन्नति में सम्बन्ध और प्रीति करने वाले स्त्री-पुरुष हों॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

प्र वा॒युमच्छा॑ बृह॒ती म॑नी॒षा बृ॒हद्र॑यिं वि॒श्ववा॑रं रथ॒प्राम्।
द्यु॒तद्या॑मा नि॒युत॒: पत्य॑मानः क॒विः क॒विमि॑यक्षसि प्रयज्यो॥४॥

प्र। वा॒युम्। अच्छ॑। बृ॒ह॒ती। म॒नी॒षा। बृ॒हत्ऽर॑यिम्। वि॒श्वऽवा॑रम्। र॒थऽप्राम्। द्यु॒तत्ऽया॑मा। नि॒ऽयुतः॑। पत्य॑मानः। क॒विः। क॒विम्। इ॒य॒क्ष॒सि॒। प्र॒य॒ज्यो॒ इति॑ प्रऽयज्यो॥४॥

पदार्थः-(**प्र**) प्रकर्षेण (**वायुम्**) पवनम् (**अच्छा**) अत्र **संहितायामिति** दीर्घः। (**बृहती**) महती (**मनीषा**) प्रज्ञा (**बृहद्रयिम्**) महान् रयिर्यस्मात्तम् (**विश्ववारम्**) यो विश्वं सर्वमुत्तमं व्यवहारं वृणोति तम् (**रथप्राम्**) यो रथानि यानानि पूर्यते तम् (**द्युतद्यामा**) द्युतन्तो विद्योतमाना पदार्था यया सा (**नियुतः**)

निश्चितगतिमत: **(पत्यमान:)** ऐश्वर्यमिच्छन् **(कवि:)** विद्वान् **(कविम्)** विद्वांसमिव क्रान्तप्रज्ञम् **(इयक्षसि)** सङ्गच्छसे प्राप्नोषि वा। **इयक्षतीति गतिकर्म्मा।** (निघं०२.१४) **(प्रयज्यो)** य: प्रकर्षेण यजति तत्सम्बुद्धौ॥४॥

अन्वय:-हे प्रयज्यो! पत्यमान: कविस्त्वं या द्युतद्यामा बृहती मनीषा तया यदि बृहद्रयिं विश्ववारं रथप्रां कविं वायुमस्य नियुतश्चाच्छा प्रेयक्षसि तर्हि किं किमभीष्टं न प्राप्नोषि॥४॥

भावार्थ:-ये मनुष्या: शुद्धया बुद्ध्या योगाभ्यासेन च सर्वसुखप्रदं सर्वजगद्धरं वायुं प्राणायामे वशीकुर्वन्ति ते सर्वाणि सुखानि प्राप्नुवन्ति॥४॥

पदार्थ:-हे **(प्रयज्यो)** उत्तमता से यज्ञ करने वाले! **(पत्यमान:)** ऐश्वर्य की इच्छा करते हुए **(कवि:)** विद्वान् आप जो **(द्युतद्यामा)** जिससे विशेषकर पदार्थ प्रकाशित होते हैं ऐसी **(बृहती)** बड़ी **(मनीषा)** बुद्धि है उससे जो **(बृहद्रयिम्)** जिससे बहुत धन सिद्ध होता उस **(विश्ववारम्)** और जो समस्त उत्तम व्यवहार को स्वीकार करता वा **(रथप्राम्)** रथ को परिपूर्ण करता वा **(कविम्)** विद्वान् के समान क्रमपूर्वक बुद्धि प्राप्त होती उस **(वायुम्)** वायु और इसके **(नियुत:)** निश्चित गति वाले वेगरूप घोड़ों को **(अच्छा) (प्र, इयक्षसि)** मिलते हैं तो कौन-कौन चाहे हुए पदार्थ को नहीं प्राप्त होते हैं॥४॥

भावार्थ:-जो मनुष्य शुद्ध बुद्धि और योगाभ्यास से सर्व सुख देने तथा सर्व जगत् के धारण करने वाले पवन को प्राणायाम में वश करते हैं, वे सर्वसुख को प्राप्त होते हैं॥४॥

पुनर्मनुष्या: केन किं प्राप्नुयुरित्याह॥

फिर मनुष्य किससे किसको प्राप्त होवें, इस विषय को कहते हैं॥

स मे॒ वपु॑श्छदयद॒श्विनो॒र्यो रथो॑ वि॒रुक्मा॒न् मन॑सा यु॒जा॒नः।
येन॑ नरा नासत्येष॒यध्यै॑ व॒र्तिर्या॒थस्तन॑याय॒ त्मने॑ च॥५॥५॥

सः। मे॒। वपु॑:। छ॒द॒य॒त्। अ॒श्विनो॑:। यः। रथ॑:। वि॒रुक्मा॑न्। मन॑सा। यु॒जा॒नः। येन॑। न॒रा॒। ना॒स॒त्या॒। इ॒ष॒यध्यै॑। व॒र्ति:। या॒थः। तन॑याय। त्मने॑। च॒॥५॥

पदार्थ:-**(स:)** मम **(वपु:)** शरीरं रूपं वा **(छदयत्)** बलयति **(अश्विनो:)** प्राणाऽपानयो: **(य:)** **(रथ:)** रमणीयो व्यवहार: **(विरुक्मान्)** विविधदीप्तियुक्त: **(मनसा)** अन्त:करणेन **(युजान:)** **(येन)** **(नरा)** नरौ नायकौ **(नासत्या)** अविद्यमानाऽसत्यौ **(इषयध्यै)** एषयितुम् **(वर्त्ति:)** मार्ग: **(याथ:)** प्राप्नुत: **(तनयाय)** सन्तानाय **(त्मने)** आत्मने **(च)**॥५॥

अन्वय:-हे विद्वांसो! योऽश्विनोर्विरुक्मान् मनसा युजानो रथो मे वपुश्छदयद्येन तनयाय त्मने च नरा नासत्या अध्यापकोपदेशकौ योगिनाविषयध्यै यो वर्त्तिस्तं याथ: स युष्माभिर्विदित्वा मनसात्मनि नियोजनीय:॥५॥

भावार्थ:-हे मनुष्या! येन वायुना योगिनो विविधं विज्ञानं प्राप्नुवन्ति येन सर्वं जगत्सर्वे प्राणिनश्च जीवन्ति तदभ्यासेन परमात्मानं विदित्वा मुक्तिपथेनानन्दं प्राप्नुत॥५॥

पदार्थः-हे विद्वानो! **(यः)** जो **(अश्विनोः)** प्राण और अपान के **(विरुक्मान्)** विविधदीप्तियुक्त **(मनसा)** अन्तःकरण से **(युजानः)** युक्त होता हुआ **(रथः)** रमणीय व्यवहार **(मे)** मेरे **(वपुः)** शरीर वा रूप को **(छदयत्)** बली करता है तथा **(येन)** जिससे **(तनयाय)** सन्तान के लिये **(त्मने, च)** और अपने लिये **(नरा)** नायक अग्रगामी **(नासत्या)** जिनके असत्य विद्यमान नहीं वे अध्यापक और उपदेशक योगीजन **(इषयध्यै)** चलने के लिये जो **(वर्त्तिः)** मार्ग है उसको **(याथः)** प्राप्त होते हैं **(सः)** वह तुम लोगों को चाहिये कि जानकर अन्तःकरण से आत्मा में निरन्तर यत्न **[=युक्त]** करने योग्य हो॥५॥

भावार्थः-हे मनुष्यो! जिस वायु से योगीजन विविध प्रकार के विज्ञान को प्राप्त होते हैं तथा जिससे सब जगत् वा सब प्राणी जीते हैं उसके अभ्यास से परमात्मा को जान कर मुक्ति-पथ से आनन्द को प्राप्त होओ॥५॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि।

सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वम्॥६॥

पर्जन्यवाता। वृषभा। पृथिव्याः। पुरीषाणि। जिन्वतम्। अप्यानि। सत्यऽश्रुतः। कवयः। यस्य। गीःऽभिः। जगतः। स्थातः। जगत्। आ। कृणुध्वम्॥६॥

पदार्थः-**(पर्जन्यवाता)** पर्जन्यस्थौ वायू **(वृषभा)** वर्षकौ **(पृथिव्याः)** अन्तरिक्षात् **(पुरीषाणि)** उदकानि। **पुरीषमित्युदकनाम।** (निघं०१.१२) **(जिन्वतम्)** गमयतम्प्राप्नुतं वा, **जिन्वतीति गतिकर्मा।** (निघं०२.१४) **(अप्यानि)** अप्सु भवानि **(सत्यश्रुतः)** ये सत्यं शृण्वन्ति **(कवयः)** विद्वांसः **(यस्य)** **(गीर्भिः)** वाग्भिः **(जगतः)** संसारस्य मध्ये **(स्थातः)** यस्तिष्ठति तत्सम्बुद्धौ **(जगत्)** **(आ)** **(कृणुध्वम्)**॥६॥

अन्वयः-हे वृषभा यजमानपुरोहितौ! यथा पर्जन्यवाता पृथिव्या अप्यानि पुरीषाणि प्रापयतस्तथा युवां जिन्वतं सत्यश्रुतः कवयः सन्तः पुरीषाण्याकृणुध्वम्। हे स्थातर्विद्वन्! यस्य गीर्भिर्जगतो जगद्विजानासि तं त्वं सत्कुर्याः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या वायुवज्जगद्धितकराः सत्यस्य श्रोतारः सन्ति त एव जगद्विज्ञायान्यानेतज्ज्ञापयितुं शक्नुवन्ति॥६॥

पदार्थः-हे **(वृषभा)** वृष्टि कराने वाले यजमान और पुरोहितो! जैसे **(पर्जन्यवाता)** मेघस्थ पवन **(पृथिव्याः)** अन्तरिक्ष से **(अप्यानि)** जलों में प्रसिद्ध हुए **(पुरीषाणि)** जलों को पहुँचाते है, वैसे तुम **(जिन्वतम्)** पहुँचो वा पदार्थ को पहुँचाओ और **(सत्यश्रुतः)** जो सत्य को सुनने वाले जन हैं, वे **(कवयः)** विद्वान् होते हुए जलों को **(आ, कृणुध्वम्)** अच्छे प्रकार सिद्ध करें। हे **(स्थातः)** स्थिर होने

वाले विद्वान् जन! **(यस्य)** जिसकी **(गीर्भिः)** वाणियों से **(जगतः)** संसार के बीच **(जगत्)** जगत् की विशेषता से जानते हो, उसका आप सत्कार करें॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य पवन के समान जगत् के हित करनेवाले तथ सत्य के सुनने वाले हैं, वे ही जगत् को जान कर औरों को इस जगत् का ज्ञान दे सकते हैं॥६॥

पुनः कीदृशी स्त्री सुखं दद्यादित्याह॥

फिर कैसी स्त्री सुख देवे इस विषय को अगले मन्त्र में कहते हैं॥

पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात्।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत्॥७॥

पावीरवी। कन्या। चित्रऽआयुः। सरस्वती। वीरऽपत्नी। धियम्। धात्। ग्नाभिः। अच्छिद्रम्। शरणम्। सऽजोषाः। दुःऽआधर्षम्। गृणते। शर्म। यंसत्॥७॥

पदार्थः-(**पावीरवी**) शोधयित्री (**कन्या**) कमनीया (**चित्रायुः**) चित्रामायुर्यस्याः सा (**सरस्वती**) विज्ञानाढ्या (**वीरपत्नी**) वीरः पतिर्यस्याः सा (**धियम्**) शास्त्रोत्थां प्रज्ञामुत्तमं कर्म वा (**धात्**) दधाति (**ग्नाभिः**) सुशिक्षिताभिर्वाग्भिः (**अच्छिद्रम्**) छेदरहितम् (**शरणम्**) आश्रयम् (**सजोषाः**) समानप्रीतिसेविका (**दुराधर्षम्**) दुःखेन धर्षितुं योग्यम् (**गृणते**) स्तावकाय (**शर्म**) गृहं सुखं वा (**यंसत्**) ददाति॥७॥

अन्वयः-हे मनुष्या! या पावीरवी चित्रायुः सरस्वती वीरपत्नी कन्या ग्नाभिर्धियं धाद्या गृणते मेऽच्छिद्रं या सजोषाः सती गृणते मे शरणं दुराधर्षं शर्म यंसत्सैव मया सदैव सत्कर्त्तव्या॥७॥

भावार्थः-या विदुषी शुभगुणकर्मस्वभावा कन्या स्यात्तामेव वीरपुरुष उद्वहेत्। यस्याः सङ्गप्रीती कदाचिन्न नश्येतां या सर्वदा सुखं दद्यात्सा पत्नी पत्या यथावत् सत्कर्त्तव्या॥७॥

पदार्थः-हे मनुष्यो! जो **(पावीरवी)** शुद्ध करने वाली **(चित्रायुः)** चित्र विचित्र जिसकी आयु वह **(सरस्वती)** विज्ञानयुक्त **(वीरपत्नी)** वीर पति वाली **(कन्या)** मनोहर **(ग्नाभिः)** सुन्दर शिक्षित वाणियों से **(धियम्)** शास्त्रोत्थ प्रज्ञा उत्तम बुद्धि वा कर्म को **(धात्)** धारण करती है वा जो **(गृणते)** स्तुति करने वाले मेरे लिये **(अच्छिद्रम्)** छेदरहित व्यवहार को तथा जो **(सजोषाः)** समान प्रीति की सेवने वाली होती हुई स्तुति करने वाले मेरे लिये **(शरणम्)** आश्रय को वा जो **(दुराधर्षम्)** दुःख से धृष्टता के योग्य **(शर्म)** घर वा सुख को **(यंसत्)** देती है, वही मुझसे सदैव सत्कार करने योग्य है॥७॥

भावार्थः-जो विदुषी शुभ गुण, कर्म, स्वभाव वाली कन्या हो, उसी को वीर पुरुष विवाहे, जिसका सङ्ग वा प्रीति कभी नष्ट न हो तथा जो सर्वदा सुख दे, वह पत्नी पति से सर्वदा सत्कार करने योग्य है॥७॥

पुनर्मनुष्यैः कः सेवनीय इत्याह॥

फिर मनुष्यों को किसका सेवन करना चाहिये, इस विषय को कहते हैं॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम्।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा॥८॥

पथःऽपथः। परिऽपतिम्। वचस्या। कामेन। कृतः। अभि। आनट्। अर्कम्। सः। नः। रासत्। शुरुधः। चन्द्रऽअग्राः। धियम्ऽधियम्। सीसधाति। प्र। पूषा॥८॥

पदार्थः-(**पथस्पथः**) मार्गान् मार्गान् (**परिपतिम्**) पतिं वर्जयित्वा वा सर्वतः स्वामिनम् (**वचस्या**) वचसि साधूनि (**कामेन**) (**कृतः**) (**अभि**) (**आनट्**) अभिव्याप्नोति (**अर्कम्**) सत्कर्त्तव्यं क्रियामयं व्यवहारम् (**सः**) (**नः**) अस्मभ्यम् (**रासत्**) दद्यात् (**शुरुधः**) सद्यो रोधिकाः (**चन्द्राग्राः**) चन्द्रं सुवर्णमग्रमुत्तमं यासु ताः (**धियंधियम्**) प्रज्ञां प्रज्ञां कर्म कर्म वा (**सीषधाति**) साधयति प्रसाधयति (**प्र**) (**पूषा**)॥८॥

अन्वयः-य पूषा कामेन नः पथस्पथः परिपतिं वचस्या कृतोऽर्कमभ्यानट्। नः शुरुधश्चन्द्राग्रा रासद्धियंधियं प्र सीषधाति स उपदेष्टा न्यायशोऽस्माकं भवेत्॥८॥

भावार्थः-हे मनुष्या! यो युष्मान् सन्मार्गं दर्शयित्वा दुष्टमार्गान्निवार्य्य सत्याचारं स्वामिनं सेवयित्वा दुष्टपतिं निवर्त्य प्रज्ञां वर्धयति स एव युष्माभिः सत्कर्त्तव्यो भवति॥८॥

पदार्थः-जो (**पूषा**) पुष्टि करने वाला (**कामेन**) कामना से (**पथस्पथः**) मार्गों मार्गों को (**परिपतिम्**) स्वामी को छोड़ के वा सब ओर से स्वामी को और (**वचस्या**) वचन में उत्तम व्यवहारों को (**कृतः**) किये हुए (**अर्कम्**) सत्कार करने योग्य क्रियामय व्यवहार को (**अभि, आनट्**) सब ओर से व्याप्त होता है तथा (**नः**) हम लोगों के लिये (**शुरुधः**) शीघ्र रोकने वाली (**चन्द्राग्राः**) जिनके तीर सुवर्ण उत्तम विद्यमान उनको (**रासत्**) देवे तथा (**धियंधियम्**) प्रज्ञा प्रज्ञा वा कर्म कर्म को (**प्र, सीषधाति**) अच्छे प्रकार सिद्ध करता है (**सः**) वह उपदेशकर्त्ता तथा न्याय करने वाला हम लोगों का हो॥८॥

भावार्थः-हे मनुष्यो! जो तुमको सन्मार्ग दिखाकर दुष्ट मार्गों का निवारण कर सत्याचरण करने वाले स्वामी का सेवन करा और दुष्टपति का निवारण कराके बुद्धि को बढ़ाता है, वही तुम लोगों को सत्कार करने योग्य होता है॥८॥

पुनर्मनुष्याः कं सेवेरन्नित्याह॥

फिर मनुष्य किसका सेवन करें, इस विषय को कहते हैं॥

प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम्।
होतां यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा॥९॥

प्रथमऽभाजम्। यशसम्। वयःऽधाम्। सुऽपाणिम्। देवम्। सुऽगभस्तिम्। ऋभ्वम्। होता। यक्षत्। यजतम्। पस्त्यानाम्। अग्निः। त्वष्टारम्। सुऽहवम्। विभाऽवा॥९॥

पदार्थः-(**प्रथमभाजम्**) यः प्रथमान् भजति सेवते (**यशसम्**) यशः कीर्तिर्विद्यते यस्य तम् (**वयोधाम्**) यो वयो जीवनं दधाति तम् (**सुपणिम्**) शोभनौ धर्मकर्मकरौ पाणी श्रेष्ठो व्यवहारो वा यस्य तम् (**देवम्**) दातारं विद्वांसम् (**सुगभस्तिम्**) सुष्ठुप्रकाशम् (**ऋभ्वम्**) मेधाविनम् (**होता**) दाता (**यक्षत्**) सङ्गच्छेत् (**यजतम्**) सङ्गन्तव्यम् (**पस्त्यानाम्**) गृहाणाम् (**अग्निः**) पावक इव वर्त्तमानः (**त्वष्टारम्**) छेत्तारम् (**सुहवम्**) सुष्ठ्वाह्वयितुं योग्यम् (**विभावा**) यो विशेषेण भाति॥९॥

अन्वयः-हे मनुष्या! योऽग्निरिव विभावा होता त्वष्टारं सुहवं पस्त्यानां मध्ये यजतमृभ्वं सुगभस्तिं प्रथमभाजं यशसं वयोधां सुपाणिं देवं यक्षत्स एव युष्माभिः सङ्गन्तव्यः॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विद्यावृद्धान् पावकवदविद्यादुःखदाहकान् विदुषः सेवन्ते ते गृहे दीप इवोपदेश्यानामात्मनः प्रकाशयितुमर्हन्ति॥९॥

पदार्थः-हे मनुष्यो! जो (**अग्निः**) पावक के समान वर्त्तमान (**विभावा**) विशेषता से प्रकाशमान (**होता**) दानशील जन (**त्वष्टारम्**) छेदन-भेदन करने वाले (**सुहवम्**) बुलाने योग्य वा (**पस्त्यानाम्**) घरों के बीच (**यजतम्**) सङ्ग करने योग्य वा (**ऋभ्वम्**) बुद्धिमान् (**सुगभस्तिम्**) सुन्दर प्रकाशक (**प्रथमभाजम्**) अगलों को सेवते हुए (**यशसम्**) कीर्त्तिमान् तथा (**वयोधाम्**) जीवन धारण करने वाले तथा (**सुपाणिम्**) सुन्दर व्यवहार वाले वा शोभन धर्म कर्मकारी हस्त जिसके उस (**देवम्**) दान करने वाले विद्वान् जन का (**यक्षत्**) सङ्ग करे, वही तुमको सङ्ग करने योग्य है॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्यावृद्ध, अग्नि के समान अविद्याजन्य दुःख के जलाने वाले विद्वानों की सेवा करते हैं, वे घर में दीपक के समान उपदेश देने योग्यों को आत्माओं के प्रकाश करने की योग्य हैं॥९॥

पुनर्मनुष्यैः कः प्रशंसनीयोऽस्तीत्याह॥

फिर मनुष्यों को कौन प्रशंसा करने योग्य है, इस विषय को कहते हैं॥

भुव॑नस्य पि॒तरं॑ गी॒र्भिरा॒भी रु॒द्रं दिवा॑ व॒र्धया॑ रु॒द्रम॒क्तौ।
बृ॒हन्त॑मृ॒ष्वम॒जरं॑ सुषु॒म्नमृध॑ग्घुवेम क॒विने॑षि॒तास॑:॥ १०॥ ६॥

भुव॑नस्य। पि॒तर॑म्। गी॒:ऽभिः। आ॒भिः। रु॒द्रम्। दिवा॑। व॒र्धय॑। रु॒द्रम्। अ॒क्तौ। बृ॒हन्त॑म्। ऋ॒ष्वम्। अ॒जर॑म्। सु॒ऽसु॒म्नम्। ऋध॑क्। हु॒वे॒म॒। क॒विना॑। इ॒षि॒तास॑:॥ १०॥

पदार्थः-(**भुवनस्य**) संसारस्य (**पितरम्**) पालकम् (**गीर्भिः**) वाग्भिः (**आभिः**) वर्त्तमानाभिः (**रुद्रम्**) दुष्टानां रोदयितारम् (**दिवा**) कामनया विद्यादीप्त्या वा (**वर्धया**) अत्र **संहितायामिति** दीर्घः। (**रुद्रम्**) यो रुद्रोगं द्रावयति तम् (**अक्तौ**) रात्रौ (**बृहन्तम्**) वर्धकम् (**ऋष्वम्**) महान्तम् (**अजरम्**) जराव्याधिरहितम् (**सुषुम्नम्**) सुष्ठु सुखयुक्तम् (**ऋधक्**) सत्यम् (**हुवेम**) स्तूयामहि (**कविना**) विदुषा (**इषितासः**) प्रेरिताः सन्तः॥१०॥

अन्वयः-हे विद्वन्! यथा कविनेषितासो वयमाभिर्गीर्भिर्भुवनस्य पितरमक्तौ रुद्रं बृहन्तमृष्वमजरं सुषुम्नं रुद्रमृधग्घुवेम तथैतं रुद्रं त्वं दिवा वर्धया॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वे मनुष्या विद्वत्प्रेरिताः सन्तो विद्याविनयव्यवहारे वृद्धा भूत्वा सर्वस्य जगतः पालकं परमात्मानं सत्येन व्यवहारेण प्रशंसन्तु यतोऽविनाशि सुखं प्राप्ताः सर्वे भवेयुः॥१०॥

पदार्थः-हे विद्वन्! जैसे **(कविना)** विद्वान् से **(इषितासः)** प्रेरणा किये हुए हम लोग **(आभिः)** इन वर्त्तमान **(गीर्भिः)** वाणियों से **(भुवनस्य)** संसार के **(पितरम्)** पालने वाले **(अक्तौ)** रात्रि में **(रुद्रम्)** दुष्टों को रुलाने और **(बृहन्तम्)** बढ़ाने वाले **(ऋष्वम्)** बड़े **(अजरम्)** जरावस्थारहित **(सुषुम्नम्)** सुन्दर सुखयुक्त **(रुद्रम्)** रोग भगाने वाले जन की **(ऋधक्)** सत्य **(हुवेम)** स्तुति करें, वैसे इस रुद्र को आप **(दिवा)** कामना वा विद्यादीप्ति से **(वर्धया)** बढ़ाओ॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्य विद्वान् से प्रेरणा को पाये हुए विद्या और नम्रता के व्यवहार में वृद्ध होकर सब जगत् के पालने वाले परमात्मा की सत्य व्यवहार से प्रशंसा करें, जिससे अविनाशी सुख को सब प्राप्त हों॥१०॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्या क्या करें, इस विषय को कहते हैं॥

आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम्।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत्॥११॥

आ। युवानः। कवयः। यज्ञियासः। मरुतः। गन्त। गृणतः। वरस्याम्। अचित्रम्। चित्। हि। जिन्वथ। वृधन्तः। इत्था। नक्षन्तः। नरः। अङ्गिरस्वत्॥११॥

पदार्थः-**(आ)** **(युवानः)** प्राप्तयौवनाः **(कवयः)** सर्वशास्त्रविदः **(यज्ञियासः)** ये सत्यप्रियं व्यवहारं कर्तुमर्हन्ति **(मरुतः)** मनुष्याः **(गन्त)** प्राप्नुवन्तु **(गृणतः)** सत्यप्रशंसकान् **(वरस्याम्)** स्वीकर्त्तव्यां प्रशंसाम् **(अचित्रम्)** अनद्भुतम् **(चित्)** अपि **(हि)** यतः **(जिन्वथा)** प्राप्नुवन्ति। अत्र **संहितायामिति** दीर्घः। **(वृधन्तः)** वर्धमानाः **(इत्था)** अनेन प्रकारेण **(नक्षन्तः)** प्राप्नुवन्तः **(नरः)** नायकाः **(अङ्गिरस्वत्)** प्रशस्ता अङ्गिरसो वायवस्तद्वत्॥११॥

अन्वयः-हे मनुष्या! ये युवानो यज्ञियासः कवयो मरुतोऽङ्गिरस्वद्वरस्यां गृणत आ गन्ताऽचित्रं वृधन्त इत्था नक्षन्तो नरश्चिज्जिन्वथा ते हि जगद्धितैषिणो भवन्ति॥११॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या विद्वांसो युवानो भूत्वा सत्क्रियां कृत्वा सर्वान् वर्धयन्ति ते वृद्धियुक्ता भवन्ति॥११॥

पदार्थः-हे मनुष्यो! जो **(युवानः)** युवा पुरुष **(यज्ञियासः)** सत्य प्रिय व्यवहार को करने योग्य हैं तथा **(कवयः)** सर्व शास्त्रवेत्ता **(मरुतः)** मनुष्य **(अङ्गिरस्वत्)** प्रशंसित वायुओं के समान **(वरस्याम्)** स्वीकार करने योग्य प्रशंसा को तथा **(गृणतः)** सत्य की प्रशंसा करने वाले विद्वानों को **(आ, गन्त)** प्राप्त

हों तथा **(अचित्रम्)** साधारण **(वृधन्तः)** बढ़ाने और **(इत्था)** इस प्रकार से **(नक्षन्तः)** व्याप्त होते हुए **(नरः)** नायक मनुष्य **(चित्)** ही **(जिन्वथा)** प्राप्त हों वे **(हि)** ही जगत्-हितैषी होते हैं॥११॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य विद्वान् तथा युवावस्था वाले होकर और अच्छी क्रिया कर सब को बढ़ाते हैं, वे वृद्धियुक्त होते हैं॥११॥

पुनर्मनुष्याः किंवत् किं प्राप्नुयुरित्याह॥

फिर मनुष्य किसके तुल्य किसको प्राप्त हों इस विषय को कहते हैं॥

प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम्।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः॥१२॥

प्र। वीराय। प्र। तवसे। तुराय। अजा। यूथाऽइव। पशुऽरक्षिः। अस्तम्। सः। पिस्पृशति। तन्वि। श्रुतस्य। स्तृऽभिः। न। नाकम्। वचनस्य। विपः॥१२॥

पदार्थः-(**प्र**) (**वीराय**) शौर्यादिगुणोपेताय (**प्र**) (**तवसे**) वर्धकाय (**तुराय**) दुःखहिंसकाय (**अजा**) छागः (**यूथेव**) समूह इव (**पशुरक्षिः**) पशूनां रक्षकः (**अस्तम्**) गृहम् (**सः**) (**पिस्पृशति**) अत्यन्तं स्पृशति (**तन्वि**) शरीरे (**श्रुतस्य**) (**स्तृभिः**) नक्षत्रैः (**न**) इव (**नाकम्**) अविद्यमानदुःखमन्तरिक्षम् (**वचनस्य**) (**विपः**) मेधावी॥१२॥

अन्वयः-हे मनुष्या! यो विपः स्तृभिर्नाकं न तन्वि श्रुतस्य वचनस्याऽजा यूथेव पशुरक्षिरस्तमिव वीराय तवसे तुरायास्तं प्र पिस्पृशति स सुखानि प्र पिस्पृशति॥१२॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यो यथाऽजाऽवयो धावित्वा स्वसमुदायं यथा वा सायं समये गोपालो गृहं तथा सकलविद्याश्रवणं प्राप्नोति॥१२॥

पदार्थः-हे मनुष्यो! जो (**विपः**) मेधावीजन (**स्तृभिः**) नक्षत्रों से (**नाकम्**) जिसमें दुःख नहीं विद्यमान उस अन्तरिक्ष को (**न**) जैसे (**तन्वि**) शरीर में (**श्रुतस्य**) सुने हुए (**वचनस्य**) वचन का वा (**अजा**) छाग (**यूथेव**) समूहों को जैसे वैसे वा (**पशुरक्षिः**) पशुओं की रक्षा करने वाला (**अस्तम्**) घर को जैसे वैसे (**वीराय**) शूरता आदि गुणों से युक्त (**तवसे**) बढ़ाने वाले (**तुराय**) दुःखनाशक के लिये घर का (**प्र, पिस्पृशति**) अत्यन्त स्पर्श करता (**सः**) वह सुखों का (**प्र**) अच्छे प्रकार अत्यन्त स्पर्श करता है॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य, जैसे भेड़ बकरी दौड़ के अपने झुण्ड को वा जैसे सायङ्काल में गोपाल घर को, वैसे समस्त विद्या के श्रवण को प्राप्त होता है॥१२॥

पुनर्मनुष्यैः किं ज्ञातव्यमित्याह॥

फिर मनुष्यों को क्या जानने योग्य है, इस विषय को कहते हैं॥

यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधितायः।

तस्य॑ ते॒ शर्म॑न्नुपदद्यमा॑ने रा॒या मदे॑म त॒न्वा॒३॑ तना॑ च॥ १३॥

यः। रजा॑ꣳसि। वि॒ऽम॒मे। पार्थि॑वानि। त्रिः। चि॒त्। वि॒ष्णुः॑। मन॑वे। बा॒धि॒ताय॑। तस्य॑। ते॒। शर्म॑न्। उ॒प॒ऽद॒द्यमा॑ने। रा॒या। म॒दे॒म॒। त॒न्वा॑। तना॑। च॒॥ १३॥

पदार्थः-(**यः**) (**रजांसि**) लोकान् (**विममे**) रचयति (**पार्थिवानि**) पृथिव्यां भवानि (**त्रिः**) त्रिवारम् (**चित्**) अपि (**विष्णुः**) यो वेवेष्टि स जगदीश्वरः (**मनवे**) मनुष्याय (**बाधिताय**) पीडिताय (**तस्य**) (**ते**) तव (**शर्मन्**) शर्म्मणि गृहे (**उपदद्यमाने**) उपादीयमाने (**राय**) धनेन (**मदेम**) आनन्देम (**तन्वा**) शरीरेण (**तना**) विस्तृतेन (**च**)॥ १३॥

अन्वयः-हे मनुष्या! यो विष्णुर्बाधिताय मनवे पार्थिवानि रजांसि त्रिश्चिद् विममे तस्य सम्बन्धे त उपदद्यमाने शर्मन् शर्मणि तना राया तन्वा च सह वयं मदेम॥ १३॥

भावार्थः-हे मनुष्या! यो जगदीश्वरः सर्वं जगन्निर्माय मनुष्याद्युपकारं करोति तस्याश्रयेणैव वयं धनवन्तश्चिरायुषो भवेम॥ १३॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**विष्णुः**) चराचर में प्रवेश होता वह जगदीश्वर (**बाधिताय**) पीड़ित (**मनवे**) मनुष्य के लिये (**पार्थिवानि**) पृथिवी में सिद्ध हुए (**रजांसि**) लोकों को (**त्रिः**) तीन वार (**चित्**) ही (**विममे**) रचता है (**तस्य**) उसके सम्बन्ध में (**ते**) आपके (**उपदद्यमाने**) समीप ग्रहण किये (**शर्मन्**) घर में (**तना**) विस्तृत (**राया**) धन (**तन्वा, च**) और शरीर के साथ हम लोग (**मदेम**) आनन्दित हों॥ १३॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर सब जगत् का निर्माण करके मनुष्यादिकों का उपकार करता है, उसके आश्रय से ही हम लोग धनवान् और बहुत आयु वाले हों॥ १३॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

तन्नोऽहि॑र्बुध्न्यो॑ अ॒द्भिर॒र्कैस्तत्पर्व॑त॒स्तत्स॑वि॒ता चनो॑ धात्।
तदोष॑धीभिर॒भि रा॑ति॒षाचो॒ भग॒ः पुरं॑धिर्जिन्वतु॒ प्र रा॒ये॥ १४॥

तत्। नः॒। अहिः॑। बु॒ध्न्यः॑। अ॒त्ऽभिः॑। अ॒र्कैः॑। तत्। पर्व॑तः॑। तत्। स॒वि॒ता। चनः॑। धा॒त्। तत्। ओष॑धीभिः॑। अ॒भि। रा॒ति॒ऽसाचः॑। भगः॑। पुर॑म्ऽधिः। जि॒न्व॒तु॒। प्र। रा॒ये॥ १४॥

पदार्थः-(**तत्**) गृहम् (**नः**) अस्मभ्यम् (**अहिः**) मेघः (**बुध्न्यः**) अन्तरिक्षे भवः (**अद्भिः**) जलादिभिः (**अर्कैः**) सत्कारसाधनैः (**तत्**) (**पर्वतः**) मेघः (**तत्**) (**सविता**) सूर्य्यः (**चनः**) अन्नादिकम् (**धात्**) दधाति (**तत्**) (**ओषधीभिः**) सोमलतादिभिः (**अभि**) आभिमुख्ये (**रातिषाचः**) दानकर्त्तारः (**भगः**) भगवान् (**पुरन्धिः**) जगद्धर्त्ता (**जिन्वतु**) प्रापयतु (**प्र**) (**राये**) धनाय॥ १४॥

अन्वय:-हे मनुष्या! यथाऽर्कैरद्भिरोषधीभिश्च सह बुध्न्योऽहिर्नो राये यच्चनस्तद्धात् तत्पर्वतो धात् तत्सविता धात् तद्रातिषाचो दधति तत्पुरन्धिर्भग: प्र जिन्वतु तदभि प्र जिन्वतु॥१४॥

भावार्थ:-हे मनुष्या! यथा परमेश्वरेण प्राण्युपकारार्थं जगन्निर्मितं तथाऽस्माद्यूयं पुष्कलानुपकारान् गृह्णीत॥१४॥

पदार्थ:-हे मनुष्यो! जैसे **(अर्कै:)** सत्कार साधनों वाले **(अद्भि:)** जलादिकों के **(ओषधीभि:)** सोमलतादि ओषधियों के साथ **(बुध्न्य:)** अन्तरिक्ष में प्रसिद्ध हुआ **(अहि:)** मेघ **(न:)** हम लोगों के लिये **(राये)** धन के लिये **(चन:)** अन्नादिक को वा **(तत्)** उस गृह को **(धात्)** धारण करता वा **(तत्)** उसको **(पर्वत:)** पर्वताकार मेघ धारण करता वा **(तत्)** उसको **(सविता)** सूर्य धारण करता वा **(तत्)** उसको **(रातिषाच:)** दान करने वाले धारण करते उसको **(पुरन्धि:)** जगत् को धारणकर्ता **(भग:)** ऐश्वर्यवान् **(प्र, जिन्वतु)** अच्छे प्रकार प्राप्त करावे उसको **(अभि)** सब ओर से प्राप्त करावे॥१४॥

भावार्थ:-हे मनुष्यो! जैसे परमेश्वर ने प्राणियों के उपकार के लिये जगत् बनाया वैसे इससे तुम लोग पुष्कल उपकार ग्रहण करो॥१४॥

पुनर्दातृभि: किं कर्त्तव्यमित्याह॥

फिर दाताओं को क्या करना चाहिये, इस विषय को कहते हैं॥

नू नो॑ र॒यिं र॑थ्यं॑ चर्षणि॒प्रां पु॑रु॒वीरं॑ म॒ह ऋ॒तस्य॑ गो॒पाम्।
क्षय॑ं दाता॒जर॑ं॒ येन॒ जना॒न्त्स्पृधो॒ अदे॑वीर॒भि च॒
क्रमा॑म॒ विश॒ आदे॑वीर॒भ्य१॑श्नवा॑म॥ १५॥ ७॥ ४॥

नु। न॒:। र॒यिम्। र॒थ्य॑म्। च॒र्ष॒णि॒ऽप्राम्। पु॒रु॒ऽवीर॑म्। म॒ह:। ऋ॒तस्य॑। गो॒पाम्। क्षय॑म्। दा॒त॒। अ॒जर॑म्। येन॑। जना॑न्। स्पृध॑:। अदे॑वी:। अ॒भि। च॒। क्रमा॑म। विश॑:। आऽदे॑वी:। अ॒भि। अ॒श्नवा॑म॥ १५॥

पदार्थ:-(**नू**) सद्य: **(न:)** अस्मभ्यम् **(रयिम्)** श्रियम् **(रथ्यम्)** रथेषु विमानादियानेषु हितम् **(चर्षणिप्राम्)** यश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति तम् **(पुरुवीरम्)** पुरवो बहवो वीरा यस्मात्तम् **(मह:)** महत: **(ऋतस्य)** सत्यस्य **(गोपाम्)** रक्षकम् **(क्षयम्)** निवासयितुम् **(दात)** **(अजरम्)** हानिरहितम् **(येन)** **(जनान्)** मनुष्यान् **(स्पृध:)** स्पर्द्धमानान् **(अदेवी:)** विद्यारहिता: **(अभि)** आभिमुख्ये **(च)** **(क्रमाम)** अनुक्रमेण प्राप्नुयाम **(विश:)** प्रजा: **(आदेवी:)** समन्ताद्देदीप्यमाना विदुषी: **(अभि)** **(अश्नवाम)** अभित: प्राप्नुयाम॥१५॥

अन्वय:-हे विद्वांसो! येन स्पृधो जनानदेवीर्विशो वयमभि क्रमामादेवीर्विशश्च वयमभ्यश्नवाम तं रथ्यं चर्षणिप्रां पुरुवीरं [क्षयमजरं] मह ऋतस्य गोपां रयिं नो नू दात॥१५॥

भावार्थ:-त एव दातार उत्तमा ये धर्मेण धनादिकं सञ्चित्य विद्यादिसद्गुणरूपपरोपकाराय प्रददति तदेव धनं येन विदुष्योऽविदुष्यश्च प्रजा अत्यन्तं सुखं प्राप्य मादेरन्निति॥१५॥

अत्र विश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे षष्ठे मण्डले चतुर्थोऽनुवाक एकोनपञ्चाशत्तमं सूक्तं चतुर्थेऽष्टकेऽष्टमेऽध्याये सप्तमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! **(येन)** जिससे **(स्पृधः)** स्पर्द्धा करते हुए **(जनान्)** मनुष्यों को तथा **(अदेवीः)** विद्यारहित **(विशः)** प्रजाओं को हम लोग **(अभि, क्रमाम)** अनुक्रम से प्राप्त हों वा **(आदेवीः)** सब ओर से निरन्तर प्रकाशमान विदुषी **(च)** और प्रजाओं को हम लोग **(अभि, अश्नवाम)** सब ओर से प्राप्त हों। तथा **(रथ्यम्)** विमान आदि रथों में हितरूप **(चर्षणिप्राम्)** मनुष्यों को व्याप्त होने तथा **(पुरुवीरम्)** बहुत वीरों के कारण **(क्षयम्)** निवास कराने को **(अजरम्)** हानिरहित अर्थात् पुष्ट **(महः)** और बड़े **(ऋतस्य)** सत्य की **(गोपाम्)** रक्षा करने वाले **(रयिम्)** धन को **(नः)** हम लोगों के लिये **(नू)** शीघ्र **(दात)** दीजिये॥१५॥

भावार्थः-वे ही देने वाले उत्तम हैं जो धर्म से धनादिकों को सञ्चित कर विद्यादिसद्गुणरूप परोपकार के लिये देते हैं और वही धन है जिससे विदुषी वा अविदुषी प्रजाएँ अत्यन्त सुख पाय हर्षित हों॥१५॥

इस सूक्त में समस्त विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ऋग्वेद के छठे मण्डल में चतुर्थ अनुवाक, उनचासवाँ सूक्त तथा चतुर्थ अष्टक के आठवें अध्याय में सातवाँ वर्ग पूरा हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्य पञ्चाशत्तमस्य सूक्तस्य ऋजिष्वा ऋषिः। विश्वेदेवा देवताः। १, ७ त्रिष्टुप्। ३, ५, ६, १०, ११, १२ निचृत्त्रिष्टुप्। ४, ८, १३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ स्वराट्पङ्क्तिः। ९ पङ्क्तिः। १४ भुरिक्पङ्क्तिः। १५ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वांसः किमर्थं किं कुर्य्युरित्याह॥

अब पन्द्रह ऋचा वाले पचासवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् जन किसलिये क्या करें, इस विषय को कहते हैं॥

हुवे वो॑ देवीमदि॑तिं॒ नमो॑भिर्मृळी॒काय॒ वरु॑णं मि॒त्रम॒ग्निम्।
अ॒भि॒क्षदाम॑र्य॒मणं॑ सु॒शेवं॑ त्रा॒तॄन् दे॒वान्त्स॑वि॒तार॒ं भग॑ं च॥ १॥

हुवे। वः। देवीम्। अदितिम्। नमः॑ऽभिः। मृळी॒काय॑। वरु॑णम्। मि॒त्रम्। अ॒ग्निम्। अ॒भि॒ऽक्षदाम्। अ॒र्य॒मण॑म्। सु॒ऽशेव॑म्। त्रा॒तॄन्। दे॒वान्। स॒वि॒तार॑म्। भग॑म्। च॒॥ १॥

पदार्थः-(हुवे) आह्वयाम्याददे वा **(वः)** युष्माकम् **(देवीम्)** देदीप्यमानां विदुषीम् **(अदितिम्)** अमातरम् **(नमोभिः)** सत्कारान्नादिभिः **(मृळीकाय)** सुखाय **(वरुणम्)** उदानमिवोत्कृष्टम् **(मित्रम्)** प्राण इव प्रियम् **(अग्निम्)** पावकम् **(अभिक्षदाम्)** ये भिक्षां न ददति तेषाम् **(अर्यमणम्)** न्यायकारिणम् **(सुशेवम्)** सुष्ठुसुखम् **(त्रातॄन्)** रक्षकान् **(देवान्)** विदुषः **(सवितारम्)** सत्कर्मसु प्रेरकं राजानम् **(भगम्)** ऐश्वर्य्यम् **(च)**॥१॥

अन्वयः-हे मनुष्या! यथाऽहं नमोभिर्वोऽभिक्षदां मृळीकायाऽदितिं देवीं वरुणं मित्रमग्निमर्यमणं सुशेवं त्रातॄन् देवान् सवितारं भगं च हुवे तथैतानस्मदर्थं यूयमाह्वयत॥१॥

भावार्थः-ये विद्वांसः सुपात्रेभ्यो भिक्षां प्रददति सर्वान् पुरुषार्थिनः कृत्वैतदर्थं विदुषीं मातरं वरुणादींश्चाददति ते जगद्धितैषिणः सन्ति॥१॥

पदार्थः-हे मनुष्यो! जैसे मैं **(नमोभिः)** सत्कार और अन्नादिकों के साथ **(वः)** तुम लोगों के **(अभिक्षदाम्)** जो भिक्षा नहीं देते उनके **(मृळीकाय)** सुख के लिये **(अदितिम्)** जो माता नहीं उस **(देवीम्)** देदीप्यमान विदुषी वा **(वरुणम्)** उदान के समान सर्वोत्कृष्ट वा **(मित्रम्)** प्राण के समान प्यारे वा **(अग्निम्)** अग्नि तथा **(अर्यमणम्)** न्यायकारी और **(सुशेवम्)** सुन्दर सुख वाले जन को वा **(त्रातॄन्)** रक्षा करने वाले व **(देवान्)** विद्वानों व **(सवितारम्)** सत्कर्मों में प्रेरणा देने वाले राजा **(भगम्, च)** और ऐश्वर्य्य को **(हुवे)** बुलाता वा देता हूं, वैसे इनको हमारे लिये तुम बुलाओ वा देओ॥१॥

भावार्थः-जो विद्वान् जन सुपात्रों के लिये भिक्षा देते और सब को पुरुषार्थी कर उनके लिये विदुषी माता वा वरुण आदि को लेते हैं, वे जगत् के हितैषी हैं॥१॥

अथ मनुष्याः सततं किं कुर्य्युरित्याह॥

अब मनुष्य निरन्तर क्या करें, इस विषय को कहते हैं॥

सुज्योतिषः सूर्य दक्षपितृननागास्त्वे सुमहो वीहि देवान्।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः॥ २॥

सुऽज्योतिषः। सूर्य। दक्षऽपितॄन्। अनागाःऽत्वे। सुऽमहः। वीहि। देवान्। द्विऽजन्मानः। ये। ऋतऽसापः। सत्याः। स्वःऽवन्तः। यजताः। अग्निऽजिह्वाः॥ २॥

पदार्थः-(**सुज्योतिषः**) सुष्ठुविनयप्रकाशकाः (**सूर्य**) सूर्य्य इव वर्त्तमान (**दक्षपितॄन्**) चतुरान् जनकानध्यापकान् वा (**अनागस्त्वे**) अनपराधित्वे (**सुमहः**) सुष्ठु महतो महाशयान् (**वीहि**) प्राप्नुहि कामय वा (**देवान्**) विदुषः (**द्विजन्मानः**) द्वे उत्पत्तिविद्याप्राप्तिरूपे जन्मनी येषान्ते (**ये**) (**ऋतसापः**) य ऋतेन सत्येन सपन्ति सम्बध्नन्ति (**सत्याः**) प्रतिज्ञां कुर्वन्ति (**स्वर्वन्तः**) बहुसुखयुक्ताः (**यजताः**) ये सर्वा विद्याः सङ्गच्छन्ते (**अग्निजिह्वाः**) अग्निरिव सत्यविद्यया सुप्रकाशिता जिह्वा येषान्ते॥ २॥

अन्वयः-हे सूर्य इव विद्वन्! येऽनागास्त्वे द्विजन्मान ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः सुज्योतिषो विद्वांसः स्युस्तान् सुमहो दक्षपितॄन् देवांस्त्वं सततं वीहि, एवं सति सर्वदा कल्याणं निवहेत्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्य्यवद्विद्याधर्मप्रकाशकानध्यापकोपदेशकान् विदुषः सुसेवन्ते तेऽपि तादृशा भवन्ति॥ २॥

पदार्थः-हे (**सूर्य**) सूर्य के समान वर्त्तमान (**ये**) जो (**अनागास्त्वे**) अनपराधिपन में (**द्विजन्मानः**) उत्पत्ति और विद्याप्राप्तिरूप जन्म वाले (**ऋतसापः**) सत्य से सम्बन्ध करते वा (**सत्याः**) प्रतिज्ञा करते (**स्वर्वन्तः**) वा बहु सुखयुक्त (**यजताः**) समस्त विद्याओं का सङ्ग करते (**अग्निजिह्वाः**) वा अग्नि के समान सत्य विद्या से सुन्दर प्रकाशित जिह्वाएं जिनकी वा (**सुज्योतिषः**) सुन्दर विनय के प्रकाश करने वाले विद्वान् हों उन (**सुमहः**) श्रेष्ठ महान् महाशय (**दक्षपितॄन्**) चतुर पिता और विद्या पढ़ाने वाले (**देवान्**) विद्वानों को आप निरन्तर (**वीहि**) प्राप्त होओ व उनकी कामना करो, ऐसा होने पर सर्वदा कल्याण प्राप्त होवे॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य के समान विद्या और धर्म के प्रकाश करने वाले अध्यापक, उपदेशक वा विद्वानों की सेवा करते हैं, वे भी वैसे ही होते हैं॥ २॥

पुनर्विद्वांसः किंवत्किं कुर्य्युरित्याह॥

फिर विद्वान् जन किसके तुल्य क्या करें, इस विषय को कहते हैं॥

उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः॥ ३॥

उत। द्यावापृथिवी इति। क्षत्रम्। उरु। बृहत्। रोदसी इति। शरणम्। सुसुम्ने। महः। करथः। वरिवः। यथा। नः। अस्मे इति। क्षयाय। धिषणे इति। अनेहः॥ ३॥

पदार्थः-(**उत**) (**द्यावापृथिवी**) विद्युद्भूमी (**क्षत्रम्**) धनं राज्यं क्षत्रियकुलं वा (**उरु**) बहु (**बृहत्**) महत् (**रोदसी**) बहुकार्य्यकरे (**शरणम्**) आश्रयम् (**सुषुम्ने**) सुष्ठु सुखकरे (**महः**) महत् (**करथः**) (**वरिवः**) परिचरणम् (**यथा**) (**नः**) अस्माकम् (**अस्मे**) अस्मासु (**क्षयाय**) निवासाय (**धिषणे**) धारिके (**अनेहः**) अहन्तव्यं सततं रक्षणीयं व्यवहारम्॥३॥

अन्वयः-हे अध्यापकोपदेशकौ! युवां यथा रोदसी सुषुम्ने धिषणे द्यावापृथिवी न उरु बृहच्छरणं क्षत्रं कुरुतस्तथा महो वरिव उताऽनेहोऽस्मे क्षयाय करथः कुर्य्यातम्॥३॥

भावार्थः-अत्रोपमालङ्कारः। येऽध्यापकोपदेशकाः सूर्यभूमिवत्सर्वेभ्यो विद्यादानधारणशरणानि प्रयच्छन्ति तथा ये सत्यस्याप्तानां विदुषां च सततं सेवां कुर्वन्ति ते सर्वथा माननीया भवन्ति॥३॥

पदार्थः-हे अध्यापक और उपदेशको! तुम (**यथा**) जैसे (**रोदसी**) बहुत कार्य और (**सुषुम्ने**) सुन्दर सुख करने वाली (**धिषणे**) व्यवहारों को धारण करने वाली (**द्यावापृथिवी**) बिजुली और भूमि (**नः**) हमारे (**उरु**) बहुत (**बृहत्**) महान् (**शरणम्**) आश्रय और (**क्षत्रम्**) धन राज्य वा क्षत्रियकुल को सिद्ध करते हैं, वैसे (**महः**) बड़े (**वरिवः**) सेवन (**उत**) और (**अनेहः**) न नष्ट करने योग्य व्यवहार (**अस्मे**) हम लोगों में (**क्षयाय**) निवास करने के लिये (**करथः**) सिद्ध करो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अध्यापन और उपदेश करने वाले जन सूर्य और भूमि के तुल्य सब को विद्यादान, धारण और शरण देते हैं तथा जो सत्य, यथार्थवक्ता और विद्वानों की सेवा करेत हैं, वे सर्वथा माननीय होते हैं॥३॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् कैसे हो इस विषय को अगले मन्त्र में कहते हैं॥

आ नो॑ रु॒द्रस्य॑ सू॒नवो॑ नमन्ताम॒द्या हू॒तासो॒ वस॒वोऽधृ॑ष्टाः।
यदी॒मर्भे॑ महति॒ वा॑ हि॒तासो॑ बा॒धे म॒रुतो॒ अह्वा॑म दे॒वान्॥४॥

आ। नः। रुद्रस्य। सूनवः। नमन्ताम्। अद्य। हूतासः। वसवः। अधृष्टाः। यत्। ईम्। अर्भे। महति। वा। हितासः। बाधे। मरुतः। अह्वाम। देवान्॥४॥

पदार्थः-(**आ**) (**नः**) अस्मान् (**रुद्रस्य**) दुष्टानां रोदयितुः (**सूनवः**) अपत्यानि (**नमन्ताम्**) (**अद्या**) इदानीम्। अत्र **निपातस्य चे**ति दीर्घः। (**हूतासः**) कृताह्वानाः सन्तः (**वसवः**) आदिकोटिस्था विद्वांसः (**अधृष्टाः**) अप्रगल्भाः (**यत्**) ये (**ईम्**) सर्वतः (**अर्भे**) अल्पवयसि जने (**महति**) (**वा**) (**हितासः**) (**बाधे**) (**मरुतः**) मनुष्याः (**अह्वाम**) इच्छेम (**देवान्**) विदुषः॥४॥

अन्वयः-हे मनुष्या! यद्ये हूतासोऽधृष्टा वसवो बाधेऽर्भे महति वा हितासो रुद्रस्य सूनवो [मरुतो] नोऽद्याऽऽनमन्तां तान् देवान् वयमीमह्वाम॥४॥

भावार्थः-ये विद्वांसश्चक्रवर्त्तिनि राजनि क्षुद्रे जने वा पक्षपातं विहाय हिताय वर्त्तमाना नम्रा विद्वत्प्रिया मनुष्याः सन्ति तेऽत्र भाग्यशालिनो वर्त्तन्ते॥४॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(हूतासः)** बुलाये हुए **(अधृष्टाः)** अप्रगल्भ **(वसवः)** आदि कोटिवाले विद्वान् जन **(बाधे)** विलोड़न के निमित्त **(अर्भे)** थोड़ी अवस्था वाले **(महति, वा)** वा बहुत अवस्था वाले जन में **(हितासः)** हित करने वाले वा **(रुद्रस्य)** दुष्टों के रुलाने वाले के **(सूनवः)** सन्तान **(मरुतः)** मनुष्य **(नः)** हम लोगों को **(अद्या)** आज **(आ, नमन्ताम्)** अच्छे प्रकार नमें उन **(देवान्)** विद्वानों को हम लोग **(ईम्)** सब ओर से **(अह्वाम)** चाहें॥४॥

भावार्थः-जो विद्वान् जन, चक्रवर्ती राजा वा क्षुद्रजन में पक्षपात छोड़ कर हित के लिये वर्त्तमान, नम्र, विद्वानों के प्रिय मनुष्य हैं, वे यहाँ भाग्यशाली होते हैं॥४॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वान् जनों को क्या करना चाहिये, इस विषय को कहते हैं॥

मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते॥५॥८॥

मिम्यक्ष। येषु। रोदसी। नु। देवी। सिसक्ति। पूषा। अभ्यर्धऽयज्वा। श्रुत्वा। हवम्। मरुतः। यत्। ह। याथ। भूम। रेजन्ते। अध्वनि। प्रऽविक्ते॥५॥

पदार्थः-**(मिम्यक्ष)** तूर्णं गच्छ **(येषु)** वाय्वादिषु **(रोदसी)** प्रकाशभूमी **(नु)** **(देवी)** दिव्यगुणे **(सिषक्ति)** सिञ्चति **(पूषा)** पुष्टिकरो मेघः **(अभ्यर्धयज्वा)** आभिमुख्यस्यार्द्धे सङ्गन्ता **(श्रुत्वा)** **(हवम्)** शब्दम् **(मरुतः)** मनुष्याः **(यत्)** ये **(ह)** किल **(याथ)** गच्छथ **(भूमा)** भूमी। अत्र **संहितायामिति** दीर्घः। **(रेजन्ते)** कम्पन्ते गच्छन्ति वा **(अध्वनि)** मार्गे **(प्रविक्ते)** प्रकर्षेण चलितव्ये॥५॥

अन्वयः-हे मरुतो! येषु रोदसी देवी अभ्यर्धयज्वा पूषा सिषक्ति त्वमतो नु मिम्यक्ष यद्ये ह भूमा प्रविक्तेऽध्वनि रेजन्ते तेषां हवं श्रुत्वैतान् यूयं याथ॥५॥

भावार्थः-हे विद्वांसो! यूयं सूर्यपृथिवीवत्प्रकाशक्षमाशीला भूत्वा सर्वेषां प्रश्नाञ्छ्रुत्वा समाधत्त, यथा भूम्यादिलोकाः स्वस्वमार्गे नियमेन गच्छन्ति तथा नियमेन धर्ममार्गे गच्छत॥५॥

पदार्थः-हे **(मरुतः)** मनुष्यो! **(येषु)** जिन वायु आदि पदार्थों में **(रोदसी)** प्रकाश और भूमि **(देवी)** जो कि दिव्यगुण वाली हैं उनको **(अभ्यर्धयज्वा)** मुख्य के आधे में सङ्गत होने वाला **(पूषा)** पुष्टि करने वाला मेघ **(सिषक्ति)** सींचता है आप इससे **(नु)** शीघ्र **(मिम्यक्ष)** शीघ्र जाइये **(यत्)** जो **(ह)** निश्चय कर **(भूमा)** भूमि में वा **(प्रविक्ते)** प्रकर्षकर चलने योग्य **(अध्वनि)** मार्ग में **(रेजन्ते)** कांपते वा जाते हैं उनके **(हवम्)** शब्द को **(श्रुत्वा)** सुनकर उनको तुम **(याथ)** प्राप्त होओ॥५॥

भावार्थः-हे विद्वानो! तुम सूर्य्य और पृथिवी के तुल्य प्रकाश और क्षमाशील होकर सबके प्रश्नों को सुनकर समाधान देओ, जैसे भूमि आदि लोक अपने-अपने मार्ग में नियम से जाते हैं, वैसे नियम से धर्म मार्ग में जाओ॥५॥

पुनर्विदुषा किमुपदिश्य किं कारयितव्यमित्याह॥

फिर विद्वानों को क्या उपदेश कर क्या करना चाहिये, इस विषय को कहते हैं॥

अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन।

श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः॥६॥

अभि। त्यम्। वीरम्। गिर्वणसम्। अर्च। इन्द्रम्। ब्रह्मणा। जरितः। नवेन। श्रवत्। इत्। हवम्। उप। च। स्तवानः। रासत्। वाजान्। उप। महः। गृणानः॥६॥

पदार्थः-(**अभि**) (**त्यम्**) तम् (**वीरम्**) वीरवन्तम् (**गिर्वणसम्**) गीर्भिः सेव्यमानम् (**अर्च**) सत्कुरु (**इन्द्रम्**) परमैश्वर्यवन्तम् (**ब्रह्मणा**) धनेनान्नादिना वा (**जरितः**) स्तावक (**नवेन**) नूतनेन (**श्रवत्**) शृणुयात् (**इत्**) एव (**हवम्**) सत्यप्रशंसाम् (**उप**) (**च**) (**स्तवानः**) स्तुवन् (**रासत्**) (**वाजान्**) अन्नादीन् (**उप**) (**महः**) महतः (**गृणानः**) प्रशंसन्॥६॥

अन्वयः-हे जरितो! भवान् महो वाजान् गृणान उप रासत् स्तवानो हवमुप श्रवदित्। नवेन ब्रह्मणा त्यं गिर्वणसं वीरमिन्द्रं चाभ्यर्च॥६॥

भावार्थः-हे विद्वंस्त्वं सर्वेषां प्रश्नाञ्छ्रुत्वा समादधन्नादीन् प्रापयन् धार्मिकान् वीरान् धनाढ्यांश्च सर्वदा शिक्षेथा येनैतेषामैश्वर्यमन्यायमार्गे विनष्टं न स्यात्॥६॥

पदार्थः-हे (**जरितः**) स्तुति करने वाले जन! आप (**महः**) बहुत (**वाजान्**) अन्नादिकों की (**गृणानः**) प्रशंसा करते हुए (**उप, रासत्**) समीप में दें और (**स्तवानः**) स्तुति करते हुए (**हवम्**) सत्य की प्रशंसा को (**उप, श्रवत्**) सुनें (**इत्**) ही तथा (**नवेन**) नवीन (**ब्रह्मणा**) धन वा अन्नादि से (**त्यम्**) उस (**गिर्वणसम्**) वाणियों से सेव्यमान (**वीरम्**) वीरवान् तथा (**इन्द्रम्**) परमैश्वर्यवान् का (**च**) भी (**अभि, अर्च**) सब ओर से सत्कार करो॥६॥

भावार्थः-हे विद्वन्! आप सब के प्रश्नों को सुनकर समाधान देते हुए और अन्नादि पदार्थों की प्राप्ति कराते हुए धार्मिक वीरों को और धनाढ्यों को सर्वदा शिक्षा देवें, जिससे इनका ऐश्वर्य अन्याय मार्ग में नष्ट न हो॥६॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः।

यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः॥७॥

ओमानम्। आपः। मानुषीः। अमृक्तम्। धात। तोकाय। तनयाय। शम्। योः। यूयम्। हि। स्थ। भिषजः। मातृऽतमाः। विश्वस्य। स्थातुः। जगतः। जनित्रीः॥७॥

पदार्थः-(**ओमानम्**) रक्षादिकर्त्तारम् (**आपः**) जलानीव (**मानुषीः**) मनुष्यसम्बन्धिनीः प्रजाः (**अमृक्तम्**) अशुद्धं जनम् (**धात**) धरत (**तोकाय**) अल्पवयसे (**तनयाय**) सुकुमाराय सन्तानाय (**शम्**) सुखम् (**योः**) प्रापयति (**यूयम्**) (**हि**) यतः (**स्था**) भवत। अत्र **संहितायामिति** दीर्घः। (**भिषजः**) सद्वैद्याः (**मातृतमाः**) अतिशयेन मातृवत् कृपालवः (**विश्वस्य**) संसारस्य (**स्थातुः**) स्थावरस्य (**जगतः**) जङ्गमस्य (**जनित्रीः**) जनन्यः॥७॥

अन्वयः-हे मनुष्या! यथा मातृतमा जनित्रीस्तोकाय तनयाय शं कुर्वन्ति तथा यूयमाप इवाऽमृक्तमोमानं मानुषीः प्रजा धात स्थातुर्जगतो विश्वस्य हि यूयं भिषजः स्था यथा न्यायेशः सर्वान् सुखं योः प्रापयति तथैवाऽत्र वर्त्तध्वम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे अध्यापकोपदेशका यूयमशुद्धं जनं सत्यं ग्राहयित्वा शुद्धं सम्पादयत सर्वस्य जगतो रक्षणेऽविद्यारोगनिवारकः सन्तः सर्वान् मातृवत् पालयत॥७॥

पदार्थः-हे मनुष्यो! जैसे (**मातृतमाः**) अतीव माता के समान कृपालु तथा (**जनित्रीः**) उत्पन्न करने वाली (**तोकाय**) थोड़ी आयु वाले सन्तान वा (**तनयाय**) सुन्दर कुमार सन्तान के लिये (**शम्**) सुख करती हैं, वैसे (**यूयम्**) तुम (**आपः**) जलों के समान (**अमृक्तम्**) अशुद्ध जन को वा (**ओमानम्**) रक्षा आदि करने वाले को और (**मानुषीः**) मनुष्य सम्बन्धी प्रजाओं को (**धात**) धारण करो तथा (**स्थातुः**) स्थावर वा (**जगतः**) जङ्गम (**विश्वस्य**) संसार के (**हि**) जिस कारण तुम (**भिषजः**) वैद्य (**स्था**) हो, वा जैसे न्यायाधीश सबको सुख (**योः**) पहुंचता है, वैसे यहाँ वर्त्तो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे अध्यापक और उपदेशको! तुम अपवित्र जन को सत्य ग्रहण कराकर शुद्ध करो तथा सब जगत् की रक्षा करने के निमित्त अविद्यारूपी रोग के निवारण करने वाले होते हुए सब को माता के तुल्य पालो॥७॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात्।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि॥८॥

आ। नः। देवः। सविता। त्रायमाणः। हिरण्यऽपाणिः। यजतः। जगम्यात्। यः। दत्रऽवान्। उषसः। न। प्रतीकम्। विऽऊर्णुते। दाशुषे। वार्याणि॥८॥

पदार्थः-(**आ**) (**नः**) अस्मान् (**देवः**) दिव्यगुणकर्मस्वभावः (**सविता**) सूर्य इव (**त्रायमाणः**) रक्षकः (**हिरण्यपाणिः**) हिरण्यं सुवर्णादिकं पाणौ हस्ते यस्य सः (**यजतः**) सङ्गन्ता (**जगम्यात्**) भृशं

प्राप्नुयात् **(यः)** **(दत्रवान्)** दानवान् **(उषसः)** प्रभातवेलायाः **(न)** इव **(प्रतीकम्)** प्रतीतिकरम् **(व्यूर्णुते)** आच्छादयति **(दाशुषे)** दात्रे **(वार्याणि)** स्वीकर्त्तुमर्हाणि वस्तूनि॥८॥

अन्वयः-हे मनुष्या! यो दत्रवान् हिरण्यपाणिर्यजतो देवः सविता त्रायमाण उषसो न समयाद् दाशुषे प्रतीकं वार्याणि च व्यूर्णुते नोऽस्मानाऽऽजगम्यात्तं वयं सदा सुखयेम॥८॥

भावार्थः-हे मनुष्या! ये दानशीलाः प्रभातवेलावत्सुप्रकाशकाः सर्वेभ्यो विद्याऽभयदाने प्रयच्छन्ति ते जगति वरा गण्यन्ते॥८॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(दत्रवान्)** दान देने वाला **(हिरण्यपाणिः)** हाथ में सुवर्णादि लिये हुए और **(यजतः)** सङ्ग करने वाला **(देवः)** दिव्य गुण, कर्म, स्वभावयुक्त **(सविता)** सूर्य के तुल्य **(त्रायमाणः)** रक्षक जन **(उषसः)** प्रभातवेला के **(न)** समान समय से **(दाशुषे)** देने वाले के लिये **(प्रतीकम्)** प्रतीति करने वाले पदार्थ और **(वार्याणि)** स्वीकार करने योग्य पदार्थों को **(व्यूर्णुते)** आच्छादित करता है तथा **(नः)** हम लोगों को **(आ, जगम्यात्)** सब ओर से निरन्तर प्राप्त हो, उसको हम लोग सदा सुखी करें॥८॥

भावार्थः-हे मनुष्यो! जो दानशील प्रभातवेला के समान सुन्दर प्रकाश करने वाले जन सब के लिये विद्या और अभयदान देते हैं, वे संसार में श्रेष्ठ गिने जाते हैं॥८॥

पुनर्मनुष्यैः कस्मात् किं प्रार्थनीयमित्याह॥

फिर मनुष्यों को किससे क्या प्रार्थना करनी योग्य है, इस विषय को कहते हैं॥

उ॒त त्वं सू॑नो सहसो नो अ॒द्या दे॒वाँ अ॒स्मिन्नध्व॒रे व॑वृत्याः।
स्याम॒हं ते॒ सद॒मिद्रा॒तौ तव॑ स्याम॒ग्नेऽव॑सा सु॒वीः॑॥९॥

उ॒त। त्वम्। सू॒नो॒ इति॑। स॒हस॒ः। न॒ः। अ॒द्य। आ। दे॒वान्। अ॒स्मिन्। अ॒ध्व॒रे। व॒वृ॒त्या॒ः। स्याम्। अ॒हम्। ते॒। सद॑म्। इत्। रा॒तौ। तव॑। स्या॒म्। अ॒ग्ने॒। अव॑सा। सु॒ऽवीः॑॥९॥

पदार्थः-**(उत)** **(त्वम्)** **(सूनो)** विद्यासन्तान **(सहसः)** शरीरात्मबलवतो विदुषः **(नः)** अस्मान् **(अद्या)** अस्मिन्दिने। अत्र **संहितायामिति** दीर्घः। **(आ)** **(देवान्)** विदुषो दिव्यान् भोगान् वा **(अस्मिन्)** **(अध्वरे)** अहिंसनीये विद्याप्राप्तिव्यवहारे **(ववृत्याः)** प्रवर्त्तयेः **(स्याम्)** भवेयम् **(अहम्)** **(ते)** तव **(सदम्)** प्राप्तव्यम् **(इत्)** एव **(रातौ)** दाने **(तव)** **(स्याम्)** **(अग्ने)** पावकवत्प्रकाशात्मन् **(अवसा)** रक्षणादिना **(सुवीरः)** सुभटः॥९॥

अन्वयः-हे सहसः सूनोऽग्ने! त्वमद्याऽस्मिन्नध्वरे नो देवाना ववृत्या येनाहं सदं प्राप्य ते रातौ स्थिरः स्यामुत तवावसा सुवीरोऽहमिदेव स्याम्॥९॥

भावार्थः-हे विद्वन्! यदि भवानिदानीमस्मान् सुखं प्रापयेत्तर्हि वयं विद्यादातारो महावीरा भूत्वा तव सेवां सततं कुर्याम॥९॥

पदार्थः-हे **(सहसः)** शरीर और आत्मा के बल से युक्त विद्वान् के **(सूनो)** विद्यासम्बन्धी पुत्र **(अग्ने)** अग्नि के तुल्य प्रकाशित आत्मा वाले! **(त्वम्)** आप **(अद्या)** आज **(अस्मिन्)** इस **(अध्वरे)** न नष्ट करने योग्य विद्या प्राप्ति के व्यवहार में **(नः)** हम **(देवान्)** विद्वानों को वा दिव्य भोगों को **(आ, ववृत्याः)** अच्छे प्रकार प्रवृत्त कीजिये जिससे **(अहम्)** मैं **(सदम्)** प्राप्त होने योग्य पदार्थ को पाकर **(ते)** आपके **(रातौ)** दान कर्म में स्थिर **(स्याम्)** होऊं **(उत)** और **(तव)** आपके **(अवसा)** रक्षा आदि कर्म से **(सुवीरः)** सुन्दर योद्धाओं वाला मैं **(इत्)** ही **(स्याम्)** होऊं॥९॥

भावार्थः-हे विद्वन्! यदि आप सब हमको सुख पहुंचाइये तो हम विद्या देने वाले महावीर होकर आपकी सेवा को निरन्तर करें॥९॥

पुनर्मनुष्यैः केषां सङ्गेन कीदृशैर्भवतिव्यमित्याह॥

फिर मनुष्यों को किनके सङ्ग से कैसा होना योग्य है, इस विषय को कहते हैं॥

उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके॥ १०॥ ९॥

उत। त्या। मे। हवम्। आ। जग्म्यातम्। नासत्या। धीभिः। युवम्। अङ्ग। विप्रा। अत्रिम्। न। महः। तमसः। अमुमुक्तम्। तूर्वतम्। नरा। दुः।ऽइतात्। अभीके॥ १०॥

पदार्थः-(**उत**) अपि (**त्या**) तौ (**मे**) मम (**हवम्**) आदातव्यम् (**आ**) (**जग्म्यातम्**) प्राप्नुयातम् (**नासत्या**) सत्याचारिणौ (**धीभिः**) प्रज्ञाभिः कर्मभिर्वा (**युवम्**) युवाम् (**अङ्ग**) मित्र (**विप्रा**) मेधाविनावध्यापकोपदेशकौ (**अत्रिम्**) सूर्य्यम् (**न**) इव (**महः**) महतः (**तमसः**) अन्धकारस्य (**अमुमुक्तम्**) मोचयेतम् (**तूर्वतम्**) हिंस्यातम् (**नरा**) नायकौ (**दुरितात्**) अधर्माचरणात् (**अभीके**) समीपे॥१०॥

अन्वयः-हे अङ्ग! नासत्या विप्रा नरा त्या युवं धीभिर्मेऽभीके हवमा जग्म्यातमुत यथा महस्तमसोऽत्रिं न दुरितादमुमुक्तं दुर्गुणांस्तूर्वतम्॥१०॥

भावार्थः-अत्रोपमालङ्कारः। यथा सूर्य्योदयं प्राप्य सर्वे पदार्थास्तमसो मुक्ता जायन्ते तथा धार्मिकं विद्वासं प्राप्याऽविद्याया जना मुक्ता जायन्ते॥१०॥

पदार्थः-हे **(अङ्ग)** मित्र! **(नासत्या)** सत्य आचरण करने वाले **(विप्रा)** मेधावी अध्यापक और उपदेशक **(नरा)** नायक सब में श्रेष्ठजन **(त्या)** वे **(युवम्)** तुम दोनों **(धीभिः)** उत्तम बुद्धि वा कर्मों से **(मे)** मेरे **(अभीके)** समीप में **(हवम्)** लेने योग्य पदार्थ को **(आ, जग्म्यातम्)** सब ओर से प्राप्त होओ **(उत)** और जैसे **(महः)** महान् **(तमसः)** अन्धकार से **(अत्रिम्)** सूर्य को **(न)** वैसे **(दुरितात्)** अधर्माचरण से **(अमुमुक्तम्)** छुड़ाओ और दुर्गुणों को **(तूर्वतम्)** नष्ट करो॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे सूर्योदय का प्राप्त होकर सब पदार्थ अन्धकार से छूट जाते हैं, वैसे धार्मिक विद्वान् को प्राप्त होकर अविद्या से मनुष्य मुक्त होते हैं॥१०॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को कहते हैं॥

ते नो॑ रा॒ये द्यु॒मतो॒ वाज॑वतो दा॒तारो॑ भूत नृ॒वत॑: पुरु॒क्षो।

दु॒श॒स्यन्तो॑ दि॒व्याः पार्थि॑वासो॒ गोजा॑ता॒ अप्या॑ मृ॒ळता॑ च देवाः॥ ११॥

ते। नः॒। रा॒यः॒। द्यु॒ऽमत॑:। वाज॑ऽवतः। दा॒तारः॑। भू॒त॒। नृ॒ऽवत॑:। पु॒रु॒ऽक्षोः॒। दु॒श॒स्यन्त॑:। दि॒व्याः॒। पार्थि॑वासः। गोऽजा॑ताः। अप्या॑:। मृ॒ळत॑। च॒। दे॒वा॒:॥ ११॥

पदार्थः-(**ते**) (**नः**) अस्माकम् (**रायः**) (**द्युमतः**) प्रशस्ता द्यौः कामना विद्यते यस्य तस्य (**वाजवतः**) बह्वन्नादियुक्तस्य (**दातारः**) (**भूत**) भवत (**नृवतः**) बहूत्तममनुष्यसहितस्य (**पुरुक्षोः**) बह्वन्नं यस्मिंस्तस्य (**दशस्यन्तः**) प्रयच्छन्तः (**दिव्याः**) (**पार्थिवासः**) पृथिव्यां भवाः (**गोजाताः**) गव्यन्तरिक्षे प्रसिद्धाः (**अप्याः**) अप्सु भवाः (**मृळता**) सुखयत। अत्र **संहितायामि**ति दीर्घः। (**च**) (**देवाः**) विद्वांसः॥ ११॥

अन्वयः-हे देवा! ये यूयं नो द्युमतो वाजवतो नृवतः पुरुक्षोर्दशस्यन्तो रायो दातारो भूत ते च ये दिव्याः पार्थिवासो गोजाता अप्याः सन्ति ते च यूयमस्मान् मृळता॥ ११॥

भावार्थः-हे विद्वांसो! भवन्तः सततं विद्याधने प्रापणीये प्राप्य सर्वाञ्जनान् सुखयन्तु॥ ११॥

पदार्थः-हे (**देवाः**) विद्वानो! जो तुम (**नः**) हमारे (**द्युमतः**) जिसकी प्रशंसायुक्त कामना विद्यमान उस (**वाजवतः**) बहुत अन्नादि पदार्थयुक्त (**नृवतः**) बहुत उत्तम मनुष्ययुक्त (**पुरुक्षोः**) बहुत अन्न वाले पदार्थ के (**दशस्यन्तः**) देनेवाले और (**रायः**) धन के (**दातारः**) देनेवाले (**भूत**) होओ (**ते**) वे (**च**) और जो (**दिव्याः**) उत्तम (**पार्थिवासः**) पृथिवी के बीच हुए (**गोजाताः**) अन्तरिक्ष में प्रसिद्ध (**अप्याः**) और जलों में प्रसिद्ध हैं, वे भी आप हम लोगों को (**मृळता**) सुखी करो॥ ११॥

भावार्थः-हे विद्वानो! तुम निरन्तर प्राप्त होने योग्य विद्या और धनों को प्राप्त होकर सब मनुष्यों को सुखी करो॥ ११॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

ते नो॑ रु॒द्रः सर॑स्वती स॒जोषा॑ मी॒ळ्हुष्म॑न्तो॒ विष्णु॑र्मृ॒ळन्तु॑ वा॒युः।

ऋ॒भु॒क्षा वाजो॒ दैव्यो॑ विधा॒ता प॒र्जन्या॒वाता॑ पिप्यता॒मिषं॑ नः॥ १२॥

ते। नः॒। रु॒द्रः। सर॑स्वती। स॒ऽजोषाः। मी॒ळ्हुष्म॑न्तः। विष्णुः॑। मृ॒ळ॒न्तु॒। वा॒यु॒:। ऋ॒भु॒क्षाः। वाज॑:। दैव्यः॑। वि॒ऽधा॒ता। प॒र्जन्या॒वाता॑। पि॒प्य॒ता॒म्। इष॑म्। नः॒॥ १२॥

पदार्थः-(**ते**) (**नः**) अस्मान् (**रुद्रः**) दुष्टानां रोदयिता (**सरस्वती**) बहुविज्ञानयुक्ता (**सजोषाः**) समानप्रीतिसेवी (**मीळ्हुष्मन्तः**) मीळ्हुषो बहवो वीर्यसेचकादयो गुणा येषां ते (**विष्णुः**) व्यापको विद्युदग्निः (**मृळन्तु**) (**वायुः**) (**ऋभुक्षाः**) मेधावी (**वाजः**) अन्नम् (**दैव्यः**) देवैः कृतः (**विधाता**) विधानकर्त्ता (**पर्जन्यावाता**) पर्जन्यश्च वातश्च तौ (**पिप्यताम्**) वर्धयेताम् (**इषम्**) अन्नादिकम् (**नः**) अस्मभ्यमस्मान् वा॥१२॥

अन्वयः-हे अध्यापकोपदेशकौ! सरस्वती सजोषाः पजन्यावातेव भवन्तौ यथा ते रुद्रो विष्णुर्वायुर्ऋभुक्षा वाजो दैव्यो विधाता मीळ्हुष्मन्तो नो मृळन्तु तथा न इषं पिप्यताम्॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथेश्वरेण निर्मिताः पृथिव्यादयः पदार्थाः प्राणिनः सुखयन्ति तथैव यूयं विद्यादिदानेन सर्वान् सुखयत॥१२॥

पदार्थः-हे अध्यापक और उपदेशको! (**सरस्वती**) बहुत विज्ञानयुक्त (**सजोषाः**) समान प्रीति सेवने वाले (**पर्जन्यावाता**) मेघ और वात के समान आप दोनों जैसे (**ते**) वे अर्थात् (**रुद्रः**) दुष्टों को रुलाने वाला (**विष्णुः**) व्यापक अग्नि (**वायुः**) पवन (**ऋभुक्षाः**) मेधावी जन (**वाजः**) अन्न (**दैव्यः**) विद्वानों से किया हुआ व्यवहार और (**विधाता**) विधान करने वाला ये सब (**मीळ्हुष्मन्तः**) बहुत वीर्य सेचक आदि गुणों वाले होते हुए (**नः**) हम लोगों को (**मृळन्तु**) सुखी करें, वैसे (**नः**) हम लोगों के लिये (**इषम्**) अन्नादि पदार्थों को (**पिप्यताम्**) बढ़ाओ॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे ईश्वर से निर्मित किये हुए पृथिवी आदि पदार्थ प्राणियों को सुखी करते हैं, वैसे ही तुम विद्यादान से सब को सुखी करो॥१२॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

उ॒त स्य दे॒वः स॑वि॒ता भगो॑ नो॒ऽपां नपा॑दवतु॒ दानु॒ पप्रिः॑।
त्वष्टा॑ दे॒वेभि॒र्जनि॑भिः स॒जोषा॒ द्यौर्दे॒वेभिः॑ पृथि॒वी स॑मु॒द्रैः॥१३॥

उ॒त। स्यः। दे॒वः। स॒वि॒ता। भगः॑। नः॒। अ॒पाम्। नपा॑त्। अ॒व॒तु॒। दानु॑। पप्रिः॑। त्वष्टा॑। दे॒वेभिः॑। जनि॑ऽभिः। स॒ऽजोषाः॑। द्यौः। दे॒वेभिः॑। पृ॒थि॒वी। स॒मु॒द्रैः॥१३॥

पदार्थः-(**उत**) अपि (**स्यः**) सः (**देवः**) देदीप्यमानः (**सविता**) प्रसवकर्त्ता सूर्य्यः (**भगः**) भजनीयः प्राणः (**नः**) अस्मान् (**अपाम्**) जलानाम् (**नपात्**) यो विद्युद्रूपोऽग्निर्न पतति सः (**अवतु**) (**दानु**) दानम् (**पप्रिः**) पूरयन् (**त्वष्टा**) छेदकः (**देवेभिः**) दिव्यगुणैः (**जनिभिः**) जन्मभिर्जनकैर्वा (**सजोषाः**) समानप्रीतिसेवी (**द्यौः**) सूर्य्यः (**देवेभिः**) सूर्यादिभिर्दिव्यैर्वा (**पृथिवी**) भूमिः (**समुद्रैः**) सागरैस्सह॥१३॥

अन्वयः-हे विद्वन्! भवान् यथा स्यो देवः सविता भग उताऽपां नपाद्देवेभिर्जनिभिः सह त्वष्टा सजोषा देवेभिस्स द्यौः समुद्रैः सह पृथिवी दानु पप्रिरिव नोऽवतु॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथेश्वरेण सृष्टाः सूर्य्यादयः पदार्थाः सर्वमनुष्यादिप्राणिनां कार्य्यसिद्धिनिमित्तानि तथा भवन्तोऽपि सर्वेषां कार्य्यसिद्धिकराः सन्तु॥१३॥

पदार्थः-हे विद्वन्! आप जैसे **(स्यः)** वह **(देवः)** देदीप्यमान **(सविता)** उत्पत्ति करने वाला सूर्य **(भगः)** सेवने योग्य प्राण **(उत)** और **(अपाम्)** जलों के बीच **(नपात्)** न गिरने वाला विद्युत् रूप अग्नि तथा **(देवेभिः)** दिव्य गुणों के और **(जनिभिः)** जन्म वा जन्म देने वालों के साथ **(त्वष्टा)** छिन्न-भिन्न कर्त्ता **(सजोषाः)** समान प्रीति का सेवने वाला **(देवेभिः)** सूर्यादि वा दिव्य पदार्थों के साथ **(द्यौः)** सूर्य **(समुद्रैः)** समुद्रों के साथ **(पृथिवी)** भूमि **(दानु)** दान को **(पप्रिः)** पूर्ण करते हुए **(नः)** हम लोगों की **(अवतु)** रक्षा करे॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे ईश्वर से रचे हुए सूर्यादि पदार्थ सब मनुष्य आदि प्राणियों के कार्यसिद्धि के निमित्त हैं, वैसे आप लोग भी सब की कार्यसिद्धि करने वाले हों॥१३॥

पुनर्मनुष्यैः किमाकाङ्क्षितव्यमित्याह॥

फिर मनुष्यों को क्या आकाङ्क्षा करने योग्य है, इस विषय को कहते हैं॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात् पृथिवी समुद्रः।
विश्वेदेवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु॥१४॥

उत। नः। अहिः। बुध्न्यः। शृणोतु। अजः। एकऽपात्। पृथिवी। समुद्रः। विश्वे। देवाः। ऋतऽवृधः। हुवानाः। स्तुताः। मन्त्राः। कविऽशस्ताः। अवन्तु॥१४॥

पदार्थः-(**उत**) अपि (**नः**) अस्माकम् (**अहिः**) मेघः (**बुध्न्यः**) बुध्नेऽन्तरिक्षे भवः (**शृणोतु**) (**अजः**) यः कदाचिन्न जायते स ईश्वरः (**एकपात्**) एकः पादो जगति यस्य सः (**पृथिवी**) भूमिः (**समुद्रः**) अन्तरिक्षम् (**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**ऋतावृधः**) सत्यस्य वर्धकाः (**हुवानाः**) आह्वातारः (**स्तुताः**) प्रशंसिताः (**मन्त्राः**) वेदस्य श्रुतयो विचारा वा (**कविशस्ताः**) कविभिर्मेधाविभिः शस्ताः प्रशंसिता अध्यापिता वा (**अवन्तु**)॥१४॥

अन्वयः-हे मनुष्या! स एकपादजः परमात्मा नस्तां प्रार्थनां शृणोतु यया बुध्न्योऽहिः पृथिवी समुद्र उतर्तावृधो हुवाना विश्वे देवाः कविशस्ताः स्तुता मन्त्रा नोऽवन्तु॥१४॥

भावार्थः-हे मनुष्या! यूयं यो जन्ममरणादिव्यवहाररहितो जगदीश्वरोऽस्ति तत्कृपया पुरुषार्थेन च सर्वेषां पृथिव्यादिपदार्थानां विज्ञानेन स्वोन्नतीः सततं विदधत॥१४॥

पदार्थः-हे मनुष्यो! [वह] **(एकपात्)** जिसका जगत् में एक पाद है **(अजः)** जो कभी नहीं उत्पन्न होता वह परमात्मा **(नः)** हमारी उस प्रार्थना को **(शृणोतु)** सुने जिसने **(बुध्न्यः)** अन्तरिक्ष में होने वाला **(अहिः)** मेघ **(पृथिवी)** भूमि **(समुद्रः)** अन्तरिक्ष **(उत)** और **(ऋतावृधः)** सत्य के बढ़ाने वाला

(हुवानाः) और आह्वान करने वाले तथा **(विश्वे, देवाः)** समस्त विद्वान् **(कविशस्ताः)** कवि मेधावी जनों से प्रशंसित वा पढ़ाये हुए और **(स्तुताः)** प्रशंसित **(मन्त्राः)** वेद की श्रुति वा वेदविचार हम लोगों की **(अवन्तु)** रक्षा करें॥१४॥

भावार्थः-हे मनुष्यो! तुम-जो जन्म-मरणादि व्यवहार से रहित जगदीश्वर है, उसकी कृपा और पुरुषार्थ से तथा सम्पूर्ण पृथिवी आदि पदार्थों के विज्ञान से अपनी उन्नति निरन्तर करो॥१४॥

पुनर्जिज्ञासवः कीदृशा भवेयुरित्याह॥

फिर जिज्ञासु जन कैसे हों, इस विषय को कहते हैं॥

एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः॥१५॥१०॥

एव। नपातः। मम। तस्य। धीभिः। भरत्ऽवाजाः। अभि। अर्चन्ति। अर्कैः। ग्नाः। हुतासः। वसवः। अधृष्टाः। विश्वे। स्तुतासः। भूत। यजत्राः॥१५॥

पदार्थः-**(एवा)** अत्र **निपातस्य चे**ति दीर्घः। **(नपातः)** पातरहिताः **(मम)** **(तस्य)** **(धीभिः)** प्रज्ञाभिः कर्मभिर्वा **(भरद्वाजाः)** धृतविज्ञानाः **(अभि)** **(अर्चन्ति)** सत्कुर्वन्ति **(अर्कैः)** विचारैः **(ग्नाः)** वाचः **(हुतासः)** सत्कारेण हुताः **(वसवः)** ये विद्यादिषु वसन्ति ते **(अधृष्टाः)** धृष्टतारहिता अप्रगल्भाः **(विश्वे)** सर्वे **(स्तुतासः)** प्राप्तप्रशंसाः **(भूता)** भवत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(यजत्राः)** सङ्गन्तारः॥१५॥

अन्वयः-हे यजत्रा! यथा मम तस्य च धीभिर्भरद्वाजा नपातो हुतासः स्तुतासो विश्वे देवा मम तस्य च धीभिरर्कैश्च ग्ना अभ्यर्चन्ति तथैवाऽधृष्टा वसवो यूयं भूता॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्यार्थिनो विद्यां प्रगल्भतां चेच्छन्ति त आप्तानामीश्वरस्य च गुणकर्मस्वभावान् धृत्वेष्टाम्मतिं विद्यां चाप्नुवन्तीति॥१५॥

अत्र विश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चाशत्तमं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(यजत्राः)** सङ्ग करने वालो! जैसे **(मम)** मेरी और **(तस्य)** उसकी **(धीभिः)** बुद्धि वा कर्मों से **(भरद्वाजाः)** धारण किया है विज्ञान जिन्होंने वे सज्जन और **(नपातः)** पातरहित **(हुतासः)** सत्कार से ग्रहण किये हुए **(स्तुतासः)** प्रशंसा को प्राप्त **(विश्वे)** सब विद्वान् मेरी और उसकी बुद्धि वा कर्मों से **(अर्कैः)** विचारों से **(ग्नाः)** वाणियों को **(अभि, अर्चन्ति)** सब ओर से सत्कृत करते हैं, वैसे **(एवा)** ही **(अधृष्टाः)** धृष्टतारहित **(वसवः)** विद्यादिकों में बसने वाले तुम **(भूत)** होओ॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्यार्थी विद्या और प्रगल्भता की इच्छा करते हैं, वे यथार्थवक्ता तथा ईश्वर के गुण कर्म और स्वभावों को धारण कर इष्ट मति और विद्या को प्राप्त होते हैं॥१५॥

इस सूक्त में विश्वे देवों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पचासवां सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षोडशर्चस्यैकपञ्चाशत्तमस्य सूक्तस्य ऋजिष्वा ऋषिः। विश्वेदेवा देवताः। १, २,३, ५, ७, १०, ११, १२ निचृत्त्रिष्टुप्। ८, त्रिष्टुप्छन्दः। धैवतः स्वरः। ४, ६,९ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १३, १४, निचृदुष्णिक्। १५ उष्णिक् छन्दः। ऋषभः स्वरः। १६ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

पुनर्मनुष्यैः किमेष्टव्यमित्याह॥

अब सोलह ऋचावाले इक्यावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर मनुष्यों को क्या चाहने योग्य है, इस विषय को कहते हैं॥

उदु॒ त्यच्चक्षु॒र्महि॑ मि॒त्रयो॒राँ एति॑ प्रि॒यं वरु॑णयो॒रद॑ब्धम्।
ऋ॒तस्य॒ शुचि॑ दर्श॒तमनी॑कं रु॒क्मो न दि॒व उदि॑ता॒ व्य॑द्यौत्॥ १॥

उ॒त्। ऊँ॒ इति॑। त्यत्। चक्षुः॑। महि॑। मि॒त्रयोः॑। आ। एति॑। प्रि॒यम्। वरु॑णयोः। अद॑ब्धम्। ऋ॒तस्य॑। शुचि॑। द॒र्श॒तम्। अनी॑कम्। रु॒क्मः। न। दि॒वः। उत्ऽइ॑ता। वि। अ॒द्यौ॒त्॥ १॥

पदार्थः-(**उत्**) (**उ**) (**त्यत्**) तत् (**चक्षुः**) चष्टेऽनेन तत् (**महि**) महत् (**मित्रयोः**) सुहृदोरध्यापकाऽध्येत्रोर्बाह्याभ्यन्तरस्थयोः प्राणयोर्वा (**आ**) (**एति**) (**प्रियम्**) यत्प्रीणाति तत् (**वरुणयोः**) उदान इव वर्त्तमानयोः (**अदब्धम्**) अहिंसितम् (**ऋतस्य**) सत्यस्य (**शुचि**) पवित्रम् (**दर्शतम्**) द्रष्टव्यम् (**अनीकम्**) सैन्यमिव कार्यसिद्धिप्रापकम् (**रुक्मः**) रोचमानस्सूर्यः (**न**) इव (**दिवः**) विद्युतः सकाशात् (**उदिता**) सूर्य्योदये (**वि**) (**अद्यौत्**) प्रकाशयति॥ १॥

अन्वयः-हे अध्यापकोपदेशका! यदि युष्मांस्त्यन्महि वरुणयोः प्रियं मित्रयोरदब्धमृतस्य शुचि दर्शतं दिव उदिता रुक्मो नाऽनीकं महि चक्षुर्व्यद्यौदा उदेति तर्हि भवन्ति उ विद्वांसो भवेयुः॥ १॥

भावार्थः-ये मनुष्याः धर्मेण यानं प्राप्तुमिच्छन्ति ते सूर्यप्रकाशवत्प्राप्तविज्ञाना जायन्ते ये सत्यस्य पदार्थस्य विद्यामुन्नयन्ति ते सर्वत्र सत्कृता भवन्ति॥ १॥

पदार्थः-हे अध्यापक और उपदेशको! जो तुम लोगों को (**त्यत्**) वह उत्तम (**महि**) बड़ा वस्तु वा (**वरुणयोः**) उदान के समान वर्त्तमान दो सज्जनों का (**प्रियम्**) प्रिय पदार्थ वा (**मित्रयोः**) दो मित्रों का अध्यापक और अध्येताओं का वा शरीर के बाहर और भीतर रहने वाला प्राण वायुओं का (**अदब्धम्**) अविनष्ट व्यवहार वा (**ऋतस्य**) सत्य का (**शुचि**) पवित्र (**दर्शतम्**) देखने योग्य (**दिवः**) बिजुली की उत्तेजना से (**उदिता**) सूर्योदयकाल में (**रुक्मः**) प्रकाशमान सूर्य के (**न**) समान (**अनीकम्**) सेना समूह के समान कार्यसिद्धि का पहुंचाने वाला (**चक्षुः**) जिससे देखते हैं वह (**वि, अद्यौत्**) विशेषता से प्रकाशित होता है (**आ, उत्, एति**) उत्कृष्टता से प्राप्त होता है तो आप लोग (**उ**) तर्क-वितर्क से विद्वान् होओ॥ १॥

भावार्थः-जो मनुष्य धर्म से यान पाने की इच्छा करते हैं, वे सूर्य के प्रकाश के तुल्य विज्ञान को प्राप्त होते हैं, जो सत्य पदार्थ की विद्या की उन्नति करते हैं, वे सर्वत्र सत्कृत होते हैं॥१॥

पुनर्मेधाविनः किं जानीयुरित्याह॥

फिर मेधावी जन क्या जानें, इस विषय को अगले मन्त्र में कहते हैं॥

वेदु यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः।
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान्॥२॥

वेद। यः। त्रीणि। विदथानि। एषाम्। देवानाम्। जन्म। सनुतः। आ। च। विप्रः। ऋजु। मर्तेषु। वृजिना। च। पश्यन्। अभि। चष्टे। सूरः। अर्यः। एवान्॥२॥

पदार्थः-(वेद) जानाति **(यः)** **(त्रीणि)** **(विदथानि)** वेदितुं योग्यानि कर्मोपासनाज्ञानानि **(एषाम्)** **(देवानाम्)** विदुषाम् **(जन्म)** प्रादुर्भावम् **(सनुतः)** सदा **(आ)** **(च)** **(विपः)** मेधावी **(ऋजु)** सरलम् **(मर्त्तेषु)** मनुष्येषु **(वृजिना)** बलानि **(च)** **(पश्यन्)** **(अभि)** **(चष्टे)** प्रकाशयति **(सूरः)** सूर्य्य इव **(अर्यः)** स्वामी **(एवान्)** प्राप्तव्यान्॥२॥

अन्वयः-योऽर्यो विप्रः सूर एवानिवैषां देवानां सनुतर्जन्म त्रीणि विदथानि मर्त्तेषु वृजिना ऋजु च पश्यन्नभ्याचष्टे स चैतान् वेद॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या मनुष्याणां विद्याजन्म जानन्ति ते मनुष्येषु पूर्णं शरीरात्मबलं प्राप्य सर्वान् पदार्थान् वेत्तुमर्हन्ति ये कर्मोपासनाज्ञानानि प्राप्नुवन्ति ते स्वामिनो भवन्ति॥२॥

पदार्थः-(यः) जो **(अर्यः)** स्वामी **(विप्रः)** बुद्धिमान् **(सूरः)** सूर्य के समान **(एवान्)** प्राप्त होने योग्य पदार्थों के तुल्य **(एषाम्)** इन **(देवानाम्)** विद्वानों के **(सनुतः)** सर्वदा **(जन्म)** उत्पन्न होने वाल **(त्रीणि)** तीन **(विदथानि)** जानने के योग्य कर्म, उपासना और ज्ञानों को **(मर्त्तेषु)** मनुष्यों में **(वृजिना)** बलों और **(ऋजु, च)** सरल व्यवहार को **(पश्यन्)** देखता हुआ **(अभि, आ, चष्टे)** सब ओर से प्रकाशित करता है, वह **(च)** भी इन उक्त पदार्थों को **(वेद)** जानता है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य मनुष्यों के विद्याजन्म को जानते हैं, वे मनुष्यों में पूर्ण शरीर और आत्मा के बल को पाय सब पदार्थों के जानने योग्य होते हैं, जो कर्म उपासना और ज्ञानों को प्राप्त होते हैं, वे स्वामी होते हैं॥२॥

पुनर्मनुष्याः केषां प्रशंसां कुर्युरित्याह॥

फिर मनुष्य किन की प्रशंसा करें, इस विषय को अगले मन्त्र में कहते हैं॥

स्तुष उ वो महऋतस्य गोपानदितिं मित्रं वरुणं सुजातान्।
अर्यमणं भगमदब्धधीतिनच्छा वोचे सधन्यः पावकान्॥३॥

स्तुषे। ऊँ इति। वः। महः। ऋतस्य। गोपान्। अदितिम्। मित्रम्। वरुणम्। सुऽजातान्। अर्यमणम्। भगम्। अदब्धऽधीतीन्। अच्छ। वोचे। सऽधन्यः। पावकान्॥ ३॥

पदार्थः-(स्तुषे) स्तौमि **(उ)** **(वः)** युष्माकम् **(महः)** महतः **(ऋतस्य)** सत्यस्य **(गोपान्)** पालकान् **(अदितिम्)** अखण्डितां विद्यां प्रकृतिं वा **(मित्रम्)** सुहृदम् **(वरुणम्)** ईप्सितव्यम् **(सुजातान्)** सुष्ठु प्रसिद्धान् **(अर्यमणम्)** न्यायेशम् **(भगम्)** ऐश्वर्यम् **(अदब्धधीतीन्)** अहिंसिताध्ययनान् **(अच्छा)** अत्र **संहितायामि**ति दीर्घः **(वोचे)** वदेयम् **(सधन्यः)** धन्यैः सह वर्त्तमानः **(पावकान्)** पवित्रकरान्॥ ३॥

अन्वयः-हे मनुष्या! यः सधन्योऽहं वो मह ऋतस्य गोपानदितिं मित्रं वरुणमर्यमणं भगमदब्धधीतीन् सुजातान् पावकान् स्तुष उ युष्मान् प्रत्यच्छा वोचे तं मां यूयं सङ्गच्छध्वम्॥ ३॥

भावार्थः-ये मनुष्या विदुषः प्रशंस्य सङ्गत्य सकलान् प्रकृत्यादिपदार्थविद्यादीन् विदित्वाऽन्यानध्यापयन्ति ते सर्वेषां पवित्रकराः सन्ति॥ ३॥

पदार्थः-हे मनुष्यो! जो **(सधन्यः)** धन्य प्रशंसितों के साथ वर्त्तमान मैं **(वः)** तुम्हारे **(महः)** बड़े **(ऋतस्य)** सत्य के **(गोपान्)** पालने वालों वा **(अदितिम्)** अखण्डित विद्या वा प्रकृति वा **(मित्रम्)** मित्र वा **(वरुणम्)** इच्छा करने योग्य वा **(अर्यमणम्)** न्यायाधीश वा **(भगम्)** ऐश्वर्य वा **(अदब्धधीतीन्)** अविनष्ट अध्ययन व्यवहार वालों वा **(सुजातान्)** सुन्दर प्रसिद्ध वा **(पावकान्)** पवित्र करने वाले पदार्थों की **(स्तुषे)** प्रशंसा करता हूँ **(उ)** और तुम्हारे प्रति **(अच्छा)** अच्छे प्रकार **(वोचे)** कहूं उस मुझे तुम अच्छे प्रकार प्राप्त होओ॥ ३॥

भावार्थः-जो मनुष्य विद्वानों की प्रशंसा कर वा विद्वानों का सङ्ग कर सकल प्रकृति आदि पदार्थविद्या आदि पदार्थों को जान कर औरों को पढ़ाते हैं, वे सबके पवित्र करने वाले हैं॥ ३॥

पुनर्मनुष्याः कीदृशान् पार्थिवान् मन्येरन्नित्याह॥

फिर मनुष्य कैसे राजजनों को मानें, इस विषय को कहते हैं॥

रिशादसः सत्पतीँरदब्धान् महो राज्ञः सुवसनस्य दातॄन्।
यूनः सुक्षत्रान् क्षयतो दिवो नॄनादित्यान् याम्यदितिं दुवोयु॥ ४॥

रिशादसः। सत्ऽपतीन्। अदब्धान्। महः। राज्ञः। सुऽवसनस्य। दातॄन्। यूनः। सुऽक्षत्रान्। क्षयतः। दिवः। नॄन्। आदित्यान्। यामि। अदितिम्। दुवःऽयु॥ ४॥

पदार्थः-**(रिशादसः)** हिंसकान् नाशकान् **(सत्पतीन्)** सत्यस्य पालकान् **(अदब्धान्)** अहिंसितानहिंसकान् **(महः)** महतः **(राज्ञः)** नृपान् **(सुवसनस्य)** सुष्ठुवासस्य **(दातॄन्)** **(यूनः)** प्राप्तयौवनान् **(सुक्षत्रान्)** उत्तमधनाञ्छ्रेष्ठराज्यान् वा **(क्षयतः)** निवसतः **(दिवः)** कमनीयान् कामयमानान् वा **(नॄन्)** **(आदित्यान्)** कृताष्टचत्वारिंशद्[वर्ष]ब्रह्मचर्येण पूर्णविदुषः **(यामि)** प्राप्नोमि **(अदितिम्)** अखण्डितां नीतिम् **(दुवोयु)** दुवः परिचरणं कामयमानान्॥ ४॥

अन्वयः-हे मनुष्या! यथाहं रिशादसः सत्पतीनदब्धान् सुवसनस्य दातॄन् सुक्षत्रानदितिं क्षयतो दिवो नॄनादित्यान् यूनो दुवोयु महो राज्ञो यामि तथेदृशान् यूयमपि प्राप्नुत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये चोरादीनां निष्कासका धर्मात्मनां पालका हिंसादिदोषरहिताः सर्वस्मै सुखेन वासं ददन्तः पूर्णविद्याजितेन्द्रिया न्यायेन पितृवत्प्रजापालकाः पूर्णयौवना दुर्व्यसनविरहा गुणग्राहिणः स्युस्तानेव यूयं स्वामिनो मन्यध्वं नेतरान् क्षुद्राशयान्॥४॥

पदार्थः-हे मनुष्यो! जैसे मैं **(रिशादसः)** हिंसक वा नाश करने वाले वा **(सत्पतीन्)** सत्य के पालने वाले वा **(अदब्धान्)** विनाश को न प्राप्त हुए उनको वा न हिंसनेवाले वा **(सुवसनस्य)** सुन्दर वास के **(दातॄन्)** देने वाले वा **(सुक्षत्रान्)** उत्तम धन और राज्यों को वा **(अदितिम्)** अखण्डित नीति को **(क्षयतः)** स्थिर होते हुए **(दिवः)** कामना करने योग्य और काम करने वा **(नॄन्)** मनुष्यों वा **(आदित्यान्)** किया है अड़तालीस वर्ष ब्रह्मचर्य्य जिन्होंने उन वा **(यूनः)** जवान मनुष्यों वा **(दुवोयु)** सेवन की कामना करने वालों को तथा **(महः)** महान् **(राज्ञः)** राजाओं को मैं **(यामि)** प्राप्त होता हूं, वैसे ऐसों को तुम भी प्राप्त होओ॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो चोर आदि के निकासने और धर्मात्माओं के पालने वाले, हिंसादि दोषों से रहित, सब के लिये सुख से निवास देनेवाले, पूर्ण विद्यायुक्त, जितेन्द्रिय, न्याय से पिता के समान प्रजा के पालने वाले, पूर्ण यौवनयुक्त, दुष्ट व्यसनों से रहित, गुणग्राही जन हों; उन्हीं को तुम स्वामी मानो और क्षुद्र हृदय वालों को न मानो॥४॥

पित्रादिभिः सन्तानेभ्यः किं कर्त्तव्यमित्याह॥

पित्रादिकों को सन्तानों के लिये क्या करना योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

द्यौ३ष्पि॒तः पृथि॑वि मा॒तर॒ध्रुग॑ग्ने॒ भ्रात॑र्वसवो मृ॒ळता॑ नः।
विश्वे॑ आदित्या अदिते स॒जोषा॑ अ॒स्मभ्यं॒ शर्म॑ ब॒हुलं॑ वि य॑न्त॥५॥११॥

द्यौः॑। पि॒त॒रिति॑। पृथि॑वि। मा॒तः॑। अध्रु॑क्। अग्ने॑। भ्रा॒तः॑। व॒स॒वः॒। मृ॒ळत॑। नः॒। विश्वे॑। आ॒दि॒त्याः॒। अ॒दि॒ते॒। स॒ऽजोषाः॑। अ॒स्मभ्य॑म्। शर्म॑। ब॒हु॒लम्। वि। य॒न्त॒॥५॥

पदार्थः-(**द्यौः**) सूर्य्य इव **(पितः)** पालक **(पृथिवि)** भूमिरिव **(मातः)** जननि **(अध्रुक्)** द्रोहरहितः **(अग्ने)** पावकवत् प्रकाशात्मन् **(भ्रातः)** बन्धो **(वसवः)** सुखवासप्रदाः **(मृळता)** सुखयत। अत्र **संहितायामिति** दीर्घः। **(नः)** अस्मान् **(विश्वे)** सर्वे **(आदित्याः)** पूर्णकृतब्रह्मचर्यविद्याः **(अदिते)** अखण्डितज्ञानैश्वर्य्ये **(सजोषाः)** समानप्रीतिसेविका **(अस्मभ्यम्)** **(शर्म)** सुखकारणं गृहम् **(बहुलम्)** बहुपदार्थान्वितम् **(वि)** **(यन्त)** ददति॥५॥

अन्वयः-हे पितर्द्यौरिव! त्वं हे मातः पृथिवि भूमिरिव! त्वं हे अग्ने! अग्निरिव भ्रातस्त्वमधृक्सन् वसवो यूयं नो मृळता। हे अदिते! यथा विश्व आदित्या अस्मभ्यं बहुलं शर्म वि यन्त तथा सजोषास्त्वं बहुसुखं विद्यां च देहि॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येषां सूर्य्यवत्सुशिक्षया पालकः पिता पृथिवीवत् क्षमादिविद्यागुणान्विता माताऽग्निवद्भ्राता वर्त्तते स एव सुखी जायते यथा पूर्णविद्यावन्तो जना अयनविद्यां प्रयच्छन्ति तथैव विद्याग्रहीतारोऽध्यापकान्सततं सत्कुर्वन्ति॥५॥

पदार्थः-हे **(पितः)** पालने वाले **(द्यौः)** सूर्य्य के समान! तुम हे **(मातः)** माता **(पृथिवि)** भूमि के समान! तुम हे **(अग्ने)** के समान प्रकाशात्मा **(भ्रातः)** भ्राता! तुम **(अधृक्)** द्रोहरहित होते हुए **(वसवः)** सुख वास के देने वाले तुम सब **(नः)** हमको **(मृळता)** सुखी करो हे **(अदिते)** अखण्डिते ज्ञान और ऐश्वर्य्यवती पण्डिता स्त्री! जैसे **(विश्वे)** सब **(आदित्याः)** पूर्ण की है ब्रह्मचर्य्य से विद्या जिन्होंने वे सज्जन **(अस्मभ्यम्)** हम लोगों के लिये **(बहुलम्)** बहुत पदार्थयुक्त **(शर्म)** सुख करने वाले घर को **(वि, यन्त)** देते हैं, वैसे **(सजोषाः)** समान एकसी प्रीति को सेवने वाली तू बहुत सुख और विद्या को दे॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिनका सूर्य के समान सुन्दर शिक्षा से पालने वाला पिता, पृथिवी के समान सहनशीलता आदि गुण और विद्यायुक्त माता, अग्नि के समान प्रकाशमान भ्राता वर्त्तमान है, वही सुखी होता है तथा जिसे पूर्ण विद्यावान् जन सन्मार्ग को पूंछते [=देते] हैं, वैसे ही विद्या पढ़ने वाले पढ़ाने वालों का निरन्तर सत्कार करते हैं॥५॥

पुनर्मनुष्यैः किं नैषितव्यमित्याह॥

फिर मनुष्यों को किसकी इच्छा नहीं करनी चाहिये, इस विषय को कहते हैं॥

मा नो॒ वृका॑य वृ॒क्ये॑ समस्मा अघाय॒ते री॑रधता यजत्राः।
यू॒यं हि ष्ठा र॒थ्यो॑ नस्त॒नूना॑ यू॒यं दक्ष॑स्य॒ वच॑सो बभू॒व॥६॥

मा। नः। वृका॑य। वृ॒क्ये॑। स॒मस्मै॑। अ॒घ॒ऽय॒ते। री॒र॒ध॒त॒। य॒ज॒त्राः॒। यू॒यम्। हि। स्थ। र॒थ्यः॑। नः॒। त॒नूना॑म्। यू॒यम्। दक्ष॑स्य। वच॑सः। ब॒भू॒व॥६॥

पदार्थः-**(मा)** निषेधे **(नः)** अस्मान् **(वृकाय)** स्तेनाय **(वृक्ये)** वृकेषु स्तेनेषु भवे व्यवहारे **(समस्मै)** सर्वस्मै **(अघायते)** आत्मनोऽघमिच्छते **(रीरधता)** भृशं हिंसत। अत्र **संहितायामिति** दीर्घः। **(यजत्राः)** सङ्गन्तारः **(यूयम्)** **(हि)** यतः **(स्था)** अत्र **संहितायामिति** दीर्घः। **(रथ्यः)** रथेषु साधुः **(नः)** अस्माकम् **(तनूनाम्)** शरीराणाम् **(यूयम्)** **(दक्षस्य)** बलयुक्तस्य **(वचसः)** वचनस्य **(बभूव)** भवत॥६॥

अन्वयः-हे यजत्रा! यूयं वृकाय वृक्ये समस्मा अघायते नोऽस्मान् मा रीरधता नस्तनूनां दक्षस्य वचसो रथ्य इव यूयं स्था हि सुखकारका बभूव॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। सर्वैर्मनुष्यैः स्तेनादीनां दुष्टानां व्यवहारः कदाचिन्न कर्त्तव्यः ये च धर्म्मात्मानोऽजातशत्रवः सर्वेषां रक्षका भवेयुस्तान् यूयं सततं सेवध्वम्॥६॥

पदार्थः-हे **(यजत्राः)** सङ्ग करने वालो! **(यूयम्)** तुम **(वृकाय)** चोर के लिये वा **(वृक्ये)** चोरों में उत्पन्न हुए व्यवहार के निमित्त **(अघायते)** अघ की इच्छा करने वाले **(समस्मै)** सर्वजन के लिये **(नः)** हम लोगों को **(मा)** मत **(रीरधता)** नष्ट करो तथा **(नः)** हमारे **(तनूनाम्)** शरीरों के **(दक्षस्य)** बलयुक्त **(वचसः)** वचन का **(रथ्यः)** रथों में साधु उत्तम जो व्यवहार उसके समान **(यूयम्)** तुम **(स्था)** हो **(हि)** जिससे सुख करने वाले **(बभूव)** होओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। सब मनुष्यों को चोर आदि दुष्टों का व्यवहार कभी नहीं कर्त्तव्य है और जो धर्मात्मा, अजातशत्रु अर्थात् जिनके शत्रु नहीं हुआ तथा सबकी रक्षा करने वाले हों, उनकी तुम निरन्तर सेवा करो॥६॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट॥७॥

मा। वः। एनः। अन्यऽकृतम्। भुजेम। मा। तत्। कर्म। वसवः। यत्। चयध्वे। विश्वस्य। हि। क्षयथ। विश्वऽदेवाः। स्वयम्। रिपुः। तन्वम्। रिरिषीष्ट॥७॥

पदार्थः-(**मा**) निषेधे **(वः)** युष्माकम् **(एनः)** अपराधम् **(अन्यकृतम्)** अन्येन कृतम् **(भुजेम)** **(मा)** **(तत्)** **(कर्म)** कुर्य्याम **(वसवः)** वासहेतवः **(यत्)** **(चयध्वे)** संचिनुथे **(विश्वस्य)** **(हि)** यतः **(क्षयथ)** निवसथ **(विश्वदेवाः)** सर्वे विद्वांसः **(स्वयम्)** **(रिपुः)** शत्रुः **(तन्वम्)** शरीरम् **(रीरिषीष्ट)** भृशं हिंस्यात्॥७॥

अन्वयः-हे वसवो विश्वदेवा! यूयं विश्वस्य मध्ये यच्चयध्वे यद्धि क्षयथ यथा रिपुस्तन्वं स्वशरीरं रीरिषीष्ट तथा तद्वोऽन्यकृतमेनो वयं मा भुजेम तद्दुष्टं कर्म मा कर्म॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यूयं कस्यापि दुष्टस्यानुकरणं मा कुरुत स्वशरीरघातं मा विधत्ताऽन्यकृतस्याऽपराधस्य सङ्गिनो मा भवत॥७॥

पदार्थः-हे **(वसवः)** वास के हेतु **(विश्वदेवाः)** सब विद्वानो! तुम **(विश्वस्य)** संसार के बीच **(यत्)** जो **(चयध्वे)** इकट्ठा करो और **(हि)** जिससे जिसको **(क्षयथ)** निवास करो जैसे **(रिपुः)** शत्रु **(तन्वम्)** अपने शरीर को **(स्वयम्)** आप **(रीरिषीष्ट)** निरन्तर मारे, वैसे उस **(वः)** तुम्हारे **(अन्यकृतम्)** और से किये हुए **(एनः)** अपराध को हम लोग **(मा)** मत **(भुजेम)** भोगें **(तत्)** उस दुष्ट कर्म को **(मा)** मत **(कर्म)** करें॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! तुम किसी दुष्ट का अनुकरण मत करो, अपने शरीर को नष्ट मत करो तथा और के किये हुए अपराध के सङ्ग मत होओ॥७॥

मनुष्याः सदैव नम्रा भवेयुरित्याह॥

मनुष्य सदैव नम्र हों, इस विषय को कहते हैं॥

नम॒ इदु॒ग्रं नम॒ आ वि॑वासे॒ नमो॑ दाधार पृथि॒वीमु॒त द्याम्।
नमो॑ दे॒वेभ्यो॒ नम॑ ईश ए॒षां कृ॒तं चि॒देनो॒ नम॒सा वि॑वासे॥८॥

नम॑:। इत्। उ॒ग्रम्। नम॑:। आ। वि॒वा॒से॒। नम॑:। दा॒धा॒र॒। पृ॒थि॒वीम्। उ॒त्। द्याम्। नम॑:। दे॒वेभ्य॑:। नम॑:। ई॒शे॒। ए॒षा॒म्। कृ॒तम्। चि॒त्। एन॑:। नम॑सा। आ। वि॒वा॒से॒॥८॥

पदार्थः-(**नमः**) सत्करणीयम् (**इत्**) (**उग्रम्**) तीव्रम् (**नमः**) अन्नम् (**आ**) (**विवासे**) सेवे (**नमः**) नमस्करणीयम्ब्रह्म (**दाधार**) दधाति (**पृथिवीम्**) भूमिम् (**उत**) अपि (**द्याम्**) सूर्य्यम् (**नमः**) (**देवेभ्यः**) विद्वद्भ्यः (**नमः**) (**ईशे**) ईष्ट इच्छामि (**एषाम्**) (**कृतम्**) (**चित्**) अपि (**एनः**) (**नमसा**) सत्कारेण (**आ**) (**विवासे**)॥८॥

अन्वयः-हे मनुष्या! यन्नमः पृथिवीमुत द्यां दाधार तदहमुग्रं नम आ विवासे देवेभ्यो नम आ विवासे नमो नम ईशे तेन नमसैषां कृतं चिदेन इदा विवासे॥८॥

भावार्थः-हे मनुष्या! सर्वैर्नमस्कणीयस्य परमेश्वरस्य सहायेन वयं सत्क्रियां धृत्वा दुष्टतां निवार्य्य विद्वद्भ्यो हितं सम्पाद्य सर्वोपकारं सदैव कुर्य्याम॥८॥

पदार्थः-हे मनुष्यो! जो (**नमः**) नमस्कार करने योग्य ब्रह्म (**पृथिवीम्**) भूमि (**उत**) और (**द्याम्**) सूर्य को (**दाधार**) धारण करते उस (**उग्रम्**) तीव्र (**नमः**) नमस्कार करने योग्य ब्रह्म का मैं (**आ, विवासे**) सेवन करूं (**देवेभ्यः**) विद्वानों के लिये (**नमः**) अन्न की सेवा करूं (**नमः**) सत्कार वा (**नमः**) अन्न की (**ईशे**) इच्छा करूं उस (**नमसा**) सत्कार से (**एषाम्**) इनके (**कृतम्**) किये उत्तम कर्म (**चित्**) और (**एनः**) अनुत्तम कर्म का (**इत्**) ही (**आ, निवासे**) योग्य सेवन करूं॥८॥

भावार्थः-हे मनुष्यो! सब से नमस्कार करने योग्य परमेश्वर के सहायरूप से हम लोग उत्तम क्रिया को धारण कर और दुष्टता को निवार विद्वानों के लिये हित सिद्ध कर सबका उपकार सदैव करें॥८॥

पुन सर्वैः के नमस्कणीयाः सन्तीत्याह॥

फिर सब को कौन नमस्कार करने योग्य हैं, इस विषय को कहते हैं॥

ऋ॒तस्य॑ वो र॒थ्यः॑ पू॒तद॑क्षानृ॒तस्य॑ पस्त्य॒सदो॒ अद॑ब्धान्।
ताँ आ नमोभिरुरुचक्ष॑सो॒ नॄन् विश्वा॑न् व॒ आ न॑मे म॒हो य॑जत्राः॥९॥

ऋ॒तस्य॑। व॒:। र॒थ्य॑:। पू॒तऽद॑क्षान्। ऋ॒तस्य॑। प॒स्त्य॒ऽसद॑:। अद॑ब्धान्। तान्। आ। नम॑:ऽभिः। उ॒रु॒ऽच॒क्ष॑सः। नॄन्। विश्वा॑न्। व॒:। आ। न॒मे॒। म॒हः। य॒ज॒त्रा॒:॥९॥

पदार्थः-(**ऋतस्य**) सत्यस्य (**वः**) युष्मान् (**रथ्यः**) रथेषु साधुः (**पूतदक्षान्**) पवित्रबलान् (**ऋतस्य**) यथार्थस्य धर्म्यस्य व्यवहारस्य (**पस्त्यसदः**) ये पस्त्येषु गृहेषु सीदन्ति तान् (**अदब्धान्**) अहिंसितानहिंसकान् वा (**तान्**) (**आ**) (**नमोभिः**) बहुभिस्सत्कारैः (**उरुचक्षसः**) बहुदर्शनान् (**नॄन्**) उत्तमान् विदुषः (**विश्वान्**) समग्रान् (**वः**) युष्मान् (**आ**) (**नमे**) समन्तान्नमामि (**महः**) महतो महाशयान् (**यजत्रा**) सद्व्यवहारं सङ्गच्छमानाः॥९॥

अन्वयः-हे यजत्रा! रथ्योऽहमृतस्य पूतदक्षानृतस्य पस्त्यसदोऽदब्धानुरुचक्षसो विश्वान् महो नॄन् व आ नमे येऽस्मान् सत्यं बोधयन्ति तान् वो नमोभिर्वयं सततमा सत्कुर्याम॥९॥

भावार्थः-हे मनुष्या! यूयं सर्वोत्कृष्टविद्यान् धर्मिष्ठान् परोपकारिणो जनानेव सदा नमतैभ्यो विनयमधिगच्छत॥९॥

पदार्थः-हे (**यजत्राः**) अच्छे व्यवहार का सङ्ग करते हुए सज्जनो! (**रथ्यः**) रथों में उत्तम व्यवहार वर्त्तने वाला मैं (**ऋतस्य**) सत्य के (**पूतदक्षान्**) पवित्र बलों वा (**ऋतस्य**) यथार्थ धर्मयुक्त व्यवहार के (**पस्त्यसदः**) जो घरों में स्थिर होते उन (**अदब्धान्**) अविनष्ट कार्य्यों वा नष्ट न करने वाले पदार्थों वा (**उरुचक्षसः**) बहुत दर्शनों वा (**विश्वान्**) समग्र (**महः**) महाशय (**नॄन्**) उत्तम विद्वान् (**वः**) आप लोगों को (**आ, नमे**) अच्छे प्रकार नमस्कार करता हूँ जो हम लोगों को सत्य बोध कराते हैं (**तान्**) उन (**वः**) आप लोगों का (**नमोभिः**) बहुत सत्कारों से हम लोग निरन्तर (**आ**) अच्छे प्रकार सत्कार करें॥९॥

भावार्थः-हे मनुष्यो! तुम सब से उत्कृष्ट विद्या वाले, धर्मिष्ठ, परोपकारी जनों ही को सदा नमो, तथा इन से विनय (नम्रता) को प्राप्त होओ॥९॥

पुनः के सत्कर्त्तव्या इत्याह॥

फिर कौन सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयन्ति।
सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः॥१०॥१२॥

ते। हि। श्रेष्ठऽवर्चसः। ते। ऊँ इति। नः। तिरः। विश्वानि। दुःऽइता। नयन्ति। सुऽक्षत्रासः। वरुणः। मित्रः। अग्निः। ऋतऽधीतयः। वक्मराजऽसत्या॥१०॥

पदार्थः-(**ते**) (**हि**) यतः (**श्रेष्ठवर्चसः**) श्रेष्ठं वर्चोऽध्ययनं येषान्ते (**ते**) तव (**उ**) (**नः**) अस्माकम् (**तिरः**) तिरस्करणे (**विश्वानि**) सर्वाणि (**दुरिता**) दुष्टाचरणानि (**नयन्ति**) (**सुक्षत्रासः**) उत्तमराज्यधनाः (**वरुणः**) श्रेष्ठः (**मित्रः**) सुहृत् (**अग्निः**) पावक इव शुद्धान्तःकरणः (**ऋतधीतयः**) सत्यधारकाः (**वक्मराजसत्याः**) वक्मेषु वक्तृषु राजसु सत्यप्रतिपादकाः॥१०॥

अन्वयः-हे मनुष्या! हि यतस्ते श्रेष्ठवर्चसः सुक्षत्रासो वरुणो मित्रोऽग्निश्चेव वर्त्तमाना ऋतधीतयो वक्मराजसत्या नो विश्वानि दुरिता तिरो नयन्ति तस्मादु ते माननीयाः सन्ति॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्माद्विद्वांसो धर्मात्मानो निष्कपटत्वेनाऽन्येषां हितसाधका विद्यादानोपदेशद्वारा सर्वान् दुष्टाचारान्निवार्य सत्याचारे प्रवर्त्तकाः सन्ति तस्मादेव सत्कर्त्तव्या वर्त्तन्ते॥१०॥

पदार्थः-हे मनुष्यो! **(हि)** जिससे **(ते)** वे **(श्रेष्ठवर्चसः)** श्रेष्ठ पढ़ने वाले **(सुक्षत्रासः)** उत्तम राज्य वा धनयुक्त **(वरुणः)** श्रेष्ठ जन **(मित्रः)** मित्र **(अग्निः)** अग्नि के समान शुद्धान्तःकरण पुरुष, इनके समान वर्त्तमान **(ऋतधीतयः)** सत्य के धारण करने वाले **(वक्मराजसत्याः)** कहने वाले राजाओं में सत्य के प्रतिपादन करने वाले सज्जन **(नः)** हम लोगों के **(विश्वानि)** समस्त **(दुरिता)** दुष्टाचरणों को **(तिरः)** तिरस्कार को **(नयन्ति)** पहुंचाते हैं उस कारण से **(उ)** ही **(ते)** वे मान करने योग्य हैं॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिससे विद्वान् धर्मात्मा जन निष्कपटता से औरों के हित साधने वाले, विद्यादान और उपदेश द्वारा सब दुष्ट आचरणों को निवार के सत्य आचरण में प्रवृत्त करने वाले हैं, इसी से सत्कार करने योग्य हैं॥१०॥

पुनः किंवत् के माननीयाः सन्तीत्याह॥

फिर किसके तुल्य कौन मानने योग्य हैं, इस विषय को कहते हैं॥

ते नु इन्द्रः पृथिवी क्षामं वर्धन् पूषा भगो अदितिः पञ्च जनाः।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः॥११॥

ते। नुः। इन्द्रः। पृथिवी। क्षामं। वर्धन्। पूषा। भगः। अदितिः। पञ्च। जनाः। सुऽशर्माणः। सुऽअवसः। सुऽनीथाः। भवन्तु। नुः। सुऽत्रात्रासः। सुऽगोपाः॥११॥

पदार्थः-**(ते)** **(नः)** अस्मान् **(इन्द्रः)** विद्युत् **(पृथिवी)** अन्तरिक्षम् **(क्षाम)** भूमिः **(वर्धन्)** वर्धयन्तु **(पूषा)** वायुः **(भगः)** भगवान् **(अदितिः)** जननी **(पञ्च, जनाः)** पञ्च प्राणा इवोत्तममनुष्याः। **पञ्चजना इति मनुष्यनाम।** (निघं०२.३) **(सुशर्माणः)** प्रशंसितगृहाः **(स्ववसः)** शोभनमवो येषान्ते **(सुनीथाः)** शोभनो नीथो न्यायो येषान्ते **(भवन्तु)** **(नः)** अस्माकम् **(सुत्रात्रासः)** सुष्ठुत्रातारः **(सुगोपाः)** सुष्ठु गवां धेनूनां पृथिव्यादीनां वा रक्षकाः॥११॥

अन्वयः-हे मनुष्या! यतस्त इन्द्रः पृथिवी क्षाम पूषा भगोऽदितिः सुशर्माणः स्ववसः सुनीथाः पञ्च जनाः सन्ति ततो नो वर्धन्त्रः सुगोपाः सुत्रात्रासो भवन्तु॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यतो विद्वांसो विद्युद्भूम्यन्तरिक्षप्राणैश्वर्य्यमातृवत् सर्वेषां वर्धकाः पालकाः सन्ति तस्मादेव पूज्या भवन्ति॥११॥

पदार्थः-हे मनुष्यो! जिससे **(ते)** वे **(इन्द्रः)** बिजुली **(पृथिवी)** अन्तरिक्ष **(क्षाम)** भूमि **(पूषा)** वायु **(भगः)** ऐश्वर्यवान् जन और **(अदितिः)** जन्म देने वाली माता के समान **(सुशर्माणः)** प्रशंसित घरों वाले **(स्ववसः)** जिन की सुन्दर रक्षा और **(सुनीथाः)** न्याय विद्यमान वे **(पञ्च, जनाः)** पांच प्राणों के समान उत्तम मनुष्य हैं, उससे **(नः)** हमको **(वर्धन्)** बढ़ावें और **(नः)** हमारे **(सुगोपाः)** सुन्दर गौ वा पृथिव्यादिकों के रक्षा करने वाले तथा **(सुत्रात्रासः)** उत्तमता से पालना करने वाले **(भवन्तु)** हों॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिससे विद्वान् जन बिजुली, भूमि, अन्तरिक्ष, प्राण, ऐश्वर्य और माता के तुल्य सब के बढ़ाने पालने वाले हैं, इसी से पूज्य होते हैं॥११॥

पुनः के धन्यवादार्हाः सन्तीत्याह॥

फिर कौन धन्यवाद के योग्य हैं, इस विषय को कहते हैं॥

नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द॥१२॥

नु। सद्मानम्। दिव्यम्। नंशि। देवाः। भारत्ऽवाजः। सुऽमतिम्। याति। होता। आसानेभिः। यजमानः। मियेधैः। देवानाम्। जन्म। वसुऽयुः। ववन्द॥१२॥

पदार्थः-(**नू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**सद्मानम्**) यस्मिन् सीदति तम् (**दिव्यम्**) कमनीयम् (**नंशि**) व्याप्नोति (**देवाः**) विद्वांसः (**भारद्वाजः**) धृतविज्ञानः (**सुमतिम्**) शोभनां प्रज्ञाम् (**याति**) प्राप्नोति (**होता**) दाता (**आसानेभिः**) आसीनैर्ऋत्विग्भिस्सह (**यजमानः**) यज्ञकर्ता (**मियेधैः**) प्रेरकैः (**देवानाम्**) विदुषाम् (**जन्म**) प्रादुर्भावम् (**वसूयुः**) वसूनि द्रव्याणि कामयमानः (**ववन्द**) वन्दति प्रशंसति॥१२॥

अन्वयः-हे देवा विद्वांसो! यो भारद्वाजो होता सुमतिं याति स नू दिव्यं सद्मानं नंशि। यो वसूयुर्यजमानो मियेधैरासानेभिस्सह देवानां जन्म ववन्द तं यूयं सत्कुरुत॥१२॥

भावार्थः-हे मनुष्या! ये राज्ञो विद्याजन्मे प्रशंसन्ति ते शुद्धं सुखमाप्नुवन्ति यथा बहुभिर्विद्वद्भिस्सह यजमानो यज्ञमलङ्कृत्य सर्वं जगदुपकरोति तथैव विद्वांसोऽध्यापनोपदेशाभ्यां सर्वान् प्रज्ञान् कृत्वा प्रशंसा यान्ति॥१२॥

पदार्थः-हे (**देवा**) विद्वानो! जो (**भारद्वाजः**) विज्ञान को धारण किये (**होता**) देने वाला (**सुमतिम्**) शोभन बुद्धि को (**याति**) प्राप्त होता है वह (**नू**) शीघ्र (**दिव्यम्**) मनोहर (**सद्मानम्**) जिसमें स्थिर होता उस घर को (**नंशि**) व्याप्त होता है। जो (**वसूयुः**) द्रव्यों की कामना करने और (**यजमानः**) यज्ञ करने वाला (**मियेधैः**) प्रेरणा देनेवाले (**आसानेभिः**) बैठे हुए ऋत्विजों के साथ (**देवानाम्**) विद्वानों के (**जन्म**) उत्पन्न होने की (**ववन्द**) प्रशंसा करता है, उसका तुम सत्कार करो॥१२॥

भावार्थः-हे मनुष्यो! जो राजा के विद्या और जन्म की प्रशंसा करते वे शुद्ध सुख को प्राप्त होते हैं, जैसे बहुत विद्वानों के साथ यज्ञ करने वाला यज्ञ को सुभूषित कर समस्त जगत् का उपकार करता है, वैसे ही विद्वान् जन पढ़ाने और उपदेशों से सब को प्राज्ञ (उत्तम ज्ञाता) कर प्रशंसा को प्राप्त होते हैं॥१२॥

पुनः के दूरीकरणीया इत्याह॥

फिर कौन दूर करने योग्य हैं, इस विषय को कहते हैं॥

अप॒ त्यं वृ॑जि॒नं रि॒पुं स्ते॒नमग्ने दुरा॒ध्य॑म्।

द॒वि॒ष्ठम॑स्य सत्पते कृ॒धी सु॒गम्॥ १३॥

अप॑। त्यम्। वृ॒जि॒नम्। रि॒पुम्। स्ते॒नम्। अ॒ग्ने॒। दुः॒ऽआ॒ध्य॑म्। द॒वि॒ष्ठम्। अ॒स्य॒। स॒त्ऽप॒ते॒। कृ॒धि। सु॒ऽगम्॥ १३॥

पदार्थः-(**अप**) दूरीकरणे (**त्यम्**) तम् (**वृजिनम्**) वर्जनीयम् (**रिपुम्**) विद्याशत्रुम् (**स्तेनम्**) चोरम् (**अग्ने**) विद्वन् (**दुराध्यम्**) दुःखेन वशीकर्तुम् योग्यम् (**दविष्ठम्**) अतिशयेन दूरम् (**अस्य**) (**सत्पते**) सत्यस्य पालक (**कृधी**) कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सुगम्**) सुष्ठु गच्छति यस्मिँस्तम्॥ १३॥

अन्वयः-हे अग्ने! त्यं दविष्ठं वृजिनं दुराध्यं रिपुं स्तेनं सुगं कृधी। हे सत्पते! त्वमस्याऽप नयनं कृधी॥ १३॥

भावार्थः-हे मनुष्या! यूयं विद्यामभ्यस्य शरीरात्मबलयुक्ताः सन्तो दुस्साध्यानपि शत्रून् सुसाध्यान् कुरुत यतस्ते दूरस्था एव भयेन सद्धर्मानुष्ठाना भवेयुः॥ १३॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**त्यम्**) उस (**दविष्ठम्**) अतीव दूर (**वृजिनम्**) त्यागने (**दुराध्यम्**) वा दुःख से वश में करने योग्य (**रिपुम्**) विद्याशत्रु (**स्तेनम्**) चोर को (**सुगम्**) सुगम (**कृधी**) करो, हे (**सत्पते**) सत्य के पालने वाले! आप (**अस्य**) इसका (**अप**) दूरीकरण करो॥ १३॥

भावार्थः-हे मनुष्या! तुम विद्या का अभ्यास कर शरीर और आत्मा के बल से युक्त होते हुए दुःसाध्य भी शत्रुओं को सुसाध्य अर्थात् उत्तमता से सूधे करो, जिससे वे दूर स्थित ही भय से सद्धर्म के अनुष्ठान करने वाले हों॥ १३॥

पुनः केन सह मित्रतां कृत्वा के निवारणीया इत्याह॥

फिर किससे मित्रता कर कौन दूर करने योग्य हैं, इस विषय को कहते हैं॥

ग्रावा॑णः सोम नो॒ हि कं॑ सखित्वनाय॑ वावशुः।

ज॒ही न्य१॑त्रिणं॑ प॒णिं वृको॒ हि षः॥ १४॥

ग्रावा॑णः। सो॒म॒। नः॒। हि। क॒म्। स॒खि॒ऽत्व॒नाय॑। वा॒व॒शुः॒। ज॒हि। नि। अ॒त्रिण॑म्। प॒णिम्। वृक॑ः। हि। सः॥ १४॥

पदार्थः-(**ग्रावाणः**) मेघा इव (**सोम**) प्रेरक (**नः**) अस्मान् (**हि**) यतः (**कम्**) सुखम् (**सखित्वनाय**) सख्युर्भावाय (**वावशुः**) कामयन्ते (**जही**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नि**) (**अत्रिणम्**) परस्वापहारकम् (**पणिम्**) व्यवहर्त्तारम् (**वृकः**) स्तेनः (**हि**) खलु (**सः**)॥ १४॥

अन्वयः-हे सोम! ये ग्रावाण इव सखित्वनाय नो हि वावशुस्ते कमाप्नुयुर्योऽत्रिणं पणिं सम्बध्नाति स हि वृकोऽस्तीत्येनं त्वं नि जही॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि धर्मात्मानो विद्वांसो धर्मिष्ठैर्विद्वद्भिः सह मित्रत्वं रक्षन्ति तर्हि ते सततं सुखं प्राप्य मेघवत् सर्वान् वर्धयित्वा दुष्टाचारान् कितवादीन् सद्यो घ्नन्ति॥१४॥

पदार्थः-हे **(सोम)** प्रेरणा देने वाले! जो **(ग्रावाणः)** मेघों के समान **(सखित्वनाय)** मित्रपन के लिये **(नः)** हम लोगों को **(हि)** ही **(वावशुः)** चाहते हैं, वे **(कम्)** सुख को प्राप्त हों जो **(अत्रिणम्)** दूसरे का सर्वस्व हरने वाला **(पणिम्)** व्यवहारकर्त्ता का संबन्ध करता है **(सः, हि)** वही **(वृकः)** चोर है, इस हेतु से इसे आप **(नि, जही)** निरन्तर मारो॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यदि धर्मात्मा विद्वान् जन धर्मिष्ठ विद्वानों के साथ मित्रता रखते हैं तो वे निरन्तर सुख को प्राप्त होकर मेघ के समान सबको बढ़ाके दुष्ट आचरण करने वाले छलियों को शीघ्र मारते हैं॥१४॥

केऽत्राऽऽनन्ददाः सन्तीत्याह॥

कौन इस संसार में आनन्द के देनेवाले हैं, इस विषय को कहते हैं॥

यू॒यं हि ष्ठा सु॑दानव॒ इन्द्र॑ज्येष्ठा अ॒भिद्य॑वः।

कर्ता॑ नो॒ अध्व॒न्ना सु॒गं गो॒पा अ॒मा॥ १५॥

यू॒यम्। हि। स्थ। सु॒ऽदा॒न॒वः। इन्द्र॑ऽज्येष्ठाः। अ॒भिऽद्य॑वः। कर्ता॑। नः॒। अध्व॑न्। आ। सु॒ऽगम्। गो॒पाः। अ॒मा॥ १५॥

पदार्थः-(**यूयम्**) **(हि)** **(स्था)** तिष्ठत। अत्र **संहितायामिति** दीर्घः। **(सुदानवः)** उत्तमगुणदानाः **(इन्द्रज्येष्ठाः)** सूर्य्यो ज्येष्ठो महान् येषां लोकानां तद्वद्वर्त्तमानाः **(अभिद्यवः)** आभ्यान्तरे कामयमानाः प्रकाशवन्तः **(कर्त्ता)** कुरुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मान् **(अध्वन्)** अध्वनि **(आ)** **(सुगम्)** सुष्ठु गच्छेयुर्यस्मिंस्तत् **(गोपाः)** रक्षकाः **(अमा)** गृहम्। **अमेति गृहनाम** (निघं०३.४)॥१५॥

अन्वयः-हे सुदानवो विद्वांस इन्द्रज्येष्ठा इवाऽभिद्यवो गोपा अध्वन्नः सुगममाऽऽकर्त्ता तत्र हि यूयं स्था॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या दुर्गमान् मार्गान् सुगमान् कुर्वन्ति उत्तमानि गृहाणि निर्माय स्वयमन्याँश्च तत्र निवासयन्ति, त एव जगति सुखकरा भवन्ति॥१५॥

पदार्थः-हे **(सुदानवः)** उत्तम गुणों के देने वाले विद्वानों! **(इन्द्रज्येष्ठाः)** सूर्यलोक महान् ज्येष्ठ जिन लोकों का उनके समान वर्त्तमान **(अभिद्यवः)** पदार्थज्ञान के भीतर प्रकाशमान **(गोपाः)** रक्षा करने वाले **(अध्वन्)** मार्ग में **(नः)** हम लोगों को तथा **(सुगम्)** सुन्दरता से जिसमें जाते **(अमा)** ऐसे घर को **(आ, कर्त्ता)** प्रकट करो उस **(हि)** ही घर में **(यूयम्)** तम **(स्था)** स्थित होओ॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य दुर्गम मार्गों को सुगम करते हैं और उत्तम घरों को बनाकर आप तथा औरों को निवास करते कराते हैं, वे ही जगत् में सुख करने वाले होते हैं॥१५॥

पुनः कीदृशा मार्गा निर्मातव्या इत्याह॥

फिर कैसे मार्ग सिद्ध करने चाहियें, इस विषय को कहते हैं॥

अपि॒ पन्था॑मगन्महि स्वस्ति॒गामने॒हस॑म्।

येन॒ विश्वाः॑ परि॒ द्विषो॑ वृ॒णक्ति॑ वि॒न्दते॒ वसु॑॥ १६॥ १३॥

अपि॑। पन्था॑म्। अ॒ग॒न्म॒हि॒। स्व॒स्ति॒ऽगाम्। अ॒नेह॑सम्। येन॑। विश्वाः॑। परि॑। द्विषः॑। वृ॒णक्ति॑। वि॒न्दते॑। वसु॑॥ १६॥

पदार्थः-(**अपि**) (**पन्थाम्**) मार्गम् (**अगन्महि**) गच्छेम (**स्वस्तिगाम्**) सुखं गच्छन्ति यस्मिँस्तम् (**अनेहसम्**) अहन्तव्यम् (**येन**) (**विश्वाः**) सर्वाः (**परि**) (**द्विषः**) शत्रून् (**वृणक्ति**) दूरीकरोति (**विन्दते**) प्राप्नोति (**वसु**) द्रव्यम्॥१६॥

अन्वयः-हे मनुष्या! येन वीरो विश्वा द्विषः परि वृणक्ति वसु विन्दते तमनेहसं स्वस्तिगां पन्थां वयमप्यगन्महि॥१६॥

भावार्थः-राजादिमनुष्या ईदृशान् मार्गान् सृजन्तु येषु गच्छतां चोरभयं न स्याद् द्रव्यलाभश्च भवेदिति॥१६॥

अत्र विश्वेदेवकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकपञ्चाशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! (**येन**) जिसको वीर जन (**विश्वाः**) सब (**द्विषः**) शत्रुओं को (**परि, वृणक्ति**) सब ओर से दूर करता और (**वसु**) धन को (**विन्दते**) प्राप्त होता है उस (**अनेहसम्**) न नष्ट करने योग्य और (**स्वस्तिगाम्**) जिसमें सुख को प्राप्त होते उस (**पन्थाम्**) मार्ग को हम लोग (**अपि**) भी (**अगन्महि**) प्राप्त हों॥१६॥

भावार्थः-राजादि मनुष्य ऐसे मार्गों को बनावें जिनमें जाते हुओं को चोरों का भय न हो और द्रव्य का लाभ भी हो॥१६॥

इस सूक्त में विश्वे देवों के कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इक्यावनवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ सप्तदशर्चस्य द्विपञ्चाशत्तमस्य सूक्तस्य ऋजिष्वा ऋषिः। विश्वेदेवा देवताः। १, ४, १५, १६ निचृत्त्रिष्टुप्। २, ३,६, १३, १७ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ७, ८, ११ गायत्री। ९, १०, १२ निचृद्गायत्री छन्दः। षड्जः स्वरः। १४ विराड्जगती छन्दः। निषादः स्वरः॥

अथ केनाऽधिकं सुखं जायत इत्याह॥

अब सत्रह ऋचावाले बावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में किस से अधिक सुख होता है, इस विषय को कहते हैं॥

न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः।
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा॥ १॥

न। तत्। दिवा। न। पृथिव्या। अनु। मन्ये। न। यज्ञेन। न। उत। शमीभिः। आभिः। उब्जन्तु। तम्। सुऽभ्वः। पर्वतासः। नि। हीयताम्। अतिऽयाजस्य। यष्टा॥ १॥

पदार्थः-(**न**) (**तत्**) (**दिवा**) दिवसे (**न**) (**पृथिव्या**) भूम्या (**अनु**) (**मन्ये**) (**न**) (**यज्ञेन**) होमादिना (**न**) (**उत**) (**शमीभिः**) कर्मभिः (**आभिः**) क्रियाभिः (**उब्जन्तु**) कुटिलं कुर्वन्तु (**तम्**) (**सुभ्वः**) ये सुष्ठु भवन्ति (**पर्वतासः**) मेघाः (**नि**) (**हीयताम्**) त्यज्यताम् (**अतिवाजस्य**) योऽतिशयेन यष्टुं योग्यस्य यज्ञस्य (**यष्टा**) सङ्गन्ता॥ १॥

अन्वयः-हे मनुष्या! यथा सुभ्वः पर्वतासस्तमुब्जन्तु तथा योऽतियाजस्य यष्टा वर्त्तते स तद्दिवा न नि हीयतां न पृथिव्यां न यज्ञेन नोताऽऽभिर्न शमीभिर्हीयतामहमनु मन्ये॥ १॥

भावार्थः-यत्सुखं मेघैर्जायते तत्सुखं न दिवसे न पृथिव्या न सङ्गत्या न कर्मणा भवति तस्माद्यजमानो हि सुखभाग्भवति॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**सुभ्वः**) जो अच्छे होते हैं, वे (**पर्वतासः**) मेघ (**तम्**) उसको (**उब्जन्तु**) कुटिल करें, वैसे (**अतियाजस्य**) जो अतीव यज्ञ करने योग्य है उसका (**यष्टा**) सङ्ग करने वाला वर्त्तमान है वह (**तत्**) उस कारण से (**दिवा**) दिन में (**न**) न (**नि, हीयताम्**) छोड़ने योग्य है (**न**) न (**पृथिव्या**) भूमि से (**न**) न (**यज्ञेन**) होम आदि कर्म से (**न**) न (**उत**) और (**आभिः**) क्रियाओं से वा (**शमीभिः**) कर्मों से छोड़ने योग्य है, उसे मैं (**अनु, मन्ये**) अनुकूलता से मानता हूँ॥ १॥

भावार्थः-जो सुख मेघों से उत्पन्न होता है, वह सुख न दिवस में, न पृथिवी, न सङ्गति, न कर्म से होता है, इससे यज्ञ करने वाला ही सुखभागी होता है॥ १॥

पुनः के मनुष्या निन्द्या वर्ज्जनीयाश्च सन्तीत्याह॥

फिर कौन मनुष्य निन्दा करने और वर्जने योग्य हैं, इस विषय को कहते हैं॥

अति॑ वा॒ यो म॑रुतो॒ मन्य॑ते नो॒ ब्रह्म॑ वा॒ यः क्रि॒यमा॑णं॒ निनि॑त्सात्।

तपूं॑षि॒ तस्मै॑ वृजि॒नानि॑ सन्तु ब्रह्म॒द्विष॑म॒भि तं शो॑चतु॒ द्यौः॥ २॥

अति॑। वा॒। यः। म॒रु॒तः॒। मन्य॑ते। नः॒। ब्रह्म॑। वा॒। यः। क्रि॒यमा॑णम्। निनि॑त्सात्। तपूं॑षि। तस्मै॑। वृ॒जि॒नानि॑। स॒न्तु॒। ब्र॒ह्म॒ऽद्विष॑म्। अ॒भि। तम्। शो॒च॒तु॒। द्यौः॥ २॥

पदार्थः-(**अति**) (**वा**) (**यः**) (**मरुतः**) मनुष्याः (**मन्यते**) (**नः**) अस्मान् (**ब्रह्म**) धनम् (**वा**) (**यः**) (**क्रियमाणम्**) (**निनित्सात्**) निन्दितुमिच्छेत् (**तपूंषि**) तेजोमयानि (**तस्मै**) (**वृजिनानि**) बाधकानि (**सन्तु**) (**ब्रह्मद्विषम्**) धनस्य द्वेष्टारम् (**अभि**) (**तम्**) (**शोचतु**) (**द्यौः**) कामयमानो विद्वान्॥ २॥

अन्वयः-हे मरुतो! यो नोऽस्मानति मन्यते वा यः क्रियमाणं ब्रह्माऽति मन्यते वा निनित्सात् तं ब्रह्मद्विषं द्यौरभि शोचतु तस्मै तपूंषि वृजिनानि सन्तु॥ २॥

भावार्थः-हे विद्वांसो! ये मनुष्या अतिमानं धनादिद्वेषमाप्तनिन्दाञ्च कुर्वन्ति ते दण्डनीया निन्दनीयाः शोचनीयाश्च सन्ति॥ २॥

पदार्थः-हे (**मरुतः**) मनुष्यो! (**यः**) जो (**नः**) हम लोगों को (**अति, मन्यते**) अत्यन्त मानता है (**वा**) वा (**यः**) जो (**क्रियमाणम्**) क्रियमाण (**ब्रह्म**) धन को अत्यन्त मानता है (**वा**) वा (**निनित्सात्**) निन्दा करने को चाहे (**तम्**) उस (**ब्रह्मद्विषम्**) धन के द्वेषीजन को (**द्यौः**) कामना करता हुआ विद्वान् (**अभि, शोचतु**) सब ओर से शोचे (**तस्मै**) इसके लिये (**तपूंषि**) तेजोमय व्यवहार (**वृजिनानि**) बाधक (**सन्तु**) हों॥ २॥

भावार्थः-हे विद्वानो! जो मनुष्य अतिमान, धनादिकों से द्वेष और अच्छे सज्जनों की निन्दा करते हैं, वे दण्ड देने, निन्दा करने और शोक करने योग्य होते हैं॥ २॥

पुनर्मनुष्याः कीदृक् परीक्षकाः स्युरित्याह॥

फिर मनुष्य कैसे परीक्षक हों, इस विषय को कहते हैं॥

किम॒ङ्ग त्वा॒ ब्रह्म॑णः सोम गो॒पां किम॒ङ्ग त्वा॑हुरशिभस्ति॒पां नः॑।

किम॒ङ्ग नः॑ पश्यसि नि॒द्यमा॑नान् ब्रह्म॒द्विषे॒ तपु॑षिं हे॒तिम॑स्य॥ ३॥

किम्। अ॒ङ्ग॒। त्वा॒। ब्रह्म॑णः। सो॒म॒। गो॒पाम्। किम्। अ॒ङ्ग॒। त्वा॒। आ॒हुः॒। अ॒भि॒श॒स्ति॒ऽपाम्। नः॒। किम्। अ॒ङ्ग॒। नः॒। प॒श्य॒सि॒। नि॒द्यमा॑नान्। ब्र॒ह्म॒ऽद्विषे॑। तपु॑षिम्। हे॒तिम्। अ॒स्य॒॥ ३॥

पदार्थः-(**किम्**) (**अङ्ग**) मित्र (**त्वा**) त्वाम् (**ब्रह्मणः**) धनस्य (**सोम**) ऐश्वर्यमिच्छो (**गोपाम्**) रक्षकम् (**किम्**) (**अङ्ग**) सखे (**त्वा**) त्वाम् (**आहुः**) कथयन्तु (**अभिशस्तिपाम्**) अभिमुखप्रशंसारक्षितारम् (**नः**) अस्मान् (**किम्**) (**अङ्ग**) (**नः**) अस्मान् (**पश्यसि**) (**निद्यमानान्**) प्राप्तनिन्दान् (**ब्रह्मद्विषे**) वेदविद्याद्वेष्ट्रे (**तपुषिम्**) प्रतप्तम् (**हेतिम्**) वज्रम् (**अस्य**)॥ ३॥

अन्वयः-हे अङ्ग सोम! किं त्वा ब्रह्मणो गोपामाहुः। हे अङ्ग! किं त्वाऽभिशस्तिपामाहुः। हे अङ्ग! त्वं नः किं पश्यसि। हे अङ्ग! त्वं निद्यमानान्नः किं पश्यसि। ब्रह्मद्विषे तपुषिं हेतिं किं न पश्यसि। अस्योपरि वज्रप्रहारं कुर्य्याः॥३॥

भावार्थः-हे मनुष्या! यूयमस्य धनस्य गोप्तारः किमर्थं न भवथ स्तावकानस्मान्निन्दकान् भ्रमेण मा पश्यत, ये हि धनेश्वरवेदविद्यां द्विषन्ति तेषां सङ्गं युद्धमन्तरा मा कुरुत॥३॥

पदार्थः-हे (**अङ्ग**) मित्र (**सोम**) ऐश्वर्य की इच्छा करने वाले जन! (**किम्**) क्या (**त्वा**) तुझे (**ब्रह्मणः**) धन का (**गोपाम्**) रक्षा करने वाला (**आहुः**) कहें। हे (**अङ्ग**) मित्र! (**किम्**) क्या (**त्वा**) तुझे (**अभिशस्तिपाम्**) सामने प्रशंसा रखने वाले कहते हैं। हे (**अङ्ग**) सखे मित्र! तू (**नः**) हम लोगों को (**किम्**) क्या (**पश्यसि**) देखता है। हे मित्र तू (**निद्यमानान्**) निन्दा प्राप्त (**नः**) लोगों को क्या देखता है (**ब्रह्मद्विषे**) वेदविद्या द्वेषी जन के लिये (**तपुषिम्**) अति तपे हुए (**हेतिम्**) वज्र को क्या नहीं देखता (**अस्य**) इस पर वज्र प्रहार कर॥३॥

भावार्थः-हे मनुष्यो! तुम इस धन के रक्षक क्यों नहीं होते हो, स्तुति (प्रशंसा) करने वाले हम लोगों को निन्दा करने वाले भ्रम से मत देखो, निश्चय धनपति तथा वेदविद्या से द्वेष करते हैं, उनका सङ्ग युद्ध विना मत करो॥३॥

पुनर्मनुष्यैः कथमाचरणीयमित्याह॥

फिर मनुष्यों को कैसा आचरण करना चाहिये, इस विषय को कहते हैं॥

अव॑न्तु मामु॒षसो॒ जाय॑मानाॅ॒ अव॑न्तु मा॒ सिन्ध॑व॒ः पिन्व॑मानाः।
अव॑न्तु मा॒ पर्व॑तासो ध्रु॒वासोऽव॑न्तु मा पि॒तरो॑ दे॒वहू॑तौ॥४॥

अव॑न्तु। माम्। उ॒षस॑ः। जाय॑मानाः। अव॑न्तु। मा॒। सिन्ध॑वः। पिन्व॑मानाः। अव॑न्तु। मा॒। पर्व॑तासुः। ध्रु॒वास॑ः। अव॑न्तु। मा॒। पि॒तर॑ः। दे॒वऽहू॑तौ॥४॥

पदार्थः-(**अवन्तु**) रक्षन्तु (**माम्**) (**उषसः**) प्रभातवेलाः (**जायमानाः**) उत्पद्यमानाः (**भवन्तु**) (**मा**) माम् (**सिन्धवः**) नद्यः (**पिन्वमानाः**) सिञ्चन्त्यः (**अवन्तु**) (**मा**) माम् (**पर्वतासः**) शैलाः (**ध्रुवासः**) निश्चलाः (**अवन्तु**) (**मा**) माम् (**पितरः**) जनका अध्यापका ऋतवो वा (**देवहूतौ**) दिव्यगुणानां विदुषां वा स- हणे॥४॥

अन्वयः-हे उपदेष्टारो! यूयं देवहूतौ यथा जायमाना उषसो मामवन्तु पिन्वमानाः सिन्धवो माऽवन्तु ध्रुवासः पर्वतासो माऽवन्तु पितरो माऽवन्तु तथा शिक्षत॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयमेवं युक्ताहारविहारं कुर्यात येन सर्वे सृष्टिस्थाः पदार्था दुःखप्रदा न स्युः शुभान् गुणांश्च यूयं प्राप्नुत॥४॥

पदार्थः-हे उपदेश करने वालो! तुम **(देवहूतौ)** दिव्यगुण वा विद्वानों के स-ह में जैसे **(जायमानाः)** उत्पद्यमान **(उषसः)** प्रभातवेलाएं **(माम्)** मेरी **(अवन्तु)** रक्षा करें तथा **(पिन्वमानाः)** सेवन करती हुई **(सिन्धवः)** नदियां **(मा)** मेरी **(अवन्तु)** रक्षा करें और **(ध्रुवासः)** निश्चल **(पर्वतासः)** शैल पहाड़ **(मा)** मेरी **(अवन्तु)** रक्षा करें और **(पितरः)** पिता वा पढ़ाने वाला वा ऋतु वसन्त आदि **(मा)** मेरी **(अवन्तु)** रक्षा करें, वैसी शिक्षा करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम इस प्रकार युक्त आहार-विहार करो, जिससे सब सृष्टिस्थ पदार्थ दुःख देने वाले न हों और शुभ गुणों को तुम लोग प्राप्त होओ॥४॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

विश्वऽदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम्।
तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः॥५॥१४॥

विश्वऽदानीम्। सुऽमनसः। स्याम। पश्येम। नु। सूर्यम्। उत्ऽचरन्तम्। तथा। करत्। वसुऽपतिः। वसूनाम्। देवान्। ओहानः। अवसा। आऽगमिष्ठः॥५॥

पदार्थः-(**विश्वदानीम्**) सर्वदा (**सुमनसः**) प्रसन्नचित्ताः (**स्याम**) (**पश्येम**) (**नु**) सद्यः (**सूर्य्यम्**) (**उच्चरन्तम्**) ऊर्ध्वं प्राप्नुवन्तम् (**तथा**) (**करत्**) कुर्यात् (**वसुपतिः**) वसूनां पदार्थानां पालकः (**वसूनाम्**) (**देवान्**) विदुषः (**ओहानः**) रक्षकः (**अवसा**) रक्षणादिना (**आगमिष्ठः**) अतिशयेनाऽऽगन्ता॥५॥

अन्वयः-हे विद्वन्नवसाऽऽगमिष्ठो वसूनां वसुपतिरोहानो भवान् यथाऽस्मान् देवान् करत् तथा वयं विश्वदानीं सूर्य्यमुच्चरन्तं पश्येम नु सुमनसः स्याम॥५॥

भावार्थः-अत्रोपमालङ्कारः। यथा प्रीत्याऽध्यापकोपदेशका विद्यार्थिनः श्रोतॄंश्च विदुषः कृत्वा सुखिनः कुर्वन्ति तथैवाऽध्येतृभिः श्रोतृभिश्च विद्वांसो भूत्वाप्येते सदा सत्करणीयाः॥५॥

पदार्थः-हे विद्वन्! **(अवसा)** रक्षा आदि के साथ **(आगमिष्ठः)** अतीव आने और **(वसूनाम्)** वसुओं के बीच **(वसुपतिः)** पदार्थों की पालना करने वाले और **(ओहानः)** रक्षक आप जैसे हम लोगों को **(देवान्)** विद्वान् **(करत्)** करें **(तथा)** वैसे हम लोग **(विश्वदानीम्)** सर्वदा **(सूर्य्यम्)** सूर्यमण्डल जो **(उच्चरन्तम्)** ऊपर को चढ़ता है उसे **(पश्येम)** देखें और **(नु)** शीघ्र **(सुमनसः)** प्रसन्नचित्त **(स्याम)** होवें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे प्रीति से अध्यापक और उपदेशक विद्यार्थियों को और उपदेश सुनने वालों को विद्वान् करके सुखी करते हैं, वैसे ही पढ़ने वालों और उपदेश सुनने वालों को चाहिये कि विद्वान् होकर भी इनका सदा सत्कार करें॥५॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॒ नेदि॑ष्ठमव॒सागा॑मिष्ठ॒: सर॑स्वती॒ सिन्धु॑भि॒: पिन्व॑माना।

प॒र्जन्यो॑ न॒ ओष॑धीभिर्मयो॒भुर॒ग्नि: सु॒शंस॑: सु॒हव॑: पि॒तेव॑॥ ६॥

इन्द्र॑:। नेदि॑ष्ठम्। अव॑सा। आऽगा॑मिष्ठ:। सर॑स्वती। सिन्धु॑ऽभि:। पिन्व॑माना। प॒र्जन्य॑:। न॒:। ओष॑धीभि:। म॒यो॒ऽभु:। अ॒ग्नि:। सु॒ऽशंस॑:। सु॒ऽहव॑:। पि॒ताऽइ॑व॥ ६॥

पदार्थ:-(**इन्द्र:**) परमैश्वर्यवान् (**नेदिष्ठम्**) अतिशयेन समीपम् (**अवसा**) रक्षणादिना (**आगमिष्ठ:**) अतिशयेनागन्ता (**सरस्वती**) प्रशस्तं सरो वेगो यस्या: सा नदी (**सिन्धुभि:**) नदीभि: (**पिन्वमाना**) संयुक्ता (**पर्जन्य:**) मेघ: (**न:**) अस्मान् (**ओषधीभि:**) (**मयोभु:**) सुखंभावुक: (**अग्नि:**) वह्निरिव (**सुशंस:**) शोभनस्तुति: (**सुहव:**) शोभनो हवस्सत्कारो यस्य (**पितेव**) जनक इव॥ ६॥

अन्वय:-हे मनुष्या! योऽवसा नेदिष्ठमागमिष्ठ: सिन्धुभि: पिन्वमाना सरस्वतीव सुशंस: सुहवोऽग्निरिवौषधीभि: पर्जन्यो मयोभुरिव पितेवेन्द्रो न: पालयति स राजाऽस्माभि: सततं सत्कर्त्तव्य:॥ ६॥

भावार्थ:-अत्रोपमालङ्कार:। यो राजा न्यायपुरुषार्थाभ्यां प्रजा: सततं रक्षति तं प्रजा: पितरमिव पालयन्ति॥ ६॥

पदार्थ:-हे मनुष्यो! जो (**अवसा**) रक्षा आदि से (**नेदिष्ठम्**) अतीव समीप को (**आगमिष्ठ:**) अतीव आने वाला वा (**सिन्धुभि:**) नदियों से (**पिन्वमाना**) संयुक्त (**सरस्वती**) प्रशंसित सरस् वेग जिसका उस नदी के समान (**सुशंस:**) शोभन तथा (**सुहव:**) शोभन सत्कार वाले (**अग्नि:**) अग्नि के समान (**ओषधिभि:**) ओषधियों से युक्त (**पर्जन्य:**) मेघ (**मयोभु:**) सुख हुवाने तथा (**पितेव**) जन्म देने वाले पिता के समान (**इन्द्र:**) परमैश्वर्यवान् राजा (**न:**) हम लोगों को पालना करता है, वह राजा हम लोगों से निरन्तर सत्कार करने योग्य है॥ ६॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो राजा न्याय और पुरुषार्थ से प्रजा की निरन्तर रक्षा करता है, उसकी पिता के समान प्रजाजन पालना करते हैं॥ ६॥

पुनरध्येतृभि: किं कर्त्तव्यमित्याह॥

फिर पढ़ने वालों को क्या करना चाहिये, इस विषय को कहते हैं॥

विश्वे॑ देवास॒ आ ग॑त शृणु॒ता म॑ इ॒मं ह॑व॒म्। एदं ब॒र्हिनि॑ षीदत॥ ७॥

विश्वे॑। दे॒वा॒स॒:। आ। ग॒त॒। शृ॒णु॒त। मे॒। इ॒मम्। ह॒व॒म्। आ। इ॒दम्। ब॒र्हि:। नि। सी॒द॒त॥ ७॥

पदार्थ:-(**विश्वे**) सर्वे (**देवास:**) विद्वांस: (**आ**) (**गत**) आगच्छत (**शृणुता**) अत्र **संहितायामिति** दीर्घ:। (**मे**) मम विद्यार्थिन: (**इमम्**) वर्त्तमाने पठितम् (**हवम्**) श्रुताधीतविषयम् (**आ**) (**इदम्**) वर्त्तमानम् (**बर्हि:**) उत्तमासनम् (**नि**) नितराम् (**सीदत**) आसीना भवत॥ ७॥

अन्वय:-हे विश्वे देवासो! यूयमस्माकं नेदिष्ठमा गत, इदं बर्हिर्नि षीदत म इमं हवमा शृणुता॥ ७॥

भावार्थः-अत्र नेदिष्ठमितिपदं पूर्वमन्त्रादनुवर्त्तते॥ विद्यार्थिभिः परीक्षकान् विदुषः प्रार्थ्य परीक्षायां नियोज्यः सर्वः श्रुताऽधीतविषयस्तत्समीपे निवेदनीयस्ते च सम्यक् परीक्ष्य गुणदोषानुपदिशेयुरेवं कृते सत्यध्ययनं निर्दोषं स्यात्॥७॥

पदार्थः-हे **(विश्वे, देवासः)** सब विद्वानो! तुम हमारे अति समीप **(आ, गत)** आओ तथा **(इदम्)** इस **(बर्हिः)** उत्तम आसन पर **(नि, सीदत)** निरन्तर स्थिर होओ तथा **(मे)** मुझ विद्यार्थी के **(इमम्)** इस **(हवम्)** सुने पढ़े विषय को **(आ, शृणुता)** अच्छे प्रकार सुनो॥७॥

भावार्थः-इस मन्त्र में 'नेदिष्ठम्' यह पद पिछले मन्त्र से अनुवृत्ति में आता है॥ विद्यार्थियों को चाहिये कि परीक्षा करने वाले विद्वानों की प्रार्थना कर परीक्षा में सुनाने योग्य समस्त सुना और पढ़ा विषय उनके समीप में निवेदन करें तथा वे परीक्षक भी अच्छे प्रकार परीक्षा कर गुण और दोषों का उपदेश दें, ऐसा करने पर पढ़ना निर्दोष हो॥७॥

पुनरध्यापकाऽध्येतारः परस्परं कथं वर्तेरन्नित्याह॥

फिर अध्यापक और अध्ययन करने वाले परस्पर कैसे वर्त्ताव करें, इस विषय को कहते हैं॥

यो वो॑ देवा घृत॒स्नु॑ना ह॒व्येन॑ प्रति॒भूष॑ति। तं विश्व॒ उप॑ गच्छथ॥८॥

यः। व॒ः। दे॒वाः। घृ॒तऽस्नु॑ना। ह॒व्येन॑। प्र॒ति॒ऽभूष॑ति। तम्। विश्वे॑। उप॑। ग॒च्छ॒थ॒॥८॥

पदार्थः-(**यः**) **(वः)** युष्मान् **(देवाः)** अध्यापकोपदेष्टारः **(घृतस्नुना)** घृतमिव शुद्धेन **(हव्येन)** आदातुं दातुमर्हेण प्रशंसितेनाऽध्ययनेन श्रवणेन वा **(प्रतिभूषति)** प्रत्यक्षतयाऽलङ्करोति **(तम्)** **(विश्वे)** सर्वे **(उप)** **(गच्छथ)**॥८॥

अन्वयः-हे देवा! यो घृतस्नुना हव्येन वः प्रतिभूषति तं विश्वे यूयमुप गच्छथ॥८॥

भावार्थः-हे मनुष्या! यः सत्येन विद्यादानेन सर्वान् युष्मान् भूषयति तं यूयं प्रतिभूषत॥८॥

पदार्थः-हे **(देवाः)** पढ़ाने और उपदेश करने वाले विद्वानो! **(यः)** जो **(घृतस्नुना)** घृत के समान शुद्ध **(हव्येन)** लेने-देने योग्य वा प्रशंसित पढ़ने और सुनने से **(वः)** तुम लोगों को **(प्रतिभूषति)** प्रत्यक्षता से सुभूषित करता है **(तम्)** उसके **(विश्वे)** सब तुम लोग **(उप, गच्छथ)** समीप प्राप्त होओ॥८॥

भावार्थः-हे मनुष्यो! जो सत्य विद्यादान से सब तुम लोगों को सुभूषित करता है, उसे तुम सब प्रतिभूषित करो अर्थात् बदले में सुशोभित करो॥८॥

पुनर्मनुष्यैः कीदृशो नियमः कर्त्तव्य इत्याह॥

फिर मनुष्यों को कैसा नियम करना चाहिये, इस विषय को कहते हैं॥

उप॑ नः सू॒नवो॒ गिरः॑ शृण्वन्त्वमृत॒स्य॒ ये। सु॒मृ॒ळी॒का भ॑वन्तु नः॥९॥

उप॑। न॒ः। सू॒नवः॑। गिरः॑। शृ॒ण्व॒न्तु॒। अ॒मृ॒त॒स्य। ये। सु॒ऽमृ॒ळी॒काः। भ॒व॒न्तु॒। न॒ः॥९॥

पदार्थः-(**उप**) (**नः**) अस्माकम् (**सूनवः**) अपत्यानि (**गिरः**) विद्यायुक्ता वाचः (**शृण्वन्तु**) (**अमृतस्य**) नाशरहितस्य विज्ञानस्य (**ये**) (**सुमृळीकाः**) सुष्ठु सुखिनः (**भवन्तु**) (**नः**) अस्मान्॥९॥

अन्वयः-हे राजन्विद्वांसो वा! ये नः सूनवः स्युस्तेऽमृतस्य गिर उप शृण्वन्तु सुमृळीका भूत्वा नः सेवका भवन्तु॥९॥

भावार्थः-पितृभी राजनीतौ स्वकुले वाऽयं दृढो नियमः कर्त्तव्यो यावन्त्यस्माकमपत्यानि स्युस्तावन्ति ब्रह्मचर्येण समस्तविद्याग्रहणाय ब्रह्मचर्यं कुर्य्युर्योऽस्य विच्छेदं कुर्यात्तं राजा कुलीनाश्च भृशं दण्डयेयुः॥९॥

पदार्थः-हे राजन् वा विद्वानो! (**ये**) जो (**नः**) हमारे (**सूनवः**) सन्तान हों वे (**अमृतस्य**) नाशरहित विज्ञान की (**गिरः**) विद्यायुक्त वाणियों को (**उप, शृण्वन्तु**) समीप में सुनें तथा (**सुमृळीकाः**) सुन्दर सुख वाले होकर (**नः**) हमारी सेवा करने वाले (**भवन्तु**) हों॥९॥

भावार्थः-पितृजनों को राजनीति वा अपने कुल में यह दृढ़ नियम करना चाहिये कि जितने हमारे सन्तान हैं, वे ब्रह्मचर्य्य से विद्याओं के समस्त ग्रहण के लिये ब्रह्मचर्य्य आश्रम को करें, जो इसका विनाश करे उसे राजा वा कुलीन निरन्तर दण्ड देवें॥९॥

पुनर्मनुष्याः किमुशित्वा विद्याः प्राप्नुयुरित्याह॥

फिर मनुष्य क्या कामना कर विद्याओं को प्राप्त होवें, इस विषय को कहते हैं॥

विश्वे॑ दे॒वा ऋ॑ता॒वृधं॑ ऋ॒तुभि॑र्हवन॒श्रुत॑:। जु॒षन्ता॑ युज्यं॑ पय॑:॥ १०॥ १५॥

विश्वे॑। दे॒वाः। ऋ॒त॒ऽवृध॑:। ऋ॒तुऽभि॑:। ह॒व॒न॒ऽश्रुत॑:। जु॒षन्ता॑म्। युज्य॑म्। पय॑:॥ १०॥

पदार्थः-(**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**ऋतावृधः**) सत्यविद्यावर्धकाः (**ऋतुभिः**) वसन्तादिभिः (**हवनश्रुतः**) ये हवनमध्ययनं शृण्वन्ति ते (**जुषन्ताम्**) (**युज्यम्**) समाधातुमर्हम् (**पयः**) दुग्धमुदकमन्नं वा। **पय इत्युदकनाम॥** (निघं०१.१२) **अन्ननाम च** (निघं०२.७)॥१०॥

अन्वयः-हे ऋतावृधो हवनश्रुतो विश्वे देवा! भवन्त ऋतुभिर्युज्यं पयो जुषन्ताम्॥१०॥

भावार्थः-येऽध्येतुं परीक्षयितुं चेच्छेयुस्ते मादककुत्सितबुद्धिनाशकानि द्रव्याणि त्यक्त्वा पय आदीनि बुद्धिवर्द्धकानि सेवेरन्॥१०॥

पदार्थः-हे (**ऋतावृधः**) सत्य विद्या के बढ़ाने वालो (**हवनश्रुतः**) जो अध्ययन को सुनते हैं, वे (**विश्वे, देवाः**) सब विद्वान्! आप लोग (**ऋतुभिः**) वसन्तादिकों के साथ (**युज्यम्**) समाधान करने योग्य (**पयः**) दूध, जल वा अन्न को (**जुषन्ताम्**) सेवें॥१०॥

भावार्थः-जो अध्ययन करने और परीक्षा कराने को चाहें वे मद करने, कुत्सित बुद्धि वा नाश करने वाले पदार्थों को छोड़ के दुग्ध आदि बुद्धि के बढ़ाने वाले उत्तम पदार्थों को सेवें॥१०॥

पुनर्मनुष्याः केन सह किं कुर्य्युरित्याह॥

फिर मनुष्य किसके साथ क्या करें, इस विषय को कहते हैं॥

स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टमान्मित्रो अर्यमा। इमा हव्या जुषन्त नः॥ ११॥

स्तोत्रम्। इन्द्रः। मरुत्ऽगणः। त्वष्टृऽमान्। मित्रः। अर्यमा। इमा। हव्या। जुषन्त। नः॥ ११॥

पदार्थः-(**स्तोत्रम्**) स्तुवन्ति येन तत् (**इन्द्रः**) परमैश्वर्य्यवान् राजा (**मरुद्गणः**) मरुतामुत्तमानां मनुष्याणां गणः समूहो यस्य (**त्वष्टृमान्**) त्वष्टार उत्तमाः शिल्पिनो विद्यन्ते यस्य सः (**मित्रः**) सर्वस्य सुहृत् (**अर्यमा**) न्यायकारी (**इमा**) इमानि (**हव्या**) दातुमादातुमर्हाण्यन्नादीनि (**जुषन्त**) सेवन्ताम् (**नः**) अस्माकम्॥ ११॥

अन्वयः-हे मनुष्या! भवन्तो यो मरुद्गणस्त्वष्टृमान् मित्रोऽर्यमेन्द्रो भवेत्तेन सह न स्तोत्रमिमा हव्या च जुषन्त॥ ११॥

भावार्थः-त एव मनुष्या इष्टानि प्राप्तुं शक्नुवन्ति ये सर्वेभ्यः श्रेष्ठं पुरुषमधिष्तातारं कुर्वन्ति॥ ११॥

पदार्थः-हे मनुष्यो! आप जो (**मरुद्गणः**) जिसके उत्तम मनुष्यों का समूह और (**त्वष्टृमान्**) उत्तम शिल्पीजन विद्यमान हैं तथा (**मित्रः**) जो कि सबका मित्र (**अर्यमा**) न्याय करने वाला और (**इन्द्रः**) परमैश्वर्यवान् राजा हो उसके साथ (**नः**) हमारे (**स्तोत्रम्**) उस स्तोत्र को जिससे स्तुति करते हो और (**इमा**) इन (**हव्या**) लेने-देने योग्य अन्नादि पदार्थों को (**जुषन्त**) सेवो॥ ११॥

भावार्थः-वे ही मनुष्य चाहे हुए पदार्थों को पा सकते हैं, जो सब के लिये श्रेष्ठ पुरुष को अधिष्ठाता करते हैं॥ ११॥

पुनर्मनुष्याः कीदृशं राजानं कुर्य्युरित्याह॥

फिर मनुष्य कैसे राजा को करें, इस विषय को कहते हैं॥

इमं नो अग्ने अध्वरं होतर्वयुनशो यज। चिकित्वान् दैव्यं जनम्॥ १२॥

इमम्। नः। अग्ने। अध्वरम्। होतः। वयुनऽशः। यज। चिकित्वान्। दैव्यम्। जनम्॥ १२॥

पदार्थः-(**इमम्**) (**नः**) अस्माकम् (**अग्ने**) पावक इव वर्त्तमान (**अध्वरम्**) अहिंसनीयं न्यायव्यवहारम् (**होतः**) दातः (**वयुनशः**) प्रज्ञानेन (**यज**) सङ्गच्छस्व (**चिकित्वान्**) ज्ञानवान् (**दैव्यम्**) विद्वद्भिः सत्कृतम् (**जनम्**) शुभाचरणैः प्रसिद्धम्॥ १२॥

अन्वयः-हे होतरग्ने! वयुनशो न इममध्वरं चिकित्वांस्त्वं दैव्यं जनं यज॥ १२॥

भावार्थः-हे राजप्रजाजन! त्वं योऽस्माकं मध्ये शुभगुणकर्मस्वभावयुक्तः स्यात्तमेव राज्यकरणे सङ्गतं कुरु॥ १२॥

पदार्थः-हे (**होतः**) देने वाले (**अग्ने**) अग्नि के समान वर्त्तमान राजन्! आप (**वयुनशः**) उत्तम ज्ञान से (**नः**) हमारे (**इमम्**) इस (**अध्वरम्**) न नष्ट करने योग्य न्याय व्यवहार को (**चिकित्वान्**) जानने योग्य वाले आप (**दैव्यम्**) विद्वानों से सत्कार को प्राप्त हुए (**जनम्**) शुभाचरणों से प्रसिद्ध जन को (**यज**) अच्छे प्रकार प्राप्त हों॥ १२॥

भावार्थः-हे राजा प्रजाजन! आप जो हमारे बीच शुभ गुणकर्मस्वभावयुक्त हो, उसी को राज्य करने में अच्छे प्रकार युक्त करो॥१२॥

पुनर्मनुष्यैः क आहूय सत्कर्त्तव्या इत्याह॥

फिर मनुष्यों को कौन बुला कर सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

विश्वे॑ देवाः शृणुतेमं हवं॑ मे॒ ये अ॒न्तरि॑क्षे य उप॒ द्यवि॒ ष्ठ।
ये अ॑ग्निजि॒ह्वा उ॒त वा॒ यज॑त्रा आ॒सद्या॒स्मिन् ब॒र्हिषि॑ मादयध्वम्॥ १३॥

विश्वे॑। दे॒वा॒ः। शृ॒णु॒त। इ॒मम्। हव॑म्। मे॒। ये। अ॒न्तरि॑क्षे। ये। उप॑। द्यवि॑। स्थ। ये। अ॒ग्नि॒ऽजि॒ह्वाः। उ॒त। वा॒। यज॑त्राः। आ॒ऽसद्य॑। अ॒स्मिन्। ब॒र्हिषि॑। मा॒द॒य॒ध्व॒म्॥ १३॥

पदार्थः-(**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**शृणुत**) (**इमम्**) (**हवम्**) श्रुताधीतज्ञातविषयम् (**मे**) मम (**ये**) (**अन्तरिक्षे**) अन्तरक्षय आकाशे (**ये**) (**उप**) (**द्यवि**) प्रकाशे (**स्थ**) (**ये**) (**अग्निजिह्वाः**) अग्निना सत्येन सुप्रकाशिता जिह्वा येषान्ते (**उत**) (**वा**) (**यजत्राः**) सङ्गन्तव्याः (**आसद्य**) स्थित्वा (**अस्मिन्**) (**बर्हिषि**) उत्तम आसने स्थाने वा (**मादयध्वम्**)॥१३॥

अन्वयः-हे विश्वे देवा! येऽन्तरिक्षे ये द्यवि येऽग्निजिह्वा उत वा यजत्राः स्युस्तैः सह म इमं हवमुप शृणुत समीपे च स्थ। अस्मिन् बर्हिष्याऽऽसद्याऽस्मान् मादयध्वम्॥१३॥

भावार्थः-मनुष्यैः सदैव ये विमानस्था अन्तरिक्षे, ये विद्युद्विद्यायां कुशला ये चाऽध्यापने परीक्षायां च निपुणा धर्मिष्ठा आप्ता विद्वांसः स्युस्तत्सन्निधौ गत्वा तान् स्वसमीपमाहूय सत्कृत्यैतेभ्यः श्रोतव्यं श्रुतं श्राव्यञ्च यतः श्रवणे विज्ञाने वा श्रमो न स्यात्॥१३॥

पदार्थः-हे (**विश्वे, देवाः**) सब विद्वानो! (**ये**) जो (**अन्तरिक्षे**) भीतर अविनाशी आकाश में (**ये**) जो (**द्यवि**) प्रकाश में (**ये**) जो (**अग्निजिह्वाः**) सत्य से प्रकाशमान जिह्वा जिन की (**उत, वा**) अथवा (**यजत्राः**) सङ्ग करने योग्य हों उन सब के साथ (**मे**) मेरे (**इमम्**) इस (**हवम्**) सुने पढ़े और जाने हुए विषय को (**उप, शृणुत**) समीप में सुनो और समीप में (**स्थ**) स्थिर होओ तथा (**अस्मिन्**) इस (**बर्हिषि**) उत्तम आसन वा स्थान में (**आसद्य**) बैठ के हम लोगों को (**मादयध्वम्**) आनन्दित करो॥१३॥

भावार्थः-मनुष्यों को सदैव जो विमानस्थ, अन्तरिक्ष में, वा जो बिजुली की विद्या में कुशल हैं और जो पढ़ाने वा परीक्षा करने में निपुण, धर्मिष्ठ, आप्त विद्वान् हों; उनके निकट जाकर और उनको अपने समीप बुलाकर सत्कार कर इनसे सुनना चाहिये और सुना हुआ सुनाना चाहिये, जिससे सुनने में वा विज्ञान में श्रम न हो॥१३॥

पुनः के सङ्गन्तुमर्हा इत्याह॥

फिर कौन सङ्ग करने योग्य हैं, इस विषय को कहते हैं॥

विश्वे॑ दे॒वा मम॑ शृण्वन्तु य॒ज्ञिया॑ उ॒भे रोद॑सी अ॒पां नपा॑च्च॒ मन्म॑।

मा वो॒ वचां॑सि परि॒चक्ष्या॑णि वोचं सु॒म्नेष्विद्वो॒ अन्त॑मा मदेम॥ १४॥

विश्वे॑। दे॒वाः॒। मम॑। शृ॒ण्व॒न्तु॒। य॒ज्ञि॒याः॑। उ॒भे इति॑। रोद॑सी॒ इति॑। अ॒पाम्। नपा॑त्। च॒। मन्म॑। मा। व॒ः॒। वचां॑सि। प॒रि॒ऽचक्ष्या॑णि। वो॒च॒म्। सु॒म्नेषु॑। इत्। व॒ः॒। अन्त॑माः॒। म॒दे॒म॒॥ १४॥

पदार्थः-(**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**मम**) (**शृण्वन्तु**) (**यज्ञियाः**) ये सत्सङ्गतिं कर्त्तुमर्हाः (**उभे**) (**रोदसी**) द्यावापृथिव्याविव सर्वेषां रक्षकाः (**अपाम्**) प्राणानाम् (**नपात्**) अनाशकम् (**च**) (**मन्म**) विज्ञानम् (**मा**) (**वः**) युष्माकम् (**वचांसि**) वचनानि (**परिचक्ष्याणि**) परितः सर्वतः ख्यातुं योग्यानि (**वोचम्**) (**सुम्नेषु**) सुखेषु (**इत्**) एव (**वः**) युष्माकम् (**अन्तमाः**) समीपस्थाः (**मदेम**) आनन्देम॥ १४॥

अन्वयः-हे विश्वे देवा! भवन्त उभे रोदसी इव यज्ञियाः सन्तो मम वचांसि शृण्वन्तु वोऽपां नपान्मन्म विरुद्धमहं मा वोचं परिचक्ष्याणि च प्रशंसेयमेवं वर्त्तमाना वयं वोऽन्तमाः सन्तः सुम्नेषु सदेन्मदेम॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! येषां विदुषां वचनं वितथं न भवति येषां सङ्गः सर्वदा सुखविज्ञानवर्धको ये भूमिसूर्य्यवत्सर्वेषां पालका विवादं श्रुत्वा पक्षपातं विहाय न्यायकर्त्तारस्स्युस्तत्सन्निधौ स्थित्वा सदैवाऽऽनन्दं प्राप्नुवन्तु॥ १४॥

पदार्थः-हे (**विश्वे, देवाः**) सब विद्वानो! आप (**उभे**) दोनों (**रोदसी**) आकाश और पृथिवी के तुल्य सब की रक्षा करने वाले (**यज्ञियाः**) सज्जनों का सङ्ग करने वाले होते हुए (**मम**) मेरे (**वचांसि**) वचनों को (**शृण्वन्तु**) सुनिये तथा (**वः**) आपके (**अपाम्**) प्राणों के (**नपात्**) न विनाश करने वाले (**मन्म**) विज्ञान को, विरुद्ध मैं (**मा, वोचम्**) मत कहूँ (**परिचक्ष्याणि, च**) और सब ओर से कहने के योग्यों की प्रशंसा करूं, इस प्रकार वर्त्तमान हम लोग (**वः**) आपके (**अन्तमाः**) समीप स्थिर होते हुए (**सुम्नेषु**) सुखों में (**इत्**) सर्वदैव (**मदेम**) आनन्दित हों॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिन विद्वानों का वचन असत्य नहीं होता तथा जिनका सङ्ग सर्वदा सुख और विज्ञान का बढ़ाने वाला है और जो भूमि और सूर्य के तुल्य सब के पालने वाले और विवाद सुनकर पक्षपात को छोड़ न्याय करने वाले हों, उनके निकट स्थित होकर सदैव आनन्द को प्राप्त होओ॥ १४॥

पुनर्मनुष्यैः के नित्यं सत्कर्त्तव्या इत्याह॥

फिर मनुष्यों से कौन नित्य सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

ये के च॒ ज्मा म॒हिनो॒ अहि॑माया दि॒वो ज॑ज्ञि॒रे अ॒पां स॒धस्थे॑।
ते अ॒स्मभ्य॑मि॒षये॒ विश्व॒मायुः॒ क्षप॑ उ॒स्रा व॑रिवस्यन्तु दे॒वाः॥ १५॥

ये। के। च॒। ज्मा। म॒हिनः॑। अहि॑ऽमायाः। दि॒वः। ज॒ज्ञि॒रे। अ॒पाम्। स॒धऽस्थे॑। ते। अ॒स्मभ्य॑म्। इ॒षये॑। विश्व॑म्। आयुः॑। क्षपः॑। उ॒स्राः। व॒रि॒व॒स्य॒न्तु॒। दे॒वाः॥ १५॥

पदार्थः-(**ये**) (**के**) (**च**) केचित् (**ज्मा**) पृथिव्या मध्ये (**महिनः**) महान्तः (**अहिमायाः**) मेघस्य मायाः कुटिलगतयः (**दिवः**) सूर्यप्रकाशात् (**जज्ञिरे**) जायन्ते (**अपाम्**) जलानाम् (**सधस्थे**) समानस्थाने मेघण्डले (**ते**) (**अस्मभ्यम्**) (**इषये**) विज्ञानायाऽन्नाय वा (**विश्वम्**) पूर्णम् (**आयुः**) जीवनम् (**क्षपः**) रात्रीः (**उस्राः**) दिनानि (**वरिवस्यन्तु**) सेवन्ताम् (**देवाः**) दिव्यगुणा विद्वांसः॥१५॥

अन्वयः-हे मनुष्या! ये के च महिनो यथा ज्माऽहिमाया दिवोऽपां सधस्थे जज्ञिरे तथा वर्त्तमाना अस्मभ्यमिषये क्षप उस्रा विश्वमायुर्वरिवस्यन्तु ते देवा अस्माभिः सततं सेवनीयाः॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! येऽत्र वर्त्तमानसमयेऽहर्निशं मनुष्याणामारोग्यायुर्विज्ञानवर्धकाः पर्जन्य इव पोषकाः स्युस्त एव सर्वैः सत्कर्त्तव्या भवन्तु॥१५॥

पदार्थः-हे मनुष्यो! (**ये**) जो (**के, च**) कोई भी (**महिनः**) महान् जैसे (**ज्मा**) पृथिवी के बीच (**अहिमायाः**) मेघ की कुटिल गतियां (**दिवः**) सूर्य्य के प्रकाश से (**अपाम्**) जलों के (**सधस्थे**) समानस्थान वाले मेघमण्डल में (**जज्ञिरे**) उत्पन्न होती हैं, वैसे वर्त्तमान (**अस्मभ्यम्**) हम लोगों के लिये (**इषये**) अन्न वा विज्ञान के अर्थ (**क्षपः**) रात्रि (**उस्राः**) दिन और (**विश्वम्**) पूर्ण (**आयुः**) जीवन को (**वरिवस्यन्तु**) सेवें (**ते**) वे (**देवाः**) दिव्यगुण वा विद्वान् जन हम लोगों से निरन्तर सेवने योग्य हैं॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो इस वर्त्तमान समय में दिन-रात्रि मनुष्यों के आरोग्य, आयु और विज्ञान के बढ़ाने और मेघ के समान पुष्टि करने वाले हों, वे ही सब से सत्कार करने योग्य हैं॥१५॥

पुनस्ते विद्वांसः कथं किं कुर्य्युरित्याह॥

फिर वे विद्वान् कैसे क्या करें, इस विषय को कहते हैं॥

अग्नीपर्जन्याववतं धियं मेऽस्मिन् हवे सुहवा सुष्टुतिं नः।
इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे॥१६॥

अग्नीपर्जन्यौ। अवतम्। धियम्। मे। अस्मिन्। हवे। सुऽहवा। सुऽस्तुतिम्। नः। इळाम्। अन्यः। जनयत्। गर्भम्। अन्यः। प्रजाऽवतीः। इषः। आ। धत्तम्। अस्मे इति॥१६॥

पदार्थः-(**अग्निपर्जन्यौ**) विद्युन्मेघाविव (**अवतम्**) रक्षतम् (**धियम्**) प्रज्ञाम् (**मे**) मम (**अस्मिन्**) (**हवे**) प्रशंसनीये धर्म्ये व्यवहारे (**सुहवा**) सुष्ठुप्रशंसितावध्यापकोपदेशकौ (**सुष्टुतिम्**) शोभनां प्रशंसाम् (**नः**) अस्माकम् (**इळाम्**) महतीं वाचम् (**अन्यः**) विद्युन्मयोऽग्निः (**जनयत्**) जनयति (**गर्भम्**) (**अन्यः**) मेघः (**प्रजावतीः**) बहुप्रशंसितप्रजायुक्ताः (**इषः**) अन्नादीच्छाः (**आ**) (**धत्तम्**) (**अस्मे**) अस्माकम्॥१६॥

अन्वयः-हे सुहवाऽग्नीपर्जन्याविवाऽस्मिन् हवे युवाम्मे धियमवतं नः सुष्टुतिमवतं यथाऽऽग्नीपर्जन्ययोर्मध्येऽन्योऽग्निरिळामन्यो मेघो गर्भं जनयत्तथाऽस्मे प्रजावतीरिष आ धत्तम्॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये वह्निमेघवत्सर्वेषां बुद्धिवर्धका रक्षकाः सर्वाः प्रजाः सुखे धरन्ति ते यथा मेघः पृथिव्यां गर्भं धृत्वौषधीर्जनयति यथा चाऽग्निर्वाचं विदधाति तथा ते सुखविधायका भवन्तीति भवन्तो विजानीयुः॥१६॥

पदार्थः-हे **(सुहवा)** सुन्दर प्रशंसित अध्यापक और उपदेशको! तुम **(अग्नीपर्जन्यौ)** बिजुलीरूप अग्नि और मेघ के तुल्य **(अस्मिन्)** इस **(हवे)** प्रशंसनीय धर्मयुक्त व्यवहार में तुम दोनों **(मे)** मेरी **(धियम्)** बुद्धि की **(अवतम्)** रक्षा करो तथा **(नः)** हमारी **(सुष्टुतिम्)** शोभन प्रशंसा की रक्षा करो जैसे अग्नि और मेघ के बीच **(अन्यः)** और बिजुलीमय अग्नि **(इळाम्)** महान् वाणी को **(अन्यः)** और मेघ **(गर्भम्)** गर्भरूप **(जनयत्)** उत्पन्न करता है, वैसे **(अस्मे)** हमारी **(प्रजावतीः)** बहुप्रशंसित प्रजायुक्त **(इषः)** अन्नादि पदार्थों की इच्छाओं को **(आ, धत्तम्)** सब ओर से धारण करो॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो वह्नि और मेघ के समान सब की बुद्धि के बढ़ाने वाले वा रक्षा करने वाले, सब प्रजाजनों को सुख में धारण करते हैं, वे जैसे मेघ पृथिवी पर गर्भ को धारण कर ओषधियों को उत्पन्न करता और जैसे अग्नि वाणी का विधान करता अर्थात् बिजुलीरूप होकर तड़कता है, वैसे वे सुखों का विधान करने वाले होते हैं, यह आप जानो॥१६॥

पुनः केऽत्राऽनन्दप्रदाः सन्तीत्याह॥

फिर कौन इस संसार में आनन्द देने वाले होते हैं, इस विषय को कहते हैं॥

स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम्॥ १७॥ १६॥

स्तीर्णे। बर्हिषि। सम्ऽइद्धाने। अग्नौ। सुऽउक्तेन। महा। नमसा। आ। विवासे। अस्मिन्। नः। अद्य। विदथे। यजत्राः। विश्वे। देवाः। हविषि। मादयध्वम्॥ १७॥

पदार्थः-(**स्तीर्णे**) इन्धनादिभिराच्छादिते **(बर्हिषे)** यज्ञकुण्डे **(समिधाने)** प्रदीप्ते **(अग्नौ)** पावके **(सूक्तेन)** वेदमन्त्रसमूहेन **(महा)** महता **(नमसा)** अन्नादिना **(आ, विवासे)** सेवेय **(अस्मिन्)** **(नः)** अस्मान् **(अद्य)** अस्मिन् अहनि **(विदथे)** विज्ञानमये यज्ञे **(यजत्राः)** सङ्गमयितारः **(विश्वे)** सर्वे **(देवाः)** विद्वांसः **(हविषि)** दातव्येऽत्तव्ये वाऽन्नादौ **(मादयध्वम्)** सुखयत॥१७॥

अन्वयः-हे यजत्रा विश्वे देवा! यूयमद्याऽस्मिन् विदथे यथाऽहं सूक्तेन महा नमसा स्तीर्णे बर्हिषि समिधानेऽग्नावा विवासे तथा नो हविषि मादयध्वम्॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथेन्धनैः प्रदीप्तेऽग्नौ वेदमन्त्रैः सुगन्ध्यादियुक्तं हुतं द्रव्यं सर्वं जगत् सुखयति तथा सुपात्रेषु विद्वद्भिरुप्ता विद्या जगदानन्दयतीति॥१७॥

अत्र विश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विपञ्चाशत्तमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(यजत्राः)** सङ्ग कराने वालो **(विश्वे, देवा)** सब विद्वानो! तुम **(अद्य)** आज के दिन **(अस्मिन्)** इस **(विदथे)** विज्ञानमय यज्ञ में जैसे मैं **(सूक्तेन)** वेद मन्त्र समूह से **(महा, नमसा)** अन्नादि समूह से **(स्तीर्णे)** इन्धनादि से आच्छादित **(बर्हिषि)** यज्ञकुण्ड में **(समिधाने)** प्रदीप्त **(अग्नौ)** अग्नि के बीच **(आ, विवासे)** सब ओर से सेवन करूं, वैसे **(नः)** हम लोगों के **(हविषि)** देने वा भोजन करने योग्य अन्नादि पदार्थों में **(मादयध्वम्)** सुखी करो॥१७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे इन्धनों से प्रदीप्त अग्नि में वेदमन्त्रों से सुगन्ध्यादियुक्त होम किया पदार्थ सब जगत् को सुखी करता है, वैसे सुपात्र में विद्वानों की बोई हुई विद्या सब जगत् को आनन्दित करती है॥१७॥

इस सूक्त में विश्वेदेवों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बावनवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य त्रिपञ्चाशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। पूषा देवता। १, ३, ४, ६, ७, १० गायत्री। २, ५, ९ निचृद्गायत्री छन्दः। षड्जः स्वरः। ८ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ मनुष्याः कस्मै कान् सेवेरन्नित्याह॥

अब दश ऋचा वाले त्रेपनवें सूक्त का आरम्भ है, इसके प्रथम मन्त्र में मनुष्य किसके लिये किनका सेवन करें, इस विषय को कहते हैं॥

वयमु॑ त्वा पथस्पते॒ रथं॒ न वाज॑सातये। धि॒ये पू॑षन्नयुज्महि॥ १॥

वयम्। ऊँ॒ इति॑। त्वा॒। पथः॑। प॒ते॒। रथ॑म्। न। वाज॑ऽसातये। धि॒ये। पू॒ष॒न्। अयु॑ज्महि॥ १॥

पदार्थः-(**वयम्**) (**उ**) (**त्वा**) त्वाम् (**पथः**) मार्गस्य (**पते**) स्वामिन् (**रथम्**) विमानादियानम् (**न**) इव (**वाजसातये**) स- ामविभाजिकायै (**धिये**) प्रज्ञायै (**पूषन्**) पुष्टिकर्त्तः (**अयुज्महि**) प्रयुञ्ज्महि॥ १॥

अन्वयः-हे पूषन् पथस्पते! वयमु वाजसातये धिये त्वा रथं नाऽयुज्महि॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्याः प्रज्ञाप्राप्तये विदुषः सेवन्ते ते वेगवता रथेन स्थानान्तरमिव विद्यान्तरं सद्यः प्राप्नुवन्ति॥ १॥

पदार्थः-हे (**पूषन्**) पुष्टि करने वाले (**पथः**) मार्ग के (**पते**) स्वामिन्! (**वयम्**) हम लोग (**उ**) ही (**वाजसातये**) संग्राम का विभाग करने वाली (**धिये**) प्रज्ञा के लिये (**त्वा**) आपको (**रथम्**) विमान आदि यान के (**न**) समान (**अयुज्महि**) प्रयुक्त करते हैं॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार है। जो मनुष्य उत्तम बुद्धि पाने के लिये विद्वानों की सेवा करते हैं, वे वेगवान् रथ से एक स्थान से दूसरे स्थान के समान एक विद्या से दूसरी विद्या को शीघ्र प्राप्त होते हैं॥ १॥

अथ स्त्रीपुरुषैः किमेष्टव्यमित्याह॥

अब स्त्रीपुरुषों को क्या चाहने योग्य है, इस विषय को कहते हैं॥

अ॒भि नो॒ नर्य॒ वसु॑ वी॒रं प्रय॑तदक्षिणम्। वा॒मं गृ॒हप॑तिं नय॥ २॥

अ॒भि। नः॒। नर्य॑म्। वसु॑। वी॒रम्। प्रय॑तऽदक्षिणम्। वा॒मम्। गृ॒हऽप॑तिम्। न॒य॒॥ २॥

पदार्थः-(**अभि**) आभिमुख्ये (**नः**) अस्मान् (**नर्यम्**) नृषु साधु (**वसु**) धनम् (**वीरम्**) शुभलक्षणान्वितं पुरुषम् (**प्रयतदक्षिणम्**) प्रयताः प्रयत्नेन दत्ता दक्षिणा यस्मात्तत् (**वामम्**) प्रशस्तम् (**गृहपतिम्**) गृहस्वामिनम् (**नय**) प्रापय॥ २॥

अन्वयः-हे पूषंस्त्वं नः प्रयतदक्षिणं नर्यं वसु वामं वीरं गृहपतिं चाभि नय॥ २॥

भावार्थः-हे विद्वन् विदुषी वा! त्वामस्मदर्थमुत्तमं पतिमुत्तमां भार्यां प्रशस्तं धनं प्रापय्य सुशिक्षया धर्म्माचारं प्रापय॥२॥

पदार्थः-हे पुष्टि करने वाले! आप **(नः)** हम लोगों को **(प्रयतदक्षिणम्)** जिससे प्रयत्नपूर्वक दक्षिणा दी गई उस **(नर्यम्)** मनुष्यों में उत्तम **(वसु)** धन और **(वामम्)** प्रशंसित **(वीरम्)** शुभलक्षणयुक्त पुरुष को **(गृहपतिम्)** गृहस्वामी को भी **(अभि,)** नय सब ओर से पहुंचाओ॥२॥

भावार्थः-हे विद्वन् वा विदुषी! आप हम लोगों के लिये उत्तम पति, उत्तम भार्या, प्रशंसित धन की प्राप्ति करा के उत्तम शिक्षा से धर्म्म आचरण की प्राप्ति कराइये॥२॥

पुनर्विद्वान् कस्मै किं प्रेरयेदित्याह॥

फिर विद्वान् जन किसके लिये क्या प्रेरणा करे, इस विषय को कहते हैं॥

अदि॑त्सन्तं चिदाघृणे॒ पूष॒न् दाना॑य चोदय। प॒णेश्चि॒द्वि म्र॑दा॒ मन॑:॥३॥

अदि॑त्सन्तम्। चि॒त्। आ॒घृ॒णे॒। पूष॑न्। दाना॑य। चो॒द॒य॒। प॒णेः। चि॒त्। वि। म्र॒दा॒। मन॑:॥३॥

पदार्थः-(**अदित्सन्तम्**) दातुमनिच्छन्तम् **(चित्)** अपि **(आघृणे)** समन्तात् प्रकाशात्मन् **(पूषन्)** पुष्टिकर विद्वन् **(दानाय)** **(चोदय)** प्रेरय **(पणेः)** द्यूतकर्त्तुः **(चित्)** अपि **(वि)** विशेषेण **(म्रदा)** दण्डय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(मनः)** अन्तःकरणम्॥३॥

अन्वयः-हे आघृणे पूषँस्त्वमदित्सन्तं चिदपि दातारं दानाय चोदय चिदपि दातारं स्वस्य मनश्च चोदय पणेश्चिन्मनो वि म्रदा॥३॥

भावार्थः-हे अध्यापकोपदेशकौ राजन्वा! विद्यादिशुभगुणस्य प्रवृत्तयेऽदातॄनपि दानकरणाय प्रेरय द्यूतकर्तॄंश्च पाखण्डिनो हिन्धि॥३॥

पदार्थः-हे **(आघृणे)** सब ओर से प्रकाशात्मन् **(पूषन्)** पुष्टि करने वाले विद्वन्! आप **(अदित्सन्तम्)** देने की अनिच्छा करते हुए **(चित्)** भी देने वाले को **(दानाय)** देने के लिये **(चोदय)** प्रेरणा देओ **(चित्)** फिर भी देने वालो को और अपने **(मनः)** मन को भी प्रेरणा देओ और **(पणेः)** जुआं खेलने वाले के भी अन्तःकरण को **(वि, म्रदा)** विशेषता से मर्दी अर्थात् दण्ड देओ॥३॥

भावार्थः-हे अध्यापक, उपदेशक वा राजन्! विद्यादि शुभगुणों की प्रवृत्ति के लिये न देने वालों को भी दान करने के लिये प्रेरणा देओ और जुआं खेलनेवाले पाखण्डियों को मारो अर्थात् ताड़ना देओ॥३॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

वि प॒थो वाज॑सातये चिनु॒हि वि मृधो॑ जहि। साध॑न्तामु॒ग्र नो॒ धिय॑:॥४॥

वि। प॒थः। वाज॑ऽसातये। चि॒नु॒हि। वि। मृध॑:। ज॒हि॒। साध॑न्ताम्। उ॒ग्र॒। नः। धिय॑:॥४॥

पदार्थः-(**वि**) (**पथः**) मार्गात् (**वाजसातये**) विज्ञानस्य धनस्य वा प्राप्तयेऽथवा सङ्ग्रामाय (**चिनुहि**) सञ्चयं कुरु (**वि**) विशेषेण (**मृधः**) स-ामेषु प्रवृत्तान् दुष्टान् (**जहि**) (**साधन्ताम्**) साध्नुवन्तु (**उग्र**) तेजस्विन् (**नः**) अस्माकम् (**धियः**) प्रज्ञाः॥४॥

अन्वयः-हे उग्र सेनेश! त्वं वाजसातये पथो वि चिनुहि मृधो वि जहि यतो नो धियः कार्याणि साधन्ताम्॥४॥

भावार्थः-हे राजँस्त्वमुत्तमान्निर्भयान् मार्गान् विधेहि तत्र परिपन्थिनो हिन्धि, येन सर्वेषां प्रज्ञा उत्तमकर्मोन्नतये प्रवर्त्तेरन्॥४॥

पदार्थः-हे (**उग्र**) तेजस्वी सेनापति! आप (**वाजसातये**) विज्ञान वा धन की प्राप्ति वा स-ाम के लिये (**पथः**) मार्ग से (**वि, चिनुहि**) सञ्चय करो तथा (**मृधः**) स-ामों में प्रवृत दुष्टों को (**वि, जहि**) विशेषता से मारो जिससे (**नः**) हमारी (**धियः**) बुद्धियां कार्यों को (**साधन्ताम्**) सिद्ध करें॥४॥

भावार्थः-हे राजन्! आप उत्तम निर्भय मार्गों को बनाओ, उन में विपथगामियों को मारो जिससे सब की बुद्धि उत्तम कर्मों की उन्नति करने के लिये प्रवृत्त हों॥४॥

पुनर्नृपेण के पीडनीया इत्याह॥

फिर राजा से कौन पीड़ा देने योग्य हैं, इस विषय को कहते हैं॥

परि॑ तृन्धि पणी॒नामार॑या॒ हृद॑या कवे। अथे॒मस्मभ्यं॑ रन्धय॥५॥१७॥

परि॑। तृ॒न्धि॒। प॒णी॒नाम्। आर॑या। हृद॑या। क॒वे॒। अथ॑। ई॒म्। अ॒स्मभ्य॑म्। र॒न्ध॒य॒॥५॥

पदार्थः-(**परि**) सर्वतः (**तृन्धि**) हिन्धि (**पणीनाम्**) द्यूतादिव्यवहारकर्त्तॄणां (**आरया**) प्रतोदेन (**हृदया**) हृदयानि (**कवे**) विद्वन् राजन् (**अथ**) (**ईम्**) सर्वतः (**अस्मभ्यम्**) (**रन्धय**)॥५॥

अन्वयः-हे कवे! त्वमारया पणीनां हृदया परि तृन्धि। अथाऽस्मभ्यमीं दुष्टान् रन्धयाऽस्मभ्यं सुखं देहि॥५॥

भावार्थः-हे राजन्! त्वं येऽपूतशासनकर्त्तारः कितवाश्च स्वराज्ये स्युस्तान् सम्यग्दण्डय सतो न्यायमार्गे वर्त्तमाना वयं सुखिनः स्याम॥५॥

पदार्थः-हे (**कवे**) विद्वन् राजन्! आप (**आरया**) उत्तम कोड़ा से (**पणीनाम्**) द्यूत आदि व्यवहार करने वाले पुरुषों के (**हृदया**) हृदयों को (**परि, तृन्धि**) सब ओर से मारो (**अथ**) इसके अनन्तर (**अस्मभ्यम्**) हमारे लिये (**ईम्**) सब ओर से दुष्टों को (**रन्धय**) पीड़ित करो और हमारे लिये सुख देओ॥५॥

भावार्थः-[हे राजन्! आप] जो अपवित्र शिक्षा देने वाले और छली पुरुष अपने राज्य में हों, उनको अच्छे प्रकार दण्डो, जिससे न्यायमार्ग के बीच हम लोग सुखी हों॥५॥

पुना राजा किं कुर्य्यादित्याह॥

पिर राजा क्या करे, इस विषय को कहते हैं॥

वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम्। अथेमस्मभ्यं रन्धय॥६॥

वि। पूषन्। आरया। तुद। पणेः। इच्छ। हृदि। प्रियम्। अथ। ईम्। अस्मभ्यम्। रन्धय॥६॥

पदार्थः-(**वि**) (**पूषन्**) पुष्टिकर्त्तः (**आरया**) (**तुद**) व्यथय (**पणेः**) प्रशंसितव्यवहारकर्त्तुः (**इच्छ**) (**हृदि**) हृदये (**प्रियम्**) (**अथ**) (**ईम्**) सर्वतः (**अस्मभ्यम्**) (**रन्धय**)॥६॥

अन्वयः-हे पूषँस्त्व दुष्टानीम्रन्धयाऽस्मभ्यं हृदि प्रियमिच्छाऽथाऽऽरया वृषभानिव पणेरसम्बन्धिनो वि तुद॥६॥

भावार्थः-हे राजंस्त्वं दुष्टान् दण्डयित्वा श्रेष्ठान् सत्कृत्य सर्वान् सत्कर्मसु प्रेरय॥६॥

पदार्थः-हे (**पूषन्**) पुष्टि करने वाले! आप दुष्टों को (**ईम्**) सब ओर से (**रन्धय**) अति पीड़ित करो तथा (**अस्मभ्यम्**) हमारे लिये (**हृदि**) हृदय में (**प्रियम्**) प्यारे पदार्थ की (**इच्छ**) इच्छा करो (**अथ**) इसके अनन्तर (**आरया**) कोड़ा से बैलों के समान (**पणेः**) प्रशंसित व्यवहार करने वाले के असम्बन्धी जनों को (**वि, तुद**) विशेषता से पीड़ा देओ॥६॥

भावार्थः-हे राजन्! आप दुष्टों को दण्ड देकर श्रेष्ठों का सत्कार कर सब को श्रेष्ठ कर्मों में प्रेरणा देओ॥६॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को कहते हैं॥

आ रिख किकिरा कृणु पणीनां हृदया कवे। अथेमस्मभ्यं रन्धय॥७॥

आ। रिख। किकिरा। कृणु। पणीनाम्। हृदया। कवे। अथ। ईम्। अस्मभ्यम्। रन्धय॥७॥

पदार्थः-(**आ**) समन्तात् (**रिख**) लिख (**किकिरा**) व्यवस्थापत्राणि (**कृणु**) (**पणीनाम्**) व्यवहर्तृणाम् (**हृदया**) हृदयानि (**कवे**) विद्वन् (**अथ**) (**ईम्**) सुखम् (**अस्मभ्यम्**) (**रन्धय**) ताडय॥७॥

अन्वयः-हे कवे! त्वं पणीनां किकिराऽऽरिख दुष्टानां हृदया रन्धयाऽथाऽस्मभ्यमीं कृणु॥७॥

भावार्थः-राजा वादिप्रतिवादिनां लेखपुरस्सरं न्यायं कुर्यात्॥७॥

पदार्थः-हे (**कवे**) विद्वन्! आप (**पणीनाम्**) व्यवहार करने वालों के (**किकिरा**) व्यवस्थापत्रों को (**आ, रिख**) सब ओर से लिखो तथा दुष्टों के (**हृदया**) हृदयों को (**रन्धय**) अति पीड़ा देओ (**अथ**) इसके अनन्तर (**अस्मभ्यम्**) हम लोगों के लिये (**ईम्**) सुख (**कृणु**) करो॥७॥

भावार्थः-राजा वादी और प्रतिवादी अर्थात् झगड़ालु प्रतिझगड़ालूओं का लिखापढ़ी पूर्वक न्याय करे॥७॥

पुनर्विदुषा कथं कस्मै प्रेरणा कार्येत्याह॥

फिर विद्वान् को कैसे किसके लिये प्रेरणा करनी योग्य है, इस विषय को कहते हैं॥

यां पूषन् ब्रह्मचोदनीमारां बिभर्ष्याघृणे। तया समस्य हृदयमा रिख किकिरा कृणु॥८॥

याम्। पूषन्। ब्रह्मऽचोदनीम्। आराम्। बिभर्षि। आघृणे। तया। समस्य। हृदयम्। आ। रिख। किकिरा। कृणु॥८॥

पदार्थः-(**याम्**) (**पूषन्**) पुष्टिकर्त्तः (**ब्रह्मचोदनीम्**) विद्याधनप्राप्तये प्रेरिकाम् (**आराम्**) काष्ठविभाजिकाम् (**बिभर्षि**) (**आघृणे**) सर्वतो न्यायप्रकाशिन् (**तया**) (**समस्य**) तुल्यस्य (**हृदयम्**) (**आ**) (**रिख**) लिख (**किकिरा**) विकीर्णानि (**कृणु**)॥८॥

अन्वयः-हे पूषन्नाघृणे! त्वं यां ब्रह्मचोदनीमारां बिभर्षि तया समस्य हृदयमा रिख किकिरा कृणु॥८॥

भावार्थः-हे राजँस्त्वं विद्याधनप्राप्तिप्रेरणामिव राजनीतिं धर येन सर्वेषां न्यायव्यवस्था स्यात्॥८॥

पदार्थः-हे (**पूषन्**) पुष्टि करने वाले (**आघृणे**) सब ओर से न्याय के प्रकाश करने वाले! आप (**याम्**) जिस (**ब्रह्मचोदनीम्**) विद्या और धन की प्राप्ति के लिये प्रेरणा करने तथा काष्ठ के विभाग करने वाली आरी को (**बिभर्षि**) धारण करते हो (**तया**) उससे (**समस्य**) तुल्य के समान अर्थात् जो सब में बुद्धि वाला है उसके (**हृदयम्**) हृदय को (**आ, रिख**) अच्छे प्रकार लिखो और (**किकिरा**) उत्तम गुणों को विकीर्ण (**कृणु**) करो फैलाओ॥८॥

भावार्थः-हे राजन्! आप विद्या और धन की प्राप्ति की प्रेरणा के समान राजनीति को धारण करो, जिससे सब की न्यायव्यवस्था हो॥८॥

मनुष्यैः किं वर्धयित्वा किं प्रार्थनीयमित्याह॥

मनुष्यों को क्या बढ़ा कर किसकी प्रार्थना करनी चाहिये, इस विषय को कहते हैं॥

या ते अष्ट्रा गोओपशाघृणे पशुसाधनी। तस्यास्ते सुम्नमीमहे॥९॥

या। ते। अष्ट्रा। गोऽओपशा। आघृणे। पशुऽसाधनी। तस्याः। ते। सुम्नम्। ईमहे॥९॥

पदार्थः-(**या**) (**ते**) तव (**अष्ट्रा**) व्यापिका (**गोओपशा**) गाव आ उप शेरते यस्यां सा (**आघृणे**) समन्तात्पशुविद्याप्रकाशक (**पशुसाधनी**) पशून् साध्नुवन्ति यया सा (**तस्याः**) (**ते**) तव (**सुम्नम्**) सुखम् (**ईमहे**) याचामहे॥९॥

अन्वयः-हे आघृणे! या तेऽष्ट्रा गोओपशा पशुसाधनी वर्तते तस्यास्ते सुम्नं वयमीमहे॥९॥

भावार्थः-हे मनुष्या! यया क्रियया पशवो वर्धेरंस्तां वर्धयित्वा सुखं याचध्वम्॥९॥

पदार्थः-हे (**आघृणे**) सब ओर से पशुविद्या के प्रकाश करने वाले (**या**) जो (**ते**) आपकी (**अष्ट्रा**) व्याप्त होने वाली (**गोओपशा**) जिसमें गौएं परस्पर सोती हैं और (**पशुसाधनी**) जिससे पशुओं को सिद्ध करते हैं वह क्रिया वर्त्तमान है (**तस्याः**) उससे (**ते**) आपके (**सुम्नम्**) सुख को हम लोग (**ईमहे**) जांचते अर्थात् मांगते हैं॥९॥

भावार्थः-हे मनुष्यो! जिस क्रिया से पशु बढ़ें, उस क्रिया को बढ़ाकर सुख को मांगो॥९॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

उ॒त नो॑ गो॒षणिं॒ धिय॑मश्व॒सां वा॑ज॒सामु॒त। नृ॒वत् कृ॑णुहि वी॒तये॑ ॥१०॥१८॥

उ॒त। नः॒। गो॒ऽसनि॑म्। धिय॑म्। अ॒श्व॒ऽसाम्। वा॒ज॒ऽसाम्। उ॒त। नृ॒ऽवत्। कृ॒णु॒हि॒। वी॒तये॑॥१०॥

पदार्थः-(**उत**) अपि (**नः**) अस्मभ्यम् (**गोषणिम्**) गवां विभाजिकाम् (**धियम्**) प्रज्ञाम् (**अश्वसाम्**) अश्वानां संविभाजिकाम् (**वाजसाम्**) वाजस्याऽन्नादेर्विभाजिकाम् (**उत**) अपि (**नृवत्**) मनुष्यवत् (**कृणुहि**) (**वीतये**) प्राप्तये॥९॥

अन्वयः-हे पशुपाल विद्वंस्त्वं नो वीतये गोषणिमुताऽश्वसामुत वाजसां धियं नृवत्कृणुहि॥१०॥

भावार्थः-मनुष्यैर्गवाश्वधनधान्यवृद्धये पुरुषार्थिवन्महान् पुरुषार्थः कर्त्तव्यः॥१०॥

अत्र राजमार्गदस्युनिवारणोत्तमदक्षिणादानप्रेरणा दुष्टहिंसनं श्रेष्ठपालनं पशुवर्धनं चोक्तमत एतत्सूक्तार्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिपञ्चाशत्तमं सूक्तमष्टादशो वर्गश्च समाप्तः॥

पदार्थः-हे पशु पालने वाले विद्वन्! आप (**नः**) हम लोगों के (**वीतये**) प्राप्ति के अर्थ (**गोषणिम्**) गौओं को अलग-अलग करने वाली (**उत**) और (**अश्वसाम्**) घोड़ों का विभाग करने वाली (**उत**) और (**वाजसाम्**) अन्नादि पदार्थों का विभाग करने वाली (**धियम्**) उत्तम बुद्धि को (**नृवत्**) मनुष्यों के तुल्य (**कृणुहि**) करो॥१०॥

भावार्थः-मनुष्यों को गौ, अश्व और धन-धान्य की वृद्धि के लिये पुरुषार्थी जनों के समान महान् पुरुषार्थ करना योग्य है॥१०॥

इस सूक्त में राजमार्ग, डाकुओं का निवारण, उत्तम दक्षिणा देने वालों को प्रेरणा, दुष्टों को मारना, श्रेष्ठों की पालना और पशुओं का बढ़ाना कहा है, इस कारण इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी योग्य है॥

यह त्रेपनवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ दशर्चस्य चतु:पञ्चाशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषि:। पूषा देवता। १, २,४, ६,७, ८, ९ गायत्री। ३, १० निचृद्गायत्री। ५ विराड्गायत्री छन्द:। षड्ज: स्वर:॥

अथ मनुष्यै: कस्य सङ्ग एष्टव्य इत्याह॥

अब दश ऋचा वाले चौवनवें सूक्त का आरम्भ है, इसके प्रथम मन्त्र में मनुष्यों को किसका सङ्ग चाहने योग्य है, इस विषय को कहते हैं॥

सं पूषन् विदुषा नय यो अञ्जसानुशासति। य एवेदमिति ब्रवत्॥ १॥

सम्। पूषन्। विदुषा। नय। य:। अञ्जसा। अनुऽशासति। य:। एव। इदम् इति। ब्रवत्॥ १॥

पदार्थ:-(**सम्**) (**पूषन्**) (**विदुषा**) (**नय**) (**य:**) (**अञ्जसा**) (**अनुशासति**) अनुशासनं करोति। अत्र **बहुलं छन्दसी**ति शपो लुङ् न। (**य:**) (**एव**) (**इदम्**) (**इति**) (**ब्रवत्**) उपदिशेत्॥ १॥

अन्वय:-हे पूषन् विद्वन्! य इदमित्थमेवेति ब्रवद्य: सत्यमनुशासति तेन विदुषा सहाऽस्मानञ्जसा सन्नय॥ १॥

भावार्थ:-हे विद्वन्! अस्मान् ये सत्युपदिशेयुस्तान् सत्कृत्य तेषां सङ्गेन वयं विद्वांसो भूत्वोपदेष्टारो भवेम॥ १॥

पदार्थ:-हे (**पूषन्**) पुष्टि करनेवाले विद्वन्! (**य:**) जो (**इदम्**) यह (**एव**) इसी प्रकार है (**इति**) ऐसा (**ब्रवत्**) उपदेश करे (**य:**) जो सत्य के (**अनुशासति**) अनुकूल शिक्षा दे उस (**विदुषा**) विद्वान् के साथ हम लोगों को (**अञ्जसा**) साक्षात् (**सम्, नय**) अच्छे प्रकार उन्नति को पहुंचाओ॥ १॥

भावार्थ:-हे विद्वन्! हम लोगों को जो सत्यविद्या का उपदेश करें, उनका सत्कार कर उनके सङ्ग से हम लोग विद्वान् होकर उपदेशकर्त्ता हों॥ १॥

मनुष्यै: कस्य सङ्ग: सततं विधेय इत्याह॥

मनुष्यों को किसका सङ्ग निरन्तर विधान करना चाहिये, इस विषय को कहते हैं॥

समु पूष्णा गमेमहि यो गृहाँ अभिशासति। इम एवेति च ब्रवत्॥ २॥

सम्। ऊँ इति। पूष्णा। गमेमहि। य:। गृहान्। अभिऽशासति। इमे। एव इति। च। ब्रवत्॥ २॥

पदार्थ:-(**सम्**) (**उ**) (**पूष्णा**) पुष्टिकर्त्रा वैद्येन सह (**गमेमहि**) गच्छेम (**य:**) (**गृहान्**) गृहस्थान् (**अभिशासति**) आभिमुख्ये शासनं करोति (**इमे**) (**एव**) (**इति**) (**च**) (**ब्रवत्**) ब्रूयात्॥ २॥

अन्वय:-य इम इत्थमेवेति ब्रवदु च गृहानभिशासति तेन पूष्णा सह वयं सङ्गमेमहि॥ २॥

भावार्थ:-यो विद्वान् निश्चयेन पृथिव्यादिविद्याऽध्यापनोपदेशाभ्यां हस्तक्रियया च साक्षात्कर्तुं शक्नुयाद् राजनीत्यादिव्यवहाराननुशिष्यात् तस्यैव विदुष: सङ्गं वयं सदा कुर्य्याम॥ २॥

पदार्थः-(यः) जो विद्वान् **(इमे)** ये पदार्थ **(एव)** इसी प्रकार हैं **(इति)** ऐसा **(ब्रवत्)** कहे **(उ)** और **(च)** भी **(गृहान्)** गृहस्थों को **(अभिशासति)** सन्मुख होकर शिक्षा दे उस **(पूष्णा)** पुष्टि करने वाले वैद्य विद्वान् जन के साथ हम लोग **(सम्, गमेमहि)** सङ्ग करें॥२॥

भावार्थः-जो विद्वान्जन निश्चय से पृथिव्यादि पदार्थों की विद्या को, अध्यापन और उपदेश से तथा हस्तक्रिया से साक्षात् कर सके तथा राजनीति आदि व्यवहारों की अनुकूलता से शिक्षा दे, उसी विद्वान् का सङ्ग हम लोग सदा करें॥२॥

कस्य कृत्यं न नश्यतीत्याह॥

किसका कर्त्तव्य नष्ट नहीं होता, इस विषय को कहते हैं॥

पूष्णश्चक्रं न रिष्यति न कोशोऽवं पद्यते। नो अस्य व्यथते पविः॥३॥

पूष्णः। चक्रम्। न। रिष्यति। न। कोशः। अवं। पद्यते। नो इति। अस्य। व्यथते। पविः॥३॥

पदार्थः-(**पूष्णः**) पुष्टिकर्तुः शिल्पिनो विदुषः **(चक्रम्)** कलायन्त्रादिकम् **(न)** निषेधे **(रिष्यति)** हिनस्ति **(न)** **(कोशः)** धनसमुदायः **(अव)** विरोधे **(पद्यते)** प्राप्नोति **(नो)** निषेधे **(अस्य)** **(व्यथते)** **(पविः)** शस्त्राऽस्त्रविद्या॥३॥

अन्वयः-हे मनुष्या! यस्याऽस्य पूष्णश्चक्रं न रिष्यति कोशो नाव पद्यते पविर्नो व्यथते तस्यैव सङ्गं वयं कुर्याम॥३॥

भावार्थः-यस्य विदुषः पूर्णं बलमस्ति यस्यैकच्छत्रं राज्यमस्ति यस्य कोशोऽभिपूर्य्यते शत्रुषु यस्य शस्त्रं च न विनश्यति तस्य राज्ये सर्वे निर्भया निवसन्तु॥३॥

पदार्थः-हे मनुष्यो! जिस **(अस्य)** इस **(पूष्णः)** पुष्ट करने वाले शिल्पी विद्वान् का **(चक्रम्)** कलायन्त्रादि **(न, रिष्यति)** हिंसन नहीं करता तथा **(कोशः)** धनसमूह **(न, अव, पद्यते)** अप्राप्त नहीं होता अर्थात् प्राप्त ही होता है और **(पविः)** शस्त्रास्त्रविद्या **(नो)** नहीं **(व्यथते)** होती अर्थात् शत्रुजन जिसको नहीं मथते, उसी का सङ्ग हम लोग करें॥३॥

भावार्थः-जिस विद्वान् का पूर्ण बल है, जिसका एकछत्र राज्य है, जिसका कोश सब ओर से पूरा होता और शत्रुओं में जिसका शस्त्र नहीं नष्ट होता है, उसके राज्य में सब जन निर्भय होकर बसें॥३॥

को महाञ्छ्रीमान् भवतीत्याह॥

कौन महान् श्रीमान् होता है, इस विषय को कहते हैं॥

यो अस्मै हविषाविधन्न तं पूषापि मृष्यते। प्रथमो विन्दते वसु॥४॥

यः। अस्मै। हविषा। अविधत्। न। तम्। पूषा। अपि। मृष्यते। प्रथमः। विन्दते। वसु॥४॥

पदार्थः-(**यः**) (**अस्मै**) (**हविषा**) दानेनादानेन वा (**अविधत्**) विदधाति (**न**) निषेधे (**तम्**) (**पूषा**) (**अपि**) (**मृष्यते**) सहते (**प्रथमः**) आदिमः शिल्पी (**विन्दते**) प्राप्नोति (**वसु**) बहुधनम्॥४॥

अन्वयः-हे विद्वांसो! यो हविषाऽस्मै वस्वविधत् प्रथमो वसु विन्दते तं पूषाऽपि न मृष्यते॥४॥

भावार्थः-हे मनुष्या! यः प्रथमतः शिल्पविद्यां प्राप्य क्रियया पदार्थान् निर्मिमीते स पुष्कलां श्रियं प्राप्नोति तत्सदृशः पुष्टः कोऽपि न भवति॥४॥

पदार्थः-हे विद्वानो! (**यः**) जो (**हविषा**) देने वा लेने से (**अस्मै**) इसके लिये (**वसु**) बहुत धन का (**अविधत्**) विधान करता है वा (**प्रथमः**) पहिला कारुक धन (**विन्दते**) पाता है (**तम्**) उसको (**पूषा**) पुष्टि करने वाला (**अपि**) भी (**न**) नहीं (**मृष्यते**) सहता है॥४॥

भावार्थः-हे मनुष्यो! जो पहिले से शिल्पविद्या को पाकर क्रिया से पदार्थों का निर्माण करता है, वह बहुत धन को प्राप्त होता है, उसके सदृश पुष्ट कोई नहीं होता है॥४॥

को राज्यं प्राप्नोतीत्याह॥

कौन राज्य को पाता है, इस विषय को कहते हैं॥

पूषा गा अन्वेतु नः पूषा रक्षत्ववर्तः। पूषा वाजं सनोतु नः॥५॥१९॥

पूषा। गाः। अनु। एतु। नः। पूषा। रक्षतु। अर्वतः। पूषा। वाजम्। सनोतु। नः॥५॥

पदार्थः-(**पूषा**) शिल्पिनां पुष्टिकर्त्ता (**गाः**) पृथिवीर्वाचो वा (**अनु**) (**एतु**) (**नः**) अस्मान् (**पूषा**) पोषकः (**रक्षतु**) (**अर्वतः**) अश्वानिवाऽग्न्यादीन् (**पूषा**) (**वाजम्**) धनम् (**सनोतु**) ददातु (**नः**) अस्मभ्यम्॥५॥

अन्वयः-यः पूषा नो वाजं सनोतु यः पूषाऽर्वतो रक्षतु स पूषा नोऽनु गा एतु॥५॥

भावार्थः-य आदावन्यानुपकरोति पदार्थान् संश्चिनोति स सर्वसहायेन भूमिराज्यादिकं प्राप्नोति॥५॥

पदार्थः-जो (**पूषा**) पुष्टि करने वाला विद्वान् (**नः**) हमारे लिये (**वाजम्**) धन को (**सनोतु**) देवे जो (**पूषा**) पुष्टि करने वाला (**अर्वतः**) घोड़ों के समान अग्न्यादि पदार्थों की (**रक्षतु**) रक्षा करे वह (**पूषा**) शिल्पिजनों की पुष्टि करने वाला (**नः**) हम लोगों को तथा (**अनु, गाः**) अनुकूल पृथिवी और वाणियों को (**एतु**) प्राप्त हो॥५॥

भावार्थः-जो पहिले औरों का उपकार करता वा पदार्थों को इकट्ठा करता है, वह सब के सहाय से भूमि के राज्य आदि को प्राप्त होता है॥५॥

केषां सङ्गेन विद्याराज्ये प्राप्नुयादित्याह॥

किन के सङ्ग से विद्या और राज्य को प्राप्त होवे, इस विषय को कहते हैं॥

पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः। अस्माकं स्तुवतामुत॥६॥

पूषन्। अनु। प्र। गाः। इहि। यजमानस्य। सुन्वतः। अस्माकम्। स्तुवताम्। उत॥६॥

पदार्थः-(**पूषन्**) (**अनु**) (**प्र**) प्रकर्षेण (**गाः**) सुशिक्षिता वाचो भूमीर्वा (**इहि**) प्राप्नुहि (**यजमानस्य**) (**सुन्वतः**) यज्ञं सम्पादयतः (**अस्माकम्**) (**स्तुवताम्**) विद्याप्रशंसकानाम् (**उत**) (**अपि**)॥६॥

अन्वयः-हे पूषंस्त्वँ सुन्वतो यजमानस्योत स्तुवतामस्माकं गा अनु प्रेहि॥६॥

भावार्थः-हे शिल्पिंस्त्वं राजधनादिसहायेनाऽस्मच्छिक्षकेभ्यश्च विद्याः प्राप्य भूमिराज्यं प्राप्नुहि॥६॥

पदार्थः-हे (**पूषन्**) पुष्टि करने वाले! आप (**सुन्वतः**) यज्ञ के सम्पादन करने वाले (**यजमानस्य**) यज्ञकर्त्ता के (**उत**) और (**स्तुवताम्**) विद्या की प्रशंसा करने वाले (**अस्माकम्**) हम लोगों की (**गाः**) सुन्दर शिक्षित वाणी वा भूमियों को (**अनु, प्र, इहि**) अनुकूलता से प्राप्त होओ॥६॥

भावार्थः-हे शिल्पी विद्वान् जन! आप राजधनादि के सहाय से हम से वा शिक्षा देने वालों से विद्याओं को पाकर भूमिराज्य को प्राप्त होओ॥६॥

केनापि हिंसा नैव कार्येत्याह॥

किसी को हिंसा नहीं करनी चाहिये, इस विषय को कहते हैं॥

माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे। अथारिष्टाभिरा गहि॥७॥

माकिः। नेशत्। माकीम्। रिषत्। माकीम्। सम्। शारि। केवटे। अथ। अरिष्टाभिः। आ। गहि॥७॥

पदार्थः-(**माकिः**) निषेधे (**नेशत्**) नश्येत् (**माकीम्**) (**रिषत्**) हिंस्यात् (**माकीम्**) (**सम्**) (**शारि**) हिंस्यात् (**केवटे**) कूपे। **केवट इति कूपनाम।** (निघं०३.२३) (**अथ**) (**अरिष्टाभिः**) अहिंसिताभिः क्रियाभिः (**आ**) (**गहि**) आगच्छ॥७॥

अन्वयः-हे विद्वन्! यः कदाचिन्माकिर्नेशत्किंचन माकीं रिषदथ केवटे माकीं सं शारि तं प्राप्यारिष्टाभिस्त्वमस्माना गहि॥७॥

भावार्थः-हे मनुष्या! यो नष्टं कर्म न करोति नापि कञ्चन हिनस्ति कूपोदकेनापि कञ्चिन्न पीडयति स एव सर्वान् सङ्गन्तुमर्होऽहिंस्रो जायते॥७॥

पदार्थः-हे विद्वन्! जो कभी (**माकिः**) न (**नेशत्**) नष्ट हो तथा किसी को (**माकीम्**) न (**रिषत्**) नष्ट करे (**अथ**) इसके अनन्तर (**केवटे**) कुँए में (**माकीम्**) न (**सम्, शारि**) नष्ट करे वा कुँए के निमित्त किसी को न नष्ट करे उसको पाकर (**अरिष्टाभिः**) अहिंसित क्रियाओं से आप हम लोगों को (**आ, गहि**) प्राप्त हूजिये॥७॥

भावार्थः-हे मनुष्यो! जो नष्ट कर्म नहीं करता न किसी को नष्ट करता है तथा कुँए के जल से भी किसी को नहीं पीड़ा देता, वही सब से सङ्ग करने योग्य और न हिंसा करने वाला होता है॥७॥

मनुष्यैः कस्माद्धनं प्राप्तव्यमित्याह॥

मनुष्यों को किससे धन पाने योग्य है, इस विषय को कहते हैं॥

शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम्। ईशानं राय ईमहे॥८॥

शृण्वन्तं॑म्। पू॒ष॑णं॑म्। व॒यम्। इर्यं॑म्। अन॑ष्टऽवेदसम्। ईशा॑नम्। रा॒यः। ई॒म॒हे॒॥८॥

पदार्थः-(**शृण्वन्तम्**) (**पूषणम्**) पुष्टिकर्त्तारम् (**वयम्**) (**इर्यम्**) प्रेरणीयम् (**अनष्टवेदसम्**) अनष्टविज्ञानधनम् (**ईशानम्**) ईशनशीलम् (**रायः**) (**ईमहे**) याचामहे॥८॥

अन्वयः-हे मनुष्या! यथा वयमिर्यमनष्टवेदसमीशानं शृण्वन्तं पूषणं प्राप्य राय ईमहे तथैनं प्राप्य यूयं धनं याचध्वम्॥८॥

भावार्थः-यः सुपात्रकुपात्रयोर्विद्वदविदुषोर्धार्मिकाऽधार्मिकयोः परीक्षकः स्यात्तस्मादेव पुरुषार्थेन धनं प्राप्तव्यम्॥८॥

पदार्थः-हे मनुष्यो जैसे (**वयम्**) हम लोग (**इर्यम्**) प्रेरणा देने योग्य (**अनष्टवेदसम्**) अक्षतविज्ञानधन तथा (**ईशानम्**) ईश्वरता का शील रखने और (**शृण्वन्तम्**) सुनने और (**पूषणम्**) पुष्टि करने वाले सज्जन विद्वान् को प्राप्त होकर (**रायः**) धनों को (**ईमहे**) मांगते हैं, वैसे इसको प्राप्त होकर तुम सब धन को मांगो॥८॥

भावार्थः-जो सुपात्र और कुपात्र, विद्वान् और अविद्वान् तथा धार्मिक और अधार्मिक की परीक्षा करने वाला हो, उसी के सकाश से पुरुषार्थ से धन पाना चाहिये॥८॥

के कस्मिन्नहिंस्राः स्युरित्याह॥

कौन किसमें अहिंसक हों, इस विषय को कहते हैं॥

पू॒ष॒न् तव॑ व्र॒ते व॒यं न रि॑ष्येम॒ कदा॑ च॒न। स्तो॒तार॑स्त इ॒ह स्म॑सि॥९॥

पूष॑न्। तव॑। व्र॒ते। व॒यम्। न। रि॒ष्ये॒म॒। कदा॑। च॒न। स्तो॒तार॑ः। ते॒। इ॒ह। स्म॒सि॒॥९॥

पदार्थः-(**पूषन्**) पालक (**तव**) (**व्रते**) कर्मणि (**वयम्**) (**न**) (**रिष्येम**) हिंस्याम (**कदा**) (**चन**) अपि (**स्तोतारः**) विद्यास्तावकाः (**ते**) तव (**इह**) (**स्मसि**)॥९॥

अन्वयः-हे पूषन्! यस्य त इह स्तोतारो वयं स्मसि तस्य तव व्रते कदा चन न रिष्येम॥९॥

भावार्थः-ये सत्यविद्यानां प्रशंसका मनुष्याः स्युस्ते विद्वत्कर्मणि हिंसका न स्युः॥९॥

पदार्थः-हे (**पूषन्**) पालन करने वाले धर्मात्मन्! जिस (**ते**) आपके (**इह**) इस संसार में (**स्तोतारः**) विद्या की स्तुति करने वाले (**वयम्**) हम लोग (**स्मसि**) हैं उस (**तव**) आपके (**व्रते**) कर्म में (**कदा, चन**) कभी भी हम लोग (**न, रिष्येम**) नष्टकर्त्ता न होवें॥९॥

भावार्थः-जो सत्यविद्याओं की प्रशंसा करने वाले मनुष्य हों, वे विद्वानों के काम में हिंसा करने वाले न हों॥९॥

कैर्गुणैः कीदृशा मनुष्या भवन्तीत्याह॥

किन गुणों से कैसे मनुष्य होते हैं, इस विषय को कहते हैं॥

परि॑ पू॒षा प॒रस्ता॒द्धस्तं॑ दधातु॒ दक्षि॑णम्। पुन॑र्नो न॒ष्टमाज॑तु॥१०॥२०॥

परि॑। पू॒षा। प॒रस्ता॑त्। हस्त॑म्। द॒धा॒तु॒। दक्षि॑णम्। पुन॑:। न॒:। न॒ष्टम्। आ। अ॒ज॒तु॒॥१०॥

पदार्थ:-(**परि**) सर्वत: (**पूषा**) पोषक: (**परस्तात्**) (**हस्तम्**) (**दधातु**) (**दक्षिणम्**) (**पुन:**) (**न:**) अस्मभ्यमस्मान् वा (**नष्टम्**) अदृष्टम् (**आ, अजतु**) समन्ताद्ददातु प्राप्नोतु वा॥१०॥

अन्वय:-हे मनुष्या! य: पूषा दाता दानसमये दक्षिणं हस्तं दधातु स पुनर्नष्टमपि द्रव्यं परस्तात् परि दधातु नोऽस्मान् पुनराजतु॥१०॥

भावार्थ:-अस्मिँल्लोके यो दाता स एवोत्तमो यो ग्रहीता सोऽधमो यश्च चौर्य्येण प्रापक: स निकृष्टो वर्त्तत इति वेद्यम्॥१०॥

अत्र विद्वत्सङ्ग: शिल्पिप्रशंसोत्तमगुणयाचनं हिंसात्यागो दानप्रशंसा चोक्ता अत एतस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतु:पञ्चाशत्तमं सूक्तं विंशो वर्गश्च समाप्त:॥

पदार्थ:-हे मनुष्यो! जो (**पूषा**) पुष्टि करने वाला दानशील (**दक्षिणम्**) दाहिने (**हस्तम्**) हाथ को धारण करे वह (**पुन:**) फिर (**नष्टम्**) नष्ट हुई भी और वस्तु को (**परस्तात्**) पीछे से (**परि, दधातु**) सब ओर से धारण करे (**न:**) हम लोगों को फिर (**आ, अजतु**) अच्छे प्रकार दे वा प्राप्त हो॥१०॥

भावार्थ:-इस लोक में जो देने वाला है, वही उत्तम है, जो लेने वाला है, यह अधम है और जो चोरी से प्राप्त करने वाला है, वह निकृष्ट है, यह जानना चाहिये॥१०॥

इस सूक्त में विद्वानों का सङ्ग, शिल्पियों की प्रशंसा, उत्तम गुणों की याचना, हिंसा छोड़ना और दान की प्रशंसा कही है, इससे इस सूक्त के अर्थ कि इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौवनवां सूक्त और बीसवां वर्ग पूरा हुआ॥

॥ओ३म्॥

अथ षडर्चस्य पञ्चपञ्चाशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। पूषा देवता। १, २, ५, ६ गायत्री। ३, ४ विराड्गायत्री छन्दः। षड्जः स्वरः॥

अथ कः सङ्गन्तव्य इत्याह॥

अब छः ऋचावाले पचपनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में किसका संग करना योग्य है, इस विषय को कहते हैं॥

एहि॒ वां॑ वि॒मुचो नपा॒दाघृ॑णे॒ सं स॑चावहै। र॒थीर्ऋ॒तस्य॑ नो भव॥ १॥

आ। इ॒हि॒। वाम्। वि॒ऽमु॒चः॒। न॒पा॒त्। आघृ॑णे। सम्। स॒चा॒व॒है॒। र॒थीः। ऋ॒तस्य॑। नः॒। भ॒व॒॥ १॥

पदार्थः-(आ) समन्तात् **(इहि)** प्राप्नुहि **(वाम्)** युवाम् **(विमुचः)** मोचय **(नपात्)** यो न पतति सः **(आघृणे)** समन्ताद्देदीप्यमान **(सम्)** **(सचावहै)** सम्बध्नीयाव **(रथीः)** बहुरथवान् **(ऋतस्य)** सत्यस्य **(नः)** अस्मभ्यम् **(भव)**॥१॥

अन्वयः-हे आघृणे नपात्! त्वं न ऋतस्य रथीर्भव न आ इहि, हे अध्यापकोपदेशकौ! वामुक्तविद्वंस्त्वं विमुचस्त्वमहञ्च सं सचावहै॥१॥

भावार्थः-यो विद्वान् सत्यपालकः सत्योपदेष्टा भवेत्स श्रोता च सखायौ त्वा सत्यविद्यां प्राप्तौ भूत्वाऽन्यानपि प्रापयेताम्॥१॥

पदार्थः-हे **(आघृणे)** सब ओर से देदीप्यमान **(नपात्)** जो नहीं गिरते वह! आप **(नः)** हमारे लिये **(ऋतस्य)** सत्य के सम्बन्धी **(रथीः)** बहुत रथोंवाले **(भव)** हो तथा आप हम लोगों को **(आ, इहि)** प्राप्त होओ। हे अध्यापक और उपदेशको! **(वाम्)** तुम दोनों को हे उक्त विद्वन्! आप **(विमुचः)** छोड़ो तथा आप और मैं **(सम्, सचावहै)** सम्बन्ध करें॥१॥

भावार्थः-जो विद्वान् सत्य की पालना करने वाला, सत्य का उपदेशक हो वह और सुनने वाला, मित्र होकर तथा सत्यविद्या को प्राप्त होकर औरों को भी विद्या को प्राप्त करावें॥१॥

पुनः कीदृशाद्धनं प्रापणीयमित्याह॥

फिर कैसे पुरुष से धन प्राप्त करना चाहिये, इस विषय को कहते हैं॥

र॒थीत॑मं कप॒र्दिन॒मीशा॑नं॒ राध॑सो म॒हः। रा॒यः सखा॑यमीमहे॥ २॥

र॒थिऽत॑मम्। क॒प॒र्दिन॑म्। ईशा॑नम्। राध॑सः। म॒हः। रा॒यः। सखा॑यम्। ई॒म॒हे॒॥ २॥

पदार्थः-(रथीतमम्) बहवो रथा विद्यन्ते यस्य तम् **(कपर्दिनम्)** जटाजूटं सखायं **(ईशानम्)** ऐश्वर्ययुक्तम् **(राधसः)** धनस्य **(महः)** महान् **(रायः)** साधारणधनस्य **(सखायम्)** मित्रम् **(ईमहे)** याचामहे॥२॥

अन्वयः-हे मनुष्या! वयं यन्महो राधसो राय ईशानं रथीतमं कपर्दिनं सखायं विद्वांसमीमहे तं यूयमपि याचध्वम्॥२॥

भावार्थः-हे मनुष्या! यो ब्रह्मचारी भूत्वाऽधीतविद्यः पुरुषार्थी बहुधनस्य स्वामी वर्त्तते तस्मादेव विद्यामधीत्य श्रियः प्राप्नुत॥२॥

पदार्थः-हे मनुष्यो! हम लोग जिस **(महः)** महान् **(राधसः)** धन के वा **(रायः)** साधारण धन के **(ईशानम्)** ऐश्वर्य्य से युक्त **(रथीतमम्)** जिसके बहुत रथ विद्यमान **(कपर्दिनम्)** जो जटाजूट ब्रह्मचारी **(सखायम्)** मित्र विद्वान् उसकी **(ईमहे)** याचना करते हैं, उसकी तुम भी याचना करो॥२॥

भावार्थः-हे मनुष्यो! जो ब्रह्मचारी होकर विद्या पढ़ा हुआ पुरुषार्थी तथा बहुत धन का स्वामी है, उसी से विद्या पढ़कर धन को प्राप्त होओ॥२॥

अथ कः सर्वस्य सुखप्रदो भवतीत्याह॥

अब कौन सब को सुख देने वाला होता है, इस विषय को कहते हैं॥

रायो धारास्याघृणे वसो राशिरजाश्व। धीवतोधीवतः सखाः॥३॥

रायः। धारा। असि। आघृणे। वसोः। राशिः। अजऽअश्व। धीवतःऽधीवतः। सखा॥३॥

पदार्थः-**(रायः)** धनस्य **(धारा)** प्रापिका वागिव **(असि)** **(आघृणे)** विद्यया प्रकाशमान **(वसोः)** वासयितुः **(राशिः)** समूहः **(अजाश्व)** अजोऽनुत्पन्नो विद्युदश्वो यस्य तत्सम्बुद्धौ **(धीवतोधीवतः)** प्राज्ञस्य प्राज्ञस्य **(सखा)**॥३॥

अन्वयः-हे अजाश्वाऽऽघृणे विद्वन्! यतस्त्वं वसो रायो राशिरिव धारेव धीवतोधीवतः सखाऽसि तस्मात् सकर्त्तव्योऽसि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः प्राज्ञानां सखायः पदार्थविद्याविदो धनाढ्याः स्युस्ते सर्वेषां सुखप्रदा भवन्ति॥३॥

पदार्थः-हे **(अजाश्व)** अविनाशी बिजुलीरूप घोड़े वाले **(आघृणे)** विद्या से प्रकाशमान विद्वन्! जिससे आप **(वसोः)** वास कराने वाले **(रायः)** धन की **(राशिः)** ढेरी के समान वा **(धारा)** प्राप्ति कराने वाली वाणी के समान **(धीवतोधीवतः)** प्राज्ञ प्राज्ञ के **(सखा)** मित्र **(असि)** हो, इससे सत्कार करने योग्य हो॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य प्राज्ञ पुरुषों के मित्र, पदार्थविद्याओं के जानने वाले तथा धनाढ्य हों, वे सबके सुख देने वाले होते हैं॥३॥

पुनः कैर्गुणैरुत्कृष्टो भवतीत्याह॥

फिर किन गुणों से उत्कृष्ट होता है, इस विषय को कहते हैं॥

पूषणं न्वऽजाश्वमुप स्तोषाम वाजिनम्। स्वसुर्यो जार उच्यते॥४॥

पूषणꣳम्। नु। अजऽअꣳश्वम्। उप। स्तोषाम। वाजिनꣳम्। स्वसुः। यः। जारः। उच्यते॥४॥

पदार्थः-(**पूषणम्**) पोषकम् (**नु**) सद्यः (**अजाश्वम्**) अजाश्चाश्वाश्चास्मिँस्तम् (**उप**) (**स्तोषाम**) प्रशंसेम (**वाजिनम्**) ज्ञानबलप्रदम् (**स्वसुः**) भगिन्या इव वर्त्तमानाया उषसः (**यः**) (**जारः**) जरयिता (**उच्यते**)॥४॥

अन्वयः-य स्वसुर्जार उच्यते तं वाजिनमजाश्वं पूषणमादित्यं वयं नूप स्तोषाम॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजादयो मनुष्या! यथा सूर्यो रात्रेर्निवारकोऽस्ति तथैव प्रजासु जारकर्मणि वर्त्तमानान् मनुष्यान्निवारयत॥४॥

पदार्थः-(**यः**) जो (**स्वसुः**) बहिन के समान वर्त्तमान उषा का (**जारः**) जीर्ण कराने वाला (**उच्यते**) कहा जाता है उस (**वाजिनम्**) ज्ञान और बल का देने वाला (**अजाश्वम्**) जिसमें बकरी और घोड़े विद्यमान (**पूषणम्**) जो पुष्टि करने वाला है, उस आदित्य की हम (**नु**) शीघ्र (**उप, स्तोषाम**) प्रशंसा करें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा आदि मनुष्यो! जैसे सूर्य्य रात्रि का निवारण करने वाला है, वैसे ही प्रजाजनों में जारकर्म में वर्त्तमान मनुष्यों का निवारण करो॥४॥

पुनर्मनुष्याः किं जानीयुरित्याह॥

फिर मनुष्य क्या जानें, इस विषय को कहते हैं॥

मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा ममः॥५॥

मातुः। दिधिषुम्। अब्रवम्। स्वसुः। जारः। शृणोतु। नः। भ्राता। इन्द्रस्य। सखा। ममः॥५॥

पदार्थः-(**मातुः**) जनन्याः (**दिधिषुम्**) धारकम् (**अब्रवम्**) ब्रूयाम् (**स्वसुः**) भगिन्या इवोषसः (**जारः**) निवारयिता (**शृणोतु**) (**नः**) अस्माकम् (**भ्राता**) बन्धुरिव (**इन्द्रस्य**) विद्युतः (**सखा**) (**मम**)॥५॥

अन्वयः-हे मनुष्या! य इन्द्रस्य भ्रातेव मम सखा नो दिधिषुं शृणोतु यः स्वसुर्जारो मातुर्धर्त्ताऽस्ति तमहमब्रवं तं सर्वे विजानन्तु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽग्ने सखा वायुरस्ति रात्रेर्निवर्त्तकः सूर्य्यश्च तथैव धार्मिका मम सखायोऽहं च तेषां सुहृद्भूत्वा रात्रिमिव वर्त्तमानामविद्यां वयं निवारयेम॥५॥

पदार्थः-हे मनुष्यो! जो (**इन्द्रस्य**) बिजुली के (**भ्राता**) भ्राता के समान (**मम**) मेरा (**सखा**) मित्र (**नः**) हम लोगों के (**दिधिषुम्**) धारण करने वाले को (**शृणोतु**) सुने और जो (**स्वसुः**) भगिनी के समान उषा का (**जारः**) निवारण करने वाला (**मातुः**) माता का धारण करने वाला है, उसको मैं (**अब्रवम्**) कहूं और उसको सब जानें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे अग्नि का मित्र वायु है, और रात्रि का निवारण करने वाला सूर्य भी है, वैसे ही धार्मिक मेरे मित्र और मैं भी उनका मित्र होकर रात्रि के समान वर्त्तमान अविद्या का हम सब निवारण करें॥५॥

पुनर्मनुष्याः किं विदित्वा किं प्राप्नुवन्तीत्याह॥

फिर मनुष्या क्या जान के किसको प्राप्त होते हैं, इस विषय को कहते हैं॥

आजासः॑ पू॒षणं॒ रथे॒ निश्॑रुम्भास्ते ज॒न॒श्रिय॑म्। दे॒वं व॑हन्तु॒ बिभ्र॑तः॥६॥२१॥

आ। अ॒जासः॑। पू॒षण॑म्। रथे॑। नि॒ऽश्रु॒म्भाः॒। ते। ज॒न॒ऽश्रिय॑म्। दे॒वम्। व॒ह॒न्तु॒। बिभ्र॑तः॥६॥

पदार्थः-**(आ)** **(अजासः)** पुष्टिकर्त्तुरश्वाः **(पूषणम्)** पोषकं सूर्य्यम् **(रथे)** रमणीये जगति **(निश्रुम्भाः)** नित्यं सम्बद्धारः **(ते)** **(जनश्रियम्)** जनानां शोभा लक्ष्मीर्यस्य तम् **(देवम्)** दिव्यगुणं विद्वांसम् **(वहन्तु)** प्राप्नुवन्तु **(बिभ्रतः)** धारकान् पोषकान्॥६॥

अन्वयः-हे मनुष्या! ये निश्रुम्भा अजासः पूषणं जनश्रियं देवं बिभ्रतो धर्त्तारं रथ आ वहन्तु ते सर्वमिष्टं प्राप्नुवन्ति॥६॥

भावार्थः-हे विद्वांसो! यूयं शरीरात्मपुष्टिकरान् पदार्थान् विदित्वोपयुज्यैश्वर्यं प्राप्नुत॥६॥

अत्र पूषादित्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चपञ्चाशत्तमं सूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(निश्रुम्भाः)** नित्य सम्बन्ध करने वाले **(अजासः)** पुष्टिकर्त्ता सूर्य्य के किरणरूप अश्व **(पूषणम्)** पुष्ट करने वाले सूर्य्य वा **(जनश्रियम्)** जिसके मनुष्यों की शोभा विद्यमान उस **(देवम्)** दिव्यगुणवाले विद्वान् के **(बिभ्रतः)** धारक अर्थात् पुष्टि करने वालों और धारण करने वालों को **(रथे)** रमणीय जगत् में **(आ, वहन्तु)** अच्छे प्रकार प्राप्त करें **(ते)** वे सर्व चाही हुई वस्तु को प्राप्त होते हैं॥६॥

भावार्थः-हे विद्वानो! तुम शरीर और आत्मा की पुष्टि करने वाले पदार्थों को जानकर और उनसे उपयोग लेकर ऐश्वर्य्य को प्राप्त होओ॥६॥

इस मन्त्र में पूषा और आदित्य के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पचपनवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य षट्पञ्चाशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। पूषा देवता। १, ४, ५ गायत्री। २, ३ निचृद्गायत्री छन्दः। षड्जः स्वरः। ६ स्वरादुष्णिक्छन्दः। ऋषभः स्वरः॥

अथ केन कस्मै किमुपदेष्टव्यमित्याह॥

अब छः ऋचावाले छप्पनवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में किसको किसके लिये क्या उपदेश करने योग्य है, इस विषय को कहते हैं॥

य एनमादिदेशति करम्भादिति पूषणम्। न तेन देव आदिशे॥ १॥

यः। एनम्। आऽदिदेशति। करम्भऽअत् इति। पूषणम्। न। तेन। देवः। आदिशे॥ १॥

पदार्थः-(**यः**) (**एनम्**) विद्युदादिस्वरूपम् (**आदिदेशति**) समन्तात् सम्यगुपदिशति (**करम्भात्**) यः करम्भमन्नविशेषमत्ति सः (**इति**) अनेन प्रकारेण (**पूषणम्**) पोषकम् (**न**) (**तेन**) (**देवः**) विद्वान् (**आदिशे**) अभिप्रशंसे॥ १॥

अन्वयः-यः करम्भादेव एनं पूषणमादिदेशति इति तेन सहाऽहमन्यथा नादिशे॥ १॥

भावार्थः-ये मनुष्याः सत्यमुपदिशन्ति ते सर्वानन्दं प्राप्नुवन्ति॥ १॥

पदार्थः-(**यः**) जो (**करम्भात्**) करम्भ करमन्हां नामक अन्न को खाने वाला (**देवः**) विद्वान् (**एनम्**) बिजुली आदि रूप वाले (**पूषणम्**) पुष्टि करने वाले को (**आदिदेशति**) सब ओर से अच्छे प्रकार उपदेश करता है (**इति**) इस प्रकार (**तेन**) उसके साथ मैं अन्यथा (**न**) नहीं (**आदिशे**) सब ओर से प्रशंसा करता हूँ॥ १॥

भावार्थः-जो मनुष्य सत्य का उपदेश करते हैं, वे सब आनन्द को प्राप्त होते हैं॥ १॥

पुनः स कीदृशो भवतीत्याह॥

फिर वह कैसा होता है, इस विषय को कहते हैं॥

उत घा स रथीतमः सख्या सत्पतिर्युजा। इन्द्रो वृत्राणि जिघ्नते॥ २॥

उत। घ। सः। रथिऽतमः। सख्या। सत्ऽपतिः। युजा। इन्द्रः। वृत्राणि। जिघ्नते॥ २॥

पदार्थः-(**उत**) अपि (**घा**) एव। अत्र **ऋचि तुनुघेति** दीर्घः। (**सः**) (**रथीतमः**) अतिशयेन रथयुक्तः (**सख्या**) मित्रेण सह (**सत्पतिः**) सतां पालकः (**युजा**) युक्तेन (**इन्द्रः**) सूर्य्येव राजा (**वृत्राणि**) घनानिव शत्रून् (**जिघ्नते**) हन्ति॥ २॥

अन्वयः-हे मनुष्या! यो युजा सख्या सत्पतिरुत रथीतम इन्द्रो यथा सूर्यो वृत्राणि हन्ति तथा शत्रूञ्जिघ्नते स घा कृतकृत्यो भवति॥ २॥

भावार्थः-हे मनुष्या! ये सत्यसत्पुरुषैः सह मित्रतां दुष्टैः सहोदासीनतां कुर्वन्ति ते दुष्टान्निवार्य्य श्रेष्ठान् स्वीकर्तुं शक्नुवन्ति॥ २॥

पदार्थः-हे मनुष्यो! जो **(युजा)** युक्त **(सख्या)** मित्र के साथ **(सत्पतिः)** सज्जनों की पालना करने वाला **(उत)** और **(रथीतमः)** अतीव रथयुक्त **(इन्द्रः)** सूर्य के समान राजा जैसे सूर्य **(वृत्राणि)** मेघों को मारता है, वैसे **(जिघ्नते)** शत्रुओं को मारता है **(सः)** वह **(घा)** ही कृतकृत्य होता है॥२॥

भावार्थः-हे मनुष्यो! जो सत्य तथा सत्पुरुषों के साथ मित्रता तथा दुष्टों के साथ उदासीनता करते हैं, वे दुष्टों को निवार कर श्रेष्ठों का स्वीकार कर सकते हैं॥२॥

पुनर्मनुष्यैः कीदृशं भाषणं कर्त्तव्यमित्याह॥

फिर मनुष्यों को कैसा भाषण करना चाहिये, इस विषय को कहते हैं॥

उतादः पंरुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतमः॥३॥

उत। अदः। परुषे। गवि। सूरः। चक्रम्। हिरण्ययम्। नि। ऐरयत्। रथिऽतमः॥३॥

पदार्थः-(**उत**) अपि (**अदः**) तत् (**परुषे**) कठोरे व्यवहारे (**गवि**) वाचि (**सूरः**) वीरः (**चक्रम्**) (**हिरण्ययम्**) सुवर्णादियुक्तं तेजोमयं वा (**नि**) (**ऐरयत्**) प्रेरयेत् (**रथीतमः**) अतिशयेन रथादियुक्तः। अत्र **संहितायामि**ति दीर्घः॥३॥

अन्वयः-हे मनुष्या! यो रथीतमः सूरोऽदो हिरण्ययं चक्रं न्यैरयदुत स परुषे गवि न प्रवर्त्तेत॥३॥

भावार्थः-यो मनुष्यः कठोरभाषणं विहाय कोमलभाषणं करोति स सदाऽऽनन्दी भवति॥३॥

पदार्थः-हे मनुष्यो! जो **(रथीतमः)** अतीव रथादि पदार्थों से युक्त **(सूरः)** वीर पुरुष **(अदः)** उस **(हिरण्ययम्)** सुवर्णादि युक्त वा तेजोमय **(चक्रम्)** चक्र को **(नि, ऐरयत्)** निरन्तर प्रेरित करे वह **(उत)** निश्चय से **(परुषे)** कठोर व्यवहार में और **(गवि)** वाणी में नहीं प्रवृत्त हो॥३॥

भावार्थः-जो मनुष्य कठोर भाषण को छोड़ कोमल भाषण करता है, वह सदा आनन्दी होता है॥३॥

पुनर्विद्वान् किं कुर्यादित्याह॥

फिर विद्वान् क्या करे, इस विषय को कहते हैं॥

यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः। तत्सु नो मन्म साधय॥४॥

यत्। अद्य। त्वा। पुरुऽस्तुत। ब्रवाम। दस्र। मन्तुऽमः। तत्। सु। नः। मन्म। साधय॥४॥

पदार्थः-(**यत्**) यत् ज्ञानम् (**अद्य**) (**त्वा**) त्वाम् (**पुरुष्टुत**) बहुभिः प्रशंसित (**ब्रवाम**) वदेम (**दस्र**) दुःखोपक्षयितः (**मन्तुमः**) प्रशस्तविज्ञानयुक्त (**तत्**) (**सु**) (**नः**) अस्मभ्यम् (**मन्म**) विज्ञानम् (**साधय**)॥४॥

अन्वयः-हे पुरुष्टुत दस्र! मन्तुमोऽद्य वयं यत्त्वा ब्रवाम स त्वं नस्तन्मन्म सु साधय॥४॥

भावार्थः-मनुष्यैः सर्वदा सम्मुखेऽन्यत्र वा सत्यमेव वाच्यं येन सत्यं ज्ञानं सर्वत्र वर्धेत॥४॥

पदार्थः-हे **(पुरुष्टुत)** बहुतों से प्रशंसा को प्राप्त **(दस्र)** दुःख को नष्ट करने वाले! **(मन्तुमः)** प्रशस्तविज्ञानयुक्त **(अद्य)** आज हम **(यत्)** जिस ज्ञान को **(त्वा)** तुझ को **(ब्रवाम)** कहें वह तू **(नः)** हमारे लिये **(तत्)** उस **(मन्म)** विज्ञान को **(सु, साधय)** अच्छे प्रकार सिद्ध कर॥४॥

भावार्थः-मनुष्यों को सर्वदा सम्मुख वा अन्यत्र सत्य ही कहना चाहिये, जिससे सत्य ज्ञान सर्वत्र बढ़े॥४॥

पुनर्विद्वान् किं कुर्यादित्याह॥

फिर विद्वान् क्या करे, इस विषय को कहते हैं॥

इमं च नो गवेषणं सातये सीषधो गणम्। आरात् पूषन्नसि श्रुतः॥५॥

इमम्। च। नः। गोऽएषणम्। सातये। सीसधः। गणम्। आरात्। पूषन्। असि। श्रुतः॥५॥

पदार्थः-**(इमम्)** **(च)** **(नः)** अस्माकम् **(गवेषणम्)** गवां वाचादीनामीषणं येन तम् **(सातये)** संविभागाय **(सीषधः)** साधय **(गणम्)** समूहम् **(आरात्)** समीपादूराद्वा **(पूषन्)** पुष्टिकर्त्तः **(असि)** **(श्रुतः)** योऽश्रावि सः॥५॥

अन्वयः-हे पूषन्! यतस्त्वमाराच्छ्रुतोऽसि तस्मात् सातये न इमं गवेषणं गणं च सीषधः॥५॥

भावार्थः-हे विद्वन्! यस्माद्भवानाप्तगुणैर्युक्तोऽस्ति तस्मादस्माकं मनुष्याणां सङ्घान् विदुषः करोतु॥५॥

पदार्थः-हे **(पूषन्)** पुष्टि करनेवाले! जिससे आप **(आरात्)** समीप वा दूर से **(श्रुतः)** सुने हुए **(असि)** हो इससे **(सातये)** संविभाग करने के लिये **(नः)** हमारे **(इमम्)** इस **(गवेषणम्)** वाणी आदि पदार्थों की प्रेरणा करने वाले को तथा **(गणम्)** अन्य पदार्थों के समूह को **(च)** भी **(सीषधः)** साधो॥५॥

भावार्थः-हे विद्वन्! जिससे आप आप्त विद्वानों के गुणों से युक्त हैं, इससे हम मनुष्यों के सङ्घों को विद्वान् करो॥५॥

पुनः सर्वैर्विद्वद्भिः किमेष्टव्यमित्याह॥

फिर सब को विद्वानों के लिये क्या इच्छा करनी चाहिये, इस विषय को कहते हैं॥

आ ते स्वस्तिमीमहे आरेअघामुपावसुम्।
अद्या च सर्वतातये श्वश्च सर्वतातये॥६॥२२॥

आ। ते। स्वस्तिम्। ईमहे। आरेऽअघाम्। उपऽवसुम्। अद्य। च। सर्वऽतातये। श्वः। च। सर्वऽतातये॥६॥

पदार्थः-**(आ)** समन्तात् **(ते)** तुभ्यम् **(स्वस्तिम्)** सुखम् **(ईमहे)** याचामहे **(आरेअघाम्)** आरे दूरेऽघं पापं यस्याम् **(उपावसुम्)** उप समीपे वसूनि यस्यां ताम् **(अद्या)** अत्र **निपातस्य चे**ति दीर्घः। **(च)** **(सर्वतातये)** सम्पूर्णसुखसाधकाय यज्ञाय **(श्वः)** आगामिदिने **(च)** तस्मादप्यग्रे **(सर्वतातये)** सर्वसुखकराय॥६॥

अन्वयः-हे विद्वन्! सर्वतातये तेऽद्या च श्वश्च सर्वतातये आरेअघामुपावसुं स्वस्तिं वयमा ईमहे॥६॥

भावार्थः-हे विद्वन्! यतो भवान् पापाचरणात् पृथक्सर्वस्य कल्याणकर्त्ताऽस्ति तस्माद्भवदर्थं सदैव सुखं वयमिच्छेमेति॥६॥

अत्रोपदेशकश्रोतृपूषार्थवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्पञ्चाशत्तमं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वन्! **(सर्वतातये)** सम्पूर्ण सुख सिद्ध करने वाले यज्ञ के लिये **(ते)** तेरे लिये **(अद्या)** आज **(च)** और **(श्वः)** आगामी दिन **(च)** भी **(सर्वतातये)** सर्वसुख करने वाले और पदार्थ के लिये **(आरेअघाम्)** जिसमें पाप दूर पहुंचे तथा **(उपावसुम्)** वा समीप धन आदि पदार्थ विद्यमान उस **(स्वस्तिम्)** सुख को हम **(आ, ईमहे)** अच्छे प्रकार मांगते हैं॥६॥

भावार्थः-हे विद्वन्! जिससे आप पापाचरण से अलग तथा सबके कल्याण करने वाले हैं, इससे आपके लिये सदैव सुख की इच्छा हम लोग करें॥६॥

इस सूक्त में उपदेशक, श्रोता और पूषा शब्द के अर्थ का वर्णन करने से इस सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छप्पनवाँ सूक्त और बाईसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य सप्तपञ्चाशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रापूषणौ देवते। १, ६ विराड्गायत्री। २ निचृद्गायत्री। ३, ४, ५ गायत्री छन्दः। षड्जः स्वरः॥

अथ मनुष्यैः केन सह सख्यं कार्य्यमित्याह॥

अब छः ऋचावाले सत्तावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को किसके साथ मित्रता करनी चाहिये, इस विषय का वर्णन करते हैं॥

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये। हुवेम वाजसातये॥ १॥

इन्द्रा नु। पूषणा। वयम्। सख्याय। स्वस्तये। हुवेम। वाजऽसातये॥ १॥

पदार्थः-(**इन्द्रा**) परमैश्वर्य्ययुक्तम् (**नु**) सद्यः (**पूषणा**) सर्वेषां पोषकम् (**वयम्**) (**सख्याय**) मित्रत्वाय (**स्वस्तये**) सुखाय (**हुवेम**) स्वीकुर्याम (**वाजसातये**) अन्नादीनां विभागो यस्मिँस्तस्मै॥ १॥

अन्वयः-इन्द्रापूषणा वयं सख्याय स्वस्तये वाजसातये नु हुवेम॥ १॥

भावार्थः-ये विश्वस्मिन् मैत्रीं विधाय सर्वस्य सुखमिच्छन्ति तानेव वयं स्वीकुर्याम॥ १॥

पदार्थः-(**इन्द्रा, पूषणा**) परम ऐश्वर्य्य युक्त को तथा सबको पुष्टि करने वाले को (**वयम्**) हम लोग (**सख्याय**) मित्रता तथा (**स्वस्तये**) सुख वा (**वाजसातये**) अन्नादिकों का जिसमें विभाग है उसके लिये (**नु**) शीघ्र (**हुवेम**) स्वीकार करें॥ १॥

भावार्थः-जो सब में मित्रता विधान कर सबके सुख की चाहना करते हैं, उन्हीं को हम लोग स्वीकार करें॥ १॥

पुनर्विद्वांसः किंवत् किं कुर्य्युरित्याह॥

फिर विद्वान् जन किसके तुल्य क्या करें, इस विषय को कहते हैं॥

सोममन्य उपासदत् पातवे चम्वोः सुतम्। करम्भमन्य इच्छति॥ २॥

सोमम्। अन्यः। उप। असदत्। पातवे। चम्वोः। सुतम्। करम्भम्। अन्यः। इच्छति॥ २॥

पदार्थः-(**सोमम्**) ऐश्वर्यम् (**अन्यः**) (**उप**) (**असदत्**) उपसीदति (**पातवे**) पातुम् (**चम्वोः**) द्यावापृथिव्योर्मध्ये (**सुतम्**) निष्पन्नम् (**करम्भम्**) भोगं कर्तुं योग्यम् (**अन्यः**) (**इच्छति**)॥ २॥

अन्वयः-हे इन्द्रापूषणौ! युवयोरन्य एकश्चम्वोर्मध्ये सुतं सोमं पातव उपासददन्यः करम्भमिच्छति तौ वयं सख्याद्याय हुवेम॥ २॥

भावार्थः-हे विद्वांसो! यथा सूर्याचन्द्रमसौ द्यावापृथिव्योर्मध्ये वर्त्तमानौ सन्तावनयोः सूर्य्यो रसं गृह्णाति चन्द्रो रसदानं च करोति तथैव यूयं वर्त्तध्वम्॥ २॥

पदार्थः-हे परमैश्वर्य्ययुक्त और सब की पुष्टि करने वाले! तुम दोनों में से (**अन्यः**) एक जन (**चम्वोः**) आकाश और पृथिवी के बीच (**सुतम्**) उत्पन्न हुए (**सोमम्**) ऐश्वर्य्य के (**पातवे**) पीने को (**उप,**

असदत्) दूसरे के समीप बैठता है **(अन्यः)** और दूसरा **(करम्भम्)** भोगने योग्य पदार्थ को **(इच्छति)** चाहता है, उन दोनों को हम लोग मित्रता आदि के लिये स्वीकार करते हैं॥२॥

भावार्थः-हे विद्वान् जनो! जैसे सूर्य और चन्द्रमा द्यावा और पृथिवी के बीच वर्त्तमान होते हुए हैं, इन दोनों में से सूर्य्य रस को लेता है और चन्द्रमा रस को देता है, वैसे ही तुम सब वर्त्तो॥२॥

पुनराभ्यां मनुष्यैः किं प्राप्यमित्याह॥

फिर इन दोनों से मनुष्यों को क्या प्राप्त होना चाहिये, इस विषय को कहते हैं॥

अजा अन्यस्य वह्नयो हरी अन्यस्य सम्भृता। ताभ्यां वृत्राणि जिघ्नते॥३॥

अजाः। अन्यस्य। वह्नयः। हरी इति। अन्यस्य। सम्ऽभृता। ताभ्याम्। वृत्राणि जिघ्नते॥३॥

पदार्थः-(**अजाः**) नित्याः **(अन्यस्य)** भूमेः **(वह्नयः)** वोढारः **(हरी)** हरणशीलौ धारणाकर्षणौ **(अन्यस्य)** विद्युतः **(सम्भृता)** सम्यग्धृतौ **(ताभ्याम्) (वृत्राणि)** धनानि **(जिघ्नते)** प्राप्नोति॥३॥

अन्वयः-हे मनुष्यास्तयोर्यस्याऽन्यस्य वह्नयोऽजा यस्याऽन्यस्य हरी सम्भृता वर्त्तेते ताभ्यां यो वृत्राणि जिघ्नते तं यूयं सत्कुरुत॥३॥

भावार्थः-हे मनुष्या! मिलितयोर्भूमिविद्युतोः सकाशाद्यूयं धनानि प्राप्नुत॥३॥

पदार्थः-हे मनुष्यो! उन दोनों के बीच जिस **(अन्यस्य)** भूमि के सम्बन्ध **(वह्नयः)** पदार्थ को एक स्थान से दूसरे स्थान में पहुंचाने वाले **(अजाः)** नित्य अर्थात् जो नष्ट नहीं होते वा जिस **(अन्यस्य)** और दूसरे बिजुलीरूप अग्नि के **(हरी)** हरणशील **(सम्भृता)** अच्छे प्रकार धारण किये हुए धारण और आकर्षण गुण वर्त्तमान हैं **(ताभ्याम्)** उनसे जो **(वृत्राणि)** धनों को **(जिघ्नते)** प्राप्त होता है, उसका तुम सत्कार करो॥३॥

भावार्थः-हे मनुष्यो! मिले हुए भूमि और बिजुली की उत्तेजना से तुम धनों को प्राप्त होओ॥३॥

पुनर्मनुष्यैः किं वेदितव्यमित्याह॥

फिर मनुष्यों को क्या जानना चाहिये, इस विषय को कहते हैं॥

यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः। तत्र पूषाभवत् सचा॥४॥

यत्। इन्द्रः। अनयत्। रितः। महीः। अपः। वृषन्ऽतमः। तत्र। पूषा। अभवत्। सचा॥४॥

पदार्थः-(**यत्**) यः **(इन्द्रः)** विद्युत् **(अनयत्)** नयति **(रितः)** गन्त्रीः **(महीः)** भूमीः **(अपः)** जलानि **(वृषन्तमः)** अतिशयेन वृष्टिकर्त्ता **(तत्र) (पूषा)** भूमिः **(अभवत्)** भवति **(सचा)** समवेता॥४॥

अन्वयः-हे मनुष्या! यद्यो वृषन्तम इन्द्रो रितो महीरपोऽनयत्तत्र पूषा सचाऽभवत्तं यूयं विजानीत॥४॥

भावार्थः-हे मनुष्या! या विद्युत् पृथिव्युदकस्था सर्वं यथासमयं यथास्थानं नयति यया संयुक्ता पृथिवी वर्त्तते तां विज्ञाय कलायन्त्रैरुद्घाट्य सर्वाणि कार्याणि साध्नुवन्तु॥४॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(वृषन्तमः)** अतीव वर्षा करने वाला **(इन्द्रः)** बिजुली रूप अग्नि **(रितः)** अपनी कक्षाओं में घूमने वाली **(महीः)** भूमि और **(अपः)** जलों को **(अनयत्)** पहुंचाता है **(तत्र)** वहाँ **(पूषा)** भूमि **(सचा)** संयुक्त **(अभवत्)** होती है, उसको तुम लोग जानो॥४॥

भावार्थः-हे मनुष्यो! जो बिजुली पृथिवी और जल के बीच स्थिर हुई सबको समय समय पर प्रतिस्थान पहुंचाती है, उसके साथ पृथिवी वर्त्तमान है, उसको जान कलायन्त्रों से उसे उठा सब कामों को सिद्ध करो॥४॥

पुनर्मनुष्यैः किं विज्ञाय किमारब्धव्यमित्याह॥

फिर मनुष्यों को क्या जान कर क्या आरम्भ करना चाहिये, इस विषय को कहते हैं॥

तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव। इन्द्रस्य चा रभामहे॥५॥

ताम्। पूष्णः। सुऽमतिम्। वयम्। वृक्षस्य। प्र। वयाम्ऽइव। इन्द्रस्य। च। आ। रभामहे॥५॥

पदार्थः-(**ताम्**) **(पूष्णः)** पृथिव्याः **(सुमतिम्)** शोभनां प्रज्ञाम् **(वयम्)** **(वृक्षस्य)** छेद्यस्य **(प्र)** **(वयामिव)** यथा वृक्षस्य सुदृढां विस्तीर्णां शाखाम् **(इन्द्रस्य)** विद्युतः **(च)** **(आ)** समन्तात् **(रभामहे)** आरम्भं कुर्याम॥५॥

अन्वयः-हे मनुष्या! वयं यां पूष्णः सुमतिं वृक्षस्य वयामिवेन्द्रस्य च प्राऽऽरभाम तथा तां यूयमपि प्रारभध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं भूगर्भविद्यां रिद्युद्विद्यां च प्राप्य कार्यसिद्धये क्रियामारभध्वम्॥५॥

पदार्थः-हे मनुष्यो! **(वयम्)** हम लोग जिस **(पूष्णः)** पृथिवी सम्बन्धिनी **(सुमतिम्)** उत्तम बुद्धि को **(वृक्षस्य)** काटने योग्य पदार्थ की **(वयामिव)** वृक्ष की दृढ़ विस्तीर्ण शाखा के समान वा **(इन्द्रस्य)** बिजुलीरूप अग्नि सम्बन्धिनी उत्तम मति का **(च)** भी **(प्र, आ, रभामहे)** आरम्भ करें **[**वैसे**]** **(ताम्)** उसको तुम भी प्रारम्भ करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम भूगर्भविद्या और विद्युद्विद्या को प्राप्त होकर कार्यसिद्धि के लिये क्रिया का आरम्भ करो॥५॥

पुनर्मनुष्यैः किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या प्राप्त होने योग्य है, इस विषय को कहते हैं॥

उत्पूषणं युवामहेऽभीशूंरिव सारथिः। मह्या इन्द्रं स्वस्तये॥६॥२३॥

उत्। पूषणम्। युवामहे। अभीशून्ऽइव। सारथिः। मह्यै। इन्द्रम्। स्वस्तये॥६॥

पदार्थः-(**उत्**) **(पूषणम्)** भूमिम् **(युवामहे)** विभजामहे **(अभीशूनिव)** रश्मीनिव **(सारथिः)** नियन्ता **(मह्यै)** पृथिव्यै **(इन्द्रम्)** विद्युतम् **(स्वस्तये)** सुखाय॥६॥

अन्वय:-हे मनुष्या! यथा वयं मह्यै स्वस्तये सारथिरभीशूनिव पूषणमिन्द्रं चोद्युवामहे तथैव यूयमपि कुरुत॥६॥

भावार्थ:-अत्रोपमालङ्कार:। यदि मनुष्या भूमिविद्युतोर्विभागं कुर्युस्तर्हि पुष्कलं सुखं प्राप्नुयुरिति॥६॥

अत्र भूमिविद्युद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तपञ्चाशत्तमं सूक्तं त्रयोविंशो वर्गश्च समाप्त:॥

पदार्थ:-हे मनुष्यो! जैसे हम लोग **(मह्यै)** पृथिवी और **(स्वस्तये)** सुख के लिये **(सारथि:)** नियन्ता अर्थात् एक स्थान से दूसरे स्थान को पहुंचाने वाला **(अभीशूनिव)** रश्मियों के समान **(पूषणम्)** भूमि को और **(इन्द्रम्)** विद्युत् रूप अग्नि को **(उत्, युवामहे)** उत्तमता से अगल करते हैं, वैसे ही तुम भी करो॥६॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। यदि मनुष्य भूमि और बिजुली का विभाग करे तो बहुत सुख पावें॥६॥

इस सूक्त में भूमि और बिजुली के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्तावनवां सूक्त और तेईसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अत्र चतुर्ऋचस्याष्टपञ्चाशत्तमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। पूषा देवता। १ त्रिष्टुप्। ३, ४ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ विराड् जगती छन्दः। निषादः स्वरः॥

पुनर्मनुष्याः किं कृत्वा किं प्राप्नुवन्तीत्याह॥

अब चार ऋचावाले अट्ठावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर मनुष्य क्या करके क्या पाते हैं, इस विषय को कहते हैं॥

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ १॥

शुक्रम्। ते। अन्यत्। यजतम्। ते। अन्यत्। विषुरूपे इति विषुऽरूपे। अहनी इति। द्यौःऽइव। असि। विश्वाः। हि। मायाः। अवसि। स्वधाऽवः। भद्रा। ते। पूषन्। इह। रातिः। अस्तु॥ १॥

पदार्थः-(शुक्रम्) शुद्धम् **(ते)** तव **(अन्यत्) (यजतम्)** सङ्गच्छेताम् **(ते)** तव **(अन्यत्)** रूपम् **(विषुरूपे)** व्याप्तस्वरूपे **(अहनी)** रात्रिदिने **(द्यौरिव)** सूर्य्यप्रकाश इव **(असि) (विश्वाः)** संपूर्णाः **(हि)** खलु **(मायाः)** प्रज्ञाः **(अवसि) (स्वधावः)** बह्वन्नयुक्त **(भद्रा)** कल्याणकारिणी **(ते)** तव **(पूषन्)** पोषणकर्त्तः **(इह) (रातिः)** दानक्रिया **(अस्तु)**॥१॥

अन्वयः-हे स्वधावः पूषंस्ते तवान्यच्छुक्रं तेऽन्यदस्ति युवां विषुरूपेऽहनी यजतं द्यौरिव विश्वा मायास्त्वमवसि यस्य ते भद्रा रातिरिहास्तु स हि त्वं सत्कर्त्तव्योऽसि॥१॥

भावार्थः-हे मनुष्या! ये पुरुषा अहोरात्रवत्क्रमेण कार्य्याणि साध्नुवन्ति तेऽखिलां सामग्रीं प्राप्य सूर्य्यप्रकाश इव सत्कीर्त्तयो जायन्ते॥१॥

पदार्थः-हे **(स्वधावः)** बहुत अन्नवाले और **(पूषन्)** पुष्टिकर्त्ता जन **(ते)** आपका **(अन्यत्)** और **(शुक्रम्)** शुद्धरूप तथा **(ते)** आपका **(अन्यत्)** रूप है सो तुम दोनों **(विषुरूपे)** व्याप्तरूप **(अहनी)** रात्रि दिन में **(यजतम्)** मिलो और **(द्यौरिव)** सूर्य्य प्रकाश के समान **(विश्वाः)** सम्पूर्ण **(मायाः)** बुद्धियों को तुम **(अवसि)** रक्खो जिन **(ते)** आपकी **(भद्रा)** कल्याण करने वाली **(रातिः)** दानक्रिया **(इह)** यहाँ **(अस्तु)** हो वह **(हि)** ही आप सत्कार करने योग्य **(असि)** हैं॥१॥

भावार्थः-हे मनुष्यो! जो पुरुष दिन-रात्रि के समान क्रम से कामों को सिद्ध करते हैं, वे सब सामग्री को पाकर सूर्य्य के प्रकाश के समान उत्तम कीर्ति वाले होते हैं॥१॥

पुनर्विद्वान् किं कुर्य्यादित्याह॥

फिर विद्वान् जन क्या करे, इस विषय को कहते हैं॥

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः।

अष्ट्रां॑ पू॒षा शि॑थि॒रामु॒द्वरी॑वृजत् स॒ञ्चक्षा॑णो॒ भुव॑ना दे॒व ई॑यते॥ २॥

अ॒जऽअ॑श्वः। प॒शु॒ऽपाः। वाज॑ऽपस्त्यः। धि॒य॒म्ऽजि॒न्वः। भुव॑ने। विश्वे॑। अर्पि॑तः। अष्ट्रा॑म्। पू॒षा। शि॒थि॒राम्। उ॒त्ऽवरी॑वृजत्। स॒म्ऽचक्षा॑णः। भुव॑ना। दे॒वः। ई॒य॒ते॥ २॥

पदार्थः-(**अजाश्वः**) अजा अश्वाश्च यस्य सः। (**पशुपाः**) यः पशून् पाति रक्षति (**वाजपस्त्यः**) वाजान्यन्नानि पस्त्ये गृहे यस्य सः (**धियंजिन्वः**) यो धियं जिन्वति प्रीणाति सः (**भुवने**) संसारे (**विश्वे**) समग्रे (**अर्पितः**) स्थापितः (**अष्ट्राम्**) व्याप्ताम् (**पूषा**) पोषकः (**शिथिराम्**) शिथिलाम् (**उद्वरीवृजत्**) भृशं वर्जयति (**सञ्चक्षाणः**) सम्यक् कामयन्नुपदिशन् वा (**भुवना**) गृहाणि (**देवः**) विद्वान् (**ईयते**) प्राप्नोति गच्छति वा॥ २॥

अन्वयः-हे मनुष्या! योऽजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो विश्वे भुवनेऽर्पितः पूषा शिथिरामष्ट्रां भुवना च सञ्चक्षाणो देव ईयत उद्वरीवृजत्त यूयं सेवध्वम्॥ २॥

भावार्थः-ये मनुष्या भुवनस्थान् सर्वान् पदार्थान् संयुक्तान् वियुक्तांश्च विज्ञाय कार्य्याणि कुर्वन्ति ते धीमन्तो भवन्ति॥ २॥

पदार्थः-हे मनुष्यो! जो (**अजाश्वः**) भेड़ बकरी और घोड़ों को रखने वाला (**पशुपाः**) जो पशुओं की रक्षा करने वाला तथा (**वाजपस्त्यः**) घर में अन्नों को रखने वाला (**धियंजिन्वः**) बुद्धि को तृप्त करता है वह (**विश्वे**) समग्र (**भुवने**) संसार में (**अर्पितः**) स्थापन किया हुआ (**पूषा**) पुष्टि करने वाला (**शिथिराम्**) शिथिल और (**अष्ट्राम्**) पदार्थों में व्याप्त बुद्धि और (**भुवना**) गृहों की (**सञ्चक्षाणः**) अच्छे प्रकार कामना वा उनका उपदेश करता हुआ (**देवः**) विद्वान् (**ईयते**) प्राप्त होता वा जाता है तथा (**उद्वरीवृजत्**) उत्तमता से वर्जता है, उसका तुम लोग सेवन करो॥ २॥

भावार्थः-जो मनुष्य भुवनस्थ सब पदार्थों को मिले वा मिले जान कर कार्य्यों को करते हैं, वे बुद्धिमान् होते हैं॥ २॥

पुनर्विद्वान् किं निर्माय क्व गत्वा किं प्राप्नुयादित्याह॥

फिर विद्वान् किसको बना कहाँ जाकर क्या पावे, इस विषय को कहते हैं॥

यास्ते॑ पूष॒न्नावो॑ अ॒न्तः स॑मु॒द्रे हि॑र॒ण्ययी॑र॒न्तरि॑क्षे॒ चर॑न्ति।

ताभि॑र्यासि दू॒त्यां सूर्यस्य॒ काम॑ेन कृत श्रव॑ इ॒च्छमा॑नः॥ ३॥

याः। ते॒। पू॒ष॒न्। नाव॑ः। अ॒न्त॒रिति॑। स॒मु॒द्रे। हि॒र॒ण्ययी॑ः। अ॒न्तरि॑क्षे। चर॑न्ति। ताभि॑ः। या॒सि॒। दू॒त्याम्। सूर्य॑स्य। काम॑ेन। कृ॒त॒। श्रव॑ः। इ॒च्छमा॑नः॥ ३॥

पदार्थः-(**याः**) (**ते**) तव (**पूषन्**) भूमिरिव पुष्टियुक्त (**नावः**) प्रशंसनीया नौकाः (**अन्तः**) मध्ये (**समुद्रे**) सागरे (**हिरण्ययीः**) तेजोमय्यः सुवर्णादिसुभूषिताः (**अन्तरिक्षे**) आकाशे (**चरन्ति**) गच्छन्ति

(ताभिः) **(यासि)** **(दूत्याम्)** दूतस्य क्रियामिव **(सूर्यस्य)** **(कामेन)** **(कृत)** यो विद्वान् कृतस्तत्सम्बुद्धौ **(श्रवः)** अन्नादिकम् **(इच्छमानः)**॥३॥

अन्वयः-हे कृत पूषन्! यास्ते हिरण्ययीर्नावः समुद्रेऽन्तरिक्षेनन्तश्चरन्ति ताभिः कामेन श्रव इच्छमानस्सूर्यस्य दूत्यामिव कामनां यासि तस्माद्धन्योऽसि॥३॥

भावार्थः-ये मनुष्या सुदृढा नावो भूविमानानि भुव्यन्तरिक्षविमानान्यन्तरिक्षे च गमनाय रचयन्ति तैश्च देशदेशान्तरं गत्वाऽऽगत्य कामनामलं कुर्वन्ति त एव सूर्य्यवत् प्रकाशितकीर्त्तयो भवन्ति॥३॥

पदार्थः-हे **(कृत)** किये हुए विद्वन्! **(पूषन्)** भूमि के समान पुष्टियुक्त! **(याः)** जो **(ते)** आपकी **(हिरण्ययीः)** तेजोमयी सुवर्णादिकों से सुभूषित **(नावः)** प्रशंसनीय नौकायें **(समुद्रे)** समुद्र वा **(अन्तरिक्षे)** अन्तरिक्ष में **(अन्तः)** भीतर **(चरन्ति)** जाती हैं **(ताभिः)** उनसे **(कामेन)** कामना करके **(श्रवः)** अन्नादिक की **(इच्छमानः)** इच्छा करते हुए **(सूर्यस्य)** सूर्य्य के **(दूत्याम्)** दूत की क्रिया के समान कामना को **(यासि)** प्राप्त होते हो, इससे धन्य हो॥३॥

भावार्थः-जो मनुष्य सुदृढ़ नावें और भूविमानों को भूमि और अन्तरिक्ष में चलने वाले यानों को अन्तरिक्ष में चलने को रचते और उनसे देश-देशान्तरों को जाय आकर अपनी इच्छा को पूरी करते हैं, वे ही सूर्य्य के समान प्रकाशित कीर्ति वाले होते हैं॥३॥

पुनः के विद्यां प्राप्तुमर्हन्तीत्याह॥

फिर कौन विद्या को प्राप्त होने के योग्य होते हैं, इस विषय को कहते हैं॥

पू॒षा सु॒बन्धु॑र्दि॒व आ पृ॑थि॒व्या इ॒ळस्पति॑र्म॒घवा॑ द॒स्मव॑र्चाः।
यं दे॒वासो॒ अद॑दुः सू॒र्यायै॒ कामे॑न कृ॒तं त॒वस॒ं स्वञ्च॑म्॥४॥२४॥

पू॒षा। सु॒ऽबन्धुः॑। दि॒वः। आ। पृ॒थि॒व्याः। इ॒ळः। पतिः॑। म॒घऽवा॑। द॒स्मऽव॑र्चाः। यम्। दे॒वासः॑। अद॑दुः। सू॒र्यायै॑। कामे॑न। कृ॒तम्। त॒वस॑म्। सु॒ऽअञ्च॑म्॥४॥

पदार्थः-**(पूषा)** भूमिवत्पुष्टः पुष्टिकर्त्ता वा **(सुबन्धुः)** शोभना बन्धवो भ्रातरः सखायो वा यस्य **(दिवः)** विद्युतः **(आ)** **(पृथिव्याः)** भूमेः **(इळः)** वाचः **(पतिः)** स्वामी **(मघवा)** बह्वैश्वर्यः **(दस्मवर्चाः)** दस्मेषूपक्षयेषु वर्चः प्रदीपनं यस्य सः **(यम्)** **(देवासः)** विद्वांसः **(अददुः)** ददति **(सूर्यायै)** सूर्यवत् शुभगुणस्वभावप्रकाशितायै कन्यायै **(कामेन)** **(कृतम्)** निष्पन्नम् **(तवसम्)** बलिष्ठम् **(स्वञ्चम्)** सुष्ठ्वञ्चन्तं प्राप्तशरीरात्मबलेन युक्तम्॥४॥

अन्वयः-हे मनुष्या! यं देवासः कामेन कृतं तवसं स्वञ्चं युवानं नरं सूर्याया अददुः स सुबन्धुर्मघवा दस्मवर्चाः पूषा दिवः पृथिव्या इळस्पतिः सन् सुखमादत्ते॥४॥

भावार्थः-ये ब्रह्मचर्येण पूर्णयुवावस्थां प्राप्ताः स्वसदृशीर्वधूः प्राप्यर्त्तुगामिनो भूत्वा सुदृढाङ्गा बुद्धिबलविद्याशिक्षाप्राप्ता भवेयुस्त एव भूगर्भविद्युदादिविद्यां प्राप्तुं शक्नुवन्ति नेतरे क्षुद्राशया इति॥४॥

अत्र विद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टपञ्चाशत्तमं सूक्तं चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **(यम्)** जिसको **(देवासः)** विद्वान् जन **(कामेन)** कामना से **(कृतम्)** किये हुए **(तवसम्)** बलिष्ठ **(स्वञ्चम्)** सुन्दरता से जाते हुए अर्थात् शरीर और आत्मा के बल से युक्त युवा मनुष्य को **(सूर्यायै)** सूर्य के समान शुभ गुण और स्वभावों से प्रकाशित कन्या के लिये **(अददुः)** देते हैं वह **(सुबन्धुः)** सुन्दर भ्राता वा मित्रों वाला **(मघवा)** बहुत ऐश्वर्य्ययुक्त **(दस्मवर्चाः)** नष्ट होते हुए पदार्थों में प्रकाश रखने वाला **(पूषा)** भूमि के समान पुष्ट वा पुष्टि करने वाला **(दिवः)** बिजुली और **(पृथिव्याः)** भूमि तथा **(इळः)** वाणी का **(पतिः)** स्वामी होता हुआ सुख को **(आ)** ग्रहण करता है॥४॥

भावार्थः-जो ब्रह्मचर्य्य से पूर्ण युवावस्था को प्राप्त हुए अपने सदृश बहुओं को प्राप्त होकर ऋतुगामी अर्थात् ऋतुकाल में स्त्रीभोग करने वाले होकर सुन्दर पुष्ट अङ्ग और बुद्धि बल विद्या और शिक्षा को प्राप्त हों, वे ही भूगर्भ वा विद्युदादि विद्या को प्राप्त हो सकते हैं और क्षुद्राशय नहीं॥४॥

इस सूक्त में विद्वानों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अट्ठावनवां सूक्त और चौबीसवां वर्ग पूरा हुआ॥

॥ओ३म्॥

अथ दशर्चस्यैकोनषष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्राग्नी देवते। १, ३, ४, ५ निचृद्बृहती। २ विराड्बृहती छन्दः। मध्यमः स्वरः। ६ भुरिगनुष्टुप्। ७, ९ निचृदनुष्टुप्। १० अनुष्टुप् छन्दः। गान्धारः स्वरः। ८ उष्णिक् छन्दः। ऋषभः स्वरः॥

अथ मनुष्याः किं कृत्वा बलिष्ठा जायेरन्नित्याह॥

अब दस ऋचा वाले उनसठवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में मनुष्य क्या करके बलिष्ठ हों, इस विषय को कहते हैं॥

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम्॥ १॥

प्र। नु। वोच। सुतेषु। वाम्। वीर्या। यानि। चक्रथुः। हतासः। वाम्। पितरः। देवऽशत्रवः। इन्द्राग्नी इति। जीवथः। युवम्॥ १॥

पदार्थः-(**प्र**) (**नु**) सद्यः (**वोचा**) उपदिशामि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सुतेषु**) निष्पन्नेषु (**वाम्**) युवाम् (**वीर्या**) वीर्याणि (**यानि**) (**चक्रथुः**) कुरुथः (**हतासः**) नष्टाः (**वाम्**) युवयोः (**पितरः**) पालकाः (**देवशत्रवः**) देवानां विदुषामरयः (**इन्द्राग्नी**) वायुविद्युताविवाध्यापकाध्येतारौ (**जीवथः**) (**युवम्**) युवाम्॥ १॥

अन्वयः-हे इन्द्राग्नी! युवं यानि सुतेषु वीर्या चक्रथुस्तैर्वां देवशत्रवो हतास स्युश्चिरञ्जीवथ इति वामहं नु प्र वोचा। येन युवयोः पितरोऽप्येवं वामुपदिशन्तु॥ १॥

भावार्थः-ये मनुष्या उत्पन्नेषु मनुष्येषु पराक्रममुन्नयन्ति तेषां शत्रवो विलीयन्ते॥ १॥

पदार्थः-हे (**इन्द्राग्नी**) वायु और बिजुली के समान अध्यापक और उपदेशको! (**युवम्**) तुम दोनों (**यानि**) जिन (**सुतेषु**) उत्पन्न हुए पदार्थों में (**वीर्या**) पराक्रमों को (**चक्रथुः**) किया करते हो उनसे (**वाम्**) तुम दोनों के जो (**देवशत्रवः**) विद्वानों से द्वेष करने वाले शत्रु (**हतासः**) नष्ट हों और तुम दोनों बहुत समय तक (**जीवथः**) जीवते हो यह (**वाम्**) तुम दोनों को मैं (**नु**) शीघ्र (**प्र, वोचा**) उपदेश देता हूँ जिससे तुम दोनों के (**पितरः**) पालने वाले भी ऐसा (**वाम्**) तुम दोनों को उपदेश दें॥ १॥

भावार्थः-जो मनुष्य उत्पन्न हुए मनुष्यों में पराक्रम की उन्नति करते हैं, उनके शत्रु विलय (नाश) को प्राप्त होते हैं॥ १॥

पुनरध्यापकोपदेशकौ कीदृशौ भवेतामित्याह॥

फिर अध्यापक और उपदेशक कैसे हों, इस विषय को कहते हैं॥

बळित्था महिमा वामिन्द्राग्नी पनिष्ट आ।

स॒मा॒नो वां॑ जनि॒ता भ्रात॑रा यु॒वं यु॒माव॒हेह॑मातरा॥ २॥

बट्। इ॒त्था। म॒हि॒मा। वा॒म्। इन्द्रा॑ग्नी॒ इति॑। पनि॑ष्ठः। आ। स॒मा॒नः। वा॒म्। ज॒नि॒ता। भ्रात॑रा। यु॒वम्। यु॒मौ। इ॒हेह॑ऽमातरा॥ २॥

पदार्थः-(**बट्**) सत्यम् (**इत्था**) अनेन प्रकारेण (**महिमा**) प्रतापः (**वाम्**) युवयोः (**इन्द्राग्नी**) वायुवह्नी इव वर्त्तमानौ राजप्रजाजनौ (**पनिष्ठः**) अतिशयेन प्रशंसितः (**आ**) (**समानः**) तुल्यः (**वाम्**) युवयोः (**जनिता**) उत्पादकः (**भ्रातरा**) बन्धू (**युवम्**) युवाम् (**यमौ**) नियन्तारौ (**इहेहमातरा**) इहेहमाता जननी ययोस्तौ॥ २॥

अन्वयः-हे इन्द्राग्नी! यो वां पनिष्ठो बड् महिमा वां समानो जनितेहेहमातरा यमौ भ्रातरा वर्त्तेते तावित्था युवमाजीवथः॥ २॥

भावार्थः-येऽध्यापकोपदेशका विद्युत्सूर्य्यवत् व्याप्तविद्याः परोपकारिणः सन्ति ते सत्यमहिमानो भवन्ति॥ २॥

पदार्थः-हे (**इन्द्राग्नी**) पवन और अग्नि के तुल्य राजप्रजाजनो! जो (**वाम्**) तुम दोनों का (**पनिष्ठः**) अतीव प्रशंसित (**बट्**) सत्य (**महिमा**) प्रताप वा (**वाम्**) तुम दोनों का (**समानः**) तुल्य (**जनिता**) उत्पादन करने वाला पिता (**इहेहमातरा**) यहाँ-यहाँ जिनकी माता वे (**यमौ**) नियन्ता अर्थात् गृहस्थी के चलाने वाले (**भ्रातरा**) भाई वर्त्तमान हैं उनको (**इत्था**) इस प्रकार से (**युवम्**) तुम (**आ, जीवथः**) जिलाते हो॥ २॥

भावार्थः-जो अध्यापक और उपदेशक बिजुली और सूर्य्य के तुल्य विद्याओं में व्याप्त तथा परोपकारी हैं, वे सत्य महिमा वाले होते हैं॥ २॥

पुनर्विद्वांसः किं विज्ञाय कीदृशा भवेयुरित्याह॥

फिर विद्वान् जन क्या जानकर कैसे हों, इस विषय को कहते हैं॥

ओ॒कि॒वांसा॑ सु॒ते सचा॑ अश्वा॒ सप्ती॑इ॒वादने।

इन्द्रा॒न्वग्नी अव॑से॒ह व॒ज्रिणा॑ व॒यं दे॒वा ह॑वामहे॥ ३॥

ओ॒कि॒ऽवांसा॑। सु॒ते। सचा॑। अश्वा॒। सप्ती॑ इ॒वेति॒ सप्ती॑ऽइव। आद॑ने। इन्द्रा॑ नु। अ॒ग्नी इति॑। अव॑सा। इ॒ह। व॒ज्रिणा॑। व॒यम्। दे॒वा। ह॒वा॒म॒हे॥ ३॥

पदार्थः-(**ओकिवांसा**) सङ्गतौ सम्बद्धौ (**सुते**) निष्पन्ने (**सचा**) सचौ समवेतौ (**अश्वा**) व्याप्तौ (**सप्तीइव**) यथा युग्मावश्वौ (**आदने**) अत्तव्ये घासे (**इन्द्रा**) (**नु**) (**अग्नी**) वायुविद्युतौ (**अवसा**) (**इह**) अस्मिन् संसारे (**वज्रिणा**) प्रशस्ताऽस्त्रयुक्तौ (**वयम्**) (**देवा**) विद्वांसः (**हवामहे**) प्रशंसामः॥ ३॥

अन्वयः-हे मनुष्या! यथा देवा वयमवसेह सुते सचाऽश्वा वज्रिणौकिवांसा सप्तीइवादने वर्त्तमानाविन्द्राग्नी नु हवामहे तथेमौ यूयमपि प्रशंसत॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये विद्वांसः सदा मिलितौ वायुविद्युतौ पदार्थौ विजानन्ति तेऽस्मिन् संसारेऽद्भुताः क्रियाः कर्तुं शक्नुवन्ति॥३॥

पदार्थः-हे मनुष्यो! जैसे **(देवा)** विद्वान् **(वयम्)** हम लोग **(अवसा)** रक्षा आदि से **(इह)** इस संसार में **(सुते)** निष्पन्न हुए व्यवहार में **(सचा)** अच्छे प्रकार युक्त **(अश्वाः)** और व्याप्त हुए **(वज्रिणा)** प्रशंसित शस्त्र-अस्त्र वाले **(ओकिवांसा)** सङ्ग और सम्बन्ध को प्राप्त हुए **(सप्तीइव)** जैसे दो घोड़े **(आदने)** भक्षण करने योग्य घास अदन के निमित्त वर्त्तमान, वैसे **(इन्द्राग्नी)** पवन और बिजुली की **(नु)** शीघ्र **(हवामहे)** प्रशंसा करते हैं, वैसे इनकी तुम भी प्रशंसा करो॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो विद्वान् जन सदा मिले हुए वायु और बिजुली इन दोनों पदार्थों को जानते हैं, वे इस संसार में अद्भुत क्रियाओं को कर सकते हैं॥३॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् जन कैसे हों, इस विषय को कहते हैं॥

य इ॑न्द्राग्नी सु॒तेषु॑ वां॒ स्तव॒त्तेष्वृ॑ता॒वृधा।

जो॒ष॒वा॒कं व॑द॒तः प॒ज्रहो॑षिणा॒ न दे॒वा भ॒सथ॑श्च॒न॥४॥

यः। इ॒न्द्रा॒ग्नी इति॑। सु॒तेषु॑। वा॒म्। स्तव॑त्। तेषु॑। ऋ॒त॒ऽवृ॒धा॒। जो॒ष॒ऽवा॒कम्। व॒द॒तः। प॒ज्रऽहो॑षिणा॒। न। दे॒वा॒। भ॒सथ॑ः। च॒न॥४॥

पदार्थः-(**यः**) **(इन्द्राग्नी)** वायुविद्युताविवाऽध्यापकोपदेशकौ **(सुतेषु)** उत्पन्नेषु पदार्थेषु **(वाम्)** युवाम् **(स्तवत्)** प्रशंसेत् **(तेषु)** **(ऋतावृधा)** सत्यवर्धकौ **(जोषवाकम्)** प्रीतिकरं वचनम् **(वदतः)** **(पज्रहोषिणा)** पज्रः सङ्गतो होषो घोषो वाग्ययोस्तौ **(न)** निषेधे **(देवा)** देवौ विद्वांसौ **(भसथः)** व्यर्थं वादं वदतः **(चन)** अपि॥४॥

अन्वयः-हे पज्रहोषिणार्तावृधेन्द्राग्नी! यस्तेषु सुतेषु वां स्तवद्यौ देवा चन न भसथस्तं प्रति युवां जोषवाकं वदतस्स चन युवां प्रति वदेत्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! सर्वेषु पदार्थेषु प्रविष्टौ वायुविद्युतौ विदित्वैश्वर्य्यं प्राप्य रूक्षामसत्यां क्रियां लोकविद्वेष्टॄन् वा मनुष्यान् विदित्वा सर्वेषामुपकाराय सत्यं प्रियं सर्वदा वदत॥४॥

पदार्थः-हे **(पज्रहोषिणा)** प्राप्त हुई वाणी वा घोषयुक्त **(ऋतावृधा)** सत्य बढ़ाने वाले **(इन्द्राग्नी)** वायु और बिजुली के समान अध्यापक और उपदेशको! **(यः)** जो **(तेषु)** उन **(सुतेषु)** उत्पन्न हुए पदार्थों में **(वाम्)** तुम दोनों की **(स्तवत्)** प्रशंसा करे वा जो **(देवा)** विद्वान् जन **(चन)** भी **(न)** नहीं **(भसथः)** व्यर्थ वाद करते हैं, उस सर्वजन के प्रति तुम दोनों **(जोषवाकम्)** प्रीति करने वाले वचन **(वदतः)** कहते हो, वह सर्वजन भी तुम्हारे प्रति कहे॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! सर्व पदार्थों में प्रविष्ट वायु और बिजुली को जानकर ऐश्वर्य को प्राप्त होकर रूखी असत्य किया और लोक विद्वेषी जनों को जान सबके उपकार के लिये सत्य प्रिय वाक्य सर्वदा कहो॥४॥

के मनुष्याः पदार्थविद्यां वेत्तुमर्हन्तीत्याह॥

कौन मनुष्य पदार्थविद्या को जानने योग्य हैं, इस विषय को कहते हैं॥

इन्द्राग्नी॒ को अ॒स्य वां॑ दे॒वौ॒ मर्॑तश्चिकेतति।

विषू॑चो॒ अश्वा॑न् युयुजा॒न ई॑यत॒ एक॑: समा॒न आ रथे॑॥५॥२५॥

इन्द्राग्नी॒ इति॑। कः। अ॒स्य। वा॒म्। दे॒वौ। मर्॑तः। चि॒के॒त॒ति॒। विषू॑चः। अश्वा॑न्। यु॒यु॒जा॒नः। ई॒य॒ते॒। एक॑ः। स॒मा॒ने। आ। रथे॑॥५॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युतौ (**कः**) (**अस्य**) (**वाम्**) युवाम् (**देवौ**) दिव्यगुणकर्मस्वभावौ (**मर्त्तः**) (**चिकेतति**) (**विषूचः**) व्याप्तान् (**अश्वान्**) आशुगामिनो विद्युदादीन् (**युयुजानः**) युक्तान् कुर्वन् (**ईयते**) गच्छति (**एकः**) असहायः (**समाने**) (**आ**) (**रथे**) विमानादौ याने॥५॥

अन्वयः-हे अध्यापकोपदेशकौ! कोऽस्य जगतो मध्ये वर्त्तमानो मर्त्तो विषूचोऽश्वान् समाने रथे युयुजान एको देवाविन्द्राग्नी चिकेतति स वामेयते॥५॥

भावार्थः-हे विद्वांसः! कोऽत्र पदार्थविद्याविद्विमानादियाननिर्माता सद्यो गन्ता स्यादित्यस्योत्तरं परस्ताद्दत्तमिति शृणुत॥५॥

पदार्थः-हे अध्यापक और उपदेशको! (**कः**) कौन (**अस्य**) इस जगत् के बीच वर्त्तमान (**मर्त्तः**) मनुष्य (**विषूचः**) व्याप्त (**अश्वान्**) शीघ्रगामी बिजुली आदि पदार्थों को (**समाने**) समान (**रथे**) विमान आदि यान में (**युयुजानः**) युक्त करता हुआ (**एकः**) एक विद्वान् (**देवौ**) दिव्यगुणकर्मस्वभावयुक्त (**इन्द्राग्नी**) वायु और बिजुली को (**चिकेतति**) जानता है वह (**वाम्**) तुम दोनों को (**आ, ईयते**) प्राप्त होता है॥५॥

भावार्थः-हे विद्वानो! कौन यहाँ पदार्थविद्या का जानने वाला, विमान आदि यानों का निर्माण करने वाला शीघ्रगामी हो, इसका उत्तर पीछे दिया यह तुम सुनो॥५॥

विद्युद्वित्किं कर्तुं शक्नोतीत्याह॥

बिजुली का जानने वाला क्या कर सकता है, इस विषय को कहते हैं॥

इन्द्राग्नी अ॒पादि॒यं पूर्वा॑गा॒त्प॒द्वती॑भ्यः।

हि॒त्वी शिरो॑ जि॒ह्वया॒ वाव॑दु॒च्चर॑त्ति॒ꣳशत्प॒दा न्य॑क्रमीत्॥६॥

इन्द्राग्नी इति। अपात्। इयम्। पूर्वा। आ। अगात्। पत्ऽवतीभ्यः। हित्वी। शिरः। जिह्वया। वावदत्। चरत्। त्रिंशत्। पदा। नि। अक्रमीत्॥६॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युतौ (**अपात्**) पादरहिता (**इयम्**) विद्युत् (**पूर्वा**) पूर्णाऽग्रस्था वा (**आ**) (**अगात्**) गच्छति (**पद्वतीभ्यः**) पद्भ्यां कृताभ्यो गतिभ्यः (**हित्वी**) त्यक्त्वा (**शिरः**) शिरोवन् मुख्यं वचनम् (**जिह्वया**) (**वाचा**) (**वावदत्**) भृशं वदति (**चरत्**) गच्छति (**त्रिंशत्**) आकाशं द्यां च वर्जयित्वा सर्वान् भूम्यादीन् पदार्थान् (**पदा**) पदानि (**नि**) नितराम् (**अक्रमीत्**) क्रामति॥६॥

अन्वयः-यो जिह्वया वावदद्येयमपात्पूर्वा पद्वतीभ्यश्शिरो हित्वी विद्युदागात्त्रिंशत् पदा न्यक्रमीत्सद्यश्चरत्तयेन्द्राग्नी विजानाति स एव मनुष्यो विद्युद्विद्याविद्भवति॥६॥

भावार्थः-हे विद्वांसो! भवन्तो यदि विद्युद्विद्यां सङ्गृह्णीयुस्तर्हि सर्वेभ्यो यानेभ्यः सद्यो गन्तुमन्यानि कार्याणि च साद्धुं शक्नुवन्ति॥६॥

पदार्थः-जो (**जिह्वया**) वाणी से (**वावदत्**) निरन्तर कहता है और जो (**इयम्**) यह (**अपात्**) पैररहित (**पूर्वा**) पूर्ण वा अग्रस्थ (**पद्वतीभ्यः**) पैरों से की हुई गतियों से (**शिरः**) शिर के तुल्य मुख्य वचन को (**हित्वी**) त्याग कर बिजुली (**आ, अगात्**) प्राप्त होती है तथा (**त्रिंशत्**) आकाश और प्रकाश को छोड़ कर सब भूमि आदि पदार्थरूपी (**पदा**) स्थानों को (**नि, अक्रमीत्**) क्रम-क्रम से पहुंचती और शीघ्र (**चरत्**) चलती है इससे (**इन्द्राग्नी**) वायु और बिजुली को जानता है, वही मनुष्य बिजुली की विद्या को जानने वाला होता है॥६॥

भावार्थः-हे विद्वानो! आप यदि बिजुली की विद्या को अच्छे प्रकार ग्रहण करो तो सब यानों से शीघ्र जाने को तथा और काम सिद्ध कर सकते हो॥६॥

के विजयिनो भवेयुरित्याह॥

कौन विजयी होते हैं, इस विषय को कहते हैं॥

इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः।
मा नो अस्मिन् महाधने परा वर्क्तं गविष्टिषु॥७॥

इन्द्राग्नी इति। आ। हि। तन्वते। नरः। धन्वानि। बाह्वोः। मा। नः। अस्मिन्। महाऽधने। परा। वर्क्तम्। गोऽइष्टिषु॥७॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युतौ (**आ**) (**हि**) खलु (**तन्वते**) विस्तृणन्ति (**नरः**) नायकाः (**धन्वानि**) धनूंषि (**बाह्वोः**) भुजयोर्मध्ये (**मा**) (**नः**) अस्मान् (**अस्मिन्**) (**महाधने**) स-ामे (**परा**) (**वर्क्तम्**) त्यजेताम् (**गविष्टिषु**) गवां किरणानामिष्टयः सङ्गतयो यासु क्रियासु तासु॥७॥

अन्वयः-हे मनुष्या! ये नर इन्द्राग्नी आ तन्वते बाह्वोर्हि धन्वानि धृत्वाऽस्मिन् महाधनेऽस्माँस्तन्वते गविष्टिषु प्रवीणाः सन्तो यथेन्द्राग्नी नो मा परा वर्क्तं तथा विदधति तान् वयं सङ्गच्छेमहि॥७॥

भावार्थः-ये राजप्रजाजना विद्युदादिनाऽऽग्नेयादीन्यस्त्राणि निर्माय स-ामस्य विजेतारो जायन्ते तेऽस्मिन् संसारे राज्यैश्वर्येण सुखं विस्तारयितुं शक्नुवन्ति॥७॥

पदार्थः-हे मनुष्यो! जो **(नरः)** नायक मनुष्य **(इन्द्राग्नी)** वायु और बिजुली को **(आ, तन्वते)** विस्तारते हैं और **(बाह्वोः)** भुजाओं में **(हि)** हि **(धन्वानि)** धनुषों को धारण कर **(अस्मिन्)** इस **(महाधने)** स-ाम में हम सब को विस्तारते हैं और **(गविष्टिषु)** किरणों की जिनमें मिलावटें हैं उन क्रियाओं में प्रवीण होते हुए जैसे वायु और बिजुली **(नः)** हम लोगों को **(मा, परा, वर्क्तम्)** मत छोड़ें वैसा करते हैं, उनको हम लोग मिलें॥७॥

भावार्थः-जो राजा प्रजाजन बिजुली आदि से आग्नेयादि अस्त्रों को बनाय संग्राम के जीतने वाले होते हैं, वे इस संसार में राज्यैश्वर्य्य से सुख बढ़ा सकते हैं॥७॥

पुनर्विद्वांसः कस्मात्कस्माद्विद्युतं सङ्गृह्णीयुरित्याह॥

फिर विद्वान् जन किस-किस से बिजुली का स-ह करें, इस विषय को कहते हैं॥

इन्द्रा॑ग्नी तप॑न्ति मा॒घा अ॒र्यो अरा॑तयः।

अप॒ द्वेषा॑ꣳस्या कृ॑तं युयु॒तं सूर्या॒दधि॑॥८॥

इन्द्रा॑ग्नी॒ इति॑। तप॑न्ति। मा। अ॒घाः। अ॒र्यः। अरा॑तयः। अप॑। द्वेषा॑ꣳसि। आ। कृ॒त॒म्। युयु॒त॒म्। सूर्या॑त्। अधि॑॥८॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युतौ **(तपन्ति)** **(मा)** **(अघाः)** हिंस्याः **(अर्यः)** स्वामी सन् **(अरातयः)** शत्रवः **(अप)** **(द्वेषांसि)** द्वेषयुक्तानि कर्माणि **(आ)** **(कृतम्)** कुर्य्यातम् **(युयुतम्)** विभाजयतम् **(सूर्यात्)** सवितृमण्डलात् **(अधि)** उपरिभावे॥८॥

अन्वयः-हे सभासेनेशौ! येऽरातय इन्द्राग्नी तपन्ति तेषां द्वेषांस्यपकृतं सूर्यादधि विद्युतमा युयुतम्। हे राजन्नर्यस्त्वमेताञ्छिल्पिनो माऽघाः॥८॥

भावार्थः-हे सराजका राजप्रजाजना यदि भवन्तः सूर्य्यादिभ्यो विद्युतं ग्रहीतुं विजानीयुस्तर्हि शत्रून् विजित्य द्वेष्टॄन् दूरीकर्तुं प्रभवेयुः॥८॥

पदार्थः-हे सभा सेनाधीशो! जो **(अरातयः)** शत्रुजन **(इन्द्राग्नी)** वायु और बिजुली को **(तपन्ति)** तपाते हैं उनके **(द्वेषांसि)** द्वेषयुक्त कामों को **(अप, कृतम्)** नष्ट करो और **(सूर्यात्)** सवितृमण्डल से **(अधि)** ऊपर जाने वाली बिजुली को **(आ, युयुतम्)** अलग करो। हे राजन्! **(अर्यः)** स्वामी आप इन शिल्पीजनों को **(मा, अघाः)** मत मारो॥८॥

भावार्थः-हे राजसहित राजप्रजा जनो! जो आप लोग सूर्यादिकों से बिजुली ग्रहण करना जानो तो शत्रुजनों को जीतकर द्वेषजीनों के दूर करने को समर्थ होओ॥८॥

क उत्तम धनं प्राप्नोतीत्याह॥

कौन उत्तम धनको प्राप्त होता है, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्राग्नी युवोरपि वसु दिव्यानि पार्थिवा।
आ न इह प्र यच्छतं रयिं विश्वायुपोषसम्॥ ९॥

इन्द्राग्नी इति। युवोः। अपि। वसु। दिव्यानि। पार्थिवा। आ। नः। इह। प्र। यच्छतम्। रयिम्। विश्वायुऽपोषसम्॥ ९॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युताविव सभासेनेशौ (**युवोः**) युवयोः (**अपि**) (**वसु**) वसूनि (**दिव्यानि**) अतीवोत्तमानि (**पार्थिवा**) पृथिव्यां भवानि (**आ**) (**नः**) (**इह**) (**प्र**) (**यच्छतम्**) (**रयिम्**) श्रियम् (**विश्वायुपोषसम्**) समग्रायुःपुष्टिकराम्॥ ९॥

अन्वयः-हे इन्द्राग्नी! सभासेनेशौ युवां यदीह नो विश्वायुपोषसं रयिं प्राऽयच्छतं तर्हि युवोरपि दिव्यानि पार्थिवा वस्वाधीनानि जायन्ताम्॥ ९॥

भावार्थः-हे मनुष्या! ये सभासेनेशा विद्युद्विद्यां विज्ञाय युष्मभ्यं प्रददति ते पूर्णायुष्करं धर्मेण प्राप्तं समग्रैश्वर्य्यं प्राप्नुवन्ति॥ ९॥

पदार्थः-हे (**इन्द्राग्नी**) वायु और बिजुली के समान सभा सेनाधीशो! तुम यदि (**इह**) यहाँ (**नः**) हमारी (**विश्वायुपोषसम्**) समस्त आयु के पुष्ट करने वाले (**रयिम्**) धन को (**प्र, आ, यच्छतम्**) अच्छे प्रकार देओ तो (**युवोः**) तुम्हारे (**अपि**) भी (**दिव्यानि**) अतीव उत्तम (**पार्थिवा**) पृथिवी में उत्पन्न हुए (**वसु**) धन आधीन हों॥ ९॥

भावार्थः-हे मनुष्यो! जो सभा सेनापति बिजुली की विद्या को जान कर तुम्हारे लिये देते हैं, वे पूर्ण आयु करने वाले धर्म से प्राप्त समग्र ऐश्वर्य को प्राप्त होते हैं॥ ९॥

मनुष्याः किं कृत्वा विद्युद्विद्यां जानीयुरित्याह॥

मनुष्या क्या करके बिजुली की विद्या जानें, इस विषय को कहते हैं॥

इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता।
विश्वाभिर्गीर्भिरा गतमस्य सोमस्य पीतये॥ १०॥ २६॥

इन्द्राग्नी इति। उक्थऽवाहसा। स्तोमेभिः। हवनऽश्रुता। विश्वाभिः। गीःभिः। आ। गतम्। अस्य। सोमस्य। पीतये॥ १०॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युताविव (**उक्थवाहसा**) प्रशंसितविद्याप्रापकौ (**स्तोमेभिः**) प्रशंसाभिः (**हवनश्रुता**) यौ हवनानि शृण्वतस्तौ (**विश्वाभिः**) समग्राभिः (**गीर्भिः**) विद्याशिक्षायुक्ताभिर्वाग्भिः (**आ**) (**गतम्**) आगच्छतम् (**अस्य**) (**सोमस्य**) महौषधिरसस्य (**पीतये**) पानाय॥ १०॥

अन्वयः-हे इन्द्राग्नी जानन्तावुक्थवाहसा हवनश्रुता! युवां स्तोमेभिर्विश्वाभिर्गीभिः सहास्य सोमस्य पीतय आ गतम्॥ १०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव विद्युद्विद्यां वेत्तुमर्हन्ति ये विद्वद्भ्यो विद्यां प्राप्तुं प्रयतन्त इति॥१०॥

अत्रेन्द्राऽग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनषष्टितमं सूक्तं षड्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्राग्नी)** वायु और बिजुली के समान पदार्थों को जानते हुए **(उक्थवाहसा)** प्रशंसित विद्या की प्राप्ति कराने और **(हवनश्रुता)** हवनों को सुनने वालो! तुम **(स्तोमेभिः)** प्रशंसाओं से और **(विश्वाभिः)** समस्त **(गीर्भिः)** विद्या और उत्तम शिक्षा युक्त वाणियों के साथ **(अस्य)** इस **(सोमस्य)** महौषधियों के रस के **(पीतये)** पीने को **(आ, गतम्)** आओ॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही बिजुली की विद्या को जानने योग्य होते हैं, जो विद्वानों से विद्या पाने का प्रयत्न करते हैं॥१०॥

इस सूक्त में इन्द्र और अग्नि के गुणों का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनसठवां सूक्त और छब्बीसवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चदशर्चस्य षष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्राग्नी देवते। १, ३ निचृत्त्रिष्टुप्। २ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४, ६, ७ विराड्गायत्री। ५, ९, ११ निचृद्गायत्री। ८, १०, १२ गायत्री छन्दः। षड्जः स्वरः। १३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १४ भुरिगनुष्टुप्। १५ विराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ क ऐश्वर्यं प्राप्नोतीत्याह॥

अब पन्द्रह ऋचावाले साठवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में कौन ऐश्वर्य को पाता है, इस विषय को कहते हैं॥

श्नथद् वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात्।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता॥ १॥

श्नथत्। वृत्रम्। उत। सनोति। वाजम्। इन्द्रा। यः। अग्नी इति। सहुरी इति। सपर्यात्। इरज्यन्ता। वसव्यस्य। भूरेः। सहः।तमा। सहसा। वाजऽयन्ता॥ १॥

पदार्थः-(**श्नथत्**) हिनस्ति (**वृत्रम्**) धनम् (**उत**) अपि (**सनोति**) प्राप्नोति (**वाजम्**) अन्नम् (**इन्द्रा**) (**यः**) (**अग्नी**) इन्द्राग्नी वायुविद्युतौ (**सहुरी**) सोढारौ (**सपर्यात्**) सेवेत (**इरज्यन्ता**) ऐश्वर्य्यं सम्पादयन्तौ (**वसव्यस्य**) वसुषु द्रव्येषु भवस्य (**भूरेः**) बहोः (**सहस्तमा**) अतिशयेन सोढारौ (**सहसा**) बलेन (**वाजयन्ता**) वाजमन्नादिकमिच्छन्तौ॥ १॥

अन्वयः-हे मनुष्या! यो विद्वान् सहुरी इरज्यन्ता सहस्तमा सहसा वाजयन्ता इन्द्राग्नी श्नथदुतापि सनोति वसव्यस्य भूरेर्वृत्रं सनोति वाजं सपर्यात् स एवैश्वर्यं प्राप्नुयात्॥ १॥

भावार्थः-हे मनुष्या! यदि भवन्तो वायुविद्युद्विद्यां विजानीयुस्तर्हि महैश्वर्या भूत्वा महतो राज्यस्य स्वामिनो भवेयुः॥ १॥

पदार्थः-हे मनुष्यो! (**यः**) जो विद्वान् (**सहुरी**) सहनशील (**इरज्यन्ता**) ऐश्वर्य को सिद्ध करते हुए वा (**सहस्तमा**) अतीव सहन करने वाले (**सहसा**) बल से (**वाजयन्ता**) अन्नादिकों की इच्छा करते हुए (**इन्द्रा, अग्नी**) पवन और बिजुली को (**श्नथत्**) ताड़ता है (**उत**) और (**सनोति**) प्राप्त होता है तथा (**वसव्यस्य**) धनादि पदार्थों में हुए (**भूरेः**) बहुत सुख से (**वृत्रम्**) धन को प्राप्त होता है और (**वाजम्**) अन्न को (**सपर्यात्**) सेवे वही ऐश्वर्य को पावे॥ १॥

भावार्थः-हे मनुष्यो! जो आप वायु और बिजुली की विद्या को जानो तो महान् ऐश्वर्य वाले होकर महान् राज्य के स्वामी होओ॥ १॥

मनुष्याः किं कृत्वा सुखं प्राप्नुवन्तीत्याह॥

मनुष्य क्या करके सुख पाते हैं, इस विषय को कहते हैं॥

ता योधिष्टमभि गा इन्द्र नूनमपः स्वरुषसो अग्न ऊळ्हाः।

दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान्॥ २॥

ता। योधिष्टम्। अभि। गाः। इन्द्र। नूनम्। अपः। स्वः। उषसः। अग्ने। ऊळ्हाः। दिशः। स्वः। उषसः। इन्द्र। चित्राः। अपः। गाः। अग्ने। युवसे। नियुत्वान्॥ २॥

पदार्थः-(**ता**) तौ (**योधिष्टम्**) युध्येयाताम् (**अभि**) (**गाः**) पृथिवीः (**इन्द्र**) परमैश्वर्ययुक्त (**नूनम्**) निश्चयेन (**अपः**) कर्म (**स्वः**) आदित्यः (**उषसः**) प्रभातवेलाः (**अग्ने**) विद्वन् (**ऊळ्हाः**) प्राप्ताः (**दिशः**) (**स्वः**) आदित्यः (**उषसः**) (**इन्द्र**) दुःखविदारक (**चित्राः**) (**अपः**) उदकानि (**गाः**) वाचः (**अग्ने**) विद्वन् (**युवसे**) संयोजयसि (**नियुत्वान्**) ईश्वर इव न्यायेशः॥ २॥

अन्वयः-हे इन्द्राग्ने वा! त्वं स्वरादित्य उषस इव गा नूनमपो युवसे याभ्यां दिश उळ्हास्ता विदित्वा युवामभि योधिष्टम्। हे इन्द्राग्ने वा नियुत्वाँस्त्वं स्वरादित्य उषस इव चित्रा अपो गा युवसे तस्मान्नियुत्वानसि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या वायुविद्युद्वत्पराक्रमिणो भूत्वा युद्धमाचरेयुस्त उषसः सूर्य इव प्रजा न्यायेन प्रकाशयित्वा सर्वदिक्कीर्त्तयो भूत्वाऽद्भुता वाचो बलानि भूमिराज्यं च प्राप्नुवन्ति॥ २॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्ययुक्त (**अग्ने**) विद्वन् वा! आप (**स्वः**) आदित्य (**उषसः**) प्रभातवेलाओं को जैसे वैसे (**गाः**) पृथिवी और (**नूनम्**) निश्चय से (**अपः**) कर्म को (**युवसे**) संयुक्त करते हो और जिनसे (**दिशः**) दिशायें (**ऊळ्हाः**) प्राप्त हुई (**ता**) उनको जानकर तुम दोनों (**अभि, योधिष्टम्**) सब ओर से युद्ध करो। हे (**इन्द्र**) दुःखविदारक= दुःख के नाश करने वाले वा (**अग्ने**) विद्वान् जन (**नियुत्वान्**) ईश्वर के समान न्यायाधीश! आप (**स्वः**) आदित्य (**उषसः**) प्रभातवेलाओं के समान (**चित्राः**) चित्रविचित्र (**अपः**) उदक (**गाः**) और वाणियों को संयुक्त करते हो, इससे ईश्वर के समान न्यायकर्त्ता हो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य वायु और बिजुली के तुल्य पराक्रमी होकर युद्ध का आचरण करें, वे उषाकाल को जैसे सूर्य उसी के समान प्रजाओं को न्याय से प्रकाश को प्राप्त कराय कर और सर्व दिशाओं में कीर्ति वाले हो अद्भुत वाणी, बलों और भूमि के राज्य को प्राप्त होते हैं॥ २॥

पुना राजाजनाः कीदृशा भवेयुरित्याह॥

फिर राजा जन कैसे हों, इस विषय को कहते हैं॥

आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्रं यातं नमोभिरग्ने अर्वाक्।

युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः॥ ३॥

आ। वृत्रऽहना। वृत्रऽहभिः। शुष्मैः। इन्द्र। यातम्। नमःऽभिः। अग्ने। अर्वाक्। युवम्। राधःऽभिः। अकवेभिः। इन्द्र। अग्ने। अस्मे इति। भवतम्। उत्ऽतमेभिः॥ ३॥

पदार्थः-(**आ**) (**वृत्रहणा**) यौ वृत्रं मेघं हतस्तौ (**वृत्रहभिः**) यैः कर्मभिर्वृत्रं हतस्तैः (**शुष्मैः**) बलैः (**इन्द्र**) विद्युदिव राजन् (**यातम्**) आगच्छतम् (**नमोभिः**) अन्नादिभिः (**अग्ने**) पावक इव सभ्यजन (**अर्वाक्**) पश्चात् (**युवम्**) युवाम् (**राधोभिः**) धनैः (**अकवेभिः**) असङ्ख्यैः (**इन्द्र**) दुष्टविदारक (**अग्ने**) पापिप्रतापक (**अस्मे**) अस्मभ्यम् (**भवतम्**) (**उत्तमेभिः**) श्रेष्ठैः॥ ३॥

अन्वयः-हे इन्द्राग्ने वायुविद्युद्वर्त्तमानौ! यथा वृत्रहणा विद्युतौ वृत्रहभिः शुष्मैर्नमोभिरर्वाग्गच्छतस्तथा युवमकवेभी राधोभिरस्माना यातम्। हे इन्द्राग्ने! उत्तमेभिः कर्मभिरस्मे सुखकरौ भवतम्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजाऽस्याऽमात्याश्च वायुविद्युद्वदुपकारिणः स्युस्तेऽसङ्ख्यं धनमाप्नुयुः॥ ३॥

पदार्थः-हे (**इन्द्र**) बिजुली के समान राजजन वा (**अग्ने**) अग्नि के समान सभ्यजन वायु और बिजुली के समान वर्त्तमान दोनों पुरुषो! जैसे (**वृत्रहणा**) मेघ को हननेवाले बिजुली के दो भाग (**वृत्रहभिः**) उन कर्म्मों से जिन से मेघ को मारते वा (**शुष्मैः**) बलों से वा (**नमोभिः**) अन्नादि पदार्थों से (**अर्वाक्**) पीछे जाते हैं, वैसे (**युवम्**) तुम दोनों (**अकवेभिः**) असङ्ख्य (**राधोभिः**) धनों से हम लोगों को (**आ, यातम्**) प्राप्त होओ। हे (**इन्द्र**) दुष्टविदारक वा (**अग्ने**) पापियों को सन्तप्त करने वाले! (**उत्तमेभिः**) श्रेष्ठ कर्मों से (**अस्मे**) हम लोगों के लिये सुख करने वाले (**भवतम्**) होओ॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा और राजमन्त्री वायु और बिजुली के समान उपकारी हों, वे असङ्ख्य धन को प्राप्त हों॥ ५॥

मनुष्यैर्वायुविद्युतौ यथावद्विज्ञातव्यावित्याह॥

मनुष्यों को चाहिये कि वायु और बिजुली को यथावत् जानें, इस विषय को कहते हैं॥

ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम्। इन्द्राग्नी न मर्धतः॥ ४॥

ता। हुवे। ययोः। इदम्। पप्ने। विश्वम्। पुरा। कृतम्। इन्द्राग्नी इति। न। मर्धतः॥ ४॥

पदार्थः-(**ता**) तौ (**हुवे**) (**ययोः**) (**इदम्**) (**पप्ने**) ययोः सकाशाद्व्यवहारे (**विश्वम्**) सर्वं जगत् (**पुरा**) (**कृतम्**) (**इन्द्राग्नी**) वायुविद्युतौ (**न**) निषेधे (**मर्धतः**) हिंसतः॥ ४॥

अन्वयः-ययोरिदं विश्वं पप्ने याविन्द्राग्नी पुरा कृतमिदं विश्वं न मर्धतस्ताऽहं हुवे॥ ४॥

भावार्थः-हे मनुष्या! याभ्यां वायुविद्युद्भ्यां सर्वं जगत् व्यवहरति यौ जगति स्थित्वा कञ्चन न हिंसतो विकृतौ सन्तौ नाशयतस्तौ मनुष्यैर्विज्ञाय यथावदुपकर्त्तव्यम्॥ ४॥

पदार्थः-(**ययोः**) जिनका (**इदम्**) यह (**विश्वम्**) समस्त जगत् वा (**पप्ने**) जिन से प्रवृत्त हुए व्यवहार में (**इन्द्राग्नी**) वायु और बिजुली (**पुरा**) पहिले (**कृतम्**) किये हुए इस विश्व को (**न**) नहीं (**मर्धतः**) नष्ट करते हैं (**ता**) उनको मैं (**हुवे**) ग्रहण करता हूं॥ ४॥

भावार्थः-हे मनुष्यो! जिन वायु और बिजुली से सब जगत् व्यवहार करता है तथा जो संसार में स्थिर हो किसी को नष्ट नहीं करते हैं और विकार को प्राप्त हुए वे नष्ट करते हैं, मनुष्यों को चाहिये कि उनको जान कर यथावत् उपकार करें॥४॥

पुनर्वायुविद्युतौ कीदृश्यौ भवत इत्याह॥

फिर वायु और बिजुली कैसे है, इस विषय को कहते हैं॥

उ॒ग्रा वि॑घ॒निना॒ मृध॑ इन्द्रा॒ग्नी ह॑वामहे। ता नो॑ मृळात ई॒दृशे॑॥५॥२७॥

उ॒ग्रा। वि॒ऽघ॒निना॑। मृध॑ः। इ॒न्द्रा॒ग्नी इति॑। ह॒वा॒म॒हे॒। ता। नः॒। मृ॒ळा॒तः॒। ई॒दृशे॑॥५॥

पदार्थः-(**उग्रा**) तेजस्विनौ (**विघनिना**) विशेषेण हन्तारौ (**मृधः**) स-ामान् (**इन्द्राग्नी**) वायुविद्युतौ (**हवामहे**) आदद्मः (**ता**) तौ (**नः**) अस्मान् (**मृळातः**) सुखयतः (**ईदृशे**) युद्धप्रकारके व्यवहारे॥५॥

अन्वयः-हे मनुष्या! वयमुग्रा विघनिनेन्द्राग्नी हवामहे ताभ्यां मृधो विजयामहे यावीदृशे व्यवहारे नो मृळातस्ता यूयमपि विजानीत॥५॥

भावार्थः-मनुष्यैर्वायुविद्युतौ यथावद्विज्ञाय सम्प्रयुज्य स-ामान् विजित्य सुखं प्राप्तव्यम्॥५॥

पदार्थः-हे मनुष्यो! हम लोग (**उग्रा**) तेजस्वी (**विघनिना**) विशेष हनने वाले (**इन्द्राग्नी**) वायु और बिजुली को (**हवामहे**) ग्रहण करते हैं उनसे (**मृधः**) स-ामों को जीतते हैं जो (**ईदृशे**) ऐसे युद्धप्रकारक व्यवहार में (**नः**) हम लोगों को (**मृळातः**) सुखी करते हैं (**ता**) उन दोनों को तुम भी जानो॥५॥

भावार्थः-मनुष्यों को वायु और बिजुली यथावत् जान और उनका संप्रयोग कर स-ामों को जीत सुख पाना चाहिये॥५॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

ह॒तो वृ॒त्राण्यार्या॑ ह॒तो दासा॑नि॒ सत्प॑ती। ह॒तो विश्वा॒ अप॒ द्विष॑ः॥६॥

ह॒तः॒। वृ॒त्राणि॑। आर्या॑। ह॒तः॒। दासा॑नि। सत्प॑ती॒ इति॒ सत्ऽप॑ती। ह॒तः॒। विश्वा॑। अप॑। द्विष॑ः॥६॥

पदार्थः-(**हतः**) हिंसकः (**वृत्राणि**) मेघाऽवयवान् (**आर्या**) उत्तमगुणकर्मस्वभावौ (**हतः**) (**दासानि**) दानानि (**सत्पती**) सतां पुरुषाणां व्यवहाराणां वा पालकौ (**हतः**) (**विश्वा**) अखिलान् (**अप**) (**द्विषः**) शत्रून्॥६॥

अन्वयः-हे मनुष्या! यावार्या सत्पती सूर्य्यविद्युतौ वृत्राणीव विश्वा द्विषोप हतः। दासान्यप हतो दुःखान्यप हतस्तौ सत्कर्त्तव्यौ॥६॥

भावार्थः-हे मनुष्या! ये श्रेष्ठगुणकर्मस्वभावा मनुष्याः सत्यधर्मनिष्ठा आप्तानां पालका दुष्टानां प्रहर्त्तारः स्युस्तान् सदा सत्कुरुत॥६॥

पदार्थः-हे मनुष्यो! जो **(आर्या)** उत्तम गुणकर्मस्वभावयुक्त **(सत्पती)** सज्जन पुरुषों के व्यवहारों के पालने वाले सूर्य्य और बिजुली **(वृत्राणि)** मेघ के अवयवों को जैसे वैसे **(विश्वा)** समस्त **(द्विषः)** शत्रुजनों को **(अप, हतः)** मारते हैं वा **(दासानि)** दानों को **(हतः)** नष्ट करते हैं वा दुःखों को **(हतः)** दूर करते हैं, वे सत्कार करने योग्य हैं॥६॥

भावार्थः-हे मनुष्यो! जो श्रेष्ठ गुणकर्मस्वभाव वाले मनुष्य, सत्य धर्मनिष्ठ, आप्त सज्जनों के पालने और दुष्टों को हरने वाले हों, उनका सदा सत्कार करो॥६॥

पुनस्तौ कीदृशावित्याह॥

फिर वे दोनों कैसे है, इस विषय को कहते हैं॥

इन्द्राग्नी युवामिमे३भि स्तोमा अनूषत। पिबतं शंभुवा सुतम्॥७॥

इन्द्राग्नी इति। युवाम्। इमे। अभि। स्तोमाः। अनूषत। पिबतम्। शम्ऽभुवा। सुतम्॥७॥

पदार्थः-(**इन्द्राग्नी**) सूर्य्यविद्युताविव सभासेनेशौ (**युवाम्**) (**इमे**) (**अभि**) (**स्तोमाः**) प्रशंसाः (**अनूषत**) प्रशंसन्ति (**पिबतम्**) (**शम्भुवा**) यौ शं सुखं भावयतस्तौ (**सुतम्**) अभिनिष्पादितं दुग्धादिरसम्॥७॥

अन्वयः-हे शम्भुवा इन्द्राग्नी! युवां य इमे स्तोमा अभ्यनूषत तैः सुतं पिबतम्॥७॥

भावार्थः-हे सभासेनेशौ! भवन्तौ पथ्याचारेण सदौषधिरसं पीत्वाऽरोगौ भूत्वा प्रशंसितानि कर्माणि कुर्याताम्॥७॥

पदार्थः-हे **(शम्भुवा)** सुख की भावना कराने वाले **(इन्द्राग्नी)** सूर्य्य और बिजुली के समान सभासेनाधीशो! **(युवाम्)** आप दोनों जो **(इमे)** ये **(स्तोमाः)** प्रशंसायें **(अभि, अनूषत)** प्रशंसा करती हैं उनसे **(सुतम्)** सब ओर से उत्पन्न किये हुए दूध आदि रस को **(पिबतम्)** पिओ॥७॥

भावार्थः-हे सभासेनाधीशो! आप लोग पथ्य आचार से सदा ओषधियों के रस को पीके अरोगी होकर प्रशंसित कर्मों को करो॥७॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा। इन्द्राग्नी ताभिरा गतम्॥८॥

या। वाम्। सन्ति। पुरुऽस्पृहः। निऽयुतः। दाशुषे। नरा। इन्द्राग्नी इति। ताभिः। आ। गतम्॥८॥

पदार्थः-(**या**) याः (**वाम्**) युवयोः (**सन्ति**) (**पुरुस्पृहः**) पुरून् बहूनुत्तमान् कामानभिकाङ्क्षयन्ति याभिस्ताः (**नियुतः**) निश्चिताः (**दाशुषे**) दात्रे (**नरा**) नायकौ (**इन्द्राग्नी**) विद्यैश्वर्य्ययुक्तावध्यापकोपदेशकौ (**ताभिः**) स्पृहाभिः (**आ**) (**गतम्**) आगच्छतम्॥८॥

अन्वयः-हे नरा इन्द्राग्नी! वा या पुरुस्पृहो नियुतः सन्ति ताभिर्दाशुष आ गतम्॥८॥

भावार्थः-ये मनुष्याः परोपकारं चिकीर्षन्ति त एव सत्पुरुषा भवन्ति॥८॥

पदार्थः-हे **(नरा)** नायक **(इन्द्राग्नी)** विद्या और ऐश्वर्य्ययुक्त अध्यापक और उपदेशको! **(वाम्)** तुम दोनों की **(या)** जो **(पुरुस्पृहः)** बहुतों की चाहना करते जिनसे वे **(नियुतः)** निश्चित **(सन्ति)** हैं **(ताभिः)** उन इच्छाओं से **(दाशुषे)** दान देने वाले के लिये **(आ, गतम्)** आओ॥८॥

भावार्थः-जो मनुष्य परोपकार करने की इच्छा करते हैं, वे ही सत्पुरुष होते हैं॥८॥

पुनस्तौ किं कुर्यातमित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

ताभि॒रा ग॑च्छतं न॒रोप॒ेदं सव॑नं सु॒तम्। इन्द्रा॑ग्नी॒ सोम॑पीतये॥९॥

ताभिः। आ। ग॒च्छ॒तम्। न॒रा॒। उप॑। इ॒दम्। सव॑नम्। सु॒तम्। इन्द्रा॑ग्नी॒ इति॑। सोम॑ऽपीतये॥९॥

पदार्थः-(**ताभिः**) स्पृहाभिः **(आ)** **(गच्छतम्)** समन्तात् प्राप्नुतम् **(नरा)** नायकौ **(उप)** **(इदम्)** **(सवनम्)** येन सूयते तत् **(सुतम्)** सुसंस्कृतम् **(इन्द्राग्नी)** इन्द्रवायू इव सज्जनौ **(सोमपीतये)** सोमस्य पानाय॥९॥

अन्वयः-हे नरेन्द्राग्नी! युवां ताभिः सोमपीतय इदं सुतं सवनमुपाऽऽगच्छतम्॥९॥

भावार्थः-यजमाना विदुष आहूय सदैव सत्कुर्य्युः सत्कृतास्ते च यजमानान् धर्मपथं नयेयुः॥९॥

पदार्थः-हे **(नरा)** नायक **(इन्द्राग्नी)** बिजुली और वायु के समान सज्जनो! तुम दोनों **(ताभिः)** उन इच्छाओं से **(सोमपीतये)** सोमपान के लिये **(इदम्)** इस **(सुतम्)** अच्छे प्रकार संस्कार किये हुए **(सवनम्)** जिससे उत्पन्न करते हैं उसके **(उप, आ, गच्छतम्)** समीप प्राप्त होओ॥९॥

भावार्थः-यजमान जन विद्वानों को बुलाकर सदैव सत्कार करें और सत्कार पाये हुए वे लोग भी यजमानों को धर्मपथ को प्राप्त करावें॥९॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को कहते हैं॥

तमी॑ळिष्व॒ यो अ॒र्चिषा॒ वना॒ विश्वा॑ परि॒ष्वज॑त्।

कृ॒ष्णा कृ॒णोति॑ जि॒ह्वया॑॥१०॥२८॥

तम्। ई॒ळि॒ष्व॒। यः। अ॒र्चिषा॑। वना॑। विश्वा॑। प॒रि॒ऽस्वज॑त्। कृ॒ष्णा। कृ॒णोति॑। जि॒ह्वया॑॥१०॥

पदार्थः-(**तम्**) **(ईळिष्व)** प्रशंसाऽध्यन्विच्छ वा **(यः)** **(अर्चिषा)** सत्कारेण **(वना)** वनानि किरणान् **(विश्वा)** सर्वाणि **(परिष्वजत्)** सर्वतः सम्बध्नाति **(कृष्णा)** कर्षणानि **(कृणोति)** **(जिह्वया)**॥१०॥

अन्वयः-हे विद्वन्! यथा सूर्य्योऽर्चिषा विश्वा वना परिष्वजत् कृष्णा कृणोति तथा यो जिह्वया सत्याचारं परिष्वजत्तं त्वमीळिष्व॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यप्रकाशेन सर्वे पदार्था यथावद् दृश्यन्ते तथैव विद्यया सर्वे पदार्थाः प्रकाश्यन्ते॥१०॥

पदार्थः-हे विद्वन् जन! जैसे सूर्य्य **(अर्चिषा)** सत्कार से **(विश्वा)** समस्त **(वना)** किरणों का **(परिष्वजत्)** सब ओर से सम्बन्ध करता है तथा **(कृष्णा)** पदार्थों की खीचों को **[**=पदार्थों का कर्षण**]** **(कृणोति)** करता है, वैसे **(यः)** जो **(जिह्वया)** जिह्वा से सत्य आचरण का सम्बन्ध करे **(तम्)** उसकी आप **(ईळिष्व)** प्रशंसा वा याचना करो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य्य के प्रकाश से सब पदार्थ यथावत् दीखते हैं, वैसे ही विद्या से सब पदार्थ प्रकाशित होते हैं॥१०॥

पुनर्मनुष्यैः कस्मै किं सेवितव्यमित्याह॥

फिर मनुष्यों को किसके लिये क्या सेवन करना चाहिये, इस विषय को कहते हैं॥

य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः। द्युम्नाय सुतरा अपः॥११॥

यः। इद्धे। आऽविवासति। सुम्नम्। इन्द्रस्य। मर्त्यः। द्युम्नाय। सुऽतराः। अपः॥११॥

पदार्थः-(**यः**) यजमानः (**इद्धे**) प्रदीप्ते (**आविवासति**) समन्तात्सेवते (**सुम्नम्**) सुखम् (**इन्द्रस्य**) ऐश्वर्यस्य (**मर्त्यः**) मनुष्यः (**द्युम्नाय**) यशसे धनाय वा (**सुतराः**) सुष्ठु तरन्ति यासु ताः (**अपः**) जलानि॥११॥

अन्वयः-यो मर्त्य इद्ध इन्द्रस्य द्युम्नाय सुतरा अपः सुम्नं चाऽऽविवासति स भाग्यवाञ्जायते॥११॥

भावार्थः-मनुष्या यथेद्धे पावके सुगन्ध्यादि हविर्हुत्वा सिद्धकामा भवन्ति तथैव ये यशसा धर्म्मकीर्त्यै स्वर्ग्याय च प्रयतन्ते ते सुतरां श्रीमन्तो जायते॥११॥

पदार्थः-(**यः**) जो (**मर्त्यः**) मनुष्य (**इद्धे**) प्रदीप्त व्यवहार में (**इन्द्रस्य**) ऐश्वर्य के (**द्युम्नाय**) यश वा धन के लिये (**सुतराः**) सुन्दरता से जिनमें तैरें उन (**अपः**) जलों को और (**सुम्नम्**) सुख को (**आविवासति**) सब ओर से सेवता है, वह भाग्यवान् होता है॥११॥

भावार्थः-मनुष्य जैसे प्रदीप्त अग्नि में सुगन्ध्यादि पदार्थों की हवि होम कर सिद्धकाम होते हैं, वैसे जो यश से धर्मकीर्त्ति वा स्वर्ग के लिये प्रयत्न करते हैं, वे निरन्तर श्रीमान् होते हैं॥११॥

पुनर्मनुष्यैः केन किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को किससे क्या करने योग्य है, इस विषय को कहते हैं॥

ता नो वाजवतीरिष आशून् पिपृतमर्वतः। इन्द्रमग्निं च वोळ्हवे॥१२॥

ता। नः। वाजऽवतीः। इषः। आशून्। पिपृतम्। अर्वतः। इन्द्रम्। अग्निम्। च। वोळ्हवे॥१२॥

पदार्थः-(**ता**) तौ (**नः**) अस्मभ्यम् (**वाजवतीः**) प्रशस्तविज्ञानयुक्तान् (**इषः**) अन्नादीन् (**आशून्**) आशुगामिनः (**पिपृतम्**) पूरयेताम् (**अर्वतः**) अश्वान् (**इन्द्रम्**) विद्युतम् (**अग्निम्**) प्रसिद्धं पावकम् (**च**) (**वोळ्हवे**) विमानादियानानां वाहनाय॥१२॥

अन्वय:-हे मनुष्या! यूयं यौ नो वाजवतीरिष आशूनर्वत: पिपृतं तेन्द्रमग्निं च वोळ्हवे सङ्गृह्णीत॥१२॥

भावार्थ:-हे मनुष्या! यूयं विद्युदादिपदार्थैर्विमानादीनि यानानि चालयित्वेच्छा: पूरयत॥१२॥

पदार्थ:-हे मनुष्यो! तुम जो **(न:)** हमारे लिये **(वाजवती:)** प्रशस्त विज्ञानयुक्त **(इष:)** अन्नादि पदार्थों और **(आशून्)** शीघ्रगामी **(अर्वत:)** घोड़ों को **(पिपृतम्)** पूर्ण करते हैं **(ता)** उन **(इन्द्रम्)** बिजुली रूप अग्नि **(अग्निम्, च)** और प्रसिद्ध अग्नि को **(वोळ्हवे)** विमान आदि यानों को वहाने के लिये स-ह करो॥१२॥

भावार्थ:-हे मनुष्यो! तुम बिजुली आदि पदार्थों से विमान आदि यानों को चलाकर इच्छओं को पूर्ण करो॥१२॥

पुन: शिल्पिनस्ताभ्यां किं कुर्य्युरित्याह॥

फिर शिल्पीजन उनसे क्या करें, इस विषय को कहते हैं॥

उ॒भा वा॑मिन्द्राग्नी आहु॒वध्या॑ उ॒भा राध॑स: स॒ह मा॑दु॒यध्यै॑।
उ॒भा दा॒तारा॑वि॒षां र॑यी॒णामु॒भा वाज॑स्य सा॒तये॑ हुवे वाम्॥१३॥

उ॒भा। वा॒म्। इ॒न्द्रा॒ग्नी॒ इति॑। आ॒ऽहु॒वध्यै॑। उ॒भा। राध॑सः। स॒ह। मा॒दु॒यध्यै॑। उ॒भा। दा॒तारौ॑। इ॒षाम्। र॒यी॒णाम्। उ॒भा। वाज॑स्य। सा॒तये॑। हु॒वे॒। वा॒म्॥१३॥

पदार्थ:-**(उभा)** उभौ **(वाम्)** युवयो: **(इन्द्राग्नी)** सूर्य्यविद्युतौ **(आहुवध्यै)** आह्वयितुम् **(उभा)** **(राधस:)** धनस्य **(सह)** **(मादयध्यै)** आनन्दयितुम् **(उभा)** **(दातारौ)** **(इषाम्)** अन्नादीनाम् **(रयीणाम्)** धनानाम् **(उभा)** **(वाजस्य)** विज्ञानस्य स-ामस्य वा **(सातये)** संविभागाय **(हुवे)** आदद्मि **(वाम्)** युवाम्॥१३॥

अन्वय:-हे शिल्पविद्याऽध्यापकोपदेशकौ! यथा वां युवयो: समीपे स्थित्वाऽऽहुवध्या उभेन्द्राग्नी राधसो मादयध्या उभा सह उभेषां रयीणां दातारा उभा वाजस्य सातयेऽहं हुवे तथोभा वामेतद्विद्यां बोधयेयम्॥१३॥

भावार्थ:-ये मनुष्या वायुविद्युतौ यथावद्विदत्वा कार्येषु सम्प्रयुञ्जते ते श्रीपतयो जायन्ते॥१३॥

पदार्थ:-हे शिल्पविद्या के अध्यापक और उपदेश करने वालो! जैसे **(वाम्)** तुम्हारे समीप स्थिर होकर **(आहुवध्यै)** आह्वान करने को **(उभा)** दोनों **(इन्द्राग्नी)** सूर्य्य और बिजुली को **(राधस:)** धन सम्बन्धी **(मादयध्यै)** आनन्द देने को **(उभा)** दोनों को **(सह)** एक साथ **(उभा)** और दोनों को **(इषाम्)** अन्नादि पदार्थों के वा **(रयीणाम्)** धनादि पदार्थों के **(दातारौ)** देने वाले तथा **(उभा)** दोनों को **(वाजस्य)** विज्ञान वा स-ाम के **(सातये)** संविभाग के लिये मैं **(हुवे)** स्वीकार करता हूं, वैसे ही **(वाम्)** तुम दोनों को इस विद्या का बोध कराऊं॥१३॥

भावार्थ:-जो मनुष्य वायु और बिजुली को यथावत् जान के कार्य्यों में उनका अच्छे प्रकार प्रयोग करते हैं, वे श्रीपति होते हैं॥१३॥

पुनर्मनुष्यैः कैः सह मित्रता कार्येत्याह॥

फिर मनुष्यों को किन के साथ मित्रता करनी चाहिये, इस विषयको कहते हैं॥

आ नो॒ गव्ये॑भि॒रश्व्यै॑र्व॒सव्यै॒रुप॑ गच्छतम्।
सखा॑यौ दे॒वौ स॒ख्याय॑ शं॒भुवे॑न्द्राग्नी ता ह॑वामहे॥ १४॥

आ। नः। गव्येभिः। अश्व्यैः। वसव्यैः। उप। गच्छतम्। सखायौ। देवौ। सख्याय। शम्ऽभुवा। इन्द्राग्नी इति। ता। हवामहे॥ १४॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मान् (**गव्येभिः**) गोर्विकारैर्घृतादिभिः (**अश्व्यैः**) अश्वेषु भवैर्गुणैः (**वसव्यैः**) वसुषु द्रव्येषु भवैः सुखैः (**उप**) (**गच्छतम्**) (**सखायौ**) सुहृदौ (**देवौ**) विद्वांसौ (**सख्याय**) मित्रत्वाय (**शम्भुवा**) सुखंभावुकौ (**इन्द्राग्नी**) सूर्य्यविद्युताविव वर्त्तमानौ (**ता**) तौ (**हवामहे**) आह्वयामहे॥ १४॥

अन्वयः-हे अध्यापकोपदेशकविन्द्राग्नी इव वर्त्तमानौ शम्भुवा देवौ सखायौ नः सख्याय गव्येभिरश्व्यैर्वसव्यैः सह वर्त्तमानौ युवां वयं हवामहे ता युवामस्मानुपाऽऽगच्छतम्॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या विद्वन्मित्रा भूत्वा पदार्थविद्यां चिकीर्षन्ति तेऽवश्यं विज्ञानं प्राप्नुवन्ति॥ १४॥

पदार्थः-हे अध्यापक और उपदेशको (**इन्द्राग्नी**) सूर्य और बिजुली के समान वर्त्तमान वा (**शम्भुवा**) सुख की भावना कराने वाले (**देवौ**) विद्वान् (**सखायौ**) मित्र (**नः**) हम लोगों को (**सख्याय**) मित्रता के लिये (**गव्येभिः**) गो घृत आदि पदार्थ (**अश्व्यैः**) अश्वादिकों में हुए गुणों और (**वसव्यैः**) धनादिकों में हुए सुखों के साथ वर्त्तमान तुम दोनों को हम लागे (**हवामहे**) बुलाते हैं (**ता**) वे तुम दोनों हम लोगों के (**उप, आ, गच्छतम्**) समीप आओ॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्वानों के मित्र होकर पदार्थविद्या सिद्ध करने की इच्छा करते हैं, वे अवश्य विज्ञान को प्राप्त होते हैं॥ १४॥

पुनस्तौ किं कुर्य्यातामित्याह॥

फिर वे दोनों क्या करें, इस विषय को कहते हैं॥

इन्द्रा॑ग्नी शृणु॒तं हव॒ं यज॑मानस्य सुन्व॒तः।
वी॒तं ह॒व्यान्या ग॑त॒ं पिब॑तं सो॒म्यं मधु॑॥ १५॥ २९॥

इन्द्राग्नी इति। शृणुतम्। हवम्। यजमानस्य। सुन्वतः। वीतम्। हव्यानि। आ। गतम्। पिबतम्। सोम्यम्। मधु॥ १५॥

पदार्थः-(**इन्द्राग्नी**) वायुविद्युताविव वर्त्तमानावध्यापकोपदेशकौ (**शृणुतम्**) (**हवम्**) ममाऽधीतविषयम् (**यजमानस्य**) शुभगुणादातुः (**सुन्वतः**) पदार्थविद्यया बहून् पदार्थान्निष्पादयतः (**वीतम्**)

प्राप्नुतं व्याप्नुतं वा **(हव्यानि)** **(आ)** **(गतम्)** आगच्छतम् **(पिबतम्)** **(सोम्यम्)** सोममर्हम् **(मधु)** मधुरादियुक्तं रसम्॥१५॥

अन्वयः-हे इन्द्राग्नी! युवां सुन्वतो यजमानस्य हवं शृणुतं हव्यानि वीतं तत्सान्निध्यमा गतं सोम्यं मधु पिबतम्॥१५॥

भावार्थः-सर्वैर्मनुष्यैरामन्त्रणेन विदुषामाह्वानं कृत्वैतान् सत्कृत्यैतेभ्यः स्वविद्यां परीक्षयित्वाऽधिका विद्या ग्रहीतव्येति॥१५॥

अत्रेन्द्राऽग्निगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्टितमं सूक्तमेकोनत्रिंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्राग्नी)** वायु और बिजुली के समान वर्त्तमान अध्यापक और उपदेशको! तुम दोनों **(सुन्वतः)** पदार्थविद्या से बहुत पदार्थों को उत्पन्न करते हुए **(यजमानस्य)** शुभ गुण देने वाले मेरे **(हवम्)** पढ़े विषय को **(शृणुतम्)** सुनो और **(हव्यानि)** पदार्थों को **(वीतम्)** प्राप्त होओ वा व्याप्त होओ उनके समीप **(आ, गतम्)** आओ और **(सोम्यम्)** शान्ति शीतलता के जो योग्य है उस **(मधु)** मधुरादि युक्त रस को **(पिबतम्)** पिओ॥१५॥

भावार्थः-सब मनुष्यों को चाहिये कि आमन्त्रण से विद्वानों को बुलाकर इनका सत्कार कर इनसे अपनी विद्या की परीक्षा कराय अधिक विद्या ग्रहण करें॥१५॥

इस सूक्त में इन्द्र और अग्नि के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह साठवां सूक्त और उनतीसवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्दशर्चस्यैकषष्टितमस्य सूक्तस्य बार्हस्पत्य ऋषिः। सरस्वती देवता। १, १३ निचृज्जगती। २ जगती। ३ विराड्जगती छन्दः। निषादः स्वरः। ४, ९, ११, १२ निचृद्गायत्री। ५, ६, १० विराड्गायत्री। ७, ८ गायत्री छन्दः। षड्जः स्वरः। १४ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथेयं वाक् किं ददातीत्याह॥

अब चौदह ऋचावाले एकसठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में यह वाणी क्या देती है, इस विषय को कहते हैं॥

इ॒यम॑ददा॒द् रभ॒समृ॑ण॒च्युतं॑ दिवो॑दासं वध्र्यश्वाय॑ दा॒शुषे॑।
या शश्व॑न्तमाच॒खादा॑व॒सं प॒णिं ता ते॑ दा॒त्राणि॑ त॒विषा॑ स॑रस्वति॥ १॥

इ॒यम्। अ॒द॒दा॒त्। रभ॒सम्। ऋ॒ण॒ऽच्युत॑म्। दिव॑ःऽदासम्। व॒ध्रि॒ऽअ॒श्वाय॑। दा॒शुषे॑। या। शश्व॑न्तम्। आ॒ऽच॒खाद॑। अ॒व॒सम्। प॒णिम्। ता। ते॒। दा॒त्राणि॑। त॒विषा॑। स॒र॒स्व॒ति॥ १॥

पदार्थः-(**इयम्**) (**अददात्**) ददाति (**रभसम्**) वेगम् (**ऋणच्युतम्**) ऋणादयुक्तम् (**दिवोदासम्**) विद्याप्रकाशस्य दातारम् (**वध्र्यश्वाय**) वध्र्यो वर्धका अश्वा यस्य तस्मै (**दाशुषे**) दात्रे (**या**) (**शश्वन्तम्**) अनादिभूतं वेदविद्याविषयम् (**आचखाद**) स्थिरीकरोति (**अवसम्**) रक्षकम् (**पणिम्**) प्रशंसनीयम् (**ता**) तानि (**ते**) तव (**दात्राणि**) दानानि (**तविषा**) बलेन (**सरस्वति**) विदुषि॥ १॥

अन्वयः-हे सरस्वति! येयं वध्र्यश्वाय दाशुषे रभसमृणच्युतं दिवोदासमददाच्छश्वन्तमवसं पणिमाचखाद सा ते तविषा ता दात्राणि ददातीति विजानीहि॥ १॥

भावार्थः-या स्त्री विद्याशिक्षायुक्तां वाचं गृह्णाति साऽनादिभूतां वेदविद्यां वेत्तुमर्हति सा येन सह विवाहं कुर्यात्तस्याऽहोभाग्यं भवतीति विज्ञेयम्॥ १॥

पदार्थः-हे (**सरस्वति**) विदुषी (**या**) जो (**इयम्**) यह (**वध्र्यश्वाय**) बढ़ाने वाले घोड़ों से युक्त (**दाशुषे**) दानशील के लिये (**रभसम्**) वेग (**ऋणच्युतम्**) ऋण से छूटे (**दिवोदासम्**) विद्या प्रकाश के देनेवाले को (**अददात्**) देती है तथा (**शश्वन्तम्**) अनादि वेदविद्याविषय जो कि (**अवसम्**) रक्षक तथा (**पणिम्**) प्रशंसनीय है उसको (**आचखाद**) स्थिर करती है वह (**ते**) आपके (**तविषा**) बल से (**ता**) उन (**दात्राणि**) दानों को देती है, यह जानो॥ १॥

भावार्थः-जो स्त्री विद्या शिक्षायुक्त वाणी को ग्रहण करती है, वह अनादिभूत वेदविद्या को जानने योग्य होती है, वह जिसके साथ विवाह करे, उसका अहोभाग्य होता है, यह जानने योग्य है॥ १॥

पुनः सा किं करोतीत्याह॥

फिर वह क्या करती है, इस विषय को कहते हैं॥

इयं शुष्मेभिर्बिसखाइवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः॥ २॥

इयम्। शुष्मेभिः। बिसखाःऽइव। अरुजत्। सानु। गिरीणाम्। तविषेभिः। ऊर्मिऽभिः। पारावतऽघ्नीम्। अवसे। सुवृक्तिऽभिः। सरस्वतीम्। आ। विवासेम। धीतिऽभिः॥ २॥

पदार्थः-(इयम्) (शुष्मेभिः) बलैः **(बिसखाइव)** यो बिसं कमलतन्तुं खनति तद्वद्वर्त्तमानाः **(अरुजत्)** भनक्ति **(सानु)** शिखरम् **(गिरीणाम्)** मेघानाम् **(तविषेभिः)** बलैः **(ऊर्मिभिः)** तरङ्गैः **(पारावतघ्नीम्)** पारावारघातिनीम् **(अवसे)** रक्षणाद्याय **(सुवृक्तिभिः)** सुष्ठुच्छेदिकाभिः क्रियाभिः **(सरस्वतीम्) (आ) (विवासेम)** सेवेमहि **(धीतिभिः)**॥ २॥

अन्वयः-हे विद्वांसो! येयं शुष्मेभिर्बिसखाइव तविषेभिरूर्भिभिर्गिरीणां सान्वरुजत्तां पारावतघ्नीं सरस्वतीं धीतिभिः सुवृक्तिभिरवसे यथा वयमा विवासेम तथा यूयमिमां सदा सेवध्वम्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यथा बिसतन्तुखनको बिसानि प्राप्नोति तथैव पुरुषार्थिनो मनुष्या उत्तमां विद्यां प्राप्नुवन्ति यथा विद्युन्मेघावयवाञ्छिनत्ति तथैव सुशिक्षिता वागविद्यावयवान् संशयान्नाशयति॥ २॥

पदार्थः-हे विद्वानो! जो **(इयम्)** यह **(शुष्मेभिः)** बलों से **(बिसखाइव)** कमल के तन्तु को खोदने वाले के समान **(तविषेभिः)** बलों और **(ऊर्मिभिः)** तरङ्गों से **(गिरीणाम्)** मेघों के **(सानु)** शिखर को **(अरुजत्)** भङ्ग करती है उस **(पारावतघ्नीम्)** आरपार को नष्ट करने वाली **(सरस्वतीम्)** वेगवती नदी को **(धीतिभिः)** धारण और **(सुवृक्तिभिः)** छिन्न-भिन्न करने वाली क्रियाओं से **(अवसे)** रक्षा के लिये जैसे हम लोग **(आ, विवासेम)** सेवें, वैसे तुम भी इसको सदा सेवो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे कमलनाल तन्तुओं को खोदने वाला कमलनाल तन्तुओं को प्राप्त होता है, वैसे ही पुरुषार्थी मनुष्य उत्तम विद्या को प्राप्त होते हैं और जैसे बिजुली मेघ के अङ्गों को छिन्न-भिन्न करती है, वैसे ही सुन्दर शिक्षित वाणी अविद्या के अङ्गों और संशयों का नाश करती है॥ २॥

पुनः सा किं करोतीत्याह॥

फिर वह क्या करती है, इस विषय को कहते हैं॥

सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः।
उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति॥ ३॥

सरस्वति। देवऽनिदः। नि। बर्हय। प्रऽजाम्। विश्वस्य। बृसयस्य। मायिनः। उत। क्षितिऽभ्यः। अवनीः। अविन्दः। विषम्। एभ्यः। अस्रवः। वाजिनीऽवति॥ ३॥

पदार्थः-(**सरस्वति**) विद्यायुक्ते स्त्रि (**देवनिदः**) ये देवान् विदुषो निन्दन्ति तान् (**नि**) नितराम् (**बर्हय**) निःसारय (**प्रजाम्**) (**विश्वस्य**) समग्रस्य (**बृसयस्य**) अविद्याछेदकस्य (**मायिनः**) प्रशंसितप्रज्ञस्य (**उत**) (**क्षितिभ्यः**) पृथिवीभ्यः (**अवनीः**) रक्षिका भूमीः (**अविन्दः**) प्राप्नुहि (**विषम्**) उदकम्। **विषमित्युदकनाम।** (निघं०१.१२) (**एभ्यः**) भूम्यन्तर्देशेभ्यः (**अस्रवः**) स्रावय (**वाजिनीवति**) विज्ञानक्रियायायुक्ते॥३॥

अन्वयः-हे वाजिनीवति सरस्वती! त्वं देवनिदो नि बर्हय [उत] विश्वस्य बृसयस्य मायिनः प्रजामविन्दः क्षितिभ्योऽवनीरविन्द एभ्यो विषमस्रवः॥३॥

भावार्थः-सैव विदुषी स्त्री वरा या विदुषां विद्यायाश्च निन्दकान् दूरीकृत्य विद्याप्रशंसकान् सत्करोति या च भूगर्भादिविद्यावित्सर्वा प्रजां विद्याभिमुखां करोति॥३॥

पदार्थः-हे (**वाजिनीवति**) विज्ञान, क्रिया और (**सरस्वती**) विद्यायुक्त स्त्री! तू (**देवनिदः**) जो विद्वानों की निन्दा करते हैं उनको (**नि, बर्हय**) निकाल (**उत**) और (**विश्वस्य**) समग्र (**बृसयस्य**) अविद्या छेदन करने वाले (**मायिनः**) प्रशंसित बुद्धियुक्त विद्वान् की (**प्रजाम्**) प्रजा को (**अविन्दः**) प्राप्त हो तथा (**क्षितिभ्यः**) पृथिवियों से (**अवनीः**) रक्षा करने वाली भूमियों को प्राप्त हो और (**एभ्यः**) इन भूमि के भीतरी देशों से (**विषम्**) जल को (**अस्रवः**) चुआओ निकालो॥३॥

भावार्थः-वही पण्डिता स्त्री श्रेष्ठ है जो विद्वान् और विद्या के निन्दकों को निकाल विद्या के प्रशंसकों (बड़ाई करने वालों) का सत्कार करती है और जो भूगर्भादि विद्या जानने वाली समस्त प्रजा को विद्याऽभिमुख करती है॥३॥

पुनः सा कीदृशी रक्षिकेत्याह॥

फिर वह कैसी रक्षा करने वाली है, इस विषय को कहते हैं॥

प्र णो॑ देवी सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती। धी॒नाम॑वि॒त्र्य॑वतु॥४॥

प्र। नः॑। देवी। सर॑स्वती। वाजे॑भिः। वा॒जिनी॑ऽवती। धी॒नाम्। अ॒वि॒त्री॒। अ॒व॒तु॒॥४॥

पदार्थः-(**प्र**) (**नः**) अस्माकम् (**देवी**) विदुषी (**सरस्वती**) विज्ञानयुक्तया वाचाऽऽढ्या (**वाजेभिः**) अन्नादिभिः (**वाजिनीवती**) प्रशस्तविज्ञानक्रियासहिता (**धीनाम्**) प्रज्ञानाम् (**अवित्री**) रक्षिका (**अवतु**)॥४॥

अन्वयः-हे सन्ताना! या देवी वाजेभिर्वाजिनीवती सरस्वती नो धीनामवित्री प्रावतु तां यूयं स्वीकुरुत॥४॥

भावार्थः-मातृभिः स्वसन्तानान् बाल्यावस्थायां सुशिक्ष्य विद्यया विदुषः सम्पाद्य तैः सहातुलं सुखं भोक्तव्यम्॥४॥

पदार्थः-हे सन्तानो! जो **(देवी)** विदुषी **(वाजेभिः)** अन्नादिकों के साथ **(वाजिनीवती)** प्रशस्तविज्ञान वा क्रिया से युक्त वा **(सरस्वती)** विज्ञानयुक्त वाणी से युक्त **(नः)** हमारी **(धीनाम्)** बुद्धियों को **(अवित्री)** रक्षा करने वाली **(प्र, अवतु)** अच्छे प्रकार करे, उसको तुम स्वीकार करो॥४॥

भावार्थः-माताजनों को चाहिये कि अपने सन्तानों को बाल्यावस्था में अच्छी शिक्षा देकर विद्या से विद्वान् कर उनके साथ अतुल सुख भोगें॥४॥

पुनः सा किंवत् किं करोतीत्याह॥

फिर वह किसके तुल्य क्या करती है, इस विषय को कहते हैं॥

यस्त्वा॑ देवि सरस्वत्युपब्रू॒ते धने॑ हि॒ते। इन्द्रं॒ न वृ॑त्र॒तूर्ये॑॥५॥३०॥

यः। त्वा॒। दे॒वि॒। स॒र॒स्व॒ति॒। उ॒प॒ऽब्रू॒ते। धने॑। हि॒ते। इन्द्र॑म्। न। वृ॒त्र॒ऽतूर्ये॑॥५॥

पदार्थः-**(यः)** **(त्वा)** त्वाम् **(देवि)** विदुषी **(सरस्वति)** विज्ञानयुक्ते **(उपब्रूते)** **(धने)** द्रव्ये **(हिते)** सुखकरे **(इन्द्रम्)** विद्युतम् **(न)** इव **(वृत्रतूर्ये)** मेघस्य हिंसने॥५॥

अन्वयः-हे देवि सरस्वती भार्ये! यस्त्वा वृत्रतूर्य इन्द्रं न हिते धन उपब्रूते तं विद्वांसं पतिं त्वं सेवस्व॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे पुरुषा! यथा पतिव्रता विदुष्यः स्त्रियो युष्मान् सत्यं ग्राहयित्वा प्रियं वदन्ति तथैताभिस्सह यूयमपि हितं वदत॥५॥

पदार्थः-हे **(देवि)** विदुषी **(सरस्वती)** विज्ञानयुक्ता भार्या! **(यः)** जो **(त्वा)** तुझे **(वृत्रतूर्ये)** मेघ के हिंसन में **(इन्द्रम्)** बिजुली के **(न)** समान **(हिते)** सुख करने वाले **(धने)** द्रव्य के निमित्त **(उपब्रूते)** कहता है, उस विद्वान् पति की तू सेवा कर॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे पुरुषो! जैसे पतिव्रता विदुषी स्त्रियाँ तुम लोगों को सत्य ग्रहण कराकर प्रिय वचन कहती हैं, वैसे इनके साथ तुम भी हित करो॥५॥

पुनः सा किं करोतीत्याह॥

फिर वह क्या करती है, इस विषय को कहते हैं॥

त्वं दे॑वि सरस्व॒त्यव॒ वाजे॑षु वाजिनि। रदा॑ पू॒षेव॑ नः स॒निम्॥६॥

त्वम्। दे॒वि॒। स॒र॒स्व॒ति॒। अव॑। वाजे॑षु। वा॒जि॒नि॒। रद॑। पू॒षाऽइ॑व। नः॒। स॒निम्॥६॥

पदार्थः-**(त्वम्)** **(देवि)** कामयमाने **(सरस्वति)** विदुषी **(अवा)** अत्र **निपातस्य चे**ति दीर्घः। **(वाजेषु)** प्राप्तव्येषु पदार्थेषु **(वाजिनि)** प्रशस्तविज्ञानयुक्ते **(रदा)** विलिख **(पूषेव)** भूमिरिव **(नः)** अस्माकम् **(सनिम्)** सत्याऽसत्यर्विभाजिकां धियम्॥६॥

अन्वयः-हे देवि वाजिनि सरस्वति! त्वं नः सनिं वाजेषु पूषेवावा रदा च॥६॥

भावार्थः-हे वरानने! त्वं पृथिवीव सर्वेषां धारणं विधेहि प्रज्ञां च देहि॥६॥

पदार्थः-हे **(देवि)** कामना करने वाली **(वाजिनि)** प्रशस्तविज्ञानयुक्त **(सरस्वति)** विदुषी स्त्री! **(त्वम्)** तू **(नः)** हमारी **(सनिम्)** सत्य और असत्य के विभाग करने वाली बुद्धि को **(वाजेषु)** प्राप्तव्य पदार्थों में **(पूषेव)** भूमि के समान **(अवा)** पालो और **(रदा)** विशेषता से लिखो॥६॥

भावार्थः-हे वरानने=सुन्दर मुख वाली! तुम पृथिवी के समान सबका धारण करो और प्रज्ञा देओ॥६॥

पुनः सा कीदृशीत्याह॥

फिर वह कैसी है, इस विषय को कहते हैं॥

उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः। वृत्रघ्नी वष्टि सुष्टुतिम्॥७॥

उत। स्या। नः। सरस्वती। घोरा। हिरण्यऽवर्तनिः। वृत्रऽघ्नी। वष्टि। सुऽस्तुतिम्॥७॥

पदार्थः-(**उत**) (**स्या**) सा (**नः**) अस्माकम् (**सरस्वती**) विज्ञानयुक्ता वाणी (**घोरा**) दुष्टानां दुःखप्रदा (**हिरण्यवर्त्तनिः**) हिरण्यस्य विद्याव्यवहारस्य वर्त्तनिर्मार्गो यस्यां सा (**वृत्रघ्नी**) मेघहन्त्री विद्युदिव (**वष्टि**) कामयते (**सुष्टुतिम्**) शोभनां प्रशंसाम्॥७॥

अन्वयः-हे मनुष्या! या हिरण्यवर्त्तनिर्घोरा वृत्रघ्नी सरस्वती नः सुखयति स्योत नोऽस्माकं सुष्टुतिं वष्टि॥७॥

भावार्थः-या विद्युल्लतेव सुशोभा विदुषी स्त्री गृहकृत्यप्रकाशिनी सन्तानविद्यां कामयते सैव सौभाग्यवती जायते॥७॥

पदार्थः-हे मनुष्यो! जो (**हिरण्यवर्त्तनिः**) जिसमें विद्याव्यवहार का वर्त्ताव है वह (**घोरा**) दुष्टों को दुःख देने वाली (**वृत्रघ्नी**) मेघ को हनने वाली बिजुली के समान (**सरस्वती**) विज्ञान भरी हुई वाणी (**नः**) हम लोगों को सुखी करती (**स्या**) वह (**उत**) भी हमारी (**सुष्टुतिम्**) सुन्दर प्रशंसा की (**वष्टि**) कामना करती है॥७॥

भावार्थः-जो बिजुली की चमक दमक के समान सुन्दर शोभा वाली विदुषी स्त्री घर के कार्यों की प्रकाश करने वाली तथा सन्तानों की विद्या की कामना करती है, वही यहाँ सौभाग्यवती होती है॥७॥

पुनः सा वाक् कीदृशीत्याह॥

फिर वह वाणी कैसी है, इस विषय को कहते हैं॥

यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः। अमश्चरति रोरुवत्॥८॥

यस्याः। अनन्तः। अह्रुतः। त्वेषः। चरिष्णुः। अर्णवः। अमः। चरति। रोरुवत्॥८॥

पदार्थः-(**यस्याः**) सरस्वत्या वाचः (**अनन्तः**) निःसीमः (**अह्रुतः**) अकुटिलः सरलः (**त्वेषः**) प्रकाशः (**चरिष्णुः**) गन्ता (**अर्णवः**) समुद्र इवाऽऽकाशः (**अमः**) यो गच्छति (**चरति**) प्राप्नोति (**रोरुवत्**) भृशं रौति शब्दं करोति॥८॥

अन्वय:-हे मनुष्या! यस्या वाचोऽह्रुतस्त्वेषश्चरिष्णुरनन्तोऽर्णवो रोरुवदमश्चरति तां यूयं विजानीत॥८॥

भावार्थ:-हे मनुष्या! यावानाकाशस्तावानेव शब्दोऽनन्तो यथा समुद्रे जलं पूर्णमस्ति तथैवाऽऽकाशे शब्दोऽस्तीति विजानीत॥८॥

पदार्थ:-हे मनुष्यो! **(यस्या:)** जिस वाणी का **(अह्रुत:)** अकुटिल सरल **(त्वेष:)** प्रकाश वा **(चरिष्णु:)** जाने वाले **(अनन्त:)** नि:सीम **(अर्णव:)** समुद्र के तुल्य आकाश **(रोरुवत्)** निरन्तर शब्द करता वा **(अम:)** फैलने वाला **(चरति)** प्राप्त होता है, उसको तुम जानो॥८॥

भावार्थ:-हे मनुष्यो! जितना आकाश है, उतना ही शब्द अनन्त है, जैसे समुद्र में जल पूरा है, वैसे आकाश में शब्द है, यह जानो॥८॥

पुन: सा कीदृशीत्याह॥

फिर वह कैसी है, इस विषय को कहते हैं॥

स नो विश्वा अति द्विष: स्वसॄरन्या ऋतावरी। अतन्नहेव सूर्य:॥९॥

सा। न:। विश्वा:। अति। द्विष:। स्वसॄ:। अन्या:। ऋतऽवरी। अतन्। अहाऽइव। सूर्य:॥९॥

पदार्थ:-**(सा)** **(न:)** अस्माकम् **(विश्वा:)** सर्वान् **(अति)** **(द्विष:)** द्वेष्टॄन् **(स्वसृ:)** स्वसेव वर्त्तमाना: **(अन्या:)** **(ऋतावरी)** उषा: **(अतन्)** व्याप्नुवन् **(अहेव)** दिनानीव **(सूर्य्य:)**॥९॥

अन्वय:-हे मनुष्या:! सा ऋतावरी नोऽस्माकं विश्वा द्विषोऽति क्रामयति सूर्य्योऽहेवाऽतन्नन्या: स्वसृ: स्वसार इव संयनुक्ति॥९॥

भावार्थ:-अत्रोपमालङ्कार:। हे मनुष्या! या वाक् सम्यक् प्रयुक्ता सती सुखमन्यथोक्ता सती दु:खं च प्रयच्छति, ये सत्यवादिन: सन्ति त एव मिथ्या वक्तुं नेच्छन्ति यथा सूर्य्य: सर्वान् मूर्त्तान् द्रव्यान् प्रकाशयति तथैवेयं वाक् सर्वान् व्यवहारान् द्योतयति॥९॥

पदार्थ:-हे मनुष्यो! **(सा)** वह **(ऋतावरी)** उषा=प्रभातवेला **(न:)** हमारे **(विश्वा:)** समस्त **(द्विष:)** द्वेषी जनों को **(अति)** अतिक्रमण=उल्लङ्घन कराती है और **(सूर्य:)** सूर्य **(अहेव)** दिनों को जैसे **(अतन्)** व्याप्त होता, वैसे **(अन्या:)** और **(स्वसृ:)** भगिनियों के समान वर्त्तमान गत विगत प्रभातवेलाओं का संयोग करती है॥९॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो वाणी अच्छे प्रकार प्रयोग की हुई सुख और अन्यथा कही हुई दु:ख प्रदान करती है। जो सत्यवादी हैं, वे ही मिथ्या कहना नहीं चाहते, जैसे सूर्य समस्त मूर्त्तिमान् द्रव्यों को प्रकाशित करता है, वैसे ही यह वाणी सब व्यवहारों को प्रकाशित करती है॥९॥

पुन: सा कीदृशीत्याह॥

फिर वह कैसी है, इस विषय को कहते हैं॥

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत्॥ १०॥ ३१॥

उतः। नः। प्रिया। प्रियासु। सप्तऽस्वसा। सुऽजुष्टा। सरस्वती। स्तोम्या। भूत्॥ १०॥

पदार्थः-(**उत**) अपि (**नः**) अस्माकम् (**प्रिया**) कमनीया (**प्रियासु**) सुखप्रदासु स्त्रीषु वा (**सप्तस्वसा**) सप्त पञ्च प्राणा मनो बुद्धिश्च स्वसेव यस्याः सा (**सुजुष्टा**) सुष्ठु सेविता (**सरस्वती**) सरो बह्वन्तरिक्षं सम्बद्धं विद्यते यस्याः सा (**स्तोम्या**) स्तोतुमर्हा (**भूत्**) भवतु॥ १०॥

अन्वयः-हे मनुष्या! यथा नः सरस्वती प्रियासु प्रिया सप्तस्वसा सुजुष्टोत स्तोम्या भूत्तथा युष्माकमपि भवतु॥ १०॥

भावार्थः-ये मनुष्याः सर्वतः शुद्धिकरीं सत्यां वाचं जानन्ति त एव प्रशंसनीया भवन्ति॥ १०॥

पदार्थः-हे मनुष्यो! जैसे (**नः**) हमारी (**सरस्वती**) वह सरस्वती जिसको बहुत अन्तरिक्ष का सम्बन्ध है तथा (**प्रियासु**) सुख देने वाली क्रिया वा स्त्रियों में (**प्रिया**) मनोहर (**सप्तस्वसा**) जिसके सात अर्थात् पांच प्राण, मन और बुद्धि बहिन के समान वर्त्तमान तथा (**सुजुष्टा**) अच्छे प्रकार सेवित की हुई (**उत**) और (**स्तोम्या**) स्तुति करने योग्य (**भूत्**) हो, वैसे तुम्हारी भी हो॥ १०॥

भावार्थः-जो मनुष्य सब ओर से शुद्धि करने वाली सत्य वाणी को जानते हैं, वे ही प्रशंसा करने योग्य होते हैं॥ १०॥

पुनः सा कीदृशी किं करोतीत्याह॥

फिर वह कैसी और क्या करती है, इस विषय को कहते हैं॥

आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम्। सरस्वती निदस्पातु॥ ११॥

आऽपप्रुषी। पार्थिवानि। उरु। रजः। अन्तरिक्षम्। सरस्वती। निदः। पातुः॥ ११॥

पदार्थः-(**आपप्रुषी**) समन्ताद् व्याप्ता (**पार्थिवानि**) पृथिव्यामन्तरिक्षे भवानि विदितानि वा (**उरु**) बहु (**रजः**) परमाण्वादीन् (**अन्तरिक्षम्**) आकाशम् (**सरस्वती**) विद्यासुशिक्षिता वाक् (**निदः**) निन्दकेभ्यः (**पातु**)॥ ११॥

अन्वयः-हे मनुष्याः! पार्थिवान्युरु रजोऽन्तरिक्षमापप्रुषी सरस्वत्यस्मान् निदः पातु॥ ११॥

भावार्थः-हे मनुष्या! या वाणी सर्वत्राकाशे व्याप्ताऽस्ति तां विदित्वाऽनया कस्यापि निन्दामर्थाद् गुणेषु दोषारोपणं दोषेषु गुणारोपणं च कदाचिन्मा कुर्वन्तु॥ ११॥

पदार्थः-हे मनुष्यो! (**पार्थिवानि**) अन्तरिक्ष में प्रसिद्ध हुए वा विदित हुए (**उरु**) बहुत (**रजः**) परमाणु आदि पदार्थों को तथा (**अन्तरिक्षम्**) आकाश को (**आपप्रुषी**) सब ओर से व्याप्त (**सरस्वती**) विद्या और उत्तम शिक्षायुक्त वाणी हम लोगों को (**निदः**) निन्दकों से (**पातु**) बचावे॥ ११॥

भावार्थः-हे मनुष्यो! जो वाणी सर्वत्र आकाश में व्याप्त है, उसको जान के इससे किसी की भी निन्दा अर्थात् गुणों में दोषारोपण और दोषों में गुणोरोपण कभी न करो॥ ११॥

पुनः सा किं करोतीत्याह॥

फिर वह क्या करती है, इस विषय को कहते हैं॥

त्रिष॒धस्था॑ स॒प्तधा॑तुः॒ पञ्च॑ जा॒ता व॒र्धय॑न्ती। वाजे॑वाजे॒ हव्या॑ भू॒त्॥ १२॥

त्रि॒ऽस॒धस्था॑। स॒प्तऽधा॑तुः। पञ्च॑। जा॒ता। व॒र्धय॑न्ती। वाजे॑ऽवाजे। हव्या॑। भू॒त्॥ १२॥

पदार्थः-(**त्रिषधस्था**) त्रिषु समानस्थानेषु या तिष्ठति सा (**सप्तधातुः**) सप्त प्राणादयो धारका यस्याः सा (**पञ्च**) पञ्चभ्यः प्राणेभ्यः (**जाता**) प्रसिद्धा (**वर्धयन्ती**) (**वाजेवाजे**) व्यवहारे स-ामे स-ामे वा (**हव्या**) उच्चारणीया (**भूत्**) भवति॥१२॥

अन्वयः-हे विद्वांसः! त्रिषधस्था सप्तधातुः पञ्च जाता वाजेवाजे हव्या वर्धयन्ती भूत्तां युक्त्या सम्प्रयङ्ध्वम्॥१२॥

भावार्थः-यदि विद्वांसो वाग्योगं जानन्ति तर्हि किं किं वर्धयितुं न शक्नुवन्ति॥१२॥

पदार्थः-हे विद्वानो! (**त्रिषधस्था**) तीन समान स्थानों में स्थित (**सप्तधातुः**) सात प्राण आदि जिसकी धारण करने वाले (**पञ्च**) पांच प्राणों से (**जाता**) प्रसिद्ध (**वाजेवाजे**) प्रत्येक व्यवहार वा प्रत्येक स-ाम में (**हव्या**) उच्चारण करने योग्य (**वर्धयन्ती**) वृद्धि को प्राप्त कराती (**भूत्**) हो उसका युक्ति के साथ अच्छे प्रकार प्रयोग करो॥१२॥

भावार्थः-जो विद्वान् जन वाणी के योग को जानते हैं तो क्या-क्या बढ़ा नहीं सकते हैं॥१२॥

पुनः सा कीदृशीत्याह॥

फिर वह कैसी है, इस विषय को कहते हैं॥

प्र या म॑हि॒म्ना म॒हिना॑सु॒ चेकि॑ते द्यु॒म्नेभि॑र॒न्या अ॒पसा॑म॒पस्त॑मा।

रथ॑ इव बृह॒ती वि॒भ्वने॑ कृ॒तोप॒स्तुत्या॑ चिकि॒तुषा॒ सर॑स्वती॥ १३॥

प्र। या। म॒हि॒म्ना। म॒हिना॑। आ॒सु॒। चेकि॑ते। द्यु॒म्नेभिः॑। अ॒न्याः। अ॒पसा॑म्। अ॒पः॒ऽत॒मा। रथः॑ऽइव। बृ॒ह॒ती। वि॒ऽभ्वने॑। कृ॒ता। उ॒प॒ऽस्तुत्या॑। चि॒कि॒तुषा॑। सर॑स्वती॥ १३॥

पदार्थः-(**प्र**) (**या**) (**महिम्ना**) महत्त्वेन (**महिना**) महती (**आसु**) (**चेकिते**) विज्ञापयतु (**द्युम्नेभिः**) प्रकाशनैर्यशोभिः (**अन्याः**) प्रतिप्राणिनं भिन्ना वाचः (**अपसाम्**) कर्मकर्तॄणाम् (**अपस्तमा**) अतिशयेन कर्मकर्त्री (**रथइव**) रमणीयाकाश इव (**बृहती**) बृंहती (**विभ्वने**) विभुत्वाय (**कृता**) जगदीश्वरेण निर्मिता (**उपस्तुत्या**) ययोपस्तौति तया (**चिकितुषा**) विज्ञापयित्र्या (**सरस्वती**) सरो विज्ञानं विद्यते यस्यां सा॥१३॥

अन्वयः-हे मनुष्या! या महिम्ना महिनाऽपसामपस्तमा रथइव बृहती विभ्वने चिकितुषोपस्तुत्या कृता निष्पादिता सरस्वती द्युम्नेभिरन्या आसु प्र चेकिते तां यथावद्विज्ञाय सत्यां वाचं सम्प्रयुङ्ध्वम्॥१३॥

भावार्थः-हे मनुष्याः! सुविद्यासुशिक्षासत्सङ्गसत्यभाषणयोगाभ्यासादिभिर्निष्पन्ना वागियं व्याप्ता वा समर्था वर्त्तते तां यूयं विजानीत॥१३॥

पदार्थः-हे मनुष्या! **(या)** जो **(महिम्ना)** बड़प्पन से **(महिना)** बड़ी **(अपसाम्)** कर्म करने वालों में **(अपस्तमा)** अतीव कर्म करने वाली और **(रथइव)** रमणीय आकाश के समान **(बृहती)** बढ़ती हुई **(विभ्वने)** विभुत्व के लिये **(चिकितुषा)** समझाने वाली **(उपस्तुत्या)** जिससे कि समीप स्तुति करता उससे **(कृता)** जगदीश्वर ने उत्पन्न की हुई **(सरस्वती)** जिसमें विज्ञान वर्त्तमान वह वाणी **(द्युम्नेभिः)** प्रकाश जो यशरूप हैं उनसे **(अन्याः)** प्रत्येक प्राणी के प्रति भिन्न-भिन्न है अर्थात् नाना प्रकार वाणी हैं **[**=नाना की वाणियाँ हैं**]** **(आसु)** उनमें जो **(प्र, चेकिते)** विज्ञान कराती उसको यथावत् जान के सत्य वाणी का अच्छे प्रकार प्रयोग करो॥१३॥

भावार्थः-हे मनुष्यो! विद्या, सुशिक्षा, सत्सङ्ग, सत्यभाषण और योगाभ्यासादिकों से निष्पन्न हुई वाणी यह व्याप्त वा समर्थ है, उसको तुम जानो॥१३॥

पुनः सा कीदृशीत्याह॥

फिर वह कैसी है, इस विषय को कहते हैं॥

सर॑स्वत्य॒भि नो॑ नेषि॒ वस्यो॒ माप॑ स्फरी॒: पय॑सा॒ मा न॒ आ ध॑क्।

जु॒षस्व॑ नः स॒ख्या वे॒श्या॑ च॒ मा त्वत्क्षे॒त्रा॒ण्यर॑णानि गन्म॥ १४॥ ३२॥८॥४॥५॥

सर॑स्वति। अ॒भि। न॒:। ने॒षि॒। वस्य॑:। मा। अप॑। स्फ॒री॒:। पय॑सा। मा। न॒:। आ। ध॒क्। जु॒ष॒स्व॒। न॒:। स॒ख्या। वे॒श्या॑। च॒। मा। त्वत्। क्षे॒त्रा॑णि। अर॑णानि। ग॒न्म॒॥१४॥

पदार्थः-**(सरस्वती)** बहुविद्यायुक्ते **(अभि)** **(नः)** अस्माकम् **(नेषि)** नयसि **(वस्यः)** अतिशयेन वसीयः **(मा)** **(अप)** **(स्फरीः)** अवृद्धं मा कुर्याः **(पयसा)** रसविशेषेण **(मा)** **(नः)** अस्मान् **(आ)** समन्तात् **(धक्)** दहेत् **(जुषस्व)** सेवस्व **(नः)** अस्मान् **(सख्या)** मित्रत्वेन **(वेश्या)** उपवेष्टुं योग्येन **(च)** **(मा)** **(त्वत्)** **(क्षेत्राणि)** क्षियन्ति निवसन्ति येषु तानि **(अरणानि)** अरमणीयानि **(गन्म)** प्राप्नुयाम॥१४॥

अन्वयः-हे सरस्वति विदुषि स्त्रि! या त्वं नो वस्योऽभि नेषि सा त्वं सुशिक्षितया वाचा विरहानस्मान् माप स्फरीः पयसा वियोज्य नोऽस्मान् माऽऽधक् वेश्या सख्या च नोऽस्माञ्जुषस्व त्वदरणानि क्षेत्राणि वयं मा गन्म तस्मात्त्वं पूजनीयासि॥१४॥

भावार्थः-हे मनुष्या! या विदुष्यः स्त्रियो यथा विद्यासुशिक्षाभ्यां युक्ता वाणी सर्वत्र संरक्ष्य सर्वथा वर्धयति या वा सत्यभाषणादिनाऽकल्याणं न प्रापयति तद्वद्वर्त्तमानाः सन्ति ता अस्माञ्छोकादिभ्यो वियोज्य मित्रत्वेन संसेवन्ते सर्वदैव चाऽऽनन्दयन्ति॥१४॥

अत्र वाग्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत् परमहंसपरिव्राजकाचार्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते सुप्रमाणयुक्ते संस्कृतार्यभाषाविभूषित ऋग्वेदभाष्ये चतुर्थाऽष्टकेऽष्टमोऽध्यायो द्वात्रिंशो वर्गश्चतुर्थोऽष्टकश्च षष्ठे मण्डले पञ्चमोऽनुवाक एकषष्टितमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(सरस्वति)** बहुत विद्या से युक्त विदुषी स्त्री! जो तू **(नः)** हमारे **(वस्यः)** अतीव ओढ़ने योग्य वस्त्र आदि को **(अभि, नेषि)** सन्मुख लाती है सो तू सुशिक्षित वाणी से हीन हम लोगों को **(मा)** मत **(अप, स्फरीः)** अवृद्ध करे किन्तु वृद्धियुक्त करे और **(पयसा)** विशेष रस से अलग कर **(नः)** हम लोगों को **(मा, आ, धक्)** मत दाह दे और **(वेश्या)** समीप प्रवेश करने योग्य **(सख्या)** मित्रपन से **(च)** भी **(नः)** हम लोगों को **(जुषस्व)** सेवे तथा **(त्वत्)** तेरे **(अरणानि)** अरमणीय **(क्षेत्राणि)** निवासस्थानों को हम लोग **(मा, गन्म)** मत प्राप्त हों, इससे तू सत्कार करने योग्य है॥१४॥

भावार्थः-हे मनुष्यो! जो विदुषी स्त्रियाँ जैसे विद्या और उत्तम शिक्षा से युक्त वाणी सर्वत्र अच्छे प्रकार रक्षाकर सर्वथा वृद्धि देती है वा जो सत्यभाषण आदि से दुःख को नहीं प्राप्त कराती उसके तुल्य वर्त्तमान हैं, वे हम लोगों को शोकादिकों से अलग कर मित्रता से अच्छे प्रकार सेवन करती और सर्वदैव आनन्दित करती हैं॥१४॥

इस सूक्त में वाणी के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त अर्थ के साथ सङ्गति जाननी चाहिये॥

यह श्रीमत्परमहंस परिव्राजकाचार्य परमविद्वान् श्रीमान् विरजानन्द सरस्वती स्वामीजी के शिष्य श्रीमान् दयानन्द सरस्वती स्वामी से विरचित सुप्रमाणयुक्त तथा संस्कृत और आर्यभाषा से विभूषित ऋग्वेदभाष्य में चतुर्थ अष्टक में अष्टम अध्याय और बत्तीसवाँ वर्ग और चतुर्थ अष्टक भी तथा छठे मण्डल में पञ्चम अनुवाक और एकसठवां सूक्त भी समाप्त हुआ॥

॥ओ३म्॥

अथर्ग्वेदे पञ्चमाऽष्टकारम्भः॥

अब ऋग्वेद में पञ्चमाष्टक का आरम्भ है॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथैकादशर्चस्य द्विषष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अश्विनौ देवते। १, २ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३ विराट् त्रिष्टुप्। ४, ६, ७, ८, १० निचृत्त्रिष्टुप्। ५, ९, ११ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्युदन्तरिक्षे कीदृशे स्त इत्याह॥

अब बिजुली और अन्तरिक्ष कैसे हैं, इस विषय को कहते हैं॥

स्तु॒षे नरा॑ दि॒वो अ॒स्य प्र॒सन्ता॒श्विना॑ हुवे॒ जर॑माणो अ॒र्कैः।
या स॒द्य उ॒स्रा व्यु॒षि॒ ज्मो अन्ता॒न् युयू॑षतः॒ पर्यु॒रू वरां॑सि॥ १॥

स्तु॒षे। नरा॑। दि॒वः। अ॒स्य। प्र॒ऽस॒न्ता॑। अ॒श्विना॑। हु॒वे॒। जर॑माणः। अ॒र्कैः। या। स॒द्यः। उ॒स्रा। वि॒ऽउ॑षि। ज्मः। अन्ता॑न्। युयू॑षतः। परि॑। उ॒रु। वरां॑सि॥ १॥

पदार्थः-(**स्तुषे**) स्तौमि (**नरा**) नरौ नायकौ (**दिवः**) प्रकाशस्य (**अस्य**) (**प्रसन्ता**) विभाजकौ (**अश्विना**) व्यापनशीले द्यावान्तरिक्षे (**हुवे**) गृह्णामि (**जरमाणः**) स्तुवन् (**अर्कैः**) मन्त्रैः (**या**) यौ (**सद्यः**) (**उस्रा**) रश्मयो विद्यन्ते ययोस्तौ (**व्युषि**) विशेषेण दाहे (**ज्मः**) पृथिव्याः। **ज्म इति पृथिवीनाम।** (निघं०१.१) (**अन्तान्**) समीपस्थान् (**युयूषतः**) संविभाजयतः (**परि**) सर्वतः (**उरु**) बहु (**वरांसि**) उत्तमानि वस्तूनि॥ १॥

अन्वयः-हे मनुष्या! जरमाणोऽहमर्कैर्या व्युष्युस्रा प्रसन्ता नराश्विनाऽस्य दिवो ज्मोऽन्तानुरु वरांसि सद्यः परि युयूषतस्तौ स्तुषे हुवे तथैतौ स्तुत्वा यूयमपि गृह्णीत॥ १॥

भावार्थः-हे मनुष्या! येऽन्तरिक्षविद्युतौ सर्वाधिकरणे सर्वपदार्थान्तःस्थे वर्त्तेते तयोर्मध्ये विद्युद्विभाजिकाऽन्तरिक्षं चाधारो वर्त्तते तयोर्गुणान् सर्वे जानन्तु॥ १॥

पदार्थः-हे मनुष्यो! (**जरमाणः**) स्तुति करता हुआ मैं (**अर्कैः**) मन्त्रों से (**या**) जो (**व्युषि**) विशेष दाह के निमित्त (**उस्रा**) जिनकी किरणें विद्यमान वे (**प्रसन्ता**) विभाग करने वाला (**नरा**) नायक (**अश्विना**) व्यापनशील बिजुली और अन्तरिक्ष (**अस्य**) इस (**दिवः**) प्रकाश के तथा (**ज्मः**) पृथिवी के (**अन्तान्**) समीपस्थ पदार्थों को (**उरु**) बहुत (**वरांसि**) उत्तम वस्तुओं को (**सद्यः**) शीघ्र (**परि, युयूषतः**) अच्छे प्रकार अलग-अलग करते उनकी (**स्तुषे**) स्तुति करता हूँ तथा (**हुवे**) ग्रहण करता हूं, वैसे इनकी स्तुति कर तुम भी ग्रहण करो॥ १॥

भावार्थः-हे मनुष्यो! जो अन्तरिक्ष और विद्युत् सर्वाधिकरण और सब पदार्थों के बीच ठहरे हुए वर्त्तमान हैं, उनके बीच बिजुली विभाग करने वाली और अन्तरिक्ष आधार वर्त्तमान है, उनके गुणों को सब जानो॥१॥

पुनस्तौ कीदृशावित्याह॥

फिर वे दोनों कैसे हैं, इस विषय को अगले मन्त्र में कहते हैं॥

ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः।
पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान्॥२॥

ता। यज्ञम्। आ। शुचिऽभिः। चक्रमाणा। रथस्य। भानुम्। रुरुचुः। रजऽभिः। पुरु। वरांसि। अमिता। मिमाना। अपः। धन्वानि। अति। याथः। अज्रान्॥२॥

पदार्थः-(**ता**) तौ (**यज्ञम्**) सर्वं सङ्गतं व्यवहारम् (**आ**) समन्तात् (**शुचिभिः**) पवित्रैर्गुणैः (**चक्रमाणा**) क्रमयितारौ (**रथस्य**) रमणीयस्य जगतः (**भानुम्**) प्रकाशकम् (**रुरुचुः**) रोचन्ते (**रजोभिः**) परमाणुभिर्लोकैर्वा सह (**पुरु**) पुरूणि बहूनि (**वरांसि**) वरणीयानि वस्तूनि (**अमिता**) अमितान्यपरिमितानि (**मिमाना**) निर्मातारौ (**अपः**) जलानि (**धन्वानि**) अन्तरिक्षस्थानि (**अति**) (**याथः**) प्राप्नुथः (**अज्रान्**) प्रक्षिप्तान्॥२॥

अन्वयः-हे अध्यापकोपदेशकौ! युवां यौ शुचिभिर्यज्ञमा चक्रमाणा रथस्य भानुं प्रदीपकौ रजोभिः पुर्वमिता वरांसि मिमानाऽपो धन्वान्यज्रान् याथो याभ्यां सर्वाणि रुरुचुस्ताऽति याथः॥२॥

भावार्थः-हे मनुष्या! यदि यूयं वायुविद्युतौ यथावद्विजानीत तर्ह्यमितमानन्दं प्राप्नुयात॥२॥

पदार्थः-हे अध्यापक और उपदेशको! तुम जो (**शुचिभिः**) पवित्र गुणों से (**यज्ञम्**) सर्वसङ्गत व्यवहार को (**आ, चक्रमाणा**) आक्रमण करते हुए (**रथस्य**) रमणीय जगत् के (**भानुम्**) प्रकाश करने वाले को प्रकाश करने वाले वा (**रजोभिः**) परमाणु वा लोकों के साथ (**पुरु**) बहुत (**अमिता**) अपरिमित (**वरांसि**) स्वीकार करने योग्य पदार्थों को (**मिमाना**) निर्माण करने वाले वा (**अपः**) जल जो (**धन्वानि**) अन्तरिक्षस्थ हैं उनको और (**अज्रान्**) प्रक्षिप्त पदार्थों को (**याथः**) प्राप्त होते और जिनसे सब (**रुरुचुः**) रुचते हैं (**ताः**) उनको (**अति**) अत्यन्त प्राप्त होते हो॥२॥

भावार्थः-हे मनुष्यो! यदि तुम वायु और बिजुली को यथावत् जानो तो अमित आनन्द को प्राप्त होओ॥२॥

पुनस्तौ कीदृशौ स्त इत्याह॥

फिर वे कैसे हैं, इस विषय को अगले मन्त्र में कहते हैं॥

ता ह त्यद्वर्तियदध्वमुग्रेत्था धिय ऊहथुः शश्वदश्वैः।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य॥३॥

ता। ह। त्यत्। वर्तिः। यत्। अरध्रम्। उग्रा। इत्था। धियः। ऊहथुः। शश्वत्। अश्वैः। मनःऽजवेभिः। इषिरैः। शयध्यै। परि। व्यथिः। दाशुषः। मर्त्यस्य॥ ३॥

पदार्थः-(**ता**) तौ (**ह**) किल (**त्यत्**) (**वर्त्तिः**) मार्गम् (**यत्**) यौ (**अरध्रम्**) असमृद्धव्यवहारम् (**उग्रा**) तेजस्विनौ (**इत्था**) अनेन हेतुना (**धियः**) प्रज्ञाः कर्माणि वा (**ऊहथुः**) वहथः। अत्र पुरुषव्यत्ययः (**शश्वत्**) निरन्तरम् (**अश्वैः**) महद्भिर्वेगादिगुणैः (**मनोजवेभिः**) मनोवद्वेगवद्भिः (**इषिरैः**) प्राप्तैः (**शयध्यै**) शयितुम् (**परि**) सर्वतः (**व्यथिः**) व्यथाम् (**दाशुषः**) दानशीलस्य (**मर्त्यस्य**) मनुष्यस्य॥ ३॥

अन्वयः-हे विद्वांसो! यदुग्रा वायुविद्युता अश्वैरिषिरैर्मनोजवेभिर्दाशुषो मर्त्यस्य त्यद्वर्त्तिररध्रं धियश्च शश्वदूहथुः शयध्यै व्यथिर्ह पर्यूहथुस्तेत्या वर्त्तमानौ विज्ञान यूयं सम्प्रयुङ्ध्वम्॥ ३॥

भावार्थः-हे मनुष्या! यदा यूयं वायुविद्युद्गुणान् विज्ञास्यथ तदैव पूर्णमैश्वर्यं प्रास्यथ॥ ३॥

पदार्थः-हे विद्वानो! (**यत्**) जो (**उग्रा**) तेजस्वी वायु और बिजुली (**अश्वैः**) महान् वेगादि गुणों से वा (**इषिरैः**) प्राप्त (**मनोजवेभिः**) मनोवद्वेगवानों से (**दाशुषः**) दानशील (**मर्त्यस्य**) मनुष्य के (**त्यत्**) उस (**वर्तिः**) मार्ग को तथा (**अरध्रम्**) असमृद्ध व्यवहार और (**धियः**) बुद्धि वा कर्मों को (**शश्वत्**) निरन्तर (**ऊहथुः**) चलाते हैं वा (**शयध्यै**) सोने को (**व्यथिः**) व्यथा को (**ह**) निश्चय से (**परि**) पहुंचाते हैं (**ता**) उनको (**इत्था**) इस प्रकार के वर्त्तमान जानकर तुम अच्छे प्रकार प्रयुक्त करो अर्थात् कलायन्त्रों में जोड़ो॥ ३॥

भावार्थः-हे मनुष्यो! जब तुम वायु और बिजुली के गुणों को जानोगे, तभी पूर्ण ऐश्वर्य को पाओगे॥ ३॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग्युवाना॥ ४॥

ता। नव्यसः। जरमाणस्य। मन्म। उप। भूषतः। युयुजान सप्ती इति युयुजानऽसप्ती। शुभम्। पृक्षम्। इषम्। ऊर्जम्। वहन्ता। होता। यक्षत्। प्रत्नः। अध्रुक्। युवाना॥ ४॥

पदार्थः-(**ता**) तौ (**नव्यसः**) अतिशयेन नवीनस्य (**जरमाणस्य**) प्रशंसकस्य (**मन्म**) विज्ञानम् (**उप**) (**भूषतः**) अलं कुरुतः (**युयुजानसप्ती**) युयुजानौ सप्ती वेगाकर्षणौ ययोस्तौ (**शुभम्**) उदकम्। **शुभमित्युदकनाम।** (निघं०११.१३) (**पृक्षम्**) अन्नम् (**इषम्**) इच्छाम् (**ऊर्जम्**) पराक्रमम् (**वहन्ता**) प्रापयन्तौ (**होता**) आदाता (**यक्षत्**) सङ्गच्छेत् (**प्रत्नः**) प्रागधीतविद्यः (**अध्रुक्**) यः कञ्चन न द्रोग्धि (**युवाना**) संयोजकौ वायुविद्युतौ॥ ४॥

अन्वयः-हे मनुष्या! यौ युयुजानसप्ती युवाना नव्यसो जरमाणस्य मन्मोप भूषतो यौ शुभं पृक्षमिषमूर्जं वहन्ताऽध्रुक् प्रत्नो होता यक्षत् ता यूयमपि सङ्गच्छध्वम्॥ ४॥

भावार्थः-हे मनुष्या! यौ वायुविद्युतौ विज्ञानविषयावश्व इव सद्यो गन्तारौ सर्वोत्तमपदार्थप्रापकौ वर्त्तेते ताभ्यामिष्टानि कार्याणि साध्नुत॥४॥

पदार्थः-हे मनुष्यो! जो **(युयुजानसप्ती)** वेग वा आकर्षणयुक्त होने वाले हैं, वे **(युवाना)** संयुक्त होने वाले वायु बिजुली **(नव्यसः)** अतीव नवीन **(जरमाणस्य)** प्रशंसा करने वाले के **(मन्म)** विज्ञान को **(उप, भूषतः)** पूर्ण करते हैं वा जो **(शुभम्)** उदक **(पृक्षम्)** अन्न **(इषम्)** इच्छा और **(ऊर्जम्)** पराक्रम को **(वहन्ता)** पहुंचाने वालों को **(अधुक्)** किसी से न द्रोह करने वाला **(प्रत्नः)** जिसने पहिले विद्या पढ़ी वह **(होता)** ग्रहण करने वाला पुरुष **(यक्षत्)** प्राप्त हो **(ता)** उनको तुम भी प्राप्त होओ॥४॥

भावार्थः-हे मनुष्यो! जो वायु और बिजुली विज्ञान के विषय, घोड़े के समान शीघ्र जाने वाले और सब उत्तम उत्तम पदार्थों की प्राप्ति कराने वाले हैं, उनसे चाहे हुए कार्य्यों को सिद्ध करो॥४॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं इस विषय को कहते हैं॥

ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्ररातीं॥५॥१॥

ता। वल्गू इति। दस्रा। पुरुशाकऽतमा। प्रत्ना। नव्यसा। वचसा। आ। विवासे। या। शंसते। स्तुवते। शम्ऽभविष्ठा। बभूवतुः। गृणते। चित्ररातीं इति चित्रऽरातीं॥५॥

पदार्थः-(**ता**) तौ (**वल्गू**) अत्युत्तमौ (**दस्रा**) दुःखोपक्षयितारौ (**पुरुशाकतमा**) अतिशयेन बहुशक्तिमन्तौ (**प्रत्ना**) प्राचीनौ (**नव्यसा**) अतिशयेन नवीनौ (**वचसा**) परिभाषणीयौ (**आ**) (**विवासे**) सेवे (**या**) यौ (**शंसते**) प्रशंसकाय (**स्तुवते**) प्रशंसिताय। अत्र **कृद्बहुलमि**ति कर्मणि कृत् (**शम्भविष्ठा**) अतिशयेन सुखंभावुकौ (**बभूवतुः**) भवतः (**गृणते**) सत्योपदेशकाय (**चित्ररातीं**) चित्राऽद्भुता रातिर्दानं याभ्यां तौ॥५॥

अन्वयः-हे मनुष्या! यथाहं या वल्गू दस्रा प्रत्ना नव्यसा वचसा पुरुशाकतमा चित्ररातीं शंसते स्तुवते गृणते शम्भविष्ठा बभूवतुस्ताऽऽविवासे तथैतो यूयमपि सेवध्वम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यौ वायुविद्युतौ कारणरूपेण सनतानौ कार्यरूपेण नूतनौ बहुशक्तिमन्तौ वेगादिगुणयुक्तौ वायुविद्युतौ कल्याणकारिणौ वर्त्तेत तौ यथावद्विजानीत॥५॥

पदार्थः-हे मनुष्यो! जैसे मैं **(या)** जो **(वल्गू)** अत्युत्तम **(दस्रा)** दुःख को नष्ट करने वाले **(प्रत्ना)** प्राचीन **(नव्यसा)** अत्यन्त नवीन **(वचसा)** परिभाषण करने योग्य **(पुरुशाकतमा)** अतीव सामर्थ्यवाले **(चित्ररातीं)** जिनसे अद्भुत दान होता वे **(शंसते)** प्रशंसा करने वाले **(स्तुवते)** वा प्रशंसा पाये हुए वा **(गृणते)** सत्य उपदेश करने वाले के लिये **(शम्भविष्ठा)** अतीव सुख की भावना कराने वाले **(बभूवतुः)** होते हैं **(ता)** उनकी **(आ, विवासे)** सेवा करता हूं, वैसे उनकी तुमभी सेवा करो॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो वायु और बिजुली कारणरूप से सनातन और कार्यरूप से नूतन, बहुत शक्तिमान्, वेगादि गुणयुक्त, कल्याणकारी वर्त्तमान हैं, उनको यथावत् जानो॥५॥

पुनस्ताभ्यां किं सिध्यतीत्याह॥

फिर उनसे क्या सिद्ध होता है, इस विषय को कहते हैं॥

ता भुज्युं विभिरुद्द्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभिः।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात्॥ ६॥

ता। भुज्युम्। विऽभिः। अत्ऽभ्यः। समुद्रात्। तुग्रस्य। सूनुम्। ऊहथुः। रजःऽभिः। अरेणुऽभिः। योजनेभिः। भुजन्ता। पतत्रिऽभिः। अर्णसः। निः। उपऽस्थात्॥ ६॥

पदार्थः-(**ता**) तौ (**भुज्युम्**) भोक्तुं योग्यमानन्दम् (**विभिः**) पक्षिभिरिव (**अद्द्यः**) उदकेभ्यः (**समुद्रात्**) सागरादन्तरिक्षाद्वा (**तुग्रस्य**) बलिष्ठस्य (**सूनुम्**) अपत्यमिव वर्त्तमानम् (**ऊहथुः**) प्रापयतः। अत्र पुरुषव्यत्ययः (**रजोभिः**) ऐश्वर्यप्रदैर्मार्गैः (**अरेणुभिः**) अविद्यमाना रेणवो वालुका येषु तैः (**योजनेभिः**) अनेकैर्योजनैर्युक्तैः (**भुजन्ता**) पालकौ (**पतत्रिभिः**) गमनशीलैः (**अर्णसः**) उदकस्य (**निः**) नितराम् (**उपस्थात्**) यः समीपे तिष्ठति तस्मात्॥६॥

अन्वयः-हे विद्वांसो! यौ विद्युत्पवनौ विभिरिवाद्द्यः समुद्रादर्णस उपस्थात् पतत्रिभिरिवारेणुभिर्योजनेभी रजोभिस्तुग्रस्य सूनुं निरूहथुर्भुजन्ता भुज्युं पालयतस्तौ यूयं विजानीत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यौ विद्युत्पवनौ विमानादीनि यानान्यन्तरिक्षे पक्षिवद्गमयितारौ वेगेन वहतस्तावुपस्थाप्याभीष्टानि सुखानि प्राप्नुवन्तु॥६॥

पदार्थः-हे विद्वानो! जो बिजुली और वायु (**विभिः**) पक्षियों के समान (**अद्द्यः**) जलों वा (**समुद्रात्**) सागर वा अन्तरिक्ष वा (**अर्णसः**) जल के (**उपस्थात्**) समीप स्थित होने वाले से (**पतत्रिभिः**) गमनशीलों के समान (**अरेणुभिः**) रज जिनमें नहीं उन (**योजनेभिः**) अनेक योजनों से युक्त (**रजोभिः**) ऐश्वर्यप्रद मार्गों से (**तुग्रस्य**) बलिष्ठ (**सूनुम्**) सन्तान के समान वर्त्तमान को (**नि, ऊहथुः**) निरन्तर पहुंचाते और (**भुजन्ता**) पालना करने वाले (**भुज्युम्**) भागेने योग्य आनन्द की पालना करते हैं (**ता**) उनको तुम जानो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो बिजुली और वायु विमान आदि यानों को अन्तरिक्ष में पक्षियों के समान चलाने वाले वेग से पहुंचाते हैं उनको समीपस्थ कर अभीष्ट सुखों को प्राप्त होओ॥६॥

पुनस्ताभ्यां किं भवतीत्याह॥

फिर उनसे क्या होता है, इस विषय को

वि जुयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः।

दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू॥७॥

वि। जुयुषा। रथ्या। यातम्। अद्रिम्। श्रुतम्। हवम्। वृषणा। वध्रिऽमत्याः। दशस्यन्ता। शयवे। पिप्यथुः। गाम्। इति। च्यवाना। सुऽमतिम्। भुरण्यू इति॥७॥

पदार्थः-(**वि**) (**जयुषा**) जयशीलौ (**रथ्या**) रथाय हितौ (**यातम्**) यातः। अत्र व्यत्ययः (**अद्रिम्**) मेघम् (**श्रुतम्**) अशृणुतम् (**हवम्**) विद्याविषयं शब्दम् (**वृषणा**) वर्षयितारौ (**वध्रिमत्याः**) बहवो वध्रयो वर्धनानि विद्यन्ते यस्यां तस्या भूमेरन्तरिक्षस्य वा (**दशस्यन्ता**) बलयन्तौ (**शयवे**) शयनाय (**पिप्यथुः**) वर्धयतः (**गाम्**) वाचम् (**इति**) अनेन प्रकारेण (**च्यवाना**) सद्यो गन्तारौ (**सुमतिम्**) शोभनां प्रज्ञाम् (**भुरण्यू**) पोषयितारौ धारकौ वा॥७॥

अन्वयः-हे अध्यापकोपदेशकौ! वध्रिमत्या भूमेर्मध्ये जयुषा रथ्या वृषणा दशस्यन्ताऽद्रिं वि यातं सुमतिं च्यवाना भुरण्यू गामिति शयवे पिप्यथुस्तयोर्हवं युवां श्रुतम्॥७॥

भावार्थः-हे मनुष्या! यौ विमानादिगमयितारौ स-ामे जयकारिणौ प्रज्ञाबलप्रदौ वृष्टिकरौ शयनजागरणवाग्घेतू वर्त्तेते तौ बुद्ध्वा कार्यसिद्धये सम्प्रयुङ्ध्वम्॥७॥

पदार्थः-हे अध्यापक और उपदेशक सज्जनो! (**वध्रिमत्याः**) जिसमें बहुत वर्धन विद्यमान उस भूमि वा अन्तरिक्ष के बीच (**जयुषा**) जयशील (**रथ्या**) रथ के लिये हितकारी (**वृषणा**) वर्षा तथा (**दशस्यन्ता**) बल कराने वाले (**अद्रिम्**) मेघ को (**वि, यातम्**) विशेषता से प्राप्त होते हैं और (**सुमतिम्**) सुन्दर मति को (**च्यवाना**) शीघ्र जाने वाले (**भुरण्यू**) पालना वा धारण कर्त्ता (**गाम्**) वाणी को (**इति**) इस प्रकार से (**शयवे**) सोने के लिये (**पिप्यथुः**) बढ़ाते हैं, उनके (**हवम्**) विद्या विषयक शब्द को तुम (**श्रुतम्**) सुनो॥७॥

भावार्थः-हे मनुष्यो! जो विमान आदि को चलाने वा स-ाम में जय कराने वा प्रज्ञा और बल के देने, वर्षा करने वाले तथा सोने जागने और वाणी के हेतु हैं, उनको जान कार्य्यसिद्धि के लिये अच्छे प्रकार प्रयोग करो॥७॥

पुनर्मनुष्याः किं धरेयुरित्याह॥

फिर मनुष्य क्या धारण करें, इस विषय को कहते हैं॥

यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा।

तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात॥८॥

यत्। रोदसी इति। प्रऽदिवः। अस्ति। भूम। हेळः। देवानाम्। उत। मर्त्यऽत्रा। तत्। आदित्याः। वसवः। रुद्रियासः। रक्षःऽयुजे। तपुः। अघम्। दधात॥८॥

पदार्थः-(**यत्**) यः (**रोदसी**) द्यावापृथिव्यौ (**प्रदिवः**) प्रकृष्टप्रकाशस्य (**अस्ति**) (**भूमा**) व्यापकः (**हेळः**) अनादरः (**देवानाम्**) विदुषाम् (**उत**) (**मर्त्यत्रा**) मर्त्येषु मनुष्येषु (**तत्**) (**आदित्याः**) कालावयवाः (**वसवः**) पृथिव्यादयः (**रुद्रियासः**) प्राणा जीवाश्च (**रक्षोयुजे**) यो रक्षांसि दुष्टान् मनुष्यान् युनक्ति तस्मै (**तपुः**) सन्तापम् (**अघम्**) अपराधम् (**दधात**) धरन्ति॥८॥

अन्वयः-हे वसवो रुद्रियास आदित्याः प्रथममध्यमोत्तमा विद्वांसो! यूयं यत्प्रदिवो देवानामुत मर्त्यत्रा भूमा हेळो रोदसी प्राप्तोऽस्ति यथा वसवो रुद्रियास आदित्यास्तद्दधात तथा रक्षोयुजे तपुरघं दधात॥८॥

भावार्थः-हे मनुष्या! यद्ब्रह्म सर्वत्र व्याप्तं सर्वधर्तृ सर्वनियन्तृ वर्त्तते तद्धृत्वा सन्ध्याय सुखयत यश्चैवं न करोति तदुपरि कठोरं दण्डं धत्त॥८॥

पदार्थः-हे (**वसवः**) पृथिवी आदि (**रुद्रियासः**) प्राण वा जीव वा (**आदित्याः**) काल के अवयवों के समान प्रथम मध्यम और उत्तम विद्वानो! तुम (**यत्**) जो (**प्रदिवः**) उत्तम प्रकाश के वा (**देवानाम्**) विद्वानों के सम्बन्ध में (**उत**) और (**मर्त्यत्रा**) मनुष्यों में (**भूमा**) व्यापक (**हेळः**) अनादर (**रोदसी**) द्यावापृथिवी को प्राप्त (**अस्ति**) है और जैसे उक्त प्रकार के विद्वान् जन (**तत्**) उसको (**दधात**) धारण करते हैं, वैसे (**रक्षोयुजे**) दुष्टों के युक्त करने वाले के लिये (**तपुः**) सन्ताप और (**अघम्**) अपराध को धारण करो॥८॥

भावार्थः-हे मनुष्यो! जो ब्रह्म सर्वत्र व्याप्त, सब को धारण करने वा सब का नियम करने वाला है, उसको धारण कर और अच्छे प्रकार ध्यान कर सुखी होओ और जो ऐसा नहीं करता है, उस पर कठोर दण्ड धरो॥८॥

पुनस्सः किं कुर्य्यादित्याह॥

फिर वह क्या करे, इस विषय को कहते हैं॥

य ईं॑ राजा॑नावृ॒तुथा॒ वि॒दध॒द्रज॑सो मि॒त्रो वरु॑ण॒श्चिके॑तत्।
गु॒म्भी॒राय॒ रक्ष॑से॒ हेति॑मस्य॒ द्रोघा॑य चि॒द्वच॑स॒ आन॑वाय॥९॥

यः ईम्। राजानौ। ऋतुऽथा। विऽदधत्। रजसः। मित्रः। वरुणः। चिकेतत्। गुम्भीराय। रक्षसे। हेतिम्। अस्य। द्रोघाय। चित्। वचसे। आनवाय॥९॥

पदार्थः-(**यः**) (**ईम्**) सर्वतः (**राजानौ**) प्रकाशमानौ सूर्य्याचन्द्रमसाविव सभासेनेशौ (**ऋतुथा**) ऋतुभ्यः (**विदधत्**) विधानं कुर्वन् (**रजसः**) लोकजातस्य (**मित्रः**) सुहृत् (**वरुणः**) शमादिगुणान्वितः (**चिकेतत्**) चिकेतति विजानाति (**गम्भीराय**) (**रक्षसे**) दुष्टाचरणाय (**हेतिम्**) वज्रम् (**अस्य**) (**द्रोघाय**) द्रोहाय (**चित्**) अपि (**वचसे**) वचनाय (**आनवाय**) समन्तान्नवीनाय॥९॥

अन्वयः-हे विद्वांसो! यो मित्रो वरुणो गम्भीरायाऽऽनवाय वचसे चिदपि द्रोघाय रक्षसेऽस्योपरि हेतिं रजस ऋतुथा राजानौ विदधत्सन्नीं चिकेतत्तं यूयमुत्साहयत॥९॥

भावार्थः-यथा सूर्याचन्द्रमसावृतून् विभज्यान्धकारं निवार्य्य जगत्सुखयतस्तथैव विद्यादिशुभगुणप्रचारं जगति प्रकल्प्य सत्याऽसत्ये विभज्याऽविद्याऽन्धकारं निवार्य विद्वांसः सर्वानानन्दयन्ति॥९॥

पदार्थः-हे विद्वानो! **(यः)** जो **(मित्रः)** मित्र वा **(वरुणः)** शमादिगुण युक्त जन **(गम्भीराय)** गम्भीर **(आनवाय)** सब ओर से नवीन **(वचसे)** वचन के लिये **(चित्)** और **(द्रोघाय)** द्रोह तथा **(रक्षसे)** दुष्ट आचरण वाले के लिये **(अस्य)** इसके ऊपर **(हेतिम्)** वज्र को **(रजसः)** और लोकजात के **(ऋतुथा)** ऋतुओं से **(राजानौ)** प्रकाशमान सूर्य और चन्द्रमा के तुल्य सभासेनापति को **(विदधत्)** विधान करता हुआ **(ईम्)** सब ओर से **(चिकेतत्)** जानता है, उसको तुम उत्साह देओ॥९॥

भावार्थः-जैसे सूर्य्य चन्द्रमा ऋतुओं को बांट और अन्धकार निवारण कर जगत् को सुखी करते हैं, वैसे ही विद्यादि शुभगुणों का प्रचार संसार में अच्छे प्रकार समर्थन, सत्य और असत्य का विभाग और अविद्यान्धकार का निवारण कर विद्वान् जन सबको आनन्दित करते हैं॥९॥

पुनः सभासेनेशौ जगदुपकाराय किं कुर्यातामित्याह॥

फिर सभा सेनापति जगत् के उपकार के लिये क्या करें, इस विषय को कहते हैं॥

अन्तरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम्॥१०॥

अन्तरैः। चक्रैः। तनयाय। वर्तिः। द्युऽमता। आ। यातम्। नृऽवता। रथेन। सनुत्येन। त्यजसा। मर्त्यस्य। वनुष्यताम्। अपि। शीर्षा। ववृक्तम्॥१०॥

पदार्थः-**(अन्तरैः)** भिन्नैः **(चक्रैः)** लोकभ्रमणाय परिध्याख्यैः **(तनयाय)** पुत्राय **(वर्त्तिः)** मार्गम् **(द्युमता)** प्रकाशवता **(आ) (यातम्)** आगच्छतम् **(नृवता)** उत्तमा नरो विद्यन्ते यस्मिँस्तेन **(रथेन)** रमणीयेन विमानादियानेन **(सनुत्येन)** सप्रेरणीयेन **(त्यजसा)** त्यागेन **(मर्त्यस्य)** मनुष्यस्य **(वनुष्यताम्)** क्रुध्यतां बाधमानानां वा। **वनुष्यतीति क्रुध्यति कर्मा।** (निघं०२.१२) **(अपि) (शीर्षा)** शिरांसि **(ववृक्तम्)** छिनत्तम्॥१०॥

अन्वयः-यौ राजानावन्तरैश्चक्रैर्वर्त्तमानेन द्युमता नृवता रथेन सनुत्येन त्यजसा मर्त्यस्य तनयाय वर्त्तिरायातं मार्गं विधाय वनुष्यतां शीर्षाऽपि ववृक्तं तौ सर्वैः सत्कर्तव्यौ॥१०॥

भावार्थः-यदि सभासेनेशौ मनुष्यसन्तानानां ब्रह्मचर्यविद्याऽभ्यासादिप्रबन्धं कुर्यातां तर्हि सर्वे विद्वांसो भूत्वाऽनेकान्युत्तमानि कार्याणि साद्धुं दुष्टाञ्छत्रून्निवारयितुं च शक्नुवन्ति॥१०॥

पदार्थः-जो राजा लोग **(अन्तरैः)** भिन्न-भिन्न **(चक्रैः)** लोकों के घूमने के लिये परिधियों के वर्त्तमान **(द्युमता)** प्रकाशवान् **(नृवता)** जिसमें उत्तम नर विद्यमान उस **(रथेन)** रमणीय विमानादि यान वा **(सनुत्येन)** प्रेरणा करने योग्य के साथ वर्त्तमान **(त्यजसा)** त्याग के साथ **(मर्त्यस्य)** मनुष्य के **(तनयाय)** पुत्र के लिये **(वर्त्तिः)** मार्ग को **(आ, यातम्)** प्राप्त होवें और मार्ग का विधान कर **(वनुष्यताम्)** क्रोध

करने वा बाधा वालों के **(शीर्षा)** शिरों को **(अपि)** भी **(ववृक्तम्)** छिन्न-भिन्न करें, उनका सबको सत्कार करना चाहिये॥१०॥

भावार्थः-यदि सभासेनापति, मनुष्य-सन्तानों का ब्रह्मचर्य और विद्याभ्यास आदि का प्रबन्ध करें तो सब विद्वान् होकर अनेक उत्तम कार्य करने और दुष्टों तथा शत्रुओं के निवारने को समर्थ हों॥१०॥

पुनस्ते किं कुर्य्युरित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

आ पर॒माभि॑रु॒त म॑ध्य॒माभि॑र्नि॒युद्भि॑र्यातमव॒माभि॑र॒र्वाक्।
दृ॒ळ्हस्य॑ चि॒द्गोम॑तो॒ वि व्र॒जस्य॒ दुरो॑ वर्तं गृण॒ते चि॑त्ररातीऽ॥११॥२॥

आ। पर॒माभि॑:। उ॒त। म॒ध्य॒माभि॑:। नि॒युत्ऽभि॑:। या॒त॒म्। अ॒व॒माभि॑:। अ॒र्वाक्। दृ॒ळ्हस्य॑। चि॒त्। गोऽम॑त:। वि। व्र॒जस्य॑। दुर॑:। व॒र्त॒म्। गृ॒ण॒ते। चि॒त्र॒रा॒ती॒ इति॑ चित्रऽराती॥११॥

पदार्थः-**(आ)** समन्तात् **(परमाभिः)** उत्कृष्टाभिः **(उत)** **(मध्यमाभिः)** मध्ये भवाभिः **(नियुद्भिः)** वायोर्गतिभिः **(यातम्)** गच्छतम् **(अवमाभिः)** निकृष्टाभिः **(अर्वाक्)** पश्चात् **(दृळ्हस्य)** **(चित्)** अपि **(गोमतः)** बह्व्यो गावः किरणा वा विद्यन्ते यस्मिंस्तस्य **(वि)** **(व्रजस्य)** मेघस्य **(दुरः)** द्वाराणि **(वर्त्तम्)** वर्त्तयतम् **(गृणते)** स्तावकाय **(चित्ररातीऽ)** चित्राऽद्भुता रातिर्दानं ययोस्तौ॥११॥

अन्वयः-हे चित्ररातीऽ सभासेनेशौ! युवामवमाभिर्मध्यमाभिरुत परमाभिर्नियुद्भिरा यातमर्वाग् दृळ्हस्य चिद् गोमतो व्रजस्य दुरो गृणते वि वर्त्तम्॥११॥

भावार्थः-हे राजप्रजाजना यथा सर्वे भूगोला वायुगतिभिस्सह गच्छन्त्यागच्छन्ति यथा च शिल्पिनो विमानेन मेघमण्डलोपरि व्रजन्ति तथैव यूयमप्यनुतिष्ठतेति॥११॥

अत्राश्विगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विषष्टितमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(चित्ररातीऽ)** अद्भुत दान वाले सभासेनाधीशो! तुम **(अवमाभिः)** निकृष्ट **(मध्यमाभिः)** मध्यम **(उत)** और **(परमाभिः)** उत्तम **(नियुद्भिः)** वायु की गतियों से **(आ, यातम्)** आओ तथा **(अर्वाक्)** पीछे **(दृळ्हस्य)** अति पुष्ट के **(चित्)** भी **(गोमतः)** बहुत गौयें वा किरणें जिसमें विद्यमान उस **(वज्रस्य)** मेघ के **(दुरः)** द्वारों को **(गृणते)** स्तुति करने वाले के लिये **(वि, वर्त्तम्)** विशेषता से वर्त्ताओ॥११॥

भावार्थः-हे राज प्रजाजनो! जैसे सब भूगोल वायु की गतियों के साथ जाते-आते हैं और जैसे शिल्पीजन विमान से मेघमण्डल पर जाते हैं, वैसे ही तुम भी अनुष्ठान करो॥११॥

इस सूक्त में अश्वियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बासठवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्य त्रिषष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। अश्विनौ देवते। १ स्वराड्बृहती छन्दः। मध्यमः स्वरः। २, ४, ६, ७ पङ्क्तिः। ३, १० भुरिक्पङ्क्तिः। ८ स्वराट् पङ्क्तिः। ११ आसुरीपङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५, ९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ सभासेनेशौ किं प्राप्नुत इत्याह॥

अब एकादश ऋचावाले तिरसठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में सभासेनापति किसको प्राप्त होते हैं, इस विषय को कहते हैं॥

क्व१ त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदुन्नमस्वान्।
आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन्॥ १॥

क्व। त्या। वल्गू इति। पुरुऽहूता। अद्य। दूतः। न। स्तोमः। अविदत्। नमस्वान्। आ। यः। अर्वाक्। नासत्या। ववर्त। प्रेष्ठा। हि। असथः। अस्य। मन्मन्॥ १॥

पदार्थः-(**क्व**) (**त्या**) तौ (**वल्गू**) शोभनवाचौ। **वल्गु इति वाङ्नाम।** (निघं०१.११) (**पुरुहूता**) बहुभिः प्रशंसितौ (**अद्य**) इदानीम् (**दूतः**) समाचारप्रापकः (**न**) इव (**स्तोमः**) श्लाघनीयः (**अविदत्**) प्राप्नोति (**नमस्वान्**) बह्वन्नयुक्तः सत्कृतो वा (**आ**) (**यः**) (**अर्वाक्**) योऽधोञ्चति (**नासत्या**) सत्यस्वभावौ (**ववर्त**) वर्त्तते (**प्रेष्ठा**) अतिशयेन प्रियौ (**हि**) (**असथः**) भवथः (**अस्य**) (**मन्मन्**) मन्मनि विज्ञाने॥१॥

अन्वयः-हे वल्गू पुरुहूता प्रेष्ठा नासत्या! योऽर्वागद्य नमस्वान् स्तोमो दूतो नाविदत् क्वास्य मन्मन्ना ववर्त्त त्या हि युवामसथः॥१॥

भावार्थः-अत्रोपमालङ्कारः। येऽस्य जगतो विज्ञाने प्रयतन्ते ते क्वापि दुःखिता न भवन्ति॥१॥

पदार्थः-हे (**वल्गू**) शोभन वाणी वाले (**पुरुहूता**) बहुतों से प्रशंसा को प्राप्त (**प्रेष्ठा**) अतीव प्रिय (**नासत्या**) सत्यस्वभावयुक्त सभासेनाधीशो! (**यः**) जो (**अर्वाक्**) नीचे जाने वाला (**अद्य**) आज (**नमस्वान्**) बहुत अन्नयुक्त वा सत्कृत (**स्तोमः**) स्तुति करने योग्य (**दूतः**) समाचार पहुंचाने वाले के (**न**) समान जन (**अविदत्**) प्राप्त होता वा (**क्व**) कहाँ (**अस्य**) इसके (**मन्मन्**) विज्ञान में जो (**आ, ववर्त्त**) अच्छे प्रकार वर्त्तमान है (**त्या, हि**) वे ही तुम दोनों (**असथः**) होते हो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो इस जगत् के विज्ञान के निमित्त प्रयत्न करते हैं, वे कही भी दुःखित नहीं होते हैं॥१॥

पुनस्तौ किं कुर्य्यातामित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः।

परि॑ ह॒ त्यद्वर्तिर्या॑थो रि॒षो न यत्परो॒ नान्त॑रस्तुतु॒र्यात्॥ २॥

अर॑म्। मे॒। ग॒न्त॒म्। हव॑नाय। अ॒स्मै॒। गृ॒ण॒ना। यथा॑। पिबा॑थः। अन्ध॑ः। परि॑। ह॒। त्यत्। व॒र्तिः। या॒थ॒ः। रि॒षः। न। यत्। परः॑। न। अन्त॑रः। तु॒तु॒र्यात्॥ २॥

पदार्थः-(**अरम्**) अलम् (**मे**) मम (**गन्तम्**) गच्छतम् (**हवनाय**) आदानाय (**अस्मै**) (**गृणाना**) स्तुवन्तौ (**यथा**) (**पिबाथः**) पिबतम् (**अन्धः**) रसम् (**परि**) (**ह**) प्रसिद्धम् (**त्यत्**) तम् (**वर्तिः**) मार्गम् (**याथः**) (**रिषः**) हिंसकाः (**न**) इव (**यत्**) यत्र (**परः**) शत्रुः (**न**) निषेधे (**अन्तरः**) भिन्नः (**तुतुर्यात्**) हिंस्यात्॥ २॥

अन्वयः-हे सभासेनेशौ! युवां त्यद्वर्त्तिः परि याथो यद्यत्र ह परोऽन्तरो रिषो न कंचिन्न तुतुर्याद्यथा मेऽस्मै हवनायाऽरं गन्तं तथा गृणाना सन्तावन्धः पिबाथः॥ २॥

भावार्थः-अत्रोपमालङ्कारः। राजजनैस्तथा प्रबन्धः क्रियेत यथा मार्गेषु कश्चिदपि चोरः शत्रुश्च कश्चिदपि न पीडयेत्॥ २॥

पदार्थः-हे सभासेनाधीशो! तुम (**त्यत्**) उस (**वर्त्तिः**) मार्ग को (**परि, याथः**) सब ओर से जाते हो (**यत्, ह**) जिसमें (**परः**) शत्रुजन (**अन्तरः**) भिन्न (**रिषः**) हिंसकों के (**न**) समान किसी को (**न**) न (**तुतुर्यात्**) मारे (**यथा**) जैसे (**मे**) मेरे (**अस्मै**) इस (**हवनाय**) ग्रहण के लिये (**अरम्**) पूर्णतया (**गन्तम्**) जाओ, वैसे (**गृणाना**) स्तुति करने वाले होते हुए (**अन्धः**) रस को (**पिबाथः**) पिओ॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। राजजनों से वैसा प्रबन्ध किया जाये, जैसे मार्गों में कोई भी चोर और शत्रु किसी को पीड़ा न दे॥ २॥

पुनस्तौ किं कुर्यातामित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

अका॑रि वा॒मन्ध॑सो॒ वरी॑म॒न्नस्ता॑रि ब॒र्हिः सु॑प्राय॒णत॑मम्।

उ॒त्ता॒नह॑स्तो युव॒युर्व॑व॒न्दा वां नक्ष॑न्तो॒ अद्र॑य आ॒जन्॥ ३॥

अका॑रि। वा॒म्। अन्ध॑सः। वरी॑मन्। अस्ता॑रि। ब॒र्हिः। सु॒प्र॒ऽअ॒य॒नत॑मम्। उत्तानऽह॑स्तः। युव॒युः। व॒व॒न्द॒। आ। वा॒म्। नक्ष॑न्तः। अद्र॑यः। आ॒जन्॥ ३॥

पदार्थः-(**अकारि**) (**वाम्**) युवाभ्याम् (**अन्धसः**) अन्नादेः (**वरीमन्**) अतिशयेन वरे (**अस्तारि**) तीर्य्यते (**बर्हिः**) अन्तरिक्षम् (**सुप्रायणतमम्**) सुप्रयान्ति यस्मिंस्तदतिशयितम् (**उत्तानहस्तः**) ऊर्ध्वबाहुः (**युवयुः**) युवां कामयमानः (**ववन्द**) वन्दति नमस्करोति (**आ**) (**वाम्**) युवाम् (**नक्षन्तः**) प्राप्नुवन्तः (**अद्रयः**) मेघा इव (**आजन्**) कामयन्ते॥ ३॥

अन्वयः-हे सभासेनेशौ! यो युवयुरुत्तानहस्तो वरीमन् वामन्धसस्सुप्रायणतमं बर्हिरकारि दुःखादस्तारि तं विज्ञाय ववन्द ये विद्यादिषु शुभगुणेषु नक्षन्तोऽद्रय इव वामाञ्जँस्तान् युवां कामयेथाम्॥ ३॥

भावार्थः-ये होमेन वाय्वादीञ्छोधयित्वा विमानादिभिर्यानैरन्तरिक्षे गच्छन्ति सुखमुत्तमान् गुणांश्च व्याप्नुवन्तः सन्तो मेघवत्सर्वेषां सुखोन्नतीरिच्छन्ति ते वरं सुखं लभन्ते॥३॥

पदार्थः-हे सभासेनाधीशो! जो **(युवयुः)** तुम दोनों की इच्छा करने वाला **(उत्तानहस्तः)** ऊपर को हाथ उठाये हुए **(वरीमन्)** अतीव उत्तम व्यवहार में **(वाम्)** तुम दोनों से **(अन्धसः)** अन्न आदि के सम्बन्ध में **(सुप्रायणतमम्)** उत्तमता से जाते हैं जिसमें वह **(बर्हिः)** अन्तरिक्ष **(अकारि)** प्रसिद्ध किया जाता वा दुःख से **(अस्तारि)** तारा जाता उसको जानके **(ववन्द)** वन्दना करते हैं, जो विद्यादि शुभगुणों में **(नक्षन्तः)** प्राप्त होते हुए **(अद्रयः)** मेघों के समान **(वाम्)** तुम दोनों की **(आ, आञ्जन्)** अच्छे प्रकार कामना करते हैं, उनकी तुम दोनों कामना करो॥३॥

भावार्थः-जो होम से वायु आदि पदार्थों को शुद्ध कर विमान आदि यानों से अन्तरिक्ष में जाते तथा सुख और उत्तम गुणों को व्याप्त होते हुए मेघ के समान सबके सुख और उन्नतियों को चाहते हैं, वे उत्तम सुख पाते हैं॥३॥

पुनस्तौ किं कुर्य्यातामित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

ऊ॒र्ध्वो वा॑मग्निरध्व॒रेष्वस्था॒त् प्र रा॒तिरे॑ति जू॒र्णिनी॑ घृ॒ताची॑।
प्र होता॑ गू॒र्तम॑ना उरा॒णोऽय॑क्त॒ यो नास॑त्या॒ हवी॑मन्॥४॥

ऊ॒र्ध्वः। वा॒म्। अ॒ग्निः। अ॒ध्व॒रेषु॑। अ॒स्था॒त्। प्र। रा॒तिः। ए॒ति॒। जू॒र्णिनी॑। घृ॒ताची॑। प्र। होता॑। गू॒र्तऽम॑नाः। उ॒रा॒णः। अय॑क्त। यः। नास॑त्या। हवी॑मन्॥४॥

पदार्थः-(**ऊर्ध्वः**) ऊर्ध्वगामी **(वाम्)** युवयोः **(अग्निः)** पावक इव **(अध्वरेषु)** अहिंसादिधर्म्यव्यवहारेषु **(अस्थात्)** तिष्ठति **(प्र)** **(रातिः)** दानम् **(एति)** प्राप्नोति **(जूर्णिनी)** वेगवती **(घृताची)** रात्रिः। **घृताचीति रात्रिनाम।** (निघं०१.७) **(प्र)** **(होता)** दाता **(गूर्तमनाः)** गूर्त्तमुद्युक्तं मनो यस्य सः **(उराणः)** बहु कुर्वाणः **(अयुक्तः)** युङ्क्ते **(यः)** **(नासत्या)** अविद्यमानासत्यव्यवहारौ **(हवीमन्)** होमे॥४॥

अन्वयः-हे नासत्या सभासेनेशौ! वां यदि यो गूर्त्तमना उराणो होताऽध्वरेषूर्ध्वोऽग्निरिवाऽस्थाद् घृताचीव जूर्णिनी रातिः प्रैति हवीमन् प्रायुक्त तं सदा सत्कुर्याताम्॥४॥

भावार्थः-हे सभासेनेशौ! ये मनुष्या राजव्यवहारे सत्योत्साहाभ्यां प्रवर्त्तन्ते तान् भवन्तौ सत्कुर्याताम्॥४॥

पदार्थः-हे **(नासत्या)** सत्य व्यवहारयुक्त सभासेनाधीशो! **(वाम्)** तुम दोनों का यदि **(यः)** जो **(गूर्त्तमनाः)** उद्यम करने को मन जिसका वह **(उराणः)** बहुत पदार्थ सिद्ध करने वाला **(होता)** दानशीलजन **(अध्वरेषु)** अहिंसादि धर्मयुक्त व्यवहारों में **(ऊर्ध्वः)** ऊपर जाने वाला **(अग्निः)** अग्नि के

समान **(अस्थात्)** स्थिर होता है और **(घृताची)** रात्रि के समान **(जूर्णिनी)** वेगवती **(रातिः)** दानक्रिया **(प्र, एति)** प्राप्त होती है वा **(हवीमन्)** होम कर्म में **(प्र, अयुक्त)** अच्छे प्रकार प्रयुक्त होता, उसका सदा सत्कार करो॥४॥

भावार्थः-हे सभासेनाधीशो! जो मनुष्य राजव्यवहार में सत्य और उत्साह से प्रवृत्त होते हैं, उनका सत्कार आप लोग करें॥४॥

पुनस्तौ किंवत्कीदृशौ भवेतामित्याह॥

फिर वे किसके समान कैसे हों, इस विषय को कहते हैं॥

अधि॑ श्रि॒ये दु॑हि॒ता सूर्य॑स्य॒ रथं॑ तस्थौ पुरुभुजा श॒तोति॑म्।
प्र मा॒याभि॑र्मायिना भूत॒मत्र॒ नरा॑ नृ॒तू जनि॑मन् य॒ज्ञिया॑नाम्॥५॥३॥

अधि॑। श्रि॒ये। दु॒हि॒ता। सूर्य॑स्य। रथ॑म्। त॒स्थौ॒। पु॒रु॒ऽभु॒जा॒। श॒तऽऊ॑ति॒म्। प्र। मा॒याभिः॑। मा॒यि॒ना॒। भू॒त॒म्। अत्र॑। नरा॑। नृ॒तू॒ इति॑। जनि॑मन्। य॒ज्ञिया॑नाम्॥५॥

पदार्थः-(**अधि**) उपरि **(श्रिये)** शोभायै लक्ष्म्यै वा **(दुहिता)** दुहिते वोषा **(सूर्य्यस्य)** **(रथम्)** रमणीयं किरणम् **(तस्थौ)** तिष्ठति। **(पुरुभुजा)** बहूनां पालकौ **(शतोतिम्)** शतान्यूतयो येन तम् **(प्र)** **(मायाभिः)** प्रज्ञाभिः **(मायिना)** प्राज्ञौ **(भूतम्)** भवेतम् **(अत्र)** अस्मिन् **(नरा)** नायकौ **(नृतू)** नेतारौ **(जनिमन्)** जन्मनि **(यज्ञियानाम्)** सत्सङ्गतिमर्हाणाम्॥५॥

अन्वयः-हे मायिना पुरुभुजा नृतू नरा राजसभासेनेशौ! युवां मायाभिरत्र यज्ञियानां जनिमन् यथा सूर्य्यस्य दुहिता शतोतिं रथमधि तस्थौ तथा श्रिये प्र भूतम्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य उषर्वद् यानादिसाधनै राज्यश्रीप्राप्तये विदुषां विद्याजन्मानि कारयन्ति तेऽसङ्ख्यां रक्षां प्राप्यात्र जगत्यधिष्ठातारो जायन्ते॥५॥

पदार्थः-हे **(मायिना)** प्राज्ञ **(पुरुभुजा)** बहुतों की पालना करने वाले **(नृतू)** अग्रगन्ता **(नरा)** नायक राजसभा-सेनाधीशो! तुम **(मायाभिः)** बुद्धियों से **(अत्र)** इस **(यज्ञियानाम्)** सत्सङ्गति के योग्य मनुष्यों के **(जनिमन्)** जन्म में जैसे **(सूर्य्यस्य)** सूर्य की **(दुहिता)** पुत्री के समान उषा **(शतोतिम्)** जिससे सैकड़ो रक्षायें होती उस **(रथम्)** रमणीय किरण के **(अधि, तस्थौ)** ऊपर स्थित होती, वैसे **(श्रिये)** शोभा वा लक्ष्मी के लिये **(प्र, भूतम्)** समर्थ होओ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो उषा के समान यानादि साधनों से राज्यश्री की प्राप्ति के लिये विद्वानों के विद्याजन्म को कराते हैं, वे असङ्ख्य रक्षा को प्राप्त होके इस जगत् में अधिष्ठाता होते हैं॥५॥

पुना राजादयः कस्मै कां प्राप्य कीदृशा भवेयुरित्याह॥

फिर राजादि किसके लिये किसको प्राप्त होके कैसे हों इस विषय को कहते हैं॥

युवं श्रीभिर्दर्शताभिरा॒भिः शुभे पुष्टिमूहथुः सूर्यायाः।

प्र वां॒ वयो॒ वपु॒षेऽनु॑ पप्तन्नक्षद्वाणी सुष्टु॒ता धिष्ण्या वाम्॥६॥

युवम्। श्रीभिः। दर्शताभिः। आभिः। शुभे। पुष्टिम्। ऊहथुः। सूर्यायाः। प्र। वाम्। वयः। वपुषे। अनु। पप्तन्। नक्षत्। वाणी। सुऽस्तुता। धिष्ण्या। वाम्॥६॥

पदार्थः-(**युवम्**) युवाम् (**श्रीभिः**) राजनीतिशोभाभिः (**दर्शताभिः**) द्रष्टव्याभिः (**आभिः**) वर्त्तमानाभिः (**शुभे**) कल्याणाय (**पुष्टिम्**) पोषणम् (**ऊहथुः**) प्रापयथः (**सूर्यायाः**) उषस इव सम्बन्धिन्याः प्रजायाः (**प्र**) (**वाम्**) युवयोः (**वयः**) पक्षिणः (**वपुषे**) सुरूपाय (**अनु**) (**पप्तन्**) पतन्ति (**नक्षत्**) व्याप्नोतु प्राप्नोतु वा (**वाणी**) वेदवाक् (**सुष्टुता**) सुष्ठु प्रशंसिता (**धिष्ण्या**) दृढौ प्रगल्भौ (**वाम्**) युवाम्॥६॥

अन्वयः-हे धिष्ण्या! यदि वां वय इव पप्तन् शुभे वपुषे सुष्टुता वाण्यनु नक्षद् यदि युवं दर्शताभिराभिः श्रीभिः सूर्याया इव वाचः पुष्टिं प्रोहथुस्तर्हि तौ वां सततं पोषयेतम्॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यदि भवन्तो राज्यं कर्तुं राज्यश्रियं प्राप्तुं च चिकीर्षन्ति तर्हि प्रयत्नेन सर्वेण धनादिना च विद्यायुक्तां वाचं प्राप्नुवन्तु यथा पक्षिणः स्वाश्रयं गच्छन्ति तथैव भवन्तो धर्म्यां नीतिं प्राप्योषा दिनमिव यशः प्रकाशयन्तु॥६॥

पदार्थः-हे (**धिष्ण्या**) दृढ प्रगल्भो! जो (**वाम्**) तुम दोनों जैसे (**वयः**) पक्षी (**पप्तन्**) गिरते हैं, वैसे (**शुभे**) कल्याणरूपी (**वपुषे**) सुरूप के लिये (**सुष्टुता**) उत्तम प्रशंसा को प्राप्त (**वाणी**) वेदवाणी (**अनु, नक्षत्**) अनुकूलता से व्याप्त वा प्राप्त हो और जो (**युवम्**) तुम दोनों (**दर्शताभिः**) द्रष्टव्य (**आभिः**) इन (**श्रीभिः**) राजनीति की शोभाओं से (**सूर्यायाः**) उषासम्बन्धिनी प्रजा से वाणी की (**पुष्टिम्**) पुष्टि को (**प्र, ऊहथुः**) प्राप्त कराते हो वे (**वाम्**) तुम दोनों निरन्तर पुष्टि करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! यदि तुम लोग राज्य करने की और राज्यलक्ष्मी को प्राप्त करने की इच्छा करते हो तो प्रयत्न से और समस्त धन आदि से विद्यायुक्त वाणी को प्राप्त होओ और जैसे पक्षी अपने आश्रय को प्राप्त होते हैं, इसी प्रकार तुम धर्मयुक्त नीति को प्राप्त होकर जैसे उषाकाल दिन को, वैसे यश को प्रकाशित करो॥३॥

पुनर्मनुष्याः केन किं कुर्युरित्याह॥

फिर मनुष्य किससे क्या करें, इस विषय को कहते हैं॥

आ वां॒ वयोऽश्वा॑सो॒ वहि॑ष्ठा अ॒भि प्रयो॑ नासत्या वहन्तु।

प्र वां॒ रथो॒ मनो॑जवा असर्जि॒षः पृ॒क्ष इ॒षिधो॒ अनु॑ पू॒र्वीः॥७॥

आ। वाम्। वयः। अश्वासः। वहिष्ठाः। अभि। प्रयः। नासत्या। वहन्तु। प्र। वाम्। रथः। मनःऽजवाः। असर्जि। इषः। पृक्षः। इषिधः। अनु। पूर्वीः॥७॥

पदार्थः-(**आ**) (**वाम्**) युवयोः (**वयः**) पक्षिण इव (**अश्वासः**) आशुगामिनोऽग्न्यादयः (**वहिष्ठाः**) अतिशयेन यानानां वोढारः (**अभि**) आभिमुख्ये (**प्रयः**) अन्नादिकम् (**नासत्या**) अविद्यमानासत्याचरणौ (**वहन्तु**) प्राप्नुवन्तु (**प्र**) (**वाम्**) (**रथः**) (**मनोजवाः**) मनोवद्गतयः (**असर्जि**) सृज्येत (**इषः**) अन्नाद्याः (**पृक्षः**) सम्प्राप्तव्याः (**इषिधः**) इच्छाप्रकाशिकाः (**अनु**) (**पूर्वीः**) प्राचीनाः॥७॥

अन्वयः-हे नासत्या! ये वां वहिष्ठा मनोजवा अश्वासो वयो न प्रय आऽभि वहन्तु येन पृक्ष इषिधः पूर्वीरिषोऽन्वसर्जि स रथो वां प्रवहतु॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यदि भवन्तोऽग्न्यादिप्रयोगाञ्जानीयुस्तर्हि विमानादियानैः पक्षिण इवान्तरिक्षे गन्तुं शक्नुयुर्येनाऽभीष्टानि प्राप्य सर्वदाऽऽनन्दिता भवेयुः॥७॥

पदार्थः-हे (**नासत्या**) सत्य आचरण करने वालो! जो (**वाम्**) तुम दोनों के (**वहिष्ठाः**) अतीव यानों के लेजाने वाले (**मनोजवाः**) मन के समान जिनकी गति वे (**अश्वासः**) शीघ्रगामी अग्नि आदि (**वयः**) पक्षियों के समान (**प्रयः**) अन्नादि पदार्थ को (**आ, अभि, वहन्तु**) सन्मुख पहुंचावें जिससे (**पृक्षः**) अच्छे प्रकार प्राप्त होने योग्य (**इषिधः**) इच्छा प्रकाश करने वाली (**पूर्वीः**) प्राचीन (**इषः**) अन्नादि वस्तुओं में से प्रत्येक (**अनु, असर्जि**) रची जाती वह (**रथः**) रथ (**वाम्**) तुम दोनों को (**प्र**) पहुंचावे॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो आप लोग अग्न्यादि पदार्थों के प्रयोगों को जानो तो विमानादि यानों से पक्षियों के समान अन्तरिक्ष में जा सको, जिससे चाहे हुए पदार्थों को प्राप्त होकर सर्वदा आनन्दित होओ॥७॥

पुना राजप्रजाजनाः कथं वर्त्तित्वा किं प्राप्नुयुरित्याह॥

फिर राजा और प्रजाजन कैसे वर्त्ताव कर क्या पावें, इस विषय को कहते हैं॥

पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्राम्।
स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन्॥८॥

पुरु। हि। वाम्। पुरुऽभुजा। देष्णम्। धेनुम्। नः। इषम्। पिन्वतम्। असक्राम्। स्तुतः। च। वाम्। माध्वी इति। सुऽस्तुतिः। च। रसाः। च। ये। वाम्। अनु। रातिम्। अग्मन्॥८॥

पदार्थः-(**पुरु**) बहु (**हि**) निश्चये (**वाम्**) युवयोः (**पुरुभुजा**) बहुपालकौ (**देष्णम्**) दातव्यम् (**धेनुम्**) वाचम् (**नः**) अस्मभ्यम् (**इषम्**) अन्नं विज्ञानं वा (**पिन्वतम्**) सुखयतम् (**असक्राम्**) या सहनं क्रामति ताम् (**स्तुतः**) प्रशंसितः (**च**) (**वाम्**) (**माध्वी**) माधुर्य्यादिगुणोपेता (**सुष्टुतिः**) श्रेष्ठा प्रशंसा (**च**) (**रसाः**) मधुरादयः (**च**) (**ये**) (**वाम्**) युवाम् (**अनु**) (**रातिम्**) दानम् (**अग्मन्**) प्राप्नुवन्ति॥८॥

अन्वयः-हे पुरुभुजा! वां युवां नः पुरु देष्णं धेनुमसक्रामिषं च पिन्वतम्। यो हि स्तुतः स च वां पिन्वतु ये वां माध्वी सुष्टुती रसाश्च सन्ति तै रातिमन्वग्मँस्तैरस्मान् योजयतम्॥८॥

भावार्थः-यदि राजप्रजाजनाः परस्परेषामुपकाराय प्रयतेरँस्तर्ह्येतान् सर्वा प्रशंसा सकलमैश्वर्यं च प्राप्नुयात्॥८॥

पदार्थः-हे **(पुरुभुजा)** बहुतों की पालना करने वालो! **(वाम्)** तुम दोनों **(नः)** हमारे लिये **(पुरु)** बहुत **(देष्णम्)** देने योग्य पदार्थ **(धेनुम्)** वाणी और **(असक्राम्)** सहन को उल्लङ्घन करने वाला **(इषम्, च)** अन्न वा विज्ञान को भी **(पिन्वतम्)** सुखयुक्त करो अर्थात् पुष्ट करो। जो **(हि)** निश्चित **(स्तुतः)** प्रशंसा को प्राप्त है **(च)** वह भी **(वाम्)** तुम दोनों को पुष्टि दे **(ये)** जो **(वाम्)** तुम दोनों के **(माध्वी)** माधुर्य्यादिगुणयुक्त **(सुष्टुतिः)** श्रेष्ठ प्रशंसा **(रसाः, च)** और रस हैं उनसे **(रातिम्)** दान को **(अनु, अग्मन्)** प्राप्त होते हैं उनसे हमको युक्त कराइये॥८॥

भावार्थः-जो राजा और प्रजाजन परस्पर के उपकार के लिये प्रयत्न करें तो इनको सर्व प्रशंसा और सकल ऐश्वर्य भी प्राप्त होवे॥८॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

उ॒त म॑ ऋ॒ज्रे पु॑र॒यस्य र॒घ्वी सु॑मी॒ळ्हे श॒तं पे॑रु॒के च॑ प॒क्वा।
शा॒ण्डो दा॑द्धिर॒णिन॒ः स्मद्दि॑ष्टी॒न् दश॑ व॒शासो॑ अभि॒षाच॑ ऋ॒ष्वान्॥९॥

उ॒त। मे॒। ऋ॒ज्र॒ इति॑। पु॒र॒यस्य॑। र॒घ्वी॒ इति॑। सु॒ऽम॒ी॒ळ्हे॒। श॒तम्। पे॒रु॒के॒। च॒। प॒क्वा। शा॒ण्डः। दा॒त्। हि॒र॒णिन॑ः। स्मत्ऽदि॑ष्टीन्। दश॑। व॒शासः॑। अ॒भि॒ऽसाच॑ः। ऋ॒ष्वान्॥९॥

पदार्थः-**(उत)** **(मे)** मम **(ऋज्रे)** ऋजुप्रिये **(पुरयस्य)** यः पुरोऽयते प्राप्नोति तस्य **(रघ्वी)** पक्वानि **(शाण्डः)** यः श्यति तनूकरोति तथाऽयम्। अत्र शो तनूकरण इत्यस्मादौणादिकोऽडच् प्रत्ययः। **(दात्)** ददाति **(हिरणिनः)** हिरणाः सन्ति येषां तान् **(स्मद्दिष्टीन्)** प्रशंसितदर्शनान् **(दश)** एतत्सङ्ख्याकानश्वान् रथादीन् वा **(वशासः)** ये वशं प्राप्ताः **(अभिषाचः)** ये आभिमुख्येन सचन्ति ते **(ऋष्वान्)** महतः। **ऋष्व इति महन्नाम।** (निघं०३.३)॥९॥

अन्वयः-येऽभिषाचो वशासः पुरयस्य म ऋज्रे सुमीळ्ह उत पेरुके रघ्वी पक्वा च शाण्डो दात् तान् हिरणिनः स्मद्दिष्टीनृष्वान् दश शतं चाऽहं प्राप्नुयाम्॥९॥

भावार्थः-हे मनुष्या! ये मम वशीभूताः प्रीतियुक्ता महान्तः सहाया भवन्ति तदधीनोऽहमपि भवेयमेवं परस्परे वशत्वे सत्युत्तमान्यसंख्यानि कार्याणि कर्तुं शक्नुयाम्॥९॥

पदार्थः-जो मनुष्य **(अभिषाचः)** सम्मुख सम्बन्ध करते वा **(वशासः)** वश को प्राप्त होते हैं तथा **(पुरयस्य)** जो पहिले प्राप्त होता उस **(मे)** मेरे **(ऋज्रे)** कोमलता से प्रिय **(सुमीळ्हे)** सुन्दर सेचने योग्य **(उत)** और **(पेरुके)** पालन करने वाले व्यवहार में **(रघ्वी)** छोटी क्रिया **(पक्वा, च)** और पक्के फलों को **(शाण्डः)** सूक्ष्मता करने वाला **(दात्)** देता है उन **(हिरणिनः)** हिरण वाले **(स्मद्दिष्टीन्)** प्रशंसित

दर्शन वाले **(ऋष्वान्)** बड़े-बड़े **(दश)** दश घोड़े वा रथों को वा **(शतम्)** और सैकड़ों को मैं प्राप्त होऊं॥९॥

भावार्थः-हे मनुष्यो! जो मेरे वशीभूत, प्रीतियुक्त, महान् सहायक होते हैं, उनके आधीन मैं भी होऊं, इस प्रकार परस्पर का वशभाव हुए पीछे उत्तम असङ्ख्य कार्य्य कर सकूं॥९॥

पुना राजसेनेशौ किं कुर्यातामित्याह॥

फिर राजा और सेनापति क्या करें, इस विषय को कहते हैं॥

सं वां॑ श॒ता ना॑सत्या स॒हस्रा॑श्वा॑नां पुरु॒पन्था॑ गि॒रे दा॑त्।
भ॒रद्वा॑जाय वी॒र॒ नू गि॒रे दा॑ द्यु॒ता रक्षा॑ꣳसि पुरुदंससा स्युः॥१०॥

सम्। वा॒म्। श॒ता। ना॒स॒त्या॒। स॒हस्रा॑। अश्वा॑नाम्। पुरु॒ऽपन्थाः॑। गि॒रे। दा॒त्। भ॒रत्ऽवा॑जाय। वी॒र॒। नु। गि॒रे। दा॒त्। हु॒ता। रक्षा॑ꣳसि। पुरु॒ऽदं॒स॒सा॒। स्यु॒रिति॑ स्युः॥१०॥

पदार्थः-(**सम्**) (**वाम्**) युवयोः (**शता**) शतानि (**नासत्या**) अविद्यमानाधर्म्माचरणौ (**सहस्रा**) सहस्राणि (**अश्वानाम्**) तुरङ्गाणामग्न्यादीनां वा (**पुरुपन्थाः**) पुरुर्बहुविधश्चासौ पन्थाश्च (**गिरे**) वाचे (**दात्**) ददाति (**भरद्वाजाय**) धृतविज्ञानाय (**वीर**) शत्रुघातिन् (**नू**) सद्यः (**गिरे**) राजनीतियुक्तायै वाचे (**दात्**) ददाति (**हता**) हताः दुष्टाः (**रक्षांसि**) प्राणिनः (**पुरुदंससा**) पुरूणि दंसांस्युत्तमानि कर्माणि ययोस्तौ (**स्युः**) भवेयुः॥१०॥

अन्वयः-हे पुरुदंससा नासत्या! यो वां पुरुपन्था अश्वानां गिरे शता सहस्रा सं दाद्यो भरद्वाजाय गिरे शता सहस्रा दाद्येन रक्षांसि हता स्युः। हे वीर! त्वं तेन दुष्टान् नू हिन्धि॥१०॥

भावार्थः-हे राजसेनेशौ! यो धार्मिको न्यायेन राज्यपालनाय शत्रुभ्यः स्वसेनारक्षणाय प्रयतेत तस्यासङ्ख्यं धनं प्रतिष्ठां च सततं कुर्यातम्॥१०॥

पदार्थः-हे (**पुरुदंससा**) बहुत उत्तम कर्म्मों वाले (**नासत्या**) अधर्माचरण रहित जो (**वाम्**) तुम दोनों का (**पुरुपन्थाः**) बहुत प्रकार का मार्ग (**अश्वानाम्**) घोड़े वा अग्नि आदि पदार्थों की (**गिरे**) वाणी के लिये (**शता**) सैकड़ों वा (**सहस्रा**) हजारों प्रकारों को (**सम्, दात्**) अच्छे प्रकार देता है जो (**भरद्वाजाय**) धारण किया विज्ञान जिसने उसके लिये वा (**गिरे**) राजनीतियुक्त वाणी के लिये सैकड़ों और हजारों प्रकारों को (**दात्**) देता है जिससे (**रक्षांसि**) राक्षस (**हता**) नष्ट (**स्युः**) हों, हे (**वीर**) वीर! उससे आप दुष्टों को (**नू**) शीघ्र मारो॥१०॥

भावार्थः-हे राजा और सेनापतियो! जो धार्मिक न्याय से राज्य की पालना करने और शत्रुओं से अपनी सेना की रक्षा करने के लिये यत्न करे, उसके लिये असङ्ख्य धन और प्रतिष्ठा निरन्तर करो॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम्॥ ११॥ ४॥

आ। वाम्। सुम्ने। वरिमन्। सुरिऽभिः। स्याम्॥ ११॥

पदार्थः-(**आ**) समन्तात् (**वाम्**) युवाम् (**सुम्ने**) सुखे (**वरिमन्**) अतिशयेन श्रेष्ठे (**सूरिभिः**) विद्वद्भिः सह (**स्याम्**) भवेयम्॥ ११॥

अन्वयः-हे राजसेनेशौ! यथाऽहं सूरिभिः सह वरिमन् सुम्न आ स्यां तथा वां विदध्यातम्॥ ११॥

भावार्थः-राजसेनेशाभ्यां सर्वदा धार्मिका विद्वांसः सत्कर्त्तव्या येनैते सर्वस्य सुखमुन्नयेयुरिति॥ ११॥

अत्राश्विगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिषष्टितमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे राजा और सेनापतियो! जिस प्रकार मैं (**सूरिभिः**) अत्यन्त बुद्धिमान् विद्वानों के साथ (**वरिमन्**) अतीव श्रेष्ठ (**सुम्ने**) सुख में (**आ, स्याम्**) सब ओर से होऊं अर्थात् प्रसिद्ध होऊं वैसा (**वाम्**) आप विधान करो॥ ११॥

भावार्थः-राजा और सेनापतियों को सर्वदा धार्मिक विद्वान् का सत्कार करना चाहिये, जिससे ये सब के सुख की उन्नति दिलावें॥ ११॥

इस सूक्त में अश्वियों का गुणवर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह त्रेसठवां सूक्त और चौथा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य चतु:षष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषि:। उषा देवता। १, २, ६ विराट्त्रिष्टुप्। ३ त्रिष्टुप्। ४ निचृत्त्रिष्टुप् छन्द:। धैवत: स्वर:। ५ पङ्क्तिश्छन्द:। पञ्चम: स्वर:॥

अथ स्त्रिय: कीदृश्यो वरा इत्याह॥

अब स्त्रियाँ कैसी श्रेष्ठ होती हैं, इस विषय को कहते हैं॥

उदु॑ श्रि॒य उ॒षसो॒ रोच॑माना॒ अस्थु॑र॒पां नोर्मयो॒ रुश॑न्तः।
कृ॒णोति॒ विश्वा॑ सु॒पथा॑ सु॒गान्यभू॑दु॒ वस्वी॒ दक्षि॑णा म॒घोनी॑॥ १॥

उत्। ऊँ इति। श्रिये। उषस:। रोचमाना:। अस्थु:। अपाम्। न। ऊर्मय:। रुशन्त:। कृणोति। विश्वा। सुऽपथा। सुऽगानि। अभूत्। ऊँ इति। वस्वी। दक्षिणा। मघोनी॥ १॥

पदार्थ:-(**उत्**) (**उ**) (**श्रिये**) शोभायै (**उषस:**) प्रभातवेला इव (**रोचमाना:**) रुचिमत्य: (**अस्थु:**) तिष्ठन्ति (**अपाम्**) जलानाम् (**न**) इव (**ऊर्मय:**) तरङ्गा: (**रुशन्त:**) हिंसन्त: (**कृणोति**) (**विश्वा**) सर्वाणि (**सुपथा**) शोभना: पन्था येषु तानि (**सुगानि**) सुष्ठु गच्छन्ति येषु तानि (**अभूत्**) भवति (**उ**) (**वस्वी**) वसूनामियम् (**दक्षिणा**) दक्षिणेव (**मघोनी**) परमधनयुक्ता॥ १॥

अन्वय:-हे पुरुषा: ! या: स्त्रियो रोचमाना उषस इवाऽपां रुशन्त ऊर्मयो न श्रिय उदस्थुस्ता उ सुखप्रदा: सन्ति। या वस्वी दक्षिणेव मघोन्यभूत् सोषर्वदु विश्वा सुपथा सुगानि कृणोति॥ १॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे पुरुषा! यथोषसो रुचिकरा भवन्ति तथाभूता: स्त्रियो वरा: सन्ति यथा जलतरङ्गास्तटाञ्छिन्दन्ति तथैव या दु:खानि कृन्तन्ति याश्च दिनवत्सर्वाणि गृहकृत्यानि प्रकाशयन्ति ता एव सर्वदा मङ्गलकारिण्यो भवन्ति॥ १॥

पदार्थ:-हे पुरुषो! जो स्त्रियाँ (**रोचमाना:**) दीप्तिमती (**उषस:**) प्रभातवेलाओं के समान वा (**अपाम्**) जलों की (**रुशन्त:**) हिंसती अर्थात् फूलों को विदारती हुई (**ऊर्मय:**) तरङ्गों के (**न**) समान (**श्रिये**) शोभा के लिये (**उत्, अस्थु:**) उठती हैं, वे (**उ**) ही सुख देने वाली हैं जो (**वस्वी**) वसुओं की यह (**दक्षिणा**) दक्षिणा के समान (**मघोनी**) परमधनयुक्त (**अभूत्**) होती है, वह उषा के समान (**उ**) ही (**विश्वा**) समस्त (**सुपथा**) शुभमार्ग वाले (**सुगानि**) जिनमें सुन्दरता से चलें, उन कामों को (**कृणोति**) करती है॥ १॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे पुरुषो! जैसे प्रभातवेलायें रुचि करने वाली होती हैं, वैसी हुई स्त्रियाँ श्रेष्ठ हैं वा जैसे जलतरंगें तटों को छिन्नभिन्न करती हैं, वैसे ही जो स्त्रियाँ दु:खों को छिन्न-भिन्न करती हैं और जो दिन के तुल्य समस्त गृहकृत्यों को प्रकाशित करती हैं, वे ही सर्वदा मङ्गलकारिणी होती हैं॥ १॥

पुनः सा कीदृशी भवेदित्याह॥

फिर वह कैसी हो, इस विषय को कहते हैं॥

भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन्।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः॥ २॥

भद्रा। ददृक्षे। उर्विया। वि। भासि। उत्। ते। शोचिः। भानवः। द्याम्। अपप्तन्। आविः। वक्षः। कृणुषे। शुम्भमाना। उषः। देवि। रोचमाना। महः।भिः॥ २॥

पदार्थः-(**भद्रा**) कल्याणकारिणी (**ददृक्षे**) दृश्यते (**उर्विया**) बहुरूपा (**वि**) (**भासि**) (**उत्**) (**ते**) तव (**शोचिः**) (**भानवः**) किरणाः (**द्याम्**) अन्तरिक्षम् (**अपप्तन्**) पतन्ति गच्छन्ति (**आविः**) प्राकट्ये (**वक्षः**) वक्षःस्थलम् (**कृणुषे**) (**शुम्भमाना**) सुशोभायुक्ता (**उषः**) उषर्वद्वर्त्तमाने (**देवि**) विदुषि (**रोचमाना**) विद्याविनयाभ्यां प्रकाशमाना (**महोभिः**) महद्भिः शुभैर्गुणकर्मस्वभावैः॥ २॥

अन्वयः-हे उषर्वद्वर्त्तमाने देवि! यतस्त्वं भद्रा ददृक्ष उर्विया सती गृहकृत्यान्युद्वि भासि यस्यास्ते शोचिर्भानवो द्यामपप्तन्निव वक्ष आविष्कृणुषे महोभिः शुम्भमाना रोचमाना सती सुखं प्रयच्छसि तस्मात् संपूज्यासि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे स्त्रियो! यूयं चातुर्येण सर्वान् पत्यादीन् सन्तोष्य गृहकृत्यानि यथावदनुष्ठायातिविषयासक्तिं विहाय सुशोभा भूत्वा सदैव पुरुषार्थेन धर्मकृत्यानि सूर्य्यवत्प्रकाशयत॥ २॥

पदार्थः-हे (**उषः**) प्रभातवेला के समान वर्त्तमान (**देवि**) विदुषी! जिससे तू (**भद्रा**) कल्याणकारिणी (**ददृक्षे**) देखी जाती है तथा (**उर्विया**) बहुरूप हुई घर के कामों को (**उत्, वि, भासि**) विशेष कर उत्तम प्रकाश करती है जिस (**ते**) तेरी (**शोचिः**) उत्तम नीति का प्रकाश (**भानवः**) किरणें जैसे (**द्याम्**) अन्तरिक्ष को (**अपप्तन्**) जातीं प्राप्त होतीं, वैसे (**वक्षः**) छाती का (**आविः, कृणुषे**) प्रकाश करती है वा (**महोभिः**) महान् शुभ गुणकर्म स्वभावों से (**शुम्भमाना**) सुन्दर शोभायुक्त और (**रोचमाना**) विद्या और विनय से प्रकाशित होती हुई सुख देती है, इससे अच्छे प्रकार सत्कार करने योग्य है॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे स्त्रियो! तुम चतुरता से सब पति आदि को सन्तोष देकर, घर के कामों को यथावत् अनुष्ठान कर, अतिविषयासक्ति को छोड़ और सुन्दर शोभायुक्त होकर सदैव पुरुषार्थ से धर्मयुक्त कामों को सूर्य के समान प्रकाशित करो॥ २॥

पुनस्ताः कीदृश्यो भवेयुरित्याह॥

फिर वे कैसी हों, इस विषय को कहते हैं॥

वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम्।
अपेजते शूरो अस्तेव शत्रून् बाधते तमो अजिरो न वोळ्हा॥ ३॥

वहन्ति। सीम्। अरुणासः। रुशन्तः। गावः। सुऽभगाम्। उर्विया। प्रथानाम्। अप। ईजते। शूरः। अस्ताऽइव। शत्रून्। बाधते। तमः। अजिरः। न। वोळ्हा॥ ३॥

पदार्थः-(**वहन्ति**) (**सीम्**) सर्वतः (**अरुणासः**) रक्तारुणादिगुणविशिष्टाः (**रुशन्तः**) हिंसन्तः (**गावः**) किरणाः (**सुभगाम्**) सौभाग्ययुक्ताम् (**उर्विया**) बहुपुरुषार्थयुक्ता (**प्रथानाम्**) विस्तीर्णसौन्दर्यप्रख्याताम् (**अप**) (**ईजते**) दूरीकरोति (**शूरः**) बलपराक्रमादियोगेन निर्भयः (**अस्तेव**) शस्त्राऽस्त्राणां प्रक्षेप्तेव (**शत्रून्**) (**बाधते**) विलोडयति (**तमः**) अन्धकारं रात्रिं वा (**अजिरः**) यः शीघ्रं न गच्छति सः (**न**) इव (**वोळ्हा**) विवाहिता॥ ३॥

अन्वयः-हे स्त्रि! त्वमजिरो न वोळ्हा सती शत्रूञ्छूरोऽस्तेवापेजत उषास्तमो बाधते यथाऽरुणासो रुशन्तो गावः सर्वान् पदार्थान् सीं वहन्ति तथोर्विया भव। हे पुरुष! उषसः सूर्य्य इवेमां प्रथानां भार्यां सुभगां कुरु॥ ३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे नरा! या उषर्वत्सुप्रकाशाः सुस्वरूपाः सूर्यकिरणवद्गृहकृत्यव्यवस्थानिर्वाहिकाः शूरवीरवद्व्यथारहिताः स्त्रियः स्युस्ताः सततं सत्कृत्य सौभाग्ययुक्ताः कुर्वन्तु॥ ३॥

पदार्थः-हे स्त्री! तू (**अजिरः**) जो शीघ्र नहीं जाता उस पुरुष के (**न**) समान और (**वोळ्हा**) विवाहित स्त्री (**शत्रून्**) शत्रुओं को (**शूरः**) बल वा पराक्रम आदि योग से निर्भय (**अस्तेव**) शस्त्र और अस्त्रों को अच्छे प्रकार फेंकने वाले के समान (**अप, ईजते**) दूर करती तथा प्रभातवेला जैसे (**तमः**) अन्धकार वा रात्रि को (**बाधते**) नष्ट-भ्रष्ट करे वा जैसे (**अरुणासः**) लाल काली पीली धौली आदि (**रुशन्तः**) पदार्थों को छिन्न-भिन्न करती हुई (**गावः**) किरणें सब पदार्थों को (**सीम्**) सब ओर से (**वहन्ति**) पहुंचाती हैं, वैसे (**उर्विया**) बहुत पुरुषार्थयुक्त हो। हे पुरुष! उषा को जैसे सूर्य, वैसे इस (**प्रथानाम्**) अत्यन्त सुन्दरता से प्रख्यात भार्या को (**सुभगाम्**) सौभाग्य करो॥ ३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जो प्रभातवेला के समान सुप्रकाश, सुरूपवती, सूर्य किरणों के तुल्य घर के कामों की व्यवस्था का निर्वाह करने वाली, शूरवीर के समान व्यथा अर्थात् परिश्रम की थकावट न मानने वाली स्त्रियाँ हों, उनका निरन्तर सत्कार कर सौभाग्युक्त करो॥ ३॥

पुनस्सा स्त्री कीदृशी भवेदित्याह॥

फिर वह स्त्री कैसी हो, इस विषय को कहते हैं॥

सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो।
सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै॥ ४॥

सुऽगा। उत। ते। सुऽपथा। पर्वतेषु। अवाते। अपः। तरसि। स्वभानो इति स्वऽभानो। सा। नः। आ। वह। पृथुऽयामन्। ऋष्वे। रयिम्। दिवः। दुहितः। इषयध्यै॥ ४॥

पदार्थः-(**सुगा**) सुष्ठु गन्तुं योग्या (**उत**) अपि (**ते**) तव (**सुपथा**) शोभनेन मार्गेण (**पर्वतेषु**) शैलेषु (**अवाते**) निर्वाते (**अपः**) जलानि (**तरसि**) (**स्वभानो**) स्वकीयदीप्ते (**सा**) (**नः**) अस्मान् (**आ**) (**वह**) गमय (**पृथुयामन्**) बहुप्रापक (**ऋष्वे**) महागुणयुक्त (**रयिम्**) श्रियम् (**दिवः**) प्रकाशस्य (**दुहितः**) कन्येव वर्त्तमाने (**इषयध्यै**) गन्तुम्॥४॥

अन्वयः-हे स्वभानो पृथुयामन्नृष्वे! त्वमनया भार्यया सह रयिमा वह नोऽवाप इव दुःखानि तरसि, अवाते पर्वतेषु सुपथा गच्छसि या ते सुगा स्त्री वा हे दिवो दुहितरिव वर्त्तमाने स्त्रि! त्वं पतिमिषयध्यै उतापि ते पतिर्हृद्यो भवेत् सा त्वं नः सुपथा सुखमा वह॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा सुनीतयो राजानः पर्वतेष्वपि सुमार्गान्निर्माय सर्वान् पथिकान् सुखयन्ति यथोषा मार्गान् प्रकाशयति तथैवोत्तमाः परस्परं प्रसन्नाः स्त्रीपुरुषा धर्ममार्गं संशोध्य परोपकारं प्रकाशयन्ति॥४॥

पदार्थः-हे (**स्वभानो**) अपनी दीप्तियुक्त (**पृथुयामन्**) बहुत पदार्थों की प्राप्ति करानेवाले (**ऋष्वे**) महान् गुणयुक्त विद्वन्! आप इस स्त्री के साथ (**रयिम्**) लक्ष्मी को (**आ, वह**) प्राप्त कराइये और (**नः**) हम लोगों की रक्षा करिये तथा (**अपः**) जलों के समान दुःखों को (**तरसि**) तरते अर्थात् उनसे अलग होते हो और (**अवाते**) निर्वात होने से (**पर्वतेषु**) पर्वतों में जैसे सुपथ से जाते हो तथा जो (**ते**) तुम्हारी (**सुगा**) सुन्दरता से जाने योग्य स्त्री वा हे (**दिवः**) प्रकाश की (**दुहितः**) कन्या के समान वर्त्तमान स्त्री! तू पति को (**इषयध्यै**) प्राप्त होने योग्य हो (**उत**) और तेरा पति तेरे मन का प्रिय हो (**सा**) तू हम लोगों को (**सुपथा**) अच्छे मार्ग से सुख प्राप्त करा॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अच्छी नीति वाले राजजन पर्वतों में भी अच्छे मार्गों को बनाकर सब मार्ग चलने वालों को सुखी करते हैं वा जैसे उषा (प्रभातवेला) मार्गों को प्रकाशित करती है, वैसे ही उत्तम परस्पर प्रसन्न स्त्री पुरुष धर्ममार्ग का संशोधन कर परोपकार का प्रकाश कराते हैं॥४॥

पुनस्तौ स्त्रीपुरुषौ कथं वर्त्तेयातामित्याह॥

फिर वे स्त्री-पुरुष कैसे वर्त्ताव वर्त्तें, इस विषय को कहते हैं॥

सा व॑ह॒ योक्षभि॒रवा॒तोषो॒ वर॑ं वह॑सि॒ जोष॒मनु॑।
त्वं दि॑वो दुहि॒तर्या ह॑ दे॒वी पू॒र्वहू॑तौ मं॒हना॑ दर्श॒ता भू॑:॥५॥

सा। आ। व॒ह॒। या। उ॒क्षऽभि॑:। अवा॑ता। उष॑:। वर॑म्। वह॑सि। जोष॑म्। अनु॑। त्वम्। दि॒व॒:। दु॒हि॒त॒:। या। ह॒। दे॒वी। पू॒र्वऽहू॑तौ। मं॒हना॑। द॒र्श॒ता। भू॒:॥५॥

पदार्थः-(**सा**) (**आ**) (**वह**) समन्तात्प्राप्नोतु (**या**) (**उक्षभिः**) वीर्यसेचकैः (**अवाता**) वायुविरहा (**उषः**) उषर्वद्वर्त्तमाने (**वरम्**) श्रेष्ठं पतिम् (**वहसि**) प्राप्नोषि (**जोषम्**) प्रीतम् (**अनु**) (**त्वम्**) (**दिवः**)

सूर्यस्य **(दुहितः)** कन्येव वर्त्तमाना **(या)** **(ह)** किल **(देवी)** विदुषी **(पूर्वहूतौ)** पूर्वेषां सत्कर्त्तव्यानां वृद्धानामाह्वाने **(मंहना)** पूजनीया **(दर्शता)** द्रष्टव्या **(भूः)** भवेः॥५॥

अन्वयः-हे दिवो दुहितरुषर्वद्वर्त्तमाने भद्रानने! याऽवातोक्षभिर्युक्तं वरं जोषमनु त्वं वहसि सा मां पतिमा वह या ह पूर्वहूतौ मंहना दर्शता देवी त्वं भूः सा मम प्रिया भव॥५॥

भावार्थः-यथोषा रात्रिमनुवर्त्तमाना नियमेन स्वकृत्यं करोति तथैव नियता सती स्त्री स्वगृहकृत्यानि कुर्यात्। ब्रह्मचर्यानन्तरं हृद्यं पतिमूढ्वा प्रसन्ना सती पतिं सततं प्रसादयेत्। एवमेव पतिरपि तामनुव्रतां सदैवानन्दयेत्॥५॥

पदार्थः-हे **(दिवः)** सूर्य की **(दुहितः)** कन्या के तुल्य तथा **(उषः)** उषा प्रभातवेला के समान वर्त्तमान श्रेष्ठ मुख वाली! **(या)** जो **(अवाता)** वायुरहित **(ऋक्षभिः)** वीर्यसेचकों से युक्त **(वरम्)** श्रेष्ठ **(जोषम्)** प्रीति से चाहे हुए पति को **(अनु)** अनुकूलता से **(त्वम्)** तू **(वहसि)** प्राप्त होती **(सा)** वह मुझ पति को **(आ, वह)** सब ओर से प्राप्त हो **(या)** जो **(ह)** ही **(पूर्वहूतौ)** पूर्व सत्कार करने योग्यों के आह्वान के निमित्त **(मंहना)** सत्कार करने और **(दर्शता)** देखने योग्य **(देवी)** विदुषी तू **(भूः)** हो सो मेरी प्रिया स्त्री हो॥५॥

भावार्थः-जैसे उषा रात्रि के अनुकूल वर्त्तमान नियम से अपने काम को करती है, वैसे ही नियमयुक्त स्त्री अपने घर के कामों को करे तथा ब्रह्मचर्य के अनन्तर अपने मन के प्यारे पति को विवाह कर प्रसन्न होती हुई पति को निरन्तर प्रसन्न करे, ऐसे ही पति भी उस अनुकूल आचरण करने वाली को सदैव आनन्दित करे॥५॥

पुनस्ते स्त्रीपुरुषाः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर वे स्त्री-पुरुष परस्पर कैसे वर्त्तें, इस विषय को कहते हैं॥

उ॒त ते॒ वय॑श्चि॒द्वस॒तेर॑पप्तन्नर॑श्च॒ ये पि॑तु॒भाजो॒ व्यु॑ष्टौ।

अ॒मा स॒ते व॑हसि॒ भूरि॑ वा॒ममुषो॑ देवि दा॒शुषे॒ मर्त्या॑य॥६॥५॥

उत्। ते॒। वयः॑। चि॒त्। व॒स॒तेः॒। अ॒प॒प्त॒न्। नरः॑। च॒। ये। पि॒तु॒ऽभाजः॑। विऽउ॑ष्टौ। अ॒मा। स॒ते। व॒ह॒सि॒। भूरि॑। वा॒मम्। उषः॑। दे॒वि॒। दा॒शुषे॑। मर्त्या॑य॥६॥

पदार्थः-(उत) **(ते)** तव **(वयः)** पक्षिणः **(चित्)** इव **(वसतेः)** **(अपप्तन्)** उड्डीयन्ते **(नरः)** नेतारः **(च)** **(ये)** **(पितुभाजः)** उत्तमान्नसेविनः **(व्युष्टौ)** विविधैर्गुणैः सेवमानायामुषसि **(अमा)** गृहाणि **(सते)** वर्त्तमानाय पत्ये **(वहसि)** प्राप्नोषि **(भूरि)** बहु **(वामम्)** प्रशस्तम् **(उषः)** उषर्वद्वर्त्तमाने **(देवि)** कमनीये **(दाशुषे)** सुखदात्रे **(मर्त्याय)** मनुष्याय॥६॥

अन्वयः-हे उषर्वद्वर्त्तमाने देवि! या त्वं व्युष्टौ सेवमानाय सते दाशुषे मर्त्याय पत्येऽमा भूरि वामं वहसि तस्यास्ते ये पितुभाजो नरस्ते च वसतेर्वयश्चित्ते सुरूपं दृष्ट्वोदपप्तंस्तेषां मध्यात् स्वयंवरविधानेन सर्वथा प्रसन्नं पतिं त्वं प्राप्नुयाः॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये वधूवरा स्वयंवरविवाहेन परस्परप्रसन्ना भूत्वा विवाहं कुर्वन्ति ते सूर्योषर्वद्गृहाश्रममुत्तमेनाचारेण सम्प्रकाश्य सदाऽऽनान्दिता भवन्तीति॥६॥ अत्रोषःसूर्यवत्स्त्रीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥६॥

इति चतुःषष्टितमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(उषः)** उषा के समान वर्त्तमान **(देवि)** मनोहररूपवती जो तू **(व्युष्टौ)** विविध गुणों से सेवा करने योग्य प्रभातवेला में **(सते)** वर्त्तमान **(दाशुषे)** सुख देने वाले **(मर्त्याय)** मनुष्य पति के लिये **(अमा)** घरों को **(भूरि)** बहुत **(वामम्)** प्रशंसित कर्म जैसे हों, वैसे **(वहसि)** प्राप्त होती उस **(ते)** तेरे **(ये)** जो **(पितुभाजः)** उत्तम अन्न के सेवनेवाले **(नरः)** मनुष्य हैं, वे **(च)** भी **(वसतेः)** निवास के सम्बन्ध में **(वयः)** पक्षियों के **(चित्)** समान तेरे सुरूप को देख **(उत्, अपप्तन्)** उड़ते हैं, उनमें से स्वयंवर विधि से सर्वथा प्रसन्न पति को तू प्राप्त हो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो वधू और वर स्वयंवर विवाह से परस्पर प्रसन्न होकर विवाह करे हैं, वे सूर्य्य और उषा के समान गृहाश्रम को उत्तम आचार से अच्छे प्रकार प्रकाशित कर सर्वदा आनन्दित होते हैं॥६॥

इस सूक्त में उषा और सूर्य के तुल्य स्त्रियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौसठवां सूक्त और पांचवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ षड्चस्य पञ्चषष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। उषा देवता। १ भुरिक्पङ्क्तिः। ५ स्वराट्पङ्क्तिश्छन्दः। पञ्चमस्स्वरः। २, ३ विराट्त्रिष्टुप्। ४, ६ निचृत्त्रिष्टुप्छन्दः। धैवतः स्वरः॥

पुनस्सा कीदृशी भवेदित्याह॥

अब छः ऋचावाले पैसठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर वह स्त्री कैसी हो, इस विषय को कहते हैं॥

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः।
या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून्॥ १॥

एषा। स्या। नः। दुहिता। दिवः।जाः। क्षितीः। उच्छन्ती। मानुषीः। अजीगरिति। या। भानुना। रुशता। राम्यासु। अज्ञायि। तिरः। तमसः। चित्। अक्तून्॥ १॥

पदार्थः-(**एषा**) (**स्या**) सा (**नः**) अस्माकम् (**दुहिता**) (**दिवोजाः**) सूर्याज्ञातेव (**क्षितीः**) पृथिवीः (**उच्छन्ती**) विवासयन्ती (**मानुषीः**) मनुष्याणामिमाः प्रजाः (**अजीगः**) जागरयति (**या**) (**भानुना**) किरणेन (**रुशता**) रूपेण (**राम्यासु**) रात्रिषु। **राम्येति रात्रिनाम।** (निघं०१.७) (**अज्ञायि**) ज्ञायते (**तिरः**) तिरश्चीने (**तमसः**) अन्धकारात् (**चित्**) (**अक्तून्**) रात्रीः॥१॥

अन्वयः-हे वरणीय! या रुशता भानुना सह वर्त्तमाना राम्यास्वज्ञायि तमसश्चिदक्तूँस्तिरस्करोति मानुषीः क्षितीरुच्छन्ती दिवोजा उषा इवाऽजीगो न एषा स्या दुहितास्ति त्वं गृहाण॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। या कन्या उषर्वद्विद्युद्वत्सुप्रकाशिता विद्याविनयहावभावैः पत्यादीनानन्दयति सूर्यो रात्रिं निवार्य्य सर्वाः प्रजाः प्रकाशयतीव गृहादविद्याऽन्धकारं निवार्य्य विद्यया सर्वान् प्रकाशयति सैव स्त्री वरा भवति॥१॥

पदार्थः-हे स्वीकार करने योग्य! (**या**) जो (**रुशता**) रूप से (**भानुना**) किरण के साथ वर्त्तमान (**राम्यासु**) रात्रियों में (**अज्ञायि**) जानी जाय (**तमसः**) अन्धकार से (**चित्**) भी (**अक्तून्**) रात्रियों को (**तिरः**) तिरस्कार करती तथा (**मानुषीः**) मनुष्यसम्बन्धी प्रजाओं को (**क्षितीः**) और पृथिवियों को (**उच्छन्ती**) विशेष निवास कराती हुई (**दिवोजाः**) सूर्य से उत्पन्न हुई उषा के समान (**अजीगः**) जगाती है (**नः**) हमारी (**एषा**) सो (**स्या**) यह (**दुहिता**) कन्या है, तुम ग्रहण करो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो कन्या उषा के तुल्य वा बिजुली के तुल्य अच्छे प्रकाश को प्राप्त, विद्या-विनय और हाव-भाव, कटाक्षों से पति आदि को आनन्दित करती है वा जैसे सूर्य्य रात्रि को दूर कर सब प्रजा को प्रकाशित करता है, वैसे घर से अविद्या और अन्धकार निवार विद्या से सब को प्रकाशित करती है, वही उत्तम स्त्री होती है॥१॥

पुनस्ता स्त्रियः कीदृश्यो भवेयुरित्याह॥

फिर वे स्त्री कैसी हों, इस विषय को कहते हैं॥

वि तद्युयुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः।
अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः॥ २॥

वि। तत्। ययुः। अरुणयुक्ऽभिः। अश्वैः। चित्रम्। भान्ति। उषसः। चन्द्रऽरथाः। अग्रम्। यज्ञस्य। बृहतः। नयन्तीः। वि। ताः। बाधन्ते। तमः। ऊर्म्यायाः॥ २॥

पदार्थः-(**वि**) (**तत्**) (**ययुः**) प्राप्नुवन्ति (**अरुणयुग्भिः**) येऽरुणान् किरणान् योजयन्ति तैः (**अश्वैः**) महद्भिः किरणैः (**चित्रम्**) अद्भुतं जगत् (**भान्ति**) (**उषसः**) प्रभातवेलाः (**चन्द्ररथाः**) चन्द्रं सुवर्णमिव रथो रमणीयं स्वरूपं यासां ताः (**अग्रम्**) (**यज्ञस्य**) सङ्गन्तव्यस्य गृहस्थव्यवहारस्य (**बृहतः**) महतः (**नयन्तीः**) प्रापयन्त्यः (**वि**) (**ताः**) (**बाधन्ते**) (**तमः**) अन्धकारम् (**ऊर्म्यायाः**) रात्रेः। **ऊर्म्येति रात्रिनाम।** (निघं०१.७)॥ २॥

अन्वयः-हे पुरुषा! याः कन्या यथा चन्द्ररथा उषसोऽरुणयुग्भिरश्वैर्ययुस्तच्चित्रं वि भान्ति बृहतो यज्ञस्याऽग्रं नयन्तीरूर्म्यायास्तमो वि बाधन्ते ता इव वर्त्तमाना वधूर्यूयं प्राप्नुत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे नरा! यूयं स्वसदृशगुणकर्मस्वभावा उषर्वदानन्दप्रदा विद्याविनयादिभिः सुशीला ब्रह्मचारिणीः कन्याः प्राप्य ताः सततमानन्द्य स्वयमानन्दं प्राप्नुत॥ २॥

पदार्थः-हे पुरुषो! जो कन्यायें जैसे (**चन्द्ररथाः**) जिनका सुवर्ण के समान रमणीयरूप है वे (**उषसः**) प्रभातवेलायें (**अरुणयुग्भिः**) जो अरुण किरणों की योजना करती हैं उन (**अश्वैः**) बड़ी-बड़ी किरणों से (**ययुः**) प्राप्त होती हैं (**तत्, चित्रम्**) उस आश्चर्य्य को (**वि, भान्ति**) विशेषता से प्रकाशित करती हैं तथा (**बृहतः**) महान् (**यज्ञस्य**) सङ्ग करने योग्य गृहस्थों के व्यवहार के (**अग्रम्**) अगले भाग को (**नयन्तीः**) प्राप्त कराती हुई (**ऊर्म्यायाः**) रात्रि के (**तमः**) अन्धकार को (**वि, बाधन्ते**) नष्ट करती हैं (**ताः**) उनके समान दुःखान्धकार को दूर करने वाली वधुओं को तुम प्राप्त होओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम अपने सदृश गुण-कर्म-स्वभावयुक्त प्रभातवेलाओं के समान आनन्द देने वाली, विद्या और नम्रता आदि गुणों से सुशील, ब्रह्मचारिणी कन्याओं को प्राप्त होकर उनको निरन्तर आनन्द देकर आप आनन्द को प्राप्त होओ॥ २॥

पुनस्ताः कीदृश्यः स्युरित्याह॥

फिर वे कैसी हों, इस विषय को कहते हैं॥

श्रवो वाजमिषमूर्जं वहन्तीर्नि दाशुषे उषसो मर्त्याय।
मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य॥ ३॥

श्रव॑:। वाज॑म्। इष॑म्। ऊर्ज॑म्। वह॑न्ती:। नि। दा॒शुषे॑। उ॒ष॒स॒:। मर्त्या॑य। म॒घोनी॑:। वी॒रऽव॑त्। पत्य॑माना:। अव॑:। धा॒त॒। वि॒धते॑। रत्न॑म्। अ॒द्य॥ ३॥

पदार्थ:-(**श्रव:**) श्रवणम् (**वाजम्**) विज्ञानम् (**इषम्**) अन्नम् (**ऊर्जम्**) पराक्रमम् (**वहन्ती:**) प्रापयन्त्य: (**नि**) नितराम् (**दाशुषे**) विद्यादिशुभगुणदात्रे (**उषस:**) प्रभातवेला: (**मर्त्याय**) मनुष्याय (**मघोनी:**) बहूत्तमधना: (**वीरवत्**) शूरवीरतुल्या: (**पत्यमाना:**) प्राप्नुवन्त्य: (**अव:**) रक्षणम् (**धात**) धत्त (**विधते**) सेवमानाय (**रत्नम्**) रमणीयम् (**अद्य**) इदानीम्॥ ३॥

अन्वय:-हे पुरुषा! या उषस इव दाशुषे विधते मर्त्याय श्रवो वाजमिषमूर्जं वहन्तीर्मघोनीर्वीरवत्पत्यमाना: स्त्रियोऽद्य रत्नमव: प्राप्नुवन्ति ता यूयं नि धात॥ ३॥

भावार्थ:-हे मनुष्या! या उषर्वद्वर्त्तमाना: सत्यशास्त्रश्रवणादियुक्ता बलिष्ठा विचक्षणा धनैश्वर्यवर्धिका रक्षणे तत्परा विदुष्य: स्त्रिय: स्युस्तासां मध्यात् स्वस्वप्रियां भार्यां सर्वे गृह्णन्तु॥ ३॥

पदार्थ:-हे पुरुषो! जो (**उषस:**) प्रभातवेलाओं के समान (**दाशुषे**) विद्यादि शुभगुण देने वाले (**विधते**) सेवा करते हुए (**मर्त्याय**) मनुष्य के लिये (**श्रव:**) श्रवण (**वाजम्**) विज्ञान (**इषम्**) अन्न और (**ऊर्जम्**) पराक्रम को (**वहन्ती:**) प्राप्त कराती तथा (**मघोनी:**) बहुत धन वाली (**वीरवत्**) वीर के समान (**पत्यमाना:**) प्राप्त होती हुई स्त्रियाँ (**अद्य**) इस समय (**रत्नम्**) रमणीय (**अव:**) रक्षा को प्राप्त होतीं उनको तुम (**नि, धात**) निरन्तर धारण करो॥ ३॥

भावार्थ:-हे मनुष्यो! जो उषा के समान वर्त्तमान, सत्यशास्त्र श्रवणादियुक्त, बलिष्ठ, विचक्षण (चित्र-विचित्र बुद्धियुक्त) धन और ऐश्वर्य्य की बढ़ाने वाली, रक्षा में तत्पर, विदुषी स्त्रियाँ हों, उनके बीच से अपनी-अपनी प्रिया भार्या को सब ग्रहण करें॥ ३॥

पुनस्ता: कीदृश्यो भवेयुरित्याह॥

फिर वे कैसी हों, इस विषय को कहते हैं॥

इ॒दा हि वो॑ विधते रत्न॒मस्ती॒दा वी॒राय॑ दा॒शुष॑ उषास:।

इ॒दा विप्रा॑य॒ जर॑ते॒ यदु॒क्था नि ष्म॒ माव॑ते॒ वहथा पु॒रा चि॑त्॥ ४॥

इ॒दा। हि। व॒:। वि॒धते॑। रत्न॑म्। अस्ति॑। इ॒दा। वी॒राय॑। दा॒शुष॑े। उ॒ष॒स॒:। इ॒दा। विप्रा॑य। जर॑ते। यत्। उ॒क्था। नि। स्म॒। माऽव॑ते। व॒हथ॒। पु॒रा। चि॒त्॥ ४॥

पदार्थ:-(**इदा**) इदानीम् (**हि**) यत: (**व:**) युष्मान् (**विधते**) परिचरते (**रत्नम्**) रमणीयं धनम् (**अस्ति**) (**इदा**) इदानीम् (**वीराय**) बलिष्ठाय जनाय (**दाशुषे**) दात्रे (**उषास:**) उषर्वद्वर्त्तमाना: (**इदा**) इदानीम् (**विप्राय**) मेधाविने (**जरते**) स्तावकाय (**यत्**) यानि (**उक्था**) वचनानि (**नि**) नित्यम् (**स्म**) एव (**मावते**) मत्सदृशाय (**वहथा**) प्राप्नुथ। अत्र **संहितायामि**ति दीर्घ:। (**पुरा**) पुरस्तात् (**चित्**) अपि॥ ४॥

अन्वय:-हे वीरपुरुषा! यथोषासस्तथैव वर्त्तमाना भार्या यदि प्राप्नुत तदेदा हि वो विधते रत्नमस्तीदा दाशुषे वीरायेदा जरते विप्राय मावते पुरा चिद्यदुक्था: सन्ति तानि स्म चिन्नि वहथा॥ ४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! या उषर्वद्वर्त्तमाना भार्या युष्मान् प्राप्नुयुस्तर्ह्यस्मिन्नेव जन्मनि सर्वाणि सुखानि भवतः प्राप्नुयुरविरोधेन वर्त्तमानान् स्त्रीपुरुषान् सदैव यशांसि प्राप्नुवन्ति॥४॥

पदार्थः-हे वीरपुरुषो! जैसे **(उषासः)** उषाकाल, उन्हीं के समान वर्त्तमान भार्याओं को जो प्राप्त होओ तो **(इदा)** अब **(हि)** ही **(वः)** तुमको **(विधते)** सेवन करते हुए के लिये **(रत्नम्)** रमणीय धन **(अस्ति)** विद्यमान है वा **(इदा)** अब **(दाशुषे)** देते हुए **(वीराय)** बलिष्ठ जन के लिये और **(इदा)** अब **(जरते)** स्तुति करने वाले **(विप्राय)** मेधावी पुरुष के लिये **(मावते)** जो मेरे सदृश है, उसके लिये **(पुरा)** पहिले **(चित्)** भी **(यत्)** जो **(उक्था)** कहने के योग्य वचन हैं **(स्म)** उन्हीं को **(नि, वहथा)** निवाहो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो उषा के समान वर्त्तमान भार्यायें तुम लोगों को प्राप्त हों तो इसी जन्म में सब सुख तुम लोगों को प्राप्त हों, क्योंकि अविरोध से वर्त्तमान स्त्री-पुरुषों को सदैव यश प्राप्त होते हैं॥४॥

पुनः सा कीदृशीत्याह॥

फिर वह कैसी है, इस विषय को कहते हैं॥

इदा हि त उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्ति।
व्य१र्केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः॥५॥

इदा। हि। ते। उषः। अद्रिसानो इत्यद्रिसानो। गोत्रा। गवाम्। अङ्गिरसः। गृणन्ति। वि। अर्केण। बिभिदुः। ब्रह्मणा। च। सत्या। नृणाम्। अभवत्। देवऽहूतिः॥५॥

पदार्थः-**(इदा)** इदानीम् **(हि)** खलु **(ते)** तव **(उषः)** उषर्वद्वर्त्तमाने **(अद्रिसानो)** अद्रौ मेघे सानूनि यस्याः सा **(गोत्रा)** भूमिः। **गोत्रेति पृथिवीनाम।** (निघं०१.१) **(गवाम्)** किरणानाम् **(अङ्गिरसः)** वायव इव **(गृणन्ति)** स्तुवन्ति **(वि)** **(अर्केण)** सूर्येण **(बिभिदुः)** विदृणन्ति **(ब्रह्मणा)** परमेश्वरेण वेदेन वा **(च)** **(सत्या)** सत्सु पदार्थेषु साध्वी **(नृणाम्)** मनुष्याणाम् **(अभवत्)** भवति **(देवहूतिः)** देवा विद्वांस आह्वयन्ति यया सा॥५॥

अन्वयः-हे अद्रिसानो उषर्वद्वर्त्तमाने वरे स्त्रि! यथा ते सम्बन्धिनोऽङ्गिरसोऽर्केण ब्रह्मणा च सूर्य्य गोत्रेव गवां सम्बन्धं वि गृणन्ति बिभिदुश्च तथेदा हि देवहूतिर्भवति नृणां मध्ये सत्याऽभवत्॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा किरणा उषसा सूर्य्यप्रकाशस्य निमित्तमस्ति तथैव सर्वेषां सत्यानां व्यवहाराणां साधिका दुष्टानां व्यवहाराणां निरोधिकोषा वर्त्तते तथा सती स्त्री भवति॥५॥

पदार्थः-**(अद्रिसानो)** मेघ के बीच शिखर=चोटी रखने वाली **(उषः)** प्रभातवेला के समान वर्त्तमान उत्तम स्त्री! जैसे **(ते)** तेरे सम्बन्धी **(अङ्गिरसः)** पवनों के तुल्य **(अर्केण)** सूर्य्य **(ब्रह्मणा)** परमेश्वर वा वेद से **(च)** भी सूर्य्य को **(गोत्रा)** पृथिवी के समान वा **(गवाम्)** किरणों के सम्बन्ध को

(वि, गृणन्ति) प्रस्तुत करते हैं और **(बिभिदुः)** विदीर्ण करते हैं, वैसे **(इदा)** अब **(हि)** ही **(देवहूतिः)** विद्वान् जन जिससे बुलाते हैं, वैसे तू प्रसिद्ध होती है सो तू **(नृणाम्)** मनुष्यों के बीच **(सत्या)** विद्यमान पदार्थों में उत्तम **(अभवत्)** होती है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे किरणें प्रभातवेला से सूर्य्यप्रकाश की निमित्त हैं, वैसे ही सत्य व्यवहारों को सिद्ध करने और दुष्ट व्यवहारों का निरोध करने वाली उषा है, वैसी श्रेष्ठ स्त्री होती है॥५॥

पुनः सा किंवत् किं कृत्वा किं प्राप्नोतीत्याह॥

फिर वह किसके समान क्या करके किसको प्राप्त होती है, इस विषय को कहते हैं॥

उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि।
सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः॥६॥६॥

उच्छ। दिवः। दुहितरिति। प्रत्नऽवत्। नः। भरद्वाजऽवत्। विधते। मघोनी। सुऽवीरम्। रयिम्। गृणते। रिरीहि। उरुऽगायम्। अधि। धेहि। श्रवः। नः॥६॥

पदार्थः-(**उच्छा**) विवासय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**दिवः**) विद्युतः (**दुहितः**) दुहितर्वद्वर्त्तमाने (**प्रत्नवत्**) प्रत्नं प्राचीनं कारणं विद्यते यस्मिंस्तद्वत् (**नः**) अस्मान् (**भरद्वाजवत्**) श्रोत्रवत् (**विधते**) विधानं कुर्वते (**मघोनि**) परमपूजितधनयुक्ते (**सुवीरम्**) शोभना वीरा यस्मात्तम् (**रयिम्**) धनम् (**गृणते**) प्रशंसकाय (**रिरीहि**) याचस्व। **रिरीहीति याच्ञाकर्मा।** (निघं०३.१९) (**उरुगायम्**) उरूणि गया अपत्यानि धनानि गृहाणि वा यस्मात्तम् (**अधि**) उपरि (**धेहि**) (**श्रवः**) अन्नं श्रवणं वा (**नः**) अस्मभ्यम्॥६॥

अन्वयः-हे दिवो दुहितर्वद्वर्त्तमाने मघोनि पत्नि! त्वं नो विधते प्रत्नवद्भरद्वाजवदुच्छा विवासय गृणते तव पत्ये नोऽस्मभ्यं सम्बन्धिभ्य उरुगायं श्रवः सुवीरं रयिं चाऽधि धेहि त्वं चास्मदेतद्रिरीहि॥६॥

भावार्थः-हे वीर पुरुष! यथा विद्युदीप्तिः सम्प्रयुक्तं सम्यङ्नैश्वर्य्यं जनयति तथैव शुभाचरणा पत्नी गृहसौभाग्यं वर्धयति यथाऽऽचार्याः प्रतिसमयं सुशिक्षां विद्यां च विद्यार्थिनो ग्राहयन्ति तथैव विद्वांसौ स्त्रीपुरुषौ स्वसन्तानानुचितसमये विद्यासुशिक्षे ग्राहयेतामिति॥६॥

अत्रोषर्वत्स्त्रीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चषष्टितमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे **(दिवः)** बिजुली की **(दुहितः)** कन्या के समान वर्त्तमान **(मघोनि)** परमपूजित धनयुक्त पत्नी! तू **(नः)** हम लोगों का **(विधते)** विधान करने वाले के लिये **(प्रत्नवत्)** प्राचीन कारण जिसमें विद्यमान उसके वा **(भरद्वाजवत्)** कर्ण के तुल्य **(उच्छा)** विवास कराओं अर्थात् एक देश से दूसरे देश में वास कराओ **(गृणते)** और प्रशंसा करने वाले तेरे पति के लिये वा **(नः)** हम लोग जो सम्बन्धी हैं, उनके लिये **(उरुगायम्)** बहुत अपत्य धन वा गृह जिससे प्राप्त होते हैं उसे और **(श्रवः)** अन्न वा

श्रवण तथा **(सुवीरम्)** शोभन वीर जिससे उस **(रयिम्)** धन को **(अधि, धेहि)** अधिकता से धारण कर और तू मुझ से इस उक्त विषय को **(रिरीहि)** मांग॥६॥

भावार्थ:-हे वीरपुरुष! जैसे बिजुली का प्रकाश संप्रयोग किया हुआ सत्य ऐश्वर्य्य को उत्पन्न करता है, वैसे ही शुभ आचरण करने वाली पत्नी घर का सौभाग्य बढ़ाती है और जैसे आचार्य प्रति समय सुन्दर शिक्षा और विद्या को विद्यार्थियों को ग्रहण कराते हैं, वैसे ही विद्वान् स्त्री पुरुष अपने सन्तानों को विद्या और सुन्दर शिक्षा ग्रहण करावें॥६॥

इस सूक्त में उषा के तुल्य स्त्रीजनों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह पैसठवां सूक्त और छठा वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्य षट्षष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। मरुतो देवताः। १, ९, ११ निचृत्पङ्क्तिः। २, ५ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ४ निचृत्पङ्क्तिः। ६, ७, १० भुरिक्पङ्क्तिः। ८ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः सा किंवत्किं करोतीत्याह॥

अब ग्यारह ऋचावाले छियासठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर वह किसके तुल्य क्या करती है, इस विषय को कहते हैं॥

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम्।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः॥ १॥

वपुः। नु। तत्। चिकितुषे। चित्। अस्तु। समानम्। नाम। धेनु। पत्यमानम्। मर्तेषु। अन्यत्। दोहसे। पीपाय। सकृत्। शुक्रम्। दुदुहे। पृश्निः। ऊधः॥ ९॥

पदार्थः-(**वपुः**) सुरूपं शरीरम् (**नु**) सद्यः (**तत्**) (**चिकितुषे**) विज्ञानवते (**चित्**) अपि (**अस्तु**) (**समानम्**) (**नाम**) सञ्ज्ञा (**धेनु**) वाक्। अत्र विभक्तिलोपः (**पत्यमानम्**) गम्यमानम् (**मर्तेषु**) मनुष्येषु (**अन्यत्**) (**दोहसे**) दोग्धुम् (**पीपाय**) आप्यायय (**सकृत्**) एकवारम् (**शुक्रम्**) आशुवीर्यकरम् (**दुदुहे**) पूरयति (**पृश्निः**) अन्तरिक्षम् (**ऊधः**) रात्रिः। **ऊध इति रात्रिनाम।** (निघं०१.७)॥१॥

अन्वयः-हे पत्नि! यथोधः पृश्निश्च सकृच्छुक्रं दुदुहे तथा धेन्विव त्वं मर्त्तेषु पत्यमानं पतिमन्यद्दोहसे पीपायैवं भूतायास्तव यच्चित्समानं वपुर्नाम च तच्चिकितुषे पत्येन्वस्तु॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे पुरुष! यथा रात्रिरान्मायाऽन्तरिक्षं वर्षाभ्योऽस्ति तथैव समानगुणकर्मस्वभावा पत्नी पत्युः सुखाय कल्पते यथा धेनुर्वत्सान् पालयति तथा विदुषी माता सन्तानान्यथावद्रक्षितुं शक्नोति॥१॥

पदार्थः-हे पत्नि! जैसे (**ऊधः**) रात्रि और (**पृश्निः**) अन्तरिक्ष (**सकृत्**) एक वार (**शुक्रम्**) शीघ्र वीर्य करने वाले को (**दुदुहे**) परिपूर्ण करता है, वैसे (**धेनु**) वाणी के समान तू (**मर्त्तेषु**) मनुष्यों में (**पत्यमानम्**) जाते हुए पति को (**अन्यत्**) और को जैसे वैसे (**दोहसे**) पूर्ण करने को (**पीपाय**) बढ़ाओ ऐसी हुई जो तू उसका जो (**चित्**) निश्चित (**समानम्**) समान (**वपुः**) सुन्दररूप और (**नाम**) नाम है (**तत्**) वह (**चिकितुषे**) विज्ञानवान् पति के लिये (**नु, अस्तु**) शीघ्र हो॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे पुरुष! जैसे रात्रि और समीप में मायारूपी अन्तरिक्ष वर्षा से होता अर्थात् मेघ से ढपा हुआ अन्तरिक्ष अन्धकारयुक्त होता है, वैसे ही समान गुणकर्मस्वभावयुक्त स्त्री पति के सुख के लिये समर्थ होती है, जैसे गौ बछड़ों को पालती है, वैसे विदुषी माता सन्तानों की यथावत् रक्षा कर सकती है॥१॥

पुनर्विद्वांस कीदृशा भवेयुरित्याह॥

फिर विद्वान् जन कैसे हों, इस विषय को कहते हैं॥

ये अ॒ग्नयो॒ न शोशु॑चन्निधा॒ना द्विर्यत्रि॒र्मरु॑तो॑ वावृ॒धन्त॑।

अ॒रे॒णवो॑ हिर॒ण्यया॑स एषां सा॒कं नृ॒म्णैः पौंस्ये॑भिश्च भूवन्॥ २॥

ये। अ॒ग्नय॑:। न। शोशु॑चन्। इ॒धा॒ना:। द्वि:। यत्। त्रि:। मरु॑त:। व॒वृ॒धन्त॑। अ॒रे॒ण॒व॑:। हि॒र॒ण्यया॑स:। एषा॒म्। सा॒कम्। नृ॒म्णै:। पौंस्ये॑भि:। च॒। भू॒व॒न्॥ २॥

पदार्थ:-(**ये**) (**अग्नय:**) पावका: (**न**) इव (**शोशुचन्**) शोधयन्ति (**इधाना:**) प्रकाशमाना: (**द्वि:**) द्विवारम् (**यत्**) (**त्रि:**) त्रिवारम् (**मरुत:**) वायव इव (**वावृधन्त**) वर्धन्ते। अत्र **तुजादीनामित्यभ्यास्सदैर्घ्यम्**। (**अरेणव:**) रेणुरहिता: (**हिरण्ययास:**) हिरण्येन विद्युत्तेजसा प्रचुरा: (**एषाम्**) (**साकम्**) सह (**नृम्णै:**) धनै: (**पौंस्येभि:**) बलै: (**च**) (**भूवन्**) भवेयु:॥ २॥

अन्वय:-हे मनुष्या! ये यतमाना हिरण्ययासोऽरेणवो मरुत इव नृम्णै: पौंस्येभि: साकं भूवन्नेषां सम्बन्धे यद्ये द्विस्त्रिर्वा वावृधन्त चेधाना अग्नयो न शोशुचंस्ते भाग्यशालिनो भूवन्॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। ये पावकवत्पवित्रा: पवित्रकरा वर्धमाना वर्धयितारो वायुवद्बलिष्ठाश्चक्रवर्त्तिनृपवच्छ्रिया सह वर्त्तमाना विद्वांसस्स्युस्तानेव यूयं भजत॥ २॥

पदार्थ:-हे मनुष्यो! (**ये**) जो यत्न करते हुए (**हिरण्ययास:**) बिजुली के तेज से बढ़े हुए (**अरेणव:**) धूलि जिनमें नहीं वे (**मरुत:**) पवनों के समान (**नृम्णै:**) धनों और (**पौंस्येभि:**) पुरुषार्थ बलों के (**साकम्**) साथ (**भूवन्**) हों (**एषाम्**) इनके सम्बन्ध में (**यत्**) जो (**द्वि:**) दो वार वा (**त्रि:**) तीन वार (**वावृधन्त**) निरन्तर बढ़ते हैं (**च**) और (**इधाना:**) प्रकाशमान (**अग्नय:**) अग्नियों के (**न**) समान (**शोशुचन्**) निरन्तर शुद्ध करते, वे भाग्यशाली होते हैं॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो अग्नि के समान पवित्र हुए पवित्र करने वाले, वृद्धि को प्राप्त हुए, बढ़ाने वाले, पवन के समान बलिष्ठ और चक्रवर्त्ती राजा के समान लक्ष्मी के साथ वर्त्तमान विद्वान् हों, उन्हीं को तुम सेवो॥ २॥

कयो: पुत्रा वरा जायन्त इत्याह॥

किन स्त्री-पुरुषों के पुत्र उत्तम होते हैं, इस विषय को कहते हैं॥

रु॒द्रस्य॒ ये मी॒ळ्हुष॒: सन्ति॑ पु॒त्रा यांश्चो॒ नु दाधृ॑वि॒र्भर॑ध्यै।

वि॒दे हि मा॒ता म॒हो म॒ही षा सेत्पृश्नि॑: सु॒भ्वे॒३॑ गर्भ॒माधा॑त्॥ ३॥

रु॒द्रस्य॑। ये। मी॒ळ्हुष॑:। सन्ति॑। पु॒त्रा:। यान्। चो॒ इति॑। नु। दाधृ॑वि:। भर॑ध्यै। वि॒दे। हि। मा॒ता। म॒ह:। म॒ही। सा। सा। इत्। पृश्नि॑:। सु॒ऽभ्वे॑। गर्भ॑म्। आ। अ॒धा॒त्॥ ३॥

पदार्थः-(**रुद्रस्य**) वायुवद्बलिष्ठस्य (**ये**) (**मीळ्हुषः**) वीर्यसेचकस्य (**सन्ति**) (**पुत्राः**) (**यान्**) (**चो**) (**नु**) (**दाधृविः**) धर्त्री (**भरध्यै**) भर्त्तुम् (**विदे**) यो वेत्ति तस्मै (**हि**) खलु (**माता**) (**महः**) महान्तम् (**मही**) महती पूजनीया (**सा**) (**सा**) (**इत्**) एव (**पृश्निः**) अन्तरिक्षमिव सावकाशा (**सुभ्वे**) यः सुष्ठु भवति तस्मै (**गर्भम्**) (**आ**) (**अधात्**)॥३॥

अन्वयः-हे मनुष्या! ये मीळ्हुषो रुद्रस्य पुत्राः सन्ति याँश्चो भरध्यै दाधृविर्मही सा माताऽऽधात् सेत् पृश्निरिव सुभ्वे विदे हि महो गर्भं न्वधात्ताँस्ताञ्च यूयं भाग्युक्तान् विजानीत॥३॥

भावार्थः-त एव मनुष्या भद्रा जायन्ते येषां मातापितरौ कृतपूर्णब्रह्मचर्यौ भवेताम्॥३॥

पदार्थः-हे मनुष्यो! (**ये**) जो (**मीळ्हुषः**) वीर्य सींचने वाले (**रुद्रस्य**) वायु के समान बलिष्ठ के (**पुत्राः**) पुत्र (**सन्ति**) हैं (**यान्, चो**) और जिनको (**भरध्यै**) पोषण वा धारण करने के लिये (**दाधृविः**) धारण करने वाली (**मही**) जो महान् सत्कार करने योग्य है (**सा**) वह (**माता**) मान करने वाली (**आ, अधात्**) अच्छे प्रकार धारण करती है और (**सा, इत्**) वही (**पृश्निः**) अन्तरिक्ष के समान विस्तार वाली (**सुभ्वे**) जो सुन्दर प्रसिद्ध होता है उस (**विदे**) जानने वाले के लिये (**हि**) ही (**महः**) महान् (**गर्भम्**) गर्भ को (**नु**) शीघ्र अच्छे प्रकार धारण करती है उन सबको और उस माता रूप स्त्री को तुम सब भाग्ययुक्त जानो॥३॥

भावार्थः-वे ही मनुष्य कल्याणरूप होते हैं जिनके माता पिता ऐसे हैं कि जिन्होंने पूरा ब्रह्मचर्य किया हो॥३॥

के श्रेष्ठा जायन्त इत्याह॥

कौन श्रेष्ठ होते हैं, इस विषय को कहते हैं॥

न य ईषन्ते जनुषोऽया न्वन्तः सन्तोऽवद्यानि पुनानाः।
निर्यद् दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः॥४॥

न। ये। ईषन्ते। जनुषः। अया। नु। अन्तरिति। सन्तः। अवद्यानि। पुनानाः। निः। यत्। दुह्रे। शुचयः। अनु। जोषम्। अनु। श्रिया। तन्वम्। उक्षमाणाः॥४॥

पदार्थः-(**न**) निषेधे (**ये**) (**ईषन्ते**) हिंसन्ति (**जनुषः**) जन्मानि (**अया**) अनया (**नु**) (**अन्तः**) मध्ये (**सन्तः**) सत्पुरुषाः (**अवद्यानि**) निन्द्यानि कर्माणि (**पुनानाः**) पवित्रयन्तः (**निः**) निरन्तरम् (**यत्**) ये (**दुह्रे**) दुहन्ति (**शुचयः**) पवित्राः (**अनु**) (**जोषम्**) सेवनम् (**अनु**) (**श्रिया**) लक्ष्म्या (**तन्वम्**) शरीरम् (**उक्षमाणाः**) सेवमानाः॥४॥

अन्वयः-हे मनुष्या! ये जनुषो नेषन्तेऽया नीत्याऽन्तः सन्तोऽवद्यानि नु विहाय पुनाना भवन्ति यद्ये शुचयोऽनु जोषं श्रिया तन्वमुक्षमाणा अनु निर्दुह्रे ते धन्या भवन्ति॥४॥

भावार्थः-ये मनुष्या ब्रह्मचर्यादीनि व्रतानि विहाय मूढा भूत्वा सद्यो विवाहं कृत्वा नपुंसकवद्भूत्वा निर्बला रोगिणो लम्पटा नृशंसा दुर्व्यसनिनो भवन्ति ते शततमाद्वर्षात् पूर्वमेव शरीरं विनाश्य मनुष्यशरीरफलमप्राप्य दुर्भाग्यवशान्निष्फला जायन्ते॥४॥

पदार्थः-हे मनुष्यो! **(ये)** जो **(जनुषः)** जन्मों को **(न)** नहीं **(ईषन्ते)** नष्ट करते किन्तु **(अया)** इस नीति से **(अन्तः)** बीच में **(सन्तः)** सत्पुरुष हुए **(अवद्यानि)** निन्द्य कर्मों को **(नु)** शीघ्र छोड़ के **(पुनानाः)** शरीर को पवित्र करते हुए होते हैं और **(यत्)** जो **(शुचयः)** पवित्र जन **(अनु, जोषम्)** सेवा के अनुकूल **(श्रिया)** लक्ष्मी से **(तन्वम्)** शरीर को **(उक्षमाणाः)** सेवन करते हुए **(अनु, निर्, दुह्रे)** अनुक्रम से जन्म पूरा करते हैं, वे धन्य होते हैं॥४॥

भावार्थः-जो मनुष्य ब्रह्मचर्यादि व्रतों को छोड़ मूढ़ होकर, शीघ्र विवाह कर, नपुंसक के अर्थात् हीजड़ा के समान होकर, निर्बल, रोगी, और लम्पट, मनुष्यों के बीच जिसकी कहावत हो रही हो तथा दुष्टव्यसन जिसको होता है, ऐसे पुरुष सौ वर्ष से पहिले ही शरीर को नष्ट-भ्रष्ट कर मनुष्य शरीर के फल को न पाकर दुर्भाग्यवश से निष्फल होते हैं॥४॥

इह कतिविधाः पुरुषा भवन्तीत्याह॥

यहाँ कितने प्रकार के पुरुष होते हैं, इस विषय को कहते हैं॥

मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः।
न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान्॥५॥७॥

मक्षू। न। येषु। दोहसे। चित्। अयाः। आ। नाम। धृष्णु। मारुतम्। दधानाः। न। ये। स्तौनाः। अयासः। मह्ना। नु। चित्। सुऽदानुः। अव। यासत्। उग्रान्॥५॥

पदार्थः-(**मक्षू**) क्षिप्रम्। अत्र **ऋचि तुनुघे**ति दीर्घः। **(न)** निषेधे **(येषु)** मनुष्येषु **(दोहसे)** कामान् दोग्धुं प्रपूरयितुम् **(चित्)** अपि **(अयाः)** प्राप्नुवतः **(आ)** **(नाम)** **(धृष्णु)** दृढं प्रगल्भम् **(मारुतम्)** मनुष्याणामिदम् **(दधानाः)** **(न)** **(ये)** **(स्तौनाः)** चौराः। अत्र वर्णव्यत्ययेनैकारस्थान औकारः। **(अयासः)** गच्छन्तः **(मह्ना)** महत्त्वेन **(नू)** सद्यः। अत्रापि **ऋचि तुनुघे**ति दीर्घः। **(चित्)** **(सुदानुः)** उत्तमदानः **(अव)** **(यासत्)** प्रापयेत् **(उग्रान्)** कठिनस्वभावान्॥५॥

अन्वयः-येषु चिद्दोहसे शक्तिर्नास्ति येऽया धृष्णु मारुतं नामाऽऽदधानाः सन्ति येऽयासः स्तौना न सन्ति यस्सुदानुस्तानुग्रान् मक्षू नाऽवयासत्तांश्चिन्मह्ना नू सत्कुर्यात् तान् यथावत्सर्वे विजानन्तु॥५॥

भावार्थः-हे मनुष्या! अत्र द्विविधा मनुष्या एके शक्तिविद्याहीना दुष्टकर्मकारिणोऽपरे शक्तिमन्तः श्रेष्ठकर्मधारिणः सन्ति तत्र ये दुष्कृतान् न सत्कुर्वन्ति श्रेष्ठाँश्चार्चन्ति ते सद्यो महदिष्टं सुखं लभन्ते॥५॥

पदार्थः-**(येषु)** जिन मनुष्यों में **(चित्)** निश्चय से **(दोहसे)** कामों के पूरे करने की शक्ति नहीं है वा जो **(अयाः)** प्राप्त होते हुए **(धृष्णु)** दृढ़ प्रगल्भ **(मारुतम्)** मनुष्यों के इस **(नाम)** प्रसिद्ध व्यवहार को

(आ, दधानाः) धारण करते हुए हैं वा **(ये)** जो **(अयासः)** चलते हुए **(स्तौनाः)** चोर **(न)** नहीं और जो **(सुदानुः)** उत्तम दान देने वाला **(उग्रान्)** कठिन स्वभाव वालों को **(मक्षू)** शीघ्र **(न)** न **(अव, यासत्)** प्राप्त करे उनका **(चित्)** शीघ्र **(महा)** महत्त्व से **(नू)** शीघ्र सत्कार करे, उनको यथावत् सब जानें॥५॥

भावार्थः-हे मनुष्यो! इस जगत् में दो प्रकार के मनुष्य हैं- एक शक्ति और विद्या से हीन, दुष्ट कर्म करने वाले हैं, दूसरे शक्तिमान्, श्रेष्ठ कर्म धारण करने वाले हैं, उनमें जो दुष्कर्म करने वालों का सत्कार नहीं करते और श्रेष्ठों का सत्कार करते हैं, वे शीघ्र महान् चाहे हुए सुख को पाते हैं॥५॥

पुनर्मनुष्याः किं कृत्वा कीदृशा भवेयुरित्याह॥

फिर मनुष्य क्या करके कैसे हों, इस विषय को कहते हैं॥

त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः॥६॥

ते। इत्। उग्राः। शवसा। धृष्णुऽसेनाः। उभे इति। युजन्त। रोदसी इति। सुमेके इति सुऽमेके। अध। स्म। एषु। रोदसी। स्वऽशोचिः। आ। अमवत्ऽसु। तस्थौ। न। रोकः॥६॥

पदार्थः-(**ते**) (**इत्**) एव (**उग्राः**) तेजस्विनः (**शवसा**) बलेन (**धृष्णुषेणाः**) धृष्णुर्दृढाः सेना येषां ते (**उभे**) (**युजन्त**) युञ्जते (**रोदसी**) द्यावापृथिव्योः (**सुमेके**) सुखरूपे (**अध**) अथ (**स्म**) एव (**एषु**) (**रोदसी**) द्यावापृथिव्योः (**स्वशोचिः**) स्वं शोचिस्तेजो यस्य (**आ**) (**अमवत्सु**) अमाः प्रशस्तानि गृहाणि विद्यन्ते येषु (**तस्थौ**) तिष्ठति (**न**) निषेधे (**रोकः**) शब्दायमानः॥६॥

अन्वयः-ये धृष्णुसेनाः शवसोग्रा उभे सुमेके रोदसी युजन्ताऽध स्मैष्वमवत्सु रोदसी स्वशोचिरा तस्थौ न रोकोऽस्ति ते इत्सुखिनो जायन्ते॥६॥

भावार्थः-ये मनुष्या विद्युतः पृथिव्याश्च विद्यां गृहीत्वा दृढसेना जायन्ते तेषां निरोधं कर्तुं शत्रवो न शक्नुवन्ति य उत्तमेषु गृहेषु निवसन्ति ते प्रकाशितप्रज्ञा जायन्ते॥६॥

पदार्थः-जो (**धृष्णुषेणाः**) दृढ सेना वाले (**शवसा**) बल से (**उग्राः**) तेजस्वी (**उभे**) दोनों (**सुमेके**) सुन्दर रूपवाले (**रोदसी**) आकाश और पृथिवी को (**युजन्त**) युक्त होते हैं (**अध**) तदनन्तर (**स्म**) ही (**एषु**) इन (**अमवत्सु**) प्रशंसित गृह वालों में (**रोदसी**) आकाश और पृथिवी के बीच (**स्वशोचिः**) अपनी दीप्ति वाला विद्युत् अग्नि (**आ, तस्थौ**) अच्छे प्रकार स्थित है और (**न**) नहीं (**रोकः**) शब्दायमान है (**ते**) वे सब (**इत्**) ही सुखी होते हैं॥६॥

भावार्थः-जो मनुष्य बिजुली और पृथिवी की विद्या को लेकर दृढ़ सेनावाले होते हैं, उनको शत्रुजन रोक नहीं सकते तथा जो उत्तम घरों में निवास करते हैं, वे प्रकाशित बुद्धिवाले होते हैं॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन्॥७॥

अनेनः। वः। मरुतः। यामः। अस्तु। अनश्वः। चित्। यम्। अजति। अरथीः। अनवसः। अनभीशुः। रजःऽतूः। वि। रोदसी इति। पथ्याः। याति। साधन्॥७॥

पदार्थः-(**अनेनः**) अविद्यमानमेनः पापं यस्मिँस्तत् (**वः**) युष्माकम् (**मरुतः**) मनुष्याः (**यामः**) यान्ति यस्मिन्त्स यामः प्रहरः (**अस्तु**) (**अनश्वः**) अविद्यमाना अश्वा यस्य सः (**चित्**) अपि (**यम्**) (**अजति**) प्रक्षिपति (**अरथीः**) अविद्यमानरथः (**अनवसः**) अविद्यमानमवोऽन्नं यस्य सः। **अव इत्यन्ननाम।** (निघं०२.७) (**अनभीशुः**) अविद्यमानावभीशू बलयुक्तौ बाहू यस्य सः। **अभीशू इति बहुनाम।** (निघं०२.४) (**रजस्तूः**) यो रज उदकं तौति वर्धयति सः (**वि**) (**रोदसी**) द्यावापृथिव्योः (**पथ्याः**) पथिषु साध्वीर्गतीः (**याति**) गच्छति (**साधन्**) साध्नुवन्॥७॥

अन्वयः-हे मरुतो! वोऽनेनोऽस्तु यो याम इवाऽनश्वोऽरथीरनवसोऽनभीशू रजस्तूश्चिद्यमजति रोदसी साधन् पथ्या वि याति तं यूयं स्वीकुरुत॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं पक्षपाताख्यं पापं विहाय निर्बलान् सततं रक्षित्वा भूगर्भविद्यां विद्युद्विद्यां च संसाध्य भूम्युदकान्तरिक्षस्थान् मार्गानुत्तमैर्यानैर्गत्वाऽऽगच्छत॥७॥

पदार्थः-हे (**मरुतः**) मनुष्यो! (**वः**) तुम्हारा चलन (**अनेनः**) निष्पाप (**अस्तु**) हो और (**यामः**) जिसमें जाते हैं उस प्रहर के समान जो (**अनश्वः**) ऐसा है कि जिसके घोड़े नहीं हैं (**अरथीः**) रथ नहीं हैं (**अनवसः**) अन्न जिसके नहीं है और (**अनभीशुः**) बलयुक्त बाहू नहीं है तथा जो (**रजस्तूः**) जल को बढ़ाता है वह (**चित्**) निश्चय के साथ (**यम्**) जिसको (**अजति**) प्रक्षिप्त करता फेंकता है वा (**रोदसी**) आकाश और पृथिवी के बीच निरन्तर (**साधन्**) साधता हुआ (**पथ्याः**) मार्गों में उत्तम गतियों को (**वि, याति**) विशेषता से जाता है, उसको तुम स्वीकार करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम पक्षपातरूपी पाप को छोड़ के निर्बलों की निरन्तर रक्षा कर भूगर्भविद्या और विद्युत् विद्या को अच्छे प्रकार सिद्ध कर भूमि और उदक तथा अन्तरिक्ष के मार्गों को उत्तम यानों से जाकर आओ॥७॥

कै रक्षणे कृते भयं न विद्यत इत्याह॥

किन से रक्षा किये जाने पर भय नहीं है, इस विषय को कहते हैं॥

नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः॥८॥

नः। अस्य। वर्त्ता। नः। तरुता। नु। अस्ति। मरुतः। यम्। अवथ। वाजऽसातौ। तोके। वा। गोषु। तनये। यम्। अप्ऽसु। सः। व्रजम्। दर्ता। पार्ये। अध। द्योः॥८॥

पदार्थः-(**न**) (**अस्य**) (**वर्त्ता**) वर्त्तयिता (**न**) (**तरुता**) उल्लङ्घयिता (**नु**) सद्यः (**अस्ति**) (**मरुतः**) उत्तमा मनुष्याः (**यम्**) (**अवथ**) रक्षथ (**वाजसातौ**) (**तोके**) अपत्ये (**वा**) (**गोषु**) गवादिषु पशुषु पृथिवीविभागेषु वा (**तनये**) सुकुमारे (**यम्**) (**अप्सु**) उदकेषु (**सः**) (**व्रजम्**) मेघम् (**दर्त्ता**) विदारकः (**पार्ये**) पारयितव्ये (**अध**) अथ (**द्योः**) प्रकाशस्य॥८॥

अन्वयः-हे मरुतो विद्वांसो! यूयं वाजसातौ यं गोष्वप्सु तोके वा तनये यमवथास्य कोऽपि वर्त्ता नास्ति कोऽपि तरुता नास्ति सोऽध पार्य्ये द्योः व्रजमिव शत्रुसेनाया दर्त्ता न्वस्ति॥८॥

भावार्थः-हे मनुष्या! येषां विद्वांसो रक्षकाः स्युस्तेषां कुतश्चिद्भयं नाप्नोति यथा सूर्याद् वृष्टिर्भूत्वा जगन्निर्भयं जायते तथैव धार्मिकविद्वत्सङ्गात् सर्वं राष्ट्रमभयं भवति॥८॥

पदार्थः-हे (**मरुतः**) विद्वानो! तुम (**वाजसातौ**) अन्नादि पदार्थों के विभाग में (**यम्**) जिसको (**गोषु**) गौ आदि पशु वा पृथिवी विभागों वा (**अप्सु**) जलों वा (**तोके**) सन्तान (**वा**) वा (**तनये**) सुकुमार इन सब में (**यम्**) जिसकी (**अवथ**) रक्षा करते हो (**अस्य**) इस व्यवहार का कोई (**वर्त्ता**) वर्त्ताव करने और कोई (**न**) नहीं है और कोई (**तरुता**) उक्त व्यवहार का उल्लङ्घन करने वाला (**न**) नहीं (**अस्ति**) है (**सः**) वह (**अध**) इसके अनन्तर (**पार्य्ये**) पार करने योग्य व्यवहार में (**द्योः**) प्रकाश के (**व्रजम्**) मेघ के समान शत्रुसेना को (**दर्त्ता, नु**) शीघ्र विदीर्ण करने वाला है॥८॥

भावार्थः-हे मनुष्यो! जिनके विद्वान् जन रक्षा करने वाले हों, उनको कहीं से भय नहीं प्राप्त होता, जैसे सूर्य से वर्षा होकर जगत् निर्भय होता है, वैसे ही धार्मिक विद्वानों के सङ्ग से समस्त राज्य निर्भय होता है॥८॥

पुनर्मनुष्याः कस्मै किं धृत्वा किं कुर्य्युरित्याह॥

फिर मनुष्य किसके लिये क्या धारण करके क्या करें, इस विषय को कहते हैं॥

प्र चित्रमर्क गृणते तुराय मारुताय स्वतवसे भरध्वम्।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः॥९॥

प्र। चित्रम्। अर्कम्। गृणते। तुराय। मारुताय। स्वऽतवसे। भरध्वम्। ये। सहांसि। सहन्ते। रेजते। अग्ने। पृथिवी। मखेभ्यः॥९॥

पदार्थः-(**प्र**) (**चित्रम्**) अद्भुतम् (**अर्कम्**) अन्नं वज्रं वा। **अर्क इत्यन्ननाम।** (निघं०२.७) **वज्र नाम च।** (निघं०२.२०) (**गृणते**) स्तुवते (**तुराय**) क्षिप्रकारिणे (**मारुताय**) मनुष्याणामस्मै (**स्वतवसे**) स्वं स्वकीयं तवो बलं यस्य तस्मै (**भरध्वम्**) (**ये**) (**सहांसि**) बलानि (**सहसा**) बलेनोत्साहेन वा (**सहन्ते**) (**रेजते**) कम्पते (**अग्ने**) विद्वन् (**पृथिवी**) भूमिः (**मखेभ्यः**) स-मादिभ्यः सङ्गन्तव्येभ्यः। **मख इति यज्ञनाम।** (निघं०३.१७)॥९॥

अन्वयः-हे विद्वांसो! ये सहसा सहांसि सहन्ते तेभ्यो यूयं चित्रमर्कं प्र भरध्वम्। हे अग्ने विद्वन्! यथा मखेभ्यः पृथिवी रेजते तथा स्वतवसे तुराय मारुताय गृणते विदुषे चित्रमर्कं भर॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा चलन्ती भूमिर्यज्ञसामग्रीं जनयति तथैव महद्भ्यः शूरवीरेभ्यो विद्वद्भ्योऽन्नादिकं शस्त्रास्त्रसमूहं च तद्विद्यां च सततमुन्नयतैवं सत्यसह्यानपि शत्रून् सोढुं पराजेतुं वा सामर्थं जायत इति वित्त॥९॥

पदार्थः-हे विद्वानो! **(ये)** जो **(सहसा)** बल वा उत्साह से **(सहांसि)** बलों को **(सहन्ते)** सहते हैं उनके लिये तुम **(चित्रम्)** अद्भुत **(अर्कम्)** अन्न वा वज्र को **(प्र, भरध्वम्)** अच्छे प्रकार धारण करो हे **(अग्ने)** विद्वन्! जैसे **(मखेभ्यः)** स- ाम आदि जो सङ्ग करने करने योग्य हैं उनके लिये **(पृथिवी)** भूमि **(रेजते)** कम्पित होती है तथा **(स्वतवसे)** अपने बल से युक्त **(तुराय)** शीघ्रता करने और **(मारुताय)** मनुष्यों के सहयोगी **(गृणते)** स्तुति करने वाले विद्वान् के लिये अद्भुत अन्न वा व्रज को धारण करो॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे चलती हुई भूमि यज्ञसामग्री को उत्पन्न करती है, वैसे ही बड़े-बड़े शूरवीर विद्वानों के लिये अन्नादि पदार्थ और अस्त्र-शस्त्र समूह तथा उनकी विद्या की निरन्तर उन्नति करो, ऐसा होने से योग्य शत्रुओं को सहने और पराजय करने का सामर्थ्य उत्पन्न होता है, यह जानो॥९॥

पुनः किंवत् कीदृशाः शूरवीराः सम्पादनीया इत्याह॥

फिर किसके तुल्य कैसे शूरवीर सिद्ध करने चाहियें, इस विषय को कहते हैं॥

त्विषीमन्तो अध्वरस्येव दिद्युत् तृषुच्यवसो जुह्वो३ नाग्नेः।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः॥१०॥

त्विषिऽमन्तः। अध्वरस्यऽइव। दिद्युत्। तृषुऽच्यवसः। जुह्वः। न। अग्नेः। अर्चत्रयः। धुनयः। न। वीराः। भ्राजत्ऽजन्मानः। मरुतः। अधृष्टाः॥१०॥

पदार्थः-(**त्विषीमन्तः**) विद्याविनयादिप्रकाशयुक्ताः **(अध्वरस्येव)** अहिंसामयस्य यज्ञस्येव **(दिद्युत्)** प्रकाशः **(तृषुच्यवसः)** तृषु क्षिप्रं ये च्यवन्ते गच्छन्ति **(जुह्वः)** जुहोति याभिस्ताः **(न)** इव **(अग्नेः)** पावकस्य **(अर्चत्रयः)** अर्चकाः **(धुनयः)** कम्पयन्तः **(न)** इव **(वीराः)** **(भ्राजज्जन्मानः)** भ्राजद्देदीप्यमानं जन्म येषां ते **(मरुतः)** वायुवद्बलिष्ठा मनुष्याः **(अधृष्टाः)** शत्रुभिरधर्षणीयाः॥१०॥

अन्वयः-येऽध्वरस्येव जुह्वो न तृषुच्यवसोऽग्नेरर्चत्रयो धुनयो न त्विषीमन्तो भ्राजज्जन्मानोऽधृष्टा मरुतो वीरा दिद्युदिव वर्त्तमानाः स्युस्तैरेव विजयं प्राप्नुवन्तु॥१०॥

भावार्थः-अत्रोपमालङ्कारः। हे राजादयो जना! यथाऽध्वरस्य मध्ये वर्त्तमाना ज्वाला सद्योऽन्तरिक्षाय गच्छति तथा शिक्षाया मध्ये वर्त्तमाना जनाः सद्यो विजयाय गन्तुं शक्नुवन्ति यथा जुहूभिरग्निः प्रदीप्यते तथा शिक्षासत्काराभ्यां वीरसेना प्रदीपनीया यथाऽग्नेर्ज्वालाः शब्दाश्च प्रभवन्ति तथैव भवतां सेनायाः प्रकाशाः शब्दाश्च महान्तो भवेयुः॥१०॥

पदार्थः-जो (**अध्वरस्येव**) अहिंसामय यज्ञ व्के समान वा (**जुह्वः**) जिनसे हवन करते उनके (**न**) समान (**तृषुच्यवसः**) जो शीघ्र जाने वाले (**अग्नेः**) अग्नि के (**अर्चत्रयः**) सत्कारकर्त्ता (**धुनयः**) कंपते हुए पदार्थों के (**न**) समान (**त्विषीमन्तः**) विद्या विनयादि के प्रकाश से युक्त (**भ्राजज्जन्मानः**) देदीप्यमान जन्म है जिनका तथा (**अधृष्टाः**) जो शत्रुओं से धृष्टता को नहीं प्राप्त होते (**मरुतः**) वे पवन के समान बली (**वीराः**) वीर (**दिद्युत्**) प्रकाश के समान वर्त्तमान हों, उन्हीं से विजय को प्राप्त होओ॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजा आदि जनो! जैसे यज्ञ के बीच वर्त्तमान लपट शीघ्र ही अन्तरिक्ष को जाती है, वैसे शिक्षा के बीच वर्त्तमान जन शीघ्र विजय के लिये जा सकते हैं, जैसे जुहूओं से अग्नि प्रदीप्त की जाती है, वैसे शिक्षा और सत्कार से वीरों की सेना को प्रदीप्त करनी चाहिये, जैसे अग्नि की लपटें और शब्द होते हैं, वैसे ही तुम्हारी सेना के प्रकाश और शब्द बहुत हों॥१०॥

पुनर्मनुष्यैः कैः सह कीदृशो जनो राज्याऽधिकारी कर्त्तव्य इत्याह॥

फिर मनुष्यों को किनके साथ कैसा जन राज्य का अधिकारी करना चाहिये, इस विषय को कहते हैं॥

तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृधन्॥११॥८॥

तम्। वृधन्तम्। मारुतम्। भ्राजत्ऽऋष्टिम्। रुद्रस्य। सुनम्। हवसा। आ। विवासे। दिवः। शर्धाय। शुचयः। मनीषाः। गिरयः। न। आपः। उग्राः। अस्पृधन्॥११॥

पदार्थः-(**तम्**) (**वृधन्तम्**) वर्धमानं वर्धयन्तं वा (**मारुतम्**) मरुतामिमम् (**भ्राजदृष्टिम्**) भ्राजद् ऋष्टिः सम्प्रेक्षणं यस्य तम् (**रुद्रस्य**) कृतचतुश्चत्वारिंशद्वर्षब्रह्मचर्य्यस्य (**सूनुम्**) पुत्रम् (**हवसा**) आदानेन (**आ**) (**विवासे**) सेवे (**दिवः**) कमनीयस्य (**शर्धाय**) बलाय (**शुचयः**) पवित्राः (**मनीषाः**) मनस्विनः (**गिरयः**) मेघाः (**न**) इव (**आपः**) जलानि (**उग्राः**) तेजस्विनः (**अस्पृधन्**) स्पर्द्धन्ताम्॥११॥

अन्वयः-ये शुचयो मनीषा उग्रा गिरय आपो न दिवः शर्धायास्पृधंस्तैस्सह वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य तं सूनुं हवसाऽहमा विवासे॥११॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये मनुष्या मेघवदुन्नताः प्रजापालका जलवत्पोषकाः पवित्राशयास्तेजस्विनः कमनीयस्य बलस्य वर्धकाः स्युस्तैस्सह यदि राजा राज्यशासनं कुर्यात्तर्हि कुत्रापि पराजयोऽपकीर्त्तिश्च न जायेतेति॥११॥

अत्र मरुद्गुणवद्विद्वद्वीरपुरुषगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्षष्टितमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-जो (**शुचयः**) पवित्र (**मनीषाः**) मनस्वी अर्थात् उत्साही मन वाले (**उग्राः**) तेजस्वी (**गिरयः**) मेघ और (**आपः**) जलों के (**न**) समान (**दिवः**) मनोहर पदार्थ के (**शर्धाय**) बल के लिये (**अस्पृधन्**) स्पर्द्धा करें उनके साथ (**वृधन्तम्**) आप बढ़ते वा दूसरों को बढ़ाते हुए (**मारुतम्**) पवनों की

विद्या जानने वाले **(भ्राजदृष्टिम्)** प्रकाशमान दृष्टियुक्त **(रुद्रस्य)** किया है चवालीस वर्ष पर्य्यन्त ब्रह्मचर्य्य जिसने उसके **(तम्)** उस **(सुनूम्)** पुत्र को **(हवसा)** लेने के व्यवहार से मैं **(आ, विवासे)** सेवता हूं॥११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो मनुष्य मेघ के समान उन्नति करने, प्रजा के पालने, जल के समान पुष्टि करने वाले, पवित्र आशययुक्त, तेजस्वी और मनोहर बल के बढ़ाने वाले हों, उनके साथ यदि राजा राज्यशिक्षा करे तो कहीं पराजय और अपकीर्ति न हो॥११॥

इस सूक्त में पवनों के गुणों के समान विद्वानों और वीरों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह छियासठवां सूक्त और आठवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्य सप्तषष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। मित्रावरुणौ देवते। १, २,९ स्वराट् पङ्क्तिः। १० भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ७, ८, ११ निचृत्त्रिष्टुप्। ४, ५ त्रिष्टुप्। ६ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः केषां सत्कारः कर्त्तव्य इत्याह॥

अब ग्यारह ऋचावाले सड़सठवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को किनका सत्कार करना चाहिये, इस विषय को कहते हैं॥

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः॥ १॥

विश्वेषाम्। वः। सताम्। ज्येष्ठतमा। गीःभिः। मित्रावरुणा। ववृधध्यै। सम्। या। रश्माऽइव। यमतुः। यमिष्ठा। द्वा। जनान्। असमा। बाहुऽभिः। स्वैः॥ १॥

पदार्थः-(**विश्वेषाम्**) सर्वेषाम् (**वः**) युष्माकम् (**सताम्**) वर्त्तमानानां सत्पुरुषाणां मध्ये (**ज्येष्ठतमा**) अतिशयेन ज्येष्ठौ (**गीर्भिः**) वाग्भिः (**मित्रावरुणा**) प्राणोदानाविवऽध्यापकोपदेशकौ (**वावृधध्यै**) अतिशयेन वर्धितुम् (**सम्**) (**या**) यौ (**रश्मेव**) किरणवद्रज्जुवद्वा (**यमतुः**) संयच्छतः (**यमिष्ठा**) अतिशयेन यन्तारौ (**द्वा**) द्वौ (**जनान्**) (**असमा**) अतुल्यौ सर्वेभ्योऽधिकौ (**बाहुभिः**) भुजैः (**स्वैः**) स्वकीयैः॥ १॥

अन्वयः-हे मनुष्या! विश्वेषां सतां वो या ज्येष्ठतमा यमिष्ठा असमा मित्रावरुणा वावृधध्यै जनान् रश्मेव गीर्भिः संयमतुर्द्वा स्वैर्बाहुभिर्जनान् रश्मेव सं यमतुस्तावध्यापकोपदेशकौ यूयं सदा सत्कुरुत॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये विद्यासुशीलतादिगुणैः श्रेष्ठा अधर्मान्निवर्त्य धर्मे प्रवर्त्तयितारोऽध्यापनोपदेशाभ्यां सूर्यवत्प्रज्ञाप्रकाशका भवेयुस्तेषामेव सत्कारं सदैव कुरुत॥ १॥

पदार्थः-हे मनुष्यो! (**विश्वेषाम्**) सब (**सताम्**) सज्जन जो (**वः**) आप लोग उनमें (**या**) जो (**ज्येष्ठतमा**) अतीव ज्येष्ठ (**यमिष्ठा**) अतीव नियम को वर्त्तने वाले (**असमा**) अतुल्य अर्थात् सब से अधिक (**मित्रावरुणा**) प्राण और उदान के समान अध्यापक और उपदेशक (**वावृधध्यै**) अत्यन्त बढ़ने के लिये (**जनान्**) मनुष्यों को (**रश्मेव**) किरण वा रज्जु के के समान (**गीर्भिः**) वाणियों से (**सम्, यमतुः**) नियमयुक्त करते हैं और (**द्वा**) दोनों सज्जन (**स्वैः**) अपनी (**बाहुभिः**) भुजाओं से मनुष्यों को किरण वा रस्सी के समान नियम में लाते हैं, उन अध्यापक और उपदेशकों का सदैव सत्कार करो॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्या और उत्तम शील आदि गुणों से श्रेष्ठ, अधर्म से निवृत्त कर धर्म के बीच प्रवृत्त कराने वाले, अध्यापन और उपदेश से सूर्य के समान उत्तम बुद्धि के प्रकाश करने वाले हों, उन्हीं का सदा सत्कार करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

इ॒यं मद्वां॒ प्र स्तृ॑णीते मनी॒षोप॑ प्रि॒या नम॑सा ब॒र्हिरच्छ॑।
य॒न्तं नो॑ मित्रावरुणा॒वधृ॑ष्टं छ॒र्दिर्यद्वां॑ वरू॒थ्यं॑ सुदानू॥ २॥

इ॒यम्। मत्। वा॒म्। प्र। स्तृ॒णी॒ते॒। म॒नी॒षा। उप॑। प्रि॒या। नम॑सा। ब॒र्हिः। अच्छ॑। य॒न्तम्। नः॒। मि॒त्रा॒व॒रु॒णौ॒। अधृ॑ष्टम्। छ॒र्दिः। यत्। वा॒म्। व॒रू॒थ्य॑म्। सु॒दा॒नू॒ इति॑ सु॒ऽदा॒नू॒॥ २॥

पदार्थः-(**इयम्**) (**मत्**) मम सकाशात् (**वाम्**) युवयोः (**प्र**) (**स्तृणीते**) आच्छादयति प्राप्नोति वा (**मनीषा**) विद्यासुशिक्षायुक्ता प्रज्ञा (**उप**) (**प्रिया**) प्रियौ कमनीयौ (**नमसा**) सत्कारेणान्नाद्येन सह वा (**बर्हिः**) अतीवविशालम् (**अच्छ**) सम्यक् (**यन्तम्**) प्राप्नुवन्तम् (**नः**) अस्माकम् (**मित्रावरुणौ**) अध्यापकोपदेशकौ (**अधृष्टम्**) शत्रुभिरधर्षितम् (**छर्दिः**) गृहम् (**यत्**) (**वाम्**) युवयोः (**वरूथ्यम्**) वरूथे गृहे भवम् (**सुदानू**) शोभनानि दानानि ययोस्तौ॥ २॥

अन्वयः-हे सुदानू प्रिया मित्रावरुणौ! वां नमसेयं मनीषा मत्प्र स्तृणीते यद्वां वरूथ्यं बर्हिरच्छ यन्तं नोऽधृष्टं छर्दिरुप स्तृणीते सा सर्वैः स- ाह्या॥ २॥

भावार्थः-हे मनुष्या! ययोः सङ्गेनास्मानुत्तमे प्रज्ञागृहे प्राप्नुतस्तौ सदैव यूयं मन्यध्वम्॥ २॥

पदार्थः-हे (**सुदानू**) सुन्दर दान देने वालो! (**प्रिया**) मनोहर (**मित्रावरुणौ**) अध्यापक और उपदेशको! (**वाम्**) तुम दोनों की (**नमसा**) सत्कार वा अन्नादिकों के साथ (**इयम्**) यह (**मनीषा**) विद्या और उत्तम शिक्षा युक्त बुद्धि (**मत्**) मुझ से (**प्र, स्तृणीते**) अच्छे प्रकार सर्व विषयों को आच्छादित करती है तथा (**यत्**) जो (**वाम्**) तुम दोनों के (**वरूथ्यम्**) घर के बीच उत्पन्न हुए (**बर्हिः**) अतीव विशाल तथा (**अच्छ**) अच्छे प्रकार (**यन्तम्**) प्राप्त होते हुए और (**नः**) हमारे (**अधृष्टम्**) शत्रुओं की न धृष्टता को प्राप्त हुए (**छर्दिः**) घर को (**उप**) समीप से ढांपती है, वह सब को अच्छे प्रकार ग्रहण करने योग्य है॥ २॥

भावार्थः-हे मनुष्यो! जिनके सङ्ग से हमको उत्तम बुद्धि और घर प्राप्त होते हैं, उनको सदैव तुम मानो॥ २॥

पुनः कौ सततं सत्करणीयावित्याह॥

फिर कौन निरन्तर सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

आ या॑तं मित्रावरुणा सुशस्त्युप॑ प्रि॒या नम॑सा हू॒यमा॑ना।
सं यावप्नः॑स्थो अ॒पसे॑व॒ जना॑ञ्छुधी॒यत॑श्चि॒द्यतथो महि॒त्वा॥ ३॥

आ। यातम्। मित्रावरुणा। सुऽशस्ति। उप। प्रिया। नमसा। हूयमाना। सम्। या। अपनःऽस्थः। अपसाऽइव। जनान्। श्रुधिऽयतः। चित्। यतथः। महिऽत्वा॥ ३॥

पदार्थः-(**आ**) समन्तात् (**यातम्**) आगच्छतम् (**मित्रावरुणा**) प्राणोदानवत्प्रियौ (**सुशस्ति**) सुष्ठु प्रशंसनम् (**उप**) (**प्रिया**) यौ सर्वान् प्रीणीतस्तौ (**नमसा**) सत्कारेण (**हूयमाना**) आहूयमानौ (**सम्**) (**यौ**) (**अपनःस्थः**) अपत्यस्थः (**अपसेव**) कर्मणेव (**जनान्**) (**श्रुधीयतः**) आत्मनः श्रुधिमन्नमिच्छतः (**चित्**) अपि (**यतथः**) (**महित्वा**) महिम्ना॥ ३॥

अन्वयः-हे प्रिया मित्रावरुणा नमसा हूयमाना! युवां जनानुपा यातं सुशस्ति प्राप्नुतं यौ चिन्महित्वा यतथश्श्रुधीयतस्तावप्नःस्थोऽपसेवास्माञ्जनान् समुपायातम्॥ ३॥

भावार्थः-हे मनुष्या! यूयमध्यापकोपदेशकौ सदा सत्कारेणाहूय सम्पूज्य विद्यासत्योपदेशौ जगति प्रसारयत। हे अध्यापकोपदेशका! यूयं प्रयत्नेन मातापितृवन्मनुष्यान् सुशिक्ष्य विद्यावतः सर्वोपकारकान् सम्पादयत॥ ३॥

पदार्थः-हे (**प्रिया**) सब को तृप्त करने वाले (**मित्रावरुणा**) प्राण और उदान के समान प्रिय पुरुषो! (**नमसा**) सत्कार से (**हूयमाना**) बुलाते हुए तुम दोनों (**जनान्**) मनुष्य के (**उप, आ, यातम्**) समीप आओ तथा (**सुशस्ति**) सुन्दर प्रशंसा को प्राप्त होओ (**यौ**) जो (**चित्**) निश्चय से (**महित्वा**) बड़प्पन से (**यतथः**) यत्न करते हैं वा (**श्रुधीयतः**) अपने अन्न की इच्छा करते हैं, वे दोनों (**अपनःस्थः**) सन्तानों में ठहरने वाला (**अपसेव**) कर्म से जैसे वैसे हम लोगों को (**सम्**) प्राप्त होवें॥ ३॥

भावार्थः-हे मनुष्यो! तुम अध्यापक और उपदेशकों को सदा सत्कार से बुलाकर उनका सत्कार कर विद्या और सत्योपदेश को संसार के बीच विस्तारो। हे अध्यापक और उपदेशको! तुम प्रयत्न से माता और पिता के समान मनुष्यों को उत्तम शिक्षा देकर विद्यावान् सर्वोपकार करने वालों को सिद्ध करो॥ ३॥

पुनः सर्वैर्मनुष्यैः कौ पूजनीयावित्याह॥

फिर सब मनुष्यों को कौन सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

अश्वा न या वाजिना पूतबन्धू ऋता यद्गर्भमदितिर्भरध्यै।
प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः॥ ४॥

अश्वा। न। या। वाजिना। पूतबन्धू इति। ऋता। यत्। गर्भम्। अदितिः। भरध्यै। प्र। या। महि। महान्ता। जायमाना। घोरा। मर्ताय। रिपवे। नि। दीधरिति दीधः॥ ४॥

पदार्थः-(**अश्वा**) तुरङ्गौ महान्तौ जनौ वा (**न**) इव (**या**) यौ (**वाजिना**) बहुवेगविज्ञानयुक्तौ (**पूतबन्धू**) पूताः पवित्रा बन्धवो ययोस्तौ (**ऋता**) सत्याचारौ (**यत्**) यम् (**गर्भम्**) (**अदितिः**) माता (**भरध्यै**) भर्तुम् (**प्र**) (**या**) यौ (**महि**) (**महान्ता**) महान्तौ पूजनीयौ (**जायमाना**) उत्पद्यमानौ (**घोरा**) भयङ्करौ (**मर्त्ताय**) मनुष्याय (**रिपवे**) शत्रवे (**नि**) (**दीधः**) नितरां कारागारे निदधाते॥ ४॥

अन्वयः-हे मनुष्या! या अश्वा न वाजिना पूतबन्धू ऋतादितिरिव महि यद्गर्भं भरध्यै प्रवर्त्तमानौ या महान्ता जायमाना रिपवे मर्त्ताय घोरा प्र णि दीधस्तौ स्वात्मवत् सत्कुरुत॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये कुलीना महापक्षा विद्वद्भ्यां मातापितृभ्यामुत्पन्नाः सुशिक्षिता महाशया मातृवज्जनाननुकम्पमाना अध्यापनोपदेशाभ्यां सर्वानुपकुर्वाणा दुष्टानां निरुन्धाना विद्वांसः स्युस्तेषामेव सेवा सङ्गस्तेभ्य एवोपदेशाऽध्ययनौ च सततं कुरुत॥४॥

पदार्थः-हे मनुष्यो! **(या)** जो **(अश्वा)** घोड़े वा महाशय जनों के **(न)** समान **(वाजिना)** बहुत वेग वा विज्ञानयुक्त **(पूतबन्धू)** पवित्र बन्धु वाले **(ऋता)** सत्य आचार के रखने वाले **(अदितिः)** माता के तुल्य **(महि)** महान् जन **(यत्)** जिस **(गर्भम्)** गर्भ को **(भरध्यै)** धारण करने को प्रवर्त्तमान वा **(या)** जो **(महान्ता)** महात्मा **(जायमाना)** उत्पन्न हुए **(रिपवे, मर्त्ताय)** शत्रुजन के लिये **(घोरा)** भयङ्कर **(प्र, णि, दीधः)** और कारागार में निरन्तर शत्रु जनों को डाल देते हैं, उनको अपने आत्मा के तुल्य सत्कार करो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो कुलीन, जिनका महान् पक्ष, विद्वान् माता पिता से उत्पन्न हुए, उत्तम शिक्षायुक्त, महाशय, माता के तुल्य मनुष्यों पर कृपा करते, वा पढ़ाने और उपदेश करने से सब पर उपकार करते, तथा दुष्टों को रोकते हुए विद्वान् होते हैं, उन्हीं की सेवा, सङ्ग, उन्हीं से उपदेश और विद्या पढ़ना निरन्तर करो॥४॥

पुनर्मनुष्यैः के सत्कर्त्तव्या इत्याह॥

फिर मनुष्यों को कौन सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

विश्वे॒ यद्वां॑ मं॒हना॒ मन्द॑माना॒: क्षत्रं॑ दे॒वासो॒ अद॑धुः स॒जोषा॑:।
परि॒ यद्भूथो रोद॑सी चिदु॒र्वी सन्ति॒ स्पशो॒ अद॑ब्धासो॒ अमू॑राः॥५॥९॥

विश्वे॑। यत्। वा॒म्। मं॒हना॑। मन्द॑मानाः। क्षत्रम्। दे॒वास॑ः। अद॑धुः। स॒ऽजोषा॑ः। परि॑। यत्। भूथः। रोद॑सी॒ इति॑। चि॒त्। उ॒र्वी इति॑। सन्ति॑। स्पश॑ः। अद॑ब्धासः। अमू॑राः॥५॥

पदार्थः-(**विश्वे**) सर्वे **(यत्)** ये **(वाम्)** युवयोः **(मंहना)** सत्कर्त्तारः **(मन्दमानाः)** आनन्दन्तः प्राप्तसत्काराः स्तुवन्तो वा **(क्षत्रम्)** धनं राज्यं वा **(देवासः)** कामयमाना विद्वांसः **(अदधुः)** दधति **(सजोषाः)** समानप्रीतिसेविनः **(परि)** सर्वतः अपि **[(3त्)** **(भूथः)** **(रोदसी)** **(चित्)** **(उर्वीः)** बहुपदार्थयुक्ते **(सन्ति)** **(स्पशः)** अविद्यान्धकारं बाधमाना विद्याप्रकाशं स्पर्शन्तः **(अदब्धासः)** अहिंसिता अहिंसका वा **(अमूराः)** मूढतादिदोषरहिताः॥५॥

अन्वयः-हे अध्यापकोपदेशकौ! यद्यौ युवामुर्वी रोदसी इव भूथस्तयोर्वा संगेन यद्ये मंहना मन्दमानाः सजोषाः स्पशोऽदब्धासोऽमूरा विश्वे देवासः सन्ति त एव चित् क्षत्रं पर्यदधुस्तौ तान् युष्मान् सर्वे वयं सततं सत्कुर्याम॥५॥

भावार्थः-त एवाप्ता विद्वांसः सन्ति येषामध्यापनोपदेशसङ्गाः सद्यः सफला जायन्ते तेषां सङ्गेन हिंसादिदोषरहिता विद्वांसो भूत्वा पक्षपातं विहाय सर्वान् प्राणिनः स्वात्मवत्सुखयन्ति॥५॥

पदार्थः-हे अध्यापक और उपदेशको! **(यत्)** जो तुम दोनों **(उर्वी)** बहुत पदार्थों से युक्त **(रोदसी)** प्रकाश और पृथिवी के समान विद्या और क्षमा से युक्त **(भूथः)** होते हो उन **(वाम्)** तुम्हारे सङ्ग से **(यत्)** जो **(मंहना)** सत्कार करने वाले **(मन्दमानाः)** आनन्द वा सत्कार को प्राप्त वा स्तुति करते **(सजोषाः)** एकसी प्रीति को सेवने वाले **(स्पशः)** अविद्यान्धकार का विनाश करने और विद्याप्रकाश का स्पर्श करने वाले **(अदब्धासः)** हिंसा को न प्राप्त और हिंसा न करने वाले **(अमूराः)** मूढ़तादि दोषरहित **(विश्वे, देवासः)** समस्त कामना करते हुए विद्वान् जन **(सन्ति)** हैं, वे ही **(चित्)** निश्चित **(क्षत्रम्)** धन वा राज्य को **(परि, अदधुः)** सब ओर से धारण करते हैं, उनका वा उन तुम लोगों को सब हम लोग निरन्तर सत्कार करें॥५॥

भावार्थः-वे ही आप्त विद्वान् जन हैं जिनका पढ़ाना, उपदेश और सङ्ग शीघ्र सफल होता है, जिनके संग से हिंसा आदि दोषरहित विद्वान् होकर पक्षपात को छोड़ सब प्राणियों को अपने आत्मा के तुल्य सुख देते हैं॥५॥

पुनः केऽत्र सङ्गन्तव्याः सुखवर्धकाश्च सन्तीत्याह॥

फिर कौन सङ्ग करने योग्य और सुख के बढ़ाने वाले हैं, इस विषय को कहते हैं॥

ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुमुपमादिव द्योः।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमाताꣳद्यां धासिनायोः॥६॥

ता। हि। क्षत्रम्। धारयेथे इति। अनु। द्यून्। दृंहेथे इति। सानुम्। उपमात्ऽइव। द्योः। दृळ्हः। नक्षत्रः। उत। विश्वदेवः। भूमिम्। आ। अतान्। द्याम्। धासिना। आयोः॥६॥

पदार्थः-**(ता)** तौ **(हि)** यतः **(क्षत्रम्)** राज्यं धनं वा **(धारयेथे)** **(अनु)** **(द्यून्)** दिवसान् **(दृंहेथे)** वर्धयथः **(सानुम्)** शिखरम् **(उपमादिव)** **(द्योः)** सूर्यस्य **(दृळ्हः)** **(नक्षत्रः)** यो न क्षीयते **(उत)** उत **(विश्वदेवः)** विश्वेषां सर्वेषां देवः प्रकाशकः **(भूमिम्)** **(आ)** **(अतान्)** समन्तादतेयुः प्रकाशयेयुः **(द्याम्)** कमनीयां विद्याम् **(धासिना)** अन्नेन **(आयोः)** जीवनस्य॥६॥

अन्वयः-हे अध्यापकोपदेशकौ! यौ हि ता अनु द्यून् क्षत्रं धारयेथे द्योरुपमादिव सानुं दृंहेथे ययोः सङ्गेन विश्वदेवो दृळ्ह उत नक्षत्रः सन् भूमिं द्यां प्राप्य धासिनाऽऽयोर्वर्धकोऽस्ति तौ तञ्च य आऽतांस्ते सततं सुखिनो जायन्ते॥६॥

भावार्थः-हे मनुष्या! येऽध्यापकोपदेशकाः प्रतिदिनं सूर्यवद्विद्याव्यवहारं सम्प्रकाश्य राज्यं धनमायुश्च वर्धयन्ति सर्वान् सुखे धारयन्ति यान् प्राप्य सर्वे जना विद्वांसो जायन्ते तत्सङ्गं सततं कुरुत॥६॥

पदार्थः-हे अध्यापक और उपदेशको! जो **(हि)** जिस कारण से हैं **(ता)** वे तुम दोनों **(अनु, द्यून्)** प्रतिदिन **(क्षत्रम्)** राज्य वा धन को **(धारयेथे)** धारण करते हो तथा **(द्योः)** सूर्य की **(उपमादिव)**

उपमा से जैसे वैसे **(सानुम्)** शिखर को **(दृंहेथे)** बढ़ाते हो जिनके सङ्ग से **(विश्वदेवः)** सब का प्रकाश करने वाला **(दृळ्हः)** दृढ़ **(उत)** और **(नक्षत्रः)** जो नहीं नष्ट होता ऐसा होता हुआ **(भूमिम्)** भूमि और **(द्याम्)** मनोहर विद्या को प्राप्त होकर **(धासिना)** अन्न से **(आयोः)** जीवन को बढ़ाता है, उन पूर्वोक्त दोनों तथा उसको जो **(आ, अतान्)** सब ओर से प्रकाशित करें, वे निरन्तर सुखी होते हैं॥६॥

भावार्थः-हे मनुष्यो! जो अध्यापक और उपदेशक प्रतिदिन सूर्य के समान विद्याव्यवहार को सम्यक् प्रकाशित कर राज्य, धन और आयु को बढ़ाते, सब को सुख की धारणा कराते, जिनको प्राप्त होकर सब जन विद्वान् होते हैं, उनका सङ्ग निरन्तर करो॥६॥

पुनः के का इव मेधाविनौ विद्यार्थिनो धरन्तीत्याह॥

फिर कौन किसके समान मेधावी विद्यार्थियों को धारण करते हैं, इस विषय को कहते हैं॥

ता विग्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति।
न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते॥७॥

ता। विग्रम्। धैथे इति। जठरम्। पृणध्यै। आ। यत्। सद्म। सऽभृतयः। पृणन्ति। न। मृष्यन्ते। युवतयः। अवाताः। वि। यत्। पयः। विश्वऽजिन्वा। भरन्ते॥७॥

पदार्थः-(**ता**) तौ (**विग्रम्**) मेधाविनम्। **विग्र इति मेधाविनाम।** (निघं०१३.१५) (**धैथे**) धारयथः (**जठरम्**) उदरस्थमग्निम् (**पृणध्यै**) सुखयितुम् (**आ**) (**यत्**) याः (**सद्म**) (**सभृतयः**) समाना भर्त्तारो यासां ताः (**पृणन्ति**) (**न**) निषेधे (**मृष्यन्ते**) सहन्ते (**युवतयः**) प्राप्तयुवावस्थाः स्त्रियः (**अवाताः**) पतीनप्राप्ताः (**वि**) (**यत्**) याः (**पयः**) उदकम् (**विश्वजिन्वा**) विश्वपोषक। अत्र **संहितायामिति** दीर्घः। (**भरन्ते**)॥७॥

अन्वयः-हे अध्यापकोपदेशकौ! यथाऽवाताः सभृतयो युवतयः समानान् पतीन् भरन्ते ता नापृणन्त्यन्याः सपत्नीर्न मृष्यन्ते यद्याः सद्म पृणन्ति यद्याः पय इव वि पृणन्ति तथा यौ युवां जठरं पृणध्यै विग्रं धैथे। हे विश्वजिन्वा! त्वं ता तौ च सततं सेवस्व॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा समानगुणकर्मस्वभावरूपाः स्त्री-पुरुषा अत्यन्तप्रीत्या विवाहं कृत्वा कदाचिन्न विरुध्यन्ति तथैव विद्वांसो विद्यार्थिनश्च न विद्विषन्त्येवं प्रेम्णा सह वर्त्तमानास्सर्वे सदाऽऽनन्दिता जायन्ते॥७॥

पदार्थः-हे अध्यापक और उपदेशको! जैसे **(अवाताः)** पतियों को न प्राप्त हुई **(सभृतयः)** समान पतियों वाली **(युवतयः)** युवति स्त्रियाँ समान पतियों को **(भरन्ते)** धारण करतीं अर्थात् प्राप्त होतीं वे **(न)** नहीं **(आ, पृणन्ति)** पूरे सुख को प्राप्त होती क्योंकि और सौतें नहीं **(मृष्यन्ते)** सहती हैं **(यत्)** जो **(सदम्)** घर को सुखयुक्त करती हैं और **(यत्)** जो **(पयः)** जल के समान **(वि)** विविध प्रकार से सुख देती हैं तथा जो तुम दोनों **(जठरम्)** उदर में ठहरे हुए अग्नि को **(पृणध्यै)** सुखी करने के लिये **(विग्रम्)**

बुद्धिमान् पुरुष को **(धैथे)** धारण करते हो। हे **(विश्वजिन्वा)** संसार की पुष्टि करने वाले! आप उन स्त्रियों तथा **(ता)** उन दोनों की निरन्तर सेवो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे समान गुण, कर्म, स्वभाव रूप स्त्री-पुरुष अत्यन्त प्रीति से विवाह कर कभी विरोध नहीं करते हैं, वैसे ही विद्वान् जन और विद्यार्थीजन विद्वेष नहीं करते हैं, ऐसे प्रेम के साथ वर्त्तमान सब सदैव आनन्दित होते हैं॥७॥

पुनः केषां सङ्गेन जना विद्वांसो भवेयुरित्याह॥

फिर किनके सङ्ग से जन विद्वान् हों, इस विषय को कहते हैं॥

ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत्।
तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः॥८॥

ता। जिह्वयाः। सदम्। आ। इदम्। सुऽमेधाः। आ। यत्। वाम्। सत्यः। अरतिः। ऋते। भूत्। तत्। वाम्। महिऽत्वम्। घृतऽअन्नौ। अस्तु। युवम्। दाशुषे। वि। चयिष्टम्। अंहः॥८॥

पदार्थः-(**ता**) तौ (**जिह्वया**) वाचा (**सदम्**) सीदन्ति विद्वांसो यस्मिंस्तत्सत्यं वचः (**आ**) (**इदम्**) (**सुमेधाः**) उत्तमप्रज्ञः (**आ**) (**यत्**) यौ (**वाम्**) युवयोरुपदेशेन (**सत्यः**) सत्सु साधुः (**अरतिः**) सत्यमुपदेशं प्राप्तः सन् (**ऋते**) सत्ये धर्मे (**भूत्**) भवेत् (**तत्**) (**वाम्**) युवयोः (**महित्वम्**) महिमानम् (**घृतान्नौ**) बहुघृतान्नौ (**अस्तु**) (**युवम्**) (**दाशुषे**) दात्रे (**वि**) विगतार्थे (**चयिष्टम्**) चिनुतः (**अंहः**) पापम्॥८॥

अन्वयः-हे घृतान्नावध्यापकोपदेशकौ! वामुपदेशेन सुमेधा अरतिः सत्यो जिह्वयेदं सदं प्राप्य ऋत आ भूद्यद्यौ युवं दाशुषेंऽहो वि चयिष्टं तद्वां महित्वमस्तु ता वयं सतत सत्कुर्याम॥८॥

भावार्थः-हे मनुष्या! येषां सकाशाद्यूयं विद्या प्राप्नुतोपदेशं वा गृह्णीत तान् धन्यवादादिना सततं सत्कुरुत येषां सङ्गेन मनुष्याः सत्याचाराः सुज्ञा जायन्ते त एव महाशयाः सन्ति॥८॥

पदार्थः-हे (**घृतान्नौ**) बहुत घृत और अन्न वाले अध्यापक और उपदेशक जनो! (**वाम्**) तुम दोनों के उपदेश से (**सुमेधाः**) उत्तम जिसकी बुद्धि वह (**अरतिः**) सत्य उपदेश को प्राप्त होता हुआ (**सत्यः**) सज्जनों में उत्तम जन (**जिह्वया**) वाणी से (**आ, इदम्, सदम्**) सब ओर से जिसमें विद्वान् जन स्थिर होते हैं, उस सत्य वचन को पाकर (**ऋते**) सत्य धर्म में (**आ, भूत्**) प्रसिद्ध होवे (**यत्**) जो (**युवम्**) आप दोनों (**दाशुषे**) दानशील पुरुष के लिये (**अंहः**) पाप को (**वि, चयिष्टम्**) विगत चयन करते हैं (**तत्**) वह (**वाम्**) तुम दोनों की (**महित्वम्**) महिमा (**अस्तु**) हो (**ता**) उन तुम दोनों का हम लोग निरन्तर सत्कार करें॥८॥

भावार्थः-हे मनुष्यो! जिनकी उत्तेजना से तुम लोग विद्या को प्राप्त होओ वा उपदेश ग्रहण करो उनका धन्यवाद आदि से निरन्तर सत्कार करो, जिनके सङ्ग से मनुष्य सत्य आचरण वाले उत्तम ज्ञाता होते हैं, वे ही महाशय हैं॥८॥

के विदुषां प्रिया अप्रिया वा भवन्तीत्याह॥

कौन विद्वानों के प्रिय वा अप्रिय होते हैं, इस विषय को कहते हैं॥

प्र यद्वां॑ मित्रावरुणा स्पू॒र्धन् प्रि॒या धाम॑ यु॒वधि॑ता मि॒नन्ति॑।
न ये दे॒वास॒ ओह॑सा॒ न मर्ता॒ अय॑ज्ञसाचो अप्यो॒ न पु॒त्राः॥ ९॥

प्र। यत्। वा॒म्। मि॒त्रा॒व॒रु॒णा॒। स्पू॒र्धन्। प्रि॒या। धाम॑। यु॒वऽधि॑ता। मि॒नन्ति॑। न। ये। दे॒वास॑ः। ओह॑सा। न। मर्ता॑ः। अय॑ज्ञऽसाचः। अप्य॑ः। न। पु॒त्राः॥ ९॥

पदार्थः-(**प्र**) (**यत्**) ये (**वाम्**) युवयोः (**मित्रावरुणा**) प्राणोदानवद्वर्त्तमानौ (**स्पूर्धन्**) स्पर्द्धमानाः (**प्रिया**) प्रियाणि (**धाम**) दधति येषु तानि (**युवधिता**) युवयोर्हितानि (**मिनन्ति**) हिंसन्ति (**न**) निषेधे (**ये**) (**देवासः**) विद्वांसः (**ओहसा**) प्राप्तेन बलेन वेगन वा (**न**) निषेधे (**मर्त्ताः**) मनुष्याः (**अयज्ञसाचः**) ये यज्ञेन न सचन्ति सम्बध्नन्ति ते (**अप्यः**) अप्सु सत्कर्मसु भवः (**न**) इव (**पुत्राः**)॥९॥

अन्वयः-हे मित्रावरुणा! यद्ये स्पूर्द्धन् वां प्रिया धाम युवधिता न प्रमिणन्ति ये देवास ओहसाऽयज्ञसाचो मर्त्ताश्च न मिनन्ति तेऽप्यो न पुत्रा इव जायन्ते॥९॥

भावार्थः-ये मनुष्या अध्यापकोपदेशकानामप्रियं नाचरन्ति ते सत्पुत्रवद्भवन्ति ये चाऽप्रियमाचरन्ति ते शत्रुवज्ज्ञायन्ते॥९॥

पदार्थः-हे (**मित्रावरुणा**) प्राण और उदान के समान अध्यापक और उपदेशको! (**यत्**) जो (**स्पूर्द्धन्**) स्पर्द्धा करते हुए जन (**वाम्**) तुम दोनों के (**प्रिया**) प्रिय (**धाम**) धाम जिनमें स्थापन करते हैं उन (**युवधिता**) तुम दोनों का हित करने वालों को (**न**) न (**प्र, मिनन्ति**) नष्ट करते हैं वा (**ये**) जो (**देवासः**) विद्वान् जन (**ओहसा**) प्राप्तबल वा वेग से (**अयज्ञसाचः**) जो यज्ञ से सम्बन्ध नहीं करते वे (**मर्त्ताः**) मनुष्य (**न**) नहीं नष्ट करते हैं, वे (**अप्यः**) कर्मों में प्रसिद्ध के (**न**) समान और (**पुत्राः**) पुत्रों के समान होते हैं॥९॥

भावार्थः-जो मनुष्य अध्यापक और उपदेशकों का अप्रिय आचरण नहीं करते हैं, वे सत्पुत्रों के समान होते हैं और जो अप्रिय का आचरण करते हैं, वे शत्रुओं के तुल्य होते हैं॥९॥

पुनः के तिरस्करणीयाः सत्कर्त्तव्याश्चेत्याह॥

फिर कौन तिरस्कार करने योग्य और सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

वि यद्वाचं॑ की॒तासो॒ भर॑न्ते॒ शंस॑न्ति॒ के चि॑न्नि॒विदो॑ मना॒नाः।
आद्वां॑ ब्रवाम स॒त्यान्यु॒क्था नकि॑र्दे॒वेभि॑र्यतथो महि॒त्वा॥ १०॥

वि। यत्। वाच॑म्। की॒तास॑ः। भर॑न्ते। शंस॑न्ति। के। चि॒त्। नि॒ऽविद॑ः। म॒ना॒नाः। आत्। वा॒म्। ब्र॒वा॒म॒। स॒त्यानि॑। उ॒क्था। नकि॑ः। दे॒वेभि॑ः। य॒त॒थ॒ः। म॒हि॒ऽत्वा॥ १०॥

पदार्थः-(**वि**) (**यत्**) ये (**वाचम्**) (**कीस्तासः**) मेधाविनः। **कीस्तास इति मेधाविनाम।** (निघं०३.१५) (**भरन्ते**) (**शंसन्ति**) (**के**) (**चित्**) अपि (**निविदः**) उत्तमा वाचः। **निविदिति वाङ्नाम।** (निघं०१.११) (**मनानाः**) मन्यमानाः (**आत्**) आनन्तर्ये (**वाम्**) युवाम् (**ब्रवाम**) अध्यापयेमोपदिशेम वा (**सत्यानि**) सत्सु अर्थेषु साधूनि (**उक्था**) वक्तुं श्रोतुमर्हाणि (**नकिः**) निषेधे (**देवेभिः**) विद्वद्भिः सह (**यतथः**) यथेथे। अत्र व्यत्ययेन परस्मैपदम् (**महित्वा**) महिम्ना॥१०॥

अन्वयः-हे अध्यापकोपदेशकौ! यदि युवां महित्वा देवेभिस्सह विद्यावृद्धये नकिर्यतथस्तर्हि वां सत्यान्युक्था आद् ब्रवाम यद्ये कीस्तासो वाचं वि भरन्ते के चिन्मनाना मननं कुर्वाणा निविदः शंसन्ति तान् सर्वदा युवां पाठयतम्॥१०॥

भावार्थः-राज्ञा राजजनैः प्रजास्थैर्विद्वद्भिश्च के विद्वांसः प्रशासनीया ये निष्कपटत्वेन यथाशक्त्यध्यापनेन विद्याप्रचारं न कुर्य्युः। ये च प्रीत्या विद्याः प्राप्य सर्वत्र प्रचारयन्ति त एव सदैव सत्कर्त्तव्याः॥१०॥

पदार्थः-हे अध्यापक और उपदेशको! यदि तुम दोनों (**महित्वा**) महिमा से (**देवेभिः**) विद्वानों के साथ विद्यावृद्धि के लिये (**नकिः**) न (**यतथः**) यत्न करते हो तो (**वाम्**) तुम दोनों के प्रति हम लोग (**सत्यानि**) उत्तम पदार्थों में भी उत्तम (**उक्था**) कहने वा सुनने के योग्य विषयों को (**आत्, ब्रवाम**) पीछे कहें (**यत्**) जो (**कीस्तासः**) मेधावीजन (**वाचम्**) वाणी को (**वि, भरन्ते**) विशेषता से धारण करते हैं और (**के, चित्**) कोई (**मनानाः**) विचार करते हुए (**निविदः**) उत्तम वाणियों की (**शंसन्ति**) प्रशंसा करते हैं, उनको सर्वदा तुम पढ़ाओ॥१०॥

भावार्थः-राजा और राजजनों और प्रजास्थ विद्वानों के द्वारा कौन विद्वान् अच्छी शिक्षा देने योग्य हैं, जो निष्कपटता से अपनी शक्ति के अनुकूल पढ़ाने से विद्या प्रचार न करें। और जो प्रीति के साथ विद्याओं को पाकर सर्वत्र प्रचार करते हैं, वे ही सदा सत्कार करने योग्य हैं॥१०॥

पुनः के विद्वांसो भवन्तीत्याह॥

फिर कौन विद्वान् होते हैं, इस विषय को कहते हैं॥

अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु।
अनु यद्गावः स्फुरान्ऋजिप्यं धृष्णुं यद् रणे वृषणं युनजन्॥११॥१०॥

अवोः। इत्था। वाम्। छर्दिषः। अभिष्टौ। युवोः। मित्रावरुणौ। अस्कृधोयु। अनु। यत्। गावः। स्फुरान्। ऋजिप्यम्। धृष्णुम्। यत्। रणे। वृषणम्। युनजन्॥११॥

पदार्थः-(**अवोः**) रक्षकयोः। अत्र **छान्दसो वर्णलोपो वे**ति सलोपः। (**इत्था**) अस्माद्धेतोः (**वाम्**) युवयो (**छर्दिषः**) गृहस्य (**अभिष्टौ**) आभिमुख्येन यजनक्रियायाम् (**युवोः**) युवयोः (**मित्रावरुणौ**) वायुसूर्यवद्वर्त्तमानौ (**अस्कृधोयु**) य आत्मनः कृधु ह्रस्वत्वं नेच्छति। अत्र **सुपां सुलुगि**ति सुलोपः। (**अनु**) (**यत्**) ये (**गावः**) किरणा धेनवो वा (**स्फुरान्**) स्फूर्त्तिमतः (**ऋजिप्यम्**) ऋजूनां पालके भवम् (**धृष्णुम्**) दृढं प्रगल्भं वा (**यत्**) यः (**रणे**) स-ामे (**वृषणम्**) बलिष्ठम् (**युनजत्**) युञ्जन्॥११॥

अन्वयः-हे अध्यापकोपदेशकौ! यद्ये गावस्तान् स्फुरानृजिप्यं धृष्णुं वृषणं रणे कश्चिद्युनजन् सन् विजयते। हे मित्रावरुणाववोर्वां छर्दिषोऽभिष्टौ यद्यः प्रयतते युवोरस्कृधोय्वित्थाऽनुयतते तं सदा सत्कुर्यातम्॥११॥

भावार्थः-हे अध्यापकोपदेशका ये विद्यार्थिनो युष्माकं कार्य्यं स्वकार्य्यवज्ञानन्ति त एव दीर्घायुषः प्रशस्तविद्या धार्मिकाः परोपकारिणो जायन्त इति॥११॥

अत्र प्राणोदानवदध्यापकोपदेशकगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तषष्टितमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे अध्यापक और उपदेशको! **(यत्)** जो **(गावः)** किरणें वा धेनु हैं उनको **(स्फुरान्)** स्फूर्त्ति वाले पदार्थों वा **(ऋजिप्यम्)** कोमल वा सरल पदार्थों के पालने वालों में हुए **(धृष्णुम्)** दृढ़ प्रगल्भ **(वृषणम्)** बलिष्ठ को **(रणे)** स-ाम में कोई **(युनजन्)** जोड़ता हुआ विजय को प्राप्त होता है, हे **(मित्रावरुणौ)** वायु और सूर्य्य के समान वर्त्तमान! **(अवोः)** रक्षा करने वाले **(वाम्)** तुम दोनों के **(छर्दिषः)** घर के **(अभिष्टौ)** सन्मुख यज्ञक्रिया में **(यत्)** जो प्रयत्न करता है तथा **(युवोः)** तुम दोनों के सम्बन्ध में **(अस्कृधोयु)** जो अपनी लघुता नहीं चाहता **(इत्था)** इस हेतु से **(अनु)** अनुकूलता से यत्न करता है, उसका सदैव सत्कार करो॥११॥

भावार्थः-हे अध्यापक और उपदेशको! जो विद्यार्थी जन तुम्हारे काम को अपने काम के समान जानते हैं, वे ही दीर्घ आयु वाले, प्रशंसित विद्यायुक्त, धार्मिक परोपकारी होते हैं॥११॥

इस सूक्त में प्राण और उदान के समान अध्यापक और उपदेशकों के गुणों का वर्णन होने से सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सड़सठवां सूक्त और दशवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकादशर्चस्याष्टषष्टितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रावरुणौ देवते। १, ११ त्रिष्टुप्। ६ निचृत्त्रिष्टुप्छन्दः। धैवतः स्वरः। २ भुरिक् पङ्क्तिः। ३, ७, ८ स्वराट् पङ्क्तिः। ४ निचृत्पङ्क्तिः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ९, १० निचृज्जगतीछन्दः। निषादः स्वरः॥

अथ विद्वद्भिः के सम्यगध्यापनीया इत्याह॥

अब ग्यारह ऋचा वाले अड़सठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वानों को अच्छे प्रकार कौन पढ़ाने चाहियें, इस विषय को कहते हैं॥

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद् वृक्तबर्हिषो यजध्यै।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत्॥ १॥

श्रुष्टी। वाम्। यज्ञः। उत्ऽयतः। सऽजोषाः। मनुष्वत्। वृक्तऽबर्हिषः। यजध्यै। आ। यः। इन्द्रावरुणौ। इषे। अद्य। महे। सुम्नाय। महे। आऽववर्तत्॥ १॥

पदार्थः-(श्रुष्टी) सद्यः **(वाम्)** युवयोः **(यज्ञः)** सङ्गमनीयः शिष्यः **(उद्यतः)** उद्योगी **(सजोषाः)** स्वात्मवदन्येषां प्रीत्या सेवकः **(मनुष्वत्)** मनुष्येण तुल्यः **(वृक्तबर्हिषः)** वृक्तं छेदितं बर्हिरुदकं येन तस्य। **बर्हिरित्युदकनाम।** (निघं०१.१३) **(यजध्यै)** यष्टुं सङ्गन्तुम् **(आ)** **(यः)** **(इन्द्रावरुणौ)** वायुविद्युताविवाऽध्यापकोपदेशकौ **(इषे)** विज्ञानायाऽन्नाय वा **(अद्य)** इदानीम् **(महे)** महते **(सुम्नाय)** सुखाय **(महे)** महते **(आववर्त्तत्)** समन्ताद्वर्तते॥१॥

अन्वयः-हे इन्द्रावरुणौ! य उद्यतस्सजोषा मनुष्यवद्वृक्तबर्हिषो वां यज्ञ आ यजध्या अद्य महे सुम्नाय मह इषे श्रुष्ट्याववर्त्ततं युवामध्यापयेतम्॥१॥०

भावार्थः-हे अध्यापकोपदेशका! ये भवतां सुखाय प्रयतमानाः पुरुषार्थिनः प्रीतिमन्त आशुकारिणो वर्त्तन्ते तान् पवित्राञ्जितेन्द्रियान् धार्मिकान् विद्यार्थिन सततं सत्यमुपदिशत॥१॥

पदार्थः-हे **(इन्द्रावरुणौ)** वायु और बिजुली के समान अध्यापक और उपदेशको! **(यः)** जो **(उद्यतः)** उद्योगी **(सजोषाः)** अपने आत्मा के तुल्य औरों का प्रीति से सेवन करता **(मनुष्यवत्)** मनुष्य के तुल्य **(वृक्तबर्हिषः)** संक्षोभित किया जल जिसने उसका और **(वाम्)** तुम्हारा **(यज्ञः)** सङ्ग करने योग्य शिष्य **(आ, यजध्यै)** अच्छे प्रकार सङ्ग करने को **(अद्य)** आज **(महे)** महान् **(सुम्नाय)** सुख वा **(महे)** बहुत **(इषे)** विज्ञान वा अन्न के लिये **(श्रुष्टी)** शीघ्र **(आववर्त्तत्)** अच्छे प्रकार वर्त्तमान है, उसको तुम दोनों पढ़ाओ॥१॥

भावार्थः-हे पढ़ाने और उपदेश करने वालो! जो आप लोगों के सुख के लिये प्रयत्न करते हुए पुरुषार्थी, प्रीतिमान्, शीघ्रकारी वर्त्तमान हैं; उन पवित्र, जितेन्द्रिय, धार्मिक विद्यार्थियों को निरन्तर सत्य का उपदेश करो॥१॥

पुनः केऽत्र राजजना उत्तमाः पूजनीयाश्चेत्याह॥

फिर कौन यहाँ राजजन उत्तम और सत्कार करने योग्य हैं, इस विषय को कहते हैं॥

ता हि श्रेष्ठा॑ दे॒वता॑ता॒ तु॒जा शूरा॑णा॒ शवि॑ष्ठा॒ ता हि भू॒तम्।
म॒घोना॒ मंहि॑ष्ठा तुवि॒शुष्मा॑ ऋ॒तेन॑ वृत्र॒तुरा॒ सर्व॑सेना॥ २॥

ता। हि। श्रेष्ठा॑। दे॒वऽता॑ता। तु॒जा। शूरा॑णाम्। शवि॑ष्ठा। ता। हि। भू॒तम्। म॒घोना॑म्। मंहि॑ष्ठा। तु॒विऽशुष्मा॑। ऋ॒तेन॑। वृ॒त्र॒ऽतुरा॑। सर्व॑ऽसेना॥ २॥

पदार्थः-(ता) तौ **(हि)** यतः **(श्रेष्ठा)** उत्तमौ **(देवताता)** देवतातौ सत्ये व्यवहारे यज्ञे **(तुजा)** दुष्टानां हिंसकौ **(शूराणाम्)** निर्भयानाम् **(शविष्ठा)** अतिशयेन बलवन्तौ **(ता)** तौ **(हि)** खलु **(भूतम्)** भवतः **(मघोनाम्)** धनाढ्यानाम् **(मंहिष्ठा)** अतिशयेन पूजनीयौ **(तुविशुष्मा)** बहुबलसेनायुक्तौ **(ऋतेन)** सत्याचरणेन **(वृत्रतुरा)** यौ वृत्राणां मेघवदुन्नतानां शत्रूणां तुरौ हिंसकौ **(सर्वसेना)** समग्राः सेना ययोस्तौ॥ २॥

अन्वयः-हे मनुष्या! यौ हि देवताता श्रेष्ठा तुजा शूराणां शविष्ठा भूतं यौ हि मघोनां मध्ये मंहिष्ठा ऋतेन तुविशुष्मा वृत्रतुरा सर्वसेना सभासेनेशौ वर्त्तेते ता सत्कर्त्तव्यौ ता ह्युत्तमाधिकारे स्थापनीयौ॥ २॥

भावार्थः-हे मनुष्या! ये सत्येन न्यायेन प्रजापालने प्रयतमानाः सर्वविद्याः सर्वोत्तमसेना दुष्टानां हिंसनेन श्रेष्ठानां धनाढ्यानां वीरपुरुषाणां च रक्षकाः स्युस्ते धन्यवादार्हाः सन्ति॥ २॥

पदार्थः-हे मनुष्यो! जो **(हि)** ही **(देवताता)** सत्यव्यवहार यज्ञ में **(श्रेष्ठा)** उत्तम **(तुजा)** दुष्टों की हिंसा करने वाले **(शूराणाम्)** निर्भय जनों में **(शविष्ठा)** अतीव बलवान् **(भूतम्)** होते हैं और जो **(हि)** निश्चय के साथ **(मघोनाम्)** धनाढ्यों के बीच **(मंहिष्ठा)** अतीव सत्कार करने योग्य **(ऋतेन)** सत्य आचरण से **(तुविशुष्मा)** बहुत बल और सेना से युक्त **(वृत्रतुरा)** जो मेघ के समान बढ़े हुए शत्रुओं का विनाश करने वाले **(सर्वसेना)** समग्र सेनाओं से युक्त सभा और सेनाधीश वर्त्तमान हैं **(ता)** वे सत्कार करने योग्य हैं और **(ता)** वे ही उत्तम अधिकार में स्थापन करने योग्य हैं॥ २॥

भावार्थः-हे मनुष्यो! जो सत्य न्याय से प्रजा की पालना करने में प्रयत्न करते हुए, सब प्रकार कि विद्या और सर्वोत्तम सेनाओं से युक्त, दुष्टों की हिंसा से श्रेष्ठ, धनाढ्य और वीर-पुरुषों की रक्षा करने वाले होवें, वे धन्यवाद के योग्य हैं॥ २॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

ता गृ॑णीहि नम॒स्येभिः॒ शूषैः॑ सु॒म्नेभि॒रिन्द्रा॒वरु॑णा चका॒ना।
वज्रे॑णा॒न्यः शव॑सा॒ हन्ति॑ वृ॒त्रं सिष॑क्त्य॒न्यो वृ॒जने॑षु॒ विप्रः॑॥ ३॥

ता। गृणीहि। नमस्येभिः। शूषैः। सुम्नेभिः। इन्द्रावरुणा। चकाना। वज्रेण। अन्यः। शवसा। हन्ति। वृत्रम्। सिसक्ति। अन्यः। वृजनेषु। विप्रः॥३॥

पदार्थः-(ता) तौ **(गृणीहि)** प्रशंस **(नमस्येभिः)** नमस्स्वन्नेषु भवैः **(शूषैः)** बलैः **(सुम्नेभिः)** सुखैः **(इन्द्रावरुणा)** वायुविद्युताविव **(चकाना)** कामयमानौ **(वज्रेण)** किरणसमूहेनेव शस्त्राऽस्त्रेण **(अन्यः)** सूर्यो विद्युद्वा **(शवसा)** बलेन **(हन्ति)** **(वृत्रम्)** मेघमिव शत्रुम् **(सिषक्ति)** सिञ्चति **(अन्यः)** वायुरिव **(वृजनेषु)** मार्गेषु बलेषु वा **(विप्रः)** मेधावी॥३॥

अन्वयः-हे विद्वन् विप्रस्त्वं ययोरन्यो वज्रेण शवसा वृत्रं हन्ति। अन्यो वृजनेषु सिषक्ति तेन्द्रावरुणेव सुम्नेभिश्चकाना शूषैर्नमस्येभिः सत्कृतौ गृणीहि॥३॥

भावार्थः-यौ सभासेनेशौ सूर्यवायुवत् प्रजापालकावुत्तमैः सैन्यैर्दुष्टनिवारकौ मेघवत् प्रजाः कामैः पूरयतस्तौ सर्वैः सत्कर्त्तव्यौ॥३॥

पदार्थः-हे विद्वान् जन **(विप्रः)** मेधावी बुद्धिमान्! आप जिनमें से **(अन्यः)** सूर्य वा बिजुली **(वज्रेणः)** किरण समूह के समान शस्त्रास्त्र और **(शवसा)** बल से **(वृत्रम्)** मेघ के समान शत्रु को **(हन्ति)** मारते हैं और जो **(अन्यः)** वायु के समान **(वृजनेषु)** मार्ग वा बलों में **(सिषक्ति)** सींचता है **(ता)** उन दोनों **(इन्द्रावरुणा)** वायु और बिजुली के समान **(सुम्नेभिः)** सुखों से **(चकाना)** कामना करते हुए **(शूषैः)** बलों और **(नमस्येभिः)** अन्नों के बीच सिद्ध हुए पदार्थों से सत्कार को प्राप्त हुओं की **(गृणीहि)** प्रशंसा करो॥३॥

भावार्थः-जो सभापति और सेनापति, सूर्य और वायु के समान प्रजा के पालने वाले, उत्तम सेनाजनों से दुष्टों को निवारने वाले, मेघों के समान प्रजाजनों को कामनाओं से पूरित करते हैं, वे सब से सत्कार करने योग्य हैं॥३॥

पुनस्तौ कैस्सह किं कुर्यातामित्याह॥

फिर वे किन के साथ क्या करें, इस विषय को कहते हैं॥

ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वर्गूर्ताः।

प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी॥४॥

ग्नाः। च। यत्। नरः। च। ववृधन्त। विश्वे। देवासः। नराम्। स्वऽगूर्ताः। प्र। एभ्यः। इन्द्रावरुणा। महिऽत्वा। द्यौः। च। पृथिवि। भूतम्। उर्वी इति॥४॥

पदार्थः-**(ग्नाः)** वाचः। **ग्नेति वाङ्नाम।** (निघं०१.११) **(च)** **(यत्)** ये **(नरः)** विद्वन्नायकाः **(च)** **(वावृधन्त)** सर्वतो वर्धन्ते **(विश्वे)** सर्वे **(देवासः)** **(नराम्)** मनुष्याणाम् **(स्वगूर्त्ताः)** स्वेन पराक्रमेणोद्यमिनः **(प्र)** **(एभ्यः)** **(इन्द्रावरुणा)** विद्युत्सूर्याविव **(महित्वा)** महिम्ना **(द्यौः)** **(च)** **(पृथिवि)** भूमिः **(भूतम्)** भवेताम् **(उर्वी)** बहुत्वे॥४॥

अन्वयः-यद्ये विश्वे देवासो नरश्च स्वगूर्त्ता नरां ग्नाः स्वकीयाश्च ग्नाः प्राप्य वावृधन्त प्रैभ्य इन्द्रावरुणोर्वी पृथिवि द्यौश्चेव वर्त्तमानौ महित्वा भूतं वर्धेते ते सर्वे मनुष्यैः सत्कर्त्तव्या सन्ति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! ये विद्याधर्मविनयैर्वर्धन्ते तैरुद्यमिभिः सहेमाः प्रजाः पालय॥४॥

पदार्थः-(**यत्**) जो (**विश्वे, देवासः**) समस्त विद्वान् जन (**नरः, च**) और विद्वानों के बीच अग्रगामी (**स्वगूर्त्ताः**) अपने पराक्रम से उद्यमी जन (**नराम्**) मनुष्यों की (**ग्नाः**) वाणी तथा अपनी (**च**) भी वाणियों को प्राप्त होकर (**वावृधन्त**) सब ओर से बढ़ते हैं (**प्र, एभ्यः**) उत्कर्षन से इनसे (**इन्द्रावरुणा**) बिजुली और सूर्य्य के समान वा (**उर्वी**) विस्तृत (**पृथिवि**) पृथिवी (**द्यौः, च**) और प्रकाश के समान वर्त्तमान (**महित्वा**) महिमा से (**भूतम्**) प्रसिद्ध होवें। वे सब जन मनुष्यों से सत्कार करने योग्य हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जो विद्या, धर्म और विनय से बढ़ते हैं, उन उद्यमियों के साथ इन प्रजाजनों की पालना करो॥४॥

पुना राजसेनाजनाः किं कुर्य्युरित्याह॥

फिर राजसेनाजन क्या करें, इस विषय को कहते हैं॥

स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन्।
इषा स द्विषस्तरेद् दास्वान् वंसद् रयिं रयिवतश्च जनान्॥५॥११॥

सः। इत्। सुऽदानुः। स्वऽवान्। ऋतऽवा। इन्द्रा। यः। वाम्। वरुण। दाशति। त्मन्। इषा। सः। द्विषः। तरेत्। दास्वान्। वंसत्। रयिम्। रयिऽवतः। च। जनान्॥५॥

पदार्थः-(**सः**) (**इत्**) एव (**सुदानुः**) सुष्ठुदाता (**स्ववान्**) स्वे आत्मीया बहवो विद्यन्ते यस्य सः (**ऋतावा**) य ऋतं सत्यं वनति भजति सः (**इन्द्रा**) सूर्यः (**यः**) (**वाम्**) युवयोः (**वरुण**) वायुः (**दाशति**) ददाति (**त्मन्**) आत्मनि (**इषा**) अन्नाद्येन (**सः**) (**द्विषः**) शत्रून् (**तरेत्**) (**दास्वान्**) दाता सन् (**वंसत्**) विभजेत् (**रयिम्**) धनम् (**रयिवतः**) बहुधनवतः (**च**) (**जनान्**)॥५॥

अन्वयः-हे इन्द्रावरुणेव वर्त्तमानौ सभासेनेशौ! वां यः सुदानुः स्ववानृतावा त्मन्नभयं दाशति यो दास्वानिषा द्विषस्तरेद् रयिवतो जनांश्च रयिं वंसत् स इत्सर्वोत्तमः स राजा भवितुमर्हति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्य्यो वर्षयित्वा वायुश्च प्राणय्य सर्वान् प्राणिनोऽभयं कुरुतस्तथा ये स-ामे समुदितैर्लब्धस्य धनस्य यथावद्विभज्य षोडशांशं भृत्येभ्यो ददति तत्र ये योद्धारो जयेयुस्तेभ्यस्तस्मादपि षोडशांशं प्रयच्छन्ति त एव विजयिनौ भूत्वा परस्परस्मिन् प्रसन्ना भवन्ति॥५॥

पदार्थः-हे (**इन्द्रा, वरुण**) सूर्य्य और वायु के समान वर्त्तमान सभासेनाधीशो! (**वाम्**) तुम दोनों का (**यः**) जो (**सुदानुः**) उत्तम देने वाला (**स्ववान्**) जिसके अपने लोग बहुत विद्यमान हैं (**ऋतावा**) जो सत्य को भजता है वह (**त्मन्**) आत्मा में अभयपन (**दाशति**) देता है जो (**दास्वान्**) देने वाला होता हुआ

(इषा) अन्न आदि से **(द्विषः)** शत्रुजनों को **(तरेत्)** तरे और **(रयिवतः)** बहुधनवान् **(जनान्, च)** जनों को भी **(रयिम्)** धन का **(वंसत्)** विभाग करे **(सः, इत्)** वही सर्वोत्तम और **(सः)** वह राजा होने योग्य है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य वर्षा करा कर और वायु प्राण धारणा करा कर ये दोनों सब प्राणियों को निर्भय करते हैं, वैसे जो स-ाम के बीच अच्छे प्रकार सन्मुख हैं, उनसे पाये हुए धन का यथावत् विभाग कर सोलहवां भाग भृत्यों के लिये देते हैं तथा वहाँ स-ाम में जो योद्धा जीते उनके लिये उससे सोलहवां भाग देते हैं, वे ही विजयी होकर आपस में प्रसन्न होते हैं॥५॥

पुनः राजजनाः किं कुर्य्युरित्याह॥

फिर राजजन क्या करें, इस विषय को कहते हैं॥

यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम्।
अस्मे स इन्द्रावरुणावपि ष्यात्र यो भनक्ति वनुषामशस्तीः॥६॥

यम्। युवम्। दाशुऽअध्वराय। देवा। रयिम्। धत्थः। वसुऽमन्तम्। पुरुऽक्षुम्। अस्मे इति। सः। इन्द्रावरुणौ। अपि। स्यात्। प्र। यः। भनक्ति। वनुषाम्। अशस्तीः॥६॥

पदार्थः-(**यम्**) प्रशस्तम् (**युवम्**) युवाम् (**दाश्वध्वराय**) दाशुर्देयोऽध्वरोऽहिंसामयो यज्ञो येन तस्मै (**देवा**) देवौ दातारौ (**रयिम्**) धनम् (**धत्थः**) धरेतम् (**वसुमन्तम्**) बह्वैश्वर्यम् (**पुरुक्षुम्**) बह्वन्नम् (**अस्मे**) अस्मासु (**सः**) (**इन्द्रावरुणौ**) विद्युद्वायुवद्वर्त्तमानौ सभासेनेशौ (**अपि**) (**स्यात्**) (**प्र**) (**यः**) (**भनक्ति**) शत्रुसेना मर्दयति (**वनुषाम्**) राज्यस्य याचकानां शत्रूणाम् (**अशस्तीः**) अप्रशंसाः॥६॥

अन्वयः-हे इन्द्रावरुणाविव वर्त्तमानौ देवा! युवं दाश्वध्वरायास्मे यं रयिं वसुमन्तं पुरुक्षुं च जनं धत्थो यो वनुषामशस्तीः प्र भनक्ति सोऽप्यतिष्ठितः स्यात्॥६॥

भावार्थः-हे सभासेनेशौ! यदि भवन्तावुत्तमां प्रज्ञामतुलां श्रियं चास्मासु धरेतां तर्हि वयं सदैव विजयिनो भूत्वा विजयं राज्यमैश्वर्यं च वर्धयेम॥६॥

पदार्थः-हे (**इन्द्रावरुणौ**) बिजुली और वायु के समान वर्त्तमान सभासेनाधीशो! (**देवा**) देने वालो (**युवम्**) तुम दोनों (**दाश्वध्वराय**) जिससे अहिंसामय यज्ञ देने योग्य होता है उसके लिये (**अस्मे**) हम लोगों में (**यम्**) जिस प्रशस्त (**रयिम्**) धन (**वसुमन्तम्**) बहुत ऐश्वर्य्ययुक्त और (**पुरुक्षुम्**) बहुत अन्न वाले जन को (**धत्थः**) धारण करो (**यः**) जो (**वनुषाम्**) राज्य को मांगने वाले शत्रुओं की (**अशस्तीः**) अप्रशंसाओ को (**प्र, भनक्ति**) अच्छे प्रकार मर्दित करता है (**सः**) सो (**अपि**) ही अतीव स्थिर (**स्यात्**) हो॥६॥

भावार्थः-हे सभासेनाधीशो! जो तुम लोग उत्तम बुद्धि और अतुल लक्ष्मी को हम लोगों में धरो तो हम लोग सदैव विजयी होकर विजय, राज्य और ऐश्वर्य्य को बढ़ावें॥६॥

पुनः को राजाऽर्हो भवेदित्याह॥

फिर कौन राजा योग्य है, इस विषय को कहते हैं॥

उ॒त न॑: सु॒त्रा॒त्रो दे॒वगो॑पा: सू॒रिभ्य॑ इन्द्रावरुणा र॒यि: ष्या॑त्।

येषां शु॒ष्म॒: पृत॑नासु सा॒ह्वान् प्र स॒द्यो द्यु॒म्ना ति॒रते॒ ततु॑रि:॥७॥

उ॒त। न॒:। सु॒ऽत्रा॒त्र:। दे॒वऽगो॑पा:। सू॒रिऽभ्य॑:। इ॒न्द्रा॒ऽव॒रु॒णा॒। र॒यि:। स्या॒त्। येषा॑म्। शु॒ष्म॑:। पृत॑नासु। सा॒ह्वान्। प्र। स॒द्य:। द्यु॒म्ना। ति॒रते॑। तत॑ुरि:॥७॥

पदार्थः-(**उत**) अपि (**नः**) अस्मभ्यम् (**सुत्रात्रः**) यस्सुष्ठु रक्षकान् रक्षति (**देवगोपाः**) यो देवान् विदुषो गोपायति (**सूरिभ्यः**) विद्वद्भ्यः (**इन्द्रावरुणा**) वायुविद्युद्वद् (**रयिः**) श्रीः (**स्यात्**) (**येषाम्**) (**शुष्मः**) बलयुक्तः सेनेशः (**पृतनासु**) शूरवीरसेनासु (**साह्वान्**) सोढा (**प्र**) (**सद्यः**) (**द्युम्ना**) धनानि यशांसि वा (**तिरते**) प्राप्नोति (**ततुरिः**) तरिता॥७॥

अन्वयः-हे इन्द्रावरुणेव वर्त्तमान राजन्! येषां पृतनासु शुष्मः साह्वान् ततुरिः सेनेशो वर्त्तते यः सद्यो द्युम्नाः प्र तिरते यस्य पराक्रमेण रयिः स्यादुत नः सूरिभ्यः सुत्रात्रो देवगोपा भवेत्स एव राजा भवितुमर्हति॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये सूर्य्यवत् प्रतापिनो वायुवद्बलिष्ठा विद्याविद्वद्विनयशूरवीररक्षकाः स्युस्ते सर्वत्र क्षिप्रं शत्रून् विजित्य यशस्विनो भूत्वा धनवन्तो जायन्ते॥७॥

पदार्थः-हे (**इन्द्रावरुणा**) वायु और बिजुली के समान वर्त्तमान प्रशंसित राजा! (**येषाम्**) जिन शूरवीरों की (**पृतनासु**) सेनाओं में (**शुष्मः**) बलवान् (**साह्वान्**) सहनशील (**ततुरिः**) उत्तीर्ण होने वाला सेनापति वर्त्तमान है। तथा जो (**सद्यः**) शीघ्र (**द्युम्ना**) धन और यशों को (**प्र, तिरते**) उत्तमता से प्राप्त होता है वा जिसके पराक्रम से (**रयिः**) लक्ष्मी (**स्यात्**) हो (**उत**) और (**नः**) हम लोग (**सूरिभ्यः**) विद्वान् हैं उनके लिये (**सुत्रात्रः**) जो अच्छों की रक्षा करने वालों की रक्षा करने वाला (**देवगोपाः**) विद्वानों का रक्षक हो, वही राजा होने योग्य है॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो सूर्य के समान प्रतापी, पवन के समान बलवान्, विद्यावान् के समान नम्रता और शूरवीरों की रक्षा करने वाले हों, वे सर्वत्र शीघ्र शत्रुओं को जीत के यशस्वी होकर धनवान् होते हैं॥७॥

पुनस्ते राजप्रजाजनाः कथं वर्त्तेरन्नित्याह॥

फिर वे राजप्रजाजन कैसे वर्त्तें, इस विषय को कहते हैं॥

नू न॑ इन्द्रावरुणा गृणा॒ना पृ॒ङ्क्तं र॒यिं सौश्र॑व॒साय॑ देवा।

इ॒त्था गृ॒णन्तो॑ म॒हिन॑स्य॒ शर्धो॑ऽपो न ना॒वा दु॑रि॒ता त॑रेम॥८॥

नु। नः। इन्द्रावरुणा। गृणाना। पृङ्क्तम्। रयिम्। सौश्रवसाय। देवा। इत्था। गृणन्तः। महिनस्य। शर्धः। अपः। न। नावा। दुःऽइता। तरेम॥८॥

पदार्थः-(**नू**) क्षिप्रम् (**नः**) अस्मान् (**इन्द्रावरुणा**) सूर्य्यचन्द्रवद्वर्त्तमानौ राजप्रजाजनौ (**गृणाना**) स्तुवन्तौ (**पृङ्क्तम्**) संबध्नीतम् (**रयिम्**) श्रियम् (**सौश्रवसाय**) सुश्रवसो भावाय (**देवा**) दातारौ (**इत्था**) अनेन प्रकारेण (**गृणन्तः**) स्तुवन्तः (**महिनस्य**) महतः (**शर्धः**) बलम् (**अपः**) जलानि (**न**) इव (**नावा**) नौकया (**दुरिता**) दुःखेनोल्लङ्घयितुं योग्यानि (**तरेम**)॥८॥

अन्वयः-हे इन्द्रावरुणेव नो गृणाना देवा राजप्रजाजनौ! यथा युवां सौश्रवसाय रयिं पृङ्क्तमित्था महिनस्य शर्धो गृणन्तो वयं नावाऽपो न दुरिता नू तरेम॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये राजप्रजाजनाः परस्परस्मिन् प्रीताः सन्तोऽन्नाद्याय श्रियं संचिन्वन्ति ते सूर्य्यचन्द्रवत्प्रतापिनो भूत्वा यथा महत्या नौकया दुर्गानपि समुद्राञ्जनास्तरन्ति तथैव महान्त्यपि दुःखदारिद्र्याणि सद्यस्तरन्ति॥८॥

पदार्थः-हे (**इन्द्रावरुणा**) सूर्य और चन्द्रमा के तुल्य वर्त्तमान (**नः**) हम लोगों को (**गृणाना**) प्रशंसा करने और (**देवा**) देने वाले राजप्रजाजनो! जैसे तुम दोनों (**सौश्रवसाय**) उत्तम यश होने के लिये (**रयिम्**) धन का (**पृङ्क्तम्**) सम्बन्ध करो (**इत्था**) ऐसे (**महिनस्य**) बड़े के (**शर्धः**) बल की (**गृणन्तः**) प्रशंसा करते हुए हम लोग (**नावा**) नाव से (**अपः**) जलों को (**न**) जैसे वैसे (**दुरिता**) दुःख से उल्लङ्घन करने योग्य कष्टों को (**नू**) शीघ्र (**तरेम**) तरें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो राजप्रजाजन आपस में प्रीति वाले होकर अन्नादि पदार्थों के लिये धन इकट्ठा करते हैं, वे सूर्य और चन्द्रमा के तुल्य प्रतापी होकर जैसे बड़ी नौका से दुःख से तरने योग्य समुद्रों को जन पार होते हैं, वैसे ही बड़े बड़े दुःख और दारिद्र्यों को शीघ्र तरते हैं॥८॥

पुनः स राजा कीदृशोऽस्मै किमुपदेष्टव्यमित्याह॥

फिर वह राजा कैसा है और उसके लिये क्या उपदेश देना चाहिये, इस विषय को कहते हैं॥

प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा॥९॥

प्र। सम्ऽराजे। बृहते। मन्म। नु। प्रियम्। अर्च। देवाय। वरुणाय। सऽप्रथः। अयम्। यः। उर्वी इति। महिना। महिऽव्रतः। क्रत्वा। विऽभाति। अजरः। न। शोचिषा॥९॥

पदार्थः-(**प्र**) (**सम्राजे**) यः सम्यक्सूर्यवद्विद्याविनयाभ्यां राजते तस्मै (**बृहते**) महते (**मन्म**) विज्ञानम् (**नु**) सद्यः (**प्रियम्**) प्रीतिकरम् (**अर्च**) सत्कुर्याः (**देवाय**) अभयदात्रे (**वरुणाय**) सर्वोत्कृष्टाय (**सप्रथः**) सत्कीर्त्या प्रख्यातः (**अयम्**) (**यः**) (**उर्वी**) द्यावापृथिव्यौ (**महिना**) महिम्ना (**महिव्रतः**) महान्ति

व्रतानि धर्म्याणि कर्माणि यस्य सः **(क्रत्वा)** प्रज्ञया कर्मणा वा **(विभाति)** **(अजरः)** जरारोगरहितः सूर्य्यो जीवात्मा परमात्मा वा **(न)** इव **(शोचिषा)** स्वप्रकाशेन॥९॥

अन्वयः-हे विद्वन्! योऽयं सप्रथो महिव्रतः क्रत्वा महिना शोचिषाऽजरो नोर्वी विभाति तस्मै वरुणाय देवाय बृहते सम्राजे प्रियं मन्म त्वं नु प्रार्च॥९॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसः! सूर्यवज्जीववत्परमात्मवच्छुभगुणकर्मस्वभावैर्देदीप्यमानो यो विद्याविनयावृतः प्रयत्नेन वाङ्मनःशरीरैः पितृवत्प्रजाः पालयितुं प्रयतते तस्मै चक्रवर्त्तिने सर्वोत्कृष्टाय विदुषे सत्कर्त्तव्याय राज्ञे राज्ये प्रतिदिनं सत्यां नीतिं भवन्तो बोधयन्तु येनाऽयं सर्वत्र धर्मयशा भवेत्॥९॥

पदार्थः-हे विद्वन्! **(यः)** जो **(अयम्)** यह **(सप्रथः)** सत्कीर्ति से विख्यात और **(महिव्रतः)** बड़े-बड़े धर्मयुक्त कर्म जिसके विद्यमान वह **(क्रत्वा)** प्रज्ञा वा कर्म से **(महिना)** और महिमा वा **(शोचिषा)** अपने प्रकाश से **(अजरः)** वृद्धावस्थारूपी रोग से रहित सूर्य जीवात्मा वा परमात्मा के **(न)** समान **(उर्वी)** सूर्यमण्डल और पृथिवी को **(विभाति)** प्रकाशित करता है उस **(वरुणाय)** सब से उत्तम **(देवाय)** अभय देने वाले **(बृहते)** बड़े **(सम्राजे)** अच्छे सूर्य के समान विद्या और नम्रता से प्रकाशमान के लिये **(प्रियम्)** प्रीति करने वाले **(मन्म)** विज्ञान को आप **(नु)** शीघ्र **(प्र, अर्च)** सत्कार देवें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान्जनो! जो सूर्य के तुल्य, जीव के तुल्य वा परमात्मा के तुल्य शुभ गुण कर्म स्वभावों से देदीप्यमान, विद्या और विनय से युक्त, उत्तम यत्न के साथ वाणी मन और शरीर से पिता के समान प्रजाजनों की पालना करने को प्रयत्न करता है, उस चक्रवर्ती, सर्वोत्कृष्ट, विद्वान् और सत्कार करने योग्य राजा के लिये राज्य में सत्य नीति को आप लोग समझावें, जिससे यह सर्वत्र धर्मयुक्त यश वाला हो॥९॥

पुनस्ते राजप्रजाजनाः किं कृत्वा कीदृशा भवेयुरित्याह॥

फिर वे राज प्रजाजन क्या करके कैसे हो, इस विषय को कहते हैं॥

इन्द्रा॑वरुणा सुतपावि॒मं सु॒तं सोम॑ं पिबत॒ं मद्य॑ं धृतव्रता।
यु॒वो रथो॑ अध्व॒रं दे॒ववी॑तये॒ प्रति॒ स्वस॑र॒मुप॑ याति पी॒तये॑॥१०॥

इन्द्रा॑वरुणा। सु॒त॒ऽपौ॒। इ॒मम्। सु॒तम्। सोम॑म्। पि॒ब॒त॒म्। मद्य॑म्। धृ॒त॒ऽव्र॒ता॒। यु॒वोः। रथः॑। अ॒ध्व॒रम्। दे॒व॒ऽवी॑तये। प्रति॑। स्वस॑रम्। उप॑। या॒ति॒। पी॒तये॑॥१०॥

पदार्थः-(**इन्द्रावरुणा**) विद्युद्वर्त्तमानौ सभासेनेशौ **(सुतपौ)** सुष्ठुब्रह्मचर्याद्यनुष्ठानाख्यं तपो ययोस्तौ। अत्र **छान्दसो वर्णलोपो वे**ति सलोपः। **(इमम्)** प्रत्यक्षम् **(सुतम्)** निष्पादितम् **(सोमम्)** महौषधिरसम् **(पिबतम्)** **(मद्यम्)** येन माद्यति हृष्यत्यानन्दति तम् **(धृतव्रता)** धृतानि कर्माणि याभ्यां तौ **(युवोः)** युवयोः **(रथः)** विमानादियानम् **(अध्वरम्)** अहिंसामयम् **(देववीतये)** दिव्यगुणप्राप्तये **(प्रति)** वीप्सायाम् **(स्वसरम्)** दिनम् **(उप)** **(याति)** उपगच्छति **(पीतये)** पानाय॥१०॥

अन्वयः-हे इन्द्रावरुणेव सुतपौ धृतव्रता सभासेनेशौ! ययोर्युवो रथो देववीतये पीतये प्रति स्वसरमध्वरमुप याति ताविमं सुतं मद्यं सोमं प्रति पिबतम्॥१०॥

भावार्थः-हे राजप्रजाजना यूयं प्रतिदिनं सोमलताद्युत्पन्नं सर्वरोगहरं बलबुद्धिपराक्रमवर्धकं हिंसारहित महौषधिरसं पीत्वा धर्मात्मानो भवत॥१०॥

पदार्थः-हे **(इन्द्रावरुणा)** बिजुली के समान वर्त्तमान **(सुतपौ)** सुन्दर ब्रह्मचर्य आदि अनुष्ठान तप जिनका और **(धृतव्रता)** जिन्होंने उत्तम कर्म धारण किये हैं, वे सभा और सेनाधीशो! जिन **(युवोः)** तुम लोगों का **(रथः)** विमान आदि यान **(देववीतये)** दिव्यगुणों की प्राप्ति और **(पीतये)** उत्तमोत्तम रस पीने के लिये **(प्रति, स्वसरम्)** प्रतिदिन **(अध्वरम्)** अहिंसामय यज्ञ को **(उप, याति)** प्राप्त होता है वे **(इमम्)** इस **(सुतम्)** उत्पन्न किये हुए **(मद्यम्)** जिससे जीव आनन्द को प्राप्त होता है उस **(सोमम्)** बड़ी-बड़ी ओषधियों के रस को **(पिबतम्)** पिओ॥१०॥

भावार्थः-हे राजप्रजाजनो! तुम प्रतिदिन सोमलता आदि से उत्पन्न किये हुए सर्व रोगों के हरने, बल बुद्धि, पराक्रम बढ़ाने वाले, हिंसारहित, महौषधियों के रस को पीकर धर्मात्मा होओ॥१०॥

पुनस्तौ किं कृत्वा किं कारयेतामित्याह॥

फिर वे क्या करके क्या करावें, इस विषय को कहते हैं॥

इन्द्रा॑वरुणा॒ मधु॑मत्तमस्य॒ वृष्णः॒ सोम॑स्य॒ वृष॒णा वृ॑षेथाम्।

इ॒दं वा॒मन्धः॒ परि॑षिक्तम॒स्मे आ॒सद्या॒स्मिन् ब॒र्हिषि॑ मादयेथाम्॥११॥१२॥

इन्द्रा॑वरुणा। मधु॑मत्ऽतमस्य। वृष्णः॑। सोम॑स्य। वृष॒णा॒। आ। वृ॒षे॒था॒म्। इ॒दम्। वा॒म्। अन्धः॑। परि॑ऽसिक्तम्। अ॒स्मे॒ इति॑। आ॒ऽसद्य॑। अ॒स्मिन्। ब॒र्हिषि॑। मा॒द॒ये॒था॒म्॥११॥

पदार्थः-**(इन्द्रावरुणा)** विद्युद्वायुवद्वर्त्तमानौ राजप्रजाजनौ **(मधुमत्तमस्य)** अतिशयेन मधुरादिगुणयुक्तस्य **(वृष्णः)** बलकरस्य **(सोमस्य)** महौषधिरसस्य **(वृषणा)** बलिष्ठौ **(आ)** **(वृषेथाम्)** बलिष्ठौ भवेथाम् **(इदम्)** **(वाम्)** **(अन्धः)** अन्नम् **(परिषिक्तम्)** सर्वतः सिक्तम् **(अस्मे)** अस्मास्वस्मान् वा **(आसद्य)** उपविश्य **(अस्मिन्)** **(बर्हिषि)** अवकाशे **(मादयेथाम्)** आनन्दयतम्॥११॥

अन्वयः-हे इन्द्रावरुणेव वृषणा! युवां मधुमत्तमस्य वृष्णः सोमस्य सेवनेना वृषेथां ययोर्वामिदं परिषिक्तमन्धोऽस्ति तौ युवामस्मे अस्मिन् बर्हिष्यासद्याऽस्मान् मादयेथाम्॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सोमलतादिरसेन युक्तेनान्नेन पानेन वा स्वयमानन्द्याऽस्मानानन्दयन्ति त एव सर्वैः सत्कर्त्तव्या जायन्त इति॥११॥

अस्मिन् सूक्ते इन्द्रावरुणवद्राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टषष्टितमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्रावरुणा)** बिजुली और वायु के समान वर्त्तमान **(वृषणा)** बलवान् राजा प्रजाजनो! तुम **(मधुमत्तमस्य)** अतीव मधुरादिगुणयुक्त **(वृष्णः)** बल करने वाले **(सोमस्य)** बड़ी बड़ी

ओषधियों के रसों के सेवने से **(आ, वृषेथाम्)** बलिष्ठ होओ जिन **(वाम्)** तुम दोनों का **(इदम्)** यह **(परिषिक्तम्)** सब ओर से सींचा हुआ **(अन्धः)** अन्न है वे तुम **(अस्मे)** हम लोगों में वा हम को **(अस्मिन्)** इस **(बर्हिषि)** अवकाश में **(आसद्य)** बैठ के **(मादयेथाम्)** आनन्दित करो॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सोमलतादि रसयुक्त अन्न वा पान से आप आनन्दित होकर हमको आनन्दित करते हैं, वे ही सब से सत्कार करने योग्य होते हैं॥११॥

इस सूक्त में वरुण के समान राजप्रजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह अड़सठवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथाष्टर्चस्यैकोनसप्ततितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्राविष्णू देवते। १, ३, ६, ७ निचृत्त्रिष्टुप्। २, ४,८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ ब्राह्म्युष्णिक्छन्दः। ऋषभः स्वरः॥

अथ राजशिल्पिनौ किं कृत्वा किं कुर्यातामित्याह॥

अब आठ ऋचावाले उनहत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में राजा और शिल्पी जन क्या करके क्या करें, इस विषय को कहते हैं॥

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता॥ १॥

सम्। वाम्। कर्मणा। सम्। इषा। हिनोमि। इन्द्राविष्णू इति। अपसः। पारे। अस्य। जुषेथाम्। यज्ञम्। द्रविणम्। च। धत्तम्। अरिष्टैः। नः। पथिऽभिः। पारयन्ता॥ १॥

पदार्थः-(**सम्**) सम्यक् (**वाम्**) युवाम् (**कर्मणा**) ईप्सिततमेन व्यापारेण (**सम्**) सम्यक् (**इषा**) अन्नादिना (**हिनोमि**) वर्धयामि (**इन्द्राविष्णू**) सूर्यविद्युतौ (**अपसः**) कर्मणः (**पारे**) (**अस्य**) (**जुषेथाम्**) सेवेथाम् (**यज्ञम्**) सङ्गतिकरणम् (**द्रविणम्**) धनं यशो वा (**च**) (**धत्तम्**) (**अरिष्टैः**) अहिंसितैर्हिंसकरहितैः (**नः**) अस्मानस्मभ्यं वा (**पथिभिः**) मार्गैः (**पारयन्ता**) पारं गमयन्तौ॥ १॥

अन्वयः-हे इन्द्राविष्णू इव वर्त्तमानौ महाराजशिल्पिनौ! यौ वामहं कर्मणा सं हिनोमि। अस्यापसः पार इषा संहिनोमि तावरिष्टैः पथिभिर्नः पारयन्ता युवां यज्ञं द्रविणं च जुषेथां नोऽस्मभ्यं धत्तम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे अध्यापकोपदेशकौ! यथा वायुविद्युतौ यानेषु सम्प्रयोजितौ गमनरूपस्य कर्मणो विषयं स्थानात्पारे गमयतस्तथा तयोर्विद्यायां युष्मान् संप्रेर्य यथा वर्द्धयेम तथा वृद्धा भूत्वा निर्विघ्नैर्मार्गैरस्मान् पारं गमयित्वा धनं यशश्च सततं प्रापयतं तौ वयं सततं सेवेमहि॥ १॥

पदार्थः-हे (**इन्द्राविष्णू**) सूर्य्य और बिजुली के समान वर्त्तमान महाराज और शिल्पीजनो! जिन (**वाम्**) तुम दोनों को मैं (**कर्मणा**) अतीव चाहे हुए काम से (**सम्, हिनोमि**) अच्छे प्रकार बढ़ाता हूँ (**अस्य**) इस (**अपसः**) काम के (**पारे**) पार में (**इषा**) अन्नादि पदार्थों से (**सम्**) अच्छे प्रकार बढ़ाता हूँ वे (**अरिष्टैः**) हिंसकरहित (**पथिभिः**) मार्गों से (**नः**) हम लोगों को (**पारयन्ता**) पार करते हुए हम तुम (**यज्ञम्**) सङ्गतिकरण कार्य (**द्रविणम्, च**) और धन वा यश को (**जुषेथाम्**) सेवो और हम लोगों के लिये (**धत्तम्**) धारण करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे अध्यापक और उपदेशको! जैसे वायु और बिजुली विमानादिकों में अच्छे प्रकार जोड़े हुए गतिरूप कर्म के विषय को स्थान से पार पहुंचाते हैं, वैसे उनकी विद्या में तुमको प्रेरणा देकर जिस प्रकार हम लोग बढ़ावें उस प्रकार बढ़कर निर्विघ्न मार्गों से हम

लोगों को ले जाके धन और यश की प्राप्ति निरन्तर कराइये, उन आप लोगों की सेवा हम लोग निरन्तर करें॥१॥

पुनस्तौ कीदृशौ किं कुर्यातामित्याह॥

फिर वे दोनों कैसे हैं और क्या करें, इस विषय को कहते हैं॥

या विश्वा॑सां जनि॒तारा॑ मती॒नामिन्द्रा॒विष्णू॑ क॒लशा॑ सोम॒धाना॑।
प्र वां॑ गिर॑: शस्य॒मा॑ना अवन्तु॒ प्र स्तोमा॑सो गी॒यमा॑नासो अ॒र्कैः॥२॥

या। विश्वा॑साम्। ज॒नि॒तारा॑। म॒ती॒नाम्। इन्द्रा॒विष्णू॒ इति॑। क॒लशा॑। सो॒म॒ऽधाना॑। प्र। वा॒म्। गिर॑:। शस्य॒मा॑ना:। अ॒व॒न्तु॒। प्र। स्तोमा॑स:। गी॒यमा॑नास:। अ॒र्कैः॥२॥

पदार्थः-(**या**) यौ (**विश्वासाम्**) सर्वासाम् (**जनितारा**) उत्पादकौ (**मतीनाम्**) प्रज्ञानाम् (**इन्द्राविष्णू**) सूर्य्यविद्युतौ (**कलशा**) कुम्भाविव (**सोमधाना**) सोमं दधति ययोस्तौ (**प्र**) (**वाम्**) (**गिरः**) वाचः (**शस्यमानाः**) स्तूयमानाः (**अवन्तु**) रक्षन्तु (**प्र**) (**स्तोमासः**) ये स्तूयन्ते (**गीयमानासः**) सुगीताः (**अर्कैः**) मन्त्रैः सत्कारैर्वा॥२॥

अन्वयः-हे राजशिल्पिनौ! या यौ विश्वासां मतीनां जनितारा सोमधाना कलशेव वर्त्तमानाविन्द्राविष्णू ययोर्वामर्कैः शस्यमाना गिरो गीयमानासः स्तोमासः सर्वान् प्रावन्तु तान् भवन्तः प्रावन्तु॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यौ वायुविद्युतौ प्रजाजनकौ सर्वविद्याधारौ वर्तेते तयोः सम्प्रयोगेण विद्याशिक्षावाचः संरक्षन्तु॥२॥

पदार्थः-हे राजा और शिल्पीजनो (**या**) जो (**विश्वासाम्**) समस्त (**मतीनाम्**) बुद्धियों के (**जनितारा**) उत्पन्न करने वाले (**सोमधाना**) जिनके बीच सोम धरते हैं, वे (**कलशा**) घट के समान वर्त्तमान (**इन्द्राविष्णू**) सूर्य और बिजुली जिन (**वाम्**) तुम दोनों में (**अर्कैः**) मन्त्र वा सत्कारों से (**शस्यमानाः**) प्रशंसा को प्राप्त होती हुई (**गिरः**) वाणी (**गीयमानासः**) सुन्दरता से गाई हुई तथा (**स्तोमासः**) जो स्तुति किये जाते हैं, वे सब की (**प्र, अवन्तु**) अच्छे प्रकार पालें उन सबों की तुम लोग (**प्र**) अच्छे प्रकार रक्षा करो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जो वायु और बिजुली बुद्धि बढ़ाने और सब विद्याओं के धारण करने वाले वर्त्तमान हैं, उनके अच्छे प्रकार प्रयोग से अर्थात् कार्यों में लाने से विद्या, शिक्षा तथा वाणियों की अच्छे प्रकार रक्षा करो॥२॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

इन्द्रा॑विष्णू मदपती मदाना॒मा सोम॑ं यात॒ं द्रवि॑णो॒ दधा॑ना।
सं वा॑मञ्जन्त्व॒क्तुभि॑र्मती॒नां सं स्तोमा॑स: शस्य॒मा॑नास उ॒क्थैः॥३॥

इन्द्रा॑विष्णू॒ इति॑। म॒दप॒ती॒ इति॑ मदऽपती। म॒दा॒ना॒म्। आ। सोम॑म्। या॒त॒म्। द्र॒वि॑णो॒ इति॑। दधा॑ना। सम्। वा॒म्। अ॒ञ्ज॒न्तु॒। अ॒क्तु॒ऽभि॑:। म॒ती॒नाम्। सम्। स्तोमा॑स:। श॒स्य॒मा॑नास:। उ॒क्थै:॥३॥

पदार्थ:-(**इन्द्राविष्णू**) वायुविद्युताविव सभासेनेशौ (**मदपती**) आनन्दस्य पालकौ (**मदानाम्**) आनन्दानाम् (**आ**) (**सोमम्**) ऐश्वर्यम् (**यातम्**) गच्छतम् (**द्रविणो**) धनं यशो वा (**दधाना**) धरन्तौ (**सम्**) (**वाम्**) युवाम् (**अञ्जन्तु**) प्रकटीकुर्वन्तु (**अक्तुभि:**) रात्रिभि: (**मतीनाम्**) मनुष्याणाम् (**सम्**) (**स्तोमास:**) स्तुतय: (**शस्यमानास:**) प्रशंसिता: (**उक्थै:**) वेदस्थै: स्तोत्रै:॥३॥

अन्वय:-हे इन्द्राविष्णू मदानां मदपती द्रविणो दधाना! युवां सोममा यातं वां मतीनामक्तुभिरुक्थैश्शस्यमानास: स्तोमासो वां समञ्जन्तु येन प्रीत्या युवामस्मान् समायातम्॥३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यौ वायुविद्युद्वत्सर्वेषामानन्दस्य वर्धकौ मनुष्यै: स्तूयमानौ विद्यां च प्रयच्छन्तौ प्रयतेते तावेव राजकर्माऽर्हत:॥३॥

पदार्थ:-हे (**इन्द्राविष्णू**) वायु और बिजुली के समान सभासेनापतियो! (**मदानाम्**) आनन्दों के बीच (**मदपती**) आनन्द के पालने और (**द्रविणो**) धन वा यश के (**दधाना**) धारण करने वालो! तुम दोनों (**सोमम्**) ऐश्वर्य्य को (**आ, यातम्**) प्राप्त होओ (**वाम्**) तुम दोनों को (**मतीनाम्**) मनुष्यों के बीच (**अक्तुभि:**) रात्रियों से और (**उक्थै:**) वेदस्थ स्तोत्रों से (**शस्यमानास:**) प्रशंसायुक्त किई जाती (**स्तोमास:**) स्तुतियां (**सम, अञ्जन्तु**) अच्छे प्रकार प्रकट करें, जिससे प्रीति के साथ तुम दोनों हम लोगों को (**सम्**) अच्छे प्रकार प्राप्त होओ॥३॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वायु और बिजुली के समान सब के आनन्द के बढ़ाने वाले, मनुष्यों से प्रशस्त किये जाते और विद्या वा धन को अच्छे प्रकार देते हुए प्रयत्न करते हैं, वे ही राजकर्म के योग्य होते हैं॥३॥

पुनस्तं राजानं के प्राप्य किं कुर्वन्तीत्याह॥

फिर उस राजा को कौन प्राप्त होकर क्या करते हैं, इस विषय को कहते हैं॥

आ वा॒मश्वा॑सो अभिमाति॒षाह॒ इन्द्रा॑विष्णू सध॒मादो॑ वहन्तु।
जु॒षेथां॑ विश्वा॒ हव॑ना मती॒नामुप॒ ब्रह्मा॑णि शृणुतं॒ गिरो॑ मे॥४॥

आ। वा॒म्। अश्वा॑स:। अ॒भि॒मा॒ति॒ऽसह॑:। इन्द्रा॑विष्णू॒ इति॑। स॒ध॒ऽमाद॑:। व॒ह॒न्तु॒। जु॒षेथा॑म्। विश्वा॑। हव॑ना। म॒ती॒नाम्। उप॑। ब्रह्मा॑णि। शृ॒णु॒त॒म्। गिर॑:। मे॒॥४॥

पदार्थ:-(**आ**) समन्तात् (**वाम्**) युवाम् (**अश्वास:**) महान्त: (**अभिमातिषाह:**) येऽभिमानयुक्ताञ्छत्रून् सोढुं शक्नुवन्ति (**इन्द्राविष्णू**) वायुसूर्य्यौ (**सधमाद:**) समानस्थानानि (**वहन्तु**) (**जुषेथाम्**) (**विश्वा**) सर्वाणि (**हवना**) दातुमादातुमर्हाणि (**मतीनाम्**) मनुष्याणाम् (**उप**) सामीप्ये (**ब्रह्माणि**) धनानि (**शृणुतम्**) (**गिर:**) वाणी: (**मे**) मम॥४॥

अन्वय:-हे इन्द्राविष्णू इव सभासेनेशौ! वां येऽश्वासोऽभिमातिषाह: सधमाद आ वहन्तु तेषां मतीनां विश्वा हवना ब्रह्माणि जुषेथां मे गिरश्चोप शृणुतम्॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे राजन्! यदि धीमन्तो बलिष्ठा: शत्रुबलसोढारो जनास्त्वां प्राप्नुयुस्तर्हि सर्वमैश्वर्यं विद्यां च जगति प्रसारयन्तु॥४॥

पदार्थ:-हे **(इन्द्राविष्णु)** वायु और सूर्य के तुल्य वर्त्तमान सभासेनाधीशो! **(वाम्)** तुम दोनों जो **(अश्वास:)** महात्माजन **(अभिमातिषाह:)** अभिमानयुक्त शत्रुओं को सह सकते हैं वे **(सधमाद:)** समान स्थान को **(आ, वहन्तु)** प्राप्त करें उन **(मतीनाम्)** मनुष्यों के **(विश्वा)** सब **(हवना)** देने लेने योग्य **(ब्रह्माणि)** धनों को **(जुषेथाम्)** सेवो और **(मे)** मेरी **(गिर:)** वाणियों को भी **(उप, शृणुतम्)** समीप में सुनो॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! यदि बुद्धिमान्, अतीव बलवान् और शत्रुओं के बल के सहने वाले मनुष्य आपको प्राप्त होवें तो वे सब ऐश्वर्य्य और विद्या को संसार में विस्तारें॥४॥

पुनस्तौ किं कुर्य्यातामित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

इन्द्रा॑विष्णू॒ तत्प॑न॒याय्यं॑ वां॒ सोम॑स्य॒ मद॑ उ॒रु च॑क्रमाथे।
अक्र॑णुतम॒न्तरि॑क्षं॒ वरी॒योऽप्रथतं जी॒वसे॑ नो॒ रजां॑सि॥५॥

इन्द्रा॑विष्णू इति॑। तत्। प॒न॒याय्य॑म्। वा॒म्। सोम॑स्य। मदे॑। उ॒रु। च॒क्र॒मा॒थे॒ इति॑। अक्र॑णुतम्। अ॒न्तरि॑क्षम्। वरी॑यः। अप्र॑थतम्। जी॒वसे॑। न॒:। रजां॑सि॥५॥

पदार्थ:-(**इन्द्राविष्णू**) वायुसूर्यौ **(तत्)** **(पनयाय्यम्)** प्रशंसनीयम् **(वाम्)** युवाम् **(सोमस्य)** ऐश्वर्य्यस्य **(मदे)** हर्षे जाते सति **(उरु)** बहु **(चक्रमाथे)** कामयथ: **(अकृणुतम्)** कुर्यातम् **(अन्तरिक्षम्)** भूमिसूर्ययोर्मध्यस्थमाकाशम् **(वरीय:)** अतिशयेन वरम् **(अप्रथतम्)** प्रख्यापयतम् **(जीवसे)** जीवितुम् **(न:)** अस्माकमस्मान् वा **(रजांसि)** ऐश्वर्याणि॥५॥

अन्वय:-हे राजप्रजाजनौ! याविन्द्राविष्णू सोमस्य मदे तदन्तरिक्षं पनयाय्यं कुरुतस्तौ वामुरु चक्रमाथे वरीयोऽप्रथतं तेन नो जीवसे रजांस्यकृणुतम्॥५॥

भावार्थ:-हे राजप्रजाजना! यथा यज्ञेन शोधिते वायुविद्युतौ सर्वं चराचरं जगत्प्रशंसनीयमरोगं कुरुतस्तथा विधाय तेनास्माकमैश्वर्यं जीवनं चाधिकं कुर्वन्तु॥५॥

पदार्थ:-हे राजा और प्रजाजनो! जो **(इन्द्राविष्णू)** वायु और सूर्य्य **(सोमस्य)** ऐश्वर्य्य का **(मदे)** आनन्द प्राप्त होने पर **(तत्)** उस **(अन्तरिक्षम्)** भूमि और सूर्य्य के बीच की पोल को **(पनयाय्यम्)** प्रशंसा के योग्य करते हैं उनकी **(वाम्)** तुम **(उरु)** बहुत **(चक्रमाथे)** कामना करो और **(वरीय:)** अत्यन्त श्रेष्ठ

को **(अप्रथतम्)** विख्यात करो उससे **(नः)** हम लोगों के **(जीवसे)** जीवन को तथा **(रजांसि)** ऐश्वर्य्यों को **(अकृणुतम्)** सिद्ध करो॥५॥

भावार्थः-हे राजप्रजाजनो! जैसे यज्ञ से शोधे हुए वायु और बिजुली समस्त चराचर जगत् को प्रशंसा के योग्य और नीरोग करते हैं, वैसे विधान कर उससे हमारे ऐश्वर्य्य और जीवन को अधिक करो॥५॥

पुनस्तौ कीदृशौ सम्पाद्य किं कर्त्तव्यमित्याह॥

फिर उन्हें कैसे सिद्ध कर क्या करना चाहिये, इस विषय को कहते हैं॥

इन्द्रा॑विष्णू॒ हवि॑षा॒ वावृ॑धा॒नाग्रा॑द्वा॒ना नम॑सा रातह॒व्या।
घृता॑सुती॒ द्रवि॑णं धत्तम॒स्मे स॑मु॒द्रः स्थः॑ क॒लशः॑ सोम॒धानः॑॥६॥

इन्द्रा॑विष्णू॒ इति॑। हवि॑षा। व॒वृ॒धा॒ना। अग्र॑ऽअद्वाना। नम॑सा। रा॒त॒ऽह॒व्या॒। घृता॑सुती॒ इति॒ घृत॑ऽआसुती। द्रवि॑णम्। ध॒त्त॒म्। अ॒स्मे॒ इति॑। स॒मु॒द्रः। स्थः॒। क॒लशः॑। सो॒म॒ऽधानः॑॥६॥

पदार्थः-(**इन्द्राविष्णू**) वायुसूर्य्यौ **(हविषा)** हुतेन द्रव्येण **(वावृधाना)** शुद्ध्या वर्द्धमानौ वर्धकौ **(अग्राद्वाना)** येऽग्रमदन्ति तद्विभाजकौ **(नमसा)** अन्नादिना **(रातहव्या)** दातव्यदानौ **(घृतासुती)** घृतेन समन्ताद् सुतिः प्रेरणं ययोस्तौ **(द्रविणम्)** धनं यशश्च **(धत्तम्)** **(अस्मे)** अस्मासु **(समुद्रः)** सम्यगापो द्रवन्ति यस्मिँस्तदन्तरिक्षं मेघो वा **(स्थः)** भवथः **(कलशः)** कलश इव जलेन पूर्णः **(सोमधानः)** सोमाद्योषधिगणा धीयन्ते यस्मिन् सः॥६॥

अन्वयः-हे ऋत्विग्यजमानौ! यथा हविषा वावृधानाग्राद्वाना नमसा रातहव्या घृतासुती इन्द्राविष्णू अस्मे द्रविणं धत्तस्तथा युवां धत्तं सोमधानः समुद्रः कलश इव स्थः॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे ऋत्विग्यजमानादयः! सुगन्धिधृतादिहोमेन वायुसूर्य्यौ शुद्धौ कृत्वा सर्वेषां भाग्यं सम्पाद्य सर्वेषां सुखवर्धका भवन्तु॥६॥

पदार्थः-हे ऋत्विज् और यजमानो! जैसे **(हविषा)** होमे हुए पदार्थ से **(वावृधाना)** निरन्तर शुद्धि से बढ़े वा बढ़ाने **(अग्राद्वाना)** अग्रभाग के भोगने को विभाग करने वाले और **(नमसा)** अन्नादि पदार्थ से **(रातहव्या)** देने योग्य को देने वाले **(घृतासुती)** सब ओर से जिनकी घी से प्रेरणा होती वे **(इन्द्राविष्णू)** वायु और सूर्य **(अस्मे)** हम लोगों में **(द्रविणम्)** धन और यश को धरते हैं, वैसे तुम **(धत्तम्)** धरो तथा **(सोमधानः)** और सोमादि ओषधि जिसमें स्थापन की जाती हैं और **(सुमद्रः)** अच्छे प्रकार जल तरंगे लेते हैं जिसमें वह अन्तरिक्ष वा मेघ **(कलशः)** घट के समान वर्त्तमान है उसके समान **(स्थः)** होते हो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे ऋत्विग् और यजमान आदि जनो! सुगन्धि और घृतादि पदार्थों के होम से वायु और सूर्य को शुद्ध कर सब के भाग्य की सिद्धि कर सब के सुख के बढ़ाने वाले होओ॥६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

इन्द्रा॑विष्णू पिब॑तं॒ मध्वो॑ अ॒स्य सोम॑स्य दस्रा ज॒ठर॑ं पृणेथाम्।
आ वा॒मन्धां॑सि मदि॒राण्य॑ग्म॒न्नुप॒ ब्रह्मा॑णि शृणुतं॒ हव॑ं मे॥७॥

इन्द्रा॑विष्णू इति। पिब॑तम्। मध्व॑:। अ॒स्य। सोम॑स्य। द॒स्रा॒। ज॒ठर॑म्। पृ॒णे॒था॒म्। आ। वा॒म्। अन्धां॑सि। म॒दि॒राणि॑। अ॒ग्म॒न्। उप॑। ब्रह्मा॑णि। शृ॒णु॒त॒म्। हव॑म्। मे॒॥७॥

पदार्थः-(**इन्द्राविष्णू**) वायुविद्युताविव (**पिबतम्**) (**मध्वः**) मधुरस्य (**अस्य**) (**सोमस्य**) सोमाद्योषधिजन्यस्य रसस्य (**दस्रा**) दुःखक्षयितारौ (**जठरम्**) उदरम् (**पृणेथाम्**) प्रपूरयेतम् (**आ**) (**वाम्**) युवाम् (**अन्धांसि**) अन्नानि (**मदिराणि**) आनन्दकराणि (**अग्मन्**) प्राप्नुवन्तु (**उप**) (**ब्रह्माणि**) पठितानि वेदस्तोत्राणि (**शृणुतम्**) (**हवम्**) स्वाध्यायम् (**मे**) मम॥७॥

अन्वयः-हे अध्यापकोपदेशकौ दस्रा! वां यानि मध्वोऽस्य सोमस्य मदिराण्यधांस्यग्मँस्तानीन्द्राविष्णू इव पिबतं तैर्जठरमा पृणेथां पुनर्मे ब्रह्माणि हवं चोप शृणुतम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या औषधैः शरीरस्य रोगान् विद्यासत्सङ्गधर्मानुष्ठानैरात्मनो रोगांश्च निवार्य वायुविद्युद्वद्बलिष्ठा भूत्वा विद्याभ्यासं कृत्वा विद्यार्थिनां परीक्षां कुर्वन्ति ते सर्वेषां दुःखानि निवार्य्याऽऽनन्दं दातुं शक्नुवन्ति॥७॥

पदार्थः-हे अध्यापक और उपदेशको! (**दस्रा**) दुःख के विनाश करने वालो (**वाम्**) तुम दोनों को जो (**मध्वः**) मधुरगुणयुक्त (**अस्य**) [इस] (**सोमस्य**) सोम आदि ओषधियों से उत्पन्न हुए इस रस के (**मदिराणि**) आनन्द करने वाले (**अन्धांसि**) अन्न (**अग्मन्**) प्राप्त होवें उनको (**इन्द्राविष्णू**) वायु और बिजुली के समान (**पिबतम्**) पिओ और उनसे (**जठरम्**) उदर को (**आ, पृणेथाम्**) अच्छे प्रकार भरो फिर (**मे**) मेरे (**ब्रह्माणि**) पढ़े हुए वेदस्तोत्रों को और (**हवम्**) नित्य के वेदपाठ को (**उप, शृणुतम्**) समीप में सुनो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य औषधों से शरीर के रोगों को तथा विद्या, सत्सङ्ग और धर्म के अनुष्ठान से आत्मा के रोगों को निवार के वायु और बिजुली के समान बलिष्ठ हो विद्याभ्यास करके विद्यार्थियों की परीक्षा करते हैं, वे सब के दुःखों को निवृत्त कर आनन्द दे सकते हैं॥७॥

पुनस्तौ कीदृशावित्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

उ॒भा जि॑ग्यथु॒र्न परा॑ जयेथे॒ न परा॑ जिग्ये कत॒रश्च॒नैनो॑:।
इन्द्र॑श्च विष्णो॒ यदप॑स्पृधेथां त्रे॒धा स॒हस्रं॒ वि तदै॑रयेथाम्॥८॥१३॥

उ॒भा। जि॒ग्य॒थुः। न। परा॑। ज॒येथे॒ इति॑। न। परा॑। जि॒ग्ये॒। क॒त॒रः। च॒न। ए॒नोः॑। इन्द्रः॑। च॒। वि॒ष्णो॒ इति॑। यत्। अप॑स्पृधेथाम्। त्रे॒धा। स॒हस्र॑म्। वि। तत्। ऐ॒र॒ये॒था॒म्॥८॥

पदार्थः-(**उभा**) सभासेनेशौ (**जिग्यथुः**) विजयेथे (**न**) निषेधे (**परा**) (**जयेथे**) पराजयं प्राप्नुथः (**न**) (**परा**) (**जिग्ये**) पराजितो भवति (**कतरः**) अनयोर्मध्ये एकः (**चन**) अपि (**एनोः**) अनयोर्मध्ये (**इन्द्रः**) परमैश्वर्यवान् वायुवद्वर्त्तमानः (**च**) (**विष्णो**) विद्युद्वद्व्यापनशील (**यत्**) (**अपस्पृधेथाम्**) स्पर्द्धेथाम् (**त्रेधा**) त्रिविधम् (**सहस्रम्**) असङ्ख्यं सैन्यम् (**वि**) (**तत्**) (**ऐरयेथाम्**) प्रेरयेतम्॥८॥

अन्वयः-हे विष्णो इन्द्रश्च! युवां यत्सहस्रं तत्त्रेधापस्पृधेथां व्यैरयेथां तदोभा युवां जिग्यथुर्न परा जयेथे एनोः कतरश्चन न परा जिग्ये॥८॥

भावार्थः-हे सेनाबलाध्यक्षा! यदि भवन्तः सर्वदा सेनोन्नतये युद्धविद्यावृद्धये प्रयतेरँस्तर्हि सर्वत्र विजयेरन् कुत्राऽपि न पराजयेरन्निति॥८॥

अत्रेन्द्रविष्णुवत्सभासेनेशादिकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनसप्ततितमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**विष्णो**) बिजुली के समान व्याप्त होने वाले (**इन्द्रः, च**) और परमैश्वर्य्यवान् वायु के समान वर्त्तमान! तुम दोनों (**यत्**) जो (**सहस्रम्**) असंख्य सेना समूह हैं (**तत्**) उसे (**त्रेधा**) तीन प्रकार (**अपस्पृधेथाम्**) स्पर्द्धा अर्थात् तर्क-वितर्क से स्थापित करो और उसे (**वि, ऐरयेथाम्**) विविध प्रकार से यथा स्थान स्थित कराओ ऐसा करो तो (**उभा**) तुम दोनों (**जिग्यथुः**) विजय को प्राप्त होते हो (**नः**) नहीं (**परा, जयेथे**) पराजय को प्राप्त होते हो तथा (**एनोः**) इनके बीच (**कतरः**) कोई एक (**चन**) भी (**न**) नहीं (**परा, जिग्ये**) पराजित होता है॥८॥

भावार्थः-हे सेनाबल के अधीशो! यदि आप लोग सर्वदा सेना की उन्नति के लिये और युद्धविद्या की वृद्धि के लिये प्रयत्न कीजिये तो सर्वत्र जीतिये कहीं भी न पराजित हूजिये॥८॥

इस सूक्त में इन्द्र और विष्णु के समान सभा और सेनेश आदि के कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह उनहत्तरवां सूक्त और तेरहवां वर्ग पूरा हुआ॥

॥ओ३म्॥

अथ षड्चस्य सप्ततितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। द्यावापृथिव्यौ देवते। १, ५ निचृज्जगती। २, ३, ४, ६ जगतीच्छन्दः। निषादः स्वरः॥

अथ भूमिसूर्यौ कीदृशौ इत्याह॥

अब छः ऋचा वाले सत्तरवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में भूमि और सूर्य कैसे वर्त्तमान हैं, इस विषय को कहते हैं॥

घृतव॑ती॒ भुव॑नानामभि॒श्रियो॒र्वी पृ॒थ्वी म॑धु॒दुघे॑ सु॒पेश॑सा।
द्यावा॑पृथि॒वी वरु॑णस्य॒ धर्म॑णा॒ विष्क॑भिते अ॒जरे॒ भूरि॑रेतसा॥ १॥

घृतव॑ती॒ इति॑ घृत॑ऽवती। भुव॑नानाम्। अ॒भि॒ऽश्रिया॑। उ॒र्वी॒ इति॑। पृ॒थ्वी इति॑। म॒धु॒दुघे॒ इति॑ म॒धु॒ऽदुघे॑। सु॒ऽपेश॑सा। द्यावा॑पृथि॒वी इति॑। वरु॑णस्य। धर्म॑णा। विस्क॑भिते॒ इति॒ विऽस्क॑भिते। अ॒जरे॒ इति॑। भूरि॑ऽरेतसा॥ १॥

पदार्थः-(**घृतवती**) बहु घृतमुदकं दीप्तिर्वा विद्यते ययोस्ते। **घृतमित्युदकनाम।** (निघं०१.१२) (**भुवनानाम्**) सर्वेषां लोकानाम् (**अभिश्रिया**) अभिमुख्या श्रीर्याभ्यां ते (**उर्वी**) बहुपदार्थयुक्ते (**पृथ्वी**) विस्तीर्णे (**मधुदुघे**) मधुरादिरसैः प्रपूरिके (**सुपेशसा**) शोभनं पेशः सुवर्णं रूपं वा ययोस्ते (**द्यावापृथिवी**) भूमिसूर्यौ (**वरुणस्य**) सूर्यस्य वायोर्वा (**धर्मणा**) आकर्षणधारणादिगुणेन (**विष्कभिते**) विशेषेण धृते (**अजरे**) अजीर्णे (**भूरिरेतसा**) भूरि बहु रेतो वीर्य्यमुदकं वा याभ्यां ते। **रेत इत्युदकनाम।** (निघं०१.१२)॥१॥

अन्वयः-हे मनुष्या! यूयं भुवनानामभिश्रियोर्वी पृथ्वी घृतवती मधुदुघे सुपेशसा भूरिरेतसाऽजरे वरुणस्य धर्मणा विष्कभिते द्यावापृथिवी यथावद्विजानीत॥१॥

भावार्थः-हे मनुष्या! भवन्तो भूगर्भविद्युद्विद्यां विजानीयुर्ये द्वे सूर्येण वायुना च धृते वर्त्तेते ताभ्यां बलवृद्धिं कामपूर्त्तिं च कुर्वन्तु॥१॥

पदार्थः-हे मनुष्यो! तुम (**भुवनानाम्**) समस्त लोकों सम्बन्धी (**अभिश्रिया**) सब ओर से कान्तियुक्त (**उर्वी**) बहुत पदार्थों से युक्त और (**पृथ्वी**) विस्तार से युक्त (**घृतवती**) जिनमें बहुत उदक वा दीप्ति विद्यमान वे तथा (**मधुदुघे**) जो मधुरादि रसों से परिपूर्ण करने वाले (**सुपेशसा**) जिनका शोभायुक्त रूप वा जिनसे दीप्तिमान् सुवर्ण उत्पन्न होता (**भूरिरेतसा**) जिन से बहुत वीर्य्य वा जल उत्पन्न होता और (**अजरे**) जो अजीर्ण अर्थात् छिन्न-भिन्न नहीं वे (**वरुणस्य**) सूर्य वा वायु के (**धर्मणा**) आकर्षण वा धारण करने आदि गुण से (**विष्कभिते**) विशेषता से धारण किये हुए (**द्यावापृथिवी**) भूमि और सूर्य्य हैं, उन्हें यथावत् जानो॥१॥

भावार्थः-हे मनुष्यो! आप भूगर्भ और बिजुली की विद्या को जानो और जो दो पदार्थ सूर्य्य तथा वायु से धारण किये हुए हैं, उनसे बल की वृद्धि और कामना की पूर्णता करो॥१॥

पुनस्ते कथंभूते इत्याह॥

फिर वे कैसे हैं, इस विषय को कहते हैं॥

असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते।
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम्॥ २॥

असश्चन्ती इति। भूरिधारे इति भूरिऽधारे। पयस्वती इति। घृतम्। दुहाते इति। सुऽकृते। शुचिव्रते इति शुचिऽव्रते। राजन्ती। अस्य। भुवनस्य। रोदसी इति। अस्मे इति। रेतः। सिञ्चतम्। यत्। मनुःऽहितम्॥ २॥

पदार्थः-(**असश्चन्ती**) पृथक् पृथग्वर्त्तमाने (**भूरिधारे**) भूरि बह्व्यो धारा ययोस्ते (**पयस्वती**) बहूदकयुक्ते (**घृतम्**) उदकम् (**दुहाते**) पिपृते (**सुकृते**) ईश्वरेण सुष्ठु निर्मिते सुकृतकर्मनिमित्ते वा (**शुचिव्रते**) पवित्रकर्मयुक्ते (**राजन्ती**) प्रकाशमाने (**अस्य**) (**भुवनस्य**) ब्रह्माण्डस्य (**रोदसी**) द्यावापृथिव्यौ (**अस्मे**) अस्मासु (**रेतः**) उदकं वीर्यं वा (**सिञ्चतम्**) सिञ्चतः। अत्र पुरुषव्यत्ययः (**यत्**) (**मनुर्हितम्**) मनुष्येभ्यो हितम्॥ २॥

अन्वयः-हे मनुष्या! येऽसश्चन्ती भूरिधारे पयस्वती सुकृते शुचिव्रतेऽस्य भुवनस्य राजन्ती रोदसी अस्मे यन्मनुर्हितं तद् घृतं दुहाते तद्रेतश्च सिञ्चतं ते यथावदुपकारायाऽनयन्तु॥ २॥

भावार्थः-हे मनुष्या! सूर्यभूमी एव सर्वस्य पाननिमित्ते बहूदकादिपदार्थयुक्ते सर्वेषां कामं पूरयतस्ते यथावद्विज्ञाय कार्यसिद्धये सम्प्रयुङ्ध्वम्॥ २॥

पदार्थः-हे मनुष्यो! जो (**असश्चन्ती**) अलग-अलग वर्त्तमान (**भूरिधारे**) जिनकी बहुत धारायें विद्यमान (**पयस्वती**) जो बहुत जल से युक्त (**सुकृते**) जो ईश्वर ने सुन्दर बनाये वा अच्छे कर्म कराने वाले और (**शुचिव्रते**) पवित्र कर्मयुक्त हैं तथा (**अस्य**) इस (**भुवनस्य**) ब्रह्माण्ड के सम्बन्ध में (**राजन्ती**) प्रकाशमान हैं, वे (**रोदसी**) आकाश और पृथिवी (**अस्मे**) हम लोगों में (**यत्**) जो (**मनुर्हितम्**) मनुष्यों का हित करने वाला है उस (**घृतम्**) जल को (**दुहाते**) पूर्ण करते हैं उस (**रेतः**) जल वा वीर्य्य को (**सिञ्चतम्**) सींचते हैं, उन्हें यथावत् उपकार के लिये प्राप्त होओ॥ २॥

भावार्थः-हे मनुष्यो! सूर्य्य और भूमि ही सब जगत् की रक्षा के निमित्त, बहुत उदक आदि पदार्थयुक्त और सब के काम को पूर्ण करते हैं, उनको यथावत् जानकर कार्य्य की सिद्धि के लिये अच्छे प्रकार उनका प्रयोग करो॥ २॥

पुनरेते विज्ञाय कः कीदृशो भवतीत्याह॥

फिर इन को जान के कौन कैसा होता है, इस विषय को कहते हैं॥

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता॥ ३॥

यः। वाम्। ऋजवे। क्रमणाय। रोदसी इति। मर्तः। ददाश। धिषणे इति। सः। साधति। प्र। प्रऽजाभिः। जायते। धर्मणः। परि। युवोः। सिक्ता। विषुऽरूपाणि। सऽव्रता॥ ३॥

पदार्थः-(**यः**) (**वाम्**) युवयो राजप्रजाजनयोः (**ऋजवे**) सरलाय (**क्रमणाय**) गमनागमनाय (**रोदसी**) द्यावापृथिव्यौ (**मर्त्तः**) मनुष्यः (**ददाश**) ददाति (**धिषणे**) प्रज्ञाप्रगल्भतयोः कारणे (**सः**) (**साधति**) (**प्र**) (**प्रजाभिः**) प्रजातैस्सह (**जायते**) (**धर्मणः**) धर्मात् (**परि**) सर्वतः (**युवोः**) युवयोः (**सिक्ता**) सिक्तानि वीर्याण्युदकानि वा (**विषुरूपाणि**) व्याप्तरूपाणि (**सव्रता**) समानकर्माणि॥ ३॥

अन्वयः-हे राजप्रजे! ये धिषणे रोदसी वामृजवे क्रमणाय भवतस्ते यो मर्त्तो ददाश स कार्याणि प्र साधति प्रजाभिः प्रजायते युवोर्धर्मणो विषुरूपाणि सव्रता सिक्ता कुरुतस्ते परिसाधनीये॥ ३॥

भावार्थः-हे मनुष्या! ये भूगर्भविद्युद्विद्यां द्यावापृथिव्योश्च कर्माणि जानन्ति ते प्रजया पशुभिर्विद्यया राज्येन च युक्ता जायन्ते॥ ३॥

पदार्थः-हे राजप्रजाजनो! जो **(धिषणे)** प्रजा और प्रगल्भता के कारण **(रोदसी)** आकाश और पृथिवी **(वाम्)** तुम लोगों को **(ऋजवे)** सरलपन के लिये और **(क्रमणाय)** गमन वा आगमन के लिये होते हैं उनको **(यः)** जो **(मर्त्तः)** मनुष्य **(ददाश)** देता है **(सः)** वह कार्यों को **(प्र, साधति)** प्रसिद्ध करता है और **(प्रजाभिः)** उत्पन्न हुए पदार्थों के साथ **(जायते)** प्रसिद्ध होता है और **(युवोः)** तुम्हारे **(धर्मणः)** धर्म से **(विषुरूपाणि)** व्याप्तरूप **(सव्रता)** समान कर्मों को तथा **(सिक्ता)** वीर्य्य वा उदकों को सींचे हुए करते हैं, वे **(परि)** सब ओर से सिद्ध करने योग्य हैं॥ ३॥

भावार्थः-हे मनुष्यो! जो भूगर्भविद्या और द्यावापृथिवी के कर्मों को जानते हैं; वे प्रजा, पशु, विद्या और राज्य से युक्त होते हैं॥ ३॥

पुनस्ते कीदृश्यौ किं प्रापयतश्चेत्याह॥

फिर वे कैसे हैं और क्या प्राप्त कराते हैं, इस विषय को कहते हैं॥

घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये॥ ४॥

घृतेन। द्यावापृथिवी इति। अभिऽवृते इति अभिऽवृते। घृतऽश्रिया। घृतऽपृचा। घृतऽवृधा। उर्वी इति। पृथ्वी इति। होतृऽवूर्ये। पुरोहिते इति पुरःऽहिते। ते इति। इत्। विप्राः। ईळते। सुम्नम्। इष्टये॥ ४॥

पदार्थः-(**घृतेन**) उदकेन (**द्यावापृथिवी**) विद्युदन्तरिक्षे (**अभीवृते**) येऽभितो वर्त्तेते (**घृतश्रिया**) घृतं प्रदीपनमवकाशनञ्च श्रीर्ययोस्ते (**घृतपृचा**) घृतेन प्रदीपनेनोदकेन वा सम्पृक्ते (**घृतावृधा**) घृतेन तेजसा वर्धेते (**उर्वी**) बहुगुणद्रव्ययुक्ते (**पृथ्वी**) विस्तीर्णे (**होतृवूर्य्ये**) होतारो व्रियन्ते ययोस्ते (**पुरोहिते**) पुरस्ताद्धितं दधत्यौ (**ते**) (**इत्**) (**विप्राः**) मेधाविनः (**ईळते**) स्तुवन्ति (**सुम्नम्**) सुखम् (**इष्टये**) सङ्गतये॥ ४॥

अन्वयः-हे मनुष्या! ये विप्रा घृतेन युक्ते उर्वी अभीवृते घृतश्रिया घृतपृचा घृतावृधा होतृवूर्ये पुरोहिते इष्टये पृथ्वी द्यावापृथिवी ईळते त इत्सर्वेभ्यः सुम्नं लभन्ते॥४॥

भावार्थः-हे मनुष्या! यथा प्राज्ञा विद्युतोऽन्तरिक्षस्य च विद्यां विज्ञाय कार्येषु संप्रयुञ्जते तथैते यूयमपि सम्प्रयुङ्ध्वम्॥४॥

पदार्थः-हे मनुष्या! जो **(विप्राः)** मेधावी बुद्धिमान् पुरुष **(घृतेन)** जल से तथा **(उर्वी)** बहुत गुण और पदार्थों से युक्त **(अभीवृते)** सब ओर से वर्त्तमान **(घृतश्रिया)** अत्यन्त प्रकाश वा अवकाश धन जिनका **(घृतपृचा)** जो प्रकाश वा जल से अच्छे प्रकार सम्बन्ध किये हुए और **(घृतावृधा)** तेज से बढ़ते हैं तथा **(होतृवूर्ये)** होता जन से स्वीकार होते और **(पुरोहिते)** आगे से हित को धारण करते हुए **(इष्टये)** सङ्ग के लिये **(पृथ्वी)** बहुत विस्तारयुक्त जो **(द्यावापृथिवी)** बिजुली और अन्तरिक्ष हैं उनकी **(ईळते)** प्रशंसा करते हैं **(ते, इत्)** वे ही सब से **(सुम्नम्)** सुख पाते हैं॥४॥

भावार्थः-हे मनुष्यो! जैसे उत्तम बुद्धिमान् जन बिजुली और अन्तरिक्ष की विद्या को जान के कार्यों में लगाते हैं, वैसे तुम भी उनका प्रयोग करो॥४॥

पुनस्ताभ्यां किं कर्त्तव्यमित्याह॥

फिर उनसे क्या करने योग्य है, इस विषय को कहते हैं॥

मधु॑ नो॒ द्यावा॑पृथि॒वी मि॑मिक्षतां॒ मधु॒श्चुता॑ मधु॒दुघे॒ मधु॑व्रते।
दधा॑ने य॒ज्ञं द्र॒वि॑णं च दे॒वता॒ महि॒ श्रवो॒ वाज॑म॒स्मे सु॒वीर्य॑म्॥५॥

मधु॑। नः॒। द्यावा॑पृथि॒वी इति॑। मि॒मि॒क्ष॒ता॒म्। मधु॒श्चुता॑। मधु॒दुघे॒ इति॑ मधु॒ऽदुघे॒। मधु॑व्रते॒ इति॒ मधु॑ऽव्रते। दधा॑ने इति॑। य॒ज्ञम्। द्र॒वि॑णम्। च॒। देव॒ता॑। महि॑। श्रवः॑। वाज॑म्। अ॒स्मे॒ इति॑। सु॒ऽवीर्य॑म्॥५॥

पदार्थः-(**मधु**) मधुरमुदकम्। **मध्वित्युदकनाम।** (निघं०१.१२) **(नः)** अस्मभ्यम् **(द्यावापृथिवी)** सूर्य्यभूमी **(मिमिक्षताम्)** मेढुमिच्छतम् **(मधुश्चुता)** मधूदकस्य वर्षयित्र्यौ **(मधुदुघे)** ये मधुनोदकेन दुग्धः कामान् प्रपूरयतस्ते **(मधुव्रते)** मधूनि व्रतानि कर्माणि ययोस्ते **(दधाने)** **(यज्ञम्)** सङ्गतिमयं व्यवहारम् **(द्रविणम्)** धनम् **(च)** **(देवता)** दिव्यस्वरूपे **(महि)** महत् **(श्रवः)** अन्नम् **(वाजम्)** विज्ञानम् **(अस्मे)** अस्मासु **(सुवीर्यम्)** उत्तमपराक्रमम्॥५॥

अन्वयः-हे अध्यापकोपदेशकौ! वे मधुश्चुता मधुदुघे मधुव्रते देवताऽस्मे यज्ञं द्रविणं महि श्रवो वाजं सुवीर्यं च दधाने द्यावापृथिवी वर्त्तेते ताभ्यां युवां नो मधु मिमिक्षताम्॥५॥

भावार्थः-हे मनुष्या! यथा भूमिसूर्य्यौ सत्यकर्माणाविच्छापूरकौ मधुरादिरसप्रदौ धनान्नबलविज्ञानवर्धकौ स्यातां तथाऽनुतिष्ठन्तु॥५॥

पदार्थः-हे अध्यापक और उपदेशको! जो **(मधुश्चुता)** मधुर जल के वर्षाने और **(मधुदुघे)** मधुर जल से काम पूरे करने **(मधुव्रते)** जिनके मधुर काम **(देवता)** जो दिव्यरूप **(अस्मे)** हम लोगों में **(यज्ञम्)** सङ्गतिमय व्यवहार **(द्रविणम्)** धन **(महि)** महान् **(श्रवः)** अन्न **(वाजम्)** विज्ञान **(सुवीर्यम्, च)**

और उत्तम पराक्रम को भी **(दधाने)** स्थापन करते हुए **(द्यावापृथिवी)** सूर्य और भूमि यह दोनों पदार्थों वर्त्तमान हैं उनसे तुम **(नः)** हमारे लिये **(मधु)** मधुर जल के **(मिमिक्षतम्)** सीचनें की इच्छा करो॥५॥

भावार्थः-हे मनुष्यो! जैसे भूमि और सूर्य्य सत्य कर्मयुक्त, इच्छा पूरी करने और मधुरादि रस देने, धन, अन्न, बल और विज्ञान के बढ़ाने वाले हों, वैसे अनुष्ठान करो॥५॥

पुनस्ते कीदृश्यौ किंवत् किं कुरुत इत्याह॥

फिर वे कैसे किसके तुल्य और क्या करते हैं, इस विषय को कहते हैं॥

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा।
संराराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वताम्॥६॥१४॥

ऊर्जम्। नः। द्यौः। च। पृथिवी। च। पिन्वताम्। पिता। माता। विश्वऽविदा। सुऽदंससा। संऽराणे इति सम्ऽराणे। रोदसी इति। विश्वऽशंभुवा। सनिम्। वाजम्। रयिम्। अस्मे इति। सम्। इन्वताम्॥६॥

पदार्थः-(**ऊर्जम्**) अन्नं पराक्रमं वा। **ऊर्गित्यन्ननाम।** (निघं०२.७) **(नः)** अस्मभ्यम् **(द्यौः)** सूर्यो विद्युद्वा **(च)** **(पृथिवी)** भूमिः **(च)** **(पिन्वताम्)** सुखयेताम् **(पिता)** पितेव **(माता)** मातेव **(विश्वविदा)** विश्वं सर्वं विन्दति याभ्यां ते **(सुदंससा)** शोभनानि दंसांसि कर्माणि ययोस्ते **(संरराणे)** ये सम्यक्सुखं रातो दत्तस्ते **(रोदसी)** बहुपदार्थयुक्ते द्यावापृथिव्यौ **(विश्वशंभुवा)** विश्वस्मै शं सुखं भावुके **(सनिम्)** संविभागम् **(वाजम्)** विज्ञानमन्नं वा **(रयिम्)** श्रियम् **(अस्मे)** अस्मासु **(सम्)** सम्यक् **(इन्वताम्)** व्याप्नुताम्॥६॥

अन्वयः-हे मनुष्या! ये विश्वविदा सुदंससा संरराणे विश्वशंभुवा रोदसी अस्मे सनिं वाजं रयिं च समिन्वतां पितेव द्यौश्च मातेव पृथिवी च न ऊर्जं पिन्वतां ते यथावद्विजानन्तु॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! भवन्तो यः सूर्य्यः पितेव या पृथिवी मातेवैते सर्वसुखप्रदे धनैश्वर्यप्रापिके मङ्गलनिमित्ते उत्तमक्रिये बलपराक्रमप्रदे वर्तेते ते प्रयत्नेन कथं न विजानन्तीति॥६॥

अत्र द्यावापृथिव्योस्तद्वदध्यापकोपदेशकयोर्ऋत्विग्यजमानयोश्च कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्ततितमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जो **(विश्वविदा)** जिनसे सर्व सुख को प्राप्त होते हैं **(सुदंससा)** जिनसे सुन्दर काम सिद्ध होते हैं **(संरराणे)** जो अच्छे प्रकार सुख देते हैं और **(विश्वशंभुवा)** जो सब के लिये सुख की भावना कराते वे **(रोदसी)** बहुपदार्थयुक्त द्यावापृथिवी **(अस्मे)** हम लोगों में **(सनिम्)** अच्छे प्रकार विभाग को और **(वाजम्)** विज्ञान वा अन्न तथा **(रयिम्)** धन को **(सम्, इन्वताम्)** उत्तमता से व्याप्त हों तथा **(पिता)** पिता के समान **(द्यौः)** सूर्य्य वा विद्युत् अग्नि **(च)** और **(माता)** माता के समान **(पृथिवी)**

भूमि **(च)** भी **(नः)** हमारे लिये **(ऊर्जम्)** अन्न वा पराक्रम को **(पिन्वताम्)** सुखपूर्वक परिपूर्ण करें, उनको यथावत् जानो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप, जो सूर्य पिता के समान, जो पृथिवी माता के समान ये दोनों सर्व सुख देने वा धन और ऐश्वर्य्य की प्राप्ति कराने वा मङ्गल कराने वाले उत्तम क्रियायुक्त और बल वा पराक्रम देने वाले वर्त्तमान हैं, उनको उत्तम यत्न के साथ कैसे न जानो॥६॥

इस सूक्त में द्यावापृथिवी और उनके समान अध्यापक और उपदेश वा ऋत्विक्, और यजमानों के काम का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह सत्तरवां सूक्त और चौदहवाँ वर्ग पूरा हुआ॥

॥ओ३म्॥

अथ षड्चस्यैकसप्ततितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। सविता देवता। १ जगती। २, ३ निचृज्जगतीच्छन्दः। निषादः स्वरः। ४ त्रिष्टुप्। ५, ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा कीदृशो भवेदित्याह॥

अब छः ऋचावाले एकसत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर राजा कैसा हो, इस विषय को कहते हैं॥

उदु ष्य देवः सविता हिरण्ययाबाहू अयंस्त सवनाय सुक्रतुः।
घृतेन पाणी अभि प्रुष्णुते मुखो युवा सुदक्षो रजसो विधर्मणि॥ १॥

उत्। ऊँ इति। स्यः। देवः। सविता। हिरण्ययाः। बाहू इति। अयंस्त। सवनाय। सुऽक्रतुः। घृतेन। पाणी इति। अभि। प्रुष्णुते। मुखः। युवा। सुऽदक्षः। रजसः। विऽधर्मणि॥ १॥

पदार्थः-(उत्) (उ) (**स्यः**) सः (**देवः**) (**सविता**) ऐश्वर्य्यवान् सत्कर्मसु प्रेरको राजा (**हिरण्यया**) हिरण्याद्याभूषणयुक्तौ (**बाहू**) भुजौ (**अयंस्त**) यच्छति (**सवनाय**) ऐश्वर्य्याय (**सुक्रतुः**) उत्तमप्रज्ञः (**घृतेन**) उदकेनाज्येन वा (**पाणी**) प्रशंसनीयौ (**अभि**) (**प्रुष्णुते**) अभिदहति (**मखः**) यज्ञ इव सुखकर्त्ता (**युवा**) प्राप्तयौवनः (**सुदक्षः**) शोभनं दक्षं बलं यस्य सः (**रजसः**) लोकस्य (**विधर्मणि**) विशिष्टे धर्मे॥ १॥

अन्वयः-यो मख इव सुखकरो विधर्मणि सुदक्षो युवा सुक्रतुः सविता देवः सवनाय घृतेन युक्तौ पाणी हिरण्यया बाहू उदयंस्त स्य उ रजसो विरोधिनोऽभि प्रुष्णुते॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो विद्वानतिबलयुक्तभुजो महाप्रज्ञो विशेषेण धार्मिकः सन्नैश्वर्यप्राप्तये सततमुद्यमं करोति स ऐश्वर्यं प्राप्य पुनः सर्वस्याः प्रजाया धर्मे निवेशनं कृत्वा यज्ञ इव सर्वदा सुखयेत्॥ १॥

पदार्थः-जो **(मखः)** यज्ञ के समान सुख करने वाला **(विधर्मणि)** विशेष धर्म में **(सुदक्षः)** सुन्दर बल जिसका वह **(युवा)** जवान **(सुक्रतुः)** उत्तम बुद्धियुक्त **(सविता)** ऐश्वर्य्यवान् **(देवः)** विद्वान् **(सवनाय)** ऐश्वर्य के लिये **(घृतेन)** जल वा घी से युक्त **(पाणी)** प्रशंसा करने योग्य **(हिरण्यया)** सुवर्ण आदि आभूषण युक्त **(बाहू)** भुजाओं को **(उत्, अयंस्त)** उठाता है **(स्यः, उ)** वही **(रजसः)** लोक के विरोधियों को **(अभि, प्रुष्णुते)** सब ओर से भस्म करता है॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् अति बल से युक्त भुजाओं वाला, अत्यन्त बुद्धिमान्, विशेषता से धर्मात्मा होकर ऐश्वर्य की प्राप्ति के लिये निरन्तर उद्यम करता है, वह ऐश्वर्य को प्राप्त होकर फिर से सब प्रजा के धर्म में प्रवेश कर जैसे यज्ञ सुख देता है, वैसे सुखी करता है॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

देवस्य॑ व॒यं स॑वि॒तुः सवी॑मनि॒ श्रेष्ठे॑ स्याम॒ वसु॑नश्च दा॒वने॑।
यो विश्व॑स्य द्वि॒पदो॒ यश्च॑तु॒ष्पदो नि॒वेश॑ने प्रस॒वे चा॑सि॒ भूम॑नः॥ २॥

देव॑स्य। व॒यम्। स॒वि॒तुः। सवी॑मनि। श्रेष्ठे॑। स्याम॒। वसु॑नः। च॒। दा॒वने॑। यः। विश्व॑स्य। द्वि॒ऽपदः॑। यः। चतु॑ः॒ऽपदः। नि॒ऽवेश॑ने। प्र॒ऽस॒वे। च। असि॑। भूम॑नः॥ २॥

पदार्थः-(**देवस्य**) स्वप्रकाशस्य परमेश्वरस्य (**वयम्**) (**सवितुः**) सकलजगदुत्पादकस्य (**सवीमनि**) उत्पादिते जगति (**श्रेष्ठे**) व्यवहारे (**स्याम**) भवेम (**वसुनः**) धनस्य (**च**) (**दावने**) दाने (**यः**) (**विश्वस्य**) समग्रस्य (**द्विपदः**) मनुष्यादेः (**यः**) (**चतुष्पदः**) गवादेः (**निवेशने**) सर्वे निविशन्ति यस्मिंस्तस्मिन् (**प्रसवे**) प्रसूते (**च**) (**असि**) (**भूमनः**) बहुरूपस्य॥ २॥

अन्वयः-हे विद्वन् राजन्! यो द्विपदो यश्चतुष्पदो भूमनो विश्वस्य प्रसवे निवेशनेऽभिव्याप्य विराजते तस्य सवितुर्देवस्य श्रेष्ठे सवीमनि वसुनश्च दावने यथा वयमुद्युक्ताः स्याम तथा त्वं यतश्चासि तस्मादत्र राजा भव॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वानो! यथाऽत्र जगति जगदीश्वरोऽभिव्याप्य सर्वं रक्षति तथैवात्र व्याप्तो भूत्वा विद्याविनयाभ्यां सर्वं राष्ट्रं पुत्रवद्रक्षत॥ २॥

पदार्थः-हे विद्वान् राजा! (**यः**) जो (**द्विपदः**) मनुष्यादि दो पग वाले जीव और (**यः**) जो (**चतुष्पदः**) गो आदि चार पग वाले पशु आदि जीवों के (**भूमनः**) बहुरूपी (**विश्वस्य**) समग्र संसार के (**प्रसवे**) उस उत्पन्न हुए स्थान में (**निवेशने**) जिसमें सब निवेश करते हैं अभिव्याप्त होकर विराजमान है उस (**सवितुः**) सकल जगत् के उत्पन्न करने वाले (**देवस्य**) अपने आप प्रकाशमान परमेश्वर के (**श्रेष्ठे**) प्रशंसित व्यवहार में (**सवीमनि**) उत्पन्न हुए जगत् में (**वसुनः, च**) धन के भी (**दावने**) देने में जैसे (**वयम्**) हम लोग उद्यत (**स्याम**) हों, वैसे तुम (**च**) भी जिस कारण (**असि**) हो इससे यहाँ राजा होओ॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे इस जगत् में जगदीश्वर अभिव्याप्त होकर सब की रक्षा करता है, वैसे ही इस जगत् में व्याप्त होकर विद्या और विनय से समस्त राज्य को पुत्र के समान पालो॥ २॥

पुनः स राजा कीदृशः केन किं कुर्यादित्याह॥

फिर वह राजा कैसा और किससे क्या करे, इस विषय को कहते हैं॥

अद॑ब्धेभिः सवितः पा॒युभि॒ष्ट्वं शि॒वेभि॑र॒द्य परि॑ पाहि नो॒ गय॑म्।
हिर॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से॒ रक्षा॒ माकि॑र्नो अघशं॒स ई॑शत॥ ३॥

अद॑ब्धेभिः। स॒वि॒तरिति॑। पा॒युऽभि॑ः। त्वम्। शि॒वेभि॑ः। अ॒द्य। परि॑। पा॒हि॒। न॒ः। गय॑म्। हिर॑ण्यऽजिह्वः। सु॒वि॒ताय॑। नव्य॑से। रक्ष॑। माकि॑ः। न॒ः। अघऽशं॑सः। ई॒श॒त॒॥ ३॥

पदार्थः-(**अदब्धेभिः**) अहिंसिकैरहिंसितैर्वा (**सवितः**) सत्कर्मसु प्रेरक राजन् (**पायुभिः**) रक्षणैः (**त्वम्**) (**शिवेभिः**) सुखकारकैर्मङ्गलविधायकैः (**अद्य**) इदानीम् (**परि**) सर्वतः (**पाहि**) रक्ष (**नः**) अस्माकम् (**गयम्**) गमयपत्यं धनं गृहं वा। **गय इत्यपत्यनाम।** (निघं०२.२) **धननाम** २.१० **गृहनाम च** (निघं०३.४) (**हिरण्यजिह्वः**) हिरण्यमिव सत्येन सुप्रकाशिता वाणी यस्य सः (**सुविताय**) ऐश्वर्याय (**नव्यसे**) अतिशयेन नवीनाय (**रक्षा**) (**माकिः**) निषेधे (**नः**) अस्माकम् (**अघशंसः**) स्तेनः (**ईशत**) विघ्नानां ईश्वरो भवेत्॥३॥

अन्वयः-हे सवितस्त्वमद्याऽदब्धेभिः शिवेभिः पायुभिर्नो गयं परि पाहि हिरण्यजिह्वः सन्नव्यसे सुविताय नो गयं रक्षा यथाऽघशंसो नो माकिरीशत तथा विधेहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा प्रयत्नेन प्रजाः संरक्ष्य दस्व्वादीन् हन्यात् स एव नवीनं नवीनमैश्वर्यं जनयित्वा सततं प्रजाप्रियो धार्मिकः स्यात्॥३॥

पदार्थः-हे (**सवितः**) अच्छे कामों में प्रेरणा देने वाले राजन्! (**त्वम्**) आप (**अद्य**) अब (**अदब्धेभिः**) न नष्ट करने वा न नष्ट होने और (**शिवेभिः**) सुख करने वा मङ्गल विधान करने वाले (**पायुभिः**) रक्षा के निमित्तों से (**नः**) हमारे (**गयम्**) सन्तान, धन और घर की (**परि, पाहि**) सब ओर से रक्षा करो तथा (**हिरण्यजिह्वः**) सुवर्ण के समान सत्य से जिसकी वाणी प्रकाशित है ऐसे होते हुए (**नव्यसे**) अतीव [नवीन] (**सुविताय**) ऐश्वर्य्य के लिये हमारे पुत्रादिकों की (**रक्षा**) रक्षा करो जैसे (**अघशंसः**) चोर (**नः**) हम लोगों के प्रति (**माकिः**) न (**ईशत**) विघ्नों के करने को समर्थ हो, वैसा करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा प्रयत्न के साथ प्रजाओं की अच्छे प्रकार रक्षा कर डाकुओं को मारे, वही नवीन-नवीन ऐश्वर्य्य को उत्पन्न कर निरन्तर प्रजाजनों का प्यारा और धार्मिक हो॥३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात्।
अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम्॥४॥

उत्। ऊँ इति। स्यः। देवः। सविता। दमूनाः। हिरण्यऽपाणिः। प्रतिऽदोषम्। अस्थात्। अयःऽहनुः। यजतः। मन्द्रऽजिह्वः। आ। दाशुषे। सुवति। भूरि। वामम्॥४॥

पदार्थः-(**उत्**) (उ) (**स्यः**) सः (**देवः**) सुखदाता विद्वान् (**सविता**) ऐश्वर्य्यप्रदः (**दमूनाः**) दमनशीलः (**हिरण्यपाणिः**) हिरण्यादिकं सुवर्णं पाणौ यस्य सः (**प्रतिदोषम्**) यथा रात्रिं रात्रिं प्रति सूर्यस्तथा (**अस्थात्**) उत्तिष्ठेत् (**अयोहनुः**) अयो लोहमिव दृढा हनुर्यस्य सः (**यजतः**) सङ्गन्ता

(मन्द्रजिह्वः) मन्द्रा आनन्दप्रदा कमनीया जिह्वा वाणी यस्य सः **(आ)** **(दाशुषे)** दात्रे प्रजाजनाय **(सुवति)** उद्योगे प्रेरयति **(भूरि)** **(वामम्)** प्रशस्यं कर्म प्रति॥४॥

अन्वयः-हे मनुष्या! यो दमूना हिरण्यपाणिरयोहनुर्यजतो मन्द्रजिह्वः सविता देवः प्रतिदोषं सूर्य इव प्रजापालनायोदस्थाद्दाशुषे भूरि वाममा सुवति स्य उ राजा भवितुमर्हेत्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथेश्वरेण नियुक्तः सूर्य्यलोकः प्रतिक्षणं स्वक्रियां न जहाति तथैव यो राजा न्यायेन राज्यपालनाय प्रतिक्षणमुद्युक्तो भवत्येकक्षणमपि व्यर्थं न नयति सर्वान् मनुष्यानुत्तमेषु कर्मसु स्वयं वर्त्तित्वा प्रेरयति स एव शमदमादिशुभगुणाढ्यो राजा भवितुमर्हतीति सर्वे विजानन्तु॥४॥

पदार्थः-हे मनुष्यो! जो **(दमूनाः)** दमनशील **(हिरण्यपाणिः)** सुवर्ण आदि हाथ में लिये हुए **(अयोहनुः)** लोहे के समान दृढ़ ठोढ़ी रखने और **(यजतः)** सङ्ग करने वाला **(मन्द्रजिह्वः)** जिसकी आनन्द देने वाली वाणी विद्यमान वह **(सविता)** ऐश्वर्य्यदाता और **(देवः)** सुख देनेहारा विद्वान् **(प्रतिदोषम्)** जैसे रात्रि-रात्रि के प्रति सूर्य्य उदय होता है, वैसे प्रजा पालन करने के लिये **(उत, अस्थात्)** उठता है तथा **(दाशुषे)** दान करने वाले के लिये **(भूरि)** बहुत **(वामम्)** प्रशंसा योग्य कर्म के प्रति **(आ, सुवति)** उद्योग करने में प्रेरणा देता है **(स्यः, उ)** वही राजा होने को योग्य होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे ईश्वर से नियुक्त किया सूर्यलोक प्रतिक्षण अपनी क्रिया को नही छोड़ता, वैसे ही जो राजा न्याय से राज्य पालने के लिये प्रतिक्षण उद्योग करता है, एक क्षण भी व्यर्थ नहीं खोता तथा सब मनुष्यों को उत्तम कर्मों के बीच आप वर्त्ताव कर उन्हें प्रेरणा देता है, वही शम-दम आदि शुभ गुणों से युक्त राजा होने योग्य है, यह सब जानें॥४॥

पुनः स राजा किंवत् कीदृशो भवेदित्याह॥

फिर वह राजा किसके तुल्य कैसा हो, इस विषय को कहते हैं॥

उद॑ू अयाँ उपव॒क्तेव॑ बा॒हू हिर॑ण्यया॑ सवि॒ता सु॒प्रती॑का।
दि॒वो रोहा॑ꣳस्यरुहत् पृथि॒व्या अरी॑रमत् प॒तय॒त् कच्चि॒दभ्व॑म्॥५॥

उत्। ऊँ इति॑। अ॒या॒न्। उ॒प॒व॒क्ताऽइ॑व। बा॒हू इति॑। हिर॑ण्यया॑। स॒वि॒ता। सु॒ऽप्रती॑का। दि॒वः। रोहा॑ꣳसि। अ॒रु॒ह॒त्। पृ॒थि॒व्याः। अरी॑रमत्। प॒तय॑त्। कत्। चि॒त्। अभ्व॑म्॥५॥

पदार्थः-(उत्) (उ) (अयान्) इयात् (उपवक्तेव) यथोपवक्ता तथा (बाहू) (हिरण्यया) हिरण्यवत् सुदृढौ सुशोभितौ (सविता) सूर्य इव (सुप्रतीका) शोभनानि प्रतीकानि प्रतीतिकराणि कर्माणि याभ्यां तौ (दिवः) आकाशस्य (रोहांसि) आरोहणानि (अरुहत्) रोहति (पृथिव्याः) अन्तरिक्षस्य मध्य इव भूमेः (अरीरमत्) रमयेत् (पतयत्) पतिः स्वामी पालक इवाचरेत् (कत्) कदा (चित्) अपि (अभ्वम्) महान्तं न्यायम्॥५॥

अन्वय:-हे मनुष्या! यथा सविता दिवो रोहांस्यरुहत् पृथिव्या: सर्वमभ्वमरीरमच्चिदपि पतयत् तथा अस्य सुप्रतीका हिरण्यया बाहू वर्तते स उ उपवक्तेव कदुदयान्॥४॥

भावार्थ:-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे राजँस्त्वं कदा सूर्यवन्न्यायविनयाभ्यां प्रकाशित: सुदृढाङ्ग आप्तवद्वक्ता भवे: यथाऽस्मिञ्जगति सर्वोपकारायेश्वरेण सूर्यो निर्मितस्तथैव सर्वेषां सुखाय राजा विहित:॥५॥

पदार्थ:-हे मनुष्यो! जैसे **(सविता)** सूर्यमण्डल **(दिव:)** आकाश की **(रोहांसि)** चढ़ाइयों को **(अरुहत्)** चढ़ता है और **(पृथिव्या:)** अन्तरिक्ष के मध्य में भूमि के समस्त **(अभ्वम्)** महान् न्याय को **(अरीरमत्)** वर्त्तावे **(चित्)** और **(पतयत्)** पति के समान आचरण करे, वैसे जिसकी **(सुप्रतीका)** सुन्दर प्रतीति करने वाले काम जिनसे होते ऐसे **(हिरण्यया)** हिरण्य के समान सुदृढ़ सुशोभित **(बाहू)** भुजा वर्त्तमान है वह **(उ)** हो **(उपवक्तेव)** समीप कहने वाले के समान **(कत्)** कब **(उत्, अयान्)** उदय हो॥५॥

भावार्थ:-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे राजन्! आप कब सूर्य के समान न्याय और विनय से प्रकाशित सुन्दर दृढ़ अङ्गयुक्त, श्रेष्ठ धर्मज्ञ विद्वानों के समान वक्ता होओ। जैसे इस जगत् में सर्वोपकार के लिये ईश्वर ने सूर्य बनाया है, वैसे ही सब के सुख के लिये राजा बनाया है॥

पुन: स प्रजाभ्य: किं कुर्यादित्याह॥

फिर वह प्रजाओं के लिये क्या करे, इस विषय को कहते हैं॥

वा॒मम॒द्य स॑वितर्वा॒ममु॒ श्वो दि॒वेदि॑वे वा॒मम॒स्मभ्यं॑ सावीः।
वा॒मस्य॒ हि क्षय॑स्य देव॒ भूरे॑रया धि॒या वा॑मभाजः॑ स्याम॥६॥१५॥

वा॒मम्। अ॒द्य। स॒वि॒तः॒। वा॒सम्। ऊँ॒ इति॑। श्वः। दि॒वेऽदि॑वे। वा॒मम्। अ॒स्मभ्य॑म्। सा॒वीः॒। वा॒मस्य॑। हि। क्षय॑स्य। दे॒व॒। भूरे॑:। अ॒या। धि॒या। वा॒मऽभाज॑:। स्या॒म॒॥६॥

पदार्थ:-(**वामम्**) प्रशस्यसुखम् (**अद्य**) इदानीम् (**सवित:**) ऐश्वर्यप्रद राजन् (**वामम्**) प्रशंसनीयम् (**उ**) (**श्व:**) आगामिदिने (**दिवेदिवे**) प्रतिदिनम् (**वामम्**) अत्युत्कृष्टम् (**अस्मभ्यम्**) (**सावी:**) जनय (**वामस्य**) प्रशस्यस्य (**हि**) यत: (**क्षयस्य**) गृहस्य (**देव**) दिव्यगुणयुक्त (**भूरे:**) बहुविधस्य (**अया**) अनया (**धिया**) प्रज्ञयाऽनेन कर्मणा वा (**वामभाज:**) ये वामं भजन्ति ते (**स्याम**) भवेम॥६॥

अन्वय:-हे सवितर्देव! यथा हि त्वमद्य वामसु श्वो वामं दिवेदिवे वाममस्मभ्यं सावीस्तस्मात् तयाऽया धिया भूरेर्वामस्य क्षयस्य वामभाजो वयं स्याम॥६॥

भावार्थ:-हे राजन्! यस्माद्भवानस्मभ्यं प्रजाजनेभ्यो नित्यं प्रशंसनीयं सुखं जनयति रक्षां विधत्ते तस्माद्वयं सुखेन धनगृहप्रशस्तकर्मणां सेवका भूत्वा भवदाज्ञायां नित्यं वर्त्तेमहीति॥६॥

अत्र सवितृराजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥ इत्येकसप्ततितमं सूक्तं पञ्चदशो वर्गश्च समाप्त:॥

पदार्थः–हे **(सवितः)** ऐश्वर्य्य के देने वाले **(देव)** दिव्यगुणयुक्त राजन्! जैसे **(हि)** जिस कारण से आप **(अद्य)** अब **(वामम्)** प्रशंसा करने योग्य सुख **(उ)** और **(श्वः)** अगले दिन **(वामम्)** प्रशंसा करने योग्य सुख तथा **(दिवेदिवे)** प्रतिदिन **(वामम्)** अति उत्तम सुख **(अस्मभ्यम्)** हमारे लिये **(सावीः)** उत्पन्न करो उससे **(अया)** इस **(धिया)** प्रज्ञा वा कर्म से **(भूरेः)** बहुत प्रकार के **(वामस्य)** प्रशंसित **(क्षयस्य)** घर के **(वामभाजः)** वामभाज अर्थात् प्रशंसित सुख भोगने वाले हम लोग **(स्याम)** हों॥६॥

भावार्थः-हे राजन् जिससे आप हम प्रजाजनों के लिये प्रशंसनीय सुख को उत्पन्न करते और रक्षा का विधान करते हो जैसे हम लोग सुख से धन, घर और प्रशंसित कामों के सेवने वाले होकर आपकी आज्ञा में नित्य वर्तें॥६॥

इस सूक्त में सविता, राजा और प्रजा के कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकहतरवां सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चर्चस्य द्विसप्ततितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। इन्द्रासौमौ देवते। १ त्रिष्टुप्। २, ४, ५ विराट्त्रिष्टुप्। ३ निचृत्त्रिष्टुप्छन्दः। धैवतः स्वरः॥

अथाध्यापकोपदेशकौ किंवत् किं कुर्यातामित्याह॥

अब बहत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में अध्यापक और उपदेशक किसके तुल्य क्या करें, इस विषय को कहते हैं॥

इन्द्रा॑सोमा॒ महि॒ तद्वां॑ महि॒त्वं यु॒वं म॒हानि॑ प्रथ॒मानि॑ चक्रथुः।
यु॒वं सूर्यं॑ विवि॒दथु॑र्यु॒वं स्व१॑र्विश्वा॒ तमां॑स्यहतं नि॒दश्च॑॥ १॥

इन्द्रा॑सोमा। महि॑। तत्। वा॒म्। म॒हि॒ऽत्वम्। यु॒वम्। म॒हानि॑। प्र॒थ॒मानि॑। च॒क्र॒थुः॑। यु॒वम्। सूर्य॑म्। वि॒वि॒दथुः॑। यु॒वम्। स्वः॑। विश्वा॑। तमां॑सि। अ॒ह॒त॒म्। नि॒दः॑। च॒॥ १॥

पदार्थः-(**इन्द्रसोमा**) विद्युच्चन्द्रमसौ (**महि**) महत् (**तत्**) (**वाम्**) युवयोः (**महित्वम्**) (**युवम्**) युवाम् (**महानि**) पूजनीयानि (**प्रथमानि**) ब्रह्मचर्यविद्याग्रहणदानादीनि (**चक्रथुः**) कुर्य्यातम् (**युवम्**) युवाम् (**सूर्यम्**) (**विविदथुः**) विन्दतः। अत्र व्यत्ययः (**युवम्**) युवाम् (**स्वः**) सुखम् (**विश्वा**) सर्वाणि (**तमांसि**) रात्रिरिवाऽविद्यादीनि (**अहतम्**) हन्यातम् (**निदः**) निन्दकान् (**च**) पाखण्डिनः॥ १॥

अन्वयः-हे अध्यापकोपदेशकौ! यथेन्द्रासोमा सूर्यं विविदथुस्तथा युवं न्यायार्कं प्राप्नुतं यथैतौ महान्ति कर्माणि कुरुतस्तथा वां तन्महि महित्वमस्ति तथा युवं महानि प्रथमानि चक्रथुः युवं यथैतौ विश्वा तमांसि हतस्तथाऽविद्याऽन्यायजनितानि पापान्यहतं स्वः प्राप्नुतं प्रापयेतं वा निदश्च सततं हन्यातम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे प्रजाजना यथा सूर्यं प्राप्य चन्द्रादयो लोकाः प्रकाशिता भवन्ति तथैवाध्यापकोपदेशकौ सङ्गत्य सर्वे प्रकाशमात्मानो भवन्तु॥ १॥

पदार्थः-हे अध्यापक और उपदेशको! जैसे **(इन्द्रासोमा)** बिजुली और चन्द्रमा **(सूर्यम्)** सूर्य्य को **(विविदथुः)** प्राप्त होते हैं, वैसे **(युवम्)** तुम न्यायरूपी सूर्य्य को प्राप्त होओ जैसे ये बड़े कामों को करते हैं, वैसे **(वाम्)** तुम्हारा **(तत्)** वह **(महि)** महान् **(महित्वम्)** बड़प्पन है और वैसे **(युवम्)** तुम **(महानि)** प्रशंसा योग्य **(प्रथमानि)** ब्रह्मचर्य्य और विद्या ग्रहण और दान आदि कामों को **(चक्रथुः)** करो **(युवम्)** तुम जैसे यह दोनों **(विश्वा)** समस्त **(तमांसि)** रात्रि के समान अविद्या आदि अन्धकारों को नष्ट करते हैं, वैसे अविद्या और अन्याय से उत्पन्न हुए पापों को **(अहतम्)** नष्ट करो **(स्वः)** सुख की प्राप्ति करो वा कराओ **(निदः, च)** और निन्दक तथा पाखण्डियों को निरन्तर नष्ट करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे प्रजाजनो! जैसे सूर्य को प्राप्त होकर चन्द्र आदि लोक प्रकाशित होते हैं, वैसे ही अध्यापक और उपदेशकों का सङ्ग कर सब प्रकाशित आत्मा वाले हों॥ १॥

पुनस्तौ किंवत् किं कुरुत इत्याह॥

फिर वे किसके तुल्य क्या करते हैं, इस विषय को कहते हैं॥

इन्द्रा॑सोमा वा॒सय॑थ उ॒षास॒मुत्सूर्यं॑ नयथो॒ ज्योति॑षा स॒ह।

उप॒ द्यां स्क॒म्भथुः॒ स्कम्भ॑ने॒नाप्र॑थतं पृथि॒वीं मा॒तर॑ं वि॥ २॥

इन्द्रा॑सोमा। वा॒सय॑थः। उ॒षस॑म्। उत्। सूर्य॑म्। न॒य॒थः॒। ज्योति॑षा। स॒ह। उप॑। द्याम्। स्क॒म्भथुः॑। स्कम्भ॑ने॒न। अप्र॑थतम्। पृ॒थि॒वीम्। मा॒तर॑म्। वि॥ २॥

पदार्थः-(**इन्द्रासोमा**) वायुविद्युताविव (**वासयथः**) (**उषासम्**) प्रभातम् (**उत्**) अपि (**सूर्यम्**) (**नयथः**) (**ज्योतिषा**) प्रकाशेन (**सह**) (**उप**) (**द्याम्**) प्रकाशम् (**स्कम्भथुः**) स्कम्भेतम् (**स्कम्भनेन**) (**अप्रथतम्**) प्रथेयाथाम् (**पृथिवीम्**) भूमिम् (**मातरम्**) मातृवद्वर्त्तमानाम् (**वि**)॥ २॥

अन्वयः-हे अध्यापकोपदेशकौ! यथेन्द्रासोमोषासमुत् सूर्यं वासयतस्तथा विद्यान्यायाभ्यां प्रजा युवां वासयथः। यथेमौ ज्योतिषा सह द्यां स्कम्भतस्तथा सद्व्यवहारमुपस्कम्भथुः। यथेमौ स्कम्भनेन मातरमिव वर्त्तमाना पृथिवीं प्रथेते तथैव राज्यं व्यप्रथतं सुखं नयथः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे अध्यापकोपदेशका यथा विद्युत्पवनौ सूर्यादींल्लोकान्निवासयतस्तथैव प्रजाः सूपदेशेन सुखे वासयत॥ २॥

पदार्थः-हे अध्यापक और उपदेशको जैसे **(इन्द्रासोमा)** वायु और बिजुली **(उषासम्)** प्रभातकाल को **(उत्)** और **(सूर्यम्)** सूर्य्यमण्डल को वसाते हैं, वैसे विद्या और न्याय से प्रजाजनों को तुम **(वासयथः)** वसाओ जैसे दोनों **(ज्योतिषा)** ज्योति के **(सह)** साथ **(द्याम्)** प्रकाश को रोकें, वैसे अच्छे व्यवहार को **(उप, स्कम्भयुः)** व्यवहार करने वाले के समीप रोको जैसे यह दोनों **(स्कम्भनेन)** रोकने से **(मातरम्)** माता के समान वर्त्तमान **(पृथिवीम्)** पृथिवी को विस्तारते हैं, वैसे ही राज्य को **(वि, अप्रथतम्)** विस्तारो और सुख को **(नयथः)** प्राप्त करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे अध्यापक और उपदेशको! जैसे बिजुली और पवन सूर्य्य आदि लोकों का निवास कराते हैं, वैसे ही प्रजाजनों को अच्छे उपदेश से सुख में बसाओ॥ २॥

पुनस्ते किंवत् कथं वर्त्तेयातामित्याह॥

फिर वे किसके तुल्य कैसे वर्त्ताव करावें, इस विषय को कहते हैं॥

इन्द्रा॑सोमा॒वहि॒मप॒ः परि॑ष्ठां ह॒थो वृ॒त्रम॑नु॒ वां॒ द्यौर॑मन्यत।

प्राणा॑॑स्यैरयतं न॒दीना॒मा स॑मु॒द्राणि॑ पप्रथुः॒ पुरू॑णि॥ ३॥

इन्द्रा॑सोमौ। अहि॑म्। अ॒पः। परि॑ऽस्थाम्। ह॒थः॒। वृ॒त्रम्। अनु॑। वा॒म्। द्यौः। अ॒म॒न्य॒त। प्र। अर्णां॑सि। ऐ॒र॒य॒त॒म्। न॒दीना॑म्। आ। स॒मु॒द्राणि॑। प॒प्र॒थुः॒। पुरू॑णि॥ ३॥

पदार्थः-(**इन्द्रासोमौ**) विद्युन्मरुतौ (**अहिम्**) मेघम् (**अपः**) जलानि (**परिष्ठाम्**) यः परितस्तिष्ठति तम् (**हथः**) (**वृत्रम्**) सूर्यावरकम् (**अनु**) (**वाम्**) युवयोर्मध्ये (**द्यौः**) प्रकाश इव (**अमन्यत**) मन्यते (**प्र**) (**अर्णांसि**) उदकानि। **अर्ण इत्युदकनाम।** (निघं०१.१२) (**ऐरयतम्**) प्रापयतम् (**नदीनाम्**) (**आ**) (**समुद्राणि**) सम्यग्द्रवन्त्यापो येषु स्थानेषु तानि (**पप्रथुः**) व्याप्नुतः। अत्र सर्वत्र पुरुषव्यत्ययः (**पुरूणि**) बहूनि॥३॥

अन्वयः-हे अध्यापकोपदेशकौ! युवां यथेन्द्रासोमौ परिष्ठां वृत्रमहिं हथोऽप आपप्रथुस्तथैवाऽविद्यां हत्वा विद्यां प्रथयतम्। यथेमौ नदीनां पुरूणि समुद्राण्यर्णांसीरयतस्तथा शास्त्राणां मध्ये मनुष्यान्तःकरणानि प्रैरयतमेवं वां युवयोरेको द्यौरिवामन्यत द्वितीयस्तमनुवर्त्तेत॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे अध्यापकोपदेशका! यथा वायुविद्युतौ मेघं हत्वोदकं वर्षयतस्तथा कुशिक्षां विनाश्य सुशिक्षावृष्टिं कुर्वन्तु॥३॥

पदार्थः-हे अध्यापक और उपदेशको! तुम दोनों जैसे (**इन्द्रासोमौ**) बिजुली और पवन (**परिष्ठाम्**) सब ओर से स्थित होने वाले (**वृत्रम्**) सूर्यावरक (**अहिम्**) मेघ को (**हथः**) छिन्न-भिन्न करते और (**अपः**) जलों को (**आ, पप्रथुः**) व्याप्त होते हैं, वैसे अविद्या को नष्ट-भ्रष्ट कर विद्या को विस्तारो जैसे ये दोनों (**नदीनाम्**) नदियों के (**पुरूणि**) बहुत (**समुद्राणि**) उन स्थानों को जिनमें अच्छे प्रकार जल तरङ्गें लेते हैं तथा (**अर्णांसि**) जलों को प्रेरणा देते हैं, वैसे शास्त्रों के बीच मनुष्यों के अन्तःकरणों को (**प्र, ऐरयतम्**) प्रेरित करो ऐसे (**वाम्**) तुम दोनों के बीच एक (**द्यौः**) प्रकाश के समान (**अमन्यत**) मानता है, दूसरा (**अनु**) तदनुगामी होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे अध्यापक और उपदेशको! जैसे वायु और बिजुली मेघ को नष्ट-भ्रष्ट कर जल को वर्षाते हैं, वैसे कुत्सित शिक्षा को विनष्ट कर अच्छी शिक्षा की वर्षा करो॥३॥

पुनस्तौ किंवत् किं कुर्यातामित्याह॥

फिर वे किसके तुल्य क्या करें, इस विषय को कहते हैं॥

इन्द्रा॑सोमा॒ प॒क्वमा॒मास्व॒न्तर्नि गवा॒मिद् द॑धथु॒र्वृक्ष॑णा॒सु।

ज॒गृ॒भथु॒रन॑पिनद्धमासु॒ रुश॑च्चि॒त्रासु॒ जग॑तीष्व॒न्तः॥४॥

इन्द्रा॑सोमा। प॒क्वम्। आ॒मासु॑। अ॒न्तः। नि। गवा॑म्। इत्। द॒ध॒थुः॒। वृ॒क्षणा॑सु। ज॒गृ॒भथुः॑। अन॑पिऽनद्धम्। आ॒सु॒। रुश॑त्। चि॒त्रासु॑। जग॑तीषु। अ॒न्तरिति॑॥४॥

पदार्थः-(**इन्द्रसोमा**) वायुविद्युतौ (**पक्वम्**) (**आमासु**) अपक्वासु ओषधीषु (**अन्तः**) मध्ये (**नि**) (**गवाम्**) किरणानाम् (**इत्**) एव (**दधथुः**) धत्तः (**वक्षणासु**) नदीषु (**जगृभथुः**) गृह्णीतः। अत्र सर्वत्र

व्यत्यय:। **(अनपिनद्धम्)** अनाच्छादितम् **(आसु)** **(रुशत्)** सुरूपम्। **(चित्रासु)** अद्भुतासु **(जगतीषु)** सृष्टिषु **(अन्त:)** मध्ये॥४॥

अन्वय:-हे अध्यापकोपदेशकौ! युवां यथेन्द्रसोमा आमास्वन्त: पक्वं नि दधथुर्गवामिदासु वक्षणास्वनपिनद्धं जगृभथुरासु चित्रासु जगतीष्वन्तो रुशद्दधथस्तथा युवां वर्त्तेयाथाम्॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये विद्युत्सोमवत्सर्वे दृढं ज्ञानं संस्थाप्य नदीप्रवाहवदग्रे चालयन्ति ते जगति कल्याणकरा भवन्ति॥४॥

पदार्थ:-हे अध्यापक और उपदेशको! तुम दोनों जैसे **(इन्द्रासोमा)** पवन और बिजुली **(आमासु)** न पकी हुई सामग्रियों के **(अन्त:)** बीच **(पक्वम्)** पाक को **(नि, दधथु:)** स्थापन करते हैं और **(गवाम्)** किरणों के बीच **(इत्)** निश्चित तथा **(आसु)** इन **(वक्षणासु)** नदियों में **(अनपिनद्धम्)** खुला हुआ **(जगृभथु:)** ग्रहण करते हैं तथा इन **(चित्रासु)** अद्भुत **(जगतीषु)** सृष्टियों के **(अन्त:)** बीच **(रुशत्)** सुरूप को धारण करते हैं, वैसे तुम वर्तो॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बिजुली और सोम के समान सब में दृढ़ ज्ञान स्थापन कर नदी के प्रवाह के तुल्य आगे चलाते हैं, वे संसार में कल्याण करने वाले होते हैं॥४॥

पुनस्तौ किंवत् किं कुर्यातामित्याह॥

फिर वे किसके तुल्य क्या करें, इस विषय को कहते हैं॥

इन्द्रा॑सोमा यु॒वम॒ङ्ग तरु॑त्रमपत्य॒साचं॒ श्रुत्यं॑ रराथे।

यु॒वं शुष्मं॒ नर्यं॑ चर्ष॒णिभ्य॒: सं वि॑व्यथु॒: पृत॑नाषाह॒मु॒ग्रा॥५॥१६॥

इन्द्रा॑सोमा। यु॒वम्। अ॒ङ्ग। तरु॑त्रम्। अ॒प॒त्य॒ऽसाच॑म्। श्रुत्य॑म्। र॒रा॒थे॒ इति॑। यु॒वम्। शुष्म॑म्। नर्य॑म्। च॒र्ष॒णि॒ऽभ्य॑:। सम्। वि॒व्य॒थु॒:। पृ॒त॒ना॒ऽसह॑म्। उ॒ग्रा॥५॥

पदार्थ:-**(इन्द्रासोमा)** वायुविद्युद्वर्त्तमानौ **(युवम्)** युवाम् **(अङ्ग)** मित्र **(तरुत्रम्)** दु:खात्तारकम् **(अपत्यसाचम्)** यदपत्ये सचति व्याप्नोति तत् **(श्रुत्यम्)** श्रुतिषु श्रवणोषु साधु: **(ररा॒थे)** रातम् **(युवम्)** **(शुष्मम्)** बलम् **(नर्यम्)** नृषु साधु: **(चर्षणिभ्य:)** मनुष्येभ्य: **(सम्)** **(विव्यथु:)** सन्तनुतं वेष्टयतम् **(पृतनाषाहम्)** य: पृतना: सेना: सहते तम् **(उग्रा)** उग्रौ तेजस्विनौ॥५॥

अन्वय:-हे अङ्ग अध्यापकोपदेशकौ! युविमिन्द्रासोमावत्तरुत्रमपत्यसाचं श्रुत्यं रराथे युवं चर्षणिभ्य: उग्रा सन्तौ पृतनाषाहं नर्यं शुष्मं सं विव्यथु:॥५॥

भावार्थ:-हे अध्यापकोपदेशका! भवन्तो वायुविद्युद्वत्सर्वत्रानुषङ्गिनस्सन्त उत्तमान्यपत्यान्युत्पाद्य मनुष्यहितकरं शरीरात्मबलं जनयन्तु येन शत्रुसेनां सोढुं शक्नुयुरिति॥५॥

अत्रेन्द्रसोमाध्यापकोपदेशककृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्विसप्ततितमं सूक्तं षोडशो वर्गश्च समाप्त:॥

पदार्थः-हे **(अङ्ग)** हे मित्र अध्यापक और उपदेशक! **(युवम्)** तुम दोनों **(इन्द्रासोमा)** वायु और बिजुली के समान वर्त्तमान **(तरुत्रम्)** दुःख से तारने और **(अपत्यसाचम्)** सन्तान के बीच व्याप्त होने वाले **(श्रुत्यम्)** श्रवणों में उत्तम ज्ञान को **(रराथे)** देओ और **(युवम्)** तुम दोनों **(चर्षणिभ्यः)** मनुष्यों के लिये **(उग्रा)** तेजस्वी होते हुए **(पृतनाषाहम्)** सेनाओं को सहने वाले **(नर्यम्)** मनुष्यों में उत्तम **(शुष्मम्)** बल को **(सम्, विव्यथुः)** अच्छे प्रकार युक्त करो॥५॥

भावार्थः-हे अध्यापक वा उपदेशको! आप लोग पवन और बिजुली के समान सर्वत्र अनुकूलता से सङ्ग वाले होते हुए उत्तम सन्तानों को उत्पन्न कर मनुष्यों के हित करने वाले शरीर और आत्मा के बल को उत्पन्न करें, जिससे शत्रुओं की सेना को सह सकें॥५॥

इस सूक्त में इन्द्र, सोम, अध्यापक और उपदेशकों के काम का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह बहत्तरवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ त्र्यृचस्य त्रिसप्ततितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्यं ऋषिः। बृहस्पतिर्देवता। १, २ त्रिष्टुप्।
३ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा किंवत् कीदृशः स्यादित्याह॥

अब तीन ऋचावाले तिहत्तरवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा किसके तुल्य कैसा हो, इस विषय को कहते हैं॥

यो अद्रिभित् प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान्।
द्विबर्हज्मा प्राधर्मसत्पिता न आ रोदसी वृषभो रोरवीति॥ १॥

यः। अद्रिऽभित्। प्रथमऽजाः। ऋतऽवा। बृहस्पतिः। आङ्गिरसः। हविष्मान्। द्विबर्हऽज्मा। प्राघर्मऽसत्। पिता। नः। आ। रोदसी इति। वृषभः। रोरवीति॥ १॥

पदार्थः-(**यः**) (**अद्रिभित्**) मेघच्छेत्ता (**प्रथमजाः**) यः प्रथमं जातः (**ऋतावा**) य ऋतं जलं संवनति भजति सः (**बृहस्पतिः**) बृहतां पृथिव्यादीनां पालकः (**आङ्गिरसः**) योऽङ्गिरसां वायुविद्युतामयमुत्पन्नः (**हविष्मान्**) हवींषि हुतानि द्रव्याणि विद्यन्ते यस्मिन् (**द्विबर्हज्मा**) यो द्वाभ्यां बृंहते स द्विबर्हस्तेन द्विबर्हेण युक्ता ज्मा भूमिर्यस्य (**प्राघर्मसत्**) यः प्रकृष्टं समन्ताद् घर्मं प्रतापं सनति सः (**पिता**) पालकः (**नः**) अस्माकम् (**आ**) (**रोदसी**) द्यावापृथिव्यौ (**वृषभः**) वर्षकः (**रोरवीति**) विद्युदादिना भृशं शब्दं करोति॥ १॥

अन्वयः-हे राजन्! यः प्रथमजा अद्रिभिदृतावा बृहस्पतिराङ्गिरसो हविष्मान् द्विबर्हज्मा प्राघर्मसन्नः पितेव वृषभोऽद्रिभिद् रोदसी आ रोरवीति तद्वत्त्वं भव॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा मेघस्य सूर्यइव शत्रूणां विदारको ज्येष्ठो महतां धर्मात्मनां पालकः प्रजावान् पृथिव्यां सुखवर्षको भूत्वा प्रजासु न्यायं भृशमुपदिशेत्स एव पृथिवीवत् क्षमाशीलः प्रतापवान् प्रजासु पितृवद्वर्त्तेत॥ १॥

पदार्थः-हे राजन्! (**यः**) जो (**प्रथमजाः**) प्रथम उत्पन्न हुआ (**अद्रिभित्**) मेघों का विदीर्ण करने और (**ऋतावा**) जल को अच्छे प्रकार सेवने वाला (**बृहस्पतिः**) पृथिवी आदि का रक्षक और (**आङ्गिरसः**) वायु और बिजुलियों में उत्पन्न हुआ (**हविष्मान्**) जिसमें हवि होमे हुए विद्यमान जो (**द्विबर्हज्मा**) दो से बढ़ता है उससे युक्त भूमि जिसकी वह (**प्राघर्मसत्**) प्रताप का सेवने वाला (**नः**) हमारा (**पिता**) पालने वाले के समान (**वृषभः**) वर्षा कराने वाला मेघों को छिन्न-भिन्न करने वाला (**रोदसी**) आकाश और पृथिवी को प्राप्त हो (**आ, रोरवीति**) बिजुली आदि के योग से सब ओर से शब्द करता है, उसके तुल्य तुम होओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा, मेघ का सूर्य जैसे शत्रुओं का विदीर्ण करने वाला, ज्येष्ठ, महात्मा, धर्मात्मा जनों की पालना करने वाला, प्रजावान्, पृथिवी पर सुख वर्षानेहारा होकर प्रजाओं में न्याय का निरन्तर उपदेश करे, वही पृथिवी के तुल्य क्षमाशील और प्रतापवान् तथा प्रजाजनों में पिता के समान वर्त्ते॥१॥

पुनस्तेन राज्ञाः कीदृशाः सेनाधिकारिणः कार्या इत्याह॥

फिर उस राजा को कैसे सेना के अधिकारी करने चाहियें, इस विषय को कहते हैं॥

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार।
घ्नन् वृत्राणि वि पुरो ददरीति जयञ्छत्रूँरमित्रान् पृत्सु साहन्॥२॥

जनाय। चित्। यः। ईवते। ऊँ इति। लोकम्। बृहस्पतिः। देवऽहूतौ। चकार। घ्नन्। वृत्राणि। वि। पुरः। ददरीति। जयन्। शत्रून्। अमित्रान्। पृत्ऽसु। सहन्॥२॥

पदार्थः-(**जनाय**) (**चित्**) अपि (**यः**) (**ईवते**) उपगताय (**उ**) (**लोकम्**) द्रष्टव्यसुखं स्थानं वा (**बृहस्पतिः**) बृहतां पालकः सूर्यलोक इव (**देवहूतौ**) देवानामाह्वाने (**चकार**) करोति (**घ्नन्**) नाशयन् (**वृत्राणि**) धनानि (**वि**) विशेषेण (**पुरः**) शत्रूणां नगराणि (**ददरीति**) भृशं विदृणाति (**जयन्**) उत्कर्षं प्राप्तुमिच्छन् (**शत्रून्**) (**अमित्रान्**) विरोधिन उदासीनान् (**पृत्सु**) स-ामे (**साहन्**)॥२॥

अन्वयः-हे मनुष्या! यो देवहूतौ बृहस्पतिरिव ईवते जनाय लोकं प्रकाशितं चकार पृत्सु साहन्नमित्राञ्जयञ्छत्रून् घ्नन् वृत्राणि प्राप्नुवन् पुरो वि ददरीति स उ चित्सेनापतिर्भवितुमर्हति॥२॥

भावार्थः-हे राजन्! ये न्यायेन प्रजापालनाय प्रसन्नाः पूर्णशरीरात्मबलयुक्ता वीरा विद्वांसः स्युस्ते सेनापतयो भवन्तु यतः शत्रूञ्जेतुं तत्सेनां सोढुं विदर्त्तुं विजयं धनं च प्राप्तुं शक्नुयुः॥२॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**देवहूतौ**) विद्वानों के बुलाने में (**बृहस्पतिः**) बड़ों की पालना करने वाले सूर्यलोक के समान (**ईवते**) समीप आने वाले (**जनाय**) मनुष्य के लिये (**लोकम्**) देखने योग्य सुख वा स्थान को प्रकाशित (**चकार**) करता है तथा (**पृत्सु**) स-ामों में (**साहन्**) सहन करता हुआ (**अमित्रान्**) विरोधी उदासीन जनों को (**जयन्**) जीतता और (**शत्रून्**) शत्रुओं को (**घ्नन्**) मारता हुआ (**वृत्राणि**) धनों को प्राप्त होता हुआ (**पुरः**) शत्रुओं के नगरों को (**वि, ददरीति**) निरन्तर विदीर्ण करता है वह (**उ, चित्**) ही सेनापति होने योग्य हैं॥२॥

भावार्थः-हे राजन्! जो न्याय से प्रजा पालने के लिये प्रसन्न, पूर्णशरीरात्मबलयुक्त वीर, विद्वान् होवें, वे सेनापति हों; जिससे शत्रुओं के जीतने और उनकी सेना के सहने और उसे छिन्न-भिन्न करने तथा विजय और धन को पाने को समर्थ हों॥२॥

पुनः स कीदृशो भवेदित्याह॥

फिर वह कैसा हो इस विषय को कहते हैं॥

बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः।

अपः सिषासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः॥ ३॥ १७॥

बृहस्पतिः। सम्। अजयत्। वसूनि। महः। व्रजान्। गोऽमतः। देवः। एषः। अपः। सिसासन्। स्वः। अप्रतिऽइतः। बृहस्पतिः। हन्ति। अमित्रम्। अर्कैः॥ ३॥

पदार्थः-(**बृहस्पतिः**) सूर्य इव बृहत्या वेदवाचः पालकः (**सम्**) सम्यक् (**अजयत्**) जयति (**वसूनि**) धनानि (**महान्**) सन् (**व्रजान्**) मेघान् (**गोमतः**) बहुकिरणयुक्तान् (**देवः**) देदीप्यमानः (**एषः**) प्रत्यक्षः (**अपः**) जलानि (**सिषासन्**) कर्मसमाप्तिं कर्त्तुमिच्छन् (**स्वः**) अन्तरिक्षमिवाक्षयं सुखम् (**अप्रतीतः**) यः शत्रुभिरप्रीयमानः (**बृहस्पतिः**) बृहतो राज्यस्य यथावद्रक्षकः (**हन्ति**) (**अमित्रम्**) शत्रुम् (**अर्कैः**) वज्रादिभिः। **अर्क इति वज्रनाम।** (निघं०२.२०)॥ ३॥

अन्वयः-हे मनुष्या! यथा महो देव एषो बृहस्पतिर्गोमतो व्रजान् हत्वाऽपो वर्षयित्वा जगत्पालयति तथा शत्रुभिरप्रतीतो बृहस्पती राजाऽर्कैः प्रजाः सिषासन्नमित्रं हन्ति शत्रून् समजयद्वसूनि प्राप्नोति स्वर्जनयति॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सूर्यवद्विद्याविनयसुसहायैः प्रकाशमानः प्रजाः पालयन् सर्वेभ्योऽभयं ददन् दुष्टकर्मकारिणो निवारयति स एवाऽत्र राजसु महान् राजा जायत इति॥ ३॥

अत्र बृहस्पतिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिसप्ततितमं सूक्तं सप्तदशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! जैसे (**महः**) महान् (**देवः**) देदीप्यमान (**एषः**) यह (**बृहस्पतिः**) सूर्य के समान वेदवाणी को पालने वाला (**गोमतः**) बहुत किरणों से युक्त (**व्रजान्**) मेघों को छिन्न-भिन्न कर (**अपः**) जलों को वर्षाय जगत् की पालना करता है, वैसे शत्रुओं से (**अप्रतीतः**) न प्रतीत को प्राप्त होता हुआ (**बृहस्पतिः**) बड़े राज्य की यथावत् रक्षा करने वाला राजा (**अर्कैः**) वज्र आदि के साथ प्रजाजनों के (**सिषासन्**) काम पूरे करने की इच्छा कर (**अमित्रम्**) शत्रु को (**हन्ति**) मारता है तथा शत्रुओं को (**सम्, अजयत्**) अच्छे प्रकार जीतता है तथा (**वसूनि**) धनों को प्राप्त होता और (**स्वः**) अन्तरिक्ष के समान अक्षय सुख को उत्पन्न करता है॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सूर्य के समान विद्या, विनय और अच्छे सहाय से प्रकाशमान, प्रजाजनों की पालना करता और सब के लिये अभयदान देता हुआ दुष्टकर्म करने वालों की निवृत्ति करता है, वही यहाँ राजाओं में महान् राजा होता है॥ ३॥

इस सूक्त में बृहस्पति के गुणों का वर्णन करने होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह तिहत्तरवाँ सूक्त और सत्रहवाँ वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथ चतुर्ऋचस्य चतुःसप्ततितमस्य सूक्तस्य भरद्वाजो बार्हस्पत्य ऋषिः। सोमारुद्रौ देवते। १, २, ४ त्रिष्टुप्। ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा वैद्यश्च कीदृशौ वरौ स्यातामित्याह॥

अब चार ऋचा वाले चौहत्तरवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा और वैद्य कैसे श्रेष्ठ हों, इस विषय को कहते हैं॥

सोमा॑रुद्रा धा॒रये॑थामसु॒र्यं१॑प्र वा॑मि॒ष्टयोऽर॑मश्नुवन्तु।
दमे॑दमे स॒प्त रत्ना॒ दधा॑ना॒ शं नो॑ भूतं द्वि॒पदे॒ शं च॑तु॒ष्पदे॥ १॥

सोमा॑रुद्रा। धा॒रये॑थाम्। अ॒सु॒र्य॑म्। प्र। वा॒म्। इ॒ष्टयः॑। अर॑म्। अ॒श्नु॒व॒न्तु॒। दमे॑ऽदमे। स॒प्त। रत्ना॑। दधा॑ना। शम्। नः॒। भू॒तम्। द्वि॒ऽपदे॑। शम्। च॒तुः॒ऽपदे॥ १॥

पदार्थः-(**सोमारुद्रा**) चन्द्रप्राणाविव राजवैद्यौ (**धारयेथाम्**) (**असुर्यम्**) असुरस्य मेघस्येदम् (**प्र**) (**वाम्**) युवाम् (**इष्टयः**) इष्टप्राप्तयः (**अरम्**) अलम् (**अश्नुवन्तु**) प्राप्नुवन्तु (**दमेदमे**) गृहेगृहे (**सप्त**) एतत्सङ्ख्याकानि (**रत्ना**) रमणीयानि हीरकादीनि (**दधाना**) धरन्तौ (**शम्**) सुखकारिणौ (**नः**) अस्माकम् (**भूतम्**) भवेतम् (**द्विपदे**) मनुष्याद्याय (**शम्**) सुखकर्तारौ (**चतुष्पदे**) गवाद्याय॥ १॥

अन्वयः-हे राजवैद्यौ सोमारुद्रेव! युवामसुर्यं धारयेथां यतो वामिष्टयोऽरं प्राश्नुवन्तु दमेदमे सप्त रत्ना दधाना सन्तौ नो द्विपदे शं भूतं चतुष्पदे शं भूतम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो राजा चन्द्रवद्यश्च वैद्यः प्राणवत्सर्वान्निर्भयान्नीरोगान् कुर्यातां तौ सर्वाणि सुखानि प्राप्नुतः यौ प्रजाया गृहे गृहे धनमारोग्यं च वर्धयतस्तौ द्विपद्भिश्चितुष्पद्भिश्च बहूनि सुखानि प्राप्नुतः॥ १॥

पदार्थः-हे (**सोमारुद्रा**) चन्द्रमा और प्राण के तुल्य राजा और वैद्यजनो! तुम दोनों (**असुर्यम्**) मेघ के इस कर्म को (**धारयेथाम्**) धारण करो जिससे (**वाम्**) तुम को (**इष्टयः**) इच्छाओं की प्राप्तियां (**अरम्**) पूरी (**प्र, अश्नुवन्तु**) मिलें तथा (**दमेदमे**) घर-घर में (**सप्त**) सात (**रत्ना**) रमणीय हीरा आदि को (**दधाना**) धारण किये हुए (**नः**) हमारे (**द्विपदे**) दो पग वाले मनुष्य आदि के लिये (**शम्**) सुख करने वाले (**भूतम्**) होओ और (**चतुष्पदे**) गौ आदि चौपाये जीवों के लिये (**शम्**) सुख करने वाले होओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो राजा चन्द्रमा के तुल्य और जो वैद्य प्राण के तुल्य सब को निर्भय और नीरोग करें, वे सब सुखों को प्राप्त होते हैं, जो प्रजा के घर-घर में धन और आरोग्य को बढ़ावें, वे द्विपग वालों और चार पग वालों से बहुत सुखों को प्राप्त होते हैं॥ १॥

पुनस्तौ किं निवार्य्य किं जनयेतामित्याह॥

फिर वे किसकों निवारिके क्या उत्पन्न करें, इस विषय को कहते हैं॥

सोमारुद्रा वि बृहतं विषूचीममीवा या नो गयमाविवेश।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु॥ २॥

सोमारुद्रा। वि। वृहतम्। विषूचीम्। अमीवा। या। नः। गयम्। आऽविवेश। आरे। बाधेथाम्। निःऽऋतिम्। पराचैः। अस्मे इति। भद्रा। सौश्रवसानि। सन्तु॥ २॥

पदार्थः-(**सोमारुद्रा**) ओषधीप्राणवत्सुखसम्पादकौ (**वि**) (**वृहतम्**) छेदयतम् (**विषूचीम्**) विषूच्यादिरोगम् (**अमीवा**) रोगः (**या**) (**नः**) अस्माकम् (**गयम्**) गृहमपत्यं वा (**आविवेश**) आविशति (**आरे**) दूरे (**बाधेथाम्**) (**निर्ऋतिम्**) दुःखप्रदां कुनीतिम् (**पराचैः**) पराङ्मुखैः (**अस्मे**) अस्मासु (**भद्रा**) भजनीयानि (**सौश्रवसानि**) सुश्रवस्सु भवान्यन्नादीनि (**सन्तु**)॥ २॥

अन्वयः-हे सोमारुद्रेव राजवैद्यौ! युवां या अमीवा नो गयमाविवेश तां विषूचीं वि वृहतं पराचैर्निर्ऋतिमारे बाधेथां यतोऽस्मे भद्रा सौश्रवसानि सन्तु॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा वैद्यवरश्च रोगाच्छरीरप्रवेशात् प्रागेव दूरीकुरुतः कुनीतिं कुपथ्यं च पुरस्तादेव दूरीकुरुतस्तयोः पुरुषार्थेन सर्वे मनुष्या धनधान्याऽऽरोग्यादीनि पुष्कलानि प्राप्नुवन्ति॥ २॥

पदार्थः-हे (**सोमरुद्रा**) ओषधी और प्राणों के समान सुख उत्पन्न करने वाला राजा और वैद्य जनो! तुम (**या**) जो (**अमीवा**) रोग (**नः**) हमारे (**गयम्**) घर वा सन्तान को (**आविवेश**) प्रवेश करता है उस (**विषूचीम्**) विषूच्यादि को (**वि, वृहतम्**) छिन्न-भिन्न करो तथा (**पराचैः**) पराजित हुए दुष्टों की (**निर्ऋतिम्**) दुःख देने वाली कुनीति को (**आरे**) दूर (**बाधेथाम्**) हटाओ, जिस कारण (**अस्मे**) हम लोगों में (**भद्रा**) सेवन करने योग्य (**सौश्रवसानि**) उत्तम अन्नादि पदार्थों में सिद्ध अन्न (**सन्तु**) हों॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा और वैद्यवर रोगों को शरीर के प्रवेश से पहिले ही दूर करते हैं तथा कुनीति और कुपथ्य को भी पहिले दूर करते हैं, उनके पुरुषार्थ से सब मनुष्य बहुत धन-धान्य और आरोग्यपनों को प्राप्त होते हैं॥ २॥

पुनस्तौ किं कुर्यातामित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत्॥ ३॥

सोमारुद्रा। युवम्। एतानि। अस्मे इति। विश्वा। तनूषु। भेषजानि। धत्तम्। अव। स्यतम्। मुञ्चतम्। यत्। नः। अस्ति। तनूषु। बद्धम्। कृतम्। एनः। अस्मत्॥ ३॥

पदार्थः-(**सोमारुद्रा**) यज्ञशोधितौ सोमलतावायू इव राजवैद्यौ (**युवम्**) (**एतानि**) विषूच्यादिनिवारकानि (**अस्मे**) अस्माकम् (**विश्वा**) सर्वाणि (**तनूषु**) शरीरेषु (**भेषजानि**) औषधानि (**धत्तम्**)

(अव) **(स्यतम्)** तनूकुरुतम् **(मुञ्चतम्)** मुञ्चेताम् **(यत्)** **(नः)** अस्माकम् **(अस्ति)** **(तनूषु)** शरीरेषु **(बद्धम्)** लग्नम् **(कृतम्)** **(एनः)** कुपथ्यादिकमपराधं वा **(अस्मत्)** अस्माकं सकाशात्॥३॥

अन्वयः-हे सोमारुद्रेव राजवैद्यौ! युवं यन्नस्तनूषु कृतं बद्धमेनोऽस्ति तदस्मन्मुञ्च तमस्माकं रोगानव स्यतमस्मे तनूषु विश्वैतानि भेषजानि धत्तम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! भवान् वैद्यविद्यां प्रचार्य्यास्माकं शरीराण्यरोगानि कृत्वा पुरुषार्थे प्रवेशयित्वा दुःखानि वियोज्य सद्वैद्यान् सत्कुर्यात्॥३॥

पदार्थः-हे **(सोमारुद्रा)** यज्ञ से शुद्ध किये हुए सोमलता और वायु के समान राजा और वैद्यो! **(युवम्)** तुम **(यत्)** जो **(नः)** हमारे **(तनूषु)** शरीरों में **(कृतम्)** किया हुआ और **(बद्धम्)** लगा हुआ **(एनः)** कुपथ्यादि या अपराध **(अस्ति)** है उसे **(अस्मत्)** हम से **(मुञ्चतम्)** छुड़ाओ और हमारे रोगों को **(अव स्यतम्)** नष्ट करो तथा **(अस्मे)** हमारे **(तनूषु)** शरीरों में **(विश्वा)** समस्त **(एतानि)** ये **(भेषजानि)** औषधें **(धत्तम्)** स्थापन करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! आप वैद्यविद्या का प्रचार कर हमारे शरीरों को नीरोग कर और पुरुषार्थ में प्रवेश करके दुःखों को अलग कर अच्छे वैद्यों का सत्कार करो॥३॥

पुनस्तौ किं कुर्य्यातामित्याह॥

फिर वे क्या करें, इस विषय को कहते हैं॥

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः।
प्र नो मुञ्चतं वरुणस्य पाशाद् गोपायतं नः समुनस्यमाना॥४॥१८॥

तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृळतम्। नः। प्र। नः। मुञ्चतम्। वरुणस्य। पाशात्। गोपायतम्। नः। सुऽमनस्यमाना॥४॥

पदार्थः-**(तिग्मायुधौ)** तिग्मानि तेजस्वीन्यायुधानि ययोस्तौ **(तिग्महेती)** तिग्मस्तीव्रो हेतिर्वज्रो ययोस्तौ **(सुशेवौ)** सुसुखौ **(सोमारुद्रौ)** शुद्धावोषधीप्राणाविव **(इह)** अस्मिन् संसारे **(सु)** सुष्ठु **(मृळतम्)** सुखयतम् **(नः)** अस्मान् **(प्र)** **(नः)** अस्मान् **(मुञ्चतम्)** **(वरुणस्य)** उदानस्येव बलवतो रोगस्य **(पाशात्)** बन्धनात् **(गोपायतम्)** **(नः)** अस्मान् **(सुमनस्यमाना)** सुष्ठु विचारयन्तौ॥४॥

अन्वयः-हे सोमारुद्राविव वर्त्तमानौ तिग्मायुधौ तिग्महेती सुशेवौ वैद्यराजानौ! युवामिह नः सु मृळतं नोऽस्मान् वरुणस्य पाशात्प्र मुञ्चतं सुमनस्यमाना सन्तौ नः सततं गोपायतम्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा महौषधिबहिःप्राणौ सर्वान् सदा पालयतस्तथोत्तमौ राजवैद्यौ सर्वेभ्य उपद्रवरोगेभ्यो निरन्तरं रक्षत इति॥४॥

अत्रौषधिप्राणवद्वैद्यराजयोः कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतु:सप्ततितमं सूक्तमष्टादशो वर्गश्च समाप्त:॥

पदार्थ:-हे **(सोमारुद्रौ)** शुद्ध औषधी और प्राणों के समान वर्त्तमान **(तिग्मायुधौ)** तेज आयुधों तथा **(तिग्महेती)** पैने वज्र वालो **(सुशेवौ)** अच्छे सुखयुक्त वैद्य और राजजनो! तुम **(इह)** इस संसार में **(न:)** हम लोगों को **(सु, मृळतम्)** अच्छे प्रकार सुखी करो तथा **(न:)** हम लोगों को **(वरुणस्य)** उदान के समान बलवान् रोग के **(पाशात्)** बन्धन से **(प्र, मुञ्चतम्)** छुड़ाओ और **(सुमनस्यमाना)** सुन्दर विचारवान् होते हुए **(न:)** हम लोगों की निरन्तर **(गोपायतम्)** रक्षा करो॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे महौषाधि और बहि: प्राण वायु सबकी सदा पालना करते हैं, वैसे उत्तम राजा और वैद्यजन समस्त उपद्रव और रोगों से निरन्तर रक्षा करते हैं॥४॥ इस सूक्त में ओषधि और प्राण के समान वैद्य और राजा के कामों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चौहत्तरवां सूक्त और अठारहवां वर्ग समाप्त हुआ॥

॥ओ३म्॥

अथैकोनविंशत्यृचस्य पञ्चसप्ततितमस्य सूक्तस्य पायुर्भारद्वाज ऋषिः। १ वर्म। २ धनुः। ३ ज्या। ४ आर्त्नी। ५ इषुधिः। ६[१] सारथिः। ६[२] रश्मयः। ७ अश्वाः। ८ रथः। ९ रथगोपाः। १० लिङ्गोक्ता देवताः। ११, १२, १५, १६ इषवः। १३ प्रतोदः। १४ हस्तघ्नः। १७-१९ लिङ्गोक्ता देवताः स- ामाशिषः (१७ युद्धभूमिर्ब्रह्मणस्पतिरदितिश्च। १८ कवचसोमवरुणाः। १९ देवा ब्रह्म च)॥ १, ३ निचृत्त्रिष्टुप्। २, ४, ५, ७, ८, ९, ११, १४, १८ त्रिष्टुप्छन्दः। धैवतः स्वरः। ६ जगती। १० विराड् जगती छन्दः। निषादः स्वरः। १२, १९, विराडनुष्टुप्। १५ निचृदनुष्टुप्। १६ अनुष्टुप् छन्दः। गान्धारः स्वरः। १३ स्वराडुष्णिक्छन्दः। ऋषभः स्वरः। १७ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ शूरवीराः किं धृत्वा किं किं कुर्युरित्याह॥

अब उन्नीस ऋचावाले पचहत्तरवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में शूरवीर किसे धारण कर क्या-क्या करें, इस विषय को कहते हैं॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु॥ १॥

जीमूतस्यऽइव। भवति। प्रतीकम्। यत्। वर्मी। याति। सऽमदाम्। उपऽस्थे अनाविद्धया। तन्वा। जय। त्वम्। सः। त्वा। वर्मणः। महिमा। पिपर्तु॥ १॥

पदार्थः-(जीमूतस्येव) मेघस्येव **(भवति) (प्रतीकम्)** प्रतीतिकरम् **(यत्)** यः **(वर्मी)** कवचधारी **(याति)** गच्छति **(समदाम्)** मदैस्सह वर्त्तन्ते येषु तेषां स- ामाणाम् **(उपस्थे)** समीपे **(अनाविद्धया)** शस्त्रास्त्ररहितया **(तन्वा)** शरीरेण **(जयः) (त्वम्) (सः) (त्वा)** त्वाम् **(वर्मणः)** कवचस्य **(महिमा)** महत्त्वम् **(पिपर्तु)** पालयतु॥ १॥

अन्वयः-हे वीर! यज्जीमतूस्येव प्रतीकं वर्म भवति तेन वर्मी भूत्वा समदामुपस्थे याति अनाविद्धया तन्वा त्वं शत्रूञ्जय स वर्मणो महिमा त्वा पिपर्त्तु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। ये मेघवत्सुन्दराणि कवचानि धृत्वा युद्धं कुर्वन्ति तेऽक्षतशरीराः शत्रूञ्जेतुं शक्नुवन्ति येन येन प्रकारेण शरीरे शल्यानि न प्राप्नुयुस्तं तमुपायं वीराः सदानुतिष्ठन्तु॥ १॥

पदार्थः-हे वीर! **(यत्)** जो **(जीमूतस्येव)** मेघ के समान **(प्रतीकम्)** प्रतीति करने वाला वर्म **(भवति)** होता है उससे **(वर्मी)** कवचधारी होकर **(समदाम्)** अहङ्कारों के साथ वर्त्तमान स- ामों के **(उपस्थे)** समीप **(याति)** जाता है तथा **(अनाविद्धया)** शस्त्रास्त्ररहित अर्थात् अनविधे **(तन्वा)** शरीर से **(त्वम्)** तुम शत्रुओं को **(जय)** जीतो **(सः)** सो **(वर्मणः)** कवच का **(महिमा)** महत्त्व **(त्वा)** तुम्हें **(पिपर्तु)** पाले॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मेघ के समान सुन्दर कवचों को धारण कर युद्ध करते हैं, वे घाव से रहित शरीर वाले हुए वैरियों को जीत सकते हैं, जिस-जिस प्रकार से शरीर में घाव करने वाले नोकदार शस्त्र न प्राप्त हों, उन-उन उपायों का वीरजन सदैव आश्रय करें॥१॥

पुनर्वीराः केन किं कुर्य्युरित्याह॥

फिर वीर किससे क्या करें, इस विषय को कहते हैं॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम॥२॥

धन्वना। गाः। धन्वना। आजिम्। जयेम। धन्वना। तीव्राः। सऽमदः। जयेम। धनुः। शत्रोः। अपऽकामम्। कृणोति। धन्वना। सर्वाः। प्रऽदिशः। जयेम॥२॥

पदार्थः-(**धन्वना**) धनुराद्येन शस्त्रास्त्रेण (**गाः**) भूमीः (**धन्वना**) (**आजिम्**) स-ामम्। **आजिरिति स-ामनाम।** (निघं०२.१७) (**जयेम**) (**धन्वना**) (**तीव्राः**) कठिनास्तेजस्विनः (**समदः**) स-ामान् (**जयेम**) (**धनुः**) शस्त्रास्त्रम् (**शत्रोः**) (**अपकामम्**) कामविनाशनम् (**कृणोति**) करोति (**धन्वना**) (**सर्वाः**) (**प्रदिशः**) दिक्प्रदिक्स्थाञ्छत्रून् (**जयेम**)॥२॥

अन्वयः-हे वीरपुरुषा! यद्धनुः शत्रोरपकामं कृणोति येन धन्वना यथा वयं गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम धन्वना सर्वाः प्रदिशो जयेम तथा तेन यूयमप्येताञ्जयत॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्या धनुर्वेदं पठित्वा पूर्णं शस्त्रास्त्रनिर्माणाभ्यासं कृत्वा प्रयोक्तुं विजानन्ति त एव सर्वत्र विजयिनो भवन्ति॥२॥

पदार्थः-हे वीरपुरुषो! जो (**धनुः**) धनुष् (**शत्रोः**) शत्रु के (**अपकामम्**) काम का विनाश (**कृणोति**) करात है जिस (**धन्वना**) धनुष् से जैसे हम (**गाः**) भूमियों को (**धन्वना**) धनुष् से (**आजिम्**) स-ाम को (**जयेम**) जीतें (**धन्वना**) धनुष् से (**तीव्राः**) कठिन तेज (**समदः**) स-ामों को (**जयेम**) जीतें और (**धन्वना**) धनुष् से (**सर्वाः**) सब (**प्रदिशः**) दिशा प्रदिशाओं में स्थित जो शत्रुजन उनको (**जयेम**) जीतें, वैसे उससे तुम भी उनको जीतो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य धनुर्वेद को पढ़ के पूरा शस्त्र और अस्त्र बनाने का अभ्यास कर प्रयोग करने को जानते हैं, वे ही सर्वत्र विजयी होते हैं॥२॥

पुनरेते कया कां क्रियां कुर्वन्तीत्याह॥

फिर ये किससे कौन क्रिया को करते हैं, इस विषय को कहते हैं॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना।
योषेव शिङ्क्ते वितताधि धन्वन् ज्या इयं समने पारयन्ती॥३॥

व॒क्ष्यन्ती॑ऽइव। इत्। आ। ग॒नी॒ग॒न्ति॒। कर्ण॑म्। प्रि॒यम्। सखा॑यम्। प॒रि॒ऽस॒स्व॒जा॒ना। योषा॑ऽइव। शि॒ङ्क्ते॒। वि॒ऽत॑ता। अधि॑। ध॒न्व॒न्। ज्या। इ॒यम्। समने॑। पा॒र॒य॒न्ती॥ ३॥

पदार्थः-(**वक्ष्यन्तीव**) यथा कथयिष्यन्ती विदुषी स्त्री (**इत्**) एव (**आ**) समन्तात् (**गनीगन्ति**) भृशं गच्छति (**कर्णम्**) श्रोत्रम् (**प्रियम्**) (**सखायम्**) मित्रमिव वर्त्तमानं पतिम् (**परिषस्वजाना**) परितः कृतसङ्गा (**योषेव**) पत्नीव (**शिङ्क्ते**) अव्यक्तं शब्दं करोति (**विताता**) विस्तृता (**अधि**) उपरि (**धन्वन्**) धनुषि (**ज्या**) प्रत्यञ्चा (**इयम्**) (**समने**) स-ामे (**पारयन्ती**) पारं प्रापयन्ती॥ ३॥

अन्वयः-हे शूरवीर! येयं ज्या वक्ष्यन्तीव प्रियं सखायं परिषस्वजाना योषेव कर्णमागनीगन्ति, अधि धन्वन् विताता समने पारयन्ती सती शिङ्क्ते तामिद् यूयं यथावद्विज्ञाय सम्प्रयुङ्ध्वम्॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। हे वीरमनुष्या! यथा प्रियेण मित्रेण पत्या सह स्त्री प्रिया सम्बद्धा यथा च विद्यार्थिनीभिः सहाऽध्यापिका विदुषी स्त्री सम्बद्धा वर्त्तते दुःखादविद्यायाश्च पारं गमयति तथैवेयं धनुर्ज्या युद्धात् पारं गमयित्वा सदैव सुखयति॥ ३॥

पदार्थः-हे शूरवीर! जो (**इयम्**) यह (**ज्या**) प्रत्यञ्चा अर्थात् धनुष् की तांति (**वक्ष्यन्तीव**) जैसे विदुषी कहने वाली होती, वैसे (**प्रियम्**) अपने प्यारे (**सखायम्**) मित्र के समान वर्त्तमान पति को (**परिषस्वजाना**) सब ओर से संग किये हुए (**योषेव**) पत्नी स्त्री (**कर्णम्**) कान को (**आ, गनीगन्ति**) निरन्तर प्राप्त होती है, वैसे (**अधि**) (**धन्वन्**) धनुष् के ऊपर (**विताता**) विस्तारी हुई तांति (**समने**) स-ाम में (**पारयन्ती**) पार को पहुंचाती हुई (**शिङ्क्ते**) गूंजती है उस (**इत्**) ही को तुम यथावत् जानकर उसका प्रयोग करो॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे वीरपुरुषो! जैसे प्रिय मित्र पति के साथ स्त्री प्यारी सम्बद्ध अर्थात् प्रेम की डोरी से बंधी हुई है और जैसे विद्यार्थिनों कन्याओं के साथ पढ़ाने वाली विदुषी स्त्री बंधी हुई दुःख से और अविद्या से पार पहुंचती है, वैसे ही यह धनुष् की प्रत्यञ्चा युद्ध से पार पहुंचा कर सदैव सुखी करती है॥ ३॥

पुनस्ते वीराः केभ्यः किं कुर्युरित्याह॥

फिर वे वीर किनसे क्या करें, इस विषय को कहते हैं॥

ते आ॒च॒र॒न्ती॒ सम॑नेव॒ योषा॑ मा॒तेव॑ पु॒त्रं बि॑भृतामु॒पस्थे॑।
अप॒ शत्रू॑न् विध्यतां संविदा॒ने आर्ती॑ ई॒मे वि॒ष्फु॒र॒न्ती॑ अ॒मित्रा॑न्॥ ४॥

ते इति॑ आ॒च॒र॒न्ती इत्या॒ऽच॒र॒न्ती॒। सम॑नाऽइव। योषा॑। मा॒ता॒ऽइ॑व। पु॒त्रम्। बि॒भृ॒ता॒म्। उ॒प॒ऽस्थे॒। अप॑। शत्रू॑न्। वि॒ध्य॒ता॒म्। सं॒वि॒दा॒ने इति॑ स॒म्ऽवि॒दा॒ने। आ॒र्ती॒ इति॑। ई॒मे इति॑। वि॒ष्फु॒र॒न्ती इति॑ वि॒ऽस्फु॒र॒न्ती॒। अ॒मित्रा॑न्॥ ४॥

पदार्थः-(**ते**) द्वे (**आचरन्ती**) समन्तात् प्रियाचरणं कुर्वन्त्यौ (**समनेव**) समानमना इव। अत्र **छान्दसो वर्णलोपो वे**ति सलोपः। (**योषा**) पत्न्यौ (**मातेव**) (**पुत्रम्**) (**बिभृताम्**) धरेताम् (**उपस्थे**) समीपे (**अप**) (**शत्रून्**) (**विध्यताम्**) ताडयतम् (**संविदाने**) प्रतिज्ञापालिके इव (**आर्त्नी**) गच्छन्त्यौ (**इमे**) (**विष्फुरन्ती**) कम्पयन्त्यौ (**अमित्रान्**) शत्रून्॥४॥

अन्वयः-हे वीरपुरुषास्ते इमे संविदाने अमित्रान् विष्फुरन्ती आर्त्नी आचरन्ती योषा समनेव पुत्रं मातेवोपस्थे विजयं बिभृतां शत्रून् अप विध्यताम्॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे वीरजना! यथा समानप्रीतिसेविनी पत्नी पतिं माता पुत्रं वा सततं सुखयति तथा शस्त्रास्त्राभ्यां शत्रून्निवारयत॥४॥

पदार्थः-हे वीरपुरुषो! (**ते**) वे दोनों (**इमे**) ये (**संविदाने**) प्रतिज्ञा पालने वालियों के समान वा (**अमित्रान्**) शत्रुजनों को (**विष्फुरन्ती**) कंपाती (**आर्त्नी**) वेग से जाती और (**आचरन्ती**) सब ओर से प्रिय आचरण करती हुई (**योषा**) पत्नी स्त्री जैसे (**समनेव**) समान मन वाली, वैसे वा (**पुत्रम्**) पुत्र को जैसे (**मातेव**) माता, वैसे (**उपस्थे**) समीप में विजय को (**बिभृताम्**) धारण करें और (**शत्रून्**) शत्रुजनों को (**अप, विध्यताम्**) पीटें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे वीरजनो! जैसे समान प्रीति की सेवने वाली पत्नी पति को तथा माता पुत्र को निरन्तर सुखी करती है, वैसे शस्त्र और अस्त्रों से शत्रुओं को निवारो॥४॥

पुनर्वीरैः किं धर्त्तव्यमित्याह॥

फिर वीरों को क्या धारण करना चाहिये, इस विषय को कहते हैं॥

ब॒ह्वी॒नां पि॒ता ब॒हुर॑स्य पु॒त्रश्चि॒श्चा कृ॑णोति॒ सम॑नाव॒गत्य॑।
इ॒षु॒धिः संका॒ः पृत॑नाश्च॒ सर्वाः॑ पृ॒ष्ठे नि॑न॒द्धो ज॑यति॒ प्रसू॑तः॥५॥१९॥

ब॒ह्वी॒नाम्। पि॒ता। ब॒हुः। अ॒स्य॒। पु॒त्रः। चि॒श्चा। कृ॒णो॒ति॒। सम॑ना। अ॒व॒ऽगत्य॑। इ॒षु॒ऽधिः। संका॑ः। पृत॑नाः। च॒। सर्वाः॑। पृ॒ष्ठे। निऽन॑द्धः। ज॒य॒ति॒। प्र॒ऽसू॑तः॥५॥

पदार्थः-(**बह्वीनाम्**) इषूणाम् (**पिता**) पितेव (**बहुः**) (**अस्य**) (**पुत्रः**) पुत्र इवेषवः (**चिश्चा**) चिश्चेति शब्दानुकरणम् (**कृणोति**) करोति (**समना**) स-मान् (**अवगत्य**) प्राप्य (**इषुधिः**) इषवो धीयन्ते यस्मिन् (**संकाः**) स-मान्। **संका इति स-मनाम।** (निघं०२.१७) (**पृतनाः**) शत्रुसेनाः (**च**) (**सर्वाः**) (**पृष्ठे**) (**निनिद्धः**) नित्यं बद्धः (**जयति**) (**प्रसूतः**) उत्पन्नः सन्॥५॥

अन्वयः-हे मनुष्या! बह्वीनां पितेवास्य बहुः पुत्रः समनाऽवगत्येषुधिश्चिश्चा कृणोति पृष्ठे निनद्धः प्रसूतस्सन् सर्वाः संकाः पृतनाश्च जयति स युष्माभिर्यथावन्निर्माय धर्त्तव्यः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे वीरपुरुषा! यदीषुधिं यूयं धरेत तर्हि शत्रून् विदार्य्य पुत्रान् प्रति पितर इव प्रजाः सम्पाल्य सर्वाः शत्रुसेना जेतुं शक्नुयुः॥५॥

पदार्थः-हे मनुष्यो! **(बह्वीनाम्)** बहुत बाणों की **(पिता)** पालना करने वाले के समान **(अस्य)** इसके **(बहुः)** बहुत **(पुत्रः)** पुत्र के समान बाण **(समना)** स-ामों को **(अवगत्य)** प्राप्त होकर **(इषुधिः)** धनुष् **(चिश्चा)** चीं चीं शब्द **(कृणोति)** करता है तथा **(पृष्ठे)** पीठ पर **(निनद्धः)** नित्य बंधा और **(प्रसूतः)** उत्पन्न होता हुआ **(सर्वाः)** समस्त **(संकाः)** संग्रामस्थ वैरियों की टोली **(पृतनाः, च)** और सेनाओं को **(जयति)** जीतता है, वह तुम लोगों को यथावत् बना कर धारण करना चाहिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे वीरपुरुषो! यदि धनुष् को तुम धारण करो तो शत्रुओं को विदीर्ण करके पुत्रों के प्रति पिता जैसे वैसे प्रजा पालन करके समस्त शत्रुसेनाओं को जीत सको॥५॥

पुनर्वीराः किंवत् किं कुर्य्युरित्याह॥

फिर वीरजन किसके तुल्य क्या करें, इस विषय को कहते हैं॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥६॥

रथे। तिष्ठन्। नयति। वाजिनः। पुरः। यत्रऽयत्र। कामयते। सुऽसारथिः। अभीशूनाम्। महिमानम्। पनायत। मनः। पश्चात्। अनु। यच्छन्ति। रश्मयः॥६॥

पदार्थः-**(रथे)** रमणीये याने **(तिष्ठन्)** **(नयति)** प्रापयति **(वाजिनः)** वेगवतोऽश्वान् **(पुरः)** पुरस्तात् **(यत्रयत्र)** **(कामयते)** **(सुषारथिः)** शोभनश्चासौ सारथिश्च **(अभीशूनाम्)** बाहूनाम् **(महिमानम्)** **(पनायत)** व्यवहरत स्तुत वा **(मनः)** चित्तम् **(पश्चात्)** **(अनु)** **(यच्छन्ति)** निगृह्णन्ति **(रश्मयः)** किरणः॥६॥

अन्वयः-हे विद्वांसो वीरपुरुषा! यथा सुषारथी रथे तिष्ठन् यत्रयत्र पुरः कामयते तत्र तत्र वाजिनो नयति यथा रश्मयः सूर्यस्य पश्चादनु यच्छन्ति तथा तत्रतत्राऽभीशूनां महिमानं मनश्च यूयं पनायत॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजादयो वीरपुरुषा! यूयं जितेन्द्रिया भूत्वा स्वकार्य्यपारं रथेन सुषारथिरिव गच्छत प्रधानमनु गच्छन्तं महान्तं व्यवहारं कृत्वा स्वसुशिक्षां भृत्यान् नीत्वा कामसिद्धिं कुरुत॥६॥

पदार्थः-हे विद्वान् वीरपुरुषो! जैसे **(सुषारथिः)** अच्छा सारथि **(रथे)** रथ पर **(तिष्ठन्)** स्थित होता हुआ **(यत्रयत्र)** जहाँ-जहाँ **(पुरः)** पहिले **(कामयते)** कामना करता है वहाँ-वहाँ **(वाजिनः)** वेग वाले अश्वों की **(नयति)** प्राप्ति कराता है जैसे **(रश्मयः)** किरणें सूर्य के **(पश्चात्)** पीछे **(अनु, यच्छन्ति)** अनुकूल नियम से जाती हैं, वैसे वहाँ-वहाँ **(अभीशूनाम्)** बाहुओं की **(महिमानम्)** महिमा को **(मनः)** और चित्त को तुम **(पनायत)** व्यवहार में लाओ वा उनकी स्तुति करो॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा आदि वीरपुरुषो! तुम जितेन्द्रिय होकर अपने कार्य के पार रथ से अच्छे सारथी के समान जाओ तथा प्रधान के अनुकूल जाने वाले बड़े व्यवहार को करके सुन्दर शिक्षा को भृत्यों को पहुंचा कर कामसिद्धि करो॥६॥

पुनर्मनुष्याः कैः कान् विजयेरन्नित्याह॥

फिर मनुष्य किन से किन्हें जीतें, इस विषय को कहते हैं॥

तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः॥७॥

तीव्रान्। घोषान्। कृण्वते। वृषऽपाणयः। अश्वाः। रथेभिः। सह। वाजयन्तः। अवऽक्रामन्तः। प्रऽपदैः। अमित्रान्। क्षिणन्ति। शत्रून्। अनपऽव्ययन्तः॥७॥

पदार्थः-(**तीव्रान्**) तीक्ष्णान् (**घोषान्**) शब्दान् (**कृण्वते**) कुर्वन्ति (**वृषपाणयः**) वृषस्येव पाणिर्व्यवहारो येषान्ते (**अश्वाः**) तुरङ्गा वह्न्यादयो वा (**रथेभिः, सह**) रमणीयैर्यानैस्सह (**वाजयन्तः**) गच्छन्तो वा (**अवक्रामन्तः**) इतस्ततो गच्छन्तः (**प्रपदैः**) प्रकृष्टैः पदैर्गमनैः (**अमित्रान्**) वैरं कुर्वतः (**क्षिणन्ति**) हिंसन्ति (**शत्रून्**) (**अनपव्ययन्तः**) अपव्ययमप्राप्नुवन्तः॥७॥

अन्वयः-हे मनुष्याः! प्रपदैरवक्रामन्तोऽनपव्ययन्तो रथेभिः सह वाजयन्तो वृषपाणयोऽश्वास्तीव्रान् घोषान् कृण्वतेऽमित्राञ्छत्रून् क्षिणन्ति तान् यूयं क्षिणध्वम्॥७॥

भावार्थः-हे राजपुरुषा! यूयमश्वान् सुशिक्ष्याग्न्यादीन् सम्प्रयुज्य शत्रूनाक्रम्य विजयध्वम्॥७॥

पदार्थः-हे मनुष्यो! (**प्रपदैः**) अति उत्तम गमनों से (**अवक्रामन्तः**) इधर-उधर जाते और (**अनपव्ययन्तः**) व्यर्थ खर्च को न प्राप्त होते हुए तथा (**रथेभिः**) रमणीय यानों के (**सह**) साथ (**वाजयन्तः**) आप जाते वा दूसरों को ले जाते हुए (**वृषपाणयः**) वृष के समान व्यवहार जिनका वे (**अश्वाः**) घोड़े वा अग्नि आदि पदार्थ (**तीव्रान्**) तीक्ष्ण (**घोषान्**) शब्दों को (**कृण्वते**) करते हैं और (**अमित्रान्**) वैर करते हुए (**शत्रून्**) शत्रुजनों को (**क्षिणन्ति**) क्षीण करते हैं, उनको तुम क्षीण करो॥७॥

भावार्थः-हे राजपुरुषो! तुम घोड़ों को अच्छे प्रकार शिक्षा देकर तथा अग्नि आदि का संप्रयोग और शत्रुओं को आक्रमण कर जीतो॥७॥

पुनर्मनुष्याः कुत्र स्थित्वा किं कुर्य्युरित्याह॥

फिर मनुष्य कहाँ ठहर कर क्या करें, इस विषय को कहते हैं॥

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म।
तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः॥८॥

रथऽवाहनम्। हविः। अस्य। नाम। यत्र। आयुधम्। निऽहितम्। अस्य। वर्म। तत्र। रथम्। उप। शग्मम्। सदेम। विश्वाहा। वयम्। सुऽमनस्यमानाः॥८॥

पदार्थः-(**रथवाहनम्**) रथं वहन्ति येन तम् (**हविः**) आदातव्यम् (**अस्य**) (**नाम**) (**यत्र**) (**आयुधम्**) (**निहितम्**) स्थापितम् (**अस्य**) (**वर्म**) (**तत्रा**) अत्र **ऋचि तुनुघे**ति दीर्घः। (**रथम्**) रमणीयं यानम् (**उप**) (**शग्मम्**) सुखम् (**सदेम**) प्राप्नुयाम (**विश्वाहा**) सर्वाणि दिनानि (**वयम्**) (**सुमनस्यमानाः**) सुष्ठु विचारं कुर्वन्तः॥८॥

अन्वयः-हे मनुष्या! यथा सुमनस्यमाना वयं यत्राऽऽयुधं निहितं यत्राऽऽस्य वर्म यस्यास्य हविर्नाम तत्रेमं रथवाहनं शग्मं रथं च विश्वाहोप सदेम॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं सुविचारेणाग्न्यादिसम्प्रयुक्तेनाऽऽयुधाद्यधिष्ठितेन रथेन सदा शत्रूँस्ताडयत॥८॥

पदार्थः-हे मनुष्यो! जैसा (**सुमनस्यमानाः**) सुन्दर विचार करते हुए (**वयम्**) हम लोग (**यत्र**) जहाँ (**आयुम्**) शस्त्र (**निहितम्**) स्थापित किया वा जहाँ (**अस्य**) इसका (**वर्म**) कवच और जिस (**अस्य**) इसका (**हविः**) लेने योग्य (**नाम**) नाम है (**तत्रा**) वहाँ इस (**रथवाहनम्**) जिससे रथ चलाया जाता है उसको वा (**शग्मम्**) सुख को और (**रथम्**) रमणीय यान को (**विश्वाहा**) सब दिनों (**उप, सदेम**) प्राप्त होवें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम लोग अच्छे विचार के साथ अग्नि आदि के सम्प्रयोग से बनाये हुए आयुधों से युक्त उत्तम यान द्वारा सर्वदैव शत्रुओं को ताड़ना देओ॥८॥

पुना राजपुरुषाः कीदृशा भवेयुरित्याह॥

फिर राजपुरुष कैसे हों, इस विषय को कहते हैं॥

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः॥९॥

स्वादुऽसंसदः। पितरः। वयःऽधाः। कृच्छ्रेऽश्रितः। शक्तिऽवन्तः। गभीराः। चित्रऽसेनाः। इषुऽबलाः। अमृध्राः। सतःऽवीराः। उरवः। व्रातऽसहाः॥९॥

पदार्थः-(**स्वादुषंसदः**) ये स्वादून्यन्नानि भोक्तुं संसीदन्ति न्यायं कर्तुं सभायां वा (**पितरः**) विज्ञानवयोवृद्धाः (**वयोधाः**) ये वयांसि दधति ते (**कृच्छ्रेश्रितः**) ये कृच्छ्रे दुःखेऽपि धर्मं श्रियन्ति सेवन्ते (**शक्तीवन्तः**) प्रशस्ता बह्वी शक्तिः सामर्थ्यं विद्यते येषान्ते (**गभीराः**) गम्भीराशयाः (**चित्रसेनाः**) चित्राऽद्भुता सेना येषान्ते (**इषुबलाः**) इषुभिः शस्त्रास्त्रैर्बलं सैन्यं वा येषान्ते (**अमृध्राः**) अहिंसकाः (**सतोवीराः**) सत्त्वबलोपेताः (**उरवः**) बहवः (**व्रातसाहाः**) ये व्राताञ्छत्रुसमूहान् सहन्ते ते॥९॥

अन्वयः-हे राजन्! ये स्वादुषंसदो वयोधा कृच्छ्रेश्रितः शक्तीवन्तो गभीराश्चित्रसेना इषुबला अमृध्राः सतोवीरा व्रातसाहा उरवः पुत्रान् पितर इव प्रजाः पालयन्तो धर्मिष्ठा मनुष्याः स्युस्तैस्त्वं प्रजाः सततं पालय॥९॥

भावार्थः-हे विद्वांसो! मनुष्या यूयं सभ्यं पितृवत्प्रजापालकं दीर्घवयसं दुःखं प्राप्याकम्पितारं शक्तिमन्तं गम्भीराशयमद्भुतसेनं शस्त्रास्त्रविद्याकुशलं सत्त्वोपेतं शत्रुसमूहसहं बहुशुभगुणकर्मयुक्तमेव राजानमभिषिञ्चत॥९॥

पदार्थः-हे राजन्! जो **(स्वादुषंसदः)** स्वादिष्ठ अन्नों के भोगने को स्थिर होते वा न्याय करने को सभा में स्थिर होते हैं वा **(वयोधाः)** जो अवस्थाओं को धारण करते हैं वा **(कृच्छ्रेश्रितः)** जो अति दुःख में भी धर्म का आश्रय करते हैं वा **(शक्तीवन्तः)** प्रशंसित बहुत शक्ति विद्यमान जिनके वा **(गभीराः)** जो गम्भीर आशय वाले हैं वा **(चित्रसेनाः)** जिनकी चित्रविचित्र सेना है तथा **(इषुबलाः)** शस्त्र और अस्त्रों से युक्त जिनकी सेना और **(अमृध्राः)** जो अहिंसन करने वाले **(सतोवीराः)** सत्त्व बल से युक्त **(व्रातसाहाः)** जो शत्रूसमूहों को सहते हैं, वे **(उरवः)** बहुत पुत्रों की **(पितरः)** पिता जैसे धर्मिष्ठ, वैसे विज्ञान और अवस्था से बढ़े हुए पालने वाले जन प्रजा की पालना करते हुए धर्मिष्ठ मनुष्य हों, उनसे तुम प्रजाओं की पालना निरन्तर करो॥९॥

भावार्थः-हे विद्वान् मनुष्यो! तुम सभ्य, पिता के समान प्रजाजनों की पालना करने वाले, बहुत अवस्था से युक्त और दुःख को पाकर न कंपने वाले, सामर्थ्यवान्, गम्भीर आशय, अद्भुत सेना तथा शस्त्र और अस्त्रों की विद्या में कुशल, बल से युक्त, शत्रुसमूह के सहने वाले और बहुत गुण कर्मों से युक्त राजा को ही राज्याभिषिञ्चन काम में अभिषिक्त करो॥९॥

पुनर्मनुष्याः परस्परं कथमनुवर्त्तेरन्नित्याह॥

फिर मनुष्य परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा।
पूषा न पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत॥१०॥२०॥

ब्राह्मणासः। पितरः। सोम्यासः। शिवे इति। नः। द्यावापृथिवी इति। अनेहसा। पूषा। नः। पातु। दुःऽइतात्। ऋतऽवृधः। रक्ष। माकिः। नः। अघऽशंसः। ईशत॥१०॥

पदार्थः-(**ब्राह्मणासः**) वेदेश्वरवेत्तारः (**पितरः**) पितर इव प्रजानामुपरि कृपालव (**सोम्यासः**) सोमगुणानर्हाः (**शिवे**) मंगलकारिण्यौ (**नः**) अस्मभ्यम् (**द्यावापृथिवी**) सूर्य्यभूमी (**अनेहसा**) अहिंसिके (**पूषा**) विद्याविनयाभ्यां पोषकः (**नः**) अस्मान् (**पातु**) (**दुरितात्**) दुष्टाचरणात् (**ऋतावृधः**) सत्यवर्धकाः (**रक्षा**) पालय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**माकिः**) निषेधे (**नः**) अस्मान् (**अघशंसः**) स्तेनः (**ईशत**) हन्तुं समर्थो भवेत्॥१०॥

अन्वयः-हे पितर इव सोम्यासो ब्राह्मणासो विद्वांसो! यूयं नोऽधर्माचरणात्पृथक् रक्षत यथाऽनेहसा शिवे द्यावापृथिवी नोऽस्मदर्थं स्यातां तथोपदिशत यथा पूषा ऋतावृधो नोऽस्मान् दुरितात् पातु यतोऽघशंसोऽस्मान् माकिरीशत। हे राजँस्त्वमेतान् सततं रक्षा॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये विद्वांसो युष्मभ्यं विद्याविनयौ प्रयच्छेरन् विद्युद्भूगर्भादिविद्यया सुखिनः सम्पादयेयुरधर्माचरणात् पृथग्रक्षेयुर्यश्च राजा चोरादिभ्यः सततं रक्षेत् तान् सर्वान् यूयं सततं सेवध्वम्॥१०॥

पदार्थः-हे (**पितरः**) पिता के समान प्रजाजनों पर कृपा करने वाले (**सोम्यासः**) शान्तियुक्त गुणों के योग्य (**ब्राह्मणासः**) वेद और ईश्वर के जानने वाले विद्वानो! तुम (**नः**) हम लोगों को अधर्म के आचरण से अलग रक्खो जैसे (**अनेहसा**) न हिंसा करने वाली (**शिवे**) मंगलकारिणी (**द्यावापृथिवी**) सूर्य और पृथिवी (**नः**) हमारे लिये हों, वैसे उपदेश करो जैसे (**पूषा**) विद्या और विनय से पुष्टिकारक (**ऋतावृधः**) सत्य का बढ़ाने वाला (**नः**) हम लोगों की (**दुरितात्**) दुष्ट आचरण से (**पातु**) पालना करे जिससे (**अघशंसः**) चोर हम लोगों को (**माकिः**) न (**ईशत**) मारने के लिये समर्थ हो, हे राजन्! तुम इन की निरन्तर (**रक्ष**) रक्षा करो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो विद्वान् जन तुम लोगों को विद्या और विनय देवें तथा बिजुली और भूगर्भविद्या से सुख से सम्पन्न करें और अधर्माचरण से अलग रक्खें तथा जो राजा चोर आदि दुष्टों से निरन्तर रक्षा करे, उस सब की तुम निरन्तर सेवा करो॥१०॥

पुनर्भूमिः कीदृग्वेगवती वीराश्च किमर्थं स- ामं कुर्वन्तीत्याह॥

फिर भूमि कैसी वेग वाली है और युद्ध करने वाले युद्ध क्यों करते हैं, इस विषय को कहते हैं॥

सुप॒र्णं व॑स्ते मृ॒गो अ॑स्या॒ दन्तो॒ गोभि॒: सन्न॑द्धा पतति॒ प्रसू॑ता।
यत्रा॒ नर॒: सं च॒ वि द्रव॑न्ति॒ तत्रा॒स्मभ्य॒मिष॑व॒: शर्म॑ यंसन्॥११॥

सु॒ऽप॒र्णम्। व॒स्ते॒। मृ॒गः। अ॒स्याः। दन्तः॑। गोभिः॑। सम्ऽन॑द्धा। प॒त॒ति॒। प्रऽसू॑ता। यत्र॑। नरः॑। सम्। च॒। वि। च॒। द्रव॑न्ति। तत्र॑। अ॒स्मभ्य॑म्। इष॑वः। शर्म॑। यं॒स॒न्॥११॥

पदार्थः-(**सुपर्णम्**) शोभनं पर्णं पालनं यस्य तम् (**वस्ते**) आच्छादयति (**मृगः**) यो मार्ष्टि तद्वत् (**अस्याः**) प्रजायाः (**दन्तः**) येन दंशति सः (**गोभिः**) किरणैर्धेनुभिर्वा (**सन्नद्धा**) सम्यग्बद्धा (**पतति**) गच्छति (**प्रसूता**) उत्पन्ना सती (**यत्रा**) यस्मिन् स- ामे। अत्र **ऋचि तुनुघे**ति दीर्घः। (**नरः**) मनुष्याः (**सम्**) (**च**) (**वि**) (**च**) (**द्रवन्ति**) गच्छन्ति (**तत्र**) (**इषवः**) बाणाः (**शर्म**) सुखम् (**यंसन्**) यच्छन्तु॥११॥

अन्वयः-हे मनुष्या! या गोभिः सन्नद्धा प्रसूता सती भूमिर्मृग इव पतति, अस्या मध्ये दन्तो वर्त्तते या सुपर्णं वस्ते यत्रा नरश्च सं द्रवन्ति वि द्रवन्ति च तत्रेषवोऽस्मभ्यं शर्म यथा यंसन् तथाऽनुतिष्ठत॥११॥

भावार्थः-हे मनुष्या! या भूमिः परमेश्वरेण पालनाय निर्मिता मृगवत्सद्यो धावति यदर्थं भूरि स- ामो भवति तस्याः प्राप्तौ वीरतां सङ्गृह्णन्तु॥११॥

पदार्थः-हे मनुष्यो! जो (**गोभिः**) किरण वा धेनुओं से (**सन्नद्धा**) अच्छे प्रकार से बंधी और (**प्रसूता**) उत्पन्न हुई भूमि (**मृगः**) मृग के समान (**पतति**) जाती है (**अस्याः**) इसके बीच (**दन्तः**) जिससे

डशते हैं वह दाँत वर्त्तमान है जो **(सुपर्णम्)** सुन्दर पालना करने वाले को **(वस्ते)** उढ़ाता है और **(यत्रा)** जिस संग्राम में **(नरः)** योद्धा नर **(च)** भी **(सम्, द्रवन्ति)** अच्छे प्रकार दौड़ते हैं **(च)** और **(वि)** विशेष धावन करते हैं **(तत्र)** वहाँ **(इषवः)** बाण **(अस्मभ्यम्)** हमारे लिये **(शर्म)** सुख जैसे **(यंसन्)** देवें वैसा अनुष्ठान करो॥११॥

भावार्थः-हे मनुष्यो! जो भूमि परमेश्वर ने पालना के लिये बनाई है और मृग के समान शीघ्र जाती है तथा जिसके लिये स- ाम होता है, उसकी प्राप्ति के निमित्त वीरता का स- ह करो॥११॥

पुनर्मनुष्यैः केन कीदृशानि शरीराणि कर्त्तव्यानीत्याह॥

फिर मनुष्यों को किससे कैसे शरीर करने चाहियें, इस विषय को कहते हैं॥

ऋजीते॒ परि॑ वृङ्ध्यि नोऽश्मा॑ भवतु नस्त॒नूः।
सोमो॒ अधि॑ ब्रवीतु॒ नोऽदि॑ति॒ः शर्म॑ यच्छतु॥१२॥

ऋजीते। परि। वृङ्धि। नः। अश्मा। भवतु। नः। तनूः। सोमः। अधि। ब्रवीतु। नः। अदितिः। शर्म। यच्छतु॥१२॥

पदार्थः-(**ऋजीते**) ऋजु गच्छति (**परि**) सर्वतः (**वृङ्धि**) वर्धय (**नः**) अस्मान् (**अश्मा**) पाषाणवद् दृढम् (**भवतु**) (**नः**) अस्माकम् (**तनूः**) शरीरम् (**सोमः**) यः सुनोति स विद्वान् (**अधि**) उपरि (**ब्रवीतु**) उपदिशतु (**नः**) अस्मानस्मभ्यं वा (**अदितिः**) मातेव भूमिः (**शर्म**) सुखं गृहं वा (**यच्छतु**) ददातु॥१२॥

अन्वयः-हे विद्वन् राजन्! यो भवानृजीते स नः परि वृङ्धि सोमो यथा नोऽस्माकं तनूरश्मेव भवतु तथाऽधि ब्रवीतु, अदितिर्नः शर्म यच्छतु॥१२॥

भावार्थः-राजैव प्रयतेत यथा दीर्घब्रह्मचर्य्येण विषयासक्तित्यागेन व्यायामेन च क्षत्रियाणां शरीराणि पाषाणवत्कठिनानि स्युरुपदेशकाश्च सर्वानेवमेवोपदिशेयुर्येन सर्वे दृढशरीरात्मानो भवेयुः॥१२॥

पदार्थः-हे विद्वन् राजन्! जो आप **(ऋजीते)** सीधे चलते हो वह **(नः)** हम लोगों को **(परि, वृङ्धि)** सर्व प्रकार वृद्धि देओ और **(सोमः)** जो ओषधियों का रस निकालने वाला विद्वान् जैसे **(नः)** हम लोगों का **(तनूः)** शरीर **(अश्मा)** पत्थर के समान दृढ़ **(भवतु)** हो वैसा **(अधि, ब्रवीतु)** ऊपर ऊपर उपदेश करे और **(अदितिः)** माता के समान भूमि **(नः)** हम लोगों के लिये **(शर्म)** सुख वा घर **(यच्छतु)** देवे॥१२॥

भावार्थः-राजा ऐसा प्रयत्न करे जैसे दीर्घ ब्रह्मचर्य्य से, विषायसक्ति के त्याग से और व्यायाम से क्षत्रियों के शरीर पाषाण के तुल्य कठिन हों और उपदेशक भी सबको ऐसा ही उपदेश करें जिससे सब दृढ़ शरीर आत्मा वाले हों॥१२॥

पुना राज्ञी स- ामे किं कुर्य्यादित्याह॥

फिर रानी स- ाम में क्या करे, इस विषय को कहते हैं॥

आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते।

अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय॥ १३॥

आ। जङ्घन्ति। सानु। एषाम्। जघनान्। उप। जिघ्नते। अश्वऽअजनि। प्रऽचेतसः। अश्वान्। समत्ऽसु। चोदय॥ १३॥

पदार्थः-(**आ**) समन्तात् (**जङ्घन्ति**) भृशं घ्नन्ति (**सानु**) अवयवान् (**एषाम्**) (**जघनान्**) नीचकर्मकारिणः (**उप**) (**जिघ्नते**) घ्नन्ति (**अश्वाजनि**) अश्वानां प्रक्षेप्त्रि (**प्रचेतसः**) प्रकृष्टं चेतो विज्ञानं येषां तान् (**अश्वान्**) महतो बलिष्ठान् (**समत्सु**) स-ामेषु (**चोदय**) प्रेरय॥ १३॥

अन्वयः-हे अश्वाजनि राज्ञि! त्वं ये वीरा एषां शत्रूणां सान्वा जङ्घन्ति जघनानुप जिघ्नते तान् प्रचेतसोऽश्वाञ्छूरान् समत्सु चोदय॥ १३॥

भावार्थः-स-ामे राजाभावे राज्ञी सेनापतिः स्याद्यथा राजा योधयितुं वीरान् प्रेरयेद्धर्षयेत्तथैव साऽप्याचरेत्॥ १३॥

पदार्थः-हे (**अश्वाजनि**) घोड़ों की पटकी देने वाली रानी! तू जो वीरजन (**एषाम्**) इन शत्रुओं के (**सानु**) अङ्गों को (**आ, जङ्घन्ति**) सब ओर से निरन्तर काटते हैं तथा (**जघनान्**) नीच कर्म करने वालों को (**उप, जिघते**) उपस्थित होकर मारते हैं उन (**प्रचेतसः**) उत्तम विज्ञान वाले (**अश्वान्**) बड़े बड़े बलवान् शूरवीर पुरुषों को (**समत्सु**) स-ामों में (**चोदय**) प्रेरो॥ १३॥

भावार्थः-स-ाम में राजा के अभाव में रानी सेनापति हो और जैसे राजा युद्ध कराने को वीरों को प्रेरणा दे, वैसे ही वह भी आचरण करे॥ १३॥

पुना राजा भृत्याश्च परस्परं कथं वर्तेरन्नित्याह॥

फिर राजा और भृत्य परस्पर कैसे वर्त्तें, इस विषय को कहते हैं॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।

हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु विश्वतः॥ १४॥

अहिःऽइव। भोगैः। परि। एति। बाहुम्। ज्यायाः। हेतिम्। परिऽबाधमानः। हस्तऽघ्नः। विश्वा। वयुनानि। विद्वान्। पुमान्। पुमांसम्। परि। पातु। विश्वतः॥ १४॥

पदार्थः-(**अहिरिव**) मेघ इव (**भोगैः**) (**परि**) (**एति**) परितः प्राप्नोति (**बाहुम्**) पत्युर्भुजम् (**ज्यायाः**) प्रत्यञ्चायाः (**हेतिम्**) वज्रवद्बाणम् (**परिबाधमानः**) सर्वतो निरुन्धानः (**हस्तघ्नः**) यो हस्ताभ्यां हन्ति (**विश्वा**) सर्वाणि (**वयुनानि**) ज्ञानानि (**विद्वान्**) यो वेदितव्यं वेत्ति (**पुमान्**) पुरुषार्थी (**पुमांसम्**) पुरुषार्थिनम् (**परि**) सर्वतः (**पातु**) रक्षतु (**विश्वतः**) सर्वतः॥ १४॥

अन्वयः-हे राजन्! यो हस्तघ्नो ज्याया हेतिं परिबाधमानो विद्वान् पुमान्नहिरिव भोगैः सह बाहुं विश्वा वयुनानि च पर्येति विश्वतः पुमांसं परि पातु तं सर्वदा सत्कुर्याः॥१४॥

भावार्थः-हे वीरा! यो राजा सर्वान् मेघवद्भोगवृष्टिं करोति समग्रविद्यायुक्तः सन् सर्वान् सर्वतः प्रीणाति तं सर्वेऽभितः सततं रक्षन्तु॥१४॥

पदार्थः-हे राजन्! जो **(हस्तघ्नः)** हाथों से मारने वाला **(ज्यायाः)** प्रत्यञ्चा के सम्बन्धी **(हेतिम्)** वज्र के समान बाण को **(परिबाधमानः)** सब ओर से रोकता और **(विद्वान्)** जानने योग्य को जानता हुआ **(पुमान्)** पुरुषार्थीजन **(अहिरिव)** मेघ के समान **(भोगैः)** भोगों के साथ **(बाहुम्)** अपने स्वामी की भुजा को और **(विश्वा)** समस्त **(वयुनानि)** ज्ञानों को **(परि, एति)** सब ओर से प्राप्त होता है वा **(विश्वतः)** सब ओर से **(पुमांसम्)** पुरुषार्थी की **(परि, पातु)** अच्छे प्रकार पालना करे, उसका सर्वदा सत्कार करो॥१४॥

भावार्थः-हे वीरो! जो राजा समस्त मेघ के समान भोगवृष्टि करता है तथा समग्र विद्यायुक्त होता हुआ सब की सब ओर से तृप्ति करता है, उसकी सब जन सब ओर से निरन्तर रक्षा करें॥१४॥

पुना राज्ञी कीदृशी भवेदित्याह॥

फिर रानी कैसी हो, इस विषय को कहते हैं॥

आलाक्ता या रुरुशीष्ण्यथो यस्या अयो मुखम्।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः॥१५॥२१॥

आलऽअक्ता। या। रुरुऽशीर्ष्णी। अथो इति। यस्याः। अयः। मुखम्। इदम्। पर्जन्यऽरेतसे। इष्वै। देव्यै। बृहत्। नमः॥१५॥

पदार्थः-**(आलाक्ता)** आलेन विषेण दिग्धा युक्ता **(या)** **(रुरुशीर्ष्णी)** रुरोः शिर इव शिरो यस्याः सा **(अथो)** **(यस्याः)** **(अयः)** लोहयुक्तम् **(मुखम्)** **(इदम्)** **(पर्जन्यरेतसे)** पर्जन्यस्य रेत उदकमिव रेतो वीर्यं यस्यास्तस्यै। **रेत इत्युदकनाम।** (निघं०१२) **(इष्वै)** गन्त्र्यै **(देव्यै)** दिव्यायै **(बृहत्)** महत् **(नमः)** अन्नम्॥१५॥

अन्वयः-याऽऽलाक्ता रुरुशीर्ष्ण्यथो यस्या इदमयो मुखमस्ति तद्धन्त्र्यै पर्जन्यरेतसे देव्या इष्वै शूरवीरायै स्त्रियै बृहन्नमोऽस्तु॥१५॥

भावार्थः-हे मनुष्या! या राज्ञी धनुर्वेदविच्छस्त्रास्त्रप्रक्षेप्त्री वर्त्तते तस्या वीरैः सत्कारः सततं कार्य्यः॥१५॥

पदार्थः-**(या)** जो **(आलाक्ता)** विष से युक्त **(रुरुशीर्ष्णी)** रुरु जाति के मृग के शिर के समान जिसका शिर और **(अथो)** इसके अनन्तर **(यस्याः)** जिसका **(इदम्)** **(अयः)** लोहेयुक्त **(मुखम्)** मुख है उस धारण करने वाली **(पर्जन्यरेतसे)** मेघ के जल के समान वीर्यवती **(देव्यै)** दिव्य और **(इष्वै)** गमन करती हुई शूरवीर स्त्री के लिये **(बृहत्)** बहुत **(नमः)** अन्न हो॥१५॥

भावार्थः-हे मनुष्यो! जो रानी धुनर्वेद जानती हुई शस्त्र-अस्त्र फेंकने वाली है, उसका वीरों को निरन्तर सत्कार करना चाहिये॥१५॥

पुनः सेनापतिः सेनां किमाज्ञपयेदित्याह॥

फिर सेनापति सेना को क्या आज्ञा दे, इस विषय को कहते हैं॥

अव॑सृष्टा॒ परा॑ पत॒ शर॑व्ये॒ ब्रह्म॑संशिते।

गच्छा॒मित्रा॒न् प्र प॑द्यस्व॒ मामीषां॑ कं च॒नोच्छि॑षः॥१६॥

अव॑ऽसृष्टा। परा॑। प॒त॒। शर॑व्ये। ब्रह्म॑ऽसंशिते। गच्छ॑। अ॒मित्रा॑न्। प्र। प॒द्य॒स्व॒। मा। अ॒मीषा॑म्। कम्। च॒न। उ॒त्। शि॒ष॒रिति॑ शिषः॥१६॥

पदार्थः-(**अवसृष्टा**) शत्रूणामुपरि निपतिता (**परा**) अस्मत्पराङ्मुखा (**पत**) (**शरव्ये**) ये शरान् व्याप्नुवन्ति तत्र साध्वि (**ब्रह्मसंशिते**) ब्रह्मणा वेदविदा सेनापतिना प्रशंसिते (**गच्छ**) (**अमित्रान्**) शत्रून् (**प्र**) (**पद्यस्व**) (**मा**) (**अमीषाम्**) परोक्षस्थानां मध्यात् (**कम्**) (**चन**) अपि (**उत्**) (**शिषः**) शिष्टं मा त्यज॥१६॥

अन्वयः-हे शरव्ये ब्रह्मशंसिते सेने! त्वमवसृष्टा परा पताऽमित्रान् गच्छ प्र पद्यस्वाऽमीषां शत्रूणां कं चन मोच्छिषः॥१६॥

भावार्थः-सेनापतिः पूर्वं सेनां सुशिक्ष्य यदा स-ाम उपतिष्ठेत्तदा स्वसेनामाज्ञपयेद्यच्छत्रूणां मध्यादेकमपि शिष्टं मा त्यजेति॥१६॥

पदार्थः-हे (**शरव्ये**) बाणों को व्याप्त होने वालों में उत्तम (**ब्रह्मशंसिते**) वेद जानने वाले सेनापति से प्रशंसा पाई हुई सेना! तू (**अवसृष्टा**) शत्रुओं के उपर पड़ी हुई (**परा**) हम लोगों से पराङ्मुख (**पत**) जाओ तथा (**अमित्रान्**) शत्रुओं के समीप (**गच्छ**) पहुंचो (**प्र, पद्यस्व**) प्राप्त होओ अर्थात् शत्रुजनों पर चढ़ाई करो और (**अमीषाम्**) परोक्षस्थ शत्रुओं के बीच (**कम्, चन**) किसी को भी (**मा**) मत (**उत्, शिषः**) शेष छोड़ो॥१६॥

भावार्थः-सेनापति पहिले सेना को अच्छी शिक्षा देकर जब स-ाम में उपस्थित हो, तब अपनी सेना को आज्ञा दे कि शत्रुओं के बीच से एक को भी न छोड़॥१६॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को कहते हैं॥

यत्र॑ बा॒णाः सं॒पत॑न्ति कुमा॒रा वि॑शि॒खाइ॑व।

तत्रा॑ नो॒ ब्रह्म॑ण॒स्पति॒रदि॑तिः॒ शर्म॑ यच्छतु वि॒श्वाहा॒ शर्म॑ यच्छतु॥१७॥

यत्र॑। बा॒णाः। स॒म्ऽपत॑न्ति। कु॒मा॒राः। वि॒ऽशि॒खाःऽइ॑व। तत्र॑। न॒ः। ब्रह्म॑णः। पति॑ः। अदि॑तिः। शर्म॑। य॒च्छ॒तु॒। विश्वाहा॑। शर्म॑। य॒च्छ॒तु॒॥ १७॥

पदार्थः-(**यत्र**) यस्मिन् (**बाणाः**) (**सम्पतन्ति**) (**कुमाराः**) कृतचूडाकर्माणः (**विशिखाइव**) शिखारहिता इव (**तत्रा**) तस्मिन् स-ामे। अत्र **ऋचि तुनुघे**ति दीर्घः। (**नः**) अस्मभ्यम् (**ब्रह्मणः**) धनस्य (**पतिः**) पालको धनकोशेशः (**अदितिः**) भूमिः (**शर्म**) सुखम् (**यच्छतु**) ददातु (**विश्वाहा**) सर्वाणि दिनानि (**शर्म**) सुखम् (**यच्छतु**) ददातु॥१७॥

अन्वयः-हे राजन्! यत्र स-ामे कुमारा विशिखाइव बाणाः सम्पतन्ति तत्रा नो यथा ब्रह्मणस्पतिर्विश्वाहा शर्म यच्छत्वदितिः शर्म यच्छतु तथा विधेहि॥१७॥

भावार्थः-हे राजन्! यदा स-ामाय सेना गच्छेत्तदा केनापि पदार्थेन विना कस्याऽपि भृत्यस्य क्लेशो न स्यात्तथाऽनुतिष्ठतु। एवं कृते सति भवतो ध्रुवो विजयः स्यात्॥१७॥

पदार्थः-हे राजन् (**यत्र**) जिस स-ाम में (**कुमाराः**) कुमार अर्थात् जिनका मुण्डन हो गया है उन (**विशिखाइव**) विना चोटी वालों के समान (**बाणाः**) बाण (**सम्पतन्ति**) अच्छे प्रकार गिरते हैं (**तत्रा**) वहाँ (**नः**) हमारे लिये जैसे (**ब्रह्मणः**) धन के (**पतिः**) पालक धनकोश का ईश (**विश्वाहा**) सब दिनों (**शर्म**) सुख (**यच्छतु**) देवे और (**अदितिः**) भूमि (**शर्म**) सुख (**यच्छतु**) देवे, वैसे विधान करो॥१७॥

भावार्थः-हे राजन्! जब स-ाम के लिये सेना जावे, तब किसी पदार्थ के विना किसी भृत्य को क्लेश न हो, वैसा अनुष्ठान कीजिये, ऐसे किये पीछे आपका ध्रुव विजय हो॥१७॥

पुनर्योद्धॄन् प्रत्यध्यक्षाः कथं वर्त्तेरन्नित्याह॥

फिर योद्धाओं के प्रति अध्यक्ष कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

मर्मा॑णि ते॒ वर्म॑णा छादयामि॒ सोम॑स्त्वा॒ राजा॒मृते॑नानु॑ वस्ताम्।
उ॒रोर्व॑रीया॒ वरु॑णस्ते कृणोतु॒ जय॑न्तं॒ त्वानु॑ दे॒वा म॑दन्तु॥ १८॥

मर्मा॑णि। ते॒। वर्म॑णा। छा॒द॒या॒मि॒। सोम॑ः। त्वा॒। राजा॑। अ॒मृते॑न। अनु॑। व॒स्ता॒म्। उ॒रोः। वरी॑यः। वरु॑णः। ते॒। कृ॒णो॒तु॒। जय॑न्तम्। त्वा॒। अनु॑। दे॒वाः। म॒द॒न्तु॒॥ १८॥

पदार्थः-(**मर्माणि**) शरीरस्थाङ्गीवनहेतूनवयवान् (**ते**) तव योद्धुः (**वर्मणा**) कवचेन (**छादयामि**) (**सोमः**) ऐश्वर्य्यसम्पन्नः (**त्वा**) त्वाम् (**राजा**) (**अमृतेन**) जलादिना (**अनु**) (**वस्ताम्**) अनुच्छादयतु (**उरोः**) बहोः (**वरीयः**) अतिशयेन वरमन्नादिकम् (**वरुणः**) सेनापालक उत्तमो विद्वान् (**ते**) तव (**कृणोतु**) (**जयन्तम्**) शत्रून् विजयमानम् (**त्वा**) त्वाम् (**अनु**) (**देवाः**) उपदेशका विद्वांसोऽधिष्ठातारो वा (**मदन्तु**) हर्षन्तु हर्षयन्तु वा॥१८॥

अन्वयः-हे योद्धृवीराहं ते मर्माणि वर्मणा छादयामि सोमो राजाऽमृतेन त्वाऽनु वस्तां वरुण उरोर्वरीयस्ते कृणोतु जयन्तं त्वा देवा अनु मदन्तु॥१८॥

भावार्थः-सेनाध्यक्षैः सर्वेषां वीराणां शरीरपरित्राणानि कवचानि यथावत्कर्त्तव्यानि सर्वाधीशेन राज्ञाऽमृतात्मकभोगाः सर्वेभ्यो देया वस्त्रशस्त्रादीनि च, युध्यतः सर्वान् सर्वेऽध्यक्षा हर्षयन्तूत्साहयन्तु स्वयं च हर्षन्तूत्सहन्तामेवं कृते सति कुतः पराजयः॥१८॥

पदार्थः-हे योद्धा वीर! मैं **(ते)** तेरे **(मर्माणि)** शरीरस्थ जीवनहेतु अङ्गों को **(वर्मणा)** कवच से **(छादयामि)** ढांपता हूँ **(सोमः)** ऐश्वर्य्यसम्पन्न **(राजा)** राजा **(अमृतेन)** जल आदि से **(त्वा)** तुझे **(अनु)** अनुकूलता से **(वस्ताम्)** ढांपे तथा **(वरुणः)** सेना की पालना करने वाला उत्तम विद्वान् **(उरोः)** बहुत **(वरीयः)** अत्यन्त श्रेष्ठ अन्न आदि **(ते)** तेरा **(कृणोतु)** करे तथा **(जयन्तम्)** शत्रुओं को जीतते हुए **(त्वा)** तुझे **(देवाः)** उपदेशक विद्वान् वा अधिष्ठाता जन **(अनु, मदन्तु)** अनुकूलता से हर्षित करें वा करावें॥१८॥

भावार्थः-सेनाध्यक्षों को चाहिये कि सब वीरों के शरीरों की रक्षा करने वाले कवचों को यथावत् करें और सर्वाधीशराजा अमृतात्मक अर्थात् अमृत के समान भोग सब सबके लिये देवे तथा वस्त्र और शस्त्र आदि पदार्थ भी देवे। और युद्ध करते हुए सब को सब अध्यक्ष हर्ष देवें और उत्साहित करें तथा आप भी हर्ष पावें और उत्साह करें, ऐसा करने पर क्योंकर हार हो॥१८॥

पुनः सेनाध्यक्षाः संग्रामे किं कुर्य्युरित्याह॥

फिर सेनाध्यक्ष स-ाम में क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति।

देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम्॥१९॥२२॥६॥६॥

यः। नः। स्वः। अरणः। यः। च। निष्ट्यः। जिघांसति। देवाः। तम्। सर्वे। धूर्वन्तु। ब्रह्म। वर्म। मम। अन्तरम्॥१९॥

पदार्थः-**(यः)** **(नः)** अस्माकम् **(स्वः)** स्वकीयः **(अरणः)** स-ामरहितो यथावत्स-ामं न करोति **(यः)** **(च)** **(निष्ट्यः)** शब्देन धर्षितुं योग्यो दूरस्थः सन् **(जिघांसति)** हन्तुमिच्छति **(देवाः)** विद्वांसः **(तम्)** **(सर्वे)** **(धूर्वन्तु)** हिंसन्तु **(ब्रह्म)** सर्वव्यापकं चेतनम् **(वर्म)** वर्म्मेव रक्षकम् **(मम)** **(अन्तरम्)** यदन्ते समीपे रमते तत्॥१९॥

अन्वयः-हे सेनापते! यो नः स्वोऽरणो यश्च निष्ट्यः स्वकीयं सैन्यं जिघांसति तं सर्वे देवा धूर्वन्तु ममान्तरं ब्रह्म वर्म्मेव रक्षकं भवतु॥१९॥

भावार्थः-सेनापतेर्ये स्वभृत्या उत्साहेन न युध्येयुर्ये च स्वभृत्यान् जिघांसन्ति तान् सर्वान् विद्वांसोऽध्यक्षाश्च सद्यो घ्नन्तु तथा युद्धसमये सर्वे वीराः परमेश्वरमेव स्वरक्षकं विजानन्त्विति॥१९॥

अत्र वर्मादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्याणां परमविदुषां श्रीमद्विरजानन्दसरस्वतीस्वामिनां शिष्येण

श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृतार्यभाषाविभूषिते सुप्रमाणयुक्त ऋग्वेदभाष्ये षष्ठे मण्डले षष्ठोऽनुवाकः पञ्चसप्ततितमं सूक्तं षष्ठं मण्डलं च पञ्चमाष्टके प्रथमेऽध्याये द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे सेनापति! **(यः)** जो **(नः)** हमारे **(स्वः)** अपना **(अरणः)** स-ाम रहित यथावत् स-ाम नहीं करता **(यः, च)** और जो **(निष्ट्यः)** शब्द से ढिठाई कराने योग्य दूरस्थ होते हुए तथा अपनी सेना को **(जिघांसति)** मारने की इच्छा करता है **(तम्)** उसको **(सर्वे)** सब **(देवाः)** विद्वान् जन **(धूर्वन्तु)** मारें तथा **(मम)** मेरा **(अन्तरम्)** समीप में रमता हुआ **(ब्रह्म)** सर्वव्यापक चेतन **(वर्म)** कवच के समान रक्षा करने वाला हो॥१९॥

भावार्थः-सेनापति के जो अपने भृत्य उत्साह से युद्ध न करें और जो अपने नौकरों के मारने की इच्छा करें, उन सब को विद्वान् और अधीश शीघ्र मारें तथा युद्ध के समय सब वीर परमेश्वर ही को अपना रक्षा करने वाला जानें॥१९॥

इस सूक्त में वर्म अर्थात् कवच बख्तर आदि के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह श्रीमान् परमहंसपरिव्राजकाचार्य्य परमविद्वान् श्रीमद्विरजानन्दसरस्वती स्वामीजी के शिष्य श्रीमान् दयानन्द सरस्वती स्वामी जी के बनाये हुए संस्कृत और आर्यभाषा से सुभूषित अच्छे-अच्छे प्रमाणों से युक्त, ऋग्वेदभाष्य के छठे मण्डल में छठा अनुवाक और पचहत्तरवां सूक्त और छठा मण्डल भी तथा पञ्चमाष्टक के प्रथमाध्याय में बाईसवां वर्ग समाप्त हुआ॥

षष्ठं मण्डलं समाप्तम्॥

॥ओ३म्॥

॥अथ सप्तमं मण्डलम्॥

ओ३म् विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव॥ ऋ०५.८२.५॥

अथ पञ्चविंशत्यृचस्य प्रथमस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १-१८ एकादशाक्षरपादैस्त्रिपदा विराड्गायत्री छन्दः। षड्जः स्वरः। १९-२५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ नरैः कथं विद्युदुत्पादनीयेत्याह॥

अब सातवें मण्डल के प्रथम सूक्त का आरम्भ है, इसके पहिले मन्त्र में मनुष्यों को विद्युत् अग्नि कैसे उत्पन्न करनी चाहिये, इस विषय को कहते हैं॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम्।
दूरेदृशं गृहपतिमथर्युम्॥ १॥

अग्निम्। नरः। दीधितिऽभिः। अरण्योः। हस्तऽच्युती। जनयन्त। प्रऽशस्तम्। दूरेऽदृशम्। गृहऽपतिम्। अथर्युम्॥ १॥

पदार्थः-(**अग्निम्**) पावकम् (**नरः**) (**दीधितिभिः**) प्रदीपिकाभिः क्रियाभिः (**अरण्योः**) यथा काष्ठविशेषयोः (**हस्तच्युती**) हस्तयोः प्रच्युत्या भ्रामणक्रियया (**जनयन्त**) (**प्रशस्तम्**) उत्तमम् (**दूरदेशम्**) दूरे द्रष्टुं योग्यम् (**गृहपतिम्**) स्वामिनम् (**अथर्युम्**) अहिंसां कामयमानम्॥ १॥

अन्वयः-हे नरो विद्वांसो! यथा भवन्तो दीधितिभिर्हस्तच्युती अरण्योर्दूरे दृशमग्निं जनयन्त तथाऽथर्युं गृहपतिं प्रशस्तं कुर्वन्तु॥ १॥

भावार्थः-हे विद्वज्जना! यथा घर्षिताभ्यामरणिभ्यामग्निरुत्पद्यते तथा सर्वैः पार्थिवैर्वायव्यैर्वा द्रव्यैर्द्रव्याणां घर्षणेन या विद्युत्सर्वव्याप्ता सत्युत्पद्यते सा दूरदेशस्थसमाचारादिव्यवहारान् साद्धुं शक्नोत्येतद्विद्यया गृहस्थानां महानुपकारो भवतीति॥ १॥

पदार्थः-हे (**नरः**) विद्वान् मनुष्यो! जैसे आप (**दीधितिभिः**) उत्तेजक क्रियाओं से (**हस्तच्युती**) हाथों से प्रकट होने वाली घुमानारूप क्रिया से (**अरण्योः**) अरणी नामक ऊपर नीचे के दो काष्ठों में (**दूरेदृशम्**) दूर में देखने योग्य (**अग्निम्**) अग्नि को (**जनयन्त**) प्रकट करें, वैसे (**अथर्युम्**) अहिंसाधर्म को चाहते हुए (**गृहपतिम्**) घर के स्वामी को (**प्रशस्तम्**) प्रशंसायुक्त करो॥ १॥

भावार्थः-हे विद्वान् जनो! जैसे घिसी हुई अरणियों से अग्नि उत्पन्न होता है, वैसे सब पार्थिव द्रव्य वा वायुसम्बन्धी द्रव्यों के घिसने से जो सर्वत्र व्याप्त हुई विद्युत् उत्पन्न होती है, वह दूर देशों में समाचारादि पहुँचने रूप व्यवहारों को सिद्ध कर सकती है। इस विद्युत् विद्या से गृहस्थों का बड़ा

उपकार होता है।

पुनस्तं कथं जनयेदित्याह॥

फिर उस बिजुली को कैसे प्रकट करे, इस विषय को अगले मन्त्र में कहते हैं॥

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्।
दक्षाय्यो यो दम आस नित्यः॥ २॥

तम्। अग्निम्। अस्ते। वसवः। नि। ऋण्वन्। सुऽप्रतिचक्षम्। अवसे। कुतः। चित्। दक्षाय्यः। यः। दमे। आस। नित्यः॥ २॥

पदार्थः-(**तम्**) (**अग्निम्**) विद्युदाख्यम् (**अस्ते**) गृहे वा प्रक्षेपणे (**वसवः**) प्राथमकल्पिका विद्वांसः (**नि**) नितराम् (**ऋण्वन्**) प्रसाध्नुवन् (**सुप्रतिचक्षम्**) सुष्ठु प्रतिचष्टे पश्यत्यनेका विद्या येन तम् (**अवसे**) रक्षणाय बह्वन्नाय वा। **अव इत्यन्ननाम।** (निघं०२.७) (**कुतः**) कस्मात् (**चित्**) अपि (**दक्षाय्यः**) दक्षश्चतुरो विद्वानिव (**यः**) (**दमे**) गृहे दमने वा (**आस**) अस्ति (**नित्यः**) सनातनः॥ २॥

अन्वयः-हे विद्वांसो! यो दक्षाय्य इव दमे नित्य आस यं सुप्रतिचक्षं कुतश्चिदवसे वसवो न्यृण्वँस्तमग्निमस्ते भवन्तो जनयन्तु॥ २॥

भावार्थः-हे विद्वांसो! योऽयं नित्यस्वरूपो विद्युदग्निर्मूर्त्तद्रव्याणि गृहाणि कृत्वा नित्यस्वरूपेण प्रतिष्ठितोऽस्ति तं विद्याक्रियाभ्यां जनयित्वा कलायन्त्रेषु संप्रयोज्य बह्वन्नधनं रक्षणं च प्राप्नुवन्तु॥ २॥

पदार्थः-हे विद्वानो! (**यः**) जो (**दक्षाय्यः**) चतुर विद्वान् के तुल्य (**दमे**) घर वा इन्द्रियादि के दमन में (**नित्यः**) सनातन उपयोगी (**आस**) है जिस (**सुप्रतिचक्षम्**) मनुष्य जिसके द्वारा अनेक विद्याओं को अच्छे प्रकार देखता है (**कुतश्चित्**) किसी से (**अवसे**) रक्षा वा अधिक अन्न के लिये (**वसवः**) प्रथम कक्षा के विद्वान् (**नि, ऋग्वन्**) निरन्तर प्रसिद्ध करें (**तम्**) उस (**अग्निम्**) विद्युत को (**अस्ते**) घर में वा फेंकने में आप लोग उत्पन्न करो॥ २॥

भावार्थः-हे विद्वानो! जो यह नित्यस्वरूप विद्युत् अग्नि स्थूल द्रव्यों को घर बना के नित्य स्वरूप से स्थित है, उस अग्नि को विद्या और क्रियाओं से प्रकट कर तथा कलायन्त्रों में संयुक्त कर के बहुत अन्न, धन और रक्षा को प्राप्त होओ॥ २॥

पुनस्तं कथं जनयेदित्याह॥

फिर उसको कैसे प्रकट करे, इस विषय को अगले मन्त्र में कहते हैं॥

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ।
त्वां शान्त उप यन्ति वाजाः॥ ३॥

प्रऽइद्धः। अग्ने। दीदिहि। पुरः। नः। अजस्रया। सूर्म्या। यविष्ठ। त्वाम्। शश्वन्तः। उप। यन्ति। वाजाः॥ ३॥

पदार्थः-(**प्रेद्धः**) प्रकर्षेणेद्धः प्रदीप्तः (**अग्नेः**) पावक इव प्रकाशितप्रज्ञ (**दीदिहि**) प्रदीपय

(पुरः) पुरस्तात् **(नः)** अस्मान् **(अजस्रया)** निरन्तरया क्रियया **(सूर्म्या)** सछिद्रया मूर्त्या कलया वा **(यविष्ठ)** अतिशयेन युवन् **(त्वाम्)** **(शश्वन्तः)** अनादिभूताः प्रवाहेण नित्याः पृथिव्यादयः **(उप)** **(यन्ति)** **(वाजाः)** प्राप्तव्याः पदार्थाः॥३॥

अन्वयः-हे यविष्ठाग्ने यः प्रेद्धोऽग्निरजस्रया सूर्म्या नोऽस्माँस्त्वां च प्राप्तोऽस्ति यं शश्वन्तो वाजा उप यन्ति तं पुरो विद्याक्रियाभ्यां दीदिहि॥३॥

भावार्थः-हे विद्वांसो! योऽग्निरनादिभूतेषु प्रकृत्यवयवेषु विद्युद्रूपेण व्याप्तोऽस्ति यस्य विद्यया बहवोः व्यवहाराः सिध्यन्ति तं सततं प्रकाश्य धनधान्यादिकमैश्वर्यं प्राप्नुत॥३॥

पदार्थः-हे **(यविष्ठ)** अत्यन्त जवान **(अग्ने)** अग्नि के तुल्य प्रकाशित बुद्धि वाले विद्वान्! जो **(प्रेद्धः)** अच्छे प्रकार जलता हुआ अग्नि **(अजस्रया)** निरन्तर प्रवृत्त क्रिया **[से]** **(सूर्म्या)** अच्छे छिद्र सहित शरीरादि मूर्त्ति वा कला से **(नः)** हम को और **(त्वाम्)** तुम को प्राप्त है जिस को **(शश्वन्तः)** प्रवाह से नित्य आदि पृथिव्यादि **(वाजाः)** प्राप्त होने योग्य पदार्थ **(उप, यन्ति)** समीप प्राप्त होते हैं उसको **(पुरः)** पहिले वा सामने विद्या और क्रिया से **(दीदिहि)** प्रदीप्त कर॥३॥

भावार्थः-हे विद्वानो! जो अग्नि अनादिस्वरूप प्रकृति के अवयवों में विद्युद्रूप से व्याप्त है, जिसकी विद्या से बहुत से व्यवहार सिद्ध होते हैं, उसको निरन्तर प्रकाशित कर धनधान्यादि ऐश्वर्य्य को प्राप्त होओ॥३॥

पुनरग्निः कस्माज्जनयितव्य इत्याह॥

फिर अग्नि किससे प्रकट करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः।
यत्रा नरः समासते सुजाताः॥४॥

प्र। ते। अग्नयः। अग्निऽभ्यः। वरम्। निः। सुऽवीरासः। शोशुचन्त। द्युऽमन्तः। यत्र। नरः। सम्ऽआसते। सुऽजाताः॥४॥

पदार्थः-**(प्र)** **(ते)** **(अग्नयः)** विद्युदादयः **(अग्निभ्यः)** पावकपरमाणुभ्यः **(वरम्)** उत्तमं व्यवहारम् **(निः)** नितराम् **(सुवीरासः)** शोभनाश्च ते वीराश्च **(शोशुचन्त)** शोधयन्ति **(द्युमन्तः)** द्यौर्बह्वी दीप्तिर्वर्त्तते येषु ते **(यत्र)** यस्मिन् व्यवहारे। अत्र **ऋचि तुनुघे**ति दीर्घः। **(नरः)** पुरुषार्थेनाप्तव्यप्रापकाः **(समासते)** सम्यक् प्राप्नुवन्ति **(सुजाताः)** सुष्ठु प्रसिद्धाः॥४॥

अन्वयः-ये सुवीरासो नरस्ते यत्राग्निभ्यः सुजाता द्युमन्तोऽग्नयो जायन्ते तत्र निः शोशुचन्त तेभ्यो वरं प्र समासते तथैतं यूयमपि जनयित्वोत्तमं सुखं प्राप्नुथ॥४॥

भावार्थः-ये मनुष्या अग्नेरग्निमुत्पाद्य सिद्धकामा भूत्वाऽनुत्तमं सुखं प्राप्नुवन्ति ते जगति सुप्रसिद्धा भवन्ति॥४॥

पदार्थः-जो **(सुवीरासः)** सुन्दर वीर **(नरः)** पुरुषार्थ को प्राप्त करने हारे विद्वान् हैं **(ते)** वे **(यत्र)** जिस व्यवहार में **(अग्निभ्यः)** अग्नि के परमाणुओं से **(सुजाताः)** अच्छे प्रकार प्रकट हुए

(द्युमन्तः) बहुत दीप्ति वाले **(अग्नयः)** विद्युत् आदि अग्नि उत्पन्न होते हैं उसमें **(निः, शोशुचन्त)** निरन्तर शुद्धि करते और उनसे **(वरम्)** उत्तम व्यवहार को **(प्र, समासते)** सम्यक् प्राप्त होते हैं, वैसे इसको प्रकट करके तुम लोग भी उत्तम सुख को प्राप्त होओ॥४॥

भावार्थः-जो मनुष्य अग्नि से अग्नि को उत्पन्न कर सिद्ध कामना वाले होके सर्वोत्तम सुख पाते हैं, वे जगत् में अच्छे प्रसिद्ध होते हैं॥४॥

पुनः सोऽग्निः कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

दा नो॑ अग्ने धि॒या र॒यिं सु॒वीरं॑ स्वप॒त्यं स॑हस्य प्रश॒स्तम्।
न यं यावा॒ तर॑ति यातु॒मावा॑न्॥५॥२३॥

दाः। नः। अ॒ग्ने॒। धि॒या। र॒यिम्। सु॒ऽवीर॑म्। सु॒ऽअ॒प॒त्यम्। स॒ह॒स्य॒। प्र॒ऽश॒स्तम्। न। यम्। यावा॑। तर॑ति। या॒तु॒ऽमावा॑न्॥५॥

पदार्थः-(**दाः**) देहि **(नः)** अस्मभ्यम् **(अग्ने)** अग्निरिव विद्वन् **(धिया)** प्रज्ञया कर्मणा वा **(रयिम्)** धनम् **(सुवीरम्)** शोभना वीरा यस्मात्तम् **(स्वपत्यम्)** शोभनान्यपत्यानि सन्ताना यस्मात्तम् **(सहस्य)** सहसि बले साधो **(प्रशस्तम्)** उत्तमम् **(न)** निषेधे **(यम्)** **(यावा)** यो याति **(तरति)** उल्लङ्घयति **(यातुमावान्)** गच्छन्मत्सदृशः॥५॥

अन्वयः-हे सहस्याग्ने! धिया यथाऽग्निर्धिया क्रियया सुवीरं स्वपत्यं प्रशस्तं रयिं नोऽस्मभ्यं ददाति। यं यातुमावान् यावा न तरति तद्विद्याधियाऽस्मभ्यं त्वं दाः॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथाग्निविद्यया सुसन्ताना उत्तमशूरवीराः श्रेष्ठं धनं महान् यानवेगश्च प्रजायते तां सुविचारेण विविधक्रियया जनयत॥५॥

पदार्थः-हे **(सहस्य)** बल में श्रेष्ठ **(अग्नि)** अग्नि के तुल्य तेजस्वी विद्वन्! **(धिया)** बुद्धि वा कर्म से जैसे अग्नि क्रिया से **(सुवीरम्)** सुन्दर वीर जन **(स्वपत्यम्)** सुन्दर सन्तान जिससे हों उस **(प्रशस्तम्)** उत्तम **(रयिम्)** धन को **(नः)** हमारे लिये देता है **(यम्)** जिसकी **(यातुमावान्)** मेरे तुल्य चलता हुआ **(यावा)** गमनशील **(न)** नहीं **(तरति)** उल्लङ्घन करता उस प्रकार की विद्या हमारे लिये बुद्धि से आप **(दाः)** दीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जिसे अग्नि-विद्या से सुन्दर सन्तान, उत्तम शूरवीर जन श्रेष्ठ धन और यानों का बड़ा वेग उत्पन्न हो, उस विद्या को उत्तम विचार और अनेक प्रकार की क्रियाओं से प्रकट करो॥५॥

पुनरग्निविद्या किंवत्किं जनयतीत्याह॥

फिर अग्नि-विद्या किसके तुल्य क्या उत्पन्न करती है, इस विषय को अगले मन्त्र में कहते हैं॥

उप॒ यमेति॑ युव॒तिः सु॒दक्षं॑ दो॒षावस्तो॑र्हवि॒ष्मती॑ घृ॒ताची॑।

उप॒स्वैन॑म॒रम॑तिर्वसू॒युः॥ ६॥

उप॑। यम्। एति॑। यु॒व॒तिः। सु॒ऽदक्ष॑म्। दो॒षा। वस्तोः॑। ह॒विष्म॑ती। घृ॒ताची। उप॑। स्वा। ए॒न॒म्। अ॒रम॑तिः। व॒सू॒ऽयुः॥ ६॥

पदार्थः-(**उप**) (**यम्**) हृद्यं पतिम् (**एति**) प्राप्नोति (**युवतिः**) प्राप्तयौवना कन्या (**सुदक्षम्**) सुष्ठुबलयुक्तम् (**दोषा**) रात्रिः (**वस्तोः**) दिनम् (**हविष्मती**) बहूनि हवींषि ग्राह्यवस्तूनि विद्यन्ते यस्यां सा (**घृताची**) रात्रिः। **घृताचीतिरात्रिनाम।** (निघं०१.७) (**उप**) (**स्वा**) स्वकीया (**एनम्**) विवाहितम् (**अरमतिः**) न विद्यते पूर्वा रमती रमणे गृहस्थक्रिया यस्याः सा (**वसूयुः**) या वसूनि द्रव्याणि कामयति सा॥ ६॥

अन्वयः-हे विद्वांसो! यथा युवतिर्दोषावस्तोः सुदक्षं यं पतिमुपैति यथा हविष्मती घृताची चन्द्रमुपैति यथाऽरमतिर्वसूयुः [स्वा] स्वभार्य्यैनं युवानं प्रियं पतिं प्राप्य सुखमुपैति तथाऽग्निविद्यां प्राप्य यूयं सततं मोदध्वम्॥ ६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। येऽहर्निशमुद्यमेन विद्यया वह्निविद्यां जनयन्ति ते प्रियस्त्रीपुरुषवन्महान्तमानन्दं प्राप्नुवन्ति॥ ६॥

पदार्थः-हे विद्वानो! जैसे (**युवतिः**) युवावस्था को प्राप्त कन्या (**दोषा, वस्तोः**) रात्रि दिन (**सुदक्षम्**) अच्छे बलयुक्त (**यम्**) जिस पति को (**उप, एति**) समीप से प्राप्त होती है जैसे (**हविष्मती**) ग्रहण करने योग्य बहुत वस्तुओं वाली (**घृताची**) रात्री चन्द्रमा को (**उप**) प्राप्त होती है तथा जैसे (**अरमतिः**) जिस के गृहस्थ के तुल्य रमण किया नहीं वह (**वसूयुः**) द्रव्यों की कामना करने वाली (**स्वा**) अपनी स्त्री (**एनम्**) इस विवाहित प्रियपति को प्राप्त होके सुख पाती है, वैसे अग्निविद्या को प्राप्त होके तुम लोग निरन्तर आनन्दित होओ॥ ६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो दिन रात उद्यम और विद्या के द्वारा अग्निविद्या को प्रकट करते हैं, वे परस्पर प्रीति रखने वाले की पुरुषों के तुल्य बड़े आनन्द को प्राप्त होते हैं॥ ६॥

पुनरग्निना कीदृश उपकारो ग्राह्य इत्याह॥

फिर अग्नि से [कैसा] उपकार लेना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

विश्वा॑ अ॒ग्नेऽप॑ द॒हारा॑ती॒र्येभि॒स्तपो॑भि॒रद॑हो॒ जरू॑थम्।
प्र नि॑स्व॒रं चा॑तय॒स्वामी॑वाम्॥ ७॥

विश्वा॑ः। अ॒ग्ने॒। अप॑। द॒ह॒। अरा॑तीः। येभि॑ः। तप॑ःऽभिः। अद॑हः। जरू॑थम्। प्र। नि॒ऽस्व॒रम्। चा॒त॒य॒स्व॒। अमी॑वाम्॥ ७॥

पदार्थः-(**विश्वाः**) समग्राः (**अग्ने**) अग्निवद्विद्वन् (**अप**) (**दह**) (**अरातीः**) शत्रुसेनाः (**येभिः**) यैः (**तपोभिः**) प्रतप्तकरैरग्निगुणैः (**अदहः**) दहति (**जरूथम्**) जरावस्थां प्राप्तं जीर्णं काष्ठम् (**प्र**)

(निस्वरम्) निर्मूलम् **(चातयस्व)** नाशं प्रापय। **चततिर्गतिकर्मा।** (निघं०२.१४) **(अमीवाम्)** रोगम्॥७॥

अन्वयः-हे अग्ने! येभिस्तपोभिरग्निर्जरूथमदहस्तैर्विश्वा अरातीरप दहाऽमीवां निस्वरं प्र चातयस्व॥७॥

भावार्थः-हे विद्वांसो! यदि भवन्तोऽग्निप्रभावं विदित्वाऽऽग्नेयाऽस्त्रादीनि निर्माय सङ्ग्रामे प्रवर्तेरँस्तर्ह्यनेकाः शत्रुसेनाः सद्यो दह्येयुर्यथा सद्वैद्यः स्वकीयं शरीरमरोगं कृत्वाऽन्यानरोगान् करोति तथैव भवन्तोऽग्निविद्याप्रभावेन रोगभूताञ्छत्रून्निवारयन्तु॥७॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य तेजस्वी विद्वन्! **(येभिः)** जिन **(तपोभिः)** हाथों को तपाने वाले अग्नि के गुणों से अग्नि **(जरूथम्)** जीर्ण अवस्था को प्राप्त हुए पुराने काष्ठ को **(अदहः)** जलाता है उन गुणों से **(विश्वाः)** सब **(अरातीः)** शत्रुओं की सेनाओं को **(अप, दह)** जलाइये तथा **(अमीवाम्)** रोग को **(निस्वरम्)** निर्मूल जैसे हो, वैसे **(प्र, चातयस्व)** नष्ट कीजिये॥७॥

भावार्थः-हे विद्वानो! जो आप अग्नि के प्रभाव को जान के आग्नेयास्त्र आदिकों को बना के संग्राम में प्रवृत्त हों तो अनेक शत्रुओं की सेनाएँ शीघ्र भस्म होवें, जैसे उत्तम वैद्य अपने शरीर को रोगरहित करके अन्यों को रोगरहित करता है, वैसे ही आप लोग अग्निविद्या के प्रभाव से रोगरूप शत्रुओं का निवारण करो॥७॥

पुनर्विद्वद्भिः केन तेजस्विनी सेना कार्येत्याह॥

फिर विद्वानों को किससे सेना तेजस्विनी करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

आ यस्ते॑ अग्न इ॒धते॒ अनी॑कं॒ वसि॑ष्ठ शुक्र॒ दीदि॑व॒ः पाव॑क।
उ॒तो न॑ एभि॒ः स्त॒वथै॑रि॒ह स्या॑ः॥८॥

आ। यः। ते। अ॒ग्ने॒। इ॒ध्य॒ते। अनी॑कम्। वसि॑ष्ठ। शुक्र॑। दीदि॑ऽवः। पाव॑क। उ॒तो॒ इति॑। नः॒। एभि॒ः। स्त॒वथै॑ः। इ॒ह। स्याः॥८॥

पदार्थः-(**आ**) समन्तात् **(यः)** **(ते)** तव **(अग्ने)** पावक इव **(इध्यते)** प्रदीपयति **(अनीकम्)** सैन्यम् **(वसिष्ठ)** अतिशयेन वसो **(शुक्र)** आशुकारिन् वीर्यवन् **(दीदिवः)** विजय कामयमान **(पावक)** पवित्र **(उतो)** **(नः)** अस्माकम् **(एभिः)** **(स्तवथैः)** **(इह)** अस्मिन् राज्ये **(स्याः)** भवेः॥८॥

अन्वयः-हे अग्ने वह्निरिव वर्त्तमान वसिष्ठ शुक्र दीदिवः पावक राजन् यस्य ते तवाऽनीकं योऽग्निरा इधते तस्यैभिः स्तवथैरिह नो रक्षकः स्या उतो अपि वयं तदग्निबलेनैव ते रक्षकाः स्याम॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये राजपुरुषा अग्निविद्ययाऽऽग्नेयास्त्रादीनि निर्माय स्वसैन्यं सुप्रकाशितं कृत्वा न्यायेन प्रजापालकास्स्युस्ते दीर्घसमयं राज्यं महैश्वर्य्या जायन्ते॥८॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य वर्त्तमान **(वसिष्ठ)** अतिशय कर वसने और **(शुक्र)** शीघ्रता करने वाले पराक्रमी **(दीदिवः)** विजय की कामना करते हुए **(पावक)** पवित्र **[**राजन्! जिस**]** **(ते)**

आपकी **(अनीकम्)** सेना को **(यः)** जो अग्नि **(आ, इधते)** प्रदीप्त प्रकाशित कराता है उस अग्नि की **(एभिः)** इन **(स्तवथैः)** स्तुतियों से **(इह)** इस राज्य में **(नः)** हमारे रक्षक **(स्याः)** हूजिये **(उतो)** और भी हम लोग उस अग्नि के बल से ही आपके रक्षक होवें॥८॥

भावार्थः-इस मन्त्र वाचकलुप्तोपमालङ्कार है। जो राजपुरुष अग्निविद्या से आग्नेयास्त्रादि को बना के अपनी सेना को अच्छे प्रकार प्रकाशित करके न्याय से प्रजा के पालक हों, वे दीर्घ समय तक राज्य को पाके महान् ऐश्वर्य वाले होते हैं॥८॥

पुनः कीदृशैः सह राजा प्रजाः पालयेदित्याह॥

फिर कैसे भृत्यों के साथ राजा प्रजा का पालन करे, इस विषय को अगले मन्त्र में कहते हैं॥

वि ये ते॑ अग्ने भेजि॒रे अनी॑कं॒ मर्ता॒ नर॒: पित्र्या॑सः पुरु॒त्रा।
उ॒तो न॑ एभिः सु॒मना॑ इ॒ह स्या॑:॥९॥

वि। ये। ते॒। अ॒ग्ने॒। भे॒जि॒रे। अनी॑कम्। मर्ता॑:। नर॑:। पित्र्या॑सः। पु॒रु॒ऽत्रा। उ॒तो॒ इति॑। न॒:। ए॒भिः। सु॒ऽमना॑:। इ॒ह। स्याः॥९॥

पदार्थः-(**वि**) (**ये**) विद्वांसः (**ते**) (**अग्ने**) तडिदिव प्रकाशमान (**भेजिरे**) सेवन्ते (**अनीकम्**) सैन्यम् (**मर्त्ताः**) मनुष्याः (**नरः**) नायकाः (**पित्र्यासः**) पितृभ्यो हिताः (**पुरुत्रा**) पुरुषु बहुषु राजसु (**उतो**) अपि (**नः**) अस्माकमुपरि (**एभिः**) प्रत्यक्षैर्विद्वद्भिः सह (**सुमनाः**) सुष्ठु शुद्धमनाः (**इह**) अस्मिन् राज्ये (**स्याः**)॥९॥

अन्वयः-हे अग्ने! ये पित्र्यासो मर्ता नरस्ते **[**पुरुत्रा**]** अनीकं वि भेजिरे उतो एभिस्सह त्वमिह नः सुमनाः स्याः॥९॥

भावार्थः-हे राजन्! येऽग्निविद्यायां कुशला भवत्सेनाप्रकाशका वीरपुरुषा धर्मिष्ठा विद्वांसोऽधिकारिणः स्युस्तैस्सह भवान् न्यायेनाऽस्माकं पालको भूयाः॥९॥

पदार्थः-हे (**अग्ने**) विद्युत् के तुल्य प्रकाशमान! (**ये**) जो विद्वान् (**पित्र्यासः**) पितरों के लिये हितकारी (**मर्त्ताः**) मनुष्य (**नरः**) नायक हैं (**ते**) वे (**पुरुत्रा**) बहुत राजाओं में (**अनीकम्**) सेना को (**वि, भेजिरे**) सेवन करते हैं (**उतो**) और (**एभिः**) इन प्रत्यक्ष विद्वानों के साथ आप (**इह**) इस राज्य में (**नः**) हम पर (**सुमनाः**) शुद्ध चित्त वाले प्रसन्न (**स्याः**) हूजिये॥९॥

भावार्थः-हे राजन्! जो अग्निविद्या में कुशल, आपकी सेना के प्रकाशक, वीर पुरुष, धार्मिक, विद्वान् अधिकारी हों, उनके साथ आप न्याय से हमारे पालक हूजिये॥९॥

राज्ञा कीदृशा अमात्याः कर्त्तव्या इत्याह॥

राजा को कैसे मन्त्री करने चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मे नरो॑ वृत्र॒हत्ये॑षु शू॒रा विश्वा॒ अदे॑वीर॒भि स॑न्तु मा॒याः।
ये मे॒ धियं॑ प॒नय॑न्त प्रशस्ताम्॥१०॥२४॥

इ॒मे। नर॑:। वृ॒त्र॒ऽइ॒त्ये॑षु। शूरा॑:। विश्वा॑:। अदे॑वी:। अ॒भि। स॒न्तु॒। मा॒या:। ये। मे॒। धिय॑म्। प॒नय॑न्त। प्र॒ऽश॒स्ताम्॥ १०॥

पदार्थ:-(**इमे**) वर्त्तमाना: (**नर:**) न्याययुक्ता: (**वृत्रहत्येषु**) स-ामेषु (**शूरा:**) (**विश्वा:**) समग्रा: (**अदेवी:**) अदिव्या अशुद्धा: (**अभि**) आभिमुख्ये (**सन्तु**) भवन्तु (**माया:**) कपटछलयुक्ता: प्रज्ञा: (**ये**) (**मे**) मम (**धियम्**) प्रज्ञाम् (**पनयन्त**) स्तुवन्ति व्यवहरन्ति वा (**प्रशस्ताम्**) उत्तमाम्॥ १०॥

अन्वय:-हे राजन्! य इमे शूरा नरो वृत्रहत्येषु विश्वा अदेवीर्माया निवार्य्य मे प्रशस्तां धियमभि पनयन्त ते तव कार्य्यकरा: सन्तु॥ १०॥

भावार्थ:-हे राजन्! ये शत्रूणां छलैर्वञ्चिता न स्युस्सङ्ग्रामेषूत्साहिता: शौर्योपेता युध्येयु: सर्वतो गुणान् गृहीत्वा दोषाँस्त्यजेयुस्त एव तवाऽमात्या: सन्तु॥ १०॥

पदार्थ:-हे राजन्! (**ये**) जो (**इमे**) वर्त्तमान (**शूरा:**) शूरवीर (**नर:**) न्याययुक्त पुरुष (**वृत्रहत्येषु**) संग्रामों में (**विश्वा:**) समस्त (**अदेवी:**) अशुद्ध (**माया:**) कपट छलयुक्त बुद्धियों को निवृत्त करके (**मे**) मेरी (**प्रशस्ताम्**) प्रशंसित (**धियम्**) उत्तम बुद्धि का (**अभि, पनयन्त**) सम्मुख स्तुति वा व्यवहार करते हैं, वे आपके कार्य्य करने वाले (**सन्तु**) हों॥ १०॥

भावार्थ:-हे राजन्! जो शत्रुओं के छलों से ठगे हुए न हों, संग्रामों में उत्साह को प्राप्त, शूरतायुक्त युद्ध करें, सब ओर से गुणों को ग्रहण कर दोषों को त्यागें, वे ही आपके मन्त्री हों॥ १०॥

पुनरेते राजादय: किं न कुर्य्युरित्याह॥

फिर ये राजादि क्या न करें, इस विषय को अगले मन्त्र में कहते हैं॥

मा शू॒ने अग्ने॒ नि ष॑दाम नृ॒णां माशेष॑सोऽवीर॒ता॒ परि॑ त्वा।
प्र॒जाव॑तीषु दुर्या॑सु दुर्य॥ ११॥

मा। शू॒ने। अ॒ग्ने॒। नि। स॒दा॒म॒। नृ॒णाम्। मा। अ॒शेष॑सः। अ॒वीर॑ता। परि॑। त्वा॒। प्र॒जाऽव॑तीषु। दुर्या॑सु। दुर्य॥ ११॥

पदार्थ:-(**मा**) निषेधे (**शूने**) शू: सद्य: करणं विद्यते यस्मिँस्तस्मिन् सैन्ये। अत्र **शू इति क्षिप्रनाम।** (निघं०२.१५) तस्मात्पामादित्वान्मत्वर्थीयो न: प्रत्यय:। (**अग्ने**) पावक इव तेजस्विन् (**नि**) नितराम् (**सदाम**) सीदेम (**नृणाम्**) नायकानाम् (**मा**) (**अशेषस:**) नि:शेषा: (**अवीरता**) वीरभावरहितता (**परि**) (**त्वा**) त्वाम् (**प्रजावतीषु**) प्रशस्तप्रजायुक्तासु (**दुर्यासु**) गृहेषु भवासु रीतिषु (**दुर्य्य**) गृहेषु वर्त्तमान॥ ११॥

अन्वय:-हे अग्ने! याऽवीरता तथा नृणां मध्ये मा निषदाम शूने सैन्येऽशेषस: त्वा मा परि नि षदाम। हे दुर्य! यत: प्रजावतीषु दुर्यासु सुखेन नि षदाम तथा विधेहि॥ ११॥

भावार्थ:-हे क्षत्रियकुलोद्भवा राजपुरुषा यूयं कातरा मा भवत विरोधेन परस्परेण सहयुध्वा नि:शेषा मा सन्तु सनातन्या राजनीत्या प्रजा: पालयित्वा यशस्विनो भवत॥ ११॥

पदार्थ:-हे (**अग्ने**) अग्नि के तुल्य तेजस्विन्! जो (**अवीरता**) वीरों का अभाव है उससे

(नृणाम्) नायकों में **(मा, निषदाम)** निरन्तर स्थित न हों **(शूने)** शीघ्रकारिणी सेना में **(अशेषसः)** सम्पूर्ण हम **(त्वा)** तेरे **(मा)** न **(परि)** सब ओर से निरन्तर स्थित हों। हे **(दुर्य्य)** घरों में वर्त्तमान! जिस कारण **(प्रजावतीषु)** प्रशस्त सन्तानों से युक्त **(दुर्यासु)** घरों में हुई रीतियों में सुखपूर्वक निरन्तर स्थित हों वैसा कीजिये॥११॥

भावार्थः-हे क्षत्रिय-कुल में हुए राजपुरुषो! तुम कातर मत होओ। विरोध से परस्पर युद्ध करके निःशेष मत होओ। सनातन राजनीति से प्रजाओं का पालन कर कीर्त्ति वाले होओ॥११॥

पुनस्सोऽग्निः किं साध्नोतीत्याह॥

फिर वह अग्नि क्या सिद्ध करता है, इस विषय को अगले मन्त्र में कहते हैं॥

यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः।
स्वजन्मना शेषसा वावृधानम्॥१२॥

यम्। अश्वी। नित्यम्। उपऽयाति। यज्ञम्। प्रजाऽवन्तम्। सुऽअपत्यम्। क्षयम्। नः। स्वऽजन्मना। शेषसा। ववृधानम्॥१२॥

पदार्थः-(**यम्**) (**अश्वी**) बहवो महान्तोऽश्वा वेगादयो गुणा विद्यन्ते यस्मिन् सोऽग्निः (**नित्यम्**) (**उपयाति**) समीपं गच्छति (**यज्ञम्**) सङ्गन्तव्यम् (**प्रजावन्तम्**) बह्व्यः प्रजा विद्यन्ते यस्मिँस्तम् (**स्वपत्यम्**) उत्तमैरपत्यैर्युक्तम् (**क्षयम्**) गृहम् (**नः**) अस्माकम् (**स्वजन्मना**) स्वस्य जन्मना (**शेषसा**) शेषीभूतेन (**वावृधानम्**) वर्धमानं वर्धयन्तम्॥१२॥

अन्वयः-हे विद्वांसो! योऽश्वी नो यं प्रजावन्तं स्वपत्यं यज्ञं क्षयं स्वजन्मना शेषसा वावृधानं नित्यमुपयाति तं यूयं विजानीत॥१२॥

भावार्थः-हे मनुष्या! योऽग्निः प्रादुर्भूतेन द्वितीयेन जन्मना प्रजाः सुसन्तानान् गृहञ्च प्रापयति तमग्निं प्रसाध्नुत॥१२॥

पदार्थः-हे विद्वानो! जो (**अश्वी**) बहुत वेगादि गुणों वाला अग्नि (**नः**) हमारे (**यम्**) जिस (**प्रजावन्तम्**) बहुत प्रजावाले (**स्वपत्यम्**) सुन्दर बालकों से युक्त (**यज्ञम्**) संग करने ठहरने योग्य (**क्षयम्**) घर को वा (**स्वजन्मना**) अपने **[**जन्म से**]** (**शेषसा**) शेष रहे भाग से (**वावृधानम्**) बढ़ते या बढ़ाते हुए के (**नित्यम्**) नित्य (**उपयाति**) निकट प्राप्त होता है, उसको तुम लोग जानो॥१२॥

भावार्थः-हे मनुष्यो! जो अग्नि प्रकट हुए द्वितीय जन्म से प्रजा, सुन्दर सन्तानों और घर को प्राप्त कराता है, उसको प्रसिद्ध करो॥१२॥

केन कस्मात् के रक्षणीया इत्याह॥

किस करके किससे किसकी रक्षा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

पाहि नो अग्ने रक्षसो अजुष्टात्पाहि धूर्तेरररुषो अघायोः।
त्वा युजा पृतनायूँरभि ष्याम्॥१३॥

पाहि। नः। अग्ने। रक्षसः। अजुष्टात्। पाहि। धूर्तेः। अररुषः। अघऽयोः। त्वा। युजा। पृतनाऽयून्। अभि। स्याम्॥ १३॥

पदार्थः-(**पाहि**) (**नः**) अस्मान् (**अग्ने**) विद्युदिव वर्त्तमान राजन्नुपदेशक वा (**रक्षसः**) दुष्टाचाराज्ञनात् (**अजुष्टात्**) धर्म्ममसेवमानात् (**पाहि**) (**धूर्तेः**) धूर्त्तात् (**अररुषः**) भृशं हिंसकात् (**अघायोः**) आत्मनोऽघमिच्छतः (**त्वा**) त्वया। विभक्तिव्यत्ययः (**युजा**) युक्तेन (**पृतनायून्**) सेनां कामयमानान् (**अभि**) आभिमुख्ये (**स्याम्**) भवेयम्॥ १३॥

अन्वयः-हे अग्ने! त्वं नो रक्षसः पाहि नोऽजुष्टाद्धूर्तेररुषोऽघायोः पाहि त्वा युजा वर्त्तमानोऽहं पृतनायूनभि ष्याम्॥ १३॥

भावार्थः-स एव राजाऽध्यापक उपदेशकः कर्मकर्ता वा श्रेष्ठो भवति यः स्वयं धार्मिको भूत्वाऽन्यानपि धार्मिकान् कुर्यात्॥ १३॥

पदार्थः-हे (**अग्ने**) विद्युत् अग्नि के तुल्य वर्त्तमान राजन् या उपदेशक! आप (**नः**) हमको (**रक्षसः**) दुष्टाचारी मनुष्यों से (**पाहि**) बचाइये। हमारी (**अजुष्टात्**) धर्म का सेवन न करते हुए अधर्मी (**धूर्तेः**) धूर्त (**अररुषः**) शीघ्र मारने वाले (**अघायोः**) आत्मा को पाप की इच्छा करते हुए से (**पाहि**) रक्षा कीजिये (**युजा**) युक्त हुए (**त्वा**) तुम्हारे साथ वर्त्तमान मैं (**पृतनायून्**) सेनाओं को चाहते हुओं के (**अभि, ष्याम्**) सम्मुख होऊँ॥ १३॥

भावार्थः-वही राजा अध्यापक उपदेशक वा कर्म करनेहारा श्रेष्ठ होता है, जो आप धर्मात्मा होकर अन्यों को भी धार्मिक करे॥ १३॥

पुनः सोऽग्निः कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

सेदुग्निरग्नीरँत्यस्त्वन्यान् यत्र वाजी तनयो वीळुपाणिः।
सहस्रपाथा अक्षरा समेति॥ १४॥

सः। इत्। अग्निः। अग्नीन्। अति। अस्तु। अन्यान्। यत्र। वाजी। तनयः। वीळुऽपाणिः। सहस्रऽपाथाः। अक्षरा। सम्ऽएति॥ १४॥

पदार्थः-(**सः**) (**इत्**) एव (**अग्निः**) पावकः (**अग्नीन्**) (**अति**) (**अस्तु**) (**अन्यान्**) भिन्नान् (**यत्र**) (**वाजी**) वेगबलादियुक्तः (**तनयः**) पुत्रः (**वीळुपाणिः**) वीळु बलं पाणयो यस्य सः (**सहस्रपाथाः**) सहस्राण्यमितानि पाथांस्यन्नादीनि यस्य सः (**अक्षरा**) उदकानि। अत्राकारादेशः। **अक्षरा इत्युदकनाम।** (निघं०१.१२) (**समेति**) सम्यगेति॥ १४॥

अन्वयः-हे मनुष्या! यो वाजी वीळुपाणिस्तनय इवाग्निर्यत्राऽन्यानग्नीन् प्राप्तोऽत्यस्तु स इत् सहस्रपाथा अक्षरा समेति तं यूयं साध्नुत॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सुपुत्रः पितॄन् प्राप्नोति तथाऽग्निरग्नीन् प्राप्नोति प्रसिद्धो भूत्वा स्वस्वरूपं कारणं प्राप्य स्थिरो भवति येऽभिव्याप्तां विद्युतं प्रकटयितुं विजानन्ति

तेऽसंख्यमैश्वर्यमाप्नुवन्ति॥१४॥

पदार्थः-हे मनुष्यो! जो **(वाजी)** वेगबलादियुक्त **(वीळुपाणिः)** बलरूप जिस के हाथ हैं **(तनयः)** पुत्र के तुल्य **(अग्निः)** अग्नि **(यत्र)** जहाँ **(अन्यान्)** अन्य **(अग्नीन्)** अग्नियों को प्राप्त **(अत्यस्तु)** अत्यन्त हो **(सः, इत्)** वही **(सहस्रपाथाः)** अतोल **[**=अतुलनीय**]** अन्नादि पदार्थों वाला **(अक्षरा)** जलों को **(समेति)** सम्यक् प्राप्त होता है, वहाँ उसको तुम लोग सिद्ध करो॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सुपुत्र पितरों को प्राप्त होता है, वैसे अग्नि अग्नियों को प्राप्त होता है तथा प्रसिद्ध होकर अपने स्वरूप कारण को प्राप्त होकर स्थिर होता है, जो लोग अभिव्याप्त बिजुली के प्रकट करने को जानते हैं, वे असंख्य ऐश्वर्य्य को प्राप्त होते हैं॥१४॥

पुनः सोऽग्निः कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

सेदु॒ग्निर्यो व॑नुष्य॒तो नि॒पाति॑ समे॒द्धार॒मंह॑स उरु॒ष्यात्।
सु॒जा॒तास॒: परि॑ चरन्ति वी॒राः॥१५॥२५॥

सः। इत्। अ॒ग्निः। यः। व॒नु॒ष्य॒तः। नि॒पाति॑। स॒म्ऽए॒द्धार॑म्। अंह॑सः। उ॒रु॒ष्यात्। सु॒ऽजा॒तास॑ः। परि॑। च॒र॒न्ति॒। वी॒राः॥१५॥

पदार्थः-**(सः)** **(इत्)** एव **(अग्निः)** पावकः **(यः)** **(वनुष्यतः)** याचमानान् **(निपाति)** नितरां रक्षति **(समेद्धारम्)** यः सम्यगिन्धयति प्रदीपयति तम् **(अंहसः)** दुःखदारिद्र्याख्यात् पापात् **(उरुष्यात्)** रक्षेत् **(सुजातासः)** सुष्ठु विद्यासु प्रसिद्धाः **(परि)** सर्वतः **(चरन्ति)** जानन्ति गच्छन्ति वा **(वीराः)** प्राप्तविज्ञानाः॥१५॥

अन्वयः-हे मनुष्य! योऽग्निर्वनुष्यतो निपाति समेद्धारमंहसः उरुष्याद्यं सुजातासो वीराः परिचरन्ति स इदेव युष्माभिः सम्प्रयोक्तव्यः॥१५॥

भावार्थः-ये मनुष्याः सुविद्ययाऽग्निं संसेव्य कार्य्यसिद्धये सम्प्रयुञ्जते ते दुःखदारिद्र्यविरहा यशस्विनः सन्तो विजयसुखं सततं प्राप्नुवन्ति॥१५॥

पदार्थः-हे मनुष्य! **(यः)** जो **(अग्निः)** अग्नि **(वनुष्यतः)** याचना करते हुओं की **(निपाति)** निरन्तर रक्षा करता है तथा **(समेद्धारम्)** सम्यक् प्रकाशित कराने वाले को **(अंहसः)** दुःख वा दरिद्रता से **(उरुष्यात्)** रक्षा करे जिसको **(सुजातासः)** विद्याओं में अच्छे प्रकार प्रसिद्ध और **(वीराः)** विज्ञान को प्राप्त हुए वीरपुरुष **(परि, चरन्ति)** सब ओर से जानते वा प्राप्त होते हैं **(सः, इत्)** वही अग्नि तुम लोगों को अच्छे प्रकार उपयोग में लाना चाहिये॥१५॥

भावार्थः-जो मनुष्य अच्छी विद्या से अग्नि का सेवन कर कार्यसिद्ध के लिये संयुक्त करते हैं, वे दुःख और दरिद्रता से रहित, कीर्त्ति वाले हुए विजय के सुख को निरन्तर प्राप्त होते हैं॥१५॥

पुनः सोऽग्निः कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिद्धे हविष्मान्।
परि यमेत्यध्वरेषु होता॥ १६॥

अयम्। सः। अग्निः। आऽहुतः। पुरुऽत्रा। यम्। ईशानः। सम्। इत्। इन्धे। हविष्मान्। परि। यम्। एति। अध्वरेषु। होता॥ १६॥

पदार्थः-(**अयम्**) (**सः**) (**अग्निः**) विद्युत् (**आहुतः**) सम्यक् स्वीकृतः (**पुरुत्रा**) बहूनि कार्याणि (**यम्**) (**ईशानः**) जगदीश्वरः (**सम्**) (**इत्**) एव (**इन्धे**) प्रकाशयते (**हविष्मान्**) बहूनि हवींषि दातव्यानि वस्तूनि विद्यन्ते यस्य सः (**परि**) सर्वतः (**यम्**) (**एति**) (**अध्वरेषु**) अहिंसायुक्तेषु स- ामादिव्यवहारेषु (**होता**) हवनकर्त्ता॥ १६॥

अन्वयः-हे मनुष्या! यमीशानः समिन्धे यं हविष्मान् होता अध्वरेषु पर्येति सोऽयमिदग्निराहुतः सन् पुरुत्रा कार्याणि साध्नोति॥ १६॥

भावार्थः-हे विद्वांस! ईश्वरेण यदर्थो निर्मितो यदर्थमृत्विग्यजमानाः सेवन्ते तदर्थः सोऽग्निर्युष्माभिर्बहुषु व्यवहारेषु सम्प्रयुक्तः सन्ननेकेषां कार्याणां साधको भवति॥ १६॥

पदार्थः-हे मनुष्यो! (**यम्**) जिसको (**ईशान**) जगदीश्वर (**सम्, इन्धे**) सम्यक् प्रकाशित करता है और (**यम्**) जिसको (**हविष्मान्**) देने योग्य बहुत वस्तुओं सहित (**होता**) होम करने वाला (**अध्वरेषु**) हिंसारहित संग्रामादि व्यवहारों में (**परि, एति**) सब ओर से प्राप्त होता है (**सः, अयम् इत्**) सो वही (**अग्निः**) विद्युत् अग्नि (**आहुतः**) सम्यक् स्वीकार किया हुआ (**पुरुत्रा**) बहुत कार्य्यों को सिद्ध करता है॥ १६॥

भावार्थः-हे विद्वानो! ईश्वर ने जिसलिये बनाया है, जिसलिये ऋत्विज् और यजमान सेवन करते हैं, तदर्थ वह अग्नि तुम लोगों से बहुत व्यवहारों में प्रयुक्त किया हुआ अनेक कार्य्यों का सिद्ध करने वाला होता है॥ १६॥

पुनर्मनुष्याः किंवत्किं कुर्युरित्याह॥

फिर मनुष्य लोग किसके तुल्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या।
उभा कृण्वन्तौ वहतू मियेधे॥ १७॥

त्वे इति। अग्ने। आऽहवनानि। भूरि। ईशानासः। आ। जुहुयाम। नित्या। उभा। कृण्वन्तः। वहतू इति। मियेधे॥ १७॥

पदार्थः-(**त्वे**) अग्नाविव त्वयि (**अग्ने**) आप्तविद्वन् (**आहवनानि**) समन्ताद् दानानि (**भूरि**) बहूनि (**ईशानासः**) समर्थाः (**आ**) समन्तात् (**जुहुयाम**) दद्याम (**नित्या**) नित्यानि (**उभा**) उभौ यजमानपुरोहितौ (**कृण्वन्तः**) कुर्वन्तः (**वहतू**) प्रापकौ (**मियेधे**) परिमाणयुक्ते यज्ञे॥ १७॥

अन्वयः-हे अग्ने! यथोभा वहतू यजमानपुरोहितौ मियेधे नित्या **[**भूरि**]** आहवनानि जुहुतस्तथा ईशानासो वयं तौ द्वौ समर्थौ कृण्वन्तस्त्वे स्वामिनि सति तान्याजुहुयाम॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये यजमानर्त्विग्वत्सर्वान् मनुष्यान् सुशिक्षयोपकुर्वन्ति तच्छिक्षां सर्वेऽनुतिष्ठन्तु॥१७॥

पदार्थः-हे **(अग्ने)** सत्यवादी आप्तविद्वान्! जैसे **(उभा)** दोनों **(वहतू)** प्राप्ति कराने वाले यजमान और पुरोहित **(मियेधे)** परिमाण युक्त यज्ञ में **(नित्या)** नित्य **(भूरि)** बहुत **(आहवनानि)** अच्छे दानों को देते हैं, वैसे **(ईशानासः)** समर्थ हम लोग उन दोनों यजमान पुरोहितों को समर्थ **(कृण्वन्तः)** करते हुए **(त्वे)** अग्नि के तुल्य तेजस्वि आप स्वामी के होते हुए उन दोनों को **(आ, जुहुयाम)** अच्छे प्रकार देवें॥१७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो यजमान और ऋत्विजों के तुल्य सब मनुष्यों का अच्छी शिक्षा से उपकार करते हैं, उनकी शिक्षा का सब लोग अनुष्ठान करें॥१७॥

पुनर्मनुष्यैः किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या प्राप्त करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

इमो अग्ने वीततमानि हव्याऽजस्रो वक्षि देवतातिमच्छ।
प्रति न ईं सुरभीणि व्यन्तु॥१८॥

इमो इति। अग्ने। वीतऽतमानि। हव्या। अजस्रः। वक्षि। देवऽतातिम्। अच्छ। प्रति। नः। ईम्। सुरभीणि। व्यन्तु॥१८॥

पदार्थः-(**इमो**) इमानि। अत्र विभक्तेरोकारादेशः। **(अग्ने)** **(वीततमानि)** अतिशयेन व्याप्तुं समर्थानि **(हव्या)** दातुं योग्यानि **(अजस्रः)** निरन्तरः **(वक्षि)** वहसि **(देवतातिम्)** दिव्यसुखप्रापकं यज्ञम् **(अच्छ)** सम्यक् **(प्रति)** **(नः)** **(ईम्)** **(सुरभीणि)** सुगन्ध्यादिगुणसहितानि **(व्यन्तु)** प्राप्नुवन्तु॥१८॥

अन्वयः-हे अग्ने! येनाऽजस्नो देवतातिमच्छ वक्ष्यनेन न इमो सुरभीणि वीततमानि हव्या च नः प्रति ईं व्यन्तु॥१८॥

भावार्थः-मनुष्या यथाग्ना उत्तमानि हवींषि हत्वा जलादीनि संशोध्य सर्वोपकारं साध्नुवन्ति तथैव वर्त्तताम्॥१८॥

पदार्थः-हे **(अग्ने)** तेजस्विन् विद्वन्! जिससे **(अजस्रः)** निरन्तर **(देवतातिम्)** उत्तम सुख देने वाले यज्ञ को **(अच्छ)** अच्छे प्रकार **(वक्षि)** प्राप्त करते हैं इससे **(इमो)** इन **(सुरभीणि)** सुगन्धि आदि गुणों के सहित **(वीततमानि)** अतिशयकर व्याप्त होने को समर्थ **(हव्या)** देने योग्य वस्तुओं को **(नः)** हमारे **(प्रति)** प्रति **(ईम्)** सब ओर से **(व्यन्तु)** प्राप्त करें॥१८॥

भावार्थः-मनुष्य जैसे अग्नि में उत्तम हविष्यों का होम, कर जल आदि को शुद्ध करके सब के उपकार को सिद्ध करते हैं, वैसे वर्त्ताव करना चाहिये॥१८॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

मा नो॑ अग्ने॒ऽवीर॑ते॒ परा॑ दा दु॒र्वास॒सेऽम॑तये॒ मा नो॑ अ॒स्यै।
मा नः॑ क्षु॒धे मा र॒क्षस॑ ऋतावो॒ मा नो॒ दमे॒ मा वन॒ आ जु॑हूर्थाः॥ १९॥

मा। नः॒। अ॒ग्ने॒। अ॒वीर॑ते। परा॑। दाः॒। दु॒ःऽवास॑से। अम॑तये। मा। नः॒। अ॒स्यै। मा। नः॒। क्षु॒धे। मा। र॒क्षसे॑। ऋ॒त॒ऽवः॒। मा। नः॒। दमे॑। मा। वने॑। आ। जु॒हू॒र्थाः॥ १९॥

पदार्थः-(**मा**) निषेधे (**नः**) अस्मान् (**अग्ने**) पावक इव विद्वन् (**अवीरते**) न विद्यन्ते वीरा यस्मिन् सैन्ये तस्मिन् (**परा**) (**दाः**) पराङ्मुखान् कुर्याः (**दुर्वाससे**) दुष्टवस्त्रधारणाय (**अमतये**) मूढत्वाय (**मा**) (**नः**) अस्मान् (**अस्यै**) पिपासायै (**मा**) (**नः**) अस्मान् (**क्षुधे**) बुभुक्षायै (**मा**) (**रक्षसे**) दुष्टाय जनाय (**ऋतावः**) सत्यप्रकाशक (**मा**) (**नः**) अस्मान् (**दमे**) गृहे (**मा**) (**वने**) अरण्ये (**आ**) (**जुहूर्थाः**) प्रदद्याः॥ १९॥

अन्वयः-हे अग्ने! त्वमवीरते नो मा परा दाः। दुर्वाससेऽमतये नो मा परा दाः नोऽस्यै मा क्षुधे मा नियुङ्क्ष्व। हे ऋतावो! रक्षसे दमे नो मा पीड वने नो मा आ जुहूर्थाः॥ १९॥

भावार्थः-हे विद्वांसो! यूयमस्माकं कातरतां दारिद्र्यं मूढतां क्षुधं तृषां दुष्टसङ्गं गृहे जङ्गले वा पीडां निवार्य सुखिनः सम्पादयत॥ १९॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य तेजस्वी! आप (**अवीरते**) वीरतारहित सेना में (**नः**) हमको (**मा, परा, दाः**) पराङ्मुख मत कीजिये (**दुर्वाससे**) बुरे वस्त्र धारण [करने] के लिये तथा (**अमतये**) मूर्खपन के लिये (**नः**) हमको (**मा**) मत नियुक्त कीजिये। (**नः**) हमको (**अस्यै**) इस प्यास के लिये (**मा**) मत वा (**क्षुधे**) भूख के लिये (**मा**) मत नियुक्त कीजिये। हे (**ऋतावः**) सत्य के प्रकाशक! (**रक्षसे**) दुष्ट जन के लिये (**दमे**) घर में (**नः**) हमको (**मा**) मत पीड़ा दीजिये (**वने**) वन में हम को (**मा**) मत (**आ, जुहूर्थाः**) पीड़ा दीजिये॥ १९॥

भावार्थः-हे विद्वानो! तुम लोग हमारी कातरता, दरिद्रता, मूढ़ता, क्षुधा, तृषा, दुष्टों के सङ्ग और घर वा जङ्गल में पीड़ा का निवारण कर सुखी करो॥ १९॥

पुनर्विद्वान् किं कुर्यादित्याह॥

फिर विद्वान् क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

नू मे॒ ब्रह्मा॑ण्यग्न उच्छ॒शाधि॒ त्वं दे॑व म॒घव॑द्भ्यः सुषूदः।
रा॒तौ स्या॑मो॒भया॑स॒ आ ते॑ यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ २०॥ २६॥

नु। मे॒। ब्रह्मा॑णि। अ॒ग्ने॒। उत्। श॒शा॒धि॒। त्वम्। दे॒व॒। म॒घव॑त्ऽभ्यः सुसू॒दः॒। रा॒तौ। स्या॒म॒। उ॒भया॑सः। आ। ते॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒॥ २०॥

पदार्थः-(**नू**) सद्यः (**मे**) मम (**ब्रह्माणि**) बृहन्ति धनानि (**अग्ने**) दातः (**उत्**) (**शशाधि**)

शिक्षय **(त्वम्)** **(देव)** विद्वन् **(मघवद्भ्यः)** बहुधनयुक्तेभ्यो धनाढ्येभ्यः **(सुषूदः)** नाशय **(रातौ)** दाने **(स्याम)** भवेम **(उभयासः)** विद्वांसोऽविद्वांसश्च **(आ)** **(ते)** तव **(यूयम्)** **(पात)** रक्षत **(स्वस्तिभिः)** सुखैः **(सदा)** **(नः)** अस्मान्॥२०॥

अन्वयः-हे देवाग्ने! त्वं मे मघवद्भ्यो ब्रह्माण्युच्छशाधि दुःखानि सुषूदः। येनोभयासो वयं रातौ स्याम तथा ते रक्षां वयं कुर्याम तथा यूयं नः स्वस्तिभिः सदा नु पात॥२०॥

भावार्थः-राजादिपुरुषैर्धनाढ्येभ्यो दरिद्रा अपि सुशिक्षा धनाढ्याः कार्याः विद्वांसोऽविद्वांसश्च मेलयित्वोन्नताः कार्या अन्योऽन्येषान्दुःखनिवारणेन सुखैः संयोजनीयाः॥२०॥

पदार्थः-हे **(देव)** विद्वन् **(अग्ने)** दाताजन! **(त्वम्)** आप **(मे)** मेरे **(मघवद्भ्यः)** बहुत धनयुक्त धनाढ्यों से **(ब्रह्माणि)** बड़े-बड़े धनों की **(उत्, शशाधि)** शिक्षा कीजिये तथा दुःखों को **(सुषूदः)** नष्ट कीजिये जिससे **(उभयासः)** दोनों विद्वान् अविद्वान् हम लोग **(रातौ)** दान देने में प्रकट **(स्याम)** हों जैसे **(ते)** आपकी रक्षा हम करें, वैसे **(यूयम्)** तुम लोग **(नः)** हमारी **(स्वस्तिभिः)** सुखों से **(सदा)** सब काल में **(नु)** शीघ्र **(आ, पात)** अच्छे प्रकार रक्षा करो॥२०॥

भावार्थः-राजादि पुरुषों को चाहिये कि धनाढ्यों से दरिद्रों को भी अच्छी शिक्षा देके धनाढ्य करें तथा विद्वान् और अविद्वानों का मेल करा के परस्पर उन्नति करावें और परस्पर दुःख का निवारण कर सुखों से संयुक्त करें॥२०॥

पुनर्विद्वानत्र कथं वर्तेतेत्याह॥

फिर विद्वान् इस जगत् में कैसे वर्ते, इस विषय को अगले मन्त्र में कहते हैं॥

त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि।
मा त्वे सचा तनये नित्य आ धड्मा वीरो अस्मन्नर्यो वि दासीत्॥२१॥

त्वम्। अग्ने। सुऽहवः। रण्वसंदृक्। सुऽदीती। सूनो इति। सहसः। दिदीहि। मा। त्वे इति। सचा। तनये। नित्ये। आ। धक्। मा। वीरः। अस्मत्। नर्यः। वि। दासीत्॥२१॥

पदार्थः-(**त्वम्**) **(अग्ने)** पावक इव विद्यया प्रकाशमान् विद्वन् **(सुहवः)** सुस्तुतिः **(रण्वसंदृक्)** रमणीयं यः सम्यक् पश्यति सः **(सुदीती)** उत्तमया दीप्त्या **(सूनो)** तनय **(सहसः)** बलवतः **(दिदीहि)** प्रकाशय **(मा)** **(त्वे)** त्वयि **(सचा)** सम्बन्धेन **(तनये)** सन्ताने **(नित्ये)** सदा कर्त्तव्ये कर्मणि **(आ)** **(धक्)** दहेः **(मा)** **(वीरः)** **(अस्मत्)** अस्माकं सकाशात् **(नर्यः)** नृषु साधुः **(वि)** **(दासीत्)** विगतदानो भवेत्॥२१॥

अन्वयः-हे सहसः सूनोऽग्ने! सुहवः रण्वसंदृग्यथा नर्यो वीरोऽस्मन्मा विदासीन्नित्ये त्वे तनये सचा मा धक् तथा त्वं सुदीती अस्मान् दिदीहि॥२१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वान्! यथाऽस्माकं बन्धवोऽस्मद्विरोधिनो न भवन्ति यथा मातरि तनयस्तनये माता प्रेम्णा सह वर्त्तते तथैव भवानस्माभिः सह वर्त्तताम्॥२१॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** पुत्र **(अग्ने)** अग्नि के तुल्य विद्या से प्रकाशमान

विद्वन्! (**सुहवः**) सुन्दर स्तुतियुक्त (**रण्वसंदृक्**) रमणीय सम्यक् देखने वाला जैसे (**नर्यः**) मनुष्यों में उत्तम (**वीरः**) वीर (**अस्मत्**) हम से (**मा**) मत (**वि, दासीत्**) दान से रहित हो वा (**नित्ये**) सब काल में करने योग्य कर्म में (**त्वे**) आप (**तनये**) सन्तान में (**सचा**) सम्बन्ध से (**मा, आ, धक्**) अच्छे प्रकार मत जलाइये, वैसे (**त्वम्**) आप (**सुदीती**) उत्तम दीप्ति से हमको (**दिदीहि**) प्रकाशित कीजिये॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे हमारे बन्धु लोग हमारे विरोधी नहीं होते, जैसे माता में पुत्र, पुत्र के विषय में माता, प्रेम के साथ वर्त्तती है, वैसे ही आप भी हमारे साथ वर्तिये॥ २१॥

पुनर्मनुष्याः सर्वेभ्यः किं गृह्णीयुरित्याह॥

फिर मनुष्य सब से किसको ग्रहण करें, इस विषय को अगले मन्त्र में कहते हैं॥

मा नो॑ अग्ने दुर्भृ॒तये॒ सचै॒षु दे॒वेद्धे॑ष्व॒ग्निषु॒ प्र वो॑चः।
मा ते॑ अ॒स्मान् दुर्म॒तयो॑ भृ॒माच्चि॑द्दे॒वस्य॑ सू॒नो सहसो नशन्त॥ २२॥

मा। नः॑। अ॒ग्ने॒। दुः॒ऽभृ॒तये॑। सचा॑। ए॒षु॒। दे॒व॒ऽइ॒द्धे॒षु॒। अ॒ग्निषु॑। प्र। वो॒च॒रिति॑। मा। ते॒। अ॒स्मान्। दुः॒ऽम॒तयः॑। भृ॒मात्। चि॒त्। दे॒वस्य॑। सू॒नो॒ इति॑। स॒ह॒सः॒। न॒श॒न्त॒॥ २२॥

पदार्थः-(**मा**) (**निषेधे**) (**नः**) अस्मान् (**अग्ने**) विद्वन् (**दुर्भृतये**) दुष्टा भृतिर्धारणं पोषणं वा यस्य तस्मै (**सचा**) सम्बन्धेन (**एषु**) (**देवेद्धेषु**) देवैरिद्धेषु प्रज्वालितेषु (**अग्निषु**) (**प्र**) (**वोचः**) (**मा**) (**ते**) तव (**अस्मान्**) (**दुर्मतयः**) (**भृमात्**) भ्रान्तेः। अत्र वर्णव्यत्ययेन रस्य स्थान **ऋकारो वा च्छन्दसीति सम्प्रसारणं वा**। (**चित्**) अपि (**देवस्य**) विदुषः (**सूनो**) तनय (**सहसः**) बलिष्ठस्य (**नशन्त**) व्याप्नुवन्तु। **नशदिति व्याप्तिकर्मा।** (निघं०२.१८)॥ २२॥

अन्वयः-हे अग्ने! त्वं सचैषु देवेद्धेष्वग्निषु दुर्भृतये नो मा प्र वोचः। हे सहसो देवस्य सूनो! भृमाच्चित्ते दुर्मतयोऽस्मान् मा नशन्त॥ २२॥

भावार्थः-सर्वैर्मनुष्यैः सर्वेभ्यः शुभगुणाः सुमतिः सुविद्या च गृहीतव्या नैव दोषाः॥ २२॥

पदार्थः-हे (**अग्ने**) विद्वन्! आप (**सचा**) सम्बन्ध से (**एषु**) इन (**देवेद्धेषु**) वायु आदि में प्रज्वलित किये हुए (**अग्निषु**) अग्नियों में (**दुर्भृतये**) दुष्ट दुःखयुक्त कठिन धारण वा पोषण जिसका उसके लिये (**नः**) हमको (**मा, प्र, वोच**) मत कठोर कहो। हे (**सहसः**) बलवान् (**देवस्य**) विद्वान् के (**सूनो**) पुत्र! (**भृमात्**) भ्रान्ति से (**चित्**) भी (**ते**) आपके (**दुर्मतयः**) दुष्टबुद्धि लोग (**अस्मान्**) हमको (**मा**) मत (**नशन्त**) प्राप्त होवें॥ २२॥

भावार्थः-सब मनुष्यों को योग्य है कि सब से शुभ गुण सुन्दर बुद्धि और उत्तम विद्या का ग्रहण करें, दोषों को कदापि ग्रहण न करें॥ २२॥

पुनर्मनुष्यैः कः सेवनीय इत्याह॥

फिर मनुष्यो को किसका सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

स मर्तो॑ अग्ने स्वनीक रे॒वानम॑र्त्ये॒ य आ॑जु॒होति॑ ह॒व्यम्।
स दे॒वता॑ वसु॒वनि॑ दधाति॒ यं सू॒रिर॒र्थी पृ॒च्छमा॑न॒ एति॑॥ २३॥

सः। मर्तः॑। अ॒ग्ने॒। सु॒ऽअ॒नी॒क॒। रे॒वान्। अम॑र्त्ये। यः। आ॒ऽजु॒होति॑। ह॒व्यम्। सः। दे॒वता॑। व॒सु॒ऽवनि॑म्। द॒धा॒ति॒। यम्। सू॒रिः॑। अ॒र्थी। पृ॒च्छमा॑नः। एति॑॥ २३॥

पदार्थः-(**सः**) (**मर्त्तः**) मनुष्यः (**अग्नेः**) विद्याविनयादिभिः प्रकाशमान (**स्वनीक**) शोभनमनीकं सैन्यं यस्य तत्सम्बुद्धौ (**रेवान्**) बहुधनवान् (**अमर्त्ये**) मरणधर्मरहिते वह्नौ परमात्मनि वा (**यः**) (**आजुहोति**) समन्तात्प्रक्षिपति स्थिरीकरोति (**हव्यम्**) होतुं दातुमर्हं घृतादिद्रव्यं चित्तं वा (**सः**) (**देवता**) दिव्यगुणा (**वसुवनिम्**) धनानां सम्भाजनम् (**दधाति**) (**यम्**) (**सूरिः**) विद्वान् (**अर्थी**) प्रशस्तोऽर्थोऽस्याऽस्तीति (**पृच्छमानः**) (**एति**) प्राप्नोति॥ २३॥

अन्वयः-हे स्वनीकाग्ने! यो रेवान् सन्नमर्त्ये हव्यमाजुहोति स देवता वसुवनिं दधाति यमर्थी पृच्छमानः सूरिरेति स मर्तः सुखयति॥ २३॥

भावार्थः-ये मनुष्या अग्निविद्यां विदित्वाऽस्मिन् सुगन्ध्यादिकं जुह्वत्यनेन कार्याणि साध्नुवन्ति ये च पृष्ट्वा ध्यात्वा परमात्मानं जानन्ति तानग्निर्धनाढ्यान् परमात्माविज्ञानवतश्च करोति॥ २३॥

पदार्थः-हे (**स्वनीक**) सुन्दर सेना वाले (**अग्ने**) विद्या और विनयादि से प्रकाशमान जन! (**यः**) जो (**रेवान्**) बहुत धनवाला होता हुआ (**अमर्त्ये**) मरणधर्मरहित अग्नि वा परमात्मा में (**हव्यम्**) देने योग्य घृतादि द्रव्य वा चित्त को (**आजुहोति**) अच्छे प्रकार छोड़ता वा स्थिर करता है (**सः**, **देवता**) दिव्यगुणयुक्त वह (**वसुवनिम्**) धनों के सेवन को (**दधाति**) धारण करता है (**यम्**) जिसको (**अर्थी**) प्रशस्त प्रयोजन वाला (**पृच्छमानः**) पूछता हुआ (**सूरिः**) विद्वान् (**एति**) प्राप्त होता है (**सः**) वह (**मर्तः**) मनुष्य सुखी करता है॥ २३॥

भावार्थः-जो मनुष्य अग्निविद्या को जान के इस अग्नि में सुगन्ध्यादि का होम करते और इससे कार्यों को सिद्ध करते हैं और जो पूछ अच्छे प्रकार विचार और ध्यान कर के परमात्मा को जानते हैं, उनको अग्नि, धनाढ्य और परमात्मा विज्ञानवान् करता है॥ २३॥

पुनर्मनुष्या विद्वद्भ्यः किं गृह्णीयुरित्याह॥

फिर मनुष्य विद्वानों से क्या ग्रहण करें, इस विषय को अगले मन्त्र में कहते हैं॥

म॒हो नो॑ अग्ने सुवि॒तस्य॑ वि॒द्वान् र॒यिं सू॒रिभ्य॒ आ व॑हा बृ॒हन्त॑म्।
येन॑ व॒यं स॑हसाव॒न् मदे॒माविं॑क्षितास॒ आयु॑षा सु॒वीरा॑:॥ २४॥

म॒हः। नः॒। अ॒ग्ने॒। सु॒वि॒तस्य॑। वि॒द्वान्। र॒यिम्। सू॒रिऽभ्य॑:। आ। व॒ह॒। बृ॒हन्त॑म्। येन॑। व॒यम्। स॒ह॒सा॒ऽव॒न्। म॒दे॒म॒। अवि॑ऽक्षितासः। आ॒युषा॑। सु॒ऽवीरा॑:॥ २४॥

पदार्थः-(**महः**) (**नः**) अस्मभ्यम् (**अग्ने**) दातः (**सुवितस्य**) प्रेरितस्य (**विद्वान्**) (**रयिम्**) (**सूरिभ्यः**) विद्वद्भ्यः (**आ**) (**वह**) समन्तात्प्रापय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**बृहन्तम्**) महान्तम्

(येन) (वयम्) (सहसावन्) बलेनयुक्त **(मदेम)** आनन्देम **(अविक्षितासः)** अविक्षीणः क्षयरहिताः **(आयुषा)** जीवनेन **(सुवीराः)** शोभनैर्वीरैरुपेताः॥ २४॥

अन्वयः-हे सहसावन्नग्ने विद्वाँस्त्वं महः सुवितस्य कर्ता सन् सूरिभ्यो बृहन्तं रयिं न आ वह येनाविक्षितासः सुवीराः सन्तो वयमायुषा मदेम॥ २४॥

भावार्थः-ये मनुष्या विद्वद्भ्यो महतीं विद्यां गृह्णन्ति ते सर्वदा वर्धमानाः सन्तः पुष्कलां श्रियं दीर्घमायुश्च प्राप्नुवन्ति॥ २४॥

पदार्थः-हे **(सहसावन्)** बल से युक्त **(अग्ने)** दानशीलपुरुष **(विद्वान्)** विद्वान्! आप **(महः)** महान् **(सुवितस्य)** प्रेरणा किये कर्म के कर्ता होते हुए **(सूरिभ्यः)** विद्वानों से **(बृहन्तम्)** बड़े **(रयिम्)** धन को **(नः)** हमारे लिये **(आ, वह)** अच्छे प्रकार प्राप्त कीजिये **(येन)** जिस से **(अविक्षितासः)** क्षीणतारहित **(सुवीराः)** सुन्दर वीरों से युक्त हुए **(वयम्)** हम लोग **(आयुषा)** जीवन के साथ **(मदेम)** आनन्दित रहें॥ २४॥

भावार्थः-जो मनुष्य विद्वानों से बड़ी विद्या को ग्रहण करते हैं, वे सब काल में वृद्धि को प्राप्त होते हुए पूर्ण लक्ष्मी और दीर्घ अवस्था को पाते हैं॥ २४॥

पुनर्विद्वान् कीदृशाः स्यादित्युच्यते।

फिर विद्वान् कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः।
रातौ स्यामोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः॥ २५॥ २७॥ १॥

नु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वम्। देव। मघवत्ऽभ्यः। सुसूदः। रातौ। स्याम। उभयासः। आ। ते। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ २५॥

पदार्थः-(**नू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। **(मे)** मह्यम् **(ब्रह्माणि)** अन्नानि **(अग्ने)** विद्वन् **(उत्)** उत्कृष्टम् **(शशाधि)** शिक्षय **(त्वम्) (देव)** धनं कामयमान **(मघवद्भ्यः)** बहुधनयुक्तेभ्यः **(सुषूदः)** देहि **(रातौ)** सुपात्रेभ्यो दाने **(स्याम)** भवेम **(उभयासः)** दातृग्रहीतारः **(आ) (ते)** तुभ्यम् **(यूयम्) (पात)** रक्षत **(स्वस्तिभिः)** सुखैः **(सदा) (नः)** अस्मान्॥ २५॥

अन्वयः-हे देवाऽग्ने! त्वं मघवद्भ्यो ब्रह्माणि म उच्छशाधि सुषूदो वयं ते तुभ्यमेव दद्याम येनोभयासो वयं रातौ स्याम यूयं स्वस्तिभिर्नो नु सदाऽऽपात॥ २५॥

भावार्थः-हे राजन्! भवान्न्यायेन सर्वानस्मान् शिक्षस्वास्मत्तो यथाविधि करं गृहाण पक्षपातं विहाय सर्वैस्सह वर्त्तस्व येन राजपुरुषाः प्रजाजनाश्च वयं सदा सुखिनः स्यामेति॥ २५॥

अत्राग्निविद्वच्छ्रोत्र्युपदेशकेश्वरराजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या।

अस्मिन्नध्यायेऽश्विद्यावापृथिव्यग्निविद्युदुषःसेनायुद्धमित्रावरुणेन्द्रावरुणेन्द्रावैष्णवद्यावापृथिवी-सवित्रिन्द्रासोमयज्ञसोमारुद्रधनुराद्यग्न्यादिगुणवर्णनादेतदर्थस्य पूर्वाध्यायेन सह सङ्गतिरस्तीति वेद्यम्।

इति श्रीमत् परमविदुषां परमहंसपरिव्राजकाचार्याणां विरजानन्दसरस्वतीस्वामिनां शिष्येण

परमहंसपरिव्राजकाचार्येण श्रीमद्दयानन्दसरस्वतीस्वामिना विरचिते संस्कृताऽऽर्यभाषाभ्यां समन्विते सुप्रमाणयुक्त ऋग्वेदभाष्ये पञ्चमाष्टके प्रथमोऽध्यायः सप्तविंशो वर्गः सप्तमे मण्डले प्रथमं सूक्तं च समाप्तम्॥

पदार्थः-हे **(देव)** धन की कामना करने वाले **(अग्ने)** विद्वन्! **(त्वम्)** आप **(मघवद्भ्यः)** बहुत धनयुक्त पुरुषों से **(ब्रह्माणि)** अन्नों की **(मे)** मेरे लिये **(उत्, शशाधि)** उत्कृष्टतापूर्वक शिक्षा कीजिये और **(सुषूदः)** दीजिये हम लोग **(ते)** तुम्हारे लिये ही देवें जिससे **(उभयासः)** देने लेने वाले दोनों हम लोग **(रातौ)** सुपात्रों को दान देने के लिये प्रवृत्त **(स्याम)** हों **(यूयम्)** तुम लोग **(स्वस्तिभिः)** सुखों से **(नः)** हमारी **(नु)** शीघ्र **(सदा)** सब काल में, **(आ, पात)** अच्छे प्रकार रक्षा करो॥२५॥

भावार्थः-हे राजपुरुष! आप न्यायपूर्वक हम सब लोगों को शिक्षा कीजिये, हम से यथायोग्य कर लिया कीजिये, पक्षपात छोड़ के सब के साथ वर्तिये, जिससे राजपुरुष और हम प्रजाजन सदा सुखी हों॥२५॥

इस सूक्त में अग्नि, विद्वान्, श्रोता, उपदेशक, ईश्वर और राजप्रजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

इस अध्याय में अश्वि, द्यावापृथिवी, अग्नि, विद्युत्, उषःकाल, सेनायुद्ध, मित्रावरुण, इन्द्रावरुण, इन्द्रावैष्णव, द्यावापृथिवी, सविता, इन्द्रासोम, यज्ञ, सोमारुद्र, धनुष् आदि और अग्नि आदि के गुणों का वर्णन होने से इस अध्याय के अर्थ की पूर्व अध्याय के अर्थ के साथ सङ्गति जाननी चाहिये।

यह श्रीमत् परमविद्वान् परमहंस परिव्राजकाचार्य्य विरजानन्द सरस्वती स्वामी जी के शिष्य परमहंस परिव्राजाकाचार्य श्रीमद्दयानन्द सरस्वती स्वामि से विरचित संस्कृतार्यभाषा से समन्वित सुप्रमाणयुक्त ऋग्वेदभाष्य में पञ्चमाष्टक में प्रथम अध्याय और सत्ताईसवां वर्ग तथा सप्तम मण्डल में प्रथम सूक्त भी समाप्त हुआ॥

॥ओ३म्॥

॥अथ पञ्चमाष्टके द्वितीयोऽध्यायः॥

ओ३म् विश्वा॑नि देव सवितर्दुरि॒ता॑नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ आ सु॑व॥ ऋ०५.८२.५॥

अथैकादशर्चस्य द्वितीयस्य सूक्तस्य वसिष्ठ ऋषिः। आप्री देवता। १-९ विराट्त्रिष्टुप् २, ४ त्रिष्टुप्। ३, ६-८, १०, ११ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वांसः किंवद्वर्त्तेरन्नित्याह॥

अब पञ्चमाष्टक के द्वितीयाऽध्याय का आरम्भ है। इसके प्रथम मन्त्र में विद्वान् लोग किसके तुल्य वर्तें, इस विषय का उपदेश करते हैं।

जु॒षस्वा॑ नः स॒मिधा॑मग्ने अ॒द्य शोचा॑ बृ॒हद्य॑जतं धू॒ममृ॑ण्वन्।
उप॑ स्पृश दि॒व्यं सानु॒ स्तूपैः॑ सं॒र॒श्मिभि॑स्ततन॒ः सूर्य॑स्य॥ १॥

जु॒षस्वा॑। न॒ः। स॒म्ऽइधा॑म्। अ॒ग्ने॒। अ॒द्य॒। शोच॑। बृ॒हत्। य॒ज॒तम्। धू॒मम्। ऋ॒ण्वन्। उप॑। स्पृ॒श॒। दि॒व्यम्। सानु॑। स्तूपैः॑। सम्। र॒श्मिऽभिः॑। त॒त॒न॒ः। सूर्य॑स्य॥ १॥

पदार्थः-(**जुषस्व**) सेवस्व (**नः**) अस्माकम् (**समिधम्**) काष्ठविशेषम् (**अग्ने**) अग्निरिव विद्वन् (**अद्य**) इदानीम् (**शोचा**) पवित्रीकुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**बृहत्**) महत् (**यजतम्**) सङ्गन्तव्यम् (**धूमम्**) (**ऋण्वन्**) प्रसाध्नुवन् (**उप**) (**स्पृश**) (**दिव्यम्**) कमनीयं शुद्धं वा (**सानु**) सम्भजनीयं धनम् (**स्तूपैः**) सन्तप्तैः (**सम्**) (**रश्मिभिः**) किरणैः (**ततनः**) व्याप्नुहि (**सूर्यस्य**) सवितुः॥ १॥

अन्वयः-हे अग्ने! त्वमग्निः समिधमिव नः प्रजा जुषस्व पावकइवाद्य बृहद्यजतं शोचा धूममृण्वन्नाग्निरिव सत्यानि कार्य्याण्युपस्पृश सूर्यस्य स्तूपै रश्मिभिर्वायुवद् दिव्यं सानु सं ततनः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथाग्निः समिद्भिः प्रदीप्यते तथाऽस्मान् विद्यया प्रदीपयन्तु यथा सूर्यस्य रश्मयस्सर्वानुपस्पृशन्ति तथा भवतामुपदेशा अस्मानुपस्पृशन्तु॥ १॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य तेजस्वि विद्वन्! आप **[**अग्नि**]** जैसे (**समिधम्**) समिधा को, वैसे (**नः**) हमारी प्रजा का (**जुषस्व**) सेवन कीजिये तथा अग्नि के तुल्य (**अद्य**) आज (**बृहत्**) बड़े (**यजतम्**) सङ्ग करने योग्य व्यवहार को (**शोचा**) पवित्र कीजिये और (**धूमम्**) धूम को (**ऋण्वन्**) प्रसिद्ध करते हुए अग्नि के तुल्य सत्य कामों का (**उप, स्पृश**) समीप से स्पर्श कीजिये तथा (**सूर्यस्य**) सूर्य के (**स्तूपैः**) सम्यक् तपे हुए (**रश्मिभिः**) किरणों से वायु के तुल्य (**दिव्यम्**) कामना के योग्य वा शुद्ध (**सानु**) सेवने योग्य धन को (**सम्, ततनः**) सम्यक् प्राप्त कीजिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे अग्नि समिधाओं से प्रदीप्त होता, वैसे हमको विद्या से प्रदीप्त कीजिये। जैसे सूर्य कि किरणें सब का स्पर्श करती हैं, वैसे आप लोगों के उपदेश हम को प्राप्त होवें॥१॥

पुनर्मनुष्यैः किं सेवनीयमित्याह॥

फिर मनुष्यों को किसका सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः।
ये सुक्रतवः शुचयो धियं धाः स्वदन्ति देवा उभयानि हव्या॥२॥

नराशंसस्य। महिमानम्। एषाम्। उप। स्तोषाम। यजतस्य। यज्ञैः। ये। सुऽक्रतव। शुचयः। धियम्ऽधाः। स्वदन्ति। देवाः। उभयानि। हव्या॥२॥

पदार्थः-(**नराशंसस्य**) नरैराशंसितस्य (**महिमानम्**) (**एषाम्**) (**उप**) (**स्तोषाम**) प्रशंसेम (**यजतस्य**) सङ्गन्तव्यस्य (**यज्ञैः**) सङ्गन्तव्यैस्साधनैः (**ये**) (**सुक्रतवः**) उत्तमप्रज्ञाः (**शुचयः**) पवित्राः (**धियन्धाः**) उत्तमकर्मधराः (**स्वदन्ति**) सुस्वादमदन्ति (**देवाः**) विद्वांसः (**उभयानि**) शरीरात्मपुष्टिकराणि (**हव्या**) हव्यान्यत्तुमर्हाणि॥२॥

अन्वयः-हे मनुष्या! ये सुक्रतवः शुचयो धियन्धा देवा उभयानि हव्या स्वदन्ति यज्ञैर्यजतस्य नराशंसस्य भोगान्भुञ्जत एषां महिमानं वयमुप स्तोषाम॥२॥

भावार्थः-हे मनुष्याः! सदैव विद्वदनुकरणेन शरीरात्मबलवर्धकान्यन्नपानानि सेवनीयानि येन युष्माकं महिमा वर्धेत॥२॥

पदार्थः-हे मनुष्यो! (**ये**) जो (**सुक्रतवः**) उत्तम प्रज्ञा वाले (**शुचयः**) पवित्र (**धियन्धाः**) उत्तम कर्मों के धारण करने वाले (**देवाः**) विद्वान् लोग (**उभयानि**) शरीर और आत्मा के पुष्टिकारक (**हव्या**) भोजन के योग्य पदार्थों को (**स्वदन्ति**) अच्छे स्वादपूर्वक खाते और (**यज्ञैः**) सङ्गति के योग्य साधनों से (**यजतस्य**) सङ्ग करने योग्य (**नराशंसस्य**) मनुष्यों से प्रशंसा किये हुए तथा अन्न का भोग करने वाले के (**एषाम्**) इनकी (**महिमानम्**) महिमा की हम लोग (**उप, स्तोषाम**) समीप प्रशंसा करें॥२॥

भावार्थः-हे मनुष्यो! तुम को चाहिये कि सदैव विद्वानों के अनुकरण से शरीर और आत्मा के बल को बढ़ाने वाले खानपानों का सेवन किया करो, जिससे तुम्हारी महिमा बड़े॥२॥

पुनर्मनुष्याः कं सत्कुर्य्युरित्याह॥

फिर मनुष्य किसका सत्कार करें, इस विषय को अगले मन्त्र में कहते हैं॥

ईळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचम्।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम॥३॥

ईळेन्यम्। वः। असुरम्। सुऽदक्षम्। अन्तः। दूतम्। रोदसी इति। सत्यऽवाचम्। मनुष्वत्। अग्निम्। मनुना। सम्ऽइद्धम्। सम्। अध्वराय। सदम्। इत्। महेम॥३॥

पदार्थः-(**ईळेन्यम्**) प्रशंसनीयम् (**वः**) युष्माकम् (**असुरम्**) मेघमिव वर्त्तमानम् (**सुदक्षम्**) सुष्ठुबलचातुर्यम् (**अन्तः**) मध्ये (**दूतम्**) यो दुनोति तम् (**रोदसी**) द्यावापृथिव्यौ (**सत्यवाचम्**) सत्या वाग्यस्य तम् (**मनुष्वत्**) मनुष्येण तुल्यम् (**अग्निम्**) कार्यसाधकं पावकम् (**मनुना**) मननशीलेन विदुषा (**समिद्धम्**) प्रदीपनीकृतम् (**सम्**) सम्यक् (**अध्वराय**) अहिंसिताय व्यवहाराय (**सदम्**) सीदन्ति यस्मिँस्तम् (**इत्**) इव (**महेम**) सत्कुर्याम॥३॥

अन्वयः-हे विद्वांसो! यथा वयं वोऽन्तरसुरमिव सुदक्षं रोदसी दूतमग्निमिव सत्यवाचमीळेऽन्यं मनुष्वन्मनुनाऽध्वराय समिद्धं सदमग्निमिव विद्वांसमिन्महेम तथा यूयमप्येनं सत्कुरुत॥३॥

भावार्थः-हे मनुष्या! ये मघवदुपकारकानग्निवत्प्रकाशितविद्यान् धर्मिष्ठान् विदुषः सत्कुर्वन्ति ते सर्वत्र सत्कृता भवन्ति॥३॥

पदार्थः-हे विद्वानो! जैसे हम लोग (**वः**) आपके (**अन्तः**) बीच में (**असुरम्**) मेघ के तुल्य वर्त्तमान (**सुदक्षम्**) सुन्दर बल और चतुराई से युक्त (**रोदसी**) सूर्य-भूमि और (**दूतम्**) उपताप देनेवाले (**अग्निम्**) कार्य को सिद्ध करने वाले अग्नि को जैसे, वैसे (**सत्यवाचम्**) सत्य बोलने वाले (**ईळेन्यम्**) प्रशंसा योग्य (**मनुष्वत्**) मनुष्य के तुल्य (**मनुना**) मननशील विद्वान् के साथ (**अध्वराय**) हिंसारहित व्यवहार के लिये (**समिद्धम्**) प्रदीप्त किये (**सदम्**) जिसके निकट बैठें उस अग्नि के तुल्य विद्वान् को (**सम्, इत्, महेम**) सम्यक् ही सत्कार करें, वैसे तुम लोग भी इस का सत्कार करो॥३॥

भावार्थः-हे मनुष्यो! जो मेघ के तुल्य उपकारक, अग्नि के तुल्य प्रकाशित विद्यावाले, धर्मात्मा, विद्वानों का सत्कार करते हैं, वे सर्वत्र सत्कार पाते हैं॥३॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

सपर्यवो भरमाणा अभिज्रु प्र वृञ्जते नमसा बर्हिरग्नौ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम्॥४॥

सपर्यवः। भरमाणाः। अभिऽज्रु। प्र। वृञ्जते। नमसा। बर्हिः। अग्नौ। आऽजुह्वानाः। घृतऽपृष्ठम्। पृषत्ऽवत्। अध्वर्यवः। हविषा। मर्जयध्वम्॥४॥

पदार्थः-(**सपर्यवः**) सत्यं सेवमानाः (**भरमाणाः**) विद्यां धरन्तः (**अभिज्रु**) विदुषां सन्निधौ कृते अभिमुखे जानुनी यैस्ते (**प्र**) (**वृञ्जते**) त्यजन्ति (**नमसा**) अन्नेन सह (**बर्हिः**) उत्तमं घृताऽऽदिकम् (**अग्नौ**) पावके (**आजुह्वानाः**) समन्ताद्धोमस्य कर्त्तारः (**घृतपृष्ठम्**) घृतं पृष्ठमिव यस्य तम् (**पृषद्वत्**) सेचकवत् (**अध्वर्यवः**) अध्वरमहिंसां कामयमानाः (**हविषा**) होमसामग्र्या (**मर्जयध्वम्**) शोधयत॥४॥

अन्वयः-हे मनुष्या! यथाऽभिज्रु विद्यार्थिनो विद्वांसो भूत्वा सपर्यवो भरमाणा नमसा सह बर्हिरग्नौ प्र वृञ्जते तथा घृतपृष्ठमाजुह्वानाः पृषद्वदध्वर्यवो हविषा जनाऽन्तःकरणानि यूयं मर्जयध्वम्॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। ये विद्वांसो यजमानवन्मनुष्याणामन्तःकरणान्यात्मनश्चाऽध्यापनोपदेशाभ्यां शोधयन्ति ते स्वयं शुद्धा भूत्वा सर्वोपकारका भवन्ति॥४॥

पदार्थः-हे मनुष्यो! जैसे **(अभिज्ञु)** विद्वानों के समीप पग पीछे करके सन्मुख घोटूं जिन के हों वे विद्यार्थी विद्वान् होकर **(सपर्यवः)** सत्य का सेवन करते और **(भरमाणाः)** विद्या को धारण करते हुए **(नमसा)** अन्न के साथ **(बर्हिः)** उत्तम घृत आदि को **(अग्नौ)** अग्नि में **(प्र, वृञ्जते)** छोड़ते हैं, वैसे **(घृतपृष्ठम्)** घृत जिसके पीठ के तुल्य है उस अग्नि को **(आजुह्वानाः)** अच्छे प्रकार होमयुक्त करते हुए **(पृषद्वत्)** सेवनकर्त्ता के तुल्य **(अध्वर्यवः)** अहिंसाधर्म चाहते हुए **(हविषा)** होम सामग्री से मनुष्यों के अन्तःकरणों को तुम लोग **(मर्जयध्वम्)** शुद्ध करो॥४॥

भावार्थः-इस मन्त्र में **[**उपमा**]** वाचकलुप्तोपमालङ्कार है। जो विद्वान् लोग यजमानों के तुल्य मनुष्यों के अन्तःकरण और आत्माओं को अध्यापन और उपदेश से शुद्ध करते हैं, वे आप शुद्ध होकर सब के उपकारक होते हैं॥४॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् लोग कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

स्वाध्यो३ऽवि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता।
पूर्वी शिशुं न मातरा रिहाणे सम्ग्रुवो न समनेष्वञ्जन्॥५॥१॥

सुऽआध्यः। वि। दुरः। देवऽयन्तः। अशिश्रयुः। रथऽयुः। देवऽताता। पूर्वी इति। शिशुम्। न। मातरा। रिहाणे इति। सम्। अग्रुवः। न। समनेषु। अञ्जन्॥५॥

पदार्थः-(**स्वाध्यः**) सुष्ठु चिन्तयन्तः **(वि)** **(दुरः)** द्वाराणि **(देवयन्तः)** देवान् विदुषः कामयन्तः **(अशिश्रयुः)** श्रयन्ति **(रथयुः)** रथं कामयमानः **(देवताता)** देवैरनुष्ठातव्ये सङ्गन्तव्ये व्यवहारे **(पूर्वी)** पूर्व्यौ **(शिशुम्)** बालकम् **(न)** इव **(मातरा)** मातापितरौ **(रिहाणे)** स्वादयन्त्यौ **(सम्)** **(अग्रुवः)** अग्रं गच्छन्त्यः सेनाः **(न)** इव **(समनेषु)** स-ामेषु **(अञ्जन्)** गच्छन्ति॥५॥

अन्वयः-ये स्वाध्यो देवयन्तो जना देवताता रथयुरिव रिहाणे पूर्वी मातरा शिशुं न समनेष्वग्रुवो न दुरो व्यशिश्रयुः समञ्जँस्ते सुखकारकाः स्युः॥५॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। ये मनुष्याः सम्यग्विचारयन्तो विद्वत्सङ्गप्रियाः यज्ञवत्परोपकारका मातापितृवन्सर्वानुन्नयन्तः संग्रामाञ्जयन्तो न्यायेन प्रजाः पालयन्ति ते सदा सुखिनो जायन्ते॥५॥

पदार्थः-जो **(स्वाध्यः)** सुन्दर विचार करते **(देवयन्तः)** विद्वानों को चाहते हुए जन **(देवताता)** विद्वानों के अनुष्ठान या सङ्ग करने योग्य व्यवहार में **(रथयुः)** रथ को चाहने वाले के तुल्य **(रिहाणे)** स्वाद लेते हुए **(पूर्वी)** अपने से पूर्व हुए **(मातरा)** माता-पिता **(शिशुम्, न)** बालक के तुल्य **(समनेषु)** संग्रामों में **(अग्रुवः)** आगे चलती हुई सेना**[**एँ**]** **(न)** जैसे, वैसे **(दुरः)** द्वारों का **(वि, अशिश्रयुः)** विशेष आश्रय करते हैं और **(सम्, अञ्जन्)** चलते हैं, वे सुखकरने वाले होवें॥५॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार है। जो मनुष्य सम्यक् विचार करते हुए, विद्वानों के सङ्ग में प्रीति रखने वाले यज्ञ के तुल्य परोपकारी, माता-पिता के तुल्य सब की उन्नति

करते और संग्रामों को जीतते हुए, न्याय से प्रजाओं का पालन करते हैं, वे सदा सुखी होते हैं॥५॥

पुनर्विदुष्यः स्त्रियः कीदृश्यो भवेयुरित्याह॥

फिर विदुषी स्त्रियाँ कैसी हों, इस विषय को अगले मन्त्र में कहते हैं॥

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः।
बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेताम्॥६॥

उत। योषणे इति। दिव्ये इति। मही इति। नः। उषासानक्ता। सुदुघाऽइव। धेनुः। बर्हिऽसदा। पुरुहूते इति पुरुऽहूते। मघोनी इति। आ। यज्ञिये इति। सुविताय। श्रयेताम्॥६॥

पदार्थः-(**उत**) अपि (**योषणे**) विदुष्यौ स्त्रियाविव (**दिव्ये**) शुद्धस्वरूपे (**मही**) महत्यौ (**नः**) अस्मभ्यम् (**उषासानक्ता**) रात्रिप्रातर्वेले (**सुदुघेव**) सुष्ठुकामप्रपूरिकेव (**धेनुः**) गौर्विद्यायुक्ता वाग्वा (**बर्हिषदा**) ये बर्हिष्यन्तरिक्षे सीदन्ति (**पुरुहूते**) बहुभिर्व्याख्याते (**मघोनी**) बहुधननिमित्ते (**आ**) (**यज्ञिये**) यज्ञसम्बन्धिनि कर्मणि (**सुविताय**) ऐश्वर्याय (**श्रयेताम्**) सेवेयाताम्॥६॥

अन्वयः-हे विद्वांसो! ये नो यज्ञिये मघोनी योषणे इव दिव्ये मही धेनुः सुदुघेवोत बर्हिषदा पुरुहूते उषासानक्ता न आश्रयेतां ते सुविताय यथावत्सेवनीये॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! याः स्त्रियो दिव्यविद्यागुणऽन्विता रात्र्युषर्वत्सुखप्रदाः सत्या वागिव प्रियवचनाः स्युस्ता एव यूयमाश्रयत॥६॥

पदार्थः-हे विद्वानो! जो (**नः**) हमारे लिये (**यज्ञिये**) सम्बन्धी कर्म में (**मघोनी**) बहुत धन मिलने के निमित्त (**योषणे**) उत्तम स्त्रियों के तुल्य (**दिव्ये**) शुद्धस्वरूप (**मही**) बड़ी (**धेनुः**) विद्यायुक्त वाणी वा गौ (**सुदुघेव**) सुन्दर प्रकार कामनाओं को पूर्ण करने वाली के तुल्य (**उत**) और (**बर्हिषदा**) अन्तरिक्ष में रहने वाली (**पुरुहूते**) बहुतों से व्याख्यान की गई (**उषासानक्ता**) दिन रात रूप वेला हम को (**आ, श्रयेताम्**) आश्रय करें वे दिन रात (**सुविताय**) ऐश्वर्य के लिये यथावत् सेवने योग्य हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो स्त्रियाँ उत्तम विद्या और गुणों से युक्त, रात्रि दिन के तुल्य सुख देने वाली सत्य वाणी के तुल्य प्रिय बोलने वाली हों उन्हीं का तुम लोग आश्रय करो॥६॥

पुनस्तौ दम्पती कीदृशौ भवेतामित्याह॥

फिर वे स्त्री-पुरुष कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै।
ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि॥७॥

विप्रा। यज्ञेषु। मानुषेषु। कारू इति। मन्ये। वाम्। जातऽवेदसा। यजध्यै। ऊर्ध्वम्। नः। अध्वरम्। कृतम्। हवेषु। ता। देवेषु। वनथः। वार्याणि॥७॥

पदार्थः-(**विप्रा**) विप्रौ मेधाविनौ स्त्रीपुरुषौ (**यज्ञेषु**) सत्सु कर्मसु (**मानुषेषु**) मनुष्यसम्बन्धिषु

(कारू) शिल्पविद्याकुशलौ पुरुषार्थिनौ **(मन्ये)** **(वाम्)** युवाम् **(जातवेदसा)** प्राप्तप्रकटविद्यौ **(यजध्यै)** सङ्गन्तुम् **(ऊर्ध्वम्)** उत्कृष्टम् **(नः)** अस्माकम् **(अध्वरम्)** अहिंसनीयं गृहाश्रमादिव्यवहारम् **(कृतम्)** कुरुतम् **(हवेषु)** गृह्णन्ति येषु पदार्थेषु **(ता)** तौ **(देवेषु)** दिव्यगुणेषु विद्वत्सु वा **(वनथः)** संविभजथः **(वार्याणि)** वर्त्तुमर्हाणि॥७॥

अन्वयः-हे स्त्रीपुरुषौ! यौ मानुषेषु यज्ञेषु कारू जातवेदसा विप्रा युवां नो हवेष्वध्वरमूर्ध्वं कृतं देवेषु वार्याणि वनथस्तौ वां यजध्यै अहं मन्ये तथा युवां मां मन्येथाम्॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यथा कृतब्रह्मचर्यविद्यौ क्रियाकुशलौ विद्वांसौ स्त्रीपुरुषौ सर्वाणि गृहकृत्यान्यलङ्कर्तुं शक्नुतस्तौ सङ्गन्तुं योग्यौ भवतस्तथा यूयमपि भवत॥७॥

पदार्थः-हे स्त्रीपुरुषो! जो **(मानुषेषु)** मनुष्यसम्बन्धी **(यज्ञेषु)** सत्कर्मों में **(कारू)** वा शिल्पविद्या में कुशल वा पुरुषार्थी **(जातवेदसा)** विद्या को प्रसिद्ध प्राप्त हुए **(विप्रा)** बुद्धिमान् तुम दोनों **(नः)** हमारे **(हवेषु)** जिन में ग्रहण करते उन घरों में **(अध्वरम्)** रक्षा करने योग्य गृहाश्रमादि के व्यवहार को **(ऊर्ध्वम्)** उन्नत **(कृतम्)** करो **(देवेषु)** दिव्य गुणों वा विद्वानों में **(वार्याणि)** ग्रहण करने योग्य पदार्थों को **(वनथः)** सम्यक् सेवन करो **(ता)** वे **(वाम्)** तुम दोनों **(यजध्यै)** सङ्ग करने के अर्थ मैं **(मन्ये)** मानता, वैसे तुम दोनों मुझ को मानो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे ब्रह्मचर्यसेवन से विद्या को प्राप्त हुए क्रिया में कुशल विद्वान् स्त्रीपुरुष सब घर के कामों को शोभित करने को समर्थ होते हैं और वे संग करने योग्य होते हैं, वैसे तुम लोग भी होओ॥७॥

पुनः स्त्रीपुरुषाः कीदृशा भवेयुरित्याह॥

फिर स्त्री-पुरुष कैसे हो, इस विषय को अगले मन्त्र में कहते हैं॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु॥८॥

आ। भारती। भारतीभिः। सऽजोषाः। इळा। देवैः। मनुष्येभिः। अग्निः। सरस्वती। सारस्वतेभिः। अर्वाक्। तिस्रः। देवीः। बर्हिः। आ। इदम्। सदन्तु॥८॥

पदार्थः-**(आ)** समन्तात् **(भारती)** सद्यः शास्त्राणि धृत्वा सर्वस्य पालिका वागिव विदुषी **(भारतीभिः)** तादृशीभिर्विदुषीभिः **(सजोषाः)** समानप्रीतिसेविका **(इळा)** स्तोतुमर्हा **(देवैः)** सत्यवादिभिर्विद्वद्भिः **(मनुष्येभिः)** अनृतवादिभिर्जनैः। **सत्यमेव देवा अनृतं मनुष्याः** (शत०ब्रा०१.१.१.४) **(अग्निः)** पावक इव **(सरस्वती)** विज्ञानयुक्ता वाक् **(सारस्वतेभिः)** सरस्वत्यां कुशलैः **(अर्वाक्)** पुनः **(तिस्रः)** त्रिविधाः **(देवीः)** दिव्याः **(बर्हिः)** उत्तमं गृहं शरीरं वा **(इदम्)** प्रत्यक्षम् **(सदन्तु)** प्राप्नुवन्तु॥८॥

अन्वयः-हे विद्वांसो! यथा भारतीभिर्भारती सजोषा देवैर्मनुष्येभिरिळा सारस्वतेभिस्सरस्वत्यर्वागग्निरिव शुद्धास्तिस्रो देवीरिदं बर्हिरा सदन्तु तथैव यूयं विद्वद्भिः

सहाऽऽगच्छध्वम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यदि यूयं प्रशस्तां वाणी प्रज्ञां च प्राप्नुयुस्तर्हि सूर्य्यवत् सुप्रकाशिता भूत्वाऽस्मिञ्जगति कल्याणकरा भवथ॥८॥

पदार्थः-हे विद्वानो! जैसे **(भारतीभिः)** तुल्य विदुषी स्त्रियों के साथ **(भारती)** शीघ्र शास्त्रों को धारण कर, वाणी के तुल्य सब की रक्षक विदुषी **(सजोषाः)** तुल्य प्रीति को सेवने वाली **(देवैः)** सत्यवादी विद्वानों **(मनुष्येभिः)** और मिथ्यावादी मनुष्यों से **(इळा)** स्तुति के योग्य **(सारस्वतेभिः)** वाणी विद्या में कुशलों से **(सरस्वती)** विज्ञानयुक्त वाणी **(अर्वाक्)** पुनः **(अग्निः)** अग्नि के तुल्य शुद्ध **(तिस्रः)** तीन प्रकार की **(देवीः)** उत्तम स्त्रियाँ **(इदम्)** इस **(बर्हिः)** उत्तम घर वा शरीर को **(आ, सदन्तु)** अच्छे प्रकार प्राप्त हों, वैसे ही तुम लोग विद्वानों के साथ **(आ)** आओ॥८॥

भावार्थः-इस मन्त्र वाचकलुप्तोपमालङ्कार है। हे मनुष्यो। यदि तुम लोग प्रशंसित वाणी और बुद्धि को प्राप्त हो तो सूर्य के तुल्य प्रकाशित होकर इस जगत् में कल्याण करने वाले होओ॥८॥

पुनर्मनुष्यैः किं प्राप्तव्यमित्याह॥

फिर मनुष्यों को क्या प्राप्त करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्विं ररा॒णः स्यस्व।
यतो॑ वी॒रः क॑र्म॒ण्यः॑ सु॒दक्षो॑ यु॒क्तग्रा॑वा॒ जाय॑ते दे॒वका॑मः॥९॥

तत्। नः। तुरीपम्। अध। पोषयित्नु। देव। त्वष्टः। वि। रराणः। स्यस्वेति स्यस्व। यतः। वीरः। कर्मण्यः। सुऽदक्षः। युक्तग्रावा। जायते। देवऽकामः॥९॥

पदार्थः-(**तत्**) अध्यापनासनम् **(नः)** अस्माकम् **(तुरीपम्)** क्षिप्रम् **(अध)** अथ **(पोषयित्नु)** पोषकम् **(देव)** विद्वन् **(त्वष्टः)** विद्याप्रापक **(वि) (रराणः)** विद्या ददत् सन् **(स्यस्व)** विद्यां पारं गमय **(यतः) (वीरः) (कर्मण्यः)** कर्मसु कुशलः **(सुदक्षः)** सुष्ठु बलोपेतः **(युक्तग्रावा)** युक्तो योजितो ग्रावा मेघो येन सः **(जायते) (देवकामः)** देवानां विदुषां काम इच्छा यस्य सः॥९॥

अन्वयः-हे त्वष्टर्देव! वि रराणस्त्वं नस्तत्पोषयित्नु तुरीपं स्यस्वाऽध यतः कर्मण्यः सुदक्षो युक्तग्रावा देवकामो वीरो जायते॥९॥

भावार्थः-सर्वैर्मनुष्यैः सर्वेभ्यो लाभेभ्यो विद्यालाभमुत्तमं मत्वा तत्प्राप्तव्यं सदैव विद्वत्सङ्गमनं कृत्वा सदैव कर्मानुष्ठानी जायते सः श्रेष्ठात्मबलो भवति॥९॥

पदार्थः-हे **(त्वष्टः)** विद्या को प्राप्त कराने वाले **(देव)** विद्वान्! **(वि, रराणः)** विशेष विद्या देते हुए **(नः)** हमारे **(तत्)** पढ़ाने के आसन को **(पोषयित्नु)** पुष्ट करने वाले **(तुरीपम्)** शीघ्र **(स्यस्व)** विद्या को पार कीजिये **(अध)** अब **(यतः)** जिससे **(कर्मण्यः)** कर्मों में कुशल **(सुदक्षः)** सुन्दर बल से युक्त **(युक्तग्रावा)** मेघ को युक्त करने और **(देवकामः)** विद्वानों की कामना करने वाला **(वीरः)** वीर पुरुष **(जायते)** प्रकट होता है॥९॥

भावार्थः-सब मनुष्यों को उचित है कि सब लाभों से विद्या लाभ को उत्तम मान के उसको

प्राप्त हों, सदैव जो विद्वानों का सङ्ग करके सदा कर्मों का अनुष्ठान करने वाला होता है, वह श्रेष्ठ आत्मा के बल वाला होता है॥९॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद॥१०॥

वनस्पते। अव। सृज। उप। देवान्। अग्निः। हविः। शमिता। सूदयाति। सः। इत्। ऊँ इति। होता। सत्यऽतरः। यजाति। यथा। देवानाम्। जनिमानि। वेद॥१०॥

पदार्थः-(**वनस्पते**) वनानां किरणानां पालक सूर्य इव विद्वन् (**अव**) (**सृज**) (**उप**) (**देवान्**) (**अग्निः**) पावकः (**हविः**) हुतं द्रव्यम् (**शमिता**) शान्तियुक्तः (**सूदयाति**) सूदयेत् क्षरयेत् (**सः**) (**इत्**) एव (**उ**) (**होता**) दाता (**सत्यतरः**) यः सत्येन दुःखं तरति (**यजाति**) यजेत् (**यथा**) (**देवानाम्**) दिव्यानां पृथिव्यादिपदार्थानां विदुषां वा (**जनिमानि**) जन्मानि (**वेद**) जानाति॥१०॥

अन्वयः-हे वनस्पते! शमिता त्वं यथाग्निर्हविः सूदयाति तथा देवानुपाऽव सृज यथा होता यजाति तथेदु सत्यतरो भव यो देवानां जनिमानि वेद स पदार्थविद्यां प्राप्तुमर्हति॥१०॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यदि भवन्तः सूर्य्यो वर्षा इव होता यज्ञमिव विद्वान् विद्या इवाऽध्यापनोपदेशाभ्यां सर्वोपकारं साध्नुयुस्तर्हि भवादृशाः केऽपि न सन्तीति वयं विजानीयामः॥१०॥

पदार्थः-हे (**वनस्पते**) किरणों के पालक सूर्य के तुल्य तेजस्वि विद्वन्! (**शमिता**) शान्तियुक्त आप (**यथा**) जैसे (**अग्निः**) अग्नि (**हविः**) हवन किये द्रव्य को (**सूदयाति**) छिन्न-भिन्न करे, वैसे (**देवान्**) दिव्यगुणों को (**उप, अव, सृज**) फैलाइये जैसे (**होता**) दाता (**यजाति**) यज्ञ करे, वैसे (**इत्**) ही (**उ**) तो (**सत्यतरः**) सत्य से दुःख के पार होने वाले हूजिये। जो (**देवानाम्**) पृथिव्यादि दिव्य पदार्थों वा विद्वानों के (**जनिमानि**) जन्मों को (**वेद**) जानता है (**सः**) वह पदार्थविद्या को प्राप्त होने योग्य है॥१०॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे विद्वानो! यदि आप लोग सूर्य जैसे वर्षा को, होता जैसे यज्ञ को और विद्वान् जैसे विद्या को, वैसे पढ़ाने और उपदेश से सर्वोपकार को सिद्ध करें तो आप के तुल्य कोई लोग नहीं हो, यह हम जानते हैं॥१०॥

पुनर्विद्वांसः किं कुर्य्युरित्याह॥

फिर विद्वान् लोग क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम्॥११॥२॥

आ। याहि। अग्ने। समऽइधानः। अर्वाङ्। इन्द्रेण। देवैः। सऽरथम्। तुरेभिः। बर्हिः। नः। आस्ताम्।

अदितिः। सुऽपुत्रा। स्वाहा। देवाः। अमृताः। मादयन्ताम्॥ ११॥

पदार्थः-(**आ**) (**याहि**) आगच्छ (**अग्ने**) पावक इव (**समिधानः**) शुभगुणैर्देदीप्यमानः (**अर्वाङ्**) योऽर्वाङ्धोऽञ्चति (**इन्द्रेण**) विद्युता सह सूर्य्येण वा (**देवैः**) विद्वद्भिर्दिव्यगुणैर्वा (**सरथम्**) रथेन सह वर्त्तमानम् (**तुरेभिः**) आशुकारिभिः (**बर्हिः**) अन्तरिक्षम् (**नः**) (**अस्मभ्यम्**) (**अदितिः**) माता (**सुपुत्रा**) शोभनाः पुत्रा यस्याः सा (**स्वाहा**) सत्यक्रियया (**देवाः**) विद्वांसः (**अमृताः**) प्राप्तमोक्षाः (**मादयन्ताम्**) आनन्दयन्तु॥ ११॥

अन्वयः-हे अग्ने! यथा समिधानोऽग्निस्सूर्यप्रकाश इन्द्रेण सहाऽर्वाङागच्छति तथाभूतस्त्वं तुरेभिर्देवैस्सह नस्सरथं बर्हिरा याहि यथा स्वाहा सुपुत्राऽदितिरस्ति तथा भवानत्राऽऽस्ताम् यथाऽमृता देवाः सर्वानानन्दयन्ति तथा भवन्तोऽपि सर्वान् मादयन्ताम्॥ ११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा सूर्यप्रकाशो दिव्यैर्गुणैः सहाऽधःस्थानस्मान् प्राप्नोति यथा च सत्यविद्यया युक्तोत्तमसन्ताना सुखमास्ते तथैवाऽविदुषोऽस्मान् भवन्तः प्राप्य सुशिक्षन्तां सुखयन्त्विति॥ ११॥

अत्राग्निमनुष्यविद्युद्विद्वध्यापकोपदेशकोत्तमवाक् पुरुषार्थ विद्वदुपदेशस्त्र्यादिकृत्यवर्णानादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वितीय सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) अग्नि के समान विद्वन्! जैसे (**समिधानः**) शुभ गुणों से देदीप्यमान अग्नि अर्थात् सूर्य्य का प्रकाश (**इन्द्रेण**) बिजुली वा सूर्य्य के साथ (**अर्वाङ्**) नीचे जाने वाला प्राप्त होता है, वैसे होकर आप भी (**तुरेभिः**) शीघ्र करने वाले (**देवैः**) विद्वानों वा दिव्य गुणों के साथ (**नः**) हमारे लिये (**सरथम्**) रथ के साथ वर्त्तमान (**बर्हिः**) अन्तरिक्ष को (**आ, याहि**) आइये और जैसे (**स्वाहा**) सत्यक्रिया से (**सुपुत्रा**) सुन्दर पुत्रों से युक्त (**अदितिः**) माता है, वैसे आप भी (**आस्ताम्**) स्थित होवें और जैसे (**अमृता**) मोक्ष को प्राप्त हुए (**देवाः**) विद्वान् जन सब की आनन्दित करते हैं, वैसे आप भी सब को (**मादयन्ताम्**) आनन्दित कीजिये॥ ११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे सूर्य्य का प्रकाश दिव्य गुण के साथ नीचे भी स्थित हम सबों को प्राप्त होता है और जैसे सत्यविद्या से युक्त और उत्तम सन्तान वाली माता सुखपूर्वक स्थित होती है, वैसे ही अविद्वान् हम सबों को आप प्राप्त होकर अच्छी शिक्षा दीजिये तथा सुखी कीजिये॥ ११॥

इस सूक्त में [अग्नि], मनुष्य, बिजुली, विद्वान्, अध्यापक, उपदेशक, उत्तम वाणी, पुरुषार्थ, विद्वानों का उपदेश तथा स्त्री आदि के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह दूसरा सूक्त और दूसरा वर्ग भी समाप्त हुआ॥

अथ दशर्चस्य तृतीयस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, ९, १० विराट्त्रिष्टुप्। ४, ६, ७, ८ निचृत्त्रिष्टुप्। ५ त्रिष्टुप्छन्दः। धैवतः स्वरः। २ स्वराट् पङ्क्तिः। ३ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ कीदृशी विद्युदस्तीत्याह॥

अब सातवें मण्डल के तृतीय सूक्त का आरम्भ है। इसके प्रथम मन्त्र में विद्युत् कैसी है, इस विषय को कहते हैं।

अ॒ग्निं वो॑ दे॒वम॒ग्निभि॑: स॒जोषा यजि॑ष्ठं दू॒तमध्व॒रे कृ॑णुध्वम्।
यो मर्त्ये॑षु॒ निर्ऋ॑तावा॒ तपु॑र्मू॒र्धा घृ॒तान्न॑: पाव॒कः॥ १॥

अ॒ग्निम्। व॒:। दे॒वम्। अ॒ग्निऽभि॑:। स॒ऽजोषा॑:। यजि॑ष्ठम्। दू॒तम्। अ॒ध्व॒रे। कृ॒णु॒ध्व॒म्। य:। मर्त्ये॑षु। निऽध्रु॑वि:। ऋ॒तऽवा॑:। तपु॑:ऽमूर्धा। घृ॒तऽअ॑न्न:। पा॒व॒क:॥ १॥

पदार्थः- (**अग्निम्**) पावकम् (**वः**) युष्माकम् (**देवम्**) दिव्यगुणकर्मस्वभावम् (**अग्निभिः**) सूर्य्यादिभिः (**सजोषाः**) समानसेवी (**यजिष्ठम्**) अतिशयेन सङ्गन्तारम् (**दूतम्**) दूतवत्सद्यः समाचारप्रापकम् (**अध्वरे**) अहिंसनीये शिल्पव्यवहारे (**कृणुध्वम्**) (**यः**) (**मर्त्येषु**) मरणधर्मेषु मनुष्यादिषु (**निध्रुविः**) नितरां ध्रुवः (**ऋतावा**) सत्यस्य जलस्य वा विभाजकः (**तपुर्मूर्धा**) तपुस्तापो मूर्द्धेवोत्कृष्टो यस्य (**घृतान्नः**) घृतमाज्यं प्रदीपनमन्नमिव प्रदीपकं यस्य (**पावकः**) पवित्रकरः॥१॥

अन्वयः-हे मनुष्या! यो वस्सजोषा मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकोऽस्ति तमध्वरेऽग्निभिस्सह यजिष्ठं दूतमग्निं देवं यूयं कृणुध्वम्॥१॥

भावार्थः-हे विद्वांसो! या विद्युत्सर्वत्र स्थिता विभाजिका प्रदीप्तगुणा साधनजन्या वर्त्तते तामेव यूयं दूतमिव कृत्वा सङ्ग्रामादीनि कार्याणि साध्नुत॥१॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**वः**) तुम्हारा (**सजोषाः**) एक सी प्रीति को सेवनेवाला (**मर्त्येषु**) मरणधर्म सहित मनुष्यादिकों में (**निध्रुविः**) निरन्तर स्थित (**ऋतावा**) सत्य वा जल का विभाग करने वाला (**तपुर्मूर्धा**) शिर के तुल्य उत्कृष्ट वा उत्तम जिसका ताप है (**घृतान्नः**) अन्न के तुल्य प्रकाशित जिसका घृत है (**पावकः**) जो पवित्र करने वाला है उस (**अध्वरे**) सूर्य आदि के साथ (**यजिष्ठम्**) अत्यन्त संगति करने वाले (**दूतम्**) दूत के तुल्य तार द्वारा शीघ्र समाचार पहुँचाने वाले (**अग्निम्, देवम्**) उत्तम गुण, कर्म और स्वभाव युक्त अग्नि को तुम लोग (**कृणुध्वम्**) प्रकट करो॥१॥

भावार्थः-हे विद्वानो! जो विद्युत् सर्वत्र स्थित, विभाग करने वाली प्रकाशित गुणों से युक्त साधनों से प्रकट हुई वर्त्तमान है, उसी को तुम लोग दूत के तुल्य बना कर युद्धादि कार्य्यों को सिद्ध करो॥१॥

पुनः सा विद्युत्कीदृशी वर्त्तत इत्याह॥

फिर वह विद्युत् कैसी है, इस विषय को अगले मन्त्र में कहते हैं॥

प्रोथ॒दश्वो॒ न यव॑सेऽवि॒ष्यन् य॒दा म॒हः सं॒वर॑णा॒द् व्यस्था॑त्।
आद॑स्य॒ वातो॒ अनु॑वाति शो॒चिरध॑ स्म ते व्र॒जनं॑ कृ॒ष्णम॑स्ति॥ २॥

प्रोथ॑त्। अश्वः॑। न। यव॑से। अ॒वि॒ष्यन्। य॒दा। म॒हः॑। सं॒ऽवर॑णात्। वि। अस्था॑त्। आत्। अ॒स्य॒। वातः॑। अनु॑। वा॒ति॒। शो॒चिः॑। अध॑। स्म॒। ते॒। व्र॒जन॑म्। कृ॒ष्णम्। अ॒स्ति॒॥ २॥

पदार्थः- (**प्रोथत्**) शब्दं कुर्वन् (**अश्वः**) आशुगामी तुरङ्गः (**न**) इव (**यवसे**) घासे (**अविष्यन्**) रक्षणं करिष्यन् (**यदा**) (**महः**) महतः (**संवरणात्**) सम्यक् स्वीकरणात् (**वि**) विशेषेण (**अस्थात्**) तिष्ठति (**आत्**) आनन्तर्ये (**अस्य**) (**वातः**) वायुः (**अनु**) (**वाति**) गच्छति (**शोचिः**) प्रदीपनम् (**अध**) अथ (**स्म**) एव (**ते**) तव (**व्रजनम्**) गमनम् (**कृष्णम्**) कर्षणीयम् (**अस्ति**)॥ २॥

अन्वयः-हे विद्वन्! यत्ते कृष्णं व्रजनमस्ति तन्महः संवरणाच्छोचिरध स्मास्य वातो [यदा]ऽनु वाति। आत्तदा यवसेऽविष्यन् प्रोथदश्वो न सद्योऽयमग्निरध्वानं व्यस्थात्॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यदा मनुष्या अग्नियानेन गमनं तडिता समाचारांश्च गृह्णीयुतस्तदेते सद्यः कार्याणि साद्धुं शक्नुवन्ति॥ २॥

पदार्थः-हे विद्वन्! जो (**ते**) आपका (**कृष्णम्**) आकर्षण करने योग्य (**व्रजनम्**) गमन (**अस्ति**) है उसके सम्बन्ध में (**महः**) महान् (**संवरणात्**) सम्यक् स्वीकार से (**शोचिः**) प्रदीपन (**अध, स्म**) और इसके अनन्तर ही (**अस्य**) इसके सम्बन्ध में (**वातः**) वायु (**यदा**) जब (**अनु, वाति**) अनुकूल चलता है (**आत्**) अनन्तर तब (**यवसे**) भक्षण के अर्थ (**अविष्यन्**) रक्षा करता (**प्रोथत्**) और शब्द करता हुआ (**अश्वः**) घोड़े के (**न**) समान शीघ्र यह अग्निमार्ग को (**वि, अस्थात्**) व्याप्त होता है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जब मनुष्य लोग अग्नियान से गमन और विद्युत् से समाचारों को ग्रहण करें तब ये शीघ्र कार्य्यों को सिद्ध कर सकते हैं॥ २॥

पुनर्विद्वान् विद्युता किं कुर्यादित्याह॥

फिर विद्वान् बिजुली से क्या सिद्ध करें, इस विषय को अगले मन्त्र में कहते हैं॥

उद्यस्य॑ ते नव॑जातस्य॒ वृष्णोऽग्ने॒ चर॑न्त्य॒जरा॑ इ॒धा॒नाः।
अच्छा॒ द्याम॑रु॒षो धू॒म ए॑ति॒ सं दू॒तो अ॑ग्न॒ ईय॑से॒ हि दे॒वान्॥ ३॥

उत्। यस्य॑। ते॒। नव॑ऽजातस्य। वृष्णः॑। अग्ने॑। चर॑न्ति। अ॒जराः॑। इ॒धा॒नाः। अच्छ॑। द्याम्। अ॒रु॒षः। धू॒मः। ए॒ति॒। सम्। दू॒तः। अ॒ग्ने॒। ईय॑से। हि। दे॒वान्॥ ३॥

पदार्थः- (**उत्**) (**यस्य**) (**ते**) तव (**नवजातस्य**) नवीनविदुषः (**वृष्णः**) विद्यया बलिष्ठस्य (**अग्ने**) विद्युदिव गुप्तप्रतापिन् (**चरन्ति**) गच्छन्ति (**अजराः**) व्ययरहिताः (**इधानाः**) देदीप्यमानाः (**अच्छा**) अत्र **संहितायामि**ति दीर्घः। (**द्याम्**) प्रकाशम् (**अरुषः**) गर्भस्थः (**धूमः**) (**एति**) गच्छति (**सम्**) सम्यक् (**दूतः**) दूत इव समाचारप्रदः (**अग्ने**) प्रसिद्धाग्निवत्कार्यसाधक (**ईयसे**) गच्छसि (**हि**)

यत: **(देवान्)** विदुष:॥३॥

अन्वय:-हे अग्ने! यस्य नवजातस्य वृष्णस्ते यथाऽग्न इधाना अजरा अग्नय उच्चरन्त्यरुषो द्यां प्राप्य यस्य धूम अच्छैति यो दूत इव देवानीयते यदा तं हि त्वं समीयसे तदा कार्यं कर्त्तुं शक्नोषि॥३॥

भावार्थ:-हे विद्वन्! यदि भवान् विद्युद्विद्यां विजानीयात्तर्हि किं किं कार्यं साद्धुं न शक्नुयात्॥३॥

पदार्थ:-हे **(अग्ने)** विद्युत् अग्नि के तुल्य गुप्त प्रताप वाले! **(यस्य)** जिस **(नवजातस्य)** नवीन प्रकट हुए **(वृष्ण:)** विद्या से बलवान् **(ते)** आप विद्वान् के निकटवर्ती जैसे **(अग्ने)** प्रसिद्ध अग्नि के तुल्य कार्यसाधक **(इधाना:)** प्रकाशमान जलते हुए **(अजरा:)** खर्चरहित अग्नि **(उत्, चरन्ति)** ऊपर को उठते वा चलते हैं **(अरुष:)** गर्भस्थ पुरुष **(द्याम्)** प्रकाश को प्राप्त होकर जिसका **(धूम:)** धुआँ **(अच्छा, एति)** अच्छा जाता है जो **(दूत:)** दूत के तुल्य **(देवान्)** विद्वानों को प्राप्त होता जब उसको **(हि)** ही आप **(सम्, ईयसे)** प्राप्त होते हो, तब कार्य करने को समर्थ होते हो॥३॥

भावार्थ:-हे विद्वन्! यदि आप विद्युत् की विद्या को जानें तो आप किस-किस कार्य को सिद्ध न कर सकें॥३॥

पुन: सा विद्युत्कीदृशी कथं प्रकटनीयेत्याह॥

फिर वह विद्युत् कैसी है और कैसे प्रकट करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

वि यस्य॑ ते पृथि॒व्यां पाजो॒ अश्रे॑त्तृषु यदन्ना॑ स॒मवृ॑क्त॒ जम्भै॑:।
सेने॑व सृ॒ष्टा प्रसि॑तिष्ट एति॒ यव॑ं न द॑स्म जु॒ह्वा॑ विवेक्षि॥४॥

वि। यस्य॑। ते॒। पृ॒थि॒व्याम्। पाज॑:। अश्रे॑त्। तृ॒षु। यत्। अन्ना॑। स॒म्ऽअवृ॑क्त। जम्भै॑:। सेना॑ऽइव। सृ॒ष्टा। प्रऽसि॑ति:। ते॒। ए॒ति॒। यव॑म्। न। द॒स्म॒। जु॒ह्वा॑। वि॒ऽवे॒क्षि॒॥४॥

पदार्थ:- **(वि)** **(यस्य)** **(ते)** तस्या विद्युत:। अत्र पुरुषव्यत्यय:। **(पृथिव्याम्)** **(पाज:)** बलम्। **पाज इति बलनाम।** (निघं०२.९) **(अश्रेत्)** श्रयति **(तृषु)** क्षिप्रम् **(यत्)** **(अन्ना)** अन्नानि **(समवृक्त)** सम्यग्वृङ्क्ते **(जम्भै:)** गात्रविक्षेपै: **(सेनेव)** **(सृष्टा)** सम्प्रयुक्ता **(प्रसिति:)** प्रकर्षं बन्धनम् **(ते)** तव **(एति)** **(यवम्)** अन्नविशेषम् **(न)** इव **(दस्म)** दु:खोपक्षयित: **(जुह्वा)** होमसाधनेन **(विवेक्षि)** व्याप्नोषि॥४॥

अन्वय:-हे दस्म विद्वन्! यां जुह्वा यवं न विद्युद्विद्यां विवेक्षि सा ते सृष्टा प्रसिति: सती सेनेवैति यद्या जम्भैरन्ना समवृक्त यस्य ते विद्युद्रूपस्याग्ने: पाज: पृथिव्यां तृषु व्यश्रेत्तां त्वं विजानीहि॥४॥

भावार्थ:-ये विद्वांसो विद्युद्विद्यां जानन्ति त उत्तमा सेनेव शत्रून् सद्यो जेतुं शक्नुवन्ति यथा घृतादिनाऽग्नि: प्रदीप्यते तथा घर्षणादिना विद्युत्प्रदीपनीया॥४॥

पदार्थ:-हे **(दस्म)** दु:खों के नाश करनेहारे विद्वन्! जिस **(जुह्वा)** होमसाधन से **(यवम्)** यवों को **(न)** जैसे, वैसे विद्युद्विद्या को **(विवेक्षि)** व्याप्त होते हो वह **(ते)** तुम्हारी **(सृष्टा)** प्रयुक्त क्रिया **(प्रसिति:)** प्रबल बन्धन होती हुई **(सेनेव)** सेना के तुल्य **(एति)** प्राप्त होती है और **(यत्)** जो

(जम्भैः) गात्रविक्षेपों से **(अन्ना)** अन्नों को **(समवृक्त)** अच्छे प्रकार वर्जित करता अर्थात् शरीर से छुड़ाता है **(यस्य)** जिस **(ते)** उस विद्युत् के **(पाजः)** बल को **(पृथिव्याम्)** पृथिवी में **(तृषु)** शीघ्र **(वि, अश्रेत्)** आश्रय करता है, उसको तुम जानो॥४॥

भावार्थः-जो विद्वान् लोग विद्युद्विद्या को जानते हैं, वे उत्तम सेना के तुल्य शत्रुओं को शीघ्र जीत सकते हैं, जैसे घी आदि से अग्नि प्रज्वलित होता, वैसे घर्षण आदि से विद्युत् अग्नि प्रकट करना चाहिये॥४॥

पुनस्सा विद्युत्कथमुत्पादनीया सा च किं करोतीत्याह॥

फिर वह विद्युत् कैसे उत्पन्न करनी चाहिये और वह क्या करती है, इस विषय को अगले मन्त्र में कहते हैं॥

तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः।
निशिशानास्तिथिमस्य योनौ दीदायं शोचिराहुतस्य वृष्णः॥५॥३॥

तम्। इत्। दोषा। तम्। उषसि। यविष्ठम्। अग्निम्। अत्यम्। न। मर्जयन्त। नरः। निऽशिशानाः। अतिथिम्। अस्य। योनौ। दीदाय। शोचिः। आऽहुतस्य। वृष्णः॥५॥

पदार्थः- **(तम्)** विद्युदग्निम् **(इत्)** एव **(दोषा)** रात्रौ **(तम्)** **(उषसि)** प्रभाते **(यविष्ठम्)** अतिशयेन युवानमिव **(अग्निम्)** विद्युतम् **(अत्यम्)** वेगवन्तं वाजिनम् **(न)** इव **(मर्जयन्त)** घर्षणादिना शोधयन्तु **(नरः)** **(निशिशानाः)** तीक्ष्णीकर्त्तारः **(अतिथिम्)** अतिथिमिव सेवनीयम् **(अस्य)** अग्नेः **(योनौ)** **(दीदाय)** प्रकाशय **(शोचिः)** दीप्तिमन्तम् **(आहुतस्य)** सर्वतः कृतप्रियस्य **(वृष्णः)** वर्षकस्य॥५॥

अन्वयः-हे नरो! ये निशिशानास्सन्तो भवन्तस्तं दोषा तमुषस्यत्यन्न यविष्ठमग्निं मर्जयन्तोऽस्याहुतस्य वृष्णोऽग्नेर्योनावतिथिमिव शोचिर्दीदायेत्॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये तीव्रैर्घर्षणादिभिरहर्निशं विद्युतमग्निं प्रकटयन्ति तेऽश्वेनेव सद्यः स्थानान्तरं गन्तुं शक्नुवन्ति॥५॥

पदार्थः-हे **(नरः)** नायक मनुष्यो! जो **(निशिशानाः)** निरन्तर तीक्ष्णता पूर्वक कार्य करते हुए आप **(तम्)** उस विद्युत् अग्नि को **(दोषा)** रात्रि में **(तम्)** उसको **(उषसि)** दिन में **(अत्यम्)** घोड़े को **(न)** जैसे, वैसे **(यविष्ठम्)** अत्यन्त जवान के तुल्य **(अग्निम्)** विद्युत् अग्नि को **(मर्जयन्त)** घर्षण आदि से शुद्ध करो **(अस्य)** इस **(आहुतस्य)** अभीष्ट सिद्धि के लिये संग्रह किये **(वृष्णः)** वर्षा के हेतु अग्नि के **(योनौ)** कारण में **(अतिथिम्)** अतिथि के तुल्य सेवने योग्य **(शोचिः)** दीप्तियुक्त विद्युत् को **(दीदाय)** प्रकाशित **(इत्)** ही कीजिये॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो तीव्र घर्षणादिकों से दिन-रात विद्युत् अग्नि को प्रकट करते हैं, वे जैसे घोड़े से, वैसे शीघ्र स्थानान्तर के जाने को समर्थ होते हैं॥५॥

पुनः सा विद्युत्कीदृशीत्याह॥

फिर वह विद्युत् अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

सुसंदृक्ते स्वनीक प्रतीकं वियद्रुक्मो न रोचस उपाके।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुम्॥६॥

सुऽसंदृक्। ते। सुऽअनीक। प्रतीकम्। वि। यत्। रुक्मः। न। रोचसे। उपाके। दिवः। न। ते। तन्यतुः। एति। शुष्मः। चित्रः। न। सूरः। प्रति। चक्षि। भानुम्॥६॥

पदार्थः- (**सुसन्दृक्**) सुष्ठु पश्यति यया सा (**ते**) तव (**स्वनीक**) शोभनमनीकं सैन्यं यस्य तत्सम्बुद्धौ (**प्रतीकम्**) विजयप्रतीतिकरम् (**वि**) (**यत्**) (**रुक्मः**) रोचमानः सूर्य्यः (**न**) इव (**रोचसे**) (**उपाके**) समीपे (**दिवः**) सूर्य्यस्य (**न**) इव (**ते**) तव (**तन्यतुः**) विद्युत् (**एति**) गच्छति (**शुष्मः**) बलयुक्तः (**चित्रः**) अद्भुतः (**नः**) (**सूरः**) सूर्य्यः (**प्रति**) (**चक्षि**) वदेयम् (**भानुम्**) प्रकाशयुक्तम्॥६॥

अन्वयः-हे स्वनीक! यस्य ते यत्प्रतीकं रुक्मो नेवास्ति ये उपाके वि रोचसे यस्य ते दिवो न सुसन्दृक् तन्यतुः प्रतीकमेति तस्य शुष्मश्चित्रः सूरो नेवाहं भानुं त्वा प्रति चक्षि॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यदि भवान् विद्युद्विद्यां प्राप्नुयात्तर्हि सूर्य्यवत्सुसेनादिभिः प्रकाशितः सन् सर्वत्र विजयकीर्त्ती राजसु राजेत॥६॥

पदार्थः-हे (**स्वनीक**) सुन्दर सेना वाले सेनापते! जिस (**ते**) आपका (**यत्**) जो (**प्रतीकम्**) विजय का निश्चय कराने वाले (**रुक्मः**) प्रकाशमान सूर्य्य के (**न**) तुल्य है जो (**उपाके**) समीप में (**वि, रोचसे**) विशेष कर रुचिकारक होते हो। जिस (**ते**) तुम्हारा (**दिवः, न**) सूर्य्य के तुल्य (**सुसन्दृक्**) अच्छे प्रकार देखने का साधन (**तन्यतुः**) विद्युत् विजय प्रतितिकारक नियम को (**एति**) प्राप्त होता है उसका (**शुष्मः**) बलयुक्त (**चित्रः**) आश्चर्यस्वरूप (**सूरः**) सूर्य (**न**) जैसे, वैसे मैं (**भानुम्**) प्रकाशयुक्त आपके (**प्रति**) (**चक्षि**) कहूं॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! यदि आप विद्युद् विद्या को जानें तो सूर्य्य के तुल्य सुन्दर सेनादिकों से प्रकाशित हुए सर्वत्र विजय, कीर्ति और राजाओं में सुशोभित होवें॥६॥

पुनर्मनुष्याः परस्परं कथं वर्तेरन्नित्याह॥

फिर मनुष्य परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

यथा वः स्वाहाऽग्नये दाशेम परीळभिर्घृतवद्भिश्च हव्यैः।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि॥७॥

यथा। वः। स्वाहा। अग्नये। दाशेम। परि। इळाभिः। घृतवत्ऽभिः। च। हव्यैः। तेभिः। नः। अग्ने। अमितैः। महःऽभिः। शतम्। पूःऽभिः। आयसीभिः। नि। पाहि॥७॥

पदार्थः- (**यथा**) (**वः**) युष्मभ्यम् (**स्वाहा**) सत्यया क्रियया (**अग्नये**) पावकाय (**दाशेम**) दद्याम (**परि**) सर्वतः (**इळाभिः**) अग्नैः (**घृतवद्भिः**) घृतादियुक्तैः (**च**) (**हव्यैः**) होतुमर्हैः (**तेभिः**) (**नः**) अस्मान् (**अग्ने**) अग्निरिव प्रकाशमान राजन् (**अमितैः**) असंख्यैः (**महोभिः**) महद्भिः कर्मभिः

पुरुषैर्वा **(शतम्)** **(पूर्भिः)** नगरीभिः **(आयसीभिः)** अयसा निर्मिताभिः **(नि)** नितराम् **(पाहि)** रक्ष॥७॥

अन्वयः-हे विद्वांसो! यथा वयं वः स्वाहा घृतवद्भिर्हव्यैरिळाभिश्चाग्नये शतं परि दाशेम तथाऽमितैर्महोभिस्तेभिरायसीभिः पूर्भिश्च सह वर्त्तमानान्नोऽस्मान् हे अग्ने! नि पाहि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथर्त्विग्यजमाना घृतादिनाऽग्निं वर्धयन्ति तथैव राजा प्रजाः प्रजा राजानं च न्यायविनयादिभिर्वर्धयित्वाऽमितानि सुखानि प्राप्नुवन्ति॥७॥

पदार्थः-हे विद्वान् लोगो! **(यथा)** जैसे हम लोग **(वः)** तुम्हारे अर्थ **(स्वाहा)** सत्यक्रिया से **(घृतवद्भिः)** घृतादि से युक्त **(हव्यैः)** होम के योग्य पदार्थों **(च)** और **(इळाभिः)** अन्नों के साथ **(अग्नये)** अग्नि के लिये **(शतम्)** सैकड़ों प्रकार के हविष्यों को **(परि, दाशेम)** सब ओर से देवें, वैसे **(अमितैः)** असंख्य **(महोभिः)** बड़े-बड़े कर्मों वा पुरुषों और **(तेभिः)** उन **(आयसीभिः)** लोहे से बनी **(पूर्भिः)** नगरियों के साथ वर्त्तमान **(नः)** हम लोगों को हे **(अग्ने)** अग्नि के तुल्य तेजस्वी प्रकाशमान् राजन्! **(नि, पाहि)** निरन्तर रक्षा कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे ऋत्विक् और यजमान लोग घृतादि से अग्नि को बढ़ाते हैं, वैसे ही राजा प्रजाओं को और प्रजाएँ राजा को न्याय विनयादि से बड़ा के अपरिमित सुखों को प्राप्त होते हैं॥७॥

पुनः कैः काभिः काः पालनीया इत्याह॥

फिर किन-किन से किनकी रक्षा करनी चाहिये॥

या वां॑ ते॒ सन्ति॑ दाशुषे॒ अधृ॑ष्टा॒ गिरो॑ वा॒ याभि॑र्नृ॒वती॑रुरु॒ष्याः।
ताभि॑र्नः॒ सूनो सहसो॒ नि पा॑हि॒ स्मत्सू॒रीञ्ज॑रि॒तॄञ्जा॑तवेदः॥८॥

याः। वा॒। ते॒। सन्ति॑। दा॒शुषे॑। अधृ॑ष्टाः। गिरः॑। वा॒। याभिः॑। नृ॒ऽवतीः॑। उ॒रु॒ष्याः। ताभिः॑। नः॒। सू॒नो॒ इति॑। स॒हः॒स॒ः। नि। पा॒हि॒। स्मत्। सू॒रीन्। ज॒रि॒तॄन्। जा॒त॒ऽवे॒दः॒॥८॥

पदार्थः- **(याः)** **(वा)** **(ते)** तव **(सन्ति)** **(दाशुषे)** दात्रे **(अधृष्टाः)** अधर्षणीयाः **(गिरः)** सुशिक्षिता वाचः **(वा)** **(याभिः)** **(नृवतीः)** नरो विद्यन्ते यासु प्रजासु ताः **(उरुष्याः)** **(रक्षेः)** **(ताभिः)** **(नः)** अस्मान् **(सूनो)** अपत्य **(सहसः)** बलिष्ठस्य **(नि)** नितराम् **(पाहि)** रक्ष **(स्मत्)** एव **(सूरीन्)** विदुषः **(जरितॄन्)** सकलविद्यास्तावकान् **(जातवेदः)** ज्ञातप्रज्ञः॥८॥

अन्वयः-हे सहसस्सूनो! जातवेदो यास्तेऽधृष्टा गिरः सन्ति वा दाशुषे हितकर्यः सन्ति याभिर्वा त्वं नृवतीरुरुष्यास्ताभिर्नोऽस्मान् सूरीञ्जरितॄन् स्मन्नि पाहि॥८॥

भावार्थः-मनुष्या यावद्विद्याशिक्षाविनयान् गृहीत्वा**[ऽन्यान्]** न ग्राहयन्ति तावत् प्रजाः पालयितुं न शक्नुवन्ति यावद्धार्मिकाणां विदुषां राज्येऽधिकारा न स्युस्तावद्यथावत्प्रजापालनं दुर्घटम्॥८॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** पुत्र! **(जातवेदः)** प्रकट बुद्धिमानी को प्राप्त हुए **(याः)** जो **(ते)** आपकी **(अधृष्टाः)** न धमकाने योग्य **(गिरः)** सुशिक्षित वाणी **(सन्ति)** हैं **(वा)** अथवा

(दाशुषे) दाता पुरुष के लिये हितकारिणी हैं **(वा)** अथवा **(याभिः)** जिन वाणियों से आप **(नृवतीः)** उत्तम मनुष्यों वाली प्रजाओं की **(उरुष्याः)** रक्षा कीजिये **(ताभिः)** उनसे **(नः)** हम **(जरितॄन्)** समस्त विद्याओं की स्तुति प्रशंसा करने वाले **(सूरीन्)** विद्वानों की **(स्मत्)** ही **(नि, पाहि)** निरन्तर रक्षा कीजिये॥८॥

भावार्थः-मनुष्य लोग जब तक विद्या, शिक्षा, विनयों को ग्रहण कर अन्यों को नहीं ग्रहण कराते, तब तक प्रजों का पालन करने को नहीं समर्थ होते हैं, जब तक धर्मात्मा विद्वानों के राज्य में अधिकार न हों, तब तक यथावत् प्रजा का पालन होना दुर्घट है॥८॥

पुनर्मनुष्यैः कीदृशो राजा मन्तव्य इत्याह॥

फिर मनुष्यों को कैसा राजा मानना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

निर्यत्पूतेव॒ स्वधि॑तिः॒ शुचि॒र्गात्स्वया॑ कृ॒पा त॒न्वा॒३॑ रोच॑मानः।
आ यो मा॒त्रोरु॒शेन्यो॒ जनि॑ष्ट देव॒यज्या॑य सु॒क्रतुः॑ पाव॒कः॥९॥

निः। यत्। पूताऽइ॑व। स्वऽधि॑तिः। शुचिः॑। गात्। स्वया॑। कृ॒पा। त॒न्वा॑। रोच॑मानः। आ। यः। मा॒त्रोः। उ॒शेन्यः॑। जनि॑ष्ट। दे॒व॒ऽयज्या॑य। सु॒क्रतुः॑। पा॒व॒कः॥९॥

पदार्थः- **(निः)** **(नितराम्)** **(यत्)** यः **(पूतेव)** पवित्रेव **(स्वधितिः)** वज्रः **(शुचिः)** पवित्रः **(गात्)** प्राप्नोति **(स्वया)** स्वकीयया **(कृपा)** कृपया **(तन्वा)** शरीरेण **(रोचमानः)** प्रकाशमानः **(आ)** **(यः)** **(मात्रोः)** जननिपालिकयोः **(उशेन्यः)** कमनीयः **(जनिष्ट)** जायते **(देवयज्याय)** देवानां समागमाय **(सुक्रतुः)** उत्तमप्रज्ञः **(पावकः)** पावक इव प्रकाशितयशाः॥९॥

अन्वयः-हे मनुष्या! यद्यः पूतेव स्वधितिः शुचिर्निं गाद्यः स्वया कृपा तन्वा रोचमानो मात्रोरुशेन्यः पावक इव सुक्रतुर्देवयज्यायऽऽजनिष्ट स एवाऽत्र प्रशंसनीयो भवेत्॥९॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। हे मनुष्या! य वज्रवद्दृढं वह्निवत्पवित्रं कृपालुं दर्शनीयशरीरं विद्वांसं धर्मात्मानं विजानीयुस्तमेवेषां राजानं मन्यन्ताम्॥९॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(पूतेव)** पवित्रता के तुल्य **(स्वधितिः)** वज्र **(शुचिः)** पवित्र पुरुष **(नि, गात्)** निरन्तर प्राप्त होता है **(यः)** जो **(स्वया)** अपनी **(कृपा)** कृपा से **(तन्वा)** शरीर करके **(रोचमानः)** प्रकाशमान **(मात्रोः)** जननी और धात्री में **(उशेन्यः)** कामना के योग्य **(पावकः)** अग्नि के तुल्य प्रकाशित यश वाले **(सुक्रतुः)** उत्तम प्रज्ञा वाले **(देवयज्याय)** बुद्धिमानों के समागम के लिये **(आ, जनिष्ट)** प्रकट होता है, वही इस जगत् में प्रशंसा के योग्य होवे॥९॥

भावार्थः-इस मन्त्र में उपमावाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो! जिसको वज्र के समान दृढ़ अग्नि के समान पवित्र, कृपालु, दर्शनीय शरीर, विद्वान् धर्मात्मा जानो उसी को इनमें से राजा मानो॥९॥

राजा च कीदृशो भवेदित्याह॥

राजा भी कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः॥१०॥४॥

एता। नः। अग्ने। सौभगा। दिदीहि। अपि। क्रतुम्। सुऽचेतसम्। वतेम। विश्वा। स्तोतृऽभ्यः। गृणते। च। सन्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥१०॥

पदार्थः- (**एता**) एतानि (**नः**) अस्माकम् (**अग्ने**) पावकवद्विद्वन् राजन् (**सौभगा**) उत्तमैश्वर्याणां भावान् (**दिदीहि**) प्रकाशय (**अपि**) (**क्रतुम्**) प्रज्ञाम् (**प्रचेतसम्**) प्रकृष्टविद्यायुक्ताम् (**वतेम**) सम्भजेम। अत्र वर्णव्यत्ययेन नस्य स्थाने तः। (**विश्वा**) सर्वाणि (**स्तोतृभ्यः**) ऋत्विग्भ्यः (**गृणते**) स्तावकाय (**च**) (**सन्तु**) (**यूयम्**) (**पात**) रक्षत (**स्वस्तिभिः**) स्वास्थ्यकारिभिः सुखैः कर्मभिर्वा (**सदा**) (**नः**) अस्मान्॥१०॥

अन्वयः-हे अग्ने! त्वं न एता सौभगा दिदीहि येनाऽपि वयं सुचेतसं क्रतुं वतेम स्तोतृभ्यो विश्वा गृणते चैतानि सन्तु यूयं स्वस्तिभिर्नः सदा पात॥१०॥

भावार्थः-हे राजन्! भवान् सर्वेषां मनुष्याणां सौभाग्यानि वर्धयित्वा प्रज्ञां प्रापयतु, हे प्रजाजना! भवन्तो राजानं राज्यं च सदैव रक्षन्त्विति॥१०॥

अत्राऽग्निविद्वद्राजप्रजाकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति तृतीयं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य तेजस्वी विद्वन् राजन्! आप (**नः**) हमारे (**एता**) इन (**सौभगा**) उत्तम ऐश्वर्य्यों के भावों को (**दिदीहि**) प्रकाशित कीजिये जिससे (**अपि**) भी हम लोग (**सुचेतसम्**) प्रबल विद्यायुक्त (**क्रतुम्**) बुद्धि का (**वतेम**) सेवन करें (**स्तोतृभ्यः**) ऋत्विजों और (**विश्वा**) सब की (**गृणते**) स्तुति करने वाले के लिये ये (**च**) भी सब प्राप्त (**सन्तु**) हों (**यूयम्**) हम लोग (**स्वस्तिभिः**) स्वस्थता करने वाले सुखों वा कर्मों से (**नः**) हमारी (**सदा**) सदा (**पात**) रक्षा करो॥१०॥

भावार्थः-हे राजन्! आप सब मनुष्यों के सौभाग्यों को बढ़ा के बुद्धि को प्राप्त करो। हे प्रजापुरुषो! आप लोग राजा और राज्य की सदैव रक्षा करो॥१०॥

इस सूक्त में अग्नि, विद्वान्, राजा और प्रजा के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥१०॥

यह तृतीय सूक्त और चौथा वर्ग समाप्त हुआ॥

अथ दशर्चस्य चतुर्थस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, ३, ४, ७ भुरिक् पङ्क्तिः। ६ स्वराट् पङ्क्तिः। ८, ९ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ५ निचृत्त्रिष्टुप्। १० विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः कीदृशैर्भवितव्यमित्याह॥

अब दश ऋचा वाले चतुर्थ सूक्त का प्रारम्भ है। इसके प्रथम मन्त्र में मनुष्यों को कैसा होना चाहिये, इस विषय को कहते हैं॥

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम्।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति॥ १॥

प्र। वः। शुक्राय। भानवे। भरध्वम्। हव्यम्। मतिम्। च। अग्नये। सुऽपूतम्। यः। दैव्यानि। मानुषा। जनूंषि। अन्तः। विश्वानि। विद्मना। जिगाति॥ १॥

पदार्थः-(**प्र**) (**वः**) युष्माकम् (**शुक्राय**) शुद्धाय (**भानवे**) विद्याप्रकाशाय (**भरध्वम्**) धरत पालयत वा (**हव्यम्**) दातुमर्हम् (**मतिम्**) मननशीलां प्रज्ञाम् (**च**) (**अग्नये**) पावके होमाय (**सुपूतम्**) सुष्ठु पवित्रम् (**यः**) (**दैव्यानि**) दैवैः कृतानि कर्माणि (**मानुषा**) मनुष्यैर्निर्मितानि (**जनूंषि**) जन्मानि (**अन्तः**) मध्ये (**विश्वानि**) सर्वाणि (**विद्मना**) विज्ञातव्यानि (**जिगाति**) प्रशंसति॥ १॥

अन्वयः-हे मनुष्या! यो वः शुकाय भानवेऽग्नये सुपूतं हव्यमिव मतिं दैव्यानि मानुषा जनूंषि चाऽन्तर्विश्वानि विद्मना जिगाति तस्मा उत्तमानि सुखानि यूयं प्र भरध्वम्॥ १॥

भावार्थः-हे विद्वांसो! यो युष्मदर्थमुत्तमानि द्रव्याणि सर्वेषां हितानि जन्मानि विज्ञानानि चोपदेष्टुं प्रवर्त्तते तं यूयं सततं रक्षत॥ १॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**वः**) तुम्हारे (**शुक्राय**) शुद्ध (**भानवे**) विद्याप्रकाश के लिये तथा (**अग्नये**) अग्नि में होम करने के लिये (**सुपूतम्**) सुन्दर पवित्र (**हव्यम्**) होमने योग्य पदार्थ के तुल्य (**मतिम्**) विचारशील बुद्धि को वा (**दैव्यानि**) विद्वानों के किये (**मानुषानि**) मनुष्यों से सम्पादित (**जनूंषि**) जन्मों वा कर्मों को (**च**) और (**विश्वानि**) सब (**अन्तः**) अन्तर्गत (**विद्मना**) जानने योग्य वस्तुओं को (**जिगाति**) प्रशंसा करता है, उसके लिये तुम लोग उत्तम सुखों का (**प्र भरध्वम्**) पालन वा धारण करो॥ १॥

भावार्थः-हे विद्वानो! जो तुम्हारे लिये उत्तम द्रव्यों तथा सब के हितकारी जन्मों और विज्ञानों का उपदेश करने को प्रवृत्त होता है, उसकी तुम लोग निरन्तर रक्षा करो॥ १॥

मनुष्यैर्युवावस्थायामेव विवाहः कार्य्य इत्याह॥

मनुष्यों को युवावस्था में ही विवाह करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः।
सं यो वना युवते शुचिदन् भूरि चिदन्ना समिदत्ति सद्यः॥ २॥

सः। गृत्सः। अग्निः। तरुणः। चित्। अस्तु। यतः। यविष्ठः। अजनिष्ट। मातुः। सम्। यः। वना। युवते। शुचिदन्। भूरि। चित्। अन्ना। समिदत्ति। सद्यः॥ २॥

युवते॑। शुचि॑ऽदन्। भूरि॑। चि॒त्। अन्ना॑। सम्। इत्। अ॒त्ति॒। स॒द्यः॥ २॥

पदार्थः-(**सः**) (**गृत्सः**) मेधावी (**अग्निः**) पावक इव तीव्रबुद्धिः (**तरुणः**) युवा (**चित्**) अपि (**अस्तु**) (**यतः**) (**यविष्ठः**) अतिशयेन युवा (**अजनिष्ट**) जायते (**मातुः**) जनन्याः सकाशात् (**सम्**) (**यः**) (**वना**) वनानि किरणान् सूर्य इव (**युवते**) युनक्ति (**शुचिदन्**) पवित्रदन्तः (**भूरि**) बहु (**चित्**) अपि (**अन्ना**) अन्नानि (**सम्**) (**इत्**) (**अत्ति**) भक्षयति (**सद्यः**)॥ २॥

अन्वयः-हे मनुष्या! यो मातुरजनिष्ट सोऽग्निरिव कुमारः संस्तरुणश्चिदस्तु यतः स गृत्सो यविष्ठः स्यात् सद्यश्चिदन्नेत् समत्ति शुचिदन् भूरि वना सूर्य इव तेजांसि सं युवते॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा स्वपुत्राः पूर्णयुवावस्था ब्रह्मचर्ये संस्थाप्य विद्यायुक्ता बलिष्ठा अभिरूपा भोक्तारो धार्मिका दीर्घायुषो धीमन्तो भवेयुस्तथाऽनुतिष्ठत॥ २॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**मातुः**) अपनी माता से (**अजनिष्ट**) उत्पन्न होता (**सः**) वह (**अग्नि**) पावक के तुल्य तेज बुद्धि वाला बालक (**तरुणः**) जवान (**चित्**) ही (**अस्तु**) हो (**यतः**) जिससे वह (**गृत्सः**) बुद्धिमान् (**यविष्ठः**) अत्यन्त जवान हो (**सद्यश्चित्**) शीघ्र ही (**अन्ना**) अन्नों का (**इत्**) ही (**सम्, अत्ति**) सम्यक् भोजन करता है (**शुचिदन्**) पवित्र दाँतों वाला (**भूरि**) बहुत (**वना**) जैसे सूर्य किरणों को संयुक्त करता, वैसे वनों **[**=तेजों**]** को (**सम्, युवते**) संयुक्त करे॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे अपने पुत्र पूर्ण युवावस्थावाले ब्रह्मचर्य्य में सम्यक् स्थापन कर विद्यायुक्त, अति बलवान्, सुरूपवान् सुख भोगने वाले, धार्मिक दीर्घ अवस्था वाले, बुद्धिमान् होवें, वैसा अनुष्ठान करो॥ २॥

पुनर्विद्वांसं कीदृशं सभ्यमध्यक्षं च कुर्य्युरित्याह॥

फिर कैसे विद्वान् को सभासद् और अध्यक्ष को, इस विषय को अगले मन्त्र में कहते हैं॥

अ॒स्य दे॒वस्य॑ सं॒सद्यनी॑के॒ यं मर्ता॑सः श्ये॒तं ज॑गृ॒भ्रे।
नि यो गृभं॒ पौरु॑षेयीमु॒वोच॑ दु॒रोक॑मग्निरा॒यवे॑ शुशोच॥ ३॥

अ॒स्य। दे॒वस्य॑। स॒म्ऽसदि॑। अनी॑के। यम्। मर्ता॑सः। श्ये॒तम्। ज॒गृ॒भ्रे। नि। यः। गृभ॑म्। पौरु॑षेयीम्। उ॒वोच॑। दुः॒ऽओक॑म्। अ॒ग्निः। आय॑वे। शु॒शो॒च॒॥ ३॥

पदार्थः-(**अस्य**) (**देवस्य**) विदुषः (**संसदि**) सभायाम् (**अनीके**) सैन्ये (**यम्**) (**मर्त्तासः**) मनुष्याः (**श्येतम्**) श्वेतं शुभ्रम् (**जगृभ्रे**) गृह्णन्ति (**नि**) (**यः**) (**गृभम्**) गृहीतुम् (**पौरुषेयीम्**) पौरुषेयस्य रीतिम् (**उवोच**) वदति (**दुरोकम्**) शत्रुभिर्दुःसेवम् (**अग्निः**) पावक इव (**आयवे**) जीवनाय (**शुशोच**) शोचति॥ ३॥

अन्वयः-हे मनुष्या! यः पौरुषेयीं नि गृभमुवोचाग्निरिवाऽऽयवे शुशोच यं श्येतं दुरोकमस्य देवस्य संसद्यनीके च मर्त्तासो जगृभ्रे तमेव सभ्यं सेनापतिं च कुरुत॥ ३॥

भावार्थः-विद्वद्भिः सुपरीक्ष्य विद्वांस एव सभ्या अध्यक्षाश्च कर्त्तव्याः ये वीर्य्यवन्तो दीर्घायुषो भवन्ति त एव राज्यं सुभूषयितुमर्हन्ति॥ ३॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(पौरुषेयीम्)** पुरुषसम्बन्धी कार्य्यों की रीति का **(नि गृभम्)** निरन्तर ग्रहण करने को **(उवोच)** कहता है **(अग्निः)** अग्नि के तुल्य तेजस्वी **(आयवे)** जीवन के लिये **(शुशोच)** शोच करता है **(यम्)** जिस **(श्येतम्)** श्वेत **(दुरोकम्)** शत्रुओं से दुःख के साथ सेवने योग्य को **(अस्य)** इस **(देवस्य)** विद्वान् की **(संसदि)** सभा वा **(अनीके)** सेना में **(मर्त्तासः)** मनुष्य **(जगृभ्रे)** ग्रहण करते हैं, उसी को सभापति सेनापति करो॥३॥

भावार्थः-विद्वानों को चाहिये कि अच्छे प्रकार परीक्षा कर सभासदों और अध्यक्षों को नियत करें। जो बलवान् और अधिक अवस्था वाले हों, वे ही राज्य को अच्छे प्रकार भूषित कर सकते हैं॥३॥

को महान् विश्वसनीयो विद्वान् भवेदित्याह॥

कौन विद्वान् अधिक कर विश्वास के योग्य हो, इस विषय को अगले मन्त्र में कहते हैं॥

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम॥४॥

अयम्। कविः। अकविषु। प्रऽचेताः। मर्तेषु। अग्निः। अमृतः। नि। धायि। सः। मा। नः। अत्र। जुहुरः। सहस्वः। सदा। त्वे इति। सुऽमनसः। स्याम॥४॥

पदार्थः-(**अयम्**) (**कविः**) क्रान्तप्रज्ञो विद्वान् (**अकविषु**) अक्रान्तप्रज्ञेष्वविद्वत्सु (**प्रचेताः**) प्रज्ञापयिता (**मर्त्तेषु**) मनुष्येषु (**अग्निः**) विद्युदिव (**अमृतः**) स्वस्वरूपेण नाशरहितः (**नि**) (**धायि**) निधीयते (**सः**) (**मा**) निषेधे (**नः**) अस्मान् (**अत्र**) अस्मिन् व्यवहारे (**जुहुरः**) हिंस्यात् (**सहस्वः**) प्रशस्तबलयुक्त (**सदा**) (**त्वे**) त्वयि (**सुमनसः**) (**स्याम**)॥४॥

अन्वयः-हे सहस्वो! योऽयं भवताऽकविषु कविर्मर्त्तेषु प्रचेता अग्निरिवाऽमृतो नि धायि स त्वमत्र नो मा जुहुरो यतो वयं त्वे सुमनसः सदा स्याम॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! योऽयं दीर्घब्रह्मचर्येण विद्वद्भ्यो विद्या गृह्णाति स एव विद्वान् प्रशस्तधीर्मनुष्येषु महान् कल्याणकारकः स्यात्तं प्रति सर्वे मनुष्याः सुहृद्भावेन यदि वर्त्तेरंस्तर्ह्यविद्वांसोऽपि धीमन्तो भवेयुः॥४॥

पदार्थः-हे **(सहस्वः)** प्रशस्त बलवाले! जो **(अयम्)** प्रत्यक्ष आप **(अकविषु)** न्यून बुद्धि वाले अविद्वानों में **(कविः)** तीव्र बुद्धियुक्त विद्वान् **(मर्त्तेषु)** मनुष्यों में **(प्रचेताः)** चेत कराने वाले **(अग्निः)** विद्युत् अग्नि के तुल्य **(अमृतः)** अपने स्वरूप से नाशरहित पुरुष को **(नि, धायि)** धारण करते हैं **(सः)** सो आप **(अत्र)** इस व्यवहार में **(नः)** हमको **(मा)** मत **(जुहुरः)** मारिये जिससे हम लोग **(त्वे)** आप में **(सुमनसः)** सुन्दर प्रसन्न चित्त वाले **(सदा)** सदा **(स्याम)** होवें॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो यह दीर्घ ब्रह्मचर्य के साथ विद्वानों से विद्या को ग्रहण करता है, वही विद्वान् प्रशंसित बुद्धि वाला, मनुष्यों में महान् कल्याणकारी हो उसके प्रति सब मनुष्य यदि मित्रता से वर्तें तो अविद्वान् भी बुद्धिमान् होवें॥४॥

को विद्वान् किंवत्करोतीत्याह॥

कौन विद्वान् किसके तुल्य करता है, इस विषय को अगले मन्त्र में कहते हैं॥

आ यो योनिं॑ दे॒वकृ॑तं स॒सादु॒ क्रत्वा॒ ह्य१॑ग्निर॒मृता॑ँ अता॑रीत्।
तमोष॑धीश्च व॒निन॑श्च॒ गर्भं॑ भूमि॑श्च वि॒श्वधा॑यसं बिभर्ति॥५॥५॥

आ। यः। योनि॑म्। दे॒वऽकृ॑तम्। स॒सादे॑। क्रत्वा॑। हि। अ॒ग्निः। अ॒मृता॑न्। अता॑रीत्। तम्। ओष॑धीः। च॒। व॒निन॑ः। च॒। गर्भ॑म्। भूमि॑ः। च॒। वि॒श्वऽधा॑यसम्। बि॒भ॒र्ति॒॥५॥

पदार्थः-(**आ**) (**यः**) (**योनिम्**) गृहम् देवकृतम् विद्वद्भिर्विद्याध्ययनाय निर्मितम् (**ससाद**) निवसेत् (**क्रत्वा**) प्रज्ञया (**हि**) यतः (**अग्निः**) पावक इव (**अमृतान्**) नाशरहिताञ्जीवान् पदार्थान् वा (**अतारीत्**) तारयति (**तम्**) (**ओषधीः**) सोमाद्याः (**च**) (**वनिनः**) वनानि बहवो किरणा विद्यन्ते येषु तान् (**च**) (**गर्भम्**) (**भूमिः**) पृथिवी च (**विश्वधायसम्**) यो विश्वाः समग्रा विद्या दधाति ताम् (**बिभर्ति**)॥५॥

अन्वयः-हे मनुष्या! योऽग्निरिव देवकृतं योनिमा ससाद स हि क्रत्वाऽमृतानतारीद्यश्च भूमिरिव तं विश्वधायसं गर्भमोषधीश्च वनिनश्च बिभर्ति स एव पूज्यतमो भवति॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाऽग्निः समिद्भिर्हविर्भिश्च वर्धते तथैव ये विद्यालयं गत्वाऽऽचार्य्यं प्रसाद्य ब्रह्मचर्येण विद्यामभ्यस्यन्ति त ओषधीवदविद्यारोगनिवारकाः सूर्यवद्धर्मप्रकाशका भूमिवद्विश्वम्भरा भवन्ति॥५॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**अग्निः**) अग्नि के तुल्य तेजस्वी (**देवकृतम्**) विद्वानों ने विद्या पढ़ने के अर्थ बनाये (**योनिम्**) घर में (**आ, ससाद**) अच्छे प्रकार निवास करे वह (**हि**) ही (**क्रत्वा**) बुद्धि से (**अमृतान्**) नाशरहित जीवों वा पदार्थों को (**अतारीत्**) तारता है (**च**) और जो (**भूमिः**) पृथिवी के तुल्य सहनशील पुरुष (**तम्**) उस (**विश्वधायसम्**) समस्त विद्याओं के धारण करने वाले (**गर्भम्**) उपदेशक (**च**) और (**ओषधिः**) सोमादि ओषधियों (**च**) और (**वनिनः**) बहुत किरणों वाले अग्नियों को (**च**) भी (**बिभर्ति**) धारण करता है, वही अतिपूज्य होता है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि समिधा और होमने योग्य पदार्थों से बढ़ता है, वैसे ही जो पाठशाला में जा आचार्य को प्रसन्न कर ब्रह्मचर्य से विद्या का अभ्यास करते हैं, वे ओषधियों के तुल्य अविद्यारूप रोग के निवारक, सूर्य के तुल्य धर्म के प्रकाशक और पृथिवी के समान सब के धारण वा पोषणकर्त्ता होते हैं॥५॥

मनुष्यैः कदाचित्कृतघ्नैर्न भवितव्यमित्याह॥

मनुष्यों को कभी कृतघ्न नहीं होना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

ईशे॒ ह्य१॑ग्निरमृ॑तस्य॒ भूरे॒रीशे॑ रा॒यः सु॒वीर्य॑स्य॒ दातो॑ः।
मा त्वा॑ व॒यं स॑हसावन्न॒वीरा॒ माप्स॑व॒ः परि॑ षदाम॒ मादु॑वः॥६॥

ईशे॑। हि। अ॒ग्निः। अ॒मृत॑स्य। भूरे॑ः। ईशे॑। रा॒यः। सु॒ऽवीर्य॑स्य। दातो॑ः। मा। त्वा॒। व॒यम्।

सहसाऽवन्। अवीराः। मा। अप्सवः। परि। सदाम। मा। अदुवः॥६॥

पदार्थः-(**ईशे**) ईष्टे ज्ञातुमिच्छति (**हि**) खलु (**अग्निः**) पावक इव (**अमृतस्य**) परमात्मनः। **अधीगर्थदयेशां कर्मणी**ति कर्मणि षष्ठी। (अष्टा०२.३.५२) (**भूरेः**) बहुविधस्य (**ईशे**) (**रायः**) धनस्य (**सुवीर्यस्य**) सुष्ठु वीर्यं पराक्रमो यस्मात्तस्य (**दातोः**) दातुम् (**मा**) (**त्वा**) त्वाम् (**वयम्**) (**सहसावन्**) बहुबलयुक्त (**अवीराः**) वीरतारहिताः (**मा**) (**अप्सवः**) कुरूपाः (**परि**) (**सदाम**) प्राप्नुयाम (**मा**) (**अदुवः**) अपरिचारकाः॥६॥

अन्वयः-हे सहसावन् विद्वन्! योऽग्निरिव भवानमृतस्येशे भूरेः सुवीर्यस्य रायो दातोरीशे तं हि त्वाऽवीराः सन्तो वयं मा परि षदामाऽप्सवो भूत्वा त्वां मा परि षदामाऽदुवो भूत्वा मा परि षदाम॥६॥

भावार्थः-हे मनुष्या! योऽमृतविज्ञानं पुष्कलां विविधसुखप्रियां श्रियं युष्मभ्यं प्रयच्छति तत्सन्निधौ वीरतां सुरूपतां सेवां च त्यक्त्वा निष्ठुराः कृतघ्ना मा भवत॥६॥

पदार्थः-हे (**सहसावन्**) बहुत बलयुक्त विद्वान् पुरुष! जो (**अग्निः**) अग्नि के समान तेजस्वी आप (**अमृतस्य**) नाशरहित नित्य परमात्मा को जानने को (**ईशे**) समर्थ वा इच्छा करते हो (**भूरेः**) बहुत प्रकार के (**सुवीर्यस्य**) सुन्दर पराक्रम के निमित्त (**रायः**) धन के (**दातोः**) देने को (**ईशे**) समर्थ हो (**तम्**) उन (**हि**) ही (**त्वा**) आपको (**अवीराः**) वीरता रहित हुए (**वयम्**) हम लोग **[(मा)]** (**परि, सदाम**) सब ओर से प्राप्त **[न]** हों (**अप्सवः**) कुरूप होकर आपको (**मा**) मत प्राप्त हों (**अदुवः**) न सेवक होकर (**मा**) नहीं प्राप्त हों॥६॥

भावार्थः-हे मनुष्यो! जो अमृतरूप ईश्वर का विज्ञान, विविध सुखों से तृप्त करने वाली परिपूर्ण लक्ष्मी को तुम्हारे लिये देता है, उसके समीप वीरता, सुन्दरपन और सेवा को छोड़ के निठुर, कृतघ्नी मत होओ॥६॥

किं धनं स्वकीयं परकीयञ्चास्तीत्याह॥

अपना कौन और पराया धन कौन है, इस विषय को अगले मन्त्र में कहते हैं॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥७॥

परिऽसद्यम्। हि। अरणस्य। रेक्णः। नित्यस्य। रायः। पतयः। स्याम। न। शेषः। अग्ने। अन्यऽजातम्। अस्ति। अचेतानस्य। मा। पथः। वि। दुक्षः॥७॥

पदार्थः-(**परिषद्यम्**) परिषदि सभायां भवम् (**हि**) (**अरणस्य**) अविद्यमानो रणः स-ामो यस्मिंस्तस्य (**रेक्णः**) धनम्। **रेक्ण इति धननाम।** (निघं०२.१०) (**नित्यस्य**) स्थिरस्य (**रायः**) धनस्य (**पतयः**) स्वामिनः (**स्याम**) (**न**) (**शेषः**) (**अग्ने**) विद्वन् (**अन्यजातम्**) अन्येनाऽन्यस्माद्वा समुत्पन्नम् (**अस्ति**) (**अचेतानस्य**) चेतनतारहितस्य मूर्खस्य (**मा**) (**पथः**) मार्गान् (**वि**) (**दुक्षः**) दूषयेः॥७॥

अन्वयः-हे अग्ने! त्वमचेतानस्य पथो मा विदुक्षः परिषद्यमन्यजातं हि रेक्णोऽस्य शेषो वा स्वकीयो नास्तीति विजानीहि त्वत्सङ्गेन सहायेन वयमरणस्य नित्यस्य रायः पतयः स्याम॥७॥

भावार्थः-हे मनुष्या! यद्धर्मयुक्तेन पुरुषार्थेन धनं प्राप्नुयात्तदेव स्वकीयं मन्यध्वं नाऽन्यायेनोपार्जितं ज्ञानिनां मार्गं पाखण्डोपदेशेन मा विदूषयत यथा धर्म्येण पुरुषार्थेन धनं लभ्येत तथैव प्रयतध्वम्॥७॥

पदार्थः-हे **(अग्ने)** विद्वन्! आप **(अचेतानस्य)** चेतनतारहित मूर्ख के **(पथः)** मार्गों को **(मा)** मत **(विदुक्षः)** दूषित कर **(परिषद्यम्)** सभा में होने वाले **(अन्यजातम्)** अन्य से उत्पन्न **(हि)** ही **(रेक्णः)** धन को इस प्रकार जाने कि इस की **(शेषः)** विशेषता वा अपने आत्मा की ओर से शुद्ध विचार कुछ **(न, अस्ति)** नहीं है, **[**ऐसा जानो**]**, आपके सङ्ग वा सहाय से हम लोग **(अरणस्य)** संग्रामरहित **(नित्यस्य)** स्थिर **(रायः)** धन के **(पतयः)** स्वामी **(स्याम)** होवें॥७॥

भावार्थः-हे मनुष्यो! धर्मयुक्त पुरुषार्थ से जिस धन को प्राप्त हो उसी को अपना धन मानो, किन्तु अन्याय से उपार्जित धन को अपना मत मानो। ज्ञानियों के मार्ग को पाखण्ड के उपदेश से मत दूषित करो, जैसे धर्मयुक्त पुरुषार्थ से धन प्राप्त हो, वैसे ही प्रयत्न करो॥७॥

कः पुत्रो मन्तुं योग्योऽस्तीत्याह॥

कौन पुत्र मानने के योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः॥८॥

नहि। ग्रभाय। अरणः। सुऽशेवः। अन्यऽउदर्यः। मनसा। मन्तवै। ऊँ इति। अध। चित्। ओकः। पुनः। इत्। सः। एति। आ। नः। वाजी। अभीषाट्। एतु। नव्यः॥८॥

पदार्थः-(**नहि**) निषेधे **(ग्रभाय)** ग्रहणाय **(अरणः)** अरममाणः **(सुशेवः)** सुसुखः **(अन्योदर्य्यः)** अन्योदराज्जातः **(मनसा)** अन्तःकरणेन **(मन्तवै)** मन्तुं योग्यः **(उ)** **(अध)** अथ। अत्र **निपातस्य चे**ति दीर्घः। (अष्टा० ६.३.१३४) **(चित्)** अपि **(ओकः)** गृहम् **(पुनः)** **(इत्)** एव **(सः)** **(एति)** **(आ)** **(नः)** अस्मान् **(वाजी)** विज्ञानवान् **(अभीषाट्)** योऽभिसहते सः **(एतु)** प्राप्नोतु **(नव्यः)** नवेषु भवः॥८॥

अन्वयः-हे मनुष्य! योऽरणः सुशेवोऽन्योदर्य्यो भवेत्स मनसा ग्रभाय नहि मन्तवै चिदु पुनरित् स ओको न ह्येत्यध यो नव्योऽभिषाड् वाजी नोऽस्माना एतु॥८॥

भावार्थः-हे मनुष्याः! पुत्रत्वायाऽन्यगोत्रजोऽन्यस्माज्ज्ञातो न गृहीतव्यः स च गृहादिदायभागी न भवेत्किन्तु य औरसो स्वगोत्राद् गृहीतो वा भवेत्स एव पुत्रः पुत्रप्रतिनिधिर्वा भवेत्॥८॥

पदार्थः-हे मनुष्य! जो **(अरुणः)** रमण न करता हुआ **(सुशेवः)** सुन्दर सुख से युक्त **(अन्योदर्य्यः)** दूसरे के उदर से उत्पन्न हुआ हो **(सः)** वह **(मनसा)** अन्तःकरण से **(ग्रभाय)** ग्रहण के लिये **(नहि)** नहीं **(मन्तवै)** मानने योग्य है **(चित्, उ, पुनः, इत्)** और भी फिर ही वह **(ओकः)** घर को नहीं **(एति)** प्राप्त होता **(अध)** इस के अनन्तर जो **(नव्यः)** नवीन **(अभीषाट्)** अच्छा सहनशील **(वाजी)** विज्ञानवाला **(नः)** हमको **(आ, एतु)** प्राप्त हो॥८॥

भावार्थः-हे मनुष्यो! अन्य गोत्र में अन्य पुरुष से उत्पन्न हुए बालक को पुत्र करने के लिये

नहीं ग्रहण करना चाहिये क्योंकि वह घर आदि का दायभागी नहीं हो सकता, किन्तु जो अपने शरीर से उत्पन्न वा अपने गोत्र से लिया हुआ हो, वही पुत्र वा पुत्र का प्रतिनिधि होवे॥८॥

पुना राजा किं कुर्य्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सन्त्वाध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥९॥

त्वम्। अग्ने। वनुष्यतः। नि। पाहि। त्वम्। उं इति। नः। सहसाऽवन्। अवद्यात्। सम्। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सम्। रयिः। स्पृहयाय्यः। सहस्री॥९॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव विद्वन् राजन् सज्जन (**वनुष्यतः**) याचमानान् (**नि**) नित्यम् (**पाहि**) (**त्वम्**) (**त्वम्**) (**उ**) (**नः**) अस्मान् (**सहसावन्**) बहुबलेन युक्त (**अवद्यात्**) अधर्माचरणान्निन्द्यात् (**सम्**) (**त्वा**) त्वाम् (**ध्वस्मन्वत्**) ध्वस्तदोषविकारम् (**अभि**) (**एतु**) सर्वतः प्राप्नोतु (**पाथः**) अन्नम् **[सम्]** (**रयिः**) धनम् (**स्पृहयाय्यः**) स्पृहणीयः (**सहस्री**) असंख्यः॥९॥

अन्वयः-हे सहसावन्नग्ने! त्वं वनुष्यतो नि पाहि त्वमु अवद्यान्नो नि पाहि यतस्त्वा ध्वस्मन्वत् पाथः समभ्येतु सहस्री स्पृहयाय्यो रयिश्च समभ्येतु॥९॥

भावार्थः-हे राजन्! यदि त्वं त्वत्तो रक्षणमिच्छतः प्रजाजनान् सततं रक्षेस्त्वं च निन्द्यादधर्माचरणात् पृथग्वर्त्तेत तर्ह्यतुले धनधान्ये त्वां प्राप्नुयाताम्॥९॥

पदार्थः-हे (**सहसावन्**) बहुत बल से युक्त (**अग्ने**) के तुल्य तेजस्वि विद्वन्! (**त्वम्**) आप (**वनुष्यतः**) मांगने वालों की (**नि, पाहि**) निरन्तर रक्षा कीजिये (**उ**) और (**त्वम्**) आप (**अवद्यात्**) निन्दित अधर्माचरण से (**नः**) हमारी निरन्तर रक्षा कीजिये जिससे (**त्वा**) आपको (**ध्वस्मन्वत्**) दोष और विकार जिसके नष्ट हो गये उस (**पाथः**) अन्न को (**सम्, अभि, एतु**) सब ओर से प्राप्त हूजिये (**सहस्री**) असंख्य (**स्पृहयाय्यः**) चाहने योग्य (**रयिः**) धन भी (**सम्**) सम्यक् प्राप्त होवे॥९॥

भावार्थः-हे राजन्! यदि आप से रक्षा चाहते हुए प्रजाजनों की निरन्तर रक्षा करें और आप स्वयं अधर्माचरण से पृथक् वर्त्तें तो आप को अतुल धनधान्य प्राप्त होवें॥९॥

पुना राज्ञा किं कर्त्तव्यमित्युच्यते।

फिर राजा को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः॥१०॥६॥

एता। नः। अग्ने। सौभगा। दिदीहि। अपि। क्रतुम्। सुऽचेतसम्। वतेम। विश्वा। स्तोतृऽभ्यः। गृणते। च। सन्तु। यूयम्। पात। स्वस्तिऽभिः सदा। नः॥१०॥

पदार्थः-(**एता**) एतानि (**नः**) अस्मभ्यम् (**अग्ने**) पावक इव विद्याविनयाभ्यां प्रकाशमान

(सौभगा) सुभगस्योत्तमैश्वर्यस्य भावो येषु तानि **(दिदीहि)** सर्वतः प्रकाशय **(अपि)** **(क्रतुम्)** प्रज्ञाम् **(सुचेतसम्)** सुष्ठु विज्ञानयुक्ताम् **(वतेम)** सम्भजेम **(विश्वा)** सर्वाणि **(स्तोतृभ्यः)** ऋत्विग्भ्यः **(गृणते)** यजमानाय **(च)** **(सन्तु)** **(यूयम्)** राजभृत्याः **(पात)** **(स्वस्तिभिः)** स्वास्थ्यकरणाभिः क्रियाभिः **(सदा)** **(नः)** अस्मान्॥१०॥

अन्वयः-हे अग्ने! त्वमेता सौभगा न दिदीह्यपि तु सुचेतसं क्रतुं दिदीहि स्तोतृभ्यो गृणते च सौभगा सन्तु यतो यूयं स्वस्तिभिर्नः सदा पात तस्माद्वयं पूर्वोक्तां प्रज्ञां विश्वा धनानि च वतेम॥१०॥

भावार्थः-हे राजन्! यदि भवान् सर्वेभ्यो ब्रह्मचर्येण विद्यादानं दापयेद् ऋत्विजो यजमानं च सर्वदा रक्षेस्तर्हि स्वास्थ्येन पूर्णं राज्यैश्वर्यं प्राप्नुयादिति॥१०॥

अत्राऽग्निविद्वद्राजवीरप्रजारक्षणादिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्थं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य तेजस्वि राजन्! आप **(एता)** इन **(सौभगा)** उत्तम ऐश्वर्य्य वाले पदार्थों को **(नः)** हमारे लिये **(दिदीहि)** प्रकाशित कीजिये **(अपि)** और तो **(सुचेतसम्)** सुन्दर ज्ञानयुक्त **(क्रतुम्)** बुद्धि को प्रकाशित कीजिये **(अपि)** और तो **(सुचेतसम्)** सुन्दर ज्ञानयुक्त **(क्रतुम्)** बुद्धि को प्रकाशित कीजिये **(स्तोतृभ्यः)** ऋत्विजों के लिये **(च)** तथा **(गृणते)** यजमान के लिये उत्तम ऐश्वर्य्य वाले **(सन्तु)** हों जिससे **(यूयम्)** तुम लोग **(स्वस्तिभिः)** स्वस्थता करने वाली क्रियाओं से **(नः)** हमारी **(सदा)** सदा **(पात)** रक्षा करो इसलिये हम लोग पूर्वोक्त बुद्धि और **(विश्वा)** धनों का **(वतेम)** सेवन करें॥१०॥

भावार्थः-हे राजन्! यदि आप सब मनुष्यों को ब्रह्मचर्य्य के साथ विद्यादान दिलावें, ऋत्विजों और यजमानों को सर्वदा रक्षा करें तो स्वस्थता से पूर्ण राज्य के ऐश्वर्य्य को प्राप्त हों॥१०॥

इस सूक्त में अग्नि, विद्वान्, राजा, वीर और प्रजा की रक्षा आदि कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह चौथा सूक्त और छठा वर्ग समाप्त हुआ॥

अथ नवर्चस्य पञ्चमस्य सूक्तस्य वसिष्ठ ऋषिः। वैश्वानरो देवता। १, ४ विराट्त्रिष्टुप् २, ३, ८, ९ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५, ७ स्वराट् पङ्क्तिः। ६ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ कस्य प्रशंसोपासने कर्त्तव्ये इत्याह॥

अब नौ ऋचावाले पांचवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में किसकी प्रशंसा और उपासना करनी चाहिये, इस विषय को कहते हैं॥

प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः।
यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः॥ १॥

प्र। अग्नये। तवसे। भरध्वम्। गिरम्। दिवः। अरतये। पृथिव्याः। यः। विश्वेषाम्। अमृतानाम्। उपऽस्थे। वैश्वानरः। ववृधे। जागृवत्ऽभिः॥ १॥

पदार्थः-(**प्र**) (**अग्नये**) परमात्मने (**तवसे**) बलिष्ठाय (**भरध्वम्**) (**गिरम्**) योगसंस्कारयुक्तां वाचम् (**दिवः**) सूर्यस्य (**अरतये**) प्राप्ताय (**पृथिव्याः**) भूमेर्मध्ये (**यः**) (**विश्वेषाम्**) सर्वेषाम् (**अमृतानाम्**) नाशरहितानां जीवानां प्रकृत्यादीनां वा (**उपस्थे**) समीपे (**वैश्वानरः**) विश्वेषु नरेषु राजमानः (**वावृधे**) वर्धयति (**जागृवद्भिः**) अविद्यानिद्रात उत्थातृभिः॥ १॥

अन्वयः-हे मनुष्या! यो वैश्वानरो जगदीश्वरे दिवः पृथिव्या विश्वेषाममृतानामुपस्थे वावृधे जागृवद्भिरेव गम्यते तस्मै तवसेऽरतयेऽग्नये गिरं प्र भरध्वम्॥ १॥

भावार्थः-यदि सर्वे मनुष्याः सर्वेषां धर्त्तारं योगिभिर्गम्यं परमात्मानमुपासीरंस्तर्हि ते सर्वतो वर्धन्ते॥ १॥

पदार्थः-हे मनुष्यो (**यः**) जो (**वैश्वानरः**) सम्पूर्ण मनुष्यों में प्रकाशमान जगदीश्वर (**दिवः**) सूर्य वा (**पृथिव्याः**) पृथिवी के बीच (**विश्वेषाम्**) सब (**अमृतानाम्**) नाशरहित जीवात्माओं वा प्रकृति आदि के (**उपस्थे**) समीप में (**वावृधे**) बढ़ाता है (**जागृवद्भिः**) अविद्या निद्रा से उठने वाले ही उसको प्राप्त होते उस (**तवसे**) बलिष्ठ (**अरतये**) व्याप्त (**अग्नये**) परमात्मा के लिये (**गिरम्**) योगसंस्कार से युक्त वाणी को (**प्र, भरध्वम्**) धारण करो अर्थात् स्तुति प्रार्थना करो॥ १॥

भावार्थः-यदि सब मनुष्य सब के धर्त्ता योगियों को प्राप्त होने योग्य परमेश्वर की उपासना करें तो वे सब ओर से वृद्धि को प्राप्त हों॥ १॥

पुनः स कीदृश इत्याह॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

पृष्ठो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभः स्तियानाम्।
स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण॥ २॥

पृष्ठः। दिवि। धायि। अग्निः। पृथिव्याम्। नेता। सिन्धूनाम्। वृषभः। स्तियानाम्। सः। मानुषीः। अभि। विशः। वि। भाति। वैश्वानरः। ववृधानः। वरेण॥ २॥

पदार्थः-(**पृष्ठः**) प्रष्टव्यः (**दिवि**) सूर्ये (**धायि**) ध्रियते (**अग्निः**) पावक इव स्वप्रकाश ईश्वरः (**पृथिव्याम्**) अन्तरिक्षे भूमौ वा (**नेता**) मर्यादायाः स्थापकः (**सिन्धूनाम्**) नदीनां समुद्राणां वा (**वृषभः**) अनन्तबलः (**स्तियानाम्**) अपां जलानाम्। **स्तिया आपो भवन्ति स्त्यायनादिति।** (निरु० ६.१७) (**सः**) (**मानुषीः**) मनुष्यसम्बन्धिनीरिमाः (**अभि**) (**विशः**) प्रजाः (**वि**) (**भाति**) प्रकाशते (**वैश्वानरः**) सर्वेषां नायकः (**वावृधानः**) सदा वर्धयिता (**वरेण**) उत्तमस्वभावेन॥ २॥

अन्वयः-हे विद्वांसो! योगिभिर्योऽग्निर्दिवि पृथिव्यां धायि सिन्धूनां स्तियानां वृषभः सन्नेता वरेण वावृधानो यो वैश्वानरो मानुषीर्विशोऽभि वि भाति स पृष्टोऽस्ति॥ २॥

भावार्थः-हे मनुष्या! यः सर्वस्याः प्रजाया नियमव्यवस्थायां स्थापकस्सूर्यादिप्रजाप्रकाशकः सर्वेषामुपास्यदेवो स पृष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो ज्ञातव्योऽस्ति॥ २॥

पदार्थः-हे विद्वानो! योगियों से जो (**अग्निः**) अग्नि के तुल्य स्वयं प्रकाशस्वरूप ईश्वर (**दिवि**) सूर्य (**पृथिव्याम्**) भूमि वा अन्तरिक्ष में (**धायि**) धारण किया जाता (**सिन्धूनाम्**) नदी वा समुद्रों और (**स्तियानाम्**) जलों के बीच (**वृषभः**) अनन्तबलयुक्त हुआ (**नेता**) मर्यादा का स्थापक (**वरेण**) उत्तम स्वभाव के साथ (**वावृधानः**) सदा बढ़ाने वाला (**वैश्वानरः**) सब को अपने-अपने कामों में नियोजक (**मानुषीः**) मनुष्यसम्बन्धी (**विशः**) प्रजाओं को (**अभि, वि, भाति**) प्रकाशित करता है (**सः**) वह (**पृष्टः**) पूछने योग्य है॥ २॥

भावार्थः-हे मनुष्यो! जो सब प्रजा का नियम व्यवस्था में स्थापक, सूर्यादि प्रजा का प्रकाशक, सब का उपास्य देव, वह पूछने, सुनने, जानने, विचारने और मानने योग्य है॥ २॥

पुनः स परमेश्वरः कीदृशोऽस्तीत्याह॥

फिर वह परमेश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

त्वद्भिया विशऽआयन्नसिक्नीरसमना जहतीर्भोजनानि।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः॥ ३॥

त्वत्। भिया। विशः। आयन्। असिक्नीः। असमनाः। जहतीः। भोजनानि। वैश्वानर। पूरवे। शोशुचानः। पुरः। यत्। अग्ने। दरयन्। अदीदेः॥ ३॥

पदार्थः-(**त्वत्**) तव सकाशात् (**भिया**) भयेन (**विशः**) प्रजाः (**आयन्**) मर्यादामायान्तु (**असिक्नीः**) रात्रीः। **असिक्नीति रात्रिनाम।** (निघं०१.७) (**असमनाः**) पृथक् पृथग्वर्त्तमानाः (**जहतीः**) पूर्वामवस्थां त्यजन्तीः (**भोजनानि**) भोक्तव्यानि पालनानि वा (**वैश्वानर**) सर्वत्र विराजमान (**पूरवे**) मनुष्याय (**शोशुचानः**) पवित्रं विज्ञानम् **[**ददन्**]** (**पुरः**) पुरस्तात् (**यत्**) यः (**अग्ने**) सूर्य इव स्वप्रकाश (**दरयन्**) दुःखानि विदारयन् (**अदीदेः**) प्रकाशयेः॥ ३॥

अन्वयः-हे वैश्वानराग्ने! यद्यस्त्वं दुःखानि दरयन् पूरवे शोशुचानः पुरोऽदीदेस्तस्मात् त्वद्भियाऽसिक्नीरसमना भोजनानि जहतीर्विश आयन्॥ ३॥

भावार्थः-हे मनुष्या! **(भीषास्माद् वातः पवते भीषोदेति सूर्यः। भीषास्मादिन्द्रश्च वायुश्च मृत्युर्धावति**

पञ्चम इति कठवल्ल्युपनिषदि (तुलना-कठोप०२.६.३, तैत्तिरोयोप० ब्र० वल्ली, अनुवाक ८.१) परमेश्वरस्य सत्यन्यायभयात् सर्वे जीवा अधर्माद्भीत्वा धर्मे रुचिं कुर्वन्ति यस्य प्रभावात्पृथिवी सूर्यादयो लोका: स्वस्वपरिधौ नियमेन भ्रमन्ति स्वस्वरूपं धृत्वा जगदुपकुर्वन्ति स एव परमात्मा सर्वैर्मनुष्यैर्ध्येय:॥३॥

पदार्थ:-हे **(वैश्वानर)** सर्वत्र विराजमान **(अग्ने)** सूर्य के तुल्य प्रकाशस्वरूप **(यत्)** जो आप दु:खों को **(दरयन्)** विदीर्ण करते हुए **(पूरवे)** मनुष्य के लिये **(शोशुचान:)** पवित्र विज्ञान को **(पुर:)** पहिले **(अदीदे:)** प्रकाशित करें इससे **(त्वत्)** आपके **(भिया)** भय से **(असिक्नी:)** रात्रियों के प्रति **(असमना:)** पृथक्-पृथक् वर्त्तमान **(भोजनानि)** भोगने योग्य वा पालन और **(जहती:)** अपनी पूर्वावस्था को त्यागती हुई **(विश:)** प्रजा **(आयन्)** मर्यादा को प्राप्त हों॥३॥

भावार्थ:-हे मनुष्यो! जिस परमेश्वर के भय से वायु आदि पदार्थ अपने-अपने काम में नियुक्त होते हैं, उसके सत्य-न्याय के भय से सब जीव अधर्म से भय कर धर्म में रुचि करते हैं। जिसके प्रभाव से पृथिवी सूर्य्य आदि लोक अपनी अपनी परिधि में नियम से भ्रमते हैं, अपने स्वरूप का धारण कर जगत् का उपकार करते हैं, वही परमात्मा सब को ध्यान करने योग्य है॥३॥

पुन: स जगदीश्वर: कीदृशोऽस्तीत्याह॥

फिर वह जगदीश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त।
त्वं भासा रोदसी आततन्थाऽजस्रेण शोचिषा शोशुचान:॥४॥

तव। त्रिऽधातु। पृथिवी। उत। द्यौ:। वैश्वानर। व्रतम्। अग्ने। सचन्त। त्वम्। भासा। रोदसी इति। आ। ततन्थ। अजस्रेण। शोचिषा। शोशुचान:॥४॥

पदार्थ:-**(तव)** जगदीश्वरस्य **(त्रिधातु)** त्रयस्सत्त्वादयो गुणा धातवो धारका यस्मिंस्तदव्यक्तं प्रकृत्यात्मकं जगत्कारणम् **(पृथिवी)** भूमि: **(उत)** **(द्यौ:)** सूर्य: **(वैश्वानर)** विश्वस्य नायक **(व्रतम्)** कर्म **(अग्ने)** सर्वप्रकाशक **(सचन्त:)** सम्बध्नन्ति **(त्वम्)** **(भासा)** स्वकीयप्रकाशेन **(रोदसी)** सूर्यादिप्रकाशकं पृथिव्याद्यप्रकाशं द्विविधं जगत् **(आ ततन्थ)** सर्वतस्तनोषि **(अजस्रेण)** निरन्तरेणान्नादिना **(शोचिषा)** स्वप्रकाशेन **(शोशुचान:)** प्रकाशमान:॥४॥

अन्वय:-हे वैश्वानराग्ने! तव व्रतं त्रिधातु पृथिवी उत द्यौश्च सचन्त यस्त्वमजस्रेण शोचिषा शोशुचान: सन् स्वभासा रोदसी आततन्थ तमेव त्वं वयं सततं ध्यायेम॥४॥

भावार्थ:-हे मनुष्या! यस्याधारे पृथिवी भूमि: सूर्यश्च स्थित्वा स्वकार्य्यं कुरुत: न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्नि:। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति कठवल्यामिति वेदितव्यम्। (कठो०२.५.१५)॥५॥

पदार्थ:-हे **(वैश्वानर)** सबके नायक **(अग्ने)** सबके प्रकाशक ईश्वर! **(तव)** आपके **(व्रतम्)** कर्म और **(त्रिधातु)** धारण करने वाले तीन सत्त्वादि गुणों वाले प्रकृत्यादिरूप अव्यक्त जगत् के कारण को **(पृथिवी)** भूमि **(उत)** और **(द्यौ:)** सूर्य **(सचन्त)** सम्बद्ध करते हैं जो **(त्वम्)** आप **(अजस्रेण)**

निरन्तर अन्नादि **(शोचिषा)** अपने प्रकाश से **(शोशुचानः)** प्रकाशमान हुए **(भासा)** अपने प्रकाश से **(रोदसी)** सूर्य्यादि प्रकाशवाले और पृथिव्यादि प्रकाशरहित दो प्रकार के जगत् को **(आ, ततन्थ)** सब ओर से विस्तृत करते हैं, उन्हीं आपका हम लोग निरन्तर ध्यान करें॥४॥

भावार्थः-हे मनुष्यो! जिसके आधार में पृथिवी सूर्य स्थित होके अपना कार्य करते हैं, कठोपनिषद् में लिखा है कि उस परमात्मा को जानने के लिये सूर्य, चन्द्रमा, बिजुली वा अग्नि आदि कुछ प्रकाश नहीं कर सकते, किन्तु उसी प्रकाशित परमेश्वर के प्रकाश से सब प्रकाशित होते हैं॥४॥

पुनः स कीदृशोऽस्तीत्याह॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

त्वामग्ने हरितो वावशाना गिरः सचन्ते धुनयो घृताचीः।
पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम्॥५॥७॥

त्वाम्। अग्ने। हरितः। वावशानाः। गिरः। सचन्ते। धुनयः। घृताचीः। पतिम्। कृष्टीनाम्। रथ्यम्। रयीणाम्। वैश्वानरम्। उषसाम्। केतुम्। अह्नाम् ॥५॥

पदार्थः-(**त्वाम्**) परमात्मानम् (**अग्ने**) ज्ञानस्वरूप (**हरितः**) दिशः। **हरित इति दिङ्नाम**। (निघं०१.६) (**वावशानाः**) कमनीयाः (**गिरः**) वाचः (**सचन्ते**) (**धुनयः**) वायवः (**घृताचीः**) रात्रयः। **घृताचीति रात्रिनाम**। (निघं०१.७) (**पतिम्**) स्वामिनं पालकम् (**कृष्टीनाम्**) मनुष्याणाम्। **कृष्टय इति मनुष्यनाम।** (निघं०२.३) (**रथ्यम्**) रथेभ्यो हितमश्वमिव प्रापकं (**रयीणाम्**) धनानाम् (**वैश्वानरम्**) अग्निमिव (**उषसाम्**) प्रभातवेलानाम् (**केतुम्**) सूर्यमिव (**अह्नाम्**) दिनानाम्॥५॥

अन्वयः-हे अग्ने जगदीश्वर! यं त्वां हरितो वावशाना गिरो धुनयो घृताचीश्च सचन्ते तं रयीणां रथ्यमिवोषसां वैश्वानरमह्नां केतुमिव कृष्टीनां पतिं त्वां वयं सततं भजेम॥५॥

भावार्थः-हे मनुष्या! यस्मिन् सर्वा दिशो वेदवाचः पवना रात्र्यादयः कालावयवाः सम्बद्धाः सन्ति तमेव समग्रैश्वर्यप्रदं सूर्य इव स्वप्रकाशं परमात्मानं नित्यं ध्यायत॥५॥

पदार्थः-हे (**अग्ने**) ज्ञानस्वरूप जगदीश्वर! जिस (**त्वाम्**) आपको (**हरितः**) दिशा (**वावशानाः**) कामना के योग्य (**गिरः**) वाणी (**धुनयः**) वायु और (**घृताचीः**) रात्री (**सचन्ते**) सम्बन्ध करते हैं उस (**रयीणाम्**) धनों के (**रथ्यम्**) पहुँचाने वाले घोड़े के तुल्य रथों के हितकारी (**उषसाम्**) प्रभात वेलाओं के बीच (**वैश्वानरम्**) अग्नि के तुल्य प्रकाशित (**अह्नाम्**) दिनों के बीच (**केतुम्**) सूर्य के तुल्य (**कृष्टीनाम्**) मनुष्यों के (**पतिम्**) रक्षक स्वामी आपका हम लोग निरन्तर सेवन करें॥५॥

भावार्थः-हे मनुष्यो! जिस में सब दिशा, वेदवाणी, पवन और रात्री आदि काल के अवयव सम्बद्ध हैं, उसी समग्र ऐश्वर्य के देने वाले सूर्य के तुल्य स्वयं प्रकाशित परमात्मा का नित्य ध्यान करो॥५॥

पुनः स कीदृशोऽस्तीत्याह॥

फिर वह कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

त्वे अ॑सु॒र्यं१॒॑ वस॑वो॒ न्यृ॑ण्व॒न् क्रतुं॒ हि ते॑ मित्रमहो जु॒षन्त॑।
त्वं दस्यूँ॒रोक॑सो अग्न आज उ॒रु ज्योति॑र्ज॒नय॒न्नार्या॑य॥ ६॥

त्वे इति॑। अ॒सु॒र्य॑म्। वस॑वः। नि। ऋ॒ण्व॒न्। क्रतु॑म्। हि। ते॒। मि॒त्र॒ऽम॒हः॒। जु॒षन्त॑। त्वम्। दस्यू॑न्। ओक॑सः। अ॒ग्ने॒। आ॒ज॒ः। उ॒रु। ज्योति॑ः। ज॒नय॑न्। आर्या॑य॥ ६॥

पदार्थः-(**त्वे**) त्वयि परमात्मनि (**असुर्यम्**) असुरस्य मेघस्येदं स्वकीयं स्वरूपम् (**वसवः**) पृथिव्यादयः (**नि**) नित्यम् (**ऋण्वन्**) प्रसाध्नुवन्ति (**क्रतुम्**) क्रियाम् (**हि**) खलु (**ते**) तव (**मित्रमहः**) यो मित्रेषु महाँस्तत्सम्बुद्धौ (**जुषन्त**) सेवन्ते (**त्वम्**) (**दस्यून्**) दुष्टकर्मकारकान् (**ओकसः**) गृहात् (**अग्ने**) वह्निवत्सर्वदोषप्रणाशकः (**आजः**) प्रापयसि (**उरु**) बहु (**ज्योतिः**) प्रकाशम् (**जनयन्**) प्रकटयन् (**आर्याय**) सज्जनाय मनुष्याय॥ ६॥

अन्वयः-हे मित्रमहोऽग्ने! यस्मिँस्त्वे वसवोऽसुर्यं क्रतुं न्यृण्वञ्जुषन्तो यस्त्वमार्यायोरु ज्योतिर्जनयन्नोकसो दस्यूनाज तस्य ते हि वयं ध्यायेम॥ ६॥

भावार्थः-हे मनुष्या! योगिनः यस्मिन् परमेश्वरे स्थिरा भूत्वेष्टं कामं साध्नुवन्ति तस्यैव ध्यानेन सर्वान् कामान् यूयमपि प्राप्नुत॥ ६॥

पदार्थः-हे (**मित्रमहः**) मित्रों में बड़े (**अग्ने**) अग्नि के तुल्य सब दोषों के नाशक! जिस (**त्वे**) आप परमात्मा में (**वसवः**) पृथिवी आदि आठ वसु (**असुर्यम्**) मेघ के सम्बन्धी (**क्रतुम्**) कर्म को (**नि, ऋण्वन्**) निरन्तर प्रसिद्ध करते हैं तथा (**जुषन्त**) सेवते हैं जो (**त्वम्**) आप (**आर्याय**) सज्जन मनुष्य के लिये (**उरु**) अधिक (**ज्योतिः**) प्रकाश को (**जनयन्**) प्रकट करते हुए (**ओकसः**) घर से (**दस्यून्**) दुष्ट कर्म करने वालों को (**आजः**) प्राप्त करते हैं उन (**ते**) आपका (**हि**) ही निरन्तर हम लोग ध्यान करें॥ ६॥

भावार्थः-हे मनुष्यो! योगीजन जिस परमेश्वर में स्थिर होकर इष्ट काम को सिद्ध करते हैं, उसी परमात्मा के ध्यान से सब कामनाओं को तुम लोग भी प्राप्त होओ॥ ६॥

पुनः स जगदीश्वरः किं करोतीत्याह॥

फिर वह जगदीश्वर क्या करता है, इस विषय को अगले मन्त्र में कहते हैं॥

स जा॑य॒मानः पर॒मे व्यो॑मन् वा॒युर्न पाथ॒ः परि॑ पासि स॒द्यः।
त्वं भुव॑ना ज॒नय॑न्न॒भिक्र॑न्नप॒त्याय जातवेदो दश॒स्यन्॥ ७॥

सः। जा॒य॒मानः। प॒र॒मे। विऽओ॑मन्। वा॒युः। न। पाथ॑ः। परि॑। पा॒सि॒। स॒द्यः। त्वम्। भुव॑ना। ज॒नय॑न्। अ॒भि। क्र॒न्। अ॒प॒त्याय। जा॒त॒ऽवे॒दः॒। द॒श॒स्यन्॥ ७॥

पदार्थः-(**सः**) योगी (**जायमानः**) उत्पद्यमानः (**परमे**) उत्कृष्टे (**व्योमन्**) व्योमवद्व्यापके (**वायुः**) पवनः (**न**) इव (**पाथः**) पृथिव्यादिकम् (**परि**) (**सर्वतः**) (**पासि**) (**सद्यः**) (**त्वम्**) (**भुवना**) सर्वांल्लोकान् (**जनयन्**) उत्पादयन् (**अभि क्रन्**) पूर्णं कुर्वन्। अत्र **वाच्छन्दसीति** विकरणभावः।

(अपत्याय) सन्तानाय मातेव **(जातवेदः)** यो जातं सर्वं वेत्ति तत्सम्बुद्धौ **(दशस्यन्)** कामान् प्रयच्छन्॥७॥

अन्वयः-हे परमेश्वर! यः परमो व्योमँस्त्वयि जायमानो योगी वायुर्न पाथः सद्य एति स भवतोन्नीयते। हे जातवेदो! यस्त्वं भुवना जनयन्नपत्याय मातेव कामान् दशस्यन् सर्वमभि क्रन् सर्वं परि पासि तस्मादुपासनीयोऽसि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! योऽपत्याय मातेव कृपालुरक्षको योगीव सर्वकामप्रदः सकलविश्वकर्त्ता सर्वरक्षक ईश्वरोऽस्ति तमेव नित्यमुपाध्वम्॥७॥

पदार्थः-हे परमेश्वर जो **(परमे)** उत्तम **(व्योमन्)** आकाश के तुल्य व्यापक आप में **(जायमानः)** उत्पन्न होता हुआ योगीजन **(वायुः, न)** वायु के तुल्य **(पाथः)** पृथिव्यादि को **(सद्यः)** शीघ्र **(एति)** प्राप्त होता है **(सः)** वह आप से उन्नति को प्राप्त होता है। हे **(जातवेदः)** उत्पन्न हुए सब को जानने वाले! जो **(त्वम्)** आप **(भुवना)** सब लोकों को **(जनयन्)** उत्पन्न करते हुए **(अपत्याय)** माता जैसे सन्तान के लिये, वैसे कामनाओं को **(दशस्यन्)** पूर्ण करते हुए सब को **(अभि, क्रन्)** पूर्ण करते हुए **(परि, पासि)** सब ओर से रक्षा करते हो, इससे उपासना के योग्य हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो अपत्य के लिये माता के तुल्य कृपालु, रक्षक, योगी के तुल्य सब काम देने वाला, सब विश्व का कर्त्ता, सब का रक्षक ईश्वर है, उसी की नित्य उपासना करो॥७॥

पुनस्स ईश्वरः कस्मै किं ददातीत्याह॥

फिर वह ईश्वरो किसको क्या देता है, इस विषय को अगले मन्त्र में कहते हैं।

तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः।
ययाराधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय॥८॥

ताम्। अग्ने। अस्मे इति। इषम्। आ। ईरयस्व। वैश्वानर। द्युऽमतीम्। जातऽवेदः। ययाः। राधः। पिन्वसि। विश्वऽवार। पृथु। श्रवः। दाशुषे। मर्त्याय॥८॥

पदार्थः-**(ताम्)** **(अग्ने)** विज्ञनस्वरूप **(अस्मे)** अस्मभ्यम् **(इषम्)** अन्नादिकम् **(आ)** समन्तात् **(ईरयस्व)** प्रापय **(वैश्वानर)** विश्वस्मिन् राजमान **(द्युमतीम्)** प्रशस्ता द्यौः कामाना विद्यते यस्यास्ताम् **(जातवेदः)** जातेषु सर्वेषु विद्यमान **(यया)** रीत्या **(राधः)** धनम् **(पिन्वसि)** ददासि **(विश्ववार)** विश्वैस्सर्वैर्वरणीयः **(पृथु)** विस्तीर्णम् **(श्रवः)** श्रवणम् **(दाशुषे)** विद्यादात्रे **(मर्त्याय)** मनुष्याय॥८॥

अन्वयः-हे वैश्वानर जातवेदो विश्ववाराग्ने! त्वं दाशुषे मर्त्याय यया पृथु राधः श्रवश्च पिन्वसि तां द्युमतीमिषमस्मे एरयस्व॥८॥

भावार्थः-हे मनुष्या! यस्योपासनेन विद्वांसः पुष्कलमैश्वर्यं पूर्णां विद्यां चाप्नुवन्ति यश्चोपासितः सन् समग्रमैश्वर्यं प्रयच्छति तमेव नित्यं सेवध्वम्॥८॥

पदार्थः-हे **(वैश्वानर)** सब में प्रकाशमान **(जातवेदः)** उत्पन्न हुए पदार्थों में विद्यमान

(विश्ववार) सब से स्वीकार करने योग्य **(अग्ने)** विज्ञानस्वरूप ईश्वर! आप **(दाशुषे)** विद्या देने वाले **(मर्त्याय)** मनुष्य के लिये **(यया)** जिससे **(पृथु)** विस्तारयुक्त **(राधः)** धन और **(श्रवः)** श्रवण को **(पिन्वसि)** देते हो **(ताम्)** उस **(द्युमतीम्)** प्रशस्त कामना वाले **(इषम्)** अन्नादि को **(अस्मे)** हमारे लिये **(आ, ईरयस्व)** प्राप्त कीजिये॥८॥

भावार्थः-हे मनुष्यो! जिसकी उपासना से विद्वान् लोग पूर्ण विद्या को प्राप्त होते हैं, जो उपासना किया हुआ समस्त ऐश्वर्य को देता है, उसी की नित्य सेवा करो॥८॥

पुनः स ईश्वर किं किं ददातीत्याह॥

फिर वह ईश्वर क्या क्या देता है, इस विषय को अगले मन्त्र में कहते हैं॥

तं नो॑ अग्ने मघवद्भ्यः पुरु॒क्षुं र॒यिं नि वा॑ज॒ं श्रुत्यं॑ युवस्व।
वैश्वा॑नर॒ महि॒ नः॒ शर्म॑ यच्छ रु॒द्रेभि॑रग्ने॒ वसु॑भिः स॒जोषा॑:॥९॥८॥

तम्। नः॒। अ॒ग्ने॒। म॒घव॑त्ऽभ्यः। पु॒रु॒ऽक्षुम्। र॒यिम्। नि। वाज॑म्। श्रुत्य॑म्। यु॒व॒स्व॒। वैश्वा॑नर। महि॑। नः॒। शर्म॑। य॒च्छ॒। रु॒द्रेभिः॑। अ॒ग्ने॒। वसु॑ऽभिः। स॒ऽजोषा॑:॥९॥

पदार्थः- **(तम्)** **(नः)** अस्मभ्यम् **(अग्ने)** विद्युदिव वर्त्तमान जगदीश्वर **(मघवद्भ्यः)** बहुधनयुक्तेभ्यो धनेशेभ्यः **(पुरुक्षुम्)** बह्वन्नादिकम् **(रयिम्)** धनम् **(नि)** नित्यम् **(वाजम्)** विज्ञानम् **(श्रुत्यम्)** श्रोतुमर्हम् **(युवस्व)** संयोजय **(वैश्वानर)** **(महि)** महत् **(नः)** अस्मभ्यम् **(शर्म)** सुखं गृहं वा **(यच्छ)** देहि **(रुद्रेभिः)** प्राणैः **(अग्ने)** प्राणस्य प्राण **(वसुभिः)** पृथिव्यादिभिस्सह **(सजोषाः)** व्याप्तः सन् प्रीतः प्रसन्नः॥९॥

अन्वयः-हे वैश्वानराग्ने त्वं मघवद्भ्यो नोऽस्मभ्यं पुरुक्षुं तं श्रुत्यं रयिं वाजं नि युवस्व। हे अग्ने! रुद्रेभिर्वसुभिः सजोषास्त्वं नो महि शर्म यच्छ॥९॥

भावार्थः-हे मनुष्या! यो धनैश्वर्यप्रशंसनीयविज्ञानं राज्यं च पुरुषार्थिभ्यः प्रयच्छति तमेव प्रीत्या सततमुपाध्वमिति॥९॥

अत्रेश्वरकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे **(वैश्वानर)** सब को अपने-अपने कार्य में लगाने वाले **(अग्ने)** अग्नि के तुल्य प्रकाशित जगदीश्वर आप **(मघवद्भ्यः)** बहुत धनयुक्त हमारे लिये **(पुरुक्षुम्)** बहुत अन्नादि **(तम्)** उस **(श्रुत्यम्)** सुनने योग्य **(रयिम्)** धन को और **(वाजम्)** विज्ञान को **(नि, युवस्व)** नित्य संयुक्त करो। हे **(अग्ने)** प्राण के प्राण! **(वसुभिः)** पृथिवी आदि तथा **(रुद्रेभिः)** प्राणों के साथ **(सजोषाः)**

व्याप्त और प्रसन्न हुए आप **(नः)** हमारे लिये **(महि)** बड़े **(शर्म)** सुख वा घर को **(यच्छ)** दीजिये॥९॥

भावार्थः-हे मनुष्यो! जो परमात्मा धन ऐश्वर्य्य और प्रशंसा के योग्य विज्ञान और राज्य को पुरुषार्थियों के लिये देता है, उसी की प्रीतिपूर्वक निरन्तर उपासना किया करो॥९॥

इस सूक्त में ईश्वर के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह पांचवां सूक्त और आठवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य षष्ठस्य सूक्तस्य वसिष्ठ ऋषिः। वैश्वानरो देवता। १, ४, ५ निचृत्त्रिष्टुप्। ६ विराट् त्रिष्टुप्छन्दः। धैवतः स्वरः। २ निचृत्पङ्क्तिः। ३, ७ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ को राजा वरः स्यादित्याह।

अब सात ऋचा वाले छठे सूक्त का आरम्भ है। इसके पहिले मन्त्र में कौन राजा श्रेष्ठ हो, इस विषय को कहते हैं॥

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य।
इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि॥ १॥

प्र। सम्ऽराजः। असुरस्य। प्रऽशस्तिम्। पुंसः। कृष्टीनाम्। अनुऽमाद्यस्य। इन्द्रस्यऽइव। प्र। तवसः। कृतानि। वन्दे। दारुम्। वन्दमानः। विवक्मि॥ १॥

पदार्थः-(**प्र**) (**सम्राजः**) चक्रवर्तिनः (**असुरस्य**) मेघस्येव वर्त्तमानस्य (**प्रशस्तिम्**) प्रशंसाम् (**पुंसः**) पुरुषस्य (**कृष्टीनाम्**) मनुष्याणाम् (**अनुमाद्यस्य**) अनुहर्षितुं योग्यस्य (**इन्द्रस्येव**) सूर्यस्येव (**प्र**) (**तवसः**) बलात् (**कृतानि**) (**वन्दे**) नमस्करोमि (**दारुम्**) दुःखविदारकम् (**वन्दमानः**) स्तुवन् सन् (**विवक्मि**) विशेषेण वदामि॥ १॥

अन्वयः-हे मनुष्या! यथा दारुं वन्दमानोऽहं कृष्टीनां मध्येऽसुरस्येवेन्द्रस्येवानुमाद्यस्य सम्राजः पुंसः प्रशस्तिं प्र विवक्मि तवसः कृतानि प्र वन्दे तथैतस्य प्रशंसां कृत्वैतं सदा वन्दध्वम्॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। हे मनुष्या! यः शुभगुणकर्मस्वभावैर्युक्तो वन्दनीयः प्रशंसनीयः स्यात् तस्य चक्रवर्तिनः शुभकर्मजनितां प्रशंसां कुरुत॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**दारुम्**) दुःख के दूर करने वाले ईश्वर की (**वन्दमानः**) स्तुति करता हुआ मैं (**कृष्टीनाम्**) मनुष्यों के बीच (**असुरस्य**) मेघ के तुल्य वर्त्तमान (**इन्द्रस्य**) सूर्य के समान (**अनुमाद्यस्य**) अनुकूल हर्ष करने योग्य (**सम्राजः**) चक्रवर्ती (**पुंसः**) पुरुष की (**प्रशस्तिम्**) प्रशंसा (**प्र, विवक्मि**) विशेष कहता हूँ (**तवसः**) बल से (**कृतानि**) किये हुओं को (**प्र, वन्दे**) नमस्कार करता हूँ, वैसे इस की प्रशंसा कर के इस की सदा वन्दना करो॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो शुभ गुण, कर्म और स्वभावों से युक्त वन्दनीय और प्रशंसा के योग्य हो, उस चक्रवर्ती राजा की शुभकर्मों से हुई प्रशंसा करो॥ १॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो इस विषय को अगले मन्त्र में कहते हैं॥

कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः।
पुरंदुरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि॥ २॥

कविम्। केतुम्। धासिम्। भानुम्। अद्रेः। हिन्वन्ति। शम्। राज्यम्। रोदस्योः। पुरम्ऽदुरस्य। गीर्ऽभिः। आ। विवासे। अग्नेः। व्रतानि। पूर्व्या। महानि॥ २॥

गी॒:ऽभि:। आ। वि॒वा॒से॒। अ॒ग्ने:। व्र॒ता॒नि॑। पू॒र्व्या। म॒हा॒नि॑॥ २॥

पदार्थ:-(**कविम्**) क्रान्तप्रज्ञं विद्वांसम् (**केतुम्**) महाप्राज्ञम् (**धासिम्**) अन्नमिव पोषकम् (**भानुम्**) विद्याविनयदीप्तिमन्तम् (**अद्रे:**) मेघस्य (**हिन्वन्ति**) प्राप्नुवन्ति वर्धयन्ति वा (**शम्**) सुखरूपम् (**राज्यम्**) (**रोदस्यो:**) प्रकाशपृथिव्यो: सम्बन्धि (**पुरंदरस्य**) शत्रूणां पुरां विदारकस्य (**गीर्भि:**) वाग्भि: (**आ**) समन्तात् (**विवासे**) सेवे (**अग्ने:**) पावकस्येव वर्त्तमानस्य (**व्रतानि**) कर्माणि (**पूर्व्या**) पूर्वै राजभि: कृतानि (**महानि**) महान्ति॥ २॥

अन्वय:-हे राजन्नग्नेरिव! यस्य ते गीर्भिरद्रेरिव वर्त्तमानस्य पुरंदरस्य राज्ञो महानि पूर्व्या व्रतानि कविं केतुं धासिं भानुं रोदस्यो: शं राज्यं हिन्वन्ति तमहं विवासे॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यस्योत्तमानि कर्माणि राज्यं विदुषो वर्धयन्ति राज्यं सुखयुक्तं कुर्वन्ति तस्यैव सत्कार: सर्वै: कर्त्तव्य:॥ २॥

पदार्थ:-हे राजन् (**अग्ने:**) अग्नि के समान! जिन आपकी (**गीर्भि:**) वाणियों से (**अद्रे:**) मेघ के तुल्य वर्तमान (**पुरंदरस्य**) शत्रुओं के नगरों को विदीर्ण करने वाले राजा के (**महानि**) बड़े (**पूर्व्या**) पूर्वज राजाओं ने किये (**व्रतानि**) कर्मों को तथा (**कविम्**) तीव्र बुद्धि वाले (**केतुम्**) अतीव बुद्धिमान् विद्वान् को (**धासिम्**) अन्न के तुल्य पोषक (**भानुम्**) विद्या, विनय और दीप्ति से युक्त (**रोदस्यो:**) प्रकाश और पृथिवी के सम्बन्धी (**शम्**) सुखस्वरूप (**राज्यम्**) राज्य को (**हिन्वन्ति**) प्राप्त करवाते बढ़ाते हैं, उनका मैं (**आ, विवासे**) अच्छे प्रकार सेवन करता हूँ॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिसके उत्तम कर्म राज्य और विद्वानों को बढ़ाते हैं और राज्य को सुखयुक्त करते हैं, उसी प्रकार सबको करना चाहिये॥ २॥

पुनर्विद्वद्भि: के निरोद्धव्या इत्याह॥

फिर विद्वानों को कौन रोकने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

न्य॑क्रतून्ग्र॒थिनो॑ मृ॒ध्रवा॑च: प॒णीरँ॑श्र॒द्धाँ अ॑वृ॒धाँ अ॑य॒ज्ञान्।
प्रप्र॒ तान् द॑स्यूँर॒ग्निर्वि॑वाय॒ पूर्व॑श्चकारापरा॑ँ अय॑ज्यून्॥ ३॥

नि। अ॒क्र॒तू॒न्। ग्र॒थि॑न:। मृ॒ध्र॒ऽवा॑च:। प॒णीन्। अ॒श्र॒द्धान्। अ॒वृ॒धान्। अ॒य॒ज्ञान्। प्रऽप्र॒। तान्। द॒स्यून्। अ॒ग्नि:। वि॒वा॒य॒। पूर्व॑:। च॒का॒र॒। अप॑रान्। अय॑ज्यून्॥ ३॥

पदार्थ:-(**नि**) (**अक्रतून्**) निर्बुद्धीन् (**ग्रथिन:**) अज्ञानेन बद्धान् (**मृध्रवाच:**) मृधा हिंस्रा अनृता वाग्येषान्ते (**पणीन्**) व्यवहारिण: (**अश्रद्धान्**) श्रद्धारहितान् (**अवृधान्**) अवर्धकान् हानिकरान् (**अयज्ञान्**) सङ्गाद्यग्निहोत्राद्यनुष्ठानरहितान् (**प्रप्र**) (**तान्**) (**दस्यून्**) दुष्टान् साहसिकाँश्चोरान् (**अग्नि:**) अग्निरिव राजा (**विवाय**) दूरं गमयति (**पूर्व:**) आदिम: (**चकार**) करोति (**अपरान्**) अन्यान् (**अयज्यून्**) विद्वत्सत्कारविरोधिन:॥ ३॥

अन्वय:-हे राजन्नग्निरिव! भवानक्रतूनग्रथिनो मृध्रवाचोऽयज्ञानश्रद्धानवृधाँस्तान् दस्यून् प्रप्र विवाय पूर्व: सन्नपरानयज्यून् पणीन्नि चकार॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यूयं सत्योपदेशशिक्षाभ्यां सर्वानविदुषो बोधयन्तु यत एतेऽपरानपि विदुषः कुर्य्युः॥३॥

पदार्थः-हे राजन् **(अग्निः)** अग्नि के तुल्य तेजोमय! आप **(अक्रतून्)** निर्बुद्धि **(ग्रथिनः)** अज्ञान से बंधने **(मृध्रवाचः)** हिंसक वाणी वाले **(अयज्ञान्)** सङ्गादि वा अग्निहोत्रादि के अनुष्ठान से रहित **(अश्रद्धान्)** श्रद्धारहित **(अवृधान्)** हानि करनेहारे **(तान्)** उन **(दस्यून्)** दुष्ट साहसी चोरों को **(प्रप्र, विवाय)** अच्छे प्रकार दूर पहुँचाइये **(पूर्वः)** प्रथम से प्रवृत्त हुए आप **(अपरान्)** अन्य **(अयज्यून्)** विद्वानों के सत्कार के विरोधियों को **(पणीन्)** व्यवहार वाले **(नि, चकार)** निरन्तर करते हैं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! तुम लोग सत्य के उपदेश और शिक्षा से सब अविद्वानों को बोधित करो, जिससे ये अन्यों को भी विद्वान् करें॥३॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून्॥४॥

यः। अपाचीने। तमसि। मदन्तीः। प्राचीः। चकार। नृऽतमः। शचीभिः। तम्। ईशानम्। वस्वः। अग्निम्। गृणीषे। अनानतम्। दमयन्तम्। पृतन्यून्॥४॥

पदार्थः-**(यः)** योऽधोऽञ्चति **(तमसि)** अन्धकारे **(मदन्तीः)** आनन्दन्तीः **(प्राचीः)** या प्रागञ्चति **(चकार)** करोति **(नृतमः)** अतिशयेन नृणां मध्य उत्तमः (**शचीभिः)** उत्तमाभिर्वाग्भिः। **शचीति वाङ्नाम**। (निघं०१.११) **(तम्)** **(ईशानम्)** समर्थम् **(वस्वः)** वसुनो धनस्य **(अग्निम्)** **(गृणीषे)** स्तौषि **(अनानतम्)** नम्रीभूतम् **(दमयन्तम्)** निवारयन्तम् **(पृतन्यून्)** आत्मनः पृतनां सेनामिच्छून्॥४॥

अन्वयः-हे मनुष्या! यो नृतमः शचीभिरपाचीने तमसि मदन्तीः प्राचीश्चकार। हे विद्वन्! यो वस्वः ईशानमनानतं पृतन्यून् दमयन्तमग्निं गृणीषे तं वयं सत्कुर्याम॥४॥

भावार्थः-यो नरोत्तमो राजा प्रजाभिस्सह पितृवद्वर्त्तते यथा निद्रायां सुखी भवति तथा सर्वाः प्रजा आनन्दयञ्छत्रून्निवारयति यो युद्धे भयाच्छत्रुभ्यो नम्रो न भवति धनस्य वर्धको वर्त्तते तमेव राजानं वयं सदा सत्कुर्याम॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(नृतमः)** मनुष्यों में उत्तम **(शचीभिः)** उत्तम वाणियों से **(अपाचीने)** बुरा चलना जिसमें हो उस **(तमसि)** अन्धकार में **(मदन्तीः)** आनन्द करती हुई **(प्राचीः)** पूर्व को चलने वाली सेनाओं को **(चकार)** करता है। हे विद्वन्! जिस **(वस्वः)** धन के **(ईशानम्)** स्वामी **(अनानतम्)** नम्रस्वरूप **(पृतन्यून्)** अपने को सेना की इच्छा करने वालों को **(दमयन्तम्)** निवृत्त करते हुए **(अग्निम्)** अग्नि के तुल्य प्रकाशस्वरूप ईश्वर की **(गृणीषे)** स्तुति करता है **(तम्)**

उसका हम लोग सत्कार करें॥४॥

भावार्थः-जो मनुष्यों में उत्तम राजा प्रजाओं के साथ पिता के तुल्य वर्त्तता है, जैसे निद्रा में सुखी होता है, वैसे सब प्रजाओं को आनन्द देता हुआ शत्रुओं को निवृत्त करता है। जो युद्ध में भय से शत्रुओं के साथ नम्र नहीं होता और धन का बढ़ाने वाला है, उसी राजा का हम लोग सदा सत्कार करें॥४॥

पुनः कीदृशो राजोत्तमतमो भवतीत्याह॥

फिर कैसा राजा अत्यन्त उत्तम होता है, इस विषय को अगले मन्त्र में कहते हैं॥

यो देह्यो३ऽ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चके बलिहृतः सहोभिः॥५॥

यः। देह्यः। अनमयत्। वधऽस्नैः। यः। अर्यऽपत्नीः। उषसः। चकार। सः। निरुध्य। नहुषः। यह्वः। अग्निः। विशः। चक्रे। बलिऽहृतः। सहःऽभिः॥५॥

पदार्थः-(**यः**) (**देह्यः**) उपचेतुं वर्धयितुं योग्यः (**अनमयत्**) दुष्टान्नम्रान् कारयेत् (**वधस्नैः**) वधेन शोधकैर्भृत्यैर्न्यायाधीशैः (**यः**) (**अर्यपत्नीः**) स्वामिनां भार्या (**उषसः**) प्रातर्वेला इव सुशोभिताः (**चकार**) करोति (**सः**) (**निरुध्या**) अत्र **संहितायामि**ति दीर्घः। (**नहुषः**) सत्ये बद्धः (**यह्वः**) महान् (**अग्निः**) अग्निरिव तेजस्वी (**विशः**) प्रजाः (**चक्रे**) कुर्यात् (**बलिहृतः**) या बलिं हरन्ति ताः (**सहोभिः**) सहनशीलैर्बलिष्ठैः॥५॥

अन्वयः-हे मनुष्यो! यो देह्यो वधस्नैर्दुष्टाननमयद्यः सूर्य उषस इवाऽर्यपत्नीश्चकार यो नहुषो यह्वोऽग्निरिव सहोभिश्शत्रून् निरुध्या विशो बलिहृतश्चक्रे स सर्वैः पितृवत्पूज्यः॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे प्रजाजना! यो विद्वत्तमो दुष्टाचारानन्यायवृत्तिं च निरुध्य जितेन्द्रियो भूत्वा न्यायेन प्रजाभ्यो बलिं हरति स सर्वैर्वर्धनीयो भवति॥५॥

पदार्थः-हे मनुष्यो (**यः**) जो (**देह्यः**) बढ़ाने योग्य (**वधस्नैः**) मारने से शुद्ध करने वाले न्यायाधीशों से दुष्टों को (**अनमयत्**) नम्र करावे (**यः**) जो सूर्य जैसे (**उषसः**) प्रातःकाल की वेलाओं को सुशोभित करता है, वैसे (**अर्यपत्नीः**) स्वामी की स्त्रियों को शोभित (**चकार**) करता है और जो (**नहुषः**) सत्य में बद्ध (**यह्वः**) महान् (**अग्निः**) अग्नि के तुल्य तेजस्वी (**सहोभिः**) सहनशील बलिष्ठों के साथ शत्रुओं को (**निरुध्या**) रोक के (**विशः**) प्रजाओं को (**बलिहृतः**) कर पहुँचाने वाला (**चक्रे**) करे (**सः**) वह सब को पिता के तुल्य पूज्य है॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे प्रजाजनो! जो अत्यन्त विद्वान् दुष्टाचारियों और अन्याय के वर्त्ताव को रोक जितेन्द्रिय होके न्यायपूर्वक प्रजा से कर लेता है, वह सब को बढ़ाने योग्य होता है॥५॥

पुनः को राजा नित्यं वर्धत इत्याह॥

फिर कौन राजा नित्य बढ़ता है, इस विषय को अगले मन्त्र में कहते हैं॥

यस्य॒ शर्म॒न्नुप॒ विश्वे॒ जना॑स॒ एवै॑स्तस्थु॒: सु॑म॒तिं भिक्ष॑माणाः।
वै॒श्वा॒न॒रो वर॒मा रोद॑स्यो॒राग्नि: स॑साद पि॒त्रोरु॒पस्थ॑म्॥ ६॥

यस्य॑। शर्म॑न्। उप॑। विश्वे॑। जना॑सः। एवै॑:। त॒स्थुः। सु॒ऽम॒तिम्। भिक्ष॑माणाः। वै॒श्वा॒न॒रः। वर॑म्। आ। रोद॑स्योः। आ। अ॒ग्निः। स॒सा॒द॒। पि॒त्रोः। उ॒पऽस्थ॑म्॥ ६॥

पदार्थः-(**यस्य**) (**शर्मन्**) गृहे (**उप**) (**विश्वे**) सर्वे (**जनासः**) उत्तमा धार्मिका विद्वांसः (**एवैः**) विज्ञानादिप्राप्तैः सद्गुणैस्सह (**तस्थुः**) तिष्ठन्ति (**सुमतिम्**) शोभनां प्रज्ञाम् (**भिक्षमाणः**) नित्यं याचमाना उन्नतिशीलाः (**वैश्वानरः**) विश्वेषां नराणां मध्ये राजमानः (**वरम्**) उत्तमं जनम् (**आ**) (**रोदस्यो**) द्यावापृथिव्योर्मध्ये (**आ**) (**अग्निः**) सूर्य इव (**ससाद**) सीदति (**पित्रोः**) सुशिक्षाकर्त्रोरध्यापकोपदेशकयोः (**उपस्थम्**) समीपम्॥६॥

अन्वयः-हे मनुष्या! यस्य शर्मन् सुमतिं भिक्षमाणा एवैः सह वर्त्तमाना विश्वे जनास उप तस्थुर्यो वैश्वानरो रोदस्योरग्निरास्थित इव पित्रोरुपस्थं वरमा ससाद स एव साम्राज्यं कर्त्तुमर्हति॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। स एव राजा नित्यं वर्धते यस्य समीपे नित्यं विद्यावर्धका विद्वांसो मन्त्रिणस्स्युर्यो ह्याप्तोपदेशं नित्यं गृह्णाति स सूर्य इव भूगोले प्रकाशमानो भूत्वा प्रशस्तं राज्यं प्राप्नोति॥६॥

पदार्थः-हे मनुष्यो (**यस्य**) जिसके (**शर्मन्**) घर में (**सुमतिम्**) उत्तम बुद्धि की (**भिक्षमाणाः**) नित्य याचना करते हुए उन्नतिशील (**एवैः**) विज्ञानादि से प्राप्त हुए श्रेष्ठ गुणों के साथ वर्त्तमान (**विश्वे**) सब (**जनासः**) धर्मात्मा, उत्तम विद्वान् जन (**उप, तस्थुः**) उपस्थित होते हैं जो (**वैश्वानरः**) समस्त मनुष्यों के बीच राजमान (**रोदस्योः**) सूर्य-पृथिवी के बीच (**अग्निः**) सूर्य के तुल्य स्थित हुए के समान (**पित्रोः**) उत्तम शिक्षा करने वाले अध्यापक-उपदेशक के (**उपस्थम्**) समीप (**वरम्**) उत्तम जन को (**आ, ससाद**) अच्छे प्रकार स्थित करो, वही चक्रवर्ती राज्य कर सकता है॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वही राजा नित्य बढ़ता है, जिसके समीप विद्यावर्धक, विद्वान् मन्त्री सदा रहें। जो सत्यवक्ता के उपदेश को नित्य स्वीकार करता है, वह सूर्य के तुल्य भूगोल में प्रकाशमान होकर प्रशस्त राज्य को प्राप्त होता है॥६॥

को राजा प्रशस्तयशा भवतीत्याह॥

कौन राजा प्रशंसित यश वाला होता है, इस विषय को अगले मन्त्र में कहते हैं॥

आ दे॒वो द॑दे॒ बु॒ध्या३॑ वसू॑नि वैश्वान॒र उ॑दि॒ता सूर्य॑स्य।
आ स॑मु॒द्रादव॑रा॒दा पर॑स्मा॒दाग्निर्द॑दे दि॒व आ पृ॑थि॒व्याः॥ ७॥ ९॥

आ। दे॒वः। द॒दे॒। बु॒ध्या॑। वसू॑नि। वै॒श्वा॒न॒रः। उ॒त्ऽइ॒ता। सूर्य॑स्य। आ। स॒मु॒द्रात्। अव॑रात्। आ। पर॑स्मात्। आ। अ॒ग्निः। द॒दे॒। दि॒वः। आ। पृ॒थि॒व्याः॥ ७॥

पदार्थः-(**आ**) समन्तात् (**देवः**) पूर्णविद्यः सुखप्रदः (**ददे**) ददाति (**बुध्या**)

बुध्न्यान्यन्तरिक्षस्थानि **(वसूनि)** द्रव्याणि **(वैश्वानरः)** विश्वेषां नराणामयं नायकः **(उदिता)** उदितावुदये **(सूर्यस्य)** **(आ)** **(समुद्रात्)** अन्तरिक्षात् **(अवरात्)** अर्वाचीनात् **(आ)** **(परस्मात्)** **(आ)** **(अग्निः)** पावक इव वर्त्तमानः **(ददे)** ददाति **(दिवः)** प्रकाशस्य **(आ)** **(पृथिव्याः)** भूमेर्मध्ये॥७॥

अन्वयः-हे मनुष्या! यो वैश्वानरोऽग्निरिव देवो राजा यथा सूर्यस्योदिता बुध्न्या वसून्यासमन्तात् प्रकाशितानि जायन्ते तथा यो न्यायविद्याप्रकाशं सर्वेभ्य आददे यथा परस्मादादवरादासमुद्राद् दिवः पृथिव्याश्च मध्ये सूर्यः प्रकाशं प्रयच्छति तथा सद्गुणानादाय प्रजाभ्यो हितमाददे स आ समन्तात्सुखेन वर्धते॥७॥

भावार्थः-यदि विद्वांसः सत्यभावेन न्यायं संगृह्य प्रजाः पुत्रवत्पालयेयुस्तर्हि ते प्रजामध्ये सूर्य इव प्रशस्तयशसो भूत्वा इति सर्वेभ्यः सुखं दातुं शक्नुवन्तीति॥७॥

अत्र वैश्वानरदृष्टान्तेन राजकर्मवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्ठं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **[**जो**]** **(वैश्वानरः)** सब मनुष्यों का नायक **(अग्निः)** अग्नि के तुल्य तेजस्वी **(देवः)** पूर्ण विद्वान् सुखदाता राजा जैसे **(सूर्यस्य)** सूर्य के **(उदिता)** उदय में **(बुध्न्या)** अन्तरिक्षस्थ **(वसूनि)** द्रव्य **(आ)** अच्छे प्रकार प्रकाशित होते हैं, वैसे जो न्याय और विद्या के प्रकाश को सब से **(आ ददे)** लेता है वा जैसे **(परस्मात्)** पर **(अवरात्)** तथा इधर हुए **(आ, समुद्रात्)** अन्तरिक्ष के जल पर्य्यन्त **(दिवः)** प्रकाश और **(पृथिव्याः)** पृथिवी के बीच सूर्य्य प्रकाश को देता है, वैसे श्रेष्ठ गुणों का ग्रहण कर प्रजा के लिये हित **(आ ददे)** ग्रहण करता है वह **(आ)** अच्छे सुख से बढ़ता है॥७॥

भावार्थः-यदि विद्वान् लोग सत्य भाव से न्याय का संग्रह कर प्रजाओं का पुत्र के तुल्य पालन करें तो वे प्रजा में सूर्य के तुल्य प्रकाशित कीर्ति वाले होकर सब के लिये सुख देने को समर्थ होते हैं॥७॥

इस सूक्त मे के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छठा सूक्त और नववां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य सप्तमस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, ३ त्रिष्टुप्। ४, ५, ६ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २ भुरिक् पङ्क्तिः। ७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ कीदृशं राजानं कुर्युरित्याह॥

अब सात ऋचा वाले सातवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में कैसे पुरुष को राजा करें, इस विषय को कहते हैं।

प्र वो॑ देवं चित्सहसानमग्निमश्वं॑ न वाजिनं॑ हिषे॒ नमो॑भिः।
भवा॑ नो दू॒तो अ॑ध्व॒रस्य॑ विद्वान्त्मना॑ देवेषु॑ विविदे मि॒तद्रु॑ः॥ १॥

प्र। वः। देवम्। चित्। सहसानम्। अग्निम्। अश्वम्। न। वाजिनम्। हिषे। नमः॑भि। भव॑। नः। दू॒तः। अ॒ध्व॒रस्य॑। विद्वान्। त्मना॑। देवेषु॑। विविदे। मि॒तऽद्रु॑ः॥ १॥

पदार्थः-(**प्र**) (**वः**) युष्मान् (**देवम्**) दातारम् (**चित्**) अपि (**सहसानम्**) (**अग्निम्**) विद्यया प्रकाशमानम् (**अश्वम्**) आशुगामिनम् (**न**) इव (**वाजिनम्**) प्रशस्तवेगवन्तम् (**हिषे**) प्रहिणोमि (**नमोभिः**) अन्नादिभिः (**भवा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्माकम् (**दूतः**) सुशिक्षितो दूत इव (**अध्वरस्य**) अहिंसामयस्य न्याय्यव्यवहारस्य (**विद्वान्**) (**त्मना**) आत्मना (**देवेषु**) विद्वत्सु (**विविदे**) विद्वत्सु (**विविदे**) विज्ञायते (**मितद्रुः**) यो मितं शास्त्रसंमितं द्रवति प्राप्नोति सः॥ १॥

अन्वयः-हे मनुष्या! यथाऽहं वः सहसानं देवमग्निमश्वं न वाजिनं नमोभिः प्र हिषे तथैतं यूयमपि वर्धयत। हे राजँस्त्मना यो देवेषु मितद्रुर्विद्वान् विविदे तं प्राप्य नोऽध्वरस्य दूतो भव॥ १॥

भावार्थः-अत्रोपमालङ्कारः। यो हि प्रजाक्षेपं सहतेऽश्व इव सर्वकार्याणि सद्यो व्याप्नोति विद्वत्सु विद्वान् दूत इव प्राप्तसमाचारो भवेत्तमेव राजानं कुरुत॥ १॥

पदार्थः-हे मनुष्यो! जैसे मैं (**वः**) तुमको (**सहसानम्**) यज्ञ के साधक (**देवम्**) दानशील (**अग्निम्**) विद्या से प्रकाशमान (**अश्वम्, न**) शीघ्र चलने वाले घोड़े के तुल्य (**वाजिनम्**) उत्तम वेग वाले (**नमोभिः**) अन्नादि करके (**प्र, हिषे**) अच्छी वृद्धि करता हूँ, वैसे इसको तुम लोग भी बढ़ाओ। हे राजन्! (**त्मना**) आत्मा से जो (**देवेषु**) विद्वानों में (**मितद्रुः**) शास्त्रानुकूल पदार्थों को प्राप्त होने वाला (**विद्वान्**) विद्वान् (**विविदे**) जाना जाता है उसको प्राप्त होके (**नः**) हमारे (**अध्वरस्य**) अहिंसा और न्याययुक्त व्यवहार के (**दूतः**) सुशिक्षित दूत के तुल्य (**भव**) हूजिये॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो प्रजा के किये आक्षेपों को सहता, घोड़े के तुल्य सब कार्य्यों को शीघ्र व्याप्त होता, विद्वानों में विद्वान्, दूत के तुल्य समाचार पहुँचाने वाला हो, उसी को राजा करो॥ १॥

पुनः कीदृशो राजा श्रेयान् भवतीत्याह॥

फिर कैसा राजा श्रेष्ठ होता है, इस विषय को अगले मन्त्र में कहते हैं।

आ या॑ह्यग्ने प॒थ्या॒३॑ अनु॒ स्वा म॒न्द्रो दे॒वाना॑ स॒ख्यं जु॑षा॒णः।

आ सानु शुष्मैर्नदयन् पृथिव्या जम्भेभिर्विश्वमुशधग्वनानि॥ २॥

आ। याहि। अग्ने। पथ्याः। अनु। स्वाः। मन्द्रः। देवानाम्। सख्यम्। जुषाणः। आ। सानु। शुष्मैः। नदयन्। पृथिव्याः। जम्भेभिः। विश्वम्। उशधक्। वनानि॥ २॥

पदार्थः-(**आ याहि**) आगच्छ (**अग्ने**) विद्युदिव राजविद्याव्याप्त (**पथ्याः**) या धर्मपन्थानमर्हन्ति (**अनु**) अनुकूलाः (**स्वाः**) स्वकीयाः प्रजाः (**मन्द्रः**) आनन्दप्रदः (**देवानाम्**) विदुषाम् (**सख्यम्**) मित्रभावम् (**जुषाणः**) सेवमानः (**आ**) (**सानु**) शिखरमिव विज्ञानम् (**शुष्मैः**) बलैः (**नदयन्**) नादं कुर्वन् (**पृथिव्याः**) भूमेः (**जम्भेभिः**) गात्रविनामैः (**विश्वम्**) सर्वं जगत् (**उशधक्**) कामयमानः (**वनानि**) सूर्यकिरणानिव धनानि॥ २॥

अन्वयः-हे अग्ने! देवानां सख्यं जुषाणो मन्द्रः शुष्मैः पृथिव्याः सान्वा नदयन्विद्युदिव जम्भेभिर्विश्वं वनान्युशधक्सन् पथ्याः स्वा अन्वा याहि॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो विद्युदिव पराक्रमी सूर्य इव प्रतापी स्वानुकूलाः प्रजा न्यायेनानन्दिताः करोति स एवोत्तमो राजा भवति॥ २॥

पदार्थः-हे (**अग्ने**) बिजुली के तुल्य राजविद्या में व्याप्त! (**देवानाम्**) विद्वानों के (**सख्यम्**) मित्रपन को (**जुषाणः**) सेवते हुए (**मन्द्रः**) आनन्ददाता (**शुष्मैः**) बलों के साथ (**पृथिव्याः**) पृथिवी के (**सानु**) शिखर के तुल्य विज्ञान को (**आ, नदयन्**) अच्छे प्रकार नाद करते हुए विद्युत् के तुल्य (**जम्भेभिः**) गात्र नमाने से (**विश्वम्**) **[**सम्पूर्ण जगत्**]** (**वनानि**) सूर्य की किरणों के तुल्य धनों की (**उशधक्**) कामना करते हुए (**पथ्याः**) धर्ममार्ग को प्राप्त होने वाली (**स्वाः**) अपनी प्रजाओं को (**अनु, आ, याहि**) अनुकूल आइये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो बिजुली के तुल्य पराक्रमी, सूर्य के तुल्य प्रतापी, अपनी अनुकूल प्रजाओं को न्याय से आनन्दित करता है, वही उत्तम राजा होता है॥ २॥

अत्र के मनुष्या उत्तमाः सन्तीत्याह॥

इस जगत् में कौन मनुष्य उत्तम हैं, इस विषय को अगले मन्त्र में कहते हैं॥

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः॥ ३॥

प्राचीनः। यज्ञः। सुऽधितम्। हि। बर्हिः। प्रीणीते। अग्निः। ईळितः। न। होता। आ। मातरा। विश्ववारे इति विश्वऽवारे। हुवानः। यतः। यविष्ठ। जज्ञिषे। सुऽशेवः॥ ३॥

पदार्थः-(**प्राचीनः**) यः प्रागञ्चति (**यज्ञः**) सङ्गन्तव्यः (**सुधितम्**) सुष्ठु हितम् (**हि**) निश्चये (**बर्हिः**) उत्तमं प्रवृद्धं हविः (**प्रीणीते**) कामयते (**अग्निः**) पावक इव (**ईळितः**) प्रशंसितगुणः (**न**) इव (**होता**) हवनकर्त्ता (**आ**) (**मातरा**) जनकौ (**विश्ववारे**) सर्वसुखवरितारौ (**हुवानः**) स्तुवन् (**यतः**) याभ्याम् (**यविष्ठ**) अतिशयेन यौवनं प्राप्तः (**जज्ञिषे**) जायसे (**सुशेवः**) सुसुखः॥ ३॥

अन्वयः-हे यविष्ठ! यतस्त्वं सुशेवो जज्ञिषे तौ विश्ववारे मातरा हुवान ईळितो होता नाग्निरिव प्राचीनो यज्ञः सुधितं बर्हिः प्राप्तुं बर्हिः प्राप्तुं य आ प्रीणीते स हि योग्यो जायते॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा होता वेदविहितं यज्ञं हवींषि च कामयते तथैव ये पितॄन् प्रशंसमानाः सेवन्ते त एवाऽत्र कृतज्ञा जायन्ते॥३॥

पदार्थः-हे **(यविष्ठ)** अतिशय कर युवावस्था को प्राप्त **(यतः)** जिनसे आप **(सुशेवः)** सुन्दर सुखयुक्त **(जज्ञिषे)** होते हो उन **(विश्ववारे)** सब सुखों के स्वीकार करने वाले दोनों **(मातरा)** माता-पिता की **(हुवानः)** स्तुति करता हुआ **(ईळितः)** प्रशंसित गुणोंवाला **(होता)** होमकर्ता **(न)** जैसे, वैसे **(अग्निः)** अग्नि के तुल्य **(प्राचीनः)** पूर्वकाल सम्बन्धी **(यज्ञः)** संग करने योग्य पुरुष **(सुधितम्)** सुन्दर हितकारी **(बर्हिः)** उत्तम अधिक हविष्य को प्राप्त करने के अर्थ जो **(आ, प्रीणीते)** अच्छे प्रकार कामना करता है **(हि)** वही योग्य होता है॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे होमकर्त्ता वेदविहित यज्ञ और उसकी सामग्री की कामना करता है, वैसे ही जो पितृजनों की प्रशंसा करते हुए सेवन करते हैं, वे इस जगत् में कृतज्ञ होते हैं॥३॥

पुनः को मनुष्यो योग्यो राजा भवतीत्याह॥

फिर कौन मनुष्य योग्य राजा होता है, इस विषय को अगले मन्त्र में कहते हैं॥

स॒द्यो अ॑ध्व॒रे र॑थि॒रं ज॑नन्त मानु॒षासो॒ विच॑ेतसो॒ य ए॑षाम्।
वि॒शाम॑धायि विश्पति॑र्दु॒रोणे॒३॑ऽग्निर्म॒न्द्रो मधु॑वचा ऋ॒तावा॑॥४॥

स॒द्यः। अ॒ध्व॒रे। र॒थि॒रम्। ज॒न॒न्त॒। मानु॑षासः। विऽच॑ेतसः। यः। ए॒षा॒म्। वि॒शाम्। अ॒धा॒यि॒। वि॒श्प॒तिः॑। दु॒रोणे॑। अ॒ग्निः। म॒न्द्रः। मधु॑ऽवचाः। ऋ॒तऽवा॑॥४॥

पदार्थः-(**सद्यः**) (**अध्वरे**) अहिंसामये व्यवहारे (**रथिरम्**) यो रथिषु रमते तम् (**जनन्त**) जनयन्ति (**मानुषासः**) मनुष्याः (**विचेतसः**) विविधप्रज्ञायुक्ताः (**यः**) (**एषाम्**) विदुषाम् (**विशाम्**) प्रजानाम् (**अधायि**) धीयते (**विश्पतिः**) प्रजापालकः (**दुरोणे**) गृहे (**अग्निः**) पावक इव (**मन्द्रः**) आनन्दप्रदः (**मधुवचाः**) मधूनि मधुराणि वचांसि यस्य सः (**ऋतावा**) य ऋतं सत्यमेव वनति सम्भजति सः॥४॥

अन्वयः-विचेतसो मानुषासोऽध्वरे यं रथिरं सद्यो जनन्त य एषां मध्ये दुरोणेऽग्निरिव मन्द्रो मधुवचा ऋतावा विशां विश्पतिर्विद्वद्भिरधायि स एव राजा भवितुमर्हति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यं सुशिक्षया विद्यां ग्राहयित्वा विपश्चितं विद्वांसो जनयन्ति स योग्यो भूत्वा गृहे दीप इव प्रजासु न्यायप्रकाशको जायते॥४॥

पदार्थः- (**विचेतसः**) विविधप्रकार की बुद्धि से युक्त (**मानुषासः**) मनुष्य (**अध्वरे**) अहिंसारूप व्यवहार में जिस (**रथिरम्**) रथवालों में रमण करने वाले को (**सद्यः**) शीघ्र (**जनन्त**) प्रकट करते हैं (**यः**) जो (**एषाम्**) विद्वानों के बीच (**दुरोणे**) घर में (**अग्निः**) अग्नि के तुल्य (**मन्द्रः**)

आनन्ददाता **(मधुवचाः)** कोमल वचनों **(ऋतावा)** और सत्य का सेवन करने वाला **(विशाम्)** प्रजाओं का **(विश्पतिः)** रक्षक विद्वानों से **(अधायि)** धारण किया जाता, वही राजा होने को योग्य होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिसको उत्तम शिक्षा से विद्या ग्रहण कराके विद्वान् लोग पण्डित करते हैं, वह योग्य होकर घर में दीप के तुल्य प्रजाओं में न्याय का प्रकाशक होता है॥४॥

पुनरग्निः कीदृशोऽस्तीत्याह॥

फिर अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता।
द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम्॥५॥

असादि। वृतः। वह्निः। आऽजगन्वान्। अग्निः। ब्रह्मा। नृऽसदने। विऽधर्ता। द्यौः। च। यम्। पृथिवी। ववृधाते इति। आ। यम्। होता। यजति। विश्वऽवारम्॥५॥

पदार्थः-(**असादि**) आसद्यते (**वृतः**) स्वीकृतः (**वह्निः**) वोढा (**आजगन्वान्**) समन्ताद्गन्ता (**अग्निः**) पावक इव (**ब्रह्मा**) चतुर्वेदवित् (**नृषदने**) नृणां स्थाने (**विधर्ता**) विशेषेण धारकः (**द्यौः**) सूर्यः (**च**) यम् (**पृथिवी**) भूमी (**वावृधाते**) वर्धयतः (**आ**) (**यम्**) (**होता**) (**यजति**) सङ्गच्छते (**विश्ववारम्**) विश्वः सर्वैर्वरणीयम्॥५॥

अन्वयः-हे मनुष्या! यथा नृषदने ब्रह्मा भवति तथा यो वृत आजगन्वान् वह्निरग्निर्विधर्ताऽसादि यं द्यौः पृथिवी च वावृधाते यं विश्ववारं होता आ यजति तं सर्वे विजानन्तु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाग्निर्यथावत्सम्प्रयुक्तः सन् सर्वाणि कार्य्याणि साध्नोति तथैव सत्कृत्य स्वीकृतवेदविद्वांसो धर्मार्थकाममोक्षान् पदार्थान् सर्वान् प्रापयन्ति॥५॥

पदार्थः-हे मनुष्यो! जैसे **(नृषदने)** मनुष्यों के स्थान में **(ब्रह्मा)** चार वेद का जानने वाला होता है, वैसे जो **(वृतः)** स्वीकार किया **(आजगन्वान्)** अच्छे प्रकार प्राप्त होने वाला **(वह्निः)** पहुँचाने वाले **(अग्निः)** अग्नि के तुल्य **(विधर्ता)** विशेष कर धारणकर्ता **(असादि)** अच्छे प्रकार स्थित होता है **(यम्)** जिसको **(द्यौः)** सूर्य **(च)** और **(पृथिवी)** भूमि **(वावृधाते)** बढ़ाते हैं **(यम्)** जिस **(विश्ववारम्)** सबको स्वीकार करने योग्य को **(होता)** होमकर्ता **(आ, यजति)** अच्छे प्रकार सङ्ग करता है, उस को सब लोग जानें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि यथावत् सम्प्रयोग किया हुआ सब कार्य्यों को सिद्ध करता है, वैसे ही सत्कार कर स्वीकार किये वेद के विद्वान् लोग धर्मार्थ-काम-मोक्ष पदार्थों को सबको प्राप्त कराते हैं॥५॥

पुनः के वरा विद्वांसो भवन्तीत्याह॥

फिर कौन श्रेष्ठ विद्वान् होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन्।
प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य॥६॥

एते। द्युम्नेभिः। विश्वम्। आ। अतिरन्त। मन्त्रम्। ये। वा। अरम्। नर्याः। अतक्षन्। प्र। ये। विशः। तिरन्त। श्रोषमाणाः। आ। ये। मे। अस्य। दीधयन्। ऋतस्य॥६॥

पदार्थः-(**एते**) (**द्युम्नेभिः**) धनैर्यशोभिर्वा (**विश्वम्**) समग्रम् (**आ अतिरन्त**) तरन्ति (**मन्त्रम्**) विचारम् (**ये**) (**वा**) (**अरम्**) अलम् (**नर्याः**) नृषु साधवः (**अतक्षन्**) कुर्वन्ति (**प्र**) (**ये**) (**विशः**) प्रजाः (**तिरन्त**) प्रतरन्ति (**श्रोषमाणाः**) शृण्वन्तः (**आ**) (**ये**) (**मे**) मम (**अस्य**) (**दीधयन्**) प्रदीपयन्ति (**ऋतस्य**) सत्यस्य विज्ञानस्य॥६॥

अन्वयः-हे मनुष्या! य एते नर्या द्युम्नेभिर्विश्वं मन्त्रमातिरन्त वारमतक्षन् ये श्रोषमाणा विशः प्र तिरन्त ये मेऽस्यर्त्तस्याऽऽदीधयँस्तेऽभीष्टं प्राप्नुवन्ति॥६॥

भावार्थः-ये मनुष्याः सुविचारेण स्वीकर्त्तव्यान् पदार्थान् प्राप्नुवन्ति नित्यं विद्वद्वचसां श्रोतारो भूत्वा सत्याऽनृते विविच्य सत्यं धृत्वाऽऽसत्यं विहाय यशस्विनो धनाढ्या जायन्ते त एवाऽत्र सत्कर्तव्या भवन्ति॥६॥

पदार्थः-हे मनुष्यो (**ये**) जो (**एते**) ये (**नर्याः**) मनुष्यों में श्रेष्ठ (**द्युम्नेभिः**) धन वा कीर्त्ति से (**विश्वम्**) समस्त (**मन्त्रम्**) विचार को (**आ, अतिरन्त**) अच्छे प्रकार पार होते (**वा, अरम्**) अथवा पूर्ण कार्य्य को (**अतक्षन्**) तीक्ष्णता से करते (**ये**) जो (**श्रोषमाणाः**) सुनते हुए (**विशः**) प्रजाजनों को (**प्र, तिरन्त**) अच्छे तरते और (**ये**) जो (**मे**) मेरे (**अस्य**) इस (**ऋतस्य**) सत्य विज्ञान को (**आ, दीधयन्**) अच्छे प्रकार प्रकाशित करते हैं, वे अभीष्ट को प्राप्त होते हैं॥६॥

भावार्थः-जो मनुष्य सुन्दर विचार के साथ स्वीकार करने योग्य पदार्थों को प्राप्त होते और नित्य विद्वानों के वचनों के श्रोता होकर सत्य झूठ का विवेक कर असत्य छोड़ सत्य का ग्रहण कर यशस्वी धनाढ्य होते हैं, वही इस जगत् में सत्कार के योग्य होते हैं॥६॥

पुनः कः सुरक्षो बलिष्ठः प्रशंसितो जायत इत्याह॥

फिर कौन अच्छा, चतुर, अतिबलवान् तथा प्रशंसित होता है, इस विषय को अगले मन्त्र में कहते हैं॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम्।
इषं स्तोतृभ्यो मघवद्भ्य आनड् यूयं पात स्वस्तिभिः सदा नः॥७॥१०॥

नु। त्वाम्। अग्ने। ईमहे। वसिष्ठाः। ईशानम्। सूनो इति। सहसः। वसूनाम्। इषम्। स्तोतृऽभ्यः। मघवत्ऽभ्यः। आनट्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥७॥

पदार्थः-(**नु**) क्षिप्रम्। अत्र **ऋचि तुनुघे**ति दीर्घः। (**त्वाम्**) (**अग्ने**) विज्ञानस्वरूप (**ईमहे**) याचामहे (**वसिष्ठाः**) अतिशयेन वसवः (**ईशानम्**) ईषणशीलम् (**सूनो**) सत्पुत्र (**सहसः**) बलिष्ठस्य

(वसूनाम्) पृथिव्यादितत्त्वानां धनानां वा **(इषम्)** अन्नादिकम् **(स्तोतृभ्यः)** सर्वविद्याप्रशंसकेभ्यः **(मघवद्भ्यः)** बहुधनयुक्तेभ्यः **(आनट्)** व्याप्नोति **(यूयम्)** **(पात)** रक्षत **(स्वस्तिभिः)** स्वास्थ्यकारिणीभिः क्रियाभिः **(सदा)** **(नः)** अस्मान्॥७॥

अन्वयः-हे सहसः सूनोऽग्ने! वसूनां मध्ये ईशानं त्वां वयं वसिष्ठा ईमहे यूयं स्तोतृभ्यो मघवद्भ्यो नोऽस्मान् सदा पात यो युष्मान्त्विषं चानट् तं यूयं स्वस्तिभिः सदा पात॥७॥

भावार्थः-यो विद्वद्भ्यो धनं प्रयच्छति विद्यां च याचते यस्य रक्षामाप्ता विदधति सर्वदा रक्षितो वर्धमानः सन् सर्वैश्वर्यो जायत इति॥७॥

अत्राग्निदृष्टान्तेन राजादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे **(सहसः)** अतिबलवान् के **(सूनो)** सत्पुत्र **(अग्ने)** विज्ञानस्वरूप! **(वसूनाम्)** पृथिव्यादि तत्त्व साधनों के बीच **(ईशानम्)** समर्थ बलवान् **(त्वाम्)** आप को **(वसिष्ठाः)** अत्यन्त वसने वाले हम लोग **(ईमहे)** याचना करते हैं **(यूयम्)** तुम लोग **(स्तोतृभ्यः)** सब विद्याओं की प्रशंसा करने वाले **(मघवद्भ्यः)** बहुत धनयुक्त होने के लिये **(नः)** हमारी **(सदा)** सदा **(पात)** रक्षा करो। जो तुमको और **(इषम्)** अन्नादि को **(नु)** शीघ्र **(आनट्)** व्याप्त हो, उसकी तुम **(स्वस्तिभिः)** स्वस्थता कराने वाली क्रियाओं से सदा रक्षा करो॥७॥

भावार्थः-जो विद्वानों के लिये धन देता है और विद्या की याचना करता है, जिसकी रक्षा आप्त करते हैं, वह सदा रक्षा को प्राप्त, बढ़ता हुआ सब ऐश्वर्य्य से युक्त होता है॥७॥

इस सूक्त में अग्नि के दृष्टान्त से राजादि के गुणों का वर्णन होने से सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यहाँ सातवां सूक्त और दशवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्याष्टमस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, ७ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५ निचृत्त्रिष्टुप्छन्दः। २, ३, ४, ६ त्रिष्टुप्छन्दः। धैवतः स्वरः॥

अथ स राजा कीदृशाः स्यादित्याह॥

अब वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒न्धे राजा॒ समर्यो॒ नमो॑भि॒र्यस्य॒ प्रती॑क॒माहु॑तं घृ॒तेन॑।
नरो॑ ह॒व्येभि॑रीळते स॒बाधु॒ आग्निरग्रं॑ उ॒षसा॑मशोचि॥ १॥

इ॒न्धे। राजा॑। सम्। अ॒र्यः। नमः॑ऽभिः। यस्य॑। प्रती॑कम्। आऽहु॑तम्। घृ॒तेन॑। नरः॑। ह॒व्येभिः॑। ई॒ळ॒ते॒। स॒ऽबाधः॑। आ। अ॒ग्निः। अग्रे॑। उ॒षसा॑म्। अ॒शो॒चि॒॥ १॥

पदार्थः-(**इन्धे**) प्रदीपयामि (**राजा**) प्रकाशमानः (**समर्यः**) युद्धकुशलः (**नमोभिः**) अन्नादिभिस्सत्कारैर्वा (**यस्य**) (**प्रतीकम्**) प्रत्येति येन तत्सैन्यम् (**आहुतम्**) स्पर्द्धितम् (**घृतेन**) प्रदीपनेनोदकेनाज्येन वा (**नरः**) नेतारो मनुष्याः (**हव्येभिः**) होतुं दातुमर्हैः (**ईळते**) स्तुवन्ति (**सबाधः**) बाधेन सह वर्त्तमानः (**आ**) (**अग्निः**) पावक इव (**अग्रे**) पुरस्तात् (**उषसाम्**) प्रभातानाम् (**अशोचि**) प्रकाश्यते॥ १॥

अन्वयः-ये नरो हव्येभिर्नमोभिस्सह घृतेन यस्याहुतं प्रतीकमीळते स समर्यो राजाऽहं तानिन्धे। यथोषसामग्रे सबाधोऽग्निराशोचि तथाऽहं शत्रूणां सम्मुखे स्वसेनाप्रकाशक उत्साहकश्च भवेयम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! ये यस्य भृत्या उपकारकाः स्युस्त उपकृतेन सदा सत्करणीयाः॥ १॥

पदार्थः-जो (**नरः**) नायक मनुष्य (**हव्येभि**) देने योग्य जनों वा (**नमोभिः**) अन्नादि से होने वाले सत्कारों के साथ (**घृतेन**) प्रदीप्तकारक जल वा घी से (**यस्य**) जिसकी (**आहुतम्**) स्पर्द्धा ईर्षा को प्राप्त (**प्रतीकम्**) सेना की निश्चय कराने वाली (**ईळते**) स्तुति करते हैं वह (**समर्यः**) युद्ध में कुशल (**राजा**) प्रकाशमान तेजस्वी मैं उनको (**इन्धे**) प्रदीप्त करता हूँ जैसे (**उषसाम्**) प्रभात समय होने से (**अग्रे**) पहिले (**सबाधः**) बाध अर्थात् संयोग से बने सब संसार के साथ वर्त्तमान (**अग्निः**) अग्नि के तुल्य तेजस्वी जन (**आ, अशोचि**) प्रकाशित किया जाता है, वैसे मैं शत्रुओं के सम्मुख अपनी सेना का प्रकाशक और उत्साह देने वाला होऊँ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो जिस के भृत्य उपकार करने वाले हों, वे उपकार को प्राप्त हुए से सदा सत्कार पाने योग्य हैं॥ १॥

पुनः स राजा कीदृशः स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

अ॒यमु॒ ष्य सु॑म॒हाँ अवे॑दि॒ होता॑ म॒न्द्रो मनु॑षो य॒ह्वो अ॒ग्निः।
वि भा अ॑कः ससृजा॒नः पृ॑थि॒व्यां कृ॒ष्णप॑विरोष॒धीभि॑र्ववक्षे॥ २॥

अ॒यम्। ऊँ॒ इति॑। स्यः। सु॒ऽम॒हान्। अ॒वे॒दि॒। होता॑। म॒न्द्रः। मनु॑षः। य॒ह्वः। अ॒ग्निः। वि। भाः। अ॒क॒रि॒। स॒सृ॒जा॒नः। पृ॒थि॒व्याम्। कृ॒ष्णऽप॑विः। ओ॒ष॒धीभिः॑। व॒व॒क्षे॒॥

अकरित्यकः। ससृजानः। पृथिव्याम्। कृष्णऽपविः। ओषधीभिः। ववक्षे॥ २॥

पदार्थः-(**अयम्**) (**उ**) (**स्यः**) सः (**सुमहान्**) शुभैर्गुणकर्मभिः पूजनीयः (**अवेदि**) विद्यते (**होता**) दाता (**मन्द्रः**) आनन्दयिता (**मनुषः**) मनुष्यः (**यह्वः**) महान् (**अग्निः**) पावक इव (**वि**) (**भाः**) यो भाति (**अकः**) करोति (**ससृजानः**) स्रष्टा सन् (**पृथिव्याम्**) भूमौ (**कृष्णपविः**) कृष्णो विलेखः पविः शस्त्रासमूहो यस्य (**ओषधीभिः**) सोमलतादिभिः (**ववक्षे**) वहति॥ २॥

अन्वयः-हे विद्वांसो! यथा विभा यह्वोऽग्निरोषधीभिर्ववक्षे तथा कृष्णपविर्होता मन्द्रः सुमहान् मनुषो विद्वद्भिरवेदि स्योऽयमु पृथिव्यां सर्वान् सुखेन ससृजानः सन् सर्वेषामुन्नतिमकः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सूर्यवदुपकारका भवन्ति त एव सुष्ठु पूज्या जायन्ते॥ २॥

पदार्थः-हे विद्वानो! जैसे (**विभाः**) प्रकाश करने वाला (**यह्वः**) बड़ा (**अग्निः**) अग्नि के तुल्य तेजस्वी (**ओषधीभिः**) सोमलतादि ओषधियों से (**ववक्षे**) प्राप्त करता है, वैसे (**कृष्णपविः**) तीक्ष्ण काट करने वाले शस्त्र अस्त्रों से युक्त (**होता**) दानशील (**मन्द्रः**) आनन्द कराने वाला (**सुमहान्**) शुभ गुणकर्मों से सत्कार करने योग्य (**मनुषः**) मनुष्य विद्वानों से (**अवेदि**) जाना जाता है (**स्यः**) वह (**अयम्**) यह (**उ**) ही (**पृथिव्याम्**) पृथिवी पर सब को सुख से (**ससृजानः**) संयुक्त करता हुआ सबकी उन्नति (**अकः**) करता है॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सूर्य के तुल्य उपकारक होते हैं वे ही अच्छे प्रकार सत्कार पाने योग्य होते हैं॥ २॥

पुनस्ते राजप्रजाजनाः कथं वर्तेरन्नित्याह॥

फिर वे राजा और प्रजा के जन कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः॥ ३॥

कया। नः। अग्ने। वि। वसः। सुऽवृक्तिम्। काम्। ऊँ इति। स्वधाम्। ऋणवः। शस्यमानः। कदा। भवेम। पतयः। सुऽदत्र। रायः। वन्तारः। दुस्तरस्य। साधोः॥ ३॥

पदार्थः-(**कया**) रीत्या (**नः**) अस्मान् (**अग्ने**) विद्युद्वदैश्वर्यप्रद (**वि**) (**वसः**) निवासय (**सुवृक्तिम्**) सुष्ठु व्रजन्ति यस्यां नीतौ ताम् (**काम्**) (**उ**) (**स्वधाम्**) अन्नम् (**ऋणवः**) प्रसाध्नुयाः (**शस्यमानः**) स्तूयमानः (**कदा**) (**भवेम**) (**पतयः**) (**सुदत्र**) सुष्ठु दातः (**रायः**) धनस्य (**वन्तारः**) सम्भाजकाः (**दुष्टरस्य**) दुःखेन तरितुं योग्यस्य (**साधोः**) सत्पुरुषस्य॥ ३॥

अन्वयः-हे सुदत्राऽग्ने! शस्यमानस्त्वं कया नो वि वसः कामु [सुवृक्तिं] स्वधामृणवः कदा दुष्टरस्य साधोर्वन्तारो रायः पतयो वयं भवेम॥ ३॥

भावार्थः-हे राजन्! यदि भवानस्मान् यथावत्पालयित्वा धनाढ्यान् कुर्यास्तर्हि वयमपि तव सज्ञनस्य सततमुन्नतिं कुर्य्याम॥ ३॥

पदार्थः-हे (**सुदत्र**) सुन्दर दाता (**अग्ने**) विद्युत् के समान ऐश्वर्य देने वाले राजपुरुष!

(शस्यमानः) प्रशंसा को प्राप्त हुए आप **(कया)** किस रीति से **(नः)** हमको **(वि, वसः)** प्रवास कराते हैं **(काम्, उ)** किसी **(सुवृक्तिम्)** सुन्दर प्रकार जिस में प्राप्त हों उस नीति और **(स्वधाम्)** अन्न को **(ऋणवः)** प्रसिद्ध करो **(कदा)** कब **(दुष्टरस्य)** दुःख से तरने योग्य **(साधोः)** सत्पुरुष के **(वन्तारः)** सेवक **(रायः)** धन के **(पतयः)** स्वामी हम लोग **(भवेम)** होवें॥३॥

भावार्थः-हे राजन्! यदि आप हमारा यथावत् पालन कर धनाढ्य करें तो हम भी आप सज्जन की निरन्तर उन्नति करें॥३॥

पुनः कीदृशो राजा सत्कर्त्तव्योऽयं कीदृशान् सत्कुर्यादित्याह॥

फिर कैसा राजा सत्कार के योग्य होता और यह राजा कैसों का सत्कार करे, इस विषय को अगले मन्त्र में कहते हैं॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच॥४॥

प्रऽप्र। अयम्। अग्निः। भरतस्य। शृण्वे। वि। यत्। सूर्यः। न। रोचते। बृहत्। भाः। अभि। यः। पूरम्। पृतनासु। तस्थौ। द्युतानः। दैव्यः। अतिथिः। शुशोच॥४॥

पदार्थः-(**प्रप्र**) अतिप्रकर्षः (**अयम्**) (**अग्निः**) पावक इव (**भरतस्य**) धारकस्य पोषकस्य (**शृण्वे**) (**वि**) (**यत्**) यः (**सूर्यः**) (**न**) इव (**रोचते**) प्रकाशते (**बृहत्**) महज्जगद्राज्यं वा (**भाः**) प्रकाशयति (**अभि**) (**यः**) (**पूरुम्**) पालकं सेनापतिम् (**पृतनासु**) सेनासु (**तस्थौ**) तिष्ठेत् (**द्युतानः**) देदीप्यमानः (**दैव्यः**) देवैः कृतो विद्वान् (**अतिथिः**) अविद्यमाना तिथिर्गमनागमनयोर्यस्य (**शुशोच**) शोचते प्रकाशते॥४॥

अन्वयः-हे राजन्! यद्योऽयं भरतस्याऽग्निरिव सूर्यो न वि रोचते यमहम्प्रप्र शृण्वे यो बृहत्पूरुमभि भा अतिथिरिव दैव्यो द्युतानः पृतनासु तस्थौ स शुशोच तं त्वं सदैव सत्कुर्याः॥४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये राजानः सत्कर्मकर्त्तॄनेव सत्कुर्य्युर्दुष्टाचारान् दण्डयेयुस्त एवसूर्यवत्प्रकाशमाना अतिथिवत्सत्कर्तव्याः सन्तः सर्वदा विजयिनो भूत्वा प्रसिद्धकीर्त्तयो भवन्ति॥४॥

पदार्थः-हे राजपुरुष **(यत्)** जो **(अयम्)** यह **(भरतस्य)** धारण वा पोषण करने वाले के **(अग्निः)** अग्नि के समान वा **(सूर्य, नः)** सूर्य के समान **(वि, रोचते)** विशेष प्रकाशित होता है वा जिसको मैं **(प्रप्र, शृण्वे)** अच्छे प्रकार सुनता हूँ **(यः)** जो **(बृहत्)** बड़े जगत् वा राज्य को तथा **(पूरुम्)** पालक सेनापति को **(अभि, भाः)** सब ओर से प्रकाशित करता है तथा **(अतिथिः)** जाने आने की तिथि जिसकी नियत न हो उसके तुल्य **(दैव्यः)** विद्वानों ने किया विद्वान् **(द्युतानः)** प्रकाशमान **(पृतनासु)** सेनाओं में **(तस्थौ)** स्थित हो वह **(शुशोच)** प्रकाशित होता है, उसका आप सदा सत्कार कीजिये॥४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो राजा लोग सत्कर्म करने वालों का ही सत्कार करें और दुष्टाचारियों को दण्ड देवें वे ही सूर्य के तुल्य प्रकाशमान अतिथियों के

समान सत्कार करने योग्य होते हुए सर्वदा विजयी होकर प्रसिद्ध कीर्त्ति वाले होते हैं॥४॥

पुनः सः राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

असन्नित्त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात॥५॥

असन्। इत्। त्वे इति। आऽहवनानि। भूरि। भुवः। विश्वेभिः। सुऽमनाः। अनीकैः। स्तुतः। चित्। अग्ने। शृण्विषे। गृणानः। स्वयम्। वर्धस्व। तन्वम्। सुऽजात॥५॥

पदार्थः-(**असन्**) भवन्ति (**इत्**) एव (**त्वे**) त्वयि (**आहवनानि**) सत्कारपूर्वकनिमन्त्रणानि (**भूरि**) (**भुवः**) पृथिव्याः (**विश्वेभिः**) समग्रैः (**सुमनाः**) शोभनमनाः (**अनीकैः**) सुशिक्षितैस्सैन्यैः (**स्तुतः**) (**चित्**) अपि (**अग्ने**) विद्वन्राजन् (**शृण्विषे**) (**गृणानः**) स्तुवन् (**स्वयम्**) (**वर्धस्व**) (**तन्वम्**) शरीरम् (**सुजात**) सुष्ठु प्रसिद्ध॥५॥

अन्वयः-हे सुजाताग्ने! त्वे भुवो भूर्याहवनान्यसन् विश्वेभिरनीकैः सुमनाः स्तुतो गृणानः सर्वेषां वाक्यानि [चित्] शृण्विषे स त्वं स्वयमित्तन्वं वर्धस्व॥५॥

भावार्थः-हे राजन्! यदि भवान् प्रशंसितानि धर्म्याणि कार्याण्यकरिष्यत्तर्हि सर्वत्र विजयमानः सन् स्वयं वर्द्धित्वा सर्वाः प्रजा अवर्धयिष्यत्॥५॥

पदार्थः-हे (**सुजात**) सुन्दर प्रकार प्रसिद्ध (**अग्ने**) विद्वन् राजन्! (**त्वे**) आप के निमित्त (**भुवः**) पृथिवी के सम्बन्ध में (**भूरि**) बहुत (**आहवनानि**) सत्कारपूर्वक निमन्त्रण (**असन्**) होते हैं (**विश्वेभिः**) सब (**अनीकैः**) अच्छी शिक्षित सेनाओं के साथ (**सुमनाः**) प्रसन्न चित्त (**स्तुतः**) स्तुति को प्राप्त (**गृणानः**) स्तुति करने वालों के वाक्यों को (**चित्**) भी (**शृण्विषे**) सुनते हैं सो आप (**स्वयमित्**) स्वयमेव (**तन्वम्**) शरीर को (**वर्धस्व**) बढ़ाइये॥५॥

भावार्थः-हे राजन्! यदि आप प्रशंसित धर्मयुक्त कर्मों को करें तो सर्वत्र विजय को प्राप्त होते हुए आप वृद्धि को प्राप्त होके सब प्रजाओं को बढ़ावें॥५॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः।
शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा॥६॥

इदम्। वचः। शतऽसाः। सम्ऽसहस्रम्। उत्। अग्नये। जनिषीष्ट। द्विऽबर्हाः। शम्। यत्। स्तोऽतृभ्यः। आपये। भवाति। द्युऽमत्। अमीवऽचातनम्। रक्षःऽहा॥६॥

पदार्थः-(**इदम्**) (**वचः**) वचनम् (**शतसाः**) यः शतानि सनति विभजति (**सम्, सहस्रम्**) सम्यक्सहस्रम् (**उत्**) (**अग्नये**) पावकायेव (**जनिषीष्ट**) जनयतु (**द्विबर्हाः**) द्वाभ्यां विद्याविनयाभ्यां बर्हः

वर्धनं यस्य सः **(शम्)** सुखम् **(यत्)** **(स्तोतृभ्यः)** स्तावकेभ्यो विद्वद्भ्यः **(आपये)** प्रापकायाऽऽप्ताय **(भवाति)** भवेत् **(द्युमत्)** द्यौः कामना विद्यते यस्य **(अमीवचातनम्)** रोगनाशनम् **(रक्षोहा)** रक्षसां दुष्टानां हन्ता॥६॥

अन्वयः-हे राजञ्छतसा द्विबर्हा रक्षोहा भवानग्नय इदं सं सहस्रं वचो जनिषीष्ट यद् द्युमदमीवचातनं शं स्तोतृभ्य आपय उद्भवाति तदेव सततं साधयतु॥६॥

भावार्थः-हे प्रजाजना! यथा राजा सभेशः सर्वेभ्योः मधुरं वचः उत्तमं सुखं दत्वा दुःखं दूरीकरोति तथैव यूयमपि राज्ञेऽसंख्यान् पदार्थान् दत्वा प्रमादरोगरहितं सम्पादयत॥६॥

पदार्थः-हे राजन्! **(शतसाः)** सौ का विभाग करने **(द्विबर्हाः)** विद्या और विनय से बढ़ने और **(रक्षोहा)** दुष्ट राक्षसों के हिंसा करने वाले आप **(अग्नये)** अग्नि के लिये जैसे, वैसे **(इदम्)** इस **(सम्, सहस्रम्)** सम्यक् सहस्र **(वचः)** वचन को **(जनिषीष्ट)** प्रकट कीजिये **(यत्)** जिस **(द्युमत्)** कामना वाले **(अमीवचातनम्)** रोगनाशरूप **(शम्)** सुख को **(स्तोतृभ्यः)** स्तुतिकर्ता विद्वानों के लिये वा **(आपये)** प्राप्त कराने वाले के लिये **(उद्भवाति)** प्रसिद्ध करते हैं, उसी को निरन्तर सिद्ध करें॥६॥

भावार्थः-हे प्रजाजनो! जैसे सभापति राजा सब के लिये मधुर कोमल वचन और उत्तम सुख देकर दुःख दूर करता है, वैसे ही तुम लोग भी राजा के लिये असंख्य पदार्थों को देकर प्रमाद और रोग रहित करके अधिकरतर धन देओ॥६॥

कीदृशं राजानं प्रजा मन्येरन्नित्याह॥

कैसे पुरुष को प्रजा लोग राजा मानें, इस विषय को अगले मन्त्र में कहते हैं॥

नू त्वाम॑ग्न ईमहे॒ वसि॑ष्ठा ईशा॒नं सू॑नो सहसो॒ वसू॑नाम्।
इष॑ꣳ स्तो॒तृभ्यो॑ म॒घव॑द्भ्य आनड्यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ न:॥७॥ ११॥

नु। त्वाम्। अ॒ग्ने॒। ई॒म॒हे॒। वसि॑ष्ठाः। ई॒शा॒नम्। सू॒नो॒ इति। स॒ह॒सः॒। वसू॑नाम्। इष॑म्। स्तो॒तृऽभ्यः। म॒घव॑त्ऽभ्यः। आ॒न॒ट्। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒॥७॥

पदार्थः-(**नु**) सद्यः **(त्वाम्)** **(अग्ने)** सन्मार्गप्रकाशक **(ईमहे)** याचामहे **(वसिष्ठाः)** अतिशयेन वसुमन्तः **(ईशानम्)** समर्थम् **(सूनो)** अपत्य **(सहसः)** बलवतः **(वसूनाम्)** वासयितॄणाम् **(इषम्)** विज्ञानं धनं वा **(स्तोतृभ्यः)** ऋत्विग्भ्यः **(मघवद्भ्यः)** बहुधनयुक्तेभ्यः **(आनट्)** व्याप्नोषि **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)** अस्मान्॥७॥

अन्वयः-हे सहसस्सूनोऽग्ने! यतस्त्वं स्तोतृभ्य इषं मघवद्भ्य इषमानट् तस्माद्वसिष्ठा वयं वसूनामीशानं त्वां न्वीमहे वयं याँश्च युष्मान् रक्षेम ते यूयं स्वस्तिभिर्नः सदा पात॥७॥

भावार्थः-हे राजन्! भवान् विद्वद्भ्यो वरं वस्तु मघवद्भ्यः प्रतिष्ठां ददाति त्वं भृत्याश्चास्मान् सततं रक्षन्ति तस्माद्भवतां वयं सेवकाः स्म इति॥७॥

अत्राग्निदृष्टान्तेन राजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सहसः)** बलवान् के **(सूनो)** पुत्र **(अग्ने)** सत्य मार्ग के प्रकाशक राजन् पुरुष! जिससे आप **(स्तोतृभ्यः)** ऋत्विजों के लिये **(इषम्)** विज्ञान वा धन को **(मघवद्भ्यः)** बहुत धन वाले के लिये धन वा विज्ञान को **(आनट्)** व्याप्त होते हो इस कारण **(वसिष्ठाः)** अत्यन्त धन वाले हम लोग **(वसूनाम्)** वास के हेतु पृथिव्यादि के **(ईशानम्)** अध्यक्ष **(त्वाम्)** आपको **(नु, ईमहे)** शीघ्र चाहते हैं और हम जिन तुम लोगों की रक्षा करें वे **(यूयम्)** तुम **(स्वस्तिभिः)** कल्याणों से **(नः)** हमारी सदा **(पात)** रक्षा करो॥७॥

भावार्थः-हे राजन्! आप विद्वानों के लिये श्रेष्ठ वस्तु, धनवानों के लिये प्रतिष्ठा देते हो आप और राजपुरुष हमारी निरन्तर रक्षा करते हैं, इसलिये आपके हम सेवक होवें॥७॥

इस सूक्त में अग्नि के दृष्टान्त से राजा के कर्त्तव्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह आठवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

अथ षड्चस्य नवमस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १ त्रिष्टुप्। ४, ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ३ भुरिक् पङ्क्तिः। ६ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनः के विद्वांसः सेवनीया इत्याह॥

अब छः ऋचा वाले नवमे सूक्त का आरम्भ है। इसके प्रथम मन्त्र में फिर कौन विद्वान् सेवने योग्य हैं, इस विषय को कहते हैं॥

अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः।
दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु॥ १॥

अबोधि। जारः। उषसाम्। उपऽस्थात्। होता। मन्द्रः। कविऽतमः। पावकः। दधाति। केतुम्। उभयस्य। जन्तोः। हव्या। देवेषु। द्रविणम्। सुकृत्ऽसु॥ १॥

पदार्थः- (**अबोधि**) बोधयति (**जारः**) रात्रेर्जरयिता सूर्यः (**उषसाम्**) प्रातर्वेलानाम् (**उपस्थात्**) समीपात् (**होता**) दाता (**मन्द्रः**) आनन्दयिता (**कवितमः**) विद्वत्तमः (**पावकः**) पवित्रीकरः (**दधाति**) (**केतुम्**) प्रज्ञाम् (**उभयस्य**) इहाऽमुत्र भवस्य (**जन्तोः**) जीवस्य (**हव्या**) होतुमर्हाणि वस्तूनि (**देवेषु**) पृथिव्यादिषु विद्वत्सु वा (**द्रविणम्**) धनं बलं वा (**सुकृत्सु**) पुण्याऽऽत्मसु॥ १॥

अन्वयः-हे मनुष्या! यथा रात्रेर्जारः सूर्य उषसामुपस्थादुभयस्य जन्तोर्हव्या केतुं द्रविणञ्च देवेषु दधाति तथा होता मन्द्रः कवितमः पावको विद्वान् जन्तोर्हव्या सुकृत्सु देवेषु द्रविणं केतुञ्च दधाति स्वयमबोध्यज्ञान् बोधयति तमेवाध्यापकं विद्वांसं सततं सेवध्वम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसो यथा सूर्यो रात्रिं निवार्य्य प्रकाशं जनयति तथाऽविद्यां निवार्य्य विद्यां जनयन्ति ते यथा धार्मिको न्यायाधीशो राजा पुण्यात्मसु प्रेम दधाति तथा शमदमादियुक्तेषु श्रोतृषु प्रीतिं विदध्युः॥ १॥

पदार्थः-हे मनुष्यो! जैसे (**जारः**) रात्रि का नाश करने वाला सूर्य (**उषसाम्**) प्रातःकाल की वेलाओं के (**उपस्थात्**) समीप से (**उभयस्य**) इस लोक परलोक में जाने आने वाले (**जन्तोः**) जीवात्मा के (**हव्या**) होमने योग्य वस्तुओं को (**केतुम्**) बुद्धि को और (**द्रविणम्**) धन वा बल को (**देवेषु**) पृथिव्यादि वा विद्वानों में (**दधाति**) धारण करता है तथा (**होता**) दानशील (**मन्द्रः**) आनन्दाता (**कवितमः**) अति प्रवीण (**पावकः**) पवित्रकर्ता विद्वान् जीव के ग्राह्य वस्तुओं को (**सुकृत्सु**) पुण्यात्मा विद्वानों में धन और बुद्धि का धारण करता स्वयं अज्ञानियों को (**अबोधि**) बोध कराता उसी अध्यापक विद्वान् की निरन्तर सेवा करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् जैसे रात्रि को सूर्य निवारण कर प्रकाश को उत्पन्न करता, वैसे अविद्या का निवारण करके विद्या को प्रकट करते हैं, वे जैसे धर्मात्मा न्यायाधीश राजा पुण्यात्माओं में प्रेम धारण करता है, वैसे शमदमादि युक्त श्रोताओं में प्रीति को विधान करें॥ १॥

पुनः क राजकर्मसु वरा भवन्तीत्याह॥

फिर राज कार्य्यों में कौन लोग श्रेष्ठ होते हैं, इस विषय को अगले मन्त्र में कहते हैं।

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः।
होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम्॥ २॥

सः। सुऽक्रतुः। यः। वि। दुरः। पणीनाम्। पुनानः। अर्कम्। पुरुऽभोजसम्। नः। होता। मन्द्रः। विशाम्। दमूनाः। तिरः। तमः। ददृशे। राम्याणाम्॥ २॥

पदार्थः-(**सः**) (**सुक्रतुः**) सुष्ठुप्रज्ञः (**यः**) (**वि**) (**दुरः**) द्वाराणि (**पणीनाम्**) स्तुत्यव्यवहारकर्तृणाम् (**पुनानः**) पवित्रयन् (**अर्कम्**) अन्नं सत्कर्तव्यं जनं वा (**पुरुभोजसम्**) बहूनां रक्षितारम् (**नः**) अस्माकम् (**होता**) दाता (**मन्द्रः**) आनन्दयिता (**विशाम्**) प्रजानां मध्ये (**दमूनाः**) दमनशीलः (**तिरः**) तिरस्करणे (**तमः**) अन्धकारम् (**ददृशे**) दृश्यते (**राम्याणाम्**) रात्रीणाम्। **राम्येति रात्रिनाम।** (निघं०१.७.२)॥२॥

अन्वयः-हे मनुष्या! यः पणीनां दुरः पुनानो राम्याणां तमस्तिरस्कृत्य सूर्यो ददृशे तथा सुक्रतुरर्कं पुरुभोजसं वि पुनानो नो विशां मन्द्रो होता दमूना अविद्यां तिरस्करोति सोऽस्माकं राजा भवतु॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सभ्या राजानः सूर्यवन्न्यायप्रकाशका अविद्यान्धकारनिवारका दुष्टानां दमनशीला धार्मिकाणां सत्कर्त्तारः सन्तो धर्ममार्गं पुनन्ति त एव सर्वैस्सत्कर्त्तव्या भवन्ति॥२॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**पणीनाम्**) प्रशस्त व्यवहार करनेहारों के (**दुरः**) द्वारों को (**पुनानः**) पवित्र करता हुआ (**राम्याणाम्**) रात्रियों के (**तमः**) अन्धकार का (**तिरः**) तिरस्कार करके सूर्य (**ददृशे**) दीखता है तथा (**सुक्रतुः**) सुन्दर बुद्धि वाला (**अर्कम्**) अन्न वा सत्कार योग्य (**पुरुभोजसम्**) बहुतों के रक्षक मनुष्य को (**वि**) विशेष कर पवित्रकर्ता (**नः**) हमारी (**विशाम्**) प्रजाओं में (**मन्द्रः**) आनन्ददाता (**होता**) दानशील (**दमूनाः**) दमनशील अविद्या का तिरस्कार करता है (**सः**) वह हमारा राजा हो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोमालङ्कार है। जो सभ्य राजा लोग सूर्य के तुल्य न्याय के प्रकाशक, अविद्यारूप अन्धकार के निवारक, दुष्टों का दमन और श्रेष्ठ धार्मिकों का सत्कार करने वाले होते हुए धर्मसम्बन्धी मार्ग को पवित्र करते हैं, वे ही सब को सत्कार करने योग्य होते हैं॥२॥

पुनः कीदृशो विद्वान् पूजनीयोऽस्तीत्याह॥

फिर कैसा विद्वान् पूजनीय होता है, इस विषय को अगले मन्त्र में कहते हैं॥

अमूरः कविरदितिर्विवस्वान्त्सुसंसन्मित्रो अतिथिः शिवो नः।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१ आ विवेश॥ ३॥

अमूरः। कविः। अदितिः। विवस्वान्। सुऽसंसत्। मित्रः। अतिथिः। शिवः। नः। चित्रऽभानुः। उषसाम्। भाति। अग्रे। अपाम्। गर्भः। प्रऽस्वः। आ। विवेश॥ ३॥

पदार्थः-(**अमूरः**) अमूढः। अत्र वर्णव्यत्ययेन ढस्य स्थाने रः। (**कविः**) क्रान्तदर्शनः प्राज्ञः (**अदितिः**) पितेव वर्त्तमानः (**विवस्वान्**) सूर्य इव (**सुसंसत्**) शोभना संसत्सभा यस्य सः (**मित्रः**) सुहृत् (**अतिथिः**) आप्तो विद्वानिव (**शिवः**) मङ्गलकारी (**नः**) अस्माकम् (**चित्रभानुः**) अद्भुतप्रकाशः (**उषसाम्**) प्रभातवेलानाम् (**भाति**) प्रकाशते (**अग्रे**) पुरस्तात् (**अपाम्**) अन्तरिक्षस्य मध्ये (**गर्भः**) गर्भ इव वर्त्तते (**प्रस्वः**) प्रकृष्टाः स्वे स्वकीयजना यस्य सः (**आ विवेश**) आविशेत्॥३॥

अन्वयः-हे मनुष्या! य उषसामग्रे चित्रभानुर्विवस्वानिवापांगर्भ इव प्रस्वः सन् भाति सुसंसन्मित्रोऽमूरः कविरदितिरतिथिरिव नः शिवः सन्नस्मा आ विवेश स एव विद्वान् सर्वैः सत्कर्त्तव्योऽस्ति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो विदुषामग्रगण्यः सूर्य इव सत्यन्यायप्रकाशकोऽविद्यादिदोषरहितो धर्मात्मा विद्वान् पुत्रवत्प्रजाः पालयति स एवाऽतिथिवत्सत्त्कर्तव्यो भवति॥३॥

पदार्थः-हे मनुष्यो! जो (**उषसाम्**) प्रभात वेलाओं के (**अग्रे**) पहिले (**चित्रभानुः**) अद्भुत प्रकाशयुक्त (**विवस्वान्**) सूर्य के समान (**अपाम्**) अन्तरिक्ष के बीच (**गर्भः**) गर्भ के तुल्य वर्त्तमान (**प्रस्वः**) अपने सम्बन्धी उत्तम जनों वाला हुआ (**भाति**) प्रकाशित होता है (**सु, संसत्**) सुन्दर सभा वाला (**मित्रः**) मित्र (**अमूरः**) मूढ़ता रहित (**कविः**) प्रवृत्त बुद्धि वाला पण्डित (**अदितिः**) पिता के तुल्य वर्त्तमान (**अतिथिः**) प्राप्त हुए विद्वान् के तुल्य (**नः**) हमारा (**शिव**) मङ्गलकारी हुआ (**आ, विवेश**) प्रवेश करता है, वही विद्वान् सब को सत्कार करने योग्य होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो विद्वानों में मुखिया, सूर्य के तुल्य सत्य-न्याय का प्रकाशक, अविद्यादि दोषों से रहित, धर्मात्मा, विद्वान्, पुत्र के तुल्य प्रजाओं का पालन करता है, वही अतिथि के तुल्य सत्कार करने योग्य होता है॥३॥

पुनः कः प्रशंसनीयो भवतीत्याह॥

फिर कौन प्रशंसा योग्य होता है, इस विषय को अगले मन्त्र में कहते हैं॥

ईळेन्यो॑ वो॒ मनु॑षो यु॒गेषु॑ समन॒गा अशु॑चज्जा॒तवे॑दाः।
सु॒सं॒दृशा॑ भा॒नुना॒ यो वि॒भाति॒ प्रति॒ गाव॑: समिधा॒नं बु॑धन्त॥४॥

ईळेन्यः। वः। मनुषः। युगेषु। समनऽगाः। अशुचत्। जातऽवेदाः। सुऽसंदृशा। भानुना। यः। विऽभाति। प्रति। गावः। सम्ऽइद्धानम् बुधन्त॥४॥

पदार्थः-(**ईळेन्यः**) स्तोतुमर्हः (**वः**) युष्मान् (**मनुषः**) मननशीलान् (**युगेषु**) बहुषु वर्षेषु (**समनगाः**) यः समनं स-ामं गच्छति सः (**अशुचत्**) शोधयति (**जातवेदाः**) जातविद्यः (**सुसंदृशा**) सुष्ठु सम्यग् दर्शकेन (**भानुना**) किरणेन (**यः**) (**विभाति**) (**प्रति**) (**गावः**) किरणाः (**समिधानम्**) देदीप्यमानम् (**बुधन्त**) बोधयन्ति॥४॥

अन्वयः-हे मनुष्या! य ईळेन्यस्समनगा जातवेदा युगेषु वो मनुषः सुसंदृशा भानुना सूर्य इव विभाति

यथा समिधानं प्रति गावो बुधन्त तथाऽशुचत् स एव नरोत्तमो भवति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्यवच्छुभान् गुणान् ग्राहयित्वा मनुष्यान् प्रकाशयन्ति ते प्रशंसितुं योग्या जायन्ते॥४॥

पदार्थः-हे मनुष्यो! **(यः)** जो **(ईळेन्यः)** स्तुति के योग्य **(समनगाः)** संग्राम को प्राप्त होने वाला **(जातवेदाः)** विद्या को प्राप्त हुआ **(युगेषु)** बहुत वर्षों में **(वः)** तुम **(मनुषः)** मनुष्यों को **(सुसन्दृशा)** अच्छे प्रकार दिखाने वाले **(भानुना)** किरण से सूर्य के समान **(विभाति)** प्रकाशित करता है और जैसे **(समिधानम्)** देदीप्यमान के **(प्रति)** प्रति **(गावः)** किरण **(बुधन्त)** बोध के हेतु होते हैं, वैसे **(अशुचत्)** शुद्ध प्रतीति कराता है, वही मनुष्यों में उत्तम होता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य्य के सदृश शुभ गुणों का ग्रहण कराके मनुष्यों को प्रकाशित करते हैं, वे प्रशंसा करने योग्य होते हैं॥४॥

पुनः के विद्वांसः सङ्गन्तव्याः सन्तीत्याह॥

फिर कौन विद्वान् संगति करने योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

अग्ने॑ याहि दू॒त्यं१॒॑ मा रि॑षण्यो दे॒वाँ अच्छा॑ ब्र॒ह्मकृ॑ता॑ ग॒णेन॑।
सर॑स्वतीं म॒रुतो॑ अ॒श्विना॒पो यक्षि॑ दे॒वान् र॑त्न॒धेया॑य॒ विश्वा॑न्॥५॥

अग्ने॑। याहि। दू॒त्य॑म्। मा। रि॒ष॒ण्यः॒। दे॒वान्। अच्छ॑। ब्र॒ह्म॒ऽकृ॑ता॑। ग॒णेन॑। सर॑स्वतीम्। म॒रुतः॑। अ॒श्विना॑। अ॒पः॒। यक्षि॑। दे॒वान्। र॒त्न॒ऽधेया॑य। विश्वा॑न्॥५॥

पदार्थः-(**अग्ने**) वह्निरिव कार्य्यसाधक **(याहि)** **(दूत्यम्)** दूतस्य कर्म **(मा)** निषेधे **(रिषण्यः)** हिंस्याः **(देवान्)** विदुषश्शुभान् गुणान् वा **(अच्छ)** सम्यक्। अत्र **संहितायामिति** दीर्घः। **(ब्रह्मकृता)** येन ब्रह्म धनमन्नं वा करोति तेन **(गणेन)** समूहेन **(सरस्वतीम्)** विद्यासुशिक्षायुक्तां वाचम् **(मरुतः)** मनुष्यान् **(अश्विना)** अध्यापकोपदेशकौ **(अपः)** कर्माणि **(यक्षि)** सङ्गच्छसे **(देवान्)** विदुषः **(रत्नधेयाय)** रत्नानि धीयन्ते यस्मिँस्तस्मै **(विश्वान्)** समग्रान्॥५॥

अन्वयः-हे अग्ने! त्वं दूत्यं याहि देवान् मा रिषण्यो ब्रह्मकृता गणेन रत्नधेयाय सरस्वतीं मरुतोऽश्विनाऽपो विश्वान् देवान् यतोऽच्छा यक्षि तस्मात् सत्कर्त्तव्योऽसि॥५॥

भावार्थः-हे मनुष्या! यथाऽग्निना दूतेन विद्वांसो बहूनि कार्याणि साध्नुवन्ति तथा कार्यसिद्धिं कृत्वा कञ्चन मा हिंसत पदार्थविद्यया धनेन धान्येन वा कोशान् प्रपूर्य्य सर्वान् सुखयत॥५॥

पदार्थः-हे **(अग्ने)** वह्नि के तुल्य कार्य सिद्ध करनेहारे विद्वन्! आप **(दूत्यम्)** दूत के कर्म को **(याहि)** प्राप्त हूजिये **(देवान्)** विद्वानों वा शुभ गुणों को **(मा)** मत **(रिषण्यः)** नष्ट कीजिये **(ब्रह्मकृता)** जिससे धन वा अन्न को उत्पन्न करते **(गणेन)** उस सामग्री के समुदाय से **(रत्नधेयाय)** रत्नों का जिसमें धारण हो उसके लिये **(सरस्वतीम्)** विद्याशिक्षायुक्त वाणी का **(मरुतः)** मनुष्यों का **(अश्विना)** अध्यापक और उपदेशकों के **(अपः)** कर्मों का और **(विश्वान्)** सब **(देवान्)** विद्वानों का जिस कारण **(अच्छा)** अच्छे प्रकार **(यक्षि)** संग करते हैं, इससे सत्कार करने योग्य है॥५॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् लोग अग्निरूप दूत से बहुत कार्य्यों को सिद्ध करते हैं, वैसे कार्य को सिद्धि करके किसी को मत मारो, पदार्थविद्या, धन वा धान्य से कोश को पूर्ण कर सब को सुखी करो॥५॥

पुनस्ते विद्वांसः किं कुर्य्युरित्याह॥

फिर वे विद्वान् क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वामग्ने समिधानो वसिष्ठो जरूथं हन् यक्षि राये पुरंधिम्॥
पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः॥६॥१२॥

त्वाम्। अग्ने। सम्ऽइधानः। वसिष्ठः। जरूथम्। हन्। यक्षि। राये। पुरम्ऽधिम्। पुरुऽनीथा। जातऽवेदः। जरस्व। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥६॥

पदार्थः-(**त्वाम्**) विद्वांसम् (**अग्ने**) वह्निवद्विद्यादिगुणप्रकाशित (**समिधानः**) सम्यक् प्रकाशमानः (**वसिष्ठः**) अतिशयेन धनाढ्यः (**जरूथम्**) जरावस्थया युक्तम् (**हन्**) हन्ति (**यक्षि**) सङ्गच्छे (**राये**) धनाय (**पुरन्धिम्**) यो बहून् दधाति तम् (**पुरुणीथा**) पुरुन्नयन्ति येषु तानि धर्म्यकर्माणि (**जातवेदः**) जातविज्ञान (**जरस्व**) प्रशंस (**यूयम्**) उपदेशकाः (**पात**) रक्षत (**स्वस्तिभिः**) सुखैः (**सदा**) सर्वस्मिन् काले (**नः**) अस्मान्॥६॥

अन्वयः-हे जातवेदोऽग्ने! यथा समिधानो वसिष्ठो जरूथं जीर्णे मेघं हँस्तथा सुसभ्यं पुरन्धिं त्वां रायेऽहं यक्षि यूयं स्वस्तिभिर्नः सदा पात पुरुणीथा जरस्व॥६॥

भावार्थः-ये सराजकाः सभ्याः सूर्यो मेघमिवाऽविद्यां दुष्टाचाराँश्च घ्नन्ति सर्वान् धर्म्यमार्गं नयन्ति ते सर्वेषां यथावद्रक्षका भवन्ति॥६॥

अत्राग्निदृष्टान्तेन विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति नवमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे (**जातवेदः**) विज्ञान को प्राप्त (**अग्ने**) अग्नि के तुल्य विद्यादि गुणों से प्रकाशित विद्वन्! जैसे (**समिधानः**) सम्यक् प्रकाशमान (**वसिष्ठः**) अत्यन्त धनी (**जरूथम्**) शिथिलावस्था से युक्त जीर्ण मेघ को (**हन्**) हनन करता है, वैसे सुन्दर सभा के योग्य (**पुरन्धिम्**) बहुतों को धारण करने वाले (**त्वाम्**) आप विद्वान् का (**राये**) धन प्राप्ति के लिये मैं (**यक्षि**) सङ्ग करता हूँ (**यूयम्**) तुम लोग (**स्वस्तिभिः**) सुख साधनों से (**नः**) हमारी (**सदा**) सदा (**पात**) रक्षा करो और (**पुरुनीथा**) बहुतों को प्राप्त होने वाले धर्मयुक्त कर्मों की (**जरस्व**) प्रशंसा करो॥६॥

भावार्थः-जो राजा के सहित सभ्य लोग, सूर्य मेघ को जैसे, वैसे अविद्या और दुष्टाचारों का नाश करते हैं, सब को धर्मयुक्त मार्ग को प्राप्त कराते, वे सब के यथावत् रक्षक होते हैं॥६॥

इस सूक्त में अग्नि के दृष्टान्त से विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह नववां सूक्त और बारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य दशमस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, २, ३ निचृत्त्रिष्टुप्। ४, ५ त्रिष्टुप् छन्दः। धैवतः स्वरः।

अथ विद्वान् किंवत्किं कुर्य्यादित्याह॥

अब पांच ऋचा वाले दशवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में अब विद्वान् किसके तुल्य क्या करे, इस विषय को कहते हैं॥

उ॒षो न जा॒रः पृ॒थु पाजो॑ अश्रे॒द्दवि॑द्युत॒द्दीद्य॒च्छोशु॑चानः।
वृ॒षा हरि॒: शुचि॒रा भा॑ति भा॒सा धियो॑ हि॒न्वा॒न उ॑श॒तीर॑जीगः॥ १॥

उ॒षः। न। जा॒रः। पृ॒थु। पाजः॑। अ॒श्रे॒त्। दवि॑द्युतत्। दीद्य॑त्। शोशु॑चानः। वृ॒षा॑। हरि॑:। शुचि॑:। आ। भा॒ति॒। भा॒सा। धिय॑:। हि॒न्वा॒नः। उ॒श॒ती:। अ॒जी॒ग॒रिति॑॥ १॥

पदार्थः- (**उषः**) प्रभातवेला (**न**) इव (**जारः**) जरयिता (**पृथु**) विस्तीर्णम् (**पाजः**) अन्नादिकम् (**अश्रेत्**) श्रयति (**दविद्युतत्**) विद्योतयति (**दीद्यत्**) दीप्यते (**शोशुचानः**) शुद्धः संशोधकः (**वृषा**) वृष्टिकर्त्ता (**हरिः**) हरणशीलः (**शुचिः**) पवित्रः (**आ भाति**) प्रकाशयते (**भासा**) दीप्त्या (**धियः**) कर्माणि प्रज्ञाश्च (**हिन्वानः**) वर्धयन् (**उशतीः**) काम्यमानाः (**अजीगः**) जागारयति॥ १॥

अन्वयः-हे विद्वन्! यथा जारो न शोशुचानो वृषा हरिरुशतीर्धियोहिन्वानोऽग्निरजीगो भासा सर्वमा भाति पृथु पाजोऽश्रेत् सर्वं दविद्युतदुषइव शुचिः स्वयं दीद्यत्तथा त्वं विधेहि॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यथा सुशिक्षिता विद्वांसः कार्याणि यथावत्साध्नुवन्ति तथैव विद्युदादयः पदार्थाः सम्प्रयुक्ताः सन्तः सर्वान् व्यवहारान् सम्पादयन्ति॥ १॥

पदार्थः-हे विद्वन् जैसे (**जारः**) जीर्ण करनेहारे के (**न**) तुल्य (**शोशुचानः**) शुद्ध संशोधक (**वृषा**) वृष्टिकर्त्ता (**हरिः**) हरणशील (**उशतीः**) कामना किये जाते (**धियः**) कर्मों वा बुद्धियों को (**हिन्वानः**) बढ़ाता हुआ अग्नि (**अजीगः**) जगाता है (**भासा**) दीप्ति से सब को (**आ, भाति**) प्रकाशित करता है (**पृथु**) विस्तृत (**पाजः**) अन्नादि का (**अश्रेत्**) आश्रय करता है, सब को (**दविद्युतत्**) प्रकट करता है (**उषः**) प्रभातवेला के तुल्य (**शुचिः**) पवित्र स्वयं (**दीद्यत्**) प्रकाशित होता है, वैसे आप कीजिये॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जैसे उत्तम शिक्षा को प्राप्त विद्वान् यथावत् कार्य्यों को सिद्ध करते, वैसे ही विद्युत् आदि पदार्थ सम्प्रयोग में लाये हुए सब व्यवहारों को सिद्ध करते हैं॥ १॥

पुनः स विद्वान् कीदृशः कि कुर्यादित्याह॥

फिर वह विद्वान् कैसा हो क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

स्व॑र्ण॒ वस्तो॑रुषसा॑मरोचि य॒ज्ञं त॑न्वा॒ना उ॒शिजो॒ न मन्म॑।
अ॒ग्निर्ज॒न्मा॑नि दे॒व आ वि विद्वान् द्र॒वद्दू॒तो दे॑व॒यावा॒ वनि॑ष्ठः॥ २॥

स्व॑:। न। वस्तो॑:। उ॒ष॒सा॑म्। अ॒रो॒चि॒। य॒ज्ञम्। त॒न्वा॒नाः। उ॒शिजः। नः। मन्म॑। अ॒ग्निः। ज॒न्मा॑नि।

देवः। आ। वि। विद्वान्। द्रवत्। दूतः। देवऽयावा। वनिष्ठः॥२॥

पदार्थः-(**स्वः**) आदित्यः (**न**) इव (**वस्तोः**) दिनस्य (**उषसाम्**) प्रभातवेलानाम् (**अरोचि**) प्रकाशते (**यज्ञम्**) सङ्गन्तव्यं व्यवहारम् (**तन्वानाः**) विस्तृणन्तः (**उशिजः**) कामयमाना ऋत्विजः (**न**) इव (**मन्म**) मन्तव्यं विज्ञानम् (**अग्निः**) पावक इव (**जन्मानि**) (**देवः**) देदीप्यमानः कामयमानो वा (**आ**) (**वि**) (**विद्वान्**) (**द्रवत्**) धावन् (**दूतः**) समाचारदाता (**देवयावा**) यो देवान् दिव्यगुणान् याति प्राप्नोति (**वनिष्ठः**) अतिशयेन संविभाजकः॥२॥

अन्वयः-हे मनुष्या! यो विद्युदग्निः स्वर्णवस्तोरुषसां सम्बन्धेऽरोचि यज्ञं तन्वाना उशिजो न देवो विद्वान्मन्म जन्मानि व्याद्रवद्दूतो वनिष्ठो देवयावाग्निरिव सद्व्यवहारानरोचि तं विपश्चितं सततं सेवध्वम्॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये जिज्ञासवो विद्वद्भ्यः शिक्षां प्राप्य विधिक्रियाभ्यां वह्न्यादिभ्यः पदार्थेभ्योऽविशिष्टान् व्यवहारान् साध्नुवन्ति ते सिद्धश्रियो जायन्ते॥२॥

पदार्थः-हे मनुष्यो! जो (**अग्निः**) विद्युत् अग्नि (**स्वः, न**) आदित्य के समान (**वस्तोः**) दिवस और (**उषसाम्**) प्रभातवेलाओं के सम्बन्ध में (**अरोचि**) रुचि करता है वा प्रकाशित होता (**यज्ञम्**) संगति योग्य व्यवहार को (**तन्वानाः**) विस्तृत करते और (**उशिजः**) कामना करते हुए के (**नः**) तुल्य (**देवः**) प्रकाशयुक्त कामना करता हुआ (**विद्वान्**) विद्वान् (**मन्म**) मानने योग्य विज्ञान और (**जन्मानि**) जन्मों को (**वि, आ, द्रवत्**) विशेष कर अच्छा शुद्ध करता हुआ (**दूतः**) समाचार पहुँचाने वाला (**वनिष्ठः**) अत्यन्त विभागकर्ता (**देवयावा**) दिव्य उत्तम गुणों को प्राप्त होने वाला अग्नि के तुल्य श्रेष्ठ व्यवहारों को प्रकाशित करता उस विद्वान् पुरुष की निरन्तर सेवा करो॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो जिज्ञासु विद्वानों से शिक्षा को प्राप्त होके विधि और क्रिया से अग्नि आदि पदार्थों से समस्त व्यवहारों को सिद्ध करते हैं, वे प्रसिद्ध धनवान् होते हैं॥२॥

पुनः स्त्रीपुरुषाः किंवद्भूत्वा कथं स्वीकुर्य्युरित्याह॥

फिर स्त्रीपुरुष किसके तुल्य होकर कैसे स्वीकार करें, इस विषय को अगले मन्त्र में कहते हैं॥

अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः।
सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणाम्॥३॥

अच्छ। गिरः। मतयः। देवऽयन्तीः। अग्निम्। यन्ति। द्रविणम्। भिक्षमाणाः। सुऽसंदृशम्। सुऽप्रतीकम्। सुऽअञ्चम्। हव्यऽवाहम्। अरतिम्। मानुषाणाम्॥३॥

पदार्थः-(**अच्छा**) सम्यक्। अत्र **संहितायामिति** दीर्घः। (**गिरः**) विद्यायुक्ता वाचः (**मतयः**) प्रज्ञा इव वर्त्तमानाः कन्याः (**देवयन्तीः**) देवान्विदुषः पतीन् कामयमानाः (**अग्निम्**) विद्युद्विद्याम् (**यन्ति**) प्राप्नुवन्ति (**द्रविणम्**) धनं यशो वा (**भिक्षमाणाः**) याचमानाः (**सुसन्दृशम्**) सुष्ठु संद्रष्टव्यम् (**सुप्रतीकम्**) सुष्ठु प्रत्येति येन तम् (**स्वञ्चम्**) यः, सुष्ठ्वञ्चति तम् (**हव्यवाहम्**) यो हव्यानि वहति तम्

(अरतिम्) सर्वत्र प्राप्तम् **(मानुषाणाम्)** मनुष्याणां सकाशात्॥३॥

अन्वयः-हे मनुष्या! याः कन्या मतय इव गिरोऽच्छ देवयन्तीः सुसन्दृशं सुप्रतीकं स्वञ्चं मानुषाणां हव्यवाहमरतिं द्रविणं भिक्षमाणा अग्निं यन्ति ता एव वरणीया भवन्ति॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कन्या दीर्घब्रह्मचर्येण विदुष्यः सत्योऽग्न्यादिविद्यां प्राप्य पुरुषाणां मध्यादुत्तममुत्तमं पतिं याचमानाः स्वाभीष्टं स्वाभीष्टं स्वामिनं प्राप्नुवन्ति तथैव पुरुषैरपि स्वेष्टा भार्याः प्राप्तव्याः॥३॥

पदार्थः-हे मनुष्यो! जो कन्या **(मतयः)** बुद्धि के तुल्य वर्त्तमान **(गिरः)** विद्यायुक्त वाणियों और **(अच्छा)** अच्छे प्रकार **(देवयन्तीः)** पतियों की कामना करती हुई **(सुसन्दृशम्)** अच्छे प्रकार देखने योग्य **(सुप्रतीकम्)** सुन्दर प्रतीति के साधन **(स्वञ्चम्)** सुन्दर प्रकार पूजने योग्य **(मानुषाणाम्)** मनुष्यों के सम्बन्ध से **(हव्यवाहम्)** होमने योग्य पदार्थों को देशान्तर पहुँचाने वाले **(अरतिम्)** सर्वत्र प्राप्त होने वाले **(द्रविणम्)** धन वा यश को **(भिक्षमाणाः)** चाहती हुई **(अग्निम्)** विद्युत् की विद्या को **(यन्ति)** प्राप्त होती हैं, वे ही विवाहने योग्य होती हैं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे कन्या दीर्घ ब्रह्मचर्य के साथ विदुषी हो और अग्नि आदि की विद्या को प्राप्त हो के पुरुषों में से उत्तम उत्तम पतियों को चाहती हुई अपने-अपने अभीष्ट स्वामी को प्राप्त होती हैं, वैसे पुरुषों को भी अपने अनुकूल स्त्रियों को प्राप्त होना चाहिये॥३॥

को विद्वान् सततं सेवनीय इत्याह॥

कौन विद्वान् निरन्तर सेवने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रं॑ नो अग्ने॒ वसु॑भिः सु॒जोषा॑ रु॒द्रं रु॒द्रेभि॒रा व॑हा बृ॒हन्त॑म्।
आ॒दि॒त्येभि॒रदि॑तिं वि॒श्वज॑न्यां बृ॒हस्पति॒मृक्व॑भिर्वि॒श्ववा॑रम्॥४॥

इन्द्र॑म्। नः॒। अ॒ग्ने॒। वसु॑ऽभिः। सु॒ऽजोषा॑ः। रु॒द्रम्। रु॒द्रेभि॑ः। आ। व॒ह॒। बृ॒हन्त॑म्। आ॒दि॒त्येभि॑ः। अदि॑तिम्। वि॒श्वऽज॑न्याम्। बृ॒हस्पति॑म्। ऋक्व॑ऽभिः। वि॒श्वऽवा॑रम्॥४॥

पदार्थः-(**इन्द्रम्**) विद्युतम् (**नः**) अस्माकम् (**अग्ने**) पावक इव विद्वन् (**वसुभिः**) पृथिव्यादिभिः (**सजोषाः**) समानसेवी (**रुद्रम्**) जीवात्मानम् (**रुद्रेभिः**) प्राणैस्सह (**आ वहा**) समन्तात्प्रापय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**बृहन्तम्**) महान्तम् (**आदित्येभिः**) संवत्सरस्य मासैः (**अदितिम्**) अखण्डितां कालविद्याम् (**विश्वजन्याम्**) विश्वं जन्यं यया ताम् (**बृहस्पतिम्**) बृहत्या ऋग्वेदादिवेवाचः पालकं परमात्मानम् (**ऋक्वभिः**) ऋग्वेदादिभिः (**विश्ववारम्**) सर्वैर्वरणीयम्॥४॥

अन्वयः-हे अग्ने! सजोषास्त्वं नो वसुभिः रुद्रेभिर्बृहन्तं रुद्रमादित्येभिर्विश्वजन्यामदितिमृक्वभिर्विश्ववारं बृहस्पतिमा वहा॥४॥

भावार्थः-यो हि पृथिव्यादिविद्यया सह विद्युद्विद्यां प्राणविद्यया सह जीवविद्यां कालविद्यया सह प्रकृतिविज्ञानं वेदविद्यया परमात्मान ज्ञापयितुं शक्नोति तमेव सर्वे विद्यार्थमाश्रयन्तु॥४॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य तेजस्वी विद्वन् **(सजोषाः)** तुल्य सेवनकर्त्ता आप **(नः)** हमारे लिये **(वसुभिः)** पृथिव्यादि के साथ **(इन्द्रम्)** विद्युत् अग्नि को **(रुद्रेभिः)** प्राणों के साथ **(बृहन्तम्)** बड़े **(रुद्रम्)** जीवात्मा को **(आदित्येभिः)** बारह महीनों से **(विश्वजन्याम्)** संसारोत्पत्ति की हेतु **(अदितिम्)** अखण्डित कालविद्या को और **(ऋक्वभिः)** ऋग्वेदादि से **(विश्ववारम्)** सब के स्वीकार करने योग्य **(बृहस्पतिम्)** बड़ी ऋग्वेदादि वाणी के रक्षक परमात्मा को **(आ, वहा)** अच्छे प्रकार प्राप्त कीजिये॥४॥

भावार्थः-जो ही पृथिव्यादि विद्या के साथ बिजुली की विद्या को, प्राणविद्या के साथ जीवविद्या को, कालविद्या के साथ प्रकृति के विज्ञान को और वेदविद्या से परमात्मा के विज्ञान कराने को समर्थ होता है, उसी का सब लोग विद्या प्राप्ति के लिये आश्रय करें॥४॥

मनुष्याः कस्यान्वेषणं प्रत्यहं कुर्युरित्याह॥

मनुष्य प्रतिदिन किस का खोज करें, इस विषय को अगले मन्त्र में कहते हैं॥

मन्द्रं होतारमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु।
स हि क्षपावाँ अभवद्रयीणामतन्द्रो दूतो यजथाय देवान्॥५॥१३॥

मन्द्रम्। होतारम्। उशिजः। यविष्ठम्। अग्निम्। विशः। ईळते। अध्वरेषु। सः। हि। क्षपाऽवान्। अभवत्। रयीणाम्। अतन्द्रः। दूतः। यजथाय। देवान्॥५॥

पदार्थः-**(मन्द्रम्)** आनन्दकरम् **(होतारम्)** दातारम् **(उशिजः)** कामयमानाः **(यविष्ठम्)** अतिशयेन युवानमिव **(अग्निम्)** पावकम् **(विशः)** प्रजाः **(ईळते)** स्तुवन्त्यन्विच्छन्ति वा **(अध्वरेषु)** अग्निहोत्रादिक्रियामयव्यवहारेषु **(सः)** **(हि)** एव **(क्षपावान्)** बह्व्यः क्षपा रात्रयो विद्यन्ते यस्मिन् सः **(अभवत्)** भवति **(रयीणाम्)** द्रव्याणाम् **(अतन्द्रः)** अनलसः **(दूतः)** दूत इव **(यजथाय)** सङ्गमनाय **(देवान्)** दिव्यगुणान्॥५॥

अन्वयः-हे मनुष्या! यमध्वरेषु मन्द्रं होतारं यविष्ठमिवाग्निमुशिजो विश ईळते स हि क्षपावानतन्द्रो दूत इव रयीणां यजथाय देवान् प्रापयितुं समर्थोऽभवत्॥५॥

भावार्थः-योऽग्निर्दूतवत्सर्वासां विद्यानां सङ्गमयिता वर्त्तते तं सर्वे मनुष्या अन्विच्छन्तु यतस्सर्वशुभगुणलाभः स्यादिति॥५॥

अत्राऽग्निविद्वद्विदुषीकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति दशमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो जिसको **(अध्वरेषु)** अग्निहोत्रादिक्रियारूप व्यवहारों में **(मन्द्रम्)** आनन्दकारी **(होतारम्)** दाता **(यविष्ठम्)** अतिजवान के तुल्य **(अग्निम्)** अग्नि की **(उशिजः)** कामना

करते हुए **(विशः)** प्रजाजन **(ईळते)** स्तुति वा खोज करते हैं **(सः, हि)** वही **(क्षपावान्)** बहुत रात्रियों वाला **(अतन्द्रः)** आलस्यरहित **(दूतः)** दूत के समान **(रयीणाम्)** द्रव्यों की **(यजथाय)** प्राप्ति के लिये **(देवान्)** दिव्यगुणों के प्राप्त करने को समर्थ **(अभवत्)** होता है॥५॥

भावार्थः-जो अग्नि, दूत के तुल्य सब विद्याओं का संग करने वाला होता है उसका सब मनुष्य खोज करें, जिससे सब गुणों की प्राप्ति हो॥५॥

इस सूक्त में अग्नि, विद्वान् और विदुषी के कर्त्तव्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये।

यह दशवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्यैकादशस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १ स्वराट् पङ्क्तिः। २, ४ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३ विराट् त्रिष्टुप्। ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्या क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह॥ १॥

महान्। असि। अध्वरस्य। प्रऽकेतः। न। ऋते। त्वत्। अमृताः। मादयन्ते। आ। विश्वेभिः। सऽरथम्। याहि। देवैः। नि। अग्ने। होता। प्रथमः। सदः। इह॥ १॥

पदार्थः-(**महान्**) (**असि**) (**अध्वरस्य**) सर्वव्यवहारस्य (**प्रकेतः**) प्रकृष्टप्रज्ञावान् प्रज्ञापकः (**न**) निषेधे (**ऋते**) (**त्वत्**) (**अमृताः**) नाशरहिता जीवाः (**मादयन्ते**) आनन्दयन्ति (**आ**) (**विश्वेभिः**) सर्वैः (**सरथम्**) रमणीयेन स्वरूपेण सह वर्त्तमानम् (**याहि**) समन्तात्प्राप्नुहि (**देवैः**) विद्वद्भिः सह (**नि**) (**अग्ने**) स्वप्रकाशस्वरूप जगदीश्वर (**होता**) विद्यादिशुभगुणदाता (**प्रथमः**) आदिमः (**सद**) सीद (**इह**)॥ १॥

अन्वयः-हे अग्ने! त्वमिह विश्वेभिर्देवैः सह प्रथमो होताऽस्मान् सरथं न्यायाहि यतस्त्वदृतेऽमृता न मादयन्ते तस्मात्त्वं सद त्वमध्वरस्य महान् प्रकेतोऽसि॥ १॥

भावार्थः-हे मनुष्या! येन विना न विद्या न सुखं लभ्यते यो विद्वत्सङ्गयोगाभ्यासधर्माचरणैः प्राप्योऽस्ति तमेव जगदीश्वरं सदोपाध्वम्॥ १॥

पदार्थः-हे (**अग्ने**) स्वप्रकाशस्वरूप जगदीश्वर आप (**इह**) इस जगत् में (**विश्वेभिः**) सब (**देवैः**) विद्वानों के साथ (**प्रथमः**) पहिले (**होता**) विद्यादि शुभगुणों के दाता हमको (**सरथम्**) रथ सहित (**नि, आ, याहि**) निरन्तर प्राप्त हूजिये जिस कारण (**त्वत्**) आप से (**ऋते**) भिन्न (**अमृताः**) नाशरहित जीव (**न**) नहीं (**मादयन्ते**) आनन्द करते हैं इससे आप (**सद**) स्थिर हूजिये आप (**अध्वरस्य**) सब व्यवहार के (**महान्**) बड़े (**प्रकेतः**) उत्तमबुद्धि के प्रकाशक (**असि**) हैं॥ १॥

भावार्थः-हे मनुष्यो! जिसके विना न विद्या, न सुख प्राप्त होता है, जो विद्वानों का सङ्ग, योगाभ्यास और धर्माचरण से प्राप्त होने योग्य है, उसी जगदीश्वर की सदा उपासना करो॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति॥ २॥

त्वाम्। ईळते। अजिरम्। दूत्याय। हविष्मन्तः। सदम्। इत्। मानुषासः। यस्य। देवैः। आ। असदः। बर्हिः। अग्ने। अहानि। अस्मै। सुऽदिना। भवन्ति॥ २॥

पदार्थः-(**त्वाम्**) (**ईळते**) स्तुवन्ति (**अजिरम्**) प्रक्षेप्तारम् (**दूत्याय**) दूतकर्मणे (**हविष्मन्तः**) प्रशस्तसामग्रीयुक्ताः (**सदम्**) यः सीदति तम् (**इत्**) एव (**मानुषासः**) मनुष्याः (**यस्य**) (**देवैः**) विद्वद्भिः (**आ**) (**असदः**) प्राप्तव्यम् (**बर्हिः**) उत्तमं वर्धकं विज्ञानम् (**अग्ने**) पावक इव स्वप्रकाशेश्वर (**अहानि**) दिनानि (**अस्मै**) विदुषे (**सुदिना**) शोभनानि दिनानि येषु तानि (**भवन्ति**)॥२॥

अन्वयः-हे अग्ने! यस्य ते देवैरासदो बर्हिः प्राप्यते अस्मै तेऽहानि सुदिना भवन्ति यथा हविष्मन्तो मानुषासो दूत्याय सदमिदजिरमग्निमीळते तथैते त्वामित्सततं स्तुवन्तु॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सामग्रीमन्तोऽग्निविद्यां प्राप्य सततमानन्दिता भवन्ति तथैवेश्वरं प्राप्य सततं श्रीमन्तो जायन्ते॥२॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य स्वयंप्रकाशस्वरूप ईश्वर (**यस्य**) जिस आप के (**देवैः**) विद्वानों से (**आ, असदः**) प्राप्त होने योग्य (**बर्हिः**) सुखवर्द्धक विज्ञान प्राप्त होता है (**अस्मै**) इस विद्वान् के लिये आप के (**अहानि**) दिन (**सुदिना**) सुदिन (**भवन्ति**) होते हैं जैसे (**हविष्मन्तः**) प्रशस्त सामग्री वाले (**मानुषासः**) मनुष्य (**दूत्याय**) दूतकर्म के लिये (**सदम्, इत्**) स्थिर होने वाले (**अजिरम्**) फैंकने हारे अग्नि की (**ईळते**) स्तुति करते हैं, वैसे ये लोग (**त्वाम्**) आपकी निरन्तर स्तुति करें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सामग्री वाले अग्निविद्या को प्राप्त होके निरन्तर आनन्दित होते हैं, वैसे ईश्वर को प्राप्त होके निरन्तर श्रीमान् होते हैं॥२॥

कस्मिन् सति मनुष्या दिव्यान् गुणान् प्राप्नुवन्तीत्याह॥

किसके होने पर मनुष्य उत्तम गुण को प्राप्त होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

त्रिश्चिद्धि दक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय।
मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा॥३॥

त्रिः। चित्। अक्तोः। प्र। चिकितुः। वसूनि। त्वे इति। अन्तः। दाशुषे। मर्त्याय। मनुष्वत्। अग्ने। इह। यक्षि। देवान्। भव। नः। दूतः। अभिशस्तिनपावा॥३॥

पदार्थः-(**त्रिः**) त्रिवारम् (**चित्**) अपि (**अक्तोः**) रात्रेः (**प्र**) (**चिकितुः**) विजानन्ति (**वसूनि**) द्रव्याणि (**त्वे**) त्वयि (**अन्तः**) मध्ये (**दाशुषे**) दात्रे (**मर्त्याय**) मनुष्याय (**मनुष्वत्**) मनुष्यैस्तुल्यम् (**अग्ने**) विद्वन् (**इह**) (**यक्षि**) यजसि (**देवान्**) विदुषः (**भव**) (**नः**) अस्माकम् (**दूतः**) दूत इव (**अभिशस्तिपावा**) प्रशंसितानां पालकः पवित्रकरः॥३॥

अन्वयः-हे अग्ने! त्वेऽन्तर्दाशुषे मर्त्याय वसून्यक्तोश्चित् त्रिः विद्वांसः प्रचिकितुस्त्वमिह मनुष्वद् देवान् यक्षि त्वं नो दूतइवाभिशस्तिपावा भव॥३॥

भावार्थः-यस्य सङ्गेन मनुष्यान् दिव्या गुणाः पुष्कलानि धनानि च प्राप्नुवन्ति तमेवेह स्तुत्वा यो दूतवत्परोपकारी भवति स सर्वानिह सत्यं प्रज्ञापयितुं शक्नोति॥३॥

पदार्थः-हे (**अग्ने**) विद्वन्! (**त्वे**) आपके (**अन्तः**) बीच (**दाशुषे**) दानशील (**मर्त्याय**) मनुष्य के लिये (**वसूनि**) द्रव्यों को (**अक्तोः**) रात्रि के सम्बन्ध में (**चित्**) भी (**त्रिः**) तीन वार विद्वान् (**प्र,**

चिकितुः) जानते हैं आप **(इह)** इस जगत् में **(मनुष्वत्)** मनुष्यों के तुल्य **(देवान्)** विद्वानों का **(यक्षि)** सत्कार कीजिये **[**आप**]** **(नः)** हमारे **(दूतः)** दूत के समान **(अभिशस्तिपावा)** प्रशंसितों के रक्षक पवित्रकारी **(भव)** हूजिये॥३॥

भावार्थः-जिसके संग से मनुष्यों को दिव्य गुण और पुष्कल धन प्राप्त होते हैं, इस जगत् में उसी की स्तुति कर जो दूत के तुल्य परोपकारी होता है, वह सब को सत्य जताने को समर्थ होता है॥३॥

कस्य विद्ययाऽभीष्टं प्राप्तव्यमित्याह॥

किसकी विद्या से अभीष्ट प्राप्त करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य।
क्रतुं ह्यस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम्॥४॥

अग्निः। ईशे। बृहतः। अध्वरस्य। अग्निः। विश्वस्य। हविषः। कृतस्य। क्रतुम्। हि। अस्य। वसवः। जुषन्त। अथ। देवाः। दधिरे। हव्यऽवाहम्॥४॥

पदार्थः-(**अग्निः**) विद्युत् **(ईशे)** ईष्टे **(बृहतः)** महतः **(अध्वरस्य)** अहिंसनीयस्य व्यवहारस्य **(अग्निः)** **(विश्वस्य)** समग्रस्य **(हविषः)** सङ्क्तुमर्हस्य **(कृतस्य)** शुद्धस्य **(क्रतुम्)** प्रज्ञाम् **(हि)** खलु **(अस्य)** **(वसवः)** **(जुषन्त)** सेवन्ते **(अथा)** अनन्तरम्। अत्र **निपातस्य चे**ति दीर्घः। **(देवाः)** विद्वांसः **(दधिरे)** दधति। **(हव्यवाहम्)** यो हव्यान्यादातुमर्हाणि वहति प्राप्नोति॥४॥

अन्वयः-अग्निर्बृहतोऽध्वरस्येशे योऽग्निः कृतस्य विश्वस्य हविष ईशेऽस्य हि सङ्क्तेन ये वसवो देवाः क्रतुं हि जुषन्ताऽथा हव्यवाहं दधिरे ते हि जगत्पूज्या जायन्ते॥४॥

भावार्थः-हे मनुष्या! या विद्युन्महान्ति कार्याणि साध्नोति यस्य सकाशाद्योगाभ्यासेन प्रज्ञां प्राप्नोति तमेवाग्निं सर्वे युक्त्या परिचरन्तु॥४॥

पदार्थः-(**अग्निः**) विद्युत् अग्नि **(बृहतः)** बड़े **(अध्वरस्य)** रक्षा योग्य व्यवहार के करने को **(ईशे)** समर्थ है **(अग्निः)** अग्नि **(कृतस्य)** शुद्ध **(विश्वस्य)** सब **(हविषः)** संग करने योग्य व्यवहार के लिये समर्थ है **(अस्य)** इस अग्नि के संग से जो **(वसवः)** चौबीस वर्ष ब्रह्मचर्य्य करने वाले प्रथम कक्षा **(देवाः)** विद्वान् जन **(क्रतुम्)** बुद्धि का **(हि)** ही **(जुषन्त)** सेवन करते हैं **(अथा)** इसके अनन्तर **(हव्यवाहम्)** ग्रहण करने योग्य वस्तुओं को प्राप्त करने वाले अग्नि को **(दधिरे)** धारण करते हैं, वे ही जगत् में पूज्य होते हैं॥४॥

भावार्थः-हे मनुष्यो! जो विद्युत् बड़े-बड़े कार्य्यों को सिद्ध करती, जिसके सम्बन्ध से योगाभ्यास कर के मनुष्य बुद्धि को प्राप्त होता, उसी अग्नि का सब लोग युक्ति से सेवन करें॥४॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

आग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम्।

इ॒मं य॒ज्ञं दि॒वि दे॒वेषु॑ धेहि यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ न:॥५॥१४॥

आ। अ॒ग्ने॒। व॒ह॒। ह॒वि॒:ऽअद्या॑य। दे॒वान्। इन्द्र॑ऽज्येष्ठास:। इ॒ह। मा॒द॒य॒न्ता॒म्। इ॒मम्। य॒ज्ञम्। दि॒वि। दे॒वेषु॑। धे॒हि॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑:। सदा॑। न॒:॥५॥

पदार्थ:-(**आ**) समन्तात् (**अग्ने**) वह्निरिव विद्वन् (**वह**) सर्वत: प्रापय (**हवि:**) अत्तुमर्हम् (**अद्याय**) अत्तुं योग्याय (**देवान्**) विदुष: (**इन्द्रज्येष्ठास:**) इन्द्रो राजा ज्येष्ठो येषान्ते (**इह**) अस्मिन्समये (**मादयन्ताम्**) आनन्दयन्तु (**इमम्**) वर्त्तमानम् (**यज्ञम्**) धर्म्यं व्यवहारम् (**दिवि**) द्योतनात्मके परमात्मनि (**देवेषु**) विद्वत्सु (**धेहि**) यूयम् (**पात**) (**स्वस्तिभि:**) सुखै: (**सदा**) (**न:**) अस्मान्॥५॥

अन्वय:-हे अग्ने! त्वमद्याय देवान् हविरावह तेनेहेन्द्रज्येष्ठासो जना मादयन्तां त्वमिमं यज्ञं दिवि देवेषु धेहि हे विद्वांसो! यूयं स्वस्तिभिर्न: सदा पात॥५॥

भावार्थ:-हे विद्वांसो! यथाग्नि: सूर्यादिरूपेण सर्वानानन्दयति तथाऽत्र यूयं सर्वान् संरक्ष्य कर्त्तव्यं कारयित्वेष्टान् भोगान् प्रापयतेति॥५॥

अत्राग्निविद्वत्कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकादशं सूक्तं चतुर्दशो वर्गश्च समाप्त:॥

पदार्थ:-हे (**अग्ने**) अग्नि के तुल्य तेजस्वि विद्वन्! आप (**अद्याय**) भोगने योग्य वस्तु के लिये (**देवान्**) विद्वानों (**हवि:**) भोजन योग्य अन्न को (**आ, वह**) अच्छे प्रकार प्राप्त कीजिये उससे (**इह**) इस समय (**इन्द्रज्येष्ठास:**) जिन में राजा श्रेष्ठ है वे मनुष्य (**मादयन्ताम्**) आनन्दित करें आप (**इमम्**) इस यज्ञम् धर्मयुक्त व्यवहार को (**दिवि**) द्योतनस्वरूप परमात्मा और (**देवेषु**) विद्वानों में (**धेहि**) धारण करो, हे विद्वानो! (**यूयम्**) तुम लोग (**स्वस्तिभि:**) सुखों से (**न:**) हमारी (**सदा:**) सदा (**पात**) रक्षा करो॥५॥

भावार्थ:-हे विद्वानो! जैसे अग्नि सूर्यादिरूप से सब को आनन्दित करता है, वैसे इस जगत् में तुम सब लोगों की रक्षा कर और कर्त्तव्य को कराके अभीष्ट लोगों को प्राप्त कराओ॥५॥

इस सूक्त में अग्नि और विद्वानों का कृत्य वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह ग्यारहवां सूक्त और चौदहवां वर्ग समाप्त हुआ॥

अथ त्र्यर्चस्य द्वादशस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १ विराट्त्रिष्टुप्। २ त्रिष्टुप् छन्दः। धैवतः स्वरः। ३ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ पुनरग्निः कीदृशोऽस्तीत्याह॥

अब बारहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में अग्नि कैसा है, इस विषय को कहते हैं॥

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम्॥ १॥

अगन्म। महा। नमसा। यविष्ठम्। यः। दीदाय। सम्ऽइद्धः। स्वे। दुरोणे। चित्रऽभानुम्। रोदसी इति। अन्तः। उर्वी इति। सुऽआहुतम्। विश्वतः। प्रत्यञ्चम्॥ १॥

पदार्थः- **(अगन्म)** प्राप्नुयाम **(महा)** महान्तम् **(नमसा)** सत्कारेणान्नादिना वा **(यविष्ठम्)** अतिशयेन विभाजकम् **(यः)** **(दीदाय)** दीपयति **(समिद्धः)** प्रदीप्तः **(स्वे)** स्वकीये **(दुरोणे)** गृहे **(चित्रभानुम्)** अद्भुतकिरणम् **(रोदसी)** द्यावापृथिव्योः **(अन्तः)** मध्ये **(उर्वी)** महत्योः **(स्वाहुतम्)** सुष्ठ्वाहुतम् **(विश्वतः)** सर्वतः **(प्रत्यञ्चम्)** यः प्रत्यञ्चति तम्॥१॥

अन्वयः-हे मनुष्या! यस्स्वे दुरोणे समिद्धः स दीदाय तमुर्वी रोदसी अन्तर्वर्त्तमानं चित्रभानुं स्वाहुतं विश्वतः प्रत्यञ्चं यविष्ठं महाऽग्निं नमसा यथा वयमगन्म तथैतं यूयमपि प्राप्नुत॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वद्भिः सर्व एवमुपदेष्टव्यो यथा वयं सर्वान्तःस्थां विद्युतं विजानीयाम तथा यूयमपि विजानीत॥१॥

पदार्थः-हे मनुष्यो **(यः)** जो **(स्वे)** अपने **(दुरोणे)** घर में **(समिद्धः)** प्रकाशित है वह **(दीदाय)** सबको प्रकाशित करता है उसको **(उर्वी)** बड़ी **(रोदसी)** सूर्य-पृथिवी के **(अन्तः)** भीतर वर्त्तमान **(चित्रभानुम्)** अद्भुत किरणों वाले **(स्वाहुतम्)** सुन्दर प्रकार ग्रहण किये **(विश्वतः)** सब ओर से **(प्रत्यञ्चम्)** पीछे चलने और **(यविष्ठम्)** अतिशय विभाग करने वाले **(महा)** बड़े अग्नि को **(नमसा)** सत्कार वा अन्नादि से जैसे हम लोग **(अगन्म)** प्राप्त हों, वैसे इसको तुम लोग भी प्राप्त होओ॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों को उचित है कि सब को ऐसा उपदेश करें कि जैसे हम लोग सब के अन्तःस्थित विद्युत् अग्नि को जानें, वैसे तुम लोग भी जानो॥१॥

पुनः प्रेम्णोपासित ईश्वरः किं करोतीत्याह॥

फिर प्रेम से उपासना किया ईश्वर क्या करता है, इस विषय को अगले मन्त्र में कहते हैं॥

स मह्ना विश्वा दुरितानि साह्वान्ग्निः ष्टवे दम आ जातवेदाः।
स नो रक्षिषद् दुरितादवद्यादस्मान् गृणत उत नो मघोनः॥ २॥

सः। मह्ना। विश्वा। दुःऽइतानि। सह्वान्। अग्निः। स्तवे। दमे। आ। जातऽवेदाः। सः। नः। रक्षिषत्।

दुःऽइतात्। अवद्यात्। अस्मान्। गृणतः। उत। नः। मघोनः॥ २॥

पदार्थः-(**सः**) (**मह्ना**) महत्त्वेन (**विश्वा**) सर्वाणि (**दुरितानि**) दुराचरणानि (**साह्वान्**) सोढा (**अग्निः**) पावक इव जगदीश्वरः (**स्तवे**) स्तवने (**दमे**) गृहे (**आ**) (**जातवेदाः**) यो जातेषु पदार्थेष्वभिव्याप्य विद्यते सः (**सः**) (**नः**) अस्मान् (**रक्षिषत्**) रक्षेत् (**दुरितात्**) दुष्टाचारात् (**अवद्यात्**) निन्दनीयात् (**अस्मान्**) (**गृणतः**) शुचिं कुर्वतः (**उत**) अपि (**नः**) अस्मान् (**मघोनः**) बहुधनयुक्तान्॥ २॥

अन्वयः-हे मनुष्या! जगदीश्वरो दमेऽग्निरिव जातवेदाः स्तवे मह्ना साह्वान् विश्वा दुरितानि दूरीकरोति सोऽवद्याद् दुरितान्न आ रक्षिषत्। गृणतोऽस्मान् न्यायाचरणाद्रक्षतु उतोऽपि मघोनो नोऽस्मान् स रक्षिषत्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा गृहे प्रज्वालितोऽग्निरन्धकारं शीतं च निवर्त्तयति तथैवोपासितः परमेश्वरोऽज्ञानमधर्माचरणं च दूरीकृत्य धर्मे विद्याग्रहणे च प्रवर्त्तयित्वा सम्यग्रक्षति॥ २॥

पदार्थः-हे मनुष्यो! जगदीश्वर (**दमे**) घर में (**अग्निः**) अग्नि के तुल्य (**जातवेदाः**) उत्पन्न हुए पदार्थों में व्याप्त होकर विद्यमान (**स्तवे**) स्तुति में (**मह्ना**) महत्त्व से (**साह्वान्**) सहनशील (**विश्वा**) सब (**दुरितानि**) दुराचरणों को दूर करता है (**सः**) वह (**अवद्यात्**) निन्दनीय (**दुरितात्**) दुष्टाचार से (**नः**) हमारी (**आ, रक्षिषत्**) रक्षा करे (**गृणतः**) शुद्धि करते हुए हम लोगों की रक्षा करे (**उत**) और (**मघोनः**) बहुत धन वाले (**नः**) हमारी (**सः**) वह रक्षा करे॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे घर में प्रज्वलित किया अग्नि अन्धकार और शीत की निवृत्ति करता है, वैसे ही उपासना किया परमेश्वर अज्ञान और अधर्म्माचरण को दूर कर धर्म और विद्या ग्रहण में प्रवृत्ति कराके सम्यक् रक्षा करता है॥ २॥

पुनः स उपासितः किं करोतीत्याह॥

फिर वह उपासना किया ईश्वर क्या करता है, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः॥ ३॥ १५॥

त्वम्। वरुणः। उत। मित्रः। अग्ने। त्वाम्। वर्धन्ति। मतिऽभिः। वसिष्ठाः। त्वे इति। वसु। सुऽसनानानि। सन्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

पदार्थः-(**त्वम्**) (**वरुणः**) वरः श्रेष्ठः (**उत**) अपि (**मित्रः**) सुहृत् (**अग्ने**) अग्निरिव स्वप्रकाशेश्वर (**त्वाम्**) (**वर्धन्ति**) वर्धयन्ति (**मतिभिः**) प्रज्ञाभिः (**वसिष्ठाः**) सकलविद्यास्वतिशयेन वासकर्त्तारः (**त्वे**) त्वयि (**वसु**) द्रव्यम् (**सुषणनानि**) सुष्ठु विभाजितानि (**सन्तु**) (**यूयम्**) (**पात**) (**स्वस्तिभिः**) स्वास्थक्रियाभिः (**सदा**) (**नः**) अस्मान्॥ ३॥

अन्वयः-हे अग्ने! ये वसिष्ठा मतिभिस्त्वां वर्धन्ति तेषां त्वे प्रीतिमतां वसु सुषणनानि सन्तु। यस्त्वं वरुण उत मित्रोऽसि सोऽस्मान् सदा पातु हे विद्वांसो! यूयं जगदीश्वरवन्नोऽस्मान् स्वस्तिभिस्सदा पात॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्वद्भिः संवर्धितोऽग्निर्दारिद्र्यं विनाशयति तथैवोपासितः परमेश्वरोऽज्ञानं निवर्तयति यथाऽऽप्ताः सर्वान् सदा रक्षन्ति तथैव परमात्मा सकलं विश्वं पातीति॥३॥

अत्राऽग्नीश्वरविद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वादशं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य स्वयं प्रकाशस्वरूप ईश्वर! जो **(वसिष्ठाः)** सब विद्याओं में अतिशय कर निवास करने वाले **(मतिभिः)** बुद्धियों से **(त्वाम्)** तुमको **(वर्धन्ति)** बढ़ाते हैं उन **(त्वे)** आप में प्रीति वालों के **(वसु)** द्रव्य **(सुषणनानि)** सुन्दर विभाग किये **(सन्तु)** हों जो **(त्वम्)** आप **(वरुणः)** श्रेष्ठ **(उत)** और **(मित्रः)** मित्र है सो आप हमारी **(सदा)** सदा रक्षा करो और हे विद्वानो! **(यूयम्)** तुम लोग ईश्वर के तुल्य **(नः)** हमारी **(स्वस्तिभिः)** स्वस्थता सम्पादक क्रियाओं से **(सदा)** सदा **(पात)** रक्षा करो॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे विद्वानों से सम्यक् बढ़ाया हुआ अग्नि दरिद्रता का विनाश करता है, वैसे ही उपासना किया परमेश्वर अज्ञान को निवृत्त करता है। जैसे आप्त लोग सब की सदा रक्षा करते हैं, वैसे परमात्मा सब संसार की रक्षा करता है॥३॥

इस सूक्त में अग्नि, ईश्वर और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बारहवां सूक्त और पन्द्रहवां वर्ग समाप्त हुआ॥

अथ त्र्यर्चस्य त्रयोदशस्य सूक्तस्य वसिष्ठ ऋषिः। वैश्वानरो देवता। १, २ स्वराट्पङ्क्तिः। ३ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ संन्यासिनः कीदृशो भवन्तीत्याह॥

अब तीन ऋचावाले तेरहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में संन्यासी कैसे होते हैं, इस विषय को कहते हैं॥

प्राग्नये॑ विश्व॒शुचे॑ धिय॒न्धेऽसुरघ्ने मन्म॑ धी॒तिं भ॑रध्वम्।
भरे॑ ह॒विर्न ब॒र्हिषि॑ प्रीणा॒नो वै॑श्वान॒राय॒ यत॑ये मती॒नाम्॥ १॥

प्र। अ॒ग्नये॑। वि॒श्व॒ऽशुचे॑। धि॒य॒म्ऽधे। अ॒सु॒र॒ऽघ्ने। मन्म॑। धी॒तिम्। भ॒र॒ध्व॒म्। भरे॑। ह॒विः। न। ब॒र्हिषि॑। प्री॒णा॒नः। वै॒श्वा॒न॒राय॑। यत॑ये। मती॒नाम्॥ १॥

पदार्थः- **(प्र)** **(अग्नये)** अग्निरिव विद्यादिशुभगुणैः प्रकाशमानाय **(विश्वशुचे)** यो विश्वं सर्वं जगच्छोधयति तस्मै **(धियन्धे)** यो धियं दधाति तस्मै **(असुरघ्ने)** योऽसुरान् दुष्टकर्मकारिणो हन्ति तिरस्करोति तस्मै **(मन्म)** विज्ञानम् **(धीतिम्)** धर्मस्य धारणाम् **(भरध्वम्)** धरध्वं पोषयत वा **(भरे)** स- ामे **(हविः)** दातव्यमत्तव्यमन्नादिकम् **(न)** इव **(बर्हिषि)** सभायाम् **(प्रीणानः)** प्रसन्नः **(वैश्वानराय)** विश्वेषां नराणां नायकाय **(यतये)** यतमानाय संन्यासिने **(मतीनाम्)** मनुष्याणां मध्ये॥ १॥

अन्वयः-हे मनुष्या! मतीनां मध्ये वैश्वानराय विश्वशुचे धियन्धेऽसुरघ्नेऽग्नये यतये बर्हिषि प्रीणानो राजा भरे हविर्न मन्म धीतिञ्च यूयं प्र भरध्वम्॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे गृहस्था! येऽग्निवद्विद्यासत्यधर्मप्रकाशका अधर्मखण्डनेन धर्ममण्डनेन सर्वेषां शुद्धिकराः प्रज्ञाः प्रमाप्रदा अविद्वत्ताविनाशका मनुष्याणां विज्ञानं धर्मधारणं च कारयन्तो यतयः संन्यासिनो भवेयुस्तत्सङ्गेन सर्वे यूयं प्रज्ञां धृत्वा निःसंशया भवत यथा राजा युद्धस्य सामग्रीमलङ्करोति तथैव यतिवराः सुखस्य सामग्रीमलंकुर्वन्ति॥ १॥

पदार्थः-हे मनुष्यो **(मतीनाम्)** मनुष्यों के बीच **(वैश्वानराय)** सब मनुष्यों के नायक **(विश्वशुचे)** सब को शुद्ध करने वाले **(धियन्धे)** बुद्धि को धारण करनेहारे **(असुरघ्ने)** दुष्ट कर्मकारियों को मारने वा तिरस्कार करने वाले **(अग्नये)** अग्नि के तुल्य विद्यादि शुभ गुणों से प्रकाशमान **(यतये)** यत्न करने वाले संन्यासी के लिये **(बर्हिषि)** सभा में **(प्रीणानः)** प्रसन्न हुआ राजा **(भरे)** संग्राम में **(हविः)** भोगने वा देने योग्य अन्न को जैसे **(न)** वैसे **(मन्म)** विज्ञान **(धीतिम्)** धर्म की धारणा को तुम लोग **(प्र, भरध्वम्)** धारण वा पोषण करो॥ १॥

भावार्थः-इस मन्त्र में **[**उपमा**]**वाचकलुप्तोपमालङ्कार हैं। हे गृहस्थो! जो अग्नि के तुल्य विद्या और सत्य धर्म के प्रकाशक, अधर्म के खण्डन और धर्म के मण्डन से सब के शुद्धिकर्त्ता, बुद्धिमान्, निश्चित ज्ञान देने वाले, अविद्वत्ता के विनाशक, मनुष्यों को विज्ञान और धर्म का धारण कराते हुए संन्यासी हों, उनके सङ्ग से सब तुम लोग बुद्धि को धारण कर निस्सन्देह होओ। जैसे राजा युद्ध की सामग्री को शोभित करता है, वैसे उत्तम संन्यासी जन सुख की सामग्री को शोभित करते हैं॥ १॥

पुनस्ते सन्यासिनः किंवत् किं कुर्वन्तीत्याह॥

फिर वे सन्न्यासी किसके तुल्य क्या करते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः।
त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा॥ २॥

त्वम्। अग्ने। शोचिषा। शोशुचानः। आ। रोदसी इति। अपृणाः। जायमानः। त्वम्। देवान्। अभिऽशस्तेः। अमुञ्चः। वैश्वानर। जातऽवेदः। महिऽत्वा॥ २॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव वर्त्तमान सन्न्यासिन् (**शोचिषा**) प्रकाशेन (**शोशुचानः**) शोधयन् (**आ**) (**रोदसी**) द्यावापृथिव्यौ (**अपृणाः**) पूरय (**जायमानः**) उत्पद्यमानः (**त्वम्**) (**देवान्**) विदुषः (**अभिशस्तेः**) आभिमुख्येन स्वप्रशंसां कुर्वतो दम्भिनः (**अमुञ्च**) मोचय (**वैश्वानर**) विश्वेषु नरेषु राजमान (**जातवेदः**) जातविद्य (**महित्वा**) महिम्ना॥ २॥

अन्वयः-हे अग्ने! त्वं यथाग्निः शोशुचानो जायमान शोचिषा रोदसी आपृणाति तथाऽस्माँस्त्वमापृणाः। हे वैश्वानर जातवेदस्त्वं महित्वाऽस्मान् देवानभिशस्तेरमुञ्चः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथाग्निः स्वयं शुद्धः सर्वांच्छोधयति तथैव सन्न्यासिनः स्वयं पवित्राचरणाः सन्तः सर्वान् पवित्रयन्ति॥ २॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य वर्त्तमान तेजस्विन् सन्न्यासिन्! आप जैसे अग्नि (**शोशुचानः**) शुद्ध करता और (**जायमानः**) उत्पन्न होता हुआ (**शोचिषा**) प्रकाश से (**रोदसी**) सूर्य भूमि को अच्छे प्रकार पूरित करता, वैसे हम लोगों को (**त्वम्**) आप (**आ, अपृणाः**) अच्छे प्रकार पूर्ण कीजिये हे (**वैश्वानर**) सब मनुष्यों के नायक (**जातवेदः**) विद्या को प्राप्त विद्वन्! (**त्वम्**) आप (**महित्वा**) अपनी महिमा से (**देवान्**) हम विद्वानों को (**अभिशस्तेः**) सम्मुख प्रशंसा करने वाले दम्भी से (**अमुञ्चः**) छुड़ाइये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे अग्नि आप शुद्ध हुआ सब को शुद्ध करता है, वैसे संन्यासी लोग स्वयं पवित्र हुए सब को पवित्र करते हैं॥ २॥

पुनस्ते यतयः कीदृशा भवेयुरित्याह॥

फिर वे संन्यासी कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः॥ ३॥ १६॥

जातः। यत्। अग्ने। भुवना। वि। अख्यः। पशून्। न। गोपाः। इर्यः। परिऽज्मा। वैश्वानर। ब्रह्मणे। विन्दु। गातुम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

पदार्थः-(**जातः**) उत्पन्नः (**यत्**) यः (**अग्ने**) अग्निरिव विद्वन् (**भुवना**) लोकलोकान्तरान् (**वि**) विशेषेण (**अख्यः**) प्रकाशयति (**पशून्**) गवादीन् (**न**) इव (**गोपाः**) गोपालाः पशुरक्षकाः (**इर्यः**)

सत्यमार्गे प्रेरकः **(परिज्मा)** परितः सर्वतोऽजति गच्छति **(वैश्वानर)** विश्वेषु नरेषु प्रकाशक **(ब्रह्मणे)** परमेश्वराय वेदाय वाऽथवा चतुर्वेदविदे **(विन्द)** प्राप्नुहि **(गातुम्)** प्रशंसितां भूमिम् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** स्वास्थ्यकारिणीभिः क्रियाभिः **(सदा)** सर्वदा **(नः)** अस्मान्॥३॥

अन्वयः-हे वैश्वानराग्ने! यते यथा जातोऽग्निर्भुवना व्यख्यस्तथा यद्यस्त्वं विद्यासु प्रसिद्धजनानामात्मनः प्रकाशय पशून् गोपा नेर्यः परिज्मा भव स त्वं ब्रह्मणे गातुं विन्द यूयं संन्यासिनः सर्वे स्वस्तिभिः सत्योपदेशनैर्नः सदा पात॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये सूर्यवत्प्रख्यातपरोपकार विद्योपदेशा वत्सान् गाव इव विद्यादानेन सर्वेषां रक्षकाः सर्वदा भ्रमन्तो वेदेश्वरविज्ञानाय राज्यरक्षणाय नृप इव न्यायशीला भूत्वा सर्वानज्ञान् बोधयन्ति ते सदैव सर्वैः सत्कर्त्तव्या भवन्तीति॥३॥

अत्राग्निदृष्टान्तेन संन्यासिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोदशं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे **(वैश्वानर)** सब मनुष्यों में प्रकाश करने वाले **(अग्ने)** अग्नि के तुल्य तेजस्वि विद्वन् संन्यासिन्! जैसे **(जातः)** उत्पन्न हुआ अग्नि **(भुवना)** लोक-लोकान्तरों को **(वि, अख्यः)** विशेष कर प्रकाशित करता है, वैसे **(यत्)** जो आप विद्याओं में प्रसिद्ध मनुष्यों के आत्माओं को प्रकाशित कीजिये तथा **(पशून्)** गौ आदि को **(गोपाः)** पशुरक्षकों के **(न)** तुल्य **(इर्यः)** सत्य मार्ग में प्रेरक और **(परिज्मा)** सब ओर से प्राप्त होने वाले हूजिये वह आप **(ब्रह्मणे)** परमेश्वर, वेद वा चार वेदों के ज्ञाता के लिये **(गातुम्)** प्रशस्त भूमि को **(विन्द)** प्राप्त हूजिये **(यूयम्)** तुम संन्यासी लोग सब **(स्वस्तिभिः)** स्वस्थता के हेतु क्रियाओं और सत्य उपदेशों से **(नः)** हमारी **(सदा)** **(पात)** रक्षा करो॥३॥

भावार्थः-इस मन्त्र में **[**उपमा**]**वाचकलुप्तोपमालङ्कार हैं। जो सूर्य के तुल्य, परोपकार, विद्या और उपदेश जिनके प्रसिद्ध हैं, वे जैसे गौएँ बछड़ों की रक्षा करती, वैसे विद्यादान से सब की रक्षा करने वाले सर्वदा घूमते हुए वेद, ईश्वर को जानने के लिये राज्यरक्षणार्थ राजा के तुल्य न्यायशील होकर सब सुखों को बोध कराते वे सदा सब को सत्कार करने योग्य होते हैं॥३॥

इस सूक्त में अग्नि के दृष्टान्त से संन्यासियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह तेरहवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथ त्र्यर्चस्य चतुर्दशस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १ निचृद्बृहती छन्दः। मध्यमः स्वरः। २ निचृत्त्रिष्टुप्। ३ विराट् त्रिष्टुप्छन्दः। धैवतः स्वरः॥

अथ यतिः किंवत्सेवनीय इत्याह॥

अब तीन ऋचा वाले चौदहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में संन्यासी की सेवा कैसे करनी चाहिये, इस विषय को कहते हैं॥

समिधा जातवेदसे देवाय देवहूतिभिः।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये॥ १॥

सम्ऽइधा। जातऽवेदसे। देवाय। देवहूतिऽभिः। हविःऽभिः। शुक्रऽशोचिषे। नमस्विनः। वयम्। दाशेम। अग्नये॥ १॥

पदार्थः- (**समिधा**) प्रदीपनसाधनेन (**जातवेदसे**) जातेषु विद्यमानाय (**देवाय**) विदुषे (**देवहूतिभिः**) देवैः प्रशंसिताभिर्वाग्भिः (**हविर्भिः**) होमसाधनैः (**शुक्रशोचिषे**) शुक्रेण वीर्येण शोचिर्दीप्तिर्यस्य तस्मै (**मनस्विनः**) नमोऽन्नं सत्कारो वा विद्यते येषां ते (**वयम्**) (**दाशेम**) (**अग्नये**) पावकाय॥ १॥

अन्वयः-हे मनुष्या! यथर्त्विग्यजमानाः समिधा हविर्भिरग्नये प्रयतन्ते तथा नमस्विनो वयं जातवेदसे शुक्रशोचिषे देवाय यतयेऽन्नादिकं दाशेम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा दीक्षिता अग्निहोत्रादौ यज्ञे घृताहुतिभिर्हुतेनाग्निना जगद्धितं कुर्वन्ति तथैव वयमतिथीनां संन्यासिनां सेवनेन मनुष्यकल्याणं कुर्याम॥ १॥

पदार्थः-हे मनुष्यो! जैसे ऋत्विज् पुरुष और यजमान लोग (**समिधा**) दीप्ति के हेतु काष्ठ और (**हविर्भिः**) होम के साधनों और (**देवहूतिभिः**) विद्वानों ने प्रशंसित की हुई वाणियों के साथ (**अग्नये**) अग्नि के लिये प्रयत्न करते हैं, वैसे (**नमस्विनः**) अन्न और सत्कार वाले (**वयम्**) हम लोग (**जातवेदसे**) उत्पन्न पदार्थों में विद्यमान (**शुक्रशोचिषे**) वीर्य्य और पराक्रम से दीप्तिमान् तेजस्वी (**देवाय**) विद्वान् संन्यासी के लिये अन्नादि पदार्थ (**दाशेम**) देवें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे दीक्षित लोग अग्निहोत्रादि यज्ञ में घृत की आहुतियों से होम किये अग्नि से जगत् का हित करते हैं, वैसे ही हम अनियत तिथि वाले संन्यासियों की सेवा से मनुष्यों का कल्याण करें॥ १॥

पुनस्ते यतयः किं कुर्युरित्याह॥

फिर वे संन्यासी क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे॥ २॥

वयम्। ते। अग्ने। सम्ऽइधा। विधेम। वयम्। दाशेम। सुऽस्तुती। यजत्र। वयम्। घृतेन। अध्वरस्य। होतः। वयम्। देव। हविषा। भद्रऽशोचे॥ २॥

पदार्थः-(**वयम्**) (**ते**) तुभ्यमतिथये (**अग्ने**) वह्निरिव विद्वन् (**समिधा**) इन्धनेन (**विधेम**) कुर्याम (**वयम्**) (**दाशेम**) (**दद्याम**) (**सुष्टुती**) श्रेष्ठया प्रशंसया (**यजत्र**) सङ्गन्तव्यं (**वयम्**) (**घृतेन**) आज्येन (**अध्वरस्य**) यज्ञस्य मध्ये (**होतः**) हवनकर्त्तः (**वयम्**) (**देव**) दिव्यगुण (**हविषा**) होतव्येन द्रव्येण (**भद्रशोचे**) कल्याणदीपक॥२॥

अन्वयः-हे यजत्र होतर्भद्रशोचे देवाग्ने! यथा वयं समिधाग्नौ होमं विधेम तथा सुष्टुती ते तुभ्यमन्नादिकं वयं दाशेम। यथर्त्विग्यजमाना अध्वरस्य मध्ये घृतेन हविषा जगद्धितं कुर्वन्ति तथा वयं तव हितं कुर्याम यथा वयं त्वां सेवेमहि तथा त्वमस्मान् सत्यमुपदिश॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा गृहस्थाः प्रीत्या यतीनां सेवां कुर्य्युस्तथैव प्रेम्णा यतय एषां कल्याणाय सत्यमुपदिशेयुः॥२॥

पदार्थः-हे (**यजत्र**) सङ्ग करने योग्य (**होतः**) होम करने वाले (**भद्रशोचे**) कल्याण के प्रकाशक (**देव**) दिव्य गुणयुक्त (**अग्ने**) अग्नि के तुल्य तेजस्विन्! जैसे (**वयम्**) हम लोग (**समिधा**) ईंधन से अग्नि में होम (**विधेम**) करें, वैसे (**सुष्टुती**) श्रेष्ठ प्रशंसा से (**ते**) तुम अतिथि के लिये (**वयम्**) हम अन्नादिक (**दाशेम**) देवें जैसे ऋत्विज् और यजमान लोग (**अध्वरस्य**) यज्ञ के बीच (**घृतेन**) घी तथा (**हविषा**) होमने योग्य द्रव्य से जगत् का हित करते हैं, वैसे (**वयम्**) हम लोग आप का हित करें। जैसे (**वयम्**) हम आप की सेवा करें, वैसे आप हमको सत्य उपदेश करें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे गृहस्थ लोग प्रीति से संन्यासियों की सेवा करें, वैसे ही प्रीति से संन्यासी भी इनके कल्याण के अर्थ सत्य का उपदेश करें॥२॥

पुनर्गृहस्थयतयः परस्परस्मिन् कथं वर्तेरन्नित्याह॥

फिर गृहस्थ और यति लोग परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

आ नो॑ देवेभिरुप॑ देवहू॑तिमग्ने॑ या॒हि वष॑ट्कृतिं जुषा॒णः।
तुभ्यं॑ दे॒वाय॒ दाश॑तः स्याम यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः॥३॥१७॥

आ। नः॒। देवेभि॑:। उप॑। देव॑ऽहूतिम्। अग्ने॑। या॒हि। वष॑ट्ऽकृतिम्। जु॒षा॒णः। तुभ्य॑म्। दे॒वाय॑। दाश॑तः। स्या॒म॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑:। सदा॑। नः॒॥३॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मानस्माकं वा (**देवेभिः**) विद्वद्भिस्सह (**उप**) समीपे (**देवहूतिम्**) देवैराहूताम् (**अग्ने**) पावक इव दोषदाहक (**याहि**) प्राप्नुहि (**वषट्कृतिम्**) सत्यक्रियाम् (**जुषाणः**) सेवमानः (**तुभ्यम्**) (**देवाय**) विदुषे (**दाशतः**) सेवमानाः (**स्याम**) भवेम (**यूयम्**) यतयः (**पात**) (**स्वस्तिभिः**) सुखक्रियाभिः (**सदा**) (**नः**) अस्मान्॥३॥

अन्वयः-हे अग्ने! त्वं देवेभिः सह नो देवहूतिं वषट्कृतिं जुषाणोऽस्मानुपा याहि वयं देवाय तुभ्यं दाशतः स्याम यूयं स्वस्तिभिर्नः सदा पात॥३॥

भावार्थः-गृहस्थैस्सदैव पूर्णविद्यानां यतीनां निमन्त्रणैरभ्यर्थना कार्य्या यतस्ते समीपमागताः सन्तस्तेषां रक्षां सत्योपदेशं च सततं कुर्य्युरिति॥३॥

अत्राग्निदृष्टान्तेन यतिगृहस्थयोः कृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्दशं सूक्तं सप्तदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य दोषों के जलाने वाले! आप **(देवेभिः)** विद्वानों के साथ **(नः)** हमारे **(देवहूतिम्)** विद्वानों से स्वीकार की हुई **(वषट्कृतिम्)** सत्य क्रिया को **(जुषाणः)** सेवन करते हुए हमको **(उप, आ, याहि)** समीप प्राप्त हूजिये हम लोग **(तुभ्यम्)** तुम **(देवाय)** विद्वान् के लिये **(दाशतः)** सेवन करने वाले **(स्याम)** होवें **(यूयम्)** तुम **(स्वस्तिभिः)** सुख क्रियाओं से **(नः)** हमारी **(सदा)** सदा **(पात)** रक्षा करो॥३॥

भावार्थः-गृहस्थों को चाहिये कि सदैव पूर्ण विद्या वाले संन्यासियों का निमन्त्रण द्वारा प्रार्थना वा सत्कार करें जिससे वे समीप आये हुए उनकी रक्षा और निरन्तर उपदेश करें॥३॥

इस सूक्त में अग्नि दृष्टान्त से यति और गृहस्थ के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह चौदहवां सूक्त और सत्रहवां वर्ग समाप्त हुआ॥

अथ पञ्चदशर्चस्य पञ्चदशतमस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, ३, ७, १०, १२, १४ विराड्गायत्री। २, ४, ५, ६, ९, १३ गायत्री। ८ निचृद्गायत्री छन्दः। षड्जः स्वरः। ११, १५ आर्च्युष्णिक् छन्दः। ऋषभः स्वरः॥

अथाऽतिथिः कीदृशो भवतीत्याह॥

अब पन्द्रहवें सूक्त का आरम्भ है। इसके प्रथम मन्त्र में अतिथि कैसा हो, इस विषय को कहते हैं॥

उप॒सद्या॑य मी॒ळ्हुष॑ आ॒स्ये॑ जुहुता ह॒विः। यो नो॒ नेदि॑ष्ठमाप्य॒म्॥ १॥

उप॑ऽसद्याय। मी॒ळ्हुषे॑। आ॒स्ये॑। जु॒ह॒त॒। ह॒विः। यः। नः॒। नेदि॑ष्ठम् आप्य॑म्॥ १॥

पदार्थः-(**उपसद्याय**) समीपे स्थापयितुं योग्याय (**मीहळुषे**) वारिणेव सत्योपदेशैस्सेचकाय (**आस्ये**) मुखे (**जुहुता**) दत्त। अत्र **संहितायामि**ति दीर्घः। (**हविः**) होतुं दातुमर्हमन्नादिकम् (**यः**) (**नः**) अस्माकम् (**नेदिष्ठम्**) अति निकटम् (**आप्यम्**) प्राप्तुं योग्यम्॥ १॥

अन्वयः-हे मनुष्या! यो नो नेदिष्ठमाप्यं प्राप्नोति तस्मै मीळ्हुष उपसद्याया ऽऽस्ये हविर्जुहुत॥ १॥

भावार्थः-हे मनुष्या! यो यतिरन्तिकं प्राप्नुयात्तं सर्वे सत्कुरुताऽन्नादिकञ्च भोजयत॥ १॥

पदार्थः-हे मनुष्यो (**यः**) जो (**नः**) हमारे (**नेदिष्ठम्**) अति निकट (**आप्यम्**) प्राप्त होने योग्य को प्राप्त होता है उस (**उपसद्याय**) समीप में स्थापन करने योग्य (**मीळ्हुषे**) जल से जैसे, वैसे सत्य उपदेशों से सींचने वाले के लिये (**आस्ये**) मुख में (**हविः**) देने योग्य वस्तु को (**जुहुत**) देओ॥ १॥

भावार्थः-हे मनुष्यो! जो यति समीप प्राप्त हो उसका तुम सब लोग सत्कार करो और अन्नादि का भोजन कराओ॥ १॥

पुनस्तौ यतिगृहस्थौ परस्परं कथं वर्तेयातामित्याह॥

फिर वे संन्यासी और गृहस्थ परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

यः पञ्च॑ चर्ष॒णरि॒भि नि॑ष॒साद॒ दमे॑दमे। क॒विर्गृ॒हप॑ति॒र्युवा॑॥ २॥

यः। पञ्च॑। च॒र्ष॒णीः। अ॒भि। नि॒ऽस॒साद॑। दमे॑ऽदमे। क॒विः। गृ॒हऽप॑तिः। युवा॑॥ २॥

पदार्थः-(**यः**) (**पञ्च**) (**चर्षणीः**) मनुष्यान् (**अभि**) आभिमुख्ये (**निषसाद**) निषीदेत् (**दमेदमे**) गृहेगृहे (**कविः**) जातप्रज्ञः (**गृहपतिः**) गृहस्य पालकः (**युवा**) पूर्णेन ब्रह्मचर्येण युवावस्थां प्राप्य कृतविवाहः॥ २॥

अन्वयः-यः कविरतिथिर्दमेदमे पञ्च चर्षणीरभिनिषसाद तं युवा गृहपतिः सततं सत्कुर्यात्॥ २॥

भावार्थः-यतिः सदा सर्वत्र भ्रमणं कुर्याद् गृहस्थश्चैतं सदैव सत्कुर्यादत उपदेशाञ्छृणुयात्॥ २॥

पदार्थः-(**यः**) जो (**कविः**) उत्तम ज्ञान को प्राप्त हुआ संन्यासी (**दमेदमे**) घर-घर में (**पञ्च**) पांच (**चर्षणीः**) मनुष्यों वा प्राणों को (**अभि, निषसाद**) स्थिर करे उसका (**युवा**) पूर्ण ब्रह्मचर्य्य के साथ वर्त्तमान (**गृहपतिः**) घर का रक्षक युवा पुरुष निरन्तर सत्कार करे॥ २॥

भावार्थः-संन्यासी जन सदा सब जगह भ्रमण करे और गृहस्थ इस विरक्त का सत्कार करे

और इससे उपदेश सुनें॥२॥

पुनस्तौ परस्परं किं कुर्यातामित्याह॥

फिर वे दोनों परस्पर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

स नो॒ वेदो॑ अ॒मात्य॑मग्नी र॑क्षतु वि॒श्वत॑:। उ॒तास्मान् पा॒त्वंह॑स:॥३॥

स:। न॒:। वेद॑:। अ॒मात्य॑म्। अ॒ग्नि:। र॒क्ष॒तु॒। वि॒श्वत॑:। उ॒त। अ॒स्मान्। पा॒तु॒। अंह॑स:॥३॥

पदार्थ:-(**स:**) यति: (**न:**) अस्मान् गृहस्थान् (**वेद:**) धनम्। **वेद इति धननाम।** (निघं०२.१०) (**अमात्यम्**) अमात्येषु साधुम् (**अग्नि:**) पावक इव (**रक्षतु**) (**विश्वत:**) सर्वत: (**उत**) अस्मान् (**पातु**) (**अंहस:**) दुष्टाचरणादपराधाद्वा॥३॥

अन्वय:-सोऽग्निरिव नोऽमात्यं वेदो विश्वतो रक्षतूताप्यस्मानंहस: पातु॥३॥

भावार्थ:-गृहस्था एवमिच्छेयुर्यतिरस्मानेवमुपदिशेद्यतो वयं धनरक्षका: सन्तोऽधर्माचरणात् पृथग्वसेम॥३॥

पदार्थ:-(**स:**) वह संन्यासी (**अग्नि:**) के तुल्य (**न:**) हम गृहस्थों की वा (**अमात्यम्**) उत्तम मन्त्री की और (**वेद:**) धन की (**विश्वत:**) सब ओर से (**रक्षतु**) रक्षा करे (**उत**) और (**अस्मान्**) हमारी (**अंहस:**) दुष्टाचरण वा अपराध से (**पातु**) रक्षा करे॥३॥

भावार्थ:-गृहस्थ लोग ऐसी इच्छा करें कि संन्यासी जन हमको ऐसा उपदेश करे कि जिससे हम लोग धन के रक्षक हुए अधर्म के आचरण से पृथक् रहें॥३॥

पुनस्तेऽतिथय: कीदृशा: स्युरित्याह॥

फिर वे संन्यासी लोग कैसे हो, इस विषय को अगले मन्त्र में कहते हैं॥

नव॑ं नु स्तोम॑मग्नये॑ दि॒व श्ये॒नाय॑ जीजनम्। वस्व॑: कु॒विद्व॒नाति॑ न:॥४॥

नव॑म्। नु। स्तोम॑म्। अ॒ग्नये॑। दि॒व:। श्ये॒नाय॑। जी॒ज॒न॒म्। वस्व॑:। कु॒वित्। व॒नाति॑। न॒:॥४॥

पदार्थ:-(**नवम्**) नवीनम् (**नु**) क्षिप्रम् (**स्तोमम्**) प्रशंसाम् (**अग्नये**) पावकवत्पवित्राय (**दिव:**) कामनाया: (**श्येनाय**) श्येन इव पाखण्डिहिंसकाय (**जीजनम्**) जनयेयम् (**वस्व:**) धनस्य (**कुवित्**) महत् (**वनाति**) सम्भजेत् (**न:**) अस्माकम्॥४॥

अन्वय:-यो नो वस्व: कुविद्वनाति तस्मै श्येनायेवाग्नये दिवो नवं स्तोममहं नु जीजनम्॥४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। येऽतिथय: श्येनवच्छीघ्रगन्तार: पाखण्डहिंसका द्रव्यविद्योपदेशका यतय: स्युस्तान् गृहस्था: सत्कुर्यु:॥४॥

पदार्थ:-जो (**न:**) हमारे (**वस्व:**) धन के (**कुवित्**) बड़े भाग को (**वनाति**) सेवन करे उस (**श्येनाय**) श्येन के तुल्य पाखण्डियों के विनाश करने वाले (**अग्नये**) अग्नि के समान पवित्र के लिये (**दिव:**) कामना की (**नवम्**) नवीन (**स्तोमम्**) प्रशंसा को मैं (**नु**) शीघ्र (**जीजनम्**) प्रकट करूं॥४॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो अतिथि लोग श्येन पक्षी के तुल्य शीघ्र चलने वाले, पाखण्ड के नाशक, द्रव्य और विद्या के उपदेशक संन्यासधर्म युक्त हों, उनका गृहस्थ

सत्कार करें॥४॥

कस्य धनं प्रशंसनीयं भवेदित्याह॥

किसका धन प्रशंसनीय होता है, इस विषय को अगले मन्त्र में कहते हैं॥

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा। अग्ने यज्ञस्य शोचतः॥५॥१८॥

स्पार्हाः। यस्य। श्रियः। दृशे। रयिः। वीरऽवतः। यथा। अग्ने। यज्ञस्य। शोचतः॥५॥

पदार्थः-(**स्पार्हाः**) स्पृहणीयाः (**यस्य**) (**श्रियः**) (**दृशे**) द्रष्टुम् (**रयिः**) धनम् (**वीरवतः**) वीरा विद्यन्ते यस्य तस्य (**यथा**) (**अग्ने**) (**यज्ञस्य**) सङ्गन्तव्यस्य व्यवहारस्य (**शोचतः**) पवित्रस्य॥५॥

अन्वयः-हे मनुष्या! यस्य वीरवतस्स्पार्हाः श्रियो दृशे योग्याः स यथाऽग्ने शोचतो यज्ञस्य साधको रयिरस्ति तथा सत्क्रियासिद्धिकरः स्यात्॥५॥

भावार्थः-अत्रोपमालङ्कारः। तस्यैव धनं सफलं येन न्यायेनोपार्जितं धर्म्ये व्यवहारे व्ययितं स्यात्॥५॥

पदार्थः-हे मनुष्यो (**यस्य**) जिस (**वीरवतः**) वीरों वाले के (**स्पार्हाः**) चाहना करने योग्य (**श्रियः**) लक्ष्मी शोभाएं (**दृशे**) देखने को योग्य हों वह (**यथा**) जैसे (**अग्ने**) पहिले (**शोचतः**) पवित्र (**यज्ञस्य**) सङ्ग के योग्य व्यवहार का साधक (**रयिः**) धन है, वैसे सत्क्रिया का सिद्ध करने वाला हो॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। उसी का धन सफल है, जिसने न्याय से उपार्जन किया धन धर्मयुक्त व्यवहार में व्यय किया होवे॥५॥

पुनः सोऽग्निः कीदृशोऽस्तीत्याह॥

फिर वह अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः। यजिष्ठो हव्यवाहनः॥६॥

सः। इमाम्। वेतु। वषट्ऽकृतिम्। अग्निः। जुषत। नः। गिरः। यजिष्ठः। हव्यऽवाहनः॥६॥

पदार्थः-(**सः**) (**इमाम्**) (**वेतु**) प्राप्नोतु (**वषट्कृतिम्**) सत्क्रियाम् (**अग्निः**) पावकः (**जुषत**) सेवध्वम् (**नः**) अस्माकम् (**गिरः**) वाचः (**यजिष्ठः**) अतिशयेन यष्टा (**हव्यवाहनः**) यो हव्यानि दातुमर्हाणि वहति प्राप्नोति सः॥६॥

अन्वयः-हे मनुष्या! स यजिष्ठो हव्यवाहनोऽग्निर्न इमां वषट्कृतिं गिरश्च वेतु तं यूयं जुषत॥६॥

भावार्थः-हे मनुष्या! योऽग्निः सम्प्रयोजितः सन्नस्माकं क्रियाः सेवते स युष्माभिस्सेवनीयः॥६॥

पदार्थः-हे मनुष्यो! (**सः**) वह (**यजिष्ठः**) अत्यन्त यज्ञकर्त्ता (**हव्यवाहनः**) देने योग्य पदार्थों को प्राप्त होने वाला (**अग्निः**) पावक अग्नि (**नः**) हमारी (**इमाम्**) इस (**वषट्कृतिम्**) शुद्ध क्रिया को और (**गिरः**) वाणियों को (**वेतु**) प्राप्त हो उसको तुम लोग (**जुषत**) सेवन करो॥६॥

भावार्थः-हे मनुष्यो! जो अग्नि सम्यक् प्रयुक्त किया हुआ हमारी क्रियाओं का सेवन करता वह तुम लोगों को सेवने योग्य है॥६॥

पुनः स राजा प्रजाजनाश्च परस्परं कथं वर्त्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

नि त्वा॑ नक्ष्य विश्पते द्यु॒मन्तं॑ देव धीमहि। सु॒वीर॑मग्न आहुत॥७॥

नि। त्वा॒। न॒क्ष्य॒। वि॒श्प॒ते॒। द्यु॒ऽमन्त॑म्। दे॒व॒। धी॒म॒हि॒। सु॒ऽवीर॑म्। अ॒ग्ने॒। आ॒ऽहु॒त॒॥७॥

पदार्थः-(**नि**) नितराम् (**त्वा**) त्वाम् (**नक्ष्य**) नक्ष्येषु व्याप्तेषु साधो (**विश्पते**) प्रजापालक (**द्युमन्तम्**) दीप्तिमन्तम् (**देव**) विद्वन् (**धीमहि**) दधीमहि (**सुवीरम्**) शोभना वीरा यस्मात्तम् (**अग्ने**) पावक इव विद्वन् (**आहुत**) बहुभिः सत्कृत॥७॥

अन्वयः-हे नक्ष्याहुत विश्पते देवाऽग्ने! यं द्युमन्तं सुवीरमग्निं त्वा यथा निधीमहि तथा त्वमस्मानानन्दे नि धेहि॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वयं भवन्तं न्यायेन राज्यपालनाख्ये व्यवहारे सदा प्रतिष्ठापयेम तथा त्वमस्मान् सदा धर्म्ये व्यवहारे प्रतिष्ठापय॥७॥

पदार्थः-हे (**नक्ष्य**) व्याप्त वस्तुओं को उत्तम प्रकार जानने वाले (**आहुत**) बहुतों से सत्कार को प्राप्त (**विश्पते**) प्रजारक्षक (**अग्ने**) अग्नि के तुल्य तेजस्वि (**देव**) विद्वन्! जिस (**द्युमन्तम्**) प्रकाश वाले (**सुवीरम्**) उत्तम वीर हों जिससे उस अग्नि के तुल्य शुद्ध (**त्वा**) आपको जैसे (**नि, धीमहि**) निरन्तर ध्यान करें, वैसे आप हमको निरन्तर आनन्द में स्थिर कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे हम लोग आपको न्याय से राज्य पालनरूप व्यवहार में सदा स्थित करें, वैसे आप हमको धर्मयुक्त व्यवहार में प्रतिष्ठित कीजिये॥७॥

पुना राजप्रजाजनाः कथं वर्त्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

क्षप॑ उ॒स्रश्च॑ दीदिहि स्व॒ग्नय॒स्त्वया॑ व॒यम्। सु॒वीर॒स्त्वम॑स्म॒युः॥८॥

क्षपः॑। उ॒स्रः। च॒। दी॒दि॒हि॒। सु॒ऽअ॒ग्नयः॑। त्वया॑। व॒यम्। सु॒वीरः॑। त्वम्। अ॒स्म॒ऽयुः॥८॥

पदार्थः-(**क्षपः**) रात्रीः (**उस्रः**) किरणयुक्तानि दिनानि। **उस्रा इति रश्मिनाम।** (निघं०१.५) (**च**) (**दीदिहि**) प्रकाशय (**स्वग्नयः**) शोभना अग्नयो येषान्ते (**त्वया**) रक्षकेण राज्ञा (**वयम्**) (**सुवीरः**) शोभना वीरा यस्य सः (**त्वम्**) (**अस्मयुः**) अस्मान् कामयमानः॥८॥

अन्वयः-हे राजन्नस्मयुः सुवीरस्त्वं क्षप उस्रश्चास्मान् दीदिहि त्वया सह स्वग्नयो वयं त्वामहर्निशं प्रकाशेम॥८॥

भावार्थः-हे राजराजजना! यथाऽहर्निशं सूर्यः प्रकाशते तथा यूयं प्रकाशिता भवत॥८॥

पदार्थः-हे राजन्! (**अस्मयुः**) हमको चाहने वाले (**सुवीरः**) सुन्दर वीर पुरुषों से युक्त (**त्वम्**) आप (**क्षपः**) रात्रियों (**च**) और (**उस्रः**) किरणयुक्त दिनों में (**अस्मान्**) हम को (**दीदिहि**) प्रकाशित कीजिये (**त्वया**) आप के साथ (**स्वग्नयः**) सुन्दर अग्नियों वाले (**वयम्**) हम लोग प्रतिदिन प्रकाशित हों॥८॥

भावार्थः-हे राजा और राजपुरुषो! जैसे प्रतिदिन सूर्य प्रकाशित होता है, वैसे तुम लोग सदा प्रकाशित होओ॥८॥

पुनर्विद्वांसः किं कुर्वन्तीत्याह॥

फिर विद्वान् क्या करते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

उप॑ त्वा सा॒तये॒ नरो॒ विप्रा॑सो यन्ति धी॒तिभि॑:। उपाक्षा॑रा सहस्रिणी॥ ९॥

उप॑। त्वा॒। सा॒तये॑। नर॑:। विप्रा॑सः। य॒न्ति॒। धी॒तिऽभि॑:। उप॑। अक्षा॑रा। स॒हस्रिणी॥ ९॥

पदार्थः-(**उप**) (**त्वा**) त्वाम् (**सातये**) संविभागाय (**नरः**) मनुष्याः (**विप्रासः**) मेधाविनः (**यन्ति**) प्राप्नुवन्ति (**धीतिभिः**) अङ्गुलिभिः (**उप**) (**अक्षरा**) अक्षराण्यकारादीनि (**सहस्रिणी**) सहस्राण्यसंख्याता विद्याविषया विद्यन्ते यस्यां सा॥९॥

अन्वयः-हे विद्यार्थिनि! यथा विप्रासो नरो धीतिभिरक्षराण्युप यन्ति ते या सहस्रिणी वर्त्तते ताञ्जानन्तु तथा त्वा सातये विप्रासो नर उप यन्ति॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽङ्गुष्ठाऽङ्गुलीभिरक्षराणि विज्ञाय विद्वान् भवति तथैव विद्वांस शोधनेन विद्यारहस्यानि प्राप्नुवन्ति॥९॥

पदार्थः-हे विद्यार्थिनि! जैसे (**विप्रासः**) बुद्धिमान् (**नरः**) मनुष्य (**धीतिभिः**) अंगुलियों से (**अक्षरा**) अकारादि अक्षरों को (**उप, यन्ति**) उपाय से प्राप्त करते वे जो कन्या (**सहस्रिणी**) असंख्य विद्याविषयों को जानने वाली हैं उसको जानें, वैसे (**त्वा**) आप के (**सातये**) सम्यक् विभाग के लिये बुद्धिमान् मनुष्य (**उप**) समीप प्राप्त हों॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अंगूठा और अंगुलियों से अक्षरों को जान कर विद्वान् होता है, वैसे ही विद्वान् लोग शोधन कर विद्या के रहस्यों को प्राप्त हों॥९॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अ॒ग्नी रक्षा॑सि सेधति शु॒क्रशो॑चि॒रम॑र्त्य:। शुचि॑: पाव॒क ईड्य॑:॥ १०॥ १९॥

अ॒ग्निः। रक्षा॑सि। से॒ध॒ति॒। शु॒क्रऽशो॑चिः। अम॑र्त्यः। शुचि॑:। पा॒व॒कः। ईड्य॑:॥ १०॥

पदार्थः-(**अग्निः**) अग्निरिव राजा सेनेशो वा (**रक्षांसि**) रक्षयितव्यानि (**सेधति**) साधयति (**शुक्रशोचिः**) शुद्धतेजस्कः (**अमर्त्यः**) मर्त्यधर्मरहितः (**शुचिः**) पवित्रः (**पावकः**) शोधकः पवित्रकर्त्ता (**ईड्यः**) स्तोतुमन्वेष्टुं वा योग्यः॥१०॥

अन्वयः-यः शुक्रशोचिरमर्त्यः शुचिः पावक ईड्योऽग्निरिव रक्षांसि सेधति स कीर्त्तिमान् भवति॥१०॥

भावार्थः-यथा राजाऽन्यायं निवार्य्य न्यायं प्रकाशयति तथैव विद्युद्दारिद्र्यं विनाशय लक्ष्मीं जनयति॥१०॥

पदार्थः-जो (**शुक्रशोचिः**) शुद्ध तेजस्वी (**अमर्त्यः**) साधारण मनुष्यपन से रहित (**शुचिः**)

पवित्र **(पावकः)** शुद्ध पवित्र करने वाला **(ईड्यः)** स्तुति करने वा खोजने चाहने योग्य **(अग्निः)** अग्नि के तुल्य राजा वा सेनाधीश **(रक्षांसि)** रक्षा करने योग्य कार्यों को **(सेधति)** सिद्ध करे वह कीर्ति वाला होता है॥१०॥

भावार्थः-जैसे राजा अन्याय का निवारण कर न्याय का प्रकाश करता है, वैसे विद्युत् दरिद्रता का विनाश कर लक्ष्मी को प्रकट करता है॥१०॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

स नो॒ राधा॑ꣳस्या भ॒रेशा॑नः सहसो यहो। भगा॑श्च दा॒तु वार्या॑म्॥ ११॥

सः। न॒ः। राधा॑ꣳसि। आ। भ॒र॒। ईशा॑नः। स॒हस॒ः। य॒हो॒ इति॑। भगा॑ः। च॒। दा॒तु॒। वार्या॑म्॥ ११॥

पदार्थः-(**सः**) (**नः**) अस्मभ्यम् (**राधांसि**) समृद्धिकराणि धनानि (**आ**) (**भर**) (**ईशानः**) ईषणशीलः समर्थः (**सहसः**) बलिष्ठस्य (**यहो**) अपत्य (**भगः**) ऐश्वर्यवानैश्वर्यं वा (**च**) (**दातु**) ददातु (**वार्यम्**) वरणीयम्॥११॥

अन्वयः-हे सहसो यहो राजन्नग्निरिवेशानो भगो यस्त्वं नो राधांस्याभर। वार्य्यं भगश्च स भवान् दातु॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्निविद्यया धनधान्यैश्वर्यं मनुष्याः प्राप्नुवन्ति तथैवोत्तमराजप्रबन्धेन जना धनाढ्याः सुखिनश्च जायन्ते॥११॥

पदार्थः-हे (**सहसः**) अति बलवान् के (**यहो**) पुत्र राजन्! अग्नि के तुल्य तेजस्वी (**ईशानः**) समर्थ (**भगः**) ऐश्वर्यवान् जो आप (**नः**) हमारे लिये (**राधांसि**) सुख बढ़ाने वाले धनों को (**आ, भर**) अच्छे प्रकार धारण वा पोषण करें तथा (**वार्यम्**) स्वीकार करने योग्य ऐश्वर्य को (**च**) भी (**सः**) सो आप (**दातु**) दीजिये॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्निविद्या से धनधान्य सम्बन्धी ऐश्वर्य को मनुष्य प्राप्त होते हैं, वैसे ही उत्तम राज्य प्रबन्ध से मनुष्य धनाढ्य और सुखी होते हैं॥११॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वमा॑ग्ने वी॒रव॒द्यशो॑ दे॒वश्चा॑ सवि॒ता भगा॑ः। दितिा॑श्च दाति॒ वार्या॑म्॥ १२॥

त्वम्। अ॒ग्ने॒। वी॒रऽव॑त्। यशा॑ः। दे॒वः। च॒। स॒वि॒ता। भगा॑ः। दितिा॑ः। च॒। दा॒ति॒। वार्या॑म्॥ १२॥

पदार्थः-(**त्वम्**) (**अग्ने**) अग्निरिव राजन् (**वीरवत्**) प्रशस्ता वीरा विद्यन्ते यस्मिंस्तत् (**यशः**) धनं कीर्तिं च (**देवः**) दाता देदीप्यमानः (**च**) (**सविता**) प्रेरकः सूर्यो वा (**भगः**) धनैश्वर्यम् (**दितिः**) दुःखनाशिका नीतिः (**च**) (**दाति**) ददाति (**वार्यम्**) वरणीयम्॥१२॥

अन्वयः-हे अग्ने राजन्! यथा देवः सविता दितिश्च वार्यं वीरवद्यशो भगश्च दाति तदेतत्त्वं देहि॥१२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा सुसम्प्रयुक्ताऽग्न्यादिवत्प्रजास्वैश्वर्यमुद्योगेन सुनीत्या च कारयित्वा दुःखं खण्डयति स एव यशस्वी भवति॥१२॥

पदार्थः-हे **(अग्ने)** अग्नि के तुल्य तेजस्वि राजन्! जैसे **(देवः)** दानशील वा प्रकाशमान **(सविता)** प्रेरणा करने वाला वा सूर्य और **(दितिः)** दुःखनाशक नीति **(च)** भी **(वार्यम्)** स्वीकार के योग्य **(वीरवत्)** जिससे उत्तम वीर पुरुष हों **(यशः)** उस धन वा कीर्ति **(च)** और **(भगः)** ऐश्वर्य को **(दाति)** देती है, इसको **(त्वम्)** आप दीजिये॥१२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा अच्छे प्रकार सम्प्रयुक्त अग्नि आदि के तुल्य प्रजाओं में उद्योग से और अच्छी नीति से ऐश्वर्य कराके दुःख को खण्डित करता है, वही यशस्वी होता है॥१२॥

पुनः स राजा किंवत्किं कुर्यादित्याह॥

फिर वह राजा किसके समान क्या करे, इस विषय को अगले मन्त्र में कहतेहैं॥

अग्ने॒ रक्षा॑ णो॒ अंह॑सः॒ प्रति॑ ष्म देव॒ रीष॑तः। तपि॑ष्ठै॒रज॑रो॑ दह॥ १३॥

अग्ने॑। रक्ष॑। नः॒। अंह॑सः। प्रति॑। स्म॒। दे॒व॒। रिष॑तः। तपि॑ष्ठैः। अ॒जरः॑। द॒ह॒॥ १३॥

पदार्थः-(**अग्ने**) पावक इव **(रक्षा)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(नः)** अस्मान् **(अंहसः)** पापाचरणात् **(प्रति)** **(स्म)** एव **(देव)** दिव्यगुणकर्मस्वभावयुक्त **(रीषतः)** हिंसकात् **(तपिष्ठैः)** अतिशयेन प्रतापकैः **(अजरः)** जरारहितः **(दह)** भस्मसात्कुरु॥१३॥

अन्वयः-हे देवाऽग्ने राजन्! यथाऽग्निस्तपिष्ठैः काष्ठादिकं दहति तथैवाऽजरः सँस्त्वं रीषतो नो रक्ष। अंहसः स्म प्रति रक्ष दुष्टाचाराँस्तपिष्ठैर्दह॥१३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाग्निः शीतादन्धकाराच्च रक्षति तथा राजादयो विद्वांसो हिंसादिपापाचरणात् सर्वान् पृथग्रक्षन्ति॥१३॥

पदार्थः-हे **(देव)** उत्तम गुण-कर्म-स्वभावयुक्त **(अग्ने)** अग्निवत् तेजस्वी राजन्! जैसे अग्नि **(तपिष्ठैः)** अत्यन्त तपाने वाले तेजों से काष्ठादि को जलाता है, वैसे **(अजरः)** वृद्धपन वा शिथिलता रहित हुए आप **(रीषतः)** हिंसक से **(नः)** हमारी **(रक्ष)** रक्षा कीजिये और **(अंहसः)** पापाचरण से **(स्म)** ही **(प्रति)** प्रतीति के साथ रक्षा कीजिये और दुष्टचारियों को तेजों से **(दह)** जलाइये॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि शीत और अन्धकार से रक्षा करता है, वैसे राजा आदि विद्वान् हिंसादि पापरूप आचरण से सब को पृथक् रखते हैं॥१३॥

पुना राजानौ प्रजाः प्रति किं कुर्यातामित्याह॥

फिर राजा और राणी प्रजा के प्रति क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अधा॑ म॒ही न॒ आय॒स्यना॑धृष्टो॒ नृपी॑तये। पूर्भ॑वा शत॒भुजिः॥ १४॥

अध॑। म॒ही। न॒ः। आय॑सी। अना॑धृष्टः। नृऽपी॑तये। पूः। भ॒व॒। श॒तऽभु॑जिः॥ १४॥

पदार्थः-(**अधा**) अध अत्र **निपातस्य चे**ति दीर्घः। (**मही**) महती वागेव राज्ञी (**नः**) अस्मान् स्त्रीजनान् (**आयसी**) अयोमयी दृढा (**अनाधृष्टः**) केनाऽप्याधर्षयितुमयोग्या (**नृपीतये**) नृणां पालनाय (**पूः**) नगरीव रक्षिका (**भवा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**शतभुजिः**) शतमसंख्याता भुजयः पालनानि यस्याः सा॥१४॥

अन्वयः-हे राज्ञि! यथा तवाऽनाधृष्टः पती राजा न्यायेन नॄन्पालयति तथाऽधाऽऽयसी पूरिव मही शतभुजिस्त्वं नृपीतये नो रक्षिका भव॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यत्र शुभगुणकर्मस्वभावो राजा नॄणां तादृशी राज्ञी च स्त्रीणां न्यायपालने कुर्यातां तत्र सर्वदा विद्यानन्दायुरैश्वर्याणि वर्धेरन्॥१४॥

पदार्थः-हे राणी! जैसे तुम्हारा (**अनाधृष्टः**) किसी से न धमकाने योग्य पति राजा न्याय से मनुष्यों का पालन करता है, वैसे (**अध**) अब (**आयसी**) लोहे से बनी दृढ़ (**पूः**) नगरी के समान रक्षक (**मही**) महती वाणी के तुल्य (**शतभुजिः**) असंख्यात जीवों का पालन करने वाली आप (**नृपीतये**) मनुष्यों के पालन के लिये (**नः**) हम स्त्री जनों की रक्षा करने वाली (**भव**) हूजिये॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जहाँ शुभ गुणकर्मस्वभावयुक्त राजा पुरुषों और वैसे गुणों वाली राणी स्त्रियों का न्याय और पालन करें, वहाँ सब काल में विद्या, आनन्द, अवस्था और ऐश्वर्य बढ़ें॥१४॥

पुना राजानौ प्रजाः प्रति कथं वर्तेयातामित्याह॥

फिर राणी राजा, प्रजा-जनों के प्रति कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं नः॑ पा॒ह्यं॑ह॑सो॒ दोषा॑वस्तरघाय॒तः। दिवा॒ नक्त॑मदाभ्य॥ १५॥ २०॥

त्वम्। नः॒। पा॒हि॒। अं॑ह॑सः। दोषा॑ऽवस्तः। अ॒घ॒ऽय॒तः। दिवा॑। नक्त॑म्। अ॒दा॒भ्य॒॥ १५॥

पदार्थः-(**त्वम्**) (**नः**) अस्मान् (**पाहि**) (**अंहसः**) अपराधात् (**दोषावस्तः**) अहर्निशम् (**अघायतः**) आत्मनोऽघमिच्छतः सङ्गात् (**दिवा**) दिनम् (**नक्तम्**) रात्रिम् (**अदाभ्य**) अहिंसनीय॥१५॥

अन्वयः-हे अदाभ्य राजन्! त्वं दोषावस्तरघायतो दिवानक्तमंहसश्च नः पाहि॥१५॥

भावार्थः-यथा राजा पुरुषान् सततं रक्षेत्तथा राज्ञी प्रजास्थानारीर्नित्यं पालयेदिति॥१५॥

अत्राऽग्निदृष्टान्तेन राजराज्ञिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चदशं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**अदाभ्य**) रक्षा करने योग्य राजन्! (**त्वम्**) आप (**दोषावस्तः**) दिन-रात (**अघायतः**) अपने को पाप चाहते हुए दुष्ट के सङ्ग से और (**दिवानक्तम्**) रात्रि दिन सब समय में

(अंहसः) अपराध से **(नः)** हमको आप **(पाहि)** रक्षित कीजिये, बचाइये॥१५॥

भावार्थः-जैसे राजा पुरुषों की निरन्तर रक्षा करे, वैसे राणी प्रजा की स्त्रियों की नित्य रक्षा करे॥१५॥

इस सूक्त में अग्नि के दृष्टान्त से राजा और रानी के कृत्यों का वर्णन करने से इस सूक्त की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पन्द्रहवां सूक्त और बीसवां वर्ग समाप्त हुआ॥

अथ द्वादशर्चस्य षोडशस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १ स्वराडनुष्टुप्। ५ निचृदनुष्टुप्। ७ अनुष्टुप्। ११ भुरिगनुष्टुप्छन्दः। गान्धारः स्वरः। २ भुरिग्बृहती। ३ निचृद्बृहती। ४, ९, १० बृहतीछन्दः। मध्यमः स्वरः। ६, ८, १२ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ राजा प्रजासुखाय किं किं कुर्य्यादित्याह॥

अब राजा प्रजा के सुख के लिये क्या क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

एना वो अग्निं नमसोर्जो नपातमा हुवे।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्॥ १॥

एना। वः। अग्निम्। नमसा। ऊर्जः। नपातम्। आ। हुवे। प्रियम्। चेतिष्ठम्। अरतिम्। सुऽअध्वरम्। विश्वस्य। दूतम्। अमृतम्॥ १॥

पदार्थः-(**एना**) एनेन (**वः**) युष्मान् (**अग्निम्**) (**नमसा**) अन्नेन सत्कारादिना वा (**ऊर्जः**) पराक्रमस्य (**नपातम्**) अविनाशम् (**आ**) (**हुवे**) आदद्मि (**प्रियम्**) कमनीयं प्रीतम् (**चेतिष्ठम्**) अतिशयेन संज्ञापकम् (**अरतिम्**) सुखप्रापकम् (**स्वध्वरम्**) शोभना अध्वरा अहिंसादयो व्यवहारा यस्य तम् (**विश्वस्य**) संसारस्य (**दूतम्**) बहुकार्यसाधकम् (**अमृतम्**) स्वस्वरूपेण नाशरहितम्॥ १॥

अन्वयः-हे प्रजाजना! यथाऽहं राजा व एना नमसोर्जो नपातं प्रियं चेतिष्ठमरतिं स्वध्वरममृतं विश्वस्य दूतमग्निमिवोपदेशकमाहुवे तथा यूयमप्येतमाह्वयत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा राजा सत्योपदेशकान् प्रचारयेत्तथोपदेष्टारः स्वकृत्यं प्रीत्या यथावत्कुर्य्युः॥ १॥

पदार्थः-हे प्रजाजनो! जैसे मैं राजा (**एना**) इस (**नमसा**) अन्न वा सत्कारादि से (**ऊर्जः**) पराक्रम के (**नपातम्**) विनाश को प्राप्त न होने वाले (**प्रियम्**) चाहने योग्य (**चेतिष्ठम्**) अतिशय कर सम्यक् ज्ञापक (**अरतिम्**) सुख प्रापक (**स्वध्वरम्**) सुन्दर अहिंसादि व्यवहार वाले (**अमृतम्**) अपने स्वरूप से नाशरहित (**विश्वस्य**) संसार के (**दूतम्**) बहुत कार्य्यों के साधक (**अग्निम्**) अग्नि के तुल्य तेजस्वी उपदेशक को (**आहुवे**) स्वीकार करता, वैसे तुम भी उसको स्वीकार करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे राजा सत्योपदेशकों का प्रचार करे, वैसे उपदेशक अपने कर्त्तव्य को प्रीति से यथावत् पूरा करें॥ १॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम्॥ २॥

सः। योजते। अरुषा। विश्वऽभोजसा। सः। दुद्रवत्। सुऽआहुतः। सुऽब्रह्मा। यज्ञः। सुऽशमी। वसूनाम्। देवम्। राधः। जनानाम्॥ २॥

पदार्थः-(**सः**) (**योजते**) (**अरुषा**) अश्वाविव जलाऽग्नी (**विश्वभोजसा**) विश्वस्य पालकौ (**सः**) (**दुद्रवत्**) भृशं गच्छेत् (**स्वाहुतः**) सुष्ठुकृताह्वानः (**सुब्रह्मा**) शोभनानि ब्रह्माणि धनाऽन्नानि यस्य यद्वा सुष्ठु चतुर्वेदवित् (**यज्ञः**) पूजनीयः (**सुशमी**) शोभनकर्मा (**वसूनाम्**) धनानाम् (**देवम्**) दिव्यस्वरूपम् (**राधः**) धनम् (**जनानाम्**) मनुष्याणाम्॥२॥

अन्वयः-हे मनुष्या! यदि स्वाहुतः स सुब्रह्मा यज्ञः सुशमी वसूनां राधो जनानां देवं विश्वभोजसा अरुषा योजयन् दुद्रवत् सन् योजते स सिद्धेच्छो जायते॥२॥

भावार्थः-यो राजा प्रजापालनाय सदा सुस्थिरस्तं ये दुःखनिवारणायाह्वयेयुस्तान् सद्यः प्राप्य सुखिनः करोत्युत्तमाचरणो विद्वान् सन्प्रजाहितं प्रतिक्षणं चिकीर्षति स एव सर्वैः पूजनीयो भवति॥२॥

पदार्थः-हे मनुष्यो यदि (**सः**) वह (**स्वाहुतः**) सुन्दर प्रकार आह्वान किया हुआ (**सः**) वह (**सुब्रह्मा**) सुन्दर अन्न वा धनों से युक्त वा अच्छे प्रकार चारों वेद का ज्ञाता (**यज्ञः**) सत्कार के योग्य (**सुशमी**) सुन्दर कर्मों वाला (**वसूनाम्**) धनों का (**राधः**) धन (**जनानाम्**) मनुष्यों के बीच (**देवम्**) उत्तम (**विश्वभोजसा**) विश्व के रक्षक (**अरुषा**) घोड़ों के तुल्य जल-अग्नि को युक्त करता और (**दुद्रवत्**) शीघ्र प्राप्त होता हुआ (**योजते**) युक्त करता है, वह इच्छा सिद्धि वाला होता है॥२॥

भावार्थः-जो राजा प्रजापालन के अर्थ सदा सुस्थिर है उसको जो दुःख निवारण के लिये बुलावें उनको शीघ्र प्राप्त होकर सुखी करता है, उत्तम आचरणों वाला विद्वान् होता हुआ प्रतिक्षण प्रजा के हित की इच्छा करता है, वही सब को पूजनीय होता है॥२॥

पुनः सोऽग्निः कीदृशोऽस्तोत्याह॥

फिर वह अग्नि कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः॥३॥

उत्। अस्य। शोचिः। अस्थात्। आऽजुह्वानस्य। मीळ्हुषः। उत्। धूमासः। अरुषासः। दिविऽस्पृशः। सम्। अग्निम्। इन्धते। नरः॥३॥

पदार्थः-(**उत्**) (**अस्य**) अग्नेः (**शोचिः**) दीप्तिः (**अस्थात्**) उत्तिष्ठते (**आजुह्वानस्य**) समन्तात् प्राप्तहुतद्रव्यस्य (**मीळ्हुषः**) सेचकस्य (**उत्**) (**धूमासः**) (**उरुषासः**) ज्वालाः (**दिविस्पृशः**) ये दिवि स्पृशन्ति (**सम्**) (**अग्निम्**) (**इन्धते**) (**नरः**) मनुष्याः॥३॥

अन्वयः-ये नरो यस्याऽऽजुह्वानस्य मीळ्हुषोऽस्याग्नेः शोचिरुदस्थाद्दिविस्पृशो धूमासोऽरुषास उत्तिष्ठन्ते तमग्निं समन्धिते त उन्नतिं प्राप्नुवन्ति॥३॥

भावार्थः-हे मनुष्या! यूयमूर्ध्वगामिनं धूमध्वजं तेजोमयं वृष्ट्यादिना प्रजापालकमग्निं सम्प्रयुङ्ध्वं येन युष्माकं कामसिद्धिः स्यात्॥३॥

पदार्थः-जो (**नरः**) मनुष्य जिस (**आजुह्वानस्य**) अच्छे प्रकार होम किये द्रव्य को प्राप्त (**मीळ्हुषः**) सेचक (**अस्य**) इस अग्नि का (**शोचिः**) दीप्ति (**उदस्थात्**) उठती है (**दिविस्पृशः**) प्रकाश

में स्पर्श करने वाले **(धूमासः)** धूम और **(अरुषासः)** अरुणवर्ण लपटें **(उत्)** उठती हैं उस **(अग्निम्)** अग्नि को **(समिन्धते)** सम्यक् प्रकाशित करते हैं, वे उन्नति को प्राप्त होते हैं॥३॥

भावार्थः-हे मनुष्यो! तुम लोग ऊर्ध्वगामी धूमध्वजा वाले तेजोमय वृष्टि आदि से प्रजा के रक्षक अग्नि को सम्यक् प्रयुक्त करो, जिस से तुम्हारे कार्यों की सिद्धि होवे॥३॥

पुना राजादयो मनुष्याः किं कुर्य्युरित्याह॥

फिर राजादि मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

तं त्वा॑ दू॒तं कृ॑ण्महे य॒शस्त॑मं दे॒वाँ आ वी॒तये॑ वह।
विश्वा॑ सूनो सहसो मर्त॒भोज॑ना॒ रास्व॒ तद्यत्त्वेम॑हे॥४॥

तम्। त्वा॒। दू॒तम्। कृ॒ण्म॒हे॒। य॒शः॑ऽत॑मम्। दे॒वान्। आ। वी॒तये॑। व॒ह॒। विश्वा॑। सू॒नो॒ इति॑। स॒ह॒सः॒। म॒र्त॒ऽभोज॑ना। रास्व। तत्। यत्। त्वा॒। ईम॑हे॥४॥

पदार्थः-(**तम्**) (**त्वा**) त्वाम् (**दूतम्**) (**कृण्महे**) (**यशस्तमम्**) अतिशयेन कीर्तिकारकम् (**देवान्**) दिव्यगुणान् पदार्थान् वा (**आ**) (**वीतये**) विज्ञानादिप्राप्तये (**वह**) प्राप्नुहि प्रापय वा (**विश्वा**) सर्वाणि (**सूनो**) अपत्य (**सहसः**) बलवतः (**मर्त्तभोजना**) मर्त्तानां मनुष्याणां भोजनानि पालनानि (**रास्व**) देहि (**तत्**) तम् (**यत्**) यम् (**त्वा**) त्वाम् (**ईमहे**) याचामहे॥४॥

अन्वयः-हे सहसस्सूनो विद्वन्! यथा वयं यशस्तमं तमग्निं दूतं कृण्महे तथा त्वा मुख्यं कृण्महे त्वं वीतये देवाना वह विश्वा मर्त्तभोजना रास्व यथा यद्यमग्निं कार्यसिद्धये प्रयुञ्जमहे तथा तत्तं त्वेमहे॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये सर्वकार्य्यसाधकं विद्युदग्निं दूतं राजकार्य्यसाधकं विद्याविनयान्वितं पुरुषं राजानं च कुर्वन्ति ते समग्रमैश्वर्यं पालनं च लभन्ते॥४॥

पदार्थः-हे (**सहसः**) बलवान् के (**सूनो**) पुत्र विद्वन्! जैसे हम लोग (**यशस्तमम्**) अतिशय कीर्ति करने वाले (**तम्**) उस अग्नि को (**दूतम्**) दूत (**कृण्महे**) करते, वैसे (**त्वा**) आपको मुख्य करते हैं आप (**वीतये**) विज्ञानादि को प्राप्त करने के लिये (**देवान्**) दिव्य गुणों वा पदार्थों को (**आ, वह**) अच्छे प्रकार प्राप्त हूजिये वा कीजिये (**विश्वा**) सब (**मर्त्तभोजना**) मनुष्यों के भोजनों वा पालनों को (**रास्व**) दीजिये जैसे (**यत्**) जिस अग्नि को कार्यसिद्धि के लिये प्रयुक्त करते, वैसे (**तत्**) उसको और (**त्वा**) आपको (**ईमहे**) याचना करते हैं॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो सब कार्यों के साधक विद्युत् अग्नि के दूत और राजकार्यों के साधक विद्या वा विनय से युक्त पुरुष को राजा करते हैं, वे सब ऐश्वर्य और पालन को प्राप्त होते हैं॥४॥

पुनर्मनुष्यः कीदृशः स्यादित्याह॥

फिर मनुष्य कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

त्वम॑ग्ने गृ॒हप॑ति॒स्त्वं होता॑ नो अध्व॒रे।

त्वं पोता॑ विश्ववार॒ प्रचे॑ता॒ यक्षि॒ वेषि॑ च॒ वार्य॑म्॥५॥

त्वम्। अ॒ग्ने॒। गृ॒हऽप॑तिः। त्वम्। होता॑। न॒रः। अ॒ध्व॒रे॒। त्वम्। पोता॑। वि॒श्व॒ऽवा॒र॒। प्रऽचे॑ताः। यक्षि॑। वेषि॑। च॒। वार्य॑म्॥५॥

पदार्थः-(**त्वम्**) (**अग्ने**) वह्निरिव प्रकाशमान (**गृहपतिः**) गृहस्य पालकः (**त्वम्**) (**होता**) दाता (**नः**) अस्माकम् (**अध्वरे**) अहिंसादिलक्षणे धर्माचरणे (**त्वम्**) (**पोता**) पवित्रकर्त्ता (**विश्ववार**) सर्वैर्वरणीय (**प्रचेताः**) प्रकर्षेण प्रज्ञापकः (**यक्षि**) यजसि सङ्गच्छसे (**वेषि**) व्याप्नोषि (**च**) (**वार्यम्**) वरणीयं धर्म्यं व्यवहारम्॥५॥

अन्वयः-हे विश्ववाराग्ने यो वह्निरिव गृहपतिस्त्वं नोऽध्वरे होता त्वं प्रचेता वार्य्यं यक्षि वेषि च तं त्वां वयमीमहे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। पूर्वस्मान् मन्त्रात् (ईमहे) इति पदमनुवर्त्तते। यथाऽग्निर्गृहपालकः सुखदाताऽध्वरे पवित्रकर्त्ता शरीरे चेतयिता सर्वं विश्वं सङ्गच्छते व्याप्नोति च तथैव मनुष्या भवन्तु॥५॥

पदार्थः-हे (**विश्ववार**) सब को स्वीकार करने योग्य (**अग्ने**) अग्नि के तुल्य प्रकाशमान (**गृहपतिः**) घर के रक्षक! (**त्वम्**) आप (**नः**) हमारे (**अध्वरे**) अहिंसादि लक्षणयुक्त धर्म के आचरण में (**होता**) दाता (**त्वम्**) (**पोता**) पवित्रकर्त्ता (**त्वम्**) आप (**प्रचेताः**) अच्छे प्रकार जताने वाले आप (**वार्य्यम्**) स्वीकार योग्य धर्मयुक्त व्यवहार को (**यक्षि**) सङ्गत करते (**च**) और (**वेषि**) व्याप्त होते हैं, उन आपकी हम लोग याचना करते हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पूर्व मन्त्र से यहाँ (ईमहे) पद की अनुवृत्ति आती है। जैसे अग्नि घर का पालक, सुखदाता, यज्ञ में पवित्रकर्त्ता, शरीर में चेतनता कराने वाला, सब विश्व का संग करता और व्याप्त होता है, वैसे ही मनुष्य होवें॥५॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे इस विषय को अगले मन्त्र में कहते हैं॥

कृ॒धि रत्नं॑ यज॒मानाय सुक्रतो॒ त्वं हि र॑त्न॒धा असि॑।
आ न॑ ऋ॒ते शि॑शीहि॒ विश्व॑मृ॒त्विजं॑ सु॒शंसो॒ यश्च॒ दक्ष॑ते॥६॥२१॥

कृ॒धि। रत्न॑म्। यज॒मानाय। सु॒क्र॒तो॒ इति॑ सुऽक्रतो। त्वम्। हि। र॒त्न॒ऽधाः। असि॑। आ। न॒रः। ऋ॒ते। शि॒शी॒हि॒। विश्व॑म्। ऋ॒त्विज॑म्। सु॒ऽशंसः॑। यः। च॒। दक्ष॑ते॥६॥

पदार्थः-(**कृधि**) कुरु (**रत्नम्**) रमणीयं धनम् (**यजमानाय**) परोपकारार्थं यज्ञं कुर्वते (**सुक्रतो**) उत्तमप्रज्ञ धर्म्यकर्मकर्त्तः (**त्वम्**) (**हि**) यतः (**रत्नधाः**) यो रत्नानि धनानि दधाति सः (**असि**) (**आ**) (**नः**) अस्मान् (**ऋते**) सत्यभाषणादिरूपे सङ्गन्तव्ये व्यवहारे (**शिशीहि**) तीव्रोद्योगिनः कुरु (**विश्वम्**) समग्रम् (**ऋत्विजम्**) य ऋतूनर्हति तम् (**सुशंसः**) सुष्ठुप्रशंसः (**यः**) (**च**) (**दक्षते**) वर्धते॥६॥

अन्वयः-हे सुक्रतो! यः सुशंसो दक्षते तं विश्वमृत्विजं नोऽस्मांश्चर्ते त्वमा शिशीहि। हि यतस्त्वं रत्नधा असि तस्माद्यजमानाय रत्नं कृधि॥६॥

भावार्थः-अस्मिन् संसारे यो धनाढ्यः स्यात्स प्रीत्या निर्धनानुद्योगं कारयित्वा सततं पालयेत्। ये सत्क्रियायां वर्धन्ते तान् धन्यवादेन धनादिदानेन च प्रोत्साहयेत्॥६॥

पदार्थः-हे (**सुक्रतो**) उत्तम बुद्धि वा धर्मयुक्त कर्म करने वाले पुरुष! (**यः**) जो (**सुशंसः**) सुन्दर प्रशंसायुक्त जन (**दक्षते**) वृद्धि को प्राप्त होता उस (**विश्वम्**) सब (**ऋत्विजम्**) ऋतुओं के योग्य काम करने वाले को (**च**) और (**नः**) हमको (**ऋते**) सत्यभाषणादि रूप संगत करने योग्य व्यवहार में (**त्वम्**) आप (**आ, शिशीहि**) तीव्र उद्योगी कीजिये (**हि**) जिस कारण आप (**रत्नधाः**) उत्तम धनों के धारणकर्त्ता (**असि**) हैं इस कारण (**यजमानाय**) परोपकरार्थ यज्ञ करते हुए के लिये (**रत्नम्**) रमणीय धन को प्रकट (**कृधि**) कीजिये॥६॥

भावार्थः-इस संसार में जो पुरुष धनाढ्य हो वह निर्धनों को उद्योग कराके निरन्तर पालन करे। जो सत् श्रेष्ठ कर्मों में बढ़ते उन्नत होते हैं उन को धन्यवाद और धनादि पदार्थों के दान से उत्साहयुक्त करे॥६॥

पुनः स राजा कान् सत्कुर्यादित्याह॥

फिर वह राजा किन का सत्कार करे, इस विषय को अगले मन्त्र में कहते हैं॥

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः।
यन्तारो ये मघवानो जनानामूर्वान् दयन्त गोनाम्॥७॥

त्वे इति। अग्ने। सुऽआहुत। प्रियासः। सन्तु। सूरयः। यन्तारः। ये। मघऽवानः। जनानाम्। ऊर्वान्। दयन्त। गोनाम्॥७॥

पदार्थः-(**त्वे**) त्वयि (**अग्ने**) विद्याविनयप्रकाशक (**स्वाहुत**) सुष्ठु सत्कृत (**प्रियासः**) प्रीतिमन्तः (**सन्तु**) (**सूरयः**) धार्मिका विद्वांसः (**यन्तारः**) ये यान्ति प्राप्नुवन्ति ते (**ये**) (**मघवानः**) बहुधनयुक्ताः (**जनानाम्**) मनुष्याणां मध्ये (**ऊर्वान्**) आच्छादकान् पावकान् (**दयन्त**) दयन्ते (**गोनाम्**) गवादिपशूनाम्॥७॥

अन्वयः-हे स्वाहुताग्ने अग्निवद्वर्त्तमान् राजन्! ये जनानां मध्ये गोनामूर्वान् दयन्त यन्तारो मघवानः सूरयस्त्वे प्रियासः सन्तु ताँस्त्वं नित्यं सत्कुर्याः॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा राजा सर्वेषु दयां विधाय विदुषः सत्कृत्य धनाढ्यान् स्वराज्ये वासयेत्तथा प्रजाजना राजहितैषिणः स्युः॥७॥

पदार्थः-हे (**स्वाहुत**) सुन्दर प्रकार सत्कार को प्राप्त (**अग्ने**) विद्या विनय के प्रकाशक अग्नि के तुल्य तेजस्वि राजन्! (**ये**) जो (**जनानाम्**) मनुष्यों के बीच (**गोनाम्**) गौ आदि पशुओं के (**ऊर्वान्**) रक्षकों को (**दयन्त**) दया करते वा सुरक्षित रखते और (**यन्तारः**) शुभ कर्मों को प्राप्त होने वाले (**मघवानः**) बहुत प्रकार के धनों से युक्त (**सूरयः**) धर्मात्मा विद्वान् (**त्वे**) आप में (**प्रियासः**) प्रीति

करने वाले **(सन्तु)** हों उनका आप नित्य सत्कार कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे राजा सब में दया का विधान कर और विद्वानों का सत्कार करके अपने राज्य में धनाढ्यों को बसावे, वैसे प्रजाजन भी राजा के हितैषी होवें॥७॥

राज्ञा के पालनीया दण्डनीयाश्च सन्तीत्याह॥

राजा को किनका पालन वा किनको दण्ड देना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति।
ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत्॥८॥

येषाम्। इळा। घृतऽहस्ता। दुरोणे। आ। अपि। प्राता। निऽसीदति। तान्। त्रायस्व। सहस्य। द्रुहः। निदः। यच्छ। नः। शर्म। दीर्घऽश्रुत्॥८॥

पदार्थः-(**येषाम्**) (**इळा**) प्रशंसनीया वाक् (**घृतहस्ता**) घृतं हस्ते गृह्यते यया सा (**दुरोणे**) गृहे (**आ**) (**अपि**) (**प्राता**) व्यापिका (**निषीदति**) (**तान्**) (**त्रायस्व**) (**सहस्य**) सहसा बलेन युक्त (**द्रुहः**) द्रोग्धीन् (**निदः**) निन्दकान् (**यच्छा**) निगृह्णीहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्माकम् (**शर्म**) गृहम् (**दीर्घश्रुत्**) यो दीर्घं कालं शृणोति॥८॥

अन्वयः-हे सहस्य! येषां दुरोणे घृतहस्ता प्रातेळा आ निषीदति ताँस्त्वं त्रायस्व दीर्घश्रुत्त्वं नः शर्म यच्छ ये द्रुहो निदः सन्ति तानप्यायच्छ॥८॥

भावार्थः-हे राजन्! ये सत्यवाचो वेदविदः स्युस्तेभ्यो नित्यं सुखं प्रयच्छ ये च द्रोहादिदोषयुक्ता आप्तनिन्दकाः स्युस्तान् भृशं दण्डय॥८॥

पदार्थः-हे (**सहस्य**) बल से युक्त राजन्! (**येषाम्**) जिन के (**दुरोणे**) घर में (**घृतहस्ता**) हाथ में घी लेने वाली के तुल्य (**प्राता**) व्यापक (**इळा**) प्रशंसा योग्य वाणी (**आ, निषीदति**) अच्छे प्रकार निरन्तर स्थिर होती (**तान्**) उनकी आप (**त्रायस्व**) रक्षा कीजिये (**दीर्घश्रुत्**) दीर्घ काल तक सुनने वाले आप (**नः**) हमारे (**शर्म**) घर को (**यच्छ**) ग्रहण कीजिये जो (**द्रुहः**) द्रोही (**निदः**) निन्दक हैं उनको (**अपि**) भी अच्छे प्रकार ग्रहण कीजिये॥८॥

भावार्थः-हे राजन्! जो सत्यवाणी वाले, वेद ज्ञाता हों उनको नित्य सुख दीजिये और जो द्रोहादि दोषयुक्त आप्तों के निन्दक हैं, उनको शीघ्र दण्ड दीजिये॥८॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः।
अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय॥९॥

सः। म॒न्द्र॒या। च॒। जि॒ह्व॒या। व॒ह्निः। आ॒सा। वि॒दुः॒ऽत॑रः। अग्ने॑। र॒यिम्। म॒घव॑त्ऽभ्यः। नः॒। आ। व॒ह॒। ह॒व्य॒ऽदा॑तिम्। च॒। सू॒द॒य॒॥९॥

पदार्थः-(**सः**) (**मन्द्रया**) प्रशंसितयाऽऽनन्दप्रदया (**च**) (**जिह्वया**) सत्यभाषणयुक्तया वाचा (**वह्निः**) वोढा विद्यासुखप्रापकः (**आसा**) मुखेन (**विदुष्टरः**) अतिशयेन विद्वान् (**अग्ने**) अग्निरिव न्यायेन प्रकाशित राजन् (**रयिम्**) धनम् (**मघवद्भ्यः**) प्रशंसितधनेभ्यः (**नः**) अस्मभ्यम् (**आ**) (**वह**) समन्तात् प्रापय (**हव्यदातिम्**) होतुं दातुं गृहीतुं वा योग्यानां खण्डनम् (**च**) (**सूदय**) विनाशय॥९॥

अन्वयः-हे अग्ने! यो वह्निरिव वर्त्तमानो विदुष्टरस्स एवं मन्द्रया जिह्वयाऽऽसा च मघवद्भ्यो नो रयिमा वह हव्यदातिं च सूदय॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽग्नि सर्वेभ्यः पृथिव्यादिभ्यस्तत्त्वेभ्यो हीरकादीनि परिपाच्य प्रयच्छति तथा राजा धनाढ्यानां सकाशान्निर्धनं श्रीमन्तं कारयित्वा सुखं प्रापयेत् सत्यया मधुरया वाचा सर्वाञ्छिक्षेत यत एतेऽयुक्ते व्यवहारे धनहानि न कुर्य्युः॥९॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य न्याय से प्रकाशित राजन्! **[**जो**]** (**वह्निः**) अग्नि के तुल्य वर्त्तमान विद्या और सुख प्राप्त करने वाले (**विदुष्टरः**) अत्यन्त विद्वान् हैं (**सः**) सो आप (**मन्द्रया**) प्रशंसित आनन्द देने वाली (**जिह्वया**) सत्य भाषणयुक्त वाणी से (**च**) और (**आसा**) मुख से (**मघवद्भ्यः**) प्रशंसित धन वाले (**नः**) हम लोगों के लिये (**रयिम्**) धन को (**आ, वह**) प्राप्त कीजिये (**च**) और (**हव्यदातिम्**) होम के वा ग्रहण करने के योग्य वस्तुओं के खण्डन को (**सूदय**) नष्ट कीजिये॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे अग्नि सब पृथिव्यादि तत्त्वों से हीरा आदि रत्नों को सब ओर से पका के देता है, वैसे राजा, धनाढ्यों के सम्बन्ध से निर्धन को धनवान् कराके सुख प्राप्त करे, सत्य मधुर वाणी से प्रजाजनों को शिक्षा करे, जिससे ये अयुक्त व्यवहार में धनहानि न करें॥९॥

पुनः स राजा प्रजाजनान् प्रति कथं वर्तेत इत्याह॥

फिर वह राजा प्रजाजनों के प्रति कैसे वर्त्ते, इस विषय को अगले मन्त्र में कहते हैं॥

ये राधां॑सि॒ ददत्यश्व्या॑ म॒घा का॒मेन॒ श्रव॑सो म॒हः।
ताँ अंह॑सः पिपृहि पर्तृभि॒ष्ट्वं श॒तं पू॒र्भिर्यवि॑ष्ठ्य॥१०॥

ये। राधां॑सि। दद॑ति। अश्व्या॑। म॒घा। काम॑न। श्रव॑सः। म॒हः। तान्। अंह॑सः। पि॒पृ॒हि॒। पर्तृ॑ऽभिः। त्वम्। श॒तम्। पू॒ःऽभिः। यवि॑ष्ठ्य॥१०॥

पदार्थः-(**ये**) (**राधांसि**) धनानि (**ददति**) (**अश्व्या**) महत्सु भवानि (**मघा**) पूजनीयानि (**कामेन**) इच्छया (**श्रवसः**) अन्नस्य (**महः**) महतः (**तान्**) (**अंहसः**) दुष्टाचारात् (**पिपृहि**) पालय (**पर्तृभिः**) पालकैः (**त्वम्**) (**शतम्**) असंख्यम् (**पूर्भिः**) नगरीभिः (**यविष्ठ्य**) येऽतिशयेन युवानस्तेषु साधो॥१०॥

अन्वयः-हे यविष्ठ्य राजन्! ये महः श्रवसः कामेन शतं मघाऽश्व्या राधांसि सर्वेभ्यो ददति तान्पर्तृभिः पूर्भिस्त्वमंहसः पिपृहि॥१०॥

भावार्थः-हे राजन्! ये धर्मात्मभ्य उद्योगिभ्यः श्रमं कारयित्वा धनाऽन्नानि प्रयच्छन्ति तान्नगरीभिः पालकैस्सह वर्त्तमानानधर्माचरणात्पृथग् रक्षयत एते धर्मेणोद्योगेन पुष्कलं धनाऽन्नं प्राप्य जगद्धिताय सततं दानं कुर्य्युः॥१०॥

पदार्थः-हे **(यविष्ठ्य)** अतिशय कर जवानों में श्रेष्ठ राजन्! **(ये)** जो **(महः)** बड़े **(श्रवसः)** अन्न की **(कामेन)** कामना से **(शतम्)** सैकड़ों **(मघा)** स्वीकार करने योग्य **(अश्व्या)** महत् लोगों में प्रकट होने वाले **(राधांसि)** धनों को सब को **(ददति)** देते हैं **(तान्)** उनको **(पर्तृभिः)** रक्षक **(पूर्भिः)** नगरियों के साथ **(त्वम्)** आप **(अंहसः)** दुष्टाचरण से **(पिपृहि)** रक्षा कीजिये॥१०॥

भावार्थः-हे राजन्! जो धर्मात्मा उद्योगी जनों को उनसे श्रम करा के धन और अन्न देते हैं, उन नगरी और पालकों के साथ वर्त्तमानों को अधर्माचरण से पृथक् रक्खो जिससे धर्मपूर्वक उद्योग से पुष्कल धन और अन्न पाकर जगत् के हितार्थ निरन्तर दान करें॥१०॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते है॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्।
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते॥११॥

देवः। वः। द्रविणः॒दाः। पूर्णाम्। विवष्टि। आऽसिचम्। उत्। वा। सिञ्चध्वम्। उप। वा। पृणध्वम्। आत्। इत्। वः। देवः। ओहते॥११॥

पदार्थः-(**देव**) विद्वान् **(वः)** युष्मान् **(द्रविणोदाः)** धनप्रदः **(पूर्णम्)** **(विवष्टि)** विशेषेण कामयते **(आसिचम्)** समन्तात्सिक्ताम् **(उत्)** **(वा)** **(सिञ्चध्वम्)** **(उप)** **(वा)** **(पृणध्वम्)** पूरयत **(आत्)** अनन्तरम् **(इत्)** एव **(वः)** युष्मान् **(देवः)** दिव्यगुणः **(ओहते)** वितर्कयति॥११॥

अन्वयः-हे मनुष्या! यो द्रविणोदा देवो वः पूर्णामासिचं विवष्टि वा यो देवो वो युष्मानोहतं तमुत्सिञ्चध्वं वाऽऽदिदुपपृणध्वम्॥११॥

भावार्थः-ये विद्वांसो मनुष्याणां पूर्णां कामनां कुर्वन्ति तान् सर्वे सुखयन्तु॥११॥

पदार्थः-हे मनुष्यो! जो **(द्रविणोदाः)** धनदाता **(देवः)** विद्वान् **(वः)** तुमको **(पूर्णाम्)** पूरी **(आसिचम्)** अच्छे प्रकार सेचन की कान्ति को **(विवष्टि)** विशेष कर कामना करता है **(वा)** अथवा जो **(देवः)** दिव्यगुणधारी विद्वान् **(वः)** तुमको **(ओहते)** वितर्कित करता उसको **(उत्, सिञ्चध्वम्)** ही सींचो **(वा)** अथवा **(आत्, इत्)** इसके अनन्तर ही **(उप, पृणध्वम्)** समीप में तृप्त करो॥११॥

भावार्थः-जो विद्वान् लोग मनुष्यों की कामना पूर्ण करते हैं, उनको सब सुखी करें॥११॥

पुनरध्यापकाः अध्येतारः किं कुर्य्युरित्याह॥

फिर अध्यापक और अध्येता क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे॥ १२॥ २२॥

तम्। होतारम्। अध्वरस्य। प्रऽचेतसम्। वह्निम्। देवाः। अकृण्वत। दधाति। रत्नम्। विधते। सुऽवीर्यम्। अग्निः। जनाय। दाशुषे॥ १२॥

पदार्थः-(**तम्**) (**होतारम्**) विद्याया आदातारम् (**अध्वरस्य**) अहिंसामयस्य यज्ञस्य (**प्रचेतसम्**) प्रकर्षेण ज्ञापयितारम् (**वह्निम्**) वोढारम् (**देवाः**) विद्वासः (**अकृण्वत**) कुर्वन्तु (**दधाति**) (**रत्नम्**) रमणीयं धनम् (**विधते**) विधानं कुर्वते (**सुवीर्यम्**) सुष्ठु पराक्रमम् (**अग्निः**) वह्निरिव वर्त्तमानः (**जनाय**) परोपकारे प्रसिद्धाय (**दाशुषे**) दात्रे॥ १२॥

अन्वयः-योऽग्निरिव विधते दाशुषे जनाय सुवीर्यं रत्नं दधाति यं देवा अध्वरस्य होतारं वह्निं प्रचेतसमकृण्वत तं सर्वे सुशिक्षयन्तु॥ १२॥

भावार्थः-हे विद्वांसो! ये जितेन्द्रियास्तीव्रप्रज्ञा विद्याग्रहणाय प्रवृत्ता विद्यार्थिनस्युस्तानहिंस्रान् प्राज्ञान् विद्याधर्मधरान्कुरुतेति॥ १२॥

अत्राग्निविद्वद्राजयजमानपुरोहितोपदेशकविद्यार्थिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षोडशं सूक्तं द्वाविंशो वर्गश्च समाप्तः॥

पदार्थः-जो (**अग्निः**) अग्नि के तुल्य वर्त्तमान विद्वान् (**विधते**) विधान करते हुए (**दाशुषे**) दाता (**जनाय**) जन के लिये (**सुवीर्यम्**) सुन्दर पराक्रम युक्त (**रत्नम्**) रमणीय धन को (**दधाति**) धारण करता जिसको (**देवाः**) विद्वान् लोग (**अध्वरस्य**) अहिंसारूप यज्ञ के कर्त्ता वा (**होतारम्**) विद्या के ग्रहीता (**वह्निम्**) कार्य्यों के चलाने और (**प्रचेतसम्**) अच्छे प्रकार जताने वाले जन को (**अकृण्वत**) करें (**तम्**) उसको सब सुशिक्षित करावें॥ १२॥

भावार्थः-हे विद्वानो! जो जितेन्द्रिय, तीव्रबुद्धि वाले, विद्या ग्रहण के अर्थ प्रवृत्त विद्यार्थी हों उनको अहिंसाशील, बुद्धिमान्, विद्या और धर्म के धारक करो॥ १२॥

इस सूक्त में अग्नि, विद्वान्, राजा, यजमान, पुरोहित, उपदेशक और विद्यार्थी के कृत्य का वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह सोलहवां सूक्त और बाईसवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य सप्तदशस्य सूक्तस्य वसिष्ठ ऋषिः। अग्निर्देवता। १, ३, ४, ६, ७ आर्च्युष्णिक् छन्दः। ऋषभः स्वरः। २ साम्नी त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ साम्नी पङ्क्तिश्छन्दः। पञ्चमः स्वरः।

अथ विद्यार्थिनः किंवत्कीदृशा भवेयुरित्याह॥

अब विद्यार्थी किसके तुल्य कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

अग्ने॒ भव॑ सु॒षमि॒धा॒ सम॑ि॒द्ध उ॒त ब॒र्हिरु॑र्वि॒या वि स्तृ॑णीताम्॥ १॥

अग्ने॑। भव॑। सु॒ऽस॒मि॒धा॑। सम्ऽइ॑द्धः। उ॒त। ब॒र्हिः। उ॒र्वि॒या। वि। स्तृ॒णी॒ता॒म्॥ १॥

पदार्थः-(**अग्ने**) अग्निरिव विद्वन्! (**भव**) (**सुषमिधा**) शोभनया समिधेव धर्म्यक्रियया (**समिद्धः**) प्रदीप्तः (**उत**) अपि (**बर्हिः**) प्रवृद्धमुदकम्। **बर्हिरित्युदकनाम।** (निघं०१.१२ (**उर्विया**) पृथिव्या सह (**वि**) (**स्तृणीताम्**) तनोतु॥१॥

अन्वयः-हे अग्ने! यथा सुषमिधा समिद्धोऽग्निर्भवति तथा भव उत यथा वह्निरुर्विया बर्हिषि स्तृणाति तथाविधो भवान् वि स्तृणीताम्॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथेन्धनैरग्निः प्रदीप्यते वर्षोदकेन भूमिमाच्छदयति तथैव ब्रह्मचर्यसुशीलतापुरुषार्थैर्विद्यार्थिनः सुप्रकाशिता भूत्वा जिज्ञासुहृदयेषु विद्यां विस्तारयन्ति॥१॥

पदार्थः-हे (**अग्ने**) अग्नि के तुल्य तेजस्वी विद्वन्! जैसे (**सुषमिधा**) समिधा के तुल्य शोभायुक्त धर्मानुकूल क्रिया से (**समिद्धः**) प्रदीप्त अग्नि होता है, वैसे (**भव**) हूजिये (**उत**) और जैसे अग्नि (**उर्विया**) पृथिवी के साथ (**बर्हिः**) बढ़े हुए जल का विस्तार करता है, वैसे प्रकार होकर आप (**वि, स्तृणीताम्**) विस्तार कीजिये॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे इन्धनों से अग्नि प्रदीप्त होता, वर्षा जल से पृथिवी को आच्छादित करता है, वैसे ही ब्रह्मचर्य्य, सुशीलता और पुरुषार्थ से विद्यार्थी जन सुप्रकाशित होकर जिज्ञासुओं के हृदयों में विद्या का विस्तार करते हैं॥१॥

पुनरध्यापकविद्यार्थिनः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर अध्यापक और विद्यार्थी परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते है॥

उ॒त द्वार॑ उ॒शती॒र्वि श्र॑यन्तामु॒त दे॒वाँ उ॑श॒त आ व॑हे॒ह॥ २॥

उ॒त। द्वार॑ः। उ॒श॒तीः। वि। श्र॒य॒न्ता॒म्। उ॒त। दे॒वान्। उ॒श॒तः। आ। व॒ह॒। इ॒ह॥ २॥

पदार्थः-(**उत**) अपि (**द्वारः**) द्वाराणि (**उशतीः**) कामयमानाः (**वि**) (**श्रयन्ताम्**) सेवन्ताम् (**उत**) (**देवान्**) दिव्यगुणकर्मस्वभावान् (**उशतः**) कामयमानान् पतीन् (**आ**) (**वह**) (**इह**) अस्मिन्॥२॥

अन्वयः-हे विद्यार्थिन्! यथा द्वार उशतीर्हृद्याः पत्नीर्विद्वांस उत वोशतो देवान् स्त्रियो वि श्रयन्तां यथाऽग्निरिह सर्वं वहत्युत वा दिव्यान् गुणान् प्रापयति तथैव त्वमावह॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्यार्थिनो विद्याकामनाय आप्तानध्यापकान् सेवन्ते

यानुत्तमान् विद्यार्थिनोऽध्यापका इच्छन्ति ते परस्परं कामयमाना विद्यामुन्नेतुं शक्नुवन्ति॥२॥

पदार्थः-हे विद्यार्थी! जैसे **(द्वारः)** द्वार **(उशतीः)** कामना वाली हृदय को प्यारी पत्नियों को विद्वान् **(उत)** और **(उशतः)** कामना करते हुए **(देवान्)** उत्तम गुण-कर्म-स्वभावयुक्त विद्वान् पतियों को स्त्रियाँ **(वि, श्रयन्ताम्)** विशेष कर सेवन करें वा जैसे अग्नि **(इह)** इस जगत् में सब को प्राप्त होता **(उत)** और दिव्य गुणों को प्राप्त कराता है, वैसे ही आप **(आ, वह)** प्राप्त करिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्यार्थी विद्या की कामना से आप्त अध्यापकों का सेवन करते, जिन उत्तम विद्यार्थियों को अध्यापक चाहते, वे परस्पर कामना करते हुए विद्या की उन्नति कर सकते हैं॥२॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

अग्ने॑ वी॒हि ह॒विषा॒ यक्षि॑ दे॒वान्त्स्व॑ध्व॒रा कृ॑णु॒हि जातवेदः॥३॥

अग्ने॑। वी॒हि। ह॒विषा॑। यक्षि॑। दे॒वान्। सु॒ऽअ॒ध्व॒रा। कृ॒णु॒हि॒। जा॒त॒ऽवे॒दः॥३॥

पदार्थः-**(अग्ने)** वह्निरिव तीव्रप्रज्ञ **(वीहि)** व्याप्नुहि **(हविषा)** आदत्तेन पुरुषार्थेन **(यक्षि)** यज सङ्गच्छस्व **(देवान्)** विदुषोऽध्यापकान् **(स्वध्वरा)** शोभनोऽध्वरोऽहिंसामयो व्यवहारो येषां तान् **(कृणुहि)** **(जातवेदः)** जातविद्य॥३॥

अन्वयः-हे जातवेदोऽग्ने विद्यार्थिँस्त्वं विद्युदिव हविषा विद्या वीहि देवान् यक्षि स्वध्वरा कृणुहि॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्यार्थिनो यथा विद्युदध्वानं सद्यो व्याप्नोति तथा पुरुषार्थेन शीघ्रं विद्याः प्राप्नुवन्त्वध्यापकाश्च ताँस्तूर्णं विदुषः कुर्वन्तु॥३॥

पदार्थः-हे **(जातवेदः)** विद्या को प्राप्त **(अग्ने)** अग्नि के तुल्य तीव्रबुद्धि वाले विद्यार्थिन्! तू विद्युत् के तुल्य **(हविषा)** ग्रहण किये पुरुषार्थ से विद्याओं को **(वीहि)** प्राप्त हो **(देवान्)** विद्वान् अध्यापकों का **(यक्षि)** सङ्ग कर और **(स्वध्वरा)** सुन्दर अहिंसारूप व्यवहार वाले कामों को **(कृणुहि)** कर॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्यार्थिजन जैसे विद्युत् मार्ग को शीघ्र व्याप्त होते, वैसे पुरुषार्थ से शीघ्र विद्याओं को प्राप्त हों और अध्यापक पुरुष उनको शीघ्र विद्वान् करें॥३॥

केऽध्यापकाः वराः सन्तीत्याह॥

कौन अध्यापक श्रेष्ठ हैं, इस विषय को अगले मन्त्र में कहते हैं॥

स्व॒ध्व॒रा क॑रति जा॒तवे॑दा॒ यक्ष॑द् दे॒वाँ अ॒मृता॑न् पि॒प्रय॑च्च॥४॥

सु॒ऽअ॒ध्व॒रा। क॒र॒ति॒। जा॒तऽवे॑दाः। यक्ष॑त्। दे॒वान्। अ॒मृता॑न्। पि॒प्र॒य॑त्। च॒॥४॥

पदार्थः-**(स्वध्वरा)** सुष्ठ्वहिंस्रस्वभावयुक्तान् **(करति)** कुर्यात् **(जातवेदाः)** प्रसिद्धविद्यः **(यक्षत्)** सङ्गच्छेत् **(देवान्)** विदुषः **(अमृतान्)** स्वस्वरूपेण मृत्युरहितान् **(पिप्रयत्)** प्रीणीयात्

(च)॥४॥

अन्वयः-यो जातवेदाः अध्यापको विद्यार्थिनो देवान् स्वध्वरा करत्यमृतान् यक्षदेतान् पिप्रयच्च स विद्यार्थिभिः सेवनीयोऽस्ति॥४॥

भावार्थः-येषामध्यापकानां विद्यार्थिनः सद्यो विद्वांसः सुशीला धार्मिका जायन्ते त एवाऽध्यापकाः प्रशंसनीयाः सन्ति॥४॥

पदार्थः-जो **(जातवेदाः)** विद्या में प्रसिद्ध अध्यापक विद्यार्थियों को **(देवान्)** विद्वान् और **(स्वध्वरा)** अच्छे प्रकार अहिंसा स्वभाव वाले **(करति)** करे **(अमृतान्)** अपने स्वरूप से मृत्यु रहितों को **(यक्षत्)** संगत करे **(च)** और इनको **(पिप्रयत्)** तृप्त करे, वह विद्यार्थियों को सेवने योग्य है॥४॥

भावार्थः-जिन अध्यापकों के विद्यार्थी शीघ्र विद्वन्, सुशील, धार्मिक होते हैं, वे ही अध्यापक प्रशंसनीय होते हैं॥४॥

पुनरध्यापकं प्रति विद्यार्थिनः किं पृच्छेयुरित्याह॥

फिर अध्यापक से विद्यार्थी जन क्या पूछें, इस विषय को अगले मन्त्र में कहते हैं॥

वंस्व॒ विश्वा॒ वार्या॑णि प्रचेतः स॒त्या भ॑वन्त्वा॒शिषो॑ नो अ॒द्य॥५॥

वंस्व॑। विश्वा॑। वार्या॑णि। प्र॒चे॒त॒ इति॑। प्रऽचतः। स॒त्याः। भ॒व॒न्तु॒। आ॒ऽशिषः॑। नः॒। अ॒द्य॥५॥

पदार्थः-(**वंस्व**) संभज (**विश्वा**) सर्वाणि (**वार्याणि**) वरणीयानि प्रज्ञानानि (**प्रचेतः**) प्रकर्षेण प्रज्ञया युक्त (**सत्याः**) सत्सु साध्व्यः (**भवन्तु**) (**आशिषः**) इच्छा (**नः**) अस्माकम् (**अद्य**) अस्मिन् अहनि॥५॥

अन्वयः-हे प्रचेतस्त्वं विश्वा वार्याणि वंस्व यतो नोऽद्याऽऽशिषः सत्या भवन्तु॥५॥

भावार्थः-हे अध्यापक! त्वं विवेकेन सत्यानि शास्त्राण्यध्यापय सुशिक्षां कुरु येन वयं सत्यकामा भवेम॥५॥

पदार्थः-हे **(प्रचेतः)** उत्तम बुद्धि से युक्त पुरुष! आप **(विश्वा)** सब **(वार्याणि)** ग्रहण करने योग्य विद्वानों का **(वंस्व)** सेवन कीजिये जिससे **(अद्य)** आज **(नः)** हमारी **(आशिषः)** इच्छा **(सत्याः)** सत्य **(भवन्तु)** होवें॥५॥

भावार्थः-हे अध्यापक! आप विवेक से सत्य शास्त्रों को पढ़ाइये और सुशिक्षा करिये जिससे हम लोग सत्य कामना वाले हों॥५॥

पुनर्विद्यार्थिनः कमिव कं सेवेरन्नित्याह॥

फिर विद्यार्थी किसके तुल्य किसका सेवन करें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वामु॒ ते द॑धिरे हव्य॒वाहं॑ दे॒वासो॑ अग्न ऊ॒र्ज आ नपा॑तम्॥६॥

त्वाम्। ऊँ इति॑। ते। दु॒धि॒रे॒। ह॒व्य॒ऽवाह॑म्। दे॒वासः॑। अ॒ग्ने॒। ऊ॒र्जः॑। आ। नपा॑तम्॥६॥

पदार्थः-(**त्वाम्**) (**उ**) (**ते**) (**दधिरे**) दधतु (**हव्यवाहम्**) यो हव्यानि हुतानि द्रव्याणि वहति तद्वद्वर्त्तमानम् (**देवासः**) दिव्यस्वभावा विद्यार्थिनः (**अग्ने**) सकलविद्यया प्रकाशित (**ऊर्जः**)

पराक्रमयुक्ता: **(आ) (नपातम्)** न विद्यते पातो यस्य तम्॥६॥

अन्वय:-हे अग्ने! त ऊर्जो देवासो नपातं हव्यवाहमिव त्वामु आ दधिरे॥६॥

भावार्थ:-यथाऽग्निविद्या जना ऋत्विजोऽग्निं परिचरन्ति तथैव विद्यार्थिनोऽध्यापकं सेवेरन्॥६॥

पदार्थ:-हे **(अग्ने)** समस्त विद्या से प्रकाशित **(ते)** आपके **(ऊर्ज:)** पराक्रम युक्त **(देवास:)** उत्तम स्वभाव वाले विद्यार्थी जन **(नपातम्)** जिसका गिरना नहीं विद्यमान उस **(हव्यवाहम्)** होते हुए पदार्थों को पहुँचाने वाले अग्नि के समान **(त्वाम्)** **(उ)** तुझे ही **(आ, दधिरे)** अच्छे प्रकार धारण करें॥६॥

भावार्थ:-जैसे अग्निविद्या जानने वाले ऋत्विज् अग्नि की सेवा करते हैं, वैसे ही विद्यार्थी जन अध्यापक की सेवा करें॥६॥

पुनस्ते परस्परं किं किं प्रदद्युरित्याह॥

फिर वे परस्पर क्या क्या देवें, इस विषय को अगले मन्त्र में कहते हैं॥

ते तें देवाय दाशंत: स्याम महो नो रत्ना वि दंध इयानः॥७॥२३॥१॥

ते। ते। देवाय। दाशंत:। स्याम। महः। नः। रत्ना। वि। दधः। इयानः॥७॥

पदार्थ:-**(ते)** **(ते)** तुभ्यम् **(देवाय)** विदुषेऽध्यापकाय **(दाशत:)** दातार: **(स्याम)** **(मह:)** महान्ति **(न:)** अस्मभ्यम् **(रत्ना)** विद्यादिरमणीयप्रज्ञाधनानि **(वि)** **(दध:)** विदधाति **(इयान:)** प्राप्नुवन्॥७॥

अन्वय:-हे अध्यापक! यो भवान् न इयानो महो रत्ना वि दधस्तस्मै ते देवाय ते यं दाशत: स्याम॥७॥

भावार्थ:-यथाऽध्यापका: प्रीत्या विद्या: प्रदद्युस्तथा विद्यार्थिनो वाङ्मन:शरीरधनैरध्यापकान् प्रीणीयुरिति॥७॥

अत्राध्यापकविद्यार्थिकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे सप्तममण्डले प्रथमोऽनुवाक: सप्तदशं सूक्त पञ्चमेऽष्टके द्वितीयाध्याये त्रयोविंशो वर्गश्च समाप्त:॥

पदार्थ:-हे अध्यापक! जो आप **(न:)** हमारे लिये **(इयान:)** प्राप्त होते हुए **(मह:)** बड़े-बड़े **(रत्ना)** रत्नों को **(वि, दध:)** विधान करते हो **(ते)** उन **(देवाय)** विद्वान् अध्यापक आप के लिये **(ते)** वे हम लोग **(दाशत:)** देने वाले **(स्याम)** हों॥७॥

भावार्थ:-जैसे अध्यापक जन प्रीति के साथ विद्यायें देवें, वैसे विद्यार्थी जन वाणी, मन शरीर और धनों से अध्यापकों को तृप्त करें॥७॥

इस सूक्त में अध्यापक और विद्यार्थियों के कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह ऋग्वेद के सप्तममण्डल में पहिला अनुवाक और सत्रहवां सूक्त तथा पांचवें अष्टक के द्वितीयाध्याय में तेईसवां वर्ग पूरा हुआ॥

अथ पञ्चविंशत्यृचस्याऽष्टादशतमस्य सूक्तस्य वसिष्ठ ऋषिः। १-२१ इन्द्रः। २२-२५ सुदासः पैजवनस्य दानस्तुतिर्देवता। १, १७, २१ पङ्क्तिः। २, ४, १२, २२ भुरिक् पङ्क्तिः। ८, १३, १४ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३, ७ विराट् त्रिष्टुप्। ५, ९, ११, १६, १९, २० निचृत्त्रिष्टुप्। ६, १०, १५, १८, २३, २४, २५ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ राजा कीदृशो वरो भवतीत्याह॥

अब पच्चीस ऋचा वाले अठारहवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में राजा कैसा श्रेष्ठ होता है, इस विषय को कहते हैं॥

त्वे ह॒ यत्पि॒तर॑श्चिन्न इन्द्र॒ विश्वा॑ वा॒मा ज॑रि॒तारो॒ अस॑न्वन्।
त्वे गाव॑: सु॒दुघा॒स्त्वे ह्यश्वा॒स्त्वं वसु॑ देवय॒ते वनि॑ष्ठः॥ १॥

त्वे॒ इति॑। ह॒। यत्। पि॒तर॑:। चि॒त्। न॒:। इ॒न्द्र॒। विश्वा॑। वा॒मा। ज॒रि॒तार॑:। अस॑न्वन्। त्वे॒ इति॑। गाव॑:। सु॒ऽदुघा॑:। त्वे॒ इति॑। हि। अश्वा॑:। त्वम्। वसु॑। दे॒व॒ऽय॒ते। वनि॑ष्ठः॥ १॥

पदार्थः-(**त्वे**) त्वयि (**ह**) खलु (**यत्**) ये (**पितरः**) ऋतवः इव पालयितारः (**चित्**) अपि (**नः**) अस्माकम् (**इन्द्र**) (**विश्वा**) सर्वाणि (**वामा**) प्रशस्यानि (**जरितारः**) स्तावकः (**असन्वन्**) याचन्ते (**त्वे**) त्वयि (**गावः**) धेनवः (**सुदुघाः**) सुष्ठु कामप्रपूरिकाः (**त्वे**) त्वयि (**हि**) (**अश्वाः**) महान्तस्तुरङ्गाः (**त्वम्**) (**वसु**) द्रव्यम् (**देवयते**) कामयमानाय (**वनिष्ठः**) अतिशयेन वनिता सम्भाजकः॥१॥

अन्वयः-हे इन्द्र राजँस्त्वे सति सद्ये नः पितरश्चिन्नरितारो विश्वा वामा असन्वँस्त्वे ह सुदुघा गावोऽसन्वँस्त्वे ह्यश्वा असन्वन् यस्त्वं देवयते वनिष्ठः सन् वसु ददासि स त्वं सर्वैः सेवनीयः॥१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि राजा सूर्यवद्विद्यान्यायप्रकाशकौ भवेत्तर्हि सर्वं राष्ट्रं कामेनालंकृतं भूत्वा राजानमलंकामं कुर्याद्धार्मिका धर्ममाचरेयुरधार्मिकाश्च पापाचारं त्यक्त्वा धर्मिष्ठा भवेयुः॥१॥

पदार्थः-हे (**इन्द्र**) राजन्! (**त्वे**) आपके होते (**यत्**) जो (**नः**) हमारे (**पितरः**) ऋतुओं के समान पालना करने वाले (**चित्**) और (**जरितारः**) स्तुतिकर्ता जन (**विश्वा**) समस्त (**वामा**) प्रशंसा करने योग्य पदार्थों की (**असन्वन्**) याचना करते हैं (**त्वे, ह**) आपके होते (**सुदुघाः**) सुन्दर काम पूरने वाली (**गावः**) गौएँ हैं उनको मांगते हैं (**त्वे, हि**) आप ही के होते (**अश्वाः**) जो बड़े-बड़े घोड़े हैं उनको मांगते हैं जो आप (**देवयते**) कामना करने वाले के लिये (**वनिष्ठः**) अतीव पदार्थों को अलग करने वाले होते हुए (**वसु**) धन देते हैं सो (**त्वम्**) आप सब को सेवा करने योग्य हैं॥१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। यदि राजा सूर्य के समान विद्या और न्याय का प्रकाशक हो तो सम्पूर्ण राज्य कामना से अलङ्कृत होकर राजा को पूर्ण कामना वाला करे तथा धार्मिक जन धर्म का आचरण करें और अधार्मिक जन भी पापाचरण को छोड़ धर्मात्मा होवें॥१॥

पुनः स राजा कीदृशः स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

राजे॑व॒ हि जनि॑भि॒: क्षेष्ये॒वाव॒ द्युभि॑र॒भि वि॒दुष्क॒वि: सन्।
पि॒शा गिरो॑ मघवन् गोभि॒रश्वै॑स्त्वाय॒त: शि॑शीहि रा॒ये अ॒स्मान्॥ २॥

राजा॑ऽइव। हि। जनि॑ऽभिः। क्षेषि॑। ए॒व। अव॑। द्युऽभि॑:। अ॒भि। वि॒दुः। क॒विः। सन्। पि॒शा। गिर॑:। म॒घ॒ऽव॒न्। गोभि॑:। अश्वै॑:। त्वा॒ऽय॒तः। शि॒शी॒हि॒। रा॒ये। अ॒स्मान्॥ २॥

पदार्थ:-(**राजेव**) यथा राजा तथा (**हि**) (**जनिभि:**) प्रादुर्भूताभि: प्रजाभि: (**क्षेषि**) निवससि (**एव**) (**अव**) (**द्युभि:**) दिनै: (**अभि**) (**विदु:**) विद्वान् (**कवि:**) काव्यादिनिर्माणे चतुर: (**सन्**) (**पिशा**) रूपेण (**गिर:**) वाच: (**मघवन्**) (**गोभि:**) धेनुभि: (**अश्वै:**) तुरङ्गै: (**त्वायत:**) त्वां कामयमानान् (**शिशीहि**) तीक्ष्णप्रज्ञान् (**कुरु**) (**राये**) धनाय (**अस्मान्**)॥ २॥

अन्वय:-हे मघवन् विद्वन्! यस्त्वं जनिभी राजेव गोभिरश्वै राये त्वायतोऽस्मांञ्छिशीहि विदु: कवि: सन् पिशा गिर: शिशीहि द्युभिर्ह्यभ्यव क्षेषि तमेव वयं सततं प्रोत्साहयेम॥ २॥

भावार्थ:-अत्रोपमालङ्कार:। यथा सूर्य: सर्वै: पदार्थैस्सह प्रकाशते तथा राजा प्रकाशमानो भवेद्यो नृप: सत्यं कामयमानानस्मान् प्रीणाति सोऽपि सदा प्रसन्न: स्यात्॥ २॥

पदार्थ:-हे (**मघवन्**) ऐश्वर्य्यवान् विद्वान्! जो आप (**जनिभि:**) उत्पन्न हुई प्रजाओं से (**राजेव**) जैसे राजा जैसे (**गोभि:**) धेनु और (**अश्वै:**) घोड़ों से (**राये**) धन के लिये (**त्वायत:**) तुम्हारी कामना करते हुए (**अस्मान्**) हम लोगों को (**शिशीहि**) तेजबुद्धि वाले करो। जो (**विदु:**) विद्वान् (**कवि:**) कविताई करने में चतुर (**सन्**) होते हुए (**पिशा**) रूप से (**गिर:**) वाणियों को तीक्ष्ण करो (**द्युभि:**) दिनों से (**हि**) ही (**अभि, अव, क्षेषि**) सब ओर से निरन्तर निवास करते हो (**एव**) उन्हीं आपको हम लोग निरन्तर उत्साहित करें॥ २॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे सूर्य सब पदार्थों के साथ प्रकाशित होता है, वैसे जो राजा प्रकाशमान हो और जो हम लोगों को सत्य के चाहने वालों को प्रसन्न करता है, वह भी सदा प्रसन्न हो॥ २॥

पुन: स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मा उ॑ त्वा पस्पृधा॒नासो॒ अत्र॑ म॒न्द्रा गिरो॑ देव॒यन्ती॒रुप॑ स्थुः।
अ॒र्वाची॑ ते पु॒थ्या॑ रा॒य ए॑तु॒ स्याम॑ ते सुम॒तावि॑न्द्र॒ शर्म॑न्॥ ३॥

इ॒माः। ऊँ॒ इति॑। त्वा॒। प॒स्पृ॒धा॒नासः॑। अत्र॑। म॒न्द्राः। गिरः॑। दे॒व॒ऽय॒न्तीः॑। उप॑। स्थुः॒। अ॒र्वाची॑। ते॒। पु॒थ्या॑। रा॒यः। एतु॒। स्याम॑। ते॒। सु॒ऽम॒तौ। इ॒न्द्र॒। शर्म॑न्॥ ३॥

पदार्थ:-(**इमा:**) प्रजा: (**उ**) (**त्वा**) त्वाम् (**पस्पृधानास:**) स्पर्धमाना: (**अत्र**) (**मन्द्रा:**) आनन्दप्रदा: (**गिर:**) वाच: (**देवयन्ती:**) देवान् विदुष: कामयमाना: (**उप**) (**स्थु:**) उपतिष्ठन्तु

(अर्वाची) नवीना **(ते)** तव **(पथ्या)** पथिषु साध्या **(रायः)** धनानि **(एतु)** प्राप्नोतु **(स्याम)** **(ते)** तव **(सुमतौ)** **(इन्द्र)** परमैश्वर्ययुक्त राजन् **(शर्मन्)** गृहे॥३॥

अन्वयः-हे इन्द्र! यं त्वा पस्पृधानस इमा देवयन्तीः मन्द्रा गिर उप स्थुस्तेऽर्वाची पथ्या राय एतु तस्य तेऽत्र सुमतौ शर्मन्नु वयं सम्मताः स्याम॥३॥

भावार्थः-हे राजन्! यदि भवान् सर्वविद्यायुक्तसुशिक्षिता मधुरा श्लक्ष्णाः सत्याः वाचो दध्यात्तर्हि तव नीतिः सर्वेषां पथ्या स्यात् सर्वाः प्रजा अनुरक्ता भवेयुः॥३॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त राजन्! जिस **(त्वा)** आपको **(पस्पृधानासः)** स्पर्धा करते अर्थात् अति चाहना से चाहते हुए **(इमाः)** यह प्रजाजन और **(देवयन्तीः)** विद्वानों की कामना करती हुई **(मन्द्राः)** आनन्द देने वाली **(गिरः)** वाणियां **(उप, स्थुः)** उपस्थित हों और **(ते)** आपकी **(अर्वाची)** नवीन **(पथ्या)** मार्ग में उत्तम नीति **(रायः)** धनों को **(एतु)** प्राप्त हो उन **(ते)** आपके **(अत्र)** इस **(सुमतौ)** श्रेष्ठमति और **(शर्मन्)** घर में **(उ)** भी हम लोग सम्मत **(स्याम)** हों॥३॥

भावार्थः-हे राजन्! यदि आप सर्वविद्या युक्त, सुशिक्षित, मधुर, श्लक्ष्ण, सत्यवाणियों को धारण करो तो तुम्हारी नीति सब को पथ्य हो, सब प्रजाजन अनुरागयुक्त होवें॥३॥

राजा सर्वसम्मत्या राजशासनं कुर्यादित्याह॥

राजा सर्वसम्मति से राजशासन करे, इस विषय को अगले मन्त्र में कहते है॥

धे॒नुं न त्वा॑ सू॒यव॑से॒ दुदु॑क्षन्नु॒प ब्रह्मा॑णि ससृजे॒ वसि॑ष्ठः।
त्वामिन्मे॒ गोप॑तिं॒ विश्व॑ आ॒हा न॒ इन्द्रः॑ सु॒मति॑ं गन्त्वच्छ॑॥४॥

धे॒नुम्। न। त्वा॒। सू॒यव॑से। दुदु॑क्षन्। उप॑। ब्रह्मा॑णि। स॒स॒जे॒। वसि॑ष्ठः। त्वाम्। इत्। मे॒। गोऽप॑तिम्। विश्व॑ः। आ॒ह॒। आ। न॒ः। इन्द्रः॑। सु॒ऽम॒तिम्। ग॒न्तु॒। अच्छ॑॥४॥

पदार्थः-(**धेनुम्**) दुग्धदात्री गौः **(न)** इव **(त्वा)** त्वाम् **(सूयवसे)** शोभने भक्षणीये घासे। अत्रा**न्येषामपी**त्याद्यचो दीर्घः। **(दुदुक्षन्)** कामान् प्रपूरयन् **(उप)** **(ब्रह्माणि)** महान्त्यन्नानि धनानि वा **(ससृजे)** सृजति **(वसिष्ठः)** अतिशयेन वसुः **(त्वाम्)** **(इत्)** **(मे)** मम **(गोपतिम्)** गवां पालकम् **(विश्वः)** सर्वो जनः **(आह)** ब्रूयात् **(आ)** **(नः)** अस्माकम् **(इन्द्रः)** परमैश्वर्ययुक्तो राजा **(सुमतिम्)** शोभनां प्रज्ञाम् **(गन्तु)** गच्छतु प्राप्नोतु **(अच्छ)** सम्यक्॥४॥

अन्वयः-हे राजन्! यो वसिष्ठः सूयवसे धेनुं न त्वा दुदुक्षन् ब्रह्माण्युप ससृजे मे गोपतिं त्वां विश्वो जनो यदाह तामिन्नः सुमतिमिन्द्रो भवानच्छा गन्तु॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यदि भवानस्माकं विदुषां सम्मतौ वर्तित्वा राज्यशासनं कुर्याद्यः कश्चित्प्रजाजनः स्वकीयं सुखदुःखप्रकाशकं वचः श्रावयेत्तत्सर्वं श्रुत्वा यथावत्समादध्यात्तर्हि भवन्तं सर्वे वयं गौर्दुग्धेनेव राज्यैश्वर्येणोन्नतं कुर्याम॥४॥

पदार्थः-हे राजन्! जो **(वसिष्ठः)** अतीव धन **(सूयवसे)** सुन्दर भक्षण करने योग्य घास के निमित्त **(धेनुम्)** गौ की **(न)** जैसे वैसे **(त्वा)** तुम्हें **(दुदुक्षन्)** कामों से परिपूर्ण करता हुआ **(ब्रह्माणि)**

बहुत अन्न वा धनों को **(उप, ससृजे)** सिद्ध करता है **(मे)** मेरी **(गोपतिम्)** इन्द्रियों की पालना करने वाले **(त्वाम्)** तुम्हें **(विश्वः)** सब जन जो **(आह)** कहे **(इत्)** उसी **(नः)** हमारी **(सुमतिम्)** सुन्दर मति को **(इन्द्रः)** परमैश्वर्ययुक्त राजा आप **(अच्छ, आ, गन्तु)** अच्छे प्रकार प्राप्त हूजिये॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। यदि आप हम लोगों को विद्वानों की सम्मति में वर्त्तकर राज्यशासन करें वा जो कोई प्रजा जन स्वकीय सुख दुःख प्रकाश करने वाले वचन को सुनावे उस सब को सुन कर यथावत् समाधान दें तो आप को सब हम लोग गौ दूध से जैसे, वैसे राज्यैश्वर्य से उन्नत करें॥४॥

पुना राजा किंवत् किं कुर्यादित्याह॥

फिर राजा किसके तुल्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अर्णांसि चित्पप्रथाना सुदासे इन्द्रो गाधान्यकृणोत् सुपारा।
शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः॥५॥२४॥

अर्णोंसि। चित्। पप्रथाना। सुऽदासे। इन्द्रः। गाधानि। अकृणोत्। सुऽपारा। शर्धन्तम्। शिम्युम्। उचथस्य। नव्यः। शापम्। सिन्धूनाम्। अकृणोत्। अशस्तीः॥५॥

पदार्थः-(**अर्णांसि**) उदकानि **(चित्)** इव **(पप्रथाना)** विस्तीर्णानि **(सुदासे)** सुष्ठु दातव्ये व्यवहारे **(इन्द्रः)** सूर्यो विद्युद्वा **(गाधानि)** परिमितानि **(अकृणोत्)** करोति **(सुपारा)** सुखेन पारं गन्तुं योग्यानि **(शर्धन्तम्)** बलं कुर्वन्तम् **(शिम्युम्)** आत्मनः शिमि कर्म कामयमानम्। **शिमीति कर्मनाम।** (निघं०२.१) **(उचथस्य)** वक्तुं योग्यस्य **(नव्यः)** नवेषु भवः **(शापम्)** शपन्त्याक्रुश्यन्ति येन तम् **(सिन्धूनाम्)** नदीनाम् **(अकृणोत्)** करोति **(अशस्तीः)** अप्रशंसिता निरुदकाः॥५॥

अन्वयः-हे राजन्! नव्यस्त्वमिन्द्रश्चित् सुदासे पप्रथाना अर्णांसि गाधानि सुपाराऽकृणोत् सिन्धूनामशस्तीरकृणोत् तथोचथस्य शर्धन्तं शिम्युं प्रति शापं कुर्याः॥५॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन् यथा सूर्यो विद्युद्वा समुद्रस्थान्यपि जलानि सुखेन पारं गन्तुं

योग्यानि करोति तथैव व्यवहारान् परिमितान् सुगमान् कृत्वा दुष्टनाशनं श्रेष्ठसम्मानं विधाय दुष्टानामधर्म्याः क्रिया निन्दितास्त्वं सदा कुर्याः॥५॥

पदार्थः-हे राजन्! **(नव्यः)** नवीनों में प्रसिद्ध आप **(इन्द्रः)** सूर्य वा बिजुली **(चित्)** के समान **(सुदासे)** सुन्दर देने योग्य व्यवहार में **(पप्रथाना)** विस्तीर्ण **(अर्णांसि)** जल जो **(गाधानि)** परिमित हैं उनको **(सुपारा)** सुन्दरता से पार जाने योग्य **(अकृणोत्)** करते हैं **(सिन्धूनाम्)** नदियों को **(अशस्तीः)** अप्रशंसित जलरहित **(अकृणोत्)** करते हैं, वैसे **(उचथस्य)** कहने योग्य **(शर्धन्तम्)** बल करते हुए **(शिम्युम्)** अपने को कर्म की कामना करने वाले **[के]** प्रति **(शापम्)** शाप अर्थात् जिससे दण्ड देते हैं, ऐसे काम को करें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है।[1] हे राजा! जैसे सूर्य वा बिजुली समुद्रस्थ जलों को सुख से पार जाने योग्य करता है, वैसे ही व्यवहारों को भी परिमाण युक्त और सुगम कर दुष्टों का नाश और श्रेष्ठों का सम्मान कर दुष्टों की अधर्म क्रियाओं को निन्दित आप सदा करें॥५॥

पुना राजा कान् सत्कुर्यादित्याह॥

फिर राजा किनका सत्कार करे, इस विषय को अगले मन्त्र में कहते हैं॥

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव।
श्रुष्टि चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद् विषूचोः॥६॥

पुरोळाः। इत्। तुर्वशः। यक्षुः। आसीत्। राये। मत्स्यासः। निऽशिताः। अपिऽइव। श्रुष्टिम्। चक्रुः। भृगवः। द्रुह्यवः। च। सखा। सखायम्। अतरत्। विषूचोः॥६॥

पदार्थः-**(पुरोळाः)** पुरःसरः **(इत्)** एव **(तुर्वशः)** सद्यो वशङ्करः **(यक्षुः)** सङ्गन्ता **(आसीत्)** अस्ति **(राये)** धनाय **(मत्स्यासः)** समुद्रस्था मत्स्या इव **(निशिताः)** नितरां तीक्ष्णगतिस्वभावाः **(अपीव)** **(श्रुष्टिम्)** शीघ्रम् **(चक्रुः)** कुर्वन्ति **(भृगवः)** परिपक्वज्ञानाः **(द्रुह्यवः)** दुष्टानां निन्दकाः **(च)**

---

१. संस्कृतभावार्थ में उपमा दिया हुआ है।

(सखा) **(सखायम्)** सखायम् **(अतरत्)** तरति **(विषूचोः)** व्याप्तविद्याधर्मसुशीलयोर्द्वयोः॥६॥

अन्वयः-हे राजन्! राये यस्तुर्वशः पुरोळा यक्षुरिदासीद् ये मत्स्यासश्चाऽपीव निशिता भृगवो द्रुह्यवश्च श्रुष्टिं चक्रुर्यः सखा विषूचोः सखायमतरत् तानित्त्वं सदा सत्कुर्याः॥६॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! सर्वेषु शुभकर्मस्वग्रसंराधनोन्नतिकारका महामत्स्या इव गम्भीराशय स्थाः शीघ्रं कर्त्तारः परस्परस्मिन् सुहृदः स्युस्तानतीवप्रज्ञान् सत्कृत्य राज्यकार्येषु नियोजय॥६॥

पदार्थः-हे राजन्! **(राये)** धन के लिये **(तुर्वशः)** शीघ्र वश करने और **(पुरोळाः)** आगे जाने **(यक्षुः)** दूसरों से मिलने वाला **(इत्)** ही **(आसीत्)** है वा **(च)** और जो **(मत्स्यासः)** समुद्रों में स्थिर मछलियों के समान **(अपीव)** अतीव **(निशिताः)** निरन्तर तीक्ष्णस्वभायुक्त **(भृगवः)** परिपक्व ज्ञान वाले **(द्रुह्यवः)** दुष्टों की निन्दा करने वाले **(च)** भी **(श्रुष्टिम्)** शीघ्रता **(चक्रुः)** करते हैं जो **(सखा)** मित्र **(विषूचोः)** विद्या और धर्म का सुन्दर शील जिनमें विद्यमान उन के **(सखायम्)** मित्र को **(अतरत्)** तरता है, उन सबों का आप सदा सत्कार करो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जो सब शुभ कर्म्मों में आगे, अच्छे प्रकार सिद्धि की उन्नति करने वाले, बड़े मगरमच्छों के समान गम्भीर आशयवाले, शीघ्रकारी एक दूसरे में मित्रता रखने वाले हों उन अतीव बुद्धिमानों का सत्कार कर राज्यकार्य्यों में नियुक्त करो॥६॥

पुना राजजनाः कीदृशा वराः स्युरित्याह॥

फिर राजजन कैसे श्रेष्ठ हों, इस विषय को अगले मन्त्र में कहते हैं॥

आ प॒क्थासो॑ भला॒नसो॑ भन॒न्तालि॑नासो विषा॒णिनः॑ शि॒वासः॑।
आ योऽन॑यत्सध॒मा आर्य॑स्य गव्या तृत्सु॑भ्यो अजगन्यु॒धा नॄन्॥७॥

आ। प॒क्थासः॑। भ॒ला॒नसः॑। भ॒न॒न्त॒। आ। अलि॑नासः। वि॒षा॒णिनः॑। शि॒वासः॑। आ। यः। अन॑यत्। स॒ध॒ऽमाः। आर्य॑स्य। ग॒व्या। तृत्सु॑ऽभ्यः। अ॒ज॒ग॒न्। यु॒धा। नॄन्॥७॥

पदार्थः-**(आ)** समन्तात् **(पक्थासः)** पाकविद्याकुशलाः परिपक्वज्ञाना वा **(भलानसः)** भलाः परिभाषणीया नासिका येषान्ते **(भनन्त)** भनन्तूपदिशन्तु **(आ)** **(अलिनासः)** अलिनाः सुभूषिता नासिका येषान्ते **(विषाणिनः)** विषाणमिव तीक्ष्णा हस्ते नखा येषान्ते **(शिवासः)** मङ्गलकारिणः **(आ)** **(यः)** **(अनयत्)** नयति **(सधमाः)** समानस्थाने मन्यमानः **(आर्यस्य)** उत्तमजनस्य **(गव्या)** गव्यानि सुवाचि भवानि **(तृत्सुभ्यः)** हिंसकेभ्यः **(अजगन्)** गच्छन्तु **(युधा)** युद्धेन **(नॄन्)** मनुष्यान्॥७॥

अन्वयः-हे राजन्! ये पक्थासो भलानसोऽलिनासो विषाणिनः शिवासो भवन्तं प्रत्याभनन्त तृत्सुभ्यो युधा नॄनाजगन् यः सधमा आर्यस्य गव्याऽऽनयत्तान् सर्वान् सुरक्ष॥७॥

भावार्थः-हे राजन्! ये तपस्विनः पुरुषार्थिनो वक्तारः सुरूपा मङ्गलाचारा युद्धविद्याकुशला आर्या जना भवन्तं यद्यदुपदिशेयुस्तत्तदप्रमत्तः सन् सदाऽनुतिष्ठ॥७॥

पदार्थः-हे राजन्! जो **(पक्थासः)** पाकविद्या में कुशल **(भलानसः)** सब ओर से कहने योग्य **(अलिनासः)** जिनकी सूभूषित नासिका **(विषाणिनः)** जिनके सींग के समान तीक्ष्ण नख

विद्यमान (**शिवासः**) और जो मङ्गलकारी आपको (**आ, भनन्त**) अच्छे प्रकार उपदेश करें (**तृत्सुभ्यः**) हिंसकों से (**युधा**) युद्ध से (**नॄन्**) मनुष्यों को (**आ, अजगन्**) प्राप्त हों (**यः**) जो (**सधमाः**) समान स्थान में मानते हुए (**आर्यस्य**) उत्तम जन के (**गव्या**) उत्तम वाणी में प्रसिद्ध हुओं को (**आ, अनयत्**) अच्छे प्रकार पहुँचाता है, उन सब की आप उत्तमता से रक्षा करो॥७॥

भावार्थः-हे राजन्! जो तपस्वी पुरुषार्थी वक्ता जन उत्तम रूप वाले मङ्गल जिनके आचरण युद्ध विद्या में कुशल आर्यजन आपको जिस-जिस का उपदेश दें, उस-उस को अप्रमत्त होते हुए सदा ठानो अर्थात् सर्वदैव उसका आचरण करो॥७॥

केऽत्र भाग्यहीना सन्तीत्याह॥

कौन इस लोग में भाग्यहीन होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

दुराध्योऽ३ अदितिं स्रेवयन्तोऽचेतसो वि जगृभ्रे परुष्णीम्।
मह्वाविव्यक् पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः॥८॥

दुःऽआध्यः। अदितिम्। स्रेवयन्तः। अचेतसः। वि। जगृभ्रे। परुष्णीम्। मह्वा। अविव्यक्। पृथिवीम्। पत्यमानः। पशुः। कविः। अशयत्। चायमानः॥८॥

पदार्थः-(**दुराध्यः**) दुष्टाचारा दुष्टधियः (**अदितिम्**) जनित्वं कामम् (**स्रेवयन्तः**) (**अचेतसः**) निर्बुद्धयः (**वि**) (**जगृभ्रे**) गृह्णन्ति (**परुष्णीम्**) पालिकाम् (**मह्वा**) महत्वेन (**अविव्यक्**) व्याजीकरोति (**पृथिवीम्**) भूमिम् (**पत्यमानः**) पतिरिवाचरन् (**पशुः**) गवादिः (**कविः**) क्रान्तप्रज्ञः (**अशयत्**) शेते (**चायमानः**) वर्धमानः॥८॥

अन्वयः-यथा मह्वा पत्यमानश्चायमानः कविः पशुरशयत् परुष्णीं पृथिवीमविव्यक् तथा येऽचेतसो दुराध्योऽदितिं स्रेवयन्ती वि जगृभ्रे ते वर्त्तन्त इति वेद्यम्॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! त एवाऽत्र पशुवत्पामराः सन्ति ये स्त्र्यासक्ता भवन्ति॥८॥

पदार्थः-जैसे (**मह्वा**) बड़प्पन से (**पत्यमानः**) पति के समान आचरण करता (**चायमानः**) वृद्धि को प्राप्त होता हुआ (**कविः**) प्रत्येक काम में आक्रमण करने वाली बुद्धि जिसकी वह (**पशुः**) गो आदि पशु (**अशयत्**) सोता है (**परुष्णीम्**) पालने वाली (**पृथिवीम्**) भूमि को (**अविव्यक्**) विविध प्रकार से आक्रमण करता है, वैसे जो (**अचेतसः**) निर्बुद्धि (**दुराध्यः**) दुष्टबुद्धिपुरुष (**अदितिम्**) उत्पत्ति काम को (**स्रेवयन्तः**) सेवते हुए (**वि, जगृभ्रे**) विशेषता से लेते हैं, वे वर्त्तमान हैं, ऐसा जानो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! वे ही इस संसार में पशु के तुल्य पामरजन हैं, जो स्त्री में आसक्त हैं॥८॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम।
सुदास इन्द्रः सुतुकाँ अमित्रानरन्धयन्मानुषेह वध्रिवाचः॥९॥

ईयुः। अर्थम्। न। निऽअर्थम्। परुष्णीम्। आशुः। चन। इत्। अभिऽपित्वम्। जगाम। सुऽदासे। इन्द्रः। सुऽतुकान्। अमित्रान्। अरन्धयत्। मानुषे। वध्रिऽवाचः॥९॥

पदार्थः-(**ईयुः**) प्राप्नुयुः (**अर्थम्**) द्रव्यम् (**न**) इव (**न्यर्थम्**) निश्चितोऽर्थो यस्मिँस्तम् (**परुष्णीम्**) पालिकां नीतिम् (**आशुः**) सद्यः (**चन**) अपि (**इत्**) एव (**अभिपित्वम्**) प्राप्यम् (**जगाम**) (**सुदासः**) शोभनानि दानानि यस्य सः (**इन्द्रः**) परमैश्वर्यवान् (**सुतुकान्**) शोभनानि तुकान्यपत्यानि येषां तान् (**अमित्रान्**) मित्रतारहितान् (**अरन्धयत्**) हिंस्यात् (**मानुषे**) मनुष्याणामस्मिन् स- ामे (**वध्रिवाचः**) वध्रयो वर्धिका वाचो येषां ते॥९॥

अन्वयः-यथा सुदास इन्द्रोऽर्थं न न्यर्थमाशुः सन् परुष्णीं चनाऽभिपित्वं जगामाऽमित्रानरन्धयन्मानुषे वध्रिवाचः सुतुकान् रक्षन्ति तथेतरेऽपि मनुष्यास्तदिदीयुः॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजजना! यथा न्यायाधीशो राजा न्यायेन प्राप्तं गृह्णात्यन्यायजन्यं त्यजति श्रेष्ठान् संरक्ष्य दुष्टान् दण्डयति स एवोत्तमो भवति॥९॥

पदार्थः-जैसे (**सुदासः**) सुन्दर दान जिसके विद्यमान वह (**इन्द्रः**) परमैश्वर्यवान् (**अर्थम्**) द्रव्य के (**न**) समान (**न्यर्थम्**) निश्चित अर्थ वाले को (**आशुः**) शीघ्रकारी होता हुआ (**परुष्णीम्**) पालना करने वाली नीति को (**चन**) भी (**अभिपित्वम्**) और प्राप्त होने योग्य पदार्थ को (**जगाम**) प्राप्त होता है (**अमित्रान्**) मित्रता रहित अर्थात् शत्रुओं को (**अरन्धयत्**) नष्ट करे और (**मानुषे**) मनुष्यों के इस संग्राम में (**वध्रिवाचः**) जिनकी वृद्धि देने वाली वाणी वे (**सुतुकान्**) सुन्दर जिनके सन्तान है उनकी रक्षा करते हैं और भी मनुष्य (**इत्**) उसको (**ईयुः**) प्राप्त हों॥९॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजजनो! जैसे न्यायाधीश राजा न्याय से प्राप्त पदार्थ को लेता और अन्याय से उत्पन्न हुए पदार्थ को छोड़ता तथा श्रेष्ठों की सम्यक् रक्षा कर दुष्टों को दण्ड देता है, वही उत्तम होता है॥९॥

पुनर्जीवा स्वस्वकृतकर्मफलं प्राप्नुवन्त्येवेत्याह॥

फिर जीव अपने-अपने किये हुए कर्म के फल को प्राप्त होते **[**ही**]** हैं, इस विषय को अगले मन्त्र में कहते हैं॥

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च॥१०॥२५॥

ईयुः। गावः। न। यवसात्। अगोपाः। यथाऽकृतम्। अभि। मित्रम्। चितासः। पृश्निऽगावः। पृश्निऽनिप्रेषितासः। श्रुष्टिम्। चक्रुः। निऽयुतः। रन्तयः। च॥१०॥

पदार्थः-(**ईयुः**) प्राप्नुयुर्गच्छेयुर्वा (**गावः**) धेनवः (**न**) इव (**यवसात्**) भक्षणीयाद् घासाद्यात्

(अगोपाः) अविद्यमानो गोपो यासां ताः **(यथाकृतम्)** येन प्रकारेणाऽनुष्ठितम् **(अभि मित्रम्)** अभिमुखं सखायमिव **(चितासः)** सञ्चययुक्ताः **(पृश्निगावः)** पृश्निवदन्तरिक्षवद्गावो येषान्ते **(पृश्निनिप्रेषितासः)** पृश्नावन्तरिक्षे नितरां प्रेषिता यैस्ते **(श्रुष्टिम्)** क्षिप्रम् **(चक्रुः)** कुर्वन्ति **(नियुतः)** निश्चितगतयो वायवः **(रन्तयः)** येषु रमन्ते **(च)**॥१०॥

अन्वयः-हे मनुष्या! यवसादगोपा गावो नाऽभिमित्रमिव चितासो जीवा यथाकृतं कर्मफलमीयुर्यथा पृश्निगावोऽन्तरिक्षकिरणयुक्ताः पृश्निनिप्रेषितासो नियुतो रन्तयश्च वायवः श्रुष्टिं चक्रुस्तथैव ये कर्माणि कुर्वन्ति ते तादृशमेव लभन्ते॥१०॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा गोपालरहिता गावः स्ववत्सान् वायवोऽन्तरिक्षस्थान् किरणान् सखा सखायं च प्राप्नोति तथैव स्वकृतानि शुभाऽशुभानि कर्माणि जीवा ईश्वरव्यवस्थया प्राप्नुवन्ति॥१०॥

पदार्थः-हे मनुष्यो! **(यवसात्)** भक्षण करने योग्य घास आदि से **(अगोपाः)** जिनकी रक्षा विद्यमान नहीं वे **(गावः)** गौयें **(न)** जैसे वा जैसे **(अभिमित्रम्)** सम्मुख मित्र, वैसे **(चितासः)** संचय अर्थात् संचित पदार्थों से युक्त जीव **(यथाकृतम्)** जैसे किया कर्म, वैसे उसके फल को **(ईयुः)** प्राप्त हों वा पहुँचें वा जैसे **(पृश्निगावः)** अन्तरिक्ष के तुल्य किरणों से युक्त **(पृश्निनिप्रेषितासः)** अन्तरिक्ष में निरन्तर प्रेषित किये हुए **(नियुतः)** निश्चित गति वाले वायु और **(रन्तयः)** जिनमें रमते हैं वे वायु **(च)** **(श्रुष्टिम्)** शीघ्रता **(चक्रुः)** करते हैं, **[**उसी प्रकार जो कर्म करते हैं,**]** वे वैसा ही फल पाते हैं॥१०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे चरवाहों से रहित गौयें अपने बछड़ों को और वायु अन्तरिक्षस्थ किरणों को और मित्र मित्र को प्राप्त होता है, वैसे ही अपने किये हुए शुभ अशुभ कर्मों को जीव ईश्वरव्यवस्था से प्राप्त होते हैं॥१०॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

एकं॑ च॒ यो विं॑श॒तिं च॑ श्रव॒स्या वैक॒र्णयो॒र्जना॒न् राजा॒ न्यस्तः॑।
दस्मो न सद्म॒न् नि शि॑शाति ब॒र्हिः शूरः॑ सर्गं॑मकृणो॒दिन्द्रः॑ एषाम्॥ ११॥

एक॑म्। च॒। यः। विं॒श॒तिम्। च॒। श्र॒व॒स्या। वैक॒र्णयोः॑। जना॑न्। राजा॑। नि। अस्त॒रित्यस्तः॑। दस्मः॑। न। सद्म॑न्। नि। शि॒शा॒ति॒। ब॒र्हिः॑। शूरः॑। सर्ग॑म्। अ॒कृ॒णो॒त्। इन्द्रः॑। ए॒षा॒म्॥ ११॥

पदार्थः-**(एकम्)** **(च)** **(यः)** **(विंशतिम्)** एतत्संख्याताम् **(च)** **(श्रवस्या)** श्रवस्यन्ने साधूनि **(वैकर्णयोः)** विविधेषु कर्णेषु श्रोत्रेषु भवयोर्व्यवहारयोः **(जनान्)** मनुष्यान् **(राजा)** राजमानः **(नि)** **(अस्तः)** योऽस्यति सः **(दस्मः)** दुःखोपक्षयिता **(न)** इव **(सद्मन्)** सीदन्ति यस्मिन् तस्मिन् गृहे **(नि)** नितराम् **(शिशाति)** तीक्ष्णीकरोति **(बर्हिः)** प्रवृद्धम् **(शूरः)** निर्भयः **(सर्गम्)** उदकम्। **सर्ग इत्युदकनाम।** (निघं०१.१२) **(अकृणोत्)** करोति **(इन्द्रः)** सूर्यः **(एषाम्)** वीराणां मनुष्याणां

मध्ये॥११॥

अन्वयः-हे मनुष्या! यो दस्मो न वैकर्णयोर्न्यस्तो राजा जनान् सद्मन् नि शिशाति विंशतिं चैकं च श्रवस्याकृणोत् स एषामिन्द्रो बर्हिः सर्गमिव शूरश्शत्रून् विजयते॥११॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यो राजा मनुष्यान् पुत्रवत्पालयत्यहिंसक इव सर्वानानन्दयते सूर्यवत् न्यायविद्याबलानि प्रकाश्य शत्रून् विजयते स एव सर्वं सुखमाप्नोति॥११॥

पदार्थः-हे मनुष्यो **(यः)** जो **(दस्मः)** दुःख के विनाश करने वाले के **(न)** समान **(वैकर्णयोः)** विविध प्रकार के कानों में उत्पन्न हुए व्यवहारों का **(नि, अस्तः)** निरन्तर प्रक्षेपण करने अर्थात् औरों के कानों में डालने वाला **(राजा)** विराजमान **(जनान्)** मनुष्यों को **(सद्मन्)** जिसमें बैठते हैं उस घर में **(नि, शिशाति)** निरन्तर तीक्ष्ण करता है और **(विंशतिम्, च, एकम्, च)** बीस और एक भी अर्थात् इक्कीस **(श्रवस्या)** अन्न में उत्तम गुण देने वालों को **(अकृणोत्)** सिद्ध करता है वह **(एषाम्)** इन वीर मनुष्यों के बीच **(इन्द्रः)** सूर्य **(बर्हिः)** अच्छे प्रकार बड़े हुए **(सर्गम्)** जल को जैसे वैसे **(शूरः)** निर्भय शत्रुओं को जीतता है॥११॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो राजा मनुष्यों के पुत्र के समान पालता, अहिंसक के समान सब को आनन्दित कराता और सूर्य के समान न्यायविद्या और बलों को प्रकाशित कर शत्रुओं को जीतता है, वही सब सुखों को प्राप्त होता है॥११॥

पुना राजामात्याः प्रजापुरुषाश्च परस्परं कथं वर्त्तेरन्नित्याह॥

फिर राजा अमात्य और प्रजा पुरुष परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

अध॑ श्रु॒त क॒वषं॑ वृ॒द्धम॒प्स्वनु॑ द्रु॒ह्युं नि वृ॑ण॒ग्वज्र॑बाहुः।
वृणा॒ना अत्र॑ स॒ख्याय॑ स॒ख्यं त्वा॒यन्तो॒ ये अम॑दन्ननु॑ त्वा॥१२॥

अध॑। श्रु॒तम्। क॒वषं॑म्। वृ॒द्धम्। अ॒प्ऽसु। अनु॑। द्रु॒ह्युम्। नि। वृ॒ण॒क्। वज्र॑ऽबाहुः। वृ॒णा॒नाः। अत्र॑। स॒ख्याय॑। स॒ख्यम्। त्वा॒ऽयन्तः। ये। अम॑दन्। अनु॑। त्वा॥१२॥

पदार्थः-(**अध**) अथ (**श्रुतम्**) (**कवषम्**) उपदेशकम् (**वृद्धम्**) वयोविद्याभ्यामधिकम् (**अप्सु**) जलेषु (**अनु**) (**द्रुह्युम्**) यो द्रोग्धि तम् (**नि**) (**वृणक्**) वृणक्ति (**वज्रबाहुः**) शस्त्रपाणिः (**वृणानाः**) स्वीकुर्वाणाः (**अत्र**) (**सख्याय**) मित्रत्वाय (**सख्यम्**) मित्रभावम् (**त्वायन्तः**) त्वां कामयमानाः (**ये**) (**अमदन्**) मदन्ति हर्षन्ति (**अनु**) (**त्वा**) त्वाम्॥१२॥

अन्वयः-हे राजन्! येऽत्र सख्याय सख्यं वृणानास्त्वायन्तो धार्मिका विद्वांसस्त्वान्वमदनध तैः यच्छुतं तेषां मध्ये कवषं वृद्धं द्रुह्युं यो वज्रबाहुः नि वृणक् अप्स्वनुवृणक् तांस्तं च सर्वे सत्कुर्वन्तु॥१२॥

भावार्थः-हे राजन्! ये तयानुकूला वर्तन्ते येषां चानुकूलो भवान् वर्तते ते सर्वे सखायो भूत्वा न्यायेन पुत्रवत् प्रजास्सम्पाल्यानन्दं भुञ्जीरन्॥१२॥

पदार्थः-हे राजन्! **(ये)** जो **(अत्र)** यहाँ **(सख्याय)** मित्रता के लिये **(सख्यम्)** मित्रपन को **(वृणानाः)** स्वीकार करते और **(त्वायन्तः)** तुम्हारी चाह करते हुए धार्मिक विद्वान् पुरुष **(त्वा)** तुमको

(अनु, अमदन्) आनन्दित करते हैं **(अध)** इसके अनन्तर उनसे जिस कारण **(श्रुतम्)** सुना इस कारण उनमें से **(कवषम्)** उपदेश करने वाले **(वृद्धम्)** अवस्था और विद्या से अधिक को और **(द्रुह्युम्)** दुष्टों से द्रोह करने वाले को जो **(वज्रबाहुः)** शास्त्रों को हाथों में रखने वाला **(निवृणक्)** निरन्तर विवेक से स्वीकार करता और **(अप्सु)** जलों में **(अनु)** अनुकूलता से स्वीकार करता है, उन सबको वा उसको सब सत्कार करें॥१२॥

भावार्थः-हे राजा! जो आपके अनुकूल वर्त्तमान हैं, जिनके अनुकूल आप हैं, वे सब मित्र मित्र होकर न्याय से पुत्र के समान पालन कर आनन्द भोगें॥१२॥

पुनस्ते राजादयः कीदृशं बलं कुर्युरित्याह॥

फिर वे राजा आदि कैसा बल करें, इस विषय को अगले मन्त्र में कहते हैं॥

वि सद्यो विश्वा दृंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचम्॥१३॥

वि। सद्यः। विश्वा। दृंहितानि। एषाम्। इन्द्रः। पुरः। सहसा। सप्त। दुर्दरितिं दर्दः। वि। आनवस्य। तृत्सवे। गयम्। भाक्। जेष्म। पूरुम्। विदथे। मृध्रऽवाचम्॥१३॥

पदार्थः-(**वि**) विशेषेण **(सद्यः)** शीघ्रम् **(विश्वा)** सर्वाणि **(दृंहितानि)** वृद्धानि सैन्यानि **(एषाम्)** शत्रूणाम् **(इन्द्रः)** परमैश्वर्यवान् **(पुरः)** शत्रूणां पुराणि **(सहसा)** बलेन **(सप्त)** एतत्संख्याकान् **(दर्दः)** विदृणाति **(वि)** **(आनवस्य)** समन्तान्नवीनस्य **(तृत्सवे)** हिंसकाय **(गयम्)** प्रजाम् गृहं वा **(भाक्)** भजति **(जेष्म)** जयेम **(पूरुम्)** पूरणप्रज्ञं **[**=पूर्णप्रज्ञं**]** मनुष्यम् **(विदथे)** स- ामे **(मृध्रवाचम्)** मृध्रा हिंसिका वाक् यस्य तम्॥१३॥

अन्वयः-यथेन्द्रो राजा सहसैषां सप्त पुरो वि दर्द आनवस्य गयं वि भाक् पूरुं विदथे मृध्रवाचं च तृत्सवे वर्तमानं वयं जेष्म यतोऽस्माकं सद्यो विश्वा दृंहितानि स्युः॥१३॥

भावार्थः-ये धार्मिकास्सप्रधाना वा राजकार्यशूरवीराः स्वेभ्यः सप्तगुणानधिकानपि दुष्टान् शत्रूञ्जेतुं शक्नुवन्ति ते प्रजाः पालयितुमर्हन्ति॥१३॥

पदार्थः-जैसे **(इन्द्रः)** परमैश्वर्य्यवान् राजा **(सहसा)** बल से **(एषाम्)** इन शत्रुओं के **(सप्त)** सातों **(पुरः)** पुरों को **(वि, दर्दः)** विशेषता से छिन्न-भिन्न करता वा **(आनवस्य)** सब ओर से नवीन के **(गयम्)** प्रजा वा घर को **(वि, भाक्)** विशेषता से सेवता है तथा **(पूरुम्)** पूरण बुद्धि वाले मनुष्य को और **(विदथे)** संग्राम में **(मृध्रवाचम्)** हिंसा करने वाली जिसकी वाणी और **(तृत्सवे)** दूसरे हिंसक के लिये सम्मुख विद्यमान है उसको हम लोग **(जेष्म)** जीतें जिससे हमारी **(सद्यः, विश्वा, दृंहितानि)** समस्त सेना के जन शीघ्र वृद्धि उन्नति को प्राप्त हों॥१३॥

भावार्थः-जो धार्मिक अपने प्रधानों से सहित वा राज्यकार्य्यों में शूरवीर पुरुष अपने से सतगुने अधिक भी दुष्ट शत्रुओं को जीत सकते हैं, वे प्रजा पालने को योग्य होते हैं॥१३॥

राजादिमनुष्यैः कियद्बलं वर्धयितव्यमित्याह॥

राजादि मनुष्यों से कितना बल बढ़वाना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा।
षष्टिर्वीरासो अधि षट् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि॥ १४॥

नि। गव्यवः। अनवः। द्रुह्यवः। च। षष्टिः। शता। सुषुपुः। षट्। सहस्रा। षष्टिः। वीरासः। अधि। षट्। दुवोयु। विश्वा। इत्। इन्द्रस्य। वीर्या। कृतानि॥ १४॥

पदार्थः-(**नि**) नितराम् (**गव्यवः**) आत्मनो गां भूमिमिच्छवः (**अनवः**) मनुष्याः। **अनव इति मनुष्यनाम।** (निघं०२.३) (**द्रुह्यवः**) ये दुष्टानधार्मिकान् द्रुह्यन्ति जिघांसन्ति (**षष्टिः**) (**शता**) शतानि (**सुषुपुः**) स्वपेयुः (**षट्**) (**सहस्रा**) सहस्राणि (**षष्टिः**) एतत्संख्याकाः (**वीरासः**) शरीरात्मबलशौर्योपेताः (**अधि**) (**षट्**) (**दुवोयु**) यो दुवः परिचरणं कामयते तस्मै (**विश्वा**) सर्वाणि (**इत्**) एव (**इन्द्रस्य**) परमैश्वर्ययुक्तस्य राज्ञः (**वीर्या**) वीर्याणि (**कृतानि**) निष्पादितानि॥ १४॥

अन्वयः-यैरिन्द्रस्य विश्वेद् वीर्या कृतानि ते गव्यवो द्रुह्यवोऽनवो षष्टिर्वीरासः षट्सहस्रा शत्रूनधि विजयन्ते ते च षट्षष्टिः शता शत्रवः दुवोयु नि सुषुपुः॥ १४॥

भावार्थः-यत्र राजा प्रजासेनयोः प्रजासेने च विद्युदिव पूरणबलां पराक्रमयुक्तां सेनां वर्द्धयन्ति तत्र षष्टिरपि योद्धारो षट् सहस्राण्यपि शत्रून् विजेतुं शक्नुवन्ति॥ १४॥

पदार्थः-जिन्होंने (**इन्द्रस्य**) परमैश्वर्ययुक्त राजा के (**विश्वा**) समस्त (**इत्**) ही (**वीर्या**) पराक्रम (**कृतानि**) उत्पन्न किये वे (**गव्यवः**) अपने को भूमि चाहते (**द्रुह्यवः**) और दुष्ट अधर्मी जनों को मारने की इच्छा करते हुए (**अनवः, षष्टिः, वीरासः**) साठ वीर अर्थात् शरीर और आत्मा के बल और शूरता से युक्त मनुष्य (**षट् सहस्रा**) छः सहस्र शत्रुओं को (**अधि**) अधिकता से जीतते हैं वे (**च**) भी (**षट्, षष्टिः, शता**) छासठ सैंकड़े शत्रु (**दुवोयु**) जो सेवन की कामना करता है, उसके लिये (**नि, सुषुपुः**) निरन्तर सोते हैं॥ १४॥

भावार्थः-जहाँ राजा और प्रजा सेनाओं में प्रजा और सेना बिजुली के समान पूरण बल और पराक्रम युक्त सेना को बढ़वाते हैं वहाँ साठ योद्धा छः हजार शत्रुओं को भी जीत सकते हैं॥ १४॥

केन सह के किं कुर्युरित्याह॥

किस के साथ कौन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे॥ १५॥ २६॥

इन्द्रेण। एते। तृत्सवः। वेविषाणाः। आपः। न। सृष्टाः। अधवन्त। नीचीः। दुःऽमित्रासः। प्रकलऽवित्। मिमानाः। जहुः। विश्वानि। भोजना। सुऽदासे॥ १५॥

पदार्थः-(**इन्द्रेण**) परमैश्वर्येण युक्तेन राज्ञा सह (**एते**) पूर्वोक्ता वीराः (**तृत्सवः**) शत्रूणां हिंसकाः (**वेविषाणाः**) शत्रुबलानि व्याप्नुवन्तः (**आपः**) जलानि (**न**) इव (**सृष्टाः**) शत्रूणामुपरि

नियता: कृता: **(अधवन्त)** धुन्वन्ति **(नीचीः)** अधोगता: **(दुर्मित्रासः)** दुष्टा मित्रा: सखायो येषां ते **(प्रकलवित्)** य: प्रकृष्टं कलनं संख्यां वेत्ति स: **(मिमानाः)** उत्पादयन्त: **(जहुः)** जहति **(विश्वानि)** सर्वाणि **(भोजना)** भोजनानि पालनानि भोक्तव्यानि वा **(सुदासे)** सुष्ठु दातरि॥१५॥

अन्वयः-य एत इन्द्रेण सहितास्तृत्सवो वेविषाणा आपो न सृष्टा विश्वानि भोजना मिमानास्सन्तो ये दुर्मित्रास: स्युस्तेषां या: सेना: ता नीचीरधवन्त तेषामुपरि शस्त्रास्त्राणि जहुर्यश्चेन्द्र: सुदासे प्रकलविदस्ति ते सर्वे विजयभाजो भवन्ति॥१५॥

भावार्थः-अत्रोपमालुप्तोपमालङ्कार:। येषां समुद्रतरङ्गा इव उत्सहिता बलिष्ठा: सेना: स्युस्ते शत्रुसेनास्सद्योऽधो निपात्य जेतुं शक्नुवन्ति॥१५॥

पदार्थः-जो **(एते)** ये **(इन्द्रेण)** परमैश्वर्ययुक्त राजा के साथ **(तृत्सवः)** शत्रुओं को मारने वाले **(वेविषाणाः)** शत्रुओं के बलों को व्याप्त होते हुए **(आपः)** जलों के **(न)** समान **(सृष्टाः)** शत्रुओं पर नियम से रक्खे और **(विश्वानि)** समस्त **(भोजना)** भोजनों को **(मिमानाः)** उत्पन्न करते हुए जो **(दुर्मित्रासः)** दुष्ट मित्रों वाले हों उनकी जो सेना हैं वे **(नीचीः)** नीचे जाती और **(अधवन्त)** कम्पती हैं उन पर जो शस्त्र अस्त्रों को **(जहुः)** छोड़ते हैं और जो परमैश्वर्ययुक्त राजा **(सुदासे)** श्रेष्ठ देने वाले के निमित्त **(प्रकलवित्)** अच्छे प्रकार संख्या का जानने वाला है, वे सब विजयभागी होते हैं॥१५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जिनकी समुद्र की तरङ्गों के समान, उत्साहयुक्त, बलिष्ठ सेना हों, वे शत्रुओं की सेनाओं को नीचे गिरा शीघ्र उन्हें जीत सकते हैं॥१५॥

पुनस्स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अभि क्षाम्।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः॥१६॥

अर्धम्। वीरस्य। शृतऽपाम्। अनिन्द्रम्। परा। शर्धन्तम्। नुनुदे। अभि। क्षाम्। इन्द्रः। मन्युम्। मन्युऽम्यः। मिमाय। भेजे। पथः। वर्तनिम्। पत्यमानः॥१६॥

पदार्थः-(**अर्द्धम्**) वर्द्धकम् (**वीरस्य**) व्याप्तशुभगुणस्य (**शृतपाम्**) य: शृते परिपक्वं पयसं पिबति तम् (**अनिन्द्रम्**) अनैश्वर्यम् (**परा**) दूरे (**शर्धन्तम्**) बलयन्तम् (**नुनुदे**) नुदति (**अभि**) आभिमुख्ये (**क्षाम्**) भूमिम्। **क्षेति भूमिनाम।** (निघं०१.१) (**इन्द्रः**) ऐश्वर्ययुक्त: शत्रूणां विदारक: (**मन्युम्**) क्रोधम् (**मन्युम्यः**) यो मन्युं मिनोति स: (**मिमाय**) मिमीते (**भेजे**) भजति (**पथः**) मार्गान् (**वर्तनिम्**) वर्तन्ते यस्मिंस्तं न्यायमार्गम् (**पत्यमानः**) पतिरिवाचरन्॥१६॥

अन्वयः-य: क्षां पत्यमान इन्द्रो वीरस्य शृतपामर्धं शर्धन्तं सेनेशं प्राप्यानिन्द्रम्परा णुनुदे यो मन्युम्य: शत्रूणामुपरि मन्युमभिमिमाय पथो वर्तनिं च भेजे स एव राजवरो राजराजेश्वरो भवति॥१६॥

भावार्थः-यो राजा वीराणां बलवृद्धिं कृत्वा दुष्टानामुपरि क्रोधकृद् धार्मिकाणामुपर्यानन्ददृष्टि: न्याय्यं पन्थानमनु वर्त्तमान: सन्नैश्वर्यं जनयति स एव सर्वदा वर्धते॥१६॥

पदार्थः-जो **(क्षाम्)** भूमि को **(पत्यमानः)** पति के समान आचरण करता हुआ **(इन्द्रः)** ऐश्वर्ययुक्त शत्रुओं को विदीर्ण करने वाला **(वीरस्य)** शुभ गुणों में व्याप्त राजा **(शृतपाम्)** पके हुए दूध को पीने वा **(अर्द्धम्)** वर्षने वा **(शर्धन्तम्)** बल करने वाले सेनापति को पाकर **(अनिन्द्रम्)** अनैश्वर्य को **(परा णुनुदे)** दूर करता है वा जो **(मन्युम्यः)** क्रोध को नष्ट करने वाला शत्रुओं पर **(मन्युम्)** क्रोध को **(अभि)** सम्मुख से **(मिमाय)** मानता **(पथः)** वा मार्गों को और **(वर्त्तनिम्)** जिसमें वर्त्तमान होते हैं उस न्याय-मार्ग को **(भेजे)** सेवता है, वही राजजनों में श्रेष्ठ और राजराजेश्वर होता है॥१६॥

भावार्थः-जो राजा वीर जनों की बल वृद्धि करके दुष्टों पर क्रोध करता और धार्मिकों पर आनन्ददृष्टि हो तथा न्याययुक्त मार्ग का अनुगामी होता हुआ ऐश्वर्य को पैदा करता है, वही सर्वदा वृद्धि को प्राप्त होता है॥१६॥

के शत्रून् विजेतुमर्हन्तीत्याह॥

कौन शत्रुओं के जीतने में योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

आ॒ध्रेण॑ चि॒त्तद्ये॑कं॑ चकार सिं॒ह्यं॑ चि॒त्पेत्वे॑ना जघान।
अध॑ स्व॒क्तीर्वे॒श्यावृ॒श्चदिन्द्रः॑ प्राय॑च्छ॒द्विश्वा॒ भोज॑ना सु॒दासे॑॥ १७॥

आ॒ध्रेण॑। चि॒त्। तत्। ऊँ॒ इति॑। एक॑म्। च॒का॒र॒। सिं॒ह्य॑म्। चित्। पेत्वे॑न। ज॒घा॒न॒। अव॑। स्व॒क्तीः। वे॒श्या॑। अ॒वृ॒श्च॒त्। इन्द्रः॑। प्र। अ॒य॒च्छ॒त्। विश्वा॑। भोज॑ना। सु॒ऽदासे॑॥ १७॥

पदार्थः-(**आध्रेण**) समन्तात् घृतेन (**चित्**) अपि (**तत्**) (**उ**) वितर्के (**एकम्**) (**चकार**) करोति (**सिंह्यम्**) सिंहेषु भवं बलमिव (**चित्**) इव **[**एव**]** (**पेत्वेन**) प्रापणेन। अत्र **संहितायामिति** दीर्घः। (**जघान**) हन्ति (**अव**) (**स्वक्तीः**) सृज्यमानाः सेनाः (**वेश्या**) वेशी प्रवेशयित्री सूची तथा (**अवृश्चत्**) वृश्चति छिनत्ति (**इन्द्रः**) दुष्टदलविदारकः (**प्र**) (**अयच्छत्**) प्रयच्छति ददाति (**विश्वा**) सर्वाणि (**भोजना**) भोजनानि अन्नादीनि (**सुदासे**) सुष्ठु दातरि सति॥१७॥

अन्वयः-य इन्द्रो स्वक्तीर्वेश्यावृश्चत् आध्रेण चित्तदेकमु चकार सिंह्यं चित्पेत्वेनाव जघान विश्वा भोजना प्रायच्छत्तस्मिन् सुदासे सति वीरा कथं न शत्रून् विजयेरन्॥१७॥

भावार्थः-अत्रोपमालङ्कारः। ये वीराः सिंहवत् पराक्रम्य शत्रून् घ्नन्त्यखण्डितमेकं राज्यं भूगोले कर्तुं प्रयतन्ते ते समग्रं बलं विधाय वीरान् सत्कृत्य धीमद्भिः राज्यं शासितुं प्रवर्तेरन्॥१७॥

पदार्थः-जो **(इन्द्रः)** दुष्टों के समूह को विदारने वाला **(स्वक्तीः)** रची हुई सेनाओं को **(वेश्या)** सूचना से **(अवृश्चत्)** छिन्न-भिन्न करता **(आध्रेण)** सब ओर से धारण किये विषय से **(चित्)** ही **(तत्)** उस **(एकम्, उ)** एक को **(चकार)** सिद्ध करता **(सिंह्यम्)** सिंहों में उत्पन्न हुए बल के समान **(चित्)** ही **(पेत्वेन)** पहुँचाने से **(अव, जघान)** शत्रुओं को मारता और **(विश्वा)** समस्त **(भोजना)** अन्नादि पदार्थों को **(प्र, अयच्छत्)** देता है उस **(सुदासे)** अच्छे देने वाले के होते वीरजन कैसे नहीं शत्रुओं को जीतें॥१७॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो वीर सिंह के समान पराक्रम पर शत्रुओं को मारते

हैं और भूगोल में एक अखण्डित राज्य करने को अच्छा यत्न करते हैं, वे समग्र बल को विधान कर और वीरों को सत्कार कर बुद्धिमानों से राज्य की शिक्षा दिलाने को प्रवृत्त हों॥१७॥

मनुष्यैस्सदा शत्रुभावप्रयुक्ता वारणीया इत्याह॥

मनुष्यों को सदा शत्रुपन से युक्त निवारने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

शश्व॑न्तो॒ हि शत्र॑वो रार॒धुष्टे॑ भे॒दस्य॑ चि॒च्छर्ध॑तो विन्दु॒ रन्धि॑म्।
मर्ता॒ एन॑: स्तु॒वतो य: कृ॒णोति॑ ति॒ग्मं तस्मि॒न्नि ज॑हि॒ वज्र॑मिन्द्र॥ १८॥

शश्व॑न्त:। हि। शत्र॑व:। र॒र॒धु:। ते॒। भे॒दस्य॑। चि॒त्। शर्ध॑त:। वि॒न्दु॒। रन्धि॑म्। मर्ता॑न्। एन॑:। स्तु॒वत:। य:। कृ॒णोति॑। ति॒ग्मम्। तस्मि॑न्। नि। ज॒हि॒। वज्र॑म्। इ॒न्द्र॒॥ १८॥

पदार्थ:-(**शश्वन्त:**) निरन्तर: (**हि**) यत: (**शत्रव:**) (**रारधु:**) हिंसन्ति (**ते**) (**भेदस्य**) विदारणस्य द्वैधीभावस्य (**चित्**) अपि (**शर्धत:**) बलवत: (**विन्द**) लभेरन् (**रन्धिम्**) वशीकरम् (**मर्त्तान्**) मनुष्यान् (**एन:**) प्रापक: (**स्तुवत:**) स्तावकान् (**य:**) (**कृणोति**) (**तिग्मम्**) तीव्रगुणकर्मस्वभावम् (**तस्मिन्**) स- ामे (**नि**) (**जहि**) त्यज (**वज्रम्**) शस्त्रास्त्रम् (**इन्द्र**) शत्रुविदारक॥१८॥

अन्वय:-हे इन्द्र! ये हि शश्वन्त: शत्रवस्ते स्तुवतो मर्त्तान् रारधु: ये भेदस्य शर्धतो रन्धिञ्चिद्विन्द य एन: हिंसां कृणोति तस्मिन् तेषु च तिग्मं वज्रं नि जहि निपातय॥१८॥

भावार्थ:-हे राजादयो धार्मिका जना! ये सर्वदा शत्रुभावयुक्ता धार्मिकान् हिंसन्तस्सन्ति तान् सद्यो घ्नत येन सर्वत्र सर्वेषामभयसुखे वर्द्धेयाताम्॥१८॥

पदार्थ:-हे (**इन्द्र**) शत्रुओं को विदीर्ण करने वाले! जो (**हि**) निश्चय से (**शश्वन्त:**) निरन्तर (**शत्रव:**) शत्रुजन हैं (**ते**) वे (**स्तुवत:**) स्तुति करते हुए (**मर्तान्**) मनुष्यों को (**रारधु:**) मारते हैं जो (**भेदस्य, शर्धत:**) बलवान् भेद के (**रन्धिम्**) वश करने को (**चित्**) हीं (**विन्द**) प्राप्त हों (**य:**) जो (**एन:**) पहुँचाने वाला हिंसा (**कृणोति**) करता है (**तस्मिन्**) उसके और उन पिछलों के निमित्त भी (**तिग्मम्**) तीव्र गुण-कर्म-स्वभाव वाले (**वज्रम्**) शस्त्र और अस्त्र को (**नि, जहि**) निरन्तर छोड़ो॥१८॥

भावार्थ:-हे राजन् आदि धार्मिक जनो! जो सर्वदा शत्रुभावयुक्त और धार्मिक जनों को नष्ट करते हुए विद्यमान हैं, उनको शीघ्र मारो, जिससे सब जगह सबके अभय और सुख बढ़ें॥१८॥

ये मनुष्या: परस्परेषां रक्षणं विधाय न्यायेन राज्यं पालयन्ति त एव शिरोवदुत्तमा भवन्ति।

जो मनुष्य परस्पर की रक्षा कर न्याय से राज्य को पालते हैं, वे ही शिर के समान उत्तम होते हैं॥

आव॒दिन्द्रं॑ यमु॒ना तृत्स॑वश्च॒ प्रात्र॑ भे॒दं स॒र्वता॑ता मुषायत्।
अ॒जास॑श्च शिग्र॒वो॒ यक्ष॑वश्च ब॒लिं शी॒र्षाणि॑ जभ्रु॒रश्व्या॑नि॥ १९॥

आव॑त्। इन्द्र॑म्। य॒मुना॑। तृत्स॑व:। च॒। प्र। अत्र॑। भे॒दम्। स॒र्वऽता॑ता। मु॒षा॒य॒त्। अ॒जास॑:। च॒। शिग्र॑व:। यक्ष॑व:। च॒। ब॒लिम्। शी॒र्षाणि॑। ज॒भ्रु॒:। अश्व्या॑नि॥ १९॥

पदार्थः-(**आवत्**) रक्षेत् (**इन्द्रम्**) परमैश्वर्यवन्तम् (**यमुना**) नियन्तारः (**तृत्सवः**) हिंस्राः (**च**) (**प्र**) (**अत्र**) अस्मिन् (**भेदम्**) विदारणं भेदभावं वा (**सर्वताता**) राजपालनाख्ये यज्ञे (**मुषायत्**) मुष्णाति (**अजासः**) शस्त्रास्त्रप्रक्षेपकाः (**च**) (**शिग्रवः**) अव्यक्तशब्दकर्तारः। अत्र शिजिधातोरौणादिको रुक् प्रत्ययः। (**यक्षवः**) सङ्गन्तारः (**च**) (**बलिम्**) भोग्यं पदार्थम् (**शीर्षाणि**) शिरांसि (**जभ्रुः**) बिभ्रति (**अश्व्यानि**) अश्वानां महतामिमानि॥१९॥

अन्वयः-ये अजासः शिग्रवः यक्षवश्च यमुना तृत्सवश्चात्र सर्वताता बलिमश्व्यानि शीर्षाणि जभ्रुः यश्च भेदं प्रमुषायदिन्द्रमावत् ते सर्वे वारस्सन्ति॥१९॥

भावार्थः-ये राजादयः सार्वजनिकाभयदक्षिणे राज्यपालनाख्ये यज्ञे भेदबुद्धिं विहाय महतां धार्मिकाणामुत्तमान्यैकमत्यादीनि कर्माणि स्वीकृत्य शत्रूणां विजयाय प्रवर्त्तन्ते त एव परमैश्वर्यं प्राप्नुवन्ति॥१९॥

पदार्थः-जो (**अजासः**) शस्त्र और अस्त्रों के छोड़ने (**शिग्रवः**) सांकेतिक बोली बोलने (**यक्षवश्च**) और संग करने वा (**यमुना**) नियम करने (**तृत्सवश्च**) और मारने वाले जन (**अत्र**) इस (**सर्वताता**) राज्यपालनरूपी यज्ञ में (**बलिम्**) भोगने योग्य पदार्थ को और (**अश्व्यानि**) बड़ों के इन (**शीर्षाणि**) शिरों को (**जभ्रुः**) धारण करते हैं (**च**) और जो (**भेदम्**) विदीर्ण करने वा एक एक से तोड़-फोड़ करने को (**प्र, मुषायत्**) चुराता छिपाता है वा जो (**इन्द्रम्**) परमैश्वर्य्यवान् की (**आवत्**) रक्षा करे, वे सब श्रेष्ठ हैं॥१९॥

भावार्थः-जो राजा आदि जन, सब मनुष्यों को अभयरूपी दक्षिणा जिस के बीच विद्यमान है ऐसे राज्यपालनरूपी यज्ञ में भेद बुदि को छोड़, महान् धार्मिक उत्तम जनों के एकमति आदि उत्तम कामों को स्वीकार कर शत्रुओं के जीतने को प्रवृत्त होते हैं, वे ही परमैश्वर्य को प्राप्त होते हैं॥१९॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः।
देवकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत्॥२०॥२७॥

न। ते। इन्द्र। सुऽमतयः। न। रायः। सम्ऽचक्षे। पूर्वाः। उषसः। न। नूत्नाः। देवकम्। चित्। मान्यमानम्। जघन्थ। अव। त्मना। बृहतः। शम्बरम्। भेत्॥२०॥

पदार्थः-(**न**) निषेधे (**ते**) तव (**इन्द्र**) सुखप्रद राजन् (**सुमतयः**) शोभनाः प्रज्ञा येषु ते (**न**) इव (**रायः**) धनानि (**संचक्षे**) सम्यक् प्रख्यातुम् (**पूर्वाः**) (**उषसः**) (**न**) इव (**नूत्नाः**) नवीनाः (**देवकम्**) देवमिव वर्त्तमानम् (**चित्**) इव (**मान्यमानम्**) मान्यानां मानं सत्कारो यस्मात् तम् (**जघन्थ**) हंसि (**अव**) विरोधे (**त्मना**) आत्मना (**बृहतः**) (**शम्बरम्**) मेघम् (**भेत्**) बिभेत्ति॥२०॥

अन्वयः-हे इन्द्र! ते पूर्वा नूत्ना उषसो न सुमतयो न रायः संचक्षे कोऽपि न जघन्थ कोऽपि न हन्ति यथा सूर्यो बृहतः शम्बरं भेत्तथा यं त्मना त्वमव जघन्थ चिदिव मान्यमानं देवकं सत्कुर्यास्तदा प्रजाः सर्वतो

वर्धेरन्॥२०॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यथा पूर्वा नूतना भविष्यन्त्यश्च प्रभातवेलाः सर्वथा मङ्गलकारिण्यः सन्ति तथा यदि न्यायोपार्जितेन धार्मिकान् प्राज्ञान् सत्कृत्यैते राजकार्याणि साधयेस्तत्र मेघं सूर्य इव दुष्टान् हत्वा श्रेष्ठान् प्रसन्नान् रक्षेस्तर्हि तव सर्वतो वृद्धिः स्यात्॥२०॥

पदार्थः-हे **(इन्द्र)** सुख देने वाले **(ते)** आपके **(पूर्वाः)** पहिली और **(नूत्नाः)** नवीन **(उषसः)** उषा वेलाओं के **(न)** समान वा **(सुमतयः)** उत्तम बुद्धिमानों के **(न)** समान **(रायः)** धनों को **(संचक्षे)** अच्छे प्रकार कहने को कोई भी **(न)** नहीं **(जघन्थ)** मारता है वा जैसे सूर्य **(बृहतः)** बड़े से बड़े **(शम्बरम्)** मेघदल को **(भेत्)** विदीर्ण करता, वैसे जिसे **(त्मना)** अपने से आप **(अव)** नष्ट करते हैं **(चित्)** उसके समान **(मान्यमानम्)** मान्यों का सत्कार जिसमें है उस **(देवकम्)** देव समान वर्त्तमान का सत्कार करें तो प्रजा सब ओर से बढ़े॥२०॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! जैसे पिछली और नई होने वाली प्रभात वेला सर्वथा मंगल करने वाली हैं, वैसे यदि न्याय से इकट्ठे किये हुए धन से धार्मिक और उत्तम बुद्धि वाले जनों का सत्कार कर उन उक्त मनुष्यों की रक्षा कर इनसे राज्य के कार्य्यों को साधिये और वहाँ मेघ को सूर्य के समान दुष्टों को मार श्रेष्ठों को प्रसन्न रखिये तो आपकी सब ओर से वृद्धि हो॥२०॥

पुना राजसहायेन प्रजाः कि कुर्य्युरित्याह॥

फि राजा के सहाय से प्रजाजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः।
न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान्॥२१॥

प्र। ये। गृहात्। अममदुः। त्वाऽया। पराऽशरः। शतऽयातुः। वसिष्ठः। न। ते। भोजस्य। सख्यम्। मृषन्त। अध। सूरिऽभ्यः। सुऽदिना। वि। उच्छान्॥२१॥

पदार्थः-**(प्र)** **(ये)** **(गृहात्)** **(अममदुः)** हर्षन्ति **(त्वाया)** तव नीत्या **(पराशरः)** दुष्टानां हिंसकः **(शतयातुः)** यः शतैः सह याति **(वसिष्ठः)** अतिशयेन वसुः **(न)** निषेधे **(ते)** **(भोजस्य)** पालनस्य भोजनस्य वा **(सख्यम्)** मित्रत्वम् **(मृषन्त)** सहन्ते **(अध)** आनन्तर्ये। अत्र **निपातस्य चे**ति दीर्घः। **(सूरिभ्यः)** विद्वद्भ्यः **(सुदिना)** सुखयुक्तानि दिनानि **(वि)** **(उच्छान्)** निवसेयुः॥२१॥

अन्वयः-हे राजन्! ये त्वाया गृहादममदुः शतयातुर्वसिष्ठः पराशर आनन्देत्ते भोजस्य सख्यं न प्र मृषन्ताऽध ये सूरिभ्यः सुदिना व्युच्छाँस्ते त्वया सत्कर्त्तव्याः सन्ति॥२१॥

भावार्थः-यस्य विद्याविनयसुशीलताभिः सर्वे गृहस्थादयो मनुष्या आनन्देयुर्ये चान्योत्कर्षं दृष्ट्वा परितपन्ति ये हि विद्वद्भ्यः सदा सुशिक्षां गृह्णन्ति ते सर्वाणि सुखानि प्राप्नुवन्ति॥२१॥

पदार्थः-हे राजन् **(ये)** जो **(त्वाया)** तुम्हारी नीति के साथ **(गृहात्)** घर से **(अममदुः)** आनन्दित होते हैं वा **(शतयातुः)** जो सैकड़ों के साथ जाता है जो **(वसिष्ठः)** अतीव वसने वाला और

जो **(पराशरः)** दुष्टों का हिंसक आनन्दित होता है **(ते)** वे **(भोजस्य)** भोगने और पालन करने की **(सख्यम्)** मित्रता को **(न)** नहीं **(प्र, मृषन्त)** सहते हैं **(अध)** इसके अनन्तर जो **(सूरिभ्यः)** विद्वानों से **(सुदिना)** सुखयुक्त दिनों में **(व्युच्छान्)** निरन्तर वसें, वे तुमको सदा सत्कार करने योग्य हैं॥ २१॥

भावार्थः-जिसकी विद्या, विनय और सुशीलता से सब गृहस्थ आदि मनुष्य आनन्दित हों और जो औरों का उत्कर्ष देखकर पीड़ित होते हैं और जो विद्वानों से सर्वदैव सुन्दर शिक्षा लेते हैं, वे सब सुख पाते हैं॥ २१॥

पुनस्स राजा किंवत्किं कुर्य्यादित्याह॥

फिर वह राजा किसके तुल्य क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

द्वे नꣳसुर्दे॒ववꣳतः शꣳते गोर्द्वा रथा॑ वꣳधूमꣳन्ता सुꣳदासꣳः।
अर्हꣳन्नग्ने पैजवꣳनस्यꣳ दानꣳ होतेꣳव सद्मꣳ पर्येमि॒ रेभꣳन्॥ २२॥

द्वे इति॑। नꣳसुꣳः। दे॒वऽवꣳतः। शꣳते इति॑। गोः। द्वा। रथा॑। वꣳधूऽमꣳन्ता। सुꣳऽदासꣳः। अर्हꣳन्। अꣳग्ने॒। पैꣳज॒ऽवꣳनस्यꣳ। दानꣳम्। होता॑ऽइव। सद्मꣳ। परि॑। एꣳमि॒। रेभꣳन्॥ २२॥

पदार्थः-(**द्वे**) **(नसुः)** पौत्रस्य **(देववतः)** प्रशस्तगुणविद्वद्युक्तस्य **(शते)** **(गोः)** धेनोर्भूमेर्वा **(द्वा)** द्वौ **(रथा)** जलस्थलान्तरिक्षेषु गमयितारौ **(वधूमन्ता)** प्रशस्ते वध्वौ विद्येते ययोस्तौ **(सुदासः)** उत्तमदानः **(अर्हन्)** सत्कुर्वन् **(अग्ने)** विद्वन् **(पैजवनस्य)** वेगयुक्तस्य **(दानम्)** यद्दीयते तत् **(होतेव)** दातेव **(सद्म)** स्थानम् **(परि)** सर्वतः **(एमि)** प्राप्नोमि **(रेभन्)** स्तुवन्ति॥ २२॥

अन्वयः-हे अग्ने! यथार्हन् सुदासोऽहं दानं होतेव सद्म पैजवनस्य नप्तुः सद्म पर्येमि देववतोगोर्द्वे शते वधूमन्ता द्वा रथा पर्येमि यथा विद्वांसो रेभँस्तान् पर्य्येमि तथा त्वं भव॥ २२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यथा दातार उत्तमानि दानानि ददति पौत्रपर्यन्तं धनदान्यपश्वादीन् समर्धयन्ति तथा सर्वैर्वर्तितव्यम्॥ २२॥

पदार्थः-हे **(अग्ने)** विद्वन्! जैसे **(अर्हन्)** सत्कार करता हुआ **(सुदासः)** उत्तम दानशील मैं **(दानम्)** दान **(होतेव)** देने वाले के समान **(सद्म)** घर को वा **(पैजनवस्य)** वेगवान् **(नसुः)** पौत्र के स्थान को **(पर्येमि)** सब ओर से जाता हूँ और **(देववतः)** प्रशंसित गुण वाले विद्वानों से युक्त की **(गोः)** धेनु वा भूमिसम्बन्धी **(द्वे)** दो **(शते)** सौ **(वधूमन्ता)** प्रशंसायुक्त वधू वाले **(द्वा)** दो **(रथा)** जल-स्थल में जाने वाले रथों को सब ओर से प्राप्त होता हूँ वा जैसे विद्वान् जन **(रेभन्)** स्तुति करते हैं, उनको सब ओर से जाता हूँ, वैसे आप हूजिये॥ २२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। हे मनुष्यो जैसे देने वाले उत्तम दान देते और पौत्रपर्य्यन्त धनधान्य और पशु आदि की समृद्धि करते हैं, वैसे सब को वर्त्तना चाहिये॥ २२॥

पुनस्ते राजादयः किमनुतिष्ठेयुरित्याह॥

फिर वे राजा आदि क्या अनुष्ठान करें, इस विषय को अगले मन्त्र में कहते हैं॥

चत्वारो॑ मा पैजव॒नस्य दाना॒: स्मद्दि॑ष्टय: कृश॒निनो॑ निरे॒के।
ऋ॒ज्रासो॑ मा पृथिवि॒ष्ठा: सु॒दास॑स्तो॒कं तो॒काय॒ श्रव॑से वहन्ति॥ २३॥

चत्वार॑:। मा॒। पैज॑ऽव॒नस्य॑। दाना॑:। स्मत्ऽदि॑ष्टय:। कृ॒श॒निन॑:। नि॒रे॒के। ऋ॒ज्रास॑:। मा॒। पृ॒थि॒वि॒ऽस्था:। सु॒ऽदास॑:। तो॒कम्। तो॒काय। श्रव॑से। व॒ह॒न्ति॒॥ २३॥

पदार्थ:-(**चत्वार:**) ऋत्विज: (**मा**) माम् (**पैजवनस्य**) क्षमाशीलस्य पुत्रस्य (**दाना:**) दातार: (**स्मद्दिष्टय:**) निश्चिता दिष्टयो दर्शनानि येषान्ते (**कृशनिन:**) कृशनं बहुहिरण्यं विद्यते येषान्ते। **कृशनमिति हिरण्यनाम।** (निघं०१.२) (**निरेके**) नि:शङ्के राजव्यवहारे (**ऋज्रास:**) सरलस्वभावा: (**मा**) माम् (**पृथिविष्ठा:**) ये पृथिव्यां तिष्ठन्ति (**सुदास:**) शोभनदान: (**तोकम्**) अपत्यम् (**तोकाय**) अपत्याय (**श्रवसे**) विद्याश्रवणाय (**वहन्ति**) प्राप्नुवन्ति॥ २३॥

अन्वय:-हे राजन्! पैजवनस्य ते यथा चत्वारो दाना: स्मद्दिष्टय: कृशनिन ऋज्रास: पृथिविष्ठा विद्वांसो निरेके मा नि दधति श्रवसे तोकाय च [मा] तोकं वहन्ति तथा तान् प्रति भवान् सुदासो भवेत्॥ २३॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे मनुष्या! यथा वेदविद ऋत्विजो राजसहायेन यज्ञानुष्ठानात्सर्वेषां निश्चितं सुखं वर्धयन्ति यथा च ब्रह्मचारिण: सन्तानाय ब्रह्मचर्येण पूर्वं विद्याध्ययनाय च विवाहं विधायाऽपत्यमुत्पादयन्ति तथैव राजा राजपुरुषाश्च सर्वेषां हिताय सर्वान् सन्तानान् ब्रह्मचर्येण विद्या ग्राहयित्वा सर्वेषां सुखमुन्नेयु:॥ २३॥

पदार्थ:-हे राजन्! (**पैजवनस्य**) क्षमाशील रखने वाले के पुत्र आपके जैसे (**चत्वार:**) चार ऋत्विज् (**दाना:**) देनेवाले (**स्मद्दिष्टय:**) जिनके निश्चित दर्शन (**कृशनिन:**) वा बहुत हिरण्य विद्यमान (**ऋज्रास:**) जो सरल स्वभाव (**पृथिविष्ठा:**) पृथिवी पर स्थित रहते हैं वे विद्वान् जन (**निरेके**) नि:शङ्क राज्यव्यवहार में (**मा**) मुझे विधान करते हैं, स्थिर करते हैं (**श्रवसे**) विद्या सुनने के लिये (**तोकाय**) सन्तान के अर्थ (**मा**) मुझ (**तोकम्**) सन्तान को (**वहन्ति**) पहुँचाते हैं, वैसे उनके प्रति आप (**सुदास:**) सुन्दर दानशील हूजिये॥ २३॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! वेदवेत्ता ऋत्विज् ब्राह्मण राजसहाय से यज्ञानुष्ठान से सब का निश्चित सुख बढ़ाते हैं और जैसे ब्रह्मचारी सन्तान के लिये ब्रह्मचर्य्य से पहिले विद्या पढ़ने के लिये विवाह कर सन्तान उत्पन्न करते हैं, वैसे राजजन और राजपुरुष सब के हित के लिये ब्रह्मचर्य्य से विद्या ग्रहण कराकर सब के सुख की उन्नति करें॥ २३॥

पुनस्ते राजादय: किंवत् किं कुर्य्युरित्याह॥

फिर वे राजा आदि किसके तुल्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

यस्य॒ श्रवो॒ रोद॑सी अ॒न्तरु॒र्वी शी॒र्ष्णेशी॑र्ष्णे वि॒बु॒भाजा॑ वि॒भ॒क्ता।
स॒सेदिन्द्रं॒ न स्रव॑तो॒ गृण॑न्ति॒ नि यु॑ध्या॒मधि॑मशिशादु॒भीके॑॥ २४॥

यस्य॑। श्रव॑:। रोद॑सी॒ इति॑। अ॒न्त:। उ॒र्वी इति॑। शी॒र्ष्णेऽशी॑र्ष्णे। वि॒ऽब॒भाज॑। वि॒ऽभ॒क्ता। स॒स॒। इत्।

इन्द्रम्। न। स्रवतः। गृणन्ति। नि। युध्यामधिम्। अशिशात्। अभीके॥ २४॥

पदार्थः-(**यस्य**) मनुष्यस्य (**श्रवः**) अन्नं श्रवणं वा (**रोदसी**) द्यावापृथिव्यौ (**अन्तः**) मध्ये (**उर्वी**) बहुकलादियुक्ते (**शीर्ष्णेशीर्ष्णे**) शिरोवदुत्तमायोत्तमाय सुखाय (**विबभाज**) विशेषेण भजेत सेवेत (**विभक्ता**) विभक्ते भिन्ने (**सप्त**) सप्तविधे (**इत्**) एव (**इन्द्रम्**) विद्युतम् (**न**) इव (**स्रवतः**) प्रापयतः (**गृणन्ति**) स्तुवन्ति (**नि**) (**युध्यामधिम्**) यो युधि स-ाम आमं रोगं दधाति तं शत्रुम् (**अशिशात्**) छेदयेत् (**अभीके**) समीपे॥ २३॥

अन्वयः-हे मनुष्या! यस्य श्रव उर्वी रोदसी शीर्ष्णेशीर्ष्णेऽन्तर्विबभाज ये इन्द्रं न सप्त विभक्ता सत्यौ सुखानीत् स्रवतो येषां सर्वे विद्वांसो गृणन्ति तयोर्विद्यया यो राजाऽभीके युध्यामधि न्यशिशात्स एव राज्यं शासितुमर्हेत्॥ २४॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यदि राजादयो धर्म्ये न्याये वर्त्तित्वा राज्यं प्रशासयेयुस्तर्हि सूर्यवत्प्रजासूत्तमानि सुखान्युन्नेतुं शक्नुवन्ति शत्रून्निवार्य्य भद्रान् समीपस्थाञ्जनान् सत्कर्तुं जानन्ति॥ २४॥

पदार्थः-हे मनुष्यो! (**यस्य**) जिसका (**श्रवः**) अन्न वा श्रवण (**उर्वी**) बहुफलादि पदार्थों से युक्त (**रोदसी**) आकाश और पृथिवी को (**शीर्ष्णेशीर्ष्णे**) शिर के तुल्य उत्तम सुख के लिये (**अन्तः**) बीच में (**विबभाज**) विशेषता से भेजता है जिन (**इन्द्रम्**) इन्द्र के (**न**) समान (**सप्त**) सप्त प्रकार से (**विभक्ता**) विभाग को प्राप्त हुई **[**=हुए**]** आकाश और पृथिवी, सुखों को (**इत्**) ही (**स्रवतः**) पहुँचाते हैं जिनकी सब विद्वान् जन (**गृणन्ति**) प्रशंसा करते हैं उनकी विद्या से जो राजा (**अभीके**) समीप में (**युध्यामधिम्**) युद्धरूपी रोग को धारण करते शत्रु को (**नि, अशिशात्**) निरन्तर छेदे, वही राज्य-शिक्षा देने के योग्य हो॥ २४॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। यदि राजादि पुरुष धर्मयुक्त न्याय में वर्त कर राज्य को उत्तम शिक्षा दिलावें तो सूर्य के समान प्रजाओं में उत्तम सुखों की उन्नति कर सकते हैं और शत्रुओं को निवार **[**=निवारण कर**]** सुख देने वाले समीपस्थ जनों को सत्कार करना जानते हैं॥ २४॥

पुनर्मनुष्याः कीदृशं राजानं समाश्रयेयुरित्याह॥

फिर मनुष्य कैसे राजा को अच्छे प्रकार आश्रय करें, इस विषय को अगले मन्त्र में कहते हैं॥

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः।
अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु॥ २५॥ २८॥

इमम्। नरः। मरुतः। सश्चत। अनु। दिवः।ऽदासम्। न। पितरम्। सुऽदासः। अविष्टन। पैजऽवनस्य। केतम्। दुःनशम्। क्षत्रम्। अजरम्। दुवः।ऽयु॥ २५॥

पदार्थः-(**इमम्**) (**नरः**) नायकाः (**मरुतः**) मनुष्याः (**सश्चत**) समवयन्तु (**अनु**) (**दिवोदासम्**) विद्याप्रकाशदातारम् (**न**) इव (**पितरम्**) पालकम् (**सुदासः**) उत्तमविद्यादानः (**अविष्टन**) व्याप्नुत। अत्र **संहितायामि**ति दीर्घः। (**पैजवनस्य**) क्षमाशीलाज्ञातस्य पुत्रस्य (**केतम्**) प्रज्ञाम् (**दूणाशम्**) दुःखेन

नाशयितुं योग्यं दुर्लभविनाशं वा **(क्षत्रम्)** राज्यं धनं वा **(अजरम्)** नाशरहितम् **(दुवोयु)** परिचरणाय कमनीयम्॥ २५॥

अन्वय:-हे नरो मरुतो य: सुदासो भवेत्तमिमं दिवोदासं पितरं न यूयं सश्चत पैजवनस्य दूणाशं केतमजरं दुवोयु क्षत्रं चान्वविष्टन॥ २५॥

भावार्थ:-अत्रोपमालङ्कार:। यदि मनुष्या विद्यादिशुभगुणदातारं पितरमिव पालकं राजानमाश्रयेयुस्तर्हि पूर्णा प्रज्ञामविनाशि सेवनीयमैश्वर्यं राज्यं च स्थिरं कर्तुं शक्नुयुरिति॥ २५॥

अत्रेन्द्रराजप्रजामित्रधार्मिकाऽमात्यशत्रुनिवारणधार्मिकसत्करणार्थप्रतिपादनादस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यष्टादशं सूक्तमष्टाविंशो वर्गश्च समाप्त:॥

पदार्थ:-हे **(नर:)** नायक **(मरुत:)** मनुष्यो! जो **(सुदास:)** उत्तम दान देने वाला हो **(इमम्)** उस **(दिवोदासम्)** विद्याप्रकाश देने वाले को **(पितरम्)** पालने वाले पिता के **(न)** समान तुम लोग **(सश्चत)** मिलो, सम्बन्ध करो और **(पैजवनस्य)** क्षमाशील है जिसका उससे उत्पन्न हुए पुत्र के **(दूणाशम्)** दु:ख से नाश करने योग्य पदार्थ वा दुर्लभ विनाश **(केतम्)** उत्तम बुद्धि और **(अजरम्)** विनाशरहित **(दुवोयु)** सेवन करने के लिये मनोहर **(क्षत्रम्)** राज्य वा धन को **(अनु, अविष्टन)** व्याप्त होओ॥ २५॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। यदि मनुष्य विद्यादि शुभ गुणों के देने वाले, पिता के समान **[**=पालक**]** राजा का आश्रय करें तो पूर्ण प्रज्ञा अविनाशि सेवने योग्य ऐश्वर्य और राज्य को स्थिर कर सकें॥ २५॥

इस सूक्त में इन्द्र, राजा, प्रजा, मित्र धार्मिक, अमात्य, शत्रुनिवारण तथा धार्मिक सत्कार के अर्थ का प्रतिपादन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अठारहवां सूक्त और अट्ठाईसवां वर्ग समाप्त हुआ॥

अथैकादशर्चस्यैकोनविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, ५ त्रिष्टुप्। ३, ६ निचृत्त्रिष्टुप्। ७, ९, १० विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ निचृत्पङ्क्तिः। ४ पङ्क्तिः। ८, ११ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ कीदृशो राजा राजोत्तमो भवतीत्याह॥

अब ग्यारह ऋचा वाले उन्नीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में कैसा राजा उत्तम राजा होता है, इस विषय को कहते हैं॥

यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः।
यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः॥ १॥

यः। तिग्मऽशृङ्गः। वृषभः। न। भीमः। एकः। कृष्टीः। च्यवयति। प्र। विश्वाः। यः। शश्वतः। अदाशुषः। गयस्य। प्रऽयन्ता। असि। सुस्वितऽतराय। वेदः॥ १॥

पदार्थः-(**यः**) (**तिग्मशृङ्गः**) तिग्मानि तेजस्वीनि शृङ्गानि किरणा यस्य सूर्यस्य सः (**वृषभः**) वृष्टिकरः (**न**) इव (**भीमः**) भयङ्करः (**एकः**) असहायः (**कृष्टीः**) मनुष्याः (**च्यावयति**) चालयति (**प्र**) (**विश्वाः**) समग्राः प्रजाः (**यः**) (**शश्वतः**) अनादिभूतस्य (**अदाशुषः**) अदातुः (**गयस्य**) अपत्यस्य (**प्रयन्ता**) प्रकर्षेण नियन्ता (**असि**) (**सुष्वितराय**) सुष्ठ्वतिशयितमैश्वर्यं यः सुनोति तस्मै (**वेदः**) विज्ञानं धनं वा। **वेद इति धननाम।** (निघं०२.१०)॥१०॥

अन्वयः-हे राजन्! यो भद्रो जनस्तिग्मशृङ्गो वृषभो भीमो नैको विश्वा कृष्टीः प्र च्यावयति यः शश्वतोऽदाशुषो गयस्य सुष्वितराय वेदः करोति तस्य यतस्त्वं प्रयन्तासि तस्मादधिकमाननीयोऽसि॥१॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा सूर्यो विद्युद्वा वृष्टिकरणेन सुखप्रदा तीव्रतापेन निपातेन वा भयङ्करा वर्त्तते तथा यो राजा विद्याध्ययनायाऽपत्यानि ये न समर्पयन्ति तेभ्यो दण्डदाता वा ब्रह्मचर्येण सर्वेषां विद्यावर्धको यो राजा भवेत्तमेव सर्वे स्वीकुर्वन्तु॥१॥

पदार्थः-हे राजन्! (**यः**) जो कल्याण जन (**तिग्मशृङ्गः**) तीक्ष्ण किरणों से युक्त (**वृषभः**) वर्षा (**भीमः**) भय करने वाले सूर्य के (**न**) समान (**एकः**) अकेला (**विश्वाः**) समग्र प्रजा (**कृष्टीः**) मनुष्यों को (**प्र, च्यावयति**) अच्छे प्रकार चलाता है और (**यः**) जो (**शश्वतः**) निरन्तर (**अदाशुषः**) न देने वाले के (**गयस्य**) सन्तान के (**सुष्वितराय**) सुन्दर अतीव ऐश्वर्य को निकालने वाले के लिये (**वेदः**) विज्ञान वा धन को करता है, उसके जिससे तुम (**प्रयन्ता**) उत्तमता से नियम करने वाले (**असि**) हो, इससे अधिक मानने योग्य हो॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे सूर्य वा बिजुली वर्षा करने से सुख देने वाली और तीव्र ताप से वा पड़ जाने से भयंकर है, वैसे जो राजा विद्याध्ययन के लिये सन्तानों को नहीं देते उनके लिये दण्ड देने वाला वा ब्रह्मचर्य्य से सब की विद्या बढ़ाने वाला राजा हो, उसी को सब स्वीकार करें॥१॥

पुना राजविषयमाह॥

फिर राजविषय को अगले मन्त्र में कहते हैं॥

त्वं ह॒ त्यदि॑न्द्र कु॒त्समा॑व॒: शुश्रू॑षमाणस्त॒न्वा॑ सम॒र्ये।
दास॑ं यच्छुष्णं॑ कु॒यव॑ं न्य॑स्मा॒ अर॑न्धय आर्जु॒नेया॑य॒ शिक्ष॑न्॥ २॥

त्वम्। ह॒। त्यत्। इ॒न्द्र॒। कु॒त्स॑म्। आ॒व॒:। शुश्रू॑षमाण:। त॒न्वा॑। स॒ऽम॒र्ये। दास॑म्। यत्। शुष्ण॑म्। कु॒यव॑म्। नि। अ॒स्मै॒। अर॑न्धय:। आ॒र्जु॒नेया॑य। शिक्ष॑न्॥ २॥

पदार्थ:-(**त्यम्**) (**ह**) खलु (**त्यत्**) (**इन्द्र**) सूर्य इव प्रतापयुक्त (**कुत्सम्**) विद्युतमिव वज्रम् (**आव:**) रक्षे: (**शुश्रूषमाण:**) श्रोतुमिच्छमानो विद्याश्रवणाय सेवां कुर्वाण: (**तन्वा**) शरीरेण (**समर्ये**) (**दासम्**) दातारं सेवकं वा (**यत्**) यम् (**शुष्णम्**) शोषकं बलवन्तम् (**कुयवम्**) कुत्सिता यवा अन्नादि यस्य तम् (**नि**) (**अस्मै**) (**अरन्धय:**) हिंसये: (**आर्जुनेयाय**) अर्जुन्या: सुरूपवत्या विदुष्या: पुत्राय (**शिक्षन्**) विद्योपार्जनं कारयन्॥ २॥

अन्वय:-हे इन्द्र राजँस्त्वं सूर्य इव त्यत्कुत्सं दुष्टानामुपरि प्रहृत्य भद्रिका: प्रजा आव: शुश्रूषमाणस्त्वं तन्वा समर्ये होत्तमा सेना आवो यद्यं शुष्णं कुयवं दासं न्यरन्धयोऽस्मा आर्जुनेयायाशिक्षन्नविद्यां हिंस्या:॥ २॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये मनुष्या विद्याप्राप्तय आप्तानध्यापकान् शुश्रूषन्ते शरीरात्मबलं विधाय संग्रामे दुष्टान् विजयन्ते विद्याध्ययनविरहाँस्तिरस्कृत्य विद्याभ्यासकान् सत्कुर्वन्ति ते स्थिरं राज्यैश्वर्यं प्राप्नुवन्ति॥ २॥

पदार्थ:-हे (**इन्द्र**) सूर्य के समान प्रतापयुक्त राजा (**त्वम्**) आप सूर्य के समान (**त्यत्**) उस (**कुत्सम्**) बिजुली के तुल्य वज्र को दुष्टों पर प्रहार कल्याण करने वाली प्रजा की (**आव:**) पालना कीजिये (**शुश्रूषमाण:**) सुनने की इच्छा करने वाले आप (**तन्वा**) शरीर से (**समर्ये**) संग्राम में (**ह**) ही उत्तम सेना की रक्षा कीजिये (**यत्**) और जिस (**शुष्णम्**) शुष्क करने वा (**कुवयम्**) कुत्सित यव आदि अन्न रखने वाले (**दासम्**) दाता वा सेवक को (**नि, अरन्धय:**) नहीं मारते (**अस्मै**) इस (**आर्जुनेयाय**) सुन्दर रूपवती विदुषी के पुत्र के निमित्त (**शिक्षन्**) विद्या इकट्ठी कराते हुए अविद्या को हनो॥ २॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य विद्याप्राप्ति के लिये आप्त, श्रेष्ठ, विद्वान् अध्यापकों की शुश्रूषा करते शरीर और आत्मा के बल का विधान कर संग्राम में दुष्टों को जीतते और विद्याध्ययन से **[**रहित**]** जनों का तिरस्कार करते, विद्याभ्यास करने वालों का सत्कार करते हैं, वे स्थिर राज्यैश्वर्य्य को प्राप्त होते हैं॥ २॥

पुन: स किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं धृ॑ष्णो धृष॒ता वी॒तह॑व्यं॒ प्राव॒ो विश्वा॑भिरू॒तिभि॑: सु॒दास॑म्।
प्र पौरु॑कुत्सिं त्र॒सद॑स्युमाव॒: क्षेत्र॑साता वृत्र॒हत्ये॑षु पू॒रुम्॥ ३॥

त्वम्। धृ॒ष्णो॒ इति॑। धृ॒ष॒ता। वी॒तऽह॑व्यम्। प्र। आ॒व॒:। विश्वा॑भि:। ऊ॒तिऽभि॑:। सु॒ऽदास॑म्। प्र।

पौरुऽकुत्सिम्। त्रसदस्युम्। आव:। क्षेत्रऽसाता। वृत्रऽहत्येषु। पूरुम्॥ ३॥

पदार्थ:-(**त्वम्**) (**धृष्णो**) दृढ (**धृषता**) प्रगल्भेन पुरुषेण सह (**वीतहव्यम्**) प्राप्तप्राप्तव्यम् (**प्र आव:**) प्रकर्षेण रक्ष (**विश्वाभि:**) समग्राभि: (**ऊतिभि:**) रक्षाभि: (**सुदासम्**) शोभना दासा दातार: सेवका वा यस्य तम् (**प्र**) (**पौरुकुत्सिम्**) पुरवो बहव: कुत्सा: शस्त्राऽस्त्रविद्यायोगा यस्य तस्यापत्यम् (**त्रसदस्युम्**) त्रसा भयभीता दस्यवो भवन्ति यस्मात्तम् (**आव:**) कामयस्व (**क्षेत्रसाता**) क्षेत्राणां विभागे (**वृत्रहत्येषु**) शत्रुहननेषु स- ामेषु (**पूरुम्**) पालकं धारकं वा॥ ३॥

अन्वय:-हे धृष्णो! त्वं धृषता विश्वभिरूतिभिर्वीतहव्यं सुदासं पौरुकुत्सिं त्रसदस्युं सततं प्राव:। क्षेत्रसाता वृत्रहत्येषु पूरुं प्राव:॥ ३॥

भावार्थ:-ये राजानो धार्मिकान् दस्युप्रहारकाञ्छस्त्रास्त्रप्रक्षेपकुशलान् विद्यादिशुभगुणदातॄन् सत्कुर्वन्ति ते सदा सुखिनो जायन्ते॥ ३॥

पदार्थ:-हे (**धृष्णो**) दृढ पुरुष! (**त्वम्**) आप (**धृषता**) प्रगल्भ पुरुष के साथ (**विश्वाभि:**) समग्र (**ऊतिभि:**) रक्षाओं के साथ (**वीतहव्यम्**) पाये हुए और पाने योग्य पदार्थ वा (**सुदासम्**) अच्छे जिसके दास जो (**पौरुकुत्सिम्**) बहुत शस्त्रास्त्रविद्याओं के योग रखने वाले पुत्र (**त्रसदस्युम्**) जिससे भयभीत दस्यु होते हैं उस जन की निरन्तर (**प्राव:**) कामना करो और (**क्षेत्रसाता**) क्षेत्रों के विभाग में (**वृत्रहत्येषु**) शत्रुओं के मारने रूप सङ्ग्रामों में (**पूरुम्**) पालना वा धारणा करने वाले की (**प्राव:**) कामना करो॥ ३॥

भावार्थ:-जो राजजन धार्मिक, दस्युओं को मारने, शस्त्र अस्त्रों के फेंकने में कुशल और विद्यादि शुभगुणों के देने वाले सज्जनों का सत्कार करते हैं, वे सदा सुखी होते हैं॥ ३॥

पुन: स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि।
त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु॥ ४॥

त्वम्। नृऽभि:। नृऽमन:। देवऽवीतौ। भूरीणि। वृत्रा। हरि:ऽअश्व। हंसि। त्वम्। नि। दस्युम्। चुमुरिम्। धुनिम्। च। अस्वापय:। दभीतये। सुऽहन्तु॥ ४॥

पदार्थ:-(**त्वम्**) (**नृभि:**) न्यायनेतृभि: सज्जनै: सह (**नृमण:**) नृषु न्यायाधीशेषु मनो यस्य तत्सम्बुद्धौ (**देववीतौ**) देवानां वीति: प्राप्तिर्यस्मिन् व्यवहारे तस्मिन् (**भूरीणि**) बहूनि (**वृत्रा**) वृत्राणि शत्रुसैन्यानि धनानि वा (**हर्यश्व**) कमनीयाश्व (**हंसि**) नाशयसि प्राप्नोषि वा (**त्वम्**) (**नि**) (**दस्युम्**) दुष्टाचारं साहसिकम् (**चुमुरिम्**) चोरम् (**धुनिम्**) श्रेष्ठानां कम्पयितारम् (**च**) (**अस्वापय:**) हत्वा शापय (**दभीतये**) हिंसनाय (**सुहन्तु**) शोभनेन प्रकारेण नाशयतु॥ ४॥

अन्वय:-हे हर्यश्व नृमणो राजँस्त्वं नृभि: सह देववीतौ भूरीणि वृत्रा हंसि त्वं धुनिं चुमुरिं दस्युं न्यस्वापयो दभीतये च दुष्टान् भवान् सुहन्तु॥ ४॥

भावार्थः-हे राजन्! भवान् सदैव सत्पुरुषसङ्गं न्यायेन राज्यं पालयित्वा धनेच्छां दुष्टान् दस्यून्निवार्य्य प्रजापालनं सततं कुरु॥४॥

पदार्थः-हे **(हर्यश्व)** मनोहर घोड़ा से युक्त **(नृमणः)** और न्यायधीशों में मन रखने वाले राजन्! **(त्वम्)** आप **(नृभिः)** न्याय प्राप्ति कराने वाले विद्वानों के साथ **(देववीतौ)** विद्वानों की प्राप्ति जिस व्यवहार में होती उसमें **(भूरीणि)** बहुत **(वृत्रा)** शत्रुसैन्यजन वा धनों को **(हंसि)** नाशते वा प्राप्त होते हैं **(त्वम्)** आप **(धुनिम्)** श्रेष्ठों को कंपाने वाले **(चुमुरिम्)** चोर और **(दस्युम्)** दुष्ट आचरण करने वाले साहसी जन को **(नि, अस्वापयः)** मार कर सुलाओ तथा **(दभीतये)** हिंसा के लिये **(च)** भी दुष्टों को आप **(सुहन्तु)** अच्छे प्रकार नाशो॥४॥

भावार्थः-हे राजा! आप सदैव सत्पुरुषों का संग न्याय से राज्य को पाल के धन की इच्छा और दुष्ट डाकुओं को निवार के प्रजापालना निरन्तर करो॥४॥

पुना राज्ञः सैन्यानि कीदृशानि भवेयुरित्याह॥

फिर राजा के सेनाजन कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः।
निवेशने शततमाऽविवेषीरहन् च वृत्रं नमुचिमुताहन्॥५॥२९॥

तव। च्यौत्नानि। वज्रऽहस्त। तानि। नव। यत्। पुरः। नवतिम्। च। सद्यः। निऽवेशने। शतऽतमा। अविवेषीः। अहन्। च। वृत्रम्। नमुचिम्। उत। अहन्॥५॥

पदार्थः-(तव) **(च्यौत्नानि)** च्यवन्ति शत्रवो येभ्यस्तानि बलानि। **च्यौत्नमिति बलनाम।** (निघं०२.९) **(वज्रहस्त)** **(तानि)** **(नव)** **(यत्)** याः **(पुरः)** शत्रूणां नगर्यः **(नवतिम्)** एतत्संख्याताः **(च)** **(सद्यः)** **(निवेशने)** निविशन्ति यस्मिंस्तस्मिन् **(शततमा)** अतिशयेन शतानि **(अविवेषीः)** व्याप्नुयाः **(अहन्)** हन्ति **(च)** **(वृत्रम्)** आवरकं मेघम् **(नमुचिम्)** यः स्वस्वरूपं न मुञ्चति तम् **(उत)** अपि **(अहन्)** हन्ति॥५॥

अन्वयः-हे वज्रहस्त! यथा तव तानि च्यौत्नानि सूर्यो यन्नवनवतिं पुरः सद्योऽहँश्च निवेशने शततमा असंख्यान्युतापि नमुचिं वृत्रं चाऽहंस्तथा त्वमविवेषीः सैन्यानि प्राप्य शत्रुबलान्यविवेषीः॥५॥

भावार्थः-हे राजन्! यथा सूर्योऽसंख्यानि मेघस्य नगराणीवाब्दलानि घनाकाराणि हन्ति तथा तवोत्तमानि सैन्यानि भूत्वा सर्वान् दुष्टाञ्छत्रून् घ्नन्तु॥५॥

पदार्थः-हे **(वज्रहस्त)** हाथ में वज्र रखने वाले! जैसे **(तव)** आपके **(तानि)** वे **(च्यौत्नानि)** बल हैं अर्थात् सूर्य **(यत्)** जो **(नवनवतिम्)** निन्यानवे **(पुरः)** मेघरूपी शत्रुओं की नगरी उनको **(सद्यः)** शीघ्र **(अहन्)** हनता **(च)** और **(निवेशने)** जिसमें निवास करते हैं उस स्थान में **(शततमा)** अतीव सैकड़ों को **(उत)** और **(नमुचिम्)** जो अपने रूप को नहीं छोड़ता उस **(वृत्रम्)** आच्छादन करने वाले मेघ को **(च)** भी **(अहन्)** मारता, वैसे आप **(अविवेषीः)** व्याप्त हूजिये अर्थात् सेना जनों को प्राप्त होकर शत्रुबलों को प्राप्त हूजिये॥५॥

भावार्थः-हे राजन्! जैसे सूर्य असंख्य मेघ की नगरियों के समान सघन घन घटाघूम बादलों को हनता है, वैसे तुम्हारे सेना जन उत्तम होकर समस्त शत्रुओं को मारें॥५॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

सना॒ ता त॑ इन्द्र॒ भोज॑नानि रा॒तह॑व्याय दा॒शुषे॑ सु॒दासे॑।
वृष्णे॑ ते॒ हरी॒ वृष॑णा युनज्मि॒ व्यन्तु॒ ब्रह्मा॑णि पुरुशाक॒ वाज॑म्॥६॥

सना॑। ता। ते॒। इ॒न्द्र॒। भोज॑नानि। रा॒तऽह॑व्याय। दा॒शुषे॑। सु॒ऽदासे॑। वृष्णे॑। ते॒। हरी॒ इति॑। वृष॑णा। यु॒न॒ज्मि॒। व्यन्तु॑। ब्रह्मा॑णि। पु॒रु॒ऽशा॒क॒। वाज॑म्॥६॥

पदार्थः-(**सना**) सनातनानि विभजनीयानि वा (**ता**) तानि (**ते**) तव (**इन्द्र**) परमैश्वर्यप्रद राजन् (**भोजनानि**) भोक्तव्यानि पालनानि वा (**रातहव्याय**) दत्तदातव्याय (**दाशुषे**) दात्रे (**सुदासे**) सुदानाय (**वृष्णे**) सुखवर्षकाय (**ते**) तव (**हरी**) अश्वौ (**वृषणा**) बलयुक्तौ (**युनज्मि**) संयोजयामि (**व्यन्तु**) प्राप्नुवन्तु (**ब्रह्माणि**) धनानि (**पुरुशाक**) बहुशक्तिमन् (**वाजम्**) वेगम्॥६॥

अन्वयः-हे पुरुशाकेन्द्र! यानि ते तव रातहव्याय सुदासे वृष्णे दाशुषे सना भोजनानि सन्ति तान्यहं युनज्मि यौ ते वृषणा हरी तावहं युनज्मि यतः प्रजाजना वाजं ब्रह्माणि च व्यन्तु॥६॥

भावार्थः-हे राजजना! यदि भवन्तः करदातॄणां पालनं न्यायेन कुर्युः शरीरेण धनेन मनसा प्रजा उन्नयेयुस्तर्हि किमप्यैश्वर्यमलभ्यं न स्यात्॥६॥

पदार्थः-हे (**पुरुशाक**) बहुत शक्तियुक्त (**इन्द्र**) परम ऐश्वर्य के देने वाले राजा! जो (**ते**) आपके (**रातहव्याय**) दी है देने योग्य वस्तु जिसने उस (**सुदासे**) सुन्दर दानशील (**वृष्णे**) सुखवृष्टि करने (**दाशुषे**) देने वाले के लिये (**सना**) सनातन वा विभाग करने योग्य (**भोजनानि**) भोजन है (**ता**) उनको मैं (**युनज्मि**) संयुक्त करता हूँ तथा जो (**ते**) आपके (**वृषणा**) बलयुक्त अश्व (**हरी**) हरणशील हैं उनको संयुक्त करता हूँ जिससे प्रजाजन (**वाजम्**) वेग और (**ब्रह्माणि**) धनों को (**व्यन्तु**) प्राप्त हों॥६॥

भावार्थः-हे राजजनो! यदि आप लोग कर देने वालों की पालना न्याय से करें और शरीर से धन से और मन से प्रजाजनों की उन्नति करें तो कुछ भी ऐश्वर्य अलभ्य न हो॥६॥

पुना राजप्रजाजना अन्योऽन्यं कथं वर्त्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

मा ते॑ अ॒स्यां स॑हसाव॒न् परि॑ष्टाव॒घाय॑ भूम हरिवः परा॒दै।
त्राय॑स्व नोऽवृ॒केभि॒र्वरू॑थै॒स्तव॑ प्रि॒यास॑: सू॒रिषु॑ स्याम॥७॥

मा। ते॒। अ॒स्याम्। स॒ह॒सा॒ऽव॒न्। परि॑ष्टौ। अ॒घाय॑। भू॒म॒। ह॒रि॒ऽव॒रिति॑। प॒रा॒ऽदै। त्राय॑स्व। नः॒। अ॒वृ॒केभिः॑। वरू॑थैः। तव॑। प्रि॒यास॑ः। सू॒रिषु॑। स्या॒म॒॥७॥

पदार्थः-(**मा**) निषेधे (**ते**) तव (**अस्याम्**) प्रजायाम् (**सहसावन्**) बहुबलयुक्त (**परिष्टौ**) परितः सङ्गन्तव्यायाम् (**अघाय**) पापाय (**भूम**) भवेम (**हरिवः**) प्रशस्तमनुष्ययुक्त (**परादै**) परादानाय त्यागाय त्यक्तव्याय (**त्रायस्व**) (**नः**) अस्मान् (**अवृकेभिः**) अचोरैः (**वरूथैः**) वरैः (**तव**) (**प्रियासः**) प्रीताः (**सूरिषु**) विद्वत्सु (**स्याम**) भवेम॥७॥

अन्वयः-हे हरिवः सहसावन् राजन्नस्यां परिष्टौ ते परादा अघाय वयं मा भूमाऽवृकेभिर्वरूथैर्नस्त्रायस्व यतो वयं तव सूरिषु प्रियासः स्याम॥७॥

भावार्थः-हे राजन्! यथा वयं तवोन्नतौ प्रयतेमहि तथा त्वमपि प्रयतस्व विद्याप्रचारेण सर्वान् विदुषः कारय येन विरोधो न स्यात्॥७॥

पदार्थः-हे (**हरिवः**) प्रशंसित मनुष्य और (**सहसावन्**) बहुत बल से युक्त राजा! (**अस्याम्**) इस (**परिष्टौ**) सब ओर से संग करने योग्य वेला में (**ते**) आपके (**परादै**) त्याग करने योग्य (**अघाय**) पाप के लिये हम लोग (**मा, भूम**) मत होवें (**अवृकेभिः**) और जो चोर नहीं उन (**वरूथैः**) श्रेष्ठों के साथ (**नः**) हम लोगों की (**त्रायस्व**) रक्षा कीजिये जिससे हम लोग (**तव**) तुम्हारे (**सूरिषु**) विद्वानों में (**प्रियासः**) प्रसन्न (**स्याम**) हों॥७॥

भावार्थः-हे राजा! जैसे हम लोग तुम्हारी उन्नति के निमित्त प्रयत्न करें, वैसे आप भी प्रयत्न कीजिये, विद्या के प्रचार से सबको विद्वान् कराइये जिससे विरोध नहो॥७॥

पुनर्मनुष्याः परस्पर कथं वर्तेरन्नित्याह॥

फिर मनुष्य परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन्॥८॥

प्रियासः। इत्। ते। मघऽवन्। अभिष्टौ। नरः। मदेम। शरणे। सखायः। नि। तुर्वशम्। नि। याद्वम्। शिशीहि। अतिथिऽग्वाय। शंस्यम्। करिष्यन्॥८॥

पदार्थः-(**प्रियासः**) प्रीतिमन्तः प्रीता वा (**इत्**) एव (**ते**) तव (**मघवन्**) बहुधनप्रद (**अभिष्टौ**) अभिप्रियायां सङ्गतौ (**नरः**) नायकाः (**मदेम**) आनन्देम (**शरणे**) शरणागतपालने कर्मणि (**सखायः**) मित्राः सन्तः (**नि**) (**तुर्वशम्**) निकटस्थं जनम्। **तुर्वश इति अन्तिकनाम।** (निघं०२.१६) (**नि**) (**याद्वम्**) ये यान्ति तान् यो याति तम् (**शिशीहि**) तीक्ष्णीकुरु (**अतिथिग्वाय**) अतिथीनां गमनाय (**शंस्यम्**) प्रशंसनीयम् (**करिष्यन्**)॥८॥

अन्वयः-हे मघवन्! सखायः प्रियासो नरो वयं तेऽभिष्टौ शरणे मदेम त्वं तुर्वशं नि शिशीहि याद्वं नि शिशीह्यतिथिग्वाय शंस्यमित्करिष्यञ्छिशीहि॥८॥

भावार्थः-हे राजन्! ये शुभगुणकर्मस्वभावाचरणेन युक्तास्त्वयि प्रीतिमन्तः स्युस्तान् धार्मिकान् प्रशंसितान् कुरु यथाऽतिथीनामागमनं स्यात्तथा विधेहि॥८॥

पदार्थः- (**मघवन्**) बहुत धन देने वाले! (**सखायः**) मित्र होते हुए (**प्रियासः**) प्रीतिमान् वा

प्रसन्न हुए **(नरः)** नायक मनुष्य हम लोग **(ते)** आपके **(अभिष्टौ)** सब ओर से प्रिय संगति अर्थात् मेल मिलाप में **(शरणे)** शरणागत की पालना करने कर्म में **(मदेम)** आनन्दित हों। आप **(तुर्वशम्)** निकटस्थ मनुष्य को **(नि, शिशीहि)** निरन्तर तीक्ष्ण कीजिये और **(याद्वम्)** जो जाते हैं उन पर जो जाता है उसको **(नि)** निरन्तर तीक्ष्ण कीजिये और **(अतिथिग्वाय)** अतिथियों के गमन के लिये **(शंस्यम्)** प्रशंसनीय को **(इत्)** ही **(करिष्यन्)** करते हुए तीक्ष्ण कीजिये॥८॥

भावार्थः-हे राजन्! जो शुभ गुणों के आचरण से युक्त तुम में प्रीतिमान् हों उन धार्मिक जनों को प्रशंसित कीजिये, जैसे अतिथियों का आगमन हो वैसा विधान कीजिये॥८॥

पुनः पठकपाठकाः [=पाठकादयः] परस्परं कथं वर्त्तेरन्नित्याह॥

फिर पढ़ने और पढ़ाने वाले परस्पर कैसे वर्ताव वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था।
ये ते हवेभिर्वि पणीरदाशन्नस्मान् वृणीष्व युज्याय तस्मै॥९॥

सद्यः। चित्। नु। ते। मघऽवन्। अभिष्टौ। नरः। शंसन्ति। उक्थऽशासः। उक्था। ये। ते। हवेभिः। वि। पणीन्। अदाशन्। अस्मान्। वृणीष्व। युज्याय। तस्मै॥९॥

पदार्थः-(**सद्यः**) (**चित्**) अपि (**नु**) इव (**ते**) तव (**मघवन्**) पूजनीयविद्याऽध्यापक (**अभिष्टौ**) अभिप्रियायाम् नीतौ (**नरः**) (**शंसन्ति**) (**उक्थशासः**) य उक्थानां प्रशंसनीयानां मन्त्राणामर्थञ्छासन्ति ते (**उक्था**) उक्थानि प्रशंसनीयानि वचनानि (**ये**) (**ते**) (**हवेभिः**) हवनैः (**वि**) (**पणीन्**) व्यवहर्तॄन् (**अदाशन्**) ददति (**अस्मान्**) (**वृणीष्व**) स्वीकुर्याः (**युज्याय**) योक्तुं योग्याय व्यवहाराय (**तस्मै**)॥९॥

अन्वयः-हे मघवन्! य उक्थशासो नरस्तेऽभिष्टौ सद्यश्चिदुक्था शंसन्ति ये च हवेभिस्ते विपणीन्वादाशँस्तानस्माँश्च तस्मै युज्याय वृणीष्व॥९॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वन्नध्यापक! यूयमस्मान् वेदार्थं सद्यो ग्राहयत येन वयमप्यध्यापनं कुर्याम॥९॥

पदार्थः-हे (**मघवन्**) प्रशंसनीय विद्या के अध्यापक! जो (**उक्थशासः**) प्रशंसा करने योग्य मन्त्रों के अर्थों की शिक्षा देने वाले (**नरः**) विद्वान् जन (**ते**) तुम्हारी (**अभिष्टौ**) सब ओर से प्रिय वेला में (**सद्यः**) शीघ्र (**चित्**) ही (**उक्था**) प्रशंसित वचनों को (**शंसन्ति**) प्रबन्ध से कहते हैं और (**ये**) जो (**हवेभिः**) हवनों के साथ (**ते**) आपके (**विपणीन्**) व्यवहारों को (**नु, अदाशन्**) ही देते है उन्हें और (**अस्मान्**) हम लोगों को (**तस्मै**) उस (**युज्याय**) युक्त करने योग्य व्यवहार के लिये (**वृणीष्व**) स्वीकार कीजिये॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वान् अध्यापक! तुम हम लोगों को वेदार्थ शीघ्र ग्रहण कराओ, जिससे हम लोग भी अध्यापन करावें॥९॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यञ्चो ददतो मघानि।
तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम्॥ १०॥

एते। स्तोमाः। नराम्। नृऽतम। तुभ्यम्। अस्मद्र्यञ्चः। ददतः। मघानि। तेषाम्। इन्द्र। वृत्रऽहत्ये। शिवः। भूः। सखा। च। शूरः। अविता। च। नृणाम्॥ १०॥

पदार्थः-(**एते**) (**स्तोमाः**) प्रशंसनीया विद्वांसोऽध्येतारश्च (**नराम्**) नायकानाम् नृणां मध्ये (**नृतम**) अतिशयेन नायक (**तुभ्यम्**) (**अस्मद्र्यञ्चः**) येऽस्मानञ्चन्ति प्राप्नुवन्ति ते (**ददतः**) (**मघानि**) विद्याधनादीनि (**तेषाम्**) (**इन्द्र**) परमैश्वर्य्ययुक्त राजन् (**वृत्रहत्ये**) मेघहनन इव स-ामे (**शिवः**) मङ्गलकारी (**भूः**) भव। अत्राडभावः। (**सखा**) सुहृत् (**च**) (**शूरः**) शत्रूणां हन्ता (**अविता**) रक्षकः (**च**) (**नृणाम्**) मनुष्याणाम्॥ १०॥

अन्वयः- हे नरां नृतमेन्द्र! य एत अस्मद्र्यञ्चः स्तोमास्तुभ्यं मघानि ददतस्तेषां नृणां वृत्रहत्ये सूर्य इवाऽविता शिवः सखा च शूरश्च त्वं भूः॥ १०॥

भावार्थः- हे राजन्! यदि भवान् विदुषां रक्षां कृत्वा तेभ्य उपकारं गृह्णीयात्तर्हि का कोन्नतिर्न स्यात्॥ १०॥

पदार्थः-हे (**नराम्**) नायक मनुष्यों के बीच (**नृतम**) अतीव नायक (**इन्द्र**) परमैश्वर्ययुक्त राजा! जो (**एते**) ये (**अस्मद्र्यञ्चः**) हम लोगों को प्राप्त होते हुए (**स्तोमाः**) प्रशंसनीय विद्वान् और पढ़ने वाले (**तुभ्यम्**) तुम्हारे लिये (**मघानि**) विद्याधनों को (**ददतः**) देते हैं (**तेषाम्**) उन (**नृणाम्**) मनुष्यों के (**वृत्रहत्ये**) मेघों के हनन करने के समान संग्राम में सूर्य के समान (**अविता**) रक्षा करने वाले (**शिवः**) मंगलकारी (**सखा, च**) और मित्र (**शूरः**) शत्रुओं के मारने वाले (**च**) भी आप (**भूः**) हूजिये॥ १०॥

भावार्थः-हे राजन्! जो आप विद्वानों की रक्षा करके उनसे उपकार लें तो कौन-कौन उन्नति न हो॥ १०॥

पुना राजविषयमाह॥

फिर राज विषय को अगले मन्त्र में कहते है॥

नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व।
उप नो वाजान् मिमीह्युप स्तीन् यूयं पात स्वस्तिभिः सदा नः॥ ११॥ ३०॥ २॥

नु। इन्द्र। शूर। स्तवमानः। ऊती। ब्रह्मऽजूतः। तन्वा। ववृधस्व। उप। नः। वाजान्। मिमीहि। उप। स्तीन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ११॥

पदार्थः-(**नू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**इन्द्रः**) शत्रूणां विदारक (**शूर**) निर्भय सेनेश (**स्तवमानः**) सर्वान् योद्धॄन् वीररसयुक्तव्याख्यानेनोत्साहयन् (**ऊती**) सम्यग्रक्षया (**ब्रह्मजूतः**) ब्रह्मणा धनेनान्नेन युक्तः (**तन्वा**) शरीरेण (**वावृधस्व**) भृशं वर्धस्व (**उप**) (**नः**) अस्मान् (**वाजान्**)

बलवेगादियुक्तान् **(मिमीहि)** मान्यं कुरु **(उप)** **(स्तीन्)** संहतान् मिलितान् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** सुखैः **(सदा)** **(नः)** अस्मान्॥११॥

अन्वयः-हे शूरेन्द्र! त्वं स्तवमानो ब्रह्मजूत ऊती तन्वा वावृधस्व स्तीन् वाजान्न उपमिमीहि नु सद्यः शत्रुबलमुपमिमीहि। हे भृत्या! यूयं स्वस्तिभिर्नः सदा पात॥११॥

भावार्थः-हे सेनेश! त्वं यथा स्वशरीरबलं वर्धयसि तथैव सर्वेषां योद्धृणां शरीरबलं वर्धय यथा भृत्यास्त्वां रक्षेयुस्तथा त्वमप्येतान् सततं रक्षेति॥११॥

अत्रेन्द्रदृष्टान्तेन राजसभासेनेशाऽध्यापकाऽध्येतृराजप्रजाभृत्यकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

अस्मिन्नध्यायेऽग्निवाग्विद्वद्राजप्रजाऽध्यापकाऽध्येतृपृथिव्यादिमेधाविविद्युत्सूर्य्यमेधयज्ञहोतृयजमान-सेनासेनापतिगुणकृत्यवर्णनादेतदध्यायार्थस्य पूर्वाऽध्यायार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे पञ्चमाष्टके द्वितीयोऽध्यायस्त्रिंशो वर्गः सप्तमे मण्डल एकोनविंशं सूक्तं च समाप्तम्॥

पदार्थः-हे **(शूर)** निर्भय सेनापति **(इन्द्र)** शत्रुओं के विदीर्ण करने वाले! आप **(स्तवमानः)** सब युद्ध करने वालों को वीररस व्याख्यान से उत्साहित करते हुए और **(ब्रह्मजूतः)** धन वा अन्न से संयुक्त **(ऊती)** सम्यक् रक्षा से **(तन्वा)** शरीर से **(वावृधस्व)** निरन्तर बढ़ो **(स्तीन्)** और मिले हुए **(वाजान्)** बल वेगादियुक्त **(नः)** हम लोगों का **(उपमिमीहि)** समीप में मान करो तथा **(नु)** शीघ्र शत्रुबल को **(उप)** उपमान करो, हे भृत्य जनो! **(यूयम्)** तुम लोग **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदा **(पात)** रक्षा करो॥११॥

भावार्थः-हे सेनापति! तुम जैसे अपने शरीर और बल को बढ़ाओ, वैसे ही समस्त योद्धाओं के शरीर-बल को बढ़ाओ। जैसे भृत्यजन तुम्हारी रक्षा करें, वैसे तुम भी इनकी निरन्तर रक्षा करो॥११॥

इस सूक्त में इन्द्र के दृष्टान्त से राजसभा, सेनापति, अध्यापक, अध्येता, राजा, प्रजा और भृत्यजनों के काम का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

इस अध्याय में अग्नि, वाणी, विद्वान्, राजा, प्रजा, अध्यापक, अध्येता, पृथिवी आदि, मेधावी, बिजुली, सूर्य, मेघ, यज्ञ, होता, यजमान, सेना और सेनापति के गुण कर्मों का वर्णन होने से इस अध्याय के अर्थ की इससे पूर्व अध्याय के अर्थ के साथ संगति जाननी चाहिये॥

यह ऋग्वेद के पञ्चम अष्टक में दूसरा अध्याय और तीसवां वर्ग, सातवां मण्डल और उन्नीसवां सूक्त पूरा हुआ॥

॥ओ३म्॥

अथ पञ्चमाष्टके तृतीयोऽध्यायः॥

ओ३म् विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव॥ ऋ०५.८२.५॥

अथ दशर्चस्य विंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १ स्वराट् पङ्क्तिः। ७ भुरिक् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४, १० निचृत्त्रिष्टुप्। ३, ५ विराट्त्रिष्टुप्। ६, ८, ९ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ कीदृशो राजा श्रेष्ठः स्यादित्याह॥

अब पञ्चमाष्टक के तीसरे अध्याय तथा दश ऋचा वाले बीसवें सूक्त का आरम्भ है, जिसके पहले मन्त्र में कैसा राजा श्रेष्ठ हो, इस विषय को कहते हैं॥

उग्रो जज्ञे वीर्याय स्वधावान् चक्रिरपो नर्यो यत्करिष्यन्।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित्॥ १॥

उग्रः। जज्ञे। वीर्याय। स्वधाऽवान्। चक्रिः। अपः। नर्यः। यत्। करिष्यन्। जग्मिः। युवा। नृऽसदनम्। अवःऽभिः। त्राता। नः। इन्द्रः। एनसः। महः। चित्॥ १॥

पदार्थः-(**उग्रः**) तेजस्वी (**जज्ञे**) जायते (**वीर्याय**) पराक्रमाय (**स्वधावान्**) बहुधनधान्ययुक्तः (**चक्रिः**) कर्ता (**अपः**) जलानि (**नर्यः**) नृषु साधुः (**यत्**) यः (**करिष्यन्**) (**जग्मिः**) गन्ता (**युवा**) प्राप्तयौवनः (**नृषदनम्**) नृणां स्थानम् (**अवोभिः**) रक्षादिभिः (**त्राता**) रक्षकः (**नः**) अस्मानस्माकं वा (**इन्द्रः**) सूर्य इव राजा (**एनसः**) पापाचरणात् (**महः**) महतः (**चित्**) इव॥ १॥

अन्वयः-यद्यो नर्यः स्वधावाञ्चकिरुग्रो युवा नृषदनं जग्मिरवोभिः पालनं करिष्यँस्त्राता सूर्योऽपश्चिदिवेन्द्रो वीर्याय जज्ञे मह एनसो नोऽस्मान् पृथग्रक्षति स एव राजा भवितुं योग्यः॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो मनुष्याणां हितकारी पितृवत्पालक उपदेशकवत्पापाचरणात् पृथक्कर्त्ता सभायां स्थित्वा न्यायकर्त्ता धनैश्वर्यपराक्रमांश्च सततं वर्धयति तमेव सर्वे मनुष्या राजानं मन्यन्ताम्॥ १॥

पदार्थः-(**यत्**) जो (**नर्यः**) मनुष्यों में साधु उत्तम जन (**स्वधावान्**) बहुत धनधान्य से युक्त (**चक्रिः**) करने वाला (**उग्रः**) तेजस्वी (**युवा**) जवान मनुष्य (**नृषदनम्**) मनुष्यों के स्थान को (**जग्मिः**) जाने वाला (**अवोभिः**) रक्षा आदि से पालना (**करिष्यन्**) करता हुआ (**त्राता**) रक्षा करने वाला सूर्य जैसे (**अपः**) जलों को (**चित्**) वैसे (**इन्द्रः**) राजा (**वीर्याय**) पराक्रम के लिये (**जज्ञे**) उत्पन्न हो और (**महः**) महान् (**एनसः**) पापाचरण से (**नः**) हम लोगों को अलग रखता है, वही राजा होने के योग्य हैं॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्यों का हितकारी पिता के समान पालने और उपदेश करने वाले के समान पापाचरण से अलग रखने वाला, सभा में स्थित होकर न्यायकर्ता तथा धन, ऐश्वर्य और पराक्रम को निरन्तर बढ़ाता है, उसी को सब मनुष्य राजा मानें॥१॥

पुनः स कीदृशो भवेदित्याह॥

फिर वह कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

हन्ता॑ वृ॒त्रमिन्द्रः॑ शूशु॑वान॒ः प्रावी॒न्नु वी॒रो ज॑रि॒तार॑मू॒तये॑।
कर्ता॑ सु॒दासे॒ अह॒ वा उ॑ लो॒कं दाता॒ वसु॒ मुहु॒रा दा॑शु॒षे॑ भूत्॥२॥

हन्ता॑। वृ॒त्रम्। इन्द्रः॑। शूशु॑वानः। प्र। आ॒वी॒त्। नु। वी॒रः। ज॒रि॒तार॑म्। ऊ॒तये॑। कर्ता॑। सु॒ऽदासे॑। अह॑। वै। ऊँ॒ इति॑। लो॒कम्। दाता॑। वसु॑। मुहुः॑। आ। दा॒शु॒षे॑। भूत्॥२॥

पदार्थः-(**हन्ता**) शत्रूणां घातकः (**वृत्रम्**) मेघमिव (**इन्द्रः**) सूर्य इव राजा (**शूशुवानः**) भृशं वर्धमानः (**प्र**) (**आवीत्**) प्रकर्षेण रक्षेत् (**नु**) शीघ्रम् (**वीरः**) शुभगुणकर्मस्वभावव्यापकः (**जरितारम्**) गुणानां प्रशंसकम् (**ऊती**) रक्षया (**कर्त्ता**) (**सुदासे**) सुष्ठु दात्रे (**अह**) विनिग्रहे (**वै**) निश्चये (**उ**) अद्भुते (**लोकम्**) दर्शनं द्रष्टव्यं जन्मान्तरे लोकान्तरं वा (**दाता**) (**वसु**) द्रव्यम् (**मुहुः**) वारंवारम् (**आ**) (**दाशुषे**) दानशीलाय (**भूत्**) भवेत्॥२॥

अन्वयः-हे मनुष्या! इन्द्रो वृत्रमिव यः शत्रूणमह नु हन्ता शूशुवानो वीरः कर्त्ता वसु दाता सुदासेऽहोती जरितारमु लोकं मुहुः प्रावीद्दाशुषे मुहुरा भूत् स वै राज्यकरणाय श्रेष्ठः स्यात्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य आशुकारी सूर्यवद्विद्याविनयप्रकाशेन दुष्टनिवारकः शूरवीरः सन् सुपात्रेभ्यो यथायोग्यं ददद् बहुसुखं प्राप्नुयात्॥२॥

पदार्थः-हे मनुष्यो! (**इन्द्रः**) सूर्य जैसे (**वृत्रम्**) मेघ को, वैसे जो शत्रुओं का (**अह**) निग्रह कर अर्थात् पकड़-पकड़ (**नु**) शीघ्र (**हन्ता**) घात करने वाला राजा (**शूशुवानः**) निरन्तर बढ़ते हुए (**वीरः**) शुभ गुण-कर्म-स्वभावों में व्याप्त (**कर्त्ता**) दृढ़ कार्य करने वाले और (**वसु, दाता**) धन के देने वाले (**सुदासे**) सुन्दर दानशील के लिये ही (**ऊती**) रक्षा से (**जरितारम्**) गुणों की प्रशंसा करने वाले (**उ**) अद्भुत (**लोकम्**) अन्य जन्म में देखने योग्य वा अन्य लोक को (**मुहुः**) वार-वार (**प्र, आवीत्**) उत्तम रक्षा करे (**दाशुषे**) दानशील के लिये वार-वार (**आ, भूत्**) प्रसिद्ध हो (**वै**) वही राज्य करने के लिये श्रेष्ठ हो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो शीघ्रकारी, सूर्य के समान विद्या और विनय के प्रकाश से दुष्टों का निवारण करने वाला शूरवीर होता हुआ अच्छे सुपात्रों के लिये यथायोग्य पदार्थ देता हुआ बहुत सुख को प्राप्त हो॥२॥

पुनः स कीदृशो भूत्वा किं कुर्यादित्याह॥

फिर वह कैसा होकर क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

यु॒ध्मो अ॑न॒र्वा ख॑ज॒कृत्स॒मद्वा॒ शूर॑ः सत्रा॒षाड् ज॒नुषे॒मषा॑ळ्हः।

व्यासु इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान॥ ३॥

युध्मः। अनर्वा। खजऽकृत्। समत्ऽवा। शूरः। सत्राषाट्। जनुषा। ईम्। अषाळ्हः। वि। आसे। इन्द्रः। पृतनाः। सुऽओजाः। अध। विश्वम्। शत्रुऽयन्तम्। जघान॥ ३॥

पदार्थः-(**युध्मः**) योद्धा (**अनर्वा**) अविद्यमाना अश्वा यस्य सः (**खजकृत्**) यः स्वजं स-ामं करोति सः। **खज इति स-ामनाम।** (निघं०२.१७) (**समद्वा**) यो मदेन सह वर्त्तमानान् वनति सम्भजति सः (**शूरः**) शत्रूणां हिंसकः (**सत्राषाट्**) यः सत्राणि बहून् यज्ञान् कर्त्तुं सहते (**जनुषा**) जन्मना (**ईम्**) सर्वतः (**अषाळ्हः**) यः शत्रुभिः सोढुमशक्यः (**वि**) (**आसे**) मुखे (**इन्द्रः**) विद्युदिव (**पृतनाः**) सेना मनुष्यान् वा (**स्वोजाः**) शोभनमोजः पराक्रमोऽन्नं वा यस्य सः (**अध**) अथ (**विश्वम्**) सर्वम् (**शत्रूयन्तम्**) शत्रून् कामयमानम् (**जघान**) हन्यात्॥ ३॥

अन्वयः-यो राजेन्द्रो जनुषा स्वोजा युध्मोऽनर्वाऽषाळ्हः खजकृत्समद्वा शूरः सत्राषाडषाळ्हः पृतनाः स्वसेनाः पालयेदध व्यासे विश्वं शत्रूयन्तमीं जघान स एव शत्रून् विजेतुं शक्नुयात्॥ ३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यो वरराजगुणसहितो दीर्घेण ब्रह्मचर्येण द्वितीयजन्मनः कर्ता पूर्णबलपराक्रमो धार्मिकः स्यात् स सूर्य्यवद्दुष्टाञ्छत्रूनन्यायान्धकारं निवारयेत्स एव सर्वेषामानन्दप्रदो भवेत्॥ ३॥

पदार्थः-जो राजा (**इन्द्रः**) बिजुली के समान (**जनुषा**) जन्म से (**स्वोजाः**) शुभ अन्न वा पराक्रम जिसके विद्यमान (**युध्मः**) जो युद्ध करने वाला (**अनर्वा**) जिसके घोड़े विद्यमान नहीं जो (**अषाळ्हः**) शत्रुओं से न सहने योग्य (**खजकृत्**) सङ्ग्राम करने वाला (**समद्वा**) जो मत्त प्रमत्त मनुष्यों को सेवता (**शूरः**) शत्रुओं को मारता (**सत्राषाट्**) जो यज्ञों के करने को सहता और (**पृतनाः**) अपनी सेनाओं को पाले (**अध**) इसके अनन्तर (**वि, आसे**) विशेषता से मुख के सम्मुख (**विश्वम्**) सब (**शत्रूयन्तम्**) शत्रुओं की कामना करने वाले को (**ईम्**) सब ओर से (**जघान**) मारे वही शत्रुओं को जीत सके॥ ३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! श्रेष्ठ राजगुणों सहित, दीर्घ ब्रह्मचर्य्य से द्वितीय जन्म अर्थात् विद्या जन्म का कर्त्ता, पूर्ण बल पराक्रमयुक्त, धार्मिक हो वह सूर्य के समान दुष्ट शत्रुओं को अन्यायरूपी अन्धकार को निवारे, वही सब का आनन्द देने वाला हो॥ ३॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः।
नि वज्रमिन्द्रो हरिवान् मिमिक्षन्त्समन्धसा मदेषु वा उवोच॥ ४॥

उभे इति। चित्। इन्द्र। रोदसी इति। महित्वा। आ। पप्राथ। तविषीभिः। तुविष्मः। नि। वज्रम्। इन्द्रः। हरिऽवान्। मिमिक्षन्। सम्। अन्धसा। मदेषु। वै। उवोच॥ ४॥

पदार्थः-(**उभे**) द्वे (**चित्**) इव (**इन्द्र**) सूर्यवद्राजन् (**रोदसी**) द्यावापृथिव्यौ (**महित्वा**) सत्कारं प्राप्य (**आ**) समन्तात् (**पप्राथ**) प्रति व्याप्नोति (**तविषीभिः**) बलिष्ठाभिः सेनाभिः (**तुविष्मः**) बहुबलयुक्तः (**नि**) (**वज्रम्**) शस्त्रास्त्रम् (**इन्द्रः**) वीरपुरुषराजा (**हरिवान्**) बहुमनुष्ययुक्तः (**मिमिक्षन्**) सुखैः सेक्तुमिच्छन् (**सम्**) (**अन्धसा**) अन्नादिना (**मदेषु**) आनन्देषु (**वै**) निश्चयेन (**उवोच**) उच्यात्॥४॥

अन्वयः-हे इन्द्र! त्वमुभे रोदसी चिदिव महित्वा तविषीभिरा पप्राथ तुविष्मः सन् हरिवानन्धसा सं नि मिमिक्षन् वज्रं धृत्वा य इन्द्रो मदेषूवोच स वै राज्यं कर्त्तुमर्हेत्॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा भूमिसूर्यौ महत्त्वेन सर्वानभि व्याप्य जलान्नाभ्यां सर्वानार्द्रीकृतं जगत्सुखयतस्तथैव राजा विद्याविनयाभ्यां सत्यमुपदिश्य सर्वाः प्रजाः सततमुन्नयेत्॥४॥

पदार्थः-हे (**इन्द्र**) सूर्य के समान वर्त्तमान राजा! आप (**उभे**) दो (**रोदसी**) आकाश और पृथिवी (**चित्**) के समान (**महित्वा**) सत्कार पाके (**तविषीभिः**) बलिष्ठ सेनाओं से (**आ, पप्राथ**) निरन्तर व्याप्त होता और (**तुविष्मः**) बहुत बलयुक्त होता हुआ (**हरिवान्**) बहुत मनुष्यों से युक्त (**अन्धसा**) अन्नादि पदार्थ से (**सम्, नि, मिमिक्षन्**) प्रसिद्ध सुखों से निरन्तर सीचने की इच्छा करता हुआ (**वज्रम्**) शस्त्र अस्त्रों को धारण कर जो (**इन्द्रः**) वीर पुरुष राजा (**मदेषु**) आनन्दों के निमित्त (**उवाच**) कहे (**वै**) वही राज्य करने को योग्य हो॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे भूमि और सूर्य बड़प्पन से सब को व्याप्त होकर जल और अन्न से सब को और गीले किये हुए जगत् को सुखी करते हैं, वैसे ही राजा विद्या और विनय से सत्य का उपदेश कर सब प्रजाजनों की निरन्तर उन्नति करे॥४॥

उत्पन्नो मनुष्यः कीदृशो भूत्वा शक्तिमाञ्जायत इत्याह॥

उत्पन्न हुआ मनुष्य कैसा होकर सामर्थ्यवान् होता है, इस विषय को अगले मन्त्र में कहते हैं॥

वृषा॑ जजान॒ वृष॑णं॒ रणा॑य॒ तमु॑ चि॒न्नारी॒ नर्यं॑ सुसूव।
प्र यः सेना॑नीरध॒ नृभ्यो॒ अस्ती॒नः सत्वा॑ गॄवेष॑णः स धृ॒ष्णुः॥५॥१॥

वृषा॑। ज॒जा॒न॒। वृष॑णम्। रणा॑य। तम्। ऊँ॒ इति॑। चि॒त्। नारी॑। नर्य॑म्। सु॒सू॒व॒। प्र। यः। सेना॑ऽनीः। अध॑। नृऽभ्यः॑। अस्ति॑। इ॒नः। सत्वा॑। गो॒ऽए॒ष॑णः। सः। धृ॒ष्णुः॥५॥

पदार्थः-(**वृषा**) वर्षकः (**जजान**) जनयेत् (**वृषणम्**) बलिष्ठं योद्धारम् (**रणाय**) स-ामाय (**तम्**) (उ) (**चित्**) (**नारी**) नरस्य स्त्री (**नर्यम्**) नृषु बलिष्ठम् (**सुसूव**) जनयति (**प्र**) (**यः**) (**सेनानीः**) यः सेनां नयति सः (**अध**) अनन्तरम् (**नृभ्यः**) सेनानायकेभ्यः (**अस्ति**) (**इनः**) ईश्वर इव (**सत्वा**) बलवान् (**गवेषणः**) उत्तमवाग्विद्यान्वेषी (**सः**) (**धृष्णुः**) धृष्टः प्रगल्भः॥५॥

अन्वयः-यो वृषा सेनानीः सत्वा गवेषणो नृभ्यो धृष्णुर्जजान स इन इव रणाय प्रताप्यस्ति अध यमु नर्यं वृषणं वृषा नारी च प्र सुसूव तं चिज्जना न्यायकारिणं मन्यन्ते॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यं स्त्रीपुरुषौ दीर्घं ब्रह्मचर्यं संसेव्य जनयतः स

पुरुषो जगदीश्वरवत्सर्वान् न्यायेन पालयितुं शक्तो भूत्वा सेनाऽधिपः शत्रून्विजेतुं सदा प्रभुर्भवति॥५॥

पदार्थः-(**यः**) जो (**वृषा**) वर्षा करने (**सेनानीः**) सेना को पहुँचाने (**सत्वा**) बलवान् (**गवेषणः**) और उत्तम वाणी विद्या का ढूंढने वाला (**नृभ्यः**) सेना नायकों से (**धृष्णुः**) धृष्ट प्रगल्भ (**जजान**) उत्पन्न हो (**सः**) वह (**इनः**) ईश्वर के समान (**रणाय**) संग्राम के लिये प्रतापी (**अस्ति**) है (**अध**) इसके अनन्तर जिस (**उ**) ही (**नर्यम्**) मनुष्यों में (**वृषणम्**) बलिष्ठ योद्धा पुत्र को वर्षा करने वाला पुरुष और (**नारी**) स्त्री (**प्र, सुसूव**) उत्पन्न करते हैं (**तम्, चित्**) उसी को जन न्यायकारी मानते हैं॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिसको स्त्रीपुरुष दीर्घ ब्रह्मचर्य्य का सेवन कर उत्पन्न करते हैं, वह पुरुष जगदीश्वरवत् सब को न्याय से पालने को समर्थ होकर सेनाधिप हुआ शत्रुओं के जीतने को सदा समर्थ होता है॥५॥

पुनर्मनुष्याः किं कृत्वा कीदृशा भवेयुरित्याह॥

फिर मनुष्य क्या करके कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

नू चित्स भ्रेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात्।
यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः॥६॥

नु। चित्। सः। भ्रेषते। जनः। न। रेषत्। मनः। यः। अस्य। घोरम्। आऽविवासात्। यज्ञैः। यः। इन्द्रे। दधते। दुवांसि। क्षयत्। सः। राये। ऋतऽपाः। ऋतेऽजाः॥६॥

पदार्थः-(**नू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**चित्**) अपि (**सः**) (**भ्रेषते**) प्राप्नोति (**जनः**) मनुष्यः (**न**) निषेधे (**रेषत्**) हिनस्ति (**मनः**) अन्तःकरणम् (**यः**) (**अस्य**) (**घोरम्**) (**आविवासात्**) समन्तात्सेवेत (**यज्ञैः**) सङ्गतैः कर्मभिः (**यः**) (**इन्द्रे**) परमैश्वर्ययुक्ते परमेश्वरे (**दधते**) धरति (**दुवांसि**) परिचरणानि सेवनानि (**क्षयत्**) निवसेत् (**सः**) (**राये**) धनाय (**ऋतपाः**) सः सत्यं पाति सः (**ऋतेजाः**) यः सत्ये जायते सः॥६॥

अन्वयः-यो जनोऽस्य घोरं मनो नाऽऽविवासात् स चिन्नु विजयं भ्रेषते स न रेषत्। य ऋतपा ऋतेजा यज्ञैरिन्द्रे दुवांसि दधते स राये सततं क्षयत्॥६॥

भावार्थः-ये रागद्वेषरहितमनसो घोरकर्मविरहाः परमेश्वरसेवका धर्मात्मानो जनाः स्युस्ते कदाचिद्धिंसिता न स्युः॥६॥

पदार्थः- (**यः**) जो (**जनः**) मनुष्य (**अस्य**) इसके (**घोरम्**) घोर (**मनः**) अन्तःकरण को (**न**) **[**नहीं**]** (**आविवासात्**) सेवे (**सः, चित्**) वही (**नु**) शीघ्र विजय को (**भ्रेषते**) पाता और वह नहीं (**रेषत्**) हिंसा करता है (**यः**) जो (**ऋतपाः**) जो सत्य की पालना करने और (**ऋतेजाः**) सत्य में उत्पन्न अर्थात् प्रसिद्ध होने वाला (**यज्ञैः**) मिले हुए कर्मों से (**इन्द्रे**) परमैश्वर्ययुक्त परमेश्वर में (**दुवांसि**) सेवनों को (**दधते**) धारण करता (**सः**) वह (**राये**) धन के लिये निरन्तर (**क्षयत्**) वसे॥५॥

भावार्थः-जो रागद्वेषरहित मन वाले, घोरकर्मरहित, परमेश्वर के सेवक, धर्मात्मा जन हों वे

कभी नष्ट न हों॥६॥

पुनर्विद्वांसोऽन्यान् प्रति कथमुपकारिणो भवेयुरित्याह॥

फिर विद्वान् अन्य जनों के प्रति कैसे उपकारी हों, इस विषय को अगले मन्त्र में कहते हैं॥

यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान् कनीयसो देष्णम्।
अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः॥७॥

यत्। इन्द्र। पूर्वः। अपराय। शिक्षन्। अयत्। ज्यायान्। कनीयसः। देष्णम्। अमृतः। इत्। परि। आसीत। दूरम्। आ। चित्र। चित्र्यम्। भर। रयिम्। नः॥७॥

पदार्थः-(**यत्**) यः (**इन्द्र**) परमैश्वर्यप्रद (**पूर्वः**) (**अपराय**) अन्यस्मै (**शिक्षन्**) विद्याग्रहणं कारयन् (**अयत्**) प्राप्नोति (**ज्यायान्**) अतिशयेन ज्येष्ठः (**कनीयसः**) अतिशयेन कनिष्ठात् (**देष्णम्**) दातुं योग्यम् (**अमृतः**) नाशरहितः (**इत्**) एव (**परि**) सर्वतः (**आसीत**) (**दूरम्**) (**आ**) (**चित्र**) अद्भुतकर्मकारिन् (**चित्र्यम्**) चित्रेष्वद्भुतेषु भवम् (**भर**) धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**रयिम्**) धनम् (**नः**) अस्मभ्यम्॥७॥

अन्वयः-हे इन्द्र! यद्यः पूर्वोऽपराय ज्यायान् कनीयसो देष्णं शिक्षन्नयत्। हे चित्र! योऽमृत इत् आत्मना नित्यो योगी दूरं पर्यासीत तेन सहितस्त्वं नश्चित्र्यं रयिमा भर॥७॥

भावार्थः-हे राजन्! ये पूर्वं विद्वांसो भूत्वा विद्यार्थिनः शिक्षयन्ति ये ज्येष्ठा कनिष्ठान्प्रति पितृवद्वर्त्तन्ते ये च योगिनः परमात्मानं समाधिनाऽऽत्मनि संस्थाप्य साक्षात्कृत्याऽन्यानुपदिशन्ति तदर्थं त्वं शरीरं मनो धनं च धर॥७॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्य के देने वाले (**यत्**) जो (**पूर्वः**) प्रथम (**अपराय**) और के लिये (**ज्यायान्**) अतीव वृद्ध वा श्रेष्ठ जन (**कनीयसः**) अत्यन्त कनिष्ठ से (**देष्णम्**) देने योग्य की (**शिक्षन्**) शिक्षा अर्थात् विद्या ग्रहण कराता हुआ (**अयत्**) प्राप्त होता वा हे (**चित्र**) अद्भुत कर्म करने वाले! जो (**अमृतः, इत्**) नाशरहित ही आत्मा से नित्य योगी (**दूरम्**) दूर (**पर्यासीत**) सब ओर से स्थित हो उसके साथ आप (**नः**) हम लोगों के लिये (**चित्र्यम्**) अद्भुत-अद्भुत कर्मों में हुए (**रयिम्**) धन को (**आ, भर**) अच्छे प्रकार धारण कीजिये॥७॥

भावार्थः-हे राजा! जो पहिले विद्वान् होकर विद्यार्थियों को शिक्षा देते हैं वा जो ज्येष्ठ कनिष्ठों के प्रति पिता के समान वर्त्ताव रखते हैं वा जो योगी जन परमात्मा को समाधि से अपने आत्मा में अच्छे प्रकार आरोप के औरों को उपदेश देते हैं, उनके लिये तुम शरीर, मन और धन को धारण करो॥७॥

पुना राजभृत्यप्रजाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर राजा, भृत्य और प्रजाजन परस्पर कैसे वर्त्ताव करें, इस विषय को अगले मन्त्र में कहते हैं॥

यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते।

वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथेह अघ्नतो नृपीतौ॥८॥

यः। ते। इन्द्र। प्रियः। जनः। ददाशत्। असत्। निरेके। अद्रिऽवः। सखा। ते। वयम्। ते। अस्याम्। सुऽमतौ। चनिष्ठाः। स्याम। वरूथे। अघ्नतः। नृऽपीतौ॥८॥

पदार्थः-(**यः**) (**ते**) तव (**इन्द्र**) विद्वन् (**प्रियः**) यः पृणाति सः (**जनः**) मनुष्यः (**ददाशत्**) दाशेत् (**असत्**) भवेत् (**निरेके**) निःशङ्के व्यवहारे (**अद्रिवः**) अद्रयो मेघा विद्यन्ते यस्य सूर्यस्य तद्वद्वर्त्तमान (**सखा**) मित्रः (**ते**) तव (**वयम्**) (**ते**) तव (**अस्याम्**) (**सुमतौ**) शोभनायां सम्मतौ (**चनिष्ठाः**) नृभिर्या पीयते रक्ष्यते तस्याम् (**स्याम**) (**वरूथे**) गृहे (**अघ्नतः**) अहिंसकस्य (**नृपीतौ**) नृभिर्या पीयते रक्ष्यते तस्याम्॥८॥

अन्वयः-हे अद्रिव इन्द्र! यः प्रियो जनः सखा निरेकेऽसत्सुखं ददाशद्यस्य तेऽस्यां नृपीतौ सुमतौ वयं चनिष्ठाः स्यामाऽघ्नतस्ते तव वरूथे चनिष्ठाः स्याम तौ द्वौ माननीयौ वयं सत्कुर्याम॥८॥

भावार्थः-हे राजन्! यस्य नीतिज्ञस्य ते ये नीतिमन्तस्त एव प्रिया सन्तु भवाँश्च तेषामेव प्रियो भवेदेवं परस्परं सुहृदो भूत्वैकमत्यं विधाय सततमुन्नतिं त्वं विधेहि॥८॥

पदार्थः-हे (**अद्रिवः**) मेघों वाले सूर्य के समान वर्त्तमान (**इन्द्र**) विद्वान्! (**यः**) जो (**प्रियः**) प्रसन्न करने वाला (**जनः**) मनुष्य (**सखा**) मित्र (**निरेके**) निःशंक व्यवहार में (**असत्**) हो और सुख (**ददाशत्**) दे जिन (**ते**) आपके (**अस्याम्**) इस (**नृपीतौ**) मनुष्यों से जो रक्षा की जाती उसमें और (**सुमतौ**) अच्छी सम्मति में (**वयम्**) हम लोग (**चनिष्ठाः**) अत्यन्त अन्नादि ऐश्वर्ययुक्त (**स्याम**) हों और (**अघ्नतः**) अहिंसक जो (**ते**) तुम उनके (**वरूथे**) घर में प्रसिद्ध हों उन मान करने योग्य दो को हम सत्कार युक्त करें॥८॥

भावार्थः-हे राजन्! जिस नीतिज्ञ आपके जो नीतिमान् जन हैं वे ही प्रिय हों और आप भी उन्हीं के प्रिय हूजिये, ऐसे परस्पर सुहृद् होकर एक सम्मति कर निरन्तर आप उन्नति कीजिये॥८॥

पुनर्मनुष्याः किं कृत्वा किं प्राप्नुयुरित्याह॥

फिर मनुष्य क्या करके किसको प्राप्त हों, इस विषय को अगले मन्त्र में कहते हैं॥

एष स्तोमो अचिक्रदद् वृषा त उत स्तामुर्मघवन्नक्रपिष्ट।
रायस्कामो जरितारं त आगन् त्वमङ्ग शक्र वस्व आ शको नः॥९॥

एषः। स्तोमः। अचिक्रदत्। वृषा। ते। उत। स्तामुः। मघऽवन्। अक्रऽपिष्ट। रायः। कामः। जरितारम्। ते। आ। अगन्। त्वम्। अङ्ग। शक्र। वस्वः। आ। शक्रः। नः॥९॥

पदार्थः-(**एषः**) (**स्तोमः**) प्रशंसनीयः (**अचिक्रदत्**) आह्वयेत् (**वृषा**) बलिष्ठः (**ते**) तव (**उत**) (**स्तामुः**) स्तावकः (**मघवन्**) बहुधनयुक्त (**अक्रपिष्ट**) कल्पते (**रायः**) श्रियः (**कामः**) कामनामभिलाषां कुर्व्वाणः (**जरितारम्**) स्तोतारम् (**ते**) तुभ्यम् (**आ**) (**अगन्**) समन्तात्प्राप्नोतु (**त्वम्**) (**अङ्ग**) सखे (**शक्र**) शक्तिमन् (**वस्वः**) धनानि (**आ**) (**शकः**) समन्ताच्छक्नुहि (**नः**) अस्मान्॥९॥

अन्वयः-हे शक्राऽङ्ग पुरुषार्थि राजन्! य एष ते स्तोम उत वृषाऽचिक्रदत्। हे मघवँस्तामुरक्रपिष्ट ते यो रायस्कामो जरितारं त्वामागन् स त्वं नो वस्व आ शकः॥९॥

भावार्थः-हे मनुष्या! यूयं यदि शक्तिं वर्धयित्वा धर्म्येण कर्मेणैश्वर्यादिप्राप्तेरभिलाषां वर्धयेयुस्तर्हि युष्मान् पुष्कलमैश्वर्यं प्राप्नुयात्॥९॥

पदार्थः-हे **(शक्र)** शक्तिमान् **(अङ्ग)** मित्र पुरुषार्थी राजन्! जो **(एषः)** यह **(ते)** आपका **(स्तोमः)** प्रशंसा करने योग्य **(उत)** और **(वृषा)** बलिष्ठ जन **(अचिक्रदत्)** बुलावे वा हे **(मघवन्)** बहुत धनयुक्त! **(स्तामुः)** स्तुति करने वाला जन **(अक्रपिष्ट)** समर्थ होता है वा **(ते)** तुम्हारे लिये जो **(रायः)** धन की **(कामः)** कामना करने वाला **(जरितारम्)** स्तुति करने वाले आपको **(आ, अगन्)** सब ओर से प्राप्त हो वह **(त्वम्)** आप **(नः)** हमारे **(वस्वः)** धनों को **(आ, शकः)** सब ओर से सह सको॥९॥

भावार्थः-हे मनुष्यो! तुम जो शक्ति को बढ़ा कर धर्म कर्म से ऐश्वर्य आदि की प्राप्ति की अभिलाषा बढ़ाओ तो तुमको पुष्कल ऐश्वर्य प्राप्त हो॥९॥

पुनर्मनुष्याः कथं प्रयतेरन्नित्याह॥

फिर मनुष्य कैसे प्रयत्न करें, इस विषय को अगले मन्त्र में कहते है॥

स नं इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥१०॥२॥

सः। नः। इन्द्रः। त्वऽयतायै। इषे। धाः। त्मना। च। ये। मघऽवानः। जुनन्ति। वस्वी। सु। ते। जरित्रे। अस्तु। शक्तिः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥१०॥

पदार्थः-**(सः)** **(नः)** अस्मान् **(इन्द्र)** परमैश्वर्ययुक्त राजन् **(त्वयतायै)** यया स्वस्मिन् यतते तस्यै **(इषे)** अन्नाद्यायै **(धाः)** धेहि **(त्मना)** आत्मना **(च)** **(ये)** **(मघवानः)** प्रशंसित धनाः **(जुनन्ति)** गच्छन्ति **(वस्वी)** धनसम्बन्धिनी **(सु)** **(ते)** तुभ्यम् **(जरित्रे)** सत्यप्रशंसकाय **(अस्तु)** **(शक्तिः)** सामर्थ्यम् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** सुखैः **(सदा)** **(नः)** अस्मान्॥१०॥

अन्वयः-हे इन्द्र! यसत्वं त्मना त्वयताया इषे नो धा ये च मघवान एतस्यै त्वां जुनन्ति स त्वमुद्योगी भव यतो जरित्रे ते वस्वी शक्तिरस्तु। हे अस्माकं सम्बन्धिनौ! यूयं स्वस्तिभिर्नः सदा सु पात॥१०॥

भावार्थः-त एव श्रीकरा जना भवन्ति य आलस्यं त्याजयित्वा पुरुषार्थेन सह योजयन्ति। ये ब्रह्मचर्यमाचरन्ति तेषामैश्वर्यप्रापकं सामर्थ्यं जायते येऽन्योऽन्यस्य रक्षं विदधति ते सदा सुखिनो भवन्तीति॥१०॥

अत्र राजसूर्य्ययोर्धृबलिष्ठसेनापतिसेवकाऽध्यापकाऽध्येतृमित्रदातृरचककृत्यगुणवर्णनादेतदर्थस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति विंशतितमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त राजा जो आप **(त्मना)** आत्मा से **(त्वयतायै)** जिससे अपने

में यत्न होता है उस **(इषे)** अन्न आदि सामग्री के लिये **(नः)** हम लोगों को **(धाः)** धारण कीजिये **(ये, च)** और जो **(मघवानः)** प्रशंसित धन वाले इस अन्नादि सामग्री के लिये आपको **(जुनन्ति)** प्राप्त होते हैं **(सः)** सो आप उद्योगी हूजिये जिससे **(जरित्रे)** सत्य की प्रशंसा करने वाले **(ते)** तेरे लिये **(वस्वी)** धनसम्बन्धिनी **(शक्तिः)** शक्ति **(अस्तु)** हो। हे हमारे सम्बन्धिजनो! **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों को **(सदा)** **(सु,पात)** अच्छे प्रकार रक्षा करो॥१०॥

भावार्थः-वे ही लक्ष्मी करने वाले जन हैं जो आलस्य का त्याग कराके पुरुषार्थ के साथ युक्त करते हैं वा जो ब्रह्मचर्य का आचरण करते हैं, उनको ऐश्वर्य की प्राप्ति कराने वाली सामर्थ्य होती है वा जो परस्पर की रक्षा करते हैं, वे सदा सुखी होते हैं॥१०॥

इस सूक्त में राजा, सूर्य, बलिष्ठ, सेनापति, सेवक, अध्यापक, अध्येता, मित्र, दाता और रचने वालों के कृत्य और गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह बीसवां सूक्त और दूसरा वर्ग समाप्त हुआ॥

अथ दशर्चस्यैकविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, ६, ८, ९ विराट् त्रिष्टुप्। २, १० निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ३, ७ भुरिक्पंक्तिः। ४, ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वान् किं कुर्य्यादित्याह॥

अब दश ऋचावाले इक्कीसवें सूक्त का आरम्भ है उसके प्रथम मन्त्र में विद्वान् क्या करे, इस विषय को कहते हैं॥

असा॑वि दे॒वं गोऋ॑जीकमन्धो॒ न्य॑स्मिन्निन्द्रो॑ जनु॒षेमु॑वोच।
बोधा॑मसि त्वा हर्यश्व यज्ञै॒र्बोधा॑ नः॒ स्तोम॒मन्ध॑सो॒ मदे॑षु॥ १॥

असा॑वि। दे॒वम्। गोऽऋ॑जीकम्। अन्धः॑। नि। अ॒स्मि॒न्। इन्द्रः॑। ज॒नु॒षा॑। ई॒म्। उ॒वो॒च॒। बोधा॑मसि। त्वा॒। हरि॑ऽअश्वः। य॒ज्ञैः॑। बोध॑। नः॒। स्तोम॑म्। अन्ध॑सः। मदे॑षु॥ १॥

पदार्थः-(**असावि**) सूयते (**देवम्**) दातारम् (**गोऋजीकम्**) गोर्भूमेर्ऋजुत्वेन प्रापकम् (**अन्धः**) अन्नम् (**नि**) (**अस्मिन्**) व्यवहारे (**इन्द्रः**) विद्यैश्वर्यः (**जनुषा**) जन्मना (**ईम्**) (**उवोच**) उच्यात् (**बोधामसि**) बोधयेम (**त्वा**) त्वाम् (**हर्यश्व**) कमनीयाश्व (**यज्ञैः**) विद्वत्सङ्गादिभिः (**बोध**) बोधय। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्मान् (**स्तोमम्**) प्रशंसाम् (**अन्धसः**) अन्नादेः (**मदेषु**) आनन्देषु॥ १॥

अन्वयः-हे हर्यश्व! यदन्धोऽसावि तज्जनुषे गोऋजीकं देवमिन्द्र उवोच यस्मिँस्त्वा नि बोधामस्यस्मिँस्त्वमन्धसो मदेषु यज्ञैर्नो बोध स्तोमं प्रापय॥ १॥

भावार्थः-हे मनुष्याः! पृथिव्यादिभ्यो धान्यादिं प्राप्य विद्यां प्राप्नुयन्ति ये च विद्वत्सङ्गेन सकलविद्यारहस्यानि गृह्णन्ति ते कदाचिद् दुःखिनो न जायन्ते॥ १॥

पदार्थः-हे (**हर्यश्व**) मनोहर घोड़ों वाले! जो (**अन्धः**) अन्न (**असावि**) उत्पन्न होता उसकी तथा (**जनुषा**) जन्म से अर्थात् उत्पन्न होते समय से (**ईम्**) ही (**गोऋजीकम्**) भूमि के कोमलता से प्राप्त कराने और (**देवम्**) देने वाले को (**इन्द्रः**) विद्या और ऐश्वर्ययुक्त जन (**उवोच**) कहे वा जिसके निमित्त (**त्वा**) आप को (**नि, बोधामसि**) निरन्तर बोधित करें (**अस्मिन्**) इस व्यवहार में आप (**अन्धसः**) अन्न आदि पदार्थ के (**मदेषु**) आनन्दों में (**यज्ञैः**) विद्वानों के संग आदि से (**नः**) हम लोगों को (**बोध**) बोध देओ और (**स्तोमम्**) प्रशंसा की प्राप्ति कराओ॥ १॥

भावार्थः-जो मनुष्य पृथिवी आदि से धान्य आदि को प्राप्त होकर विद्या को प्राप्त होते हैं और जो विद्वानों के संग से समस्त विद्या के रहस्यों को ग्रहण करते हैं, वे कभी दुःखी नहीं होते हैं॥ १॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

प्र यं॑न्ति य॒ज्ञं वि॒पय॑न्ति ब॒र्हिः सो॑म॒मादो॑ वि॒दथे॑ दु॒ध्रवा॑चः।
न्यु॑ ध्रियन्ते य॒शसो॑ गृभा॒दा दू॒रउ॑पब्दो॒ वृष॑णो नृ॒षाच॑ः॥ २॥

प्र। यन्ति। यज्ञम्। विपर्यन्ति। बर्हिः। सोमऽमादः। विदथे। दुध्रऽवाचः। नि। ऊँ इति। ध्रियन्ते। यशसः। गृभात्। आ। दूरेऽउपब्दः। वृषणः। नृऽसाचः॥ २॥

पदार्थः-(**प्र**) (**यन्ति**) प्राप्नुवन्ति (**यज्ञम्**) विद्वत्सङ्गादिकम् (**विपयन्ति**) विशेषेण गच्छन्ति (**बर्हिः**) अन्तरिक्षे (**सोममादः**) ये सोमेन मदन्ति हर्षन्ति ते (**विदथे**) स-ामे (**दुध्रवाचः**) दुर्धरा वाग्येषान्ते (**नि**) (उ) (**ध्रियन्ते**) ध्रियन्ते (**यशसः**) कीर्तेः (**गृभात्**) गृहात् (**आ**) (**दूरउपब्दः**) दूर उपब्दिर्वाग्येषान्ते। **उपब्दिरिति वाङ्नाम।** (निघं०१.११) (**वृषणः**) बलिष्ठाः (**नृषाचः**) ये नृभिर्नायकैस्सह। सम्बध्नन्ति ते॥ २॥

अन्वयः-ये सोममादो दुध्रवाचो वृषणो नृषचो यज्ञं प्र यन्ति विदथे बर्हिर्विपयन्त्यु ये यशसो गृभादा ध्रियन्ते दूरउपब्दो नि ध्रियन्ते ते विजयमाप्नुवन्ति॥ २॥

भावार्थः-यथा यज्ञानुष्ठातार आनन्दमाप्नुवन्ति तथा युद्धकुशला विजयं लभन्ते यथा दूरकीर्तिर्विद्वान् भवति तथा यशोचितानि कर्माणि कृत्वा परोपकारिणो जना भवन्तु॥ २॥

पदार्थः-जो (**सोममादः**) सोम से हर्षित होते (**दुध्रवाचः**) वा जिनकी दुःख से धारण करने योग्य वाणी (**वृषणः**) वे बलिष्ठ (**नृषाचः**) नायक मनुष्यों से सम्बन्ध करने वाले जन (**यज्ञम्**) विद्वानों के संग आदि को (**प्र, यन्ति**) प्राप्त होते हैं (**विदथे**) संग्राम में (**बर्हिः**) अन्तरिक्ष में (**विपयन्ति**) विशेषता से जाते हैं (**उ**) और जो (**यशसः**) कीर्ति से वा (**गृभात्**) घर से (**आ, ध्रियन्ते**) अच्छे प्रकार उत्तमता को धारण करते हैं तथा (**दूरउपब्दः**) जिनकी दूर वाणी पहुँचती वे सज्जन (**नि**) निरन्तर उत्तमता को धारण करते हैं और वे विजय को प्राप्त होते हैं॥ २॥

भावार्थः-जैसे यज्ञ का अनुष्ठान करने वाले आनन्द को प्राप्त होते हैं, वैसे युद्ध में निपुण पुरुष विजय को प्राप्त होते हैं जैसे दूरदेशों में कीर्ति रखने वाले विद्वान् जन होता है, वैसे यश से संचय किये कर्मों को कर परोपकारी जन हों॥ २॥

पुनः स राजा किंवत्किं कुर्य्यादित्याह॥

फिर वह राजा किसके तुल्य क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

त्वमिन्द्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः।
त्वद्वावक्रे रथ्योऽ३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा॥ ३॥

त्वम्। इन्द्र। स्रवितवै। अपः। करिति कः। परिऽस्थिताः। अहिना। शूर। पूर्वीः। त्वत्। वावक्रे। रथ्यः। न। धेनाः। रेजन्ते। विश्वा। कृत्रिमाणि। भीषा॥ ३॥

पदार्थः-(**त्वम्**) (**इन्द्र**) सूर्य इव विद्वन् (**स्रवितवै**) स्रवितुम् (**अपः**) जलानि (**कः**) करोषि (**परिष्ठिताः**) परितः सर्वतः स्थिताः (**अहिना**) मेघेन (**शूर**) (**पूर्वीः**) पूर्वे स्थिताः (**त्वत्**) (**वावक्रे**) वक्रा गच्छन्ति (**रथ्यः**) रथाय हितोऽश्वः (**न**) इव (**धेनाः**) प्रयुक्ता वाच इव (**रेजन्ते**) कम्पन्ते (**विश्वा**) सर्वाणि (**कृत्रिमाणि**) कृत्रिमाणि (**भीषा**) भयेन॥ ३॥

अन्वयः-हे शूरेन्द्र राजन्! यथा सूर्य्यः स्रवितवा अहिना सह पूर्वीः परिष्ठिता अपः करोति तथा त्वं

प्रजाः सन्मार्गे को यथा सूर्यादयो रथ्यो वावक्रे कृत्रिमाणि रेजन्ते तथा त्वद्भीषा प्रजा धेना न प्रवर्त्तन्ताम्॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यो राजा सूर्यवत्प्रजाः पालयति दुष्टान्भीषयति स एव व्याप्तसुखो भवति॥३॥

पदार्थः-हे **(शूर)** शूरवीर **(इन्द्रः)** सूर्य के समान विद्वान् राजा! जैसे सूर्य्य **(स्नवितवै)** वर्षा को **(अहिना)** मेघ के साथ **(पूर्वीः)** पहिले स्थिर हुए **(परिष्ठिताः)** वा सब ओर से स्थिर होने वाले **(अपः)** जलों को उत्पन्न करता है, वैसे **(त्वम्)** आप प्रजा जनों को सन्मार्ग में **(कः)** स्थिर करो जैसे सूर्य आदि और **(रथ्यः)** रथ के लिये हितकारी घोड़ा यह सब पदार्थ **(वावक्रे)** टेढ़े चलते हैं और **(विश्वा)** समस्त **(वि, कृत्रिमणि)** विशेषता से कृत्रिम किये कामों को **(रेजन्ते)** कंपित करते हैं, वैसे **(त्वत्)** तुम से **(भीषा)** उत्पन्न हुए भय से प्रजाजन **(धेनाः)** बोली हुई वाणियों के **(न)** समान प्रवृत्त हों॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो राजा सूर्य्य के समान प्रजाजनों की पालना करता है, दुष्टों को भय देता है, वही सुख से व्याप्त होता है॥३॥

पुनस्स सेनेशः किं कुर्यादित्याह॥

फिर वह सेनापति क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान्।
इन्द्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना जघान॥४॥

भीमः। विवेष। आयुधेभिः। एषाम्। अपांसि। विश्वा। नर्याणि। विद्वान्। इन्द्रः। पुरः। जर्हृषाणः। वि। दूधोत्। वि। वज्रऽहस्तः। महिना। जघान॥४॥

पदार्थः-(**भीमः**) भयङ्करः (**विवेष**) व्याप्नुयात् (**आयुधेभिः**) युद्धसाधनैः (**एषाम्**) (**अपांसि**) कर्माणि (**विश्वा**) सर्वाणि (**नर्याणि**) नृभ्यो हितानि (**विद्वान्**) (**इन्द्रः**) परमैश्वर्यवान् (**पुरः**) शत्रुपुराणि (**जर्हृषाणः**) भृशं हृषितः (**वि**) (**दूधोत्**) अकम्पयत् (**वि**) (**वज्रहस्तः**) शस्त्रास्त्रपाणिः (**महिना**) महिम्ना (**जघान**) हन्यात्॥४॥

अन्वयः-यो भीमो वज्रहस्तो जर्हृषाणो विद्वाननिन्द्र आयुधेभिर्महिनैषां शत्रूणां विश्वा नर्याण्यपांसि विवेष पुरो विदूधोच्छत्रून्विजघान स एव सेनापतित्वमर्हति॥४॥

भावार्थः-हे मनुष्या! ये युद्धकृत्यानि समग्राणि विज्ञाय स्वसैन्यानि युद्धकुशलानि कृत्वा शत्रूनभिकम्प्य शत्रूसेनाः कम्पयन्ति ते विजयेन भूषिता भवन्ति॥४॥

पदार्थः-जो **(भीमः)** भय करने वा **(वज्रहस्तः)** शस्त्र और अस्त्र हाथों में रखने वाला **(जर्हृषाणः)** निरन्तर आनन्दित **(विद्वान्)** विद्वान् **(इन्द्रः)** परमैश्वर्यवान् राजा **(आयुधेभिः)** युद्ध सिद्धि कराने वाले शस्त्रों से **(महिना)** बड़प्पन के साथ **(एषाम्)** इन शत्रुओं के **(विश्वा)** समस्त **(नर्याणि)** मनुष्यों के हित करने वाले **(अपांसि)** कर्मों को **(विवेष)** व्याप्त हो **(पुरः)** शत्रुओं की नगरियों को **(वि, दूधोत्)** कंपावे शत्रुओं को **(वि, जघान)** मारे, वही सेनापति होने योग्य होता है॥४॥

भावार्थः-हे मनुष्यो! जो युद्ध कार्यों को समग्र जान अपनी सेना को युद्ध में निपुण कर शत्रुओं को कंपा और शत्रुसेनाओं को कंपाते हैं, वे विजय से शोभित होते हैं॥४॥

अथ के तिरस्करणीयः सन्तीत्याह॥

अब कौन तिरस्कार करने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

न यातव॑ इन्द्र जूजुवुर्नो॒ न वन्दना॑ शविष्ठ वे॒द्याभिः॑।
स शर्धदु॒र्वो विषु॑णस्य॒ जन्तोर्मा शि॒श्नदे॑वा॒ अपि॑ गु॒र्ऋतं नः॑॥५॥३॥

न। या॒तव॑ः। इ॒न्द्र॒। जू॒जु॒वुः॒। नः॒। न। वन्द॑ना। श॒वि॒ष्ठ॒। वे॒द्याभिः॑। सः। शर्ध॑त्। अ॒र्यः। विषु॑णस्य। ज॒न्तोः॒। मा। शि॒श्नऽदे॑वाः। अपि॑। गुः॒। ऋ॒तम्। नः॒॥५॥

पदार्थः-(**न**) (**यातवः**) स-ामं ये यान्ति ते (**इन्द्र**) दुष्टशत्रुविदारक (**जूजुवुः**) सद्यो गच्छन्ति (**नः**) अस्मान् (**न**) निषेधे (**वन्दना**) वन्दनानि स्तुत्यानि कर्माणि (**शविष्ठ**) अतिशयेन बलयुक्त (**वेद्याभिः**) ज्ञातव्याभिर्नीतिभिः (**सः**) (**शर्धत्**) उत्सहेत् (**अर्यः**) स्वामी (**विषुणस्य**) शरीरे व्याप्तस्य (**जन्तोः**) जीवस्य (**मा**) (**शिश्नदेवाः**) अब्रह्मचर्या कामिनो ये शिश्नेन दीव्यन्ति क्रीडन्ति ते (**अपि**) (**गुः**) प्राप्नुयुः (**ऋतम्**) सत्यं धर्मम् (**नः**) अस्मान्॥५॥

अन्वयः-हे शविष्ठेन्द्र! यथा यातवो नो न जूजुवुर्ये शिश्नदेवास्त ऋतं मा गुरपि च नोऽस्मान्न प्राप्नुवन्तु ते च विषुणस्य जन्तोर्वेद्याभिर्वन्दना मा गुर्योऽर्यो विषुणस्य जन्तोः शर्धन्त्सोऽस्मान्प्राप्नोतु॥५॥

भावार्थः-हे मनुष्या! ये कामिनो लम्पटा स्युस्ते युष्माभिः कदापि न वन्दनीयास्तेऽस्मान् कदाचिन्माप्नुवन्त्विति मन्यध्वम्। ये च धर्मात्मानस्ते वन्दनीयाः सेवनीयाः सन्ति कामातुराणां धर्मज्ञानं सत्यविद्या च कदाचिन्न जायते॥५॥

पदार्थः-हे (**शविष्ठ**) अत्यन्त बलयुक्त (**इन्द्र**) दुष्ट शत्रुजनों के विदीर्ण करने वाले जन! जैसे (**यातवः**) संग्राम को जाने वाले (**नः**) हम लोगों को (**न**) न (**जूजुवुः**) प्राप्त होते हैं और जो (**शिश्नदेवाः**) शिश्न अर्थात् उपस्थ इन्द्रिय से विहार करने वाले ब्रह्मचर्य्यरहित कामी जन हैं वे (**ऋतम्**) सत्यधर्म को (**मा, गुः**) मत पहुँचे (**अपि**) और (**नः**) हम लोगों को (**न**) न प्राप्त हों वे ही (**विषुणस्य**) शरीर में व्याप्त (**जन्तोः**) जीव को (**वेद्याभिः**) जानने योग्य नीतियों से (**वन्दना**) स्तुति करने योग्य कर्मों को न पहुँचे और (**यः**) जो (**अर्यः**) स्वामी जन शरीर में व्याप्त जीव को (**शर्धत्**) उत्साहित करे (**सः**) वह हम को प्राप्त हो॥५॥

भावार्थः-हे मनुष्यो! जो कामी लंपट जन हों, वे तुम लोगों को कदापि वन्दना करने योग्य नहीं, वे हम लोगों को कमी न प्राप्त हों, इसको तुम लोग जानो और जो धर्मात्मा जन हैं, वे वन्दना करने तथा सेवा करने योग्य हैं, कामातुरों को धर्मज्ञान और सत्यविद्या कभी नहीं होती है॥५॥

अथ कीदृशाज्ञनाच्छत्रवो जेतुं न शक्नुयुरित्याह॥

अब कैसे जन से शत्रुजन नहीं जीत सकते, इस विषय को अगले मन्त्र में कहते हैं॥

अ॒भि क्रत्वे॑न्द्र भू॒रध॒ ज्मन्न ते॑ वि॒व्यङ् महि॒मान॒ रजां॑सि।

स्वेना॒ हि वृ॒त्रं शव॑सा ज॒घन्थ॒ न शत्रु॒रन्तं॑ विविदद्यु॒धा ते॑॥६॥

अ॒भि। क्रत्वा॑। इ॒न्द्र॒। भू॒:। अध॑। ज्मन्। न। ते॒। वि॒व्य॒क्। म॒हि॒मान॑म्। रजां॑सि। स्वेन॑। हि। वृ॒त्रम्। शव॑सा। ज॒घन्थ॑। न। शत्रु॑:। अन्त॑म्। वि॒वि॒द॒त्। यु॒धा। ते॒॥६॥

पदार्थ:-(**अभि**) आभिमुख्ये (**क्रत्वा**) प्रज्ञया सह (**इन्द्र**) परमैश्वर्ययुक्त (**भू:**) भव (**अध**) अथ (**ज्मन्**) पृथिव्याम्। **ज्मेति पृथिवीनाम।** (निघं०१.१) (**न**) निषेधे (**ते**) तव (**विव्यक्**) व्याप्नुयात् (**महिमानम्**) (**रजांसि**) ऐश्वर्याणि (**स्वेन**) स्वकीयेन। अत्र **संहितायामि**ति दीर्घ:। (**हि**) खलु (**वृत्रम्**) मेघमिव शत्रुम् (**शवसा**) बलेन (**जघन्थ**) हन्यात् (**न**) निषेधे (**शत्रु:**) (**अन्तम्**) (**विविदत्**) प्राप्नोति (**युधा**) स-ामेण (**ते**) तव॥६॥

अन्वय:-हे इन्द्र! त्वं क्रत्वा ज्मञ्छत्रूनभि भूरध ते महिमानं रजांसि शत्रुर्मा न विव्यक् स्वेन शवसा हि सूर्यो वृत्रमिव शत्रुं त्वं जघन्थैवं युधा शत्रुस्तेऽन्तं न विविदत्॥६॥

भावार्थ:-ये मनुष्या शरीरात्मबलं प्रत्यहं वर्धयन्ति तेषां शत्रवो दूरत: पलायन्ते शत्रून्विजेतुं स्वयं शक्नुयु:॥६॥

पदार्थ:-हे (**इन्द्र**) परमैश्वर्ययुक्त जन! आप (**क्रत्वा**) बुद्धि के साथ (**ज्मन्**) पृथिवी पर शत्रुओं के (**अभि, भू:**) सम्मुख हूजिये (**अध**) इसके अनन्तर (**ते**) आपके (**महिमानम्**) बड़प्पन को और (**रजांसि**) ऐश्वर्य्यों को (**शत्रु:**) शत्रुजन मुझे (**न**) न (**विव्यक्**) व्याप्त हों (**स्वेन**) अपने (**शवसा**) बल से (**हि**) ही सूर्य जैसे (**वृत्रम्**) मेघ को, वैसे शत्रु को आप (**जघन्थ**) मारो इस प्रकार से (**युधा**) संग्राम से शत्रुजन (**ते**) आपके (**अन्तम्**) अन्त अर्थात् नाश वा सिद्धान्त को (**न**) न (**विविदत्**) प्राप्त हो॥६॥

भावार्थ:-जो मनुष्य शरीर और आत्मा के बल को प्रतिदिन बढ़ाते हैं, उन के शत्रुजन दूर से भागते हैं, किन्तु वह आप शत्रुओं को जीत सकें॥६॥

पुन: स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

दे॒वाश्चि॑त्ते असु॒र्या॑य॒ पूर्वेऽनु॑ क्ष॒त्राय॑ ममिरे॒ सहां॑सि।
इन्द्रो॑ म॒घानि॑ दयते वि॒षह्येन्द्रं॒ वाज॑स्य जोहुवन्त सा॒तौ॥७॥

दे॒वा:। चि॒त्। ते॒। अ॒सु॒र्या॑य॒। पूर्वे॑। अनु॑। क्ष॒त्राय॑। म॒मि॒रे॒। सहां॑सि। इन्द्र:। म॒घानि॑। द॒य॒ते॒। वि॒ऽसह्य॑। इन्द्र॑म्। वाज॑स्य। जो॒हु॒व॒न्त॒। सा॒तौ॥७॥

पदार्थ:-(**देवा:**) विद्वांस: (**चित्**) अपि (**ते**) तव (**असुर्याय**) असुरे मेघे भवाय (**पूर्वे**) प्रथमतो विद्यां गृहीतवन्त: (**अनु**) (**क्षत्राय**) राज्याय धनाय वा (**ममिरे**) निर्मिमते (**सहांसि**) बलानि (**इन्द्र:**) सूर्य इव राजा (**मघानि**) पूजनीयानि धनानि (**दयते**) दयां करोति (**विषह्य**) विशेषेण सोढ्वा (**इन्द्रम्**) परमैश्वर्यम् (**वाजस्य**) प्राप्तस्य (**जोहुवन्त**) भृशमाददति (**सातौ**) संविभागे॥७॥

अन्वयः-हे विद्वन्! ये पूर्वे देवास्तेऽसुर्याय क्षत्राय सहांस्यनु ममिरे यश्चिदपीन्द्रो मघानि दयते ये वाजस्य साताविन्द्रं जोहुवन्त ताँस्त्वं सत्कुरु॥७॥

भावार्थः-ते एव विद्वांसो वरा भवन्ति ये सर्वेषु दयां विधाय सत्यशास्त्राण्युपदिश्य बलानि वर्धयन्ति त एव पितेव पूजनीया भवन्ति॥७॥

पदार्थः-हे विद्वान् जो **(पूर्वे)** पहिले विद्या ग्रहण किये हुए **(देवाः)** विद्वान् जन **(ते)** आप के **(असुर्याय)** मेघ में उत्पन्न हुए के लिये और **(क्षत्राय)** राज्य वा धन के लिये **(सहांसि)** बलों का **(अनु, ममिरे)** निरन्तर अनुमान करते जो **(चित्)** भी **(इन्द्रः)** सूर्य के समान राजा **(मघानि)** प्रशंसा करने योग्य धनों को **(दयते)** ग्रहण करता वा जो **(वाजस्य)** प्राप्त हुए व्यवहार के **(सातौ)** संविभाग में **(इन्द्रम्)** परमैश्वर्य्य को **(विषह्य)** विशेष सह करके परमैश्वर्य को **(जोहुवन्त)** निरन्तर ग्रहण करते हैं, उनका आप सत्कार करो॥७॥

भावार्थः-वे ही विद्वान् जन श्रेष्ठ होते हैं जो सबों में दया का विधान और सत्य शास्त्रों का उपदेश कर बलों को बढ़ाते हैं, वे ही पिता के समान सत्कार करने योग्य होते हैं॥७॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता॥८॥

कीरिः। चित्। हि। त्वाम्। अवसे। जुहाव। ईशानम्। इन्द्र। सौभगस्य। भूरेः। अवः। बभूथ। शतम्ऽऊते। अस्मे इति। अभिऽक्षत्तुः। त्वाऽवतः। वरूता॥८॥

पदार्थः-(**कीरिः**) सद्यः स्तोता। **कीरिरिति स्तोतृनाम**। (निघं०३.१६) **(चित्)** इव **(हि)** निश्चये **(त्वाम्)** **(अवसे)** **(जुहाव)** आह्वयेत् **(ईशानाम्)** समर्थम् **(इन्द्र)** परमैश्वर्यप्रद **(सौभगस्य)** सुभगस्यैश्वर्यस्य भावस्य **(भूरेः)** **(अवः)** रक्षणम् **(बभूथ)** भवति **(शतमूते)** असंख्यरक्षाकर्त्तः **(अस्मे)** अस्मान् **(अभिक्षत्तुः)** अभितः क्षयकर्त्तुहिंस्रस्य **(त्वावतः)** त्वया सदृशस्य **(वरूता)** स्वीकर्त्ता॥८॥

अन्वयः-हे शतमूत इन्द्र! यो हि कीरिश्चिदवसे **[**ईशानं त्वाम्**]** जुहाव तस्य भूरेः सौभगस्याऽवः कर्त्ता त्वं बभूथ। योऽस्मे त्वावतोऽभिक्षत्तुर्वरूता भवेत्तस्यापि रक्षको भव॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे राजञ्छूरवीर! ये पीडिता प्रजाजनास्त्वामाह्वयेयुस्तद्वचस्त्वं सद्यः शृणु सर्वेषां रक्षको भूत्वा दुष्टानां हिंस्रो भव॥८॥

पदार्थः-हे **(शतमूते)** सैकड़ों प्रकार की रक्षा करने वा **(इन्द्र)** परम ऐश्वर्य के देने वाले! जो **(हि)** ही **(कीरिः)** स्तुति करने वाले **(चित्)** के समान **(अवसे)** रक्षा के लिये **(ईशानम्)** समर्ते **(त्वाम्)** आपको **(जुहाव)** बुलावे उसके **(भूरेः)** बहुत **(सौभगस्य)** उत्तम भाग्य के होने की **(अवः)** रक्षा करने वाले आप **(बभूथ)** हूजिये। जो **(अस्मे)** हम लोगों को **(त्वावतः)** आपके सदृश **(अभिक्षत्तुः)** सब ओर से नाशकर्त्ता हिंसक के **(वरूता)** स्वीकार करने वाला हो, उसके भी रक्षक

हूजिये॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन् शूरवीर! जो पीड़ित प्रजाजन तुमको आह्वान दें उनके वचन को आप शीघ्र सुनें और सब की रक्षा करने वाले होकर दुष्टों की हिंसा करने वाले हूजिये॥८॥

पुनः कस्य मित्रता कार्येत्याह॥

फिर किसकी मित्रता करनी चाहिये, इस विषय को अगले मन्त्र में कहते है॥

सखायस्त इन्द्र विश्वह स्याम नमोवृधासो महिना तरुत्र।
वन्वन्तु स्मा तेऽवसा समीके३भीतिमर्यो वनुषां शवांसि॥९॥

सखायः। ते। इन्द्र। विश्वह। स्याम। नमःऽवृधासः। महिना। तरुत्र। वन्वन्तु। स्म। ते। अवसा। सम्ऽईके। अभिऽइतिम्। अर्यः। वनुषाम्। शवांसि॥९॥

पदार्थः-(**सखायः**) सुहृदः सन्तः (**ते**) तव (**इन्द्र**) राजन् (**विश्वह**) सर्वाणि दिनानि (**स्याम**) (**नमोवृधासः**) अन्नस्य वर्धका अन्नेन वृद्धा वा (**महिना**) महिम्ना (**तरुत्र**) दुःखात्तारक (**वन्वन्तु**) याचन्ताम् (**स्मा**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**ते**) तव (**अवसा**) रक्षणादिना (**समीके**) समीपे (**अभीतिम्**) अभयम् (**अर्यः**) स्वामी वैश्यः (**वनुषाम्**) याचकानाम् (**शवांसि**) बलानि॥९॥

अन्वयः-हे तरुतेन्द्र! नमोवृधासो वयं महिना विश्वह ते सखायः स्याम ये ते समीकेऽवसाऽभीतिं वनुषां शवांसि च वन्वन्तु स्मार्यस्त्वमेतदेषां दध्याः॥९॥

भावार्थः-ये धार्मिकस्य राज्ञो नित्यं सख्यमिच्छन्ति ते महिम्ना सत्क्रियन्ते ये प्रजाऽभ्योऽभयं ददति ते प्रत्यहं बलिष्ठा जायन्ते॥९॥

पदार्थः-हे (**तरुत्र**) दुःख से तारने वाले (**इन्द्र**) राजा! (**नमोवृधासः**) अन्न के बढ़ाने वा अन्न से बढ़े हुए हम लोग (**महिना**) बड़प्पन से (**विश्वह**) सब दिनों (**ते**) आपके (**सखायः**) मित्र (**स्याम**) हों जो (**ते**) आपके (**समीके**) समीप में (**अवसा**) रक्षा आदि से (**अभीतिम्**) अभय और (**वनुषाम्**) मंगता जनों के (**शवांसि**) बलों को (**वन्वन्तु, स्म**) हीं मांगे (**अर्यः**) वैश्यजन आप इनके इस पदार्थ को धारण करो॥३॥

भावार्थः-जो धार्मिक राजा से नित्य मित्रता करने की इच्छा करते हैं वे बड़प्पन से सत्कार पाते हैं, जो प्रजा को अभय देते हैं, वे प्रतिदिन बलिष्ठ होते हैं॥९॥

पुनः राजप्रजाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर राजा-प्रजाजन परस्पर कैसे वर्त्तें, इस विषय को अगले मन्त्र में कहते हैं॥

स न इन्द्र त्वयताया इषे धास्तमना च ये मघवानो जुनन्ति।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥१०॥४॥

सः। नः। इन्द्र। त्वऽयतायै। इषे। धाः। त्मना। च। ये। मघऽवानः। जुनन्ति। वस्वी। सु। ते। जरित्रे।

अस्तु। शक्तिः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ १०॥

पदार्थः-(**सः**) (**नः**) अस्मान् (**इन्द्र**) दुःखविदारक (**त्वयतायै**) त्वया प्रयत्नेन साधितायै (**इषे**) इच्छासिद्धयेऽन्नप्राप्तये वा (**धाः**) धेहि (**त्मना**) आत्मना (**च**) (**ये**) (**मघवानः**) नित्यं धनाढ्याः (**जुनन्ति**) प्रेरयन्ति (**वस्वी**) धनकारिणी (**सु**) (**ते**) तव (**जरित्रे**) स्तावकाय (**अस्तु**) (**शक्तिः**) सामर्थ्यम् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥ १०॥

अन्वयः-हे इन्द्र! स त्वं त्मना त्वयताया इषे नो धाः। ये च मघवानो जुनन्ति ताँश्चास्यै धाः। येन ते जरित्रे वस्वी शक्तिरस्तु। हे अमात्या! यूयं स्वस्तिभिर्नः सदा सु पात॥ १०॥

भावार्थः-हे राजँस्त्वं प्रयत्नेन सर्वान् पुरुषार्थयित्वा धनाढ्यान् सततं कुर्याः धनाढ्याँश्च सत्कर्मसु प्रेरय यतो भवतस्त्व भृत्यानां चाऽलौकिकी शक्तिः स्यादेते च भवन्तं सदा रक्षेयुरिति॥ १०॥

अत्र राजप्रजाविद्वद्दिन्द्रमित्रसत्यगुणयाच्ञादिगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकविंशतितमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) दुःख के विदीर्ण करने वाले! (**सः**) सो आप (**त्वयतायै**) आपने जो बड़े यत्न से सिद्ध की उस (**इषे**) इच्छा सिद्धि वा अन्न की प्राप्ति के लिये (**नः**) हम लोगों को (**धाः**) धारण कीजिये (**ये, च**) और जो (**मघवानः**) नित्य धनाढ्य जन (**जुनन्ति**) प्रेरणा देते हैं उनको भी उक्त इच्छासिद्धि वा अन्न की प्राप्ति के लिये धारण कीजिये जिससे (**ते**) आपकी (**जरित्रे**) स्तुति करने वाले के लिये (**वस्वी**) धन करने वाली (**शक्तिः**) सामर्थ्य (**अस्तु**) हो। हे मन्त्री जनो! (**यूयम्**) तुम लोग (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों को (**सदा**) सब कभी **[**=सदा**]** (**सु, पात**) अच्छे प्रकार रक्षा करो॥ १०॥

भावार्थः-हे राजा! आप प्रयत्न से सबको पुरुषार्थी कर निरन्तर धनाढ्य कीजिये और अच्छे कामों में प्रेरणा दीजिये जिससे आपकी भृत्यों की अलौकिक शक्ति हो और ये आपकी सर्वदा रक्षा करें॥ १०॥

इस सूक्त में राजा, प्रजा, विद्वान्, इन्द्र, मित्र, सत्य, गुण और याच्ञा आदि के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इक्कीसवां सूक्त और चौथा वर्ग पूरा हुआ॥

अथ नवर्चस्य द्वाविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १ भुरिगुष्णिक्छन्दः। ऋषभः स्वरः। २, ७ निचृदनुष्टुप्। ३ भुरिगनुष्टुप्। ५ अनुष्टुप्। ६, ८ विराडनुष्टुप् छन्दः। गान्धारः स्वरः। ४ आर्ची पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ९ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यः किं कृत्वा कीदृशो भवेदित्याह॥

अब नव ऋचा वाले बाईसवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में मनुष्य क्या करके कैसा हो, इस विषय को उपदेश करते हैं॥

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषावर्हर्यश्वाद्रिः।
सोतुर्बाहुभ्यां सुयतो नार्वा॥ १॥

पिब। सोमम्। इन्द्र। मन्दतु। त्वा। यम्। ते। सुसाव। हरिऽअश्व। अद्रिः। सोतुः। बाहुऽभ्याम्। सुऽयतः। न। अर्वा॥ १॥

पदार्थः-(**पिबा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**सोमम्**) महौषधिरसम् (**इन्द्र**) रोगविदारक वैद्य (**मन्दतु**) आनन्दयतु (**त्वा**) त्वाम् (**यम्**) (**ते**) तव (**सुषाव**) (**हर्यश्व**) कमनीयाश्व (**अद्रिः**) मेघः (**सोतुः**) अभिषवकर्त्तुः (**बाहुभ्याम्**) (**सुयतः**) सुन्वतो निष्पादयतः (**न**) (**अर्वा**) वाजी॥ १॥

अन्वयः-हे हर्यश्वेन्द्र! त्वमर्वा न सोमं पिब यमद्रिः सुषाव यः सोतुः सुयतस्ते बाहुभ्यां सुषाव स त्वा मन्दतु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे भिषजो! यूयं यथा वाजिनो तृणान्नजलादिकं संसेव्य पुष्टा भवन्ति तथैव सोमं पीत्वा बलवन्तो भवत॥ १॥

पदार्थः-हे (**हर्यश्व**) मनोहर घोड़े वाले (**इन्द्र**) रोग नष्टकर्त्ता वैद्यजन! आप (**अर्वा**) घोड़े के (**न**) समान (**सोमम्**) बड़ी ओषधियों के रस को (**पिब**) पीओ (**यम्**) जिसको (**अद्रिः**) मेघ (**सुषाव**) उत्पन्न करता है और जो (**सोतुः**) सार निकालने वा (**सुयतः**) सार निकालने की और सिद्धि करने वाले (**ते**) आपकी (**बाहुभ्याम्**) बाहुओं से कार्य सिद्धि करता है वह (**त्वा**) आपको (**मन्दतु**) आनन्दित करे॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे वैद्यो! तुम जैसे घोड़े तृण, अन्न और जलादिकों का अच्छे प्रकार सेवन कर पुष्ट होते हैं, वैसे ही बड़ी ओषधियों के रसों को पीकर बलवान् होओ॥ १॥

पुनः स राजा किंवत्किं कुर्यादित्याह॥

फिर वह राजा किसके तुल्य क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि।
स त्वामिन्द्र प्रभूवसो ममत्तु॥ २॥

यः। ते। मदः। युज्यः। चारुः। अस्ति। येन। वृत्राणि। हरिऽअश्व। हंसि। सः। त्वाम्। इन्द्र। प्रभुऽवसो इति प्रभुऽवसो। ममत्तु॥ २॥

पदार्थः-(**यः**) (**ते**) तव (**मद्रः**) आनन्दः (**युज्यः**) योक्तुमर्हः (**चारुः**) सुन्दरः (**अस्ति**) (**येन**) (**वृत्राणि**) मेघाङ्गानीव शत्रुसेनाङ्गानि (**हर्यश्व**) हरयो हरणशीलो अश्वा यस्य तत्सम्बुद्धौ (**हंसि**) विनाशयसि (**सः**) (**त्वाम्**) (**इन्द्र**) (**प्रभूवसो**) यः समर्थश्चासौ वासिता च तत्सम्बुद्धौ (**ममत्तु**) आनन्दयतु॥२॥

अन्वयः-हे प्रभूवसो हर्यश्वेन्द्र! यस्ते युज्यश्चारुर्मदोऽस्ति येन सूर्यो वृत्राणि शत्रुसेनाङ्गानि हंसि स त्वां ममत्तु॥२॥

भावार्थः-येन येनोपायेन दुष्टा बलहीना भवेयुस्तं तमुपायं राजाऽनुतिष्ठेत्॥२॥

पदार्थः-हे (**प्रभूवसो**) समर्थ और वसाने वाले (**हर्यश्व**) हरणशील घोड़ों से युक्त (**इन्द्र**) परमैश्वर्यवान् राजा! (**यः**) जो (**ते**) आप का (**युज्यः**) योग करने योग्य (**चारुः**) सुन्दर (**मदः**) आनन्द (**अस्ति**) है वा (**येन**) जिससे सूर्य (**वृत्राणि**) मेघ के अङ्गों को, वैसे शत्रुओं की सेना के अङ्गों का (**हंसि**) विनाश करते हो (**सः**) वह (**त्वाम्**) तुम्हें (**ममत्तु**) आनन्दित करे॥२॥

भावार्थः-जिस-जिस उपाय से दुष्ट बलहीन हों उस-उस उपाय का राजा अनुष्ठान करे अर्थात् आरम्भ करे॥२॥

पुनर्मनुष्येषु कथं वर्तेतेत्याह॥

फिर मनुष्यों में कैसे वर्ते, इस विषय को अगले मन्त्र में कहते हैं॥

बोधा॒ सु मे॑ मघव॒न् वाच॒मेमां यां ते॒ वसि॑ष्ठो॒ अर्च॑ति॒ प्रश॑स्तिम्।
इ॒मा ब्रह्म॑ सध॒मादे॑ जुषस्व॥३॥

बोध॑। सु। मे॒। म॒घ॒ऽव॒न्। वाच॑म्। आ। इ॒माम्। याम्। ते॒। वसि॑ष्ठः। अर्च॑ति। प्रऽश॑स्तिम्। इ॒मा। ब्रह्म॑। स॒ध॒ऽमादे॑। जु॒ष॒स्व॒॥३॥

पदार्थः-(**बोध**) जानीहि (**सु**) (**मे**) मम (**मघवन्**) प्रशंसितधनयुक्त (**वाचम्**) (**आ**) (**इमाम्**) (**याम्**) (**ते**) तव (**वसिष्ठः**) (**अर्चति**) (**प्रशस्तिम्**) प्रशंसितारम् (**इमा**) इमानि (**ब्रह्म**) धनान्यन्नानि वा (**सधमादे**) समानस्थाने (**जुषस्व**)॥३॥

अन्वयः-हे मघवन्विद्वँस्त्वं यान्ते प्रशस्तिं वसिष्ठ आर्चति तामिमां मे वाचं त्वं सु बोध सधमाद इमा ब्रह्म जुषस्व॥३॥

भावार्थः-स एव विद्वानुत्तमोऽस्ति यो यादृशीं प्रज्ञां शास्त्रविषयेषु प्रवीणां स्वार्थमिच्छेत्तामेवाऽन्यार्थामिच्छेत् यद्यदुत्तमं वस्तु स्वार्थं तत्परार्थे च जानीयात्॥३॥

पदार्थः-हे (**मघवन्**) प्रशंसित धन वाले विद्वान्! आप (**याम्**) जिस (**ते**) आपके विषय की (**प्रशस्तिम्**) प्रशंसित वाणी को (**वसिष्ठः**) अतीव वसनेवाला (**आ, अर्चति**) अच्छे प्रकार सत्कृत करता है (**इमाम्**) इस (**मे**) मेरी (**वाचम्**) वाणी को आप (**सु, बोध**) अच्छे प्रकार जानो उससे (**सधमादे**) एक से स्थान में (**इमा**) इन (**ब्रह्म**) धन वा अन्नों का (**जुषस्व**) सेवन करो॥३॥

भावार्थः-वही विद्वान् उत्तम है जो जिस प्रकार की उत्तम शास्त्र विषय में बुद्धि अपने लिये

चाहे उसी को औरों के लिये चाहे और जो-जो उत्तम अपने लिये पदार्थ हो, उसे पराये के लिये भी जाने॥३॥

पुनरध्यापकाऽध्येतारः परस्परं कथं वर्तेरन्नित्याह॥

फिर पढ़ने-पढ़ाने वाले परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम्।
कृष्वा दुवांस्यन्तमा सचेमा॥४॥

श्रुधि। हवम्। विऽपिपानस्य। अद्रेः। बोध। विप्रस्य। अर्चतः। मनीषाम्। कृष्व। दुवांसि। अन्तमा। सचा। इमा॥४॥

पदार्थः-(**श्रुधि**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**हवम्**) शब्दसमूहम् (**विपिपानस्य**) विविधानि पानानि यस्मात् तस्य (**अद्रेः**) मेघस्येव (**बोध**) विजानीहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**विप्रस्य**) मेधाविनः। (**अर्चतः**) सत्क्रियां कुर्वतः (**मनीषाम्**) प्रज्ञाम् (**कृष्व**) कुरुष्व। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**दुवांसि**) परिचरणानि (**अन्तमा**) समीपस्थानि (**सचा**) सम्बन्धेन (**इमा**) इमानि॥४॥

अन्वयः-हे परमविद्वँस्त्वं विपिपानस्याद्रेरिवार्चतो विप्रस्य हवं श्रुधि मनीषां बोधेमान्तमा दुवांसि सचा कृष्व॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे जिज्ञासवो! यूयं स्वकीयं पठितं परीक्षकाय विदुषे श्रावयन्तु तत्र ते यदुपदिशेयुस्तानि सततं सेवध्वम्॥४॥

पदार्थः-हे परम विद्वान्! आप (**विपिपानस्य**) विविध प्रकार के पीने जिस से बनें उस (**अद्रेः**) मेघ के समान (**अर्चतः**) सत्कार करते हुए (**विप्रस्य**) उत्तम बुद्धि वाले जन के (**हवम्**) शब्दसमूह को (**श्रुधि**) सुनो (**मनीषाम्**) उत्तम बुद्धि को (**बोध**) जानो और (**इमा**) इन (**अन्तमा**) समीपस्थ (**दुवांसि**) सेवनों को (**सचा**) सम्बन्ध करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे जिज्ञासु विद्यार्थी जनो! तुम अपना पढ़ा हुआ परीक्षा लेने वाले विद्वान् को सुनाओ, वहाँ वे जो उपदेश करें, उनका निरन्तर सेवन करो॥४॥

पुनः परीक्षकाः किं कुर्य्युरित्याह॥

फिर परीक्षक जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्।
सदा ते नाम स्वयशो विवक्मि॥५॥५॥

नः। ते। गिरः। अपि। मृष्ये। तुरस्य। नः। सुऽस्तुतिम्। असुर्यस्य। विद्वान्। सदा। ते। नाम। स्वऽयशः। विवक्मि॥५॥

पदार्थः-(**न**) (**ते**) तव (**गिरः**) वाचः (**अपि**) (**मृष्ये**) विचारये (**तुरस्य**) क्षिप्रं कुर्वतः (**न**)

(सुष्टुतिम्) शोभनां प्रशंसाम् **(असुर्यस्य)** असुरेषु मूर्खेषु भवस्य **(विद्वान्)** **(सदा)** **(ते)** **(नाम)** संज्ञाम् **(स्वयशः)** स्वकीयकीर्तिम् **(विवक्मि)** विवेकेन परीक्षयामि॥५॥

अन्वयः-हे विद्यार्थिन! अनभ्यस्तविद्यस्य ते तुरस्य गिरो विद्वानहं न मृष्येऽपि त्वसुर्यस्य सुष्टुतिं न मृष्ये ते तव नाम स्वयशश्च सदा विवक्मि॥५॥

भावार्थः-विद्वान् परीक्षायां यानलसान् प्रमादिनो निर्बुद्धीन् पश्येत्तान्न परीक्षयेन्नाप्यध्यापयेत्। ये चोद्यमिनः सुबुद्धयो विद्याभ्यासे तत्परा बोधयुक्ताः स्युस्तान् सु परीक्ष्य प्रोत्साहयेत्॥५॥

पदार्थः-हे विद्यार्थी! नहीं है विद्या में अभ्यास जिसको ऐसे **(ते)** तेरे **(तुरस्य)** शीघ्रता करने वाले की **(गिरः)** वाणियों को **(विद्वान्)** विद्वान् मैं **(न, मृष्ये)** नहीं विचारता **(अपि)** अपितु **(असुर्यस्य)** मूर्खों में प्रसिद्ध हुए जन की **(सुष्टुतिम्)** उत्तम प्रशंसा को **(न)** नहीं विचारता **(ते)** तेरे **(नाम)** नाम और **(स्वयशः)** अपनी कीर्त्ति की **(सदा)** सदा **(विवक्मि)** विवेक से परीक्षा करता हूँ॥५॥

भावार्थः-विद्वान् जन परीक्षा में जिनको आलसी, प्रमादी और निर्बुद्धि देखे, उनकी न परीक्षा करे और न पढ़ावे। और जो उद्यमी अर्थात् परिश्रमी उत्तम बुद्धि, विद्याभ्यास में तत्पर बोधयुक्त हों, उनकी उत्तम परीक्षा कर उन्हें अच्छा उत्साह दे॥५॥

पुनर्मनुष्यैः किमेष्टव्यमित्याह॥

फिर मनुष्यों को क्या इच्छा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

भूरि॑ हि ते॒ सव॑ना मानु॒षेषु॒ भूरि॑ मनी॒षी ह॑वते॒ त्वामित्।
मारे अ॒स्मन् म॑घव॒न् ज्योक् क॑॥६॥

भूरि॑। हि। ते॒। सव॑ना। मानु॑षेषु। भूरि॑। म॒नी॒षी। ह॒व॒ते॒। त्वाम्। इत्। मा। आ॒रे। अ॒स्मत्। म॒घ॒ऽव॒न्। ज्योक्। क॒रित॑। कः॥६॥

पदार्थः-(**भूरि**) बहूनि (**हि**) खलु (**ते**) तव (**सवना**) सवनानि यज्ञसाधककर्माण्यैश्वर्याणि कर्माणि प्रेरणानि वा (**मानुषेषु**) मनुष्येषु (**भूरि**) बहु (**मनीषी**) मेधावी (**हवते**) गृह्णाति स्तौति वा (**त्वाम्**) (**इत्**) एव (**मा**) (**आरे**) दूरे समीपे वा (**अस्मत्**) (**मघवन्**) बह्वैश्वर्ययुक्त (**ज्योक्**) निरन्तरम् (**कः**) कुर्याः॥६॥

अन्वयः-हे मघवन् बहुविद्यैश्वर्ययुक्त! यो मानुषेषु भूरि मनीषी ते सवना भूरि हवते ये हि त्वामित् स्तौति तं ह्यस्मदारे ज्योग्मा कः किन्तु सदाऽस्मत्समीपे रक्षेः॥६॥

भावार्थः-यो हि मनुष्याणां मध्य उत्तमो विद्वानाप्तः परीक्षको भवेत्तमन्यानध्यापकांश्च सततं प्रार्थयेयुर्भवद्भिरस्माकं निकटे यो धामिको विद्वान् भवेत् स एव निरन्तरं रक्षणीयो यश्च मिथ्या प्रियवादी न स्यात्॥६॥

पदार्थः-हे **(मघवन्)** बहुत विद्यारूपी ऐश्वर्य्ययुक्त! जो **(मानुषेषु)** मनुष्यों में **(भूरि)** बहुत **(मनीषी)** बुद्धिवाला जन **(ते)** आपके **(सवना)** यज्ञसिद्धि कराने वाले कर्मों वा प्रेरणाओं को **(भूरि)**

बहुत **(हवते)** ग्रहण करता तथा जो **(त्वाम्)** आप की **(इत्)** ही स्तुति प्रशंसा करता **(हि)** उसी को **(अस्मत्)** हम लोगों से **(आरे)** दूर **(ज्योक्)** निरन्तर **(मा, कः)** मत करो, किन्तु सदा हमारे समीप रक्खो॥६॥

भावार्थः-जो निश्चय से मनुष्यों के बीच उत्तम विद्वान् आप्त परीक्षा करने वाला हो उसको तथा अन्य अध्यापकों की निरन्तर प्रार्थना करो आप लोगों को हमारे निकट जो धार्मिक, विद्वान् हो, यही निरन्तर रखने योग्य है, जो मिथ्या प्यारी वाणी बोलने वाला न हो॥६॥

पुनस्सेनाऽधिष्ठातृभिः किं कर्त्तव्यमित्याह॥

फिर सेनापतियों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि।
त्वं नृभिर्हव्यो विश्वधासि॥७॥

तुभ्य। इत्। इमा। सवना। शूर। विश्वा। तुभ्यम्। ब्रह्माणि। वर्धना। कृणोमि। त्वम्। नृऽभिः। हव्यः। विश्वधा। असि॥७॥

पदार्थः-(**तुभ्य**) तुभ्यम् (**इत्**) एव (**इमा**) इमानि (**सवना**) ओषधिनिर्माणानि प्रेरणानि वा (**शूर**) निर्भयतया शत्रूणां हिंसक (**विश्वा**) सर्वाणि (**तुभ्यम्**) (**ब्रह्माणि**) धनान्यन्नानि वा (**वर्धना**) उन्नतिकराणि कर्माणि (**कृणोमि**) करोमि (**त्वम्**) (**नृभिः**) नायकैर्मनुष्यैः (**हव्यः**) स्तोतुमादातुमर्हः (**विश्वधा**) यो विश्वं दधाति सः। अत्र **छान्दसो वर्णलोपः** इति सलोपः। (**असि**)॥७॥

अन्वयः-हे शूर राजन् सेनेश वा! यो विश्वधास्त्वं नृभिर्हव्योऽसि तस्मात्तुभ्येदिमा सवना कृणोमि तुभ्यं विश्वा ब्रह्माणि वर्धना च कृणोमि॥७॥

भावार्थः-सेनाधिष्ठातारः सेनास्थान् योद्धॄन् भृत्यान् सुपरीक्ष्याऽधिकारेषु कार्येषु च नियोजयेयुस्तेषां यथावत्पालनं विधाय सुशिक्षया वर्धयेयुः॥७॥

पदार्थः-हे (**शूर**) निर्भयता से शत्रुजनों की हिंसा करने वाले राजा वा सेनापति! जो (**विश्वधा**) विश्व को धारण करने वाले (**त्वम्**) आप (**नृभिः**) नायक मनुष्यों से (**हव्यः**) स्तुति वा ग्रहण करने योग्य (**असि**) हैं इससे (**तुभ्य**) तुम्हारे लिये (**इत्**) ही (**इमा**) यह (**सवना**) ओषधियों के बनाने वा प्रेरणाओं को (**कृणोमि**) करता हूँ और (**तुभ्यम्**) तुम्हारे लिये (**विश्वा**) समस्त (**ब्रह्माणि**) धन वा अन्नों और (**वर्धना**) उन्नति करने वाले कर्मों को करता हूँ॥७॥

भावार्थः-सेनाधिष्ठाता जन सेनास्थ योद्धा भृत्यजनों की अच्छे प्रकार परीक्षा कर अधिकार और कार्य्यों में नियुक्त करें यथावत् उनकी पालना करके उत्तम शिक्षा से बढ़ावें॥७॥

पुनः स राजा कीदृशान् पुरुषान् रक्षेदित्याह॥

फिर वह राजा कैसे पुरुषों को रक्खे, इस विषय को अगले मन्त्र में कहते हैं॥

नू चिन्नु ते मन्यमानस्य दस्मोद्दंशनुवन्ति महिमानमुग्र।

न वीर्यमिन्द्र ते न राधः॥८॥

नु। चित्। नु। ते। मन्यमानस्य। दस्म। उत्। अश्नुवन्ति। महिमानम्। उग्र। न। वीर्यम्। इन्द्र। ते। न। राधः॥८॥

पदार्थः-(**नु**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**चित्**) अपि (**नु**) (**ते**) तव (**मन्यमानस्य**) (**दस्म**) दुःखोपक्षयितः (**उत्**) (**अश्नुवन्ति**) प्राप्नुवन्ति (**महिमानम्**) (**उग्र**) तेजस्विन् (**न**) निषेधे (**वीर्यम्**) पराक्रमम् (**इन्द्र**) परमैश्वर्ययुक्त राजन् (**ते**) तव (**न**) निषेधे (**राधः**) धनम्॥८॥

अन्वयः-हे दस्मोग्रेन्द्र! मन्यमानस्य ते महिमानं नु सज्जना उदश्नुवन्ति तेषु विद्यमानेषु सत्सु ते तव वीर्यं शत्रवो हिंसितुं न शक्नुवन्ति न चित् तत्र नु राधो ग्रहीतुं शक्नुवन्ति॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे राजन्! यदि भवान् सुपरीक्षितान् धार्मिकाञ्छूरान् विदुषस्सत्कृत्य सन्निकटे रक्षेत्तर्हि कोऽपि शत्रुर्भवन्तं पीडयितुं न शक्नुयात् सदा वीयैश्वर्येण वर्धेत॥८॥

पदार्थः-हे (**दस्म**) दुःख के विनाशने वाले (**उग्र**) तेजस्वी (**इन्द्र**) परमैश्वर्ययुक्त राजा! (**मन्यमानस्य**) माननीय के मानने वाले (**ते**) आपके (**महिमानम्**) बड़प्पन को (**नु**) शीघ्र सज्जन (**उत्, अश्नुवन्ति**) उन्नति पहुँचाते हैं उनके विद्यमान होते (**ते**) आपके (**वीर्यम्**) पराक्रम को शत्रुजन नष्ट (**न**) न कर सकते हैं (**चित्**) और (**न**) न वहाँ (**नु**) शीघ्र (**राधः**) धन ले सकते हैं॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे राजन्! आप अच्छी परीक्षा कर सुपरीक्षित, धार्मिक, शूर, विद्वान् जनों को अपने निकट रक्खें तो कोई भी शत्रुजन आपको पीड़ा न दे सके सदा वीर्य और ऐश्वर्य से बढ़ो॥८॥

राजादिभिः कैस्सह मैत्री विधेयेत्याह॥

राजादिकों को किनके साथ मैत्री विधान करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः।
अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः॥९॥६॥

ये। च। पूर्वे। ऋषयः। ये। च। नूत्नाः। इन्द्र। ब्रह्माणि। जनयन्त। विप्राः। अस्मे इति। ते। सन्तु। सख्या। शिवानि। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥९॥

पदार्थः-(**ये**) (**च**) (**पूर्वे**) अधीतवन्तः (**ऋषयः**) वेदार्थविदः (**ये**) (**च**) (**नूत्नाः**) अधीयते (**इन्द्र**) राजन् (**ब्रह्माणि**) धनान्यन्नानि वा (**जनयन्त**) जनयन्ति (**विप्राः**) मेधाविनः (**अस्मे**) अस्मभ्यमस्माकं वा (**ते**) तव (**सन्तु**) (**सख्या**) सख्युः कर्माणि (**शिवानि**) मङ्गलप्रदानि (**यूयम्**) (**पात**) (**स्वस्तिभिः**) सदा (**नः**)॥९॥

अन्वयः-हे इन्द्र! ये पूर्व ऋषयो धार्मिकाश्च ये नूत्ना धीमन्तश्च विप्रास्ते अस्मे च ब्रह्माणि जनयन्त तैस्सहाऽस्माकं तव च शिवानि सख्या सन्तु यथा यूयमस्मत्सखाय सन्तः स्वस्तिभिर्नः सदा पात तथा वयमपि युष्मान् स्वस्तिभिः सदा रक्षेम॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन् ये वेदार्थविदर्थविदो योगिन आप्ता उपदेशका अध्यापकाश्च ये धर्म्येण विद्याध्ययने रताः प्राज्ञाश्चास्मत्कल्याणेच्छुका भवेयुस्तैस्सहैव मैत्रीं कृत्वा धनधान्यानि वर्धयित्वैतैरेतान् सततं रक्ष रक्षिताश्च ते भवन्तं सदा रक्षयिष्यन्तीति॥९॥

अत्रेन्द्रराजशूरसेनेशाध्यापकाऽध्येतृपरीक्षकोपदेशककृत्यगुणवर्णनादेतदर्थस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वाविंशतितमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः- हे **(इन्द्र)** राजन् **(ये)** जो **(पूर्वे)** विद्या पढ़े हुए **(ऋषयः)** वेदार्थवेत्ता जन **(च)** और धार्मिक अन्य जन **(ये)** जो **(नूत्नाः)** नवीन पढ़ने वाले जन **(च)** और बुद्धिमान् अन्य जन **(विप्राः)** उत्तम बुद्धि वाले जन **(ते)** तुम्हारे और **(अस्मे)** हम लोगों के लिये **(ब्रह्माणि)** धन वा अन्नों को **(जनयन्त)** उत्पन्न करते हैं उनके साथ हमारे और आपके **(शिवानि)** मङ्गल देने वाले **(सख्या)** मित्र के कर्म **(सन्तु)** हों जैसे **(यूयम्)** तुम हमारे मित्र हुए **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सदा **(पात)** रक्षा करो, वैसे हम लोग भी तुम को सुखों से सदा पालें॥९॥

भावार्थः- इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजा! जो वेदार्थवेत्ता और अर्थ पदार्थों को जानने वाले योगी जन विद्याध्ययन में निरत बुद्धिमान् हमारे कल्याण की इच्छा करने वाले हों उनके साथ ऐसी मित्रता कर धनधान्यों को बढ़ा इनसे इनकी सदा रक्षा कर और रक्षा किये हुए वह जन आप की सदा रक्षा करेंगे॥९॥

इस सूक्त में इन्द्र, राजा, शूर, सेनापति, पढ़ाने, पढ़ने, परीक्षा करने और उपदेश देने वालों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बाईसवां सूक्त और छठा वर्ग पूरा हुआ॥

अथ षड्चस्य त्रयोविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, ६, भुरिक् पङ्क्तिः। ४ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ३ विराट् त्रिष्टुप्। ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ उपस्थित सङ्ग्रामे प्रबन्धकर्तारः किं किं कुर्य्युरित्याह॥

अब छः ऋचावालें तेईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में प्रबन्धकर्ता जन क्या क्या करें, इस विषय को कहते हैं॥

उदु ब्रह्माण्यरैत श्रवस्यैन्द्रं समर्ये महया वसिष्ठ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि॥ १॥

उत्। ऊँ इति। ब्रह्माणि। ऐरत। श्रवस्या। इन्द्रम्। सऽमर्ये। महय। वसिष्ठ। आ। यः। विश्वानि। शवसा। ततान। उपऽश्रोता। मे। ईवतः। वचांसि॥ १॥

पदार्थः-(**उत्**) (**उ**) (**ब्रह्माणि**) धनधान्यानि (**ऐरत**) प्रेरयन्ति (**श्रवस्या**) श्रवःस्वन्नेषु श्रवणेषु भवानि (**इन्द्रम्**) शूरवीरम् (**समर्ये**) स-ामे (**महया**) पूजय। अत्र **संहितायामि**ति दीर्घः। (**वसिष्ठ**) अतिशयेन वसो (**आ**) समन्तात् (**यः**) (**विश्वानि**) सर्वाणि (**शवसा**) बलेन (**ततान**) तनोति (**उपश्रोता**) य उपद्रष्टा सञ्छृणोति (**मे**) मम (**ईवतः**) सामीप्यं गच्छतः (**वचांसि**) वचनानि॥ १॥

अन्वयः-हे वसिष्ठ विद्वन् राजन्! यथा विद्वांसः श्रवस्या ब्रह्माण्युदैरत तथेन्द्रमु समर्ये महय। य उपश्रोता शवसेवतो मे विश्वानि वचांस्या ततान तमप्युपदेष्टारं समर्ये महय॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजन्! यदा सङ्ग्राम उपतिष्ठेत्तदा पुष्कलं धनं धान्यं शस्त्रादिकं सेनाङ्गानि चैतेषां रक्षकान् सुप्रबन्धकर्तॄन् भवान् प्रेरयतु तत्राप्तानुपदेष्टॄँश्च रक्षयत योद्धार उत्साहिताः सुरक्षिताः सन्तः क्षिप्रं विजयं कुर्य्युः॥ १॥

पदार्थः-हे (**वसिष्ठ**) अतीव बसने वाले विद्वान् राजा! जैसे विद्वान् जन (**श्रवस्या**) अन्न वा श्रवणों के बीच उत्पन्न हुए (**ब्रह्माणि**) धन-धान्यों को (**उत्, ऐरत**) प्रेरणा देते हैं, वैसे (**इन्द्रम्**) शूरवीरजन का (**उ**) तर्क वितर्क से (**समर्ये**) समर में (**महय**) सत्कार करो (**यः**) जो (**उपश्रोता**) ऊपर से देखने वाला अच्छे सुनता है वह (**शवसा**) बल से (**ईवतः**) समीप जाते हुए (**मे**) मेरे (**विश्वानि**) सब (**वचांसि**) वचनों को (**आ, ततान**) अच्छे प्रकार विस्तारता है, उस उपदेशक का भी समर में सत्कार करो॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन्! जब संग्राम उपस्थित हो तब बहुत धन अन्न शस्त्र अस्त्र सेनाओं के अङ्ग और इनकी रक्षा करने तथा अच्छे प्रबन्ध करने वालों को आप प्रेरणा देओ, आप्त और उपदेष्टा जनों को रक्खो, योद्धा जन उत्साहित और सुरक्षित हुए शीघ्र विजय करें॥ १॥

पुनः स राजाऽमात्याश्चाऽन्योऽन्यं कथं वर्त्तेरन्नित्याह॥

फिर वह राजा और मन्त्री जन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान्॥ २॥

अयामि। घोषः। इन्द्र। देवऽजामिः। इरज्यन्त। यत्। शुरुधः। विऽवाचि। नहि। स्वम्। आयुः। चिकिते। जनेषु। तानि। इत्। अंहांसि। अति। पर्षि। अस्मान्॥ २॥

पदार्थः-(**अयामि**) प्राप्नोति (**घोषः**) सुवक्तृत्वयुक्ता वाक्। **घोष इति वाङ्नाम।** (निघं०१.११) (**इन्द्र**) परमैश्वर्यप्रद (**देवजामिः**) यो देवैस्सह जमति सः (**इरज्यन्त**) प्राप्नुवन्तु (**यत्**) ये (**शुरुधः**) ये सद्यो रुन्धन्ति ते (**विवाचि**) विविधासु विद्यासु प्रवृत्ता वाक् तस्याम् (**नहि**) निषेधे (**स्वम्**) स्वकीयम् (**आयुः**) जीवनम् (**चिकिते**) जानाति (**जनेषु**) मनुष्येषु (**तानि**) (**इत्**) एव (**अंहांसि**) अधर्मयुक्तानि कर्माणि (**अति**) (**पर्षि**) पूरयसि (**अस्मान्**)॥ २॥

अन्वयः-हे इन्द्र यद्ये शुरुधो विवाचीरज्यन्त यैः सह देवजामिर्घोषः प्रवर्तेत यो जनेषु स्वमायुश्चिकिते तान्यंहांसि दूरेऽति पर्ष्यस्माँश्च सुरक्षति तमहमयामि एते सर्वे वयं पुरुषार्थेन कदाचित् पराजिता इन्नहि भवेम॥ २॥

भावार्थः-हे मनुष्या! यथा विद्वांसो धर्म्ये वर्त्तेरँस्तथा यूयमपि वर्त्तध्वम् ब्रह्मचर्यादिना स्वकीयमायुर्वर्धयत॥ २॥

पदार्थः-हे (**इन्द्र**) परम ऐश्वर्य के देने वाले! (**यत्**) जो (**शुरुधः**) शीघ्र रूंधने वाले (**विवाचि**) नाना प्रकार की विद्याओं में जो प्रवृत्त वाणी उसमें (**इरज्यन्त**) प्राप्त होते हैं वा जिनके साथ (**देवजामिः**) विद्वानों के संग रहने वाली (**घोषः**) अच्छी वक्तृता से युक्त वाणी प्रवृत्त हो वा जो (**जनेषु**) मनुष्यों में (**स्वम्**) अपनी (**आयुः**) उमर को (**चिकिते**) जानता है वा (**तानि**) उन (**अंहांसि**) अधर्मयुक्त कामों को दूर (**अति, पर्षि**) आप अति पार पहुँचाते वा (**अस्मान्**) हम लोगों की अच्छे प्रकार रक्षा करता है उसकी मैं (**अयामि**) रक्षा करता हूँ ये समस्त हम लोग पुरुषार्थ से पराजित (**इत्, नहि**) कभी न हों॥ २॥

भावार्थः-हे मनुष्यो! जैसे विद्वान् जन धर्मयुक्त व्यवहार में वर्तें, वैसे तुम भी वर्तो, ब्रह्मचर्य्य आदि से अपनी आयु को बढ़ाओ॥ २॥

पुनः किं कृत्वा वीराः सङ्ग्रामे गच्छेयुरित्याह॥

फिर क्या करके वीर संग्राम में जावें, इस विषय को अगले मन्त्र में कहते हैं॥

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान्॥ ३॥

युजे। रथम्। गोऽएषणम्। हरिऽभ्याम्। उप। ब्रह्माणि। जुजुषाणम्। अस्थुः। वि। बाधिष्ट। स्यः। रोदसी इति। महिऽत्वा। इन्द्रः। वृत्राणि। अप्रति। जघन्वान्॥ ३॥

पदार्थः-(**युजे**) युनज्मि (**रथम्**) प्रशस्तं यानम् (**गवेषणम्**) गां भूमिं प्रापकम् (**हरिभ्याम्**)

अश्वाभ्याम् **(उप)** धनधान्यानि **(जुजुषाणम्)** सेवमानम् **(अस्थुः)** तिष्ठन्तु **(वि)** **(बाधिष्ट)** बाधयन्तु **(स्यः)** सः **(रोदसी)** द्यावापृथिव्यौ **(महित्वा)** महिम्ना **(इन्द्रः)** सूर्यः **(वृत्राणि)** धनानि **(अप्रति)** अप्रत्यक्षेऽपि **(जघन्वान्)** हन्ता॥३॥

अन्वयः-हे सेनेश! यथेन्द्रो महित्वा रोदसी प्रकाशयति तथायं ब्रह्माणि जुजुषाणं रथं वीरा उपास्थुर्येन शूरवीराः शत्रून् विबाधिष्ट तमप्रति जघन्वान् स्योऽहं गवेषणं रथं हरिभ्यां युजे वृत्राणि प्राप्नुयाम्॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे शूरवीरा! यदा भवन्तो युद्धाय गच्छेयुस्तदा सर्वा सामग्रीमलंकृत्य यान्तु येन शत्रूणां बाधा सद्यः स्याद्विजयैश्वर्यं च प्राप्नुयात्॥३॥

पदार्थः-हे सेनेश! जैसे **(इन्द्रः)** सूर्य **(महित्वा)** अपने महान् परिमाण से **(रोदसी)** आकाश और पृथिवी को प्रकाशित करता है, वैसे जिस **(ब्रह्माणि)** धन धान्य पदार्थों को **(जुजुषाणाम्)** सेवते हुए **(रथम्)** प्रशंसनीय रथ को वीरजन **(उपास्थुः)** उपस्थित होते हैं जिससे शूरवीर जन शत्रुओं को **(वि, बाधिष्ट)** विविध प्रकार से विलोवें पीड़ा दें उसको **(अप्रति)** अप्रत्यक्ष अर्थात् पीछे भी **(जघन्वान्)** मारने वाला **(स्यः)** वह मैं **(गवेषणम्)** भूमि पर पहुँचाने वाले रथ को **(हरिभ्याम्)** हरणशील घोड़ों से **(युजे)** जोड़ता हूँ जिससे **(वृत्राणि)** धनों को प्राप्त होऊँ॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे शूरवीरो! जब आप लोग युद्ध के लिये जावें तब सामग्री को पूरी करके जावें, जिससे शत्रुओं को शीघ्र बाधा पीड़ा हो और विजय को भी प्राप्त हो॥३॥

पुनः सेनापतीशः कीदृशान् योद्धॄन् रक्षेदित्याह॥

फिर सेनापति का ईश वीर कैसे युद्ध करने वालों को रक्खे, इस विषय को अगले मन्त्र में कहते हैं॥

आपश्चित्पिप्युः स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इन्द्र।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान्॥४॥

आपः। चित्। पिप्युः। स्तर्यः। न। गावः। नक्षन्। ऋतम्। जरितारः। ते। इन्द्र। याहि। वायुः। न। निऽयुतः। नः। अच्छ। त्वम्। हि। धीभिः। दयसे। वि। वाजान्॥४॥

पदार्थः-(**आपः**) जलानि **(चित्)** इव **(पिप्युः)** वर्धयेयुः **(स्तर्यः)** आच्छादिताः **(न)** इव **(गावः)** किरणाः **(नक्षन्)** व्याप्नुवन्ति **(ऋतम्)** सत्यम् **(जरितारः)** स्तावकाः **(ते)** तव **(इन्द्र)** सर्वसेनेश **(याहि)** **(वायुः)** पवनः **(न)** इव **(नियुतः)** निश्चितान् **(नः)** अस्मान् **(अच्छ)** अत्र **संहितायामि**ति दीर्घः। **(त्वम्)** **(हि)** यतः **(धीभिः)** प्रज्ञाभिः **(दयसे)** कृपां करोषि **(वि)** **(वाजान्)** वेगवतः॥४॥

अन्वयः-हे इन्द्र! ये वीरा आपश्चिद्गमयन्तस्तर्यो गावो न पिप्युस्ते जरितार ऋतं नक्षंस्तैस्सह वायुर्न त्वं याहि हि त्वं धीभिर्नियुतो वाजान्नोऽच्छ विदयसे तस्माद्वयं तवाज्ञां नोल्लङ्घयामः॥४॥

भावार्थः-अत्रोपमालङ्कारः। हे सेनाध्यक्षेश! यदि भवान्सुपरीक्षिताञ्छूरवीरान् संरक्ष्य सुशिक्षाय

कृपयोन्नीय शत्रुभिस्सह योधयेत्तर्ह्येत सूर्यकिरणवत्तेजस्विनो भूत्वा वायुवत्सद्यो गत्वा शत्रूँस्तूर्ण विनाशयेयुः॥४॥

पदार्थः-हे **(इन्द्र)** सर्व सेनापति! जो वीरजन **(आपः)** जलों के **(चित्)** समान सेनाजनों को चलाते हुए **(स्तर्यः)** ढँपी हुई **(गावः)** किरणों के **(न)** समान **(पिप्युः)** बढ़ावें और **(ते)** आप की **(जरितारः)** स्तुति करने वाले जन **(ऋतम्)** सत्य को **(नक्षन्)** व्याप्त होते हैं उनके साथ **(वायुः)** पवन के **(न)** समान **(त्वम्)** आप **(याहि)** जाइये **(हि)** जिससे **(धीभिः)** उत्तम क्रियाओं से **(नियुतः)** निश्चित किये हुए **(वाजान्)** वेगवान् **(नः)** हम लोगों की **(अच्छ)** अच्छे प्रकार **(वि, दयसे)** विशेषता से दया करते हो, इससे हम लोग तुम्हारी आज्ञा को न उल्लंघन करें॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे सेनाध्यक्ष पति! यदि आप सुरक्षित शूरवीर जनों की अच्छे प्रकार रक्षा कर अच्छी शिक्षा देकर और कृपा से उन्नति कर शत्रुओं के साथ युद्ध करावें तो ये सूर्य की किरणों के समान तेजस्वी होकर पवन के समान शीघ्र जा शत्रुओं को शीघ्र विनाशें॥४॥

पुनस्ते सर्वसेनेशाः सर्वे सेनाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर वे सब सेनापति और सब सेनाजन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

ते त्वा॒ मदा॑ इन्द्र मादयन्तु शुष्मिणं॑ तुवि॒राध॑सं जरि॒त्रे।
एको॑ देव॒त्रा दय॑से॒ हि मर्ता॒॑न॒स्मिञ्छू॑र॒ सव॑ने मादयस्व॥५॥

ते। त्वा॒। मदा॑ः। इ॒न्द्र॒। मा॒द॒य॒न्तु॒। शु॒ष्मिण॑म्। तु॒वि॒ऽराध॑सम्। ज॒रि॒त्रे। एक॑ः। दे॒व॒ऽत्रा। दय॑से। हि। मर्ता॑न्। अ॒स्मिन्। शू॒र॒। सव॑ने। मा॒द॒य॒स्व॒॥५॥

पदार्थः-(**ते**) (**त्वा**) त्वाम् (**मदाः**) आनन्दयुक्ताः सुभटाः (**इन्द्र**) सर्वसेनास्वामिन् (**मादयन्तु**) हर्षयन्तु (**शुष्मिणम्**) बहुबलयुक्तम् (**तुविराधसम्**) बहुधनधान्यम् (**जरित्रे**) सत्यस्तावकाय (**एकः**) असहायः (**देवत्रा**) देवेषु विद्वत्सु (**दयसे**) (**हि**) यतः (**मर्त्तान्**) मनुष्यान् (**अस्मिन्**) वर्त्तमाने (**शूर**) निर्भय (**सवने**) युद्धाय प्रेरणे (**मादयस्व**) आनन्दयस्व॥५॥

अन्वयः-हे शूरेन्द्र! हि यतस्त्वमेको देवत्रा यस्मै जरित्रे येभ्यो भृत्येभ्यश्च दयसे ते मदाः सन्तः शुष्मिणं तुविराधसं त्वा मादयन्तु त्वमस्मिन् सवने तान् मर्तान् मादयस्व॥५॥

भावार्थः-हे सर्वसेनाऽधिकारिपते! त्वं सदा सर्वेषामुपरि पक्षपातं विहाय कृपां विदध्याः सर्वांश्च समभावेनानन्दय यतस्ते सुरक्षिताः सत्कृताः सन्तो दुष्टान्निवार्य श्रेष्ठान् रक्षित्वा राज्यं सततं वर्धयेयुः॥५॥

पदार्थः-हे **(शूर)** निर्भय **(इन्द्र)** सर्व सेना स्वामी! **(हि)** जिस कारण आप **(एकः)** अकेले **(देवत्रा)** विद्वानों में जिस **(जरित्रे)** सत्य की स्तुति करने वाले के लिये जिन भृत्य जनों से **(दयसे)** दया करते हो **(ते)** वे **(मदाः)** आनन्दयुक्त होते हुए अच्छे भट योद्धाजन **(शुष्मिणम्)** बलयुक्त **(तुविराधसम्)** बहुत धन-धान्य वाले **(त्वा)** आप को **(मादयन्तु)** हर्षित करें आप **(अस्मिन्)** इस वर्त्तमान **(सवने)** युद्ध के लिये प्रेरणा में उन **(मर्त्तान्)** मनुष्यों को **(मादयस्व)** आनन्दित करो॥५॥

भावार्थः-हे सर्व सेनाधिकारियों के पति! आप सर्वदैव सब पक्षपात को छोड़ कृपा करो और सब को समान भाव से आनन्दित करो जिससे वे अच्छी रक्षा और सत्कार पाये हुए दुष्टों का निवारण और श्रेष्ठों की रक्षा करके निरन्तर राज्य बढ़ावें॥५॥

पुनः सर्वसेनेशं सेनाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर सर्व सेनापति को सेनाजन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः।
स नः स्तुतो वीरवत्पातु गोमद्यूयं पात स्वस्तिभिः सदा नः॥६॥७॥

एव। इत्। इन्द्रम्। वृषणम्। वज्रऽबाहुम्। वसिष्ठासः। अभि। अर्चन्ति। अर्कैः। सः। नः। स्तुतः। वीरऽवत्। पातु। गोऽमत्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥६॥

पदार्थः-(**एव**) (**इत्**) अपि (**इन्द्रम्**) सर्वसेनाधिपतिम् (**वृषणम्**) सुखानां वर्षयितारम् (**वज्रबाहुम्**) शस्त्रास्त्रपाणिम् (**वसिष्ठासः**) अतिशयेन वासयितारः (**अभि**) (**अर्चन्ति**) सत्कुर्वन्ति (**अर्कैः**) सुविचारैः (**सः**) (**नः**) अस्मान् (**स्तुतः**) प्रशंसितः (**वीरवत्**) वीरा विद्यन्ते यस्मिँस्तत्सैन्यम् (**पातु**) (**गोमत्**) प्रशस्ता गौर्वाग् विद्यते यस्मिँस्तत् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**) अस्माकम्॥६॥

अन्वयः-ये वसिष्ठासोऽकैर्वृषणं वज्रबाहुमिन्द्रमभ्यर्चन्ति स एव स्तुतः सन्नः पातु। सर्वे यूयं स्वस्तिभिर्नो गोमद्वीरवदित्सैन्यं सदा पात॥६॥

भावार्थः-येषां योऽधिष्ठाता भवेत्तदाज्ञायां सर्वैर्यथावद्वर्तितव्यमधिष्ठाता च पक्षपातं विहाय सुविचार्याज्ञां प्रदद्यादेवं परस्परस्मिन् प्रीताः सन्तोऽन्योऽन्येषां रक्षणं विधाय राज्यधनयशांसि वर्धयित्वा सदा वर्धमाना भवन्त्विति॥६॥

अत्रेन्द्रसेनायोद्धृसर्वसेनेशकृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रयोविंशतितमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-जो (**वसिष्ठासः**) अतीव बसाने वाले जन (**अर्कैः**) उत्तम विचारों से (**वृषणम्**) सुखों की वर्षा करने और (**वज्रबाहुम्**) शस्त्र अस्त्रों को हाथों में रखने वाले (**इन्द्रम्**) सर्व सेनाधिपति का (**अभि, अर्चन्ति**) सत्कार करते हैं (**सः, एवः**) वही (**स्तुतः**) स्तुति को प्राप्त हुआ (**नः**) हम लोगों की (**पातु**) रक्षा करे। सब (**यूयम्**) तुम लोग (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों की तथा (**गोमत्**) प्रशंसित गौएं जिसमें विद्यमान वा (**वीरवत्**) वीरजन जिसमें विद्यमान वा (**इत्**) उस सेना

समूह की भी **(सदा) [**सदा**] (पात)** रक्षा करो॥६॥

भावार्थ:-जिनका जो अधिष्ठाता हो उसकी आज्ञा में सब को यथावत् वर्तना चाहिये। अधिष्ठाता भी पक्षपात को छोड़ अच्छे प्रकार विचार कर आज्ञा दे, ऐसे परस्पर की रक्षा कर राज्य, धन और यशों को बढ़ा सदा बढ़ते हुए होओ॥६॥

इस सूक्त में इन्द्र, सेना, योद्धा और सर्व सेनापतियों के कार्य्यों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह तेईसवां सूक्त और सातवां वर्ग समाप्त हुआ॥

अथ षड्चस्य चतुर्विंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, ३ निचृत्त्रिष्टुप्। २, ५ त्रिष्टुप्। ४ विराट् त्रिष्टुप्छन्दः। धैवतः स्वरः। ६ विराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैः किं कर्त्तव्यमित्याह॥

अब छः ऋचीवाले चौबसीवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को क्या करना चाहिये, इस विषय को कहते हैं॥

योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि।
असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः॥ १॥

योनिः। ते। इन्द्र। सदने। अकारि। तम्। आ। नृऽभिः। पुरुऽहूत। प्र। याहि। असः। यथा। नः। अविता। वृधे। च। ददः। वसूनि। ममदः। च। सोमैः॥ १॥

पदार्थः-(**योनिः**) गृहम् (**ते**) तव (**इन्द्र**) नरेश (**सदने**) उत्तमे स्थले (**अकारि**) क्रियते (**तम्**) (**आ**) (**नृभिः**) नायकैर्मनुष्यैः (**पुरुहूत**) बहुभिः स्तुत (**प्र**) (**याहि**) (**असः**) भवेः (**यथा**) (**नः**) अस्माकम् (**अविता**) रक्षकः (**वृधे**) वर्धनाय (**च**) (**ददः**) ददासि (**वसूनि**) द्रव्याणि (**ममदः**) आनन्द (**च**) आनन्दमय (**सोमैः**) ऐश्वर्योत्तमौषधिरसैः॥ १॥

अन्वयः-हे पुरुहूत इन्द्र राजंस्ते सदने यो योनिस्त्वयाऽकारि तं नृभिस्सह प्र याहि यथा नोऽविताऽसो नो वृधे च वसून्या ददः सोमैश्च ममदस्तथा सर्वेषां सुखाय भव॥ १॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैर्निवासस्थानमुत्तमजलस्थलवायुके देशे गृहं निर्माय तत्र निवसितव्यम्। सर्वैः सर्वेषां सुखवर्धनाय धनादिभिः संरक्षणं कृत्वाऽखिलैरानन्दितव्यम्॥ १॥

पदार्थः-(**पुरुहूत**) बहुतों से स्तुति पाये हुए (**इन्द्र**) मनुष्यों के स्वामी राजा! (**ते**) आपके (**सदने**) उत्तम स्थान में जो (**योनिः**) घर तुम से (**अकारि**) किया जाता है (**तम्**) उसको (**नृभिः**) नायक मनुष्यों के साथ (**प्र, याहि**) उत्तमता से जाओ (**यथा**) जैसे (**नः**) हमारी (**अविता**) रक्षा करने वाला (**असः**) होओ और हमारी (**वृधे**) वृद्धि के लिये (**च**) भी (**वसूनि**) द्रव्य वा उत्तम पदार्थों को (**आ, ददः**) ग्रहण करो (**सोमैः, च**) और ऐश्वर्य वा उत्तमोत्तम ओषधियों के रसों से (**ममदः**) हर्ष को प्राप्त होओ, वैसे सब के सुख के लिये होओ॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को चाहिये कि निवासस्थान उत्तम जल, स्थल और पवन जहाँ हो उस देश में घर बना कर वहाँ बसें, सब के सुखों के बढ़ाने के लिये धनादि पदार्थों से अच्छी रक्षा कर सबों को आनन्दित करें॥ १॥

पुनः स्त्रीपुरुषौ किं कृत्वा विवाहं कुर्यातामित्याह॥

फिर वे स्त्री-पुरुष क्या करके विवाह करें, इस विषय को अगले मन्त्र में कहते हैं॥

गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि।
विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा॥ २॥

गृभीतम् ते। मनः। इन्द्र। द्विऽबर्हाः। सुतः। सोमः। परिऽसिक्ता। मधूनि। विसृष्टऽधेना। भरते। सुऽवृक्तिः। इयम्। इन्द्रम्। जोहुवती। मनीषा॥ २॥

पदार्थः-(**गृभीतम्**) गृहीतम् (**ते**) तव (**मनः**) अन्तःकरणम् (**इन्द्र**) परमैश्वर्यप्रद (**द्विबर्हाः**) द्वाभ्यां विद्यापुरुषार्थाभ्यां यो वर्धते सः (**सुतः**) निष्पादितः (**सोमः**) ओषधिरसः (**परिषिक्ता**) सर्वतः सिक्तानि (**मधूनि**) क्षौद्रादीनि (**विसृष्टधेना**) विविधविद्यायुक्ता धेना वाग्यस्याः सा (**भरते**) धरति (**सुवृक्तिः**) शोभना वृक्तिः वर्त्तनं यस्याः सा (**इयम्**) (**इन्द्रम्**) परमैश्वर्यप्रदं पुरुषम् (**जोहुवती**) या भृशमाह्वयति (**मनीषा**) प्रिया॥ २॥

अन्वयः-हे इन्द्र! या विसृष्टधेना सुवृक्तिरियं मनीषेन्द्रं जोहुवती भरते यया ते मनो गृभीतं यो द्विबर्हाः सुतः सोमोऽस्ति यत्र परिषिक्तानि मधूनि सन्ति तं सेवस्व॥ २॥

भावार्थः-या स्त्री सुविचारेण स्वप्रियं पतिं प्राप्य गर्भं बिभर्ति सा पत्युश्चित्ताकार्षिका वशकारिणी भूत्वा वीरसुतं जनयित्वा सर्वदाऽऽनन्दति॥ २॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्य के देने वाले जो (**विसृष्टधेना**) नाना प्रकार की विद्यायुक्त वाणी और (**सुवृक्तिः**) सुन्दर चाल ढाल जिसकी ऐसी (**इयम्**) यह (**मनीषा**) प्रिया स्त्री (**इन्द्रम्**) परमैश्वर्य देने वाले पुरुष को (**जोहुवति**) निरन्तर बुलाती है उसको (**भरते**) धारण करती है जिसने (**ते**) तेरा (**मनः**) मन (**गृभीतम्**) ग्रहण किया तथा जो (**द्विबर्हाः**) दो से अर्थात् विद्या और पुरुषार्थ से बढ़ता वह (**सुतः**) उत्पन्न किया हुआ (**सोमः**) ओषधियों का रस है और जहाँ (**परिषिक्ता**) सब ओर से सींचे हुए (**मधूनि**) दाख वा सहत आदि पदार्थ हैं, उन्हें सेवो॥ २॥

भावार्थः-जो स्त्री सुविचार से अपने प्रिय पति को प्राप्त होके गर्भ को धारण करती है वह पति के चित्त को खींचने और वश **[**में**]** करने वाली होकर वीर सुत को उत्पन्न कर सर्वदा आनन्दित होती है॥ २॥

पुनर्मनुष्यैः किं वर्त्तयित्वा किं पेयमित्याह॥

फिर मनुष्यों को क्या वर्त्त कर क्या पीना चाहिये, इस विषय को अगले मन्त्र में कहते है॥

आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि।
वहन्तु त्वा हरयो मद्र्यञ्चमाङ्गूषमच्छा तवसं मदाय॥ ३॥

आ। नः। दिवः। आ। पृथिव्याः। ऋजीषिन्। इदम्। बर्हिः। सोमऽपेयाय। याहि। वहन्तु। त्वा। हरयः। मद्र्यञ्चम्। आङ्गूषम्। अच्छ। तवसम्। मदाय॥ ३॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्माकम् (**दिवः**) प्रकाशम् (**आ**) (**पृथिव्याः**) भूमेः (**ऋजीषिन्**) सरलस्वभाव (**इदम्**) वर्त्तमानम् (**बर्हिः**) उत्तमं स्थानमवकाशं वा (**सोमपेयाय**) उत्तमौषधिरसपानाय (**याहि**) आगच्छ (**वहन्तु**) प्रापयन्तु (**त्वा**) त्वाम् (**हरयः**) (**मद्र्यञ्चम्**) मामञ्चतम् (**आङ्गूषम्**) प्राप्नुवन्तम् (**अच्छा**) सम्यक्। अत्र **संहितायामि**ति दीर्घः। (**तवसम्**) बलम् (**मदाय**) आनन्दाय॥ ३॥

अन्वयः-हे ऋजीषिंस्त्वं सोमपेयाय दिवः पृथिव्याः न इदं बर्हिरायाहि मदाय मद्र्यञ्चमाङ्गूषं तवसं त्वा सोमपेयाय हरयोऽच्छा वहन्तु॥३॥

भावार्थः-त एवारोगाः शिष्टा धार्मिका चिरायुषः परोपकारिणो भवेयुर्ये मद्यबुद्ध्यादिप्रलम्पकं विहाय बलबुद्ध्यादिवर्धकं सोमादिमहौषधिरसं पातुं सज्जनैः सह स्वाप्तस्थानं **[**वा**]** गच्छेयुः॥३॥

पदार्थः-हे **(ऋजीषिन्)** सरल स्वभाव वाले आप **(सोमपेयाय)** उत्तम ओषधियों के रस के पीने के लिये **(दिवः)** प्रकाश और **(पृथिव्याः)** भूमि से **(नः)** हमारे **(इदम्)** इस वर्त्तमान **(बर्हिः)** उत्तम स्थान वा अवकाश को **(आ, याहि)** आओ **(मदाय)** आनन्द के लिये **(मद्र्यञ्चम्)** मेरा सत्कार करते **(आङ्गूषम्)** और प्राप्त होते हुए **(तवसम्)** बलवान् **(त्वाम्)** आपको उत्तम ओषधियों के रस पीने के लिये **(हरयः)** हरणशील **(अच्छ)** अच्छे **(आ, वहन्तु)** पहुँचावें॥३॥

भावार्थः-वे ही नीरोग, शिष्ट, धार्मिक, चिरायु और परोपकारी हों जो मद्यरूप और अच्छे प्रकार बुद्धि के नष्ट करने वाले पदार्थ को छोड़ बल, बुद्धि आदि को बढ़ाने वाले सोम आदि बड़ी ओषधियों के रस के पीने को अपने वा आप्त के स्थान को जावें॥३॥

पुनः क आप्ता भवन्तीत्याह॥

फिर कौन आप्त विद्वान् होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

आ नो॒ विश्वा॑भिरू॒तिभि॑: स॒जोषा॒ ब्रह्म॑ जुषा॒णो ह॑र्यश्व याहि।
वरी॑वृजत्स्थवि॒रेभि॑: सुशिप्रा॒स्मे दध॒द् वृष॑णं शुष्म॑मिन्द्र॥४॥

आ। नः। विश्वा॑भिः। ऊ॒तिऽभि॑:। स॒ऽजोषा॑:। ब्रह्म॑। जु॒षा॒णः। ह॒रि॒ऽअ॒श्व॒। या॒हि॒। वरी॑ऽवृजत्। स्थवि॒रेभिः। सु॒ऽशि॒प्र॒। अ॒स्मे॒ इति॑। दध॑त्। वृष॑णम्। शुष्म॑म्। इ॒न्द्र॒॥४॥

पदार्थः-(**आ**) समन्तात् **(नः)** अस्मान् **(विश्वाभिः)** सर्वाभिः **(ऊतिभिः)** रक्षणादिक्रियाभिः **(सजोषाः)** समानप्रीतिसेवी **(ब्रह्म)** धनमन्नं वा **(जुषाणः)** सेवमानः **(हर्यश्वः)** हरयो मनुष्या अश्वा महान्त आसन् यस्य तत् सम्बुद्धौ **(याहि)** प्राप्नुहि **(वरीवृजत्)** भृशं वर्जय **(स्थविरेभिः)** विद्यावयोवृद्धैः सह **(सुशिप्र)** सुशोभितमुखावयव **(अस्मे)** अस्मासु **(दधत्)** धेहि **(वृषणम्)** सुखवर्षकम् **(शुष्मम्)** बलम् **(इन्द्र)** परमैश्वर्यप्रद॥४॥

अन्वयः-हे सुशिप्र हर्यश्वेन्द्र! विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणः स्थविरेभिरस्मे वृषणं शुष्मं दधत् त्वं दुःखानि वरीवृजन्नोऽस्मानायाहि॥४॥

भावार्थः-त एव मनुष्या महाशया भवन्ति ये पापानि परोपघातान् वर्जयित्वा स्वात्मवत्सर्वेषु मनुष्येषु वर्त्तमानाः सर्वेषां सुखाय स्वकीयं शरीरं वाग्धनुमात्मानं च वर्त्तयन्ति॥४॥

पदार्थः-हे **(सुशिप्र)** उत्तम शोभायुक्त ठोढ़ी वाले **(हर्यश्व)** हरणशील मनुष्य वा घोड़े बड़े-बड़े जिसके हुए वह **(इन्द्र)** परम ऐश्वर्य देने वाले! **(विश्वाभिः)** समस्त **(ऊतिभिः)** रक्षा आदि क्रियाओं से **(सजोषाः)** समानप्रीति सेवने वाले **(ब्रह्म)** धन वा अन्न को **(जुषाणः)** सेवने वा **(स्थविरेभिः)** विद्या और अवस्था में वृद्धों के साथ **(अस्मे)** हम लोगों में **(वृषणम्)** सुख वर्षाने वाले

(शुष्मम्) बल को **(दधत्)** धारण करते हुए आप दु:खों को **(वरीवृजत्)** निरन्तर छोड़ो और **(न:)** हम लोगों को **(आ, याहि)** आओ, प्राप्त होओ॥४॥

भावार्थ:-वे ही मनुष्य महाशय होते हैं जो पाप और परोपघात अर्थात् दूसरों को पीड़ा देने के कामों को छोड़ के अपने आत्मा के तुल्य सब मनुष्यों में वर्त्तमान सब के सुख के लिये अपना शरीर, वाणी और ठोढ़ी को वर्ताते हैं॥४॥

पुनर्विद्वान् किंवत् किं कुर्यादित्याह॥

फिर विद्वान् किसके तुल्य क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

एष स्तोमो मह उग्राय वाहे धुरीव वात्यो न वाजयन्नधायि।
इन्द्र त्वाऽयमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः॥५॥

एषः। स्तोमः। महे। उग्राय। वाहे। धुरिऽइव। अत्यः। न। वाजयन्। अधायि। इन्द्र। त्वा। अयम्। अर्कः। ईट्टे। वसूनाम्। दिविऽइव। द्याम्। अधि। नः। श्रोमतम्। धाः॥५॥

पदार्थ:-(**एष:**) (**स्तोम:**) श्लाध्यो व्यवहार: (**महे**) महते (**उग्राय**) तेजस्विने (**वाहे**) सर्वान्सुखं प्रापयित्रे (**धुरीव**) सर्वे यानावयवा लग्ना: सन्तो गच्छन्ति (**अत्य:**) अश्व: (**न**) इव (**वाजयन्**) वेगं कारयन् (**अधायि**) ध्रियते (**इन्द्र**) परमैश्वर्यप्रद (**त्वा**) त्वाम् (**अयम्**) विद्वान् (**अर्क:**) सत्कर्त्तव्य: (**ईट्टे**) ऐश्वर्यं प्रयच्छति (**वसूनाम्**) पृथिव्यादीनां मध्ये (**दिवीव**) सूर्यज्योतिषीव (**द्याम्**) प्रकाशम् (**अधि**) (**न:**) अस्माकम् (**श्रोमतम्**) श्रोतव्यं विज्ञानमन्नादिकं वा (**धा:**) धेहि॥५॥

अन्वय:-हे इन्द्र! येन त्वया वाहे मह उग्राय धुरीवात्यो न वाजयन्नेष स्तोमोऽधायि योऽयमर्को वसूनां दिवीव त्वेट्टे स त्वं नो द्यां श्रोमतं चाधि धा:॥५॥

भावार्थ:-अत्रोपमालङ्कार:। हे मनुष्या! यो विद्वान् तेजस्विभ्य: प्रशंसां धरति स धूर्वत्सर्वसुखाधारो वाजिवद्वेगवान् भूत्वा पुष्कलां श्रियं प्राप्य सूर्य इवात्र भ्राजते॥५॥

पदार्थ:-हे (**इन्द्र**) परमैश्वर्य के देने वाले! जिन आपने (**वाहे**) सब को सुख की प्राप्ति कराने वाले (**महे**) महान् (**उग्राय**) तेजस्वी के लिये (**धुरीव**) धुरी में जैसे रथ आदि के अवयव लगे हुए जाते हैं, वैसे (**अत्य:**) शीघ्र चलने वाले घोड़े के (**न**) समान (**वाजयन्**) वेग कराते हुए (**एष:**) यह (**स्तोम:**) श्लाघनीय स्तुति करने योग्य व्यवहार (**अधायि**) धारण किया जो (**अयम्**) यह (**अर्क:**) सत्कार करने योग्य (**वसूनाम्**) पृथिवी आदि के बीच (**दिवीव**) वा सूर्य ज्योति के बीच (**त्वा**) आपको (**ईट्टे**) ऐश्वर्य देता है वह आप (**न:**) हम लोगों को (**द्याम्**) प्रकाश और (**श्रोमतम्**) सुनने योग्य को (**अधि, धा:**) अधिकता से धारण करो॥५॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्वान् तेजस्वियों के लिये प्रशंसा धारण करता वह धुरी के समान सुख का आधार और घोड़े के समान वेगवान् हो बहुत लक्ष्मी पाकर सूर्य के समान इस संसार में प्रकाशित होता है॥५॥

पुनर्मनुष्यै: परस्पर कथं वर्तितव्यमित्याह॥

फिर मनुष्यों को परस्पर कैसे वर्तना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः॥६॥८॥

एव। नः। इन्द्र। वार्यस्य। पूर्धि। प्र। ते। महीम्। सुऽमतिम्। वेविदाम। इषम्। पिन्व। मघवत्ऽभ्यः। सुऽवीराम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥६॥

पदार्थः-(**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) शत्रुदुःखविदारक (**वार्यस्य**) वरितुं योग्यस्य (**पूर्धि**) पूरय (**प्र**) (**ते**) तव (**महीम्**) महतीम् (**सुमतिम्**) शोभनां प्रज्ञाम् (**वेविदाम**) यथावल्लभेमहि (**इषम्**) अन्नम् (**पिन्व**) सेवस्व (**मघवद्भ्यः**) बहुधनयुक्तेभ्यः (**सुवीराम्**) शोभना वीरा यस्यास्ताम् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**) अस्मान्॥६॥

अन्वयः-हे इन्द्र! त्वं वार्यस्य ते यां महीं सुमतिं वयं वेविदाम तामेव नः प्र पूर्धि यां मघवद्भ्यः सुवीरामिषं वयं वेविदाम तां त्वं पिन्व तया सुमत्येषेण च स्वस्तिभिर्यूयं नः सदा पात॥६॥

भावार्थः-हे विद्वँस्त्वमस्मभ्यं धर्म्यां प्रज्ञां देहि यया वयं शुभान् गुणकर्मस्वभावान् प्राप्य सर्वाञ्ज्ञनान् सदा सुरक्षेम॥६॥

अत्रेन्द्रराजस्त्रीपुरुषविद्वद्गुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुर्विंशतितमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) शत्रुओं के विदीर्ण करने वाले! आप (**वार्यस्य**) ग्रहण करने योग्य (**ते**) आप की जिस (**महीम्**) बड़ी (**सुमतिम्**) उत्तम बुद्धि को हम लोग (**वेविदाम**) यथावत् पावें (**एव**) उसी को और (**नः**) हमको (**प्र, पूर्धि**) अच्छे प्रकार पूर्ण करो जिसको (**मघवद्भ्यः**) बहुत धनयुक्त पदार्थों से (**सुवीराम्**) उत्तम वीर हैं जिससे उस (**इषम्**) अन्न को हम लोग यथावत् प्राप्त हों। और उसको आप (**पिन्व**) सेवो उस सुमति और अन्न तथा (**स्वस्तिभिः**) सुखों से (**यूयम्**) तुम लोग (**नः**) हम लोगों की (**सदा**) सर्वदा (**पात**) रक्षा करो॥६॥

भावार्थः-हे विद्वान्! आप हम लोगों के लिये धर्मयुक्त उत्तम बुद्धि को देओ जिससे हम लोग अच्छे गुण-कर्म-स्वभावों को प्राप्त होकर सब मनुष्यों की अच्छे प्रकार रक्षा करें॥६॥

इस सूक्त में इन्द्र, राजा, स्त्री-पुरुष और विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौबीसवां सूक्त और आठवां वर्ग पूरा हुआ॥

अथ षड्चस्य पञ्चविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १ निचृत्पङ्क्तिः। २ विराट्पङ्क्तिः। ४ पङ्क्तिः। ६ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ३ विराट्त्रिष्टुप्। ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ कीदृशी सेना वरा स्यादित्याह॥

अब छः ऋचावाले पच्चीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में कैसी सेना उत्तम होती है, इस विषय को कहते हैं॥

आ ते॑ म॒ह इ॑न्द्रो॒त्यु॒ग्र सम॑न्यवो॒ यत्स॒मर॑न्त॒ सेना॑ः।
पता॑ति दि॒द्युन्नर्य॑स्य बा॒ह्वोर्मा ते॒ मनो॑ विष्व॒द्र्य॑ग्वि चा॑रीत्॥ १॥

आ। ते॒। म॒हः। इ॒न्द्र॒। ऊ॒ती। उ॒ग्र॒। सऽम॑न्यवः। यत्। स॒म्ऽअर॑न्त। सेना॑ः। पता॑ति। दि॒द्युत्। नर्य॑स्य। बा॒ह्वोः। मा। ते॒। मन॑ः। वि॒ष्व॒द्र्य॑क्। वि। चा॒री॒त्॥ १॥

पदार्थः-(**आ**) समन्तात् (**ते**) तव (**महः**) महतः (**इन्द्र**) सेनापते (**ऊती**) ऊत्या रक्षणाद्यया क्रियया (**उग्र**) शत्रूणां हनने कठिनस्वभाव (**समन्यवः**) मन्युना क्रोधेन सह वर्त्तमानाः (**यत्**) यस्य (**समरन्त**) सम्यग् गच्छन्ति (**सेनाः**) (**पताति**) पतेत् (**दिद्युत्**) देदीप्यमानाः (**नर्यस्य**) नृषु साधोः (**बाह्वोः**) भुजयोः (**मा**) (**ते**) तव (**मनः**) चित्तम् (**विष्वद्र्यक्**) यद्विष्वगञ्चति व्याप्नोति तत् (**वि**) (**चारीत्**) विशेषेण चरति॥ १॥

अन्वयः-हे उग्रेन्द्र! यद्यस्य नर्यस्य महस्ते समन्यवः सेना ऊती आ समरन्त तस्य ते बाह्वोर्दिद्युन्मा पताति ते मनो विष्वद्र्यग्विचारीत्॥ १॥

भावार्थः-हे सेनाधिपते! यदा सङ्ग्रामसमय आगच्छेत्तदा या क्रोधेन प्रज्वलिताः सेनाः शत्रूणामुपरि पतेयुस्तदा ता विजयं लभेरन् यावत्तव बाहुबलं न हृष्येत मनश्चान्याये न प्रवर्तेत तावत्तवोन्नतिर्जायत इति विजानीहि॥ १॥

पदार्थः-हे (**उग्र**) शत्रुओं के मारने में कठिन स्वभाव वाले (**इन्द्र**) सेनापति! (**यत्**) जिस (**नर्यस्य**) मनुष्यों में साधु (**महः**) महान् (**ते**) आप के (**समन्यवः**) क्रोध के साथ वर्त्तमान (**सेनाः**) सेना (**ऊती**) रक्षण आदि क्रिया से (**आ, समरन्त**) सब ओर से अच्छी जाती हैं उन (**ते**) आप की (**बाह्वोः**) भुजाओं में (**दिद्युत्**) निरन्तर प्रकाशमान युद्धक्रिया (**मा**) मत (**पताति**) गिरे, मत नष्ट हो और तुम्हारा (**मनः**) चित्त (**विष्वद्र्यक्**) सब ओर से प्राप्त होता हुआ (**वि, चारीत्**) विचरता है॥ १॥

भावार्थः-हे सेनाधिपति! जब संग्राम समय में आओ तब जो क्रोध प्रज्वलित क्रोधाग्नि से जलती हुई सेना शत्रुओं के ऊपर गिरें, उस समय वे विजय को प्राप्त हों, जब तक तुम्हारा बाहुबल न फैले मन भी अन्याय में न प्रवृत्त हो, तब तक तुम्हारी उन्नति होती है, यह जानो॥ १॥

पुना राज्ञा के दण्डनीया निवारणीयाश्चेत्याह॥

फिर राजा को कौन दण्ड देने योग्य और निवारने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

नि दुर्ग इन्द्र श्नथिह्यमित्रान्नभि ये नो मर्तासो अमन्ति।
आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनाम्॥ २॥

नि। दुःगे। इन्द्र। श्नथिहि। अमित्रान्। अभि। ये। नः। मर्तासः। अमन्ति। आरे। तम्। शंसम्। कृणुहि। निनित्सोः। आ। नः। भर। सम्ऽभरणम्। वसूनाम्॥ २॥

पदार्थः-(**नि**) नितराम् (**दुर्गे**) शत्रुभिर्दुःखेन गन्तव्ये प्रकोटे (**इन्द्र**) दुष्टशत्रुविदारक (**श्नथिहि**) हिंसय (**अमित्रान्**) सर्वैः सह द्रोहयुक्तान् (**अभि**) (**ये**) (**नः**) अस्मान् (**मर्त्तासः**) मनुष्याः (**अमन्ति**) प्रापयन्ति रोगान् (**आरे**) दूरे (**तम्**) (**शंसम्**) प्रशंसनीयं विजयम् (**कृणुहि**) (**निनित्सोः**) निन्दितुमिच्छोः (**आ**) (**नः**) अस्मान् (**भर**) (**सम्भरणम्**) सम्यग् धारणं पोषणं वा (**वसूनाम्**) द्रव्याणाम्॥ २॥

अन्वयः-हे इन्द्र! ये मर्त्तासो नो दुर्गेऽमन्ति तानमित्राँस्त्वं न्यभि श्नथिह्यस्मदारे प्रक्षिप निनित्सोरस्मानारे कृत्वा नस्तं शंसं कृणुहि वसूनां संभरणमाभर॥ २॥

भावार्थः-हे राजन्! ये धूर्त्ता मनुष्या ब्रह्मचर्यादिनिवारेण मनुष्यान् रुग्णान् कुर्वन्ति तान् कारागृहे बध्नीहि ये च स्वप्रशंसायै सर्वान्निन्दन्ति तान् सुशिक्ष्य भद्रिकायाः प्रजाया दूरे रक्षैव कृते भवतो महती प्रशंसा भविष्यति॥ २॥

पदार्थः-हे (**इन्द्र**) दुष्ट शत्रुओं के निवारने वाला राजा! (**ये**) जो (**मर्त्तासः**) मनुष्य (**नः**) हम लोगों को (**दुर्गे**) शत्रुओं को दुःख से पहुँचने योग्य परकोटा में (**अमन्ति**) रोगों को पहुँचाते हैं उन (**अमित्रान्**) सब के साथ द्रोहयुक्त रहने वालों को [आप] (**नि, अभि, श्नथिहि**) निरन्तर सब ओर से मारो हम लोगों से (**आरे**) दूर उनको फेंको (**निनित्सोः**) और निन्दा की इच्छा करने वाले से हम लोगों को दूर कर (**नः**) हम लोगों के (**तम्**) उस (**शंसम्**) प्रशंसनीय विजय को (**कृणुहि**) कीजिये तथा (**वसूनाम्**) द्रव्यादि पदार्थों के (**संभरणम्**) अच्छे प्रकार पोषण को (**आ, भर**) सब ओर से स्थापित कीजिये॥ २॥

भावार्थः-हे राजा! जो धूर्त मनुष्य ब्रह्मचर्य आदि के निवारण से मनुष्यों को रोगी करते हैं, उनको काराघर में बांधो और जो अपनी प्रशंसा के लिये सब की निन्दा करते हैं, उनको समझा कर उत्तम प्रजाजनों से अलग रक्खो, ऐसे करने से आपकी बड़ी प्रशंसा होगी॥ २॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु।
जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि॥ ३॥

शतम्। ते। शिप्रिन्। ऊतयः। सुऽदासे। सहस्रम्। शंसाः। उत। रातिः। अस्तु। जहि। वधः। वनुषः। मर्त्यस्य। अस्मे इति। द्युम्नम्। अधि। रत्नम्। च। धेहि॥ ३॥

पदार्थः-(**शतम्**) (**ते**) तव (**शिप्रिन्**) सुमुख (**ऊतयः**) रक्षाद्याः क्रियाः (**सुदासे**) यः सुष्ठु

ददाति तस्मै **(सहस्रम्)** असंख्याः **(शंसाः)** प्रशंसाः **(उत)** **(रातिः)** दानम् **(अस्तु)** **(जहि)** **(वधः)** ताडनम् **(वनुषः)** याचमानस्य **(मर्त्यस्य)** मनुष्यस्य पीडितस्य मर्तस्य **(अस्मे)** अस्मासु **(द्युम्नम्)** धर्म्यं यशः **(अधि)** उपरि **(रत्नम्)** रमणीयं धनम् **(च)** धेहि॥३॥

अन्वयः-हे शिप्रिन् राजँस्ते तव वनुषो मर्त्तस्य शतमूतयः सहस्रं शंसाः सन्तूत सुदासे रातिरस्तु त्वमधर्म्येण वनुषः पाखण्डिनो मर्त्यस्य वधो जह्यस्मे द्युम्नं रत्नं चाधि धेहि॥३॥

भावार्थः-हे राजन्! भवाञ्छतशः सहस्रशः प्रकारैः प्रजापालनं सुपात्रदानं दुष्टवधं प्रजासु कीर्त्तिवर्धनं धनं च सततं त्वं विधेहि यतः सर्वे सुखिनः स्युः॥३॥

पदार्थः-हे **(शिप्रिन्)** अच्छे मुख वाले राजा **(ते)** आपके **(वनुषः)** याचना करते हुए पीड़ित मनुष्य की **(शतम्)** सैकड़ों **(ऊतयः)** रक्षा आदि क्रिया और **(सहस्रम्)** असंख्य **(शंसाः)** प्रशंसा हों **(उत)** और **(सुदासे)** जो उत्तमता से देता है उसके लिये **(रातिः)** दान **(अस्तु)** हो आप **(वनुषः)** अधर्म से मांगने वाले पाखण्डी **(मर्त्यस्य)** मनुष्य की **(वधः)** ताड़ना को **(जहि)** हनो, नष्ट करो तथा **(अस्मे)** हम लोगों में **(द्युम्नम्)** धर्मयुक्त यश और **(रत्नं च)** रमणीय धन भी **(अधि, धेहि)** अधिकता से धारण करो॥३॥

भावार्थः-हे राजा! आप सैकड़ों वा सहस्रों प्रकारों से प्रजा की पालना और सुपात्रों को देना, दुष्टों का बंधन, प्रजाजनों में कीर्ति बढ़ाना और धन को निरन्तर विधान करो जिससे सब सुखी हों॥३॥

पुनस्ते राजप्रजाजनाः परस्परस्मिन् कथं वर्तेरन्नित्याह॥

फिर वे राजा और प्रजाजन परस्पर में कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

त्वावँतो हीन्द्र क्रत्वे अस्मि त्वावँतोऽवितुः शूर रातौ।
विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः॥४॥

त्वाऽवँतः। हि। इन्द्र। अस्मि। त्वाऽवँतः। अवितुः। शूर। रातौ। विश्वा। इत्। अहानि। तविषीऽवः। उग्रः। ओकः। कृणुष्व। हरिऽवः। न। मर्धीः॥४॥

पदार्थः-(**त्वावतः**) त्वया सदृशस्य **(हि)** खलु **(इन्द्र)** **(क्रत्वे)** प्रज्ञायै कर्मणे वा **(अस्मि)** **(त्वावतः)** त्वत्तुल्यस्य **(अवितुः)** रक्षकस्य **(शूर)** निर्भय **(रातौ)** दाने **(विश्वा)** सर्वाणि **(इत्)** एव **(अहानि)** दिनानि **(तविषीवः)** प्रशंसिता तविषी सेना विद्यते तस्य तत्सम्बुद्धौ **(उग्रः)** तेजस्वी **(ओकः)** गृहम् **(कृणुष्व)** **(हरिवः)** प्रशस्ता हरयो मनुष्या विद्यन्ते यस्य तत्सम्बुद्धौ **(न)** निषेधे **(मर्धीः)** अभिकाङ्क्षे॥४॥

अन्वयः-हे तविषीवो हरिवः शूरेन्द्र सेनेश! हि यतोऽहं विश्वेदहानि त्वावतः क्रत्वे प्रवृत्तोऽस्मि त्वावतोऽवितू रातावुद्यतोऽस्मि तस्मै मह्यमुग्रस्त्वमोकः कृणुष्याधार्मिकमित्कंचन न मर्धीः॥४॥

भावार्थः-हे धार्मिक नृप! यतस्त्वं सर्वेषां रक्षणाय सदा प्रवृत्तो भवति तस्मात्तव रक्षणे वयं सर्वदा प्रवृत्ताः स्म॥४॥

पदार्थः-हे **(तविषीवः)** प्रशंसित सेना वा **(हरिवः)** प्रशंसित हरणशील मनुष्यों वाले **(शूर)** निर्भय **(इन्द्र)** सेनापति! **(हि)** जिस कारण मैं **(विश्वा, इत्)** सभी **(अहानि)** दिनों **(त्वावतः)** तुम्हारे समान के **(क्रत्वे)** बुद्धि वा कर्म के लिये प्रवृत्त हूँ **(त्वावतः)** और आपके सदृश **(अवितुः)** रक्षा करने वाले के **(रातौ)** दान के निमित्त उद्यत **(अस्मि)** हूँ उस मेरे लिये **(उग्रः)** तेजस्वी आप **(ओकः)** घर **(कृणुष्व)** सिद्ध करो, बनाओ और अधार्मिक किसी जन को **(न)** न **(मर्धीः)** चाहो॥४॥

भावार्थः-हे धार्मिक राजा! जिससे आप सबकी रक्षा के लिये सदा प्रवृत्त होते हो, इससे तुम्हारी रक्षा में हम लोग सर्वदा प्रवृत्त हैं॥४॥

पुनस्तेन राज्ञा किमवश्यं कर्त्तव्यमित्याह॥

फिर उस राजा को क्या अवश्य करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

कुत्सा॑ ए॒ते हर्य॑श्वाय शू॒षमिन्द्रे॒ सहो॑ दे॒वजू॑तमिया॒नाः।
स॒त्रा कृ॑धि सु॒हना॑ शूर वृ॒त्रा व॒यं तरु॑त्राः सनुयाम॒ वाज॑म्॥५॥

कुत्सा॑ः। ए॒ते। हरि॑ऽअश्वाय। शू॒षम्। इन्द्रे॑। सहः॑। दे॒वऽजू॑तम्। इ॒या॒नः॒। स॒त्रा। कृ॒धि॒। सु॒ऽहना॑। शूर॑। वृ॒त्रा। व॒यम्। तरु॑त्राः। स॒नु॒या॒म॒। वाज॑म्॥५॥

पदार्थः-(**कुत्साः**) वज्राऽस्त्राद्या शस्त्राऽस्त्रसमूहाः **(एते)** **(हर्यश्वाय)** प्रशंसितनराश्वाय **(शूषम्)** बलम् **(इन्द्रे)** परमैश्वर्ययुक्ते **(सहः)** सहनम् **(देवजूतम्)** देवैः प्राप्तम् **(इयानाः)** प्राप्नुवन्तः **(सत्रा)** सत्येन **(कृधि)** **(सुहना)** सुहनानि हन्तुं सुगमानि **(शूर)** निर्भय **(वृत्रा)** वृत्राणि **(वयम्)** **(तरुत्राः)** दुःखात्सर्वेषां सन्तारकाः **(सनुयाम)** याचेम **(वाजम्)** विज्ञानम्॥५॥

अन्वयः-हे शूर! यस्मिँस्त्वयीन्द्रे हर्यश्वायैते कुत्साः सन्तु तान्देवजूतं शूषं सह इयानास्तरुत्रा वयं वाजं सनुयाम त्वं सत्रा **[**वृत्रा**]** सुहना कृधि॥५॥

भावार्थः-हे राजन्! यदि राज्यं पालयितुं वर्धयितुं भवानिच्छेत्तर्हि शस्त्राऽस्त्रसेनाः सततं गृहाण पुनः सत्याऽऽचारं विज्ञानवृद्धिं याचमानः सन् सततं वर्धस्वास्मान्वर्धय॥५॥

पदार्थः-हे **(शूर)** निर्भय जिन **(इन्द्रे)** परमैश्वर्य्ययुक्त आप में **(हर्यश्वाय)** प्रशंसित जिसके मनुष्य वा घोड़े उसके लिये **(एते)** ये **(कुत्साः)** वज्र अस्त्र और शस्त्र आदि समूह हों उनको और **(देवजूतम्)** देवों से पाये हुए **(शूषम्)** बल तथा **(सहः)** क्षमा **(इयानाः)** प्राप्त होते हुए **(तरुत्राः)** दुःख से सबको अच्छे प्रकार तारने वाले **(वयम्)** हम लोग **(वाजम्)** विज्ञान को **(सनुयाम)** याचें आप **(सत्रा)** सत्य से **(वृत्रा)** दुःखों को **(सुहना)** नष्ट करने के लिये सुगम **(कृधि)** करो॥५॥

भावार्थः-हे राजा! यदि राज्य पालने वा बढ़ाने को आप चाहें तो शस्त्र अस्त्र और सेना जनों को निरन्तर ग्रहण करो फिर सत्य आचार को मांगते हुए निरन्तर बढ़ो और हम लोगों को बढ़ाओ॥५॥

पुनरुपदेष्ट्र्युपदेश्यगुणानाह॥

फिर उपदेशक और उपदेश करने योग्यों के गुणों को अगले मन्त्र में कहते हैं॥

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः॥६॥९॥

एव। नः। इन्द्र। वार्यस्य। पूर्धि। प्र। ते। महीम्। सुऽमतिम्। वेविदाम। इषम्। पिन्व। मघवत्ऽभ्यः। सुऽवीराम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥६॥

पदार्थः-(**एवा**) अवधारणे। अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) परमैश्वर्यप्रद (**वार्यस्य**) वरणीयस्य (**पूर्धि**) (**प्र**) (**ते**) तव (**महीम्**) महतीं वाचम् (**सुमतिम्**) शोभना मतिः प्रज्ञा यया ताम् (**वेविदाम**) प्राप्नुयाम (**इषम्**) विद्याम् (**पिन्व**) (**मघवद्भ्यः**) बहुधनयुक्तेभ्यः (**सुवीराम्**) शोभना वीरा विज्ञानवन्तो यस्यां ताम् (**यूयम्**) विज्ञानवन्तः (**पात**) (**स्वस्तिभिः**) सुखादिभिः (**सदा**) (**नः**) अस्मान्॥६॥

अन्वयः-हे इन्द्र! त्वं नो विद्यया सुशिक्षया प्र पूर्धि यतो वयं वार्यस्य ते सुमतिं महीं वेविदाम मघवद्भ्यः सुवीरामिषं प्राप्नुयामाऽत्र त्वमस्मान्पिन्व यूयं स्वस्तिभिर्नः सदैव पात॥६॥

भावार्थः-त एवाऽध्यापका धन्यवादार्हा भवन्ति ये विद्यार्थिनः सद्यो विदुषो धार्मिकान्कुर्वन्ति सदैव रक्षायां वर्त्तमानाः सन्तः सर्वानुन्नयन्तीति॥६॥

अत्रेन्द्रसेनेशराजशस्त्राऽस्त्रग्रहणार्थवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति पञ्चविंशतितमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-हे (**इन्द्र**) परमैश्वर्य्य के देने वाले! आप (**नः**) हम लोगों को विद्या और उत्तम शिक्षा से (**प्र, पूर्धि**) अच्छे प्रकार पूरा करो जिससे हम लोग (**वार्यस्य**) स्वीकार करने योग्य (**ते**) आपकी (**सुमतिम्**) उत्तम मति और (**महीम्**) अत्यन्त वाणी को (**वेविदाम**) प्राप्त हों तथा (**मघवद्भ्यः**) बहुत धन से युक्त सज्जनों से (**सुवीराम्**) उत्तम विज्ञानवान् वीर जिसमें होते उस (**इषम्**) विद्या को प्राप्त होवें यहाँ आप हम लोगों की (**पिन्व**) रक्षा करो और (**यूयम्**) तुम (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों की (**सदा, एव**) सर्वदैव (**पात**) रक्षा करो॥६॥

भावार्थः-वे ही पढ़ाने वाले धन्यावद के योग्य होते हैं जो विद्यार्थियों को शीघ्र विद्वान् और धार्मिक करते हैं और सर्वदैव रक्षा में वर्त्तमान होते हुए सब की उन्नति करते हैं॥६॥

इस सूक्त में सेनापति, राजा और शस्त्र अस्त्रों को ग्रहण करना इन अर्थों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पच्चीसवां सूक्त और नवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य षड्विंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, २, ३, ४ त्रिष्टुप्। ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ जीवमुपकर्तुं किं न शक्नोतीत्याह॥

अब पांच ऋचा वाले छब्बीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में जीव का उपकार कौन नहीं कर सकता, इस विषय को कहते हैं॥

न सोम॒ इन्द्र॒मसु॑तो ममाद॒ नाब्र॑ह्माणो म॒घवा॑नं सु॒तास॑:।
तस्मा॑ उ॒क्थं ज॑नये॒ यज्जुजो॑षन्नृ॒वन्नवी॑यः शृ॒णव॒द्यथा॑ नः॥ १॥

न। सोमः। इन्द्रम्। असुतः। ममाद। न। अब्रह्माणः। मघऽवानम्। सुतासः। तस्मै। उक्थम्। जनये। यत्। जुजोषत्। नृऽवत्। नवीयः। शृणवत्। यथा। नः॥ १॥

पदार्थः-(**न**) निषेधे (**सोमः**) महौषधिरसः (**इन्द्रम्**) इन्द्रियस्वामिनं जीवम् (**असुतः**) अनुत्पन्नः (**ममाद**) हर्षयति (**न**) (**अब्रह्माणः**) अचतुर्वेदविदः (**मघवानम्**) परमपूजितधनवन्तम् (**सुतासः**) उत्पन्नाः (**तस्मै**) (**उक्थम्**) प्रशंसनीयमुपदेशम् (**जनये**) उत्पादये (**यत्**) (**जुजोषत्**) सेवते (**नृवत्**) बहवो नायका विद्यन्ते यस्मिँस्तत् (**नवीयः**) अतिशयेन नवीनम् (**शृणवत्**) शृणोति (**यथा**) (**नः**) अस्मान्॥ १॥

अन्वयः-हे विद्वांसो! यथाऽसुतः सोमो यमिन्द्रं न ममाद यथाऽब्रह्माणं सुतासो मघवानं नानन्दयन्ति स इन्द्रो यन्नृवन्नवीय उक्थं जुजोषन्नोऽस्माञ्च्छृणवत्तस्मै सर्वं विधानमहं जनये॥ १॥

भावार्थः-अत्रोपमालङ्कारः। हे विपश्चितो! यथोत्पन्नः पदार्थो जीवमानन्दयति यथा यथा वेदविद्या आप्ता जना धार्मिकं धनाढ्यं विपश्चितं कुर्वन्ति तथोत्पन्ना विद्याऽऽत्मानं सुखयति शुभा गुणा धनाढ्यं वर्धयन्ति सत्सङ्गेनैव मनुष्यत्वं प्राप्नोति॥ १॥

पदार्थः-हे विद्वानो! (**यथा**) जैसे (**असुतः**) न उत्पन्न हुआ (**सोमः**) महौषधियों का रस यह (**इन्द्रम्**) इन्द्रियों के स्वामी जीव को (**न**) नहीं (**ममाद**) हर्षित करता वा जैसे (**अब्रह्माणः**) चार वेदों का वेत्ता जो नहीं वे (**सुतासः**) उत्पन्न हुए (**मघवानम्**) परमपूजित धनवान् को (**न**) नहीं आनन्दित करते हैं वह इन्द्रियस्वामी जीव (**यत्**) जिस (**नृवत्**) नृवत् अर्थात् जिसमें बहुत नायक मनुष्य विद्यमान और (**नवीयः**) अत्यन्त नवीन (**उक्थम्**) उपदेश को (**जुजोषत्**) सेवता है (**नः**) हम लोगों को (**शृणवत्**) सुनता है (**तस्मै**) उसके लिये सब प्रकार के विधानों को मैं (**जनये**) उत्पन्न करता हूँ॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे बुद्धिमान् मनुष्यो! जैसे उत्पन्न हुआ पदार्थ जीव को आनन्द देता है जैसे यथावत् वेदविद्या और आप्तजन धार्मिक धनाढ्य को विद्वान् करते हैं, वैसे उत्पन्न हुई विद्या आत्मा को सुख देती है और शुभगुण धनाढ्य को बढ़ाते हैं और सत्संग से ही मनुष्यत्व को जीव प्राप्त होता है॥ १॥

पुनः किंवत्कः किं करोतीत्याह॥

फिर किसके तुल्य कौन क्या करता है, इस विषय को अगले मन्त्र में कहते हैं॥

उक्थउक्थे सोम इन्द्रं ममादु नीथेनीथे मघवानं सुतासः।
यदी सबाधः पितरं न पुत्रा समानदक्षा अवसे हवन्ते॥ २॥

उक्थेऽउक्थे। सोमः। इन्द्रम्। ममादु। नीथेऽनीथे। मघऽवानम्। सुतासः। यत्। ईम्। सऽबाधः। पितरम्। न। पुत्राः। समानऽदक्षाः। अवसे। हवन्ते॥ २॥

पदार्थः-(**उक्थेउक्थे**) धर्म्य उपदेष्टव्ये व्यवहारे व्यवहारे (**सोमः**) महौषधिरस ऐश्वर्यं वा (**इन्द्रम्**) जीवात्मानम् (**ममाद**) हर्षयति (**नीथेनीथे**) प्रापणीये प्रापणीये सत्ये व्यवहारे (**मघवानम्**) धर्म्येण बहुजातधनम् (**सुतासः**) विद्यैश्वर्ये प्रादुर्भूताः (**यत्**) ये (**ईम्**) सर्वतः (**सबाधः**) बाधसा सह वर्त्तमानम् (**पितरम्**) जनकम् (**न**) इव (**पुत्राः**) (**समानदक्षाः**) स्पर्धन्त आददति वा॥ २॥

अन्वयः-हे विद्वांसो! यद्य ईं सबाधः पितरं समानदक्षाः पुत्रा नावसे सुतासो मघवानं हवन्ते यथा सोम उक्थउक्थे नीथेनीथ इन्द्रं ममाद तैस्तथा चरत॥ २॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये विद्यार्थिनो यथा सत्पुत्राः क्लेशयुक्तौ मातापितरौ प्रीत्या सेवन्ते तथा गुरुं सेवन्ते यथा विद्याविनयपुरुषार्थजातमैश्वर्यं कर्त्तारमानन्दयति तथा यूयं वर्त्तध्वम्॥ २॥

पदार्थः-हे विद्वानो! (**यत्**) जो (**ईम्**) सब ओर से (**सबाधः**) पीड़ा के साथ वर्त्तमान (**पितरम्**) पिता को (**समानदक्षाः**) समान बल, विद्या और चतुरता जिनके विद्यमान वे (**पुत्राः**) पुत्र जन (**न**) जैसे (**अवसे**) रक्षा आदि के लिये (**सुतासः**) विद्या और ऐश्वर्य में प्रकट हुए (**मघवानम्**) धर्म कर्म बहुत धन जिसके उसको (**हवन्ते**) स्पर्द्धा करते वा ग्रहण करते हैं और जैसे (**सोमः**) बड़ी-बड़ी ओषधियों का रस वा ऐश्वर्य्य (**उक्थे-उक्थे**) धर्मयुक्त उपदेश करने योग्य व्यवहार तथा (**नीथे-नीथे**) पहुँचाने-पहुँचाने योग्य सत्य व्यवहार में (**इन्द्रम्**) जीवात्मा को (**ममाद**) हर्षित करता है, उनके साथ वैसा ही आचरण करो॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो विद्यार्थी जन जैसे अच्छे पुत्र क्लेशयुक्त माता पिता को प्रीति से सेवते हैं, वैसे गुरु की सेवा करते हैं वा जैसे विद्या, विनय और पुरुषार्थों से उत्पन्न हुआ, उत्पन्न करने वाले को आनन्दित करता है, वैसे तुम लोग वर्तो॥ २॥

पुनर्मनुष्याः किंवत्किं कुर्य्युरित्याह॥

फिर मनुष्य किसके तुल्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सुसर्वीः॥ ३॥

चकार। ता। कृणवत्। नूनम्। अन्या। यानि। ब्रुवन्ति। वेधसः। सुतेषु। जनीःऽइव। पतिः। एकः। समानः। नि। ममृजे। पुरः। इन्द्रः। सु। सर्वीः॥ ३॥

पदार्थः-(**चकार**) करोतु (**ता**) तानि (**कृणवत्**) कुर्यात् (**नूनम्**) निश्चितम् (**अन्या**) अन्यानि

(यानि) उपदेशवचनानि **(ब्रुवन्ति)** उपदिशन्ति **(वेधसः)** मेधाविनः **(सुतेषु)** उत्पन्नेषु जातेषु विज्ञानबलेषु **(जनीरिव)** जायमानाः प्रजा इव **(पतिः)** स्वामी राजा **(एकः)** असहायः **(समानः)** पक्षपातरहितः **(नि)** नितराम् **(मामृजे)** मृजति शोधयति। अत्र **तुजीदीनामि**त्यभ्यासदीर्घः। **(पुरः)** पुरस्तात् **(इन्द्रः)** परमैश्वर्यवान् **(सु सर्वाः)** सम्यगखिलाः॥३॥

अन्वयः-हे विद्वन्! यथा वेधसः सुतेषूपदेश्यान् यान्यन्या ब्रुवन्ति ता भवान्नूनं कृणवद्यथा समानः पतिरेक इन्द्रो जनीरिव सुसर्वाः प्रजाः पुरो नि मामृजे तथैतद्भवाञ्चकार॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। हे मनुष्या! यूयं विद्वदुपदिष्टानुकूलमेवाचरत यथा धार्मिको जितेन्द्रियो विद्वान् राजा पक्षपातं विहाय स्वाः प्रजा न्यायेन रक्षति तथा प्रजा अप्येनं सततं रक्षन्त्वेवं कृते सर्वेषां ध्रुवः सुखलाभो जायते॥३॥

पदार्थः-हे विद्वान्! जैसे **(वेधसः)** मेधावी जन **(सुतेषु)** उत्पन्न हुए विज्ञान और बलों में उपदेश करने योग्यों को **(यानि)** जिन उपदेश-वचनों को तथा **(अन्या)** और वचनों को **(ब्रुवन्ति)** कहते हैं **(ता)** उनको आप **(नूनम्)** निश्चित **(कृणवत्)** करें वा जैसे **(समानः)** पक्षपात रहित **(पतिः)** स्वामी राजा **(एकः)** अकेला **(इन्द्रः)** परमैश्वर्य्यवान् **(जनीरिव)** उत्पन्न हुई प्रजा के समान **(सु, सर्वाः)** सम्यक् समस्त प्रजा को **(पुरः)** पहिले **(नि, मामृजे)** निरन्तर पवित्र करता है, वैसे इसको आप **(चकार)** करो॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है।[२] हे मनुष्यो! तुम विद्वानों के उपदेश के अनुकूल ही आचरण करो जैसे धार्मिक, जितेन्द्रिय, विद्वान् राजा पक्षपात छोड़ के अपनी प्रजा न्याय से रखता है, वैसे प्रजाजन इस राजा की निरन्तर रक्षा करें, ऐसे करने से निरन्तर सब को निश्चल सुखलाभ होता है॥३॥

पुनः कोऽत्र राजा भवितुं योग्यो भवतीत्याह॥

---

२. संस्कृतभावार्थ में उपमा भी दिया हुआ है।

फिर कौन इस जगत् में राजा होने योग्य होता है, इस विषय को अगले मन्त्र में कहते है॥

एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्मघानाम्।
मिथस्तुरः ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि॥४॥

एव। तम्। आहुः। उत। शृण्वे। इन्द्रः। एकः। विऽभक्ता। तरणिः। मघानाम्। मिथः।ऽतुरः। ऊतयः। यस्य। पूर्वीः। अस्मे इति। भद्राणि। सश्चत। प्रियाणि॥४॥

पदार्थः-(**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**तम्**) (**आहुः**) कथयन्ति (**उत**) अपि (**शृण्वे**) (**इन्द्रः**) परमैश्वर्ययुक्तः (**एकः**) असहायः (**विभक्ता**) सत्याऽसत्ययोः विभाजकः (**तरणिः**) तारयिता (**मघानाम्**) धनानाम् (**मिथस्तुरः**) या मिथस्त्वरयन्ति ताः (**ऊतयः**) रक्षाः (**यस्य**) (**पूर्वीः**) पुरातन्यः (**अस्मे**) अस्मासु (**भद्राणि**) कल्याणकराणि कर्माणि (**सश्चत**) सेवन्तां सम्बध्नन्तु (**प्रियाणि**) कमनीयानि॥४॥

अन्वयः-यस्य पूर्वीर्मिथस्तुर ऊतयोऽस्मे प्रियाणि भद्राणि सश्चत य एको मघानां विभक्ता तरणिरिन्द्रो जीवो धर्मं सेवते तमेवाऽऽप्ता धार्मिकमाहुरुत तस्यैवोपदेशमहं शृण्वे॥४॥

भावार्थः-हे मनुष्या! यस्य प्रशंसामाप्ता विद्वांसः कुर्य्युर्यस्य धर्म्याणि कर्माणि सर्वाः प्रजा इच्छेयुर्यो हि सत्यानृतयोर्यथावद्विभागं कृत्वा न्यायं कुर्य्यात् स एवाऽस्माकं राजा भवतु॥४॥

पदार्थः-(**यस्य**) जिसकी (**पूर्वीः**) पुरातन (**मिथस्तुरः**) परस्पर शीघ्रता करती हुई (**ऊतयः**) रक्षायें (**अस्मे**) हम लोगों में (**प्रियाणि**) मनोहर (**भद्राणि**) कल्याण करने वाले काम (**सश्चत**) सम्बन्ध करें जो (**एकः**) एक (**मघानाम्**) धनों के (**विभक्ता**) सत्य असत्य का विभाग करने वा (**तरणिः**) तारने वाला (**इन्द्रः**) परमैश्वर्य्य युक्त जीव धर्म की सेवा करता है (**तम्, एव**) उसी को आप्त शिष्ट धर्मशील सज्जन धर्मात्मा (**आहुः**) कहते हैं (**उत**) निश्चय उसी का उपदेश मैं (**शृण्वे**) सुनता हूँ॥४॥

भावार्थः-हे मनुष्यो! जिसकी प्रशंसा आप्त विद्वान् जन करें वा जिसके धर्मयुक्त कर्मों को समस्त प्रजा प्रीति से चाहे, जो सत्य झूठ को यथावत् अलग कर न्याय करे, वही हमारा राजा हो॥४॥

पुनर्विद्वान् राजादीन् मनुष्यान् धर्म्ये पथि नित्यं संरक्षेदित्याह॥

फिर विद्वान् जन राजा आदि मनुष्यों को धर्म-मार्ग में नित्य अच्छे प्रकार रक्खे, इस विषय को अगले मन्त्र में कहते हैं॥

एवा वसिष्ठ इन्द्रमूतये नॄन् कृष्टीनां वृषभं सुते गृणाति।
सहस्रिणं उप नो माहि वाजान् यूयं पात स्वस्तिभिः सदा नः॥५॥१०॥

एव। वसिष्ठः। इन्द्रम्। ऊतये। नॄन्। कृष्टीनाम्। वृषभम्। सुते। गृणाति। सहस्रिणः। उप। नः। माहि। वाजान्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥५॥

पदार्थः-(**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**वसिष्ठः**) अतिशयेन विद्यासु कृतवासः (**इन्द्रम्**)

परमैश्वर्यवन्तम् (**ऊतये**) रक्षाद्याय (**नॄन्**) नायकान् (**कृष्टीनाम्**) मनुष्यादिप्रजानां मध्ये (**वृषभम्**) अत्युत्तमम् (**सुते**) उत्पन्नेऽस्मिञ्जगति (**गृणाति**) सत्यमुपदिशति (**सहस्रिणः**) सहस्राण्यसङ्ख्याताः पदार्था विद्यन्ते येषां तान् (**उप**) (**नः**) अस्मान् (**माहि**) सत्कुरु (**वाजान्**) विज्ञानाऽन्नादियुक्तान् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) सदा (**नः**)॥५॥

अन्वयः-हे विद्वन् वसिष्ठस्त्वं कृष्टीनां वृषभमिन्द्रं नॄँश्चोतय एव माहि सुते सहस्रिणो वाजान्नोऽस्मान् यो भवानुपगृणाति सततं माहि। हे विद्वांसो! जना यूयं स्वस्तिभिर्नः सदैव पात॥५॥

भावार्थः-हे विद्वांसो! यूयमेवं प्रयतध्वं येन राजादयो जना धार्मिका भूत्वाऽसंख्यं धनमतुलमानन्दं प्राप्नुयुर्यथा भवन्तस्तेषां रक्षां कुर्वन्ति तथैते भवतः सततं रक्षन्त्विति॥५॥

अत्रेन्द्रशब्देन जीवराजकृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षड्विंशतितमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् (**वसिष्ठः**) अत्यन्त विद्या में वास जिन्होंने किया ऐसे! आप (**कृष्टीनाम्**) मनुष्यादि प्रजाजनों के बीच (**वृषभम्**) अत्युत्तम (**इन्द्रम्**) परमैश्वर्यवान् जीव और (**नॄन्**) नायक मनुष्यों की (**ऊतये**) रक्षा आदि के लिये (**एव**) ही (**माहि**) सत्कार कीजिये (**सुते**) उत्पन्न हुए इस जगत् में (**सहस्रिणः**) सहस्रों पदार्थ जिनके विद्यमान उन (**वाजान्**) विज्ञान वा अन्नादियुक्त (**नः**) हम लोगों को जो आप (**उप, गृणाति**) सत्य उपदेश देते हैं सो निरन्तर मान कीजिये। हे विद्वानो! (**यूयम्**) तुम (**स्वस्तिभिः**) कल्याणों से (**नः**) हम लोगों की (**सदा**) सर्वदा (**पात**) रक्षा करो॥५॥

भावार्थः-विद्वान् जनो! तुम ऐसा प्रयत्न करो जिससे राजा आदि जन धार्मिक होकर असंख्य धन वा अतुल आनन्द को प्राप्त हों, जैसे आप उनकी रक्षा करते हैं, वैसे ये आपकी निरन्तर रक्षा करें॥५॥

इस सूक्त में इन्द्र शब्द शब्द से जीव, राजा के कर्म और गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह छब्बीसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य सप्तविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, ५ विराट् त्रिष्टुप्। २ निचृत्त्रिष्टुप्। ३, ४ त्रिष्टुप्छन्दः। धैवतः स्वरः॥

अथ सर्वैः कीदृशो विद्वान् राजा कमनीयोऽस्तीत्याह॥

अब पांच ऋचा वाले सत्ताईसवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में सबको कैसा विद्वान् राजा इच्छा करने योग्य है, इस विषय को कहते है॥

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः॥ १॥

इन्द्रम्। नरः। नेमऽधिता। हवन्ते। यत्। पार्याः। युनजते। धियः। ताः। शूरः। नृऽसाता। शवसः। चकान। आ। गोऽमति। व्रजे। भज। त्वम्। नः॥ १॥

पदार्थः-(**इन्द्रम्**) परमैश्वर्यप्रदं राजानम् (**नरः**) विद्यासु नेतारः (**नेमधिता**) नेमधितौ स- ामे (**हवन्ते**) आह्वयन्ति (**यत्**) या (**पार्याः**) पालनीयाः (**युनजते**) युञ्जते। अत्र **बहुलं छन्दसी**त्यलोपो न। (**धियः**) प्रज्ञाः (**ताः**) (**शूरः**) शत्रूणां हिंसकः (**नृषाता**) नरः सीदन्ति यस्मिंस्तस्मिन् नृसातौ (**शवसः**) बलात् (**चकानः**) कामयमानः (**आ**) (**गोमति**) गावो विद्यन्ते यस्मिँस्तस्मिन् (**व्रजे**) व्रजन्ति यं तस्मिन् (**भजा**)। सेवस्व अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**त्वम्**) (**नः**)॥ १॥

अन्वयः-हे राजन्! यः शूरो शवसश्चकानस्त्वं नृषाता गोमति व्रजे न आ भज **[**हे राजन्!**]** यमिन्द्रं त्वा यद्या पार्या धियो युनजते तास्त्वमाभज ये नरो नेमधिता त्वां हवन्ते ताँस्त्वमा भज॥ १॥

भावार्थः-यो ह्यत्र प्रशस्तप्रज्ञा सर्वदा बलवृद्धिमिच्छञ्छिष्टसम्मतो विद्वानुद्योगी धार्मिकः प्रजापालनतत्परो नरः स्यात्तमेव सर्वे कामयन्ताम्॥ १॥

पदार्थः-हे राजन्! जो (**शूरः**) शत्रुओं की हिंसा करने वाले (**शवसः**) बल से (**चकानः**) कामना करते हुए (**त्वम्**) आप (**नृसाता**) मनुष्य जिसमें बैठते वा (**गोमति**) गौयें जिसमें विद्यमान ऐसे (**व्रजे**) जाने के स्थान में (**नः**) हम लोगों को (**आ, भज**) अच्छे प्रकार सेविये, हे राजन्! जिन (**इन्द्रम्**) परमैश्वर्य देने वाले आप को (**यत्**) जो (**पार्याः**) पालना करने योग्य (**धियः**) उत्तम बुद्धि (**युनजते**) युक्त होती हैं (**ताः**) उनको आप अच्छे प्रकार सेवो। जो (**नरः**) विद्याओं में उत्तम नीति देने वाले (**नेमधिता**) संग्राम में आप को (**हवन्ते**) बुलाते हैं, उनको आप अच्छे प्रकार सेवो॥ १॥

भावार्थः-जो निश्चय से इस संसार में प्रशंसित बुद्धिवाला, सर्वदा बल वृद्धि की इच्छा करता हुआ, शिष्ट जनों की सम्मति वर्तने वाला, विद्वान्, उद्योगी, धार्मिक और प्रजा पालन में तत्पर जन हो, उसी की सब कामना करो॥ १॥

पुनः स राजा कीदृशः स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

य इन्द्र शुष्मो मघवन् ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः।
त्वं हि दृळ्हा मघवन् विचेता अपा वृधि परिवृतं न राधः॥ २॥

यः। इ॒न्द्र॒। शुष्मः॑। म॒घ॒ऽव॒न्। ते॒। अस्ति॑। शिक्षा॑। सखि॑ऽभ्यः। पुरु॑ऽहूत। नृऽभ्यः॑। त्वम्। हि। दृ॒ळ्हा। म॒घ॒ऽव॒न्। विऽचे॑ताः। अप॑। वृ॒धि॒। परि॑ऽवृतम्। न। राधः॑॥ २॥

पदार्थः-(**यः**) (**इन्द्र**) परमैश्वर्यप्रद (**शुष्मः**) पुष्कलबलयुक्तः (**मघवन्**) परमपूजितधनवत् (**ते**) तव (**अस्ति**) (**शिक्षा**) शासनम् (**सखिभ्यः**) मित्रेभ्यः (**पुरुहूत**) बहुभिः प्रशंसित (**नृभ्यः**) स्वराज्ये नायकेभ्यः (**त्वम्**) (**हि**) (**दृळ्हा**) दृढानि शत्रुसैन्यानि (**मघवन्**) बलधनयुक्त (**विचेताः**) विविधा विशिष्टा वा चेतः प्रज्ञा यस्य सः (**अपा**) अत्र **निपातस्य चे**ति दीर्घः। (**वृधि**) दूरीकुरु (**परिवृतम्**) सर्वतः स्वीकृतम् (**न**) इव (**राधः**) धनम्॥ २॥

अन्वयः-हे मघवन्निन्द्र! यस्ते शुष्मोऽस्ति। हे पुरुहूत! या ते सखिभ्यो नृभ्यः शिक्षाऽस्ति। हे मघवन्! यानि ते दृळ्हा सैन्यानि सन्ति तैर्विचेतास्त्वं हि परिवृतं राधो न दृळ्हा शत्रुसैन्यान्यपा वृधि॥ २॥

भावार्थः-अत्रोपमालङ्कारः। स एव राजा सदा वर्धते यो प्राप्ताऽपराधमित्राण्यपि दण्डदानेन विना न त्यजति यो हि सदैवं प्रयतते येन स्वस्य मित्रोदासीनशत्रवोऽधिका न भवेयुर्यः सदैव विद्याशिक्षावृद्धये प्रयतते स एव सर्वान् दुष्टाँल्लोककण्टकान् दस्य्यादीन्निवार्य्य राज्यं कर्त्तुमर्हति॥ २॥

पदार्थः-हे (**मघवन्**) परम पूजित धनवान् (**इन्द्र**) परमैश्वर्य देने वाले! (**यः**) जो (**ते**) आपका (**शुष्मः**) पुष्कल बलयुक्त व्यवहार (**अस्ति**) है। हे (**पुरुहूत**) बहुतों से प्रशंसा को प्राप्त! जो आपकी (**सखिभ्यः**) मित्रों के लिये वा (**नृभ्यः**) अपने राज्य में नायक मनुष्यों के लिये (**शिक्षा**) सिखावट है। हे (**मघवन्**) बहुधनयुक्त! जो आपके (**दृळ्हा**) दृढ़ शत्रु सैन्यजन हैं उनसे (**विचेताः**) विविध प्रकार वा विशिष्ट बुद्धि जिनकी वह (**त्वम्**) आप (**हि**) (**परिवृतम्**) सब ओर से स्वीकार किये (**राधः**) धन को (**न**) जैसे वैसे दृढ़ शत्रुसेनाजनों को (**अपा, वृधि**) दूर कीजिये॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वही राजा सदा बढ़ता है जो अपराधी मित्रों को भी दण्ड देने के बिना नहीं छोड़ता, जो ऐसा सदैव उत्तम यत्न करता है जिससे कि अपने मित्र उदासीन वा शत्रु अधिक न हों और जो सदैव विद्या और शिक्षा की वृद्धि के लिये प्रयत्न करता है, वही सब दुष्ट और लोककण्टक डाकुओं को निवार के राज्य करने के योग्य होता है॥ २॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रो॒ राजा॒ जग॑तश्चर्षणी॒नामधि॒ क्षमि॒ विषु॑रूपं॒ यदस्ति॑।
ततो॑ ददा॒ति दा॒शुषे॒ वसू॑नि चोदद्रा॒ध उप॑स्तुतश्चिदर्वा॒क्॥ ३॥

इन्द्रः॑। राजा॑। जग॑तः। च॒र्ष॒णी॒नाम्। अधि॑। क्षमि॑। विषु॑ऽरूपम्। यत्। अस्ति॑। ततः॑। द॒दा॒ति॒। दा॒शुषे॑। वसू॑नि। चो॒द॒त्। रा॒धः॑। उप॑ऽस्तुतः। चि॒त्। अ॒र्वा॒क्॥ ३॥

पदार्थः-(**इन्द्रः**) शत्रूणां विदारकः (**राजा**) विद्याविनयाभ्यां प्रकाशमानः (**जगतः**) संसारस्य मध्ये (**चर्षणीनाम्**) मनुष्याणाम् (**अधि**) उपरि (**क्षमि**) पृथिव्याम् (**विषुरूपम्**) व्याप्तस्वरूपम् (**यत्**) (**अस्ति**) (**ततः**) तस्मात् (**ददाति**) (**दाशुषे**) दात्रे (**वसूनि**) धनानि (**चोदत्**) प्रेरयेत् (**राधः**) धनम्

(उपस्तुतः) समीपे प्रशंसितः **(चित्)** इव **(अर्वाक्)** योऽधोऽञ्चति सः॥३॥

अन्वयः-हे मनुष्या! यथा सूर्यो जगतोऽधि क्षमि प्रकाशते तथेन्द्रो राजा चर्षणीनां मध्ये प्रकाशते यदत्र विषुरूपं व्याप्तस्वरूपं धनमस्ति ततो दाशुषे वसूनि ददाति उपस्तुतश्चिदिवार्वाक्सर्वान् राधः प्रति चोदत् स एव राज्यं कर्तुमर्हेत्॥६॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये हि राजादयः सूर्यवद्राष्ट्रे प्रकाशितदण्डाः सुखप्रदातारः सन्ति ते हि सर्वं सुखं प्राप्नुवन्ति॥३॥

पदार्थः-हे मनुष्यो! जैसे सूर्य **(जगतः)** संसार के बीच **(अधि, क्षमि)** पृथिवी पर प्रकाशित होता है, वैसे **(इन्द्रः)** शत्रुओं का विदीर्ण करने वाला **(राजा)** विद्या और नम्रता से प्रकाशमान राजा **(चर्षणीनाम्)** मनुष्यों के बीच प्रकाशित होता **(यत्)** जो **[**जो**]** **(विषुरूपम्)** व्याप्तरूप धन **(अस्ति)** है **(ततः)** उससे **(दाशुषे)** देने वाले के लिये **(वसूनि)** धनों को **(ददाति)** देता और **(उपस्तुतः)** समीप में प्रशंसा को प्राप्त हुए **(चित्)** के समान **(अर्वाक्)** नीचे प्राप्त होने वाला सबको **(राधः)** धन के प्रति **(चोदत्)** प्रेरणा देवे वही राज्य करने के योग्य होता है॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है।[३] जो राजा आदि जन सूर्य के सम्मान राज्य में दण्ड प्रकाश किये और सुख के देने वाले होते हैं, वे ही सब सुख पाते हैं॥३॥

पुनः स राजा कीदृशः स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

नू चि॑न्न इन्द्रो॑ म॒घवा॒ सह॑ूतो दा॒नो वाज॑ं नि यम॑ते न ऊ॒ती।
अनू॑ना यस्य॒ दक्षि॑णा पी॒पाय॑ वा॒मं नृभ्यो॑ अ॒भिवी॑ता॒ सखि॑भ्यः॥४॥

नु। चि॒त्। नः॒। इन्द्रः॑। म॒घऽवा॑। सऽह॑ूतो। दा॒नः॑। वाज॑म्। नि। य॒म॒ते॒। नः॒। ऊ॒ती। अनू॑ना। यस्य॑। दक्षि॑णा। पी॒पाय॑। वा॒मम्। नृऽभ्यः॑। अ॒भिऽवी॑ता। सखि॑ऽभ्यः॥४॥

---

३. संस्कृतभावार्थ में उपमा भी दिया हुआ है।

पदार्थः-(**नु**) क्षिप्रम्। अत्र **ऋचि तनुघे**ति दीर्घः। (**चित्**) अपि (**नः**) अस्मभ्यम् (**इन्द्रः**) विद्युदिव (**मघवा**) बहुधनः (**सहूती**) समानप्रशंसया (**दानः**) यो ददाति (**वाजम्**) धनमन्नं वा (**नि**) नितराम् (**यमते**) यच्छति (**नः**) अस्मान् (**ऊती**) ऊत्या रक्षणाद्यया क्रियया (**अनूना**) पूर्णा यस्य (**दक्षिणा**) (**पीपाय**) वर्धते (**वामम्**) प्रशस्यं कर्म (**नृभ्यः**) मनुष्येभ्यः (**अभिवीता**) अभितस्सर्वतो व्याप्ता अभयाख्या (**सखिभ्यः**) सुहृद्भ्यः॥४॥

अन्वयः-हे मनुष्या! यो मघवा दान इन्द्रो नस्सहूत्यूत्या नो वाजं नि यमते यस्य चित्सखिभ्यो नृभ्योऽनूनाऽभिवीता दक्षिणा वामं पीपाय स सर्वेभ्यो नु क्षिप्रं सुखदो भवति॥४॥

भावार्थः-ये राजादयो जना यथावत्पुरुषार्थेन सर्वान्मनुष्यानधर्मान्निरोध्य धर्मे प्रवर्त्तयित्वाऽभयं जनयन्ति ते प्रशंसनीया जायन्ते॥४॥

पदार्थः-हे मनुष्यो! जो (**मघवा**) बहुत धन युक्त (**दानः**) देने वाला (**इन्द्रः**) बिजुली के समान विद्या में व्याप्तः (**नः**) हम लोगों को (**सहूती**) एकसी प्रशंसा (**ऊत्या**) तथा रक्षा आदि क्रिया से (**नः**) हम लोगों के लिये (**वाजम्**) धन वा अन्न को (**नि, यमते**) निरन्तर देता है (**यस्य**) जिसकी (**चित्**) निश्चित (**सखिभ्यः**) मित्र (**नृभ्यः**) मनुष्यों के लिये (**अनूना**) पूरी (**अभिवीता**) सब ओर से व्याप्त समय (**दक्षिणा**) दक्षिणा और (**वामम्**) प्रशंसा करने योग्य कर्म (**पीपाय**) बढ़ता है वह सब के लिये (**नु**) शीघ्र सुख देने वाला होता है॥४॥

भावार्थः-जो राजा आदि जन यथावत् पुरुषार्थ से सब मनुष्यों को अधर्म से धर्म में प्रवृत्त करा अभय उत्पन्न कराते हैं, वे प्रशंसनीय होते हैं॥४॥

पुना राजप्रजाजनाः परस्परं किं कुर्य्युरित्याह॥

फिर राजा प्रजाजन परस्पर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

नू इ॑न्द्र रा॒ये वरि॑वस्कृधी न॒ आ ते॒ मनो॑ ववृत्याम म॒घाय॑।
गोम॒दश्वा॑व॒द् रथ॑व॒द् व्यन्तो॑ यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥५॥११॥

नु। इ॒न्द्र॒। रा॒ये। वरि॑वः। कृ॒धि॒। न॒ः। आ। ते॒। मन॑ः। व॒वृ॒त्या॒म॒। म॒घाय॑। गोऽम॑त्। अश्व॑ऽवत्। रथ॑ऽवत्। व्यन्त॑ः। यू॒यम्। पा॒त॒। स्व॒स्तऽभि॑ः। सदा॑। न॒ः॥५॥

पदार्थः-(**नु**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**इन्द्र**) धनोन्नतये प्रेरक (**राये**) धनाय (**वरिवः**) परिचरणम् (**कृधि**) कुरु। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**नः**) अस्माकमस्मभ्यं वा (**आ**) (**ते**) तव (**मनः**) चित्तम् (**ववृत्याम**) वर्त्तयेम (**मघाय**) धनाय (**गोमत्**) बहुगवादियुक्तम् (**अश्वावत्**) बह्वश्वसहितम् (**रथवत्**) प्रशस्तरथादियुक्तम् (**व्यन्तः**) प्राप्नुवन्तः (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥५॥

अन्वयः-हे इन्द्र! त्वं राये नो वरिवस्कृधि यत्ते मनोऽस्ति तन्मघाय वयं न्वाववृत्याम। गोमदश्वावद् रथवद् व्यन्तो यूयं स्वस्तिभिर्नः सदा पात॥१५॥

भावार्थः-हे राजन्! यथा वयं भवन्तं राज्योन्नतये प्रवर्त्तयेम तथा त्वमस्मान् धनप्राप्ये प्रवर्त्तय। सर्वे

भवन्तः परमैश्वर्यं प्राप्यास्माकं रक्षणे सततं प्रयतन्तामिति॥५॥

अत्रेन्द्रसेनेशराजोपदेशकदातृरक्षकप्रवर्त्तकगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तविंशतितमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे **(इन्द्र)** धन की उन्नति के लिये प्रेरणा देने वाले! आप **(राये)** धन के लिये **(नः)** हमारी **(वरिवः)** सेवा **(कृधि)** करो जो **(ते)** आप का **(मनः)** चित् है उसको **(मघाय)** धन के लिये हम लोग **(नु)** शीघ्र **(आ, ववृत्याम)** सब ओर से वर्तें **(गोमत्)** बहुत गो आदि वा **(अश्वावत्)** बहुत घोड़ों से युक्त वा **(रथवत्)** प्रशंसित रथ आदि युक्त धन को **(व्यन्तः)** प्राप्त होते हुए **(यूयम्)** तुम लोग **(स्वस्तिभिः)** उत्तम सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदा **(पात)** रक्षा करो॥५॥

भावार्थः-हे राजा! जैसे हम लोग आपको राज्य की उन्नति के लिये प्रवृत्त करावें, वैसे हम लोगों को धन प्राप्ति के लिये प्रवृत्त कराओ। सब आप लोग परमैश्वर्य्य को प्राप्त होकर हमारी रक्षा में निरन्तर प्रयत्न करो॥५॥

इस सूक्त में इन्द्र, सेनापति, राजा, दाता, रक्षा करने वाले और प्रवृत्ति कराने वाले के गुणों का और कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह सत्ताईसवां सूक्त और ग्यारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्याष्टविंशतितमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १, २, ५ निचृत्त्रिष्टुप् छन्दः। धैवतस्स्वरः। ३ भुरिक्पङ्क्तिः। ४ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ स राजा किं कुर्यादित्याह॥

अब पांच ऋचा वाले अट्ठाईसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में वह राजा क्या करे, इस विषय को कहते हैं॥

ब्रह्मा॑ ण इन्द्रोप॑ याहि वि॒द्वान॒र्वाञ्च॑स्ते हर॑यः सन्तु यु॒क्ताः।
विश्वे॑ चि॒द्धि त्वा॑ वि॒हव॑न्त॒ मर्ता॑ अ॒स्माक॒मिच्छृ॑णुहि विश्वमिन्व॥ १॥

ब्रह्म॑। न॒ः। इ॒न्द्र॒। उप॑। या॒हि॒। वि॒द्वान्। अ॒र्वाञ्च॑ः। ते॒। हर॑यः। स॒न्तु॒। युक्ताः। विश्वे॑। चि॒त्। हि। त्वा॒। वि॒ऽहव॑न्त। मर्ता॑ः। अ॒स्माक॑म्। इत्। शृ॒णु॒हि॒। वि॒श्व॒म्ऽइ॒न्व॒॥ १॥

पदार्थः-(**ब्रह्म**) धनमन्नं वा। अत्र च **संहितायामि**ति दीर्घः। (**नः**) अस्मान् (**इन्द्र**) परमैश्वर्यविद्याप्रापक (**उप**) (**याहि**) (**विद्वान्**) (**अर्वाञ्चः**) येऽर्वागधोऽञ्चन्ति (**ते**) तव (**हरयः**) मनुष्याः। अत्र **वाच्छन्दसी**ति रोः स्थान उकारादेशः। (**सन्तु**) (**युक्ताः**) कृतयोगाः (**विश्वे**) सर्वे (**चित्**) (**हि**) (**त्वा**) त्वाम् (**विहवन्त**) विशेषेणाऽऽहूयन्ति (**मर्ताः**) मनुष्याः (**अस्माकम्**) (**इत्**) एव (**शृणुहि**) शृणु (**विश्वमिन्व**) यो विश्वं मिनोति तत्सम्बुद्धौ॥ १॥

अन्वयः-हे विश्वमिन्वेन्द्र विद्वांस्त्वं नो ब्रह्मोप याहि यस्य तेऽर्वाञ्चो हरयो युक्ताः सन्तु ये चिद्धि विश्वे मर्त्तास्त्वा वि हवन्त तैस्सहाऽस्माकं वाक्यमिच्छृणुहि॥ १॥

भावार्थः-ये मनुष्याः सत्यं न्यायवृत्त्या राज्यभक्ताः स्युस्ते राज्ये सत्कृताः सन्तो निवसन्तु॥ १॥

पदार्थः-हे (**विश्वमिन्व**) सब को फेंकने वा (**इन्द्र**) परमैश्वर्य्य और विद्या की प्राप्ति कराने वाले (**विद्वान्**) विद्यावान्! आप (**नः**) हम लोगों को (**ब्रह्म**) धन वा अन्न (**उप, याहि**) प्राप्त कराओ जिन (**ते**) आपके (**अर्वाञ्चः**) नीचे को जाने वाले (**हरयः**) मनुष्य (**युक्ताः**) किये योग (**सन्तु**) हों (**चित्**) और जो (**हि**) ही (**विश्वे**) सब (**मर्त्ताः**) मनुष्य (**त्वा**) आपको (**वि, हवन्त**) विशेषता से बुलाते हैं, उनके साथ (**अस्माकम्**) हमारे वाक्य को (**इत्**) ही (**शृणुहि**) सुनिये॥ १॥

भावार्थः-जो मनुष्य सत्य न्यायवृत्ति से राज्य भक्त हों, वे राज्य में सत्कार किये हुए निरन्तर बसें॥ १॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

हव॑ं त इन्द्र महि॒मा व्या॑न॒ड् ब्रह्म॒ यत्पासि॑ शवसि॒न्नृषी॑णाम्।
आ यद्व॒ज्रं द॑धि॒षे हस्त॑ उग्र घो॒रः सन् क्रत्वा॑ जनिष्ठा॒ अषा॑ळ्हाः॥ २॥

हव॑म्। ते॒। इ॒न्द्र॒। म॒हि॒मा। वि। आ॒न॒ट्। ब्रह्म॑। यत्। पासि॑। श॒व॒सि॒न्। ऋषी॑णाम्। आ। यत्। व॒ज्र॑म्। द॒धि॒षे। हस्ते॑। उ॒ग्र॒। घो॒रः। सन्। क्रत्वा॑। ज॒नि॒ष्ठाः। अषा॑ळ्हाः॥ २॥

पदार्थः-(**हवम्**) प्रशंसनीयं वाग्व्यवहारम् (**ते**) तव (**इन्द्र**) दुष्ट विदारक (**महिमा**) प्रशंसा समूहः (**वि**) विशेषेण (**आनट्**) अश्नोति व्याप्नोति (**ब्रह्म**) धनम् (**यत्**) यः (**पासि**) (**शवसिन्**) बहुविधं शवो बलं विद्यते यस्य तत्सम्बुद्धौ (**ऋषीणाम्**) वेदार्थविदाम् (**आ**) (**यत्**) यम् (**वज्रम्**) (**दधिषे**) दधसि (**हस्ते**) करे (**उग्र**) तेजस्विस्वभाव (**घोरः**) यो हन्ति सः (**सन्**) (**क्रत्वा**) प्रज्ञया कर्मणा वा (**जनिष्ठाः**) जनय (**अषाळ्हाः**) असोढव्याः शत्रुसेनाः॥२॥

अन्वयः-हे शवसिन्नुग्रेन्द्र! यद्यन्ते महिमा हवं ब्रह्म व्यानड् येन त्वमृषीणां हवं पासि यद्यं वज्रं हस्ते आ दधिषे घोरः सन् क्रत्वाऽषाळ्हो जनिष्ठाः स त्वमस्माभिः सत्कर्त्तव्योऽसि॥२॥

भावार्थः-हे मनुष्या! यः शस्त्राऽस्त्रप्रयोगकर्त्ता धनुर्वेदादिशास्त्रवित्प्रशस्तसनो भवेद्यस्य पुण्या कीर्तिर्वर्त्तेत स एव शत्रुहनने प्रजापालने समर्थो भवति॥२॥

पदार्थः-हे (**शवसिन्**) बहुत प्रकार के बल और (**उग्र**) तेजस्वी स्वभाव युक्त (**इन्द्र**) दुष्टों के विदारने वाला राजा! (**यत्**) जो (**ते**) आप का (**महिमा**) प्रशंसा समूह (**हवम्**) प्रशंसनीय वाणियों के व्यवहार को और (**ब्रह्म**) धन को (**व्यानट्**) व्याप्त होता है तथा आप (**ऋषीणाम्**) वेदार्थवेत्ताओं के **[(हवम्)]** प्रशंसनीय वाणी व्यवहार की (**पासि**) रक्षा करते हो और (**यत्**) जिस (**वज्रम्**) शस्त्रसमूह को (**हस्ते**) हाथ में (**आ, दधिषे**) अच्छे प्रकार धारण करते हो और (**घोरः**) मारने वाले (**सन्**) होकर (**क्रत्वा**) प्रज्ञा वा कर्म से (**अषाळ्हाः**) न सहने योग्य शत्रु सेनाओं को (**जनिष्ठाः**) प्रगट करो अर्थात् ढिठाई उन की दूर करो सो तुम हम लोगों से सत्कार पाने योग्य हो॥२॥

भावार्थः-हे मनुष्यो! जो शस्त्र और अस्त्रों के प्रयोगों का करने धनुर्वेदादिशाओं का जानने और प्रशंसायुक्त सेना वाला हो और जिस की पुण्यरूपी कीर्त्ति वर्त्तमान है, वही शत्रुओं के मारने और प्रजाजनों के पालने में समर्थ होता है॥२॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

तव॒ प्रणी॑तीन्द्र॒ जोहु॑वान॒न्त्सं यन्नृ॒न्न रोद॑सी नि॒नेथ॑।
म॒हे क्ष॒त्राय॒ शव॑से॒ हि ज॒ज्ञेऽतू॑तुजि॒ चित्तू॑तुजिरशिश्नत्॥३॥

तव॑। प्रऽनी॑ती। इ॒न्द्र॒। जोहु॑वानान्। सम्। यत्। नॄ॒न्। न। रोद॑सी इति॑। नि॒नेथ॑। म॒हे। क्ष॒त्राय॑। शव॑से। हि। ज॒ज्ञे। अतू॑तुजिम्। चि॒त्। तूतु॑जिः। अ॒शि॒श्न॒त्॥३॥

पदार्थः-(**तव**) (**प्रणीती**) प्रकृष्टनीत्या (**इन्द्र**) परमैश्वर्ययुक्त (**जोहुवानान्**) भृशमाहूयमानान् (**सम्**) (**यत्**) (**नॄन्**) नायकान् (**न**) इव (**रोदसी**) द्यावापृथिव्यौ (**निनेथ**) नयसि (**महे**) (**क्षत्राय**) राज्याय धनाय वा (**शवसे**) बलाय (**हि**) यतः (**जज्ञे**) जायते (**अतूतुजिम्**) भृशमहिंस्रम् (**चित्**) अपि (**तूतुजिः**) बलवान् (**अशिश्नत्**) हिनस्ति॥३॥

अन्वयः-हे इन्द्र! हि त्वं महे क्षत्राय शवसे जज्ञे तूतुजिः सन् हिंस्राँश्चिद्धवानशिश्नद्यज्जोहुवानान् नॄनतूतुजिं रोदसी न त्वं सन्निनेथ तस्य तव प्रणीती सह वयं राज्य पालयेम॥३॥

भावार्थः-अत्रोपमालङ्कारः। ये राजपुरुषाः सूर्यपृथिवीवत् सर्वाः प्रजा धृत्वा धर्मं नयेयुस्ते नीतिज्ञा वेदितव्याः॥३॥

पदार्थः-हे **(इन्द्र)** परमैश्वर्ययुक्त! **(हि)** जिस कारण आप **(महे)** महान् **(क्षत्राय)** राज्य धन और **(शवसे)** बल के लिये **(जज्ञे)** उत्पन्न होते **(तूतुजिः)** बलवान् होते हुए हिंसक लोगों को **(चित्)** भी आप **(अशिश्नत्)** मारते और **(यत्)** जो **(जोहुवानान्)** निरन्तर बुलाये हुए **(नॄन्)** जन और **(अतूतुजिम्)** निरन्तर न हिंसा करने वाले को **(रोदसी)** आकाश और पृथिवी के **(न)** समान आप **(सम्, निनेथ)** अच्छे प्रकार पहुँचाते हो उन **(तव)** आप की **(प्रणीती)** उत्तम नीति के साथ हम लोग राज्य पालें॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो राजपुरुष सूर्य और पृथिवी के समान समस्त प्रजाजनों को धारण कर धर्म को पहुँचावें, वे नीति जानने वाले समझने चाहियें॥३॥

पुनर्मनुष्यैः कथं वर्तितव्यमित्याह॥

फिर मनुष्यों को कैसे वर्त्तना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

एभिर्नो इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवन्ते।
प्रति यच्चष्टे अनृतमनेना अवा द्विता वरुणो मायी नः सात्॥४॥

एभिः। नः। इन्द्र। अहऽभिः। दशस्य। दुःऽमित्रासः। हि। क्षितयः। पवन्ते। प्रति। यत्। चष्टे। अनृतम्। अनेनाः। अव। द्विता। वरुणः। मायी। नः। सात्॥४॥

पदार्थः-(**एभिः**) वर्त्तमानैः **(नः)** अस्मान् **(इन्द्र)** दोषविदारक **(अहभिः)** दिवसैस्सह **(दशस्य)** देहि **(दुर्मित्रासः)** दुष्टानि तानि मित्राणि **(हि)** **(क्षितयः)** मनुष्याः **(पवन्ते)** पवित्रा भवन्ति **(प्रति)** **(यत्)** **(चष्टे)** वदति **(अनृतम्)** मिथ्याभाषणम् **(अनेनाः)** निष्पापः **(अव)** **(द्विता)** द्वयोर्भावः **(वरुणः)** वरणीयः **(मायी)** उत्तमा प्रज्ञा विद्यते यस्य सः **(नः)** अस्मान् **(सात्)** निश्चिनुयात्॥४॥

अन्वयः-हे इन्द्र! येऽनृतं वदन्ति ते दुर्मित्रासः सन्ति यो हि क्षितयः सत्यं वदन्ति त एभिरहभिः पवन्त एतैः स त्वं नो दशस्यानेना भवान् यत्प्रति चष्टे द्विता वरुणो मायी सन् नः सत्यमव सात्॥४॥

भावार्थः-हे मनुष्या! येऽत्राऽसत्यं वदन्ति तेऽधर्मात्मानो ये सत्यं ब्रुवन्ति ते धार्मिका इति निश्चिन्वन्तु॥४॥

पदार्थः-हे **(इन्द्र)** दोषों के विदीर्ण करने वाले! जो **(अनृतम्)** झूंठ कहते हैं वे **(दुर्मित्रासः)** दुष्ट मित्र हैं और जो **(हि)** निश्चित **(क्षितयः)** मनुष्य सत्य कहते हैं वे **(एभिः)** इन वर्त्तमान **(अहभिः)** दिवसों के साथ **(पवन्ते)** पवित्र होते हैं इनके साथ आप **(नः)** हम लोगों को **(दशस्य)** दीजिये और **(अनेनाः)** निष्पाप आप **(यत्)** जिसके **(प्रति)** प्रति **(चष्टे)** कहते हैं **(द्विता)** तथा दो का होना **(वरुणः)** जो स्वीकार करने योग्य वह और **(मायी)** उत्तम बुद्धिमान् होता हुआ जन **(नः)** हम लोगों को सत्य का **(अव, सात्)** निश्चय कर देवे॥४॥

भावार्थः-हे मनुष्यो! जो यहाँ झूंठ कहते हैं, वे अधर्मात्मा पुरुष हैं और जो सत्य कहते हैं वे

धर्मात्मा हैं, ऐसा निश्चय करो॥५॥

पुनर्विद्वांसः किमुपदिशेयुरित्याह॥

फिर विद्वान् जन क्या उपदेश करें, इस विषय को अगले मन्त्र में कहते हैं॥

वो॒चेमेदिन्द्रं॑ म॒घवा॑नमेनं म॒हो रा॒यो राध॑सो॒ यद्ददन्नः।
यो अर्च॑तो॒ ब्रह्म॑कृ॒तिमवि॑ष्ठो यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः॥५॥१२॥

वो॒चेम॑। इत्। इन्द्र॑म्। म॒घऽवा॑नम्। ए॒न॒म्। म॒हः। रा॒यः। राध॑सः। यत्। दद॑त्। न॒ः। यः। अर्च॑तः। ब्रह्म॑ऽकृतिम्। अवि॑ष्ठः। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑ः। सदा॑। न॒ः॥५॥

पदार्थः-(**वोचेम**) उपदिशेम (**इत्**) (**इन्द्रम्**) दुष्टशत्रुविदारकम् (**मघवानम्**) परमैश्वर्यवन्तम् (**एनम्**) (**महः**) महतः (**रायः**) धनस्य (**राधसः**) समृद्धस्य (**यत्**) (**ददत्**) दद्यात् (**नः**) अस्मान् (**यः**) (**अर्चतः**) सत्कुर्वतः (**ब्रह्मकृतिम्**) ब्रह्मणो धनस्य कृतिः क्रिया यस्य तम् (**अविष्ठः**) अतिशयेन यविता (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥५॥

अन्वयः-हे विद्वांसो! योऽर्चतो नो महो राधसो रायोऽविष्ठो ब्रह्मकृतिमेनं मघवानमिन्द्रं यद्ददत्तमिद्वयं वोचेम यूयं स्वस्तिभिर्नः सदा पात॥५॥

भावार्थः-हे विद्वांसो! यथा वयं राजादीन् मनुष्यान् प्रति सत्यं सर्वदोपदिशेम तथा यूयमप्युपदिशतैवं परस्परेषां रक्षां विधायोन्नतिर्विधेयेति॥५॥

अत्रेन्द्रविद्वद्राजगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्तेन सह सङ्गतिर्वेद्या॥

इत्यष्टाविंशतितमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! (**यः**) जो (**अर्चतः**) सत्कार करते हुए (**नः**) हम लोगों के (**महः**) महान् (**राधसः**) समृद्ध (**रायः**) धन सम्बन्ध के (**अविष्ठः**) प्राप्त होने वाला (**ब्रह्मकृतिम्**) जिसके धन की क्रिया हैं (**एनम्**) इस (**मघवानम्**) परमैश्वर्यवान् (**इन्द्रम्**) दुष्ट शत्रुओं के विदीर्ण करने वाले को (**यत्**) जो (**ददत्**) देवें (**इत्**) उसी को हम लोग (**वोचेम**) कहें (**यूयम्**) तुम लोग (**स्वस्तिभिः**) सुखों से (**नः**) हमारी (**सदा**) सर्वदैव (**पात**) रक्षा करो॥५॥

भावार्थः-हे विद्वानो! जैसे हम लोग राजा आदि मनुष्यों के प्रति सत्य का सर्वदा उपदेश करें, वैसे तुम भी उपदेश करो, ऐसे परस्पर की रक्षा कर उन्नति विधान करनी चाहिये॥५॥

इस सूक्त में इन्द्र, विद्वान्, राजगुणों और कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अट्ठाईसवां सूक्त और बारहवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्यैकोनत्रिंशत्तमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १ स्वराट्पङ्क्तिः। ३ पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २ विराट् त्रिष्टुप्। ४, ५ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ कस्मै को निर्मातव्य इत्याह॥

अब पांच ऋचा वाले उनतीसवें सूक्त का आरम्भ है, इसके प्रथम मन्त्र में किसको कौन बनाना चाहिये, इस विषय को कहते हैं॥

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः।
पिबा त्वस्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः॥ १॥

अयम्। सोमः। इन्द्र। तुभ्यम्। सुन्वे। आ। तु। प्र। याहि। हरिऽवः। तत्ऽओकाः। पिब। तु। अस्य। सुऽसुतस्य। चारोः। ददः। मघानि। मघऽवन्। इयानः॥ १॥

पदार्थः-(**अयम्**) (**सोमः**) ओषधिरसः (**इन्द्र**) दारिद्र्यविदारक (**तुभ्यम्**) (**सुन्वे**) (**आ**) (**तु**) (**प्र**) (**याहि**) गच्छ (**हरिवः**) प्रशस्तैर्मनुष्यैर्युक्त (**तदोकाः**) तच्छ्रेष्ठमोको गृहं यस्य सः (**पिब**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**तु**) (**अस्य**) (**सुषुतस्य**) सुष्ठु निमित्तस्य (**चारोः**) सुन्दरस्य (**ददः**) देहि (**मघानि**) धनानि (**मघवन्**) बहुधनयुक्त (**इयानः**) प्राप्नुवन्॥ १॥

अन्वयः-हे मघवन् हरिव इन्द्र! योऽयं सोमोऽस्ति यमहं तु तुभ्यं प्र सुन्वे तं त्वं पिब तदोकाः सन्नायाहि अस्य सुषुतस्य चारोस्तु मघवनीयान अस्मभ्यं ददः॥ १॥

भावार्थः-ये मनुष्या वैद्यकशास्त्ररीत्या निष्पादितं सर्वरोगहरं बुद्धिबलप्रदं महौषधिरसं पिबन्ति ते सुखैश्वर्यमाप्नुवन्ति॥ १॥

पदार्थः-हे (**मघवन्**) बहुधन और (**हरिवः**) प्रशस्त मनुष्ययुक्त (**इन्द्र**) दारिद्र्य विनाशने वाले! जो (**अयम्**) यह (**सोमः**) ओषधियों का रस है जिसको मैं (**तु**) तो (**तुभ्यम्**) तुम्हारे लिये (**प्र, सुन्वे**) खींचता हूँ उसको तुम (**पिब**) पीओ (**तदोकाः**) वह श्रेष्ठ गृह जिसका है ऐसे होते हुए (**आ, याहि**) आओ (**अस्य**) इस (**सुषुतस्य**) सुन्दर निर्माण किये और (**चारोः**) सुन्दर जन के (**मघानि**) धनों को (**इयानः**) प्राप्त होते हुए हमारे लिये (**ददः**) देओ॥ १॥

भावार्थः-जो मनुष्य वैद्यकशास्त्र की रीति से उत्पन्न किये हुए सर्वरोग हरने और बुद्धि बल के देने वाले, बड़ी-बड़ी ओषधियों के रस को पीते हैं, वे सुख और ऐश्वर्य पाते हैं॥ १॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

ब्रह्मन् वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम्।
अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः॥ २॥

ब्रह्मन्। वीर। ब्रह्मऽकृतिम्। जुषाणः। अर्वाचीनः। हरिऽभिः। याहि। तूयम्। अस्मिन्। ऊँ इति। सु। सवने। मादयस्व। उप। ब्रह्माणि। शृणवः। इमा। नः॥ २॥

पदार्थः-(**ब्रह्मन्**) चतुर्वेदवित् (**वीर**) सकलशुभगुणव्यापिन् (**ब्रह्मकृतिम्**) ब्रह्मणः परमेश्वरस्य कृतिं संसारम् (**जुषाणः**) सेवमानः (**अर्वाचीनः**) इदानीन्तनः (**हरिभिः**) सद्गुणकर्षकैर्मनुष्यैस्सह (**याहि**) (**तूयम्**) शीघ्रम्। **तूयमिति क्षिप्रनाम।** (निघं०२.१५) (**अस्मिन्**) (**उ**) (**सु**) (**सवने**) सुन्वन्ति निष्पादयन्ति येन कर्मणा तस्मिन् (**मादयस्व**) आनन्दयस्व (**उप**) (**ब्रह्माणि**) अधीतानि वेदवचांसि (**शृणवः**) शृणु (**इमा**) इमानि (**नः**) अस्माकम्॥२॥

अन्वयः-हे ब्रह्मन् वीर! ब्रह्मकृतिं जुषाणोऽर्वाचीनस्त्वं हरिभिस्सह तूयं याहि अस्मिन् सवनेऽस्मान् नु मादयस्व न इमा ब्रह्माणि सूप शृणवः॥२॥

भावार्थः-हे विद्वन्! त्वं सृष्टिक्रमं विज्ञायास्मान् प्रबोधयास्मिन्नध्यापनाऽध्ययने कर्मण्यस्माकमधीतं परीक्ष्य विद्याप्रदानेन सर्वान् सद्यः प्रमोदय॥२॥

पदार्थः-हे (**ब्रह्मन्**) चार वेदों के जानने वाले (**वीर**) समस्त शुभगुणों में व्याप्त! (**ब्रह्मकृतिम्**) परमेश्वर की कृति जो संसार इसको (**जुषाणः**) सेवते हुए (**अर्वाचीनः**) वर्त्तमान समय में प्रसिद्ध हुए आप (**हरिभिः**) अच्छे गुणों के आकर्षण करने वाले मनुष्यों के साथ (**तूयम्**) शीघ्र (**याहि**) जाओ (**अस्मिन्**) इस (**सवने**) सवन में अर्थात् जिस कर्म से पदार्थों को सिद्ध करते हैं उसमें हम लोगों को (**मादयस्व**) आनन्दित कीजिये (**नः**) हमारे (**इमा**) इन (**ब्रह्माणि**) पढ़े हुए वेदवचनों को (**सु, उ, उप, शृणवः**) उत्तम प्रकार तर्क-वितर्क से समीप में सुनिये॥२॥

भावार्थः-हे विद्वन्! आप सृष्टि के क्रम को जान कर हमको जतलाओ, इसमें पढ़ाना पढ़ना काम और पढ़े हुए की परीक्षा करो और विद्यादान से शीघ्र प्रमोद देओ॥२॥

केऽध्यापकाऽध्येतारः परीक्षकाः प्रशंसनीया इत्याह॥

कौन पढ़ाने और पढ़ने वाले प्रशंसा करने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

का ते॑ अ॒स्त्यर॑ङ्कृतिः सू॒क्तैः कु॒दा नू॒नं ते॑ मघवन् दाशेम।
विश्वा॑ म॒तीरा त॑तने त्वा॒याधा॑ म इन्द्र शृ॒णवो॒ हवे॒मा॥३॥

का। ते॒। अ॒स्ति॒। अर॑म्ऽकृतिः। सु॒ऽउ॒क्तैः। कु॒दा। नू॒नम्। ते॒। म॒घ॒ऽव॒न्। दा॒शे॒म॒। विश्वा॑ः। म॒तीः। आ। त॒त॒ने॒। त्वा॒ऽया। अध॑। मे॒। इ॒न्द्र॒। शृ॒ण॒वः॒। हवा॑। इ॒मा॥३॥

पदार्थः-(**का**) (**ते**) तव (**अस्ति**) (**अरङ्कृतिः**) अलङ्कारः (**सूक्तैः**) सुष्ठूक्तार्थैर्वेदवचोभिः (**कदा**) (**नूनम्**) निश्चितम् (**ते**) तुभ्यम् (**मघवन्**) (**दाशेम**) दद्याम (**विश्वाः**) अखिलाः (**मतीः**) प्रज्ञाः (**आ**) (**ततने**) विस्तृणीयाम् (**त्वाया**) त्वदीयया (**अध**) अथ। अत्र **निपातस्य चे**ति दीर्घः। (**मे**) मम (**इन्द्र**) विद्यैश्वर्यसम्पन्न (**शृणवः**) शृणु (**हवा**) हवानि श्रुतानि (**इमा**) इमानि॥३॥

अन्वयः-हे मघवन्निन्द्र! का तेऽरङ्कृतिरस्ति सूक्तैस्ते नूनं विश्वा मतीर्वयं कदा दाशेम त्वायाऽहमा ततनेऽध त्वं मे ममेमा हवा शृणवः॥३॥

भावार्थः-तेऽध्यापकाः श्रेष्ठा भवन्ति य इमान् स्वकीयान् विद्यार्थिनः कदा विद्वांसः करिष्यामेतीच्छन्ति सर्वेभ्यः सत्यानि प्रज्ञानानि प्रयच्छन्ति त एव विद्यार्थिनः श्रेष्ठाः सन्ति य उत्साहेन

स्वाधीतस्योत्तमास्परीक्षां प्रददति त एव परीक्षकाः श्रेष्ठाः सन्ति ये परीक्षायां कस्यापि पक्षपातं न कुर्वन्ति॥३॥

पदार्थः-हे **(मघवन्)** बहुधनयुक्त **(इन्द्र)** विद्या और ऐश्वर्य्य सम्पन्न! **(का)** कौन **(ते)** आपका **(अरङ्कृतिः)** अलङ्कार **(अस्ति)** है **(सूक्तैः)** और अच्छे प्रकार कहा है अर्थ जिनका उन वेद-वचनों से **(ते)** आपको **(नूनम्)** निश्चित **(विश्वाः)** सब **(मतीः)** बुद्धियों को हम लोग **(कदा)** कब **(दाशेम)** देवें **(त्वाया)** आपकी बुद्धि से मैं **(आ, ततने)** विस्तार करूं **(अध)** इसके अनन्तर आप **(मे)** मेरे **(इमा)** इन **(हवा)** सुने वाक्यों को **(शृणवः)** सुनो॥९॥

भावार्थः-वे अध्यापक श्रेष्ठ होते हैं जो इन अपने विद्यार्थियों को कब विद्वान् करें ऐसी इच्छा करते हैं और सब के लिये सत्य उत्तम ज्ञानों को देते हैं और वे ही विद्यार्थी श्रेष्ठ हैं जो उत्साह से अपने पढ़े हुए की उत्तम परीक्षा देते हैं तथा वे ही परीक्षा करने वाले श्रेष्ठ हैं जो परीक्षा में किसी का पक्षपात नहीं करते हैं॥३॥

केऽध्यापका वरतमाः सन्तीत्याह॥

कौन पढ़ाने वाले अतिश्रेष्ठ हैं, इस विषय को अगले मन्त्र में कहते हैं

उतो घा ते पुरुष्या३ इदासन् येषां पूर्वेषामशृणोॠषीणाम्।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव॥४॥

उतो इति। घ। ते। पुरुष्याः। इत्। आसन्। येषाम्। पूर्वेषाम्। अशृणोः। ऋषीणाम्। अध। अहम्। त्वा। मघऽवन्। जोहवीमि। त्वम्। नः। इन्द्र। असि। प्रऽमतिः। पिताऽइव॥४॥

पदार्थः-(**उतो**) अपि **(घ)** एव। अत्र **ऋचि तुनुघे**ति दीर्घः। **(ते)** **(पुरुष्याः)** पुरुषेषु साधवः **(इत्)** एव **(आसन्)** भवन्ति **(येषाम्)** **(पूर्वेषाम्)** पूर्वमधीतविद्यानाम् **(अशृणोः)** शृणुयाः **(ऋषीणाम्)** वेदार्थशब्दसम्बन्धविदाम् **(अध)** अथ **(अहम्)** **(त्वा)** त्वाम् **(मघवन्)** विद्यैश्वर्यसम्पन्न **(जोहवीमि)** भृशं प्रशंसामि **(त्वम्)** **(नः)** अस्माकम् **(इन्द्र)** विद्यैश्वर्यप्रद **(असि)** **(प्रमतिः)** प्रकृष्टप्रज्ञः **(पितेव)** जनकवत्॥४॥

अन्वयः-हे मघवन्निन्द्र! यस्त्वं येषां पूर्वेषामृषीणां सकाशाद्वेदानशृणोरुतो ये पुरुष्या घासँस्ते नोऽस्माकमध्यापकाः सन्तु यतस्त्वं नोऽस्माकं पितेव प्रमतिरसि तस्मादधाहं त्वेज्जोहवीमि॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये विद्वांसः पितरः पुत्रानिव विद्यार्थिनः पालयन्ति त एव सत्कर्तव्याः प्रशंसनीया भवन्ति॥४॥

पदार्थः-हे **(मघवन्)** विद्या ऐश्वर्य से सम्पन्न **(इन्द्र)** विद्या ऐश्वर्य देने वाले विद्वान्! जो आप **(येषाम्)** जिन **(पूर्वेषाम्)** पहिले जिन्होंने विद्या पढ़ी उन **(ऋषीणाम्)** ऋषिजनों से वेदों को **(अशृणोः)** सुनो **(उतो)** और जो **(पुरुष्षाः)** पुरुषों में सत्पुरुष **(घा)** ही **(आसन्)** होते हैं **(ते)** वे **(नः)** हमारे अध्यापक हों जिससे **(त्वम्)** आप हमारे **(पितेव)** पिता के समान **(प्रमतिः)** उत्तम बुद्धि वाले **(असि)** हैं इससे **(अध)** इसके अनन्तर **(अहम्)** मैं **(त्वा)** आपकी **(इत्)** ही **(जोहवीमि)** निरन्तर प्रशंसा करूं॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् पितृजन पुत्रों के समान विद्यार्थियों की पालना करते हैं, वे ही सत्कार करने और प्रशंसा करने योग्य होते हैं॥४॥

पुनः केऽत्र सर्वेषां रक्षकाः सन्तीत्याह॥

फिर कौन यहाँ संसार में सब की रक्षा करने वाले होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः॥५॥१३॥

वोचेम। इत्। इन्द्रम्। मघऽवानम्। एनम्। महः। रायः। राधसः। यत्। ददत्। नः। यः। अर्चतः। ब्रह्मऽकृतिम्। अविष्ठः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥५॥

पदार्थः-(**वोचेम**) वदेम (**इत्**) इव (**इन्द्रम्**) अविद्यान्धकारविदारकमध्यापकम् (**मघवानम्**) प्रशस्तविद्याधनवन्तम् (**एनम्**) (**महः**) महतः (**रायः**) विद्याधनस्य (**राधसः**) शरीरात्मबलवर्धकस्य (**यत्**) यम् (**ददत्**) दद्यात् (**नः**) अस्मभ्यम् (**यः**) (**अर्चतः**) सत्कृतस्य (**ब्रह्मकृतिम्**) वेदोक्तां सत्यक्रियाम् (**अविष्ठः**) अतिशयेन रक्षकः (**यूयम्**) विद्यावृद्धाः (**पात**) (**स्वस्तिभिः**) सुशिक्षाभिः (**सदा**) (**नः**) (**अस्मान्**)॥५॥

अन्वयः-हे विद्वांसो! यूयं स्वस्तिभिर्नः सदा पात हे परीक्षक! योऽविष्ठो ब्रह्मकृतिं नो ददद्यद्यमर्चतो महो राधसो रायः प्रदातारमेनं मघवानमिन्द्रम् [इत्] वयं वोचेम तं यूयमपि प्रशंसत॥५॥

भावार्थः-येऽक्षयस्य सर्वत्र सत्कारहेतोर्विद्याधनस्य दातारः सन्ति त एव सर्वेषां यथावत्पालका वर्त्तन्त इति॥५॥

अत्रेन्द्रसोमपानाध्यापकाऽध्येतृपरीक्षकविद्यादातृगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनत्रिंशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् जनो (**यूयम्**) विद्यावृद्ध तुम (**स्वस्तिभिः**) उत्तम शिक्षाओं से (**नः**) हम लोगों की (**सदा**) सदा (**पात**) रक्षा करो। हे परीक्षा करने वाले! (**यः**) जो (**अविष्ठः**) अतीव रक्षा करने वाला (**ब्रह्मकृतिम्**) वेदोक्त सत्य क्रिया को (**नः**) हम लोगों के लिये (**ददत्**) देवे वा (**यत्**) जिसको (**अर्चतः**) सत्कार किये हुए जन का (**महः**) महान् (**राधसः**) शरीर और आत्मा के बल का बढ़ाने वाला (**रायः**) विद्यारूपी धन का उत्तम प्रकार से देने वाले (**एनम्**) इस (**मघवानम्**) प्रशस्त

विद्या धनयुक्त **(इन्द्रम्, इत्)** अविद्यान्धकार विदीर्ण करने वाले अध्यापक की हम लोग **(वोचेम)** प्रशंसा कहें, उसकी तुम भी प्रशंसा करो॥५॥

भावार्थः-जो जन नाश न होने वाले सर्वत्र सत्कार के हेतु विद्याधन के देने वाले हैं, वे ही सबके यथावत् पालने वाले हैं॥५॥

इस सूक्त में इन्द्र, सोमपान, अध्यापक, अध्येता, परीक्षक और विद्या देने वालों के गुण और कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥५॥

यह उनतीसवां सूक्त और तेरहवां वर्ग समाप्त हुआ॥

अथा पञ्चर्चस्य त्रिंशत्तमस्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। १ विराट् त्रिष्टुप्। २ निचृत्त्रिष्टुप्छन्दः। धैवतः स्वरः। ३ निचृत्पङ्क्तिः। ४, ५ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ को राजा प्रशंसनीयो भवतीत्याह॥

अब पांच ऋचा वाले तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में कौन राजा प्रशंसा करने योग्य होता है, इस विषय को कहते हैं॥

आ नो॑ देव॒ शव॑सा याहि शुष्मि॒न् भवा॑ वृध इ॑न्द्र रा॒यो अ॒स्य।
म॒हे नृ॒म्णाय॑ नृपते सुवज्र॒ महि॑ क्षत्राय॒ पौंस्या॑य शूर॥ १॥

आ। नः। दे॒व॒। शव॑सा। या॒हि॒। शु॒ष्मि॒न्। भव॑। वृ॒धः। इ॒न्द्र॒। रा॒यः। अ॒स्य। म॒हे। नृ॒म्णाय॑। नृ॒ऽप॒ते॒। महि॑। क्ष॒त्राय॑। पौंस्या॑य। शू॒र॒॥ १॥

पदार्थः-(**आ**) समन्तात् (**नः**) अस्मान् (**देव**) दिव्यगुणसम्पन्न (**शवसा**) उत्तमेन बलेन (**याहि**) प्राप्नुहि (**शुष्मिन्**) प्रशंसितबलयुक्त (**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वृधः**) वर्धनस्य (**इन्द्र**) परमैश्वर्ययुक्त (**रायः**) धनस्य राज्यस्य वा (**अस्य**) (**महे**) महते (**नृम्णाय**) धनाय (**नृपते**) नृणां पालक (**सुवज्र**) शोभनशस्त्रास्त्रप्रयोगकुशल (**महि**) महते (**क्षत्राय**) राष्ट्राय (**पौंस्याय**) पुंसु भवाय बलाय (**शूर**) निर्भय॥ १॥

अन्वयः-हे शूर सुवज्र नृपते शुष्मिन् देवेन्द्र! त्वं शवसा नोऽस्मानायाह्यस्य रायो वृधो भव महे नृम्णाय महि क्षत्राय पौंस्याय च प्रयतस्व॥ १॥

भावार्थः-स एव राजा श्रेष्ठो भवति यो राष्ट्ररक्षणे सततं प्रयतेत धनविद्यावृद्ध्या प्रजाः सम्पोष्य सुखयेत्॥ १॥

पदार्थः-हे (**शूर**) निर्भय (**सुवज्र**) उत्तम शस्त्र और अस्त्रों के चलाने में कुशल (**नृपते**) मनुष्यों की पालना करने वाले (**शुष्मिन्**) प्रशंसित बलयुक्त (**देव**) विद्या गुण सम्पन्न (**इन्द्र**) परम ऐश्वर्यवान् राजन्! आप (**शवसा**) उत्तम बल से (**नः**) हम लोगों को (**आ, याहि**) प्राप्त होओ (**अस्य**) इस (**रायः**) धन वा राज्य की (**वृधः**) वृद्धि सम्बन्धी (**भव**) हूजिये और (**महे**) महान् (**नृम्णाय**) धन के तथा (**महि**) महान् (**क्षत्राय**) राज्य के और (**पौंस्याय**) पुरुष विषयक बल के लिये प्रयत्न करो॥ १॥

भावार्थः-वही राजा श्रेष्ठ होता है जो राज्य की रक्षा में निरन्तर उत्तम यत्न करे और धनविद्या की वृद्धि से प्रजा को अच्छे प्रकार पुष्टि देकर सुखी करे॥ १॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

हव॑न्त उ त्वा॒ हव्यं॑ विवा॑चि त॒नूषु॒ शूराः॑ सू॒र्यस्य सा॒तौ।
त्वं विश्वे॑षु॒ सेन्यो॒ जने॑षु॒ त्वं वृ॒त्राणि॑ रन्धया सुहन्तु॥ २॥

हव॑न्ते। ऊँ इति॑। त्वा॒। हव्य॑म्। विऽवा॑चि। त॒नूषु॑। शूरा॑:। सूर्य॑स्य। सा॒तौ। त्वम्। विश्वे॑षु। सेन्य॑:। जने॑षु। त्वम्। वृ॒त्राणि॑। र॒न्धय॒। सु॒ऽह॒न्तु॒॥ २॥

पदार्थ:-(**हवन्ते**) आह्वयन्तु (**उ**) (**त्वा**) त्वाम् (**हव्यम्**) आह्वानयोग्यम् (**विवाचि**) विरुद्धा वाचो यस्मिन् संग्रामे भवन्ति तस्मिन् (**तनूषु**) विस्तृतबलेषु शरीरेषु (**शूरा:**) शत्रूणां हिंसका: (**सूर्यस्य**) सवितृमण्डलस्येव राज्यस्य मध्ये (**सातौ**) संविभागे (**त्वम्**) (**विश्वेषु**) (**सेन्य:**) सेनासु साधु: (**जनेषु**) मनुष्येषु (**त्वम्**) (**वृत्राणि**) शत्रुसैन्यानि (**रन्धय**) हिंसय (**सुहन्तु**)॥ २॥

अन्वय:-हे इन्द्र! यस्त्वं विश्वेषु जनेषु सेन्य: सन् वृत्राणि रन्धय त्वं यथा वीर: सन् शत्रून् सुहन्तु तथैतान् हिन्धि सूर्यस्य किरणा इव तनूषु प्रकाशमाना: शूरा: यं हव्यं त्वा सातौ विवाच्यु हवन्ते ताँस्त्वमाह्वय॥ २॥

भावार्थ:-स एव राजा सर्वप्रियो भवति यो न्यायेन प्रजा: सम्पाल्य संग्रामान्विजयते॥ २॥

पदार्थ:-हे परमैश्वर्ययुक्त! जो (**त्वम्**) आप (**विश्वेषु**) सब (**जनेषु**) मनुष्यों में (**सेन्य:**) सेना में उत्तम होते हुए (**वृत्राणि**) शत्रु सैन्य जन आदि को (**रन्धय**) मारो (**त्वम्**) आप जैसे वीर होता हुआ जन शत्रुओं को अच्छे प्रकार हने, वैसे उनको आप (**सुहन्तु**) मारो (**सूर्यस्य**) सवितृमण्डल की किरणों के समान राज्य के बीच और (**तनूषु**) फैला है बल जिनमें उन शरीरों में प्रकाशमान (**शूरा:**) शत्रुओं के मारने वाले जन जिन (**हव्यम्**) बुलाने योग्य (**त्वा**) आपको (**सातौ**) संविभाग में अर्थात् बांट चूंट में वा (**विवाचि, उ**) विरुद्ध वाणी जिसमें होती है उस संग्राम में (**हवन्ते**) बुलावें उनको आप बुलावें॥ २॥

भावार्थ:-वही राजा सर्वप्रिय होता है जो न्याय से प्रजा की अच्छी पालना कर संग्राम जीतता है॥ २॥

पुन: स राजा कीदृश: सन् किं कुर्यादित्याह॥

फिर वह राजा कैसा होता हुआ क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

अ॒हा यदि॑न्द्र सु॒दिना॑ व्यु॒च्छान् दधो॒ यत्के॒तुमु॑प॒मं स॒मत्सु॑।
न्य१॒॑ग्नि: सी॑द॒दसु॑रो न होता॑ हुवा॒नो अत्र॑ सु॒भगा॑य दे॒वान्॥ ३॥

अहा॑। यत्। इ॒न्द्र॒। सु॒ऽदिना॑। वि॒ऽउ॒च्छान्। दध॑:। यत्। के॒तुम्। उ॒प॒ऽमम्। स॒मत्ऽसु॑। नि। अ॒ग्नि:। सी॒द॒त्। असु॑र:। न। होता॑। हु॒वा॒न:। अत्र॑। सु॒ऽभगा॑य। दे॒वान्॥ ३॥

पदार्थ:-(**अहा**) अहानि दिनानि (**यत्**) यान् (**इन्द्र**) सूर्य इव वर्त्तमान (**सुदिना**) सुखकराणि दिनानि (**व्युच्छान्**) विवासितान् (**दध:**) देहि (**यत्**) यम् (**केतुम्**) प्रज्ञाम् (**उपमम्**) येन उपमिमीते तम् (**समत्सु**) संग्रामेषु (**नि**) नितराम् (**अग्नि:**) पावक इव तेजस्वी (**सीदत्**) निषीदति (**असुर:**) योऽसुषु रमते स: (**न**) इव (**होता**) हवनकर्त्ता (**हुवान:**) स्पर्धमान: (**अत्र**) (**सुभगाय**) सुष्ठ्वैश्वर्याय (**देवान्**) विदुष:॥ ३॥

अन्वय:-हे इन्द्रात्र समत्सु यद्यान् देवान् सुभगायाऽसुरो होता न शत्रून् युद्धाग्नौ हुवान: सन्नग्निरिव

भवान्नि सीदद्यदुपमं केतुं महा सुदिना व्युच्छाँश्च देवान् समत्सु दधः स त्वं विजेतुं शक्नोषि॥३॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। स एव राजा विजयते य उत्तमाञ्छूरवीरान्विदुषः स्वसेनायां सत्कृत्य रक्षेद्यथा होताऽग्नौ साकल्यं जुहोति तथा शस्त्राऽस्त्राग्नौ शत्रूञ्जुहुयात्॥३॥

पदार्थः-हे **(इन्द्र)** सूर्य के समान वर्त्तमान! **(अत्र)** इन **(समत्सु)** संग्रामों में **(यत्)** जिन **(देवान्)** विद्वानों को **(सुभगाय)** सुन्दर ऐश्वर्य्य के लिये **(असुरः)** जो प्राणों में रमता है उस **(होता)** होम करने वाले के **(न)** समान शत्रुओं को युद्ध की आग में **(हुवानः)** होमते अर्थात् उनको स्पर्द्धा से चाहते हुए **(अग्निः)** अग्नि के समान आप **(नि, सीदत्)** निरन्तर स्थिर होते हो और **(यत्)** जिस **(उपमम्)** उपमा दिलाने वाली **(केतुम्)** बुद्धि के विषय को **(अहा)** साधारण दिन वा **(सुदिना)** सुख करने वाले दिनों दिन **(व्युच्छान्)** विविध प्रकार से वसाये हुए विद्वानों को संग्रामों में **(दधः)** धारण करो सो आप जीत सकते हो॥३॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालंङ्कार हैं। वही राजा जीतता है जो उत्तम शूरवीर विद्वानों को अपनी सेना में सत्कार का रक्खे जैसे होम करने वाली अग्नि में साकल्य होमता है, वैसे शस्त्र और अस्त्रों की अग्नि में शत्रुओं को होमें॥३॥

पुनः कस्योत्तमे विजयप्रशंसे भवेतामित्याह॥

फिर किसकी उत्तम जीत और प्रशंसा होती है, इस विषय को अगले मन्त्र में कहते हैं॥

व॒यं ते त॑ इन्द्र॒ ये च॑ देव॒ स्तव॑न्त शूर॒ दद॑तो म॒घानि॑।
यच्छा॑ सू॒रिभ्य॑ उप॒मं वरू॑थं स्वा॒भुवो॑ जर॒णाम॑श्नवन्त॥४॥

व॒यम्। ते। ते॒। इ॒न्द्र॒। ये। च॒। दे॒व॒। स्तव॑न्त। शू॒र॒। दद॑तः। म॒घानि॑। यच्छ॑। सू॒रिऽभ्यः॑। उ॒प॒ऽमम्। वरू॑थम्। सु॒ऽआ॒भुवः॑। ज॒र॒णाम्। अ॒श्न॒व॒न्त॒॥४॥

पदार्थः-**(वयम्)** **(ते)** **(ते)** तव **(इन्द्र)** परमैश्वर्यप्रद **(ये)** **(च)** **(देव)** विद्वन् **(स्तवन्त)** प्रशंसन्ति **(शूर)** शत्रूणां हिंसक **(ददतः)** दानं कुर्वतः **(मघानि)** धनानि **(यच्छा)** देहि। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(सूरिभ्यः)** विद्वद्भ्यः **(उपमम्)** उपमिमीते येन तम् **(वरूथम्)** गृहम् **(स्वाभुवः)** ये सुष्ठु समन्तादुत्तमा भवन्ति ते **(जरणाम्)** जरावस्थाम् **(अश्नवन्त)** अश्नुवते॥४॥

अन्वयः-हे शूरेन्द्र देव! ये सूरिभ्यो मघानि ददतस्त उपमं स्तवन्त ये च स्वाभुवो वरूथं जरणामश्नवन्त ते वयं त्वां प्रशंसेम त्वं नो मघानि यच्छा॥४॥

भावार्थः-यो राजा सुपरीक्ष्य विद्वद्भ्यो धनादिकं दत्वा सत्कृत्यैतान् विद्यावयोवृद्धान् धार्मिकान् सेनाद्यधिकारेषु नियोजयति तस्य सर्वदा विजयप्रशंसे जायेते॥४॥

पदार्थः-हे **(शूर)** शत्रुओं के मारने और **(इन्द्र)** परम ऐश्वर्य देने वाले **(देव)** विद्वान् जन! **(ये)** जो **(सूरिभ्यः)** विद्वानों के लिये **(मघानि)** धनों को **(ददतः)** देते हुए **(ते)** आपके **(उपमम्)** जिससे उपमा दी जाती है उस कर्म की **(स्तवन्त)** प्रशंसा करते हैं **(च)** और जो **(स्वाभुवः)** अच्छे प्रकार सब ओर से उत्तम होते हैं वे जन **(वरूथम्)** घर और **(जरणाम्)** जरावस्था को **(अश्नवन्त)**

प्राप्त होते हैं **(ते)** वे **(वयम्)** हम लोग आपकी प्रशंसा करें आप हम लोगों के लिये धनों को **(यच्छा)** देओ॥४॥

भावार्थः-जो राजा अच्छी परीक्षा कर विद्वानों के लिये धन आदि दे और सत्कार कर इन विद्या अवस्था वृद्ध धार्मिक जनों को सेना आदि के अधिकारों में नियुक्त करता है, उसकी सर्वदा जीत और प्रशंसा होती है॥४॥

पुना राजप्रजाजनाः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

वोचेमेदिन्द्रं॑ मघवा॑नमेनं म॒हो रा॒यो राध॑सो यद्द॑दन्नः।
यो अर्च॑ता॒ ब्रह्म॑कृ॒तिमवि॑ष्ठो यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥५॥१४॥

वो॒चे॒म॑। इत्। इन्द्र॑म्। म॒घऽवा॑नम्। ए॒न॒म्। म॒हः। रा॒यः। राध॑सः। यत्। दद॑त्। न॒ः। यः। अर्च॑तः। ब्रह्म॑ऽकृतिम्। अवि॑ष्ठः। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑ः। सदा॑। न॒ः॥५॥

पदार्थः-(**वोचेम**) सत्यं प्रशंसेम **(इत्)** एव **(इन्द्रम्)** भयविदारकम् **(मघवानम्)** बहुधनैश्वर्योपपन्नम् **(एनम्)** **(महः)** महतः **(रायः)** धनस्य **(राधसः)** सुसमृद्धिकरस्य **(यत्)** यम् **(ददत्)** ददाति **(नः)** अस्मभ्यम् **(यः)** **(अर्चतः)** सत्कुर्वतः **(ब्रह्मकृतिम्)** परमेश्वरोपदिष्टां प्रियां गाम् **(अविष्ठः)** अतिशयेन रक्षकः **(यूयम्)** राजाद्याः **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)**॥५॥

अन्वयः-हे मनुष्या! योऽविष्ठोऽर्चतो नो ब्रह्मकृतिं ददद्यद्यमेनं मघवानं महो राधसो रायो वर्धकमिन्द्रं वोचेम तमिद्यूयमपि सत्यमुपदिशत हे राजादयो जना! यूयं स्वस्तिभिर्नः सदा पात॥५॥

भावार्थः-यदि सर्वे सत्योपदेशकाः स्युस्तर्हि राजा कदाचिदपि प्रमाहीनो न स्याद्यदा राजा धर्मिष्ठो भवेत्तदा सर्वे मनुष्याः धर्मात्मानो भवेयुरेवं परस्परेषां रक्षणेन सदैव सुखं यूयं प्राप्नुतेति॥५॥

अत्रेन्द्रराजप्रजाभृत्योपदेशककृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति त्रिंशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो **(यः)** जो **(अविष्ठः)** अतीव रक्षा करने वाला **(अर्चतः)** सत्कार करते हुए **(नः)** हम लोगों को प्राप्त होकर **(ब्रह्मकृतिम्)** परमेश्वर ने उपदेश की हुई प्रिय वाणी **(ददत्)** देता है **(यत्)** जिस **(एनम्)** इस **(मघवानम्)** बहुत धन और ऐश्वर्य से युक्त तथा **(महः)** महान् **(राधसः)** उत्तम समृद्धि करने वाले **(रायः)** धन की वृद्धि करने और **(इन्द्रम्)** भय विदीर्ण करने वाले विषय को **(वोचेम)** सत्य कहें **(इत्)** उसी को तुम भी सत्य उपदेश करो। हे राजन्! आदि जनो **(यूयम्)** तुम **(स्वस्तिभिः)** सर्वसुखों से **(नः)** हम लोगों की **(सदा)** सर्वदा **(पात)** रक्षा करो॥५॥

भावार्थ:-यदि सब मनुष्य सत्य के उपदेश करने वाले हों तो राजा कभी ज्ञानहीन न हो, जब राजा धर्मिष्ठ हो तब सब मनुष्य धर्मात्मा हों, ऐसे परस्पर की रक्षा से सदैव सुख तुम लोग पाओ॥५॥

इस सूक्त में इन्द्र, राजा, प्रजा, भृत्य और उपदेशक के काम का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह तीसवां सूक्त और चौदहवां वर्ग पूरा हुआ॥

अथ द्वादशर्चस्यैकत्रिंशत्तमस्य सूक्तस्य वसिष्ठ ऋषिः इन्द्रो देवता। १ विराड्गायत्री। २, ८ गायत्री। ६, ७, ९ निचृद्गायत्री छन्दः। षड्जः स्वरः। ३, ४, ५ आर्च्युष्णिक् छन्दः। ऋषभः स्वरः। १०, ११ भुरिगनुष्टुप्। १२ अनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ सखिभिर्मित्राय किं कर्त्तव्यमित्याह॥

अब बारह ऋचा वाले इकतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मित्रों को मित्र के लिये क्या करना चाहिये, इस विषय को कहते हैं॥

प्र व॒ इन्द्रा॑य॒ माद॑नं॒ हर्य॑श्वाय गायत। सखा॑यः सोम॒पाव्ने॑॥ १॥

प्र। व॒ः। इन्द्रा॑य। माद॑नम्। हरि॑ऽश्वाय। गा॒य॒त॒। सखा॑यः। सो॒म॒ऽपाव्ने॑॥ १॥

पदार्थः-(**प्र**) (**वः**) युष्माकम् (**इन्द्राय**) परमैश्वर्याय (**मादनम्**) आनन्दनम् (**हर्यश्वाय**) हरयो मनुष्या हरणशीला वा अश्वा यस्य सः (**गायत**) प्रशंसत (**सखायः**) सुहृदः (**सोमपाव्ने**) यः सोमं पिबति तस्मै॥ १॥

अन्वयः-हे सखायो! वो युष्माकं हर्यश्वाय सोमपाव्न इन्द्राय मादनं यूयं प्र गायत॥ १॥

भावार्थः-ये सखायः स्वसखीनामानन्दं जनयन्ति ते सखायो भवन्ति॥ १॥

पदार्थः-हे (**सखायः**) मित्रो! (**वः**) तुम्हारे (**हर्यश्वाय**) मनुष्य वा हरणशील घोड़े जिसके विद्यमान हैं उस (**सोमपाव्ने**) सोम पीने वाले (**इन्द्राय**) परमैश्वर्यवान् के लिये (**मादनम्**) आनन्द तुम (**प्र, गायत**) अच्छे प्रकार गाओ॥ १॥

भावार्थः-जो मित्रजन अपने मित्रजनों को आनन्द उत्पन्न करते हैं, वे मित्र होते हैं॥ १॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

शंसे॒दु॒क्थं सु॒दान॑व उ॒त द्यु॒क्षं यथा॒ नरः॑। च॒कृ॒मा स॒त्यरा॑धसे॥ २॥

शंस॑। इत्। उ॒क्थम्। सु॒ऽदान॑वे। उ॒त। द्यु॒क्षम्। यथा॑। नरः॑। च॒कृ॒म। स॒त्यऽरा॑धसे॥ २॥

पदार्थः-(**शंसे**) प्रशंस (**इत्**) एव (**उक्थम्**) प्रशंसनीयम् (**सुदानवे**) उत्तमदानाय (**उत**) अपि (**द्युक्षम्**) कमनीयम् (**यथा**) (**नरः**) मनुष्याः (**चकृम**) कुर्याम। अत्र **संहितायामिति** दीर्घः। (**सत्यराधसे**) सत्यं राधो धनं यस्य तस्मै॥ २॥

अन्वयः-हे विद्वन्! यथा नरो वयं सुदानवे सत्यराधसे द्युक्षमुक्थं चकृम तथा त्वमिच्छंस उत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे विद्वांसो! यस्य धर्मजं धनं सुपात्रेभ्यो दानं च वर्त्तते तमेवोत्तमं विजानीत॥ २॥

पदार्थः-हे विद्वान्! (**यथा**) जैसे (**नरः**) मनुष्य हम लोग (**सुदानवे**) उत्तम दान के लिये वा (**सत्यराधसे**) सत्य जिसका धन है उसके लिये (**द्युक्षम्**) मनोहर (**उक्थम्**) प्रशंसनीय काम (**चकृम**) करें, वैसे आप (**इत्**) ही (**शंसे**) प्रशंसा करें (**उत**) ही॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे विद्वानो! जिसका धर्म से उत्पन्न हुआ धन है और

सुपात्रों के लिये दान वर्त्तमान है, उसी को उत्तम जानो॥२॥

पुनः स विद्वान् कीदृशो भवेदित्याह॥

फिर वह विद्वान् कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो॥३॥

त्वम्। नः। इन्द्र। वाजऽयुः। त्वम्। गव्युः। शतक्रतो इति शतऽक्रतो। त्वम्। हिरण्ययुः। वसो इति॥३॥

पदार्थः-(**त्वम्**) (**नः**) अस्माकम् (**इन्द्र**) परमैश्वर्ययुक्त (**वाजयुः**) वाजं प्रशस्तमन्नं धनं वाऽऽत्मन इच्छति (**त्वम्**) (**गव्युः**) गां पृथिवीमुत्तमां वाचं वा कामयमानः (**शतक्रतो**) असंख्यप्रज्ञ (**त्वम्**) (**हिरण्ययुः**) हिरण्यं सुवर्णं कामयमानः (**वसो**) वासयितः॥३॥

अन्वयः-हे शतक्रतो वसविन्द्र वाजयुस्त्वं गव्युस्त्वं हिरण्ययुस्त्वं नोऽस्माकं रक्षकोऽध्यापको वा भव॥३॥

भावार्थः-सर्वैर्मनुष्यैरिदमेष्टव्यं यो धर्मात्माऽऽप्तो विद्वान् राजाऽध्यापकः परीक्षको वा स सततमुन्नेता स्यात्॥३॥

पदार्थः-हे (**शतक्रतो**) असंख्यप्रज्ञावान् (**वसो**) वसाने वाले (**इन्द्र**) परम ऐश्वर्ययुक्त (**वाजयुः**) प्रशंसित अन्न वा धन अपने को चाहने वाले! (**त्वम्**) आप (**गव्युः**) पृथिवी वा उत्तम वाणी की कामना करने वाले (**त्वम्**) आप (**हिरण्ययुः**) सुवर्ण की कामना करने वाले (**त्वम्**) आप (**नः**) हमारी रक्षा करने और पढ़ाने वाले हूजिये॥३॥

भावार्थः-सब मनुष्यों को यही इच्छा करनी चाहिये जो धर्मात्मा आप्त विद्वान् राजा अध्यापक वा परीक्षा करने वाला है सो निरन्तर उन्नति करनेहारा हो॥३॥

पुना राजप्रजाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन्। विद्धि त्व१स्य नो वसो॥४॥

वयम्। इन्द्र। त्वाऽयवः। अभि। प्र। नोनुमः। वृषन्। विद्धि। तु। अस्य। नः। वसो इति॥४॥

पदार्थः-(**वयम्**) (**इन्द्र**) विद्यैश्वर्ययुक्त राजन्नध्यापक वा (**त्वायवः**) त्वां कामयमानः (**अभि**) (**प्र**) (**नोनुमः**) भृशन्नमेम (**वृषन्**) बलवन् बलप्रद (**विद्धि**) विजानीहि (**तु**) (**अस्य**) (**नः**) अस्मान् (**वसो**) वासयितः॥४॥

अन्वयः-हे वसो वृषन्निन्द्र! त्वायवो वयं त्वामभि प्र णोनुमस्त्वं नस्त्वस्य राज्यस्य रक्षितॄन् विद्धि॥४॥

भावार्थः-यथा धार्मिक्यः प्रजा धार्मिकं राजानं कामयन्ते नमस्यन्ति तथैव राजैता धार्मिकीः प्रजाः कामयेत सततं नमस्येत्॥४॥

पदार्थः-हे (**वसो**) वसाने (**वृषन्**) बल रखने और बल के देने वाले (**इन्द्र**) विद्या और

ऐश्वर्ययुक्त राजा वा अध्यापक! **(त्वायवः)** आपकी कामना करने वाले **(वयम्)** हम लोग आपको **(अभि, प्र, णोनुमः)** सब ओर से अच्छे प्रकार निरन्तर प्रणाम करें आप **(नः)** हमको **(तु)** तो **(अस्य)** इस राज्य के रक्षा करने वाले **(विद्धि)** जानो॥४॥

भावार्थः-जैसे धार्मिक प्रजाजन धार्मिक राजा की कामना करते और उस को नमते हैं, वैसे ही राजा इस धार्मिकी प्रजा की कामना करे और निरन्तर नमें॥४॥

पुना राजा किं कुर्यादित्याह॥

फिर राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

मा नो निदे च वक्तवेऽर्यो रन्धीररावणे। त्वे अपि क्रतुर्मम॥५॥

मा। नः। निदे। च। वक्तवे। अर्यः। रन्धीः। अरावणे। त्वे इति। अपि। क्रतुः। मम॥५॥

पदार्थः-(**मा**) निषेधे (**नः**) अस्माकम् (**निदे**) निन्दकाय (**च**) (**वक्तवे**) वक्तव्याय (**अर्यः**) स्वामी सन् (**रन्धीः**) हिंस्याः (**अरावणे**) अदात्रे (**त्वे**) त्वयि (**अपि**) (**क्रतुः**) प्रज्ञा (**मम**)॥५॥

अन्वयः-हे राजन्नर्यस्त्वं यो मम त्वे क्रतुरस्ति तं मा रन्धीरपि तु नो वक्तवे अरावणे निदे च भृशं दण्डं दद्याः॥५॥

भावार्थः-राजा सदैव विद्याधर्मसुशीलतां वर्धयित्वा निन्दकारीन् दुष्टान् मनुष्यान्निवार्य्य प्रजाः सततं रञ्जयेत्॥५॥

पदार्थः-हे राजन्! (**अर्यः**) स्वामी होते हुए जो (**मम, त्वे**) मेरी तुम्हारे बीच (**क्रतुः**) उत्तम बुद्धि है उसको (**मा**) मत (**रन्धीः**) नष्ट करो (**अपि**) किन्तु (**नः**) हमारे (**वक्तवे**) कहने योग्य (**अरावणे**) न देने वाले के लिये और (**निदे**) निन्दक के लिये (**च**) भी निरन्तर दण्ड देओ॥५॥

भावार्थः-राजा सदैव विद्या, धर्म और सुशीलता बढ़वाने के लिये निन्दक, दुष्ट मनुष्यों को निवार के प्रजा को निरन्तर प्रसन्न करे॥५॥

पुनः स कीदृशो भवेदित्याह॥

फिर वह कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन्। त्वया प्रति ब्रुवे युजा॥६॥१५॥

त्वम्। वर्म। असि। सऽप्रथः। पुरःऽयोधः। च। वृत्रऽहन्। त्वया। प्रति। ब्रुवे। युजा॥६॥

पदार्थः-(**त्वम्**) (**वर्म**) कवचमिव (**असि**) (**सप्रथः**) सप्रख्यातिः (**पुरः**) पुरस्तात् (**योधः**) योद्धा (**च**) (**वृत्रहन्**) दुष्टानां हन्तः (**त्वया**) (**प्रति**) (**ब्रुवे**) उपदिशामि (**युजा**) यो न्यायेन युनक्ति तेन॥६॥

अन्वयः-हे वृत्रहन् राजन्! यस्त्वं योधः सप्रथो वर्मेव चासि येन युजा त्वयाऽहं प्रति ब्रुवे स त्वं पुरो रक्षको भव॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यदि राजा सत्कीर्तिः सुशीलो निरभिमानो विद्वान् स्यात्तर्हि तं प्रति सर्वे सत्यं ब्रूयुः स च श्रुत्वा प्रसन्नः स्यात्॥६॥

पदार्थः-हे **(वृत्रहन्)** दुष्टों के हनने वाला राजा! जो **(त्वम्)** आप **(योधः)** युद्ध करने वाले **(सप्रथः)** प्रख्याति प्रशंसा के सहित **(वर्म, च)** और कवच के समान **(असि)** हैं जिस **(युजो)** न्याय से युक्त होने वाले **(त्वया)** आपके साथ मैं **(प्रति, ब्रुवे)** प्रत्यक्ष उपदेश करता हूँ सो आप **(पुरः)** आगे रक्षा करने वाले हूजिये॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा सत्कीर्ति, सुशील, निरभिमान, विद्वान् हो तो उसके प्रति सब सत्य बोलें और वह सुनकर प्रसन्न हो॥६॥

पुनस्तस्य विद्याविनये किं कुर्यातामित्याह॥

फिर उसकी विद्या और विनय क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

महाँ उतासि यस्य तेऽनु स्वधावरी सहः। मम्नाते इन्द्र रोदसी॥७॥

महान्। उत। असि। यस्य। ते। अनु। स्वधावरी इति स्वधाऽवरी। सहः। मम्नाते इति। इन्द्र। रोदसी इति॥७॥

पदार्थः-**(महान्)** **(उत)** अपि **(असि)** **(यस्य)** **(ते)** तव **(अनु)** **(स्वधावरी)** बह्वन्नादिप्रदे **(सहः)** बलम् **(मम्नाते)** अभ्यासाते **(इन्द्र)** राजन् **(रोदसी)** द्यावापृथिव्यौ॥७॥

अन्वयः-हे इन्द्र! यथा महान् सूर्योऽस्ति तथा यस्य सकाशात् स्वधावरी रोदसी अनु मम्नाते तस्य ते तथैव सेनाराष्ट्रे स्यातामुताऽपि यतस्त्वं महानसि तस्मात् सहो गृहीत्वा निर्बलान् पालय॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यस्य राज्ञः प्रजासेने धार्मिके सुरक्षिते स्तस्तस्य सूर्यवत्प्रतापो भवति॥७॥

पदार्थः-हे **(इन्द्र)** राजा! जैसे **(महान्)** बड़ा सूर्य है, वैसे **(यस्य)** जिनके सकाश से **(स्वधावरी)** बहुत अन्न की देने वाली **(रोदसी)** आकाश और पृथिवी **(अनु, मम्नाते)** अनुकूलता से अभ्यास करते हैं उन **(ते)** आपके, वैसे ही सेना और राज्य हों **(उत)** और जिससे आप महान् **(असि)** हैं इससे **(सहः)** बल को ग्रहण कर निर्बलों को पालो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जिस राजा की प्रजा और सेना धार्मिक और सुरक्षित हों, उसका सूर्य के समान प्रताप होता है॥७॥

कः प्रशंसनीयाः स्यादित्याह॥

कौन प्रशंसा करने योग्य हो, इस विषय को अगले मन्त्र में कहते हैं॥

तं त्वा मरुत्वती परि भुवद्वाणी सयावरी। नक्षमाणा सह द्युभिः॥८॥

तम्। त्वा। मरुत्वती। परि। भुवत्। वाणी। सऽयावरी। नक्षमाणा। सह। द्युभिः॥८॥

पदार्थः-**(तम्)** **(त्वा)** त्वाम् **(मरुत्वती)** प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्यां सा **(परि)** **(भुवत्)** भवेत् **(वाणी)** वाक् **(सयावरी)** या सहैव याति **(नक्षमाणा)** सर्वासु विद्यासु व्याप्नुवती **(सह)** **(द्युभिः)** विज्ञानादिप्रकाशैः॥८॥

अन्वयः-हे विद्वन्! यं त्वा मरुत्वती सयावरी नक्षमाणा वाणी द्युभिः सह परि भुवत्तं त्वा वयं सर्वतो

भूषयेम॥८॥

भावार्थः-यस्य विदुषो राज्ञ उपदेशकस्य वा सकलविद्यायुक्ता वाणी उत्तमा कार्यकरा उपदेश्या वा स्यात् स एव सर्वा प्रशंसामर्हति॥८॥

पदार्थः-हे विद्वान्! जिन **(त्वा)** आपको **(मरुत्वती)** जिसमें प्रशंसायुक्त मनुष्य विद्यमान **(सयावरी)** जो साथ जाती **(नक्षमाणा)** और सब विद्याओं में व्याप्त होती हुई **(वाणी)** वाणी **(द्युभिः)** विज्ञानादि प्रकाशों के **(सह)** साथ **(परि, भुवत्)** सब ओर से प्रसिद्ध हो **(तम्)** उन आपको हम लोग सब ओर से भूषित करें॥८॥

भावार्थः-जिस विद्वान् राजा वा उपदेशक विद्वान् की सकलविद्यायुक्त वाणी उत्तम और कार्य करने वाले उपदेश के योग्य हो, वही सब प्रशंसा को योग्य होता है॥८॥

पुनः कं नरं सर्वे नमन्तीत्याह॥

फिर किस मनुष्य को सब नमते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

ऊ॒र्ध्वास॒स्त्वान्विन्द॑वो॒ भुव॑न् दु॒स्ममुप॒ द्यवि॑। सन्ते॑ नमन्त कृ॒ष्टय॑:॥९॥

ऊ॒र्ध्वास॑:। त्वा॒। अनु॑। इन्द॑वः। भुव॑न्। दु॒स्मम्। उप॑। द्यवि॑। सम्। ते॒। न॒म॒न्त॒। कृ॒ष्टय॑:॥९॥

पदार्थः-(**ऊर्ध्वासः**) उत्कृष्टाः **(त्वा)** त्वाम् **(अनु)** **(इन्दवः)** ऐश्वर्ययुक्ता आनन्दिताः **(भुवन्)** भवन्ति **(दस्मम्)** **(उप)** **(द्यवि)** समीपस्थे प्रकाशितेऽप्रकाशिते वा **(सम्)** **(ते)** तव **(नमन्त)** नमन्ति **(कृष्टयः)** मनुष्याः॥९॥

अन्वयः-हे विद्वन्! य ऊर्ध्वास इन्दवोऽनु भुवँस्ते कृष्टयः उपद्यवि दस्मं त्वा सन्नमन्त॥९॥

भावार्थः-यस्य राज्ञः समीपे भद्रा धार्मिका जनाः सन्ति तस्य विनयेन सर्वाः प्रजाः नम्रा भवन्ति॥९॥

पदार्थः-हे विद्वान्! जो **(ऊर्ध्वासः)** उत्कृष्ट **(इन्दवः)** ऐश्वर्ययुक्त आनन्दित **(अनु, भुवन्)** अनुकूल होते हैं **(ते)** वे **(कृष्टयः)** मनुष्य **(उपद्यवि)** समीपस्थ प्रकाशित वा अप्रकाशित विषय में **(दस्मम्)** शत्रुओं का उपक्षय विनाश करने **(त्वा)** आपको **(सम्, नमन्त)** अच्छे प्रकार नमते हैं॥९॥

भावार्थः-जिस राजा के समीप में भद्र, धार्मिक जन हैं, उसकी नम्रता से सब प्रजा नम्र होती है॥९॥

पुना राजप्रजाजनाः परस्परं किं कुर्य्युरित्याह॥

फिर राजप्रजाजन परस्पर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

प्र वो॑ म॒हे म॑हि॒वृधे॑ भरध्वं॒ प्रचे॑तसे॒ प्र सु॑म॒तिं कृ॑णुध्वम्।
विश॑: पू॒र्वीः प्र च॑रा चर्षणि॒प्राः॥१०॥

प्र। व॒:। म॒हे। म॒हि॒ऽवृधे॑। भ॒र॒ध्व॒म्। प्रऽचे॑तसे। प्र। सु॒ऽम॒तिम्। कृ॒णु॒ध्व॒म्। विश॑:। पू॒र्वीः। प्र। च॒र॒। च॒र्ष॒णि॒ऽप्राः॥१०॥

पदार्थः-(**प्र**) **(वः)** युष्मभ्यम् **(महे)** महते **(महिवृधे)** महतां वर्धकाय **(भरध्वम्)** **(प्रचेतसे)**

प्रकृष्टं चेतः प्रज्ञा यस्य तस्मै **(प्र)** **(सुमतिम्)** शोभनां प्रज्ञाम् **(कृणुध्वम्)** **(विशः)** प्रजाः **(पूर्वीः)** प्राचीनाः पितापितामहादिभ्यः प्राप्ताः **(प्र)** **(चर)** अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। **(चर्षणिप्राः)** यश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति सः॥१०॥

अन्वयः-हे विद्वांसो! यथा वयं वो युष्मभ्यमुत्तमान् पदार्थान् प्रयच्छेम तथा यूयं नो महे महिवृधे प्रचेतसे सुमतिं प्र भरध्वमस्मान् पूर्वीर्विशो विदुषीः प्र कृणुध्वम्। चर्षणिप्रास्त्वं राजँस्त्वं न्याये प्र चर॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्वांसो युष्मदर्थं शुभान् गुणान् पुष्कलमैश्वर्यं विदधति तथा यूयमेतदर्थं श्रेष्ठां नीतिं धत्त॥१०॥

पदार्थः-हे विद्वानो! जैसे हम लोग **(वः)** तम्हारे लिये उत्तम पदार्थों को दें, वैसे तुम हम लोगों के **(महे)** महान् व्यवहार के लिये **(महिवृधे)** तथा बड़ों के बढ़ने और **(प्रचेतसे)** उत्तम प्रज्ञा रखने वाले के लिये **(सुमतिम्)** सुन्दर मति को **(प्र, भरध्वम्)** उत्तमता से धारण करो हम लोगों को **(पूर्वीः)** प्राचीन पिता पितामहादिकों से प्राप्त **(विशः)** प्रजाजनों को **(प्र, कृणुध्वम्)** विद्वान् अच्छे प्रकार करो **(चर्षणिप्राः)** जो मनुष्यों को व्याप्त होता वह राजा आप न्याय में **(प्र, चर)** प्रचार करो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन तुम लोगों के लिये शुभगुण और पुष्कल ऐश्वर्य विधान करते हैं, वैसे तुम इनके लिये श्रेष्ठ नीति धारण करो॥१०॥

पुनस्ते विद्वांसः किमुत्पादयेयुरित्याह॥

फिर वे विद्वान् जन क्या उत्पन्न करें, इस विषय को अगले मन्त्र में कहते हैं॥

उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः।
तस्य व्रतानि न मिनन्ति धीराः॥११॥

उरुऽव्यचसे। महिने। सुऽवृक्तिम्। इन्द्राय। ब्रह्म। जनयन्त। विप्राः। तस्य। व्रतानि। न। मिनन्ति। धीराः॥११॥

पदार्थः-(**उरुव्यचसे**) बहुषु विद्यासु व्यापकाय **(महिने)** सत्कर्त्तव्याय **(सुवृक्तिम्)** सुष्ठु वर्जन्त्यन्यायं यया ताम् **(इन्द्राय)** परमैश्वर्याय **(ब्रह्म)** धनमन्नं वा **(जनयन्त)** जनयन्ति **(विप्राः)** मेधाविनः **(तस्य)** **(व्रतानि)** सत्यभाषणादीनि कर्माणि **(न)** निषेधे **(मिनन्ति)** हिंसन्ति **(धीराः)** ध्यानवन्तः॥११॥

अन्वयः-हे धीरा विप्रा! भवन्त उरुव्यचसे महिन इन्द्राय सुवृक्तिं ब्रह्म च जनयन्त तस्य व्रतानि केऽपि न मिनन्ति॥११॥

भावार्थः-ये राज्ञे महद्धनं जनयन्त्यसत्याचारं वर्जयित्वा सत्याचारं प्रसेधयन्ति ते पूज्या जायन्ते॥११॥

पदार्थः-हे **(धीराः)** ध्यानवान् **(विप्राः)** विद्वानो! आप लोग **(उरुव्यचसे)** बहुत विद्याओं में व्यापक **(महिने)** सत्कार करने योग्य **(इन्द्राय)** परमैश्वर्यवान् के लिये **(सुवृक्तिम्)** उत्तमता से अन्याय

को वर्जते हैं जिससे उसको और **(ब्रह्म)** धन वा अन्न को **(जनयन्त)** उत्पन्न करते हैं **(तस्य)** उनके **(व्रतानि)** सत्य भाषण आदि कर्म कोई **(न)** नहीं **(मिनन्ति)** नष्ट करते हैं॥११॥

भावार्थः-जो राजा के लिये बहुत धन उत्पन्न करते और असत्य आचरण को निवृत्त कर सत्य आचरण प्रसिद्ध करते हैं, वे पूज्य होते हैं॥११॥

पुनः कीदृशं नरं सत्या वाक्सेवत इत्याह॥

फिर कैसे मनुष्य को सत्य वाणी सेवती है, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्रं॑ वाणी॒रनु॑त्तमन्यु॒मेव॑ स॒त्रा राजा॑नं दधिरे॒ सह॑ध्यै।
हर्य॑श्वाय बर्हया॒ सम॒पीन्॥ १२॥ १६॥

इन्द्र॑म्। वाणीः॑। अनु॑त्तऽमन्युम्। ए॒व। स॒त्रा। राजा॑नम्। दु॒धि॒रे॒। सह॑ध्यै। हरि॑ऽअश्वाय। ब॒र्ह॒य॒। सम्। आ॒पीन्॥ १२॥

पदार्थः-(**इन्द्रम्**) अविद्याविदारकमाप्तविद्वांसम् **(वाणीः)** सकलविद्यायुक्ता वाचः **(अनुत्तमन्युम्)** न उत्तो न प्रेरितो मन्युः क्रोधो यस्य तम् **(एव)** **(सत्रा)** सत्येन **(राजानम्)** **(दधिरे)** दधति **(सहध्यै)** सोढुम् **(हर्यश्वाय)** प्रशंसितमनुष्याश्वादियुक्ताय **(बर्हय)** वर्धय। अत्र **संहितायामि**ति दीर्घः। **(सम्)** **(आपीन्)** य आप्नुवन्ति तान्॥१२॥

अन्वयः-हे विद्वन्! या वाणीः सत्राऽनुत्तमन्युं राजानमिन्द्रं सहध्यै दधिरे आपीन् सन् दधिरे तस्मा एव हर्यश्वाय सर्वा विद्या बर्हय॥१२॥

भावार्थः-यमजातक्रोधं जितेन्द्रियं राजानं सकलशास्त्रयुक्ता वागाप्नोति स एव सत्येन न्यायेन प्रजाः पालयितुमर्हतीति॥१२॥

अत्रेन्द्रविद्वद्राजकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकत्रिंशत्तमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान्! जो **(वाणीः)** सकल विद्यायुक्त वाणी **(सत्रा)** सत्य से **(अनुत्तमन्युम्)** जिसका प्रेरणा नहीं किया गया क्रोध उस **(राजानम्)** प्रकाशमान **(इन्द्रम्)** अविद्या विदीर्ण करने वाले विद्वान् को **(सहध्यै)** सहने को **(दधिरे)** धारण करते तथा **(आपीन्)** जो व्याप्त होते हैं उनको **(सम्)** अच्छे प्रकार धारण करते हैं **(एव)** उसी **(हर्यश्वाय)** प्रशंसित मनुष्य और घोड़ों वाले के लिये सब विद्याओं को **(बर्हय)** बढ़ाओ॥१२॥

भावार्थः-जिस न उत्पन्न हुए क्रोध वाले, जितेन्द्रिय राजा को सकल शास्त्रयुक्त वाणी व्याप्त होती है, वही सत्य न्याय से प्रजा पालने योग्य होते हैं॥१२॥

इस सूक्त में इन्द्र, विद्वान् और राजा के काम का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इकतीसवां सूक्त और सोलहवां वर्ग समाप्त हुआ॥

अथ सप्तविंशत्यृचस्य द्वात्रिंशत्तमस्य सूक्तस्य। १-२५, २६ २७ वसिष्ठः। २६ वसिष्ठः शक्तिर्वा ऋषिः। इन्द्रो देवता। १, ४, २४ विराड् बृहती। ६, ८, १२,१६, १८, २६, निचृद् बृहती। ११, २७ बृहती। १७,२५ भुरिग्बृहती। २१ स्वराड्बृहती छन्दः। मध्यमः स्वरः। २, ९ पङ्क्तिः। ५.१३.१५, १९, २३ निचृत्पंक्तिः। ३ साम्नी पङ्क्तिः। ७ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। १०, १४ भुरिगनुष्टुप्। २०, २२ स्वराडनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ के दूरे समीपे च रक्षणीया इत्याह॥

अब सत्ताईस ऋचावाले बत्तीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में कौन दूर और समीप में रक्षा करने योग्य होते हैं, इस विषय को कहते हैं॥

मो षु त्वा॑ वा॒घत॑श्च॒नारे अ॒स्मन्नि री॑रमन्।
आ॒रात्ता॑च्चित्सध॒मादं॑ न॒ आ ग॑हीह वा॒ सन्नुप॑ श्रुधि॥ १॥

मो॒ इति॑। सु। त्वा॒। वा॒घत॑ः। च॒न। आ॒रे। अ॒स्मत्। नि। री॒र॒म॒न्। आ॒रात्ता॑त्। चि॒त्। स॒ध॒ऽमाद॑म्। न॒ः। आ। ग॒हि॒। इ॒ह। वा॒। सन्। उप॑। श्रु॒धि॒॥ १॥

पदार्थः-(**मो**) निषेधे (**सु**) (**त्वा**) त्वाम् (**वाघतः**) मेधाविनः। **वाघत इति मेधाविनाम**। (निघं०३.१५) (**चन**) अपि (**आरे**) समीपे दूरे वा (**अस्मत्**) (**नि**) (**रीरमन्**) रमन्ताम् (**आरात्तात्**) दूरे (**चित्**) अपि (**सधमादम्**) यत्र सह माद्यन्त्यानन्दन्ति तम् (**नः**) अस्माकम् (**आ**) (**गहि**) आगच्छ प्राप्नुहि वा (**इह**) (**वा**) (**सन्**) (**उप**) (**श्रुधि**)॥१॥

अन्वयः-हे विद्वन् राजन्! वाघतस्तवारे चनाप्यस्मदारे मो सुरीरमन्। सततं तवारे सन्तस्त्वा रमयन्तु। आरात्ताच्चित्वं नः सधमादमा गहीह वा प्रसन्नः सन्नस्माकं वचांसि न्युप श्रुधि॥१॥

भावार्थः-येषां मनुष्याणां समीपे मेधाविनो धार्मिका विद्वांसो वसन्ति दुष्टांश्च दूरे तिष्ठन्ति ते सदैव सुखं लभन्ते॥१॥

पदार्थः-हे विद्वान् राजा! (**वाघतः**) मेधावी जन आपके (**आरे**) दूर (**चन**) और (**अस्मत्**) हम से दूर (**मो, सु, रीरमन्**) मत रमें। निरन्तर आपके समीप होते हुए (**त्वा**) आपको रमावें। (**आरात्तात्**) दूर में (**चित्**) भी आप (**नः**) हमारे (**सधमादम्**) उस स्थान को कि जिसमें एक साथ आनन्द करते हैं (**आ, गहि**) आओ (**इह, वा**) यहाँ प्रसन्न (**सन्**) होते हुए हमारे वचनों को (**नि, उप, श्रुधि**) समीप में सुनो॥१॥

भावार्थः-जिन मनुष्यों के समीप बुद्धिमान् धार्मिक, विद्वान्जन और दूर में दुष्ट जन हैं, वे सदैव सुख पाते हैं॥१॥

पुनः कस्य समीपे के वसेयुरित्याह॥

फिर किसके समीप कौन बसें, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मे हि ते॑ ब्रह्मकृ॒तः सु॒ते सचा॒ मधौ॒ न मक्ष॒ आस॑ते।

इन्द्रे॒ काम॑ं जरि॒तारो॑ वसू॒यवो॒ रथे॒ न पादु॒मा द॑धुः॥ २॥

इ॒मे। हि। ते॒। ब्र॒ह्म॒ऽकृ॒तः॒। सु॒ते। सचा॑। मधौ॑। न। मक्षः॑। आस॑ते। इन्द्रे॑। काम॑म्। ज॒रि॒तारः॑। व॒सु॒ऽय॒वः॑। रथे॑। न। पाद॑म्। आ। द॒धुः॥ २॥

पदार्थः-(**इमे**) (**हि**) खलु (**ते**) तत्र (**ब्रह्मकृतः**) ये ब्रह्म धनमन्नं वा कुर्वन्ति ते (**सुते**) निष्पादिते (**सचा**) समवायेन (**मधौ**) मधुरादिगुणयुक्ते (**न**) इव (**मक्षः**) मक्षिकाः (**आसते**) उपतिष्ठन्ति (**इन्द्रे**) परमैश्वर्यवति विदुषि राजनि (**कामम्**) (**जरितारः**) सत्यस्तावकाः (**वसूयवः**) वसूनि धनानि कामयमानाः (**रथे**) रमणीये याने (**न**) इव (**पादम्**) चरणम् (**आ**) समन्तात् (**दधुः**) धरन्ति॥ २॥

अन्वयः-हे राजंस्ते य इमे ब्रह्मकृतो वसूयवो जरितारः सुते मधौ मक्षो न सचासते। इन्द्रे त्वयि रथे पादं न काममा दधुस्ते हि सुखिनो जायन्ते॥ २॥

भावार्थः-अत्रोपमालङ्कारः। यो विद्वान्राजा धर्मात्मा न्यायकारी स्यात्तर्ह्यस्य समीपे बहवो धार्मिका विद्वांसो भवेयुः॥ २॥

पदार्थः-हे राजन्! (**ते**) आपके जो (**इमे**) यह (**ब्रह्मकृतः**) धन वा अन्न को सिद्ध करने (**वसूयवः**) धनों की कामना करने (**जरितारः**) और सत्य की स्तुति करने वाले जन (**सुते**) उत्पन्न किये हुए (**मधौ**) मधुरादिगुणयुक्त स्थान में (**मक्षः**) मक्खियों के (**न**) समान (**सचा**) सम्बन्ध से (**आसते**) उपस्थित होते हैं (**इन्द्रे**) परमैश्वर्यवान् आप में (**रथे**) रमणीय यान में (**पादम्**) पैर जैसे धरें (**न**) वैसे (**कामम्**) कामना को (**आ, दधुः**) सब ओर से धारण करते हैं, वे (**हि**) ही सुखी होते हैं॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो विद्वान् राजा धर्मात्मा न्यायकारी हो तो इसके समीप में बहुत धार्मिक विद्वान् हों॥ २॥

पुनः केनः कः किंवदुपासनीय इत्याह॥

फिर किसको कौन किसके तुल्य उपासना करने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

रा॒यस्का॑मो॒ वज्र॑हस्तं सु॒दक्षि॑णं पु॒त्रो न पि॒तर॑ं हुवे॥ ३॥

रा॒यऽका॑मः। वज्र॑ऽहस्तम्। सु॒ऽदक्षि॑णम्। पु॒त्रः। न। पि॒तर॑म्। हु॒वे॒॥ ३॥

पदार्थः-(**रायस्कामः**) यो धनानि कामयते सः (**वज्रहस्तम्**) शस्त्रास्त्रपाणिम् (**सुदक्षिणम्**) शोभना दक्षिणा यस्य तम् (**पुत्रः**) (**न**) इव (**पितरम्**) जनकम् (**हुवे**)॥ ३॥

अन्वयः-हे मनुष्या! यथा रायस्कामोऽहं पुत्रः पितरं न वज्रहस्तं सदक्षिणं राजानं हुवे तथैनं यूयमप्याह्वयत॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या यथा पुत्राः पितरमुपासते तथा राजानं ये परिचरन्ति ते सकलैश्वर्यमश्नुवते॥ ३॥

पदार्थः-हे मनुष्यो! (**रायस्कामः**) धनों की कामना करने वाला मैं (**पुत्रः**) पुत्र (**पितरम्**)

पिता को जैसे **(न)** वैसे **(वज्रहस्तम्)** शस्त्र और अस्त्रों के पार जाने और **(सुदक्षिणम्)** शुभ दक्षिणा रखने वाला राजा को **(हुवे)** बुलाता हूँ, वैसे तुम भी बुलाओ॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य जैसे पुत्र पिता की उपासना करते हैं, वैसे राजा की जो सेवा करते हैं, वे समस्त ऐश्वर्य पाते हैं॥३॥

पुना राजादयः किमाचरेयुरित्याह॥

फिर राजा आदि क्या आचरण करें, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒म इन्द्रा॑य सुन्वि॒रे॒ सोमा॑सो॒ दध्या॑शिरः।

ताँ आ मदा॑य वज्रहस्त पी॒तये॒ हरि॑भ्यां या॒ह्योक॒ आ॥४॥

इ॒मे। इन्द्रा॑य। सु॒न्वि॒रे॒ सोमा॑सः। दधि॑ऽआशिरः। तान्। आ। मदा॑य। व॒ज्र॒ऽह॒स्त॒। पी॒तये॑। हरि॑ऽभ्याम्। या॒हि॒। ओक॑ः। आ॥४॥

पदार्थः-(**इमे**) (**इन्द्राय**) परमैश्वर्याय (**सुन्विरे**) सुन्वन्त्युत्पादयन्ति (**सोमासः**) प्रेरकाः (**दध्याशिरः**) ये दधत्यश्नन्ति ते (**तान्**) (**आ**) (**मदाय**) आनन्दाय (**वज्रहस्त**) शस्त्रास्त्रपाणे (**पीतये**) पानाय (**हरिभ्याम्**) सुशिक्षिताभ्यामश्वाभ्यां युक्ते रथेन (**याहि**) प्राप्नुहि (**ओकः**) गृहम् (**आ**) समन्तात्॥४॥

अन्वयः-हे वज्रहस्त! य इमे दध्याशिरः सोमासो जना मदायेन्द्राय पीतये सुन्विरे महौषधिरसान् सुन्विरे तान् हरिभ्यां युक्तेन रथेनाऽऽयाहि शुभमोक आयाहि॥४॥

भावार्थः-ये पुरुषार्थेन विद्याः प्राप्योद्यमं कुर्वन्ति ते राज्यश्रियं लभन्ते॥४॥

पदार्थः-हे (**वज्रहस्त**) शस्त्र और अस्त्रों को हाथ में रखने वाले! जो (**इमे**) यह (**दध्याशिरः**) धारण करने और व्याप्त होने वाले (**सोमासः**) प्रेरक जन (**मदाय**) आनन्द और (**इन्द्राय**) परमैश्वर्य के लिये तथा (**पीतये**) पीने को (**सुन्विरे**) अच्छे रसों को उत्पन्न करते हैं (**तान्**) उनको (**हरिभ्याम्**) अच्छी सीख पाये हुए घोड़ों से युक्त रथ से (**आ, याहि**) आओ शुभ (**ओकः**) स्थान को (**आ**) प्राप्त होओ॥४॥

भावार्थः-जो पुरुषार्थ से विद्याओं को प्राप्त होकर उद्यम करते हैं, वे राज्यश्री को प्राप्त होते हैं॥४॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

श्रव॒च्छ्रुत्क॑र्ण ईयते॒ वसू॑नां नू चि॑न्नो मर्धिष॒द्गिर॑ः।

स॒द्यश्चि॒द्यः स॒हस्रा॑णि श॒ता दद॒न्नकि॒र्दित्स॑न्तमा मि॑नत्॥५॥१७॥

श्रव॑त्। श्रुत्ऽक॑र्णः। ई॒यते॒। वसू॑नाम्। नु। चि॒त्। नः॒। म॒र्धि॒ष॒त्। गिर॑ः। स॒द्यः। चि॒त्। यः। स॒हस्रा॑णि। श॒ता। दद॑त्। नकि॑ः। दित्स॑न्तम्। आ। मि॒न॒त्॥५॥

पदार्थः-(**श्रवत्**) शृणुयात् (**श्रुत्कर्णः**) श्रुतौ कर्णे यस्य सः (**ईयते**) गच्छति (**वसूनाम्**) धनानाम् (**नु**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**चित्**) अपि (**नः**) अस्माकम् (**मर्धिषत्**) अभिकाङ्क्षेत् (**गिरः**) सुशिक्षिता वाचः (**सद्यः**) (**चित्**) अपि (**यः**) (**सहस्राणि**) (**शता**) असंख्यानि (**ददत्**) ददाति (**नकिः**) निषेधे (**दित्सन्तम्**) दातुमिच्छन्तम् (**आ**) (**मिनत्**) हिंस्यात्॥५॥

अन्वयः-यः श्रुत्कर्णः सद्यः श्रवन्नो वसूनां गिरश्चिन्नु मर्धिषत्सहस्राणि शतां ददन्नीयते दित्सन्तं नकिरामिनत् स चित्सर्वदा सुखी भवति॥५॥

भावार्थः-ये दीर्घेण ब्रह्मचर्येण सर्वा विद्या शृण्वन्ति विद्यासुशिक्षिता वाच इच्छन्त्यन्येभ्योऽतुलं विज्ञानं ददति ते दुःखं नाप्नुवन्ति॥५॥

पदार्थः-(**यः**) जो (**श्रुत्कर्णः**) श्रुति में कान रखने वाला (**सद्यः**) शीघ्र (**श्रवत्**) सुने (**नः**) हमारे (**वसूनाम्**) धनों के सम्बन्ध में (**गिरः**) अच्छी शिक्षा की भरी हुई वाणियों को (**चित्**) भी (**नु**) शीघ्र (**मर्धिषत्**) चाहे (**सहस्राणि**) हजारों (**शता**) सैकड़ों पदार्थों को (**ददत्**) देता और (**ईयते**) पहुँचाता है (**दित्सन्तम्**) देना चाहते हुए को (**नकिः**) नहीं (**आ, मिनत्**) विनाशे (**चित्**) वही सर्वदा सुखी होता है॥५॥

भावार्थः-जो दीर्घ ब्रह्मचर्य्य से सब विद्याओं को सुनते, अच्छी शिक्षायुक्त वाणियों को चाहते और औरों को अतुल विज्ञान देते हैं, वे दुःख नहीं पाते हैं॥५॥

पुनर्मनुष्यः कैः सह किं कुर्यादित्याह॥

फिर मनुष्य किनके साथ क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

स वी॒रो अप्र॑तिष्कुत॒ इन्द्रे॑ण शूशुवे॒ नृभिः॑।
यस्ते॑ गभी॒रा सव॑नानि वृत्रहन्त्सु॒नोत्या च॒ धाव॑ति॥६॥

सः। वी॒रः। अप्र॑तिऽस्कुतः। इन्द्रे॑ण। शूशुवे॒। नृऽभिः॑। यः। ते॒। ग॒भी॒रा। सव॑नानि। वृ॒त्र॒ऽह॒न्। सु॒नोति॑। आ। च॒। धाव॑ति॥६॥

पदार्थः-(**सः**) (**वीरः**) निर्भयः (**अप्रतिष्कुतः**) इतस्ततः कम्परहितः (**इन्द्रेण**) परमैश्वर्येण (**शूशुवे**) उपगच्छति (**नृभिः**) नायकैर्मनुष्यैः (**यः**) (**ते**) तव (**गभीरा**) गभीराणि (**सवनानि**) प्रेरणानि (**वृत्रहन्**) शत्रुहन्तः (**सुनोति**) (**आ**) (**च**) (**धावति**)॥६॥

अन्वयः-हे वृत्रहन्! यस्तेऽप्रतिष्कुतो वीरो इन्द्रेण नृभिः सह शूशुवे गभीरा सवनानि सुनोति सद्य आधावति च स एव शत्रून् विजेतुं शक्नोति॥६॥

भावार्थः-य उत्तमैः पुरुषैः सहाऽभिसन्धिं दुष्टैः सह वैमनस्यं रक्षन्ति तेऽसंख्यमैश्वर्यमाप्नुवन्ति॥६॥

पदार्थः-हे (**वृत्रहन्**) शत्रुओं को मारने वाले (**यः**) जो (**ते**) आपका (**अप्रतिष्कुतः**) इधर उधर से निष्कंप (**वीरः**) निर्भय पुरुष (**इन्द्रेण**) परमैश्वर्य और (**नृभिः**) नायक मनुष्यों के साथ (**शूशुवे**) समीप आता है (**गभीरा**) गम्भीर (**सवनानि**) प्रेरणाओं को (**सुनोति**) उत्पन्न करता है शीघ्र (**आ, धावति, च**) दौड़ता है (**सः**) वही शत्रुओं को जीत सकता है॥६॥

भावार्थः-जो उत्तम पुरुषों के साथ सब ओर से मित्रता और दुष्टों के साथ वैमनस्य रखते हैं, वे असंख्य ऐश्वर्य पाते हैं॥६॥

पुनः स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

भवा॒ वरू॑थं मघवन् म॒घोना॑ं यत्स॒मजा॑सि॒ शर्ध॑तः।
वि त्वाह॑तस्य॒ वेद॑नं भजेम॒ह्या दू॒णाशो॑ भरा॒ गय॑म्॥७॥

भव॑। वरू॑थम्। म॒घऽव॑न्। म॒घोना॑म्। यत्। स॒म्ऽअजा॑सि। शर्ध॑तः। वि। त्वाऽह॑तस्य। वेद॑नम्। भ॒जे॒म॒हि॒। आ। दु॒ःऽनशः॑। भ॒र॒। गय॑म्॥७॥

पदार्थः-(**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वरूथम्**) प्रशस्तं गृहम् (**मघवन्**) बहुधनयुक्त (**मघोनाम्**) धनाढ्यानाम् (**यत्**) (**समजासि**) सम्यक्प्राप्नुयाः (**शर्धतः**) बलवतः (**वि**) (**त्वाहतस्य**) त्वया हतस्य (**वेदनम्**) प्रापणम् (**भजेमहि**) सेवेमहि (**आ**) (**दूणाशः**) दुर्लभो नाशो यस्य सः (**भर**) धर। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**गयम्**) प्रजाम्॥७॥

अन्वयः-हे मघवन्निन्द्र राजँस्त्वं यन्मघोनां वरूथमस्ति तत्समजासि त्वाहतस्य शर्धतो वरूथं प्राप्तो भव शर्धतो गयं भर दूणाशः सन् वि भव येन वेदनं वयमा भजेमहि॥७॥

भावार्थः-हे राजन्! दुष्टहन्तुस्ते प्रजायां या नीतिस्तदनुकूलानि कर्माणि वयं कुर्याम यतस्त्वमस्मदनुकूलो भवेः॥७॥

पदार्थः-हे (**मघवन्**) बहुधनयुक्त राजा! आप (**यत्**) जो (**मघोनाम्**) धनवानों का (**वरूथम्**) प्रशंसित घर है उसे (**समजासि**) अच्छे प्राप्त होओ (**त्वाहतस्य**) तुम्हारे नष्ट किये हुए (**शर्धतः**) बलवान् के घर को प्राप्त (**भव**) होओ बलवान् के (**गयम्**) प्रजाजनों को (**भर**) धारण पोषण करो और (**दूणाशः**) दुर्लभ है नाश जिसका ऐसे होते हुए (**वि**) विशेषता से प्रसिद्ध हूजिये जिससे (**वेदनम्**) पदार्थों की प्राप्ति को हम लोग (**आ, भजेमहि**) अच्छे सेवें॥७॥

भावार्थः-हे राजा! दुष्टों के मारने वाले आपकी प्रजा में जो नीति उसी के अनुकूल कर्म हम लोग करें, जिससे हमारे अनुकूल आप होओ॥७॥

पुना राज्ञा वैद्यैः किं कारयितव्यमित्याह॥

फिर राजा को वैद्यों से क्या कराना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

सु॒नोता॑ सोम॒पाव्ने॒ सोम॒मिन्द्रा॑य व॒ज्रिणे॑।
पच॑ता प॒क्तीरव॑से कृणु॒ध्वमित्पृ॑ण॒न्नित्पृ॑ण॒ते मय॑ः॥८॥

सु॒नोत। सो॒म॒ऽपाव्ने॑। सोम॑म्। इन्द्रा॑य। व॒ज्रिणे॑। पच॑त। प॒क्तीः। अव॑से। कृ॒णु॒ध्वम्। इत्। पृ॒ण॒न्। इत्। पृ॒ण॒ते। मय॑ः॥८॥

पदार्थः-(**सुनोत**) निष्पादयत। अत्र **संहितायामिति** दीर्घः। (**सोमापाव्ने**) महौषधिरसम् पात्रे

(सोमम्) ऐश्वर्यम् **(इन्द्राय)** दुष्टशत्रुविदारकाय **(वज्रिणे)** **(पचत)** अत्र **संहितायामि**ति दीर्घः। **(पक्तीः)** पाकान् **(अवसे)** रक्षणाद्याय **(कृणुध्वम्)** **(इत्)** एव **(पृणन्)** पालयन् **(इत्)** एव **(पृणते)** पालयति **(मयः)** सुखम्॥८॥

अन्वयः-हे वैद्यशास्त्रविदो विद्वांसो! यूयं सोमपाव्ने सोमं सुनोता वज्रिण इन्द्राय सोमं सुनोत सर्वेषामवसे पक्तीः पचत कृणुध्वमिद् यथा पृणन् विद्वान् मयः पृणते तथेत्प्रजाभ्यो मयः पृणत॥८॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये वैद्याः स्युस्त उत्तमान्यौषधानि प्रशस्तान् रोगनाशकान् रसानुत्तमानन्नपाकाँश्च सर्वान् मनुष्यान् प्रतिशिक्षेरन् येन पूर्णं सुखं स्यात्॥८॥

पदार्थः-हे वैद्यशास्त्रवेत्ता विद्वानो! तुम **(सोमपाव्ने)** बड़ी-बड़ी ओषधियों के रस को पीने वाले के लिये **(सोमम्)** ऐश्वर्य्य को **(सुनोता)** उत्पन्न करो **(वज्रिणे)** शस्त्र और अस्त्रों को धारण करने और **(इन्द्राय)** दुष्ट शत्रुओं को विदीर्ण करने वाले के लिये ऐश्वर्य्य को उत्पन्न करो सब की **(अवसे)** रक्षा के लिये **(पक्तीः)** पाकों को **(पचत)** पकाओ **(कृणुध्वम्, इत्)** करो ही जैसे **(पृणन्)** पालना करता हुआ विद्वान् **(मयः)** सुख को **(पृणते)** पालता है, वैसे **(इत्)** ही प्रजाजनों के लिये सुख पालो॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो वैद्य हों वे उत्तम ओषधि, प्रशंसायुक्त रोगनाशक रस और उत्तम अन्न पाकों की सब मनुष्यों के प्रति शिक्षा दें, जिससे पूर्ण सुख हो॥८॥

पुनमनुष्याः किंवद्वर्तेरन्नित्याह॥

फिर मनुष्य किसके तुल्य वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

मा स्रे॑धत सोमिनो॒ दक्ष॑ता म॒हे कृ॑णु॒ध्वं रा॒य आ॒तुजे॑।
त॒रणि॒रिज्ज॑यति॒ क्षेति॑ पु॒ष्यति॒ न दे॒वास॑: कवत्नवे॑॥९॥

मा। स्रे॒ध॒त। सो॒मि॒नः। दक्ष॑त। म॒हे। कृ॒णु॒ध्व॒म्। रा॒ये। आ॒ऽतुजे॑। त॒रणिः॑। इत्। ज॒य॒ति॒। क्षेति॑। पु॒ष्य॑ति। न। दे॒वासः॑। क॒व॒त्न॒वे॑॥९॥

पदार्थः-(**मा**) निषेधे **(स्रेधत)** हिंसत **(सोमिनः)** ओषध्यादियुक्तस्यैश्वर्यवतो वा **(दक्षत)** बलं प्राप्नुत। अत्र **संहितायामि**ति दीर्घः। **(महे)** महते **(कृणुध्वम्)** **(राये)** धनाय **(आतुजे)** बलकारकाय **(तरणिः)** पुरुषार्थी **(इत्)** इव **(जयति)** **(क्षेति)** निवसति **(पुष्यति)** **(न)** निषेधे **(देवासः)** विद्वांसः **(कवत्नवे)** कुत्सितकर्मव्यापनाय॥९॥

अन्वयः-हे मनुष्या! यथा देवासः कवत्नवे न प्रवर्तन्ते तथा सोमिन आतुजे महे राय मा स्रेधत दक्षत सुकर्माणि कृणुध्वं यस्तरणिरिदिव जयति क्षेति पुष्यति ते दक्षत॥९॥

भावार्थः-अत्रोपमालङ्कारः। येऽन्यायेन कञ्चिन्न हिंसन्ति धर्मात्मानां वृद्धिं सततं कुर्वन्ति ते विद्वांसः सदा विजयन्ते धर्म्ये निवसन्ति पुष्टाश्च जायन्ते॥९॥

पदार्थः-हे मनुष्यो! जैसे **(देवासः)** विद्वान् जन **(कवत्नवे)** कुत्सित कर्म में व्याप्ति के लिये **(न)** नहीं प्रवृत्त होते हैं, वैसे **(सोमिनः)** ओषधी आदि युक्त वा ऐश्वर्यवान् के **(आतुजे)** करने वाले

(महे) महान् **(राये)** धन के लिये **(मा)** मत **(स्त्रेधत)** विनाशो **(दक्षत)** बल पाओ सुकर्म **(कृणुध्वम्)** करो जो **(तरणिः)** पुरुषार्थी जन **(इत्)** ही **(जयति)** जीतता **(क्षेति)** जो निरन्तर वसता वा **(पुष्यति)** जो पुष्ट होता, वे सब बल पावें॥९॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अन्याय से किसी की हिंसा नहीं करते और धर्मात्माओं की वृद्धि करते हैं, वे विद्वान् जन सर्वदा जीतते, धर्म में निवास करते और पुष्ट होते हैं॥९॥

पुनः कस्य केन किं स्यादित्याह॥

फिर किसका किससे क्या हो, इस विषय को अगले मन्त्र में कहते हैं॥

नकिः सुदासो रथं पर्यासु न रीरमत्।
इन्द्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे॥१०॥१८॥

नकिः। सुऽदासः। रथम्। परि। आसु। न। रीरमत्। इन्द्रः। यस्य। अविता। यस्य। मरुतः। गमत्। सः। गोऽमति। व्रजे॥१०॥

पदार्थः-(**नकिः**) (**सुदासः**) श्रेष्ठा दासाः सेवका दानानि वा यस्य सः (**रथम्**) (**परि**) सर्वतः (**आस**) अस्यति (**न**) निषेधे (**रीरमत्**) रमयति (**इन्द्रः**) दुष्टानां विदारकः (**यस्य**) (**अविता**) रक्षकः (**यस्य**) (**मरुतः**) प्राणा इव मनुष्याः (**गमत्**) गच्छति (**सः**) (**गोमति**) गावो बहवो धेनवो विद्यन्ते यस्मिँस्तस्मिन् (**व्रजे**) व्रजन्ति यस्मिँस्तस्मिन् स्थाने॥१०॥

अन्वयः-यस्येन्द्रोऽविता गमद्यस्य मरुतो रक्षकाः सन्ति गोमति व्रजे गमत् यस्येन्द्रो रक्षिता नास्ति स सुदासो रथं नकिः पर्यास स न रीरमत्॥१०॥

भावार्थः-यदि राजा प्रजाया रक्षको न स्यात्तर्हि कस्यापि सुखं न भवेत्॥१०॥

पदार्थः-(**यस्य**) जिसका (**इन्द्रः**) दुष्टों को विदीर्ण करने वाला (**अविता**) रक्षक (**गमत्**) जाता है वा (**यस्य**) जिसके (**मरुतः**) प्राण के मनुष्य रक्षा करने वाले हैं जो (**गोमति**) जिसमें बहुत सी गौयें विद्यमान और (**व्रजे**) जिसमें जाते हैं उस स्थान में जाता है, जिसका दुष्टों का विदीर्ण करने वाला रक्षक नहीं वह (**सुदासः**) श्रेष्ठ सेवक वा दोनों वाला जन (**रथम्**) रथ को (**नकिः**) नहीं (**परि, आस**) सब ओर से अलग करता और (**सः**) वह (**न**) नहीं (**रीरमत्**) दूसरों को रमाता है॥१०॥

भावार्थः-यदि राजा प्रजा का रक्षक न हो तो किसी को सुख न हो॥१०॥

पुना राजप्रजाजनाः परस्परं किं कुर्य्युरित्याह॥

फिर राजा और प्रजाजन परस्पर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

गमद्वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः।
अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम्॥११॥

गमत्। वाजम्। वाजयन्। इन्द्र। मर्त्यः। यस्य। त्वम्। अविता। भुवः। अस्माकम्। बोधि। अविता।

रथानाम्। अस्माकम्। शूर। नृणाम्॥ ११॥

पदार्थः-(**गमत्**) प्राप्नोति (**वाजम्**) विज्ञानमन्नादिकं वा (**वाजयन्**) प्राप्तुमिच्छन् (**इन्द्र**) परमैश्वर्ययुक्त राजन् (**मर्त्यः**) मनुष्यः (**यस्य**) (**त्वम्**) (**अविता**) रक्षकः (**भुवः**) भवेः (**अस्माकम्**) (**बोधि**) बुध्यस्व (**अविता**) रक्षकः (**रथानाम्**) यानादीनाम् (**अस्माकम्**) (**शूर**) निर्भयः (**नृणाम्**) मनुष्याणाम्॥ ११॥

अन्वयः-हे शूरेन्द्र! यस्य त्वमविता भुवः स मर्त्यो वाजयन् सन् वाजं गमद्येषामस्माकं रथानामेषामस्माकं नृणां चाऽविता संस्त्वं बोधि ते वयं वाजं प्राप्नुयाम॥ ११॥

भावार्थः-यदा राजा प्रजाः प्रजा राजानञ्च रक्षेत्तदा सर्वेषां यथावद्रक्षा संभवेत्॥ ११॥

पदार्थः-हे (**शूर**) निर्भय (**इन्द्र**) परमैश्वर्ययुक्त राजा! (**यस्य**) जिसके आप (**अविता**) रक्षक (**भुवः**) हों वह (**मर्त्यः**) मनुष्य (**वाजयन्**) पाने की इच्छा करता हुआ (**वाजम्**) विज्ञान वा अन्नादि को (**गमत्**) प्राप्त होता है जिन (**अस्माकम्**) हम लोगों के (**रथानाम्**) रथ आदि के तथा जिन (**अस्माकम्**) हम लोगों के (**नृणाम्**) मनुष्यों के भी (**अविता**) रक्षा करने वाले (**त्वम्**) आप (**बोधि**) समझें वे हम लोग विज्ञान वा अन्न आदि को प्राप्त हों॥ ११॥

भावार्थः-जब राजा प्रजाओं की और प्रजाजन राजाओं की रक्षा करें, तब सब की यथावत् रक्षा का संभव हो॥ ११॥

पुनः स राजा कि कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

उदिन्नवस्य रिच्यतेंऽशो धनं न जिग्युषः।
य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि॥ १२॥

उत्। इत्। नु। अस्य। रिच्यते। अंशः। धनम्। न। जिग्युषः। यः। इन्द्रः। हरिऽवान्। न। दुभन्ति। तम्। रिपः। दक्षम्। दधाति। सोमिनि॥ १२॥

पदार्थः-(**उत्**) (**इत्**) (**नु**) (**अस्य**) (**रिच्यते**) अधिको भवति (**अंशः**) भागः (**धनम्**) (**न**) इव (**जिग्युषः**) जयशीलस्य (**यः**) (**इन्द्रः**) समर्थो राजा (**हरिवान्**) बहुप्रशस्तमनुष्ययुक्तः (**न**) निषेधे (**दभन्ति**) हिंसन्ति (**तम्**) (**रिपः**) शत्रवः (**दक्षम्**) बलम् (**दधाति**) (**सोमिनि**) ऐश्वर्यवति॥ १२॥

अन्वयः-यो हरिवानिन्द्रः सोमिनि दक्षं दधाति तं रिपो न दभन्ति यस्याऽस्य जिग्युषस्तमिदंश उद्रिच्यते तमंशो धनं नेव नु दधाति॥ १२॥

भावार्थः-यो राजा धनिष्वैश्वर्यं दरिद्रेषु च वर्धयति तं हिंसितुं कोऽपि न शक्नोति यस्याऽधिकः पुरुषार्थो भवति तमेव धनप्रतिष्ठे प्राप्नुतः॥ १२॥

पदार्थः-(**यः**) जो (**हरिवान्**) बहुत प्रशंसित मनुष्य युक्त (**इन्द्रः**) समर्थ राजा (**सोमिनि**) ऐश्वर्यवान् में (**दक्षम्**) बल (**दधाति**) धारण करता है (**तम्**) उसको (**रिपः**) शत्रुजन (**न**) नहीं (**दभन्ति**) नष्ट करते हैं जिस (**अस्य**) इस (**जिग्युषः**) जयशील के (**इत्**) उस के प्रति (**अंशः**) भाग

(उत् रिच्यते) अधिक होता है उसको वह भाग **(धनम्)** धन के **(न)** समान **(नु)** शीघ्र धारण करता है॥१२॥

भावार्थः-जो राजा धनियों में जो ऐश्वर्य हैं उसे दरिद्रियों में भी बढ़ाता है उसको कोई नष्ट नहीं कर सकता है, जिसका अधिक पुरुषार्थ होता है उसी को धन और प्रतिष्ठा प्राप्त होती है॥१२॥

पुनः प्रजाः कीदृशं राजानमनुकूला भवन्तीत्याह॥

फिर प्रजा कैसे राजा के अनुकूल होती है, इस विषय को अगले मन्त्र में कहते हैं॥

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत्॥१३॥

मन्त्रम्। अखर्वम्। सुऽधितम्। सुऽपेशसम्। दधात। यज्ञियेषु। आ। पूर्वीः। चन। प्रऽसितयः। तरन्ति। तम्। यः। इन्द्रे। कर्मणा। भुवत्॥१३॥

पदार्थः-(**मन्त्रम्**) विचारम् (**अखर्वम्**) अनल्पं पूर्णम् (**सुधितम्**) सुष्ठुहितम् (**सुपेशसम्**) सुरूपम् (**दधात**) (**यज्ञियेषु**) राजपालनादिसङ्गतेषु व्यवहारेषु (**आ**) (**पूर्वीः**) प्राचीनाः (**चन**) अपि (**प्रसितयः**) प्रकृष्टानि प्रेमबन्धनानि (**तरन्ति**) प्राप्नुवन्ति (**तम्**) (**यः**) (**इन्द्रे**) राजनि (**सति**) (**कर्मणा**) सत्क्रियया (**भुवत्**) भवेत्॥१३॥

अन्वयः-ये यज्ञियेष्वखर्वं सुधितं सुपेशसं मन्त्रं दधात यः कर्मणेन्द्रे भुवत्तं पूर्वीः प्रसितयश्चना तरन्ति॥१३॥

भावार्थः-येषां राज्ञां गूढो विचारः सर्वहितकरणं श्रेष्ठप्रयत्नश्च भवति ते सत्क्रियया सर्वाः प्रजाः प्रेमास्पदेन रञ्जयितुं शक्नुवन्ति॥१३॥

पदार्थः-जो (**यज्ञियेषु**) राजपालनादि कामों से संग रखते हुए व्यवहारों में (**अखर्वम्**) पूर्ण (**सुधितम्**) सुन्दरता से स्थापित (**सुपेशसम्**) सुरूपम् (**मन्त्रम्**) विचार को (**दधात**) धारण करें। (**यः**) जो (**कर्मणा**) उत्तम क्रिया से (**इन्द्रे**) राजा के निमित्त (**भुवत्**) प्रसिद्ध हो (**तम्**) उसको (**पूर्वीः**) प्राचीन (**प्रसितयः**) प्रकृष्ट प्रेमबन्धन (**चन**) भी (**आ, तरन्ति**) प्राप्त होते हैं॥१३॥

भावार्थः-जिन राजाओं का गूढ़ विचार सर्वहित करना और श्रेष्ठ यत्न होता है, वे अच्छी क्रिया से सब प्रजाजनों को प्रेमास्मपद से प्रसन्न कर सकते हैं॥१३॥

पुनर्मनुष्यः केन रक्षितः कीदृशो भवतीत्याह॥

फिर मनुष्य किससे रक्षा पाया हुआ कैसा होता है, इस विषय को अगले मन्त्र में कहते हैं॥

कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति।
श्रद्धा इत्ते मघवन् पार्ये दिवि वाजी वाजं सिषासति॥१४॥

कः। तम्। इन्द्र। त्वाऽवसुम्। आ। मर्त्यः। दधर्षति। श्रद्धा। इत्। ते। मघऽवन्। पार्ये। दिवि। वाजी। वाजम्। सिसासति॥१४॥

पदार्थः-(**कः**) (**तम्**) (**इन्द्र**) धार्मिक राजन् (**त्वावसुम्**) त्वया प्राप्तधनम् (**आ**) (**मर्त्यः**) (**दधर्षति**) तिरस्करोति (**श्रद्धा**) सत्ये प्रीतिः (**इत्**) एव (**ते**) तव (**मघवन्**) बह्वैश्वर्य (**पार्ये**) पालनीये पूर्णे वा (**दिवि**) प्रकाशे (**वाजी**) विज्ञानवान् (**वाजम्**) विज्ञानम् (**सिषासति**) विभक्तुमिच्छति॥१४॥

अन्वयः-हे मघवन्निन्द्र को मर्त्यो तं त्वावसुं दधर्षति ते पार्ये दिवि को वाजी वाजं श्रद्धा श्रदामिदासिषासति॥१४॥

भावार्थः-यस्य रक्षां धार्मिको राजा करोति तं तिरस्कर्तुं कः शक्नोति॥१४॥

पदार्थः-हे (**मघवन्**) बहुत ऐश्वर्य वाले (**इन्द्र**) धार्मिक राजा! (**कः**) कौन (**मर्त्यः**) मनुष्य (**तम्**) उस (**त्वावसुम्**) तुम से पाये हुए धन वाले का (**दधर्षति**) तिरस्कार करता है (**ते**) आपके (**पार्ये**) पालना करने योग्य वा पूर्ण (**दिवि**) प्रकाश में कौन (**वाजी**) विज्ञानवान् (**वाजम्**) विज्ञान को तथा (**श्रद्धा**) सत्य में प्रीति श्रद्धा (**इत्**) ही को (**आ, सिषासति**) अलग करना चाहता है॥१४॥

भावार्थः-जिसकी रक्षा धार्मिक राजा करता है, उसका तिरस्कार कौन कर सकता है॥१४॥

पुनः स राजा किं कुर्य्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

म॒घोन॑: स्म वृत्र॒हत्ये॑षु चोदय॒ ये दद॑ति प्रि॒या वसु॑।
तव॒ प्रणी॑ती हर्यश्व सू॒रिभि॒र्विश्वा॑ तरेम दुरि॒ता॥ १५॥ १९॥

म॒घोन॑:। स्म॒। वृ॒त्र॒ऽहत्ये॑षु। चो॒द॒य॒। ये। दद॑ति। प्रि॒या। वसु॑। तव॑। प्रऽनी॑ती। हरि॒ऽअ॒श्व॒। सू॒रिऽभि॑:। विश्वा॑। त॒रे॒म॒। दु॒:ऽइ॒ता॥ १५॥

पदार्थः-(**मघोनः**) धनाढ्यान् (**स्म**) एव (**वृत्रहत्येषु**) वृत्राणां शत्रूणां हत्या येषु स- ामेषु तेषु (**चोदय**) प्रेरय (**ये**) (**ददति**) (**प्रिया**) प्रियाणि कमनीयानि (**वसु**) धनानि (**तव**) (**प्रणीति**) प्रकृष्टया नीत्या रक्षिताः सन्तः (**हर्यश्व**) हरयोऽश्वा महान्तो मनुष्या यस्य तत्सम्बुद्धौ (**सूरिभिः**) विद्वद्भिः सह (**विश्वा**) सर्वाणि (**तरेम**) (**दुरिता**) दुःखानि॥१५॥

अन्वयः-हे हर्यश्व! सूरिभिस्सह ये तव प्रणीती प्रिया वसु ददति तान् ये च तव प्रणीती सूरिभिः सह वयं विश्वा दुरिता तरेम ताँश्च त्वं वृत्रहत्येषु मघोनः स्म चोदय॥१५॥

भावार्थः-हे राजन्! भवान् यदि पक्षपातं विहाय सर्वान् रक्षेदुदारान् धनाढ्यान् सङ्ग्रामेषु प्रेरयेत्तर्हि सर्वे वयं सर्वाणि दुःखानि तरेम॥१५॥

पदार्थः-हे (**हर्यश्व**) हरणशील महान् घोड़ों वाले मनुष्य! (**सूरिभिः**) विद्वानों के साथ (**ये**) जो (**तव**) आपकी (**प्रणीती**) उत्तम नीति से (**प्रिया**) प्रिय मनोहर (**वसु**) धनों को (**ददति**) देते हैं उनको और जो आपकी उत्तम नीति और विद्वानों के साथ हम लोग (**विश्वा**) सब (**दुरिता**) दुःखों को (**तरेम**) तरें उन्हें भी आप (**वृत्रहत्येषु**) शत्रुओं की हिंसा जिनमें होती है उनमें (**मघोनः**) धनाढ्य करने (**स्म**) ही को (**चोदय**) प्रेरणा देओ॥१५॥

भावार्थः-हे राजा! आप यदि पक्षपात को छोड़ के सबकी रक्षा करें और उदार धनाढ्यों को

संग्राम में प्रेरणा दें तो सब हम लोग सब दु:खों को तरें॥१५॥

पुन: स राजा कीदृश: स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम्।
सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते॥१६॥

तव। इत्। इन्द्र। अवमम्। वसु। त्वम्। पुष्यसि। मध्यमम्। सत्रा। विश्वस्य। परमस्य। राजसि। नकि:। त्वा गोषु। वृण्वते॥१६॥

पदार्थ:-(**तव**) (**इत्**) (**इन्द्र**) (**अवमम्**) निकृष्टं रक्षकं वा (**वसु**) द्रव्यम् (**त्वम्**) (**पुष्यसि**) (**मध्यमम्**) मध्ये भवम् (**सत्रा**) सत्यम् (**विश्वस्य**) समग्रस्य (**परमस्य**) उत्कृष्टस्य (**राजसि**) (**नकि:**) निषेधे (**त्वा**) त्वाम् (**गोषु**) पृथिवीषु (**वृण्वते**) स्वीकुर्वन्ति॥१६॥

अन्वय:-हे इन्द्र! यत्तवाऽवमं मध्यमं वस्वस्ति येन त्वं पुष्यसि यस्य विश्वस्य परमस्य धनस्य मध्ये सत्रा त्वं राजसि तत्र गोषु च त्वा केऽपि शत्रवो नकिरिद् वृण्वते॥१६॥

भावार्थ:-हे राजँस्त्वं सदैव निकृष्टमध्यमोत्तमानां धनानां न्यायेनैव सञ्चयं कुर्य्या: यस्य धर्मजत्वात् सत्यं धनं वर्तते तं किमपि दु:ख नाप्नोति॥१६॥

पदार्थ:-हे (**इन्द्र**) परमैश्वर्यवान्! जो (**तव**) आपका (**अवमम्**) निकृष्ट वा रक्षा करने वाला और (**मध्यमम्**) मध्यम (**वसु**) धन है जिससे (**त्वम्**) आप (**पुष्यसि**) पुष्ट होते जिस (**विश्वस्य**) समग्र (**परमस्य**) उत्तम धन के बीच (**सत्रा**) सत्य आप (**राजसि**) प्रकाशित होते हैं उसमें और (**गोषु**) पृथिवियों में (**त्वा**) आपको कोई भी शत्रु जन (**नकि:**) न (**इत्**) ही (**वृण्वते**) स्वीकार करते हैं॥१६॥

भावार्थ:-हे राजा! आप सदैव निकृष्ट, मध्यम और उत्तम धनों का न्याय से ही संचय करो, जिसका धर्म्म से उत्पन्न होने से सत्य धन वर्त्तमान है, उसको कोई दु:ख नहीं प्राप्त होता है॥१६॥

पुन: स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजय:।
तवायं विश्व: पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते॥१७॥

त्वम्। विश्वस्य। धनऽदा:। असि। श्रुत:। ये। ईम्। भवन्ति। आजय:। तव। अयम्। विश्व:। पुरुऽहूत। पार्थिव:। अवस्यु:। नाम। भिक्षते॥१७॥

पदार्थ:-(**त्वम्**) (**विश्वस्य**) समग्रस्य राष्ट्रस्य (**धनदा:**) यो धनं ददाति स: (**असि**) (**श्रुत:**) प्रसिद्धकीर्ति: (**ये**) (**ईम्**) सर्वत: (**भवन्ति**) (**आजय:**) स-ामा: (**तव**) (**अयम्**) (**विश्व:**) सर्वो जन: (**पुरुहूत**) बहुभि: प्रशंसित स्वीकृत (**पार्थिव:**) पृथिव्यां विदित: (**अवस्यु:**) आत्मनोऽवो रक्षामिच्छु: (**नाम**) प्रसिद्धं रक्षणम् (**भिक्षते**) याचते॥१७॥

अन्वयः-हे पुरुहूत! यः श्रुतः पार्थिवस्त्वं विश्वस्य धनदा असि यस्य तवायं विश्वोऽवस्युर्जनो नाम त्वद्रक्षणं भिक्षते य ईमाजयो भवन्ति तत्र सर्वे त्वत्सहायमिच्छन्ति ताँस्त्वं सततं रक्ष॥१७॥

भावार्थः-यो राजा सङ्ग्रामे विजयकर्तृभ्यः पुष्कलं धनं ददाति तस्य पराजयः कदापि न भवति यः प्रजाजनो रक्षणमिच्छेत्तस्य रक्षां यः सततं करोति स एव पुण्यकीर्तिर्भवति॥१७॥

पदार्थः-हे **(पुरुहूत)** बहुतों से प्रशंसा को प्राप्त स्वीकार किये हुए राजन्! जो **(श्रुतः)** प्रसिद्ध कीर्तियुक्त **(पार्थिवः)** पृथिवी पर विदित **(त्वम्)** आप **(विश्वस्य)** समग्र राज्य के **(धनदाः)** धन देने वाले **(असि)** हैं जिन **(तव)** आपका **(अयम्)** यह **(विश्वः)** सर्व **(अवस्युः)** अपने को रक्षा चाहने वाला जन **(नाम)** प्रसिद्ध तुम से रक्षा को **(भिक्षते)** मांगता है **(ये)** जो **(ईम्)** सब ओर से **(आजयः)** संग्राम **(भवन्ति)** होते हैं, उनमें सब तुम्हारे सहाय को चाहते हैं, उनकी आप निरन्तर रक्षा करें॥१७॥

भावार्थः-जो राजा संग्राम में विजय करने वालों को बहुत धन देता है, उसका पराजय कभी नहीं होता है, जो प्रजाजन रक्षा चाहें उसकी रक्षा जो निरन्तर करता है, वही पुण्यकीर्ति होता है॥१७॥

पुना राजपुरुषैः किमेष्टव्यमित्याह॥

फिर राजपुरुषों को क्या चाहना योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

यदिन्द्र यावतस्त्वमेतावदहमीशीय।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय॥१८॥

यत्। इन्द्र। यावतः। त्वम्। एतावत्। अहम्। ईशीय। स्तोतारम्। इत्। दिधिषेय। रदवसो इति रदऽवसो। न। पापऽत्वाय। रासीय॥१८॥

पदार्थः-(**यत्**) यः **(इन्द्र)** परमैश्वर्यप्रदातः **(यावतः)** **(त्वम्)** **(एतावत्)** **(अहम्)** **(ईशीय)** ईश्वरः समर्थो भवेयम् **(स्तोतारम्)** **(इत्)** एव **(दिधिषेय)** धरेयम् **(रदावसो)** यो रदेषु विलेखनेषु वसति तत्सम्बुद्धौ **(न)** निषेधे **(पापत्वाय)** पापस्य भावाय **(रासीय)** दद्याम्॥१८॥

अन्वयः-हे रदावस इन्द्र! यद्यस्त्वं यावत ईशिषे एतावदहमपीशीय स्तोतारमिद्दिधिषेय पापत्वाय नाहं रासीय॥१८॥

भावार्थः-हे राजन्! यदि भवानस्मान्सततं रक्षेत् तर्हि वयं भवतो राष्ट्रस्य च रक्षां विधाय पापाचारं त्यक्त्वाऽन्यानप्यधर्माचारात् पृथग्रक्ष्य सततमानन्देम॥१८॥

पदार्थः-हे **(रदावसो)** करोदनों में वसने वाले **(इन्द्र)** परम ऐश्वर्य्य के देने वाले! **(यत्)** जो **(त्वम्)** आप **(यावतः)** जितने के ईश्वर हों **(एतावत्)** इतने का मैं **(ईशीय)** ईश्वर हूँ समर्थ होऊँ **(स्तोतारम्)** प्रशंसा करने वाले को **(इत्)** ही **(दिधिषेय)** धारण करूं और **(पापत्वाय)** पाप होने के लिए पदार्थ **(न)** न **(अहम्)** मैं **(रासीय)** देऊं॥१८॥

भावार्थः-हे राजा! यदि आप हम लोगों की निरन्तर रक्षा करें तो हम आपके राज्य को रक्षा कर पापाचरण त्याग औरों को भी अधर्माचरण से अलग रख कर निरन्तर आनन्द करें॥१८॥

पुनः प्रजाजनैः किमेष्टव्यमित्याह॥

फिर प्रजाजनों को क्या चाहने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन॥ १९॥

शिक्षेयम्। इत्। महयते। दिवेऽदिवे। रायः। आ। कुहचित्ऽविदे। नहि। त्वत्। अन्यत्। मघऽवन्। नः। आप्यम्। वस्यः। अस्ति। पिता। चन॥ १९॥

पदार्थः-(**शिक्षेयम्**) सुशिक्षां कुर्याम् (**इत्**) एव (**महयते**) महते (**दिवेदिवे**) (**राये**) धनाय (**आ**) समन्तात् (**कुहचिद्विदे**) यः कुह क्वचिदपि विन्दति तस्मै (**नहि**) (**त्वत्**) (**अन्यत्**) (**मघवन्**) पूजितधनयुक्त (**नः**) अस्माकम् (**आप्यम्**) आप्तुं योग्यम् (**वस्यः**) वशीयः (**अस्ति**) (**पिता**) (**चन**) अपि॥ १९॥

अन्वयः-हे मघवन्निन्द्र! योऽहं दिवेदिव आ कुहचिद्विदे महयते राये शिक्षेयं त्वदन्यद्रक्षकं न जानीयां यस्त्वं पिता चनासि स त्वमिन्नो वस्य आप्यमन्यन्नह्यस्ति॥ १९॥

भावार्थः-त एव भृत्या उत्तमाः सन्ति ये राजानं स्वस्वामिनं विहायाऽन्यं न याचन्ते नादत्तं गृह्णन्ति प्रतिदिनं पुरुषार्थेन प्रजारक्षणं धनवृद्धिं च चिकीर्षन्ति॥ १९॥

पदार्थः-हे (**मघवन्**) पूजित धनयुक्त परमैश्वर्य्यवान्! जो मैं (**दिवेदिवे**) प्रकाश प्रकाश के लिये (**आ, कुहचिद्विदे**) जो कहीं भी प्राप्त होता उस (**महयते**) महान् (**राये**) धन के लिये (**शिक्षेयम्**) अच्छी शिक्षा करूं (**त्वत्**) तुम से (**अन्यत्**) और रक्षक को न जानूं जो आप (**पिता**) पिता रक्षा करने वाले (**चन**) भी हैं इस कारण सो आप (**इत्**) ही (**नः**) हमारे (**वस्यः**) अत्यन्त वश (**आप्यम्**) प्राप्त होने के योग्य हैं और (**नहि**) नहीं (**अस्ति**) है॥ १९॥

भावार्थः-वे ही भृत्य उत्तम हैं जो राजा वा स्वामी को छोड़ के दूसरे को **[**=से**]** नहीं जांचते **[**=मांगते**]** न विना दिये लेते, प्रतिदिन पुरुषार्थ से प्रजा की रक्षा कर और धनवृद्धि करना चाहते हैं॥ १९॥

पुना राजप्रजाजनाः परस्परं कथं वर्तेरन्नित्याह॥

फिर राजा और प्रजाजन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

तरणिरित्सिषासति वाजं पुरंध्या युजा।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रवम्॥ २०॥ २०॥

तरणिः। इत्। सिसासति। वाजम्। पुरम्ऽध्या। युजा। आ। वः। इन्द्रम्। पुरुऽहूतम्। नमे। गिरा। नेमिम्। तष्टाऽइव। सुऽद्रवम्॥ २०॥

पदार्थः-(**तरणिः**) तारकः (**इत्**) एव (**सिषासति**) सम्भक्तुमिच्छति (**वाजम्**) धनं विज्ञानं वा (**पुरन्ध्या**) या पुरूनर्थान् दधाति तया प्रज्ञया (**युजा**) योगयुक्तया (**आ**) (**वः**) युष्माकम् (**इन्द्रम्**) परमैश्वर्यम् (**पुरुहूतम्**) बहुभिः स्तुतम् (**नमे**) नमामि (**गिरा**) वाण्या (**नेमिम्**) चक्रम् (**तष्टेव**) तक्षेव

(सुद्रवम्) यः सुष्ठु द्रवति गच्छति धावति तम्॥ २०॥

अन्वयः-यस्तरणिरिद्राजा युजा पुरन्ध्या वाजं सिषासति तं वः पुरहूतमिन्द्रं सुद्रवं नेमिं तष्टेव गिरा आ नमे॥ २०॥

भावार्थः-यो राजा पूर्णाभ्यां विद्याविनयाभ्यां धर्म्येण च सत्यासत्ये विभज्य न्यायं करोति तं वयं सर्वे नमेम यथा तक्षा रथादिकं रचयति तथैव वयं सर्वाणि कार्याणि रचयेम॥ २०॥

पदार्थः-जो **(तरणिः)** तारने वाला **(इत्)** ही राजा **(युजा)** योगयुक्त **(पुरन्ध्या)** बहुत अर्थों को धारण करने वाली बुद्धि से **(वाजम्)** धन वा विज्ञान को **(सिषासति)** अच्छे प्रकार बांटने की इच्छा करता है उस **(वः)** तुम्हारे **(पुरुहूतम्)** बहुतों से स्तुति को पाये हुए **(इन्द्रम्)** परमैश्वर्य्यवान् को **(सुद्रवम्)** अच्छे प्रकार दौड़ने वाले **(नेमिम्)** पहिये को **(तष्टेव)** बढ़ई जैसे, वैसे **(गिरा)** वाणी से **(आ, नमे)** अच्छे प्रकार नमता हूँ॥ २०॥

भावार्थः-जो राजा पूर्ण विद्या और विनय तथा धर्मयुक्त व्यवहार से सत्य और असत्य को अलग कर न्याय करता है, उसको हम सब लोग नमते हैं जैसे बढ़ई रथादि को बनाता है, वैसे हम लोग सब कामों को रचें॥ २०॥

पुनर्मनुष्या धनप्राप्तये किं किं कर्म कुर्य्युरित्याह॥

फिर मनुष्य धन की प्राप्ति के लिये क्या-क्या कर्म करें, इस विषय को अगले मन्त्र में कहते हैं॥

न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत्।
सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि॥ २१॥

न। दुःऽस्तुती। मर्त्यः। विन्दते। वसु। न। स्रेधन्तम्। रयिः। नशत्। सुऽशक्तिः। इत्। मघऽवन्। तुभ्यम्। माऽवते। देष्णम्। यत्। पार्ये। दिवि॥ २१॥

पदार्थः-(**न**) निषेधे **(दुष्टुती)** दुष्टया प्रशंसया **(मर्त्यः)** मनुष्यः **(विन्दते)** प्राप्नोति **(वसु)** धनम् **(न)** निषेधे **(स्रेधन्तम्)** हिंसन्तम् **(रयिः)** श्रीः **(नशत्)** प्राप्नोति **(सुशक्तिः)** शोभना चासौ शक्तिश्च सुशक्तिः **(इत्)** एव **(मघवन्)** परमपूजितधनयुक्त **(तुभ्यम्)** **(मावते)** मत्सदृशाय **(देष्णम्)** दातुं योग्यम् **(यत्)** **(पार्ये)** पालयितुं पूरयितुं योग्ये **(दिवि)** कामे॥ २१॥

अन्वयः-हे मघवन्! यथा मर्त्यो दुष्टुती वसु न विन्दते स्रेधन्तं नरं रयिः सुशक्तिरिन्न नशदेवं मावते तुभ्यं पार्ये दिवि यद्देष्णं न नशत् तदन्यमपि न प्राप्नोति॥ २१॥

भावार्थः-येऽधर्माचारा दुष्टा हिंस्रा मनुष्याः सन्ति तान् धनं राज्यं श्रीरुत्तमं सामर्थ्यं च न प्राप्नोति तस्मात् सर्वैर्न्यायाचारेणैव धनमन्वेषणीयम्॥ २१॥

पदार्थः-हे **(मघवन्)** परमपूजित धनयुक्त! जैसे **(मर्त्यः)** मनुष्य **(दुष्टुती)** दुष्ट प्रशंसा से **(वसु)** धन को **(न)** न **(विन्दते)** प्राप्त होता है **(स्रेधन्तम्)** और हिंसा करने वाले मनुष्य को **(रयिः)** लक्ष्मी और **(सुशक्तिः)** सुन्दर शक्ति **(इत्)** ही **(न)** नहीं **(नशत्)** प्राप्त होती है इस प्रकार **(मावते)**

मेरे समान **(तुभ्यम्)** तुम्हारे लिये **(पार्ये)** पालना वा पूर्णता करने के योग्य **(दिवि)** काम में **(यत्)** जो **(देष्णम्)** देने योग्य को न प्राप्त होता वह और को भी नहीं प्राप्त होता है॥११॥

भावार्थः-जो अधर्माचरण से युक्त दुष्ट, हिंसक मनुष्य हैं उनको धन, राज्य, और उत्तम सामर्थ्य नहीं प्राप्त होता है, इससे सबको न्याय के आचरण से ही धन खोजना चाहिये॥२१॥

पुनरस्य जगतः कः स्वामीत्याह॥

फिर इस जगत् का स्वामी कौन है, इस विषय को अगले मन्त्र में कहते हैं॥

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥२२॥

अभि। त्वा। शूर। नोनुमः। अदुग्धाःऽइव। धेनवः। ईशानम्। अस्य। जगतः। स्वःऽदृशम्। ईशानम्। इन्द्र। तस्थुषः॥२२॥

पदार्थः-(**न**) (**अभि**) (**त्वा**) त्वाम् (**शूर**) पापाचाराणां हिंसकः (**नोनुमः**) भृशं नमामः (**अदुग्धाइव**) दुग्धरहिता इव (**धेनवः**) गावः (**ईशानम्**) ईषणशीलम् (**अस्य**) (**जगतः**) संसारस्य (**स्वर्दृशम्**) सुखं द्रष्टुम् (**ईशानम्**) निर्मातारम् (**इन्द्र**) परमैश्वर्ययुक्त (**तस्थुषः**) स्थावरस्य॥२२॥

अन्वयः-हे शूरेन्द्र परमात्मन्नस्य जगत ईशानमस्य तस्थुष ईशानं त्वा त्वां स्वर्दृशं धेनवोऽदुग्धा इव वयमभि नोनुमः॥२२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यदि सततं सुखेच्छा स्यात्तर्हि परमात्मानमेव भवन्त उपासीरन्॥२२॥

पदार्थः-हे (**शूर**) पापाचरणों के हिंसक (**इन्द्र**) परमैश्वर्ययुक्त परमात्मा! (**अस्य**) इस (**जगतः**) जङ्गम के (**ईशानम्**) चेष्टा कराने और (**तस्थुषः**) स्थावर संसार के (**ईशानम्**) निर्माण करने वाले (**त्वा**) आपको (**स्वर्दृशम्**) सुखपूर्वक देखने को (**धेनवः**) गौवें (**अदुग्धाइव**) दूधरहित हों जैसे, वैसे हम लोग (**अभि, नोनुमः**) सब ओर से निरन्तर नमते प्रणाम करते हैं॥२२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्य! यदि निरन्तर सुखेच्छा हो तो परमात्मा ही की आप लोग उपासना करें॥२२॥

परमेश्वरेण तुल्योऽधिको वा कोऽपि नास्तीत्याह॥

परमेश्वर के तुल्य वा अधिक कोई नहीं है, इस विषय को अगले मन्त्र में कहते हैं॥

न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥२३॥

न। त्वाऽवान्। अन्यः। दिव्यः। न। पार्थिवः। न। जातः। न। जनिष्यते। अश्वऽयन्तः। मघऽवन्। इन्द्र। वाजिनः। गव्यन्तः। त्वा। हवामहे॥२३॥

पदार्थः-(**न**) निषेधे (**त्वावान्**) त्वया सदृशः (**अन्यः**) (**दिव्यः**) शुद्धस्वरूपः (**नः**)

(पार्थिवः) पृथिव्यां विदितः **(न)** **(जातः)** उत्पन्नः **(न)** **(जनिष्यते)** उत्पत्स्यते **(अश्वायन्तः)** महतो विदुषः कामयमानाः **(मघवन्)** बहुधनयुक्त **(इन्द्र)** परमैश्वर्यप्रद जगदीश्वर **(वाजिनः)** विज्ञानाऽन्नवन्तः **(गव्यन्तः)** आत्मनो गां सुशिक्षितां वाचमुत्तमां भूमिं वेच्छन्तः **(त्वा)** त्वाम् **(हवामहे)** प्रशंसामहे॥२३॥

अन्वयः-हे मघवन्निन्द्र! यतः कोऽपि पदार्थो न त्वावानन्यो दिव्यः पदार्थोऽस्ति न पार्थिवोऽस्ति न जातोऽस्ति न जनिष्यते तस्मात्त्वाऽश्वायन्तो वाजिनो गव्यन्तो वयं हवामहे॥२३॥

भावार्थः-हे मनुष्या! यस्मात्परमेश्वरेण तुल्योऽधिकोऽन्यः पदार्थः कोऽपि नास्ति नोत्पन्न आसीन्न चैव कदाचिदुत्पत्स्यते तस्मादेव तस्योपासनं प्रशंसां च वयं नित्यं कुर्याम॥२३॥

पदार्थः-हे **(मघवन्)** बहुधनयुक्त **(इन्द्र)** परम ऐश्वर्य देने वाले जगदीश्वर! जिससे कोई पदार्थ **(न)** न **(त्वावान्)** आपके सदृश **(अन्यः)** और **(दिव्यः)** शुद्धस्वरूप पदार्थ है **(न)** न **(पार्थिवः)** पृथिवी पर जाना हुआ है **(न)** न **(जातः)** उत्पन्न हुआ है **(न)** न **(जनिष्यते)** उत्पन्न होगा इससे **(त्वा)** आपकी **(अश्वायन्तः)** महान् विद्वानों की कामना करने वाले **(वाजिनः)** विज्ञान और अन्न वाले और **(गव्यन्तः)** अपने को उत्तम वाणी वा उत्तम भूमि की इच्छा करने वाले हम लोग **(हवामहे)** प्रशंसा करते हैं॥२३॥

भावार्थः-हे मनुष्यो! जिस कारण परमेश्वर से तुल्य अधिक अन्य पदार्थ कोई नहीं न उत्पन्न हुआ न कभी भी उत्पन्न होगा, इससे ही उसकी उपासना और प्रशंसा हम लोग नित्य करें॥२३॥

पुनः स परमेश्वरः कीदृशोऽस्तीत्याह॥

फिर वह परमेश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

अ॒भी ष॒तस्तदा भ॒रेन्द्र॒ ज्याय॒ः कनीयसः।
पु॒रु॒वसु॒र्हि म॑घवन्त्स॒नादसि॒ भरे॑भरे च॒ हव्य॑ः॥२४॥

अ॒भि। स॒तः। तत्। आ। भ॒र॒। इन्द्र॑। ज्यायः॑। कनी॑यसः। पु॒रु॒ऽवसु॑ः। हि। म॒घऽव॒न्। स॒नात्। असि॑। भरे॑ऽभरे। च॒। हव्य॑ः॥२४॥

पदार्थः-(**अभि**) अत्र **निपातस्य चे**ति दीर्घः। **(सतः)** विद्यमानस्य **(तत्)** चेतनं ब्रह्म **(आ)** **(भर)** **(इन्द्र)** ऐश्वर्ययुक्तजीव **(ज्यायः)** अतिशयेन ज्येष्ठम् **(कनीयसः)** अतिशयेन कनिष्ठात् **(पुरुवसुः)** पुरूणां बहूनां वासयिता **(हि)** यतः **(मघवन्)** सकलैश्वर्यधनयुक्त **(सनात्)** सनातन **(असि)** **(भरेभरे)** पालनीये व्यवहारे **(च)** **(हव्यः)** स्तोतुमर्हः॥२४॥

अन्वयः-हे मघवन्निन्द्र! हि यतस्त्वं भरेभरे सनाद्धव्यः पुरुवसुरसि तस्मात्सतस्तत्कनीयसो ज्यायो ब्रह्म भरेभरे चाऽभि भर॥२४॥

भावार्थः-हे मनुष्या! यः परमात्मा अणोरणीयान् महतो महीयान् सनातनः सर्वाधारः सर्वव्यापकस्सर्वैरुपासनीयोऽस्ति तदाऽऽश्रयमेव सर्वे कुर्वन्तु॥२४॥

पदार्थः-हे **(मघवन्)** सकलैश्वर्य और धनयुक्त **(इन्द्र)** साधारणतया ऐश्वर्ययुक्त **(हि)** जिससे

आप **(भरेभरे)** पालना करने योग्य व्यवहार में **(सनात्)** सनातन **(हव्यः)** स्तुति करने योग्य **(पुरुवसुः)** बहुतों के वसाने वाले **(असि)** हैं इससे **(सतः)** विद्यमान **(तत्)** उस चेतन ब्रह्म **(कनीयसः)** अतीव कनिष्ठ के **(ज्यायः)** अत्यन्त ज्येष्ठ प्रशंसनीय ब्रह्म को **[(भरे)]** पालनीय व्यवहार में **(च)** भी **(आ, अभि, भर)** सब ओर से धारण करो॥ २४॥

भावार्थः-हे मनुष्यो! जो परमात्मा अणु से अणु, सूक्ष्म से सूक्ष्म, बड़े से बड़ा सनातन सर्वाधार सर्वव्यापक सब की उपासना करने योग्य है, उसी का आश्रय सब करें॥ २४॥

पुनः स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

परा॑ णुदस्व मघवन्न॒मित्रा॑न्त्सु॒वेदा॑ नो॒ वसू॑ कृधि।
अ॒स्माक॑ं बोध्यवि॒ता म॑हाध॒ने भवा॑ वृ॒धः सखी॑नाम्॥ २५॥

परा॑। नु॒दु॒स्व॒। म॒घ॒ऽव॒न्। अ॒मित्रा॑न्। सु॒ऽवेदा॑ः। न॒ः। वसु॑। कृ॒धि॒। अ॒स्माक॑म्। बो॒धि॒। अ॒वि॒ता। म॒हा॒ऽध॒ने। भव॑। वृ॒धः। सखी॑नाम्॥ २५॥

पदार्थः-(**परा**) (**णुदस्व**) प्रेरय (**मघवन्**) बहुधनयुक्त राजन् (**अमित्रान्**) शत्रून् (**सुवेदाः**) धर्मोपार्जितैश्वर्यः (**नः**) अस्माकमस्मभ्यं वा (**वसु**) अत्र **संहितायामि**ति दीर्घः। (**कृधि**) कुरु (**अस्माकम्**) (**बोधि**) बुध्यस्व (**अविता**) रक्षकः (**महाधने**) महान्ति धनानि प्राप्नुवन्ति यस्मिँस्तस्मिन् स- ामे (**भव**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**वृधः**) वर्धकः (**सखीनाम्**) सर्वसुहृदाम्॥ २५॥

अन्वयः-हे मघवन् राजन् सुवेदास्त्वं नोऽस्माकमित्रान् परा णुदस्व नो वसु कृधि महाधनेऽस्माकं सखीनामविता बोधि वृधो भव॥ २५॥

भावार्थः-हे राजंस्त्वं धार्मिकाञ्छूरान्सत्कृत्य शिक्षयित्वा युद्धविद्यायां कुशलान्कृत्वा दस्व्यादीन्दुष्टान्निवार्य्य सर्वोपकारकाणां मनुष्याणां रक्षको भव॥ २५॥

पदार्थः-हे (**मघवन्**) बहुधनयुक्त राजा (**सुवेदाः**) धर्म से उत्पन्न किये हुए ऐश्वर्ययुक्त आप (**नः**) हमारे (**अमित्रान्**) शत्रुओं को (**परा, णुदस्व**) प्रेरो हमारे लिये (**वसु**) धन को (**कृधि**) सिद्ध करो (**महाधने**) बड़े वा बहुत धन जिसमें प्राप्त होते हैं उस संग्राम में (**अस्माकम्**) हमारे (**सखीनाम्**) सर्व मित्रों के (**अविता**) रक्षा करने वाले (**बोधि**) जानिये और (**वृधः**) बढ़ने वाले (**भव**) हूजिये॥ २५॥

भावार्थः-हे राजा! आप धार्मिक, शूरजनों का सत्कार कर उनको शिक्षा देकर युद्धविद्या में कुशल कर डाकू आदि दुष्टों को निवृत्त कर सर्वोपकारी मनुष्यों के रक्षा करने वाले हूजिये॥ २५॥

परमेश्वरो मनुष्यैः किंवत्प्रार्थनीय इत्याह॥

परमेश्वर मनुष्यों को किसके तुल्य प्रार्थना करने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

इन्द्र॒ क्रतु॑ं न॒ आ भ॑र पि॒ता पु॒त्रेभ्यो॒ यथा॑।

शिक्षा॑ णो अ॒स्मिन् पु॑रुहूत॒ याम॑नि जी॒वा ज्योति॑रशीमहि॥ २६॥

इन्द्र॑। क्रतु॑म्। न॒:। आ। भ॒र॒। पि॒ता। पु॒त्रेभ्य॑:। यथा॑। शिक्ष॑। न॒:। अ॒स्मिन्। पु॒रु॒ऽहू॒त॒। याम॑नि। जी॒वा:। ज्योति॑:। अ॒शी॒म॒हि॥ २६॥

पदार्थ:-(**इन्द्र**) परमैश्वर्यप्रद जगदीश्वर (**क्रतुम्**) धर्म्यां प्रज्ञाम् (**न:**) अस्मभ्यम् (**आ**) (**भर**) (**पिता**) (**पुत्रेभ्य:**) (**यथा**) (**शिक्षा**) अत्र **द्व्यचोऽतस्तिङ** इति दीर्घ:। (**न:**) अस्मान् (**अस्मिन्**) (**पुरुहूत**) बहुभि: प्रशंसित (**यामनि**) यान्ति यस्मिँस्तस्मिन् वर्त्तमाने समये (**जीवा:**) (**ज्योति:**) प्रकाशस्वरूपं परमात्मानं त्वाम् (**अशीमहि**) प्राप्नुयाम॥ २६॥

अन्वय:-हे पुरुहूतेन्द्र भगवन्! यथा पुत्रेभ्य: पिता तथा न: क्रतुमाभराऽस्मिन् यामनि नोऽस्माञ्छिक्ष यतो जीवा वयं ज्योतिर्विज्ञानं त्वां चाशीमहि॥ २६॥

भावार्थ:-अत्रोपमालङ्कार:। हे जगदीश्वर! यथा जनकोऽस्मान् पोषयति तथा त्वं पालय यथाऽऽप्तो विद्वानध्यापको विद्यार्थिभ्य: शिक्षां दत्वा सत्यां प्रज्ञां ग्राहयति तथैवास्मान् सत्यं विज्ञानं ग्राहय यतो वयं सृष्टिविद्यां भवन्तं च प्राप्य सदैवानन्देम॥ २६॥

पदार्थ:-हे (**पुरुहूत**) बहुतों से प्रशंसा को प्राप्त (**इन्द्र**) परमैश्वर्य के देने वाले जगदीश्वर भगवन्! (**यथा**) जैसे (**पुत्रेभ्य:**) पुत्रों के लिये (**पिता**) पिता, वैसे (**न:**) हम लोगों के लिये (**क्रतुम्**) धर्मयुक्त बुद्धि को (**आ, भर**) अच्छे प्रकार धारण कीजिये (**अस्मिन्**) इस (**यामनि**) वर्त्तमान समय में (**न:**) हम लोगों को (**शिक्ष**) सिखलाओ जिससे (**जीवा:**) जीव हम लोग (**ज्योति:**) विज्ञान को और आपको (**अशीमहि**) प्राप्त होवें॥ २६॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे जगदीश्वर! जैसे पिता हम लोगों को पुष्ट करता है, वैसे आप पालना कीजिये जैसे आप्त विद्वान् जन विद्यार्थियों के लिये शिक्षा देकर सत्य बुद्धि का ग्रहण कराता है, वैसे ही हमको सत्य विज्ञान ग्रहण कराओ जिससे हम लोग सृष्टिविद्या और आपको पाकर सर्वदैव आनन्दित हों॥ २६॥

मनुष्या: समुद्रादिकं केन तरेयुरित्याह॥

मनुष्य समुद्रादिकों को किससे तरें, इस विषय को अगले मन्त्र में कहते हैं॥

मा नो॒ अज्ञा॑ता वृ॒जना॑ दुरा॒ध्यो॑३॑ माशि॑वासो॒ अव॑ क्रमु:।
त्वया॑ व॒यं प्र॒वत॒: शश्व॑तीर॒पोऽति॑ शूर तरामसि॥ २७॥ २१॥

मा। न॒:। अज्ञा॑ता:। वृ॒जना॑:। दु॒:आ॒ध्य॑:। मा। अशि॑वास:। अव॑। क्र॒मु॒:। त्वया॑। व॒यम्। प्र॒ऽवत॑:। शश्व॑ती:। अ॒प:। अति॑। शू॒र॒। त॒रा॒म॒सि॥ २७॥

पदार्थ:-(**मा**) निषेधे (**न:**) अस्मान् (**अज्ञाता:**) (**वृजना:**) वृजन्ति येषु यैस्सह वा ते (**दुराध्य:**) दु:खेनाऽऽध्यातुं योग्य: (**मा**) (**अशिवास:**) असुखप्रदा: (**अव**) (**क्रमु:**) अवक्राम्यन्तु (**त्वया**) [त्वया] सह (**वयम्**) (**प्रवत:**) निम्नान् (**शश्वती:**) अनादिभूता: (**अप:**) जलानि (**अति**)

(शूर) निर्भय **(तरामसि)** उल्लङ्घेमहि॥२७॥

अन्वयः-हे शूर! नाऽज्ञाता वृजना दुराध्यो नोऽस्मान्माव क्रमुरशिवासोऽस्मान्माऽव क्रमुर्यतस्त्वया सह वयं प्रवतो देशाञ्शश्वतीरपोऽति तरामसि॥७॥

भावार्थः-राजा राजजनाः सेनाः सभाध्यक्षाश्चेदृशीर्नावो रचयेयुर्याभिस्समुद्रान् सुखेन सर्वे तरेयुस्तत्र समुद्रेषु नौचालकानां मार्गविज्ञानं यथार्थं स्यादिति॥२७॥

अत्रेन्द्रमेधाविधनविद्याकामिरक्षकराजेश्वरजीवधनसंचयेश्वरनौयायिगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति द्वात्रिंशत्तमं सूक्तमेकविंशो वर्गश्च समाप्तः॥

पदार्थः-हे **(शूर)** निर्भय! **(नः)** हम लोगों को **(अज्ञाताः)** छिपे हुये **(वृजनाः)** जिनमें जाते हैं वा जिनसे जाते हैं वे **(दुराध्यः)** और दुःख से चिंतने योग्य **(नः)** हम लोगों को **(मा)** मत **(अव, क्रमुः)** उल्लंघन करें **(अशिवासः)** दुःख देने वाले हम लोगों को **(मा)** मत उल्लंघन करें जिससे **(त्वया)** तुम्हारे साथ **(वयम्)** हम लोग **(प्रवतः)** नीचे देशों को तथा **(शश्वतीः)** अनादिभूत **(अपः)** जलों को **(अति, तरामसि)** अतीव उतरें॥२७॥

भावार्थः-राजा और राजजन, सेना और सभाध्यक्ष ऐसी नावें रचें जिनसे समुद्रों को सुख से सब तरें उन समुद्रों में नौकाओं के चलाने वालों को मार्गविज्ञान यथार्थ हों॥२७॥

इस सूक्त में इन्द्र, मेधावी, धन, विद्या की कामना करने वाले, रक्षक, राजा, ईश्वर, जीव, धनसंचय फिर ईश्वर और नौकाओं के जाने वालों के गुण और कर्म का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

वह बत्तीसवां सूक्त और इक्कीसवां वर्ग समाप्त हुआ॥

अथ चतुर्दशर्चस्य त्रयस्त्रिंशत्तमस्य सूक्तस्य १-१४ संस्तवो वसिष्ठस्य सपुत्रस्येन्द्रेण वा संवादः। १-९ वसिष्ठपुत्रः। १०-१४ वसिष्ठ ऋषिः त एव देवताः। १, २, ६, १२, १३ त्रिष्टुप्। ३, ४, ५, ७, ९, १४ निचृत्त्रिष्टुप्। ८, ११ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। १० भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाऽध्यापकाऽध्येतारः किं किं कुर्य्युरित्याह॥

अब चौदह ऋचा वाले तेतीसवें सूक्त का आरम्भ है, इसके प्रथम मन्त्र में पढ़ाने और पढ़ने वाले क्या करें, इस विषय का वर्णन करते हैं।

श्वित्यञ्चो॑ मा दक्षिण॒तस्क॑पर्दा धिय॑ंजि॒न्वासो॑ अ॒भि हि प्र॑म॒न्दुः।
उ॒त्ति॒ष्ठ॑न् वोचे॒ परि॑ ब॒र्हिषो॒ नृन्न मे॑ दू॒रादवि॑तवे॒ वसि॑ष्ठाः॥ १॥

श्वित्यञ्चः। मा। दक्षिणतःऽकपर्दाः। धियम्ऽजिन्वासः। अभि। हि। प्रऽमन्दुः। उत्ऽतिष्ठन्। वोचे। परि। बर्हिषः। नॄन्। न। मे। दूरात्। अवितवे। वसिष्ठाः॥ १॥

पदार्थः-(**श्वित्यञ्चः**) ये श्वितिं वृद्धिमञ्चन्ति प्राप्नुवन्ति ते (**मा**) माम् (**दक्षिणतस्कपर्दाः**) दक्षिणतः कपर्दा जटाजूटा येषां ब्रह्मचारिणां ते (**धियम्**) प्रज्ञाम् (**जिन्वासः**) प्राप्नुवन्तः (**अभि**) (**हि**) (**प्रमन्दुः**) प्रकुष्टमानन्दमाप्नुवन्ति (**उत्तिष्ठन्**) उद्यमाय प्रवर्त्तमानः (**वोचे**) वदामि (**परि**) सर्वतः (**बर्हिषः**) विद्यावर्धकान् (**नॄन्**) नायकान् (**न**) इव (**मे**) मम (**दूरात्**) (**अवितवे**) अवितुम् (**वसिष्ठाः**) अतिशयेन विद्यासु वसन्तः॥१॥

अन्वयः-ये श्वित्यञ्चो दक्षिणतस्कपर्दा धियं जिन्वासो वसिष्ठा हि मा अभि प्र मन्दुर्मे ममाऽवितवे दूरादागच्छेयुस्तान् बर्हिषो नॄन्नुत्तिष्ठन् परि वोचे॥१॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये विद्यासु प्रवीणा मनुष्याणां सत्याचारे बुद्धिवर्धका अध्यापकाः अध्येतार उपदेशकाश्च स्युस्तान् प्रविद्याधर्मप्रचाराय सततं शिक्षोत्साहसत्कारान् कुर्य्युः॥१॥

पदार्थः-जो (**श्वित्यञ्चः**) बुद्धि को प्राप्त होते (**दक्षिणतस्कपर्दाः**) दाहिनी ओर को जटाजूट रखने वाले (**धियम्**) बुद्धि को (**जिन्वासः**) प्राप्त हुए (**वसिष्ठाः**) अतीव विद्याओं में वसने वाले (**हि**) ही (**मा**) मुझे (**प्र, मन्दुः**) आनन्दित करते हैं (**मे**) मेरे (**अवितवे**) पालने का (**दूरात्**) दूर से आवें उन (**बर्हिषः**) विद्या धर्म बढ़ाने वाले (**नॄन्**) नायक मनुष्यों को (**उत्तिष्ठन्**) उठता हुआ अर्थात् उद्यम के लिये प्रवृत्त हुआ (**परि, वोचे**) सब ओर से कहता हूँ॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्याओं में प्रवीण, मनुष्यों की सत्य आचार में बुद्धि बढ़ाने वाले, पढ़ाने-पढ़ने और उपदेश करने वाले हों उनको विद्या और धर्म के प्रचार के लिये निरन्तर शिक्षा, उत्साह और सत्कारयुक्त करें॥१॥

पुनः स राजा कीदृशान् विदुषः स्वीकुर्यादित्याह॥

फिर वह राजा कैसे विद्वानों को स्वीकार करे, इस विषय को अगले मन्त्र में कहते हैं॥

दू॒रादि॑न्द्र॒मन॑यन्ना सु॒तेन॑ ति॒रो वै॑श॒न्तम॑ति॒ पान्त॑मु॒ग्रम्।

पाशद्युम्नस्य वायतस्य सोमात् सुतादिन्द्रो अवृणीता वसिष्ठान्॥ २॥

दूरात्। इन्द्रम्। अनयन्। आ। सुतेन। तिरः। वैशन्तम्। अति। पान्तम्। उग्रम्। पाशऽद्युम्नस्य। वायतस्य। सोमात्। सुतात्। इन्द्रः। अवृणीत। वसिष्ठान्॥ २॥

पदार्थः-(**दूरात्**) (**इन्द्रम्**) परमैश्वर्यम् (**अनयन्**) नयन्ति (**आ**) (**सुतेन**) निष्पन्नेन पुत्रेण वा (**तिरः**) तिरस्कारे (**वैशन्तम्**) वेशन्तस्य विशतो जनस्येमम् (**अति**) (**पान्तम्**) रक्षन्तम् (**उग्रम्**) तेजस्विनम् (**पाशद्युम्नस्य**) पाशात्प्राप्तं द्युम्नं यशो धनं येन तस्य (**वायतस्य**) विज्ञानवतः (**सोमात्**) ऐश्वर्यात् (**सुतात्**) धर्म्येण निष्पादितात् (**इन्द्रः**) परमैश्वर्यो राजा (**अवृणीत**) वृणुयात्। अत्र **संहितायामि**ति दीर्घः। (**वसिष्ठान्**) अतिशयेन विद्यासु कृतवासान्॥ २॥

अन्वयः-हे मनुष्या! ये सुतेन वैशन्तं पान्तमुग्रमिन्द्रं दूरादनयन् दारिद्र्यं तिरो नयन्ति तैः पाशद्युम्नस्य वायतस्य सुतात्सोमादिन्द्रो वसिष्ठानत्यावृणीत॥ २॥

भावार्थः-राजादयो जनाः। ये दूरादैश्वर्यं स्वदेशं प्रापयन्ति दारिद्र्यं विनाश्य श्रियं जनयन्ति तानुत्तमाञ्जनान्सर्वन्तो सततं रक्षेयुः॥ २॥

पदार्थः-हे मनुष्यो! जो (**सुतेन**) उत्पन्न हुए पदार्थ वा पुत्र से (**वैशन्तम्**) प्रवेश होते हुए जन के सम्बन्धी (**पान्तम्**) पालना करते हुए (**उग्रम्**) तेजस्वी (**इन्द्रम्**) परमैश्वर्यवान् को (**दूरात्**) दूर से (**अनयन्**) पहुँचाते और दारिद्र्य को (**तिरः**) तिरस्कार करते हैं उनसे (**पाशद्युम्नस्य**) जिसने धन यश पाया है उस (**वायतस्य**) विज्ञानवान् के (**सुतात्**) धर्म से उत्पन्न किये (**सोमात्**) ऐश्वर्य से (**इन्द्रः**) परमैश्वर्य राजा (**वसिष्ठान्**) अतीव विद्याओं में किया निवास जिन्होंने उन को (**अति, आ, अवृणीत**) अत्यन्त स्वीकार करे॥ २॥

भावार्थः-हे राजन् आदि जनो! जो दूर से अपने देश को ऐश्वर्य पहुँचाते और दारिद्र्य का विनाश कर लक्ष्मी को उत्पन्न करते हैं, उन उत्तम जनों की निरन्तर रक्षा कीजिये॥ २॥

पुनर्मनुष्याः किं किं कुर्य्युरित्याह॥

फिर मनुष्या क्या-क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः॥ ३॥

एव। इत्। नु। कम्। सिन्धुम्। एभिः। ततार। एव। इत्। नु। कम्। भेदम्। एभिः। जघान। एव। इत्। नु। कम्। दाशऽराज्ञे। सुऽदासम्। प्र। आवत्। इन्द्रः। ब्रह्मणा। वः। वसिष्ठाः॥ ३॥

पदार्थः-(**एव**) (**इत्**) अपि (**नु**) क्षिप्रम् (**कम्**) (**सिन्धुम्**) नदीम् (**एभिः**) उत्तमैर्विद्वद्भिः (**ततार**) तरेत् (**एव**) (**इत्**) (**नु**) (**कम्**) (**भेदम्**) भेदनीयं विदारणीयम् (**एभिः**) (**जघान**) हन्यात् (**एव**) (**इत्**) (**नु**) (**कम्**) (**दाशराज्ञे**) यो दाशति सुखं ददाति राजा तस्मै (**सुदासम्**) सुष्ठु दातारं सेवकं वा (**प्र**) (**आवत्**) प्रकर्षेण रक्षेत् (**इन्द्रः**) परमैश्वर्यो जनः (**ब्रह्मणा**) धनेन (**वः**) युष्मान् (**वसिष्ठाः**)

अतिशयेन ब्रह्मचर्ये कृतवासाः॥३॥

अन्वयः-हे वसिष्ठा! इन्द्रोऽयमेभिः कमेवेत्सिन्धुं नु ततार एभिः कमेवेन्नु जघान दाशराज्ञे कमेवेद् भेदं ब्रह्मणा नु प्रावत् सुदासं वो युष्माँश्च नु प्रावत्॥३॥

भावार्थः-ये मनुष्या नौकाभिः समुद्रादिकं सद्यस्तरेयुर्वीरैः शत्रून् क्षिप्रं विनाशयेयू राज्ञो राष्ट्रस्य च रक्षाः सर्वदा कुर्य्युस्ते माननीया भवेयुः॥३॥

पदार्थः- (**वसिष्ठाः**) अत्यन्त ब्रह्मचर्य के बीच जिन्होंने वास किया वह हे विद्वानो! (**इन्द्रः**) परमैश्वर्यवान् यह जन (**एभिः**) उत्तम विद्वानों के साथ (**कम्, एव, इत्**) किसी (**सिन्धुम्**) नदी को भी (**नु**) शीघ्र (**ततार**) तरे (**एभिः**) इन उत्तम विद्वानों के साथ (**कम्, एव, इत्**) किसी को भी (**नु**) शीघ्र (**जघान**) मारे (**दाशराज्ञे**) जो सुख देता है उस के लिये (**कम्, एव, इत्**) किसी (**भेदम्**) विदीर्ण करने योग्य को भी (**ब्रह्मणा**) धन से (**नु**) शीघ्र (**प्र, आवत्**) अच्छे प्रकार रक्खे और (**सुदासम्**) अच्छे देने वाले वा सेवक को तथा (**वः**) तुम लोगों को भी (**नु**) शीघ्र रक्खे॥३॥

भावार्थः-जो मनुष्य नौकादिकों से समुद्रादिकों को अच्छे प्रकार शीघ्र तरें, वीरों से शत्रुओं को शीघ्र विनाशें, राजा और राज्य की रक्षा करें, वे मान करने योग्य हों॥३॥

पुनर्मनुष्याः किं कृत्वा किन्न कुर्वन्तीत्याह॥

फिर मनुष्य क्या करके क्या नहीं करते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

जुष्टी॑ नरो॒ ब्रह्म॑णा वः पितॄ॒णामक्ष॑मव्ययं॒ न किला॑ रिषाथ।
यच्छक्व॑रीषु बृह॒ता रवे॒णेन्द्रे॒ शुष्म॒मद॑धाता वसिष्ठाः॥४॥

जुष्टी॑। नरः॑। ब्रह्म॑णा। वः॑। पि॒तॄ॒णाम्। अक्ष॑म्। अ॒व्य॒य॒म्। न। किल॑। रि॒षा॒थ॒। यत्। शक्व॑रीषु। बृ॒ह॒ता। रवे॑ण। इन्द्रे॑। शुष्म॑म्। अद॑धात। व॒सि॒ष्ठाः॥४॥

पदार्थः-(**जुष्टी**) जुष्ट्या प्रीत्या सेवया वा (**नरः**) नेतारः (**ब्रह्मणा**) धनेन (**वः**) युष्माकम् (**पितॄणाम्**) जनकादीनाम् (**अक्षम्**) व्याप्तम् (**अव्ययम्**) नाशरहितम् (**न**) निषेधे (**किल**) अत्र **निपातस्य चे**ति दीर्घः। (**रिषाथ**) हिंसथ (**यत्**) येन (**शक्वरीषु**) शक्तिमतीषु सेनासु (**बृहता**) महता (**रवेण**) शब्देन (**इन्द्रे**) परमैश्वर्ये (**शुष्मम्**) बलम् (**अदधात**) धर्त। अत्र **संहितायामि**ति दीर्घः। (**वसिष्ठाः**) धनेऽत्यन्तं वासं कुर्वन्तः॥४॥

अन्वयः-हे वसिष्ठा नरो! यूयं यद् बृहता रवेण शक्वरीष्विन्द्रे शुष्ममदधात जुष्टी ब्रह्मणा वः पितॄणामव्ययमक्षं किल यूयं न रिषाथ तेन सर्वस्य रक्षणं विधत्त॥४॥

भावार्थः-ये मनुष्याः स्वशक्तिं वर्धयित्वा दुष्टान् हिंसित्वा धनवृद्ध्या सर्वार्थमक्षीणं सुखं प्रीत्या वर्धयन्ति ते बृहतीं कीर्तिमाप्नुवन्ति॥४॥

पदार्थः-हे (**वसिष्ठाः**) धन में अत्यन्त वास करते हुए (**नरः**) नायक मनुष्यो! तुम (**यत्**) जिस (**बृहता**) महान् (**रवेण**) शब्द से (**शक्वरीषु**) शक्तियुक्त सेनाओं में और (**इन्द्रे**) परमैश्वर्य में (**शुष्मम्**) बल को (**अदधात**) धारण करते हो (**जुष्टी**) प्रीति वा सेवा से तथा (**ब्रह्मणा**) धन से (**वः**)

आप के **(पितृणाम्)** जनक अर्थात् पिता आदि का जो **(अव्ययम्)** नाशरहित **(अक्षम्)** व्याप्त बल उसे **(किल)** निश्चय कर तुम **(न, रिषाथ)** नहीं नष्ट करते हो, उससे सब की रक्षा करो॥४॥

भावार्थः-जो मनुष्य अपनी शक्ति को बढ़ा के दुष्टों को मार धन की वृद्धि से सब के अर्थ जो नष्ट नहीं उस सुख को प्रीति से बढ़ाते, वे बढ़ी कीर्ति को पाते हैं॥४॥

पुनः के मनुष्याः सूर्य्यवद्भवन्तीत्याह॥

फिर कौन मनुष्य सूर्य के तुल्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

उद्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः॥
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम्॥५॥२२॥

उत्। द्याम्ऽइव। इत्। तृष्णऽजः। नाथितासः। अदीधयुः। दाशऽराज्ञे। वृतासः। वसिष्ठस्य। स्तुवतः। इन्द्रः। अश्रोत्। उरुम्। तृत्सुऽभ्यः। अकृणोत्। ऊँ इति। लोकम्॥५॥

पदार्थः-(उत) **(द्यामिव)** सूर्यमिव **(इत्)** एव **(तृष्णजः)** प्राप्ततृष्णः **(नाथितासः)** याचमानाः **(अदीधयुः)** दीपयेयुः **(दाशराज्ञे)** दाशानां दातॄणां राज्ञे **(वृतासः)** स्वीकृताः **(वसिष्ठस्य)** अतिशयेन विदुषः **(स्तुवते)** स्तुवतः **(इन्द्रः)** परमैश्वर्यवान्राजा **(अश्रोत्)** शृणुयात् **(उरुम्)** बहुसुखकारकम् **(तृत्सुभ्यः)** शत्रूणां हिंसकेभ्यः **(अकृणोत्)** करोति (उ) **(लोकम्)**॥५॥

अन्वयः-हे मनुष्या! ये द्यामिव नाथितासस्तृष्णजो वृतास इत् दाशराज्ञे उददीधयुर्य इन्द्रो वसिष्ठस्य स्तुवत उरुं वाक्यमश्रोत् तृत्सुभ्य उ लोकमकृणोत्तान् सर्वे सत्कुर्वन्तु॥५॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः सूर्य्य इव विद्याविनयप्रकाशिता तृषिता जलमिवैश्वर्य्यमन्वेषमाणाः सकलविद्यायुक्तेभ्य आनन्दं दधति शूरवीरेभ्यो धनं च प्रयच्छन्ति ते बहुसुखं लभन्ते॥५॥

पदार्थः-हे मनुष्यो! जो **(द्यामिव)** सूर्य के समान **(नाथितासः)** मांगते हुए और **(तृष्णजः)** तृष्णा को प्राप्त **(वृतासः)** स्वीकार किये हुए **(इत्)** ही **(दाशराज्ञे)** देने वालों के राजा के लिये **(उत्, अदीधयुः)** ऊपर को प्रकाशित करें जो **(इन्द्रः)** परमैश्वर्यवान् राजा **(वसिष्ठस्य)** अतीव विद्वान् की **(स्तुवतः)** स्तुति करने वाले के लिये **[**=वाले**]** की **(उरुम्)** बहुत सुख करने वाले वाक्य को **(अश्रोत्)** सुने **(तृत्सुभ्यः)** और शत्रुओं के मारने वाले के लिये (उ) ही **(लोकम्)** लोक को **(अकृणोत्)** प्रसिद्ध करता है, उनको सब सत्कार करें॥५॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य सूर्य के समान विद्या और नम्रता से प्रकाशित और तृषित जल के समान ऐश्वर्य के ढूढ़ने वाले सकल विद्यायुक्त विद्वानों के लिये आनन्द को धारण करते और शूरवीरों के लिये धन भी देते हैं, वे बहुत सुख पाते हैं॥५॥

पुनः केऽध्याप्या अनध्याप्याश्च भवन्तीत्याह॥

फिर कौन पढ़ाने और कौन न पढ़ाने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

दुण्डाइवेद् गोअजनास आसन् परिच्छिन्ना भरता अर्भकासः।

अभ॑वच्च पुरए॒ता वसि॑ष्ठ॒ आदि॑त्तृ॒त्सू॑नां॒ विशो॑ अप्रथन्त॥६॥

दु॒ण्डाः॑ऽइव॑। इत्। गो॒ऽअ॑जनासः। आ॒स॒न्। परि॑ऽछिन्नाः। भ॒र॒ताः। अ॒र्भ॒कास॑ः। अभ॑वत्। च॒। पु॒र॒ः॑ऽए॒ता। वसि॑ष्ठः। आत्। इत्। तृ॒त्सू॑नाम्। विश॑ः। अ॒प्र॒थ॒न्त॥६॥

पदार्थः-(**दण्डाइव**) यष्टिका इव शुष्कहृदयाऽभिमानिनः (**इत्**) (**गोअजनासः**) गवि सुशिक्षितायां वाच्यप्रादुर्भूताः (**आसन्**) सन्ति (**परिच्छिन्नाः**) छिन्नभिन्नविज्ञानाः (**भरताः**) देहधारकपोषकाः (**अर्भकासः**) अल्पवयसो बालका इव क्षुद्राशयाः (**अभवत्**) भवति (**च**) (**पुरएता**) यः पुर एति (**वसिष्ठः**) अतिशयेन वसुमान् धनाढ्यः (**आत्**) आनन्तर्ये (**इत्**) (**तृत्सूनाम्**) अनादृतानाम् (**विशः**) प्रजा मनुष्यान् (**अप्रथन्त**) प्रथयन्ति॥६॥

अन्वयः-हे विद्वांसो! ये गोअजनासः परिच्छिन्ना भरता अर्भकासो दण्डा इवेदासँस्तेषां तृत्सूनां विशोऽप्रथन्त। आदिदेषां यः पुरएता वसिष्ठोऽभवत् स चैतान् सुशिक्षयेत्॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्या दण्डयञ्जडबुद्धयः स्युस्ते सुपरीक्ष्याऽनध्यापनीया भवन्ति ये च धीमन्तः स्युस्ते पाठनीया यो विद्याव्यवहारे प्रधानः स्यात्स एव विद्याविभागस्य सुष्ठु प्रबन्धेन शिक्षां प्रापयेत्॥६॥

पदार्थः-हे विद्वानो! जो (**गोअजनासः**) सुशिक्षित वाणी में **[**अ**]**प्रसिद्ध हुए (**परिच्छिन्नाः**) छिन्न-भिन्न विज्ञान वाले (**भरताः**) देह धारण ओर पुष्टि करने से युक्त (**अर्भकासः**) थोड़ी-थोड़ी आयु के बालक (**दण्डाइव**) लट्ठ से सूखे हृदय में अभिमान करने वाले (**इत्**) ही (**आसन्**) हैं उन (**तृत्सूनाम्**) अनादर किये हुओं के बीच (**विशः**) प्रजा मनुष्यों को (**अप्रथन्त**) प्रख्यात करते हैं (**आत्, इत्**) और ही इनके जो (**पुरएता**) आगे जाने वाला (**वसिष्ठः**) अतीव धनाढ्य (**अभवत्**) हो (**च**) वही इन को अच्छी प्रकार शिक्षा दे॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य दण्ड के समान जड़बुद्धि हों, वे अच्छी परीक्षा कर न पढ़ाने योग्य और जो बुद्धिमान् हों वे पढ़ाने योग्य होते हैं, जो विद्या व्यवहार में प्रधान हो, वही विद्याविभाग की उत्तम प्रबन्ध से शिक्षा पहुँचावे॥६॥

पुनर्मनुष्याः कि कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

त्रय॑ः कृ॒ण्व॒न्ति॒ भुव॑नेषु॒ रेत॑स्ति॒स्रः प्र॒जा आर्या॒ ज्योति॑रग्राः।
त्रयो॑ घ॒र्मास॑ उ॒षस॑ं सचन्ते॒ सर्वा॑ इत्ताँ अनु॑ वि॒दु॒र्वसि॑ष्ठाः॥७॥

त्रय॑ः। कृ॒ण्व॒न्ति॒। भुव॑नेषु। रेत॑ः। ति॒स्रः। प्र॒ऽजाः। आर्या॑ः। ज्योति॑ः॑ऽअग्राः। त्रय॑ः। घ॒र्मास॑ः। उ॒ष॒स॑म्। स॒च॒न्ते॒। स॒र्वान्। इत्। तान्। अनु॑। वि॒दु॒ः। वसि॑ष्ठाः॥७॥

पदार्थः-(**त्रयः**) विद्युद्भौमसूर्याख्याऽग्नयो भूम्यप्तेजांसि वा (**कृण्वन्ति**) (**भुवनेषु**) लोकेषु (**रेतः**) वीर्यम् (**तिस्रः**) विद्याराजधर्मसभास्थाः (**प्रजाः**) (**आर्याः**) उत्तमगुणकर्मस्वभावाः (**ज्योतिः**)

विद्याप्रकाशादिकम् **(अग्राः)** अग्रगण्याः **(त्रयः)** **(घर्मासः)** पापानि **(उषसम्)** प्रभातवेलाम् **(सचन्ते)** सम्बध्नन्ति **(सर्वान्)** **(इत्)** एव **(तान्)** **(अनु)** **(विदुः)** जानन्ति **(वसिष्ठाः)**॥७॥

अन्वयः-हे मनुष्या! यथा त्रयो भुवनेषु रेतः कृण्वन्ति यथा त्रयो घर्मास उषसं ज्योतिः सचन्ते तथा तिस्रो वसिष्ठा आर्या अग्रा प्रजास्तान् सर्वान्निदनु विदुर्ज्योतिः सचन्ते॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा कार्यकारणकार्यस्था विद्युतः सूर्यादिकं ज्योतिः प्रकाशयन्त्युषसं दिनं च जनयन्ति तथा तिस्रः सभा धर्मार्थकाममोक्षसाधनप्रकाशान् कुर्वन्ति॥७॥

पदार्थः-हे मनुष्यो! जैसे **(त्रयः)** तीन **(भुवनेषु)** लोकों में **(रेतः)** वीर्य **(कृण्वन्ति)** करते हैं जैसे **(त्रयः)** तीन **(घर्मासः)** पाप **(उषसम्)** प्रभातवेला और **(ज्योतिः)** विद्याप्रकाश आदि का **(सचन्ते)** सम्बन्ध करते हैं, वैसे **(तिस्रः)** तीन अर्थात् विद्या, राजा और धर्मसभास्थ **(वसिष्ठाः)** अतीव धन में स्थिर **(आर्याः)** उत्तम गुण, कर्म, स्वभाव वाले पुरुष **(अग्राः)** अग्रगण्य **(प्रजाः)** प्रजा जन **(तान्)** उन **(सर्वान्)** सब को **(इत्, अनु, विदुः)** ही अनुकूल जानते हैं और विद्या प्रकाश आदि को सम्बन्ध करते हैं॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे कार्य्य और कारण को कार्य में स्थिर बिजुलियां सूर्य आदि ज्योति को प्रकाशित करती हैं, प्रभातवेला और दिन को उत्पन्न करती हैं, वैसे तीन सभा धर्म, अर्थ, काम और मोक्ष साधन देने वाले प्रकाशों को करती हैं॥७॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥८॥

सूर्यस्यऽइव। वक्षथः। ज्योतिः। एषाम्। समुद्रस्यऽइव। महिमा। गभीरः। वातस्यऽइव। प्रऽजवः। न। अन्येन। स्तोमः। वसिष्ठाः। अनुऽएतवे। वः॥८॥

पदार्थः-(**सूर्यस्येव**) **(वक्षथः)** रोषः **(ज्योतिः)** प्रकाशः **(एषाम्)** विद्युदादीनाम् **(समुद्रस्येव)** **(महिमा)** महतो भावः **(गभीरः)** अगाधः **(वातस्येव)** **(प्रजवः)** प्रकृष्टो वेगः **(न)** **(अन्येन)** तुल्यः **(स्तोमः)** प्रशंसा **(वसिष्ठाः)** अतिशयेन विद्यावासाः **(अन्वेतवे)** अन्वेतुं विज्ञातुं प्राप्तुं गन्तुं वा **(वः)** युष्माकम्॥८॥

अन्वयः-हे वसिष्ठा! योऽन्वेतवे आप्तो विद्वांस एषां वोऽन्वेतवे सूर्यस्येव वक्षथो ज्योतिः समुद्रस्येव महिमा गभीरो वातस्येव प्रजवः स्तोमोऽस्ति सोऽन्येन तुल्यो नास्ति॥८॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! येषां धार्मिकाणां विदुषां सूर्यवद्विद्याधर्मप्रकाशो दुष्टाचारे क्रोधः समुद्रवद्गाम्भीर्यं वायुवत्सत्कर्मसु वेगो भवेत्त एव सङ्गन्तुमर्हाः सन्तीति वेद्यम्॥८॥

पदार्थः-हे **(वसिष्ठाः)** अतीव विद्या में वास करने वालो! जो **(अन्वेतवे)** विशेष जानने को, प्राप्त होने को वा गमन को आप्त अत्यन्त धर्मशील विद्वान् हैं **(एषाम्)** इन बिजुली आदि पदार्थों के

और **(वः)** तुम्हारे विशेष जानने को प्राप्त होने को वा गमन के **(सूर्यस्येव)** सूर्य के समान **(वक्षथः)** रोष वा **(ज्योतिः)** प्रकाश **(समुद्रस्येव)** समुद्र के समान **(महिमा)** महिमा **(गभीरः)** गम्भीर **(वातस्येव)** पवन के समान **(प्रजवः)** उत्तम वेग और **(स्तोमः)** प्रशंसा है वह **(अन्येन)** और के समान **(न)** नहीं है॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिन धार्मिक विद्वानों का सूर्य के समान विद्या और धर्म का प्रकाश, दुष्टाचार पर क्रोध, समुद्र के समान गम्भीरता, पवन के समान अच्छे कर्मों में वेग हो वे मिलने योग्य हैं, यह जानना चाहिये॥८॥

के सत्यं निश्चयं कर्त्तुमर्हन्तीत्याह॥

कौन सत्य का निश्चय करने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि संचरन्ति।
यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः॥९॥

ते। इत्। निण्यम्। हृदयस्य। प्रऽकेतैः। सहस्रऽवल्शम्। अभि। सम्। चरन्ति। यमेन। ततम्। परिऽधिम्। वयन्तः। अप्सरसः। उप। सेदुः। वसिष्ठाः॥९॥

पदार्थः-(**ते**) विद्वांसः **(इत्)** एव **(निण्यम्)** निर्णीतान्तर्गतम् **(हृदयस्य)** आत्मनो मध्ये **(प्रकेतैः)** प्रकृष्टाभिः प्रज्ञाभिः **(सहस्रवल्शम्)** सहस्राण्यसंख्या वल्शा अङ्कुरा इव शास्त्रबोधा यस्मिंस्तं विज्ञानमयं व्यवहारम् **(अभि)** आभिमुख्ये **(सम्)** **(चरन्ति)** सम्यगाचरन्ति **(यमेन)** नियन्त्रा जगदीश्वरेण **(ततम्)** व्याप्तम् **(परिधिम्)** सर्वलोकावरणम् **(वयन्तः)** व्याप्नुवन्तः **(अप्सरसः)** या अप्स्वन्तरिक्षे सरन्ति गच्छन्ति ताः **(उप)** **(सेदुः)** सीदन्ति **(वसिष्ठाः)** अतिशयेन विद्यावन्तः॥९॥

अन्वयः-ये अप्सरसो यमेन सह ततं परिधिं वयन्तो वसिष्ठाः प्रकेतैर्हृदयस्य निण्यं सहस्रवल्शमुपसेदुस्त इत्पूर्णविद्या अभि सं चरन्ति॥९॥

भावार्थः-त एव विद्वांसो जगदुपकारिणो भवन्ति ये दीर्घेण ब्रह्मचर्येणाप्तानां विदुषां सकाशाच्छिक्षां प्राप्याऽखिलां विद्याम् अधीत्य परमात्मना व्याप्तं सर्वं सृष्टिक्रमं विशन्ति॥९॥

पदार्थः- **(अप्सरसः)** जो अन्तरिक्ष में जाते हैं वे और **(यमेन)** नियन्ता जगदीश्वर से **(ततम्)** व्याप्त **(परिधिम्)** सर्व लोकों के परकोटे को **(वयन्तः)** व्याप्त होते हुए **(वसिष्ठाः)** अतीव विद्यावान् जन **(प्रकेतैः)** उत्तम बुद्धियों से **(हृदयस्य)** आत्मा के बीच **(निण्यम्)** निर्णीत अन्तर्गत **(सहस्रवल्शम्)** हजारों असंख्य अंकुरों के समान शास्त्रबोध जिसमें उस विद्या व्यवहार को **(उप, सेदुः)** उपस्थित होते अर्थात् स्थिर होते हैं **(ते, इत्)** वे ही पूर्ण विद्याओं का **(अभि,सम्, चरन्ति)** सब ओर से संचार करते हैं॥९॥

भावार्थः-वे ही विद्वान् जन संसार के उपकारी होते हैं जो दीर्घ ब्रह्मचर्य्य से और आप्त विद्वानों की उत्तेजना से शिक्षा पाय समस्त विद्या पढ़ परमात्मा से व्याप्त सर्व सृष्टिक्रम को प्रवेश करते हैं॥९॥

पुनर्विद्वांसः कीदृशा भवेयुरित्याह॥

फिर विद्वान् जन कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा।
तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार॥ १०॥ २३॥

विऽद्युतः। ज्योतिः। परि। सम्ऽजिहानम्। मित्रावरुणा। यत्। अपश्यताम्। त्वा। तत्। ते। जन्म। उत। एकम्। वसिष्ठ। अगस्त्यः। यत्। त्वा। विशः। आऽजभार॥ १०॥

पदार्थः-(**विद्युतः**) (**ज्योतिः**) प्रकाशम् (**परि**) सर्वतः (**संजिहानम्**) अधिकरणं त्यजन् (**मित्रावरुणा**) अध्यापकोपदेशकौ (**यत्**) यः (**अपश्यताम्**) पश्यतः (**त्वा**) त्वाम् (**तत्**) (**ते**) तव (**जन्म**) (**उत**) अपि (**एकम्**) (**वसिष्ठ**) प्रशस्त विद्वन् (**अगस्त्यः**) अस्तदोषः (**यत्**) यम् (**त्वा**) त्वाम् (**विशः**) प्रजाः (**आ, जभार**) समन्ताद्बिभर्ति॥ १०॥

अन्वयः-हे वसिष्ठ! योऽगस्त्यस्ते विश आ जभार उताप्येकं जन्मा जभार उताऽपि त्वाऽऽजभार यद्विद्युतस्संजिहानं ज्योतिर्मित्रावरुणा पर्यपश्यतां त्वैतद्विद्यां प्रापयतस्तदेतत्सर्वं त्वं गृहाण॥ १०॥

भावार्थः-यस्य मनुष्यस्य विद्यायां जन्मप्रादुर्भावो भवति तत्प्रज्ञा विद्युज्ज्योतिरिव सकलाविद्या बिभर्ति॥ १०॥

पदार्थः-हे (**वसिष्ठ**) प्रशंसायुक्त विद्वान्! जो (**अगस्त्यः**) निर्दोष जन (**ते**) आपकी (**विशः**) प्रजाओं को (**आ, जभार**) सब ओर से धारण करता (**उत**) और (**एकम्**) एक (**जन्म**) जन्म को सब ओर से धारण करता और (**त्वा**) आप को सब ओर से धारण करता तथा (**यत्**) जिस (**विद्युतः**) बिजुली को (**संजिहानम्**) अधिकार त्याग करते हुए (**ज्योतिः**) प्रकाश को (**मित्रावरुणा**) अध्यापक और उपदेशक (**परि, अपश्यताम्**) **[**सब ओर**]** देखते हैं (**त्वा**) आपको इस विद्या की प्राप्ति कराते हैं, उस समस्त विषय को आप ग्रहण करें॥ १०॥

भावार्थः-जिस मनुष्य का विद्या में जन्म प्रादुर्भाव होता है, उसकी बुद्धि बिजुली की ज्योति के समान सकल विद्याओं को धारण करती है॥ १०॥

पुनर्मनुष्याः किं कुर्य्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधि जातः।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाऽददन्त॥ ११॥

उत। असि। मैत्रावरुणः। वसिष्ठ। उर्वश्याः। ब्रह्मन्। मनसः। अधि। जातः। द्रप्सम्। स्कन्नम्। ब्रह्मणा। दैव्येन। विश्वे। देवाः। पुष्करे। त्वा। अददन्त॥ ११॥

पदार्थः-(**उत**) अपि (**असि**) (**मैत्रावरुणः**) मित्रावरुणयोः प्राणोदानयोरयं वेत्ता (**वसिष्ठ**) पूर्णविद्वन् (**उर्वश्याः**) विशेषविद्यायाः। **उर्वशीति पदनाम।** (निघं०४.२) (**ब्रह्मन्**) सकलवेदवित्

(मनसः) अन्तःकरणपुरुषार्थात् **(अधि)** **(जातः)** प्रादुर्भूतः **(द्रप्सम्)** कमनीयम् **(स्कन्नम्)** प्राप्तम् **(ब्रह्मणा)** बृहता धनेन **(दैव्येन)** देवैर्विद्वद्भिः कृतेन **(विश्वे)** सर्वे **(देवाः)** विद्वांसः **(पुष्करे)** अन्तरिक्षे। **पुष्करमित्यन्तरिक्षनाम।** (निघं०१.३) **(त्वा)** त्वाम् **(अददन्त)** दद्युः॥११॥

अन्वयः-हे ब्रह्मन् वसिष्ठ! यो मैत्रावरुणस्त्वमुर्वश्या उत मनसोऽधिजातोऽसि तं त्वा विश्वे देवा ब्रह्मणा दैव्येन पुष्करे स्कन्नं द्रप्समददन्त॥११॥

भावार्थः-ये मनुष्याः शुद्धान्तःकरणेन प्राणोदानवत्सततं पुरुषार्थेन कमनीयां विद्यां गृह्णन्ति ते विद्वद्वदानन्दिता भवन्ति॥११॥

पदार्थः-हे **(ब्रह्मन्)** समस्त वेदों को जानने वाले **(वसिष्ठ)** पूर्ण विद्वान्! जो **(मैत्रावरुणः)** प्राण और उदान के वेत्ता आप **(उर्वश्याः)** विशेष विद्या से **(उत)** और **(मनसः)** मन से **(अधि, जातः)** अधिकतर उत्पन्न **(असि)** हुए हो उन **(त्वा)** आपको **(विश्वे)** समस्त **(देवाः)** विद्वान् जन **(ब्रह्मणा)** बहुत धन से और **(दैव्येन)** विद्वानों ने किये हुए व्यवहार से **(पुष्करे)** अन्तरिक्ष में **(स्कन्नम्)** प्राप्त **(द्रप्सम्)** मनोहर पदार्थ को **(अददन्त)** देवें॥११॥

भावार्थः-जो मनुष्य शुद्धान्तःकरण से प्राण और उदान के तुल्य और निरन्तर मनोहर विद्या को ग्रहण करते हैं, वे विद्वानों के समान आनन्दित होते हैं॥११॥

पुनः स विद्वान् कीदृशो भवेदित्याह॥

फिर वह विद्वान् कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः॥१२॥

सः। प्रऽकेतः। उभयस्य। प्रऽविद्वान्। सहस्रऽदानः। उत। वा। सऽदानः। यमेन। ततम्। परिऽधिम्। वयिष्यन्। अप्सरसः। परि। जज्ञे। वसिष्ठः॥१२॥

पदार्थः-(**सः**) **(प्रकेतः)** प्रकृष्टप्रज्ञः **(उभयस्य)** जन्मद्वयस्य **(प्रविद्वान्)** प्रकृष्टो विद्वान् **(सहस्रदानः)** असंख्यप्रदः **(उत)** **(वा)** **(सदानः)** दानेन सह वर्त्तमानः **(यमेन)** वायुना विद्युता वा सह **(ततम्)** व्याप्तम् **(परिधिम्)** **(वयिष्यन्)** व्ययं करिष्यन् **(अप्सरसः)** अन्तरिक्षचराद्वायोः **(परि)** सर्वतः **(जज्ञे)** जायते **(वसिष्ठः)** अतिशयेन वसुमान्॥१२॥

अन्वयः-हे मनुष्या! य उभयस्य प्रविद्वान् प्रकेतः सहस्रदान उत वा सदानो यमेन सह ततं परिधिं वयिष्यन् वसिष्ठोऽप्सरसः परि जज्ञे स सर्वैस्सेवनीयोऽस्ति॥१२॥

भावार्थः-यस्य मनुष्यस्य मातुः पितुरादिमं जन्म द्वितीयमाचार्यार्याद्विद्यायाः सकाशज्जन्म भवति स एवाऽऽकाशस्थपदार्थानां वेत्ता प्रादुर्भूतः पूर्णो विद्वानतुलसुखप्रदो भवति॥१२॥

पदार्थः-हे मनुष्यो! जो **(उभयस्य)** जन्म और विद्या-जन्म दोनों का **(प्रविद्वान्)** उत्तम विद्वान् **(प्रकेतः)** उत्तम बुद्धियुक्त **(सहस्रदानः)** हजारों पदार्थ देने वाला **(उत, वा)** अथवा **(सदानः)** दानयुक्त **(यमेन)** वायु वा बिजुली के साथ वर्त्तमान **(ततम्)** विस्तृत **(परिधिम्)** परिधि को

(वयिष्यन्) खर्च करता हुआ **(वसिष्ठः)** अतीव धनवान् **(अप्सरसः)** अन्तरिक्ष में चलने वाले वायु से **(परि, जज्ञे)** सर्वतः प्रसिद्ध होता है **(सः)** वह सब को सेवा करने योग्य है॥१२॥

भावार्थः-जिस मनुष्य का माता पिता से प्रथम जन्म, दूसरा आचार्य से विद्या द्वारा होता है, वही आकाश के पदार्थों को जानने वाला उत्पन्न हुआ पूर्ण विद्वान् अतुल सुख का देने वाला है॥१२॥

पुनः कथं विद्वांसो जायन्त इत्याह॥

फिर कैसे विद्वान् होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

सत्रे ह जातावि॑षिता नमो॑भिः कुम्भे रेतः॑ सिषिचतुः समानम्।
ततो॑ ह मान उदि॑याय॒ मध्या॒त्ततो॑ जा॒तमृषि॑माहुर्वसि॑ष्ठम्॥१३॥

सत्रे। ह। जातौ। इषिता। नमः॑ऽभिः। रेतः॑। सिसिचतुः। समानम्। ततः॑। ह। मानः॑। उत्। इयाय। मध्यात्। ततः॑। जातम्। ऋषि॑म्। आहुः। वसि॑ष्ठम्॥१३॥

पदार्थः-(**सत्रे**) दीर्घे यज्ञे (**ह**) खलु (**जातौ**) (**इषिता**) इषितावध्यापकोपदेशकौ (**नमोभिः**) (**कुम्भे**) कलशे (**रेतः**) उदकमिव विज्ञानम् (**सिषिचतुः**) सिञ्चेताम् (**समानम्**) तुल्यम् (**ततः**) (**ह**) प्रसिद्धम् (**मानः**) यो मन्यते सः (**उत्**) (**इयाय**) एति (**मध्यात्**) (**ततः**) तस्मात् (**जातम्**) प्रादुर्भूतम् (**ऋषिम्**) वेदार्थवेत्तारम् (**आहुः**) (**वसिष्ठम्**) उत्तमं विद्वांसम्॥१३॥

अन्वयः-यदि जातावि॑षिता नमोभिः सत्रे हाऽध्यापनाध्ययनाख्ये यज्ञे कुम्भे रेत इव समानं विज्ञानं सिषिचतुस्ततो ह यो मान उदियाय ततो मध्याज्जातं वसिष्ठमृषिमाहुः॥१३॥

भावार्थः-अत्रवाचकलुप्तोपमालङ्कारः। यथा स्त्रीपुरुषाभ्यामपत्यं जायते तथाऽध्यापकोपदेशकाऽध्ययनोपदेशैर्विद्वांसो जायन्ते॥१३॥

पदार्थः-यदि (**जातौ**) प्रसिद्ध हुए (**इषिताः**) अध्यापक और उपदेशक (**नमोभिः**) अन्नादिकों से (**सत्रे**) दीर्घ (**ह**) ही पढ़ाने पढ़नेरूप यज्ञ में (**कुम्भे**) कलश में (**रेतः**) जल के (**समानम्**) समान विज्ञान को (**सिषिचतुः**) सीचें छोड़ें (**ततः, ह**) उसी से जो (**मानः**) मानने वाला (**उत्, इयाय**) उदय को प्राप्त होता है (**ततः**) उस (**मध्यात्**) मध्य से (**जातम्**) उत्पन्न हुए (**वसिष्ठम्**) उत्तम (**ऋषिम्**) वेदार्थवेत्ता विद्वान् को (**आहुः**) कहते हैं॥१३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे स्त्री और पुरुषों से सन्तान उत्पन्न होता है, वैसे अध्यापक और उपदेशकों के पढ़ाने और उपदेश करने से विद्वान् होते हैं॥१३॥

पुनरध्यापकाऽध्येतारः किं कुर्य्युरित्याह॥

फिर पढ़ाने और पढ़ने वाले जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

उक्थ॒भृतं॑ साम॒भृतं॑ बिभर्ति॒ ग्रावा॑णं॒ बिभ्र॒त् प्र व॑दा॒त्यग्रे॑।
उपै॑नमाध्वं सुमन॒स्यमा॑ना॒ आ वो॑ गच्छाति प्रतृ॒दो॒ वसि॑ष्ठः॥१४॥२४॥२॥

उक्थ॒ऽभृतं॑। साम॒ऽभृतं॑। बि॒भर्ति॒। ग्रावा॑णम्। बिभ्र॑त्। प्र। व॒दा॒ति॒। अग्रे॑। उप॑। ए॒न॒म्। आ॒ध्व॒म्।

सुऽमनस्यमानाः। आ। वः। गच्छाति। प्रऽतृदः। वसिष्ठः॥ १४॥

पदार्थः-(**उक्थभृतम्**) य ऋग्वेदं बिभर्ति (**सामभृतम्**) यो सामवेदं दधाति (**बिभर्ति**) (**ग्रावाणम्**) सूर्यो मेघमिव (**बिभ्रत्**) विद्यां धरन् (**प्र**) (**वदाति**) वदेत् (**अग्रे**) पूर्वम् (**उप**) (**एनम्**) (**आध्वम्**) (**सुमनस्यमानाः**) सुष्ठु विचारयन्तः (**आ**) (**वः**) युष्मान् (**गच्छाति**) गच्छेत् प्राप्नुयात् (**प्रतृदः**) प्रकर्षेणाविद्यादिदोषहिंसकः (**वसिष्ठः**) अतिशयेन विद्यादिधनयुक्तः॥ १४॥

अन्वयः-हे सुमनस्यमाना मनुष्या! यः प्रतृदो ग्रावाणं सूर्य इव विद्यां बिभ्रद्वसिष्ठोऽग्र उक्थभृतं सामभृतं बिभर्ति सोऽन्यान् प्र वदाति यो व आगच्छाति तमेनं यूयमुपाध्वम्॥ १४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो विद्यार्थी सकलवेदविदं कुशिक्षाऽविद्याहिंसकमाप्तं विद्वांसं पुरः संसेव्य विद्याः पुनरध्यापयति तं सर्वे जिज्ञासवो विद्याप्राप्तये उपासत इति॥ १४॥

अत्राऽऽध्यापकाऽध्येतृपदेशकोपदेश्यगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे सप्तमे मण्डले द्वितीयोऽनुवाकस्त्रयस्त्रिंशं सूक्तं पञ्चमेऽष्टके तृतीयाध्याये चतुर्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**सुमनस्यमानाः**) सुन्दर विचार वाले मनुष्यो! जो (**प्रतृदः**) अतीव अविद्यादि दोष के नष्ट करने वाले (**ग्रावाणम्**) मेघ को सूर्य जैसे वैसे विद्या को (**बिभ्रत्**) धारता हुआ (**वसिष्ठः**) अत्यन्त विद्या आदि धन से युक्त (**अग्रे**) पूर्व (**उक्थभृतम्**) ऋग्वेद को और (**सामभृतम्**) सामवेद को धारण करने वाले को (**बिभर्ति**) धारण करता वह औरों को (**प्र, वदाति**) कहे जो (**वः**) तुम लोगों को (**आ, गच्छाति**) प्राप्त हो (**एनम्**) उस की तुम (**उप, आध्वम्**) उपासना करो॥ १४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्यार्थी सकल वेदवेत्ता कुशिक्षा और अविद्या को नष्ट करने वाले आप्त विद्वान् की पूर्व अच्छे प्रकार सेवा कर विद्या पाय फिर पढ़ाता है, उसकी सब ज्ञान चाहने वाले जन विद्या पाने के लिये उपासना करते हैं॥ १४॥

इस सूक्त में पढ़ाने-पढ़ने और उपदेश सुनाने और सुनने वालों के गुण और कार्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये।

यह ऋग्वेद के सातवें मण्डल में दूसरा अनुवाक, तेतीसवां सूक्त और पञ्चम अष्टक के तीसरे अध्याय में चौबीसवां वर्ग समाप्त हुआ॥

अथ पञ्चविंशत्यृचस्य चतुस्त्रिंशत्तमस्य सूक्तस्य वसिष्ठ ऋषिः। १-१५, १८-२५ विश्वेदेवाः। १६ अहिः। १७ अहिर्बुध्न्यो देवता। १, २, ५, १२, १३, १४, १६, १९, २० भुरिगार्ची गायत्री। ३, ४, १७ आर्ची गायत्री। ६, ७, ८, ९, १०, ११, १५, १८, २१ निचृत्त्रिपादगायत्री। २२, २४ निचृदार्षी त्रिष्टुप् छन्दः। षड्जः स्वरः। २३ आर्षी त्रिष्टुप्। २५ विराडार्षी त्रिष्टुप् च छन्दः। धैवतः स्वरः॥

अथ कन्याः काभ्यो विद्याः प्राप्नुयुरित्याह॥

अब कन्याजन किनसे विद्या को पावें, इस विषय को अगले मन्त्र में कहते हैं॥

प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी॥ १॥

प्र। शुक्रा। एतु। देवी। मनीषाः। अस्मत्। सुऽतष्टः। रथः। न। वाजी॥ १॥

पदार्थः-(**प्र**) (**शुक्रा**) शुद्धान्तःकरणा आशुकारिणी (**एतु**) प्राप्नोतु (**देवी**) विदुषी (**मनीषाः**) प्रज्ञाः (**अस्मत्**) अस्माकं सकाशात् (**सुतष्टः**) उत्तमेन शिल्पिना निर्मितः (**रथः**) (**न**) इव (**वाजी**)॥ १॥

अन्वयः-शुक्रा देवी कन्याऽस्मत्सुतष्टो वाजी रथो न मनीषाः प्रैतु॥ १॥

भावार्थः-अत्रोपमालङ्कारः। सर्वाः कन्या विदुषीभ्यः स्त्रीभ्यो ब्रह्मचर्येण सर्वा विद्या अधीयीरन्॥ १॥

पदार्थः- (**शुक्रा**) शुद्ध अन्तःकरणयुक्त शीघ्रकारिणी (**देवी**) विदुषी कन्या (**अस्मत्**) हमारे से (**सुतष्टः**) उत्तम कारू अर्थात् कारीगर के बनाये हुए (**वाजी**) वेगवान् (**रथः**) रथ के (**न**) समान (**मनीषाः**) उत्तम बुद्धियों को (**प्र, एतु**) प्राप्त होवे॥ १॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब कन्या विदुषियों से ब्रह्मचर्य्य नियम से सब विद्या पढ़ें॥ १॥

पुनस्ताः कन्याः कां कां विद्यां जानीयुरित्याह॥

फिर वे कन्या किस-किस विद्या को जानें, इस विषय को अगले मन्त्र में कहते हैं॥

विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अधः क्षरन्तीः॥ २॥

विदुः। पृथिव्याः। दिवः। जनित्रम्। शृण्वन्ति। आपः। अधः। क्षरन्तीः॥ २॥

पदार्थः-(**विदुः**) जानीयुः (**पृथिव्याः**) भूमेः (**दिवः**) सूर्यस्य (**जनित्रम्**) जनकं कारणम् (**शृण्वन्ति**) (**आपः**) जलानीव (**अधः**) (**क्षरन्तीः**) वर्षन्त्यः॥ २॥

अन्वयः-याः कन्या अधः क्षरन्तीराप इव विद्याः शृण्वन्ति ताः पृथिव्या दिवो जनित्रं विदुः॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा मेघमण्डलादापो वेगेन पृथिवीं प्राप्य प्रजा आनन्दन्ति तथैव याः कन्या अध्यापिकाभ्यो भूगर्भादिविद्याः प्राप्य पत्यादीन् सततं सुखयन्ति ताः श्रेष्ठतरा भवन्ति॥ २॥

पदार्थः-जो कन्या (**अधः, क्षरन्तीः**) नीचे को गिरते वर्षते हुए जलों के समान विद्या (**शृण्वन्ति**) सुनती हैं वे (**पृथिव्याः**) पृथिवी और (**दिवः**) सूर्य के (**जनित्रम्**) कारण को (**विदुः**) जानें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे मेघमण्डल से जल वेग से पृथिवी को पाकर प्रजा आनन्दित होते हैं, वैसे जो कन्या पढ़ाने वाली से भूगर्भादि विद्या को पाकर पति आदि को निरन्तर सुख देती हैं, वे अत्यन्त श्रेष्ठ होती हैं॥२॥

पुनस्ताः कीदृशो भवेयुरित्याह॥

फिर वे कैसी हों, इस विषय को अगले मन्त्र में कहते हैं॥

आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मसन्त उग्राः॥३॥

आपः। चित्। अस्मै। पिन्वन्त। पृथ्वीः। वृत्रेषु। शूराः। मंसन्ते। उग्राः॥३॥

पदार्थः-(**आपः**) जलानि (**चित्**) इव (**अस्मै**) विद्याव्यवहाराय (**पिन्वन्त**) सिञ्चन्ति (**पृथ्वीः**) भूमीः (**वृत्रेषु**) धनेषु (**शूराः**) (**मंसन्ते**) परिणमन्ते (**उग्राः**) तेजस्विनः॥३॥

अन्वयः-याः कन्याः पृथ्वीरापश्चिदस्मै पिन्वन्त वृत्रेषु उग्राः शूरा इव मंसन्ते ता विदुष्यो जायन्ते॥३॥

भावार्थः-अत्रोपमालङ्कारः। याः कन्या जलवत्कोमलत्वादिगुणाः पृथिवीवत्क्षमाशीलाः शूरवदुत्साहिन्यो विद्या गृह्णन्ति ताः सौभाग्यवत्यो जायन्ते॥३॥

पदार्थः-जो कन्या (**पृथ्वीः**) भूमि और (**आपः**) जल (**चित्**) ही के समान (**अस्मै**) इस विद्याव्यवहार के लिये (**पिन्वन्त**) सिंचन करती और (**वृत्रेषु**) धनों के निमित्त (**उग्राः**) तेजस्वी (**शूराः**) शूरवीरों के समान (**मंसन्ते**) मान करती है, वे विदुषी होती हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो कन्या जल के समान कोमलत्वादि गुणयुक्त हैं, पृथिवी के समान सहनशील और शूरों के समान उत्साहिनी विद्याओं को ग्रहण करती हैं, वे सौभाग्यवती होती हैं॥३॥

पुनस्ताः कन्या विद्यायै कं यत्नं कुर्य्युरित्याह॥

फिर वे कन्या विद्या के लिये क्या यत्न करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः॥४॥

आ। धूः। अस्मै। दधात। अश्वान्। इन्द्रः। न। वज्री। हिरण्यबाहुः॥४॥

पदार्थः-(**आ**) (**धूर्षु**) रथाधारेषु (**अस्मै**) विद्याग्रहणाय (**दधात**) (**अश्वान्**) शीघ्रगामितुरङ्गान् (**इन्द्रः**) सूर्य इव राजा (**न**) इव (**वज्री**) शस्त्रास्त्रयुक्तः (**हिरण्यबाहुः**) हिरण्यं बाह्वोर्दानाय यस्य सः॥४॥

अन्वयः-हे कन्या! यूयमस्मै धूर्ष्वश्वान् हिरण्यबाहुर्वज्रीन्द्रो न ब्रह्मचर्यमा दधात॥४॥

भावार्थः-अत्रोपमालङ्कारः। यथा सारथिरश्वान् रथे संयोज्य नियमेन चालयति तथा कन्या आत्मान्तःकरणेन्द्रियाणि विद्याप्रापणे व्यवहारे नियोज्य नियमेन चालयन्तु॥४॥

पदार्थः-हे कन्याओ! तुम (**अस्मै**) इस विद्याग्रहण करने के लिये (**धूर्षु**) रथों के आधार धुरियों में (**अश्वान्**) घोड़े और (**हिरण्यबाहुः**) जिसकी भुजाओं में दान के लिये हिरण्य विद्यमान उस (**वज्री**) शस्त्र अस्त्रों से युक्त (**इन्द्रः**) सूर्यतुल्य राजा के (**न**) समान ब्रह्मचर्य को (**आ, दधात**) अच्छे

प्रकार धारण करो॥४॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जैसे सारथी घोड़ों को रथ में जोड़ कर नियम से चलाता है, वैसे कन्या आत्मा अन्त:करण और इन्द्रियों को विद्या की प्राप्ति से व्यवहार में निरन्तर जोड़ कर नियम से चलावें॥४॥

पुन: कन्या: कथं विद्यां वर्धयेयुरित्याह॥

फिर कन्याजन कैसे विद्या को बढ़ावें, इस विषय को अगले मन्त्र में कहते हैं॥

अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत॥५॥

अभि। प्र। स्थात। अह:ऽइव। यज्ञम्। याताऽइव। पत्मन्। त्मना। हिनोत॥५॥

पदार्थ:-(**अभि**) (**प्र**) (**स्थात**) (**अहेव**) अहानीव (**यज्ञम्**) अध्ययनाध्यापनाख्यम् (**यातेव**) गच्छन्निव (**पत्मन्**) मार्गे (**त्मना**) आत्मना (**हिनोत**) वर्धयत॥५॥

अन्वय:-हे कन्या! यूयं विद्याप्राप्तयेऽहेव यज्ञमभि प्र स्थात त्मना पत्मन् यातेव हिनोत॥५॥

भावार्थ:-अत्रोपमालङ्कार:। हे कन्या! यथा दिनान्यनुक्रमेण गच्छन्त्याऽऽगच्छन्ति यथा च पथिका नित्यं चलन्ति तथैवानुक्रमेण विद्याप्राप्तिमार्गेण विद्याप्राप्तिरूपं यज्ञं वर्धयत॥५॥

पदार्थ:-हे कन्याओ! तुम विद्याप्राप्ति के लिये (**अहेव**) दिनों के समान (**यज्ञम्**) पढ़ने पढ़ाने रूप यज्ञ के (**अभि, प्र, स्थात**) सब ओर से जाओ (**त्मना**) अपने से (**पत्मन्**) मार्ग में (**यातेव**) जाते हुए के समान (**हिनोत**) बढ़ाओ॥५॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। हे कन्याओ! जैसे दिन अनुकूल क्रम से जाते और आते हैं और जैसे बटोही जन नित्य चलते हैं, वैसे ही अनुकूल क्रम से विद्याप्राप्ति मार्ग से विद्याप्राप्तिरूप यज्ञ को बढ़ाओ॥५॥

पुन: कन्या विद्याप्राप्तिव्यवहारं वर्धयन्त्वित्याह॥

फिर कन्या विद्याप्राप्ति व्यवहार को बढ़ावें, इस विषय को अगले मन्त्र में कहते हैं॥

त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम्॥६॥

त्मना। समत्ऽसु। हिनोत। यज्ञम्। दधात। केतुम्। जनाय। वीरम्॥६॥

पदार्थ:-(**त्मना**) आत्मना (**समत्सु**) स-ामेषु (**हिनोत**) वर्धयत (**यज्ञम्**) सङ्गन्तव्यं विद्याबोधम् (**दधात**) (**केतुम्**) प्रज्ञाम् (**जनाय**) राज्ञे (**वीरम्**) दोग्धारम्॥६॥

अन्वय:-हे कन्या! यथा जनाय समत्सु वीरं प्रेरयन्ति तथा त्मना केतुं दधात यज्ञं हिनोत॥६॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा शूरवीरा धीमन्तो राजपुरुषा: प्रयत्नेन संग्रामान् विजयन्ते तथा कन्याभिरिन्द्रियाणि जित्वा विद्या: प्राप्य विजयो विभावनीय:॥६॥

पदार्थ:-हे कन्याओ! जैसे (**जनाय**) राजा के लिये (**समत्सु**) संग्रामों में (**वीरम्**) पूरा करने वाले जन को प्रेरणा देते हैं, वैसे (**त्मना**) अपने से (**केतुम्**) बुद्धि को (**दधात**) धारण करो और (**यज्ञम्**) संग करने योग्य विद्याबोध को (**हिनोत**) बढ़ाओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे शूरवीर धीमान् बुद्धिमान् राजा पुरुष उत्तम यत्न से संग्रामों को विशेषता से जीतते हैं, वैसे कन्याओं को इन्द्रियाँ जीत और विद्याओं को पाकर विजय की विशेष भावना करनी चाहिये॥६॥

पुनस्ताः कन्या विद्याः कथं प्राप्नुयुरित्याह॥

फिर वे कन्या विद्या कैसे पावें, इस विषय को अगले मन्त्र में कहते हैं॥

उदस्य शुष्मादुनुर्त बिभर्ति भारं पृथिवी न भूम॥७॥

उत्। अस्य। शुष्मात्। भानुः। न। आर्त। बिभर्ति। भारम्। पृथिवी। न। भूम॥७॥

पदार्थः-(**उत्**) (**अस्य**) (**शुष्मात्**) बलात् (**भानुः**) किरणयुक्तः सूर्यः (**न**) इव (**आर्त**) प्राप्नोति (**बिभर्ति**) (**भारम्**) (**पृथिवी**) भूमिः (**न**) इव (**भूम**) भवेम॥७॥

अन्वयः-हे कन्या! यथा वयं भारं पृथिवी न भानुर्नास्य शुष्माद्विदुष्यो भूम यथाऽयं भानुः पृथिव्यादिभारमुद्बिभर्ति सकलं तदार्त्त तथा यूयं भवत॥७॥

भावार्थः-यथा विद्वांसोऽस्य विद्याबोधस्य बलात् सर्वं सुखं बिभ्रति तथैव कन्या विद्याबलात् समग्रमानन्दं प्राप्नुवन्ति॥७॥

पदार्थः-हे कन्याजनो! जैसे हम (**भारम्**) भार को (**पृथिवी**) भूमि (**न**) जैसे और (**भानुः**) किरणयुक्त सूर्य जैसे (**न**) वैसे (**अस्य**) इस विद्याव्यवहार के (**शुष्मात्**) बल से विदुषी (**भूम**) हों वा जैसे यह भानु पृथिवी आदि के भार को (**उद्**, **बिभर्ति**) उत्कृष्टता से धारण करता है, समस्त उस व्यवहार को (**आर्त्त**) प्राप्त होता है, वैसे तुम होओ॥७॥

भावार्थः-जैसे विद्वान् जन इस विद्याबोध के बल से सब सुख को धारण करते हैं, वैसे ही कन्याजन विद्याबल से सब आनन्द को पाती हैं॥७॥

पुनरध्यापका अध्येतॄन् किमुपदिशेयुरित्याह॥

फिर अध्यापक, अध्येताओं को क्या उपदेश करें, इस विषय को अगले मन्त्र में कहते हैं॥

ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि॥८॥

ह्वयामि। देवान्। अयातुः। अग्ने। साधन्। ऋतेन। धियम्। दधामि॥८॥

पदार्थः-(**ह्वयामि**) (**देवान्**) विदुषः (**अयातुः**) यो न याति तस्मात् (**अग्ने**) विद्वन् (**साधन्**) (**ऋतेन**) सत्येन व्यवहारेण (**धियम्**) प्रज्ञां शुभं कर्म वा (**दधामि**)॥८॥

अन्वयः-हे अग्ने! यथाऽहं देवान् ह्वयाम्यृतेन साधन्धियं दधाम्ययातुः स्थिराद्विद्यां गृह्णामि तथा त्वं कन्यापाठनस्य निबन्धं कुरु॥८॥

भावार्थः-ये विदुष आहूय सत्कृत्य सत्याचारेण विद्यां धरन्ति ते विद्वांसो भवन्ति॥८॥

पदार्थः-हे (**अग्ने**) विद्वान्! जैसे मैं (**देवान्**) विद्वानों को (**ह्वयामि**) बुलाता हूँ (**ऋतेन**) सत्य व्यवहार से (**साधन्**) सिद्ध करता हुआ (**धियम्**) उत्तम बुद्धि वा शुभ कर्म को (**दधामि**) धारण करता हूँ और (**अयातुः**) जो नहीं जाता उस स्थिर से विद्या ग्रहण करता हूँ, वैसे आप कन्या पढ़ाने का

निबन्ध करो॥८॥

भावार्थः-जो विद्वानों को बुला के और उनका सत्कार कर सत्य आचार से विद्या को धारण करते हैं, वे विद्वान् होते हैं॥८॥

सर्वैर्मनुष्यैः किमेष्टव्यमित्याह॥

सब मनुष्यों को क्या इच्छा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम्॥९॥

अभि। वः। देवीम्। धियम्। दधिध्वम्। प्र। वः। देवऽत्रा। वाचम्। कृणुध्वम्॥९॥

पदार्थः-(**अभि**) आभिमुख्ये (**वः**) युष्माकम् (**देवीम्**) दिव्याम् (**धियम्**) प्रज्ञाम् (**दधिध्वम्**) (**प्र**) (**वः**) युष्माकम् (**देवत्रा**) विद्वत्सु (**वाचम्**) (**कृणुध्वम्**)॥९॥

अन्वयः-हे विद्वांसो! यान् देवत्रा वर्त्तमानां देवीं धियं यूयमभि दधिध्वं तां वो वयमपि दधीमहि। यान् देवत्रा वाचं यूयं प्र कृणुध्वं तां वो वयमपि प्र कुर्याम॥९॥

भावार्थः-मनुष्यैर्विद्वदनुकरणेन प्रज्ञा विद्या वाक् च धर्त्तव्या॥९॥

पदार्थः-हे विद्वानो! जैसे (**देवत्रा**) विद्वानों में वर्त्तमान (**देवीम्**) दिव्य (**धियम्**) बुद्धि को तुम (**अभि, दधिध्वम्**) सब ओर से धारण करो उस (**वः**) आपकी बुद्धि को हम लोग भी धारण करें, विद्वानों में जिस (**वाचम्**) वाणी को तुम (**प्र, कृणुध्वम्**) प्रसिद्ध करो उस (**वः**) आपकी वाणी को हम लागे भी (**प्र**) प्रसिद्ध करें॥६॥

भावार्थः-मनुष्यों को चाहिये कि विद्वानों का अनुकरण कर बुद्धि, विद्या और वाणी को धारण करें॥९॥

पुनस्स विद्वान् कीदृशो भवेदित्याह॥

फिर वह विद्वान् कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः॥१०॥२५॥

आ। चष्टे। आसाम्। पाथः। नदीनाम्। वरुणः। उग्रः। सहस्रऽचक्षाः॥१०॥

पदार्थः-(**आ**) (**चष्टे**) समन्तात्कथयति (**आसाम्**) (**पाथः**) उदकम् (**नदीनाम्**) (**वरुणः**) सूर्य इव (**उग्रः**) तेजस्वी (**सहस्रचक्षाः**) सहस्रं चक्षांसि दर्शनानि यस्माद्यस्य वा॥१०॥

अन्वयः-हे विद्वन्! यथा वरुण उग्रः सहस्रचक्षास्सूर्य आसां नदीनां पाथ आकर्षति पूरयति च तथाभूतो भवान् मनुष्यचित्तान्याकृष्य यतो विद्यामाचष्टे तस्मात्सत्कर्तव्योऽस्ति॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो विद्वान् सूर्यवदविद्यां निवार्य विद्याप्रकाशं जनयति स एवात्र माननीयो भवति॥१०॥

पदार्थः-हे विद्वान्! जैसे (**वरुणः**) सूर्य के समान (**उग्रः**) तेजस्वी जन (**सहस्रचक्षाः**) जिसके वा जिससे हजार दर्शन होते हैं वह सूर्य (**आसाम्**) इन (**नदीनाम्**) नदियों के (**पाथः**) जल को खींचता और पूरा करता है, वैसे हुए आप मनुष्यों के चित्तों को खींच के जिस कारण विद्या को (**आ,**

चष्टे) कहते हैं, इससे सत्कार करने योग्य हैं॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् सूर्य के तुल्य अविद्या को निवार के विद्या के प्रकाश को उत्पन्न करता है, वही यहाँ माननीय होता है॥१०॥

पुनस्स राजा किंवत् किं कुर्यादित्याह॥

फिर वह राजा किसके तुल्य क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

राजा॑ रा॒ष्ट्राना॑ं पेशो॑ न॒दीना॒मनु॑त्तमस्मै क्ष॒त्रं वि॒श्वायु॑॥ ११॥

राजा॑। रा॒ष्ट्राना॑म्। पेश॑ः। न॒दीना॑म्। अनु॑त्तम्। अ॒स्मै॒। क्ष॒त्रम्। वि॒श्वऽआ॑यु॥ ११॥

पदार्थः-(**राजा**) प्रकाशमानः (**राष्ट्रानाम्**) राज्यानाम्। अत्र **वा छन्दसी**ति णत्वाभावः। (**पेशः**) रूपम् (**नदीनाम्**) (**अनुत्तम्**) अनुकूलं शत्रुभिरबाधितम् (**अस्मै**) (**क्षत्रम्**) धनं राज्यं वा (**विश्वायु**) विश्वं सम्पूर्णामायु यस्मात्तत्॥११॥

अन्वयः-यो राजा नदीनां पेश इव राष्ट्रानां रक्षां विधत्तेऽस्मा अनुत्तं विश्वायु क्षत्रं भवति॥११॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यो राजा न्यायकारी विद्वान् भवति तम्प्रति समुद्रं नद्य इव प्रजा अनुकूला भूत्वैश्वर्यं जनयन्ति पूर्णमायुश्चास्य भवति॥११॥

पदार्थः-जो (**राजा**) प्रकाशमान (**नदीनाम्**) नदियों के (**पेशः**) रूप के समान (**राष्ट्रानाम्**) राज्यों की रक्षा का विधान करता है (**अस्मै**) इसके लिये (**अनुत्तम्**) शत्रुओं से अपीड़ित (**विश्वायु**) जिससे समस्त आयु होती है वह (**क्षत्रम्**) धन वा राज्य होता है॥११॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजा न्यायकारी विद्वान् होता है, उसके प्रति समुद्र को नदी जैसे, वैसे प्रजा अनुकूल होकर ऐश्वर्य्य को उत्पन्न कराती हैं और इस राजा को पूरी आयु भी होती है॥११॥

पुना राजजनाः किं कुर्युरित्याह॥

फिर राजजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अवि॑ष्टो अ॒स्मान् विश्वा॑सु वि॒क्ष्वद्यु॑ं कृणोत॒ शंस॑ं नि॒नि॒त्सोः॥ १२॥

अवि॑ष्टो॒ इति॑। अ॒स्मान्। विश्वा॑सु। वि॒क्षु। अद्यु॑म्। कृ॒णो॒त॒। शंस॑म्। नि॒नि॒त्सोः॥ १२॥

पदार्थः-(**अविष्टो**) दोषेष्वप्रविष्टाः सन्तो रक्षतः (**अस्मान्**) तदनुकूलान् राज्यादिकारिणः (**विश्वासु**) अखिलासु (**विक्षु**) प्रजासु (**अद्युम्**) प्रकाशरहितं व्यवहारम् (**कृणोत**) (**शंसम्**) प्रशंसनम् (**निनित्सोः**) निन्दितुमिच्छतः॥१२॥

अन्वयः-हे राजजना! यूयं विश्वासु विक्ष्वस्मान्नविष्टो सततं रक्षत अस्माकं शसं कृणोत अस्मान्निनित्सोर्व्यवहारमद्युं कृणोत॥१२॥

भावार्थः-राजजनाः प्रजासु वर्त्तमानान् निन्दकान् जनान् निवार्य प्रशंसकान् संरक्ष्य प्रजासु पितृवद्वर्तित्वा अविद्यान्धकारं निवारयन्तु॥१२॥

पदार्थः-हे राजजनो! तुम (**विश्वासु**) समस्त (**विक्षु**) प्रजाओं में (**अस्मान्**) उनके अनुकूल

राज्याधिकारी हम जनों को **(अविष्टो)** दोषों में न प्रवेश किये हुए निरन्तर रक्षा करो हमारी **(शंसम्)** प्रशंसा **(कृणोत)** करो हम लोगों की **(निनित्सो:)** निन्दा करना चाहते हुए के **(अद्युम्)** प्रकाशरहित व्यवहार को प्रकाश करो॥१२॥

भावार्थ:-राजजन प्रजाओं में वर्त्तमान निन्दक जनों का निवारण कर प्रशंसा करने वालों की रक्षा कर और प्रजाजनों में पिता के समान वर्त्त कर अविद्यान्धकार को निवारण करें॥१२॥

पुनस्ते राजजना: किं कुर्युरित्याह॥

फिर वे राजजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

व्येतु द्विद्युद् द्विषामशेवा युयोत विष्वग्रपस्तनूनाम्॥ १३॥

वि। एतु। द्विद्युत्। द्विषाम्। अशेवा। युयोत। विष्वक्। रप:। तनूनाम्॥ १३॥

पदार्थ:-(**वि**) विशेषेण (**एतु**) प्राप्नोतु (**दिद्युत्**) भृशं द्योतमानम् (**द्विषाम्**) द्वेष्टृणाम् (**अशेवा**) असुखानि (**युयोत**) (**विष्वक्**) व्याप्तम् (**रप:**) अपराधम् (**तनूनाम्**) शरीराणाम्॥१३॥

अन्वय:-हे राजजना विद्वांसो! यूयं द्विषामशेवा कुरु तनूनां दिद्युद्विष्वग्रपो युयोत पृथक्कुरुत यत: भद्रान् सर्वान् सुखं व्येतु॥१३॥

भावार्थ:-हे राजजना! यूयं ये धार्मिकान् पीडयेयुस्तान् दण्डेन पवित्रान् कुरुत यतो सर्वतस्सर्वान् सुखं प्राप्नुयात्॥१३॥

पदार्थ:-हे राजजन विद्वानो! तुम (**द्विषाम्**) द्वेष करने वालों को (**अशेवा**) असुख अर्थात् दु:ख को करो (**तनूनाम्**) शरीरों के (**दिद्युत्**) निरन्तर प्रकाशमान (**विष्वक्**) और व्याप्त (**रप:**) अपराध को (**युयोत**) अलग करो जिसमें भद्र उत्तम सब मनुष्यों को सुख (**वि, एतु**) व्याप्त हो॥१३॥

भावार्थ:-हे राजजनो! तुम, जो धार्मिक सज्जनों को पीड़ा देवें उनको दण्ड से पवित्र करो, जिससे सब ओर से सबको सुख प्राप्त हो॥१३॥

पुन: स राजा किं कुर्यादित्याह॥

फिर वह राजा क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

अवीन्नो अग्निर्हव्यान्नमोभि: प्रेष्ठो अस्मा अधायि स्तोम:॥ १४॥

अवीत्। न:। अग्नि:। हव्यऽअत्। नम:ऽभि:। प्रेष्ठ:। अस्मै। अधायि। स्तोम:॥ १४॥

पदार्थ:-(**अवीत्**) रक्षेत् (**न:**) अस्मान् (**अग्नि:**) पावक इव (**हव्यात्**) यो हव्यान्यत्ति स: (**नमोभि:**) अन्नादिभि: (**प्रेष्ठ:**) अतिशयेन प्रिय: (**अस्मै**) (**अधायि**) ध्रियते (**स्तोम:**) प्रशंसाव्यवहार:॥१४॥

अन्वय:-येन राज्ञाऽस्मै राष्ट्राय प्रेष्ठ: स्तोमोऽधायि यो हव्यादाग्निरिव राजा नमोभिर्नोऽस्मान् अवीत् स एवास्माभि: सत्कर्तव्योऽस्ति॥१४॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। यथा सूर्यस्स्वप्रकाशेन सर्वान्रक्षति तथा राजा न्यायप्रकाशेन सर्वा: प्रजा रक्षेत्॥१४॥

पदार्थः-जिस राजा ने **(अस्मै)** इस राज्य के लिये **(प्रेष्ठः)** अतीव प्रिय **(स्तोमः)** प्रशंसा व्यवहार **(अधायि)** धारण किया गया जो **(हव्यात्)** होम करने योग्य अन्न भोजन करने वाले **(अग्निः)** अग्नि के समान वर्त्तमान **[**राजा**]** **(नमोभिः)** अन्नादि पदार्थों से **(नः)** हम लोगों की **(अवीत्)** रक्षा करे, वही हम लोगों को सत्कार करने योग्य है॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे सूर्य स्वप्रकाश से सब की रक्षा करता है, वैसे राजा न्याय के प्रकाश से सब प्रजा की रक्षा करे॥१४॥

पुनस्ते राजजनाः किं कुर्युरित्याह॥

फिर वे राजजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु॥ १५॥

सऽजूः। देवेभिः। अपाम्। नपातम्। सखायम्। कृध्वम्। शिवः। नः। अस्तु॥ १५॥

पदार्थः-(**सजूः**) सह वर्त्तमानः (**देवेभिः**) विद्वद्भिर्दिव्यैः पृथिव्यादिभिर्वा (**अपाम्**) जलानाम् (**नपातम्**) यो न पतति न नश्यति तं मेघमिव (**सखायम्**) सुहृदम् (**कृध्वम्**) कुरुध्वम् (**शिवः**) मङ्गलकारी (**नः**) अस्मभ्यमस्माकं वा (**अस्तु**)॥१५॥

अन्वयः-हे राजन्! यथा देवेभिस्सजूस्सूर्योऽपां नपातं करोति तथा भवान् नः शिवोऽस्तु हे विद्वांस! ईदृशं राजानं नस्सखायं यूयं कृध्वम्॥१५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सूर्यादयः पदार्थाः जगति मित्रवद्वर्तित्वा सुखकारिणो भवन्ति तथैव राजजनाः सर्वेषां सखायो भूत्वा मङ्गलकारिणो भवन्ति॥१५॥

पदार्थः-हे राजन्! जैसे **(देवेभिः)** विद्वानों से वा पृथिवी आदि दिव्य पदार्थों के **(सजूः)** साथ वर्त्तमान सूर्यमण्डल **(अपां नपातम्)** जलों के उस व्यवहार को जो नहीं नष्ट होता मेघ के समान करता है, वैसे आप **(नः)** हमारे वा हमारे लिये **(शिवः)** मंगलकारी **(अस्तु)** हों हे विद्वानो! ऐसे राजा को हमारा **(सखायम्)** मित्र **(कृध्वम्)** कीजिये॥१५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य आदि पदार्थ जगत् में मित्र के समान वर्त कर सुखकारी होते हैं, वैसे ही राजजन सब के मित्र होकर मंगलकारी होते हैं॥१५॥

पुनस्ते राजजना किंवत् किं कुर्युरित्याह॥

फिर वे राजजन किसके तुल्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन्॥ १६॥

अप्ऽजाम्। उक्थैः। अहिम्। गृणीषे। बुध्ने। नदीनाम्। रजःऽसु। सीदन्॥ १६॥

पदार्थः-(**अब्जाम्**) अप्सु जातम् (**उक्थैः**) ये तद्गुणप्रशंसकैर्वचोभिः (**अहिम्**) मेघमिव (**गृणीषे**) (**बुध्ने**) अन्तरिक्षे (**नदीनाम्**) सरिताम् (**रजःसु**) लोकेष्वैश्वर्येषु वा (**सीदन्**) तिष्ठन्॥१६॥

अन्वयः-हे राजन्! यथा सूर्यो बुध्ने वर्त्तमानो नदीनां रजःसु सीदन् अब्जामहिं जनयति तथोक्थै राष्ट्रे

रजःसु सीदन् नदीनां प्रवाहमिव यतो विद्या गृणीषे तस्मात् सत्कर्तव्योऽसि॥१६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजपुरुषा! यथा सूर्यो वर्षाभिर्नदीः पूरयति तथा धनधान्यैः प्रजा यूयं पूरयत॥१६॥

पदार्थः-हे राजन्! जैसे सूर्य **(बुध्ने)** अन्तरिक्ष में वर्त्तमान **(नदीनाम्)** नदियों के सम्बन्धी **(रजःसु)** लोकों में **(सीदन्)** स्थिर होता हुआ **(अब्जाम्)** जलों में उत्पन्न हुए **(अहिम्)** मेघ को उत्पन्न करता है, वैसे **(उक्थैः)** उसके गुणों के प्रशंसक वचनों से राज्य में जो ऐश्वर्य उनमें स्थिर होते हुए आप नदियों के प्रवाह के समान जिससे विद्या को **(गृणीषे)** कहते हो, इससे सत्कार करने योग्य हो॥१६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजपुरुषो! जैसे सूर्य वर्षा से नदियों को पूर्ण करता है, वैसे धन-धान्यों से तुम प्रजाओं को पूर्ण करो॥१६॥

पुनस्ते राजजनाः किं कुर्युरित्याह॥

फिर वे राजजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः॥१७॥

मा। नः। अहिः। बुध्न्यः। रिषे। धात्। मा। यज्ञः। अस्य। स्रिधत्। ऋतऽयोः॥१७॥

पदार्थः-(**मा**) निषेधे (**नः**) अस्मान् (**अहिः**) मेघः (**बुध्न्यः**) बुध्नेऽन्तरिक्षे भवः (**रिषे**) हिंसनाय (**धात्**) दध्यात् (**मा**) निषेधे (**यज्ञः**) राजपालनीयो व्यवहारः (**अस्य**) राज्ञः (**स्रिधत्**) हिंसितः स्यात् (**ऋतायोः**) ऋतं सत्यं न्यायधर्मं कामयमानस्य॥१७॥

अन्वयः-हे विद्वांसो! यथा बुध्न्योऽहिर्नो रिषे मा धात् यथाऽस्यर्तायो राज्ञो यज्ञो मा स्रिधत् तथाऽनुतिष्ठत॥१७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे राजादयो मनुष्या! यथाऽवृष्टिर्न स्यात् न्यायव्यवहारो न नश्येत्तथा तथा यूयं विधत्त॥१७॥

पदार्थः-हे विद्वानो! जैसे (**बुध्न्यः**) अन्तरिक्ष में उत्पन्न हुआ (**अहिः**) मेघ (**नः**) हम लोगों को (**रिषे**) हिंसा के लिये (**मा**) मत (**धात्**) धारण करे वा जैसे (**अस्य**) इस (**ऋतायोः**) सत्य न्याय धर्म की कामना करने वाला राजा का (**यज्ञः**) प्रजा पालन करने योग्य व्यवहार (**मा**) मत (**स्रिधत्**) नष्ट हो वैसा अनुष्ठान करो॥१७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे राजन् आदि मनुष्यो! जैसे अवर्षण न हो, न्यायव्यवहार न नष्ट हो, वैसा तुम विधान करो॥१७॥

पुनस्ते राजजनाः किं कुर्युरित्याह॥

फिर वे राजजन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः॥१८॥

उत। नः। एषु। नृषु। श्रवः। धुः। प्र। राये। यन्तु। शर्धन्तः। अर्यः॥१८॥

पदार्थः-(**उत**) अपि (**नः**) अस्माकम्। अत्र **वा छन्दसी**त्यवसानम्। (**एषु**) (**नृषु**) नायकेषु मनुष्येषु (**श्रवः**) अन्नं श्रवणं वा (**धुः**) दध्युः (**प्र**) (**राये**) धनाय (**यन्तु**) गच्छन्तु (**शर्धन्तः**) बलवन्तः (**अर्यः**) अरयश्शत्रवः॥१८॥

अन्वयः-हे राजन्! ये न एषु राये श्रवो धुस्तेऽस्मान् प्राप्नुवन्तूत ये नः शर्धन्तो नृष्वर्योऽस्माकं राज्यादिकमिच्छेयुस्ते दूरं प्र यन्तु॥१८॥

भावार्थः-मनुष्यैः सज्जनानां निकटे दुष्टानां दूरे स्थित्वा श्रीरुन्नेया॥१८॥

पदार्थः-हे राजन्! जो (**नः**) हमारे (**एषु**) इन व्यवहारों में (**राये**) धन के लिये (**अवः**) अन्न वा श्रवण को (**धुः**) धारण करें वे हम लोगों को प्राप्त होवें (**उत**) और जो (**नः**) हम लोगों को (**शर्धन्तः**) बली करते हुए (**नृषु**) नायक मनुष्यों में (**अर्यः**) शत्रुजन हमारे राज्य आदि ऐश्वर्य को चाहें वे दूर (**प्र, यन्तु**) पहुँचें॥१८॥

भावार्थः-मनुष्यों को चाहिये कि सज्जनों के निकट और दुष्टों के दूर रह कर लक्ष्मी की उन्नति करें॥१८॥

के शत्रुनिवारणे समर्था भवन्तीत्याह॥

कौन शत्रुओं के निवारण में समर्थ होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

तप॑न्ति॒ शत्रुं॑ स्व॒र्णभूमा॑ म॒हासे॑नासो॒ अमे॑भिरेषाम्॥ १९॥

तप॑न्ति। शत्रु॑म्। स्व॑रिति॑। न। भूम॑। म॒हाऽसे॑नासः। अमे॑भिः। ए॒षा॒म्॥ १९॥

पदार्थः-(**तपन्ति**) (**शत्रुम्**) (**स्वः**) सुखम् (**न**) इव (**भूम**) भवेम। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**महासेनासः**) महती सेना येषान्ते (**अमेभिः**) बलादिभिः (**एषाम्**) वीराणाम्॥१९॥

अन्वयः-ये महासेनास एषाममेभिः शत्रुं तपन्ति तैस्सह राजादयो वयं स्वर्न भूम॥१९॥

भावार्थः-हे राजन्! यदि भवता योद्धॄणां शूरवीराणां सेना सत्कृत्य रक्ष्येत तर्हि ते शत्रवो निलीयेरन् सुखं च सततं वर्धेत॥१९॥

पदार्थः- (**महासेनासः**) जिनकी बड़ी सेना है वे जन (**एषाम्**) इन वीरों के (**अमेभिः**) बलादिकों से (**शत्रुम्**) शत्रु को (**तपन्ति**) तपाते हैं उनसे साथ राजा आदि हम लोग (**स्वः**) सुख (**न**) जैसे हो वैसे (**भूम**) प्रसिद्ध हों॥१९॥

भावार्थः-हे राजन्! यदि आपसे योद्धा शूरवीर जनों की सेना सत्कार कर रक्खी जाय तो आप के शत्रुजन बिला जायें और सुख निरन्तर बढ़े॥१९॥

पुना राजामात्यभृत्याः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर राजा और अन्य भृत्य परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

आ यन्नः॒ पत्नी॒र्गम॒न्त्यच्छा॒ त्वष्टा॑ सु॒पा॒णिर्दधा॑तु वी॒रान्॥ २०॥ २६॥

आ। यत्। न॒ः। पत्नीः॑। गम॑न्ति। अच्छ॑। त्वष्टा॑। सु॒ऽपा॒णिः। दधा॑तु। वी॒रान्॥ २०॥

पदार्थः-(**आ**) (**यत्**) याः (**नः**) अस्मानस्माकं वा (**पत्नीः**) भार्याः (**गमन्ति**) प्राप्नुवन्ति

(अच्छा) सम्यक्। अत्र **संहितायामि**ति दीर्घः। **(त्वष्टा)** दुःखच्छेदकः **(सुपाणिः)** शोभनहस्तो राजा **(दधातु) (वीरान्)** शौर्यादिगुणोपेतान्नमात्यादिभृत्यान्॥ २०॥

अन्वयः-हे राजन्! यथा यद्याः पत्नीर्नोऽच्छाऽऽगमन्ति रक्षन्ति यथा च वयं ता रक्षेम तथा त्वष्टा सुपाणिर्भवान् वीरान् दधातु॥ २०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पतिव्रताः स्त्रियः स्त्रीव्रताः पतयश्च परस्परेषां प्रीत्या रक्षां विदधति तथा राजा धार्मिकानमात्यभृत्याश्च धार्मिकं राजानं सततं रक्षन्तु॥ २०॥

पदार्थः-हे राजन्! जैसे **(यत्)** जो **(पत्नीः)** भार्या **(नः)** हम लोगों को **(अच्छा)** अच्छे प्रकार **(आ, गमन्ति)** प्राप्त होती और रक्षा करती हैं और जैसे हम लोग उनकी रक्षा करें, वैसे **(त्वष्टा)** दुःख विच्छेद करने वाला **(सुपाणिः)** सुन्दर हाथों से युक्त राजा आप **(वीरान्)** शूरता आदि गुणों से युक्त मन्त्री और भृत्यों को **(दधातु)** धारण करो॥ २०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पतिव्रता स्त्री स्त्रीव्रत पति जन परस्पर की प्रीति से रक्षा करते हैं, वैसे राजा धार्मिकों की, अमात्य और भृत्यजन धार्मिक राजा की निरन्तर रक्षा करें॥ २०॥

पुनस्ते राजामात्यादयः परस्परं कथं वर्त्तेरन्नित्याह॥

फिर वे राजा और मन्त्री आदि परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

प्रति॑ नः॒ स्तोम॒ꣳ त्वष्टा॑ जुषेत॒ स्याद॒स्मे अ॒रम॑तिर्वसू॒युः॥ २१॥

प्रति॑। नः॒। स्तोम॑म्। त्वष्टा॑। जु॒षे॒त॒। स्यात्। अ॒स्मे॒ इति॑। अ॒रम॑तिः। वसु॑ऽयुः॥ २१॥

पदार्थः-**(प्रति) (नः)** अस्मान्नस्माकं वा **(स्तोमम्)** प्रशंसाम् **(त्वष्टा)** दुःखविच्छेदको राजा **(जुषेत)** प्रीत्या सेवेत **(स्यात्)** भवेत् **(अस्मे)** अस्मासु **(अरमतिः)** अरं अलं मतिः प्रज्ञा यस्य सः **(वसूयुः)** वसूनि धनानि कामयमानः॥ २१॥

अन्वयः-हे विद्वांसो! यथा वयं राजानं प्रीत्या सेवेमहि तथाऽरमतिर्वसूयुस्त्वष्टा राजा नोऽस्मान् प्रति जुषेत यथाऽयं राजा नः स्तोमं जुषेत तथा वयमस्य कीर्तिं सेवेमहि यथाऽयमस्मे प्रीतः स्यात् तथा वयमप्यस्मिन् प्रीताः स्याम॥ २१॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यत्र राजामात्यभृत्यप्रजाजना अन्योऽन्येषामुन्नतिं चिकीर्षन्ति तत्र सर्वमैश्वर्यं सुखं वर्धनं च प्रजायते॥ २१॥

पदार्थः-हे विद्वानो! जैसे हम लोग राजा की प्रीति से सेवा करें, वैसे **(अरमतिः)** पूर्ण मति है जिस की **(वसूयुः)** धनों की कामना करता हुआ **(त्वष्टा)** दुःखविच्छेद करने वाला राजा **(नः)** हम लोगों को **(प्रति, जुषेत)** प्रीति से सेवे जैसे यह राजा हमारी **(स्तोमम्)** प्रशंसा को सेवे, वैसे हम लोग इसकी कीर्ति को सेवें जैसे यह **(अस्मे)** हम लोगों में प्रसन्न **(स्यात्)** हो, वैसे हम लोग भी इस में प्रसन्न हों॥ २१॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जहाँ राजा अमात्यभृत्य और प्रजाजन एक-

दूसरे की उन्नति को करना चाहते हैं, वहाँ समस्त ऐश्वर्य, सुख और वृद्धि होती है॥२१॥

पुनस्ते राजादय: प्रजासु कथं वर्त्तेरन्नित्याह॥

फिर वे राजादि प्रजाजनों में कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

ता नो रासन्नातिषाचो वसून्या रोदसी वरुणानी शृणोतु।
वरूत्रीभि: सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु राय:॥२२॥

ता। न:। रासन्। रातिऽसाच:। वसूनि। आ। रोदसी इति। वरुणानी। शृणोतु। वरूत्रीभि:। सुऽशरण:। न:। अस्तु। त्वष्टा। सुऽदत्र:। वि। दधातु। राय:॥२२॥

पदार्थ:-(**ता**) तानि (**न:**) अस्मभ्यम् (**रासन्**) प्रदद्यु: (**रातिषाच:**) ये रातिं सचन्ते सम्बध्नन्ति ते (**वसूनि**) धनानि (**आ**) (**रोदसी**) द्यावापृथिव्यौ (**वरुणानी**) जलादिपदार्थयुक्ते (**शृणोतु**) (**वरूत्रीभि:**) वरणीयाभिर्विद्याभि: (**सुशरण:**) शोभनं शरणमाश्रयो यस्य स: (**न:**) अस्मभ्यम् (**अस्तु**) (**त्वष्टा**) दु:खविच्छेदक: (**सुदत्र:**) सुष्ठुदान: (**वि, दधातु**) (**राय:**) धनानि॥२२॥

अन्वय:-हे विद्वांसो! भवन्तो वरूत्रीभिर्वरुणानी रोदसी इव रातिषाच: सन्तो नस्ता वसून्या रासन् हे राजन्! सुदत्रस्त्वष्टा सुशरणो भवान् नो रक्षकोऽस्तु नो रायो वि दधातु अस्माकं वार्ता: शृणोतु॥२२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये राजपुरुषा: सूर्यभूमिवत् प्रजा: धनयन्ति तासां न्यायकरणाय वार्ता: शृण्वन्ति यथावत्पुरुषार्थेन श्रीमती: प्रकुर्वन्ति त एवात्रालंसुखा भवन्ति॥२२॥

पदार्थ:-हे विद्वानो! आप (**वरूत्रीभि:**) वरुणसम्बन्धो विद्याओं से (**वरुणानी**) जलादि पदार्थयुक्त (**रोदसी**) प्रकाश और पृथिवी के समान (**रातिषाच:**) दान सम्बन्ध करते हुए (**न:**) हम लोगों के लिये (**ता**) उन (**वसूनि**) धनों को (**आ, रासन्**) अच्छे प्रकार देवें। हे राजन्! (**सुदत्र:**) अच्छे दानयुक्त (**त्वष्टा**) दु:खविच्छेदक (**सुशरण:**) सुन्दर आश्रम जिनका वह आप (**न:**) हमारे रक्षक (**अस्तु**) हों हमारे लिये (**राय:**) धनों को (**वि, दधातु**) विधान कीजिये। हमारी वार्ता (**शृणोतु**) सुनिये॥२२॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो राजपुरुष सूर्य और भूमि के तुल्य प्रजाजनों को धनी करते, उनके न्याय करने को बातें सुनते और यथावत् पुरुषार्थ से लक्ष्मीवान् करते हैं, वे ही पूर्ण सुख वाले होते हैं॥२२॥

पुनर्विद्वांसोऽन्यान् प्रति किं किं बोधयेयुरित्याह॥

फिर विद्वान् जन अन्यों को क्या-क्या ज्ञान देवें, इस विषय को अगले मन्त्र में कहते हैं॥

तन्नो राय: पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौ:।
वनस्पतिभि: पृथिवी सजोषा उभे रोदसी परि पासतो न:॥२३॥

तत्। न:। राय:। पर्वता:। तत्। न:। आप:। तत्। रातिऽसाच:। ओषधी:। उत। द्यौ:। वनस्पतिऽभि:। पृथिवी। सऽजोषा:। उभे इति। रोदसी इति। परि। पासत:। न:॥२३॥

पदार्थः-(**तत्**) तान् (**नः**) अस्मभ्यम् (**रायः**) धनानि (**पर्वताः**) मेघाः शैला वा (**तत्**) तान् (**नः**) अस्मभ्यम् (**आपः**) जलानि (**तत्**) तान् (**रातिषाचः**) या रातिं दानं सचन्ते ताः (**ओषधीः**) यवाद्याः (**उत**) अपि (**द्यौः**) सूर्यः (**वनस्पतिभिः**) वटादिभिस्सह (**पृथिवी**) भूमिः (**सजोषाः**) समानसेवी (**उभे**) (**रोदसी**) द्यावापृथिव्यौ (**परि**) सर्वतः (**पासतः**) रक्षेताम् (**नः**) अस्मान्॥ २३॥

अन्वयः-हे विद्वांसो! यथा पर्वता नस्तद्राया रातिषाच आपो नस्तदोषधीस्तदुत सजोषा द्यौर्वनस्पतिभिः पृथिवी उभे रोदसी च नः परि पासतस्तथाऽस्मान् भवन्तो शिक्षयन्तु॥ २३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। अध्येतारः श्रोतरश्च चाध्यापकानुपदेशकान् प्रत्येवं प्रार्थयेयुरस्मान् भवन्त एवं बोधयन्तु येन वयं सर्वस्याः सृष्टेः सकाशात् सुखोन्नतिं कर्तुं सततं शक्नुयामेति॥ २३॥

पदार्थः-हे विद्वानो! जैसे (**पर्वताः**) मेघ वा शैल (**नः**) हमारे लिये (**तत्**) उन (**रायः**) धनों को (**रातिषाचः**) जो दान का सम्बन्ध करते हैं वा (**आपः**) जलों को वा **[**हमारे**]** (**तत्**) उन (**ओषधीः**) यवादि ओषधियों को वा (**तत्**) उन अन्य पदार्थों को (**उत**) निश्चय करके (**सजोषाः**) समान सेवनेवाला जन वा (**द्यौः**) सूर्य (**वनस्पतिभिः**) वटादिकों के साथ (**पृथिवी**) पृथिवी वा (**उभे**) दोनों (**रोदसी**) प्रकाश और पृथिवी भी (**नः**) हम लोगों की (**परि, पासतः**) रक्षा करें, वैसे हम लोगों की आप लोग रक्षा करें॥ २३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। पढ़ने और सुनने वाले जन पढ़ाने और उपदेश कराने वालों के प्रति ऐसी प्रार्थना करें हम लोगों को आप ऐसा बोध करावें कि जिससे हम लोग सब सृष्टि के सकाश से सुख की उन्नति कर सकें॥ २३॥

पुनर्विद्वांसः किंवत्किं कुर्युरित्याह॥

फिर विद्वान् जन किसके तुल्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अनु॒ तदु॒र्वी रोद॑सी जिहाता॒मनु॑ द्यु॒क्षो वरु॑ण॒ इन्द्र॑सखा।
अनु॒ विश्वे॑ म॒रुतो॒ ये स॒हासो॑ रा॒यः स्या॑म ध॒रुणं॑ धि॒यध्यै॑॥ २४॥

अनु॑। तत्। उ॒र्वी॒ इति॑। रोद॑सी॒ इति॑। जि॒हा॒ता॒म्। अनु॑। द्यु॒क्षः। वरु॑णः। इन्द्र॑ऽसखा। अनु॑। विश्वे॑। म॒रुत॑ः। ये। स॒हास॑ः। रा॒यः। स्या॒म॒। ध॒रुण॑म्। धि॒यध्यै॑॥ २४॥

पदार्थः-(**अनु**) (**तत्**) तानि (**उर्वीः**) बहुपदार्थयुक्ते (**रोदसी**) द्यावापृथिव्यौ (**जिहाताम्**) प्राप्नुतः (**अनु**) (**द्युक्षः**) यो दिवः प्रकाशान् वासयति (**वरुणः**) श्रेष्ठः (**इन्द्रसखा**) इन्द्रः परमैश्वर्यो राजा सखा यस्य सः (**अनु**) (**विश्वे**) सर्वे (**मरुतः**) मनुष्याः (**ये**) (**सहासः**) सहनशीलाः बलवन्तः (**रायः**) धनस्य (**स्याम**) (**धरुणम्**) (**धियध्यै**) धर्तुं समर्थाः॥ २४॥

अन्वयः-हे विद्वांसो! यथोर्वी रोदसी तदनु जिहातामिन्द्रसखा द्युक्षो वरुणोऽनुजिहातां ये विश्वे सहासो मरुतोऽनुजिहातान्तथा वयं रायो धरुणं धियध्यै शक्तिमन्तः स्याम॥ २४॥

भावार्थः-हे मनुष्या! यथा सृष्टिस्था भूम्यादयः पदार्थास्सर्वान् धृत्वा सुखं प्रयच्छन्ति तथैव यूयं

भवत॥ २४॥

पदार्थः-हे विद्वान् जनो! जैसे **(उर्वीः)** बहुपदार्थयुक्त **(रोदसी)** आकाश और पृथिवी **(तत्)** उन पदार्थों को **(अनु, जिहाताम्)** अनुकूल प्राप्त हों वा **(इन्द्रसखा)** परमैश्वर्य राजा सखा मित्र जिस का **(द्युक्षः)** प्रकाशों को वसाता **(वरुणः)** और श्रेष्ठ जन **(अनु)** पीछे जावे वा **(ये)** जो **(विश्वे)** सब **(सहासः)** सहनशील और बलवान् **(मरुतः)** मनुष्य अनुकूलता से प्राप्त हों, वैसे हम लोग **(रायः)** धन के **(धरुणम्)** धारण करने वाले को **(धियध्यै)** धारण करने को समर्थ **(स्याम)** हों॥ २४॥

भावार्थः-हे मनुष्यो! जैसे सृष्टिस्थ भूमि आदि पदार्थ सब को धारण कर सुख देते हैं, वैसे ही आप हों॥ २४॥

पुनः सेव्यसेवकाध्यापकाध्येतारः परस्परं कथं वर्तेरन्नित्याह॥

फिर सेव्य-सेवक और अध्यापक-अध्येता जन परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

तन्न इन्द्रो वरुणो मित्रो अग्निरापो ओषधीर्वनिनो जुषन्त।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः॥ २५॥ २७॥

तत्। नः। इन्द्रः। वरुणः। मित्रः। अग्निः। आपः। ओषधीः। वनिनः। जुषन्त। शर्मन्। स्याम। मरुताम्। उपऽस्थे। यूयम्। पात। स्वस्तिभिः। सदा। नः॥ २५॥

पदार्थः-(**तत्**) सुखम् (**नः**) अस्मभ्यम् (**इन्द्रः**) विद्युदिव राजा (**वरुणः**) श्रेष्ठः (**मित्रः**) सखा (**अग्निः**) पावकः (**आपः**) जलानि (**ओषधीः**) यवाद्याः (**वनिनः**) किरणवन्तः (**जुषन्त**) सेवन्ते (**शर्मन्**) शर्मणि सुखे गृहे वा (**स्याम**) भवेम (**मरुताम्**) मनुष्याणाम् (**उपस्थे**) समीपे (**यूयम्**) (**पात**) (**स्वस्तिभिः**) सुखादिभिः (**सदा**) (**नः**) अस्मान्॥ २५॥

अन्वयः-हे विद्वांसो! ये वनिन इन्द्रो वरुणो मित्रोऽग्निराप ओषधीश्च नस्तञ्जुषन्त येन यूयं स्वस्तिभिर्न सदा पात तेषां युष्माकं मरुतामुपस्थे शर्मन् वयं स्थिराः स्याम॥ २५॥

भावार्थः-मनुष्यैरिदमेष्टव्यं विदुषां सङ्गेन यथा विद्युदादयः पदार्थास्स्वकार्याणि सेवेरन् तथा वयमनुतिष्ठेमेति॥ २५॥

अत्राध्येत्रध्यापकस्त्रीपुरुषराजप्रजासेनाभृत्यविश्वेदेवगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति चतुस्त्रिंशत्तमं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! जो **(वनिनः)** किरणवान् **(इन्द्रः)** बिजुली के समान राजा **(वरुणः)** श्रेष्ठ **(मित्रः)** मित्रजन **(अग्निः)** पावक **(आपः)** जल और **(ओषधीः)** यवादि ओषधी **(नः)** हमारे लिये **(तत्)** उस सुख को **(जुषन्त)** सेवते हैं जिससे **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदैव **(पात)** रक्षा करो उन तुम **(मरुताम्)** लोगों के **(उपस्थे)** समीप **(शर्मन्)** सुख में हम लोग स्थिर **(स्याम)** हों॥ २५॥

भावार्थः-मनुष्यों को ऐसी इच्छा करनी चाहिये कि विद्वानों के संग से जैसे बिजुली आदि पदार्थ अपने कामों को सेवें, वैसे हम लोग अनुष्ठान करें॥२५॥

इस सूक्त में अध्येता, अध्यापक, स्त्री, पुरुष, राजा, प्रजा, सेना, भृत्य और विश्वेदेवों के गुण और कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौतीसवां सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥

अथ पञ्चत्रिंशत्तमस्य पञ्चदशर्चस्य सूक्तस्य वसिष्ठर्षिः। विश्वेदेवा देवताः। १, २, ३, ४, ५, ११, १२ त्रिष्टुप्। ६, ८, १०, १५ निचृत्त्रिष्टुप्। ७, ९ विराट्त्रिष्टुप्छन्दः। धैवतः स्वरः। १३, १४ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः।

मनुष्यैः सृष्टिपदार्थेभ्यः किं किं गृहीतव्यमित्याह॥

अब पन्द्रह ऋचा वाले पैंतीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को सृष्टिपदार्थों से क्या-क्या ग्रहण करना चाहिये, इस विषय को कहते हैं॥

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ॥ १॥

शम्। नः। इन्द्राग्नी इति। भवताम्। अवोऽभिः। शम्। नः। इन्द्रावरुणा। रातऽहव्या। शम्। इन्द्रासोमा। सुविताय। शम्। योः। शम्। नः। इन्द्रापूषणा। वाजऽसातौ॥ १॥

पदार्थः-(**शम्**) सुखकारकौ (**नः**) अस्मभ्यम् (**इन्द्राग्नी**) विद्युत्पावकौ (**भवताम्**) (**अवोभिः**) रक्षणादिभिः (**शम्**) मङ्गलकारकौ (**नः**) (**अस्मभ्यम्**) (**इन्द्रावरुणा**) विद्युज्जले (**रातहव्या**) रातं दत्तं हव्यं गृहीतुं योग्यं वस्तु याभ्यां तौ (**शम्**) सुखवर्धकौ (**इन्द्रासोमा**) विद्युदोषधिगणौ (**सुविताय**) ऐश्वर्याय (**शम्**) (**योः**) सुखनिमित्तौ (**शम्**) आनन्दप्रदौ (**नः**) अस्मभ्यम् (**इन्द्रापूषणा**) विद्युद्वायू (**वाजसातौ**) स-ामे॥ १॥

अन्वयः-हे जगदीश्वर! वाजसातौ सुविताय नोऽवोभिस्सहेन्द्राग्नी शं शं रातहव्येन्द्रावरुणा नश्शमिन्द्रासोमा शं योरिन्द्रापूषणा नः शं च भवतां तथा वयं प्रयतेमहि॥ १॥

भावार्थः-हे जगदीश्वर! भवत्कृपया विद्वत्संगेन स्वपुरुषार्थेन भवद्रचितायां सृष्टौ वर्त्तमानेभ्यो विद्युदादिपदार्थेभ्यो वयमुपकारं ग्रहीतुं ग्राहयितुमिच्छामस्सोऽयमस्माकं प्रयत्नः सफलः स्यात्॥ १॥

पदार्थः-हे जगदीश्वर! (**वाजसातौ**) संग्राम में (**सुविताय**) ऐश्वर्य होने के लिये (**नः**) हम लोगों को (**अवोभिः**) रक्षा आदि के साथ (**इन्द्राग्नी**) बिजुली और साधरण अग्नि (**शम्**) सुख करने वाले (**शम्**) मंगल करने वाले (**रातहव्या**) दीनी है ग्रहण करने को वस्तु जिन्होंने ऐसे (**इन्द्रावरुणा**) बिजुली और जल (**नः**) हम लोगों के लिये (**शम्**) सुख करने वाले (**इन्द्रासोमा**) बिजुली ओषधिगण (**शम्**) सुखकारक (**योः**) सुख के निमित्त और (**इन्द्रापूषणा**) बिजुली और वायु (**नः**) हमारे लिये (**शम्**) आनन्द देने वाले (**भवताम्**) हों वैसा हम लोग प्रयत्न करें॥ १॥

भावार्थः-हे जगदीश्वर! आप की कृपा से, विद्वानों के संग से और अपने पुरुषार्थ से आप की रची हुई सृष्टि में वर्त्तमान बिजुली आदि पदार्थों से हम लोग उपकार करना कराना चाहते हैं, सो यह हम लोगों का प्रयत्न सफल हो॥ १॥

मनुष्यैर्यथैश्वर्यादीनि सुखकराणि स्युस्तथा विधेयमित्याह॥

मनुष्यों को जैसे ऐश्वर्य आदि सुख करने वाले हों, वैसे विधान करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॒ भग॒: शमु॑ न॒: शंसो॑ अस्तु॒ शं न॒: पुर॑न्धि॒: शमु॑ सन्तु॒ राय॑:।
शं न॒: स॒त्यस्य॑ सु॒यम॑स्य॒ शंस॒: शं नो॑ अर्य॒मा पु॑रुजा॒तो अ॑स्तु॥ २॥

शम्। न॒:। भग॑:। शम्। ऊँ॒ इति॑। न॒:। शंस॑:। अ॒स्तु॒। शम्। न॒:। पुर॑म्ऽधि:। शम्। ऊँ॒ इति॑। स॒न्तु॒। राय॑:। शम्। न॒:। स॒त्यस्य॑। सु॒ऽयम॑स्य। शंस॑:। शम्। न॒:। अ॒र्य॒मा। पु॒रु॒ऽजा॒त:। अ॒स्तु॒॥ २॥

पदार्थ:-(**शम्**) सुखकर: (**न:**) अस्मभ्यम् (**भग:**) ऐश्वर्यम् (**शम्**) सुखकर: (**उ**) वितर्के (**न:**) अस्मभ्यम् (**शंस:**) अनुशासनं प्रशंसा वा (**अस्तु**) भवतु (**शम्**) सुखकर: (**न:**) अस्मभ्यम् (**पुरन्धि:**) पुरव: बहव: पदार्था ध्रियन्ते यस्मिन् स आकाश: (**शम्**) सुखकरा: (**उ**) (**सन्तु**) (**राय:**) धनानि (**शम्**) सुखप्रद: (**न:**) अस्मभ्यम् (**सत्यस्य**) यथार्थस्य धर्मस्य परमेश्वरस्य (**सुयमस्य**) सुष्ठु नियमेन प्रापणीयस्य (**शंस:**) प्रशंसा (**शम्**) आनन्दकर: (**न:**) अस्मभ्यम् (**अर्यमा**) न्यायकारी (**पुरुजात:**) पुरुषु बहुषु नरेषु प्रसिद्ध: (**अस्तु**) भवतु॥ २॥

अन्वय:-हे मनुष्या! यथा नो भग: शं न: शंस: शमु पुरन्धि: शमस्तु न: राय: शमु सन्तु न: सत्यस्य सुयमस्य शंस: शं पुरुजातोऽर्यमा न: शमस्तु तथा वयं प्रयतेमहि॥ २॥

भावार्थ:-हे मनुष्या! यूयं यथैश्वर्यं पुण्या कीर्तिरवकाशो धनानि धर्मो योग: न्यायाधीशश्च सुखकरा: स्युस्तथाऽनुतिष्ठत॥ २॥

पदार्थ:-हे मनुष्यो! जैसे (**न:**) हम लोगों के लिये (**भग:**) ऐश्वर्य (**शम्**) सुख करने वाला (**न:**) हम लोगों के लिये (**शंस:**) शिक्षा वा प्रशंसा (**शम्**) सुख करने वाली (**उ**) और (**पुरन्धि:**) बहुत पदार्थ जिस में रक्खे जाते हैं वह आकाश (**शम्**) सुख करने वाला (**अस्तु**) हो (**न:**) हम लोगों के लिये (**राय:**) धन (**शम्**) सुख करने वाले (**उ**) ही (**सन्तु**) हों (**न:**) हम लोगों के लिये (**सत्यस्य**) यथार्थ धर्म वा परमेश्वर की (**सुयमस्य**) सुन्दर नियम से प्राप्त करने योग्य व्यवहार की (**शंस:**) प्रशंसा (**शम्**) सुख देनेवाली और (**पुरुजात:**) बहुत मनुष्यों में प्रसिद्ध (**अर्यमा**) न्यायकारी (**न:**) हमारे लिये (**शम्**) आनन्द देने वाला (**अस्तु**) होवे वैसा हम लोग प्रयत्न करें॥ २॥

भावार्थ:-हे मनुष्यो! तुम जैसे ऐश्वर्य, पुण्यकीर्त्ति, अवकाश, धन, धर्म, योग और न्यायाधीश सुख करने वाले हों, वैसा अनुष्ठान करो॥ ३॥

पुनर्मनुष्यै: सृष्ट्या कीदृगुपकारो गृहीतव्य इत्याह॥

फिर मनुष्यों को सृष्टि से कैसा उपकार लेना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॑ धा॒ता शमु॑ ध॒र्ता नो॑ अस्तु॒ शं न॑ उरू॒ची भ॑वतु स्व॒धाभि॑:।
शं रोद॑सी बृह॒ती शं नो॑ अद्रि॒: शं नो॑ दे॒वानां॑ सु॒हवा॑नि सन्तु॥ ३॥

शम्। न॒:। धा॒ता। शम्। ऊँ॒ इति॑। ध॒र्ता। न॒:। अ॒स्तु॒। शम्। न॒:। उ॒रू॒ची। भ॒व॒तु॒। स्व॒धाभि॑:। शम्। रोद॑सी॒ इति॑। बृ॒ह॒ती इति॑। शम्। न॒:। अद्रि॑:। शम्। न॒:। दे॒वाना॑म्। सु॒ऽहवा॑नि। स॒न्तु॒॥ ३॥

पदार्थ:-(**शम्**) शमित्यस्य सर्वत्रैव पूर्वोक्तरीत्यार्थो वेदितव्य: (**न:**) अस्मभ्यम् (**धाता**) धर्ता

(शम्) **(उ)** **(धर्ता)** पोषकः **(नः)** अस्याप्येवमेव चतुर्थीबहुवचनान्तस्यार्थो वेदितव्यः **(अस्तु)** **(शम्)** **(नः)** **(उरूची)** या बहूनञ्चति प्राप्नोति सा पृथिवी **(भवतु)** **(स्वधाभिः)** अन्नादिभिः **(शम्)** **(रोदसी)** द्यावान्तरिक्षे **(बृहती)** महत्यौ **(शम्)** **(नः)** **(अद्रिः)** मेघः **(शम्)** **(नः)** **(देवानाम्)** विदुषाम् **(सुहवानि)** सुष्ठु आह्वानानि प्रशंसनानि वा **(सन्तु)**॥३॥

अन्वयः-हे जगदीश्वर विद्वन् वा! भवत्कृपया सङ्गेन च नो धाता शमु धर्ता नः शमस्तु स्वधाभिः सहोरूची नः शं भवतु बृहती रोदसी नः शं भवतां अद्रिर्नः शं भवतु नो देवानां सुहवानि शं सन्तु॥३॥

भावार्थः-ये मनुष्याः पोषकादिभ्य उपकारान् ग्रहीतुं विजानन्ति ते सर्वाणि सुखानि लभन्ते॥३॥

पदार्थः-हे जगदीश्वर वा विद्वान्! आप की कृपा और संग से **(नः)** हम लोगों के लिये **(धाता)** धारण करने वाला **(शम्)** सुखरूप **(उ)** और **(धर्ता)** पुष्टि करने वाला **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(अस्तु)** हो **(स्वधाभिः)** अन्नादिकों के साथ **(उरूची)** जो बहुत पदार्थों को प्राप्त होती वह पृथिवी **(नः)** हम लोगों के लिये **(शम्)** सुख देने वाली **(भवतु)** हो **(बृहती)** महान् **(रोदसी)** प्रकाश और अन्तरिक्ष **(नः)** हम लोगों के लिये **(शम्)** सुखरूप होवें **(अद्रिः)** मेघ **(नः)** हमारे लिये **(शम्)** सुखकारक हो **(नः)** हम लोगों के लिये **(देवानाम्)** विद्वानों के **(सुहवानि)** सुन्दर आवाहन प्रशंसा से बुलावे **(शम्)** सुखरूप **(सन्तु)** हों॥३॥

भावार्थः-जो मनुष्य पुष्टि करने वालों से उपकार लेना जानते हैं, वे सब सुखों को पाते हैं॥३॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते है॥

शं नो॑ अ॒ग्निर्ज्योति॑रनीको अस्तु शं नो॑ मि॒त्रावरु॑णावश्वि॒ना॒ शम्।
शं न॑ सु॒कृता॑ सुकृ॒तानि॑ सन्तु शं न॑ इषि॒रो अ॒भि वा॑तु॒ वात॑:॥४॥

शम्। नः। अग्निः। ज्योतिः॑ऽअनीकः। अस्तु। शम्। नः। मित्रावरु॑णौ। अश्विना। शम्। शम्। नः। सुऽकृता॑म्। सुऽकृतानि॑। सन्तु। शम्। नः। इषिरः। अभि। वातु। वातः॥४॥

पदार्थः-(**शम्**) **(नः)** **(अग्निः)** पावकः **(ज्योतिरनीकः)** ज्योतिरेवानीकं सैन्यमिव यस्य सः **(अस्तु)** **(शम्)** **(नः)** **(मित्रावरुणौ)** प्राणोदानौ **(अश्विना)** व्यापिनौ **(शम्)** **(शम्)** **(नः)** **(सुकृताम्)** ये सुष्ठु धर्ममेव कुर्वन्ति तेषाम् **(सुकृतानि)** धर्माचरणानि **(सन्तु)** **(शम्)** **(नः)** **(इषिरः)** सद्यो गन्ता **(अभि)** **(वातु)** **(वातः)** वायुः॥४॥

अन्वयः-हे जगदीश्वर विद्वन् वा! भवत्कृपया ज्योतिरनीकोऽग्निर्नः शमस्त्वश्विना शं मित्रावरुणौ नः शं भवतां न सुकृतां सुकृतानि शम् **[सन्तु]** इषिरो वातो नः शमभि वातु॥४॥

भावार्थः-ये अग्निवाय्वादिभ्यः कार्याणि साध्नुवन्ति ते समग्रैश्वर्यमश्नुवन्ति॥४॥

पदार्थः-हे जगदीश्वर वा विद्वान्! आप की कृपा से **(ज्योतिरनीकः)** ज्योति ही सेना के समान जिस की **(अग्निः)** वह अग्नि **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(अस्तु)** हो **(अश्विना)**

व्यापक पदार्थ **(शम्)** सुखरूप और **(मित्रावरुणौ)** प्राण और उदान **(नः)** हमारे लिये **(शम्)** सुखरूप होवें **(नः)** हम **(सुकृताम्)** सुन्दर धर्म करने वालों के **(सुकृतानि)** धर्माचरण **(शम्)** सुखरूप **(सन्तु)** हों और **(इषिरः)** शीघ्र जाने वाला **(वातः)** वायु **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(अभि, वातु)** सब ओर से बहे॥४॥

भावार्थः-जो अग्नि और वायु आदि पदार्थों से कार्य्यों को सिद्ध करते हैं, वे समग्र ऐश्वर्य को प्राप्त होते हैं॥४॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः॥५॥२८॥

शम्। नः। द्यावापृथिवी इति। पूर्वऽहूतौ। शम्। अन्तरिक्षम्। दृशये। नः। अस्तु। शम्। नः। ओषधीः। वनिनः। भवन्तु। शम्। नः। रजसः। पतिः। अस्तु। जिष्णुः॥५॥

पदार्थः-(**शम्**) (**नः**) (**द्यावापृथिवी**) विद्युद्भूमी (**पूर्वहूतौ**) पूर्वेषां हूतिः प्रशंसा यस्मिन् येन वा तस्याम् (**शम्**) (**अन्तरिक्षम्**) भूमिसूर्ययोर्मध्यमाकाशम् (**दृशये**) दर्शनाय (**नः**) (**अस्तु**) (**शम्**) (**नः**) (**ओषधीः**) यवसोमलताद्याः (**वनिनः**) वनानि सन्ति येषु ते वृक्षाः (**भवन्तु**) (**शम्**) (**नः**) (**रजसः**) लोकजातस्य (**पतिः**) स्वामी (**अस्तु**) (**जिष्णुः**) जयशीलः॥५॥

अन्वयः-हे जगदीश्वरशिक्षकौ! भवत्कृपोपदेशाभ्यां पूर्वहूतौ द्यावापृथिवी नश्शं दृशयेऽन्तरिक्षं नश्शमस्त्वोषधीर्वनिनो नश्शं भवन्तु रजसस्पतिर्जिष्णुर्नश्शमस्तु॥५॥

भावार्थः-ये सर्वान् सृष्टिस्थान् पदार्थान् सुखाय संयोक्तुमर्हन्ति त एवोत्तमा विद्वांसस्सन्ति॥५॥

पदार्थः-हे जगदीश्वर और शिक्षा देने वाले! आप की कृपा और उपदेश से **(पूर्वहूतौ)** जिसमें पिछलों की प्रशंसा विद्यमान वा जिससे पिछलों की प्रशंसा होती है उस में **(द्यावापृथिवी)** बिजुली और भूमि **(नः)** हम लोगों के लिये **(शम्)** सुख **(दृशये)** देखने को **(अन्तरिक्षम्)** भूमि और सूर्य्य के बीच का आकाश **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(अस्तु)** हो और **(ओषधीः)** ओषधि तथा **(वनिनः)** वन जिसमें विद्यमान वे वृक्ष **(नः)** हमारे लिये **(शम्)** सुखरूप **(भवन्तु)** होवें **(रजसः)** लोकों में उत्पन्न हुओं का **(पतिः)** स्वामी **(जिष्णुः)** जयशील **(नः)** हमारे लिये **(शम्)** सुखरूप **(अस्तु)** हो॥५॥

भावार्थः-जो सब सृष्टिस्थ पदार्थों को सुख के **[**लिये**]** संयुक्त करने को योग्य होते हैं, वे ही उत्तम विद्वान् होते हैं॥५॥

पुनर्विद्वद्भिः किं विज्ञाय सम्प्रयुज्य किं प्राप्तव्यमित्याह॥

फिर विद्वानों को क्या जान के और संयुक्त कर क्या पाने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टाग्नाभिरिह शृणोतु॥ ६॥

शम्। नः। इन्द्रः। वसुऽभिः। देवः। अस्तु। शम्। आदित्येभिः। वरुणः। सुऽशंसः। शम्। नः। रुद्रः। रुद्रेभिः। जलाषः। शम्। नः। त्वष्टा। ग्नाभिः। इह। शृणोतु॥ ६॥

पदार्थः-(**शम्**) (**नः**) (**इन्द्रः**) विद्युत्सूर्यो वा (**वसुभिः**) पृथिव्यादिभिस्सह (**देवः**) दिव्यगुणकर्मस्वभावयुक्तः (**अस्तु**) (**शम्**) (**आदित्येभिः**) संवत्सरस्य मासैः (**वरुणः**) जलसमुदायः (**सुशंसः**) प्रशस्तप्रशंसनीयः (**शम्**) (**नः**) (**रुद्रः**) परमात्मा जीवो वा (**रुद्रेभिः**) जीवैः प्राणैर्वा (**जलाषः**) दुःखनिवारकः (**शम्**) (**नः**) (**त्वष्टा**) सर्ववस्तुविच्छेदकोऽग्निरिव परीक्षको विद्वान् (**ग्नाभिः**) वाग्भिः। **ग्नेति वाङ्नाम।** (निघं०१.११) (**इह**) अस्मिन् संसारे (**शृणोतु**)॥ ६॥

अन्वयः-हे जगदीश्वर विद्वन् वा! भवत्सहायपरीक्षाभ्यामिह वसुभिस्सह देव इन्द्रो नः शमादित्येभिस्सह सुशंसो वरुणो नः शमस्तु रुद्रेभिस्सह जलाषो रुद्रो नश्शमस्तु ग्नाभिस्सह त्वष्टा नश्शं शृणोतु॥ ६॥

भावार्थः-ये पृथिव्यादित्यवायुविद्ययेश्वरजीवप्राणान् विज्ञायेहैतद्विद्यामध्याप्य परीक्षां कृत्वा सर्वान् विदुष उद्योगिनः कुर्वन्ति तेऽत्र किं किमैश्वर्यं नाप्नुवन्ति॥ ६॥

पदार्थः-हे जगदीश्वर वा विद्वान् आपके सहाय से और परीक्षा से (**इह**) यहाँ (**वसुभिः**) पृथिव्यादिकों के साथ (**देवः**) दिव्य गुणकर्मस्वभावयुक्त (**इन्द्रः**) बिजुली या सूर्य (**नः**) हम लोगों के लिये (**शम्**) सुखरूप और (**आदित्येभिः**) संवत्सर के महीनों के साथ (**सुशंसः**) प्रशंसित प्रशंसा करने योग्य (**वरुणः**) जल समुदाय (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**अस्तु**) हो (**रुद्रेभिः**) जीव प्राणों के साथ (**जलाषः**) दुःख निवारण करने वाला (**रुद्रः**) परमात्मा वा जीव (**नः**) हम लोगों के लिये (**शम्**) सुखरूप हो (**ग्नाभिः**) वाणियों के साथ (**त्वष्टा**) सर्व वस्तुविच्छेद करने वाला अग्नि के समान परीक्षक विद्वान् (**नः**) हम लोगों के लिये (**शम्**) सुख (**शृणोतु**) सुने॥ ६॥

भावार्थः-जो पृथिवी, आदित्य और वायु की विद्या से ईश्वर, जीव और प्राणों को जान यहाँ इनकी विद्या को पढ़ा परीक्षा कर सब को विद्वान् और उद्योगी करते हैं, वे इस संसार में किस-किस ऐश्वर्य को नहीं प्राप्त होते हैं॥ ६॥

पुनर्विद्वद्भिः कैरुपायैर्जगदुपकारः कर्तव्य इत्याह॥

फिर विद्वानों को किन उपायों से जगत् का उपकार करना योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः॥ ७॥

शम्। नः। सोमः। भवतु। ब्रह्म। शम्। नः। शम्। नः। ग्रावाणः। शम्। ऊँ इति। सन्तु। यज्ञाः। शम्।

नः। स्वरूणाम्। मितयः। भवन्तु। शम्। नः। प्रऽस्वः। शम्। ऊँ इति। अस्तु। वेदिः॥७॥

पदार्थः-(**शम्**) (**नः**) (**सोमः**) चन्द्रः (**भवतु**) (**ब्रह्म**) धनमन्नं वा (**शम्**) (**नः**) (**शम्**) (**नः**) (**ग्रावाणः**) मेघाः (**शम्**) (**उ**) (**सन्तु**) (**यज्ञाः**) अग्निहोत्रादयः शिल्पान्ताः (**शम्**) (**नः**) (**स्वरूणाम्**) यज्ञशालास्तम्भशब्दानाम् (**मितयः**) (**भवन्तु**) (**शम्**) (**नः**) (**प्रस्वः**) याः प्रसूयन्ते ता ओषधयः (**शम्**) (**उ**) (**अस्तु**) (**वेदिः**) कुण्डादिकम्॥७॥

अन्वयः-हे जगदीश्वर वा विद्वन्! भवत्कृपाध्यापनाभ्यां सोमो नश्शं भवतु ब्रह्म नः शं भवतु ग्रावाणो नः शं सन्तु यज्ञा नः शमु सन्तु स्वरूणां मितयो नः शं भवन्तु प्रस्वो नश्शं भवन्तु वेदिः नः शम्वस्तु॥७॥

भावार्थः-ये मनुष्या विद्यौषधीधनयज्ञादिभ्यः जगत्सुखेनोपकुर्वन्ति तेप्यतुलं सुखं लभन्ते॥७॥

पदार्थः-हे जगदीश्वर वा विद्वान्! आपकी कृपा और पढ़ाने से (**सोमः**) चन्द्रमा (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**भवतु**) हो (**ब्रह्म**) धन वा अन्न (**नः**) हमारे लिये (**शम्**) सुखरूप हो (**ग्रावाणः**) मेघ (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**सन्तु**) हों (**यज्ञाः**) अग्निहोत्र को आदि ले **[**=अग्निहोत्र से लेकर**]** शिल्प यज्ञ पर्य्यन्त (**नः**) हम लोगों के लिये (**शम्, च**) सुखरूप ही हों (**स्वरूणाम्**) यज्ञशाला के स्तम्भ शब्दों के (**मितयः**) प्रमाण हमारे लिये (**शम्**) सुखरूप (**भवन्तु**) हों (**प्रस्वः**) जो उत्पन्न होती है वह ओषधि (**नः**) हमारे लिये (**शम्**) सुखरूप हों और (**वेदिः**) कुण्ड आदि हमारे लिये (**शम्, उ**) सुख ही (**अस्तु**) हो॥७॥

भावार्थः-जो मनुष्य विद्या, ओषधी, धन और यज्ञादि से जगत् का सुख के साथ उपकार करते हैं, वे अतुल सुख पाते हैं॥७॥

पुनर्विद्वद्भिः किमेष्टव्यमित्याह॥

फिर विद्वान् जनों को क्या इच्छा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः॥८॥

शम्। नः। सूर्यः। उरुऽचक्षाः। उत्। एतु। शम्। नः। चतस्रः। प्रऽदिशः। भवन्तु। शम्। नः। पर्वताः। ध्रुवयः। भवन्तु। शम्। नः। सिन्धवः। शम्। ऊँ इति। सन्तु। आपः॥८॥

पदार्थः-(**शम्**) (**नः**) (**सूर्यः**) सविता (**उरुचक्षाः**) उरूणि बहूनि चक्षांसि दर्शनानि यस्मात् सः (**उत्**) (**एतु**) (**शम्**) (**नः**) (**चतस्रः**) (**प्रदिशः**) पूर्वाद्या ऐशान्याद्या वा (**भवन्तु**) (**शम्**) (**नः**) (**पर्वताः**) शैलाः (**ध्रुवयः**) स्वस्वस्थाने स्थिराः (**भवन्तु**) (**शम्**) (**नः**) (**सिन्धवः**) नद्यः समुद्रा वा (**शम्**) (**उ**) (**सन्तु**) (**आपः**) जलानि प्राणा वा॥८॥

अन्वयः-हे परेश विद्वन् वा! भवच्छिक्षया उरुचक्षास्सूर्यः नः शमुदेतु चतस्रः प्रदिशः नः शं भवन्तु ध्रुवयः पर्वताः नः शं भवन्तु सिन्धवो नः शमापः शमु सन्तु॥८॥

भावार्थः-ये जगदीश्वरनिर्मितेभ्यः सूर्यादिभ्यः उपकारानादातुं शक्नुवन्ति तेऽत्र श्री राज्यसत्कीर्तिमन्तो जायन्ते॥८॥

पदार्थः-हे परमेश्वर वा विद्वान्! आपकी शिक्षा से **(उरुचक्षाः)** जिससे बहुत दर्शन होते हैं वह **(सूर्यः)** सूर्य **(नः)** हम लोगों के लिये **(शम्)** सुख रूप **(उत्, एतु)** उदय हो **(चतस्रः)** चार **(प्रदिशः)** पूर्वादि वा रोशनी आदि दिशा वा विदिशा **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(भवन्तु)** हों **(ध्रुवयः)** अपने-अपने स्थान में स्थिर **(पर्वताः)** पर्वत **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(भवन्तु)** होवें **(सिन्धवः)** नदी वा समुद्र **(नः)** हम लोगों के लिये **(शम्)** सुखरूप और **(आपः)** जल वा प्राण **(शम्)** सुखरूप **(उ)** ही **(सन्तु)** हों॥८॥

भावार्थः-जो जगदीश्वर ने बनाये हुए सूर्यादिकों से उपकार ले सकते हैं, वे इस जगत् में श्री, राज्य और कीर्ति वाले होते हैं॥८॥

पुनः शिक्षकैः शिष्यान् संशिक्ष्य कीदृशाः सम्पादनीया इत्याह॥

फिर शिक्षकजनों को शिष्यजन अच्छी शिक्षा दे कैसे सिद्ध करने चाहियें, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॒ अदि॑तिर्भवतु व्र॒तेभि॒: शं नो॑ भवन्तु म॒रुत॑: स्व॒र्काः।
शं नो॒ विष्णु॒: शमु॑ पू॒षा नो॑ अस्तु॒ शं नो॑ भ॒वित्रं॒ शम्व॑स्तु वा॒युः॥९॥

शम्। न॒:। अदि॑तिः। भ॒व॒तु॒। व्र॒तेभि॑:। शम्। न॒:। भ॒व॒न्तु॒। म॒रुत॑:। सु॒ऽअ॒र्काः। शम्। न॒:। विष्णु॑:। शम्। ऊँ॒ इति॑। पू॒षा। न॒:। अ॒स्तु॒। शम्। न॒:। भ॒वित्र॑म्। शम्। ऊँ॒ इति॑। अ॒स्तु॒। वा॒युः॥९॥

पदार्थः-**(शम्)** **(नः)** **(अदितिः)** विदुषी माता **(भवतु)** **(व्रतेभिः)** सत्कर्मभिः **(शम्)** **(नः)** **(भवन्तु)** **(मरुतः)** प्राणा इव प्रिया मनुष्याः **(स्वर्काः)** शोभना अर्का मन्त्रा विचारा येषान्ते **(शम्)** **(नः)** **(विष्णुः)** व्यापको जगदीश्वरः **(शम्)** **(उ)** **(पूषा)** पुष्टिकरब्रह्मचर्यादिव्यवहारः **(नः)** **(अस्तु)** **(शम्)** **(नः)** **(भवित्रम्)** भवितव्यम् **(शम्)** **(उ)** **(अस्तु)** **(वायुः)** पवनः॥९॥

अन्वयः-हे अध्यापकोपदेशका विद्वांसो! यूयं यथाऽदितिर्व्रतेभिस्सह नश्शं भवतु स्वर्का मरुतो व्रतेभिस्सह नः शं भवन्तु विष्णुर्नः शं भवतु पूषा नः शम्वस्तु भवित्रं नः शं भवतु वायुर्नः शमु अस्तु तथा शिक्षध्वम्॥९॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मात्रादिभिर्विदुषीभिः कन्या पित्रादिभिर्विद्वद्भिः पुत्रास्सम्यक् शिक्षणीया यदेते भूमिमारभ्येश्वरपर्यन्तपदार्थानां विद्याः प्राप्य धर्मिष्ठा भूत्वा सर्वान् मनुष्यादीन् सततमानन्दयेयुः॥९॥

पदार्थः-हे अध्यापक और उपदेशक विद्वानो! तुम जैसे **(अदितिः)** विदुषी माता **(व्रतेभिः)** अच्छे कामों के साथ **(नः)** हम लोगों को **(शम्)** सुखरूप **(भवतु)** हो और **(स्वर्काः)** सुन्दर मन्त्र विचार हैं जिनके वे **(मरुतः)** प्राणों के समान प्रियजन अच्छे कामों के साथ **(शम्)** सुखरूप **(भवन्तु)** होवें **(विष्णुः)** व्यापक जगदीश्वर **(नः)** हम लोगों के **[**=को**]** **(शम्)** सुखरूप हो **(पूषा)** पुष्टि करने वाला ब्रह्मचर्य्यादि व्यवहार **(नः)** हमारे लिये **(शम्)** सुखरूप **(उ)** ही **(अस्तु)** हो **(भवित्रम्)** होनहार काम **(नः)** हमारे लिये **(शम्)** सुखरूप होवे और **(वायुः)** पवन **(नः)** हमारे लिये **(शम्)** सुखरूप

(उ) ही (**अस्तु**) हो वैसी शिक्षा देओ॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। माता आदि विदुषियों को कन्या और विद्वान् पिता आदि को पुत्र अच्छे प्रकार शिक्षा देने योग्य हैं जिससे यह भूमि से ले के ईश्वर पर्यन्त पदार्थों की विद्याओं को पाके धार्मिक होकर सब मनुष्यों को निरन्तर आनन्दित करें॥९॥

पुनर्विद्वद्भिः कीदृशी शिक्षा कार्येत्याह॥

फिर विद्वानों को कैसी शिक्षा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॑ दे॒वः स॑वि॒ता त्राय॑माणः॒ शं नो॑ भवन्तू॒षसो॑ विभा॒तीः।
शं नः॑ प॒र्जन्यो॑ भवतु प्र॒जाभ्यः॒ शं नः॒ क्षेत्र॑स्य॒ पति॑रस्तु शं॒भुः॥१०॥२९॥

शम्। नः॒। दे॒वः॒। स॒वि॒ता। त्राय॑माणः॒। शम्। नः॒। भ॒व॒न्तु॒। उ॒षसः॑। वि॒ऽभा॒तीः॒। शम्। नः॒। प॒र्जन्यः॑। भ॒व॒तु॒। प्र॒जाऽभ्यः॑। शम्। नः॒। क्षेत्र॑स्य। पतिः॑। अ॒स्तु॒। श॒म्ऽभुः॥१०॥

पदार्थः-(**शम्**) (**नः**) (**देवः**) सर्वसुखप्रदाता स्वप्रकाशः (**सविता**) सकलजगदुत्पादक ईश्वरः (**त्रायमाणः**) रक्षन् (**शम्**) (**नः**) (**भवन्तु**) (**उषसः**) प्रभातवेलाः (**विभातीः**) विशेषेण दीप्तिमत्यः (**शम्**) (**नः**) (**पर्जन्यः**) मेघः (**भवतु**) (**प्रजाभ्यः**) (**शम्**) (**नः**) (**क्षेत्रस्य**) क्षयन्ति निवसन्ति यस्मिन् जगति तस्य (**पतिः**) स्वामीश्वरो राजा वा (**अस्तु**) (**शम्भुः**) यः शं सुखं भावयति सः॥१०॥

अन्वयः-हे विद्वांसो! यूयन्तथास्मान् शिक्षध्वं यथा त्रायमाणः सविता देवो नः शं भवतु विभातीरुषसो नश्शं भवन्तु पर्जन्यः प्रजाभ्यो नश्शं भवतु क्षेत्रस्य पतिश्शम्भुर्नश्शमस्तु॥१०॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। विद्वद्भिर्वेदादिविद्याभिः परमेश्वरादिपदार्थगुणकर्मस्वभावाः विद्यार्थिनः प्रति यथावत् प्रकाशनीया येन सर्वेभ्य उपकारं ग्रहीतुं शक्नुयुः॥१०॥

पदार्थः-हे विद्वानो! तुम वैसे हम लोगों को शिक्षा देओ जैसे (**त्रायमाणः**) रक्षा करता हुआ (**सविता**) सकल जगत् की उत्पत्ति करने वाला ईश्वर (**देवः**) जो कि सब सुखों का देने वाला आप ही प्रकाशमान वह (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**भवतु**) हो (**विभातीः**) विशेषता से दीप्तिवाली (**उषसः**) प्रभात वेला (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**भवन्तु**) हों (**पर्जन्यः**) मेघ (**नः**) हम (**प्रजाभ्यः**) प्रजाजनों के लिये (**शम्**) सुखरूप (**भवतु**) हो और (**क्षेत्रस्य, पतिः**) जिसके बीच में निवास करते हैं उस जगत् का स्वामी ईश्वर वा राजा (**शम्भुः**) सुख की भावना कराने वाला (**नः**) हमारे लिये (**शम्**) सुखरूप (**अस्तु**) हो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। विद्वानों को वेदादि विद्याओं से परमेश्वर आदि पदार्थों के गुण-कर्म-स्वभाव विद्यार्थियों के प्रति यथावत् प्रकाश करने चाहियें, जिससे सबों से उपकार ले सकें॥१०॥

पुनर्मनुष्याः कान् प्राप्नुयुरित्याह॥

फिर मनुष्य किनको प्राप्त हों, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॑ दे॒वा वि॒श्वदे॑वा भवन्तु॒ शं सर॑स्वती स॒ह धी॒भिर॑स्तु।

शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः॥ ११॥

शम्। नः। देवाः। विश्वऽदेवाः। भवन्तु। शम्। सरस्वती। सह। धीभिः। अस्तु। शम्। अभिऽसाचः। शम्। ऊँ इति। रातिऽसाचः। शम्। नः। दिव्याः। पार्थिवाः। शम्। नः। अप्याः॥ ११॥

पदार्थः-(**शम्**) (**नः**) (**देवाः**) विद्यादिशुभगुणानां दातारः (**विश्वदेवाः**) सर्वे विद्वांसः (**भवन्तु**) (**शम्**) (**सरस्वती**) विद्यासुशिक्षायुक्ता वाक् (**सह**) (**धीभिः**) प्रज्ञाभिः सह (**अस्तु**) (**शम्**) (**अभिषाचः**) य आभ्यन्तर आत्मनि सचन्ते सम्बध्नन्ति ते (**शम्**) (**उ**) (**रातिषाचः**) ये रातिं विद्यादिदानं सचन्ते ते (**शम्**) (**नः**) (**दिव्याः**) शुद्धगुणकर्मस्वभावाः (**पार्थिवाः**) पृथिव्यां विदिता राजानः बहुमूल्याः पदार्था वा (**शम्**) (**नः**) (**अप्याः**) अप्सु भवा नौयायिनो मुक्ताद्याः पदार्था वा॥ ११॥

अन्वयः-अस्मच्छुभाचारेण देवा विश्वदेवा नः शं भवन्तु सरस्वती धीभिः सह नः शमस्त्वभिषाचः नः शं भवन्तु रातिषाचो नः शमु भवन्तु दिव्याः पार्थिवाः शमप्याश्च नः शं भवन्तु॥ ११॥

भावार्थः-मनुष्यैरीदृशः श्रेष्ठाऽऽचारः कर्त्तव्यो येन सर्वान् सर्वे विद्वांसः शोभना प्रज्ञा वाक् च योगिनो विद्यादातारः राजानः शिल्पिनश्च तथा दिव्याः पदार्थाः प्राप्नुयुः॥ ११॥

पदार्थः-हमारे शुभ गुणों के आचार से (**देवाः**) विद्यादि शुभ गुणों के देने वाले (**विश्वदेवाः**) सब विद्वान् जन (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**भवन्तु**) होवें (**सरस्वती**) विद्या सुशिक्षायुक्त वाणी (**धीभिः**) उत्तम बुद्धियों के (**सह**) साथ (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**अस्तु**) हो (**अभिषाचः**) जो आभ्यन्तर आत्मा में सम्बन्ध करते हैं वे (**नः**) हम लोगों के लिये (**शम्**) सुखरूप हों और (**रातिषाचाः**) विद्यादि दान का सम्बन्ध करने वाले हम लोगों के लिये (**शम्**) सुखरूप (**उ**) ही होवें तथा (**दिव्याः**) शुभ गुण-कर्म-स्वभावयुक्त (**पार्थिवाः**) पृथिवी में विदित राजजन वा बहुमूल्य पदार्थ (**शम्**) सुखरूप और (**अप्याः**) जलों में उत्पन्न हुए नौकाओं से जाने वाले वा मोती आदि पदार्थ हम लोगों के लिये (**शम्**) सुखरूप हों॥ ११॥

भावार्थः-मनुष्यों को ऐसा आचार करना चाहिये जिससे सब को सब विद्वान् जन, सुन्दर बुद्धि और वाणी, विद्या देने वाले योगीजन राजा और शिल्पी जन तथा दिव्य पदार्थ प्राप्त हों॥ ११॥

पुनर्मनुष्याः किमिच्छेयुरित्याह॥

फिर मनुष्य किसकी इच्छा करें, इस विषय को अगले मन्त्र में कहते हैं॥

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु॥ १२॥

शम्। नः। सत्यस्य। पतयः। भवन्तु। शम्। नः। अर्वन्तः। शम्। ऊँ इति। सन्तु। गावः। शम्। नः। ऋभवः। सुऽकृतः। सुऽहस्ताः। शम्। नः। भवन्तु। पितरः। हवेषु॥ १२॥

पदार्थः-(**शम्**) (**नः**) (**सत्यस्य**) सत्यभाषणादिव्यवहारस्य (**पतयः**) पालकाः (**भवन्तु**)

(शम्) (नः) (अर्वन्तः) उत्तमा अश्वाः **(शम्) (उ) (सन्तु) (गावः)** धेनवः **(शम्) (नः) (ऋभवः)** मेधाविनः **(सुकृतः)** धर्मात्मानः **(सुहस्ताः)** शोभनेषु कर्मसु हस्ता येषां ते **(शम्) (नः) (भवन्तु) (पितरः) (हवेषु)** हवनादिसत्कर्मसु॥१२॥

अन्वयः-हे जगदीश्वर विद्वन् वा! यथा हवेषु सत्यस्य पतयो नः शं भवन्त्वर्वन्तो नः शं भवन्तु गावो नः शमु सन्तु सुकृतस्सुहस्ता ऋभवो नः शं सन्तु पितरो नः शं भवन्तु तथा विधेहि॥१२॥

भावार्थः-मनुष्यैरेवं शीलं वर्तव्यं येन आप्ताः प्रीताः स्युः येषां प्रीत्या सर्वे पशवो विद्वांसः पितरश्च प्रसन्नाः सुखकरा भवेयुः॥१२॥

पदार्थः-हे जगदीश्वर वा विद्वान्! जैसे **(हवेषु)** हवन आदि अच्छे कामों में **(सत्यस्य)** सत्यभाषण आदि व्यवहार के **(पतयः)** पति **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(भवन्तु)** होवें **(अर्वन्तः)** उत्तम घोड़े **(नः)** हमारे लिये **(शम्)** सुखरूप होवें **(गावः)** दूध देती हुई गौवें **(नः)** हम लोगों को **(शम्)** सुखरूप **(उ)** ही **(सन्तु)** हों **(सुकृतः)** धर्मात्मा **(सुहस्ताः)** सुन्दर अच्छे कामों में हाथ डालने वाले **(ऋभवः)** बुद्धिमान् जन **(नः)** हम लोगों के लिये **(शम्)** सुखरूप हों **(पितरः)** पितृजन **(नः)** हम लोगों के लिये **(शम्)** सुखरूप **(भवन्तु)** होवें वैसा विधान करो॥१२॥

भावार्थः-मनुष्यों को ऐसे शील की धारणा करनी चाहिये जिससे आप्त सज्जन प्रसन्न हों, जिनकी प्रीति से सब पशु और विद्वान् पितृजन प्रसन्न और सुख करने वाले होंवें॥१२॥

पुनर्विद्वद्भिः का शिक्षा कार्येत्याह॥

फिर विद्वान् जनों को क्या शिक्षा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॑ अ॒ज एक॑पादे॒वो अ॑स्तु॒ शं नोऽहि॑र्बु॒ध्न्यः॑ शं स॑मु॒द्रः।
शं नो॑ अ॒पां नपा॑त् पे॒रुर॑स्तु॒ शं नः॒ पृश्नि॑र्भवतु दे॒वगो॑पाः॥ १३॥

शम्। नः॒। अ॒जः। एक॑ऽपात्। दे॒वः। अ॒स्तु॒। शम्। नः॒। अहिः॑। बु॒ध्न्यः॑। शम्। स॒मु॒द्रः। शम्। नः॒। अ॒पाम्। नपा॑त्। पे॒रुः। अ॒स्तु॒। शम्। नः॒। पृश्निः॑। भ॒व॒तु॒। दे॒वऽगो॑पाः॥ १३॥

पदार्थः-(**शम्**) (**नः**) (**अजः**) यः कदाचिन्न जायते जगदीश्वरः **(एकपात्)** सर्वे जगदेकस्मिन् पादे यस्य सः **(देवः)** सर्वसुखप्रदाता **(अस्तु) (शम्) (नः) (अहिः)** मेघः **(बुध्न्यः)** बुध्नेऽन्तरिक्षे भवः **(शम्) (समुद्रः)** समुद्रवन्त्यापो यस्मिन् स सागरः **(शम्) (नः) (अपाम्) (नपात्)** न विद्यन्ते पादा यस्यां सा नौ **(पेरुः)** पारयिता **(अस्तु) (शम्) (नः) (पृश्निः)** अन्तरिक्षमवकाशः **(भवतु) (देवगोपाः)** सर्वेषां रक्षकः॥१३॥

अन्वयः-हे विद्वांसो! यूयं तथा शिक्षध्वं यथा न अज एकपादेवश्शमस्तु बुध्न्योऽहिर्नश्शमस्तु समुद्रो नश्शमस्त्वपां पेरुर्नपात्रः शमस्तु देवगोपाः पृश्निर्नः शं भवतु॥१३॥

भावार्थः-हे अध्यापकोपदेशकाः! यूयमस्माञ्जन्ममरणादिदोषरहितेश्वरमेघसमुद्रनौविद्या ग्राहयन्तु यतो वयं सर्वेषां रक्षका भवेम॥१३॥

पदार्थः- हे विद्वानो! तुम वैसी शिक्षा देओ जैसे **(नः)** हम लोगों को **(अजः)** जो कभी नहीं

उत्पन्न होता वह जगदीश्वर (**एकपात्**) जिसके पैर में सब जगत् विद्यमान है (**देवः**) सब सुख देने वाला विद्वान् (**शम्**) सुखरूप (**अस्तु**) हो (**बुध्न्यः**) अन्तरिक्ष में प्रसिद्ध होने वाला (**अहिः**) मेघ (**नः**) हम लोगों के लिये (**शम्**) सुखरूप हो (**समुद्रः**) जिसमें अच्छे प्रकार जल उछलते हैं वह सागर (**नः**) हम लोगों के लिये (**शम्**) सुखरूप हो (**अपाम्**) जलों का (**पेरुः**) पार करने वाला और (**नपात्**) पैर जिसके नहीं है वह नौका (**नः**) हम लोगों के लिये (**शम्**) सुखरूप (**अस्तु**) हो (**देवगोपाः**) और सब की रक्षा करने वाला (**पृश्निः**) अन्तरिक्ष अवकाश हम लोगों के लिये (**शम्**) सुखरूप (**भवतु**) हो॥१३॥

भावार्थः-हे अध्यापक और उपदेशको! तुम हम लोगों को जन्ममरणादि दोषरहित ईश्वर, मेघ, समुद्र और नौका की विद्या का ग्रहण कराइये जिससे हम लोग सब के रक्षक हों॥१३॥

पुनर्मनुष्याः किमवश्यं कुर्युरित्याह॥

फिर मनुष्य क्या अवश्य करें, इस विषय को अगले मन्त्र में कहते हैं॥

आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः॥१४॥

आदित्याः। रुद्राः। वसवः। जुषन्त। इदम्। ब्रह्म। क्रियमाणम्। नवीयः। शृण्वन्तु। नः। दिव्याः। पार्थिवासः। गोऽजाताः। उत। ये। यज्ञियासः॥१४॥

पदार्थः-(**आदित्याः**) अष्टाचत्वारिंशद्वर्षकृतेन ब्रह्मचर्येण पूर्णविद्याः (**रुद्राः**) चतुश्चत्वारिंशद्वर्षप्रमितेन ब्रह्मचर्येणाधीतविद्याः (**वसवः**) चत्वारिंशद्वर्षपरिमाणेन ब्रह्मचर्येण पठितवेदशास्त्राः (**जुषन्त**) सेवन्ताम् (**इदम्**) प्रत्यक्षम् (**ब्रह्म**) बृहद्धनमन्नं वा (**क्रियमाणम्**) वर्त्तमाने सम्पाद्यमानम् (**नवीयः**) अतिशयेन नूतनम् (**शृण्वन्तु**) (**नः**) अस्माकं विद्याः (**दिव्याः**) दिवि शुद्धे कमनीये गुणादौ भवाः (**पार्थिवासः**) पृथिव्यां विदिताः (**गोजाताः**) गवा सुशिक्षितया वाचा प्रादुर्भूताः (**उत**) (**ये**) (**यज्ञियासः**) यज्ञसम्पादकाः॥१४॥

अन्वयः-हे विद्वांसो! ये भवन्त आदित्या रुद्रा वसवो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः सन्ति ते न इदं नवीयः क्रियमाणं ब्रह्म जुषन्तास्माभिरधीतं शृण्वन्तु॥१४॥

भावार्थः-मनुष्यैः धार्मिकान् विदुष आहूय सत्कृत्यान्नादिना सन्तर्प्य स्वश्रुतं संश्राव्य शेषमेभ्यः शृण्वन्तु यतो निर्भ्रमाः सर्वे स्युः॥१४॥

पदार्थः-हे विद्वानो! जो आप लोग (**आदित्याः**) अड़तालीस वर्ष प्रमाण से ब्रह्मचर्य सेवन से विद्या पढ़े हुए हों वा (**रुद्राः**) चवालीस वर्ष प्रमाण ब्रह्मचर्य से विद्या पढ़े हुए हों वा (**वसवः**) चालीस वर्ष परिमाण जिसका है ऐसे ब्रह्मचर्य्य से विद्या पढ़े हुए हैं वा (**दिव्याः**) शुद्ध मनोहर गुण आदि में प्रसिद्ध वा (**पार्थिवासः**) पृथिवी में विदित वा (**गोजाताः**) सुशिक्षित वाणी से उत्पन्न हुए (**उत**) और (**ये**) जो (**यज्ञियासः**) यज्ञ सम्पादन करने वाले हैं वे (**नः**) हम लोगों के लिये (**इदम्**) इस प्रत्यक्ष (**नवीयः**) अत्यन्त नवीन (**क्रियमाणम्**) वर्त्तमान में सिद्ध होते हुए (**ब्रह्म**) बहुत धन वा

अन्न को **(जुषन्त)** सेवें और हम लोगों का पढ़ा हुआ **(शृण्वन्तु)** सुनें॥१४॥

भावार्थः-मनुष्यों को चाहिये कि धार्मिक विद्वानों को बुलाय सत्कार कर अन्नादिकों से अच्छे प्रकार तृप्त कर अपना पढ़ा अच्छे प्रकार सुना, शेष इन से सुनें, जिससे भ्रम रहित सब हों॥१४॥

मनुष्यैः केषां सकाशादध्ययनमुपदेशश्च श्रोतव्य इत्याह॥

मनुष्यों को किसकी ओर से **[**=को किनसे**]** विद्याध्ययन और उपदेश सुनने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः॥१५॥३०॥३॥

ये। देवानाम्। यज्ञियाः। यज्ञियानाम्। मनोः। यजत्राः। अमृताः। ऋतऽज्ञाः। ते। नः। रासन्ताम्। उरुऽगायम्। अद्य। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥१५॥

पदार्थः-**(ये)** **(देवानाम्)** विदुषां मध्ये विद्वांसः **(यज्ञियाः)** ये यज्ञं कर्तुमर्हन्ति ते **(यज्ञियानाम्)** **(मनोः)** मननशीलस्य **(यजत्राः)** संगन्तारः **(अमृताः)** स्वस्वरूपेण नित्या जीवन्मुक्ता वा **(ऋतज्ञाः)** य ऋतं सत्यं जानन्ति **(ते)** **(नः)** अस्मभ्यम् **(रासन्ताम्)** ददतु **(उरुगायम्)** बहुभिर्गीयमानं विद्याबोधम् **(अद्य)** इदानीम् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** विद्यादिदानैः **(सदा)** **(नः)** अस्मान्॥१५॥

अन्वयः-ये देवानां देवा यज्ञियानां यज्ञियाः मनोर्यजत्रा अमृता ऋतज्ञास्सन्ति तेऽद्य न उरुगायं रासन्तां हे विद्वांसो! यूयं स्वस्तिभिर्नः सदा पात॥१५॥

भावार्थः-हे मनुष्याः ये विद्वत्तमाश्शिल्पितमास्सत्याचारा जीवनमुक्ता ब्रह्मविदो जना अस्मान् विद्यासुशिक्षाभ्यां सततमुन्नयन्ति तान् वयं संरक्ष्य सदा सेवेमहीति॥१५॥

अत्र सर्वसुखप्राप्तये सृष्टिविद्याविद्वत्संगमाहात्म्यं चोक्तमत एतत्सूक्तस्यार्थेन सह पूर्वसूक्तार्थस्य सङ्गतिर्वेद्या॥

इत्यृग्वेदे पञ्चमाष्टके तृतीयोऽध्यायस्त्रिंशो वर्गः सप्तमे मण्डले पञ्चत्रिंशत्तमं सूक्तं च समाप्तम्॥

पदार्थः- **(ये)** जो **(देवानाम्)** विद्वानों के बीच विद्वान् **(यज्ञियानाम्)** यज्ञ करने के योग्यों में **(यज्ञियाः)** यज्ञ करने योग्य **(मनोः)** विचारशील के **(यजत्राः)** संग करने **(अमृताः)** अपने स्वरूप से नित्य वा जीवन्मुक्त रहने **(ऋतज्ञाः)** और सत्य के जानने वाले हैं **(ते)** वे **(अद्य)** आज **(नः)** हम लोगों के लिये **(उरुगायम्)** बहुतों ने गाये हुए विद्याबोध को **(रासन्ताम्)** देवें, हे विद्वानो! **(यूयम्)** तुम **(स्वस्तिभिः)** विद्यादि दानों से **(नः)** हम लोगों की **(सदा)** सर्वदा **(पात)** रक्षा करो॥१५॥

भावार्थः-हे मनुष्यो! जो अत्यन्त विद्वान् अत्यन्त शिल्पी सत्य आचरण करने वाले जीवन्मुक्त ब्रह्मवेत्ता जन हम लोगों को विद्या और सुन्दर शिक्षा से निरन्तर उन्नति देते हैं, उनको हम लोग रखकर सदा सेवें॥१५॥

इस सूक्त में सर्व सुखों की प्राप्ति के लिये सृष्टिविद्या और विद्वानों के संग का उपदेश किया, इससे इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह ऋग्वेद के पंचमाष्टक में तीसरा अध्याय ओर तीसवां वर्ग, सप्तम मण्डल में पैतीसवां सूक्त समाप्त हुआ॥

अथ नवर्चस्य षट्त्रिंशत्तमस्य सूक्तस्य वसिष्ठर्षिः। विश्वेदेवा देवताः। २ त्रिष्टुप्। ३, ४, ६ निचृत्त्रिष्टुप्। ८, ९ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। ५ पङ्क्तिः। १, ७ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यः किं कुर्यादित्याह॥

अब नव ऋचावाले छत्तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्य क्या करे इस विषय को कहते हैं॥

प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः।
वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः॥ १॥

प्र। ब्रह्म। एतु। सदनात्। ऋतस्य। वि। रश्मिऽभिः। ससृजे। सूर्यः। गाः। वि। सानुना। पृथिवी। सस्रे। उर्वी। पृथु। प्रतीकम्। अधि। आ। ईधे। अग्निः॥ १॥

पदार्थः-(**प्र**) (**ब्रह्म**) धनम् (**एतु**) प्राप्नोतु (**सदनात्**) स्थानात् (**ऋतस्य**) सत्यस्य (**वि**) (**रश्मिभिः**) किरणैः (**ससृजे**) सृजति (**सूर्यः**) सविता (**गाः**) रश्मीन् (**वि**) (**सानुना**) शिखरेण सह (**पृथिवी**) (**सस्रे**) सरति गच्छति (**उर्वी**) बहुपदार्थयुक्ता (**पृथु**) विस्तीर्णम् (**प्रतीकम्**) प्रतीतिकरम् (**अधि**) (**आ**) (**ईधे**) प्रकाशयति (**अग्निः**) अग्निरिव विद्वान्॥ १॥

अन्वयः-अग्निरिव विद्वान् यथा सूर्यो रश्मिभिः पृथु प्रतीकं गाश्च वि ससृजे अध्येधे यथोर्वी पृथिवी सानुना वि सस्रे तथा भवान् ऋतस्य सदनात् ब्रह्म प्रैतु॥ १॥

भावार्थः-यो जगदीश्वरः स्वप्रकाशः सूर्यादीनां प्रकाशको निर्माता जगत्प्रकाशनार्थमग्निं सूर्यलोकञ्च रचयति तमुपास्य सत्याचारेण मनुष्या ऐश्वर्यं प्राप्नुवन्तु॥ १॥

पदार्थः- (**अग्निः**) अग्नि के समान विद्वान् जन जैसे (**सूर्यः**) सूर्य (**रश्मिभिः**) किरणों से (**पृथु**) विस्तृत (**प्रतीकम्**) प्रतीति करने वाले पदार्थ (**गाः**) किरणों को (**वि, ससृजे**) विविध प्रकार रचता वा छोड़ता वा (**अधि, आ, ईधे**) अधिकता से प्रकाशित होता है और जैसे (**उर्वी**) बहुपदार्थयुक्त (**पृथिवी**) पृथिवी (**सानुना**) शिखर के साथ (**वि, सस्रे**) विशेषता से चलती है, वैसे आप (**ऋतस्य**) सत्य के (**सदनात्**) स्थान से (**ब्रह्म**) धन को (**प्र, एतु**) अच्छे प्रकार प्राप्त हो॥ १॥

भावार्थः-जो जगदीश्वर आप ही प्रकाशमान और सूर्यादिकों का प्रकाश करने वा बनाने वाला जगत् के प्रकाश के लिये अग्नि और सूर्यलोक को रचता है, उसाकी उपासना कर सत्य आचरण से मनुष्य ऐश्वर्य को प्राप्त होवें॥ १॥

पुनर्मनुष्याः कं भजेयुरित्याह॥

फिर मनुष्य किसको सेवें, इस विषय को अगले मन्त्र में कहते है॥

इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः।
इनो वामन्यः पदुवीरदब्धो जनं च मित्रो यतति ब्रुवाणः॥ २॥

इमाम्। वाम्। मित्रावरुणा। सुऽवृक्तिम्। इषम्। न। कृण्वे। असुरा। नवीयः। इनः। वाम्। अन्यः।

पदऽवीः। अदब्धः। जनम्। च। मित्रः। ययतति। ब्रुवाणः॥ २॥

पदार्थः-(**इमाम्**) (**वाम्**) युवयोः (**मित्रावरुणा**) प्राणोदानाविवाध्यापकोपदेशकौ (**सुवृक्तिम्**) सुष्ठु वर्जन्ति दुःखानि यया ताम् वाचं (**इषम्**) इच्छामन्नं वा (**न**) इव (**कृण्वे**) करोमि (**असुरा**) यावसुषु रमेते तौ (**नवीयः**) अतिशयेन नवीनम् (**इनः**) ईश्वरः (**वाम्**) युवयोः (**अन्यः**) (**पदवीः**) यः पदं व्येति सः (**अदब्धः**) अहिंसितः (**जनम्**) (**च**) (**मित्रः**) सखा (**यतति**) यतते। अत्र व्यत्ययेन परस्मैपदम् (**ब्रुवाणः**) उपदिशन्॥ २॥

अन्वयः-हे असुरा मित्रावरुणा! योऽन्यः पदवीरदब्धो मित्र इनो ब्रुवाणः सन् वां जनञ्च नवीयः प्रापयितुं यतति वामिमां सुवृक्तिं सत्यां वाचमिषन्न प्र यच्छति यामहं परोपकाराय कृण्वे तां युवामहं च नित्यं भजेम॥ २॥

भावार्थः-हे मनुष्या! भवन्तो यस्सर्वेभ्यः पृथक् सर्वव्यापी सर्वसुहृज्जगदीश्वरः सर्वेषां हिताय सदा वर्तते तमेवोपास्य मोक्षपदवीं प्राप्नुवन्तु॥ २॥

पदार्थः-हे (**असुरा**) प्राणों में रमते हुए (**मित्रावरुणा**) प्राण और उदान के समान अध्यापक और उपदेशको! जो (**अन्यः**) और जन (**पदवी**) पद को प्राप्त होता और (**अदब्धः**) अहिंसित (**मित्रः**) सखा (**इनः**) ईश्वर (**ब्रुवाणः**) उपदेश करता हुआ (**वाम्**) तुम दोनों को (**जनम्, च**) और जन को भी (**नवीयः**) अत्यन्त नवीन व्यवहार की प्राप्ति कराने का (**यतति**) यत्न कराता तथा (**वाम्**) तुम दोनों की (**इमाम्**) इस प्रत्यक्ष (**सुवृक्तिम्**) जिससे सुन्दरता से दुःखों की निवृत्ति करते हैं उस सत्य वाणी को (**इषम्**) इच्छा वा अन्न के (**न**) समान देता है, जिसको कि मैं परोपकार के लिये (**कृण्वे**) सिद्ध करता हूँ, उस को मैं [और] तुम नित्य सेवें॥ २॥

भावार्थः-हे मनुष्यो! आप जो सब के लिये अलग सर्वव्यापी सब का मित्र जगदीश्वर सब के हित के लिये सदैव प्रवृत्त है, उसी की उपासना कर मोक्ष पद को प्राप्त होवें॥ २॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः।
महो दिवः सदने जायमानोऽचिक्रदद् वृषभः सस्मिन्नूधन्॥ ३॥

आ। वातस्य। ध्रजतः। रन्ते। इत्याः। अपीपयन्त। धेनवः। न। सूदाः। महः। दिवः। सदने। जायमानः। अचिक्रदत्। वृषभः। सस्मिन्। ऊधन्॥ ३॥

पदार्थः-(**आ**) समन्तात् (**वातस्य**) वायोः (**ध्रजतः**) गच्छतः (**रन्ते**) रमते (**इत्याः**) एतुं प्राप्तुं योग्याः (**अपीपयन्त**) प्याययन्ति (**धेनवः**) गावः (**न**) इव (**सूदाः**) पाककर्त्तारः (**महः**) महतः (**दिवः**) प्रकाशस्य (**सदने**) सीदन्ति यस्मिंस्तस्मिन् (**जायमानः**) उत्पद्यमानः (**अचिक्रदत्**) आह्वयति (**वृषभः**) बलिष्ठः (**सस्मिन्**) अन्तरिक्षे (**ऊधन्**) ऊधन्युषसि॥ ३॥

अन्वयः-हे मनुष्या! यो महो दिवस्सदने जायमानो वृषभः सस्मिन्नूधन्नचिक्रदत् यस्मिन् ध्रजतो

वातस्य सूदा न धेनव इत्या रन्ते सर्वानापीपयन्त तं सूर्यं संयुक्त्या सम्प्रयाजयन्तु॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यथा प्रकाशवता जायमानो रविरन्तरिक्षे प्रकाशते यस्मिन्नन्तरिक्षे सर्वे प्राणिनो रमन्ते तस्मिन्नेव सर्वे सुखमश्नुवते॥३॥

पदार्थः-हे मनुष्यो! जो **(महः)** महान् **(दिवः)** प्रकाश के **(सदने)** घर में **(जायमानः)** उत्पन्न होता हुआ **(वृषभः)** बलिष्ठ **(सस्मिन्)** अन्तरिक्ष में और **(ऊधन्)** उषाकाल में **(अचिक्रदत्)** आह्वान करता जिस में **(ध्रजतः)** जाते हुए **(वातस्य)** पवन के सम्बन्धी **(सूदाः)** पाप करने वालों के **(न)** समान **(धेनवः)** गायें **(इत्याः)** जो कि पाने योग्य हैं उन को **(रन्ते)** रमता और सब को **(आ, अपीपयन्त)** सब ओर से बढ़ाता है, उस सूर्य को युक्ति के साथ उत्तम प्रयोग में लाओ॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे प्रकाशमान पदार्थों में उत्पन्न हुआ रवि अन्तरिक्ष में प्रकाशित होता है वा जिस अन्तरिक्ष में सब प्राणी रमते हैं, उसी में सब सुख को प्राप्त होते हैं॥३॥

पुनस्स राजा कं सत्कृत्य रक्षेदित्याह॥

फिर वह राजा किस का सत्कार करके और उसकी रक्षा करे, इस विषय को अगले मन्त्र में कहते हैं॥

गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम्॥४॥

गिरा। यः। एता। युनजत्। हरी इति। ते। इन्द्र। प्रिया। सुऽरथा। शूर। धायू इति। प्र। यः। मन्युम्। रिरिक्षतः। मिनाति। आ। सुऽक्रतुम्। अर्यमणम्। ववृत्याम्॥४॥

पदार्थः-**(गिरा)** वाण्या **(यः)** **(एता)** एतौ **(युनजत्)** युनक्ति **(हरी)** अश्वौ **(ते)** तव **(इन्द्र)** राजन् **(प्रिया)** कमनीयौ **(सुरथा)** सुष्ठु रथो ययोस्तौ **(शूर)** शत्रूणां हिंसक **(धायू)** धारकौ **(प्र)** **(यः)** **(मन्युम्)** क्रोधम् **(रिरिक्षतः)** हन्तुमिच्छतो दुष्टाच्छत्रोः **(मिनाति)** हिनस्ति **(आ)** **(सुक्रतुम्)** प्रशस्तप्रज्ञम् **(अर्यमणम्)** न्यायकारिणम् **(ववृत्याम्)** वर्तयेयम्॥४॥

अन्वयः-हे शूरेन्द्र! यस्त एता सुरथा धायू प्रिया हरी गिरा युनजत् यो रिरिक्षतो मन्युं प्रमिणाति तं सुक्रतुमर्यमणमहमा ववृत्याम्॥४॥

भावार्थः-हे राजन्! ये यानचालने कुशला राजप्रियाः विद्वांसः स्युस्ताँस्त्वं न्यायकारिणः कुर्याः॥४॥

पदार्थः-हे **(शूर)** शत्रुओं की हिंसा करने वाले **(इन्द्र)** राजा! **(यः)** जो **(ते)** आपके **(एता)** यह दोनों **(सुरथा)** सुन्दर रथ वाले **(धायू)** धारणकर्त्ता **(प्रिया)** मनोहर **(हरी)** घोड़ों को **(गिरा)** वाणी से **(युनजत्)** युक्त करता है वा **(यः)** जो **(रिरिक्षतः)** हिंसा करने की इच्छा किये हुए दुष्ट शत्रु से **(मन्युम्)** क्रोध को **(प्र, मिनाति)** नष्ट करता है उस **(सुक्रतुम्)** प्रशंसित बुद्धियुक्त **(अर्यमणम्)** न्यायकारी सज्जन को मैं **(आ, ववृत्याम्)** अच्छे प्रकार वर्त्तूँ॥४॥

भावार्थः-हे राजन्! जो रथ आदि के चलाने में कुशल, राजप्रिय, विद्वान् हों, उनको आप

न्यायकारी करो॥४॥

के संगन्तुमर्हा भवन्तीत्याह॥

कौन संग करने योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन्।
वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम्॥५॥१॥

यजन्ते। अस्य। सख्यम्। वयः। च। नमस्विनः। स्वे। ऋतस्य। धामन्। वि। पृक्षः। बाबधे। नृऽभिः। स्तवानः। इदम्। नमः। रुद्राय। प्रेष्ठम्॥५॥

पदार्थः-(**यजन्ते**) संगच्छन्ते (**अस्य**) (**सख्यम्**) मित्रत्वम् (**वयः**) जीवनम् (**च**) (**नमस्विनः**) बह्वन्नादियुक्तः (**स्वे**) स्वकीयाः (**ऋतस्य**) सत्यस्य (**धामन्**) धामनि (**वि**) (**पृक्षः**) सम्पर्चनीयमन्नम् (**बाबधे**) बध्नाति (**नृभिः**) नायकैर्मनुष्यैः (**स्तवानः**) स्तूयमानः (**इदम्**) सुसंस्कृतम् (**नमः**) अन्नादिकम् (**रुद्राय**) (**प्रेष्ठम्**) अतिशयेन प्रियम्॥५॥

अन्वयः-ये स्वे नमस्विन ऋतस्य धामन् वर्तमानस्यास्य सख्यं वयः पृक्षश्च यजन्ते यो हि नृभिस्सह स्तवानो रुद्राय इदं प्रेष्ठं नमो वि बाबधे तं ताँश्च वयं संगमयेम॥५॥

भावार्थः-ये सत्पुरुषा अभिसंधिनः सर्वस्य सुहृदस्सर्वेषां दीर्घं जीवनं अन्नाद्यैश्वर्यं चिकीर्षन्ति त एव लोके प्रियतमा जायन्ते॥५॥

पदार्थः-जो (**स्वे**) अपने (**नमस्विनः**) बहुत अन्नयुक्त जन (**ऋतस्य**) सत्य के (**धामन्**) धाम में वर्त्तमान (**अस्य**) इस की (**सख्यम्**) मित्रता को (**वयः**) जीवन को तथा (**पृक्षः**) अच्छे प्रकार संग करने योग्य अन्न को (**यजन्ते**) सग करते हैं जो निश्चय से (**नृभिः**) नायक मनुष्यों के साथ (**स्तवानः**) स्तुति किया हुआ (**रुद्राय**) रुलाने वाले के लिये (**इदम्**) इस (**प्रेष्ठम्**) अत्यन्त प्रिय और (**नमः**) अन्न आदि पदार्थ को (**वि, बाबधे**) विशेषता से बांधता है उस (**च**) और उन को हम लोग संग करावें॥५॥

भावार्थः-जो अच्छे पुरुष संग करने वाले, सब के मित्र और सब का दीर्घ जीवन अन्नादि ऐश्वर्य्य को करना चाहते हैं, वे ही लोक में अत्यन्त प्यारे होते हैं॥५॥

पुनः कीदृश्यः स्त्रियो वरा भवन्तीत्याह॥

फिर कैसी स्त्रियाँ श्रेष्ठ होती हैं, इस विषय को अगले मन्त्र में कहते हैं॥

आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः॥६॥

आ। यत्। साकम्। यशसः। वावशानाः। सरस्वती। सप्तथी। सिन्धुऽमाता। याः। सुष्वयन्त। सुऽदुघाः। सुऽधाराः। अभि। स्वेन। पयसा। पीप्यानाः॥६॥

पदार्थः-(**आ**) (**यत्**) याः (**साकम्**) सह (**यशसः**) कीर्तेः (**वावशानाः**) कामयमानाः

(सरस्वती) उत्तमा वाणी **(सप्तथी)** सप्तमी। अत्र **वा छन्दसी**ति मस्य स्थाने थः। **(सिन्धुमाता)** सिन्धूनां नदीनां परिमाणकर्त्री **(याः)** **(सुष्वयन्त)** गच्छन्ति **(सुदुघाः)** सुष्ठु कामान् पूरयित्र्यः **(सुधाराः)** शोभना धारा यासां ताः **(अभि)** **(स्वेन)** स्वकीयेन **(पयसा)** उदकेन। **पय इत्युदकनाम।** (निघं०१.१२) **(पीप्याना:)** वर्धमानाः॥६॥

अन्वयः-हे विद्वांसो! यासां सिन्धुमातेव यद्या सप्तथी सरस्वती वर्तत्ते याः स्वेन पयसा साकं पीप्याना नद्य इव सुदुघाः सुधाराः यशसो वावशाना विदुष्यः स्त्रियोऽभ्या सुष्वयन्त ताः सततं माननीया भवन्ति॥६॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे पुरुषाः! यथा षण्णां ज्ञानेन्द्रियमनसां मध्ये कर्मेन्द्रियं वाक् सुशोभिता वर्तते यथा जलेन पूर्णा नद्यः शोभन्ते तथा विद्यासत्ये कामयमाना अलंकामाः सत्यवाचः स्त्रियः श्रेष्ठा माननीयाश्च भवन्तीति विजानीत॥६॥

पदार्थः-हे विद्वानो! जिन की **(सिन्धुमाता)** नदियों का परिमाण करने वाली सी **(यत्)** जो **(सप्तथी)** सातवीं **(सरस्वती)** उत्तम वाणी वर्त्तमान **(याः)** जो **(स्वेन)** अपने **(पयसा)** जल के **(साकम्)** साथ **(पीप्यानाः)** बढ़ती हुई नदियों के समान **(सुदुघाः)** सुन्दर कामों को पूरी करने वाली **(सुधाराः)** सुन्दर धाराओं से युक्त **(यशसः)** कीर्त्ति की **(वावशानाः)** कामना करती हुई विदुषी स्त्री **(अभि, आ, सुष्वयन्त)** सब ओर से जाती हैं, वे निरन्तर मान करने योग्य होती हैं॥६॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे छः अर्थात् पांच ज्ञानेन्द्रिय और मन के बीच कर्मेन्द्रिय वाणी सुन्दर शोभायुक्त है और जैसे जल से पूर्ण नदी शोभा पाती है, वैसे विद्या और सत्य की कामना करती हुई पूर्ण कामना वाली स्त्री श्रेष्ठ और मान करने योग्य हीती है॥६॥

के विद्वांसो वरा भवन्तीत्याह॥

कौन विद्वान् जन श्रेष्ठ होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

उ॒त त्ये नो॑ म॒रुतो॑ मन्दसा॒ना धिय॑ं तो॒कं च॑ वा॒जिनो॑ऽवन्तु।
मा नः॒ परि॑ ख्य॒दक्ष॑रा॒ चर॒न्त्यवी॑वृधन् युज्यं॒ ते र॒यिं नः॑॥७॥

उ॒त। त्ये। नः॒। म॒रु॑तः। म॒न्द॒सा॒नाः। धिय॑म्। तो॒कम्। च॒। वा॒जिन॑ः। अ॒व॒न्तु॒। मा। नः॒। परि॑। ख्य॒त्। अक्ष॑रा। चर॑न्ती। अवी॑वृधन्। युज्य॑म्। ते। र॒यिम्। नः॒॥७॥

पदार्थः-**(उत)** **(त्ये)** **(नः)** अस्माकम् **(मरुतः)** विद्वांसो मनुष्याः **(मन्दसानाः)** कामयमाना आनन्दितास्सन्तः **(धियम्)** प्रज्ञाम् **(तोकम्)** अपत्यम् **(च)** **(वाजिनः)** प्रशस्तविज्ञानवन्तः **(अवन्तु)** वर्धयन्तु **(मा)** **(नः)** अस्मान् **(परि)** सर्वतः **(ख्यत्)** वर्जयेत् **(अक्षरा)** अविनाशिनी सकलविद्याव्यापिनी **(चरन्ती)** प्राप्नुवन्ती **(अवीवृधन्)** वर्धयन्तु **(युज्यम्)** योक्तुमर्हम् **(ते)** तव **(रयिम्)** धनम् **(नः)** अस्माकम्॥७॥

अन्वयः-त्ये वाजिनो मन्दसाना मरुतो नो धियमुत तोकं चावन्तु यथा चरन्त्यक्षरा वाक् नो मा परि

ख्यत् तथा नस्ते तव च युज्यं रयिमवीवृधन्॥७॥

भावार्थः-त एव विद्वांसोऽत्युत्तमास्सन्ति ये सर्वेषां पुत्रान् पुत्रीश्च ब्रह्मचर्येण संरक्ष्य वर्धयित्वा प्राज्ञाः कुर्वन्ति॥७॥

पदार्थः- (**त्ये**) वे (**वाजिनः**) प्रशंसित विज्ञान वाले (**मन्दसानाः**) कामना करते हुए (**मरुतः**) विद्वान् जन (**नः**) हमारी (**धियम्**) बुद्धि को (**उत**) और (**तोकम्**) सन्तान को (**च**) भी (**अवन्तु**) बढ़ावें जैसे (**चरन्ती**) प्राप्त होती हुई (**अक्षरा**) अविनाशिनी वाणी (**नः**) हम लोगों को (**मा**) मत (**परि, ख्यत्**) सब ओर से वर्जे, वैसे (**नः**) हम लोगों के सम्बन्ध में (**ते**) आप के (**युज्यम्**) योग्य (**रयिम्**) धन को (**अवीवृधन्**) बढ़ावें॥७॥

भावार्थः-वे ही विद्वान् जन अति उत्तम हैं, जो सब के पुत्र और कन्याओं को ब्रह्मचर्य्य से रक्षा कर और बढ़ा कर उत्तम ज्ञाता करते हैं॥७॥

पुनर्विद्वद्विद्यार्थिनः परस्परं कथं वर्तेरन्नित्याह॥

फिर विद्वान् जन और विद्यार्थी परस्पर कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

प्र वो॑ म॒हीम॒रम॑तिं कृणुध्वं॒ प्र पू॒षणं॑ विदु॒ष्यं॑ न वी॒रम्।
भगं॑ धि॒योऽवि॒तार॑ं नो अ॒स्याः सा॒तौ वाज॑ं राति॒षाच॒ं पुर॑न्धिम्॥८॥

प्र। व॒रः। म॒हीम्। अ॒रम॑तिम्। कृ॒णु॒ध्व॒म्। प्र। पू॒षण॑म्। वि॒दु॒ष्य॑म्। न। वी॒रम्। भग॑म्। धि॒यः। अ॒वि॒तार॑म्। नः। अ॒स्याः। सा॒तौ। वाज॑म्। रा॒ति॒ऽसाच॑म्। पुर॑म्ऽधिम्॥८॥

पदार्थः-(**प्र**) (**वः**) युष्माकम् (**महीम्**) महतीं वाचम् (**अरमतिम्**) अलं प्रज्ञाम् (**कृणुध्वम्**) (**प्र**) (**पूषणम्**) (**विदथ्यम्**) विदथेषु संग्रामेषु साधुम् (**न**) इव (**वीरम्**) शौर्यादिगुणोपेतम् (**भगम्**) ऐश्वर्यम् (**धियः**) प्रज्ञाः (**अवितारम्**) वर्धयितारम् (**नः**) अस्माकम् (**अस्याः**) (**सातौ**) संभक्तौ (**वाजम्**) विज्ञानम् (**रातिषाचम्**) दानसम्बन्धिनम् (**पुरन्धिम्**) बहुसुखधरम्॥८॥

अन्वयः-हे विद्वांसो! यथा यूयं नः पूषणं विदथ्यं वीरं न वोऽरमतिं महीं भगं धियोऽवितारमस्याः

सातौ पुरन्धिं रातिषाचं वाजं च प्र कृणुध्वं तथा चैतान् वयमपि प्रकुर्याम॥८॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारः। यथा विद्वांसोऽध्यापका उपदेशकाश्च सर्वेषां बुद्ध्यायुर्विद्यावृद्धिं शूरवीरवत् सर्वदा रक्षणं च कुर्वन्ति तथा तेषां सेवासत्कारौ सर्वैस्सदा कार्यौ॥८॥

पदार्थः-हे विद्वानो! जैसे तुम **(नः)** हमारी **(पूषणम्)** पुष्टि करने वाले **(विदथ्यम्)** संग्रामों में उत्तम **(वीरम्)** शूरता आदि गुणों से युक्त जन के **(न)** समान **(वः)** तुम्हारी **(अरमतिम्)** पूर्णमति **(महीम्)** बड़ी वाणी **(भगम्)** ऐश्वर्य्य **(धियः)** बुद्धियों और **(अवितारम्)** बढ़ाने वाले **(अस्याः)** इस बुद्धिमात्र के तथा **(सातौ)** अच्छे भाग में **(पुरन्धिम्)** बहुत सुख धारण करने वाले **(रातिषाचम्)** दानसम्बन्धि **(वाजम्)** विज्ञान को **(प्र, कृणुध्वम्)** अच्छे प्रकार सिद्ध करो, वैसे इन को हम लोग भी **(प्र)** सिद्ध करें॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है।[४] जैसे विद्वान् जन अध्यापक और उपदेशक सब की बुद्धि आयु विद्या की वृद्धि और शूरवीरों के समान सर्वदा रक्षा करते हैं, वैसे उन की सेवा और सत्कार सब को सदा करने योग्य हैं॥८॥

के विद्वांसस्सेवनीया इत्याह॥

कौन विद्वान् सेवा करने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः।
उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः॥९॥२॥

अच्छ। अयम्। वः। मरुतः। श्लोकः। एतु। अच्छ। विष्णुम्। निसिक्तऽपाम्। अवःऽभिः। उत। प्रऽजायै। गृणते। वयः। धुः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥९॥

पदार्थः-(**अच्छ**) (**अयम्**) (**वः**) युष्माकम् (**मरुतः**) विद्वांसो मनुष्याः (**श्लोकः**) शिक्षिता वाक्। **श्लोक इति वाङ्नाम।** (निघं०१.११) (**एतु**) प्राप्नोतु (**अच्छा**) सम्यक्। अत्र **संहितायामि**ति

---

४. संस्कृतभावार्थ में उपमावाचकलुप्तोपमा अलङ्कार दिया हुआ है।

दीर्घः। **(विष्णुम्)** व्यापकं परमेश्वरम् **(निषिक्तपाम्)** यो धर्मे निषिक्तानभिषेकप्राप्तान् पाति रक्षति तम् **(अवोभिः)** रक्षादिभिः **(उत) (प्रजायै) (गृणते)** स्तावकाय **(वयः)** जीवनम् **(धुः)** दधति **(यूयम्) (पात) (स्वस्तिभिः) (सदा) (नः)**॥९॥

अन्वयः-हे मरुतः! यथाऽयं वश्श्लोकोऽवोभिस्सह निषिक्तपां विष्णुमच्छैतूत ये गृणते प्रजायै महाँ च वयोऽच्छ धुः यथा यूयं स्वस्तिभिर्नस्सदा पात तथा युष्मान् वयं सततं रक्षेम॥९॥

भावार्थः-जिज्ञासुभिः श्रोत्रियान् ब्रह्मविदोऽध्यापकानुपदेशकांश्च प्राप्य परमेश्वरादिविद्याः सङ्गृह्य सर्वदा सर्वेषां रक्षणोन्नतिर्वर्धयितव्येति॥९॥

अत्र विश्वेदेवकृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति षट्त्रिंशत्तमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(मरुतः)** विद्वान् मनुष्यो! जैसे **(अयम्)** यह **(वः)** तुम्हारी **(श्लोकः)** शिक्षायुक्त वाणी **(अवोभिः)** रक्षाओं के साथ **(निषिक्तपाम्)** जो धर्म के बीच अभिषेक पाये हुए **[**हैं उन के रक्षक**] (विष्णुम्)** व्यापक परमेश्वर को **(अच्छ, एतु)** अच्छे प्रकार प्राप्त हो **(उत)** और जो **(गृणते)** स्तुति करने वाली **(प्रजायै)** प्रजा के लिये **(वयः)** जीवन को **(अच्छा)** अच्छे प्रकार **(धुः)** धारण करते हैं जैसे **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों के साथ **(नः)** हम लोगों की **(सदा)** सर्वदैव **(पात)** रक्षा करो, **[**वैसे हम तुम्हारी रक्षा करें**]**॥९॥

भावार्थः-जानने की इच्छा वालों को वेदवेत्ता ब्रह्म के जानने वाले अध्यापक और उपदेशकों को प्राप्त होकर परमेश्वर आदि की विद्याओं का संग्रह कर सर्वदैव सब प्रकार से सब की रक्षा और उन्नति बढ़ानी चाहिये॥९॥

इस सूक्त मे विश्वेदेवों के कर्म और गुणों का गुणों का वर्णन होने से इस सूक्त के अर्थ की संगति इस से पूर्व सूक्त के अर्थ के साथ जाननी चाहिये।

यह छत्तीसवां सूक्त और दूसरा वर्ग पूरा हुआ॥

अथाष्टर्चस्य [सप्तत्रिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः विश्वेदेवा देवताः। १ त्रिष्टुप् २, ३, ७ निचृत्त्रिष्टुप्। ५, ८ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ निचृत्पङ्क्तिः। ६ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वांसः किं प्रापयन्त्वित्याह॥

अब सैंतीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् जन क्या प्राप्त करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ वो॒ वाहि॑ष्ठो वहतु स्त॒वध्यै॒ रथो॑ वाजा ऋभुक्षणो॒ अमृ॑क्तः।
अ॒भि त्रि॑पृ॒ष्ठैः सव॑नेषु॒ सोमै॒र्मदे॑ सुशिप्रा म॒हभि॑: पृणध्वम्॥ १॥

आ। व॒रिति॑ वः। वाहि॑ष्ठः। व॒ह॒तु॒। स्त॒वध्यै॑। रथ॑ः। वा॒जा॒रिति॑ वाजाः। ऋ॒भु॒क्ष॒ण॒रित्यृ॑भुक्षणः। अमृ॑क्तः। अ॒भि। त्रि॒ऽपृ॒ष्ठैः। सव॑नेषु। सोमै॑ः। मदे॑। सु॒ऽशि॒प्राः॒। म॒हऽभि॑ः। पृ॒ण॒ध्व॒म्॥ १॥

पदार्थः-(**आ**) (**वः**) युष्माकम् (**वाहिष्ठः**) अतिशयेन वोढा (**वहतु**) (**स्तवध्यै**) स्तोतुम् (**रथः**) रमणीयं यानम् (**वाजाः**) विज्ञानवन्तः (**ऋभुक्षणः**) मेधाविनः (**अमृक्तः**) अहिंसितः (**अभि**) आभिमुख्ये (**त्रिपृष्ठैः**) त्रीणि पृष्ठानि ज्ञीप्सितव्यानि येषां तैः (**सवनेषु**) उत्तमकर्मसु (**सोमैः**) ऐश्वर्यौषध्यादिभिः पदार्थैः (**मदे**) आनन्दाय (**सुशिप्राः**) शोभनहनुनासिकाः (**महभिः**) सत्कारैः (**पृणध्वम्**) पूरयत॥ १॥

अन्वयः-हे सुशिप्रा वाजा ऋभुक्षणो यो वोऽमृतो वाहिष्ठो रथो मदे त्रिपृष्ठैर्महभिस्सोमैः सवनेषु स्तवध्या अस्मानभ्यावहति स एव युष्मानप्यभ्या वहतु यूयं तं पृणध्वम्॥ १॥

भावार्थः-हे विद्वांसो! यूयमस्मान् रथेनाभीष्टं स्थानमिवाध्यापनेन विद्याः प्रापयन्तु॥ १॥

पदार्थः-हे (**सुशिप्राः**) सुन्दर ठोढ़ी और नासिका वाले (**वाजाः**) विज्ञानवान् (**ऋभुक्षणः**) मेधावी बुद्धिमान्! जो (**वः**) तुम्हारा (**अमृक्तः**) न नष्ट हुआ (**वाहिष्ठः**) अत्यन्त पहुँचाने वाला (**रथः**) रमण करने योग्य यान (**मदे**) आनन्द के लिये (**त्रिपृष्ठैः**) तीन जानने योग्य रूप जिन के विद्यमान उन (**महभिः**) सत्कार और (**सोमैः**) ऐश्वर्य्य वा ओषधि आदि पदार्थों से (**सवनेषु**) उत्तम कामों में (**स्तवध्यै**) स्तुति करने को हम को सब ओर से पहुँचाता है वही तुम को (**अभि, आ, वहतु**) सब ओर पहुँचावे उस को तुम (**पृणध्वम्**) पूरो, सिद्ध करो॥ १॥

भावार्थः-हे विद्वानो! तुम हम लोगों को रथ से चाहे हुए स्थान को पहुँचने के समान पढ़ाने से विद्या को पहुँचाओ॥ १॥

पुनर्विद्वद्भिः किं कर्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

यू॒यं ह॒ रत्नं॑ मघव॒त्सु धत्थ स्व॒र्दृशं॑ ऋभुक्षणो॒ अमृ॑क्तम्।
सं य॒ज्ञेषु॑ स्वधावन्तः पिबध्वं॒ वि नो॒ राधां॑सि म॒तिभि॑र्दयध्वम्॥ २॥

यू॒यम्। ह॒। रत्नं॑म्। म॒घव॑त्ऽसु। ध॒त्थ॒। स्व॒ऽदृशं॑ः। ऋ॒भु॒क्ष॒ण॒रित्यृ॑भुक्षणः। अमृ॑क्तम्। सम्। य॒ज्ञेषु॑। स्व॒धा॒ऽव॒न्तः॒।

पिबध्वम्। वि। नः। राधांसि। मतिऽभिः। दयध्वम्॥ २॥

पदार्थः-(**यूयम्**) (**ह**) खलु (**रत्नम्**) रमणीयधनम् (**मघवत्सु**) बहुधनयुक्तेषु (**धत्थ**) धरत (**स्वर्दृशः**) ये स्वः सुखं यन्ति (**ऋभुक्षणः**) मेधाविनः (**अमृक्तम्**) अहिंसितम् (**सम्**) (**यज्ञेषु**) संगन्तव्यषु व्यवहारेषु (**स्वधावन्तः**) बह्वन्नादिपदार्थयुक्ताः (**पिबध्वम्**) (**वि**) (**नः**) अस्माकम् (**राधांसि**) धनानि (**मतिभिः**) प्रज्ञाभिः (**दयध्वम्**) दयां कुरुत॥ २॥

अन्वयः-हे स्वधावन्तः स्वर्दृश ऋभुक्षणो विद्वांसो! यूयं मतिभिः मघवत्सु रत्नं सं धत्थ यज्ञेष्वमृक्तं रत्नमहौषधिरसं पिबध्वं नो राधांसि वि दयध्वम्॥ २॥

भावार्थः-ये विद्वांसस्ते प्रजासु ब्रह्मचर्य्यविद्यासत्क्रियामहौषधधनानि च वर्धयित्वा सुखिनः सन्तु॥ २॥

पदार्थः-हे (**स्वधावन्तः**) बहुत अन्नादि पदार्थयुक्त (**स्वर्दृशः**) सुख देखते हुए (**ऋभुक्षणः**) मेधावी विद्वान् जनो! (**यूयम्, ह**) तुम्हीं (**मतिभिः**) बुद्धियों से (**मघवत्सु**) बहुत धनयुक्त व्यवहारों में (**रत्नम्**) रमणीय धन को (**सम्, धत्थ**) अच्छे प्रकार धारण करो (**यज्ञेषु**) संग करने योग्य व्यवहार में (**अमृक्तम्**) विनाश को नहीं प्राप्त ऐसे बड़ी ओषधियों के रस को (**पिबध्वम्**) पीओ और (**नः**) हमारे (**राधांसि**) धनों को (**वि, दयध्वम्**) विशेष दया से चाहो॥ २०॥

भावार्थः-जो विद्वान् जन हैं वे प्रजाओं में ब्रह्मचर्य्य विद्या उत्तम क्रिया बड़ी-बड़ी ओषधियों और धनों को बढ़वाकर सुखी हों॥ २॥

पुनर्धनाढ्याः कस्मै दानं दद्युरित्याह॥

फिर धनाढ्य किस को दान देवें, इस विषय को अगले मन्त्र में कहते हैं॥

उवोचिथ हि मघवन् देष्णं महो अर्भस्य वसुनो विभागे।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या॥ ३॥

उवोचिथ। हि। मघऽवन्। देष्णम्। महः। अर्भस्य। वसुनः। विऽभागे। उभा। ते। पूर्णा। वसुना। गभस्ती इति। न। सूनृता। नि। यमते। वसव्या॥ ३॥

पदार्थः-(**उवोचिथ**) उपदिश (**हि**) (**मघवन्**) बहुधनयुक्त (**देष्णम्**) दातुं योग्यम् (**महः**) (**अर्भस्य**) अल्पस्य (**वसुनः**) धनस्य (**विभागे**) विभजन्ति यस्मिँस्तस्मिन् (**उभा**) उभौ (**ते**) तव (**पूर्णा**) पूर्णौ (**वसुना**) धनेन (**गभस्ती**) हस्तौ (**न**) निषेधे (**सूनृता**) सत्यप्रियवाणी (**नि**) (**यमते**) (**वसव्या**) वसुषु धनेषु साध्वी॥ ३॥

अन्वयः-हे मघवन्! हि यतस्त्वं महोऽर्भस्य वसुनो विभागे देष्णमुवोचिथ यस्य त उभा गभस्ती वसुना पूर्णा वर्त्तेते तस्य तव वसव्या सूनृता वाक् केनापि न नि यमते॥ ३॥

भावार्थः-ये धनाढ्याः महतोऽल्पस्य धनस्य सुपात्रकुपात्रयोर्धर्माधर्मयोर्विभागेन सुपात्रधर्मवृद्धये च धनदानं कुर्वन्ति तेषा कीर्तिश्चिरन्तनी भवति॥ ३॥

पदार्थः-हे (**मघवन्**) बहुधनयुक्त! (**हि**) जिस से आप (**महः**) बहुत वा (**अर्भस्य**) थोड़े

(वसुनः) धन के **(विभागे)** विभाग में **(देष्णम्)** देने योग्य को **(उवोचिथ)** कहो जिन **(ते)** आप के **(उभा)** दोनों **(गभस्ती)** हाथ **(वसुना)** धन से **(पूर्णा)** पूर्ण वर्त्तमान हैं उन आपकी **(वसव्या)** धनों में उत्तम **(सूनृता)** सत्य और प्रिय वाणी किसी से भी **(न)** नहीं **(नि, यमते)** नियम को प्राप्त होती अर्थात् रुकती है॥३॥

भावार्थः-जो धनाढ्य जन बहुत वा थोड़े धन वा सुपात्र और कुपात्र वा धर्म और अधर्म के विभाग में सुपात्र और धर्म की वृद्धि के लिये धन दान करते हैं, उन की कीर्ति चिरकाल तक ठहरने वाली होती है॥३॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

त्वमि॑न्द्र॒ स्वय॑शा ऋभु॒क्षा वाजो॒ न सा॒धुरस्त॑मे॒ष्यृक्वा॑।
व॒यं नु ते॑ दा॒श्वांस॑: स्याम॒ ब्रह्म॑ कृ॒ण्वन्तो॑ हरिवो॒ वसि॑ष्ठाः॥४॥३॥

त्वम्। इ॒न्द्र॒। स्वऽयशाः॑। ऋ॒भु॒क्षाः॑। वाज॑ः। न। सा॒धुः॑। अस्त॑म्। ए॒षि॒। ऋक्वा॑। व॒यम्। नु। ते॒। दा॒श्वांस॑ः। स्या॒म॒। ब्रह्म॑। कृ॒ण्वन्त॑ः। ह॒रि॒ऽव॒ः। वसि॑ष्ठाः॥४॥

पदार्थः-(**त्वम्**) (**इन्द्र**) योगैश्वर्ययुक्त (**स्वयशाः**) स्वकीयं यशः कीर्तिर्यस्य सः (**ऋभुक्षाः**) मेधावी (**वाजः**) ज्ञानवान् (**न**) इव (**साधुः**) सत्कर्मसेवी (**अस्तम्**) गृहम् (**एषि**) प्राप्नोषि (**ऋक्वा**) सत्कर्त्ता (**वयम्**) (**नु**) क्षिप्रम् (**ते**) तव (**दाश्वांसः**) दातारः (**स्याम**) भवेम (**ब्रह्म**) धनमन्नं वा (**कृण्वन्तः**) कुर्वन्तः (**हरिवः**) प्रशस्तमनुष्ययुक्त (**वसिष्ठाः**) अतिशयेन सद्गुणकर्मसु निवासिनः॥४॥

अन्वयः-हे हरिव इन्द्र! य ऋभुक्षाः स्वयशा ऋक्वा वाजो न साधुस्त्वमस्तमेषि तस्य ते ब्रह्म न कृण्वन्तो वसिष्ठा वयं दाश्वांसः स्याम॥४॥

भावार्थः-अत्रोपमालङ्कारः। ये सन्मार्गस्थाः साधव इव धर्मानाचरन्ति ते सहैश्वर्या भूत्वा दातारो भवन्ति॥४॥

पदार्थः-हे (**हरिवः**) प्रशंसित मनुष्यों (**इन्द्र**) और योगैश्वर्यों से युक्त जन! जो (**ऋभुक्षाः**) मेधावी (**स्वयशाः**) अपनी कीर्ति से युक्त (**ऋक्वाः**) सत्कार करने वाले (**वाजः**) ज्ञानवान् के (**न**) समान (**साधुः**) सत्कर्म सेवने हारे (**त्वम्**) आप (**अस्तम्**) घर को (**एषि**) प्राप्त होते हैं उन (**ते**) आप के (**ब्रह्म**) धन वा अन्न को (**नु**) शीघ्र (**कृण्वन्तः**) सिद्ध करते हुए (**वसिष्ठाः**) अतीव अच्छे गुण कर्मों के बीच निवास करने वाले (**वयम्**) हम लोग (**दाश्वांसः**) दानशील (**स्याम**) हों॥४॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो अच्छे मार्ग में स्थिर, साधु जनों के समान धर्मों का आचरण करते हैं, वे ऐश्वर्य के साथ हो अर्थात् ऐश्वर्य्यवान् होकर दानशील होते हैं॥४॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सनि॑तासि प्र॒वतो॑ दा॒शुषे॑ चि॒द्याभि॒र्विवे॑षो॒ हर्यश्व धी॒भिः।

व॒व॒न्मा नु ते॒ युज्या॑भिरू॒ती क॒दा न॑ इन्द्र रा॒य आ द॑शस्येः॥५॥३॥

सनि॑ता। अ॒सि॒। प्र॒ऽवतः॑। दा॒शुषे॑। चि॒त्। याभिः॑। विवे॑षः। हरि॑ऽअश्व। धी॒भिः॑। व॒व॒न्म॒। नु। ते॒। युज्या॑भिः। ऊ॒ती। क॒दा। नः॒। इ॒न्द्र॒। रा॒यः। आ। द॒श॒स्येः॥५॥

पदार्थः-(**सनिता**) विभाजकः (**असि**) (**प्रवतः**) नम्रत्वादिगुणप्रदानाम् (**दाशुषे**) दात्रे (**चित्**) अपि (**याभिः**) (**विवेषः**) व्याप्नोति (**हर्यश्व**) सदुणहरणशीला हरयोऽश्वा महान्तो यस्य तत्सम्बुद्धौ (**धीभिः**) प्रज्ञाभिः (**ववन्मा**) याचामहे। अत्र **संहितायामि**ति दीर्घः। (**नु**) चित्रम् (**ते**) तव (**युज्याभिः**) योजनीयाभिः (**ऊती**) ऊत्या रक्षणाद्यया (**कदा**) (**नः**) अस्मभ्यम् (**इन्द्र**) परमसुखप्रद (**रायः**) धनानि (**आ**) (**दशस्येः**) आदद्याः॥५॥

अन्वयः-हे हर्यश्वेन्द्र! यतस्त्वं याभिर्युज्याभिर्विद्याभिश्चिद्धीभिरूती दाशुषे सनिताऽसि प्रवतो रायो विवेषः यान् वयं ते ववन्मा तान्नु त्वं नः कदा आ दशस्येः॥५॥

भावार्थः-मनुष्यैः विद्वद्भ्यस्सदा उत्तमा विद्या याचनीयाः विद्वांसश्च यथावत् प्रदद्युः॥५॥

पदार्थः-हे (**हर्यश्व**) सद्गुण और हरणशील घोड़ों वाले (**इन्द्र**) परम सुखप्रद विद्वान्! जिस से आप (**याभिः**) जिन (**युज्याभिः**) युक्त करने योग्य विद्याओं (**चित्**) और (**धीभिः**) बुद्धियों से (**ऊती**) तथा रक्षा आदि क्रिया से (**दाशुषे**) देने वाले के लिये (**सनिता**) विभाग करने वाले (**असि**) हैं (**प्रवतः**) नम्रत्व आदि गुणों के देने वालों के (**रायः**) धनों को (**विवेषः**) प्राप्त होते हैं हम लोग (**ते**) आप के जिन पदार्थों को (**ववन्म**) मांगते हैं उन को (**नु**) आश्चर्य्य है आप (**नः**) हम लोगों के लिये (**कदा**) कब (**आ, दशस्ये**) देओगे॥५॥

भावार्थः-मनुष्यों को विद्वानों से सदा उत्तम विद्या लेनी चाहिये और विद्वान् भी यथावत् अच्छे प्रकार देवें॥५॥

पुनर्विद्वद्भिः किं कर्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

वा॒सय॑सीव वे॒धस॒त्वं नः॑ क॒दा न॑ इन्द्र॒ वच॑सो बुबोधः।
अस्तं॑ ता॒त्या धि॒या र॒यिं सु॒वीरं॑ पृ॒क्षो नो॒ अर्वा॒ न्यु॑हीत वा॒जी॥६॥

वा॒सय॑सीऽइव। वे॒धसः॑। त्वम्। नः॒। क॒दा। नः॒। इ॒न्द्र॒। वच॑सः। बु॒बो॒धः॒। अस्त॑म्। ता॒त्या। धि॒या। र॒यिम्। सु॒ऽवीर॑म्। पृ॒क्षः। नः॒। अर्वा॑। नि। उ॒हीत॒। वा॒जी॥६॥

पदार्थः-(**वासयसीव**) (**वेधसः**) मेधाविनः (**त्वम्**) (**नः**) अस्मान् (**कदा**) (**नः**) अस्माकम् (**इन्द्र**) सुखप्रद (**वचसः**) वचनस्य (**बुबोधः**) बुद्ध्याः (**अस्तम्**) गृहम् (**तात्या**) या तते परमेश्वरे साध्वी तया (**धिया**) प्रज्ञया (**रयिम्**) धनम् (**सुवीरम्**) शोभना वीरा यस्मात्तम् (**पृक्षः**) सम्पर्चनीयमन्नम् (**नः**) अस्मान् (**अर्वा**) अश्व इव (**नि**) (**उहीत**) वहेत् (**वाजी**) विज्ञानवान्॥६॥

अन्वयः-हे इन्द्र! त्वं तात्या धिया नोऽस्मान् वेधसो वासयसीव नोऽस्माकं वचसः कदा बुबोधः

वाज्यर्वा स नु नोऽस्मान् सुवीरं रयिं कदा न्युहीतास्माकमस्तं प्राप्य पृक्षः कदा सेवयेः॥६॥

भावार्थः-अत्रोपमालङ्कारः। सर्वे मनुष्या विदुषः प्रत्येवं प्रार्थयेयुर्भवन्तोऽस्मान् कदा विदुषः कृत्वा धनधान्यस्थानाद्यैश्वर्यं प्रापयिष्यन्तीति॥६॥

पदार्थः-हे **(इन्द्र)** सुख देने वाले! **(त्वम्)** आप **(तात्या)** व्याप्त परमेश्वर में उत्तमता से स्थिर होने वाली **(धिया)** बुद्धि से **(नः)** हम **(वेधसः)** बुद्धिमान् जनों को **(वासयसीव)** वसाते हुए से **(नः)** हमारे **(वचसः)** वचन को **(कदा)** कब **(बुबोधः)** जानोगे **(वाजी)** विज्ञानवान् आप **(अर्वा)** घोड़े के समान **(नः)** हम लोगों को **(सुवीरम्)** जिससे अच्छे-अच्छे वीर जन होते हैं उस **(रयिम्)** धन को कब **(नि, उहीत)** प्राप्त करियेगा और हमारे **(अस्तम्)** घर को प्राप्त होकर **(पृक्षः)** सम्पर्क करने योग्य अन्न कब सेवोगे॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। सब मनुष्य विद्वानों के प्रति ऐसी प्रार्थना करें आप लोग हमें कब विद्वान् करके धन-धान्य, स्थान आदि पदार्थ और ऐश्वर्य्य को प्राप्त करावेंगे॥६॥

पुनर्मनुष्याः कथं वर्त्तेरन्नित्याह॥

फिर मनुष्य कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः।
उप त्रिबन्धुर्जरदष्टिमेत्यस्वंवेशं यं कृणवन्त मर्ताः॥७॥

अभि। यम्। देवी। निःऽऋतिः। चित्। ईशे। नक्षन्ते। इन्द्रम्। शरदः। सुऽपृक्षः। उप। त्रिऽबन्धुः। जरत्ऽअष्टिम्। एति। अस्वंऽवेशम्। यम्। कृणवन्त। मर्ताः॥७॥

पदार्थः-(**अभि**) (**यम्**) (**देवी**) विदुषी (**निर्ऋतिः**) भूमिः। **निर्ऋतीति पृथिवीनाम**। (निघं०१.१) (**चित्**) इव (**ईशे**) ईष्टे। अत्र **तलोप आत्मनेपदेष्वि**ति तकारलोपः। (**नक्षन्ते**) व्याप्नुवन्ति (**इन्द्रम्**) सूर्यम् (**शरदः**) शरदाद्या ऋतवः (**सुपृक्षः**) शोभनं पृक्षोऽन्तं यस्य सः (**उप**) (**त्रिबन्धुः**) त्रयाणां बन्धुः (**जरदष्टिम्**) वृद्धावस्थाम् (**एति**) प्राप्नोति (**अस्ववेशम्**) न स्वकीयो वेशो यस्य तम् (**यम्**) (**कृणवन्त**) कुर्वन्ति (**मर्ताः**) मनुष्याः॥७॥

अन्वयः-हे मनुष्याः! **[**यथा**]** यं निर्ऋतिश्चिदिव देव्यभ्येति यस्सुपृक्षस्त्रिबन्धुर्या जरदष्टिमीशे यमिन्द्रं शरदो नक्षन्ते यमस्ववेशं मर्ता उप कृणवन्त तान् सर्वान् वयमुप कुर्याम॥७॥

भावार्थः-हे मनुष्या! यूयं यथा शरीरवाङ्मनोजं त्रिविधं सुखं प्राप्तो विद्वान् हृद्यां भार्यां प्राप्नोति स्त्री च प्रियं पतिं प्राप्य मोदते यथर्तवः स्वं स्वं समयं प्राप्य सर्वानानन्दयन्ति यथा स्वभावेनैव कौमाराद्या अवस्था आगच्छन्ति तथैव परस्परस्मिन् प्रीतिं कृत्वा प्रयतेत॥७॥

पदार्थः-हे मनुष्यो! जैसे **(यम्)** जिस पदार्थ को **(निर्ऋतिः)** भूमि **(चित्)** वैसे **(देवी)** विदुषी स्त्री उसको **(अभि, एति)** सब ओर से प्राप्त होती वा **(सुपृक्षः)** जो सुन्दर अन्न वाला **(त्रिबन्धुः)** तीन जनों का बन्धु जिस **(जरदिष्टम्)** वृद्धावस्था को **(ईशे)** ऐश्वर्ययुक्त करता है जिस **(इन्द्रम्)** सूर्य को **(शरदः)** शरद् आदि ऋतु **(नक्षन्ते)** व्याप्त होती हैं जिस **(अस्ववेशम्)** अपने रूप को न धारण किये

हुए का **(मर्ताः)** मनुष्य **(उप, कृणवन्त)** उपकार करते हैं, उन सब का हम भी उपकार करें॥७॥

भावार्थः-हे मनुष्यो! तुम जैसे शरीर वाणी और मन से उत्पन्न हुए तीन प्रकार के सुख को प्राप्त विद्वान् जन हृदय से चाही हुई भार्या को प्राप्त होता है, स्त्री भी प्रिय पति को प्राप्त होकर आनन्दित होती वा जैसे ऋतु अपने-अपने समय को प्राप्त होकर सबको आनन्दित करती वा जैसे स्वभाव से ही कौमार आदि अवस्था आती हैं, वैसे ही परस्पर में प्रीति कर प्रयत्न करो॥७॥

मनुष्याः परमेश्वराज्ञापालनस्वपुरुषार्थाभ्यां श्रियमुन्नयेयुरित्याह॥

मनुष्य परमेश्वर की आज्ञा पालने से और पुरुषार्थ से लक्ष्मी की उन्नति करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः॥८॥४॥

आ। नः। राधांसि। सवितरिति। स्तवध्यै। आ। रायः। यन्तु। पर्वतस्य। रातौ। सदा। नः। दिव्यः। पायुः। सिसक्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥८॥

पदार्थः-**(आ)** **(नः)** अस्मान् **(राधांसि)** धनानि **(सवितः)** सकलजगदुत्पादकेश्वर **(स्तवध्यै)** स्तोतुम् **(आ)** **(रायः)** धनानि **(यन्तु)** प्राप्नुवन्तु **(पर्वतस्य)** मेघस्य **(रातौ)** दाने **(सदा)** **(नः)** अस्मान् **(दिव्यः)** शुद्धगुणकर्मस्वभावेषु भवः **(पायुः)** रक्षकः **(सिषक्तु)** सुखैः संयोजयतु **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)** अस्मान्॥८॥

अन्वयः-हे सवितर्जगदीश्वर! त्वां स्तवध्यै नोऽस्मान् राधांस्यायन्तु पर्वतस्य रातौ राय आ यान्तु दिव्यः पायुर्भवान् नः सदा आ सिषक्तु हे विद्वांस! एतद्विज्ञानेन सहिता यूयं स्वस्तिभिर्नस्सदा पात॥८॥

भावार्थः-ये सत्यभावेन परमेश्वरमुपास्य न्याय्येन व्यवहारेण धनं प्राप्तुमिच्छन्ति ये च सदाप्तसङ्गं सेवन्ते ते कदाचिद्दारिद्र्यं न सेवन्त इति॥८॥

अत्र विश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति सप्तत्रिंशत्तमं सूक्तं चतुर्थो वर्गश्च समाप्तः॥

पदार्थः-हे **(सवितः)** सकल जगत् के उत्पन्न करने वाले जगदीश्वर! आप की **(स्तवध्यै)** स्तुति करने को **(नः)** हम लोगों को **(राधांसि)** धन **(आ, यन्तु)** मिलें **(पर्वतस्य)** मेघ के **(रातौ)** देने में **(रायः)** धन आवें **(दिव्यः)** शुद्ध गुण-कर्म-स्वभाव में प्रसिद्ध हुए **(पायुः)** रक्षा करने वाले आप **(नः)** हम लोगों को सदा **(आ, सिषक्तु)** सुखों से संयुक्त करें हे विद्वानो! इस विज्ञान से सहित **(यूयम्)** तुम लोग **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदैव **(पात)** रक्षा करो॥८॥

भावार्थ:-जो सत्य भाव से परमेश्वर की उपासना कर न्याययुक्त व्यवहार से धन पाने को चाहते हैं और जो सदा आप्त अति सज्जन विद्वान् का संग सेवते हैं, वे दारिद्र्य कभी नहीं सेवते हैं॥८॥

इस सूक्त में विश्वेदेवों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सैंतीसवां सूक्त और चौथा वर्ग पूरा हुआ॥

अथाष्टर्चस्य [अष्टात्रिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। १-६ सविता देवता। ६ सविता भगो वा। ७, ८ वाजिनः। १, ३, ८ निचृत्त्रिष्टुप्। ५ विराट्त्रिष्टुप्छन्दः। धैवतः स्वरः। २, ४, ६ स्वराट्पङ्क्तिः। ७ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ मनुष्यैः क उपासनीय इत्याह॥

अब अड़तीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्यों को किसकी उपासना करनी चाहिये, इस विषय को कहते हैं॥

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत्।
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति॥ १॥

उत्। ऊँ इति। स्यः। देवः। सविता। ययाम। हिरण्ययीम्। अमतिम्। याम्। अशिश्रेत्। नूनम्। भगः। हव्यः। मानुषेभिः। वि। यः। रत्ना। पुरुऽवसुः। दधाति॥ १॥

पदार्थः-(**उत्**) (**उ**) (**स्यः**) स पूर्वोक्तः जगदीश्वरः (**देवः**) दाता (**सविता**) सकलैश्वर्यप्रदः (**ययाम**) प्राप्नुयाम (**हिरण्ययीम्**) हिरण्यादिप्रचुराम् (**अमतिम्**) सुरूपां श्रियम् (**याम्**) (**अशिश्रेत्**) आश्रयेत् (**नूनम्**) निश्चितम् (**भगः**) भजनीयः सकलैश्वर्ययुक्तः (**हव्यः**) स्तोतुमर्हः (**मानुषेभिः**) मनुष्यैः (**वि**) विशेषेण (**यः**) (**रत्ना**) रमणीयानि धनानि (**पुरूवसुः**) पुरूणि बहूनि वसूनि धनानि यस्य स। अत्र **संहितायामि**त्याद्यपदस्य दैर्घ्यम्। (**दधाति**) निष्पादयति॥ १॥

अन्वयः-यो भगो पुरूवसुः सविता देव ईश्वरो मानुषेभिर्नूनं हव्योऽस्ति योऽस्माकं कामान् विदधाति स्य उ यां हिरण्ययीममतिं रत्ना चास्मदर्थमशिश्रेत् तं वयमुद्ययाम॥ १॥

भावार्थः-ये मनुष्याः परमेश्वरमुपासते श्रेष्ठां श्रियं लभन्ते॥ १॥

पदार्थः- (**यः**) जो (**भगः**) सेवन करने योग्य सकलैश्वर्ययुक्त (**पुरूवसुः**) बहुत धनों वाला (**सविता**) सकलैश्वर्य देने हारा (**देवः**) दाता ईश्वर (**मानुषेभिः**) मनुष्यों से (**नूनम्**) निश्चय से (**हव्यः**) स्तुति करने योग्य है जो हम लोगों के कामों को (**वि, दधाति**) सिद्ध करता है (**स्यः**) वह जगदीश्वर (**उ**) ही (**याम्**) जिस (**हिरण्ययीम्**) हिरण्यादि रत्नों वाली (**अमतिम्**) सुन्दर रूपवती लक्ष्मी को तथा (**रत्ना**) रमण करने योग्य धनों को **[**हमारे लिये**]** (**अशिश्रेत्**) आश्रय करता है, उसका हम लोग (**उत्, ययाम**) उत्तम नियम पालें॥ १॥

भावार्थः-जो मनुष्य परमेश्वर की उपासना करते हैं वे श्रेष्ठ लक्ष्मी को प्राप्त होते हैं॥ १॥

पुनस्स जगदीश्वरः कीदृशोऽस्तीत्याह॥

फिर वह जगदीश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

उदु तिष्ठ सवितः श्रुध्यस्य हिरण्यपाणे प्रभृतावृतस्य।
व्युर्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः॥ २॥

उत्। ऊँ इति। तिष्ठ। सवितरिति। श्रुधि। अस्य। हिरण्यऽपाणे। प्रऽभृतौ। ऋतस्य। वि। उर्वीम्। पृथ्वीम्। अमतिम्। सृजानः। आ। नृऽभ्यः। मर्तऽभोजनम्। सुवानः॥ २॥

पदार्थः-(**उत्**) (**उ**) (**तिष्ठ**) प्रकाशितो भव (**सवितः**) अन्तर्यामिन् (**श्रुधि**) शृणु (**अस्य**) जीवस्य हृदये (**हिरण्यपाणे**) हिरण्यं हितरमणं पाणिर्व्यवहारो यस्य तत्सम्बुद्धौ (**प्रभृतौ**) प्रकृष्टतया धारणे (**ऋतस्य**) सत्यस्य कारणस्य (**वि**) (**उर्वीम्**) बहुपदार्थयुक्ताम् (**पृथ्वीम्**) भूमिम् (**अमतिम्**) सुखरूपाम् (**सृजानः**) उत्पादयन् (**आ**) समन्तात् (**नृभ्यः**) मनुष्येभ्यः (**मर्तभोजनम्**) मर्तेभ्य इदं भोजनं मर्तभोजनम् (**सुवानः**) प्रेरयन्॥ २॥

अन्वयः-हे हिरण्यपाणे सवितर्जगदीश्वर! त्वमस्य स्तुतिं श्रुधि उ अस्य हृदय उत्तिष्ठ उत्कृष्टतया प्राप्नुहि ऋतस्य प्रभृतावमतिमुर्वीं पृथ्वीं वि सृजानः मा नृभ्यो मर्तभोजनमा सुवानः सन् कृपस्व॥ २॥

भावार्थः-ये सत्यभावेन धर्ममनुष्ठाय योगमभ्यस्यन्ति तेषामात्मनि परमात्मा प्रकाशितो बवति येनेश्वरेण सकलं जगदुत्पाद्य मनुष्यादीनामन्नादिना हितं सम्पादितं तं विहाय कस्याप्यन्यस्योपासनां मनुष्याः कदापि मा कुर्युः॥ २॥

पदार्थः- (**हिरण्यपाणे**) हित से रमणरूप व्यवहार जिसका (**सवितः**) वह अन्तर्यामी है जगदीश्वर! आप (**अस्य**) इस जीव की किई स्तुति (**श्रुधि**) सुनिये (**उ**) और इसके हृदय में (**उत्, तिष्ठ**) उठिये अर्थात् उत्कर्ष से प्राप्त हूजिये और (**ऋतस्य**) सत्य कारण की (**प्रभृतौ**) अत्यन्त धारणा में (**अमतिम्**) अच्छे अपने रूप वाली (**उर्वीम्**) बहुत पदार्थयुक्त (**पृथ्वीम्**) पृथिवी को (**वि, सृजानः**) उत्पन्न करते हुए (**नृभ्यः**) मनुष्यों के लिये (**मर्त्तभोजनम्**) मनुष्यों को जो भोजन है उसे (**आ, सुवानः**) प्रेरणा देते हुए कृपा कीजिये॥ २॥

भावार्थः-जो सत्यभाव से धर्म का अनुष्ठान कर योग का अभ्यास करते हैं, उनके आत्मा में परमात्मा प्रकाशित होता है, जिस ईश्वर ने समस्त जगत् उत्पन्न कर मनुष्यादिकों का अन्नादि से हित सिद्ध किया उसको छोड़ किसी और की उपासना मनुष्य कभी न करें॥ २॥

पुनः कस्सर्वैः प्रशंसनीय इत्याह॥

फिर कौन सब को प्रशंसा करने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

अपि॑ ष्टुतः स॑वि॒ता दे॒वो अ॑स्तु॒ यमा चि॒द्विश्वे॒ वस॑वो गृ॒णन्ति॑।
स नः॒ स्तोमा॑न्नम॒स्य॑श्चनो॑ धा॒द्विश्वे॑भिः पातु पा॒युभि॒र्नि सू॒रीन्॥ ३॥

अपि॑। स्तु॒तः॒। स॒वि॒ता। दे॒वः॒। अ॒स्तु॒। यम्। आ। चि॒त्। विश्वे॑। वस॑वः॒। गृ॒णन्ति॑। सः॒। नः॒। स्तोमा॑न्। न॒म॒स्यः॑। चनः॑। धा॒त्। विश्वे॑भिः॒। पा॒तु॒। पा॒युऽभिः॑। नि। सू॒रीन्॥ ३॥

पदार्थः-(**अपि**) पदार्थसंभावनायाम् (**स्तुतः**) प्रशंसितः (**सविता**) सर्वोत्पादकः (**देवः**) सूर्यादीनामपि प्रकाशकः (**अस्तु**) (**यम्**) (**आ**) समन्तात् (**चित्**) अपि (**विश्वे**) सर्वे (**वसवः**) वसन्ति विद्या येषु तेषु ते विद्वांसः (**गृणन्ति**) स्तुवन्ति (**सः**) (**नः**) अस्माकम् (**स्तोमान्**) प्रशंसाः (**नमस्यः**) नमस्करणीयः (**चनः**) अन्नादिकमैश्वर्यम् (**धात्**) दधातु (**विश्वेभिः**) सर्वैस्सह (**पातु**) रक्षतु (**पायुभिः**) रक्षाभिः (**नि**) नितराम् (**सूरीन्**) विदुषः॥ ३॥

अन्वयः-हे मनुष्या! यं चिद्विश्वे वसवो गृणन्ति स सविता देवोऽस्माभिरा स्तुतोऽस्तु सोऽपि

नमस्योऽस्तु नोऽस्माकं स्तोमान् चनश्च धात् स विश्वेभिः पायुभिस्सूरीन्नि पातु॥३॥

भावार्थः-हे मनुष्याः! यस्येश्वरस्य सर्व आप्ताः प्रशंसां कुर्वन्ति योऽस्मान् सततं रक्षत्यस्मदर्थं सर्वं विश्वं विधत्ते तमेव वयं सर्वे सदा प्रशंस्येम॥३॥

पदार्थः-हे मनुष्यो! **(यम्, चित्)** जिस परमेश्वर की **(विश्वे)** सब **(वसवः)** वे विद्वान् जन जिन में विद्या वसती है **(गृणन्ति)** स्तुति कराते हैं वह **(सविता)** सब को उत्पन्न करने वाला **(देवः)** सूर्यादिकों का भी प्रकाशक ईश्वर हम लोगों से **(आ, स्तुतः)** अच्छे प्रकार स्तुति को प्राप्त **(अस्तु)** हो और वह **(अपि)** भी **(नमस्यः)** नमस्कार करने योग्य हो **(नः)** हमारी **(स्तोमान्)** प्रशंसाओं को और **(चनः)** अन्नादि ऐश्वर्य को भी **(धात्)** धारण करे तथा **(सः)** वह **(विश्वेभिः)** सब के साथ **(पायुभिः)** रक्षाओं से **(सूरीन्)** विद्वानों की **(नि, पातु)** निरन्तर रक्षा करे॥३॥

भावार्थः-हे मनुष्यो! जिस ईश्वर की सब धर्मात्मा सज्जन प्रशंसा करते हैं, जो हम लोगों की निरन्तर रक्षा करता, हम लोगों के लिये समस्त विश्व का विधान करता है, उसी की हम लोग सदा प्रशंसा करें॥३॥

पुनर्मनुष्यैः कस्य प्रशंसा कार्येत्याह॥

फिर मनुष्यों को किसकी प्रशंसा करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा।
अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः॥४॥

अभि। यम्। देवी। अदितिः। गृणाति। सवम्। देवस्य। सवितुः। जुषाणा। अभि। सम्ऽराजः। वरुणः। गृणन्ति। अभि। मित्रासः। अर्यमा। सऽजोषाः॥४॥

पदार्थः-(**यम्**) (**देवी**) विदुषी (**अदितिः**) माता (**गृणाति**) (**सवम्**) प्रसूतं जगत् (**देवस्य**) सर्वसुखप्रदातुः (**सवितुः**) प्रेरकस्यान्तर्यामिणः (**जुषाणा**) सेवमाना (**अभि**) (**सम्राजः**) सम्यग्राजमानश्चक्रवर्तिनो राजानः (**वरुणः**) वरो विद्वान् (**गृणन्ति**) स्तुवन्ति (**अभि**) (**मित्रासः**) सर्वस्य सुहृदः (**अर्यमा**) न्यायधीशः (**सजोषाः**) समानप्रीतिसेवी॥४॥

अन्वयः-हे मनुष्याः सवितुर्देवस्य सवं जुषाणा देव्यदितिर्यमभि गृणाति वरुणस्सजोषा अर्यमा यमभिगृणाति यं मित्रासस्सम्राजोऽभिगृणन्ति तमेव सर्वे सततं स्तुवन्तु॥४॥

भावार्थः-हे मनुष्या! यूयं तस्यैव प्रशंसनीयस्य परमेश्वरस्यैव स्तुतिं कुरुत यं स्तुत्वा विदुष्यः स्त्रियः राजानो विद्वांसश्चाऽभीष्टं प्राप्नुवन्ति॥४॥

पदार्थः-हे मनुष्यो! **(सवितुः)** प्रेरणा देने वाला अन्तर्यामी **(देवस्य)** सर्व सुखदाता जगदीश्वर के **(सवम्)** उत्पन्न किये जगत् की **(जुषाणा)** सेवा करती हुई **(देवी)** विदुषी **(अदितिः)** माता जिस को **(अभि, गृणाति)** सम्मुख कहती है वा **(वरुणः)** श्रेष्ठ विद्वान् जन **(सजोषाः)** समान प्रीति सेवने वाला **(अर्यमा)** न्यायाधीश और **(मित्रासः)** सब के सुहृद **(सम्राजः)** अच्छे प्रकार प्रकाशमान चक्रवर्ती राजजन **(यम्)** जिसकी **(अभि, गृणन्ति)** सब ओर से स्तुति करते हैं, उसी की सब निरन्तर

स्तुति करें॥४॥

भावार्थः-हे मनुष्यो! तुम उसी प्रशंसा करने योग्य परमेश्वर की स्तुति करो, जिस की स्तुति करके विदुषी स्त्री राजा और विद्वान् जन चाहा हुआ फल पाते हैं॥४॥

पुनर्मनुष्याः परस्परं किं कुर्युरित्याह॥

फिर मनुष्य परस्पर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः।
अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु॥५॥

अभि। ये। मिथः। वनुषः। सपन्ते। रातिम्। दिवः। रातिऽसाचः। पृथिव्याः। अहिः। बुध्न्यः। उत। नः। शृणोतु। वरूत्री। एकधेनुऽभिः। नि। पातु॥५॥

पदार्थः-(**अभि**) (**ये**) (**मिथः**) परस्परम् (**वनुषः**) याचमानान् (**सपन्ते**) आक्रुष्यन्ति (**रातिम्**) (**दिवः**) कमनीयस्य (**रातिषाचः**) दानस्य दातुः (**पृथिव्याः**) भूमेरन्तरिक्षस्य वा मध्ये (**अहिः**) मेघः (**बुध्न्यः**) बुध्न्येऽन्तरिक्षे भवः (**उत**) अपि (**नः**) अस्मान् (**शृणोतु**) (**वरूत्री**) वरणीया नीतियुक्ता माता (**एकधेनुभिः**) एकैव धेनुर्वाक् सहायभूता येषां तैः सह (**नि**) पातु॥५॥

अन्वयः-ये दिवो रातिषाच एकधेनुभिस्सह मिथो वनुषो नो रातिमाभि सपन्ते उतापि वरूत्री बुध्न्योऽहिरिवास्मान् पृथिव्या नि पातु स सर्वोजनोऽस्माकमधीतं शृणोतु॥५॥

भावार्थः-येऽस्मान् विद्याहीनान् दृष्ट्वा निन्दन्ति विदुषो दृष्ट्वा प्रशंसन्त्यैकमत्याय प्रेरयन्ति त एवास्माकं कल्याणकरा भवन्ति॥५॥

पदार्थः- (**ये**) जो (**दिवः**) मनोहर (**रातिषाचः**) दान देने वाले के (**एकधेनुभिः**) एक वाणी ही है सहायक जिनकी उनके साथ (**मिथः**) परस्पर (**वनुषः**) मांगते हुए (**नः**) हम लोगों की (**रातिम्**) देने को (**अभि, सपन्ते**) अच्छे प्रकार सब ओर से नियम करते हैं (**उत**) और (**वरूत्री**) स्वीकार करने योग्य माता (**बुध्न्यः**) अन्तरिक्ष में प्रसिद्ध हुए (**अहिः**) मेघ के समान हम लोगों को (**पृथिव्याः**) भूमि और अन्तरिक्ष के बीच (**नि, पातु**) निरन्तर रक्षा करे, वह समस्त जनमात्र हमारा पढ़ा हुआ (**शृणोतु**) सुने॥५॥

भावार्थः-जो हम लोगों को विद्याहीन देख निन्दा करते और विद्वान् देख प्रशंसा करते और एकता के लिये प्रेरणा देते हैं, वे ही हमारे कल्याण करने वाले होते हैं॥५॥

पुना राजादिमनुष्यैः किं कृत्वा किं प्रापणीयमित्याह॥

फिर राजा आदि मनुष्यों को क्या करके क्या प्राप्त करने योग्य है, इस विषय को अगले मन्त्र में कहते हैं॥

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम्॥६॥

अनु॑। तत्। नः। जाःपति॑ः। मंसीष्ट। रत्न॑म्। देवस्य॑। सवि॒तुः। इ॒या॒नः। भग॑म्। उ॒ग्रः। अव॑से। जोह॑वीति। भग॑म्। अनु॑ग्रः। अध॑। या॒ति॒। रत्न॑म्॥६॥

पदार्थः-(**अनु**) (**तत्**) (**नः**) अस्मभ्यम् (**जास्पतिः**) प्रजापालकः (**मंसीष्ट**) मन्यताम् (**रत्नम्**) रमणीयं धनम् (**देवस्य**) सर्वप्रकाशकस्य (**सवितुः**) सर्वान्तर्यामिणः (**इयानः**) प्राप्नुवन् (**भगम्**) ऐश्वर्यम् (**उग्रः**) तेजस्वी (**अवसे**) रक्षणाद्याय (**जोहवीति**) भृशमाददाति (**भगम्**) ऐश्वर्यम् (**अनुग्रः**) अतेजस्वी (**अधः**) हीनताम् (**याति**) प्राप्नोति (**रत्नम्**) रमणीयं धनम्॥६॥

अन्वयः-हे मनुष्या! यथोग्रो जास्पतिस्सवितुर्देवस्य भगमियानः यद्रत्नं स्वार्थं मंसीष्ट तन्नोऽनु मंसीष्ट यं भगमवसेऽनुग्रो जनो जोहवीति तद्रत्नमध याति॥६॥

भावार्थः-हे मनुष्या! यो राजा परमेश्वरस्य सृष्टौ सर्वेषां रक्षणाय प्रवर्तते स एव सर्वमैश्वर्यं लब्ध्वा सर्वानानन्दयति॥६॥

पदार्थः-हे मनुष्यो! जैसे (**उग्रः**) तेजस्वी (**जास्पतिः**) प्रजा पालने वाला (**सवितुः**) सर्वान्तर्यामी (**देवस्य**) सब प्रकाश करने वाले के (**भगम्**) ऐश्वर्य्य को (**इयानः**) प्राप्त होता हुआ जिस (**रत्नम्**) रमणीय धन को स्वार्थ (**मंसीष्ट**) मानता है (**तत्**) उस को (**नः**) हम लोगों के लिये (**अनु**) अनुकूल माने जिस (**भगम्**) ऐश्वर्य्य को (**अवसे**) रक्षा आदि के (**अनुग्रः**) तेजरहित जन (**जोहवीति**) निरन्तर ग्रहण करता है वह (**रत्नम्**) रमणीय धन (**अधः**) हीन दशा को (**याति**) प्राप्त होता है॥६॥

भावार्थः-हे मनुष्यो! जो राजा परमेश्वर की सृष्टि में सब की रक्षा के लिये प्रवृत्त होता है, वही सब ऐश्वर्य को पाकर सब को आनन्दित कराता है॥६॥

पुनः केऽत्र कल्याणकरा भवन्तीत्याह॥

फिर कौन इस संसार में कल्याण करने वाले होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

शं नो॑ भवन्तु वा॒जिनो॒ हवे॑षु दे॒वता॑ता मि॒तद्र॑वः स्व॒र्काः।
ज॒म्भय॒न्तोऽहि॑ं वृ॒कं रक्षा॑ंसि सने॑म्य॒स्मद्यु॑यव॒न्नमी॑वाः॥७॥

शम्। नः। भ॒व॒न्तु। वा॒जिनः॑। हवे॑षु। दे॒वऽता॑ता। मि॒तऽद्र॑वः। सु॒ऽअ॒र्काः। ज॒म्भय॑न्तः। अहि॑म्। वृ॒कम्। रक्षा॑ंसि। सने॑मि। अ॒स्मत्। यु॒य॒व॒न्। अमी॑वाः॥७॥

पदार्थः-(**शम्**) सुखाय (**नः**) अस्माकम् (**भवन्तु**) (**वाजिनः**) वेगवन्तोऽश्वाः ज्ञानवन्तो योद्धारो वा (**हवेषु**) संग्रामेषु (**देवताता**) विद्वद्भिरनुष्ठातव्ये यज्ञे (**मितद्रवः**) ये मितं द्रवन्ति गच्छन्ति ते (**स्वर्काः**) शोभनोऽर्कोऽन्नादिकमैश्वर्यं येषान्ते (**जम्भयन्तः**) विनामयन्तः (**अहिम्**) सर्पमिव वर्तमानम् (**वृकम्**) स्तेनम् (**रक्षांसि**) दुष्टान् प्राणिनः (**सनेमि**) पुरातने। **सनेमीति पुराणनाम।** (निघं०३.२७) (**अस्मत्**) अस्माकं सकाशात् (**युयवन्**) वियुज्यन्ताम् (**अमीवाः**) रोगाः॥७॥

अन्वयः-हे विद्वांसो! वाजिनो मितद्रवः स्वर्का हवेषु देवताताहिमिव वृकं रक्षांसि च जम्भयन्तो नोऽस्माकं शं भवन्तु यतोऽस्मत् सनेम्यमीवा युयवन्॥७॥

भावार्थः-ये दुष्टाचारान् प्राणिनो रोगान् शत्रूँश्च निवर्त्य सर्वेषां कल्याणकरा भवन्ति त एव

जगत्पूज्यास्सन्ति॥७॥

पदार्थः-हे विद्वानो! **(वाजिनः)** वेगवान् घोड़ा वा ज्ञानवान् योद्धा पुरुष **(मितद्रवः)** जो प्रमाण भर जाते हैं **(स्वर्काः)** जिन का शुभ अन्नादि है **(हवेषु)** वे संग्रामों में **(देवताता)** वा विद्वानों के अनुष्ठान करने योग्य यज्ञ में **(अहिम्)** सर्प के समान वर्तमान **(वृकम्)** चोर को और **(रक्षांसि)** दुष्ट प्राणियों को **(जम्भयन्तः)** जम्भाई दिलाते हुए **(नः)** हम लोगों को **(शम्)** सुख के लिये **(भवन्तु)** होवें जिस से **(अस्मत्)** हम लोगों से **(सनेमि)** पुराने व्यवहार में **(अमीवाः)** रोग **(युयवन्)** अलग हों॥७॥

भावार्थः-जो दुष्ट आचार वाले प्राणी, रोग और शत्रुओं को निवार के सब के सुख करने वाले होते हैं, वे ही जगत् पूज्य होते हैं॥७॥

पुनर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥८॥५॥

वाजेऽवाजे। अवत। वाजिनः। नः। धनेषु। विप्राः। अमृताः। ऋतऽज्ञाः। अस्य। मध्वः। पिबत। मादयध्वम्। तृप्ताः। यात। पथिऽभिः। देवऽयानैः॥८॥

पदार्थः-**(वाजेवाजे)** संग्रामे संग्रामे **(अवत)** रक्षत **(वाजिनः)** बहुविज्ञानान्नबलवेगयुक्ताः **(नः)** अस्मान् **(धनेषु)** **(विप्राः)** मेधाविनः **(अमृताः)** मृत्युरहिताः **(ऋतज्ञाः)** य ऋतं सत्यं जानन्ति ते सत्यं व्यवहारं ब्रह्म वा जानन्ति ते **(अस्य)** **(मध्वः)** मधुरादिगुणयुक्तस्य **(पिबत)** **(मादयध्वम्)** आनन्दयत **(तृप्ताः)** प्रीणिताः **(यात)** **(पथिभिः)** **(देवयानैः)** विद्वन्मार्गैः॥८॥

अन्वयः-हे अमृता ऋतज्ञा वाजिनो विप्रा! यूयं धनेषु वाजेवाजे च नोऽस्मानवत अस्य मध्वः पिबत अस्मान् मादयध्वम् तृप्ताः सन्तो देवयानैः पथिभिर्यात॥८॥

भावार्थः-विदुषः प्रतीश्वरस्येयमाज्ञाऽस्ति यूयं विद्वांसो धार्मिका भूत्वा सर्वेषां रक्षां सततं विधत्त स्वयमानन्दिता महौषधरसेनारोगास्सन्तस्सर्वानानन्द्य तर्पयित्वाऽऽप्तमार्गैः स्वयं गच्छन्तोऽन्यान् सततं गमयत॥८॥

अत्र सवित्रैश्वर्यविद्वद्विदुषीगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या।

इत्यष्टात्रिंशत्तमं सूक्तं पञ्चमो वर्गश्च समाप्तः॥

पदार्थः-हे **(अमृताः)** मृत्युरहित **(ऋतज्ञाः)** सत्य व्यवहार वा ब्रह्म के जानने वाले **(वाजिनः)** बहु विज्ञान अन्न बल और वेगयुक्त **(विप्राः)** मेधावी सज्जनो! तुम **(धनेषु)** धनों में **(वाजेवाजे)** और संग्राम संग्राम में **(नः)** हम लोगों की **(अवत)** रक्षा करो **(अस्य)** इस **(मध्वः)** मधुरादि गुणयुक्त रस को **(पिबत)** पीओ, हम लोगों को **(मादयध्वम्)** आनन्दित करो और **(तृप्ताः)** तृप्त होते हुए **(देवयानैः)** विद्वानों के मार्ग जिन से जाना होता उन **(पथिभिः)** मार्गों से **(यात)**

जाओ॥८॥

भावार्थः-विद्वानों के प्रति ईश्वर की यह आज्ञा है कि तुम धार्मिक विद्वान् होकर सब की रक्षा निरन्तर करो और आनन्दित तथा बड़ी ओषधियों के रस से नीरोग हुए सब को आनन्दित और तृप्त कर धर्मात्माओं के मार्गों से आप चलते हुए औरों को निरन्तर उन्हीं मार्गों से चलावें॥८॥

इस सूक्त मे सविता, ऐश्वर्य, विद्वान् और विदुषियों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अड़तीसवां सूक्त और पांचवां वर्ग पूरा हुआ॥

अथ सप्तर्चस्य [एकोनचत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। विश्वेदेवा देवताः। १, २, ५, ७ निचृत्त्रिष्टुप्। ३ स्वराट् त्रिष्टुप्। ४, ६ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वांसौ स्त्रीपुरुषौ किं कुर्यातामित्याह॥

अब सात ऋचा वाले उनतालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में विद्वान् स्त्री-पुरुष क्या करें, इस विषय को कहते हैं॥

ऊ॒र्ध्वो अ॒ग्निः सु॑मति॒ वस्वो॑ अश्रेत् प्रती॒ची जू॒र्णिर्दे॒वता॑तिमेति।
भे॒जाते॒ अद्री॑ र॒थ्ये॑व॒ पन्था॑मृ॒तं होता॑ न इषि॒तो य॑जाति॥ १॥

ऊ॒र्ध्वः। अ॒ग्निः। सु॒ऽम॒ति॒म्। वस्वः॑। अ॒श्रे॒त्। प्र॒ती॒ची। जू॒र्णिः। दे॒व॒ऽता॒ति॒म्। ए॒ति॒। भे॒जा॑ते इति॑। अद्री॒ इति॑। र॒थ्या॑ऽइव। पन्था॑म्। ऋ॒तम्। होता॑। नः॒। इ॒षि॒तः। य॒जा॒ति॒॥ १॥

पदार्थः-(**ऊर्ध्वः**) ऊर्ध्वगामी (**अग्निः**) पावक इव (**सुमतिम्**) श्रेष्ठां प्रज्ञाम् (**वस्वः**) धनस्य (**अश्रेत्**) आश्रयेत् (**प्रतीची**) या प्रत्यगञ्चती (**जूर्णिः**) जीर्णा (**देवतातिम्**) देवैरनुष्ठितं यज्ञम् (**एति**) प्राप्नोति (**भेजाते**) भजतः (**अद्री**) अनिन्दितौ पत्नीयजमानौ (**रथ्येव**) यथा रथेषु साधू अश्वौ (**पन्थाम्**) मार्गम् (**ऋतम्**) सत्यम् (**होता**) दाता (**नः**) अस्मान् (**इषितः**) इष्टः (**यजाति**) यजेत् संगच्छेत्॥ १॥

अन्वयः-या जूर्णिः प्रतीची विदुषी पत्नी ऊर्ध्वोऽग्निरिव देवतातिं सुमतिमश्रेत् रथ्येवर्तं पन्थामेति यथाऽद्री वस्वो भेजाते यथेषितो होता नो यजाति तान् तं च सर्वे सत्कुर्वन्तु॥ १॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। यत्र स्त्रीपुरुषौ कृतबुद्धी पुरुषार्थिनौ सत्कर्मण्याचरतस्तत्र सर्वा श्रीर्विराजते॥ १॥

पदार्थः-जो (**जूर्णिः**) जीर्ण (**प्रतीची**) वा कार्य के प्रति सत्कार करने वाली विदुषी पत्नी (**ऊर्ध्वः**) ऊपर जाने वाले (**अग्निः**) अग्नि के समान (**देवतातिम्**) विद्वानों ने अनुष्ठान किये हुए यज्ञ को और (**सुमतिम्**) श्रेष्ठमति को (**अश्रेत्**) आश्रय करे वा (**रथ्येव**) जैसे रथों में उत्तम घोड़े, वैसे (**ऋतम्**) सत्य (**पन्थाम्**) मार्ग को (**एति**) प्राप्त होती वा जैसे (**अद्री**) निन्दारहित पत्नी यजमान (**वस्वः**) धन को (**भेजाते**) भजते हैं वा जैसे (**इषितः**) इच्छा को प्राप्त (**होता**) देने वाला (**नः**) हम लोगों को (**यजाति**) संग करे उन सब को और उस का, वैसे ही सब सत्कार करें॥ १॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जहाँ स्त्री-पुरुष ऐसे हैं कि जिन्होंने बुद्धि उत्पन्न की है, अच्छे काम में आचरण करते हैं, वहाँ सब लक्ष्मी विराजमान है॥ १॥

पुनस्तौ स्त्रीपुरुषौ किं कुर्यातामित्याह॥

फिर वे स्त्री-पुरुष क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

प्र वा॑वृजे सुप्र॒या ब॒र्हिरे॑षा॒मा वि॒श्पती॑व॒ बीरि॑ट इयाते।
वि॒शाम॒क्तोरु॒षस॑: पू॒र्वहू॑तौ वा॒युः पू॒षा स्व॒स्तये॑ नि॒युत्वा॑न्॥ २॥

प्र। वा॒वृ॒जे॒। सु॒ऽप्र॒याः। ब॒र्हिः। ए॒षा॒म्। आ। वि॒श्पती॑ इ॒वेति॑ वि॒श्पती॑ऽइव। बीरि॑टे। इ॒या॒ते॒ इति॑। वि॒शाम्। अ॒क्तोः। उ॒षस॑ः। पू॒र्वऽहू॑तौ। वा॒युः। पू॒षा। स्व॒स्तये॑। नि॒युत्वा॑न्॥ २॥

पदार्थः-(**प्र**) (**वावृजे**) व्रजति (**सुप्रयाः**) यस्सर्वान् सुष्ठु प्रीणाति (**बर्हिः**) उत्तमं सर्वेषां वर्धकं कर्म (**एषाम्**) मनुष्याणां मध्ये (**आ**) समन्तात् (**विश्पतीव**) विशां प्रजानां पालको राजेव (**बीरिटे**) अन्तरिक्षे (**इयाते**) गच्छतः (**विशाम्**) प्रजानाम् (**अक्तोः**) रात्रेः (**उषसः**) दिवसस्य (**पूर्वहूतौ**) पूर्वैर्विद्वद्भिः कृतायां स्तुतौ (**वायुः**) प्राण इव (**पूषा**) पुष्टिकर्त्ता (**स्वस्तये**) सुखाय (**नियुत्वान्**) नियन्तेश्वरः॥२॥

अन्वयः-यौ स्त्रीपुरुषौ बीरिटे सूर्याचन्द्रमसाविवेयाते विश्पतीवाक्तोरुषसः पूर्वहूताविवाते पूषा वायुरिव नियुत्वानीश्वरो विशां स्वस्तयेऽस्तु एषां मध्यात् यः कश्चित्सुप्रया बर्हिरा प्र वावृजे तान् सर्वान् सर्वे सत्कुर्वन्तु॥२॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। सदैव यौ स्त्रीपुरुषौ न्यायकारिराजवत् प्रजापालनमीश्वरवन्न्यायाचरणं वायुवत् प्रियप्रापणं संन्यासिवत्पक्षपातमोहादिदोषरहितौ स्यातां तौ सर्वार्थसिद्धौ भवेताम्॥२॥

पदार्थः-जो स्त्री-पुरुष (**बीरिटे**) अन्तरिक्ष में सूर्य और चन्द्रमा के समान (**इयाते**) जाते है (**विश्पतीव**) वा प्रजा पालने वाले राजा के समान (**अक्तोः**) रात्रि की (**उषसः**) और दिन की (**पूर्वहूतौ**) अगले विद्वानों ने की स्तुति के निमित्त जाते हैं वा (**पूषा**) पुष्टि करने वाले (**वायुः**) प्राण के समान (**नियुत्वान्**) नियमकर्ता ईश्वर (**विशाम्**) प्रजाजनों के (**स्वस्तये**) सुख के लिये हो (**एषाम्**) इन में से जो कोई (**सुप्रयाः**) सब को अच्छे प्रकार तृप्त करता है वा (**बर्हिः**) उत्तम सब का बढ़ाने वाला कर्म (**आ, प्र, वावृजे**) सब ओर से अच्छे प्रकार प्राप्त होता है, उन सब का सब सत्कार करें॥२॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। सदैव जो स्त्री-पुरुष न्यायकारी राजा के समान प्रजा पालना, ईश्वर के समान न्यायचरण, पवन के समान प्रिय पदार्थ पहुँचाता और संन्यासी के तुल्य पक्षपात और मोहादिदोष त्याग करने वाले होते हैं, वे सर्वार्थ सिद्ध हों॥२॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः।
अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य॥३॥

ज्मयाः। अत्र। वसवः। रन्त। देवाः। उरौ। अन्तरिक्षे। मर्जयन्त। शुभ्राः। अर्वाक्। पथः। उरुऽज्रयः। कृणुध्वम्। श्रोत। दूतस्य। जग्मुषः। नः। अस्य॥३॥

पदार्थः-(**ज्मयाः**) भूमेर्मध्ये (**अत्र**) अस्मिन् संसारे (**वसवः**) विद्यायां कृतवासाः (**रन्त**) रमन्ताम् (**देवाः**) विद्वांसः (**उरौ**) बहुव्यापके (**अन्तरिक्षे**) आकाशे (**मर्जयन्त**) शोधयन्तु (**शुभ्राः**) शुद्धाचाराः (**अर्वाक्**) (**पथः**) मार्गान् (**उरुज्रयः**) बहुगन्तारः (**कृणुध्वम्**) (**श्रोता**) शृणुत। अत्र **द्व्यचोऽतस्तिङ** इति दीर्घः। (**दूतस्य**) (**जग्मुषः**) गन्तॄन् प्राप्तान् वेदितॄन् (**नः**) अस्माकं अस्मान् वा (**अस्य**)॥३॥

अन्वयः-हे उरुञ्जयः शुभ्रा वसवो देवा! यूयमुरावन्तरिक्षेऽत्र ज्मया रन्तार्वाक् पथो मर्जयन्तास्य दूतस्य नो जग्मुषः कृणुध्वमस्माकं विद्याः श्रोता॥३॥

भावार्थः-हे विद्वांसो! यूयं धर्ममार्गान् शुद्धान् प्रचार्य्य दूतवत् सर्वत्र भ्रमणं कृत्वा धर्मं विस्तार्य सर्वान् मनुष्यान् प्राप्तविद्यासुखान् कुरुत॥३॥

पदार्थः-हे **(उरुञ्जयः)** बहुत जाने और **(शुभ्राः)** शुद्ध आचरण करने वाले **(वसवः)** विद्या में वास किये हुए **(देवाः)** विद्वान् जनो! तुम **(उरौ)** बहुव्यापक **(अन्तरिक्षे)** आकाश में **(अत्र)** इस संसार में **(ज्मयाः)** भूमि के बीच **(रन्त)** रमें **(अर्वाक्)** पीछे **(पथः)** मार्गों को **(मर्जयन्त)** शुद्ध करो **(अस्य)** इस **(दूतस्य)** दूत को **(नः)** हम लोगों को **(जग्मुषः)** जाने, प्राप्त होने वा जानने वाले **(कृणुध्वम्)** करो और हमारी विद्याओं को **(श्रोता)** सुनो॥३॥

भावार्थः-हे विद्वानो! तुम धर्ममार्गों को शुद्ध प्रकाशित कर दूत के समान सब जगह घूम, धर्म का विस्तार कर सब मनुष्यों को विद्या सुखयुक्त करो॥३॥

पुनर्विद्वांसः कीदृशाः किं कुर्युरित्याह॥

फिर विद्वान् कैसे हों और क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

ते हि यज्ञेषु यज्ञियासु ऊमाः सधस्थं विश्वे अभि सन्ति देवाः।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम्॥४॥

ते। हि। यज्ञेषु। यज्ञियासः। ऊमाः। सधऽस्थम्। विश्वे। अभि। सन्ति। देवाः। तान्। अध्वरे। उशतः। यक्षि। अग्ने। श्रुष्टी। भगम्। नासत्या। पुरम्ऽधिम्॥४॥

पदार्थः-**(ते)** **(हि)** यतः **(यज्ञेषु)** विद्यादानाऽदानादिव्यवहारेषु **(यज्ञियासः)** यज्ञसिद्धिकराः **(ऊमाः)** रक्षादिकर्तारः **(सधस्थम्)** समानस्थानम् **(विश्वे)** सर्वे **(अभि)** आभिमुख्ये **(सन्ति)** **(देवाः)** विद्वांसः **(तान्)** **(अध्वरे)** अहिंसनीये व्यवहारे **(उशतः)** कामयमानान् **(यक्षि)** संगमयेयम् **(अग्ने)** विद्वन् **(श्रुष्टी)** क्षिप्रम् **(भगम्)** ऐश्वर्यम् **(नासत्या)** अविद्यमानासत्यव्यवहारावध्यापकोपदेशकौ **(पुरन्धिम्)** बहूनां सुखानां धर्तारम्॥४॥

अन्वयः-ते हि यज्ञियास ऊमा विश्वे देवा यज्ञेष्वभि सन्ति तानध्वरे सधस्थमुशतो विदुषोऽहं यक्षि यौ नासत्या पुरन्धिं भगं श्रुष्टी दद्यातां तौ यथाऽहं यक्षि तथा हे अग्ने! त्वमप्येतान् यज॥४॥

भावार्थः-हे मनुष्या! ये सत्यविद्याधर्मप्रकाशका वेदविदः अध्यापकोपदेशका विद्वांसो जगति सर्वान् मनुष्यादीन्नुन्नयन्ति ते हि सर्वदा सर्वथा सर्वैस्सत्कर्तव्या भवन्ति॥४॥

पदार्थः- **(ते)** वे **(हि)** ही **(यज्ञियासः)** यज्ञ सिद्ध करने **(ऊमाः)** और रक्षा करने वाले **(विश्वे)** सब **(देवाः)** विद्वान् **(यज्ञेषु)** विद्या देने न देने के व्यवहारों में **(अभि, सन्ति)** सम्मुख वर्त्तमान हैं **(तान्)** उन **(अध्वरे)** अहिंसनीय व्यवहार में **(सधस्थम्)** एक स्थान को **(उशतः)** चाहने वाले विद्वानों को मैं **(यक्षि)** मिलूं जो **(नासत्या)** असत्यव्यवहाररहित अध्यापक और उपदेशक **(पुरन्धिम्)** बहुत सुखों के धारण करने वाले **(भगम्)** ऐश्वर्य को **(श्रुष्टी)** शीघ्र देवें, जैसे मैं मिलूं, वैसे

ही हे **(अग्ने)** विद्वान्! आप भी इन को मिलो॥४॥

भावार्थः-हे मनुष्यो! जो सत्यविद्या और धर्म के प्रकाश करने वाले वेदवेत्ता अध्यापक, उपदेशक, विद्वान् सब मनुष्य आदि की उन्नति करते हैं, वे ही सर्वदा सर्वथा सब को साकार करने योग्य होते हैं॥४॥

पुनर्विद्वांसः किं विज्ञाय किं ज्ञापयेयुरित्याह॥

फिर विद्वान् जन क्या जान कर क्या दूसरों को जतलावें, इस विषय को अगले मन्त्र में कहते हैं॥

आग्ने॒ गिरो॑ दि॒व आ पृ॑थि॒व्याः मि॒त्रं व॑ह॒ वरु॑ण॒मिन्द्र॑म॒ग्निम्।
आर्य॑मण॒मदि॑तिं॒ विष्णु॑मेषां॒ सर॑स्वती म॒रुतो॑ मादयन्ताम्॥५॥

आ। अ॒ग्ने॒। गिरः॑। दि॒वः॑। आ। पृ॒थि॒व्याः॑। मि॒त्रम्। व॒ह॒। वरु॑णम्। इन्द्र॑म्। अ॒ग्निम्। आ। अ॒र्य॒मण॑म्। अदि॑तिम्। विष्णु॑म्। ए॒षा॒म्। सर॑स्वती। म॒रुतः॑। मा॒द॒य॒न्ता॒म्॥५॥

पदार्थः-(**आ**) (**अग्ने**) विद्वन् (**गिरः**) सुशिक्षिता वाचः (**दिवः**) विद्युत् सूर्यादेर्विद्याप्रकाशिकाः (**आ**) (**पृथिव्याः**) भूम्यादेः (**मित्रम्**) सखायम् (**वह**) (**वरुणम्**) अतिश्रेष्ठम् (**इन्द्रम्**) परमैश्वर्यवन्तं राजानम् (**अग्निम्**) पावकम् (**आ**) (**अर्यमणम्**) न्यायाधीशम् (**अदितिम्**) अन्तरिक्षम् (**विष्णुम्**) व्यापकं वायुम् (**एषाम्**) (**सरस्वती**) विद्यायुक्ता वाणी (**मरुतः**) मनुष्याः (**मादयन्ताम्**) आनन्दयन्तु॥५॥

अन्वयः-हे अग्ने त्वं दिवः पृथिव्या गिर आ वह मित्रं वरुणमिन्द्रमग्निमर्यमणमदितिं विष्णुमावहैषां सरस्वती तां च विदित्वाऽस्मदर्थमा वह, हे विद्वांसो! मरुत एतद्विद्यां दत्वाऽस्मान् भवन्तो मादयन्ताम्॥५॥

भावार्थः-ये मनुष्या विद्युदादिविद्यां प्राप्यान्यान् प्रापयन्ति ते सर्वेषामानन्दकरा भवन्ति॥५॥

पदार्थः-हे (**अग्ने**) विद्वन्! आप (**दिवः**) बिजुली और सूर्यादि प्रकाशवान् पदार्थों की विद्या का प्रकाश करने वाली वा (**पृथिव्याः**) भूमि आदि पदार्थों का प्रकाश करने वाली (**गिरः**) सुन्दर शिक्षित वाणियों को (**आ, वह**) प्राप्त कीजिये (**मित्रम्**) मित्र (**वरुणम्**) अतिश्रेष्ठ (**इन्द्रम्**) परमैश्वर्यवान् राजा (**अग्निम्**) अग्नि (**अर्यमणम्**) न्यायाधीश (**अदितिम्**) अन्तरिक्ष (**विष्णुम्**) व्यापक वायु को (**आ**) प्राप्त कीजिये और जो (**एषाम्**) इनकी (**सरस्वती**) विद्यायुक्त वाणी उस को जान कर हमारे अर्थ (**आ**) प्राप्त कीजिये, हे (**मरुतः**) विद्वान् मनुष्यो! उक्त विद्या को देकर हम लोगों को आप (**मादयन्ताम्**) आनन्दित कीजिये॥५॥

भावार्थः-जो मनुष्य बिजुली आदि की विद्या को प्राप्त होकर औरों को प्राप्त कराते हैं, वे सब का आनन्द करने वाले होते हैं॥५॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

र॒रे ह॒व्यं म॒तिभि॑र्य॒ज्ञिया॑नां॒ नक्ष॒त्कामं॒ मर्त्या॑नामसि॒न्वन्।

धाता॑ र॒यिम॑विदु॒स्यं स॑दा॒सां स॑क्षी॒महि॒ युज्ये॑भि॒र्नु दे॒वैः॥६॥

र॒रे। ह॒व्यम्। म॒तिऽभिः॑। य॒ज्ञिया॑नाम्। नक्ष॑त्। काम॑म्। मर्त्या॑नाम्। असि॑न्वन्। धात॑। र॒यिम्। अ॒वि॒ऽदु॒स्यम्। स॒दा॒ऽसाम्। स॒क्षी॒महि॑। युज्ये॑भिः। नु। दे॒वैः॥६॥

पदार्थः-(**ररे**) दद्याम् (**हव्यम्**) गृहीतुमर्हम् (**मतिभिः**) प्राज्ञैर्मनुष्यैः सह (**यज्ञियानाम्**) यज्ञसम्पादकानाम् (**नक्षत्**) प्राप्नोति (**कामम्**) (**मर्त्यानाम्**) मनुष्याणाम् (**असिन्वन्**) बध्नन्ति (**धाता**) दधाति। अत्र **द्व्यच०** इति दीर्घः। (**रयिम्**) धनम् (**अविदस्यम्**) अक्षीणम् (**सदासाम्**) सदा संसेवनीयम् (**सक्षीमहि**) प्राप्नुयाम (**युज्येभिः**) योक्तुमर्हैः (**नु**) क्षिप्रम् (**देवैः**) विद्वद्भिः सह॥६॥

अन्वयः-ये मतिभिर्युज्येभिर्देवैस्सह यज्ञियानां मर्त्यानां हव्यं काममसिन्वन् यमविदस्यं सदासां रयिं धात य एतैस्सहैतं नक्षत् तमहं ररे वयमेतैस्सहैतं नु सक्षीमहि॥६॥

भावार्थः-ये विद्वांसोऽन्येषां मनुष्याणां काममलं कुर्वन्ति ते पूर्णकामा भवन्ति॥६॥

पदार्थः-जो (**मतिभिः**) प्राज्ञ मनुष्यों के साथ वा (**युज्येभिः**) योग करने योग्य (**देवैः**) विद्वानों के साथ (**यज्ञियानाम्**) यज्ञ सम्पादन करने वाले (**मर्त्यानाम्**) मनुष्यों के (**हव्यम्**) ग्रहण करने योग्य (**कामम्**) काम को (**असिन्वन्**) निबन्ध करते हैं जिस (**अविदस्यम्**) अक्षीण विनाशरहित (**सदासाम्**) सदैव अच्छे प्रकार सेवने योग्य (**रयिम्**) धन को (**धात**) धारण करते हैं वा जो इन के साथ उस को (**नक्षत्**) व्याप्त होता है उस को मैं (**ररे**) देऊं हम सब लोग इन के साथ उस को (**नु**) शीघ्र (**सक्षीमहि**) व्याप्त होवें॥६॥

भावार्थः-जो विद्वान् जिन मनुष्यों का काम पूरा करते हैं, वे पूर्णकाम होते हैं॥६॥

पुनर्विद्वांसोऽन्येभ्यः किं प्रदद्युरित्याह॥

फिर विद्वान् जन औरों के लिये क्या देवें, इस विषय को अगले मन्त्र में कहते हैं॥

नू रोद॑सी अ॒भिष्टु॑ते॒ वसि॑ष्ठैर्ऋ॒तावा॑नो॒ वरु॑णो मि॒त्रो अ॒ग्निः।
यच्छ॑न्तु च॒न्द्रा उ॑प॒मं नो॑ अ॒र्कं यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः॥७॥६॥

नु। रोद॑सी इति। अ॒भिस्तु॑ते॒ इत्य॒भिऽस्तु॑ते। वसि॑ष्ठैः। ऋ॒तऽवा॑नः। वरु॑णः। मि॒त्रः। अ॒ग्निः। यच्छ॑न्तु। च॒न्द्राः। उ॒प॒ऽमम्। नः॒। अ॒र्कम्। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑ः। सदा॑। नः॒॥७॥

पदार्थः-(**नु**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**रोदसी**) द्यावापृथिव्यौ (**अभिष्टुते**) अभितः प्रशंसनीये (**वसिष्ठैः**) अतिशयेन वायसितृभिः (**ऋतावानः**) सत्यं याचमानाः (**वरुणः**) वरः (**मित्रः**) सुहृत् (**अग्निः**) पावक इव विद्यादिशुभगुणप्रकाशितः (**यच्छन्तु**) ददतु (**चन्द्राः**) आह्लादकराः (**उपमम्**) येनोपमीयते तम् (**नः**) अस्मभ्यम् (**अर्कम्**) सत्कर्तव्यमन्नं विचारं वा (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥७॥

अन्वयः-यथा वरुणो मित्रोऽग्निश्चर्तावानश्चन्द्रा वसिष्ठैस्सहाभिष्टुते रोदसी उपममर्कं नो नु यच्छन्तु तथा हे विद्वांसो! यूयं स्वस्तिभिर्नस्सदा पात॥७॥

भावार्थः-ये विद्वांस आप्तैस्सहानुपमं विज्ञानं प्रयच्छन्ति तेऽस्मान् सदा रक्षितुं शक्नुवन्तीति॥७॥
अत्र विश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्येकोनचत्वारिंशत्तमं सूक्तं षष्ठो वर्गश्च समाप्तः॥

पदार्थः-जैसे **(वरुणः)** श्रेष्ठ **(मित्रः)** मित्र **(अग्निः)** अग्नि के समान विद्यादि शुभ गुणों से प्रकाशित और **(ऋतावानः)** सत्य को याचने वा **(चन्द्राः)** हर्ष करने वाले जन **(वसिष्ठैः)** वसाने वाले के साथ **(अभिष्टुते)** सब ओर से प्रशंसित **(रोदसी)** प्रकाश और पृथिवी **(उपमम्)** जिस से उपमा दी जावे उस **(अर्कम्)** सत्कार करने योग्य अन्न वा विचार को **(नः)** हम लोगों के लिये **(नु)** शीघ्र **(यच्छन्तु)** देवें, वैसे हे विद्वानो! **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हमारी **(सदा)** सदैव **(पात)** रक्षा कीजिये॥७॥

भावार्थः-जो विद्वान् जन धर्मात्मा, विद्वानों के साथ जिसकी उपमा नहीं उस विज्ञान को देते हैं, वे हम लोगों की रक्षा कर सकते हैं॥७॥

इस सूक्त में विश्वेदेवों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह उनतालीसवां सूक्त और छठा वर्ग पूरा हुआ॥

अथ सप्तर्चस्य [चत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। विश्वेदेवा देवताः। १ पङ्क्तिः। ३ भुरिक्पङ्क्तिः। ६ विराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ४ विराट्त्रिष्टुप्। ५, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

अब सात ऋचा वाले चालीसवें सूक्त का प्रारम्भ किया जाता है, उसके प्रथम मन्त्र में फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम्।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे॥ १॥

ओ इति। श्रुष्टिः। विदथ्या। सम्। एतु। प्रति। स्तोमम्। दधीमहि। तुराणाम्। यत्। अद्य। देवः। सविता। सुवाति। स्याम। अस्य। रत्निनः। विऽभागे॥ १॥

पदार्थः- (**ओ**) सम्बोधने (**श्रुष्टिः**) आशुकारी (**विदथ्या**) विदथेषु संग्रामादिषु व्यवहारेषु भवा (**सम्**) (**एतु**) सम्यक् प्राप्नोतु (**प्रति**) (**स्तोमम्**) (**दधीमहि**) (**तुराणाम्**) सद्यः कारिणाम् (**यत्**) यः (**अद्य**) इदानीम् (**देवः**) विद्वान् (**सविता**) सत्कर्मसु प्रेरकः (**सुवाति**) जनयति (**स्याम**) भवेम (**अस्य**) विदुषः (**रत्निनः**) बहूनि रत्नानि धनानि विद्यन्ते येषु तान् (**विभागे**) विशेषेण भजनीये व्यवहारे॥ १॥

अन्वयः-ओ विद्वन्! यथा श्रुष्टिर्विदथ्या तुराणां प्रतिस्तोमं समेतु तथैतं स्तोमं वयं दधीमहि यदद्य देवस्सविता विभागेऽस्य रत्निनः स्तोमं सुवाति तथा वयं स्याम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विदुषी माताऽपत्यानि संरक्ष्य सुशिक्ष्य वर्द्धयति तथा विद्वांसोऽस्मान् वर्द्धयन्तु॥ १॥

पदार्थः- (**ओ**) ओ विद्वान्! जैसे (**श्रुष्टिः**) शीघ्र करने वाला (**विदथ्या**) संग्रामादि व्यवहारों में हुई (**तुराणाम्**) शीघ्रकारियों के (**प्रति, स्तोमम्**) समूह-समूह के प्रति (**सम्, एतु**) अच्छे प्रकार प्राप्त होवे, वैसे इस समूह को हम लोग (**दधीमहि**) धारण करे (**यत्**) जो (**अद्य**) अब (**देवः**) विद्वान् (**सविता**) अच्छे कामों में प्रेरणा देने वाला (**विभागे**) विशेष कर सेवने योग्य व्यवहार में (**अस्य**) इस विद्वान् के (**रत्निनः**) उन व्यवहारों को जिन में बहुत रत्न विद्यमान और स्तुति समूह को (**सुवाति**) उत्पन्न करता है, वैसे हम लोग उत्पन्न करने वाले (**स्याम**) हों॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे विदुषी माता सन्तानों की रक्षा कर और अच्छी शिक्षा देकर बढ़ाती है, वैसे विद्वान् जन हम को बढ़ावें॥ १॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु।
दिदेष्टु देव्यदितीरेक्णो वायुश्च यन्नियुवैते भगश्च॥ २॥

मित्रः। तत्। नः। वरुणः। रोदसी इति। च। द्युऽभक्तम्। इन्द्रः। अर्यमा। ददातु। दिदेष्टु। देवी।

अदितिः। रेक्णाः। वायुः। च। यत्। नियुवैते इति निऽयुवैते। भगः। च॥ २॥

पदार्थः-(**मित्रः**) सखा (**तत्**) तम् (**नः**) अस्मभ्यम् (**वरुणः**) जलसमुदायः (**रोदसी**) द्यावापृथिवी (**च**) (**द्युभक्तम्**) यो दिवं भजति तम् (**इन्द्रः**) परमैश्वर्यो राजा (**अर्यमा**) न्यायकारी (**ददातु**) (**दिदेष्टु**) उपदिशतु (**देवी**) विदुषी (**अदितिः**) स्वरूपेणखण्डिता (**रेक्णः**) अधिकं धनम् (**वायुः**) पवनः (**च**) (**यत्**) यत् (**नियुवैते**) योजयेताम् (**भगः**) (**च**)॥ २॥

अन्वयः-ये रोदसीव मित्रोऽर्यमेन्द्रो वरुणो वायुश्च द्युभक्तं तन्नो ददातु देव्यदितिर्भगश्च यद्रेक्णो नियुवैते तत् विद्वानस्माँश्च दिदेष्टु॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यास्सर्वदा पुरुषार्थेन सर्वानैश्वर्ययुक्तान् कारयन्तु॥ २॥

पदार्थः-जो (**रोदसी**) आकाश और पृथिवी के समान (**मित्रः**) मित्र (**अर्यमा**) न्यायकारी (**इन्द्रः**) परम ऐश्वर्यवान् राजा (**वरुणः**) जलसमूह (**वायुः**) और पवन (**च**) भी (**द्युभक्तम्**) जो प्रकाश को सेवता है (**तत्**) उस को (**नः**) हम लोगों के लिये (**ददातु**) देओ और (**देवी**) विदुषी (**अदितिः**) स्वरूप से अखण्डित (**भगः**) और ऐश्वर्यवान् (**च**) भी (**यत्**) जिस (**रेक्णः**) अधिक धन को (**नियुवैते**) निरन्तर जोड़े उस का विद्वान् जन हमें (**च**) भी (**दिदेष्टु**) उपदेश करें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्य सर्वदा पुरुषार्थ से सब को ऐश्वर्ययुक्त करावें॥ २॥

कः सुरक्षितो विद्वान् भवतीत्याह॥

कौन सुरक्षित विद्वान् होता है, इस विषय को अगले मन्त्र में कहते हैं॥

सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति॥ ३॥

सः। इत्। उग्रः। अस्तु। मरुतः। सः। शुष्मी। यम्। मर्त्यम्। पृषत्ऽअश्वाः। अवाथ। उत। ईम्। अग्निः। सरस्वती। जुनन्ति। न। तस्य। रायः। परिऽएता। अस्ति॥ ३॥

पदार्थः-(**सः**) (**इत्**) एव (**उग्रः**) तेजस्वी (**अस्तु**) (**मरुतः**) विद्वांसो मनुष्याः (**सः**) (**शुष्मी**) बहुबली (**यम्**) (**मर्त्यम्**) मनुष्यम् (**पृषदश्वाः**) सिक्तजलाग्निनाऽऽशुगामिनो महान्तः (**अवाथ**) रक्षेत (**उत**) (**ईम्**) सर्वतः (**अग्निः**) पावक इव (**सरस्वती**) शुद्धा वाणी (**जुनन्ति**) प्रेरयन्ति (**न**) (**तस्य**) (**रायः**) धनानि (**पर्येता**) वर्जिता (**अस्ति**)॥ ३॥

अन्वयः-हे मरुतः ! पृषदश्वा यं मर्त्यमवाथ स इदेव उग्रः स शुष्म्यस्तु यं विद्वांसो जुनन्ति तस्य रायः पर्येता न जायत उतेमग्निरिव सरस्वती तस्योत्तमाऽस्ति॥ ३॥

भावार्थः-यान् मनुष्यान् विद्वांसो रक्षन्ति ते विद्वांसो भूत्वा धनैश्वर्यं प्राप्याऽन्यानपि रक्षितुं शक्नुवन्ति॥ ३॥

पदार्थः-हे (**मरुतः**) विद्वान् मनुष्यो ! (**पृषदश्वाः**) सींचे हुए जल और अग्नि से जल्दी चलने वाले बढ़े (**यम्**) जिस (**मर्त्यम्**) मनुष्य को (**अवाथ**) रक्खें (**स, इत्**) वही (**उग्रः**) तेजस्वी (**सः**) वह

(शुष्मी) बहुत बलवान् **(अस्तु)** हो जिस को विद्वान् **(जुनन्ति)** प्रेरणा देते हैं **(तस्य)** उस के **(रायः)** धनों को **(पर्येता)** वर्जन करने वाला **(न)** नहीं होता है **(उत, ईम्)** और सब ओर से **(अग्निः)** अग्नि के समान **(सरस्वती)** शुद्ध वाणी उस की उत्तम **(अस्ति)** है॥३॥

भावार्थः-जिन मनुष्यों की विद्वान् जन रक्षा करते हैं, वे विद्वान् हो धन और ऐश्वर्य को पाकर औरों की भी रक्षा कर सकते हैं॥३॥

के राजानो भवितुमर्हन्तीत्याह॥

कौन राजा होने योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः।
सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान्॥४॥

अयम्। हि। नेता। वरुणः। ऋतस्य। मित्रः। राजानः। अर्यमा। अपः। धुरिति धुः। सुऽहवा। देवी। अदितिः। अनर्वा। ते। नः। अंहः। अति। पर्षन्। अरिष्टान्॥४॥

पदार्थः-(**अयम्**) (**हि**) (**नेता**) नयनकर्ता (**वरुणः**) श्रेष्ठः (**ऋतस्य**) सत्यस्य (**मित्रः**) सखा (**राजानः**) (**अर्यमा**) न्यायेशः (**अपः**) सुकर्म (**धुः**) दध्युः (**सुहवा**) सुष्ठुदानादानाः (**देवी**) देदीप्यमाना (**अदितिः**) अखण्डिता (**अनर्वा**) अविद्यमानाश्वगमनेव (**ते**) (**नः**) अस्मान् (**अंहः**) अपराधात् (**अति**) (**पर्षन्**) उल्लङ्घयेयुः (**अरिष्टान्**) अहिंसितान्॥४॥

अन्वयः-येऽयं नेता वरुणो मित्रोऽर्यमा च सुहवा राजानो ह्यृतस्यापो धुस्तेऽनर्वा देव्यदितिरिव नोऽरिष्टानंहोऽति पर्षन्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव राजानो भवन्ति ये न्यायं शुभान् गुणान् सर्वेषु मैत्रीं च भावयन्ति त एवापराधाचरणाज्जनान् पृथग्रक्षितुमर्हन्ति त एव राजानो भवितुमर्हन्ति॥४॥

पदार्थः-जो (**अयम्**) यह (**नेता**) न्यायकर्त्ता (**वरुणः**) श्रेष्ठ (**मित्रः**) मित्र (**अर्यमा**) और न्यायाधीश (**सुहवा**) सुन्दर देने लेने वाले (**राजानः**) राजजन (**हि**) ही (**ऋतस्य**) सत्य के (**अपः**) कर्म को (**धुः**) धारण करें (**ते**) वे (**अनर्वा**) नहीं है घोड़े की चाल जिस की उस (**देवी**) देदीप्यमान (**अदितिः**) अखण्डित नीति के समान (**नः**) हम लोगों को (**अंहः**) अपराध से (**अरिष्टान्**) न विनाश किये हुए (**अति, पर्षन्**) उल्लंघे अर्थात् छोड़े॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही राजा होते हैं, जो न्याय, श्रेष्ठ गुण और सबों में मित्रता की भावना कराते हैं, वे ही अपराध के आचरण से लोगों को दूर रखने योग्य होते हैं और राजा होने योग्य होते हैं॥४॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः।

विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्॥५॥

अस्य। देवस्य। मीळ्हुषः। वयाः। विष्णोः। एषस्य। प्रऽभृथे। हविःऽभिः। विदे। हि। रुद्रः। रुद्रियम्। महिऽत्वम्। यासिष्टम्। वर्तिः। अश्विनौ। इरावत्॥५॥

पदार्थः-(**अस्य**) (**देवस्य**) देदीप्यमानस्य सकलसुखदातुः (**मीळ्हुषः**) जलेनेव सुखसेचकस्य (**वयाः**) प्रापकः (**विष्णोः**) विद्युदिव व्यापकस्येश्वरस्य (**एषस्य**) सर्वत्र प्राप्तव्यस्य (**प्रभृथे**) प्रकर्षेण धारिते जगति (**हविर्भिः**) होतव्यैः पदार्थैरिवादत्तैः शान्तैश्चित्तादिभिः (**विदे**) प्राप्नोमि (**हि**) (**रुद्रः**) दुष्टानां रोदयिता (**रुद्रियम्**) प्राणसम्बन्धि (**महित्वम्**) महत्त्वम् (**यासिष्टम्**) प्राप्नुतः (**वर्तिः**) मार्गम् (**अश्विनौ**) सूर्याचन्द्रमसौ (**इरावत्**) अन्नाद्यैश्वर्ययुक्तम्॥५॥

अन्वयः-यथाश्विना अस्य मीळ्हुषो विष्णोरेषस्य देवस्य हविर्भिः प्रभृथे जगतीरावद्वर्तिर्महित्वं यासिष्टं तस्य रुद्रियं वया रुद्रोऽहं हि विदे॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यस्येश्वरस्य महिमानं प्राप्य सूर्यादयो लोकाः प्रकाशयन्ति तस्यैवोपासनं सर्वस्वेन कर्तव्यम्॥५॥

पदार्थः-जैसे (**अश्विना**) सूर्य और चन्द्रमा (**अस्य**) इस (**मीळ्हुषः**) जल के समान सुख सींचने वाला (**विष्णोः**) बिजुली के समान व्यापक ईश्वर (**एषस्य**) जो कि सर्वत्र प्राप्त होने (**देवस्य**) और निरन्तर प्रकाशमान सकल सुख देनेवाला उसके (**हविर्भिः**) होमने योग्य पदार्थों के समान ग्रहण किये शान्त चितादिकों से (**प्रभृथे**) उत्तमता से धारण किये हुए जगत् में (**इरावत्**) अन्नादि ऐश्वर्य्य युक्त (**वर्तिः**) मार्ग को और (**महित्वम्**) महत्व को (**यासिष्टम्**) प्राप्त होते हैं, उस ईश्वर की (**रुद्रियम्**) प्राणसम्बन्धी महिमा को (**वयाः**) प्राप्त करने (**रुद्रः**) दुष्टों को रुलाने वाला मैं (**हि**) ही (**विदे**) प्राप्त होता हूँ॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जिस ईश्वर की महिमा को पाकर सूर्य आदि प्रकाश करते हैं, उसी को उपासना सर्वस्व से करनी चाहिये॥५॥

पुनर्विद्वांसः किं कुर्वन्तीत्याह॥

फिर विद्वान् जन क्या करते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

मात्र पूषन्नाघृण इरस्यो वरूत्री यद्रातिषाचश्च रासन्।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु॥६॥

मा। अत्र। पूषन्। आऽघृणे। इरस्यः। वरूत्री। यत्। रातिऽसाचः। च। रासन्। मयःऽभुवः। नः। अर्वन्तः। नि। पान्तु। वृष्टिम्। परिऽज्मा। वातः। ददातु॥६॥

पदार्थः-(**मा**) (**अत्र**) अस्मिन् (**जगति**) (**पूषन्**) पुष्टिकर्तः (**आघृणे**) सर्वतो दीप्ते (**इरस्यः**) प्राप्तुं योग्यः (**वरूत्री**) वर्तुमर्हा (**यत्**) याः (**रातिषाचः**) दानकर्तारः (**च**) (**रासन्**) प्रयच्छन्ति (**मयोभुवः**) शुभं भावुकाः (**नः**) अस्मान् (**अर्वन्तः**) प्राप्नुवन्तः (**नि**) नितराम् (**पान्तु**) रक्षन्तु (**वृष्टिम्**)

(परिज्मा) यः परितस्सर्वतो गच्छति सः **(वातः)** वायुः **(ददातु)**॥६॥

अन्वयः-हे आघृणे पूषन्! यथा परिज्मा वातो वृष्टिं ददातु तथा मयोभुवोऽर्वन्तो रातिषाच आप्ता नो नि पान्तु यद्या वरूत्री वरणीया विद्यास्ति तां च रासन् तथेरस्यस्त्वं कुर्याः माऽत्र विद्वेषी भवेः॥६॥

भावार्थः-ये विद्वांस आप्तवद्वर्तित्वा सर्वेभ्यः सुखं विद्यां च प्रयच्छन्ति ते सर्वाभिरक्षकास्सन्ति॥६॥

पदार्थः-हे **(आघृणे)** सब ओर से प्रकाशित **(पूषन्)** पुष्टि करने वाले! जैसे **(परिज्मा)** सब ओर से जो जाता है वह **(वातः)** वायु **(वृष्टिम्)** वर्षा को **(ददातु)** देवे वैसे **(मयोभुवः)** श्रेष्ठता हुवाने वाले **(अर्वन्तः)** प्राप्त होते हुए **(रातिषाचः)** दानकर्ता जन **(नः)** हम लोगों की **(नि, पान्तु)** निरन्तर रक्षा करें और **(यत्)** जो **(वरूत्री)** स्वीकार करने योग्य विद्या है **(च)** उसी को भी **(रासन्)** देते हैं, वैसे **(इरस्यः)** प्राप्त होने योग्य आप करें **(मा)** और मत **(अत्र)** इस जगत् में विद्वेषी होओ॥६॥

भावार्थः-जो विद्वान् जन श्रेष्ठ जनों के तुल्य वर्त कर सब के लिये सुख वा विद्या देते हैं, वे सब के सब ओर से रक्षक हैं॥६॥

पुनरध्यापकोपदेशिका स्त्रियः किं कुर्युरित्याह॥

फिर पढ़ाने और उपदेश करने वाली स्त्रियाँ क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः॥७॥७॥

नु। रोदसी इति। अभिस्तुते इत्यभिऽस्तुते। वसिष्ठैः। ऋतऽवानः। वरुणः। मित्रः। अग्निः। यच्छन्तु। चन्द्राः। उपऽमम्। नः। अर्कम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥७॥

पदार्थः-(नु) क्षिप्रम्। अत्र **ऋचि तुनुघे**ति दीर्घः। **(रोदसी)** द्यावापृथिव्या इव **(अभिष्टुते)** आभिमुख्येनाध्यापयन्त्यावुपदिशन्त्यावध्यापकोपदेशिके **(वसिष्ठैः)** अतिशयेन धनाढ्यैः सह **(ऋतावानः)** सत्यस्य प्रकाशिकाः **(वरुणः)** जलमिव शान्तिप्रदः **(मित्रः)** सखेव प्रियाचारः **(अग्निः)** पावक इव प्रकाशितयशाः **(यच्छन्तु)** ददतु **(चन्द्राः)** आनन्ददाः **(उपमम्)** उपमेयसाधकतमम् **(नः)** अस्मभ्यम् **(अर्कम्)** सत्कर्तव्यं धनधान्यम् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)**॥७॥

अन्वयः-ये अध्यापकोपदेशिके रोदसी इवाभिष्टुते वसिष्ठैस्सह यथा मित्रो वरुण अग्निश्च चन्द्रा न उपममर्कं न यच्छन्तु तथाऽस्मानृतावानः कन्या सततं विद्याः प्रयच्छन्तु हे विदुष्यः स्त्रियो! यूयं स्वस्तिभिर्नः सदा पात॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। या भूमिवत् क्षमाशीलाः श्रीवच्छोभमाना जलवच्छान्ताः सखीवदुपकारिण्यः विदुष्योऽध्यापिका स्युस्ताः सकलाः कन्या अध्यापनेन सर्वास्त्रिय-श्चोपदेशेनान्दयन्त्विति॥७॥

अत्र विश्वेदेवगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति चत्वारिंशत्तमं सूक्तं सप्तमो वर्गश्च समाप्तः॥

पदार्थः-जो पढ़ाने और उपदेश करने वाली **(रोदसी)** आकाश और पृथिवी के समान **(अभिष्टुते)** सामने पढ़ाती वा उपदेश करती वे **(वसिष्ठैः)** अतीव धनाढ्यों के साथ जैसे **(मित्रः)** मित्र के समान प्यारे आचरण करने वाला **(वरुणः)** जल के समान शान्ति देने वाली और **(अग्निः)** अग्नि के समान प्रकाशित यश जन तथा **(चन्द्राः)** आनन्द देने वाले **(नः)** हमारे लिये **(उपमम्)** उपमा जिस को दी जाती उस को अतीव सिद्ध कराने वाले **(अर्कम्)** सत्कार करने योग्य धन धान्य को **(नु)** शीघ्र **(यच्छन्तु)** देवें, वैसे हम लोगों को **(ऋतावानः)** सत्य की प्रकाश करने वाली कन्या जन निरन्तर विद्या देवें, हे विदुषी स्त्रियो! **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदैव **(पात)** रक्षा करो॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो भूमि के तुल्य क्षमाशील, लक्ष्मी के तुल्य शोभती हुई, जल के तुल्य शान्त, सहेली के तुल्य उपकार करने वाली विदुषी पढ़ाने वाली हों वे सब कन्याओं को पढ़ा के और सब स्त्रियों को उपदेश से आनन्दित करें॥७॥

इस सूक्त में विश्वेदेवों के गुण और कृत्य का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह चालसीवाँ सूक्त और सातवाँ वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य [एकचत्वारिंशत्तमस्य] सूक्तस्य १-७ वसिष्ठर्षिः। १ लिङ्गोक्तदेवताः। २-६ भगः। ७ उषाः। १ निचृज्जगती छन्दः। निषादः स्वरः। २, ३, ५, ७ निचृत्त्रिष्टुप्। ६ त्रिष्टुप्छन्दः। धैवतः स्वरः। ४ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ प्रातरुत्थाय यावच्छयनं तावन्मनुष्यैः किं किं कर्तव्यमित्याह॥

अब सात ऋचा वाले इक्तालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में प्रातःकाल उठ के जब तक सोवें तब तक मनुष्यों को क्या-क्या करना चाहिये इसविषय को कहते हैं॥

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम॥ १॥

प्रातः। अग्निम्। प्रातः। इन्द्रम्। हवामहे। प्रातः। मित्रावरुणा। प्रातः। अश्विना। प्रातः। भगम्। पूषणम्। ब्रह्मणः। पतिम्। प्रातरिति। सोमम्। उत। रुद्रम्। हुवेम॥ १॥

पदार्थः-(**प्रातः**) प्रभाते (**अग्निम्**) पावकम् (**प्रातः**) (**इन्द्रम्**) विद्युतं सूर्यं वा (**हवामहे**) होमेन विचारेण प्रशंसेम (**प्रातः**) (**मित्रावरुणा**) प्राणोदानाविव सखिराजानौ (**प्रातः**) (**अश्विना**) सूर्याचन्द्रमसौ वैद्यावध्यापकौ वा (**प्रातः**) (**भगम्**) ऐश्वर्यम् (**पूषणम्**) पुष्टिकरं वायुम् (**ब्रह्मणस्पतिम्**) ब्रह्मणो वेदस्य ब्रह्माण्डस्य सकलैश्वर्यस्य वा स्वामिनं जगदीश्वरम् (**प्रातः**) (**सोमम्**) सर्वौषधिगणम् (**उत**) (**रुद्रम्**) पापफलदानेन पापिनां रोदयितारं पापफलभोगेन रोदकं जीवं वा (**हुवेम**) प्रशंसेम॥ १॥

अन्वयः-हे मनुष्या! यथा वयं प्रातरग्निं प्रातरिन्द्रं प्रातर्मित्रावरुणा प्रातरश्विना हवामहे प्रातर्भगं पूषणं ब्रह्मणस्पतिं सोममुत प्राता रुद्रं हुवेम तथा यूयमप्याह्वयत॥ १॥

भावार्थः-मनुष्यैः रात्रेः पश्चिमे याम उत्थायावश्यकं कृत्वा ध्यानेन शरीरस्थं ब्रह्माण्डस्य वाऽग्निं विद्युतं प्राणोदानौ मित्राणि सूर्याचन्द्रमसावैश्वर्यं पुष्टिः परमेश्वर ओषधिगणः जीवश्च विचारेण वेदितः यः पुनरग्निहोत्रादिभिः कर्मभिः सर्वं जगदुपकृत्य कृतकृत्यैर्भवितव्यम्॥ १॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**प्रातः**) प्रभात काल में (**अग्निम्**) अग्नि को (**प्रातः**) प्रभात समय में (**इन्द्रम्**) बिजुली वा सूर्य को (**प्रातः**) प्रातः समय (**मित्रावरुणाः**) प्राण और उदान के समान मित्र और राजा को तथा (**प्रातः**) प्रभात काल (**अश्विना**) सूर्य चन्द्रमा वैश्व वा पढ़ाने वालों की (**हवामहे**) विचार से प्रशंसा करें (**प्रातः**) प्रभात समय (**भगम्**) ऐश्वर्य्य को (**पूषणम्**) पुष्टि करने वाले वायु को (**ब्रह्मणस्पतिम्**) वेद ब्रह्माण्ड वा सकलैश्वर्य के स्वामी जगदीश्वर को (**सोमम्**) समस्त ओषधियों को (**उत**) और (**प्रातः**) प्रभात समय (**रुद्रम्**) फल देने से पापियों को रुलाने वाले ईश्वर वा पाप फल भोगने से रोने वाले जीव की (**हुवेम**) प्रशंसा करें, वैसे तुम भी प्रशंसा करो॥ १॥

भावार्थः-मनुष्यों को रात्रि के पिछले पहर में उठ कर आवश्यक कार्य्य कर ध्यान से शरीरस्थ वा ब्रह्माण्डस्थ वा बिजुली, प्राण, उदान, मित्र, सूर्य, चन्द्रमा, ऐश्वर्य, पुष्टि, परमेश्वर, ओषधिगण और जीव विचार से जानने योग्य हैं, फिर अग्निहोत्रादि कामों से सब जगत् का उपकार कर कृतकृत्य होना चाहिये॥ १॥

पुनर्मनुष्यैः किं कर्त्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह॥ २॥

प्रातःऽजितम्। भगम्। उग्रम्। हुवेम। वयम्। पुत्रम्। अदितेः। यः। विऽधर्ता। आध्रः। चित्। यम्। मन्यमानः। तुरः। चित्। राजा। चित्। यम्। भगम्। भक्षि इति। आह॥ २॥

पदार्थः-(**प्रातर्जितम्**) प्रातरेव जेतुमुत्कर्षयितुं योग्यम् (**भगम्**) ऐश्वर्यम् (**उग्रम्**) तेजोमयम् (**हुवेम**) शब्दयेम (**वयम्**) (**पुत्रम्**) पुत्रमिव वर्तमानम् (**अदितेः**) अन्तरिक्षस्थाया भूमेः प्रकाशस्य वा (**यः**) (**विधर्ता**) विविधानां लोकानां धर्ता (**आध्रः**) यः सर्वैस्समन्ताद् ध्रियते (**चित्**) अपि (**यम्**) (**मन्यमानः**) विजानन् (**तुरः**) शीघ्रकारी (**चित्**) इव (**राजा**) प्रकाशमानः (**चित्**) अपि (**यम्**) (**भगम्**) ऐश्वर्यम् (**भक्षि**) भजेयं सेवेय (**इति**) अनेन प्रकारेण (**आह**) उपदिशतीश्वरः॥ २॥

अन्वयः-हे मनुष्या! योऽदितेर्विधर्ताऽऽध्रश्चिन्मन्यमानस्तुरो राजा चिदिव परमात्मा यं भगं प्रातुमाह यत्प्रेरिता वयं पुत्रमिव प्रातर्जितमुग्रं भगं हुवेमेति यं चिदहं भक्षि तं सर्व उपासीरन्॥ २॥

भावार्थः-अत्रोपमावाचकलुप्तोपमालङ्कारौ। मनुष्यैः प्रातरुत्थाय सर्वाधारं परमेश्वरं ध्यात्वा सर्वाणि कर्तव्यानि कार्याणि विचिन्त्य धर्मेण पुरुषार्थेन प्राप्तमैश्वर्यं भोक्तव्यं भोजयितव्यमितीश्वर उपदिशति॥ २॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**अदितेः**) अन्तरिक्षस्थ भूमि वा प्रकाश का (**विधर्ता**) वा विविध लोकों का धारण करने वाला (**आध्रः, चित्**) जो सब ओर से धारण सा किया जाता (**मन्यमानः**) जानता हुआ (**तुरः**) शीघ्रकारी (**राजा**) प्रकाशमान (**चित्**) निश्चय से परमात्मा (**यम्**) जिस (**भगम्**) ऐश्वर्य्य की प्राप्ति होने को (**आह**) उपदेश देता है, जिसकी प्रेरणा पाये हुए (**वयम्**) हम लोग (**पुत्रम्**) पुत्र के समान (**प्रातर्जितम्**) प्रातःकाल ही उत्तमता से प्राप्त होने को योग्य (**उग्रम्**) तेजोमय तेज भरे हुए (**भगम्**) ऐश्वर्य्य को (**हुवेम**) कहें (**इति**) इस प्रकार (**यम्, चित्**) जिस को निश्चय से मैं (**भक्षि**) सेवूं, उसकी **[**सब**]** उपासना करें॥ २॥

भावार्थः-इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। मनुष्यों को चाहिये कि प्रातः समय उठकर सब के आधार परमेश्वर का ध्यान कर सब करने योग्य कामों को नाना प्रकार से चिंतवन कर धर्म और पुरुषार्थ से पाये हुए ऐश्वर्य को भोगें वा भुगावें, यह ईश्वर उपदेश देता है॥ २॥

पुनर्मनुष्यैरीश्वरः किमर्थं प्रार्थनीय इत्याह॥

फिर मनुष्यों को ईश्वर की प्रार्थना क्यों करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम॥ ३॥

भग। प्रणेतरिति प्रऽनेतः। भगः। सत्यऽराधः। भगः। इमाम्। धियम्। उत्। अवा। ददत्। नः। भग।

प्र। नः। जनय। गोभिः। अश्वैः। भग। प्र। नृऽभिः। नृऽवन्तः। स्याम॥ ३॥

पदार्थः-(**भग**) सकलैश्वर्ययुक्त (**प्रणेतः**) प्रकर्षेण प्रापक (**भग**) सेवनीयतम (**सत्यराधः**) सत्यं राधः प्रकृत्याख्यं धनं यस्य तत्सम्बुद्धौ (**भग**) सकलैश्वर्यप्रद (**इमाम्**) वर्तमानां प्रशस्ताम् (**धियम्**) प्रज्ञाम् (**उत्**) (**अव**) रक्ष वर्धय वा। अत्र **द्व्यचो०** इति दीर्घः। (**ददत्**) प्रयच्छन् (**नः**) अस्मभ्यम् (**भग**) सर्वसामग्रीप्रद (**प्र**) (**नः**) अस्मभ्यम् (**जनय**) (**गोभिः**) धेनुभिः पृथिव्यादिभिर्वा (**अश्वैः**) तुरङ्गैर्महद्भिर्विद्युदादिभिर्वा (**भग**) सकलैश्वर्ययुक्त (**प्र**) (**नृभिः**) नायकैः श्रेष्ठैर्मनुष्यैः (**नृवन्तः**) बहूत्तममनुष्ययुक्ताः (**स्याम**) भवेम॥ ३॥

अन्वयः-हे भग प्रणेतर्भग सत्यराधो भगेश्वर! त्वं कृपया न इमां धियं ददस्मानुदव हे भग! नो गोभिरश्वैः प्र जनय, हे भग! त्वमस्मान्नृभिः प्र जनय यतो वयं नृवन्तस्स्याम॥ ३॥

भावार्थः-ये मनुष्या ईश्वराज्ञाप्रार्थनाध्यानोपासनानुष्ठानपुरःसरं पुरुषार्थं कुर्वन्ति ते धर्मात्मानो भूत्वा सुसहायास्सन्तः सकलैश्वर्यं लभन्ते॥ ३॥

पदार्थः-हे (**भग**) सकलैश्वर्य्ययुक्त (**प्रणेतः**) उत्तमता से प्राप्ति कराने वाले (**भग, सत्यराधः**) अत्यन्त सेवा करने योग्य प्रकृतिरूप धनयुक्त (**भग**) सकल ऐश्वर्य देने वाले ईश्वर! आप कृपा कर (**नः**) हम लोगों के लिये (**इमाम्**) इस प्रशंसायुक्त (**धियम्**) उत्तम बुद्धि को (**ददत्**) देते हुए हम लोगों की (**उत्, अव**) उत्तमता से रक्षा कीजिये, हे (**भग**) सर्वसामग्री युक्त! (**नः**) हम लोगों के लिये (**गोभिः**) गौवें वा पृथिवी आदि से (**अश्वैः**) वा शीघ्रगामी घोड़ा वा पवन वा बिजुली आदि से (**प्र, जनय**) उत्तमता से उत्पत्ति दीजिये, हे (**भग**) सकलैश्वर्य्य युक्त! आप हम लोगों को (**नृभिः**) नायक श्रेष्ठ मनुष्यों से (**प्र**) उत्तम उत्पत्ति दीजिये जिस से हम लोग (**नृवन्तः**) बहुत उत्तम मनुष्य युक्त (**स्याम**) हों॥ ३॥

भावार्थः-जो मनुष्य ईश्वर की आज्ञा, प्रार्थना, ध्यान और उपासना का आचरण पहिले करके पुरुषार्थ करते हैं, वे धर्मात्मा होकर अच्छे सहायवान् हुए सकल ऐश्वर्य को प्राप्त होते हैं॥ ३॥

पुनर्मनुष्यैः केन कीदृशैर्भवितव्यमित्याह॥

फिर मनुष्यों को किससे कैसा होना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्।
उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम॥ ४॥

उत। इदानीम्। भगऽवन्तः। स्याम। उत। प्रऽपित्वे। उत। मध्ये। अह्नाम्। उत। उत्ऽइता। मघऽवन्। सूर्यस्य। वयम्। देवानाम्। सुऽमतौ। स्याम॥ ४॥

पदार्थः-(**उत**) (**इदानीम्**) वर्तमानसमये (**भगवन्तः**) बहूत्तमैश्वर्ययुक्ताः (**स्याम**) (**उत**) (**प्रपित्वे**) प्रकर्षेणैश्वर्यस्य प्राप्तौ (**उत**) (**मध्ये**) (**अह्नाम्**) दिनानाम् (**उत**) (**उदिता**) उदये (**मघवन्**) परमपूजितैश्वर्येश्वर (**सूर्यस्य**) सवितृलोकस्य (**वयम्**) (**देवानाम्**) आप्तानां विदुषाम् (**सुमतौ**) (**स्याम**) भवेम॥ ४॥

अन्वयः-हे मघवन् जगदीश्वरेदानीमुत प्रपित्व उताह्नां मध्य उत सूर्यस्योदितोतापि सायं भगवन्तो वयं स्याम देवानां सुमतौ स्याम॥४॥

भावार्थः-ये मनुष्या जगदीश्वराश्रयाज्ञापालनेन विद्वत्सङ्गादतिपुरुषार्थिनो भूत्वा धर्मार्थकाममोक्षसिद्धये प्रततन्ते त सकलैश्वर्ययुक्ताः सन्तस्त्रिषु कालेषु सुखिनो भवन्ति॥४॥

पदार्थः-हे **(मघवन्)** परमपूजित ऐश्वर्य्य युक्त जगदीश्वर! **(इदानीम्)** इस समय **(उत)** और **(प्रपित्वे)** उत्तमता से ऐश्वर्य्य की प्राप्ति समय में **(उत)** और **(अह्नाम्)** दिनों में **(मध्ये)** बीच **(उत)** और **(सूर्यस्य)** सूर्य लोक के **(उदिता)** उदय में **(उत)** और सायंकाल में **(भगवन्तः)** बहुत उत्तम ऐश्वर्ययुक्त **(वयम्)** हम लोग **(स्याम)** हों **(देवानाम्)** तथा आप्तविद्वानों की **(सुमतौ)** श्रेष्ठ मति में स्थिर हों॥४॥

भावार्थः-जो मनुष्य जगदीश्वर का आश्रय और आज्ञा पालन से विद्वानों के संग से अति पुरुषार्थी होकर धर्म, अर्थ, काम और मोक्ष की सिद्धि के लिये प्रयत्न करते हैं, वे सकलैश्वर्य युक्त होते हुए भूत, भविष्यत् और वर्त्तमान इन तीनों कालों में सुखी होते हैं॥४॥

पुनर्मनुष्याः किं कृत्वा कीदृशा भवेयुरित्याह॥

फिर मनुष्य क्या करके कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह॥५॥

भगः। एव। भगवान्। अस्तु। देवाः। तेन। वयम्। भगवन्तः। स्याम। तम्। त्वा। भग। सर्वः। इत्। जोहवीति। सः। नः। भग। पुरः।एता। भव। इह॥५॥

पदार्थः-(**भगः**) भजनीयः **(एव)** **(भगवान्)** सकलैश्वर्यसम्पन्नः **(अस्तु)** **(देवाः)** विद्वांसः **(तेन)** **(वयम्)** **(भगवन्तः)** सकलैश्वर्ययुक्ताः **(स्याम)** **(तम्)** **(त्वा)** त्वाम् **(भग)** सर्वैश्वर्यप्रद **(सर्वः)** सम्पूर्णः **(इत्)** एव **(जोहवीति)** भृशं प्रशंसति **(सः)** **(नः)** अस्माकम् **(भग)** भजनीय वस्तुप्रद **(पुरएता)** यः पुर एति अग्रगामी भवति सः **(भव)** **(इह)** अस्मिन् वर्तमाने समये॥५॥

अन्वयः-हे भग! यो भवान् भगो भगवानस्तु तेनैव भगवता सह वयं देवा भगवन्तस्स्याम, हे भग! यस्सर्वो जनस्तं त्वा जोहवीति स इह नोऽस्माकं पुरएताऽस्तु हे भग! त्वमिदस्मर्थं पुरएता भव॥५॥

भावार्थः-हे जगदीश्वर! यो भगवान् भवान् सर्वान् सर्वमैश्वर्यं ददाति तत्सहायेन सर्वे मनुष्याः धनाढ्या भवन्तु॥५॥

पदार्थः-हे **(भगः)** सकल ऐश्वर्य्य के देने वाले! जो आप **(भगः)** अत्यन्त सेवा करने योग्य **(भगवान्)** सकलैश्वर्य्यसम्पन्न **(अस्तु)** होओ **(तेनैव)** उन्हीं भगवान् के साथ **(वयम्)** हम **(देवाः)** विद्वान् लोग **(भगवन्तः)** सकलैश्वर्य्य युक्त **(स्याम)** हों, हे सकलैश्वर्य्य देने वाले! जो **(सर्वः)** सर्व मनुष्य **(तम्)** उन **(त्वा)** आपको **(जोहवीति)** निरन्तर प्रशंसा करता है **(सः)** वह **(इह)** इस समय में **(नः)** हमारे **(पुरएता)** आगे जाने वाला हो और हे **(भग)** सेवा करने योग्य वस्तु देने वाले! आप ही

हमारे अर्थ आगे जाने वाले **(भव)** हूजिये॥५॥

भावार्थः-हे जगदीश्वर जो सकलैश्वर्य्यवान् आप सब को सब ऐश्वर्य्य देते हैं, उन के सहाय से सब मनुष्य धनाढ्य होवें॥५॥

पुनर्मनुष्याः कीदृशा भूत्वा किं प्राप्य किं कुर्युरित्याह॥

फिर मनुष्यो को कैसे होकर क्या पाकर क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

सम॑ध्व॒रायो॒षसो॑ नमन्त दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑।
अ॒र्वा॒ची॒नं व॑सुविद॒ं भग॑ं नो॒ रथ॑मि॒वाश्वा॑ वा॒जिन॒ आ व॑हन्तु॥६॥

सम्। अ॒ध्व॒राय॑। उ॒षस॑:। न॒म॒न्त॒। द॒धि॒क्रावा॑ऽइव। शुच॑ये। प॒दाय॑। अ॒र्वा॒ची॒नम्। व॒सु॒ऽविद॑म्। भग॑म्। न॒:। रथ॑म्ऽइव। अश्वा॑:। वा॒जिन॑:। आ। व॒ह॒न्तु॒॥६॥

पदार्थः-(**सम्**) (**अध्वराय**) हिंसारहिताय धर्म्याय व्यवहाराय (**उषसः**) प्रभातवेलायाः (**नमन्त**) नमन्ति (**दधिक्रावेव**) धारकान् क्रमत इव (**शुचये**) पवित्राय (**पदाय**) प्राप्तव्याय (**अर्वाचीनम्**) इदानीन्तनं नूतनम् (**वसुविदम्**) यो वसूनि विन्दति प्राप्नोति तम् (**भगम्**) सर्वैश्वर्ययुक्तम् (**नः**) अस्मान् (**रथमिव**) रमणीयं यानमिव (**अश्वाः**) महान्तो वेगवन्तस्तुरङ्गा आशुगामिनो विद्युदादयो वा (**वाजिनः**) (**आ**) (**वहन्तु**)॥६॥

अन्वयः-रथमिवाश्वा ये वाजिनो जनाः शुचयेऽध्वराय पदायोषसो दधिक्रावेव सन्नमन्त तेऽर्वाचीनं वसुविदं भगं न आ वहन्तु॥६॥

भावार्थः-अत्रोपमालङ्कारः। ये मनुष्याः प्रातरुत्थाय वेगयुक्ताश्ववत्सद्यो गत्वाऽऽगत्वाऽऽलस्यं विहायैश्वर्यं प्राप्य नम्रा जायन्ते त एव पवित्रं परमात्मानं प्राप्तुं शक्नुवन्ति॥६॥

पदार्थः- (**रथमिव, अश्वाः**) रमणीय यान को महान् वेग वाले घोड़े वा शीघ्र जाने वाले बिजुली आदि पदार्थ जैसे वैसे जो (**वाजिनः**) विशेष ज्ञानी जन (**शुचये**) पवित्र (**अध्वराय**) हिंसारहित धर्मयुक्त व्यवहार (**पदाय**) और पाने योग्य पदार्थ के लिये (**उषसः**) प्रभात वेला की (**दधिक्रावेव**) धारणा करने वालों को प्राप्त होते के समान (**सम्, नमन्त**) अच्छे प्रकार नमते हैं वे (**अर्वाचीनम्**) तत्काल प्रसिद्ध हुए नवीन (**वसुविदम्**) धनों को प्राप्त होते हुए (**भगम्**) सर्व ऐश्वर्य्य युक्त जन को और (**नः**) हम लोगों को (**आ, वहन्तु**) सब ओर से उन्नति को पहुँचावें॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो मनुष्य प्रातःकाल उठ के वेगयुक्त घोड़ों के समान शीघ्र जाकर आकर आलस्य छोड़ ऐश्वर्य को पाय नम्र होते हैं, वे ही पवित्र परमात्मा को पा सकते हैं॥६॥

पुनर्विदुष्यः स्त्रियः किं कुर्युरित्याह॥

फिर विदुषी स्त्री क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अश्वा॑वती॒र्गोम॑तीर्न उ॒षासो॑ वी॒रव॑ती॒: सद॑मुच्छन्तु भ॒द्राः।

घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः॥७॥८॥

अश्वाऽवतीः। गोऽमतीः। नः। उषसः। वीरऽवतीः। सदम्। उच्छन्तु। भद्राः। घृतम्। दुहानाः। विश्वतः। प्रऽपीताः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥७॥

पदार्थः-(**अश्वावतीः**) अश्वा महान्तः पदार्था विद्यन्ते यासु ताः (**गोमतीः**) गावो धेनवः किरणा विद्यन्ते यासु ताः (**नः**) अस्माकम् (**उषसः**) प्रभातवेला इव शोभमाना। अत्र **वा छन्दसी**त्युपधा दीर्घः। (**वीरवतीः**) वीरा विद्यन्ते यासु ताः (**सदम्**) सीदन्ति यस्मिन् तम् (**उच्छन्तु**) सेवन्ताम् (**भद्राः**) कल्याणकर्यः (**घृतम्**) उदकम् (**दुहानाः**) प्रपूरयन्त्यः (**विश्वतः**) (**प्रपीताः**) प्रकर्षेण पीता वर्धयित्र्यः (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥७॥

अन्वयः-हे अध्यापकोपदेशिका विदुष्यस्त्रिय! उषास इवाश्वावतीर्गोमतीर्वीरवतीर्भद्राः प्रपीता विश्वतो घृतं दुहानाः भवत्यो नः सदमुच्छन्तु यूयं स्वस्तिभिर्नस्सदा पात॥७॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथोषसस्सर्वान् निद्रास्थान् मृतककल्पान् चेतयित्वा कर्मसु प्रवर्तयन्ति तथैव सत्यो विदुष्यस्त्रियस्सर्वा स्त्रियोऽविद्यानिद्रास्था अध्यापनोपदेशाभ्यां चेतयित्वा सत्कर्मसु प्रेरयन्त्विति॥७॥

अत्र मनुष्याणां दिनचर्याप्रतिपादनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इत्येकचत्वारिंशत्तमं सूक्तमष्टमो वर्गश्च समाप्तः॥

पदार्थः-हे पढ़ाने और उपदेश करने वाली पण्डिता स्त्रियो! तुम (**उषसः**) प्रभात वेला सी शोभती हुई (**अश्वावतीः**) जिन के समीप बड़े-बड़े पदार्थ विद्यमान (**गोमतीः**) वा किरणें विद्यमान (**वीरवतीः**) वा वीर विद्यमान (**भद्राः**) जो कल्याण करने (**प्रपीताः**) उत्तमता से बढ़ाने और (**विश्वतः**) सब ओर से (**घृतम्**) जल को (**दुहानाः**) पूरा करती हुईं आप (**नः**) हमारे (**सदम्**) स्थान को (**उच्छन्तु**) सेवो वह (**यूयम्**) तुम (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों की (**सदा**) सर्वदैव (**पात**) रक्षा कीजिये॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्रभात वेला सब निद्रा में ठहरे हुए मरे हुए जैसों को चैतन्य करा कर्मों में युक्त कराती हैं, वैसे ही होती हुईं विदुषी स्त्रियाँ सब अविद्या निद्रास्थ स्त्रियों को पढ़ाने और उपदेश करने से अच्छे काम में प्रवृत्त करावें॥७॥

इस सूक्त में मनुष्यों की दिनचर्य्या का प्रतिपादन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह इकतालीसवां सूक्त और आठवां वर्ग समाप्त हुआ॥

अथ षड्चस्य [द्विचत्वारिंशत्तमस्य] सूक्तस्य १-६ वसिष्ठर्षिः। विश्वेदेवा देवताः। १, ३ निचृत्त्रिष्टुप्। ४, ५ विराट् त्रिष्टुप्। २ त्रिष्टुप्छन्दः। धैवतः स्वरः। ६ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ पूर्णविद्या जनाः किं कुर्युरित्याह॥

अब छः ऋचा वाले बयालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में पूरी विद्या वाले जन क्या करें, इस विषय को कहते हैं॥

प्र ब्रह्माणो अङ्गिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु।
प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः॥ १॥

प्र। ब्रह्माणः। अङ्गिरसः। नक्षन्त। प्र। क्रन्दनुः। नभन्यस्य। वेतु। प्र। धेनवः। उदऽप्रुतः। नवन्त। युज्यातामिति। अद्री इति। अध्वरस्य। पेशः॥ १॥

पदार्थः-(**प्र**) (**ब्रह्माणः**) चतुर्वेदविदः (**अङ्गिरसः**) प्राणा इव सद्विद्यासु व्याप्ताः (**नक्षन्त**) व्याप्नुवन्तु (**प्र**) (**क्रन्दनुः**) आह्वाता (**नभन्यस्य**) नभस्यन्तरिक्षे पृथिव्यां सुखे वा भवस्य। **नभ इति साधारण नाम।** (निघं०१.४)। (**वेतु**) व्याप्नोतु प्राप्नोतु (**प्र**) (**धेनवः**) दुग्धदात्र्यो गाव इव वाचः (**उदप्रुतः**) उदकं प्राप्ता नद्य इव (**नवन्त**) स्तुवन्ति (**युज्यातामिति**) युक्तौ भवतः (**अद्री**) मेघविद्युतौ (**अध्वरस्य**) अहिंसनीयस्य व्यवहारस्य (**पेशः**) सुरूपम्॥ १॥

अन्वयः-हे ब्रह्माणोऽङ्गिरसो विद्वांसः यथा क्रन्दनुर्नभन्यस्याध्वरस्य पेशः प्र वेत्वुदप्रुत इव धेनवोऽध्वरस्य पेशो नवन्त यथाऽद्री अध्वरस्य पेशो प्र युज्यातां तथा विद्यासु भवन्तः प्र नक्षन्त॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये चतुर्वेदविदो विद्वांसोऽहिंसादिलक्षणस्य धर्मस्य स्वरूपं बोधयन्ति ते स्तुत्या भवन्ति॥ १॥

पदार्थः-हे (**ब्रह्माणः**) चारों वेदों के जानने वाले जनो! (**अङ्गिरसः**) प्राणों के समान विद्वान् जन जैसे (**क्रन्दनुः**) बुलाने वाला (**नभन्यस्य**) अन्तरिक्ष पृथिवी वा सुख में उत्पन्न हुए (**अध्वरस्य**) न नष्ट करने योग्य व्यवहार के (**पेशः**) सुन्दर रूप को (**प्र, वेतु**) अच्छे प्रकार प्राप्त हो वा (**उदप्रुतः**) उदक जल को प्राप्त हुई नदियों के समान (**धेनवः**) और दूध देने वाली गौओं के समान वाणी अहिंसनीय व्यवहार के रूप की (**नवन्त**) स्तुति करती हैं और जैसे (**अद्री**) मेघ और बिजुली अहिंसनीय व्यवहार के रूप को (**प्र, युज्यातामिति**) प्रयुक्त हों आप लोग वैसी विद्याओं में (**प्र, नक्षन्त**) व्याप्त होओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो चारों वेद के जानने वाले विद्वान् जन, अहिंसादिलक्षण हैं जिसके ऐसे धर्म के स्वरूप का बोध कराते हैं, वे स्तुति करने योग्य होते हैं॥ १॥

के विद्वांसः श्रेष्ठास्सन्तीत्याह॥

कौन विद्वान् जन श्रेष्ठ होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

सुगस्ते अग्ने सनवित्तो अध्वा युक्ष्वा सुते हरितो रोहितश्च।

ये वा॒ सद्मन्नरु॒षा वी॑र॒वाहो॑ हु॒वे दे॒वानां॒ जनि॑मानि स॒त्तः॥ २॥

सु॒ऽगः। ते॒। अ॒ग्ने॒। सन॑ऽवित्तः। अध्वा॑। यु॒ङ्क्ष्व। सु॒ते॒। ह॒रित॑ः। रो॒हित॑ः। च॒। ये। वा॒। सद्म॑न्। अ॒रु॒षाः। वी॒र॒ऽवाह॑ः। हु॒वे॒। दे॒वाना॑म्। जनि॑मानि। स॒त्तः॥ २॥

पदार्थः-(**सुगः**) सुष्ठु गच्छन्ति यस्मिन्सः (**ते**) तव (**अग्ने**) पावक इव विद्याप्रकाशित (**सनवित्तः**) यः सनातनेन वेगेन वित्तः लब्धः (**अध्वा**) मार्गः (**युङ्क्ष्वा**) युक्तो भव (**सुते**) उत्पन्नेऽस्मिन् जगति (**हरितः**) दिश इव। **हरित इति दिङ्नाम।** (निघं०१.६) (**रोहितः**) नद्य इव। **रोहित इति नदीनाम।** (निघं०१.१३) (**च**) (**ये**) (**वा**) (**सद्मन्**) सद्मनि स्थाने (**अरुषाः**) रक्तादिगुणविशिष्टाः (**वीरवाहः**) ये वीरान् वहन्ति प्रापयन्ति ते (**हुवे**) प्रशंसेयम् (**देवानाम्**) विदुषाम् (**जनिमानि**) जन्मानि (**सत्तः**) निषण्णः॥ २॥

अन्वयः-हे अग्ने! सुतेऽस्मिन् जगति ये हरितो रोहितश्चेव सद्मन्नरुषा वीरवाहो वा सन्ति तेषां देवानां जनिमानि सत्तोऽहं हुवे तथा यस्ते सुगः सनवित्तोऽध्वास्ति यमहं हुवे तं त्वं युङ्क्ष्व॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव विद्वांसः श्रेष्ठास्सन्ति ये सनातनं वेदप्रतिपाद्यं धर्मनुष्ठायानुष्ठापयन्ति तेषामेव विदुषां जन्म सफलं भवति ये पूर्णा विद्याः प्राप्य धर्मात्मानो भूत्वा प्रीत्या सर्वान् सुशिक्षयन्ति॥ २॥

पदार्थः-हे (**अग्ने**) अग्नि के समान विद्याप्रकाशित! (**सुते**) उत्पन्न हुए इस जगत् में (**ये**) जो (**हरितः**) दिशाओं के समान (**च**) और (**रोहितः**) नदियों के समान (**सद्मन्**) स्थान में (**अरुषाः**) लालगुणयुक्त (**वीरवाहः**) वीरों को पहुँचाने वाले हैं उन (**देवानाम्**) विद्वानों के (**जनिमानि**) जन्मों को (**सत्तः**) आसक्त हुआ मैं (**हुवे**) प्रशंसा करता हूँ, वैसे जो आप का (**सुगः**) अच्छे जाते हैं जिस में वह (**सनवित्तः**) सनातन वेग से प्राप्त (**अध्वा**) मार्ग है जिसकी कि मैं प्रशंसा करूं उसको आप (**युङ्क्ष्व**) युक्त करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही विद्वान् जन श्रेष्ठ हैं जो सनातन वेदप्रतिपादित धर्म का अनुष्ठान करके कराते हैं, उन्हीं विद्वानों का जन्म सफल होता है, जो पूर्ण विद्या को पाकर धर्मात्मा होकर प्रीति के साथ सब को अच्छी शिक्षा दिलाते हैं॥ २॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सम॑ु वो य॒ज्ञं म॑हय॒न्नमो॑भि॒: प्र होता॑ म॒न्द्रो रि॑रिच उपा॒के।
यज॑स्व॒ सु पु॑र्वणीक दे॒वाना य॒ज्ञिया॑म॒रम॑तिं ववृत्याः॥ ३॥

सम्। ऊँ॒ इति॑। व॒रिति॑। य॒ज्ञम्। म॒ह॒य॒न्। नम॑ःऽभिः। प्र। होता॑। म॒न्द्रः। रि॒रि॒चे॒। उ॒पा॒के॒। यज॑स्व। सु। पु॒रु॒ऽअ॒नी॒क॒। दे॒वान्। आ। य॒ज्ञिया॑म्। अ॒रम॑तिम्। व॒वृ॒त्याः॥ ३॥

पदार्थः-(**सम्**) (**उ**) (**वः**) युष्माकम् (**यज्ञम्**) विद्याप्रचारमयम् (**महयन्**) सत्कुर्वन्ति

(नमोभिः) अन्नादिभिः **(प्र)** **(होता)** दाता **(मन्द्रः)** आनन्दप्रदः **(रिरिचे)** अन्यायात् पृथग्भव **(उपाके)** समीपे **(यजस्व)** सङ्गच्छस्व **(सु)** **(पुर्वणीक)** पुरूण्यनीकानि सैन्यानि यस्य तत्सम्बुद्धौ **(देवान्)** विदुषः **(आ)** **(यज्ञियाम्)** या यज्ञमर्हति ताम् **(अरमतिम्)** पूर्णां प्रज्ञाम् **(ववृत्याः)** प्रवर्त्तय॥३॥

अन्वयः-हे पुर्वणीक राजन्! त्वं देवान् सुयजस्व यज्ञियामरमतिमा ववृत्याः मन्द्रो होता सन्नुपाके प्र रिरिचे, हे विद्वांसो! ये नमोभिर्वो यज्ञं सम्महयन् तानु यूयं सत्कुरुत॥३॥

भावार्थः-ये विद्वांसः सत्कर्मानुष्ठानाख्यं यज्ञमनुतिष्ठन्ति ते पुष्कलवीरसेनास्सन्तः सर्वेषामानन्दप्रदा भवन्ति॥३॥

पदार्थः-हे **(पुर्वणीक)** बहुत सेनाओं वाले राजा! आप **(देवान्)** विद्वानों को **(सु, यजस्व)** अच्छे प्रकार प्राप्त होओ **(यज्ञियाम्)** जो यज्ञ के योग्य होती उस **(अरमतिम्)** पूरी मति को **(आ, ववृत्याः)** प्रवृत्त कराओ **(मन्द्रः)** आनन्द देने वा **(होता)** दान करने वाले होते हुए **(उपाके)** समीप में **(प्र, रिरिचे)** अन्याय से अलग रहिये, हे विद्वानो! जो **(नमोभिः)** अन्नादिकों से **(वः)** तुम लोगों के **(यज्ञम्)** विद्याप्रचारमय यज्ञ का **(सम्, महयन्)** सम्मान करते हैं **(उ)** उन्हीं का तुम सत्कार करो॥३॥

भावार्थः-जो विद्वन् जन सत्कर्मानुष्ठानयज्ञ का अनुष्ठान करते हैं, वे पुष्कल वीर सेना वाले होते हुए सबको आनन्द देने वाले होते हैं॥३॥

पुनरतिथिगृहस्थाः परस्परं किं कुर्युरित्याह॥

फिर अतिथि और गृहस्थ परस्पर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत्।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै॥४॥

यदा। वीरस्य। रेवतः। दुरोणे। स्योनऽशीः। अतिथिः। आऽचिकेतत्। सुऽप्रीतः। अग्निः। सुऽधितः। दमे। आ। सः। विशे। दाति। वार्यम्। इयत्यै॥४॥

पदार्थः-(**यदा**) (**वीरस्य**) (**रेवतः**) बहुधनयुक्तस्य (**दुरोणे**) गृहे (**स्योनशीः**) यः सुखेन शेते सः (**अतिथिः**) सत्योपदेशकः (**आचिकेतत्**) समन्ताद्विजानाति (**सुप्रीतः**) सुष्ठु प्रसन्नः (**अग्निः**) पावक इव पवित्रतेजस्वी (**सुधितः**) सुष्ठु हितकारी (**दमे**) गृहे (**आ**) (**सः**) (**विशे**) प्रजायै (**दाति**) ददाति (**वार्यम्**) वरणीयं विज्ञानं (**इयत्यै**) सुखप्राप्तीच्छायै॥४॥

ाअन्वयः-यदा स्योनशीरतिथी रेवतो वीरस्य दुरोण आ चिकेतत्तदा सोऽग्निरिव सुधितः सुप्रीतो गृहस्थस्य दमे इयत्यै विशे वार्यमा दाति॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यदा विद्वान् धार्मिक उपदेशकोऽतिथिर्युष्माकं गृहाण्यागच्छेत्तदा सम्यगेनं सत्कुरुत। हे अतिथे! यदा यत्र यत्र भवान् रमणं कुर्यात्तत्र सर्वेभ्यः सत्यमुपदिशेत्॥४॥

पदार्थः- **(यदा)** जब **(स्योनशीः)** सुख से सोने वाला **(अतिथिः)** सत्य उपदेशक **(रेवतः)**

बहुत धन वाले (**वीरस्य**) वीर के (**दुरोणे**) घर में (**आ, चिकेतत्**) सब ओर से जानता है तब (**सः**) वह (**अग्निः**) अग्नि के समान पवित्र (**सुधितः**) अच्छा हित करने वाला (**सुप्रीतः**) सुन्दर प्रसन्न गृहस्थ के (**दमे**) घर में (**इयत्यै**) सुखप्राप्ति की इच्छा के लिये (**विशे**) और प्रजा सन्तान के लिये (**वार्यम्**) स्वीकार करने योग्य विज्ञान को (**आ, दाति**) सब ओर से देता है॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जब विद्वान् धार्मिक उपदेश करने वाला अतिथि जन तुम्हारे घरों को आवे तब अच्छे प्रकार उसका सत्कार करो, हे अतिथि! जब जहाँ-जहाँ आप रमण भ्रमण करें, वहाँ-वहाँ सब के लिये सत्य उपदेश करें॥४॥

पुनस्ते गृहस्थातिथयः परस्परस्मै किं किं कुर्युरित्याह॥

फिर वे गृहस्थ अतिथि परस्पर के लिये क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मं नो॑ अग्ने अध्व॒रं जु॑षस्व म॒रुत्स्विन्द्रे॑ य॒शसं॑ कृधी नः।
आ नक्तां॑ ब॒र्हिः स॑दतामु॒षासो॒शन्ता॑ मि॒त्रावरु॑णा यजे॒ह॥५॥

इ॒मम्। नः॒। अ॒ग्ने॒। अ॒ध्व॒रम्। जु॒ष॒स्व॒। म॒रुत्ऽसु॑। इन्द्रे॑। य॒शस॑म्। कृ॒धि॒। नः॒। आ। नक्ता॑। ब॒र्हिः। स॒द॒ता॒म्। उ॒षसा॑। उ॒शन्ता॑। मि॒त्रावरु॑णा। य॒ज॒। इ॒ह॥५॥

पदार्थः-(**इमम्**) (**नः**) अस्माकम् (**अग्ने**) पावक इव विद्याप्रकाशितातिथे (**अध्वरम्**) उपदेशाख्यं यज्ञम् (**जुषस्व**) (**मरुत्सु**) मनुष्येषु (**इन्द्रे**) राजनि (**यशसम्**) कीर्तिम् (**कृधि**) अत्र **द्व्यच०** इति दीर्घः। (**नः**) अस्माकम् (**आ**) (**नक्ता**) रात्रिम् (**बर्हिः**) उत्तमासनम् (**सदताम्**) आसीदेत् (**उषसा**) दिनेन (**उशन्ता**) कामयमानौ (**मित्रावरुणा**) प्राणोदानाविव स्त्रीपुरुषौ (**यज**) (**इह**) अस्मिन् जगति॥५॥

अन्वयः-हे अग्ने! त्वं मरुत्स्विन्द्रे न इममध्वरं सततं जुषस्व नोऽस्माकं यशसं कृधि नक्तोषासा बर्हिरासदतामिहोशन्ता मित्रावरुणा त्वं यज॥५॥

भावार्थः-यदाऽतिथिरागच्छेत्तदा गृहस्था अर्घ्यपाद्यासनमधुपर्कप्रियवचनान्नादिभिः सत्कृत्य पृष्ट्वा सत्यासत्यनिर्णयं कुर्वन्त्वतिथिञ्च प्रश्नान् समादधातु॥५॥

पदार्थः-हे (**अग्ने**) अग्नि के समान विद्या से प्रकाशित अतिथि! आप (**मरुत्सु**) मनुष्यों के (**इन्द्रे**) और राजा के निमित्त (**नः**) हम लोगों के (**इमम्**) इस (**अध्वरम्**) उपदेशरूपी यज्ञ को निरन्तर (**जुषस्व**) सेवो (**नः**) हमारी (**यशसम्**) कीर्ति की वृद्धि (**कृधि**) करो (**नक्तोषासा**) रात्रि को दिन के साथ (**बर्हिः**) तथा उत्तम आसन को (**आ, सदताम्**) स्वीकार करो स्थिर होओ और (**इह**) इस जगत् में (**उशन्ता**) कामना करते हुए (**मित्रावरुणा**) प्राण और उदान के समान स्त्री-पुरुषों को आप (**यज**) मिलो॥५॥

भावार्थः-जब अतिथि आवें तब गृहस्थ अर्घ्य, पाद्य, आसन, मधुपर्क, वचन और अन्नादिकों से उसका सत्कार कर और पूछ कर सत्य और असत्य का निर्णय करें और अतिथि भी प्रश्नों के समाधान देवें॥५॥

धनकामाः पुरुषाः किं कुर्युरित्याह॥

धन की कामना करने वाले क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

एवाग्निं सहस्यं१ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत्।
इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः॥६॥९॥

एव। अग्निम्। सहस्यम्। वसिष्ठः। रायःऽकामः। विश्वप्स्न्यस्य। स्तौत्। इषम्। रयिम्। पप्रथत्। वाजम्। अस्मे इति। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥६॥

पदार्थः-(**एव**) (**अग्निम्**) पावकम् (**सहस्यम्**) सहसि भवम् (**वसिष्ठः**) अतिशयेन वसुः (**रायस्कामः**) रायो धनस्य काम इच्छा यस्य सः (**विश्वप्स्न्यस्य**) विश्वेषु समग्रेषु स्नुषु स्वरूपेषु भवस्य (**स्तौत्**) स्तौति (**इषम्**) अन्नादिकम् (**रयिम्**) श्रियम् (**पप्रथत्**) प्रथयति (**वाजम्**) विज्ञानमन्नं वा (**अस्मे**) अस्माकम् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥६॥

अन्वयः-यो रायस्कामो वसिष्ठो विश्वप्स्न्यस्य सहस्यमग्निं स्तौत् स एवास्मे इषं रयिं वाजं पप्रथत्, हे अतिथयः! यूयं स्वस्तिभिर्नोऽस्मान् सदा पात॥६॥

भावार्थः-यस्य धनस्य कामना स्यात् स मनुष्योऽग्न्यादि विद्यां गृह्णीयात् येऽतिथिसेवां कुर्वन्ति तानतिथयोऽधर्माचरणात् पृथक्सदा रक्षन्तीति॥६॥

अत्र विश्वेदेवगुणकृत्यवर्णानादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति द्विचत्वारिंशत्तमं सूक्तं नवमो वर्गश्च समाप्तः॥

पदार्थः-जो (**रायस्कामः**) धन की कामना वाला (**वसिष्ठः**) अतीव निवासकर्ता जन (**विश्वप्स्न्यस्य**) समग्र रूपों में और (**सहस्यम्**) बल में हुए (**अग्निम्**) अग्नि की (**स्तौत्**) स्तुति करता है (**एव**) वही (**अस्मे**) हमारी (**इषम्**) अन्नादि सामग्री (**रयिम्**) लक्ष्मी (**वाजम्**) विज्ञान वा अन्न को (**पप्रथत्**) प्रसिद्ध करता है, हे अतिथि जनो! (**यूयम्**) तुम (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों की (**सदा**) सदैव (**पात**) रक्षा करो॥६॥

भावार्थः-जिसको धन की कामना हो, वह मनुष्य अग्न्यादि विद्या को ग्रहण करे, जो अतिथियों की सेवा करते हैं, उनको अतिथि लोग अधर्म के आचरण से सदा अलग रखते हैं॥६॥

इस सूक्त में विश्वेदेवों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बयालीसवां सूक्त और नवम वर्ग पूरा हुआ॥

अथ पञ्चर्चस्य [त्रिचत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। विश्वेदेवा देवताः। १ निचृत्त्रिष्टुप्। ४ त्रिष्टुप्। ३ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ५ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनरतिथिगृहस्थाः परस्परस्मै किं किं प्रदद्युरित्याह॥

अब पांच ऋचा वाले तेतालीसवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में फिर अतिथि और गृहस्थ एक दूसरे के लिये क्या क्या देवें, इस विषय को कहते हैं॥

प्र वो॑ यज्ञेषु॑ देव॒यन्तो॑ अर्चन् द्यावा॒ नमो॑भिः पृथि॒वी इ॒षध्यै॑।
येषां॑ ब्रह्मा॒ण्यस॑मानि॒ विप्रा॒ विष्व॑ग्वि॒यन्ति॑ व॒निनो॒ न शाखा॑ः॥ १॥

प्र। वः। यज्ञेषु। देव॒ऽयन्तः। अर्चन्। द्यावा। नमः॑ऽभिः। पृथि॒वी इति॑। इ॒षध्यै॑। येषा॑म्। ब्रह्मा॑णि। अस॑मानि। विप्राः॑। विष्व॑क्। वि॒ऽयन्ति॑। व॒निनः॑। न। शाखाः॑॥ १॥

पदार्थः-(**प्र**) (**वः**) युष्मान् (**यज्ञेषु**) विद्याप्रचारादिव्यवहारेषु (**देवयन्तः**) कामयमानाः (**अर्चन्**) अर्चन्ति सत्कुर्वन्ति (**द्यावा**) सूर्यम् (**नमोभिः**) अन्नादिभिः (**पृथिवी**) भूमिम् (**इषध्यै**) एष्टुं ज्ञातुम् (**येषाम्**) (**ब्रह्माणि**) धनान्यन्नानि वा (**असमानि**) अन्येषां धनैरतुल्यान्यधिकानीति यावत् (**विप्राः**) मेधाविनः (**विष्वक्**) विषु व्याप्तं अञ्चतीति (**वि, यन्ति**) व्याप्नुवन्ति (**वनिनः**) वनसम्बन्धो विद्यते येषां ते (**न**) इव (**शाखाः**) याः खेऽन्तरिक्षे शेरते ताः॥ १॥

अन्वयः-हे विप्राः! येषामसमानि ब्रह्माणि वनिनः शाखा न विष्वग्वि यन्ति ये नमोभिरिषध्यै द्यावापृथिवी यज्ञेषु देवयन्तो वो युष्मान् प्रार्चंस्तान् भवन्तोऽपि सत्कुर्वन्तु॥ १॥

भावार्थः-हे अतिथयो विद्वांसो! यथा गृहस्था अन्नादिभिर्युष्मान् सत्कुर्युस्तथा यूयं विज्ञानदानेन गृहस्थान् सततं प्रीणन्तु॥ १॥

पदार्थः-हे (**विप्राः**) बुद्धिमानो! (**येषाम्**) जिनको (**असमानि**) औरों के धनों से न समान किन्तु अधिक (**ब्रह्माणि**) धन वा अन्न (**वनिनः**) वन सम्बन्ध रखने और (**शाखाः**) अन्तरिक्ष में सोनेवाली शाखाओं के (**न**) समान (**विष्यक्**) अनुकूल व्याप्ति जैसे हो, वैसे (**वि, यन्ति**) व्याप्त होते हैं वा जो (**नमोभिः**) अन्नादिकों से (**इषध्यै**) इच्छा करने वा जानने को (**द्यावापृथिवी**) सूर्य और भूमि की (**यज्ञेषु**) विद्याप्रचारदि व्यवहारों में (**देवयन्तः**) कामना करते हुए (**वः**) तुम लोगों का (**प्रार्चन्**) अच्छा सत्कार करते हैं, उनका तुम भी सत्कार करो॥ १॥

भावार्थः-हे अतिथि विद्वानो! जैसे गृहस्थ जन अन्नादि पदार्थों के साथ आपका सत्कार करें, वैसे तुम विज्ञानदान से गृहस्थों को निरन्तर प्रसन्न करो॥ १॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

फिर मनुष्य कैसे हों, इस विषय को अगले मन्त्र में कहेत हैं॥

प्र य॒ज्ञ ए॑तु॒ हेत्वो॒ न सप्ति॒रुद्यच्छ॑ध्वं॒ सम॑नसो घृ॒ताचीः॑।
स्तृ॒णी॒त ब॒र्हिर॑ध्व॒राय॑ सा॒धूर्ध्वा शो॒चींषि॑ देव॒यून्य॑स्थुः॥ २॥

प्र। यज्ञः। एतु। हेत्वः। नः। सप्तिः। उत्। यच्छध्वम्। सऽमनसः। घृताचीः। स्तृणीत। बर्हिः। अध्वराय। साधु। ऊर्ध्वा। शोचींषि। देवऽयूनि। अस्थुः॥ २॥

पदार्थः-(**प्र**) प्रकर्षे (**यज्ञः**) विज्ञानमयः संगन्तुमर्हः (**एतु**) प्राप्नोतु (**हेत्वः**) प्रवृद्धो वेगवान् (**न**) इव (**सप्तिः**) अश्वः (**उत्**) (**यच्छध्वम्**) उद्यमिनः कुरुत (**समनसः**) सज्ञानाः समानमनसः (**घृताचीः**) या घृतमुदकमञ्चन्ति ता रात्रीः। **घृताचीति रात्रिनाम।** (निघं १.७) (**स्तृणीत**) आच्छादयत (**बर्हिः**) अन्तरिक्षम् (**अध्वराय**) अहिंसामयाय यज्ञाय (**साधु**) समीचीनतया (**ऊर्ध्वा**) ऊर्ध्वं गन्तॄणि (**शोचींषि**) तेजांसि (**देवयूनि**) देवान् दिव्यान् गुणान् कुर्वन्ति (**अस्थुः**) तिष्ठन्ति॥ २॥

अन्वयः-हे समनसो विद्वांसो! यान् युष्मान् यज्ञ एतु ते यूयं हेत्वस्सप्तिर्न सर्वान् प्रोद्यच्छध्वं यस्योर्ध्वा देवयूनि शोचींष्यस्थुस्तस्मादध्वराय यूयं घृताचीर्बर्हिश्च साधु स्तृणीत॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे गृहस्था! येन वायूदकौषधयः पवित्रा जायन्ते तं यज्ञं सततमनुतिष्ठन्तु यज्ञधूमेनान्तरिक्षमाच्छादयत, हे अतिथयो! यूयं सर्वान् मनुष्यान् सारथिरश्वानिव धर्मकृत्येषूद्यमिनः कृत्वैषामालस्यं दूरीकुरुत यदेतान् सकला श्रीः प्राप्नुयात्॥ २॥

पदार्थः-हे (**समनसः**) समान ज्ञान वा समान मन वाले विद्वानो! जिन आप लोगों को (**यज्ञः**) विज्ञानमय संग करने योग्य व्यवहार (**एतु**) प्राप्त हो वे आप लोग (**हेत्वः**) अच्छे बड़े हुए वेगवान् (**सप्तिः**) घोड़ा के (**न**) समान सब को (**प्र, उत्, यच्छध्वम्**) अतीव उद्यमी करो जिसके (**ऊर्ध्वा**) ऊपर जाने वाले (**देवयूनि**) दिव्य उत्तम गुणों को करते हुए (**शोचींषि**) तेज (**अस्थुः**) स्थिर होते हैं उससे (**अध्वराय**) अहिंसामय यज्ञ के लिये आप (**घृताचीः**) रात्रियों और (**बर्हिः**) अन्तरिक्ष को (**साधु**) समीचीनता से (**स्तृणीत**) आच्छादित करो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे गृहस्थो! जिससे वायु, जल और ओषधि पवित्र होती हैं, उस यज्ञ का निरन्तर अनुष्ठान करो, यज्ञ धूम से अन्तरिक्ष को ढांपो। हे अतिथियो! तुम सब मनुष्यों को सारथि, घोड़ों को जैसे, वैसे धर्म कामों में उद्यमी कर इनका आलस्य दूर करो, जिससे इनको समस्त लक्ष्मी प्राप्त हो॥ २॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु।
आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः॥ ३॥

आ। पुत्रासः। न। मातरम्। विऽभृत्राः। सानौ। देवासः। बर्हिषः। सदन्तु। आ। विश्वाची। विदथ्याम्। अनक्तु। अग्ने। मा। नः। देवऽताता। मृधः। करिति कः॥ ३॥

पदार्थः-(**आ**) (**पुत्रासः**) पुत्राः (**न**) इव (**मातरम्**) (**विभृत्राः**) विशेषेण पोषकाः (**सानौ**) ऊर्ध्वे देशे (**देवासः**) विद्वांसः (**बर्हिषः**) प्रवृद्धाः (**सदन्तु**) आसीदन्तु (**आ**) (**विश्वाची**) या विश्वमञ्चति (**विदथ्याम्**) विदथेषु गृहेषु साध्वीं नीतिम् (**अनक्तु**) कामयताम् (**अग्ने**) विद्वन् (**मा**) (**नः**) अस्माकम्

(देवताता) दिव्यगुणप्रापके यज्ञे **(मृध्रः)** हिंस्रान् **(कः)** कुर्याः॥३॥

अन्वयः-हे अग्ने! यथा विश्वाची विदथ्यामानक्तु तदुपदेशेन त्वं नो देवताता मृधो मा कः ये देवासो सानौ विभृत्राः पुत्रासो मातरन्न बर्हिषः आ सदन्तु ताँस्त्वं कामयस्व॥३॥

भावार्थः-अत्रोपमालङ्कारः। सैव मातोत्तमा या ब्रह्मचर्येण विदुषी भूत्वा सन्तानान् सुशिक्ष्य विद्ययैषामुन्नतिं कुर्यात् स एव पिता श्रेष्ठोऽस्ति यो हिंसादिदोषरहितान् सन्तानान् कुर्यात् त एव विद्वांसः प्रशस्ताः सन्ति येऽन्यान् मनुष्यान् मातृवत् पालयन्ति॥३॥

पदार्थः-हे **(अग्ने)** विद्वान्! जैसे **(विश्वाची)** विश्व को प्राप्त होने वाली **(विदथ्याम्)** घरों में नीति को **(आ, अनक्तु)** सब ओर से चाहे उसके उपदेश से आप **(नः)** हमारे **(देवताता)** दिव्य गुणों की प्राप्ति कराने वाले यज्ञ में **(मृधः)** हिंसकों को **(मा)** मत **(कः)** करें जो **(देवासः)** विद्वान् जन **(सानौ)** ऊपर ले देश स्थान में **(विभृत्राः)** विशेष कर पुष्टि करने वाले **(पुत्रासः)** पुत्र जैसे **(मातरम्)** माता को **(न)** वैसे **(बर्हिषः)** उत्तम वृद्ध जन **(आ, सदन्तु)** स्थिर हों, उनकी आप कामना करें॥२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। वही माता उत्तम है जो ब्रह्मचर्य से विदुषी होकर सन्तानों को अच्छी शिक्षा देकर विद्या से इनकी उन्नति करे, वही पिता श्रेष्ठ हैं जो हिंसादि दोषरहित सन्तान करे, वे ही विद्वान् प्रशंसा पाये हैं जो और मनुष्यों को माँ के समान पालते हैं॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः।
ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ॥४॥

ते। सीषपन्त। जोषम्। आ। यजत्राः। ऋतस्य। धाराः। सुऽदुघाः। दुहानाः। ज्येष्ठम्। वः। अद्य। महः। आ। वसूनाम्। आ। गन्तन। सऽमनसः। यति। स्थ॥४॥

पदार्थः-(ते) **(सीषपन्त)** शपथान् कुरुत **(जोषम्)** पूर्णम् **(आ)** **(यजत्रा)** संगन्तारः **(ऋतस्य)** सत्यस्य **(धाराः)** वाचः **(सुदुघाः)** कामानां पूरयित्रीः **(दुहानाः)** पूर्णशिक्षाविद्याः **(ज्येष्ठम्)** **(वः)** युष्मान् **(अद्य)** **(महः)** महत् **(आ)** **(वसूनाम्)** धनानाम् **(आ)** **(गन्तन)** प्राप्नुत **(समनसः)** समानविज्ञानाः **(यति)** प्रयतन्ते यस्मिन् तस्मिन् **(स्थ)** भवत॥४॥

अन्वयः-ये यजत्रा जोषमासीषपन्त ते समनस ऋतस्य सुदुघा दुहाना धारा आ गन्तन यत्यास्थ हे धार्मिका! वो युष्मान् वसूनां महो ज्येष्ठमद्य प्राप्नोतु॥४॥

भावार्थः-ये सत्यवादिनः सत्यकर्तारः सत्यमन्तारो भवन्ति ते पूर्णकामा भूत्वा सर्वान् मनुष्यान् विदुषः कर्तुं शक्नुवन्ति॥४॥

पदार्थः-जो **(यजत्राः)** संग करने वाले **(जोषम्)** पूरी **(आ, सीषपन्त)** शौ **[**=शपथों को**]** करें **(ते)** वे **(समनसः)** एक से विज्ञान वाले जन **(ऋतस्य)** सत्य की **(सुदुघाः)** कामनाओं की पूरी करने वाली **(दुहानाः)** पूर्ण शिक्षा शिक्षायुक्त **(धाराः)** वाणियों को **(आ, गन्तन)** प्राप्त हों और **(यति)**

जिनमें यत्न करते हैं उस व्यवहार में **(आ, स्थ)** स्थिर हों, हे धार्मिक सज्जनो! **(वः)** तुम लोगों को **(वसूनाम्)** धनों का **(महः)** महान् **(ज्येष्ठम्)** प्रशंसित भाग **(अद्य)** आज प्राप्त हो॥४॥

भावार्थः-जो सत्य कहने, सत्य करने और सत्य मानने वाले होते हैं वे पूर्णकाम होकर सब मनुष्यों को विद्वान् कर सकते हैं॥४॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

एवा नो॑ अग्ने विक्ष्वा द॑शस्य॒ त्वया॑ व॒यं स॑हसाव॒न्नास्क्रा॑ः।
रा॒या युजा स॑ध॒मादो॒ अरि॑ष्टा यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥५॥१०॥

एव। नः। अग्ने। विक्षु। आ। दशस्य। त्वया। वयम्। सहसाऽवन्। आस्क्राः। राया। युजा। सधऽमादः। अरिष्टाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥५॥

पदार्थः-(**एवा**) अत्र **निपातस्य चे**ति दीर्घः। (**नः**) अस्मान् (**अग्ने**) विद्वन् (**विक्षु**) प्रजासु (**आ**) (**दशस्य**) देहि (**त्वया**) **[**त्वया**]** सह (**वयम्**) (**सहसावन्**) बहुबलयुक्त (**आस्क्राः**) समन्तादाहूताः (**राया**) धनेन (**युजा**) युक्तेन (**सधमादः**) समानस्थानाः (**अरिष्टाः**) अहिंसिताः (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**) अस्मान्॥५॥

अन्वयः-हे सहसावन्नग्ने! त्वं विक्षु नो धनं दशस्य यतस्त्वया सह युजा वयं राया सधमाद आस्क्रा अरिष्टास्स्याम यूयं स्वस्तिभिर्नः सदा पात तानेव वयमपि रक्षेमहि॥५॥

भावार्थः-हे विद्वांसो! यूयमस्मान् विद्याः प्रदत्त येन वयं प्रजासूत्तमानि धनादीनि प्राप्य युष्मान् सततं रक्षेम॥५॥

अत्र विश्वेदेवगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगातिर्वेद्या॥

इति त्रिचत्वारिंशत्तमं सूक्तं दशमो वर्गश्च समाप्तः॥

पदार्थः-हे (**सहसावन्**) बहुबलयुक्त (**अग्ने**) विद्वान्! आप (**विक्षु**) प्रजाजनों में (**नः**) हम लोगों को धन (**दशस्य**) देओ जिससे (**त्वया**) तुम्हारे साथ (**युजा**) युक्त (**वयम्**) हम लोग (**राया**) धन से (**सधमादः**) तुल्य स्थान वाले (**आस्क्राः**) सब ओर से बुलावें और (**अरिष्टाः**) अविनष्ट हों (**यूयम्**) तुम (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों की (**सदा**) सर्वदा (**पात**) रक्षा करो (**एव**) उन्हीं की हम लोग भी रक्षा करें॥५॥

भावार्थः-हे विद्वानो! तुम हम को विद्या देओ, जिससे हम लोग प्रजाजनों में उत्तम धन आदि पाकर तुम्हारी सदैव रक्षा करें॥५॥

इस सूक्त में विश्वेदेवों के गुण और कामों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह तयालीसवां सूक्त और दशवां वर्ग समाप्त हुआ॥

अथ पञ्चर्चस्य [चतुश्चत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। लिङ्गोक्ता देवताः। १ निचृज्जगती छन्दः। निषादः स्वरः। २, ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४, ५ पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

मनुष्यैः सृष्टिविद्यया सुखं वर्धनीयमित्याह॥

अब चवालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को सृष्टिविद्या से सुख बढ़ाना चाहिये, इस विषय को कहते हैं॥

दुधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान् द्यावापृथिवी अपः स्वः॥ १॥

दुधिऽक्राम्। वः। प्रथमम्। अश्विना। उषसम्। अग्निम्। सम्ऽइद्धम्। भगम्। ऊतये। हुवे। इन्द्रम्। विष्णुम्। पूषणम्। ब्रह्मणः। पतिम्। आदित्यान्। द्यावापृथिवी इति। अपः। स्वरिति स्वः॥ १॥

पदार्थः-(**दधिक्राम्**) यो धारकान् क्रामति (**वः**) युष्मान् (**प्रथमम्**) आदिमम् (**अश्विना**) सूर्याचन्द्रमसौ (**उषसम्**) प्रभातवेलाम् (**अग्निम्**) पावकम् (**समिद्धम्**) प्रदीप्तम् (**भगम्**) ऐश्वर्यम् (**ऊतये**) धनाढ्याय (**हुवे**) आददे (**इन्द्रम्**) विद्युतम् (**विष्णुम्**) व्यापकं वायुम् (**पूषणम्**) पुष्टिकरमोषधिगणम् (**ब्रह्मणस्पतिम्**) ब्रह्माण्डस्य स्वामिनं परमात्मानम् (**आदित्यान्**) सर्वान् मासान् (**द्यावापृथिवी**) सूर्यभूमी (**अपः**) जलम् (**स्वः**) सुखम्॥ १॥

अन्वयः-हे विद्वांसो! यथोतयेऽहं वः प्रथमं दधिक्रामश्विनोषसं समिद्धमग्निं भगमिन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान् द्यावापृथिवी अपः स्वश्च हुवे तथा मदर्थं यूयमप्येतद्विद्यामादत्त॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यथा विद्वांस आदितः भूम्यादिविद्यां संगृह्य कार्यसिद्धिं कुर्वन्ति तथा यूयमपि कुरुत॥ १॥

पदार्थः-हे विद्वानो! जैसे (**ऊतये**) धनादि के लिए मैं (**वः**) तुम लोगों को और (**प्रथमम्**) पहिले (**दधिक्राम्**) जो धारण करने वालों को क्रम से प्राप्त होता उसे (**अश्विना**) सूर्य और चन्द्रमा (**उषसम्**) प्रभातवेला (**समिद्धम्**) प्रदीप्त (**अग्निम्**) अग्नि (**भगम्**) ऐश्वर्य्य (**इन्द्रम्**) बिजुली (**विष्णुम्**) व्यापक वायु (**पूषणम्**) पुष्टि करने वाले ओषधिगण (**ब्रह्मणस्पतिम्**) ब्रह्माण्ड के स्वामी (**आदित्यान्**) सब महीने (**द्यावापृथिवी**) सूर्य और भूमि (**अपः**) जल और (**स्वः**) सुख को (**हुवे**) ग्रहण करता हूँ, वैसे ही मेरे लिये इस विद्या को आप भी ग्रहण करें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन प्रथम से भूमि आदि की विद्या का संग्रह करके कार्यसिद्धि करते हैं, वैसे तुम भी करो॥ १॥

पुनर्विद्वांसः कुर्य्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

दुधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः।
इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम॥ २॥

दुधिऽक्राम्। ऊँ इति। नमसा। बोधयन्तः। उत्ऽईराणाः। यज्ञम्। उपऽप्रयन्तः। इळाम्। देवीम्। बर्हिषि। सादयन्तः। अश्विना। विप्रा। सुऽहवा। हुवेम॥ २॥

पदार्थः-(**दधिक्राम्**) पृथिव्यादिधारकाणां क्रमितारम् (**उ**) (**नमसा**) अन्नाद्येन सत्कारेण वा (**बोधयन्तः**) (**उदीराणाः**) उत्कृष्टं ज्ञानं प्राप्ताः (**यज्ञम्**) संगतिकरणाख्यम् (**यज्ञम्**) (**उपप्रयन्तः**) प्रयत्नेनोपायं कुर्वन्तः (**इळाम्**) प्रशंसनीयां वाचम् (**देवीम्**) दिव्यगुणकर्मस्वभावाम् (**बर्हिषि**) वृद्धिकरे व्यवहारे (**सादयन्तः**) (**अश्विना**) अध्यापकोपदेशकौ (**विप्रा**) मेधाविनौ विपश्चितौ (**सुहवा**) शोभनानि हवान्याह्वानानि ययोस्तौ (**हुवेम**) प्रशंसेम॥ २॥

अन्वयः-हे मनुष्या! यथा नमसा दधिक्रां बोधयन्त उदीराणा यज्ञमुप प्रयन्त उ देवीमिळां बर्हिषि सादयन्तो वयं सुहवाऽश्विना विप्रा हुवेम तथैतौ यूयमप्याह्वयत॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमलाङ्कारः। त एव विद्वांसो जगद्धितैषिणस्सन्ति ये सर्वत्र विद्याः प्रसारयन्ति॥ २॥

पदार्थः-हे मनुष्यो! जैसे (**नमसा**) अन्नादि से वा सत्कार से (**दधिक्राम्**) पृथिवी आदि के धारण करने वालों को (**बोधयन्तः**) बोध दिलाते हुए (**उदीराणाः**) उत्कृष्ट ज्ञान को प्राप्त (**यज्ञम्**) यज्ञ का (**उपप्रयन्तः**) प्रयत्न करते (**उ**) और (**देवीम्**) दिव्य गुण-कर्म-स्वभाव वाली (**इळाम्**) प्रशंसनीय वाणी को (**बर्हिषि**) वृद्धि करने वाले व्यवहार में (**सादयन्तः**) स्थिर कराते हुए हम लोग (**सुहवा**) शुभ बुलाने जिनके उन (**अश्विना**) पढ़ाने और उपदेश करने वाले (**विप्रा**) बुद्धिमान् पण्डितों की (**हुवेम**) प्रशंसा करें, वैसे उनकी तुम भी प्रशंसा करो॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही विद्वान् जन जगत् के हितैषी होते हैं, जो सब जगह विद्या फैलाते हैं॥ २॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

दुधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम्।
ब्रध्नं मंश्चतोर्वरुणस्य बभ्रुं ते विश्मास्माद्दुरिता यावयन्तु॥ ३॥

दुधिऽक्रावाणम्। बुबुधानः। अग्निम्। उप। ब्रुवे। उषसम्। सूर्यम्। गाम्। ब्रध्नम्। मंश्चतोः। वरुणस्य। बभ्रुम्। ते। विश्मा। अस्मत्। दुःऽइता। यवयन्तु॥ ३॥

पदार्थः-(**दधिक्रावाणम्**) धारकाणां यानानां क्रामयितारं गमयितारम् (**बुबुधानः**) विजानन् (**अग्निम्**) वह्निम् (**उप**) (**ब्रुवे**) उपदिशामि (**उषसम्**) प्रभातवेलाम् (**सूर्यम्**) सूर्यलोकम् (**गाम्**) भूमिम् (**ब्रध्नम्**) महान्तम् (**मंश्चतोः**) मन्यमानान् विदुषो याचमानस्य (**वरुणस्य**) प्रेष्ठस्य (**बभ्रुम्**) धारकं पोषकं वा (**ते**) (**विश्मा**) विश्वानि सर्वाणि (**अस्मत्**) अस्माकं सकाशात् (**दुरिता**) दुरितानि दुष्टाचरणानि (**यावयन्तु**) दूरीकुर्वन्तु। अत्र **संहितायामि**त्याद्यचो दीर्घत्वम्॥ ३॥

अन्वयः-हे विद्वांसो! दधिक्रावाणमग्निमुषसं ब्रध्नं सूर्यं गां मंश्चतोर्वरुणस्य बभ्रुं च यान् युष्मान्

प्रत्युप ब्रुवे ते भवन्तोऽस्मत्तद्विश्वा दुरिता यावयन्तु॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथाऽप्ता विद्वांसस्सर्वेभ्यो विद्याऽभयदाने कृत्वा पापाचरणात् पृथक् कुर्वन्ति तथा सर्वे विद्वांसः कुर्युः॥३॥

पदार्थः-हे विद्वानो! **(दधिक्रावाणाम्)** धारण करने वाले यानों को चलाने वाले **(अग्निम्)** आग **(उषसम्)** प्रभातवेला **(बृध्नम्)** महान् **(सूर्यम्)** सूर्यलोक **(गाम्)** भूमि को **(मंश्चतोः)** मानते हुए विद्वानों को मांगने वाले **(वरुणस्य)** श्रेष्ठ जन के **(बभ्रुम्)** धारण वा पोषण करने वाले को तथा जिनको आपके प्रति **(उप, ब्रुवे)** उपदेश करता हूँ **(ते)** वे आप लोग **(अस्मत्)** हम से **(विश्वा)** सब **(दुरिता)** दुष्ट आचरणों को **(यावयन्तु)** दूर करें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे आप्त विद्वान् सब के लिए विद्या और अभयदान देकर पाप के आचरण से उन्हें अलग करते हैं, वैसे सब विद्वान् करें॥३॥

पुनर्विद्वान् किं विज्ञाय किं कुर्यादित्याह॥

फिर विद्वान् जन क्या जान कर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन्।
संविदान उषसा सूर्येणादित्येभिर्वसुभिरङ्गिरोभिः॥४॥

दधिऽक्रावा। प्रथमः। वाजी। अर्वा। अग्रे। रथानाम्। भवति। प्रऽजानन्। सम्ऽविदानः। उषसा। सूर्येण। आदित्येभिः। वसुऽभिः। अङ्गिरःऽभिः॥४॥

पदार्थः-(**दधिक्रावा**) धारकाणां गमयिता **(प्रथमः)** आदिमः साधकः **(वाजी)** वेगवान् **(अर्वा)** प्राप्तप्रेरणः **(अग्रे)** पुरस्सरम् **(रथानाम्)** रमणीयानां यानानाम् **(भवति)** **(प्रजानन्)** प्रकर्षेण जानन् **(संविदानः)** सम्यग्विज्ञानं कुर्वन् **(उषसा)** प्रातर्वेलया **(सूर्येण)** सवित्रा **(आदित्येभिः)** संवत्सरस्य मासैः **(वसुभिः)** पृथिव्यादिभिः **(अङ्गिरोभिः)** वायुभिः॥४॥

अन्वयः-यो दधिक्रावा प्रथमो वाज्यर्वाग्निरुषसा सूर्येणादित्येभिर्वसुभिरङ्गिरोभिस्सहितस्सन् रथानामग्रे वोढा भवति तं प्रजानन् संविदानस्सन् विद्वान् सम्प्रयुञ्जीत॥४॥

भावार्थः-येऽग्निविद्यां जानन्ति ते यानानां सद्यो गमयितारो भवन्ति॥४॥

पदार्थः-जो **(दधिक्रावा)** धारण करने वालों को पहुँचाने और **(प्रथमः)** प्रथम सिद्ध करने वाला **(वाजी)** वेगवान् **(अर्वा)** प्रेरणा को प्राप्त अग्नि **(उषसा)** प्रातःकाल की बेला **(सूर्येण)** सूर्यलोक **(आदित्येभिः)** संवत्सर के महीनों **(वसुभिः)** पृथिवी आदि लोकों और **(अङ्गिरोभिः)** पवनों के सहित होता हुआ **(रथनाम्)** रमणीय यानों के **(अग्रे)** आगे बहाने वाला **(भवति)** होता है उसको **(प्रजानन्)** उत्तमता से जानता और **(संविदानः)** अच्छे प्रकार उसका विज्ञान करता हुआ विद्वान् जन अच्छा प्रयोग करे॥४॥

भावार्थः-जो अग्निविद्या को जानते हैं, वे रथों के शीघ्र चलाने वाले होते हैं॥४॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

आ नो॑ दधि॒क्राः प॒थ्या॑मनक्त्वृ॒तस्य॒ पन्था॒मन्वे॑तवा उ।
शृ॒णोतु॑ नो॒ दैव्यं॒ शर्धो॑ अ॒ग्निः शृ॒ण्वन्तु॒ विश्वे॑ महि॒षा अमू॑राः॥५॥११॥

आ। नः। दधिऽक्राः। पथ्याम्। अनक्तु। ऋतस्य। पन्थाम्। अनुऽएतवै। ऊँ इति। शृणोतु। नः। दैव्यम्। शर्धः। अग्निः। शृण्वन्तु। विश्वे। महिषाः। अमूराः॥५॥

पदार्थः-(**आ**) (**नः**) (**दधिक्राः**) अश्व इव धारकान् क्रामयिता गमयिता (**पथ्याम्**) पथि साध्वीं गतिम् (**अनक्तु**) कामयताम् (**ऋतस्य**) सत्यस्योदकस्य वा (**पन्थाम्**) पन्थानम् (**अन्वेतवै**) अन्वेतुमनुगन्तुम् (**उ**) (**शृणोतु**) (**नः**) अस्माकम् (**दैव्यम्**) देवैर्विद्वद्भिर्निष्पादितम् (**शर्धः**) शरीरात्मबलम् (**अग्निः**) विद्युदिव (**शृण्वन्तु**) (**विश्वे**) सर्वे (**महिषाः**) महान्तः (**अमूराः**) अमूढा विद्वांसः॥५॥

अन्वयः-हे विद्वान्! भवान् दधिक्राः पथ्यामिव नोऽस्मानृतस्य पन्थामन्वेतवा आ अनक्तू अग्निरिव सद्यो गच्छतु नो दैव्यं शर्धः शृणोतु महिषा विश्वेऽमूराः विद्वांसो नो दैव्यं वचः शृण्वन्तु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यथा परीक्षको न्यायेशो राजा वा सर्वेषां वचांसि श्रुत्वा सत्याऽसत्ये निश्चिनोति अग्न्यादिप्रयोगेण पन्थानं सद्यो गच्छन्ति तथैव यूयं विद्वद्भ्यः श्रुत्वा धर्म्येण मार्गेण व्यवहृत्य मौढ्यं त्यजत त्याजयत॥५॥

अत्राग्न्यश्वादिगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति चतुश्चत्वारिंशत्तमं सूक्तमेकादशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान्! आप (**दधिक्राः**) घोड़े के समान धारण करने वालों को चलाने वाले (**पथ्याम्**) मार्ग में सिद्धि करने वाली गति के समान (**नः**) हम लोगों के (**ऋतस्य**) सत्य वा जल (**पन्थाम्**) मार्ग के (**अन्वेतवै**) पीछे जाने को (**आ, अनक्तु**) कामना करें (**उ**) और (**अग्निः**) बिजुली के समान शीघ्र जावे और (**नः**) हमारे (**दैव्यम्**) विद्वानों ने उत्पन्न किये (**शर्धः**) शरीर और आत्मा के बल को (**शृणोतु**) सुने (**महिषाः**) महान् (**विश्वे**) सब (**अमूराः**) अमूढ़ अर्थात् विज्ञानवान् जन हमारे विद्वानों ने **[**=के**]** सिद्ध किये हुए वचन को (**शृण्वन्तु**) सुनें॥५॥

भावार्थः-हे मनुष्यो! जैसे परीक्षक न्यायधीश वा राजा सब के वचनों को सुन के सत्य और असत्य का निश्चय करता और अग्नि आदि का प्रयोग कर शीघ्र मार्ग को जाता है, वैसे ही तुम लोग विद्वानों से सुन कर धर्मयुक्त मार्ग से अपना व्यवहार कर मूढ़ता छोड़ने और छुड़ाओ॥५॥

इस सूक्त में अग्निरूपी घोड़ों के गुण और कामों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चवालीसवां सूक्त और ग्यारहवां वर्ग पूरा हुआ॥

अथ चतुर्ऋचस्य पञ्चचत्वारिंशत्तमस्य सूक्तस्य वसिष्ठर्षिः। सविता देवता। २ त्रिष्टुप्। ३, ४ निचृत्त्रिष्टुप्। १ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्विद्वांसः किंवत् किं कुर्युरित्याह॥

अब पैंतालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर विद्वान् जन किसके तुल्य क्या करें, इस विषय को कहते हैं॥

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः।
हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम॥ १॥

आ। देवः। यातु। सविता। सुऽरत्नः। अन्तरिक्षऽप्राः। वहमानः। अश्वैः। हस्ते। दधानः। नर्या। पुरूणि। निऽवेशयन्। च। प्रऽसुवन्। च। भूम॥ १॥

पदार्थः-(**आ**) समन्तात् (**देवः**) दाता दिव्यगुणः (**यातु**) आगच्छतु (**सविता**) सकलैश्वर्यप्रदः (**सुरत्नः**) शोभनं रत्नं रमणीयं धनं यस्मादस्य वा (**अन्तरिक्षप्राः**) योऽन्तरिक्षं प्राति व्याप्नोति (**वहमानः**) प्राप्नुवन् प्रापयन् (**अश्वैः**) किरणैरिव महद्भिरग्निजलादिभिः (**हस्ते**) करे (**दधानः**) धरन् (**नर्या**) नृभ्यो हितानि (**पुरूणि**) बहूनि (**निवेशयन्**) प्रवेशयन् (**च**) (**प्रसुवन्**) प्रसुवन्ति यस्मिन् तदैश्वर्यम् (**च**) (**भूम**) भवेम॥ १॥

अन्वयः-हे मनुष्याः! सुरत्नस्सविता देवोऽन्तरिक्षप्रा अश्वैर्भूगोलान् वहमानः पुरूणि नर्या दधानो निवेशयन् प्रसुवं याति तथा सर्वमेतत्प्रापयंश्चैश्वर्यं हस्ते दधानो विद्वानायातु तेन सह वयञ्चेदृशा भूम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये मनुष्याः सूर्यवच्छुभगुणकर्मप्रकाशिता मनुष्यादिहितं कुर्वन्ति ते बहैश्वर्यं प्राप्नुवन्ति॥ १॥

पदार्थः-हे मनुष्यो! (**सुरत्नः**) जिसके वा जिससे सुन्दर रमणीय धन होता (**सविता**) जो सकलैश्वर्य्य देने वाला (**देवः**) दाता दिव्य गुणवान् (**अन्तरिक्षप्राः**) अन्तरिक्ष को व्याप्त होता (**अश्वैः**) किरणों के समान महान् अग्नि जल आदिकों से भूगोलों को (**वहमानः**) पहुँचता वा पहुँचता (**पुरूणि**) बहुत (**नर्या**) मनुष्यों के लिये हितों को (**दधानः**) धारण करता और (**निवेशयन्**) प्रवेश करता हुआ (**प्रसुवम्**) जिसमें नाना रूप उत्पन्न होते हैं उस ऐश्वर्य को प्राप्त होता है, वैसे इससे प्राप्त कराता हुआ (**च**) और ऐश्वर्य को (**हस्ते**) हाथ में धारण करता हुआ विद्वान् (**आ, यातु**) आवे, उसके साथ हम लोग (**च**) भी वैसे ही (**भूम**) होवें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो मनुष्य सूर्य के तुल्य शुभ गुण और कर्म से प्रकाशित, मनुष्यादि प्राणियों का हित करते हैं, वे बहुत ऐश्वर्य पाते हैं॥ १॥

पुना राजादिजनः कीदृशः स्यादित्याह॥

फिर राजादि जन कैसा हो, इस विषय को अगले मन्त्र में कहते है॥

उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम्।
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम्॥ २॥

उत्। अस्य। बाहू इति। शिथिरा। बृहन्ता। हिरण्यया। दिवः। अन्तान्। अनष्टाम्। नूनम्। सः। अस्य। महिमा। पनिष्ट। सूरः। चित्। अस्मै। अनु। दात्। अपस्याम्॥ २॥

पदार्थः-(**उत्**) (**अस्य**) पूर्णविद्यस्य (**बाहू**) भुजौ (**शिथिरा**) शिथिलौ दृढौ (**बृहन्ता**) महान्तौ (**हिरण्यया**) हिरण्यया भूषणयुक्तौ (**दिवः**) प्रकाशस्य (**अन्तान्**) समीपस्थान् (**अनष्टाम्**) प्रसिद्धाम् (**नूनम्**) निश्चयः (**सः**) (**अस्य**) (**महिमा**) महती प्रशंसा (**पनिष्ट**) पन्यते स्तूयते (**सूरः**) सूर्यः (**चित्**) इव (**अस्मै**) (**अनु**) (**दात्**) (**अपस्याम्**) आत्मनः कर्मेच्छाम्॥ २॥

अन्वयः-हे मनुष्याः! यः सूरश्चिदिवास्मा अपस्यामनु दात् यस्यास्य स महिमाऽस्माभिर्नूनं पनिष्ट यस्यास्य दिवोऽन्तान् हिरण्यया बृहन्ता शिथिरा बाहू उदनष्टां स एवाऽस्माभिः प्रशंसनीयोऽस्ति॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्याः! यस्य सूर्यवन्महिमा प्रतापः सर्वबलयुक्तौ बाहू वर्तेते स एवास्य राष्ट्रस्य मध्ये महीयते॥ २॥

पदार्थः-हे मनुष्यो! जो (**सूरः**) सूर्य के (**चित्**) समान (**अस्मै**) इस विद्वान् के लिये (**अपस्याम्**) अपने को कर्म की इच्छा (**अनु, दात्**) अनुकूल दे जिस (**अस्य**) इसकी (**सः**) वह (**महिमा**) अत्यन्त प्रशंसा हम लोगों से (**नूनम्**) निश्चय (**पनिष्ट**) स्तुति की जाती है जिस (**अस्य**) इस (**दिवः**) प्रकाश के (**अन्तान्**) समीपस्थ पदार्थ वा (**हिरण्यया**) हिरण्य आदि आभूषणयुक्त (**बृहन्ता**) महान् (**शिथिरा**) शिथिल दृढ़ (**बाहू**) भुजा (**उत्, अनष्टाम्**) उत्तमता से प्रसिद्ध होती, वही हम लोगों से प्रशंसा करने योग्य है॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जिसका सूर्य के समान महिमा, प्रताप, सर्व बलयुक्त बाहू वर्तमान हैं, वही इस राज्य के बीच पूजित होता है॥ २॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः॥ ३॥

सः। घ। नः। देवः। सविता। सहऽवा। आ। साविषत्। वसुऽपतिः। वसूनि। विऽश्रयमाणः। अमतिम्। उरूचीम्। मर्तऽभोजनम्। अध। रासते। नः॥ ३॥

पदार्थः-(**सः**) (**घा**) एव। अत्र **ऋचि तुनुघे**ति दीर्घः। (**नः**) अस्मान् (**देवः**) कमनीयः (**सविता**) ऐश्वर्यवान् सूर्यवत्प्रकाशमानः (**सहावा**) यः सहैव वनति संभजति (**आ**) समन्तात् (**साविषत्**) सुवेत् (**वसुपतिः**) धनपालकः (**वसूनि**) धनानि (**विश्रयमाणः**) (**अमतिम्**) सुन्दरं रूपम्। **अमतिरिति रूपनाम।** (निघं०३.७) (**उरूचीम्**) उरूणि बहूनि वस्तून्यञ्चन्तीम् (**मर्तभोजनम्**) मर्त्येभ्यो भोजनं मर्तभोजनम् मनुष्याणां पालनं वा (**अध**) अथ (**रासते**) ददाति (**नः**) अस्मभ्यम्॥ ३॥

अन्वयः-यो वसुपतिरुरूचीममतिं विश्रयमाणो नो मर्तभोजनं रासते स घाश्च सविता सहावा देवो नो वसून्या साविषत्॥ ३॥

भावार्थः-ये मनुष्याः सूर्यवत्सर्वेषां धनानि वर्धयित्वा सुपात्रेभ्यः प्रयच्छन्ति ते धनपतयो भवन्ति॥३॥

पदार्थः-जो (**वसुपतिः**) धनों की पालना करने वाला (**उरूचीम्**) बहुतों वस्तुओं को प्राप्त होता और (**अमतिम्**) सुन्दररूप को (**विश्रयमाणः**) विशेष सेवन करता हुआ (**नः**) हम लोगों को (**मर्तभोजनम्**) मनुष्यों का हितकारक भोजन व मनुष्यों का पालन (**रासते**) देता है (**स, घा, अध**) वही पीछे (**सविता**) ऐश्वर्य्यवान् सूर्य के समान प्रकाशमान (**सहावा**) साथ सेवने वाला (**देवः**) मनोहर विद्वान् (**नः**) हमको (**वसूनि**) धन (**आ, साविषत्**) प्राप्त करे॥३॥

भावार्थः-जो मनुष्य सूर्य के समान सब के धनों को बढ़ा कर सुपात्रों के लिये देते हैं, वे धनपति होते हैं॥३॥

पुनर्धार्मिकाः विद्वांसः काभिः स्तूयन्त इत्याह॥

फिर धार्मिक विद्वान् जन किनसे स्तुति किये जावें, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मा गिरः॑ सवि॒तार॑ सुजि॒ह्वं पू॒र्णग॑भस्तिमीळते सुपा॒णिम्।
चि॒त्रं वयो॑ बृ॒हदु॒स्मे द॑धातु यू॒यं पा॑त रवस्तिभिः॒ सदा॑ नः॥४॥१२॥

इ॒माः। गिरः॑। स॒वि॒तार॑म्। सु॒ऽजि॒ह्वम्। पू॒र्णऽग॑भस्तिम्। ई॒ळ्ते॒। सु॒ऽपा॒णिम्। चि॒त्रम्। वयः॑। बृ॒हत्। अ॒स्मे॒ इति॑। द॒धा॒तु॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒॥४॥

पदार्थः-(**इमाः**) (**गिरः**) विद्याशिक्षायुक्ता धर्म्या वाचः (**सवितारम्**) ऐश्वर्यवन्तम् (**सुजिह्वम्**) शोभना जिह्वा यस्य तम् (**पूर्णगभस्तिम्**) पूर्णा गभस्तयो रश्मयो यस्य सूर्यस्य तद्वद्वर्तमानम् (**ईळते**) प्रशंसन्ति (**सुपाणिम्**) शोभनौ पाणी हस्तौ यस्य तम् (**चित्रम्**) अद्भुतम् (**वयः**) जीवनम् (**बृहत्**) महत् (**अस्मे**) अस्मासु (**दधातु**) (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥४॥

अन्वयः-योऽस्मे बृहच्चित्रं वयो दधातु तं सुपाणिं पूर्णगभस्तिमिव सवितारं सुजिह्वं धार्मिकं नरमिमा गिर ईळते, हे विद्वांसो! यूयं विद्यायुक्तवाणीवत्स्वस्तिभिर्नस्सदा पात॥४॥

भावार्थः-सद्विद्यया धार्मिकाः पुरुषा जायन्ते धर्मात्मानमेव विद्या सर्वसुखानि चाप्नुवन्ति॥४॥

अत्र सवितृवद्विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति पञ्चचत्वारिंशत्तमं सूक्तं द्वादशो वर्गश्च समाप्तः॥

पदार्थः-जो (**अस्मे**) हम लोगों में (**बृहत्**) बहुत (**चित्रम्**) अद्भुत (**वयः**) आयु को (**दधातु**) धारण करे उस (**सुपाणिम्**) सुन्दर हाथों वाले (**पूर्णगभस्तिम्**) पूर्ण रश्मि जिसकी उस सूर्यमण्डल के समान वर्त्तमान (**सवितारम्**) ऐश्वर्ययुक्त (**सुजिह्वम्**) सुन्दर जीभ रखते हुए धार्मिक मनुष्य की (**इमाः**) यह (**गिरः**) विद्या शिक्षा और धर्मयुक्त वाणी (**ईळते**) प्रशंसा करती हैं, हे विद्वानो! (**यूयम्**)

तुम विद्यायुक्त वाणी के समान **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदैव **(पात)** रक्षा करो॥४॥

भावार्थः-अच्छी विद्या से धार्मिक पुरुष होते हैं, धर्मात्मा पुरुष ही को विद्या और सर्व सुख प्राप्त होते हैं॥४॥

इस सूक्त में सविता के तुल्य विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पैंतालीसवां सूक्त और बारहवां वर्ग पूरा हुआ॥

अथ चतुर्ऋचस्य [षट्चत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। रुद्रो देवता। २ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। १ विराड् जगती। ३ निचृज्जगती छन्दः। निषादः स्वरः। ४ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्योद्धारः कीदृशा भवेयुरित्याह॥

अब छयालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में योद्धाजन कैसे हों, इस विषय को कहते हैं॥

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः॥ १॥

इमाः। रुद्राय। स्थिरऽधन्वने। गिरः। क्षिप्रऽइषवे। देवाय। स्वधाऽव्ने। अषाळ्हाय। सहमानाय। वेधसे। तिग्मऽआयुधाय। भरत। शृणोतु। नः॥ १॥

पदार्थः-(**इमाः**) (**रुद्राय**) शत्रूणां रोदकाय शूरवीराय (**स्थिरधन्वने**) स्थिरं दृढं धनुर्यस्य तस्मै (**गिरः**) वाचः (**क्षिप्रेषवे**) क्षिप्राः शीघ्रगामिन इषवः शस्त्रास्त्राणि यस्य तस्मै (**देवाय**) विदुषे न्यायं कामयमानाय (**स्वधाव्ने**) यः स्वं वस्त्वेव दधाति यः स्वां धार्मिकां क्रियां दधाति तस्मै (**अषाळ्हाय**) शत्रुभिरसहमानाय (**सहमानाय**) शत्रून् सोढुं समर्थाय (**वेधसे**) मेधाविने (**तिग्मायुधाय**) तिग्मानि तीव्राण्यायुधानि यस्य तस्मै (**भरता**) धरत। अत्र **संहितायामि**ति दीर्घः। (**शृणोतु**) (**नः**) अस्माकम्॥ १॥

अन्वयः-हे विद्वांसो! यस्मै स्थिरधन्वने क्षिप्रेषवे स्वधाव्नेऽषाळ्हाय सहमानाय तिग्मायुधाय वेधसे रुद्राय देवायेमा गिरो यूयं भरता स नोऽस्माकमिमा गिरः शृणोतु॥ १॥

भावार्थः-ये दुष्टानां शासितारः शस्त्रास्त्रविदः सोढारो युद्धकुशला विद्वांसः सन्ति तान् सदा धनुर्वेदाध्यापनेन तदर्थगर्भितवक्तृत्वेन विद्वांसः प्रोत्साहयन्तु यश्च सेनेशः स प्रजास्थानां वाचः शृणोतु॥ १॥

पदार्थः-हे विद्वानो! जिस (**स्थिरधन्वने**) स्थिरधनुष् वाले (**क्षिप्रेषवे**) शीघ्र जाने वाले शस्त्र अस्त्रों वाले (**स्वधाव्ने**) तथा अपनी ही वस्तु और अपनी धार्मिक क्रिया को धारण करने वाले (**अषाळ्हाय**) शत्रुओं से न सहे जाते हुए (**सहमानाय**) शत्रुओं के सहने को समर्थ (**तिग्मायुधाय**) तीव्र आयुध शस्त्रयुक्त (**वेधसे**) मेधावी (**रुद्राय**) शत्रुओं को रुलाने वाले शूरवीर (**देवाय**) न्याय की कामना करते हुए विद्वान् के लिये (**इमाः**) इन (**गिरः**) वाणियों को (**भरत**) धारण करो वह (**नः**) हम लोगों की इन वाणियों को (**शृणोतु**) सुने॥ १॥

भावार्थः-जो दुष्टों के शिक्षा देने वाले, शस्त्र और अस्त्रवेत्ता, सहनशील, युद्धकुशल विद्वान् हैं, उनको सर्वदैव धनुर्वेद पढ़ाने से और उसके अर्थ से भरी हुई वक्तृता से विद्वान् जन अत्यन्त उत्साह दें और जो सेनापति है, वह प्रजास्थ पुरुषों की वाणी सुने॥ १॥

पुनस्ते राजादयः कीदृशास्सन्तः किं कुर्युरित्याह॥

फिर वे राजा आदि जन कैसे हुए क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

स॒ हि क्षये॑ण॒ क्षम्य॑स्य॒ जन्म॑न॒: साम्रा॑ज्येन दि॒व्यस्य॒ चेत॑ति।
अव॒न्नव॑न्ती॒रुप॑ नो॒ दुर॑श्चरानमी॒वो रु॑द्र॒ जासु॑ नो भव॥ २॥

स:। हि। क्षये॑ण। क्षम्य॑स्य। जन्मन:। साम्ऽरा॑ज्येन। दि॒व्यस्य॑। चेत॑ति। अव॑न्। अव॑न्ती:। उप॑। न॒:। दुर॑:। च॒र॒। अ॒न॒मी॒व:। रु॒द्र॒। जासु॑। न॒:। भ॒व॒॥ २॥

पदार्थ:-(**स:**) (**हि**) यत: (**क्षयेण**) निवासेन (**क्षम्यस्य**) क्षन्तुमर्हस्य (**जन्मन:**) प्रादुर्भावस्य (**साम्राज्येन**) सम्यग्राजमानस्य प्रकाशितेन राष्ट्रेण (**दिव्यस्य**) दिवि शुद्धगुणकर्मस्वभावे भवस्य (**चेतति**) संजानीते (**अवन्**) रक्षन् (**अवन्ती:**) रक्षन्ती: सेना: प्रजा वा (**उप**) (**न:**) अस्माकम् (**दुर:**) द्वाराणि (**चर**) (**अनमीव:**) अविद्यमानरोग: (**रुद्र**) दुष्टानां रोदक (**जासु**) यासु प्रजासु। अत्र वर्णव्यत्ययेन यस्य स्थाने ज:। (**न:**) अस्माकम् (**भव**)॥ २॥

अन्वय:-हे रुद्र! यो भवान्नोऽवन्तीरवन् दुर उप चरानमीवस्सन् हि क्षयेण क्षम्यस्य दिव्यस्य जन्मन: साम्राज्येनास्मांश्चेतति स त्वं नो जासु रक्षको भव॥ २॥

भावार्थ:-यो विद्वान् रक्षिका: सेना: प्रजा: रक्षन् प्रतिगृहस्थस्य व्यवहारं विजानन् दु:खानि क्षयन् दिव्यं सुखं जनयन् साम्राज्यं कर्तुं शक्नोति स एव प्रजापालको भवत्विति सर्वे निश्चिन्वन्तु॥ २॥

पदार्थ:-हे (**रुद्र**) दुष्टों को रुलाने वाले! जो आप (**न:**) हमारी (**अवन्ती:**) रक्षा करती हुई सेना वा प्रजाओं की (**अवन्**) पालना करते हुए (**दुर:**) द्वारों के (**उप, चर**) समीप जाओ और (**अनमीव:**) नीरोग होते हुए (**हि**) जिस कारण (**क्षयेण**) निवास से (**क्षम्यस्य**) क्षमा करने योग्य (**दिव्यस्य**) शुद्ध गुण-कर्म-स्वभाव में प्रसिद्ध हुए (**जन्मन:**) जन्म के (**साम्राज्येन**) सुन्दर प्रकाशमान के प्रकाशित राज्य से हम लोगों को (**चेतति**) अच्छे प्रकार चेताते हैं (**स:**) वह आप (**न:**) हम लोगों की (**जासु**) प्रजाओं में रक्षा करने वाला (**भव**) हूजिये॥ २॥

भावार्थ:-जो विद्वान् रक्षा करने वाली सेना वा प्रजाओं की रक्षा करता हुआ प्रत्येक गृहस्थ के व्यवहार को विशेष जानता, दु:खों को नाश करता और सुखों को उत्पन्न करता हुआ अच्छे प्रकार राज्य कर सकता है, वही प्रजाजनों की पालना करने वाला है, यह सब निश्चय करें॥ २॥

पुन: स राजा कीदृशो भवेदित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

या ते॑ दि॒द्युदव॑सृष्टा दि॒वस्परि॑ क्ष्म॒या चर॑ति॒ परि॒ सा वृ॑णक्तु न:।
स॒हस्रं॑ ते स्वपिवात भेष॒जा मा न॑स्तो॒केषु॑ तन॒येषु॑ रीरिष:॥ ३॥

या। ते॒। दि॒द्युत्। अव॑ऽसृष्टा। दि॒व:। परि॑। क्ष्म॒या। चर॑ति। परि॑। सा। वृ॒ण॒क्तु॒। न॒:। स॒हस्र॑म्। ते॒। सु॒ऽअ॒पि॒वा॒त॒। भे॒ष॒जा। मा। न॒:। तो॒केषु॑। तन॒येषु॑। रि॒रि॒ष॒:॥ ३॥

पदार्थ:-(**या**) (**ते**) तव (**दिद्युत्**) न्यायदीप्ति: (**अवसृष्टा:**) शत्रुप्रेरिता (**दिव:**) कमनीयस्य (**परि**) सर्वत: (**क्ष्मया**) भूम्या सह। **क्ष्मेति पृथिवीनाम।** (निघं०१.१ (**चरति**) गच्छति (**परि**) (**सा**)

(वृणक्तु) वर्जयतु **(नः)** अस्मान् **(सहस्रम्)** असंख्यम् **(ते)** तव **(स्वपिवात)** वायुरिव वर्तमान **(भेषजा)** ओषधानि **(नः)** अस्मानस्माकं वा **(तोकेषु)** सद्यो जातेष्वपत्येषु **(तनयेषु)** सुकुमारेषु **(रीरिषः)** हिंस्याः॥३॥

अन्वयः-हे स्वपिवात! ते तव या दिवः पर्यवसृष्टा दिद्युत् क्ष्मया चरति सा नोऽधर्माचरणात् परि वृणक्तु यस्य ते सहस्रं भेषजा सन्ति स त्वं तोकेषु तनयेषु वर्तमानो नोऽस्मानस्माकमपत्यान्यपि मा सु रीरिषः॥३॥

भावार्थः-यस्य राज्ञो न्यायप्रकाशः सर्वत्र प्रदीप्यति स एव सर्वानधर्माचरणान्निरोद्धुं शक्नोति यस्य राष्ट्रे सहस्राणि दूताश्चारा वैद्याश्च विचरन्ति तस्य स्वल्पाऽपि राज्यस्य हानिर्न जायेत॥३॥

पदार्थः-हे **(स्वपिवात)** पवन के समान वर्त्तमान! **(ते)** आपकी **(या)** जो **(दिवः)** मनोहर कार्य के सम्बन्ध में **(परि)** सब ओर से **(अवसृष्टा)** शत्रुओं में प्रेरणा देने वाली **(दिद्युत्)** न्यायदीप्ति **(क्ष्मया)** भूमि के साथ **(चरति)** जाती है **(सा)** वह **(नः)** हम लोगों को अधर्माचरण से **(परि, वृणक्तु)** सब ओर से अलग रक्खे जिस **(ते)** आपके **(सहस्रम्)** असंख्य हजारों **(भेषजा)** ओषधियाँ हैं, वह आप **(तोकेषु)** शीघ्र उत्पन्न हुए और **(तनयेषु)** कुमार अवस्था को प्राप्त हुए बालकों में वर्तमान **(नः)** हम लोगों को वा हमारे सन्तानों को **(मा)** मत **(रीरिषः)** नष्ट करो॥३॥

भावार्थः-जिस राजा का न्यायप्रकाश सर्वत्र प्रदीपता है, वही सबको अधर्माचरण से रोक सकता है, जिसके राज्य में हजारों दूत और चार गुप्तचर मुखवर वैद्यजन विचरते हैं, उसकी थोड़ी भी राज्य की हानि नहीं होती है॥३॥

पुनः स राजा कीदृशः स्यादित्याह॥

फिर वह राजा कैसा हो, इस विषय को अगले मन्त्र में कहते हैं॥

मा नो॑ वधी रुद्र मा परा॑ दा॒ मा ते॑ भूम॒ प्रसि॑तौ हीळी॒तस्य॑।
आ नो॑ भज ब॒र्हिषि॑ जीवशंसे यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः॥४॥१३॥

मा। न॒:। व॒धी॒:। रु॒द्र॒। मा। परा॑। दा॒:। मा। ते॒। भू॒म॒। प्रऽसि॑तौ। ही॒ळि॒तस्य॑। आ। न॒:। भ॒ज॒। ब॒र्हिषि॑। जी॒व॒ऽश॒ंसे। यू॒यम्। पा॒त॒। स्व॒स्तिऽभि॑:। सदा॑। न॒:॥४॥

पदार्थः-**(मा)** **(नः)** अस्मान् **(वधीः)** हन्याः **(रुद्र)** **(मा)** **(परा)** **(दाः)** दूरे भवेः **(मा)** **(ते)** तव **(भूम)** भवेम **(प्रसितौ)** प्रकर्षेण बन्धने **(हीळितस्य)** अनादृतस्य **(आ)** **(नः)** अस्मान् **(भज)** सेवस्व **(बर्हिषि)** अन्तरिक्षे **(जीवशंसे)** जीवैः प्रशंसनीये **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)**॥४॥

अन्वयः-हे रुद्र! त्वं नो मा वधीः मा परा दा हीळितस्य ते प्रसितौ वयं मा भूम त्वं जीवशंसे बर्हिषि नोऽस्माना भज, हे विद्वांसो! यूयं स्वस्तिभिर्नः सदा पात॥४॥

भावार्थः-स एव राजा वीरो वोत्तमः स्यात् यो धार्मिकानदण्ड्यान् कृत्वा दुष्टान् दण्डयेदिति॥४॥

अत्र रुद्रराजपुरुषगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति षट्चत्वारिंशत्तमं सूक्तं त्रयोदशो वर्गश्च समाप्तः॥

पदार्थः-हे (**रुद्र**) दुष्टों को रुलाने वाले! आप (**नः**) हम लोगों को (**मा**) मत (**वधीः**) मारो (**मा**) मत (**परा, दाः**) दूर हो और (**हीळितस्य**) अनादर किये हुए (**ते**) आपके (**प्रसितौ**) बन्धन में हम लोग (**मा**) मत (**भूम**) हों आप (**जीवशंसे**) जीवों से प्रशंसा करने योग्य (**बर्हिषि**) अन्तरिक्ष में (**नः**) हम लोगों को (**आ, भज**) अच्छे प्रकार सेवो, हे विद्वानो! (**यूयम्**) तुम (**स्वस्तिभिः**) सुखों से (**नः**) हम लोगों की (**सदा**) सदा (**पात**) रक्षा करो॥४॥

भावार्थः-वही राजा वीर वा उत्तम हो जो धार्मिक जनों को अदण्ड [=अदण्डय्य] कर दुष्टों को दण्ड दे॥४॥

इस सूक्त में रुद्र, राजा और पुरुषों के गुण और कामों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छयालीसवां सूक्त और तेरहवां वर्ग पूरा हुआ॥

अथ चतुर्ऋचस्य [सप्तचत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठिर्षिः। आपो देवताः। १, ३ त्रिष्टुप्। २ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः। ४ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

पुनर्मनुष्याः प्रथमे वयसि विद्यां गृह्णीयुरित्याह॥

अब सैंतालीसवां सूक्त का आरम्भ है, इसके प्रथम मन्त्र में फिर मनुष्य प्रथम अवस्था में विद्या ग्रहण करें, इस विषय को कहते हैं॥

आपो॒ यं वः॑ प्र॒थ॒मं दे॒व॒यन्त॑ इन्द्र॒पान॑मू॒र्मिमकृ॑ण्वत॒ेळः।
तं वो॑ व॒यं शुचि॑मरि॒प्रम॒द्य घृ॒त॒प्रु॒षं मधु॑मन्तं वनेम॥ १॥

आपः॑। यम्। व॒रुः। प्र॒थ॒मम्। दे॒व॒ऽयन्तः॑। इ॒न्द्र॒ऽपान॑म्। ऊ॒र्मिम्। अकृ॑ण्वत। इ॒ळः। तम्। वः॒। व॒यम्। शुचि॑म्। अ॒रि॒प्रम्। अ॒द्य। घृ॒त॒ऽप्रु॒षम्। मधु॑ऽमन्तम्। व॒ने॒म॒॥ १॥

पदार्थः-(**आपः**) जलानीव विद्वांसः (**यम्**) (**वः**) युष्माकम् (**प्रथमम्**) (**देवयन्तः**) कामयमानाः (**इन्द्रपानम्**) इन्द्रस्य जीवस्य पातुमर्हम् (**ऊर्मिम्**) तरङ्गमिवोच्छतम् (**अकृण्वत**) कुर्वन्तु (**इळः**) वाचः। **इळेति वाङ्नाम।** (निघं०१.११) (**तम्**) (**वः**) युष्मभ्यम् (**वयम्**) (**शुचिम्**) पवित्रम् (**अरिप्रम्**) निष्पापं निर्दोषम् (**अद्य**) इदानीम् (**घृतप्रुषम्**) घृतेनोदकेनाज्येन वा सिक्तम् (**मधुमन्तम्**) बहुमधुरादिगुणयुक्तम् (**वनेम**) विभजेम॥ १॥

अन्वयः-हे मनुष्या! देवयन्तो व इळः प्रथममिन्द्रपानमाप ऊर्मिमिव च यमकृण्वत तं शुचिमरिप्रं घृतप्रुषं मधुमन्तं वो वयमद्य वनेम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये विद्वांसः प्रथमे वयसि विद्यां गृह्णन्ति युक्ताहारविहारेण शरीरमरोगं कुर्वन्ति तानेव सर्वे सेवन्ताम्॥ १॥

पदार्थः-हे मनुष्यो! (**देवयन्तः**) कामना करते हुए जन (**वः**) तुम्हारी (**इळः**) वाणी को (**प्रथमम्**) और प्रथम भाग जो कि (**इन्द्रपानम्**) जीव को प्राप्त होने योग्य उसको (**आपः**) तथा बहुत जलों के समान वा (**ऊर्मिम्**) तरंग के समान (**यम्**) जिसको (**अकृण्वत**) सिद्ध करें (**तम्**) उस (**शुचिम्**) पवित्र (**अरिप्रम्**) निष्पाप निर्दोष (**घृतप्रुषम्**) उदक वा घी से सिंचे (**मधुमन्तम्**) बहुत मधुरादिगुणयुक्त पदार्थ को (**वः**) तुम्हारे लिए (**वयम्**) हम लोग (**अद्य**) आज (**वनेम**) विशेषता से भजें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो विद्वान् जन पहिली अवस्था में विद्या ग्रहण करते और युक्त आहार-विहार से शरीर को नीरोग करते हैं, उन्हीं की सब सेवा करें॥ १॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

तमू॒र्मिमा॑पो॒ मधु॑मत्तमं वो॒ऽपां नपा॑दवत्वाशुहे॒मा॑।
यस्मि॒न्निन्द्रो॒ वसु॑भि॒र्मा॒दया॑ते॒ तम॑श्याम देव॒यन्तो॑ वो अ॒द्य॥ २॥

तम्। ऊ॒र्मिम्। आ॒पः॒। मधु॑मत्ऽतमम्। व॒रुः। अ॒पाम्। नपा॑त्। अ॒व॒तु॒। आ॒शु॒ऽहे॒मा॑। यस्मि॑न्। इन्द्रः॑।

वसुऽभिः। मादयाते। तम्। अश्याम। देवऽयन्तः। वः। अद्य॥ २॥

पदार्थः-(**तम्**) (**ऊर्मिम्**) तरङ्गम् (**आपः**) जलानीव (**मधुमत्तमम्**) अतिशयेन मधुरादिगुणयुक्तम् (**वः**) युष्मान् (**अपाम्**) जलानाम् (**नपात्**) यो न पतति (**अवतु**) रक्षतु (**आशुहेमा**) शीघ्रं वर्धको गन्ता वा (**यस्मिन्**) (**इन्द्रः**) विद्युदिव राजा (**वसुभिः**) धनैः (**मादयाते**) मादयेः हर्षयेत् (**तम्**) (**अश्याम**) प्राप्नुयाम (**देवयन्तः**) कामयमानाः (**वः**) युष्माकम् (**अद्य**) इदानीम्॥ २॥

अन्वयः-हे विद्वांसो! यस्मिन्नाशुहेमेन्द्रो वसुभिस्सह वो युष्मान् मादयाते तमाप ऊर्मिमिव मधुमत्तममपां नपादिन्द्रो यथाऽवतु तथा वयं तं रक्षेम वो देवयन्तो वयमद्याश्याम॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा वायुरपान्तरङ्गानुच्छयति तथा यो राजा धनादिभिः प्रजाजनान् रक्षेत् तस्यैव वयं राजत्वाय सम्मतिं दद्याम॥ २॥

पदार्थः-हे विद्वानो! (**यस्मिन्**) जिसमें (**आशुहेमा**) शीघ्र बढ़ने वा जाने वाला (**इन्द्रः**) बिजुली के समान राजा (**वसुभिः**) धनों के साथ (**वः**) तुमको (**मादयाते**) हर्षित करे (**तम्**) उसको (**आपः**) जल (**ऊर्मिम्**) तरङ्गों को जैसे वैसे (**मधुमत्तमम्**) अतीव मधुरादिगुणयुक्त पदार्थ को (**अपांनपात्**) जो जलों के बीच नहीं गिरता है वह बिजुली के समान राजा जैसे (**अवतु**) रक्खे, वैसे हम लोग (**तम्**) उसको रक्खें और (**वः**) तुम लोगों की (**देवयन्तः**) कामना करते हुए हम लोग (**अद्य**) आज (**अश्याम**) प्राप्त होवें॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे वायु जल को तरङ्गों को उछालता है, वैसे जो राजा धनादिकों से प्रजाजनों की रक्षा करे, उसी को हम लोग राजा होने की सम्मति देवें॥ २॥

पुनः स्त्रीपुरुषाः कीदृशा भूत्वा विवाहं कुर्युरित्याह॥

फिर स्त्री-पुरुष कैसे होकर विवाह करें, इस विषय को अगले मन्त्र में कहते हैं॥

शतऽपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत॥ ३॥

शतऽपवित्राः। स्वधया। मदन्तीः। देवीः। देवानाम्। अपि। यन्ति। पाथः। ताः। इन्द्रस्य। न। मिनन्ति। व्रतानि। सिन्धुऽभ्यः। हव्यम्। घृतऽवत्। जुहोत॥ ३॥

पदार्थः-(**शतपवित्राः**) शतैरुपायैर्ये शुद्धाः (**स्वधया**) अन्नाद्येन (**मदन्तीः**) आनन्दतीः (**देवीः**) विदुष्यो ब्रह्मचारिण्यः (**देवानाम्**) विदुषाम् (**अपि**) (**यन्ति**) प्राप्नुवन्ति (**पाथः**) अन्नाद्यैश्वर्यम् (**ताः**) (**इन्द्रस्य**) समग्रैश्वर्यस्य परमात्मनः (**न**) निषेधे (**मिनन्ति**) हिंसन्ति (**व्रतानि**) सत्यभाषणादीनि कर्माणि (**सिन्धुभ्यः**) नदीभ्य इव (**हव्यम्**) होतुं दातुमर्हम् (**घृतवत्**) बहुघृतयुक्तम् (**जुहोत**) आदद्यात॥ ३॥

अन्वयः-हे विद्वांसो नरा! याः शतपवित्रा मदन्तीर्देवीर्विदुष्यो देवानां स्वधया पाथोऽपि यन्ति ता इन्द्रस्य व्रतानि न मिनन्ति यथा सिन्धुभ्यो घृतवद्धव्यं निर्माय ता जुह्वति तथैता यूयं जुहोत आदद्यात॥ ३॥

भावार्थः-या युवतयः कन्याः सिन्धवः समुद्रानिव हृद्यान् पतीन् प्राप्य न व्यभिचरन्ति तथैव यूयं सर्वे मनुष्याः परस्परेषां संयोगेन सर्वदाऽऽनन्दत॥ ३॥

पदार्थः-हे विद्वान् मनुष्यो! जो **(शतपवित्राः)** सौ उपायों से शुद्ध **(मदन्तीः)** आनन्द करती हुई **(देवीः)** विदुषी पण्डित ब्रह्मचारिणी कन्या **(देवानाम्)** विद्वानों के **(स्वधया)** अन्नादि पदार्थ से **(पाथः)** अन्नादि ऐश्वर्य को **(अपि, यन्ति)** प्राप्त होती हैं **(ताः)** वे **(इन्द्रस्य)** समग्र ऐश्वर्यवान् परमात्मा के **(व्रतानि)** व्रतों को **(न)** नहीं **(मिनन्ति)** नष्ट करती हैं जैसे **(सिन्धुभ्यः)** नदियों के समान **(घृतवत्)** बहुत घी से युक्त **(हव्यम्)** देने योग्य वस्तु बनाकर वे होमती हैं, वैसे इनको तुम **(जुहोत)** ग्रहण करो॥३॥

भावार्थः-जो युवति कन्या, नदियाँ समुद्रों को जैसे, वैसे हृदय के प्यारे पतियों को पाकर छोड़ती नहीं हैं, वैसे ही तुम सब मनुष्य एक-दूसरे के संयोग से सर्वदा आनन्द करो॥३॥

पुनः स्त्रीपुरुषाः किं कुर्युरित्याह॥

फिर स्त्री-पुरुष क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

याः सूर्यो रश्मिभिरातताऩ याभ्य इन्द्रो अरदद् गातुमूर्मिम्।
ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः॥४॥१४॥

याः। सूर्यः। रश्मिऽभिः। आऽततान। याभ्यः। इन्द्रः। अरदत्। गातुम्। ऊर्मिम्। ते। सिन्धवः। वरिवः। धातन। नः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥४॥

पदार्थः-(**याः**) अपः **(सूर्यः)** सविता **(रश्मिभिः)** किरणैः **(आततान)** आतनोति विस्तृणाति **(याभ्यः)** अद्भ्यः **(इन्द्रः)** विद्युत् **(अरदत्)** विलिखति **(गातुम्)** भूमिम्। **गातुरिति पृथिवीनाम।** (निघं०१.१) **(ऊर्मिम्)** तरङ्गम् **(ते)** **(सिन्धवः)** नद्यः **(वरिवः)** परिचरणम् **(धातन)** धर्त **(नः)** अस्माकम् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** सुखादिभिः **(सदा)** **(नः)**॥४॥

अन्वयः-हे पुरुषाः! सूर्यो रश्मिभिर्या आ ततान इन्द्रो याभ्यो गातुमूर्मिमरदत् ता अनुकृत्य स्त्रीपुरुषाः प्रवर्तन्ताम् यथा ते सिन्धवः समुद्रं पूरयन्ति तथा या स्त्रियः सुखैरस्मान् धातन नोऽस्माकं वरिवः कुर्युस्ता वयमपि सेवेमहि, हे पतिव्रता स्त्रियो! यूयं स्वस्तिभिर्नोऽस्मान् पतीन् सदा पात॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो! यथा सूर्यः स्वतेजोभिः भूमेर्जलान्याकृष्य विस्तृणाति तथा सत्कर्मभिः प्रजाः यूयं विस्तृणीतेति॥४॥

अत्र विद्वत्स्त्रीपुरुषगुणवर्णनादेतदर्थस्य सूक्तस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तचत्वारिंशत्तमं सूक्तं चतुर्दशो वर्गश्च समाप्तः॥

पदार्थः-हे पुरुषो! **(सूर्यः)** सूर्यमण्डल **(रश्मिभिः)** अपनी किरणों से **(याः)** जिन जलों को **(आ, ततान)** विस्तारता है **(इन्द्रः)** बिजुली **(याभ्यः)** जिन जलों से **(गातुम्)** भूमि को और **(ऊर्मिम्)** तरङ्ग को **(अरदत्)** छिन्न-भिन्न करती है, उनको अनुहारि स्त्री-पुरुष वर्तें जैसे **(ते)** वे **(सिन्धवः)** नदियाँ समुद्र को पूरा करती हैं, वैसे जो स्त्रियाँ सुखों से हम लोगों को **(धातन)** धारण करें **(नः)** हमारी **(वरिवः)** सेवा करें, उनकी हम भी सेवा करें, हे पतिव्रता स्त्रियो! **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हम पति लोगों की **(सदा)** सदा **(पात)** रक्षा करो॥४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! जैसे सूर्य अपने तेजों से भूमि के जलों को खींच कर विस्तार करता है, वैसे अच्छे कामों से प्रजा को तुम विस्तारो॥४॥

इस सूक्त में विद्वान्, स्त्री-पुरुष के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह सैंतालीसवां सूक्त और चौदहवां वर्ग पूरा हुआ॥

अथ चतुर्ऋचस्य [अष्टचत्वारिंशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। १-३ ऋभवः। ४ ऋभवो विश्वेदेवाः। १ भुरिक्पङ्क्तिश्छन्दः। पञ्चमःस्वरः। २ निचृत्त्रिष्टुप्। ३ त्रिष्टुप्। ४ विराट्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वद्भिः किं कर्तव्यमित्याह॥

अब चार ऋचा वाले अड़तालीसवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु॥ १॥

ऋभुक्षणः। वाजाः। मादयध्वम्। अस्मे इति। नरः। मघऽवानः। सुतस्य। आ। वः। अर्वाचः। क्रतवः। न। याताम्। विऽभ्वः। रथम्। नर्यम्। वर्तयन्तु॥ १॥

पदार्थः-(**ऋभुक्षणः**) महान्तः। **ऋभुक्षा इति महन्नाम।** (निघं०३.३ **(वाजाः)** विज्ञानवन्तः **(मादयध्वम्)** आनन्दयत **(अस्मे)** अस्मान् **(नरः)** नायकाः **(मघवानः)** बहूत्तमधनयुक्ताः **(सुतस्य)** निष्पन्नस्य **(आ) (वः)** युष्माकम् **(अर्वाचः)** येऽर्वाग्गच्छन्ति ते **(क्रतवः)** प्रजाः **(न)** इव **(याताम्)** गच्छताम् **(विभ्वः)** सकलविद्यासु व्यापिनः **(रथम्)** रमणीयम् यानम् **(नर्यम्)** नृषु साधुम् **(वर्त्तयन्तु)**॥१॥

अन्वयः-हे ऋभुक्षणो मघवानो विभ्वोऽर्वाचो वाजा नरो! यूयं क्रतवो न सुतस्य सेवनेनास्मे मादयध्वमा यातां वो युष्माकं अस्माकं च नर्यं रथमन्ये वर्तयन्तु॥१॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! ये विद्वांसो युष्मानस्मांश्च विद्याबुद्धिप्रदानेन शिल्पविद्यया चानन्दयन्ति ते सर्वदा प्रशंसनीयाः सन्ति॥१॥

पदार्थः-हे **(ऋभुक्षणः)** महात्मा **(मघवानः)** बहुत उत्तम धनयुक्त **(विभ्वः)** सकल विद्याओं में व्याप्त **(अर्वाचः)** जो पीछे जाने वाले **(वाजाः)** विज्ञानवान् **(नरः)** मनुष्यो! तुम **(क्रतवः)** अतीव बुद्धियों के **(न)** समान **(सुतस्य)** उत्पन्न हुए के सेवने से **(अस्मे)** हम लोगों को **(मादयध्वम्)** आनन्दित करो **(आ, याताम्)** आते हुए **(वः)** तुम लोगों के और हमारे **(नर्यम्)** मनुष्यों में उत्तम **(रथम्)** रमणीय यान को और नर **(वर्तयन्तु)** वर्तें॥१॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जो विद्वान् जन तुम्हें और हमें विद्या और बुद्धि के दान से वा शिल्पविद्या से आनन्दित करते हैं, वे सर्वदा प्रशंसा करने योग्य हैं॥१॥

मनुष्याः कथं विद्वांसो भवन्तीत्याह॥

मनुष्य कैसे विद्वान् होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि।
वाजो अस्माँ अवतु वाजसातावेन्द्रेण युजा तरुषेम वृत्रम्॥ २॥

ऋभुः। ऋभुऽभिः। अभि। वः। स्याम। विऽभ्वः। विभुऽभिः। शवसा। शवांसि। वाजः। अस्मान्।

अवतु। वाजऽसातौ। इन्द्रेण। युजा। तरुषेम। वृत्रम्॥ २॥

पदार्थः-(**ऋभुः**) मेधावी विद्वान् (**ऋभुभिः**) मेधाविभिरासैर्विद्वद्भिस्सह। **ऋभुरिति मेधाविनाम।** (निघं०३.१५) (**अभि**) आभिमुख्ये (**वः**) युष्मान् (**स्याम**) (**विभ्वः**) सकलशुभगुणकर्मस्वभाव-व्यापिनः (**विभुभिः**) सद्गुणादिषु व्याप्तैः (**शवसा**) बलेन (**शवांसि**) स-ामे (**इन्द्रेण**) विद्युदाद्यस्त्रेण (**युजा**) युक्तेन (**तरुषेम**) प्राप्नुयाम। **तरुष्यतीति पदनाम।** (निघं०४.२) (**वृत्रम्**) धनम्। **वृत्रमिति धननाम।** (निघं०२.१०)॥२॥

अन्वयः-हे मनुष्या! यथा वाज ऋभुभिस्सह वाजसातावृभुर्वो युष्मानस्माँश्चावतु युजेन्द्रेण वृत्रं प्राप्नुयात् तथा विभ्वो वयं विभुभिः शवसा च सह शवांस्यभि तरुषेम यतो वयं सुखिनः स्याम॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। त एव विद्वांसो व्याप्तविद्याशुभगुणस्वभावा भवन्ति ये संग्रामेऽपि सर्वान्रक्षयित्वा धनं बलं च दातु शक्नुवन्ति॥२॥

पदार्थः-हे मनुष्यो! जैसे (**वाजः**) विज्ञानवान् वा ऐश्वर्य्ययुक्त जन (**ऋभुभिः**) बुद्धिमान् उत्तम विद्वानों के साथ (**वाजसातौ**) संग्राम में (**ऋभुः**) बुद्धिमान् (**वः**) तुम्हें और (**अस्मान्**) हमें (**अवतु**) पाले रक्खे वा (**युजा**) योग किये हुए (**इन्द्रेण**) बिजुली आदि शस्त्र से (**वृत्रम्**) धन को प्राप्त हो, वैसे (**विभ्वः**) सकल शुभ गुण, कर्म और स्वभावों में व्याप्त हम लोग (**विभुभिः**) अच्छे गुणादिकों में व्याप्त जन और (**शवसा**) बल के साथ (**शवांसि**) बलों को (**अभि, तरुषेम**) प्राप्त हों जिससे हम लोग सुखी (**स्याम**) हों॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही विद्वान् जन विद्याओं में व्याप्त शुभ गुण-कर्म-स्वभाव युक्त हैं, जो संग्राम में भी सब की रक्षा करके धन और बल दे सकते हैं॥२॥

पुनः को राजा विजयी राज्यवर्धको भवतीत्याह॥

फिर कौन राजा विजयशील राज्य का बढ़ाने वाला होता है, इस विषय को अगले मन्त्र में कहते हैं॥

ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरतातिं वन्वन्।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन् वि नृम्णम्॥ ३॥

ते। चित्। हि। पूर्वीः। अभि। सन्ति। शासा। विश्वान्। अर्यः। उपरऽतातिं। वन्वन्। इन्द्रः। विऽभ्वान्। ऋभुक्षाः। वाजः। अर्यः। शत्रोः। मिथत्या। कृणवन्। वि। नृम्णम्॥ ३॥

पदार्थः-(**ते**) विद्वांसः (**चित्**) अपि (**हि**) यतः (**पूर्वीः**) सनातन्यः प्रजाः (**अभि**) (**सन्ति**) (**शासा**) शासनेन (**विश्वान्**) सर्वान् (**अर्यः**) स्वामी (**उपरताति**) उपरतातौ पलैः मेघास्त्रादिभिः संग्रामे (**वन्वन्**) याचन्ते (**इन्द्रः**) परमैश्वर्ययुक्तः (**विभ्वान्**) विभून् विद्याव्याप्तानमात्यान् (**ऋभुक्षाः**) य ऋभून् मेधाविनः क्षियति निवासयति स महान् (**वाजः**) बलविज्ञानान्नयुक्तः (**अर्यः**) स्वामी (**शत्रोः**) (**मिथत्या**) हिंसया (**कृणवन्**) कुर्वन्ति (**वि**) (**नृम्णम्**) नृणां रमणीयं धनम्॥३॥

अन्वयः-हे मनुष्या! यो वाजोऽर्य ऋभुक्षाः स इन्द्रः शत्रोर्मिथत्या नृम्णमिच्छन् यान् विश्वान् विभ्वान्

स्वकीयान् करोति त उपरताति विजयं कृणवन् ते चिद्धि शासा पूर्वीरभि सन्ति सोऽर्यो सुखी विजयी जायते॥३॥

भावार्थः-स एव राजा महान् विजयी भवति यो धार्मिकानुत्तमान् विदुषः संगृह्णाति॥३॥

पदार्थः-हे मनुष्यो जो **(वाजः)** बल विज्ञान और अन्नयुक्त **(अर्यः)** स्वामी **(ऋभुक्षाः)** उत्तम बुद्धिमानों को निरन्तर बसावे वह **(इन्द्रः)** परमैश्वर्ययुक्त महान् राजा **(शत्रोः)** शत्रु की **(मिथत्या)** हिंसा से **(नृम्णम्)** जो मनुष्यों में रमणीय ऐसे धन की इच्छा करता हुआ जिन **(विश्वान्)** समस्त **(विभ्वान्)** विद्या में व्याप्त अमात्य जनों को अपना करता है **(ते)** वे विद्वान् जन **(उपरताति)** मेघास्त्रादिकों से संग्राम में विजय **(कृणवन्)** करते हैं वे **(चित्)** ही **(हि)** निश्चय कर **(शासा)** शासन से **(पूर्वीः)** सनातन प्रजाजन **(अभि, सन्ति)** सब ओर से विद्यमान हैं तथा वह स्वामी **(वि)** विजयी होता है॥३॥

भावार्थः-वही राजा महान् विजयी होता है, जो धार्मिक उत्तम विद्वानों का संग्रह करता है॥३॥

पुना राजादिभिर्विद्वद्भिः किं कर्त्तव्यमित्याह॥

फिर राजादिकों से विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः।
सम्मस्मे इषं वसवो ददीरन् यूयं पात स्वस्तिभिः सदा नः॥४॥१५॥

नु। देवासः। वरिवः। कर्तन। नः। भूत। नः। विश्वे। अवसे। सऽजोषाः। सम्। अस्मे इति। इषम्। वसवः। ददीरन्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥४॥

पदार्थः-(**नु**) क्षिप्रम्। अत्र **ऋचि तुनुघे**ति दीर्घः। **(देवासः)** विद्वांसः **(वरिवः)** **(कर्तना)** कुर्यात्। अत्र **संहितायामि**ति दीर्घः। **(नः)** अस्माकम् **(भूत)** भवत **(नः)** अस्माकम् **(विश्वे)** सर्वे **(अवसे)** रक्षणाद्याय **(सजोषाः)** समानप्रीतिसेविनः। अत्र वचनव्यत्ययेन जसः स्थाने सुः। **(सम्)** **(अस्मे)** अस्मभ्यम् **(इषम्)** अन्नं विज्ञानं वा **(वसवः)** ये विद्यायां वसन्ति ते **(ददीरन्)** प्रयच्छेयुः **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)**॥४॥

अन्वयः-हे सजोषा वसवो विश्वे देवासो! यूयं नो वरिवः कर्त्तन नोऽवसे नु भूताऽस्मे इषं संददीरन् यूयं स्वस्तिभिर्नस्सदा पात॥४॥

भावार्थः-हे विद्वांसो! राजजना यूयमस्मान् प्रजाः सततं रक्षत सर्वदा विज्ञानमन्नाद्यैश्वर्यं च प्रयच्छत एवं कृते सति युष्मान् वयं सततं रक्षेमेति॥४॥

अत्र विद्वद्गुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इत्यष्टचत्वारिंशत्तमं सूक्तं पञ्चदशो वर्गश्च समाप्तः॥

पदार्थः-हे **(सजोषाः)** समान प्रीति के सेवने वाले **(वसवः)** विद्या में निवासकर्त्ता **(विश्वे)** समस्त **(देवासः)** विद्वान् जनो! तुम **(नः)** हमारा **(वरिवः)** सेवन **(कर्त्तन)** करो **(नः)** हमारी

(अवसे) रक्षा आदि के लिये **(नु)** शीघ्र **(भूत)** संनद्ध होओ **(अस्मे)** हमारे लिये **(इषम्)** अन्न वा विज्ञान को **(सम्, ददरीन्)** अच्छे प्रकार देओ **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हमारी **(सदा)** सर्वदा **(पात)** रक्षा करो॥४॥

भावार्थः-हे विद्वान् राजजनो! तुम हम लोगों की ओर प्रजाजनों की निरन्तर रक्षा करो, सर्वदा विज्ञान और अन्न आदि ऐश्वर्य को देओ, ऐसा करो तो तुम लोगों की हम निरन्तर रक्षा करें॥४॥

इस मन्त्र में विद्वानों के गुण और कर्मों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अड़तालीसवां सूक्त और पन्द्रहवां वर्ग पूरा हुआ॥

अत चतुर्ऋचम्य [एकोनपञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। आपो देवताः। १ निचृत्त्रिष्टुप्। २, ३ त्रिष्टुप्। ४ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनस्ता आपः कीदृश्यः सन्तीत्याह॥

अब चार ऋचा वाले उनंचासवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में फिर वे जल कैसे हैं, इस विषय को कहते हैं॥

समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः।
इन्द्रो या वज्री वृषभो ररादु ता आपो देवीरिह मामवन्तु॥ १॥

समुद्रऽज्येष्ठाः। सलिलस्य। मध्यात्। पुनानाः। यन्ति। अनिऽविशमानाः। इन्द्रः। याः। वज्री। वृषभः। ररादः। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ १॥

पदार्थः-(**समुद्रज्येष्ठाः**) समुद्रः ज्येष्ठो यासां ताः (**सलिलस्य**) अन्तरिक्षस्य (**मध्यात्**) (**पुनानाः**) पवित्रयन्त्यः (**यन्ति**) (**अनिविशमानाः**) याः कुत्रचिन्न निविशन्ते (**इन्द्रः**) सूर्यो विद्युद्वा (**याः**) (**वज्री**) वज्रतुल्यछेदकबहुकिरणयुक्तः (**वृषभः**) वर्षकः (**ररादः**) विलिखति वर्षयति (**ताः**) (**आपः**) जलानि (**देवीः**) प्रमोदिकाः (**इह**) अस्मिन् संसारे (**माम्**) (**अवन्तु**) रक्षन्तु॥ १॥

अन्वयः-हे विद्वांसो! यास्समुद्रज्येष्ठाः पुनाना अनिविशमाना आपस्सलिलस्य मध्याद्यन्ति मामिहावन्तु ताः देवीः वृषभो वज्रीन्द्रो ररादः तथा यूयं भवत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! या आप अन्तरिक्षाद्वर्षित्वा सर्वान् पालयन्ति ता यूयं पानादिकार्येषु संप्रयुङ्ग्ध्वम्॥ १॥

पदार्थः-हे विद्वानो! (**याः**) जो ऐसी हैं कि (**समुद्रज्येष्ठाः**) जिन में समुद्र ज्येष्ठ है वे (**पुनानाः**) पवित्र करती हुईं (**अनिविशमानाः**) कहीं निवास न करने वाली (**आपः**) जल तरङ्गें (**सलिलस्य**) अन्तरिक्ष के (**मध्यात्**) बीच से (**यन्ति**) जाती हैं वह (**माम्**) मेरी (**इह**) इस संसार में (**अवन्तु**) रक्षा करें और (**ताः**) उन (**देवीः**) प्रमोद कराने वाली जल तरंगों को (**वृषभः**) वर्षा करने वा (**वज्री**) वज्र के तुल्य छिन्न-भिन्न करने वाला बहुत किरणों से युक्त (**इन्द्रः**) सूर्य वा बिजुली (**ररादः**) वर्षाता है, वैसे तुम होओ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जो जल अन्तरिक्ष से बरस के सब की पालना करते हैं, उन का तुम पान आदि कामों में अच्छे प्रकार योग करो॥ १॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु॥ २॥

याः। आपः। दिव्याः। उत। वा। स्रवन्ति। खनित्रिमाः। उत। वा। याः। स्वयम्ऽजाः। समुद्रऽअर्थाः। याः। शुचयः। पावकाः। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ २॥

पदार्थः-(**याः**) (**आपः**) जलानि (**दिव्याः**) शुद्धाः (**उत**) अपि (**वा**) (**स्रवन्ति**) चलन्ति उत वा (**खनित्रिमाः**) याः खनित्रेण संजाताः (**उत**) (**वा**) (**याः**) (**स्वयंजाः**) स्वयंजाताः (**समुद्रार्थाः**) समुद्रायेमाः (**याः**) (**शुचयः**) पवित्राः (**पावकाः**) पवित्रकर्त्र्यः (**ताः**) (**आपः**) (**देवीः**) देदीप्यमानाः (**इह**) (**माम्**) (**अवन्तु**)॥२॥

अन्वयः-हे मनुष्या! या दिव्या आपस्स्रवन्ति उत वा खनित्रिमा जायन्ते याः स्वयंजा उत वा समुद्रार्थाः याः शुचयः पावकाः सन्ति ता देवीराप इह मामवन्तु॥२॥

भावार्थः-हे विद्वांसो! यथा जलानि प्राणाश्चाऽस्मान् संरक्ष्य वर्धयेयुस्तथा यूयमस्मान् बोधयत॥२॥

पदार्थः-हे मनुष्यो (**याः**) जो (**दिव्याः**) शुद्ध (**आपः**) जल (**स्रवन्ति**) चूते हैं (**उत, वा**) अथवा (**खनित्रिमाः**) खोदने से उत्पन्न होते हैं वा (**याः**) जो (**स्वयंजाः**) आप उत्पन्न हुए हैं (**उत, वा**) अथवा (**समुद्रार्थाः**) समुद्र के लिये हैं वा (**याः**) जो (**शुचयः**) पवित्र (**पावकाः**) पवित्र करने वाले हैं (**ताः**) वह (**देवीः**) देदीप्यमान (**आपः**) जल (**इह**) इस संसार में (**माम्**) मेरी (**अवन्तु**) रक्षा करें॥२॥

भावार्थः-हे विद्वानो! जैसे जल और प्राण हमारी अच्छे प्रकार रक्षा कर बढ़ावें, वैसे तुम लोग हम को बोध कराओ॥२॥

पुनः स जगदीश्वरः कीदृशोऽस्तीत्याह॥

फिर वह जगदीश्वर कैसा है, इस विषय को अगले मन्त्र में कहते हैं॥

यासां॑ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्य॒ञ्जना॑नाम्।
म॒धु॒श्चु॒तः॒ शुच॑यो॒ याः पा॑व॒कास्ता आपो॑ दे॒वीरि॒ह मा॑मवन्तु॥३॥

यासा॑म्। राजा॑। व॑रुणः। याति॑। मध्ये॑। स॒त्या॒नृ॒ते इति॑। अ॒व॒ऽपश्य॑न्। जना॑नाम्। म॒धु॒श्चु॒तः॒। शुच॑यः। याः। पा॒व॒काः। ताः। आपः॑। दे॒वीः। इ॒ह। माम्। अ॒व॒न्तु॒॥३॥

पदार्थः-(**यासाम्**) अपाम् (**राजा**) प्रकाशमानः (**वरुणः**) सर्वोत्कृष्ट ईश्वरः (**याति**) प्राप्नोति (**मध्ये**) (**सत्यानृते**) सत्यं चानृतं च ते (**अवपश्यन्**) यथार्थं विजानन् (**जनानाम्**) जीवानाम् (**मधुश्चुतः**) मधुरादिगुणैर्निष्पन्नाः (**शुचयः**) पवित्राः (**याः**) (**पावकाः**) पवित्रकराः (**ताः**) (**आपः**) (**देवीः**) देदीप्यमानाः (**इह**) अस्मिन् संसारे (**माम्**) (**अवन्तु**)॥३॥

अन्वयः-हे मनुष्या! यासां मध्ये वरुणो राजा जनानां सत्यानृत आचरणे अवपश्यन् याति या मधुश्चुतः शुचयः पावकास्सन्ति ता देवीराप इह मामवन्तु॥३॥

भावार्थः-हे मनुष्या! यो जगदीश्वरः प्राणदिष्वभिव्याप्तस्सर्वेषां जीवानां धर्माधर्मौ पश्यन् फलेन योजयन् सर्वं रक्षति स एव सर्वैः सततं ध्येयोऽस्ति॥३॥

पदार्थः-हे मनुष्यो! (**यासाम्**) जिन जलों के (**मध्ये**) बीच (**वरुणः**) सब से उत्तम (**राजा**) प्रकाशमान ईश्वर (**जनानाम्**) मनुष्यों के (**सत्यानृते**) सत्य और झूंठ आचरणों को (**अव, पश्यन्**) यथार्थ जानता हुआ (**याति**) प्राप्त होता है वा (**याः**) जो (**मधुश्चुतः**) मधुरादि गुणों से उत्पन्न हुए

(शुचयः) पवित्र **(पावकाः)** और पवित्र करने वाले हैं **(ताः)** वे **(देवीः)** देदीप्यमान **(आपः)** जल **(इह)** इस संसार में **(माम्)** मेरी **(अवन्तु)** रक्षा करें॥ ३॥

भावार्थः-हे मनुष्यो! जो जगदीश्वर प्राणादिकों में अभिव्याप्त सब जीवों के धर्म-अधर्म को देखता और फल से युक्त करता हुआ सब की रक्षा करता है, वही सब को निरन्तर ध्यान करने योग्य है॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

यासु॒ राजा॒ वरु॑णो॒ यासु॒ सोमो॒ विश्वे॑ दे॒वा यासूर्ज्जं मद॑न्ति।
वै॒श्वा॒न॒रो यास्व॒ग्निः प्रवि॑ष्टस्ता आपो॑ दे॒वीरि॒ह माम॑वन्तु॥ ४॥ १६॥

यासु॑। राजा॑। वरु॑णः। यासु॑। सोमः॑। विश्वे॑। दे॒वाः। यासु॑। ऊर्ज्जम्। मद॑न्ति। वै॒श्वा॒न॒रः। यासु॑। अ॒ग्निः। प्रऽवि॑ष्टः। ताः। आपः॑। दे॒वीः। इ॒ह। माम्। अ॒व॒न्तु॒॥ ४॥

पदार्थः-(**यासु**) अन्तरिक्षे जलेषु प्राणेषु वा (**राजा**) न्यायविनयाभ्यां प्रकाशमानः (**वरुणः**) श्रेष्ठगुणकर्मस्वभावः (**यासु**) (**सोमः**) ओषधिगणः (**विश्वे**) सर्वे (**देवाः**) विद्वांसः पृथिव्यादयो वा (**यासु**) (**ऊर्जम्**) बलं पराक्रमम् (**मदन्ति**) प्राप्नुवन्ति (**वैश्वानरः**) विश्वेषु नरेषु वा राजमानः परमात्मा (**यासु**) (**अग्निः**) विद्युत् (**प्रविष्टः**) (**ताः**) (**आपः**) (**देवीः**) कमनीयाः (**इह**) अस्मिन् संसारे (**माम्**) (**अवन्तु**)॥ ४॥

अन्वयः- हे विद्वांसो! यास्वप्सु वरुणो राजा यासु सोमो यासु विश्वे देवाश्चोर्जं मदन्ति यासु वैश्वानरोऽग्निः प्रविष्टस्ता देवीराप इह मामवन्तु तथा बोधयत॥ ४॥

भावार्थः- हे मनुष्या! यस्मिन्नाकाशे प्राणेषु जले वा सर्वं जगज्जीवति येषु प्राणेषु स्थितो योगी परमात्मानं लभते यत्र विद्युत्प्रविष्टाऽस्ति ता अपो यूयं विज्ञाय रक्षिता भवतेति॥ ४॥

अत्राबादिगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इत्येकोनपञ्चाशत्तमं सूक्तं षोडशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! **(यासु)** जिन अन्तरिक्ष जल वा प्राणों में **(वरुणः)** श्रेष्ठ गुण-कर्म-स्वभावयुक्त **(राजा)** न्याय और विनय नम्रता से प्रकाशमान **(यासु)** वा जिन में **(सोमः)** ओषधिगण और **(यासु)** जिन में **(विश्वे)** समस्त **(देवाः)** विद्वान् जन अथवा पृथिवी आदि लोक **(ऊर्जम्)** बल पराक्रम को **(मदन्ति)** प्राप्त होते हैं या **(यासु)** जिन में **(वैश्वानरः)** सब में वा मनुष्यों में प्रकाशमान परमात्मा वा **(अग्निः)** बिजुलीरूप अग्नि **(प्रविष्टः)** प्रविष्ट है **(ताः)** वे **(देवीः)** मनोहर **(आपः)** जल

(इह) इस संसार में **(माम्)** मेरी **(अवन्तु)** रक्षा करें॥४॥

भावार्थ:-हे मनुष्यो! जिस आकाश में, प्राणों में वा जल में सब जगत् जीवन धारण करता है वा जिन प्राणों में स्थित योगी जन परमात्मा को प्राप्त होता है वा जहाँ बिजुली प्रविष्ट है, उन जलों को तुम जान कर रक्षायुक्त होओ॥४॥

इस सूक्त में जलादिकों के गुण और कृत्यों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह उनंचासवां सूक्त और सोलहवां वर्ग पूरा हुआ॥

अथ चतुर्ऋचस्य [पञ्चाशत्तमस्य] सूक्तस्य १-४ वसिष्ठः। १ मित्रावरुणौ। २ अग्निः। ३ विश्वेदेवाः। ४ नद्यः। १, ३ स्वराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २ निचृज्जगती। ४ भुरिगतिजगतीच्छन्दः। निषादः स्वरः॥

अथ मनुष्यैः किमत्रानुष्ठेयमित्याह॥

अब चार ऋचा वाले पचासवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में मनुष्यों को इस संसार में क्या आचरण करना चाहिये, इस विषय को कहते हैं॥

आ मां मित्रावरुणेह रक्षतं कुलायय॑द्विश्वय॒न्मा न॒ आ ग॑न्।
अ॒ज॒का॒वं दु॒र्दृ॒शी॑कं ति॒रो द॑धे॒ मा मां पद्ये॑न॒ रप॑सा वि॒द॒त्स॒रुः॥ १॥

आ। माम्। मित्रावरुणा। इह। रक्षतम्। कुलाययत्। विऽश्वयत्। मा। नः। आ। गन्। अजकाऽवम्। दुःऽदृशीकम्। तिरः। दधे। मा। माम्। पद्येन। रपसा। विदत्। त्सरुः॥ १॥

पदार्थः-(**आ**) (**माम्**) (**मित्रावरुणा**) प्राणोदानाविवाध्यापकोपदेशकौ (**इह**) अस्मिन् संसारे (**रक्षतम्**) (**कुलाययत्**) कुलायं कुलोन्नतिं कामयमानः (**विश्वयत्**) यो विश्वं करोति सः (**मा**) निषेधे (**नः**) अस्मान् (**आ**) (**गन्**) आगच्छेत् प्राप्नुयात् (**अजकावम्**) योऽजान् जीवान् कावयति पीडयति तम् (**दुर्दृशीकम्**) दुःखेन द्रष्टुं योग्यम् (**तिरः**) (**दधे**) निवारयामि (**मा**) निषेधे (**माम्**) (**पद्येन**) प्राप्तुं योग्येन (**रपसा**) पापेन (**विदत्**) प्राप्नुयात् (**त्सरुः**) कुटिलगतिः॥ १॥

अन्वयः-हे मित्रावरुणा! युवामिह योऽहं कुलाययद्विश्वयद् दुर्दृशीकमजकावं तिरोदधे त्सरू रोगः पद्येन रपसा मां मा विदत् कापि पीडा नोऽस्मान् मा आगन् तस्मान्मा मां रक्षतम्॥ १॥

भावार्थः-मनुष्यैः कदापि पापाचरणं कुपथ्यं च न कार्यं येन कदाचिद् रोगप्राप्तिर्न स्यात् येऽत्र संसारे अध्यापकोपदेशकास्सन्ति तेऽध्यापनोपदेशाभ्यां सर्वानरोगान् कृत्वा सरलानुद्योगिनः कुर्वन्तु॥ १॥

पदार्थः-हे (**मित्रावरुणा**) प्राण और उदान के समान अध्यापक और उपदेशक! तुम (**इह**) इस संसार में जो मैं (**कुलाययत्**) कुल की उन्नति चाहता हुआ (**विश्वयत्**) सब काम करने वाला (**दुर्दृशीकम्**) दुःख से देखने योग्य (**अजकावम्**) जीवों को पीड़ा देता उसको (**तिरोदधे**) निवारणे करता हूँ वह (**त्सरूः**) कुटिल गति रोग (**पद्येन**) प्राप्त होने योग्य (**रपसा**) पाप से (**माम्**) मुझे (**मा**) मत (**विदत्**) प्राप्त हो कोई पीड़ा (**नः**) हम लोगों को (**मा**) मत (**आ, गन्**) प्राप्त हो इससे (**माम्**) मेरी (**आ, रक्षतम्**) सब ओर से रक्षा करो॥ १॥

भावार्थः-मनुष्यों को पापाचरण वा कुपथ्य कभी न करना चाहिये जिससे कभी रोगप्राप्ति न हो जो, इस संसार में अध्यापक और उपदेशक हैं, वे पढ़ाने और उपदेश करने से सब को अरोगी कर सीधे और उद्योगी करें॥ १॥

पुनर्मनुष्यैः रोगनिवारणार्थं किं कर्तव्यमित्याह॥

फिर मनुष्यों को रोगनिवारणार्थ क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

यद्विजाम॒न् पर्रुषि॒ वन्द॑नं भुव॑दष्ठी॒वन्तौ॒ परि॑ कु॒ल्फौ च॒ देह॑त्।

अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा विदुत्सरुः॥ २॥

यत्। विऽजामन्। परुषि। वन्दनम्। भुवत्। अष्ठीवन्तौ। परि। कुल्फौ। च। देहत्। अग्निः। तत्। शोचन्। अप। बाधताम्। इतः। मा। माम्। पद्येन। रपसा। विदत्। त्सरुः॥ २॥

पदार्थः-(**यत्**) यस्मिन् (**विजामन्**) विजानन् (**परुषि**) कठोरे व्यवहारे (**वन्दनम्**) (**भुवत्**) भवति (**अष्ठीवन्तौ**) ष्ठीवनं कफादिकमत्यजन्तौ (**परि**) सर्वतः (**कुल्फौ**) गुल्फौ (**च**) (**देहत्**) वर्धये (**अग्निः**) (**तत्**) (**शोचन्**) पवित्रीकुर्वन् (**अप**) (**बाधताम्**) निवारयतु (**इतः**) अस्मात्सः (**मा**) निषेधे (**माम्**) (**पद्येन**) (**रपसा**) अपराधेन (**विदत्**) (**त्सरुः**) कठिनो रोगः॥ २॥

अन्वयः-हे मनुष्या! यद्यस्मिन् परुषि वन्दनं विजामन् भुवत् यत्सरू रोगोऽष्ठीवन्तौ कुल्फौ च परिदेहत् तत्तमग्निः शोचन्नितोऽप बाधतां यः पद्येन रपसा मां रोगः प्राप्नोति स मां मा विदत्॥ २॥

भावार्थः-ये मनुष्या ब्रह्मचर्यं विहाय बाल्यविवाहं कुपथ्यं च कुर्वन्ति तेषां शरीरेषु शोथादयो रोगाः प्रभवन्ति तेषां निवारणं वैद्यकरीत्या कार्यम्॥ २॥

पदार्थः-हे मनुष्यो! जो इस (**परुषि**) कठोर व्यवहार में (**वन्दनम्**) वन्दना को (**विजामन्**) विशेषता से जानता हुआ (**भुवत्**) प्रसिद्ध होता है (**यत्**) जिस व्यवहार में (**त्सरुः**) कठिन रोग (**अष्ठीवन्तौ**) कफादि न थूकने वाली (**कुल्फौ**) जङ्घाओं को (**च**) भी (**परि, देहत्**) सब ओर से बढ़ावे पीड़ा दे (**तत्**) उसको (**अग्निः**) अग्नि (**शोचन्**) पवित्र करता हुआ अग्नि (**इतः**) इस स्थान से (**अप, बाधताम्**) दूर करें (**पद्येन**) प्राप्त होने योग्य (**रपसा**) अपराध से (**माम्**) मुझको रोग प्राप्त होता है, वह मुझ को (**मा**) मत (**विदत्**) प्राप्त हो॥ २॥

भावार्थः-जो मनुष्य ब्रह्मचर्य्य को छोड़ के बालकपन में विवाह वा कुपथ्य करते हैं, उनके शरीर में शोध आदि रोग होते हैं, उनका निवारण वैद्यक-रीति से करना चाहिये॥ २॥

मनुष्यै रोगनिवारणं कृत्वैव पदार्थसेवनं कर्तव्यमित्याह॥

मनुष्यों को रोगनिवृत्त करके ही पदार्थ सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम्।
विश्वे देवा निरितस्तत्सुवन्तु मा मां पद्येन रपसा विदुत्सरुः॥ ३॥

यत्। शल्मलौ। भवति। यत्। नदीषु। यत्। ओषधीभ्यः। परि। जायते। विषम्। विश्वे। देवाः। निः। इतः। तत्। सुवन्तु। मा। माम्। पद्येन। रपसा। विदत्। त्सरुः॥ ३॥

पदार्थः-(**यत्**) (**शल्मलौ**) शल्मलीवृक्षादौ (**भवति**) (**यत्**) (**नदीषु**) नदीनां प्रवाहेषु (**यत्**) (**ओषधीभ्यः**) यवादिभ्यः (**परि**) सर्वतः (**जायते**) उत्पद्यते (**विषम्**) प्राणहरम् (**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**निः**) निस्तारणे (**इतः**) अस्माच्छरीरात् (**तत्**) (**सुवन्तु**) दूरे प्रेरयन्तु (**मा**) माम् (**पद्येन**) प्राप्तव्येन (**रपसा**) पापचरणेन (**विदत्**) लभेत (**त्सरुः**) कुटिलो रोगः॥ ३॥

अन्वयः-हे मनुष्या! यद्विषं शल्मलौ यन्नदीषु भवति यदोषधीभ्यो विषं परिजायते तदितो विश्वे देवा निस्सुवन्तु यतः पद्येन रपसा जातस्त्सरू रोगो मां मा विदत्॥३॥

भावार्थः-हे वैद्यादयो मनुष्याः! सर्वेभ्यः पदार्थेभ्यः पदार्थेषु वा यावद्विषं प्रजायते तावत्सर्वं निवार्यान्नपानादिकं सेवनीयं यतो युष्मान् कश्चिदपि रोगो न प्राप्नुयात्॥३॥

पदार्थः-हे मनुष्यो! **(यत्)** जो **(विषम्)** प्राण हरने वाला पदार्थ विष **(शल्मलौ)** सेमर आदि वृक्ष में और **(यत्)** जो **(नदीषु)** नदियों के प्रवाहों में **(भवति)** होता है **(यत्)** जो **(ओषधीभ्यः)** यव आदि ओषधियों से विष **(परि, जायते)** उत्पन्न होता है **(तत्)** उसको **(इतः)** इस शरीर से **(विश्वे)** सब **(देवाः)** विद्वान् जन **(निः, सुवन्तु)** निरन्तर दूर करें जिस कारण **(पद्येन)** प्राप्त होने योग्य **(रपसा)** पापाचरण से उत्पन्न हुआ **(त्सरूः)** कुटिल रोग **(माम्)** मुझको **(मा)** मत **(विदत्)** प्राप्त हो॥३॥

भावार्थः-हे वैद्य आदि मनुष्यो! सब पदार्थों से वा पदार्थों में जितना विष उत्पन्न होता है, उतना सब निवार के अन्न पानी आदि सेवन करना चाहिये, जिससे तुम को कोई भी रोग न प्राप्त हो॥३॥

पुनर्मनुष्यैः किं निवार्य किं सेवनीयमित्याह॥

फिर मनुष्यों को किसका निवारण कर क्या सेवन करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः।
ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु
सर्वा नद्यो अशिमिदा भवन्तु॥४॥१७॥

याः। प्रऽवतः। निऽवतः। उत्ऽवतः। उदुन्ऽवतीः। अनुदुकाः। च। याः। ताः। अस्मभ्यम्। पयसा। पिन्वमानाः। शिवाः। देवीः। अशिपदाः। भवन्तु। सर्वाः। नद्यः। अशिमिदाः। भवन्तु॥४॥

पदार्थः-(**याः**) **(प्रवतः)** गमनार्हान् **(निवतः)** निम्नान् **(उद्वतः)** ऊर्ध्वान् देशान् **(उदन्वतीः)** उदकयुक्ताः **(अनुदकाः)** जलरहिताः **(च)** **(याः)** **(ताः)** **(अस्मभ्यम्)** **(पयसा)** उदकेन। **पय इत्युदकनाम।** (निघं०१.१२ **(पिन्वमानाः)** सिञ्चमानाः प्रीणन्त्यः **(शिवाः)** सुखकर्यः **(देवीः)** आनन्दप्रदाः **(अशिपदाः)** भोजनादिव्यवहाराय प्राप्ताः **(भवन्तु)** **(सर्वाः)** **(नद्यः)** **(अशिमिदाः)** भोजनादिस्नेहकारिकाः **(भवन्तु)**॥४॥

अन्वयः-याः प्रवतो निवत उद्वतो देशान् गच्छन्ति याश्चोदन्वतीरनुदकास्सन्ति ताः सर्वा नद्योऽस्मभ्यं पयसा पिन्वमाना अशिपदा देवीः शिवा भवन्तु अशिमिदा भवन्तु॥४॥

भावार्थः-हे मनुष्याः! यावज्जलं नद्यादिषु गच्छति यावच्च मेघमण्डलं प्राप्नोति तावत्सर्वं होमेन शोधयित्वा सेवन्ताम्, यतः सर्वदा मङ्गलं वर्धित्वा दुःखप्रणाशो भवेदिति॥४॥

अत्राबौषधीविषनिवारणेन शुद्धसेवनमुक्तमत एतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति पञ्चाशत्तमं सूक्तं सप्तदशो वर्गश्च समाप्तः॥

पदार्थः- (**याः**) जो (**प्रवतः**) जाने योग्य (**निवतः**) नीचे (**उद्वतः**) वा ऊपरले देशों को जाती हैं (**याश्च**) और जो (**उदन्वतीः**) जल से भरी वा (**अनुदकाः**) जलरहित हैं (**ताः**) वे (**सर्वाः**) सब (**नद्यः**) नदियाँ (**अस्मभ्यम्**) हमारे लिये (**पयसा**) जल से (**पिन्वमानाः**) सींचती हुई वा तृप्त करती हुई (**अशिपदाः**) भोजनादि व्यवहारों के लिये प्राप्त होती हुई (**देवीः**) आनन्द देने और (**शिवः**) सुख करने वाली (**भवन्तु**) हों और (**अशिमिदाः**) भोजन आदि स्नेह करने वाली (**भवन्तु**) हों॥४॥

भावार्थः-हे मनुष्यो! जितना जल नदी आदि में जाता है और जितना मेघमण्डल में प्राप्त होता है, उतना सब होम से शुद्ध कर सेवो जिससे सर्वदा मंगल बढ़ कर दुःख का अच्छे प्रकार नाश हो॥४॥

इस सूक्त में जल और ओषधी विष के निवारण से शुद्ध सेवन कहा, इससे इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह पचासवां सूक्त और सत्रहवां वर्ग समाप्त हुआ॥

अथ ऋचस्य [एकपञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। आदित्या देवताः। १, २ त्रिष्टुप्। ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अत्र केषां संगेन किं भवतीत्याह॥

अब तीन ऋचा वाले इक्यावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में किनके संग से क्या होता है, इस विषय को कहते हैं॥

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शन्तमेन।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः॥ १॥

आदित्यानाम्। अवसा। नूतनेन। सक्षीमहि। शर्मणा। शम्ऽतमेन। अनागाःऽत्वे। अदितिऽत्वे। तुरासः। इमम्। यज्ञम्। दधतु। श्रोषमाणाः॥ १॥

पदार्थः-(**आदित्यानाम्**) पूर्णविद्यानां विदुषाम् (**अवसा**) रक्षणादिना (**नूतनेन**) नवीनेन (**सक्षीमहि**) सम्बध्नीयाम (**शर्मणा**) विग्रहेण (**शन्तमेन**) अतिशयेन सुखकर्त्रा (**अनागास्त्वे**) अनपराधित्वे (**अदितित्वे**) अखण्डितत्वे (**तुरासः**) शीघ्रकारिणः (**इमम्**) (**यज्ञम्**) (**दधतु**) (**श्रोषमाणाः**) श्रवणं कुर्वन्तः॥ १॥

अन्वयः-ये तुरासः श्रोषमाणा अनागास्त्वे अदितित्व इमं यज्ञं दधतु तेषामादित्यानामवसा शन्तमेन नूतनेन शर्मणा सह वयं सक्षीमहि॥ १॥

भावार्थः-हे मनुष्या! यथा वयं विद्वत्संगेनात्यन्तं सुखं प्राप्नुमस्तथैव यूयमपीदं प्राप्नुत॥ १॥

पदार्थः-जो (**तुरासः**) शीघ्रकारी (**श्रोषमाणाः**) सुनते हुए (**अनागास्त्वे**) अनपराधनपन में (**अदितित्वे**) अखण्डित काम में (**इमम्**) इस (**यज्ञम्**) यज्ञ को (**दधतु**) धारण करें, उन (**आदित्यानाम्**) पूर्ण विद्यायुक्त विद्वानों की (**अवसा**) रक्षा आदि से (**शन्तमेन**) अतीव सुख करने वाले (**नूतनेन**) नवीन (**शर्मणा**) विग्रह के साथ हम लोग (**सक्षीमहि**) बंधें॥ १॥

भावार्थः-हे मनुष्यो! जैसे हम लोग विद्वानों के संग से अत्यन्त सुख पावें, वैसे ही तुम भी इसको पाओ॥ १॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः।
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य॥ २॥

आदित्यासः। अदितिः। मादयन्ताम्। मित्रः। अर्यमा। वरुणः। रजिष्ठाः। अस्माकम्। सन्तु। भुवनस्य। गोपाः। पिबन्तु। सोमम्। अवसे। नः। अद्य॥ २॥

पदार्थः-(**आदित्यासः**) पूर्णा विद्वांसः संवत्सरस्य मासा वा (**अदितिः**) अखण्डिता नीतिः (**मादयन्ताम्**) आनन्दयन्ताम् (**मित्रः**) सखा (**अर्यमा**) व्यवस्थापकः (**वरुणः**) श्रेष्ठः (**रजिष्ठाः**)

अतिशयेन रजितार: **(अस्माकम्)** **(सन्तु)** **(भुवनस्य)** जलादेर्लोकसमूहस्य। **भुवनमित्युदकनाम।** (निघं०१.१२ **गोपा:)** रक्षका: **(पिबन्तु)** **(सोमम्)** महौषधिरसम् **(अवसे)** रक्षणाद्याय **(न:)** अस्माकम् **(अद्य)** इदानीम्॥२॥

अन्वय:-हे मनुष्या:! यथा रजिष्ठा अदितिर्मित्रोऽर्यमा वरुणोऽस्माकं भुवनस्य गोपा: सन्ति नोऽवसे मादयन्तामद्य सोमं संपिबन्तु तथा ते आदित्यासोऽस्माकं भुवनस्य गोपास्सन्तु॥२॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। हे विद्वांसो! यूयमादित्यवत् विद्याप्रकाशेन वैद्यवदौषधसेवनेन नीरोगा भूत्वाऽस्माकमप्यारोग्यं कुर्वन्तु॥२॥

पदार्थ:-हे मनुष्यो! जैसे **(रजिष्ठा:)** अतीव प्रीति करते हुए **(अदिति:)** अखण्डित नीति **(मित्र:)** मित्र **(अर्यमा)** व्यवस्था देने वाला **(वरुण:)** श्रेष्ठ **(अस्माकम्)** हमारे **(भुवनस्य)** जल आदि लोकसमूह की **(गोपा:)** रक्षा करने वाले हैं **(न:)** हमारी **(अवसे)** रक्षा आदि के लिये **(मादयन्ताम्)** आनन्द देते हैं **(अद्य)** आज **(सोमम्)** बड़ी-बड़ी ओषधियों के रस को **(पिबन्तु)** पीवें, वैसे वे **(आदित्यास:)** पूर्ण विद्वान् वा संवत्सर के महीने हमारे जलादि वा लोक-समूह की रक्षा करने वाले **(सन्तु)** हों॥२॥

भावार्थ:-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वानो! तुम आदित्य के समान विद्या प्रकाश से, वैद्य के समान ओषधियों के सेवने से नीरोग होकर हमारा भी आरोग्य करो॥२॥

पुन: केषां रक्षणेन सर्वं सुखं संभवतीत्याह॥

फिर किसकी रक्षा से सब सुख होता है, इस विषय को अगले मन्त्र में कहते हैं॥

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्वे ऋभवश्च विश्वे।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभि: सदा न:॥३॥१८॥

आदित्या:। विश्वे। मरुत:। च। विश्वे। देवा:। च। विश्वे। ऋभव:। च। विश्वे। इन्द्र:। अग्नि:। अश्विना। तुस्तुवाना:। यूयम्। पात। स्वस्तिऽभि:। सदा। न:॥३॥

पदार्थ:-(**आदित्या:**) संवत्सरस्य मासा इव विद्यावृद्धा: **(विश्वे)** सर्वे **(मरुत:)** मनुष्या: **(च)** **(विश्वे)** **(देवा:)** विद्वांस: **(च)** **(विश्वे)** अखिला: **(ऋभव:)** मेधाविन: **(च)** **(विश्वे)** **(इन्द्र:)** विद्युत् **(अग्नि:)** **(अश्विना)** सूर्याचन्द्रमसौ **(तुष्टुवाना:)** प्रशंसन्त: **(यूयम्)** **(पात)** **(स्वस्तिभि:)** समग्रैस्सुखै: **(सदा)** **(न:)** अस्माकम्॥३॥

अन्वय:-हे विश्व आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्वे ऋभवश्च इन्द्रोऽग्निरश्विना तुष्टुवाना विद्वांसो यूय स्वस्तिभिर्नस्सदा पात॥३॥

भावार्थ:-यस्मिन्देशे सर्वे विद्वांसो धीमन्त: चतुरा धार्मिकाश्च रक्षका विद्याप्रदा उपदेशकास्सन्ति तत्र सर्वतो रक्षिता भूत्वा सर्वे सुखिनो भवन्तीति॥३॥

अत्रादित्यवद् विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इत्येकपञ्चाशत्तमं सूक्तमष्टादशो वर्गश्च समाप्त:॥

पदार्थः-हे **(विश्वे)** सब **(आदित्याः)** संवत्सर के महीनों के समान विद्यावृद्ध **(विश्वे, मरुतः च)** और समस्त **(विश्वे, देवाः, च)** और समस्त विद्वान् **(विश्वे, ऋभवः, च)** और बुद्धिमान् जन **(इन्द्रः)** बिजुली **(अग्निः)** साधारण अग्नि **(अश्विना)** सूर्य चन्द्रमा **(तुष्टुवानाः)** प्रशंसा करते हुए विद्वान् जन तथा **(यूयम्)** तुम **(स्वस्तिभिः)** सुखों से **(नः)** हम लोगों की **(सदा)** सर्वदा **(पात)** रक्षा करो॥३॥

भावार्थः-जिस देश में सब विद्वान् जन बुद्धिमान् चतुर धार्मिक और रक्षा करने और विद्या देने वाले उपदेशक हैं, वहाँ सब से रक्षायुक्त होकर सब सुखी होते हैं॥३॥

इस सूक्त में सूर्य के समान विद्वानों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह इक्यावनवां सूक्त और अठारहवां वर्ग पूरा हुआ॥

अथ त्र्यृचस्य [द्विपञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। आदित्या देवताः। १, ३ स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्मनुष्याः कीदृशा भवेयुरित्याह॥

अब बावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर मनुष्य कैसे हों, इस विषय को कहते हैं॥

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः॥ १॥

आदित्यासः। अदितयः। स्याम। पूः। देवऽत्रा। वसवः। मर्त्यऽत्रा। सनेम। मित्रावरुणा। सनन्तः। भवेम। द्यावापृथिवी इति। भवन्तः॥ १॥

पदार्थः-(**आदित्यासः**) मासा इव (**अदितयः**) अखण्डिताः (**स्याम**) भवेम (**पूः**) नगरीव (**देवत्रा**) देवेषु वर्तमानाः (**वसवः**) निवसन्तः (**मर्त्यत्रा**) मर्त्येषूपदेशकाः (**सनेम**) विभजेम (**मित्रावरुणा**) प्राणोदानौ (**सनन्तः**) सेवमानाः (**भवेम**) (**द्यावापृथिवी**) सूर्यभूमी इव (**भवन्तः**)॥ १॥

अन्वयः-हे मनुष्या! यथा वयं देवत्राऽऽदित्यासोऽदितयः स्याम यथा मर्त्यत्रा वसवस्सन्तस्सनेम पूरिव मित्रावरुणा सनन्तो द्यावापृथिवी इव भवन्तो भवेम तथा यूयमपि भवत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं आप्तविद्वद्वद्वर्तित्वा धार्मिकेषु विद्वत्सु न्युष्य सत्यासत्ये विभज्य सूर्यभूमीवत् परोपकारं कृत्वा विश्वसुखाय प्राणोदानवत् सर्वेषामुन्नतये भवतः॥ १॥

पदार्थः-हे मनुष्यो! जैसे हम लोग (**देवत्रा**) देवों में वर्त्तमान (**आदित्यासः**) महीने के समान (**अदितयः**) अखण्डित (**स्याम**) हों जैसे (**मर्त्यत्रा**) मनुष्यों में उपदेशक (**वसवः**) निवास करते हुए (**सनेम**) विभाग करें (**पूः**) नगरी के समान (**मित्रावरुणा**) प्राण और उदान दोनों (**सनन्तः**) सेवन करते हुए (**द्यावापृथिवी**) सूर्य और भूमि के समान (**भवन्तः**) आप (**भवेम**) हों, वैसे आप भी हों॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! तुम आप्त विद्वान् के समान वर्त कर धार्मिक विद्वानों में निरन्तर बस कर सत्य और असत्य का विभाग कर सूर्य और भूमि के समान परोपकार कर विश्व के सुख के लिये प्राण और उदान के सदृश सब की उन्नति के लिये होओ॥ १॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

मित्रस्तन्नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः।
मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे॥ २॥

मित्रः। तत्। नः। वरुणः। मामहन्त। शर्म। तोकाय। तनयाय। गोपाः। मा। वः। भुजेम। अन्यऽजातम्। एनः। मा। तत्। कर्म। वसवः। यत्। चयध्वे॥ २॥

पदार्थः-(**मित्रः**) प्राण इव सखा (**तत्**) सुखम् (**नः**) अस्माकम् (**वरुणः**) जलमिव पालकः (**मामहन्त**) सत्कुर्वन्तु। अत्र **तुजादीनामित्यभ्यासदैर्घ्यम्**। (**शर्म**) सुखं गृहं वा (**तोकाय**) सद्यो जातायापत्याय (**तनयाय**) सुकुमाराय (**गोपाः**) रक्षकाः (**मा**) (**वः**) युष्मान् (**भुजेम**) अभ्यवहरेम (**अन्यजातम्**) अन्यास्मादुत्पन्नम् (**एनः**) पापम् (**मा**) (**तत्**) (**कर्म**) (**वसवः**) निवसन्तः (**यत्**) (**चयध्वे**) संचिनुत॥२॥

अन्वयः-हे वसवो! यदन्यजातमेनोऽस्ति तत्कर्म यूयं मा चयध्वे यथा गोपाः शर्म मामहन्त तथा नस्तोकाय तनयाय तत् मित्रो वरुणश्च प्रदद्यताम् येन वयं व एनो मा भुजेम॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! भवन्तस्सदैव ब्रह्मचर्यविद्यादानाभ्यां स्वापत्यानि रक्षयित्वा सत्कृत्य वर्धयन्तु स्वयं पापमकृत्वाऽन्येन कृतमपि मा भजन्तु॥२॥

पदार्थः-हे (**वसवः**) निवास करने वालो! (**यत्**) जो (**अन्यजातम्**) और से उत्पन्न (**एनः**) पाप कर्म है (**तत्**) वह (**कर्म**) कर्म तुम (**मा**) मत (**चयध्वे**) इकट्ठा करो जैसे (**गोपाः**) रक्षा करने वाले (**शर्म**) सुख वा घर को (**मामहन्त**) सत्कार से वर्ते, वैसे (**नः**) हमारे (**तोकाय**) शीघ्र उत्पन्न हुए बालक के लिये और (**तनयाय**) सुन्दर कुमार के लिये उसको (**मित्रः**) प्राण के समान मित्र (**वरुणः**) जल के समान पालने वाला देवें, जिससे हम लोग (**वः**) तुम लोगों को और पाप (**मा**) मत (**भुजेम**) भोगें॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप सदैव ब्रह्मचर्य्य और विद्यादान से अपने लड़कों की रक्षा और सत्कार कर बढ़ावें और आप पाप न करके और से किये हुए को भी न सेवें॥२॥

पुनर्मनुष्याः किंवद्भूत्वा किं कुर्युरित्याह॥

फिर मनुष्य किसके तुल्य होकर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः।
पिता च तन्नो महान् यजत्रो विश्वे देवाः समनसो जुषन्त॥३॥१९॥

तुरण्यवः। अङ्गिरसः। नक्षन्त। रत्नम्। देवस्य। सवितुः। इयानाः। पिता। च। तत्। नः। महान्। यजत्रः। विश्वे। देवाः। सऽमनसः। जुषन्त॥३॥

पदार्थः-(**तुरण्यवः**) क्षिप्रं कर्तारः (**अङ्गिरसः**) प्राणा इव (**नक्षन्त**) व्याप्नुवन्तु (**रत्नम्**) रमणीयं धनम् (**देवस्य**) प्रकाशमानस्य (**सवितुः**) सकलजगदुत्पादकस्य परमेश्वरस्य (**इयानाः**) अधीयमानाः (**पिता**) जनक इव (**च**) (**तत्**) (**नः**) अस्मभ्यम् (**महान्**) पूजनीयः सर्वेभ्यो महान् (**यजत्रः**) संगन्तव्यो ध्येयः (**विश्वे**) सर्वे (**देवाः**) विद्वांसः (**समनसः**) समानं मनोऽन्तःकरणं येषां ते (**जुषन्त**) सेवन्ताम्॥३॥

अन्वयः-हे मनुष्या! ये तुरण्यवोऽङ्गिरसस्समनस इयाना जनाः सवितुर्देवस्य सृष्टौ यद्रत्नं नक्षन्त तत्पितेव वर्तमानो महान् यजत्र ईश्वरो विश्वे देवाश्च नोऽस्मभ्यं जुषन्त॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्वांसोऽस्यामीश्वरकृतसृष्टौ विद्यापुरुषार्थविद्वत्सेवाद्यैः सर्वाणि सुखानि लभन्ते तथा भवन्तो लभन्तां सर्वे मिलित्वा पितृवत्पालकं परमात्मानं सततमुपासीरन्निति॥३॥

अत्र विश्वेदेवगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति द्विपञ्चाशत्तमं सूक्तमेकोनविंशो वर्गश्च समाप्तः॥

पदार्थः-हे मनुष्यो! **[**जो**]** **(तुरण्यवः)** शीघ्र करने वाले **(अङ्गिरसः)** प्राणों के समान **(समनसः)** समान अन्तःकरण युक्त **(इयानाः)** पढ़ते हुए **[**जन**]** **(सवितुः)** सकल जगत् उत्पन्न करने वाले **(देवस्य)** प्रकाशमान परमेश्वर की सृष्टि में जिस **(रत्नम्)** रमणीय धन को **(नक्षन्त)** व्याप्त हो **(तत्)** वह **(पिता)** उत्पन्न करने वाले के समान वर्त्तमान **(महान्)** सब से सत्कार **(यजत्रः)** संग और ध्यान करने योग्य ईश्वर **(विश्वे, देवाः, च)** और सब विद्वान् जन **(नः)** हम लोगों के लिये **(जुषन्त)** सेवें॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् जन इस ईश्वरकृत सृष्टि में विद्या पुरुषार्थ और विद्वानों की सेवा आदि से सब सुखों को पाते हैं, वैसे आप प्राप्त हों सब मिल कर पिता के समान पालना करने वाला परमात्मा की निरन्तर उपासना करें॥३॥

इस सूक्त में विश्वेदेवों के गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह बावनवां सूक्त और उन्नीसवां वर्ग पूरा हुआ॥

अथ ऋचस्य [त्रिपञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। द्यावापृथिवी देवते। १ त्रिष्टुप्। २, ३ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ विद्वांसः किं कुर्युरित्याह॥

अब तीन ऋचा वाले त्रेपनवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में अब विद्वान् जन क्या करें, इस विषय को कहते हैं॥

प्र द्यावा॑ य॒ज्ञैः पृ॑थि॒वी नमो॑भिः स॒बाध॑ ईळे बृ॒हती यज॑त्रे।
ते चि॒द्धि पूर्वे॑ क॒वयो॑ गृ॒णन्तः॑ पु॒रो म॒ही द॑धि॒रे दे॒वपु॑त्रे॥ १॥

प्र। द्यावा॑। य॒ज्ञैः। पृ॒थि॒वी इति॑। नमः॑ऽभिः। स॒ऽबाधः॑। ईळे॑। बृ॒हती॒ इति॑। यज॑त्रे॒ इति॑। ते इति॑। चि॒त्। हि। पूर्वे॑। क॒वयः॑। गृ॒णन्तः॑। पु॒रः॑। म॒ही इति॑। द॒धि॒रे। दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे॥ १॥

पदार्थः-(**प्र**) (**द्यावा**) (**यज्ञैः**) संगतिकरणैः कर्मभिः (**पृथिवी**) सूर्यभूमी (**नमोभिः**) अन्नादिभिः (**सबाधः**) बाधेन सह वर्त्तमानः (**ईळे**) गुणैः प्रशंसामि (**बृहती**) महत्यौ (**यजत्रे**) संगन्तव्ये (**ते**) (**चित्**) अपि (**हि**) (**पूर्वे**) (**कवयः**) विद्वांसः (**गृणन्तः**) स्तुवन्तः (**पुरः**) पुराणि (**मही**) महत्यौ (**दधिरे**) धरन्ति (**देवपुत्रे**) देवा विद्वांसः पुत्राः पुत्रवत्पालकाः ययोस्ते॥ १॥

अन्वयः-हे मनुष्या! यथा सबाधोऽहं नमोभिर्यज्ञैः ये मही बृहती यजत्रे पुरो धरन्त्यौ देवपुत्रे द्यावापृथिवी पूर्वे कवयो गृणन्तो दधिरे ते चिद्धि प्रेळे॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा सर्वधारकौ भूमिसूर्यौ विद्वांसो विज्ञायोपकुर्वन्ति तथा यूयमपि कुरुत॥ १॥

पदार्थः-हे मनुष्यो जैसे (**सबाधः**) पीड़ा के सहित वर्त्तमान मैं (**नमोभिः**) अन्नादिकों से और (**यज्ञैः**) संगति करने-कराने वालों से जो (**मही**) बड़े (**बृहती**) बड़े (**यजत्रे**) संग करने योग्य (**पुरः**) नगरों को धारण करने वाली (**देवपुत्रे**) देवपुत्र अर्थात् विद्वान् जन जिनकी पुत्र के समान पालना करते वाले हैं उन (**द्यावापृथिवी**) सूर्य और भूमि की (**पूर्वे**) अगले (**कवयः**) विद्वान् जन (**गृणन्तः**) स्तुति करते हुए (**दधिरे**) धारण करते हैं (**ते, चित्**) (**हि**) उन्हीं की (**प्र, ईळे**) अच्छे प्रकार गुणों से प्रशंसा करता हूँ॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सबको धारण करने वाले भूमि और सूर्य को विद्वान् जन जान कर उपकार करते हैं, वैसे तुम भी करो॥ १॥

पुनस्ते भूमिविद्युतौ कीदृश्यौ स्त इत्याह॥

फिर वे भूमि और बिजुली कैसी हैं, इस विषय को अगले मन्त्र में कहते हैं॥

प्र पू॒र्वज॑ पि॒तरा॒ नव्य॑सीभिर्गी॒र्भिः कृ॑णुध्वं॒ सद॑ने ऋ॒तस्य॑।
आ नो॑ द्यावापृथिवी दैव्ये॑न जने॑न यात॒ं महि॑ वां॒ वरू॑थम्॥ २॥

प्र। पू॒र्व॒जे॒ इति॑ पू॒र्व॒ऽजे॒। पि॒तरा॑। नव्य॑सीभिः। गी॒ःऽभिः। कृ॒णु॒ध्व॒म्। सद॑ने॒ इति॑। ऋ॒तस्य॑। आ। नः॒। द्या॒वा॒पृ॒थि॒वी॒ इति॑। दैव्ये॑न। जने॑न। या॒त॒म्। महि॑। वा॒म्। वरू॑थम्॥ २॥

पदार्थः-(**प्र**) (**पूर्वजे**) पूर्वस्माज्जाते (**पितरा**) मातापितृवद्वर्तमाने (**नव्यसीभिः**) अतिशयेन नवीनाभिः (**गीर्भिः**) सुशिक्षिताभिर्वाग्भिः (**कृणुध्वम्**) कुरुत (**सदने**) सीदन्ति ययोस्ते (**ऋतस्य**) सत्यस्योदकस्य वा (**आ**) (**नः**) अस्माकम् (**द्यावापृथिवी**) भूमिविद्युतौ (**दैव्येन**) देवैर्विद्वद्भिः कृतेन विदुषा (**जनेन**) प्रसिद्धेन मनुष्येण (**यातम्**) प्राप्नुयातम् (**महि**) महत् (**वाम्**) युवयोः स्त्रीपुरुषयोः (**वरूथम्**) वरं गृहम्॥२॥

अन्वयः-हे शिल्पिनो विद्वांसो! यूयं नव्यसीभिर्गीर्भिर्ऋतस्य सम्बन्धे सदने पूर्वजे पितरेव वर्त्तमाने द्यावापृथिवी दैव्येन जनेन वां महि वरूथमा यातं तथेमे नः कृणुध्वम्॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे स्त्रीपुरुषा! यूयं पदार्थविद्यया पृथिव्यादिविज्ञानं कृत्वा सुन्दराणि गृहाणि निर्माय तत्र मनुष्यसुखोन्नतिं कुरुत॥२॥

पदार्थः-हे शिल्पि विद्वानो! तुम (**नव्यसीभिः**) अतीव नवीन (**गीर्भिः**) सुशिक्षित वाणियों से (**ऋतस्य**) सत्य वा जल के सम्बन्ध में (**सदने**) स्थानरूप जिन में स्थिर होते हैं वे (**पूर्वजे**) आगे से उत्पन्न हुए (**पितरा**) माता-पिता के समान वर्त्तमान (**द्यावापृथिवी**) भूमि और बिजुली (**दैव्येन**) विद्वानों ने बनाये हुए विद्वान् (**जनेन**) प्रसिद्ध जन से (**वाम्**) तुम दोनों के (**महि**) बड़े (**वरूथम्**) श्रेष्ठ घर को (**आ, यातम्**) प्राप्त हों, वैसे इनको (**नः**) हमको (**कृणुध्वम्**) सिद्ध करो॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे स्त्री-पुरुषो! तुम पदार्थविद्या से पृथिवी आदि का विज्ञान करके सुन्दर घर बना वहाँ मनुष्यों के सुखों की उन्नति करो॥२॥

पुनर्मनुष्यैर्भूम्यादिगुणा वेदितव्या इत्याह॥

फिर मनुष्यों को भूमि आदि के गुण जानने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे।
अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः॥३॥२०॥

उतो इति। हि। वाम्। रत्नऽधेयानि। सन्ति। पुरूणि। द्यावापृथिवी इति। सुऽदासे। अस्मे इति। धत्तम्। यत्। असत्। अस्कृधोयु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥३॥

पदार्थः-(**उतो**) अपि (**हि**) (**वाम्**) युवयोः (**रत्नधेयानि**) रत्नानि धीयन्ते येषु तानि (**सन्ति**) (**पुरूणि**) बहूनि (**द्यावापृथिवी**) भूमिविद्युतौ (**सुदासे**) शोभना दासाः दातारो ययोस्ते (**अस्मे**) अस्मासु (**धत्तम्**) धरेतम् (**यत्**) (**असत्**) भवेत् (**अस्कृधोयु**) अस्थूलम् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥३॥

अन्वयः-हे अध्यापकोपदेशकौ! ये सुदासे द्यावापृथिवी वर्तेते यत्र वां हि पुरूणि रत्नधेयानि धनाधिकरणानि सन्ति ते अस्मे धत्तं यदुतो अस्कृधोयु असत् येन सहिता यूयं स्वस्तिभिर्नस्सदा पात॥३॥

भावार्थः-ये मनुष्या विद्युद्भूमिगुणान् विज्ञाय तत्रस्थानि रत्नानि प्राप्य सर्वार्थं सुखं विदधति ते सर्वतस्सदा सुरक्षिता भवन्तीति॥३॥

अत्र द्यावापृथिवीगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति त्रिपञ्चाशत्तमं सूक्तं विंशो वर्गश्च समाप्तः॥

पदार्थः-हे अध्यापक और उपदेशको! जो **(सुदासे)** सुन्दर दानशीलों वाले **(द्यावापृथिवी)** भूमि और बिजुली वर्त्तमान हैं अथवा जिनमें **(वाम्)** तुम दोनों के **(हि)** ही **(पुरूणि)** बहुत **(रत्नधेयानि)** रत्न जिनमें भरे जाते **(सन्ति)** हैं वे धन धरने के पदार्थ हैं **(ते)** वे भूमि और बिजुली **(अस्मे)** हम लोगों में **(धत्तम्)** धारण करें **(यत्)** जो **(उतो)** कुछ **[**भी**]** **(अस्कृधोयु)** कृश हो अर्थात् मोटा न **(असत्)** हो उसके साथ **(युवम्)** तुम लोग **(स्वस्तिभिः)** सुखों से **(वः)** हम लोगों की **(सदा)** सदा **(पात)** रक्षा करो॥३॥

भावार्थः-जो मनुष्य बिजुली और भूमि के गुणों को जान कर वहाँ स्थित जो रत्न उनको पाकर सब के लिये सुख का विधान करते हैं, वे सब ओर से सदा सुरक्षित होते हैं॥३॥

इस सूक्त में द्यावापृथिवी के गुणों और कृत्यों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह त्रेपनवां सूक्त और बीसवां वर्ग पूरा हुआ॥

अथ त्र्यृचस्य [चतुष्पञ्चाशत्तमस्य] सूक्तस्य वसिष्ठिर्षिः। वास्तोष्पतिर्देवता। १, ३ निचृत्त्रिष्टुप्। २ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः॥

मनुष्याः गृहं निर्माय तत्र किं कुर्वन्तीत्याह॥

अब तीन ऋचा वाले चौवनवें सूक्त का आरम्भ है, उसके प्रथम मन्त्र में मनुष्य घर बना कर उस में क्या करते हैं, इस विषय को कहते हैं॥

वास्तोष्पते प्रति जानीह्यस्मान् स्वावेशो अनमीवो भवा नः।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥ १॥

वास्तोः। पते। प्रति। जानीहि। अस्मान्। सुऽआवेशः। अनमीवः। भव। नः। यत्। त्वा। ईमहे। प्रति। तत्। नः। जुषस्व। शम्। नः। भव। द्विऽपदे। शम्। चतुःऽपदे॥ १॥

पदार्थः-(**वास्तोः**) वासहेतोर्गृहस्य (**पते**) स्वामिन् (**प्रति**) (**जानीहि**) (**अस्मान्**) (**स्वावेशः**) स्वः आवेशो यस्य सः (**अनमीवः**) रोगरहितः (**भव**) अत्र **द्व्यचो०** इति दीर्घः। (**नः**) अस्माकम् (**यत्**) यत्र (**त्वा**) त्वाम् (**ईमहे**) प्राप्नुयाम (**प्रति**) (**तत्**) सह (**नः**) अस्मान् (**जुषस्व**) सेवस्व (**शम्**) सुखकारी (**नः**) अस्माकम् (**भव**) (**द्विपदे**) मनुष्याद्याय (**शम्**) (**चतुष्पदे**) गवाद्याय॥ १॥

अन्वयः-हे वास्तोष्पते गृहस्थ! त्वमस्मान् प्रति जानीहि त्वमत्र नो गृहे स्वावेशोऽनमीवो भव यद्यत्र वयं त्वेमहे तन्नः प्रति जुषस्व त्वन्नो द्विपदे शं चतुष्पदे शं भव॥ १॥

भावार्थः-ये मनुष्यास्सर्वतोद्वारं पुष्कलावकाशं गृहं निर्माय तत्र वसन्ति रोगरहिता भूत्वा स्वेभ्यश्चान्येभ्यश्च सुखं प्रयच्छन्ति ते सर्वेषां मङ्गलप्रदा भवन्ति॥ १॥

पदार्थः-हे (**वास्तोः**) निवास कराने वाले घर के (**पते**) स्वामी गृहस्थ जन! आप (**अस्मान्**) हम लोगों के (**प्रति, जानीहि**) प्रतिज्ञा से जानो आप (**नः**) हमारे घर में (**स्वावेशः**) सुख में हैं सब ओर से प्रवेश जिनको ऐसे और (**अनमीवः**) नीरोग (**भव**) हूजिये (**यत्**) जहाँ हम लोग (**त्वा**) आपको (**ईमहे**) प्राप्त हों (**तत्**) उसको (**नः**) हमारे (**प्रति, जुषस्व**) प्रति सेवो आप (**नः**) हम लोगों के (**द्विपदे**) मनुष्य आदि जीव (**शम्**) सुख करने वाले और (**चतुष्पदे**) गौ आदि पशु के लिये (**शम्**) सुख करने वाले (**भव**) हूजिये॥ १॥

भावार्थः-जो मनुष्य सब ओर द्वार और बहुत अवकाश वाले घर को बना कर उस में वसते और रोगरहित होकर अपने तथा औरों के लिये सुख देते हैं, वे सबको मङ्गल देने वाले होते हैं॥ १॥

पुनर्गृहस्थः किं कृत्वा कान् के इव रक्षेदित्याह॥

फिर गृहस्थ क्या करके किनको किसके समान रक्खे, इस विषय को अगले मन्त्र में कहते हैं॥

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो।
अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व॥ २॥

वास्तोः। पते। प्रऽतरणः। नः। एधि। गयऽस्फानः। गोभिः। अश्वेभिः। इन्दो इति। अजरासः। ते।

सख्ये। स्याम। पिताऽइव। पुत्रान्। प्रति। नः। जुषस्व॥ २॥

पदार्थः-(**वास्तोः**) गृहस्य (**पते**) पालक (**प्रतरणः**) प्रकर्षेण दुःखात्तारकः (**नः**) अस्माकम् (**एधि**) भव (**गयस्फानः**) गृहस्य वर्धकः (**गोभिः**) गवादिभिः (**अश्वेभिः**) तुरङ्गादिभिः (**इन्दो**) आनन्दप्रद (**अजरासः**) जरारोगरहिताः (**ते**) तव (**सख्ये**) मित्रत्वे (**स्याम**) (**पितेव**) (**पुत्रान्**) (**प्रति**) (**नः**) अस्मान् (**जुषस्व**)॥ २॥

अन्वयः-हे इन्दो वास्तोष्पते! त्वं गोभिरश्वेभिर्गयस्फानः प्रतरणो नोऽस्माकं सुखकार्येधि यस्य ते सख्ये अजरासः वयं स्याम स त्वं नोऽस्मान् पुत्रान् पितेव प्रति जुषस्व॥ २॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्या उत्तमं गृहं निर्माय गवादिभिः पशुभिरलंकृत्य शोधयित्वा प्रजाया वर्धका भूत्वाऽक्षयं मित्रत्वं सर्वेषु संभाव्य यथा पिता पुत्रान् रक्षति तथैव सर्वान् रक्षन्तु॥ २॥

पदार्थः-हे (**इन्दो**) आनन्द के देने वाले (**वास्तोष्पते**) घर के रक्षक! आप (**गोभिः**) गौ आदि से (**अश्वेभिः**) घोड़े आदि से (**गयस्फानः**) घर की वृद्धि करने (**प्रतरणः**) उत्तमता से दुःख से तारने और (**नः**) हमारे सुख करने वाले (**एधि**) हूजिये जिन (**ते**) आप के (**सख्ये**) मित्रपन में हम लोग (**अजरासः**) शरीर जीर्ण करने वाली वृद्धावस्था से रहित (**स्याम**) हों सो आप (**नः**) हम लोगों को (**पुत्रान्**) पुत्रों को जैसे (**पितेव**) पिता वैसे (**प्रति, जुषस्व**) प्रतीति से सेवो॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्य उत्तम घर बना कर गो आदि पशुओं से शोभित कर शुद्ध कर प्रजा के बढ़ाने वाले होकर अक्षय मित्रपन सब में अच्छे प्रकार प्रसिद्ध कराय जैसे पिता पुत्रों की रक्षा करता है, वैसे ही सब की रक्षा करें॥ २॥

पुनस्ते गृहस्थः किं कुर्युरित्याह॥

फिर वे घर में रहने वाले क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या।
पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः॥ ३॥ २१॥

वास्तोः। पते। शग्मया। सम्ऽसदा। ते। सक्षीमहि। रण्वया। गातुऽमत्या। पाहि। क्षेमे। उत। योगे। वरम्। नः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

पदार्थः-(**वास्तोः**) गृहस्य (**पते**) पालक (**शग्मया**) सुखरूपया (**संसदा**) सम्यक् सीदन्ति यस्यां तया (**ते**) तव (**सक्षीमहि**) सम्बध्नीयाम (**रण्वया**) रमणीयया (**गातुमत्या**) प्रशस्तवाग्भूमियुक्तया (**पाहि**) (**क्षेमे**) रक्षणे (**उत**) (**योगे**) अनुपात्तस्योपात्तलक्षणे (**वरम्**) (**नः**) अस्मान् (**यूयम्**) (**पात**) (**स्वस्तिभिः**) सुखादिभिः (**सदा**) (**नः**)॥ ३॥

अन्वयः-हे वास्तोष्पते! यस्य ते तव शग्मया संसदा रण्वया गातुमत्या सह सक्षीमहि स त्वं योग उत क्षेमे नोऽस्मान् वरं पाहि यूयं स्वस्तिभिर्नस्सदा पात॥ ३॥

भावार्थः-ये गृहस्थाः सज्जनान् सत्कृत्य रक्षन्ति ते तेषां योगक्षेमावुन्नीय सततं तान् पालयन्तीति॥ ३॥
अत्र वास्तोष्पतिगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इति चतुष्पञ्चाशत्तमं सूक्तमेकविंशतितमो वर्गश्च समाप्तः॥

पदार्थः-हे **(वास्तोष्पते)** घर की रक्षा करने वाले जिन **(ते)** आप के **(शग्मया)** सुख रूप **(संसदा)** जिस में अच्छे प्रकार स्थिर हों उस **(रण्वया)** रमणीय **(गातुमत्या)** प्रशंसित वाणी वा भूमि से युक्त सभा के साथ **(सक्षीमहि)** सम्बन्ध करें वह आप **(योगे)** न ग्रहण किये हुए पदार्थ के ग्रहण लक्षण विषय में **(उत)** और **(क्षेमे)** रक्षा में **(नः)** हम लोगों की **(वरम्)** उत्तमता जैसे हो, वैसे **(पाहि)** रक्षा करो **(यूयम्)** तुम **(स्वस्तिभिः)** सुखादिकों से **(नः)** हम लोगों की **(सदा)** सदैव **(पातः)** रक्षा करो॥३॥

भावार्थः-जो गृहस्थ सज्जनों का सत्कार कर उनकी रक्षा करते हैं, वे उन के योग-क्षेम की उन्नति कर निरन्तर उनकी पालना करते हैं॥३॥

इस सूक्त में वास्तोष्पति के गुण और कृत्यों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह चौपनवां सूक्त और इक्कीसवां वर्ग पूरा हुआ॥

अथाष्टर्चस्य [पञ्चपञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। [१] वास्तोष्पतिर्देवता। २-८ इन्द्रः। १ निचृद्गायत्रीछन्दः। षड्जः स्वरः। २, ३, ४ बृहतीछन्दः। मध्यमः स्वरः। ५, ७ अनुष्टुप्। ६, ८ निचृदनुष्टुप् छन्दः। गान्धारः स्वरः॥

अथ गृहपतिः किं कुर्यादित्याह॥

अब आठ ऋचा वाले पचपनवें सूक्त का प्रारम्भ है, इसके प्रथम मन्त्र में घर का स्वामी क्या करे, इस विषय को कहते हैं॥

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः॥ १॥

अमीवऽहा। वास्तोः। पते। विश्वा। रूपाणि। आऽविशन्। सखा। सुऽशेवः। एधि। नः॥ १॥

पदार्थः-(**अमीवहा**) योऽमीवान् रोगान् हन्ति (**वास्तोः**) गृहस्य (**पते**) स्वामिन् (**विश्वा**) सर्वाणि (**रूपाणि**) (**आविशन्**) आविशन्ति (**सखा**) सुहृत् (**सुशेवः**) सुष्ठुसुखः (**एधि**) भव (**नः**) अस्मभ्यम्॥ १॥

अन्वयः-हे वास्तोष्पते! यत्र गृहे विश्वा रूपाण्याविशन् तत्र नोऽमीवहा सखा सुशेवः सन्नेधि॥ १॥

भावार्थः-हे गृहस्था! यूयं सर्वप्रकाराण्युत्तमानि गृहाणि निर्माय सुखिनो भवत॥ १॥

पदार्थः-हे (**वास्तोष्पते**) घर के स्वामी! जिस घर में (**विश्वा**) सब (**रूपाणि**) रूप (**आविशन्**) प्रवेश करते हैं वहाँ (**नः**) हम लोगों के लिये (**अमीवहा**) रोग हरने वाले (**सखा**) मित्र (**सुशेवः**) सुन्दर सुख वाले होते हुए (**एधि**) प्रसिद्ध हूजिये॥ १॥

भावार्थः-हे गृहस्थो! तुम सर्व प्रकार उत्तम घरों को बना कर सुखी होओ॥ १॥

पुनर्गृहस्थाः कुत्र वासं कुर्युरित्याह॥

फिर गृहस्थ कहाँ वास करें, इस विषय को अगले मन्त्र में कहते हैं॥

यदर्जुन सारमेय दतः पिशङ्ग यच्छसे।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप॥ २॥

यत्। अर्जुन। सारमेय। दतः। पिशङ्ग। यच्छसे। विऽइव। भ्राजन्ते। ऋष्टयः। उप। स्रक्वेषु। बप्सतः। नि। सु। स्वप॥ २॥

पदार्थः-(**यत्**) (**अर्जुन**) सुखरूप (**सारमेय**) साराणां निर्मातः (**दतः**) दन्तान् (**पिशङ्ग**) पिशङ्गादिवर्णयुक्त (**यच्छसे**) (**वीव**) पक्षीव (**भ्राजन्ते**) प्रकाशन्ते (**ऋष्टयः**) प्रापकः (**उप**) (**स्रक्वेषु**) प्रासेषूत्तमेषु गृहेषु (**बप्सतः**) भक्षयतः (**नि**) (**सु**) (**स्वप**) शयस्व॥ २॥

अन्वयः-हे अर्जुन सारमेय! पिशङ्ग यद्यस्त्वं वीव दतो यच्छसे स्रक्वेषु बप्सत ऋष्टय उप भ्राजन्ते स तेषु नि सु स्वप॥ २॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! यत्रारोग्येन युष्माकं दन्तादयोऽवयवास्सुशोभन्ते तत्रैव निवासं शयनादिव्यवहारं च कुरुत॥ २॥

पदार्थः-हे (**अर्जुन**) अच्छे रूपयुक्त (**सारमेय**) सारवस्तुओं की उत्पत्ति करने वाले (**पिशङ्ग**)

पीछे-पीछे **(यत्)** जो आप **(वीव)** पक्षी के समान **(दतः)** दाँतों को **(यच्छसे)** नियम से रखते हो वह जो **(स्रक्वेषु)** प्राप्त उत्तम घरों में **(बप्सतः)** भक्षण करते हुए **(ऋष्टयः)** पहुँचाने वाले **(उप, भ्राजन्ते)** समीप प्रकाशित होते हैं उन में आप **(नि, सु, स्वप)** निरन्तर अच्छे प्रकार सोओ॥ २॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जहाँ आरोग्यपन से तुम्हारे दन्त आदि अवयव अच्छे प्रकार शोभते हैं, वहाँ ही निवास और शयन आदि व्यवहार को करो॥ १॥

पुनर्गृहस्थैः किं कर्तव्यमित्याह॥

फिर गृहस्थों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

स्तेनं राय सारमेय तस्करं वा पुनःसर।
स्तोतृनिन्द्रस्य रायसि किमस्मान् दुच्छुनायसे नि षु स्वप॥ ३॥

स्तेनम्। राय। सारमेय। तस्करम्। वा। पुनःऽसर। स्तोतॄन्। इन्द्रस्य। रायसि। किम्। अस्मान्। दुच्छुनऽयसे। नि। सु। स्वप॥ ३॥

पदार्थः-(**स्तेनम्**) चोरम् (**राय**) रासु धनेषु साधो (**सारमेय**) (**तस्करम्**) दस्व्यादिकम् (**वा**) (**पुनःसर**) पुनःपुनः दण्डदानाय प्राप्नुहि (**स्तोतॄन्**) स्तावकान् (**इन्द्रस्य**) परमैश्वर्यस्य (**रायसि**) शब्दयसि (**किम्**) (**अस्मान्**) (**दुच्छुनायसे**) दुष्टेष्वेवाचरसि (**नि**) नितराम् (**सु**) (**स्वप**)॥ ३॥

अन्वयः-हे राय सारमेय! त्वमिन्द्रस्य स्तेनं वा तस्करं वा पुनस्सर यस्त्वं स्तोतॄन् रायसि सोऽस्मान् किं दुच्छुनायसे स त्वमुत्तमे स्थाने नि सु स्वप॥ ३॥

भावार्थः-गृहस्थैः स्तेनानां निग्रहं श्रेष्ठानां सत्करणं कृत्वा कदाचिद् श्ववन्नाचरणीयम् सदैव शुद्धवायूदकावकाशे शयितव्यम्॥ ३॥

पदार्थः-हे (**राय**) धनियों में सज्जन (**सारमेय**) सार वस्तुओं से मान करने योग्य आप (**इन्द्रस्य**) परम ऐश्वर्य्य के (**स्तेनम्**) चोर (**वा**) (**तस्करम्**) डांकू आदि चोर को (**पुनःसर**) फिर फिर दण्ड देने के लिये प्राप्त होओ जो आप (**स्तोतॄन्**) स्तुति करने वालों को (**रायसि**) कहलाते हो (**अस्मान्**) हम लोगों को (**किम्**) क्या (**दुच्छुनायसे**) दुष्टों में, वैसे वैसे आचरण से प्राप्त होंगे सो आप उत्तम स्थान में (**नि, सु, स्वप**) निरन्तर अच्छे प्रकार सोओ॥ ३॥

भावार्थः-गृहस्थों को चाहिये कि चोरों की रुकावट और श्रेष्ठों का सत्कार कर के कभी कुत्ते के समान न आचरण करें और सदैव शुद्ध वायु, जल और अवकाश में सोवें॥ ३॥

पुनस्तमेव विषयमाह॥

फिर उसी विषय को अगले मन्त्र में कहते हैं॥

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः।
स्तोतृनिन्द्रस्य रायसि किमस्मान् दुच्छुनायसे नि षु स्वप॥ ४॥

त्वम्। सूकरस्य। दर्दृहि। तव। दर्दर्तु। सूकरः। स्तोतॄन्। इन्द्रस्य। रायसि। किम्। अस्मान्।

दुच्छुनऽयसे। नि। सु। स्वप॥४॥

पदार्थः-(**त्वम्**) (**सूकरस्य**) यः सुष्ठु करोति (**दर्दृहि**) भृशं वर्धय (**तव**) (**दर्दर्तु**) भृशं वर्द्धताम् (**सूकरः**) यः सम्यक् करोति (**स्तोतॄन्**) विदुषः (**इन्द्रस्य**) परमैश्वर्यस्य (**रायसि**) रा इवाचरसि (**किम्**) (**अस्मान्**) (**दुच्छुनायसे**) (**नि**) (**सु**) (**स्वप**)॥४॥

अन्वयः-हे गृहस्थ! यस्य सूकरस्येन्द्रस्य तव सूकरो दर्दर्तु त्वं रायसि यत् सर्वान् दर्दृहि स्तोतॄनस्मान् किं दुच्छुनायसे तत्र गृहे सुखेन नि सु स्वप॥४॥

भावार्थः-हे गृहस्थ! त्वमैश्वर्यं संचित्य धर्मे व्यवहारे संवीय विदुषः सत्कृस्य श्रीमानिवाचरास्मान् प्रति किमर्थं श्वेवाचरति नीरोगस्सन् प्रतिसमयं सुखेन शयस्व॥४॥

पदार्थः-हे गृहस्थ! जिस (**सूकरस्य**) सुन्दरता से कार्य करने वाले (**इन्द्रस्य**) परमैश्वर्य्यवान् (**तव**) तुम्हारे (**सूकरः**) कार्य को अच्छे प्रकार करने वाला (**दर्दर्तु**) निरन्तर बढ़े (**त्वम्**) आप (**रायसि**) लक्ष्मी के समान आचरण करते हो और जो सब को (**दर्दृहि**) निरन्तर उन्नति दें अर्थात् सब की वृद्धि करें (**स्तोतॄन्**) स्तुति करने वाले विद्वान् (**अस्मान्**) हम लोगों को (**किम्**) क्या (**दुच्छुनायसे**) दुष्ट कुत्तों में जैसे वैसे आचरण से प्राप्त होते हो, उस घर में सुख से (**नि, सु, स्वप**) निरन्तर सोओ॥४॥

भावार्थः-हे गृहस्थ! आप ऐश्वर्य का संचय कर, धर्म व्यवहार में अच्छे प्रकार विस्तार कर और विद्वानों का सत्कार कर श्रीमानों के समान आचरण करो, हम लोगों के प्रति किसलिये कुत्ते के समान आचरण करते हैं, नीरोग होते हुए प्रति समय सुख से सोओ॥४॥

पुनर्गृहस्थाः गृहे किं किं कुर्युरित्याह॥

फिर गृहस्थ घर में क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः॥५॥

सस्तु। माता। सस्तु। पिता। सस्तु। श्वा। सस्तु। विश्पतिः। ससन्तु। सर्वे। ज्ञातयः। सस्तु। अयम्। अभितः। जनः॥५॥

पदार्थः-(**सस्तु**) शयताम् (**माता**) (**सस्तु**) (**पिता**) (**सस्तु**) (**श्वा**) कुक्कुरः (**सस्तु**) (**विश्पतिः**) प्रजापतिः (**ससन्तु**) शयीरन् (**सर्वे**) (**ज्ञातयः**) सम्बन्धिनः (**सस्तु**) (**अयम्**) (**अभितः**) सर्वतः (**जनः**) उत्तमो विद्वान्॥५॥

अन्वयः-ये मनुष्या यथा मद्गृहे मम माताऽभितः सस्तु पिता सस्तु श्वा सस्तु विश्पतिस्सस्तु सर्वे ज्ञातयोऽभितः ससन्त्वयं जनः सस्तु तथा युष्माकं गृहेऽपि ससन्तु॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। मनुष्यैरीदृशानि गृहाणि निर्मातव्यानि यत्र सर्वेषां सर्वव्यवहारकरणाय पृथक् पृथक् शालागृहाणि च भवेयुः॥५॥

पदार्थः-जो मनुष्य जैसे मेरे घर में मेरी (**माता**) माता (**अभितः**) सब ओर से (**सस्तु**) सोवे

(पिता) पिता **(सस्तु)** सोवे **(श्वा)** कुत्ता **(सस्तु)** सोवे **(विश्पतिः)** प्रजापति **(सस्तु)** सोवे **(सर्वे)** सब **(ज्ञातयः)** सम्बन्धी सब ओर से **(ससन्तु)** सोवें **(अयम्)** यह **(जनः)** उत्तम विद्वान् सोवे, वैसे तुम्हारे घर में भी सोवें॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को ऐसे घर रचने चाहियें, जिनमें सब के सर्व व्यवहारों के करने को अलग-अलग शाला और घर होवें॥५॥

पुनर्मनुष्यैः कीदृशानि गृहाणि निर्मातव्यानीत्याह॥

फिर मनुष्यों को कैसे घर बनाने चाहियें, इस विषय को अगले मन्त्र में कहते हैं॥

य आस्ते यश्च चरति यश्च पश्यति नो जनः।
तेषां स हन्मो अक्षाणि यथेदं हर्म्यं तथा॥६॥

यः। आस्ते। यः। च। चरति। यः। च। पश्यति। नः। जनः। तेषाम्। सम्। हन्मः। अक्षाणि। यथा। इदम्। हर्म्यम्। तथा॥६॥

पदार्थः-(**यः**) (**आस्ते**) उपविशति (**यः**) (**च**) (**चरति**) गच्छति (**यः**) (**च**) (**पश्यति**) (**नः**) अस्मानस्माकं गृहे वा (**जनः**) मनुष्यः (**तेषाम्**) (**सम्**) (**हन्मः**) संहितानि निमीलितान्यादर्शकानि कुर्मः (**अक्षाणि**) इन्द्रियाणि (**यथा**) (**इदम्**) (**हर्म्यम्**) कमनीयं गृहम् (**तथा**)॥६॥

अन्वयः-हे मनुष्या! यथेदं हर्म्यमस्ति तथा यो जनो नो गृह आस्ते यश्च चरति यश्च नोऽस्मान् पश्यति तेषामक्षाणि वयं संहन्मस्तथा यूयमप्याचरत॥६॥

भावार्थः-अत्रोपमालङ्कारः। मनुष्यैरीदृशानि गृहाणि निर्मातव्यानि यत्र सर्वेष्वृतुषु निर्वाहस्स्यात् सर्वं सुखं वर्धेत बहिः स्थाः जना गृहस्थान् सहसा न पश्येयुर्न च गृहस्था बाह्यान् पश्येयुरिति॥६॥

पदार्थः-हे मनुष्यो! (**यथा**) जैसे (**इदम्**) यह (**हर्म्यम्**) मनोहर घर है (**तथा**) वैसे (**यः**) जो (**जनः**) मनुष्य (**नः**) हमारे घर में (**आस्ते**) बैठता है (**यः, चः**) और जो (**चरति**) जाता है (**यः, च**) और जो हम लोगों को (**पश्यति**) देखता है (**तेषाम्**) उन सभों की (**अक्षाणि**) इन्द्रियों को हम लोग (**सम्, हन्मः**) सहित न देखने वाले करें, वैसे तुम भी आचरण करो॥६॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। मनुष्यों को ऐसे घर बनाने चाहियें, जिन में सब ऋतुओं में निर्वाह हो, सब सुख, बड़े और बाहर वाले जन गृहस्थों को सहसा न देखें और न घर वाले बाहर वालों को देखें॥६॥

पुनः कीदृशे गृहे गृहस्थैः शयनादिव्यवहाराः कर्तव्य इत्याह॥

फिर कैसे घर में सोना आदि करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत्।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि॥७॥

सहस्रऽशृङ्गः। वृषभः। यः। समुद्रात्। उत्ऽआचरत्। तेन। सहस्येन। वयम्। नि। जनान्।

स्वा॒प॒या॒म॒सि॒॥७॥

पदार्थः-(**सहस्रशृङ्गः**) सहस्राणि शृङ्गाणि तेजांसि किरणा यस्य सूर्यस्य सः (**वृषभः**) वृष्टिकरः (**यः**) (**समुद्रात्**) अन्तरिक्षात्। **समुद्र इत्यन्तरिक्षनाम।** (निघं०१.३) (**उदाचरत्**) ऊर्ध्वं गच्छति (**तेना**) अत्र **संहितायामि**ति दीर्घः। (**सहस्येना**) सहसि बले साधुना। अत्रापि **संहितायामि**ति दीर्घः। (**वयम्**) (**नि**) नित्यम् (**जनान्**) (**स्वापयामसि**)॥७॥

अन्वयः-हे मनुष्या! यस्सहस्रशृङ्गो वृषभः सूर्यः समुद्राद्यथोदाचरत् तथा तेन सहस्येन गृहेण सह वयं जनान् तत्र नि स्वापयामसि॥७॥

भावार्थः-हे मनुष्याः! यत्र सूर्यस्य किरणानां स्पर्शस्सर्वतः स्यात् यच्च बलाधिवर्धकं गृहं भवेत् तत्र शुद्धे सर्वान् स्वापयेम वयं च शयीमहि॥७॥

पदार्थः-हे मनुष्यो! (**यः**) जो (**सहस्रशृङ्गः**) हजारों किरण वाला (**वृषभः**) वृष्टि कारण सूर्य (**समुद्रात्**) अन्तरिक्ष से जैसे (**उदाचरत्**) ऊपर जाता है, वैसे (**तेन**) उस के साथ (**सहस्येन**) बल में उत्तम घर से (**वयम्**) हम लोग (**जनान्**) मनुष्यों को (**नि, स्वापयामसि**) निरन्तर सुलावें॥७॥

भावार्थः-हे मनुष्यो! जहाँ सूर्य की किरणों का स्पर्श सब ओर से हो और जो बल का अधिक बढ़ाने वाला घर हो, उसके शुद्ध होने में सब को सुलावें और हम लोग भी सोवें॥७॥

पुनः स्त्रीणां गृहाणि उत्तमानि कार्याणीत्याह॥

फिर स्त्री जनों के घर उत्तम बनावें, इस विषय को अगले मन्त्र में कहते हैं॥

प्रो॒ष्ठे॒शया॑ वह्ये॒शया॑ नारी॒र्यास्त॑ल्प॒शीव॑री॒ः।
स्त्रियो॒ याः पुण्य॑गन्धा॒स्ताः सर्वा॑ः स्वापयामसि॥८॥२२॥३॥

प्रो॒ष्ठे॒ऽशया॒ः। व॒ह्ये॒ऽशयः। नारीः। याः। त॒ल्प॒ऽशीव॑री॒ः। स्त्रिय॑ः। याः। पुण्य॑ऽगन्धाः। ताः। सर्वा॑ः। स्वा॒प॒या॒मा॒सि॒॥८॥

पदार्थः-(**प्रोष्ठेशयाः**) या प्रोष्ठे अतिशयेन प्रौढे गृहे शेरते ताः (**वह्येशयाः**) या वह्ये प्रापणीये शेरते ताः (**नारीः**) नरस्य स्त्रियः (**याः**) (**तल्पशीवरीः**) यास्तल्पेषु शेरते ताः (**स्त्रियः**) (**याः**) (**पुण्यगन्धाः**) पुण्यः शुद्धो गन्धो यासां ताः (**ताः**) (**सर्वाः**) (**स्वापयामसि**)॥८॥

अन्वयः-हे गृहस्था! यथा वयं याः प्रोष्ठेशया वह्येशया तल्पशीवरीर्नारीः स्त्रियः याः पुण्यगन्धाः स्युस्ताः सर्वा वयं उत्तमे गृहे स्वापयामसि यूयमप्येता उत्तमे गृहे स्वापयत॥८॥

भावार्थः-हे गृहस्था! यत्र गृहे स्त्रियो वसेयुस्तद्गृहमतीवोत्तमं रक्षणीयं यतः स्वसन्ताना उत्तमा भवेयुः॥८॥

अत्र गृहस्थकृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इत्यृग्वेदे सप्तमे मण्डले तृतीयोनुवाकः पञ्चपञ्चाशत्तमं सूक्तं पञ्चमेऽष्टके चतुर्थेऽध्याये द्वाविंशो वर्गश्च समाप्तः॥

की प्राप्ति कराने वाले घर में सोती हैं **(वह्योशया:)** वा जो प्राप्ति कराने वाले घर में सोतीं वा जो **(तल्पशीवरी:)** पलंग पर सोने वाली उत्तम **(नारी:)** स्त्री **(स्त्रिय:)** विवाहित तथा **(पुण्यगन्धा:)** जिन का शुद्धगन्ध हो **(ता:)** उन **(सर्वा:)** सभों को हम लोग उत्तम घर में **(स्वापयामसि)** सुलावें, वैसे तुम भी उत्तम घर में सुखाओ॥८॥

भावार्थ:-हे गृहस्थो! जिस घर में स्त्री बसें वह घर अतीव उत्तम रखना चाहिये जिससे निज सन्तान उत्तम हों॥८॥

इस सूक्त में गृहस्थों के काम का और गुणों का वर्णन होने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह ऋग्वेद के सातवें मण्डल में तीसरा अनुवाक, पचपनवां सूक्त और पञ्चम अष्टक के चौथे अध्याय में बाईसवां वर्ग पूरा हुआ॥

अथ पञ्चविंशतितमर्चस्य [षट्पञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। मरुतो देवताः। १ आर्ची गायत्री। २, ६, ७, ९ भुरिगार्चीगायत्री छन्दः। षड्जः स्वरः। ३, ४, ५ प्राजापत्या बृहतीछन्दः। मध्यमः स्वरः। ८, १० आर्च्युष्णिक्। ११ निचृदार्च्युष्णिक् छन्दः। ऋषभः स्वरः। १२, १३, १५, १८, १९, २१ निचृत्त्रिष्टुप्। १७, २०, त्रिष्टुप्। २२, २३, २५ विराट् त्रिष्टुप्छन्दः। धैवतः स्वरः। २४ पङ्क्तिः। १४, १६ स्वराट्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ के मनुष्याः श्रेष्ठा भवन्तीत्याह॥

अब पच्चीस ऋचा वाले छप्पनवें सूक्त का आरम्भ हैं, उसके प्रथम मन्त्र में अब कौन मनुष्य श्रेष्ठ होते हैं, इस विषय को कहते हैं॥

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः॥ १॥

के। ईम्। विऽअक्ताः। नरः। सऽनीळाः। रुद्रस्य। मर्याः। अध। सुऽअश्वाः॥ १॥

पदार्थः-(**के**) (**ईम्**) सर्वतः (**व्यक्ताः**) विशेषेण प्रसिद्धाः कमनीयाः (**नरः**) नेतारो मनुष्याः (**सनीळाः**) समानं नीळं प्रशंसनीयं गृहं येषां ते (**रुद्रस्य**) रोगाणां द्रावकस्य निस्सारकस्य (**मर्याः**) मनुष्याः (**अधा**) अथ। अत्र **निपातस्य चे**ति दीर्घः। (**स्वश्वाः**) शोभना अश्वाः तुरङ्गा महान्तो जना वा येषां ते॥ १॥

अन्वयः-हे विद्वन्नध क ईं रुद्रस्य स्वश्वा व्यक्ताः सनीळा मर्या नरस्सन्तीति ब्रूहि॥ १॥

भावार्थः-अत्र संसारे क उत्तमाः प्रसिद्धाः प्रशंसनीयाः मनुष्यास्सन्तीत्यस्याग्रस्थे मन्त्रे समाधानं वेद्यमिति॥ १॥

पदार्थः-हे विद्वान्! (**अध**) अनन्तर इस के (**के**) कौन (**ईम्**) सब ओर से (**रुद्रस्य**) रोगों के निकालने वाले के (**स्वश्वाः**) सुन्दर घोड़े का महान् जल जिस में विद्यमान हैं (**व्यक्ताः**) विशेषता से प्रसिद्ध (**सनीळाः**) समान घर वाले (**मर्याः**) मरणधर्मा (**नरः**) नायक मनुष्य हैं, इस को कहो॥ १॥

भावार्थः-इस संसार में कौन उत्तम प्रशंसा करने योग्य मनुष्य हैं, इस का अगले मन्त्र में समाधान जानना चाहिये॥ १॥

पुनर्विद्वांस एव प्रकटकीर्तयो जायन्त इत्याह॥

फिर विद्वान् जन ही प्रकट कीर्ति वाले होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

नकिर्ह्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम्॥ २॥

नकिः। हि। एषाम्। जनूंषि। वेद। ते। अङ्ग। विद्रे। मिथः। जनित्रम्॥ २॥

पदार्थः-(**नकिः**) निषेधे (**हि**) यतः (**एषाम्**) (**जनूंषि**) जन्मानि (**वेद**) विदन्ति (**ते**) (**अङ्ग**) सुहृत् (**विद्रे**) लभन्ते (**मिथः**) परस्परम् (**जनित्रम्**) जन्मसाधनं कर्म॥ २॥

अन्वयः-अङ्ग जिज्ञासो! ये ह्येषां जनूंषि नकिर्वेद ते मिथो जनित्रं विद्रे॥ २॥

भावार्थः-ये विदुषां जन्मानि विद्याप्रापकाणि जन्मानि न विदुस्ते प्रसिद्धा न भवन्ति ये च विद्याजन्म

प्राप्नुवन्ति ते हि कृत्यकृत्याः प्रसिद्धा जायन्त इत्युत्तरम्॥२॥

पदार्थः-हे **(अङ्ग)** मित्र जिज्ञासु! जो **(हि)** जिस कारण **(एषाम्)** इन के **(जनूंषि)** जन्मों को **(नकिः)** नहीं **(वेद)** जानते हैं **(ते)** वे उसी कारण **(मिथः)** परस्पर **(जनित्रम्)** जन्म सिद्ध कराने वाले कर्म को **(विद्रे)** पाते हैं॥२॥

भावार्थः-जिन विद्वानों के जन्मों को विद्या प्राप्ति कराने वाले न जानते हैं, वे प्रसिद्ध नहीं होते हैं और जो विद्या जन्म पाते हैं, वे ही कृतकृत्य और प्रसिद्ध होते हैं, यह उत्तर है॥२॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन्॥३॥

अभि। स्वऽपूभिः। मिथः। वपन्त। वातऽस्वनसः। श्येनाः। अस्पृध्रन्॥३॥

पदार्थः-(**अभि**) आभिमुख्ये **(स्वपूभिः)** शयानैस्स्वकीयैः पवित्राचरणैः सह **(मिथः)** अन्योन्यम् **(वपन्त)** वपन्ति **(वातस्वनसः)** वातस्य स्वनः शब्द इव शब्दो येषान्ते **(श्येनाः)** श्येन इव पराक्रमिणः **(अस्पृध्रन्)** स्पर्धन्ते॥३॥

अन्वयः-ये गृहस्था वातस्वनसः श्येना इव वर्त्तमानाः स्वपूभिर्मिथो वपन्ताभ्यस्पृध्रन् ते श्रेष्ठैश्वर्या जायन्ते॥३॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये गृहस्थाः परस्परं सत्याचरणानुष्ठानेन गम्भीराशयाः पराक्रमिणो भूत्वा सर्वस्योन्नतिं चिकीर्षन्ति तेऽभिपूजिता भवन्ति॥३॥

पदार्थः-जो गृहस्थ पुरुष **(वातस्वनसः)** पवन के शब्द के समान जिनका शब्द है वे **(श्येनाः)** वाज के समान पराक्रमी **(स्वपूभिः)** सोते हुए अर्थात् अप्रसिद्ध अपने पवित्र आचरणों के साथ **(मिथः)** परस्पर **(वपन्त)** धोते **(अभि, अस्पृध्रन्)** और सम्मुख स्पर्द्धा करते हैं, वे श्रेष्ठ ऐश्वर्य वाले होते हैं॥३॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो गृहस्थ परस्पर सत्याचरणानुष्ठान से गम्भीर आशय वाले पराक्रमी होकर सब की उन्नति करना चाहते हैं, वे पूजित होते हैं॥३॥

पुनर्विद्वान् किं कुर्यादित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

एतानि धीरो निण्या चिकेत पृश्निर्यदूधो महो जभार॥४॥

एतानि। धीरः। निण्या। चिकेत। पृश्निः। यत्। ऊधः। महो। जभार॥४॥

पदार्थः-(**एतानि**) **(धीरः)** मेधावी विद्वान् **(निण्या)** निश्चितानि **(चिकेत)** **(पृश्निः)** अन्तरिक्षमिव गम्भीराशयोऽक्षोभः **(यत्)** **(ऊधः)** दुग्धाधारम् **(महो)** पृथिवी **(जभार)** बिभर्ति॥४॥

अन्वयः-यो धीरः यदूधः पृश्निर्महो जभार तद्वदेतानि निण्या चिकेत जानीयात्स गृहभारं धर्तुं शक्नुयात्॥४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। यथा पृथिवी सूर्यश्च सर्वान् गृहान् बिभर्ति तथैव ये विद्वांसो निर्णीतान् सिद्धान्ताञ्जानन्ति ते सर्वत्र सत्कर्तव्या भवन्ति॥४॥

पदार्थः-जो **(धीरः)** बुद्धिमान् विद्वान् **(यत्)** जैसे **(ऊधः)** दुग्धधारायुक्त और **(पृश्निः)** अन्तरिक्ष के **(मही)** तथा पृथिवी **(जभार)** धारण करती है, वैसे क्षोभ रहित निष्कम्प गम्भीर **(एतानि)** इन **(निण्या)** पदार्थों को जो **(चिकेत)** जाने, वह घर के भार को धर सके॥७॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे पृथिवी और सूर्य्य सब गृहों को धारण करते हैं, वैसे जो विद्वान् जन निर्णीत सिद्धान्तों को जानते हैं, वे सर्वत्र सत्कार करने योग्य होते हैं॥४॥

का प्रजा उत्तमेत्याह॥

कौन प्रजा उत्तम है, इस विषय को अगले मन्त्र में कहते हैं॥

सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम्॥५॥

सा। विट्। सुऽवीरा। मरुत्ऽभिः। अस्तु। सनात्। सहन्ती। पुष्यन्ती। नृम्णम्॥५॥

पदार्थः-**(सा)** **(विट्)** प्रजा **(सुवीरा)** शोभना वीरा यस्यां सा **(मरुद्भिः)** मनुष्यैः **(अस्तु)** **(सनात्)** सनातने **(सहन्ती)** सहनं कुर्वती **(पुष्यन्ती)** पुष्टं कारयित्री **(नृम्णम्)** धनम्॥५॥

अन्वयः-या सुवीरा विट् मरुद्भिः सनात् नृम्णं पुष्यन्ती पीडां सहन्ती वर्त्तते साऽस्माकमस्तु॥५॥

भावार्थः-सैव स्त्री वरा या ब्रह्मचर्येण समग्रा विद्या अधीत्य शूरवीराँस्तनयान् प्रसूते सहनशीला कोशिका भवति॥५॥

पदार्थः-जो **(सुवीरा)** सुन्दर वीरों वाली **(विट्)** प्रजा **(मरुद्भिः)** मनुष्यों के साथ **(सनात्)** सनातन व्यवहार में **(नृम्णम्)** धन को **(पुष्यन्ती)** पुष्ट करवाती और पीड़ा को **(सहन्ती)** सहने वाली वर्त्तमान है **(सा)** वह हमारे लिये **(अस्तु)** होवे॥५॥

भावार्थः-वही स्त्री श्रेष्ठ है जो ब्रह्मचर्य्य से समग्र विद्याओं को पढ़ के शूरवीर पुत्रों को उत्पन्न करती है और वही सहनशील तथा कोश वाली होती है॥५॥

पुनस्ता नार्यः कीदृश्यो भवेयुरित्याह॥

फिर वे स्त्री कैसी हों, इस विषय को अगले मन्त्र में कहते हैं॥

यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः॥६॥

यामम्। येष्ठाः। शुभा। शोभिष्ठाः। श्रिया। सम्ऽमिश्लाः। ओजःऽभिः। उग्राः॥६॥

पदार्थः-**(यामम्)** प्रहरं प्राप्तव्यं वा **(येष्ठाः)** अतिशयेन यातारः **(शुभा)** शोभनेन **(शोभिष्ठाः)** अतिशयेन शोभायुक्ताः **(श्रिया)** धनेन **(संमिश्लाः)** सम्यक् मित्रत्वेन मिश्रिताः **(ओजोभिः)** पराक्रमादिभिः **(उग्राः)** कठिनगुणकर्मस्वभावाः॥६॥

अन्वयः-हे गृहस्था! याः शुभा शोभिष्ठाः श्रिया संमिश्ला येष्ठा ओजोभिरुग्राः सत्यो यामं प्रापणीयं यान्ति ताः गृहस्थैस्सम्माननीयाः॥६॥

भावार्थः-हे गृहस्था! याः शाला श्रियान्नादिभिर्युक्ताः शोभमानाः प्रापणीयं सुखं प्रयच्छन्ति ताः पतिव्रता स्त्रिय इव सुशोभनीयाः सततं कुरुत॥६॥

पदार्थः-हे गृहस्थो! जो **(शुभा)** शोभन **(शोभिष्ठाः)** अतीव शोभायुक्त **(श्रिया)** धन से **(संमिश्लाः)** अच्छे प्रकार मित्रता के साथ मिली हुई **(येष्ठाः)** अतीव प्राप्त होने और **(ओजेभिः)** पराक्रम आदि से **(उग्राः)** कठिन गुण-कर्म-स्वभाव वाली होती हुई **(यामम्)** प्राप्त होने वाले व्यवहार को पहुँचती हैं, वे गृहस्थों को मान करने योग्य हैं॥६॥

भावार्थः-हे गृहस्थो! जो शालाधर धन और अन्नादि पदार्थों से युक्त शोभायमान प्राप्त होने योग्य सुख को देते हैं, उनको पतिव्रता स्त्रियों के समान सुन्दर शोभायुक्त निरन्तर करो॥६॥

पुनः स्त्रियः कथं वर्तेरन्नित्याह॥

फिर स्त्री कैसे वर्तें, इस विषय को अगले मन्त्र में कहते हैं॥

उ॒ग्रं व॒ ओज॑: स्थि॒रा शवां॑स्यधा॑ मरुद्भि॑र्गणस्तुवि॑ष्मान्॥७॥

उ॒ग्रम्। व॒:। ओज॑:। स्थि॒रा:। शवां॑सि। अध॑। मरुत्ऽभि॑:। ग॒ण:। तुवि॑ष्मान्॥७॥

पदार्थः-(**उग्रम्**) तेजस्वी (**वः**) युष्माकम् (**ओजः**) पराक्रमः (**स्थिरा**) स्थिराणि दृढानि (**शवांसि**) बलानि (**अधा**) अथ। अत्र **निपातस्य चे**ति दीर्घः। (**मरुद्भिः**) उत्तमैर्मनुष्यैः (**गणः**) समूहः (**तुविष्मान्**) बलवान्॥७॥

अन्वयः-हे स्त्रियो! वो मरुद्भिस्सहोग्रम् ओजः स्थिरा शवांस्यध गणस्तुविष्मान् भवतु॥७॥

भावार्थः-या स्त्रियः स्वेषां पतीनां च बलं न ह्रासयन्ति तासां पुत्रपौत्रादिगणो बलवान् जायते॥७॥

पदार्थः-हे स्त्रियो! (**वः**) तुम्हारा (**मरुद्भिः**) उत्तम मनुष्यों के साथ (**उग्रम्**) तेजस्वी (**ओजः**) पराक्रम और (**स्थिरा**) स्थिर दृढ़ (**शवांसि**) बल (**अध**) इस के अनन्तर (**गणः**) समूह (**तुविष्मान्**) बलवान् हो॥७॥

भावार्थः-जो स्त्रियाँ अपने पतियों के बल को न क्षीण करातीं उनका पुत्र-पौत्रादि समूह बलवान् होता है॥७॥

पुनर्गृहस्थः किं कर्म कुर्यादित्याह॥

फिर गृहस्थ कौन काम करे, इस विषय को अगले मन्त्र में कहते हैं॥

शु॒भ्रो व॒: शुष्म॒: क्रुध्मी॒ मनां॑सि॒ धुनि॒र्मुनि॑रिव॒ शर्ध॑स्य धृ॒ष्णो:॥८॥

शु॒भ्र:। व॒:। शुष्म॑:। क्रु॒ध्मी॑। मनां॑सि। धुनि॑:। मुनि॑:ऽइव। शर्ध॑स्य। धृ॒ष्णो:॥८॥

पदार्थः-(**शुभ्रः**) शुद्धः प्रशंसनीयः (**वः**) युष्माकम् (**शुष्मः**) बलयुक्तो देहः (**क्रुध्मी**) क्रोधशीलानि (**मनांसि**) अन्तःकरणानि (**धुनिः**) कम्पनं चेष्टाकरणम् (**मुनिरिव**) यथा मननशीलो विद्वांस्तथा (**शर्धस्य**) बलयुक्तस्य (**धृष्णोः**) दृढस्य॥८॥

अन्वयः-हे गृहस्था! वो युष्माकं धार्मिकेषु शुभ्रः शुष्मोऽस्तु दुष्टेषु क्रुध्मी मनांसि सन्तु मुनिरिव शर्धस्य धृष्णोर्धुनिरिव वागस्तु॥८॥

भावार्थः-अत्रोपमालङ्कारः। ये गृहस्थाः श्रेष्ठैस्सह सन्धिं दुष्टैस्सह पृथग्भावं रक्षन्ति ते बहुबलं लभन्ते॥८॥

पदार्थः-हे गृहस्थो! **(वः)** तुम्हारा धार्मिक जनों में **(शुभ्रः)** प्रशंसनीय **(शुष्मः)** बलयुक्त देह हो, दुष्टों में **(क्रुध्मी)** क्रोधशील **(मनांसि)** मन हों **(मुनिरिव)** मननशील विद्वान् के समान **(शर्धस्य)** बलयुक्त बली **(धृष्णोः)** दृढ़ के **(धुनिः)** चेष्टा करने के समान वाणी हो॥८॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जो गृहस्थ जन श्रेष्ठों के साथ मिलाप और दुष्टों के साथ अलग होना रखते हैं, वे बहुत बल पाते हैं॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सने॑म्य॒स्मद्यु॒योत॑ दि॒द्युं मा वो॑ दुर्म॒तिरि॒ह प्रण॑ङ्नः॥९॥

सने॑मि। अ॒स्मत्। यु॒योत॑। दि॒द्युम्। मा। व॒ः। दुः॒ऽम॒तिः। इ॒ह। प्रण॑क्। न॒ः॥९॥

पदार्थः-**(सनेमि)** पुरातनम् **(अस्मत्)** अस्माकं सकाशात् **(युयोत)** पृथक् कुरुत **(दिद्युम्)** प्रज्वलितं शस्त्रास्त्रम् **(मा)** **(वः)** युष्मान् **(दुर्मतिः)** दुष्टधीः **(इह)** अस्मिन् गृहाश्रमे **(प्रणक्)** प्रणाशयेत् **(नः)** अस्मान्॥९॥

अन्वयः-हे विद्वांसः! अस्मत्सनेमि दिद्युं युयोत यत इह वो युष्मान् नोऽस्माँश्च दुर्मतिर्मा प्रणक्॥९॥

भावार्थः-हे मनुष्या! यूयं सदा दुष्टचारेभ्यो मनुष्येभ्यः पृथक् स्थित्वा शत्रुबलं निवार्य वर्धमाना भवत॥९॥

पदार्थः-हे विद्वानो! **(अस्मत्)** हम से **(सनेमि)** पुराने **(दिद्युम्)** प्रज्वलित शस्त्र और अस्त्र समूह को **(युयोत)** अलग करो जिससे **(इह)** इस गृहाश्रम व्यवहार में **(वः)** तुम लोगों को और **(नः)** हम लोगों को **(दुर्मतिः)** दुष्टबुद्धि **(मा)** मत **(प्रणक्)** नष्ट करावे॥९॥

भावार्थः-हे मनुष्यो! तुम सदा दुष्टाचारी मनुष्यों से अलग रह कर और शत्रु बल को निवार के बढ़ते हुए होओ॥९॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

प्रि॒या वो॒ नाम॑ हुवे तु॒राणा॒मा यत्तृ॒पन्म॑रुतो वावशा॒नाः॥१०॥२३॥

प्रि॒या। व॒ः। नाम॑। हु॒वे॒। तु॒राणा॒म्। आ। यत्। तृ॒पत्। म॒रु॒तः॒। वा॒व॒शा॒नाः॥१०॥

पदार्थः-**(प्रिया)** प्रियाणि कमनीयानि **(वः)** युष्माकम् **(नाम)** नामानि **(हुवे)** प्रशंसामि **(तुराणाम्)** सद्यःकारिणाम् **(आ)** **(यत्)** यः **(तृपत्)** तृप्यति **(मरुतः)** प्राण इव प्रिया विद्वांसः **(वावशानाः)** कामयमानाः॥१०॥

अन्वयः-हे वावशाना मरुतस्तुराणां वः प्रिया नामाहं हुवे यद्यः आ तृपत् तं मा च यूयं सत्कुरुत॥१०॥

भावार्थः-ये सर्वेषां प्रियाचरणाः सुखं कामयमाना मनुष्या वर्तन्ते त एव प्रियाणि सुखानि लभन्ते॥१०१॥

पदार्थः-हे **(वावशानाः)** कामना करते हुए **(मरुतः)** प्राण के समान प्यारे विद्वानो! **(तुराणाम्)** शीघ्र करने वालों **(वः)** आप लोगों के **(प्रिया)** मनोहर **(नाम)** नामों को मैं **(हुवे)** प्रशंसता हूँ अर्थात् मैं उनकी प्रशंसा करता हूँ **(यत्)** जो **(आ, तृपत्)** अच्छे प्रकार तृप्त होता है उस का और मेरा सत्कार करो॥१०॥

भावार्थः-जो सब के प्रियाचरण करने और सुख की कामना करने वाले मनुष्य वर्त्तमान हैं, वे ही प्रिय सुखों को पाते हैं॥१०॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

स्वा॒यु॒धास॑ इ॒ष्मिण॑: सु॒नि॒ष्का उ॒त स्व॒यं त॒न्व१॑: शुम्भ॑माना:॥ ११॥

सु॒ऽआ॒यु॒धास॑:। इ॒ष्मिण॑:। सु॒ऽनि॒ष्का:। उ॒त। स्व॒यम्। त॒न्व॑:। शुम्भ॑माना:॥ ११॥

पदार्थः-**(स्वायुधासः)** शोभनान्यायुधानि येषान्ते **(इष्मिणः)** इच्छान्नादियुक्ताः **(सुनिष्काः)** शोभनानि निष्काणि सौवर्णानि येषां ते **(उत)** **(स्वयम्)** **(तन्वः)** शरीराणि **(शुम्भमानाः)** शोभमानाः॥११॥

अन्वयः-हे मनुष्याः! ये स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्वः शुम्भमानास्सन्ति त एव विजयप्रशंसे प्राप्नुवन्ति॥११॥

भावार्थः-ये धनुर्वेदमधीत्यारोगशरीरा युद्धविद्याकुशलास्सन्ति त एव धनधान्ययुक्ता भवन्ति॥११॥

पदार्थः-हे मनुष्यो! जो **(स्वायुधासः)** अच्छे हथियारों वाले **(इष्मिणः)** इच्छा और जलादि पदार्थों से युक्त **(सुनिष्काः)** जिन के सुन्दर सुवर्ण के गहने विद्यमान **(उत)** और **(स्वयम्)** आप **(तन्वः)** शरीरों की **(शुम्भमानाः)** शोभा करते हुए वर्त्तमान हैं, वे ही विजय और प्रशंसा को पाते हैं॥

भावार्थः-जो धुनर्वेद को पढ़ के आरोग्ययुक्त शरीर और युद्ध विद्या में कुशल हैं, वे ही धनधान्य युक्त होते हैं॥११॥

केऽत्र संसारे पवित्रा जायन्त इत्याह॥

कौन इस संसार में पवित्र होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

शुची॑ वो ह॒व्या म॑रुत: शुचीना॑ शुचिं॑ हिनोम्यध्व॒रं शुचि॑भ्यः।

ऋ॒तेन॑ स॒त्यमृ॑त॒साप॒ आय॒ञ्छुचि॑जन्मान॒: शुच॑य: पाव॒का:॥ १२॥

शुची॑। व॒:। ह॒व्या। म॒रु॒त॒:। शुचीना॑म्। शुचि॑म्। हि॒नो॒मि॒। अ॒ध्व॒रम्। शुचि॑ऽभ्यः। ऋ॒तेन॑। स॒त्यम्। ऋ॒त॒ऽसाप॑:। आ॒य॒न्। शुचि॑ऽजन्मानः। शुच॑यः। पा॒व॒काः॥ १२॥

पदार्थः-**(शुची)** शुचीनि पवित्राणि **(वः)** युष्माकम् **(हव्या)** दातुमादातुमर्हाणि **(मरुतः)**

मरणधर्माणो मनुष्याः **(शुचीनाम्)** पवित्राचाराणाम् **(शुचिम्)** पवित्रम् **(हिनोमि)** वर्धयामि **(अध्वरम्)** अहिंसनीयं यज्ञम् **(शुचिभ्यः)** पवित्रेभ्यो विद्वद्भ्यः पदार्थेभ्यो वा **(ऋतेन)** यथार्थेन **(सत्यम्)** अव्यभिचारि नित्यम् **(ऋतसापः)** ये ऋतेन सपन्ति प्रतिज्ञां कुर्वन्ति ते **(आयन्)** आगच्छन्ति प्राप्नुवन्ति **(शुचिजन्मानः)** पवित्रजन्मवन्तः **(शुचयः)** पवित्राः **(पावकाः)** वह्नय इव वर्त्तमानाः॥१२॥

अन्वयः-हे पावका इव शुचयः शुचिजन्मान ऋतसापो मरुतः शुचीनां वो यानि शुची हव्यास्सन्ति तेभ्यः शुचिभ्यः शुचिमृतेन सत्यमध्वरं य आयँस्तानहं हिनोमि तं मां सर्वे वर्धयत॥१२॥

भावार्थः-येषां प्राक्कर्माणि पुण्यात्मकानि सन्ति त एव पवित्रजन्मानोऽथवा येषां वर्तमाने धर्माचरणानि सन्ति ते पवित्रजन्मानो भवन्ति॥१२॥

पदार्थः-हे **(पावकाः)** अग्नि के समान प्रताप सहित वर्त्तमान **(शुचयः)** पवित्र **(शुचिजन्मानः)** पवित्र जन्म वाले **(ऋतसापः)** जो सत्य से प्रतिज्ञा करते हैं वे **(मरुतः)** मरणधर्मा मनुष्यो **(शुचीनाम्)** पवित्र आचरण करने वाले **(वः)** तुम लोगों के जो **(शुची)** पवित्र **(हव्या)** देने लेने योग्य वस्तु वर्त्तमान हैं उन **(शुचिभ्यः)** पवित्र वस्तुओं से वा पवित्र विद्वानों से **(शुचिम्)** पवित्र को और **(ऋतेन)** यथार्थ भाव से **(सत्यम्)** अव्यभिचारी नित्य **(अध्वरम्)** न नष्ट करने योग्य व्यवहार को **(आयन्)** जो प्राप्त होते हैं उन्हें **(हिनोमि)** बढ़ाता हूँ, उस मुझे सब बढ़ावें॥१२॥

भावार्थः-जिनके पिछले काम पुण्यरूप हैं वे ही पवित्र जन्म वाले हैं अथवा जिनके वर्त्तमान में धर्मयुक्त आचरण हैं, वे पवित्रजन्मा होते हैं॥१२॥

पुनर्योद्धारः कीदृशा भवेयुरित्याह॥

फिर योद्धा कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः॥१३॥

अंसेषु। आ। मरुतः। खादयः। वः। वक्षःऽसु। रुक्माः। उपऽशिश्रियाणाः। वि। विऽद्युतः। न। वृष्टिऽभिः। रुचानाः। अनु। स्वधाम्। आयुधैः। यच्छमानाः॥१३॥

पदार्थः-(**अंसेषु**) भुजमूलेषु **(आ)** **(मरुतः)** वायव इव बलिष्ठा मनुष्याः **(खादयः)** ये खादन्ति ते **(वः)** युष्माकम् **(वक्षःसु)** हृदयदेशेषु **(रुक्माः)** देदीप्यमानाः **(उपशिश्रियाणाः)** ये उपश्रयन्ति ते **(वि)** **(विद्युतः)** स्तनयित्नवः **(न)** इव **(वृष्टिभिः)** **(रुचानाः)** रोचमानाः **(अनु)** **(स्वधाम्)** अन्नम् **(आयुधैः)** शस्त्रास्त्रैः युद्धसाधनैः **(यच्छमानाः)** निग्रहीतारः॥१३॥

अन्वयः-हे मरुतो! ये उपशिश्रियाणा वक्षःसु रुक्माः खादयो वृष्टिभिर्विद्युतो नानु स्वधां वि रुचाना आयुधैश्शत्रून् यच्छमानाः तेषां वोंऽसेषु बलमा वर्तते ते भवन्तो विजयिनो भवन्ति॥१३॥

भावार्थः-अत्रोपमालङ्कारः। हे शूरवीरा! मनुष्या यथा विद्युतो वृष्टिभिस्सहैव प्रकाशन्ते तथैव यूयं शस्त्रास्त्रैः प्रकाशध्वं स्वशरीरबलं वर्धयित्वोत्तमसेनामुपश्रित्य शत्रुन् निगृह्णीत॥१३॥

पदार्थः-हे **(मरुतः)** पवनों के समान बलिष्ठ मनुष्यो! जो **(उपशिश्रियाणाः)** समीप सेवने

वाले **(वक्षःसु)** हृदयों में **(रुक्माः)** देदीप्यमान **(खादयः)** भक्षण करते हैं **(वृष्टिभिः)** वर्षाओं से जैसे **(विद्युतः)** बिजुली **(न)** वैसे **(अनु, स्वधाम्)** अनुकूल अन्न को **(वि, रुचानाः)** प्रदीप्त करते हुए **(आयुधैः)** शस्त्र और अस्त्र युद्ध के साधनों से शत्रुओं को **(यच्छमानाः)** पराजय देने वाले उन **(वः)** आप की **(अंसेषु)** भुजाओं की मूलों में बल **(आ)** सब ओर से वर्तमान है, वे आप लोग विजय प्राप्त होने वाले होते हैं॥१३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे शूरवीर पुरुषो! जैसे बिजुली वर्षाओं के साथ ही प्रकाशित होती है, वैसे ही आप लोग शस्त्र और अस्त्रों से प्रकाशित होओ और अपने शरीर बल को बढ़ाके और उत्तम सेना का आश्रय लेकर शत्रुओं को पराजय देओ॥१३॥

पुनर्मनुष्यैः किं कर्तव्यमित्याह॥

फिर मनुष्यों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

प्र बुध्न्या॑ व ईरते महां॑सि प्र नामा॑नि प्रयज्यवस्तिरध्वम्।
स॒हस्रि॒यं॒ दम्यं॑ भा॒गमे॒तं गृ॑ह॒मे॒धीयं॑ मरुतो जुषध्वम्॥ १४॥

प्र। बु॒ध्न्याः॑। व॒ः। ई॒र॒ते॒। महां॑सि। प्र। नामा॑नि। प्र॒ऽय॒ज्य॒वः॒। ति॒र॒ध्व॒म्। स॒हस्रि॒यम्। दम्य॑म्। भा॒गम्। ए॒तम्। गृ॒ह॒ऽमे॒धीय॑म्। म॒रु॒तः॒। जु॒ष॒ध्व॒म्॥ १४॥

पदार्थः-(**प्र**) (**बुध्न्याः**) बुध्न्येऽन्तरिक्षे मेघाः (**वः**) युष्माकम् (**ईरते**) प्राप्नुवन्ति (**महांसि**) (**प्र**) (**नामानि**) (**प्रयज्यवः**) प्रकर्षेण संगन्तारः (**तिरध्वम्**) शत्रुबलमुल्लङ्घ्वम् (**सहस्रियम्**) सहस्रेषु भवं (**दम्यम्**) दमनीयम् (**भागम्**) भजनीयम् (**एतम्**) (**गृहमेधीयम्**) गृहमेधे गृहस्थे शुद्धे व्यवहारे भवम् (**मरुतः**) वायव इव (**जुषध्वम्**) सेवध्वम्॥१४॥

अन्वयः-हे मरुतः प्रयज्यवो! यूयं ये वो महांसि नामानि बुध्न्याः प्रेरते तैः शत्रून् प्र तिरध्वमेतं सहस्रियं दम्यं गृहमेधीयं भागं जुषध्वम्॥१४॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे गृहस्था! यथा मेघाः पृथिवीं सेवन्ते तथैव भवन्तः प्रजाः सेवध्वम् शत्रून्निवार्यातुलसुखं प्राप्नुत॥१४॥

पदार्थः-हे (**मरुतः**) पवनों के समान (**प्रयज्यवः**) उत्तम संग करने वालो! तुम जो (**वः**) तुम लोगों के (**महांसि**) बड़े-बड़े (**नामानि**) नामों को (**बुध्न्याः**) अन्तरिक्ष में उत्पन्न हुए मेघ (**प्र, ईरते**) प्राप्त होते हैं उससे शत्रुओं के (**प्र, तिरध्वम्**) बल को उल्लङ्घन करो (**एतम्**) इस (**सहस्रियम्**) हजारों में हुए और (**दम्यम्**) शान्त करने योग्य (**गृहमेधीयम्**) घर के शुद्ध व्यवहार में हुए (**भागम्**) सेवने करने योग्य विषय को (**जुषध्वम्**) सेवो॥१४॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे गृहस्थो! जैसे मेघ पृथिवी को सेवते हैं, वैसे ही आप लोग प्रजाजनों को सेओ और शत्रुओं की निवृत्ति कर अतुल सुख पाओ॥१४॥

पुनस्ते मनुष्याः कीदृशा जायेरन्नित्याह॥

फिर वे मनुष्य कैसे प्रसिद्ध हों, इस विषय को अगले मन्त्र में कहते हैं॥

यदि॑ स्तु॒तस्य॑ मरुतो अधी॒थेत्था विप्र॑स्य वा॒जिनो॒ हवी॑म॒न्।
म॒क्षू रा॒यः सु॒वीर्य॑स्य दात॒ नू चि॒द्यम॒न्य आ॒दभ॒दरा॑वा॥ १५॥ २४॥

यदि॑। स्तु॒तस्य॑। म॒रु॒तः॒। अ॒धि॒ऽइ॒थ॒। इ॒त्था। विप्र॑स्य। वा॒जिनः॑। हवी॑मन्। म॒क्षु। रा॒यः। सु॒ऽवीर्य॑स्य। दा॒त॒। नु। चि॒त्। यम्। अ॒न्यः। आ॒ऽदभ॑त्। अरा॑वा॥ १५॥

पदार्थः-(**यदि**) (**स्तुतस्य**) (**मरुतः**) वायव इव (**अधीथ**) (**इत्था**) अनेन प्रकारेण (**विप्रस्य**) मेधाविनः (**वाजिनः**) वेगयुक्तस्य (**हवीमन्**) हवींषि दातव्यानि वसूनि विद्यन्ते यस्मिन् (**मक्षू**) सद्यः। अत्र **ऋचि तुनुघे**ति दीर्घः। (**रायः**) धनस्य (**सुवीर्यस्य**) शोभनं वीर्यं यस्मात्तस्य (**दात**) दत्त (**नु**) शीघ्रम्। अत्र **ऋचि तुनुघे**ति दीर्घः। (**चित्**) अपि (**यम्**) (**अन्यः**) (**आदभत्**) हिंस्यात् (**अरावा**) अदाता अवचनो वा॥ १५॥

अन्वयः-हे मरुतो! यदि स्तुतस्य वाजिनो विप्रस्य हवीमन्नित्था मक्ष्वधीथ सुवीर्यस्य रायो दात चिदपि यमन्योऽरावा न्वादभत् तर्हि किं किं विमर्शनं न जायेत॥ १५॥

भावार्थः-ये विदुषः सकाशादधीयते ते समर्था भूत्वा धनस्वामिनो जायन्ते॥ १५॥

पदार्थः-हे (**मरुतः**) पवनों के समान वर्त्तमान मनुष्यो! (**यदि**) यदि (**स्तुतस्य**) प्रशंसित (**वाजिनः**) वेगयुक्त (**विप्रस्य**) मेधावी जन के (**हवीमन्**) जिस में देने योग्य वस्तु विद्यमान उस व्यवहार में (**इत्था**) इस प्रकार से (**मक्षू**) शीघ्र (**अधीथ**) स्मरण करो (**सुवीर्यस्य**) और जिन के सम्बन्ध में शुभ वीर्य होता उस (**रायः**) धन को (**दात**) देओ (**चित्**) और (**यम्**) जिसको (**अन्यः**) अन्य (**अरावा**) न देने वाला जन (**नु**) शीघ्र (**आदभत्**) नष्ट करें तो क्या-क्या विचार न हो॥ १५॥

भावार्थः-जो विद्वान् के समीप से पढ़ते हैं, वे समर्थ अर्थात् विद्यासम्पन्न हो धनपति होते हैं॥ १५॥

पुनस्ते राजजनाः कीदृशाः भवेयुरित्याह॥

फिर वे राजजन कैसे हों इस विषय को अगले मन्त्र में कहते हैं॥

अत्या॑सो॒ न ये म॒रु॒तः॒ स्वञ्चो॑ यक्षदृ॒शो॒ न शु॒भय॑न्त॒ मर्या॑ः।
ते ह॑र्म्ये॒ष्ठाः शिश॑वो॒ न शु॒भ्रा व॒त्सासो॒ न प्र॑क्री॒ळिन॑ः॒ पयो॒धाः॥ १६॥

अत्या॑सः। न। ये। म॒रु॒तः॒। सु॒ऽअञ्चः॑। य॒क्ष॒ऽदृ॒शः॒। न। शु॒भय॑न्त। मर्या॑ः। ते। ह॒र्म्ये॒ऽस्थाः। शिश॑वः। न। शु॒भ्राः। व॒त्सासः॑। न। प्र॒ऽक्री॒ळिनः॑। पय॒ःऽधाः॥ १६॥

पदार्थः-(**अत्यासः**) येऽतन्त्यध्वानं व्याप्नुवन्ति ते (**न**) इव (**ये**) (**मरुतः**) वायव इव बलिष्ठा मनुष्याः (**स्वञ्चः**) ये सुष्ठ्वञ्चन्ति गच्छन्ति ते (**यक्षदृशः**) ये यक्षान् पूजनीयान् पश्यन्ति ते (**न**) इव (**शुभयन्त**) शुभ इवाचरन्ति (**मर्याः**) मनुष्याः (**ते**) (**हर्म्येष्ठाः**) ये हर्म्ये तिष्ठन्ति ते (**शिशवः**) बालकाः (**न**) इव (**शुभ्राः**) शुद्धाः (**वत्सासः**) सद्योजाता वत्साः (**न**) इव (**प्रक्रीळिनः**) प्रकृष्टा क्रीळा विद्यते येषां ते (**पयोधाः**) ये पयांसि स्वगतानि दधति ते॥ १६॥

अन्वय:-हे मनुष्या:! ये मर्या अत्यासो न स्वञ्च: पयोधा मरुत इव गतिमन्तो बलिष्ठा यक्षदृशो न हर्म्येष्ठा: शिशवो न शुभ्रा वत्सासो न प्रक्रीळिन: सन्त: शुभयन्त ते कृतकार्या भवन्ति॥१६॥

भावार्थ:-अत्रोपमालङ्कार:। ये शूरवीरा अश्ववद्वेगवन्त: कल्याणदृष्टिवत्समीक्षका: शिशुवत्सरलस्वभावा वत्सवत्क्रीडाकर्तार: वायुवत्सामग्रीधरा राजादयो वीरास्सन्ति त एव विजयप्रतिष्ठे सततं लभन्ते॥१६॥

पदार्थ:-हे मनुष्यो! **(ये)** जो **(मर्या:)** मरणधर्मा मनुष्य **(अत्यास:)** मार्ग को व्याप्त होते हुओं के **(न)** समान **(स्वञ्च:)** सुन्दरता से जाने **(पयोधा:)** वा जलों को धारण करने वाले **(मरुत:)** पवनों के समान निरन्तर चाल वाले बलिष्ठ **(यक्षदृश:)** जो पूजन करने योग्यों को देखते हैं उनके **(न)** समान **(हर्म्येष्ठा:)** अटारियों पर स्थिर होने वाले **(शिशव:)** बालकों के **(न)** समान **(शुभ्रा:)** शुद्ध सुन्दर **(वत्सास:)** शीघ्र उत्पन्न हुए बछड़ों के **(न)** समान **(प्रक्रीळिन:)** अच्छे प्रकार खेल वाले होते हुए **(शुभयन्त)** उत्तम के समान आचरण करते हैं **(ते)** वे कृतकार्य होते हैं॥१६॥

भावार्थ:-इस मन्त्र में उपमालङ्कार है। जो शूरवीर घोड़े के समान वेग वाले, अच्छी दृष्टि वाले के समान देखने वाले, बालकों के समान सीधे स्वभाव वाले, बछड़ों के समान खेल करने वाले, पवनों के समान पदार्थों के धारण करने वाले राजा आदि वीर जन हैं, वे ही विजय और प्रतिष्ठा को निरन्तर पाते हैं॥१६॥

पुन: के राजजना: श्रेष्ठा: सन्तीत्याह॥

फिर कौन राजजन श्रेष्ठ हैं, इस विषय को अगले मन्त्र में कहते हैं॥

दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम्॥१७॥

दशस्यन्त:। न:। मरुत:। मृळन्तु। वरिवस्यन्त:। रोदसी इति। सुमेके इति सुऽमेके। आरे। गोऽहा। नृऽहा। वध:। व:। अस्तु। सुम्नेभि:। अस्मे इति। वसव:। नमध्वम्॥१७॥

पदार्थ:-**(दशस्यन्त:)** बलयन्त: **(न:)** अस्मान् **(मरुत:)** प्राणा इव **(मृळन्तु)** सुखयन्तु **(वरिवस्यन्त:)** परिचरन्त: **(रोदसी)** द्यावापृथिव्यौ **(सुमेके)** सुस्वरूपे **(आरे)** दूरे **(गोहा)** यो गां हन्ति **(नृहा)** यो नॄन् हन्ति **(वध:)** हन्ति येन स: **(व:)** युष्माकम् **(अस्तु)** **(सुम्नेभि:)** सुखै: **(अस्मे)** अस्मान् **(वसव:)** वासयितार: **(नमध्वम्)**॥१७॥

अन्वय:-हे वीरा मरुत इव! दशस्यन्तस्सुमेके रोदसी वरिवस्यन्तो नो मृळन्तु वो युष्माकमारे गोहा नृहा वधोऽस्तु वसवो यूयं सुम्नेभिरस्मे नमध्वम्॥१७॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। त एव राजजना उत्तमास्सन्ति ये श्रेष्ठान् सुखयित्वा दुष्टान् घ्नन्त्यासान्नत्वा दुष्टेषूग्रा भवन्तीति॥१७॥

पदार्थ:-हे वीरो **(मरुत:)** प्राणों के समान! **(दशस्यन्त:)** बल करते और **(सुमेके)** एक से रूप वाले **(रोदसी)** आकाश और पृथिवी को **(वरिवस्यन्त:)** सेवते हुए जन **(न:)** हम लोगों को

(मृळन्तु) सुख देवें और **(वः)** तुम्हारे **(आरे)** दूर देश में **(गोहा)** गो हत्यारा **(नृहा)** और मनुष्य हत्यारा **(वधः)** वह दोनों जिससे मारते हैं वह **(अस्तु)** दूर हो जाये **(वसवः)** निवास दिखाने वाले तुम लोग **(सुम्नेभिः)** सुखों के साथ **(अस्मे)** हम लोगों को **(नमध्वम्)** नमो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। वे ही राजजन उत्तम हैं, जो श्रेष्ठों को सुख देकर दुष्टों को मारते हैं और आप्त जनों को नम के दुष्टों में उग्र होते हैं॥१७॥

पुनस्ते कीदृशा भवेयुरित्याह॥

फिर वे राजजन कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

आ वो॒ होता॑ जोहवीति स॒त्तः स॒त्राची॑ रा॒तिं म॑रुतो गृणा॒नः।
य ईव॑तो वृषणो॒ अस्ति॑ गो॒पाः सो अद्व॑यावी हवते व उ॒क्थैः॥१८॥

आ। व॒ः। होता॑। जो॒हवी॑ति। स॒त्तः। स॒त्राची॑म्। रा॒तिम्। म॒रु॒तः॒। गृ॒णा॒नः। यः। ईव॑तः। वृ॒ष॒णः॒। अस्ति॑। गो॒पाः। सः। अद्व॑यावी। ह॒व॒ते॒। व॒ः। उ॒क्थैः॥१८॥

पदार्थः-(**आ**) समन्तात् (**वः**) युष्मान् (**होता**) दाता (**जोहवीति**) भृशमाह्वयति (**सत्तः**) निषण्णः (**सत्राचीम्**) या सत्रा सत्यमञ्चति प्रापयति ताम् (**रातिम्**) दानम् (**मरुतः**) वायव इव मनुष्याः (**गृणानः**) स्तुवन् (**यः**) (**ईवतः**) गच्छतः (**वृषणः**) वृष्टिकरस्य (**अस्ति**) (**गोपाः**) रक्षकः (**सः**) (**अद्वयावी**) छलकपटादिरहितः (**हवते**) आह्वयति (**वः**) युष्मान् (**उक्थैः**) वक्तुमर्हैः वचनैः॥१८॥

अन्वयः-हे मरुतो! यो गृणानः सत्तोऽद्वयावी होता ईवतो वृषणो वो युष्माना जोहवीति सत्राची रातिं ददाति गोपा अस्ति उक्थैर्वे हवते स उत्तमोऽस्तीति विजानीत॥१८॥

भावार्थः-यो राजादिर्जनो भवदाता सर्वस्य रक्षकः मायादिदोषरहितः सत्यविद्याप्रदाता सत्यग्राहकोऽस्ति स एवात्र प्रशंसितो वर्त्तते तमेवोत्तमं मनुष्या विजानन्तु॥१८॥

पदार्थः-हे (**मरुतः**) पवनों के तुल्य मनुष्यो! (**यः**) जो (**गृणानः**) स्तुति करता (**सत्तः**) बैठा हुआ (**अद्वयावी**) छल-कपट आदि से रहित (**होता**) देने वाला (**ईवतः**) जाते हुए (**वृषणः**) वर्षा करने वाले के सम्बन्ध में (**वः**) तुम लोगों को (**आ, जोहवीति**) निरन्तर बुलाता (**सत्राचीम्**) जो सत्य को देती है उस (**रातिम्**) दान को देता और (**गोपाः**) रक्षा करने वाला (**अस्ति**) है तथा (**उक्थैः**) कहने योग्य वचनों से (**वः**) तुम लोगों को (**हवते**) बुलाता है, वह उत्तम है, इस को जानो॥१८॥

भावार्थः-जो राजा आदि जन अभय देने और सब की रक्षा करने वाला, छलकपट आदि दोषरहित, सत्यविद्या दाता और सत्यग्राहक है, वही यहाँ प्रशंसित वर्त्तमान है, उसी को मनुष्य उत्तम जानें॥१८॥

पुनस्ते कीदृशा भवेयुरित्याह॥

फिर वे कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मे तु॒रं म॒रुतो॑ रामयन्ती॒मे सहः॑ सह॑स॒ आ न॑मन्ति।

इमे शंसं॑ वनुष्य॒तो नि पा॑न्ति गु॒रु द्वेषो॒ अर॑रुषे दधन्ति॥ १९॥

इमे। तु॒रम्। म॒रुत॑:। र॒मय॒न्ति॒। इमे। सह॑:। सह॑स:। आ। न॒म॒न्ति॒। इमे। शंस॑म्। व॒नुष्य॑त:। नि। पा॒न्ति॒। गु॒रु॒। द्वेष॑:। अर॑रुषे। दु॒ध॒न्ति॒॥ १९॥

पदार्थ:-(**इमे**) (**तुरम्**) शीघ्रम् (**मरुत:**) वायव इव (**रमयन्ति**) (**इमे**) (**सह:**) बलम् (**सहस:**) बलात् (**आ**) (**नमन्ति**) (**इमे**) (**शंसम्**) प्रशंसकम् (**वनुष्यत:**) क्रुध्यत:। **वनुष्यतीति क्रुध्यतिकर्मा।** (निघं०२.१२) (**नि**) (**पान्ति**) रक्षन्ति (**गुरु**) भारवत् (**द्वेष:**) अप्रीतिम् (**अररुषे**) अलंरोषकाय (**दधन्ति**)॥ १९॥

अन्वय:-हे राजन्! य इमे मरुतस्तुरं रमयन्तीमे सहसस्सह आ नमन्तीमे वनुष्यत: शंसं नि पान्त्यररुषे द्वेषो गुरु दधन्ति स्तांस्त्वं सततं सत्कृद्रक्ष॥ १९॥

भावार्थ:-हे राजन्ये! सेनां सुशिक्ष्य सद्यो व्यूह्य बलिष्ठानपि शत्रून् विजित्योत्तमान् संरक्ष्य दुष्टे द्वेषं विदधति ते त्वया सत्कर्तव्या: सन्ति॥ १९॥

पदार्थ:-हे राजन्! जो (**इमे**) ये (**मरुत:**) पवनों के समान (**तुरम्**) शीघ्र (**रमयन्ति**) रमण कराते (**इमे**) यह (**सहस:**) बल से (**सह:**) बल को (**आ, नमन्ति**) सब ओर से नमते (**इमे**) यह (**वनुष्यत:**) क्रोध करने वाले की (**शंसम्**) प्रशंसा करने वाले को (**नि, पान्ति**) निरन्तर रखते और (**अररुषे**) पूरा रोष करने वाले के लिए (**द्वेष:**) वैर (**गुरु**) बहुत (**दधन्ति**) धारण करते हैं, उन का आप निरन्तर सत्कार करो॥ १९॥

भावार्थ:-हे राजा! जो सेना को अच्छी शिक्षा देकर शीघ्र विशेष रचना कर बड़ी शत्रुओं को भी जीत उत्तमों की रक्षा कर दुष्टों में द्वेष फैलाते हैं, वे तुम को सत्कार करने चाहियें॥ १९॥

पुनस्ते राजजना: कीदृशा भवन्तीत्याह॥

फिर वे राजजन कैसे होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

इमे र॒ध्रं चि॑न्म॒रुतो॑ जुनन्ति॒ भृमिं॑ चि॒द्यथा॒ वस॑वो जु॒षन्त॑।
अप॑ बाधध्वं वृषण॒स्तमां॑सि ध॒त्त विश्वं॑ तन॑यं तो॒कम॒स्मे॥ २०॥ २५॥

इमे। र॒ध्रम्। चि॒त्। म॒रुत॑:। जु॒न॒न्ति॒। भृमि॑म्। चि॒त्। यथा॑। वस॑व:। जु॒ष॒न्त॒। अप॑। बा॒ध॒ध्व॒म्। वृ॒ष॒ण॒:। तमां॑सि। ध॒त्त॒। विश्व॑म्। तन॑यम्। तो॒कम्। अ॒स्मे॒ इति॑॥ २०॥

पदार्थ:-(**इमे**) (**रध्रम्**) समृद्धिमन्तम् (**चित्**) अपि (**मरुत:**) वायव इव मनुष्या: (**जुनन्ति**) प्रेरयन्ति (**भृमिम्**) भ्रमणशीलम् (**चित्**) अपि (**यथा**) (**वसव:**) वासयितार: (**जुषन्त**) सेवन्ते (**अप**) (**बाधध्वम्**) (**वृषण:**) बलिष्ठा: (**तमांसि**) रात्रिरिव वर्तमानान् दुष्टान् जनान् (**धत्त**) (**विश्वम्**) सर्वम् (**तनयम्**) विस्तीर्णशुभगुणकर्मस्वभावम् (**तोकम्**) अपत्यम् (**अस्मे**) अस्मासु॥ २०॥

अन्वय:-हे वृषणो वसवो! यूयं यथेमे मरुतो रध्रं चित् जुनन्ति भृमिं चित् जुषन्त तथा यूयं सूर्यस्तमांसीव शत्रूनप बाधध्वमस्मे विश्वं तनयं तोकं धत्त॥ २०॥

भावार्थः-अत्रोपमालङ्कारः। यथा प्राणायामादिभिः सुसाधिता वायवस्समृद्धिं कुपथ्येन सेविता दारिद्र्यं च जनयन्ति तथैव सेविता विद्वांसो राज्यर्द्धिमपमानिता राज्यभङ्गं जनयन्ति सुशिक्ष्य सत्कृत्य रक्षिताः शूरवीराः यथा शत्रूनपबाधन्ते तथा वर्तित्वा प्रजासूत्तमान्यपत्यानि राजजना नयन्तु॥२०॥

पदार्थः-हे **(वृषणः)** बलिष्ठो **(वसवः)** निवास कराने वालो! तुम **(यथा)** जैसे **(इमे)** यह **(मरुतः)** पवनों के समान वर्त्तमान **(रध्रम्)** समृद्धिमान् **(चित्)** ही को **(जुनन्ति)** प्रेरणा करते हैं और **(भृमिम्)** घूमने वाले को **(चित्)** ही **(जुषन्त)** सेवते हैं, वैसे और जैसे सूर्य अन्धकारों को वैसे **(तमांसि)** रात्रि के समान वर्त्तमान दुष्ट शत्रुओं को **(अप, बाधध्वम्)** अत्यन्त बाधा देओ और **(अस्मे)** हम लोगों में **(विश्वम्)** समस्त **(तनयम्)** विस्तारयुक्त शुभ गुण-कर्म-स्वभाव वाले **(तोकम्)** सन्तान को **(धत्त)** धारण करो॥१०॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जैसे प्राणायामादिकों से अच्छे सिद्ध किये हुए पवन समृद्धि और कुपथ्य से सेवन किये दरिद्र**[ता]** को उत्पन्न करते हैं, वैसे ही सेवन किये हुए विद्वान् राज्य की वृद्धि और अपमान किये हुए राज्य का भङ्ग उत्पन्न करते हैं, अच्छी शिक्षा दिये और सत्कार कर रक्षा किये हुए शूरवीर जैसे शत्रुओं को नष्ट करते हैं, वैसे वर्त्तकर प्रजाजनों में उत्तम सन्तान राजजन उत्पन्न करावें॥२०॥

पुनर्मनुष्याः कीदृशा भवन्तीत्याह॥

फिर मनुष्य कैसे होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

मा वो॑ दा॒त्रान्म॑रुतो॒ निर॑राम॒ मा प॒श्चाद्ध्म रथ्यो॑ विभा॒गे।
आ नः॑ स्पा॒र्हे भ॑जतना वस॒व्ये३॑ यदी॑ सुजा॒तं वृ॑षणो वो॒ अस्ति॑॥२१॥

मा। व॒रिति॑। दा॒त्रात्। म॒रु॒तः॒। निः। अ॒रा॒म॒। मा। प॒श्चात्। दु॒ध्म॒। र॒थ्यः॒। वि॒ऽभा॒गे। आ। नः॒। स्पा॒र्हे। भ॒ज॒त॒न॒। व॒स॒व्ये॑। यत्। ई॒म्। सु॒ऽजा॒तम्। वृ॒ष॒णः॒। वः॒। अस्ति॑॥२१॥

पदार्थः-**(मा)** **(वः)** युष्मान् **(दात्रात्)** दानात् **(मरुतः)** वायव इव मनुष्याः **(निः)** नितराम् **(अराम)** **(मा)** **(पश्चात्)** **(दध्म)** गच्छेम। **दध्यतीति गतिकर्मा।** (निघं०२.१४) **(रथ्यः)** बहवो रथा विद्यन्ते येषां ते **(विभागे)** विभजन्ति यस्मिन् तस्मिन् व्यवहारे **(आ)** **(नः)** अस्मान् **(स्पार्हे)** स्पृहणीये **(भजतना)** सेवध्वम्। अत्र **संहितायामिति** दीर्घः। **(वसव्ये)** वसुषु द्रव्येषु भवे **(यत्)** **(ईम्)** सर्वतः **(सुजातम्)** सुष्ठु प्रसिद्धं सुखम् **(वृषणः)** **(वः)** युष्माकम् **(अस्ति)**॥२१॥

अन्वयः-हे मरुतो! यथा वयं वो दात्रान्मा निरराम, हे रथ्यो! वयं पश्चान्मा दध्म, हे वृषभो! वो यत्सुजातमस्ति तस्मिन् वसव्ये स्पार्हे विभागे यूयं नोऽस्मानीमा भजतन॥२१॥

भावार्थः-मनुष्याः सदैव विद्वद्भ्यो देयात्सत्यासत्ययोर्विभागात्पृथङ्मां भवन्तु यत्किञ्चिदपि श्रेष्ठं सुखं भवेत्तत्सर्वस्मै निवेदयन्तु॥२१॥

पदार्थः-हे **(मरुतः)** पवनों के समान मनुष्यो! जैसे हम लोग **(वः)** तुम को **(दात्रात्)** दान से **(मा)** मत **(निः, अराम)** अलग करें, हे **(रथ्यः)** बहुत रथों वालो! हम लोग **(पश्चात्)** पीछे से **(मा,**

दध्म) मत जावें, हे **(वृषणः)** वर्षा कराने वालो! **(वः)** तुम्हारा **(यत्)** जो **(सुजातम्)** सुन्दर प्रसिद्ध सुख **(अस्ति)** है उस **(वसव्ये)** द्रव्यों में हुए **(स्पार्हे)** इच्छा करने योग्य **(विभागे)** विभाग जिसमें कि बांटते हैं उस में तुम **(नः)** हम लोगों को **(ईम्)** सब ओर से **(आ, भजतन)** अच्छे प्रकार सेवो॥ २१॥

भावार्थः-मनुष्य सदैव विद्वानों के लिये देने योग्य सत्यासत्य व्यवहार से अलग न होवें, जो कुछ भी उत्तम सुख हो, उसको सब के लिये निवेदन करें॥ २१॥

पुनस्ते वीराः कीदृशा भवेयुरित्याह॥

फिर वे वीर कैसे हों, इस विषय को अगले मन्त्र में कहते हैं॥

सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु।
अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः॥ २२॥

सम्ऽयत्। हनन्त। मन्युऽभिः। जनासः। शूराः। यह्वीषु। ओषधीषु। विक्षु। अध। स्म। नः। मरुतः। रुद्रियासः। त्रातारः। भूत। पृतनासु। अर्यः॥ २२॥

पदार्थः-(**संयत्**) (**हनन्त**) घ्नन्ति (**मन्युभिः**) क्रोधादिभिः (**जनासः**) जनाः प्रसिद्धाः (**शूराः**) निर्भयाः (**यह्वीषु**) महतीषु (**ओषधीषु**) (**विक्षु**) प्रजासु च (**अध**) अथ (**स्मा**) एव। अत्र **निपातस्य चे**ति दीर्घः। (**नः**) युष्माकम् (**मरुतः**) वायव इव मनुष्याः (**रुद्रियासः**) रुद्र इवाचरन्तः (**त्रातारः**) रक्षकाः (**भूत**) भवत (**पृतनासु**) शूरवीरमनुष्यसेनासु (**अर्यः**) स्वामी॥ २२॥

अन्वयः-हे मरुतो यद्ये रुद्रियासो जनासः शूरा मनुष्या! मन्युभिश्शत्रून् संयत् हनन्ताध यह्वीष्वोषधीषु विक्षु पृतनासु स्म नस्त्रातारो भूत यो युष्माकमर्यः स्वामी तस्यापि त्रातारो भवत॥ २२॥

भावार्थः-ये वीराः शत्रूणां हन्तारः प्रजानां रक्षकाः महौषधीषु चतुरास्सन्ति तान् स्वामी राजा प्रीत्या रक्षेत्॥ २२॥

पदार्थः-हे (**मरुतः**) पवनों के समान! (**यत्**) जो (**रुद्रियासः**) रुद्र के समान आचरण करने वाले (**जनासः**) प्रसिद्ध (**शूराः**) निर्भय मनुष्यो! (**मन्युभिः**) क्रोधादिकों से शत्रुओं को (**संयत्**) संग्राम में (**हनन्त**) मारिये (**अध**) इसके अनन्तर (**यह्वीषु**) बहुत बड़ी (**ओषधीषु**) ओषधियों में और (**विक्षु**) प्रजाओं में (**पृतनासु**) शूरवीरों की सेनाओं में (**स्म**) निश्चित (**नः**) हमारे (**त्रातारः**) रक्षा करने वाले (**भूत**) हूजिये जो (**वः**) तुम्हारा (**अर्यः**) स्वामी है, उसकी भी रक्षा करने वाले हूजिये॥ २२॥

भावार्थः-जो वीरजन शत्रुओं को मारने वाले, प्रजाओं के रक्षक और बड़ी-बड़ी ओषधियों में चतुर हैं, उनको स्वामी राजा प्रीति से रक्खें॥ २२॥

पुनस्ते मनुष्याः किं किं कुर्युरित्याह॥

फिर वे मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित्।

मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा॥ २३॥

भूरि। चक्र। मरुतः। पित्र्याणि। उक्थानि। या। वः। शस्यन्ते। पुरा। चित्। मरुत्ऽभिः। उग्रः। पृतनासु। साळ्हा। मरुत्ऽभिः। इत्। सनिता। वाजम्। अर्वा॥ २३॥

पदार्थः-(**भूरि**) बहु (**चक्र**) कुर्वन्ति (**मरुतः**) वायुवद्वर्तमाना मनुष्याः (**पित्र्याणि**) पितॄणां सेवनादीनि (**उक्थानि**) प्रशंसनीयानि कर्माणि (**या**) यानि (**वः**) युष्माकम् (**शस्यन्ते**) स्तूयन्ते (**पुरा**) वाक् (**चित्**) अपि (**मरुद्भिः**) उत्तमैर्मनुष्यैस्सह (**उग्रः**) तेजस्वी (**पृतनासु**) सेनासु (**साळ्हा**) सहनकर्ता (**मरुद्भिः**) मनुष्यैः (**इत्**) एव (**सनिता**) विभाजकः (**वाजम्**) विज्ञानं वेगं वा (**अर्वा**) वेगवानश्व इव॥ २३॥

अन्वयः-हे मरुतो! वो योक्थानि पित्र्याणि शस्यन्ते पुरा तानि मरुद्भिस्सह पृतनासूग्रः साळ्हा मरुद्भिस्सह सनिताऽर्वेव वाजं प्राप्तश्चिदेव विजयते तानि यूयं भूरि चक्र॥ २३॥

भावार्थः-ये मनुष्याः प्रशस्तानि कर्माणि कुर्वन्ति तेषां सदैव विजयो जायते॥ २३॥

पदार्थः-हे (**मरुतः**) पवन के सदृश वर्त्तमान मनुष्यो! (**वः**) आप लोगों के (**या**) जो (**उक्थानि**) प्रशंसा करने योग्य कर्म्म और (**पित्र्याणि**) पितरों के सेवन आदि (**शस्यन्ते**) स्तुति किये जाते हैं (**पुरा**) पहिले उनको (**मरुद्भिः**) उत्तम मनुष्यों के साथ (**पृतनासु**) सेनाओं में (**उग्रः**) तेजस्वी (**साळ्हा**) सहने वाला पुरुष और (**मरुद्भिः**) मनुष्यों के साथ (**सनिता**) विभाग करने वाला (**अर्वा**) वेग युक्त घोड़ा जैसे वैसे (**वाजम्**) विज्ञान वा वेग को प्राप्त हुआ (**चित्**) भी जीतता है, उनको आप लोग (**भूरि**) बहुत (**चक्र**) करते हैं॥ २३॥

भावार्थः-जो मनुष्य प्रशंसनीय कर्मों को करते हैं, उनका सदा ही विजय होता है॥ २३॥

पुनस्ते मनुष्याः कीदृशा भवेयुरित्याह॥

फिर वे मनुष्य कैसे होवें, इस विषय को अगले मन्त्र में कहते हैं॥

अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता।
अपो येन सुक्षितये तरेमाध स्वमोको अभि वः स्याम॥ २४॥

अस्मे इति। वीरः। मरुतः। शुष्मी। अस्तु। जनानाम्। यः। असुरः। विऽधर्ता। अपः। येन। सुऽक्षितये। तरेम। अध। स्वम्। ओकः। अभि। वः। स्याम॥ २४॥

पदार्थः-(**अस्मे**) अस्माकम् (**वीरः**) प्राप्तबलबुद्धिशौर्यादिः (**मरुतः**) प्राणवद् बलकारकाः (**शुष्मी**) बहुबलयुक्तः (**अस्तु**) (**जनानाम्**) (**यः**) (**असुरः**) असुषु प्राणेषु विद्युदग्निरिव (**विधर्ता**) विशेषेण धर्ता (**अपः**) जलानि (**येन**) (**सुक्षितये**) शोभनायै पृथिव्याः प्राप्त्यै (**तरेम**) (**अध**) अथ (**स्वम्**) स्वकीयम् (**ओकः**) गृहम् (**अभि**) (**वः**) युष्माकम् (**स्याम**) भवेम॥ २४॥

अन्वयः-हे मरुतो! यो वीरोऽसुरो जनानां विधर्ता सोऽस्मे शुष्म्यस्तु येन सुक्षितये वयमपस्तरेमाऽध स्वमोकोऽभि तरेम वो युष्माकं रक्षकाः स्याम॥ २४॥

भावार्थः-ये मनुष्या मनुष्यान् बलयुक्तान् कुर्वन्ति नौकादिभिः समुद्रं तीर्त्वा द्वितीयं देशं गत्वा धनमार्जयन्ति ते युष्माकमस्माकं च रक्षकास्सन्तु॥२४॥

पदार्थः-हे (**मरुतः**) प्राणों के सदृश बल करने वाले जनो! (**यः**) जो (**वीरः**) वीर अर्थात् प्राप्त हुई बल, बुद्धि और शूरता आदि जिसको (**असुरः**) प्राणों में रमता हुआ बिजुली अग्नि के सदृश (**जनानाम्**) मनुष्यों का (**विधर्ता**) विशेष करके धारण करने वाला है वह (**अस्मे**) हमारा (**शुष्मी**) बहुत बल से युक्त (**अस्तु**) हो (**येन**) जिससे (**सुक्षितये**) सुन्दर पृथिवी की प्राप्ति के लिये हम लोग (**अपः**) जलों को (**तरेम**) तरें (**अध**) इसके अनन्तर (**स्वम्**) अपने (**ओकः**) गृह के पार होवें और (**वः**) आप लोगों के रक्षक (**स्याम**) होवें॥२४॥

भावार्थः-जो मनुष्य, मनुष्यों को बलयुक्त करते और नौका आदिकों से समुद्र के पार होकर दूसरे देश में जाकर धन बटोरते हैं, वे आप लोगों और हम लोगों के रक्षक हों॥२४॥

पुनर्मनुष्याः किंवत् किं कुर्युरित्याह॥

फिर मनुष्य किसके सदृश क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

तन्न इन्द्रो वरुणो मित्रो अग्निरापः ओषधीर्वनिनो जुषन्त।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः॥२५॥२६॥

तत्। नः। इन्द्रः। वरुणः। मित्रः। अग्निः। आपः। ओषधीः। वनिनः। जुषन्त। शर्मन्। स्याम। मरुताम्। उपऽस्थे। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥२५॥

पदार्थः-(**तत्**) पूर्वोक्तं सर्वं कर्म वस्तु वा (**नः**) अस्माकम् (**इन्द्रः**) विद्युत् (**वरुणः**) जलाधिपतिः (**मित्रः**) सखा (**अग्निः**) पावकः (**आपः**) जलानि (**ओषधीः**) सोमलताद्याः (**वनिनः**) बहुकिरणयुक्ता वनस्था वृक्षादयः (**जुषन्त**) सेवन्ताम् (**शर्मन्**) शर्मणि सुखकारके गृहे (**स्याम**) भवेम (**मरुताम्**) वायूनां विदुषां वा (**उपस्थे**) समीपे (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**) अस्मान्॥२५॥

अन्वयः-हे विद्वांसो! यथेन्द्रो वरुणो मित्रोऽग्निराप ओषधीर्वनिनो नस्तञ्जुषन्त यस्मिन् शर्मन् मरुतामुपस्थे वयं सुखिनः स्याम तत्र यूयं स्वस्तभिर्नस्सदा पात॥२५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथा विद्युदादयः पदार्थाः सर्वान्नुन्नयन्ति क्षयन्ति च तथैव दोषान् विनाश्य गुणानुन्नीय सर्वेषां रक्षणं सर्वे सदा कुर्वन्त्विति॥२५॥

अत्र मरुद्विद्वद्राजशूरवीराध्यापकोपदेशकरक्षकगुणकृत्यवर्णनादेतर्थदस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षट्पञ्चाशत्तमं सूक्तं षड्विंशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वानो! जैसे (**इन्द्रः**) बिजुली (**वरुणः**) जल **[**=जलाधिपति**]** (**मित्रः**) मित्र (**अग्निः**) अग्नि (**आपः**) जल (**ओषधीः**) सोमलता आदि ओषधियों को (**वनिनः**) बहुत किरणें जिनमें पड़तीं ऐसे वन में वर्त्तमान वृक्ष आदि (**नः**) हम लोगों के (**तत्**) पूर्वोक्त सम्पूर्ण कर्म वा वस्तु

की **(जुषन्त)** सेवा करें और जिस **(शर्मन्)** सुखकारक गृह में **(मरुताम्)** पवनों वा विद्वानों के **(उपस्थे)** समीप में हम लोग सुखी **(स्याम)** होवें उसमें **(यूयम्)** आप लोग **(स्वस्तिभिः)** कल्याणों से **(नः)** हम लोगों की **(सदा)** सदा **(पात)** रक्षा कीजिये॥ २५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे बिजुली आदि पदार्थ सब की उन्नति और नाश करते हैं, वैसे ही दोषों का नाश कर और गुणों की वृद्धि करके सब की रक्षा को सब सदा करें॥ २५॥

इस सूक्त में वायु, विद्वान्, राजा, शूरवीर, अध्यापक, उपदेशक और रक्षक के गुण वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह छप्पनवां सूक्त और छब्बीसवां वर्ग समाप्त हुआ॥

अथ सप्तर्चस्य [सप्तपञ्चाशत्तमस्य] सूक्तस्य वसिष्ठर्षिः। मरुतो देवताः। २, ४ त्रिष्टुप्। १ विराट् त्रिष्टुप्। ३, ५, ६, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः॥

पुनर्मनुष्याः किंवत् किं कुर्युरित्याह॥

फिर मनुष्य किसके सदृश क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

मध्वो॑ वो॒ नाम॒ मारु॑तं यजत्रा॒: प्र य॒ज्ञेषु॒ शव॑सा मदन्ति।
ये रे॒जय॑न्ति॒ रोद॑सी चिदु॒र्वी पिन्व॒न्त्युत्सं॒ यदया॑सुरु॒ग्राः॥ १॥

मध्व॑:। व॒:। नाम॑। मारु॑तम्। य॒ज॒त्रा॒:। प्र। य॒ज्ञेषु॑। शवसा। म॒दन्ति॒। ये। रे॒जय॑न्ति। रोद॑सी॒ इति॑। चि॒त्। उ॒र्वी॒ इति॑। पिन्व॑न्ति। उत्स॑म्। यत्। अया॑सुः। उ॒ग्राः॥ १॥

पदार्थः-(**मध्वः**) मन्यमानाः (**वः**) युष्माकम् (**नाम**) (**मारुताम्**) मरुतां मनुष्याणामिदं कर्म (**यजत्राः**) संगन्तारः (**प्र**) (**यज्ञेषु**) विद्वत्सत्कारादिषु (**शवसा**) बलेन (**मदन्ति**) कामयन्ते (**ये**) (**रेजयन्ति**) कम्पयन्ति (**रोदसी**) द्यावापृथिव्यौ (**चित्**) अपि (**उर्वी**) बहुपदार्थयुक्ते (**पिन्वन्ति**) सिञ्चन्ति (**उत्सम्**) कूपमिव (**यत्**) ये (**अयासुः**) प्राप्नुयुः (**उग्राः**) तेजस्विनः॥ १॥

अन्वयः-हे यजत्रा! य उग्रा विद्युत्सहिता वायवो यद्ये उर्वी रोदसी उत्समिव सर्वं जगत् पिन्वन्ति चिदपि रेजयन्त्ययासुस्तद्वद्ये वो मध्वो नाम यज्ञेषु शवसा मारुतं प्रमदन्ति तान् यूयं विजानीत॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। ये वायवो भूगोलान् भ्रामयन्ति धरन्ति वृष्टिभिस्सिञ्चन्ति तान् विदित्वा विद्वांसः कार्याणि निष्पाद्यानन्दन्तु॥ १॥

पदार्थः-हे (**यजत्राः**) मिलने वाले! (**ये**) जो (**उग्राः**) तेजस्वी बिजुली के सहित पवन (**यत्**) जो (**उर्वी**) बहुत पदार्थों से युक्त (**रोदसी**) अन्तरिक्ष पृथिवी और (**उत्सम्**) कूप को जैसे वैसे सम्पूर्ण संसार को (**पिन्वन्ति**) सींचते हैं और (**चित्**) भी (**रेजयन्ति**) कम्पाते हैं (**अयासुः**) प्राप्त होवें उसको (**ये**) जो (**वः**) आप लोगों को (**मध्वः**) मानते हुए (**नाम**) प्रसिद्ध (**यज्ञेषु**) विद्वानों के सत्कार आदिकों में (**शवसा**) बल से (**मारुतम्**) मनुष्यों के कर्म की (**प्र, मदन्ति**) कामना करते हैं, उनको आप लोग जानिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो पवन, भूगोलों को घुमाते और धारण करते हैं और दृष्टियों से सीचते हैं, उनको जान कर विद्वान् जन कार्यों को कर के आनन्द करें॥ १॥

पुनस्ते विद्वांसः कीदृशा भवेयुरित्याह॥

फिर वे विद्वान् कैसे होवें, इस विषय को अगले मन्त्र में कहते हैं॥

नि॒चे॒तारो॒ हि म॒रुतो॑ गृ॒णन्तं॑ प्रणे॒तारो॒ यज॑मानस्य॒ मन्म॑।
अ॒स्माक॑म॒द्य वि॒दथे॑षु ब॒र्हिरा वी॒तये॑ सदत पिप्रियाणाः॥ २॥

नि॒ऽचे॒तार॑:। हि। म॒रुत॑:। गृ॒णन्त॑म्। प्र॒ऽने॒तार॑:। यज॑मानस्य। मन्म॑। अ॒स्माक॑म्। अ॒द्य। वि॒दथे॑षु। ब॒र्हिः। आ। वी॒तये॑। स॒द॒त॒। पि॒प्रि॒या॒णाः॥ २॥

पदार्थः-(**निचेतारः**) ये निचयं समूहं कुर्वन्ति ते (**हि**) यतः (**मरुतः**) वायवः (**गृणन्तम्**) स्तुवन्तम् (**प्रणेतारः**) प्रकृष्टं न्यायं कुर्वन्तः (**यजमानस्य**) सर्वेषां सुखाय यज्ञकर्तुः (**मन्मः**) विज्ञानम् (**अस्माकम्**) (**अद्य**) अस्मिन् (**विदथेषु**) यज्ञेषु (**बर्हिः**) अन्तरिक्षस्थमुत्तममासनम् (**आ**) (**वीतये**) विज्ञानाय प्राप्तये वा (**सदत**) आसीदत (**पिप्रियाणाः**) प्रियमाणाः॥२॥

अन्वयः-हे विद्वांसो! हि निचेतारो मारुतः सर्वान् प्रेरयन्ति ततः प्रणेतारस्सन्तो यजमानस्य मन्मास्माकं विदथेषु गृणन्तं पिप्रियाणाः अद्य वीतये बर्हिरासदत॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यूयं सर्वेषां पदार्थानां संधातारं मरुद्गणं विज्ञाय सर्वेषां प्रियं साध्नुवन्तु॥२॥

पदार्थः-हे विद्वान् जनो! (**हि**) जिस कारण (**निचेतारः**) समूह करने वाले (**मरुतः**) पवन सब को प्रेरित करते हैं, उस कारण (**प्रणेतारः**) अच्छे न्याय को करते हुए जन (**यमजानस्य**) सब के सुख के लिये यज्ञ करने वाले के (**मन्म**) विज्ञान को (**अस्माकम्**) हम लोगों के (**विदथेषु**) यज्ञों में (**गृणन्तम्**) स्तुति करते हुए को (**पिप्रियाणाः**) प्रसन्न करते हुए (**अद्य**) आज (**वीतये**) विज्ञान वा प्राप्ति के लिये (**बर्हिः**) अन्तरिक्ष में स्थित उत्तम आसन पर (**आ, सदत**) बैठिये॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग सम्पूर्ण पदार्थों के रचने वाले पवनों के समूह को जान कर सब के प्रिय को सिद्ध करो॥२॥

पुनस्ते विद्वांसः कीदृशा भवन्तीत्याह॥

फिर वे विद्वान् जन कैसे होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः।
आ रोदसी विश्वपिशः पिशानाः समानमञ्ज्यञ्जते शुभे कम्॥३॥

न। एतावत्। अन्ये। मरुतः। यथा। इमे। भ्राजन्ते। रुक्मैः। आयुधैः। तनूभिः। आ। रोदसी इति। विश्वऽपिशः। पिशानाः। समानम्। अञ्जि। अञ्जते। शुभे। कम्॥३॥

पदार्थः-(**न**) निषेधे (**एतावत्**) (**अन्ये**) (**मरुतः**) वायुवन्मनुष्याः (**यथा**) (**इमे**) (**भ्राजन्ते**) प्रकाशन्ते (**रुक्मैः**) देदीप्यमानैः (**आयुधैः**) (**तनूभिः**) शरीरैः (**आ**) (**रोदसी**) द्यावापृथिव्यौ (**विश्वपिशः**) विश्वस्यावयवभूताः (**पिशानाः**) संचूर्णयन्तः (**समानम्**) तुल्यम् (**अञ्जि**) गमनम् (**अञ्जते**) गच्छन्ति व्यक्तिं कुर्वन्ति (**शुभे**) शोभनाय (**कम्**) सुखम्॥३॥

अन्वयः-हे विद्वांसो! यथेमे मरुतो रुक्मैरायुधैस्तनूभिस्सह भ्राजन्ते विश्वपिशः पिशानाः शुभे समानमञ्जि कमञ्जते रोदसी आ भ्राजन्ते नैतावदन्ये कर्तुं शक्नुवन्ति॥३॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्याः! यथा विद्वांसः शूरवीरा शरीरात्मबलयुक्ताः स्वायुधाः संग्रामेषु प्रकाशन्ते तथा भीरवो मनुष्या न प्रकाशन्ते यथा प्राणस्सर्वं जगदानन्दयन्ति तथा विद्वांस्सर्वान् मनुष्यान् सुखयन्ति॥३॥

पदार्थः-हे विद्वान् जनो! (**यथा**) जैसे (**इमे**) ये (**मरुतः**) वायु के सदृश मनुष्य (**रुक्मैः**)

प्रकाशमान (**आयुधैः**) आयुधों और (**तनूभिः**) शरीरों के साथ (**भ्राजन्ते**) प्रकाशित होते हैं और (**विश्वपिशः**) संसार के अवयवभूत (**पिशानाः**) उत्तम प्रकार चूर्ण करते हुए (**शुभे**) सुन्दरता के लिये (**समानम्**) तुल्य (**अञ्जि**) गमन को और (**कम्**) सुख को (**अञ्जते**) व्यतीत करते हैं तथा (**रोदसी**) अन्तरिक्ष और पृथिवी को (**आ**) सब ओर से प्रकाशित करते हैं (**न**) न (**एतावत्**) इतना ही (**अन्ये**) अन्य करने को समर्थ होते हैं॥३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! जैसे विद्वान् शूरवीर जन शरीर और आत्मा के बल से युक्त और श्रेष्ठ आयुधों से युक्त हुए सङ्ग्रामों में प्रकाशित होते हैं, वैसे भीरु मनुष्य नहीं प्रकाशित होते हैं, जैसे प्राण सब जगत् को आनन्दित करते हैं, वैसे विद्वान् सब को सुखी करते हैं॥३॥

पुनर्मनुष्यैः कथं वर्तितव्यमित्याह॥

फिर मनुष्यों को कैसा वर्ताव करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा॥४॥

ऋधक्। सा। वः। मरुतः। दिद्युत्। अस्तु। यत्। वः। आगः। पुरुषता। कराम। मा। वः। तस्याम्। अपि। भूम। यजत्राः। अस्मे इति। वः। अस्तु। सुऽमतिः। चनिष्ठाः॥४॥

पदार्थः-(**ऋधक्**) सत्ये (**सा**) (**वः**) युष्माकम् (**मरुतः**) मनुष्याः (**दिद्युत्**) देदीप्यमाना नीतिः (**अस्तु**) (**यत्**) यथा (**वः**) युष्माकम् (**आगः**) अपराधम् (**पुरुषता**) पुरुषाणां भावेन पुरुषार्थतया (**कराम**) कुर्याम (**मा**) (**वः**) युष्मान् (**तस्याम्**) (**अपि**) (**भूम**) भवेम। अत्र **द्व्यचो०** इति दीर्घः। (**यजत्राः**) संगन्तारः (**अस्मे**) अस्मासु (**वः**) युष्माकम् (**अस्तु**) (**सुमतिः**) शोभना प्रज्ञा (**चनिष्ठा**) अतिशयेनान्नाद्यैश्वर्ययुक्ता॥४॥

अन्वयः-हे यजत्राः मरुतः! यद्यया व आगः यद्यया पुरुषता कराम तस्यामपि च आगो मा कराम यया वयं पुरुषार्थिनो भूम सा व ऋधक् चनिष्ठा सुमतिरस्मे अस्तु सा विद्युद्वो युष्माकमस्तु॥४॥

भावार्थः-हे मनुष्या! अन्यायापराधं विहाय सत्यां प्रज्ञां गृहीत्वा पुरुषार्थेन सह सुखिनो भवत॥४॥

पदार्थः-हे (**यजत्राः**) मेल करने वाले (**मरुतः**) मनुष्यो! (**यत्**) जिससे (**वः**) आप लोगों के (**आगः**) अपराध को और जिस (**पुरुषता**) पुरुषपने से (**कराम**) करें (**तस्याम्**) उसमें (**अपि**) भी (**नः**) आप लोगों के अपराध को (**मा**) नहीं करें और जिससे हम लोग पुरुषार्थी (**भूम**) होवें (**सा**) वह (**वः**) आप लोगों के (**ऋधक्**) सत्य में (**चनिष्ठा**) अतिशय अन्न आदि ऐश्वर्य्य से युक्त (**सुमतिः**) अच्छी बुद्धि (**अस्मे**) हम लोगों में (**अस्तु**) हो और वह (**दिद्युत्**) प्रकाशमान नीति (**नः**) आप लोगों की (**अस्तु**) हो॥४॥

भावार्थः-हे मनुष्यो! अन्याय से अपराध का परित्याग कर और सत्य बुद्धि को ग्रहण कर वे पुरुषार्थ से सुखी होओ॥४॥

पुनर्विद्वांसः कीदृशा भूत्वा किं कुर्युरित्याह॥

फिर विद्वान् जन कैसे होकर क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः॥५॥

कृते। चित्। अत्र। मरुतः। रणन्त। अनवद्यासः। शुचयः। पावकाः। प्र। नः। अवत। सुमतिऽभिः। यजत्राः। प्र। वाजेभिः। तिरत। पुष्यसे। नः॥५॥

पदार्थः-(**कृते**) (**चित्**) अपि (**अत्र**) अस्मिन् संसारे (**मरुतः**) मनुष्याः (**रणन्त**) रमध्वम् (**अनवद्यासः**) अनिन्द्याः धर्माचराः (**शुचयः**) पवित्राः (**पावकाः**) पवित्रकराः (**प्र**) (**नः**) अस्मान् (**अवत**) रक्षत (**सुमतिभिः**) उत्तमप्रज्ञैर्मनुष्यैः (**यजत्राः**) सङ्गन्तारः (**प्र**) (**वाजेभिः**) अन्नादिभिः (**तिरत**) निष्पादयत (**पुष्यसे**) पुष्टये (**नः**) अस्मान्॥५॥

अन्वयः-हे विद्वांसो! यथाऽनवद्यासः शुचयः पावकाः मरुतश्चित्कृतेऽत्र रणन्त तथा यजत्रास्सन्तो यूं सुमतिभिर्वाजेभिस्सह नः प्रावत नः पुष्यसे प्र तिरत॥५॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। य आप्तवद्धार्मिकाः पवित्राः विद्वांसो भूत्वा सर्वे सर्वान् रक्षन्ति ते सर्वान् पुष्टान् सुखिनः कर्तुं शक्नुवन्ति॥५॥

पदार्थः-हे विद्वान् जनो! जैसे (**अनवद्यासः**) नहीं निन्दा करने योग्य और धर्म्माचरण से युक्त (**शुचयः**) पवित्र और (**पावकाः**) पवित्र करने वाले (**मरुतः**) मनुष्य (**चित्**) भी (**कृते**) उत्तम कर्म्म में (**अत्र**) इस संसार में (**रणन्त**) रमें, वैसे (**यजत्राः**) मिलने वाले हुए आप लोग (**सुमतिभिः**) उत्तम बुद्धिवाले मनुष्यों और (**वाजेभिः**) अन्न आदिकों के साथ (**नः**) हम लोगों की (**प्र, अवत**) रक्षा कीजिये और (**नः**) हम लोगों को (**पुष्यसे**) पुष्टि के लिये (**प्र, तिरत**) निष्पन्न कीजिये॥५॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो यथार्थवक्ता, धार्मिक, पवित्र, विद्वान् होके सब सबकी रक्षा करते हैं, वे सब को पुष्ट और सुखी कर सकते हैं॥५॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्या क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि॥६॥

उत। स्तुतासः। मरुतः। व्यन्तु। विश्वेभिः। नामऽभिः। नरः। हवींषि। ददात। नः। अमृतस्य। प्रऽजायै। जिगृत। रायः। सूनृता। मघानि॥६॥

पदार्थः-(**उत**) अपि (**स्तुतासः**) प्राप्तप्रशंसाः (**मरुतः**) वायव इव मनुष्याः (**व्यन्तु**) व्याप्नुवन्तु प्राप्नुवन्तु (**विश्वेभिः**) समग्रैः (**नामभिः**) संज्ञाभिः (**नरः**) नायकाः (**हवींषि**) दातुमर्हाणि (**ददात**) (**नः**) अस्माकम् (**अमृतस्य**) नाशरहितस्य (**प्रजायै**) प्रजासुखाय (**जिगृत**) उद्गिरत (**रायः**) श्रियः (**सूनृता**)

सूनृतानि धर्मेण सम्पादितानि **(मघानि)** धनानि॥६॥

अन्वयः-हे मरुतो नरो! यूयं विश्वेभिर्नामभिर्नो हवींषि ददात उत स्तुतासो हवींषि व्यन्तु नोऽस्माकममृतस्य प्रजायै रायस्सूनृता मघानि च जिगृत॥६॥

भावार्थः-हे मनुष्याः! ये प्रशंसका मनुष्याः समग्रैश्शब्दार्थसम्बन्धैः सर्वा विद्याः प्राप्य शुम्भमाना भूत्वा प्रजाजनेभ्यस्सत्यां वाचं प्रयच्छन्ति ते सर्वे सुखं प्राप्नुवन्ति॥६॥

पदार्थः-हे **(मरुतः)** पवनों के सदृश मनुष्यो **(नरः)** अग्रणी! आप लोगो **(विश्वेभिः)** सम्पूर्ण **(नामभिः)** संज्ञाओं से **(नः)** हम लोगों के लिये हम लोगों के **(हवींषि)** देने योग्य पदार्थों को **(ददात)** दीजिये **(उत)** और **(स्तुतासः)** प्रशंसा को प्राप्त हुए जन देने योग्य द्रव्यों को **(व्यन्तु)** प्राप्त होवें, हम लोगों और **(अमृतस्य)** अविनाशी की **(प्रजायै)** प्रजा के सुख के लिये **(रायः)** शोभाओं वा लक्ष्मियों को और **(सूनृता)** धर्म्म से इकट्ठे किये गये **(मघानि)** धनों को **(जिगृत)** उगलिये॥६॥

भावार्थः-हे मनुष्यो! जो प्रशंसा करने वाले मनुष्य सम्पूर्ण शब्द और अर्थ के सम्बन्धों से सम्पूर्ण विद्याओं को प्राप्त कर और शोभित होकर प्रजाजनों के लिये सत्य वचन को देते हैं, वे सम्पूर्ण सुख को प्राप्त होते हैं॥६॥

पुनः के प्रशंसनीया माननीया भवन्तीत्याह॥

फिर कौन प्रशंसा करने और आदर करने योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात।
ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः॥७॥२७॥

आ। स्तुतासः। मरुतः। विश्वे। ऊती। अच्छ। सूरीन्। सर्वऽताता। जिगात। ये। नः। त्मना। शतिनः। वर्धयन्ति। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥७॥

पदार्थः-(**आ**) **(स्तुतासः)** प्राप्तप्रशंसाः **(मरुतः)** वायव इव व्याप्तविद्या मनुष्याः **(विश्वे)** सर्वे **(ऊती)** **(अच्छा)** सम्यक्। अत्र **संहितायामिति** दीर्घः। **(सूरीन्)** धार्मिकान् विदुषः **(सर्वताता)** सर्वेषां सुखकरे यज्ञे **(जिगात)** प्रशंसत **(ये)** **(नः)** अस्मान् **(त्मना)** आत्मना **(शतिनः)** शतमसंख्यातं बलं येषामस्ति ते **(वर्धयन्ति)** **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)**॥७॥

अन्वयः-हे विद्वांसो! ये विश्वे स्तुतासः शतिनो मरुतो त्मनोती नोऽस्मान् वर्धयन्ति तान् सूरीन् सर्वताता यूयमच्छा जिगात स्वस्तिभिर्नस्सदा पात॥७॥

भावार्थः-हे मनुष्या! ये विद्वांसो धर्म्यकर्माणो असंख्यविद्या दयालवो न्यायकारिण आप्ता अस्मान् सर्वान् सततं वर्धयेयुर्वर्धयित्वा सदा रक्षन्ति वयं तानेव प्रशंसितान् कृत्वा सेवेमहीति॥७॥

अत्र मरुद्विद्वद्गुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति सप्तपञ्चाशत्तमं सूक्तं सप्तविंशो वर्गश्च समाप्तः॥

पदार्थः-हे विद्वान् मनुष्यो! **(ये)** जो **(विश्वे)** सम्पूर्ण **(स्तुतासः)** प्रशंसा को प्राप्त हुए

(शतिनः) असंख्य बलवाले **(मरुतः)** पवनों के समान विद्या से व्याप्त मनुष्य **(त्मना)** आत्मा से **(ऊती)** रक्षण आदि क्रिया से **(नः)** हम लोगों को **(वर्धयन्ति)** बढ़ाते हैं उन **(सूरीन्)** धार्मिक विद्वानों को **(सर्वताता)** सब के सुख करने वाले यज्ञ में **(यूयम्)** आप लोग **(अच्छ)** अच्छे प्रकार **(आ, जिगात)** प्रशंसा कीजिये और **(स्वस्तिभिः)** कल्याणों से **(नः)** हम लोगों की **(सदा)** सब काल में **(पात)** रक्षा कीजिये॥७॥

भावार्थः-हे मनुष्यो! जो विद्वान् धर्म्मयुक्त कर्म्म करने वाले असंख्य विद्या से युक्त, दयालु, न्यायकारी, यथार्थवक्ता जन हम सबों की निरन्तर वृद्धि करें, वृद्धि करके सदा रक्षा करते हैं, उनको ही हम लोग प्रशंसित करके सेवा करें॥७॥

इस सूक्त में पवन के सदृश विद्वान् के गुणों और कृत्य का वर्णन करने से इस सूक्त के अर्थ की संगति इससे पूर्व सूक्त के अर्थ के साथ जाननी चाहिये॥

यह सत्तावनवां सूक्त और सत्ताईसवां वर्ग समाप्त हुआ॥

अथ षड्चस्याष्टापञ्चाशत्तमस्य सूक्तस्य वसिष्ठर्षिः। मरुतो देवताः। ३, ४ निचृत्त्रिष्टुप्। ५ त्रिष्टुप्। १ विराट् त्रिष्टुप् छन्दः। धैवतः स्वरः। २, ६ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथ विद्वांसः किं कुर्युरित्याह॥

अब छः ऋचा वाले अट्ठावनवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में विद्वान् जन क्या करें, इस विषय को कहते हैं॥

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान्।
उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात्॥ १॥

प्र। साकम्ऽउक्षे। अर्चत। गणाय। यः। दैव्यस्य। धाम्नः। तुविष्मान्। उत। क्षोदन्ति। रोदसी इति। महिऽत्वा। नक्षन्ते। नाकम्। निःऽऋतेः। अवंशात्॥ १॥

पदार्थः-(**प्र**) (**साकमुक्षे**) यः साकं सहोक्षति सुखेन सचति सम्बध्नाति तस्मै (**अर्चता**) सत्कुरुत। अत्र **संहितायामि**ति दीर्घः। (**गणाय**) गणनीयाय (**यः**) (**दैव्यस्य**) देवैः कृतस्य (**धाम्नः**) नामस्थानजन्मनः (**तुविष्मान्**) बहुबलयुक्तः (**उत**) अपि (**क्षोदन्ति**) संपिंशन्ति (**रोदसी**) द्यावापृथिव्यौ (**महित्वा**) महत्त्वेन (**नक्षन्ते**) प्राप्नुवन्ति (**नाकम्**) अविद्यमानदुःखम् (**निर्ऋतेः**) भूमेः (**अवंशात्**) असन्तानात्॥ १॥

अन्वयः-यस्तुविष्मान् दैव्यस्य धाम्नो ज्ञातास्ति तस्मै साकमुक्षे गणाय विदुषे यूयं प्रार्चत अपि ये वायवो महित्वा रोदसी नक्षन्ते सावयवानुत क्षोदन्ति निर्ऋतेरवंशान्नाकं व्याप्नुवन्ति तद्विदो विदुषो यूयमुत प्रार्चत॥ १॥

भावार्थः-हे मनुष्या! ये वायुविद्यां जानन्ति तान् नित्यं सत्कृत्यैतेभ्यो वायुविद्यां प्राप्य भवन्तो महान्तो भवत॥ १॥

पदार्थः- (**यः**) जो (**तुविष्मान्**) बहुत बल से युक्त (**दैव्यस्य**) देवताओं से किये गये (**धाम्नः**) नाम, स्थान और जन्म का जानने वाला है उस (**साकमुक्षे**) साथ ही सुख से सम्बन्ध करने वाले (**गणाय**) गणनीय विद्वान् के लिये आप लोग (**प्र, अर्चत**) सत्कार करिये और (**अपि**) भी जो पवन (**महित्वा**) महत्त्व से (**रोदसी**) अन्तरिक्ष और पृथिवी को (**नक्षन्ते**) व्याप्त होते हैं, अवयवों के सहितों को (**उत**) भी (**क्षोदन्ति**) पीसते हैं (**निर्ऋतेः**) भूमि से (**अवंशात्**) सन्तान भिन्न से (**नाकम्**) दुःख से रहित स्थान को व्याप्त होते हैं, उनको जानने वाले विद्वानों को आप लोग भी सत्कार कीजिये॥ १॥

भावार्थः-हे मनुष्यो! जो वायु आदि की विद्या को जानते हैं, उनका नित्य सत्कार करके इनसे वायु की विद्या को प्राप्त होकर आप लोग श्रेष्ठ हूजिये॥ १॥

पुनः के अविश्वसनीया इत्याह॥

फिर कौन नहीं विश्वास करने योग्य हैं, इस विषय को अगले मन्त्र में कहते हैं॥

जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः।

प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन् भयते स्वर्दृक्॥ २॥

जनूः। चित्। वः। मरुतः। त्वेष्येण। भीमासः। तुविऽमन्यवः। अयासः। प्र। ये। महःऽभिः। ओजसा। उत। सन्ति। विश्वः। वः। यामन्। भयते। स्वःऽदृक्॥ २॥

पदार्थः-(**जनूः**) जनन्यः प्रकृतयः (**चित्**) अपि (**वः**) युष्माकम् (**मरुतः**) वायव इव मनुष्याः (**त्वेष्येण**) त्विषि प्रदीपने भवेन (**भीमासः**) बिभ्यति येभ्यस्ते (**तुविमन्यवः**) बहुक्रोधाः (**अयासः**) ज्ञातारो गन्तारो वा (**प्र**) प्रकाशयन्तः (**ये**) (**महोभिः**) महद्भिः पराक्रमैर्गुणैर्वा (**ओजसा**) बलेन सह (**उत**) अपि (**सन्ति**) (**विश्वः**) सर्वः (**वः**) युष्मान् (**यामन्**) यान्ति येन यस्मिन् वा तस्मिन् (**भयते**) भयं करोति (**स्वर्दृक्**) यः स्वः सुखं पश्यति सः॥ २॥

अन्वयः-हे मरुतो! ये महोभिरोजसा त्वेष्येण सह वर्त्तमानाः भीमासस्तुविमन्यवोऽयासो वो युष्माकं जनूः प्रसन्त्युत यो विश्वः स्वर्दृग्जनो यामन् वो भयते ताँस्तं चिद्यूयं विज्ञाय युक्त्या सेवध्वम्॥ २॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे विद्वांसो मनुष्याः! ये भयङ्करा मनुष्यादयः प्राणिनः सन्ति तेषां विश्वासमकृत्वा तान् महता बलेन पराक्रमेण च वशं नयत॥ २॥

पदार्थः-हे (**मरुतः**) पवनों के समान मनुष्यो! (**ये**) जो (**महोभिः**) बड़े पराक्रमों वा गुणों के और (**ओजसा**) बल (**त्वेष्येण**) प्रकाश में हुए के साथ वर्त्तमान (**भीमासः**) डरते हैं जिन से वे (**तुविमन्यवः**) बहुत क्रोधयुक्त (**अयासः**) जानने वा जाने वाले जन (**वः**) आप लोगों को (**जनूः**) स्वभाव (**प्रसन्ति**) प्रकाश करते हुए हैं और (**उत**) भी जो (**विश्वः**) सम्पूर्ण (**स्वर्दृक्**) सुख को देखने वाला मनुष्य (**यामन्**) लाते हैं जिससे वा जिस में उस में (**वः**) आप लोगों को (**भयते**) भय देता है उनको और उस को (**चित्**) भी आप लोग जान कर युक्ति से सेवा करिये॥ २॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे विद्वान् मनुष्यो! जो भयङ्कर मनुष्य आदि प्राणी है, उनका विश्वास नहीं करके उन को बड़े बल और पराक्रम से वश में करिये॥ २॥

पुनः के जगत्पूज्या भवन्तीत्याह॥

फिर कौन जगत् से आदर पाने योग्य होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

बृहद्वयो मघवद्भ्यो दधातु जुजोषन्निन्मरुतः सुष्टुतिं नः।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत॥ ३॥

बृहत्। वयः। मघवत्ऽभ्यः। दधात। जुजोषन्। इत्। मरुतः। सुऽस्तुतिम्। नः। गतः। न। अध्वा। वि। तिराति। जन्तुम्। प्र। नः। स्पार्हाभिः। ऊतिऽभिः। तिरेत॥ ३॥

पदार्थः-(**बृहत्**) महत् (**वयः**) जीवनम् (**मघवद्भ्यः**) (**दधात**) दधति (**जुजोषन्**) सेवन्ते (**इत्**) एव (**मरुतः**) (**सुष्टुतिम्**) शोभनां प्रशंसाम् (**नः**) अस्माकमस्मान् वा (**गतः**) प्राप्तः (**न**) निषेधे (**अध्वा**) मार्गः (**वि**) (**तिराति**) विहन्ति (**जन्तुम्**) प्राणिनम् (**प्र**) (**नः**) अस्मान् (**स्पार्हाभिः**) स्पृहणीयाभिः (**ऊतिभिः**) रक्षादिभिः क्रियाभिः (**तिरेत**) वर्धये॥ ३॥

अन्वयः-हे मनुष्या! ये मरुतो मघवद्भ्यो नोऽस्मभ्यं बृहद्वयो जुजोषन्निन्नोऽस्माकं सुष्टुतिं दधात यो गतोऽध्वास्ति तस्मिन् जन्तुं न वि तराति यश्च स्पार्हाभिरूतिभिर्नोऽस्मान् प्र तिरेत तान् वयं नित्यं सेवेमहि॥३॥

भावार्थः-हे मनुष्या! ये विद्वांसः सर्वेषामायुर्वर्धयन्ति प्रशंसितानि कर्माणि कारयन्ति त एव सर्वैस्सत्कर्तव्या भवन्ति॥३॥

पदार्थः-हे मनुष्यो! जो (**मरुतः**) मनुष्य (**मघवद्भ्यः**) अन्न से युक्त (**नः**) हम लोगों के लिये (**बृहत्**) बहुत (**वयः**) जीवन का (**जुजोषन्**) सेवन करते (**इत्**) ही हैं (**नः**) हम लोगों की (**सुष्टुतिम्**) उत्तम प्रशंसा को (**दधात**) धारण करते हैं और जो (**गतः**) प्राप्त हुआ (**अध्वा**) मार्ग है उस में (**जन्तुम्**) प्राणी को (**न**) नहीं (**वि, तिराति**) मारता है और जो (**स्पार्हाभिः**) स्पृहा करने योग्य (**ऊतिभिः**) रक्षा आदि क्रियाओं से हम लोगों को (**प्र, तिरेत**) बढ़ावें, उनका हम लोग नित्य सेवन करें॥३॥

भावार्थः-हे मनुष्यो! जो विद्वान् जन सब की अवस्था को बढ़ाते हैं, प्रशंसित कर्मों को कराते है, वे ही सबों से सत्कार करने योग्य होते हैं॥३॥

केन रक्षिताः मनुष्याः कीदृशा भवन्तीत्याह॥

किससे रक्षित मनुष्य कैसे होते हैं, इस विषय को कहते हैं॥

युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्त्री।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम्॥४॥

युष्माऽऊतः। विप्रः। मरुतः। शतस्वी। युष्माऽऊतः। अर्वा। सहुरिः। सहस्त्री। युष्माऽऊतः। सम्ऽराट्। उत। हन्ति। वृत्रम्। प्र। तत्। वः। अस्तु। धूतयः। देष्णम्॥४॥

पदार्थः-(**युष्मोतः**) युष्माभी रक्षितः (**विप्रः**) मेधावी (**मरुतः**) प्राणा इव प्रियकरा विद्वांसः (**शतस्वी**) शतमसंख्यं स्वं धनं विद्यते यस्य सः (**युष्मोतः**) युष्माभिः पालितः (**अर्वा**) अर्वेव अश्व इव (**सहुरिः**) सहनशीलः (**सहस्त्री**) सहस्राण्यसंख्याता उत्तममनुष्याः पदार्था वा विद्यन्ते यस्य सः (**युष्मोतः**) युष्माभिः संरक्षितः (**सम्राट्**) सः सूर्यः सम्यग्राजते तद्वद्वर्तमानश्चक्रवर्ती राजा (**उत**) (**हन्ति**) (**वृत्रम्**) मेघम् (**प्र**) (**तत्**) (**वः**) युष्मभ्यम् (**अस्तु**) (**धूतयः**) कम्पयितारः (**देष्णम्**) दातुं योग्यं धनम्॥४॥

अन्वयः-हे धूतयो मरुतो! यं युष्मोतो विप्रः शतस्वी युष्मोतोऽर्वेव सहुरिः सहस्त्युत युष्मोतः सम्राड् वृत्रमिव शत्रून् हन्ति तद्देष्णं वः प्रास्तु॥४॥

भावार्थः-हे मनुष्या! यथा प्राणः शरीरादिकं सर्वं रक्षयित्वा सुखं प्रापयन्ति तथैव विद्वांसः शरीरात्मबलायूंषि रक्षयित्वा सर्वानानन्दयन्ति नैतेषां रक्षया विना कोपि सम्राड् भवितुमर्हति तस्मादेते सर्वदा सत्कर्तव्यास्सन्ति॥४॥

पदार्थः-हे (**धूतयः**) कम्पाने वाले (**मरुतः**) प्राणों के सदृश प्रिय करने वाले विद्वान् जनो! **[**जो**]** (**युष्मोतः**) आप लोगों से रक्षा किया (**विप्रः**) बुद्धिमान् जन (**शतस्वी**) असंख्य धन वाला (**युष्मोतः**) आप लोगों से पालन किया गया (**अर्वा**) घोड़े के सामन (**सहुरिः**) सहनशील (**सहस्त्री**)

असंख्यात उत्तम मनुष्य वा पदार्थ जिसके वह **(उत)** और **(युष्मोतः)** आप लोगों से उत्तम प्रकार रक्षा किया गया **(सम्राट्)** उत्तम प्रकाशित सूर्य्य के समान वर्त्तमान चक्रवर्ती राजा **(वृत्रम्)** मेघ को जैसे सूर्य वैसे शत्रुओं का **(हन्ति)** नाश करता है **(तत्)** वह **(देष्णम्)** देने योग्य दान **(वः)** आप लोगों के लिये **(प्र, अस्तु)** हो अर्थात् आप का दिया हुआ समस्त है सो आपका विख्यात हो॥४॥

भावार्थः-हे मनुष्यो! जैसे प्राण, शरीर आदि सब की रक्षा करके सुख को प्राप्त कराते हैं, वैसे ही विद्वान् जन शरीर, आत्मा, बल और अवस्था की रक्षा कर के सब को आनन्द देते हैं, उनकी रक्षा के बिना कोई भी चक्रवर्ती राजा होने को योग्य नहीं होता, तिस से ये सब काल में सत्कार करने योग्य होते हैं॥४॥

पुनः के मनुष्याः सत्करणीयास्तिरस्करणीयाश्च भवन्तीत्याह॥

फिर कौन मनुष्य सत्कार करने योग्य और तिरस्कार करने योग्य होते हैं, इस विषय को कहते हैं॥

ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नरः।
यत्सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम्॥५॥

तान्। आ। रुद्रस्य। मीळ्हुषः। विवासे। कुवित्। नंसन्ते। मरुतः। पुनः। नरः। यत्। सस्वर्ता। जिहीळिरे। यत्। आविः। अव। तत्। एनः। ईमहे। तुराणाम्॥५॥

पदार्थः-(**तान्**) (**आ**) समन्तात् (**रुद्रस्य**) प्राणस्येव विदुषः (**मीळ्हुषः**) सेचकस्य (**विवासे**) वासयामि (**कुवित्**) महत् (**नंसन्ते**) नमन्ति (**मरुतः**) मनुष्याः (**पुनः**) (**नः**) अस्मान् (**यत्**) येन (**सस्वर्ता**) उपतापकेन शब्देन (**जिहीळिरे**) क्रोधयेयुः (**यत्**) (**आविः**) प्राकट्ये (**अव**) विरोधे (**तत्**) (**एनः**) पापमपराधम् (**ईमहे**) दूरीकुर्महे (**तुराणाम्**) क्षिप्रं कारिणाम्॥५॥

अन्वयः-ये मनुष्याः यत्सस्वर्ता नो जिहीळिरे तेषां तुराणां यदेनस्तदवेमहे तान् रुद्रस्य मीळ्हुषो नंसन्ते पुनस्तान् रुद्रस्य कुवित् कुर्वतोऽहमाविराविवासे॥५॥

भावार्थः-हे मनुष्या! ये पापिनो धार्मिकाणामनादरकर्तारः स्युस्ते दूरे निवासनीयाः ये च नम्रत्वादिगुणयुक्ता धार्मिकाः स्युस्तान्निकटे निवासयेयुर्यतः सर्वेषां सत्कीर्तिः प्रकटा स्यात्॥५॥

पदार्थः-जो मनुष्य **(यत्)** जिस **(सस्वर्ता)** तपाने वाले शब्द से **(नः)** हम लोगों को **(जिहीळिरे)** क्रुद्धित करावें उन **(तुराणाम्)** शीघ्र कार्य्य करने वालों का **(यत्)** जो **(एनः)** पाप अपराध **(तत्)** उस को **(अव)** विरोध में **(ईमहे)** दूर करें उनको **(रुद्रस्य)** प्राण के सदृश विद्वान् **(मीळ्हुषः)** सींचने वाले विद्वान् के सम्बन्ध में **(नंसन्ते)** नम्र होते हैं **(पुनः)** फिर **(तान्)** उनको **(रुद्रस्य)** प्राण के सदृश विद्वान् के **(कुवित्)** बड़ा करते हुए को मैं **(आविः)** प्रकटता में **(आ)** सब प्रकार से **(विवासे)** बसाता हूँ॥५॥

भावार्थः-हे मनुष्यो! जो पापी जन धार्मिक जनों के अनादर करने वाले होवें, उनको दूर वसाना चाहिये और जो नम्रता आदि से युक्त धार्म्मिक होवें, उन को समीप बसावें, जिससे सब का

श्रेष्ठ यश प्रकट होवे॥५॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् जन क्या करें, इस विषय को कहते हैं॥

प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त।
आराच्चिद्द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः॥६॥२८॥

प्र। सा। वाचि। सुऽस्तुतिः। मघोनाम्। इदम्। सुऽउक्तम्। मरुतः। जुषन्त। आरात्। चित्। द्वेषः। वृषणः। युयोत। पात। स्वस्तिऽभिः। सदा। नः॥६॥

पदार्थः-(**प्र**) (**सा**) (**वाचि**) वाण्याम् (**सुष्टुतिः**) शोभना प्रशंसा (**मघोनाम्**) बहुपूजितधनानाम् (**इदम्**) (**सूक्तम्**) शोभनं वचनम् (**मरुतः**) विद्वांसो मनुष्याः (**जुषन्त**) सेवन्ताम् (**आरात्**) दूरात् समीपाद् वा (**चित्**) अपि (**द्वेषः**) द्वेष्टॄन् दुष्टान् शत्रून् मनुष्यान् (**वृषणः**) बलिष्ठाः (**युयोत**) पृथक्कुरुत (**यूयम्**) (**पात**) (**स्वस्तिभिः**) (**सदा**) (**नः**)॥६॥

अन्वयः-हे वृषणो! मघोनां वाचि सा सुष्टुतिस्तदिदं सूक्तं मरुतः प्र जुषन्त साऽस्मान् जुषतां यूयं द्वेष आरात् दूरान्निकटाच्चिद्युयोत स्वस्तिभिर्नस्सदा पात॥६॥

भावार्थः-ये मनुष्यास्सदैव सत्यस्य वक्तारस्ते स्तावकाः स्युस्तैस्सह बलं वर्धयित्वा सर्वशत्रून् निवार्य श्रेष्ठान् सदा रक्षन्तु॥६॥

अत्र मरुद्विद्वद्गुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह संगतिर्वेद्या॥

इत्यष्टपञ्चाशत्तमं सूक्तमष्टाविंशो वर्गश्च समाप्तः॥

पदार्थः-हे (**वृषणः**) बलयुक्त जनो! (**मघोनाम्**) बहुत श्रेष्ठ धन वालों की (**वाचि**) वाणी में (**सा**) वह (**सुष्टुतिः**) सुन्दर प्रशंसा है (**इदम्**) इस (**सूक्तम्**) उत्तम वचन को (**मरुतः**) विद्वान् मनुष्य (**प्र, जुषन्त**) सेवन करें (**सा**) वह हम लोगों को सेवन करे (**यूयम्**) आप लोग (**द्वेषः**) करने वालों को (**आरात्**) समीप से वा दूर से (**चित्**) भी (**युयोत**) पृथक् करिये और (**स्वस्तिभिः**) कल्याणों से (**नः**) हम लोगों की (**सदा**) सब काल में (**पात**) रक्षा कीजिये॥१॥

भावार्थः-जो मनुष्य सदा ही सत्य के कहने वाले हों, वे ही स्तुति करने वाले होवें, उन के साथ बल को बढ़ाय के सब शत्रुओं को दूर करके श्रेष्ठों की सदा रक्षा करो॥६॥

इस सूक्त में वायु और विद्वान् के गुणवर्णन करने से इस सूक्त के अर्थ की इस से पूर्व सूक्त के अर्थ के साथ संगति जाननी चाहिये॥

यह अट्ठावनवां सूक्त और अट्ठाईसवां वर्ग समाप्त हुआ॥

अथ द्वादशर्चस्यैकोनषष्टितमस्य सूक्तस्य वसिष्ठ ऋषिः। १-११ मरुतः। १२ रुद्रो देवता। १ निचृद्बृहती। ३ बृहती। ६ स्वराड्बृहती छन्दः। मध्यमस्स्वरः। २ पङ्क्तिः। ४ निचृत्पङ्क्तिश्छन्दः। पञ्चमः स्वरः। ५, १२ अनुष्टुप् छन्दः। गान्धारः स्वरः। ७ निचृत्त्रिष्टुप्। ८ त्रिष्टुप् छन्दः। धैवतः स्वरः। ९, १० गायत्री। ११ निचृद्गायत्री छन्दः। षड्जः स्वरः॥

पुनर्विद्वद्भिः किं कर्तव्यमित्याह॥

अब बारह ऋचा वाले उनसठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में फिर विद्वानों को क्या करना चाहिये, इस विषय को कहते हैं॥

यं त्रायध्व इदमिदं देवासो यं च नयथ।
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत॥ १॥

यम्। त्रायध्वे। इदम्ऽइदम्। देवासः। यम्। च। नयथ। तस्मै। अग्ने। वरुण। मित्र। अर्यमन्। मरुतः। शर्म। यच्छत॥ १॥

पदार्थः-(**यम्**) (**त्रायध्वे**) रक्षथ (**इदमिदम्**) वचनं श्रावयिता कर्म कृत्वा वा (**देवासः**) प्राणा इव विद्वांसः (**यम्**) नरम् (**च**) (**नयथ**) प्रापयथ (**तस्मै**) (**अग्ने**) (**वरुण**) श्रेष्ठ (**मित्र**) सखे (**अर्यमन्**) न्यायकारिन् (**मरुतः**) प्राण इव नेतारः (**शर्म**) सुखं गृहं वा (**यच्छत**) दत्त॥ १॥

अन्वयः-हे मरुतो देवासो! यूयमिदमिदं यन्नयथ यं च त्रायध्ये तस्मै शर्म यच्छत, हे अग्ने वरुण मित्रार्यमँस्त्वमेतानेव सदा सेवस्य॥ १॥

भावार्थः-हे विद्वांसो! भवन्तस्सत्योपदेशसुशिक्षाविद्यादानेन सर्वान् मनुष्यान् सम्यग्रक्षित्वा वर्धन्तु येन सर्वे सुखिनः स्युः॥ १॥

पदार्थः-हे (**मरुतः**) प्राणों के सदृश अग्रणी (**देवासः**) विद्वान्! आप लोग (**इदमिदम्**) इस-इस वचन को सुनाय के वा कर्म करके (**यम्**) जिसको (**नयथ**) प्राप्त कराइये (**यम्, च**) और जिस मनुष्य की (**त्रायध्वे**) रक्षा करें (**तस्मै**) उसके लिये (**शर्म**) सुख वा गृह (**यच्छत**) दीजिये और हे (**अग्ने**) अग्नि के समान तेजस्वी (**वरुण**) श्रेष्ठ (**मित्र**) मित्र (**अर्यमन्**) न्यायकारी! आप इन्हीं की सदा सेवा करिये॥ १॥

भावार्थः-हे विद्वान् जनो! आप लोग सत्य उपदेश, उत्तम शिक्षा और विद्या दान से सब मनुष्यों की उत्तम प्रकार रक्षा करके वृद्धि करिये, जिससे सब सुखी होवें॥ १॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति॥ २॥

युष्माकम्। देवाः। अवसा। अहनि। प्रिये। ईजानः। तरति। द्विषः। प्र। सः। क्षयम्। तिरते। वि। महीः। इषः। यः। वः। वराय। दाशति॥ २॥

पदार्थः-(**युष्माकम्**) (**देवाः**) विद्वांसः (**अवसा**) रक्षणादिना (**अहनि**) दिने (**प्रिये**) कमनीये प्रीतिकरे (**ईजानः**) (**तरति**) उल्लङ्घते (**द्विषः**) द्वेष्टॄन् (**प्र**) (**सः**) (**क्षयम्**) निवासम् (**तिरते**) वर्धयति (**वि**) (**महीः**) भूमीः सुशिक्षिता वाचो वा (**इषः**) अन्नाद्याः (**यः**) (**वः**) युष्मान् (**वराय**) श्रेष्ठत्वाय (**दाशति**)॥२॥

अन्वयः-हे देवा! य ईजानोऽवसा द्विषस्तरति प्रियेऽहनि युष्माकं प्रियं साध्नोति यो महीरिषो वो वराय प्र दाशति स क्षयं प्र वि तिरते॥२॥

भावार्थः-हे मनुष्या! ये दुष्टतानिवारकास्सर्वेषां रक्षका विद्याद्यैश्वर्यप्रदाः सुखेन सर्वदा वासयितारो विद्वांसः स्युस्तानेव सेवयित्वा संगत्य प्राप्नुत॥२॥

पदार्थः-हे (**देवाः**) विद्वान् जनो! (**यः**) जो (**ईजानः**) यजमान (**अवसा**) रक्षण आदि से (**द्विषः**) द्वेष करने वालों का (**तरति**) उल्लङ्घन करता है और (**प्रिये**) प्रीति करने वाले (**अहनि**) दिन में (**युष्माकम्**) आप लोगों के प्रिय को सिद्ध करता है और जो (**महीः**) भूमियों का उत्तम प्रकार शिक्षित वाणियों वा (**इषः**) अन्नादिकों (**वः**) आप लोगों के अर्थ (**वराय**) श्रेष्ठत्व के लिये (**प्र, दाशति**) देता है (**सः**) वह (**क्षयम्**) निवास को (**प्र, वि, तिरते**) बढ़ाता है॥२॥

भावार्थः-हे मनुष्यो! जो दुष्टता के दूर करने वाले, सब की रक्षा करने वाले, विद्या आदि ऐश्वर्य्य के देने वाले और सुख से सर्वदा वसाने वाले विद्वान् हों, उन्हीं की सेवा और मेल कर के विद्याओं को प्राप्त हूजिये॥२॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

नहि वश्चरमं चन वसिष्ठः परिमंसते।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः॥३॥

नहि। वः। चरमम्। चन। वसिष्ठः। परिऽमंसते। अस्माकम्। अद्य। मरुतः। सुते। सचा। विश्वे। पिबत। कामिनः॥३॥

पदार्थः-(**नहि**) निषेधे (**वः**) युष्माकम् (**चरमम्**) अन्तिमम् (**चन**) अपि (**वसिष्ठः**) अतिशयेन वासयिता (**परिमंसते**) वर्जनीयं विरुद्धं वा परिणमति (**अस्माकम्**) (**अद्य**) (**मरुतः**) मनुष्याः (**सुते**) निष्पन्ने महौषधिरसे (**सचा**) सम्बन्धेन (**विश्वे**) सर्वे (**पिबत**) (**कामिनः**) कामयितारः॥३॥

अन्वयः-हे विद्वांसः कामिनो विश्वे मरुतो! यूयं सचाद्यास्माकं सुते रसं पिबत यतो वश्चरमं चन वसिष्ठो नहि परिमंसते॥३॥

भावार्थः-हे मनुष्या! यदि यूयमिच्छासिद्धिं चिकीर्षेयुस्तर्हि युक्ताहारविहारं ब्रह्मचर्यं कुरुत॥३॥

पदार्थः-हे विद्वानो (**कामिनः**) कामना करने वाले (**विश्वे**) सम्पूर्ण (**मरुतः**) मनुष्य! आप लोग (**सचा**) सम्बन्ध से (**अद्य**) इस समय (**अस्माकम्**) हम लोगों के (**सुते**) उत्पन्न हुए बड़ी ओषिधियों के रस में रस को (**पिबत**) पीवें जिससे (**वः**) आप लोगों के (**चरमम्**) अन्त वाले को

(चन) भी **(वसिष्ठः)** अतिशय वसाने वाला **(नहि)** नहीं **(परिमंसते)** त्यागने योग्य वा विरुद्ध परिणाम को प्राप्त होता है॥३॥

भावार्थः-हे मनुष्यो! जो आप लोग इच्छा की सिद्धि करने की इच्छा करें तो योग्य आहार और विहार जिसमें उस ब्रह्मचर्य्य को करिये॥३॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को कहते हैं॥

नहि वः ऊतिः पृतनासु मर्धति यस्माअराध्वं नरः।
अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः॥४॥

नहि। वः। ऊतिः। पृतनासु। मर्धति। यस्मै। अराध्वम्। नरः। अभि। वः। आ। अवर्त्। सुऽमतिः। नवीयसी। तूयम्। यात। पिपीषवः॥४॥

पदार्थः-(**नहि**) निषेधे (**वः**) युष्माकम् (**ऊतिः**) रक्षाद्या क्रिया (**पृतनासु**) मनुष्यसेनासु (**मर्धति**) हिंसति (**यस्मै**) (**अराध्वम्**) स्मर्धयन्ति (**नरः**) नायकाः (**अभि**) (**वः**) युष्माकम् (**आ**) (**अवर्त्**) आवर्तते (**सुमतिः**) शोभना प्रज्ञा (**नवीयसी**) अतिशयेन नवीना (**तूयम्**) तूर्णम्। **तूयमिति क्षिप्रनाम।** (निघं०२.१५) (**यात**) प्राप्नुत (**पिपीषवः**) पातुमिच्छवः॥४॥

अन्वयः-हे पिपीषवो नरो! येषां व ऊतिः पूतनासु नहि मर्धति यस्मै यूयमराध्वं स वोऽभ्यावर्त् येषां नवीयसी सुमतिरस्ति ते यूयं विद्यां तूयं यात॥४॥

भावार्थः-हे मनुष्याः! भवन्त एवं प्रयतन्तां येन युष्माकं न्यायेन रक्षा सेनाः समृद्धिरुत्तमा प्रज्ञा कदाचिन्न ह्रस्येत॥४॥

पदार्थः-हे (**पिपीषवः**) पान करने की इच्छा करने वाले (**नरः**) अग्रणी जनो! जिन (**वः**) आप लोगों की (**ऊतिः**) रक्षा आदि क्रिया (**पृतनासु**) मनुष्यों की सेनाओं में (**नहि**) नहीं (**मर्धति**) हिंसा करती है और (**यस्मै**) जिस के लिये आप लोग (**अराध्वम्**) आराधना करते हैं वह (**वः**) आप लोगों के (**अभि, आ, अवर्त्**) समीप सब प्रकार से वर्त्तमान होता है और जिनकी (**नवीयसी**) अतिशय नवीन (**सुमतिः**) उत्तम बुद्धि है वे आप लोग विद्या को (**तूयम्**) शीघ्र (**यात**) प्राप्त हूजिये॥४॥

भावार्थः-हे मनुष्यो! आप लोग इस प्रकार से प्रयत्न करिये, जिससे आप लोगों की न्याय से रक्षा सेना की बढ़ती और उत्तम बुद्धि कभी न न्यून हो॥४॥

पुनः स्वामिनः भृत्यान् प्रति कथमाचरेयुरित्याह॥

फिर स्वामी जन नौकरों के प्रति कैसा आचरण करें, इस विषय को अगले मन्त्र में कहते हैं॥

ओ षु घृष्विराधसो यातनान्धांसि पीतये।
इमा वो हव्या मरुतो रारे हि कं मो ष्व१न्यत्र गन्तन॥५॥

ओ इति। सु। घृष्विऽराधसः। यातन। अन्धांसि। पीतये। इमा। वः। हव्या। मरुतः। ररे। हि। कम्। मो इति। सु। अन्यत्र। गन्तन॥५॥

पदार्थः-(**ओ**) सम्बोधने (**सु**) (**घृष्विराधसः**) घृष्वीनि सम्बद्धानि रारांसि येषां ते (**यातन**) प्राप्नुत (**अन्धांसि**) अन्नपानादीनि (**पीतये**) पानाय (**इमा**) इमानि (**वः**) युष्मभ्यम् (**हव्या**) दातुमादातुमर्हाणि (**मरुतः**) मनुष्याः (**ररे**) ददामि (**हि**) (**कम्**) सुखम् (**मो**) निषेधे (**सु**) (**अन्यत्र**) (**गन्तन**) गच्छत॥५॥

अन्वयः-ओ घृष्विराधसो मरुतो! यानीमा हव्यान्धांसि वः पीतयेऽहं ररे तैर्हि यूयं कं सु यातनान्यत्र मो सु गन्तन॥५॥

भावार्थः-हे धार्मिका विद्वांसोऽहं युष्माकं पूर्णं सत्कारं करोमि यूयमन्यत्रेच्छां मा कुरुतात्रैव कर्तव्यानि कर्माणि यथावत् कृत्वा पूर्णमभीष्टं सुखमत्रैव प्राप्नुत॥५॥

पदार्थः- (**आ**) हे (**घृष्विराधसः**) इकट्ठे लिये हुए धनों वाले (**मरुतः**) मनुष्यो! जिन (**इमा**) इन (**हव्या**) देने और ग्रहण करने योग्य (**अन्धांसि**) अन्नपान आदिकों को (**वः**) आप लोगों के अर्थ (**पीतये**) पान करने के लिये मैं (**ररे**) देता हूँ उनसे (**हि**) ही आप लोग (**कम्**) सुख को (**सु, यातन**) अच्छे प्रकार प्राप्त हूजिये (**अन्यत्र**) अन्य स्थान में (**मो**) नहीं (**सु**) अच्छे प्रकार (**गन्तन**) जाइये॥५॥

भावार्थः-हे धार्मिक विद्वानो! मैं आप लोगों का पूर्ण सत्कार करता हूँ, आप लोग अन्यत्र की इच्छा को न करिये, यहाँ ही करने योग्य कर्मों को यथावत् करके पूर्ण अभीष्ट सुख को यहाँ ही प्राप्त हूजिये॥५॥

पुनर्विद्वद्भिः किं कर्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

आ च नो बर्हिः सदताविता च नः स्पार्हाणि दातवे वसु।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै॥६॥२९॥

आ। च। नः। बर्हिः। सदत। अविता। च। नः। स्पार्हाणि। दातवे। वसु। अस्रेधन्तः। मरुतः। सोम्ये। मधौ। स्वाहा। इह। मादयाध्वै॥६॥

पदार्थः-(**आ**) (**च**) अथार्थे (**नः**) अस्माकम् (**बर्हिः**) उत्तमं बृहद्गृहम् (**सदत**) उपविशत (**अविता**) प्रविशत रक्षत। अत्र **संहितायामिति** दीर्घः। (**च**) (**नः**) अस्मभ्यम् (**स्पार्हाणि**) स्पृहणीयानि कमनीयानि (**दातवे**) दातुं (**वसु**) द्रव्यम् (**अस्रेधन्तः**) अहिंसन्तः (**मरुतः**) मनुष्याः (**सोम्ये**) सोम इवानन्दकरे (**मधौ**) मधुरे (**स्वाहा**) सत्यया क्रियया (**इह**) अस्मिन् लोके (**मादयाध्वै**)॥६॥

अन्वयः-हे वस्वस्रेधन्तो मरुतो! यूयं नो स्पार्हाणि च दातवेऽस्माकं बर्हिरा सदत नोऽस्माँश्चावितेह स्वाहा सोम्ये मधौ मादयाध्वै॥६॥

भावार्थः-हे विद्वांसो! यूयं सर्वेभ्यो मनुष्येभ्यो विद्यां दातुं प्रवर्त्तध्वं विद्ययैवैषां रक्षां विधत्तैश्वर्यं सर्वार्थं वर्धयत॥६॥

पदार्थः-हे **(वसु)** द्रव्य का **(अस्रेधन्तः)** नहीं नाश करते हुए **(मरुतः)** मनुष्यो! आप लोग **(नः)** हम लोगों के **(स्पार्हाणि)** कामना करने योग्य पदार्थों को **(च)** निश्चित **(दातवे)** देने के लिये हम लोगों के **(बर्हिः)** उत्तम बड़े गृह में **(आ, सदत)** बैठिये **(नः, च)** और हम लोगों की **(अवित)** रक्षा कीजिये **(इह)** इस लोक में **(स्वाहा)** सत्य क्रिया से **(सोम्ये)** सोमलता के सदृश आनन्द करने वाले **(मधौ)** मधुर रस में **(मादयाध्वै)** आनन्द कीजिये॥६॥

भावार्थः-हे विद्वानो! आप लोग सब मनुष्यों के लिये विद्या देने को प्रवृत्त हूजिये, विद्या ही से इनकी रक्षा कीजिये और ऐश्वर्य्य सब के लिये बढ़ाइये॥६॥

पुनर्मनुष्याः किंवत् किं जानीयुरित्याह॥

फिर मनुष्य किसके सदृश किसको जानें, इस विषय को अगले मन्त्र में कहते हैं॥

स॒स्वश्चि॒द्धि त॒न्व१॑: शुम्भ॑माना॒ आ हं॒सासो॒ नील॑पृष्ठा अपप्तन्।
विश्वं॒ शर्धो॑ अ॒भितो॑ मा॒ नि षे॑द॒ नरो॒ न र॒ण्वाः सव॑ने॒ मद॑न्तः॥७॥

स॒स्वरिति॑। चि॒त्। हि। त॒न्वः॑। शुम्भ॑मानाः। आ। हं॒सासः॑। नील॑ऽपृष्ठाः। अ॒प॒प्त॒न्। विश्व॑म्। शर्धः॑। अ॒भित॑ः। मा॒। नि। से॒द॒। नरः॑। न। र॒ण्वाः। सव॑ने। मद॑न्तः॥७॥

पदार्थः-(**सस्वः**) अन्तर्हिताः **(चित्)** अपि **(हि)** यतः **(तन्वः)** विस्तीर्णाः **(शुम्भमानाः)** शोभायुक्ताः **(आ)** **(हंसासः)** हंसा इव गमनकर्तारः **(नीलपृष्ठाः)** नीलं शुद्धं पृष्ठमन्तावयवं कारणं येषां ते **(अपप्तन्)** पतन्ति **(विश्वम्)** अखिलम् **(शर्धः)** बलम् **(अभितः)** सर्वतः **(मा)** माम् **(नि, सेद)** निषादयत **(नरः)** नायकाः **(न)** इव **(रण्वाः)** रमणीयाः **(सवने)** ऐश्वर्ये **(मदन्तः)** आनन्दन्तः॥७॥

अन्वयः-हे विद्वांसो! यथा शुम्भमानाः हि हंसासो नीलपृष्ठाः सस्वश्चित्तन्वः प्राणाः देहादिष्वापप्तन् तथा सवने मदन्तः रण्वा नरो न मामभितो यूयं नि षेद विश्वं शर्धः प्रापयत॥७॥

भावार्थः-हे मनुष्याः! यथा हंसा पक्षिणस्सद्यो गच्छन्ति तथा देहात्प्राणा निर्गच्छन्ति यथा रमणीया नरा सर्वेषां हृद्या भवन्ति तथैव विद्वांसः सर्वेषां प्रिया जायन्ते॥७॥

पदार्थः-हे विद्वान् जनो! जैसे **(शुम्भमानाः)** शोभते हुए **(हि)** ही **(हंसासः)** हंसों के समान गमन करने वाले **(नीलपृष्ठाः)** शुद्ध कारण जिनके वे **(सस्वः)** छिपे हुए **(चित्)** निश्चित **(तन्वः)** विस्तारयुक्त प्राण देह आदि में **(आ)** सब ओर से **(अपप्तन्)** गिरते हैं, वैसे **(सवने)** ऐश्वर्य्य में **(मदन्तः)** आनन्द करते हुए **(रण्वाः)** सुन्दर **(नरः)** अग्रणी जनों के **(न)** समान **(मा)** मुझ को **(अमितः)** सब ओर से आप लोग **(नि, सेद)** बैठाइये और **(विश्वम्)** सम्पूर्ण **(शर्धः)** बल को प्राप्त कराइये॥७॥

भावार्थः-हे मनुष्यो! वैसे हंस पक्षी शीघ्र चलते हैं, वैसे देह से प्राण निकलते हैं और जैसे उत्तम मनुष्य सब के प्रिय होते हैं, वैसे ही विद्वान् जन सब के प्रिय होते हैं॥७॥

पुनर्धार्मिका विद्वांसः किं कुर्युरित्याह॥

फिर धार्मिक विद्वान् क्या करें, इस विषय को कहते हैं॥

यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति।
द्रुहः पाशान् प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम्॥८॥

यः। नः। मरुतः। अभि। दुःऽहृणायुः। तिरः। चित्तानि। वसवः। जिघांसति। द्रुहः। पाशान्। प्रति। सः। मुचीष्ट। तपिष्ठेन। हन्मना। हन्तन। तम्॥८॥

पदार्थः-(**यः**) (**नः**) अस्मान् (**मरुतः**) मनुष्याः (**अभि**) आभिमुख्ये (**दुर्हृणायुः**) दुष्टहृदयः (**तिरः**) तिरस्करणे (**चित्तानि**) अन्तःकरणानि (**वसवः**) वासयितारः (**जिघांसति**) हन्तुमिच्छति (**द्रुहः**) द्रोग्धीन् (**पाशान्**) बन्धकान् (**प्रति**) (**सः**) (**मुचीष्ट**) मुञ्चत (**तपिष्ठेन**) अतिशयेन तप्तेन (**हन्मना**) हननेन (**हन्तना**) अत्र **संहितायामि**ति दीर्घः (**तम्**)॥८॥

अन्वयः-हे वसवो मरुतो! यो दुर्हृणायुर्नश्चित्तान्यभि जिघांसति स द्रुहः पाशान् प्रापयति तमस्मान् प्रति मुचीष्ट तपिष्ठेन हन्मना तं तिरो हन्तन॥८॥

भावार्थः-हे धार्मिका विद्वांसो! यूयं दुष्टान् मनुष्यान् श्रेष्ठेभ्यो दूरीकृत्य मोहादि बन्धनानि निवार्य तेषां देवान् हत्वैतान् शुद्धान् सम्पादयत॥८॥

पदार्थः-हे (**वसवः**) वास कराने वाले (**मरुतः**) मनुष्यो! (**यः**) जो (**दुर्हृणायुः**) दुष्ट विचार वाला (**नः**) हम लोगों के (**चित्तानि**) अन्तःकरणों को (**अभि**) सम्मुख (**जिघांसति**) मारने की इच्छा करता है (**सः**) वह (**द्रुहः**) द्रोह करने वाले (**पाशान्**) बन्धनों को प्राप्त कराता है (**तम्**) उसको हम लोगों के (**प्रति**) प्रति (**मुचीष्ट**) छोड़िये (**तपिष्ठेन**) और अत्यन्त तप्त (**हन्मना**) हनन से उसको (**तिरः, हन्तन**) तिरछा मारिये॥८॥

भावार्थः-हे धार्मिक विद्वानो! आप लोग दुष्ट मनुष्यों को श्रेष्ठों से दूर करके मोह आदि बन्धनों को निवृत्त कर के उनके दोषों का नाश करके उन को शुद्ध करिये॥८॥

पुनर्मनुष्याः किं कुर्युरित्याह॥

फिर मनुष्य क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सांतपना इदं हविर्मरुतस्तज्जुषेतन। युष्माकोती रिशादसः॥९॥

साम्ऽतपनाः। इदम्। हविः। मरुतः। तत्। जुजुषेतन। युष्माक। ऊती। रिशादसः॥९॥

पदार्थः-(**सान्तपनाः**) सन्तपने भवाः शत्रूणां सन्तापकराः (**इदम्**) (**हविः**) दातुमर्हमन्नादिकम् (**मरुतः**) मानवाः (**तत्**) (**जुजुषेतन**) सेवध्वम् (**युष्माक**) अत्र **वा छन्दसी**ति मलोपः। (**ऊती**) ऊत्या रक्षणाद्यया क्रियया (**रिशादसः**) हिंसकानां हिंसकाः॥९॥

अन्वयः-हे विद्वांसस्सान्तपना मरुतो! यूयं तदिदं हविर्जुजुषेतन, हे रिशादसः! युष्माकोती जुजुषेतन॥९॥

भावार्थः-हे विद्वांसो! भवन्तः सर्वेषां रक्षणं विधाय ग्रहीतव्यं ग्राहयन्तु॥९॥

पदार्थः-हे विद्वानो (**सान्तपनाः**) उत्तम प्रकार तपन में हुए (**मरुतः**) मनुष्यो! आप (**तत्**) उस

(इदम्) इस **(हविः)** देने योग्य अन्न आदि पदार्थ की **(जुजुष्टन)** सेवा करिये, हे **(रिशादसः)** हिंसा करने वालों के हिंसक! **(युष्माक)** आप लोगों की **(ऊती)** जो रक्षण आदि क्रिया उससे आप सेवन करें अर्थात् परोपकार करें॥९॥

भावार्थः-हे विद्वानो! आप लोग सबका रक्षण करके ग्रहण करने योग्य को ग्रहण कराइये॥९॥

पुनर्गृहस्थाः कीदृशा भवेयुरित्याह॥

फिर गृहस्थ कैसे होवें, इस विषय को अगले मन्त्र में कहते हैं॥

गृहमेधासु आ गत मरुतो माप भूतन। युष्माकोती सुदानवः॥ १०॥

गृहऽमेधासः। आ। गत। मरुतः। मा। अप। भूतन। युष्माक। ऊती। सुऽदानवः॥ १०॥

पदार्थः-(**गृहमेधासः**) गृहे मेधा प्रज्ञा येषां ते **(आ)** **(गत)** आगच्छत **(मरुतः)** उत्तमा मनुष्याः **(मा)** निषेधे **(अप)** **(भूतन)** विरुद्धा भवत **(युष्माक)** युष्माकम् **(ऊती)** ऊत्या रक्षणाद्यया क्रियया **(सुदानवः)** सुष्ठु दानाः॥१०॥

अन्वयः-हे गृहमेधासो मरुतो! यूयमत्रागत सुदानवो भूतन युष्माकोती सहिता यूयं माप भूतन॥१०॥

भावार्थः-हे गृहस्था! यूयं विद्यादिशुभगुणदातारो भूत्वा धर्मपुरुषार्थविरुद्धा मा भवत॥१०॥

पदार्थः-हे **(गृहमेधासः)** गृह में बुद्धि जिन की ऐसे **(मरुतः)** उत्तम मनुष्यो! आप लोग यहाँ **(आ, गत)** आइये और **(सुदानवः)** अच्छे दान वाले **(भूतन)** हूजिये और **(युष्माक)** आप लोगों की **(ऊती)** रक्षण आदि क्रिया के सहित आप लोग **(मा)** नहीं **(अप)** विरुद्ध हूजिये॥१०॥

भावार्थः-हे गृहस्थ जनो! आप लोग विद्या आदि श्रेष्ठ गुणों के देने वाले होकर धर्म्म और पुरुषार्थ के विरुद्ध मत होओ॥१०॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

इहेह वः स्वतवसः कवयः सूर्यत्वचः। यज्ञं मरुत आ वृणे॥ ११॥

इहऽइह। वः। स्वऽतवसः। कवयः। सूर्यऽत्वचः। यज्ञम्। मरुतः। आ। वृणे॥ ११॥

पदार्थः-(**इहेह**) अस्मिन् संसारे **(वः)** युष्माकम् **(स्वतवसः)** स्वकीयबलाः **(कवयः)** विद्वांसः **(सूर्यत्वचः)** सूर्य इव प्रकाशमाना त्वग्येषां ते **(यज्ञम्)** संगतिमयम् **(मरुतः)** मनुष्याः **(आ)** समन्तात् **(वृणे)** स्वीकरोमि॥११॥

अन्वयः-हे सूर्यत्वचस्स्वतवसः कवयो मरुत! इहेह वो यज्ञमहमा वृणे॥११॥

भावार्थः-हे विद्वांसो! भवन्तो विद्यादिप्रचाराख्यं कर्म सदोन्नयत॥११॥

पदार्थः- **(सूर्यत्वचः)** सूर्य्य के समान प्रकाशमान त्वचा जिन की ऐसे **(स्वतवसः)** अपने बल वाले हे **(कवयः)** विद्वान् **(मरुतः)** मनुष्यो! **(इहेह)** इसी संसार में **(वः)** आप लोगों के **(यज्ञम्)**

सङ्गतिस्वरूप यज्ञ को मैं **(आ, वृणे)** स्वीकार करता हूँ॥११॥

भावार्थः-हे विद्वानो! आप लोग विद्या आदि के प्रचार नामक कर्म्म की सदा उन्नति करिये॥११॥

पुनर्मनुष्यैः क उपासनीय इत्याह॥

फिर मनुष्यों को किसकी उपासना करनी चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥१२॥३०॥४॥

त्र्यम्बकम्। यजामहे। सुगन्धिम्। पुष्टिवर्धनम्। उर्वारुकमिव। बन्धनात्। मृत्योः। मुक्षीय। मा। आ। अमृतात्॥१२॥

पदार्थः-(**त्र्यम्बकम्**) त्रिष्वम्बकं रक्षणं यस्य रुद्रस्य परमेश्वरस्य यद्वा त्रयाणां जीवकारणकार्याणां रक्षकस्तं परमेश्वरम् (**यजामहे**) संगच्छेमहि (**सुगन्धिम्**) सुविस्तृतपुण्यकीर्तिम् (**पुष्टिवर्धनम्**) यः पुष्टिं वर्धयति तम् (**उर्वारुकमिव**) यथोर्वारुकफलम् (**बन्धनात्**) (**मृत्योः**) मरणात् (**मुक्षीय**) मुक्तो भवेयम् (**मा**) निषेधे (**आ**) मर्यादाम् (**अमृतात्**) मोक्षप्राप्तेः॥१२॥

अन्वयः-हे मनुष्या! यं सुगन्धिं पुष्टिवर्धनं त्र्यम्बकं वयं यजामहे तं यूयमपि यजध्वं यथाऽहं बन्धनादुर्वारुकमिव मृत्योर्मुक्षीय तथा यूयं मुच्यध्वं यथाऽहममृतादा मा मुक्षीय तथा यूयमपि मुक्तिप्राप्तेर्विरक्ता मा भवत॥१२॥

भावार्थः-अत्रोपमालङ्कारः। हे मनुष्या! अस्माकं सर्वेषां जगदीश्वर एवोपास्योऽस्ति यस्योपासनात् पुष्टिर्वृद्धिः शुद्धकीर्तिर्मोक्षश्च प्राप्नोति मृत्युभयं नश्यति तं विहायान्यस्योपासनां वयं कदापि न कुर्यामेति॥१२॥

अत्र वायुदृष्टान्तेन विद्वदीश्वरगुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इत्यृग्वेदे पञ्चमाष्टके चतुर्थोऽध्यायस्त्रिंशो वर्गः सप्तमे मण्डले एकोनषष्टितमं सूक्तं च समाप्तम्॥

पदार्थः-हे मनुष्यो! जिस (**सुगन्धिम्**) अच्छे प्रकार पुण्यरूपय यशयुक्त (**पुष्टिवर्धनम्**) पुष्टि बढ़ाने वाले (**त्र्यम्बकम्**) तीनों कालों में रक्षण करने वा तीन अर्तात् जीव, कारण और कार्य्यों की रक्षा करने वाले परमेश्वर को हम लोग (**यजामहे**) उत्तम प्रकार प्राप्त होवें उसकी आप लोग भी उपासना करिये और जैसे मैं (**बन्धनात्**) बन्धन से (**उर्वारुकमिव**) ककड़ी के फल के सदृश (**मृत्योः**) मरण से (**मुक्षीय**) छूटूं, वैसे आप लोग भी छूटिये जैसे मैं मुक्ति से न छूटूं, वैसे आप भी (**अमृतात्**) मुक्ति की प्राप्ति से विरक्त (**मा, आ**) मत हूजिये॥१२॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। हे मनुष्यो! हम सब लोगों का उपास्य जगदीश्वर ही है जिसकी उपासना से पुष्टि, वृद्धि, उत्तम यश और मोक्ष प्राप्त होता है, मृत्यु सम्बन्धि भय नष्ट होता है, उस का त्याग कर के अन्य की उपासना हम लोग कभी न करें॥१२॥

इस सूक्त में वायु के दृष्टान्त से विद्वान् और ईश्वर के गुण और कृत्य के वर्णन करने से इस सूक्त के अर्थ की इससे पूर्व सूक्त के अर्थ के साथ सङ्गति जाननी चाहिये॥

यह ऋग्वेद में पांचवे अष्टक में चौथा अध्याय तीसवां वर्ग तथा सप्तम मण्डल में उनसठवां सूक्त समाप्त हुआ॥

॥ओ३म्॥

अथ पञ्चमाष्टके पञ्चमाऽध्यायारम्भः॥

ओ३म् विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव॥ ऋ०५.८२.५॥

अथ द्वादशर्चस्य षष्टितमस्य सूक्तस्य वसिष्ठ ऋषिः। १ सूर्यः। २-१२ मित्रावरुणौ देवते। १ पङ्क्तिः। ९ विराट् पङ्क्तिः। १० स्वराट् पङ्क्तिश्छन्दः। पञ्चमः स्वरः। २, ३, ४, ६, ७, १२ निचृत्त्रिष्टुप्। ५, ८, ११ त्रिष्टुप् छन्दः। धैवतः स्वरः॥

अथ मनुष्यैः कः प्रार्थनीय इत्याह॥

अब मनुष्यों को किसकी प्रार्थना करनी चाहिये, इस विषय को कहते हैं॥

यद्‌द्य सूर्य ब्रवोऽनागा उद्यन्मित्राय वरुणाय सत्यम्।
वयं देवत्रादिते स्याम तव प्रियासो अर्यमन् गृणन्तः॥ १॥

यत्। अद्य। सूर्य। ब्रवः। अनागाः। उत्ऽयन्। मित्राय। वरुणाय। सत्यम्। वयम्। देवऽत्रा। अदिते। स्याम। तव। प्रियासः। अर्यमन्। गृणन्तः॥ १॥

पदार्थः-(**यत्**) यः (**अद्य**) (**सूर्य**) सूर्य इव वर्त्तमान (**ब्रवः**) वद (**अनागाः**) अनपराधः (**उद्यन्**) उदयन् (**मित्राय**) सख्ये (**वरुणाय**) श्रेष्ठाय (**सत्यम्**) यथार्थम् (**वयम्**) (**देवत्रा**) देवेषु विद्वत्सु (**अदिते**) अविनाशिन् (**स्याम**) (**तव**) (**प्रियासः**) प्रियाः (**अर्यमन्**) न्यायकारिन् (**गृणन्तः**) स्तुवन्तः॥ १॥

अन्वयः-हे सूर्यादितेऽर्यमन् जगदीश्वर! यद्योऽनागास्त्वमस्मानुद्यन् सूर्य इव यथा मित्राय वरुणाय सत्यं ब्रवस्तथाऽस्मभ्यं ब्रूहि यतस्स्त्वां देवत्रा गृणन्तो वयं तवाद्य प्रियासस्स्याम॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! भवन्तं सूर्यवत्प्रकाशकं परमात्मानमेवं प्रार्थयन्तु, हे परब्रह्मन्! भवान्नस्माकमात्मस्वन्तर्यामिरूपेण सत्यं सत्यमुपदिशतु येन तवाज्ञायां वर्तित्वा वयं भवत्प्रिया भवेमेति॥ १॥

पदार्थः-हे (**सूर्य**) सूर्य्य के समान वर्त्तमान (**अदिते**) अविनाशी और (**अर्यमन्**) न्यायकारी जगदीश्वर! (**यत्**) जो (**अनागाः**) अपराध से रहित आप हम लोगों को (**उद्यन्**) उद्यत कराते हुए सूर्य्य जैसे वैसे (**मित्राय**) मित्र और (**वरुणाय**) श्रेष्ठ जन के लिये (**सत्यम्**) यथार्थ बात को (**ब्रवः**) कहिये, वैसे हम लोगों के लिये कहिये जिससे आप की (**देवत्रा**) विद्वानों में (**गृणन्तः**) स्तुति करते हुए हम लोग (**तव**) आपके (**अद्य**) इस समय (**प्रियासः**) प्रिय (**स्याम**) होवें॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! आप लोग सूर्य्य के सदृश प्रकाशक परमात्मा ही की प्रार्थना करो, हे परब्रह्मन्! आप हम लोगों के आत्माओं में अन्तर्य्यामी के

स्वरूप से सत्य-सत्य उपदेश करिये, जिससे आपकी आज्ञा में वर्त्ताव कर के हम लोग आप के प्रिय होवें॥१॥

पुनः स जगदीश्वरः कीदृशः किंवत्किं करोतीत्याह॥

फिर वह कैसा जगदीश्वर किसके सदृश क्या करता है, इस विषय को अगले मन्त्र में कहते हैं॥

एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन्।
विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन्॥२॥

एषः। स्यः। मित्रावरुणा। नृऽचक्षाः। उभे इति। उत्। एति। सूर्यः। अभि। ज्मन्। विश्वस्य। स्थातुः। जगतः। च। गोपाः। ऋजु। मर्तेषु। वृजिना। च। पश्यन्॥२॥

पदार्थः-(**एषः**) (**स्यः**) सः (**मित्रावरुणा**) सर्वेषां प्राणोदानौ (**नृचक्षाः**) नृणां कर्मणां द्रष्टा (**उभे**) द्वे (**उत्**) (**एति**) उदयं करोति (**सूर्यः**) सवितृलोकः (**अभि**) अभितः (**ज्मन्**) भूमौ। **ज्मेति पृथिवीनाम।** (निघं०१.१) (**विश्वस्य**) सर्वस्य (**स्थातुः**) स्थावरस्य (**जगतः**) जङ्गमस्य (**च**) (**गोपाः**) रक्षकः (**ऋजु**) सरलम् (**मर्तेषु**) मनुष्येषु (**वृजिना**) वृजिनानि बलानि (**च**) (**पश्यन्**) विजानन्॥२॥

अन्वयः-हे मनुष्या! एषः स्यो नृचक्षाः परमात्मोभे स्थूलसूक्ष्मे जगति यथा ज्मन् सूर्योऽभ्युदेति तथा विश्वस्य स्थातुर्जगतश्च गोपाः मर्तेष्वृजु वृजिना च पश्यन् मित्रावरुणा प्रकाशयति॥२॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्या! यथोदितः सूर्यः सन्निहितं स्थूलं जगत् प्रकाशयति तथान्तर्यामीश्वरस्स्थूलं सूक्ष्मं जगज्जीवांश्च सर्वतः प्रकाशयति सर्वान् संरक्ष्य सर्वेषां कर्माणि पश्यन् यथायोग्यं फलं प्रयच्छति॥२॥

पदार्थः-हे मनुष्यो (**एषः**) (**स्यः**) सो यह (**नृचक्षाः**) मनुष्यों के कर्मों को देखने वाला परमात्मा (**उभे**) दोनों प्रकार के स्थूल और सूक्ष्म संसार में जैसे (**ज्मन्**) भूमि में (**सूर्यः**) सूर्य्य लोक (**अभि, उत्, एति**) सब ओर से उदय करता है, वैसे (**विश्वस्य**) सम्पूर्ण (**स्थातुः**) नहीं चलने वाले और (**जगतः**) चलने वाले संसार का भी (**गोपाः**) रक्षक वह (**मर्तेषु**) मनुष्यों में (**ऋजु**) सरलतापूर्वक (**वृजिना**) सेनाओं को (**च**) और (**पश्यन्**) विशेष कर के जानता हुआ (**मित्रावरुणा**) सब के प्राण और उदान वायु को प्रकाशित करता है॥२॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे उदय को प्राप्त हुआ सूर्य्य समीप में वर्त्तमान स्थूल जगत् को प्रकाशित करता है, वैसे अन्तर्य्यामी ईश्वर स्थूल और सूक्ष्म जगत् और जीवों को सब प्रकार से प्रकाशित करता है और सब की उत्तम प्रकार रक्षा कर के सब के कर्मों को देखता हुआ यथायोग्य फल देता है॥२॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् क्या करें, इस विषय को अगले मन्त्र में कहतेहैं॥

अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः।

धामानि मित्रावरुणा युवाकुः सं यो यूथेव जनिमानि चष्टे॥ ३॥

अयुक्त। सप्त। हरितः। सधऽस्थात्। याः। ईम्। वहन्ति। सूर्यम्। घृताचीः। धामानि। मित्रावरुणा। युवाकुः। सम्। यः। यूथाऽइव। जनिमानि। चष्टे॥ ३॥

पदार्थः-(**अयुक्त**) युज्जते (**सप्त**) एतत्संख्याकाः (**हरितः**) दिशः। **हरित इति दिङ्नाम।** (निघं०१.६) (**सधस्थात्**) समानस्थानात् (**याः**) (**ईम्**) उदकम् (**वहन्ति**) (**सूर्यम्**) (**घृताचीः**) रात्रयः (**धामनि**) जन्मस्थाननामानि (**मित्रावरुणा**) प्राणोदानौ (**युवाकुः**) सुसंयोजकः (**सम्**) (**यः**) (**यूथेव**) यूथानि समूहा इव (**जनिमानि**) जन्मानि (**चष्टे**) प्रकाशयति॥ ३॥

अन्वयः-हे विद्वांसो! यथा सप्त हरितो या घृताची रात्रयस्सधस्थात् सूर्यमीं वहन्ति तथा योऽयुक्त धामानि मित्रावरुणा युवाकुस्सन् यूथेव जनिमानि सं चष्टे तं यूयं बोधयत॥ ३॥

भावार्थः-अत्रोपमालङ्कारः। यथा वायवस्सूर्यान् लोकान् सर्वतो वहन्ति तथा विद्वांसस्सूर्यप्राणपृथिव्यादिविद्या जानीयुः॥ ३॥

पदार्थः-हे विद्वानो! जैसे (**सप्त**) सात (**हरितः**) दिशा और (**याः**) जो (**घृताचीः**) रात्रियाँ (**सधस्थात्**) तुल्य स्थान से (**सूर्यम्**) सूर्य्य को और (**ईम्**) जल को (**वहन्ति**) धारण करती हैं, वैसे (**यः**) जो (**अयुक्त**) युक्त होता है (**धामानि**) जन्म, स्थान और नाम को (**मित्रावरुणा**) प्राण और उदान वायु को (**युवाकुः**) उत्तम प्रकार संयुक्त करने वाला हुआ (**यूथेव**) समूहों के सदृश (**जनिमानि**) जन्मों को (**सम्, चष्टे**) प्रकाशित करता है, उसको आप लोग जनाइये॥ ३॥

भावार्थः-इस मन्त्र में उपमालङ्कार है। जैसे पवन सूर्य्य लोकों को सब ओर से धारण करते हैं, वैसे विद्वान् जन सूर्य्य, प्राण और पृथिवी आदि की विद्या को जानें॥ ३॥

पुनर्विद्वद्भिः किं कर्तव्यमित्याह॥

फिर विद्वानों को क्या करना चाहिये, इस विषय को अगले मन्त्र में कहते हैं॥

उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः।
यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः॥ ४॥

उत्। वाम्। पृक्षासः। मधुऽमन्तः। अस्थुः। आ। सूर्यः। अरुहत्। शुक्रम्। अर्णः। यस्मै। आदित्याः। अध्वनः। रदन्ति। मित्रः। अर्यमा। वरुणः। सऽजोषाः॥ ४॥

पदार्थः-(**उत्**) (**वाम्**) (**युवयोः**) (**पृक्षासः**) सेचकाः (**मधुमन्तः**) मधुरादयो गुणा विद्यन्ते येषु ते (**अस्थुः**) उत्तिष्ठन्तु (**आ**) (**सूर्यः**) सूर्यलोकः (**अरुहत्**) रोहति (**शुक्रम्**) शुद्धम् (**अर्णः**) उदकम् (**यस्मै**) (**आदित्याः**) संवत्सरस्य मासाः (**अध्वनः**) मार्गस्य मध्ये (**रदन्ति**) विलिखन्ति (**मित्रः**) प्राणः (**अर्यमा**) विद्युत् (**वरुणः**) जलादिकम् (**सजोषाः**) समानप्रीत्या सेवनीयः॥ ४॥

अन्वयः-हे अध्यापकोपदेशकौ! वां ये पृक्षासो मधुमन्त उत्तस्थुः यः सूर्यः शुक्रमर्णः आरुहद्यस्मा आदित्या अध्वनो रदन्ति सजोषा मित्रो वरुणोऽर्यमा चाध्वनो रदन्ति तान् सर्वान् यूयं यथावद्विजानीत॥ ४॥

भावार्थः-हे विद्वांसः! अध्यापकोपदेशाभ्यां प्राप्तविद्या यूयं पृथिव्यादिपदार्थविद्यां विज्ञाय श्रीमन्तो भवत॥४॥

पदार्थः-हे अध्यापक और उपदेशक जनो! **(वाम्)** आप दोनों के जो **(पृक्षासः)** सींचने वाले **(मधुमन्तः)** मधुर आदि गुण विद्यमान जन में वे **(उत्, अस्थुः)** उठें और जो **(सूर्यः)** सूर्य्य लोक **(शुक्रम्)** शुद्ध **(अर्णः)** जल को **(आ, अरुहत्)** सब ओर से चढ़ाता और **(यस्मै)** जिसके लिये **(आदित्याः)** वर्ष के महीने **(अध्वनः)** मार्ग के मध्य में **(रदन्ति)** आक्रमण करते हैं **(सजोषाः)** तुल्य प्रीति से सेवा करने योग्य **(मित्रः)** प्राण **(वरुणः)** जल आदि **(अर्यमा)** बिजुली और मार्ग के मध्य में आक्रमण करते हैं, उन सब को आप लोग यथावत् जानो॥४॥

भावार्थः-हे विद्वानो! अध्यापक और उपदेशक से विद्या को प्राप्त हुए आप लोग पृथिवी आदि की विद्या को जान कर धनवान् हूजिये॥४॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒मे चे॒तारो॒ अनृ॑तस्य॒ भूरे॑र्मि॒त्रो अ॑र्य॒मा वरु॑णो॒ हि सन्ति॑।
इ॒म ऋ॒तस्य॑ वावृधुर्दुरो॒णे शग्मा॑सः॒ पुत्रा॒ अदि॑ते॒रद॑ब्धाः॥५॥

इ॒मे। चे॒तारः॑। अनृ॑तस्य। भूरे॑ः। मि॒त्रः। अ॒र्य॒मा। वरु॑णः। हि। सन्ति॑। इ॒मे। ऋ॒तस्य॑। व॒वृ॒धुः॒। दु॒रो॒णे। शग्मा॑सः॑। पु॒त्राः। अदि॑तेः। अद॑ब्धाः॥५॥

पदार्थः-(**इमे**) (**चेतारः**) सम्यग्ज्ञानयुक्ताः विज्ञापकाः (**अनृतस्य**) मिथ्यावस्तुनः (**भूरेः**) बहुविधस्य (**मित्रः**) सर्वसुहृत् (**अर्यमा**) न्यायकारी (**वरुणः**) जलमिव पालकः (**हि**) (**सन्ति**) (**इमे**) (**ऋतस्य**) सत्यस्य वस्तुनो व्यवहारस्य वा (**ववृधुः**) वर्धयन्ति। अत्राभ्यासदैर्घ्यम्। (**दुरोणे**) गृहे (**शग्मासः**) बहुसुखयुक्ताः (**पुत्राः**) (**अदितेः**) अखण्डितस्य (**अदब्धाः**) अहिंसकाः॥५॥

अन्वयः-हे विद्वांसो! यथेमे मित्रोऽर्यमा वरुणश्च भूरेरनृतस्य चेतारस्सन्तीमे हि शग्मास अदितेः पुत्रा अदब्धाः दुरोणे भूरेर्ऋतस्य विज्ञानं वावृधुस्तस्मात्ते सत्कर्तव्यास्सन्ति॥५॥

भावार्थः-ये पूर्णविद्या भवन्ति त एव सत्याससत्यप्रज्ञापका जायन्ते॥५॥

पदार्थः-हे विद्वानो! जैसे **(इमे)** ये **(मित्रः)** सर्व मित्र **(अर्यमा)** न्यायकारी और **(वरुणः)** जल के सदृश पालक **(भूरेः)** बहुत प्रकार के **(अनृतस्य)** मिथ्या वस्तु के **(चेतारः)** उत्तम प्रकार ज्ञानयुक्त वा जनाने वाले **(सन्ति)** हैं और **(इमे)** जो **(हि)** निश्चित **(शग्मासः)** बहुत सुख से युक्त **(अदितेः)** अखण्डित न नष्ट होने वाली के **(पुत्राः)** पुत्र **(अदब्धाः)** नहीं हिंसा करने वाले **(दुरोणे)** गृह में बहुत प्रकार के **(ऋतस्य)** सत्य वस्तु के विज्ञान को **(वावृधुः)** बढ़ाते हैं, इससे वे सत्कार करने योग्य हैं॥५॥

भावार्थः-जो पूर्ण विद्यायुक्त होते हैं, वे ही सत्य और असत्य के जानने वाले होते हैं॥५॥

पुनर्विद्वांसः कीदृशा वरा भवन्तीत्याह॥

फिर विद्वान् कैसे श्रेष्ठ होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः।
अपि क्रतुं सुचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति॥६॥१॥

इमे। मित्रः। वरुणः। दुःऽदभासः। अचेतसम्। चित्। चितयन्ति। दक्षैः। अपि। क्रतुम्। सुऽचेतसम्। वतन्तः। तिरः। चित्। अंहः। सुऽपथा। नयन्ति॥६॥

पदार्थः-(**इमे**) (**मित्रः**) सखा (**वरुणः**) श्रेष्ठः (**दूळभासः**) दुःखेन लब्धुं योग्या विद्वांसः (**अचेतसम्**) अज्ञानिनम् (**चित्**) अपि (**चितयन्ति**) ज्ञापयन्ति (**दक्षैः**) बलैश्चतुरैर्जनैर्वा (**अपि**) (**क्रतुम्**) प्रज्ञाम् (**सुचेतसम्**) शुद्धान्तःकरणम् (**वतन्तः**) वनन्तः संभजन्तः। अत्र वर्णव्यत्ययेन नस्यः तः। (**तिरः**) तिरस्करणे निवारणे (**चित्**) अपि (**अंहः**) अपराधं पापम् (**सुपथा**) शोभनेन धर्मेण मार्गेण (**नयन्ति**) प्रापयन्ति॥६॥

अन्वयः-य इमे दूळभासो मित्रो वरुणश्च दक्षैरप्यचेतसं चिच्चितयन्ति सुचेतसं क्रतुं वतन्तस्सुपथांऽहश्चित् तिरो नयन्ति त एव जगत्कल्याणकारका भवन्ति॥६॥

भावार्थः-ये अज्ञान् ज्ञानिनस्सज्ञानान् सद्यो विदुषः कृत्वा सत्यधर्ममार्गेण गमयित्वा पापाद्वियोजयन्ति त एवात्र संसारे दुर्लभास्सन्ति॥६॥

पदार्थः-जो (**इमे**) ये (**दूळभासः**) दुःख से प्राप्त होने योग्य विद्वान् (**मित्रः**) मित्र और (**वरुणः**) श्रेष्ठ पुरुष (**दक्षैः**) सेनाओं वा चतुर जनों से (**अपि**) भी (**अचेतसम्**) अज्ञानी को (**चित्**) भी (**चितयन्ति**) जनाते हैं और (**सुचेतसम्**) शुद्ध अन्तःकरण और (**क्रतुम्**) बुद्धि का (**वतन्तः**) सेवन करते हुए जन (**सुपथा**) सुन्दर धर्म्मयुक्त मार्ग से (**अंहः**) अपराध को (**चित्**) भी (**तिरः**) निवारण में (**नयन्ति**) पहुँचाते हैं, वे ही संसार में कल्याणकारक होते हैं॥६॥

भावार्थः-जो अज्ञानियों को ज्ञानी और ज्ञानियों को शीघ्र विद्वान् करके सत्य धर्म्म के मार्ग से चलाकर पाप से पृथक् करते हैं, वे ही इस संसार में दुर्लभ हैं॥६॥

पुनः के विद्वांसः श्रेष्ठा भवन्तीत्याह॥

फिर कौन विद्वान् श्रेष्ठ होते हैं, इस विषय को अगले मन्त्र में कहते है॥

इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति।
प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन्॥७॥

इमे। दिवः। अनिऽमिषा। पृथिव्याः। चिकित्वांसः। अचेतसम्। नयन्ति। प्रव्राऽजे। चित्। नद्यः। गाधम्। अस्ति। पारम्। नः। अस्य। विष्पितस्य। पर्षन्॥७॥

पदार्थः-(**इमे**) (**दिवः**) सूर्यादेः (**अनिमिषा**) नैरन्तर्येण (**पृथिव्याः**) भूम्यादेः पदार्थमात्रस्य (**चिकित्वांसः**) विज्ञापयन्तः (**अचेतसम्**) जडबुद्धिम् (**नयन्ति**) (**प्रव्राजे**) प्रव्रजन्ति यस्मिन् देशे (**चित्**) यथा (**नद्यः**) सरितः (**गाधम्**) अपरिमितमुदकम् (**अस्ति**) (**पारम्**) परभागम् (**नः**) अस्मान् (**अस्य**)

(विष्पितस्य) व्याप्तस्य कर्मण: **(पर्षन्)** पारयन्ति॥७॥

अन्वय:-हे मनुष्या: ! य इमे चिकित्वांसोऽनिमिषा पृथिव्या: दिवश्च विद्यामचेतसं नयन्ति चित् प्रव्राजे नद्यो गच्छन्ति यदासां गाधमुदकमस्ति तस्मात्पारं नयन्ति तथाऽस्य विष्पितस्य कर्मण: पारं नोऽस्मान् पर्षन् एत एव विदुष: कर्तुमर्हन्ति॥७॥

भावार्थ:-ये विद्वांसो विद्युद्भूम्यादेस्सर्वस्या: सृष्टेर्विद्यां बोधयन्ति ते सर्वान् मनुष्यान् दु:खात् पारं नेतुं शक्नुवन्ति॥७॥

पदार्थ:-हे मनुष्यो! जो **(इमे)** ये **(चिकित्वांस:)** विज्ञान देते हुए **(अनिमिषा)** निरन्तरता से **(पृथिव्या:)** भूमि आदि पदार्थ मात्र की ओर **(दिव:)** सूर्य्य आदि की विद्या को **(अचेतसम्)** जड़ बुद्धि को **(नयन्ति)** प्राप्त कराते हैं और **(चित्)** जैसे **(प्रव्राजे)** जिसमें चलते हैं उस देश में **(नद्य:)** नदियाँ जाती हैं जो इन नदियों का **(गाधम्)** अथाह जल **(अस्ति)** है इससे **(पारम्)** परभाग को पहुँचाते हैं, वैसे **(अस्य)** इस **(विष्पितस्य)** व्याप्त कर्म के पार में **(न:)** हम लोगों को **(पर्षन्)** पहुँचाते हैं, वे ही विद्वान् करने को योग्य होते हैं॥७॥

भावार्थ:-जो विद्वान् जन बिजुली और भूमि आदि सम्पूर्ण सृष्टि की विद्या को जानते हैं वे सब मनुष्यों को दु:ख से पार ले जाने को समर्थ होते हैं॥७॥

पुन: के विद्वांस उत्तमा भवन्तीत्याह॥

फिर कौन विद्वान् उत्तम होते हैं, इस विषय को अगले मन्त्र में कहते हैं॥

यद् गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे।
तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः॥८॥

यत्। गोपावत्। अदितिः। शर्म। भद्रम्। मित्रः। यच्छन्ति। वरुणः। सुऽदासे। तस्मिन्। आ। तोकम्। तनयम्। दधानाः। मा। कर्म। देवऽहेळनम्। तुरासः॥८॥

पदार्थ:-(**यत्**) ये **(गोपावत्)** पृथिवीपालवत् **(अदिति:)** विदुषी माता **(शर्म)** गृहम् **(भद्रम्)** भजनीयं कल्याणकरम् **(मित्र:)** सखा **(यच्छन्ति)** प्रददति **(वरुण:)** श्रेष्ठ: **(सुदासे)** शोभना दासा दातारो यस्मिन् व्यवहारे **(तस्मिन्)** **(आ)** समन्तात् **(तोकम्)** अपत्यम् **(तनयम्)** विशालम् **(दधाना:)** धरन्त: **(मा)** निषेधे **(कर्म)** **(देवहेळनम्)** देवानां विदुषामनादराख्यम् **(तुरास:)** त्वरिता आशुकारिण:॥८॥

अन्वय:-यथादितिर्मित्रो वरुणश्च गोपावद्भद्रं शर्म ददाति तथा सुदासे तस्मिन् तनयं तोकं च दधाना यद्ये सर्वेभ्य: सुखं यच्छन्ति ते भवन्त: तुरासस्सन्तो: देवहेळनं कर्म मा कुर्वन्॥८॥

भावार्थ:-अत्र वाचकलुप्तोपमालङ्कार:। ये मातृवन्मित्रवन्न्यायाधीशराजवत्सर्वान् सत्या विद्या: प्रदाय सुखं प्रयच्छन्ति धार्मिकाणां विदुषामनादरं कदाचिन्न कुर्वन्ति सर्वान् सन्तानान् ब्रह्मचर्ये विद्यायां च रक्षन्ति त एव सर्वजगद्धितैषिणो भवन्ति॥८॥

पदार्थ:-जैसे **(अदिति:)** विद्यायुक्त माता **(मित्र:)** मित्र **(वरुण:)** श्रेष्ठ **(गोपावत्)** पृथिवी के

पालन करने वाले राजा के सदृश **(भद्रम्)** सेवन करने योग्य सुखकारक **(शर्म)** गृह को देते हैं, वैसे **(सुदासे)** सुन्दर दाता जन जिस व्यवहार में **(तस्मिन्)** उसमें **(तनयम्)** विशाल उत्तम **(तोकम्)** सन्तान को **(दधानाः)** धारण करते हुए **(यत्)** जो जन सबके लिये सुख **(यच्छन्ति)** देते हैं वे आप लोग **(तुरासः)** शीघ्र करने वाले हुए **(देवहेळनम्)** विद्वानों का जिसमें अनादर हो ऐसे **(कर्म)** कर्म्म को **(मा)** मत करें॥८॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो माता के, मित्र के और न्यायाधीश के सदृश सब को सत्य विद्या देकर सुख देते हैं और धार्मिक विद्वानों के अनादर को कभी भी नहीं करते हैं और सब सन्तानों की ब्रह्मचर्य्य और विद्या में रक्षा करते हैं, वे ही सम्पूर्ण जगत् के हित चाहने वाले होते हैं॥८॥

पुनर्मनुष्याः किं कुर्युः किं च न कुर्युरित्याह॥

फिर मनुष्य क्या करें और क्या न करें, इस विषय को कहते हैं॥

अव॒ वेदिं॑ होत्रा॑भिर्यजेत॒ रिप॒ः काश्चि॑द्वरुण॒ध्रुत॒ः सः।
परि॒ द्वेषो॑भिरर्य॒मा वृ॑णक्त्तु॒रुं सु॒दासे॑ वृषणा उ लो॒कम्॥९॥

अव॑। वेदि॑म्। होत्रा॑भिः। य॒जे॒त॒। रिप॑ः। काः। चि॒त्। व॒रु॒ण॒ऽध्रुत॑ः। सः। परि॑। द्वेषः॑ऽभिः। अ॒र्य॒मा। वृ॒ण॒क्तु॒। उ॒रुम्। सु॒ऽदासे॑। वृ॒ष॒णौ॒। ऊँ इति॑। लो॒कम्॥९॥

पदार्थः-(**अव**) विरोधे **(वेदिम्)** हवनार्थं कुण्डम् **(होत्राभिः)** हवनक्रियाभिर्वाग्भिर्वा। **होत्रेति वाङ्नाम।** (निघं०१.११) **(यजेत)** संगच्छेत् **(रिपः)** पापात्मिकाः क्रियाः **(काः)** **(चित्)** अपि **(वरुणध्रुतः)** वरुणेन ध्रुतः स्थिरीकृतः **(सः)** **(परि)** सर्वतः **(द्वेषोभिः)** द्वेषयुक्तैः सह **(अर्यमा)** न्यायाधीशः **(वृणक्तु)** पृथग्भवतु **(उरुम्)** बहुसुखकरं विस्तीर्णम् **(सुदासे)** सुष्ठु दानाख्ये व्यवहारे **(वृषणौ)** बलिष्ठौ राजामात्यौ **(उ)** **(लोकम्)**॥९॥

अन्वयः-यो होत्राभिर्वेदिं यजेत यः कश्चित् काश्चिद्रिपः क्रिया अवयजेत स वरुणध्रुतोऽर्यमा द्वेषोभिः परि वृणक्तूरुं लोकमु वृषणौ च सुदासे प्राप्नोतु॥९॥

भावार्थः-ये विद्वांसो वेदयुक्ताभिर्वाग्भिस्सर्वान् व्यवहारान् संसाध्य दुष्टक्रिया दुष्टांश्च त्यजन्ति त एवोत्तमं सुखं लभन्ते॥९॥

पदार्थः-जो **(होत्राभिः)** हवन की क्रियाओं वा वाणियों से **(वेदिम्)** हवन के निमित्त कुण्ड का **(यजेत)** समागम करे और जो कोई **(चित्)** भी **(काः)** किन्हीं **(रिपः)** पापस्वरूप क्रियाओं का **(अव)** नहीं समागम करे **(सः)** वह **(वरुणध्रुतः)** श्रेष्ठ से स्थिर किया गया **(अर्यमा)** न्यायाधीश **(द्वेषोभिः)** द्वेष से युक्त जनों के साथ **(परि)** सब ओर से **(वृणक्तु)** पृथक् होवे तथा **(उरुम्)** बहुत सुखकारक और विस्तीर्ण **(लोकम्)** लोक को **(उ)** और **(वृषणौ)** दो बलिष्ठों को **(सुदासे)** उत्तम प्रकार दान जिसमें दिया जाये, ऐसे कर्म्म में प्राप्त होवे॥९॥

भावार्थः-जो विद्वान् जन वेद से युक्त वाणियों से सम्पूर्ण व्यवहारों को सिद्ध करके और दुष्ट

क्रियाओं और दुष्टों का त्याग करते हैं, वे ही उत्तम सुख को प्राप्त होते हैं॥९॥

पुनस्ते विद्वांसः किं कुर्युरित्याह॥

फिर वे विद्वान् जन क्या करें, इस विषय को अगले मन्त्र में कहते हैं॥

सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहन्ते।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः॥१०॥

सस्वरिति। चित्। हि। सम्ऽऋतिः। त्वेषी। एषाम्। अपीच्येन। सहसा। सहन्ते। युष्मत्। भिया। वृषणः। रेजमानाः। दक्षस्य। चित्। महिना। मृळत। नः॥१०॥

पदार्थः-(**सस्वः**) अन्तश्चरन्तः (**चित्**) अपि (**हि**) (**समृतिः**) सम्यक् सत्यक्रियावान् (**त्वेषी**) प्रकाशमाना (**एषाम्**) (**अपीच्येन**) येनायमञ्चति तत्र भवेन (**सहसा**) बलेन (**सहन्ते**) (**युष्मत्**) युष्माकं सकाशात् (**भिया**) भयेन (**वृषणः**) बलिष्ठाः (**रेजमानाः**) कम्पमाना गच्छन्तः (**दक्षस्य**) बलस्य (**चित्**) अपि (**महिना**) महत्त्वेन (**मृळत**) सुखयत। अत्र **संहितायामि**ति दीर्घः (**नः**) अस्मान्॥१०॥

अन्वयः-ये हि सस्वश्चिदेषां त्वेषी समृतिरस्त्यपीच्येन सहसा सहन्ते तेभ्यो युष्मद्भिया रेजमाना वृषणो रेजमाना भवन्ति ते यूयं दक्षस्य महिना चिन्नो मृळत॥१०॥

भावार्थः-हे मनुष्या! यस्य सत्या प्रज्ञा विद्या नीतिः सेना प्रजाश्च वर्तते स एव शत्रून् सहमानः सर्वान् सुखयति स महिम्नानन्दितो भवति॥१०॥

पदार्थः-जो (**हि**) निश्चित (**सस्वः**) मध्य में चलते हुए हैं (**चित्**) और (**एषाम्**) इनकी (**त्वेषी**) प्रकाशमान (**समृतिः**) उत्तम प्रकार सत्यक्रिया है (**अपीच्येन**) जिससे चलता है उस में हुए (**सहसा**) बल से (**सहन्ते**) सहते हैं उनके लिये और (**युष्मत्**) आप लोगों के समीप से (**भिया**) भय से (**रेजमानाः**) कांपते और चलते हुए (**वृषणः**) बलिष्ठ कांपते हुए जाने वाले होते हैं, वे आप लोग (**दक्षस्य**) बल के (**महिना**) महत्व से (**चित्**) भी (**नः**) हम लोगों को (**मृळत**) सुखयुक्त करें॥१०॥

भावार्थः-हे मनुष्यो! जिसकी सत्य बुद्धि, विद्या, नीति, सेना और प्रजा वर्त्तमान है, वही शत्रुओं को सहता हुआ सब को सुखयुक् करता है, वह महिमा से आनन्दित होता है॥१०॥

पुनर्विद्वांसः किं कुर्युरित्याह॥

फिर विद्वान् क्या करे, इस विषय को अगले मन्त्र में कहते हैं॥

यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातुः॥११॥

यः। ब्रह्मणे। सुऽमतिम्। आऽयजाते। वाजस्य। सातौ। परमस्य। रायः। सीक्षन्त। मन्युम्। मघऽवानः। अर्यः। उरु। क्षयाय। चक्रिरे। सुऽधातुः॥११॥

पदार्थः-(**यः**) (**ब्रह्मणे**) धनाय परमेश्वराय वा (**सुमतिम्**) शोभनां प्रज्ञाम् (**आयजते**) समन्ताद्यजेत सङ्गच्छेत (**वाजस्य**) विज्ञानस्य (**सातौ**) संविभागे (**परमस्य**) श्रेष्ठस्य (**रायः**) धनस्य

(सीक्षन्त) सम्बध्नन्ति **(मन्युम्)** क्रोधम् **(मघवानः)** परमधनयुक्ताः **(अर्यः)** यथावज्ज्ञातारः **(उरु)** बहु **(क्षयाय)** निवासाय **(चक्रिरे)** कुर्वन्ति **(सुधातु)** शोभना धातवो यस्मिन् गृहे॥११॥

अन्वयः-हे मनुष्या! यः परमस्य वाजस्य रायः सातौ ब्रह्मणे सुमतिमा यजाते ये मघवानोऽर्यः मन्युं सीक्षन्त क्षयायोरु सुधातु चक्रिरे त एव श्रीमन्तो जायन्ते॥११॥

भावार्थः-ये मनुष्या ईश्वरविज्ञानायोत्तमधनलाभाय श्रेष्ठाय गृहाय क्रोधादिदोषान् विहाय प्रयतन्ते ते सर्वसुखा जायन्ते॥१॥

पदार्थः-हे मनुष्यो **(यः)** जो **(परमस्य)** श्रेष्ठ **(वाजस्य)** विज्ञान और **(रायः)** धन के **(सातौ)** उत्तम प्रकार बांटने में **(ब्रह्मणे)** धन के वा परमेश्वर के लिये **(सुमतिम्)** उत्तम बुद्धि को **(आयजाते)** सब प्रकार से प्राप्त होवें और जो **(मघवानः)** अत्यन्त धन से युक्त **(अर्यः)** यथावत् जानने वाले **(मन्युम्)** क्रोध को **(सीक्षन्त)** सम्बन्धित करते हैं और **(क्षयाय)** निवास के लिये **(उरु)** बड़े **(सुधातु)** सुन्दर धातु सुवर्ण आदि जिसमें उस गृह को **(चक्रिरे)** सिद्ध करते हैं, वे ही लक्ष्मीवान् होते हैं॥११॥

भावार्थः-जो मनुष्य ईश्वर के विज्ञान के, उत्तम धन के लाभ के और श्रेष्ठ गृह के लिये क्रोध आदि दोषों का परित्याग कर के प्रयत्न करते हैं, वे सम्पूर्ण सुखों से युक्त होते हैं॥११॥

पुनर्विद्वद्भिः किं क्रियत इत्याह॥

फिर विद्वानों से क्या किया जाता है, इस विषय को अगले मन्त्र में कहते हैं॥

इ॒यं दे॑व पु॒रोहि॑तिर्यु॒वभ्यां॑ य॒ज्ञेषु॑ मित्रावरुणावकारि।
विश्वा॑नि दु॒र्गा पि॑पृतं ति॒रो नो॑ यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ न:॥१२॥२॥

इ॒यम्। दे॒वा॒। पु॒रःऽहि॑तिः। यु॒वऽभ्या॑म्। य॒ज्ञेषु॑। मि॒त्रा॒व॒रु॒णौ॒। अ॒का॒रि॒। विश्वा॑नि। दु॒ःऽगा। पि॒पृ॒त॒म्। ति॒रः। नः॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒॥१२॥

पदार्थः-**(इयम्)** **(देवा)** दातारौ **(पुरोहितिः)** पुरस्ताद्धिता क्रिया **(युवभ्याम्)** **(यज्ञेषु)** विद्वत्सत्कारादिषु **(मित्रावरुणौ)** प्राणोदानवदध्यापकोपदेशकौ **(अकारि)** क्रियते **(विश्वानि)** सर्वाणि **(दुर्गा)** दुःखेन गन्तुं योग्यानि **(पिपृतम्)** पूरयतम् **(तिरः)** तिरस्क्रियायाम् **(नः)** अस्मान् **(यूयम्)** **(पात)** **(स्वस्तिभिः)** **(सदा)** **(नः)**॥१२॥

अन्वयः-हे मित्रावरुणौ देवा! युवभ्यां यज्ञेष्वियं पुरोहितिरकारि युवां नो विश्वानि तिरस्कृत्य पिपृतम्, हे विद्वांसो! यूयं स्वस्तिभिर्नस्सर्वान् मनुष्यान् सदा पात॥१२॥

भावार्थः-हे अध्यापकोपदेशकौ यथा भवन्तौ सर्वेषां हितं कुर्यातां तथाऽस्मत् दुर्व्यसनानि दूरीकृत्य सर्वदाऽस्मान् वर्धयतमिति॥१२॥

अत्र सूर्यादिदृष्टान्तैर्विद्वद्गुणकृत्यवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या॥

इति षष्टितमं सूक्तं द्वितीयो वर्गश्च समाप्तः॥

पदार्थः-हे **(मित्रावरुणौ)** प्राण और उदान वायु के सदृश वर्त्तमान अध्यापक और उपदेशक जनो **(देवा)** दाता दोनों! **(युवभ्याम्)** आप दोनों से **(यज्ञेषु)** विद्वानों के सत्काररूपी यज्ञ कर्मों में

(इयम्) यह **(पुरोहितिः)** पहले हित की क्रिया **(अकारि)** की जाती है, वे दोनों आप **(नः)** हम लोगों के लिये **(विश्वानि)** सम्पूर्ण **(दुर्गा)** दुःख से जाने योग्य कामों का **(तिरः)** तिरस्कार कर के आप दोनों **(पिपृतम्)** पूर्ण करिये और हे विद्वान् जनो! **(यूयम्)** आप लोग **(स्वस्तिभिः)** कल्याणों से **(नः)** हम सब मनुष्यों की **(सदा)** सब काल में **(पात)** रक्षा कीजिये॥१२॥

भावार्थः-हे अध्यापक और उपदेशक जनो! जैसे आप दोनों सब के हित को करें, वैसे हम लोगों के दुष्ट व्यसनों को दूर कर के सब काल में हम लोगों की वृद्धि करें॥१२॥

इस सूक्त में सूर्य्य आदि के दृष्टान्तों से विद्वानों के गुण और कृत्य के वर्णन होने से इस सूक्त के अर्थ की संगति इससे पूर्व सूक्त के अर्थ के साथ जाननी चाहिये।

यह साठवां सूक्त और द्वितीय वर्ग समाप्त हुआ॥

अथैकषष्टितमस्य सप्तर्चस्य सूक्तस्य वसिष्ठर्षिः। मित्रावरुणौ देवते। २, ४ त्रिष्टुप् । ३ ५, ६, ७ निचृत्त्रिष्टुप् छन्दः। धैवतः स्वरः। १ भुरिक्पङ्क्तिश्छन्दः। पञ्चमः स्वरः॥

अथाध्यापकोपदेशकौ कीदृशौ भवेतामित्याह॥

अब सात ऋचा वाले इकसठवें सूक्त का प्रारम्भ है, उसके प्रथम मन्त्र में अब अध्यापक और उपदेशक कैसे होवें, इस विषय को कहते हैं॥

उद्वां॑ चक्षु॒र्वरु॑ण सु॒प्रती॑कं दे॒वयो॑रेति॒ सूर्य॑स्तत॒न्वान्।
अ॒भि यो विश्वा॒ भुव॑नानि॒ चष्टे॒ स म॒न्युं मर्त्ये॒ष्वा चि॑केत॥ १॥

उत्। वा॒म्। चक्षुः॑। व॒रु॒णा॒। सु॒ऽप्रती॑कम्। दे॒वयोः॑। ए॒ति॒। सूर्यः॑। त॒त॒न्वान्। अ॒भि। यः। विश्वा॑। भुव॑नानि। चष्टे॑। सः। म॒न्युम्। मर्त्ये॑षु। आ। चि॒के॒त॒॥ १॥

पदार्थः-(**उत्**) (**वाम्**) युवयोः (**चक्षुः**) चष्टेऽनेन तत् (**वरुणा**) वरौ (**सुप्रतीकम्**) सुष्ठु रूपादिप्रतीतिकरम् (**देवयोः**) विदुषोः (**एति**) (**सूर्यः**) सवितृमण्डलम् (**ततन्वान्**) विस्तीर्णः (**अभि**) (**यः**) (**विश्वा**) सर्वाणि (**भुवनानि**) (**चष्टे**) जानाति (**सः**) (**मन्युम्**) क्रोधम् (**मर्त्येषु**) मनुष्येषु (**आ**) समन्तात् (**चिकेत**) विजानीयात्॥ १॥

अन्वयः-हे वरुणा देवयोर्वां यत्सुप्रतीकं चक्षुस्ततन्वान् सूर्यइवोदेति यो मनुष्यो विश्वा भुवनान्यभि चष्टे स मर्त्येषु मन्युमा चिकेत तथा युवां कुरुतम्॥ १॥

भावार्थः-अत्र वाचकलुप्तोपमालङ्कारः। हे मनुष्याः! यथा सूर्यस्सर्वान् लोकान् प्रकाशयति तथाऽध्यापकोपदेशकौ सर्वेषामात्मनः प्रकाशयतः॥ १॥

पदार्थः-हे (**वरुणा**) श्रेष्ठो (**देवयोः**) विद्वान्! जो (**वाम्**) आप उन दोनों के जिस (**सुप्रतीकम्**) उत्तम प्रकार रूप आदि के ज्ञान कराने वाले (**चक्षुः**) चक्षु इन्द्रिय को कि जिससे देखता है (**ततन्वान्**) विस्तृत करता हुआ (**सूर्यः**) सूर्य्यमण्डल जैसे (**उत्, एति**) उदय को प्राप्त होता है और (**यः**) जो मनुष्य (**विश्वा**) सम्पूर्ण (**भुवनानि**) भुवनों को (**अभि, चष्टे**) जानता है (**सः**) वह (**मर्त्येषु**) मनुष्यों में (**मन्युम्**) क्रोध को (**आ**) सब प्रकार से (**चिकेत**) जाने वैसे आप दोनों करिये॥ १॥

भावार्थः-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। हे मनुष्यो! जैसे सूर्य्य सम्पूर्ण लोकों को प्रकाशित करता है, वैसे अध्यापक और उपदेशक जन सब के आत्माओं को प्रकाशित करते हैं॥ ११॥

पुनस्तौ कीदृशौ भवेतामित्याह॥

फिर वे दोनों कैसे हों, इस विषय को कहते हैं॥

प्र वां॑ स मि॒त्रावरुणावृ॒तावा॒ विप्रो॒ मन्मा॑नि दीर्घ॒श्रुदि॑यर्ति।
यस्य॒ ब्रह्मा॑णि सुक्र॒तू अवा॑थ॒ आ यत्क्रत्वा॒ न श॒रद॑: पृ॒णैथे॑॥ २॥

प्र। वा॒म्। सः। मि॒त्रा॒व॒रु॒णौ। ऋ॒तऽवा॑। विप्रः॑। मन्मा॑नि। दी॒र्घ॒ऽश्रुत्। इ॒य॒र्ति॒। यस्य॑। ब्रह्मा॑णि। सु॒क्र॒तू इति॑ सुऽक्रतू। अवा॑थः। आ। यत्। क्रत्वा॑। न। श॒रद॑ः। पृ॒णैथे॒ इति॑॥ २॥

पदार्थः-(**प्र**) (**वाम्**) युवाम् (**सः**) (**मित्रावरुणौ**) प्राणोदानाविवाध्यापकोपदेशकौ (**ऋतावा**) सत्यसेवी (**विप्रः**) मेधावी (**मन्मानि**) मन्तव्यानि विज्ञानानि (**दीर्घश्रुत्**) यो दीर्घं विस्तीर्णानि बहुकालं वा शास्त्राणि शृणोति (**इयर्ति**) प्राप्नोति (**यस्य**) (**ब्रह्माणि**) धनानि (**सुक्रतू**) शोभनप्रज्ञायुक्तौ (**अवाथः**) रक्षेताम् (**आ**) (**यत्**) (**क्रत्वा**) प्रज्ञया (**न**) इव (**शरदः**) शरदाद्यृतून् (**पृणैथे**) पूरयतम्॥२॥

अन्वयः-हे मित्रावरुणा! स ऋतावा दीर्घश्रुद्विप्रो वां मन्मानीयर्ति यस्य ब्रह्माणि सुक्रतू सन्तौ युवां प्रावाथः यत् क्रत्वा न शरद आ पृणैथे तौ युवां वयं सततं सत्कुर्याम॥२॥

भावार्थः-हे विद्वांसः! यो दीर्घकालं ब्रह्मचर्येण शास्त्राण्यधीते स एव मेधावी भूत्वा सर्वान् मनुष्यान् रक्षितुं शक्नोति॥२॥

पदार्थः-हे (**मित्रावरुणौ**) प्राण और उदान वायु के सदृश वर्त्तमान अध्यापक और उपदेशक जनो! (**सः**) वह (**ऋतावा**) सत्य का सेवन करने और (**दीर्घश्रुत्**) बहुत शास्त्रों को वा बहुत काल पर्य्यन्त शास्त्रों को सुनने वाला (**विप्रः**) बुद्धिमान् जन (**वाम्**) आप दोनों के (**मन्मानि**) विज्ञानों को (**इयर्त्ति**) प्राप्त होता है (**यस्य**) जिसके (**ब्रह्माणि**) धनों को (**सुक्रतू**) सून्दर बुद्धि से युक्त होते हुए आप (**प्र, अवाथः**) रक्षा करें और (**यत्**) जिसकी (**क्रत्वा**) बुद्धि से (**न**) जैसे पदार्थों को वैसे (**शरदः**) शरद् आदि ऋतुओं को (**आ, पृणैथे**) अच्छे प्रकार पूरो, उन आप दोनों का हम लोग निरन्तर सत्कार करें॥२॥

भावार्थः-हे विद्वानो! जो बहुत काल पर्य्यन्त ब्रह्मचर्य्य से शास्त्रों को पढ़ता है, वही बुद्धिमान् होकर सब मनुष्यों की रक्षा करने को समर्थ होता है॥२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीपरमविदुषां विरजानन्दसरस्वतीस्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृतार्यभाषाभ्यां समन्विते सुप्रमाणयुक्ते ऋग्वेदभाष्ये सप्तमे मण्डले चतुर्थानुवाक एकषष्टितमे सूक्ते पञ्चमाष्टके पञ्चमाध्याये तृतीयवर्गे द्वितीयमन्त्रस्य भाष्यं समाप्तम्॥

उक्तस्वामिकृतं भाष्यं चैतावदेवेति।

सं० १९५६ वि० आषाढ कृष्णा ५ को छपके समाप्त हुआ॥